GOVERNMENT OF INDIA
ARCHÆOLOGICAL SURVEY OF INDIA
ARCHÆOLOGICAL
LIBRARY

ACCESSION NO. 19789
CALL No. RSa4K/Tar

D.G.A. 79

D 2292



OFFICE OF THE DIRECTOR GENERAL
Library Regr No
INDIA.

CENTRAL ARCHAEOLOGICAL LIBRARY New Delhi 19789

 J.B.M.Beglar.

नियमवताम्। कृष्णत्वं नेत्रकाकाक्षिपक्ष्मनिधिपक्षो रुचाम्। रक्तत्वं रत्नबन्धूकविद्रुमाम्भोजविम्बितानाम्। तथा वसन्त एवान्यपुष्टानां कलकूजितम्। वर्षास्वेव मयूराणां रुतं नृत्यञ्च वर्णयेत्। नियमस्य विशेषोऽत्र पुनः क्वचित् प्रकाश्यते। कमलासम्पदोः कृष्णहरितोर्नागसर्षपयोः। पीतलोहितयोः स्वर्णपरागाग्निशिखादयु। चन्द्रशङ्खयोः कामध्वजे मकरमत्स्ययोः। दानवासुरदैत्यानामैक्यमेवाभिसम्मतम्। बहुकालजन्मनोऽपि शिवचन्द्रस्य बालता। मानवा मौलितो वर्णा देवाश्चरणतः पुनः"। नियमयति नि+यम-णिच्-अच्। दर्शननियामके परमेश्वरे "अतीन्द्रः संपदः सर्गो धृतात्मा नियमोऽयमः" विष्णुध०"स्वेषु स्वेष्वधिकारेषु प्रजा नियमयतीति नियमः" भा०।

नियमन न०नि+यम-भावे ल्युट्। १नियमशब्दार्थे २नियहे २बन्धे "नियमनादसतां च नराधिपः" रघुः इतरनिवारणरूपेऽपरिसंख्यार्थे च "युग्मान्निक्षतभृतानि षण्मुन्योर्वसुरन्ध्रयोः। रुद्रेण द्वादशी युक्ता चतुर्दश्या च पूर्णिमा। प्रतिपदाद्यमावास्या तिथ्योर्युग्मं महाफलम्। एतद्व्रतं महाघोरं हन्ति पुण्यं पुरार्जितम्" निगमवाक्यतात्पर्य्यं कथने "एतत्प्रयोजनं तु तिथिविशेषविहिते कर्मणि तिथिखण्डविशेषनियमनम्" तिथ्य० रघु०। एतदुपदर्शित खण्डविशेषतिथावेव कृत्यान्नेतरत्रेति परिसंख्यातुल्यत्वं गम्यते। नियमपरत्वे विपरीतकरणे दोषाभावप्रसङ्गात् नियमे इतरसंबन्धस्य शास्त्रार्थत्वात् नचैद्युक्तम् इतरत्र करणे निन्दाश्रवणात्। अतः परिसंख्याकार्य्यकारीह नियमनमिति स्थितम्।

नियमसेवा स्त्री नियमेन सेवा विष्णोः। नियमपूर्वकम् आश्विनस्य शुक्लैकादश्यामारभ्य कार्त्तिकमासे विष्णोः सेवायाम् "आश्विनस्य तु मासस्य या शुक्लैकादशी भवेत्। कार्त्तिकस्य व्रतानीह तस्यां कुर्य्यादतन्द्रितः। अज्ञात्वा नियमं विष्णोः कार्त्तिकं यः क्षिपेन्नरः। जन्मार्जितस्य पुण्यस्य फलं नाप्नोति नारद!"। किञ्च "नियमेन विना चैव न नयेत् कार्त्तिकं क्षपे!। चातुर्मास्यं तथा चैव ब्रह्महा स कुलाधमः" हरिभक्तिविलासः।

नियमस्थिति स्त्री नियमेन स्थितिरत्र। तपस्यायाम् हेमच०

नियमित त्रि० नि+यम-णिच्-कर्मणि क्त। १व्रतबन्धने "किञ्चिदभ्युन्नतोत्तीर्णनियमितजलधिरामसन्नेयामि" मघानाथ०। २व्रतनियमे च

नियम्य त्रि० नि+यम-यत्। १निरोद्धव्ये २नियाह्ये च "त्वया नियम्या ननु दिव्यचक्षुषा" रघुः।

निययिन पु० नी-भावे क्विप् निये नयनाय इनः प्रभुः बा० खलुक्स०। प्रापणाय स्वामिनि रथादौ "त्वेषं निययिनं रथम्" ऋ०१०।७।२

नियव पु० नि+यु-मिश्रणे वेदे बा० अप्। मिश्रीभावे "गौषु युधो नियवं चरन्तीः" ऋ० १०।१०।१० लोके तु घञ्। नियाव तत्रार्थे।

नियातन न० नितरां यात्यते याति-ल्युट्। १निपातने नितरां यातना यत्र प्रा०व०। २भयुते नपुंसकम्।

नियान न० नियमेन यान्ति गावोऽत्र या-आधारे ल्युट्। गोष्ठस्थाने। "यन्नियानं न्यासं संस्थानम्" ऋ०१०।१६।४ "नियानं गोष्ठम्" भा०।

नियाम पु० नि+यम-घञ्। नियमे

नियामक त्रि० नि+यम-णिच्-ण्वुल्। नियमकारके नियामकत्वम् अदृष्टकालादेः "कारणस्य कार्यं प्रति नियामकत्वम्" सर्वद० "कृत्तद्धितसमासानामभिधानं नियामकम्" अमरः। स्त्रियां टापि अत इत्त्वम् नियामिका। "विकल्पे चात्मप्रीतिर्नियामिका" मिता० २निराकरणे च "लोकप्रसिद्धमेवैतदारि वक्त्रं नियामकम्" कामन्द०।

नियुक्त त्रि० नि+युज-क्त। १अधिकृते २नियोजिते ३प्रेरिते च "केनापि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमि" आ०त० प्रातःकृत्ये। "नियुक्तस्तु यथान्यायं यो मांसं नात्ति मानवः" "स्त्रिया सम्यग्नियुक्तया" "विधवायां नियुक्तस्तु" "नियुक्तो यो विधिं हित्वा" इति च मनुः।

नियुत पु० नि+यु-कर्मणि क्विप् तुक्। १वायोरश्वे निघ० "सहस्रेण नियुता नियुत्वते" ऋ०१।१६।१ "जातावेकवचनम्। नियुत इति वायोरश्वानां नामधेयं "नियुतो वायोरिति निरुक्ते उक्तत्वात्" भा० कर्मणि क्विप्। २नियोजिते ३नियते च नियुद्वयशब्दे दृश्यम्।

नियुत न०। १लक्षसंख्यायां २दशलक्षसंख्यायां ३तत्संख्येयेषु च "शतं सहस्रमयुतं नियुतं प्रयुतं मतम्। स्त्री कोटिरर्बुदमिति क्रमाद्दशगुणोत्तरम्" इति रत्नकोषः। "एकं दश शतञ्चैव सहस्रमयुतं तथा। लक्षञ्च नियुतञ्चैव कोटिरर्बुद एव च। वृन्दः खर्वो निखर्वश्च शङ्कुपद्मौ च सागरः। अन्त्यं मध्यं परार्द्धञ्च दशगुणा यथोत्तरम्" पुराणम्।

R Sa4K Tar

नियुत्वत् पु० नियुतोऽस्याः सन्त्यस्य मतुप् मस्य वः तान्तस्यास्यार्थे परे पदत्वाभावात् न तस्य दः। वायौ "नियुत्वान् सोमपीतये" यजु० २७।१२। तस्येदं अ। नियुत्वतीय वायुदेवताके ऋचिरादौ "एष वा प्राजापत्य एष वा नियुत्वतीयः" शत०ब्रा० ६।२।२।१५।

नियुत्सा स्त्री भरतवंश्यस्य प्रस्तारस्यपस्य पत्न्याम् "प्रस्तारस्य नियुत्सायां हृदयज आसीत् विभुः" भाग०५।१५।७ नियुत्सायामित्यत्र निरुत्सायामिति पाठान्तरं वाऽपि तत्रार्थे।

नियुद्ध न०नि+युध–भावे क्त। बाहुयुद्धे अमरः। "नियुद्धं बाहुयुद्धम्" भा०दी० निपूर्वकस्य युध्यतेः बाहुयुद्धपरत्वम्। "तेन नियोद्धुकामे किल बहुवर्षमी" नैष०।

नियुद्रथ त्रि० नियुत्–नियोजितो नियतो वा रथोयस्य। गमनाय नियोजितरथे "स दक्षा नियुद्रथः" ऋ०१०।२६।१ "नियुद्रथो गमनाय सर्वदा नियतरथो नियुक्तरथो वा" भा०

नियोग पु० नि+युज–घञ् कुत्वम्। १प्रेरणे इष्टसाधनत्वादि बोधनेन २प्रवर्त्तने नियोज्यशब्दे दृश्यम्। ३व्याप्तायाम् ४अवश्यभावे अवधारणे तच्चावधारणम् अन्ययोगव्यवच्छेदार्थकम्। "एवानियोगे" सुश्रु०। अनियोगे अनवश्यभावित्यर्थः "तस्मिन्प्रेते नियोगेन स विकल्परादङ्मुखः" रघुः। ५पत्नीत्पादनाय विधवायाः ६नियोजने च। नियोगप्रकारश्च शब्दशब्दे २४०६पृ० दृश्यः। "उक्तो नियोगो मनुना निषिद्धः स्वयमेव हि" हरिस्मृतिः।

नियोक्तृ त्रि०नियोक्तुमर्हति नि+युज–अर्हार्थे कर्त्तरि ण्वुल् कुत्वम्। प्रभौ। शक्यार्थे कर्मणि तु न कुत्वम्।

नियोजन न० नि+युज–भावे ल्युट्। १प्रेरणे २प्रवर्त्तने अन्यादेः कर्मकरणाय स्वपदेशात्मकव्यापारे "नियोजनकालेऽष्टाचत्वारिंशतमाद्यानग्निके" कात्या० श्रौ०२।१।८। ३नितरां योजने च "पात्रं कृत्वा प्रतिष्ठन्नत्यथातो नियोजनस्यैव" शत०ब्रा० ३।७।२।१३।

नियोज्य त्रि० नि+युज–शक्यार्थे कर्मणि ण्यत् "प्रयोज्यनियोज्यौ शक्यार्थे" पा०उक्तेः न कुत्वम्। १प्रवर्त्तनीये नियुज्यतेः प्रवर्त्तनार्थकत्वात् कर्मणि ण्यता तत्कर्म उच्यते प्रवर्त्तनाकर्म च तत्सम्बन्धप्रवृत्तिमत्। तथा च स्वर्गकामोयजेतेत्यादौ स्वर्गकामो यागे नियोज्यः स्वर्गकामादेव कामनाद्वारा यागे क्रतिसाध्यताधीद्वारा प्रवृत्तिर्जायते इति तस्य तथात्वम्। तदेतत् शब्दधि० उक्तं यथा "स्वर्गकामो यजेतेत्यादौ इष्टसाधनत्वं कार्यतया वा यदि विधिः समभिव्याहृतक्रियान्वयी तदन्वान्वयी वा स्मर्यते यागादिर्न कार्यतया लिङा बोधयितुं शक्यते स्वर्गकामनियोज्यान्वययोग्यताविरहात्। कामनाविशिष्टस्य हि मनेदं कर्त्तव्यमिति बोद्धृत्वं नियोज्यत्वं कामना च तद्बोधोपयोगे सति भवति न च कामनानन्तरं कार्यसाधनताबोधात् कार्यताबोधे सति स्यात् एवञ्च स्वर्गसाधनताबोधे सति स्वर्गकामनियोज्यान्वययोग्यता। न च कालान्तरे भाविस्वर्गे क्रिया साक्षात् परम्परया वा साधनमिति शब्दो बोधयितुमर्हति आशुविनाशित्वात् परम्पराघटकानुपस्थितेश्च तृतीय प्रकारस्याभावात् अन्यथा तत्तादाय साधनत्वसम्भवात् कल्पप्रसङ्गपूर्वं न स्यात् इष्टसाधनताविधिपक्षे तु स्फुटैवानुपपत्तिः। कार्यताविधिपक्षे अन्वयप्रकारतया साधनत्वं शाब्दमिति फलतो न विशेषः। अतः क्रियातोऽन्यत् स्वर्गसाधनतार्हं कार्यं क्रियाकार्यतानिर्वाहकमित्यार्थम्" गदाधरेणेदं नियोज्यान्वयप्रसङ्गे विवृतं दिङ्मात्रमत्रोच्यते "लिङोऽर्थः कार्यत्वं पाकादिक्रियायामेव प्रथमतोऽन्वेति न तु स्वर्गकामो यजेतेत्यादितो यागादौ प्रथमतस्तदन्वयः किन्तु कार्यत्वेनैव वैदिकलिङ्वाच्येऽपूर्वे प्रथमतो विश्रयतया यागाद्यन्वयः प्रतीयते विश्रयत्वन्तु अन्यत्वकृत तत्र च शक्यतावच्छेदककार्यत्वैकदेशे सतौ स्वर्गकामान्वयः एवञ्च यागविषयकं स्वर्गकामकार्यमिति प्राथमिको बोधः तदनन्तरमपूर्वस्य क्रतिसाध्यता यागद्वारैव, यागमकृत्वा अपूर्वस्य साधयितुमशक्यत्वादतो यागकार्यतां विना अपूर्वकार्यत्वमनुपपन्नमित्यनुपपत्तिप्रतिसन्धाने तत्सङ्गतलोकस्वसङ्कल्पक्रियाकार्यतान्वयगोचरशाब्दसामग्रीतो यागे कौपादानिकोबोधः। पुनरनुवर्त्तमानशब्दसङ्गतानुपपत्तिज्ञानमेवोपादानमिति गीयते तद्सङ्गतं स्थानस्थार्थापत्तिरिति। न च यागकार्यतायाः पूर्वमप्रतीतत्वेन यागकार्यताव्यतिरेकस्य दुर्वचत्वात् उक्तानुपपत्तिधीरेव न घटते इति वाच्यं यागो यदि कार्य्यो न स्यात् तदाऽपूर्वमपि कार्यं न स्यात् इति तर्काकारानुपपत्तिप्रतिसन्धानस्य यागकार्यताविषयकधीनस्य यागकार्यताज्ञापकत्वोपगमात्। न चायाज्ञापादकयोर्वैयधिकरण्यान्नोक्त तर्कसम्भव इति वाच्यं यागो यदि क्रतिसाध्यो न स्यात् स्वसाध्यकक्रत्वसाध्यक्रतिसाध्यव्यापारको न स्यादिति तात्पर्यतर्कोपगमेन सामञ्जस्यात्। क्रतिसाध्यत्वञ्चादिरूपव्यापारके, अनुसाध्यकार्यादौ [illegible] व्यापारविषयके, क्रतिसाध्यव्यापारके नित्ये

CENTRAL ARCHAEOLOGICAL
LIBRARY, NEW DELHI
Acc. No. 19789
Date. 30.5.63
Call No.

व्यभिचारवारणायाऽननुकूलत्वमपेक्ष्य कृत्याध्यत्वं कृतौ विशेषणं शब्दानुपपत्तिधीजन्यतावच्छेदकधर्म्मयोः सङ्करे न दोषो गुणमतजात्यनभ्युपगमेन तयोर्ज्ञातित्व विरहात्। अस्तु वा श्येनेनाभिचरन्यजेतेत्यादिप्रमाणजन्यबोधविजातीय एव औपादानिकबोधः अपूर्वविषयककामिततेरपूर्वसाधनक्रियाविषयकत्वं विनाऽपूर्वसाधनतानुपपत्तेः कृतौ क्रियाविषयकत्वोपपादकत्वं तस्याः काम्यसाधनत्वमप्यपूर्वकार्यत्वोपपादकम् इति यागादेः काम्यसाधनताऽौपादानिकी, अस्माकं काम्यसाधनत्वस्य विधिप्रत्ययावाच्यत्वेऽप्यध्याहारितस्वार्थस्य शाब्दधीगोचरतया पदजन्यायां स्वर्गसाधनत्वोपस्थितेः पदजन्यक्रियादावुपस्थितिसङ्क्षितायाः शाब्दसामग्रीत्वादिष्टसाधनत्वस्योपादानसम्भवात। वाक्यप्रेषेण यजेतेत्यादौ च तदाभिधानिकमेव स्वर्गादिपदोपस्थाप्ये इष्टे कथञ्चित् कृतीयार्थकरणत्वान्वय उपेयते इति गुरुमतं निराकृत्य आकृत्यैव यागादौ विध्यर्थकृतिसाध्यत्वेष्टसाधनत्वयोरन्वयबोधं व्यवस्थापयितुकामो विचारयन्नं विप्रतिपत्तिं दर्शयति अत्रेति स्वर्गकामोयजेतेत्यादाविति वाक्यान्तरभाविफलकामनाबोधकघटितवेदवाक्ये इत्यर्थः प्रतिपाद्यत्वं विधावन्वेति विधित्वञ्च विदधाति प्रवर्त्तयतीति व्युत्पत्त्या प्रवृत्तिप्रयोजकत्वं प्रवृत्तिजनकतावच्छेदकप्रकारतानिरूपितत्वम्। कार्यत्वञ्च विधिष्वेव कथं न पक्षतोपेयते इत्याकाङ्क्षायाम् इष्टसाधनतासाधारणरूपावच्छिन्नपक्षो, गुरुप्राभाकरसाधने एव नैयायिकाभिमतस्वात्यक्रियाविषयसाधनतान्वयस्यापि निराकरणं भवतीत्युक्तानुगतरूपेण पक्षकरणप्रयोजनमाविष्कर्त्तुं विधित्वेन संख्याद्यन्वयं दर्शयति इष्टसाधनत्वं कार्यत्वं वेति वाक्यारोऽनास्थायां न विवक्षे। इष्टसाधनत्वस्य विधित्वपक्षे कार्यत्वस्वातन्त्र्यात्। एवञ्चालौकिकक्रियागोचरकालान्तरभाविफलकामनाधीनप्रवृत्तिपरविधिपदं तात्पर्यविषयप्रवर्त्तकधर्मत्वमेव प्रत्ययवाच्यं पक्षतावच्छेदकम्" इत्युपक्रम्य तु बध्ये

"स्वर्गकामेति काम्यस्वर्गसाधनतानिर्वाहकापूर्वरूपव्यापारे साधनत्वाप्रत्यायने स्वर्गकामकृतिसाध्यत्वान्वयबोधजनकधीविषयतदन्वयप्रयोजक स्वर्गकामनियोज्यकत्वरूपयोग्यताविषयकयाद्दशज्ञानस्य जनकीभूतं यन्नियोज्यतया स्वर्गकामरूपनियोज्यस्यान्वयप्रयोजकस्वर्गसाधनतायाज्ञानं तदसम्भवादित्यर्थः। कृतिविषयनिष्ठकाम्यसाधनतायाः कृतिविशेषप्रयोजकत्वेऽपि इष्टसाधनस्यापि सुखादेः कृतित्वसत्त्वेः। कृतिसाध्यत्वसामान्ये यद्यपि साक्षाद्दष्टसाधनत्वं प्रयोजकं तथापि तत्र कर्त्तुः क्रियानियोज्यत्वं क्रियाविषयककृतिसाध्यतात्मज्ञानवत्त्वरूपं प्रयोजकमिति कार्यतान्वयबोधसामान्ये कर्त्तुर्नियोज्यतात्मज्ञानसत्त्वप्रयोजकरूपयोग्यतात्मज्ञानविधया कारणम् तदपि ज्ञानं शाब्दाकाङ्क्षमेवोपेयस्य प्रमाणान्तराभावात्। एवञ्च काम्यत्वेन कामिनियोज्यतया बोधे कामनाविशिष्टस्यैव तथाभानसङ्गीकार्यं कामनाया विशेषणत्वावच्छेदकत्वात् कामनाया उपलक्षणत्वे आकाङ्क्षाविरहेणोपलक्षणतया निष्कामसाधारणनियोज्यतावोधो न, विशेषणाकाङ्क्षाप्रसङ्गात्" "वस्तुतो वेदस्यले विधिशब्दस्य औत्सर्गिक्याः कथञ्चित्तत्सम्बन्धे तत्त्यागायोगादपि कामनाया विशेषणत्वमावश्यकमेव"। स्वसान्तरे च

"यद्यपि नियोज्यत्वं विधिकर्त्तृकप्रवर्त्तनारूपनियोगकर्मत्वं भात्पर्यतावच्छेदकप्रवृत्तिरूपफलाश्रयत्वमेव प्रवर्त्तकज्ञानानुकूलव्यापारस्य नियोगत्वे च तादृशज्ञानाश्रयत्वमेव तथापि निरुक्तं पारिभाषिकमेव वा नियोज्यत्वम् अथ वा प्रवर्त्तकज्ञानोपधायकतानिर्वाहकव्यापारो नियोग इति कामनासाधारणं तादृशज्ञानोपधायकत्वं नियोज्यत्वं कामनायास्तद्बोधोपयोगे कार्यतावोधजनकत्वे भवति निर्वहतीत्यर्थः। अन्यथा विशेषणांशे तद्घटेन कामनाया विशेषणत्वायोगादिति भावः। स चेति कामनायास्तद्बोधोपयोगश्चेत्यर्थः। कामनानन्तरं काम्यसाधनताबोधात् कार्यत्वबोधे सतीति कामनाधीनकाम्यसाधनताबोधस्य कार्यतावोधोपयोगे सतीत्यर्थः साक्षात्तदनुपयोगादिति भावः। काम्यसाधनताबोधस्य कामनाधीनत्वं कामनाविषयकत्वेन बोध्यं तथा च कामनाविशिष्टस्य क्रियानियोज्यत्वं कामनायाः क्रियानिष्ठकाम्यसाधनताज्ञानोपयोगितानिर्वाहमिति तदुक्तक्रियानिष्ठकाम्यसाधनत्वमपि नियोज्यतान्वयप्रयोजकमिति पर्यवसितम्। एवञ्च स्वर्गकामसाधनताया नियोज्यतया स्वर्गकामान्वय प्रयोजकत्वे च सति सत्येव नियोज्यान्वययोग्यता नियोज्यत्वान्वयप्रयोजकयोग्यताघटितनियोज्यान्वयबोधसामग्रीसम्भवात्तिः। एवञ्च यागः स्वर्गसाधनीभूत स्वनियोज्य स्वर्गकामकार्यतान्वयधीरेवजन्यते तत्र स्वर्गकामे नियोज्यताज्ञानं क्रियायां स्वर्गसाधनताज्ञानञ्च योग्यताज्ञानमेव औपादानिकरूपमनुपपत्तिसाक्षमूलकं वा अपेक्ष्यते इति तस्या अपि स्वर्गसाधनताविषयकतया तन्निर्वाहक-

फलसमवपर्य्यन्तस्थाविव्यापारजनकत्वज्ञानमर्थ्यपेक्षितमिति नाकृत्यक्रियाकार्यताधीरिति सप्तदायार्थः" ।

एवं शुचित्वतत्कालादिरूपकर्तृविशेषयुतस्यापि नियोज्यत्वम् अत्र को नियोज्यः इत्याकाङ्क्षोत्थापितस्य शुचितत्त्व कालजीवित्वादेरधिकारिविशेषस्य नियोज्यतापर्य्यवसितत्वात् इत्याकारे विस्तरः। [इकारिधि वि० ।

नियोढ़ पु० नि+युध–ल्वच् । १कुक्कुटे राजनि० २वाडवयु-

निर् अव्य० नृ–क्विप् न दीर्घः । १वियोगे २अभावे ३आदेशे ४अतिक्रमे ५भोगे ६निश्चिते च गणरत्नमहो० । तत्र यथाक्रमसप्तदाहृतं च यथा १निःसङ्गः २निर्मेषम् ३निर्देशः। ४निष्क्रान्तः ५निर्वेशः । ६निश्चितम् । ७निर्णये मेदि० निर्मेक्षिकम् । अयं शब्दः प्रादिः सान्तः रान्तश्च "निसस्तपतावासेवने" पा० ८।२ १२० सूत्रे निस इति निर्देशात् निष्कृतं दुष्कृतमित्युदाहृत्य "इदुदुपधस्य इकारस्य यो विसर्जनीयः" इति भाष्योक्तेश्च सान्तत्वम् । "निरः कुषः" पा० ७।२।४६ सूत्रे निर इति निर्देशात् रान्तत्वम् । एवं दुस् दुर् सान्तोरान्तश्च दुष्कृतमित्यत्र भाष्योक्तेः सान्तत्वम् "खदूरोरधिकरणे" वार्त्ति० सूत्रे खदुरोरिति निर्देशात् रान्तत्वम् । उपसर्गगणसूत्रे तु तन्त्रोच्चारितः" मनोरमा ।

निरंश त्रि० निर्गतोऽंशात् निरा०त० । सूर्य्यभुज्यमानराशेः प्रथमे राशेस्त्रिंशांशरूपे भागे तद्राशिभोगस्य अंशशून्यत्वात् तथात्वम् । "राशेः प्रथमभागस्थः निरंशः सूर्य्यः उच्यते" ज्योतिषम् । २रवे राश्यन्तरसंक्रान्तिदिने रघु० । निर्गतो भागो यस्य प्रा० ब० वा कप् । ३भागरहिते च । "पतितस्तत्सुतः क्लीवः पङ्गुश्चक्षुर्विवर्जितः । अन्धोऽचिकित्स्यरोगार्त्तो भर्त्तव्यास्ते निरंशकाः" याज्ञ० "निरंशौ क्लीवपतितौ जात्यन्धबधिरौ तथा" मनुः । अनंशौ इति पाठः

निरञ्च त्रि० निर्गतः अञ्चत्युन्नतिर्यस्मात् प्रा०ब० । अधोन्नतिशून्यदेशे स च देशः सूर्य्यसि० उक्तो यथा "समनान्नेरुमध्यात् तु तुल्यभागेषु तोयधेः । द्वीपेषु दिक्षु पूर्वादि नगर्य्यो देवनिर्मिताः । भूवृत्तपादे पूर्वस्यां यमकोटीति विश्रुता । भद्राश्ववर्षे नगरी स्वर्णप्राकारतोरणा । याम्यायां भारते वर्षे लङ्का२ तन्नृहती पुरी । पश्चिमे केतुमालाख्ये रोमकाख्या३ प्रकीर्त्तिता । उदक्सिद्धपुरी४ नाम्ना कुरुवर्षे प्रकीर्त्तिता । भूवृत्तपादविवराच्चाचान्योन्यं प्रतिष्ठिताः । ताभ्यश्चोत्तरगो मेरुस्तानेव सुरार्च्चयः । तासामुपरिगो याति विषुवस्थो दिवाकरः । न तासु विषुवच्छाया नाक्षस्योन्नतिरिष्यते । मेरोरुभयतो मध्ये प्रवृत्तारे नभःस्थिते । निरक्षदेशसंस्थानामुभये क्षितिजाश्रये । अतो नाक्षोच्छ्रयस्तासु ध्रुवयोः क्षितिजस्थयोः । नवतिर्लम्बकांशास्तु मेरावक्षांशकास्तथा" ।

निरग्नि पु० निर्गतोऽग्निस्तत्साध्यकार्यं यस्मात् प्रा०ब० । श्रौतस्मार्त्ताग्निसाध्यकर्मरहिते द्विजे "एकोद्दिष्टं सदा कुर्य्यात् निरग्निः प्राङ्मुखः सुतः" उशनाः "वीरहा वा एष देवानां भवति योऽग्निमुद्वासयते" श्रुतौ अग्नित्यागस्य पुत्रहत्यातुल्यपापजनकत्वश्रुतम् । उपपातकशब्दे निरग्नितादोष उपपातकत्वेन मनुनोक्तो दर्शितः ।

निरङ्कुश त्रि० निर्गतोऽङ्कुश इव प्रतिबन्धको यस्य प्रा०ब० । १प्रतिबन्धशून्ये २अनिवार्य्ये जटाध० "विक्रयार्थं हि यो हन्यात् भक्षयेद्वा निरङ्कुशः" भा०अनु०३६०८श्लो० । "निरङ्कुशाः कवयः" । "कुवलयदृशां वामः कामो निकामनिरङ्कुशः" गीतगो० ।

निरङ्ग त्रि० निर्गतमङ्गं यस्य प्रा०ब० । १अङ्गहीने २रूपकालङ्कारभेदे न० सा०द० अलङ्कारशब्दे ४०२४०३भागम् ।

निरङ्गुल त्रि० निर्गतमङ्गुलिभ्यः प्रा०त० अच्समा० । अङ्गुलितोनिर्गते । [निरुदकादि० अन्तोदात्तताऽस्य ।

निरजिन न० निर्गतमजिनात् प्रा०त० । अजिनात् निर्गते

निरञ्जन न० शालाङ्गोपायाभ्यासरज्ज्वाः प्रथमे षष्ठे भागे कर्त्तव्ये लक्षणभेदे शालाङ्गसूत्रं परिभिष्टे "विंशत्यरत्निः शाला स्यात्तद्वेन तु विस्तृतेति" तत्साधनोपायश्च "प्रमाणार्द्धं बाभ्यस्याभ्यासषष्ठे लक्षणं करोति तन्निरञ्जनमिति अत्र विंशत्यरत्निर्मूलरज्ज्वाः दशारत्निरभ्यासरज्ज्वाः तस्याः प्रथमे षष्ठे भागे निरञ्जनम् तस्या अर्द्धं पञ्चारत्निमिते श्रोण्यञ्जनार्थमिति" कात्या०श्रौ० ७।१।२४ कर्कः ।

निरञ्जन त्रि० निर्गतमञ्जनं कज्जलं तदिव समलमज्ञानं वा यस्मात् प्रा०ब० । १कज्जलरहिते नेत्रे २दोषरहिते ३अज्ञानशून्ये परमात्मनि पु० "तदा विद्वान् पुण्यपापे विधूय निरञ्जनं परमं साम्यमुपैति" मुण्डकोप० "निरवद्यं निरञ्जनम्" श्वेता० ४शिवे पु० "दीर्घरोमा दीर्घभुजो दीर्घबाहुर्निरञ्जनः" हरिवं० २२७अ० शिवनामोक्तौ ।

निरति स्त्री नितरां रतिः, नि+रम–क्तिन् वा । अत्यन्तरतौ ।

निरतिशय पु० निर्गतोऽतिशयो यस्मात् नितरामतिशयो वा । १अत्यन्तातिशये २स्वापेक्षयातिशयशून्ये ३परमेश्वरे

यदपेक्षया कस्याप्यतिशयाभावः ततश्चिन् त्रि०। "तत्र निरतिशयं सार्वज्ञ्यबीजम्" पात०सू० "यदिदमतीतानागतप्रत्युत्पन्नानां प्रत्येकञ्च षण्णवतेरक्षयातीन्द्रियप्रकृष्टमल्पं वर्त्तते सार्वज्ञ्यबीजमेतद्विवर्द्धमानं यत्र निरतिशयं स सर्वज्ञः। अस्ति काष्ठाप्राप्तिः सार्वज्ञ्यबीजस्य सातिशयत्वात् परिमाणवदिति यत्र काष्ठाप्राप्तिर्ज्ञानस्य स सर्वज्ञः स च पुरुषविशेषः" भा० "व्याचष्टे यदिदमिति। बुद्धिसत्त्वावरकतमोऽपगमतारतम्येन यदिदमतीतानागतप्रत्युत्पन्नानां प्रत्येकञ्च षण्णवत्या च वर्त्तमानानामतीन्द्रियाणां प्रकृष्टं तस्य विशेषवत्त्वमल्पं वर्त्तते सार्वज्ञ्यबीजं कारणम्। क्वचित् किञ्चिदेवातीतादि स्फुरति क्वचिद् बहुतरं क्वचिद्बहुतमम् एतद्विवर्द्धमानं यत्र निष्क्रान्तमतिशयात् स सर्वज्ञ इति तदनेन प्रमेयमाह क्वचित्। यत्र प्रमाणयति अस्ति काष्ठा प्राप्तिः सार्वज्ञ्यबीजस्येति साध्यनिर्देशः निरतिशयकाष्ठा यतः परमतिशयवत्ता नास्तीति। तेन नावधिमात्रेण सिद्धसाधनं, सातिशयत्वादिति हेतुः। यत् सातिशयं तत् तत्रैवं निरतिशयं यथा कुवलामलकविल्वेषु सातिशयमिति। व्याप्तिं दर्शयति परिमाणवत्। न च परिमाणादिगुणैर्व्यभिचार इति साध्यतम्, न ह्यल्पावयवपरिमाणवतः किन्वा, परमाणुभ्य अल्पावयविभ्यो यावन्तः केचन ह्रस्वा प्रत्येकं वर्त्तिनं परिमाणं समाहृत्य परिमर्द्धमानमभिमानः प्रमाणन्तु प्रतिक्षेपं समाश्रयते दृश्यैकहिबुकविषयतया युक्तं सातिशयमिति न व्यभिचारः" विवरणम्।

निरत्यय त्रि० निर्गतोऽत्ययो यस्य प्रा०ब०। १अत्ययशून्ये "निरत्ययं काम न दातुमर्हति" किरा०। अभावेऽव्ययी०। २अत्ययाभावे अव्य०। [निष्क्रान्ते।

निरध्व त्रि० निष्क्रान्तोऽध्वनः प्रा०त० ऋक्षरा०। अध्वनो

निरनुनासिक त्रि० निर्गतमनुनासिकमनुनासिकत्वं यस्य। अनुनासिकभिन्ने वर्णभेदे "यस्तो द्विधाऽरो निरनुनासिकः सानुनासिकः" मुग्धबोधः।

निरनुयोज्यानुयोग पु० गौतमोक्ते निग्रहस्थानभेदे तल्लक्षणञ्च तदुक्तं यथा "निग्रहस्थानानियोगो निरनुयोज्यानुयोगः" सू० "निग्रहस्थानलक्षणस्य मिथ्याध्यवसायादनिग्रहस्थाने निगृहीतोऽयमिति परं ब्रुवन् निरनुयोज्यानुयोगान्निगृहीतो वेदितव्यः" इति भा०। "अवसरे यथार्थनिग्रहस्थानोद्भावनातिरिक्तं वादिनिग्रहस्थानोद्भावनं तदिच्छुः एतेनावसरे निग्रहस्थानोद्भावने एकनिग्रहस्थाने निग्रहस्थानान्तरोद्भावने च नातिव्याप्तिः। सोऽयं चतुर्थो ह्रस्वं जातिराभासोऽवसरप्रकृष्टत्वं। आभासो व्यभिचारादावधिक्षेपादुद्भावनम् अनवसरप्रकृष्टत्वाभावे एवोद्भावनं यथा ह्यस्मिंश्चेत् प्रतिज्ञादिः विशेष्यसिद्धिश्चेत् हेत्वन्तरम्। एवमवसरातीत्यकथनमपि, यथा उच्यमानयाऽनुस्रोतसादेः परिसमाप्तौ एवमनुक्रमपाठाद्यानाद्यनुभाषणावसरेऽनुद्भाव्यबोधाविष्करणानुभाषणप्रवृत्ते वादिनि तदुद्भावनमित्यादिकन्तल्लक्षणम्" वृत्तिः।

निरन्तर त्रि० निर्गतमन्तरं यस्मात् प्रा०ब०। १सन्ततेऽविच्छिन्ने सन्ततियुक्ते सन्ततिश्च दैयिकी कालिकी च तत्र दैयिकविच्छेदशून्ये "क्षतापराधानपि योषितः प्रियान् परिष्वजन्ते शयने निरन्तरम्" ऋतुसं० "भूभर्तुरायतनिरन्तरसन्निविष्टाः" माघः "निरन्तरान्तर वातङ्किष्टु" कुमा० कालिकविच्छेदशून्ये निरवधौ यथा "कपिलानां सवत्सानां वर्षमेकं निरन्तरम्" भा०व०८७अ० २अपरिधाने २अव्यवधाने ४अभेदे ५अतादार्थ्ये च। निरन्तराद्ययोऽत्र "निरन्तराः करिणां कदम्बकैः" [त्रिका०

निरन्तराभ्यास पु० कर्म०। १सततताहेतौ ब०व०। २साध्यादे

निरन्वय त्रि०नास्ति अन्वयः सम्बन्धो यस्य। १सम्बन्धरहिते "का त्वमेकाकिनी भीरु! निरन्वयजने वने" भट्टिः। २स्वाभिसम्बन्धारूपसम्बन्धशून्ये क्षयभेदे "स्यात् साहसं सम्बन्धवत् प्रथमं कर्म यद् हि तत्। निरन्वयं भवेत् क्षेयं स्थूलाऽपङ्कूयते च यत्" मनुः (निरन्वयं)"स्वामिपरोक्षापकृतं क्षेयम्" कुल्लू०। ३स्वाभिसम्बन्धशून्ये क्षये च "परिपूतेषु धान्येषु शाकमूलफलेषु च। निरन्वये शतं दण्डः सान्वये द्विगुणं दमः" मनुः "निष्पुलाकीकृतेषु धान्येषु शाकादिषु चापकृतेषु अन्वयो ह्यस्वामिनां सम्बन्धः तेन सह कश्चिदपि सम्बन्धो नास्ति" कुल्लू०। ४निर्वंशे च।

निरपत्रप त्रि० निष्क्रान्तः अपत्रपायाः प्रा०त०। निर्लज्जे धृष्टे लटा०। "अप्सरो मेनका ब्रह्मन् निर्दया निरपत्रपा" भा०आ० ८७अ०।

निरपेक्ष त्रि० निर्गता अपेक्षा यस्य प्रा०ब०। १अपेक्षाशून्ये स्वार्थबोधनाय अन्यापेक्षाशून्ये "निरपेक्षो रवः श्रुतिः" भट्टवार्त्तिकम्। "तत्तत्कर्मसु विनियोगसाधकानां श्रुतिलिङ्गादीनां मध्ये श्रुतेः (यूयमाद्यविभक्तेः)इतरानपेक्षत्वेन विनियोगसाधकत्वात् तथात्वं लिङ्गादीनां तु हितो-

वादिस्तुतिं कल्पयित्वा तदुद्वारेव तथात्वमिति सापेक्षत्वमिति भेदः। २आशाशून्ये "अध्यात्मरतिरासीनो निरपेक्षो निरामिषः" मनुः। ३अशक्यविषयके "उक्तानि प्रतिषिद्धानि पुनः सम्भावितानि च। सापेक्षनिरपेक्षाणि शक्याशक्यविषयाणि" ज्योति०त० रघु०।

निरमण न० नियतं रमणम्। नियतरतौ अत्यन्तानुरागे "निर्कंतिर्निरमणात्" निरु० २।७ नियतं रमन्त्यस्मिन् नि+रम+आधारे ल्युट्। २नियतरागाधारे "अश्नुतं निरटं निरमणम्" शत०ब्रा० १३।४।२।५

निरमित्र पु० पाण्डवनकुलस्य पुत्रभेदे "नकुलस्तु शैव्यां करेणुमत्यां नाम भार्यायामदधात् तस्मात् पुत्रं निरमित्रं नामाजनयत्" भा०आ०४५अ०। निर्गतोऽमित्रो यस्य। २अत्यन्तरहिते त्रि०। ३त्रिगर्त्तराजपुत्रभेदे पु०"हाहाकारो महानासीत् त्रिगर्त्तानां जनेश्वर!। राजपुत्रं हतं दृष्ट्वा निरमित्रं महारथम्" भा०द्रो० १५७अ०। ४वार्हद्रथवंश्ये भाविनि नृपभेदे पु० "ततो युतायुतस्थापि निरमित्रोऽथ तत्सुतः" भाग० ९।२२।१० भाविवार्हद्रथवंशोक्तौ।

निरय पु० निर्गतोऽयोऽत्र प्रा०ब० नीचैरेत्यत्र निर्+इ आधारे अच् वा। नरके अमरः "निरये चैव पतनं यातनाश्च यमक्षये" मनुः।

निरयण न०निर्+अय-भावे ल्युट्। निर्गमने। करणे ल्युट्। निर्गमनोपाये "पश्यात् निरयणं कृतम्" ऋ०१०।१२१।६ "निरयणं निर्गमनोपायः" भा०। [अशून्ये अमरः।

निरर्गल त्रि०निर्गतमर्गलमिव प्रतिबन्धो यस्य प्रा०ब०। प्रतिबन्धशून्ये।

निरर्थ पु० निर्गतोऽर्थो यस्य प्रा०ब०। अर्थशून्ये १निष्फले २अभिधेयशून्ये च "निरर्था खाद्यमूर्त्तत्वात् पुरुषस्य महीयते" मार्कण्डेयपु०।

निरर्थक त्रि० निर्गतोऽर्थो यस्य प्रा०ब० वा कप्। १निष्फले "प्रमादो निष्फलो यस्य क्रोधश्चापि निरर्थकः" भा०उ० ३५अ०। "इत्थं जन्म निरर्थकं क्षितितलेऽस्मिन्यथा मालती" सा०द०। २अभिधेयशून्ये ३काव्यदोषभेदे च "निरर्थकं ग्रहीत्यादि पूरणैकप्रयोजनम्" चन्द्रा० गौतमोक्ते ४निग्रहस्थानभेदे "वर्णक्रमनिर्देशवदिरर्थकम्" सू० "यथा लिम्बः शब्दः कचटतपयजवगडदशत्वात् झभञघढधवदिति एवमकारं निरर्थकम् अभिधानाभिधेयभावानुपपत्तौ अर्थगतेरभावाद् यथा एव क्रमेण निर्दिश्यत इति" भा०। "वर्णानां क्रमेण निर्देशो जवगडेत्यादिप्रयोगस्तस्यो निर्देशोनिरर्थकं निग्रहस्थानम् अवाचकपदप्रयोग इति फलितार्थः। अवाचकत्वं च शक्त्या निरूढलक्षणया आक्षपरिभाषया वा बोध्यं समयबन्धव्यतिरेकेणेति विशेषणीयं तेन यत्रापभ्रंशेन विचारः कर्त्तव्य इति समयबन्धस्तत्रापभ्रंशे न दोषः। झटिति संवरेण तु न दोष इत्युक्तमाचार्यैः। अस्य सम्भवः प्रमादादित्यवधेयम्" वृत्तिः। क्रमश्चेहाक्षरसमाम्नाये माहेश्वरे सूत्रे यथा पठितात्तथेत्यर्थः।

निरवकाश त्रि० निर्गतोऽवकाशो यस्य प्रा०ब०। १अवसरवत्कालान्तरकर्त्तव्यताके कार्य्ये २अवकाशशून्ये च।

निरवग्रह त्रि० निर्गतोऽवग्रहः प्रतिबन्धो दृष्टिप्रतिबन्धो नियमनं वा यस्य प्रा०ब०। १स्वच्छन्दे स्वतन्त्रे अन्येच्छानधीनमतिवृत्तौ अमरः। "केचित् क्रोधसमाविष्टा मदान्धा निरवग्रहाः" भा०भी०८३अ०। २दृष्टिप्रतिबन्धशून्ये च।

निरवद्य त्रि० निर्गतमवद्यं दोषः अज्ञानं रागद्वेषादि वा यस्य। १निर्दोषे तत्कृते "तस्य निरवद्यविद्योद्द्योतेन द्योतितश्चत्वतोऽयमर्थः" दायभा०। २अज्ञानशून्ये ३रागादिशून्ये परमात्मनि च "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" श्वेता०उ०।

निरवयव त्रि०निर्गतोऽवयवो यस्य। न्यायमते १अवयवशून्ये परमाण्वाकाशादौ सर्वथावयवशून्ये २व्याप्तौ च "नाशकारणाभावेन निरवयवद्रव्याणां नाशाभावः" सा०प्र०भा०

निरवशेष त्रि० निर्गतोऽवशेषो यस्य। अवशेषशून्ये समग्रे "यावत् निरवशेषं भवति तावत् दाहयित्वा" आश्व०श्रौ० २।१२।५।

निरवसित त्रि० निर्+अव+सो-क्त। येन मुक्ते पात्रे संस्कारेणापि न शुध्यति तस्मिन् पात्रवर्ज्जिते चरकादौ। [शब्दमाला।

निरवहानिका स्त्री निर+अव+हन-ण्वुल्। प्राचीरे

निरविन्द पु० पर्वतरूपे तीर्थभेदे "अश्वमेधे गयायाञ्च निरविन्दे च पर्वते" भा०आनु० २५अ०।

निरशन अव्य० अशनस्याभावः अव्ययी०। १भोजनाभावे। निर्गतमशनं यस्य प्रा०ब०। २भोजनरहिते त्रि० "अश्नन्कृष्णा निरशना दृशत्पक्षतपाच यें हरिवं० ४६अ०।

निरष्ट पु० निर्गतानि अष्टौ वयोऽङ्गानि यस्मात् षट्समा०। चतुर्विंशतिवर्षीये २अश्वे "अश्वस्य तिस्रगतानि वयोऽङ्गानि

भवन्ति तेषामेकैकं त्रीणि त्रीणि वर्षाणि अनुवर्त्तते तान्यष्टौ व्यञ्जनानि निर्गतान्यक्षादिति निरष्टं चतुर्विंशतिवर्णौघम्" भा०। निर्+अच-क्त। २निराकृते त्रि० "इषायुधो न वध्रयो निरष्टाः" ऋ०१।३२।६ "निरष्टा निराकृताः" भा०।

निरस त्रि० निष्टप्तो रसो यस्मात् प्रा०ब०। १निष्टप्तरसे रसहीने २निःस्नेहिकाहारे स्त्री राजनि०।

निरसन न०निर्+अस-ल्युट्। प्रत्याख्याने अमरः "स पितुर्विक्रियां दृष्ट्वा राज्यान्निरसनं तथा" भा०आश्व० ४अ०। आधारे ल्युट्। २वधे निष्कृष्य असनम् क्षेपणम्। ३निष्ठीवने च मेदि०। दिवु निरसने दैवादिकोः ल्युट्यस्य निष्कृष्यक्षेप्रादेः क्षेपणरूपत्वात्तथात्वम्।

निरस्त त्रि० निर-अस-क्षेपे कर्मणि क्त। १प्रत्याख्याते निवारिते अमरः "निरस्तगाम्भीर्यमपास्तपुष्पकम्" माघः "निरस्तः परावसुः" ऋग्वादान्निभागत्यागे मन्त्रः। २त्वरितोदिते न०। ३त्वक्षरे पु० अमरः। ४निष्प्रभूते ५प्रतिहते ६प्रेषिते त्रि० मेदि०। भावे क्त। ७निष्ठीवने ८निवारणे ९क्षेपणे च न०।

निरस्थि न० निर्गतमस्थि यस्मात् प्रा०ब०। दूरीकृतास्थिके मांसे "मांसं निरस्थि रुधिरं पुनर्दृदि चूर्णितम्" सुश्रुतः।

निरहङ्कार त्रि० निर्गतोऽहङ्कारो यस्य प्रा०ब०। १अभिमानशून्ये देहेन्द्रियादावहमित्यभिमानशून्ये २धनविद्यादिनिमित्ताक्रोत्कर्षसम्भावनाहीने च "निर्वैरा निरहङ्कारा विगतक्रोधमत्सराः" भा०आश्व० ३२अ०।

निरहम् त्रि० निर्गतमहमिति बुद्धिर्यस्य प्रा०ब०। अहङ्कारशून्ये "प्रत्यक् प्रशान्तं सुधियोपलभ्यं ज्ञानस्वरूपं निरहं प्रपद्ये" भाग० ५।१८।४ श्लो०।

निरङ्ग पु० निर्गतमङ्गः प्रा०स० टच्समा० "अङ्गोङ्ग एतेभ्यः" पा० अङ्गादेशः अङ्गोऽदन्तात्" पा० नियमात् न अत्वम् "अङ्गाद्धान्नाः पुंसि" पा० पुंस्त्वम्। १निर्गते दिने निष्क्रान्तोऽङ्गः निरा०त० साधनं प्राप्यत्। २दिनात् निर्गते त्रि०।

निराक पु०निर्+अक-अकगतौ भावे घञ्। १पाके २क्षेदे च कर्मणि घञ्। अस्तत्कर्मफले हेमच०।

निराकरिष्णु त्रि० निर्+आ+कृ-ग्लाघ्यें ष्णुच्। निराकरणशीले निवारणशीले "निराकरिष्णू वर्त्तिष्णू वर्द्धिष्णू परितो रथम्" भट्टिः "निराकरिष्णोर्जिनाहतेऽपि" रघुः "निराकरिष्णुता चैव विज्ञेया प्राणघातुकाः" सुश्रुतः।

निराकाङ्क्ष त्रि० निर्गता आकाङ्क्षा अपेक्षा इच्छा वा यस्य प्रा०ब०। १शब्दबोधोपयोग्यपेक्षाशून्ये २इच्छाशून्ये च "तेषां वाक्यं निराकाङ्क्षम्" काव्या०औ० ३।२।२ "यावत् पदद्वन्द्वं निराकाङ्क्षं पूर्वापरपठितपदान्तराकाङ्क्षारहितम्" संग्रहव्याख्या। आकाङ्क्षाशब्दपक्षे आकाङ्क्षाशब्दे दृश्यम्।

निराकार त्रि० निर्गतः आकारोऽवयवोऽस्य प्रा०ब०। १अवयवहीने २देहाद्याकारवर्जिते ब्रह्मणि च "तेजःस्वरूपो भगवान् निराकारो निराश्रयः" ब्रह्मवै० जन्मख०७अ०। "निराकरणज्ञानवादेऽपि योग्यतावशेन प्रतिकर्मव्यवस्थावाः स्थितत्वात्" सर्वद०। आकार आज्ञानम्। ३निर्गताज्ञाने च "निराकारा निरानन्दा दीना प्रतिहतस्पृहा" (अयोध्या) रामा०अयो० ११३अ०।

निराकुल नितरामाकुलः प्रा०ब०। अत्यन्ताकुले "अविकुलसङ्कुलकुलसमूहनिराकुलवकुलकलापे" गीतगो०। "सुपात्रनिक्षेपनिराकुलात्मना" माघः।

निराकृति स्त्री निर्+आ+कृ-क्तिन्। १प्रत्यादेये निराकरणे निवारणे अमरः। "प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिराकृतिः" भा०द०। निर्गता आकृतिराकारोऽस्य प्रा०ब०। २निराकारे "योऽसौ विष्णुरगाधात्मा परमात्मा निराकृतिः" हरिवं० २१८अ०। निर्+आ+कृ-कर्त्तरि क्तिच्। ३पक्षयज्ञत्यागिनि पु० "यक्ष्मी च पशुमांश्चैव परिवेत्ता निराकृतिः" मनुः "यस्तु पञ्च महायज्ञविहीनः स निराकृतिः" कुल्लू०धृतवचनम्। "निराकर्त्ता सुरादीनां स विज्ञेयो निराकृतिः" शब्दार्थचि० धृतवाक्यम्। तस्य देवयज्ञनिराकर्त्तृत्वात् तथात्वम्। ४रोहितमनुपुत्रभेदे पु० "दक्षपुत्रस्य पुत्रास्ते रोहितस्य प्रजापतेः। मनोः सुतो धृष्टकेतुः पञ्चहोत्रो निराकृतिः" हरिवं०७अ०।

निराकृतिन् त्रि० निराकृतमनेन दृष्टा० इनि। निराकरणकर्त्तरि "अलोलुपोऽव्यथोदान्तो न क्रतौ न निराकृतौ" भा०शा० २३६अ०।

निरातङ्क त्रि० निर्गता आतङ्का यस्य यस्माद्वा प्रा०ब०। १भयशून्ये २रोगरहिते राजनि० "पुरुषायुषजीविन्यो निरातङ्का निरीतयः" रघुः। ३शिवे पु०।

निरातप त्रि० निर्गत आतपो यस्मात् प्रा०ब०। १आतपशून्ये २रात्रौ स्त्री शब्दच०।

निराबाध त्रि॰ निर्गता आबाधा यस्य। १आबाधाशून्ये २व्यथाशून्ये ३प्रतिबन्धशून्ये च "दवीयान् महीधरो नेदीयान् दीर्घो वक्षरिति व्यवहारश्च निराबाधं जागरूकत्वात्" सर्वदर्शनसं॰। ४पक्षाभासभेदे पु॰ "अप्रसिद्धं निराबाधं निरर्थं निष्प्रयोजनम्। असाध्यं वा विरुद्धं वा पक्षाभासं विवर्जयेत्" मिता॰ धृतवचनम्। "निराबाधम् अक्षद्वयप्रदीपप्रकाशेनायं खण्डोऽयं व्यवहरतीति" मिताक्षरा।

निरामय त्रि॰ निर्गत आमयात् प्रा॰त॰। १आमयरहिते रोगशून्ये अमरः। २वनस्पतौ पुंस्त्री॰ मेदि॰ ३गुग्गुरे शब्दमाला उभयत्र स्त्रियां जातित्वात् ङीष्। [शब्दच॰।

निरमालु पु॰ नितरां रमतेऽत्र रम-आलुच्। कपित्थवृक्षे

निरामिष त्रि॰ निर्गतमामिषमिव्याषो मांसाद्याभिषं वा यस्मात् प्रा॰ब॰। १लोभशून्ये "अध्यात्मरतिरासनो निरपेक्षो निरामिषः" मनुः २मांसाद्याभिषहीने च "सामिषं कुररं दृष्ट्वा बध्यमानं निरामिषैः। आमिषस्य परित्यागात् कुररः सुखमेधते" भा॰शा॰ ११८अ॰। ३आमिषरहिते अन्नादौ। "नैवेद्यैश्च निरामिषैः" ति॰त॰।

निरालक पुंस्त्री निर्+अल-एवुल्। शालुके मत्स्यभेदे "तिमितिमिङ्गिलकुलिशपाकमत्स्यनिरालकनन्दिवारवक्रमकरगवेरूकचन्द्रकमङ्गामीनराजीवप्रभृतयः शालुकाः" सुश्रु॰।

निरालम्ब त्रि॰ निर्गत आलम्बः अवलम्बनं यस्य प्रा॰ब॰। १अवलम्बनशून्ये "एवं मयि निरालम्बे मायात् स्थिरतां गते" हरिवं॰१७३अ॰ "निरालम्बो लम्बोदरजननि! कं यामि शरणम्" जगन्नाथः। २आकाशमांसाशी स्त्री राजनि॰। तस्या मूलरूपालम्बनशून्यत्वात्तथात्वम् ३वह्नौ न॰ तदधिकारेण प्रवृत्ते ४उपनिषद्भेदे न उपनिषच्छब्दे १२२२पृ॰ दृश्यम्।

निरालोक त्रि॰ निर्गत आलोक आलोको दृष्टिर्यस्मात् प्रा॰ब॰। आलोकशून्ये १अन्धकारे २आलोकनरहिते च "त्यक्त्वा लोकान् निरालोकान्" भा॰आ॰ २२अ॰।

निराश त्रि॰ निर्गता आशा यस्य प्रा॰ब॰। आशारहिते "निराशाः पितरो यान्ति श्राद्धं दत्त्वा सुदारुणम्" ति॰त॰ "मनो बभूवेन्दुमतीनिराशम्" रघुः। तस्य भावः अञ्। नैराश्य आशाशून्यत्वे "आशा बलवती राजन्! नैराश्यं परमं सुखम्। आशां निराशां कृत्वा तु सुखं स्वपिति पिङ्गला" भा॰आ॰ १७८अ॰।

निराशिष् त्रि॰ निर्गता आशीराशंसनं यस्य प्रा॰ब॰। १आशंसनशून्ये "जगच्चरण्यस्य निराशिषः सतः" कुमा॰ "निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः" गीता। वैराग्यदाढ्यात्तेन २विगततृष्णे च।

निराश्रय त्रि॰ निर्गत आश्रय आधारोऽवलम्बनं वा यस्य। १आश्रयरहिते २आलम्बनरहिते च "चित्रं यथाश्रयमृते स्थास्नादिभ्यो विना यथा लेखा। तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम्" सां॰का॰ "निराश्रयं मां जगदीश! रक्ष" चण्डटः "त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः" गीता "निराश्रयः योगक्षेमार्थमाश्रयशीयरहितः" श्रीधरः। ३अहंतदर्थनेन देहेन्द्रियाद्यभिमानशून्ये शब्दार्थचि॰।

निरास पु॰ निर्+अस-भावे घञ्। १प्रत्याख्याने निराकरणे "तथा विज्ञानपक्षनिरासहेतवोऽप्रतीत्यादि" सां॰प्रभा॰। निर्+आ+अस-अच्। २निरासके त्रि॰ "निरासैरखिलैः आत्मैश्वर्यमानैः स्वकर्मभिः" भा॰या॰ २७॰अ॰।

निराहार त्रि॰ निर्गत आहारो यस्य प्रा॰ब॰। १आहारशून्ये "निराहाराश्च ये जीवाः" तर्पणमन्त्रः। निवृत्त आहारः प्रा॰ब॰। २निवृत्ते आहारे "पवनाशो निराहारः सर्वेऽमी शुद्धिहेतवः" याज्ञ॰अध्यायी॰। ३आहाराभावे न॰

निरिङ्गिणी स्त्री निश्चलमङ्गं निरङ्गं तदस्यस्या आच्छादनेन इनि ङीप्। तिरस्करिण्यां प्रच्छदपटे त्रिका॰

निरिन्द्रिय त्रि॰ निर्गतं निवृत्तमिन्द्रियं यस्य प्रा॰ब॰। इन्द्रियशून्ये "ये च केचिन्निरिन्द्रियाः" मनुः।

निरीति त्रि॰ निर्गता ईतिर्यत्र। अतिवृष्ट्यादीतिशून्ये "निरीतिभावं गमितेऽतिवृष्टयाः" नैष॰ "निरातङ्का निरीतयः" रघुः।

निरीष न॰ निर्गतशीषायाः निरा॰त॰। फाले अमरः।

निरीश्वर त्रि॰ निश्चयेन ईश्वरो यत्र प्रा॰ब॰। १ईश्वररहिते वादे "निरीश्वरेण वादेन कृतं शास्त्रं महत्तरम्" सां॰प्र॰भा॰पञ्चमु॰। २तद्वादयुते नास्तिके। निरीशादयोऽत्र।

निरीह त्रि॰ निर्गता ईहा यस्य प्रा॰ब॰। चेष्टाशून्ये "निरीहस्य हृतद्विषः" रघुः निवृत्ता ईहा प्रा॰त॰। चेष्टाविरोधिव्यापारे स्त्री "अथो निरीहावस्थायामात्मविश्रान्तं सुखम्" सा॰द॰।

निरुक्त न॰ निर्-वच-भावे क्त। १निर्वचने पदानामवयवार्थाः समाविता निःशेषेण निरुक्तेन उच्यन्ते यत्र आधारे वा॰ क्त। पदानामवयवार्थनिर्वचनप्रतिपादके

यास्कादिग्रथीते २यन्थभेदे तदेतत् ऋग्वेदभाष्योपक्रमे उक्तं यथा

"षड्ध्यायरूपकाण्डत्रयात्मके एतस्मिन् ग्रन्थे परनिरपेक्षितया पदार्थस्योक्तत्वात्तस्य ग्रन्थस्य निरुक्तत्वम्। तदुव्याख्यानं च "समाम्नायः समाम्नातः" इत्यारभ्य "तस्मात्तस्यात्तद्ब्राह्मणमनुभवत्यनुभवति" इत्यन्तैर्द्वादशभिरध्यायैर्यास्को निर्ममे। तदपि निरुक्तमित्युच्यते एकैकस्य पदस्य समाम्नाता व्यवयवार्थोक्तत्र निःशेषेणोच्यन्त इति व्युत्पत्तेः। तथा हि "चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्चेति" प्रतिज्ञाय "उच्चावचेष्वर्थेषु निपतन्तीति" निपातस्वरूपं निरूप्यैवमुदाहृतम् "नेति प्रतिषेधार्थीयो भाषायामुभयमध्यायम् "नेन्द्र देवममंसतेति" प्रतिषेधार्थीय इति। "दुर्मदासो न सुरायाम्" इत्युपमार्थीयः इति च। तत्र लोके केवलप्रतिषेधार्थकस्यापि नकारस्य वेदे प्रतिषेधोपमानक्षणार्थादिदाहरणमस्मिन् ग्रन्थेऽवगम्यते। एवं ग्रन्थकारेणोक्तास्तत्तत्पदनिर्वचनविशेषास्तत्तन्मन्तव्याख्यानावसरे एवास्माभिरुदाहरिष्यन्ते। न च निर्वचनानां निर्मूलत्वं शङ्कनीयम् एतदुद्युक्तत्वमेव ब्राह्मणेषु पदनिर्वचनानां तेषामिदुक्तत्वात्। "तदाहुतीनामाहुतित्वमिति" "तमिदन्द्रं सत्यमिन्द्रम् इत्याचक्षते" इति "यदग्नयस्तत् पृथिव्याः पृथिवीत्वमिति च"। ग्रन्थकारोऽपि तत्र तत्र श्लोकनिर्वचनमूलभूतब्राह्मणान्युदाहरिष्यति तेषामिदानिर्वचनानां व्याकरणबलेन सिद्धावपि न सर्वेषां सिद्धिरस्ति। अतएव ग्रन्थकार आह "तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यं स्वार्थसाधकं चेति"। तस्माद्देवार्षिबोधायोपयुक्तं निरुक्तम्" । तत्र निर्वचने पदसाधनप्रकारश्च "वर्णागमो वर्णविपर्ययश्चेत्यादिनोक्तो निपातशब्दे द्रष्टव्यः। "शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति षडङ्गकोषः "छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते। ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते। शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्। तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते" तस्यैतत् निरुक्तं हृदयमिति हृदयम्" आ०उप०। हेमचन्द्रे तु पदमञ्जनं निरुक्तमित्युक्तं तेनावयवार्थज्ञापनार्थं तत्तद्घटकपदस्य विभागकरणमेव निरुक्तमिति तदर्थः। ३नियोगेन उक्ते ४नियुक्ते च निरुक्तजशब्दे द्रष्टव्यम्।

निरुक्तकार पु० निरुक्तं ग्रन्थं करोति कृ-अण् उपस०। १यास्के मुनौ २शाकपूणिनामकमुनौ च। कृ-क्विप् निरुक्तकृदपि तयोरर्थबोधः।

निरुक्तज पु० निरुक्तः नियुक्तः अस्यां पुत्रसत्तायामेत्युक्तः अन्यस्तस्मात् जायते जन-ड। क्षेत्रजपुत्रे "आत्मा पुत्रश्च विज्ञेयस्तस्यानन्तरजश्च यः। निरुक्तजश्च विज्ञेयः सुतः प्रकृतजस्तथा" भा०अनु० ४६अ०। "निरुक्तजः स्वक्षेत्रेऽन्योरतःसेकार्थमुक्तस्तज्ज्ञैः" मीमक०।

निरुक्ति स्त्री निर्+वच-क्तिन्। १निर्वचने प्रकृतिप्रत्ययादिवयवार्थकथनद्वारा सकृदितार्थबोधने "किं कारणं जरत्कारोर्नामैतत् प्रथितं भुवि। जरत्कारुनिरुक्तिं त्वं यथावत् वक्तुमर्हसि" सौतिरुवाच "जरेति क्षयमाहुर्वै दारुणं कारुसंज्ञितम्। शरीरं कारु तस्योक्तं धीमाञ्छास्त्रैः पुरैः। क्षपयामास तीव्रेण तपसेत्यत उच्यते। जरत्कारुरिति ब्रह्मन्! वासुकेर्भगिनी तथा" भा०आ०४०अ०। २६६४०-कलङ्कारसर्वस्वोक्ते २अलङ्कारभेदे

निरुत्सुक त्रि० नितरामुत्सुकः प्रा०स०। १अत्यन्तोत्सुके निर्गतसकलोत्सुकम् उत्सुकता यस्य प्रा०ब०। २औत्सुक्यशून्ये च "ममापि कण्वसुतामनुक्षत्य मृगयां प्रति निरुत्सुकं चेतः" रैवतकमनोः १पुत्रभेदे पु० "धृतिमानव्ययोवक्षस्त्वदर्शी निरुत्सुकः" हरिवं० ७अ० रैवतपुत्रौ। त्रयोदशमन्वन्तरे सप्तर्षिमध्ये भार्गवे ऋषिभेदे "यौवनाश्वस्त्वदर्शी तु भार्गवश्च निरुत्सुकः" तत्रैव त्रयोदशमन्वन्तरे सप्तर्षिकथने।

निरुदकादि पु० पा०ग० सु० उक्ते अन्योदात्ततानिमित्ते शब्दगणभेदे स च "निरुदक निरुपल निर्मशिक निर्मशक निष्कालक निष्कालिक निर्बुध दुष्करीष निष्करीष निष्करी निरजिन उदजिन उपाजिन (परेर्हसपादवेशकर्षाः)" "निरुदकादिराकृतिगणः" सि०कौ०।

निरुद्ध त्रि०नि+रुध-कर्मणि क्त। १संरुद्धे क्षतगमनादिप्रतिरोधे "बलनिरुद्धवाहैः" माघः। पात०भा० उक्ते २चित्तस्यावस्थारूपभूमिभेदे तच्च तल्लोक्तं यथा

"क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तभूमयः। तत्र विक्षिप्ते चेतसि विक्षेपोपसर्जनीभूतः समाधिर्न योगपक्षे वर्त्तते यस्त्वेकाग्र्ये चेतसि सद्भूतमर्थं प्रद्योतयति क्षिणोति च क्लेशान् कर्मबन्धनानि शिथिलयति निरोधमभिमुखं करोति स सम्प्रज्ञातो योग इत्याख्यायते" भा० 'क्षिप्तं सदैव रजसा तेषु तेषु विषयेषु क्षिप्यमाणमत्यन्तमस्थिरम्। मूढन्तु तमःसमुद्रेकाच्चिराद्दृत्तिमत्। विक्षिप्तं

क्षिप्तादिक्षिप्तं विशेषो हि स्वेमवद्धलस्य कादाचित्कः स्वेमा वा चाक्षा स्वेमवद्धलता सांसिद्धिकी वा वस्त्रमाषव्याधिस्थानाद्यन्तरायजनिता वा। एकाग्रमेकतानम्। निरुद्धसकलवृत्तिकं संस्कारमात्रशेषं चित्तं निरुद्धम्। तत्र क्षिप्तमूढयोः सत्यपि परस्परापेक्षया वृत्तिनिरोधे पारम्पर्येणापि निर्बीजहेतुभावाऽभावात् तदुपघातकत्वाच्च योगपक्षादुदीरितत्वमिति नतयोर्योगत्वं निषिद्धम्। विक्षिप्तस्य तु कादाचित्कसद्भूतविषयस्वेमशालिनः समाख्येत योगत्वमिति निषेधति तत्र विक्षिप्ते चेतसि समाधिः कादाचित्कः सद्भूतविषयस्य चित्तस्य स्वेमा न योगपक्षे वर्त्तते। कस्मादुच्यतस्तद्विपक्षविशेषोपसर्जनीभूतः विपक्षवर्गान्तर्गतस्य हि स्वरूपमेव दुर्लभं प्रागेव कार्यकरणात्। न खलु दग्धान्तर्गतं बीजं त्रिचतुरक्षणावस्थितसप्रमथ्यङ्कुराय कल्पते इति भावः। यदि विक्षेपोपसर्जनीभूतः समाधिर्न योगः कस्तर्हि इत्यत आह यस्त्वेकाग्रे चेतसि इति। भूतमिति समारोपितमर्थं निवर्त्तयति। निद्रावृत्तिरपि स्वालम्बने तमसि भूते भवत्येकाग्र्येत्यत उक्तम् सदिति। शोभनं नितान्तमाविर्भूततत्त्वं, तमःसङ्गेकस्वशोभनस्य क्लेशहेतुत्वादिति। द्योतनं हि तत्त्वज्ञानमागमाद्दानुमानाद्वा भवदपि परोक्षरूपतया न साक्षात्कारवतोऽविद्यादिक्लेशनत्ति द्विचन्द्रदिङ्मोहादिवत्तच्छेदकत्वादत आह प्रेति प्रशब्दो हि प्रकर्षं द्योतयन् साक्षात्कारं क्षपयति। अविद्यामूलत्वादस्मितादीनां क्लेशानां विद्यायाश्च अविद्याच्छेदरूपत्वात् विद्योदये चाविद्याक्लेशसत्त्वच्छेदो विरोधित्वात् कारणविनाशाच्चेत्याह क्षिणोति चेति। अतएव कर्म रूपाणि बन्धनानि क्षपयति। कर्म चात्रापूर्वमभिमतं कार्यं कारणत्वोपचारात्। क्षपयति स्वकार्याद्ववहादयति। वक्ष्यति हि "सति मूले तद्विपाकः"। इति किञ्च निरोधमभिमुखं करोत्यभिमुखीकरोति" विव०

निरुद्धप्रकर्ष(स) न० सुश्रुतोक्ते क्षुद्ररोगभेदे "वातोपसृष्टमेवन्तु कर्म संक्षयते मणिम्। मणिधर्मोपनद्धस्तु मूत्रस्रोतोरुधश्च। निरुद्धप्रकर्षे(से) तस्मिन् मन्दधारे सवेदनम्। मूत्रं प्रवर्त्तते जन्तोर्मणिर्न च विदीर्य्यते। निरुद्धप्रकर्ष(से) विद्याद्दुरुढां चापपाटिकाम्"।

निरुपाख्य त्रि० निर्गता उपाख्या यस्मात् प्रा०ब०। असत्पदार्थे १वन्ध्यासुतादौ २अभावपदार्थे च वाचोयुक्तिरहिते विषयतयोक्तेऽनायोग्ये अस्फुटरूपे ३अलक्षणे च। "ज्ञानविज्ञानयुक्तानां निरुपाख्या निरञ्जना। कैवल्या या गतिर्देव! परमा सा गतिर्भवान्" भा०अनु०१७अ०। ४निःस्वरूपे "तदयमपि चैतदवस्तु अभावमात्रं निरुपाख्यमिति" शारी०भा० "निरुपाख्यं निःस्वरूपम्" रत्नप्र०।

निरुपाय त्रि० निर्गत उपायोयस्य प्रा०ब०। १उपायरहिते "उच्छिद्यमानोबलिना निरुपायप्रतिक्रियः" कामन्द०।

निरुप्त त्रि० निर्+वप-कर्मणि क्त। यज्ञादौ भागशः पृथक्कृत्य दत्ते "न च सृष्टिमात्रेण निरुप्तेन प्रयोजनम्" काल्पा०श्रौ० १५।१।६सू० कर्कः।

निरूढ त्रि०निर्-रुह-क्त। १नितरां रूढे २शक्तितुल्यलक्षणयार्थबोधके शब्दे "पूर्वस्मिन्सम्बन्धीनं तत्स्वाम्यु-परमे यत्र द्रव्ये स्वत्वं तत्र निरूढोदायशब्दः" इति दायभागः। २पशुयागभेदे "निर्मित ऐन्द्राग्नः" आश्व० श्रौ० ३।८।४ "ऐन्द्राग्नो निरूढो नाम पशुः कर्त्तव्यः। अयमपि पशूनां प्रकृतिः। तेनाङ्गभूतानामग्नीषोमीयः प्रकृतिः। अतस्तान्यां निरूढः प्रकृतिरिति तेष्वेव पशुष्टिनाङ्गभूतेष्विज्येवमर्थं निरूढप्रकृतित्वान्नानम्" नारा०। "षाण्मासिकः संवत्सरो वा" ६सू० "सोऽयं निरूढः पशुः षट्सु षट्सु मासेषु कर्त्तव्यः संवत्सरे संवत्सरे वा। अतोऽयं वीप्सावचनात् नित्योऽयं पशुरिति गम्यते" नारा०।

निरूढलक्षणा स्त्री निरूढा शक्तितुल्या लक्षणा। व्याकरणकोषादिहेतुतः प्रसिद्धार्थे शक्तितुल्यायां लक्षणायां शब्दस्यार्थबोधनायशक्तौ।

निरूढि स्त्री नि+रुह-क्तिन्। १प्रसिद्धौ "रूप! विद्यासु निरूढिमागता" किरा०। २निरूढलक्षणायाञ्च।

निरूपक त्रि० निरूपयति नि+रूप-ण्वुल्। निरूपणकर्त्तरि तस्य भावः तल्। निरूपकता स्वरूपसम्बन्धभेदे यथाऽऽधारतानिरूपकताऽऽधेयत्वे इत्यादि।

निरूपण न० नि+रूप-ल्युट्। तत्त्वज्ञानानुकूलशब्दप्रयोगे १विचारे २निदर्शने ३आलोके च "निरूपणं लक्षणादिप्रकारेण ज्ञानानुकूलवचनम्" दाय०भा० श्रीकृष्णः।

निरूपित त्रि० नि+रूप-क्त। निरूपणकर्मणि तस्य भावः त्व। निरूपितत्वं न्यायोक्ते स्वरूपसम्बन्धविशेषे।

निरूह पु० निर्+ऊह-करणे घञ्। सुश्रुतोक्ते दोषनिर्हरणोपाये वस्तिभेदे "तत्र द्विविधो वस्तिः नैरूहिकः शौद्धिकश्च। आस्थापनं निरूह इत्यनर्थान्तरम्। तस्य

विकल्पोमाधुतैलिकः। तस्य पर्य्यायशब्दो यापनोयुक्तरथः सिद्धबस्तिरिति। स दोषनिर्हरणाच्छरीरारोगहरणाद्वा निरूहः वयःस्थापनाद्वायुःस्थापनहाऽऽस्थापनम्। माधुतैलिकविधानन्तु निरूहक्रमचिकित्सिते वक्ष्यामः"। "तत्र यथाप्रमाणगुणविहितः क्षेहबस्तिविकल्पोऽनुवासनः पादावशेषः। अनुवसन्नपि न दुष्यत्यनुदिवसं वा दीयते स्नेहानुवासनः। तस्यापि विकल्पोऽर्द्धमात्रावशेषोऽपरिहार्य्यो मात्रावस्तिरिति"। "निरूहः शोधनो लेखनो रोपणो रंहणो मतः। निरूहयोधितान्मार्गान् सम्यक्क्षेपोऽनुगच्छति। अपेतसर्वदोषस्तु नाड्योश्चिव वहत्यजम्। सर्वदोषहरत्वात्तौ शरीरस्य च जीवनः। तस्मादिगुणदैहस्य क्षेहबस्तिर्विधीयते। तत्रोन्मादमदशोकपिपासारोचकाजीर्णगरपाण्डुरोगश्लीपदमूत्रौकस्तिकुष्ठमेहोदरस्त्रैल्यश्वासकासकण्ठशोषशोफोपसृष्टस्य क्षीणचतुष्पित्तमांसगर्भिणीदुर्बलाग्न्यसृग्वातरक्तौ च वातरोगार्त्ते क्षीणा नानुवास्या नास्थापयिव्याः"। उदरी च प्रमेही च कुष्ठी स्थूलश्च मानवः। अवश्यं स्थापनीयाश्च नानुवास्याः कथञ्चन। असाध्यता विकाराणां स्नेहेषामनुवासनात्"।

तत्प्रयोगप्रकारश्च तत्रैवोक्तो यथा

"अथातो निरूहोपक्रमचिकित्सितं व्याख्यास्यामः। अथानुवासितमास्थापयेत्स्नेहस्वेदक्षीणशरीरंतत्स्नेहबहिर्वेगमप्रवाते शुचौ वेश्मनि मध्याह्ने प्रततायां शय्यायामधःशुषिरायां श्रोणिप्रदेशव्यूढायामनुपधानायां वामपार्श्वशायिनमाकुञ्चितदक्षिणसक्थ्यवस्थितरप्रसारितसक्थिं सुमनसं श्रोणीं वाग्यतं स्नेहप्रस्थैर्हृं विदित्वा ततो वामपादस्योपरि नेत्रं कृत्वेतरपादाकुञ्चाकुञ्चिभ्यां कर्षिकासपरि निष्पीड्य सव्यपार्श्विकनितम्बिकाभ्यां वस्तेर्मध्यार्द्धं सङ्कोच्य मध्यमप्रदेशिन्यङ्गुष्ठैरन्तु विस्तारं कृत्वा वस्तावौषधं प्रक्षिप्य दक्षिणहस्ताङ्गुष्ठप्रदेशिनीभ्यां स्नायुसिक्थमनायतमनुद्वेष्टमसङ्कुचितमवातमौषधसत्त्वोपसंस्पृष्टं पुनरितरेण स्पृष्ट्वा दक्षिणेनावस्तिं ततः स्नेहैर्वधीयात्ते द्विस्त्रिर्वेष्ट्य बध्नीयात्। अथ दक्षिणेनोत्तानेन पाणिना वस्तिं स्पृष्ट्वा वामहस्तमध्यमाङ्गुलिप्रदेशिनीभ्यां नेत्रोपसंस्पृष्टाङ्गुष्ठेन नेत्रद्वारं पिधाय घृताभ्यक्तायनेत्रं घृताक्तमुदाव प्रयच्छेदनुपूर्व्वं समस्तन्मुखमाकर्षिकं नेत्रं प्रक्षिपत्स्नेहेति ब्रूयात्। वस्तिं सव्ये करे कृत्वा दक्षिणेनापीडयेत्। एतेनैवापीडनेन न द्रुतं न विलम्बितम्" ततो नेत्रमपनीय निर्मन्थात्मानं पीडनकालादुपेक्षोत्क्षेपेत्यादरं ब्रूयात्। आदरस्योपवेशवेदुत्कटुकं वक्ष्यमाणमनार्त्तम्। निरूहप्रत्यागमनकालस्तु मुहूर्त्तौ भवति। "अनेन विधिना वस्तिं दद्यादस्तिविशारदः। द्वितीयं वा तृतीयं वा चतुर्थं वा यथार्हतः। सम्यग्निरूढस्निग्धे तु प्राप्ते वस्तिं निवारयेत्। अपि क्षीणक्रमं कुर्य्याच्च तु कुर्य्यादतिक्रमम्। विशेषात्सुकुमाराणां क्षीणएव क्रमो हितः। यस्य स्यादस्तिरत्यल्पवेगो क्षीणमलानिलः। दुर्निरूढः स विज्ञेयो मूत्रार्त्तस्य रुजाधवान्। वान्तेव प्राक्प्रयुक्तानि विक्लान्तानिविरेचिते। तान्येवातिनिरूढेऽपि विज्ञेयानि विपश्चिता। यस्य क्रमेण गच्छन्ति विट्पित्तकफवायवः। लाघवं चोपजायेत सुनिरूढं तमादिशेत्। सुनिरूढं ततोजन्तुं स्नानवन्तं तु भोजयेत्। पित्तश्लेष्मानिलाविष्टं क्षीरयूषरसैः क्रमात्। सर्वं वा लाङ्गलरसैर्भोजयेदविकारिभिः। त्रिभागहीनमर्द्धं वा हीनमात्रमथापि वा। यथाग्निदोषं मात्रेयं भोजनस्य विधीयते। अनन्तरं ततो युञ्जाद्यथास्वं स्नेहवस्तिना। विविक्तता मनस्तुष्टिः स्निग्धता व्याधिनिग्रहः। आस्थापनस्नेहवस्त्योः सम्यग्दाने तु लक्षणम्। तदहस्तस्य पवनाद्यं बलवद्दीयते। रसौदनस्तेन शस्तस्तदहश्चानुवासनम्। पश्चादग्निबलं मत्वा पवनस्य च चेष्टितम्। अन्नोपसंस्थिते कोष्ठे स्नेहवस्तिर्विधीयते। अनायान्तं मुहूर्त्तात्तु निरूहं शोधनैर्हरेत्। तीक्ष्णैर्निरूहैर्मतिमान् क्षारमूत्रास्रसंयुतैः। विशुद्धानिलविष्टब्धं चिरं तिष्ठत्यिरूहणम्। भुक्ताऽरतिज्वरानाहं मरणं वा प्रवर्त्तयेत्। तनु भुक्तवते देयमास्थापनमिति स्थितिः। विरूक्षिकां वा जनयेच्छर्दिं वापि सुदारुणम्। कोपयेत्सर्वदोषान्वा तस्माद्दद्यादभोजिने। क्षीणक्षतक्षयये दोषाः पुंसः प्रव्यक्तिमागताः। निःशेषाः सुखमायान्ति भोजनेनाप्रणोदिताः। न ह्यास्थापनविक्षिप्तमलमग्निः प्रधावति। तस्मादास्थापनं देयं निराहाराय जानता। आवस्थिकं क्रमञ्चापि मत्वा कार्यं निरूहणम्। मलेऽपक्वेऽदोषाणां बलवत्त्वं न विद्यते"। वस्तिभेदश्च (पिचकारी) ख्यातः "वस्तिर्द्विधातुवाख्योनिरूहश्चेति संज्ञितः। यः स्नेहैर्दीयते स स्यादनुवासननामकः। कषायक्षीरतैलैश्च निरूहः स निगद्यते" इति वैद्यसारकौ०। स्नुट। निरूहक्रमशब्द न०।

निर्ऋ(र्ऋ)ति पु०नियता ऋतिर्या यत्र प्रा०ब०समो वा। १दक्षिणप्रतिमविदिक्पतौ।"सगव्याधश्च सर्पश्च निर्ऋतिश्च मघावयाः"भा०आ० ६६अ०। २अलक्ष्म्याम् स्त्री ३निरुपद्रवे त्रि०। ४अधर्मस्य भार्य्यायां स्त्री"अधर्मस्तत्र संजातः सर्वभूतभयावहः। तस्यापि निर्ऋतिर्भार्य्या नैर्ऋता येन राक्षसाः" भा०आ०६६अ०। ५अधर्मस्य कन्यायाञ्च स्त्री "हिंसा भार्य्या त्वधर्मस्य तस्यां जज्ञे तथाऽनृतम्। कन्या च निर्ऋतिस्तस्यां सुतौ द्वौ नरकं भयम्" मार्कण्डेयपु०१०अ०। ६मृत्युभार्य्यायाम्। "निर्ऋतिश्च तथा भार्य्या मृत्योर्भार्य्याऽभवत्सुते!" तत्रैवाध्याये। अलक्ष्मीश्च लक्ष्म्या ज्येष्ठा भगिनी अलक्ष्मीशब्दे ५०६पृ० दृश्यम्। ७मूलानक्षत्रे तस्य नैर्ऋतताकत्वात् तथात्वम्। निर्ऋतिर्लोकपालश्च पिङ्गाक्षव्याधः कार्पटिकादीनां रक्षार्थं यतमानस्तारात्रेण तत्पिटव्येन घातितः मरणकाले तेषामाधिपत्यं लभेयमितीक्षया प्राणविमोचनात् तदीयतामाप तत्कथा काशीख०१२अ० यथा "अक्षद्विषमेतांस्तदभविष्यं यदीश्वरः। अभिलष्योन्नतिं प्राणानत्याक्षीत् स परार्थतः। या मतिस्तत्कालेऽस्यादृतिस्तदनुरूपतः। दिगीशत्वमतः प्राप्तो नैर्ऋत्यां नैर्ऋतेश्वरः"इति। एतल्लोकप्राप्तिकारणादिकं तत्रैव यथा "दिक्पतेनैर्ऋतस्यासौ पुण्यापुण्यजनोचिता। राक्षसा निवसन्त्यस्यामपरद्वोच्छिषः सदा। जातिमात्रेण रक्षांसि दुष्टैः पुण्यजना इमे। अत्यल्पश्रुतिवत्तीनो जाता वर्षा नरेष्वपि। नाद्रियन्तेऽध्वपानानामस्मत्प्युक्तं कदाचन। परदारपरद्रव्यपरद्रोहपराङ्मुखाः। जाता जातौ निकृष्टायामपि पुण्यानुसारिणः। द्विजातिभक्तयुत्पन्नाश्चैरात्मानं पोषयन्ति ये। सदा सङ्कुचिताङ्गाश्च द्विजसम्भाषणादिषु। आहुता हृष्टवदना वदन्ति द्विजसन्निधौ। जय जीव भगोनाथ स्वामिन्निति हि वादिनः। तीर्थे स्नानपरानित्यं नित्यदेवपरायणाः। द्विजेषु नित्यं प्रणताः स्वनामाख्यानपूर्वकम्। दमदानदयाशान्तिशौचेन्द्रियविनिग्रहाः। अस्तेयसत्याऽहिंसाश्च सर्वेषां धर्महेतवः। नवस्वेषु सदोद्युक्ता ये जातावत्र कुत्रचित्। सर्वभोगसमृद्धाढ्ये वसन्त्यत्र पुरोत्तमे। स्वेच्छा अपि श्रुतीर्येषु ये स्मृता नात्मघातकाः। विहाय कार्यं निर्वाप्य विश्राम्यान्तेऽत्र भोगिनः। अन्यजन्मनि विशेयुस्ते वैवाऽत्रत्नो जनाः। भुक्त्वा निरयशाङ्कं ते च क्षुधांसमूकराः। आत्मघातो न कर्त्तव्यस्तस्मात् क्वापि विपश्चिता। इहापि च परत्रापि न शुभान्यात्मघातिनाम्। यत्रेदमरणं केचिदाङ्गसत्त्वावबोधकाः। प्रयागे सर्वतीर्थानां राशि सर्वाभिलाषदे। अन्यत्रा अपि ये केचिद्व्याधर्मानुसारिणः। परोपद्रवनिष्ठास्ते वसन्त्यत्र तु सत्तमाः। अस्य स्वरूपं वक्ष्यामो दिक्पतेः ऋक्षतः शृणु। मध्येविन्ध्याटवि पुरा पक्षयस्य जनाग्रणीः। पक्षीपतिरभूद्व्यः पिङ्गाक्ष इति विश्रुतः। निर्विन्ध्यायाऽटवे शूरः क्रूरकर्मपराङ्मुखः"।

निर्ऋत्य पु० निर्+ऋ-यक्। रामभेदे उज्ज्वलद०।

निरोद्धव्य त्रि०नि+रुध-कर्मणि तव्य। १आवरणीये लोकानां यथेष्टप्रचारवारणाय रक्षणीये "आशयाच्चोदपानाच्च प्रभूतसलिलाकराः। निरोद्धव्याः सदा राज्ञा चौरिश्च सहीरुजाः" भा०शा०८६अ०। यथेष्टावगाहनादिभिर्जलमालिन्यसम्भवात् तन्निवारणार्थं तस्यावरणादिना रक्षणं कार्यम्। २प्रतिरोधनीये च

निरोध पु० नि+रुध-भावे घञ्। १नाशे २गत्यादिप्रतिरोधे मेदि० ३नियन्त्रणे च तत्र नाशे (प्रलये) "न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः। न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता"सां०प्र०भा०धृता श्रुतिः। ४निरुद्धाख्यचित्तावस्थाभेदे निरुद्धशब्दे उक्त स्वरूपादिकमुक्तम्। "योगश्चित्तवृत्तिनिरोधः" पात०सू० "अनयोर्द्वयोरेकाग्यनिरुद्धयोर्भूम्योर्वृत्तिस्त्वेकाग्यतारूपः परिणामः स योग इत्युक्तं भवति एकाग्ये बहिर्वृत्तिनिरोधः निरुद्धे च सर्वासां वृत्तीनां संस्कारशेषाणां प्रविलय इत्यनयोरेव भूम्योर्योगस्य सम्भवः"भोजवृत्तिः। तस्य कारणञ्च तत्र दर्शितं यथा "अभ्यासवैराग्याभ्यां तन्निरोधः" पात०सू०"अभ्यासं निरोधे कः उपायः? इति चित्तनदी नामोभयतोवाहिनी वहति कल्याणाय वहति पापाय च। या तु कैवल्य प्राग्भारा विवेकविषयनिम्ना सा कल्याणवहा। संसार प्राग्भाराऽविवेकविषयनिम्ना पापवहा। तत्र वैराग्येण विषयस्रोतः खिलीक्रियते विवेकदर्शनाभ्यासेन विवेकस्रोत उद्घाट्यते इत्युभयाधीनचित्तवृत्तिनिरोधः" भा०। "अभ्यासवैराग्ये वक्ष्यमाणलक्षणे ताभ्यां प्रकाशप्रवृत्तिनियमरूपा या वृत्तयस्तासां निरोधो भवतीत्युक्तं भवति तासां विनिवृत्तबाह्याभिनिवेशानाम् अन्तर्मुखतया स्वकारण एव चित्ते शक्तिरूपतयाऽवस्थानम्। तत्र विषयदोषदर्शनजेन वैराग्येण तद्वैमुख्यसम्पादने। अभ्यासेन च सुखजनकं शान्तप्रवाहप्रदर्शनद्वारेण तदुन्मुखैर्वृत्त्य-

द्यते । इत्थं तासां भवति चित्तवृत्तिनिरोधः" भोजवृत्तिः । "अथातो विपरीता । विवेकख्यातिरित्यतस्तां विरक्तं चित्तं तामपि निरुणद्धि । तदवस्थं चित्तं संस्कारोपगं भवति । स निर्बीजः समाधिः, न तत्र किञ्चित् सम्प्रज्ञायत इत्यसम्प्रज्ञातः द्विविधः स योगश्चित्तवृत्तिनिरोध इति । तदवस्थे चेतसि विषयाभावात् बुद्धिबोधात्मा पुरुषः किं स्वभावः इति" पात०भा० "अतश्चितियक्तेर्विपरीतेति । यदा च विवेकख्यातिरपि हेया तदा कैव कथा इत्यन्तराणां दोषबहुत्वानामिति भावः । ततश्च द्वेतोर्निरोधसमाधेरवतारो युज्यते इत्याह अतस्तस्यामिति । ज्ञानप्रसादमात्रेण हि परेण वैराग्येण विवेकख्यातिमपि निरुणद्धीत्यर्थः । अथ अनिरुद्धाऽशेषवृत्तिचित्तं कीदृशमित्यत आह तदवस्थमित्यादि । स निरोधः अवस्था यस्य तत्तथोक्तम् । निरोधस्य स्वरूपमाह स निर्बीज इति । क्लेशरहितः कर्माशयो ज्ञात्वादुर्भोगबीजम् तत्रान्निर्गत इति निर्बीजः । अस्यैव योगिजनप्रसिद्धामन्वर्थसंज्ञामादर्शयति न तत्रेति । उपसंहरति । द्विविधः स्यं योगश्चित्तवृत्तिनिरोध इति । संप्रज्ञातरूपस्य अवतारबंधोदयति । तदवस्थे चेतसीति । किमाख्ये तत्तदाकारपरिणतबुद्धिबोधात्मा स्वयं पुरुषः स्वतोभूयते नन्वु बुद्धिबोधरहितोऽतोऽस्य पुरुषस्य बुद्धिबोधस्वभावः सवितरिव प्रकाशः न च संस्कारशेषे चेतसि सोऽस्ति न च स्वभावमपहाय भावो वर्त्तितुमर्हति इति भावः । स्यादेतत् संस्कारशेषमपि बुद्धिं कस्मात् पुरुषो न बुध्यते इत्यत आह विषयाभावादिति । न बुद्धिमात्रं पुरुषस्य विषयोऽपि तु पुरुषार्थवती बुद्धिः विवेकख्यातिविषयभोगौ च पुरुषार्थौ तौ च निरुद्धावस्थायां न स्त इति सिद्धो विषयाभाव इत्यर्थः" विव० । "तदा द्रष्टुः स्वरूपेऽवस्थानम्" पात०सू० "स्वरूपप्रतिष्ठा तदानीं चितिशक्तिर्यथा कैवल्ये, व्युत्थानचित्ते तु सति तथापि भवन्ती न तथा" भा० "मूले च परिस्फुरति तदा द्रष्टुः स्वरूपेऽवस्थानम् । स्वरूप इत्यारोपितम् भ्रान्तघोरमूढस्वरूपं निवर्त्तयति । पुरुषस्य हि चैतन्यं स्वरूपमनौपाधिकम् । न तु बुद्धिबोधः भ्रान्तादिरूपः । औपाधिको हि सः, स्फटिकस्येव स्वभावस्वच्छधवलस्य जपाकुसुमसन्निधानोपाधिरक्तिमा, न चोपाधिनिष्ठत्वात्तस्यस्थितनिष्ठत्तिरतिप्रसङ्गादिति भावः । स्वरूपस्य चामेदेऽपि भेदं विकल्प्य अधिकरणभाव उक्त इति । अयमेवार्थोभाष्यकृता द्योत्यते स्वरूपप्रतिष्ठेति । तदानीं निरोधावस्थायां न व्युत्थानावस्थायामिति भावः । स्यादेतत् व्युत्थानावस्थायामप्रतिष्ठिता स्वरूपे, चितिशक्तिः निरोधावस्थायां प्रतिष्ठिन्ती परिणामिनी स्याद् व्युत्थाने वा स्वरूपप्रतिष्ठाने सति व्युत्थाननिरोधयोरविशेष इत्यत आह व्युत्थानचित्ते त्विति । न ह्यात्मा कूटस्थनित्या चितिशक्तिः स्वरूपात् च्यवते । तेन यथा निरोधे तथैव व्युत्थानेऽपि । न खलु शुक्तिकायाः प्रमाणविषयं यज्ञानगोचरत्वेऽपि स्वरूपोदयव्ययौ भवतः प्रतिपत्ता तु तथाभूतमप्यतथात्वेनाभिमन्यते । निरोधसमाधिमपेक्ष्य सम्प्रज्ञातोऽपि व्युत्थानमेवेति" विवरणम् २निरुध्यते यस्मै यस्मादाने घञ् । निरोधजनिते वशीकारे च "निरोधश्छर्दिविधारणाभ्याम्" सां०सू० "प्राणस्येति प्रविभज्य उभयते "प्रच्छर्दनविधारणाभ्यां प्राणस्येति" योगसूत्रे भाष्यकारेण प्राणायामस्य व्याख्यातत्वात् । छर्दिर्व मनम्, विधारणं त्याग इति यावत् । तेन पूरकरेचनयोर्लाभः । विधारणं च कुम्भकम् । तथा च प्राणस्य पूरकरेचककुम्भकैर्योनिरोधो वशीकरणं सा धारणेत्यर्थः" सां०प्र०भा० ।

निरोधक त्रि० नितरां रुणद्धि नि+रुध-ण्वुल् । ३निरोधकारके स्त्रियां टाप् अत इत्त्वम् । या च सत्वप्रविष्टचित्तक्लेशः तमःप्राचुर्यात् २निरोधकारिण्यां स्त्री राजबलकृः । ध्वनिमन्दे २६२२पृ० दृश्यम् ।

निरोधन न० नि+रुध-ल्युट् । कारागारादौ प्रवेशनेन ३गतिरोधने २विषयसंप्रचाररहितकरणे च ।

निर्ग त्रि० नितरां गच्छत्यत्र "सदुरोरधिकरणे" वार्त्ति० "अन्यत्रापि दृश्यते इति वक्तव्यम्" निर्+गम-अधिकरणे ड । देवे हेमच० । [निःसृते ।

निर्गत त्रि० निर्+गम-कर्त्तरि क्त । निष्क्रान्ते बहिर्भूते

निर्गन्ध त्रि० निर्गतो गन्धोऽस्य । गन्धशून्ये "निर्गन्धा इव किंशुकाः" चाणक्यः । [मारणे अदर्शनेच० ।

निर्गन्धन न० निर्+गन्ध-अदने-भावे ल्युट् । नितान्तार्दने

निर्गन्धपुष्पी स्त्री निर्गन्धं गन्धशून्यं पुष्पं यस्याः ङीप् । शालुकभिदायां शब्दच० ।

निर्गमन न० निर्+गम-करणे ल्युट् । १द्वारे २प्रतिकारिणि शब्दार्थचि० । भावे ल्युट् । ३निःसरणे

निर्गुण पु० निर्गतो गुणेभ्यः । सत्वरजस्तमोरूपगुणत्रयशून्ये निर्धर्मके १परमात्मनि । "साकारञ्च निराकारं सगुणं

निर्गुणं विभुम्" ब्रह्मवै०पु०। "गुणभङ्गिर्गुणो भङ्गात्" विष्णुध०। निर्गताः गुणाः औपाधिकाद्योरूपादयो वा यस्मात् प्रा०ब०। २गुणरहिते त्रि० वैशेषिकमते २४गुणादौ "गुणादिनिर्गुणश्चियः" भाषा०।

निर्गुण्डी स्त्री निर्गता गुण्डात् गुण्डनात् निरा०त० गौरा० ङीष्। (निसिन्दा) इत्ते अमरटीकायां मधुसूदनः।

निर्गुण्डी स्त्री निर्गुण्डति गुड-रक्षायां क पृषो०। निर्गता गुण्डात् वेष्टनाद्वा ङीष्। नीलझेण्टिकायां (निसिन्दा) इत्ते अमरः। "श्वेतनीलपुष्पभेदात् निर्गुण्डी द्विविधा मता" २करहाटे २पद्मकन्दे विश्वः। "समूलफलपत्रायाः निर्गुण्ड्याः स्वरसैर्युतम्। सिद्धं पीत्वा जयत्योघो निर्व्याधिर्भाति देववत्" चक्रद०।

निर्गूढ त्रि० निर्+गुह-क्त। १संवृते २नितान्तगूढे ३वृक्षकोटरे पु० अमरटीका०।

निर्ग्रन्थ पु०निर्गतो ग्रन्थेभ्यः निरा०त०। १क्षपणके दिगम्बरे २बौद्धभेदे २द्यूतकरे ४सन्निभेदे च मेदि०। ३निर्द्धने ५मूर्खे ६निःसङ्गे ७निर्वेदं गते त्रि० हेमच०। तत्र क्षपणस्य वस्त्रग्रन्थिशून्यत्वात् मनेर्हृदयग्रन्थशून्यत्वात् च तथात्वम् "आत्मारामाश्च मुनयोनिर्ग्रन्था अप्युरुक्रमे" भाग० १।७।४ "शाक्योपाध्यायार्हतनिर्ग्रन्थनिमित्तनिमन्त्रणैः" इ०सं०५।२अ० स्वार्थे क। निर्ग्रन्थक क्षपणे पु० निष्फले वस्त्ररहिते त्रि० जटाधरः।

निर्ग्रन्थन न० निर्+ग्रथि-कौटिल्ये ल्युट्। मारणे अमरः

निर्ग्रन्थिक पु० निर्गतो ग्रन्थिर्वस्त्रग्रन्थिर्यस्य कप् प्रा०ब०। १क्षपणके २निर्ग्रन्थे ३ग्रन्थिरहिते च त्रि० भट्टरत्ना० "सोऽपि कथञ्चित् निर्ग्रन्थिकपदभोचितात्मा भदन्तशिरोहृतमः स्वधर्ममेव प्रत्यपद्यत" दशकुमा० ४जैनसन्न्यासिन्यां स्त्रियां स्त्री "उद्यानवाटिकायां गतो नितम्बवतीं निर्ग्रन्थिकाप्रयत्नेनोपनीतां पादे परामृशन्निव" दशकुमा०।

निर्ग्राह्य त्रि० निर्+ग्रह-कर्मणि यत्। निश्चयेन गृहीतुं शक्ये "अस्थूलमनण्वह्रस्वमदीर्घमनिर्ग्राह्यम्" इ०उप०।

निर्घट त्रि० निर्गतो घटो यस्मात् प्रा०ब०। १घटशून्यदेशे २राजकरशून्यदेशे शब्दच०। ३वञ्चनजनसंकीर्णदेशे हारा०। अभावे अव्ययी०। ४घटाभावे अव्य०।

निर्घण्ट निर्+घटि-अच्। १ग्रन्थानां सूचीपत्रे २निघण्टौ च शब्दार्थचि०।

निर्घात पु० निर्+हन-घञ्। पवनाहतपवनस्य शमनाद्भूमौ पतनजन्ये शब्दभेदे तच्चिह्नादिकं इ०सं०३८अ० उक्तं यथा "पवनः पवनाभिहतो गगनादवनौ यदा समापतति। भवति तदा निर्घातः स च घोषो दीप्तविहगरुतः। अर्कोदयेऽधिकरविकन्दपथनियोधाङ्कनाबधिरे स्याः। आ प्रहरात्सोऽज्ञानिक्षुपक्षन्याच्छ्दूषौरांश्च। आ मध्याह्नाद्बालोपसेविनो ब्राह्मणांश्च पीडयति। वैश्यजलदांस्तृतीये चौरान् प्रहरे चतुर्थे च। अस्त्रं याते नीचान् प्रथमे यामे निहन्ति सस्यानि। रात्रौ द्वितीययामे पिशाचसङ्घान्विपीडयति। तुरगकरिक्षत्तृतीये विनिहन्याद्यायिनश्चतुर्थे च। भैरवजर्जरशब्दो याति यतस्तां दिशं वृन्दे" इति। "निर्घाते भूमिचलने ज्योतिषाञ्चोपसर्जने। एतानाकाशिकान् विद्यादुत्पाताञ्छान्तावपि" मनुः। "निर्घातोत्थैः कुञ्जलीनान् जिघांसुः" रघुः। "उल्कापाते च निर्घाते तथैवाकालवर्षणे। छिन्ने सूर्ये विनिर्दिष्टे न कुर्यान्मङ्गलक्रियाम्" ज्योतिषतत्त्वे गर्गः।

निर्घातन न० निर्+हन-स्वार्थे णिच्-भावे ल्युट्। शस्त्रोक्ते यन्त्रनिष्पादे क्रियाभेदे यन्त्रकर्मणि तु निर्घातनपूरुषवन्त्रनेत्यादिना षष्ठ्यन्त्र निर्घातनस्य कर्म कार्यं तत्राह "उत्तुण्डितं छित्त्वा निर्घातयेत् छेदनीयसूत्रम्। छेदनीयसूत्रान्यपि कृत्तिपक्षःकक्षावक्षणपर्यन्तान्तरगतानि च छेत्तव्यं यथाभागं छेत्तुमेवापक्रमं प्रयतेत। अनुत्तुण्डितसूत्राणि छेदनीयसूत्राणि च। अनिर्घातानि जानीयात् भूयश्छेदाद्रुजावहात्" इति।

निर्घृण त्रि०निर्गता घृणा दया यस्मात्। निर्दये "यस्त्रीवाग्व्यतिनिर्घृणः" भाकैरवेयपु०।

निर्घोष पु० निर्+घुष-घञ्। शब्दमात्रे अमरः "व्योमनिर्घोषैः क्षोभयामास सिंहान्" "स्त्रिग्धगम्भीरनिर्घोषम्" इति च रघुः। [विजने।

निर्जन त्रि० निर्गतो जनो यस्मात् प्रा० ब०। अनैरनाकीर्णे

निर्जर पु० निर्गता जरा यस्मात्। १देवे २जराशून्ये त्रि०। ३ब०। ४अमृते न०। जराशब्दस्य शीर्णत्वेऽपि अजादौ प्रत्यये परे वा जरसादेशः निर्जरसौ निर्जरौ। आर्हतमतसिद्धे जीवाजीवादिषु सप्तसु पदार्थेषु ४पदार्थभेदे आर्हतशब्दे १८५पृ० दृश्यम्। ५गुडूच्यां हेमाद्रौ पर्य्यायौ च स्त्री मेदि०। [राजनि०।

निर्जरसर्षप पु० निर्जरप्रियः सर्षपः श०त०। देवसर्षपे

निर्जरायु पु० निर्गतो जरायुतः निरा०त०। जरायुहीने

निर्गते त्वगवादौ । निर्गतो जरायुर्वस्य । २जरायुहीने त्रि० । "अमूः पारे पृदाकुक्षिप्रभृतिर्जरायवः । तासां जरायुभिर्वेष्टनमध्यावपि" अम० १।२७।१

निर्जर्जल्प पु० नितरां जर्जरः पृषो० । अत्यन्तजर्जरीभूते "निर्जर्जितं निर्जर्जल्पेन शीर्णा (शीर्णानि) यजु०२५।२ "नितरां जर्जरीभूतेन शिरोभागेन" वेददी० ।

निर्जल त्रि० निर्गतं जलं यस्मात् प्रा०ब० । जलशून्ये देशे "कोशञ्च जनयेद्राजा निर्जलेभ्यो यथा जलम्" भा०शा० १२० अ० ।

निर्जलैकादशी स्त्री कर्म० ज्यैष्ठस्य शुक्लैकादश्याम् यथाऽऽह्नि भीमसेनं प्रति व्यासः । "द्वयस्ये मिथुनस्थेऽर्के शुक्ला ह्येकादशी हि या । ज्यैष्ठे मासि प्रयत्नेन सोपवासा जलवर्जिता । स्नाने चाचमने चैव वर्जयित्वोदकं बुधः । उपयुञ्जीत नैवान्यद् व्रतमस्योऽन्यथा भवेत् । उदयादुदयं यावद् वर्जयित्वा जलं बुधः । अप्रवत्तादवाप्नोति द्वादशद्वादशी फलमिति" ।

निर्जित त्रि० निर्+जि-क्त । १पराजिते २वशीकृते "निर्जितैरावता गजाः" कुमा० । निर्जितेन्द्रियग्रामः अमरः ।

निर्जिह्व त्रि० निर्गता सुखादिःसृता जिह्वा यस्य । १सुखादृबहिर्गतरसने । "निर्जिह्वैश्च सदङ्गिश्च कूजद्भिश्च गतासुभिः । श्वभैर्वभौ नरश्रेष्ठ !" भा०भी०६०अ० । २जिह्वाशून्ये भेके च जिह्वशब्दे ८२४ पृ० दृश्यम् ।

निर्जीव त्रि० निर्गतो जीवो यस्मात् प्रा०ब० । जीवात्मरहिते देहे "वाजिभिश्चापि निर्जीवैः सङ्गैः शोणितोक्षितैः" भा०द्रो० ४६अ० । निर्जीवैर्मृतैरित्यर्थः । "चिता दहति निर्जीवं चिन्ता दहति जीवितम्" प्राचीनगाथा ।

निर्झर पु०निर्+झृ-अप् । १पर्वतादिःसृतजलप्रवाहे(झरना) अमरः । २सूर्य्ये ३सुधानले च मेदि० "झामोरधीनिर्झरीकराणाम्" कुमा० । "पृक्तस्रुधारैर्गिरिनिर्झराणाम्" रघुः । स कारणत्वेनास्त्यस्या अच् गौरा० ङीष् । ४नद्याम् स्त्री शब्दर० । "अटाऽटाऽसम्भ्रमभ्रमन्निम्ननिर्झरी" इत्यादि रावणजटायिवधः ।

निर्झरिणी स्त्री निर्झरः पर्वतादिःसृतजलप्रवाहः कारणत्वेनास्त्यस्या इति ङीष् । नद्याम् त्रिका० । "सुखसलिलसुरभिरिवोत्तरो निर्झरिणध्वः" महावीरचरितम् ।

निर्णय पु० निर्+नी-भावे अच् । १निश्चये तदभावाभ्यामिथि तदभ्यामिथि ज्ञाने । सन्देहे यथा भावाभावौ द्वावेव विषयतया भासेते नैवं निश्चये किन्तु तत्र एकविध एवावभासते । निश्चयत्वं च न जातिः प्रत्यक्षत्वादिना बाङ्मुखात् किन्तु विषयितावि शेष इत्याकरे स्थितम् । २विरोधपरिहारे मीमांसोक्ते पक्षावयवसमुदायमध्ये ३चरमावयवे न्यायोक्ते सन्दिग्ध पक्षप्रतिपक्षयोः ४साधनबाधनाभ्यामर्थावधारणे स च गौतमोक्तेषु षोडशसु पदार्थेषु पदार्थभेदः तल्लक्षणादिकं गौ०सू०भा०उक्तं यथा "विप्रतिपत्तौ पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः" सू० "स्थापना साधनं, प्रतिषेध उपालम्भः, तौ साधनोपालम्भौ पक्षप्रतिपक्षाश्रितौ व्यतिषक्तावनुबन्धेन प्रवर्त्तमानौ पक्षप्रतिपक्षावित्युच्यते, तयोरन्यतरस्य सिद्धिरितरेतरस्यावस्थानम् अवयवभावि, यस्यावस्थानं तस्यावधारणं निर्णयः । नेदं पक्षप्रतिपक्षाभ्यामर्थावधारणं सम्भवतीति एको हि प्रतिज्ञातमर्थं हेतुतः स्थापयति प्रतिषिद्धं चोद्धरतीति द्वितीयेन स्थापनाहेतुः प्रतिषिध्यते तस्यैव प्रतिषेधहेतुरुद्धियते स निवर्त्तते तस्य निवृत्तौ शेषोऽवतिष्ठते तेनार्थावधारणं निर्णय इति उभाभ्यामेवार्थावधारणसिद्धेः । यथा युक्तः एकस्य सम्बन्धी द्वितीयस्यासम्बन्धः तावेतौ सम्बन्धासम्बन्धौ विमर्शं सह निवर्त्तयतः, उभयसम्बन्धे उभयासम्बन्धे त्वनिवृत्तो विमर्श इति । विरुद्धयोरिति विमर्शं कृत्वा, सोऽयं विमर्शः पक्षप्रतिपक्षाभावद्योत्यं न्यायं प्रवर्त्तयतीत्युपादीयते इति । एतच्च विरुद्धयोरेकधर्मिस्थयोर्बोद्धव्यं यत्र तु धर्मिसामान्यगतौ विरुद्धौ धर्मौ हेतुतः सम्भवतः तत्र सदसत्त्वहेतुतोऽर्थस्य तत्त्वाभावोपपत्तेः, यथा क्रियावद्द्रव्यमिति वाक्यप्रयोगे यस्य द्रव्यस्य क्रियायोगो हेतुतः सम्भवति तत् क्रियावत् यस्य न सम्भवति तदक्रियमिति, एकधर्मिस्थयोश्च विरुद्धयोर्युगपद्भाविनोः कालविकल्पः यथा तदेव द्रव्यं क्रियायुक्तं क्रियावत् कृतत्यक्तोपरतक्रियं पुनरक्रियमिति । न चायं निर्णये नियमो विप्रतिपत्तावेव पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णय इति किन्त्विन्द्रियार्थसन्निकर्षोत्पन्नप्रत्यक्षेऽर्थावधारणं निर्णय इति । परीक्षाविषये तु विप्रतिपत्तौ पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः आक्षेपवादे च विमर्शवर्जम् । मीमांसकोक्तस्याधिकरणस्यावयवस्य च "विषयोऽविषयश्चैव पूर्वपक्षस्तथोत्तरम् । निर्णय इति सिद्धान्तः आक्षेपाधिकरणं कृतम्" इत्युक्तेः । "तत्र निर्णयः सिद्धान्तसिद्धविचार्यवाक्यतात्पर्यावधारणम्" तत्त्वकौ० ।

निर्णयपाद पु० चतुष्पादव्यवहारस्य निर्णयात्मके विद्विपादापरपर्य्याये ग्रंथभेदे "भाषोत्तरक्रियाध्यधिद्विभिः क्रमवर्त्तिभिः। साक्षिप्रत्ययरंयस्तु चतुष्पादभिधीयते" मिता० धृतवचनम्। स च वीरमि० विस्तरतो दर्शितो यथा

"अथ निर्णयापरपर्य्यायः सिद्धिपादः। तेषां प्रत्याकलितं व्यवहारपाद इत्यभिमतं तेषां सिद्धेः फलत्वाद्व्यवहारपृथग्भावोऽन्येषां प्रत्याकलितस्य चतुष्पात्त्वमेव तु वर्णयते व्यवहारस्य। याज्ञवल्क्यः "तत्सिद्धौ सिद्धिमाप्नोति विपरीतमतोऽन्यथा" इति। तस्य प्रमाणस्य सिद्धौ निःशङ्कप्रामाण्यव्यवस्थितौ सत्यां प्रमाणोपन्यासकर्त्तां सिद्धिं जयलक्षणामाप्नोति। अन्यथा प्रामाण्यासिद्धौ विपरीतमसिद्धिं पराजयलक्षणमाप्नोति। नारदः "सारस्तु व्यवहाराणां प्रतिष्ठा सदुदाहृता। तद्बानौ क्षीयते वादी तरंस्तारतरो भवेत्"। तरन्निर्णयन्। उत्तरः उत्कृष्टो विजयीति यावत्। निर्णयप्रकारानाह व्यासः "प्रमाणैर्हेतुचरितैः प्रथमेन नयेन वा। वादि सम्प्रतिपत्त्या वा निर्णयोऽष्टविधः स्मृतः। विस्तरतश्चैतत् स एव "लिखितं साक्षिणो भुक्तिः प्रमाणं त्रिविधं स्मृतम्। अनुमानं दिव्यहेतुस्तर्कश्चेति मनीषिणः। देवस्थितिः पूर्वजनाचरितं सदुदाहृतम्। अर्थानुरूपाः शपथाः कृताः सत्यघटादयः। तेषामभावे राजानां निर्णयन्तु विदुर्बुधाः"। इति प्रमाणत्वं सतर्कोपष्टब्धमनुमानं चरितादिचतुष्टयमित्यष्टविधहेतुकत्वान्निर्णयस्याष्टविधत्वं यद्यपि भुक्तिरप्यनुमानमेव। तथापि प्रत्याकलितकालीनं सभ्यानामनुमानमिहानुमानपदेन विवक्षितम्। "धर्मेण व्यवहारेण चरित्रेण नयेन वा। चतुःप्रकारोऽभिहितः सन्दिग्धेऽर्थे विनिर्णयः" इति वृद्धशातातपोक्तानां धर्मादीनां निर्णयहेतुत्वं प्रागेव "तत्र सत्ये स्थितो धर्मं" इत्यादिना तेनैव विवृतं प्रागेव निरूपितम्। स एव "एकैको द्विविधः प्रोक्तः क्रियाभेदान्मनीषिभिः"। क्रियाभेदात् धर्मनिर्णयस्य द्वैधमाह। स एव "सभ्यप्रविचार्यं कार्यन्तु युक्त्या संपरिकल्पितम्। परीक्षितन्तु शपथैः स ज्ञेयो धर्मनिर्णयः। प्रतिवादी प्रपद्येत यत्र धर्मः स निर्णयः। दिव्यैर्विशोधितः सम्यक् द्वितीयः स उदाहृतः"। प्रतिवादी प्रपद्येतेत्यस्य काकाक्षिवदुभयत्र सम्बन्धः। यत्र प्रतिवादी युक्त्या सम्यग् विचार्यं सम्परिकल्पितं, निर्णीतं पुनः शपथैः पुलिशिरःऋषादिभिः परीक्षितं कार्यं प्रपद्येताङ्गीकुर्यात् स आद्यो धर्मनिर्णयः दिव्यैर्घटादिभिर्विशोधितः प्रतिवादी यत्र कार्यं प्रपद्येत स द्वितीयो धर्माख्यो निर्णयः इत्यर्थः। व्यवहारनिर्णयस्यापि द्वैविध्यमाह स एव "प्रमाणैर्निश्चयो यस्तु व्यवहारः स उच्यते। वाक्छलानुत्तरत्वेन द्वितीयः परिकीर्त्तितः" प्रमाणपदेनात्र साक्षिणो लिखितञ्च व्यक्त्यभिप्रायेण च बहुवचनम्। भुक्तेरनुमानत्वाद्विभक्तस्य धर्मनिर्णयान्तर्भावात्। वाक्छलानुत्तरत्वेन वाक्छलेनानुत्तरत्वेन च यो निश्चयो द्वितीयो व्यवहारः स इत्यर्थः। चरित्रनिर्णयस्यापि भेदद्वयमेवाभिहितम् "अनुमानेन निर्णीतं चरित्रमिति कीर्त्तितम्। दैवस्थित्या द्वितीयन्तु शास्त्रविद्भिरुदाहृतम्" अनुमानेन भुक्तिस्वरूपेण यो निर्णयस्तदेकं चरित्रम्। दैवस्थित्या यो निर्णयस्तद्द्वितीयं चरित्रमित्यर्थः। राजाज्ञानिर्णयस्यापि द्विभेदताभिहिता तेनैव "प्रमाणसहिताद्यस्तु राजाज्ञा निर्णयः कृतः। शास्त्रसभ्यविरोधे च तथान्यः परिकीर्त्तितः" प्रमाणसहिता राजाज्ञा आद्यो निर्णय इत्यर्थः। शास्त्राणां सभ्यानाञ्च विरोधे परस्परं विप्रतिपत्तौ वा राजाज्ञा स द्वितीयो राजाज्ञानुरूपो निर्णय इत्यर्थः। ननु शास्त्राणां सभ्यानाञ्च विरोध एवासम्भवी कुत्सितेतानामधिकारिणां सभ्यानां दण्ड्यत्वात्। न च शास्त्राणां परस्पर विरोधे सभ्यानाञ्चेत्यर्थ इति वाच्यम् सभ्यविरोधोपन्यासानर्थक्यात्। शास्त्रविरोधे न्यायोपष्टब्धशास्त्रानुसारेण निर्णयः कार्य इत्यस्यार्थस्य "शास्त्रोर्विरोधे न्यायस्तु बलवान् व्यवहारतः। धर्मशास्त्रविरोधे तु युक्तियुक्तो विधिःस्मृतः। केवलं शास्त्रमाश्रित्य न कर्त्तव्यो हि निर्णयः। युक्तिहीनविचारे हि धर्महानिः प्रजायते" "न्यायाधिगमे तर्कोऽभ्युपायस्तेनाभ्यूह्य यथास्थानं समवेदित्यादि" योगीश्वरनारदबृहस्पतिगौतमादिवचोभिर्निर्धारितत्वात्। तादृशि विषये राजाज्ञानवकरात् अनीदृशराजाज्ञाया निषिद्धत्वाच्चेति चेत् उच्यते यत्र शास्त्रविरोधे बलवान्न्यायोऽन्यतरार्थविनिर्णायकः सभ्यप्राड्विवाकस्य सभापतेर्न हृदयमारोहति चिरतरं मीमांसितोऽपि तादृशशास्त्रविरोधे तन्मूलके वा सभापतेः सभ्यविरोधे राजकृतव्यवस्था वादिप्रतिवादिभ्यां मन्तव्येत्येतदर्थकमिदं वचनम्। अतएव पितामहः "वचनं प्राग्लिखितस्त्रिषेद्धं येन शक्याः स्युः" इत्यादि।

धर्मादीनां चतुर्णां पूर्वोत्तरोत्तरापेक्षया दुर्बलत्वमाह नारदः "धर्मश्च व्यवहारश्च चरितं राजशासनम्। चतुष्पादव्यवहारोऽयमुत्तरः पूर्वबाधकः" इति। व्यवहारस्य धर्मबाधकतामाह बृहस्पतिः "शास्त्रं केवलमाश्रित्य क्रियते यत्र निर्णयः। व्यवहारः स विज्ञेयो धर्मस्तेनावहीयते"। शास्त्रशब्देन शास्त्रोक्तं शास्त्रादिप्रमाणं तेन यो निर्णयः क्रियते स व्यवहारः। तेन धर्मः प्रमाणादिप्रतो निर्णयोऽवहीयते बाध्यते मानुषप्रमाणे सति दिव्यानवगमात्। अतएवाह कात्यायनः "युक्तियुक्तन्तु कार्यं स्याद्दिव्यं यत्र विवर्जितम्। धर्मस्तु व्यवहारेण बाध्यते तत्र नान्यथा" चरित्रस्य व्यवहारबाधकतामाह बृहस्पतिः "देशस्थित्यानुमानेन नैगमानुमतेन वा। क्रियते निर्णयस्तत्र व्यवहारस्तु बाध्यते"। नैगमाः पौरवणिजः। नैगमानुमतेनानुमानेनेति सम्बन्धः सामानाधिकरण्येन षष्ठ्यर्थे देशस्थित्यपेक्षः। अनुमेयार्थं स्फुटयति कात्यायनः "प्रतिलोमप्रसूतेषु तथा दुर्गनिवासिषु। विरुद्धश्चियतं प्राज्ञस्तं धर्मं न विचालयेत्। निर्णयन्तु यदा कुर्यात्तेन धर्मेण पार्थिवः। व्यवहारचरित्रेभ्यः तदा तेनैव बाध्यते" इति। स्मृतिविरुद्धमपि नियतत्वात्र विचालयेद्राजा। राजशासनस्य चरित्रबाधकतामाह बृहस्पतिः "विहाय चरिताचारं यत्र कुर्यात् पुनर्नृपः। निर्णयं सा तु राजाज्ञा चरित्रं बाध्यते तदा" इति चरिताचारं पूर्वपूर्वचरितमाचारम्। यद्यपि तं धर्मं न विचालयेदित्युक्तमत्र तु विहाय चरिताचारमित्युच्यते तेन विरोधः प्रतिभाति। तथापि यदि तद्विचालने पुरराष्ट्रादिक्षोभो न भवति तदा स्मृत्यादिविरुद्धत्वात्तं दूरीकृत्य स्मृत्याद्यविरोधी राजाज्ञया निर्णयः कार्य इति तात्पर्यम्। अतएव पुरराष्ट्रस्य विरुद्धस्य विवादस्थानादेयत्वलक्षणम् पुरराष्ट्रक्षोभापादकतया तदनापादकतया तु स्मृत्याद्यनुरोध एव कार्यो राज्ञेति। अतएवाह कात्यायनः "विरुद्धं न्यायतो यत्तु चरित्रं कल्प्यते बुधैः। एवन्तत्र निरस्येत चरित्रन्तु बलीयसा" इति न्यायैर्न्यायविरुद्धं चरित्रं न तदुपादेयमिति कल्प्यते। तत्र बलीयस्त्वा तच्चरित्रं निरस्यते बाध्यत इत्यर्थः। यथोक्तप्रकारातिरिक्तप्रकारेणैषां बाध्यबाधकताकल्पने दोषमाह कात्यायनः "अनेन विधिना युक्तं बाधकं यदुदाहृतम्। अन्यथा बाधनं यत्र तत्र धर्मो विहन्यते"।

निर्णाम पु० नितरां नामो नमनम् प्रा०स० णत्वम्। नितरां नमने "अथ निर्णामौ पक्षयोः करोति। निर्णामौ हि वयसः पक्षयोर्भवतो द्वितीये, द्वितीये हि वयसः पक्षयोर्निर्णामौ भवतोऽन्तरे द्वितीयेऽन्तरे वयसः पक्षयोर्निर्णामौ भवतः स चतुरङ्गुलमेव पुरस्तादुद्गृह्णति चतुरङ्गुलं पश्चादुपसमूहति तद्यावदेवोद्गृह्णति तावदुपसमूहति तस्माद्वैवातिरेचयति नो कनीयः करोति। स तस्मिन्निर्णामे एकाभिदीक्षामुपदधाति तस्मिन्वै वयसः पतितो निर्णामादेका साद्युपगते तां तत्करोति" शत०ब्रा०१०।१।२।५।

निर्णायन न० निर्+नी-णिच्-ल्युट्। १निर्णयकरणे २गवामयाङ्गदिवसे निर्णये शब्दरत्ना०।

निर्णिक्त त्रि० निर्+निज-क्त। १शोधिते २अपगतपापे च। "एतैर्द्विजैरनिर्णिक्तैर्नार्वं किञ्चित् समाचरेत्" मनुः।

निर्णिज् पु० निर+निज-औचयोपधयोः क्विप्। १रूपे निघण्टुः "बिम्बदुद्भापि चिरण्मयं वरूथाय्यस्य निर्णिजम्" ऋ०१।२५।१३। २शोधके त्रि०। क। निर्णिज तत्रार्थे त्रि०

निर्णेक पु० निर्+निज-घञ्। नितरां शुद्धौ "दानेन वपनिर्णेकं सपिंडीनामशक्नुवन्"। "अपामग्नेश्च संयोगात् क्षेम रूपस्य संभवः। तस्मात्तयोः स्वयोन्यैव निर्णेको शुचयस्त्रयः" मनुः।

निर्णेजक पु० निर्+निज-ण्वुल्। रजके (धोबा) अमरः। "श्वतां शौण्डिकानाञ्च चेलनिर्णेजकस्य च"। "कारुकान्नं प्रजां हन्ति वस्त्रं निर्णेजकस्य च" मनुः।

निर्णेजन न० निर्+निज-भावे ल्युट्। १शुद्धौ करणे ल्युट्। २शोधहेतौ प्रायश्चित्ते "कृतनिर्णेजनांस्चैव न विगर्हेत कर्हिचित्" मनुः। [व्यायके च।

निर्णेतृ त्रि० निर्+नी-तृच्। निश्चयकर्त्तरि विवादपदनि-

निर्दं(र्दि)ग्धिका स्त्री निर्+दह-दिह-वा क्त संज्ञायां कन् काप इत्त्वम्। निर्दिग्धिकायाम् हेमच०।

निर्दट त्रि० निर्दय(र)+टच्। १दयाहीने २परापवादके ३निष्प्रयोजने च मेदि० ४मन्दे ५तीव्रे च शब्दरत्ना०।

निर्दण्ड त्रि० निःशेषेण दण्डो यस्य प्रा०ब०। सर्वप्रकारदण्डार्हे १मुक्ते "वाचा दण्डो ब्राह्मणानां क्षत्रियाणां भुजार्पणम्। दानदण्डाः स्मृता वैश्या निर्दण्डः शूद्र उच्यते" भा०शा० १५अ०। २दण्डनार्हे च

निर्दर पु० निर्+दृ-कर्मणि अप्। १निर्झरे २निर्झरे च "गिरिनिर्दरवासिनाम्" रामा० अयो० २८अ०।

निर्गतोदरो यस्मात् प्रा०ब० २निर्गते त्रि० ३सारे न० ४कठिने ६स्वल्पत्वे च त्रि० मेदि०।

निर्दश त्रि० निर्गतानि दश दिनानि यस्य ब्रह्मसमा०। अतिक्रान्तदशाहे "निर्दशं प्रातिसरकं श्रुत्वा पुत्रस्य जन्म च" मनुः "यथा वै पशुर्निर्दशो भवत्यथ स मेध्यो भवति" ऐत०ब्रा०७।१४।

निर्दहस् अव्य० निर्+दह्-असुन् "ईश्वरे तोसुनकसुनौ" पा० कसुन्। निर्दग्धुमित्यर्थे "अपशब्येव तु वा ईश्वरा पशूञ्छिर्दहः" ता०ब्रा० २।७।२

निर्दहन पु० नितरां दहति निर्+दह्-ल्यु। १भल्लातके शब्दर०। २भूर्जतायां स्त्री राजनि०। निर्गतोदहनो वह्निः दहनं वा यस्मात् प्रा०ब०। ३वह्निशून्ये ४दाहशून्ये च त्रि०।

निर्दातृ त्रि०निर्+दो-खण्डने दा-दाने वै-शोधने तृच्। नितरां १छेत्तरि २दातरि ३शोधके च "यथोद्धरति निर्दाता कक्षं धान्यस्य रक्षति" मनुः।

निर्दिग्ध त्रि० निर्+दिह्-क्त। १बलवति मांसले चेमच०। २निर्लिप्ते च।

निर्दिष्ट त्रि० निर्+दिश्-क्त। १उपदिष्टे २प्रदर्शिते ३कथिते च "निर्दिष्टविषयं किञ्चित् उपात्तरिपयं तथा" हरि०

निर्देश पु०निर्+दिश्-भावे घञ्। १शासने आज्ञायां २कथने ३उपदेशे च। निर्दिश्यतेऽभिधीयतेऽनेन करणे घञ्। ४प्रतिपादकशब्दभेदे नाम्नि "स्यौ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः" गीता। ५चेतने च "कालमेव प्रतीक्षेत निर्देशं भृतको यथा" इति पुराणम्। निर्गतो देशस्तत् निरा०त०। २देशान्निर्गते त्रि० ३उपधान्ये च मेदि०।

निर्दोष त्रि० निर्गतो दोषो यस्मात् प्रा०ब०। दोषरहिते "निर्दोषे पितरि स्थिते" दायभा०"निर्दोषं दर्शयित्वा तु यदोषं यः प्रयच्छति" चिता० भृतवचनम्।

निर्द्वन्द्व त्रि०निर्गतो द्वन्द्वात् निरा०त०। शीतोष्णादिद्वन्द्वरहिते "निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान्" गीता

निर्द्धन त्रि० निर्गतं धनमस्य। १धनशून्ये दरिद्रे "शक्तिमन्तमवज्ञाय स्वयंभोऽपि निर्द्धनः परिभूयते" माघकाव्यः।२जरद्गवे पु० शब्दच०।

निर्द्धर्म त्रि० निर्गतो धर्मात् निरा०त० धर्मवर्हिभूते "निर्द्धर्मार्थं कर्म कृत्वा च यावैः" भा०उ० २४अ०।

निर्द्धार पु० निर्+धृ-णिच्-भावे घञ्। निश्चये ज्ञानभेदे।

निर्द्धारण न० निर्+धृ-णिच्-ल्युट्। १निश्चये ज्ञातिगुणक्रियाभिः सजातीयादेकदेशस्य २पृथक्करणे "यतस्य निर्द्धारणम्" पा० तदर्थे षष्ठी सप्तमी च भवति। तत्स्वरूपान्वयादिकं शब्दश०म० उक्तं यथा

"विशेषस्य खेतरसामान्यव्याहृत्तधर्मवत्त्वं निर्धारणं तच्च सप्तदितं न षष्ठ्यर्थः सामान्यतद्विशेषधर्मयोः स्वपदोपात्तत्वात्। किन्तु विशेषान्यत्वं व्याहृत्तं च। विशेषस्तत्सभिव्याहृतसत्त्वादिर्विशेष्य आद्यः। व्याहृत्तत्वञ्च भेदप्रतियोगित्वं तथा च नराणां क्षत्रियः शूरतम इत्यत्र क्षत्रियस्य नरविशेषतया षष्ठ्यर्थेन क्षत्रियान्यत्वेन विशिष्टस्य तत्प्रकृत्यर्थस्य नरस्य ताटस्थ्यनरत्वावच्छिन्नाधेयत्वसंसर्गेण भेदेऽन्वयबलस्य क्षत्रियान्यनरत्वावच्छिन्नवृत्तिकभेदप्रतियोगित्वस्य शूरतमे शूरतमस्य च क्षत्रिये तादात्म्येनान्वय इति क्षत्रियान्यनरत्वावच्छिन्नवृत्तिकभेदप्रतियोगित्वच्छूरतमाभिन्नः क्षत्रिय इत्याकारकस्तत्र बोधः। क्षत्रियान्यनरसाधेयतामात्रेण भेदेऽन्वये नराणां क्षत्रियः सुन्दर इत्यपि प्रयोगापत्तेः क्षत्रियान्यकृत्स्नरनिष्ठभेदप्रतियोगित्वस्य सुन्दरे सत्त्वात्। एवञ्च नरत्वावच्छिन्नवृत्तिकभेदप्रतियोगित्वस्य शूरतमे बाधादुक्तवाक्यस्यायोग्यतापत्तिरतः षष्ठ्यर्थेन क्षत्रियान्यत्वेन तत्प्रकृत्यर्थो नरो विशेषितः। नच घटानां क्षत्रियः शूर इत्यपि स्यात् क्षत्रियान्यघटत्वावच्छेदेन शूरभेदस्य सत्त्वादिति वाच्यं राहोः शिर इत्यादाविव प्रकृते क्षत्रियान्यविनः स्वप्रकृत्यर्थतादात्म्यस्य यक्ष्या बोधयत्वात्। न च सङ्ख्यान्यवर्षस्य प्रकृत्यर्थविशेष्यत्वनियमात् क्षत्रियान्यत्वरूपस्य षष्ठ्यर्थस्य प्रकृत्यर्थनरे प्रकारत्वायोग इति वाच्यं सम्बोध्यत्वादौ व्यभिचारेण ताटस्थ्याप्तेः प्रायिकत्वस्य प्रागुक्तत्वात्। न च नराणां क्षत्रियो द्रव्यमित्यपि स्यात् क्षत्रियान्यनरत्वावच्छेदेन द्विपादावच्छिन्नद्रव्यप्रतियोगिताकभेदसत्त्वादिति वाच्यं द्रव्यत्वादिविशिष्टे धर्मिणि द्रव्यत्वाद्यवच्छिन्नस्यैव भेदप्रतियोगित्वस्य बोधने निर्द्धारणषष्ठ्याः समर्थत्वात्। यद्यपि भेदः प्रतियोगित्वञ्च द्वयमेव निर्द्धारणषष्ठ्यर्थः क्षत्रियशब्देनोपस्थापितस्य क्षत्रियस्य षष्ठ्यर्थभेदे तस्य च नरे नरस्य च पुनर्भेदे पुनर्भेदस्य प्रतियोगित्वेऽन्वयादेव क्षत्रियान्यनरत्वावच्छिन्नवृत्तिकभेदप्रतियोगित्वस्य शूरतमेऽन्वयसम्भवः। तथापि क्षत्रियादिनामोपस्थाप्यस्य क्षत्रियादेस्ताटस्थ्यनामोत्तरविभक्त्यर्थ एव भेदान्वयस्य व्युत्पन्नत्वात् नरपदोत्तरषष्ठ्यर्थे तदन्वयासम्भवात् क्षत्रियान्यत्वं विशिष्टमेव षष्ठ्यर्थो नत्व-

न्यतामात्रम् ; न च नरस्य क्षत्रियः शूर इत्यपि स्यात् पाण्डिपाटस्य पाण्डिः पण्डित इत्यत्रेवान्यत्रापि एकवचनस्य निर्द्धारणार्थकत्वे सत्यभावात् । अतएव इन्द्रः सामासिकस्य चेति गीतापि सङ्गच्छते। एकवचनभिन्नयोरेव षष्ठीसप्तम्योरुक्तनिर्द्धारणबोधकत्वव्युत्पत्तिस्वीकाराद्वा । ननु पाथः पृथिव्योर्जलं क्षेत्रवदित्यादौ जलभिन्नयोः पाथःपृथिव्योरप्रसिद्ध्या पाथःपृथिव्यभयवृत्तिभेदप्रतियोगित्वस्य क्षेत्रवति बाधेन च जलान्यपाथःपृथिव्यभयत्वावच्छिन्नवृत्तिकभेदप्रतियोगिनः क्षेत्रवतो बोधासम्भवः । न च द्वितीयतृतीयान्तरनिर्द्धारणषष्ठ्या अन्यतरवृत्तिभेदप्रयोगित्वमेवार्थः तत्रविष्टे चान्यतरत्वस्यैकपदोपात्तत्वेन जलान्यत्वादेः षष्ठ्यर्थान्तरस्यान्वयः तथाच जलान्यो यः पाथः पृथिव्योरन्यतरवृत्तिस्तस्य भेदस्य प्रतियोगित्वं क्षेत्रवति वर्त्तत एवेति वाच्यं तावतापि पाथःपृथिव्यभयवृत्तादाक्षस्य जले बाधादुक्तवाक्यस्यायोग्यतातादवस्थ्यात् पाथःपृथिव्योरेव जलभिन्नत्वाद्यप्रयोगेण निर्द्धारणषष्ठ्यासादाक्षबाधितात्वौचित्यात् घटतद्भिन्नयोर्घटः कम्बुग्रीवादिमानित्यादौ घटतद्भिन्नान्यतरत्वाप्रसिद्ध्या तादृशान्यतरवृत्तिभेदस्य बोधयितुमशक्यत्वाच्चेति चेन्न द्वितीयतृतीयनिर्द्धारणषष्ठ्याः पर्य्याप्तसंख्यावाचकत्वेन तत्रिक्षेत्रैकपदोपात्तत्वेन षष्ठ्यर्थस्य जलादान्यत्वरूपनिर्द्धार्य्यभेदस्यान्वयेन सर्वनाशप्रसङ्गात् । पाथःपृथिव्योर्जलं क्षेत्रवदित्यादौ जलभिन्नो यः पाथःपृथिवीपर्य्याप्तसंख्याश्रयस्तत्त्वावच्छिन्नवृत्तिकभेदप्रतियोगित्वस्य क्षेत्रेऽभिन्नं पाथः पृथिवीपर्य्याप्तसंख्याश्रयो जलभिन्नत्वे बाधकभावात् । षटतटपठानां घटः कम्बुग्रीवादिमानित्यादावप्युक्तरीत्यैवान्वयधीः । इदन्तु बोध्यं यत्रोद्देश्यविधेययोस्तादाक्ष्येनान्वयबोधसामग्री तत्रैव निर्द्धारणषष्ठ्या भेदप्रतियोगित्वमर्थः यत्र तु सत्त्वज्ञानरेण, तत्तज्जलाभावप्रतियोगित्वमतो नराणां क्षत्रिये शौर्य्यमित्यादौ क्षत्रियान्यनरत्वावच्छिन्नवृत्तिकत्वात्यन्ताभावस्यैव प्रतियोगित्वं शौर्य्यादौ प्रतीयते न तु तादृशभेदस्य नराणां क्षत्रिये रूपमित्यपि प्रयोगापत्तेः । नरेषां मध्ये क्षत्रियः शूर इत्यादौ तु निर्द्धारणवाचिनो मध्ये इत्यव्ययस्य तदर्थकषष्ठ्या सह सम्भेदे हेतौ चैव इत्यादाविव नान्यतरवैयर्थ्यम् । नरेषु क्षत्रियः शूर इत्यादौ निर्द्धारणसप्तमीस्थलेऽप्युक्तदिशैवान्वयो द्रष्टव्यः । यत्तु नराणां क्षत्रिय, शूरतम इत्यादौ राहोः शिर इत्यत्रेवाभेदएव षष्ठ्यर्थकत्वादाक्ष्यं वा तथा च नराभिन्नक्षत्रियत्वाक्षेत्रेन शूरतमत्वाभेदस्तत्र वाक्यार्थस्तेन नराणां क्षत्रियोऽर्जुन इत्यादिकोन प्रयोगः नरभिन्नक्षत्रियत्वावच्छेदेनार्जुनाभेदस्याभावात् न वा नराणां वानरः पशुरित्यादिकः, कीशे पशुभेदसत्त्वेऽपि मानुषभेदस्य विरहादिति तन्तुच्छं नराणां क्षत्रियः प्राणी क्षत्रियाणां नरः शूरइत्यादिवाक्यस्य दुर्वारतापत्तेः । केचित्तु नराणां क्षत्रियः शूर इत्यादौ क्षत्रियान्यो नरः शूरभिन्नो नराभिन्नः क्षत्रियश्च शूरइत्येवमन्वयितावच्छेदकधर्मावच्छेदेन धियस्वरीकुर्वन् भेदमभेदञ्च निर्द्धारणवाचिषष्ठीसप्तम्योरर्थमाङ्गीकुर्य्यात् नामार्थसङ्गविशेषकान्वयबोधे नाम्नः प्रथमान्तत्वापेक्षायाः परित्यागापत्तेः स्वप्रकृत्यर्थावच्छिन्नस्यैव संख्यान्वयबुत्पत्तेश्च शब्दान्तरार्थेन सहान्वयस्य व्युत्पन्नत्वेन शब्दार्थे केवलभेदे शूरादेरन्वयायोगाच्चेत्यास्तां विस्तरः"। "पञ्चमी विभक्ते" पा॰यत्र निर्द्धार्य्यवाचस्य भेदएव प्रतीयते तत्र पञ्चमी स्यात् सि॰कौ॰पञ्चम्यास्तु भेदएवार्थः यथा माथुरा पाटलिपुत्रेभ्य आढ्यतर इति"यत्र च निर्द्धारणमित्यनुवर्त्तते विभागोऽत्र भेदः यत्र निर्द्धारणे सर्वत्र यथा कथञ्चित् भेदस्य सत्त्वेऽपि विभक्तिप्रकृत्यसामर्थ्यात् यत्र भेद एव न तु तेनाप्युपाध्यादिरूपेणाभेदस्यत्वेवाद्याः प्रवृत्तिरित्याह भेदएवेति न तु शब्दान्तरोपात्ते सामान्याक्रान्ततेति भावः । अत्र पञ्चम्यर्थो निर्द्धारणविषयरूपएव तत्र च स्वधिकरणत्वसम्बन्धेन पाटलिपुत्रस्यान्वयः तेन पाटलिपुत्रावच्छिन्निर्द्धारणविषया माथुरा आढ्यतरा इति बोधः । न चात्र निर्द्धारणावधेर्निर्द्धार्य्यमाणस्य च गोषु कृष्णेत्यादाविव सामान्यविशेषभावोऽस्ति प्रत्युत शब्दोपात्तयोर्धर्म्ययोर्विरोध एवं मनोरमा ।

निर्द्धारित वि॰निर्+धारि–क्त । १निर्द्धारणविषये २निश्चिते च "निर्द्धारितेऽर्थे लेखेन खलूक्ता खलु वाचिकम्" माघः ।

निर्द्धार्य्य वि॰निर्+धारि–कर्म्मणि ण्यत् । १निर्द्धारणकर्म्मणि सामान्यतः पृथक्कार्य्ये विशेषे यथा नराणां क्षत्रियः शूरतमः इत्यत्र शूरत्वेन नरान्तरेभ्यः पृथक् कार्य्यरूपविशेषः क्षत्रियः । २निश्चेये च । भावे ण्यत् । ३स्वरूपनिर्द्धारणे न० । तद्धितेऽस्य चञ् । ४निःशङ्कर्मकर्त्तरि रमानाथः । "निर्द्धार्य्यः कर्मकर्त्ता च संयतः सत्त्वसम्पदा । व्यसनेऽभ्युदये वापि सुविकारं यदा मनः । तत्तु सत्त्वमिति प्रोक्तम्" शब्दार्थचि॰ धृतवाक्यम् ।

निर्धूत त्रि॰ निर्+धू–कर्मणि क्त। निरस्ते "निर्धूतगीत-ध्वनि वालकरुतञ्चवनम्" माघः।

निर्धापन निर्+धा–णिच्–भावे ल्युट्। शुद्धतोक्ते शल्यो-द्धरणार्थे व्यापारभेदे "शल्योद्धारेषुहेतूपक्रमे "प्रमार्जनं निर्धापनं वमनम्" इत्यादिना विभज्य "आहारशेषश्चे-ष्टाहीनानुशल्यानि स्वयमेवोत्क्वसनप्रधमैर्निर्धमेत्" सुश्रु॰।

निर्बन्ध पु॰ निर्+बन्ध–भावे घञ्। आग्रहे क्वचिन्नियमभेदे "अवश्यनिर्बन्धपरे कथं नु ते" कुमा॰ "निर्बन्धसंजातरुषार्थ कार्श्यम्" रघुः। निरः बध्नातेस्तदर्थत्वम् "तथापि निर्ब-न्धति। तेऽथ वा स्यृङाम्" नैष॰ प्रयोगात्।

निर्वं(र्वं)हण न॰ निर्+बृ(वृ)ह–भावे ल्युट्। निर्वहणे भारथे नीलकण्ठः।

निर्बाध त्रि॰ निर्गता बाधा यस्मात् प्रा॰ब॰। १अप्रतिबन्धे २निरुपद्रवे ३विघ्नशून्ये च शब्दार्थचि॰। ४निष्काम्ये च "परिमण्डलो ह्येष एकविंशतिर्निबाँध एकविंशो ह्येष बर्हिष्टाच्चिर्बाँधं बिभर्त्ति रश्मयो वा एतस्य निबाँधा बाहुत एवा एतस्य रश्मयः" शत॰ब्रा॰ ६।७।१।२ "निबाँ-धम् निबाँध्यन्ते निःकाशन्ते उद्यताः स्वरूपाद्दृष्टिनिः-सृता भवन्ति" यजु॰संपदव्याख्या। "परिमण्डल एकविं-शतिर्निबाँधश्लक्ष्णो वज्रुरधस्ताच्चिर्बाँधस्तपदधाति रश्मयः" शत॰ब्रा॰७।४।१।१०"परिमण्डलोवर्तुलाकृतिः एकविंशति-संख्याकैःपुलाकैर्युक्तः। उपधानसमये यथा निबाँधानाम-वोभागाऽधस्थानं भवति तथा कर्त्तव्यम्" भा॰ ५मन्त्र भा॰ भेदे च पु॰"निबाँधेनाग्निम्" यजु॰ २५।२"निचितं बाध्यते शिरोऽस्थिमध्यसंलग्नो मज्जाभागः तेन" वेददी॰।

निर्बुध त्रि॰ निर्गतं बुधं यस्मात्। बुध–(जानना) रहिते मूर्खे धान्ये हेमच॰। निरुदकादि॰ अनोदात्ततास्य

निर्भट त्रि॰ निर्+भट–अच्। दृढे त्रिका॰।

निर्भय त्रि॰ निर्गतं भयमस्मात् प्रा॰ब॰। १भयरहिते त्रिका॰ 'निर्भयन्तु भवेद्यस्य राष्ट्रं बाहुबलाश्रितम्' मनुः। रौच्य-मनोः २पुत्रभेदे पु॰ "ध्रुवेतः खलदक्षिण स्तुतया निर्भयो दृढः" हरिवं॰ ७अ॰।

निर्भर न॰ निःशेषेण भरो भरणं प्राप्तिर्यस्मात् प्रा॰ब॰। १अतिमात्रे २तदुक्ते त्रि॰ अमरः "द्रुतपीतमाधवरसो मुनिभिरैः करजसमङ्करन्दनिर्भरात्" माघः। ३वेतन-शून्ये अत्रे च।

निर्भर्त्सन न॰ नितरां भर्त्सनम् प्रा॰स॰। १स्वीकारे २अभिभवे। कर्मणि ल्युट्। ३अनर्थके न॰ मेदि॰ "निर्भ-र्त्सनापवादैश्च तथैवाप्रियया गिरा" भा॰व॰ ३०२॰अ॰।

निर्भाग्य त्रि॰ निर्गतं भाग्यं यस्मात् प्रा॰ब॰। भाग्यरहिते अमरः। (बेमार) हेमच॰।

निर्मृति त्रि॰ निर्गता भृतिरस्य। वेतनशून्ये कर्मकरे

निर्मक्षिक अव्य॰मक्षिकायाः अभावः अव्ययी॰। १मक्षिकाया अभावे। निर्गता मक्षिका यस्मात् प्रा॰ब॰। २मक्षिकाशून्ये देशे ३तदुपलक्षिते निर्जने देशे"क्षतं भवतेदानीं निर्मक्षि-कम्"शकु॰प्राकृतानुवादः। निरुदकादि॰अनोदात्ततास्य।

निर्मज् त्रि॰ निर्–मृज–क्विप् वेदे गुणो॰। निर्मार्जनशुद्धे "यद्दिं सप्तरुषान्तु निर्मज्जामजे" ऋ॰ ८।४।२॰ "निर्मलां निःशेषेण शुद्धानां गवाम्" भा॰।

निर्मथ पु॰ निर्मथ्यतेऽनेन निर्+मथ–करणे ल्युट्। अग्नि-मन्थनदारुणि अरणौ हेमच॰। निर्मथननिर्मन्थनिर्मन्थन शब्दा अप्यत्र।

निर्मद त्रि॰ निर्गतो मदो दानजलं दर्पो गर्वो वा यस्मात्। १निरभिमाने २दर्पशून्ये ३दानजलशून्ये च "निर्मदं दुःखितं दृष्ट्वा पितरो रामभद्रवत्" भा॰व॰ ६६अ॰।

निर्मन्थ्य न॰ निर्मन्थ्यते अग्न्युत्पादनार्थं एष्यते निर्+मन्थ–कर्मणि यत्। अग्न्युत्पादनार्थं इष्यमाणे दारुणि अमरः।

निर्मर्य्याद त्रि॰ निर्गतो मर्य्यादायाः निरा॰त॰। १मर्य्यादा-तीते २अविनीते "निर्मर्य्यादा स्त्रेच्छा ये पश्चिमदिक्स्थि-तास्ते च" ह॰सं॰ १४अ॰।

निर्मल त्रि॰ निर्गतो मलो यस्य प्रा॰ब॰। मलरहिते "नित्या-नित्यविवेकज्ञाः" वेदान्तसारः "निर्मलाः स्वर्गमायान्ति मलः क्षत्रियतो यथा" मनुः। मलश्च रागादिदोषः कालुष्यञ्च।

निर्मलोपल नित्यकर्म॰। स्फटिकोपले राजनि॰।

निर्मशक त्रि॰ निर्गतो मशको यस्मात् प्रा॰ब॰। मशकरहिते देशे निरुदका॰ अनोदात्ततास्य। अभावे अव्ययी॰। २मशकाभावे अव्य॰।

निर्मांस त्रि॰निर्गतं मांसमस्य प्रा॰ब॰। १मांसरहिते २आ-हाराभावेनातिकृशे तपस्विदरिद्रप्रभृतौ च "निर्मांस-बालवृद्धाः क्षुत्क्षामाश्चानि परदेशान्" ह॰सं॰ ३अ॰।

निर्मांसबक्त्र पु॰ निर्मांसं बक्त्रमस्य। कुमारानुचरभेदे "कृष्णा निर्मांसबक्त्राश्च स्थूलपृष्ठास्तनूदराः" भा॰श॰ ४अ॰।

निर्माण न॰ निर्+मि–भावे ल्युट्। १घटादेः २रचनायाम्। "निर्माणदक्षस्य कपीश्वरेषु" भट्टिः "निर्माणश्च शरीरस्य

ततो धैर्य्यमवाप्नुहि" भा॰व॰ २६१अ॰। निर्मीयतेऽनेन करणे ल्युट्। निर्माणसाधने २कायादौ। क्रौर्यकर्मविपाकाग्यवैरपरामृष्टो निर्माणकायमधिष्ठाय सम्प्रदाय प्रवर्त्तकः" कुसुमा॰। कायस्य निर्माणसाधनत्वात् तथात्वम्। निर्माणार्थं कायं निर्माणकायमिति हरिदासः तत्तु न युक्तं कायाधिष्ठानस्यैव निर्माणार्थत्वेन कायस्य तथात्वाभावात्। निर्गतो मानात् निरा॰त॰। प्रमानातीते। "पूर्वपदादिति" पा॰ असंज्ञायामपि आर्षं षत्वम्। "अनच्छत्रगणं व्योम निर्माणं घनगर्जितम्" रा॰कि॰४४अ॰

निर्माल्य न॰ निर्+मल–ण्यत्। देवदत्ते तद्विसर्जनोत्तरस्पृष्टे द्रव्ये "अर्वाक् विसर्जनाद्द्रव्यं नैवेद्यं सर्वमुच्यते। विसर्जिते जगद्धात्रे निर्माल्यं भवति क्षणात्" गारुड़पु॰। विद्यानन्दनिबन्धे "स्कन्दे गणपतावुग्रे शाक्ते सौरेऽथ वैष्णवे। तेजश्चण्डमयोच्छिष्टशोभासच्छिष्टपूर्विकाम्। चाण्डालीं शेषिकां चण्डं विष्वक्सेनं क्रमाद्यजेत्। शोभो गणेशः" "रुद्रदेवे च वह्निदेवीं समर्च्य विधिवत्ततः। निर्माल्यञ्च शुचौ देशे नैवेद्यं भक्षयेत् सुधीः" तन्त्रान्तरे आ॰त॰ निर्माल्यस्य धारणप्रकारादिकं निरूपितं यथा "निर्माल्यं शिरसा धार्य्यं सर्वाङ्गे चानुलेपनम्। नैवेद्यञ्चोपभुञ्जीत दत्त्वा तद्भक्तिशालिने"। तद्भक्तिशालिने विष्वक्सेनादये "उद्धास्य देवं स्वे धाम्नि तद्विवेदितमात्मनः। अद्यादात्मविशुद्ध्यर्थं सर्वकामसमृद्धये"। स्वे धाम्नि स्वीयहृदये उद्धास्य संस्थाप्य तथाच कालिकापुराणे "ध्यायंस्तु मन्त्रमेतेन तत्तस्यं स्थापयेत् हृदि तिष्ठ देवि! परे स्थाने स्वस्थानं परमेश्वरि। यत्र ब्रह्मादयः सर्वे सुराश्चिन्वन्ति मे हृदि"। भविष्ये "निर्माल्यं नोपभोक्तव्यं रुद्रस्य तपनस्य च। भक्षते यदि तन्मोहात्तरके पच्यते ध्रुवम्"। निर्माल्यमात्रे तु "उदके तरुमूले वा निर्माल्यं तस्य संत्यजेत्" कालिकापुराणे "यो वह्नेर्वार्च्चनरतः स तच्चैवेद्यभक्षकः" ब्रह्मपु॰ "अम्बरीष! नवं वस्त्रं फलमन्यद्रसादिकम्। कृत्वा कृष्णोपभोग्यन्तु सदा सेव्यं हि वैष्णवैः" तत्रैककर्त्तरि क्रान्यत्वात् स्वदत्तनैवेद्यभक्षणेऽप्यधिकार उक्तः "केवलं सौरशैवे तु वैष्णवो नैव भक्षयेत्"। विष्णुयामले "पीत्वा पादोदकं देवि! नैवेद्यं स्वयमुद्धरेत्। त्यजेत् पादोदकं वस्तु नैवेद्यं वा त्यजेच्च यः। षष्टिवर्षसहस्राणि रौरवे नरके पचेत्"। उद्धरेत् स्वयमुद्धरेत्। स्कन्दयामले "उद्धास्य देवं स्वे धाम्नि तद्विवेदितमात्मनः। भक्षयेत् पापशुद्ध्यर्थं सर्वदा साधकः प्रिये!" शिवधर्म्मोत्तरे रुद्रनैवेद्यभक्षणशक्तं यथा "यत्र भक्त्या शिवं पूज्य नैवेद्यमुपकल्पयेत्। तदन्नं स्वयमश्नीयात् तत् सर्वं विनिवेदयेत्"। "फलं पुष्पञ्च ताम्बूलम् अन्नपानादिकञ्च यत्। अदत्त्वा तन्महादेव्यै न भोक्तव्यं कदाचन"। एतेन यत् पठन्ति "अन्यदेवस्य नैवेद्यं भुक्त्वा चान्द्रायणञ्चरेत्" इति तदेकान्तवैष्णवपरमिति भूमणः। यत्तु "भूक्तान्नं याजकान्नञ्च नैवेद्यञ्चापि वर्जयेत्" इति लैङ्गवचनम्। तच्चैवेद्यत्वेनोपकल्पितानिवेदितपरं लोभादिना भोजननिषेधकं वा यथोक्तं शास्त्रे "नोपभुक्ता च नैवेद्यं प्रयाति प्रेतयोनिषु।" द्रव्यविशेषस्य कालभेदे निर्माल्यतोक्ता तन्त्रसा॰ योगिनीतन्त्रे यथा "मणिमुक्ता सुवर्णानि देवे दत्तानि यानि वै। न निर्माल्यं हाटशब्दं ताम्रपात्रं तथैव च। षट्पाटी च षण्मासं नैवेद्यं दत्तमात्रतः। मोदकं क्षीरञ्चैव मासार्द्धेन महेश्वरि!। षट्रसं त्रिमासाच्च यातयाममहः कृतम्। यावदुष्णं भवेदन्नं परमान्नं तथैव च। भक्तं रुधिरञ्चैव अहोरात्रेण पार्वति!। सहस्रेन्दुदिनञ्चाज्यं यामेन गव्यदधि। करवीरमहोरात्रं बिल्वपत्रं तथैव च। जवारक्तञ्च माल्यं च निर्माल्यं सार्द्धयामके। माल्यं वै करवीरस्य पद्मस्य बिल्वजस्य च। यामार्द्धेन महेश्वरि! ताम्बूलं दत्तमात्रतः। अनिर्माल्यञ्च दाड़िम्बं तथा बिल्वफलं प्रिये!। सौगन्धिकञ्च कदलीं प्रयत्नेन नियोजयेत्। कदलीबीजपूरञ्च दुग्धपक्वं निवेदयेत्।" शिवनिर्माल्यधारणे विशेषः ति॰त॰ उक्तो यथा स्कान्दे "निर्माल्यं यो हि मद्भक्त्या शिरसा धारयिष्यति। अशुचिर्भिन्नमर्य्यादो नरः पापसमन्वितः। नरके पच्यते घोरे तिर्य्यग्योनौ च जायते। ब्रह्मरन्ध्रापि शुचिर्भूत्वा निर्माल्यं वस्तु धारयेत्। तस्य पापं महच्छीघ्रं नाशयिष्ये महाव्रते!।" शुचिःस्नानादिनेति शेषः। एवञ्च "स्नात्वा रुद्रस्य निर्माल्यं सवासा आप्लुतः शुचिः" इति कालिकापुराणीयमशुचिविषयम्। अनुपनीतविषयमिति श्रीदत्तः। वह्नि॰ चण्डपरिशिष्टम्। अयाज्ञं शिवनैवेद्यं पत्रं पुष्पं फलं जलम्। शालग्रामशिलास्पर्शात् सर्वं याति पवित्रताम्" उदके निर्माल्यत्यागश्च गङ्गेतरपरः। यथोक्तं ब्रह्मपु॰ "गङ्गां पुण्यजलां प्राप्य चतुर्दश विवर्जयेत्। शौचमाचमनं केशं निर्माल्यं मलधर्षणम्"। २पुष्पायां स्त्री शब्दर॰।

निर्मित त्रि॰ निर्+मा–क्त। कृतरचने "निजनिर्मितकारिकावलीम्" सि॰कौ॰।

निर्मिति स्त्री निर्+मा–भावे क्तिन्। निर्माणे करणे। "नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति" काव्यप्र॰।

निर्मुक्त पु॰निर्+सच–क्त। १सक्तकञ्चुके सर्पे (खोलसछाड़ा साप) निःश्रेयेण मुक्तः। निष्परिग्रहे २सङ्गरहिते ३बन्धशून्ये च अमरः। ४वियुक्ते मेदि॰ "हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव" रघुः।

निर्मुट न॰निर्गतं मुटं यस्मात् प्रा॰ब॰। १करशून्यहट्टे (कुटिशून्यहाट) हारा॰। २वनस्पतौ पु॰ त्रिका॰ ३सूर्य्ये ४खर्परे पु॰ हारा॰।

निर्मूल त्रि॰ निर्गतं मूलमस्य प्रा॰ब॰। मूलरहिते "आरुह्य दृक्षान् निर्मूलान् गजः परिहृदद्रिव" भा॰उ॰ ७४अ०।

निर्मूलन न॰निर्मूल+कृतौ णिच–भावे ल्युट्। उत्पाटने

निर्मृजस् अव्य॰ निर्+मृज–"ईश्वरे तोसुनकसुनौ" पा॰ तुमर्थे कसुन्। निर्मार्ष्टुमित्यर्थे "मृज्मेव तु वा ईश्वराः पशून्निर्मृजः" ताण्ड्यब्रा॰२।२।३। "निर्मार्ष्टुमपगमयितुं विनाशयितुमीश्वराः समर्थाः" भा॰।

निर्मृष्ट त्रि॰ निर्+मृज–क्त। मोक्षिते। "निर्मृष्टरागोऽधरः" सा॰ द॰।

निर्मोक पु॰निर्+मुच–घञ्। १सर्पकञ्चुके (खोलस) २मोचने ३सन्नाहे ४आकाशे च मेदि॰। "निर्मोकपक्ष्मः कपिभिर्विलक्षाः" रघुः। ५सावर्णिमनोःपुत्रभेदे पु॰। "निर्मोकविरजस्काद्याः सावर्णेस्तनया नृप!" भाग॰८।१३।६ क्वचित् निर्मोचेति पाठान्तरं तत्रार्थे।

निर्मोक्ष पु॰ निःश्रेयेण मोक्षः प्रा॰ स॰। निःश्रेयेण मोक्षे "क्वनिर्मोक्षप्रसङ्गः" सा॰प्र॰भा॰।

निर्मोह त्रि॰ निर्गतो मोहो यस्मात् प्रा॰ब॰। १मोहशून्ये रैवतमनोः २पुत्रभेदे पु॰ "अरण्यश्च प्रकाशश्च निर्मोहः सत्यवान् ऋतौ। रैवतस्य मनोःपुत्राः" हरिवं॰ ७अ॰। ३सावर्णिमनोःपुत्रभेदे निर्मोकशब्दे दृश्यम्। त्रयोदशमन्वन्तरे काश्यपे ४सप्तर्षिभेदे "त्रयोदशेऽथ पर्य्याये भव्ये मन्वन्तरे मनोः" इत्युपक्रमे "निष्प्रकम्पस्तथात्रेयः निर्मोहः काश्यपस्तथा" हरिवं॰ ७ अ॰।

निर्म्रेतुका स्त्री निर्+म्रा–तन् संज्ञायां कन् पृषो॰। म्लानिशून्ये ओषधिभेदे "निर्म्रेतुकास्तत्र भवन्ति" पञ्चभी॰ ब्रा॰१२।८।६।

निर्यन्त्रण न॰ निर्+यन्त्र–ल्युट्। १निष्पीडने निर्+यन्त्रणं यस्मात् प्रा॰ब॰। २यन्त्रणाशून्ये बाधाशून्ये ३निरर्गले ४उच्छृङ्खले त्रि॰जटा॰।

निर्याण न॰ निर्यांति मदोऽनेन निर्+या करणे ल्युट्। १गजापाङ्गदेशे। भावे ल्युट्। २मोचने ३अध्वनिर्गमे च मेदि॰। ४निःसरणे ५प्राणवायोर्देहनिःसरणरूपमरणे च तन्मावधिकस्थानभेदस्वरूपभेदैस्तज्ज्ञानं तद्ज्ञातके निरूपितं यथा "मृत्युर्मृत्युष्टङ्कणेन बलिभिस्तद्वातकोपोद्भवस्तत्संयुक्तभगात्मजो बन्धुभवो धीर्यान्वितैर्भूरिभिः। अन्यस्वाबुधजो ज्वरामयजतत्क्षुत्क्षतत्वाष्टमे स्वर्यौद्यैर्निधने चरादिषु परस्वाध्वप्रदेशेऽपि। शैत्याभिहतस्य स्वर्यकुजयोर्मृत्युः खवन्ध्युस्थ॰ ४थोः कूपे मन्दगशाङ्कभूमितनयैर्बन्धुस्तकर्मग॰ ४।७।१०स्थितैः। कन्यायां खजनाद्विभोष्णकरयोः पापग्रहैर्दृष्टयोः स्यातां यद्युभवोदयेऽर्कगशिनौ तोये तदा मज्जतः। मन्दे कर्कटगे जलोदरजतो मृत्युर्मृगाङ्के मृगे भस्त्राग्निप्रभवः यस्मिन्नशुभयोर्मध्ये कुजर्क्षे स्थिते। कन्यायां रुधिरोत्थशोणजनितस्तद्वत् स्थिते शीतगौ सौरे॰ यदि तद्दृशे हिमगौ रज्ज्वस्त्रिपातैः क्षतः। बन्धाङ्गे५नवमस्थयोरशुभयोः सौम्यग्रहादृष्टयोर्भौमार्कैश्च समेर्पयाग्निगडैः क्षिप्तस्तिर्यैर्बन्धतः। कन्यायामशुभान्वितेऽस्तमयगे चन्द्रे स्थिते मेषगे सूर्ये लग्नगते च विद्धि मरणं क्षीणेहुकं मन्दिरे। भूयोद्भिन्नतनुः सुखेऽवनिसुते स्वर्यैऽपि वा खे॰ यमे सप्रच्छोषहिमांशुभिश्च युगपत्यापैश्चिकोणाद्य॰ ८।१।१गैः। बन्धुष्ठस्थे च रवौ॰ वियत्सवनिजे क्षीणेन्दुसंवीक्षिते काष्ठेनाभिहतः प्रयाति मरणं स्वर्यात्मजेनेक्षिते। रन्ध्रास्तदाकृच्छ्रिवुकैद॰ १०।१।४ लैगुड़ाहताङ्गः प्रक्षीणचन्द्ररुधिरार्किदिनेश्वयुक्तैः। तैरेव कर्म॰ नवमोदय१पुत्र५संस्थैर्धर्माग्निबन्धनशरीरनिकृन्तनान्तः। बन्धुस्तकर्म४।७।१०सहितैः कुजस्वर्यमन्दैर्निर्यांधमायुधशिखिचितिपालकोपात्। सौरीन्दुभूमितनयैः स्वसुखास्तदस्थ २।४।१०र्नैयः क्षतक्लमिक्षतच शरीरपातः। स्व१०स्थेऽर्केऽवनिजे रसातल४गते यानप्रपातात्बधो बन्धोत्पीडनजः कुजेऽस्तमयगे सौरेन्दिनाभ्युद्गमे। विध्मध्ये रुधिरार्किशीतकिरणैर्जूकाजसौरर्क्षगैर्यांतैर्वा गलितेन्दुस्वर्यरुधिरैर्व्योमास्तबन्धा१०।७।२क्षयान्। वीर्य्यान्वितवक्रगोचिते क्षीणेन्दौ निधनस्थितेऽर्कजे। शुक्रोद्भवरोगपीड़या स्वयुः स्यात् क्षमिशस्त्रदाहजः। अस्ते७

रवौ मरुधिरे निधनेऽर्कयुक्ते चीर्णे रसातलगते क्षिगगौ खगान्तः। लग्नाब्जजाष्टमतपः१।५।८।६स्थिन मौमभन्द्वचन्द्रैस्तु शैलशिखराग्रनिकृन्तपातैः। द्वाविंशः कथितस्तु कारणं ईक्षाणो निधनस्य सूरिभिः। तस्मा-धिपतिर्भवोऽपि वा निर्याणं स्वगुणैः प्रयच्छति। क्षीरार्णवांशकपयुक्तसमानभमौ योगेऽष्टमादभिरतः परि-कल्प्यमेतत्। मोक्षस्तु सत्यु समवेऽहृदितांशसंस्थः खेऽर्के-क्षिते द्विगुणितस्त्रिगुणः शुभैश्च। दृग्नजलविमिश्रचैर्म-र्मसंक्षेदशोषैर्निधनभवनसंस्थैर्व्याधिवर्गैर्विहीनः। इति ग्रथपरिणामचिन्तनीयो यथोक्तः पृथुविरचितशास्त्राद्वल्य-नूकादि चिन्यम्। गुरुरङ्गपतिशुक्रौ सूर्यभौमौ य-मज्ञौ विबुधपिङ्गतिरश्चोनैरकोयांच कुर्युः। दिनकरशशि-बीर्याधिष्ठिता त्र्यंशनाथात् प्रवरसमनिकृष्टास्तुङ्गहासा-दनूके। गतिरपि रिपुरन्ध्रत्र्यंशपोऽस्तस्थितो वा गुरु-रथ रिपुकेन्द्रच्छिद्रगः क्षोणसंस्थः। उदयति भवनेऽन्त्ये सौम्यभागे च मोक्षो भवति यदि बलेन प्रोक्षितास्तत्र शेषाः। इति नैर्याणिकाध्यायः"। "नेष्टा योगा जातकं कामिनीनां निर्याणं स्यान्नष्टजन्मर्क्षिकायाः" इत्युपसंहा-राध्याये तत्रोक्तम्। निर्गतं यानमस्मात् प्रा॰ब॰ "सं-ज्ञायां पूर्वपदात्" पा॰ षत्वम्। पशूनां पादबन्धने ह्रस्वमनि वैज॰ "निर्याणरज्ज्वा पुरो दुधुक्षतः" माघः।

निर्यातक त्रि॰ निर्यातं निर्याणं बहिष्करणं तत् करोति णिच्-ण्वुल्। निर्हारके। "अनग्नयश्च ये विप्राः प्रेतनिर्यातकास्तथा" भा॰ अनु॰ २३ अ॰। "मृत-निर्यातकाश्चैव परदाररताश्च ये" मार्कण्डे ३५ अ॰।

निर्यातन न॰निर्+यत-णिच् ल्युट्। १वैरशुद्धौ, २प्रतीकारे ३प्रतिदाने ४न्यासस्वमर्पणे च अमरः। ५मारणे हेमच॰। ६क्षपणादेः शोधने च। "विगणनक्षणनिर्यातनम्" सि॰ कौ॰। "नक्षत्रस्य भवेच्छक्रिर्वैरनिर्यातनं प्रति" हरिवं॰

निर्यात्य त्रि॰ निर्+याति-कर्मणि यत्। १शोधनीये २प्रति-देये च "कन्या चैवं न चान्यस्य निर्यात्यानेन कश्चता" हरिवं॰ १७७ अ॰।

निर्याम पु॰ निर्+यम-घञ्। पोतवाहे हेमच॰।

निर्यास पु॰न॰ निर्-यस-घञ् अर्द्धर्चा॰। १क्षपाये २क्षाये शब्दमा॰। ३वृक्षादिक्षीरे वृक्षात् निर्गत्य कठिनतां याते वृक्षरसभेदे (आठा) रत्नमा॰"गालनिर्यासगन्धिभिः" रघुः। "लोहितान् वृक्षनिर्यासान्" मनुः। ४निम्बादि-लवादौ च कंसस्याव सुखस्वेदो भूमेदान्तरगोचरः। अमवद्रोधनिर्यासः" हरिवं॰ ८७अ॰। निर्यासस्यादूरदे-शादिः कुलदा॰ठच्। निर्यासिक तत्सम्बन्धिवृक्षादौ त्रि॰।

निर्यूष पु॰ नितरां यूषः प्रा॰ स॰। निर्यासशब्दार्थे शब्दमा॰

निर्यूह पु॰ निर्+ऊह-क पृषो॰। १भक्तसारखे वैजयन्ती तद्वाकारतया निर्मिते २नागदन्ते द्वारवेदिकायां जालभेदे अमरः। ३शेखरे ४आपीडे ५द्वारे ६क्षाये निर्यासे मेदि॰। "वितर्दिनिर्यूहविटङ्कशीर्षैः" माघः। द्वार-तोरणनिर्यूहैर्युक्तमभ्रचयोपमैः" भा॰आ॰१०८ अ॰ तत्र आपीडे "खड्गकार्मुकनिर्यूहैः शरैश्च विविधैरपि" भा॰ उ॰१८ अ॰। कार्मुकस्य निर्यूहैः आपीडैरिव शरै-रित्यर्थः। [२पाण्डुरपृष्ठे हेम॰।

निर्लक्षण त्रि॰ निर्गतं लक्षणमस्य प्रा॰ब॰। १शुभलक्षणशून्ये

निर्लिप्त त्रि॰ निर्+लिप-क्त। १लेपरहिते २सम्बन्धशून्ये निःसङ्गे। "निरुपाधिर्न निर्लिप्तो निरीहो निधना-त्मकः" ब्रह्मवै॰ ४॰।

निर्लुञ्चन न॰ निर्+लुञ्च-भावे ल्युट्। वितुषीकरणादौ "नखनिर्लुञ्चनादिभिरपि तत्कार्यसिद्धेः" काव्या॰ओ॰ १।६।६ सू॰ कर्कः।

निर्लुण्ठन न॰ निर्+लुठि-भावे ल्युट्। अपहरणे (लोटा) "अङ्गानीव परस्परं विदधते निर्लुण्ठनं सभ्रुवः" मा॰द॰।

निर्लेखन न॰ निर्+लिख-भावे ल्युट्। १मलादेरपसारणे (खाँचड़ान) करणे ल्युट्। २तत्साधने "जिह्वानिर्ले-खनं रौप्यं सौवर्णं वार्क्षमेव च" सुश्रुतः।

निर्लेप त्रि॰ निर्गतो लेपः सम्बन्धोऽनुलेपनं वा यस्य प्रा॰ब॰। १परिणामहेतुसंयोगादिशून्ये २अनुलेपनरहिते च "लो-कवेदविरुद्धैरपि निर्लेपः स्वतन्त्रश्चेति मन्यमानाशुपताः" कुसुमा॰। "निर्लेपं कालुषं भावमद्भिरेव विशुध्यति" मनुः।

निर्लोमन् त्रि॰ निर्गतं लोम यस्य। लोमरहिते (टाक) रोगयुक्ते। तद्रोगस्तु "षड्रात्रस्य ज्वरात् निर्लोमा जायते नरः" भाता॰ उक्तेः षड्रात्रज्वरात्स्यात्।

निर्व्वयनी स्त्री नितरां वयति वह्निरक्षाम् त्वचि ल्युट् ङीष् पृषो॰। सर्पत्वचि (खोलस) "तद्यथाऽहिर्निर्व्व-यनी वल्मीके मृता प्रत्यस्ता शयीत" बृह॰उप॰। "अहिर्निर्व्वयनी सर्पनिर्मोकः वल्मीके सर्पाश्रये वल्मीकादावित्यर्थः प्रत्यस्ता प्रक्षिप्ता मृताऽनात्मभावेन सर्पेण परित्यक्ता मृता शयीत" भा॰।

निर्वक्तव्य त्रि॰ निर्+वच-कर्मणि तव्य। अवयवार्थकथनेन प्रतिपाद्ये निर्वाच्यनिर्वचनीयावयवत्र।

निर्वचन न० निर्+वच–भावे ल्युट्। १निरुक्तौ अवयवार्थ कथने। २प्रसिद्धे च "न निर्मन्युः क्षत्रियोऽस्ति लोके निर्वचनं श्रुतम्" भा० व० २७ अ०। "वत्सं स्तेने वनं नार्यां राज्यं दुर्योधने तथा। इति लोके निर्वचनं लोके चरति भारत" भा० व० २२अ०। निर्गतं वचनं यस्य प्रा० व०। वचनशून्ये शठशीलित्यर्थे "साम्नेन तां निर्वचनं जघान" कुमा०। ४वचनरहिते वक्तव्यताशून्ये त्रि० "येषां तडागानि महोदकानि वाप्यश्च कूपाश्च प्रतिश्रयाश्च। अन्नस्य दानं मधुरा च वाणी यमस्य ते निर्वचना भवन्ति" भा० व० १६६ अ०।

निर्वण त्रि० निर्गतो व्रणात् निरा०त० प्रक्षिरन्तरित्यादिना असंज्ञायामपि अत्वम्। व्रणाद्विष्क्रान्ते "निर्व्रणो बध्यते व्याघ्रो निर्व्रणं छिद्यते वनम्" भा०उ० २८अ० अस्य "वनं समासे" पा० समासमात्रे वनान्तत्वेनान्तोदात्तता।

निर्वपण न० निर्+वप–भावे ल्युट्। १दाने २अन्नादीनां संविभागे च। "परिस्तरणपात्रसंसादनप्रोक्षणाज्यनिर्वपणाधिश्रयणानि" कात्या० श्रौ० ८।२।१। "अनयैवादृता कार्यं पिण्डनिर्वपणं सुतैः" मनुः।

निर्वर त्रि० निर्गतो वरो वरणमस्य। १निर्लज्जे कठिने २निर्भये ३सारे च हेमच०। अत्र निर्दर इत्येव पाठः सद्रादीत्वात् निर्वर इति पाठोऽशुद्धः। अतएव मेदिनीकोषे निर्दरं निर्भये सारेऽव्ययवत् कठिनेऽपि इत्युक्तम्।

निर्वर्णन न० निर्+वर्ण "सत्यापपाशेति" पा०णिच् भावे ल्युट्। दर्शने त्रिका०।

निर्वर्त्तित त्रि०निर्+वृत–णिच्–कर्म्मणि क्त। निष्पादिते।

निर्वर्त्य त्रि० निर्+वृत–णिच्-कर्म्मणि यत्। निष्पाद्ये व्याकरणपरिभाषिते कर्मभेदे न०"तत्क्रियमाणं विकार्यञ्च कर्मेदेधा व्यवस्थितम्"हरिः कर्मनृशब्दे १७७१ पृ०दृश्यम्।

निर्वहण न० निर्+वह-भावे ल्युट्। १नाट्योक्तौ प्रस्तुतकथासमाप्तौ २प्रकृताभिनयस्य निर्वाहे, नाटकसन्ध्यादेरङ्गभेदे तल्लक्षणानि सन्ध्यादीनि यथोक्तं साहि०"सन्धिर्विबोधो यवनं निर्णयः परिभाषणम्। कृतिः प्रसाद आनन्दः समयोऽप्युपगूहनम्। भाषणं पूर्ववाक्यस्य काव्यसंहार एव च। प्रशस्तिरिति संहारे त्रयोव्यङ्गानि नामतः"। युच्। निर्वहणा निशायाम् स्त्री।

निर्वाच् त्रि० निर्+वच–अनुच–क्विप् अवोपसर्गस्य वकारोपः। निर्गते "तस्मादिमे प्राणा विप्रवोऽवाङ्वोऽन्तुनिर्वाचि" सां०ब्रा० ७।६।

निर्वाण त्रि० निर्+वा–क्त। "निर्वाणोऽवाते" पा० तस्य नः। १शान्ते वङ्निसन्यादौ २परमाश्रमस्थे मुनौ ३निश्चले ४शून्ये शब्दर०। भावे क्त। ५अस्तगमने ६निर्दृतौ ७गजमज्जने ८सङ्गमे ९अपवर्गे मोक्षे मेदि०। १०विनाशे यादवः ११विश्रान्तौ हेमच०। "निर्वाणोत्थानशयनानि त्रीणि गजकर्माणीति" पालकाव्योक्ते १२गजकर्मभेदे। "अरन्तुदमिवाज्ञानमनिर्वाणस्य दन्तिनः" रघुः। "अनिर्वाणस्य मज्जनरहितस्येति" मल्लि०। "कुरुतेऽस्मिन्मोक्षेऽपि निर्वाणात्तत्राधवम्"। "निर्वाणभूविष्टमवास्य वीर्यम्" कुमा०। निर्दृतौ "अलौकिको गात्रनिर्वाणमत्र" माघः। "यतितव्यं समत्वेन निर्वाणमपि चेच्छता" "समत्वबुद्धेर्निर्वाणं फलरूपं श्रुतौ स्मृतौ सर्वदुःखोपरमणलक्षणं ब्रह्मणि स्थितिः" "स्थित्वाऽस्यामन्तःकालेऽपि ब्रह्म निर्वाणमृच्छति" "स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति" गीता। सर्वदुःखोपरमात्मकत्वात् निरतिशयानन्दरूपत्वाच्च परमपुरुषार्थकैवल्यरूपं ब्रह्म निर्वाणमुच्यते इत्यर्थः। १२आदिगुरुके (ऽ) त्रिकले मात्रागणभेदे १३विद्योपदेशपद्धतिभेदे यथा निर्वाणतन्त्रादि। नामिदेशे जले १४प्रथमपुटितमालत्या पुटितस्वाभीष्टमन्त्रे। "कुलकुण्डां भूमिं संजप्य कृष्टिसेतुं विचिन्तयेत्। महासेतुं विशुद्धे तु षोड़शारे समुद्धरेत्। मणिपूरे तु निर्वाणं महाकुण्डलिनीमधः। स्वाधिष्ठाने कामबीजं राकिणीमूर्ध्नि संस्थितम्। विचिन्त्य विधिवद्देवि! मूलाधारान्निराकृषेत्!। विशुद्धान्तं समारुह्य देवि! विगततन्तुनीयसीम्। देवीस्थानं द्विजिह्वान्तं मन्त्रमूलाहतं सुधः"। तत्र निर्वाणं यथा "अथ वक्ष्यामि निर्वाणं शृणु सारस्वितानघे। प्रथमं पूर्वसङ्केतं मातृकाद्यं समुद्धरेत्। मातृकाद्यां समस्तान्तु पुनः प्रथमसुद्धरेत्। एवं पुटितमूलन्तु प्रजपेन्मणिपूरके। एवं निर्वाणमीशानि! यो न जानाति पामरः। कल्पकोटिसहस्रेषु तस्य सिद्धिर्न जायते"आगमविद्यासतन्त्रम्।

निर्वाणमण्डप पु० काशीस्थे शक्तिमण्डपाख्ये तीर्थभेदे।

निर्वाणमस्तक पु० निर्वाणं निर्दृतिर्मस्तकमिव यत्र। मोक्षे त्रिका०।

निर्वाणरुचि त्रि० निर्वाणे रुचिरस्य। १मोक्षसाधनायस्के एकादशमन्वन्तरे २देवभेदे "महर्षिर्धर्मसावर्णिरेकादशम आत्मवान्" इत्युपक्रमे "विहङ्गमाः कामगमा निर्वा-

चरन्तवः सुराः" भागवते ८।१३।१२ श्लोकः।

निर्वाणी स्त्री जैनानां शासनदेवताभेदे हेम०। निर्गता वाणी यस्य बा० कप् न। २वाक्यरहिते तूष्णीम्भूते कपि निर्वाणीकोऽप्यत्र त्रि०।

निर्वात त्रि० निर्गतो वातो यस्मात् प्रा० ब०। वायुशून्यदेशे। निर्+वा-क्त निर्वाणोऽवाते पा० न तस्य नः। २निर्गते वाते हेमच०। "अक्षुब्धमिव सूर्येण निर्वातं इव वायुना" भा० स० ३५ अ०।

निर्वाद पु० निर्+वद-घञ्। निष्कृष्टवादे १लोकापवादे अमरः। "किमात्मनिर्वादकथासमेषे" रघुः। नितरां वादः। २निश्चितवादे चोरस्वामी। अभावेऽव्ययी०। ३वादाभावे अव्य०।

निर्वाप पु० निर्+वप-भावे घञ्। १दाने, प्राग्रपिण्डलोकोद्देशेन २दाने च। "अमावास्यां तु निर्वापात् सर्वकामानवाप्नुयात्" भा० अनु० ८७ अ०।

निर्वापण न० निर्+वप णिच्,-बा-वा णिच्-ल्युट्। १भारखे वधे अमरः। २दाने च हलायु०। (निर्वान) ३निर्वाणतासम्पादने। "तप्तायःपिण्डसिकतानां वा निर्वापणं प्रसाधनञ्च कर्त्तव्यम्" सुश्रुतः। "दाहपाकज्वरवतां कार्य्यं निर्वापणं भवेत्" सुश्रुतः। "दीपनिर्वापणात् डंसः कृष्णाख्यश्छेदनात् स्त्रियः" ति०त०।

निर्वार्य्य न० निर्+वृ-ण्यत्। निःशङ्ककर्म्मकर्त्तरि सत्यसम्मदा उद्यमेन कार्यकर्त्तरि अमरः। भयविक्रमव्यसनाभ्युदयादौ निर्विकारं मनः सत्यम् तत् सम्यदा सम्यतनुद्यमं कुर्वन् योनिःशङ्को भूत्वा कर्म्म कुरुते स निर्वार्य्य उच्यते।

निर्वासन पु० निर्+वस-णिच् भावे ल्युट्। पुरादितो बहिष्करणे १निःसारणे २मारणे ३क्षेपणे ४विसर्जने च भेदि०। "ततो दुर्योधनः क्रूरः कर्णश्च सहसौबलः। तेषां निर्वासनान् विविधांस्ते समारभन्" भा०आ० ६१ अ०। "निर्वासनञ्च नगरात् प्रव्रज्या च परन्तप!" भा० उ० ८६ अ०।

निर्वास्य त्रि० निर्+वस-णिच्-कर्म्मणि यत्। नगरादितो बहिष्कार्य्ये। "कन्यां कृतान्नो निर्वास्यः स्त्रियं वाऽस्यावकर्त्तयेत्" मनुः। "निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव च" याज्ञ०।

निर्वाह पु० निर्+वह-घञ्। १कार्य्यसम्पादने २निष्पादने ३समाप्तौ च। "यावता स्यात् स्वनिर्वाहः स्वीकुर्य्यात्तावद्देव तु" नारदीयपु० "स्वतिथ्या कर्मनिर्वाहे" ति०त०।

निर्विकल्प(क) त्रि० निर्गतो विकल्पो ज्ञातृज्ञेयादिविभागो विशेषप्रविशेषघतासम्बन्धो वा यस्मात् प्रा०ब० वा कप्। १वेदान्तोक्ते ज्ञातृज्ञेयादिविभागशून्ये ब्रह्मात्मैकात्मविषये अखण्डाकारके एकविषयके विशेषप्रविशेषघतासम्बन्धरहिते ज्ञाने, "आत्मारामा विहितरतयो निर्विकल्पे समाधाविति वेषी०। "तत् प्रमा नाप्रमा नापि ज्ञानं यन्निर्विकल्पकम्। प्रकारतादिशून्यं हि सम्बन्धानवगाहि यत्" इति न्यायोक्ते अलौकिके आलोचनात्मके २ज्ञानभेदे। "ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते" भाषा०। आलोचनशब्दे ८२६ पृ० दृश्यम्। बौद्धमते निर्विकल्पकज्ञानमेव प्रमाणं कल्पनाशून्यत्वात् तद्भिन्नं सर्वमप्रमाणं यथोक्तं सर्वदर्शनसंग्रहे

"ततश्चार्थो द्विविधः ग्राह्योऽध्यवसेयश्च तत्र यद्रूपं निर्विकल्पकरूपं प्रमाणं कल्पनापोढत्वात् अध्यवसायः सविकल्पकरूपोऽप्रमाणं कल्पाज्ञानत्वात्। तदुक्तम् "कल्पनापोढमभ्रान्तं प्रत्यक्षं निर्विकल्पकम्। विकल्पो वस्तुनिर्भासादसंवादादुपप्लवः। ग्राह्यं वस्तु प्रमाणं हि यद्रूपं यदितोऽन्यथा। न तद्वस्तु न तज्ज्ञानं शब्दलिङ्गेन्द्रियादिजमिति" च। ननु सविकल्पकस्याप्रामाण्ये कथं ततः प्रवृत्तस्यार्थप्राप्तिः संवादश्चोपपद्येयातामिति चेन्न तद्वृद्धं मणिप्रभाविषयमणिविकल्पन्यायेन पारम्पर्य्येणार्थप्रतिलम्भसम्भवेन तदुपपत्तेः"।

निर्विकार पु० प्रकृतेरन्यथाभावः विकारः स निर्गतोयस्मात् प्रा०ब०। जन्मादिषड्भावविकारहीने १परमात्मनि। २विकारशून्ये त्रि०। "त्वयेह भवने मह्यं वस्तव्यं निर्विकारया" हरिवं० ६अ०। "सिद्ध्यसिद्ध्योर्निर्विकारः कर्त्ता सात्विक उच्यते" गीता।

निर्विचार त्रि० निर्गतो विचारो यतः प्रा०ब०। १विचाररहिते "रे रे स्वैरिणि! निर्विचारकविते! साक्षत् प्रकाशीभव" चन्द्रालो०। पात० सूत्रोक्ते सूक्ष्मविषयके समापत्तिरूपे २समाधिभेदे च "एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता" पात० सू०। "तत्र भूतसूक्ष्मेष्वभिव्यक्तधर्म्मकेषु देशकालनिमित्तानुभवावच्छिन्नेषु या समापत्तिः सा सविचारेत्युच्यते। तत्राद्ये कवृद्धिनिर्ग्राह्यमेवोदितधर्म्मविशिष्टं भूतसूक्ष्मालम्बनीभूतं समाधिप्रज्ञायास्तपतिष्ठते। या पुनः सर्वथा सर्वतः शान्तोदिताव्यपदेश्यधर्म्मानवच्छिन्नेषु

सर्वधर्मानुपातिषु सर्वधर्मात्मकेषु समापत्तिः सा निर्विचारेत्युच्यते एवं स्वरूपं हि तत् भूतसूक्ष्मम् एतेनैव स्वरूपेणालम्बनीभूतमेव समाधिप्रज्ञास्वरूपमवद्योतयति। प्रज्ञा च स्वरूपशून्येव अर्थमात्रा यदा भवति तदा निर्विचारेत्युच्यते। तत्र महाभूतविषया सवितर्का, निर्वितर्का च सूक्ष्मविषया सविचारा निर्विचारा च एवमभयोरेतयैव निर्वितर्कया विकल्पसहितयाख्यातेति" भा० "निर्विचारवैशारद्ये अध्यात्मप्रसादः" सू०। "ऋतम्भरा तत्र प्रज्ञा" सू०। "श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात्। समाधिजसंस्काराः व्युत्थानसंस्कारान् बाधते तत्समुद्भवाश्चित्तधर्मा आत्मदर्शनसंस्कारान्। तदुभयसंस्कारक्षये सर्वसंस्कारक्षयान्निर्बीजः समाधिः" भा०। "तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः" पात० सू०। "स खल्वयं सम्प्रज्ञातः समाधिः सालम्बनत्वात् सबीजः" भा०। "तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः" पात० सू०। "तस्यापि परवैराग्यात् सर्वसंस्कारक्षये निर्बीजः समाधिः" भा०।

निर्विचिकित्स त्रि० निर्गता विचिकित्सा यस्य प्रा० ब०। निःसंशये।

निर्वितर्क त्रि० निर्गतो वितर्को यस्मात् प्रा० ब०। १वितर्कशून्ये पात० सू० उक्ते २समाधिभेदे तल्लक्षणादिकं तत्रोक्तं यथा "स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का" सू० "शब्दार्थस्मृतिप्रविलये सति प्रत्युदितखण्डवाक्याकारप्रतिभासितया स्वयमुभयात्मानात्मत्वेन स्वरूपशून्येव निर्वितर्का समापत्तिः" भा०।

निर्विद्ध त्रि० निर्+विध्-क्त निर्विद्धक्लेशसंस्कारत्वात् दग्धबीजत्वे खण्डितत्वे। १निर्वेदयुक्ते २खिन्ने ३प्राप्तवैराग्ये विरक्ते च। "निर्विद्धोऽहं दक्षिणेन मार्गेण गतागतलक्षणेन" दैशोप० भा०।

निर्विन्ध्य त्रि० निर्गतः विन्ध्यात् नि०त०। १विन्ध्यपर्वतनिःसृते। तद्भवे २नदीभेदे स्त्री "गोदावरी निर्विन्ध्या पयोष्णी इत्यादि" भाग० ५।१९।८ भारतवर्षनदयुक्तौ। "निर्विन्ध्यायाः पथि भवरसाभ्यन्तरः सन्निपत्य" मेघ०। "नर्मदा सुरसाद्याश्च नद्यो विन्ध्यविनिर्गताः। तापी पयोष्णी-निर्विन्ध्या-कावेरीप्रमुखा नदी" विष्णुपु०।

निर्विशेष न० निर्गतो विशेषो यस्य प्रा० ब०। सर्वैकरूपे विशेषरहिते परब्रह्मणि। "निर्विशेषं परं ब्रह्म साक्षात्कर्त्तुमनीश्वराः। ये भवन्त्यत्र ते कल्पन्ते सविशेषनिरूपणैः" विशेषरहिते तत्स्वरूपे त्रि०। "प्रवातनीलोत्पलनिर्विशेषम्" कुमा०।

निर्विष त्रि० निर्गतं विषं यस्मात् प्रा० ब०। १विषरहिते २अविषायां स्त्रियां ङीष्। "निर्विषा कटुका शीता कफवातास्रदोषनुत्। अनेकविषहन्त्री च व्रणनिर्भूजकारिणी" राजनि०। गौरा० ङीष्। निर्विषो २श्यामकन्दायां स्त्री। इयं चतुर्विधा भवति "रक्ता श्वेता श्यामा कृष्णा पीतवर्णा तथैव च। यथापूर्वञ्च विज्ञेया बल्या चेष्टा गुणोत्तमा। सर्वदोषहरी ह्येषा कृष्णा वातप्रणाशिनी। श्लेष्मजान् विंशतिरोगान् सद्यो हन्यात् निषेवणादिति" भावप्र०।

निर्विष्ट त्रि० निर्+विश-क्त। कृतनिर्विशे १कृतभोगे २प्राप्तवेतने लब्धभृतौ ३कृतविवाहे ४कृताग्निहोत्रे च। "ज्येष्ठेऽनिर्विष्टे कनीयान् निर्वेशात् परिवेत्ता भवति" यदा० त० स्मृतिः। ५भोग्ये च। "खनिस्निग्धेषु निर्विष्टो भुङ्क्ते भूतेषु तद्गुणान्" भा० १।२ अ०। ६भुक्ते च "निर्विष्टविषयस्नेहः" रघुः। "निर्विष्टं वैश्यशूद्रयोः" गौतम०। निर्विष्टं वेतनलब्धम् निर्वेशो स्मृतिभोगयोरित्युक्तेः" एका० त० रघु०। निर्वेशः स्मृतिर्वेतनं भोगश्च।

निर्वीज त्रि० निर्गतं बीजमस्य। १बीजशून्ये २कारणरहिते पात० उक्ते ३समाधिभेदे पु०।

"तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः" पात० सू० "स न केवलं समाधिप्रज्ञाविरोधी प्रज्ञाजनितानां संस्काराणामपि प्रतिबन्धी भवति। कस्मात्? निरोधजः संस्कारः समाधिजान् संस्कारान् बाधते इति निरोधस्थितिकालक्रमानुभवेन निरोधचित्तजनितसंस्कारोपचितत्वमनुमेयम्, व्युत्थाननिरोधसमाधिप्रभवैः सह कैवल्यभागीयैः संस्कारैश्चित्तं खल्वयं प्रकृताववस्थितायां प्रविलीयते तस्मात्ते संस्काराश्चित्तस्याधिकारविरोधिनो न स्थितिहेतवो भवन्तीति यस्मादवस्थिताधिकारं सह कैवल्यभागीयैः संस्कारैश्चित्तं विनिवर्त्तते तस्मिन्निवृत्ते पुरुषः स्वरूपप्रतिष्ठः। अतः शुद्धो मुक्त इत्युच्यते" भा०"तस्यापि निरोधे सर्वनिरोधात् निर्बीजः समाधिः। परेण वैराग्येण ज्ञानप्रसादमात्रलक्षणेन सर्वसंस्कारोपजननद्वारा तस्यापि प्रज्ञाजनस्य संस्कारस्य निरोधे न केवलं प्रज्ञाया इत्यपिशब्दार्थः सर्वसंस्कारोत्पद्यमानस्य संस्कारप्रज्ञाप्रवाहस्य निरोधात् कारणाभावेन कार्य्यानुत्पादनात् सोऽयं निर्बीजः समाधिः। व्याचष्टे स निर्बीजः समाधिः समाधिप्रज्ञाविरोधिनः परत्वात् वैराग्यात् उपजायमानसंस्कारद्वारेण न केवलं समाधिप्रज्ञाविरोधी प्रज्ञाजनता-

नामप्यसौ संस्काराणां परिपन्थी भवति। ननु वैराग्यजं विज्ञानं सदविज्ञानं प्रज्ञाभावं बाधतां संस्काररूपविज्ञानं कथं बाधते इदा हि स्वप्रदृष्टार्थस्मृतिरित्याशयवान् पृच्छति। कस्मादिति उत्तरं निरोधज इति निरुध्यतेऽनेन प्रज्ञेति निरोधः परं वैराग्यं ततो जातो निरोधजः संस्कारः, संस्कारादेव दीर्घकाननैरन्तर्यसत्कारासेवितपरवैराग्यजन्मनः प्रज्ञासंस्कारबाधो नतु विज्ञानादित्यर्थः। स्यादेतन्निरोधजसंस्कारसद्भावे किं प्रमाणं स हि प्रत्यक्षेण नानुभूयते स्मृत्या वा कार्य्येणानुमीयेत न च सर्ववृत्तिमात्रनिरोधे प्रत्यक्षमस्ति योगिनः, नापि स्मृतिः तस्य वृत्तिमात्रनिरोधितया स्मृतिजनकत्वासम्भवादित्यत आह निरोधेति। निरोधे स्थितिः चित्तस्य निरुद्धावस्थेत्यर्थः। तस्याः कालक्रमो मुहूर्त्तार्द्धयामयामाहोरात्रादिसदनुभवेन। एतदुक्तं भवति वैराग्याभ्यासप्रकर्षानुरोधी निरोधप्रकर्षो मुहूर्त्तार्द्धयामादिव्याप्तितयानुभूयते योगिना, न च वैराग्यस्याक्रमनियततया परस्परमसम्भवन्मुहूर्त्तार्द्धकालव्यापिनया सातिशयं निरोधं कर्त्तुमीशत इति तत्तद्वैराग्यक्षयप्रचयजन्यः स्यायी संस्कारः प्रचयपेक्षित्व्य इति भावः। ननु क्लिष्टानां प्रज्ञासंस्काराः, निरोधसंस्कारास्तु कुतः सक्लिष्टत्वे सतुच्छेदे वा साधिकारत्वमेव इत्यत आह व्युत्थानेति। व्युत्थानञ्च तस्य निरोधसमाधिश्च सम्प्रज्ञातः तत्प्रभवाः संस्काराः कैवल्यभागीया निरोधजाः संस्कारा इत्यर्थः। व्युत्थानप्रज्ञासंस्काराच्चित्ते प्रलीना इति भवति चित्ते व्युत्थानप्रज्ञासंस्कारवत्, निरोधसंस्कारस्तु प्रत्यस्त इवास्ते चित्ते। निरोधसंस्कारे सत्यपि चित्तमनधिकारवत्, पुरुषार्थजनकं हि चित्तं साधिकारं शब्दाद्युपभोगविवेकख्याती च पुरुषार्थौ संस्कारशेषतायां तु न बुद्धेः प्रतिसंवेदी पुरुष इति नासौ पुरुषार्थो विदेहप्रकृतिलयानां न निरोधभागितया साधिकारं चित्तम् अपि तु क्लेशवासितमेत्याशयवानाह यस्मादिति। शेषं सुगमम्" विव०। २कालक्षीद्राक्षायां स्त्री राजनि०।

निर्वीर त्रि०निर्गतो वीरः शूरः पतिःपुत्रो वा यस्य यस्या वा ब्रा०ब०। १वीरशून्ये "कैनापीदमहो मद्भुजबलतो निर्वीरमुर्वीतलम्" भट्टिना०। २पतिपुत्रविहीनायामवीरायां स्त्रियां स्त्री हेमच०।

निर्वृत त्रि० निर्+वृ-क्त। सुखे।

निर्वृति स्त्री निर्+भावे क्तिन्। १स्वास्थ्ये सुखे २मोक्षे हेमच०। "न जातु कामो जपते न निर्वृतिम्"। "सर्व्वं तुनिर्वृतिकरे नियतस्तुपेति" माघः।

निर्वृत्त त्रि० निर्+वृत-क्त। १निष्पन्ने अमरः। "विप्रेन्यूने त्रिभिर्वर्षैर्न्यूने युद्धिस्तु नैश्चिकी। निर्वृत्तचूडके विप्रे त्रिरात्राच्छुद्धिरिष्यते" यु० त० अङ्गिराः।

निर्वृत्तयज्ञु पु० द्वापरयुगीये यदुवंश्ये ऋषभेदे। "दृष्ण्यन्धकेषु चान्येषु सुखेषु मधुसूदनः। गुरुभारञ्च तं भारं ययौ द्वारवतीं प्रति" "रामे भारं समारोप्य युयुधाने च वीर्य्यवान्। अक्रूरे विप्रवो चापि" इत्युपक्रमे "निर्वृत्तयज्ञौ विक्रान्ते भङ्गकारे विदूरथे" इत्यभिधानम् हरिवं० ११७ अ०।

निर्वृत्ति स्त्री निर्+वृत-भावे क्तिन्। निष्पत्तौ "वाचि प्राणे च पक्षयोर्यत्ननिर्वृत्तिमत्त्वाम्" मनुः। "न विना भावैर्लिङ्गं न विना लिङ्गेन भावनिर्वृत्तिः" सां०का०। "यथा दृष्टेन दोषेण यथा चातुविसर्पता। निर्वृत्तिरामयस्यैव संप्राप्तिर्जातिरागमैः" माधवनिदानम्। निर्गता वृत्तिर्जीविका यस्य। २जीविकारहिते त्रि०।

निर्वेद पु० निर्+विद-भावे घञ्। १स्वावमाननायाम्। स च व्यभिचारिभावभेदः "निर्वेदो वेगदैन्यश्रमसदज्डतेत्यादिना व्यभिचारिभावान् विभज्य सा० द० लक्षितो यथा "तत्त्वज्ञानाप्तदीप्त्यादेर्निर्वेदः स्वावमानना। दैन्यचिन्ताऽश्रुनिःश्वासवैवर्ण्योच्छ्वसितादिकृत्" अस्य व्यभिचारिभावत्वेऽपि क्वचित् स्थायिभावत्व द्योतनार्थं प्राग् निर्देशः अतएव "निर्वेदस्थायिभावोऽपि शान्तोऽस्ति नवमो रसः" काव्यप्र० उक्तम्। एतन्मते निर्वेद एव शान्तरसे स्थायिभाव इति भेदः। २परमवैराग्ये "ततः कदाचिन्निर्वेदान् निराकाराश्रितेन च। लोकतन्त्रं परित्यक्तं दुःखार्त्तेन भृगं मया" भा० मा० "तदा गन्तासि निर्निर्वेदं श्रोतव्यस्य श्रुतस्य च" गीता "जातनिर्वेदसङ्गो स कर्मनिर्वेदमब्रवीत्। कर्म्म निर्वेदसङ्गो च धर्म्मं निर्वेदमब्रवीत्" भा०मा०२१८अ०। ३खेदे "अनिर्वेदः सदा कार्य्यो निर्वेदाद्धि कुतः सुखम्। प्रयत्नात् प्राप्यते ह्यर्थः कस्माद् गच्छत निर्द्दयाः" १५२ अ०। ४अल्पकालेनाभ्यसिद्धपदार्थेषु निष्प्रयोजनत्वज्ञाने नानुतापभेदे च। [शब्दे १७१२ पृ० दृश्यम्।

निर्वेधिम पु० सुश्रुतोक्ते कर्णवेधनाकारभेदे कर्णव्यधविधि-

निर्वेश पु० निर्+विश-घञ्। १भोगे, २वेतने, ३मूल्यदाने,

भेदि०। ४विवाहे च अमरः। "कालमेव प्रतीक्षते निर्वे(र्दे)शं भृतको यथा" मनुः। "अर्थानुक्रतनिर्वेशो जन्मकोशंहसापि" माघ० ६।२।७ श्लोकः।

निर्वेष्टन न० नितरां वेष्टनमत्र। १क्षुद्रवेष्टनवल्लिकायां नाडीकरे हारा० प्रा०ब०। वेष्टनरहिते त्रि०।

निर्वेष्टुकाम पु० निर्वेष्टुं कामो यस्य तमोऽन्तलोपः। विवेष्टुकामे। "निर्वेष्टुकामो रोगार्त्तो वियच्चुम्बने स्थितः। अभियुक्तसधाऽन्वेन राजकर्मोद्यतस्तथा"। आशेधनिषेधे नारदः।

निर्व्यथन न० निर्+व्यध-भावे ल्युट्। १नितरां व्यधने २छिद्रे अमरः। निर्गतं व्यथनं यतः प्रा०ब०। ३व्यथाशून्ये त्रि०।

निर्व्यापार त्रि० निर्गतो व्यापारो यस्मात् प्रा०ब०। व्यापारशून्ये तत्सौ स्त्रियाम्। (तं मधिम्) "दधार मैथिलीकण्ठनिर्व्यापारेण बाहुना" रघुः।

निर्व्यूढ त्रि०निर्+वि-वह-क्त। १निष्पन्ने २समाप्ते ३दत्तसम्पन्ने अप्रतिबन्धे ४यत्नेष्टविनियोगार्हे। यथा स्त्रीषां पतिपुत्रादिधने न निर्व्यूढं स्वत्वं पुंसान्तु तन्निर्व्यूढं स्वत्वम् अप्रतिबन्धकतया यत्नेष्टविनियोगार्हत्वात्। पुत्रिकारूपाया दुहितुस्तु पुत्रोत्पत्त्यनन्तरं पितृधने निर्व्यूढं स्वत्वं पुत्रोत्पत्तेः पूर्वन्तु न निर्व्यूढमिति भेदः इति दायभागमतम्। मिताक्षरामते तु स्त्रीसंक्रान्तधनस्यापि स्त्रीधनतया यत्नेष्टविनियोगार्हत्वेन तत्र स्त्रीणां निर्व्यूढं स्वत्वम्।

निर्व्यूह पु० निर्+व्यूह+घञ्। १निर्व्यूहे नागदन्ताकारकाष्ठे हेमच०। "द्वारतोरणनिर्व्यूहध्वजसंबाधशोभिना" भा० ब०१६०अ०। प्रा०ब०। २व्यूहरहिते सैन्यादौ त्रि०।

निर्हरण न० निःशेषेण हरणम्। १दाहार्थं शवादेर्बहिर्नयने, निःसारणे च। तस्य निर्हरणादीनि सम्भरेतस्य भामिनि!। युधिष्ठिरः कारयित्वा सङ्कर्त्तुं दुःखितोऽभवत्" शु० त० भागवतवाक्यम्। २नाशने च "तस्माद्बुद्धिः कर्त्तव्यं कर्म्मणां निष्कृणाशनम्। पीडानिर्हरणम्" भाग० ७।७।२८।

निर्हा(र्ह्रा)द पु० निर्+हद (हृद) वा घञ्। शब्दभेदे खगादीनां शब्दे "सारसानान्तु निर्हादमयोदकमसंशयम्" भा० व० २११०। "सारसैः कलनिर्हादैः क्वचिदुन्नमिता ननौ" रघुः।

निर्हार पु० निर्+हृ-घञ्। १निष्कासनशब्दादेः शब्दभेदे २मलमूत्रादित्यागे "आहारनिर्हारविहारयोगाः सुसंहता धर्मविदा तु कार्य्याः" आ०त०। ३प्रेतदेहस्य दाहार्थं बहिर्नयने, ४यत्नेष्टविनियोगे च। "न निर्हारं स्त्रियः कुर्युः कुटुम्बात् बन्धुमध्यगात्। स्वकादपि च वित्तादि स्वस्य भर्त्तुरनाज्ञया" मनुः।

निर्हारक त्रि० निर्हरति बहिर्गमयति निर्+हृ-ण्वुल्। अवादेर्हृतः बहिष्कारके "प्रेतनिर्हारकाश्चैव वर्ज्जनीयाः प्रयत्नतः" मनुः प्रेतनिर्हारकस्य अपाङ्क्तेयत्वोक्तिर्धनग्रहणेन तन्निर्हारकविषया। धर्म्मार्थं तन्निर्हारे तु न दोषः "एतद्धि परमं तपो यत् प्रेतमरण्ये हरन्तीति" कुल्लूकभट्टधृतशङ्खात्। तद्विधानात्।

निर्हारिन् पु० निर्हरति दूरं गच्छति निर्+हृ-णिनि। १दूरगामिगन्धे अमरः। २निर्हरणकर्त्तरि। ३अवादेर्बहिर्निष्कारके त्रि०च।

निर्हिम अव्य० हिमस्याभावः अव्ययी०। १हिमाभावे निर्गतं हिमं यतः प्रा० ब०। २हिमशून्ये त्रि०।

निर्ह्रास पु० निःशेषेण ह्रासः। नितान्तह्रासे "निर्ह्रास एवैकखिनृ" आश्व० श्रौ० ६।६।६।

निलय पु० निलीयतेऽत्र ली-आधारे अच्। १गृहे २आवासस्थाने च अमरः। "निलयः श्रियः सततमेतदिति" माघः। ३निःशेषेण लये ४अदर्शने। उभयत्र "सन्ध्यारपूतानि दिगन्तराणि कृत्वा दिनान्ते निलयाय गन्तुम्। प्रचक्रमे पल्लवरागताम्रा प्रभा पतङ्गस्य सनेव धेनुः" रघुः।

निलयन न० निलीयतेऽत्र नि+ली आधारे ल्युट्। नीडादावाश्रये। "निलयनञ्चानिलयनञ्च" तैत्ति०उप० "निलयनं नीडमाश्रयो मूर्त्तेष्वेव धर्मः" भा०। "विष्णुं तत् सर्वदृग्भं सभयं भारतावरम्। बलमाक्षीत् तदा सर्वक्षत्रे द्रोणार्जुनावुभौ। तावेवास्तां निलयनं तावास्तांवनमेव च" भा०द्रो० १८८ अ०। भावे ल्युट्। २श्लेषणे सम्बन्धे "उत्तमाङ्गे निलयनं कपोतकबुधस्तीनाम्" सुश्रु०।

निलिम्प पु० नि+लिप कर्त्तरि अ। १देवे "जटाकटाहसम्भ्रमभ्रमन्निलिम्पनिर्झरी" रावणकृतशिवस्तोत्रम्। "वेडसां स्व ध्रुवायां दिशि निलिम्पा नाम देवास्तेषाम्" अथ० १।२६।५। २स्त्रीगव्यां स्त्री त्रिका०। स्वार्थे क। निलिम्पिका सौरभेय्यां स्त्रीगव्यां स्त्री त्रिका०।

निलीन त्रि० नितरां लीनः। अत्यन्तसम्बद्धे तद्बहुरदेशादि ऋक्षादि० क। निलीनक तत्सम्बद्धदेशादौ त्रि०

निवचन न० निरन्तरं वचनम् प्रा० त०। निरन्तरवचने। "तदेतन्निवचनमिवास्ति" शत०ब्रा०२।४।३।४ "निवचनं निरन्तरवचनम्" भा०। अभावे अव्ययी०। २वचनाभावे अव्य०।

निवचने अव्य०निवचनं वचनाभावः एतदन्तत्वं निपातनात्। वचननियमे "मध्ये पदे निवचने च" पा०"अनत्याधाने (उपक्लेशाभावे) एतैः सह क्त्वो विभाषया उप०स०। "निवचनेक्त्व निवचने क्त्वेति वा वाचं नियम्येत्यर्थः" सि० कौ०।

निवत् त्रि० नि+ "उपसर्गाच्छन्दसि धात्वर्थे" पा० "धात्वर्थविशिष्टे साधने वर्त्तमानादुपसर्गादुत्तरे स्वार्थे वतिः स्यात्" सि० कौ० वेदे वति। निम्नगताद्यर्थे "निवतः निम्नगतानित्यर्थः" सि०कौ०। "दृढं निवत्स्वपः स्वप्नया नरः" ऋ०१।१६१।११। "निवत्सु प्रवणदेशेषु" भा० नीचैर्भाववति २निम्नदेशे च "स चेद्वतो निवतो याति वेविषत्" ऋ० ३।२।१०। "निवतः नीचैर्भाववतः प्रदेशान्" भा० "अग्नीव निवता चरन्" ऋ०८।४५।२८। "अक्षै रीयन्ते निवनेव सिस्रवः" ऋ० १०।४०।६। "निवनेव प्रवणेनेव" भा० छान्दसः तस्य नः।

निवपन न० नि+वप-भावे ल्युट्। पित्राद्युद्देशेन दाने "ऋणवो धर्मनित्यास्तु कृत्वा निवपनान्युत। तर्पणश्राद्धकुर्वन्त" भा० अनु० ८२ अ०। "यत्र वा निवपनम्" कात्या० ७।७।२ "अस्मिन् काले वा उत्तरदेशे सोमनिवपनं भवति" कर्कः।

निवर त्रि० नि+अन्तर्भूतण्यर्थे वृ-कर्त्तरि अच्। १निवारके "आदु मे निवरो भुवत्" ऋ० ८।६१।५। "निवरो निवारयिता" भा०। नितरां व्रियते वृ-वरणे कर्मणि "अन्येभ्योऽपि दृश्यते" पा० अप्। "कुमार्याश्चाभिविवाहितायां स्त्रियां स्त्री सि० कौ०।

निवर्त्तन न० नि+वृत-णिच्-भावे ल्युट्। १निवारणे "सेतुश्च द्विविधो ज्ञेयः खेयो बन्ध्यस्तथैव च। तोयप्रवर्त्तनात् खेयो बन्ध्यः स्यात् तन्निवर्तनात्" मिताक्षरा। "तथा कराणां दृषकेन वंशः। निवर्त्तनं विंशतिसंख्यैः क्षेत्रं चतुर्भिश्च भुजैर्निबद्धम्" क्षीरस्वामीपरिभाषिते (१विघा) क्षेत्रभेदे "विष्णवे विषयं यामं यामार्द्धमपि यच्छितः" इत्युपक्रमे "निवर्त्तनत्रयं वा यो विष्णवे विनिवेदयेत्। सर्वगोर्वाणनिलये स क्रीडति युगावधि। निवर्त्तनशतेनापि यः प्रोक्षयति केशवम्। शतयोजनविस्तीर्णं स राजा भूतले भवेत्" हेमा०दा० वराहपु०। अन्यत्राऽपि निवर्त्तनमानम् यत्राह बृहस्पतिः "दण्डहस्तेन दण्डेन त्रिंशद्दण्डो निवर्त्तनम्"। मत्स्यपु०"दण्डेन सप्तहस्तेन त्रिंशद्दण्डो निवर्त्तनम्"। देशभेदात् शक्त्यपेक्षया वा दाने फलतारतम्यद्योतनाय मानभेदोक्तिः।

निवसति स्त्री नि+वस-आधारे अतिच्। गृहे शब्दरत्ना०

निवसथ पु० न्युप्रतेऽत्र नि+वस-आधारे अथच्। ग्रामे हेमच०।

निवसन न० न्युप्रतेऽत्र नि+वस-निवासे आधारे ल्युट्। १गृहे शब्दर०। नि+वस-आच्छादने ल्युट्। २वस्त्रे हलायुधः। "प्राप्ननाभिनदमज्जनमाशु प्रस्थितं निवसनप्रहणाय" माघः। "हेमनैर्निवसनैः सुमध्यमा" रघुः।

निवह पु० नितरां वहते वह-घ। १समूहे अमरः "भाग्ये (११अंशे) शकटपुष्पिन्द्रप्रध्वंसकरोऽम्बुनिवहमोक्षाय" बृ० स०८अ०। नि+वह-अच्। २सप्तवायुमध्ये वायुभेदे। अनिलशब्दे १६६ पृ० दृश्यम्। "निवहो यत्र वा याति केषाञ्चित्र सुखप्रदः। न प्रचण्डो न च मृदुः प्रमादी च प्रभञ्जनः" ज्यो०त०।

निवाकु त्रि० नि+वच-वा० कुक्। निवचनशीले। ततः बाह्वा० अपत्यादौ दक्। नैवाकवि तदपत्यादौ।

निवात पु० निहतो निरुद्धो वा वातोऽस्मात् प्रा०व०। १दृढकवचे शस्त्राद्यभेद्यकवचे, २आश्रये च अमरः। निवा-(वां)त निष्कम्पमिव प्रदीपम्" कुमा०। "निवां(वा)तनिष्कम्पतया विभाति" रघुः।

निवातकवच पु० हिरण्यकशिपोः पुत्रस्य संह्लादस्य दैत्यस्य पुत्रे १दैत्यभेदे अग्निपु०। निवातमभेद्यं कवचं येषाम्। २दानवभेदे ते च इन्द्रप्रेरितेनार्জুनेन निहतास्तत्कथा भा०व०१६८अध्यायादौ। "निवातकवचानाम दानवा मम शत्रवः। समुद्रकुक्षिमाश्रित्य दुर्गं प्रतिवसन्त्युत। तिग्मकोष्ठः समाख्यातास्तुल्यरूपबलप्रभाः। तांस्तात्र जहि कौन्तेय! दुर्वर्षस्ते भविष्यति" १६८ इत्युपक्रमे ५ अध्यायैस्तद्वधो वर्णितः।

निवान्या स्त्री नितरां वाति गच्छति गौरत्वेन नि+वा-क-निवः गौरा अन्यः परकीयोवत्सो यस्याः। परकीयेण वत्सेन या स्तनवत्या गौर्दुह्यते तस्यां गवि। "अभिलक्षार्द्धमपिहा निवान्या दुग्धे" कात्या०श्रौ० ५।८।१८।

निवान्यवत्सा स्त्री निवः गौरा अन्यस्तावत्सः अन्यवत्सो यस्याः। स्वदुग्धेपायिपरकीयवत्सयुक्तायां गवि "निवा-

व्यवत्सामेष्टवै ब्रूयात् तस्मै पयसा जुहुयादार्त्तं वा एतत् पयो यन्निवान्यवत्सायाः आर्त्तमेतदग्निहोत्रं यन्मृतस्य तदार्त्तमेव तदार्त्तं निष्कृत्य श्रेयान् भवति" शत०ब्रा० १२।५।३।४ ।

निवाप पु० न्युप्यते नि+वप-घञ्। १पित्राद्युद्देशेन दाने २दानमात्रे च अमरः। "भर्त्तृलोकप्रपन्नानां निवापान् विदुः पृथक्"। "अनुगच्छन्ति निवापदत्तिभिः" रघुः

नि(नी)वार पु० नि+वृ-"नौ वृ-धान्ये" कर्मणि घञ् वा दीर्घः। नीवाराख्ये धान्यभेदे। नीवारशूकनिचितोऽपि केवलमहो सेयं कृताथा तनुः" मा०द०। निवारयति पापानि नि+वारि अच् वा० दीर्घः। दीर्घयुक्तः नदीभेदे स्त्री "नीवारां महितां चापि सुप्रयोगां जनाधिप!" भा० भी०८ अ०। ["कण्डूयनैर्दंशनिवारणैश्च" रघुः।

निवारण न० नि+वृ-णिच्-भावे ल्युट्। नितरां वारणे

निवास पु० नि+वस-आधारे घञ्। १गृहे २आश्रये च हेमच० "जगन्निवासो वसुदेवसद्मनि" माघः। भावे घञ्। ३वासे "कुम्भकारस्य शालायां निवासं चक्रिरे तदा" भा० आ० १८५ अ०। ततः घान्या० चतुरर्थी क। निवासक तत्सम्बन्धिगृहदेशादौ त्रि०।

निवासिन् त्रि०नि+वस+णिनि। १निवासकारके "क्रव्यादान् अकुतोभयान् सर्वांस्तथा ग्रामनिवासिनः" मनुः। "अथानाथा प्रकृतयो भावबन्धुनिवासिनः" रघुः।

निविड त्रि०नितरां विडति संहन्यते नि+विड-क। १सान्द्रे घने २नीरन्ध्रे ३दृढे च "गुरुनितम्बविम्बभारा" माघः। नितरां नासा नि+नासायाः विडच्। ४नतनासिकायां स्त्री हेमच० नितनासिकायुक्ते ५अघटीटे त्रि०।

निविद् स्त्री नि+विद-करणे क्विप्। १वाचि निघण्टुः। वैश्वदेवस्य शस्त्रे शंसनीये २मन्त्रपदभेदे च "कति देवा यात्तवल्क्येति स इमैतयैव निविदा प्रतिमेदे, यावन्तो वैश्वदेवस्य निविद्युच्यन्ते त्रयश्च स्त्री च शता त्रयश्च स्त्री च सहस्रा" छ०उप०। "स यात्तवल्क्योऽपि एतयैव ब्रह्मसाम्या निविदा प्रतिमेदे, यां संख्यां प्रष्टवान् शाकल्यो यावन्तो यावत्सङ्ख्याका देवा वैश्वदेवस्य शस्त्रस्य निविदि, निविद्धाम देवतासंख्यावाचकानि मन्त्रपदानि कानिचिद्वैश्वदेवे शस्त्रे शस्यन्ते तानि निवित्संज्ञकानि तस्यां निविदि यावन्तो देवाः श्रूयन्ते तावन्तो देवा इति। का पुनः सा निविदिति तानि निवित्पदानि प्रदर्श्यन्ते। त्रयश्च स्त्री च शता त्रयश्च देवा देवानां स्त्रीणि च शतानि पुनरप्येवं त्रयश्च स्त्री च सहस्राण्येतावन्तो देवाः" भा०। ३यज्ञसामान्यनूक्तशब्दार्थे "पदैराप्नोति निविदः" यजु०१८।२५ "पदैः निविदः न्यूङ्खानाप्नोति" वेददी०"सावित्रं शस्त्रमैकाहिके निविदं दधाति" "चतुर्थकं व्यावाश्वधिवीयं शस्त्रमैकाहिके निविदं दधाति" "अच्छावाकीयं शस्त्रमैकाहिके निविदं दधाति" वैश्वदेवं शस्त्रमैकाहिके निविदं दधाति" इत्यादीनि शत० ब्रा० १३।५।३।११ पठितानि।

निविधान न० निविद् न्यूङ्खो धीयतेऽस्मिन् धा-आधारे ल्युट्। ऐकाहिके यज्ञादौ "तद्यदैकाहिकानि निविधानानि भवन्ति" शत०ब्रा० १३।५।३।१२ यत्र यत्र निविद् धीयते तत् निविदितिशब्दे उक्तम् द्रष्टव्यम्।

निविरीस स्त्री निनता नासा "नेर्विडजविरीसचौ" पा० विरीसच् दन्त्योष्ठारम्भसामर्थ्यात् न षत्वम्। १नतायां नासिकायां २तद्युक्तपुरुषादौ त्रि०। ३सान्द्रे घने जटा० "उरुनिविरीसनितम्बभारखेदि" माघः।

निविष्ट त्रि०नि+विश-क्त। १चित्ताभिनिवेशयुक्ते २एकाग्रे च "भवन्ति साम्येऽपि निविष्टचेतसाम्" कुमा०।

निवीत न० नि+व्यच-क्त आदिः। १कण्ठलम्बिते यज्ञसूत्रे। व्येञ् संवरणे क्त संप्रसारणादि। २प्राचीनावीतभेदे अमरः "उपवीतं भवेद्यज्ञियं निवीतं कण्ठसज्जनम्" कूर्मपु० "अधो वासः प्रतिमुञ्चेत्तीर्थं संवेक्ष्य निवीते" कात्या०श्रौ०१५।५।१२ "निवीतञ्च कण्ठेसज्जनम्" कर्कः।

निवीतिन् त्रि० निवीतमस्यास्ति इनि। कण्ठलम्बितयज्ञसूत्रयुक्ते "ऋतोपवीतो देवेभ्यो निवीती च भवेत्ततः। मनुष्यांस्तर्पयेद्भक्त्या ऋषिपुत्रान्धरीक्षया" आङ्गि०त०ब्रह्मपु० "उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजैः। सव्ये तु प्राचीनावीती निवीती कण्ठसज्जने" मनुः। स्त्रियां ङीप् "त्वगुत्तरासङ्गवतीं निवीतिनीम्" कुमा०।

निवृत् स्त्री "ऊनाधिकैर्नैकेन निवृद्भुरिजौ" छन्दोऽनुक्रमणिकायां कात्यायनोक्तेषु गायत्र्यादिषडक्षरादिषु एकाक्षरन्यूनपादके छन्दोभेदे। [२परिवृते त्रि०।

निवृत न० नि+वृ-क्त। (वडनी) १उत्तरीये स्वामी।

निवृत्त न० नि+वृत-भावे क्त। १निवृत्तौ यत्नभेदे चित्तस्य विषयेभ्य २उपरमे च। ३अभावे न०। नञ्सुब्तत्पुरुषे "निवृत्तपदार्थक" इत्युक्तम्। "तस्यार्थः निवृत्तस्याभावः प्रदार्थो यस्येति नञ्सुब्ते भावे क्त इति" वैयाकरणभूषणे

उक्तं, हरिस्वाम्युक्तं यथा "अभावो वा तदर्थस्तु भाव्यस्य हि तदाश्रयात्" । कर्त्तरि क्त । ४निवृत्तियुक्ते त्रि० "निवृत्ततर्षैरुपगीयमानात्" भाग० १।१अ०। "निवृत्ते भरते धीमानलेरामत्तपोवनम्" भट्टिः । ५निवृत्तिपूर्वके कर्मणि न० "प्रवृत्तञ्च निवृत्तं च द्विविधं कर्म वैदिकम् । सगादौ सृजता सृष्टं ब्रह्मणा वेदरूपिणा" हेमा० व्रत० भृगुः । धर्मभेदस्य निवृत्तिपूर्वकत्वादुपचारात्त्र निवृत्तपदव्यपदेश्यता ।

निवृत्तसन्तापन न० निवृत्तं सन्तापनं यस्य । सन्तापविहीने। तस्य हितम् क । निवृत्तसन्तापनीय रसायनभेदे यथोक्तं सुश्रुते "यथा निवृत्तसन्तापा मोदन्ते दिवि देवताः । तथौषधीरिमाः प्राप्य मोदन्ते भुवि मानवाः । अथ खल्वमुं पुरुषा रसायनं नोपयुञ्जीरन् तद्यथा अनात्मवानसत्यो दरिद्रः प्रमादी व्यसनी पापकृत्त्वेजापमानी चेति । एतैरेव कारणैर्न सम्पद्यते । अज्ञानादनारम्भादस्वरचित्तत्वाद्दारिद्र्यादनावृत्तत्वादपमादौषधाभावाच्चेति" औषधशब्दे दृश्यम् ।

निवृत्तात्मन् त्रि० निवृत्तः विषयेभ्य उपरत आत्मा अन्तःकरणं यस्य । १विषयरागशून्यचेतस्के २विष्णौ पु० "अनिवर्त्ती निवृत्तात्मा" विष्णुस० "स्वभावतो विषयेभ्यो निवृत्त आत्मावस्येति विग्रहः" भा० ।

निवृत्ति स्त्री नि+वृत भावे क्तिन् । न्यायमतसिद्धे १यत्नभेदे "प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम् । एवं प्रयत्नवैविध्यं तान्त्रिकैः परिदर्शितम् । निवृत्तिश्च भवेद् द्वेषात् हिंसाधनाधियः" भाषा० "हिंसाधनता ज्ञानस्य दुःखसाधनविषयकनिवृत्तिं प्रति जनकत्वमन्वय व्यतिरेकाभ्यामवधारितमिति" सिद्धा० मीमांसकमते कल्पाधिकरणशब्दे "प्रवृत्त्युपाधिना विनाशं प्राप्स्यन् प्रागभाव एव प्रवृत्तिनिराकरणस्य साध्यमानो निवृत्तिरित्युच्यते" इत्युक्ते २पदार्थे । अधिकं तत्तच्छब्दे नञ्शब्दे च दृश्यम् "यौतुकप्रनिवृत्त्यर्थं यथा क्रियासु प्रवर्त्तते लोकः" सा०का० ।

निवृत्त्यात्मन् त्रि० निवृत्तिः आत्मा स्वरूपं यस्य । निषेधे "निषेधस्तु निवृत्त्यात्मा कालभाक्त्वमपेक्षते" ति०त० ।

निवेश पु० नि+विश–भावे घञ् । १प्रवेशे २उपवेशने आधारे घञ् । ३निवेशाधारे गृहादौ अस्य चुम्बा० उत्तरपदस्य संज्ञायामपि न णत्वम् अरनिवेशः । "श्रीमतां हरिस्वामिनीनिवेशः" किरा० । आधारे घञ् । ४शिविरे भावे घञ् । ५उद्वाहे विवाहे मेदिनिकोषः ।

निवेशन न० नि+विश–आधारे ल्युट् । १गेहे २नगरे हेमच० । ३निवेशाधारे पृथिव्यां स्त्री ङीप् । "क्षोणा पृथिवि ! नो भवान्वरा निवेशनी" "निविशन्ति जनायस्यां साधुप्रतिष्ठाना पृथिवी" वेददी० । भावे ल्युट् । ४प्रवेशे ५स्थितौ च जटाध० नि+विश+णिच्–भावे ल्युट् । ६विन्यासे "या गौरसिद्धार्थनिवेशवद्भिः" कुमा० ।

निवेश्य न० नि+विश–भावे ण्यत् । १व्याप्तौ । कर्मणि ण्यत् । २व्याप्ये त्रि० वा० कर्त्तरि ण्यत् । ३व्यापके देवभेदे पु० "निवेश्यं (देवभेदम्) मूर्द्धा" यजु० २५।२। ४आवर्त्ते ५नीहारजले पु० "अथ निवेश्यं स्टङ्क्षाति" शत०ब्रा० ५।३।४।११ "निवेश्य आवर्त्तः" भा० निवेश्यो भवः यत् । ६तत्र भवे त्रि० । ७तत्र भवे रुद्रे पु० "हृदयाय च निवेश्याय च" यजु० १६।४४ "निवेश्य आवर्त्तः नीहारजलं वा तत्र भवो निवेश्यः" वेददी० ।

निव्याधिन् पु० नितरां विध्यति हन्ति यत्नून् नि+व्यध–णिनि । १रुद्रभेदे "नमः यक्ष्माणाय निव्याधिने" यजु० १६।२०। २नितान्तव्याधके त्रि० ।

निश् स्त्री नितरां श्यति तनूकरोति व्यापारान् शो–क्विप् । १रात्रौ २हरिद्रायाञ्च निशाशब्दस्य शसादौ भत्वे च वा निश् आदेशः । "विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि" मनुः निशाशब्दे दृश्यम् ।

निशठ पु० बलदेवपुत्रभेदे "रामाच्च निशठो लक्ष्मे रेवत्यां दयितः सुतः" हरिवं० २६अ० ।

निशमन न० नि+शम–णिच्–ल्युट् वा ह्रस्वः । १दर्शने दृष्टौ २श्रवणे च मेदि० । निपूर्वकात् शमधातोः श्रवणार्थत्वं यथा "निशामय तदुत्पत्तिं विस्तरात् गदतो मम" देवीभा० । "अक्षिद्वितयसङ्गत्या निशम्यताम्" । "निशम्य ताः श्रेष्ठ गवीरभिधातुमधोक्षजः" माघः

निशा स्त्री नितरां श्यति तनूकरोति व्यापारान् शो–क । १रात्रौ २हरिद्रायाम् "अजगोपतियुग्मञ्च कर्किधन्विमृगा निशा" इति ज्योतिषोक्तेषु ३मेषादिराशिषु च । शसादौ भत्वे च वा निश् आदेशः । "अग्निहोत्रं जुहुयात् आद्यन्ते द्युनिशोः सदा" मनुः "न स्नानमाचरेत् भुक्त्वा नातुरो न महानिशि" मनुः "संविशन्ति कृशयनेषु निशां निनाय" रघुः "त्रिभागशेषायु निशासु च क्षणम्" कुमा० "निशातुषारैर्नयनाम्बुकल्पैः" भट्टिः । तत्पुरुषेऽस्य "विभाषा सेनासुराच्छायाशालानिशानाम्"

(ङीषता "श्वनिशं श्वनिशा वा" सि० कौ० । समाहारद्वन्द्वेऽपि ङीषता । "इन्द्रियाणां जये योगं स याति चेदु दिवानिशम्" मनुः ।

निशाकर पु० निशां करोति "दिवाविभानिशेति" या० ट० उप०स० । १चन्द्रे २कर्पूरे च अमरः । "दिवावलीबालनिशाकरांशुभिः" माघः "बलेऽपि गते निशाकरः" कुमा० । ३कुक्कुटे शब्दरत्ना० ।

निशाख्या स्त्री निशाया आख्या आख्या यस्याः । निशाह्वयायां हरिद्रायाम् अमरः ।

निशाचर पुंस्त्री निशायां चरति चर–ट । १राक्षसे २भूतग्राहे ३पेचके ४सर्पे च मेदि० "अर्जुनस्य वचः श्रुत्वा वित्रस्तोऽभून्निशाचरः" भा०अनु०१५२अ० "तस्योपाद्रवदुदस्य दक्षिणं दोर्निशाचरः" रघुः स्त्रियां जातित्वात् ङीष् । ५रात्रिचारिमात्रे त्रि० स्त्रियां टित्त्वात् ङीप् । सा च हरिद्रायां ७कैशिनीनामगन्धद्रव्ये च जटाधरः । "रामभल्लशरेण ताडिता दुःसहेन हृदये निशाचरी । गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा" रघुः । ८पिशाचादौ त्रि० ।

निशाचरपति निशाचरणां भूतानां पतिः । प्रमथपतौ १शिवे "ततो हरो जटी स्थाणुर्निशाचरपतिः शिवः" भा०द्रो० १२अ० २राक्षसेश्वरे रावणे च । [त्रिका० ।

निशाचर्मन् पु० निशाया चर्मेव आवरकत्वात् । अन्धकारे

निशाजल न० निशाजातं जलम् श०त०। हिमजले त्रिका०।

निशाट पुंस्त्री निशायामटति अट–अच् । १पेचके हेमच० स्त्रियां जातित्वात् ङीष् । २निशागतियुक्तमात्रे त्रि०

निशाटक पु० निशेव कृष्णत्वात् अटति निशायामटति वा अट–ण्वुल् । १शुनकुक्कुरे राजनि० । २रात्रिचरमात्रे त्रि० ।

निशाटन पुंस्त्री निशायामटति अट–ल्यु । १पेचके हेमा० स्त्रियां जातित्वात् ङीष् । २रात्रिचरमात्रे त्रि० स्त्रियां टाप् ।

निशात त्रि० नि+शो–क्त पचे इत्त्वाभावः । तेजिते तीक्ष्णीकृते "शराश्च दुर्गाश्च निशातमायुधम्" माघः "तस्यातिनिशातासिं प्रत्युद्यच्छ जिजीविषुः" भट्टिः ।

निशात्यय पु०ह्रस्व० । १निशावसाने । ७त० । २प्रभाते च हेमच० ।

निशाद पु० निशायामत्ति अद–अच् । १रात्रिभोजिनि २निषादे रत्नमालाधरः । [ब्दार्थकल्पतरुः ।

निशादर्शिन् पु० निशायां पश्यति दृश–णिनि । पेचके भ०

निशादि पु० ह्रस्व० । सायंसन्ध्यायां राजनि० ।

निशान न० नि+शो–भावे ल्युट् । तीक्ष्णीकरणे तेजने "क्रमादेतेऽत्र सन्देहे चान्तिनिन्दाविचारणे । निशानाजैवनिन्दासु रुग्जवेऽपि कितोमतः" शब्दचं० । "तेषां (शस्त्राणां) निशानार्थं शालमलिशिलामाधवर्षम्" सुश्रुतः

निशानाथ पु० ह्रस्व० । १चन्द्रे "अष्टमस्थे निशानाथे कण्टकैः पापवर्जितैः । प्रवासी सुखमायाति सौम्यैर्वाभसमन्वितः" षट्पञ्चाशिका । २कर्पूरे च अमरः ।

निशान्त न० नितरां शम्यते विश्रम्यतेऽत्र आधारे क्त । १भवने अमरः । "तस्याः स राजोपपदं निशान्तं कामीव कान्तहृदयं विवेश" रघुः "निशान्तनारीपरिधानधूनेत्यादि" माघः ह्रस्व० । २निशायाः अन्ते । ७त० । ३जघनि । "न निशान्ते परिम्लानो ब्रह्माधीत्य पुनः स्वपेत्" मनुः । प्रा०त० । ४नितान्तशान्ते च मेदि० । ततः उत्करा० । चतु० रर्थां ञ् । निशान्तीय तत्सम्बन्धिनष्टदेशादौ त्रि० ।

निशान्ध त्रि० निशायामन्धः ७त० । १रात्रान्धे नक्तान्धशब्दे दृश्यम् । २अतुकान्तायां स्त्री रात्रान्धस्तुचक्रयोगभेदो हरिव्यातके उक्तो यथा "शूरःस्तब्धो विकलनयनो निर्दयोऽर्कं तनुस्थे मेषे सस्त्रस्त्रिमिरनयनः सिंहसंस्थे निशान्धः" । "सिंहलग्ने तनुस्थे चार्के निशान्धः रात्रान्धो भवति" भट्टोत्पलः ।

निशापति पु० ह्रस्व० । १चन्द्रे २कर्पूरे च अमरः "क्षमस्विमुक्तिसंयुक्ता मध्यभुक्तिर्निशापतेः" ज्यो० सि० ।

निशापुत्र पु० निशायाः पुत्र इव । खेचरे नक्षत्रादौ तेषां रात्रौ पुष्टज्योतिष्कत्वात् रात्रिपुत्रतुल्यत्वम् । "खेचराश्च निशापुत्रास्तथा पातालवासिनः" हरिवं० २२६अ० ।

निशापुष्प न० निशायां पुष्प्यति पुष्प–विकासे अच् । कुसुदे उत्पले राजनि० ।

निशाबल पु०निशायां बलं वीर्यमस्य । मेषवृषधनुःकर्कटसिंहनक्रकराख्येषु षट्सु राशिषु यथोक्तं हरिव्यातके "मोऽजाश्विकर्किसिंहुना सङ्गता निशाख्याः पृष्ठोदया विमिथुनाः कथितास्तएव । शीर्षोदया द्विनवलाश्च भवन्ति शेषा लग्नं समेत्युभयतः पृथुरोभयुग्मम्" । "निशाख्या निशाबलसंज्ञा उत्तरत्र द्विनवला इत्युक्तेरत्रापि निशाबला इति, व्याख्यातं तत्प्रयोजनं, यात्रायां तल्लोकं यथा च "शस्तं दिवा द्विनवले निशि नक्तवीर्ये रात्रौ विपर्ययमतो गमनं न शस्तम्" । नक्तवीर्योदयोऽत्र ।

निशाभङ्गा पु०निशाया हरिद्रायाः भङ्गः इव भङ्गः यस्याः । दुग्धतुम्बीम् (डुधमेया) शब्दच० ।

निशामणि पु० निशायां मणिरिव प्रकाशकत्वात् । १चन्द्रे त्रिका० २कर्पूरे च ।

निशामन पुंस्त्री नि+शम–णिच्–ल्युट् । १दर्शने २आलोचने च मेदि० ३श्रवणे हेमच० ।

निशामुख न० ६त० । प्रदोषे "स चोपेन्द्रो हर्षं कृत्वा कान्तचन्द्रे निशामुखे" कथिसं० ७८अ० "व्रतं निशामुखे पाद्मम्" प्रा०त० ।

निशामृग पुंस्त्री निशाचरः सत्त्वः पशुः शा०त० । भृगादौ अमरः । स्त्रियां जातित्वात् ङीष् ।

निशारण न० नि+शृ–हिंसायां घञर्थे णिच्–भावे ल्युट् । १मारणे अमरः । स्वार्थे णिजभावे निशरणमप्यत्र ।

निशारत्न न० निशायां रत्नमिव प्रकाशित्वात् । १चन्द्रे हेमच० २कर्पूरे च ।

निशारुक पु० १सङ्गीतशास्त्रप्रसिद्धे रूपकभेदे यथा "दृढः प्रौढोऽथ खचरो विभक्तस्तरकमः । निशारुकः प्रतिताद्यः कथिताः सप्त रूपकाः" तस्य लक्ष्म यथा "लघु द्वन्द्वं गुरुद्वन्द्वं तत्र्यवसानकः स्मृतः । चतुर्विंशतिवर्णैस्तु रसे स्याद्ये निशारुकः" सङ्गीतदामोदरः । २ च तालविशेषः । तथा हि "प्रविश्य नर्त्तको रङ्गं विकीर्य्य कुसुमादिकम् । निशारुकेण तालेन कोमलं नृत्यमाचरेत्" सङ्गीतदा० । ३नितान्तस्निग्धे त्रि० [राजनि० ।

निशावन पु० निशानां हरिद्राणामिव वनमत्र । मणडपे

निशाविहार पुंस्त्री निशायां विहारोऽत्र । रात्रौ "इत्थं प्रसादं बुधि संहारं प्रचक्रतुः रामनिशाविहारौ" भट्टिः । स्त्रियां जातित्वात् ङीष् ।

निशावृन्द न० ६त० । रात्रिसमूहे मल्लिरा० ।

निशावेदिन् पु० निशा तन्मानं तत्परिच्छेदं वेदयति ज्ञापयति विद+णिच्–णिनि । कुक्कुटे हेमच० ।

निशाहस पु० निशायां हसति शुभ्रविकाशेन हस–अच् । कुमुदे त्रिका० । [हरिद्रायाम् अमरः ।

निशाह्वा स्त्री निशाया आह्वा आह्वाऽभिधानं यस्याः ।

निशित त्रि० नि+शो–क्त पक्षे दस्यत्वम् । १शाणिते तेजिते २तीक्ष्णे न० राजनि० । आधारे क्त । ३निशीथे स्त्री "निशितायां निर्मेघेऽशितायां हि रक्षांसि प्रेरते" तैत्ति० ब्रा० ३।२।२। ४

निशिति स्त्री नि+शो–कर्मणि क्तिन् । तनूकृते "आकृतिं निशितिं मत्वा नमत्" भट्टि० ६।२।५ "निशितिं तनूकृताम्" भा० ।

निशिपालक न० पञ्चदशाक्षरपादके १छन्दोभेदे "निशिपालकमिदं भजसनाश्च रः" ह०टीका० । २निशिपालके प्रहरिभेदे पु० ।

निशिपुष्पा स्त्री निशि रात्रौ पुष्पति पुष्प–अच् अनुकृ० । मेषशृङ्गिकायाम् । पाककर्षेति ङीष् । निशिपुष्पीत्यप्यत्र

निशीथ पु० निशेरतेऽत्र नि+शी–आधारे थक् । १अर्द्धरात्रे अमरः । "अस्त्रिशीथादयो भवेत्" त्रि०त० २रात्रिमात्रे मेदिनिः । "निशीथदीपाः सहसा हतत्विषः" रघुः ।

निशीथिनी स्त्री निशीथोऽस्त्यस्या इनि । रात्रौ अमरः ।

निशौथिनीश पु० ६त० । १चन्द्रे हेमा० । २कर्पूरे च ।

निशुम्भ पु०नि+शुम्भ–भावे घञ् । १वधे हेमच० । २हिंसने ३मर्दने "प्रागप्राप्तनिशुम्भगाम्भवधनुर्दण्डावभङ्गोद्यतः" वीरच० ४असुरभेदे "कस्यपस्य दनुर्नाम भार्य्यासीद्द्विजसत्तम ! । तस्यास्तु द्वौ सुतावास्तां सङ्ख्याद्वयविधौ । ज्येष्ठः शुम्भ इति ख्यातो निशुम्भापरोऽसुरः । तृतीयो नमुचिर्नाम महाबलसमन्वितः" वामन पु०५२अ० । "इरा शुम्भनिशुम्भाभ्यामसुराभ्यां प्रधोपतेः । त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात्" देवीमा० । देव्या तस्य वधकथा "शुम्भस्तं समायान्तं निशुम्भममरार्दनम् । हृदि विव्याध शूलेन वेगाविद्धेन चण्डिका । भिन्नस्य तस्य शूलेन हृदयान्निःसृतोऽपरः । महाबलो महावीर्यस्तिष्ठेति पुरुषो वदन् । तस्य निष्क्रामतो देवी प्रहस्य स्वनवत्तदा । शिरश्चिच्छेद खड्गेन ततोऽसावपतद्भुवि" मार्कण्डेयपु० ८६अ० । अन्योऽपि निशुम्भासुर आसीत् यथाह देवीभाग० "वैवस्वतेऽन्तरे प्राप्ते अष्टाविंशतिमे युगे । शुम्भो निशुम्भश्चैवान्यावुत्पत्स्येते महासुरौ । नन्दगोपगृहे जाता यशोदागर्भसम्भवा । ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनौ" मार्कण्डेयपु० । "तत्रैव त्वां भगिन्यौ ते हरिष्यति स दानवः । कृष्णस्य तु गोत्रेण कौशिकी त्वं भविष्यसि । ते तु विन्ध्ये नगश्रेष्ठे स्थानं दास्यति शाश्वतम् । ततः स्थानवरश्रेष्ठं पृथिव्यां गोमविष्यसि । तत्र शुम्भनिशुम्भौ द्वौ दानवौ नगचारिणौ । भक्षयित्वा जनपदांस्तौ यास्यतो नाशमक्षयम्" हरिवं० ५८अ० ।

निशुम्भन न० नि+शुम्भ–भावे ल्युट् । मारणे ।

निशुम्भमर्दिनी स्त्री निशुम्भं मर्द्नाति मृद–णिनि ङीप् । दुर्गायाम् अमरः । तत्कथा निशुम्भशब्दे दृश्या । [त्रि० ।

निशुम्भिन् पु०नि+शुम्भ–णिनि । १युद्धभेदे त्रिका०, २नाशके

निशृम्भ पु० निश्चय्य सम्बध्य हरति नि+अनृश–वा० भक्–बा० सम्प्रसा० पृषो०। निश्चय्य सम्बध्य हर्त्तरि पूषणश्छाग-भेदे "आजाशः पूषणं रथे निशृम्भान्तो अनाधृषम्" ऋ०६।५५।६ "निशृम्भा निश्चय्य सम्बध्य हर्त्तारः पूषो वाहनतया प्रसिद्धाः" भा०। इमामेव ऋचमधिकृत्य निरु० ६।४ "निशृम्भा निश्चय्य हारिणः" इत्युक्तम्।

निशैत ङीष्ठी निशायामेतम् इण्इतं यस्य। वके त्रिका० स्त्रियां जातित्वात् ङीष्। [त्वारिंशतोनिर्गते।

निश्चत्वारिंश त्रि० निर्गतः चत्वारिंशतः अदन्तात् ड। च-

निश्चप्रच त्रि० निश्चितं च प्रचितञ्च मयूरव्य० नि०। निश्चिते चयच प्रचिते वस्तुनि।

निश्चय पु० निर्+चि–अच्। १संशायान्यज्ञाने निर्णये २सिद्धान्ते इदमित्थमेवेति ३विषयपरिच्छेदे च "तद्भावाप्रकारा धीः तत्प्रकारा तु निश्चयः" भाषा०। "तद्भिन्नभावाप्रकारकत्वे सति तत्प्रकारकज्ञानत्वं निश्चयत्वम्" सङ्क्षा० अनुमित्यादौ निश्चयत्वमेव न सन्देहत्वम् "परोक्षज्ञान-मनाहार्य्यं निश्चयत्वं अनुचि० उक्ते। "संशयोऽथ विपर्य्यासो निश्चयः स्मृतिरेव च" भाग०३।२६।३० ४बुद्धेरसाधारणवृत्तिभेदे "मनो बुद्धिरहङ्कारश्चित्तं करण मान्तरम्। संशयो निश्चयो गर्वः स्मरणं विषया इमे" वेदान्तपरिभा०। "बुद्धिर्नाम निश्चयात्मकान्तःकरणवृत्तिः" वेदा०सा०। "अध्यवसायो बुद्धिः" सा०सू० "मनश्चक्षुश्च पर्य्यायो बुद्धिरिति अध्यवसायश्च निश्चयाख्यस्तस्यासाधारणी वृत्तिरित्यर्थः अभेदनिर्देशस्तु धर्मधर्म्यभेदात्" भा०। ५अर्थालङ्कारभेदे अलङ्कारशब्दे २८८पृ० दृश्यम्।

निश्चर पु० एकादशमन्वन्तरीये सप्तर्षिभेदे तन्मन्वन्तरप्रक्रम्य "अङ्गिरासोदधिष्यश्च पौलस्त्यो निश्चरस्तथा। पुलहस्याग्नितेजाश्च भाव्याः सप्त महर्षयः" हरिवं०७अ०।

निश्चल त्रि० निर्+चल–अच्। १स्थिरे २अचले ३अस्वभावनाविपरीतभावनारहिते च। ४भूम्नि ५आलयपर्य्यायेषु स्त्री राजनि०। "तालुस्थाचलजिह्वश्च संहताष्ठोऽथ निश्चलः" याज्ञ०। "श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला। समाधावचला बुद्धिस्तदा योगमवाप्स्यसि" गीता।

निश्चलाङ्ग ङीष्ठी निश्चलं मत्स्यधारणाय स्थन्दरहितमङ्गं यस्य। २वके राजनि० स्त्रियां जातित्वात् ङीष्। २स्थन्दरहिते त्रि०। स्त्रियां स्वाङ्गत्वात् वा ङीष्।

निश्चायक त्रि० निर्+चि–ण्वुल्। निश्चयकर्त्तरि निर्णायके

निश्चारक त्रि० निर्+चर–ण्वुल्। १वायौ २पुरीषत्यागे

१स्वच्छन्दे त्रि० मेदि०। निर्गतश्चारो यस्मात् प्रा०ब० कप्। ४चारहिते त्रि० चारस्य गतिर्द्वितभेदश्च।

निश्चित त्रि० निर्+चि–कर्म्मणि क्त। १निश्चयज्ञानविषये अवधारिते "वेदान्तविज्ञानसुनिश्चितार्थाः" वेदा०। २नदी-भेदे स्त्री "कौशिकीं निश्चितां कृत्वां निश्चितां लोहितारिणीम्" भा०भी० ६अ० नानानद्युक्तौ।

निश्चिन्त त्रि० निर्गता चिन्ता यस्मात् प्रा०ब०। चिन्तान्यून्ये "निश्चिन्तो बहुरनिशं कलापरोधीरवलितः स्यात्" सा०द०

निश्चि(श्री)रा स्त्री नदीभेदे विष्णुपु०। [(निसि) त्रिका०।

निश्चूर्ण न० निःशेषेण चूर्णनम्। दन्तशोधके चूर्णभेदे

निश्चेष्टाकरण निश्चेष्टा चेष्टाराहित्यं क्रियतेऽनेन कृ-करणे ल्युट्। १कामशास्त्रभेदे त्रिका०। २मनःशिलाधटितौषधभेदे वैद्यकम्।

निश्च्यवन पु०वैवस्वतमन्वन्तरे सप्तर्षिमध्ये १ऋषिभेदे तदुपक्रमे "प्राणो बृहस्पतिश्चैव दत्तो निश्च्यवनस्तथा" हरिवं० ७अ०। २अग्निभेदे "यस्तु न च्यवते नित्यं यशसा वर्चसा श्रिया। अग्निर्निश्च्यवनो नाम पृथिवीं द्यौरिव स्थितम्" भा०व० ११८अ०। निर्गतं च्यवनमस्य प्रा०ब०। २च्युतिरहीने त्रि०।

निश्छन्दस् त्रि० निर्गतं छन्दो वेदोयस्य प्रा०ब०। वेदाध्ययनहीने "हीनक्रियं निष्पुरुषं निश्छन्दो रोमशार्शसम्" (कुष्ठम्) मनुः।

निश्र त्रि० निश्र–समाधौ बा० नङ्। समाहिते ततः। ब्राह्मणा० भावे कर्म्मणि च यञ्। नैश्रय समाहितत्वे न०।

निश्वास पु० नि+श्वस–भावे घञ्। प्राणवायोर्बहिर्गमनरूपे व्यापारे हेमच०। "निश्वासधूमं सहज रत्नभासिः" माघः।

निश्वाससंहिता शिवप्रणीते पाशुपते शास्त्रभेदे "एवमभ्यर्थितस्तैस्तु पुराहं द्विजसत्तमाः। वेदक्रियासमायुक्तां ऋतवानस्मि संहिताम्। निश्वासाख्यां ततस्तस्यां वीणा वाद्यव्यपाश्रयाः। निश्वाससंहिता या हि सूक्ष्मज्ञानप्रमाणतः। ह्येव पाशुपती दीक्षा योगः पाशुपतस्य हि। एतस्माद्देवमार्गोऽयं यदन्यदिह जायते। तत् क्षुद्रकर्म विज्ञेयं रौद्रं मौक्षविवर्जितम्" वराहपु०।

निषङ्ग पु० नितरां सजन्ति शरा यत्र सृज–आधारे घञ्। १तूणीरे अमरः। "जाताभिषङ्गो नृपतिर्निषङ्गात्" ततो निषङ्गादसमग्रसङ्गृतम्" रघुः। भावे घञ्। २नितान्तसङ्गे च "केन कार्य्यनिषङ्गेण तमाख्याहि महाबल!" भा०शा० २०अ०। ३खड्गे च मेदि०निषङ्गधिषणे दृश्यम्।

निषङ्गथि पु० नि+षन्ज–भावे गथिन् कुत्वम्। समाधिङ्के उज्ज्वद०।

निषङ्गधि पु० निषङ्गः खड्गः धीयतेऽस्मिन् धा–आधारे कि ।खड्गधिधाने कोशे (खाप्) "आतरस्व निषङ्गधिः" यजु० १६।१० "निषङ्गः खड्गः स धीयतेऽस्मिन्निति निषङ्गधिः कोशः" वेददी०।

निषङ्गिन् त्रि०निषङ्गोऽस्यास्ति इनि। १धनुर्द्धरे अमरः। नि+षन्ज–घिणुन्। २तूणीरे शब्दार्थचि० ३खड्गधारिणि च "नमो निषङ्गिणे कवचिने कवचिनां पतये" यजु० १६।२० "निषङ्गिणे खड्गधारिणे" वेददी०। "निषङ्गश्चस्ती धनुर्द्धरः" इत्यमरे पाठात् निषङ्गीन इति शब्दक० उक्तिः प्रामादिकी अत्राप्यत्वञ्च चिन्त्यम्। ५नितान्तसङ्गयुक्ते च "स्थाणौ निषङ्गिण्यनसि घर्मं पुरः" माघः "निषङ्गिणि सक्ते अनसि" मल्लि०। ६तूणीरवति च "रथी निषङ्गी कवची धनुष्मान्" रघुः। ७धृतराष्ट्रपुत्रभेदे पु० "कवची निषङ्गी दण्डी दण्डधारो धनुर्धरः" भा०आ० ६७अ० तत्पुत्रोक्तौ।

निषण्ण त्रि० नि+सद–कर्त्तरि क्त। उपविष्टे "संनिषण्णा सिताब्जे" सरस्वतीध्यानम्। "निषण्णा पङ्कजे पूज्या नमो देव्यै त्रिया इति" ति०त०। स्वार्थे–क। तत्रार्थे त्रि० संज्ञायां कन्। ह्रनिषण्णके शाकभेदे शब्दरत्ना०।

निषत्तृ त्रि० नि+सद–बा०तृच्। निषण्णे "निषत्तृं स यः सरीस्रपम्" ऋ०१०।१६२।२

निषद् स्त्री निषीदत्यस्याम् नि+सद–आधारे क्विप्। १यज्ञदीक्षायाम् "वा वै दीक्षा सा निषत् तत्सत्रं तदयनं तत्त्रायणम्" शत०ब्रा०४।६।७।२। निषीदति वेद्यत्वेन देवता अत्र आधारे क्विप्। २वेदवाक्यविशेषे "यं वाक्येष्वनुवाकेषु निषत्स्वपनिषत्सु च। स्तुवन्ति सत्यकर्माणम्" भा० शा० ७७ अ०। "वाक्येषु मन्त्रेषु सामान्यतः कर्मप्रकाशकेषु अनुवाकेषु मन्त्रार्थविवरणभूतेषु ब्राह्मणवाक्येषु निषत्सु कर्माङ्गावबद्धदेवताविज्ञानवाक्येषु उपनिषत्सु केवलात्मज्ञापकेषु स्तुवन्ति ध्यायन्ति" नीलक०। सद्म० भावे क्विप्। ३उपसदने स्त्री "अभिसरा निषदा गा अवस्रवः" ऋ० २।२३।५ "निषदा उपसदनेन" भा०। नि+सद–कर्त्तरि क्विप्। ४उपवेष्टरि निषद्वरशब्दे दृश्यम्।

निषदन न०निषीदत्यत्र आधारे ल्युट्। १स्थाने शब्दार्थचि०। २उपवेशनस्थाने च "निक्रमथं निषदनम्" यजु०२५।२८ "निषदनमुपवेशनस्थानम्" वेददी०। भावे ल्युट्। ३स्थितौ "अश्वत्थे वो निषदनम् पर्णे वो वसतिष्कृता" यजु० १२। ७६ "निषदनं स्थानम्" वेददी०। निषीदति पापकर्मत्र ल्युट्। ४निषादे पु० "निषादः कस्मान्निषदनो भवति निषण्णमत्र पापकमिति" निरु० ३।८

निषद्या स्त्री निषीदन्त्यस्याम् जनाः नि+सद–आधारे क्यप्। १मण्यविक्रयशालायां (हाटचाला) २हट्टे अमरः ३क्षुद्रखड्गायाञ्च शब्दार्थचि० "केचित् गुर्वीमेतां संयन्निषद्याम् क्षीणन्ति स्म प्राणमूलैर्यशांसि" माघः।

निषदर पु० नि+सद–किप् निषदु आसनं तां दृणाति ड–अच् वरः आवरकः ह्रत०। जम्बाले ३कर्दमे अमरः। नि–सद आधारे वा० अरच्। स्त्रियाम् ङीष्। २निशायां स्त्री मेदि०। उभयत्र हि गतेर्निषण्णत्वात् तथात्वम्। ह्रत०। ३निषदामुपवेष्टॄणां वरे श्रेष्ठे त्रिषभेदे "निषदरं त्रिषभं नर्य्यापसम्" यजु० २८।४ "निषीदन्ति निषद उपवेष्टारस्तेषां वरम्" श्रेष्ठम् त्रिषभम्" वेददी०।

निषध पु० पर्वतभेदे स च त्रि०शि० उक्तो यथा

"अक्षुदेशाद्विमगिरिरुदग्वेमकूटोऽथ तस्मात् तस्मा० ज्ञान्यो निषध इति ते सिन्धुपर्यन्त दैर्घ्यात्" । एवं सिद्धादुदगपि पुरात् ग्रह्मवच्छ्रुतीला वर्षाण्येषां जगुरिह बुधा अन्तरे द्रोण्यिदेशान्। भारतवर्षमिदं क्षुदगस्मात् किम्पुरुषवर्षमतो हरिवर्षम्" सू० "अतो अक्षुद्या उत्तरतो हिमवान् नाम गिरिः पूर्व सिन्धुपर्यन्तदैर्घ्यो ऽस्ति। तस्योत्तरे हेमकूटः, सोऽपि समुद्रपर्यन्तदैर्घ्यः। तथा तदुत्तरे निषधः"। तेषामन्तरे द्रोण्यिदेशा वर्षसंज्ञाः, तत्रादौ भारतवर्षम्। तदुत्तरं किम्पुरुषवर्षम्। ततो हरिवर्षमिति प्रसिद्धा०। स च किंपुरुषवर्षस्य सीमापर्वतः यथाह भाग० ५।१६। १०श्लो०। "एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयः। अयुतयोजनोत्सेधा हरिवर्षकिम्पुरुषभारतानां यथासंख्यम्"। ह्रयंवंश्ये रामात्मजकुशस्य पौत्रे २ऋषभेदे "अतिथिस्तु कुशाज्जज्ञे निषधस्तस्य चात्मजः" हरिवं १५अ०। "स (अतिथिः) नैषधस्यार्थपतेः सुतायाम् उत्पादयामास निषिद्धशत्रुः। अनूनसारं निषधात्मगेन्द्रात् पुत्रं यमाहुर्निषधास्त्वमेव" रघुः। चन्द्रवंश्ये ३जनमेजयान्तरस्यात्मजभेदे "जनमेजयस्य तनयाः भुवि ख्याता महाबलाः। धृतराष्ट्रः प्रथमजः पाण्डुर्बाह्लीक एव च। निषधश्च महातेजास्तथा जाम्बूनदो बली" भा०आ०६३अ०। ४दैत्यभेदे पु० ब०व०। "अका

निषादा निषधाश्चैवानर्त्तनैर्ऋताः" भा० भी० ६अ० जनपदोक्तौ। "निषधेषु मरीषाक्षो वीरसेन इति श्रुतः" भा०व०५२अ०। निषधानां राजा ते कमिञनोऽस्य वा अण्। नैषध तद्देशशब्दयो पित्रादिक्रमेण तद्देशवासिनि च। "न नैषधे कार्यसिद्धिं निशामयेत्" नैष० बहुषु अणो लुक्। ५कठिने त्रि० मेदि० ६निषादस्वरे हेमच०। ७कुरुनामकक्षत्रपुत्रे च "तपत्यां सूर्यकन्यायां कुरुक्षेत्रपतिः कुरुः। परीक्षित् सुधनुर्मन्युर्निषधश्च कुरोः सुताः" भाग० २२।२

निषाद पुंस्त्री निषीदति पापमत्र नि+सद–आधारे घञ्। १चण्डाले जातिभेदे अमरः तद्विवरणम् "निषादः कर्त्रास्त्रिधनो भवति निषत्वमत्र पापकमिति" निरु० २।८। वेनोरुमन्थनाज्जाते २जातिभेदे तत्कथा "दग्धस्य पापप्रतीकाशो विकटाक्षोऽतिरुक्षकः। किङ्करोमीति तान् सर्वान् विप्रानाह स चात्तरः। निषीदेति तमूचुस्ते निषादस्तेन सोऽभवत्। ततस्तत्सम्भवा जाता विन्ध्यशैलनिवासिनः। निषादा म्लेच्छजातयश्च! पापकर्मोपलक्षणात्। तेन द्वारेण निष्क्रान्तं तत्पापं तस्य भूपतेः। निषादास्ते ततो जाता वेनकल्मषनाशनाः" स्त्रियां जातित्वात् ङीष्। "निषादाः पञ्चपञ्चाशः सप्तावरा जातयश्चेत्यनि" भा०आ० १अ०। तन्नामकण्ठोक्तिते २स्वरभेदे पु० अमरः। "षड्जादयः षड्जेनैव स्वराः सर्वे मनोहराः। निषीदन्ति यतो लोके निषादस्तेन कथ्यते। चतस्रः पञ्चमे षड्जे मध्यमे श्रुतयो मताः। ऋषभे धैवते तिस्रोऽतो गान्धारनिषादके" सङ्गीतदामोदरः "निषादं रौति कुञ्जरः" इत्युक्तेः तस्य ध्वनितुल्यस्वरता। ३ब्राह्मण्याञ्शूद्रकन्यायामम्बष्ठे पारशवाख्ये जातिभेदे च "ब्राह्मण्यात् वैश्यकन्यायामम्बष्ठो नाम जायते निषादः। शूद्रकन्यायां यः पारशव उच्यते" मनुः। "मत्स्यघातोनिषादानाम्" मनुना तद्वृत्तिरुक्ता ४देशभेदे च च देशः सरस्वती नदान्तर्वेदस्थानं यथोक्तं भा०व०१३०अ० "एतद्विनशनं नाम सरस्वत्या विशाम्पते!। द्वारं निषादराष्ट्रस्य येषां दोषात् सरस्वती। अविशद्य पृथिवीं वीर सा निषादा हि सा मिदुः"।

निषादकर्ष पु० देशभेदे ततः प्रौषिकः ठञ् "दण्डकुक्तान्तात् कः" पा० ठस्य कः, "केऽणः" पा० ह्रस्वः। नैषादकर्षक तत्सम्बन्धादौ त्रि०।

निषादवत् पु० निषादोऽस्यास्ति मतुप् मस्य वः। १निषादस्वरे "षड्ज ऋषभगान्धारौ मध्यमो धैवतस्तथा। पञ्चमश्चापि विज्ञेयस्तथा चापि निषादवान्" भा०शा० १८३ अ०। २निषादस्वरयुक्ते गानादौ त्रि० स्त्रियां ङीप्।

निषादित न०नि+सद–णिच्–भावे क्त। १निषादने उपवेशनकरणे। निषादितमनेनेत्यर्थे रक्षा० इनि। निषादितृ निषादनकर्त्तरि त्रि० स्त्रियां ङीप्। कर्मणि क्त। २उपवेशिते त्रि०।

निषादिन् पु० निषादयति क्षत्तिनं नि+सद–णिच्–णिनि। क्षत्रियादेरुपवेशनादिकारके १क्षत्तिपके अमरः "निषीद निषदक्षत्तं चलितं निषादी" भाघः। नि+सद–णिनि। २उपविष्टे "आतपात्ययसंक्षिप्तनीवाराश्च निषादिभिः" रघुः। स्त्रियां ङीप्। "दत्तच्छायानिषादिन्यः" रघुः।

निषिक्त त्रि० नि+सिच–क्त। १नितान्तसिक्ते आर्द्रिते २शुक्रादौ च शब्दे गर्भे च "योनेः शरीरम्" भा० शल्यभाष्ये "योनौ निषिक्ते रेतसि" उक्तम् "विष्णुं निषिक्तपामयोभिः" ऋ० ७ ३६।६ "निषिक्तपाम् निषिक्तस्य गर्भस्य रक्षितारम्" भा०।

निषिद्ध त्रि० नि+सिध–कर्मणि क्त। १निषेधविषये २बाधिते "निषिद्धैरप्यभिलषितमकरन्दैकमधुकरैः" वेणीसं०। ३अभावगतेष्टसाधनतानिषेधिनञ्पदयोगिवाक्यगम्ये ४अनिष्टसाधनताबोधकलिङादियुक्तनञ्पदयोगिवाक्यगम्ये च यथा "न कलञ्जं भक्षयेत्" इत्यत्र "कलञ्जभक्षणं निषिद्धम्" "काम्यनिषिद्धवर्जनपुरःसरम्" वेदान्तसा०।

निषेक पु० नि+सिच–भावे घञ् कुत्वम्। १जलादेः नितान्तसेचने २गर्भाधाने च "निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः" मनुः "योषितस्तु तदीर्ण्यं निषेकभूमिः" कुमा०। "वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम्। कार्यः शरीरसंस्कारः" मनुः। "निषेककाले सोमे च सीमन्तोन्नयने तथा। धेयं पुंसवने चैव चाद्यं कर्मोदयेव च" आ०त० भविष्यपु०। "निषेककाले गर्भार्थशुक्राधानदिने" रघु०।

निषेदिवस् त्रि० नि+सद–क्वसु। निषण्णे उपविष्टे स्त्रियां ङीप् वेटोपश्च उः। "निषेदुषी स्वशिखेव एव केवले" कुमा०

निषेध पु० नि+सिध–भावे घञ्। १वारणे २निवर्त्तने। निषिध्यतेऽनेन करणे घञ्। ३अनिष्टसाधनताबोधक वेदादिवाक्यभेदे "स च (वेदः) विधिरन्यनामधेयनिषेधार्थवादभेदात् षड्विधः" जैमिनिभाष्यकारः। तद्भाष्यादि तत्र निरूपितं यथा

"पुरुषस्य निवर्त्तकं वाक्यं निषेधः निषेधवाक्यानामर्थहेतुक्रियानिवृत्तिजनकत्वेनैवार्थवत्त्वात्। तथाहि यथा विधिः प्रवर्त्तनां प्रतिपादयन् स्वप्रवर्त्तकत्वनिर्वाहार्थं विधेयस्य यागादेरिष्टसाधनत्वमाक्षिपन् पुरुषं तत्र प्रवर्त्तयति। तथा "न कलञ्जं भक्षयेत्" इत्यादि निषेधोऽपि निवर्त्तयन् स्वनिवर्त्तकत्वनिर्वाहार्थं निषेध्यस्य कलञ्जभक्षणस्य परानिष्टसाधनत्वमाक्षिपन् पुरुषं ततो निवर्त्तयति। ननु निषेधवाक्यस्य कथं निवर्त्तनाप्रतिपादकत्वमिति चेत्? उच्यते न तावदत्र धात्वर्थस्य नञर्थेनान्वयः अव्यवधानेऽपि तस्य प्रत्ययार्थभावनोपसर्जनत्वेनोपस्थितेः। न ह्यन्योपसर्जनत्वेनोपस्थितमन्यस्यान्वेति। अन्यथा राजपुरुषमानयेत्यादावपि राज्ञः क्रियान्वयापत्तेः। अतः प्रत्ययार्थस्यैव नञर्थेऽन्वयः। तत्रापि आख्यातांशवाच्यार्थभावनायाः, तस्या लिङंशवाच्यप्रवर्त्तनोपसर्जनत्वेनोपस्थितेः। किन्तु लिङंशवाच्यशाब्दभावनायाः, तस्याः सर्वापेक्षया प्रधानत्वात्। नञर्थस्य स्वभावो यत् स्वसमभिव्याहृतपदार्थविरोधिबोधकत्वम्। यथा "घटोनास्तीत्यादौ" अस्तीति शब्दसमभिव्याहृतो नञ् घटवत्ताविरोधिनिवर्त्तनामेव बोधयति विधिवाक्यश्रवणेऽहं मां प्रवर्त्तयतीति प्रतीतेः। तस्माद्विधिवाक्यस्थले निवर्त्तनैव वाक्यार्थः! यदा तु प्रत्ययार्थस्य तत्रान्वये बाधकं तदा धात्वर्थस्यैव तत्रान्वयः। तच्च बाधकं द्विविधम्। तस्य व्रतमित्युपक्रमो विकल्पप्रसक्तिश्च। तत्राद्यं "नेक्षेतोद्यन्तमादित्यम्" इत्यादौ तस्य व्रतमित्युपक्रम्यैतद्वाक्यपाठात्। तथा चात्र पर्युदासाश्रयणम्। तथा हि व्रतशब्दस्य कर्त्तव्यार्थरूढत्वात्तस्य व्रतमित्यत्र स्नातकस्य व्रतानां कर्त्तव्यत्वेनोपक्रमात् किं तत् कर्त्तव्यमित्याकाङ्क्षायां "नेक्षेतोद्यन्तमादित्यम्" इत्यादिना कर्त्तव्यार्थ एव प्रतिपादनीयः। अन्यथा पूर्वोत्तरवाक्ययोरेकवाक्यत्वं न स्यात्। तथा च नञर्थेन प्रत्ययार्थान्वये कर्त्तव्यार्थानवबोधात् विध्यर्थप्रवर्त्तकाविरोधिनिवर्त्तनाया एव तादृशनञा बोधनात् तस्याश्च कर्त्तव्यार्थत्वाभावात्। तस्मान्नेक्षेतेत्यत्र नञा धात्वर्थविरोध्यनीक्षणसङ्कल्प एव स्वसमया प्रतिपाद्यते। तस्य कर्त्तव्यत्वसम्भवात्। आदित्यविषयकानीक्षणसङ्कल्पेन भावनेदिति वाक्यार्थस्तत्र भाष्याकाङ्क्षायाम् "एतावता चैनसा वियुक्तो भवतीति" वाक्यशेषावगतः पापक्षयो भाव्यतयान्वेति। एवञ्च पूर्वोत्तरयोरेकवाक्यत्वं निर्वहत्येव। न चात्र धात्वर्थविरोधिनः पदार्थान्तरस्यापि सम्भवात् कथमनीक्षणसङ्कल्पस्यैव भावनान्वय इति वाच्यम् तत्र कर्त्तव्यत्वाभावेन प्रकृते भावनान्वययोग्यत्वात्। द्वितीयं "यजतिषु ये यजामहङ्करोति नानुयाजेषु" इत्यादौ। अत्र विकल्पप्रसक्तेरेव पर्युदासाश्रयणात्। तथाहि यद्यत्र वाक्ये नञर्थे प्रत्ययार्थान्वयः स्यात्तदा "अनुयाजेषु ये यजामहे" इति मन्त्रस्य प्रतिषेधः स्यात्। अनुयाजेषु ये यजामहे" न कुर्यादिति। स च प्राप्तिपूर्वक एव प्राप्तस्यैव प्रतिषेधात्। प्राप्तिश्च यजतिषु "ये यजामहङ्करोतीति" शास्त्रादेव वाच्या। शास्त्रप्राप्तस्य च प्रतिषेधे विकल्प एव न तु बाधः। प्राप्तिमूलरागस्यैव तन्मूलशास्त्रस्य शास्त्रान्तरेण बाधायोगात्। न च यदै जुहोतीत्यादौ हि विधेयशास्त्रेणाहवनीये जुहोतीति शास्त्रस्यैव नानुयाजेष्वित्यनेन यजतिषु ये यजामहङ्करोतीत्यस्य बाधः स्यादिति वाच्यम् परस्परनिरपेक्षयोरेव शास्त्रयोर्बाध्यबाधकभावात्। पदशास्त्रस्य हि स्वार्थविधानार्थमाहवनीयशास्त्रानपेक्षणाद्विरपेक्षत्वम्। प्रकृते तु निषेधशास्त्रस्य निषेध्यप्रसक्त्यर्थं "यजतिषु ये यजामहम्" इत्यस्यानपेक्षणात् निरपेक्षत्वम्। तस्माच्छास्त्रविहितस्य शास्त्रान्तरेण प्रतिषेधे विकल्प एव, स च न युक्तः। विकल्पे शास्त्रस्य पाक्षिकाप्रामाण्यापातात्। न "अनुयाजेषु ये यजामहम्" इत्यस्यानुष्ठाने नानुयाजेष्वित्यस्य प्रामाण्यं सम्भवति, ब्रीहियागानुष्ठाने यवशास्त्रस्येव। द्विरदृष्टकल्पना च स्यात्, विधिप्रतिषेधयोरपि पुरुषार्थत्वात्। अतोऽत्र न प्रतिषेधस्याश्रयणम्। किन्तु अनुयाजसम्बन्धमाश्रित्य पर्युदासस्यैव। इत्यस्यानुयाजव्यतिरिक्तेषु "यजतिषु ये यजामहे" इति मन्त्रं कुर्यादिति वाक्यार्थबोधः नञोऽनुयाजव्यतिरिक्ते लाक्षणिकत्वात्। एवञ्च न विकल्पः। अत्र च वाक्ये "ये यजामहे" इति न विधीयते। "यजतिषु ये यजामहे" इत्यनेनैव प्राप्तत्वात्। किन्तु सामान्यशास्त्रप्राप्ते "ये यजामहे" इत्यनुवादेन तस्यानुयाजव्यतिरिक्तविषयत्वं विधीयते यत् यजतिषु ये यजामहङ्करोति तदनुयाजव्यतिरिक्तेष्वेवेति। नन्वेवं सामान्यतः प्राप्तस्य विशेषसङ्कोचरूपापवादसंहारात् पर्युदासस्य भेदो न स्यादिति चेन्न उपसंहारो हि तत्तात्पर्यसङ्कोचार्थः। यथा पुरोडाशे "चतुर्धा करोतीति" सामान्यप्राप्तचतुर्धाकरणम् "आग्नेये चतुर्धा करोतीति" विशेषादाग्नेयपुरोडाशमात्रे सङ्को-

यते पर्युदासस्तु तदन्यमात्रसङ्कोचार्थ इति ततो भेदात्। कुत्रचिदिकल्पप्रसक्तावप्यनुवाद्यत्वेन प्रतिषेधाश्रयत्वम्। यथा "नातिरात्रे षोडशिनं स्तुह्वाति" इत्यादौ। अत्र "अतिरात्रे षोडशिनं स्तुह्वातीति" प्राप्तप्राप्तषोडशिपक्षस्य निषेधादिकल्पप्रसक्तावपि न पर्युदासाश्रयत्वम्, असम्भवात्। तथाहि यदत्र षोडशिपदार्थे नञर्थान्वयस्तदातिरात्रे षोडशिव्यतिरिक्तं स्तुह्वातीति वाक्यार्थबोधः स्यात्। स च न सम्भवति "अतिरात्रे षोडशिनं स्तुह्वातीति" प्राप्तविधिविरोधात्। यदि चातिरात्रपदार्थेनान्वयस्तदातिरात्रव्यतिरिक्ते षोडशिनं स्तुह्वातीति वाक्यार्थबोधः स्यात्। सोऽपि न सम्भवति, तद्विधिविरोधात्। अतोऽनन्यगत्या प्राप्तप्राप्तषोडशिपक्षस्यैव निषेधः। न च विकल्पप्रसक्तिः तस्याश्चाश्रयणीयत्वात्। क्वचित्तु विधेर्यदिकल्पादावेकप्रतिपिध्यमानस्य नानर्थहेतुत्वम्। यथा "न कलञ्जं भक्षयेत्" इत्यादौ कलञ्जभक्षणादेः, तत्र भक्षणनिषेधस्यैव पुरुषार्थत्वात्। न च "दीक्षितो न ददाति न जुहोति" इत्यादौ प्राप्तप्राप्तदानहोमादीनां निषेधादिकल्पापत्तिरिति वाच्यम्। अतः पुरुषार्थभूतदानहोमादीनां निषेधस्य पुरुषार्थत्वाऽभावेपि निषिध्यमानस्यानर्थहेतुत्वम् यथा क्रतौ स्त्रीगमनादेः। तन्निषेधस्य क्रत्वर्थत्वेन तस्य क्रतवैगुण्यस्यादकत्वात्"। [निषेधकाः" मार्कण्डपु०।

निषेधक त्रि० नि+षिध-ण्वुल्। निवारके "ये चाच्छाद-

निषेधविधि पु० निषेधे अभावे विधिरिष्टसाधनतावोधहेतुः। अभावे इष्टसाधनताबोधकवाक्ये यथा "एकादश्यां न भुञ्जीतेत्यादौ" भोजनाभावे एव इष्टसाधनत्वं बोधयति न तु भोजने विध्यधेष्टसाधनत्वभावम्, अतो निषेधवाक्यादस्य भेदः। "अष्टम्यां मांसं नाश्नीयात्" इत्यादौ तु निषेधे मांसभोजने अनिष्टसाधनत्वं बोधयति "एकादश्यां न भुञ्जीत" इत्यादौ तु भोजनाभावे इष्टसाधनत्वमिति विधिस्वरूपे गदाधरः। एवं नेच्चेतोद्यन्नादित्यमित्यादावपि निषेधविधित्वमित्याकरे स्थितम्। अतएव एकादशीभोजनाभावस्य अभोजनसंकल्परूपस्य व्रतत्वम् तिथिस्वरूपविशेषनियमनं च। निषेधत्वे कालमात्रापेक्षतया तत्कालमात्रे च निष्ठत्तिः स्यात् "निषेधस्तु निवृत्त्यात्मा कालमात्रमपेक्षते" इति भट्टोक्तेः।

निष्क माने चु० आत्म०सक० सेट्। १निष्कयते अनिष्कत। अणोपदेशत्वात् यति निष्किते न क्तत्वम्। प्रनिष्कयते।

निष्क पु०न० निश्चयेन कायति निस्+कै-क निष्क-अच् वा। शास्त्रीयषोडशमाषकपरिमितसुवर्णनामकाधिकृते, २व्यवहारिकरूपके (टाका) ३चतुस्सुवर्णपरिमिते पलपरिमाणे मानभेदे, ४स्वर्णभूषणे ५हेमपात्रे ६दीनारे च अमरः। दीनारशब्दे दीनारार्थः दृश्यः। ७पञ्चे षोडशद्रम्मे (काहन) परिमाणे "वराटकानां द्वयकहयं यत् सा काकिणी तास्च पञ्चसत्यः। ते षोडश द्रम्म इहावगम्यो द्रम्मैस्त्रया षोडशभिश्च निष्कः" लीला०। "परिचक्रेच तेनाश्च कण्ठे निष्कमिवार्पितम्" कुमा० "चतुःसौवर्णिको निष्को विज्ञेयस्तु प्रमाणतः" मनुः "गवामभावे निष्कः स्यात् तदूर्द्धं पादमेव वा" मिता० धृता स्मृतिः।

निष्कण्टक त्रि० निर्गतः कण्टकोऽस्य प्रा०व०। १उपसर्गरहिते २बाधकरहिते "राज्यं निष्कण्टकं कृत्वा भोक्ष्यसे मेदिनीं पुनः" भा०वि० ६अ०।

निष्कण्ठ पु० निर्गतः कण्ठः स्वरोऽस्य। वरुणद्रुमे शब्दच०

निष्कम्म त्रि० निर्गतः कम्मो यस्य प्रा०व०। कम्मरहिते "निवातनिष्कम्पमिव प्रदीपम्" "निष्कम्पदृश्यं निश्चलद्विरेफम्" कुमा० "दिशः पपात पत्रेण वेगनिष्कम्पकेतुना" रघुः।

निष्कम्मु पु० देवसेनाधिपभेदे "बलिना द्वयपवौ तु सह निष्कम्मुना रथे" हरिवं० २४३अ० देवासुरयुद्धोक्तौ।

निष्कर्ष पु० निस् क्षप+भावे घञ्। १निश्चये २प्रयत्नादिना स्वरूपपरिच्छेदे "एतद्विद्वांसस्त्रयीनिष्कर्षमन्वहम्" मनुः। "स उपाधिर्भवेत्तस्य निष्कर्षोऽयं प्रदर्श्यते" भाषा०। ३निःसारत्वे च

निष्कर्षण न०निस्+कृष-भावे ल्युट्। १निष्कासने २निःसारत्वे "आत्मभस्त्रं प्रियाशोकश्वसनिष्कर्षणोऽधमम्" रघुः

निष्कल त्रि० निर्गता कला यस्य प्रा०व०। १कलाशून्ये २निरवयवे सम्पूर्णे "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" श्वेता०उ० "चिन्मयस्यादितीयस्य निष्कलस्याशरीरिणः" एका० आमदग्न्यवाक्यम्। ३कलादिव्यापारशून्ये च "दग्धेन्धने निष्कलाः शान्तं प्रक्षीणाः खलकर्मभिः" भा०व० २०८अ०। ४मतार्त्तवायां द्रव्यायां स्त्रियां स्त्री शब्दरत्ना० नीरक्तायां स्त्रियां स्त्री ङीप् शब्दरत्ना०।

निष्कषाय त्रि० निर्गतः कषायः चित्तमलभेदो यस्य प्रा०व०। १चित्तदोषशून्ये निर्मलचित्ते शुद्धचौ। उत्तरपिण्यां २जिनभेदे पु० हेमच०।

निष्कादि पु० "अक्षशाणे निष्कादिभ्यः" पा० तेन क्रीतमित्यर्थे अक्षशाणे ठञ्निमित्ते शब्दगणे स च गणः पा०ग० ङ्० उक्तो यथा "निष्क पक्ष पाद माष वाह द्रोण षष्टि"। निष्केण क्रीतं नैष्किक निष्केण क्रीते त्रि०। स्त्रियां टाप्। अक्षशाणे तु ठञ् स्त्रियां ङीप् इतिभेदः

निष्काम त्रि० निर्गतः कामोऽभिलाषो यस्य यस्य वा प्रा०व०। विषयभोगेच्छाशून्ये ३कामनयाऽऽक्रान्ते कर्मादौ च "निष्कामं ज्ञानपूर्वं च निष्टप्तमुपदिश्यते" मनुः। "निष्कामादनुष्ठानाङ्गजपादिकर्मणो न दुःखं प्रत्युत मोक्षफलं प्राप्यते" सा०प्र०भा० "विशिष्टफलदाः पुंसां निष्कामाणां विसृष्टिदाः" अत०त० विष्णु पु० "निष्कामाणां सक्तिप्रतिकूलकामनारहितानाम्" रघुनन्दनः।

निष्कालक पु० निर्गतः कालकः केशादिः खण्डनेन यस्य प्रा०व०। २खण्डितकेशशीर्षादौ "निष्कालको हतास्यस्त्वं मूर्खो परिव्रज मरणात् पूतो भवतीति विज्ञायते" वसिष्ठः। प्रा०व०कप्। ३निर्गतसमयके अभावे अव्ययी०। ४कालकाभावे अव्य०। निरुदकादि० अन्तोदात्तता

निष्कालन न०निर्+कल-भावे ल्युट्। ३चालने २मारणे च

निष्कालिक अव्य० कालिकस्याभावः अव्ययी०। कालिका भावे निरुदकादि० अस्य अन्तोदात्तता। काले कालने साधु तदर्हति वा ठञ् कालिकः कालो कालयिता जेता वा स निर्गतो यस्य प्रा०व० कप् वा। २कालयितरि जेतरि अव्यये च त्रि०। "तं सूतपुत्रं रथिनां वरिष्ठं निष्कालिकं कालवशं नवाद्य" भा०क० ७२अ०। निष्कालिकः निर्गतः कालो कालयिता जेता यस्येति विग्रहः" नीलकण्ठः।

निष्का(ग्र)स पु० निर्+कस(स)-भावे घञ्। निष्कासने बहिष्करणे ३निःसारणे "सन्ध्ये रजनीदिनयोः प्रवेश निष्कासौ(सौ)" हेका०"न च पश्यामि निष्कास(स)म्" रामा०कि० ५२सर्गः। कर्त्तरि घञ्। प्रासादादुपरितो बहिर्गतभागे (बाजा) ख्याते पदार्थे च।

निष्काशि(सि)त त्रि० निस्+क(श)स-गतौ क्त्रि-क्त। ३निःसारिते दन्त्यमध्यस्तु दूरीकृते समपसारिते जटा०। २निर्गमिते ४आकृष्टे अधिक्षते च त्रि० मेदि०।

निष्काष पु० निर्-कष घञ्। तापवशादधःस्रावीतलस्थे पयस्यावश्येये "वारणीनिष्काषेणावश्यम्" कात्या०श्रौ० ५।५२८। उक्तार्थेऽव कर्त्तरि घञ्।

निष्किञ्चन त्रि० निर्गतं किञ्चन गव्यं धनं वा यस्य प्रा०व०। ३किञ्चनशून्ये विषयान्तरशून्ये "प्रज्ञानं ब्रह्मचैवात्र शरीरस्य विशेषतः। तथा निष्किञ्चनत्वं मनसश्च प्रसन्नता" भा०अनु०१०८अ०। २अकिञ्चने दरिद्रे च।

निष्कुट पु० निस्+कुट-क। ३गृहसमीपस्थे उपवने अमरः २केदारे क्षेत्रे ३राज्ञाम् अन्तःपुरे च मेदि०। "अवस्करे चिरं स्थानं निष्कुटेषु च वर्जयेत्" भा०व०२२१अ०। ४पर्वतभेदे "स विनिर्जित्य संग्रामे हिमवन्तं सनिष्कुटम्" भा०स० २६अ०। "सपर्वतवनाकाशां ससप्तद्वां सनिष्कुटाम्" भा० व० २५३अ०।

निष्कुटि(टी) स्त्री कुट-इन् कौटिल्यम् निर्गता कुटिर्यस्याः वा० ङीप्। एलायाम् अमरः।

निष्कुटिका स्त्री निष्कुटः अस्त्यस्याः वाहत्वेन ठन्। कुमारानुचरमातृभेदे "ऋचाऽम्बिका निष्कुटिका वामा जलरवासिनी" भा०श० ४७अ० स्कन्दमातृगणोक्तौ।

निष्कुम्भ पु० नि+स्कुभ-घञ् सत्वम्। ३दम्भीढ्ये रायसकुटः। निर्गतः कुम्भोऽस्य प्रा०व०। २कुम्भशून्ये च त्रि०।

निष्कुल त्रि०निर्गतं कुलमवयवानां समूहो यस्मात् प्रा०व०। अवयवसमूहशून्ये। ततः निष्कोषणे ल्यजि डाच्। निष्कुलाकरोति दाडिमम् निष्कोषयतीत्यर्थः। निर्गतं कुलं सपिण्डादिर्यस्य प्रा०व०। २सपिण्डादिकुलरहिते त्रि०। "वशाऽपुत्रासु चैवं स्यात् रक्षणं निष्कुलासु च। पतिव्रतासु च स्त्रीषु विधवासाहतासु च" मनुः "निष्कुलासु सपिण्डरहितासु" कुल्लू०।

निष्कुलीकृत त्रि०निष्कुल+अभूततद्भावे च्वि-कृ-कर्मणि क्त। निष्कुलिते "काम्बुजस्त्रीणां निष्कुलीकृतानाम्" सुश्रुतः।

निष्कुषित त्रि० निस्+कुष-निष्कर्षे क्त। ३निस्सत्वीकृते खण्डिते "कालैर्निष्कुषितं क्षमिः कवलितं वीचिभिरान्दोलितम्" गङ्गास्तोत्रम्। "चिरकालोषितं जीर्णं कोटनिष्कुषितं धनुः" भट्टिः "उपान्तयोर्निष्कुषितं विहङ्गैः" रघुः। २मरुद्वृक्षभेदे पु० "अश्वत्थं चिल्वरिष्टञ्च तथा निष्कुषितं नृप" हरिवं० २०४अ० मरुद्वृक्षोक्तौ।

निष्कुह पु० निःशेषेण कुहयते विस्मापयति कुह-अच्। उद्यादिस्थे स्वयंजाते वृक्षे कोटरे अमरः।

निष्कृति स्त्री निर्+कृ-क्तिन्। ३निस्सारे २निर्वृत्तौ पापादिभ्य ३उद्धारे च अमरः "कामतो ब्रह्मवधे निष्कृतिर्न विधीयते" मनुः "कृतघ्ने नास्ति निष्कृतिः" स्मृतिः

निष्कृष्ट त्रि० निर+कृष-क्त। ३सारांशे २निश्चिते च

निष्कैवल्य पु० यज्ञिये स्तोमकारितशंसनात्मके यज्ञभेदे "माध्यन्दिने तु होतृनिष्कैवल्ये स्तोमकारितं शस्त्रम्" आश्व० श्रौ०८।१।१४ "तत्र तु ऋग्भिरेव निष्कैवल्यस्य स्तोमकारितशंसनं स्वस्तोमातिशंसनन्तु कर्त्तव्यं न वक्तव्यं" यदि स्वस्तोमाधिको निष्कैवल्यस्तोमस्तदा तस्मादप्यतिशंसनन्तु कर्त्तव्यं यदा हीनं तदाप्यतिशंसनमिति निष्कैवल्ये स्तोमकारितमिति पाठः कर्त्तव्यो न निष्कैवल्यस्तोमकारितमिति" नारा० । "निष्कैवल्यसक्थ्यमध्यावै" यजु०१५।१२ "प्रउगं शंसति निष्कैवल्यं शंसतीति" श्रुतिः तच्छस्त्रेच पाशे २यज्ञपात्ररूपे यज्ञभेदे पु० "सरस्वतीयाश्च मे निष्यक्कैवल्यश्च मे" यजु० १८।२० ।

निष्कैवल्य त्रि० केवलस्य भावः कैवल्यम् निश्चितकैवल्यमसहायत्वमस्य प्रा०व० । निश्चितकैवल्यत्वे अन्यासहकारिणि "निष्कैवल्येन पापेन तिर्यग्योनिमवाप्नुयात् । दुष्टपापेन मानुष्यं दुष्टेनैकेन देवताम्" भा०शा० २०४ अ० । २निष्टप्तकैवल्ये ३मोक्षहीने च ।

निष्कोषण न० निर्+कुष–ल्युट् । अलरसवतां वह्निनिःसारणे "यवकराशिकतामेरुवातकुलत्थिकाशोणाद्यनयवकरोपकुणकखण्डशालूकनिष्कोषणदूषिताश्च दन्तवेष्टाः" सुश्रुतः

निष्कौशाम्बि त्रि० निर्गतः कौशाम्ब्या नगर्याः निरा०त० तत्पुरुषे गोचत्वेन वृद्धिः । कौशाम्ब्या नगर्या निर्गते ।

निष्क्रम पु०निर्+क्रम–घञ् । १गृहादितो बहिर्गमने प्रथमनिष्क्रमणनिमित्तं कर्त्तव्ये शिशोः २संस्कारभेदे च "अकृन्तनेकादशे नाम चतुर्थे मासि निष्क्रमः" भाग० ।

निष्क्रमण न० निर्+क्रम–ल्युट् । १गृहादितो बहिर्गमने चतुर्थे मासि शिशोः कर्त्तव्ये प्रथमनिष्क्रमणनिमित्ते २संस्कारभेदे च । तन्मुहूर्त्तादिकं वृहू० पी० उक्तं यथा "दोलाधिरूढिरव निष्क्रमणं चतुर्थमासे गमोक्तसमयेऽर्कमितेऽह्नि वा स्यात्" स्मृ० "अथ निष्क्रमणमुहूर्त्तः तत्र चतुर्थमासे गमोक्तसमये यात्राभिहितसमीचीनतिथिवारनक्षत्रादिसहिते काले शिशूनां निष्क्रमणम् । निष्क्रमाख्यसंस्कारपूर्वं गृहाद्बहिर्गमनं कुर्यात् । वा अथवार्कमितेऽह्नि द्वादशे दिवसे निष्क्रमणं कुर्यात् । यदाह मनुः "चतुर्थे मासि कर्त्तव्यं शिशोर्निष्क्रमणं गृहात्" । गुरुरपि "गृहात् निष्क्रमणं सूतेश्चतुर्थे मासि कारयेत् । यात्रोक्ते समये मासि तृतीये द्वादशेऽहनि" अत्र तृतीयमासोऽभ्युक्तः । राजमार्त्तण्डेऽपि "मासे तृतीये प्रथिते द्विपक्षे शुभाकरे शोभनगोचरस्थे । उत्पातपापग्रहवर्जिते मे निष्क्रामणं सौख्यकरं शिशूनाम्" । तदेतयोः पक्षयोर्यथागृह्यं व्यवस्था । मुहूर्त्तसंग्रहे तु निष्क्रमणे विशिष्य तिथ्यादुक्तं यथा "पूर्वः पक्षः शुभः प्रोक्तः कृष्णश्चान्त्यत्रिकं विना । रिक्ताषष्ठ्यष्टमीदर्शद्वादशीश्च विवर्जयेत् । चत्वार्यार्यमघस्तस्रोऽपि वैश्वात् त्रीण्यपि च वह्नेः" । वह्नेरग्नेरादित्यात् परामाद्रापर्यन्तास्तस्रोऽपि भानि । "मैत्रमादित्यपुष्यौ च रोहिणी च शुभावहाः । ध्रुवाणि मेषा वज्राणि मृदुक्षिप्राणि वै च । सतां तु वारवर्गाश्च शुभदास्तूदयास्तगाः । केन्द्रत्रिकोणगाः सौम्याः पापाः षष्ठत्रिलाभगाः । उपनिष्क्रमणे शस्ता मातुलो वाऽवेक्ष्यतामिति" । अथोत्तमानि मूलाश्विमित्रोपमधोत्तमं भवेदित्युक्तानि । उदयाः लग्नानि । एवंविधे मुहूर्त्ते क्रियमाणस्य शिशुनिष्क्रमस्य फलमाह वृहस्पतिः । "अथ निष्क्रमणं नाम गृहात् प्रथमनिर्गमः । अक्षतायां क्रियायां स्यादायुःश्रीनाशनं शिशोः" । क्षते संपद्विवृद्धिः स्यादायुर्वर्द्धनमेव चेति" अत्र विशेषमाह यमः "तृतीये मासि कर्त्तव्यं शिशोः सूर्यस्य दर्शनम् । चतुर्थे मासि कर्त्तव्यमग्नेश्चन्द्रस्य दर्शनम्" इति । वेदभेदेन व्यवस्था ज्यो०त० दर्शिता यथा "चतुर्थमासीति ऋग्वेदिवसुर्वेदिनोः । यथाह विष्णुः "चतुर्थमासादित्यदर्शनमिति" । शौनकोऽपि "चतुर्थे मासि पुण्यर्क्षे शुक्ले निष्क्रमणं शिशोः" पारस्करः "चतुर्थे मासि नक्षत्रमधिकं सूर्यसदीक्षयति यजुरितीति" मासे तृतीय इति तु छन्दोगानां गोभिलेन जननान्तरं तृतीयशुक्लपक्षतृतीयायां चन्द्रदर्शनरूपनिष्क्रामस्यविधानात् यथा गोभिलः "जननाद्यस्तृतीयो ज्योत्स्नस्तत्तृतीयायामित्यादि" । ज्योत्स्नः शुक्लपक्षः । अत्रैव क्वचिन्नामधिः "तस्मात् यस्यविधानतोऽर्कमभिनोरध्यं शिशुं दापयेत्" । ततः तारका० संज्ञातार्थे इतच् । निष्क्रमणित संजातनिष्क्रमणे त्रि० ।

निष्क्रय पु० निष्क्रीयते प्रत्यार्प्यतेऽनेन परगृहीतम् निस्+क्री–करणे अच् । १मूल्यं येन वेतने २विनिमयद्रव्ये तुल्ये मूल्यद्रव्येच विनिमिते द्रव्ये । भावे अच् । ३क्रये ४बुद्धियोगे ५सामर्थ्ये ६निर्गमने च वैजय० । ७प्रत्युपकारे ८विनिमये च शब्दार्थचि० "यस्तत्रिपदम् यः पृथिवीमतां वरम् वरप्रदानस्य चकार भूमिनः । तस्यतु प्रायद्विगुणासमम् मूल्यं यदृच्छे पणखेन निष्क्रयम्" माघः ।

दृविक्लवे "न निष्क्लविवर्मास्यां भर्तुर्भार्या विमुच्यते" मनुः ।

निष्क्रिय त्रि॰ निर्गता क्रिया यस्य प्रा॰ब॰ अत्यम् । क्रियादिव्यापारशून्ये "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" श्रुतिः "निष्क्रियस्य तदसम्भवात्" वा॰सू॰ "अथ दुःखाभिभूता ये वा निर्दुःखा निष्क्रिया गुणाः" भाषा॰ । [काये (भोज) क्षेमश्च॰ ।

निष्क्वाथ पु॰ निःसृतः क्वाथः प्रा॰ त॰ अत्यम् । मांसादि-

निष्कृन् त्रि॰ निर्+तक्ष–क्विप् वेदे अत्वटुत्वे । नितरां तक्षणशीले स्त्रियां "वनो र च" पा॰ ङीप् रचानादेशः । निष्टक्वरी । "दार्वी निष्टक्वरीमिच्छ" अथ॰ ५।२२।६

निष्टानक पु॰ नितान्तस्तानकः शब्दभेदः प्रा॰त॰बा॰अत्वटुत्वे । शब्दशब्दे "निष्टानकश्च दुन्दुभिस्तत्र सैन्यस्य चाभवत्" भा॰भी॰४८अ॰ ।

निष्टि स्त्री निश–समाधौ क्तिच् । अदितिसपत्न्यां १दितौ "निष्टिद्याः पुत्रमाच्यावयतेव" श्रु॰१०।१०१।१२ "निष्टिं दितिं सपत्नीं गिरतीति निष्टिद्योरदितिः तस्याः पुत्रम्" भा॰ ।

निष्टुर् त्रि॰ निस्+तु–क्विप् वेदे वा॰ षः रपरत्वम् अत्वटुत्वे । निस्तरते अतूस्वाभिभावके "प्र व उपाय निष्टुरे" ऋ॰ ८।२२।२७ "निष्टुरे अतून् निस्तरते" भा॰ ।

निष्ठ पु॰ निर्गत स्थावते स्थै–क निस्+अतार्थे त्यप् वा । विसर्गलोपअत्वटुत्वे १चण्डालादौ २म्लेच्छजातिभेदे क्षेमश्च॰ २पुत्रादौ च । "यं मे निष्ट्यो यमस्मात्तो निचखान" यजु॰ ५।२१। "स्थै स्थे शब्दसङ्घातयोः नितरां स्थायति सङ्घातरूपेण सह वर्त्तते इति निष्ठः यद्वा निर्गत्य शरीरात् स्थायति विलीयौ भवतीति निष्ठः पुत्रादिः । यद्वा निर्गतो वर्णोत्तमेभ्यो निष्ठः चण्डालादिः "निसो गते" इति पा॰ वार्त्तिकेन निस उपसर्गोद्धृतार्थे त्यप् इति काशिकायाम्" वेददी॰ ।

निष्ठ त्रि॰ नि+स्था–क अत्वटुत्वे । नितरां स्थितिशीले "अथ वा क्षेत्रमस्थिरविरूढ़ाप्रतियोगिना" भाषा॰ ।

निष्ठा स्त्री नि+स्था–भावे अ अत्वटुत्वे । १निश्चये २नाशे ३अवधौ सीमायां ४निर्बन्धे च अमरः । ५वाच्यायां भेदि॰ । ६धर्मादौ श्रद्धायाम् "लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ!। ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्" गीता "तस्मिंस्तु मोक्षोपदेशात्" भा॰ सू॰ "तस्मिन्नात्मनि चेतने निष्ठा यस्येति विग्रहः। "तेषां निष्ठा तु का कृष्ण! सत्वमाहो रजस्तमः" गीता । ७अवधारणे च "घ्राणं जिह्वा च चक्षुश्च त्वक्श्रोत्रं मनएव च । न निष्ठामधिगच्छन्ति बुद्धिस्तावधिगच्छति" भा॰ आश्व॰ ६६५ श्लो॰ । व्याकरणपरिभाषिते क्तक्तवतुप्रत्यये "क्तक्तवतू निष्ठा" पा॰ "धौरनिङ्निष्ठः" धातुपाठः । नितरां तिष्ठन्ति भूतान्यस्मिन् आधारे घा॰ क । प्रलये सर्वभूतस्थित्याधारे दृविष्णौ स्त्री "निष्ठा शान्तिः परायणः" विष्णुस॰ ।

निः(नि)ष्ठा त्रि॰ नि(निर्)+स्था–क्विप् अत्वटुत्वे वा विसर्गलोपः । नितरां यथा भूतस्थितौ "ज्ञातो निःष्ठामदभूर्भीषु धीरान्" ऋ॰३।३१।१० "निष्ठां पूर्वं यथास्थितिमर्वाङ्भूः तथा" भा॰ अश्व॰ अनुगीतादौ निःष्ठः निःष्ठा निःष्ठे इत्यादिरूपमिति भेदः । [तिमने व्यञ्जने अमरः।

निष्ठान न॰ नि+स्था–करणे ल्युट् अत्वटुत्वे । भक्षाद्युपसेचने

निष्ठानक पु॰ नागभेदे "निष्ठानको हेमगुहो नहुषः पिङ्गलस्तथा" भा॰आ॰ ३५अ॰ ।

निष्ठान्त त्रि॰ निष्ठा नामोऽन्ते यस्य । नामान्ते वस्तुनि । "निष्ठान्तं यस्य चापि स्यं शास्त्रं धर्मश्च केवलम्" भा॰ स्त्री॰ ११अ॰। २नितरांस्थितवति च "मानादिरत्र निष्ठान्तो मानुषा बहवो यथा" अनु॰ १०१अ॰ ।

निष्ठित त्रि॰ नि+स्था–क्त अत्वटुत्वे । १नितरांस्थिते वस्तुनि २निष्पन्ने च "बुद्धियोगवतोत्पन्नैः सर्वान्क्षेषु च निष्ठितः" भा॰आ॰ १२२अ॰ ।

निष्ठो(ष्ठी)व पु॰ नि+ष्ठिव–भावे घञ् वा दीर्घः । ष्ठीवने क्षेत्रादीनां सस्याद्यिरसने क्षेमश्च॰ ।

निष्ठो(ष्ठी)वन न॰ नि+ष्ठिव–भावे ल्युट् वा दीर्घः । क्षेत्रादीनां सस्येन निरसने "वान्तं निष्ठीवनं चैव कुर्वते चास्य सन्निधौ" भा॰आ॰ ५६अ॰ "क्षुतेऽवलीढे वान्ते च तथा निष्ठीवनादिषु । कुर्यादाचमनं स्पर्शं मोक्षणस्यार्कदर्शनम्" मार्कण्डेयपु॰ २४अ॰ ।

निष्ठीवित न॰ निष्ठीवं करोति कर्त्तरि निष्ठीव+क्विप्–भावे क्त । निष्ठीवनकरणे "वाचः परुष्या निष्ठीवितं क्षुतं चाशुभं कथितम्" ह॰सं॰ ५२अ॰ ।

निष्ठुर न॰ नि+स्था–उरच् बहुरादि॰नि॰अत्वटुत्वे । १परुषवाक्ये २कठोरे त्रि॰ । "शुष्काक्रामेध्यशब्दानां यद्वचनं निष्ठुरं विदुः। यदन्यद्वा वचो नीचं स्त्रीपुंसमैथुनाश्रयम्"

दत्युक्ते २कथनीयवाक्ये न० ४तत्तद्विषिष्टे त्रि० अमरः। "छिन्ना भवतु ते बुद्धिरेताद्दृक् निष्ठुरम्" भट्टिः। "धैरव्य कस्मिंपकनिष्ठुर चोदनाभिः" माघः।

निष्ठुरिक पु० नागभेदे "आप्नः कोटरकर्दैव शिखी निष्ठुरिकस्तथा" भा०उ० १०२अ०।

निष्ठूव त्रि० नि+ष्ठिव–क्त ऊठ्। १मुखेन निरस्ते श्लेष्मादौ "कफनिष्ठूतमिषोर्द्धसर्जैः" माघः "श्लेष्मनिष्ठूतवान्तानि नाधितिष्ठेत्तु कामतः" मनुः भावे क्त। २निष्ठीवने न०।

निष्ण त्रि० नि+स्ना–क "निनदीभ्यां स्नातेः कौशले" पा० षत्वे टुत्वम्। कुशले "अतिथ्यनिष्णा वनवासिसख्याः" भट्टिः।

निष्णात त्रि० नि+स्ना–क्तरि क्त "निनदीभ्यां स्नातेः कौशले" पा०षत्वे टुत्वम्। १कुशले निपुणे अमरः। "निष्णातैरपि सरसा प्रियासमूहैः" माघः। २पारङ्गते च "वैद्यस्यावनएवैको निष्णातोयजुषान्तत" भाग० १।३अ०।

निष्पक्व त्रि० निर्गतं पक्वम्। "इदुदुपधस्य चाप्रत्ययस्य" पा० षत्वम्। १अतिशयेन पक्वे व्यञ्जने २काथिते दग्धमूलादौ च "पर्णेकपावनिष्पक्वा एतामापो भवन्ति" शत०ब्रा०३।५।३।५

निष्पतिष्णु त्रि० निर्+पत–वा० ष्णुच् षत्वम्। नितान्तपतनशीले "इन्द्रियाणि प्रमाथीनि बुद्ध्या संयम्य यत्नतः। सर्वतो निष्पतिष्णूनि" भा०शा० २५०अ०।

निष्पतिसुता स्त्री निर्गतो पतिः सुतश्च यस्याः ब्रा०ब०षत्वम्। अवीरायां पतिपुत्रविहीनायां स्त्रियाम् अमरः।

निष्पत्ति स्त्री निर्+पद–क्तिन् षत्वम्। १समाप्तौ २सिद्धौ च "कथमप्यसमाप्तस्य निष्पत्तेः प्रतीक्षते" कुमा० "निष्पत्तिः कर्मणो दैवे पौरुषे च व्यवस्थिता" मार्क०पु०४३अ०।

निष्पत्र त्रि० निर्गतमन्यपार्श्वेन निःसृतं पत्रं शरपुङ्खो यस्य ब्रा०ब०षत्वम्। १एकपार्श्वनिर्गतपक्षपुङ्खशरस्यापरपार्श्वेन निर्गमयुक्ते मृगादौ ततः "सपत्रनिष्पत्रादतिव्यधने" पा० ञ्योयोगे ष्टाच्। निष्पत्राकरोति मृगं सपुङ्खस्य शरस्यापरपार्श्वेन निर्गमनात् निष्पत्रं करोतीत्यर्थः णि०औ० निर्गतं पत्रं यस्य। निर्गतपत्रके त्रि०। "विध्यन्त्यनिष्पत्रम्" कात्या० श्रौ० १२।२२।२ "अनिष्पत्रमनिःसृतपत्रं विध्यन्ति क्षत्रियाः" कर्कः।

निष्पत्रक त्रि० निर्गतं पत्रं पर्णं यस्य कप्। १पत्रशून्ये स्त्रियां टाप् अपि अत इत्वम्। स्त्री च २करीरवृक्षे राजनि०। [वने हेमच०।

निष्पत्राजति स्त्री निष्पत्र+ष्टाच् ज–भावे क्तिन्। अतिव्य-

निष्पद् न० निर्गतं पर्दं पादोऽस्य ब्रा०ब०षत्वम्। १पादशून्ये २नाडयाने नौकादौ युक्तिकल्पतरुः।

निष्पदयानञ्च नौकादिरूपं तद्विवरणञ्च तत्र यथा "नौकाद्यं निष्पदं यानं तस्य लक्षणमुच्यते। यत्रादिकन्तु यद्यानं स्थले सर्वं प्रतिष्ठितम्। जले नौरेव यानं स्यात्तस्यां यत्नतो वसेत्"। तद्घटनादिकालो यथा "शुक्रारवेला तिथिचन्द्रयोगे चरे विलग्ने मकरादिषट्के। कुजेऽन्त्यसप्तव्यतिरेकतोऽन्ये वदन्ति नौकाघटनादि कर्म। अश्विश्रवःपुष्यधनिष्ठिपूर्वाभित्रधनाच्युतभे शुभलग्ने। तारकयोगतिथीन्दुविशुद्धौ नौगमनं शुभदं शुभवारे। इत्यायुर्वेदगदिता लक्षजातिचतुर्विधा। समासेनैव गदितं तेषां काष्ठं चतुर्विधम्"। तद्यथा "लघु यत् कोमलं काष्ठं शुषिरं ब्रह्मजाति तत्। दृढाङ्गं लघु यत् काष्ठमघटं क्षत्रजाति तत्। कोमलं गुरु यत् काष्ठं वैश्यजाति तदुच्यते। दृढाङ्गं गुरु यत् काष्ठं शूद्रजाति तदुच्यते। लक्षणक्षययोगेन द्विजातिकाष्ठसंग्रहः। क्षत्रियकाष्ठैर्घटिता भोजमते सुखसम्पदि नौका। अन्यैर्लघुभिः सुदृढैर्विदधति जलदुर्गदे नौकाम्। विभिन्नजातिदयकाष्ठजाता न श्रेयसे नापि सुखाय नौका। तेषां चिरं तिष्ठति भुज्यते च विभिद्यते वारिधि मज्जते च। न विल्वजाद्याऽर्हति कौशलत्वं तल्लोहकानैर्ह्रियते हि लौहम्। विपद्यते तेन जलेषु नौका गुरुत्वेन यथा निजगाद भोजः"। अथ लक्षणानि "सामान्यञ्च विशेषश्च नौकाया लक्षणद्वयम्"। तत्र सामान्यम्। "राजहंसमिताधामा तत्पादपरिवाहिनी। तावद्देशोन्नता नौका क्षुद्रेति गदिता बुधैः। अतः सार्द्धमिताधामा तदर्द्धपरिवाहिनी। त्रिभागेनोन्नता नौका मध्यमेति प्रचक्षते। क्षुद्राश्च मध्यमा भीमा चपला घटना मता। दीर्घा पत्रपुटा चैव गर्भरा मन्थरा तथा। नौकादशकमित्युक्तं राजहंसादनुक्रमात्। एकैकहस्तैः सार्द्धैश्च विज्ञानीयाद्दृढं दृढम्। उन्नतिश्च प्रवीणा च हंसादर्द्धावसम्मिता। अत्र भीमा मता चैव गर्भराख्या शुभप्रदा। मन्थरा परतोयासु तासां सेवाप्यधोगतिः। तासां सुखस्तु संक्षेपाद् दृढता च प्रकीर्त्तिता"। अथ विशेषः "दीर्घा चैवोन्नता चेति विशेषे द्विविधा मिदा। तत्र दीर्घा यथा "राजहंसदयावामा चतुरंशपरिवाहिनी। नौकैवं दीर्घिका नाम दशांशेनोन्नतापि च। दीर्घिका तरणिर्नौका

मत्वरा गामिनी तरिः। जङ्घाला स्रावियी चैव धारिणी वेगिनी तथा। राजहंसैकैकहस्ता नौकानामानि वै दश। उन्नतिः परिणाहश्च दशार्धांशमितौ क्रमात्। यत्र नौका गामिनी च स्रावियी दुःखदा भवेत्। नौकावमानमारभ्य यावत् भवति मत्वरा। नौकायाः फलमाधत्ते एवं सर्वासु निर्णयः। वेगिन्याः परतो या तु साखिलायोत्तरा तथा"। भोजोऽपि "नौकादीर्घं यत्रेच्छं स्यात् तत्रैतानि विवर्जयेत्। दृक्संख्या परिणाह्या दशद्व्यष्टवेदहस्तोत्तरैः। षष्ठ्युत्तरमिता नौका कुलं क्लृप्ति वसं धनम्। नवतीत्तरे यापि या चत्वारिंशतः परा"। यावदपरार्धकं तावदेव तत् फलमिति। अथोन्नता। "राजहंसद्वयमिता तावत् प्रस्तरनौन्नता। दृभमूर्वाभिधा नौका क्षेमाय पृथिवीभुजाम्। ऊर्ध्वानूर्ध्वा सर्वसखी गर्भिणी मत्वरा तथा। राजहंसैकैकहस्ता नाम पञ्च भयं भवेत्। ऊर्ध्वानूर्ध्वा गर्भिणी च निन्दितं नाम युग्मकम्। मत्वरायाः पराबास्तु ताः शुभाय यथोद्भवम्"। भोजोऽपि। बाणाग्न्युत्तरतो मानं नौका नाम शुभा वहेत्। पञ्चाग्न्यूर्ध्वा दुःखासं धननाशं त्रयोर्दशः। इत्युक्ता "धात्वादौ नाम्नतो वक्षे निर्णयं तरिसंश्रयम्। कनकं रजतं ताम्रं त्रितयं वा यथाक्रमम्। ब्रह्मादिभिः परिन्यस्य नौकाचित्रयकर्मणि। चतुःषट्का त्रिषट्का वा द्विषट्का चैव ऋक्षिणी। सितरक्तपीतनीलवर्णाक्षाःसूर्यभाक्रमम्। केसरी भक्षिणो नागो द्विरदो व्याघ्र एव च। पक्षी मेषो मनुष्यश्च एतेषां वदनाष्टकम्। नावां सखोपरिन्यस्य आदित्यादिदशाभुवाम्। कलशो दर्पणचन्द्रौ दैवज्ञानां मक्षीभुजाम्। हंसः केकी शुकः सिंहो मत्स्योऽश्विन्यौत्रषट्पदौ। आदित्यादिदशाजातनौकोपरि परिन्यसेत्। नौकाश्च मणिविन्यासो विप्रेवो नवदण्डवत्। दण्डाक्षवर्जयुक्ता नौका स्यात् सर्वतो भद्रा। तत्संख्या वेदयमवेदहयसंमिता क्रमशः। कनकादीनां भाषा जयमावेति गद्यते बुद्धिः। ब्रह्मजले द्वितये एकैके वैश्यशूद्रयोनी। निर्दं सगुणं वाथ तत्सर्वं द्विविधं भवेत्। निर्दं पूर्वसंदिष्टं सप्तदशादि यथा क्रमेण। सप्तदशा त्रिविधा प्रोक्ता सर्वमध्याग्रमन्दिरा। सर्वतो मन्दिरं यत्र सा श्रेष्ठा सर्वमन्दिरा। राज्ञां कोशाश्वनारीणां फलमत्र प्रशस्यते। मध्यतो मन्दिरं यत्र सा श्रेष्ठा मध्यमन्दिरा। राज्ञां विलासवास्तादिवर्णांशु च प्रशस्यते। अग्रतो मन्दिरं यत्र सा श्रेष्ठा ह्यग्रमन्दिरा। चित्रगवाक्षवातायां रचै काले घनात्यये। मन्दिरमानं नौकाप्रसरत एवार्द्धभागतो न्यूनम्"। भोजस्तु दीर्घदण्डवसुषड्दिशकरानेकदिङ्नवमिता यथाक्रमम्। राजपङ्क्तिभुजसंख्यितोन्नतिर्मन्दिरे तरिसते मक्षीभुजाम्। भास्करादिदशाभुवां पुनर्धांशनिर्णयनमत्र पूर्ववत्। पताकाकलशादीनां निर्णयो नवदण्डवत्। काष्ठजं धातुजं चेति मन्दिरं द्विविधं भवेत्। काष्ठजं सुखसम्पत्त्यै विलासे धातुजं मतम्। अत्र शय्यासनादीनां मन्थरोद्योचयोरपि। अन्येषां चैव सर्वेषां निर्णयः पूर्ववन्मतः। दिङ्मात्रमिदमुद्दिष्टं नौकालक्षणमञ्जसम्। प्रधानेष्वेव निपुणो अप्रधाने न निर्णयः। लघुता दृढता चैव गामिताऽक्षिद्रता तथा। सप्तैते गुणोद्देशो नौकानां सम्प्रकाशितः। एवं विचिन्त्य यो राजा नौकायानं करोति च। स चिरं सुखमाप्नोति विजयं समरे श्रियम्। योऽज्ञानाद्व्यथा यानं नौकानां कुरुते नृपः। तस्यैतानि विनश्यन्ति यशोवीर्यं बलं धनम्"। अथन्यजलयानानि यथा "नौकान्यतो जले यानं अथन्यमिति गद्यते। तद्दारुवल्कवस्त्रे तु पाषाणानां प्रकीर्त्तिताः। द्रोणीरूपन्तु यद्यानं द्रोणीयानं तदुच्यते। घटीभिर्घटितं यानं घटी नौकेति गद्यते। तुम्बादौस्तु फलैर्यानं फलयानं प्रचक्षते। चर्मभिस्तूपपूर्णैर्यच्चर्मयानं तदुच्यते। यानं वस्तुभिर्वेष्टैस्तयानं तदुच्यते। जन्तुभिः सहिते यानं जन्तुयानं प्रचक्षते। बाहुभ्यां सन्तरेद्यत्र वारि अथन्येषु न निर्णयः"

निध्यदी स्त्री निर्गतः पादोऽङ्घ्रिः पादः अन्तलोपः समा० कुम्पदा० ङीष्, पद्भावः विसर्गस्य षः। १पादहीनायां स्त्रियाम्। निर्+पद्–क्विप्। २निर्गते "निष्पदो सङ्गजानाम्" ऋ० १०।१०२।६ "निष्पदः निर्गच्छन्तः" भा०।

निष्पन्द त्रि०निर्गतः स्पन्दो यस्य प्रा०ब०। विसर्गलोपाभावे "इदुदुपधस्य चाप्रत्ययस्य" पा० षत्वटुत्वे। स्पन्दनरहिते "अथावन्त्वनिष्पन्दभुजेन यस्य"। "मैथिलीतनयोद्वीतनिष्पन्दसमाधिमग्नम्" रघुः। विसर्गलोपे न षत्वम्।

निष्पव त्रि० निर्+पद्–क्त षत्वम्। १सिद्धे २समाप्ते च।

निष्परिग्रह त्रि०निर्गतः परिग्रहः यस्य प्रा०ब०। १विषयादिसङ्गरहिते कम्बापादुकादिभिन्नद्रव्यरहिते २वस्त्रादौ च "आत्मस्थात्मानमाधाय निर्द्वन्द्वो निष्परिग्रहः" मार्क० ४० १६अ०।

निष्पवन न० निष्+पू–भावे ल्युट् नत्वम् । धान्यादेर्निस्तुषीकरणे । निष्पावशब्दादें "निष्पवनादिकीकरणात्तं भेदेन धात्वर्थमधिकृत्यादिकर्मणि ल्युट्" काशि० श्रौ० पद्धतौ कर्त्तृः ।

निष्पाद पु० निर्गतौ पादौ यस्य प्रा०ब० अन्यपदोपः समा० विसर्गस्य षः । निर्गतपादके ततः शिल्पा० अच्प्रत्ययें कच् । निष्पाद्य तद्युक्ते देशादौ त्रि० ।

निष्पादक त्रि० निर्+पद–णिच्-ण्वुल् विसर्गस्य षः । निष्पत्तिकारके "न चार्जयिनने तस्य मन्त्री सहायः किन्तु स्वयमेव निष्पादकः" हा०द० ।

निष्पाव पु० निष्पूयते शुद्धाद्यपनयनेन शोध्यतेऽनेन निर्+पू–करणे घञ् नत्वम् । १स्वर्णादिशोधो तेन हि खलस्थधान्यादिकं कडङ्करादिशून्यं करोति । कर्मणि घञ् । २कडङ्करे (आगडा) ३राजमाषे (वरवटी) ४श्वेतशिम्बीधान्ये ५निर्विवरके त्रि० मेदि० । भावे घञ् । ६धान्यादीनां विशुद्धीकरणे अमरः । "चौरदित्वा तु निष्पावान् जायते मङ्गलोलकः" मार्क० पु० १५अ० संज्ञायां कन् । श्वेतशिम्ब्यां राजनि० "निष्पावो मधुरो रूक्षो विषाहेऽल्पो गुरुः सरः । कषायस्वल्पपित्तास्रश्लेष्मवातविनाशनः । विदाह्यतिसृष्टविण्मूत्रोऽधोवृत् यत्नवान्मतः" भावप्र० । ततः शिल्पा० अच्प्रत्ययें कच् । निष्पावश्च विशुद्धीकरणयुक्ते धान्यादौ त्रि० गौरा० ङीष् । निष्पावी शिम्बीभेदे स्त्री राजनि० ।

निष्फलाक त्रि० निर्गतः फलाको यतः प्रा०ब० नत्वम् । १फलाकरहिते धान्यादौ (आगडा) तुच्छ धान्यरहिते शब्दार्णवे २जैनभेदे पु० हेम० ।

निष्पेष पु०निर्+पिष–घञ् । १निष्पोडने २निष्पन्ने ३चूर्णने "नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलम्" रघुः । तत्र प्रभवति छन्दापादि० ठञ् । नैष्पेषिक निष्पेषसम्बन्धादौ । अभावे अव्य० ४मेषणाभावे अव्य० निरुदका० अनोदात्तताश्च भावे ल्युट् । निष्पेषणमयत्न न० ।

निष्प्रकम्प त्रि० निर्गतः प्रकम्पो यस्य प्रा०ब० नत्वम् । १प्रकम्पशून्ये अयोदशमन्वन्तरोत्थे २सप्तर्षिभेदे पु० । तदुपक्रमे "निष्प्रकम्पसभासीनो निर्मोहः कार्यवत्सला । सुतपाश्चैव वाग्मिश्च सप्तैते तु महर्षयः" हरिवं० ७अ० ।

निष्प्रतिभ त्रि० निर्गतः प्रतिभायाः निरा०त० नत्वम् । १जडे अज्ञे २प्रागल्भ्यरहिते च लटादौ "चौक्षाकाराश्च नाराश्च सुप्तनिष्प्रतिभाश्च ये" हरिवं० ८१अ० ।

निष्प्रत्यूह त्रि० निर्गतः प्रत्यूहो यस्य प्रा०ब० नत्वम् । निर्विघ्ने निरुपद्रवे "निष्प्रत्यूहकृषाक्षेत्रे भगवतः कौमोदकीवज्रभयः" मुरारिनाटकम् ।

निष्प्रभ त्रि० निर्गता प्रभाऽस्य प्रा०ब० नत्वम् । १दीप्तिशून्ये अमरः । "निष्प्रभश्च रिपुराश भूभृताम्" रघुः । २दानवभेदे पु० । "निष्प्रभः सुप्रभश्चैव तथैव च निरुद्धरः" हरिवं०२६३अ० २नागदानवोक्तौ ।

निष्प्रयोजन त्रि० निर्गतं प्रयोजनमस्य प्रा०ब० नत्वम् । प्रयोजनशून्ये "गुरुणानुपदेशो हि निष्प्रयोजनतां व्रजेत्" प्राय०त० "निरानन्दं निराखादं निष्प्रयोजनमाहतम्" हरिवं०अ० ।

निष्प्रवाण न० प्रकर्षेण वयति अनेन प्र+वे–ल्युटौ करणे ल्युट् प्रवाणं तन्त्रवायसाधनद्रव्यं निर्गतं प्रवाणात् निरा०त० । नवाम्बरे डाराव० ।

निष्प्रवाणि त्रि० प्रोवन्तेऽस्यामनया वा प्र+वेञ्–करणे ल्युट् ङीप् प्रवाणी तन्त्रवायशलाका निर्गतः प्रवाणात् निरा० ङ० सौत्रत्वेन ह्रस्वः नत्वम् । नवाम्बरे अभिनवे (तँतकाटा) वसने अमरः ।

निष्प्राण त्रि० निर्गतः प्राणः तज्जन्योच्छ्वासादिर्यस्य प्रा०ब० नत्वम् । श्वासप्रश्वासादिशून्ये "म्लानिर्निष्प्राणतामस्य हाक्षांस्तृप्तश्चकासादिवत्" रघुः । "संस्तम्भितमिवाभाति निष्प्राणसदृशाकृति" (वस्त्रम्) हरिवं० ४६अ० ।

निष्फल त्रि० निर्गतं फलं यस्मात् प्रा०ब० नत्वम् । १फलरहिते "अवनम्य वयोन्नतं वपुः प्रियबन्धोरिव निष्फलोदयः" कुमा० । फलशून्ये धान्यकाण्डे २पलाले (नाड़ा) पु० अमरः । ३विगतार्त्तवायां स्त्रियां स्त्री गौरा० ङीष् । निष्फली विगतरजस्कायां स्त्रियां स्त्री शब्दरत्ना० ।

निष्फेन त्रि० निर्गतं फेनं यस्य प्रा०ब० नत्वम् । फेनरहिते उपरतफेने "यत् काय्यमानं निर्वेगं निष्फेनं निर्मलं बभौ सलिलम् । पक्षे विसर्गोपधानीयौ

निष्प(स्य)न्द पु० नि+स्पन्द्–भावे घञ् वा नत्वम् । क्षरणे जलादेः स्वसंस्पर्शे "स्निग्धनिष्प्रन्दगोलकम् ।" कच् । २निष्प्रन्दयुक्ते त्रि० ।

निष्प्लुत त्रि० नि+प्लुत–क्त अट् नत्वम् । नितान्तप्लुते

निष्प्लन्धि त्रि० निर्गतः सन्धिः सन्धानं यस्य प्रा०ब०सुधामा० नत्वम् ष्टुत्वञ्च । सन्धिरहिते ।

निष्प्रथम अव्य० निर्गता प्रथमा यस्य तिङन्तस्य प्र० अव्ययी० नत्वष्टुत्वे । वत्सरातीते ।

निस्वामन् त्रि॰ निर्गतं स्वाम यस्य प्रा॰ब॰ स्वाभा॰ अत्वम् टुत्वञ्च। स्वामशून्ये। [नितान्तसेधे।

निस्वेध पु॰ निस्+सिध–भावे घञ् सुपामा॰ अत्वम् टुत्वञ्च।

निस् अव्य॰निस्–क्विप् उपसर्गभेदः। १निषेधे २निश्चये ३साकल्ये ४अतिक्रमे च शब्दार्थचि॰। निर् शब्दे दृश्यम्

निसम्पात पु॰ निष्टप्तः सम्पातः सङ्घारो यत्र। निर्घाते अर्द्धरात्रे शब्दरत्ना॰ निरा समासे निःसम्पातोऽप्यत्र।

निसर त्रि॰ निसरति नि+सृ–अच्। नितान्तसर्त्तरि नितान्तगामके "अन्यवेऽयज्ञाय क्रोधाय निसरम्" यजु॰ २०।१४ च॰।

निसर्ग पु॰ नि+सृज–घञ्। १स्वभावे २स्वरूपे ३सृष्टौ च मेदि॰ "वर्णोनिसर्गोज्ज्वलः" नैष॰ "मधुराक्षापनिसर्गपण्डिताम्" कुमा॰ "निसर्गदुर्बोधमबोधविक्लवाः" किरा॰ "निसर्गजं तु तत्तस्य कस्तस्मात्तदपोहति" मनुः। पक्षाणां निसर्गबलम् पक्षबलशब्दे २७५४ पृ॰ दृश्यम्।

निसार पु॰ नि+सृ–घञ्। समूहे त्रिका॰।

निसिन्व पु॰ नितरां सिन्वरिव बहुत्वपत्वादिसत्त्वात्। सिन्वसारे (निसिन्दा) शब्दच॰।

निसुम्ब(न्द) पु॰ वसुरभेदे "सादिता मौरवाः काश्या निसुम्ब(न्द) प्रतयो हताः" भा॰व॰ १२अ॰ "हयग्रीवो निसुं(न्द)म्भश्च मौरः पञ्चजनस्तथा" हरिवं॰ १२२अ॰।

निसूदक त्रि॰ निसूदयति नि+सूदि–ण्वुल्। हिंसके "तथात्मेवीनिसूदकः" याज्ञ॰।

निसूदन न॰ नि+सूद–भावे ल्युट्। १मारणे वधे अमरः। कर्त्तरि ल्यु। २मारके नाम्नि त्रि॰ "वज्रिन्द्रशत्रुहन्तृनिसूदनं हरेः" माघः "बलनिसूदनमर्थपतिञ्च तम्" रघुः।

निसृता स्त्री नितरां सृता नि+सृ–क्त। १निष्टतायाम् (तेओडि) रत्नमा॰। २नितान्तगते त्रि॰।

निसृष्ट त्रि॰ नि+सृज–कर्मणि क्त। १त्यक्ते अमरः २मध्यस्थे त्रिका॰। "न स्वामिना निसृष्टोऽपि भृत्यो दायाद्यमर्हति" मनुः।

निसृष्टार्थ पु॰ "उभयोर्भाषितस्यैव स्वयं वदति योत्तरम्। सन्दिष्टः कुरुते कर्म निसृष्टार्थस्तु स स्मृतः" सा॰द॰ दूत्यञ्चे १दोषभेदे "निसृष्टार्थोभितार्थश्च तथा सन्देशहारकः। कार्य्यभेदास्त्रिधा दूतो दूत्यवापि तथाविधाः" सा॰द॰ "यः स्वामिना नियुक्तोऽपि धनायव्ययपालने। कुशीदकृषिवाणिज्ये निसृष्टार्थस्तु स स्मृतः" २दूतभेदे च "धीरः स्थिरमतिः शूरः स्वामिकार्यविधायकः। स्वपौरुषप्रकाशी च निसृष्टार्थः स उच्यते" सङ्गीतदा॰ च उक्ते ३मुक्ते।

निसोढ त्रि॰ नि+सह क्त ओत् ओत्त्वात्त्व धः। नितान्तसहे एवं निसोढवत्। निसोढि इत्यादावपि न धः।

निस्तत्त्व त्रि॰ निर्गतं तत्त्वं वास्तवं रूपं स्वरूपं वा यस्य प्रा॰ब॰। अवस्तुन्यर्थे।

निस्तनी स्त्री नितरां स्तनस्तदाकारोऽस्त्यस्याः अच् गौरा॰ ङीष् वा रोर्लोपः। वटिकायां (वडि) अत्र निस्तनीत्येव पाठः शब्दच॰। निर्गतौ स्तनौ यस्याः वा विसर्गलोपः। स्तनहीनायां स्त्रियाञ्च स्वाङ्गत्वात् वा ङीष् पक्षे टाप् इति भेदः।

निस्तन्द्र त्रि॰ निष्क्रान्ता तन्द्रा यस्य प्रा॰ब॰। १तन्द्रारहिते २आलस्यरहिते च "निस्तन्द्रो क्षपितश्रमस्तमभवत्" स्फुट॰

निस्तन्द्रि त्रि॰ निर्गता तन्द्रिरालस्यं यस्य प्रा॰। आलस्यरहिते। निर्गता तन्द्रा॰ किरा॰त॰। निस्तन्द्री इत्येव स्त्रीप्रत्ययान्तत्वाभावात् ओरेऽपि न ह्रस्व इति भेदः।

निस्तरण न॰नि र्+तॄ–करणे ल्युट्। १उपाये। भावे ल्युट्। २निस्तारे ३पारगमने ४तरणे च मेदि॰ ५निर्गमे विश्वः।

निस्तरीक्ष अव्य॰ तरे देवः ईक्ष तरीक्षः अभावे अव्ययी॰। १तरणार्थदेवकराभावे निरुदका॰ अन्तोदात्तताऽस्य। प्रा॰ब॰। २तरीकशून्ये त्रि॰।

निस्तीप त्रि॰ तरीं पाति पाः क निर्गतस्तरीपो यस्मात् प्रा॰ब॰। १तरीकापालकशून्ये अभावे अव्ययी॰। २तरीपाभावे अव्य॰। निरुदका॰ अस्यान्तोदात्तता। [अमरः।

निस्तर्हण न॰ नि+तृह–क्विपायां भावे ल्युट्। मारणे

निस्तल त्रि॰ निरस्तं तलं प्रतिष्ठा यस्य। १अतले २तलशून्ये अतले न॰ अमरः। ३तले मेदि॰ अस्य प्रतिष्ठाराहित्यात् तथात्वम्। नितान्तं तलं प्रा॰स॰। ५तले क्षेमच॰ ५वटिकायां स्त्री शब्दच॰ गौरा॰ ङीष्।

निस्तार पु॰ निःशेषेण तारः पारगमनम्। १उद्धारे २पारगमने ३अभीष्टप्राप्तौ च "जीर्णा तरिः सरितोवगभीरनीरा वाञ्छा सदं सकलमित्यनवस्थितेः। निस्तारबीजमिदमेव जगोदरीणां यन्नाथ! त्वयि समुचितं कर्णधारः" स्फुटः। "कलौ पापयुगे घोरे तपोहीनेऽतिदुस्तरे। निस्तारबीजमेतद् यद्ब्रह्मनन्तस्य साधनम्" भक्तिनि॰त॰।

निस्तुष त्रि॰ निर्गतास्तुषा यतः प्रा॰ब॰। १वितुषीकृते धान्यादौ "पूर्वैर्दुर्दशिभिर्नृपैर्निस्तुषावश्च्यवानाम्" कथा॰ औ॰ ५।३२। २निर्मले च।

निस्वचीर पु॰निस्वं निर्मलं चीरं यस्य । मोघुमे राजनि॰
निस्वपत्र न॰ निस्वं निर्मलं पत्रम् । स्फटिके राजनि॰ ।
निस्वषित त्रि॰ निस्व+क्षतौ षिच्–क्त । १त्वग्विहीने क्षते तण्डुलादौ २क्षयप्राप्ते १त्यक्ते च मेदि॰ ।
निस्तेजस् त्रि॰ निर्गतं तेजोऽस्य प्रा॰ब॰ । तेजोहीने "नभेतव्यं भयं चैते मात्रा निस्तेजसः कृताः" मार्कण्डपु॰ १८अ॰ ।
निस्तोद पु॰ निस्+तुद–भावे घञ् । नितान्तव्यथने "सूचीभिरिव निस्तोदः" "तेषु कायेषु निस्तोदो मारुतेनोपजायते" सुश्रुतः भावे ल्युट् । निस्तोदनमप्यत्र न॰ । "पार्श्वभङ्गो गुदवस्तिनिस्तोदनम्" सुश्रुतः ।
निस्त्रिंश पु॰ निर्गतस्त्रिंशतोऽङ्गुलिभ्यः ढच् समा॰ । १खड्गे अमरः त्रिंशदङ्गुल्यधिकस्यैव खड्गत्वात् ततो न्यूनत्वे छुरिका । तत्तुल्यहिंसकत्वात् २निर्दये त्रि॰मेदि॰ "हे निस्त्रिंश (निर्दय) विस्रब्धकण्ठकरणं तावत् सखी रोदिति" अमरशतकम् "सप्तर्षयोऽनिस्त्रिंशः पादचारीव पर्वतः" भा॰आ॰ १२६अ॰ । ३मन्वन्तरभेदे "नवाक्षरो ध्रुव युतो मनुर्निस्त्रिंश ईरितः" तन्त्रसा॰ ।
निस्त्रिंशपत्रिका स्त्री निस्त्रिंशः खड्ग इव पत्रमस्या कप् कापि अत इत्त्वम् । क्षुद्रोद्भिदे राजनि॰ ।
निस्त्रिंशिन् त्रि॰निस्त्रिंशः धार्य्यत्वेनास्त्यस्य इनि । खड्ग धारिणि "सन्नद्धा लोहितोष्णीषा निस्त्रिंशिनो याजवेयुः" आश्व॰श्रौ॰ ६।७।४ स्त्रियां ङीप् ।
निस्त्रैगुण्य त्रि॰ निष्क्रान्तः त्रैगुण्यात् त्रिगुणकार्य्यात् संसारात् तत्कार्येभ्यः कामादिभ्यो वा निरा॰त॰ । १कामादिशून्ये २संसारातीते च "निस्त्रैगुण्यो भवार्जुन !" गीता ।
निस्त्रैणपुष्पी स्त्री निर्गतं स्त्रैणं स्त्रीरागादि यस्मात् प्रा॰ब॰ निस्त्रैणं पुंप्रमस्याः ङीप् । राजपुत्रूरक्षे राजनि॰ ।
निस्स्नेह त्रि॰ निर्गतः स्नेहः प्रेम तैलादिकं वास्य प्रा॰ब॰ । १प्रेमशून्ये २तैलशून्ये च ३मन्वन्तरभेदे पु॰ "शतद्वयं हि नवतिरेकहीना तथापि वा । यावच्छतत्रयं सङ्ख्या निस्स्नेहाख्ये प्रकीर्त्तिताः" तन्त्रसा॰पक्षे विसर्गः । निःस्नेहः
निस्स्नेहफला स्त्री निःस्नेहं फलमस्याः । श्वेतकण्टकार्य्यां राजनि॰ । पक्षे विसर्गः ।
निस्पन्द पु॰ निर्गतः स्पन्दो यस्य प्रा॰ब॰ वा विसर्गलोपः । १स्पन्दनरहिते "स्पन्दे चले नैष्प्रकम्पेऽपाये निपत्य निस्पन्दतरोभवद्भ्राम्" नैष॰ । २चेष्टाशून्ये पक्षे विसर्गः ।
नि(स्पृ)स्पृह त्रि॰ निर्गता स्पृहा यस्य वा विसर्गलोपाभावे विसर्गस्य रुत्वुपधत्वेन घत्वे ष्टुत्वम् झरोझरीति ष लोपे एकः । १विषयादिषु इच्छाशून्ये "आशादीनां निस्पृहाणां पाराय्यमिह दृश्यते" "निस्पृहः सर्वकामेभ्यो युक्तस्तदुच्यते तदा" गीता । २वह्निशिखावृक्षे स्त्री शब्दर॰। अव्ययी॰ ३स्पृहाया अभावे अव्य॰। विसर्गलोपे न घः ।
निस्यन्द पु॰नि+स्यन्द्–घञ् वा धत्वम् । १स्यन्दने रेफतृप्तरसे । कर्त्तरि अच् । २तद्युते त्रि॰ । यथाङ्कुरिकाहृतचन्द्रकान्ते निस्यन्दनीरनिकरेण कृताभिषेका" माघः "तदङ्गनिस्यन्दजलेन लोचने" रघुः ।
नि(स्रा)स्राव पु॰नि+स्रु–घञ्, संज्ञायां घञ् वा । १भल्लातके (भाड) अमरः । भावे घञ् घञ् वा । २क्षरणे च ।
निस्स्व त्रि॰ निर्गतं स्वमस्य प्रा॰ब॰ । दरिद्रे पक्षे विसर्गः ।
नि(स्व)स्वान पु॰ नि+स्वन–घञ् घञ् वा । शब्दे अमरः । "सुखश्रवा मङ्गलतूर्यनिस्वनाः" रघुः "वायुं कृत्वाथ वाजाभ्यां युक्तं वैयश्वतं यमम् । विद्युत् कृत्वाथ निस्वानं मेघं कृत्वाथ वै ध्वजम्" भा॰द्रो॰ २·२अ॰ । आर्षे विद्युत्निस्वत्य अभो लोपः ।
निस्सीम त्रि॰ निष्क्रान्ता सीमा यस्मात् प्रा॰ब॰ विसर्गस्य वा षः । अवधिशून्ये अपर्य्याप्ते "निः(स)सीमानन्दमाधीदुपनिषदुपमा तत्परीमूय मूयः" नैष॰ ।
निह त्रि॰ निहन्ति नि+हन–ड । निहन्तरि "अति निहो अति स्विधः" यजु॰ २७।६
निहनन न॰ नि+हन–ल्युट् । १वधे अमरः । उदात्तस्वरेणानुदात्तादेरनुदात्तस्वरूपे निघाते च । निघातशब्दे दृश्यम् ।
निहन्तृ त्रि॰ नि+हन–तृच् । १नाशकर्त्तरि "निहन्ता वैरकारणाम्" भट्टिः स्त्रियां ङीप् । २रुद्रदेवे पु॰ "भगहारी निहन्ता च कालो ब्रह्मा पितामहः" भा॰अनु॰ १७अ॰ "बहुमन्ता विभक्तिता निहन्ता क्रयविक्रयी" मनुः एकपदे अन्यस्वरोच्चारणप्रयोजके निघातकर्त्तरि १उदात्ते स्वरभेदे च अतएव "निहन्तरीनेकपदे य उदात्तः स्वरानिव" माघे उदात्तस्वरस्य एकपदे अन्यस्वराणां निहन्तृत्वोपमानविधयोक्तम् "बहुदात्ते पदमेकवर्जमिति" पा॰ परिभाषाबलेन तस्य तथात्वम् निघातशब्दे दृश्यम् ।

निह्नव पु० नि+ह्नु–अप् "ह्नुः संप्रसारणञ्च" पा० सम्प्रसारणम् यण् आदेशादि पा०सू० अस्य अन्तोदात्तता। आङ्ग्राने "आदित्य ऊकारः निह्नव एकारः" ऋ०उ० "निह्नव इत्या-ङ्गानमेकारः स्तोभः। एहीति चाह्वयन्नीति तत्सामा-न्यात्" भा०। "इन्द्र! नेदीय एदिहीन्द्रो निह्नवः प्रयाखः" आश्व०श्रौ० ५।१४।६

निह्नाका स्त्री नियतं जहाति सुखं हा–कनु ह्रस्वः। गो-धिकायाम् अमरः "साकं नख निह्नाकया" ऋ०१०।९७ ११ "नीहाराय स्वाहा निह्नाकाय स्वाहा" तैत्ति० सं० ५।५।११।११

नि(नी)हार न० निह्रियते नि+हृ–कर्मणि घञ् वा दीर्घः। ह्रस्वमध्यः। १हिमे शब्दरत्ना०। दीर्घमध्यः। तत्रार्थे अमरः २कुज्झटिकायां कुह्नू० "नीहारे वाष्पशब्दे च सन्ध्ययोरेव चोभयोः" मेदिनिः। "नीहारः कुज्झटिका" कुह्नूकः स च घनीभूतं शिशिरं (बरफ) इति ख्यातं कुज्झटिका च "नीहारमग्नो दिनपूर्वभागः" रघुः "एवं तयोक्तो मनसानीहारमसृजत् प्रभुः" भा० आ० ६०अ०। अत्रुगन्नयोक्तः पराशरः कुज्झटिकारूपं नीहारं स्रष्टवानिति प्रसिद्धम्।

निहिंसन न० नि+हिंस–भावे ल्युट्। मारणे अमरः।

निहित त्रि० नि+धा–क्त हिरादेशः। १आकृष्टे २स्थापिते ३निक्षिप्ते च "धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्थाः" भा०व० ३१२अ०।

निहीन त्रि० नितरां हीनः प्रा०स०। १नीचे २पामरे अमरः। "निहीनैः परिक्लिश्यन्तीं सत्तमेवन्ति मां कथम्" भा०व०१२अ०। सत्तमेवन्तीत्यत्र आर्षः पदव्यत्ययः।

निह्नव पु० नि+ह्नु–अप्। १आठ्ये अन्यथा स्थितस्य वस्तुनो ऽन्यथात्वेन २स्वरूपने अपलापे। "निह्नवे साक्षिभावि-तम्" मनुः "निह्नवे याचितो दद्यादनं रात्रौ च तत्समम्" याज्ञ०। नि+ह्नु–क्विप्। निह्नुतिरप्यत्र स्त्री अमरः।

नी त्रि० नयति नी+कर्त्तरि–क्विप्। प्रापके। ङौ न्याम्

नीक पु० नी–कन्। दलभेदे [२अवहेलने शब्दार्थचि०।

नी(नि)कार पु० नि+कृ–भावे घञ् वा दीर्घः। १न्यक्कारे

नीकाश पु०नि+काश–घञ्। उत्तरपदस्थः १उपमाने अमरः अस्य निमादित्वेन नित्यसमास एव पृथक्प्रयोगाभा-वात्। २निकषे पु० मेदि० "आकाशनीकाशतटां तीरवा-नीरसङ्गमाम्" भा०व० १८२अ०।

नीकुलक पु० प्रवरभेदे हेमा०ब्र० प्रवरोक्तौ दृश्यम्।

नीक्षण न० नीक्ष्यतेऽनेन नि+ईक्ष–करणे ल्युट्। पाकादि-परीक्षासाधने काष्ठभेदे "यत्रीक्षणं मांसपचन्याः" ऋ० १।१६२।१२ "नीक्षणं पाकपरीक्षासाधनं काष्ठम्" भा०।

नीच त्रि० निकृष्टार्थौ गोभां चिनोति चि–ड। जातिगुण क्रियादिभिः निकृष्टे १अधमे अमरः। २वामने खर्वे च अमरः। ३चोरनामगन्धद्रव्ये पु० राजनि०। ४निम्ने च। नीचसङ्गदोषो यथा "न प्राप्नोति सुखं किञ्चिन्नीच-सङ्गान्महानपि। प्रेतसङ्गात् महादेवो नग्नो भस्मविभू-षितः। प्रविश्य निलयं नीचः स्त्रीधनादिजिघृक्षति। स्वयं नेतुं न शक्नोति तदा नाशयति ध्रुवम्। स्थिते सुखेऽपि नीचस्तु यत्नाद्दोषं प्रपद्यते। किञ्चित्तु सङ्गमा-साद्य तदुक्तं स्यात् सनातनम्। श्रुत्वा श्रुत्वा सुखं नीचः श्रोतुमायाति बन्धुवत्। ततः समयमासाद्य प्रकाशयति तद्धनम्। मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम्। मनस्यन्यद्वचस्यन्यत् कर्मण्यन्यत् दुरात्मनाम्" पाद्मे क्रिया योगसारे ६अ०। "बुद्धिश्च क्षीयते पुंसां नीचैः सह स-म्भाषणात्। मध्यमे मध्यतां याति श्रेष्ठतां याति वि-त्तमे" भा० शा०। "प्रायो नीचानपि मेदिनीभृतः" माघः। "नीचादप्युत्तमां विद्यां स्त्रीरत्नं दुष्कुलादपि" मनुः। षड्भेदानाम् उच्चशब्दव्याख्यानात् सप्त-मस्थाने तच्च रज्ज्वादीनां यद्यद् भवति तत् नीचस्थान-शब्दे दृश्यम्। स्वार्थे क। नीचक तत्रार्थे

नीचकदम्ब पु० नीचः कदम्बो यस्मात् ५त०। मध्यकीरे नैघण्टुप्रकाशिका।

नीचका स्त्री निकृष्टार्थौ गोभां चकते प्रतिहन्ति चक–प्रतिघाते क। उत्तमायां गवि भरतः।

नीचकिन् त्रि० निकृष्टार्थौ गोभां चकते चक–प्रतिघाते वा० इनि। उच्चे हेमा०।

नीचकैस अव्य० नीचैस् अव्ययस्य चैः पूर्वमकच्। नीचैरित्यर्थे

नीचग त्रि० नीचं निम्नं गच्छति गम–ड। १निम्नगामिनि २जले च। ३नीचवर्त्मगामिन्यां स्त्रियां स्त्री "नीचगासङ्गनां प्राप्य चन्द्रनैर्मण्डलं लिखेत्" तन्त्रम्। ४स्वस्वोच्चस्थानात् सप्तमं स्थानं नीचं तत्स्थानस्थिते पक्षे "तत्सप्तमं भवेन्नीचम्" ज्यो०ति०। "सुनीचनेऽस्तमेऽपि वा द्यूनफलं प्रकीर्त्तितम्" नील०ता०। उच्चशब्दे दृश्यम्। ५निम्न-गायां नद्यां स्त्री "सङ्गमयति विदौव नीचगाऽपि नदं सरित्। सत्सङ्गमिव दुर्लभं रूपं भाग्यं यतः ध्रुवम्" गिता०।

नीचगृह न० रव्यादीनां स्वोच्चस्थानात् सप्तमे राशौ: यथा रवेस्तुला, चन्द्रस्य वृश्चः, कुजस्य कर्कः। बुधस्य मीनो गुरोर्मकरः शुक्रस्य कन्या शनेर्मेषः। "स्वोच्चात्तु सप्तमस्थानि नीचमूचनेश्वरोक्तेः। उच्चवद्दे दृश्यम्

नीचभोज्य पु० नीचैर्भोज्यः। १पक्षाख्यो मन्त्र०। २नीचभोज्यकारके त्रि०।

नीचयोनिन् त्रि० नीचा योनिरस्य स्त्रीत्वा० ङीप्। नीचजातिमति। "एतत् कृतयुगे वृत्तं सर्वेषामेव भारत!। प्राणिनां धर्मबुद्धीनामपि चैत्रीचयोनिनाम्" हरिवं० १६८अ०। इत्यभावे ब०व०। नीचयोनिरस्यत्र।

नीचवज्र पु०न० नीचप्रियं वज्रम्। वैक्रान्तमणौ राजनि०।

नीचा अव्य०निकृष्टार्थी श्रोभां चिनोति वा० डा। १नीचैरित्यर्थे २नीचे च "नीचा यन्तद्वनयः" ऋ० २।१३।१२ "नीचा नीचम्" भा० "नीचा वर्त्तन उपरि" ऋ०१०। २३।६

नीचात् अव्य० निकृष्टार्थी चिनोति वा० डाति। नीचैरित्यर्थे "नीचादुच्चा चक्रयुः पात्रये वा" ऋ० १।११६।२२

नीचायक त्रि० नितरां निकृष्टेन वा चिनोति नि+चि-ण्वुल् मयूरव्यंसकादिनिर्देशात् दीर्घः। नितान्तनीचयति। ततः उत्करा० चातुरर्थ्यां क। नीचायकीव तत्सम्बन्ध्यादौ

नीचावया त्रि० नीचा स्वगभावमवयति अव+या-क्विप्। स्वगभावप्राप्ते "नीचावया अभवत् द्यस्तुरेन्द्रः" ऋ० १।१२।६ "नीचावयाः स्वगभावं प्राप्तः कृतः" भा०।

नीचीन त्रि० स्वगेऽ स्वार्थे च अञ्चतेर्नञोपाञ्चोपे पूर्वाग्रो दीर्घः। स्वगभूते अधोमुखे "नीचीनाः स्थुरुपरि बुध्नः" ऋ० १।२४।७ "नीचीनवारं वरुणः कबन्धम्" ऋ०५।८५।२ "नीचीनवारमधोमुखविलम्" भा०।

नीचैर्गति स्त्री कर्म०। १मन्दगमने २निम्नगमने च।

नीचैस् अव्य० नि+चि-"नौ दीर्घश्च" डैसि दीर्घश्च। १नीचे २खेदे ३वल्गे ४अनुच्चे च अमरः "नीचैर्गच्छत्युपरि च दशाचक्रनेमिः क्रमेण" मेघ०। तथापि नीचैर्विनयादवग्रत" "प्रविश्य चैनं पुरमप्रयायी नीचैस्तथोपचरद्भिरीड्यः" रघु०। ततः यद्ध्ये उत्कर्षे तरप् तमप् च आद्य। नीचैस्तराम्(माम्)वा। द्रव्ये तु नीचैस्तरस्तः। [दीर्घश्च। निम्नभवे स्वगभूतभवे।

नीच्य त्रि० नीचि भवः स्वगृच्-यत् नञोपाञ्चोपौ पूर्वाग्रो

नीड पु०न० नितरामिवन्ति खगा अत्र नि+इल-क डस्य डः। खगानां १वासस्थाने (वासा) अमरः २आश्रये च "वितर्दिनिर्यूहविटङ्कनीडः" माघः "नीडारम्भैर्दृढ-वल्लिभुजाभाकुलश्यामचैत्याः" मेघ०। नितरामीयते नि+ईड-कर्मणि घञ्। ३रथावयवभेदे "प्रदक्षिणं रथनीड परिहारः" काशा० श्रौ० १८।४।१८ "भग्नचक्राक्षनीडाश्च निपातितमहाध्वजाः" भा०भी० ७१अ०। स्वार्थे क। तत्रार्थे "कुर्वाणो नीडकं तत्र जटाभि रुचिरं तन्तुभिः" भा०आ० २६२अ०।

नीडक पुंस्त्री नीडे कायति प्रकाशते कै-क ७त०। खगे मेदिनीकरौ। स्त्रियां जातित्वात् ङीष्।

नीडज पुंस्त्री नीडे जायते जन-ड ७त०। खगे हेमच०। स्त्रियां जातित्वात् ङीष्।

नीडि पु० नितान्तमिवन्त्यत्र नि+इल-खच् इन् डस्य डः। निवासे आवासस्थाने "श्येनासो अत्यरुषो नीडयः" ऋ० १०।६२।६

नीडोद्भव पुंस्त्री नीडे उद्भवति उद्-भू-अच्, उद्भवस्यात् उद्-भू-अपादाने वप् नीड उद्भवो यस्य वा। खगे अमरः स्त्रियां जातित्वात् ङीष्।

नीत त्रि० नी-कर्मणि क्त। १प्रापिते २याचिते ३स्वीकृते च "नीतं जन्म नवीननीरजवने पीतं मधु स्वेच्छया" अमरः। "नीते पलायिन्युचिते मरीरवद्व गलान्तकेनान्तमदान्त कर्मणा" माघः।

नीति स्त्री नीयन्ते उद्दीयन्तेऽर्था आनयता वा नी-क्तिन्। १शुक्रादुक्तराजविद्यायां कार्यकारणयोरभेदात् २तच्छास्त्रे च। भावे क्तिन्। ३प्रापणे ४नये च मेदि०। ५तदधिष्ठातृदेवीभेदे "त्रिष्टाच देव्यः प्रवराः स्त्रीः कीर्त्तिर्द्युतिरेव च। प्रभा धृतिः क्षमा मूर्तिर्नीतिर्विद्या दया मतिः" हरिवं०२५६अ०। "नीतिरापदि यद्वस्तुः परलोकमानिनो स्थिरे" माघः नीतिश्च कामन्दकीयशास्त्रादौ दृश्यम्।

"नीतिस्ते पुष्करोक्ता तु रामोक्ता वज्रधारिणः। जयाय तां प्रवक्ष्यामि शृणु धर्मादिवर्द्धनीम्। न्यायेनार्जनमर्थस्य वर्द्धनं रक्षणं चरेत्। सत्पात्रे प्रतिपत्तिश्च राजवृत्तं चतुर्विधम्। नयस्य विनयो मूलं विनयः शास्त्रनिश्चयात्। विनयो वृद्धसेवया जितेन्द्रियजयस्तैर्युक्तः पालयेन्महीम्। शास्त्रं प्रज्ञा धृतिर्दाक्ष्यं प्रागल्भ्यं धारणिष्णुता। उत्साहो वाग्मितादार्यमायत्तकालशक्तिष्णुता। प्रभावः शुचिता मैत्री त्यागः सत्यं कृतज्ञता। कुलं शीलं दमश्चेति गुणाः सम्पत्तिहेतवः। प्रकीर्णविधिवारण्ये धावन्तं विप्रमाथिनम्। आनाङ्कुशेव कुरुते

वयमिन्द्रियदन्तिनम् । कामः क्रोधस्तथा लोभो हर्षो मानो मदस्तथा । षड्वर्गमुत्सृजेदेनमस्मिंस्त्यक्ते सुखी नृपः । आन्वीक्षिकीं त्रयीं वार्त्तां दण्डनीतिं च पार्थिवः । तद्विद्यैस्तत्क्रियोपेतैर्विनयेद्विनयान्वितः । आन्वीक्षिक्यार्थविज्ञानं धर्माधर्मौ च त्रयीस्थितौ । अर्थानर्थौ तु वार्त्तायां दण्डनीत्यां नयानयौ । अस्तिंसा सत्यता वाणी सत्यं शौचं दया क्षमा । वर्णिनां सिद्धिदानां चैव सामान्यो धर्म उच्यते । प्रजाः समनुशिष्टास्तैर्यायात् कार्य्यादाचारसंस्थितिम् । वाक्सत्यता दया दानं क्षीणोपगत रक्षणम् । इति वृत्तं सतां साधु स्थितं सत्पुरुषव्रतम् । व्याधिव्याधिपरीताय अद्य श्वो वा विनाशिने । को हि राजा शरीराय धर्मापेतं समाचरेत् । न हि सुखमन्विच्छन् पीडयेत् प्रजम् । प्रजाः पीड्यमानो हि मन्युना हन्ति पार्थिवम् । क्रियतेऽभ्यर्हणीयाय स्वजनाय यथाऽऽकृतिः । ततः साधुतरः कार्य्यो दुर्जनाय शिवार्थिना । प्रियमेवाभिधातव्यं सदृशं नित्यं हितञ्च । देवात्ते प्रियवक्तारः पशवः क्रूरवादिनः । शुचिताक्षिक्यभूतात्मा पूजयेद्देवता सदा । देवतावद्गुरुजनमात्मवच्च सदूजनम् । प्रणिपातेन हि गुरुं ततोऽस्यानुचेष्टितैः । कुर्वीतानिष्ठुरान् भृत्यैर्दैवात् सदृशतर्कणा । सद्भावेन हरेन्मित्रं सम्भोगेन च बान्धवान् । स्त्रीभृत्यान् प्रेमदानाभ्यां दाक्षिण्येनेतरं जनम् । अनिन्दा परवृत्तेषु स्वधर्मपरिपालनम् । व्यसनेषु दयालुत्वं सर्वत्र मधुरा गिरः । प्राणैरर्थ्यपकारित्वं मित्रायाभिचारिते । गृहागते परिष्वङ्गः शक्त्या दानं सहिष्णुता । स्वसद्भिर्वृत्तमुत्सेकः परदूषणवर्जनम् । परोपतापि वचनं मौनव्रतचरिष्णुता । बन्धुभिर्दुःसंयोगः स्वजने चतुरस्रता । उचितानुविधायित्वमिति वृत्तं महात्मनाम्" अग्निपु २३७अ०।

नीतिघोष पु० नीत्यात्मकः घोषो यस्य । दुष्टस्तिरस्के क्षिप्ता०

नीतिज्ञ त्रि० नीतिं जानाति ज्ञा-क । नीतिवेदिनि विद्वत्रि । नीतिवेदिनृ तत्रार्थे "त्रिवर्गो नीतिवेदिनाम्"

नीतिमत् त्रि० प्रशस्त्येन नीतिर्वेद्यत्वेनास्त्यस्य मतुप् । प्रशस्तनीतियुक्ते "कदाचिदथ गाङ्गेयः सर्वनीतिमतां वरः" भा०आ० १७८अ० स्त्रियां ङीप् ।

नीतिशास्त्र न० शिष्यतेऽनेन शास-त्रन् दुक् त० । नीतिशास्त्रे यौवनस्थत्वकामन्दकप्रभृत्युक्तनीतिसारनीतिमात्रा नीतिमयूखहितोपदेशचाणक्यशारसंग्रहाद्युक्तशास्त्रे "मार्गतो नीतिशास्त्रं तु जगाद जगतोहितम्" भा० शा०२१०अ० ।

नीथ त्रि०नी-क्थन् । १नेतरि प्रापके । करणे क्थन् । २लोके ३नयनहेतौ च पु० "प्रति यत् सा नीथादर्शि" ऋ०१।१०४।६"नीथा नयनहेतुभूता" भा० । भावे क्थन् । ४प्रापणे पु० "सहस्रचेताः शतनीथ ऋभुः" ऋ ३।१०। १२ "शतनीथः बहुस्तुतिः बाहुप्रापणो वा" भा० "नीथाविदो ऽरित्रारः" ऋ० २।१२।५ "नीथाविदः स्तोत्राभिज्ञाः" भा० ।

नीध्र(त्र) न० नितरां ध्रि(त्रि)यते धृ-ड्रु-घा मूलवि० क दीर्घः । १वंशीके पटलप्रान्ते २वने ३नेमौ ४चन्द्रे ५रेवतीनक्षत्रे हेमच० । नीत्रमिति पाठान्तरं तत्रार्थे "स्कन्धाग्नि नीत्रैरिव यत्र रेजुः" माघः ।

नीनाह पु० नि+नह-भावे घञ् दीर्घः । निबन्धे नितरां बन्धने "स्नायुभिर्व कङ्कालस्य इव नीनाहम्" अथ०१८। ५७।४

नीप पु० नी-प किच्च । १कदम्बवृक्षे अमरः २धाराकदम्बे राजनि० । ३वञ्जुलवृक्षे ४नीलाशोकवृक्षे च मेदि० "नवनीपवनीधुवनः पवनः" मा०द० टीका । "तस्य नीपरजसाङ्कुरागिणः" रघुः । ५देशभेदे स च देशः दृष्ट०सं० १४अ० कूर्मविभागे मध्यदेशवर्त्तिनोक्तः यथा "भद्रारिमेदमाण्डव्यसालनीपोल्लिङ्गानसंख्याताः" इत्युपक्रमे "गजाङ्गयाचेति मध्यमिदम्" इत्युक्तम् । जनपदवाचित्वात् अभिजने राजनि० च अण् । नैप तद्देशवासिनि तद्भूपे च बहुषु अणो लुक् । "शतं मत्स्या नृपतयः शतं नीपाः शतं हयाः" भा०स० ८अ० । निपतिता नीचैः पतिता आपो यत्र अलुमा० न्युपसर्गात्परस्यापि आदेरत ईत्त्वम् । दृगित्यधोभागे पु०तत्र भवः यत् । नैप्य तत्र भवे त्रि० दृङ्भेदे पु० "नमः काट्याय च नीप्याय च" यजु०१६। ३७। "नीपो गिर्यधोभागस्तत्र भवः" वेदटी० ।

नीर न० नी-रक् निर्गतं रादग्नेः निरा०त० । निर्गतो रोऽग्निर्यस्मात् प्रा०ब० वा । १जले अमरः । "आपोमयः प्राणः" छा०उ० उक्तेः जलस्य प्राणाग्निहेतुत्वात् "अग्नेरापः" श्रुत्या तस्य अग्नेर्जातत्वात् "अद्भ्योऽग्निः ब्रह्मणः क्षत्रमिति" श्रुतेश्च वज्रादग्नेर्जलजातत्वेन च तस्य तथात्वम् । "निषण्णनीरनिकरेष्वतामिषेका" माघः । तद्गुणादि अम्बुशब्दे उक्तं द्रष्टव्यम् । पूर्वमुक्तत्वात् सम्प्रति कतिविधेयोऽत्रोच्यते

दक्षस्मृतिः "भूमिस्थमुदकं मेध्यं यत्र गोर्विहरेन्मुखे-
नेत् । व्याप्तं चेदमध्येन तदेव शिलागतम् । शिला-
गतमिति शिला नीहारस्थतमित्यर्थः । उशनाः
"नद्यः कूपं तडागानि सरांसि सरितस्तथा । सर्वंदु-
ष्टान्यदोषाणि मनुः स्वायम्भुवोऽब्रवीत्" । देवलः "अपि
गन्धरसोपेता निर्मलाः पृथिवीगताः । अशौचा-
दैव गोपानादापः शुद्धिकराः स्मृताः । उद्धृतास्तु
प्रयत्नाः स्यु शुद्धैः पात्रैर्यथाविधि । एकरात्रोषितास्तासु
स्नेजेदपः समुद्धृताः" इति । सर्वत्रात्रा प्रक्षालनगोहरि
मात्रपर्याप्ता अल्पा एवेत्यर्थात् परास्तमग्ने अतो
बहुकालात् तडागादेरुद्धृतानां रात्र्युषितानां च न
दोषः । तडागोद्धृता अप्यापः रात्र्युषितोदकान्तर-
मध्ये अशुद्धा एवेति मदनपारिजाते । इदं गङ्गाव्य-
तिरिक्तविषयम् "त्यजेत् पर्युषितं दुग्धं त्यजेत्
पर्युषितं जलम् । गङ्गातोयं च तुलसी पवित्रं सर्वदा
स्मृतम्" इति विशेषोक्तेः । "अब्धोऽन्यानि तडागानि नदी
वापीसरांसि च । यद्यन्नाद्यशुचिस्पर्शैर्लीढं तत् परि-
वर्जयेत्" । अन्नाद्यादपवरणमार्गमित्यर्थः । हारीतः
"वापीकूपतडागेषु स्नानमाचरितं यदि । अस्थिचर्म-
विनिर्मुक्तैर्दूषितं च खरादिभिः । उद्धृत्य तज्जलं सर्वं
शोधनं परिकल्पयेत्" । "अस्थिचर्मविनिर्मुक्तैश्चिरकाल-
वासेन विशीर्णैरित्यर्थः । दक्षस्मृतिः "मृतपङ्गनत्वात्
कूपादल्पत्वोपक्रमात्तथा । अपः सप्तोद्धरेत् सर्वाः शेषं
यज्ञेन शोधयेत् । वह्निप्रज्वालितं कृत्वा कूपे पक्वेष्ट-
कान्विते । पञ्चगव्यं न्यसेत्पश्चात्ततोयं सप्तधोद्धरेत्" । देवलः
"उद्धरेदुदकं सर्वं पञ्चविंशतिमुद्धृतम्" । अचिरका-
लोपघाते स्वल्पघाते च हारीतः "घटानां शतसप्तोद्धृत्य
पञ्चगव्यं क्षिपेत्ततः । अग्निं कार्कचाण्डालैर्दूषितेषु
विशोधनम्" । आपस्तम्बः "उपानत्पक्षे अविप्लुतं क्षी-
रजो मद्यमेव च । एभिर्विदूषिते कूपे कुम्भानां षष्टि-
सप्तकम्" । विष्णुः "जलाशयेष्वल्पेषु स्थावरेषु महीत-
लेषु । कूपवत् कल्पिता शुद्धिर्महत्सु न तु दूरयमिति" ।
स्थावरेषु महीतलेऽप्रवाहिषु । यमः "चाण्डालश्वपाकसं-
स्पृष्टं पीत्वा कूपगतं जलम् । गोमूत्रयावकाहारस्त्रि-
रात्रेणैव शुध्यति" । तथा 'नदीवेगेन शुध्यति' कश्यपः
"दृतीनां रज्जुसंस्पृष्टं शुद्धिः" । इति धर्मकोशः रज्जुसं स्पृष्टं
दृतिजलं कथा-
दृष्ट्वैव शोधनम् । यमः "प्रपाखरखेष्वेव वाप्यकूपे
ह्रोण्यां जलं कोपगता तथापः । स्पृष्टेऽपि शूद्रं
द्विजयेषमाहरापस्तृतः काङ्क्षितवत् पिबेत्तु" । अस्यार्थः
यद्यपि शूद्रादिरिक्तविप्रादिवर्णसम्बन्धि प्रपादि तथापि
तद्गतजलं धर्मार्थं दीयमानमनापदि न पेयम् । आ-
पदि पेयं यद्यरखगतं प्रपादिर्भवति । द्रोण्यः अ-
श्वादिमयी जलपात्री सर्वसाधारणी । कोशो दृतिः तथा
"अजागोमहिषस्य त्राक्षणी च प्रसूतिका । दश-
रात्रेण शुद्ध्यन्ति भूमिस्थं च नवोदकम्" । योगीश्वरः
"शुचि गोदग्निसंस्पर्शं प्रकृतिस्थं महीगतम्" ।
प्रकृतिस्थं रूपरसगन्धस्पर्शान्तरमनापन्नं महीगतमित्य-
शुद्धित्वनिवृत्त्यर्थं न तु जन्तुरिक्तोदकस्य शुद्धत्वाद-
त्यर्थं नाप्युद्धृतस्य । "उद्धृताश्चेति" प्राग्युक्तदेवल-
वचनादिति विज्ञानेश्वरः । हेमाद्रौ पराशरः "वापी-
कूपतडागेभ्य आपो आह्याः सदैव तु । यद्यत्पङ्कादिमे-
ध्यन्तु पञ्चगव्येन शुध्यति । अस्थिचर्मावसिक्तेन मा-
र्जारैश्च समूषिकैः । दूषितं तद्भवेत्तोयं यथाधस्तात्
शुभोधनम् । अस्थिचर्मावपतितं खरवानरकुक्कुरैः ।
उद्धरेदुदकं सर्वं शोधनं परिमार्जनम्" । इदं चिर-
कालविषयमित्युक्तमेव । यमः "वापीकूपतडागेषु
दूषितेषु कथञ्चन । उद्धृत्य शतकुम्भांश्च पञ्चगव्येन शु-
द्ध्यति । वापीकूपतडागेषु सन्दिग्धेषु विशेषतः ।
अथोद्धृत्य शतं पञ्चगव्येन शुद्ध्यति । पादुकोपानह
विप्लुष्टं कूपे यदि निमज्जति । षष्टिकुम्भान् समुद्धृत्य
पञ्चगव्येन शुद्ध्यति" । मात्स्येऽपि "दूषितं च शवैः
क्लिन्नं यत्र विण्मूत्रमेधितम् । अद्भिः शुध्यति तत्सर्वमपां
शुद्धिः कथं भवेत् । गवां मूत्रपुरीषेण शोभनद्रव्यसं-
स्पृष्टैः । मारुतस्य च वेगेन त्वापः शुद्धिमवाप्नु-
युरिति" स्मृत्यर्थसारेऽपि "वापीकूपतडागेष्वल्पजलेषु
क्षमाजीरादिपङ्किले जीर्णरोधसि तज्जलं सर्वं
निःसार्य मृत्तिकां परित्यज्योद्धृत्य पञ्चगव्यप्रोक्षणात्
शुद्धिः । पाषाणैरिष्टकाभिर्वा बद्धे तथास्थाने दृढ-
नम् । सदा बद्धे प्रक्षालनमेव बद्धजले तु तस्मिन् षष्टि-
कुम्भोद्धारः । मूषकादिक्षुद्रप्राणिघाते सिंहमत्कुम्भो-
द्धारो गोमूत्रादिप्रक्षेपश्च । जले जलप्राणिमयोपघाते
न दोषः । वापीकूपादिजले मरणे क्षितेऽङ्गोपघाते
घटशतसप्तोद्धृत्य पञ्चगव्यप्रक्षेपात् शुद्धिः । पशुमनुषा-
तेऽप्येवमेव शुद्धिः कार्या । तत्र जलेन मरणे जलस्य
शिरावमार्जोचम् । अशौचान्ते पूर्वोक्ता शुद्धिः कार्या ।
वापीकूपजले उपानत्पक्षेऽविप्लुतरक्षवसामज्जास्थि-

मांसदूषिते घटिकुम्भातङ्कृत्य पञ्चगव्येन शुद्धिः। जल बाष्कल्ये शतकुम्भोद्धारात् पञ्चगव्यप्रोक्षणाच्च शुद्धिः। कूपादिषु दूषितेषु दिवा सूर्यरश्मिवायुस्पर्शनात् शुद्धिः। रात्रौ वायुचन्द्रनक्षत्ररश्मिस्पर्शनात् शुद्धिः। सन्ध्यायां वायुस्पर्शनात् शुद्धिः। नद्यादौ अन्त्यजादिभिर्दूषिते तत्क्षीणतजलस्नानादन्यत्र जलं शुद्धमेवेति। एवं स्वबुध्या शुद्धिर्विवेचनीया" विधा०पा०।

अथ प्रसङ्गादुपहतजलपाने प्रायश्चित्तमभिधीयते। तत्र विष्णुः "ऋतपञ्चनखात् कूपादल्पोपहताद्दोदकं पीत्वा ब्राह्मणस्त्रयहमुपवसेद् द्वयहं राजन्य एकाहं वैश्यः शूद्रो नक्तं सर्वे तेऽल्पे पञ्चगव्यं पिबेयुरिति"। अल्पोपहतात् मूत्रपुरीषादिभिः। इदमकामविषयं कामतो मानुष मलोपहतकूपादिजलपाने हारीतः "क्लिन्नं भिन्ने शवे तोयं तत्स्थं यदि तत् पिबेत्। शूद्रो चान्द्रायणं कुर्यात्तप्तकृच्छ्रमथापि वा"। अथक्लो तप्तकृच्छ्रमिति धर्मप्रदीपः। "यदि कश्चित्ततः स्नायात् प्रमादेन द्विजोत्तमः। जपंस्त्रिषवणस्नायी अहोरात्रेण शुद्ध्यति"। अकामतो देवलोक्तम् "क्लिन्नं भिन्नं शवं चैव कूपस्थं यदि दृश्यते। पयः पिबेत् त्रिरात्रेण वासुके द्विगुणं घृतम्"। अङ्गिराः "कूपे विण्मूत्रसंसृष्टे पीत्वा तोये द्विजोत्तमः। त्रिरात्रेण विशुध्येत तप्तकृच्छ्रं वानलपनं घृतम्"। स्नाने तु खलु विष्णुः "अपो मूत्रपुरीषाद्यैर्दूषिताः प्राश्येद्यदा। तदा स्नानपनं कृच्छ्रं व्रतं कार्यं विशुद्धये"। बाष्कलकूपादि जलपाने आपस्तम्बः "बाष्कलकूपभाण्डस्थं नरः कामात् जलं पिबेत्। प्रायश्चित्तं कथं तत्रयं वर्षं विनिर्दिशेत्। चरेत् सान्तपनं विप्रः प्राजापत्यं तु भूमिपः। तदर्धं तु चरेत् वैश्यः शूद्रे पादं विनिर्दिशेत्। तथा "श्वोष्ट्रादीनां जलं पीत्वा पुष्करिण्यां हृदेऽपि वा। जानुदघ्नं शुचि श्वेयमधस्तादशुचि स्मृतम्। तस्मोयं यः पिबेद् विप्रः कामतोऽकामतोऽपि वा। अकामाच्छ्रभोजी स्यादहोरात्रं तु कामतः"। अत्रैवाभ्यासे प्राजापत्यम् "अन्त्यजैः खानिताः कूपाः तडागं वाथ एव वा। तेषु स्नात्वा च पीत्वा च प्राजापत्येन शुद्ध्यति" इत्यापस्तम्बस्मरणात्। इदमनापदिषयम्। यत्तु "अन्त्यजैः खानिताः कूपा तडागादि तथैव च। तेषु स्नात्वा च पीत्वा च पञ्चगव्येन शुद्ध्यति"। तदशक्तावपाने वा आपदि तु यातातपः "अन्त्यैरपि कृते कूपे सेतौ वाप्यादिके कृते। तत्र स्नात्वा च पीत्वा च प्रायश्चित्तं न विद्यते"। इदमल्पोपहतविषयमिति शूलपाणिः। "ब्राह्मणक्षत्रियो वैश्यः शूद्रश्चैवान्त्यजातयः। एभिर्यैः कारिताः कूपाः स्नानं तेषु तु कारयेत्"। अन्त्यजातयो मूर्धावसिक्तादयो वक्ष्यमाणाः। अन्त्यखानितचण्डालपरिष्टहीतकूपादिजलपानेऽङ्गिराः "चाण्डालपरिष्टहीतं योऽज्ञानादुदकं पिबेत्। तस्य शुद्धिं विजानीयात् प्राजापत्येन नित्यशः"। यत्तदभ्यासे यत्तापस्तम्बेन पञ्चगव्यप्राशनमात्रमुक्तम् "प्रपास्वरण्ये घटके च सौरे द्रोण्यां जलं कोष्ट्रविनिःसृतं च। श्वपाकचाण्डालपरिषेकेषु पीत्वा जलं पञ्चगव्येन शुद्ध्येदिति" तदशक्तविषयमापदिषयं वा" विधा०पा०।

अथ प्रसङ्गात्तडागादिविक्रयप्रायश्चित्तम्। तत्र "देवब्रह्मप्रतिश्रयोद्यानारामसभाप्रपातडागपुण्यसेतुक्षेत्रविक्रयं कृत्वा तप्तकृच्छ्रं समाचरेदिति" मनुवचनमकामतविषयम्। यत्तु पैठिनस्युक्तम् "आरामतडागोद्यानपुष्करिणीक्षेत्रे विक्रीते त्रिषवणस्नायधःशायी चतुर्थकालभक्षी स्यात्" तदनुत्सृष्टविषयम् उत्सृष्टस्य तु सर्वस्वहरणेन तत्साधारण्येन सत्त्वाभावाद्विक्रयासम्भवात्। सर्वानुमतेन कर्तुमशक्यत्वात् साधारणस्त्रीधनवत्तुल्य इति दिक्" विधा०पा०।

"तिलकल्कं जलं क्षीरं दधि चौद्रं हतानि च। न लङ्घेदर्द्धजन्मानि" विधा०पा० धृतवाक्यम्।

वर्ज्यजलमुक्तं हेमाद्रौ ब्रह्मपुराणे "दुर्गन्धि फेनिलं क्षीरं पङ्किलं पल्वलोदकम्। न भवेद् यत्र गोऽग्निर्नक्तं यत्राश्नुपाकृतम्। यच्च सर्वात्मनोत्सृष्टं यत्राभोज्यनिपातनजम्। तद्वर्ज्यं सर्वथा तात! सदैव श्राद्धकर्मणि। निपानं जलाशयः। शुद्धितत्त्वे शङ्खः "स्नानमाचमनं दानं देवतापितृतर्पणम्। शूद्रोदकैर्न कुर्वीत तथा मेघाद्विनिःसृतैः" हेमाद्रावादित्यपुराणे "चिरं पर्युषितं वापि शूद्रस्पृष्टमथापि वा। आक्रम्याः स्नानदानादौ पुनस्तोयं सदा पयः"। कात्यायनः "अपो निशि न गृह्णीयान्न पिबेच्च कदाचन। उद्धृत्याग्निसपर्यन्नेधोम्भो धान्न हरेत्तोयवेत्"। रजोदोषे तु प्रागुक्तम् नारदीये "त्यजेत् पर्युषितं पुष्पं त्यजेत् पर्युषितं जलम्। न त्यजेत् जाह्नवीतोयं तुलसी बिल्वपत्रकम्" नि०सि०।

"पानीयं पायसं सर्पिर्दधि क्षीरं हतानि च। निरग्नं शेषमेतेषां न प्रदेयन्तु कस्यचित्" आङ्गि०त० महाभारतम् जलपानप्रकारः विधानपारिजाते उक्तो यथा

"जलपात्रं तु निःक्षिप्य मध्यन्दिने च दक्षिणे। विप्रो भोजनकाले तु पित्तेदामेन पाणिना" अन्यकाले तु "धारया नोदकं पेयं पीत्वा दोषमवाप्नुयात्। जलपात्रेण तत् पेयमिति शातातपोऽब्रवीदिति"। आ०त० विशेष उक्तो यथा "करेण च पिबेत्तोयं यावन्मांसं न लेपयेत्। मांसलिप्तकरे तोयं सद्यो गोमांसभक्षणम्" ब्रह्माण्डे मांसलिप्तकरेण जलपाननिषेधवात् मांसलिप्तकरेण अपोशानं न कर्त्तव्यम्" रघु० षट्त्रिंशन्मतम् "पिबतो यत् पतेत् तोयं भोजने तच्च निःक्षतम्। अभक्ष्यं तत् भवेद्यस्मं भुक्ता चान्द्रायणं चरेत्। वामपार्श्वे स्थिते तोये यो भुङ्क्ते ज्ञानदुर्बलः। तोयं पिबति यक्ष्मैव स्राडसौ भवति नान्यथा। यामे यामे मद्यं भुक्ता पानीयं रुधिरं पिबेत्। विद्यमाने तु हस्ते तु आचमो ज्ञानदुर्बलः। उद्धृत्य वामहस्तेन यत्तोयं पिबति द्विजः। सुरापानेन तुल्यं तदिति व्याघ्रप्रजापतिः"। "वामहस्तेन केवलवामहस्तेनेति" रघु०। "अदुष्टा जलताधारेति" तु शुद्ध्यर्थं न तु पेयतार्थम् "अभिषुःसरसोमधुसक्तूनां कमलिनीमलिनीरपत्रिक्षिप्तः" माघः

नीरज न० नीरे जायते जन–ड। १पद्मे २कुशेशयौ मेदि०। ३रक्तोत्पले राजनि०। ४उदुम्बरे जन्तौ(उदिड़ास) पुंस्त्री स्त्रियां जातित्वात् ङीष्। ५जलजीवित्रि च राजनि०। ६जलजातमात्रे त्रि० "नीतं जन्म नवीननीरजतने पीतं मधु स्वेच्छया" भ्रमरीदूतम् निर्गतं रजात् प्रा०ब० रजोपद्दोषौ "सर्वे सान्ताः पदन्ताश्च" इत्युक्तेः रजसद्दोऽपि रजःशमनार्थकः। ७रजोगुणकार्यरागशून्ये ८मक्षदेवे पु०। "उद्धित् त्रिविक्रमो वैद्यो विरजो नीरजोऽमरः" भा०अ०१७अ०।

नीरजस् त्रि० निर्गतं रजो धूलिः परागः स्त्रीरजः रजो गुणो वा यस्य प्रा०ब० वा अप् रजोपे दीर्घः। १निर्मूलिदेशे "नीरजोऽरितच्छाम्" भट्टिः अभूततद्भावे चौरुक्तोपः। "क्षोत्तरीयैरकुर्वन्ननीरजस्कं महीतलम्" भट्ट०। २परागशून्ये ३रजआदौ रजोगुणकार्यरागादिशून्ये "नीरजस्तमता सत्वगुणिनिस्तृतागमः" याज्ञ० "नीरजस्के सदानन्दे पदे चात्मं निवेशितः" प्रबोध०। "वेदशैलावतीर्णेन नीरजस्का महीकृता" मार्क०पु० १अ०। ४गतार्त्तवायां स्त्रियां स्त्री।

नीरजात त्रि०नीरात् जायते जन–ड ६त०। १जलजातमात्रे ऋचादौ "इदं रत्नं ततः प्रजाः" सीतावाम् "अङ्गरोऽङ्गम्" इति श्रुतौ चाङ्गस्य जलाज्जातत्वात् तथात्वम्। "अस्त्वापि प्रभवति पानीयात् कुरुसत्तम!। नीरजातेन (जलेन) रहितं न किञ्चित् सम्प्रवर्त्तते। नीरजातश्च भगवान् सोमो ग्रहगणेश्वरः। अमृतं च सुधा चैव सुधा चैवामृतं तथा। ओषधयश्च महाराज! वीरुधश्च जलोद्भवाः" भा० अनु० ६७अ०। २कमलादौ न०।

नीरद पु० नीरं ददाति–दा–क। १मेघे २मुस्तके च राजनि० "धूपायतीव पटलैर्नवनीरदानाम्" माघः "नवीननीरदश्यामं रामं राजीवलोचनम्" रामकवचम्। "आस्वाद्य निरवशेषं विरञ्चिवधूनां मृदूनि मांसानि। करकाविशेष मन्ये निर्दीयति नीरदोऽस्मीनीति" अद्भुतः०।

निरधि पु० नीराणि धीयन्तेऽत्र धा–कि उप०स०। समुद्रे ब्रह्मा० नीरनिधिरप्यत्र। "पारे जलं नीरनिधेरपश्यत्" माघः।

नीरन्ध्र त्रि० निर्गतं रन्ध्रं छिद्रमस्य प्रा०ब० रलोपे दीर्घः। छिद्रशून्ये "नीरन्ध्रास्तनुमालिखन्तु जरठच्छेदा नखव्यूहयः" सा०द०। "नीरन्ध्रदुर्दिनगिरिं भुवं व्रजन्ति" माघः

नीरप्रिय पु० नीरं प्रियमस्य प्रा०ब०। १जलवेतसे वैद्यकनिघण्टुप्रकाशिका। २जलप्रियमात्रे त्रि०।

नीरस पु० निःसारो नीरसो यस्य निर्गतो रसः शृङ्गारादिर्यस्माद्वा प्रा०ब० रलोपे दीर्घः। १दाडिमे त्रिका० २शृङ्गारादिरसादिशून्ये त्रि०। "अवश्यकवनीरसं मम विधाय तस्मिन्नृते सरागमनसोरसं भवतु पञ्चबाणः कृती" विक्रमोर्वश्यौ। [त्रिका०]

नीराज पु०नीराजति अज–अच् घञ्वा। जलविडाले

नीराजन(ना) निर्–राज–भावे ल्युट् युच् वा रलोपे पूर्वाणो दीर्घः। दीपादिना प्रतिमादेरारार्त्तिके। युजनः स्त्री। "नीराजनां जनयतां निजवाग्विलासानाम्" नैष०। तत्प्रकारश्च तिथि० त० देवीपु० उक्तो यथा "यवपिष्टप्रदीपाद्यैश्चूतपल्लवादिपल्लवैः। औषधीभिश्च मेध्याभिः सर्वबीजैर्वनादिभिः। नवम्यां पर्वकाले तु यात्राकाले विशेषतः। यः कुर्यात् अथवा वीर! देव्या नीराजनं नरः। अश्वमेधादिभिर्दत्तैर्वाजपेयशतैः पुनः। यावतो दिवसान् वीर! देव्या नीराजनं कृतम्। तावत् कल्पसहस्राणि दुर्गालोके महीयते"। "यस्तु कुर्यात् प्रदीपेन सूर्यलोके महीयते"। पर्वकाले उत्सवकाले। देव्या इति स्त्रीत्वमविवक्षितं विष्णुादिप्रतिमायां तथाचारात्" रघु०। पद्म नीराजनादि यथा "पद्मनीराजनं कुर्यात् प्रथमं

दीपमालया। हितीयं षोडशाङ्गेन हतीयं धौतवाससा। चूताश्वत्थादिपत्रैश्च चतुर्थं परिकीर्तितम्। पञ्चमं प्रक्षिपातेन साष्टाङ्गेन यथाविधि काष्ठोत्तरतन्त्रम्। तस्य वर्त्तिकादिप्रमाणं यथा "कङ्कुभागुरुकर्पूरहतचन्दननिर्मिताः। वर्त्तिकाः सप्त वा पञ्च कृत्वा वन्द्यापनीयकम्। कुर्यात् सप्तप्रदीपेन यद्वयष्टादिवाद्यकैः। हरेः पञ्चप्रदीपेन वङ्गो भक्तितत्परः" पद्मोत्तरखण्डे १०७अ०। राज्ञां। २शान्तिभेदे तद्विधानादि अग्निपु०२६७अ० यथा "नीराजनविधिं वक्ष्ये ऐशान्यां मन्दिरे चरेत्। तोरणत्रितयं तत्र मञ्चे देवान् यजेत् सदा। चित्रां त्यक्त्वा यदा स्वातिं सविता प्रतिपद्यते। ततः प्रभृति कर्त्तव्यं यावत् स्वातौ रविः स्थितः। ब्रह्मा विष्णुश्च शम्भुश्च शक्रश्चैवाग्नयानिलौ। विनायकः कुमारश्च वरुणो धनदो यमः। विश्वे देवा वैश्रवणो गजाश्वाटौ च तान् यजेत्। कुशैरावरणौ पद्मः पद्मदण्डश्च वामनः। सुप्रतीकोऽञ्जनो नीलः पूजा कार्या यथादिशे। पुरोधा जुहुवादग्नौ समित्सिद्धार्थकं तिलाः। कुम्भा अष्टौ पूजिताश्च तैः स्नाप्याश्च गजोत्तमाः। अद्भाः स्नाप्याः दहेत् पिण्डान् ततो हि प्रथमं गजान्। निष्क्रामत्तोरणैस्तु गोपुरादि न लङ्घयेत्। विक्रमेत्तुस्ततः सर्वं राजलिङ्गं मञ्चे यजेत्। वारुणे वरुणं प्राच्यं रात्रौ भूतबलिं ददेत्। विशाखायां गते सूर्ये आत्मने निवसेन्नृपः। अलङ्कुर्यात् दिने तस्मिन् वाहनन्तु विशेषतः। पूजिता राजलिङ्गाश्च कर्त्तव्या वरहस्तगाः। हस्तिनं तुरगं छत्रं खड्गं चापञ्च दुन्दुभिम्। ध्वजं पताकां पर्यङ्कः कालज्ञस्त्वभिमन्त्रयेत्। अभिमन्त्र्य ततः सर्वान् कुर्यात् कुञ्जरघूर्णतान्। कुञ्जरोपरिगौ स्नातां सांवत्सर पुरोहितौ। मन्त्रितांश्च समारुह्य तोरणेन विनिर्गमेत्। निष्क्रम्य नागमारुह्य तोरणेनाथ निर्गमेत्। बलिं बिम्बञ्च विधिवद्राजा कुञ्जरघूर्णतः। छत्रमूढानान्तु निश्चयमादोक्षितदिगन्तरम्। राजा प्रदक्षिणं कुर्यात्त्रीन् वारान् सुसमाहितः। चतुरङ्गबलोपेतः सर्वसैन्येन नादयन्। एवं कृत्वा मञ्चं गच्छेदिसर्जितजलाञ्जलिः। शान्तिर्नीराजनाख्येयं ह्यग्नेये रिपुमर्दनी।

अन्योऽपि शेषाद्रिव्रतखण्डे विष्णुधर्मोत्तरोक्तो ह्यग्रः। "भगवति अखिलपापप्रशमाकरार्केऽद्य कमलनाभे। उन्मीलति तरङ्गमकरिनरनीराजनं कुर्यात्। द्वादशाब्दस्यां कार्त्तिकशुक्लस्य पञ्चदश्यां वा। आश्वयुजे वा कुर्यान्नीराजनसञ्ज्ञितां शान्तिम्। नगरोत्तरपूर्वादिप्रशस्तभूमौ प्रशस्तदारुमयम्। षोडशहस्तोच्छ्रायं दशविपुलं तोरणं कार्यम्। सजोदुम्बरशाखाकुसुमयं शान्तिसञ्ज्ञं कृतवञ्चनम्। पंचविनिर्मितमत्स्यध्वजचक्राङ्कृतद्वारम्। प्रतिवरणे तुरगाणां भद्रातलशालिकुशविद्धार्द्रान्। कण्ठेषु निबध्नीयात् पुष्पार्घं शान्तिसङ्घानाम्। रविवरुणविश्वदेवप्रजेशगुरुशक्रतर्वेष्णवैर्मन्त्रैः। सम्प्राप्तं शान्तिमञ्चे कुर्याच्छान्तिं तुरङ्गाणाम्। अभ्यर्चिता न पश्यं वक्त्रया नापि ताड़नीयास्ते। पुण्याहशङ्खतूर्यध्वनिगीतरवैर्विशुद्धभयाः। प्राप्ते ऽष्टमेऽह्नि कुर्यादुदङ्मुखं तोरणस्य दक्षिणतः। कृतचीराहृतनाश्रमनम्नि पुरतोऽस्य वेद्यां च। चन्दनकुङ्कुमकल्पाकृतिताङ्गनःशिलाग्निकुण्डाः। दत्त्वाहुतीर्घृतयुक्ताग्निमन्थाच्च। श्वेताम्बूपूर्णकोशां कटम्बरात्रायमाणसद्देवीः। नागकुसुमशालगुप्तां शतावरीं सोमराजीं च। कलशेष्वेतान् कृत्वा सम्भारानुपकरेद्वह्निं सम्यक्। मन्त्रैर्नानाकारैर्मधुपायसयावकप्रचुरैः। खदिरपलाशोदुम्बरकाम्पिल्यैस्तत्समिधः। कुङ्कुमकाञ्चनताद्रा कर्त्तव्या भूतिकामेन। पूर्वाभिमुखः सौमान् दैयाघ्रे चर्मणि स्थितो राजा। तिष्ठेदनलसमीपे तुरगमभिमुखदेवविसृष्टचित्तः। यात्रायां यदभिहितं यच्छयनविधौ महेन्द्रकेतौ च। वेदीपुरोहितानलसंस्कारमग्निसदवधार्यम्। सलक्षणयुक्तं तुरगं हिरण्यरं चैव दीक्षितं स्नातम्। अक्षतसिताम्बरगन्धस्रग्भूषाभ्यर्चितं कृत्वा। आत्मतोरणमूलं समुपनयेदात्मवच्छनैर्यन्तारौ। वादित्रशब्दपूर्णाकाशनिःस्वनापूरितदिगन्तम्। यद्यानीतस्तिष्ठेद्दक्षिणचरणं क्षयः समुत्क्षिप्य। स जयति तदा नरेन्द्रः शत्रूनचिराद्दिशो यात्रात्। लक्षणहीनो राज्ञः परिक्षेपं चेष्टितं द्विषतयानाम्। यात्रायां आख्यातं तदिह विचिन्त्यं यथायुक्ति। पिण्डमभिमन्त्र्य दद्यात् पुरोहितो वाजिने स यदि जिघ्रेत्। अग्रीयाद्वा जयलक्षद्विपरीतोऽतोऽन्यथाऽभिहितः। कलशोदकेषु शाखाभाङ्गाव्योदुम्बरीं स्पृशेत्तुरगान्। शान्तिकपौष्टिकमन्त्रैरेवं सेनां सन्दर्शनागाम्। शान्तिं राष्ट्रविवृद्धौ कृत्वा भूयोऽभिचारकैर्मन्त्रैः। कृष्णमयमरिं विभिन्द्याच्छ्येनोरःस्थले विप्रः। अग्निं हृदाय दद्यादभिमन्त्र्य पुरोहितस्ततो राजा। आरब्धोदकपूर्वां यात्रां नीराजितः सबलः। सदङ्गशङ्खध्वनिघुष्टकुञ्जरस्वनदाशोद-

सुगन्धिमारुतः। शिरोमणिप्रभाचक्रैर्व्याप्तं विवस्वानिव तोयदालये। हंसपङ्क्तिभिरिताततोऽद्रिराट् सम्मतङ्गिरिव शुक्लचामरैः। सदागन्धवनानुवाहि-भिर्धूयमानरुचिरोरुगह्वरः। नैकवर्णमणिवज्रभूषितै-र्भूषितो सुकुटकुण्डलाङ्गदैः। भूरिरत्नकिरणौघरञ्जितः शक्रकार्मुकरुचं सृजन्निव। उत्पतद्भिरिव खं तुरङ्गमै-र्दारवद्भिरिव दन्तिभिर्धराम्। निर्जितारिभिरिवामरैर्नरैः शक्रवत्परिवृतो व्रजेन्नृपः। सवज्रसप्ताफलभूषणोऽथ वा स्रितसुगन्धीपविलेपनाम्बरः। धृतातपत्रो गज-पृष्ठमाश्रितो घनोपरीवेन्दुतले श्रगोः सुतः। सश्रसृष्ट-नरवाजिकुञ्जरं निर्मलप्रहरणांशुभास्वरम्। निर्विकार-मरिपक्षभीषणं यस्य सैन्यमचिरात्स गां जयेत्।" इ०सं० ४४अ०। "स्नाने धूपे च नैवेद्ये दीपे वस्त्रे च भूषणे। घण्टानादं प्रकुर्वीत तथा नीराजनेऽपि च" विधान-पाजातधृतवाक्यम्।

नीरिन्दु पु० नि+इर-क्विप् तथाविधः सन् इन्दति इन्द-उन्। चन्द्रशालोटके हृद्ये (आसशेड्डा) शब्दच०।

नीरुच् त्रि०निर्गतं रोचते निर्+रुच-क्विप् रलोपे दीर्घः। नितान्तदीप्तियोगे।

नीरुज् अव्य० रुजोऽभावः अभावे अव्ययी० रलोपदीर्घौ। १रोगाभावे। २निर्गता रुग् प्रा०त०। आरोग्ये। निर्गता रुग् रोगो यस्य प्रा०ब०। ३रोगशून्ये त्रि० "स्निग्धो बहुः पाण्डुरनिष्टगन्धोभेदःकृतो नीरुगथातिकण्डूः" सुश्रुतः। ततः भावे ष्यञ्। नैरुज्य रोगाभावे स्वास्थ्ये न०

नीरुज त्रि० निर्गता रुजा रोगो यस्य यस्मात् वा प्रा०ब० रलोपदीर्घौ। १रोगरहिते "पूतात्मा नीरुजः श्रीमां-स्तस्माद्रोगाहिसङ्कवान्" साम्बपु० २कुष्ठौषधौ जटा० रोग-भेदे (खजगञ्जिकारोगे) स्त्री "स्निग्धा सवर्णा घथिता नीरुजा बहुगन्धिमा" सुश्रुतः।

नीरूप त्रि० निर्गतं रूपमस्य प्रा०ब०। रूपशून्ये "नीरूप-स्यापि कालस्य षडिन्द्रियवेद्यत्वाभ्युपगमेन" वेदा०परि०।

नील पु० नील-अच्। स्वनामख्याते वर्णे १श्यामवर्णे २तद्वति त्रि० अमरः। ३पर्वतभेदे ४वानरभेदे च मेदि०। ५नीलो-ध्यौ ६निधिभेदे ७लाञ्छने च पु० हेमच०। ८मद्गु-लघोषे त्रिका० ९वटवृक्षे राजनि०। नीलपर्वतस्य रम्य-कवर्षस्य सीमापर्वतः यथोक्तं भाग० ५।१६। हरिवं० "उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृङ्गवानिति त्रयो-रम्यकहिरण्मयकुरूणां वर्षाणां मर्य्यादागिरयः प्रा-गायता उभयतः क्षारोदावधयोहिमाहवशृङ्गवन्त एक-शः पूर्वस्मात् पूर्वस्मादुत्तरोत्तरेण दशांशाधिकांशेन दैर्घ्य एव भवन्ति"। भारतवर्षदक्षिणस्थे स्वनामख्याते १०गिरौ च ११इन्द्रनीलमणौ अनिलुब्ध्यर्थं धार्ये देवे च मणिभेदे। तस्योत्पत्त्यादिपरीक्षा गरुडपु० उक्ता यथा "तत्रैव सिंहलवधूकरपल्लवाभ्यालूनबालनवनीलसुम प्रवाले। देशे पपात दितिजस्य नितान्तकान्तं मोदुम्बरं नीरजसमद्युति नेत्रयुग्मम्। तत्प्रत्ययादुभयशोभन बीचीभासा विस्तारिणी जलनिधेरुपकण्ठभूमिः। प्रोद्दु-भिन्नकेतकवनप्रतिबद्धलेखा सान्द्रेन्द्रनीलमणिरत्नवती विभाति। तत्राधिराजकुलभद्रसनाभिधङ्गशार्ङ्गायु-धाभहरकण्ठकलापधुर्यैः। शुक्लेतरैश्च कुसुमैर्गिरि-कर्णिकाद्यास्तस्मिन् भवन्ति मणयः सदृशावभासः। अन्ये प्रसन्नपयसः पयसां निधातुरम्बुत्विषः शिखिगल प्रतिमास्तमान्ये। नीलोरुसप्रभवबुद्बुदभाव केचित् केचित्तथा समदकोकिलकण्ठभासः। एकप्रकारा विबुध वर्णयोभावभासिनः। जायन्ते मणयस्तस्मिन्निन्द्रनीला मरुत्सुताः। मरुत्प्राणग्रिलावज्रकर्कराभासंयुताः। खञ्जिकापटलच्छाया वर्णदोषैश्च दूषिताः। तत एव हि जायन्ते मणयस्तत्र मूरयः। शास्त्रसम्बोधित धियस्तान् प्रशंसन्ति बुधाः। धार्यमाणश्च ये दृष्टाः पद्म-रागमणेर्गुणाः। धारणादिन्द्रनीलस्य तानेवाप्नोति मानवः। यथा च पद्मरागाणां जातु कर्हिभयं भवेत्। इन्द्रनीलेष्वपि तथा द्रव्यमविशेषतः। परीक्षाप्रत्ययै-श्चैव पद्मरागाः परीक्ष्यते। तथैव प्रत्यया दृष्टा इन्द्र-नीलमणेरपि। यावन्नखं क्रमेदग्निं पद्मरागः प्रयो-गवः। इन्द्रनीलमणिस्तस्मात् क्रमेत सुमहत्तरम्। तथापि न परीक्षार्थं गुणानामतिहृद्यते। मणिरत्नौ समाधेयः कचञ्चिदपि कचन। अग्निमात्राऽपरिज्ञाने दाहदोषैश्च दूषितः। सोऽनर्घ्यं भवेद्वर्तः कर्तुः कार-यितुस्तथा। श्यामोत्पलकरवीरस्फटिकाद्या इह बुधैः सवैदूर्याः। कथिता विजातय इमे सदृशा मणि-नेन्द्रनीलेन। गुरुभावकठिनभावाश्चैतेषां नित्यमेव विज्ञेयाः। चाचाद्यावावदुत्तरविवर्द्धमाना विशेषेण। इन्द्रनीलो यदा कश्चित् बिभर्त्ति ताम्रवर्णताम्। रक्त-श्वेतौ तथा ताम्रौ करवीरोत्पलावुभौ। वस्त्र मध्यगता भाति नीलेन्द्रायुधप्रभा। तदिन्द्रनीलमित्याहुर्म-हार्घं भुवि दुर्लभम्। यस्तु वर्णस्य भूयस्त्वात् क्षीरे यत

शुभे स्थितः । नीलतां तत्रवेत् सर्वं महानीलः स उच्यते । यत् पद्मरागस्य महागुणस्य मूल्यं भवेन्नाथ वसुन्धितस्य । तदिन्द्रनीलस्य महागुणस्य सवर्णसंख्यातुलितस्य मूल्यम्" १२नागभेदे पु० "नीलानीलौ तथा नागौ कल्माषश्यवलौ तथा" भा०आ० ३५अ० । क्रोधवशसर्पांशजाते द्वापरयुगीये १३ऋषभेदे "गणः क्रोधवशो नाम यक्षो राजन् ! प्रकीर्त्तितः । ततः संजज्ञिरे वीराः क्षितिविक्ष नराधिपाः" इत्युपक्रमे "क्रोधविचित्रः सुरथः श्रीमान् नीलश्च भूमिपः" भा०आ० ६७० अक्षम् । १४अजमीढस्य नीलाख्यपरनाम्न्यां नीलिन्यां जाते पुत्रभेदे "अजमीढस्य नीलिनी नाम पत्नी तस्यां नीलसंज्ञः पुत्रोऽभवत्" विष्णुपु० ४अंशे १८अ० । अजमीढस्य १५पत्नीभेदे स्त्री ङीप् । "अजमीढस्य पत्नीषु तिस्रो वै यशसान्विता । नीली च केशिनी चैव धूमिनी च वराङ्गना" हरिवं०२२अ० वानरभेदश्च रामसेनान्तर्गतः "नलनीलाङ्गदक्राथशतबलिविदर्पाजिता । ययौ सुमहती सेना राघवस्यार्थसिद्धये" भा०व० २८२अ० । नील+स्त्रीत्वविवक्षायां ङीप् । १६नीलीवृक्षौ स्त्री नीलस्य रक्तम् अण् । नील १७नीलीरक्ते त्रि० १८यमभेदे पु० "वैश्रवणाय कालाय नीलाय परमेष्ठिने" यजुर्वेदमन्त्रः । १९कालिकाशक्तिभेदे स्त्री "नीला घना बलाका च मात्रा मुद्रा मिता च माम्" कालीकवचम् । २०काचलवणे २१तालीशपत्रे २२विष्णौ शब्दार्थचि० । २३स्वल्पाङ्गाष्टोत्तरशतकरणाङ्गर्गतकरणे संगीतदा० ।

नीलवस्त्रधारणादिनिषेधः मिताक्षरायाम् यथा

"नीलीरक्तं यदा वस्त्रं ब्राह्मणोऽङ्गेषु धारयेत् । अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति" "रोमकूपे यदा गच्छेद्रसो नील्यास्तु कस्यचित् । त्रिवर्षेषु च सामान्यप्रकल्पं विशोधनम् । पालनं विक्रयश्चैव तद्वृत्त्या चोपजीवनम् । पातनञ्च भवेद्विप्रे त्रिभिः कृच्छ्रैर्व्यपोहति । नीलीदोषं यदा भिन्द्याद्ब्राह्मणस्य शरीरतः । शोणितं दृश्यते यत्र द्विजस्तान्द्रावयेद्धरेत् । स्त्रीणां क्रीडार्थसम्भोगे शयनीये न दुष्यति" स्मृत्यन्तरम् "स्त्रीक्रीड़ाशयने नीली ब्राह्मणस्य न दुष्यति । नृपस्य हट्टो वैश्यस्य पर्ववर्जं विधारणम्" तथा वस्त्रविशेषस्यैव प्रतिप्रसवः "कम्बले पट्टसूत्रे च नीलीरागो न दुष्यति" इति स्मरणात् । "नीलीरक्तं यदा वस्त्रं विप्रः स्कन्धेषु धारयेत् । तन्तुसन्ततिसंख्याब्दं वसेत् स नरके ध्रुवम्" । स्कान्दे काशीखण्डे "नीलीरक्तं तु यद्वस्त्रं दूरतस्तद्विवर्जयेत् । स्त्रीणां क्रीडार्थसंयोगे शयनीये न दुष्यति । मृते भर्त्तरि या नारी नीलीवस्त्रं तु धारयेत् । भर्त्तारं नरकं याति सा नारी तदनन्तरम् । कम्बले पट्टसूत्रे च नीलीदोषो न विद्यते" । अन्यत्र विशेषः "ब्राह्मणस्य सितं वस्त्रं नृपते रक्तमुच्यते । पीतं वैश्यस्य शूद्रस्य नीलं सर्ववदिष्यते । नीलं सर्ववत् कृष्णमिति" विधा०पा० कतिचित् नीलवस्त्राणि कविकल्पलतायां दर्शितानि यथा "शुकः शैवालं दूर्वा बालदलं बुधश्च वंशाङ्कुरः सरकत इन्द्रनीलमणिः । २४मालाङ्कभेदे न० "तालपयोधरनायकतोमरवज्रधरम् पाणियुतञ्च विधाय भामिनीदत्तवरम् । नीलमिदम् फणिनायकपिङ्गलसंवलितम् पण्डितमण्डलिकासुखदं सखि ! कर्षगतम्" "परिधीयय नीलनिचोलम्" गीतगो० । "शुक्राङ्गनीलोपलनिर्मितानाम्" माघः "कण्ठप्रभासङ्गविशेषनीलां कृष्णत्वचं यन्मिषतीं दधानम्" कुमा० । नीलश्यामलकालानामीषद्भेदात् एकपर्य्याप्तता अमरे पर्य्यायतया तेषामुक्तेः । २५दिग्गजभेदे नीराजनशब्दे दृश्यम् ।

नीलक न० नील+स्वार्थे संज्ञायां कन् वा । १काचलवणे २वर्णभेदे ३अञ्जनवृक्षे राजनि० । नीलेन वर्णेन कायति कै-क । ४अक्षरे कोटभेदे पु० । "यथा मधुकरीं ध्यायन् नीलकस्तन्मयो भवेत्" हरिभ० सं० ७५अ० पाठान्तरम् । बीजगणितोक्ते ५अव्यक्तराशिसंज्ञाभेदे पु० "यावत्तावत् कालको नीलकोऽन्योवर्णः पीतो लोहितस्तथैवमाद्याः" बीजग० ।

नीलकण्ठ पुंस्त्री नीलः कण्ठो यस्य । १मयूरे अमरः । २दात्यूहे कालकण्ठे ३श्यामवटके ५अञ्जने च हेमच० स्त्रियां सर्वत्र ङीप् । ५पीतसारे पु० हेमच० विशेष कालकण्ठे ६शिवे पु० अमरः । "स्कन्धाधिरूढोज्ज्वल नीलकण्ठात्तपोनिरूढः स्थितनूनहीन्द्रैः" "जगाप वाल्योचितनीलकण्ठ !" माघः "क्व नीलकण्ठ ! व्रजसीत्य जल्पवाक्" कुमा० । ७मूलके न० राजनि० ८राक्षसभेदे पु० "षष्टाजालावसक्तास्तु नीलकण्ठा विभीषणाः" भा०सौ० ८अ० नामाराक्षसोक्तौ । शिवस्य नीलकण्ठनामनिर्वचनम् हरिवं० १२२अ० अन्यथोक्तं यथा "दत्तः प्रहारः कुलिशेन पूर्वं तवेशान ! क्षरराक्षाऽतिशीर्य्यै । कण्ठे नैल्यं तेन ते यत् प्रवृत्तं तस्मात् ख्यातस्त्वं नीलकण्ठेति कल्पः" २२२अ० । अन्यथापि तस्य तथात्वलक्षणम्

"ततः प्रसभमाजुह्व रुद्रं विष्णुः सनातनः। जघाह कण्ठे भगवान्नीलकण्ठस्ततोऽभवत्" । भागवते ५८अ०
"तद्दिवं जगदुद्भारे प्रभावात्तस्योदतः। ततः करतलीलग्न व्यापि हालाहलं विषम्। अमन्यन् महादेवः कृपया भूतभावनः। तस्यापि दर्शयामास स्वीर्यं जलकलुषयः। यज्ञकार गले नीलं तच्च साधोर्विभूषणम्" । नीलग्रीवादयोऽप्युक्तार्थे "नीलग्रीव! शुभग्रीव! सर्वकामफलप्रद" । "अधो यो अवसर्पति नीलग्रीवो विलोहितः" यजु०१६।७ रुद्राध्याये। खञ्जनच्च खनामख्यातः पक्षिभेदः खञ्जनशब्दे २४५६पृ० दृश्यम्।

नीलकण्ठाच पु० नीलकण्ठप्रियः शिवप्रियोऽच् अथमाता यस्य। रुद्राक्षे राजनि०। नीलकण्ठस्य खञ्जनस्याक्षी वाक्षि यस्य षच् समा०। खञ्जनतुल्यनेत्रयुक्ते स्त्रियां स्त्रियाम् ङीष्। [पक्षिन्दे च दृश्ये राजनि०।

नीलकन्द पु० नीलः कन्दो मूलमस्य। १विषकन्दे २महि-

नीलकमल न० नीलं कमलम्। १नीलपद्मे नित्यक०। २नीलोत्पले राजनि "गणेशाय नमोनीलकमलामलकान्तये" श्रीवा०।

नीलकुन्तला स्त्री नीलाः कुन्तला यस्याः। दुर्गाभक्तभेदे "सखी रक्तसखी नाम जगादैवं शुचिस्मिता। तां निबार्यापरा प्राह सखी वा नीलकुन्तलाम्" दुर्गाकर्मपु०।

नीलकुरण्टक पु० कर्म०। नीलभिण्टाम् रत्नमाला।

नीलकुसुमा स्त्री नीलं कुसुमं यस्याः। नीलभिण्टां राजनि०

नीलक्रान्ता स्त्री नीलेन वर्णेन क्रान्ता। क्रमापराजितायां राजनि०। [जातित्वात् ङीष्।

नीलक्रौञ्च पुंस्त्री (कोँचक) कारण्डवे राजनि० स्त्रियां

नीलगङ्गा स्त्री नदीभेदे शिवपु०।

नीलगणेश पु० नीलवर्णो गणक्रीडाख्ये गणेशे "कर्णिकायां चतुर्दिक्षु प्रथमं पूजयेदिमान्। गणाधिपं गणेशानं तृतीयं गणनायकम्। गणक्रीडं पीतगौररक्तनीलस्वरूपः क्रमात्" शा०ति०१२पटले "गणेशाय नमो नीलकमलासनकान्तये" श्रीवा०।

नीलगिरिकर्णिका स्त्री कर्म०। गिरिकर्णिकाभेदे राजनि०

नील(ला)ङ्गु नि+लमि-कु उपसर्गदीर्घः धातोरपि दीर्घ इति केचित् १लमिजातौ अमरादौ २कुलुमे च उज्ज्वलद०। ३देवभेदे पु० "चित्रग्रीवाय वर्त्तिका नीलाङ्गोः लमिः" यजु०२४।२०

नीलचर्मन् न० कर्म०। १नीलवर्णचर्मणि। हेम०। २तद्वति चर्मयुक्ते त्रि०।

नीलज न० नीलात् पर्वतात् जायते जन-ड ५त०। १पर्वतोद्भवे राजनि० २नीलजातमात्रे त्रि०।

नीलभिण्टी स्त्री कर्म०। नीलवर्णभिण्ट्यां राजनि०।

नीलतन्त्र न० श्रीनाचारादिप्रकाशके तन्त्रभेदे

नीलतरु पु० नित्यकर्म०। १नारिकेले राजनि०। २नीलवर्णवृक्षमात्रे च।

नीलताल पु० तलमेव तालं स्वरूपं नीलं तालमस्य। १हिन्तालवृक्षे २तन्मात्रवृक्षे च राजनि०।

नीलदूर्वा स्त्री कर्म०। हरिद्वर्णदूर्वायां राजनि०।

नीलद्रुम पु० नित्यकर्म०। नीलवर्णे अवनवृक्षे राजनि०।

नीलध्वज पु० नीलवर्णो ध्वज इव। १तालवृक्षे हेम०। २नीलध्वजवति त्रि० राजनि० ३रूपभेदे पु० "अर्जुनस्य सुतो राजन् पुरीं माहिष्मतीं ययौ। नीलध्वजेन वीरेण रक्षितां दुर्गमक्षिताम्। नीलध्वजस्य महिषी ज्वालानाम्नी सुमध्यमा। स्वाहां कन्यां प्रसूतां सा सुन्दरीं धर्मतत्पराम्" जैमिनीभारते आश्वमेधिके १५अ०।

नीलनिर्गुण्डी स्त्री कर्म०। नीलसिन्धुवारे राजनि०।

नीलनिर्यासक पु० नीलवर्णो निर्यासो यस्य कप्। १नीलवर्णेऽवनवृक्षे राजनि०। हेम०। २तन्निर्यासयुक्ते त्रि०।

नीलपङ्क पुन० नीलं पङ्कं इव। अन्धकारे त्रिका०।

नीलपत्र न० नीलं पत्रं पर्णं पुष्पदलं वा (पावडि) यस्य। १नीलवर्णे उत्पले। २गुग्गुलवृक्षे ३खञ्जनवृक्षे ४नीलावनवृक्षे ५दाडिमे च राजनि० कर्म०। ६नीलवर्णपर्णे न० हेम०। ७तद्वति नीलवर्णपत्रयुक्ते त्रि०। ८इन्दीवरे शब्दच०।

नीलपद्म न० कर्म०। नीलवर्णे पद्मे शब्दच०।

नीलपिङ्गल त्रि० "वर्णो वर्णेन" पा०कर्म०। १नीलवर्णयुक्ते अव च पिङ्गलवर्णयुक्ते च २गोजातिभेदे पुंस्त्री० "गवां जातीसु वक्ष्यामि शृणुष्वैकमना दिज!। प्रथमा गौरकपिला द्वितीया गौरपिङ्गला। तृतीया रक्तकपिला चतुर्थी नीलपिङ्गला। पञ्चमी शुक्लपिङ्गाक्षी षष्ठी च शुक्लपिङ्गला। सप्तमी चित्रपिङ्गाक्षी अष्टमी वभ्रुरोहिणी। नवमी श्वेतपिङ्गाक्षी दशमी श्वेतपिङ्गला। तादृग्लक्षेऽथनडाहः कपिलास्तु प्रकीर्त्तिताः" हरिवंशे पु० १५अ०।

नीलपिच्छ पुंस्त्री० नीलं पिच्छं यस्य । शुकसारसे राजनि० । स्त्रियां जातित्वात् ङीष् ।

नीलपिष्टोडी स्त्री नीलाख्योडचे (नल्लुवलगुड) भाषाप्रसिद्धे क्षुपभेदे राजनि० । [जनि० ।

नीलपुनर्णवा स्त्री कर्म० । लक्ष्मणापुनर्णवाशाकभेदे रा-

नीलपुष्प पु०नीलं पुष्पमस्य । १नीलझङ्गराजे २नीलाख्याने च । ३पनिवपर्णे न० ४लक्षापरालितायां स्त्री राजनि० ५शतपुष्पां (मक्षिना) स्त्री ङीप् । स्वार्थे क तत्रैव ।

नीलपृष्ठ पु० नीलं पृष्ठं घूमरूपेऽस्य । वह्नौ "या वोधमं नीलपृष्ठमृ इन्द्रम्" ऋ०६।३३।१

नीलपोरक पु० रज्जुभेदे सुश्रुतः रज्जुशब्दे ६०६पृ० दृश्यम् "स्त्रीपशो नीलपोरो नैपालो दोषैपलकः । वातलाः कफपित्तघ्नाः सकषाया विदाहिनः" सुश्रुते तद्गुणादि ।

नीलफला स्त्री नीलं फलं यस्याः । जम्बूवृक्षे राजनि० ।

नीलभृङ्गराज पु० कर्म० । नीलवर्णभृङ्गराजे (नीलकेशरिया) राजनि० ।

नीलमक्षिका स्त्री कर्म० । नीलवर्णमक्षिकायाम् । "स्नातानुलिप्तं यद्यपि भजन्ते नीलमक्षिकाः । सुगन्धिवांति योऽकस्मात् व्रजन्ति ते मतायुषः" सुश्रुतः ।

नीलमणि पु० कर्म० । १इन्द्रनीलमणौ हारा० । नीलशब्दे दृश्यम् । तदर्थत्वात् २कृष्णे वासुदेवे च नीलरत्नमयत

नीलमक्षिका स्त्री नित्यकर्म० । विल्वे वैद्यकगुणप्रकाशिका ।

नीलमाधव पु० कर्म० । जगन्नाथदेवे "प्रेक्षितोऽहं हरिं द्रष्टुं मङ्गलं नीलमाधवम्" स्कं०पु० उत्क० ७अ० ।

नीलमाष पु० नित्यकर्म० । राजमाषे राजनि० । [शब्दमाला ।

नीलमौलिक पु० नीला मौलिका शिरोभूषणं यस्य । खद्योते

नीलमृत्तिका स्त्री नीला मृत्तिकेव । १पुष्पकाशये राजनि० कर्मधा० । २नीलवर्णमृत्तिकायाम् । नीला मृत्तिका यत्र । ३तद्युक्तदेशादौ त्रि० ।

नीलमेहिन् पु०नीलं तदर्थं शुक्रं मेहति सिह्-णिनि । नीलवर्णमेहयुक्ते "पैत्तिकेषु नीलमेहिनम्" सुश्रुतः ।

नीलराजि पु० ह्रस्व० । तमस्ततौ "निशा यथाङ्कुरतनीलराजयः" ऋतुसं० ।

नीललोचन त्रि० नीलं लोचनं नेत्रं यस्य । नीलवर्णनेत्रयुक्ते "शाकहारी च पुरुषो जायते नीललोचनः" शाता० शाकहरणपापेन तथात्वमस्य जायते" इत्युक्तम् ।

नीललोहित पु० "वर्णोवर्णेन" पा० कर्म० । कृष्णेन नीलेन वर्णेषु लोहितवर्णयुक्ते १शिवे अमरः । "अंशाद्धते नि-

धिकस्य नीललोहितरेतसः" क्षमा० "हृषे अस्मत्सकाशाते दरिद्र ! नीललोहित !" यजु०१६।४७ "प्रजार्थं वरयामास नीललोहितसंज्ञितम्" भा०शानु० १६अ० । २निश्चितनीललोहितवर्णे ३तद्युते त्रि० । ४भूमिजम्बां स्त्री शब्दच० ।

नीललौह न० नित्यक० । वर्णलोहे राजनि० ।

नीलवर्णाभू पु० वर्णार्थं भवति भू-क्विप् कर्म० । १कृष्णवर्णभूयांसतायां २कृष्णभेदे च ।

नीलवल्ली स्त्री कर्म० । वन्द्यायाम् (परगाछा) रत्नमाला ।

नीलवसन त्रि० नीलो रक्तः वसनं यत्र नीलं वसनमस्य । १नीलवस्त्रयुक्ते २शनैश्चरे पु० हारा० । ३बलरामे च पु० कर्म० । ४नीलवर्णे वस्त्रे नीलवस्त्रादयोऽपि एतत्पर्यायेषु । "स्त्रीक्रीडाश्वयनीवादौ नीलवस्त्रं न दुष्यति" नीलशब्दे दृश्यम् । "परिगीलय नीलनिचोलम्" गीत०गो० "नीलवासा एककुण्डलोऽकृतकृदि लसत्सुभगसुन्दरभुजः" (बलरामः) भाग० ६।२५।८।

नीलवोज पु० नीलं वोजमस्य । १नीलाख्ये राजनि० २नीलवर्णवीजयुक्तमात्रे त्रि० ।

नीलवृक्ष स्त्री कर्म० । नीलवर्णे वृक्षभेदे राजनि० ।

नीलवृन्त पु० कर्म० । खजान्यां नीलाख्ये वृक्षभेदे राजनि० ।

नीलवृन्त(क) न० नीलं वृन्तमस्य वा कप् । वृक्षे राजनि० ।

नीलवृष पु० नित्यकर्म० । विशेषलक्षणाक्रान्ते वृषभेदे तल्लक्षणं यथा० तन्त्रे शङ्करेण "लोहितो यस्तु वर्णेन सर्वे पुच्छे च पाण्डुरः । श्वेतः खुरविषाणाभ्यां स वृषो नील उच्यते" "स वृषो नील उच्यते" इत्युक्तेः नीलशब्दः स्वेव तत्रार्थे पारिभाषिकत्वं तस्य सामानाधिकरण्यद्योतनायैव वृषशब्दप्रयोगः । अतएव "नीलं वा वृषभस्तत्रजेत्" देवीपु० वाक्ये व्यासप्रयोगः । नीलषण्डप्रमोक्षेण यमाबाख्यां तिलोदकैः" भा०अनु० १६५ अ० वृषार्थकषण्डशब्दप्रयोगश्च । "लोहितो यस्तु वर्णेन शङ्खवर्णखुरो वृषः । ताम्रचूचिरशोर्षैव स वै नीलवृषः स्मृतः" इति वचनेऽपि न वृषदाने पारिभाषिकत्वम् किन्तु नीलशब्दस्यैव सामान्याधिकरण्यद्योतनाय वृषशब्दप्रयोगः पूर्वोक्तहेतोः । एवं लोहितवृषशब्देऽपि लोहितशब्दस्यैव पारिभाषिकत्वम् यथोक्तं विष्णुसं० "लोमवत्सायाः पर्यस्विन्याः पुत्रं सर्वलक्षणोपेतं नीलं लोहितं वा वृष पुच्छपादशृङ्गयुक्तं यूथस्याच्छादकम्" । नीलषण्डादयोऽप्यत्र ।

नीलवपा स्त्री नीलवर्णं पलं पुष्पं फलं च वर्षति प्रहरते ष्ठक-क। वार्त्ताकीभेदे राजनि०।

नीलव्रत न० व्रतभेदे "यस्तु नीलोत्पलं हैमं शर्करापात्रसंयुतम्। एकान्तरितनक्ताशी समाप्ते घृतधेनुं ददेत्। स वैष्णवपदं याति नीलव्रतमिदं स्मृतम्" मत्स्यपु०।

नीलशिखण्ड त्रि० नीलः शिखण्डोऽस्य। १नीलवर्णशिखण्डयुक्ते २रुद्रभेदे पु० "रुद्र! जटीश! भेषज! नीलशिखण्ड! कर्मकृत!" भाग० २।२७।६। [राजनि०।

नीलशिव पु० कर्म०। नीलवर्णपुष्पयुक्ते शोभाञ्जनभेदे

नीलसन्ध्या स्त्री नीला सन्ध्येव। ब्रह्मापराजितायां राजनि०

नीलसरस्वती स्त्री द्वितीयविद्यायां तारायाम् "ब्रह्मनीलसरस्वति! प्रणमतां सौभाग्यसम्पत्प्रदे!" इति तत्स्तोत्रम्। "नीला च वाक्प्रदा चेति तेन नीलसरस्वती" तन्त्रसारे तन्नामनिरुक्तिः। तन्मन्त्रस्तु तत्रैव "ताराद्या पञ्चवर्णेयं श्रीमन्नीलसरस्वती। सर्वभाषामयी गुह्या सर्वदेवैर्नमस्कृता" ("ॐ ह्रीं हुं क फट्") १२८।१०० तारिण्यीशब्दे दर्शिते तारिण्यीमन्त्रे सरस्वतीपदं नीलसरस्वतीपरम्।

नीलसार पु० नीलः सारोऽस्य। तिन्दुवृक्षे (तेँट) राजनि०।

नीलसिन्धुवार पु० कर्म०। नीलनिर्गुण्ड्याम् राजनि०।

नीलस्तम्भा स्त्री नीलः स्तम्भोऽस्याः। नीलदूर्वायाम् नेपथ्यप्रकाशिका।

नीला स्त्री १नीलवर्णिकायाम् अमरः। २नीलपुनर्नवायां ३नीलौषधौ च राजनि० अत्र बा० न ङीष्। ४मद्यराजस्त्रीभेदे हरिवंशपु०। अन्यान्योऽर्थो नीलशब्दे दृश्यः

नीलाङ्कितदल पु० नीलाङ्कितं दलमस्य। तैलकन्दे वैद्यक०।

नीलाङ्ग पुंस्त्री नीलमङ्गं यस्य। १शारसखने राजनि० स्त्रियां जातित्वात् ङीष्। २नीलवर्णाङ्गयुक्तमात्रे त्रि० स्त्रियां स्वाङ्गत्वात् ङीष्।

नीलाञ्जन न० कर्म०। १खोटीराञ्जने (तुँते) राजनि० "नीलाञ्जनचयप्रख्याम्" तन्त्रसारः। नीलं मेघमञ्जयति अनक्ति-यिच्-ल्यु। २विद्युति जटा० करणे ल्युट् ङीष्। ३काजाञ्जनीलुपे राजनि०।

नीलाञ्जसा स्त्री नीलमञ्जति अनक्ति-यिच् असच्। १अप्सरोभेदे २नदीभेदे ३विद्युति च मेदि०।

नीलाद्रिकर्णिका स्त्री कर्म०। ब्रह्मापराजितायां राजनि० नीलापराजितावत्र।

नीलाम्बर ह० नीलमम्बरं यस्य। १यक्षदेवे २शिवेश्वरे च कर्म०। ३नीलीरक्ते वस्त्रे न०। ४वृ०। ५तद्वति त्रि०। नीलमम्बति अवि-अरण्। ६ताक्षीयपक्षे राजनि०।

नीलाम्बुज न० कर्म०। नीलपद्मे रत्नमाला नीलाम्बुजातादयोऽप्यत्र।

नीलाम्बुजन्मन् न० नीलवर्णमम्बुजन्म। नीलोत्पले अमरः

नीलाम्ला पु० ईषत्काशेन आस्वायति आ+स्वा-क कर्म०। १नीलझिण्टाम्। तस्या हि पुष्पमल्पकाशेनैव गच्छति। २श्यामाम्लायां स्त्री गौरा० ङीष्। नीलाम्लानीलपत्रे।

नीलालु पु० कर्म०। श्यामवर्णकन्दे आलुभेदे राजनि०।

नीलाशी स्त्री नीलं वर्णमश्नुते आप्नोति अश-क्विप् उप०स० गौरा० ङीष्। नीलनिर्गुण्ड्यां नीलसिन्धुवारे राजनि०।

नीलाशोक पु० कर्म०। नीलवर्णे अशोके "साक्षेन कल्मषाक्षी, रक्ताशोकेन रक्ताक्षानी च। पाण्डूकः क्षीरिकया नीलाशोकेन सुकरकः" ह०सं० २६अ० वनस्पतिभेदद्वया अमरभेदद्वयञ्च।

नीलाश्मन् पु० कर्म०। नीलमणौ "नीलाश्मद्युतिमास्यवादनयनां शेवे महाकालिकाम्" महाकालीध्याने। "नीलाश्मद्युतिभिदुराम्बरधरोऽपरत्र" माधवः।

नीलासन पु० कर्म०। (पियाशाल) वृक्षभेदे राजनि०।

नीलि पु० नील-इन्। जलजन्तुभेदे "मद्यं नीलिञ्च वाराञ्च सर्वांश्चैकशफांस्तथा" अधिक्षेपोक्तौ मनुः। "नीलिर्जलजन्तुः" कुल्लू०।

नीलिका स्त्री नीली इदर्थे क नील-स्वार्थे क वापि अत इत्वं वा। १नीलसिन्धुवारे राजनि० २नीलिन्यां ३नील क्षेपकाधिकायां मेदि०। ४नेत्ररोगभेदे "स एव सित्तनामश्च नीलिकाकाचसंज्ञितः" सुश्रुतः। ५क्षुद्ररोगभेदे "क्रोधाय संप्रकुपितो वायुः पित्तेन संवृतः। सक्थ्यागत्य सहसा मण्डलं विसृजत्यतः। नीरुजं कृष्णं श्यावं तं व्यङ्गमिति निर्दिशेत्। ब्रह्मणैवंगुणं प्राहुः क्षुद्रे वा नीलिकां विदुः" माधवकरः। जलस्य इत्वरविषये "भूमेरुपरि दृश्यस्य कोटरः जलस्य नीलिका" इत्यादि।

नीलिन् त्रि० नीलो भूम्ना प्राशस्त्येन वाऽस्यास्ति इनि। प्रशस्तनीलवर्णयुक्ते स्त्रियां ङीप्। सा च २जालजीवृन्दपत्नीभेदे पु० नीलशब्दे दृश्यम् "जालजीवृन्द नीलिन्यां प्रधानिरुदपद्यत" हरिवं० १२अ०। ३नीलौषधौ च।

नीलिमन् पु० नीलस्य भावः इमनिच्। नीलवर्णे "कज्जलसन्निभविलोचनचुम्बनविरचितनीलिमरूपम्" गीतगो०

नीलीराग पु० "नचातियोभते यत्रापैति प्रेम मनोगतम् । तन्नीलीरागमाख्यान्ति यथा नीरामसीतयोः" सा०द० उक्ते १प्रेममेदे। सोऽस्यास्ति अच्। २पूर्वोक्तप्रेमयुक्ते पुंसि ३तद्वाविधस्त्रियां स्त्री ङीप्च०। नीलीराग इव। ४नीलवर्णे मत्वर्थीयच०। स्वार्थे क। नीलिकाऽप्यत्र नेत्ररोगभेदे च "नीलिकाकाचसंज्ञितः" सुश्रुतः।

नीलीरोग पु० अक्षिरोगभेदे "ऐर्ष्य" इत्यादाध्यं नक्तान्ध्यकाचात् नीलीरोगं तैमिरं चाञ्जनेन" सुश्रुतः।

नीलीवृक्षाकृति पु० नीलीवृक्षस्याकृतिरिवाकृतिरस्य। अरण्ये शब्दार्थचि०।

नीलोत्पल न०कर्म०। नीलवर्णे उत्पले "विलम्बिनीलोत्पलकर्णपूराः" माघ० "नीलोत्पलं बिभ्रती" ताराध्यानम्। इदञ्च अञ्जनादिगणे सुश्रुते पठित्वा तद्गुणे उक्तो यथा "अञ्जनरसाञ्जननामश्यामप्रियङ्गुनीलोत्पलनलदमञ्जिष्ठाकेशराणि मधूकञ्चेति। अञ्जनादिर्गणो ज्ञेयो रक्तपित्तनिवर्हणः"।

नीलोत्पलाद्यघृत न० चक्रपाणिदत्तोक्ते घृतभेदे "नीलोत्पलोशीरमधूकयष्टीद्राक्षा विदारीकुशपञ्चमूलैः। क्वाथ्यैर्जलैर्यैश्च घृतं विपक्वं मतावरीकारसदुग्धमिश्रम्। तच्चक्षुरापादयुतं प्रशस्तम् अञ्जद्वरे मारुतरक्तपित्ते। शीते बले रेतसि संप्रनष्टे क्षये च रक्तप्रभवे च शुक्रे"

नीलोत्पलिन् पु० नीलोत्पलं धार्य्यत्वेन तद्वत्यौ वाऽस्त्यस्य इनि। मञ्जुघोषे शिवांशभेदे त्रिका०। [च भेदि०।

नीवर पु० नी-अरच् नि०। १परिव्राजि २वल्किले ३वास्तव्ये

नीवाक पु० नियतं वाको वचनं नि-वच-घञ् दीर्घः। १मङ्गार्थेऽतोर्थान्यस्य संप्रयोगकारके अमरः। निष्ठतौ अव्ययौ०। २वचननिष्ठतौ अव्य०।

नीवार पु० नि+वृ-घञ् दीर्घः। तृणधान्यभेदे "नीवारपाकादिकङ्कुरोधैः" "अपत्वैरिव नीवारभागधेयोचितैर्मुनैः" रघुः "नीवारकलमूलाशान्वीनयति शेरते" भट्टिः। स च कृधान्यं यथोक्तं सुश्रुते "कोरदूषकश्यामाकनीवारश्यामतृणवरकोद्दालकप्रियङ्गुमधूलिकानान्दीमुखीकुरुविन्दगवेधुकाबरुकतोदपर्णीडकुन्दकरेषु संप्रयुक्तेषु कृधान्यविशेषाः। एषाः कषायमधुराः रूक्षाः कटुविपाकिनः। क्षेप्रा बद्धविण्मूत्रावातपित्तप्रकोपणाः। कषायमधुराश्चैषां शीतपित्तापहाः स्मृताः। नीवारः शीतलोग्राही पित्तशुक्रकफापहः" भावप्र० स्वार्थे क। तत्रार्थे "नीवारकादयो मुद्गादयश्च श्यामाकेन कषायोष्णैः" सुश्रु०।

नीवि(वी) स्त्री नियतयति निधीयते वा नि+व्ये-इन् यद्वोपदीर्घौ ङित्त्वाङीप्। १वस्त्रिजां मूलधने २स्त्रीकटीपरिधाने अमरः "नीविं प्रति प्रस्थितेषु च करे प्रियेषु" सा०द० "नीवीरतिक्रम्य स्थितेतरस्य" कुमा० "आलोच्य प्रियतमसंभृते विनीवौ" माघः "नीवीप्रविस्रंसनकरः" भा० स्त्री० २४अ०। ३वस्त्रग्रन्थौ "अवनिज्य पूर्ववल्लीविं विश्रस्य नसोव इत्यादि" कात्या० ४।१।१५। ४राजपुत्रा देवन्यके सुभृतिः तत्र मूलधने "निजगृहमिवातुप्रविश्य नीविं सारमहतीमादाय गिरगाम्" दशकु०।

नीव्र न० नीध्रशब्दार्थे पटले अमरे पाठान्तरम्।

नीव्रत् पुंस्त्री नियतं वर्त्ततेऽत्र नि+वृत-आधारे क्विप् दीर्घः। देशे जनपदे अमरः "गमिष्यन्नीव्रतनैकनीव्रता" नैष०।

नीष्मार पु० नितरां ष्मायंते हिंसायन्तेऽनेन वा नि+ष्मि-करणे आधारे वा घञ् दीर्घः। हिंसानिवर्त्तनिवारणे १प्रावरणे २कार्पटे च (जानात्) अमरः।

नीहार पु०निह्रियते नि+हृ-कर्मणि घञ् दीर्घः। घनीभूते १शिशिरे २हिमे च अमरः "नीहारजालमलिनाः पुनरुक्षसान्द्राः" माघः ह०र०टीकोक्ते त्रयोविंशतिरगच्छाखके २दण्डकभेदे।

नु अव्य० नुदति नौति वा नुद-नु-वा मित० डु। १विकल्पे २अनुनये ३अतीते ४अग्रे ५प्रेक्षणे ६वितर्के ७अपमाने ८आदेशे ९अनुज्ञायां च मेदि०"आस्तितं तु गमितं तु मधूनाम्" माघः अयञ्चात्रोत्प्रेक्षाद्योतकः। क्वचित् संशयालङ्कारद्योतकश्च। [अर्थोपदेशत्वात् न अत्र प्रत्ययः।

नुड वधे तु० उ० पर० सक० सेट्। नुडति अनुडीत्। नुनोड।

नुति स्त्री नु-क्तिन्। १स्तवे २प्रणामे च।

नुत्त(न्न) त्रि० नुद-क्त। १प्रेरिते २क्षिप्ते च अमरः "अदस्त्वया नुत्तमनुत्तमं तमः" माघः। पक्षे क्तस्य नः पूर्वदस्य तः। "न नोनतुन्नोनुन्नोनोनाना नानानना नत्र। तुन्नोऽनुन्नोनतुन्ने नोनानेनानुन्नतुन्नुत" किरा०।

नूतन त्रि० नवएव "नवस्य नश्च पुनर्नवश्च" पा० स्वार्थे तनप् नूरादेशश्च। नवीने अमरः "नूतनजलधररुचये" माघः "प्रथमश्रुतपूर्वपार्थिवम् कुलमभ्युतनूतनेश्वरम्" रघुः।

नूत्न त्रि० नव एव नव+नूतनवत् स्वप् नूरादेशश्च। नवीने अमरः "नूत्ना इन्द्र! ते रथमधितो भूषः" ऋ०८।२१।७

नूद पु० नुदति पापं क पृषो० दीर्घः। अश्वत्थाकारे ब्रह्मदारुवृक्षे अमरः।

नूनम् अव्य० नु+क्त-मि। १वितर्के २निश्चिते ३अरथे

अमरः ४वाक्यारम्भे ५उत्प्रेक्षाद्योतने च मेदि० "बुद्धेऽपि नूनं शरणं प्रपन्ने" "न वेत्ति नूनं यतएवमात्थ माम्" कुमा० "नूनं शङ्के ध्रुवं प्रायोन्यूनभिन्नेवमादयः" सा०द० उत्प्रेक्षाद्योतकोऽव्ययौ।

नूपुर न० नू-क्विप् तुवि पुरति पुर-अलगमने क। (नेपुर) पादाङ्दे अमरः "अप्सरोनूपुररवैः प्रबुद्धस्मरबन्दिवः" भा०व० १४६ अ०।

नृ नये भ्वा० प० अक० अनिट्। नरति अनार्षीत् ननार अघोपदेशत्वात् न क्त्वं प्रनरति "घोपदेशाल्लनर्दनाटिनाट्यारम्भेषु" कविकङ्कणः। "नर्द शब्दे नट अवस्यन्दने चुरादिः नाटीति दीर्घनिर्देशात् घट जताविति घटादिर्नेह नट्यते नाघृ नाघ्ट याच्ञादौ तु नदि अवस्यौ नक्त नाघने न नये नटतो गात्रविक्षेपे एतद्भिन्ना घोपदेशाः" इति मनोरमा। नृ नये सेट् इत्यन्ये

नृ पु०स्त्री-ऋन् डिच्च। १मनुष्ये २पुरुषे च अमरः। ना नरौ नरः ननृ तुः नृणां नृणाम्। "नृणामेकोगम्यस्त्वमसि पयसामर्णव इव" पुष्पदन्तस्तोत्रम्। "अन्ये कृतयुगे नृणां युगच्छायानुरूपतः" मनुः। ३नेतरि त्रि० ४अङ्गौ पु०। मनुष्यजातौ स्त्रियां ङीप् ङीषो नारी "नारीणामनुकूलमाचरसि चेज्जानासि" सा०द०। [टिकायत स्त्री।

नृकपाल न० ६त०। नरस्य कपाले शीर्षास्थि ककरो-

नृकेशरिन् पु०ना चासौ केशरी च। नरसिंहे विष्णोरवतारभेदे नरसिंहशब्दे दृश्यम्।

नृग पु० औशीनरे १क्षत्रभेदे २ततपत्न्यां स्त्री। दर्वाशब्दे २४७२ पृ० मूलं दृश्यम्। "राजर्षेर्नृगस्य च वरिष्ठ! नृगस्य भरतर्षभ!। रम्यतीर्था बहुक्षीरा पक्षोष्णी द्विजसेविता" भा०व० ८८अ०। स च यज्ञानात् स्वकीय धेनुबुद्धया ब्राह्मणधेनुं विप्राय दत्त्वा कृकलासतां प्राप्त इत्येषा कथा भा० अनु० ७०अ० दृश्या।

नृगधूम पु० तीर्थभेदे शब्दार्थ०।

नृचक्षस् पु० ननृ चष्टे पश्यति मन्यतेन चक्ष-असुन् न क्षादेशः। १राजर्षे हेमच०। २मनुष्यदर्शके च "श्येनो नृचक्षा अभवद्दा चक्षुषावपश्यत्" ताण्ड्य०ब्रा०। ३देवे च "नृचक्षसां भागोऽसि" यजु० १४।२४ "ननृ शुभाशुभकर्तृन् चष्टे जानाति ये ते नृचक्षसो देवाः" वेददी०

नृचक्षुस् पु० कौरवे सुनीथपुत्रे भाविनि नृपभेदे "सुनीथस्य भविता नृचक्षुर्यत्सुखी नृपः" भाग० ८।२२। २८श्लो०।

नृजल न० ६त०। १मनुष्यनेत्रजले ऋनिःसृतं जलम् मा०त०। २मानवमूत्रे हेमच०।

नृत नर्त्तने दिवा० प० अक० सेट्। नृत्यति अनर्तीत् ननर्त्त नर्तिष्यति नर्त्तति। नृत्तम् नृत्यम्। निष्कृष्यति नरीनृत्यते। नरीनर्त्ति ननर्त्ति नरीनरीति ननरीति। अघोपदेशत्वात् क्ति निमित्ते न क्त्वम्। प्रनृत्यति नर्त्तकः नर्त्तकी। "नृत्यति युवतिजनेन समं सखि! विरहिजनस्य दुरन्ते" गीतगो० "नृत्यन्ति मोक्षार्थंशरीरभङ्गाः" चोरप०। [त्वम्। नर्त्तने भव्द्यच०।

नृति स्त्री नृत-गात्रविक्षेपे क्तिच् अभिधानात् स्त्री-

नृतु पु० नृत-कु। नर्त्तके "तेऽपरीतं नृतो शवः" ऋ०८।२४।८ "नृतु जनिमनु यज्ञियानाम्" ऋ०६।६२।५ "नृतु नर्त्तकायश्विनौ" भा० "वज्रेण दासुषे नृतो!" ऋ०१।१२०।७

नृतू त्रि०नृत-कू। १नर्त्तके। ननृ तुर्वति छिनत्ति तुर्व-क्विप्। २नरसिंहवे च "नृतूरिवापोधुते" ऋ०१।८२।४

नृत्त(त्य) न० नृत-क्त क्यप् वा। तालमानयुक्ते सविलासाङ्गविक्षेपरूपे नर्त्तने "ताण्डवं नटनं नृत्यं लास्यं नृत्तञ्च नर्त्तने" अमरे देवक्ष्वेडेऽपि पर्य्यायता। तच्च यथा "देवक्ष्वा प्रतीतो यस्तालमानरसाश्रयः। सविलासोऽङ्गविक्षेपो नृत्तमित्युच्यते बुधैः। ताण्डवञ्च तथा लास्यं द्विविधं नृत्यमुच्यते। अङ्गविक्षेपबाहुल्यं तथाभिनयशून्यता। यत्र वा मेरविक्षसाः संज्ञा देशीति लोकतः। छेदनं भेदनं यत्र बहुरूपा सुखावली। ताण्डवं बहुरूपत्वाद्भावरसाश्रयसङ्कुलम्। कुरितं यौवतञ्चेति लास्यं द्विविधमुच्यते। यत्राभिनयाद्यैर्भावैरसैराङ्गेपचुम्बनैः। नायिकानायकौ रङ्गे नृत्यतस्तत्कुरितं हि तत्। मधुरं बहुशोचाभिनटीभिर्यत्र नृत्यते। वशीकरणविद्याभं तल्लास्यं यौवतं मतम्। नेपाङ्गित्तिते वाद्यं वाद्याङ्गित्तिते नयः। नयतालसमारब्धं ततो नृत्यं प्रवर्त्तते" सङ्गीतदा०। अपरूपञ्च नृत्यं व्यर्थं यथा "नृत्येनालमरूपेण सिद्धिर्नास्य रूपतः। चार्थिकानवद्यत्वं नृत्यमन्यद्विडम्बना" इति मार्क०पु०। "रङ्गस्य दर्शयित्वा नर्त्तकी निवर्त्तते यथा नृत्यात्" सा०का०। "गोपाङ्गना नृत्यमनन्दयत्तम्" भट्टिः।

नृत्यप्रिय त्रि० नृत्यं प्रियमस्य। १नर्त्तनप्रिये २ताण्डवप्रिये शिवे पु० ३कुमारानुचरमातृभेदे स्त्री "नृत्यप्रिया च राजेन्द्र! ततोलूखलमेखला" भा०श० ४७अ०।

नृत्यशाला स्त्री ६त०। (नाचघर) नाट्यगृहे

नृत्यस्थान न० ६त०। नृत्याधिकरणे रङ्गस्थाने अमरः।

नृदुर्ग न० नृवेष्टितं दुर्गम् मा०त०। मनुष्यरथादिवेष्टिते नृपस्याश्रयणीये दुर्गभेदे (गड) भेदे "नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत् नृपः" मनुः "नृदुर्गं चतुर्दिगवस्थाविच्छिन्नशरयुक्तवप्रपादातरक्षितम्" कुल्लू०।

नृदेव पु० ना देव इव। नरदेवे नृपे "ब्रह्मज्ञानमात्रां विप्रां च पत्नीं दैवा नृदेवाय भिदां न मेजुः" नैष०।

नृधर्मन् पु०नरस्येव धर्मोऽस्य बनिच् समा०। १कुबेरे हेमच० २मनुष्यधर्मयुक्तमात्रे त्रि० स्त्रियां वा ङीप्।

नृनमन न०६त०। नृभिर्नम्यते नम-कर्मणि ल्युट् पूर्वपदादित्वे प्राप्ते शुभ्रा० न षत्वम्। २मनुष्यनमनीये देवादौ।

नृप पु० नॄन् पाति रक्षति पा-क। "चतुर्योजनपर्यन्तो यधिकारी नृपो भवेत्" इत्युक्ते १राजविशेषे २राजमात्रे च अमरः। "नृपादिलक्षणं यथा "चतुर्योजनपर्यन्तमधिकारो नृपस्य च। यो राजा सकलगुणः स एव मण्डलेश्वरः। तस्माद्गुणो राजा राजेन्द्रः परिकीर्त्तितः" ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ८६अ०। तत्प्रशंसा यथा "अपुत्रस्य नृपः पुत्रो निर्धनस्य धनं नृपः। असातृजननी राजा असातस्य पिता नृपः। अनाथस्य नृपो नाथो ह्यभर्तुः पार्थिवः पतिः। अभृत्यस्य नृपो भृत्यो नृप एव नृणां सखा। सर्वदेवमयो राजा तस्मात्त्वामर्चये नृप!" कालिकापु०५०अ०। "व्यवहाराद्नृपः पञ्चैर्विद्वद्भिः ब्राह्मणैः सह" याज्ञ० "नृपेण पाणिग्रहणस्य हेति" नैष०। २षोडशसंख्यायाम् भारते षोडशानामेव राज्ञां भाङ्गात्यविशेषकथनात् नृपशब्दस्य तत्सङ्ख्यावाचित्वम् षोडश नृपाश्च भा०द्रो० ५५अध्यायादौ षोडशराजिकपर्वण्युक्ताः तत्रैव द्रष्टव्याः। "भुवि नृपतितरुस्ते व्यक्तमग्नं तदग्रम्" गीता०। राज्ये एकनृपकरणस्यावश्यकता तत्र विशेषश्च शौनसनीतिपरिशिष्टे १अ० उक्तो यथा

"सदैकनायकं राज्यं कुर्याच्च बहुनायकम्। नानायकं क्वचिदपि कर्त्तुरीप्सितमूतये। राजकुले तु बहवः पुरुषा यदि सन्ति हि। तेषु ज्येष्ठो भवेद्राजा शेषास्तत्कार्यसाधकाः। सरीयांसोवराः सर्वे सहायेभ्यो विशेषतः। ज्येष्ठोऽपि बधिरः कुष्ठी मूढोऽन्धः षण्ढ एव यः। स राज्यार्हो भवेन्नैव भ्राता तत्सुत एव वा। न कनिष्ठोऽपि, ज्येष्ठस्य भ्रातुः पुत्रस्तु राज्यभाक्। दायादानामेकमत्यं राज्ञः श्रेयस्करं परम्। पृथग्भावो विनाशाय राज्यस्य च कुलस्य च। अतः सभोमसदृशान् दायादान् कारयेन्नृपः। अव्याकृताग्रः संतुष्टोक्षविसंवादनैरपि। राज्यविभजनाच्छ्रेयो न भूपानां भवेत् क्वचित्। अलीकृतं विभागेन राज्यं शत्रुर्लिहेत्ति। राज्यतुर्यांशदानेन स्थापयेत्तान् समन्ततः। चतुर्दिक्षु च वा देशाधिपान् कुर्यात् सदा नृपः। गोगजाश्वोष्ट्रकोशाधामाधिपत्ये नियोजयेत्। सेनाधिकारे संयोज्या बान्धवाः श्यालकादयः। खदोषदर्शकाः कार्या गुरवः सुहृदश्च ये। वस्त्रालङ्कारपात्राणां स्त्रियो योज्यास्तु दर्शने। स्वयं सर्वं च विक्षेत पर्यायेण च दर्शयेत्। मन्त्रयेन्मन्त्रिभिः सार्द्धं भावि कार्यं तु निर्जने। अन्तर्वेश्मनि रात्रौ वा दिवा वाऽन्यविशोधिते। सुहृद्भिर्भ्रातृभिः सार्द्धं सभायां पुत्रबान्धवैः। राजकार्यं कैन्यपेक्ष सभ्यादीश्चिन्तयेन्नृपः"। [राजनि०।

नृपकन्द पु० कन्दानां नृपः श्रेष्ठः राजद०। राजपलाण्डौ

नृपगृह न० ६त०। राजमन्दिरे तद्वक्षणादि ह०सं० ५२अ० "उत्तमसप्ताभ्यधिकं शतं नृपसद्म पृथुत्वेन। अष्टोनान्येवं पञ्च शतादानि दैर्घ्येण" बौधायनसंज्ञोतिपरिशिष्टे १अ० तद्विवृतिर्यथा

"राजसद्म सभामध्यं गवाक्षगजशालिकम्। प्रपञ्च वापीकूपादिजलयन्त्रैः सुशोभितम्। सर्वतः स्यात् समभुजं दक्षिणोत्तरदङ्मुखम्। शालां विना नैकभुजम् तथा विषमबाहुकम्। प्रायःशाला नैकभुजा चतुरश्रं विना शुभा। अस्त्राक्षधारिभिर्युक्तप्राकारं सुदृढान्वितम्। सन्निविष्टचतुर्द्वारं चतुर्दिक्षु सुशोभनम्। दिवारात्रौ सशस्त्रास्त्रैः प्रतिकक्षासु गोपितम्। चतुर्भिः पञ्चभिः षड्भिर्यामिकैः परिवर्त्तकैः। नानाष्टकोपकार्याढ्यसंयुतं कल्पयेत् सदा। वस्त्रादिमार्जनार्थं च स्नानार्थं यजनार्थकम्। भोजनार्थं च पाकार्थं पूर्वस्यां कल्पयेत् सदम्। निद्रार्थञ्च विहारार्थं पानार्थं रोदनार्थकम्। धान्यार्थं द्वारपालार्थं दासीदासार्थमेव च। उत्सवार्थं सदान् कुर्यात् दक्षिणस्यामनुक्रमात्। गो खगोष्ट्रगजाद्यर्थं सदान् प्रत्यक् प्रकल्पयेत्। रथवाह्यर्थशस्त्रार्थव्यायामवाजिकार्थकम्। वस्त्रार्थकं तद्वरार्थं विद्याभ्यासार्थमेव च। उदक् सदान् प्रकुर्वीत सुशुभान् सुमनोहरान्। यथासङ्ख्यानि वा कुर्यादुदग्दशसदानि वै नृपः। धर्माधिकरणं शिल्पशालां कुर्यादुदग् सदान्। षड्भागाधिकोच्छ्रायां भित्तिं विस्तरतो दृढे।

कोडविस्तारषडांशस्थूला सा च प्रशीर्त्तिता। एकभूमेरिदं मानमूर्द्धभूर्द्धं समन्ततः। भस्मैव भित्तिभिर्वापि पृथक् कोडानि संन्यसेत्। त्रिकोडं पञ्चकोडं वा सप्तकोडं मठं स्मृतम्। द्वारार्द्धमष्टधा भक्तं द्वारस्यांशौ तु मध्यगौ। द्वौ द्वौ श्रेयो चतुर्दिक्षु धनुष्पदौ न्यसेत्। तत्रैव कल्पयेत् द्वारं नान्यत्र तु कदाचन। वातायनं पृथक् कोडे कुर्य्याद्दक् सुखावहम्। अन्य गेहद्वारविद्धं गृहद्वारं न कारयेत्। इष्टकोपलभग्नाग्नि पीठकूपैश्च वेधितम्। प्रासादमण्डपद्वारे मार्गवेधो न विद्यते। गृहपीठं चतुर्थांशसुच्छ्रायस्य प्रकल्पयेत्। प्रासादानां मण्डपानां चार्द्धांशं चापरे जगुः। पर वातायनैर्विद्धं नापि वातायनं स्मृतम्। हीना निम्ना छदिर्न स्यात्ताडक् कोडस्य विस्तरः। स्रोच्छ्रायस्यार्द्धमूलैक प्राकारः समन्ततः। तृतीयांशकमूलो वा सुखस्यार्द्ध प्रविस्तरः। सच्छिद्रस्तु तथा कार्य्यो दस्युभिर्न विलुप्यते। यामिकैरक्षितो नित्यं नालिकाभ्यैश्च संयुतः। वडवडदगुल्मश्च सुगवाक्षसमन्वितः। खड्गेनमड्डाप्राकारो दृषदीपमकपीधरः। परिखा तत्र कार्य्या च खातात् द्विगुणविस्तरा। नातिश्लक्ष्णप्राकारा सुगाधसलिला शुभा। युद्धसाधनसम्भारैः सुयुद्धकुशलैर्विना। न श्रेयसे दुर्गवासे राज्ञः स्याद् बन्धनाय वै"।

नृपञ्जय पु० अन्यान् नृपान् जयति जि-खश्। पौरवे नृपभेदे "जेष्यात् सुवीरो नृपतिः सुवीरात्तु नृपञ्जयः। नृपञ्जयो बडरथ इत्येते पौरवाः स्मृताः" हरिवं० २०अ०।

नृपति पु० नृन् पाति पा-डति तुक्। १कुबेरे २नृपाले राजनि च मेदि० "आताभिधङ्गो नृपतिर्निषङ्गात्" रघुः। ऋनाद्यादयोऽपि राजनि। ३क्षत्रिये "नृपतेर्वैश्यजोर्योः" मनुः।

नृपतिवल्लभ पु० तृ०। १वटिकाख्ये औषधभेदे "जातीफलं सकङ्कोलत्वगेलाटङ्करामठम्। जीरकञ्च यवानी च विश्वासैन्धवपत्रकम्। लौहभस्म रसं गन्धं ताम्रं प्रत्येकशः पलम्। मरिचं त्रिपलं दत्त्वा छागीदुग्धेन पेषयेत्। धात्रीरसेन वा पिष्ट्वा वटिकां कुरु यत्नतः। श्रीमद्भगननाथेन विचिन्य परिनिर्मितः। सर्व्वरोगहरो ज्ञेयो नृपतिवल्लभः। वटादष्टवटीं खादेत् यतिः सर्व्वदर्शकः। हन्ति मन्दानलं वर्द्धमानदोषं विरुचिताम्। प्लीहगुल्मोदरार्शीसि ग्रहणीं पाण्डुकामलाम्। कृच्छ्रं कण्ठगुदञ्च चक्षुःशूलञ्च कामलाम्। शिरःशूलं कटीशूलमानाहशोफशूलकम्। कासश्वासमवातञ्च क्षीपदं शोथमर्बुदम्। गलगण्डं गण्डमालामस्रपित्तञ्च गर्दभीम्। क्रिमिकुष्ठानि दद्रूणि वातरक्तं भगन्दरम्। उपदंशमतीसारं ग्रहणीमूत्रसंग्रहम्। अश्मरीं मूत्रकृच्छ्रञ्च मूत्राघातमरुद्गरम्। ज्वरं जीर्णज्वरं कण्डूं तन्द्रालस्यं वमिं भ्रमिम्। दाहविद्रधि हिक्काञ्च जड़गद्गदमूकताः। बाधिर्य्यं स्वरभेदञ्च शुक्रदुष्टिविषर्पकान्। उरस्तम्भं रक्तपित्तं गुदभ्रंशार्चिलक्षाम्। कर्णनासातुशोथांश्च दन्तरोगञ्च पीनसम्। स्त्रीत्वञ्च शीतपित्तञ्च स्थावराणि विषाणि च। वातपित्तकफोत्थांश्च दुष्टजान् सान्निपातिकान्। सर्व्वरोगहरान् हन्ति चक्षुरिव पावकः। बलवर्णकरो ह्येष आयुष्यो वीर्य्यवर्द्धनः। परं वाजीकरः श्रेष्ठः षट्तामन्त्र विद्विदः। अरोगी दीर्घजीवी स्यात् रोगी रोगं विमुञ्चति। रसराज प्रसादेन सुदुर्विज्ञायते नरैः भैषज्यरत्नावली। २राज्ञां प्रिये त्रि० ३राजपत्न्यां स्त्री नृपवल्लभादयोऽप्यत्र।

नृपत्नी स्त्री नृणां पतिः पालयित्री "विभाषा सपूर्वस्य" पा० नान्त्वादेशः नान्तत्वात् स्त्रियां ङीप्। नृणां पालयित्र्यां स्त्रियां "अभि नो देवीरवसा महः शर्म्मणा नृपत्नीः" ऋ०१।२२।११ "नृपत्नीः मनुष्याणां पालयित्र्यः" भा० छन्दसि जसः स्थाने शस्।

नृपद्रुम पु० नृपस्यादनो द्रुमः श०त०। राजादने आरग्वधे राजनि०। नृपवल्लभादयोऽप्यत्र "खादेदाम्रकुरान् मधान् पूतीकनृपद्रुमजान्" सुश्रुतः।

नृपप्रिय पु० तृ०। (वेडुवांश) १वंशभेदे तस्य दुर्गवेष्टनकारित्वात्तत्प्रियत्वम्। २राजपलाण्डौ ३शालिधान्ये ४आम्रे च शब्दच०। ५राजवल्लभे त्रि० तृतीयान्यां ७राजखर्जूर्यां स्त्री राजनि०। [राजनि०।

नृपप्रियफला स्त्री नृपप्रियं फलं यस्याः। वार्त्ताक्यां

नृपबदर पु० बदराणां नृपः राजदना० पूर्वनि०। राजबदरे राजनि०।

नृपमन्दिर न० तृ०। राजगृहे सौधे हेमच०।

नृपमाङ्गल्यक न० नृपस्य मङ्गल्यं यस्मात् कप्। माङ्गल्यवृक्षे राजनि०।

नृपमान न० नृपस्य तन्नोजनस्य मानमावेदकं शास्त्रम्। नृपस्य भोजनकालावेदके वाद्यभेदे त्रिका०।

नृपलक्षण् न० ६त० । नृपचिह्ने छत्रे चामरादौ च नृपलिङ्गादयोऽत्र "निजपाहोजसा वीरः कश्चिं दिग्विजये क्वचित् । नृपलिङ्गधरं शूद्रं भृत्यं गोमिथुनं पदा" भाग० ।

नृपवल्लभ न० चक्रपाणिदत्तोक्ते पक्वे १तैलभेदे २घृतभेदे च । "गवां शतत्कार्थविपक्वसत्तमं घृतञ्च तैलं तिमिरेषु नस्ततः । घृतं घृतं केवलमेव पैत्तिके तथानुतैलं पवनास्रगुल्मयोः । जीवक्रमभकौ मेदाद्राक्षांगुमती निदिग्धिका दहती । मधुकं वला बिडङ्गं मञ्जिष्ठा शर्करा रास्ना । नीलोत्पलं वटादा प्रपौण्डरीकं पुनर्नवा सवचम् । पिप्पल्याः सर्वेषां भागैरक्षांशिकैः पिष्टैः । तैलं वा यदि वा सर्पिर्दत्त्वा क्षीरे चतुर्गुणं पक्वम् । तिमिरं पटलं कार्यं नक्तान्ध्यं चार्बुदलयान्वितञ्च । श्वेतञ्च लिङ्गनाशं नाशयति नीलिकासंज्ञम् । सुखनासादौर्गन्ध्यं खलितत्वाकालजं वृत्तस्वप्नम् । कासं श्वासं शोषं हिक्कां छर्दिं तथा व्यथां नेत्रे । सकलैकाक्षिमर्दनेदं रोगं बाह्यपक्वं शिरस्तम्भम् । रोगानशेषाञ्जनोः सर्वानचिरेण नाशयति । नस्यार्थं कृष्णं तैलं पक्तव्यं नृपवल्लभे । सर्वांशैः शार्ङ्गिकैः कल्कैरन्ये भृङ्गादितैलवत् ।

नृपशासन न० ६त० । राजशासने तत्प्रकारः औशनसनीतिपरिभिष्टे १अ० उक्तो यथा

"शासनं कोशवृद्धिं कार्यं राज्ञा नित्यं प्रजासु च । दासे भृत्येषु भार्यायां पुत्रे मित्रेऽपि वा क्वचित् । वाग्दण्डं परुषं नैव कार्यं तद्देशसंस्थिते । तृणशासन मानानां नाशकस्यापि वा क्वचित् । निर्यातानां च धातूनां सजातीनां वृतस्य च । सदुदुम्बरसातैलपिष्टादीनाञ्च सर्वदा । कूटं नैव तु कार्यं स्यात् कस्यचिन्निर्मितं जनैः । तत्कोशपक्षयं नैव स्वामिकार्यविलोपनम् । दुष्टसंकारिणं चोरं जारं सद्देषिणं द्विषम् । नरवन्तप्रकाशं हि तथान्यानपकारकान् । मातरां पितरां चैव पूज्यानां विदुषामपि । नावमानं नोपहासं न कुर्युः पितृपुत्रयोः । वापीकूपारामसीमाधर्मशालासुराचलान् । मार्गांश्चैव प्रपाश्चेयुर्दीनान्धविकलाङ्गकान् । द्यूतञ्च मद्यपानञ्च स्त्रियां शस्त्रधारणम् । योगजाश्चोद्भटभिक्षीनृणां च स्थावरस्य च । रत्नसर्वरत्नानां मादकस्य विषस्य च । क्रयं वा विक्रयं वापि मद्यस्यान्नमेव च । क्रयपत्रं दानपत्रमृणनिर्णयपत्रकम् । राजाज्ञया विना नैव जनैः कार्यं चिकित्सितम् । महापाषाणभिन्नमं निधिप्रकृष्टमेव च । न वा समाजनियमं निर्णयं जातिदूषणम् । अस्वामिनाहितधनसंपर्कमन्यभेदतः । नृपतेर्गुप्तकोषञ्च नैव कुर्युः कदाचन । अधर्मं हानिमनृतं परदाराभिमर्शनम् । कूटसाक्ष्यं कूटलेख्यमप्रकाशप्रतिपक्षम् । निर्धारितकराधिक्यं क्लेशं साहसमेव च । मनसापि न कुर्वन्तु स्वामिद्रोहं तथैव च । हत्वा गुरुक्रमेण हत्वा दर्पात्प्रवक्षात् क्षात् । अधर्मं न कुर्वन्तु यत्र कस्यापि सर्वदा । परिमाणोन्मानं मानं धार्यं नृपविनिर्मितम् । गुणसाधनसंज्ञा भवन्तु निखिला जनाः । साहसाधिक्रतो न स्यूर्विना चैवाततायिनम् । वृत्तहृष्टा हयभाद्या यैस्तैस्ते धार्याः सदन्विताः । इति मन्त्रायनं श्रुत्वा येऽन्यथा वर्त्तयन्ति तान् । नाशयिष्यामि दण्डेन महता पापकारकान् । इति प्रबोधयेद्विद्वं प्रजाशासनडिण्डिमैः । लिखित्वा शासनं राजा धारयेच्च चतुष्पथे । तथा घोषयेदण्डः सादरापुरु च यत्नपुः ।

नृपशु ६० वा पशुरिव वा चासौ पशुश्चेति वा । १मूर्खे २वृषभपशौ च "यावत् स्त्रियो नृपशून् खादन्ति" भाग० ५।२६।२८ श्लो० ।

नृपसभ(भा) न०स्त्री० नृपाणां सभा "राजासनुष्यपूर्व्वेति" पा० राजपर्य्यायपदत्वात् ङीषत्वम् । बहूनां नृपाणां सभायाम् । एकस्य सभायां तु स्त्री । तत्सभाप्रकारश्च औशनसनीतिपरिभिष्टे १अ० उक्तो यथा

"राज्ञा राजसभा कार्य्या सुगुप्ता च मनोरमा । त्रिकोष्ठैः पञ्चकोष्ठैर्वा सप्तकोष्ठैः सुविस्तृता । दक्षिणोदक् तथा दीर्घा प्राक् प्रत्यग् द्विगुणाऽथ वा । त्रिगुणा वा यथाकामनेकभूमिर्द्विभूमिका । त्रिभूमिका वा कर्त्तव्या सोपकार्य्याशिरोन्नता । परितः परिकोष्ठेषु वातायन विराजिता । पार्श्वकोष्ठात्तु द्विगुणा मध्यकोष्ठेषु विस्तृता । पञ्चमांशाधिकं त्वौच्चं मध्यकोष्ठस्य विस्तरात् । विस्तारेण समं त्वौच्चं पञ्चमांशाधिकं तु वा । कोष्ठकानां च भूमिं च यदि वा तत्र कारयेत् । द्विभूमिके पार्श्वकोष्ठे मध्यमं त्वेकभूमिकम् । पृथक्स्तम्भा तु सर्वकोष्ठा चतुर्भागसमा शुभा । अलोद्वारादिवन्तैव युता सुखरवन्तकैः । वातप्रेरकवन्तैव वन्तैः कान्तप्रवोधकैः । प्रतिष्ठिता च सादर्शैस्तथा च प्रतिरूपकैः । एवंविधा राजसभा वन्तार्या कार्यदर्शने । तथाविधामात्यलेख्यसभाधिकृतमाहिकाः । कर्त्तव्याः प्राग्दक् चितान्तदर्शाश्च पृथक् पृथक् । यत्रस्थमिता भूमिं

स्थाप्य राजगृहात् सदा। उदक् द्विगतरक्षा प्राक् सेना सन्निवेशनार्थिता। आराद्राजगृहस्यैव प्रजानां निवसानि च। सर्वनिम्नेष्किानतुङ्गमतश्च सदा ततः। समन्ताच्च चतुर्दिक्षु विन्यसेच्च ततःपरम्। प्रकृत्यनुप्रकृतयो ह्याधिकारिगणस्ततः। सेनाधिपपदातीनां गणः सादि गणस्ततः। सान्त्व समनस्यापि गजपाश्वगणस्ततः। हट्टहाट्टिकयन्त्राणि ततः सत्वरगोगणः। ततः खगोलूलिकगणो ह्यारण्यकगणस्ततः। क्रमादेषां गृहाणि स्युः शोभनानि परे सदा। मान्यशाला ततः कार्या सुप्रा सजलाशया। सजातीयगृहाणां च सदाचेन चङ्कितः। निवेशने पुरे ग्रामे प्राग्दक् सुखमेधते। सजातिपण्यनिचयैरापणे पण्यवेशनम्। धनिकादिक्रमेणैव राजमार्गस्य पार्श्वतः। एवं हि पत्तनं कुर्याद्ग्रामं चैव नराधिपः"। तद्विवेशनप्रकारः तत्रैव "सभायां प्रत्यगर्द्धस्य मध्ये राजासनं भवेत्। दक्षसंस्था वामसंस्याः विशेयुः पार्श्वतृतगाः। पुत्राः पौत्राः भ्रातरश्च भागिनेयाश्च पृष्ठतः। दौहित्रा दक्षभागास्तु वामसंस्याः क्रमादिमे। पित्र्याः स्वकुलसम्बन्धाः सभ्याः सेनाधिपास्तथा। स्याप्ये दक्षिणभागे तु प्राक्संस्याः पृथनासनाः। मातामहकुलसम्बन्धा मन्त्रिणो बान्धवास्तथा। श्वशुराश्चैव श्यालाश्च वामाग्रे चाधिकारिणः। वामदक्षिणपार्श्वस्थो जामाता भगिनीपतिः। स्वसदृश्यसंभेदे वा स्वार्द्धासनगतः सुहृत्। दौहित्रभागिनेयानां स्थाने स्युर्दुहितादयः। भागिनेयाश्च दौहित्राः पुत्रादिस्थानसंस्थिताः। यथा पिता तथाचार्या समः श्रेष्ठासने स्थितः। पार्श्वयोरुभयतः सर्वे सेवका मन्त्रिणस्तथा। परिवारगणाः सर्वैः सर्वेभ्यः पृष्ठसंस्थिताः। सर्वोदग्दक्षधरो ज्ञातां प्रवेशनविवेदकौ। विशिष्टविशिष्टक्रमं राजा स्वासने प्रवेशेत् सदा। सुभूषणः सुवसनः कवची सकुटान्वितः। स्निग्धास्त्रसन्नगस्त्रस्तु सावधानः मनाः सदा"।

नृपसुता स्त्री ६त०। १राजकन्यायां २कुलुन्दस्यां स्त्री ङीप् संज्ञायां कप्। "कुलुन्दरो नृपसुता वार्त्तेयोगर्दभः प्रोक्तः"।

नृपांग ६त०। १नृपाय देये करे भागादौ २राजपुत्रे पु०।

नृपाकृष्ट श०त०। चतरङ्गशब्दे २८६४ पृ० दर्शिते क्रीडार्थराजाकृष्टे राजनि। "नृपाकृष्टो यदा राजा गमिष्यति युधिष्ठिर!। तदा राजा हि राजानं घातेऽपि तं हनिष्यति"।

नृपात्मज पु० ६त०। १राजपुत्रे २राजकन्यायां स्त्री "स्वयंवरं भीमनृपात्मजायाः" नैष०। नृपस्यात्मजेव। २कटुतुम्ब्यां स्त्री रत्नमाला।

नृपाध्वर पु० नृपमात्रकर्त्तव्योऽध्वरः शाक०त०। राजमात्रकर्त्तव्ये राजसूययज्ञे "राजा राजसूयेन यजेत" श्रुत्या राजमात्रस्यैव तत्राधिकारस्य विधानात्तस्य तथात्वम्।

नृपान्न न०नृपप्रियमन्नम्। १राजान्नाभिधे धान्यभेदे राजनि० ६त०। २राज्ञोऽन्ने च।

नृपाभीर न० नृपं तद्भोजनकालमभीरयति अभि+ईर-अच् उप०स०। राज्ञो भोजनकालावेदके नृपमानाख्ये वाद्यभेदे त्रिका०।

नृपामय पु० आमयानां नृपः राजदन्ता० पूर्वनि०। १राजयक्ष्मरोगे राजनि० ६त०। २राज्ञोरोगे च।

नृपाल पु० नृनृ पालयति पालि-अच् उप०स०। १नृपतौ राजनि। "अथो नृपालाः किलतत्र तत्र बलिं हरिष्यन्ति सलोकपालाः" भाग०४।१६।२०नरपालाद्वोऽथत्र

नृपावर्त्त न० नृप इवावर्त्तते आ-वृत-अच्। राजावर्त्ते मणिभेदे राजनि०। [आसनभेदे अमरः।

नृपासन न०। राज्ञो भद्रासने सिंहासने मञ्चादिरचिते

नृपाह्वय पु० नृपमाह्वयति नाम्ना आ+ह्वे-य। राजपलाण्डौ राजनि०।

नृपीट न० शदके निघण्टु ऋपीटमित्यत्र पाठान्तरम्।

नृपीति स्त्री पा-रक्षणे भावे क्तिन् आत ईत्त्वम् ६त०। १मनुष्यरक्षणे। "अनाधृष्टो नृपीतये" ऋ० ७।१५।१४। कर्त्तरि क्विप्। २मनुष्यरक्षके त्रि० "बहवे अन्नतो नृपीतौ" ७।२०।८ "नृपीतौ नृणां रक्षके" भा०।

नृपोचित पु० नृषेषु उचितः। १राजमात्रे २राजयोग्ये त्रि० राजनि०।

नृभोजा त्रि० नभसि जायते जन-विट् डा। आकाशजाते "नभोजाः पुत्र ऋषतस्य दर्शि" ऋ० १०।१२३।२ नभोजस् शब्दकल्पनं प्रामादिकम्।

नृमणस् त्रि० नृषु यजमानेषु मनो यस्य "ऋन्दसृदवपहात्" पा० यत्वम्। रक्षितव्ययजमानेषु यतुष्याङ्के वृद्धियुक्ते इन्द्रादौ देवे "त्वं पिप्रोर्नृमणः प्राऋजः पुरः" ऋ०१।५१।५ नृणां मनोयत्र यत्वम्। २धने नृम्ण शब्दे द्रष्टव्यम्। ३जम्बूद्वीपस्थे महानदीभेदे स्त्री आवन्तः "ऋक्षा नृमणाङ्गिरसी सावित्री सुभ्राता ऋतम्भरा सत्यम्भरेति महानद्यः" भाग० ५।१९।१६

नृमिथुन न० ६त०। मनुष्यस्य स्त्रीपुरुषयुग्मे। "मनुष्यौ घटौ नृमिथुनं सगदं सवीषधम्" हरिवंशा० मिथुनराशिस्वरूपोक्तौ। नृयुग्मादयोऽत्र। "उच्चं नृयुग्मं घटभं त्रिकोणम्" ज्योति०त०।

नृमेध पु० ना मिध्यतेऽत्र मिध-आधारे घञ्। पुरुषमेधे १यज्ञभेदे। तद्विधिः यजु० २०अ० दृश्यः। २ऋषिभेदे "नृमेधं प्रजयाऽमृतत्वम्" ऋ० १०।८०।१२ "नृमेधमेतत्सामानस्ऋषिम्" भा०।

नृमृण न० नृभिर्मीयतेऽभ्यस्यते उपार्जयितव्यं मृ-बाहुलकात्-क "छन्दसृदवपद्यातृ" पा० णत्वम्। धने निघण्टुः। "अक्षय्यं नृमृणमामराक्षय्यं नृमणस्यसे" ऋ० ५।२८३। नृमृणं धनम्। नृमणस्यसे धनमिच्छसि" भा० नृमणस्+क्यच्।

नृयज्ञ पु० नृनरार्यो यज्ञः। प्रत्यहं गृहस्थकर्त्तव्यत्वेन यज्ञान्तर्गते अतिथिपूजनरूपे यज्ञे "अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्। होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्। पञ्चैतान् यो महायज्ञान् न हापयति शक्तितः" "ऋषियज्ञं देवयज्ञं भूतयज्ञञ्च सर्वदा। नृयज्ञं पितृयज्ञञ्च यथाशक्ति न हापयेत्" इति च मनुः।

नृवत् त्रि० ना-परिचारकादिरस्यास्य मतुप् वेदे मस्य वः लोके तु न वः। परिचारकनरयुक्ते "भरद्वाजे नृवत इन्द्र! खरीन् दिवि" ऋ० ६।१७।१४

नृवराह पु०ना चासौ वराहश्च। अंशाभ्यां मनुष्यवराहाकृतौ भगवदवतारभेदे "दैत्यस्ततोऽसौ नृवराहमाहवे निपातयामास रुषा ज्वलन्तीम्। शक्तिं यथा विद्युतमाशु कृच्छ्रे प्रवर्षमाणोऽपि गिरिं सुमेघः। स हन्यमानो गदयाऽप्रमेयः प्रोवाच दैत्यं नृवराहमूर्त्तिः। प्रजापतेः सेतुमिमं निहत्य प्रजेच्छ कः स्वस्ति यथा सुरेन्द्र!" अग्निपु०। "नृवराहस्य वसतिर्महर्लोके प्रतिष्ठिता। नृसिंहस्य तथा प्रोक्ता जनलोके महात्मनः"। सएव बलेर्द्वारी यथा "शौकरं रूपमास्थाय हार्यक्षस्य च दुरात्मनः। भविष्यामि न सन्देहो व्रज शक्र! त्वरान्वितः" पाद्मे सृष्टिखण्डे २८अ०।

नृवाहन पु० ना वाहनमस्य। १नरवाहने कुबेरे नृर्नेतुर्वाहनम् "छन्दसृदवपद्यातृ" पा० वेदे णत्वम्। २नेतुर्वाहने "अवांसमद्य यज्यं नृवाहणम्" ऋ० २।३७।५

नृवाहस् पु० नृन् वहति वह-वेदे असुन् क्विच्। मनुष्यवाहके "शोषा इष्णू नृवाहसा" ऋ०१।६।२

नृशंस त्रि० नृन् शंसति मनुषु-हिंसायाम् अच्। १घातुके क्रूरे अमरः २परद्रोहिणि च "भगो नृशंस! दुर्वृत्तारिरम्" ऋ० १०।६।५ "इतरेषु (विवाहेषु) तु शिष्टेषु नृशंसानृतवादिनम्" मनुः।

नृशृङ्ग न० तुः ऋक्सम्। अलीकपदार्थे नरस्य ऋङ्गाभावात् अयोग्यत्वेऽपि अलीकत्वविवक्षायामस्य साधुत्वम् "नासदुद्गत्मादो नृशृङ्गवत्" सां०सू० "नरशृङ्गतुल्यत्वासत उत्पादो न सम्भवतीति" प्र०भा०।

नृषद् पु० नरि पुरुषे षलर्थांभितया सीदति षद-क्विप् वेदे णत्वम्। १परमात्मनि २कक्षवर्षैः पितरि ऋषिभेदे "उत कक्षं नृषदः पुत्रमाहुः" ऋ०१०।३१।११ ३मनुष्यस्थायिनि च "ध्रुवसदं त्वा नृषदं मनःसदम्" यजु०६।२।

नृषदन न० नरः नेतारः ऋत्विजः तेषाम् सदनम् वेदे णत्वम्। यज्ञगृहे "सन्तो रण्वा नरो नृषदने" ऋ० ५।७।२ "नृषदने यागगृहे" भा०।

नृसिंह पु० ना चासौ सिंहश्च। अंशाभ्यां मनुष्यसिंहाकृतियुक्ते १भगवतोऽवतारभेदे "सिंहस्य कृत्वा वदनं मुरारिः सदा कराग्रञ्च सुरक्तनेत्रम्। खड्गं वपुर्वै मनुजस्य कृत्वा ययौ सभां दैत्यपतेः पुरस्तात्" अग्निपु०। २रतिबन्धभेदे तस्य लक्षणं यथा "पादौ संपीड्य योनौ च कठाद्विकटप्रवेशनम्। कृत्वयोर्वैपरीत्यात्तं बन्धो नृसिंहसंज्ञकः" रतिम०। ना सिंह इव उपमितसमासः। २उत्तमश्लोके च

नृसिंहचतुर्दशी स्त्री नृसिंहस्याविर्भावदिनं चतुर्दशी या० त०। वैशाखशुक्लचतुर्दश्याम्। आगमे "वैशाखे शुक्लपक्षे च चतुर्दश्यां महातिथौ। सायं प्रह्लादाधिकारमवहिष्णुः परोहरिः। सद्यः कटकटाशब्दविस्फोटितसभाजनः। क्षीलया सम्भ्रमाकुलीकृतः शब्दशोषणः। नृहरेरवतारात्तां यत्नतः समुपोषयेत्। महापुण्यतमायाञ्च सायं विष्णुं प्रपूजयेत्"। हरिचारसिंहे "वैशाखशुक्लपक्षस्य चतुर्दश्यां समाचरेत्। मज्जन्मसदृशं पुण्यं व्रतं पापप्रणाशनम्" किञ्च "स्वातीनक्षत्रयोगे तु अनिवारे हि सद्व्रतम्। सिद्धियोगस्य योगे च लभ्यते दैवयोगतः। सर्वैरेतैस्तु संयुक्तैर्हत्याकोटिविनाशनम्। केवलञ्च प्रकर्त्तव्यं महिमं फल्गुकाङ्क्षिभिः। वैष्णवैर्न तु कर्त्तव्या खरविद्धा चतुर्दशी"। तत्र व्रतनित्यत्वादि हरिचारसिंहपुराणे "वर्षे वर्षे तु कर्त्तव्यं मम सन्तुष्टिकारणम्। महापुण्यमिदं श्रेष्ठं मानवैर्भवभीरुभिः" किञ्च "विधाय महिमं यस्तु भङ्गयेत् स तु पापभाक्। एवं ज्ञात्वा प्रक-

र्त्तव्यं महिने व्रतमुत्तमम्। अन्यथा नरकं याति याव-
च्चन्द्रदिवाकरौ" तत्राधिकारिनिर्णयः तत्रैव "सर्वेषा-
मेव लोकानामधिकारोऽस्ति मद्व्रते। मद्भक्तैस्तु विशे-
षेण प्रयत्नेयं मत्परायणैः"।

नृसिंहपुराण न० उपपुराणभेदे उपपुराणशब्दे दृश्यम्।

नृसिंहवन न० ष० त० १६श० क्षुपविभागे उक्ते पश्चिमोत्तर-
दिक्स्थिते देशभेदे क्षुपविभागशब्दे दृश्यम्।

नृसेन(ना) न०स्त्री नृणां सेना "विभाषा सेनेत्यादि" पा० वा
ङीषता। बहुमनुष्यसेनायाम्।

नृसोम पु० ना सोम इव। १मनुजश्रेष्ठे २सोमोद्भवायाः
सरितो नृसोमः" रघुः।

नृहरि पु० ना चासौ हरिश्च। नरसिंहे भगवदवतारभेदे
"नृहरिवामनजामदग्न्यः" उद्भटो०।

नृ नीतौ क्र्यादि० पर० सक० सेट्। नृणाति अनारीत् अयोपदेशत्वान्न थलम् अविकल्पतुमः पाणिनि-
मते नृ नये इति तुदादन्तस्य पाठः। तस्यैव योपदेश
पर्युदासता। [क्विप् नरयति। न थलम्।

नृ नये भ्वा० पर० सक० सेट्। नरति अनारीत्। घटा०

नेउ(ड्)ली स्त्री हठयोगभेदे तत्प्रकारस्तु हठ्यामले
"धौतीयोगानन्तरं हि ने(उ)डुलीकर्म समाचरेत्।
ने(उ)डुलीयोगमात्रेण आसने ने(उ)डुलोपमः। नेउ-
(डु)लीसाधनादेव चिरजीवी निरामयः। तत्कारणं
प्रवक्ष्यामि सावधानावधारय। मुक्त्वा सङ्गादपङ्कञ्च वारैकं
प्रतिचालयेत्। प्रतिचालयेत् क्षोदरञ्च कठिनाद्यविव-
र्जितः। पुनःपुनश्चालनञ्च कुर्य्यात् क्षोदरमध्यकम्।
कुलालचक्रवत् कुर्य्यात् भ्रमणञ्चोदरस्य च। सर्वाङ्गचा-
लनादेव कुण्डलीशक्तिचालनम्। चालनात् कुण्डली-
देव्याश्चेतना सा भवेत् प्रभो!। एतस्मादनन्तरं देव! चालनं
परिकीर्त्तितम्। नाडीनां चालनादेव सर्वविद्यानिधिर्भ-
वेत्। वायुसिद्धिर्भवेत्तस्य पञ्चभूतसुसिद्धिभाक्। कुण्डा-
लनं हि सर्वत्र सर्वदा कारयेद्बुधः। बहुपद्मासनं कृत्वा
अधोवस्त्रे जपं चरेत्। तदा त्रिदिनमाकर्त्तुं समर्थो
भवेत्कासनम्। तदा हि सर्वनाड्यश्च वशीभूता न संशयः।
नाडीचालनयोगेन सिद्धिमाप्नोति साधकः।
नेउ(ड्)लीं यो न जानाति स कथं कर्त्तुमुद्यतः। स
धीरो मानसचरोमतिमान् स जितेन्द्रियः। यो नेउ-
(डु)लीयोगसारं कर्त्तुमुद्यमपारगः। स चावश्यं चा-
लनञ्च कुर्य्यान्नाड्यादिसाधनम्। नेउ(ड)लीयोगमार्गेण
नाडीचालनतत्परः। भवत्येव महाकाल! राजराजेश्वरो
यथा। केवलं प्राणवायोश्च धारणात् चालनं भवेत्।
विना चालनयोगेन देहशुद्धिर्न जायते। चालनं नाडि-
कादीनां कफपित्तादिनाशनम्। करोति यत्नतो योगी
सुखासनादिनाशनात्। वायुपङ्कथमेवं हि नेउ(ड)-
लीयशकाले। न कुर्य्यात् केवलं नाथ! अन्यकाले सदा-
चरेत्। यावन्नेउ(ड)लीं न जानाति तावद्वायुं न
संपिबेत्। बद्धतरं न संपाद्यं वायोरोगमवाप्नुयात्।
केवलं श्वासगमनं यावन्नेउ(डु)ली न सिद्ध्यति। पश्चा-
त्तासाधनाच्च पञ्चवायुवशो भवेत्"।

नेजक पु० निज-ण्वुल्। १रजके "शास्त्रमीक्षस्व
कृष्णे नेनिक्ष्यात् नेजकः शनैः। न च वासांसि वासो-
भिर्निर्हरेच्च च वाससेत्" मनुना तत्कृत्यमुक्तम्। २शोध-
कमात्रे त्रि०।

नेजन न० निज्यतेऽत्र निज-आधारे ल्युट्। १नेजकावासे
"राजयः प्रत्यदृश्यन्त वाससां नेजनेष्विव" भा०द्रो०
१८८अ०। भावे ल्युट्। २शोधने

नेत्(द्) अव्य० नी-क्विप् वा० तुक् नेद-क्विप् वा आदि०
१शङ्कायां २प्रतिषेधे ३समुच्चये च मेदिनी। न
दृष्ट। ४नैवेत्यर्थे। "अन्यो नेत् क्षुरिरोहते" ऋ०
८।५।८। "नेच्छदप्येतवातै" यजु० २।१७

नेतीयोग पु० हठयोगभेदे सच हठ्यामले उत्तरखण्डे उक्तो
यथा "नेतीयोगविधानानि ब्रूहि मे वीरपूजित!। येन
सर्वमलस्यस्कफानां दाहनं भवेत्। सूक्ष्मसूत्रं दृढतरं
प्रदद्याद्गुरुराधिकारिणे। सुखरन्ध्रे समानीय सञ्चालेन स-
माचरेत्। पुनःपुनः सदा योगी यातायातेन चर्यवेत्।
क्रमेण वर्द्धनं कुर्य्यात् सूत्रस्य परमेश्वर!। नेतीयोगेन
नासाया रन्ध्रं निर्मलकं भवेत्। वायोर्गमनकाले तु
महायुद्धानिति प्रभो!"।

नेत्र क्ली० नी-ष्ट्रन्। १प्रभौ अमरः २निर्वाहके ३नायके
४प्रवर्त्तके ५प्रापके च स्त्रियां ङीप्। ६निम्बवृक्षे पु०
राजनि०। "इतो नेता हि तत्र त्वं गोपानूर्जस्वसि मत्-
कृतात्" भा०व०६६अ०। "स नेता शासिता च नः" मनुः।
७विष्णौ पु०। "न्यायो नेता समीरयः" विष्णुस० "जग-
द्धन्ननिर्वाहकोनेता" भा०। नयत्यनयाधकात् परमेतत्कात्
बहु० अच्समा०। सुगोनेता यस्याः सुननेत्रा रात्रिः।
यस्यां रात्रौ चारम्भावधिशेषपर्य्यन्तं सुगमोऽनयत्नस्य
दर्शनं तत्रारात्रेर्नेत्रत्वस्यत्वात् तथात्वम्।

नेत्र न० नयति नीयते वाऽनेन ष्ट्रन् । १मन्थनदामनि २वस्त्रभेदे ३छत्रमूले ४रथे ५जटायाम् ६नाडीव्राम् मेदि० । ७चक्षुषि अमरः । ८प्रापयितरि ९नयनसाधने १०प्रवर्त्तके च त्रि० । ११वस्तिशलाकायां राजनि० । १२चक्षुर्गोलकावस्थिते वह्निदेवताके तैजसे इन्द्रियभेदे न० "विजित्य नेत्रप्रतिघातिनीं प्रभाम्" कुमा० तत्र अग्निमन्थनदामनि "व्यामप्रमाणं नेत्रं स्यात् प्रमथ्यक्तेन पावकः" कर्मप्रदीपे काल्या० "मन्थानं मन्दरं कृत्वा तथा नेत्रञ्च वासुकिम्" भा०आ० १८अ० । चक्षुषि "नेत्रे दूरमनञ्चने पुलकिता तन्वी तवेयं तनुः" सा०द० । ११हैहयवस्वपुत्रभेदे पु० "धर्मस्तु हैहयसुतो नेत्रः कुन्तिपिता ततः" भाग०९।२३।६६। १३त्रिसंख्यायां न० "त्रिनिषद्-यमनेत्राणि (२२६७) सू० सि० ज्यार्द्धपिण्डोक्तौ । वस्तिशलाकामानादि सुश्रुते उक्तं यथा "अथातो नेत्र-वस्तिप्रमाणप्रविभागचिकित्सितं व्याख्यास्यामः" इत्यु-पक्रमे सप्तपञ्चसङ्ख्या नेत्रप्रमाणादि उक्तं यथा "पञ्चविंशतेरङ्गुलं द्वादशाङ्गुलं मूलेऽङ्गुलोदरपरीणाहप्रमाणे कनिष्ठिकोदरपरीणाहप्रमाणे स्थूलवस्तिपिटकर्णिकं सु-प्रपत्तनाडीवल्कप्रवेशं कोशास्थिमात्रं छिद्रं छिद्रवत्रा-यमात्रं छिद्रमित्येके । सर्वाणि मूले वस्तिनिबन्धनार्थं द्विकर्णिकानि । आस्थापनद्रव्यप्रमाणं तु विहिता द्वादश-प्रसृतयः । सप्ततेस्तु नेत्रप्रमाणमेतदेव द्रव्यप्रमाणन्तु द्विरुत्तरवर्धवत् । तत्र नेत्राणि सुवर्णरजतताम्रायोरीति-दन्तस्फटिकमणिवरसारमयानि श्लक्ष्णानि दृढानि गोपु-च्छाग्रतीक्ष्णमूलानि गुटिकासुखानि । वस्तयश्चाद्यानां स्थूलो नातिबहुला दृढाः प्रमाणवन्तो गोमहिषवराहा-जोरभ्राणाम्" । "नेत्राणामे स्थिता नाड़ी नलवंशास्थि-सम्भवा । वस्त्रजाभे स्थितं चर्म श्लक्ष्णं वा तानवं घनम्" । वस्तिशलाकारूपं च उत्तरवस्तिशब्दे १०८० पृ० सुश्रुतोक्तं द्रष्टव्यम् । "चतुर्दशाङ्गुलं नेत्रमाद्यराङ्गु-लमानतः" इत्यादिनोक्तं द्रष्टव्यम् । "कृत्वा स्नेहेन नेत्रेण चक्षुस्तेन तर्पयेत्" सुश्रुतः ।

नेत्रकोष पु० क्लीं० । नेत्रपटले

नेत्रच्छद पु० नेत्रे छाद्यते अनेन छद+णिच्-क सुडभः । नेत्रपिधायके चर्ममये नेत्रपुटे (चक्षेरपाता) अमरः ।

नेत्रपर्य्यन्त पु० नेत्रयोः पर्य्यन्तः कोणसीमा । १अपाङ्गे राजनि० । २नेत्रावधिके त्रि० ।

नेत्रपाक पु० नेत्ररोगभेदे तल्लक्षणं सुश्रुते उक्तं यथा "कण्डूपदेहान्वितः पक्वोदुम्बरसन्निभः । दाहसंहर्ष ताम्रत्वशोफनिस्तोदगौरवैः । अक्ष्णो सङ्गः स्रवेद्यश्च तप्तशीताम्बुपिच्छिलम् । संरम्भी पच्यते यश्च नेत्रपाकः स शोफजः । शोफहीनानि लिङ्गानि नेत्रपाके त्वशो-फजे । अन्तःसिराणां श्वयनः स्रिग्धो दृष्टिं प्रतिक्षिपन् । कृताधिमन्थं जानीत्तमसाध्यं विदुर्बुधाः" ।

नेत्रपिण्ड पुंस्त्री नेत्रं पिण्ड इव यस्य । विडाले शारा० स्त्रियां जातित्वात् ङीष् । हृत० । नेत्रगोलके न० ।

नेत्रपुष्कर न० नेत्रस्य पुष्करं जलं यस्याः ५त० । रङ्गजटायां राजनि० । तत्सेवने हि नेत्रात् जलं स्रवतीति तस्यास्त-थात्वम् ।

नेत्रप्रबन्ध पु० नेत्रे प्रबध्येते अनेन प्र+बन्ध-करणे घञ् । नेत्रपुटे "कर्षकोतः सुश्रुतारकं च नेत्रप्रबन्धमवसम्" इ०सं० ५८अ० ।

नेत्रबन्ध पु० हृत० । पृष्ठतोऽवचितेनानत्य करतलाभ्यां नेत्रयोः उपधानरूपे बाहानां क्रीड़ाभेदे "अक्ष्णनेत्र-बन्धादौः क्वचिन्मृगखगेक्षया" भा० १०।१८।८ रासक्रीड़ा-योर्बाहुक्रीडावर्णने ।

नेत्रमल न० हृत० । चक्षुर्मले दृग्विकायाम् (पिंचुटि) अमरः ।

नेत्रमीला(ना) स्त्री नेत्रयोः मीला सङ्घर्षः यस्याः ५ब० ष्टचो० वा सञ्ज्ञा०, स्त्रान्तपाठः साधुः । युवतिस्त्रायां राजनि० । तत्सेवने हि नेत्रयोर्मीलनं जायते इति तस्यास्तथात्वम् ।

नेत्रमुष् त्रि० नेत्रं तत्प्रचारं मुष्णाति मुष-क्विप् । दृष्टे-रपघातके दृष्टिप्रचारनाशके "यक्षन्ति वे नेत्रमुषं दिव्यं यावामयं रथम्" भा०व० ४२अ० ।

नेत्रयोनि पु०नेत्राणि योनय इवास्य । इन्द्रे शब्दमाला । नेत्रमिवनेत्रं योनिरुत्पत्तिस्थानं यस्य । २चन्द्रे च

नेत्ररञ्जन न० नेत्रे रज्यते अनेन रञ्ज-करणे ल्युट् । कज्जले "एष वा कथितो धूपः श्रुतं नेत्ररञ्जनम्" कालिकापु० ६१अ० ।

नेत्ररुज् स्त्री हृत० । नेत्ररोगे

नेत्ररोग पु० हृत० । नयनस्य रोगभेदे तच्चिदानादि माधव करेणोक्तं यथा "तप्ताभितप्तस्य जलप्रवेशाद्दूरेक्षणात् खप्रविपर्य्ययाच्च । खेदाद्रजोधूमनिषेवणाच्च दृष्टेर्विघाता-दमनात्तियोगात् । दृग्वस्तयाद्याद्विगि सेविताच्च विण्मूत्र-वातक्रमनिग्रहाच्च । प्रसक्तसंरोदनशोकशोषाच्छिरो-रुग्विघातादतिमद्यपानात् । तथा क्षतात्रा विपर्ययेण

क्लेशाभिघातादतिमैथुनाच्च। वाष्पग्रहात् क्षुज्जृम्भणिरोधणाच्च नेत्रे विकारान् जनयन्ति दोषाः। वातात् पित्तात् कफाद्रक्तादभिष्यन्दस्तुर्विधः। प्रावेष्य जायते घोरः सर्वनेत्रामयाकरः"। तस्य यस्याग्निर्यथा "निस्तोदनस्तम्भनरोमहर्षसंघर्षपारुष्यशिरोऽभितापाः। विशुष्कभावः शिशिरास्रता च वाताभिपन्ने नयने भवन्ति। दाहप्रपाकौ शिशिराभिनन्दात् धूमायनं वाप्यसहिष्णुता च। उष्णास्रता पीतकनेत्रता च पित्ताभिपन्ने नयने भवन्ति। उष्णाभिनन्दो गुरुताक्षिशोथः कण्डूप देहावतिशीतता च। स्रावो बहुः पिच्छिल एव चापि कफाभिपन्ने नयने भवन्ति। ताम्रास्रता लोहितनेत्रता च बाह्यः समन्तादतिलोहितत्व। पित्तस्य लिङ्गानि च यानि तानि रक्ताभिपन्ने नयने भवन्ति"।

नेत्ररोगहेतुदोष उक्तो वैद्यके

"नेत्रं स्यात् पवनाद्रूक्षं धूम्रवर्णं तथाऽरुणम्। क्षोटरान्तःप्रविष्टञ्च तथाऽस्रञ्च विलोकनम्। हरिद्राखण्डवर्णञ्च रक्तं वा हरितं तथा। दोषैर्युक्तं यदाऽस्रञ्च नेत्रं स्यात् पित्तकोपतः। चलुर्बलासबाहुल्यात् स्निग्धं स्यात् सलिलप्लुतम्। तथा धवलवर्णञ्च ज्योतिर्हीनं बलान्वितम्। नेत्रं त्रिदोषबाहुल्यात् स्याद् दोषद्वयलक्षणम्। त्रिदोषलिङ्गं सर्व्वेयं तत्प्रकारयति रोगिणम्। त्रिदोषदूषितं नेत्रमत्यर्थम्भं भयं भवेत्। त्रिलिङ्गं सलिलस्रावि प्रायेणोन्मीलयत्यपि"। नेत्ररोगभेदाश्च सुश्रुते उत्तरतन्त्रे षड्भिरध्यायैः सलक्षणचिकित्सास्तत्रैव द्रष्टव्याः। "मधुकारी च पुरुषो जायते नेत्ररोगवान्"। "मधुकारी च पुरुषो जायते नेत्ररोगवान्" इत्यादि० बहुमधुकरदर्शनेन तद्रोगवान् जायते" इत्युक्तम्।

नेत्ररोगहन् पु० नेत्ररोगं हन्ति हन-क्विप्। इक्षिकाकीडके राजनि०तस्य हि नेत्ररोगनाशकत्वं वैद्यके प्रसिद्धम्

नेत्ररोमन् न० ६त०। नेत्रपक्ष्मणि हेम०।

नेत्रवस्त्र न० नेत्रयोर्वस्त्रमिवाच्छादकम्। (चक्षेरपाता) नेत्रच्छदे।

नेत्रविष् स्त्री ६त०। नेत्रमले (पिंचुटि) "नेत्रविट् चक्षुषः क्लेदो मात्रतां क्रमशो गताः" सुश्रुतः।

नेत्रविष पुंस्त्री नेत्रे विषं यस्य। दृष्टे सर्पभेदे "दृष्टिनिश्वासविषा दिव्याः सर्पाः" सुश्रुतः। "आशीविषान् नेत्रविषान् क्रोधजेन्द्र च पन्नगान्" भा०स० ६२अ०।

नेत्रस्तम्भ पु० ६त०। नेत्रयोः स्तम्भे नयनोन्मीलनादिव्यापाररहिते "नेत्रस्तम्भं निमेषञ्च दृष्ट्वा दाहं प्रजागरम्। जभते दलचाञ्च तांस्तानन्यानुपद्रवान्" सुश्रुतः।

नेत्रान्त पु० ६त०। अपाङ्गदेशे "नेत्रान्तपादकरतालधरोष्ठजिह्वाः रक्ता नखाश्च खलु षण्ण सुखावहानि" ह०सं०६८अ०

नेत्राभि(स्य)ष्यन्द पु० ६त०। नेत्रस्य रोगभेदे अभिष्यन्दशब्दे २०४ पृ० दृश्यम्। "नेत्राभिष्यन्दपक्ष्मप्रकोपयोश्च दोषजाः" सुश्रुतः। स च संक्षाभिरोगः यथाह सुश्रुते "प्रसक्ताद्गात्रसंस्पर्शात् निःश्वासात् सह भोजनात्। सह शय्यासनाच्चापि वस्त्रमाल्यानुलेपनात्। कुष्ठं ज्वरश्च शोथश्च नेत्राभिष्यन्द एव च। औपसर्गिकरोगाश्च संक्राम्यन्ति नराद्धरम्"।

नेत्रामय पु० ६त०। नयनरोगे "वातात् पित्तात् कफाद्रक्ता दभिष्यन्दस्तुर्विधः। प्रावेष्य जायते घोरः सर्वनेत्रामयाकरः" माधवनि०।

नेत्रास्रु न० ६त०। चक्षुर्जले अमुखि अमरः।

नेत्रारि पु० ६त०। श्वेतखदिरे राजनि०।

नेत्री स्त्री नी-ट्टन् ङीप्। १चक्षुषि २नाड्यां च मेदिः। २नद्यां मेदि०। नी-ट्टन् स्त्रियां ङीप्। ३प्रापयित्र्यां स्त्रियां स्त्री।

नेत्रोपमफल पु०नेत्रे उपमा यस्य तादृशं फलमस्य। (वादाम) वृक्षभेदे भावप्र०। [मात्रे च

नेत्रौषध न० ६त०। १पुष्पकासीसे राजनि० २नेत्रयोरौषध-

नेत्रौष(धि)धी स्त्री ६त० वा ङीप्। अजशृङ्ग्याम् (गाड़रशिङ्गी) रत्नमाला।

नेद् गतौ भ्वा० प० सक० सेट्। गतिकर्मसु निघण्टुः। नेदति अनेदीत्। निनेद "या छुता अस्तुश्वस्ते या छुता अतिनेदते" ह०उप०।

नेदिष्ठ त्रि० अतिशयेनान्तिकः इयसुन् नेदादेशः। १अतिशयनिकटस्थे "नेदिष्ठे अस्मिन्नहन्यधि वोचा नु सुन्वते" ऋ० १।१२२।१। २निपुणे त्रि० राजनि०। ३अल्पोदरे पु० जटाध०।

नेदिष्ठिन् पु० नेदिष्ठं जन्मतः सन्निहितस्थानं विद्यतेऽस्य इनि। क्षोदरज्ञातरि "क्षिप्रेत चेद्विप्रबन्धुर्न दग्ध्वा शास्त्रिताहास्थीन्युपनह्य नेदिष्ठिनस्तदपदीक्ष्य तेन सह यजेरन्" आश्व०श्रौ० २५।१३।२८। "मृतं यजमानं निर्मन्थ्येन शास्त्रिणेष्ट्वा दग्ध्वास्थीन्युपनह्य तस्य यो नेदिष्ठो ज्ञोभ्राता स्यात् तं दीक्षयित्वा तेन सह यजेरन्" कर्कः।

नेदीयस् त्रि॰ अतिशयेनान्तिकः ईयसुन् नेदादेशः। अत्यन्तसमीपस्थे स्त्रियां ङीप्।

नेप पु॰ नी–प। १पुरोहिते उज्ज्वल॰। २वृक्षे निघण्टुः

नेपथ्य न॰ नी–विच् नेः नेता तस्य पथ्यम्। १भूषणे अमरः २वेशे ३वेशस्थाने नाटकादेरभिनयार्थसज्जाभूमौ च मेदि॰ "न पथ्यं नेपथ्यं बहुतरमनल्पोत्सवविधौ" मा॰द॰ "उदारनेपथ्यभृतां स मध्ये" रघुः "नेपथ्योक्तं श्रुतं यत्र त्वाकाशवचनं तथा" सा॰द॰।

नेपाल पु॰ देशभेदे "नेपालभल्लिमध्यकच्छुराट्पट्टान्" बृ॰सं॰ ४च॰ "नेपालादागतोऽयं नवकम्बलवत्त्वात्" क्षेमेन्द्रः "अटेश्वरं समारभ्य योगेशान्तं महेश्वरि!। नेपालदेशो देवेशि! साधकानां सुसिद्धिदः" यक्षिणीतन्त्रम्। "नेपाले माहिषं मांसम्" आचारोक्तौ

नेपालजा स्त्री नेपाले देशे जायते जन–ड ७त॰। नेपालजातायां मनःशिलायाम् "नेपालजासरिचशङ्करसाञ्जनानि" सुश्रुतः। जन–कर्त्तरि क्त ७त॰। नेपालजातायत्र। "मरिचं च गुडं नेपालजाता च समप्रमाणा" सुश्रुतः।

नेपालकम्बल पु॰ ६त॰। कुथास्ते चित्रकम्बले शब्दार्थचि॰।

नेपालनिम्ब पु॰ ६त॰। ज्वरान्तके वृक्षनिम्बे नेपालजाते निम्बभेदे राजनि॰।

नेपालमूलक न॰ कर्म्मधा॰ मूलभेदे राजनि॰।

नेपालिका स्त्री नेपाल उत्पत्तिस्थानत्वेनास्त्यस्याः ठन्। मनःशिलायां राजनि॰।

नेम पु॰ नी–मन्। १काले २अवधौ ३खण्डे ४प्राकारे ५कैतवे च मेदि॰। ६वर्द्धे ७अर्द्धे च हेमच॰। दनादौ अन्यार्थे च शब्दरत्ना॰। ८सार्वभौमे १०मूले च ११जङ्घे च सुमूतिः। अर्द्धार्थेऽस्य सर्वनामता। नेमश्चै नेमस्मिन् इत्यादि। असि वा॰ नेमे नेमाः। १२अक्षे १३दिग्य उत्तरवर्त्तिनि च निघण्टुः। "क्षितं जनिम नेमसद्यतम्" ऋ॰ ८।६८।५ "नेममर्द्धम्" भा॰ "आवन् पचाति नेमो नहि पक्वदर्धः" ऋ॰ १०२७।१८

नेमधित त्रि॰ नेमं क्षितः नेम+धा–क्त "सुधितनेमधितेत्यादिना" पा॰ निपा॰। अर्द्धक्षिते "सखीता यद्वयामसि त्वा युध्यन्तो नेमधिता पृतन्यून्!" ऋ॰६।२२।४ भावे क्तिन्। नेमधिति। अर्द्धधाने स्त्री। नेमं धीयतेऽत्र धा–क्तिन् निपा॰। संग्रामे निघण्टुः।

नेमन् त्रि॰ नी–मनिन्। प्रापके "तं गूर्त्तयो नेमन्निषः" ऋ॰१।५६।२ "इमं नरो मरुतः सश्चत श्रुतं नेमानः प्रायुधा रथानाम्" भा॰। छान्दसो नलोपाभावः।

नेमि पु॰ नी–मि। १तिनिशवृक्षे। २कूपसमीपे रज्जुधारणार्थे शिलाद्वयन्यस्ते ३चक्रान्ते च (रथचक्रस्य भूमिस्पर्शनयोग्ये भागे) ४कूपान्तिकस्थे-समानस्वभावे स्त्री अमरः वा ङीप्। ५जिनभेदे पु॰ हेमच॰। ६वज्रे पु॰ निघण्टुः "नियन्तुर्नेमिवृत्तयः" रघुः "आनेमिमग्नैः शितिकण्ठपक्षैः" "अपतन् द्रुतभ्रमितनेमिवृत्तयः" माघः

नेमिचक्र पु॰ परीक्षितवधपक्ष्यस्त्रे भाविन्द्रपभेदे "अधीनकृष्णस्त्रापि नेमिचक्रस्तु तत्सुतः। गजाह्वये हते तस्मा कौशाम्ब्यां स निवत्स्यति" भाग॰ ९।२२।२७

नेमिन् पु॰ नी–मा॰ मिनि। तिनिशवृक्षे भरतः।

नेयार्थता स्त्री नेयः रूढिप्रयोजनाभावादशक्यप्राक्षेपो लक्ष्यार्थो यत्र तस्य भावः। काव्यदोषभेदे "प्रायोऽप्रतीतसन्दिग्धनेयार्थक्लिष्टार्थता" सा॰द॰ "कमले चरणाघातं सख्यं सूचयसि! तेऽकरोत्"। अत्र चरणाघातेन निर्जितत्वं लक्ष्यते" सा॰द॰। तत्र रूढिप्रयोजनयोरभावात् तथात्वम्।

ने(नै)मिश्र न॰ नेमिः शीर्य्यतेऽत्र श्र–बा॰ आधारे ड। नैमिशारण्ये ततः स्वार्थे अण्। नैमिशतत्रार्थे वायुपु॰ यथा "एतच्चक्रमिदं चक्रं मया सृष्टं विसृज्यते। यस्माच्च शीर्य्यते नेमिः सदेशस्तपसः शुभः। इत्युक्त्वा सूर्य्यसङ्काशं चक्रं सृष्ट्वा मनोमयम्। प्रक्षिपत्स महादेवं विससर्ज्ज पितामहः। तेऽपि सृष्टतरा विप्राः प्रणम्य जगतां प्रभुम्। प्रययुस्तस्य चक्रस्य यत्र नेमिर्विशीर्य्यते। ततस्तं तेन विख्यातं नैमिशं भुवि पूजितम्"।

नेष्ट त्रि॰ न दृष्टम् नञर्थनञ्शब्देन "सृष्ट सुपा" पा॰स॰। १अनिष्टे २तत्प्रापणे निघण्टौ च। "अतिकृद्राः क्रमदेष्टा नेष्टाः क्षीणाधिकाङ्गाश्च" बृ॰सं॰ ६।च॰।

नेष्टु पु॰ निश–तृच्। क्षौरे शब्दार्णवधिः। "यथा मङ्गार्थिने क्षिप्रः क्षिप्रं नेष्टुर्विनश्यति" भा॰अनु॰ १२च॰ "नेष्टुः पांशुपिण्डः" नीलकण्ठः।

नेष्टृ पु॰ नी– तृच् नि॰ गुक्। ऋत्विग्भेदे उज्ज्वलद॰। "स्मावो नेष्टः! पिब ऋतुना" ऋ॰ १।१५।२ "समानरानू ब्राह्मणाच्छंसिपोतनेष्टृकावाकानाम्" कात्या॰८।६।२१।

नेष्ट्र त्रि॰ नेष्टृरिदम् अ॰ अण्। नेष्टृसम्बन्धिनि "नेष्ट्राद्यृभिरिष्यते" ऋ॰ १।१५।८ [अध्यात्म न॰।

नैःस्व न॰ निः स्वस्य भावः अण्। निर्द्धनत्वे अञ् नैःस्व

नैक त्रि॰ न एकः नञर्थनञ्शब्देन "सृष्ट सुपा" पा॰स॰।

अनेके १एकस्मिन् २विष्णौ पु० "एकोऽनेकः सवः कः किम्" विष्णुस० "मायया बहुरूपत्वान्नैकः "इन्द्रोमायाभिः पुरुरूप ईयते इति श्रुतेः" भा० ।

नैकचर त्रि० नैकः संघीभूय चरति चर–ट । संघीभूयचारिणि शूकरादौ "अपि न हंकः शाखाहकोऽन्यतमोनैकचरोऽपि वा भक्षयति" भाग० ५।८।२०

नैकज पु० नैकधा–जायते जन–ड पृषो० धालोपः । धर्मगुप्तये अनेकधा जायमाने परमेश्वरे "हंसदो नैकजोऽजः" विष्णुस० "धर्मसंरक्षणार्थाय संभवामि युगे युगे" भगवदुक्तेः भा० ।

नैकटिक त्रि० प्रयोजनाय निकटे वसति ठक् । भिक्षादिलाभहेतोः ग्रामादिनिकटवासिनि भिक्षुकादौ । भिक्षुणा हि ग्रामात् निकटे स्थातव्यमिति शास्त्रात् तद्भावत्वम् "ग्रामे नैकटिकाश्रमान्" भट्टिः ।

नैकती स्त्री नैकं तायते ताव–ड गौरा० ङीष् । नौष्यां तत्र भवः पचद्या० अण् नैकत तत्रार्थे त्रि० ।

नैकधा अव्य० नैक+प्रकारे धाच् । अनेकप्रकारे "शीर्षयोः पतिता दृष्ट्वाविभिन्नैकधा तयोः" भा०व० ११अ० ।

नैकभेद त्रि० नैकोभेदोऽस्य । उद्भावने अनेकप्रकारे अमरः

नैकमाय त्रि० नैका माया यस्य । १अनेककपटे २परमेश्वरे पु० "नैकमायो महासेनः" विष्णुस० "इन्द्रोमायाभिः पुरुरूप ईयते" श्रुतेस्तस्यानेकमायत्वात्तद्वत्वम् ।

नैकरूप त्रि० नैकं रूपं यस्य । १नानारूपे २परमेश्वरे पु० "नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः" विष्णुस० । "इन्द्रो मायाभिः पुरुरूप ईयते" श्रुतेस्तस्य तद्वत्वम् । कर्म० ३अनेकेषु रूपेषु "नैकरूपधरोऽव्यग्रः" विष्णुस्तुतिः ।

नैकशृङ्ग पु० नैकानि चत्वारि शृङ्गाण्यस्य । परमेश्वरे "नैकशृङ्गो गदाग्रजः" विष्णुस० । "चत्वारि शृङ्गाऽत्रयो अस्य पादाः" इति मन्त्रवर्णात् तस्य तद्वत्वम् स्त्रियां ङीष् ।

नैकषेय पुंस्त्री निकषाया अपत्यम् ढक् । राक्षसे स्त्रिया० नैकसानु पु० नैके सानवोऽस्य । पर्वतभेदे तत्र चरतीति चर–ट । नैकसानुचर त्रिके "नैकसानुचरश्चरः" भा०शान्ति० १७अ० ।

नैकात्मन् पु० नैक आत्मा स्वरूपमस्य । परमेश्वरे "नैकात्मा नैककर्मकृत्" विष्णुस० । "तदैक्षत बहु स्यामिति" श्रुतेस्तस्य तद्वत्वम् ।

नैकृतिक त्रि० निकृत्या परापकारेण जीवति निकृत्या निकृतया चरति वा निकृति+ठक् । स्वार्थमात्रपरोपकारित्व

शून्यत्वात् परवञ्चनेनैव स्वार्थपरे २शाठ्येन चारिणि च "अधोदृष्टिर्नैकृतिकः स्वार्थसाधनतत्परः" मनुः "न नास्तिको नैकृतिकोऽथ वापि" हरिवं० १५४अ० ।

नैगम पु० निगम एव स्वार्थे–अण् । ब्रह्मप्रदिपादके उपनिषद्रूपे १वेदभागे २नये नीतौ हेमच० । निगमे भवः अण् । ३वणिग्जने अमरः । ४नागरे मेदि० तस्येदमण् । ५निगमसम्बन्धिनि त्रि० "तेषां प्रतिविधानार्थं प्रवक्ष्याम्यथ नैगमम् । काण्डानां सर्वसिद्ध्यर्थं तान्मे पादान् निबोध मे" भा०भी० १००अ० तत्र वणिजि "श्रेष्ठीनैगमपाषण्डिगणानाप्यं विधिः" याज्ञ० "मार्गे च महति निगमे नैगमानाम्" दशकुमा० ६निघण्टुपञ्चाध्यायभेदे "आद्यं नैघण्टुकं काण्डं द्वितीयं नैगमं तथा" निघण्टुभाष्यम् । "अष्टाद्युत्तरषोडशान्तं नैगमं संप्रचक्षते" इति च तद्भाष्यम् ।

नैगमिक त्रि० निगमे भवः तस्य व्याख्यानो वा ठगयनाः ठक् । १निगमभवे २तद्व्याख्यानग्रन्थे ३तदध्यायिनि च ।

नैगमेय(ष) पु० १कुमारानुचरभेदे "तस्य (कार्त्तिकेयस्य) शाखो विशाखश्च नैगमेयश्च पृष्ठजः" भा०आ० २१अ० स्तुतौ उक्ते २बालग्रहभेदे "स्कन्दग्रहस्तु प्रथमं" इत्युपक्रमे "नवमो नैगमेयश्च यः पितृग्रहइतिस्मृतः" इत्युक्त्वा "यः क्रेंकं वमति विनश्यते च मध्ये सोऽहेगं विलपति शोर्द्धशीर्षमाधः । अध्यर्धं प्रततमघोवकासगन्धिः षष्ठो भवति हि नैगमेयजुष्टः" इति वर्णितः । अत्र नैगमेय इत्यपपाठः ।

नैघण्टुक न० निघण्टुः पर्यायशब्दसंग्रहस्तत्र प्रवृत्तम् ठक् । "गौराद्यपारेपर्यन्तमाद्यं नैघण्टुकं मतम्" माध्योक्ते प्रथमाध्यायत्वयुक्ते निघण्टुपञ्चस्य प्रथमकाण्डे "नैघण्टुकमिदं देवतानामप्राधान्येनेदमिति तदाद्यदेवते मन्त्रे निपतति नैघण्टुकं ततः" निरुक्तकारः १।२०।

नैचाशाख न० नीचाश्च शूद्रयोनिषु शाखा पुत्रपौत्रादिपरम्परा यस्य नीचाशाखः पतितः "शूद्रावेदी पतत्यत्रेः" स्मृत्यन्तरत्वात् तस्येदमण् । शूद्रावेदिसम्बन्धिपदे "नैचाशाखं मघवन् ! रन्धया नः" ऋ०२।५२।१४ तद्भाष्ये षुञ् उक्त्वैव व्युत्पत्तिर्दर्शिता ।

नैचक न० नीचा–भवतीति ठक् । नीचःशिरोभागे हेमच० ।

नैचिकी स्त्री नीचैश्चरति ठक् अव्ययस्य टिलोपः । प्रथमा निचिः गोऽर्धशिरोदेयः । प्रायश्लोक निचिकाख्यस्याः

ज्योत्स्ना० यः वा। २उत्तमायां स्त्रीगव्याम् अमरः।
नैचित्य त्रि० निचिते भवः नादित्वात् यत्। निचितदेशभवे
नैचुल न० निचुलस्येदमण् फलस्य पृषद्प्रयोगे अणो न लुप्। १निचुलसम्बन्धिनि द्रव्यलक्षणादौ "पिप्पली सर्षपांश्चैव नागरं नैचुलं फलम्" सुश्रुतः। निचुलशब्दस्यैव फलपरत्वे तु लुप् निचुलमित्येव न०।
नैतोश्य पुंस्त्री नितोशयतीति नितोशतिर्वधकर्मा निघण्टुः। ततः अच् नितोशः हिंसकः तस्यापत्यम् अण्। फन्तुरपत्ये "नैतोशेव ठक्फरी पर्फरीका" ऋ०१०।१०६।६
नैत्य त्रि० नित्ये दीयते नित्य+व्युट्० अण्। १नित्ये दीयमाने। नित्यं विहितः अण् स्वार्थे अण् वा। नित्यविहिते कर्मणि। २नित्ये कर्मणि च। ततः स्वार्थे क। नैत्यक तत्रार्थे "ऋषिं समीपे नियतो नैत्यकं विधिमास्थितः" "वेदोपकरणे चैव स्वाध्याये चैव नैत्यके" "नैत्यके नास्त्यनध्यायः" इति च मनुः।
नैत्यशब्दिक त्रि० नित्यं शब्दमाह माशब्द०ठक्। नित्यशब्दवादिनि शब्दं नित्यतया यो वदति मीमांसकसञ्ज्ञिनि।
नैत्यिक त्रि० नित्यं विहितः ठक्। नित्यविहिते "सन्ध्यां यश्च न वहायत्नात् नैत्यिकं स्मृतिकर्म च" मनुः।
नैदाघ त्रि० निदाघस्येदम् वेदे शैषिकोऽण्। निदाघसम्बन्धिनि "जघन्ये नैदाघे समिवैव क्षोपयति" शत० ब्रा०१।४।१।६ लोके तु निदाघस्तुवाचित्वेन "कालाट् ठञ्" पा० ठञ्। नैदाघिक शीघ्रत्वसम्बन्धिनि त्रि०।
नैदान त्रि०निदानं कारणं वेत्ति अण्। कारणवेत्तरि "स्याच्च आसन्नार्थसंयोगेनेति नैदानाः" निरु० १।८
नैदानिक त्रि० निदानं रोगकारणं वेत्ति तत्प्रतिपादकं ग्रन्थमधीते वा ठक्। १रोगनिदानाभिज्ञे २तत्प्रतिपादकग्रन्थाध्येतरि च "यथाक्षैर्नैदानिकाः" मल्लिनाथः।
नैदेशिक त्रि० निदेशं करोति ठक्। १किङ्करे दासे "नैदेशिकैर्यस्य वशे जनोऽयम्" भाग० ६८३।२
नधन न० निधनमेव स्वार्थे अण्। १निधने मरणे २लग्नाभे चया अष्टमस्थाने च "गुह्यैर्दारुयकेन्द्रनैधनसटैः पापैस्त्रिषडायगैः" बृ०सं०८८८अ०।
नैधान त्रि०निधानेन निर्वृत्तं सङ्ज्ञा० अञ्। निधानसाध्ये
नैधेय पु०त्रि० निधेरपत्यादि० बाह्वा०ठक्। १निधेरपत्ये तस्येदं ठक्। २तत्सम्बन्धिनि त्रि०।
नैध्रुव पु० निध्रुवगोत्रप्रवरर्षिभेदे "निध्रुवाणां काश्यपावत्सार नैध्रुवेति" आश्व० श्रौ० ६।१४।६
नैध्रुवि पु०सामवेदाध्यापकपरम्परास्थे काश्यपे ऋषिभेदे "काश्यपान्नैध्रुवेः काश्यपो नैध्रुविः" शत०ब्रा०१४।८।१।२२
नैप त्रि० नीपस्य विकारः रजतादि० अञ्। नीपविकारे
नैपात्य न० निपातस्य भावः ब्राह्मणा० अञ्। निपातस्य भावे
नैपाल पु० नेपाले भवः तस्येदम् वा अण्। १नेपालभवे निम्बे राजनि०। २नवमल्लिकायां स्त्री टाप्। ३मनःशिलायां ४शेफालिकायां स्त्री ङीप्। शब्दर०५नेपालदेशभवे ७तत्सम्बन्धिनि च त्रि०स्त्रियां ङीप्
नैपालिक न० नेपाले भवः वा० ठक्। ताम्रे राजनि०।
नैपुण न० निपुणस्य भावः युवा० अण्। निपुणत्वे "अधमसमवरिष्ठान्यर्कैकेन्द्रादिसंस्थे यमिनि विनयविज्ञानधी नैपुणानाम्" ज्योति०त०। "प्रकटान्यपि नैपुणं महत् परवाच्यानि चिराय गोपितुम्" माघः।
नैपुण्य न० निपुणस्य भावः कर्म वा ब्राह्मणा० ष्यञ्। १निपुणत्वे २निपुणकर्मणि च। "धर्मनैपुण्यकामानां पूतिगन्धे च सर्वदा" मनुः। [समीपादौ।
नैवडक त्रि० निवड्यादूरदेशादि वराड्० कक्। निवड्य-
नैभृत्य न० निभृतस्य भावः ब्राह्मणा० ष्यञ्। निभृतत्वे अचाञ्चल्ये "हृत्वा च पुरुषव्याघ्रो नैभृत्येन च पार्थवः। अन्तर्यो वदान्यश्च स्त्रीमान् सत्यपराक्रमः" भा०उ० १२अ०। [यादूरदेशादौ।
नैमग्नक त्रि० निमग्न+चतुरर्थां वराड्० कक्। निमग्न-
नैमित्त त्रि० निमित्ते भवः निमित्तस्य शकुनशास्त्रस्य व्याख्यानो ग्रन्थो वा अयनादि० अण्। १निमित्तभवे २शकुनरूपनिमित्तस्यकथनग्रन्थव्याख्याने च।
नैमित्तिक त्रि० निमित्तं वेत्ति तत्प्रतिपादकग्रन्थमधीते वा ठक्या० ठक्। १निमित्ताभिज्ञे २निमित्तरूपशकुनशास्त्राध्येतरि च। निमित्तादागतः ठक्। ३निमित्तमात्रमाश्रित्य कर्त्तव्ये कर्मणि तच्च पुत्रजन्माश्रित्य विहितं जातेष्ट्यादि यज्ञयादिनिमित्तमाश्रित्य स्नानादि च "नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमिष्यते" ति०त० "नैमित्तिकत्वं तु निमित्तनियतदधिकारिकर्त्तव्यत्वम्" स्मार्त्ताः। "यत्तु पापोपशान्त्यै च दीयते विदुषां करे। नैमित्तिकं तदुद्दिष्टं दानं सद्भिरनुष्ठितम्" इति गरुड़पु० "निमित्तमात्रमाश्रित्य यो धर्मः सम्प्रवर्त्तते। नैमित्तिकः स विज्ञेयः प्रायश्चित्तविधिर्यथा"। चक्षुःश्रवणपूयादि स्पृष्ट्वा स्नातां रजस्वलाम्। स्नानार्हस्तु यदा स्नाति स्नानं नैमित्तिकं तु तत्"। "नैमित्तिकानि काम्यानि नित्यानि

यथा यथा" मत्स्य० ६निमित्ताधीने च "दुरधो हे रक्षवती ह्योर्नैमित्तिकोदुयः" "सांसिद्धिकं द्रव्यत्वं स्यात् नैमित्तिकमथापरम्। नैमित्तिकं वह्नियोगात् तपनीयतादिषु" भाषा० "दुरधार्थहेतुकमिदं निमित्त नैमित्तिकप्रसङ्गेन" वा०का०।

नैमित्तिकलय पु० "चतुर्युगसहस्रान्ते ब्राह्मो नैमित्तिको लयः" स्मृ० प्रलयभेदे "चतुर्दशसु सोऽथ कालो ब्राह्ममहः स्मृतम्। तस्यान्ते प्रलयः प्रोक्तो ब्रह्मन्! नैमित्तिको बुधैः" मार्कण्डेयपु०।

नैमिष न० निमिषमेव स्वार्थे अण्। निमिषारण्ये तीर्थभेदे निमिषशब्दे दृश्यम्। "पृथिव्यां नैमिषं क्षेत्रमन्तरीक्षे च पुष्करम्। त्रयाणामपि लोकानां कुरुक्षेत्रं विशिष्यते" भा०व० ७५ अ० श्लो०। नैमिषारण्यमप्यत्र।

नैमिषि पु० निमिषस्यापत्यम् इञ्। नितरां मिषस्यापत्ये ततः यूनि फक्। तस्य तौल्वल्या० न लुक्। नैमिषायण यूनि तदपत्ये

नैमिष न० चरणव्यूहे तीर्थभेदे आरण्ये निमिषेण दानवबलं विष्णुना निहतमिति तस्य तथात्वं तन्निर्वचनं यथा वराहपु० "तेन चक्रेण तत् सैन्यमासुरं दुर्जयं युधात्। निमिषान्तरमात्रेण भस्मवद्दुरवुधा कृतम्। एवं कृत्वा ततो देवो मुनिं गौरमुखं तदा। उवाच निमिषेणेदं निहतं दानवं बलम्। चरण्येऽस्मिंस्ततस्तेन नैमिषारण्यसंज्ञितम्। भविष्यति यथार्हं वै ब्राह्मणानां विशेषतः"। "नैमिषे तु महास्थाने देवी या चिक्रधारिणी" इति देवीगीता। तत्रेदम् "इह्राक्षः" पा० सू। नैमिषीय तत्सम्बन्धिनि "स च नैमिषीयाणामृषीणां बभूव" छा०उ०।

नैमिषकुञ्ज न० तीर्थभेदे नैमेयेशब्दे दृश्यम्।

नैमिषि पुंस्त्री निमिषति नि+मिष–क निमिषस्यापत्यम् इञ्। निमेषशुक्लस्यापत्ये ततः यूनि फक्। तस्य तौल्वल्या० न लुक्। नैमिषायण तदीये बह्वपत्ये पुंस्त्री०।

नैमिषेय त्रि० निमिषे भवः निमिषस्येदं वा वा० ढक्। १निमिषारण्यस्थे २नैमिषसम्बन्धिनि च "ततः नैमिषकुञ्जस्य समासाद्य कुरूद्वह!। ऋषयः क्षिप्र राजेन्द्र! नैमिषेयास्तपस्विनः" भा०व० ८३अ०।

नैमेय पु०नि+मि–यत् स्वार्थेऽण्। विनिमये परीवर्त्ते अमरः

नैयग्रोध न० न्यग्रोधस्य विकारः प्रचा० अण् तस्य न लुक् यदान्तत्वात् पूर्वमैत्। वटफलादौ अमरः। "नैयग्रोधं भवति स्वप्नमेवावरुन्धे" शत०ब्रा०१२।७२२।१४ [मांदी।

नैयङ्गव त्रि० न्यङ्गोरिदम् अण् यात्पूर्वमैत्। न्यङ्गगस्य च-

नैयमिक त्रि० नियमादागतः ठक्। नियमविधिप्राप्ते कर्मणि ऋतुभाव्यागमनादौ। [न्यायव्याख्याने ग्रन्थे।

नैयाय त्रि० न्यायस्य व्याख्यानो ग्रन्थः ऋगयनादि० अण्।

नैयायिक त्रि० न्यायं वेत्त्यधीते वा उक्थाऽ०ठक्। न्यायते "नैयायिकानान्तु नये द्व्यणुकादावपीष्यते" भाषा०।

नैयायिक त्रि० न्यायं वेत्ति अधीते उक्थाऽ०ठक्। १हरदत्तकृतपदमञ्जर्यपरनामकन्यासग्रन्थाभिज्ञे २भाट्टकादिन्यायवेत्तरि च।

नैरन्तर्य्य न० निरन्तरस्य भावः ष्यञ्। अविच्छेदे "स तु दीर्घकालनैरन्तर्य्यसत्कारासेवितो दृढभूमिः" पात० सू० "नैरन्तर्य्यात्तु संस्कारो दृढः विषयदोषवत्" सू०वि०

नैरपेक्ष्य न० निरपेक्षस्य भावः ष्यञ्। अपेक्षाशून्यत्वे "नैरपेक्ष्येऽपि प्रकृत्युपकारेऽविवेको निमित्तम्" सां०सू०

नैरयिका त्रि० निरये वसति ठक्। नरकवासिनि "पञ्चेन्द्रिया एव देवा नरा नैरयिका अपि" क्षेमच०।

नैराश्य न० निराशस्य निष्कामस्य भावः ष्यञ्। आशाशून्यत्वे "आशा हि परमं दुःखं नैराश्यं परमं सुखम्। यथा संत्यज्य कान्ताशां सुखं सुष्वाप पिङ्गला" सां०प्र०भाष्यधृत वाक्यम् नैराश्यस्य सुखरूपत्वं तत्र समर्थितं यथा "निराशः सुखी पिङ्गलावत्" सां०सू० "नन्वाशानिवृत्त्या दुःखनिवृत्तिः स्यात् सुखं तु कुतः साधनाभावनादिति" उच्यते। चित्तस्य सत्त्वप्राधान्येन स्वाभाविकं यत् सुखमाशया पिहितं तिष्ठति तदेवाशाविगमे सत्त्वशक्तिकं भवति तेजःप्रतिबद्धजलशैत्यवदिति न तत्र साधनापेक्षा" सां०प्र०भा०।

नैरुक्त त्रि० निरुक्तस्य व्याख्यानो ग्रन्थः तत्र भवो वा ऋगयनादि० अण्। १निरुक्तव्याख्याने ग्रन्थे तत्र २भवे(आचक्षे) च "नैवित्तोऽहैतुकस्तर्को नैरुक्तो धर्मपाठकः" मनुः।

नैरुक्तिक त्रि० निरुक्तं निर्वचनं वेत्ति तद्ग्रन्थं वाऽधीते उक्थाऽठक्। १निर्वचनाभिज्ञे २निरुक्तग्रन्थाध्येतरि च।

नैरूहिक पु० निरूहः प्रयोजनमस्य ठक्। तन्त्रोक्ते वस्तिभेदे निरूहशब्दे ४०८८ पृ० दृश्यम्।

नैर्ऋत पुंस्त्री निर्ऋतेरपत्यम् अण्। १राक्षसे अमरः स्त्रियां ङीष्। "तस्यापि (अधर्मस्य) निर्ऋतिर्भार्य्या नैर्ऋता येन राक्षसाः" भा०आ० ६६अ०। निर्ऋतिशब्दे इयं व्युत्पत्तिरुक्ता अत्र तु स्वार्थे लुक् कल्पभेदादविरोधः। "अयमग्नि-

योऽनादावस्यनैर्ऋतोदरे" रघुः। निर्ऋतेरिदम् अण् २निर्ऋतिसम्बन्धिनि स्त्रियां ङीप्। सा च ३दक्षिणपश्चिमदिशि ४राक्षसशक्तौ च "नैर्ऋतीं दिशमाश्रयेत्" या०त०। ५मूलनक्षत्रे न०तत्र तद्देवताकत्वात् तथात्वम्।

नैर्ऋतेया पुंस्त्री० निर्ऋत्याः अपत्यम् स्त्रीपत्यपत्यत्वात् ढक्। निर्ऋत्या अपत्ये "नैर्ऋतेया दुहितरस्तासां स प्रसवः स्मृतः" स्मृ०।

नैर्ऋत्य त्रि० निर्ऋतिर्देवताऽस्य अर्शं वा० यत्। निर्ऋतिदेवताके पश्वादौ "गर्दभं पशुमालभ्य नैर्ऋत्यं स विशुध्यति" याज्ञ०। क्षीरे तु अण्। नैर्ऋत इत्येव

नैर्गुण्य न०निर्गुणस्य भावः ष्यञ्। सत्त्वादिगुणसङ्कररहित्ये "नैर्गुण्यात् ब्रह्म चाप्नोति सगुणत्वान्निवर्त्तते" भा०शा० २०५अ०।

नैर्मल्य न० निर्मलस्य भावः ष्यञ्। निर्मलत्वे १स्वच्छत्वे। "विषयेष्वतिसंरागो मानसो मल उच्यते। तेष्वेव हि विरागस्तु नैर्मल्यं समुदाहृतम्" इत्युक्ते २विषयवैराग्ये च "शमाङ्कुरेण ते कोपं नैर्मल्यं प्रापयिष्यति" भा०टी० २०० अ० "वाक्यार्थः शब्दोच्चारणमात्रेण वेद्यः एव (व्यङ्ग्यार्थः) तु तथाविधप्रतिभानैर्मल्यादिनेति निमित्त भेदः" सा०द०।

नैलायनि पुंस्त्री नीलस्यापत्यं तिका० फिञ्। नीलशानरस्यापत्ये [उदा०।

नैल्य न० नीलस्य भावः ष्यञ्। नीलवर्णे नीलकण्ठशब्दे

नैवकि(ति) पुंस्त्री निवक(त)स्यार्षैरपत्यम् इञ्। निवक(त)र्षैरपत्ये ततः यूनि फक् तस्य लौल्यात्० न लुक्। नैवका(ता)यनि यूनि तदपत्ये

नैवाकव त्रि० निवाकोरिदम् अण्। निवचनशीलसम्बन्धिनि तस्यादूरदेशादि० उत्करा० ढक्। नैवाकवीय तस्यादूरदेशादौ। [वातगुल्मदेशसमीपादौ।

नैवातायन त्रि०निवातस्यादूरदेशादि पत्या०चतुर्थ्यां फक्।

नैवासिक त्रि० निवासे साधु गृहा० ठञ्। निवाससाधौ

नैविद्य न० निविदश्य भावः ष्यञ्। १घनत्वे अविच्छेदेन संयोगे २वंशीफुत्कारगुणभेदे च "नैविद्यं गौढता चापि सुस्वरत्वञ्च शौक्लता। माधुर्य्यमिति पञ्चामी फुत्कारेषु गुणाः स्मृताः" संगी०।

नैवेद्य न० निवेद्यं निवेदनमर्हति यत् नि+विद्-णिच् कर्मणि यत् स्वार्थे अण् वा। "निवेदनीयं द्रव्यन्तु नैवेद्यमिति कथ्यते" इति स्मृयुक्ते देवतोद्देशेन त्यक्तव्ये द्रव्ये तस्य व्युत्पत्तिर्यथा "चतुर्विधं कृतेशानि! द्रव्यं तु षड्रसान्वितम्। निवेदनात् भवेत् तस्मिन्नैवेद्यं तदुदाहृतम्" कृत्यार्णवे १७उल्लासे। तद्द्रव्याणि यथा "सक्तिकेन सगुडेन पायसेन सपर्पया। सितोदनं सकदलिकं दध्याद्यैव निवेदयेत्" इति प्रपञ्चसारः। "निवेदनीयं यद्द्रव्यं प्रशस्तं प्रयतं तथा। तद्भक्ष्यार्हं पञ्चविधं नैवेद्यमिति कथ्यते। भक्ष्यं भोज्यञ्च लेह्यञ्च पेयं चोष्यञ्च पञ्चमम्। सर्वत्र चैतन्नैवेद्यमाराध्यस्य निवेदयेत्" तत्पात्रं यथा "तैजसेषु च पात्रेषु सौवर्णे राजते तथा। ताम्रे वा प्रस्तरे वापि पद्मपत्रेऽथ वा पुनः। यत्तदारभ्य वापि नैवेद्यं स्थापयेद्बुधः। सर्वाभावे च माषेऽपि स्वच्छस्थघटितं यदि" इति तन्त्रसारः। तद्दानफलं यथा "नैवेद्येन भवेत् स्वर्गी नैवेद्येनामृतं भवेत्। धर्मार्थकाममोक्षाय नैवेद्येषु प्रतिष्ठिताः। सर्वयज्ञफलं नित्यं नैवेद्यं सर्वतुष्टिदम्। दानेषु मानदं पुण्यं सर्वभोग्यमयं तथा। मनसापि महादेव्यै नैवेद्यं दातुमिच्छति। यो नरो भक्तियुक्तः सन् दीर्घायुः स सुखी भवेत्। महामायां कदा देवीमर्चयिष्यामि भक्तितः। नानाविधैस्तु नैवेद्यैरिति चिन्ताकुलस्तु यः। स सर्वकामान् संप्राप्य मम लोके महीयते" इति कालिकापु० १६८।७०अ०। तत्काले यथा "स्वयंकृ विसर्जनाद्द्रव्यं नैवेद्यं सर्वमुच्यते। विसर्जिते जगन्नाथे निर्माल्यं भवति ध्रुवात्। पञ्चरात्रविदो मुख्या नैवेद्यं भुञ्जते सुखम्" गरुडपु०। तस्य स्थापनस्थानं यथा गौतमीये "वामतस्तु तथा धूपमग्ने वा न तु दक्षिणे। नैवेद्यं दक्षिणे भागे पुरतो वा न पृष्ठतः"। दक्षिणभागस्तु देवतायाः एव न तु साधकस्य। "पक्वञ्च देवतावामे आमान्नञ्चैव दक्षिणे" पुरश्चरणचन्द्रिका। "दक्षिणं तु परित्यज्य वामे चैव निधापयेत्। अभोज्यं तद्भवेद्यत्तु यानीयञ्च सुरोपमम्" इति तन्त्रसारः। तन्मुद्रा यथा "नैवेद्यमुद्रामङ्कुशकनिष्ठाभ्यां प्रदर्शयेत्। कनिष्ठानामिकाङ्कुशैर्मुद्रा प्राणस्य कीर्त्तिता। तर्जनीमध्यमाङ्कुशैरपानस्य तु मुद्रिका। अनामामध्यमाङ्कुशैरुदानस्य तु सा मुद्रा। तर्जन्यङ्गुष्ठानामामध्याभिः साङ्कुशाभिश्चतुर्थिका। सर्वाभिः सा समानस्य प्राणादीनां प्रदर्शयेत्" इति यामलः। ब्राह्मणाय तत्समर्पणं यथा "साक्षात् स्वादति नैवेद्यं विष्णुरूपो जनार्दनः। ब्राह्मणे परितुष्टे च सन्तुष्टाः सर्वदेवताः।

19789

देवाय दत्त्वा नैवेद्यं द्विजाय न प्रयच्छति । भक्षीभूतस्य नैवेद्यं पूजनं निष्फलं भवेत् । देवदत्तं न भोक्तव्यं नैवेद्यञ्च विना हरेः । प्रथमं सर्वदेवेषु विष्णोर्नैवेद्य-भोजनम्" । शूद्रस्य तद्भक्षणविधिर्यथा "शूद्रश्चेद्धरिभक्तश्च नैवेद्यभोजनोत्सुकः । आमान्नं हरये दत्त्वा पाकं कृत्वा तु खादयेत्" श्रीकृष्णजन्मखण्डे ११ अ० । भारसिंहे "मोचकं पनसं जम्बु तथाऽन्यद्वल्कलीफलम् । प्राचीनामलकं श्रेष्ठं मधूकोडुम्बरन्तथा । यद्यप्येकमपि प्राह्यं कदलीफलसप्तमम्" मोचकं कदलकम् । प्राचीनामलकं करमर्दकम् । वराहपुराणे "अपर्युषितपक्वानि दातव्यानि प्रयत्नतः । खण्डाज्यादिकृतं पक्वं नैव पर्युषितं भवेत्" । वामनपुराणम् "कृषिघ्ना संस्कृता ये च यत्र गोधूमशालयः । तिलकङ्गादयो माषा व्रीहयश्च प्रियाः हरेः" विष्णुः "नाभक्ष्यं नैवेद्यार्थं भक्षयेज्जातिहीनं क्षीरं वर्जयेत् । पद्मनखश्च मत्स्यवराहमांसानि चेति" । अभक्ष्यमिति यद्यस्य यदभक्ष्यं स्वरूपतोऽगुणादि तत् तेन न देयम् । न तु रात्र्यादौ दध्यादि । पद्मनखश्च अप्यतिरिक्तः । "मार्गं मांसं तथा छागं गव्यं मांसन्तथैव च । एतानि हि प्रियाण्याहुः प्रयोज्यानि यतस्वरे!" इति वराहपुराणे भगवद्वाक्यात् तथा "माहिषघृताविकं मांसमवाप्तिकृतटाङ्कदम् । माहिषं वर्जयेन्मांसं क्षीरं दधि घृतन्तथा" देवलः । "चाण्डालेन शुना वापि दृष्टं हविरयज्ञियम् । विड्वाराहादिभिश्चुम्बितं दुष्टमन्नं विवर्जयेत्" । "अन्यत्र किरणोदकस्यादिति" । श्रीभागवते "यद्यदिष्टतमं लोके यच्चापि प्रियमात्मनः । तत्तन्निवेदन्नस्तं तदानन्त्याय कल्पते" मद्यं वासुदेवाय वाङ्मितः । नैवेद्यञ्च पञ्चोपचारादिपूजाङ्गम् । तद्दाने च षष्ठ्यादानं कर्तव्यम् "धूपे दीपे च नैवेद्ये स्वपने वसने तथा । षष्ठ्यादाः प्रकुर्वीत तथा नीराजनेऽपि च" विधा० पा० धृतवाक्यात् । ङीप्ते । निवेद्यो विवाहः ।

नैवेद्य त्रि० निवेद्येन निर्वृत्तम् अण्वा० यञ् । निवेद्यनि-

नैवेद्यिक त्रि० निवेद्याय विवाहाय हितम् ठक् । विवाहार्थं दीयमाने द्रव्ये "नैवेद्यिकं स्त्रीधनं" दत्त्वा स्वर्गं महीयते" याज्ञ० "नैवेद्यिकं विवाहोचितं द्रव्यम्" मु० त० रघु० ।

नैश त्रि० निशायां भवम् अण् । निशासम्बन्धिनि "पूर्वां सन्ध्यां जपंस्तिष्ठन् नैशमेनो व्यपोहति" मनुः । "चतुर्थमेव यामिनि रक्षेदीक्षितवस्त्रमीनैशम् । चपयति" हु० सं० ४ अ० "जगति नैशमशीतकरः करैः" माघः

नैशिक त्रि० निशायां भवः निशाया व्याप्तो वा "कालाट्ठञ्" पा० ठञ् । इनिशाभवे २रात्रिव्यापके स्त्रियां ङीप् । "स्नानमक्षततूष्णानां विशुद्धिर्नैशिकी स्मृता" मनुः । "आदन्नजन्मनः सद्म व्याघ्रादाद्वैशिकी स्मृता" याज्ञ०

नैश्रेयस त्रि० निश्रेयसाय हितमण् । निःश्रेयससाधने "शुश्रूषैव तु शूद्रस्य धर्मो नैश्रेयसः परः" मनुः पक्षे विसर्गः नैःश्रेयस तत्रार्थे ।

नैश्रेयसिक त्रि० निश्रेयसं प्रयोजनमस्य ठक् । निश्रेयससाधने "सुखाभ्युदयिकञ्चैव नैश्रेयसिकमेव च" मनुः । पक्षे विसर्गः नैःश्रेयसिक तत्रार्थे ।

नैषध पु० निषधानां राजा अण् । इनिषधदेशराजे "स नैषधस्यार्थपतेः सुतायाम्" रघुः । २नलराजे त्रिका० "न नैषधे कार्यमिदं निगद्याम्" "देवः पतिर्दुहितुः ! नैषधराजजन्या" नैषध० । निषधोऽभिजनोऽस्य अण् । ३पित्रादिक्रमेण निषधदेशवासिनि त्रि० बहुषु उभयत्र अणो लुक् । निषधाः तद्भूपा तद्देशवासिनश्च । नैषधं नलमधिकृत्य कृतो ग्रन्थः अण् । ४नलराजचरितरूपे द्वाविंशतिसर्गात्मके श्रीहर्षकविकृते महाकाव्यभेदे महाकाव्योदाहरणे "यथा रघुवंशशिशुपालवधनैषधादिः" सा० द०

नैषधीय त्रि० नैषधस्येदम् "इदमर्थाच्छः" पा० छ । नलसम्बन्धिनि । "काव्ये चारुणि नैषधीयचरिते सर्गोऽयमादिर्गतः" नैषधम् ।

नैषध्य पुंस्त्री निषधस्य लक्षणया तद्भूपत्यमपत्यम् नादित्वात् ष्यञ् । निषधस्त्रीपत्ये स्त्रियां टाप् ।

नैषाद पुंस्त्री निषादस्यापत्यम् विदा० अञ् । निषादस्यापत्ये ततः फक्रिता० यूनि फक् । नैषादायन यूनि तदपत्ये

नैषादक त्रि० निषादेन कृतम् कृताद्या० संज्ञायां वुञ् । निषादकृते पदार्थभेदे ।

नैषादकि पुंस्त्री निषादस्यापत्यं विदा० अञ् । "व्यासवसिष्ठ नैषादेत्यादि" वार्त्ति० अकङ् । निषादस्यापत्ये ।

नैषादि पुंस्त्री निषादस्यापत्यम् आर्षं इञ् । निषादापत्ये "न स तं प्रतिजघ्राह नैषादिरिति चिन्तयन्" भा० आ० १३२ अ० । लोके तु विदा० अञ् । नैषाद इत्येव ।

नैषिध पु० निषधः नलो वाचकतयाऽस्यास्ति अण् शुभो० । तन्नामनामके नलरूपे दक्षिणाग्नौ "कव्यवाहो नलश्चैवेति" नलस्याग्निनामत्वात् लक्षितलक्षणया तस्य तथात्वम् "तस्मिन्वसन्नीन्द्रो यमो राजा नहो नैषिधोऽद

अन्नसंगमनोऽसन् पांसवः" शत०ब्रा०२।३।२।१ "नलो नैषध इति निषधदेशाधिपतिर्नलः प्रसिद्धो राजा ऋत्वाङ्पर्णपचनोऽभिः एष एव नलो नैषध इति निर्दिष्टः। निषधराजस्य च नलस्य दक्षिणाग्नेय साम्यमाह तद्यदिति अग्निहोत्रहोमकाले एतन्नाम्नाङ्पर्णपचनं यत् यस्माद्दक्षिणत आहरन्ति तस्मादेव नैषधो नलोऽपि यमस्य राज्ञो दक्षिणत उपगच्छतीति लोकप्रसिद्धिः" भा०। "तत्र निष्क्रमणं कुर्वन्नृतवे नैषधायान्वाङ्पर्णपचनाय नम इति मनसा दक्षिणाग्निमुपस्थरेत्" कात्या०श्रौ० ४।१४ पद्धतिः।

नैष्कर्म्य न० निष्कर्मणो भावः ष्यञ्। विधिना सर्वकर्मत्यागे "न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते" गीता। "ब्रह्मण्यभिरूढनैष्कर्म्यात्मभूढबुद्धिरिहोच्यते" भा०शा० ३२अ०।

नैष्कायतिक त्रि०निष्कायतमर्हत्यस्य "शतसहस्रान्नाच्च निष्कात्" पा० सत्वर्थे ठञ्। निष्कायतमानयुक्ते एवं नैष्कसहस्रिक तन्मानयुक्ते।

नैष्किक पु० निष्के हेम्नि दीनारे तदगारे नियुक्तः ठक्। १कोषाध्यक्षे टङ्कशालायां नियुक्ते अमरः। निष्केण क्रीतम् "अष्टकाभ्यां निष्कादिभ्यः" पा० ठञ्। २निष्केण क्रीते समासे तु ठक्। परमनैष्किक स्त्रैरं भेदः। निष्कस्य विकारः "क्रीतवत् परिमाणात्" पा० ठञ्। ३निष्कविकारे।

नैष्क्रमण त्रि०निष्क्रमणे शिशोर्जन्मादुत्तरस्मिन्मासे दीयते तत्र कार्यं वा व्युत्पा० अञ्। शिशोर्निष्क्रमणकाले १दीयमाने २तत्र कार्ये पदार्थे च

नैष्ठिक त्रि० निष्ठा नाशपर्यन्तं ब्रह्मचर्य्येण तिष्ठति निष्ठायां मरणे वा विहितम् निष्ठायां भवः (आसन्नः) वा ठक्। उपनयनोत्तरं मरणपर्यन्तं ब्रह्मचर्य्येण गुरुकुले वासिनि १ब्रह्मचारिभेदे २मरणकाले विहिते कर्मणि ३व्रततविशेषासक्ते च "नैष्ठिको ब्रह्मचारी तु वसेदाऽऽचार्यसन्निधौ"। तदभावेऽस्य तनये पत्न्यां वैश्वानरेऽपि वा। अनेन विधिना देहं साधयन् विजितेन्द्रियः। ब्रह्मलोकमवाप्नोति नचेह जायते पुनः" याज्ञ०। "निवेदितो नैष्ठिकसुन्दरत्वया" कुमा०। "विदधे विधिमस्य नैष्ठिकम्" रघुः स्त्रियां ङीप्। "इमावयस्यां पश्यन्त्यः पश्चिमां तव नैष्ठिकीम्" हरिवं० ८८अ०।

नैष्णिक्य न०निष्णेहस्य भावः ष्यञ् आर्द्रे अत्वम्। रागाभावे "यः कामयेत नैष्णिक्यं पापमन इयादिति स व्रतमेवेन यजेत" आश्व०श्रौ०८।७।१५। निष्स्नेहस्य भावो नैष्णिक्यम्। पापमनो नैष्णिक्यं गच्छेयमिति यः कामयेत स व्रतपेयनामकेन एकाहेन यजेत" नारा०। लोके तु नैःस्निक्य इत्येव। पक्षे विसर्गः नैःस्निक्य तत्रार्थे

नैसर्गिक त्रि०निसर्गादागतः ठक्। स्वाभाविके "अज्ञाननिमित्तः सत्यान्ते मिथुनीकृत्य अहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः" शा०भा०। तदेव नैसर्गिक स्वार्थतलम् "नैसर्गिकोऽप्युत्सहजे विरोधः" रघुः स्त्रियां ङीप्। "पृच्छामस्त्वामियं भद्रे कस्त्वं क्व वा परमात्मनः। कस्य वा शिक्षिता राजन्! किं वा नैसर्गिकी तव" कल्किपु० २६अ०। [खड्गेन योद्धरि अमरः।

नैस्त्रिंशिक पु० निस्त्रिंशः खड्गः प्रहरणमस्य ठक्।

नो अव्य०नञ्-डो। नञर्थे अभावादौ। "नोत्थाधिभोगे नो हृद्भिः सोपकारेऽथ हापिते"। "वैद्यवृत्त्या तु जीवन्तो विक्रीणीत कदाचन" याज्ञ०।

नोचेत् अव्य०नो च चेत् च। नयदीत्यर्थे [नोटी नटाम्।

नोट त्रि० नट-अच् पृषो०। नटे ततः गौरा० स्त्रियां ङीष्।

नोत् अव्य० न च उच्च। नैवेत्यर्थे "अस्मिन्मात्रमवर्धन्त नोदिव दिवमस्तृतन्" ऋग्० ५।१९।१ "प्रजाऽनायकेन नोत्परा बभूवुः" शत०ब्रा० २।४।३।२

नोदन न० नुद-भावे ल्युट्। १खण्डने णिच्-भावे ल्युट्। २प्रेरणे ३संयोगभेदे च "अभिघातो नोदनञ्च प्रवृत्तेरुदितादिभिः" भाषा० युच्। नोदना प्रेरणायां विधिरूपायां चोदनायां स्त्री।

नोधस् पु० नु-असि धुट् च। अग्निभेदे। तेन दृष्टं साम अण्। नौधस सामभेदे न० तच्च माध्यन्दिनसवने गेयेषु सप्तसु स्तोत्रेषु षष्ठम् साम यथोक्तं सामसंहितासायणभाष्ये "एवमन्वक्षिन् सवने सप्त स्तोत्राणि तेषु गायत्रमाग्नेयं चेति द्वे सामनी, द्वितीये रौरवं यौधाजयं च तृतीये औशनम्, चतुर्थे रथन्तरम्, पञ्चमे वामदेव्यम्, षष्ठे नौधसम्, सप्तमे काण्वेयम्"।

नोधा अव्य० नव-धाच्-पृषो०। नवप्रकारे नवधेत्यर्थे "नोधा विधाय रूपं स्वं सर्वसंकल्पविद् विभुः" भाग० ३।२३।४५।

नोपस्थात त्रि० न उपतिष्ठति उप+स्था-क्त। १दूरस्थे "अन्यवादी क्रियाद्वेषी नोपस्थाता निरुत्तरः" इति स्मृत्युक्ते क्षीणे २प्रतिवादिनि च।

नौ स्त्री नुद-डौ। जलोपरिप्लवनसाधने १तरण्यौ "नोदवे

शकटं याति न च नौर्गच्छति स्थले" हितो० "स्कन्दनाश्वैः समे युध्येदनूपे नौहिपैस्तथा" मनुः "विप्लवत्तविशस्तरन्ति च यया नावा तयैवेतरे" सच्छ० २यत्नवाचकनीये नौभेदे च "ततः प्रवासितो विद्वान् विदूरेण नरस्तदा। पार्थानां दर्शयामास मनोमारुतमाशिनीम्। सर्ववातसहां नावं यन्त्रयुक्तां पताकिनीम्। शिवे भागीरथीतीरे नरैर्विस्मिभिः कृताम्" भा०आ०१४८अ०। ततः तार्य्यं यत्। नाव्य नावा तार्य्यं व्रीह्यादि यवखादि० ढक। नाविक नौविगिष्टे त्रि०। नावा तरति "नौद्व्यचष्ठन्" ठन्। नाविक नावा तारिणि त्रि० 'नावोद्विगोः' पा०। नौशब्दान्तात् द्विगोष्टच् ततु तद्धितलुकि। द्वाभ्यां नौभ्यामागतः द्विनावकृष्यः "द्विगोर्लुगनपत्ये" पा०अचीत्यस्यापकर्षणात् यत्र लुगादेशं लुक्। पञ्चनावप्रियः उत्तरपदद्विगुः द्विनावं त्रिनावम् समा० द्वि०। अतद्धितलुकीति किं? पञ्चभिर्नौभिः क्रीतः आर्हीयष्ठक् अध्यर्द्धपूर्वेत्यादिना तस्य लुकि न, द्विनौः इत्येव। अर्द्धं नावः एकदेशितत्पु० टच्। अर्द्धनावम् क्लीवत्वं कोषात्।

नौकर्णधार पु० नावः कर्णं धारयति धारि-अण् उप०स०। नाविके नावः कर्णतुल्यस्य (हाल) पदार्थस्य धारके "सुरभिमधुकुसुमानि गन्धा वणिजो नौकर्णधाराश्च" हरिवं० १८अ०।

नौकर्णी स्त्री नौरिव कर्णौ यस्याः ङीष्। कुमारानुचरमातृभेदे "नौकर्णी शिवकर्णी च वसुधा महिमा तथा" भा०श० ४७अ०।

नौकर्मन् न० नावि कर्म चालनादिव्यापारः नौकायां चालनादिव्यापारे "निषादोभागवं लते दाशं नौकर्मजीविनम्" मनुः।

नौका स्त्री नौ+स्वार्थे-क। नौशब्दार्थे अमरः। विख्यातशब्दे ४१२०पृ०तल्लक्षणादि दृश्यम्। "चक्रमिश्र सञ्जनसङ्क्रतिरेका भवति भयार्णवतरणे नौका" ओड्रसुन्दरः चतुरङ्क क्रीडाङ्के पदार्थभेदे स्त्री तथाखटाकारत्वात् तथात्वम्। चतुरङ्गशब्दे २८६३ पृ० दृश्यम्।

नौकाकट न० चतुरङ्गक्रीडाभेदे चतुरङ्गशब्दे २८६४पृ० दृश्यम् "काकवाद इहनौका नौकाकटप्रकारकम्"।

नौकादण्ड पु० ष० त०। नौकायां चालनार्थं पार्श्वद्वयवद्धे काष्ठदण्डे (दाँड) अमरः।

नौचर त्रि० नावा चरति चर-ट। नावा चरणशीले "वादित्रवः शिवजलपथः कर्णधे नौचराणाम्" रघुः।

नौजीविक त्रि० नावा जीविका यस्य। नौचालनादिजीविकायुक्ते "पण्यभिन्नौजीविकसलिलजतुरगोपघातकरः" हरिवं० ७अ०।

नौतार्य्य त्रि० नावा तार्य्यम्। नौकया तरणीयदेशादौ।

नौयायिन् त्रि० नावा याति या-णिनि। नौकया नद्यादेः पारगामिनि तेषां नदीतरणे पण्यादिनिरूपणम् मनूक्तं यथा "पण्यं यानं तरे दाप्यमित्यादितरशब्दे २२४१पृ०दृश्यम्"तत्र भाण्डपूर्णानि यानानि तार्य्यं दाप्यानि सारतः। रिक्तभाण्डानि यत्किञ्चिन् पुमांसश्चापरिच्छदाः। दीर्घां ध्वनि यथादेशं यथाकालं तरोभवेत्। नदीतारेषु तद्विद्यात् समुद्रे नास्ति लक्षणम्। गर्भिणी तु हिमासादिस्त्रिया प्रव्रजितो मुनिः। ब्राह्मणा क्षत्रियश्चैव न दाप्यास्तारिकं तरे। यच्चापि किञ्चिद्दाशानां विशीर्य्येतापरघतः। तद्दाशैरेव दातव्यं समागम्य स्वतोंऽशतः। एष नौयायिनाम्नो व्यवहारस्य निर्णयः। दाशापराधकोषे च दैविके नास्ति निग्रहः"।

नौवाह त्रि० नावं वाहयति वाहि-अण् उप०स०। नौकावाहके (दाँड़ी) प्रसिद्धे नौकाचालके त्रिका०।

नौसेचन न० ष० त०। नौकायाः सेचने

न्यक्का स्त्री नि+अक्-क वा०नलोपः। विट्कीटे शब्दार्थ०

न्यक्कारुका स्त्री विट्कीटे क्षुद्रभेदे त्रिका०।

न्यक्कार पु० न्यक्+क्र-घञ्। १नीचकरणे च २तिरस्कारे च "न्यक्कारो ह्ययमेव मे यदरयः" मा०द०"न्यक्कारमासन्नतरं निधत्ते" हरिवं०१७८अ०। क्विप् न्यक्कृतिरप्यत्रार्थे स्त्री

न्यक्त त्रि० नि+अञ्जू-क्त कत्वम्। नितान्ताञ्जनयुक्तीकृते "कस्मिन्यक्ताः पत्नीसंयाजानास्तुचः स्युः" तै०ब्रा० ३।३।११।४।

न्यङ्क पुंस्त्री नियते निक्षते वा अङ्कियी यस्य षत्वम०। १मङ्किभेदे स्त्रियां ङीष्। २जामदग्न्यभेदे परशुरामे ऐभच०। २२कार्त्तवीर्य्ये ४मङ्किफलके न० ५निकृष्टे अधमे त्रि०अमरः

न्यङ्गभाव पु० नीचो भावः। नीचत्वे।

न्यग्रोध पु० न्यक् रुणद्धि रुध-अच्। १वटवृक्षे अमरः २शमीवृक्षे वाह्वादयविस्तारकृतव्यासरूपपरिमाणे(हाथ) ३बाहौ च न्यग्रोधपरिमण्डलशब्दे दृश्यम्। सर्वाणि न्यक्कृत्य स्थिते ४विष्णौ "न्यग्रोधोदुम्बरोऽश्वत्थः" विष्णुसं०। "सर्वाणि भूतानि न्यक्कृत्य निजमायया रुणद्धि इति न्यग्रोधः" भा० ५विषयमात्रे स्त्री ङीष्। भेदि०एवं ह्रस्वोऽपौ च ७मूषिकपर्ण्यां त्रिका० उपसर्गेण

ऋषस्य दशमभेदे पु० "नवोग्रसेनस्य सुताश्चेषां कंसस्तु पूर्वजः। न्यग्रोधश्च सुनामा च" हरिवं० १८अ०। तस्मादूरदेशादि ऋशप्रा० क। न्यग्रोधक तत्सन्निकृष्टदेशादौ कुत्सदा० ठन्। न्यग्रोधिक तत्सन्निकृष्टदेशादौ त्रि० तत्रार्थे प्रेक्षादि० इनि। न्यग्रोधिन् तत्रार्थे त्रि०।

न्यग्रोधपरिमण्डल पु० न्यग्रोधस्यामः परिमण्डलं परिणाहो यस्य। १आमपरिमितोच्छ्रायपरिणाहे पुरुषे। तल्लक्षणं यथा "महाधनुर्द्धरावेव त्रेतायां चक्रवर्त्तिनः। सर्वलक्षणसम्पन्नान्यग्रोधपरिमण्डलाः। न्यग्रोधौ तु ऋतौ वाङ्ग आमो न्यग्रोध उच्यते। आमेन तुल्यो यस्य ऊर्ध्व जङ्घश्च देहिनः। समोच्छ्रयपरिणाहो न्यग्रोधपरिमण्डलः" मत्स्यपु० ११८अ०। २स्त्रीनाविशेषे स्त्री "स्तनौ सुकठिनौ यस्या नितम्बे च विशालता। मध्ये क्षीणा भवेद्या सा न्यग्रोधपरिमण्डला" इति शब्दमा० "दूर्वाकाण्डमिव श्यामा न्यग्रोधपरिमण्डला" भट्टिः।

न्यङ्कु पु० नितरामञ्चति नि+अञ्च-उ न्यङ्कादेशः कुत्वम्। १मृगभेदे मेदिनिः। २वज्रभेदे अमरः। ३नितरां गन्तरि त्रि० "सद्योहतन्यङ्कुशिरस्तदिग्धम्" रघुः "न्यङ्कुः खादुर्लघुर्वल्यो हृद्यो दोषत्रयापहः" भावप्र०। न्यङ्कोर्विकारः अण्। नैयङ्कव तदीयचर्मादौ

न्यङ्कुभूरुह पु० न्यङ्कुरिव भूरुहः। श्योनाकवृक्षे शब्दार्थचि० तस्य बकुलवृक्षाकारशाखत्वात्तथात्वम्।

न्यङ्कादि कुत्वनिमित्ते शब्दगणभेदे सच पा०ग०सू०उक्तो यथा "न्यङ्कु मङ्कु भ्रंशु दूरेपाक फलेपाक क्षणेपाक दूरेपाका फलेपाका दूरेपाकु फलेपाकु तक्र वक्र व्यतिषङ्ग अनुषङ्ग अवसर्ग उपसर्ग सुपाक मांसपाक मूलपाक कपोतपाक उलूकपाक (संज्ञायां मेघनिदाघावदाघार्घाः)। न्यग्रोध वीरुत् न्यङ्कादिः।

न्यञ्च पु० नि+अञ्च-घञ्। नितरामञ्चने "सोमस्य न्यञ्चो वदरूणपुष्पाणि फाल्गुनानि" शत०ब्रा०४।५।१०

न्यञ्च न०१क्षुद्रोक्ते क्षुद्ररोगभेदे "मस्तकं मस्तदल्पञ्च श्यामं वा यदि वा सितम्। सहजं नीरुजं ज्ञात्वा न्यञ्चमित्यधिभीयते" तल्लक्षणम् २नितरामञ्चे त्रि०।

न्यञ्च् त्रि० निम्नतयाऽञ्चति अञ्च-क्विप्। निम्ने किन् न्यच् तत्रार्थे त्रि०। अस्यादौ भत्वे च नीचः नीचा अन्यत्र कुत्वम्। न्यङ् न्यग्भ्याम्।

न्यञ्चन न० नितरामञ्चनं गमनम्। १नितरां गमने "न्यञ्चने दुर्गे खिदाय यत्नम्" ऋ०८।२७।८। २न्यग्भावे च।

न्यञ्चित त्रि० नि+अञ्च-क्विच्-क्त। अधःक्षिप्ते हेमच०।

न्यन्त पु० नितरामन्तः। चरमभागे।

न्याय पु० नि+इण्-भावे घञ्। १नीतौ २व्यवहारे च।

न्यर्थ पु० नि+ऋ-मतौ थन्। निकृष्टायां मतौ "न भोजा मम्रुर्न न्यर्थमीयुः" ऋ० १०।१०७।८ "न्यर्थं निकृष्टां गतिम्" भा० समासे वाचादिस्वरः। निकृष्टोऽर्थो यस्य। २निकृष्टार्थे त्रि०।

न्यर्बुद न० १दशसङ्ख्यितार्बुदसंख्यायां २तत्सङ्ख्येये च "प्रयुतञ्चार्बुदञ्च न्यर्बुदञ्च समुद्रञ्च" यजु०१७।२ "अर्बुदं दशगुणं न्यर्बुदम्" वेददीपः।

न्यर्बुदि पु० निकृष्टः अर्बुदिर्देवो देवान्तरं यतः। रुद्रभेदे "अर्बुदिर्नाम यो देव ईशानश्च न्यर्बुदिः" शत० ११।६।४

न्यस्त त्रि०नि+अस-कर्मणि क्त। १क्षिप्ते २त्यक्ते ३विसृष्टे ४निक्षिप्ते च अमरः "न्यस्तशस्त्रं द्विषीयञ्च तञ्च युद्धे युधां प्रभुम्" रघुः।

न्यस्तशस्त्र पु० न्यस्तं शस्त्रं शस्त्रसाध्यं युद्धं येन। "न्यस्तशस्त्रा महाभागाः पितरः पूर्वदेवताः" मनूक्ते १पितृलोके २त्यक्तायुधे च "न्यस्तशस्त्रं द्विषीयञ्च" रघुः।

न्यस्य त्रि० नि-अस-ण्यत् कर्मणि वा० आर्धे यत्। स्थापनीये त्यक्तव्ये "अर्जुनार्जुन! मोघन्ते! न न्यस्यं गाण्डिवं त्वया" भा०द्रो० २००अ०। लोके तु ण्यत्। नास्य दत्येव

न्याक्य न० नि+अकि-ण्यत् वा०नलोपः। भक्तपण्डले(सुड़ि) (भाजाचाल) शब्दच०।

न्याद पु० नि+अद-घञ् न षत्वादेशः। आहारे अमरः।

न्याय पु० नि+इण्-भावकरणादौ घञ्। १उचिते २गोतमप्रोक्तोऽयपदार्थनिरूपके शास्त्रभेदे प्रतिज्ञादेर्दृष्टान्तरूपोपनयननिगमनात्मके ३वाक्यभेदे "अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशब्दज्ञानजनकवाक्यत्वम्" तल्लक्षणमिति चिन्तामणिः। "उचितानुपूर्वीकप्रतिज्ञादिपञ्चकसमुदायत्वमिति" शिरोमणिः। अवयवशब्दे ४२२पृ०दृश्यम्। यथा पर्वतो वह्निमान् (प्रतिज्ञा) धूमात् (हेतुः) यो यो धूमवान् स वह्निमान् यथा महानसम् (उदा०) वह्निव्याप्यधूमवांश्चायम् (उपनयनम्) तस्माद्वह्निमान् (निगमनम्) एतद्दर्शनमतञ्च सर्वदर्शनसंग्रहे दर्शितं यथा

"तत्त्वज्ञानान्मुक्तिः स्यात्सन्नोच्छेदलक्षणं निःश्रेयसमवतीति समानतन्त्रेऽपि प्रतिपादितं तदाह सूत्रकारः प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानां तत्त्व-

प्रामाण्निश्रेयसाधिगमः" इति। इदं न्यायशास्त्रस्यादिमं सूत्रम्। न्यायशास्त्रञ्च पञ्चाध्यायात्मकं तत्र प्रत्यध्यायस्याङ्किकरणम्। तत्र प्रथमाध्यायस्य प्रथमाह्निके भगवता गौतमेन प्रमाणादिपदार्थानवयवलक्षणनिरूपणं विधाय द्वितीये वादादिसप्तपदार्थलक्षणनिरूपणं कृतम्। द्वितीयस्य प्रथमे संशयपरीक्षणं प्रमाणचतुष्टयाप्रामाण्यशङ्कानिराकरणञ्च। द्वितीये अर्थापत्त्यादिरन्तर्भावनिरूपणम्। तृतीयस्य प्रथमे शरीरेन्द्रियार्थपरीक्षणं द्वितीये बुद्धिमनःपरीक्षणम्। चतुर्थस्य प्रथमे प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गपरीक्षणं द्वितीये दोषनिमित्तकत्वनिरूपणम् अवयवादिनिरूपणञ्च। पञ्चमस्य प्रथमे जातिभेदनिरूपणं द्वितीये निग्रहस्थानभेदनिरूपणम्। "प्रमाणाधीना मेयसिद्धिरिति" न्यायेन प्रमाणस्य प्रथमसूद्देशः तदनुसारेण लक्षणस्य कथनीयतया प्रथमोद्दिष्टस्य प्रमाणस्य प्रथमं लक्षणं कथ्यते। साधनाव्यापकत्वासम्भवरूपदोषद्वयरहितं प्रमाव्याप्यं प्रमाणम्। एवञ्च प्रतितन्त्रसिद्धान्तसिद्धं परमेश्वरप्रामाण्यं संगृहीतं भवति यदुक्तवत् सूत्रकारः "मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यादिति"। तथाच न्यायपारावारं दृष्ट्वा विश्वविख्यातकीर्त्तिरुदयनाचार्योऽपि कुसुमाञ्जलौ चतुर्थे स्तबके "मितिः सम्यक्परिच्छित्तिस्तद्वत्ता च प्रमातृता। तदयोगव्यवच्छेदः प्रामाण्यं गौतमे मते" इति। "साक्षात्कारिणि नित्ययोगिनि परहारानपेक्षस्थितौ भूताद्यानुभवे निविष्टनिश्चितप्रस्ताविषयक्रमः। लेशादृष्टनिमित्तदुष्टविगमप्रध्वस्तशङ्कातमः प्रद्धोन्मेषकलङ्किभिः किमपरैरस्मे प्रमाणं शिवः" इति। तच्चतुर्विधं प्रत्यक्षानुमानोपमानशब्दभेदात्। स्वमेयं द्वादशप्रकारकम् आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गभेदात्। अनवधारणात्मकं ज्ञानं संशयः स त्रिविधः साधारणधर्मासाधारणधर्मविप्रतिपत्तिलक्षणभेदात्। यमधिकृत्य प्रवर्त्तन्ते पुरुषास्तत्प्रयोजनं तद्विविधं दृष्टादृष्टभेदात्। व्याप्तिसंवेदनभूमिर्दृष्टान्तः स द्विविधः साधर्म्यवैधर्म्यभेदात्। प्रामाणिकत्वेनाभ्युपगतोऽर्थः सिद्धान्तः स चतुर्विधः सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमभेदात्। परार्थानुमानवाक्यैकदेशोऽवयवः स पञ्चविधः प्रतिज्ञाहेत्वुदाहरणोपनयनिगमनभेदात्। व्यापारोपे व्यापकारोपस्तर्कः स चैकादशविधः आत्माताऽऽश्रयेतरेतराश्रयचक्रकाश्रयानवस्थाप्रतिबन्दिकल्पनाऽप्रतिभाविघातकल्पनागौरवोत्सर्गापवादवैलक्षण्यभेदात्। यथार्थानुभवपर्य्यवसायी प्रमितिर्निश्चयः स चतुर्विधः साक्षात्कृत्यनुमित्युपमितिशाब्दीभेदात्। तत्त्वनिर्णयफलः कथाविशेषो वादः१०। उभयसाधनवती विजिगीषुकथा जल्पः११। स्वपक्षस्थापनाहीनः कथाविशेषो वितण्डा१२। कथा नाम वादिप्रतिवादिनोः पञ्चप्रतिपञ्चपरिग्रहः। असाधको हेतुत्वेनाभिमतो हेत्वाभासः१३ स च पञ्चविधः सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकालभेदात्। शब्दवृत्तिव्यवस्थेन प्रतिषेधहेतूच्छलं१४ तच्त्रिविधं वाक्छलं सामान्यात्ययोपचारव्यत्ययवृत्तिभेदात्। स्वव्याघातकस्तर्कः जातिः१५। सा चतुर्विंशतिविधा साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्तिप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुपपत्तिसंशयप्रकरणहेत्वर्थापत्तिविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमभेदात्। पराजयनिमित्तं निग्रहस्थानं१६ तद्द्वाविंशतिप्रकारं प्रतिज्ञाहानिप्रतिज्ञान्तरप्रतिज्ञाविरोधप्रतिज्ञासंन्यासहेत्वन्तरार्थान्तरनिरर्थकाविज्ञातार्थापार्थकाप्राप्तकालन्यूनाधिकपुनरुक्ताननुभाषणाज्ञानाप्रतिभाविक्षेपमतानुज्ञापर्य्यनुयोज्योपेक्षणनिरनुयोज्यानुयोगापसिद्धान्तहेत्वाभासभेदात्। अत्र सर्वान्गौतमीयस्तु विशेषस्तत्र शास्त्रे विस्तरो विस्तरभिया न प्रस्तूयते। नन्वत्र प्रमाणादिपदार्थोद्देशवाक्ये प्रतिज्ञायाने कथमिदं न्यायशास्त्रमिति व्यपदिश्यते सत्यं तथापि "व्यपदेशा भवन्तीति" न्यायेन न्यायस्य परार्थानुमानावयवप्रयोजकतया सर्वकर्मानुष्ठानसाधनतया प्रधानत्वेन तथा व्यपदेशो युज्यते। तथाऽभाणि सर्वज्ञेन, "सोऽयं परमो न्यायः विप्रतिपन्नपुरुषप्रतिपादकत्वात् तथा प्रवृत्तिहेतुत्वाच्चेति"। पक्षिलस्वामिना च "श्रेयसान्वीक्षिकी विद्या प्रमाणादिभिः पदार्थैः प्रविभज्यमाना "प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्। आश्रयः सर्वधर्माणां विद्योद्देशे परीक्षितेति"। नन्वत्र तत्त्वज्ञानान्निःश्रेयसमवतीत्युक्तं तत्र किं? तत्त्वज्ञानादनन्तरमेव निःश्रेयसं सम्पद्यते नेत्युच्यते किन्तु तत्त्वज्ञानाद्दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभाव इति। तत्र मिथ्याज्ञानं नामानात्मनि देहादावात्मबुद्धिः तदनुकूलेषु रागः तत्प्रतिकूलेषु द्वेषः वस्तुतस्त्वात्मनः प्रतिकूलमनुकूलं वा न किञ्चित् समस्ति परस्परानुबन्धाच्च रागादीनां, मूढो रज्यति रक्तो द्वेष्टि मूढः कुप्यति कुपितो मुह्यतीति तत्को

दोषैः प्रेरितः प्राणी प्रतिषिद्धानि शरीरेण हिंसास्तेया-दीन्याचरति, वाचा अनृतादीनि, मनसा परद्रोहादीनि, सेयं पापरूपा प्रवृत्तिरधर्मभावहतीति। शरीरेण प्रशस्तानि दानपरपरित्राणादीनि, वाचा हितसत्यादीनि, मनसा अहिंसादीनि, सेयं पुण्यरूपा प्रवृत्तिर्धर्मः। सेय-मुभयी प्रवृत्तिः। ततः स्वस्यातुरूपं प्रशस्तं निन्दितं वा जन्म पुनः शरीरादेः प्रादुर्भावः। तस्मिन् सति प्रतिकूल-वेदनीयतया वासनात्मकं दुःखं भवति। त इमे मिथ्याज्ञा-नादयो दुःखान्ता अविच्छेदेन प्रवर्त्तमानाः संसारशब्दार्थो लटीवन्त्रवच्चिरवधिरनुवर्त्तते। यदा कदाचित् पुरुषधौरेयः पुराकृतशुभतरपरिपाकवशादाचार्योपदेशेन सर्वमिदं दुःखा-यतनं दुःखानुषक्तञ्च पश्यति तदा तत्सर्वं ज्ञेयत्वेन बुध्यते ततस्तन्निवर्त्तयिषादि निवर्त्तयिषति तन्निवर्त्तयुपायञ्च तत्त्वज्ञानमिति कस्मिंश्चित्तस्मिन्विं-द्याभिर्विभक्तं प्रमेयं भावयतः सम्यग्दर्शनपदवेदनीय-तया तत्त्वज्ञानं जायते तत्त्वज्ञानान्मिथ्याज्ञानमपैति मिथ्याज्ञानापाये दोषाः अपयान्ति दोषापाये प्रवृत्तिर-पैति प्रवृत्त्यपाये जन्मापैति जन्मापाये दुःखमत्यन्तं नि-वर्त्तते सात्यन्तिकी निवृत्तिरपवर्गः। निवृत्तेरात्यन्ति-कत्वं नाम निवर्त्त्यसजातीयस्य पुनरुत्पाद इति तथा च पारमर्षं सूत्रं "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञा-नानामुत्तरोत्तरापाये तदनन्तराभावादपवर्गः" इति। ननु दुःखात्यन्तोच्छेदोऽपवर्ग इत्येतदप्यपि कथोच्यिषु-र्जावितं वर्त्तते तत्कथं सिद्धवत्कृत्य व्यवस्थित इति चेन्नैवं सर्वेषां मोक्षवादिनामपवर्गदशायामात्यन्तिकी दुःखनिवृत्तिरभीप्सितार्थस्य सर्वतन्त्रसिद्धान्तसिद्धतया प-रीक्षापथत्वात् न स्वप्रवृत्तस्य दुःखं प्रत्यापद्यते इति क-श्चित् प्रपद्यते तथा हि आत्मोच्छेदो मोक्ष इति माध्य-मिकमते दुःखोच्छेदोऽभीप्सितावत्तावदविवादम्। अथ सन्त्येवाः शरीरादिवदात्मापि दुःखक्षेत्रत्वाद्दुःखवेद्य इति तन्न सङ्गच्छते विकल्पानुपपत्तेः किमात्मा ज्ञानसन्तानो विवक्षितः तदरिक्तो वा। प्रथमे न विप्रतिपत्तिः कः खल्वनुकूलमाचरति प्रतिकूलमाचरेत। द्वितीये तस्य नित्यत्वे निवृत्तिरयत्नविधानेन प्रवृत्त्यनुपपत्तिबाधितं दूषणं, न खलु कश्चित् प्रेक्षावान् "आत्मनस्तु कामाय सर्वं प्रियं भवतीति" सर्वतः प्रियतमस्यात्मनः सदुच्छेदाय प्रय-तते सर्वो हि प्राणी सुखं इति व्यवहरति।

अभिनिवृत्तौ निर्मलज्ञानोदयो मनोदय इति विज्ञान-वादिवादे सामग्र्यभावः सामानाधिकरण्यानुपपत्तिश्च। भावनाचतुष्टयं हि तस्य कारणमभीष्टं तच्च अयमङ्गपञ्चके स्थिरैकाधारसम्बन्धात् सङ्कल्पाभ्यासादिवदनासादितप्र-कर्षं न स्फुटमभिज्ञानमभिजनयितुं प्रभवति सोपप्लवस्य ज्ञानसन्तानस्य बहुत्वे निरुपप्लवस्य च सङ्कल्पे यो बद्धः स एव मुक्त इति सामानाधिकरण्यं न सङ्कल्पते।

आवरणसङ्क्लिष्टं क्लिरिति जैनजनाभिमतोऽपि मार्गो न निरर्गलः कथं भवान् पृष्टो व्याचष्टां किमा-वरणं? धर्माधर्मस्वभाव इति चेत् इदमेव। अथ देह-मेवावरणं तथा च तन्निवृत्तौ पक्षिराज्ञुक्तस्य शुक्तेर्वा-त्मनः सततोर्द्ध्वगमनं मुक्तिरिति चेत्तदा वक्तव्यं किमय-मात्मा मूर्त्तोऽमूर्त्तो वा। प्रथमे निरवयवः सावयवो वा निरवयवत्वे निरवयवो मूर्त्तः परमाणुरिति परमाणु-लक्षणापत्त्या परमाणुधर्मवदात्मनोऽनादीन्द्रियत्वं प्रस-ज्येत्। सावयवत्वे यल्लावयवं तदनित्यमिति प्रतिबन्धं बलेनानित्यत्वापत्तौ कृतप्राणाद्याकृताभ्यागमौ निष्प्रति-बन्धौ प्रसरेताम्। अमूर्त्तत्वे गमनमनुपपन्नमेव चक्षु-र्नालिकायाः क्रियायाः मूर्त्तप्रतिबन्धात्।

पारतन्त्र्यं बन्धः स्वातन्त्र्यं मोक्ष इति चार्वाकपक्षेऽपि स्वातन्त्र्यं दुःखनिवृत्तिश्चेदविवादम् ऐश्वर्यं चेत् स्वाति-शयतया सामेच्छतया च प्रेक्षावतां नाभिमतम्।

प्रकृतिपुरुषान्यत्वख्यातौ प्रकृत्युपरमे पुरुषस्य स्वरूपेणा-वस्थानं मुक्तिरिति साङ्ख्याख्यातेऽपि पक्षे दुःखोच्छेदोऽ-भ्युपेयते विवेकज्ञानं पुरुषाश्रयं प्रकृत्याश्रयं वेति यावदवशिष्यते तत्र पुरुषाश्रयमिति न शिष्यते पुरुषस्य कौटस्थ्यात् स्थाननिरोधापातात्तापि प्रकृत्याश्रयः अचेन-त्वात् तस्याः। किञ्च प्रकृतिः प्रवृत्तिस्वभावा निवृत्ति-स्वभावा वा आद्ये अनिर्मोक्षः स्वभावस्यानपायात् द्वितीये कथमिति संसारोऽस्तमियात्।

नित्यनिरतिशयसुखाभिव्यक्तिर्मुक्तिरिति भट्टसर्वज्ञा-द्यभिमतेऽपि दुःखनिवृत्तिरभिमतैव परन्तु नित्यसुखं न प्रमाणपद्धतिमध्यास्ते। श्रुतिस्तत्र प्रमाणमिति चेन्न योग्यानुपलब्धिबाधिते तदनवकाशादवकाशे वा याव-द्भावेऽपि तथा भावप्रसङ्गात्। ननु सुखाभिव्यक्तिर्मु-क्तिरिति पक्षं परित्यज्य दुःखनिवृत्तिरेव मुक्तिरिति स्वीकारः क्षीरं विहायारोचकपक्षपतितं तक्रमिव मनुष्करोतीति चेत्तदेतन्नाटकपक्षपतितं तक्रमेव दुर्लभ-मेक्षते। सुखस्य सातिशयत्वेन प्रत्यक्षतया बहुप्रत्य-

नीकाक्रान्ततया साधनप्रार्थनापरिक्लिष्टतया च दुःखाविनाभूतत्वेन विधानुषक्तमधुवत् दुःखपङ्कनिःक्षेपात्। ननु "एकमनुसन्धिस्तोऽपरं प्रच्यवते" इति न्यायेन दुःखवत् सुखमप्युत्क्रियत इति अकाम्योऽयं पक्ष इति चेन्नैवं अस्याः सुखसम्पादने दुःखसाधनवाहुल्यानुषङ्गनियमेन तप्तायःपिण्डे तपनीयबुद्धा प्रवर्त्तमानेन सास्वापातात् तथा हि न्यायोपार्जितेषु विषयेषु कियन्तः सुखद्योताः कियन्ति दुःखदुर्दिनानि अन्यायोपार्जितेषु तु यद्भविष्यति तन्नामापि चिन्तयितुं न शक्यमित्येतत् स्वानुभवसनाच्छादयन्तः सन्तोविदाङ्कुर्वन्तु विदांवरा भवन्तः। तस्मात् परिशेषात् परमेश्वरानुग्रहश्राद्धवादिकर्मेश्वरात्मतत्त्वसाक्षात्कारवतः पुरुषधौरेयस्य दुःखनिवृत्तिरात्यन्तिकी निःश्रेयसमिति निरवद्यम्। नन्वीश्वरसद्भावे किं प्रमाणं प्रत्यक्षमनुमानमागमो वा न तावदत्र प्रत्यक्षं क्रमते, रूपादिरहितत्वेनातीन्द्रियत्वात् नाप्यनुमानं तद्व्याप्तिग्रहणाभावात् नागमः विकल्पासहत्वात् किं नित्योऽनमनत्वनित्यो वा। आद्ये अप्रसिद्धान्तापातः द्वितीये परस्पराश्रयापातः। उपमानादिकमप्यत्र नियतविषयत्वात्। तस्मादीश्वरः प्रमाविषयायते इति चेत्तदेतत् चतुरचेतसां चेतसि चमत्कारमाविष्करोति। विवादास्पदं जगद्गागरादिकं सकर्तृकं कार्यत्वात् कुम्भवत्। न चायमसिद्धो हेतुः सावयवत्वेन तस्य सुसाधनत्वात्। ननु किमिदं सावयवत्वम् अवयवसंयोगित्वम् अवयवसमवायित्वं वा नाद्यः गगनादौ व्यभिचारात् न द्वितीयः तन्तुत्वादावनैकान्त्यात्। तस्मादनुपपन्नमिति चेन्नैवं वादीः समवेतद्रव्यत्वं सावयवत्वमिति निरूक्तेर्वक्तुं शक्यत्वात्। नापि विरुद्धो हेतुः साध्यविपर्ययव्याप्तेरभावात् नाप्यनैकान्तिकः पक्षादन्यत्र हेत्वदर्शनात् नापि कालात्ययापदिष्टः बाधकानुपलम्भात् नापि सत्प्रतिपक्षः प्रतिभटादर्शनात्। ननु नगादिकमकर्तृकं शरीराजन्यत्वात् गगनवदिति चेन्नैतत् परीक्षाक्षमीक्षते नहि कठोरकण्ठीरवस्य क्रूरक्रूरावः प्रतिभटो भवति स्वजन्यत्वस्यैव समर्थतया शरीरविशेषस्यवैयर्थ्यात्। तर्ह्यजन्यत्वमेव साधनमिति चेन्नाभिदेः। नापि सोपाधिकत्वशङ्कावकाशङ्कुरः सम्भवी स्वनुकूलतर्कसम्भवात् यद्ययमकर्तृकः स्यात् कार्यमपि न स्यादिह जगति नास्त्येव तत्कार्यं नाम यत्कारकचक्रमयधीर्यौक्तानमायादवेदित्वे तदविवादम्। तच्च सर्वं कर्तृविशेषोपस्थितमर्यादं कर्तृत्वं चेतरकारकाप्रयोज्यत्वे सति सकलकारकप्रयोक्तृत्वलक्षणं ज्ञानक्रियाविशेषप्रयत्नाधारत्वम्। एवञ्चकर्तृव्याहत्तेस्तदुपस्थितसमस्तकारकव्याहत्तावकारणकार्योत्पादप्रसङ्गः। इति स्थूलः प्रमादः। तथा निरटङ्कि भट्टैरकिङ्करेण "अनुकूलेन तर्केण सनाथे सति साधने। साध्यव्यापकताभङ्गात् पक्षे नोपाधिसम्भवः" इति। यदीश्वरः कर्त्ता स्यात्तर्हि शरीरी स्यादित्यादिप्रतिकूलतर्कज्ञातं जागर्त्तीति चेदीश्वरसिद्ध्यसिद्ध्यां व्याघातात् तदुदितसदयनेन "आगमादेः प्रमाणत्वे बाधनादनिषेधनम्। आभासत्वे तु सैव स्यादाश्रयासिद्धिरुद्धता" इति। न च विशेषविरोधः शक्यशङ्कः ज्ञातत्वाज्ञातत्वविकल्पपराहतत्वात्। तदेतत् परमेश्वरस्य जगन्निर्माणे प्रवृत्तिः किमर्था स्वार्था परार्था वा आद्येऽपीष्टप्राप्त्यर्था अनिष्टपरिहारार्था वा नाद्यः आप्तसकलकामस्य तदनुपपत्तेः अतएव न द्वितीयः। द्वितीये प्रवृत्त्यनुपपत्तिः कः खलु परार्थं प्रवर्त्तमानं प्रेक्षावानित्याचक्षीत। अथ करुणया प्रवृत्त्युपपत्तिरित्याचक्षीत कथितं प्राचक्षीत तर्हि सर्वान् प्राणिनः सुखिन एव सृजेदीश्वरः न दुःखयत्वात् करुणाविरोधात्। स्वार्थमनपेक्ष्य परदुःखपरिहरणेच्छा हि कारुण्यं तस्मादीश्वरस्य जगत्सर्जनं न युज्यते। तदुक्तं भट्टाचार्यैः "प्रयोजनमनुद्दिश्य न मन्दो हि प्रवर्त्तते। जगच्च सृजतस्तस्य किं नाम न कृतं भवेत्" इति। नास्तिकशिरोमणे! तावदीर्ष्याकषायिते चक्षुषी निमील्य परिभावयतु भवान् करुणया प्रवृत्तिरस्त्वेव, न च निसर्गतः सुखमयसर्गप्रसङ्गः सृज्यप्राणिकृतसुकृतदुष्कृतपरिपाकविशेषादैषम्योपपत्तेः न च ज्ञातन्त्यभङ्गः शङ्कनीयः "स्वाङ्गं खल्वधायकं न भवतीति, न्यायेन प्रत्युत तद्विपर्ययाच्च। "एक एव रुद्रो न द्वितीयोऽवतस्थे" इत्यादिरागमस्तत्र प्रमाणम्। यद्येवं तर्हि परस्पराश्रयव्याघातं समाधत्स्वेति चेत् तस्यानुत्थानात् किमत्रभवतो परस्पराश्रयः शङ्कते उताहो वा। नाद्यः आगमस्येश्वराधीनोत्पत्तिकत्वेऽपि तस्मान्नतोऽवगमात् नापि तदनित्यत्वं ब्रूमः, आगमानित्यत्वस्य तीव्रादिधर्मोपेतत्वादिना सुगमत्वात्। तस्माच्चिवर्गैकधर्मानुष्ठानवशादीश्वरप्रसादसिद्धावभिमतेऽसिद्धिरिति सर्वमवदातम्"।

अनयैनीतौ पूतीसाधने उपाये हविष्यौ च "अपघोषोमणीः श्रीमान् न्यायो नेता समीरणः" विष्णुस-

"प्रमाणानुपपन्नकत्वं न्यायः" भा॰ तदनुसृत्योक्तप्रमाणगन्थो भगवानपि न्यायशब्देन लक्षितलक्षणया प्रतिपाद्यते" आनन्दगिरिः। "न्यायप्रसूनाञ्जलिः" कुसुमाञ्जलिः "समस्तोपपत्तिविकल्पप्रतिपादकं वाक्यं न्यायः" हरिदासः। निश्चितमीयते निर्णीयतेऽनेन करणे घञ्। ७वेदार्थनिर्णयसाधने अधिकरणात्मके पदार्थे अधिकरणशब्दे १२६८॰दृश्यम्। स च न्यायः पूर्वोत्तरवेदसम्बन्धी जैमिनिवेदव्यासाभ्यां बहुप्रकारो दर्शितः। ततएव संक्षिप्य साधवाचार्येण जैमिनीयन्यायमालायां वैयासिकन्यायमालायाञ्च प्रायशः सर्वे न्याया दर्शितास्ते च ततएवावगन्तव्याः। लोकप्रसिद्धप्रसिद्धदृष्टान्तभेदेषु ते च लौकिकन्यायतया प्रसिद्धाः। ते च नानास्थानात् संगृह्यात्र प्रदर्श्यन्ते

१ "अक्षे चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्" इति न्यायः यत्साध्यायासेनाभीष्टसिद्धिर्लभ्यते तत्र बह्वायाससाध्ये प्रेक्षावतां न प्रवृत्तिरिति प्रदर्शनायास्य न्यायस्य प्रवृत्तिः।

२ अजाकृपाणीयन्यायः अजाकृपाणपदे तत्क्षितक्रियाविशेषपरे अजागमनकालीनं कृपाणपतनं यथाकस्मिकम्। तथा चाकस्मिकाजागमनकालीनकृपाणपतनतुल्ये आकस्मिकानिष्टलाभस्थलेऽस्य न्यायस्य प्रवृत्तिः। [प्रवृत्तिः।

३ अज्ञातकुलनामोल्लेखनन्यायः भाविसंज्ञया निर्देशेऽस्य

४ अधिकं तु प्रविष्टं न च तद्वानिरिति न्यायः यत्राधिकप्रवेशेऽपि प्रकृतस्य न हानिस्तत्रायं प्रवर्त्तते।

५ अध्यारोपन्यायः अध्यारोपो नाम वस्त्वन्यवस्त्वारोपः यथा-ऽरजतभूतायां शुक्तौ रजतारोप इति वेदान्तिनः। ननु कथमवस्तुनोनिरात्मकस्य आरोपः क्वचिद्दृष्टपूर्वस्य सतः क्वचिदारोपदर्शनात् यथा जवायां दृष्टस्य लौहित्यस्य स्फटिके आरोपः इति चेत्सत्यं तत्सिद्धयेऽनुभवमात्रमपेक्ष्यते न तु पूर्वमनुभूतस्य तात्त्विकत्वमपि व्यतिरेकाभावात् सन्दिग्धविपर्यये ऽपि अत्र स्थाणौ मे नरो वा राक्षसोवेति सन्देहे आसीत् अत्रां रज्ज्वां सर्पोऽयमिति विपर्यय आसीत् इत्यादिसंस्कारकार्यस्मृतिदर्शनात्। न च सन्देहविपर्ययोरेवं स्मृतिर्न तदर्थयोरिति वाच्यम् सर्वविरुद्धयोस्तयोः स्मृतिगोचरत्वायोगात्। तस्मात्तु स्मृतेरस्य पूर्वपूर्वभ्रमानुभूतस्योत्तरोत्तरारोपोपपत्तिः। भ्रमत्वाद्दृश्यस्य च बीजाङ्कुरप्रवाहवदनादितयाऽन्योन्याश्रयानवस्थादिप्रसङ्गानवकाशात्। तथा च परमार्थसति सच्चिदानन्दब्रह्मणि वस्तुनि अवस्तुनोऽनिर्वचनीयस्याज्ञानतत्कार्यादेरध्यारोपः। ब्रह्मतत्त्वसाक्षात्कारेण चाध्यारोपितस्याज्ञानादेर्निवृत्तिः यथा शुक्तिकादिज्ञानेन रजतादिनिवृत्तिः। अतएवाज्ञानादीनां ज्ञाननिर्वर्त्यत्वान्यथानुपपत्त्या अध्यारोपितत्वं कल्प्यते इत्याकरे स्थितम्।

६ अन्धकूपपतनन्यायः अनेन पथा गन्तव्यमिति सद्गुरूपदिष्टस्तत्पथं परित्यज्यान्यो यथा कूपे पतति एवं वेदाद्युपदिष्टमार्गं परित्यजन्नन्धः नरकादौ पततीत्यस्य न्यायस्य तत्र प्रवृत्तिः"।

७ अन्धगजन्यायः अन्धैर्निर्धारितो गजः भा॰त॰ अन्धगजः। तत्तुल्यन्यायः। यथा हि जन्मान्धा बहवः कञ्चिदन्धं पुरुषमूचुरस्मान् गजं ज्ञापयेति। स च गजमाचार्यां नीत्वा कञ्चित् कञ्चित् गजावयवं कैश्चित् कैश्चित् आहयित्वोवाच अयं गज इति ते चान्धास्तदुपदिष्टास्तदवयवं गजत्वेन निश्चित्य स्वस्वदृष्टे आगताः परस्परं विवदन्ते। तत्र कर्णस्पर्शी सूर्पाकारो गज इति, शुण्डास्पर्शी महासर्पतुल्य इति जङ्घास्पर्शी स्तम्भतुल्य इति पुच्छग्राहकः स्थूलरज्जुसम इति पृष्ठस्पर्शी चतुरस्रसदृशो गज इति। एवंप्रदिष्टान्नपुरुषबुद्धिवैचित्र्यात् ईश्वरस्य नानारूपकल्पनमित्यत्र न्यायावतारः। अन्धहस्तीत्यादिन्यायोऽप्यत्र प्रसरति।

८ अन्यगोलाङ्गूलन्यायः अन्येन सङ्गीतं गोलाङ्गूलम् भा॰त॰ अन्यगोलाङ्गूलं तत्तुल्यन्यायः "तद्विद्धि मोक्षोपदेशात्" भा॰सू॰ भाष्ये "यदि चान्यस्य मतो मुक्तोरचेतनमनात्मानमात्मेत्युपदिशेत् प्रमाणभूतं शास्त्रं स च श्रद्धानतयाऽन्यगोलाङ्गूलन्यायेन तदाश्रयेत् न परित्यजेत् तदतिरिक्तं चात्मानं न प्रतिपादयेत् तथा सति पुरुषार्थाद्विहन्यते अनर्थश्च आपद्येत" इत्युक्तम्। विवृतञ्चैतत् रत्नप्रभायां यथा "यथा कश्चित्किल दुष्टात्मा महारण्ये पतितमन्धं बन्धुनगरं जिगमिषुं दृष्ट्वा मोहेन किमत्रायुक्तमिति दुःखितेन स्रीयते इति। स चान्धः सुखप्राप्तीच्छाकर्षं तस्मात्तं सत्योवाच अहो महाभागधेयं यदत्रभवान् दीनं मां स्वाभीष्टनगरं गन्तुमसमर्थं भाषते इति स च विप्रलिप्सुः दुष्टं गोयुवानमानीय तदीयबाङ्गूलमन्धेन याचयामास उपदिदेश च एनमन्धम्, एष गोयुवा त्वाभिष्टनगरं नेष्यति मा त्वमस्य बाङ्गूलमिति स चान्धः श्रद्धालुतया तदत्यजन् स्वाभीष्टमप्राप्यानर्थपरम्परां प्राप्तः तेन न्यायेनेति"। एवमनुसन्धेयं विप्रवेशस्य प्रचारः।

९ अन्धघटकन्यायः अन्धस्य वृत्ते पतितघटकः आ०त०। यथा दैवात् अन्धस्य वृत्ते पतितघटोऽन्धेन गृहीत इति लोकप्रसिद्धिः। एवं दैवाद्भोक्तव्याभे कस्यचिदकारणस्यापि कारणत्वकल्पनं घुणाक्षरन्यायविषये द्रष्टव्यः प्रवृत्तिः।

१० अन्धपरम्परान्यायः एकेनान्धेन यथोपदिष्टमन्धान्तरं पुनरन्यमन्धं तथैवोपदिशति इत्येवमन्धस्यान्धान्तरं प्रत्युपदेशपरम्परा न प्रामाणिकीति विवक्षायामस्य प्रवृत्तिः।

११ अपवादन्यायः अधिष्ठाने भ्रान्त्या प्रतीतस्य तदतिरेकेणाभावनिश्चयोऽपवादः, यथा स्वाप्नादौ भ्रान्त्या प्रतीतस्य पुरुषादेः स्वाप्नाद्यतिरेकेणाभावनिश्चयः। अयमेव बाधो विलापनमिति चोच्यते स चायं बाधस्त्रिविधः श्रौतो यौक्तिकः प्रत्यक्षश्चेति। "अथात आदेशो नेति नेति" "नेह नानास्ति किञ्चन" इत्यादिश्रुतेर्ब्रह्मातिरिक्ताभावनिश्चयः श्रौतो बाधः। कनकाद्यतिरेकेण कटकाद्यभावनिश्चयवन्निश्चितकारणब्रह्मातिरेकेण निश्चितप्रपञ्चाभावं निर्धार्य दह्यमानस्य मिथ्यात्वनिर्धारणात् प्रपञ्चस्य ब्रह्मात्मात्मकत्वनिश्चयो यौक्तिको बाधः। इयं रज्जुः न सर्प इत्युपदेशसहकृतप्रत्यक्षेणैव तत्त्वमस्यादिवाक्यजनितेन चिन्मात्रोऽहमिति प्रत्यक्षेण ब्रह्मात्मनिश्चयः प्रत्यक्षबाधः।

१२ अर्धजरतीयन्यायः द्वयर्थे ऋ। अयं च २७३५°-दर्शितः।

१३ अशोकवनिकान्यायः अशोकवनिकागमने यथेच्छायासौरभलाभेन अन्यत्र गमनाकाङ्क्षा यथा न भवेत् एवं यत्रेष्टलाभादन्यत्रेच्छाभावस्तत्रायं प्रवर्त्तते।

१४ ऋक्षशोष्टन्यायः लोष्टस्य तूलाद्यपेक्षया काठिन्येऽपि ऋक्षापेक्षया मृदुत्वं यथा। तथा वस्तु यदपेक्षया वैषम्याधिक्यं विवक्ष्यते तत्रास्य प्रवृत्तिः। अल्पान्तरत्वविवक्षायां तु पाषाणेष्टकान्यायोऽवतरति।

१५ अधाधारत्वेन व्यपदेशभवन्तीति न्यायः यथा गोतमोक्तशास्त्रे प्रमाणादिषोडशपदार्थप्रतिपादनेऽपि तदेकदेशे न्यायपदार्थस्य अनुयाज्ञापेक्षयाप्राधान्येन प्रतिपादनात् न्यायशास्त्रमिति तस्य संज्ञा एवमन्यत्र प्राधान्यविवक्षया तत्तत्संज्ञेति तत्रास्य प्रवृत्तिः।

१६ अहिकुण्डलन्यायः सर्पस्य यथा कुण्डलाकृतिवेष्टनं स्वाभाविकं तथा यस्य स्वाभाविकधर्मो व्यपदिश्यते तत्रास्य प्रवृत्तिः। [प्रसिद्धाभाषकं तत्रास्य प्रवृत्तिः।

१७ आभाषकन्यायः लोकप्रसिद्धवचनमाभाषकं तद्वदस्य

१८ आम्रवणन्यायः वने इतरवृक्षसत्त्वेऽपि आम्राणां बाहुल्ये यथा आम्रवणव्यपदेश एवमेकस्य प्राधान्ये "भूयस्त्वात्तदादृतिं" न्यायेन तद्व्यपदेशो यत्र तत्रास्य प्रवृत्तिः।

१९ उदकनिमज्जनन्यायः शत्रोभिसन्धस्य उदकनिमज्जनरूपे दिव्ये शोध्यस्य जलनिमज्जनसमये तत्स्थानाद्विःक्षिप्तं शरमादाय तत्पतनस्थानादितोऽपरो नरो यद्यतिवेगेन शोध्यस्थानमागत्य तच्छिरोनिरिक्तं मुखनासिकाद्यवयवं न पश्यति तदा शुद्धिः मिथ्याभिसन्धस्य तदर्शनादशुद्धिरित्येवं दिव्ये प्रसिद्धिवत् यत्र सत्यासत्ययोर्ज्ञानं तत्रास्य प्रवृत्तिः।

२० उपयन्नपयन् धर्मोविकरोति हि धर्मिणमिति न्यायः यथा पूर्वरूपरसादिरूपधर्मापराहत्तौ रूपरसाद्यन्तरोत्पत्तौ च घटादेर्धर्मिणोविलक्षणतिरेवं यस्य धर्मिणः पूर्वधर्मापगमे अन्यधर्मोत्पत्तिस्तत्रायं न्यायोऽवतरति।

२१ उपवासादरं भैक्ष्यमितिन्यायः भिक्षायाः क्लेशजनकत्वेऽपि उपवासक्लेशाधिकदुःखप्रदत्वापेक्षया इष्टत्वेन यथा वरत्वं तथा क्लेशदायकतारतम्येन बहुदुःखदायकापेक्षया स्वल्पदुःखदायकस्य वरत्वं यत्रोपदिश्यते तत्रास्य प्रवृत्तिः।

२२ उभयतः पाशारज्जुन्यायः रज्ज्वां यथा उपयपार्श्वे पाशसत्त्वे उभयपार्श्वयोर्गमने बन्धनम् एवमुपन्यस्तयोः पक्षयोर्दुष्टत्वे दोषोद्धारणाभावेन बहुबन्धावेऽस्य प्रवृत्तिः।

२३ उष्ट्रकण्टकभक्षणन्यायः उष्ट्रस्य श्रमीकण्टकवेधजातदुःखकालेऽपि श्रमोपलभ्यभक्षणसुखवेगो यथा तथाभीष्टविषयोपार्जनदुःखकाले तदुपार्जितद्रव्यजसुखवेगो यत्रोपदिश्यते तत्रास्य प्रवृत्तिः।

२४ एकं सन्वित्सतोऽपरं प्रच्यवत इति न्यायः यथा एकं कांस्यपात्रावयवभेदं सन्धातुमिच्छतोऽपरं तदवयवमत्यन्तानलसंयोगेन नष्टमिव प्रच्यवते एवमन्यत्र एकस्य सन्धानेच्छया कृतव्यापारभेदेऽन्यस्य यत्र प्रच्यवः, तत्रास्य प्रवृत्तिः। तथा एकामसिद्धिं परिहरतोद्वितीयासिद्धिप्रसङ्गः। यथोदाहृतं बौद्धाधिकारे उदयनेन यथा बहुराद्यकर्तृकं शरीरादन्यत्वादित्यत्र शरीरीति विशेषणेन स्वरूपासिद्धिं परिहरतो बौद्धस्य व्याप्यत्वासिद्धिरापद्यते इत्यत्रेत्यं"।

२५ एकवाक्यतापन्नानां समूहैकार्थप्रतिपादकत्वमिति न्यायः समूह्य मिलित्वा इतरसाध्यं नेत्यर्थः। यथा प्रयाजाद्याङ्गजातवाक्यसमूहानां दर्शपूर्णमासैकसाध्यत्वेनैकवाक्यत्वमित्येवं बल विवक्षते तत्रास्य प्रवृत्तिः।

२६ एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति न्यायः यथा हस्तिदर्शनात् तत्सम्बन्धिनो हस्तिपकादेः स्मरणमेवं शब्दज्ञानात् हस्तिसम्बन्धेन शब्दसम्बन्धिनोऽर्थस्य स्मरणमित्यादि यत्रोपदिश्यते तत्रास्य प्रवृत्तिः।

२७ एकाकिनी प्रतिज्ञा हि प्रतिज्ञातं न साधयेदिति न्यायः एकाकिनी हेत्वादिचतुष्करहिता परार्थानुमाने हि प्रतिज्ञादिपञ्चकेनैवार्थसिद्धिः न केवलप्रतिज्ञामात्रेणार्थसिद्धिः तथात्वे सर्वत्र सर्वसिद्धिप्रसङ्गात्। प्रतिज्ञादिपञ्चकञ्चानुपदमुक्तम्। न हि प्रतिज्ञामात्रेणार्थसिद्धिरिति न्यायोऽर्थतोऽपि शब्दमात्रे भेदः।

२८ औपाधिकाकाशभेदन्यायः यथा औपाधिकाकाशगोचरं ज्ञानं सविशेषमेव दृष्टं न्यायेनोपाधिभेदविषयं तथा जीवब्रह्मभेदविषयं प्रत्यक्षादिकं तदुपाधिभेदविषयमित्येवं यत्र विदुष्यते तत्रायं प्रवर्त्तते। "घटसंवृत आकाशे नीयमाने यथा घटः। घटो नीयेत नाकाशं तद्वज्जीवो नभोपमः इति श्रुत्युक्तिश्चैतन्यायमूलिका।

२९ कष्टचामीकरन्यायः चामीकरशब्दः चामीकरनिर्मितभूषणपरः। तद्धि यथा कष्टगतमपि चिरप्राप्तमपि विनष्टं सत् दुःखाकरोति प्राप्तोदशात् प्राप्तमिव भवत् सुखाकरोति न तु वस्तुतोऽप्राप्तातिरिक्तं तस्य प्राप्तिरस्ति प्राप्तत्वात्। एवं यस्य प्राप्तस्य नष्टत्वाच्चा दुःखं तदुपदेशेन तज्ज्ञानाच्च सुखं यत्रोपदिश्यते तत्रास्य प्रवृत्तिः। तथा जीवस्य स्वतःसिद्धब्रह्मात्मकस्य अज्ञानादि दोषात् तद्विस्मरणं तत्त्वमस्यादिवाक्यजन्यात्साक्षात्कारेण स्वप्राप्तस्य प्राप्तिरिव भवतीत्युपपद्यते।

३० कदम्बगोलकन्यायः कदम्बगोलकस्य गोलाकारकदम्बस्य सर्वावयवेषु यथा युगपत् पुष्पोद्गमः एवं सर्वप्रदेशेषु युगपत् यत्र प्रसरस्तत्रास्य न्यायस्य प्रवृत्तिः। "कदम्बगोलकन्यायादुत्पत्तिः कस्यचित्क्वचे" भाषा०।

३१ कफोणिगुडन्यायः कफोणौ गुडाभावेऽपि तदाशया यथा लेहनमेवं यत्र वस्त्वसद्भावेऽपि तत्प्राप्त्याशया व्यापारभेदस्तत्रास्य प्रवृत्तिः।

३२ करकङ्कणन्यायः कङ्कणं करभूषणमित्यमरोक्तेः कङ्कणशब्दस्यैव करभूषणवाचित्वेऽपि तत्पूर्वं करशब्दप्रयोगे यथा प्रयोगकाले तस्य करसम्बन्धिता द्योत्यते एवमन्यस्यापि तत्काले तत्सम्बन्धद्योतनार्थं यत्र प्रयोगस्तत्रास्य प्रवृत्तिः।

३३ काकतालीयन्यायः इदार्थे ढ। काकतालीयशब्दे ।८३१९० दृश्यः। अत्रायं विशेषः अतर्कितेऽर्थलाभे अतर्कितानिष्टलाभे चायमवतरति तथा हि काकस्तालफलप्राप्त्यर्थे पतनात् तालस्योपभोगलाभः। एवं तत्फलस्य गिरेरपि पतनात् मरणमपि सम्भवति। तत्रानिष्टलाभे "फलन्ति काकतालीयं तेभ्यः प्राप्ता न विभ्यति" वेणीसं०। दृष्टा वाप्तौ यत्तया मेलनं तत्र कामो मे यच्च शुभ्रुवः। तदेतत् काकतालीयमवितर्कितसम्भवम्" चन्द्रालोकः। "पतत् तालफलं यथा काकेनोपभुक्तमेवं रङ्कोदर्शनक्षुभितहृदया तन्वी मया भुक्तेति" कुवलयानन्दः।

३४ काकदध्युपघातकन्यायः यथा काकेभ्यो दधि रक्षतामित्यादौ उपघातकमात्राभिप्रायेण काकशब्दस्य दध्युपघातकमात्रे लक्षणा एवं यत्र तात्पर्यवशेनेतरार्थपरत्वं तत्रास्य प्रवृत्तिः। उदाहरणमिदमुक्तैः "काकेभ्यो रक्षतामन्नमिति बालोऽपि दीक्षितः। उभयघातप्रधानत्वात् न श्वादिभ्योऽपि रक्षति ?"।

३५ काकदन्तगवेषणान्यायः काकस्य दन्ताः सन्ति नवा तेषां सौक्ष्म्यं नवेत्यन्वेषणं यथा निष्फलं तथा यस्यान्वेषणं निष्फलं तत्रास्य प्रवृत्तिः।

३६ काकमांसं शुनोच्छिष्टं स्वल्पं तदपि दुर्लभम् इति न्यायः अत्यन्तनिकृष्टस्यातितुच्छस्यापि दुर्लभत्वेऽयं न्यायः प्रवर्त्तते।

३७ काकाक्षिगोलकन्यायः एकस्य काकचक्षुषः प्रयोजनवशाद्यथा उभयगोलके सञ्चारः तथा एकस्य पदार्थस्य उभयत्र सम्बन्धविवक्षायामस्य प्रवृत्तिः।

३८ कारणगुणप्रक्रमन्यायः कारणगुणाः सजातीयगुणानेव कार्ये आरभन्ते यथा तन्तुरूपादयः स्वकार्ये पटे सजातीयरूपादीनारभन्ते न विजातीयानेवं यत्र कारणगुणानुक्रमस्तत्रास्य प्रवृत्तिः।

३९ कारयितृकर्तृत्वन्यायः यः कारयति स करोत्येव यथा राजा भटादिभिर्युद्धं कारयन् तत्कर्त्तेति व्यपदिश्यते युद्धफलविजयराज्यलाभादेस्तद्भागित्वात्। तथा यत्र विवक्षा तत्रास्य प्रवृत्तिः।

४० कार्येण कारणसंग्रत्ययन्यायः कार्येण धूमादिना यथा वह्न्यादेरनुमानरूपः संप्रत्यय एवं यत्र कार्येण कारणसंप्रत्ययस्य विवक्षा तत्रास्य प्रवृत्तिः।

४१ कुशकाशावलम्बनन्यायः नद्यादौ पतितस्य सन्तरणायाभिमुखस्य यथा कुशकाशावलम्बनं निरर्थकमेव प्रवहयुक्तिषु निराकृतात्तु दुर्बलयुक्त्यवलम्बनं विरर्थकमित्येवमवलम्बनस्य निरर्थकत्वविवक्षायामस्य प्रवृत्तिः।

४२ कूपखननन्यायः कूपखननस्य कूपखननकाले गात्रे संलग्नै

पङ्कं कूपोत्थितजलेन यथापयाति एवं विषयावच्छिन्ने-श्वरभेदबुद्धिजनितो दोषस्तदुपासनजनितसुकृतविशेषजनेनाई-तबोधेन समूलं निवर्त्तत इत्येवं विवक्षायामस्य प्रवृत्तिः।

४१ कूपमण्डूकन्यायः सप्तद्वीपसप्तसमुद्रं कथञ्चित्तीरस्थीपस्थकूपं गतं कूपस्थमण्डूकः पप्रच्छ कुत आगतोभवानिति स च सप्तद्वीपादिति प्रत्युक्तवान्। पुनः कूपमण्डूकः कीदृशः सप्तद्वीप इति पप्रच्छ तेन चातीव महानिति प्रत्युक्तं ततिकं कूपसदृश इत्युक्ते तेन प्रत्युक्तं नहि नहि नास्ति तनुस्फोऽत्रः सहि चरितो यतिरत्नवगाह्यगाम्भीर्योऽलब्धपारोऽतीव महत्तम इति। कूपमण्डूकस्तु कूपात् महान् नास्ति त्वं तु मिथ्यैव प्रलपसीत्युक्तवान्। सप्तद्वीपैकस्तु तत् श्रुत्वा मनसा तस्योपजहासेति लोके गाथा गीयते तथा च यथा सप्तद्वीपमज्ञात्वा तन्महिमानं निराकुर्वन् कूपमण्डूक उपहास्यतां प्राप्तस्तथा परसिद्धान्तानभिज्ञस्तदुपघाय प्रवर्त्तमान उपहास्यतां गच्छतीति विवक्षायामस्य प्रवृत्तिः।

४२ कूपयन्त्रघटिकान्यायः कूपात् गभीरादपि यन्त्रेण यथा घटिका उत्तोल्यते एवं अतिदुर्बोधत्वेन गम्भीरादपि शास्त्रात् उपदेशादिरूपयन्त्रेण सारोद्धरणं यत्र विवक्ष्यते तत्रास्य प्रवृत्तिः।

४३ कूर्मोङ्गन्यायः कूर्मः स्वेच्छया यथा निजाङ्गस्य सङ्कोचविकाशौ करोति एवं यस्येच्छामात्रात् स्वोपाध्यज्ञानकार्यजातस्य स्वोपाधौ सङ्कोचविकाशकारित्वमित्येवं विवक्षाविषयेऽस्य प्रवृत्तिः "यदा संहरते चायं कूर्मोङ्गानीव सर्वशः" गीता।

४४ कैवलिकन्यायः यत्र दुर्बोधस्य दुःसाध्यस्य सुखेन बोधसाधनादि तत्र सुबोधस्य सुसाध्यस्य नितरां सिद्धिरित्येवं यत्र विवक्षा तत्रास्य प्रवृत्तिः।

४७ कोद्रवपानन्यायः कोद्रवपानं दिव्यभेदः। तत्र यथा सर्वदिव्यसाधारणधर्मपूर्वदिनोपवासवतोऽभिषिक्तस्य मिथ्यावादिनः प्रथमतिन्दुकजलपानकाले कश्चित् सुखविशेषो भवति शास्त्रनिर्दिष्टावधिकाले तु महद्दुःखं तथा हरिहरादिदेवे कञ्चित् भक्तिव्याजेनेतरनिन्दां कुर्वतो निन्दाव्यसनिनो यद्यपि तत्काले कश्चित् सुखविशेषः स्यात् तथापि निन्दाजन्यदुरितपरिपाककाले कुम्भीपाकादिजन्यं घोरतमं दुःखं भवतीत्यस्य विवक्षायामस्य न्यायस्य प्रवृत्तिः।

४८ क्रिया हि विकल्पते न वस्त्विति न्यायः क्रिया हि कर्त्तुमकर्त्तुमन्यथा वा कर्त्तुं शक्यत्वात् विकल्पते न तु वस्तु एवं नैवं वेति विकल्प्यते। तदेतदुक्तं शाबरभाष्ये "कर्त्तुमकर्त्तुमन्यथा वा कर्त्तुं शक्यं लौकिकं वैदिकञ्च कर्म यथा रात्रेः शेषेऽग्निं मन्थेत् मन्थति नारात्रेः शेषेऽग्निं मन्थेत् मन्थति उदिते जुहोति अनुदिते जुहोति" इत्येवं पक्षग्राहकत्वेन वा गच्छति न गच्छति वेति। न तु वस्त्वेवं नैवमस्ति नास्तीति वा विकल्प्यते विकल्पना हि पुरुषबुद्धिसापेक्षा न वस्तुयाथात्म्यज्ञानं पुरुषबुद्ध्यपेक्षं किं तर्हि वस्तुतन्त्रमेव न हि स्थाणावेकस्मिन् स्थाणुर्वा पुरुषोऽन्योवेति तत्त्वज्ञानं भवति तत्र पुरुषो वान्योवेति मिथ्याज्ञानं स्थाणुरेवेति तत्त्वज्ञानम् एवमन्यत्राप्यूह्यम्।

४९ खले कपोतन्यायः "इडा युवानः प्रियवः कपोताः खले यथाऽमी युगवत् पतन्ति। तथैव सर्वे युगपत् पदार्थाः परस्परेणान्वयिनोभवन्ति" इत्युक्तरीत्या यत्र पदार्थानां युगपदन्वयबलात् प्रवृत्तिः।

५० गड्डलिकाप्रवाहन्यायः गड्डलिकानामवीनां संघाटे का चेत् कश्चादौ पतति तदा तत्सङ्गान्नगंताः सर्वेऽपि वार्यमाणा अपि तत्र पतन्तीति लोकप्रसिद्ध्या यत्र वार्यमाणानामपि अनिष्टमार्गे धावनं तत्रास्य प्रवृत्तिः।

५१ गुडजिह्विकान्यायः यथा तिक्ततयाभिया निम्बपानमकुर्वाणस्य बालस्य जिह्वायां गुडलेपं दत्त्वा पित्रादिकं निम्बं पाययति एवमर्थवादवाक्यानि बहूनावसाध्ये कर्मण्यप्रवर्त्तमानं पुरुषं स्वर्गौषध्यादिकं श्रावयित्वा प्रवर्त्तयन्ति। फलश्रुतिरपि रोचनार्थी तदुक्तं भग० त० भाग० १।२ "वेदोक्तमेव कुर्वाणो निःसङ्गोऽर्पितमीश्वरे। नैष्कर्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः" "फलश्रुतिरियं नृणां नार्त्तेयो रोचनं परम्। श्रेयोविमूढया प्रोक्ता यथा भैषज्यरोचनम्" अस्य तात्पर्यं शुक्लं तत्रैव "पिब निम्बं प्रदास्यामि खलु खण्डगुडादिकान्। पित्रैवमुक्तः पिबति तिक्तमप्यतिबालकः"। तत्र यथा निम्बादिपानस्य न खलु खण्डादिलाभएव प्रयोजनं किन्त्वारोग्यं तथा वेदोऽप्यवान्तरफलैः प्रलोभयन् मोक्षायैव कर्माणि विधत्ते"।

५२ गोबलीवर्द्दन्यायः बलीवर्द्दस्य गोविशेषत्वेऽपि बलीवर्द्दस्य भूमिति गोत्वेन बोधनार्थं यथा प्रयोगः तथाऽन्ययोः सामान्यविशेषरूपयोर्भूमिति बोधनार्थं यत्र प्रयोगस्तत्रास्य प्रवृत्तिः। एवं गोडमन्यायोऽप्येतादृशार्थेऽवतरति।

५३ घट्टकुटीप्रभातन्यायः तच्छब्दे २७८१पृ० अस्य विवरणम्।

५४ घुणाक्षरन्यायः घुणः कीटभेदः तेन वर्षेः वंशस्य खोदने कृते ततो रेखासन्निवेशभेदेन दैवाद् यथाऽक्षराकारनिष्पत्तिः एवमन्यार्थप्रवृत्तस्य दैवादन्यार्थस्य यत्र निष्पत्तिर्विवक्ष्यते तत्रास्य प्रवृत्तिः ।

५५ चतुर्वेदविद्यायः यथा गोहिरण्यादिरूपं बहुधनं चतुर्वेदविदे मया देयमिति कस्यचित् दातुर्वचनं श्रुत्वा कश्चित् मूढः वेदाश्चत्वार इत्यहं जाने मह्यमिदं सर्वं धनं देयमिति वदन् तद्वचनं न लभते प्रत्युत उपहसनीयश्च भवति एवं सच्चिदानन्दरूपं प्रत्यगभिन्नं ब्रह्मेति शब्दमात्राभिज्ञस्तदर्थशाब्दबोधमात्रशाली वा यस्तत्त्वविच्चाभिमानेन तत्त्ववित्तां गतिं वाञ्छति स न तां प्राप्नोति प्रत्युत उपहास्यश्च भवति । तथा च वेदसङ्ख्यामात्रज्ञाने तद्विशेषस्वरूपार्थयोरज्ञाने यथा तदभिज्ञयोर्यथासम्मानपूजामानाप्तिः तथा सच्चिदानन्दादिशब्दमात्रज्ञाने तदर्थस्य साक्षात्काराभावे न ब्रह्मभावापत्तिलक्षणमुक्तिप्राप्तिरित्येवं यत्र विवक्ष्यते तत्रास्य प्रवृत्तिः ।

५६ चालनीन्यायः चालनीभ्रामणे तत्स्थतण्डुलानां स्वच्छिद्रद्वारा सर्वेषां यथा पतनम् । एवं क्वचित्स्थितवस्तूनां सर्वेषां लक्षणादिवृत्तिभावो यत्र सम्भाव्यते तत्रास्य प्रवृत्तिः । यथा व्याप्यतावच्छेदे साध्यप्रतियोगिकाभावप्रवेशे महानसीयवह्न्यधिकरणे पर्वतीयवह्न्यभावस्य एवं पर्वतीयवह्न्यधिकरणे महानसीयवह्न्यभावस्य च सत्त्वेन वह्निप्रतियोगिकाभावस्य तत्तदधिकरणे सत्त्वात् सर्वेषां वह्नीनां व्याप्यतावच्छेदकवह्निभावः ।

५७ चौरापराधेन माण्डव्यदण्डन्यायः चौरस्यापराधेन यथा माण्डव्यस्य शूलारोपणं पुराणप्रसिद्धम् । एवमेकस्यापराधेनान्यस्य दोषारोपणं यत्र विवक्ष्यते तत्रास्य प्रवृत्तिः ।

५८ जलतन्विकान्यायः यथा पङ्कविप्रा तन्विका नद्यादौ निमज्जति पङ्कलेपापगमे च उन्मज्जति तद्गतिप्रतिरोधकविरहादेवं जीवः देहादिसम्बन्धहेतुमलादौ क्षीणे सति स्वालोकाकाशे स्वयमेव गत्वा तिष्ठति तादृशएव तस्य मोक्ष इति दिगम्बरमते स्थितम् ।

५९ जलानयनन्यायः यथा जलमानीयतामित्युक्ते अनुक्तमपि तत्पात्रानयनं नान्तरीयकतया प्रतिभाति एवमेकस्मिन्नुक्तौ तदाधारादेरनुक्तस्यापि अन्यस्य यत्र प्रतीतिस्तत्रास्य प्रवृत्तिः ।

६० तण्डुलभक्षणन्यायः यथा चौरस्य तण्डुलभक्षणरूपटिप्पे श्रीघ्रमेव लोहितादिनिर्जीवनं दृश्यते "लोहितं दृश्यते यस्य सर्वे कृतुच शीर्यते । गात्रं च कम्पते यस्य तमशुद्धं विनिर्दिशेत्" पितामहेन तस्य सद्योऽनिष्टलोक्तेस्तथा यत्र सद्योऽनिष्टसम्बन्धस्तत्रास्य प्रवृत्तिः ।

६१ तप्तपरशुपरुषन्यायः सत्याभिसन्धस्य मोक्षो मिथ्याभिसन्धस्य बन्ध इति विवक्षायामस्य न्यायस्य प्रवृत्तिः । तप्तपरशुपरुषश्च दिव्यभेदः । तथा हि चौरत्वसन्देहे निर्णयार्थं तादृशसन्देहविषयं पुरुषमुद्दिश्य पञ्चाशत्पलसम्मितमखिरच्छितमष्टाङ्गुलायामं लौहं परशुमग्नौ प्रक्षिप्याग्निवर्णं कृत्वा अश्वत्थपत्रदधिपूर्वाद्युत्तरितयोः शोध्यस्य हस्तयोर्विधिना प्राङ्विपाको निःक्षिपेत् स चेदनृतवादी नाहं चौर इति तदा तादृशपरशुपरुषे दह्यते यस्तु नाहं चौर इति सत्यवादी स तादृशपरशुपरुषेऽपि न दह्यते तत्र दाहाभावप्रयोजकं नाहं चौर इति विषयस्य सत्यत्वं दाहप्रयोजकं तु तद्विषयस्याऽनृतत्वम् । तथा सर्वो प्रयोजकमहं ब्रह्मेति वाक्यविषयस्य सत्यत्वं बन्धप्रयोजकं तु नाहं ब्रह्मेति वाक्यविषयस्याऽनृतत्वम् । अयमेव न्यायः छा० उ० श्रुत्या प्रतिपादितो यथा "तद्यथा पुरुषं सोम्योत हस्तगृहीतमानयत्यपहार्षीत् स्तेयमकार्षीत् परशुमस्मै तपतेति स यदि तस्य कर्त्ता भवति तत एवानृतमात्मानं कुरुते सोऽनृताभिसन्धोऽनृतेनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स दह्यतेऽथ हन्यते अथ यदि तस्याकर्त्ता भवति ततएव सत्यमात्मानं कुरुते सत्याभिसन्धः सत्येनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स न दह्यतेऽथ मुच्यते स यथा तत्र नादह्यतैतदात्म्यमिदं सर्वं स आत्मा तत्त्वमसि श्वेतकेतो" इति ।

६२ तप्तमाषकोद्धरणन्यायः तप्तपरशुपरुषन्यायविवक्षेऽस्य प्रवृत्तिः तप्तमाषकपरुषमपि दिव्यभेदः । तत्रापि धृतितप्ततैलादितः सौवर्णमाषकोद्धरणे शोध्यस्य करे स्फोटाद्यभावे शुद्धिः अन्यथा त्वशुद्धिः ।

६३ तृणतु दुर्जन इति न्यायः यत्र प्रतिवाद्युक्तपक्षं दुष्टमपि वादिना प्रौढिवादेन अङ्गीक्रियापि दूषणान्तरस्य दानं तत्रास्य प्रवृत्तिः ।

६४ तृणजलौकान्यायः यथा जलौका तृणान्तरमवलम्ब्यैव पूर्वाश्रितं तृणं त्यजति तथा जीवः स्वाविद्याकामकर्मवासनादिभिर्देहान्तरसत्त्वाद्यैव पूर्वं देहं त्यजतीति विवक्षायामस्य प्रवृत्तिः ।

६५ तृणारणिमणिन्यायः तार्णवह्निं प्रति तृणस्य, आरण्येय

वह्निं प्रति अरणेः मथिजन्यवह्निं प्रति मथेश्च कारणत्वं न तु वह्नित्वावच्छिन्नं प्रति तयादेः कारणत्वं परस्परव्यभिचारात्। एवं यत्र कार्यकारणभावबाहुल्यं कार्यतावच्छेदकं कारणतावच्छेदकत्वं नाना तत्रास्य प्रवृत्तिः।

६६ दग्धपटन्यायः पटस्य दग्धत्वेऽपि यथा पूर्वाकारेणावस्थानं गृह्यते एवं यत्र वस्तुनो दाहेऽपि तदाकारप्रतीतिस्तत्रास्य प्रवृत्तिः एवं दग्धपटन्यायोऽप्येवं विषयः।

६७ दग्धबीजन्यायः दग्धस्य बीजस्य यथा नाङ्कुरोत्पादकता एवमविवेकज्ञाने न संसारहेतुत्वं इत्येवं यत्र विवक्षा तत्रास्य प्रवृत्तिः।

६८ दण्डचक्रन्यायः दण्डचक्रसूत्रवस्त्रादेर्यथा घटत्वादेकधर्मावच्छिन्नं प्रति कारणत्वमेवं विवक्षायामस्य प्रवृत्तिः।

६९ दण्डापूपन्यायः दण्डस्याधुना भक्षणे प्रतीते तत्संबन्धापूपस्य भक्षणमर्थात् यथा प्रतीयते एवं यत्र दुष्करे कस्मिंश्चिदर्थे कृतेऽन्यस्य सुकरस्य कृतत्वमर्थात् सिद्धं प्रतीयते इत्यस्य विवक्षायामस्य प्रवृत्तिः।

७० देवदत्तापुत्रन्यायः पुत्रस्य मातापितृसम्बन्धित्वेऽपि मातुः प्राधान्यविवक्षायां यथा देवदत्तापुत्र इत्युच्यते तथाऽन्यत्र यत्र मातुः प्राधान्यविवक्षा तत्रास्य प्रवृत्तिः। पितुः प्राधान्ये देवदत्तपुत्र इति व्यपदेशः। अतएव यजुर्वेदवंशकीर्त्तने स्त्रीप्राधान्येनैव निर्देशो यथा "अथ वंशः तदिदं वयं भारद्वाजीपुत्राद्भारद्वाजीपुत्रो वात्स्रीभाण्डवीपुत्रादात्स्रीभाण्डवीपुत्रः इत्यादि" शत०ब्रा०१४।९।४।२१।

७१ घटारोहणन्यायः घटारोहणं द्वारोहणं दिव्यभेदः। तत्र सत्याभिसन्धस्य शुद्धिः मिथ्याभिसन्धस्याशुद्धिः तथा हि "दूषितो यदि वर्द्धेत न शुद्धः स्यान्न संशयः। समोवा क्षीयमाणो वा न विशुद्धो भवेन्नरः" इत्युक्तदिशा शुद्धत्वशुद्धी ज्ञेये। एवं यत्र विवक्षा तत्रास्य प्रवृत्तिः।

७२ धर्माधर्मपरिणामन्यायः धर्माधर्मभूत्तिंपरिणामरूपदिव्ये सत्याभिसन्धस्य यथा धर्मभूत्तिंपरिणामं मिथ्याभिसन्धस्याधर्मभूत्तिंपरिणामम् ताभ्यां च जयपराजयौ यथा भवतः। एवं यत्र विवक्षा तत्रास्य प्रवृत्तिः। तत्र दिव्यं पितामहेनोक्तं यथा "राजतं कारयेत् धर्मंमधर्मं सीसकायसम्। खिलेष्टभूर्जे घटे वापि धर्माधर्मौ लिखेतितौ। अभ्युक्ष्य मन्त्रगन्धेन गन्धमाल्यैः समर्चयेत्। लिखेत्पुण्यस्तु धर्मः स्यादधर्मोऽलिखितश्चभवत्। एवंविधावधानेन लिखेतां तौ निधापयेत्। गोमयेन तदा वापि पिण्डौ कार्यौ समन्ततः। मन्त्राभ्यर्चेऽनुपहते स्वाभौ चानुपचलितौ। उपलिप्ते शुचौ देशे देवब्राह्मणसन्निधौ। आवाहयेत् ततो देवान्लोकपालांश्च पूर्ववत्। धर्मावाहनपूर्वं तु प्रतिष्ठापनकं ततः। यदि पापविशुद्धोऽहं धर्मस्त्वायातु मे करे" "अभियुक्तजयोर्यं प्रगृह्णीताविलम्बितः। धर्मं गृहीते शुद्धिः स्यादधर्मे तु न शीयते"।

७३ नष्टाश्वदग्धरथन्यायः इत्थं लोकप्रसिद्धिः द्वौ हि रथिनौ कस्मिंश्चिद्ग्रामं प्रविश्य रथाभ्यामवतीर्याश्वौच मोचयित्वा खट्वायां निविष्टौ दैवेन तदानीं दह्यमाने तस्मिन् ग्रामे तयोरेकः पश्चादश्वान्निःसरिष्यामीति धिया रथमादौ निःसारितवान्, परस्त्वश्वान्, तावता तस्मिन्नन्ये दग्धे एकस्याश्वनष्टा द्वितीयस्य रथोदग्धः तौ चान्योन्यमेलया एकं रथं कृत्वा यथेष्टदेशं यथा प्रजग्मतुस्तथार्थवादविधिवाक्ये प्रधानाङ्गवाक्ये चेतरेतराकाङ्क्षयैकवाक्यतां प्राप्य प्रवृत्त्यादिकं जनयतः।

७४ न हि करकङ्कणदर्शनावादर्शापेक्षेति न्यायः यथा प्रत्यक्षयोग्यं करे स्थितं कङ्कणं प्रत्यक्षेणैव गृह्यते न तद्दर्शनावादर्शापेक्षा एवं प्रत्यक्षसामग्र्यसत्त्वे तयैव पदार्थप्रतीतिर्नानुमित्यादिसामग्र्यपेक्षेति विवक्षायामस्य प्रवृत्तिः "न हि करिणि दृष्टे चीत्कारेण तमनुमिनोतेऽनुमातारः" वाचस्पत्युक्तमेतन्न्यायमूलकम्। अनुमित्यायां तु तदपेक्षा "प्रत्यक्षपरिकल्पितमर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः" इति वाचस्पत्युक्तेः।

७५ न हि त्रिपुलोदिपुत्रः कथ्यते इति न्यायः त्रित्वस्य द्वित्वव्यापकत्वेऽपि वाक्यस्य सावधारणत्वात् पुत्रत्रयवतः पुत्रद्वयवत्त्वेऽपि न तस्य द्विपुत्रशब्दवाच्यता न्यूनसंख्याव्यवच्छेदकत्वेन त्रित्वस्य न यथा द्विपुत्रवाचकतेत्येवं यत्र विवक्षा तत्रास्य प्रवृत्तिः।

७६ न हि दृष्टेऽनुपपन्नं नामेति न्यायः न प्रत्यक्षविषये प्रमाणान्तरान्वेषणमिति यत्र विवक्षा तत्रास्य प्रवृत्तिः तथा हि प्रत्यक्षस्य सर्वप्रमाणबाधकत्वात् अनुपपत्तेरर्थापत्तिरूपतया व्यभिचारानुमितिरूपतया वा प्रत्यक्षेण बाध्यत्वात् प्रत्यक्षविषये विरोधिन्या अनुपपत्तेर्न सम्भवः।

७७ नहि निन्दा निन्द्यं निन्दितुं प्रवर्त्तते किन्तु विधेयं स्तोतुमिति न्यायः निन्दार्थवादस्य तदितरत्र प्राबल्यविधानार्थमेव प्रवृत्तिर्न तु तस्य निन्दार्थं निन्दायां पूर्वोत्तरभावादित्येवं मीमांसायां लोके च प्रसिद्धम्।

७८ निम्नगाप्रवाहन्यायः नदीप्रवाहो हि यां दिशं स्रोतो गच्छति ततोऽन्यत्र तस्य नयने ब्रह्मप्रवाहेऽपि न

वस्तुत्व एवं जन्मान्तरीयसंस्कारवशाद्यस्मिन्नीश्वरविषये ध्यानाद्याकस्मिकचित्तप्रसादस्तत्रेश्वरे नयने महायत्नसत्त्वेऽपि वैफल्यमस्य इत्येवं विवक्षायामस्य प्रवृत्तिः।

७६ कूपनापितन्यायः इत्यं हि लौकिकी गाथा कस्यचित्पथश्रमो नापितः कथित्, प्रातः समस्तनगरनिवासिप्रातिरभणीयतमो वाञ्छो मे दर्शनाय त्वयाऽऽनेतव्य इति, स्वमेवाद्यप्रभृति प्रातस्त्वाय सर्वं पुरमनिष्य इहापि च तत्र तत्रातिरमणीयतमान्यानानि स्वप्नतल्यानमत्वा तमेव राजवेश्मनि नीत्वा निवेदयामास स्वामिन्नानीतोऽयं द्वितीय इव रतिपतिरतिमनोज्ञाकृतिर्वेति राजा च तत्पश्यान्नानालङ्कारारामं खलाटकाष्ठं स्थूलस्थोदरं क्षयक्षुखवाङ्कुमालोक्य उपहासमयं मे खलु कृतवानिति मत्वा चुकोप उवाच च अरे लाल्य किमिदमुपहसनं क्रियते इति। नापितश्च कुपितं रूपं ज्ञात्वा कृताञ्जलिर्भूत्वोवाच राजेन्द्रमीशे! तव चरणसपाशमे नायमुपहासः किन्तु मे मनसीत्थमेव निश्चयो नास्मे-त्यादयश्लिष्टोक्त्या तव मुख्यौ तु का कथेति राजा च तत्थमेतादृश्येव स्वेष्टातिशयवर्णवदस्य चित्तस्य दर्शेति मत्वा कोपं तत्याजेति। तथा च यथाऽतिकुरूपेऽपि पुत्रे रागातिशयवशात्तापितस्य सर्वोत्तमत्वधीस्तथा मन्दधियां केषाञ्चिज्जन्मान्तरीयसंस्कारपुरस्कृतरागातिशयवशात् कस्मिंश्चिदतिदुष्टेऽपि देवे सर्वोत्तमत्वधीः परित्यज्य च हरिहरादीनुपासने प्रवृत्तिरित्येवं विषयेऽस्य प्रवृत्तिः

८० पङ्गुप्रक्षालननन्यायः "प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्" इत्युक्तदिशा पङ्कदेपने प्रक्षालनमपेक्ष्य पङ्कस्पर्शनमेव न कर्त्तव्यमिति लोकप्रसिद्धिवदन्यत्रापि अनिष्टसाधनस्य कारणान्तरेण निवारणमपेक्ष्य अनिष्टसाधनमेव न कर्त्तव्यमिति यत्र विवक्षा तत्रास्य प्रवृत्तिः।

८१ पञ्जरशकुननन्यायः यथा दशभिः पञ्जरस्थपक्षिभिः स्वस्वयत्नैरेकां पञ्जरे क्रियास्तत्पादा तस्य शकुनं तिर्यग् मूर्द्धनयनं च क्रियते तथा दशभिरिन्द्रियैरेकां ज्ञानरूपां क्रियास्तत्पादा देहशकुनं क्रियते इति सांख्ये स्थितम्।

८२ पञ्जरस्थपक्षिन्यायः पञ्जरस्था विहगास्तत्रा यथेष्टमुत्पत्य यथा देशान्तरं गच्छन्ति तथा जीवः बन्धनान्मुक्त ऊर्द्धलोकाग्रे तिष्ठतीति जैनमते स्थितम्।

८३ पाषाणेष्टकान्यायः यथा तत्पादपेक्षया कठिनाया अपि इष्टकायाः पाषाणापेक्षयामृदुत्वम् एवं यत्र विवक्षा तत्रास्य प्रवृत्तिः।

८४ पिष्टपेषणन्यायः पिष्टस्य पुनःपेषणं यथा निरर्थकम् एवं कृतस्य करणं वृथेति विवक्षायामस्य प्रवृत्तिः। तथाचोक्तं "कृतस्य करणं नास्ति"।

८५ पुत्रलिप्सया देवं भजन्या भर्त्तापि नष्ट इति न्यायः अभीष्टान्तराशया व्यापारवतस्तन्मूलं यत्र नश्यति तत्रास्य प्रवृत्तिः तथा च इष्टसिद्धयतोमूलं विनष्टमिति न्यायविषयेऽस्य प्रवृत्तिः।

८६ पूपाशकनन्यायः सितादिनानाद्रव्यैर्मिश्रितैर्यथा एकोऽङ्गुतरसोनिष्पाद्यते तथा यत्र अनेकसाधनैर्मिश्रूपः पदार्थो जायते तत्रास्य प्रवृत्तिः। यथा विभावानुभावादिभिः शृङ्गारादिरसोनिष्पद्यते एवमत्रापि।

८७ प्रासादवासिन्यायः एक एव देवदत्तः प्रासादस्थोपर्यधस्ताच्च कालभेदेन वसन्नपि प्रासादवासप्राधान्ये प्रासादवासीत्युच्यते तथाऽत्रस्य प्राधान्यधर्मेण व्यपदेश विवक्षायामस्य प्रवृत्तिः।

८८ फलवत्सहकारन्यायः यथातिमधुरपक्वफलनमितशाखोऽतिसौरभ आम्रवृक्षः स्वस्मैस्वस्मै स्वार्थिनं जनं फलं परिमलं चामर्थितमपि ददातीति तथा विवक्षायामस्य प्रवृत्तिः।

८९ बहुराजपुरुषन्यायः एकस्मिन् पुरे यदा बहवो राजानस्तदा तेषामैकमत्याभावेन यथा प्रजानां क्लेशस्तथा एकस्मिन् देहे नानेन्द्रियाणां कर्त्तृत्वे क्लेशते विरोधाद्भोक्तमपि सिध्येत्। तथा हि यदा चक्षुर्दर्शनाय प्रवर्त्तमानं भवति तदा श्रवणादि च इन्द्रियाणि स्वस्वक्रियानिर्वाहोद्यतानि भवन्ति चेत्तदा दर्शनादि नैकमपि न जायते एवं विवक्षायामस्य प्रचारः।

९० बहुवृषलाङ्गटभ्रमणन्यायः यथा तुल्यबलैः बहुभिर्वृषैराङ्गटस्य स्थानस्य न नियतैकत्र स्थितिरेवं यत्र बहूनां परस्परविरोधस्तत्र नैकस्य स्थितेत्येवं विषयेऽस्य प्रवृत्तिः।

९१ बहूनामप्युपकारोनाश्च इति न्यायः अनुपकृत् साधार्यं न्यायः न्यायावलीतेरनपेतोऽवंशतदुपेतः कार्यसाधक इति यावत् यथाऽहुः "बहूनामप्यसाराणां समवायो हि कार्यसाधकम्। तृणैः संपादिते रज्जुस्तया नागोऽपि बध्यते" इति तथा विवक्षायामस्य प्रवृत्तिः।

९२ बिलवर्त्तिशोधनन्यायः बिले गर्त्ते वर्त्तमानायाः शोधायाः विभजनं विभाजकधर्मेण निर्देशो यथा न सम्भवति तस्य अदृष्टत्वादेवमज्ञातपरविद्वान्तस्य तद्दृष्टयाय प्रवृत्तिर्भवतीत्येवं विवक्षायामस्य प्रवृत्तिः।

९९ ब्राह्मणप्रामन्त्रायः यथा ग्रामे वनेषु वर्षासु वसतस्यपि ब्राह्मणानां बाहुल्ये ब्राह्मणग्राम इत्युच्यते एवं विवक्षायामस्य प्रवृत्तिः। एवं मञ्चप्रामन्त्रायादयोऽपि प्राधान्यविवक्षायां "प्रधान्येन व्यपदेशा भवन्तीति" न्यायविषये प्रवर्त्तन्ते

९८ ब्राह्मणश्रमणन्यायः श्रमणो बौद्धयतिः तस्याशास्त्रीयविधिना लक्षणशिखासूत्रकृच्छ्रादेरभावेऽपि यथाभूतपूर्वेण ब्राह्मणत्वेन निर्देशस्तथा यत्र भूतपूर्वत्वा निर्देशस्तत्रास्य प्रवृत्तिः।

९९ भिक्षुपादप्रसारणन्यायः यथा कश्चिद्भिक्षुर्वेलायां भोजनाच्छादनवासस्टहादिलाभार्थं कस्यचिद्धनिनो गृहे प्रविश्य युगवत् सर्वाभीष्टलाभं मन्यमानः प्रथमं धनिष्टहे मे पादप्रसारणमस्तु पश्चादनेन परिचयसत्पाद्य सर्वं स्वाभीष्टं संपादयिष्यामीति धिया स्वस्यापि भिक्षां वहु मन्यमानः पश्चात् क्रमेण स्वाभीष्टं सम्पादयति एवं यत्र विवक्षा तत्रास्य प्रवृत्तिः।

९६ मज्जनोन्मज्जननन्यायः यथा नद्यादौ पतितः सन्तरणानभिज्ञः कदाचिन्मज्जति कदाचिदुन्मज्जति। एवं दुष्टवादिना स्वपक्षसमर्थनाय यतमानेन प्रबलयुक्तिमनासाद्य क्लिश्यते इति यत्र विवक्षा तत्रास्य प्रवृत्तिः।

९७ मक्षिकान्यायः मक्षिकान्वादीनां वस्त्रादीन् प्रति यथा स्वातन्त्र्येण प्रतिबन्धकत्वम् लोकसिद्धम् न च तत्र युक्तयपेक्षा एवं वह्निजिज्ञासाया अपि ज्ञानमात्रं प्रतिपतिबन्धकत्वमित्येवं यत्र पृथक् प्रतिबन्धकत्वं तत्रास्य प्रवृत्तिः।

९८ मण्डूकप्लवनन्यायः केनचित् कार्पटिकवणिजा स्वाभीष्टमानपूरणार्थं मण्डूकेषु मेयद्रव्यसङ्कारेण तुलामारोपितेषु मध्ये कतिचिद्दृतमुत्तत्र यदा पलायन्ते तदा तस्य यथा कपटव्यक्तिर्भवति एवं यत्र विवक्षा तत्रास्य प्रवृत्तिः।

९९ मरणादरं व्याधिरितिन्यायः मरणमिति सामान्येन क्लीवम्। अत्यन्तदुःखजनकविषयोपस्थितौ यथा तदपेक्षयाऽल्पदुःखजनकस्वीकारो तथा विवक्षायामस्य प्रवृत्तिः। अत्रैव विषये "मारणाय वृद्धोऽङ्गच्छेदं स्वीकरोतीति, न्यायोऽपि प्रवर्त्तते "सर्वनाशे समुत्पन्ने अर्धं त्यजति पण्डितः" इति सर्वजनीनप्रसिद्धेः।

१०० सङ्गादिदोषोद्धरणन्यायः सङ्गादेतन्नामकतृष्णविशेषादिरूपा गर्भस्था लोभरूपं तृणम्। बहिरावरकतया स्वतानां स्वकृतपुण्यानां सङ्काख्यानां विभजनेन यथेप्सितं समृद्ध्यते तथा यत्र विवक्षा तत्रास्य प्रचारः।

१०१ यत्कृतकं तदनित्यमिति न्यायः कृतकं कार्यं जन्यभाव इति यावत् तथा च कार्यभावस्य उत्पत्तेः प्रागसत्त्वेन प्रागभावप्रतियोगित्वात् न प्रागभावाप्रतियोगित्वघटितनित्यत्वम्। ध्वंसस्य प्रागभावप्रतियोगित्वेऽपि भावत्वाभावात् न व्यभिचार इति तार्किकाः। वेदान्तिमते तु ध्वंसस्यापि नाशाभ्युपगमेन न भावत्वं विशेषणीयमिति भेदः।

१०२ यत्रोभयोः समोदोषो न तत्रैकोऽनुयोज्य इति न्यायः वादिप्रतिवादिभ्यां न्यूनपक्षयोर्यत्र तुल्योदोषो न तत्र एकः पर्यनुयोज्यः स्वपक्षेऽपि तदोषसत्त्वात् इत्येवं यत्र विवक्षा तत्रास्य प्रवृत्तिः "यत्रोभयोः समोदोषः परिहारोऽपि वा समः। नैकः पर्यनुयोक्तव्यस्तादृग्चर्चाविचारणे" इति सां०प्र०भा० धृतवाक्यम्।

१०३ यद्विशेषयोः कार्यकारणभावोऽस्ति बाधके तत्सामानाधिकरण्योरपीति न्यायः यथा तार्किकाणां घटत्वकृतवत्वकृतत्वादिना कार्यकारणभावे सिद्धे कार्यत्वेन कृतित्वे न च कार्यकारणभावः नतु कृतवत्कृततेर्जातित्वेन द्रव्यत्वेन घटादिकं प्रति कारणत्वं तथात्वे तयोरनुगतसिद्धत्वेनाकारणत्वं स्यात् कारणतां प्रति व्यभिचारसिद्धेर्बाधकत्वात् अतएव न द्रव्यत्वेन दण्डादेर्घटादिं प्रति, कारणत्वं नापीन्द्रियत्वेन प्रत्यक्षत्वावच्छिन्नं प्रति, इन्द्रियत्वस्यैकस्याभावादिति।

१०४ यादृशं सुखं तादृशी चपेटेति न्यायः तुल्यरूपपरिहारविवक्षायामस्य प्रवृत्तिः। [विवक्षायामस्य प्रवृत्तिः।

१०५ यादृशो यच्चस्ताडशो वह्निरिति न्यायः तुल्यरूपोपचार

१०६ येनोक्तयते येन चोपसंक्षिप्यते स वाक्यार्थ इति न्यायः यथा गिरिरग्निमान् इति प्रतिज्ञावाक्येन पर्वतस्यैवोपक्रमः तस्यादृङ्निगमनेति निगमनवाक्येऽपि गिरेरेव वह्निमत्त्वेन बोधात् सएव वाक्यार्थएवमन्यत्रापि।

१०७ योजनप्राप्यायां कावेर्यां मल्लबन्धनमिति न्यायः कावेरी नदीविशेषः मल्लः कैवर्त्तभेदस्तद्देशः वस्त्रभेदस्य बन्धनं यदा मल्लो बाहुयुद्धकुशलस्तद्वद्बन्धोचितवाससां कटौ बन्धनं मल्लबन्धनं तच्च नदीतारणाय कार्यमिति लोकप्रसिद्धम्। तद्यथा योजनमार्गेण प्राप्यायां तस्यामयुक्तं तथा यत्र विवक्षा तत्रास्य प्रचारः।

१०८ रक्तपटन्यायः यदा तु निराकाङ्क्षेऽपि वाक्ये आकाङ्क्षा-

सत्याध्येकवाक्यता क्रियते तदा रक्तपटन्यायप्रवृत्तिः यथा पटोऽस्तीति वाक्यस्य निराकाङ्क्षस्यापि कौतुक इत्याकाङ्क्षासत्याप्य रक्त इत्यनेनैकवाक्यता क्रियते तथा प्रज्ञतीनां दर्शपूर्णमासादीनां स्वप्रकरणस्थाङ्गैर्निर्दिष्टोपकाराकाङ्क्षाणामनारभ्याधीताङ्गैः, विज्ञतीनां चातिदिष्टाङ्गैः परिपूर्णानां परमवादिभिः सङ्कोचिताकाङ्क्षाविरहेऽप्युत्थापिताकाङ्क्षावान्वय इत्येवं विधयेऽस्य प्रचारः।

१०९ राजपुरप्रवेशनन्यायः विशिष्टक्रियतया राजपुरप्रवेशे राजपुररक्षकैस्ताडनादिकं क्रियेतेतिभिया श्रोणीभूततया यथा तत्पुरप्रवेश एवं सुहृद्भूततया यत्र कार्यकरणस्य विवक्षा तत्रास्य प्रवृत्तिः।

११०लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिरिति न्यायः सजातीय विजातीयव्यावर्त्तको लक्ष्यवस्तुगतः कश्चिद्धौके वेदे वा प्रसिद्धो धर्मः लक्षणं तेन लक्ष्ये वस्तुनि सम्भावनायां जातायां प्रमातृसदृक्षः प्रमाणेन तदवगच्छति यथा ताभ्यां वस्तुसिद्धिस्तदुपकारयोग्यतया ज्ञातः, तथा च यथा गन्धवत्त्वादिलक्षणेन प्रत्यक्षादिप्रमाणेन च पृथिव्यादिसिद्धिस्तया यत्र विवक्षा तत्रास्य प्रवृत्तिः।

१११ लूतातन्तुन्यायः लूता कीटविशेषः सा यथा स्वदेहात् तन्तून् निर्मिते संहरति च स्वदेहे, यथा च तस्याः स्वतः तन्तुनिर्माणे स्वतः निमित्तकारणत्वरूपकर्तृत्वं, स्वदेहापेक्षया उपादानकारणत्वम् एवं ब्रह्मणः जगतां स्वतः कर्तृत्वं, स्वशक्तिमायाद्वारा उपादानत्वं च एवञ्च जगत् स्वशक्त्या निर्मिते संहरति च इत्येवं विवक्षायामस्य प्रवृत्तिः।

११२ लोष्टजगुडन्यायः लोष्टस्य उपमर्दकः जगुडो यथा, तथा उपमर्द्योपमर्दकयोः साधिर्व्यविवक्षायामस्य प्रवृत्तिः।

११३ लोहचुम्बकन्यायः चुम्बकः मणिभेदः स यथा निष्क्रियोऽपि सन्निधिमात्रेण लौहस्याकर्षकः तत्क्रियाहेतुश्च भवति एवमवङ्मनसगोचरोऽकर्तृरपि पुरुषस्य प्रवृत्त्यादिक्रियाप्रवर्त्तकत्वमित्यादि यत्र विवक्षा तत्रास्य प्रवृत्तिः।

११४ वरगोदोनन्यायः गोदो वधूवरपक्षयोः अन्योन्यवार्त्ता वरस्य वरत्वाभाव गोदो वरगोदो वरवधूबन्धूनामन्योन्यगोदौ तथा ऐकमत्ये सति वरत्वाभरूपमेकं कार्यं यथा निष्पाद्यते एवं यत्र विवक्षा तत्रास्य प्रवृत्तिः।

११५ वरप्रातायं कन्यावरयतीति न्यायः विवक्षायां इतायां यत्र वरस्य घातः सम्पाद्यते तत्र तं नोद्वहेत् एवं विवक्षायामस्य प्रवृत्तिः। तथा च अनिष्टान्तरपातादिसम्भावनायाम् अभीष्टहेतुरपि वस्तु न वरणीयमित्येवं तन्न्याय तात्पर्यम्। अयमेव न्यायः क्वचित् "नहि वरघाताय कन्याप्रदाहवतीति" न्यायतया पठ्यते।

११६ वह्निधूमन्यायः धूमरूपकार्यदर्शनात् यथा कारणरूप वह्नेरनुमानं तथा यत्र कार्यविङ्गेन कारणानुमानं तत्रास्य प्रवृत्तिः।

११७ विल्वखट्वाटनन्यायः अयं न्यायः श्लोकेनाभियुक्तैर्निबद्धो यथा "खट्वाटो दिवसेश्वरस्य किरणैः सन्तापितो मस्तके बाध्यते देशमनातपं विधिवशाद्विल्वस्य मूलङ्गतः। तत्रापास्य महाफलेन पतता भग्नं स्वशब्दं शिरः प्रायोगच्छति यत्र भाग्यरहितस्तत्रापदां भाजनमिति"। तथा च दृष्टान्तरं समीहमानस्याभीष्टप्राप्तिर्दूरतःप्रत्युतानिष्टप्राप्तिरित्येवं यत्र विवक्षा तत्रास्य प्रवृत्तिः।

११८ विशेष्ये विशेषणं तत्रापि च विशेषणमिति न्यायः भूतलं जलवद्घटवदित्यादौ भूतले घटोविशेषणं स च भूतलांशे विशेषणमिति रीत्या यत्र भाषते तत्रास्य प्रवृत्तिः।

११९ विषमक्षणन्यायः विषमक्षणं दिव्यभेदः। तस्य यथा सत्याभिसन्धस्यानिष्टानुत्पादकत्वम् मिथ्याभिसन्धस्यानिष्टहेतुत्वमेवं यत्र विवक्षा तत्रास्य प्रवृत्तिः। तत्प्रकारमाह नारदः "दद्याद्विषं सोपवासो देवब्राह्मणसन्निधौ। धूपोपहारमन्त्रैश्च पूजयित्वा महेश्वरम्। द्विजानां सन्निधावेव दक्षिणाभिमुखे स्थिते। उदङ्मुखः प्राङ्मुखो वा विषं दद्यात् समाहितः" इति। विषञ्च वत्सनाभादि ग्राह्यम् "श्वेतिणो हत्सनाभस्य हिमजस्य विषस्य च" इति पितामहोक्तेः। शुद्धत्वाशुद्धत्वपरीक्षा तु याज्ञवल्क्येनोक्ता "यस्य वेगैर्विना जीर्येच्छ्वित्तं तस्य विनिर्दिशेत्" इति। विषवेगो नाम धातोर्धात्वन्तरप्राप्तिः "धातोर्धात्वन्तरं प्राप्तिर्विषवेग इति स्मृतः" इति वचनात् तेषां लक्षणादि तु विषतन्त्रादवोध्यानि। "पूर्वोक्ते गोतले देये विषं देयं तु देहिनाम्। अनेन योजितं लक्ष्णं पिष्टं त्रिंशद्गुणान्वितम्" इति पितामहोक्तमितं देयम्। तथा च एवं विधे गोले यावत्करताविकाभतण्डुलं तावत्कालः प्रतीक्षणीयः अनन्तरं चिकित्सनीयः "पञ्चतालगतं कालं निर्विकारो यदा भवेत्। तदा भवति संशुद्धस्ततः क्रियात् चिकित्सितम्" इति वचनात् यदा तु सविकारस्तदाऽशुद्ध इत्यर्थात् सिद्धम्।

१२०विषदष्टन्यायः अन्योदष्टस्वावद्दशां विषस्य तथोदितचित्कारणात् सम्यग्वर्द्धित्वा स्वयं हेतुमनर्हः

इति न्यायार्थः एवं स्वार्जितस्यानिष्टस्यापि स्वयं नाशनमयुक्तमिति विवक्षायामस्य प्रवृत्तिः।

१२१ वीचितरङ्गन्यायः यथा वीच्यान्तरङ्गान्तरमुत्पद्यते तेन च पुनस्तरङ्गान्तरमित्येवं यत्र परम्परया उत्पत्तिस्तत्रास्य प्रवृत्तिः "वीचितरङ्गन्यायेन तदुत्पत्तिस्तु कीर्त्तिता" भाषा० "प्रथमशब्देन बहिर्देशावच्छिन्नोऽन्यः शब्दश्चैव चान्यः शब्दो जन्यते तेन चानुत्तद्व्यापकः एवं क्रमेण श्रोतृपर्यन्तो गच्छति" सि०मुक्ता०।

१२२ बीजाङ्कुरन्यायः बीजं विना नाङ्कुरो जायते अङ्कुरं विना च न बीजोत्पत्तिः इत्येवं यत्र परस्परकार्य्यकारणभावस्तत्रायं न्यायः प्रवर्त्तते तथा च बीजजातीयं प्रति अङ्कुरजातीयं, अङ्कुरजातीयं प्रति च बीजजातीयं कारणमतो बीजाङ्कुरप्रवाहोऽनादिः तथा च यद्बीजं प्रति यदङ्कुरस्य कारणत्वं तदङ्कुरं प्रति तद्बीजस्य न कारणत्वमतो नान्योन्याश्रयः एव च प्रामाणिकत्वात् गच्छते यत्र च न प्रामाणिकत्वं तत्र नानादित्वकल्पनेति प्रामाणिकप्रवाहस्यैवानादित्वकल्पना नान्यस्येति सिद्धान्तात् सूचितं च तथा भा०भा० यथा

"तत्कृतधर्माधर्मनिमित्तं सशरीरत्वमिति चेत् न शरीरसम्बन्धस्यासिद्धत्वाद्धर्माधर्मयोरात्मकृतत्वासिद्धेः। शरीरसम्बन्धस्य धर्माधर्मयोश्चतत्कृतत्वस्य चेतरेतराश्रयत्वप्रसङ्गादन्यत्परम्परयैषा अनादित्वकल्पना" भा० "आत्मनः शरीरसम्बन्धे जाते धर्माधर्मोत्पत्तिः तस्यां च सत्यां सम्बन्धकल्पनेत्यन्योन्याश्रयादेकस्यासिद्धा द्वितीयस्यासिद्धिः स्यादिति परिहरति नेत्यादिना नन्वेतद्देहजन्यधर्माधर्मकर्मेण एतद्देहसम्बन्धहेतुत्वे स्यादन्योन्याश्रयः पूर्वदेहकर्मेण एतद्देहसम्बन्धोत्पत्तिः, पूर्वदेहश्च तत्पूर्वदेहकर्मेणः तद्देहसम्बन्धोत्पत्तिः, तत्पूर्वदेहश्च तत्पूर्वदेहजतत्कर्मेण इति बीजाङ्कुरवदनादित्वान्नायं दोष इत्यत आह अन्येति अप्रामाणिकीत्यर्थः। न हि बीजादङ्कुरः ततो बीजान्तरञ्च यथा प्रत्यक्षेण दृश्यते तथात्मनो देहसम्बन्धः पूर्वकर्मजतः प्रत्यक्षः नाप्यस्ति कश्चिदागमः प्रत्युतासङ्गो ह्येवादि श्रुतिः सर्वकर्तृत्वं वारयतीति भावः" आनन्दगिरिश्च।

१२३ इक्षुप्रकम्पनन्यायः यथा इक्षुमारूढः अधःस्थेन केनचिद् नरेण प्रथमशिरं शाखा प्रकम्पयितव्या अन्येन च प्रथमशिरं शाखा प्रकम्पयितव्येति भिन्नभिन्नशाखा प्रकम्पने नियोजितस्तदधःस्थेनैव केनचित् सर्वेषूपप्रकम्पने नियोजितः सन् सर्वैः प्रथमशाखाविशेषप्रकम्पनस्यात्मत्वेन यौगपद्यस्यासम्भवेन क्रमविकल्पोपगमेऽपि सर्वाविरोधासिद्धेः तच्चिकीर्षया सर्वं इक्षुं प्रकम्पयति तत्प्रकम्पनेन हि सर्वाः शाखा अपि प्रकम्पिताः स्युरिति भवति सर्वैरविरोधः एवं यत्र सर्वाविरोधेनाचरणं तत्रास्य प्रवृत्तिः।

१२४ इक्षुकुमारीवाक्यन्यायः अयं न्यायो महाभाष्ये व्याख्यातः "तद्यथा इक्षुकुमारी इन्द्रं याचा वरं वृणीष्वेति सा च वरमृणीत पुत्रा मे बहुक्षीरघृतमोदनं कांस्यपात्र्यां भुञ्जीरन्निति न च तावतस्तां पतिर्भवति कुतः पुत्राः कुतो गावः कुतो धान्यादिकं तत्रानया एकेन वाक्येन पतिः पुत्रा गावो धान्यं हिरण्यञ्चेति सर्वं संगृहीतं भवतीति तथा तत्तदुपासनया मोक्षप्रतिपादकवाक्यैरपि चित्तशमादिश्रवणादिसाधनसहिततत्त्वज्ञानं च यदनेन मोक्षसिद्धिस्तत्सर्वं संगृहीतं भवतीति एवमेकवाक्यैर्यत्र नानार्थप्रतिपादनं तत्रास्य प्रवृत्तिः अयं च वृत्रमारीवरन्यायः इति क्वचित् पठ्यते।

१२५ इद्धिमिष्टवतो मूलमपि विनष्टमिति न्यायः इद्धिर्धनप्रयोगे अधमर्णात् प्राप्यांशभेदलाभः तामिष्टवतः उत्तमर्णस्य अधमर्णदौरात्म्यात् यथा मूलं नश्यति एवं यत्र अभीष्टान्तरसम्पादनाय प्रयतमानस्य मूलं नश्यति तत्रास्य प्रवृत्तिः।

१२६ शङ्खवेलान्यायः वेलाविशेषे शङ्खध्वनिविशेषः यत्र नियमितः तत्र शङ्खध्वनिना वेलाविशेषज्ञानं यथा जायते तथा यत्र विवक्षा तत्रास्य प्रवृत्तिः। यथा चैत्रोत्तरं वैशाखः वैशाखोत्तरं ज्यैष्ठ इति क्रमविशेषज्ञानं शङ्खवेलान्यायादिति म०त० रघु०।

१२७ शतपत्रपत्रभेदननन्यायः यथा सूच्या शतपत्रभेदने क्रमयौगपद्यप्रतीतिर्भ्रमः तथा हि प्रथमसूचे सूचीक्रियया तस्याः पत्रेण संयोगः द्वितीये पत्रावयवयोः क्रिया तृतीये तयोर्विभागः तुरीये चारम्भसंयोगनाशः पञ्चमे पत्रनाश इति प्रतिपत्रभेदने बहुक्षणविलम्बस्य युक्तिसिद्धत्वात् तथा दीर्घशष्कुल्यादिभक्षणादौ रासनादिज्ञानानां यौगपद्यप्रतीतिर्भ्रम इति एवं क्रमेण ज्ञायमानायां यौगपद्यभ्रमो यत्र विवक्षते तत्रास्य प्रवृत्तिः।

१२८ शते पञ्चाग्रदिति न्यायः व्याप्यशतसंख्यायां यत्र व्यापकपञ्चाग्रसंख्या निविष्टा एवं यत्र व्यापके व्याप्यस्य निवेशस्तत्रास्य प्रवृत्तिः।

१२८ शालिसम्पत्तौ कोद्रवाशननयायः शालिः उत्तमधान्यभेदः कोद्रवः अधमधान्यभेदः उत्तमवस्तुसद्भावे यत्राधमवस्तुसेवनं तत्रास्य प्रवृत्तिः ।

१२९ श्यामरक्तनयायः घटादौ श्यामगुणनाशे यथा रक्तगुणोत्पत्तिरेवं यत्र पूर्वगुणनाशे अपरगुणसमावेशस्तत्रास्य प्रवृत्तिः ।

१३१ श्यालगुनकनयायः दृश्यं लौकिकाख्यायिका कश्चित् पुरुषः स्वदेहे वर्त्तमाने गुनि श्यालनामसङ्केतं कृतवान् सन्धा च तद्भार्यां तं भ्रातरं मन्यते स्म च यदा तस्याः कोपोत्पादनाय तं स्वानं प्रति गालीर्ददाति स्म तदा सातिकोपपरीतान्तरीयतयाऽतिदुःखवती बभूवेति तथा च स्वभ्रातरि गुनके भ्रान्तभ्रान्तिमत्या भार्यायाः कोपोत्पादनाय मत्तो गुनकनिन्दा क्रियते तथात्मन्यभिन्नेऽपि तत्तद्विषयावच्छिन्ने परमेश्वरे भेदभ्रमवतां कोपोत्पादनाय शास्त्रेण तत्तद्विषयावच्छिन्नपरमेश्वरनिन्दाव्याजेनेतरविषयावच्छिन्नेश्वरस्तुतिः क्रियते इति केचित् । वस्तुतस्तु यथा श्यालगालिप्रदाने वक्तृतात्पर्याभावेऽपि श्यालैक्येन तात्पर्यभ्रमात्तस्याः कोपोत्पादस्तथा शास्त्रस्य ब्रह्मविष्ण्वाद्यैक्यं तात्पर्याभावेऽपि तेषां स्वतविराडादिनामसाम्येन तात्पर्यभ्रमवतां कोपादिः । इदंतु विशेषो यत्तस्य कृपितप्रियासन्तोषावलोकनाय प्रवृत्तिः शास्त्रस्य तु मारणाय गृह्णीत इति न्यायेन कस्यचिदैक्यबोधनायेति भेदः ।

१३२ सन्दंशपतितनयायः संदंशः । (सँड़ासी) इति यस्य प्रसिद्धिः तेन स्वावयवयोर्मध्यपातिनः पदार्थस्य यथा ग्रहणम् एवं पूर्वोत्तरयोः पदार्थयोर्ग्रहणेन तन्मध्यस्थपदार्थस्य ग्रहणं यत्र विवक्ष्यते तत्रास्य प्रवृत्तिः ।

१३३ सन्निहितादपि व्यवहितं साकाङ्क्षं बलीय इति न्यायः शाब्दबोधयोग्यतया साकाङ्क्षस्य स्वार्थान्वयबोधप्रयोजकतेति नियमेन तस्य चासन्निकृष्टमनादृत्य अन्वययोग्यपदार्थवाचकशब्दस्य [व्यवहितत्वेऽपि आसत्तिं पृकल्प्य यथा काव्यादावन्वयः एवं यत्र साकाङ्क्षकत्वं तत्रैव तस्यान्वय इति यत्र विवक्षा तत्रास्य प्रवृत्तिः ।

१३४ सन्निहिते बुद्धिरन्तरङ्गमिति न्यायः सन्निकृष्टविप्रकृष्टयोर्यत्रोभयोरन्वयसम्भावना तत्र सन्निहितस्यैव आसत्तिबलादन्वयः न विप्रकृष्टस्येत्येवं विवक्षायामस्य प्रवृत्तिः ।

१३५ समूहालम्बनन्यायः यत्र उपस्थितपदार्थानां विशेषणविशेष्यभावेनान्वयासम्भवः तत्र उपस्थितपदार्थानां समूहमालम्ब्यैव बोधः यथा घटः पटश्च इत्यादौ घटपटयोरुभयोरेव विशेष्यता । समूहालम्बनबोधे च विशेष्यतादयम् संसर्गे तु एका विशेष्यतेति भेदः ।

१३६ सम्भवत्येकवाक्यत्वे वाक्यभेदो न चेष्यते इति न्यायः पशुना यजेतेत्यादौ यागे एकत्वविशिष्टपशुकरणकत्वं विधेयं न तु पशौ एकत्वं यागे च पशुकरणकत्वमित्येवं विधेयद्वयम् । एवमन्यत्रापि ।

१३७ सर्वं विधेयमवधारणमिति न्यायः यथा श्वेतः पशुः इत्यादौ श्वेत एवेत्यर्थपरत्वमेवमन्यत्रापि ।

१३८ सर्वं वाक्यं सावधारणमिति न्यायः अवधारणवाचकस्याभावे यत्रावधारणं प्रतीयते तत्रास्य प्रवृत्तिः । एवकारादिसत्त्वे तु तस्यैवावधारणवाचकत्वम् न तत्रास्य प्रवृत्तिः ।

१३९ सर्वापेक्षान्यायः बहुषु निमन्त्रितेषु एकस्मिन् आगतेऽपि यथा न तस्मै भोजनं दीयते अपेक्षते च सर्वान् एवं यत्र सर्वापेक्षा तत्रास्य प्रवृत्तिः ।

१४० सविशेषयोर्हि वर्त्तमानौ विधिनिषेधौ विशेषणमुपसंक्रामतः सति विशेष्ये बाधे इति न्यायः यथा घटाकाशमानय न मठाकाशमित्यानयनविषयौ विधिनिषेधौ विशेष्ये आकाशे बाधाद्घटादिरूपं विशेषणमुपसंक्रामतस्तथा यत्र विवक्षा तत्रास्य प्रचारः । न च निषेधस्य कथं बाधः तस्य प्रसक्तिपूर्वकतया तदभावेऽनुपपत्तेः किं चात्र विधिनिषेधशब्दौ भावाभावमात्रबोधकौ तथा च घटाकाशोऽत्रानीतो न मठाकाशः घटाकाश उत्पन्नः घटाकाशो विनष्ट इत्यादौ भावाभावौ विशेष्ये बाधादिशेषणमुपसंक्रामतस्तथा विवक्षायामस्य प्रवृत्तिः । विशेष्ये बाधादिशेषणे तयोः पर्यवसानमित्यर्थः ।

१४१ साक्षात् प्रकृतौ विकारस्य इति न्यायः यथा घटादीनां मृत्तिकाः स्वप्रकृतौ कपालादावेव न तु परमाणौ तथैवानुभवादित्येवं विकारस्य स्वप्रकृतित्वयो यत्र विवक्ष्यते तत्रास्य प्रवृत्तिः ।

१४२ सावकाशनिरवकाशयोर्मध्ये निरवकाशो बलवान् इति न्यायः सम्भवद्विषयान्तरः सावकाशः अतस्तावभूतो निरवकाशः तेन निरवकाशेन सावकाशो विधिर्बाध्यते यथा मा हिंस्यात् सर्वाभूतानीति निषेधवाक्यं निरवकाशेन श्येनमालभेतेति वाक्येन बाध्यते हिंसाया वैधेतरविषयकत्वसम्भवेन तत्र तस्य सावकाशत्वात् पशुरालम्भनस्य विषयान्तराभावात् न तस्य सङ्कोच एवमन्यत्रापि ।

१४३ सिंहावलोकनन्यायः सिंहो यथा कञ्चिन्मृगं हत्वार्थं

गच्छन्नोऽपि कश्चित् स्वगृहेत् स्यात्तदा तमपि हन्यामिति बुद्धा पृष्ठदेशावलोकनं पुरोदेशावलोकनञ्च करोति हन्ति च दृष्टिपथमागतं स्वगादिकं इति प्रसिद्धम् तथा एकस्य शब्दस्य पुरतः पृष्ठे च यत्र उभयोरन्वयस्तत्रास्य प्रवृत्तिः।

१४४ स्वचीकटाहन्यायः अल्पायासस्साध्या स्वची बह्वायास साध्यः कटाहः यथा तयोर्निर्माणाय प्रयतमानस्य प्रथमं स्वल्पायासस्साध्ये स्वचीनिर्माणे प्रवृत्तिः ततो बह्वायासस्साध्यकटाहनिर्माणे एवं यत्र बह्वायासस्साध्यस्तपेक्ष्य स्वल्पायासस्साध्यस्य निर्देशादि तत्रास्य प्रवृत्तिः।

१४५ स्वल्पशाटिकान्यायः स्वल्पस्य शाटिकोपादानत्वेऽपि यथा भाविन्या शाटिकासंज्ञया निर्देशस्तथा यत्र भाविन्या संज्ञया उपादानस्य कार्यसंज्ञया निर्देशस्तत्रास्य प्रवृत्तिः।

१४६ सोपानारोहणन्यायः यथा प्रासादमारोढुकामः कश्चिद्युगपदारोढुमशक्नुवन् पूर्वां पूर्वां कक्षां परित्यजन्नुत्तरात्तरां च कक्षामारोहन् क्रमेण प्रासादमारोहति तथा स्वस्वरूपभूतमपि ब्रह्म अज्ञानेन व्यवहितमिवापन्नमात्मत्वेन ज्ञातुकामो मुमुक्षुः सकृत् साक्षात्कर्तुमशक्नुवन् पृथ्वादीराभ्यानन्दमयान्तेषूत्तरस्मिन्नुत्तरस्मिन्नात्मत्वबुद्ध्या पूर्वेषु पूर्वेष्वात्मत्वबुद्धित्यागे कृते सति क्रमेण प्रपञ्चोपशमं शिवमद्वैतं चतुर्थमात्मत्वेन जानातीति एवमादिषु तस्य प्रवृत्तिः।

१४७ सोपानावरोहणन्यायः यथा हि येन क्रमेण सोपानमारोहति तद्विपरीतक्रमेण ततोऽवरोहतीति लोके प्रसिद्धं तथा बह्वीशावतरणक्रमेण अद्वैततत्त्वे बुद्धिमारोहयितुमशक्तो भोग्यभोगायतनतदाश्रयचतुर्दशभुवनतदाधारब्रह्मखण्डानि पञ्चीकृतपञ्चभूतमात्राणि न तेभ्योऽतिरिच्यन्ते इति सम्भावयेत् पञ्चीकृतानि। भूतानि सूक्ष्मशरीराणि चापञ्चीकृतभूतेभ्यो नातिरिच्यन्ते इति जानीयात्। एवं सञ्चतन्मात्रात्मिकां पृथिवीं रसतन्मात्रात्मकाप्यात्मत्वेन भावयेत् अपच्च रूपतन्मात्रात्मकतेजोमात्रत्वेन, तच्च तेजः स्पर्शतन्मात्रात्मकं वायुमात्रत्वेन, तच्च वायुं शब्दतन्मात्रात्मकाकाशमात्रत्वेन, तच्चाकाशं अकारस्वरूपमायोपहितमहेश्वरमात्रत्वेन भावयेदिति एवं च यथा पूर्वोक्तक्रमेणावरोहणात् सुखेन भूमिं प्राप्नोति तथैवानेन विपरीतक्रमेण भावनात् सुखेन भूमानमद्वितीयं शिवमाप्नोतीति। प्रलयोऽप्यनेनैव व्युत्क्रमेण भवतीति बोध्यं वाचात् प्रकृतौ विकारलय इति न्यायात् तथा च श्रूयते "जगत् प्रतिष्ठा देवर्षे! पृथिव्यप्सु प्रलीयते ज्योतिष्यापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते। वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते। अव्यक्तं पुरुषे ब्रह्मन्निष्कले संप्रलीयते" इति।

१४८ स्थविरलगुडन्यायः दृढहस्तपातितलगुडस्य यथा यथास्थानं न पतनमेवं लक्ष्यस्थानेऽपतितस्य प्रवृत्तिः।

१४९ स्थूणानिखननन्यायः स्थूणा महत्तमभेदः तस्या निखननदाढार्थसुखोत्पाद्यः पुनःपुनः करास्यां चालयित्वा यथा निखननं क्रियते एवं समर्थितपक्षस्य दाढार्थसदाहरणयुक्त्यादिभिः पुनःपुनर्बलसमर्थनं तत्रास्य प्रवृत्तिः।

१५० स्थूलारुन्धतीन्यायः यथा हि ध्रुवमरुन्धतीञ्च दर्शयतीति विधिवत्तादृशवध्वोरन्धतीदर्शने प्राप्ते सूक्ष्मतमायास्तस्याश्चटिति दर्शयितुमशक्यतया अरुन्धती दृश्यतामित्युक्ते चन्द्रादिपेक्षयाल्पतरत्वेन अतिदूरस्थत्वेन नभस्यलक्ष्यमेव किञ्चिदरुन्धतीत्वेन दूरं दृश्यतामित्यङ्गुलिनिर्देशेन तावच्चन्द्रमरुन्धतीत्वेन वदति ततश्चन्द्रेतरास्तत्समीपस्थास्तारकाः, ततः इतरतारकाभिन्नाः सप्तर्षिसंज्ञिकाः समीपतराः, ततस्तन्मध्यवर्त्तिनीं वसिष्ठरूपां समीपतमां तारकामरुन्धतीयमित्युक्ता तत्पार्श्ववर्त्तिनीमरुन्धतीमेवारुन्धतीत्वेन बोधयति एवं यत्रातिसूक्ष्मदुर्विज्ञेयवस्तुविज्ञानाय क्रमेण तत्समीपसमीपतरसमीपतमं वस्तु शास्त्रेण तत्तयोच्यते तत्र स्थूलारुन्धतीन्यायोऽवतरति। अयमेव केनचिदरुन्धतीप्रदर्शनन्यायत्वेनोदाह्रियते।

१५१ स्वामिभृत्यन्यायः स्वामिन उपकारार्थं प्रवर्त्तमाना भृत्यास्तदुपकारकरणेन सन्तोषितात् स्वामिनः प्रसादलब्धासुखभाजं यथा भवन्ति एवं यत्र परस्परोपकार्योपकारकभावो विवक्ष्यते तत्रास्य प्रवृत्तिः।

सांख्यसूत्रे ३अ० कतिचित् प्रसिद्धदृष्टान्ता उक्तास्तेऽपि न्यायशब्देनानुक्ता अपि प्रसिद्धदृष्टान्तदर्शनप्रसङ्गादत्र ओकारादिक्रममनादृत्य सूत्रक्रमेणैव प्रदर्श्यन्ते यथा "राजपुत्रवत् तत्त्वोपदेशात्" सां०प्र०४।१सू०"राजपुत्रवत्तत्त्वोपदेशाद्विवेको जायत इत्यर्थः। यत्रेयमाख्यायिका कश्चिद्राजपुत्रो मृगयुचौरजनानां पुराच्चिःसारितः शबरेण केनचित् पोषितोऽहं शबर इत्यभिमन्यमान आस्ते तं जीवन्तं ज्ञात्वा कश्चिदमात्यः प्रबोधयति न त्वं शबरो राजपुत्रोऽसीति स यथा झटित्येव चाण्डालाभिमानं त्यक्त्वा तात्त्विकं राजभावमेवावलम्बते राजाहमस्मीति। एवमे-

वादिपुरुषात् परिपूर्णचिन्मात्रैकाभिव्यक्तादुत्पन्नस्तं तं स्वांश इति कारुणिकोपदेशात् प्रकृत्यभिमानं त्यक्त्वा ब्रह्मपुत्रत्वादहमपि ब्रह्मैव न तु तद्विलक्षणः संसारीत्येवं स्वस्वरूपमेवानुभवत इत्यर्थः। तथा च गारुडे "यथैकक्षेममधिना सर्वं क्षेममयं जगत्। तथैव ज्ञातमीशेन ज्ञातेनाप्यखिलं भवेत्। यद्दाविष्टो द्विजः कश्चिच्छूद्रोऽहमिति मन्यते। यद्दनाशात् पुनः स्वीयं ब्राह्मणं मन्यते यथा। मायाविष्टस्तथा जीवो देहोऽहमिति मन्यते। मायानाशात् पुनःस्वीयं रूपं ब्रह्माहमिति मन्यते" भा०। "पिशाचवदन्यार्थोपदेशेऽपि" ४।२सू० "अर्जुनार्थं श्रीकृष्णेन तत्त्वोपदेशे क्रियमाणेऽपि समीपस्थस्य पिशाचस्य यथा विवेकराहित्यं जातमेवमन्येषामपि भवेदित्यर्थः" भा०। "म्लेनवत् सुखदुःखी त्यागवियोगाभ्याम्" ४।९सू० "परित्यक्तो न कर्तव्यो यतो दृष्टार्थां त्यागेन लोकः सुखी वियोगेन च दुःखी भवति म्लेनवदित्यर्थः। म्लेनो हि स्वामिनः केनाप्यपहृत्याभिषादियोज्य दुःखी क्रियते स्वयं चेत् त्यजति तदा दुःखाद्विमुच्यते तदुक्तम् "स्वामिनं क्रूरं जन्मवैलिनोऽन्ये निरामिषाः। तदामिषं परित्यज्य स सुखं समविन्दत" इति मनुनाप्युक्तम् "नदीकूलं यथा वृक्षो वृक्षं वा शकुनिर्यथा। तथा त्वज्ञमिमं देहं जरुद्वाद् त्यजादिमुच्यते" भा०, "अहिनिर्ल्वयनीवत्" ४।६सू० "यथाहिर्जीर्णां त्वचं परित्यजत्यनायासेन हेयबुद्ध्या तथैव सुखदुःखप्रकृतिं वस्तुतोऽपभुक्तां जीर्णां हेयबुद्ध्या त्यजेदित्यर्थः। तदुक्तम् "जीर्णां त्वचमिवोरगः इति" भा०। "छिन्नहस्तवदा" ४।७सू० यथा "छिन्नहस्तं पुनः कोऽपि नादत्ते तद्वैतत् त्यक्तं पुनर्नाभिमन्येतेत्यर्थः" भा०। "असाधनानुचिन्तनं बन्धाय भरतवत्" ४।८सू० "विवेकस्य यद्यन्तरङ्गसाधनं न च चेद्देहोऽपि स्यात् तथापि तदनुचिन्तनं तदनुष्ठाने चित्तस्य तात्पर्यं न कर्तव्यं यतस्तद्बन्धाय भवति विवेकविचारकृतयो भरतवत् यथा भरतस्य राज्यैश्वर्यस्यमपि दीनानाथहरिणशावकस्य पोषणमित्यर्थः। तथा च जडभरतं प्रकृत्य विष्णुपुराणे "चपलं चपले तस्मिन् दूरगं दूरगामिनि। आलोक्येतः समासक्तं तस्मिन् हरिणपोतके" भा०। "बहुभिर्योगे विरोधो रागादिभिः कुमारीशङ्खवत्" ४।९सू० "बहुभिः सङ्गो न कार्यः। बहुभिः सङ्गे हि रागाद्यभिव्यक्त्या कलहो भवति योगभ्रंशकः। यथा कुमारीहस्तशङ्खानामनोऽन्यत्र-

ङ्गेन ऋषत्कारो भवतीत्यर्थः" साङ्ख्यवचनभाष्यम्।

"अनारम्भोऽपि परगेहे सुखी सर्पवत्" ४।१०सू० "सुखी भवेदिति शेषः शेषं सुगमम्। तदुक्तम् "अट्टारम्भो हि दुःखाय न सुखाय कथञ्चन। सर्पः परकृतं वेश्म प्रविश्य सुखमेधते" भा०।

"बहुशास्त्रगुरूपासनेऽपि सारादानं षट्पदवत्" ४।११सू० "कर्तव्यमिति शेषः। तदुक्तं "अणुभ्यश्च महद्भ्यश्च शास्त्रेभ्यः कुशलो नरः। सर्वतः सारमादद्यात् पुष्पेभ्य इव षट्पदः"। "सारभूतमुपासीत ज्ञानं यत् स्वार्थसाधकम्। अज्ञानानां बहुता यैषा योगविघ्नकरी हि सा। इदं ज्ञेयमिदं ज्ञेयमिति यस्तृषितस्वरेत्। अयौ कल्पसहस्रेषु नैव ज्ञानमवाप्नुयात्" मार्क॰पु॰ भा०।

"इषुकारवदेकचित्तस्य समाधिहानिः" ४।१३सू० "यथा शरनिर्माणायैकचित्तस्येषुकारस्य पार्श्वे राज्ञो गमनेनापि न क्षुब्धान्तरनिरोधो दीयत एवमेकार्थचित्तस्य सर्वथापि न समाधिहानिर्बहिर्व्यापारनिरोधश्चेति भवति। ततश्च विषयान्तरसञ्चाराभावे ध्येयसाक्षात्कारोऽप्यवश्यं भवतीत्येवमर्थतां कुर्यादित्यर्थः। तदुक्तं "तदैवमात्मनावस्थचित्तो न वेद किञ्चिद् बहिरन्तरं वा। यथेषुकारो नृपतिं व्रजन्तमिषौ गतात्मा न ददर्श पार्श्वे" भा०।

"ऋतनियमकृतादानवत्" ४।१५सू० "यः शास्त्रेषु ऋतो योगिनां नियमस्तत्कृते ज्ञाननिष्पत्त्याक्षोऽर्थो न भवति लोकवत्। यथा लोके भैषज्यादौ विहितपथ्यादीनां कृते तत्सिद्धिर्न भवति तद्वदित्यर्थः। अथवा ज्ञानरक्षार्थं वा कृते तु न ज्ञानप्रतिबन्धः। "अपेतव्रतकर्मा तु केवलं ब्रह्मणि स्थितः। ब्रह्मभूतवरत् लोके ब्रह्मचारीति कथ्यते" भा०। "तद्विहारवेऽपि भेकोवत्" ४।१६सू० "सुगमम्। भेक्याख्येयमाख्यायिका कश्चिद्राजा मृगयां गतो विपिने सुन्दरीं कन्यां ददर्श। सा च राज्ञा भार्याभावाय प्रार्थिता नियमं चक्रे यदा मद्यं त्वया जलं प्रदर्श्यते तदा मया गन्तव्यमिति। एकदा तु क्रीडया परिधाना राजानं पप्रच्छ कुत्र जलमिति। राजापि समयं विस्मृत्य जलमदर्शयत्। ततः सा भेकराजदुहिता कामरूपिणी भेकी भूत्वा जलं विवेश ततश्च राजा जात्यादिभिरनिष्टापि न त्यामविन्ददिति" भा०।

"नोपदेशश्रवणेऽपि जातत्वता परामर्शादते विरोचनवत्" ४।१७सू० परामर्शो गुरुवाक्यतात्पर्यनिर्णयस्

विचारस्तं विरोपदेशवाक्यत्वेऽपि तत्त्वज्ञाननियमो नास्ति प्रजापतेरुपदेशत्ववेऽपीन्द्रविरोचनयोर्मध्ये विरोचनस्य परामर्शाभावेन भ्रान्तत्वश्रुतेः (छा०उ०)। अतो गुरूपदिष्टस्य मननमपि कार्यमिति। इयते चेदानीमध्येकस्यैव तत्त्वमस्युपदेशस्य नानारूपैरर्थैः समावना। अखण्डत्वमवैधर्म्यं लक्षणभेदोऽविभागश्चेति" भा०।

"न कालनियमो वामदेवत्" ४।२० सू० "ऐहिकसाधनादेव भवतीत्यादिर्ज्ञानोदये कालनियमो नास्ति वामदेववत्। वामदेवस्य जन्मान्तरीयसाधनेभ्यो गर्भेऽपि यथा ज्ञानोदयस्तथात्रापीत्यर्थः। तथा च श्रुतिः "तद्धैतत् पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्चेति तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदं भवतीत्यादिरिति"। अहं मनुरभवमित्यादिकमवैधर्म्यं लक्षणभेदपरं सर्वव्यापकताख्यब्रह्मतापरं वा। "सर्वं समाप्नोषि ततोऽसि सर्वः" इत्यादि स्मरणात् भा०।

"विरक्तस्यैव हेयहानरूपादेयोपादानं हंसक्षीरवत्" ४।२२ सू० "विरक्तस्यैव हेयानां प्रकृत्यादीनां हानमुपादेयस्य ब्रह्मण उपादानं भवति। यथा दुग्धजलयोरैक्यभावापन्नयोर्मध्येऽसारजलत्यागेन सारभूत क्षीरोपादानं हंसस्यैव न तु काकादेरित्यर्थः" भा०।

"न कामचारित्वं रागोपहते शुकवत्" ४।२४ सू० "रागोपहते पुरुषे कामतः सङ्गो न कर्त्तव्यः शुकवत्। यथा शुकपक्षी प्रकटरूप इति ज्ञात्वा कामचारं न करोति रूपस्योपैवन्धनभयात् तद्वदित्यर्थः" भा०।

"शुचियोगाद्बकः शुकवत्" ४।२६ सू० "तेषां सङ्गे तु शुचियोगात् तदीयरागादियोगाद्बकः स्यात् शुकवदेव। यथा शुकपक्षी व्याधस्य शुचैरज्जुभिर्बद्धो भवति तद्वदित्यर्थः। अथ वा शुचितया शुचयोपैवन्धो भवति शुकवदित्यर्थः। तथैवोक्तं सौभरिणा "स मे समाधिर्जलवासमित्रमत्स्यस्य सङ्गात् सहसैव नष्टः। परिग्रहः सङ्गकृतो मयायं परिग्रहोत्थाश्च महाविघित्साः" भा०।

"न भोगाद्रागशान्तिर्लिवत्" सां० ४।२७ सू० "यथा ऋतेः सौभरेर्भोगाच्च रागशान्तिरभूत् एवमन्येषामपि न भवतीत्यर्थः। तदुक्तं सौभरिणैव "या स्मृतो नैव मनोरथानामनोऽस्ति वित्तातिदं मयाद्य। मनोरथासक्तिपरस्य चित्तं नो जायते वै परमार्थसङ्गि" भा०।

"न मलिनचेतस्युपदेशबीजप्ररोहोऽजवत्" ४।२९ सू० "उपदेशरूपं यज्ञानवृक्षस्य बीजं तस्याङ्कुरोऽपि रागादिमलिनचित्ते नोत्पद्यते अजवत्। यथाऽजनाम्नि भृत्ये भार्यांशोकमलिनचित्ते वशिष्ठेनोक्तस्याप्युपदेशबीजस्य नाङ्कुर उत्पन्न इत्यर्थः" भा०।

"नाभासमात्रमपि मलिनदर्पणवत्" ४।३० सू० "आपातज्ञानमपि मलिनचेतस्युपदेशान्न जायते विषयान्तरसञ्चारादिभिः प्रतिबन्धात् यथा मलैः प्रतिबन्धात् मलिनदर्पणेऽर्थो न प्रतिबिम्बति तद्वदित्यर्थः" भा०।

"न तत्सिद्धावपि तद्रूपता पङ्गुवत्" ४।३१ सू० तस्मादुपदेशाज्ज्ञातस्यापि ज्ञानस्योपादेयात्मरूपता न भवति सामर्थ्यज्ञानबोधात्। पङ्गुवत्। यथा बीजस्योत्तमत्वेऽपि पङ्गुदोषादीजातरूपता पङ्गुस्य न भवति तद्वदित्यर्थः। पङ्गुस्थानीयं शिष्यचित्तम्" भा०।

न्यायपथ पु० न्यायोपेतः पन्थाः मा०त० ष० स०। मीमांसायाम् [ब०व०। २तद्वति त्रि०।

न्यायवृत्त न० न्यायोपेतं वृत्तं मा०त०। १शास्त्रविहिताचारे

न्यायसारिणी स्त्री न्यायं सरति सृ–णिनि। युक्तिपूर्वककर्मानुसारिण्याम् रीतौ वृद्धग्रां टिका०।

न्याय्य त्रि०न्यायादागतः न्यायादनपेतो न्याये भवः वा दिगा० यत् वा। १न्यायसिद्धे २न्यायोपेते यौक्तिके ३न्यायभवे च "सर्वेषामपि तं न्याय्यं दातुं शक्त्या मनीषिणः"। "न्याय्यं वः शिशुरुक्तवान्" मनुः "इदमुत्तरं न्याय्यमिति बुद्धा विलक्षणः" कुमा०। वर्ण्यादि०आद्युदात्तत्वात्।

न्यास पु० नि+अस–कर्मणि, भावे वा घञ्। १स्वाधद्रव्ये (गच्छित) अमरः निःक्षेपणऽस्त्रे ४०५२पृ० तद्वत्त्वादि द्रव्यम्। "राज्ञं न्यासमिवाभुनक्"रघुः २अर्पणे ३विन्यासे च हेमच०। "अवत्तवत्तिरङ्गन्यासैः कृताङ्गुलितर्जनैः" भा०द०। "नमयन् सारसुरभिः पादन्यासैर्वसुन्धराम्" कुमा०। ४त्यागे "काम्यानां कर्मणां न्यासं सन्न्यासं कवयो विदुः" गीता। "वक्ष्ये विविदिषान्यासं विद्वन्न्यासं च भेदतः। ज्ञेऽत्र विदेहमुक्ते च जीवन्मुक्ते च तौ क्रमात्" जीवन्मुक्तिविवेकः। ५क्षरदत्तग्रन्थोक्ते पदमञ्जर्यपरपर्याये व्याकरणग्रन्थभेदे "अतत्स्वरूपदन्यासा सदृष्टिः सन्निबन्धना। शब्दविद्येव नो भाति राजनीतिरपस्मया"माघ०"तन्त्रपुराणादिमते पूजाजपादेः प्राक्कर्त्तव्ये देहावयवभेदेषु वर्णाद्युच्चारणरूपे ६व्यापारभेदे "अङ्गन्यासकरन्यासौ वीजन्यासं तथैव च" षट्कमोक्तम्। सामान्यपूजाङ्गन्यासास्तु "आदाद्यग्रादिकन्यासः करशुद्धि स्ततःपरम्। अङ्गजीव्यापकन्यासौ हृदादिन्यास एव च"

तन्त्रसा०। तत्कालस्तु "प्रातःकालेऽथ वा पूजासमये होमकर्मणि। जपकाले समस्ते वा विनियोगः पृथक् पृथक्। पूजाकाले समस्तं वा कुर्यात् साधकसत्तमः" इति योगिनीहृदयम्। यामले "भूतशुद्धिविधिन्यासौ विना यस्तु प्रपूजयेत्। विपरीतफलं दद्यादभक्त्या पूजनं यथा"। सामान्यन्यासेऽङ्गुलिनियमो गौतमीये "मनसा विन्यसेन्मन्त्रान् पुष्पेष्वेवाथ वा क्षणे!। अङ्गुष्ठानामिकाभ्यां वा अन्यथा विफलं भवेत्"। यामले "हृदयं मध्यमानामा तर्जनीभिः, स्मृतं शिरः। मध्यमातर्जनीभ्यां, स्यादङ्गुष्ठेन शिखा स्मृता। दशभिः कवचं प्रोक्तं, तिसृभिर्नेत्रमीरितम्। प्रोक्ताङ्गुलीभ्यामस्त्रं स्यादङ्गुष्ठैरितरं मतं" इति। तिसृभिस्तर्जनीमध्यमानामाभिः। "तर्जनीमध्यमानामाः प्रोक्ता नेत्रत्वकस्मात्। यदि नेत्रद्वयं प्रोक्तं तदा तर्जनिमध्यमे" इति भट्टधृतवचनात् "हृदयादिषु विन्यसेदङ्गमन्त्रांस्ततः सुधीः। हृदयाय नमः पूर्वं शिरसे वह्निवल्लभा (स्वाहा)। शिखायै वषडित्युक्तं कवचाय हुमीरितम्। नेत्रत्रयाय वौषट् स्यादस्त्राय फडिति क्रमात्। षडङ्गमन्त्रानित्थं तान् षडङ्गेषु नियोजयेत्। पश्चाङ्गानि मनोर्यत्र तत्र नेत्रमनुं त्यजेत्" इति शारदातिः। वैष्णवे तु "अनङ्गुष्ठा ऋजवो ह्रस्वशाखा भवेन्मुद्रा हृदये शीर्षके च। अधोऽङ्गुष्ठा खलु तर्जनिः शिखायां करद्वयाङ्गुष्ठयोर्वर्मणि स्युः। नाराचसञ्ज्ञा धृत बाहुयुग्मकाङ्गुष्ठतर्जन्युदितो ध्वनिस्तु। विन्यस्तिभक्ताः कथितास्तु मुद्रा यत्राधिपो तर्जनिमध्यमे च। अङ्गुष्ठीनस्य मन्त्रस्य खेनैवाङ्गानि कल्पयेत्" तन्त्रसारः।

न्यासिक त्रि० न्यासेन चरति ठक्। न्यासकारिणि स्त्रियां स्त्रित्वात् ङीष्।

न्यासिन् त्रि०नि+अस-णिनि। १न्यासिनि २सन्न्यासिनि च

न्यु(न्यू)ङ्ख नि+उङ्ख-घञ् पृषो०वा दीर्घः। १ऋगभेदे गीतिषु उदात्तानुदात्तस्वरितेषु षोडशसु ओकारेषु तत्र त्रयः श्रुताः त्रयोदश ह्रस्वौकारा ह्रस्वेषु षोडशसु ओकाराः तत्प्रकारादिः आह० श्रौ० ७।११ प्रथमादिस्तत्रोक्तो यथा "चतुर्थेऽहनि यत् प्रातरनुवाकं प्रतिपद्यर्चोद्यौर्न्युङ्खः" १सू० "पार्ष्टिके चतुर्थेऽहनि यत् प्रातरनुवाकं तस्मादाद्या ऋचोयावर्धर्चयोरादौ तयोर्न्युङ्खो भवति। अक्षरधिकारे पुनरुक्तीतिवचनम् अक्षर्धर्चोक्तं न्युङ्ख इति प्रदर्शनार्थम्। तेनात्र यान्युङ्खभाञ्ज ऋचस्तासामन्यत्र वचनादते न्युङ्खो न भवति" नारा०ड० "द्वितीयं स्वरमोकारविमात्रमुदात्तन्निः" २सू० "इदानीं न्युङ्खस्य लक्षणमुच्यते तयोरर्धर्चयोर्यो द्वितीयः स्वरः संहितायास्यावाल्लोकारं विमात्रं कृत्वा निः ब्रूयात् पक्षोऽर्धर्चयः कृष्ण इति सर्वत्र संज्ञनविधानात्। संहितावस्यामेव मन्त्राणां संज्ञनमङ्गं भवति। अत्र संहितावस्यामेवमित्युक्तम्। पूर्वखण्डेऽर्धर्चाद्योरित्याद्ययोरचरोन्युङ्खो विहितः इह तु द्वितीयबोर्विधीयते कथमनयोः सम्बन्ध इति पूर्वखण्डस्यायमभिप्रायः आङ्गषोक्तो यो न्युङ्खविधिरेकाचरद्व्यचरत्र्यचरचतुरचरैरिति योऽयमर्धर्चाद्योरित्यनेन सूचितो भवति। यस्तु खलु यज्ञखण्डे सिद्धान्तितः तस्मात् द्व्यचरेणैव न्युङ्खयेत् इति तमेव पक्षमङ्गीकृत्येदानीं न्युङ्खो विधीयते द्वितीयं स्वरम् इत्यादिना" नारा०ड०। "तस्य तस्य चोपरिष्टादपरिमितान् पञ्च पञ्चौंकारानुदात्तान्" २सू० "तस्य तस्योकारस्योपरिष्टादर्धौंकारानुदात्तानपरिमितान् त्रीन् चतुरः प्रश्लिष्य ब्रूयात्। यत्र सङ्ख्याविशेषनिर्दिष्टस्यापरिमितशब्दं ब्रवीति तत्र निर्दिष्टसङ्ख्याविशेषादुपरिष्टादपरिमितशब्दार्थो ग्रहीतव्यः। यत्र पुनरुपरिष्टात् संख्याविशेषेण निर्दिष्टत्वात् प्रागेव संख्याविशेषात् बहुत्वे सत्यवधिवता ग्रहीतव्येति सिद्धम्। अर्धर्चाद्यो ओकारश्चार्धौंकार इति कर्मधारयः" नारा०ड०। "उत्तमस्य तु त्रीन्" ३सू० "उत्तमस्योकारस्योपरिष्टात् त्रीनेवार्धौंकारान् ब्रूयात्" नारा०ड०। "पूर्वमक्षरं निहन्यते न्युङ्खमाने" ४सू० "निहन्यत इत्यनुदात्तीक्रियत इत्यर्थः। न्युङ्खाधिकारे पुनर्न्युङ्खमान इति वचनं प्रथमे द्वितीये तृतीये चतुर्थे वाक्षरे न्युङ्खमानेऽपि तस्मात् पूर्वमक्षरं न निहन्यत इत्येवमर्थम्" नारा०ड०। "तदपि निदर्शनायोदाहरिष्यामः" ६सू० "उत्तमस्यापि न्युङ्खस्यार्धौंकारस्यलौकिकत्वादन्यदर्थवं जातीयकं सन्देहं व्यवर्तयितुं निदर्शनं क्रियते" नारा०ड०। "आपोऽउउउउउओऽउउउउउओऽउउउउ स्वः स्वपस्व मतीः सरस्वती तद्वृणते। वयोधोऽमापोऽ" ७सू० "आपोऽश्रुतः रायोऽश्रुतः वयोधोऽ मापोऽश्रुत इत्येवं न्युङ्खस्य पुनरावृत्तिप्रदर्शनं मन्त्रावृत्ति न्युङ्खप्रापणार्थम्। अयमेव पाठः अवच्छिन्नसम्प्रदायागतः। यस्तु पुनःसंहितानुरोधेन पाठः स प्रमादकृतत्वात् त्यक्तव्यः" नारा०ड०। अत्र श्रुतस्य ओकारत्वस्य उपरिष्टात् पञ्च पञ्च च अर्धौंकारा एव बोध्या उकाराकारेषु ये दर्शितास्ते अर्धौं-

कारा इति बोध्यम् "यत्तत्कर्मण्यजपन्यूङ्कसमाहु" पा० "यत्तक्रियायां मन्त्रएकश्रुतिः स्याच्छपादीन्वर्जयित्वा "अग्निर्मूर्द्धादिवः ककुत्" । यत्नेति किम् ? स्वाध्यायकाले तैस्सर्वमेव । अजमेति किम् ? समाम्ने ! वर्त्तो विहवेष्वस्तु । जपोनाम उपांशुप्रयोगः यथा जले निमग्नस्य । न्यङ्कानाम षोडश ओकाराः गीतिषु समाख्याः" सि०कौ० कात्या०श्रौ० भाष्यादौ द्वादश ओकारा दीर्घसंध्या न्यङ्कुतया उक्ता यथा

"एकश्रुतिर्दूराच्छ्रवणौ यत्तत्कर्मणि मन्त्रब्राह्मणसामजपन्यङ्कुयाजमानवर्जम्" कात्या० श्रौ० १।८।१९ "एकश्रुतिर्दूराच्छ्रवणौ विज्ञायतुवर्त्तमाने यत्तत्कर्मणि मन्त्राब्राह्मणेकश्रुतिर्भवति न केनचित् स्वरेण प्रयोगः किं सर्वत्र मन्त्रब्राह्मणसामजपन्यङ्कुयाजमानवर्जम् । एतानि वर्जयित्वा अन्येषु मन्त्रेष्वेकश्रुतिर्भवति । मन्त्रब्राह्मणोऽग्निरिन्द्रागच्छेत्यादिर्निगदः मन्त्रब्राह्मणा सामानि बृहद्रथन्तरादीनि गीयमानानि । जपाश्च धूरसि ब्रह्मन्ब्राह्मणसि मयिदिक्षाद्या जपतीति शब्देन चोदिता मन्त्राः । न्यङ्कास्तु पृष्ठे षडहे स्तोत्रभेदे प्रसिद्धा ओकारा द्वादश पिबा सोममिन्द्र मन्दतु त्वा यं ते ओ ओ ओ३ ओ ओ ओ३ ओ ओ ओ ओ३स्तुषाव । इत्यश्वादिरित्याद्यः । यजमानं च सर्वं विष्णुक्रमादिकम् । तत्सम्बन्धिनो ये मन्त्रादिषि विष्णुरित्याद्याः अथ वा यजमानस्थे याजमानाः एषु मन्त्रब्राह्मणादिषु याजमानान्तेषु यथा प्राप्तएव संहिता स्वरो भवति नैकश्रुतिः" कर्कः । अनयोः पक्षयोः वेदभेदादविरोधः । २अतिप्रये ३मनोहरे त्रि० ।

न्यङ्क न० नि+अञ्च–अच् । १कर्मरङ्गफले २दर्भमयरज्जुवि पु० ३अधोमुखे त्रि० मेदि० । "प्रथमपात्रे संस्रवान् समवनीय पात्रं न्यङ्कं कुर्यात् पितृभ्यः स्थानमसीति"गोभि० न्यङ्कमधोमुखम् "पितृभ्यः स्थानमीति न्यङ्कं पात्रं करोत्यधः" याज्ञ० । "पितृपात्रे निधायाथ न्यङ्कमुत्तरतोन्यसेत्" मत्स्यपु० । "न्यङ्कानि च विमानानि" हरिवं० ३२अ० । ४कृशे ५मुम्माले च पु० हेमच० वक्रीकृतपृष्ठाधोमुखे मानुषे ६कृशे त्रि० अमरः ।

न्यङ्कुखड्ग पु० न्यङ्कोः कृष्ण इव खड्गः (तरवार) इति प्रसिद्धे खड्गभेदे त्रि० । [च अमरः ।

न्यून त्रि० न्यूनयति नि+ऊन–परिमाणे अच् । १ऊने २गर्हो

न्यूनपञ्चाग्रद्राव पु० न्यूनपञ्चाग्रतः ऊनपञ्चाग्रतो वा यूनां विकारो यत् । वातुले (पागल) "उद्वेरितेन्द्रियो धातुर्वीक्षाऽच्चक्षे यदाकुलाम् । तदैव न्यूनपञ्चाग्द्राव्णो जातः शरीरतः" कालिपु० २अ० ।

न्योकस् त्रि० नियतमोको यस्य । नियतस्थानयुक्ते "शतेजसे न्योकसे" ऋ०१।६।१०"न्योकसे नियतस्थानाय इन्द्राय"भा०

न्योचनी स्त्री नि+उचतिः सेवायां निघ०ल्यु गौरा०ङीष् । दास्याम् "रैभ्याश्वीदनुदेयी नारांगसी न्योचनी" ऋ० १०। ८५।६ "न्योचनी वधूशुच्यूर्णां दीयमाना दासी"भा०।

न्योजस् त्रि० नि+ओजस–असि बहोपे सुधः । आर्ज्जवशुन्ये कुटिले ।

नृस्थिमालिन् त्रि० नृरस्थिमाला अस्यास्य इनि । नरास्थिमालाभूषणे स्त्रियां ङीप् । २शिवे पु० त्रिका० शुभम्

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यसङ्कलिते वाचस्पत्ये नकारादिशब्दार्थसङ्कलनम् ।

इतः परं यन्त्रसंक्षेपार्थवा पकारादिशब्दावधि फकारादिशब्दानां निरुदाहरणा अर्था सङ्कलयितव्याः । परिशिष्टे खण्डे च उदाहरणानि वक्ष्यन्ति ।

परिशिष्टम् ।

१८२६पृष्ठस्थनकुलीशब्दार्थपरिशिष्टम् । १शिवे तत्प्रणीते पाशुपतशास्त्रं तन्मतञ्च सर्वदर्शनसंग्रहे दर्शितं यथा "तदेतदैश्वर्यमतं दासत्वादिपदवेदनीयं परतन्त्रत्वदुःखावहत्वान्न दुःखं जिहीर्षुणाभीप्सितात्मलाभरोचमानाः पारमैश्वर्यं कामयमानाः पराभिमता सक्ता न भवन्ति परतन्त्रत्वात् पारमैश्वर्यरहितत्वादक्षादिवत् सक्तात्मानश्च परमेश्वरगुणसम्बन्धिनः पुरुषत्वे सति समस्तदुःखबीजविधुरत्वात् परमेश्वरवदित्याद्यनुमानं प्रमाणं प्रतिपद्यमानाः केचन माहेश्वराः परमपुरुषार्थसाधनपञ्चार्थप्रपञ्चनपरं पाशुपतशास्त्रमाश्रयन्ते । तत्रेदमादिमं सूत्रम् "अथातः पशुपतेः पाशुपतव्रतविधिं व्याख्यास्यामः"इति । अथार्थः अनाद्यनन्तः पूर्वप्रकृतापेक्षः । पूर्वप्रकृतञ्च गुरुं प्रति शिष्यस्य प्रश्नः । गुरुस्वरूपं गणकारितायां निरूपितम् "पञ्चकाक्षरविद्येशो गणवैकविकाल्पकः । वेत्ता नवगणस्यास्य संस्कर्त्ता गुरुरुच्यते" इति । "लाभालाभा उपायाश्च देशावस्थाविशुद्धयः । दीक्षाकारित्वलाभश्च षडक्षीणि इत्तयः" इति । तिस्रो इत्तय इति प्रयोक्तव्ये लीणि इत्तय इति छान्दसः प्रयोगः । तत्र विधी-

यमानसुपावफलं लाभः ज्ञानतपोदेवनित्यत्वस्थितिशुद्धि-भेदात् पञ्चविधः। तदाह हरदत्ताचार्यः "ज्ञानं तपोऽथ नित्यत्वं स्थितिः शुद्धिश्च पञ्चमीति"। चात्माश्रितो दुष्टभावो मलः स मिथ्याज्ञानादिभेदात् पञ्चविधः। तदाह सएव "मिथ्याज्ञानमधर्मश्च सक्लिष्टैतच्चतुष्टितया। पशुत्वमूलं पञ्चैते तन्त्रे क्वेवा विविक्षितः" इति। साधकस्य शुद्धिहेतुरुपायः वासचर्यादिभेदात् पञ्चविधः। तदाह "वासचर्या जपो ध्यानं सदा रुद्रस्तुतिस्तथा। प्रतिपत्तिश्च लाभानामुपायाः पञ्च निश्चिताः"। येनार्थानुसन्धानपूर्वकं ज्ञानतपोऽद्वौ प्राप्नोति स देशो गुरुजनादिः यदाह "गुरुर्जनो गुहा देशः श्मशानं रुद्र एव चेति" या लाभप्राप्तेरेकतमादौ यदवस्थानं सावस्था व्यक्तादिविशेषेण विशिष्टा, तदुक्तम् "व्यक्ताव्यक्तजपा दानं निशा चैव हि पञ्चमीति"। मिथ्याज्ञानादीनामत्यन्तव्यपोहो विशुद्धिः सा प्रतियोगिभेदात् पञ्चविधा। तदुक्तम् "अज्ञानस्याथसक्तस्य हानिः सङ्कल्पस्य च। च्युतिर्हानिः पशुत्वस्य शुद्धिः पञ्चविधा स्मृतेति" दीक्षाकारिपञ्चकं चोक्तम् "द्रव्यं कालः क्रिया मूर्तिर्गुरुश्चैव हि पञ्चमः" इति बलपञ्चकञ्च "गुरुभक्तिः प्रसादश्च मतेर्ह्लजयस्तथा। धर्मश्चैवाप्रमादश्च बलं पञ्चविधं स्मृतमिति" पञ्चमलक्षूकरणार्थं मानामानविरोधिनोऽर्जनोपाया इत्तयः भैक्षोत्पुटयाचनाभिधा इति। शेषमशेषमाकर एवावगन्तव्यम्। अत्राद्यशब्देन दुःखात्मनः प्रतिपादनम् आध्यात्मिकादिदुःखव्यपोहप्राधान्यात्तस्य पशुशब्देन कार्यस्य, परतन्त्रत्ववचनत्वात्तस्य, पतिशब्देन कारणस्य, ईश्वरः पतिरीशितेति जगत्कारणीभूतेश्वरवचनत्वात्तस्य। योगविधी तु प्रसिद्धौ। तत्र दुःखात्मनो द्विविधः अनात्मकः सात्मकश्चेति तत्रानात्मकः सर्वदुःखानामत्यन्तोच्छेदरूपः। सात्मकस्तु ह्यक्रियाशक्तिलक्षणमैश्वर्यम्। तत्र ह्यक्शक्तिरेकापि विषयभेदात् पञ्चविधा उपचर्यते" दर्शनं श्रवणं मननं विज्ञानं सर्वज्ञत्वञ्चेति। तत्र श्रुत्यवच्छिन्नविप्रकृष्टाशेषशब्दार्थादिविषयं ज्ञानं दर्शनम्। अशेषशब्दविषयं सिद्धिज्ञानं श्रवणम्। समस्तचिन्ताविषयं सिद्धिज्ञानं मननम्। निरवशेषशास्त्रविषयं यत्नतोऽर्थतश्च सिद्धिज्ञानं विज्ञानम्। उक्तलक्षणेषूत्तरोत्तरेषु समासविस्तरविभागविशेषतश्च तत्त्वज्ञानप्रसादोदितसिद्धिज्ञानं सर्वज्ञत्वम् इत्येषा धीशक्तिः। क्रियाशक्तिरेकापि त्रिविधोपचर्यते मनोजवित्वं कामरूपित्वं विकरणधर्मित्वञ्चेति। तत्र निरतिशयशीघ्रकारित्वं मनोजवित्वम्। कर्मादिनिरपेक्षस्य स्वेच्छयैवानन्यलक्षणविचित्रशरीरकरणाधिष्ठातृत्वं कामरूपित्वम्। उपसंहृतकरणस्यापि निरतिशयैश्वर्यसम्बन्धित्वं विकरणधर्मित्वमित्येषा क्रियाशक्तिः। यदस्तन्त्रं सर्वं कार्यं त्रिविधं विद्या कला पशुश्चेति। तत्र पशुगुणो विद्या, सापि द्विविधा बोधाबोधस्वभावभेदात् बोधस्वभावा विवेकाविवेकप्रवृत्तिभेदात् द्विविधा तत्र या विवेकप्रवृत्तिः प्रमाणमात्रव्यङ्ग्या चित्तमित्युच्यते। चित्तेन हि सर्वः प्राणी बाह्यार्थात्मप्रकाशानुसृहीतं सामान्येन विवेचितमविवेचितञ्चार्थं चेतयते इति। पञ्चधर्मावधर्मिका पुनरबोधात्मिका विद्या स्वयमज्ञं येनोच्यते। चेतनपरतन्त्रत्वे सत्यचेतना कला सापि द्विविधा कार्याख्या कारणाख्या चेति। तत्र कार्याख्या दशविधा पृथिव्यादीनि पञ्च तत्त्वानि रूपादयः पञ्च गुणाश्चेति। कारणाख्या त्रयोदशविधा ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकम् अध्यवसायाभिमानसङ्कल्पाभिवृत्तिभेदात् बुद्ध्यहङ्कारमनोलक्षणमन्तःकरणत्रयञ्चेति। पशुत्वसम्बन्धी पशुः सोऽपि द्विविधः साञ्जनो निरञ्जनश्चेति। तत्र साञ्जनः शरीरेन्द्रियसम्बन्धी निरञ्जनस्तु पञ्चार्थभाष्यदीपिकादौ द्रष्टव्यः। समस्तवृत्तिसंहारानुग्रहकारि कारणं तस्यैकस्यापि गुणकर्मभेदापेक्षया विभाग उक्तः पतिः साद्य इत्यादिना। तत्र पतित्वं निरतिशयवृत्क्रियाशक्तिमत्त्वं तेनैश्वर्येण च नित्यसम्बन्धित्वम्। साद्यत्वमनाद्यनुत्तरैश्वर्यसम्बन्धित्वम् इत्यादर्शकारादिभिस्तीर्थकरैर्निरूपितम्। चित्तद्वारेणात्मेश्वरसम्बन्धो योगः स च द्विविधः क्रियालक्षणः क्रियोपरमलक्षणश्चेति तत्र जपध्यानादिरूपः क्रियालक्षणः क्रियोपरमलक्षणस्तु संविदुत्था संस्थितः। धर्मार्थसाधकव्यापारो विधिः। स च द्विविधः प्रधानभूतो गुणभूतश्च तत्र प्रधानभूतः साक्षाद्धर्महेतुः चर्या। सा द्विविधा व्रतं द्वाराणि चेति। तत्र भक्ष्यज्ञानशब्दोपहारजपप्रदक्षिणादि व्रतम्। तदुक्तम् भगवता नकुलीशेन "भक्ष्यज्ञानं क्रियाध्यानं स्तावोऽस्य भक्षणं जपो"तेति"। शब्दोपहारो नियमः स च षड्विधः। तदुक्तम् सूत्रकारेण "हसितगीतनृत्यहुडुक्कारनमस्कारजयषड्विधोपहारेण उपतिष्ठेतेति"। तत्र हसितं नाम कण्ठोष्ठपुटविस्फूर्जनपुरःसरमट्टहासेत्यट्टहासः। गीतं गान्ध-

वैशाख्यसमवायानुसारेण महेश्वरसम्बन्धिगुणधर्मादिनिमित्तानां चिन्तनम्। नाट्यमपि नाट्यशास्त्रानुसारेण हस्तपादादीनामवक्षेपणादिकमङ्गप्रत्यङ्गोपाङ्गसहितं भावाभावसमेतञ्च प्रयोक्तव्यम्। ङडुक्कारो नाम जिह्वातालुसंयोगाग्निघ्यमानः पुष्टश्चनादसदृशो नादः। ङडुगिति शब्दानुकारो वर्षाड्डितवत्। यत्र लौकिका न भवन्ति तत्तैतत् सर्वं गूढं प्रयोक्तव्यम्। शिष्टं प्रसिद्धम्। द्वारार्थि तु क्राथनस्यन्दनभन्दनहङ्कारणावितत्करणावितङ्गाथनानि। तत्रास्तम्भनेव सुप्तलिङ्गवर्धनं क्राथनम्। बाह्यभिभूतस्येव शरीरावयवानां कम्पनं स्यन्दनम्। उपहतपादेन्द्रियस्येव गमनं भन्दनम्। रूपयौवनसम्पन्नां कामिनीमवलोक्यात्मानं कामुकमिव यैर्विलासैः प्रदर्शयति तत् हङ्कारणम्। कार्याकार्यविवेकविकलस्येव लोकनिन्दितकर्मकरणमवितत्करणम्। व्याहृतापार्थकादिशब्दोच्चारणमवितङ्गाथनमिति। गुणभूतस्तु चर्यानुप्राहकोऽनुस्नानादिः भैक्षोच्छिष्टादिनिर्मिता योग्यताप्रत्ययनिरूपणार्थः। तदप्युक्तं सूत्रकारेण "अनुस्नाननिर्माल्यलिङ्गधारीति"। तत्र समासो नाम धर्मिमात्राभिधानं तच्च प्रथमसूत्र एव विहितम्, पञ्चानां पदार्थानां प्रमाणतः प्रपञ्चाभिधानं विस्तरः। स खलु राशीकरभाष्ये द्रष्टव्यः। एतेषां यथासम्भवं लक्षणोऽस्मदुरेणाभिधानं विभागः स तु विरचितशास्त्रान्तरेभ्योऽमीषां गुणातिशयेन कथनं विशेषः। तथा हि अन्यत्र दुःखनिवृत्तिरेव दुःखान्तः दृष्टं तु पारमैश्वर्यप्राप्तिश्च। अन्यत्राऽभूत्वा भावि कार्यमिष्टं तु नित्यं पशुत्वादि। अन्यत्र रागादेः कारणम् दृष्टं तु निरपेक्षो भगवानेव। अन्यत्र कैवल्यादिफलको योगः दृष्टं तु पारमैश्वर्यदुःखान्तफलकः। अन्यत्र पुनरावृत्तिः स्वर्गादिः दृष्टं पुनरपुनरावृत्तिरूपः सामीप्यादिफलकः। नन्वेवं सति इदमिन्द्रजालं यन्निरपेक्षः परमेश्वरः कारणमिति तथात्वे कर्मवैफल्यं सर्वकार्याणां समसमयसत्त्वात्तदेति दोषद्वयं प्राप्नोत्येवं मन्येथाः व्यधिकरणत्वात्। यदि निरपेक्षस्य भगवतः करणत्वं स्यात्तर्हि कर्मणो वैफल्ये किमायातम्। प्रयोजनाभाव इति चेत् कस्य प्रयोजनाभावः कर्मवैफल्ये कारणं किं कर्मिणः? किं वा भगवतः। नाद्यः ईश्वरेच्छानुसृष्टीतस्य कर्मणः सफलत्वोपपत्तेः। तदनुसृष्टीतस्य ययातिप्रभृतिकर्मवत् कदाचित् निष्फलत्वसम्भवाच्च। न चैतावता कर्मस्वाग्रहनिवृत्तिः कर्मकादिदुरुपपत्तेः ईश्वरेच्छायत्तत्वाच्च पशूनां प्रवृत्तेः। नापि द्वितीयः परमेश्वरस्य पर्याप्तकामत्वेन कर्मसाध्यप्रयोजनापेक्षाया अभावात्। यदुक्तं "समसमयसत्त्वात्" इति तदप्ययुक्तम् अचिन्त्यशक्तिकस्य परमेश्वरस्येच्छानुविधायिन्या अव्याहतक्रियाशक्तेः कार्यकारित्वाभ्युपगमात्। तदुक्तं सद्भद्रायविद्भिः "कर्मादिनिरपेक्षस्तु स्वेच्छाचारी यतो ह्ययम्। ततः कारणतः शास्त्रे सर्वकारणकारणमिति"। नन्वेवं दर्शनान्तरेऽपीश्वरज्ञानान्मोक्षो लभ्यत एवेति कुतोऽस्य विशेष इति चेन्नैवं वादीः विकल्पानुपपत्तेः किमीश्वरविषयज्ञानमात्रं निर्बीजकारणं किं वा साक्षात्कारः अथ वा यथावत्तत्त्वनिश्चयः। नाद्यः शास्त्रमन्तरेणापि प्राक्तरजनबहवानामधिपो महादेव इति ज्ञानोत्पत्तिमात्रेण मोक्षसिद्धौ शास्त्राभ्यासवैफल्यप्रसङ्गात्। नापि द्वितीयः अनेकजन्मप्रयोपचितानां पिशितलोचनानां पशूनां परमेश्वरसाक्षात्कारानुपपत्तेः। ततोऽनेकजन्मतापात् पाशुपतशास्त्रमन्तरेण यथावत्तत्त्वनिश्चयानुपपत्तेः! तदुक्तमाचार्यैः "ज्ञानमात्रे यथाशास्त्रं साक्षाद्दृष्टिस्तु दुर्लभा। पञ्चार्थादन्यतो नास्ति यथावत्तत्त्वनिश्चयः" इति। तस्मात् पुरुषार्थकामैः पुरुषधौरेयैः पञ्चार्थप्रतिपादनपरं पाशुपतशास्त्रमाश्रयणीयम्"। नकुलीश्वरोऽपि शिवे काशीस्थशिवलिङ्गभेदे च काशीख० १००अ०।

४०० पृष्टस्तनदृष्टशब्दार्थपरिशिष्टम्। छन्दःशास्त्रविहिते प्रस्तारे दत्तलङ्कत्तमात्रज्ञाने तत्स्वरूपावधारणाय क्रियाभेदे "प्रस्तारो नष्टसंहिष्टमेकद्व्यादिसंक्रिया" इत्तर० उपक्रमे "नष्टस्य यो भवेदङ्कस्तस्यार्द्धं ऽर्द्धं समे च बः। विषमे चैकमाधाय तस्यार्द्धं ऽर्द्धं गुरुर्भवेत्"। नष्टस्य अज्ञातस्वरूपस्य योऽङ्कः प्रस्तारमध्यपातिसंख्याज्ञापकः अङ्कः तस्य तत्संख्यायाः समत्वे लोपगुर्लघ्वः तस्य अर्द्धं कृते तस्य समत्वे च सति लो लघुर्लघ्वः। पुनस्तस्यार्द्धं समे लघुः एवं यावदक्षरसंख्या तावत्। नष्टस्य संख्याया विषमत्वे गुरुः, तत्रैकमाधाय संयोज्य तस्यार्द्धं कृते विषमत्वे गुरुः समत्वे लघुः विषमत्वे एकयोजिते पुनरर्द्धं कृते समत्वे लघुः विषमत्वे गुरुः, यथा तत्प्रस्तारप्रस्तारे चतुर्थो भेदः कीदृशः इति प्रश्ने, तत्संख्यायाः समत्वात् प्रथमं लघुः तस्यार्द्धं कृते तस्य समत्वेन पुनर्लघुः शिष्टे द्व्यङ्केऽर्द्धीकृते तस्य विषमत्वात् गुरुः एवञ्च चतुर्थो भेदः अन्त्यगुरुः इत्युत्तरम् इत्यर्थः।

प

पः पञ्चमवर्गस्य प्रथमोवर्णः स्पर्शवर्णेषु एकविंशतितमः। तस्योच्चारणस्थानमोष्ठः। तस्योच्चारणे आभ्यन्तरप्रयत्नः स्पोडेन सह जिह्वाग्रस्य स्पर्शः। बाह्याः प्रयत्नाः विवारश्वासघोषाः अल्पप्राणश्च। अस्मिन् परे विसर्गस्य स्थाने उपाध्मानीयः। वर्णाभिधाने अस्य वाचकशब्दाउक्ता यथा "पः खरप्रियता तीक्ष्णा लोहितः पञ्चमो रसा। शुक्रकर्त्ता निधिः मेधः कालरात्रिः खरारिहा। तपनः प्राक्तनः पाता देवदेवो निरञ्जनः। सावित्री पतिनी पानं वीरतन्त्रो धनुर्द्धरः। दक्षपार्श्वश्च सेनानीर्मरीचिः पवनः शनिः। उड्डीयं जविनी कुम्भोऽनलरेखा च ओष्ठकः। मूलं द्वितीयमिन्द्राणी लोलाची मनआत्मकः" तदधीशदेवताध्यानं यथा "विचित्रवसनां देवीं द्विभुजां पङ्कजेक्षणाम्। रक्तचन्दनलिप्ताङ्गीं पद्ममालाविभूषिताम्। मणिरत्नादिकेयूरहारभूषितविग्रहाम्। चतुर्वर्गप्रदां नित्यां नित्यानन्दमयीं पराम्। एवं ध्यात्वा पकारन्तु तन्मन्त्रं दशधा जपेत्"। अस्य स्वरूपं यथा "अतः परं प्रवक्ष्यामि पकाराक्षरमव्ययम्। चतुर्वर्गप्रदं वर्णं शरच्चन्द्रसमप्रभम्। पञ्चदेवमयं वर्णं स्वयं परमकुण्डली। पञ्चप्राणमयं वर्णं त्रिशक्तिसहितं तथा। त्रिगुणावस्थितं वर्णमात्मादितत्त्वसंयुतम्। महामोक्षप्रदं वर्णं हृदि भावय पार्वति!" इति कामधेनुतन्त्रे ५पटले। अस्य मातृकान्यासे दक्षपार्श्वे न्यासता। काव्यादौ अस्य प्रथमप्रयोगे सुखं फलम्। "सुखभयमरणक्लेशदुःखं प्रवर्गः" इ०टी०। प्रवर्गस्थानां पञ्चानां वर्णानां क्रमेण फलपञ्चकोक्तेः। [एकाक्षरकोषः।

प पु० पत–पा–वा ड। १पवने २पर्णे ३पाने ४पातने चरित्रे

पकार पु० प+स्वरूपे कार। पवर्णे [अमरः।

पकण पु० पचति पच–किप् कण–अच् कर्म०। शवरालये

पक्कपीड पु० (पाखौडा) इति प्रसिद्धे वृक्षभेदे राजनि०।

पक्तृ त्रि०पच–तृन्। १पाककर्त्तरि २अग्नौ पु० अग्निपु०२अ०

पक्ति स्त्री पच–भावे क्तिन्। १पाके २गौरवे मेदि० ३परिणामे च। [काले जायमाने शूले रोगभेदे राजनि०।

पक्तिशूल न० पक्तौ अन्नपरिणामे शूलम्। अन्नादिपाक-

पक्त्र न० पच–त्र। गार्हपत्ये स्टङ्स्वधर्मे उलूखलदत्तः।

पक्त्रिम त्रि० पच–क्त्रि ततो–मप्। पाकनिर्वृत्ते

पक्थ पु० पच–बा० थक्। १राजभेदे ऋ०८।२२।१०भा० भावे थक् २पाके च। ततोऽस्यर्थे इनि पक्थिन्। पाक० युक्ते ऋ०६।२०।१२ भा०।

पक्व त्रि० पच–क्त तस्य वः। १परिणते २दृढे ३विनाशोन्मुखे ४कृतपाके च अमरः। भावे क्त ५पाके न०

पक्वकृत् पु० पक्वं करोति कृ–क्विप् तुक्०। १निम्बवृक्षे शब्दच० २पाककर्त्तरि त्रि०।

पक्वरस पु० पक्वस्य अन्नगुडादेः रसः। मद्ये शब्दरत्ना०।

पक्ववारि न० पक्वस्यान्नादेर्वारि। काञ्जिके(आमानि)शब्दच०।

पक्वश पुंस्त्री पक्वश+पृषो०। अन्त्यजातिभेदे हेमा०।

पक्वशस्योपमोन्नति पु० पक्वशस्योपमा यत्र तादृशी उन्नतिरस्य। राजकदम्बे नैषधटुप्र०।

पक्वातीसार पु० सुश्रुतोक्ते आमातिसारभिन्ने पञ्चप्रकारे अतिसारभेदे अतिसारशब्दे १०।६पृ० दृश्यम्।

पक्वाधान न० पक्वस्य पाकस्याधानम् कृत०। नाभेरधोभागस्थे पाकाशये सुश्रुतः पक्वाशयोऽत्र "पक्वाशयस्त्वधोनाभेर्द्वे आमाशयः स्थितः" वैद्यकम्।

पक्वान्न न० कर्म०। १कृतपाके अन्ने "आमं शूद्रस्य पक्वान्नं पक्वमुच्छिष्टमुच्यते" स्मृतिपरिभाषिते शूद्रस्य २आमान्ने च। [चतु त।

पक्ष परिग्रहे भ्वा० चु० उभ० सक० सेट्। पक्षयति ते अपप-

पक्ष परिग्रहे चु० उभ० सक० सेट् अयं भ्वादिश्च पर० पक्षति पक्षयति ते अपपक्षत् त अपक्षीत्।

पक्ष पु० पच–क्ष। १शुक्लकृष्णप्रतिपदादिपञ्चदशसङ्ख्यतिथ्यात्मके काले २खगानां पतत्रे (पाखा) ३शरीरस्य पृष्ठस्थे पक्षे। केशात् परः समूहार्थे पक्षप्रत्ययान्तः। ४केशसमूहार्थे यथा केशपक्ष इत्यादि। ५पार्श्वे हेमच० ६दृष्टे न्यायोक्ते ७सन्दिग्धसाध्यवति पदार्थे, पक्षतासब्दे दृश्यम् यथा पर्वतो वह्निमान्। ८विरोधे हेमचन्द्रे १०बले ११सख्यौ १२क्षुद्रोरन्ध्रे १३राजकुञ्जरे १५खगे. १६वनचये १७समूहे १८पिञ्छे १९देहार्द्धे च अमरमेदिन्यौ। २०विहगे २१गुडे शब्दरत्ना० २२वर्गे २३देहाङ्गभेदे वादिप्रतिवादिभ्यां दर्शितविप्रतिपत्तौ २५कोटिभेदे च।

पक्षक पु० पक्ष इव कायति कै–क। १पार्श्वद्वारे (खिड़की) अमरः। २पार्श्वमात्रे मेदि०। ३मङ्गले शब्दर०।

पक्षग्रहण न० भावप्रधान्ये कृत०। साक्षाद्यग्रहणे।

पक्षचर पु० पक्षे शुक्लादौ चरति चर–ड। १चन्द्रे २पक्षयुक्ते चरे ३गजे च मेदि०।

पक्षज पु॰पक्षे शुक्ले जायते जन-ड। १चन्द्रे त्रिका॰ २पक्षे जातमात्रे त्रि॰। पक्षजन्माप्यत्र शब्दरत्ना॰

पक्षता स्त्री पक्षस्य भावः। न्यायोक्ते अनुमानेच्छाभाव-समानाधिकरणे १साध्यवत्तानिश्चयाभावे यत्र यद्धर्म्मादिकं साध्यते तत्र धर्म्मिणि यद्धर्म्मत्वनिश्चयाभावे एव पक्षत्वं तत्र तन्निश्चयसत्त्वे तु अनुमानेच्छासत्त्वएव पक्षता नेतरथेति न्याये स्थितम्। "सिषाधयिषया शून्या सिद्धिर्यत्र न विद्यते। स पक्षस्तत्र दुष्टत्वं ज्ञानादनुमितिर्भवेत्" भाषा॰

पक्षति स्त्री पक्षस्य मूलम् ति। पक्षारम्भके १प्रतिपदि तिथौ खगानां २पक्षस्य मूले च (डाना) अमरः। [अमरः।

पक्षद्वार न॰ पक्षे पार्श्वे द्वारम्। (खिड़की) पार्श्वस्थे द्वारे

पक्षधर पु॰ पक्षं धारयति धृ-अच्। १चन्द्रे जटाध॰ पक्षं पक्षदृष्टान्तात्मकलक्षणम् तत्तिथिमानादिकं धारयति अच् तत्कारके २विद्वद्भेदे स हि चिन्तमणाद्यालोकं प्रसन्न-राघवनाटकं च चकार तस्य जयदेवेति नामान्तरम् पक्षस्यतिथिमानादिधारणाशक्तिमत्त्वात्तस्य तथात्वसिद्धिः।

पक्षपात पु॰ पक्षे अन्यायसाहाय्ये पातः अभिनिवेशः। १अन्यायसाहाय्ये "पक्षपातः पतङ्गानामिति" विजयरक्षितोक्ते खगानां २ज्वरभेदे च।

पक्षपातिता स्त्री पक्षपात+अस्त्यर्थे इनि तस्य भावः तल्। १साहाय्यकरणाभिनिवेशे २पक्षाभ्यां पतने च "न परं पक्षि पक्षपातिताऽनयलभ्ये किन्तु मादृशेऽपि सा" नैषधम्।

पक्षपालि स्त्री पक्षस्य द्वारभेदस्य पालिरिव (खिड़की) द्वारभेदे शब्दरत्ना॰।

पक्षभाग पु॰ पक्ष इव भागः। कक्षिपार्श्वभागे अमरः।

पक्षमूल न॰ ६त॰। (पाकारमूल) पक्षस्य १मूले २प्रतिपत्तिथौ च अमरः। [स्त्रियां जातित्वात् ङीप्।

पक्षवाहन पुंस्त्री पक्षौ वाहनमिवास्य। खगे शब्दच॰।

पक्षस् न॰ पच-असुन् क्षट् च। पक्षशब्दार्थे "पक्षौ तु क्षतौ पक्षौ" उत्तररत्नम्। यजु॰ २८।५ उदा॰दृश्यम्।

पक्षसन्धि पु॰ पक्षयोः सन्धिः। पर्वसन्धिकाले

पक्षसुन्दर पु॰ पक्षे सुन्दरः। लोध्रे शब्दार॰। [लोभभेदे।

पक्षहोम पु॰ पक्षव्यापको होमः। पक्षपर्य्यन्तं कर्त्तव्ये

पक्षाघात पु॰ वातरोगभेदे तल्लक्षणादि सुश्रुतोक्तं यथा "अङ्गभागाः सन्धिसंश्रया धमनीरूर्द्धदेहगाः। यदा प्रकुपितोऽन्यतरं पक्षमातरिश्वा प्रपद्यते। तदन्यतरपक्षस्य सन्धिबन्धान् विमोचयन्। हन्ति पक्षं तमाहुर्हि पक्षाघातं भिषग्वराः। यस्य जत्रूर्ध्वं शरीरार्द्धमकर्म्मण्यमचेतनम्। ततः पतत्यसृङ् वापि जङ्घात्वनिलपीडितः। शुद्धवातकृतं पक्षं कृच्छ्रसाध्यतमं विदुः। साध्यमन्वेन संसृष्टमसाध्यं त्रयहेतुकम्। वायुरूर्द्धं व्रजेत्स्थानात् कुपितो हृदयं शिरः। अङ्गौ च पीड़यत्यङ्गान्याक्षिपेन्मर्म्मवेद्य सः"। पक्षवधोऽप्यत्र।

पक्षान्त पु॰ पक्षस्यान्तो यत्र काले। १अमावास्यायां २पूर्णिमायाञ्च तिथौ "पक्षान्ते निष्फला यात्रा मासान्ते मरणं ध्रुवम्" ज्यो॰त॰। ६त॰। ३पक्षस्यावसाने च।

पक्षादि पु॰ ६त॰। पक्ष आदिर्यस्य चतुरर्थ्यां फक्-प्रत्ययनिमित्ते शब्दगणे स च गणः पा॰ ग॰ सू॰ उक्तो यथा पक्ष तल्प तुण्ड खण्ड कम्बलिका वलिक चिल्ल चल्लि पक्षिन् (पक्ष च) कुक्ष सीरक सरक सरस समल अतिथिन् रोमन् लोमन् हस्तिन् मकर लोमक शीर्ष निवात पाकसिंहक अङ्गुष्ठ सुवर्णक हंसक हिंसक कुल्य विल खिल यमक हस्त कलाप-कर्षक"। पाक्षायण इत्यादि।

पक्षालिका स्त्री कुमारानुचरमातृकाभेदे भा॰ग॰ ४७अ॰

पक्षालु पु॰ पक्ष+अस्त्यर्थे आलुच्। विहगे शब्दच॰।

पक्षावसर पु॰ पक्षस्यावसरोऽवसरः यत्र काले। पौर्ण-मास्याम् अमावास्यायाञ्च शब्दर॰।

पक्षिणी स्त्री पक्षतुल्यौ दिवसौ यस्या अस्ति इनि ङीप्। आगामिवर्त्तमानाद्युक्तायां रात्रौ अमरः। "द्वावङ्गावेव रात्रेश्च पक्षिणीत्यभिधीयते" शुद्धि॰त॰। तत्र पूर्वदिन रात्रौ तन्निमित्ते जाते पूर्वदिवसीयदिनमादायैव पक्षिणी व्यवहारः" शु॰त॰ स्थितम्। "यापयेत् पक्षिणीं रात्रिं शिष्यर्त्विग्बान्धवेषु च" मनुः। २विहगजातिस्त्रियां स्त्री

पक्षिन् पु॰ पक्ष+अस्त्यर्थे इनि। १खगे तेषामुत्पत्तिर्यथा "अरण्यस्य भार्य्या श्येनी वीर्य्यवन्तौ महाबलौ। सम्पातिश्च जटायुश्च प्रासोढ पक्षिसत्तमौ। सम्पातिर्जनयन् पुत्रान् काकाः पुत्रा जटायुषः। भार्य्या गरुत्मतश्चापि भासी क्रौञ्ची शुनी शुकी। धृतराष्ट्री गरुत्मांस्तु शुन्यां जज्ञे च षट् सुतान्। विनिश्चस्य सुनेत्रश्च सुवर्चा सुनयस्तथा। सुरूपन्तु सुपर्णाख्यं तेषां पुत्रा व्यजन्यकाः। चतुर्दश सहस्राणि क्रूराणां पन्नगाशिनाम्। सम्प्रहीयेत्रिमे यत्नि गारुड़ाख्ये महाबलाः। भासीपुत्राश्चया भासा उलूकाः काककुक्कुटाः। मयूराः कलविङ्काश्च कपोती चैव तित्तिरी। क्रौञ्च्यां वाध्रीणसा व्याघ्र कुररा सारसारकाः। धृतराष्ट्री कलहंसान् धार्त्त-

राङ्गांश्च भामिनी। चक्रवाकांश्च विहगान् सम्पूजयानयेद्गृहान् द्विजान्। अन्यानपि द्विजान् जग्ध्वा पुत्रपौत्राननन्तकान्" अग्निपु०। गुरुभक्षभङ्गभक्षस्थूलकायपक्षिणां पूर्वार्द्धस्य श्रेष्ठत्वं यथा "गुरुभक्षा बकभुजो वे चोपचितमेदसः। एकदेशेऽपि पूर्वार्द्धं मृगाणां पक्षिणां वरम्" पक्षिणामङ्गभेदानामुत्तरोत्तरं गुरुत्वं यथा "सर्वेषाञ्च शिरःस्कन्धग्रीवपर्यन्तमङ्गमुदग्रम्। पादपुच्छान्त्रमस्तिष्कशुष्ककोड़ाः समेधनाः। धातवः शोणिताद्याश्च गुरवः स्युः परस्परम्"। तन्मांसगुणाः। "मत्स्यकूर्मखगाण्डानि स्वादुवाजीकराणि च। कटुपाकानि तानि स्युर्वातश्लेष्महराणि च" राजवल्लभः। तल्लेदमांसगुणाः सुश्रुतोक्ता यथा

"लावतित्तिरिकपिञ्जलवर्त्तीरवर्त्तिकावर्त्तकनप्तृकावातोकचकोरकलविङ्कमयूरकक्रकरोपचक्रकुक्कुटसारङ्गशतपत्रककृतित्तिरिक्ररराजहंसबलाकाभृतयस्त्राहृद्या विष्किरा लघवः शीतमधुरा कषाया दोषशमनाश्च। "संग्राही दीपनश्चैव कषायमधुरो लघुः। लावः कटुविपाकश्च सन्निपाते च पूजितः। तैषट्टगुरुरुष्णमधुरो हृद्यो मेधाग्निवर्द्धनः। तित्तिरिः सर्वदोषघ्नो ग्राही वर्णप्रसादनः। हिक्काश्वासानिलहरो विशेषान्नीरतित्तिरिः। रक्तपित्तहरः शीतो लघुश्चापि कपिञ्जलः। कफोत्थेषु च रोगेषु मन्दवाते च शस्यते। वातपित्तहरा हृद्या मेधाग्निबलवर्द्धनाः। लघवः क्रकरा रूक्षास्तथा चैवोपचक्रकाः। कषायः स्वादुवर्णस्थ्यः केश्यो रुचिप्रदः। मयूरः स्वरमेधाग्निदृक्शोकेन्द्रियदार्ढ्यकृत्। स्निग्धोष्णोऽनिलहृद्धृद्यः स्वेदस्वरबलावहः। ह्रंसः कुक्कुटो वन्यस्तद्वद्व्याख्यो गुरुस्तु सः। वातरोगज्वरवमीविषमज्वरनाशनः"। "कपोतपारावतभृङ्गराजपरभृतकोयष्टिककृकिलकुण्टकुक्किलगोचोड़कडिडिमाण्डकशतपत्रककलहंसनिन्द्यभेदाशिशुकसारिकाबलकुलीगिरिशालङ्कालदूषकसुन्दरीखञ्जरीटकहारीतदात्यूहप्रभृतयः प्रसहाः। कषायमधुरा रूक्षाः फलाहारा मरुत्कराः। पित्तश्लेष्महराः शीता बद्धमूत्रालवर्चसः। सर्वदोषकरस्तेषां भेदाग्नी मलदूषकः। कषायस्वादुलवणो गुरुः काण्डकपोतकः। रक्तपित्तप्रशमनः कषायविशदोऽपि च। विपाके मधुरश्चापि गुरुः पारावतः स्मृतः। कृकिलो मधुरःस्निग्धः कफशुक्रविवर्द्धनः। रक्तपित्तहरो वेध्रकृकिलस्त्वतिशुक्रदः"।

पक्षिराज पु० ६त० टच्समा०। गरुडे पक्षीन्द्रादयोऽप्यत्र।

पक्षिल पु० पक्ष-वा० इलच्। वात्स्यायने गौतमसूत्रभाष्यकारके मुनिभेदे त्रिका०। [२नीडे च त्रिका०।

पक्षिशाला स्त्री ६त०। (चिड़ियाखाना) १पक्षिवासस्थाने

पक्षिसिंह पु० पक्षी सिंह इव उपमितस०। गरुडे त्रिका०

पक्षिस्वामिन् पु० ६त०। गरुडे हेमच०।

पक्ष्णु त्रि० पच-स्नु। पाकशीले

पक्ष्मकोप पु० सुश्रुतोक्ते नेत्ररोगभेदे "पक्ष्माश्रयगता दोषाश्चीक्ष्ण्याश्रि खराणि च। निर्वर्त्तयन्ति पक्ष्माणि तैर्नुन्नत्वाच्च दूयते। उत्पाटितैः पुनः शान्तिः पक्ष्मभिश्चोपजायते। वातातपानलद्वेषी पक्ष्मकोपः स उच्यते" पक्ष्मप्रकोपोऽप्यत्र पु०।

पक्ष्मन् न०पक्ष-मनिन्। १नेत्रावरके लोम्नि २पद्मादेः केसरे अमरः ३क्षत्रादेरक्षभागे ४खगादेः पक्षे च अमरमाला।

पक्ष्मल त्रि० पक्ष्मन्+सिध्मा० मत्वर्थे इलच्। पक्ष्मयुक्ते

पङ्क पु०न० पचि-बिस्तारे कर्मणि करणे वा घञ् कुत्वम्। अर्द्धर्चा०। १कर्दमे २पापे च अमरः। [त्रिका०।

पङ्ककर्वट पु० पङ्केषु कर्वटः मनोहरः। जलयुक्तपङ्के

पङ्ककीर पुंस्त्री पङ्कप्रियः कीरः। (कादाखोंचा) पक्षिभेदे त्रिका० स्त्रियां जातित्वात् ङीष्।

पङ्कक्रीड़ पु० पङ्केन क्रीड़ति क्रीड़-अच् ६त०। शूकरे त्रिका० ख्यु। पङ्कक्रीड़नोऽप्यत्र। [त्रिका०।

पङ्कगड़क पु० पङ्के स्थितः गड़कः। (पाँकाल) मत्स्यभेदे

पङ्कगति पु० पङ्के गतिरस्य। (पाँकाल) मत्स्यभेदे शब्दमा०

पङ्कग्राह पुंस्त्री पङ्के स्थितः ग्राहः। मकरे जलजन्तुभेदे त्रिका०।

पङ्क(ङ्के)ज न० पङ्के जायते जन-ड ७त० वा अलुक्समा०। १पद्मे २सारसपक्षिणि च राजनि० पङ्कजनिकर्त्तृत्वविशिष्टे तस्य शब्दस्य योगरूढता कुमुदादीनां पङ्कजातत्वेऽपि न तत्र रूढिः किन्तु तत्पङ्कतेत्याकारे स्थितम्।

पङ्कजन्मन् न० पङ्के जन्म यस्य। १पद्मे राजनि० २सारसपक्षिणि च। २पद्मसमूहे च हेमच०।

पङ्कजिनी स्त्री पङ्कज+पुष्करा०इनि। १पद्मयुक्तदेशे पद्माकरे

पङ्कण पु० पङ्क्य+पृषो०। शवरालये शब्दमाला।

पङ्कप्रभा स्त्री पङ्कस्येव प्रभा यस्याः। कर्दमतुल्यप्रभान्वितनरकभेदभूमौ हेमच०।

पङ्कमण्डूक पुंस्त्री पङ्के मण्डूक इव। शम्बुके (शामुक) जलशुक्तिभेदे त्रिका०।

पङ्क(ङ्के)रुह न० रुह–क ७त० वा अलुक्। १पद्मे अमरः २सारसखगे च।

पङ्कवास पु० पङ्के वासोऽस्य। कर्कटे (काँकड़ा) जलजन्तुभेदे राजनि० स्त्रियां जातित्वात् ङीष्। हारा०।

पङ्कशुक्ति स्त्री पङ्के स्थिता शुक्तिः (झिनुक) जलशुक्तिभेदे

पङ्कशूरण पु० पङ्के शूरण इव। शालूके राजनि०

पङ्कार पु० पङ्कमर्च्छति क्व–अण् उप०स०। १शैवले २क्षेतौ च २शोपावे ४जलकुब्जकपुष्पभेदे मेदि०।

पङ्किल त्रि० पङ्क+अस्यर्थे इलच्। पङ्कयुक्ते

पङ्क्तेय त्रि० पङ्क्तौ भवे यौ–अच् ७त० अलुक्स०। १पङ्क्त्याधिनि २जलौकाभेदे स्त्री "न च सङ्कीर्णचारिण्यो न च पङ्क्तेयाश्च ताः" स्मृ०।

पङ्क्ति स्त्री पचि–विस्तारे क्तिन्। १स्वजातीयपदार्थानां स्थितिभेदे (सारि पाँति) इति ख्याते पदार्थे "भौमिति पङ्क्तिः" ह०र० उक्तलक्षणे पद्याक्षरपादके २छन्दोभेदे ३दशाक्षरपादके छन्दोजातिभेदे "गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च" ह०र०। ४दशसंख्यायाम् पङ्क्तिरथः (दशरथः)। ५पृथिव्यां शब्दमा०। ६गौरवे ७पाके च मेदि०। पतितादीकपङ्क्तौ भोजनादौ दोषः "न संवसेच्च पतितैर्न चाषण्डालैर्न पुक्कसैः। न मूर्खैर्नावलिप्तैश्च नान्त्यैर्नान्त्यावसायिभिः। एकशय्यासनपङ्क्तिभाण्डपक्वान्नमिश्रणम्। याजनाध्यापने योनिसम्बन्धेव सहभोजनम्। सहाध्यायस्तु दशमः सह याजनमेव च। एकादश समुद्दिष्टा दोषाः साङ्कर्य्य सञ्ज्ञिताः। समीपे चाप्यसम्बन्धात् पापं संक्रमते नृणाम्। तस्मात् सर्वप्रयत्नेन साङ्कर्य्यं परिवर्जयेत्"। पङ्क्तिसाङ्कर्य्यदोषनिवारणोपाया यथा। एकपङ्क्त्युपविष्टा ये न स्पृशन्ति परस्परम्। भक्षणा ह्यतमर्य्यादा न तेषां सङ्करो भवेत्। अग्निना भक्षणा चैव षड्भिः पङ्क्तिर्विभिद्यते" कूर्मपु० १५अ०।

पङ्क्तिकण्टक पु० पङ्क्तौ एकपङ्क्तौ वेशनादौ कण्टक इव परिहार्य्यत्वात्। पङ्क्तिदूषके [ग्रीवे शब्दर०।

पङ्क्तिग्रीव पु० पङ्क्तिसञ्ज्ञिका ग्रीवा यस्य। रावणे दश-

पङ्क्तिदूष(क) पु० पङ्क्तिम् एकपङ्क्तिं भोजने दूषयति दूषि–अण् ष्वुन् वा उप०स०। अपाङ्क्तेये अपङ्क्तब्राह्मणे स च अपाङ्क्तेयशब्दे २४३८०उक्तः। अन्येऽपि केचित् पात्रे ३१अ० उक्ता यथा "अपाङ्क्तेयास्तु ये राजन्! कीर्त्तयिष्यामि तानृ शृणु। कितवो भ्रूणहा यक्ष्मी पशुपालो निराकृतिः। याम प्रेष्यो वार्द्धुषिको गायनः सर्वविक्रयी। अगारदाही गरदः कुण्डाशी सोमविक्रयी। सामुद्रिको राजदूतस्तैलिकः कूटकारकः। पिता विवदमानश्च यस्य चोपपतिर्गृहे। अभिशस्तस्तथा स्तेनः शिल्पं यश्चोपजीवति। पर्वकारश्च सूची च मित्रध्रुक् पारदारिकः। अव्रतानामनध्यायः काण्डपृष्ठस्तथैव च। अग्निश्च यः परिक्रामेद्यः गुना दृष्ट एव च। परिवित्तिस्तु यश्चाद्यः सर्मा गुरुतल्पगः। कुनीलवो देवलको नक्षत्रैर्यश्च जीवति। ईदृशा ब्राह्मणा ये च अपाङ्क्तेयास्तु ते मताः। रक्षांसि भुञ्जते हव्यं यदीयान्तु प्रदीयते। श्राद्धे भुक्ता महाराज! दुष्टमां गुरुतल्पगः। श्राद्धं नाशयते तस्य पितरोऽपि न भुञ्जते। सोमविक्रयिणे दत्तं विष्ठायामुप्तं भवेन्नृप! भिषजे योषितसमं नष्टं देवलके तथा। अप्रतिष्ठं वार्द्धुषिके निष्फलं परिकीर्त्तितम्। वस्त्रवाणिजके दत्तं नेह नामुत्र तद्भवेत्। भक्षनीव हुतं हव्यं तथा पौनर्भवे द्विजे। ये तु धर्मव्यपेतेषु चरित्रापगतेषु च। हव्यं कव्यं प्रयच्छन्ति तेषां तत्परिभक्षति। ज्ञानपूर्वन्तु ये तेभ्यः प्रयच्छन्त्यल्पबुद्धयः। पुरीषं भुञ्जते तस्य पितरः प्रेत्य निश्चितम्। एतान् विद्धि महाबाहो! अपाङ्क्तेयान् द्विजाधमान्। शूद्राधमोपदेशन्तु ये कुर्वन्त्यल्पबुद्धयः। यष्टिं काष्ठं शतं खड्गः स्त्रियो यावत् प्रपश्यति। पङ्क्त्यां समुपविष्टानां तावद्दूषयते नृप!। यद्वेतशिरा भुङ्क्ते यद्भुङ्क्ते दक्षिणामुखः। सोपानत्कश्च यद्भुङ्क्ते सर्वं विद्यात्तदासुरम्। अक्षुण्वया च यद्दत्तं यच्च श्रद्धादिवर्जितम्। सर्वं तदसुरेन्द्राय ब्रह्मा भागमकल्पयत्। यानञ्च पङ्क्तिदूषञ्च नावेक्षेरन् कदाचन। तस्मात् परिहृते दद्यात्तिलांश्चाद्धे विकीरयेत्। तिलैर्विरहितं श्राद्धं हृतं क्रोधवशेन च। यातुधानाः पिशाचाश्च विप्रलुम्पन्ति तद्विधिः। अपाङ्क्त्यान् यावतः पङ्क्त्यां भुञ्जानो नन्तु पश्यति। तावत् फलाद्भ्रंशयति दातारं तस्य वाऽनिशम्"।

पङ्क्तिपावन पु० पङ्क्तिं श्राद्धे भोजनार्थमुपविष्टानामावर्त्तिं पुनाति पू–णिच्–ल्यु। श्राद्धभोजनार्थमुपविष्टानां विप्राणां पङ्क्तिपावितताकारके विद्याविशिष्टादौ "अपाङ्क्त्योपहता पङ्क्तिः पाव्यते यैर्द्विजोत्तमैः। तान्निबोधत कार्त्स्न्येन द्विजाग्र्यान् पङ्क्तिपावनान्। ऋग्राः सर्वेषु वेदेषु सर्वप्रवचनेषु च। श्रो-

त्रियान्वयजाश्चैव विज्ञेयाः पङ्क्तिपावनाः। त्रिषाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षडङ्गवित्। ब्राह्मद्देयात्सन्तानो ज्येष्ठसामग एव च। वेदार्थवित् प्रवक्ता च ब्रह्मचारी सहस्रदः। शतायुश्चैव विज्ञेया ब्राह्मणाः पङ्क्तिपावनाः" मनुः "इमे हि मनुजश्रेष्ठ! विज्ञेयाः पङ्क्तिपावनाः। विद्यावेदव्रतस्नाता ब्राह्मणाः सर्व एव हि। मातापित्रोर्यश्च वश्यः श्रोत्रियो दशपूरुषः। ऋतुकालाभिगामी च धर्मपत्नीषु यः सदा। वेदविद्याव्रतस्नातो विप्रः पङ्क्तिं पुनात्युत। अथर्वशिरसोऽध्येता ब्रह्मचारी यतव्रतः। सत्यवादी धर्मशीलः स्वकर्म निरतश्च यः। ये च पुत्रेषु तीर्थेषु अभिषेकृतश्रमाः। सत्रेषु च समृद्धेषु भवन्त्यध्वर्यवश्च ताः। अक्रोधना शुचयः क्षान्ता दान्ता जितेन्द्रियाः। सर्वभूतहिता ये च ब्राह्मणेतान्निमन्त्रयेत्। एतेषु दत्तमक्षय्यमेते वै पङ्क्तिपावनाः। यतयो मोक्षधर्मज्ञा ये वा सुचरितव्रताः। ये चेतिहासं प्रवताः श्रावयन्ति द्विजोत्तमान्। ये च भाष्यविदः केचिद्ये च व्याकरणे रताः। अधीयते पुराणं ये धर्मशास्त्राणि चाप्युत। अधीत्य च यथान्यायं विधिवत्तस्य कारिणः। उपसद्यो गुरुकुले सत्यवादी सहस्रदः। ऋषयः सर्वेषु वेदेषु सर्वप्रवचनेषु च। यावदेते प्रपश्यन्ति पङ्क्तयां तावत् पुनन्ति च। ततो हि पावनात् पाङ्क्तया उच्यन्ते पङ्क्तिपावनाः। ऋत्विगनुपाध्यायः स वेदमग्रासनं व्रजेत्। ऋत्विग्भिरननुज्ञातः पङ्क्तया हरति दुष्कृतम्। अथ चेद्देवित् सर्वैः पङ्क्तिदोषैर्विवर्जितः। न च स्यात् पतितो राजन् पङ्क्तिपावन उच्यते" पाद्मे सर्ग खण्डे ३५ अ०।

पङ्क्तिरथ पु० पङ्क्तिस्थ दशस्थ दिलु गतौ रथो यस्य। दशरथे शब्दरत्ना०। [राजनि०।

पङ्क्तिवीज पु० पङ्क्तिभूतानि बीजानि यस्य। वर्बुरवृक्षे

पङ्क त्रि० खञ्ज-कु-पमादेशः नुक् च। १गतिहीने स्त्रियां ङीप्। २मन्दगतौ शनिग्रहे शब्दर० तत्कक्षाया अल्पुत्तया बहुकालेन राशिभोगादिकस्य तेन भोगात् तस्य मन्दगतित्वम्। अथ हरणकर्मविपाकेन पङ्गुर्ता जायते इत्युक्तं मनुः। [ङीप्। शिखण्डीवृक्षे राजनि०।

पङ्गुत्वहारिणी स्त्री पङ्गुत्वं हरति हरणात् हृ-णिनि पङ्गुल पु० खितकाचाभदृयभेदे हेम०।

पच पाके भ्वा०उभ०सक०अनिट्। पचति ते। अपाक्षीत् अपक्त अपाचि पेचे। पक्ता। पक्तुम् पचेलिम् पक्तिः पाकः। द्विषत् पक्तिमः। अनेन विक्लेदनाया उत्पत्त्यनुकूलव्यापारस्य चेति व्यापारद्वयस्य वचनात् द्विकर्मकत्वम् तण्डुलानोदनं पचतीत्यस्य तण्डुलान् विक्लेदयन् ओदनं निष्पादयतीत्यर्थः। दुहा० गौणे कर्मणि लकारादयः। तण्डुला ओदनं पच्यन्ते इत्यादिशब्दे कर्मनृशब्दे च अधिकं द्रष्टव्यम्।

परि+परितः पाके परिणामे।

वि+विशेषेण पाके अन्यथाभूतस्य अन्यरूपेण परिणामे।

पच व्यक्तीकारे भ्वा०आत्म० अनिट्। पचते अपक्त पेचे।

पच विस्तारे चु० उ० सक० सेट् इदित्। पञ्चयति ते अपपञ्चत् त।

पचत पु० पच-अतच्। १अग्नौ २सूर्ये ३इन्द्रे च उणादि०।

पचतभृज्जता स्त्री पचत भृज्जत इत्युच्यते यस्यां क्रियायाम् मयू०स०। पाकभर्जनार्थं निर्देशक्रियायाम्।

पचत्पुट पु० पचत् पुटमस्य। खर्वमणिवृक्षे शब्दच०।

पचत्य त्रि० पचते पाके साधुः यत्। पाके साधौ ऋ०२।५२। २२भा०। ["कर्मस्थाः पचतेर्भावः" व्याक०का०।

पचति पु० पच-धातुस्वरूपे शतिप्। पचधातुस्वरूपे

पचतिकल्पम् न० ईषदूनं पचति तिङन्तात् कल्पप्। ईषदून पाककर्त्तरि रूपप्। पचतिरूपमत्र।

पचतितरा(मा)म् अव्य० अतिशयेन पचति तर(म)प् आप्। अतिशयेन पाककर्त्तरि।

पचन पु० पच-कर्त्तरि ल्यु। १अग्नौ शब्दच० २पाककर्त्तरि त्रि० भावे ल्युट्। ३पाके न०। करणे ल्युट्। ४पाकसाधने त्रि०स्त्रियां ङीप्। "मांसपचन्या उखायाः" इति महाभाष्यम्। सा च ६वनवीजपूरके राजनि०।

पचपच पु० पचप्रकारः पच-प्रकारे द्वित्वम् पचस्य पाककर्त्तुर्यमादेरपि पचो वा। महादेवे। भा०शा०२८६अ०। "यस्य ब्रह्म च चत्रञ्चोभे भवत ओदनौ मृत्युर्यस्योपसेचनम्" श्रुतेः "अत्ता चराचरग्रहणात्" शा०सू०न्यायाच्च तस्य तथात्वम्।

पचप्रकुटा स्त्री पच प्रकृट (प्रकर्षेण क्लिन्ने) इत्युच्यते यस्यां क्रियायाम् मयू० स०। पाकक्लेदनार्थनियोगक्रियायाम्।

पचम्पचा स्त्री पचं पाचकं पचति पच-वा० खस् चम्। दारुहरिद्रायाम् अमरः।

पचलवणा स्त्री पच लवणमित्युच्यते यस्यां क्रियायाम् मयू० स०। लवणपाकार्थनिर्देशक्रियायाम्।

पचा स्त्री पच-भावे अ। १पाके अमरः। अच्। २पाककर्त्र्यां स्त्रियां स्त्री।

पचादि पु० "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" पा० कर्त्तरि अच्प्रत्ययनिमित्ते धातुगणे च च गणः पा०ग० उक्तो यथा "पच वच वप वद वन पत नदट् भषट् प्लुवट् चरट् गरट् चोरट् गाहट् स्फरट् देवट् दोषट् रज मद क्षप सेव मेध कोष मेध नर्त्त ब्रण दर्श दनुभ दर्प हार भर क्षपच" । आकृतिगणः ।

पचि पु०पच–इन् । १अग्नौ उज्ज्वलदत्तः धातुनिर्देशे इक् । २पचधातौ "इदर्थः पचिरिति" महाभाष्यम् ।

पचेलिम त्रि० स्वयमेव पच्यते पच–कर्मकर्त्तरि केलिम । १स्वयं पक्के नैष० १।९४श्लो० । कर्त्तरि केलिम । २अग्नौ १स्वर्थे च पु० उणादिकोषः ।

पचेलुक त्रि० पच–बा० एलुक । स्वदे पाककर्त्तरि त्रिका० ।

पच्छस् अव्य० पादं पादं शस् पद्भावः । पादं पादमिति वीप्सार्थक्रियाकर्मणि ज्ञा०उ०१।२।२७। न्युङ्खशब्दे च उदा० ।

पच्य त्रि० पच–कर्मणि यत् । पाकार्हे अक्षतपच्यः क्षतपच्यः इत्यादि । [पच्छ ।

पज आवरणे भ्वा०पर०सक०सेट् इदित् । पञ्जति अपञ्जीत् ।

पज्ज पुंस्त्री पद्भ्यां जायते जन–ड । शूद्रे हेमच० तस्य "पद्भ्यां शूद्रो अजायत" यजु० ३१।१३ ब्राह्मणः पादात् जातत्वोक्तेस्तद्यात्वम् स्त्रियां जातित्वात् ङीष् ।

पज्झटिका स्त्री "प्रतिपद यमकितयोऽयमाद्या नवमगुरुत्व विभूषितगात्रा । पज्झटिकाया एष विवेकः क्वापि न मध्यगुरुर्गणएकः" छ०र० उक्ते मात्रावृत्तभेदे ।

पञ्च पु० पञ्ज–बा०क् पृषो०नलोपः । १अङ्गिरसि ऋषौ "पञ्च वाक्यङ्गिरसः" काण्वायनः । २पामेन जीर्णे ३कविर्लेखनाद्यनुक्ते च त्रि० ऋ०१।४६।५भा० ४प्राञ्जिते प्रकर्षेण सम्मादिते च त्रि० ऋ०६।५८।४भा० "पञ्चसोमः प्राञ्जिसचोपरूपःसोमः" इति स्वितम् । पञ्चस्यायम् वैयिकः ठञ् । पञ्चीय आङ्गिरसवंशे पु० स्त्री ।

पञ्चक त्रि० पञ्चभिः क्रीतः कन् । १पञ्चभिः क्रीते । पञ्चैव स्वार्थे क । २पञ्चसंख्यान्विते १भक्तनि पञ्चकाधिकृते ग्राम्ये सि० कौ० । पञ्च अंशो भागो वेतनं मूल्यं वाऽस्य (सोऽंशवस्य भृतयः) पा०कन् । ३पञ्चांशयुक्ते ४पञ्चधनियुक्ते ५पञ्चमूल्यान्विते च त्रि० । पञ्चाक्षिन् इडादिरूपेण दीयन्ते "तदक्षिन् इडादयश्चाभरणकोपदा दीयते" पा०कन् । इडादित्वेन दीयमानपञ्चसंख्यायुक्ते ६शतादौ । इडिर्दीयत इत्यादिक्रमेण प्रत्येकं सम्बन्धादेकवचनम् । पञ्चाक्षिन् इडिः आयः लाभः शुल्कस्तुपदा वा दीयते । पञ्चकः अतिकः अल्पः बाहुलः । उक्तमर्थेन मूलातिरिक्तम् याच्यं इडिः । आमादिषु स्वामिप्राप्तो भागः आयः विक्रेता मूल्यादधिकप्राप्तोः लाभः । रक्षानिर्वेशो राजभागः शुल्कः" त्रि०कौ० "वर्षक्रमाच्छतं द्वित्रिचतुःपञ्चकमन्यथा" याज्ञ० "चतुर्थ्यर्थे उपसंख्यानम्" वार्त्ति०पञ्च इडादिना दीयन्ते ऽर्थे । ७इडादिना दीयमानपञ्चसंख्यान्वितद्रव्यसम्प्रदाने त्रि० । पञ्चमेन रूपेण पञ्चधम् "तावतिथं पञ्चधमिति लुग्वा" पा० कन् । पूरणार्थस्य वा लुक् । पञ्चमेन रूपेण कस्यचित् ८पञ्चधे । "तावतिथेन मट्टातीति कन् वक्तव्यः नित्यञ्च लुक्" वार्त्ति० उक्तः कन् पूरणार्थस्य वा लुक् । पञ्चमेन रूपेण ९याचके त्रि० । पञ्चानामवयवम् कन् अर्द्धचा० पु०न० । १०पञ्चसंख्यायाम् "एकं द्विकं त्रिकं चैव चतुष्कं पञ्चकं तथा" हरिका० ११धनिष्ठान्त्याद्यर्क्षादिपञ्चतारके ज्योतिषम् । १२रोगाग्निराजचौरस्वत्युसंज्ञके बाधपञ्चके च "भौमार्करिक्तामाद्यूने चरोनेऽङ्के विपञ्चके" छन्दो० व्याख्याने पी० धारायां पञ्चान्तरे विपञ्चक इत्यस्य बाधपञ्चकार्थकत्वोक्तेः बाधाश्च उपयमशब्दे १२६८पृ०दर्शिताः । पञ्चभागेनानीतत्वा तेषां तथात्वम् । पञ्चके निषिद्धानि यथा वसिष्ठः "वस्त्रपराङ्मौक्तपञ्चकधिष्ण्ये कार्यं गेहस्य गोपनं नैव । दक्षिणादिङ्मुखगमनं दारुं प्रेतस्य काष्ठसंग्रहणमिति" नारदः "वस्त्रान्त्यार्द्रादिपञ्चकं संग्रहं दारुकाष्ठयोः । याम्यदिग्गमनं शय्या न कार्यं गृहगोपनम्" इति श्रीपतिरपि "वासवोत्तरदलादिपञ्चके याम्यदिग्गमनगेहगोपनम् । प्रेतदारुदलकाष्ठसंग्रहं शय्यकावितननं च वर्जयेत्" लिविक्रमोऽपि "शय्यावितानं प्रेतादिक्रियां काष्ठसञ्चयनम् । याम्यदिग्गमनं कुर्याच्च चन्द्रे कुम्भमीनगे" इति नन्वत्र प्रेतदाहे किं नक्षत्रान्तरे मृतस्य धनिष्ठोत्तरार्द्रादिके दाहो न कार्य इति उत पञ्चकएव मृतस्य पञ्चके दाहो न कार्य इति आहोस्विदृक्षिन् कस्मिंश्चिन्नक्षत्रे पञ्चकातिरिक्ते पञ्चके वा मृतस्य पञ्चके दाहो न कार्य इति त्रयः पक्षाः सम्भवन्ति तत्र यदि विज्ञायते नक्षत्रान्तरे मृतस्य पञ्चके दाहो न कार्य इति तत्र पञ्चके मरणस्य दोषवत्ता न प्राप्नोति तद्वायुक्तं यस्मादुक्तं ब्रह्मपुराणे "कुम्भमीनस्थिते चन्द्रे मरणं यस्य जायते । न तस्योर्ध्वगतिर्दृष्टा सप्ततौ न शुभं भवेत्" इति । अथ विज्ञायते पञ्चकएव मृतस्य पञ्चके दाहो न कार्य इति तदपि न, अवश्ये, धनिष्ठापूर्वार्द्धे च मृतस्य

पञ्चके दाहनिषेधो न प्राप्नोति किन्तु दाहः कर्त्तव्य इत्येव प्राप्नोति । अस्त्वेवमिति चेन्न प्राप्तस्य दाहं लक्षयेदिति दाहस्यैव क्रियाकारकसम्बन्धेन प्राधान्यतो निषेधात्, किञ्च "त्रिगुणफलदोऽग्नौ नष्टे क्षुते च स्तेऽपि वेति" त्रिगुणकरयोगफलवत् पञ्चकमरणनिषेध एव वक्तव्ये दाहनिषेधस्य पृथगुपादानात् कर्त्तव्यतापत्तिः । तस्माद्यस्मिन् कस्मिंश्चिन्मृते सूतस्य पञ्चके दाहो न कार्य इति तृतीयः पक्षः साधीयान् । प्राधान्याद्दाहस्यैव निषेध इत्युक्तं प्राक् अतः पञ्चकात् प्राक् मरणदोषो नास्ति तथा तत्रैव दाहोऽपि न दोषाय। यदि क्रियाकारकयोगात् कालातिक्रमे सति पञ्चकप्रवृत्तिस्तदा शान्तिं विधाय दाहः कार्यः पञ्चके तु इयमपि निषिद्धं मरणं दाहश्चेति । उक्तं च ब्रह्मपुराणे "कुम्भीनस्थिते चन्द्रे मरणं यस्य जायते । न तस्योर्द्ध्वगतिर्दृष्टा बन्धतो न शुभं भवेत् । न तस्य दाहः कर्त्तव्यो विनाशः स्वेषु जन्तुषु । पञ्चकानन्तरं कार्यं कार्यं दाहादिकं खलु । अथ वा तद्दिने कार्यो दाहस्तु विधिपूर्वकम्" । रेवतीप्राप्ते मृतस्य रेवतीमपक्षाय दाहः कार्य इत्यर्थः अनिष्टोत्तराद्यादिमृतस्य दाहस्तु सद्यएव पञ्चकस्य सङ्कल्पव्यापित्वात्पुनर्मृतदाहनिषेधाच्च । स च दाहः शान्तिविधिपूर्वकः कार्यः । स च विधिरुक्तो ब्रह्मपुराणे "दाहदेशे शवं नीत्वा स्नापयेच्च प्रयत्नतः । दर्भाणां प्रतिमाः कार्याः पञ्चोत्तरशतत्रयेत्यादिना । अविपिष्टेनाज्यसिक्ताभिः सह शवं दहेत् । प्रेतवाहः प्रेतसखः प्रेतपः प्रेतभूमिपः । प्रेतकर्त्ता यमस्य नामान्येतानि च क्रमात्" इति । विशेषस्त्वन्येष्टिपद्धत्यादौ द्रष्टव्यः । नन्वत्र "त्रिगुणफलदो वह्नौ नष्टे क्षुते च स्तेऽपि वेति" मरणनिषेधएव वक्तव्यो किं पुनर्दाहनिषेधेन । उच्यते दोषाधिक्यसूचनार्थं हि पुनर्दाहनिषेधः अतएव पञ्चके मृतस्य पुत्तलकविधानं कृत्वा दाहः कार्यः ततः सूतकान्ते पुत्रादिभिः शान्तिकं च विधेयम् । उक्तं च गरुडपुराणे "ततो दाहः प्रकर्त्तव्यस्तैव पुत्तलकैः सह । सूतकान्ते तदा पुत्रैः कार्यं शान्तिकपौष्टिकम् । पञ्चके तु मृतो योऽसौ न गतिं लभते नरः । तिलांश्चैव घृतयुक्तं च तस्मिंश्च हुतं दहेत्" इति । अतो नक्षत्रान्तरे मृतस्य पञ्चके दाहप्राप्तौ पुत्तलकविधिरेव भवति ततः सूतकान्ते शान्तिकं च । एवं पञ्चकान्ते मृतस्याश्विन्यां दाहप्राप्तौ पुत्तलकविधिर्न किन्तु सूतकान्ते शान्तिकमेव विधेयम्" धी० धा० ।

पञ्चकपाल त्रि० पञ्चसु कपालेषु संस्कृतः अण् तस्य लुक् । पञ्चकपालेषु संस्कृते पुरोडाशादौ समा० द्वि० । समाहृते पञ्चकपालेषु स्त्री ङीप् ।

पञ्चकर्ण त्रि० पञ्च कर्णा यस्य बहुत्वेऽपि विष्टादित्वात् न पूर्वपददीर्घः । पञ्चकर्णयुक्ते ।

पञ्चकर्मन् न० पञ्चानां कर्मणां समाहारः "अनो नलोपश्च वा हिगुः स्त्रियाम्" वार्त्ति० पक्षे नलोपाभावः । पञ्चानां कर्मणां वस्त्रेषादीनां समाहारे । तानि च कर्माणि कर्मन्शब्दे १७३६पृ० उक्तानि । २वैद्योक्ते कर्मपञ्चकभेदे "वमनं रेचनं नस्यं निरूहश्चानुवासनम् । पञ्चकर्मेदमन्यच्च शेयस्तत्रेषादिकम्" । पक्षे नलोपे ङीपि पञ्चकर्मीत्यपि स्त्री ।

पञ्चकषाय पु०न०पञ्चविधः कषायः "जम्बुशाल्मलिबाल्वं बदरं बकुलं तथा । एतेषां वल्कलरसः कषाय परिकीर्त्तितः इत्युक्ते पञ्चानां कषाये वल्कलरसे । कर्मधा० संज्ञात्वात् न हिगुः । २पञ्चसु कषायेषु ब०व० । "जम्बु शाल्मलि बाल्वं बदरं बकुलं तथा । कषायाः पञ्च विज्ञेयाः देव्याः प्रीतिकराः शुभाः" दुर्गोत्सवत०।

पञ्चकाम पु० ष०व० । कर्म० संज्ञात्वात् न हिगुः । "पञ्चकामा इमे देवि ! नामानि ब्रह्मणः पार्वति । कामसञ्जयकन्दर्पमकरध्वजसंज्ञकाः । मीनकेतुर्मरेशानि ! पञ्चमः परिकीर्त्तितः" तन्त्रसा० उक्तेषु पञ्चसु कामभेदेषु ।

पञ्चकृत्य पु०पञ्चं विस्तृतं कृत्यं यत्र । पञ्चगौडब्रह्मणे राजनि० ।

पञ्चकृष्ण पु० पञ्चसु कृष्णः । कोटभेदे कीटशब्दे दृश्यम् ।

पञ्चकोण न० पञ्च कोणा यस्य । पञ्चकोणात्मके १क्षेत्रभेदे २तन्त्रोक्ते यन्त्रभेदे ३तन्मात्रविधानवशपञ्चमात्मके स्थाने च

पञ्चकोल न० "पञ्चकोलं कणामूलं कृष्णाचव्याग्निनागरैः" शब्दच० उक्ते पाचनविशेषे यस्य गुणाः "पञ्चकोलं रसे पाके कटुकं रुचिकृन्मतम् । तीक्ष्णोष्णं पाचनं श्रेष्ठं दीपनं कफवातनुत् । गुल्मप्लीहोदरानाहशूलघ्नं पित्तकोपनम्" भावप्र० उक्ताः । "पिप्पलीपिप्पलीमूलं चव्यचित्रक नागरम् । दीपनीयः स्मृतो वर्गः कफानिलगदापहः" चक्रदत्तोक्ते २व्याधभेदे च ।

पञ्चकोष पु० संज्ञात्वात् कर्म० । वेदान्तिकसिद्धे अन्नमयादिषु पञ्चसु कोषवदाच्छादकेषु देहादिषु । तेषां स्वरूपादिकञ्च विवेकचूडामणौ दर्शितं यथा "कोशैरन्नमयाद्यैः पञ्चभिरात्मा न संवृतो भाति । निजशक्तिसमुत्पन्नैः शैवालपटलैरिवाम्बु यावीत्यम्" इत्युपक्रमे "देहोऽयमन्नभवनोऽन्नमयस्तु कोश-

चाक्षेण क्षीयति विनश्यति तद्विहीनः। त्वक्चर्ममांस-रुधिरास्थिपुरीषराशिर्नवं खयं भवितुमर्हति नित्य-शुद्धः"। "कर्मेन्द्रियैः पञ्चभिरन्वितोऽयं प्राणो भवेत् प्राणमयस्तु कोषः"। "ज्ञानेन्द्रियाणि च मनश्च मनोमयः स्यात् कोषो ममाहमिति वस्तुविकल्पहेतुः। संज्ञादिभेद-कलनाकलितो बलीयांस्तत्पूर्वकोशमभिपत्य विजृम्भते यः। पञ्चेन्द्रियैः पञ्चभिरेव कोशैः प्रचोद्यमानो विषयाञ्ज-धारया। जाज्वल्यमानो बहुवासनेन्धनैर्मनोमयाग्निर्दहति प्रपञ्चम्"। "बुद्धिर्बुद्धीन्द्रियैः सार्द्धं सप्तभिः कर्तृलक्षणः। विज्ञानमयकोषः स्यात् पुंसः संसारकारणम्। अनुव्रज-त्यमुमिदं विज्ञानमंशुः प्रकृतेर्विकारः। ज्ञान-क्रियावानहमित्यजस्रं देहेन्द्रियादिष्वभिमन्यते स्वयम्" आनन्दमयकोषस्तु आनन्दमयकोषशब्दे ७२६ पृ० उक्तः।

पञ्चक्रोशी स्त्री पञ्चानां क्रोशानां समाहारः। काश्याः दीर्घविस्ताराभ्यां पञ्चसु क्रोशेषु "वाराणस्यां कृतं पापं पञ्चक्रोश्यां विनश्यति। पञ्चक्रोश्यां कृतं पापमनन्तैर्जन्मभिर्विनश्यति" काशीख०। तद्भेदात् पञ्चक्रोशीदीर्घत्वाभावायां २काशब्दात्।

पञ्चचारगण न० ६त०। पञ्चानां चारीणां गणः समूहः। छन्दःपङ्गले "चारैस्तु पञ्चभिः प्रोक्तः पञ्चचारा-भिधो गणः। काश्यमैन्द्रवसासृग्विट सौम्यैश्चलैः समैः। स्यात् पञ्चचारगं तच्च सज्जौघेतं षडक्षरम्" राजनि०।

पञ्चगङ्ग अव्य० पञ्चानां गङ्गानां नदीनां समाहारः "नदी-भिश्च" मा० अव्ययी० "समाहारे चायमिष्यते" सि०कौ०। समाहृतास्तु पञ्चसु नदीषु भा०द्रो०१४अ० तत्र पञ्चगङ्गेषु स्नातस्य सप्तम्या वा न लुक्। २काशीस्थे पञ्चनदतीर्थे पञ्चनदशब्दे दृश्यम्।

पञ्चगण पु० पञ्चानां गणो यत्र। 'विदारी गन्धा वृहती वृश्चिकाली नेदिष्ठिकाः राजनि० उक्ते विदार्यादीनां पञ्चानां गणे।

पञ्चगव न० पञ्चानां गवां समाहारः टच्समा० क्लीवता च। पञ्चानां गवां समाहारे। पञ्च गावोधनमस्य उत्तरपदद्विगौ टच् समा०। पञ्चसंख्यान्वितगवधनस्वामिनि त्रि०।

पञ्चगव्य न० गोर्विकारः यत् पञ्चसु स्थितं गव्यम्। गोमूत्रादि पञ्चके तस्य प्रभावादि क्षेमा०व्र०ख० उक्तं यथा स्कन्दपुराणे विष्णुं तथा वह्नीन्द्रवाय्वर्कदैवतानि यथा-क्रमम्। विड्वेति कुबेरदत्त पितृराजाधिदैवतम्। गोक्षीरभावे त्वजैतानि कपिलायाः प्रकल्पयेत्। गोमूत्र-मागस्तार्द्धं गव्यं क्षीरस्य च त्रयम्। दधं दशो घृतस्यैकमेकत्र कुशवारिजः। गायत्र्या चैव गोमूत्रं गन्धद्वारेति गोमयम्। आप्यायस्वेति च क्षीरं दधि क्राव्णेति वै दधि। तेजोऽसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकम्। एभिस्तु पञ्चभिर्युक्तं पञ्चगव्यं प्रचक्षते। एतदेव महापुण्यं ब्रह्मकूर्चमिति स्मृतम्"। व्यासेन "गोमूत्रं ताम्रवर्णायास्त्वेकमाषकसङ्ख्यया। पुण्यं वा रुद्रदैवत्यगायत्र्यभिमन्त्रितम्। गोमयं श्वेतवर्णाया वायुदैवत्यमन्त्रवा। मन्त्रोयादग्निदैवत्यकृष्णवारेति वै मनैः। क्षीरं काञ्चनवर्णायाः सोमदैवत्यमेव च। आप्यायस्वेति मन्त्रेण माषद्वादशसम्मितम्। मन्त्रोत वायुदैवत्यं शुक्लवर्णोद्भवं दधि। दशमाषमितन्तु दधि-क्राव्ण इति चरन्। हतं तु नीलवर्णायाः पञ्चमाषक-संख्यया। मन्त्रोत सूर्यदैवत्यं तेजोऽसीति जपन् क्र-मात्। शतत्रयं माषमानं चत्वारिंशच्च पञ्च च। कुशो-दकस्य मन्त्रोयाद्देवस्यत्वेति कीर्त्तयन्। ताम्रपात्रे प-लाशे वा पात्रे मिश्रीकृतञ्च तत्। आपोहि ष्ठेति चा-पोद्य मन्त्रेण पिबेच्च तत्। उदङ्मुखस्थिराचम्य यतो गच्छेत् सुखं गृहम्। तत्रापि होमे प्राग्वच्च कृत्वा दद्याच्च दक्षिणाम्। ब्राह्मणस्य यथा गव्या शोभनं न मनोहरम्। गवां वर्णास्तु शुक्लाद्याः सन्ति देशेषु यत्र न! तत्र वर्णविभागेन पञ्च गव्यानि चाहरेत्। वर्णलाभाच्च दोषोऽस्ति मात्राहीनं विवर्जयेत्। त्याज्यानि दूषितानां च दधिमूत्रपयांसि च। चेन्नवेद्यास्त्विमच्छा-यामभव्यैः सम्पृक्तां तथा। रोगार्त्तानां च मूत्रार्त्ति सूतायुष्मानामभक्तलम्। (सूतायुष्मा सूतसुतः) निष्क-लत्वेन बन्ध्यानां क्षत्तानां क्षमिभिस्तथा। श्वमानप्रति-दत्तानि सन्धिनीप्रभवानि च। गृहभाण्डे मनोज्ञे च भूमावपतितानि च। यहीतव्यानि विविधं खेदं तासां न कारयेत्"। ब्रह्मकूर्चव्रतमिदं सर्वपाप प्रणाशनम्। सर्वकामप्रदं पुंसां रूपारोग्यबलप्रदम्। महतामपि पापानां नाशनं श्रीविवर्द्धनम्"।

पञ्चगव्यघृत सुश्रुतोक्ते घृतभेदे "त्रिफलां चित्रकं शुण्ठीं हरिद्रे द्वे विषां वचाम्। विड्ङ्गं त्रायमाणां च दारु तद्वच्च। पञ्चगव्यमिदं पानादिषमज्वरनाश-नम्। पञ्चगव्यस्थते गर्भात् पाण्डुमन्यहृद्ग्रहे च। वह-याच परं पाण्डुं गुडूच्या तद्वदेव तु। औषज्वरे च

शोफे च पाण्डुरोगे च पञ्जितम्" । [भिर्गोभिः क्रीते ।
पञ्चगु त्रि० पञ्चभिर्गोभिः क्रीतः ठक् तस्य लुक् ङ्यञ्च । पञ्च-
पञ्चगुण पु० पञ्चगुणितो गुणः कर्म० । १शब्दस्पर्शरूपरसगन्ध-रूपेषु गुणेषु । पञ्च गुणा यस्याः । २पृथिव्यां स्त्री मेदि० "यो यो यावतिथस्तेषां स स तावद्गुणः स स्मृतः" मनुना सामान्यत उक्तेः पृथिव्या पञ्चत्वात् पञ्चगुणत्वम् । ३त० ३पञ्चभिर्गुणिते ४पञ्चप्रकारे च संख्या० रघु० ।
पञ्चगुप्त पुंस्त्री करचरणयोश्चतुष्कं शिरश्चेति पञ्च गुप्तान्यस्य । १कञ्चुके त्रिका० स्त्रियां ङीप् । २चार्वाकदर्शने त्रिका० ।
पञ्चगुग्गिरसा स्त्री पञ्चधा गुग्गो रसोऽस्याः । स्यूलायां राजनि० । [उक्ते षोडशाक्षरपादके छन्दोभेदे ।
पञ्चचामर न० "यमाधिकापदहयं यदन्ति पञ्चचामरम्" छ० र०
पञ्चचितिक पु० पञ्च चितयः प्रस्तारा यस्मिन् । १अग्निभेदे "पञ्चकृत्वः सादयति पञ्चचितिकोऽग्निः" शत० ब्रा० ७।१। १।७२ "पञ्चकृत्व इति मध्ये उपर्यधश्चैकाचतुष्टयस्यैकाः सादनायान्यासां चतस्र इति पञ्चचितयो भवन्ति" भा० ।
पञ्चचीर पु० पञ्च चीरागस्य । मञ्जुघोषे त्रिका० ।
पञ्चचूडा स्त्री अप्सरोभेदे भा० व० १६६ श्लोके
पञ्चजन पु० पञ्चभिः भूतैर्जन्यते जन-घञ्, न ह्रस्वः । १मनुष्ये अमरः । २मनुष्यसम्बन्धिनि प्राणादौ ३मनुष्यतत्त्वे देवादौ ४मनुष्यभेदे ब्राह्मणादौ च शा० सू० भाष्यम् तथाहि "यस्मिन् पञ्च पञ्च जना आकाशश्च प्रतिष्ठितः" तदुत्तरवेदमन्त्रे "प्रत्न पञ्च शब्दशब्देन पञ्चविंशतितत्त्वान्युच्यन्ते" इति सांख्यमतनिराकरणेन पञ्चजनशब्दस्य प्राणादिपरत्वं समर्थितं दिङ्मात्रमत्रोद्धृतं
"कथं तर्हि पञ्च पञ्चजना इति, उच्यते, "दिक्सङ्ख्ये संज्ञायामिति" पा० विशेषस्मरणात् संज्ञायामेव पञ्चशब्दस्य जनशब्देन समासः, ततश्च रूढ्याभिप्रायेणैव केचित् पञ्चजना नाम विवक्षन्ति, न साङ्ख्यतत्त्वाभिप्रायेण, ते कतीत्यस्माकञ्चार्थे पुनः पञ्चेति प्रयुज्यते, पञ्चजना नाम केचित्, ते च पञ्चेत्यर्थः सम्पद्यते सम्पन्ने यथा। के पुनस्ते पञ्चजना नामेति तदुच्यते । "प्राणादयो वाक्यशेषात्" शा० सू० "यस्मिन् पञ्च पञ्चजना इत्यत उत्तरस्मिन्मन्त्रे ब्रह्मस्वरूपनिरूपणाय प्राणादयः पञ्च निर्दिष्टाः "प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदुः" इत्यत्र वाक्यशेषगताः सन्निधानात् पञ्चजना विवक्षन्ते । कथं पुनः प्राणादिषु पञ्चजनशब्दप्रयोगः तत्रापि वा कथं जनशब्दप्रयोगः समाने तु प्रसिद्धिप्रक्रमे वाक्यशेषवशात् प्राणादय एव यक्षीतव्या भवन्ति जनसम्बन्धाच्च प्राणादयो जनशब्दभाजो भवन्ति । जनवचनश्च पुरुषशब्दः प्राणेषु प्रयुक्तः, "ते वा एते पञ्च ब्रह्म पुरुषाः" इति, अत्र "प्राणो ह पिता प्राणो ह माता" इत्यादि च ब्राह्मणम् । समासबलाच्च समुदायस्य रूढत्वमभिप्रेतम् । कथं पुनरसति प्रथमप्रयोगे रूढिः शक्याश्रयितुं शक्या, उद्भिदादिवदित्याह । प्रसिद्धार्थसन्निधानेन ह्यप्रसिद्धार्थः शब्दः प्रयुज्यमानः समभिव्याहारात् तद्विषयो नियम्यते यथोद्भिदा यजेत, यूपं छिनत्ति, वेदिं करोतीति । तथाऽत्रापि पञ्चजनशब्दः समासाव्याख्यानादसतसंज्ञाभावः संज्ञाकाङ्क्षो वाक्यशेषसमभिव्याहृतेषु प्राणादिषु वर्त्तिष्यते । केचित्तु देवाः पितरो गन्धर्वा असुरा रक्षांसि च पञ्च पञ्च जना व्याख्याताः । अन्ये चत्वारो वर्णा निषादपञ्चमाः परिगृहीताः" । तत्परिग्रहेऽपीह न कश्चिद्विरोधः । आचार्यस्तु न पञ्चविंशतेस्तत्त्वानामिह प्रतीतिरस्तीत्येवंपरतया प्राणादयो वाक्यशेषादिति जगाद" ।
२दैत्यभेदे च यस्यास्थ्नां क्षणस्य पाञ्चजन्यः शङ्खोजातः । पाञ्चजन्यशब्दे दृश्यम् । ३कश्यपवंशपुत्रे हरिवं० १२अ० अंशुमतः पितरि भगीरथस्य ४पुत्रभेदे १२ अ० । ५प्रजापतिभेदे भाग० ६।६।४६ विश्वायसदुहितरि भरतस्य ६पत्न्यां स्त्री ङीप् । भाग० ५।७।१
पञ्चजनीन षष्ठ जनेषु व्याप्तः ख । मनुष्ये हेमा० ।
पञ्चजीरकगुड पु० चक्रदत्तोक्ते जीरकादिभिः पञ्चे गुडभेदे "जीरकं हपुषा धान्यं यवानी सरदारु च । यमानी त्रिकटुकं चित्रकस्य पत्रांशानि तथान्यच्च चतुःपलम् । कर्षेरुक्तं नागरस्य कृतं दीप्यकमेव च । गुडस्य च शतं दद्यात् घृतस्यैवं तथैव च । जीरद्वितस्यसंयुक्तं घनैर्भक्षयेदग्निना पचेत् । पञ्चजीरक इत्येष सूतिकानां प्रशस्यते । गर्भाशिनीनां नारीणां छर्दिष्वेते समाहृते । विंशतिं व्यापदो योनेः कासं श्वासं ज्वरं क्षयम् । कृमीसकं पाण्डुरोगं दौर्गन्ध्यं वङ्क्षणव्रताम् । हन्ति पीनोन्नतकुचाः पद्मपत्रायतेक्षणाः । उपयोगात् स्त्रियोनित्यमलक्ष्मीमत्यजिताः" ।
पञ्चज्ञान पु० पञ्चानां पदार्थानां ज्ञानमस्य । १बुद्धे त्रिका० २पाशुपतदर्शनाभिज्ञे च नकुलीशशब्दे ३।७५ पृ० दृश्यम् ।

पञ्चत् पु० पञ्च परिमाणमस्य वर्गस्य, पञ्चन्+मि० । पञ्चसंख्यायुक्ते वर्गे

पञ्चतच्चन्(च्ची) न० पञ्चानां तच्चां समाहारः अजन्तत्वात् नलोपे वा ङीप् । पञ्चानां तच्चां समाहारे पक्षे वा ङीपि स्त्री ।

पञ्चतत्त्व पु०न० पञ्चानां तत्त्वानां समाहारः । पञ्चसु भूतेषु स्वरोदयः । "मद्यं मांसं तथा मत्स्यो मुद्रा मैथुनमेव च । पञ्चतत्त्वमिदं प्रोक्तं देवि ! निर्वाणहेतवे । मकार पञ्चकं देवि ! देवानामपि दुर्लभम्" "पञ्चतत्त्वविहीनानां कलौ सिद्धिर्न जायते" तन्त्रसा० । वैष्णवानान्तु "गुरुतत्त्वं मन्त्रतत्त्वं मनस्तत्त्वं हरेश्वरि ! । देवतत्त्वं ध्यानतत्त्वं पञ्चतत्त्वं प्रकीर्त्तितम्" निर्वाणतन्त्रे ।

पञ्चतन्त्र न० तन्त्रम् । नीतिशास्त्रभेदे ।

पञ्चतन्मात्र न० पञ्चगुणितं तन्मात्रम् । पञ्चगुणिते शब्दस्पर्शरूपरसगन्धात्मके १तन्मात्रे २सूक्ष्मपञ्चभूतरूपे आकाशादौ तन्मात्रशब्दे ३२२८ पृ० दृश्यम् ।

पञ्चतप पु० पञ्चभिस्तेजस्विभिः अग्निचतुष्टयसूर्य्यैस्तपति तप-अच् । पञ्चभिस्तप्यति तपस्विभेदे "पौष्णे पञ्च तपास्तथा" भा०अनु० १४२अ० अक्षन् । पञ्चतपस् तत्रार्थे माघः २।५१ श्लो०। पञ्चातप शब्दे दृश्यम् ।

पञ्चतय न० पञ्चानामवयवं पञ्च अवयवायस्य वा अवयवे तयप् । १पञ्चसंख्यायां २तदन्विते त्रि० स्त्रीत्वे ङीप् । "द्वित्रयः पञ्चतय्यः क्रियाऽक्रियाः" पा० सू० ।

पञ्चता स्त्री पञ्चानां भूतानां भावः तद्भावापत्तिः । आरब्धक पञ्चभूतानां १तद्भावापत्तौ उपचारात् २मृत्यौ च ।

पञ्चतिक्त न० पञ्चगुणितं तिक्तम् । "निम्बामृता दृषपटोल निदिग्धिकाश्चेति" चक्रदत्तोक्ते पञ्चविधे तिक्तद्रव्यभेदे

पञ्चतीर्थी स्त्री पञ्चानां तीर्थानां समाहारः ङीप् । तीर्थपञ्चके सा च तीर्थभेदे भिन्नभिन्नरूपा तत्र काशीस्था यथा "ज्ञानवापीसपस्पृश्य नन्दिकेशं ततोऽर्चयेत् । तारकेशं ततोऽभ्यर्च्य महाकालेश्वरं ततः । ततः पुनर्दण्डपाणिरित्येषा पञ्चतीर्थिका" काशीख० १००अ० । पुरुषोत्तमस्था यथा "मार्कण्डेयवटे क्षेत्रे रौहिणेये महोदधौ । इन्द्रद्युम्नसरः स्नात्वा पुनर्जन्म न विद्यते" मत्स्यपु० यथा उत्तरमानसदक्षिणचमानसकनखलधर्मवनफल्गुतीर्थात्मिका । तत्र वायुपु० उदिच्यां प्रसिद्धमित्युक्तम् यथा "उदिच्यां मुञ्जपृष्ठस्य देवर्षिगणसेवितम् । स्नात्वा धर्मवनं तीर्थं त्रिषु लोकेषु विश्रुतम्" इत्युक्तं तेन धर्मवनस्यैव तत्र प्राप्तता तेनैव पञ्चसंख्यायाः पूरणात् । नानास्थानस्थिता वराहपु० उक्ता यथा "पृथिव्यां यानि तीर्थानि सर्वाण्येवाभिषेचनात् । तत् पञ्चतीर्थीस्नानेन समं नास्त्यत्र संशयः । एकादश्यां च विश्राम्यां १ द्वादश्यां पौष्करे२ तथा । त्रयोदश्यां नैमिषेऽ च प्रयागेऽ च चतुर्दशी । कार्त्तिक्यां पुष्करेऽ चैव कार्त्तिकस्य सितासिते । कालेष्वेषु नरः स्नात्वा सर्वं पापं व्यपोहति" ।

पञ्चत्व न० पञ्चानां भावः तद्भावापत्तिः । १पञ्चभूतानामारब्धकसंयोगनाशात् स्वभावप्राप्तौ २तदुपलक्षिते मरणे अमरः

पञ्चथ त्रि० पञ्चानां पूरणः । "षट् च छन्दसि पा० वेदे पूरणे थट् । पञ्चसङ्ख्यापूरणे लोके तु पञ्चम इत्येव

पञ्चदक पु० देशभेदे लोकरूढ्याः पञ्चदका वसना ह्यवरास्तथा" मार्कण्डे० ५८अ० । सोऽभिजनोऽस्य तस्य राज्ञो वा अण् । पाञ्चदक पित्रादिक्रमेण तद्देशवासिनि तद्भूपे च बहुषु तस्य लुकि । तद्राजः प्रयोगः ।

पञ्चदश त्रि० पञ्चदशानां पूरणः डट् । १पञ्चदशसंख्यापूरणीके स्त्रियां ङीप् । सा च पञ्चदशपूरणतिथिभेदे २पौर्णमास्याम् ३अमावास्यायाम् विद्यारण्यप्रणीते वेदान्तप्रकरणभेदे च । एवं षष्टिंशादयोऽपि पञ्चाधिकविंशतिसंख्यापूरणे त्रि० स्त्रियां ङीप् । इदांस्तु विशेषः विंशत्यादौ पूरणे तमप् वा । पञ्चविंशतितमादयोऽपि तत्रार्थे त्रि० । "तैयुं तं शतादि "दशादेर्डौक्तौ शतादौ" सम्व० ड । तैयुंते शतादौ त्रि० स्त्रियां टाप् इति भेदः ।

पञ्चदशन् त्रि० ब०व० पञ्चाधिका दश । (पनेर) १पञ्चाधिकदशसंख्यायां २तत्संख्येये च ।

पञ्चदशाह पु० पञ्चदशगुणितमहः टच् समा० । अह्नोऽहादेशः । पञ्चदशगुणिते यज्ञे । "वैश्ये पञ्चदशाहः स्यात्" मनुः ।

पञ्चदशाहिक त्रि० पञ्चदशाहः साधनकालतयाऽस्यास्य ठन् । पञ्चदशाहसाध्ये व्रतभेदे "पिण्याकदधिसक्तूनां प्राशनं प्रतिवासरम् । एकैकमुपवासः स्यात् सौम्यकृच्छ्रः प्रकीर्त्तितः । एषां त्रिरात्रमभ्यासादेकैकस्य यथाक्रमम् । तच्चापुरुष इत्येषः श्रेयः पञ्चदशाहिकः" चतुर्विंशे ।

पञ्चदशिन् त्रि० पञ्चदश परिमाणमस्य इनि । पञ्चदश परिमाणयुक्ते शत०ब्रा० १३।२।५।१ उदा० स्त्रियां ङीप् । एवं पञ्चविंशत्यादि परिमाणमस्य इनि । पञ्चविंशिनः पञ्चत्रयः पञ्चविंशत्यादि परिमाणयुक्ते त्रि० स्त्रियां ।

पञ्चदीर्घ त्रि० पञ्चसु अवयवेषु दीर्घः। "बाहू नेत्रद्वयं कुक्षिर्हनू नासे तथैव च। स्वनयोरन्तरञ्चैव पञ्चदीर्घः प्रशस्यते" स्मृयुक्तेषु पञ्चदीर्घत्वप्रशस्तत्वयुक्ते पुरुषे

पञ्चदेवता स्त्री संज्ञात्वात् कर्म०। आदित्यं गणनाथं च देवीं रुद्रं च केशवम्। पञ्चदैवतमित्युक्तं सर्वकर्मसु पूजयेत्" इत्युक्तेषु पञ्चसु देवेषु। केचिदेषादित्यादिनायकादित्वमिच्छन्ति शाक्तास्तु शक्तिरादित्यादित्वं मन्यन्ते इति भेदः।

पञ्चन् त्रि० पचि–कनिन्। १पञ्चसंख्यायां २तत्संख्यायुक्ते च पञ्चसंख्यायुक्तास्च कतिचित् पदार्था एकादिशब्दे १५०६ पृ० दर्शिताः। पञ्चकशब्दे द्रष्टव्यम्।

पञ्चनख पुंस्त्री०पञ्च नखा यस्य। १गजे २कूर्मे च हेमच०। ३व्याघ्रे राजनि०। ४शरभादिषु च "शरभः शल्लकी गोधा खड्गी कूर्मश्च पञ्चमः" भक्ष्यपञ्चनखोक्तौ स्मृतिः "त्रिविधं शल्लकं गोधां खड्गिकूर्मशशांस्तथा। भक्षान् पञ्चनखेष्वाहुः" मनुः।

पञ्चनद पु० पञ्च नद्यः सन्त्यत्र अच्। (पञ्जाब) प्रसिद्धे १देशभेदे। स च देशः अपरस्यां दिशि कूर्मविभागशब्दे २१८८पृ० विवृतिः। "वितस्तिचन्द्रभागा च विपाशेरावती तथा। शतद्रुश्चेति विज्ञेयाः पञ्च नद्यः शुभावहाः"। सोऽभिज नोऽस्य तस्य राजा वा अण्। पाञ्चनद पित्रादिक्रमेण तदाभिनि तद्भूपे च बहुषु अणो लुक्। भा०आ० ७अ०। पञ्चानां नदीनां समाहारः। "नदीभिश्च" अव्ययीभावसमा० २पञ्चनदीसमाहारे तच्च आगीस्वनदीपञ्चकरूपं तीर्थं "किरणाधूतपापे च तस्मिन् धर्मनदे शुभे। स्नवन्त्यो पापसंहर्त्र्यौ वाराणस्यां शुभह्रदे। ततो भागीरथी प्राप्ता तेन दैवीपिना सह। भागीरथी समायाता यमुना च सरस्वती। किरणा धूतपापा च पुण्यतीर्थे सरस्वती। गङ्गा च यमुना चैव पञ्च नद्यः प्रकीर्त्तिताः। अतः पञ्चनदं नाम तीर्थं त्रैलोक्यविश्रुतम्" काशीख०५८अ०।

पञ्चनिम्ब न० "पञ्चनिम्बन्तु तत्पुष्पमूलत्वक्फलच्छदैरिति" शब्दच० उक्ते निम्बस्य पुष्पादिपञ्चके। [शब्दरत्ना०।

पञ्चनी स्त्री पचि–ल्युट्। शारिष्टङ्गलायाम् (पाशारङ्क)

पञ्चपक्षिन् पु० शिवोक्ते पक्षिपक्षाधिकारेण प्रश्नादिज्ञानार्थे शाकुनशास्त्रभेदे "अक्षरं पक्षिभूतञ्च दिग्देवतदिनानि च। कालं वर्णं बलं मित्रं धातुलिङ्गादिकं क्रमात्। प्रश्नादिजातिवर्णञ्च देहसङ्ख्यादिभिः। चिन्तितान्यपि सर्वाणि वक्ष्यन्ते वर्णकैः क्रमात्। शङ्कनख क्रमागत्या द्यूते युद्धे जयादिषु। आरुढप्रश्नस्तस्मैभ्यः प्रथमाक्षरतोऽपि वा। अकारादिस्वराणाञ्च पञ्चानाञ्च विचारयेत्। अस्य नामाक्षरस्यादौ स्वरारूढं सशब्दमेत्। प्रश्नकस्य वचः श्रुत्वा यान्त्योवर्णः स्वरश्चया। स्वरेण कल्पयेद्वारं वारात् पक्षी प्रजायते। पक्षिणो जायते वाक्यं वाक्याच्च फलसम्भवः। अकाराद्या ओकारान्ताः स्वराः पञ्च प्रकीर्त्तिताः। भक्ष्यार्थं कल्पयेद्रूपं स्वराणां पक्षिरूपिणः। अकारः श्येन आख्यात इकारः पिङ्गलस्तथा। उकारो वायसश्चैव एकारस्ताम्रचूडकः। ओकारो नीलकण्ठश्च स्वराणां पक्षिसंज्ञकाः। अकारः पूर्वदिग्भागे इकारश्चैव दक्षिणे। उकारः पश्चिमे ज्ञेय एकारश्चोत्तरे तथा। मध्यस्थानेषु सर्वेषु ओकारः परिकीर्त्तितः। प्राङ्मुखेनः, पिङ्गलो याम्ये, पश्चिमे काक उच्यते। उत्तरे ताम्रचूड़श्च, कथापी मध्यगो मतः" इत्यादि अस्य कथादिकं तत्र द्रष्टव्यम् विस्तरभयान्नोक्तम्।

पञ्चपञ्चिनी स्त्री पञ्च पञ्च ऋचः परिमाणमस्याः ठिनि। पञ्चदशस्तोमस्य विष्टुतिभेदे "अथ पञ्चदशस्तोमस्य तिस्रो विष्टुतयः। तत्र प्रथमं पञ्चपञ्चिन्याख्यां विष्टुतिं दर्शयति" भा०। "पञ्चभ्यो हिङ्करोति स तिसृभिः स एकया स एकया, पञ्चभ्यो हिङ्करोति स एकया स तिसृभिश्च एकया, पञ्चभ्यो हिङ्करोति स एकया स एकया स तिसृभिः, पञ्चपञ्चिनी पञ्चपञ्चदशस्य विष्टुतिः" ताण्ड्य०ब्रा० ४।१। "चतुर्षु स्तोत्रेष्वेकैकं तृचात्मकं सूक्तं तस्मिन् तृचे पञ्चदशसंख्या ऋचः सम्पादनीयाः। तत्र सम्पादनम् आवृत्तिमन्तरेण न सम्भवतीत्यावृत्तिप्रकार दर्शोपदिश्यते त्रिभिः पर्यायैः स्तोत्रमावर्त्तनीयम्। अत्र आद्यावृत्तेषु सूक्ते प्रथमा ऋक् "तन्वा समिङ्गिरिति" द्वितीया "स नः पृथ्विति" तृतीया तासु प्रथमामृचं प्रथमे पर्याये त्रिरावर्त्तयेत् इतरे द्वे सकृत् सकृत्। द्वितीये पर्याये मध्यमां त्रिरभ्यसेत्, तृतीये पर्याये अन्तिमां त्रिरभ्यसेत्। एवं सत्येकैकस्य आवृत्तिः पञ्चधा सम्पद्यते। एषा पञ्चपञ्चिनी एकैकस्मिन् पर्याये पञ्चधा भवतीति। पञ्चपञ्चिन्येतत्संज्ञा पञ्चदशस्तोमस्येषा विष्टुतिः"।

पञ्चपत्र पु०पञ्च पञ्च पत्राण्यस्य। (आन्दला) वृक्षभेदे राजनि०

पञ्चपदी स्त्री पञ्च पादा अस्याः अन्यत्वार्थे ङीपि पद्भावः। १ऋग्भेदे आश्व० श्रौ० १।७।१६ उदा०। कुशद्वीपस्थे २नदीभेदे भाग०५।१०।२६ उदा०।

पञ्चपर्णिका स्त्री पञ्च पञ्च पर्णान्यवस्थाः कप् कापि अतइत्वम्। गोक्षुरक्षुपे राजनि०।

पञ्चपर्वन् न० संज्ञात्वात् कर्म०। "चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा। पर्वाण्येतानि राजेन्द्र! रविसंक्रान्तिरेव च" परिभाषितेषु अष्टम्यादिषु

पञ्चपल्लव न० पञ्चानां पल्लवानां समाहारः पात्रा०। इत्र विशेषपञ्चकपल्लवे तच्च गन्धकर्मणि "आम्रजम्बूकपित्थानां बीजपूरकबिल्वयोः। गन्धकर्मणि सर्वत्र पत्राणि पञ्चपल्लवम्" शब्दचन्द्रिकोक्तम्। वैदिककर्मणि त्वाश्वघटे देवन्तु "अश्वत्थोडुम्बरप्लक्षचूतन्यग्रोधपल्लवाः। पञ्चपल्लवमित्युक्तं सर्वकर्मणि शोभनम्" ब्रह्मपु० उक्तं याज्ञम्। तान्त्रिककर्मणि तु "पनसाम्रं तथाश्वत्थं वटं बकुलमेव च। पञ्चपल्लवमुक्तं च सर्वनिम्नन्तरेदिभिः"। तेषां फलविशेषस्तत्र दृश्यः। कर्म०। पञ्चभक्त्यादयोऽप्यत्र ब०व०।

पञ्चपात्र न० पञ्चानां पात्राणां समाहारः पात्रा० न ङीप्। १समाहृतेषु पञ्चसु पात्रेषु। पञ्च पात्राणि दानोद्देश्यानि यत्र। वैश्वदेवपित्र्यादित्वयरूपपञ्चदैवते २श्राद्धे तच्च अमावास्याप्रेतपक्षसङ्क्रान्तीद्देश्यकश्राद्धं सपिण्डीकरणञ्च एतेषु मातामहपक्षाभावात् पञ्चदैवतत्वम्। तथात्वेऽपि श्राद्धमपि तत्र पित्रादिस्थाने मात्रादिनिर्देश्यत्वात् तथात्वम्।

पञ्चपाद् त्रि० पञ्च पादा यस्य अन्तलोपः समा०। १पञ्च पादयुक्ते स्त्रियां ङीपि पङ्क्तावः। पञ्चपङ्क्त्यङ्कमेरूपः पादोऽस्य। २संवत्सरे संवत्सरस्य पञ्चर्त्वात्मकत्वात् हेमन्तशिशिरयोरेकत्वाभिप्रायेण ऋतूनां पञ्चत्वम्। ऋ० १।६४। १२भा० दृश्यम्।

पञ्चपादी स्त्री पञ्चानां पादानां समाहारः ङीप्। पादपद्धतौ पादवेद्ये ग्रन्थावयवभेदः संज्ञायां कन्। पञ्चपादिका शारीरकभाष्यव्याख्याने ग्रन्थभेदे

पञ्चपितृ पु० संज्ञात्वात् कर्म०। "जनकश्चोपनेता च यश्च कन्यां प्रयच्छति। अन्नदाता भयत्राता पञ्चैते पितरः स्मृताः" प्रा०वि० धृतवचनोक्ते जनकादिपञ्चके

पञ्चपित्त न० पञ्चगुणितं पित्तं प्रा०त०। "वराहच्छागमहिष मत्स्यभाकूरपित्तकम्। पञ्चपित्तमिदं प्रोक्तं सर्वेष्वेव हि कर्मसु" वैद्यकोक्ते वराहादिपञ्चकपित्ते।

पञ्चप्रदीप न० पञ्च प्रदीपाः यत्र। नीराजनाङ्गे दीपभेदे "हरेः पञ्चप्रदीपेन वह्नयो भक्तितत्परः" पद्मपु०।

पञ्चपुष्प न० पञ्चगुणितं पुष्पम्। "पञ्चकाञ्चनपीतकरवीरं च पञ्चकम्" देवीपु० १०३अ० उक्ते पुष्पपञ्चके।

पञ्चप्रस्थ न०पञ्च विषयाः शब्दादयः प्रस्थाः स्थानत्व यस्य। संसारवने "स एकदा महेष्वासो रथं पञ्चाश्वमास्थितम्। द्वीपं द्विचक्रमेकाक्षं त्रिवेणुं पञ्चबन्धुरम्। एकरश्मिमेकदमनमेकनीडं द्विकूबरम्। पञ्चप्रहरणं सप्तवरूथं पञ्चविक्रमम्। हैमोपस्करमारुह्य स्वर्गवर्माक्षयेषुधिः। एकादशचमूनाथः पञ्चप्रस्थमगाद्वनम्" भाग० ४।२६।४। "महाभिष्वाहो धनुः कर्षत्वभोक्तृत्वाद्यभिनिवेशोयस्यसः। रथमारुह्य पञ्चप्रस्थं वनमगादिति श्रुतौवैनाश्ववः। रथम् इदानीमेव विहतं स्वप्नेदृक् जाग्रद्दृश्य मतसम्बत्सरोपभोग्यपुरत्वेनोक्तत्वात्। पञ्चज्ञानेन्द्रियाण्यश्वाः यस्य। आयुर्गं शीघ्रगतिम्। हे अहन्तामनते दृश्ये दक्षिणके यस्य। हे पुण्यपापे चक्रे यस्य। एकं प्रधानमनो यस्य तयोर्गुणावेषणोर्ध्वजा यस्य पञ्च प्राणा बन्धुराणि बन्धनानि यस्य। एकं मनो रश्मिः प्रग्रहो यस्य एका बुद्धिर्दमनः स्रुतो यस्य कर्मधारयः। एकं हृदयं नीडं रथिनउपवेशस्थानं यस्मिन्। द्वौ श्रोत्रनासौ क्षुरौ युगबन्धनस्थाने यस्य। पञ्च शब्दादयो विषयाः प्रक्षिप्यन्ते प्रक्षिप्यन्ते यस्मिन् यस्य व्याख्यानं भविष्यति पञ्चेन्द्रियार्थप्रक्षेप इति। सप्त धातवोवरूथा रथरक्षार्थं चर्मावावरणानि यस्य पञ्च कर्मेन्द्रियाणि विक्रमा गतिप्रकारा यस्य। हैमोपस्करं सौवर्णोरथं स्वर्गवर्मा वर्मं च कवचं रजोगुणाहतं अक्षयेषुधिर्निषङ्गम् अनन्तवासनाहङ्कारोपाधिः। एकादशो मनोरूपः चमूनाथः सेनापतिर्यस्य। वासनामयस्य मनसः प्रग्रहत्वं सङ्कल्पविकल्पात्मकस्य इन्द्रियवनत्वेन वश्यमाणस्य चमूनाथत्वमिति भावः। पञ्च शब्दादयो विषयाः प्रस्थाः स्थानयो यस्मिन् तद्वनं भजनीयं देशमगात्" श्रीध०।

पञ्चप्राण पु० कर्म०। देहस्थे प्राणनादिवृत्तियुते वायुपञ्चके पञ्चवृत्तिशब्दे दृश्यम्।

पञ्चप्रासाद पु० पञ्चचूडायुक्तः प्रासादः प्रा०त०। (पञ्चरत्न) इति ख्याते देवगृहभेदे "पञ्चैकाधिकं रम्यं पञ्चप्रासादसंयुतम्। कारयित्वा हरौ चाथ घृतपायो दिवं व्रजेत्" अग्निपु०।

पञ्चबन्ध पु०पञ्च पञ्चमः बन्धो भागो यत्र। पञ्चमांशयुतेदमादौ "आगमेनोपभोगेन लब्धं भाग्यमतोऽन्यथा। पञ्चबन्धोदयस्तत्र राज्ञे तेनाविभाविते" मिता०धृतवचनम्।

पञ्चबला स्त्री पञ्चगुणिता बला। ब्रह्मनागबलाभद्रबला-

तिवला राजवलाऽपवलापञ्चके नैवरुक्प्रकाशिकायाम्।

पञ्चबाण ङ० पञ्च बाणा यस्य। १कन्दर्पे तस्य बाणपञ्चकं च कालिकापुराणशब्दे २०१३५०दर्शितम् संज्ञात्वात् कर्म०। २कामस्य बाणेषु पञ्चविधामिनानीतेषु विवाहादौ वर्जनीयेषु पञ्चसु शरीरादिषु उभयत्रशब्दे १२६६५० दृश्यम्।

पञ्चबाहु पु० पञ्च बाहवोऽस्य। महादेवे हरिवं०२७७अ०।

पञ्चब्रह्म न० उपनिषद्भेदे

पञ्चभद्र पुंस्त्री पञ्चसङ्ख्यकभेदेषु भद्रः पुष्पितत्वात्। "पञ्चभद्रस्तु कृतपृष्ठसुखपार्श्वेषु पुष्पितः" हेम० उक्ते १हयभेदे स्त्रियां जातित्वात् ङीष्। "शिरोरुजापर्पटवारिवाहभूनिम्बगुडूचीजनितः कषायः। समीरपित्तज्वरजर्जराणां करोति भद्रं खलु पञ्चभद्रम्" शार्ङ्गधरोक्ते २पाचनभेदे न०

पञ्चभूत न० ब०व०संज्ञत्वात् कर्म०। आकाशवायुतेजोजलभूमिरूपभूतेषु। "भूतादिकादहङ्कारात् पञ्चभूतानि जज्ञिरे" भार०शि०। अस्य पुंस्त्वमपि "शब्दाद्व्योम स्पर्शतस्तेन वायुस्ताभ्यां रूपाद्बह्निरेतैः रसाच्च। अभ्भांस्येतैर्गन्धतो भूर्धरात्मा भूताः पञ्च स्युर्गुणोनाः क्रमेण" तेषां च द्रव्यविशेषशब्दे १७८१ पृ० तत्तत्तोक्तं गुणादि द्रष्टव्यम् तेषामस्थ्यादिविशेषकार्यकारिता ब्रह्मज्ञानतन्त्रे प्रथमपटले उक्ता यथा "चक्षिमांसं नखञ्चैव नाडी त्वक् चेति पञ्चमी। पृथ्वी पञ्चगुणा प्रोक्ता ब्रह्मज्ञानेन भाषितम्। मज्जं मूत्रं तथा शुक्रं स्वेदा शोणितमेव च। तोयं पञ्चगुणं प्रोक्तं ब्रह्मज्ञानेन भाषितम्। क्षुधा निद्रा क्षुधा चैव भ्रान्तिरालस्यमेव च। तेजः पञ्चगुणं प्रोक्तं ब्रह्मज्ञानेन भाषितम्। धारणं चालनं क्षेपः सङ्कोचः प्रसरस्तथा। वायुः पञ्चगुणः प्रोक्तो ब्रह्मज्ञानेन भाषितम्। कामः क्रोधस्तथा लोभस्तृष्णा मोहश्च पञ्चमः। नभः पञ्चगुणं प्रोक्तं ब्रह्मज्ञानेन भाषितम्"। भूत नक्षत्राणि यथा "धनिष्ठा रेवती ज्येष्ठानुराधा अश्वयातथा। अभिजिद्भोत्तराषाढा पृथ्वीतत्त्वसदाहृतम्। पूर्वाषाढा तथाऽश्लेषा मूलार्द्रा चैव रोहिणी। पर भाद्रपदा तोयम् आपस्तत्त्वन्त्वभीष्टदम्। भरणी कृत्तिका पुष्या मघा पूर्वा च फाल्गुनी। पूर्वभाद्रपदा स्वाती तेजस्तत्त्वमिति प्रिये!। विशाखोत्तरफल्गुन्यौ हस्ता चित्रा पुनर्वसुः। अश्विनी मृगशीर्षा च वायुस्तत्त्वसुदाहृतम्" रुद्रयामलोदयः। [प्रपञ्चे नैवरुक्प्र०]

पञ्चभृङ्ग न० देवदानीयमीभृङ्गानिर्यूहीतमाल्लात्मके द्रव्ये

पञ्चम त्रि०पञ्चानां पूरणः डटि मट्। पञ्चानां पूरणे स्त्रियां ङीप्। २दले २रुचिरे त्रि० हेमच० ३मैथुने न०, तन्त्रीकण्ठोत्थितस्वरभेदे स्वरः। "वायुः सञ्चरतो नाभेरुरोहृत्कण्ठमूर्द्धसु। विचरन् पञ्चमस्थानमाप्नुवन् पञ्चम उच्यते"। तन्निरुक्तिः। "प्राणोऽपानः समानश्च उदानो व्यान एव च। एतेषां समवायेन जायते पञ्चमः स्वरः" तत्कारणम्। ६रागभेदे मेदि० स च सोमेश्वरमते तृतीयो रागः अस्य गान्धारस्वरश्लोत्रः ऋषभपञ्चमौ द्रुतौ षड्जः षट्तांशः। भरतमते भैरवरागस्याष्टमः पुत्रः। अस्योद्धारणं पिकध्वनिवत्। उद्धारस्थानं गल उरः शिरश्च।

पञ्चमकार न०पञ्च मकारा यत्र। मकारादिपदवेद्यमद्यादिपञ्चके "मद्यं मांसं तथा मत्स्यो मुद्रा मैथुनमेव च। पञ्चतत्त्वमिदं देवि! निर्वाणमुक्तिहेतवे। मकारपञ्चकं देवि! देवानामपि दुर्लभम्" गुप्तसाधनतन्त्रे ७ पटले। तत्र मद्यादिकं प्रसिद्धम्। मुद्रा तु "शुष्ककासखण्डा भृष्टा गोधूमचणकादयः। तेषां नाम भवेद्देवि! मुद्रा मुक्तिप्रदायिनी"। तत्र परिभाषिता

पञ्चमहिष न० पञ्चगव्यवत् महिषस्य मूत्रादिपञ्चके। पञ्चगव्य शब्ददर्शितकल्पेन तस्य पाकविधिः "एतेनैव तु कल्पेन हृतं पञ्चाविकं पचेत्। पञ्चाजं पञ्चमहिषं चतुरङ्गमथापि वा" स्मृतेः। पञ्चाजपञ्चाविकशब्दावपि क्रमेण अजाविसम्बन्धिमूत्रादिपञ्चके।

पञ्चमहापातक न० पञ्चप्रकारं महापातकम् शा०त०। ब्रह्महत्यादिमहापातकपञ्चके "ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः। महान्ति पातकान्याहुः संसर्गश्चापि तैः सह" मनुः। स्तेयमत्र ब्राह्मणस्वाभिकसुवर्णहरणं यथाह विष्णुः "ब्रह्महत्या सुरापानं ब्राह्मणसुवर्णहरणं गुरुदाराभिगमनं संयोगश्च तैः सहेति महापातकानि"। सुवर्णञ्च कर्ममितसुवर्णम्।

पञ्चमहायज्ञ पु० पञ्चसङ्ख्यितो महायज्ञः कर्म० वा। गृहस्थैः प्रतिदिनं कर्त्तव्ये देवपित्रादियज्ञपञ्चके। "पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः। कण्डनी चोदकुम्भश्च तस्य पापस्य शान्तये। पञ्चयज्ञविधानञ्च गृही नित्यं न हापयेत्। पञ्चयज्ञविधानेन तत् पापं तस्य नश्यति। देवयज्ञो भूतयज्ञः पितृयज्ञस्तथैव च। ब्रह्मयज्ञो नृयज्ञश्च पञ्चयज्ञाः प्रकीर्त्तिताः। होमो देवोबलिर्भौतः पित्रः पिण्डक्रिया श्रुतः। स्वाध्यायो ब्रह्मयज्ञश्च नृयज्ञोऽतिथिपूजनम्" यज्ञसं०। पञ्चमहायज्ञादयोऽत्र

"देवभूतपितृब्रह्ममनुष्याणामनुक्रमात् । महासत्त्वानि जानीयात् एते चेह महामखाः । अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् । श्राद्धं वा पितृयज्ञः स्यात् पित्रो बलिरथापि वा । यस्य श्रुतिजपः प्रोक्तो ब्रह्मयज्ञः स उच्यते । स चावश्यं तर्पणात् कार्यः पश्चाद्वा मातराऽऽतेः । वैश्वदेवावसाने वा नान्यत्रर्तुनिमित्तकात् । अथैकमाग्नयेहिप्रं पितृयज्ञार्थसिद्धये । अदैवं नास्ति चेदन्यो भोक्ता भोज्यमथापि वा । अथ्वृत्य यथाशक्त्या किञ्चिदन्नं यथाविधि । पितृभ्योऽथ मनुष्येभ्यो दद्यादहरहर्द्विजे । पितृभ्य इदमित्युक्त्वा स्वधाकारसदीरयेत् । हन्तकारं मनुष्येभ्यस्तद्वद्दुं निनयेदपः" कात्या०स०

पञ्चमार पु० १वसदेवपुत्रे शब्दर० कर्म० । २पञ्चविधकामे च ।

पञ्चमाधिक त्रि०पञ्च मात्राः प्रमाणमस्य ठक् न पूर्वपदवृद्धिः । स्वर्णमात्रपञ्चकमिते दण्डाद्यै मनुः ८।१३८

पञ्चमास्य पुंस्त्री० पञ्चमः स्वरभेदः आस्ये अस्य । १कोकिले शब्दर० स्त्रियां जातित्वेऽपि योषधत्वात् टाप् । पञ्चमं कोकिलो वदेत्" पञ्चसु मासेषु भवः यत् । २पञ्चमासभवे त्रि०

पञ्चमी स्त्री पञ्च पतीन् मिनोति वध्नाति प्रेमृषा मी-वन्बे पृषो० कि । पञ्चपाण्डवपतिकायां १द्रौपद्यां २शारिश्रद्धकायाञ्च (पाशारङ्क)पञ्चन्+पूरणे घट् । पञ्चानां पूरण्यां स्त्री ङीप् । अस्य बहु० समासे समासवाच्यत्वे अच् समा० । कल्याणी पञ्चमी यासु रात्रिषु कल्याणपञ्चमा रात्रयः । सङ्ख्यात्वाभावे कप् । कल्याणी पञ्चमी यत्र पक्षे कल्याणपञ्चमीकः पक्षः यत्र पूरणस्य सङ्ख्यात्वाभावात् न समासवाच्यत्वम् । चन्द्रमण्डलस्य प्रवेशनिर्गमाभ्यां सूर्यकिरणप्रतिबिम्बयोर्म्यत्वयोर्म्यत्वाभावयुक्तायां चन्द्रस्य ४पञ्चम्यां कलायां ५तदुपलक्षितायां तिथौ च स्त्री । विहितकर्मविषयविशेषे तस्याः कर्म याह्यतेति कालमा० निर्णीतं यथा

"युग्मशास्त्रेण पञ्चमी पूर्वविद्धा याह्या । नन्वु "प्रायः प्रातरुपोष्या हि तिथिर्दैवे फलेप्सुभिरिति" शिवरहस्यौरपुराणयोस्त्रिंश्यधिकसप्तोपवासाङ्गत्वाभिधानात् पञ्चम्युपवासः परेद्युः प्राप्नोति, तत्र स्मारीतेन परविद्धायाः प्रतिषिद्धत्वात् । "चतुर्थीसंयुता कार्या पञ्चमी वरदा नृप । दैवे कर्मणि पित्र्ये च शुक्लपक्षे तथाऽसिते" इति । नचैतावता प्रायः प्रातरिति वचनस्य निर्विषयत्वं शङ्कनीयम् । निर्णीतान्न निर्णयप्रमाणाच्च तिथिषु यत्र यत्र परविद्धोपवासः शास्त्रान्तरेण प्राप्तस्य सर्वस्य तद्विषयोपपत्तेः । न च तेनैव शास्त्रेण तदुपवासविधेः कृतमनेन वचनेनेति शङ्कनीयम् । सामान्यविशेषरूपेण शास्त्रद्वयस्यापि चरितार्थत्वात् । तस्य सामान्यशास्त्ररूपस्य प्राप्तोपवासवचनस्य विरोधिना षष्ठी युक्तपञ्चमीनिषेधकेन विशेषशास्त्ररूपेण हारीतवचनेन बाधो युज्यते । एतादृशं बाधमभिलक्ष्यैव प्रायः प्रातरुपोष्येति प्रायःशब्दः प्रयुक्तः । प्रतिपच्छायेन पौर्वाह्णिकी इति वचनबलात् । पञ्चम्यामपि दानव्रतयोः परदिनानुष्ठानप्राप्तौ तद्बाधाय हारीतवचने दैवे कर्मण्युच्यते । न च दैवकर्मणि पूर्वाह्णस्य कर्मकालशास्त्रप्राबल्यस्य च वर्णितत्वात् तद्बाधो न युक्त इति शङ्कनीयम् । विधेर्निषेधस्य वा प्रतिपदोक्तस्य प्रबलतरत्वात् । न च पूर्वदिनपूर्वाह्णव्याप्यकर्मकालत्वं, साकल्यवचनादाहितकर्मकालत्वस्य सङ्गावात् । दैवमेव विषयमभिलक्ष्य साकल्यवचनस्य प्रवृत्तत्वात् । स्वाभाविकतिथिव्याप्तियुक्ते विषये साकल्यवचनस्य निरर्थकत्वात् । तस्माद्दैव कर्मणि परविद्धायाः पञ्चम्याः निषेधो न विरुध्यते । नन्वेवमपि पित्र्ये निषेधो निरर्थकः । पित्र्यस्य स्वत एव परविद्धायामप्राप्तत्वात् । मैवं दृष्टान्तत्वेऽपि च तदुपन्यासोपपत्तेः । यथा पित्र्यकर्मणि उत्तरविद्धा न याह्या तथा दैवेऽपीति विवक्षया दैवपित्र्ययोः सदोपन्यासः । ननु व्यासनिगममतयुग्मशास्त्रसदाचरणैः पञ्चम्याः पूर्वविद्धत्वमभिधीयते । आपस्तम्बादयस्तु तद्विपर्ययेण युग्मान्युदाजहुः । "प्रतिपत् सहितीया स्याद् द्वितीया प्रतिपद्युता । चतुर्थीसंहिता सा च सा तृतीया फलप्रदा । पञ्चमी च प्रकर्तव्या षष्ठ्या युक्ता च नारद!" इति । अतएवैतद्युग्मशास्त्रपर्यालोचने पञ्चम्याः परविद्धत्वं प्राप्नोति । बाढम् अतएवात्र शुक्लपक्षशास्त्रेण व्यवस्था प्रवृत्ता तां निषेद्धुं हारीतेन शुक्लपक्षे तथाऽसिते इत्युक्तम् । न च सा व्यवस्था वचनेन निषेद्धुमशक्या, किं हि वचनं न कुर्यादिति वचनस्थातिभार इति न्यायात् । तस्माद्धारीतवचनेन पञ्चमी पूर्वविद्धा याह्या । स्कन्दपुराणेऽपि "पञ्चमी च तथा कार्या चतुर्थ्या संयुता विभो!" तथा पद्मपुराणभविष्यत्पुराणयोः पूर्वोत्तरविद्धाविद्धयोर्विधिनिषेधौ स्मर्येते । "पञ्चमी च चतुर्थ्या तु कार्या षष्ठ्या न संयुता" इति । यत्तु ब्रह्मवैवर्तेऽभिहितम् "पञ्चमी च प्रकर्तव्या षष्ठ्या युक्ता तु नारद!",

इति तद्वचनं स्कन्दोपवासविषयतया सङ्कोचनीयम्। वाक्यशेषे तथाभिधानात् "स्कन्दोपवासे स्त्रीकार्या पञ्चमी परसंयुता" इति वाक्यशेषः। न चासङ्गातविरोधिनो वाक्योपक्रमस्य सङ्गातविरोधिना वाक्यशेषेण कथं सङ्कोच इति वाच्यम्। असन्दिग्धोपक्रमस्य प्राबल्येऽपि सन्दिग्धोपक्रमस्य वाक्यशेषेण निर्णेतव्यत्वात्। अतएव जैमिनिनापि सूत्रितम्। "सन्दिग्धे तु वाक्यशेषादिति"। अतः स्कन्दोपवासे पञ्चमी परविद्धा। अन्यत्र पूर्वविद्धेति स्थितम्"।

पञ्चमुख त्रि॰पञ्च मुखान्यस्य। १पञ्चवदनयुक्ते स्त्रियां वाहुलात् ङीष्। २महादेवे पु॰ तन्मुखनामादि देवीपु॰ उक्तं यथा "शिवस्तत्रस्थितः साक्षात् सर्वेषामीश्वरः प्रभुः। स तु पञ्चमुखः ख्यातो लोकसर्वार्थसाधकः। पञ्चब्रह्मात्मको यस्मात्तेन पञ्चमुखः स्मृतः। पश्चिमे तु मुखे सद्यो, वामदेवस्तथोत्तरे। पूर्वं तत्पुरुषं विद्यादघोरं चापि दक्षिणे। ईशानः पञ्चमो मध्ये सर्वेषामुपरिस्थितः। एते पञ्चमुखा वत्स पापघ्ना मङ्गलालयाः। सद्योजातो भवेच्छुक्लो वामदेवस्तु पीतकः। रक्तस्तत्पुरुषो ज्ञेयोऽघोरः कृष्णः सदैव च। ईशानः पश्चिमस्तेषां सर्ववर्णसमन्वितः। कामदः कामरूपी स्यात् ज्ञानाधारः शिवात्मकः"। ३पञ्चवक्त्रे रुद्राक्षभेदे च "पञ्चवक्त्रः स्वयं रुद्रः कालाग्निर्नामतोमतः। अगम्यागमनाच्चैव अभक्ष्यस्य च भक्षणात्। मुच्यते सर्वपापेभ्यः पञ्चवक्त्रस्य धारणात्" तिथि॰त॰ स्कान्दे। ४जयाभेदे स्त्री ङीष्। ५वासकवृक्षे च राजनि॰। पचि-विस्तारे अच् तादृशं मुखमस्य। ६विष्णौ पुंस्त्री॰ स्त्रियां ङीष्। पञ्चवक्त्रादयोऽपि तत्रैवेषु।

पञ्चमुद्रा स्त्री पञ्चसंख्यिता मुद्रा। १आवाहन्यादिमुद्रापञ्चके तत्स्वरूपनामादि पूजाप्रदीपे उक्तं यथा "सम्यक् प्रपूरितः पुष्पैः करास्यां कल्पितोऽञ्जलिः। आवाहनी१ समाख्याता मुद्रा देशिकसत्तमैः। अधोमुखी स्त्रियं चेत् स्यात् स्थापनी२ मुद्रिका भवेत्। सन्निरुद्धाङ्गुष्ठयोस्तु संयोगात् संनिधापनी३। अन्तःप्रवेशिताङ्गुष्ठा सैव सम्बोधनी४मता। उत्तानमुष्टियुगला सम्मुखीकरणी५मता"। तन्त्रोक्ते देवभेदपूजाङ्गे २योन्यादिमुद्रापञ्चके च तन्नामादिः।

पञ्चमुष्टिक पु॰चक्रदत्तोक्ते यवादिमुष्टिपञ्चकक्वाथभेदे "यवकोल कुलत्थानां मुद्गमूलकयूषयोः। एकैकमुष्टिसंयुक्तं जले पञ्चगुणे जले। पञ्चमुष्टिक इत्येष वातपित्तकफापहः। भक्षते गुडमूले च श्वासे कासे च्छर्दे ज्वरे"।

पञ्चमूत्र न॰ पञ्चप्रकारं मूत्रम्। गवालामेषीमहिषी गर्दभीनां पञ्चानां मूत्रे राजनि॰।

पञ्चमूल न॰पञ्चसंख्यितं मूलम् या॰त॰। १वैद्यकोक्ते बिल्वादिपञ्चकमूलेतच्च त्रिविधं बृहल्लघुत्तत्क्षाख्यभेदात् तत्र बृहत् "श्रीफलः सर्वतोभद्रा पाटला गणिकारिका। स्योनाकः पञ्चभिश्चैतैः पञ्चमूलं बृहन्मतम्। पञ्चमूलं बृहत् तिक्तं कषायं कफवातनुत्। मधुरं श्वासकासघ्नं बृंहणं दीपनम्" अथ लघुपञ्चमूलस्य लक्षणकृत्याह च "शालपर्णी पृश्निपर्णी वार्ताकी कण्टकारिका। गोक्षुरं पञ्चभिश्चैतैः कनिष्ठं पञ्चमूलकम्। पञ्चमूलं लघु स्वादु वल्यं पित्तानिलापहम्। नात्युष्णं दीपनं हृद्यं वह्निसंदीपनं परम्" भावप्र॰ "बिल्वाग्निमन्थश्योनाक काश्मर्यः पाटला तथा। क्षेयं बृहत् पञ्चमूलं पञ्चमूलमिति स्मृतम्" मतान्तरम्। "शरेक्षुदर्भकाशानां मूलस्य मूलमेव च। शौण्डुतं चारकं चैव तृणाख्यं पञ्चमूलकम्" शब्दच॰। पञ्चमूलीत्यपि स्वल्पपञ्चमूलभेदे "शालपर्णी पृश्निपर्णी द्वयी कण्टकारिका। तथा गोक्षुरकश्चैव पञ्चमूली कनीयसी" शब्दच॰। पञ्चानां मूलानां समाहारः ङीष्। २मूलपञ्चके

पञ्चमूल्यादि न॰ चक्रदत्तोक्ते पाचनभेदे यथा "पञ्चमूली बला बिल्वयुङ्नीलवृन्तनागरैः। पाठा भूनिम्बखीरैरण्डजलकृत्फलैः श्रृतम्। हन्ति सर्वान् ज्वरदोषान् वह्निमत्या। समूलोपद्रवं श्वासं कासं कृच्छ्रात् सुदारुणम्"।

पञ्चयाम पु॰ पञ्च यामा यत्र। १दिवसे "त्रियामां रजनीं प्राहुस्तच्चाद्यन्तचतुष्टये। नाडीनां तदुभे सन्ध्ये दिवसाद्यन्तसंज्ञिते" उक्तेः अहोरात्रस्य अष्टमहरात्मकत्वेन तन्मध्ये रात्रेस्त्रियामत्वात् परिशिष्टयामपञ्चकस्य दिवसत्वम्। २तदभिमानिदेवभेदे "विभावसोरसूतोषा व्युष्टं रोचिषमातपम्। पञ्चयामोष भूतानि येन जागर्ति कर्मसु" भाग॰ ६।६।१५

पञ्चयुग न॰ पञ्चभिः पञ्चभिः युगम्। ऋादिभिः पञ्चभिः पञ्चभिः वर्षैः द्वादशवर्षात्मकषष्टिसंवत्सरे "संवत्सराः पञ्चयुगं चाहोरात्रचतुर्विधः" भा॰स॰१२श्लो॰ "दैवपैत्रमानुषब्राह्मभेदात् अहोरात्रचतुर्विधं ऋत्वर्थः" नीलक॰।

पञ्चरत्नक पु॰पञ्च रत्नका इव कण्टकादयोऽस्य। १पङ्कपोढ-

द्वन्द्वे राजनि० । २इन्द्रियपञ्चकरूपरसकयुक्ते च ।

पञ्चरत्न न० पञ्चसंख्यितं रत्नम् । पञ्चविधे १रत्नभेदे तच्च नानाविधम् "नीलकं वज्रकं चेति पद्मरागश्च मौक्तिकम् । प्रवालं चेति विज्ञेयं पञ्चरत्नं मनीषिभिः" विधा० मया० "स्वर्णं रजतं शुक्ला राजावर्त्तं प्रवालकम् । रत्नपञ्चकमाख्यातम्" हेमा०भ्र० "कनकं हीरकं नीलं पद्मरागश्च मौक्तिकम् । पञ्चरत्नमिदं प्रोक्तमृषिभिः पूर्वदर्शिभिः । अभावे सर्वरत्नानां हेम सर्वत्र योजयेत्" हेमा०दा० पञ्च रत्नानीव उपदेशकत्वात् यत्र । २नीतिगर्भ कवितापद्धतौ "नागः पोतस्तथा वैद्यं खानिः शक्रो यथाक्रमम् । पञ्चरत्नमिदं प्रोक्तं विदुषापि सुदुर्लभम्" काव्यर्थ० । नाग इत्यादिना एकैकपद्यस्य आद्यपदेन सूचित कवितापद्धतौ च यानि । तानि च पद्यानि प्रागेव काव्यसंग्रहे दृश्यानि । ३पञ्चचूडदेवस्य भेदे न० ।

पञ्चरश्मि पु०पञ्च पञ्चवर्णा रश्मयोऽस्य । पिङ्गलादिपञ्चवर्णरश्मियुते सूर्ये तस्य तथात्वम् निरौतं छा०उ० यथा "अथ या एता हृदयस्य नाड्यस्ताः पिङ्गलस्याणिम्नस्तिष्ठन्ति शुक्लस्य नीलस्य पीतस्य लोहितस्येत्यसौ वा आदित्यः पिङ्गल एष शुक्ल एष नील एष पीत एष लोहितः । तद्यथा महापथ आतत उभौ ग्रामौ गच्छतीमं चामुं चैवमेवैता आदित्यस्य रश्मयः उभौ लोकौ गच्छतीमं चामुं चामुष्मादादित्यात् प्रतायन्ते ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मादादित्ये सृप्ताः" उप० "अथ या एता वक्ष्यमाणा हृदयस्य पुण्डरीकाकारस्य ब्रह्मोपासनस्थानस्य सम्बन्धिन्योनाड्योहृदयमांसपिण्डात् सर्वतोविनिःसृता आदित्यमण्डलादिव रश्मयस्ताश्चैताः पिङ्गलस्य वर्णविशेषविशिष्टस्याग्निम्नः सूक्ष्मरसस्य रसेन पूर्णास्तदाकारा एव तिष्ठन्ति वर्त्तन्त इत्यर्थः । तथा शुक्लस्य नीलस्य पीतस्य लोहितस्य च रसस्य पूर्णा इति सर्वत्राध्याहार्यम् । सौरेण तेजसा पित्ताख्येन पाकाभिनिर्वृत्तेन कफेनाल्पेन सम्बन्धात् पिङ्गलं भवति सौरं तेजः पित्ताख्यम् । तदेव वातभूयस्त्वाद्धोलं भवति । तदेव च कफभूयस्त्वाच्छुक्लम् । कफेन समतायां पित्तम् शोणितबाहुल्येन लोहितम् । वैद्यकादा वर्णविकारा अन्वेष्टव्याः । कथं भवन्तीति श्रुतिस्त्वादित्यसम्बन्धादेव तत्तेजसो नाड्यनुगतस्यैते वर्णविशेषा इति । कथमसौ वा आदित्यः पिङ्गलो वर्णत एष आदित्यः शुक्लोऽप्येष नील एष पीत एष लोहित आदित्य एव । तस्माध्यात्मं नाड्यादीभिः कथं सम्बन्ध इत्यत्र दृष्टान्तमाह तत्तत्र यथा लोके महान् विस्तीर्णः पन्था महापथ आततो व्याप्त उभौ ग्रामौ गच्छतीमं च सन्निहितमसुं च विप्रकृष्टं दूरस्थमेवं यथा लोके दृष्टान्तो महापथ उभौ ग्रामौ प्रविष्टः । एवमेवैता आदित्याः महापथा यथा गच्छन्ति तथोभयत्रादित्यस्य रश्मयः उभौ लोकावसुं चादित्यमण्डलमिमं च दूरस्थं गच्छन्त्युभयत्र प्रविष्टाः यथा महापथः । कथमस्मादादित्यमण्डलात् प्रतायन्ते सन्तता भवन्ति । ता अध्यात्ममासु पिङ्गलादिवर्णाश्च यथोक्तासु नाड़ीषु सृप्ता गताः प्रविष्टा इत्यर्थः । आभ्यो नाडीभ्यः प्रतायन्ते प्रहृष्टाः सन्तानभूताः सत्यस्तेऽस्मिन् रश्मीनामभयत्रिकृत्वात्ते इत्युच्यन्ते भा० "रसेनात्रसेति शेषः तदाकारा इति तच्छब्दोऽत्ररसविषयः । शुक्लस्येत्यादिषु षष्ठी पूर्ववत् । श्रुताविति शब्दोऽध्याहारद्योतनार्थः । कथं पुनरत्ररसस्य पिङ्गलादिविचित्रो वर्णविशेषः सिध्यतीत्याशङ्क्याह सौरेणेति वातपित्ताख्यं सौरं तेजः । तेन पाकोऽग्नितस्य च जायते । तेनाभिनिर्वृत्तेनाल्पेन कफेन सम्बन्धात् तदेव पित्ताख्यं सौरं तेजो भवति पिङ्गलम् । तेन सम्बन्धादस्य नाडीनां च जायते पिङ्गलत्वमित्यर्थः । तदेव च पित्ताख्यं सौरं तेजो यथोक्तपाकाभिनिर्वृत्तेन प्रभूतेन वातेन सम्बन्धात्तद्भूयस्त्वाद्भवति नीलं तेन च सम्बन्धादस्य नाडीनां च जायते नैलमित्याह तदेवेति । प्रकृतमेव पित्ताख्यं सौरं तेजो यथोक्त पाकवशादभिनिर्वृत्तकफस्य सम्बन्धिनो भूयस्त्वाद्भवति शुक्लं तेन च सम्बन्धादस्य नाडीनां च शौक्ल्यं भवतीत्याह तदेव चेति । उक्तपाकाभिनिर्वृत्तेन कफेन तदभिनिर्वृत्तस्यैव वातस्य समतायां तदेव तेजस्तत् सम्बन्धि पीतं जायते । ततसम्बन्धाच्चास्रस्य च नाड़ीनां च पीतत्वं भवतीत्याह कफेनेति । यदा तु यथोक्तपाकाभिनिष्पन्नं शोणितं बहुलं भवति तदा तस्य नाड़ीनां च लौहित्यं भवतीत्याह शोणितेति । पक्षान्तरमाह वैद्यकाद्वेति । अन्येषामप्रकारमाह कवयमिति । नाभेरूर्द्धं हृदयादधस्तादामाशयमाचक्षते । तेजः सौरं पित्तमित्युच्यते । तच्चास्रस्य धात्वन्तरसङ्कारिवशादवर्णविशेषे कारणमाश्रयगतं पीतं रञ्जकं रसरञ्जनादित्यादिवचनादित्यर्थः । कथं तर्हि पिङ्गलेत्याद्या श्रुतिरित्याशङ्क्याह श्रुतिस्त्विति । उक्तमर्थं-

माकाङ्क्षादारा स्फोरयति कवर्गमित्यादिना आदित्यस्य पिङ्गलादयो वर्णविशेषाः शास्त्रप्रमाणादेव ग्रहीतव्याः। आदित्यस्य तेजसो नाड्योऽनुगतस्य पैङ्गल्यादयो वर्णविशेषाभवन्तीत्युक्तं तदेव ग्रन्थद्वारा दृष्टान्तावष्टम्भेन स्फुटयति तस्येत्यादिना" आनन्दगिरिः।

पञ्चरसा स्त्री पञ्चो विस्तीर्णोरसोऽस्याम्। आमलक्यां हारा०।

पञ्चरात्र न०पञ्चानां रात्रीणां समाहारः अच्समा०। रात्रान्तत्वेऽपि संख्यापूर्वकत्वेन क्लीवता। १रात्रिपञ्चके पञ्च रात्राणि ज्ञानानि यत्र। नारदादिप्रणीते ज्ञानोपदेशके २प्रन्थभेदे तन्निरूपकत्वादिकं ब्रह्मपु० जन्मखण्डे १२अ० उक्तं यथा "रात्रञ्च ज्ञानवचनं ज्ञानं पञ्चविधं स्मृतम्। तेनेदं रञ्चरात्रं च प्रवदन्ति मनीषिणः। प्रथमं सात्विकं ज्ञानं द्वितीयन्तु तदेव च। नैर्गुण्यं च तृतीयं च ज्ञानं च सर्वतत्परम्। चतुर्थं च राजसिकं भक्तज्ञानाभिधास्मृतम्। पञ्चमं तामसं ज्ञानं विद्धिज्ञानाभिधास्मृतम्। ज्ञानं पञ्चविधं प्रोक्तं पञ्चरात्रं विदुर्बुधाः" तच्च सप्तविधं यथा "पञ्चरात्रं सप्तविधं ज्ञानिनां ज्ञानदं परम्। ब्राह्मं प्रैवं च कौमारं वाशिष्ठं कापिलं परम्। गौतमीयं नारदीयमिदं सप्तविधं स्मृतम्" इति नारदपञ्चरात्रे प्रथमरात्रम्। "पञ्चकं पञ्चरात्राणां कृष्णमाहात्म्य पूर्वकम्। वाशिष्ठं नारदीयं च कापिलं गौतमीयकम्। परं सनत्कुमारीयं पञ्चरात्रं च पञ्चकम्"।

पञ्चरात्रिक पु० पञ्चरात्रमुपासनास्साधनतयास्त्यस्य ठन्। विष्णौ भा० शा० १३अ०।

पञ्चराशिक पु० पञ्च राशयो यत्र कप्। लीलावत्युक्ते पञ्चराश्यधिकारेण गणितभेदे यथा "पञ्चघ्नपञ्चराशिकादिकेऽन्योन्यपञ्चनयनं क्लेशच्छिदाम्। संविधाय वज्रराशिजे वधे खलराशिवधभाजिते फलम्।

उदाहरणम्। मासे यत्र यदि पञ्च कलान्तरं स्यादर्धे गते भवति किं वद षोडशानाम्। काले तथा कथय मूलकलान्तराभ्यां मूलं धनं गणक! काकफले विदित्वा।

न्यासः १ १२ अन्योऽन्यपञ्चनयने कृते १ १२
१०० १६ (फलस्य छेदोऽन्यपक्षे १०० १६
६ ० न नेय इति बोध्यम्) ० ६

वज्रनां राशीनां वधः। ८६०।

खलराशिवधः १०० अनेन भक्ते लब्धम्। ६।

शेषम् $\frac{६०}{१००}$ विंशत्यापवर्त्यं $\frac{३}{५}$ जातं कलान्तरम् $\frac{३}{५}$

छेदघ्नरूपेऽन्विते कृते जातम् $\frac{४८}{५}$

पञ्चलक्षण न० पञ्च सर्गादीनि लक्षणान्यस्य। १पुराणे अमरः। पुराणशब्दे ६७५म् पञ्चानां लक्षणानां समाहारः ङीप्। अनुमानचिन्तामणौ व्याप्तिलक्षणपञ्चके साध्याभावदवृत्तित्वमित्यादिकं व्याप्तिलक्षणपञ्चकं तल्लक्षणमिति तस्य ग्रन्थस्य तथात्वम्।

पञ्चलवण न० पञ्चगुणितं लवणम्। "काचकं सैन्धवं चैव सामुद्रं विडमेव च। औद्भिदं तथा पञ्चलवणं परिकीर्त्तितम्" राजनि० उक्ते लवणपञ्चके।

पञ्चलाङ्गलक न० महादानभेदे तत्स्वरूपं मत्स्यपु० यथा "अथातः संप्रवक्ष्यामि महादानमनुत्तमम्। पञ्चलाङ्गलकं नाम महापातकनाशनम्। पुण्यां तिथिं समासाद्य युगादिप्रहणादिकम्। भूमिदानं ततो दद्यात् पञ्चलाङ्गलकान्वितम्। कर्षकं खेटकं वापि यामं वा मल्लशालिनम्। निवर्त्तनयुतं वापि तदर्द्धं वापि शक्तितः। सारदारुमयान् कृत्वा हलान् पञ्च विचक्षणः। सर्वोपकरणैर्युक्तानन्यान् पञ्च च काञ्चनान्। कृष्यात् पञ्चपलादूर्द्धं मासकृष्टपलावधि। हलान् वृषभसंयुक्तान् दद्यात् चैव धुरन्धरान्। सुवर्णशृङ्गाभरणान् सुताम्राङ्घ्रिखुभूषणान्। रूप्यपादापतिलकान् रक्तकौशेयभूषणान्। कण्ठदामचन्दनयुतान् शालायामधिवासयेत्" इतःपरं तदध्याये २८२अ०६श्लोकम्।

पञ्चलोकपाल पु० संज्ञात्वात् कर्म०। यक्षशब्दाद्युक्ते विनायकादिदेवपञ्चके "विनायकं तथा दुर्गां वायुमाकाशमेव च। अश्विनौ क्रमतः पञ्चलोकपालान् प्रपूजयेत्" विधानपा०।

पञ्चलोह न० पञ्च विस्तीर्णं लोहम्। सौराष्ट्रदेशजे लोहे हेम०। पञ्चगुणितं लोहं संज्ञायां कन्। पञ्चलोहक सुवर्णरजतताम्ररङ्गनागरूपे धातुपञ्चके राजनि०।

पञ्चवक्त्र पु० पञ्च वक्त्राण्यस्य। १महादेवे २रुद्राक्षभेदे च पञ्चमुखशब्दे ६७५म्। पञ्चवदनादयोऽप्यत्र [त्रिका०।

पञ्चवट पु० पञ्चो विस्तीर्णो वटः वेष्टनम्। बालयज्ञोपवीतके

पञ्चवटी स्त्री पञ्चानां वटानां वटप्रभृतीनां समाहार

ङीप्। वटादिदलपञ्चके "अश्वत्थं बिल्वदलं च वटं धात्रीमशोकजम्। वटीपञ्चकमित्युक्तं स्थापयेत् पञ्चदिक्षु च। अश्वत्थं स्थापयेत् प्राचि बिल्वमुत्तरभागतः। वटं पश्चिमभागे तु धात्रीं दक्षिणतस्तथा। अशोकं पङ्क्तिदिक्स्थं तपसार्थं सुरेश्वरि!। मध्ये वेदीं चतुर्हस्तां चतुरस्रां मनोहराम्। प्रतिष्ठां कारयेत्तस्याः पञ्चवर्षोत्तरं शिवे!। अनन्तफलदात्री सा तपस्याफलदायिनी। इयं पञ्चवटी प्रोक्ता दलैः पञ्चवटी स्मृता। बिल्वदलं मध्यभागे चतुर्दिक्षु चतुष्टयम्। वटदलं चतुष्कोणे वेदसंख्यं प्ररोपयेत्। अशोकं वर्तुलाकारं पञ्चविंशतिसंख्यितम्। दिग्विदिक्षामलकीं च एकैकं परमेश्वरि!। अश्वत्थश्च चतुर्दिक्षु दलैः पञ्चवटी भवेत्। यः करोति महेशानि! साक्षादिन्द्रसमो भवेत्। दलैर्लोके महासिद्धिः परे च परमा गतिः" हेमा०व्र० स्कन्दपु० वचनानि। २दक्षिणदिक्स्थे तीर्थभेदे "ततो पञ्चवटीं गत्वा ब्रह्मचारी जितेन्द्रियः। पुण्येन महता युक्तः सतां लोके महीयते। यत्र योगेश्वरः स्थाणुः स्वयमेव वृषध्वजः। तमर्चयित्वा देवेशं गमनादेव सिध्यति" भा०व० १८अ०। रासा०धर० स्वर्गे दृश्यम्।

पञ्चवर्ग पु० पञ्च वर्गा प्रहारा यत्र। १पञ्चप्रहरयुक्तिते यागभेदे "सर्वे पञ्चवर्गाः पशुकामस्य" आश्वा०श्रौ० ६। ३।८ "पशुकामस्य यजमानस्य सर्वे तवोऽभिप्लवाः पञ्चवर्गाः पञ्चप्रहाराः भवन्ति" कर्कः। पञ्चानां चाराणां वर्गः। २चारपञ्चके पु० "कृत्यं चाष्टविधं कर्म पञ्चवर्गस्तु तत्त्वतः। अनुरागापरागौ च प्रचारं मण्डलस्य च" मनुटीकायां कुल्लू० उक्तं यथा "कापटिकोदास्थित गृहपतिवैदेहिकतापसव्यञ्जनात्मकं पञ्चविधं चारवर्गं पञ्चवर्गशब्दवाच्यं तत्त्वतश्चिन्तयेत्। तत्र परमर्मज्ञः प्रगल्भश्चालः कपटव्यवहारित्वात् कापटिकस्तं दृष्ट्वा चिरमर्थमानाय्यासप्रच्छन्नं रहसि राजा ब्रूयात् यस्य दुर्वृत्तं पश्यसि तत्तदानीमेव मयि वक्तव्यमिति। प्रव्रज्याकृदपतितउदास्थितः तं लोकेषु विदितदोषं प्रज्ञाशौचयुक्तं दृष्ट्वार्थिनं ज्ञात्वा रहसि राजा पूर्ववत् ब्रूयात्। बलोत्पत्तिकमठे स्थापयेत् प्रचरत्यस्योपस्थितं मूल्यन्तस्य तद्दृष्ट्वा वयमुपलक्षयेत् स चान्येषामपि प्रव्रजितानां राजचारकर्मकारिणां यथाज्ञादानादिकं दद्यात्। कर्मकः शौचवृत्तिः प्रज्ञाशौचयुक्तो गृहपतिव्यञ्जनस्थमपि पूर्ववदुक्त्वा स्वमूलो क्रियकर्म कारयेत्। वाणिजकः शौचवृत्तिः वैदेहिकव्यञ्जनस्थं पूर्ववदुक्त्वा धनमानाभ्यां सत्कृत्य वाणिज्यं कारयेत्। सस्त्रीको जटिलो वा वृत्तिकामस्तापसव्यञ्जनः सोऽपि क्वचिदाश्रमे वसन् बहुसस्यजटिलान्तरकपटशिष्यप्रगल्भ इतो मुग्धराजोपलक्षितवृत्तिः तपस्यां कुर्यात् आसन्निभाश्चालरितं प्रकाशं वदरादिवृष्टिमत्रीयात् रहसि च राजोपकल्पितं यथेष्टमाहारं कल्पयेत् शिष्याश्चाश्चातीतानागतज्ञानादिकं ख्यापयेयुः तेन बहुलोकवेदनमासाद्य सर्वेषां विश्वसनीयत्वात् सर्वं कार्यमकार्यं च पृच्छन्ति अन्यस्य च कुक्षियादिकं कथयन्त्येवंरूपं पञ्चवर्गं यथावच्चिन्तयेत्। एवं प्रकल्प्य तेनैव पञ्चवर्गद्वारेण प्रतिराजस्त्रीयाज्ञाज्ञात्यादीनाम् अनुरागविरागौ ज्ञात्वा तदनुरूपं चिन्तयेत्" कुल्लू०। पञ्चानां वर्गाणां समाहारः ङीप्। नील०ता० उक्ते श्येनक्रोडादिपञ्चके स्त्री पञ्चवर्गीविज्ञानयने च रीतिः नील०ता० दृश्या यथा

"सूर्यादिग्रहर्क्षमजोशनक्रकन्याकुलीरान्यतुलानि वैश्यः। दिग्भिर्गुणैरष्टयमैः शरैकैर्भूतैर्भसङ्ख्यैर्नखसम्मितैश्च"। अथोच्चखनकांशानाह "तत्सप्तमं नीचमनेन हीनोपरोऽधिकश्चेद्रसभाद्विशोध्यः। चक्रात् तदंशाङ्कवधो वसूनां स्यात् क्रियैषतौच्चेन्दुमतो नवांशाः" अथ हृद्देशानाह "मेषेऽङ्कतर्काष्टशरेषुभागा जीवास्फुजिज्ञारशनैश्चराणाम्। वृषेऽष्टखाग्न्यग्निशरानलांशाः शुक्रज्ञजीवार्किकुजेषु वृद्धाः। युग्मे भवृक्षेषुनगाङ्कभागाः सौम्यास्फुजिज्जीवकुजार्किवृद्धाः। कर्केऽद्रितर्काङ्कनगाग्निभागाः कुजास्फुजिज्ज्ञेज्यशनैश्चराणाम्। सिंहेऽङ्कभूताद्रिरसाङ्कभागाः शनेज्यशुक्रार्किबुधारवृद्धाः। कन्यां नगाग्न्यब्धिनगाग्निभागाः सौम्यौशनोजीवकुजार्किनाथाः। तुले रसाष्टाद्रिनगद्रिभागाः शौक्रज्ञजीवास्फुजिदारनाथाः। कीटे नगाब्ध्यष्टशराङ्कभागाः भौम्यास्फुजिज्ज्ञेज्यशनैश्चराणाम्। चापे रवीज्यस्फुधिपक्षवेदा जीवास्फुजिज्ज्ञारशनैश्चराणाम्। मृगे नगाद्र्यष्टयुगस्तुतीनां सौम्येज्यशुक्रार्किकुजेशवृद्धाः। कुम्भे नगाङ्काद्रिशरेषुभागा शुक्रज्ञजीवारशनैश्चराणाम्। मीनेऽर्कवेदानलनन्दपक्षाः क्षितेज्यसौम्यारशनैश्चराणाम्। त्रिंशत्सभे विंशतिरुक्षभे खेऽहेऽज्यचन्द्रादशकं दशार्धे। दशक्षहे (नवांशे)पक्ष खवाः प्रदिष्टाविंशोपका वेदखवैः प्रकल्प्याः। स्वस्वाधिकारोक्तबलं गृहर्क्षे पादोनमर्धं समभेऽरिभेऽङ्घ्रिः एवं समानीय बलं तदैक्ये वेदोद्धृते हीनबलः शरोनः"।

पञ्चवर्ण न॰ पञ्च वर्णा अस्य। पञ्चवर्णान्वितखण्डचूर्णे "रजांसि पञ्चवर्णानि मण्डलार्थं हि कारयेत्। यावितखण्डचूर्णेन शुक्लं वा सर्वसम्भवम्। रक्तं कुङ्कुमसिन्दूरगैरिकादिखण्डजम्। हरितानीलपूर्वं पीतं रजनी सम्भवं क्वचित्। कृष्णं दग्धपुलाकैस्तु कृष्णैर्द्रव्यैरथापि वा। हरितं बिल्वपत्रोत्थं पीतकृष्णविमिश्रितम्"। हेमा॰ख॰। २अकारोकारमकारनादबिन्दुयुक्ते प्रणवे च

पञ्चवल्कल न॰ ५त॰। "न्यग्रोधोदुम्बराश्वत्थप्लक्षवेतसवल्कलैः। सर्वैरेकत्रसंयुक्तैः पञ्चवल्कलमुच्यते" शब्दच॰ २उक्ते "न्यग्रोधोदुम्बराश्वत्थप्लक्षाम्लानां त्वचौ। चीरिवृक्षाच्च पञ्चैषां वल्कलं पञ्चवल्कलम्" इत्युक्तक्रमे "पञ्चैते चीरिणो वृक्षास्तेषां त्वक्पञ्चकं मतम्। त्वक्पञ्चकं क्षिपं कृत्वा प्रस्थयोर्विसर्पणित्" राजनि॰ २उक्ते च वृक्षपञ्चकवल्कले।

पञ्चवातीय न॰ राजसूयाङ्गे फाल्गुनशुक्लप्रतिपदि कर्त्तव्ये पञ्चाग्निसाध्यहोमकर्ममेदे "पञ्चवातीयम् आहवनीयं प्रतिदिशं व्यूह्य मध्ये च खुवेणाग्निषु जुहोत्यग्निनेत्रेभ्य इति प्रतिमन्त्रम्" कात्या॰श्रौ॰ १५।१।२० "होममन्त्राणां लिङ्गेन व्यवस्था (फाल्गुनशुक्ले प्रतिपदोक्ते) पञ्चवातीय संज्ञकं वक्ष्यमाणकर्म भवति आहवनीयं प्रतिदिशं व्यूह्य खरमध्यस्थं कृष्णप्रेरितमेव खरमध्य एव प्राच्यादिदिक्षु स्थापयित्वा मध्ये चावस्थाय पञ्चसन्निधु जुहोति" कर्कः "उत्तराः समस्य के देवा इति प्रतिमन्त्रम्" २१सू॰ जुहोतीति शेषः समस्य चाग्नीनिति प्रतिदिशं व्यूढमाहवनीयमेकत्र कृत्वा उत्तराः पञ्चाहुतीर्जुहोति" कर्कः "त्रिवृत्प्राञ्चरयो दक्षिणा" २२सू॰ "त्रिभिरग्नैर्वृत्तोरथो दक्षिणा" कर्कः। तस्य नामनिरुक्तिः शत॰ब्रा॰५।२।४ दर्शिता यथा "तस्य प्रतिष्ठाहुतोऽश्वरथो दक्षिणा। "त्रयोऽश्वा हौ सव्येष्टारथौ ते पञ्च प्राणा वै प्राणः क वातस्तदेतस्य कर्मण एषा दक्षिणा तस्मात् पञ्चवातीयं नाम"। तस्य व्याधितरोगनिवृत्तिहेतुत्वमपि तत्र दर्शितं यथा "स यैतेनापि भिषजेत्"। "अयं वै प्राणो योऽयं पवते यो वै प्राणः स आयुः योऽयमेक इवैव पवते योऽयं पुरुषेऽनाःप्रविष्टो दशधा विहितो दश वा एता आहुतीर्जुहोति तदस्मिन् दश प्राणान् तत्स्थमेव सर्वमायुर्दधाति समदिष्टादि गतासुरिव भवत्या हैवैनेन हरति"।

पञ्चविधप्रकृति स्त्री कर्म॰। अमात्यराष्ट्रदुर्गकोशदण्डाख्यास पञ्चप्र राज्याङ्गप्रकृतिषु मनुः ७अध्याये १५७श्लोके।

पञ्चबीज न॰पञ्च विल्वीयं मध्ये बीजमस्य। १त्रयपे (यमा) २कर्कट्यां ३दाडिमे च मेदिनी पृ॰।

पञ्चवृत्ति स्त्री पञ्चसुखिता वृत्तिः मा॰त॰, कर्म॰, ब॰व॰ वा। घात॰उक्तात्त पञ्चसु मनोवृत्तिषु "वृत्तयः पञ्चतय्यः क्लिष्टाऽक्लिष्टाः" सू॰। "प्रमाणविपर्ययविकल्पनिद्रास्मृतयः" सू॰ प्राणनापाननसमाननोदाननव्याननरूपवृत्तिपञ्चकयुक्ते देहस्थे अयौ २प्राणे च।

पञ्चशर पु॰ पञ्च शरा अस्य। १कन्दर्पे अमरः। तत्करास्त्रकालिकापुराणशब्दे २०१२पृ॰दर्शिताः। पञ्चसुखिताः शराः मा॰त॰। कामस्य २शरेषु १२६८ पृ॰ उपमशब्ददर्शिते ३रोगादिद्योतकपञ्चके च।

पञ्चशस्य न॰ समा॰ द्वि॰। "धान्यसप्तकाश्रिता माषाः यवाः सिद्धार्थकोऽथ वा। पञ्चशस्यमिति प्रोक्तम्" इत्युक्तेषु धान्यादिषु। दुर्गोत्सवपद्धतिः।

पञ्चशाख पु॰ पञ्च शाखाकारा अङ्गुलयो यस्य। १हस्ते अमरः। २गजे पु॰स्त्री स्त्रियां जातित्वात् ङीष्। समा॰ द्वि॰। पञ्चानां शाखानां २समाहारे न॰।

पञ्चशारदीय पु॰ यज्ञभेदे कात्या॰श्रौ॰ २२।४।२ उक्तः।

पञ्चशिख पु॰ मुनिभेदे तत्रोत्पत्त्यादिकं वामनपु॰ ६०अ॰ उक्तं यथा "धर्मशास्त्रेषु भाष्यौ वा तथा पुराणचतुष्टयम्। सम्यग्मुनिभिर्दृष्टं योगशास्त्रविचारणम्। ब्रह्मेशः सनत्कुमारोऽभूत्तृतीयश्च सनातनः। तृतीयः सनको नाम चतुर्थश्च सनन्दनः। सांख्यवेत्तारमपरं कपिलं बोढुमासुरिम्। दृष्ट्वा पञ्चशिखं श्रेष्ठं योगयुक्तं तपोनिधिम्। ज्ञानयोगं न ते दद्युर्ब्राह्मणा योऽपि कश्चन"। भा॰शा॰ २१८अ॰ तस्य नामनिरुक्तिरन्यथोत्पत्तिश्चोक्ता यथा "तत्र पञ्चशिखो नाम कापिलेयो महामुनिः। परिधावन् महीं कृत्स्नां जगाम मिथिलामथ। सर्वसंन्यासधर्माणां तत्त्वज्ञानविनिश्चये। स पर्यवसितार्थश्च निर्द्वन्द्वो नष्टसंशयः। क्रमेणाभाद्भिक्षुरेकं यं कामादवसितं व्रजन्। शाश्वतं सुखमत्यन्तमक्षयं सुदुर्लभम्। यमाहुः कपिलं सांख्याः परमर्षिं प्रजापतिम्। स मन्ये तेन रूपेण विख्यापयति हि स्वयम्। आसुरेः प्रथमं शिष्यं यमाहुश्चिरजीविनम्। पञ्चस्रोतसि यः स्नातमासीनमागम्य कापिलं मण्डलं महत्। पञ्चस्रोतसि विख्यातः पञ्चरात्रविशारदः। पञ्चघ्नः पञ्चकृत् पञ्चभुक्

पञ्चशिखः ऋषिः। पुरुषावस्थमव्यक्तं परमार्थं न्यवेदयत्। दृष्टश्चैव सम्पृष्टो मूयश्च तपसाङ्गिरिः। क्षेत्रक्षेत्रज्ञयोर्व्यक्तिं बुबुधे देवदर्शनः। यत्तदेकाक्षरं ब्रह्म नानारूपं प्रदृश्यते। आसुरिर्मध्वले तस्मिन् प्रतिभेदे तदब्रवम्। तस्य पञ्चशिखः शिष्यो मनुष्यो वयसा मतः। ब्राह्मणी कपिला नाम काचिदासीत् कुटुम्बिनी। तस्याः पुत्रत्वमागम्य स्त्रियाः स पिबति स्तनौ। ततः स कापिलेयत्वं लेभे बुद्धिञ्च नैष्ठिकीम्। एतन्मे भगवानाह कापिलेयस्य सम्भवम्। तस्य तत्कापिलेयत्वं सर्वविज्ञमनुत्तमम्"।

पञ्चशीर्ष पुं० पञ्च शीर्षाण्यस्य। सर्पभेदे। [इत्यमरः।

पञ्चशुक्ल पुं० पञ्चसु शुक्लः। कीटभेदे सुश्रुतः कीटशब्दे

पञ्चशूरण पुं० पञ्च शूरणा यत्र। "अत्यम्लकाण्डीरमाला-कन्दहिङ्गूरणैः। छुप्तो भवति योगोऽयं पञ्चशूरणसंज्ञकः" राज० उक्ते मिलिते अत्यम्लादौ।

पञ्चशैरीषक न० पञ्चसु मिलितं शैरीषकम् मा० त०। शिरीषवृक्षस्य पुष्पमूलफलपत्रवल्कलेषु राजनि०।

पञ्चशैल पुं० मेरोर्दक्षिणस्थे पर्वतभेदे "पञ्चशैलोऽथ कैलासो हिमवांश्चाचलोत्तमः। इत्येते दक्षिणं पार्श्वं मेरोः प्रोक्ता महाचलाः" मार्कण्डपु० ५५ अ०।

पञ्चय त्रि० व० पञ्च वा षट् वा वार्थे व० स० ड समा०। पञ्च वा षट् वा परिमाणं येषां तेषु पदार्थेषु।

पञ्चसिद्धान्ती स्त्री समा० ङी०। ब्रह्मसूर्यसोमाद्युक्तेषु पञ्चसु ज्योतिषसिद्धान्तेषु।

पञ्चसिद्धौषधिक पुं० पञ्च सिद्धौषधयो यत्र कप्। "तैलकन्दं सुधाकन्दक्रोडकन्दरुदन्तिकाः। सर्पनेत्रयुताः पञ्चसिद्धौषधिकसंज्ञकः" राजनि० उक्ते तैलकन्दादिसिद्धौषधिपञ्चकयोगभेदे।

पञ्चसुगन्धिक "कर्पूरकक्कोलत्वक्कुष्ठगुवाकजातीफलपत्रकैः। समांशभागैः च योजितैः मनोहरं पञ्चसुगन्धिकं स्यात्" इत्युक्तेषु मिलितसुगन्धिकर्पूरादिद्रव्येषु राजनि०।

पञ्चसूना स्त्री पञ्च सूनाः प्राणिवधस्थानानि। "पञ्च सूना गृहस्थस्य चूल्ली पेषण्युपस्करः। कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन्" मनुनोक्तेषु पञ्चसु कीटवधस्थानेषु

पञ्चस्रोतस् न० पञ्च स्रोतांसि यत्र। तीर्थभेदे भा० शा० २१८ अ० इत्यम्। २योगभेदे पञ्चशिखशब्दे दृश्यम्।

पञ्चस्वरा स्त्री पञ्च स्वराः प्रतिपाद्यतया यत्र। प्रजापतिदासे वैष्णवते ज्योतिषग्रन्थभेदे।

पञ्चस्वरोदय पुं० ज्योतिषग्रन्थभेदे गरुडपु० मूलं दृश्यम्।

पञ्चहारक न० क्षेमचन्द्रोक्ते क्षारभेदे।

पञ्चहीत्र पुं० वैवस्वतमनोः पुत्रभेदे हरिवं० ७अ०।

पञ्चाङ्ग पुं० अङ्गौ सङ्ख्यावचनस्य पूरणार्थत्वस्वीकारेण पञ्चशब्दः पञ्चमार्थे कर्म०। त्रिंशदंशात्मकराशेः पञ्चमेऽंशे तदंशानयनरीतिः नीलकण्ठताजके उक्ता यथा "ओजर्क्षे पञ्चमांशेषा कुजार्कीजप्रभागवाः। समभे व्यत्ययाद् ज्ञेयाः"

पञ्चाक्षर त्रि० पञ्च अक्षराणि यत्र। १मन्त्रभेदे २प्रतिशाख्य छन्दोभेदे च। "गुरु पञ्चाक्षरेण" यजु० ८।१२ "पञ्चाक्षरेण छन्दसा" वेददी०। ३प्रणवे च पञ्चवर्णशब्दे दृश्यम्।

पञ्चाग्नि पुं० संज्ञायां कर्म०। १अन्वाहार्यपचनगार्हपत्याहवनीयसभ्यावसथ्याग्निकेषु पञ्चस्वग्निषु" "पवमानः पावनश्चेता यस्य पञ्चाग्नयो गृहे" इति स्मारीतः तत्र पवनः आवसथ्योऽग्निः पावनः सभ्योऽग्निः" कुल्लू०। ते यस्य वा०। २तदग्निभिर्विहिततत्तत्कार्यकारके च। "कर्मनिष्ठाश्चयोनिष्ठाः पञ्चाग्निब्रह्मचारिणः" याज्ञ० व्याख्यायां सभ्यावसथ्यौ त्रेता चाग्नयश्च यस्य सन्ति स पञ्चाग्निः पञ्चाग्निविद्याध्यायी वा" मिता० छान्दो० उक्तेषु च स्वर्गपर्जन्यपृथिवीपुरुषयोषाख्येषु अग्निवदाख्याधारेषु ३पदार्थेषु "पञ्चाग्नयो वै च त्रिणाचिकेताः" श्रुतिः चतुर्दिक्षु च जठरे च स्थितेषु पचतु ४तेजस्विषु।

पञ्चाङ्ग पुंस्त्री० पञ्चाङ्गानि यस्य। १कमठे शब्दमाला। पञ्चभद्राख्ये २वृक्षभेदे शब्दमा० "बाहुभ्यां चैव जानुभ्यां शिरसा वचसा दृशा"। पञ्चाङ्गोऽयं प्रणामः स्यात्" इति तन्त्रसारोक्ते ३प्रणामभेदे "त्वक्पत्रकुसुमं मूलं फलमेकस्य वाक्षिणः। एकत्र मिलितं चैतत् पञ्चाङ्गमिति कीर्तितम्" राजनि० उक्तेषु ४एकदृक्षत्वगादिषु पञ्चसु "जपहोमौ तर्पणञ्चाभिषेको विप्रभोजनम्। पञ्चाङ्गोपासनं लोके उरश्चरणमिष्यते" तन्त्रसारोक्ते ५मन्त्रोपरश्चरणे न०। "तिथिर्वारश्च नक्षत्रं योगः करणमेव च। पञ्चाङ्गमेतदुद्दिष्टं" ज्यो० उक्तेषु इतिप्रसिद्धे। "आगमो दीर्घकालस्य निश्चिद्रोऽन्यरवोज्झितः। प्रत्यर्थिसन्निधानञ्च पञ्चाङ्गो भोग इष्यते" कात्या० उक्ते आगमादिपञ्चकयुक्ते ७भोगे च।

पञ्चाङ्गगुप्त पुंस्त्री पञ्चाङ्गानि गुप्तान्यस्य। कच्छपे त्रिका०। करपादचतुष्कशिरोरूपावयवपञ्चकस्य स्वेच्छया गोपनात् तस्य तथात्वम्। स्त्रियां जातित्वात् ङीष्।

पद्माङ्गशुद्धि स्त्री पद्माङ्गस्य शुद्धिः। तिथिवारादीनां शुद्धौ दोषराहित्ये विहिततिथ्यादौ "पद्माङ्गशुद्धिदिवसे रोदये ग्रहितारयोः। शुक्रशुक्रोदये शुद्धे लग्ने द्वादशयोषिते। चन्द्रतारानुकूले च जप्यते सर्वकर्मणि"।

पद्माङ्गी स्त्री करिणां कटिबन्धनद्रामणि हेमच०।

पद्माङ्गुल पु०पद्म अङ्गुलय इव पत्रेष्वस्य दारुणि अच्समा०। एरण्डवृक्षे अमरः। २पद्माङ्गुल्याकारयुक्ते दर्वीभेदे च अदारुणि तु न अच्। पद्माङ्गुलि इत्येव।

पद्माज न०गच्छगव्यवत् विपदः। अजायाः पूरीषादिपङ्के तद्देव तद्दृष्टपाकविधिः कुष्ठतोक्तः पद्मसङ्गिषयग्रन्थे दर्शितः।

पद्मातप त्रि० पद्मभिरग्न्यादिभिरातप्यते या+तप-अच् इत०। अग्निचतुष्टयसूर्यरूपैः पद्मभिस्तप्यति। तत्स्थापनप्रकारस्तु "यत्रिवेदैरभिः शुक्लैश्चतुर्दिक्षु चतुष्कृतम्। वह्निसंस्थापनं पीठे तीव्रांशुस्तत्र पञ्चमः। कृत्वान्तरे चतुर्वक्त्रान् कृत्वा कैशानरेहिना। तन्मध्यस्था सूर्यबिम्बं पीतनीलं वडवांशुजा" कालिकापु० ४२अ०। "पीठे पञ्चाग्निमध्यस्थो वर्णान्तु स्वखिलेक्षयः" स्मृतिः।

पद्मात्मक त्रि० पद्म आकाशादय आत्मा स्वरूपं वा यस्य। आकाशादिपञ्चभूतस्वरूपे "पद्मात्मकं देहमिदं" मार्कण्डपु० २४अ०। पद्मोक्तभूतज्ञाततत्त्वाद्देहस्य तथात्वं पाञ्चभौतिकशब्दे दृश्यम्।

पद्मानन पुंस्त्री पद्मं विस्तीर्णमाननमस्य। १सिंहे स्त्रियां ङीष्। २सिंहराशौ पु० पद्म आननमास्यस्य। ३पद्मयुक्ते त्रिषु च। "विभाव्य सत्त्वपद्मं हि शिवस्य वरवर्णिनि!। सद्योजातं वामदेवमघोरञ्च ततःपरम्। तत्पुरुषं तथेशानं पञ्चवक्त्रं प्रकीर्त्तितम्। सद्योजातं च यै शुक्लं शुद्धस्फटिकसन्निभम्। पीतवर्णं तथा सौम्यं वामदेवं मनोहरम्। कृष्णवर्णमघोरं च रक्तं तत्पुरुषं देवि! दिव्यमूर्त्तिमनोहरम्। श्यामलं च तथेशानं सर्वदेवं शिवात्मकम्। चिन्तयेत् पश्चिमे चाद्यं द्वितीयं च तथोत्तरे। अघोरं दक्षिणे देवं पूर्वं तत्पुरुषं तथा। ईशानं मध्यतो ध्येयं चिन्तयेत् भक्तितत्परः" निर्वाणतन्त्रे ६पटले। ४रुद्राक्षभेदे।

पद्माप्सरस् मातङ्गर्षिकृतनेत्रपद्माभङ्गार्थमिन्द्रप्रेषित पद्मापरोभिःपद्माभङ्गे कृते यस्य सरोवरे तासां सर्वदास्थितिरासीत् ताडशे सरोभेदे रघु० १३सर्गे दृश्यम्।

पद्माब्जमण्डलम् न० सर्वतोभद्रमण्डलान्तर्गते पञ्चपद्मात्मके मण्डलभेदे "पद्माब्जमण्डलं प्रोक्तमेतत् सर्वत्र वर्जितम्" राघवभट्टधृतवचनम्।

पद्मामरा स्त्री संज्ञात्वात् कर्म०। अमरतापद्मके "एका तु अमरा दूर्वा तस्या अन्या समानयेत्। अन्या तु विजया देवी सिद्धिरूपा सरस्वती। अन्या तु विशालाक्षी शिवस्योपकारिणी। अन्या तु योगसिद्ध्यर्थं निर्मुण्डी चामरा लता। अन्या तु कायस्थस्थी श्रीविष्णोः प्रियतोषिणी। एताः पद्मामरा ज्ञेया योगसाधनकर्मणि" इति रुद्रयामलोत्तरखण्डे ३६पटले।

पद्मामृत न० समा०हि०। "दुग्धं च शर्करा चैव घृतं दधि तथा मधु। पद्मामृतमिदं प्रोक्तं भिषग्भिश्च पञ्चसु दुग्धादिषु।

पद्मासनयोग पु० "गुदपादौ गोजुरश्चैव मूलञ्च सन्धिबन्धा तथा। शतावरीति पञ्चानां योगः पद्मासनाभिधः" राजनि० शक्रादिषु युक्तगुडूच्यादिषु।

पद्माम्नाय पु० संज्ञात्वात् कर्म०। शिवेन पञ्चभिर्वक्त्रैरुक्तेषु आम्नायतन्त्रशास्त्रेषु यथोक्तं "पूर्वाम्नायः पूर्वतश्च प्रथिमः पश्चिमास्तथः। दक्षिणो दक्षिणस्तद्वदुत्तरश्चोत्तरःपरः। निरुत्तरं तथा चोर्द्ध्वं सिद्धान्तागमरूपिणम्। अहोम्नाय इत्यान्नाय तपसः फलम्" इति "पूर्वाम्नायः मन्त्ररूपो दक्षिणः कर्मरूपकः। पश्चिमः प्रश्नरूपः स्यादुत्तरं ज्ञानरूपधृक्। ऊर्ध्वाम्नायस्तत्त्वबोधः केवलानुभवात्मकः" इति भैरवतन्त्रम् "शिवपञ्चमुखेभ्यश्च पञ्चाम्नायाः समुद्गताः" इत्यादि कुलार्णवतन्त्रम्।

पद्माम्र न० "अश्वत्थमेकं पिचुमर्दमेकं न्यग्रोधमेकं दशपुष्पजातीः। द्वे द्वे तथा दाडिमसप्तपर्णे पञ्चाम्रवापी नरकं न याति" इति वराहपु० १७अ० "अश्वत्थ एकः पिचुमर्द एको द्वौ चम्पकौ त्रीणि च केसराणि। सप्तार्क ताला नव नारिकेलाः। पञ्चाम्रवापी नरकं न याति" तिथि०त०२अ० च अश्वत्थादौ। वस्तुतः पञ्चानामाम्राणां वापीत्युत्तरपदहिंगुः तात्पर्यवशात् अश्वत्थादीनां वापीत्यध्याहारेणान्वयः इति बोध्यम्।

पद्माम्ल न० अम्लपद्मके "कोलदाड़िमदधाम्लैरम्लवेतसयूतैः। चतुरम्लञ्च पद्माम्लं मातुलाङ्गसमन्वितम्" शब्दच० अम्लपञ्चके

पद्मायतनी स्त्री पञ्चानामुपास्यदेवरूपाणामायतनानां समाहारः। गणेशादिपञ्चदेवरूपोपास्यानां समाहारे। पञ्चदेवोपासकस्य यस्मिन् दिने यस्य पूज्यता तस्य तद्दिने मध्ये

स्थापनमन्येषां च दिग्देवेषु स्थापनसूत्रं तन्त्रसा० यामले "भवानीन्तु यदा मध्ये ऐशान्यामच्युतं यजेत्। आग्नेय्यां पार्वतीनाथं नैर्ऋत्यां मधनायकम्। वायव्यां तपनं चैव पूजाक्रमसदाहृतः। यदा तु मध्ये गोविन्दमैशान्यां मधुरं यजेत्। आग्नेय्यां मधनाथञ्च नैर्ऋत्यां तपनन्तथा। वायव्यामम्बिकां चैव भोगमोक्षैकभूमिकाम्। मधुरं च यदा मध्ये ऐशान्यामच्युतं यजेत्। आग्नेय्यां तपनं चैव नैर्ऋत्यां मधनायकम्। वायव्यां पार्वतीं चैव स्वर्गमोक्षप्रदायिनीम्। आदित्यं च यदा मध्ये ऐशान्यां मधुरं यजेत्। आग्नेय्यां मधनाथं च नैर्ऋत्यां केशवं यजेत्। वायव्यामम्बिकां देवीं स्वर्गसाधनभूमिकाम्। मधनाथं यदा मध्ये ऐशान्यां केशवं यजेत्। आग्नेय्यामीश्वरं चैव नैर्ऋत्यां तपनन्तथा। वायव्यां पार्वतीं चैव पूजयेन्मोक्षदायिनीम्। सस्थान वर्त्तिता देवा दुःखशोकभयप्रदाः"।

पञ्चारी स्त्री पञ्च पञ्च संख्यामच्छति क्यङ-अच् उप०स०। गौरा० ङीष्। शारीफलके (पाशारखेल) शब्दमाला। तस्य पञ्चपञ्चकोष्ठात्मकत्वात्तथात्वम्।

पञ्चार्चिस् पु० पञ्च अर्चींषि यस्य। बुधग्रहे त्रिका०।

पञ्चाल पु० ब०व०। पञ्चि-कालन्। १देशभेदे तस्यादिकोषः। विष्णुपु० ४अ० १६अध्याये अस्यान्वा निरुक्तिर्दर्शिता यथा "कर्म्मणानृतसङ्गसङ्गयदङ्गदिण्युयवीनरकाम्मिस्त संज्ञाः। पञ्चानामेतेषां विषयाणां रक्षणायालमेते मत्पुत्रा इति पित्राभिहिता इति पञ्चालाः"। पृषो०दीर्घत्वे पाञ्चालोऽप्यत्र तस्य०। "गच्छताद्यैव पाञ्चालान् द्रुपदस्य निवेशने" भा०आ० १८३०। सोऽभिजनोऽस्य तस्य राजा वा अण्। पाञ्चाल तद्देशवासिनि तद्भूपे च। यञ्लुपि अणो लुक्। पञ्चाला इत्यत्रैव। पञ्चालचण्ड भारते द्रुपद इति ख्यातः। तस्यापत्यं स्त्री पाञ्चाली द्रौपद्याम् २मल्लादेशे ऋ०प० २८६अ०। ३बाभ्रव्यगोत्रे परमेश्वरात् क्रमप्राप्तरि ४ऋषिभेदे भा०शा०३४४अ०।

पञ्चालिका स्त्री पञ्चाय प्रपञ्चाय अलति अल-एवुल् कापि अतइत्वम्। वस्त्रादिनिर्मितपुत्तलिकायाम् अमरः।

पञ्चाली स्त्री पञ्चाय अलति अच् गौरा० ङीष्। १वस्त्रादिनिर्मितपुत्तलिकायाम् (पाँचाली) ख्याते २गीतिभेदे च मेदि०। पञ्चारी+रस्य लः। ३शारिफलकक्रीडायाम् (पाशारखेल) त्रिका०।

पञ्चावट वरक्षे वाचोपवीते ज्ञान०।

पञ्चावत्तिन् त्रि० पञ्चधा अवत्तं खण्डनमस्यस्य। पञ्चधा खण्डिते चर्वादौ काश्र०श्रौ० १।१०।१८

पञ्चावयव पु० पञ्च प्रतिज्ञादयोऽवयवाश्चास्य। प्रतिज्ञाहेतूदाहरणोपनयनिगमनात्मकावयवपञ्चकयुक्ते न्यायवाक्ये

पञ्चावस्थ पु० पञ्चसु भूतेषु स्वकारणेषु अवस्था यस्य। यत्र प्रतिदेहे त्रिका० तस्य देहारम्भकभूतानां स्वस्वकारणे स्थानात्तथात्वम्।

पञ्चावी स्त्री पञ्च अवयः षण्मासात्मककाला वयोऽस्याः ङीप्। खार्द्धवर्षद्वयपर्य्यन्तायां स्त्रीगव्यां यजु०१८।१६।

पञ्चाशत् स्त्री पञ्च दशतः परिमाणमस्याः नि०। (पचास) १संख्याभेदे २तत्सङ्ख्यान्विते च ततः पूरणे डट्। पञ्चाश तत्सङ्ख्यापूरणे त्रि०स्त्रियां ङीप्। तमप् पञ्चाशत्तम तदर्थे। षडधिकं यस्य शतादौ ङट्। पञ्चाश पञ्चाशदधिके शते सहस्रे च त्रिषु। पञ्चाशिन् तत्परिमाणयुक्ते। स्त्रियां ङीप्। स्वार्थे क टाप्। पञ्चाशिका चौरपञ्चाशिका षट्पञ्चाशिका इत्यादि। [१सङ्ख्याभेदे २तत्संख्यके च।

पञ्चाशीति स्त्री पञ्चाधिका अशीतिः। मा० त०। (पँचासी)

पञ्चास्य पुंस्त्री० पञ्च विस्तीर्णमास्यं वक्त्रं यस्य। १सिंहे स्त्रियां जातित्वेऽपि योपधत्वात् टाप्। २सिंहराशौ च पञ्चास्यास्य। ३पञ्चानने त्रिषु ४पञ्चवक्त्रे रुद्राक्षे च।

पञ्चिन् त्रि० पञ्च परिमाणमस्य इनि। पञ्च परिमाणयुक्ते ऐत०ब्रा० ३।११।८

पञ्चीकरण न० अपञ्च पञ्चात्मकानि क्रियन्ते अनेन पञ्चन्+च्वि-कृ-भावे ल्युट्। अपञ्चात्मकस्य पञ्चात्मकतासम्पादने व्यापारभेदे। पञ्चीकरणन्तु आकाशादिषु पञ्चसु एकैकं द्विधा समं विभज्य तेषु दशसु भागेषु मध्ये प्राथमिकान् पञ्च भागान् प्रत्येकं चतुर्धा समं विभज्य तेषां चतुर्णां भागानां स्वस्वद्वितीयार्द्धभागं परित्यज्य भागान्तरेषु संयोजनम् तदुक्तं "द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः। स्वेतरद्वितीयांशैर्योजनात् पञ्च पञ्च ते" वेदान्तसारः।

पञ्चीकृत त्रि० पञ्चीभू-कर्मणि क्त। पञ्चात्मकताकरणेन उत्पादिते "अपञ्चीकृतभूतेभ्यः सूक्ष्मेभ्यः भोगसाधनम्" वेदान्तपरिभाषा।

पञ्चेधीय पु० पञ्चभिरिध्मैः निर्वृत्तः छ। पञ्चेध्माध्ये क्रोमभेदे तैत्ति०८२।७ "रात्रौ निशायां पञ्चेधीयेन च" आपस्तम्बः।

पञ्चेन्द्र त्रि० पञ्च इन्द्राक्षो देवता अस्य अण् तस्य "द्विगो-

र्कुंगनपत्रे "पा० सुचि "सुक् तद्धिततसुचि" पा० उपसर्जन स्त्रीप्रत्ययस्य लुक्। इन्द्राणीपञ्चकदेवतायां कविरादौ।

पञ्चेन्द्रिय न० संख्यात्वात् कर्म०। इन्द्रियपञ्चके इन्द्रियशब्दे दृश्यम्। तच्च ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकं च।

पञ्चेषु पु० संख्यात्वात् कर्म०। कामस्य ।बाणपञ्चके कालिकापु० २०।१२ दृश्यम्। उपसमशब्दे ।२६८पृ० उक्ते विवाहादौ वर्ज्ये २चौरादिपञ्चके। पच दृष्वोऽस्य। ३कामदेवे हेका०।

पञ्चोपचार पु० संख्यात्वात् कर्म०। गन्धादिनैवेद्यान्तेषु पञ्चसु ।पूजाङ्गेषु उपचारशब्दे ।२०।३पृ०।३७३ दृश्यम्। पञ्च उपचारा यत्र। २पञ्चोपचाराङ्गे पूजनादौ त्रि०।

पञ्चोपविष न० संख्यात्वात् कर्म०। "क्षुद्रार्कस्करवीराणि ताक्ष्यी विषमुष्टिका। एतान्यु पविषाण्याहुः पञ्च पाण्डुसुतप्रियाः" राजनि० उक्तेषु पञ्चसु क्षुद्रादिषु उपविषेषु।

पञ्चौषन् पु० संख्यात्वात् कर्म०। "भौमाप्यान्तेवयावद्याः पञ्चौषाद्याः सनामसाः। तत्तदाकारतः खात् खात् पार्थिवादीन् पचन्त्यमी" शारदी० उक्ते आकारभाजके ३क्षुद्रास्थिपञ्चके।

पञ्चौदन पु० पञ्चधा विभक्तः ओदनः। पञ्चाकुलिभिः पञ्चधा विभक्ते ओदने। "पञ्चौदनं पञ्चभिरकुलिभिर्द्व्यौदनं पञ्चधैतमेनम्" अथ० ७।१४।७ तस्य विनियोगश्च तदुत्तरत्र मन्त्रेषु द्रष्टव्यः।

प(पि)ञ्जर पु०न०पञ्ज-(पिञ्ज-)घा अरन्। ।मरोरास्थिबन्धे कङ्काले २विच्छङ्कमादिबन्धनस्थाने न०अमरः। ३क्षत्रियपुत्रे ४गवां नीराजनाविधौ च शारदीपदी। ततः चतुरस्रां सङ्घाया० ङीप्। पाञ्जर्यं तत्सम्बन्धिदेशादौ त्रि०।

पञ्जराखेट पु० पञ्जरमिवाखेटः। मत्स्यधारणयन्त्रभेदे (शोलो) त्रिका०।

पञ्जल पु० पञ्ज-अलच्। कोलकन्दे राजनि०।

पञ्जि(ञ्जी) स्त्री पञ्ज-इन् वा ङीप्। ।लग्नसाधननाडिकायां (पाँजि)।

पञ्जिका स्त्री पञ्जि+स्वार्थे क। पाणिनीयसूत्रवृत्तिभेदे तिथिवाराद्यिपञ्चाङ्गप्रतिपादिकायां २पत्रिकायाञ्च शब्दमाला (पाँजि) "वारो हरति दुःखानि नक्षत्रं पापनाशनम्। तिथिर्भवति गङ्गाभा योगः सागरसङ्गमः। करणं सर्वतीर्थानि स्नुता चेत् दिनपञ्जिकां ज्योति०। तत्सूचकत्वात् तस्यास्तथात्वम् "टीका निरन्तरव्याख्या पञ्जिका पदभञ्जिका" हेमच० उक्तलक्षणे ३व्याख्यानभेदे च ४आयव्ययसूचनार्थपत्रे च ५चपलजात्यां त्रिका०।

पञ्जिकारक त्रि०पञ्जिकायव्ययसूचकपत्रं करोति क-ण्वुल्। कायस्थे जटाधरः क-ट। पञ्जीकरोऽप्यत्र त्रिका०।

पट गतौ भ्वा०पर०सक०सेट्। पटति। अपाटीत् अपटीत्। पपाट पेटतुः। उद्+णिच्। उन्मूलने उत्पाटयति।

पट दीप्तौ चु०उभ०अक०सेट्। पाटयति ते अपीपटत् त।

पट छेदने सक०। अवपाटयति छिनत्तीत्यर्थः।

पट वेष्टने खद० चु०उभ०सक०सेट्। पटयति ते अपपटत् त

पट पु०पट वेष्टने करणे घञर्थे क। ।वस्त्रे अमरः स्त्रीत्वमपि अपटीचेपेचेल्वुदाहरणदर्शनात्। २चित्रपटे मेदि० चित्रवेष्टनपटस्वरूपादि देवीपु०उक्तं यथा "पटस्य लक्षणं वक्ष्ये यथा सिध्यन्ति साधकाः। पञ्चिकेयविहीने तु अजीर्णे वमतन्तुके। अस्फुटिते चाच्छिन्ने स्वलेनैव समालिखेत्। योगिनीरूपिणी कार्या जवादीः परिकारिता। दृष्ट्वैनं च भवेद्दोष्याधिते व्याधितो भवेत्। कुरूपेण कुरूपस्तु कुरूपेण कुरूपताभियात्। वेष्टकस्य तु यद्रूपं चित्रे भवति तादृशम्"। पटस्यांशभेदच्छेदनादिषु फलं तद्वारणलक्षणादिकञ्च ब्र०खं० ७।अ० उक्तं यथा

"वस्त्रस्य कोणेषु वसन्ति देवा नराश्च पार्श्वान्वदनान्तमध्ये। येषान्तवस्यात् निशाचरांशात्तथैव यथा-क्रमपाटकासु। छिन्ने मसीलोमयकर्दमाद्यैश्छिन्ने प्रदग्धे स्फुटिते च विद्यात्। पुष्टं नवेऽल्पात्तपरं च भुक्ते पापं शुभं वाऽधिकतन्तुरीवे। स्यात्तन्तुसंघेष्वथ वापि मृत्युः पुत्रस्य तेजश्च मनुष्यभागे। भागेऽमरस्यामथ भोगहानिः प्रान्तेषु सर्वत्र वदन्त्यनिष्टम्। छद्मप्रयोजूककपोतकाकक्रव्यादगोमायुखरोष्ट्रसर्पैः। छेदाकृतिर्दैवतभागगापि पुंसां भयं मृत्युसमं करोति। अतश्चजक्षत्रियवर्द्धमानश्रोत्रियकन्यान्वुजतोरणाद्यैः। छेदाकृतिर्नैर्ऋतभागगापि पुंसां विधत्ते नचिरेण लक्ष्मीम्। प्रभूतवस्त्रादाविनी भरण्यवापहारिणी। प्रदक्षतेऽग्निदैवते२ प्रजेश्वरेऽर्थसिद्धयः। क्षते तु मूषकाङ्कयं व्यङ्गत्वमेव शाङ्करेद्। पुनर्वसौ शुभागमस्तदग्रभेऽ धनैर्युतिः। भुजङ्गभेऽ विलुप्यते मघासु मृत्युमादिशेत्। भगाङ्कवे११ स्वपाङ्कयं धनागमाय चोत्तरा१२। करेष१३ कर्मसिद्धयः शुभागमस्तु चित्रया। शुभं च भोक्ष्यमाणिजे१५ विदैवते१६ जनप्रियः। सुकृद्युतिश्च मित्रभे१७ पुरन्दरोऽम्बरच्छयः। जलद्युतिश्च नैर्ऋते१८ रुजो जलाधिदैवते२०। मित्रभद्वयश्च विश्वदैवते२१ वैष्णवे२२ भवति नेत्ररोगिता। धान्यवल्लिमपि माहवे२३ विद्यु-

वौरुषे२३ विषक्षतं मङ्गल्यम् । माङ्गल्यदाह्य भयं सखि-
त्वोक्तं तत्परत्र२६ च भवेत्सुतवच्छिः । रत्नयुक्तिं कथयन्ति
च पौष्णे२७ योऽभिनवाम्बरमिच्छति भोक्तुम् । वि-
प्रमताद्य भूपतिदत्तं यश्च विवाहविधावपि चक्रम् । तेषु
शुभैः रहितेष्वपि भोक्तुं नूतनमम्बरमिष्टफलं स्यात् ।
भोक्तुं नवाम्बरं शस्तमृक्षेऽपि गुणवर्जिते । विवाहे
राजसम्माने ब्राह्मणानां च सम्मते"। २पियालवृक्षे पु०
मेदि० ३पुरस्कृते त्रि० विश्वः । ५छदिषि (चाल) भरतः
पट् न० पटवेष्टने-क्विप् । पादवन्धने पट्टीशब्दे ६४ख्याते ।
पटक न० पट-वा० वुन् । शिविरे शब्दमाला ।
पटकार त्रि० पटं करोति कृ-अण् । तन्तुवाये
पटकुटी स्त्री पटनिर्मिता कुटी शा०त० । पटमये गृहे (तँबु)
हेमच० । पटगृहादयोऽप्यत्र
पटच्चर न०पट्यते आवेष्ट्यते पट-अति, भूतपूर्वं पटत् पटत्+
चरट् । १जीर्णवस्त्रे । पटदिव वेष्टित इव चरति चर-
अच् । २चौरे पु० अमरः ।
पटत् अव्य० १अव्यक्तशब्दकरणशब्दभेदे ततः डाचि टिलोपे द्विर्वे
पटपटाकरोति । इति शब्दसत्त्वे तु न डाच् पटदिति
क्रोतीत्येव । २पटे पटच्चरशब्दे दृश्यम् ।
पटत्क पु० पटदिव वेष्टित इव कायति कै-क । चौरे तस्य
कथा त० नपुंसकता चिह्नया० अस्य आद्युदात्तता ।
पटमण्डप पु० पटनिर्मितो मण्डपः (तँबु) ख्याते वस्त्रगृहे
पटमय न० पट+प्राचुर्ये मयट् । १प्रचुरपटनिर्मिते गृहे
(तावुँ) २गाटयां स्त्रियां ङीष् ।
पटर त्रि० पट-वा० अरन् पटं राति रा-क वा । १गतिशीले २वस्त्रदायके च ततः गौरा० स्त्रियां ङीष् ।
पटरक पु० पटर+संज्ञायां कन् । गुन्द्रवृक्षे राजनि०
पटल न०पट-वेष्टने कलच् । १छदिषि (चाल) अमरः २नेत्र-
रोगभेदे च ३पिटके ४परिच्छदे ५तिलके ६समूहे च
मेदि० । ७छदेरावरके (चन्देरपाता) । नेत्ररोगभेदश्च
अक्षिपटलशब्दे ४३ पृ० उक्तः "तेजो जलाश्रितं बाह्यं
तेजस्वात् प्रिशिताश्रितम् । मेदस्तृतीयं पटलमाश्रितं
सन्धि चापरम् । पक्ष्मसंज्ञमं दृष्टेस्तेषां बाह्यमभि-
ख्यते" । एतत्संज्ञभेदे च । छदिषि अस्य स्त्रीत्वमपि
गौरा० ङीष् । हेमच० दृढे (दृने) च शब्दरत्ना० ।
पटलप्रान्त पु० ६त० । स्वच्छन्दादिषोऽन्तभागे (छाँत्रि) इति
प्रसिद्धे नीव्रे अमरः ।
पटवाप पु० पट उप्यतेऽत्र वप-आधारे घञ् । वस्त्रमयगृहे
त्रिका० ।
पटवास पु० पटनिर्मितः वासः । १वस्त्रमयगृहे (तँबु) २गा-
टयाञ्च शब्दरत्ना० । पटं वासयति सुरभीकरोति वास-
णच् उप०स० । २वस्त्रसुरभीकारके द्रव्यभेदे । तद्विधानं
ह०सं० १२०अ० यथा "त्वगुशीरपत्रभागैः सूक्ष्मैश्चार्धेन
संयुतैर्भूयैः । पटवासः प्रवरोऽयं सम्भवपूरमयत्नेन" ।
स्वार्थे क वासि-स्वुञ् वा । पटवासकोऽप्यत्र अमरः ।
पटवेश्मन् न० पटनिर्मितं वेश्म । पटमण्डपे (तँबु)
पटह पु०पु० अर्द्यते अर्द-अच्, पट इत्येवं
शब्दं जहाति वा हा-वा क । १डक्कायाद्ये अमरः
२समारम्भे पु० पट-वा० अच् । ३हिंसने शब्दरत्ना०
पटाक पुंस्त्री० पट-आक । १खण्डे उज्ज्वलद० स्त्रियां
जातित्वात् ङीष् । २पताकायां स्त्री शब्दर० । [त्रिका०।
पटाल्लका स्त्री पट इवाचरति अल-वा० उक । अलौकायां
पटि(टी) स्त्री पट-इन् वा ङीप् । १पटभेदे २कुम्भिकाख्ये
च ३शाखुकी मेदि० स्वार्थे क । पटिका तत्रार्थे ययत्रि०
कायां (पट्टी) त्रिका० । [दृश्यत्वे ।
पटिमन् पु० पटोभावः पृथ्वा० इमनिच् डिदङ्गावः । पटुत्वे
पटिष्ठ त्रि० अतिशयेन पटुः इष्ठन् । अतिशयेन पटो ईयसुन्
पटीयस् तत्रार्थे त्रि० स्त्रियां ङीप् ।
पटीर न० पट-ईरन् । १चालन्यां २मूलके ३केदारे मेदि०
४वंशसारे ५खदिरे ७उदरे ८कन्दर्पे ९चन्दने च "परि-
पीतपटीररसैरसकृत्" सा०द०टी० १०उच्चे ११रमणीये च
त्रि० शब्दरत्ना० ।
पटु न० पट-उन् । १छत्रायां २वस्त्रे च मेदि० ३पांशुवस्त्रे
रत्नमा० । ४पटोले पु० अमरः ५पटोलफले न० विश्वः ।
६क्षारक्षीरलतायां ७कारवेल्ले ८चोरके पु० राजनि० ।
९दक्षे १०नीरोगे ११चतुरे त्रि०मेदि० । १२तीक्ष्णे ११क्षुद्रे
त्रि० हेमच० १४निपुणे त्रि० शटा० । १५धूर्त्ते त्रिका० ।
गुणवचनत्वात् स्त्रियां ङीप् । ततः भावे त्व् पटुत्व
न० त्व पटुत्व तल् पटुता स्त्री दृश्यतायाम् ।
पटुक पु० पटु-संज्ञायां कन् । पटोले शब्दरत्ना० ।
पटुकल्प त्रि० ईषदूनः पटुः पटु+कल्पप् । ईषदूने पटौ
पटुजातीय त्रि० पटुप्रकारः पटु+प्रकारे जातीयर् ।
पटुप्रकारे ।
पटुदृषक न० पटु लवणं तदिव दृषमस्य कप् । लवणाढ्य-
दृषद्युक्ते दृषद्भुमभेदे राजनि० ।
पटुपत्रिका स्त्री पटु पत्रमस्याः कप् अतइत्त्वम् । क्षुद्र-
चञ्चुचुपे राजनि० ।
पटुपर्णी स्त्री पटूनि पर्णान्यस्याः जातित्वात् ङीष् । अर्क-

चीरिणीवृक्षे अमरः ङप् कापि अतइत्त्वम्। पटुपर्णिकाप्यत्र चीरिणीवृक्षे [यवदर्थे राजनि०।

पटुरूप त्रि० प्रशस्ताः पटुः पटु+प्राशस्त्ये रूपप्। अतिपटु।

पटुल पु० राजभेदे भा०प० २८३अ०।

पटुस पु० राजभेदे हरिवं० ११७अ०।

पटोटज न० पट इव उटात् मूलात् जायते जन–ड। अलाबे शब्दरत्ना० तस्य मूलतएव वस्त्रतुल्यत्वात्तथात्वम्।

पटोल पु० पट–ओलच्। खनामख्याते १लतामेदे २वस्त्रभेदे न० मेदि०। तल्लतायाः मूलादिगुणाः "पटोलस्य भवेन्मूलं विरेचनकरं सुखात्। नाडं श्लेष्मकरं, पत्रं पित्तहारि फलं पुनः। दोषत्रयहरं प्रोक्तं तद्वत्त्वक् पटोलिका भावप्र०उक्ताः। "पटोलपत्रं पित्तघ्नं दीपनं पाचनं लघु। स्निग्धं हृद्यं तथोष्णञ्च ज्वरकासकृमिप्रणुत्। पटोलं कफपित्तास्रकृच्छ्वरकुष्ठव्रणापहम्। विसर्पनयनव्याधित्रिदोषगरनाशनम्। पटोलफलकश्चेति किञ्चिद्गुणान्तरा वुभौ" राजवल्लभः।

पटोलक पु० पटोलमिव कायति कै–क। शुक्तौ वल्मीकाद्या तस्याः पटोलफलाकारत्वात् तथात्वम्।

पटोलादि पु० चक्रदत्तोक्ते कषायभेदे "पटोलं चन्दनं मूर्वा त्रिफला पाठामृतागवः। पित्तश्लेष्मास्रविच्छर्दि ज्वरकण्डूविषापहः"।

पटोलाद्यघृत पु० चक्रदत्तोक्ते घृतभेदे यथा "पटोलं कटुकां दार्वीं निम्बं वासां फलत्रिकम्। दुरालभां पर्पटकं सायलीच पलोन्मिताम्। प्रस्थमामलकानाच क्वाथयेत्तुल्यनेऽम्भसि। पादशेषे रसे तस्मिन् घृतप्रस्थं विपाचयेत्। कल्कैर्मूलनिम्बत्वक्पटजम्बुत्वदाम्रचन्दनैः। सर्पिष्मतीकैस्तत्सिद्धं चक्षुषोः शुक्लयोर्हितम्। व्रणकर्णाक्षिपर्वत्वग्दुष्टरोगव्रणापहम्। कामलाज्वरवीसर्पगुल्मार्शहरं परम्"।

पटोली स्त्री अपक्रष्टः पटोलः ङीष् (झिङ्गा) ख्यातायां लतायाम् स्वार्थे क। तत्फलार्थे मेदि० पटोलशब्दे तद्गुणादि द्रष्टव्यम्।

पट्ट न० पट–क्त नेट् ट वा तस्य नेत्त्वम्। १नगरे २चतुष्पथे ३भूम्यादिकरग्रहणलेखपत्रे (पाट्टा) ४पीठे ५फलके (डाल)६राजसिंहासने ७उत्तरीयवस्त्रे ८कौषेये (रेशम) ९पेषणपाषाणे पु० मेदि० १०व्रणादीनां प्रतिकारार्थबन्धनवस्त्रे (पटी) स्वार्थे क। पट्टक तत्रार्थे सिंहासनरूपपट्टवत्यर्थे इ०पं० १६अ० उक्तं यथा

"विस्तरो निर्दिष्टं पट्टानां लक्षणं यदाचार्यैः। तल्लक्ष्येऽ क्रियते मयात्र सकलार्थसम्पदः। पट्टः शुभदो राज्ञां मध्येऽष्टावङ्गुलानि विस्तीर्णः। षण्णरेन्द्रमुख्यानां षड् युवराजस्य निर्दिष्टः। चतुरङ्गुलविस्तारः पट्टः सेनापतेर्भवति मध्ये। द्वे च प्रसादपट्टः पञ्चैते कीर्त्तिताः पट्टाः। सर्वे द्विगुणायामा मध्यादर्धेन पार्श्वविस्तीर्णाः। सर्वे च शुद्धजाम्बूनदविनिर्मिताः श्रेयसो हृद्याः। पञ्चशिखो भूमिपतेस्त्रिशिखो युवराजपार्थिवमुख्योः। एकशिखः सैन्यपतेः प्रसादपट्टो विना शिखया। क्रियमाणं यदि पत्रं सुखेन विस्तारमेति पट्टस्य। वृद्धिजयौ भूमिपतेस्तथा प्रजानां च सुखमस्मत्। जीवितराज्यविनाशं करोति मध्ये व्रणः सशस्त्रः। मध्ये स्फुटितस्याज्ञो विघ्नकरः पार्श्वयोः स्फुटितः। व्रणनिमित्तोत्पत्तौ शास्त्रतः शालिहादिभेदाच्च। शस्त्रनिमित्तः पट्टो नरपाद्विहस्ते भवति"। अस्य पुंस्त्वमपि

पट्टज न०पट्टात् जायते जन–ड। (रेशमी)कौषेयवस्त्रेऽटा०

पट्टदेवी स्त्री पट्टे सिंहासने स्थिता तद्दर्शा वा देवी। (पाटराणी) सिंहासनयोग्यायां लताभिषेकायां राजपत्न्यां राजनि० पट्टराज्ञीशब्दे।

पट्ट(त्त)न न० पट(ट्ट)न्ति जना यत्र पट–यत, वा तनन् [नेट्। प्रधाननगरे।

पट्टरङ्ग न० पट्टं रञ्जतेऽनेन रञ्ज–करणे घञ्। (चक्रम्) इति ख्याते पदार्थे ख्युट्। पट्टरञ्जनमस्यत्र राजनि०।

पट्टशाक पु० कर्म०। (नालिता) १शाकभेदे (पाटशाक) इति ख्याते २शाकभेदे च "पट्टशाकस्तु नाडीको नाडीशाकश्च यः स्मृतः। नाडीको रक्तपित्तघ्नो विष्टम्भी वातकोपनः" भावप्र० तद्गुणा उक्ताः।

पट्टार पु० पट्टमृच्छति ऋ–अण् उप०स०। देशभेदे ततो भूमा० भवेऽर्थे वुञ्। पट्टारक तद्देशभवे त्रि०।

पट्टार्हा स्त्री पट्टे राजसिंहासने अर्हा योग्या। पट्टदेव्यां राजनि०।

पट्टिका स्त्री क्षुद्रं पट्टं पट्टी स्वार्थे कन् कापि अतइत्त्वम् पट्टीव कायति कै–क वा। लोध्रभेदे वाचस्पतिः।

पट्टिकाख्य पु० पट्टिकामाख्याति सरूपेण आ+ख्या–अच्। रक्तलोध्रे (पाटियालोध) अमरः।

पट्टिकालोध्र पु० कर्म०। रक्तलोध्रे भावप्र०

पट्टिल पु० पट्ट+अस्त्यर्थे इलच्। प्रतिकरजे जटा०।

पट्टिश(स) पु० अस्त्रभेदे अमरः। तद्वत्त्वं हेमा०परिशेषोक्तं यथा

"उक्तं नामसूर्यकं षट्त्रिंशविधिर्वक्ष्यते । वक्ष ! निबोध त्रिहस्तः सार्द्धत्रिहस्तचतुर्हस्तश्चेति त्रैविध्यमाश्रमाणां दण्डस्त्रिविधः । कर्त्रोर्योग्यस्तो आचार्यानाद्दो भवेत् । दण्डचाष्टाविंशतिपर्वो निरन्ध्रो मध्यमचतुस्त्रिंशत्पर्वः त्रैहस्तश्चत्वारिंशत्पर्वः । यथा कुलप्रमाणेनोपयोगः कथ्यतेऽपि द्रष्टव्यः । तथा सूर्यचन्द्रसदृशाकारं शोभनाकुलविस्तारं तीक्ष्णधारान्वितं द्वात्रिंशत्पर्वं पत्रं भवति । तस्यारा षडङ्गुलाः । कोशः सप्ताङ्गुलः तस्य पर्वपत्रं तस्मात्सयोगतः संप्रश्लिष्टकीलाभ्यामेव कोशो भवेत् तदारया दृढसमन्वितया । अयकल्पः सुदृढः सर्वदक्षमत्वादारामुखमानादुद्वयङ्गुलोन्नतः दण्डः कार्यः । एकाङ्गुलाद्या द्वादारा षडङ्गुलान्ता दण्डमूले चार्पिता सप्तलाक्षासंसक्तया । फलविस्तारोमध्ये भवेत् । समग्र भवेत् पाशधारयन्त्रिपलगौरवो द्व्यङ्गुलश्च कोशो मूलपार्श्वौ दृढारान्तात् । धारायां वितानार्थं सूनेरपि बन्धार्थं च मूलं रचेच्च सुदृढार्दसारावलेन युक्तं कोशमध्ये सुविन्यस्तारामां यथा दृढं कृष्णलाक्षं यथायोगं च नामपाशधारकं सुनिर्दिष्टादुपरि बन्धाधानसूत्रसमन्वितं भवेत् । धारागलं सम्यक्पङ्क्त्यङ्गुलायतं सुदृढं दृढपार्श्वं च स्यात् । तथैव चाष्टपलसमन्वितं छेदाङ्गुलप्रकरपमूलं फलं विद्यात् भवति चात्र श्लोकाः । प्राधान्यं षट्त्रिंशानां स्याच्छेद्ययोनविधानतः । मध्यमं चैव सप्तेषु नीचं चैवाधमेषु च । भिन्नयोगेन भिन्नं स्याद्दण्डकोशावतः स्मृतः । विद्वानेव यथेष्टानि शस्त्राणीह प्रयोजयेत्"

षट्टीम(स) पट्टीं स्यति स्यति वा षो-तनूकरणे षो-कर्मणि वा क । पट्टिशास्त्रे हरिवं० १८३अ० उदा०।

षट्टोलिका स्त्री षट्टालिका+पृषो० । (पाड़ा) स्थाते भूमिकरणेऽट्टसम्बन्धापणे पत्रभेदे त्रिका० ।

षठ विक्षिप्ताक्षरवाचने भ्वा०पर०सक०सेट् । षठति अषाठीत् अषठीत् षषाठ षेठतुः । षठितव्यं षाठ्यं षाठः षठनम्

षठमञ्जरी स्त्री श्रीरामस्य चतुर्थरागिणीभ्राम् । "वियोगिनी कान्तिवतीषुमां स्वरं वहन्ती वसुषाऽतिसुन्दरा । आन्दोलमाना प्रियया च सख्या विधुस्वराङ्गी षठमञ्जरीयम्" सङ्गी०दा० तदभिमानिनी स्त्रीरूपसङ्गम् ।

षठसमञ्जरी स्त्री रागिणीभेदे हनु० । [धातौ पु० ।

षठि स्त्री षठ-इन् । १पट्टने पाठे धातुनिर्देशे दक् । २षठ-षड नतौ भ्वा० आ० सक० सेट् इदित् । षण्ढते अषण्ढिष्ट षषण्ढे षण्ढा । षण्ढितः ।

षड संहतौ (राशीकरणे) चु०उभ०सक० सेट् । षण्डयति ते अषिषण्डत्-त । इदित् षण्ड्यते ।

षडङ्गभि पु० चतुरभेदे ऋ०१०।४८।५ भाष्ये तथार्थता दृश्या

षडवीश्य न० १पादकन्दने २तद्दोग्यदामनि च ऋ०१।१६२।३७ भा० दृश्यम् ।

षण व्यवहारे (क्रयविक्रयादौ)स्तुतौ च भ्वा०आ०सक०सेट् । देवने सक०अर्चने निघण्टुः । आर्धे आय वा स्तुतौ पर० षणायति ते षणते व्यवहारे ह षणायति इत्येव । आर्द्धधातुके स्वात् वा आय । अषणायीत् अषणायिष्ट अषणिष्ट । क्रयविक्रयार्थे च अस्य कर्मणि प्रेषत्वेन विवक्षिते अकर्मकः तस्माच्च न समासः अतस्य षणायते "व्यङ्षणोः समर्थयोः" पा० द्यूते क्रयविक्रयव्यवहारे चानयोस्तुल्यार्थता अतस्य षणनम् । स्तुतौ ह समासः कृष्णषणनम् सि०कौ० प्रत्ययान्तत्वात् भावे च षणाया ।

षण पु० षण-कर्मणि "नित्यं षणः परिमाणे" पा० षप् । १कर्षमितताम्रे "ताम्रिकः कार्षिकः षणः" याज्ञ० । "अशीतिभिर्वराटकैः षण इत्यभिधीयते" भविष्यत्पु० उक्तेषु २अशीतिवराटकेषु "वराटकानां दशकद्वयं यत्तद्वा काकिणी तान्त षणतस्तैः" लीला० । भावे अप् ३निर्वेशे ४भटो ५द्यूते ग्लहे (बाजि) ६मूल्ये ७धने च दक्षाभीपथे ८क्रयणशालायाम् १०व्यवहारे मेदि० कर्त्तरि अच् । ११क्रयविक्रयादिकारके त्रि० १२शौण्डिके पु० शटा० आधारे अच् । १३स्तुते शब्दमात्रा १४विष्णौ पु० "प्राणदः प्रणवः पणः" विष्णुस० "पणतिर्व्यवहारार्थः तत्कुर्वन् पणः "कवींश्च रूपाणि विचित्र्य धीरोनामानि कृत्वाभिवदन् व याति" इति श्रुतेः पुण्यानि कर्माणि संस्तुत्याधिकारिस्थस्तत्फलं प्रयच्छन् तत्त्वतया वा पणः" भा० । [इडे द्वारा० ।

पणग्रन्थि पु० पणस्य क्रयविक्रयादेर्ग्रन्थिः सम्बन्धोऽत्र ।

पणन न० पण-भावे ल्युट् । १विक्रये शब्दरत्ना० । २क्रयादौ

पणफर न० "पणफरं हितीयाष्टं पञ्चमैकादशं क्रमात्" ज्यो०त० उक्ते क्रमात् हितीयपञ्चमाष्टमैकादशस्थाने

पणबन्ध पु० ६त० ग्लहे (जुआ) राजनि० नियमविशेषे बन्धने । यदि भवानिदं कुर्यात् तर्हि इदमहं भवते दास्यामीतिसमयकरणं पणबन्धः" मनोरमा

पणव पुंस्त्री० पणं स्तुतिं वाति वा-क । पटहे हिरूपकोषः

पणस पु० पण-कर्मणि असच् । क्रेयद्रव्ये उणादिकोषः

पण(न)स्य अर्चने निघ० भ्वा० परः सेट्। पण(न)ति अपण(न)त्।

पणाङ्गना स्त्री पण-कर्मणि घञ् कर्म०। पण्याङ्गनायां वेश्यायां हेमच० पण्यस्त्रीशब्दतयोऽप्यत्र स्त्री।

पणाया स्त्री पण-आय-भावे घञ। १क्रयविक्रयव्यवहृतौ २स्तुतौ ३द्यूते च जटाध०।

पणायित त्रि० पण-स्वार्थे आय-क्त। १स्तुते आयाभावपक्षे पणितमप्यत्र अमरः २क्रीते ३विक्रीते ४व्यवहृते च

पणादि न० इत०। वराटके कपर्दके त्रिका०।

पणि स्त्री पण-आधारे इन्। १विपणौ पण्यवीथिकायाम् रुजज्वलदत्तः। धातुनिर्देशे इक्। २पणधातौ पु०

पणिन् त्रि० व्यवहारो द्यूतं स्तुतिर्वा पणः अस्त्यर्थे इनि। १क्रयादिव्यवहारयुक्ते २स्तुतियुक्ते च १क्षत्रियभेदे पु०। तस्यापत्यम् अण् "गाधिविदथीत्यादि"सू० न टिलोपः। पाणिन तस्यापत्ये यूनि ततः इञ् पाणिनिः।

पण्ड पु०न०। पण-ड तस्य नेत्त्वम्। १क्लीबे २निष्फले त्रि० विद्वः २वेदोज्ज्वलायां बुद्धौ स्त्री भानुरिः तस्याः स्तुत्यत्वात् तत्त्वम्।

पण्डक पु० सार्वधिमनोः पुत्रभेदे हरिवं० ७अ०।

पण्डापूर्व न०पण्डं फलसाधनमपूर्वम्। वस्तुतः फलसाधनायोग्ये फलानुपहिते १धर्मांशभूतेऽदृष्टे यथा सन्ध्यावन्दनादेरभावे दुरदृष्टं जायते सन्ध्यादेर्वन्दने तु तस्यानुत्पत्त्या फलानुपहितं दुरदृष्टं नश्यतीति तत्पण्डापूर्वमिति मीमांसामतसिद्धम् २फलानामादृष्टे अदृष्टभेदे। तद्भिः कार्यत्वेनापूर्वे एव विधेः शक्तिः स्वीकृता न फलत्वं भक्षयेदित्यादिनिषेधे फलत्वभक्षणाभावविषयकं कार्यं नित्यत्वयबोधत्वं स्वीकृतः। तच्चापूर्वं न किञ्चित् फलजनकमिति स्थितम्। न्यायनये तु पण्डापूर्वं नाङ्गीक्रियते विध्यर्थस्तु दृष्टसाधनताज्ञानाधीनप्रवृत्तिसाध्यत्वमेव दृष्टत्वं विवक्षिता यजेत इत्यादौ यत्र फलं न श्रूयते तत्रापि स्वर्गः फलं कल्प्यते यथोक्तं सि०सङ्गा० "नन्वदृष्टरूपः सन्ध्यानुष्ठातेत्यादौ दृष्टानुत्पत्तेः प्रवृत्तिः कथम् न चार्थवादिकं ब्रह्मलोकादि प्रत्यवायाभावो वा फलमिति वाच्यम् तथा सति काम्यत्वे नित्यत्वहान्यापत्तेः कामनाभावेऽकरणापत्तेश्च इत्यत्र फलश्रुतिस्तावार्थवादमात्रमिति चेन्न यष्टव्याद्यादौ नित्यत्वकाम्यत्वयोरप्यविरोधात्। न च कामनाभावेऽकरणापत्तिः लिङादेस्तवपाठादाविव कामनासङ्कावस्यैव कल्पनात्। ननु वेदबोधितकार्यतात्पर्यज्ञानात् प्रवृत्तिः सम्भवतीति चेन्न दृष्टसाधनताज्ञानं विना तादृशकार्यतात्पर्यज्ञानस्यैवापि प्रवृत्तेरसम्भवात्। यदपि पण्डापूर्वं फलमिति तदपि न कामनाभावेऽकरणापत्तेस्तौल्यात्। कामनाकल्पने त्वार्थवादिकफलमेव रात्रिसत्रन्यायात् कल्प्यतामन्यथा प्रवृत्त्यनुपपत्तेः। तेन "स्वर्गं कोविद्वान्तस्य दुरितस्य प्रणश्यते। अतस्तत्प्राप्तिं तथा चान्ये प्रत्यवायस्य मन्यते"। एवम् "सन्ध्यामुपासते ये तु सततं संशितव्रताः। विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम्" एवम् "दद्यादहरहः श्राद्धं पितृभ्यः प्रीतिमावहन्" इत्यादिकमेव फलमस्तु। न च पितृप्रीतिः कथं फलं अधिकरणत्वादिति वाच्यम्। गयाश्राद्धादाविव तद्देशप्राप्यसम्बन्धेनैव फलजनकत्वस्य क्वचित् कल्पनात्। अतएवोक्तं "यावदस्थितफलमनुष्ठातरीत्युपसर्गः" इति। पितृणां सुखत्वे तु स्वस्य स्वर्गफलं यावच्छ्रुत्यैमित्तिकानुष्ठानस्य सामान्यतः स्वर्गफलकल्पनात्। पण्डापूर्वं प्रवृत्तिश्च न सम्भवति। न हि तत्सुखदुःखाभाववत् स्वतः इष्टार्थः, नवा तत्साधनम्। प्रत्यवायानुत्पत्तौ कथं प्रवृत्तिरिति चेत्। इत्थम् यथा हि नित्यजाते प्रत्यवायाभावस्तिष्ठति तदभावे तदभावः। एवं प्रत्यवायाभावस्य सत्त्वे दुःखाभावस्तत्त्वं तदभावे तदभाव इति योगक्षेमसाधारणकारणतया दुःखप्रागभावं प्रत्यपि सुवचत्वात्"।

पण्डित पु० पण्डा वेदोज्ज्वला बुद्धिर्जातास्य तारः इतच्। शास्त्रतात्पर्यज्ञे १विदुषि। तस्य बुद्धेरुज्ज्वलत्वञ्च कार्यभेदादनुमातव्यं तदेव तस्य लक्षणं यथा

"षट्काः पाटकाश्चैव ये चान्ये शास्त्रचिन्तकाः। सर्वे व्यसनिनो मूर्खा यः क्रियावान् स पण्डितः" भा०व०

"विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि। शुनि चैव श्वपाके च पण्डिताः समदर्शिनः" गीता २अ०श्लोके पु० मेदि०। [स्वार्थे क। २पण्डितशब्दार्थे च।

पण्डितक पु० १धृतराष्ट्रपुत्रभेदे भा०आ० ६अ०। पण्डित+

पण्डितिमन् पु०पण्डितस्य भावः दृढा० इमनिच्। पाण्डित्ये

पण्डुक पु० वातरोगभुते पङ्गौ "विधर्माणश्च पूर्वाह्णे सन्ध्याकाले च पण्डुकाः" भार्क०२१अ०। सायंकाले स्त्रीगमने पुंसः पण्डुकता भवतीत्युक्तम्।

पण्य त्रि० पण-कर्मणि यत्। १व्यवहर्त्तव्ये २विक्रेये च अमरः "सुलभेंऽत्र न यत्। किन्तु यदेव पाण्यम्" सि०कौ०। कम्बलेन समासेऽस्य आद्युदात्तता।

पण्यस्त्रीयोषित् स्त्री कर्म०। वेश्यायाम् त्रिका०। [कला०।
पण्यविक्रयशाला स्त्री ६त०। (हाटचाला) हट्टशालायां
पण्यवीथि स्त्री ६त०। १विक्रेयद्रव्यविक्रयशालायां (हाट-
चाला) २हट्टे च। स्वार्थे क। पण्यवीथिका तत्रार्थे
अमरः।
पण्यशाला स्त्री ६त०। (हाटचाला) हट्टशालायाम् हेमच०।
पण्या स्त्री पिण्या+पृषो०। पिण्यायां द्विरूपकोषः।
पण्याङ्गना स्त्री वेश्यायाम् हेमच०। पण्यस्त्रादयोऽत्र।
पण्याजिर न० पण्यस्त्रीव अजिरमिव। पण्यस्त्रीक्रयविक्रय-
स्थाने हट्टे। [योपजीवके वणिग्जने अमरः।
पण्याजीव त्रि० पण्यमाजीवति या+जीव-अण् उप०स०।
पण्याजीवक न० पण्यस्त्रीजीवेन वणिजा कायति के-क,
या+जीव-ण्वुल् ६त०वा। १हट्टे २वणिजि च त्रिका०।
पण्यान्ध स्त्री पण्यमन्धयति अच्। हट्टभेदे राजनि०
पत गतौ भ्वा० पर०सक०, ऐश्वर्ये अक० सेट्। पत-
ति-ते अपपतत्-त।
पत ऐश्वर्ये दि० आ० अक० सेट्। पत्यते अपतिष्ट। पेते
पत गतौ भ्वा० पर०सक०, ऐश्वर्ये अक०ज्वला० सेट्। पतति
अपप्तत्। पपात पेततुः। ज्वला०पतः पातः। पतितः
पतयति पातयति। घनि पित्पतति पापत्यते। अधःस्व-
र्गादेः अक०अधःसंयोगानुकूले अक० नरकं पतित इत्यादि
पत न० पत-अच्। १मुकुटे जटाधरः। २पतनकर्त्तरि त्रि०
पतग पुंस्त्री० पतनू चतुर्भुवनं वनू गच्छति गम-ड
नि०। खगे अमरः स्त्रियां जातित्वात् ङीष्।
पतङ्ग पुंस्त्री पतनू चतुर्भुवनं गच्छति ड नि०। १खगे
अमरः स्त्रियां जातित्वात् ङीष्। २सूर्य्ये पु० ३शलभे
(फड़िङ्ग)कीटभेदे ४आखिभेदे पु० मेदि० ५जलमधूकवृक्षे
राजनि०। ६पारदे न०मेदि० ७चन्दनभेदे न० शब्दच०।
प्लक्षद्वीपस्थे क्षत्रियस्थानीये स्वर्णभेदे पु० "हंसपतङ्गोर्द्ध-
वनवत्याङ्गसंज्ञावत्वारो वर्णाः" भाग० ५।२०।७ श्लो०।
चतुर्भुवनेन १०पतने च पतङ्गशब्दे दृश्यम्।
पतङ्गम पुंस्त्री० पतनू चतुर्भुवनं वनू गच्छति गम-खच्
नि०। खगे स्त्रियां जातित्वात् ङीष्।
पतङ्गर पु० पतङ्गं पतनेनोर्द्ध्वभुवनेन गमनम् पतङ्गं ततः अ-
स्त्यर्थे र। चतुर्भुवनेन गतियुक्ते अ०६।४।२ भा०।
पतङ्गा पु० अन्ने निघण्टुः। [मधुमक्षिकाभेदे अमरः
पतङ्गिका स्त्री पतङ्ग+संज्ञायां वनू ङापि अतइत्वम्।
पतङ्गिन् पु० पतङ्ग-चतुर्भुवनेन गमनमस्त्यस्य इनि। खगे
स्त्रियां नान्तत्वात् ङीष्। हरिवं०२०अ० उदाहरणम्।
पतङ्गिका स्त्री पतङ्गीवां शब्दच०।
पतञ्जल पु० गोत्रप्रवर्त्तकर्षिभेदे ब च आद्यः। "ते पतञ्ज-
लस्य काश्यस्य" मत० ब्रा० १४।६।२ पतञ्जल इति तत्र
पाठान्तरम्। बहुत्वे उपका०इञ् अहञ् पतञ्जला इत्यपि।
पतञ्जलि पु० पतनू अञ्जलिर्नमस्कृतया यस्मिन्। १योगसूत्र-
कारके ऋषिभेदे गोनर्द्दतीरे तपस्यतः कस्यचिद्ब्रह्म-
क्षत्रियस्य पतिते पाणिनिसूत्रस्य २भाष्यप्रकारे तस्य तथो-
त्पत्तिकथा शकन्धु० वार्त्ति० शेखरादौ दृश्या। अत्र
च योगशास्त्रकारकात् भिन्न इति वरदराजमल्लाभिः।
समर्थितम्। अनयोरभेद इति पाश्चात्यवैयाकरणाः।
भेदाभेदयोर्युक्त्यायुक्तत्वे च सुधीर्विभाव्ये। योगमतस्य
सर्वदर्शनसंग्रहे प्रदर्शितं यथा "सांख्यप्रवचनापरनामधेयं
मनुवर्त्तमानानां मतमुपन्यस्यते। तत्र योगशास्त्रं पत-
ञ्जलिप्रणीतं पादचतुष्टयात्मकम्। तत्र प्रथमे पादे "अथ
योगानुशासनमिति" योगशास्त्रारम्भप्रतिज्ञां विधाय
"योगश्चित्तवृत्तिनिरोधः" इत्यादिना योगलक्षणमभि-
धाय समाधिं सम्पादयितुं निरदिक्षत् भगवान् पतञ्जलिः।
द्वितीये "तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः"
इत्यादिना व्युत्थितचित्तस्य क्रियायोगं यमादीनि पञ्च
बहिरङ्गानि साधनानि। तृतीये "देशबन्धश्चित्तस्य
धारणा" इत्यादिना धारणाध्यानसमाधित्रयमन्तरङ्गं
संयमपदवाच्यं तत्प्रावान्तरफलं विभूतिजातञ्च। चतुर्थे
"जन्मौषधिमन्त्रतपःसमाधिजाःसिद्धयः" इत्यादिना सिद्धि-
पञ्चकप्रपञ्चनपुरःसरं परं प्रयोजनं कैवल्यम्। प्रधाना-
दीनि पञ्चविंशतितत्त्वानि प्राचीनान्येव सम्मतानि षड्-
विंशस्तु परमेश्वरः क्लेशकर्म्मविपाकाशयैरपरामृष्टः पुरुष-
श्लेष्मया निर्माणकायमधिष्ठाय लौकिकवैदिकसम्प्रदाय-
प्रवर्त्तकः संसाराङ्गारे तप्यमानानां प्राणभृतामनुग्राह-
कश्च। ननु पुष्करप्रलाशवच्छिर्द्धस्य तस्य (पुरुषस्य) तापः
कथमपपद्यते येन परमेश्वरोऽस्यानुग्राहकतया कथ्यीक्रियते
इति चेदुच्यते तापकस्य रजसः सत्त्वमेव तत्त्वं बुद्धाकृना
परिणमते इति सत्त्वे परितप्यमाने तमोवशेन तद्भेदाव-
गाढो पुरुषोऽपि तप्यत इत्युच्यते। तदुक्तमाचार्यैः
"सत्त्वं तत्त्वं बुद्धिभावेन वृत्तं भावाङ्गे वा राजसास्तापा-
काङ्गे। तत्त्वाभेदप्रार्थिनी तामसी या वृत्तिस्तस्यां
तत्त्वं रत्युक्त आत्मेति"। तद्भाष्ये व्यासेनाप्युक्तम्
"अपरिणामिनी हि भोक्तृशक्तिरप्रतिसंक्रमा च परि-

स्वामिन्यर्थे प्रतिसंक्रान्ते च तद्वृत्तिमनुभवतीति। भोक्तृशक्तिरिति चिच्छक्तिरुच्यते सा चात्मैव परिणामिन्यर्थे बुद्धिसत्वे प्रतिसंक्रान्ते च प्रतिबिम्बिते तद्वृत्तिमनुभवतीति बुद्धौ प्रतिबिम्बिता सा चिच्छक्तिर्बुद्धिच्छायापत्त्या बुद्धिवृत्त्यनुकारवतीति भावः। तथा शुद्धोऽपि पुरुषः प्रत्ययं बौद्धमनुपश्यति तमनुपश्यन्नतदात्मापि तदात्मक इव प्रतिभासत इति। इत्थं तथमानस्य दृश्यस्यादरनैरन्तर्यदीर्घकालासेवनसम्पादितयमनियमाद्यष्टाङ्गयोगानुष्ठानेन परमेश्वरप्रणिधानेन च सत्वपुरुषान्यताख्यातावनुपप्लवायां ज्ञातायामविद्यादयः पञ्च क्लेशाः समूलकाषं कषिता भवन्ति कुशलाकुशलाश्च कर्माशयाः समूलघातं हता भवन्ति। ततश्च पुरुषस्य निर्लेपस्य कैवल्येनावस्थानं कैवल्यमिति सिद्धम्। तत्र "अथ योगानुशासनमिति" प्रथमसूत्रेण प्रेक्षावत्प्रवृत्त्यङ्गं विषयप्रयोजनसम्बन्धाधिकारिरूपमनुबन्धचतुष्टयं प्रतिपाद्यते। अथशब्दोऽधिकारार्थः स्वीक्रियते (इतःपरं तच्छास्त्रमर्थवत्ता सफला प्रबन्धेन समर्थिता तत्र दशा) तदाह व्यासभाष्ये "अथेत्ययमधिकारार्थः प्रयुज्यते" इति योगसूत्रविवरणे च तदुव्याचख्यौ वाचस्पतिः "तस्मादयमथशब्दोऽधिकारद्योतको मङ्गलार्थश्चेति सिद्धमिति"। तदित्थमनुशासनशब्दस्याधिकारार्थत्वपक्षे शास्त्रेण प्रस्तूयमानस्य योगस्योपवर्णनात् समस्तशास्त्रतात्पर्यव्याख्यानेन शास्त्रस्य सुखतोबोधप्रवृत्तिरास्थानित्युपपन्नम्। ननु "हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातनः" इति याज्ञवल्क्यस्मृतेः पतञ्जलिः कथं योगस्य शास्तेति चेदुच्यते यतएव तत्र तत्र पुराणादौ विधिषु योगस्य विप्रकीर्णतया दुर्ग्राह्यार्थत्वं मन्यमानेन भगवता कृपासिन्धुना फणिपतिना सारं सङ्गृह्योच्चैः अनुशासनमारब्धं न तु साक्षाच्छासनम्। यदाथमथशब्दोऽधिकारार्थः तदैवं वाक्यार्थः सम्पद्यते योगानुशासनं शास्त्रमधिकृतं वेदितव्यमिति। तत्र शास्त्रे व्युत्पाद्यमानतया योगः ससाधनः सफलो विषयः तदुव्युत्पादनमवान्तरफलं व्युत्पादितस्य योगस्य कैवल्यं परमप्रयोजनम्। शास्त्रयोगयोः प्रतिपाद्यप्रतिपादकभावलक्षणः सम्बन्धः, योगस्य कैवल्यस्य च साध्यसाधनभावलक्षणः सम्बन्धः स च सूत्रादिप्रसिद्ध इति प्रागेवावादिषम्। मोक्षमपेक्षमाणाः श्रवणाधिकारिण इत्यर्थसिद्धम्। न चायातो ब्रह्मजिज्ञासेत्यादाविवाधिकारिणोऽर्थतः सिद्धिरांगङ्गनीया तत्रायशब्देनानन्तर्याभिधाने प्रयोजिकया अधिकारिसमर्पणसिद्धावार्थिकत्वयङ्गानुद्धारात्। अतएवोक्तं "न स्मृतिप्राप्ते प्रकरणादीनामवकाशः" इति। तस्मादयं यत्र हि स्मृत्या अर्थो न लभ्यते तत्रैव प्रकरणादयोऽर्थं समर्पयन्ति नेतरत्र। यत्र तु यद्वादेवार्थस्योपलम्भः तत्र नेतरस्य सम्भवः श्रौत्रबोधिन्या स्मृत्या बोधितेऽर्थे तद्विरुद्धार्थं प्रकरणादि समर्पयति अविरुद्धं वा। न प्रथमः विरुद्धार्थबोधकस्य तस्य बाधितत्वात्। न चरमः वैयर्थ्यात्तदाह "स्मृतिसिद्धवाक्यप्रकरणस्थानसमाख्यानां सबधावे पारदौर्बल्यमर्थविप्रकर्षादिति" "बाधिकैव स्मृतिर्नित्यं समाख्या बाध्यते सदा। अध्यायानां तु बाध्यत्वं बाधकत्वमपेक्षया" इति च तस्माद्विध्यादिसत्त्वादुब्रह्मविचारकशास्त्रवद्योगानुशासनं शास्त्रमारभणीयमिति स्थितम्। ननु व्युत्पाद्यमानतया योग एवात्र प्रस्तुतो न शास्त्रमिति चेत् सत्यं प्रतिपाद्यतया योगः प्राधान्येन प्रस्तुतः स च तद्विषयेण शास्त्रेण प्रतिपाद्यत इति तत्प्रतिपादने करणं शास्त्रं करणगोचरश्च कर्तव्यापारो न कर्मगोचरतामाचरति। यथा छेत्तुर्देवदत्तस्य व्यापारभूतस्वशमनिपातनादि कर्म करणभूतपरशुगोचरं न कर्मभूतदात्रादिगोचरं तथा च वक्तुः पतञ्जलेः प्रवचनव्यापारापेक्षया योगविषयस्याधिकृतता करणस्य शास्त्रस्य, अभिधानव्यापारापेक्षया तु योगस्यैवेति विभागः। ततश्च यागशास्त्रसारूप्यं सम्भावनां भजते यत्र चानुशासनीयो योगचित्तवृत्तिनिरोध इत्युच्यते। ननु युजिर्योग इति संयोगार्थतया परिपठितात् युजे निष्पन्नो योगशब्दः संयोगवचनएव स्यान्न तु निरोधवचनः। अतएवोक्तं याज्ञवल्क्येन "संयोगो योग इत्युक्तो जीवात्मपरमात्मनोः" इति तदेतदार्षं जीवपरयोः संयोगे कारणत्रान्यतरकर्मादेरसम्भवादजसंयोगस्य कथमज्ञानचरणादिभिः प्रतिक्षेपाच्च। मीमांसकमतानुसारेण तदङ्गीकारेऽपि नित्यसिद्धस्य तस्य साध्यत्वाभावेन शास्त्रवैफल्यापत्तेश्च धातूनामनेकार्थत्वेन युजेः समाध्यर्थत्वोपपत्तेश्च। तदुक्तम् "निपाताश्चोपसर्गाश्च धातवश्चेति ते त्रयः। अनेकार्थाः स्मृताः सर्वे पाठस्तेषां निदर्शनमिति" अतएव केचन युजिं समाधावपि पठन्ति (युज समाधाविति)। नापि याज्ञवल्क्यवचनव्याकोपः तत्रस्यस्यापि योगशब्दस्य समाध्यर्थत्वात्। "समाधिः समतावस्था जीवात्मपरमात्मनोः। ब्रह्मण्येव

स्थितिर्यो सा समाधिः प्रत्यगात्मनः" इति तेनैवोक्तत्वाच्च । तदुक्तं भगवता व्यासेन "योगः समाधिरिति"। यद्येवमष्टाङ्गयोगे चरमस्याङ्गस्य समाधित्वमुक्तं पतञ्जलिना यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधयोऽष्टाङ्गानि योग इति । न चाङ्गाङ्गिभावो नन्वसत्यपेक्षते उपकार्योपकारकभावस्य दर्शपूर्णमासप्रयाजादौ भिन्नायतनत्वेनात्मनभेदादतः समाधिरपि न योगशब्दार्थो युज्यत इति चेत्तन्न युज्यते व्युत्पत्तिमात्राभिधित्सया तदेवार्थमात्रनिर्मासं स्वरूपमुन्मथ्य समाधिरिति निरूपितचरमाङ्गवाचकेन समाधिशब्देनाङ्गिनो योगस्याभेदविवक्षया व्यपदेशोपपत्तेः। न च व्युत्पत्तिबलादेव सर्वत्र शब्दः प्रवर्त्तते तथात्वे गच्छतीति गौरिति व्युत्पत्तेः तिष्ठन् गौर्न स्यात् गच्छतो देवदत्तस्य स्यात् प्रवृत्तिनिमित्तञ्च प्रागुक्तमेव चित्तवृत्तिनिरोध इति यदुक्तं "योगश्चित्तवृत्तिनिरोधः" इति । ननु वृत्तीनां निरोधश्चेद्योगोऽभिमतस्तासां ज्ञानत्वेनात्माश्रयतया तन्निरोधोऽपि ध्वंसप्रतियोग्यनुयायित्वेनाश्रयो भवेत् प्रागभावध्वंसयोः प्रतियोगिसमानाश्रयत्वनियमात् ततश्च "उपरक्तमुपरक्तवत् धर्म्मो विकरोति हि धर्मिणमिति" न्यायेनात्मनः कौटस्थ्यं विहन्येतेति चेत्तदपि न घटते निरोध्यानां प्रमाणविपर्ययविकल्पनिद्रास्मृतिस्वरूपाणां वृत्तीनामन्तःकरणादापरमोक्षावश्चित्तधर्मत्वाङ्गीकारात् कूटस्थनित्या चिच्छक्तिरपरिणामिनी विज्ञानधर्म्माश्रयो भवितुं नार्हत्येव । न च चितिशक्तेरपरिणामित्वमसिद्धमिति मन्तव्यं चितिशक्तिरपरिणामिनी सदा ज्ञातृत्वात् न सदैवं न तदैवं यथा चित्तादि दृश्यादनुमानसम्भवात् तथा यदासौ पुरुषः परिणामी स्यात्तदा परिणामस्य कादाचित्कत्वात्तस्यां चित्तवृत्तीनां सदाज्ञातृत्वं नोपपद्येत चिद्रूपस्य सदैवाधिष्ठातृत्वेनावस्थितस्य यदन्तरङ्गनिमित्तं सत्त्वं तस्यापि सदैव स्थितत्वात् येन येनार्थेनोपरक्तं भवति तस्य दृश्यस्य सदैव चिच्छायापत्त्या भानोपपत्त्या पुरुषस्य निःसङ्गत्वं सम्भवति । ततश्च सिद्धं तस्य सदा ज्ञातृत्वमिति न कांचित् परिणामित्वमापादयतीति । चित्तं हृदयेन विषयेणोपरक्तं भवति स विषयो ज्ञानः यदुपरक्तं न भवति तदज्ञातमिति वस्तुतोऽयस्कान्तमणिकल्पस्य ज्ञानाज्ञानकारणभूतोपरागानुपरागधर्मित्वादयं सधर्मकं चित्तं परिणामि इत्युच्यते । ननु चित्तस्येन्द्रियाणां चाङ्गाङ्गिभावात् सर्वगतत्वात् सर्वविषयैरस्य सदा सम्बन्धः तथाच सर्वेषां सर्वदा सर्वत्र ज्ञानं प्रसज्येत सर्वगतत्वेऽपि चित्तं यत्र शरीरे इन्द्रियवत् तेन शरीरेण सह सम्बन्धो येषां विषयाणां तेष्वेवास्य ज्ञानं भवति नेतरेष्वित्यतिप्रसङ्गाभावादतएवायस्कान्तमणिकल्पा विषयाः स्वयःसधर्मकं चित्तमिन्द्रियप्रणालिकयाभिसम्बध्योपरञ्जयन्ति । तस्माच्चित्तस्य धर्मा वृत्तयो नात्मनः तथाच श्रुतिः "ज्ञानः सङ्कल्पो विचिकित्सा श्रद्धा अश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवेति" । चिच्छक्तेरपरिणामित्वं पञ्चशिखाचार्यैरप्युक्तं "अपरिणामिनी भोक्तृशक्तिरिति" यतञ्जलिनापि "सदाज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामित्वादिति"। चित्तपरिणामित्वेऽनुमानमुच्यते चित्तं परिणामि ज्ञाताज्ञातविषयत्वात् श्रोत्रादिवदिति । परिणामश्च त्रिविधः प्रसिद्धः धर्मलक्षणावस्थाभेदात् धर्मिणश्चित्तस्य नीलाद्यालोचनं धर्मपरिणामः यथा कनकस्य कटकरुचकमुकुटकेयूरादि । धर्मस्य वर्त्तमानत्वादिर्लक्षणपरिणामः नीलाद्यालोचनस्य स्फुटत्वादिरवस्थापरिणामः कनकादेस्तु नवपुराणत्वादिरवस्थापरिणामः । एवमन्यत्रापि यथासम्भवं परिणामत्रितयमूहनीयं तथाच प्रमाणादिवृत्तीनां चित्तधर्मत्वात् तन्निरोधोऽपि तदाश्रय एवेति न किञ्चिदनुपपन्नम् । ननु वृत्तिनिरोधो योग इत्यङ्गीकारे सुषुप्त्यादौ विक्षिप्तमूढादिचित्तवृत्तीनां निरोधसम्भवाद्योगत्वप्रसङ्गः न चैतद्युज्यते क्षिप्तादावस्थासु क्लेशप्रक्षयादेरसम्भवात्तेषु यत्नपरिपन्थित्वाच्च । तथा हि क्षिप्तं तेषु तेषु विषयेषु क्षिप्यमाणमस्थिरं चित्तमुच्यते । तमःसत्त्वे मग्नं निद्रावृत्तिमच्चित्तं मूढमिति गीयते । क्षिप्तादिविधं चित्तं विक्षिप्तमिति गीयते विशेषो नाम चक्षुर्वै हि मनः क्षण ! प्रमाथि बलवद्दृढमिति" न्यायेनास्थिरस्यापि मनसः कादाचित्कमसङ्कल्पविषयस्थैर्यं सम्भवेन स्थैर्यम् । अस्थिरत्वञ्च स्वाभाविकं व्याध्याद्युपप्लवजनितं वा तदाह "व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः" इति । तत्र दोषत्रयवैषम्यनिमित्तो ज्वरादिर्व्याधिः, चित्तस्याकर्मण्यत्वं स्त्यानं, विरुद्धकोटिद्वयावगाहि ज्ञानं संशयः, समाधिसाधनानामभावनं प्रमादः, शरीरवाङ्मनसां गुरुत्वादप्रवृत्तिरालस्यं, विषयाभिलाषोऽविरतिः, यतश्चित्तमदृढीभवति तत्तच्चित्रिमित्तात् समाधिभूमेरन्यस्यां भूमिकत्वं लब्धायामपि तस्यां चित्तस्याप्रतिष्ठा अनवस्थितत्वमित्यर्थः । तस्मान्न वृत्तिनिरोधो

योगपक्षनिक्षेपमर्हति इति चेन्नैवं वोचः हेयमूतचित्तप्रा-दुर्भावस्तावद् वृत्तिनिरोधश्च हेयत्वसम्भवेऽप्युपादेयबोधेकाप्रनिरुद्धावस्थयोर्वृत्तिनिरोधश्च योगत्वसम्भवात् । एकतानं चित्तमेकाग्रशब्देन उच्यते निरुद्धसकलवृत्तिकं संस्कारमात्रशेषं चित्तं निरुद्धमिति मन्यते । स च समाधिर्द्विविधः सम्प्रज्ञातासम्प्रज्ञातभेदात् तत्रैकाग्रचेतसि यः प्रमाणादिवृत्तीनां बाह्यविषयाणां निरोधः स सम्प्रज्ञातसमाधिः सम्यक् प्रज्ञायतेऽस्मिन् ग्रहणेर्विविक्ततया चित्तमिति व्युत्पत्तेः । स चतुर्विधः सवितर्कादिभेदात् समाधिनाम भावना सा च माध्यस्य विषयान्तरपरिहारेण चेतसि पुनः पुनर्निवेशनं, भाव्यस्तु द्विविधस् ईश्वरस्तत्त्वानि च । तान्यपि द्विविधानि जड़ाजड़भेदात् जड़ानि प्रकृतिमहदहङ्कारादीनि चतुर्विंशतिः अजड़ः पुरुषः । तत्र यदा क्षितिव्यादीनि स्थूलानि विषयत्वेनादाय पूर्वापरानुसन्धानेन शब्दार्थोल्लेखसम्भेदेन च भावना प्रवर्त्तते स समाधिः सवितर्कः । यदा तन्मात्रान्तःकरणचक्षुं कृष्णं विषयमालम्ब्य देशादिभेदेन भावना प्रवर्त्तते तद् सविचारः । यदा रजस्तमोलेशानुविद्धं चित्तं भाव्यते तदा सुखप्रकाशमयस्य सत्त्वस्योद्रेकात् सानन्दः । यदा रजस्तमोलेशानभिभूतं शुद्धं सत्त्वमात्रमवलम्ब्य वा प्रवर्त्तते भावना तदा तस्यां सत्त्वस्य स्वप्रकाशाद्विनियोगकर्तृकाच्च सत्त्वमात्रावशेषत्वेन साक्षितः सकाशिः । वितर्कविचारानन्दाक्षिताऽस्मितानुगमात् सम्प्रज्ञातः इति । सर्ववृत्तिनिरोधे त्वसम्प्रज्ञातः समाधिः । ननु सर्ववृत्तिनिरोधोयोग इत्युक्ते सम्प्रज्ञाते व्याप्तिर्न स्यात् तत्र सत्त्वप्रधानायाः सत्त्वपुरुषान्यताख्यातिलक्षणायाः वृत्तेरनिरोधादिति चेत्तदेतदार्त्तं क्लेशकर्मविपाकाशयपरिपन्थिचित्तवृत्तिनिरोध योग इत्युक्तीकारात् । क्लेशाः पुनः पञ्चधा प्रसिद्धाः अविद्यास्मितारागद्वेषाभिनिवेशाः । तत्राविद्येत्यत्र किमाश्रीयते पूर्वपदार्थप्राधान्यम् अमक्षिकं वर्त्तत इतिवत् उत्तरपदार्थप्राधान्यं वा राजपुरुष इतिवत् अन्यपदार्थप्राधान्यं वा अमक्षिको देश इतिवत् तत्र न पूर्वः, पूर्वपदार्थप्रधानत्वे विद्यायाः प्रसज्यप्रतिषेधोपपत्तौ क्लेशादिकारकत्वानुपपत्तेः अविद्याशब्दस्य क्षीणक्लिष्टत्वाभावापत्तेश्च । न द्वितीयः, कस्यचिदभावेन विशिष्टाया विद्यायाः क्लेशादिपरिपन्थित्वेन तद्धेतुत्वानुपपत्तेः । न तृतीयः "तत्रोऽक्तप्रत्ययानां बहुव्रीहिर्वा चोत्तरपदलोपः" इति वृत्तिकारवचनानुसारेण अविद्यामात्रा विद्या यस्याः सा अविद्या वृत्तिरिति समाधिसिद्धौ तस्या अविद्यायाः क्लेशादिबीजत्वानुपपत्तेः विवेकख्यातिपूर्वकसर्ववृत्तिसम्भावनात्तस्याः सम्यग्ज्ञानयाथात्म्यप्रसङ्गाच्च उक्तञ्च चक्षितादीनां क्लेशानामविद्यानिदानत्वम् । "अविद्याक्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणामिति" । तत्र प्रसुप्तं प्रबोधसहकार्यभावेनानभिव्यक्तिः, तनुत्वं प्रतिपक्षभावनया शिथिलीकरणं, विच्छिन्नत्वं बलवता क्लेशेनाभिभवः, उदारत्वं सहकारिसन्निधिवशात् कार्यकारित्वम् । तदुक्तं वाचस्पतिमिश्रेण व्यासभाष्यव्याख्यायाम् "प्रसुप्तास्तत्त्वज्ञानानां तनुदग्धाश्च योगिनाम् । विच्छिन्नोदाराश्च क्लेशा विषयसङ्गिनाम्" इति इत्थम् स्वतन्त्रपदार्थद्वयानवगमादुद्भूतपदार्थप्रधानत्वं नाश्रयितम् । तस्मात् पञ्चानामपि क्लेशादिनिदानत्वमविद्यायाः प्रसिद्धं लोकेति चेत् तदपि न शोभनं विभाति यद्दीर्घसत्रमाश्रित्याविद्याशब्देन विद्याविरुद्धस्य विपर्ययज्ञानस्याभिधानमिति ह्रस्वैरङ्गीकारात् । तदाह "नामधात्वर्थयोगे तु नैव नञ् प्रतिषेधकः । यदत्यन्ताक्षमाधर्म्यमात्मविरोधिनाविति । ह्रस्वप्रयोगगम्या हि शब्दार्थाः सर्व एव नः । तेन यत्र प्रयुक्तो यो न तत्तादृगवगीयते" इति वाचस्पतिमिश्रैरप्युक्तं "लोकाधीनावधारणो हि शब्दार्थयोः सम्बन्धः लोके चोत्तरपदार्थप्रधानस्यापि नञ उत्तरपदाभिधेयोपमर्दकस्य तद्विहतया तत्र तत्प्रतीत्यैरिष्यमाणत्वात्" । एतदेवाभिप्रेत्योक्तम् "अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्येति" । अतस्मिंस्तद्बुद्धिर्विपर्ययः इत्युक्तं भवति तद्यथा अनित्ये घटादौ नित्यत्वाभिमानः, अशुचौ कायादौ शुचित्वप्रत्ययः । "स्थानाद्बीजादवष्टम्भात्पिण्डग्रन्थिबन्धनादपि । कायमाधेयशौचत्वात् पण्डिता अशुचिं विदुः" इति "परिणामतापसंस्कारैर्दुःखवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिन इति" न्यायेन दुःखे सुखचन्दनवनितादौ सुखत्वारोपः अनात्मनि देहादावात्मबुद्धिः । तदुक्तम् "अनात्मनि च देहादावात्मबुद्धिस्तु देहिनाम् । अविद्या तत्कृतो बन्धस्तद्वाधे मोक्ष उच्यते" इति एवमियमविद्या चतुष्प्रकारा भवति । तत्रैतेष्वविद्याविशेषेषु किञ्चिदनुगतं सामान्यलक्षणं वक्तव्यम् अन्यथा विशेषलाभसिद्धेः । तथाचोक्तं भट्टाचार्यैः "सामान्यलक्षणं लब्ध्वा विशेषस्यैव लक्षणम् । न शक्यं केवलं वक्तुमतोऽस्य न वाच्यता" इति तदपि न वाच्यमतस्मिंस्तद्बुद्धिरिति सामान्यलक्षणाभि-

धानेन दत्तोत्तरत्वात्। सत्यदुःखयोरङ्गमकीत्वेऽताभिमानोऽस्मिता तदुक्तं "दृक्दर्शनशक्त्योरेकात्मतेवास्मिता" इति। सुखाभिज्ञस्य सुखानुस्मृतिपूर्वकः सुखसाधनेषु तृष्णारूपो गर्द्धो रागः। दुःखस्य तदनुस्मृतिपुरःसरं तत्साधनेषु निन्दा द्वेषः तदुक्तं "सुखानुशयी रागः दुःखानुशयी द्वेषः" इति। किमत्रानुशयिशब्दे ताच्छील्यार्थे णिनिरिनिर्वा मत्वर्थीयोऽभिमतः नाद्यः "सुखजातौ णिनिस्ताच्छील्ये इत्यत्र सुपीति वर्त्तमाने पुनःसुब्ग्रहणस्य उपसर्गनिवृत्त्यर्थत्वेन सोपसर्गादातोर्णिनेरनुत्पत्तेः यथा कथञ्चिदङ्गीकारेऽपि "अधोऽधितीति" इत्यिप्रसङ्गापत्तिमाश्रित्यादिपदवदनुशयिपदस्य प्रयोगप्रसङ्गात्। न द्वितीयः "एकाचरात् क्त्तोजातेः सम्प्रत्यात् न सौ (इनिठनौ) स्वतावितिं तदप्रतिषेधादत्र चानुशयशब्दस्याञ्चत्वेन जदन्तत्वात्। तस्मादनुशयिशब्दो दुरुपपाद इति चेत् नैतद्वृद्धं भावाभवबोधात् प्राविकाभिप्रायमिदं वचनम्। अतएवोक्तं वृत्तिकारेण "इतिकरणो विवक्षार्थः सर्वत्राभिसम्बध्यते" इति तेन क्वचिद्भवति कार्यी कार्यिकस्तद्वृत्तिक इति तथा च जदन्तात् जातेश्च प्रतिषेधस्य प्राविकत्वम् अनुशयशब्दस्य जदन्तत्वेनेरुपपत्तिरिति सिद्धम्। पूर्वजन्मानुभूतमरणदुःखानुभवावासनाबलात् सर्वस्य प्राणभृन्मात्रस्याजमेरा च विदुषः सञ्जायमानः शरीरविषयादेर्मम वियोगो मा भूदिति प्रत्यक्षं निमित्तं विना प्रवर्त्तमानोभयरूपोऽभिनिवेशः पञ्चमः क्लेशः मा च भूवं हि भूयासमिति प्रार्थनावाः प्रत्यात्मनुभवसिद्धत्वात् तदाह "स्वरसवाही विदुषोऽपि तथा रूढोऽभिनिवेशः" इति। ते चाविद्यादयः पञ्च सांसारिकविविधदुःखोपकारहेतुत्वेन इदं क्लिश्नीत क्लेशाः प्रसिद्धाः। कर्माणि विचित्रजातिस्थितिभोगरूपाणि ज्योतिष्टोमशक्वत्यादीनि विपाकाः कर्मफलानि जात्यायुर्भोगाः, आशयविपाकाक्षिप्तभूमौ शेरते इत्याशयाः धर्माधर्मसंस्काराः। तत्परिपन्थिचित्तवृत्तिनिरोधो योगः। निरोधो, नाभावमात्रमभिमतं तच्च तुच्छत्वेन भावरूपसंस्काराजननशक्तमत्वासम्भवात् किन्तु तदाश्रयो मधुमतीमधुप्रतीकाविशोकासंस्काराख्येभताख्यदेशः चित्तस्यावस्थाविशेषः निरुध्यतेऽस्मिन् प्रज्ञाधाद्यात्मिकवृत्तय इति व्युत्पत्तेरुपपत्तेः। अभ्यासवैराग्याभ्यां वृत्तिनिरोधः। तत्स्थितौ भूयान् यत्नोऽभ्यासः। प्रकामप्रहृत्तिरूपदृढिरक्षितस्य चित्तस्य स्वरूपनिष्ठः परिणामविशेषः स्थितिः। तन्निमित्तीकृत्य यत्नः पुनःपुनस्तथात्वेन चेतसि निवेशनमभ्यासः। कर्मस्थि दीर्घिनं श्रुतीतिवन्निमित्तार्थं सप्तम्यन्तमुक्तं भवति "दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्"। ऐहिकपारत्रिकविषयादौ दोषदर्शनाभिरभिलाषस्य भवति विषया वशाः नाहमेतेषां वशग इति विमर्शो वैराग्यमित्युक्तं भवति। समाधिपरिपन्थिक्लेशतनूकरणार्थं समाधिलाभार्थं च प्रथमं क्रियायोगविधानपरेण योगिना भवितव्यं क्रियायोगसम्पादने अभ्यासवैराग्ययोः सम्भवात् तदुक्तं भगवता "आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते। योगारूढस्य तस्यैव शमः कारणमुच्यते" इति। क्रियायोगश्चोपदिष्टः पतञ्जलिना "तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः" इति। तपःस्वरूपं निरूपितं वाग्वपुस्तन्त्रेण "विधिनोक्तेन मार्गेण ब्रह्मचान्द्रायणादिभिः। शरीरशोषणं प्राहुस्तपसां तप उत्तमम्" इति। प्रणवसावित्रीमन्त्रप्रभृतीनामध्ययनं स्वाध्याय इति। तत्र मन्त्रा द्विविधाः वैदिकास्तान्त्रिकाश्च। वैदिकाश्च द्विविधाः प्रगीता अप्रगीताश्च। तत्र प्रगीताः सामानि अप्रगीताश्च द्विविधाः छन्दोब्राह्मणविभागाश्च। तत्र प्रथमा ऋचोद्वितीया यजूंषि तदुक्तं जैमिनिना "तेषामृग् यत्रार्थवशेन पादव्यवस्था गीतिषु सामाख्या शेषे यजुःशब्द" इति। तन्त्रेषु कामिककारणप्रभृत्यागमेषु ये ये वर्णितास्ते तान्त्रिकाः। ते पुनर्मन्त्रास्त्रिविधाः स्त्रीपुन्नपुंसकभेदात्तदाह "स्त्रीपुंनपुंसकत्वेन त्रिविधा मन्त्रजातयः। स्त्रीमन्त्रा वह्निजायान्ताः नमोऽन्ताः स्युर्नपुंसकाः। शेषाः पुमांसस्ते मन्त्राः सिद्धा वषट्त्रादिकर्मणि" इति। स्नापनादिसंस्काराभावेऽपि निरस्तसमस्तदोषत्वेन सिद्धिहेतुत्वात् सिद्धत्वम्। स च संस्कारो दशविधः कथितः शारदातिलके "मन्त्राणां दश कथ्यन्ते संस्काराः सिद्धिदायिनः। निर्दोषतां प्रयान्त्याशु ते मन्त्राः साधु संस्कृताः। जननं जीवनञ्चैव ताडनं बोधनं तथा। अभिषेकोऽथ विमलीकरणाप्यायने पुनः। तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंस्क्रियाः। मन्त्राणां मातृकावर्णोद्धारो जननं मतम्। प्रणवाद्यारितान् कृत्वा मन्त्रवर्णान् जपेत् सुधीः। मन्त्रार्णसंख्यया तद्वि जीवनं संप्रचक्षते। मन्त्रवर्णान् समाभिख्य ताडनेवेन्दुनामसा। प्रत्येकं वायुबीजेन ताडनं तदुदाहृतम्। विलिख्य मन्त्रवर्णांस्तु प्रस्तरैः कठोरजैः। मन्त्राक्षरेण संख्यातैर्घात्तद्बोधनं मतम्।

स्नतन्त्रोक्तविधानेन मन्त्री मन्त्रार्थसङ्गया। यत्तत्पदुर्वैमन्त्रमभिषिञ्चेद्विगुह्यवे। संचिन्त्य मनसा मन्त्रं ज्योतिर्मन्त्रेण निर्दहेत्। मन्त्रे मलत्रयं मन्त्री विमलीकरणं हि तत्। तारव्योमाग्निमनुयुक् ज्योतिर्मन्त्र उदाहृतः। कुशोदकेन जप्तेन प्रत्यूषं प्रोक्षणं मनोः। वारिधीजेन विधिवदेतदाप्यायनं मतम्। मन्त्रेण वारिणा मन्त्रे तर्पणं तर्पणं स्मृतम्। तारमायारमायोगो मनोर्दीपनमुच्यते। जप्यमानस्य मन्त्रस्य गोपनं त्वप्रकाशनम्। संस्कारा दश मन्त्राणां सर्वतन्त्रेषु गोपिताः। यत्कृत्वा सम्पदायेन मन्त्री वाञ्छितमश्नुते। दुष्कीलितविच्छिन्नसुप्तप्रागादयोऽपि च। मन्त्रदोषाः प्रणश्यन्ति संस्कारैरिभिरुत्तमैः" इति। तदेवमकारेफताक्षरकलेन मन्त्राक्षरदग्धोद्दोषेण। ईश्वरप्रणिधानं नामाभिसंहितानामनभिसंहितानाच्च सर्वासां क्रियाणां परमेश्वरे परगुरौ फलार्पणमेतया समर्पणम्। अत्रैवदत्तम् "कामतोऽकामतो वापि यत्करोमि शुभाशुभम्। तत्सर्वं त्वयि विन्यस्तं त्वत्प्रयुक्तः करोम्यहम्" इति। क्रियाफलसन्न्यासोऽपि भक्तिविशेषापरपर्यायं प्रणिधानमेव फलानभिसन्धानेन कर्मकरणात् तथा च गीयते गीतासु भगवता "कर्मण्येवाधिकारस्ते मा फलेषु कदाचन। मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि" इति फलाभिसन्धेरपघातकत्वमभिहितं भगवद्भिर्नीलकण्ठभारतीश्रीचरणैः "अपि प्रयत्नसम्भृतं कामेनोपहतं तपः। न तुष्टये महेशस्य स्वजीवमिव पायसम्" इति सा च तपःस्वाध्यायेश्वरप्रणिधानात्मिका क्रिया योगसाधनत्वाद्योग इति। गुह्यसारोपलक्षणाद्दृष्ट्याश्रयत्वेन निरूप्यते यथायुर्घृतमिति। गुह्यसारोपलक्षणा नाम लक्षणाप्रभेदः। सख्यार्थबाधतद्योगाभ्यामर्थान्तरप्रतिपादनं लक्षणा सा द्विविधा रूढिमूला प्रयोजनमूला च तदुक्तं काव्यप्रकाशे "मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्। अन्योऽर्थो लक्ष्यते यत् सा लक्षणाऽऽरोपिता क्रिया" इति। यच्छब्देन लक्षत इत्याख्याते सुबोभूतं प्रतिपादनमात्रं परामृश्यते। सा लक्षणेति प्रतिनिर्दिश्यमानापेक्षया तच्छब्दस्य स्त्रीलिङ्गत्वोपपत्तिः। तदुक्तं कैयटैः "निर्दिश्यमानप्रतिनिर्दिश्यमानयोरैक्यमापादयन्ति सर्वनामानि पर्यायेण तत्तल्लिङ्गमुपाददते" इति तत्र कर्मणि कुशल इत्यादि रूढिलक्षणाया उदाहरणं कुशान् लातीति व्युत्पत्त्या दर्भादानकर्तरि यौगिकं कुशलपदं विवेचकत्वसारूप्यात् प्रवीणे प्रवर्त्तमानम् अनादिदृष्टव्यवहारपरम्परानुपातित्वेनाभिधानवत् प्रयोजनमनपेक्ष्य प्रवर्त्तते। तदाह "निरूढा लक्षणाः काश्चित् शब्दशक्त्यादिभिधानवत्" इति। तस्मात् रूढिलक्षणायाः प्रयोजनापेक्षा नास्ति। यद्यपि प्रयुक्तः शब्दः प्रकृतं लक्ष्यार्थं प्रतिपादयति तेनार्थेनार्थान्तरं लक्ष्यते इति सर्वधर्मी लक्षणा तथापि तत्प्रतिपादके शब्दे समारोपितः सन् शब्दव्यापार इति व्यपदिश्यते" इति। स च योगो यमादिभेदशादङ्ग इति निर्दिष्टः। तत्र यमा अहिंसादयः। तदाह पतञ्जलिः "अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः" इति। नियमाः शौचादयः। तदाह "शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः" इति। एते च यमनियमा विष्णुपुराणे दर्शिताः "ब्रह्मचर्यमहिंसां च सत्यास्तेयापरिग्रहान्। सेवेत योगी निष्कामो योग्यतां स्वं मनो नयन्। स्वाध्यायशौचसन्तोषतपांसि नियतात्मवान्। कुर्वीत ब्रह्मणि परं परस्मिन् प्रवणं मनः। एते यमाः सनियमाः पञ्च पञ्च प्रकीर्तिताः। विशिष्टफलदाः काम्ये निष्कामाणां विशुद्धिदाः" इति। स्थिरसुखमासनं पद्मासनभद्रासनवीरासनस्वस्तिकासनदण्डकासनसोपाश्रयपर्यङ्कक्रौञ्चनिषदनोष्ट्रनिषदनसमसंस्थानभेदाद्बहुविधम् "पादाङ्कुरौ निक्षिपेदाङ्कपार्श्वाभ्यां व्युत्क्रमेण तु। ऊर्वोरुपरि विप्रेन्द्र! कृत्वा पादतले उभे। पद्मासनं भवेदेतत् सर्वेषामभिपूजितम्" इत्यादिना याज्ञवल्क्यः पद्मासनादिस्वरूपं निरूपितवान् तत्सर्वं ततएवावगन्तव्यम्। तस्मिन्नासनस्थैर्ये सति प्राणायामः प्रतिष्ठितो भवति। स च श्वासप्रश्वासयोर्गतिविच्छेदस्वरूपः तत्र श्वासो नाम बाह्यस्य वायोरन्तरानयनम्। प्रश्वासः पुनः कौष्ठ्यस्य बहिर्निःसारणम्। तयोरुभयोरपि सत्वरत्वाभावः प्राणायामः। ननु नेदं प्राणायामसामान्यलक्षणं तद्विभेदेषु रेचकपूरककुम्भकप्रकारेषु तदनुगतेरयोगादिति चेन्नैष दोषः सर्वत्रापि श्वासप्रश्वासगतिविच्छेदसम्भवात् तथा हि कौष्ठ्यस्य वायोर्बहिर्निःसरणं रेचकः प्राणायामः प्रश्वासत्वेन प्रागुक्तः। बाह्यवायोरन्तर्धारणं पूरकः श्वासरूपः। अन्तस्तम्भवृत्तिः कुम्भकः यस्मिन् जलमिव कुम्भे निश्चलतया प्राणाख्यो वायुरवस्थाप्यते। तत्र सर्वत्र श्वासप्रश्वासद्वयगतिविच्छेदोऽस्त्येवेति नास्ति मतभावकामः। तदुक्तं "तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः

प्राणायामः" इति। स च वायुः सूर्योदयमारभ्य षार्द्ध-घटिकाद्वयं घटीयन्त्रस्थितघटभ्रमणन्यायेन एकैकस्यां नाड्यां भवति एवं सत्यहर्निशं श्वासप्रश्वासयोः षट्शता-न्येकविंशतिसहस्राणि जायन्ते। अतएवोक्तं मन्त्र-समर्पणरहस्यवेदिभिरजपामन्त्रसमर्पणे "षट्शतानि नमेशाय षट्सहस्रं खयम्भुवे। विष्णवे षट्सहस्रञ्च षट्सहस्रं पिनाकिने। सहस्रमेकं गुरवे सहस्रं पर-मात्मने। सहस्रमात्मने चैवमर्पयामि जपं" इति तथा नाडीसञ्चरणदशायां वायोः सञ्चरणे पृथिव्यादीनि तत्त्वानि वर्णविशेषत्वात् पुरुषार्थाभिधायकैः पुरुषैरव-गन्तव्यानि। तदुक्तमभियुक्तैः "षार्द्धं घटीद्वयं नाडी रेकैकार्कोदयात् वहेत्। खरषट्घटीभ्रान्तिन्यायो नाड्योः पुनः पुनः। शतानि तस्य जायन्ते निश्वासोच्छ्वासयोर्नव। खषट्कुहिकैः २१६०० सङ्ख्याहोरात्रे सकले पुनः। षट्त्रिंशद्वर्णानां या वेला भवने भवेत्। सा वेला महतो नाड्यन्तरे सञ्चरतो भवेत्। प्रत्येकं पञ्च तत्त्वानि नाड्योश्च वक्ष्यमाणयोः। वक्ष्यन्त्यहर्निशं तानि ज्ञातव्या-न्यिततात्मभिः। ऊर्द्धं वह्निरधस्तोयं तिरश्चीनः समीर-रयः। भूमिरर्द्धपुटे व्योम सर्वगं प्रवहेत् पुनः। वा-योर्वक्त्रेरपां पृष्ठ्या व्योम्नस्तत्त्वं वहेत् क्रमात्। वह-न्तीरुभयोर्नाड्योर्ज्ञातव्योऽयं यथाक्रमम्। पृथ्व्याः पञ्चाशत्पञ्चाशत्तत्त्वानामायुः। अग्नेस्त्रिंशत् पुनर्वायोर्विंशतिर्दश च। प्रवाहकालसंख्येयं हेत-र्विलयोरपि। पृथ्वी पञ्चगुणा तोयं चतुर्गुणमथानलः। त्रिगुणोद्विगुणो वायुरियदेकगुणं भवेत्। गुणं प्रति दश पञ्चान्युर्व्यां पञ्चाशदिष्यतः। एकैकहानिस्तोयादे-स्तथा पञ्चगुणाः क्षितेः। तत्त्वाभ्यां भूजलाभ्यां स्यात् प्राणिकार्य्यं फलोन्नतिः। दीप्तास्तिरादिके ज्ञेये तेजो-वाय्वम्बरेषु च। पृथ्व्यग्नेरुभयस्थोमतत्त्वानां चिह्न-मुच्यते। आद्ये स्वैर्यं स्वचित्तस्य, मैत्र्यं कामोद्भवो भ-वेत्। तृतीये क्रोधसम्भावो चतुर्थे भक्षणेच्छता। पञ्चमे शून्यतैव स्यादथ वा धर्मवासना। भ्रुवोरुभौ मध्या-कुञ्चौ नासापुटहृदये। अक्ष्णोः प्रान्त्यकोप्रान्त्याकुञ्चौ ज्ञेये दृगन्तयोः। न्यक्षान्तर्भूपृथिव्यादितत्त्वज्ञानं भवेत् क्रमात्। पीतत्वेतारुणत्वग्राभैरिन्दुभिर्निरूपाधि खम्" इत्यादिना। यद्यपदायुक्तत्वमवगम्य तत्रियमने विधीय-माने विवेकज्ञानावरणकर्मक्षयो भवति। "तपो न परं प्राणायामादिति"। "दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः। प्राणायामैस्तु दह्यन्ते तद्वदिन्द्रियजा मलाः" इति च। तदेवं यमादिभिः संस्कृतमनसस्तु योगिनः संयमप्रत्याहारः कर्त्तव्यः चक्षुरादीनामिन्द्रियाणां प्रति-नियतरूपनीलकोपनीलमोहनीयप्रवणत्वप्रहाणेनाविक्षत-स्वरूपप्रवणचित्तानुकारः प्रत्याहारः इन्द्रियाणि विष-येभ्यः प्रतीपमाहियन्तेऽस्मिन्निति व्युत्पत्तेः। ननु तदा चित्तमभिनिविशते नेन्द्रियाणि तेषां बाह्यविषयत्वेन तत्र सामार्थ्याभावादतः कथं चित्तानुकारः? उच्यते अतएव वस्तुतत्त्वासम्भवमभिसन्धाय साङ्ख्याचार्यमिव भाष्यकार एवेन्द्रियाणां प्रत्याहारः" इति। साङ्ख्यप्रक्रि-यानुकारनिमित्तं विषयासम्प्रयोगः यदा चित्तं नि-रुध्यते तदा चक्षुरादीनां निरोधे प्रयत्नान्तरं नापेक्ष-णीयं यथा मधुकरराजं मधुमक्षिका अनुवर्त्तन्ते तथे-न्द्रियाणि चित्तमिति। तदुक्तं विष्णुपुराणे "शब्दा-दिष्वनुरक्तानि निग्रहीष्यन्ति योगवित्। कुर्य्यात्तेषां चित्तानु-कारीणि प्रत्याहारपरायणः" इति। "वश्यता परमा तेन प्रायतेऽतिचलात्मनः। इन्द्रियाणामवश्यत्वे सौर्यो योगस्य बाधकः" इति। नाभिचक्रहृदयपुण्डरीकनाड्य-यादावाध्यात्मिके हिरण्यगर्भप्रजापतिप्रभृतिके बाह्ये वा देशे चित्तस्य विषयान्तरपरिहारेण स्थिरीकरणं धारणा। तदाह "देशबन्धश्चित्तस्य धारणेति"। गौरा-णिकाश्च "प्राणायामेन पवनं प्रत्याहारेण चेन्द्रियम्। वशीकृत्य ततः कुर्य्यात्तिस्थानं शुभाश्रयम्" इति। तस्मिन् देशे ध्येयावलम्बनस्य प्रत्ययस्य विसदृशप्रत्ययप्र-हाणेन प्रवाहोध्यानं तदुक्तं "तत्र प्रत्ययैकतानता ध्यानमिति"। अन्यैरप्युक्तं "तदूर्ध्वप्रत्ययैकाग्र्या सन्तति-श्चान्यनिस्पृहा। तद्ध्यानं प्रवदन्तीह मुनयो मोक्षदायकं तथा" इति। प्रसङ्गाद्धरणमङ्गं प्रसङ्गेन प्रत्ययोपदर्शि। तदनेन योगाङ्गानुष्ठानेनादरनैरन्तर्यदीर्घकालसेवितेन स-माधिप्रतिपक्षक्लेशप्रक्षयेऽभ्यासवैराग्यवशात्पुरुषाद्यभि-धाभो भवति। अथ किमेवमकस्मादज्ञानतिविकटाभि-रत्यन्तप्रसिद्धाभिः कर्णाटगौडलाटभाषाभिर्भीषयते भगवान्, न हि वयं भवन्तं भीषयामहे किन्तु मधुमत्यादिप-दार्थव्युत्पादनेन तोषयामः ततश्चाकुतोभयेन भवता श्रू-यतामवधानेन। तत्र मधुमती नामाभ्यासवैराग्याद्विशद्-धात्तरजस्तमोलेशमलप्रक्षयप्रकाशमयसत्त्वभावनावाऽनवद्यवैशार-द्यविद्योतनरूपा ऋतम्भरप्रज्ञाख्या समाधिसिद्धिः। तदुक्तं

"ऋतम्भरा तत्र प्रज्ञेति"। ऋतं सत्यं बिभर्त्ति कदाचिदपि न विपर्य्येणाच्छाद्यते तत्र स्थितौ दार्ढ्यं सति द्वितीयस्य योगिनः सा प्रज्ञा भवतीत्यर्थः। चत्वारः खलु योगिनः प्रसिद्धाः प्रथमकल्पिको मधुभूमिकः प्रज्ञाज्योतिरतिक्रान्तभावनीयश्चेति। तत्राभ्यासे प्रवृत्तिमात्रज्योतिः प्रथमः न त्वनेन परचित्तादिगोचरज्ञानरूपं ज्योतिर्योगोक्ततत्त्वमित्युक्तं भवति। ऋतम्भरप्रज्ञो द्वितीयः, भूतेन्द्रियजयी तृतीयः परवैराग्यसम्पन्नश्चतुर्थः। मनोजवित्वादयो मधुप्रतीकसिद्धयः। तदुक्तं "मनोजवित्वं विकरणभावः प्रधानजयश्चेति"। मनोजवित्वं नाम कायस्य मनोवदुत्तमो गतिलाभः विकरणभावः कार्यनिरपेक्षाणामिन्द्रियाणामभिमतदेशकालविषयापेक्षवृत्तिलाभः, प्रधानजयः प्रकृतिविकारेषु सर्वेषु वशित्वम्। एताश्च सिद्धयः करणपञ्चकस्वरूपजत्वात् तृतीयस्य योगिनः प्रादुर्भवन्ति यथा मधुन एकदेशोऽपि स्वदते तथा प्रत्येकमेव ताः सिद्धयः स्वदन्त इति मधुप्रतीकाः। सर्वभावाद्यधिष्ठातृत्वादिरूपा विशोका सिद्धिः। तदाह "सत्त्वपुरुषान्यताख्यातिमात्रप्रतिलब्धसर्वभावाधिष्ठातृत्वं सर्वज्ञत्वं चेति"। सर्वेषां व्यवसायाव्यवसायात्मकानां गुणपरिणामरूपाणां भावानां स्वामिवदात्मभूतं सर्वभावाधिष्ठातृत्वं तेनैव ग्राह्योदिताव्यदेशधर्मित्वेन स्थितानां विवेकज्ञानं सर्वज्ञातृत्वम्। तदुक्तं "विशोका वा ज्योतिष्मतीति"। सर्ववृत्तिप्रलयसम्भवे परं वैराग्यमाश्रितस्य जात्यादिबीजानां क्लेशानां निरोधसमर्थो निर्बीजः समाधिः असम्प्रज्ञातपदवेदनीयः संस्कारशेषताव्यपदेश्यः चित्तस्यावस्थाविशेषः। तदुक्तं "विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः इति। एवञ्च सर्वतो विरज्यमानस्य तस्य पुरुषधौरेयस्य क्लेशबीजानि च निर्दग्धप्रायबीजकल्पानि प्रसवसामर्थ्यविधुराणि मनसा सार्द्धं प्रलयं गच्छन्ति। तदेतेषु प्रलीनेषु निरुपप्लवविवेकख्यातिपरिपाकवशात् कार्यकारणात्मकानां प्रधानेशयः चितिशक्तिस्वरूपप्रतिष्ठा पुनर्बुद्धित्वाभिसम्बन्धविधुरा कैवल्यं लभते इति। सिद्धिद्वयी च सङ्क्षिप्ता पतञ्जलिना "पुरुषार्थशून्यानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति"। न चास्मिन् सत्यपि कस्मान्न जायते जन्तुरिति वदितव्यं कारणाभावात् कार्याभाव इति प्रमाणसिद्धार्थे नियोगानुयोगयोरयोगात्। अपरथा कारणाभावेऽपि कार्यसम्भवे मधिवेधादयोऽन्धादिभ्यो भवेयुः। तथा चानुपपन्नार्थतायामाभाणको लौकिक उपपन्नार्थो भवेत्। तथा च श्रूयते "अन्धो मणिं मविध्यत्समनक्ष्किरथावयत् (पथितवान्)। अपोवस्तं प्रत्यसक्षत् (पिनद्धवान्) तमजिङ्घोऽभ्यपूजयत्" (स्तुतवानिति) यावत्। एवञ्च चिकित्साशास्त्रवद्योगशास्त्रं चतुर्व्यूहं यथा चिकित्साशास्त्रं रोगो रोगहेतुरारोग्यं भेषजमिति तथेदमपि संसारः संसारहेतुर्मोक्षो मोक्षोपाय इति। तत्र दुःखमयः संसारो हेयः, प्रधानपुरुषयोः संयोगो हेयहेतुः, तस्यात्यन्तिकी निवृत्तिर्हानं तदुपायः सम्यग्दर्शनम्। एवमन्यदपि शास्त्रं यथासम्भवं चतुर्व्यूहमूहनीयमिति सर्वमवदातम्"।

पतत् त्रि॰ पत–शतृ वा॰ अति वा। १पतनकर्त्तरि २पक्षिणि पु॰ अमरः।

पतत्र न॰ पत–करणे अत्रन्। वाहने उज्ज्वलदत्तः।

पतत्रि पु॰पत–अत्रिन्। खगे उज्ज्वल॰ पतत्री पतत्रयः।

पतत्र पु॰ पतनं त्रायते त्रै–क। पक्षिणां पक्षे (पाखा) अमरः। [हरिवं॰ १८४५ श्लो॰।

पतत्रिकेतन पु॰ पतत्री केतनं यस्य। गरुड़ध्वजे विष्णौ

पतत्रिन् पु॰ पतत्र+अस्यर्थे इनि। खगे अमरः।

पतद्ग्रह पु॰ पतत् सुखादिभ्यः सवत् जलादि गृह्णाति ग्रह–अच्। (पिकदानी)पात्रभेदे अमरः। अस्य उप॰स॰। पतद्पाद तत्रार्थे हेमच॰। [शब्दरत्ना॰

पतङ्गीरु पु॰ पतन् पक्षी भीरुर्यस्मात्। ग्रीवे खगभेदे

पतन न॰ पत–भावे ल्युट्। १अधःसंयोगानुकूलस्पन्दने २पातित्वे च "द्विजातिकर्मभ्योहानिः पतनम्। परत्र चासिद्धिस्तमेके नरकम्" गौतमः। पतितशब्दे दृश्यम् "विहितस्याननुष्ठानात् निन्दितस्य च सेवनात्। अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति" याज्ञ॰।

पतनीय त्रि॰ पत–अनीयर् पतनमर्हति छ वा। १पाप्ये २पतनार्हे च त्रि॰। वा॰ करणे अनीयर्। ३पातके न॰

पतम पु॰ पतत्यस्मात् कर्मण्यये पत–अम। चन्द्रे उणादिवृत्तिः स्त्रीषुपुंस्कानां चन्द्रलोकादेव पतनं शास्त्रे श्रूयते इति तस्य तथात्वम्। [नशीले।

पतयालु त्रि॰पति–आलु–तत्पर्य्युदासेन न विलोपः। पत-

पतयिष्णु पति–वा॰ इष्णुच् न विलोपः। पतनशीले ऋ॰ १।१६३।११। उद्दा॰।

पतर त्रि॰ पत–वा॰ अरन्। गन्तरि ऋ॰ २।२।४ उद्दा॰

पतरु त्रि॰ पत–वा॰ अरु। पतनशीले ऋ॰ १।१८।७ उद्दा॰

पतस त्रि॰ पत–असच्। १खगे २चन्द्रे ३पतङ्गे च उणादि॰

पताका स्त्री पत्यते गम्यते योधोऽनया पत्–निः काच्। त्रिकोणाकारे १पटादिनिर्मिते वस्त्रखण्डभेदे। मत्स्यपे देवपताकालक्षणं यथा "मत्स्यरुक्ताः पताकाः स्युर्विंशत्यङ्गुलविस्तृताः। दशरुक्ताः पताकानां दण्डाः पञ्चांशमेधिताः। सिन्दूरा कर्बुरा धूम्रा धूसरा मेघसन्निभा। हरिता पाण्डुवर्णा च शुभा पूर्वादितः क्रमात्। एवं वर्णाः शुभाः कार्याः पताकाः पाकशासन!"। "लोकेशवर्णांश्चयुताः पताकाः शैलेन्दुदण्डोपतिकाच मध्ये। चित्रं ध्वजं दिक्करदैर्ध्यवंशं त्रिदोक्षतप्रान्तगविङ्खिणीकम्। श्वेताच नवमीं पूर्वेशानकोर्मध्यतो न्यसेत्। विन्यसेत्तु पताकाच ध्वजांशा अपि पूर्वतः" कृष्णोद्योतः। "लोकेशानां लोकपालानां ये वर्णाः पीतादयः पूर्वलोकोक्ताः, गैरिकादिलिखितवज्रचिह्नदण्डखण्डपाषाणाद्युपलादिनिर्मितानि (तेषामस्त्राणि) तैर्युक्ताः ऊर्ध्वलम्बदीर्घा एकहस्तविस्तृताः पताका दण्डस्तंशयोर्धगाः चित्रं ध्वजं त्रिहस्तविस्तृतं प्रान्ते वर्तुलान्तर्विङ्खिणीकं शीर्षे चामरं दण्डस्तदर्ध्वं तंशस्तादृशं तं मध्ये विन्यसेत् पूर्वादितः पताकाच विन्यसेदित्युत्तरश्लोकेनान्वयः नवमीं पताकां पूर्वेशानयोर्मध्ये श्वेतां तादृशीमेवाचार्यः कुर्यात् ध्वजांशा अपि पताकाच पूर्वादिक्रमेण भूमौ पञ्चांशरोपणेन विन्यसेदिति"[2]। अन्याः "त्रिकोणा वै पताकाः स्युश्चतुष्कोणा ध्वजाः स्मृताः" विधा० उक्तेः त्रिकोणाकारता बोध्या। २सौभाग्ये १नाटकाङ्कभेदे पताकास्थानकशब्दे दृश्यम् पिङ्गलोक्ते वक्ष्यमाणमेरुपङ्क्तिस्थतत्तत्कोष्ठस्थाङ्कनिर्धारितस्वरूपभेदानां प्रथमत्वद्वितीयत्वादिना प्रातिस्विकरूपनिर्धारणे पूनिर्धारणाङ्कसमूहे वा यथोक्तं पिङ्गलतट्टीकयोः

"यस्तवर्णमात्राप्रस्तारयोरेतावद्गुरुलघुयुक्तो भेद एतावत्संख्याक इति मेरुपङ्क्तिवर्त्तितत्तत्कोष्ठस्थाङ्कनिर्धारितस्वरूपसंख्यानां भेदानां प्रथमत्वद्वितीयत्वादिप्रातिस्विकरूपस्य निर्धारणं निर्धारकाङ्कसमूहो वा पताका सा च द्विधा वर्णमात्राभेदात्। तत्र प्रथमं वर्णपताकानिर्णयप्रकारमाह उद्दिष्टेति टी०। "उद्दिष्टा यदि चेद्वा दिक्षु गुरुके परभरणं कर्त्तव्यम्। प्राक्कोष्ठ एव पङ्क्तिस्थ एतत्परकस्य पताका करिष्यसि" पिं०भू०। "उद्दिष्टसंख्यानङ्कान् देहि पूर्वाङ्कस्य परस्मिन् भरणं कुरुष्व। प्रथमप्राप्तमङ्कं परित्यज्य प्रस्तारसंख्यं पताकां कुर्वंतिसंज्ञकम्। "उद्दिष्टाङ्कसंख्यानङ्कान् देहीत्यर्थः पूर्वमेकमङ्कं दत्त्वा उत्तरोत्तरं द्विगुणितान् द्विचतुरष्टादिकानङ्कान् यथाप्रस्तारसङ्ख्यं स्थापयेत्यर्थः। ततः पूर्वाङ्कस्य परस्मिन्नुत्तरवर्त्तिन्यङ्के प्रस्तारसंख्यं प्रस्तारसंख्या यत्रां क्रियायां तद्यथा स्यात्तथा भरणं योजनं कुरुष्वेत्यर्थः। प्रस्तारसंख्याधिक्यस्य योजनकरणविशेषस्यत्वेन यदि कुत्रचित् पूर्वाङ्कस्य परोऽङ्कयोजने प्रस्तारसंख्यातोऽधिका संख्या भवेत् तत्र तत्र प्राप्तसिद्धायातम्। एवं सति प्रथमप्राप्तमङ्कं परित्यज्य तेन यत्र प्रथमप्राप्तोऽङ्क एव कुत्रचित् पूर्वाङ्कस्य योजननिष्पन्नाङ्कस्तत्र न प्राप्त इत्यर्थायातम्। एवं प्रकारेण वर्णानां पताकां कुरुष्वेत्यर्थः। तत्र यः पूर्वाङ्कः यत्र परोऽङ्के प्रथमं योज्यते तेन योजननिष्पन्ना यङ्काः तत्परोऽङ्कादयोऽधोधःस्थाप्या इति नियमो गुरूपदेशतो बोध्यः। पूर्वपरमङ्कादेरभेदाबोधजनकत्वात् क्रमयोऽपेक्षातं पूर्वापरत्वं भवतीत्यपि। एतदर्थं वक्ष्यमाणमेरुप्रस्तारे अतरङ्गस्य प्रथमकोष्ठस्थितिकाङ्कस्थितः अतर्युक्त एको भेदो द्वितीयकोष्ठस्थितचतुरङ्कस्थितः त्रिगुरुकाश्चत्वारो भेदास्तृतीयकोष्ठस्थषट्कस्थिता द्विगुरुकाः षड्भेदाश्चतुर्थकोष्ठस्थचतुरङ्कस्थिता एकगुरुकाश्चत्वारो भेदाः पञ्चमकोष्ठस्थैकाङ्कस्थितः सर्वलघुक एको भेदः। पञ्चकोष्ठाङ्कयोजननिष्पन्नाङ्को दशसंख्या इति। तत्र तत्तत्संख्यगुरुलघुकाः भेदा यथानिर्दिष्टप्रस्तारकरणे कतमे कतमे इति प्रश्ने प्रथमम् एकं कोष्ठं कर्त्तव्यं ततस्तत्संलग्नमेकं कोष्ठं त्यक्त्वा तदधःकोष्ठद्वयं कार्यं" ततो द्वितीयपङ्क्तिवत् तृतीयपङ्क्तौ कोष्ठचतुष्टयं त्यक्त्वा तदधः कोष्ठद्वयं ततस्तृतीयपङ्क्तिस्थितकोष्ठषट्कमध्यादुत्सारितकोष्ठचतुष्टयसंलग्नं कोष्ठचतुष्टयं कार्यं" ततः चतुर्थपङ्क्तिस्थितकोष्ठचतुष्टयमध्योपरितनैकसंलग्नमेकं कोष्ठं कार्यमेवं कोष्ठेषु कोष्ठानि सम्पद्यन्ते चतुरङ्गरङ्गे तेषामेवापेक्षत्वात् नतु कथमेतैनैव क्रमेण कर्त्तव्यम् अन्यक्रमस्यापि सम्भवादिति क्षेत्र मेरुस्थितानां चतुरङ्गरङ्गे पञ्चानां कोष्ठानां कोष्ठस्थाङ्कस्थितानाम् एकचतुःषट्चतुरेककोष्ठानां क्रमशः पङ्क्तिरूपेण विन्यासेन तथास्थापनौचित्यात् ततः प्रथमकोष्ठादिक्रमेण एकद्विचतुरष्टषोडशाङ्कान् स्थापयेत्। ततः प्रथमकोष्ठस्थैकाङ्कस्य सर्वेभ्यः पूर्ववर्त्तित्वात् तेन सह बहुत्तरवर्त्तिद्व्यङ्केः

न योजितस्त्रप्राङ्गो द्रष्टव्याधः स्याप्यः ततः तेन सह चतुरष्टाङ्कयोजननिष्पन्नषष्ठाङ्कनवाङ्को लघ्वङ्कादधोऽधः-स्थाप्यौ। तेन सह षोड़शाङ्कस्य योजने प्रस्तारसंख्याधिक्याच्च तत्कर्त्तव्यम्। तथा च तेन सह कस्यचित् परस्याङ्कस्य योजने प्रथमप्राप्राङ्क एवायातीति प्रथम-कोष्ठस्थमङ्कं त्यक्त्वा द्वितीयकोष्ठस्थं द्रष्टव्यं तदानीं सर्वेभ्यः पूर्वत्वेन स्थाप्यत्वात्। तथाच तेन पूर्वाङ्केन द्रष्टव्येन तदुत्तरवर्त्ति तृतीयकोष्ठस्थचतुरङ्कस्य योजननिष्पन्नषडङ्क-चतुरङ्कादधो विन्यास्यः ततो द्वितीयकोष्ठपङ्क्तिस्थद्रष्टव्याधःस्थितलघ्वङ्केन पूर्वेण चतुरङ्कस्य योजननिष्पन्नः षष्प्राङ्कः तृतीयकोष्ठस्थषडङ्कादधः स्थाप्यस्ततः द्वितीय-पङ्क्तितृतीयकोष्ठस्थषष्प्राङ्केन सह चतुरङ्कस्य योजने पूर्वप्राप्तनवाङ्कलाभात् तत्परित्यागेन तदधोनिहितनवाङ्केन चतुरङ्कस्य योजननिष्पन्नस्त्रयोदशाङ्कस्तृतीयपङ्क्तारधः-कोष्ठे स्थाप्यः। ततो द्वितीयपङ्क्तिस्थकोष्ठचतुष्टयस्थ-द्रष्टव्यादिनवान्तचतुरङ्कानामन्यतमेन सह चतुरङ्कस्य योजने कृते पूर्वप्राप्ताङ्कलाभापेक्षत्यागः। ततः तृतीयपङ्क्तित उत्तरवर्त्ति चतुर्थपङ्क्तिप्रथमकोष्ठस्थाष्टाङ्कस्य योजन-निष्पन्नो दशाङ्कः तृतीयपङ्क्तौ प्रथमकोष्ठे स्थाप्यः द्वितीय-पङ्क्तिद्वितीयकोष्ठस्थद्रष्टव्यान्ताष्टाङ्कस्य योजननिष्पन्नैका-दशाङ्कस्तृतीयपङ्क्तौ षष्ठकोष्ठे स्थाप्यः। प्रथमप्राप्ताङ्क-लाभापेक्षया द्वितीयपङ्क्तित्यागः। ततस्तृतीयपङ्क्तिस्थ-चतुःषट्प्राङ्कैरुत्तरवर्त्तिषडङ्कस्य क्रमशः योजननि-ष्पन्नदशचतुर्दशपञ्चदशाङ्काः क्रमशस्तुर्यपङ्क्तिद्वि-तीयादिकोष्ठेष्वधोऽधोलेख्याः"।

चतुरस्रप्रस्तारे यन्त्राः स्वरूपदर्शनम्।

१गुरुः१	२गुरुः४	३गुरुः६	४गुरुः४	५गुरुः१	
१	२	४	८	१६	तत्रत्य प्रस्तारः
	२	६	१२	ऽ ऽ ऽ ऽ	१मः
	५	७	१३	। ऽ ऽ ऽ	२यः
	९	१२	१५	ऽ । ऽ ऽ	३यः
		१०		। । ऽ ऽ	४र्थः
		११		ऽ ऽ । ऽ	५मः
अत्रत्याङ्कात्तत्रत्य				। ऽ । ऽ	६ष्ठः
संख्यापूरणार्थः				ऽ । । ऽ	७मः
अस्याश्च पताकाकारत्वात्				। । । ऽ	८मः
पताकासंज्ञकत्वमेवं मात्रा				ऽ ऽ ऽ ।	९मः
पताकाया अपि ।				। ऽ ऽ ।	१०मः
				ऽ । ऽ ।	११यः
				। । ऽ ।	१२यः
				ऽ ऽ । ।	१३यः
				। ऽ । ।	१४यः
				ऽ । । ।	१५यः
				। । । ।	१६यः

मात्रापताका तु तत्रैवोक्ता यथा "यस्मात्यमात्रामेरुस्त-त्तत्संख्याकभेदानां प्रथमत्वद्वितीयत्वादिनिर्णयाय मात्रापताकानिर्माणमाह उद्दिष्टेति" टी०। "उद्दिष्ट मरि यङ्का ठापय वामावर्त्तेन परङ्क परय लोपङ्क। एक-लोपे एकगुरु जानह दुइतिएलोपे दुइतिएगुरु जानह। मात्रापताकां पिङ्गलो गायति यो पढम पावइ स परं बोधयइ" भू० "उद्दिष्टस्थानङ्कान् स्थापय वामावर्त्तेन परस्मिन्नीत्वा लोपय। एकलोपे एकगुरुं जा-नीत द्विलोपे द्विलान् गुरून् जानीत"। "मात्रापताकां पिङ्गलो गायति यः प्रथमं प्राप्नोति स परं बोधयतीति" सङ्क०। "उद्दिष्टाङ्कसदृशान् ऊर्ध्वप्रकारोद्दिष्टपूर्वाङ्कयुगल-युतपराङ्कान् प्रस्तारसंख्यं तत्सदृशान् एकद्वित्रिपञ्चाष्ट-त्रयोदशैकविंशचतुस्त्रिंशदित्येवंरूपान् स्थापय उत्तरो-त्तरमिति शेषः। वामावर्त्तेन प्रतिलोमविधिना सर्वा-न्तिमाङ्कादारभ्यावस्थितपूर्वाङ्कमारभ्येति यावत् नीत्वा यष्ट्वीत्वा परस्मिन् सर्वान्तिमाङ्के लोपय तस्मिन्नतां गतवत सर्वान्ति-माङ्के तदवस्थितपूर्वाङ्कमारभ्य पूर्वपूर्वाङ्काः क्रमेण लोप्या इत्यर्थः। एकलोपे एकाङ्कलोपे एकगुरुं जानीत द्वि-लिलोपे द्विलान् गुरून् जानीत। एवंरूपाङ्कलोपे येऽङ्का अवशिष्यन्ते ते एकगुरुयुक्तभेदज्ञापकाः पूर्वाङ्कद्वयलोपे येऽवशिष्यन्ते ते गुरुद्वययुक्तभेदज्ञापका इत्यर्थः। एवंप्रकारेण मात्रापताकां पिङ्गलो गायति कथयति यः प्रथमं प्राप्नोति गुरूपदेशाज्जानाति स परं बोधयतीत्यर्थः। अत्र च एकत्वद्वित्वसंख्याविशिष्टः प्रथमं सर्वान्तिमे लोप्यते तदव्यवहितपूर्वाङ्कमारभ्यावशिष्टाङ्काःक्रमेणाधोधः स्थाप्या इति यदङ्कद्वयलोपे शून्यमवशिष्यते पूर्वप्राप्ताङ्को वा लभ्यते तदङ्कद्वयलोपो न कार्य्य इति नियमत्रयं गुरू-पदेशादवोध्यम्। अथ तन्निर्माणं षट्कलपताकास्वरूपम् वामदक्षिणयोरङ्कपक्षपरिमाणभूद्वीरेखाद्वयमङ्क-यङ्काङ्कान्तरितं कर्त्तव्यं तत ऋजुरेखया पार्श्वयोर्मेलनं विधेयमेवमेकं दीर्घकोष्ठं ततश्चाङ्कपरिमितमन्तरं

त्यङ्कोर्द्धरेखामारभ्याऽन्यरेखापर्य्यन्तं ऋजुरेखाः क्रमेण दत्त्वा कोष्ठषट्कसत्तरोत्तरपरस्परसंश्लिष्टं विधेयं ततोऽष्टाङ्कसंज्ञाः षट्कलप्रस्तारे एकद्वित्रिपञ्चाष्टत्रयोदशेति पूर्वोक्ताः पूर्वयुगलैक्यक्रियानिष्पन्नोत्तरोत्तराः षडङ्काः क्रमेण स्थाप्यास्तदधः षट्कलमेरुस्थितकोष्ठचतुष्टयसत्तरोत्तरसंश्लिष्टं कार्य्यं ततो मेरुद्वितीयकोष्ठस्थित षड्ङ्कसूचितषड्भेदानां द्वितीयकोष्ठमेकं तदधः अष्टाधः संश्लिष्टं कोष्ठपञ्चकमिति कोष्ठषट्कमेवं मेरुतृतीयकोष्ठे पञ्चाङ्कसत्त्वात् तृतीयकोष्ठमेकं तदधः अष्टाधः संश्लिष्टकोष्ठचतुष्टयमितिकोष्ठपञ्चकमवशिष्टकोष्ठद्वयस्याधो मेरौ एकाङ्कसद्भावात् न कोष्ठान्तरं कार्य्यम्। ततः सर्वान्तिमस्त्रयोदशाङ्कस्यान्तिमकोष्ठे स्थापनं ततः सर्वान्तिमत्रयोदशाङ्कमध्ये तदव्यवहितादाङ्कोपे उर्वरितं पञ्चाङ्कं यावत्तेनोपान्तिमोपरिकोष्ठे स्थापयेत् ततोऽष्टाङ्कलोपे पूर्वप्राप्ताङ्कलाभाभावात्र लोपः कार्य्यः। किन्तु अष्टाङ्कपूर्वस्थितपञ्चाङ्कस्य त्रयोदशाङ्के लोपं कृत्वा उपान्तिमकोष्ठोपरितनकोष्ठाधःकोष्ठे उर्वरितमष्टाङ्कं स्थापयेत् ततस्त्रयाङ्कस्य त्रयोदशाङ्के लोपं कृत्वा उर्वरितं दशाङ्कं तदधःकोष्ठे स्थापयेत् ततो द्व्यङ्कलोपे उर्वरितमेकादशाङ्कं तदधःकोष्ठे संस्थाप्य एकाङ्कलोपे उर्वरितं द्वादशाङ्कं तदधःस्थापयेत् ततस्त्रयोदशाङ्के लोपकरणे पूर्वाङ्कलाभाभावात् न तत् कार्य्यम्। ततः अष्टपञ्चेत्यङ्कद्वयलोपे शून्यावशेषात् न तत्कार्य्यम्। अष्टत्रीत्यङ्कद्वयलोपे उर्वरितं द्व्यङ्कं द्वितीयकोष्ठोपरितनकोष्ठे स्थापयेत् ततो द्वादशेत्यङ्कद्वयलोपे उर्वरितत्र्यङ्कस्तदधःस्थाप्यस्तत एकादशेत्यङ्कद्वयलोपे उर्वरितचतुरङ्कस्तदधःकोष्ठे स्थाप्यः। ततः अष्टाङ्कघटितद्व्यङ्कलोपासम्भवात् पञ्चाङ्कघटितद्व्यङ्कलोपः कार्य्यस्तत्र पञ्चत्रीत्यङ्कद्वयलोपे पूर्वप्राप्तपञ्चाङ्क एवोर्वरितः स्यात् अतः द्विपञ्चेति द्व्यङ्कलोपे उर्वरितं षड्ङ्कं तदधःकोष्ठे स्थापयेत्। एकपञ्चेत्यङ्कद्वयलोपे उर्वरितं सप्ताङ्कस्तदधःकोष्ठे स्थाप्यस्ततः पञ्चाङ्कघटितद्व्यङ्कलोपे पूर्वप्राप्ताङ्कलाभाभावात् न तत्कार्य्यं किन्तु त्रिपञ्चाङ्कद्वयलोपस्तत्र त्रिरीति द्व्यङ्कलोपे पूर्वप्राप्ताङ्कलाभाभावात् न तत्कार्य्यं तत एकत्रीत्यङ्कद्वयलोपे उर्वरितनवाङ्कं तदधःकोष्ठे स्थापयेत्। ततः कोष्ठाभावात् एकत्रीत्यङ्कद्वयलोपे उर्वरितदशाङ्कस्य प्राप्तत्वात् न द्व्यङ्कलोपः। तत एकत्रयेत्यङ्कद्वयलोपे उर्वरितमेकाङ्कं प्रथमे कोष्ठे स्थापयेदिति। तत्र मेरुप्रथमकोष्ठस्थैकाङ्कसूचितषट्कलसर्वगुरुकभेदस्यात्रत्यप्रथमकोष्ठस्थैकाङ्केन प्रथमत्वं सूचितं त्र्यङ्कलोपे त्रिगुरुकत्वाभिधानात्। एवं मेरुद्वितीयकोष्ठस्थषड्ङ्कसूचितानां षट्कलप्रस्तारस्य द्विगुरुकभेदानां षष्ठ्या द्वितीयतृतीयत्वादिनिर्णयपताकादितीयकोष्ठस्थाङ्कषट्केन सूचितद्व्यङ्कलोपे द्विगुरुकत्वाभिधानात्। एवं मेरुपञ्चाङ्कसूचितानां पञ्चानां षट्कलैकगुरुकभेदानां पताकातृतीयकोष्ठस्थाङ्कपञ्चकेन पञ्चमत्वाष्टमत्वेत्यादि निर्णीतमेकाङ्कलोपे एकगुरुकत्वाभिधानात्। सर्वान्तिमे त्रयोदशाङ्के अङ्कलोपपूर्वकयोजनासम्भवात् मेरुप्रथमकोष्ठस्थैकाङ्कसूचितषट्कलस्यैकस्य सर्वलघुकभेदस्य पताकान्त्यसप्तमकोष्ठस्थत्रयोदशाङ्केन त्रयोदशत्वं निर्णीतमेवमन्यत्रापि।

षट्कलप्रस्तारे तत्सङ्ख्यपदर्शनम्।

१	२	३	४	८	१३	षट्कलप्रस्तारः
त्रिगुरुः१	द्विगुरुः६	एकगुरुः५	सर्वलघुः१			ऽ ऽ ऽ १मः
१	२	५	१३			। । ऽ ऽ २यः
	३	८				। ऽ । ऽ ३यः
	४	१०				ऽ । । ऽ ४र्थः
	६	११				। । । । ऽ ५मः
	७	१२				। ऽ ऽ । ६ष्ठः
	८					ऽ । ऽ । ७मः
अत्रत्याङ्कात्तत्सूचित						। । । ऽ । ८मः
संख्यापूरणार्थाः।						ऽ ऽ । । ९मः
						। । ऽ । । १०मः
						। ऽ । । । ११मः
						ऽ । । । । १२मः
						॥ । । । । १३मः

पताकास्थानक न० सा०द० उक्ते नाटकाङ्कभेदे तल्लक्षणभेदादिकं तत्रोक्तं यथा

"यत्रार्थे चिन्तितेऽन्यस्मिन् तद्विद्धोऽन्यः प्रयुज्यते। आगन्तुकेन भावेन पताकास्थानकन्तु तत्" तद्भेदानाह सङ्कल्पैवार्थसम्पत्तिर्गुणवत्त्वमुपचारतः। पताकास्थानकमिदं प्रथमं परिकीर्त्तितम्" यथा रत्नावल्यां "वासवदत्तेयमिति" राजा यदा तत्कण्ठपार्श्वं मोचयति तदा तद्भक्त्या "सागरिकेयमिति" प्रत्यभिज्ञाय "कथं प्रिया मे सागरिका कलमलमतिमात्रमित्यादि। फलरूपार्थसम्पत्तिः पूर्वापेक्षया उपचारातिशयाद् गुणवती तत्क्षणा। "यत्नः सातिशयश्चिन्तं नानावस्त्वसमाश्रयम्।

पताकास्थानकमिदं द्वितीयं परिकीर्तितम्" । यथा वेण्यां भीमः । "रक्तप्रसाधितभुवः शतविघट्टाश्च सुप्ता भवन्तु कुरुराजसुताः सदस्याः" । अत्र रक्तादीनां रुधिरशरीरार्थहेतुकत्वेऽपवर्गेण बीजार्थप्रतिपादनात् नेतरमङ्गमतिपत्तौ सत्यां द्वितीयं पताकास्थानकम् । "अर्थोपक्षेपकं यत्तु लोनं सविनयं भवेत् । श्लिष्टप्रश्नुत्तरोपेतं तृतीयमिदमुच्यते" । लीनमव्यक्तार्थं श्लिष्टेन सम्बन्धयोग्येनाभिप्रायान्तरप्रयुक्तेन प्रश्नुत्तरेणोपेतं सविनयं विशेषनिश्चयप्राप्त्या सहितं सम्पद्यते यत् तत् तृतीयं पताकास्थानकम् । यथा वेण्यां द्वितीयेऽङ्के । कञ्चुकी । देव ! भग्नं भग्नम् । राजा । केन । कञ्चु । भीमेन । राजा । कस्य । कञ्चु । भवतः । राजा । वाः किं प्रलपसि । कञ्चु । सभयं देव ! नतु ब्रवीमि भग्नं भीमेन भवतः । राजा । धिक् दुष्टापसद ! कोऽयमद्य ते व्यामोहः । कञ्चु । देव न व्यामोहः सत्यमेव । "भग्नं भीमेन भवतो महता रथकेतनम् । पातितं किङ्किणीजालबद्धाक्रन्दमिव क्षितौ" । अत्र दुर्योधनोरुभङ्गरूपप्रस्तुतसंक्रान्तभर्त्सोपक्षेपत्वम् । "ह्यर्थो वचनविन्यासः सश्लिष्टः काव्ययोजितः । प्रधानार्थान्तराक्षेपी पताकास्थानकं परम्" । यथा रत्नावल्याम् "उद्दामोत्कलिकां विपाण्डुरमुखीं प्रारब्धजृम्भां जवादायामं श्वसनोद्यमैरविरलैरातन्वतीमात्मनः । अद्योद्यानलतामिमां समदनां नारीमिवान्यां ध्रुवं पश्यन् कोपविपाटलद्युतिसुखं देव्याः करिष्याम्यहम्" । अत्र भाव्यर्थः सूचितः । इतानि चत्वारि पताकास्थानकानि क्वचिन्मङ्गार्थं क्वचिदमङ्गार्थमपि सर्वसन्धिषु भवन्ति । काव्यकर्तुरिच्छावशाद् भूयोऽपि भवन्ति" ।

पताकिक त्रि० पताका अस्त्यस्य ब्रीह्या० का ठन् । पताकायुक्ते ।

पताकिन् त्रि० पताका+अस्त्यर्थे ब्रीह्या० वा इनि । पताकायुक्ते जन्मलग्ने यद्विशेषवेधवशात् तदीयदण्डपलादिजन्मतः फलविशेषस्तच्चक्रे चक्रभेदे तत्स्वरूपादिकं ज्यो०त० उक्तं यथा

"तिर्य्यगूर्द्धगता रेखास्तिस्रोदेयाः पताकया। युताः काद्याः वेधविदा सर्वसङ्गतरेखया । दक्षस्योत्तरेखातो वामं मेषादिराशयः । षष्ठसप्तमविप्राश्च षड्दशेन्द्राग्निसागराः । कर्कटान्मीनपर्य्यन्तमङ्का देया यथाक्रमम् । कालस्य जन्मकालीनयद्दलग्नमजादिषु । विन्यस्य चिन्तयेत् प्राज्ञः शुभाशुभं यथाक्रमम् । शुभदण्डयोगवेधैर्लग्नाद्बालस्य शोभनम् । पापदण्डयोगवेधैराख्यद्वाद्विष्टिकालवित् । बलाधिके दिनं, मध्ये मासो, हीने च वायनम् । कर्कौमीनधनुर्भ्यांच्च हरिः कीटघटेन च । स्त्रियास्तौलिमृगाभ्याच्च घटे मीनेन कन्यया । धनुषो मृगकर्किभ्यां मकरे धनुषा स्त्रिया । मीने कर्कितुलाभ्यां मीनस्त्रीधनुषा त्यजे । तुलाकर्किमृगैर्न्यूने कीटकुम्भवृषेषु च । सिंहवृश्चेषु एतेषु वामदक्षिणसम्मुखे । राहुकेत्वर्कसौरारैः पापैर्विद्धो युतोऽशुभः । तदन्यैर्युतविद्धस्तु लग्नराशिः शुभप्रदः । एकोनविंशतिः कर्के सिंहे सप्तदशैव तु । षट्त्रिंशदब्धायाच्च षड्विंशतिस्तुलाधरे । वृश्चिके सिंहवज्ज्ञेयमूनत्रिंशच्चरासने । षड्विंशं मकरे ज्ञेयं, कुम्भे सप्तदश स्मृताः । नवयुग्मे तथा मीने मेषे षड् दशभिस्तथा । वृषभे च यथा सिंहे युग्मेऽङ्कुरलोचने । त्रिनवाब्धादियं संख्या दिनमासाब्दनिर्णये । एकाङ्कात् द्विष्टहाङ्काद्वा क्वचिद्विष्टेच सम्भवः । वारेशाद्दर्शयामेषु रात्र्यङ्कोः षड्घट्यङ्कमात् । अधिपाः सूर्यहोरेश यथाकोष्ठे भवन्ति हि । रवीज्येन्दुभृगुक्षाजशनिक्षरवयो निशि । रविशुक्रक्षरात्रीशयमनीज्यकुजभास्कराः । दिने, तुल्याः परेज्यैवं तथा रात्रावपि यद्दाः । पापदण्डे भवेद्विष्टिः शुभदण्डे शुभं भवेत् । शुभपापस्य दण्डे तु कर्मारम्भाच्छुभं भवेत् । आरम्भात् पापदण्डे तु कर्म निष्फलतां व्रजेत् । यद्यार्द्धयामसञ्ज्ञैव प्राग्दण्डः सप्तदाहृतः । षट् षट्परीत्य दण्डाश्च त्रयो रात्रौ मतास्तथा । आदित्ये भृगुजो बुधोऽपि च शशी, सोमे शनीज्यौ कुजो, भौमेऽर्कः सितसोमजौ, च शशिजे सोमः शनिर्वाक्पतिः । जीवेऽङ्गारकवी भृगुर्भगुसुते सौम्येन्दुमार्त्तण्डजाः । काले जीवसहोजतिग्मकिरणा रात्रौ च दण्डाधिपाः । यामार्द्धाधिपसंख्यातो द्वितीयस्तु तदर्द्धतः । तदर्द्धात् तु तृतीयः स्यात्तदर्द्धात् तु तुरीयकः । अङ्काभावे तु राहुः स्यात्तदङ्को वसुसंख्यकः । भग्नाङ्कस्य परित्यागाद्विना दण्डाधिपा यथा । रविदनुजबुधग्लौचन्द्रक्षरासुरगुरुः कुजरविदनुजज्ञाः शेन्दुक्षरासुराश्च । गुरुशशिरविदैत्याः शुक्रभौमार्कदैत्याः शनिकुजरविदैत्या दण्डपाद्यार्द्धयामे । दनुजो राहुः । चार्द्धयामे दिनार्द्धप्रहरे । शुभदण्डमाह । "शेषार्कस्य दण्डौ सततशुभकरावादिशेषौ तथेन्दोः, शेषो दण्डः कुजस्याथ गुरुबुधयोराद्यमार्द्धं

प्रशस्तम् । आदित्यस्तस्यैको भृगुकुलजातेः सर्वकार्येषु हि शस्तो दण्डाचलार एव कचिदपि समये नैव शौरेः प्रशस्ताः । प्रतिदण्डं पलान्येषां ज्ञात्वा वाच्यं कचिच्छुभम् । रवौ च वेदा, वसवः सुधांशौ, कुजे च बाणाः शशिजे तथाऽब्धाः । शनाहत,र्दिक् च हरस्तथौ स्याद्राहौ तुरङ्गा भृगुजे च रुद्राः । अशुभे दण्डसंयोगे सर्वत्र पुण्यवर्जिते । बालस्य मरणं शीघ्रं यदि पापैः समन्वितम् । अशुभग्रहदण्डे तु सर्वत्र पापवर्जिते । बालस्य कुशलं सर्वं शुभैर्यदि समन्वितम् । अशुभो दण्डनाशो हि वेधदोषेण लभ्यते । मरणं तत्र वक्तव्यं बालस्य नान्यथा भवेत् । पापस्य दण्डमात्रे तु तद्योगवेधवर्जिते । बालस्य कुशलं तत्र शुभैर्यदि समन्वितम्" । वर्षपताकी तु केतुपताकाशब्दे २२२६ पृ० उक्तः तत्र द्रष्टव्यः

पतापत त्रि० पत–यङ्लुक्–अच् नि० अतिशयपतनयुक्ते

पति पु० पा–डति । १भर्तरि २स्वामिनि च ततस्त्रियां "पत्यु,र्नो यज्ञसम्बन्धे" पा० न ङीप् च पत्नी । पतिश्चतयज्ञश्चभागिन्याम् स्त्रियां "विभाषा सपूर्वस्य" पा० सट्टस्य पतिः सट्टपतिः सट्टपत्नी वा । बहुव्रीहावपि भूद्रः पतिर्यस्याः भूद्रपत्नी भूद्रपतिः । पतिशब्दस्य समास एव विसंज्ञा श्रीपतये श्रीपतेः इत्यादि असमासे तु न विसंज्ञा पत्या पत्ये इत्यादि क्वार्थे कचित् समासेऽपि विसम् "क्षीरे वा पतीते पत्नौ" भरतः "सीतायाः पतये नमः" इत्यादि पतिसेवनप्रकारादिकं यथा

"व्यर्थं व्रतादिकं तस्या या भर्तुश्चापकारिणी । तपश्चानशनञ्चैव व्रतं दानादिकञ्च यत् । भर्तुरप्रियकारिण्याः सर्वं भवति निष्फलम् । यथा प्रियः पूजितश्च श्रीकृष्णः पूजितस्तया । पतिव्रताव्रतार्थञ्च पतिरूपी हरिः स्वयम् । सर्वदानं सर्वयज्ञः सर्वतीर्थनिषेवणम् । सर्वं व्रतं तपः सर्वमुपवासादिकञ्च यत् । सर्वधर्मश्च सत्यञ्च सर्वदेवप्रपूजनम् । तत्सर्वं स्वामिसेवायाः कलां नार्हन्ति षोडशीम् । सुपुण्ये भारते वर्षे पतिसेवां करोति या । वैकुण्ठं स्वामिना सार्द्धं सा याति ब्रह्मणः शतम् । विप्रियं कुरुते भर्तुर्विप्रियं वदति प्रियम् । असत्कुल प्रसूता या तत्फलं लभते ध्रुवम् ।। कुम्भीपाकं व्रजेत् सा च यावच्चन्द्रदिवाकरौ । ततो भवति चाण्डाली पतिपुत्रविवर्जिता" ब्रह्म० वै० प्र० ४३ अ० । पतिसेवाप्रकारस्तु भा० व० २२२ अ० द्रौपद्या सत्यभामां प्रति उक्तत्वात् द्रष्टव्यः । अधिकम् उक्तं पतिव्रताशब्दे द्रष्टव्यम् ।

पतिंवरा स्त्री पतिं वृणोति वृ–खच् टाप् । १स्वयं पतिवरणकारिकायां कन्यायाम् स्वयंवरायाम् । २लक्ष्मीरूपे शब्दच० ।

पतिघातिनी स्त्री पतिं हन्ति हन–णिनि ङीप् । पतिनाशिकायां स्त्रियां तत्सूचकयोगश्च कर्कटे लग्ने कर्कटे चन्द्रे वा सौरिर्मांशगतोमेति ह० आ० उक्तं यथा "लग्नन्दा पतिघातिनी वदनुधा मिश्रिन्वसाध्वीन्दुभे" मू० "इन्दुभे कर्कटे लग्ने तद्गते वा चन्द्रे सौरिर्मांशगताता लग्नन्दा खैरिणी यटेदव्यवहारिणी भवति सौरिर्मांशगताता पतिघातिनी भवति" भट्टोत्पलः ।

पतिघ्न त्रि० पतिं हन्ति हन–"लक्षणे जायापत्योष्टक्" पा० टक् । पतिनाशसूचके लक्षणभेदे स्त्रियां ङीप् । पतिघ्नी पाणिरेखा । विवाहात् प्राक् चैत्रादिसप्तपिण्डाष्टकस्य कुमार्यै परीक्षार्थं दाने श्मशानजातसप्तपिण्डस्य कुमार्या यज्ञे तथाः पतिघ्ननक्षत्रसङ्गम् आह्निकत० १।५।६ "यदो पिण्डान् हृत्वा पिण्डानभिसन्धय कुमारीं ब्रूयादेषामेकं स्वदाधेति" इति नियोजिता कुमारी यदि श्मशानादाहृतां मृदं स्वखाति तदा पतिघ्नीति विद्यात् तदुक्तं तत्रैव दृष्ट० "श्मशानात् पतिघ्नीति" ।

पतित त्रि० पत–गत्यर्थत्वात् कर्त्तरि क्त सनि वेट्कत्वेऽपि पतेः पृथग्ग्रहणात् इट् पतधातौ पितृव्रतीत्येकरूपलिखनं प्रमादात् प्रत्ये पितृपतिव्रतीति रूपान्तरं भवतीति बोध्यम् । १पतनकर्त्तरि २नरकगमनसूचककर्मविशेषकारके स च कर्मविशेषः प्रतितत्त्वविधया प्रा० वि० निर्णीतो यथा

गौतमः "ब्रह्महा सुरापः सुवर्णस्तेयी मातृपितृयोनिसम्बन्धासंव्यवहार्यनास्तिकनिन्दितकर्माभ्यासी पतितान्याजी पतितत्यागिनश्च पतिताः पातकसंयोजकाश्च तैस्तावदेतत् समाचरन्तीति" । पातकसंयोजकाः सुरापानादौ परान् प्रयोजयन्ति । इत्युपक्रमे सामान्यलक्षणेऽपि विशेषलक्षणमेवाह्यति ब्रह्मादिपदस्यैव प्रथौ, ह्रारीतेन विशेषवचने पाठात् । तथा च्यवनः "अथ पातकोपपातकमहापातकानि व्याख्यास्यामः इति । तथा च पठन्ति "महापातकसंज्ञानि पापान्युक्तानि यानि च । तानि पातकसंज्ञानि तदूनमुपपातकम्" । अतो महापातकसूक्ष्मपापविशेषेऽप्यस्य शक्तिः । पतनशब्दार्थमाह गौतमः "हिंजातिकर्मभ्यो हानिः पतनं परत्र चाविहितमेके नर-

कर्म्म। द्विजातिकर्म औतसग्निहोत्रादि स्मार्त्तं भट्टादि प्रायश्चित्ततदङ्गजपादिव्यतिरिक्तं तेभ्यो व्यावृत्तिरनधिकारः इति द्विजातिपदग्रहणं प्राधान्यार्थं सूत्रस्थापि वाक्यान्तरेण पातित्याभिधानात्। इह लोके तावत् पातित्यलक्षणमिष्टं परलोके चासिद्धिः पातककर्मप्रतिबन्धात् उपात्तसुकृतफलानिष्पत्तिः नरकं वा सूतकादिव्याहत्यर्थमिदम्। द्विजातिकर्मानधिकारत्व महापातके श्रूयते यथा देवलः "पञ्चैतानि महापातकानि कृत्वा ब्राह्मणः सन्निनीषुर्भाष्यो नानुपाद्योऽभिशस्तः सर्वकर्मवर्जितः पतिततमो भवति"। महापातकाधिकारे मनुः "असम्भाष्याह्यसंभोज्या ह्यविवाह्या ह्यपाठिनः। चरेयुः पृथिवीं दीनाः सर्वधर्मबहिष्कृताः"। अतो महापातकेषु द्विजातिकर्मानधिकारः तद्विहितदादशवार्षिकप्रायश्चित्तापनेयत्वादतिपातकानुपातकयोरपि। अतो द्वादशवार्षिकप्रायश्चित्तापनेयाहं पापं पतनम्। अर्हता च सामान्यबोधितत्वं तच्च स्त्रीत्वादिनाऽसम्भूयोनुष्ठानेऽप्यस्त्येव ज्ञप्तेः द्रव्यघातस्य। अथ वा द्विजातिकर्मानधिकारापादकं पापं पतनम् अनधिकारश्च महापातके श्रुतएव अनुपातकेऽपि तत्सममत्वात् उपपातकादौ च क्वचित् पततीति श्रुतेः अतिपातके ततो गुरुत्वात् लभ्यते। यद्वा महापातकानपकृष्टं पापं पतनम् अनुपातकञ्च तत्सममत्वात् उपपातकादेः क्वचित् पततीत्यभिधानात् अनपकर्षएव, अस्वजनब्राह्मणीगमने पतनपाताद्युत्पत्तिश्रवणादनपकर्षएव। अतएव "मद्यः पतति मांसेनेति" शुद्धावेदी पतत्यत्रे"रित्यादिमनुवचनं निन्द्यार्थम्।

स्वधर्मच्युते "स्वधर्मं यः परित्यज्य परधर्मं समाश्रयेत्। अनापदि स विद्वद्भिः पतितः परिकीर्त्तितः" मार्क०पु० चाण्डालान्त्यादिस्त्रीगमनादिकमभ्यासकृतं पातित्यकारणम् "चाण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च। पतत्यज्ञानतो विप्रो ज्ञानाज्ज्ञात्वं तु गच्छति" मनुस्मृ०। अन्यान्यपि कतिचित् कर्माणि पतितानामिव दारुनिषेधप्रयोजकान्युक्तानि शु०त० ब्रह्मपु० "गरान्निविषदाश्चैव पापण्डाः क्रूरवृत्तयः। क्रोधात् प्राणं विषं वह्निं शस्त्रस्तद्वन्धनं जलम्। गिरिद्वेष प्रपातञ्च ये कुर्वन्ति नराधमाः। कृत्रिमस्त्रीविनश्चैव जनानङ्कारकारिणः" तथा "ब्रह्मदण्डहता ये च ये च ये ब्राह्मणैर्हताः। महापातकिनो ये च पतितास्ते प्रकीर्त्तिताः। पतितानां न दाहः स्यान्नान्त्येष्टिर्नौर्ध्वदेहिकम्। नाशौचं नोदकं कार्य्यं सपिण्डैर्बान्धवैः सह। निन्दितेऽहनि सायाह्ने ज्ञातिभिर्गुरुसन्निधौ। दासो घटमपां पूर्णं पर्य्यस्येत् प्रेतवत् सदा। अहोरात्रमुपासीनं नाशौचं ब्राह्मणैः सह। निवर्त्तेरंस्ततस्तस्मात्तु सम्भाषणसहासनम्" मात्स्ये २०१अ०। "पतिता गुरवस्त्याज्या न तु माता कदाचन। गर्भधारणपोषाभ्यां तेन माता गरीयसी" मत्स्यपु०।

पतित्वन न० यौवने अ० १०।४०६ भाष्ये दृश्यम्।

पतिदेवता स्त्री पतिरेव देवता यस्याः। पतिव्रतायाम् पतिदैवताऽप्यत्र। [रिक्थाम्।

पतिद्विष् स्त्री पत्यौ द्वेष्टि द्विष–क्विप् ३त०। पत्यौ द्वेषकारि-

पतिमती स्त्री पति+अस्त्यर्थे मतुप् ङीप्। स्वामियुक्तायां भूम्यादौ।

पतिलोक पु० पतिभ्योऽयो लोकः स्वर्गादिः ष०त०। पत्यासहधर्माचरणेन प्राप्ये स्वर्गादिलोके मनुः ५।१५६

पतिवक्त्री स्त्री पति+अस्त्यर्थे मतुप् नि० सधवायां अस्य वः नुक् च। समर्द्धकायां स्त्रियाम् अमरः। तद्विपरीतायान्तु पतिमतीत्येव सि० कौ०।

पतिवेदन पु० पतिं वेदयति विद–णिच्–ल्यु। पतिप्रापके महादेवे "त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम्" यजु० ३।६०

पतिव्रता स्त्री पतिर्व्रतमिव नियतोपास्यत्वात् यस्याः। साध्व्यां स्त्रियाम् अमरः तद्भर्त्तृ आशी०ख० ४अ० उक्ता यथा

"पतिव्रतेयं कल्याणी लोपामुद्रा सधर्मिणी। तपोऽरुन्धत्या तुल्या यत्कृता पुण्यकारिणी। पतिव्रतास्वरूपत्वा सावित्र्याप्यनसूयया। आखिल्यया च सत्या च लक्ष्म्या च सतरूपया। मेनया च सुनीत्या च संज्ञया स्वाहया तथा। तथैवा वर्ण्यते श्रेष्ठा न

तथान्येति निश्चितम्। भुङ्क्ते भुक्ते त्वयि सुते! तिष्ठति त्वयि तिष्ठति। विनिद्रिते च निद्राति प्रथमं प्रतिबुध्यते। अनन्यहृतमात्मानं तव नो दर्शयेत् क्वचित्। कार्यार्थं प्रोषिते क्वापि सर्वमङ्गलवर्जिता। न च ते नाम मृह्णीयात्तवायुष्यविवृद्धये। गुरुणान्यैरनामापि न मृह्णाति कदाचन। आक्रुष्टापि न चाक्रोशेत् ताडितापि प्रसीदति। इदं कुरु कृतं स्वामिन्! मन्यतामिति वक्ति च। आहूता मृदुकर्माणि त्यक्त्वा गच्छति सत्वरम्। किमर्थं व्याहृता नाथ! क्षमस्वादोऽभिधीयताम्। न चिरं तिष्ठते द्वारि न द्वारमुपसेवते। यदापितं त्वया किंचित् कस्मैचिन्न ददात्यपि। भूषोपकरणं सर्वमनुक्ता साधयेत् स्वयम्। नियमोदकबर्हीणि पत्रपुष्पाक्षतादिकम्। प्रतीक्षमाणावसरं यथाकालोचितं हि यत्। तदुपस्थापयेत् सर्वमनुद्विग्नाति मूढवत्। सेवते भर्तुरुच्छिष्टमिष्टमन्नफलादिकम्। महाप्रसाद इत्युक्त्वा पतिदत्तं प्रतीच्छति। अविभज्य न भुञ्जीयात् देवपित्रतिथिष्वपि। परिचारकवर्गेषु गोषु भिक्षुकुलेषु च। संयतोपस्करा दक्षा मृष्टा व्ययपराङ्मुखी। कुर्यात् त्वयाऽनुज्ञाता नोपवास व्रतादिकम्। दूरतो वर्जयेदेषा समाजोत्सवदर्शनम्। न गच्छेत् तीर्थयात्रादिविवाहप्रेक्षणादिषु। सुखसुप्तं सुखासीनं वसनस्थ यदृच्छया। आत्मरेखापि कार्येषु पतिं नोत्थापयेत् क्वचित्। स्त्रीधर्मिणी विरावन्तु स्वदुःखं नैव दर्शयेत्। स्ववाक्यं श्रावयेन्नापि यावत् स्वामी न शुध्यति। सुस्वामी भर्तृवदनमीक्षतेऽन्यस्य न क्वचित्। अथ वा मनसि ध्यात्वा पतिं भानुं विलोकयेत्। कुरिद्रां कुङ्कुमञ्चैव सिन्दूरं कज्जलं तथा। कूर्पासकञ्च ताम्बूलं भाङ्गल्याभरणं तथा। केशसंस्कार कबरीकरकर्णविभूषणम्। भर्तुरायुष्यमिच्छन्ती दूरयेन्न पतिव्रता। न रञ्जया न हैतुक्या तथा श्रमणया न च। न च दुर्भगया क्वापि सख्यं कुरुते सती। भर्तृविद्वेषिणीं नारीं नैषा सम्भाषते क्वचित्। नैकाकिनी क्वचिद्भूयान्न स्नाति च क्वचित्। नोदुखले न मुषले न वर्हन्यां दृषद्यपि। न यन्त्रके न देहल्यां सती चोपविशेत् क्वचित्। विना व्यायममयं प्रागल्यं न क्वचिच्चरेत्। यत्र यत्र रुचिर्भर्तुस्तत्र प्रेमवती सदा। इदमेव व्रतं स्त्रीणामयमेको दृढः परः। इदमेका देवपूजा भर्तुर्वाक्यं न लङ्घयेत्। स्त्रीयं वा दुरवस्थं वा व्याधितं दुर्मुखमेव वा। दुस्थितं दुस्थितं वापि पतिमेकं न लङ्घयेत्। दृष्टा दृष्टे विमुखाऽमुखे प्रिये सदा। एकरूपा भवेत् दुग्धा सम्मतेषु च विपत्सु च। सर्पिर्लवणतैलादिष्वेषापि च पतिव्रता। पतिं नाक्षौति न ब्रूयादायासेषु न योजयेत्। तीर्थस्नानार्थिनी नारी पतिपादोदकं पिबेत्। शङ्करादपि विष्णोर्वा पतिरेकोऽधिकः स्त्रियाः। व्रतोपवासनियमं पतिसङ्कल्पु नाचरेत्। आयुष्यं हरते भर्तुर्मृता निरयमृच्छति। भर्तुः प्रत्युत्तरं दद्याद्यारी या क्रोधतत्परा। कुक्कुरी जायते ग्रामे शृगाली निर्जने वने। स्त्रीणां हि परमश्चैको नियमः समुदाहृतः। अभ्यर्च्य चरणौ भर्तुर्भोक्तव्यं कृतनिश्चयम्। उद्वासनं न सेवेत न व्रजेत् परवेश्मसु। न तपाकरवाक्यानि वक्तव्यानि कदाचन। अपवादो न वक्तव्यः कस्यचिं दूरतस्त्यजेत्। गुरूणां सन्निधौ चापि नोच्चैर्ब्रूयान्न वा हसेत्। या भर्तारं परित्यज्य रङ्कचरति दुर्मतिः। उलूकी जायते क्रूरा वृक्षकोटरशायिनी। ताडिता ताडितं वेच्छेत् सा नारी वृषदंशिका। कटाक्षयति यान्यं वै केवराको वृषा भवेत्। या भर्तारं परित्यज्य मिष्टमन्नाति केवलम्। ग्रामे सा शूकरी भूयाद्विष्ठाभुक् तुषविड्भुजा। या कुङ्कृत्य प्रियं ब्रूते सा मूका जायते खलु। या सपत्नीं सदेर्ष्यन्ति दुर्भगा सा पुनः पुनः। दृष्टिं विलुप्य भर्तुर्या कञ्चिदन्यं समीक्षते। काणा वा विमुखी वापि कुरूपापि च जायते। वाङ्मात्रायान्तमालोक्य त्वरिता च जलासनैः। ताम्बूलैर्व्यजनैश्चैव पादसंवाहनादिभिः। तथैव चाटुवचनैः खेदसंनोदनैः परैः। या प्रियं प्रीणयेत् प्रीता त्रिलोकी प्रीणिता तया। पितं ददाति हि पिता पितं भ्राता पितं सुतः। अमितस्य हि दातारं भर्तारं पूजयेत् सदा। भर्ता देवो गुरुर्भर्ता धर्मतीर्थव्रतानि च। तस्मात् सर्वं परित्यज्य पतिमेकं समर्चयेत्। जीवद्दोनो यथा देहः क्षणादशुचितां व्रजेत्। भर्तृहीना तथा योषा मुहूर्ताच्यशुचिः सदा। अमङ्गलेभ्यः सर्वेभ्यो विधवाह्यत्यमङ्गला। विधवादर्शनात् सिद्धिर्नास्ति यात्रां व्रजेत्। विहाय मातरं चैकां सर्वमङ्गलवर्जिताम्। तदाशिषमपि प्राप्तस्त्यजेदाशीविषोपमाम्। कन्या विवाहसमये वाचयेयुरिति द्विजाः। पत्युः सङ्कचरी भूया जीवतोऽजीवतः सदा। भर्ता सदानुयातव्यो देहवत्

क्षायया क्षिया। चन्द्रमा ज्योत्स्नया यद्वद्विद्युत्वान् विद्युता यथा। यद्वत्प्रजनो भर्त्तारं स्टक्षात् पिदधनं सदा। पदे पदेऽश्वमेधस्य फलं प्राप्नोत्यसंशयम्। व्याघ्रयाक्षी यथा व्याघ्रं बलाद्धरते विलात्। एवमुत्क्रम्य दूतेभ्यः पतिं स्वर्गं नयेत् सती। यमदूताः पलायन्ते सतीभालोक्य दूरतः। अपि दुष्कृतकर्माणं सप्तसूक्ष्म च तत्पतिम्। न तथा विभिभो वज्रेन तथा विद्युतो यथा। आपतन्तीं समालोक्य वयं दूताः पतिव्रताम्। तपनस्तपतेऽत्यन्तं दृष्ट्वोऽपि च दहते। कम्पन्ते सर्वतेजांसि दृष्ट्वा पातिव्रतं महः। यावत् स्त्रोमसंख्यानि तावत् कोट्ययुतानि च। भर्त्ता स्वर्गसुखं भुङ्क्ते रमाया पतिव्रता। धन्या सा जननी लोके धन्योऽसौ जनकः पुनः। धन्यः स च पतिः श्रीमान् येषां गेहे पतिव्रता। पितृवंश्या मातृवंश्याः पतिवंश्याश्चयश्चयः। पतिव्रतायाः पुण्येन स्वर्गसौख्यानि भुञ्जते। शीलभङ्गेन दुर्वृत्ताः पातयन्ति कुलत्रयम्। पितर्मातुस्तथा पत्युरिहामुत्र च दुःखिता। पतिव्रतायाश्चरणो यत्र यत्र स्पृशेद् भुवम्। तत्रेति भूमिमन्येत नात्र भारोऽस्ति पावनी। विभ्यत् पतिव्रतास्पर्शं कुरुते भानुमानपि। लोभो गन्धवहोऽपि स्वपतिव्राय नान्यथा। आपः पतिव्रतास्पर्शमभिलिप्सन्ति सर्वदा। यद्य आद्यविनाशो नो जातास्त्वद्यापि पावनाः। स्टक्षे स्टक्षे न किं नार्यो रूपलावण्यगर्विताः। परं विश्वेशभक्त्यैव लभ्यते स्त्री पतिव्रता। भार्य्या मूलं स्टक्षस्य भार्य्या मूलं सुखस्य च। भार्य्या धर्मफलावाप्त्यै भार्य्या सन्तानहेतवे। परलोकस्थितं लोको जीयते भार्य्यया ह्यम्। देवपितृतिथीज्यादि नाभार्य्यः कर्म चार्हति। गृहस्थः स हि विज्ञेयो यस्य गेहे पतिव्रता। यस्यतेऽन्यः पतिः पट्टं राज्ञस्या जरयाऽथ वा। यथा गङ्गावगाहेन शरीरं पावनं भवेत्। तथा पतिव्रतादृष्ट्या शुभया पावनं भवेत्"। "आत्तौत्तें सदिते दृष्टा प्रोक्षिते मन्त्रिना क्षया। स्मृते क्षिप्ते या पत्यौ साध्वी ज्ञेया पतिव्रता" शु०त०।

पतिष्ठ त्रि० अतिशयेन पतिता दृष्टृ इष्ठो लोपः अतिशयेन पतितरि ऋ०१०।१६१।५ उदा०। द्वैयसनु पतीयस् तत्रार्थे त्रि० पञ्चमीभ्रा०५।१।१२ उदा० स्त्रियां ङीप्।

पतेर पुंस्त्री पत–एर। १खगे उज्ज्वल० स्त्रियां जातित्वात् ङीप्। २गन्तरि त्रि० ३खाटके ४गर्त्ते च पु० संक्षिप्तसा०

पत्काधिन् त्रि० पादेन कषति गच्छति कष–णिनि पदादेशः इत०। पादेन गन्तरि। मक्षिः ३।४उदाहरणं द्रष्टव्यम्।

पत्तङ्ग न० पत्राङ्ग+पृषो०। रक्तचन्दने (वक्रम) हृद्यभेदे गन्धर०। "पत्तङ्गं मधुरं शीतं पित्तश्लेष्मव्रणास्रजित्। हरिचन्दनवज्ज्ञेयं विशेषाद्दाहनाशनम्" भावप्र०।

पत्त पु० पतत्यनेन पत–बा०करणे तक् नेट्। पादे "निशीर्यतो निपत्ततः" ऋग्० ६।१२।१

पत्तन न० पतत्यत्र बा० आधारे तन। १नगरे महाद्व्यां अमरः २स्कन्दक्षे हारा०।

पत्तनाधिपति पु० ६त०। राजभेदे भा०श्र० १८६अ०।

पत्तरङ्ग पु० पट्टरङ्ग+पृषो०। (वक्रम्) हृद्ये

पत्ति पु०पद–तिन्। १सेनायाम्। २वीरे विश्वः क्तिन्। ३गतौ (१रथः २गजः ३अश्वाः ४सेनाः) एतत् संख्यान्विते ४सेनाभेदे च स्त्री। "एको रथो गजश्चैको नराः पञ्च पदातयः। त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते" भा०आ०१अ०। ५पञ्चपञ्चाशदात्मकनरसैन्ये "नराणां पञ्चपञ्चाशदेषा पत्तिर्विधीयते" भा०उ०१६४अ०।

पत्तिगणक त्रि० पत्तिं गणयति गण–ण्वुल् चुरादित्वेऽपि याजका० ६त०स०। पत्तीनां गणयितरि। ततः स्वार्थाण्। पात्तिगणक तद्भावे।

पत्तिन् त्रि० पद्भ्यां तिलति तिल–गतौ बा० डिनि। पद्भ्यां गन्तरि। "पत्तिनो भुवि चैकस्य गोपस्यात्यबलीवर्दः" हरिवं० १००अ०।

पत्तिसंहति स्त्री ६त०। पादाते सैन्यभेदे अमरः।

पत्तूर पु० पत–बा० ऊर वङ्गूरा० निपा०। १शालिधान्यभेदे त्रिका० २पत्तङ्गे रक्तचन्दने न० शब्दच०।

पत्त्र(त्र) न०पत–ष्ट्रन् "ऋरोऽरि सर्वधे" पा० वा तलोपः। १वाहनमात्रे २पर्णे ३पक्षिणां पक्षे अमरः। ४लेखनाधारे(पात्र) इति ख्याते पदार्थे ५धातुमयपत्राकारे द्रव्ये च "सुवर्णपत्राभरणा च कार्या सुलोहपार्श्वहयसङ्गताभिः" हेमाद्रौ स्त्री ङीप्। ७तेजपत्रे राजनि० "पत्रकं मधुरं किञ्चित्तीक्ष्णोष्णं पित्तलं लघु। निहन्ति कफवातार्शोदुर्नामास्रकृमीनसान्" भावप्र०। तत्र लिखनाधारपत्रे "षण्मासिके तु सम्प्राप्ते म्लानिः संजायते यतः। पत्राक्षराणि लुप्तानि पत्रारूढान्यतः पुरा" ज्यो०त०। तस्य रञ्जनं यथा "सुवर्णैरथरङ्गाद्यै रञ्जयेत् पत्रमुत्तमम्। सामान्योत्तममध्यानां पत्ररञ्जनमीरितम्" तत्प्रमाणम् "षड्ङ्गुलाधिकं दीर्घं पत्रमुत्तममीरितम्। मध्यमं दीर्घमात्रं स्यात् सामान्यं

षष्टिश्लोकम्" पत्रभङ्गप्रकारः "पत्रन्तु त्रिगुणीकृत्य ऊर्द्धं तु द्विगुणं त्यजेत्। शेषभागे लिखेद्वर्णान् गद्य पद्यादिसंयुतान्" पत्रस्य रचनाक्रमः "राजलेखक माद्यं त्वर्णो ब्रूयात् प्रयत्नतः। पत्रं कुरु यथायोग्यं गद्यपद्यादिसंयुतम्। पण्डितहृयमानीय लेखको रङ्गसि स्थितः। यथायोग्यानुसारेण पत्रं कुर्यान्मनोरमम्। दिनद्वयं त्रयं वापि विचार्य पण्डितेन वै। सम्यान्दूषणं ज्ञात्वा विलिखेत् पत्रपुस्तके। सामान्यपत्रे संलिख्य रङ्गसि श्रावयेन्नृपम्। ऋपात्रया शुभे पत्रे विलिखेद्राजलेखकः" लेखनप्रकारः "षड्कुरं प्रथमं दद्यान्मङ्गलार्थं विचक्षणः। मध्ये बिन्दुसमायुक्तमधः सप्ताङ्कसंयुतम्। तदधः स्वस्ति विन्यस्य ततो गद्यं सुशोभनम्। ततः श्रीशब्दमपि पद्यन्यासक्रमं लिखेत्। भाव्या संस्कृतेनापि कुशलं विलिखेत् सुधीः। ततः शुभाशुभं वार्त्तां संस्कृतैः प्राकृतैस्तथा। ततः प्रमाणसन्देशं ततो वार्त्तां नियोजयेत्। कीर्त्तिप्रीतियुतं पद्यं ततः किमधिकादिकम्। पत्रप्रेषणश्लोकञ्च यदृच्छासादिसंयुतम्। सर्वेषामेव पत्रेषु लिखनं चैवमीरितम्। सर्वेषामेव पत्राणां विधिं ज्ञात्वा लिखेत्तु यः। स्वदेशे कीर्त्तिमाप्नोति तथा देशान्तरेष्वपि। एवं शास्त्रक्रमं ज्ञात्वा यो लिखेद्राजपत्रकम्। स राजमन्त्रिभिः सार्द्धं यशः प्राप्नोत्यनुत्तमम्। शास्त्रसन्दर्भमज्ञात्वा यो लिखेद्राजपत्रकम्। स राजमन्त्रिभिः सार्द्धं दुर्यशो लभते ध्रुवम्" पत्रनयनक्रमः। "राजपत्रं नयेन्मूर्द्ध्नि ललाटे पात्रमन्त्रिणाम्। गुरुपत्रं नयेन्मूर्ध्नि ब्राह्मणानां तथैव च। यतिसन्न्यासिनाञ्चैव स्वामिनस्तथैव च। सादरेणैव यत्नेन तथा मूर्द्ध्नि धारयेत्। भार्य्यापत्रस्य मित्रस्य त्रुटये धारयेत् सुधीः। प्रवीराणां करतले पत्रधारणमीरितम्। एतेषाञ्चैव पत्राणामक्षधारणलक्षणम्। अन्येषामपि पत्राणां नियमो नात्र दर्शितः"। पत्रपठनप्रकारः "पत्रं ज्ञात्वा नमस्कृत्य पूर्वाह्णं स्थापयेत् सुधी। दक्षिणाग्रं तु सदसि ऋपात्रे राजलेखकः। पत्रं वितत्य सदसि द्विरारं मनसा पठेत्। स्फुटं पश्चात् प्रवक्तव्यमन्योन्यं राजलेखकः। रङ्गसि श्रावयेत् पत्रं शुभं वा यदि वाऽशुभम्। पत्रं श्रुत्वा विदित्वार्थं सभायां श्रावयेत्ततः। रङ्गपत्रं रङ्गसि ऋपात्रे श्रावयेद्द्विजः। शुभं नैव सदसि शुभं पत्रं ऋपात्रया। एवं क्रमेण पत्रार्थं श्रावयित्वा द्विजोत्तमः। ऋपतेः सन्निधौ स्थित्वा ऋपात्रामनुवर्त्तते"। पत्रचिह्नानि "ऊर्द्धं षड्कुरं लक्ष्मा पर्यन्तं चन्द्रबिम्बवत्। कस्तूरीकुङ्कुमैः कृत्वा राजपत्रं सुचिह्नितम्। मन्त्रिणां कुङ्कुमेनैव पण्डितस्यैव चन्दनैः। गुरूणां चन्दनेनैव सिन्दूरेणैव स्वामिनः। भार्य्यायाश्चाष्टगन्धेन चन्दनैः पितृपक्षयोः। सन्न्यासिनां चन्दनेन यतीनां कुङ्कुमेन च। रक्तचन्दनपङ्केन भृत्यस्य सत्तदीरितम्। श्रोत्रियेणैव शास्त्रज्ञां पत्रचिह्नं प्रकल्पयेत्। एतेषाञ्चैव सर्वेषां यथायोग्यानुसारतः। पत्रमूर्द्धं तु मतिमान् कुर्यात् चिह्नं सुपर्णकम्"। राजपत्रस्य कोषच्छेदनप्रकारः "दक्षिणे पत्रकोणस्य ऋधस्तात् छेदयेत् सुधीः। एकाङ्गुलप्रमाणेन राजपत्रस्य चैव हि"। राजपत्रादेः पद्यन्यासः "महाराजाधिराजस्य दानशौण्डं तथैव च। तथा सच्चरितं योग्यं कल्पद्रुमादिकं न्यसेत्। यथायोग्यानुसारेण तथैव गुणभेदतः। राजपत्रेषु सर्वेषु पद्यन्यासक्रमं विदुः"। मन्त्रिपत्रस्य "प्रवरं गुणभेदेन तथा सच्चरितादिकम्। विन्यस्य विलिखेत् प्राज्ञो मन्त्रिपत्रे पदक्रमम्"। पण्डितस्य "संख्यावद्वन्दिनपदं शास्त्रार्थनिपुणादिकम्। पण्डितानाञ्च पत्रेषु विलिखेद्वै पदक्रमम्"। गुरुपत्रस्य "शास्त्रसिद्धान्तनिपुणं सनमस्कारकं पदम्। विन्यस्य विलिखेत् प्राज्ञो गुरुपत्रे पदक्रमम्"। स्वामिपत्रस्य "प्रवर्ण्यं सनमस्कारं प्राणप्रियादिकं पदम्। विन्यस्य विलिखेद्धीमान् स्वामिपत्रे पदक्रमम्"। भार्य्यायाः "प्राणप्रियापदं साध्वीपदं सच्चरितादिकम्। भार्य्यापत्रे लिखेद्विद्वान् पदक्रममनुत्तमम्"। पुत्रस्य "प्राणतुल्यपदं तद्वत्तथा सच्चरितादिकम्। आशीर्वचनसंयुक्तं पुत्रपत्रे पदक्रमम्"। पितृपत्रस्य "प्रभुवर्यं नमस्कारं तथा सच्चरितादिकम्। विन्यस्य विलिखेत् पुत्रः पितृपत्रे पदक्रमम्"। सन्न्यासिपत्रस्य "सर्वशास्त्राविनिर्मुक्तं सर्वशास्त्रार्थपारगम्। सन्न्यासियतिपत्रेषु विलिखेच्च पदक्रमम्"। सामान्यस्य "सामान्यलक्षणपत्रे विनियोज्यासकं प्रति। शब्दावयेमितपदं ज्ञागतुल्यादिकं तथा। एतेषामेव पत्रेषु यथायोग्यानुसारतः। विन्यस्य विलिखेत् प्राज्ञः पदक्रममनुत्तमम्"। श्रीशब्दविन्याससंख्या यथा "षड्गुरोः स्वामिनः पञ्च दे श्वश्रे चतुरो रिपौ। श्रीशब्दानां त्रयं मित्रे एकैकं पुत्रभार्य्ययोः" पत्रकौ०।

देवभेदे द्रुतरूपपत्रविशेषाणां प्रीतिकरत्वतत्त्वं यथा "पत्राण्यपि सपुष्पाणि हरेः प्रीतिकराणि च। प्रवक्ष्यामि नृपश्रेष्ठ! शृणुष्व गदतो मम। अपामार्गकं प्रथमं तत्पादु भृङ्गारकं परम्। तत्पात्तु खादिरं श्रेष्ठं ततश्च शमीपत्रकम्। दुर्वापत्रं ततः श्रेष्ठं ततोऽपि कुशपत्रकम्। पत्रं तत्पाद्मनकं ततो विल्वस्य पत्रकम्। विल्वपत्रादपि हरेस्तुलसीपत्रमुत्तमम्। एतेषां च यथा लब्धैः पत्रैर्वा योऽर्चयेद्धरिम्। सर्वपापविनिर्मुक्तो विष्णुलोके महीयते" नरसिंहपु० ५२ अ०। देवीप्रीतिकरपत्राण्यपि यथा "अपामार्गस्य पत्रन्तु ततो भृङ्गारपत्रकम्। ततोऽपि गन्धिनीपत्रं वृक्षाकमतः परम्। तस्मात् खदिरपत्रं तु वञ्जुलस्यवकस्यथा। आम्रन्तु वकुलस्तु जम्बूपत्रं ततः परम्। बीजपूरस्य पत्रं तु ततोऽपि कुशपत्रकम्। दूर्वाङ्कुरं ततः प्रोक्तं शमीपत्रमतः परम्। पत्रमालतकं तस्माद्दाम्पत्रमतःपरम्। सर्वेषां विल्वपत्रन्तु देव्याः प्रीतिकरं सदम्" कालिकापु०।

पत्त्रक न० पत्त्र+स्वार्थे क तदिव कायति कै–क वा। १दलस्य पर्णे २पत्रावल्यां शब्दर०। ३तेजपत्रे राजनि० ४शालिञ्जशाके पु० रत्नमाला। ५पत्त्रभङ्गे न० शब्दच०।

पत्त्रकाहला स्त्री १पिङ्गलायां २पत्त्रशब्दे च हारा०।

पत्त्रगुप्त पु० पत्त्रं गुप्तमस्य परनि०। (तेकाटा विशेष) त्रिकण्टे शब्दच०।

पत्त्रघना इत०३त०। शातलाहृक्षे राजनि०।

पत्त्रङ्क न० पत्त्रमङ्क्यते अनेन अनृज–करणे घञ् अक०। रक्तचन्दनाकारे (वकम) वृक्षे शब्दच०। [त्रिका०।

पत्त्रभृङ्गार पु० पत्त्रे भृङ्गारोऽस्य। घुरोटिवृक्षे (रायमटी)

पत्त्रणा स्त्री पत्त्रं नम्यतेऽत्र नम–बा० ड संज्ञायां त्वत्स्। पत्त्ररचनायाम् हारा०।

पत्त्रतण्डुली स्त्री पत्त्रे तण्डुला अस्त्यस्याः अच् गौरा० ङीष्। यवतिक्तायाम् राजनि०।

पत्त्रतरु पु० पत्त्रप्रधानस्तरुः मा० त०। दुण्डखदिरे राजनि०

पत्त्रदारक पु० पत्त्रमिव दारयति दारि–ण्वुल्। क्रकचे (करात) त्रिका०।

पत्त्रनाडिका स्त्री इत०। पर्णशिरायाम् जटा०।

पत्त्रपरशु पु० पत्त्रे धातुमयपत्त्रे परशुरिव। (छेनी) ख्याते स्वर्णकारयन्त्रभेदे। पत्त्रपर्णेरथस्य शब्दर०।

पत्त्रपाल पु० असिसुतायां क्षुरिकायां हेमच०।

पत्त्रपाली स्त्री पत्त्राकारा पालिरस्यं यस्याः वा ङीष्। (काँचि) कर्त्तव्यां क्षुद्रायु०तस्याः पर्यन्तस्थायित्वात्तथात्वम्।

पत्त्रपाश्या स्त्री पत्त्रमिव पाश्या। स्वर्णादिरचितललाटालङ्कारभेदे (टीका) अमरः।

पत्त्रपिशाचिका स्त्री पत्त्रेण पिशाचीव इवार्थे कन्। जलवारणसाधने यन्त्रभेदे (टीका) त्रिका०।

पत्त्रपुष्प पु० पत्त्रं पुष्पमिवास्य। १रक्ततुलस्यां शब्द० २तुलस्यां स्त्री टाप् शब्दमाला। क्षुद्रपत्त्रतुलस्याम् स्त्री रत्नमाला ङीप्। कप्। पत्त्रपुष्पक भूर्जपत्त्रे शब्दमा०।

पत्त्रबन्ध पु० पत्त्राकारः बन्धः। पुष्परचनाभेदे शब्दरत्ना०।

पत्त्रभङ्ग पु० पत्त्राकारः भङ्गः रचना। सनकपोलादौ कस्तूरकादिरचितपत्त्ररेखायां तिलकभेदे हेम० पत्त्रभङ्गि, पत्त्रभङ्गीत्यपि तत्र स्त्री शब्दर०।

पत्त्रमञ्जरी स्त्री इत०। १पर्णशाखाग्रभागे २पत्त्राकारमञ्जरीयुते तिलकभेदे हेमच०। [२ततत्सदृशे स्त्री।

पत्त्रमाल पु०पत्त्राणां माला यत्र। १वेतसे नैषध० इत०।

पत्त्रमूल पु० इत०। पर्णस्य मूले ततः प्रकारे स्यूचा० कन्। पत्त्रमूलक तत्प्रकारे न०। तत्र गन्धे पत्त्रमूलेति व्यक्तं समस्तञ्च तेन पत्त्रक मूलक तत्तत्प्रकारे न०

पत्त्रयौवन न० पत्त्रस्य यौवनमत्र। नवपल्लवे जटाध०

पत्त्ररथ स्त्री पत्त्रं पक्षो रथ इव यस्य। खगे अमरः जातित्वात् स्त्रियां ङीष्। [भेदे हेमच०।

पत्त्र(रे)लेखा स्त्री पत्त्राकारा(रे)लेखा। पत्त्रभङ्गे तिलक०

पत्त्रल न० पत्त्रमिवाकारोऽस्त्रस्य सिध्मा० लच्। द्रुपक्षे (पातालादर) हेमच०।

पत्त्रलता स्त्री पत्त्राकारा लता यत्र। पत्त्राकारे १तिलकभेदे हेमच० मा०त०। २पत्त्रप्रधानलतायाम्।

पत्त्रलवण न० पत्त्रविशेषेण पक्वं लवणम् मा०त०। सुश्रुतोक्ते लवणभेदे "सञ्जर्जरकसक्तुकनक्रमालाटरूषकपूतीकारग्वधचित्रकादीनां पत्त्राण्यादाँश्च लवणेन सङ्घर्षयेत्ततोऽवचुदा स्त्रेहघटे प्रक्षिप्यावक्षिप्य गोमूत्रह्रिह्रेरेतत् पत्त्रलवणमुपदिशन्ति वातरोगेषु"।

पत्त्रवल्लरी स्त्री पत्त्रयुक्ता वल्लरीव। तिलकभेदे पत्त्रभङ्गे हेमच० पत्त्रवल्लीत्यपि तत्र।

पत्त्रवाह पु० पत्त्रं पत्त्रं शिखिं वा वहति वह–अण् उप० स०। १पत्त्रवाहे शमे २शरे जटा० ३शिखिवाहके त्रि०।

पत्त्रविशेषक न० पत्त्रमिव विशेषो यत्र कप्। तिलकभेदे

पत्त्रवृश्चिक पु० पत्त्रमिव वृश्चिकः। पत्त्राकारे वृश्चिकभेदे क्षुद्र० कीटशब्दे दृश्यम्।

पत्रवेष्ट पु० पत्रमिव वेष्टते वेष्ट-कर्मणि घञ्। ताड़ड़े रत्नः १६।१७श्लो०।

पत्रशाक पत्रात्मकं शाकम्। "पत्रं पुष्पं फलं नालं कन्दं संखेदजं तथा। शाकं षड्विधमुद्दिष्टं गुरु विद्याद्यथोत्तरम्" भावप्र०उक्ते शाकवर्गमध्ये पत्रात्मकशाके। पत्रशाकानि च वास्तूकादीनि शब्दार्थचन्द्रिकायां पुष्पशाकानि मल्लीपुष्पे, फलशाकानि कुष्माण्डादिकण्टकारीफलान्तानि, नालशाकं सर्षपनालम्। कन्दशाकानि सूरणादिशालूकान्तानि, संखेदजशाकं जिलीन्ध्रादि तत्र द्रष्टव्यम्।

पत्र(ग्रि)सिरा स्त्री द्वत०। १पत्रनाड्यां २पत्रभङ्गे हारा०

पत्रशृङ्गी स्त्री पत्रं शृङ्गमिवास्याः ङीप्। द्रवन्तीलतायाम् राजनि०। [द्वत०। २पर्णानां पङ्क्तौ च।

पत्रश्रेणी स्त्री पत्राणां श्रेणीव। १द्रवन्तीलतायां राजनि०

पत्रश्रेष्ठ पु० पत्रं श्रेष्ठं यस्य। विल्ववृक्षे राजनि०।

पत्रसुन्दर पु० पत्रं सुन्दरमस्य। खनामख्याते द्रुमभेदे मेदि०। [ङीप्।

पत्रसूचि स्त्री न० पत्राणां सूचिरिव। कण्टके त्रिका० वा

पत्रहिम न० पत्रेषु हिमं यतः। हिमदूषिते त्रिका०

पत्राख्य न० पत्रेति आख्या यस्य। १तेजपत्रे शब्दच० २तालीशपत्रे राजनि०।

पत्राङ्ग न० पत्रमिवाङ्गमस्य। १रक्तचन्दनाकारे काष्ठभेदे (पकम) अमरः। २भूर्जपत्रवृक्षे ३पद्मबीजे च मेदि०।

पत्राङ्गुलि स्त्री पत्रमिवाङ्गुलयो यत्र। पत्रभङ्गे तिलकभेदे अमरः। [शब्दर०।

पत्ताच्छन न०पत्रमच्छतेऽनेन अच्छ-करणे ल्युट्। मञ्चाम्।

पत्राढ्य त्रि० पत्रैराढ्यम्। १बहुपत्रयुक्ते २विष्णुकान्तामूले ३पर्वतवृक्षे च न० राजनि०।

पत्रान्य न० पत्राङ्ग+पृषो०। (पकम) काष्ठभेदे राजनि०।

पत्राह्वा स्त्री पत्रेणाह्वा। (चुकोपालङ्क)शाकभेदे नैघण्टु०

पत्रालु पु० पत्र+अस्त्यर्थे आलु। १काशालौ २द्रुतुदर्भे च राजनि०। [द्वत०। २पत्रपङ्क्तौ च।

पत्रावलि न०पत्राणामावलयो यस्मात्। १गैरिके शब्दच० पत्रावली स्त्री पत्राणामावलीव। १पत्रभङ्गे तिलकभेदे शब्दच० द्वत०। २पत्रश्रेणौ च

पत्रिका स्त्री पत्री+स्वार्थे क कापि ह्रस्वः। १क्षिप्राम्। पत्रं विद्यतेऽस्याः ठन्। २प्रशस्तपत्रयुक्तास्त्रवस्तु कदल्यादिषु नवपत्रिकाशब्दे २६६०पृ० उदा० द्रष्टव्यम्। ३पत्रिकाख्ये कर्पूरभेदे (पातकपुर) त्रिकाण्डशेषः।

पत्त्रिकाख्य पत्रिका आख्या यस्य। कर्पूरभेदे राजनि०।

पत्त्रिन् त्रि० पत्र+अस्त्यर्थे इनि। १पर्णयुक्ते २शरे पु० २वृक्षे अमरः ४म्लेच्छभेदे ५वृक्षे च पु० राजनि० ५पर्वते पु० मेदि० ६ताडे ७श्वेतकिणिहीवृक्षे ८गरुडपक्षिणि ९पाठायाञ्च राजनि० १०पक्षिणि स्त्री शब्दच० ङीप्।

पत्री स्त्री पत्र-इन् ङीप्। तिणौ

पत्रोपस्कर पु० पत्रेणोपस्करोऽस्य। वासभेदे हारा०

पत्र्योर्ण न० पत्रजाता ऊर्णा साधनत्वेनास्त्यस्य अच्। धौतकौशेये पट्टसूत्रमयवस्त्रे अमरः बदरादिपर्णजातन्तिजातोर्णाजातत्वात्तस्य तथात्वम्।

पत्र्य त्रि० पत्रस्य हितं यत्। श्रोणाके वृक्षे पु० अमरः

पत्नी स्त्री पति+"पत्युर्नो यज्ञसम्बन्धे" पा० नः, ङीप् च। १पतिकृतयज्ञफलभोक्त्र्यां विवाहितायां स्त्रियाम् अमरः "पत्नीमूलं मूलं पुंसां यदि जन्दोऽनुवर्त्तिनी। मूलाभ्यां सममं नास्ति यदि भार्य्या वशानुगा। तया धर्मार्थकामानां त्रिवर्गफलमश्नुते। प्राकाम्ये वर्त्तमाना तु क्लेशाद्य तु निवारिता। अवश्या सा भवेत् पश्चाद् यथा व्याधिरुपेक्षितः। अतन्त्रज्ञा न वाग्दुष्टा दक्षा साध्वी प्रियंवदा। कालज्ञा स्वामिभक्ता देवता सा न मानुषी। अतन्त्रज्ञकलत्रो यस्य स्वर्गं दृष्टैव हि। प्रतिकूलकलत्रस्य नरको नात्र संशयः। स्वर्गोऽपि दुर्लभं क्षेत्रदृतरागः परस्परम्। रक्त एको विरक्तोऽन्यस्तयोरात् कष्टतरं तु किम्? मृदुवासः सुखार्थाय पत्नीमूलं मृदु सुखम्। सा पत्नी या विनीता स्यात्सिता सा वशवर्त्तिनी। दुःखदाऽन्या सदा खिन्ना चित्तभेदात् परस्परम्। प्रतिकूलकलत्रस्य हिदारस्य विशेषतः। योषित् सर्वा जलौकेव भूपयात्यादनाशनैः। क्षुभूत्यापि क्षता नित्यं पुरुषं क्षपकर्षति। जलौका रक्तमादत्ते केवलं सा तथस्विनी। इतरा तु धनं वित्तं मांसं वीर्य्यं बलं सुखम्। सशङ्का बालभावे तु यौवने विमुखी भवेत्। क्षयवन्मन्यते पश्चादुद्वृत्तभावे स्वकं पतिम्। अतन्त्रज्ञा न वाग्दुष्टा दक्षा साध्वी पतिव्रता। एभिरेव गुणैर्युक्ता स्त्रीरेव स्त्री न संशयः। या हृष्टमनसा नित्यं स्वानमान विचक्षणा। भर्तुः प्रीतिकरी नित्यं सा भार्य्या श्रीतरा ज्वरां दक्षसं०। [शालायाम्।

पत्नीशाला(ल) न०स्त्री द्वत० वा ङीषन्तम्। पत्न्यधिष्ठित-

पत्नीसंनहन न०द्वत०। नेमखचा योक्त्रे च वा प्रतिपस्लाद-

यज्ञदीक्षार्थं यजमानपत्न्या बन्धनभेदे काल्या० श्रौ० ७।४।६ कर्क० ८।१।७ खले च दृश्यम्।

पत्नीसंयाज पु० वैदिके कर्मभेदे स च काल्या० श्रौ० २।७।७ खलादौ उक्तस्तत्रैव दृश्यः। पत्नीसंयाजनमयत्र न०। "जायन्या पत्नीसंयाजनम्" काल्या० श्रौ० ६।८।४

पत्प्राट पु० पत्नी घटत्यत्र घट-आधारे घञ्। पत्न्यगारे त्रिका०।

पत्मन् पु० पत-भावे मनिन्। १पतने करणे मनिन्। २पतनसाधने यजु० ८।४८ कर्क० ५।७,७

पत्वन् पु० पतत्यत्र+पत-आधारे वनिप्। मार्गे यजु०२२।२८ उज्ज्वलदत्तेन ऊषादिसूत्रे पदीति पठित्वा पदन् इत्युदाहृतम् वेददीपकारस्तु तत्र पतिं मत्वा तन्मतव्याख्याने पतेः वनिपमाह। [उज्ज्वल०।

पत्सल पु० पतत्यत्र पत-आधारे सरन् रस्य लच। मार्गे

पथ गतौ भ्वा० पर०सक० सेट्। पथति ददित् अपथीत्। उज्ज्वला० पथः पाथः प(पा)थयति। पपाथ पेथतुः।

पथ गतौ वा चु०उभ०पक्षे भ्वा०पर०सक०सेट् ददित्। पन्थयति ते पन्थति। अपपन्थत् त। अपन्थीत् ददित् पन्थ्यते

पथ पु० पथत्यत्र पथ-घञर्थे आधारे क। मार्गे त्रिका०।

पथक त्रि०पथे कुशलः कन्। १मार्गकुशले २कपिलद्राक्षायां स्त्री

पथिक त्रि० पन्थानं गच्छति पथिन्+कन्। देशान्तरयानाय गृहाद्विःसृत्य पथिमात्रि राजनि०। [संघातादयोऽस्यत्र।

पथिकसंहति पु० ६त०। पान्थसमूहे हारा०। पथिक-

पथिकार त्रि० पन्थानं करोति कृ-अण् उप० स०। मार्गकारके, ततः कुर्वा० यत्। पाथिकार्य्य तदपत्ये पुंस्त्री०।

पथिदेय न० पथि मार्गे देयम् अलुक्स०। राज्ञे देये करभेदे हारा०। [खदिरे राजनि०।

पथिद्रुम पु० पथ-द्रु कर्म्म०। १खदिरवृक्षे अटाध० २श्वेत-

पथिन् पु०पथ-आधारे इनि। १मार्गे तद्भेदलक्षणादिकं यथा

"त्रिंशद्धनूंषि विस्तीर्णो देशमार्गस्तु तैः कृतः। विंशद्धनुर्ग्रामपथः सीमामार्गो दशैव तु। धनूंषि दशविस्तीर्णः श्रीमान् राजपथः स्मृतः। स्यन्दनाश्वरथनागानामसम्बाधः ससञ्चरः। धनूंषि चैव चत्वारि शास्त्रा रथ्यास्तु निर्मिताः। त्रिकरावोपरथ्यास्तु द्विकराण्युपरथिका। जङ्घापथश्चतुष्पादक्षिपादस्तु गृहान्तरम्। तृतीपादस्तृपादः प्रागुक्तेभ्यः पादकः स्मृतः। अवकरः परीवाहः पादमात्रः समन्ततः" देवीपु०। पथिगमनगुणाः "श्रध्वा मेदःकफस्त्रौल्यसौकुमार्यादिनाशनः। यत्तु चंक्रमणं नातिदेहपीड़ाकरं भवेत्। तदायुर्बलमेधाग्निपदमिन्द्रियबोधनम्" राजवल्लभः। २धर्माचारे च "महाजनोयेन गतः स पन्थाः" भा०व० यक्षप्रश्ने।

पथिरक्षस् पु० पन्थानं रक्षति रक्ष-असुन् ६त०। १रुद्रभेदे यजु० १६।८ २मार्गरक्षके त्रि०। खिनि। पथिरक्षिन् तत्रार्थे कर्क० १०।१४।११।

पथिल पु० पथे-गतौ इलच्। पथिके उज्ज्वल०।

पथिवाहक त्रि० पन्थानं वाहयति प्रापयति वाहि-ण्वुल्। १मार्गवाहके २शाकुनिके ३निष्ठुरे च शब्दमाला।

पथीन नामधातुः पन्था इवाचरति पथिन्-क्विप् दीर्घः मार्गसेवाचरणे अक० सेट्। पथीनति अपथीनीत्। एवं सधीन इत्यपि नामधातुः तत्तत्सेवाचरणे।

पथिष्ठा त्रि०पथे मार्गे तिष्ठति स्था-क्विप् अलुक्स०भेदे यत्वम्। मार्गे वर्त्तमाने कर्क० ५।५०।३। लोके तु पथस्थ दृश्येत्।

पथ्य त्रि० पथि साधु दिगा० यत् इनो लोपः। १मार्गसाधौ पथोऽनपेतः यत्। २हिते चिकित्सादौ ३हितकारकाकारकभोज्यद्रव्यभेदे। पथ्यञ्च अपथ्यशब्दे २६६५ कर्कतोक्तहिताहितीध्याये दर्शितम्। रोगभेदे पथ्यापथ्यञ्च वैद्यके प्रसिद्धं विस्तरभयान्नोक्तम्। ४हरितकीवृक्षे पु० शब्दमाला अमरे स्त्री। ५स्वर्गेवीरो ६चिर्भिटायां ७वन्याकर्कटयाञ्च स्त्री राजनि०। ८मात्राछत्तभेदे स्त्री "त्रिंशद्वर्णेषु दलयोरादौ दृश्यते यस्याः। पथ्येति नाम तस्याः प्रकीर्त्तितं नागराजेन" छन्दः।

पथ्यप्राक पु० पथ्यं प्राकमस्य। तण्डुलीयशाके राजनि०।

पथ्यादिगुग्गुलु पु०औषधिविशेषे यथा "पथ्या विभीतामलकीफलानां शतं क्रमेण द्विगुणाभिवृद्धम्। प्रस्थेन युक्तञ्च पलक्रमेण द्रोणे जले संस्थितमेकरात्रम्। अर्द्धावशेषं क्वथितं कषायं भाण्डे पचेत्तत् पुनरेव तोये। अमूनि वल्लेरवताप्यं दद्यात् द्रव्याणि संचूर्ण्य पलार्द्धकानि। विड्भृङ्गदन्तीत्रिफलावृहतीकृष्णात्रिवृद्भागरकोषणानि। यवेटचेटस्य नरस्य शीघ्रं त्रिभाम्बुपानानि च भोजनानि। निषेव्यमाणो विनिहन्ति रोगान् सप्तप्रसौ नूतनवच्च कुर्यात्। श्रीज्ञानसुखं जठरार्त्तिशूलं गण्डूलकण्डूत्वविवातरक्तम्। पथ्यादिको गुग्गुलुरेष नाम्ना ख्यातः क्षितावप्रमितप्रभावः। बलेन नागेन समं मनुष्यं जवेन कुर्यात्तुरगेण तुल्यम्। आयुःप्रकर्षं विदधाति चक्षुर्बलं तथापुष्टिकरो विघृष्टः। अतस्य बन्धानकरो विशेषाद्रोगेषु यक्ष्मोदरपाण्डुरोगेषु तज्ज्ञैः" भावप्र०।

पद्यावक्त्र न० "वुजोर्जेन सरिद्वर्त्तः पद्यावक्त्रं प्रकीर्त्तितम्" छ०र० उक्तलक्षणे मात्राछन्दोभेदे। [पपाद पेदतुः।

पद् स्वैर्ये भ्वा०पर०सक० सेट्। पदति अपादीत् अपदीत्।

पद् गतौ दि० आ०सक०अनिट्। पद्यते अपादि मेदे पक्षः आ+विपत्तौ आपत्तौ च क्विप् आपादन व्यापकाभावेन व्याप्याभावकल्पने प्राप्तौ च।

उद्+उत्पत्तौ उद्भवे जनने अक०।

प्रति+उद् झटित्युद्भवे अक०।

वि+पद्-शब्दस्वावयवार्थबोधने व्युत्पत्तिः।

उप+युक्तियोगे उपपद्यते उपपत्तिः।

अभि+उपसन्नत्वने। कुमा० ३श्लोकः

निस्+निष्पत्तौ अवस्थान्तरप्राप्तौ अक०।

प्र+प्राप्तौ सक०। प्रपद्यः

प्रति+स्वीकारे अङ्गीकारे सक० प्रतिपत्तिः प्रतिपद्यः।

वि+प्रति+संगये सक० विप्रतिपद्यः।

वि+मरणे नाशे अक०। विपद्यते विपन्नः विपद्।

सम्+सम्यग् इष्टौ अक० सम्पद्यते सम्पद्।

पद् गतौ भ्वा० चु०आत्म०सक० सेट्। पदयते अपपदत।

पद् पु०पद्यते गच्छत्यनेन करणे क्विप्। पादे "पदादयः पृथक् शब्दा दत्येके "पदङ्घ्रिचरणोऽस्त्रियाम्" अमरः।

पद न० पद्-अच्। १व्यवसाये २लक्ष्ये ३स्थाने ४चिह्ने ५पादे ६वस्तुनि च अमरः। ७विभक्त्यन्तशब्दभेदे "सुप्तिङन्तं पदम्" पा०। ८वाक्यैकदेशे च "वर्णाः पदं प्रयोगार्हान्वितैकार्थबोधकाः" सा०द०। ९श्लोकचरणे १०किरणे पु० मेदि० ११अर्थबोधकशक्तिविशिष्टे नैयायिकाः "शक्तिमत्त्वं पदत्वमिति" तल्लक्षणात्।

पदक त्रि० पदं वेत्ति क्रमा०वुन्। १वेदमन्त्रपदविभाजकग्रन्थाध्येतरि २तद्वेत्तरि च ३गोत्रप्रवर्त्तकर्षिभेदे पु०ततः अपत्ये इञ् पादकि तदपत्ये पुंस्त्री०। यस्का० बहुत्वे लुक्। पदकान्तद्वोत्रापत्येषु।

पदकार पु० पदं पदविभागं करोति कृ-अण् उप०स०। वेदानां मन्त्रपदविभाजकग्रन्थकर्त्तरि।

पदक्रम पु० इत०। वेदमन्त्राणां पदविभाजकक्रमे। तमधीते वेत्ति वा उक्था०ठक्। पादक्रमिक तदधीताध्येतरि तद्वेत्तरि च त्रि०।

पदक्रमक न० पदं क्रमश्च तौ वेत्त्यधीते वा वुन्। १पदक्रमयोर्वेत्तरि २तदधीताध्येतरि च। [पदातिङे अमरः।

पदग त्रि० पादेन गच्छति गम-ड पादस्य पद इत्यादेशः।

पदगोत्र न०इत०। "भारद्वाजमाख्यातं भार्गवं नाम, वार्षिष्ठ उपसर्गः, निपातः काश्यपः" इत्येषु यजु० प्रातिशाख्योक्तेषु भारद्वाजादिषु पदानां गोत्रेषु। "चत्वारिपदजातानि आख्यातनामनिपातोपसर्गाः" इति निरुक्तोक्तानां च तेषां चतुर्णां भारद्वाजादिगोत्रत्वम्। [मन्त्रे निरुक्त०।

पदजात न० इत०। आख्यातनामनिपातोपसर्गरूपे शब्दपदच्छल पु०ऋषिभेदे ततः अपत्ये गोत्रप्रत्ययस्य बहुत्वे लुक्।

पददेवता स्त्री पदानां आख्यातादीनां देवता। आख्यातादीनां सोमादिषु देवतासु "सौम्यमाख्यातं नाम वायव्यमाग्नेय उपसर्गः निपातोवारुणः" वाजपेयिप्रतिशाख्यम्। ६।६। [सू०६।१।१

पदनिधन न०पदमधिकृत्य निधनम्। सामभेदे ताण्ड्यादयश्च०

पदन्यास पु० इत०। १चरणार्पणे। पदस्येव न्यासोऽस्त्र। २गोत्तरहस्ये शब्दच० तन्त्रोक्ते अङ्गन्यासमन्त्रस्य पदानां तत्तदङ्गेषु १न्यासे च यथाह तन्त्रसा०"ज्ञानार्थं वै एकमेकं पुनश्चैकं पुनरेकं द्वयं ततः। चतुष्टयन्तथा ह्यन्यं पदान्येतानि पार्वति!। पदान्येतानि देवेशि! नवद्वारेषु विन्यसेत्। मूर्द्धादिगुह्यपर्य्यन्तं पुनस्तेषु वरानने!। गुह्यादिब्रह्मरन्ध्रान्तं पदानां नवकं न्यसेत्"। तदुक्तं तत्रैव "ब्रह्मरन्ध्राच्छुदयमूलाधारेष्वनुक्रमात्। चतुर्वीजानि विन्यस्य परेषत्यांय विन्यसेत्। ब्रह्मध्यानाधिका कण्ठनाभिहृच्छिरेषु पञ्चस्त। पूर्ववत् क्रमतो देवि! नमःप्रभृतिकं न्यसेत्"। [पाठान्तराच्च साम्राम्" देवीभा०।

पदपाठ पु० इत०। वेदपदविभाजकग्रन्थभेदे "सहीचरस्य

पदभञ्जन न० पदानि भञ्जन्त्यनेन भञ्ज-करणे ल्युट्। १निरुक्तरूपे ग्रन्थे २गूढार्थव्याख्याने च [हेमच०।

पदभञ्जिका स्त्री पदानि भञ्जति भञ्ज-ण्वुल्। टीकायाम्

पदमञ्जरी स्त्री पदानां मञ्जरीव। व्याकरणग्रन्थभेदे। [देवीपु० ६अ०।

पदमाला स्त्री इत०। १पदश्रेण्यौ २मोहननामविद्यायाम्

पदवि(वी) स्त्री पद्-अवि वा ङीप्। १पथि। अमरः २धर्माचारे च। [२०२अ०।

पदविग्रह पु० पदेन विग्रहो यत्र। समासे हरिवं०

पदव्याख्यान न० इत०। वेदमन्त्रस्य विभाजकग्रन्थभेदे तस्य व्याख्यानो ग्रन्थः तत्र भवो वा अश्वयना० अण्। पादव्याख्यान तस्य व्याख्याने तत्रभवे च त्रि०।

पदष्ठीव न० पादौ च अष्ठीवन्तौ च द्वन्द्व० नि०। पादजानुनोः समाहारे।

पदस्तोभ पु० पदस्थितः स्तोभः। पदमध्यपठिते निरर्थके शब्दभेदे गानशब्दे २५७२पृ०उक्तम्। [क्षितावां राजनि०।

पदाङ्को स्त्री पदं हंसपदमिवाङ्कं यस्याः ङीष्। हंसपदी-

पदाजि पु० पादेन अजति गच्छति अज-इण्। "पादस्य पदाज्यतीति" निर्देशात् अभावः पादस्य पद इत्यादेशः। पादेन गन्तरि पदातौ अमरः।

पदात त्रि०पादेनातति अत-अच्। पदातौ शब्दरत्ना०।

पदाति पु० पादेन अतति गच्छति उपपदि अत-इण् पदादेशः। पादेन गन्तरि (पेयादा) अमरः। स्वार्थे क। पदातिक तत्रार्थे शब्दर०।

पदाद्यविद् पु० पदादिं न वेत्ति विद-क्विप् ६त०। पदाद्युच्चारणानभिज्ञे ज्ञात्यगर्ह्ये अपक्वटक्वाले डारा०।

पदानुशासन न० पदान्यनुशिष्यन्तेऽनेन अनु+शास-करणे ल्युट्। शब्दानुशासने व्याकरणे मेदि०।

पदानुस्वार पु० ग्रामभेदे लाट्यायन० ६।६।१

पदान्त पु० ६त०। पदावसाने

पदान्तर न० अन्यत् पदम् मयू० स०। एकपदभिन्ने अन्यस्मिन्। १पदे २स्थानान्तरे च। [क्षिकेच मेदि०।

पदार पु० पदात् क्रन्दति अ-अच् ५त०। १पादधूलौ २पदा-

पदार्थ पु० ६त०। शब्दाभिधेये द्रव्यादौ। पदार्थाश्च दर्शनभेदेन नानाविधाः तत्तद्दर्शनमतपदर्शने उक्ता यथा वैशेषिकाणां द्रव्यादयः षट्, सप्त वा, नैयायिकानां प्रमाणादयः षोडश, सांख्यानां प्रकृत्यादयः पञ्चविंशतिः, पातञ्जलानां सेश्वराः प्रकृत्यादयः षड्विंशतिः। वेदान्तिनाम् चिदचिदात्मकौ द्वाविंशेवं बोध्यम्।

पदालिक पु० पदस्य चरणस्यालिकमिव। चरणोपरिभागे

पदासन ६त०। पादपीठे हेमच०।

पदि इ० पद्यते पद-कर्मणि इन्। गन्तव्ये निरु० "पदिर्गन्तुर्भवति यत् पद्यते" निरु० ५।१८। "पदिस्तृप्तिनाति" उज्ज्व०१।१२५।२। [चारिषि स्त्रियां पित्त्वात् ङीष्।

पदिक त्रि० पादेन चरति पर्या० ठन् पदादेशश्च। पाद-

पदिन्याय पु० जैमि० १।१।१८ सूत्रोक्ते न्यायभेदे।

पदिहोम पु० पदि पादस्थाने होमः मध्य०स०। पदि जुहोति वक्ष्यमि जुहोतीतिस्तुतिविहितहोमभेदे तत्र पादस्थ हस्तिनएव याज्ञः "सर्वे पदो हस्तिपदे निमग्नाः" इत्युक्तेः। [पादेनोपहते।

पदोपहत त्रि० पादेन उपहतः पादस्य पद इत्यादेशः।

पद्ध त्रि० पद्भ्यां गच्छति गम-ड ३त०। पद्भ्यां गन्तरि पदातौ अमरः। पादशब्देन समासेतु अदन्तपदादेशे पदग इत्येव।

पद्धोष पु० ६त० वा पदादेशः। पादशब्दे। एवं शब्दभिन्नयोरपि वा पदादेशे पच्छब्दपक्षे पादशब्दाद्यर्थे पक्षे पादघोष पादशब्द पादभिन्न तत्तदर्थे।

पद्धति(ती) स्त्री पादेन हन्यते गम्यते हन-गतौ आधारे क्तिन् पदादेशः वा ङीप्। १पथि २पङ्क्तौ च मेदि०। ३ग्रन्थस्य निष्कृष्टार्थबोधके ग्रन्थभेदे हेमच०। ४उपनामभेदे च च्यूढस्य वसुघोषादिः। "गृह्णां नामकरणं वसुघोषभिलादिरूपपद्धतियुक्तनामत्वम्" उद्वा० रघु०।

पद्धिम न० पादस्य हिमं पदादेशः। पादशीतत्वयोः।

पद्म न० पद्-मन्। १जमले २गजसुखादिस्थे बिन्दुसदृशदाये कमलाकारेच सैन्यादेरभिनिवेशनरूपे ३व्यूहभेदे ४निधिभेदे "अर्बुदमब्जमिति पद्मपर्यायाञ्जनाख्योक्तायां ५दशार्बुदसंख्यायां ६तत्संख्यातेषु ७पुष्करमूले ८हीबेरे धानौ ९शरीरस्थे नाडीचक्रभेदे च मेदि० १०पद्मकाष्ठौषधौ धरणिः। देहस्थपद्मानि च चक्रत्वेन प्रसिद्धानि तानि च चक्रशब्दे २८०८पृ० दर्शितानि। कमले पु०न० अमरे स्थितं तत्रास्य पुंस्त्वमपयुक्तादोषयुक्तमिलाक्षद्वारिकाः। ११दाशरथौ १२नागभेदे पु० धरणिः। १३जिनचक्रवर्त्तिभेदे पु०हेम० १४रतिबन्धभेदे पु० "हस्ताभ्यान्तु समाक्रिम्य नारी पद्मासनोपरि। रमेदुगाढं समाक्रम्य बन्धोऽयं पद्मसंज्ञकः" रतिम०।

पद्मक न० पद्ममिव कायति कै-क। १गजसुखादिस्थे पुष्पाकारे बिन्दुसदृशे अमरः। २पद्मकाष्ठे मेदि०। ३कुष्ठौषधौ राजनि० स्वार्थे क। ४पद्मशब्दार्थे च पद्मकाष्टगुणाः भावप्र० उक्ता यथा "पद्मकं त्वरं तिक्तं शीतलं वातलं लघु। शीतपित्तविस्फोटकृमिरक्तक्षयापहम्। गर्भसंस्थापनं रूक्षं वमिप्रशमनं परम्" [दयोऽप्यत्र।

पद्मकर पु० पद्मं करेऽस्य। पद्महस्ते विष्णौ पद्महस्ता-

पद्मकन्द पु० ६त०। कमलकन्दे शालूके "शालूकं शीतलं हृद्यं पित्तदाहास्रनुद् गुरु। दुर्जरं स्वादुपाकञ्च सन्धानिलकफप्रदम्। संपाकि मधुरं रूक्षं भिन्नाखण्डमपि तद्गुणम्" भावप्र०।

पद्मकाद्यघृत न० "पद्मकास्तनिम्बानां धान्यचन्दनयोः पचेत्। कल्के क्वाथे च घृतपः प्रस्थं ज्वरनिवारणम्। तच्चारुचिप्रशमनं दाहज्वरहरं परम्" चक्रदत्तोक्ते घृतभेदे

पद्मकाष्ठ न०पद्ममिव सुगन्धि काष्ठमस्य। ओषधिभेदे राजनि०

पद्मकिन् पु० पद्मकं बिन्दुजालमस्यास्त्यत्र इनि। १भूर्जवृक्षे शब्दमा०। २हस्तिनि [२०५८पृ० दृश्यम्।

पद्मकीट पु० पद्मनिव कीटः। कीटभेदे सुश्रुतः कीटशब्दे

पद्मकेतन पु०१गरुडात्मजभेदे भा०उ०१००अ०। हेत०। २पद्मनिवासे न०

पद्मकेशर पु०न० हेत०। किञ्जल्के राजनि०।

पद्मगन्ध(न्धि) त्रि०पद्मस्येव गन्धोऽस्य वा इच् समा०। १पद्मतुल्यगन्धयुक्ते। इदनः। २पद्मकाष्ठे न० भावप्र०।

पद्मगर्भ पु० पद्मं विष्णुनाभिकमलं गर्भ इव उत्पत्तिस्थानमस्य। चतुरानने ब्रह्मणि शब्दर० तस्य तथोत्पत्तिर्यथा "परावरेषां भूतानामात्मा यः पुरुषः परः। स एवासीदिदं विश्वं कल्पान्तेऽन्यन्न किञ्चन। तस्य नाभेः समभवत् पद्मकोशो हिरण्मयः। तस्मिंस्तज्ञे महाराज! स्वयम्भूश्चतुराननः" भाग०८।१।३। पद्मस्य हृदयपुण्डरीकस्य गर्भोऽध्य उपासनास्थानतयाऽस्य। २परमेश्वरे "पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत्" विष्णुस०। हेत०। ३कमलमध्ये च। [भा०आ० ६६अ०। २लक्षे च

पद्मगुणा स्त्री पद्मं गुणवति आसनत्वेन गुण-क। १लक्ष्म्यां

पद्मचारिणी स्त्री पद्मनिव चरति चर-णिनि। उत्तराषाढप्रसिद्धे स्वनामख्याते सुतभेदे अमरः।

पद्मज पु० पद्मात् विष्णुनाभिकमलात् जायते जन-ड। ब्रह्मणि चतुर्मुखे पद्मगर्भशब्दे दृश्यम्। पद्मजातादयोऽप्यत्र।

पद्मतन्तु पु० हेत०। मृणाले राजनि०।

पद्मदर्शन त्रि० पद्मस्येव दर्शनमस्य। १पद्मतुल्यदर्शने (नीवा) इति ख्याते २वृक्षे पु० शब्दच०।

पद्मनाभ पु० पद्मं नाभौ यस्य संज्ञायाम् अच्स०। १विष्णौ। "पद्मनाभोऽरविन्दाक्षः" विष्णुसं० भाष्ये तु पद्मस्य नाभौ स्थित इत्येवं उक्तम्। तत्र अर्श आद्यच् इति भेदः। २धृतराष्ट्रपुत्रभेदे भा० आ० ६७अ०। ३नागभेदे पु० भा०३५७अ०। [समा०। विष्णौ हिरूपकोषः।

पद्मनाभि पु० संज्ञात्वेऽपि समासान्तविधेरनित्यत्वात् न अच्

पद्मनाल न०स्त्री हेत०। मृणाले [पु० फेमः।

पद्मनेत्र त्रि०पद्मनिव नेत्रमस्य। १पद्मतुल्यनेत्रयुक्ते २वुद्धभेदे

पद्मपत्र न० पद्मस्य पत्रमिव। १पुष्करमूले अमरः हेत०। २कमलदले च पद्मपर्णादयोऽप्यत्र न०।

पद्मपाणि पु० पद्मं पाणौ यस्य। ब्रह्मणि १चतुर्मुखे २बुद्धे त्रिका०। ३कमलहस्तके त्रि०।

पद्मपुराण न० व्यासप्रणीते महापुराणभेदे तत्प्रतिपाद्यादि नारदीयपु० उक्तं यथा

प्रथमे सृष्टिखण्डे "पुलस्त्येन तु भीष्माय सृष्ट्यादिक्रमतो द्विज!। नानाख्यानेतिहासाद्यैर्वेदोक्तो धर्मविस्तरः। पुष्करस्य च माहात्म्यं विस्तरेण प्रकीर्त्तितम्। ब्रह्मयज्ञविधानञ्च वेदपाठादिलक्षणम्। दानानां कीर्त्तनं यत्र दत्तानाञ्च पृथक् पृथक्। विवाहः शैलजायाञ्च तारकाख्यानकं महत्। माहात्म्यञ्च गवादीनां कीर्त्तितं सर्वपुण्यदम्। कालकेयादिदैत्यानां वधो यत्र पृथक् पृथक्। पदार्थानामर्जनं दानं यत्र प्रोक्तं द्विजोत्तम!। तत् सृष्टिखण्डसंज्ञितं व्यासेन मुनिभाषितम्" द्वितीये भूमिखण्डे "पितृमात्रादिपूजात्वे शिवधर्मकथा पुरः। सुव्रतस्य कथा पश्चात् दक्षस्य च वधस्तथा। पृथोर्वैन्यस्य चाख्यानं धर्माख्यानं ततः परम्। पितृशुश्रूषाख्यानं नहुषस्य कथा ततः। ययाति-चरितञ्चैव गुरुतीर्थनिरूपणम्। राज्ञा जैमिनिसंवादो वङ्गाश्वर्थकथायुतः। कथा ह्यशोकसुन्दर्य्या कुण्डदैत्यवधान्विता। कामोदाख्यानकं तत्र विष्णुखण्डवधसंयुतम्। कुञ्जलस्य च संवादश्रवणेन महात्मना। सिद्धाख्यानं ततः प्रोक्तं खण्डस्यास्य फलोदयम्। सूतशौनकसंवादं भूमिखण्डमिदं स्मृतम्"। तृतीये स्वर्गखण्डे "ब्रह्माण्डोत्पत्तिरुदिता यत्रविष्णोश्च सौतिना। सप्तभूमिलोकसंस्थानं तीर्थाख्यानं ततः परम्। नर्मदोत्पत्तिकथनं तत्तीर्थानां कथा पृथक्। कुरुक्षेत्रादितीर्थानां कथाः पुण्याः प्रकीर्त्तिताः। कालिन्दीपुण्यकथनं कार्त्तीमाहात्म्यवर्णनम्। गयायाश्चैव माहात्म्यं प्रयागस्य च पुण्यकम्। वर्णाश्रमानुरोधेन कर्मयोगनिरूपणम्। व्यासजैमिनिसंवादः पुण्यकर्मकथान्वितः। समुद्रमथनाख्यानं व्रताख्यानं ततः परम्। ऊर्ज्जव्रताच्च माहात्म्यं श्रोतॄणां सर्वपापहृत्। एतत् स्वर्गाभिधं विप्र! सर्वपातकनाशनम्"। चतुर्थे पातालखण्डे "रामाश्वमेधे प्रथमं रामराज्याभिषेचनम्। अगस्त्याद्यागमश्चैव पौलस्त्यान्वयकीर्त्तनम्। अश्वमेधोपदेशश्च ह्यवध्यां ततःपरम्। नाना राजकथाः पुण्या जगन्नाथानुवर्णनम्। वृन्दावनस्य माहात्म्यं सर्वपापप्रणाशनम्। नित्यलीलानुकथनं यत्र कृष्णावतारिणः। माधवस्थानमाहात्म्ये स्नानदानार्च्चने फलम्। धरावराहसंवादो यमब्राह्मणयोः कथा। संवादो राज-

दूतानां कण्वकोत्पत्तिनिरूपणम्। शिवशर्म्मसमावेशो दधीच्याख्यानकथनतः। भक्तमाहात्म्यमतुलं शिवमाहात्म्यसंयुतम्। देवरातसुताख्यानं पुराणाश्च प्रशंसनम्। गौतमाख्यानकथैव शिवगीता ततः कृता। कल्पान्तरी रामकथा भारद्वाजाश्रमस्थितौ। पातालखण्डमेतद्वि श्रृण्वतां ज्ञानिनां सदा। सर्वपापप्रशमनं सर्वाभीष्टफलप्रदम्"। पञ्चमे उत्तरखण्डे "पर्वताख्यानकं पूर्वं गौर्य्यै प्रोक्तं शिवेन वै। जालन्धरकथा पश्चात् श्रीशैलाद्यनुकीर्त्तनम्। सागरस्य कथा पुण्या ततःपरमुदीरिता। महाप्रयागकाशीनां गयायाश्चाधिपुण्यकम्। श्राद्धादिदानमाहात्म्यं तन्महाद्वादशीव्रतम्। चतुर्विंशैकादशीनां माहात्म्यं पृथगीरितम्। विष्णुधर्म्मसमाख्यानं विष्णुनामसहस्रकम्। कार्त्तिकव्रतमाहात्म्यं माघस्नानफलन्ततः। जम्बुद्वीपस्य तीर्थानां माहात्म्यं पापनाशनम्। साधुसङ्गाच्च माहात्म्यं ऋषिकोत्पत्तिवर्णनम्। देवशर्म्मादिकाख्यानं गीतामाहात्म्यवर्णने। भक्ताख्यानञ्च माहात्म्यं श्रीमद्भागवतस्य च। इन्द्रद्युम्नस्य माहात्म्यं बकतीर्थकथाचितम्। मन्वन्तराभिधानञ्च विष्वक्सेनुसवर्णनम्। अवतारकथा पुण्या मत्स्यादीनामतःपरम्। रामनामशतं दिव्यं तन्माहात्म्यञ्च वाडव!। परीक्षाञ्च श्रुत्वा श्रीविष्णोर्वैभवञ्च च। इत्येतदुत्तरं खण्डं पञ्चमं सर्वपुण्यदम्" तत्फलश्रुतिः "पञ्चखण्डयुतं पाद्मं यः श्रृणोति नरोत्तमः। स लभेद्वैष्णवं धाम भुक्त्वा भोगानिहेप्सितान्। एतद्वै पञ्चपञ्चाशत्सहस्रं पद्मसंज्ञकम्। पुराणं लेखयित्वा वै ह्यैश्वर्य्यसंयुतम्। यः प्रदद्यात् सुमतये पुराणाय मानदः। स याति वैष्णवं धाम सर्वदेवनमस्कृतः। पद्मानुक्रमणीमेतां यः पठेत् श्रृणुयात् तथा। सोऽपि पद्मपुराणस्य लभेत् चरणजं फलम्"।

पद्मपुष्प पु० पद्ममिव पुष्पमस्य। १कर्णिकारवृक्षे २पिप्पलीभेदे पुंस्त्री० शब्दच० स्त्रियां ङीष्।

पद्मप्रभ त्रि० पद्मस्येव प्रभा यस्य। १कमलसदृशप्रभान्विते २जैनभेदे पु० हेमच०। [मनसादेव्यां शब्दच०।

पद्मप्रिया स्त्री पद्मं प्रियं यस्याः। जरत्कारुमुनिपत्न्यां

पद्मबन्ध पु० चित्रालङ्कारभेदे अलङ्कारशब्दे २६०पृ०दृश्यम्।

पद्मबन्धु पु० हृत०। १सूर्य्ये शब्दरत्ना० २सूर्य्यवृक्षे च ३अरके शब्दच०।

पद्मभू पु० पद्मात् विष्णुनाभिकमलात् भवति भू-क्विप्। चतुर्मुखे ब्रह्मणि हेमा०। पद्मगर्भसदृशे दृश्यम्।

पद्ममुख त्रि० पद्ममिव सुखमस्य। १कमलसदृशमुखयुते स्त्रियां वा ङीष्। सा च २दुर्वासतायां शब्दच०।

पद्ममुद्रा स्त्री "हस्तौ तु सम्मुखौ कृत्वा तदधःप्रोथिताङ्गुली। तत्तान्तर्मिलिताङ्गुष्ठौ कल्पैषा पद्मसंज्ञिका" तन्त्रसारोक्ते मुद्राभेदे [चतुर्थे अमरः।

पद्मयोनि पु० पद्मं विष्णुनाभिकमलं योनिरस्य। ब्रह्मणि

पद्मराग न० पद्मस्येव रागोऽस्य। रक्तवर्णमणिभेदे तद्गुणादि ह०सं० ४० उक्तं यथा

"सौगन्धिककुरुविन्दस्फटिकेभ्यः पद्मरागसम्भूतिः। सौगन्धिकजा अमराङ्गनाजनभ्रुरसद्युतयः। कुरुविन्दुभवाः सबला मन्दद्युतयश्च धातुभिर्विद्धाः। स्फटिकभवा द्युतिमन्तो नानावर्णा विशुद्धाश्च। स्निग्धः प्रभानुलेपी सच्छोऽर्चिष्मान् गुरुः सुसंस्थानः। अनुप्रभाऽतिरागा मणिरत्नगुणाः समस्तानाम्। कलुषा मन्दद्युतयो लेखाकीर्णाः सधातवः खण्डाः। दुर्विद्धा न मनोज्ञाः सपर्करा इति मणिदोषाः। भ्रमरशिखिकण्ठवर्णौ दीपशिखासमप्रभौ भुजङ्गानाम्। भवति मणिः किल मूर्द्धनि योऽनर्घो वै स विज्ञेयः। यस्तं बिभर्त्ति भुजाधिपतिर्न तस्य दोषा भवन्ति विषरोगजताः कदाचित्। राष्ट्रे च नित्यमभिवर्षति तस्य देवः शत्रूंश्च नाशयति तस्य मणेः प्रभावात्। षड्विंशतिः सहस्राण्येकस्य मणेः पद्मप्रभस्य। कर्षत्रयस्य विंशतिरुपदिष्टा पद्मरागस्य। अर्द्धपलस्य द्वादश कर्षस्यैकस्य षट् सहस्राणि। यद्दाडिमाभकलितं तस्य सहस्रत्रयं मूल्यम्। आम्रकपत्रद्वयं दशशतकयं हौ तु पद्मशतमूल्यौ। परिकल्प्यमनारागे मूल्यं हीनाधिकगुणानाम्। वर्णमूल्यार्धं तेजोहीनस्य मूल्यमष्टांशः। अल्पगुणो बहुदोषो मूल्यात् प्राप्नोति विंशांशम्। स्निग्धं ह्रस्वत्वं अल्पगुणं चाप्नुयाद्विंशभागम्। इति पद्मरागमूल्यं पूर्वाचार्य्यैः समुद्दिष्टम्"। युक्तिकल्पतरौ जातिविशेषो यथा "सिंहले तु भवेद्रक्तं पद्मरागमनुत्तमम्। पीतं काञ्चपुरोद्भूतं कुरुविन्दमिति स्मृतम्। अशोकपल्लवच्छायमतं सौगन्धिकं विदुः। ताम्रारे जायया नीलं नीलगन्धि प्रकीर्त्तितम्। उत्तमं सिंहलोद्भूतं निकषे ताम्रवर्णकम्। मध्यमं मध्यमं ज्ञेयं माणिक्यं खेलभेदतः" तथा "जम्बूकगुञ्जाग्रकदेन्द्रगोपजवासनाकृत्

समवर्णशोभाः । स्वाभिष्णो दाडिमबीजवर्णास्तथा परे किंशुकपुष्पभासः । सिन्दूरपद्मोत्पलकङ्कुमानां साचारसस्यापि समानवर्णाः । सान्द्रेऽतिरागे प्रभवा खयैव भान्ति स्वच्छा स्फुटमध्यशोभाः । भानोश्च भासा मणुवेधयोगमासाद्य रश्मिप्रकरेण दूरम् । पार्श्वानि सर्वाण्यनुरञ्जयन्ति गुणोपपन्नाः स्फटिकप्रसूताः । कुसुमनीलोव्यतिमिश्ररागप्रत्ययरक्ताम्बरतुल्यभासः । तथा परे ऽरुष्करकण्टकारीपुष्पसन्निभो हिङ्गुलकसन्निभोऽन्ये । चकोरपुंस्कोकिलसारसानां नेत्रावभासश्च भवन्ति केचित् । अन्ये पुनर्नीतिविपुञ्जितानां तुल्यत्विषः कोकनदोदराणाम् । प्रभावकाठिन्यगुरुत्वयोगैः प्रायः समानाः स्फटिकोद्भवानाम् । कानीलरक्तोत्पलचारुभासः सौगन्धिकाख्या मणयो भवन्ति । यो मन्दरागः कुरुविन्दजेषु स एव जातः स्फटिकोद्भवेषु । निरन्तरोऽत्यर्थघनः समश्च भवन्ति प्रभावन्तोऽपि न तत्समानाः । ये तु रावणगङ्गायां जायन्ते कुरुविन्दकाः । पद्मरागा घनं रागं बिभ्राणाः स्वस्फुटार्चिषः । वर्णोत्तमायास्तेषामन्यदेशे तथाऽपरे । न जायन्ते तु ते केचित् मूल्यतेजसमन्वयुः । तथैव स्फटिकोत्थानां देशे तुम्बुरसंज्ञके । सप्तधर्माणः प्रजायन्ते सत्त्वमुख्या हि ते मताः" । इत्यादि "माणिक्यस्य प्रवक्ष्यामि यथा जातिचतुष्टयम् । ब्रह्मक्षत्रियवैश्याच्च शूद्रायाश्च यथाक्रमम् । रक्तश्वेतो भवेद्विप्रस्तिरक्तस्तु क्षत्रियः । रक्तपीतो भवेद्वैश्यो रक्तनीलस्तथाऽन्यजः । पद्मरागो भवेद्विप्रः कुरुविन्दस्तु बाहुजः । सौगन्धिको भवेद्वैश्यो मांसखण्डस्तथान्यजः । शोणपद्मसमाकारः खदिराङ्गारसप्रभः । पद्मरागो द्विजः प्रोक्तश्छायाभेदेन सर्वदा । गुञ्जाबन्धूकसिन्दूरबन्धूकनागरङ्गसमप्रभः । दाडिमीकुसुमाभासः कुरुविन्दस्तु बाहुजः । हिङ्गुलाभाशोकपुष्पाभश्चीयत्प्रीतश्चोच्छ्रितम् । जवाकाचारसप्रायं वैश्यं सौगन्धिकं विदुः । आरक्तः कान्तिहीनश्च चिक्कणश्च विशेषतः" । मांसखण्डसमाभासो ज्ञान्यजः प्रापनाशनः" । तद्दोषादि "माणिक्यस्य समाख्याता अष्टौ दोषा मनीषिभिः । छिद्रायत्वं द्विरूपत्वं सश्वेदः कर्करस्तथा । अशोभनं कोकिलत्वं जलं धूम्राभिषत्वं वै । गुणाश्चत्वार आख्याताञ्छायाः षोडश कीर्तिताः" । छायास्तु पूर्वोक्ता एव "छाया हितत्वसम्बन्धाद्धिक्षायं बन्धुनाशनम् । विरूपं विपदं तेन माणिक्येन पराभवः । सश्वेदो भिन्नमित्युक्तः शस्त्रघातविधायकः । कर्करं कर्करायुक्तं पशुबन्धुविनाशकृत् । दुग्धेनेव समाक्षिप्तं मधोः पुटकमुच्यते । अशोभनं समुद्दिष्टं माणिक्यं बन्धुदुःखकृत् । मधुबिन्दुसमच्छायं कोकिलं परिकीर्त्तितम् । आयुर्लक्ष्मीर्यशो हन्ति सदोषं तच्च धारयेत् । रागहीनं जलं प्रोक्तं धनधान्यापवादकृत् । धूम्रं धूमसमाकारं वैद्युतं भयमावहेत्" । तथा "शोभादित्यवतो ये मणयः क्षत्रिकारकाः । सभयत्वं पटं वेधां तेन च स्यात् पराभवः । भिन्नेन युद्धे स्यात् कर्करं धननाशकृत् । दुग्धेनेव समाक्षिप्तः पुटके यस्तु सम्भवेत् । दुःखकृत् स समाख्यातो न स्वपरक्षणीयकः । मधुबिन्दुसमा शोभा कोकिलानां प्रकीर्त्तिता । तेषां च बहुभेदाः स्युर्न ते ग्राह्या कदाचन" । अथ गुणाः "गुरुत्वं स्निग्धता चैव वैमल्यमतिरक्तता । वर्णाधिक्यं गुरुत्वञ्च स्निग्धता समताऽच्छता । अर्चिष्मत्ता महत्ता च मणीनां गुणसंग्रहः" । फलम् "ये कर्करास्तिद्रुमलोपदिग्धाः प्रभाविसक्ताः परुषा विवर्णाः । न ते प्रशस्ता मणयो भवन्ति समानतो जातिगुणैः समस्तैः । दोषोपरुद्धं मणिमप्रबोधाद्बिभर्त्ति यः कश्चन कश्चिदेकम् । तं बन्धुदुःखायसबन्धवित्तनाशादयो दोषगुणा भजन्ते । सप्तप्रभेदेऽपि कृताधिवासं प्रमादहत्त्वापि वर्त्तमानम् । न पद्मरागस्य महागुणस्य भर्त्तारमापत् सहसैति काचित् । दोषोपसर्गप्रभवाश्च ये ते नोपद्रवास्तं समभिद्रवन्ति । गुणैः स गुह्यैः सकलैरुपेतो यः पद्मरागं प्रयतो बिभर्त्ति" । परीक्षा यथा "बालार्ककरसंस्पर्शात् यः शिखां लोहितां वमेत् । रक्तवेदाश्रयं वापि स महागुण उच्यते । दुग्धे शतगुणे क्षिप्तो रक्तवेद्यः समन्ततः । वमेल्लिक्षां लोहितां वा पद्मरागः स उत्तमः । अन्धकारे महाघोरे यो न्यस्तः सूनृमङ्गमणिः । प्रकाशयति खद्योतः स श्रेष्ठः पद्मरागकः । पद्मकोषे तु यच्छस्तं विकाशयति तत्क्षणात् । पद्मरागवरो ह्येष देवानामपि दुर्लभः । सर्वारिष्टप्रशमनाः सर्वसम्पत्तिदायकाः । चत्वारस्तु मयोद्दिष्टा गुणिनश्च यथोत्तरम् । यो मणिर्दृश्यते दूराज्ज्वलदग्निसमच्छविः । वंशकान्तिः स विज्ञेयः सर्वसम्पत्तिकारकः । पद्मप्रभवविंशतिरागः क्षिप्र एव सकलः खलु यस्य । वर्णवेदमति वा करजालस्तरोत्तरमहागुणिनस्ते । नीलं रसं दुग्धरसं जलं वा ये रञ्जयन्ति दिशतश्चमाद्यम् । ते ते यथापूर्वमतिप्रशस्ताः सौभाग्यसम्पत्तिविधानदाक्षाः" । परि-

माषम् "गुञ्जाफलप्रमाणस्तु दशगुञ्जात्मकः। पद्मरागस्तुलयति यवानष्टौ महागुणः। क्रोष्टुकोल फलाकारो द्वादशाष्टाक्षिगुञ्जकान्। पद्मरागस्तुलयति यवानष्टौ महागुणः। बदरीफलतुल्यो यः स्वरदिग्वसुमाषकः। तथा धात्रीफलनिर्मितिद्वयष्टमाषकः। तथाऽक्षफलतुल्यो यो वह्निपलैकमाषकः। ताम्बूलफलमानो यश्चतुस्त्रिंशतोलकः। बिल्वीफलसमाकारो वसुषड्द्वयतोलकः। अतःपरं प्रमाणेन मानेन च न लभ्यते। यदि लभ्येत पुण्येन तदा सिद्धिमवाप्नुयात्। केचिच्चारुतराः सन्ति जातीनां प्रतिरूपकाः। विज्ञातयः प्रयत्नेन विद्वांस्तानपलक्षयेत्। कलसपुरोद्भवसिंहलतम्बुरुदेशोत्पत्तिमाश्रीयाः। श्रीमणिकायाः सदृशा विज्ञातयः पद्मरागाणाम्। तृणोपलगर्भात् कलसाभिधानमाताम्रभावादपि ताम्बुरोत्थम्। काष्ठाद्रौत्तया सिंहलदेशजातं सङ्गामिधानं नभसः स्वभावात्। श्रीपर्णकं दीप्तिनिराकृतित्वाद्विजातिचिह्नाश्रय एष भेदः"। तथा "स्निग्धप्रदेहो महता गुणेन विज्ञातिचिह्नं खलु सर्वजन्यम्। यः श्यामिकां पुष्यति पद्मरागो यो वा तृणाग्निमिव चूर्णमध्यः। स्निग्धप्रदिग्धो न च यो विभाति यो वा प्रस्फुटः प्रजहाति दीप्तिम्। आक्रान्तमूर्ध्वं च तथाकुलिस्थां यः कान्तिकां पार्श्वगतां बिभर्त्ति। सम्राज्य चोत्तेजपथानुवृत्तिं बिभर्त्ति यः सर्वगुणानतीव। तुल्यप्रमाणस्य च तुल्यजाते यो वा गुरुत्वेन भवेच्च तुल्यः। प्राप्यापि रत्नाकरजां स्वजातिं लभेत् गुरुत्वेन गुणेन विद्वान्। अप्रयत्नतः सन्देहे शिलायां परिघर्षयेत्। स्फुटो योऽल्पनखोभावात् परिमाणं न सहते। स ज्ञेयः शुद्धजातिस्तु ज्ञेयाश्चान्ये विजातयः। स्वजातकसतत्वेन विलिखेद्वा परस्परम्। वज्रं वा कुरुविन्दं वा विसृज्यान्योन्यलेन चेत्। न शक्यं लेखनं कर्तुं पद्मरागेन्द्रनीलयोः। जात्यस्य सर्वेऽपि मणेर्न जातु विजातयः कान्तिसमानवर्णाः। तथापि नानाकरणार्थमेवं भेदप्रकारः परयोः प्रदिष्टः। तृणोपलेन सदृशवह्नौ मणिस्तु धार्यो विगुणेन जात्यः। न कौसुम्भेनापि सदृशवर्णं विद्वान् विजातिं विभृयात् कदाचित्। चरणेन एकोऽपि यथा द्विजातीन् समेत्य भूरीनपहन्त्यदत्रात्। तथा मणीन् भूरिगुणोपपन्नान् शक्नोति विद्रावयितुं विजातः"। तस्य मूल्यम् "बालार्कभिन्नसं हत्वा दर्पणे धारयेन्मणिम्। तत्र कान्तिविभागेन छायाभागं विनिर्दिशेत्। वज्रस्य यत्तच्छुभसंख्ययोक्तं मूल्यं सतत्त्वेपितगौरवस्य। तत् पद्मरागस्य गुणान्वितस्य स्वान्यापकाख्यातुलितस्य मूल्यम्। यन्मूल्यं पद्मरागस्य सगुणस्य प्रकीर्त्तितम्। तावन्मूल्यं तथा शुद्धे कुरुविन्दे विधीयते। सगुणे कुरुविन्दे च यावन्मूल्यं प्रकीर्त्तितम्। तावन्मूल्यं चतुर्थांशहीनं स्याद्दोषगन्धिके। यावन्मूल्यं समाख्यातं वैद्यवर्यैश्च सूरिभिः। तावन्मूल्यं चतुर्थांशात् क्षीयते मूढजन्मनि। पद्मरागः पलं यस्तु धत्ते साचारसप्रभः। कार्षापणसहस्राणि त्रिंशन्मूल्यं लभेत सः। इन्द्रगोपकसङ्काशः कर्णस्थ धृतो मणिः। द्वाविंशतिसहस्राणां तस्य मूल्यं विनिर्दिशेत्। एको नोनयते यस्तु जवाकुसुमसन्निभः। कार्षापणसहस्राणि तस्य मूल्यं चतुर्दश। बालादित्य द्युतिनिभः कर्णं यस्तु प्रतुल्यते। कार्षापणशतानान्तु मूल्यं षड्भिः प्रकीर्त्तितम्। यस्तु दाडिमपुष्पाभः कर्णालंकृत एव सन्निभः। कार्षापणशतानान्तु विंशतिं मूल्यमादिशेत्। चत्वारो माषका यस्तु रक्तोत्पलदलप्रभः। मूल्यं तस्य विधातव्यं सूरिभिः शतपञ्चकम्। हिमाभको यस्तु गुणैः सर्वैरेव समन्वितः। तस्य मूल्यं विधातव्यं द्विशतं तत्त्ववेदिभिः। माषकैकमितो यस्तु पद्मरागो गुणान्वितः। शतैकसम्मितं तस्य मूल्यं रत्नविचक्षणैः। अतो न्यूनप्रमाणास्तु पद्मरागा गुणोत्तराः। स्वर्णद्विगुणमूल्येन मूल्यं तेषां प्रकल्पयेत्। कार्षापणः समाख्यातः पुराणहृदयस्थितः। अन्ये कुसुम्भपानीयमज्जशोदकसन्निभाः। कार्षापा इति विख्याताः स्फटिकप्रभवाश्च ते। तेषां दोषान् गुणान् वापि पद्मरागवदादिशेत्। मूल्यमल्पन्तु विज्ञेयं धारणेऽल्पफलं तथा। ब्रह्मक्षत्रियवैश्यानां चत्वर्णां ये प्रकीर्त्तिताः। चतुर्विधैर्नृपतिभिर्धार्यां सम्पत्तिहेतवे। अतोऽन्यथा धृतः कुर्याद्रोगशोकभयक्षयम्" अत्र तस्य क्लीबत्वमशुद्धम्।

पद्मरेखा स्त्री पद्माकारा रेखा ष०त०। हस्तस्थितपद्माकाररेखायाम्।

पद्मलाञ्छन पु० पद्मं विष्णुकमलं वा लाञ्छनमस्य। १अर्हति २रुद्रे ३शङ्करे ४बुद्धे च मेदि० ५तारायां हेमच्छदां ७सरस्वत्यां च स्त्री मेदि०८पद्मरेखायुक्ते त्रि०।

पद्मवर्णक त्रि० पद्मस्येव वर्णोऽस्य कप्। १कमलतुल्यवर्णयुक्ते। पद्मं वर्णो वर्ण्यं यस्य कप्। २पुष्करमूले जटा०।

पद्मवासा स्त्री पद्मं वासोऽस्याः। १पद्मालयायां २लक्ष्म्यां

हेमच० पद्मस्य वासः सौरभम् इत० । २कमलसौरभे पु० ।

पद्मवृक्ष पु० पद्मवृक्षो वृक्षः । पद्मकाष्ठे राजनि० ।

पद्म(बी)बीज न० इत० । कमलबी(बी)जे पद्माक्षे राजनि० "पद्म(बी)बीजं हिमं स्वादु कषायं तिक्तकं गुरु । विदग्धि वृष्यं रूक्षञ्च गर्भसंस्रावकं परम्" भावप्र० ।

पद्मवो(बी)जाभ न० पद्मवो(बी)जमिवाभाति आ+भा-क । (माखना) ख्याते मक्षाके राजनि० ।

पद्मा स्त्री पद्मनाधारत्वेनास्त्यस्याः अच् । १लक्ष्म्यां २लवङ्गे ३पद्मचारिण्यां लतायां च अमरः । ४मनसादेव्यां पद्मस्यां ५कस्तूरिकाहचे च मेदि० ६वर्हन्नाडभेदे हेमच० ७कुसुम्भपुष्पे रत्नमाला । ८दक्षदुहितरि दक्षस्य किदेवपत्न्याञ्च कस्कि पु० ।

पद्माकर पु० इत० । १जलाशयमात्रे अमरः २पद्मेऽप्याधारजलाशये ३तद्योग्ये निम्नक्षे तदर्थं जलाशयोत्खननशब्ददर्शिते ४तडागरूपे जलाधारे च ।

पद्माक्ष न० पद्माक्षीव अक्षमस्य० । १पद्माक्षी(बी)जे हारा० "पद्माक्षैर्निर्मिता माला शत्रूणां नाशिनी मता" तन्त्रसारः । पद्ममिवाक्षि यस्य अक्षसमा० । २पद्मवत्सुन्दरनेत्रे त्रि० स्त्रियां स्त्रित्वात् ङीष् ।

पद्माट पु० पद्ममिवाटति अट-अच् । चक्रमर्दवृक्षे (दादमर्दन) राजनि० । [अमरः इत० । २पद्मानां स्थाने पु० ।

पद्मालया स्त्री पद्ममालयो यस्याः । १लक्ष्म्यां २लवङ्गे च

पद्मावती पु० पद्म+अस्त्यर्थे मतुप् मस्य वः संज्ञायां दीर्घश्च । (पद्मा) १नदीभेदे २मनसादेव्यां शब्दच० ३पद्मचारिणीलतायां जटाध० । ४कुमारानुचरमातृभेदे भा०म०४७अ० । ५प्रहगात्रस्थपद्मविशेषभेदे हरिवं० १०१अ० । अस्यां संज्ञायां ह्रस्व दीर्घः । पद्मवत् पद्मयुक्ते त्रि० स्त्रियां ङीप् ।

पद्मावतीप्रिय पु० इत० । १जरत्कारुसुनौ २कस्किदेवे ३प्रहगात्रस्थे च त्रि०

पद्मासन "ऊरूमूले वामपादं पुनस्तु दक्षिणं पदम् । वामोरौ स्थापयित्वा तु पद्मासनमिति स्मृतम्" आगमोक्ते आसनभेदे अस्यैव प्रकारभेदः तन्त्रसारे योगाङ्गतया उक्तः तच्च ८८६पृ० दर्शितम् एवमन्यदपि तत्तत्स्थं योगाङ्गतया ध्येयं बद्धपद्मासनमण्डूकपद्मासनेति च तस्यैव प्रकारभेदः । देवमूर्त्यादौ पद्माकारे १आसनभेदे पद्ममासनं यस्य । २कमलासने ब्रह्मणि पु० ।

पद्माह्वा स्त्री पद्मं तद्गन्धमाह्वयते आह्वते सुगन्धेन आ+ह्वे-क । १पद्मचारिण्यां लतायां राजनि० २लवङ्गे न०

पद्मिनी स्त्री पद्मं विद्यतेऽस्याः पुष्करा० इनि अभिधानात् स्त्रीत्वम् । १पद्मयुक्तदेशे २पद्मचारिणि विष्णौ पु० "पद्मी पद्मनिभेक्षणः" विष्णुसं० तस्य शङ्खचक्रगदापद्मधारित्वात् तथात्वम् । ३पद्मधारिमात्रे त्रि० स्त्रियां ङीप् । ४कस्तूरिकायां पु० अमरः पद्मानां समूहः इनि । ५पद्मसमूहे ७पद्मजटायाञ्च अमरः "सूक्ष्मनाडदलोत्फुल्लफलैः सा लतिका पुनः । पद्मिनीत्युच्यते प्राज्ञैर्विसिन्यादिव सा लता । पद्मिनी मधुरा तिक्ता कषाया शिशिरा सरा । पित्तकफविषोदावर्त्तिश्वासिमन्दाग्निदोषहृत्" राजनि० "भवति कमलनेत्रा नासिकाप्युन्नसा च विरलरुचयुग्मा दीर्घकेशी लताङ्गी । मृदुचरणसुशीला नीतनत्यानुरक्ता सकलतनुसुवेशा पद्मिनी पद्मगन्धा" रतिमञ्जर्युक्तलक्षणयुक्ते ६स्त्रीभेदे "पद्मिनी गणके तृष्टा" इति च तन्त्रोक्तम् । ७सरोवरे ११पद्मे च विश्वः १२सरघाले शब्दमाला ।

पद्मिनीकण्टक पु० कमलिन्याः कण्टकाकारे सुश्रुतोक्ते क्षुद्ररोगभेदे २१८२ पृ० दृश्यम् ।

पद्मिनीकान्त पु० इत० । १सूर्य्ये जटाध० । २चक्रवाकेच पद्मिनीपल्लभादयोऽप्यत्र । [भा०शा० २४०अ० वटा० ।

पद्मेक्षण पु० पद्मे इते गी-अच् अलुक्स० । विष्णौ हेमच० ।

पद्मोत्तर पु० पद्मादुत्तरः उत्तमो वर्णेन । कुसुम्भे राजनि० ।

पद्मोत्तराग्रज पु० जिनचक्रवर्त्तिभेदे हेमच० [दिव्यां स्त्री

पद्मोद्भव पु० पद्मादुद्भवोऽस्य । कमलयोनौ १ब्रह्मणि २मनसादेव्यां स्त्री ।

पद्य न० पदं चरणमर्हति पद+यत् । कविजते चतुश्चरणात्मके "पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा" इत्युक्ते १वाक्यभेदे २पदव्यां स्त्री । पद्मां जातः यत् । ३शूद्रे पु० "पद्म्यां शूद्रो अजायत" यजु०३१।१२ पदं शिष्यति यत् । ५अर्करायां स्त्री । पदमर्हति यत् । ६नातिशुक्ले कर्दमे त्रि०कौ० । ७स्तुतौ विश्वः ७पथि स्त्री अमरः ।

पद्र पु० पद्यते गच्छत्यत्र पद-आधारे रक् । ग्रामे उज्ज्वल०

पद्रथ पु० पद् रथ इव यस्य । पद्मभिर्नि भाग०३।१८।१२

पद्व पु० पद-स्वार्थे आधारे करणे वा वन् । १भूलोके २रन्ध्रे च संक्षिप्तसारः ।

पद्वन् पु० पद-करणे वनिप् । पथि उज्ज्वल० ।

पन स्तुतौ भ्वा०आत्म०सक०सेट सार्वे धातौ पनाय वा तत्र आत्म० । पनायते पनायति चार्द्धधातुके वा पाय । अपनायीत् अपनायिष्ट अपनिष्ट । पनायां-बभूव आस चक्रे पेने इत्यादि ।

पनस पु० पन्यते स्तूयतेऽसौ इच्छेषु उत्तमफलत्वात् इषृतृच्

लवादा पन–कर्मणि अच् ।(काँटाच) इक्षुभेदे फलादौ न० "पनसं शीतलं पक्वं स्निग्धं पित्तानिलापहम् । तर्पणं हृद्यं स्वादु मांसलं श्लेष्मलं गुरु । बल्यं शुक्रप्रदं स्निग्धं रक्तपित्तक्षतक्षयान् । आमनदेव विष्टम्भि वातलं दुर्जरं गुरु । दाहक्लमकरं बल्यं कफमेदोविवर्द्धनम् । पनसोद्भूतबीजानि हृद्यानि मधुराणि च । गुरूणि बहुवर्चांसि कृमिमूत्राणि संवदेत्" अन्यच्च "मज्जा पनसजो हृद्यो वातपित्तकफापहः । विशेषात् पनसं वर्ज्यं गुल्मिभिर्मन्दवह्निभिः । अर्कं पनसपाकाय फलं कदलसम्भवम्" भावप्र० "कण्टाफलं सुमधुरं हृद्यं स्निग्धं श्रमापहम् । दुर्जरं वातपित्तघ्नं श्लेष्मशुक्रबलप्रदम् । तदेव सर्पिषा युक्तं स्निग्धं हृद्यं बलप्रदम् । अदीप्तं न च चक्षुष्यं हृद्यञ्च वातपित्तहृत् । कण्टाफलमपक्वन्तु कषायं स्वादु वातलम् । रक्तपित्तकरं स्वादु तत्फलास्यापि तद्गुणम्" राजवल्लभः ।

पनसतालिका स्त्री पनसं स्तुत्यं तालं तत्तुल्यफलं विद्यते ऽस्याः ठन् । पनसे भवे० पनतालिकेति तत्र पाठान्तरं तत्रार्थे ।

पनसिका स्त्री पनसः तदाकारोऽस्त्यस्याः ठन् । सुश्रुतोक्ते क्षुद्ररोगरोगभेदे २३८२ पृ० दृश्यम् ।

पनस्य नामधा० पनं स्तुतिमिच्छति क्यच् उनागमः स्रोतेरिच्छायां पर०अक०सेट् । पनस्यति अपनस्यीत् ऋ०१।५५।२ भट्टा० तत्र तङ् आर्षः । निघण्टौ तु पनसधातुः अर्चतिकर्मसु पठितः तेन पूजायामपि । [१।२८।५

पनस्यु त्रि० पनस्य नामधातुः उ । आत्मनः स्तोत्रेच्छौ ऋ०

पनिष्टम त्रि० पन–कर्मणि इष्टन् अतिशयेन पनिः तमप् । स्तुत्यतमे साम० १।२।२।४

पनिष्ठ त्रि० अतिशयेन पनिता इष्टन् इष्ठोवोपः । स्तोतृतमे ऋ०६।५८।२ द्वयसुन् । पनीयस् तत्रार्थे स्त्रियां ङीप्

पनिस्पट त्रि० स्पन्द–यङ्लुक् अच् अभ्यासे निगागमः । भृशं स्पन्दमाने अथ० ५।२०।१६

पनु स्त्री पन–उ । स्तुतौ ऋ० १।६५।२ [जाते सि०कौ० ।

पन्थक त्रि०पथि जातः "पथः पन्थ च" पा० कन् । पथिपद्य त्रि० पद–क्यप् । १च्युते २गच्छिते च अमरः । २गते पद–यत् । ४नीचगमने न० उज्ज्वल० ।

पन्नग पु० पन्नमधोमुखं यथा तथा गच्छति, पन्नान्न गच्छति वा गम+ड । १सर्पे अमरः जातौ ङीप् सर्वार्थम् । २पन्नकाले मेदि० २स्त्रीसर्के न०।

पन्नगकेशर पु० पन्नग इव केशरोऽस्य । नागकेशरे राजनि० तस्य सर्पफणातुल्यकेशरत्वात् तथात्वम् ।

पन्नगारि पु० ६त० । गरुडे

पन्नगाशन पु० पन्नगः अशनमस्य । गरुडे अमरः पन्नगभोजनादयोऽप्यत्र । तस्य तद्भोक्तृत्वकथा भा०आ० अस्तास्तरपर्व० द्रष्टव्यम् ।

पन्नद्धा स्त्री पदि नद्धा । चर्मपादुकायां हेमच० ।

पन्नद्धी स्त्री पदः नद्धीव नह–इन् ङीष् वा ६त० । चर्ममयपादुकायां त्रिका० ।

पन्नागार पु० प्राच्ये गोत्रप्रवर्त्तकर्षिभेदे तस्यापत्यम् इञ् । पान्नागारि तदपत्ये पुंस्त्री० बहुत्वे इञोलुक् । पन्नागारा इत्येव ।

पन्निष्क पुंन० पादो निष्कस्य एकदेशिस० वा पदादेशः । निष्कस्य चतुर्थभागे पदादेशाभावे पादनिष्कोऽप्यत्र ।

पन्य त्रि० पन–स्तुतौ यक्प्रादि० यत् । स्तुत्ये ऋ०१।२६।२

पन्यस् त्रि० पन–असुन् युगागमः । १स्तोतरि ऋ० ६।६।२ भट्टा० । २स्तुत्ये च ६।१८।६ भट्टा० ।

पपि पु० पा–कि द्वित्वम् । १चन्द्रे २पानकर्त्तरि च त्रि० ।

पपौ पु० पा–ईक् द्वित्वम् । १चन्द्रे २सूर्य्ये च उज्ज्वल० ।

पपु त्रि० पा–कु द्वित्वम् । पानके उज्ज्वल० ।

पपुरि त्रि० पृ–कि द्वित्वम् । प्रीणनशीले । ऋ०१।१५।४

पपृक्षेण्य त्रि० सम्पर्कार्हे । ऋ० ५।२२।६ भाष्ये स्थितम् ।

पप्रि त्रि० प्रा०पूरणे कि द्वित्वम् । पूरणशीले यजु० १।८ ।

पफक पु० गोत्रर्षिभेदे ततः तिका० गोत्रे फिञ् । पाफकायनि तद्गोत्रापत्ये । बहुत्वे निरवकेन बहु फिञोलुक् । कफकनिरवका इत्येव

पमरा स्त्री (बङ्गदे) ख्याते गन्धद्रव्यभेदे राजवल्लभः ।

पम्मस् दुःखे अच्छीभावे कण्ड्वा० प०अक० सेट् । पम्मसति अपम्मसीत् ।

पम्पा स्त्री १दक्षिणस्थनदीभेदे भा०वन० ११६। ऋष्यमूकशैलसमीपस्थे २सरोभेदे च "एषा पम्पा शिवजला बहुतोया तडागिनी" भा०व० २७६अ० । ततः वरणादि० चातुरर्थिकस्य लुक् । पम्पानामदूरभवं नगरं पम्पा इत्येव ।

पम्प गतौ भ्वा०प०सक०सेट् । पम्पति अपम्पीत् पपम्प ।

पय गतौ भ्वा०आत्म०सक०सेट् । पयते अपयिष्ट ।

पयःकन्दा स्त्री पयः दुग्धमिव स्वादुत्वात् कन्दोऽस्याः । क्षीरविदार्य्याम् राजनि० । [भा०व० १२० अ० ।

पयःपयोष्णी स्त्री पयःप्रचुरा पयोष्णी मा०त० । नदीभेदे

पयःफेनी स्त्री पयः दुग्धमिव फेनमस्याः गौरा० ङीष्। दुग्धफेन्यां राजनि०।

पयश्चय पु० ह्रस्व० अलपूरे जटा०।

पयस् न० पा–पाने कर्मणि असुन् रकारचान्तादेशः। १दुग्धे २जले च मेदि० २अन्ने ४रात्रौ च निघण्टुः।

पयस्य नामधातौ (परिमाणविशेषे) कण्ड्वा०यक०सेट्। पयस्यति अपयस्यीत्।

पयस्य त्रि० पयसो दुग्धस्य विकारः तत्र हितं वा यत्। १दुग्धविकारे दध्यादौ अमरः। २दुग्धस्थिते त्रि०१विड्वाले पु० शब्दच०। ३दुग्धिकायां ५क्षीरकाकोल्यां ह्रस्वक्षीरिकायां च स्त्री मेदि०। ७कर्कटपुष्पिकायां रत्नमाला ८कटुतुम्बिनीक्षुपे राजनि०। ९आमिक्षायाम् हेमच०।

पयस्वत् त्रि० पयस्+अस्त्यर्थे मतुप् मस्य वः सान्तत्वात् न पदकार्यम्। १जलविशिष्टे स्त्रियां ङीप्। २नद्यां स्त्री ३०३० निघण्टुः।

पयस्वल त्रि० पयोऽस्यस्य वलच् सान्तत्वात् न पदकार्यम्। १जलयुक्ते। २आगे पुंस्त्री राजनि० स्त्रियां जातित्वात् ङीष्।

पयस्विन् त्रि० पयोऽस्यस्य विनि न पदकार्यम्। १पयोविशिष्टे स्त्रियां ङीष्। २नद्यां ३धेन्यां ४रात्रौ च मेदि०। ५काकोल्यां ६क्षीरकाकोल्यां ७दुग्धफेन्यां ८क्षीरविदार्यां ९लाक्ष्यां राजनि०। १०श्रीवन्द्रां भावप्र०।

पयाय आत्मनः पय इच्छति क्यङ् नामधातुः या०अक०सेट् वा सकोपः। पयायते पयस्यते।

पयोगल पु० पयो गलति यस्मात् गल–अपादाने क। १वनोपले (करका) २द्वीपे च शब्दमा०।

पयोग्रह पु० पयसो दुग्धस्य ग्रहः ग्रह आधारे अच्। यज्ञिये पात्रभेदे। कात्या० श्रौ०१०।२।१२।

पयोघन पु० पयसा घनो निविडः। वर्षोपले हारा०।

पयोजन्मन् पु० पयसो जन्म यस्मात्। १मेघे शब्दमा०। २वृक्षके च।

पयोद पु० पयो ददाति दा–क। १जलदे मेघे २वृक्षके च ३यदुवंशप्रभेदे हरिवं० २०अ० ४कुमारानुचरमातृभेदे स्त्री भा०श०४७अ०।

पयोधर पु० पयो दुग्धं जलं वा धरति धृ–अच् ६त०। १मेघे २स्तने अमरः ३वृक्षके च ४कोषकारे ५नारिकेले ६कर्कटके च मेदि०। [त्रि० उक्ता०।

पयोधस् पु० पयो दधाति धा–असुन्। १वृक्षे २जलाधारे

पयोधारा स्त्री ६त०। १जलानां धारायाम्। पयसां धारा यत्र। २नदीभेदे हरिवं० २२३ अ०।

पयोधि पु० पयो धीयतेऽस्मिन् धा–आधारे कि उप०स०। समुद्रे राजनि०। [राजनि०।

पयोधिक न० पयसी तदुपरि कायति कै–क। समुद्रफेने

पयोनिधि पु०पयांसि निधीयन्ते यत्र नि+धा–आधारे कि उप०स०। समुद्रे। [२वृक्षके च।

पयोमुच् पु० पयोमुञ्चति मुच–किप्। १जलमुचि मेघे

पयोर पु० पयोजलं सेवने सुखनिष्पन्नजलं राति रा–क। १खदिरे शब्दार्थ०। २जलदायिनि त्रि०।

पयोलता स्त्री पयःप्रधाना लता। क्षीरविदार्यां राजनि०

पयोवाह पु० पयो जलं वहति वह–अण् उप०स०। १मेघे २वृक्षके च।

पयोव्रत न० पयः तत्पानमात्रं व्रतम्। १दुग्धपानमात्रे व्रतभेदे तच्च त्रिरात्रादिसाध्यं मत्स्यपु० उक्तं यथा "पुण्यां तिथिं समासाद्य युगमन्वादिकम्। पयोव्रतक्षिरात्रं स्यादेकरात्रमथापि वा" ५२अ० तद्विविधं प्रायश्चित्तात्मकं काम्यञ्च मनुः११।१४४। द्वादशरात्रसाध्यं तु विष्णुव्रतभेदः भाग०८।१६। पयस्तत्पानं व्रतमस्य। २यज्ञदीक्षितव्रतभेदे शत०ब्रा० ३५।१।१

पयोशिजाता स्त्री। पयोशी जाता यस्याः पृषो०। सरस्वत्यां नद्यां राजनि०।

पयोष्णी स्त्री विन्ध्याचलदक्षिणस्थे नदीभेदे "पयोष्णी सविद्युं रुच्यं पवित्रं पापनाशनम्। सर्वौषधकरं सौख्यवल्कलान्तिप्रदं नृणाम्" राजनि०। "एष विन्ध्यो महाशैलः पयोष्णीयं सरिद्वरा। चाम्रमाद्य महर्षीणां बहुमूलफलान्विताः। एष पन्था विदर्भाणामसौ गच्छति कोसलाम्। अतः परञ्च दैशोऽयं दक्षिणे दक्षिणापथः" भा० व० ६१अ०।

पर त्रि० पॄ–भावे अप्, कर्त्तरि अच् वा। १अन्तरिते भिन्ने २उत्तरे ३दूरे ४सीमापरिच्छिन्ने ५श्रेष्ठे ६मोक्षे ७केवले ब्रह्मणि च न० "द्वे ब्रह्मणी वेदितव्ये परञ्चापरमिति" श्रुतिः। ८शत्रौ पु०। अस्य व्यवस्थायां सर्वनामता ङिङसोर्जसि च वा परस्मात् परात्। परे पराः वा। अत्यन्तपरत्वेऽपि व्यवस्थाबोधनात् सर्वनामता। ९ब्रह्मणि आयुःकाले च पु० "कालसंख्यां समासेन पूर्वाद्रैर्द्वयकल्पिताम्। अहश्च स्यात् परः कालस्तदन्ते परिवर्त्तते। निजेन तस्य मानेन आयुर्वर्षशतं स्मृतम्।

तत्पराख्यं तदर्द्धं च परार्द्धमभिधीयते"। "त्रीणि कल्पशतानि ब्रुह्मणा यद्दिनानि मे। ब्रह्मणः कथितं वर्षं पराख्यं तच्च तत्पदम्" कौर्मे ५अ०। न्यायमते १०व्यापकसामान्ये "सामान्यं द्विविधं प्रोक्तं परञ्चापरमेव च" भाषा० ११तथाजातौ स्त्री "व्यापकत्वात् परापि स्यात् व्याप्यत्वादपराऽपि च"। व्यवस्था च दिग्देशकालैरवधिनियमभेदरूपा। १२वक्ष्यमाणदैशिककालिकपरत्वरूपगुणाश्रये त्रि०। तस्य दिशि दृष्टत्वेन तद्योगे पञ्चमी। अयमस्मात् पर इत्यादिप्रयोगात्। परस्येदम् गहा०ञ कुकच्। परकीय परसम्बन्धिनि त्रि०। सर्वनामत्वादस्य ङसो पुंवत्। परस्याः धनं परधनम् परस्वामित्वञ्च परत्र इत्यादि। १३बोधेच्छया उच्चरिते "यत्परः शब्दः स शब्दार्थ इति न्यायः तात्पर्य्यम्।

परःकृष्ण त्रि० परः कृष्णात् पारस्क० सुट्। कृष्णात् परे छान्दोग्यो० १।६।५उदा०।

परःपुमस् पु० परः अन्यः पुंसः पारस्क० सुट्। स्वपुरुषादन्यस्मिन् पुरुषे "यत् परपुंसा वा पत्यौ स्यात्" शत० ब्रा० १।२।१।२१

परःशत न० परे शतात् पारस्क० सुट्। १शताधिकसंख्यायां २तत्सङ्ख्यातेषु च अमरः।

परःश्वस् अव्य० श्वः परं दिनं नि० पारस्क० सुट्। आगामिपरदिवसात् परस्मिन् दिने अमरः पृषो०। परश्व इत्यपि। [२ततसंख्यातेषु च शत०ब्रा० १०।२।६।८

परःषष्टि स्त्री परःषष्टेः निपा० सुट्। १षष्टेरधिकसङ्ख्यायां

परःसहस्र न० सहस्रात् परे नि० सुट्। १सहस्राधिकसंख्यायां २तत्संख्यान्वितेषु च अमरः।

परउर्वी स्त्री परउर्व्याः नि० पारस्क० सुट्। १उपसङ्केते "उपर्य्युपरि एकद्व्यादिद्वित्र्या व्रतद्वित्र्यौस्वसि ताः परउर्वीरुपसदस्याः केचनातुतिवन्ति" शत०ब्रा० ३।४।४ २६ भाष्यम्।

परकीय त्रि०परस्येदम् गहादि०ञ "कुक् जनस्य परस्य च" वार्त्ति० कुक्। १परसम्बन्धिनि। २नायिकाभेदे स्त्री रसमञ्जर्यां तद्भेदादिकमुक्तं यथा

"अप्रकटितपरपुरुषानुरागा परकीया। सा च द्विविधा परोढा कन्यका चेति कन्यायाः पित्राद्यधीनत्वात् परकीयत्वम्। अस्या गुप्ता एव सर्वाः चेष्टाः। गुप्ता(रक्षिता) विदग्धाकुलटानुशयानासुदिताप्रथतीनां परकीयायामेवान्तर्भावः। विदग्धा द्विविधा वाग्विदग्धा क्रियाविदग्धा। अनुशयाना दृष्टस्थानविघटनेन भाविस्थानाभावशङ्कया स्वानधिष्ठितसङ्केतस्थाने भर्तुर्गमनानुमानेन चानुशयाना भवति"। एतदुदाहरणानि तत्र दृश्यानि।

परक्रान्तिच्या स्त्री ऋ०सि० उक्तायां "परमापक्रमच्छा तु सप्तरज्वृषेन्द्वः" १२८७ योजनात्मिकायां च्छायाम्। "क्रान्योर्ज्यं क्रिच्यया भ्यस्ता परक्रान्तिज्ययोद्धृते" ऋ०सि०। "अत्रूनं चतुर्दशगतं परमक्रान्तिज्या इति रङ्गनाथः"।

परक्षेत्र न० ६त०। परकीये क्षेत्रे १कलत्रे २भूम्यादौ च। "कन्यासु च परक्षेत्रे नियोगोत्पादितः सुतः" "आददानः परक्षेत्रात् दण्ड्यं दातुमर्हति" इति च मनुः।

परगामिन् त्रि० परं वाच्यं गच्छति णिनि समत्वात्। वाच्यलिङ्गे शब्दे "गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः" अमरः।

परग्रन्थि पु० परेण ग्रन्थिरत्र। अङ्गुलिपर्व्वणि शारा०।

परचक्र न० परस्य शत्रोश्चक्रम्। १शत्रोः राष्ट्रादौ भा० आ० १६अ०। ह०सं०२अ०। २तज्जे रोगभेदे [भिक्षायां च।

परच्छन्द त्रि० परस्य छन्दो यत्र। १पराधीने ६त०। २परा-

परच्छिद्र न० ६त०। परस्य दोषादिच्छिद्रे

परजात त्रि० परेण जातः। औदासीन्येन परेषिते १परपुष्टे अमरः। २अन्येनोत्पन्ने अण्डगोलकादौ जनड। परजादयोऽप्यत्र।

परजित त्रि० परेण जितः। १परपुष्टे अमरः २पराजिते त्रि०

परञ्ज न० परञ्जयति जि-बा० ड सुट् च। १तैलयन्त्रे २कुरिकाफले च मेदि०।

परञ्जन पु० परां पश्चिमां दिशं जनयति स्वामित्वात् जन-अच् सर्वनाम्नो ह्रस्वे पुंवत् सुट्। वरुणे हेमच०।

परञ्जय पु० परां पश्चिमां दिशं जयति स्वामित्वात् जि-बा० अच् सुट् पुंवद्भावः। १वरुणे त्रिका० २यमुजेतरि त्रि०

परतङ्गण पु० देशभेदे भा०भ० ५।अ०।

परतन्त्र त्रि० परस्य तन्त्रमधीनता यत्र। पराधीने अमरः।

परतर्कु त्रि० परः अत्यु तर्कुरिवास्य कप्। अत्यु भवयुते "कुनखिवित्यैः परतर्कुकाद्यैः तार्क्ष्यैश्च पुरुषमूपतयः" ह०सं० ६।अ० नरलक्षणोक्तौ।

परतस् अव्य० पर+विभक्त्यर्थे तसिल्। १परस्मादित्यादार्थे २पराधीने च। ततोभावेत्वपरतस्य पराधीनत्वे परतोभावशब्दे दृश्यम्। [तापके च।

परतापन न० शत्रुतः १शुत्रभेदे हरिवं० २०अ०। २पर-

परतीआत्त अव्य०परस्मात् आत्तः। स्वभिन्नपुरुषसम्बन्धी बोध्ये

प्रमाणत्वाप्रमाणत्वादौ तयोः कस्य स्वतोभावता कस्य वा परतो भावता तदेतन्मतभेदेन सर्वदर्शनसंग्रहे दर्शितम्

"प्रमाणत्वाप्रमाणत्वे स्वतः साङ्ख्याः समाश्रिताः। नैयायिकास्ते परतः, सौगतास्त्वरमं स्वतः। प्रथमं परतः प्राहुः प्रमाणं, वेदवादिनः। प्रमाणत्वं स्वतः प्राहुः, परतस्त्वप्रमाणताम्" इति। "वादिविवाददर्शनात् कस्यद्वारं वेदानां धर्मे स्वतःप्रामाण्यमिति सिद्धवत्कृत्य स्वीक्रियते। किंच किमिदं स्वतः प्रामाण्यं नाम ? किं स्वत एव प्रामाण्यस्य जन्म ? आहोस्वित् स्वाश्रयग्रहणजन्यत्वम् ? किंवा स्वाश्रयग्रहणसामग्रीजन्यत्वम् ? उताहो ग्रहणसामग्रीजन्यग्रहणविशेषाश्रितत्वम् ? किं वा ग्रहणसामग्रीमात्रजन्यग्रहणविशेषाश्रितत्वम् ? तत्राद्यः सावद्यः- कार्यकारणभावस्य भेदसमानाधिकरणत्वेनैकक्षिसहसम्भवात्, नापि द्वितीयः गुणस्य सतो ग्रहणस्य प्रामाण्यं प्रति समवायिकारणतया द्रव्यत्वापातात्। नापि तृतीयः प्रामाण्यस्योपाधित्वे जातित्वे वा जन्मायोगात्, जातित्वानधिकरणस्य ग्रहणस्य बाधाज्ञानाभावः प्रामाण्योपाधिः न च तस्योत्पत्तिसम्भवः अज्ञानाभावस्य नित्यत्वाभ्युपगमादत एव न जातेरपि जनिर्युज्यते। नापि चतुर्थः ग्रहणविशेषो ह्यप्रमा विशेषसामग्र्याश्च सामान्यसामग्री अनुप्रविशति किंपणासामग्र्यामिव इक्षुसामग्री, अपरथा तस्याकिञ्चित्करत्वं प्रसज्येत तस्मात् परतस्त्वेन स्वीकृतं प्रामाण्यं विज्ञानसामग्रीजन्याश्रितमित्यतिव्याप्तिरापद्येत। यत्तमविकल्पं विकल्पयामः किं दोषाभावसहकृतग्रहणसामग्रीजन्यत्वमेव ग्रहणसामग्रीमात्रजन्यत्वं, किं दोषाभावसहकृतग्रहणसामग्रीजन्यत्वं, नाद्यः दोषाभावसहकृतग्रहणसामग्रीजन्यत्वमेव परतः प्रामाण्यमिति परतः प्रामाण्यवादिभिरस्वीकारात् नापि द्वितीयः, दोषाभावसहकृतत्वेन सामग्र्या सहकृतत्वे सिद्धे अनन्यथासिद्धान्वयव्यतिरेकसिद्धतया दोषाभावस्य कारणतायाः बलेनापतमानत्वात्। अभावः कारणमेव न भवतीति चेत् तदा वक्तव्यम् अभावत्वे कार्यत्वमस्ति न वा यदि नास्ति तदा घटप्रध्वंसानुपपत्त्या नित्यताप्रसङ्गः। अथास्ति किमपराद्धं कारणत्वेनेति चेदयुक्तमुक्तः। तदुदितसदृशेन "भावो यथा तथाऽभावः कारणं कार्यवन्मतम्" इति। तथाच प्रयोगः विमता प्रमा ज्ञानज्ञेतरातिरिक्तहेत्वधीना कार्यत्वे सति तद्विशेषत्वात् अप्रमावत् प्रामाण्यं च परतो ज्ञायते अनभ्यासदशायां सांशयिकत्वात् अप्रामाण्यवत्। तस्मादुत्पन्नौ ग्रहणौ च परतस्ते प्रामाण्यसम्भवात् स्वतः सिद्धं प्रामाण्यमित्येतत् मूतिकुम्भाख्यायत इति चेत् तदेतदाकाशकुसुमायते। विज्ञानसामग्रीजन्यत्वे सति तदतिरिक्तहेत्वजन्यत्वं प्रमायाः स्वतस्त्वमिति निरूक्तिसम्भवात् यत्र चातानुमानं विमता प्रमा विज्ञानसामग्रीजन्यत्वे सति तदतिरिक्तजन्या न भवति अप्रमात्वानधिकरणत्वात् घटादिवत् न चौदनवनतुमानं परतस्त्वसाधकमिति शङ्कनीयं प्रमा दोषव्यतिरिक्तज्ञानहेत्वतिरिक्तजन्या न भवति ज्ञानत्वाद्भ्रमवदिति प्रतिसाधनयदृच्छत्वात् ज्ञानसामग्रीमात्रादेव प्रमोत्पत्तिसम्भवे तदतिरिक्तस्य गुणस्य दोषाभावस्य वा कारणत्वकल्पनायां कल्पनागौरवप्रसङ्गाच्च। ननु दोषस्याप्रमाहेतुत्वेन तदभावस्य प्रमां प्रति हेतुत्वं दुर्निवारमिति चेत् न दोषाभावस्याप्रमाप्रतिबन्धकत्वेनान्यथासिद्धत्वात्। "तस्माद्गुणेभ्यो दोषाणामभावस्तदभावतः। अप्रमाण्यग्रहायत्तं तेनोत्सर्गो नयोदितः" इति। तथा प्रमात्मिरपि ज्ञानज्ञापकसामग्रीत एव जायते। न च संशयानुदयप्रसङ्गो बाधक इति युक्तं वक्तुं सत्यपि प्रतिभासपुञ्जकारणे प्रतिबन्धकदोषादिसम्भवधानात् तदुपपत्तेः। किञ्च तावदनुमानं स्वतः प्रमाणं न वा आद्ये अनैकान्तिकता द्वितीये तथापि परतः प्रामाण्यमेवं तस्य तस्याफीलनवस्था दुरवस्था स्यात्। यदत्र कुसुमाञ्जलावुदयनेन ऋटिति प्रचुरप्रवृत्तेः प्रामाण्यनिश्चयाधीनत्वाभावमापादयता प्रमाणादि प्रवृत्तिर्दीपमपेक्षते तत्प्राचुर्ये चेच्छाप्राचुर्यमुद्दिश्य चेष्टसाधनताज्ञानं तच्चेष्टजातीयत्वलिङ्गानुभवं सोऽपीन्द्रियार्थसन्निकर्षं प्रामाण्यग्रहस्तु न क्वचिदुपयुज्यत इति तदपि तस्करस्य पुरस्तात् कथे सुवर्णसमेत्य सर्वाङ्गोद्घाटनमिव प्रतिभाति। अतः समीहितसाधनताज्ञानमेव प्रमाणतयावगम्यमानमिच्छां जनयतीत्यत्रैव स्फुट एव प्रामाण्यग्रहस्योपयोगः। किंच क्वचिदपि चेद्विचिकित्सा प्रवृत्तिः संशयादुपपद्येत तर्हि सर्वत्र तथाभावसम्भवात् प्रामाण्यनिश्चयो निरर्थकः स्यात्। अनिश्चितस्य कस्यचिदर्थस्य दुर्लभमिति प्रामाण्यं दत्तजलाञ्जलिकं भवेत्"।

परत्र अव्य॰परशब्द काले पर+त्रल्। परकाले स्वर्गादिलोके।

परत्वभीरु त्रि॰ परलोकभीरौ धर्मिष्ठे स्त्रियां॰ ङीप्। परत्व न॰ परस्य भावः। वैशेषिकोक्तौ द्रव्याश्रिते गुणभेदे तच्च द्विविधं दैशिकं कालिकञ्च तदेतत् कणादसूत्रोप-

स्करङत्योर्निर्णीतं यथा "एकदिक्काभ्यामेककालाभ्यां सन्निकृष्टविप्रकृष्टाभ्यां परमपरञ्च" सू०।

"इदानीमेतद्वैशेषिकसूत्रे परत्वापरत्वे परस्परानुबद्धव्यवहारकारणतया शिष्यबुद्धिवैशद्यार्थं संक्षेपार्थमेकपदेनाह परमपरञ्चेति भावप्रधानो निर्देशः, चलत्यत इति शेषः, यद्वा परमपरयोरिति व्यवहार इति शेषः, इतिरध्याहार्यः। एका दिग् यदोक्तावेकदिक्कौ ताभ्यामेकदिक्काभ्यां पिण्डाभ्यामित्यर्थः तल्लक्षणावयवे कदिक्कौ भवतः न तु ताभ्यां परत्वापरत्वे उत्पद्येते व्यवस्थियेते वेत्यत उक्तं सन्निकृष्टविप्रकृष्टाभ्यामिति, सन्निकर्षः संयुक्तसंयोगात्सत्वम्, विप्रकर्षस्तदभूयस्त्वं, तदङ्गत्वमित्यर्थः। एतेन समवायिकारणसूत्रं, दिक्पिण्डसंयोगस्त्वसमवायिकारणं, तथा हि प्राङ्मुखस्य पुरुषस्य प्राच्यवस्थितयोः पिण्डयोरेकस्मिन् संयुक्तसंयोगभूयस्त्वमपरस्मिन् संयुक्तसंयोगाल्पतरत्वमपेक्ष्य परत्वमपरत्वञ्चोत्पद्यते, असमवायिकारणसूत्रम्, सन्निकृष्टविप्रकृष्टाभ्यामिति विषयेण विषयिणं प्रत्ययमुपलक्षयति तथा चापेक्षाबुद्धेर्निमित्तकारणत्वसूत्रम्, एकदिगवस्थितयोरेव परत्वापरत्वे उत्पद्येते इति न सर्वतोत्पत्तिः, एकस्यैव द्रष्टुरपेक्षाबुद्धिः सत्युत्पद्यते इति न सर्वतोत्पत्तिः, अपेक्षाबुद्धिनियमाच्च सर्वतोत्पत्तिः कारणयत्नैरुत्पत्त्योः प्रत्यक्षसिद्धत्वान्न परस्पराश्रयत्वम्, अन्यथा हि नोत्पद्येयातां न वा प्रतीयेयातां परस्परापेक्षायां हि द्वयोरनुत्पत्तिरप्रतीतिश्च स्यात् प्रतीयेते च परत्वापरत्वे, प्रतीतिश्च तयोर्नोत्पत्तिमन्तरेणेति। एककालाभ्यामिति कालिकपरत्वापरत्वे अभिप्रेत्य तत्रैककालाभ्यामिति एको वर्त्तमानः कालोययोर्द्वयस्य विरपिण्डयोः तावेककालौ ताभ्यामेककालाभ्यामित्यर्थः। सन्निकर्षोऽल्पतरतपनपरिस्पन्दान्तरितजन्मत्वं, विप्रकर्षश्च बहुतरतपनपरिस्पन्दान्तरितजन्मत्वम्, अत्रापि विषयेण विषयिणो बुद्धिमुपलक्षयति तेन युवस्थविरपिण्डौ समवायिकारणे, कालपिण्डसंयोगश्चासमवायिकारणम्, अल्पतरतपनपरिस्पन्दान्तरितजन्मत्वबुद्धिरपरत्वे बहुतरतपनपरिस्पन्दान्तरितजन्मत्वबुद्धिः परत्वे निमित्तकारणम्। एते च परत्वापरत्वे अनियतदिग्देशयोरपि पिण्डयोरुत्पद्येते, तत्र दैशिकपरत्वापरत्वयोः सप्तधा विनाशः, उत्पादस्तु युगपदेव द्वयोरन्यथान्योन्याश्रयः स्यात्, अपेक्षाबुद्धिनाशात्,१ संयोगस्यासमवायिकारणस्य नाशात्,२ द्रव्यस्य च समवायिकारणस्य नाशात्,३ निमित्तसमवायिकारणयोर्नाशात्,४ समवायसमवायिकारणयोर्नाशात्,५ निमित्तासमवायिकारणयोर्नाशात्,६ निमित्तनाशासमवायिकारणनाशसमवायिकारणनाशेभ्यः७। तत्रापेक्षाबुद्धिनाशात्१ तावत्, परत्वोत्पत्तिः परत्वसामान्यज्ञानं ततोऽपेक्षाबुद्धिविनाशस्तस्मिन्नाशात् परत्वविशिष्टद्रव्यज्ञानकाले परत्वनाशः, द्वित्वनाशवदेव सर्वमूह्यमेयम्। असमवायिकारणनाशादपि २तद्यथा यदैवापेक्षाबुद्धिस्तदैव परत्वाधारे पिण्डे कर्म्म ततो यदैव परत्वोत्पत्तिस्तदैव दिक्पिण्डविभागश्चतो यदा परत्वसामान्यज्ञानं तदा दिक्पिण्डसंयोगनाशः ततः सामान्यज्ञानादपेक्षाबुद्धिनाशस्तदैव दिक्पिण्डसंयोगनाशात् परत्वापरत्वयोर्नाशः, तत्र चापेक्षाबुद्धिनाशस्य परत्वनाशसमकालत्वान्न तत्राशकत्वम्। नन्वसमवायिकारणनाशादपि गुणनाशे आत्ममनःसंयोगनाशादपि संस्कारादृष्टादीनां विनाशे बहु व्याकुलं स्यादिति चेन्न विप्रकृष्टत्वेन परत्वस्य व्यापनात् परत्वाधारस्यान्यत्र गमने विप्रकर्षाभावात् परत्वनिवृत्तिरावश्यकी न च तदा नाशकान्तरमपेक्ष्यते न्यायानुपपत्त्या संयोगनाश एव नाशकः कल्प्यते, संस्कारादृष्टादेः कार्य्यस्य क्षतिसुखादेश्चिरेणापि दर्शनाच्च तत्राशकल्पना। उपलक्षणञ्चैतत् अवयवेद्रव्येण तत्तद्देशसंयोगनाशादपि परत्वापरत्वे विनश्यतः युक्तेस्तुल्यत्वात्। समवायिकारणनाशादपि क्वचित् परत्वनाशः३ तथा हि यदा पिण्डावयवे सत्युत्पन्ने कर्म्मण्यवयवान्तरादिभागस्तदैवापेक्षाबुद्धिः, विभागात् पिण्डारम्भकसंयोगनाशः परत्वोत्पत्तिः, अपिच तत्रैव संयोगनाशाद्द्रव्यनाशः परत्वसामान्यज्ञानं, द्रव्यनाशात् परत्वनाशोऽपेक्षाबुद्धिनाशश्च सामान्यज्ञानात्, तथाच यौगपद्यान्नापेक्षाबुद्धिनाशात् परत्वनाश इति, क्वचिद्द्रव्यनाशापेक्षाबुद्धिनाशाभ्यां परत्वनाशः४ तद्यथा पिण्डावयवे कर्मापेक्षाबुद्धेरुत्पादस्ततोऽवयवान्तरविभागः परत्वोत्पत्तिः तत आरम्भकसंयोगनाशसामान्यज्ञाने ततो द्रव्यनाशापेक्षाबुद्धिनाशौ ततश्च परत्वनाशः। क्वचिद्द्रव्यस्य संयोगस्य च नाशाभ्यां परत्वनाशः५ तद्यथा यदा द्रव्यावयवविभागस्तदैव पिण्डकर्मापेक्षाबुद्धेरुत्पादस्तदनन्तरमवयवसंयोगनाशदिक्पिण्डविभागपरत्वोत्पत्तयः ततो द्रव्यनाशदिक्पिण्डसंयोगनाशपरत्वसामान्यबुद्धयः ततो द्रव्यनाशदिक्पिण्डसंयोगनाशाभ्यां परत्वनाशः सामान्यबुद्धेरपेक्षाबुद्धिनाशश्च इति। क्वचित् संयोगनाशापेक्षाबुद्धिनाशाभ्यां परत्वनाशः६ तद्-

यथा परत्वोत्पत्तिपिण्डकर्मणी सामान्यज्ञानविभागौ अपेक्षाबुद्धिनाश्यादिक्पिण्डसंयोगनाशौ ततः परत्वनाशः। क्वचित् समवायसमवायिनिमित्तनाशेभ्यः७ तद्यथा परत्वोत्पत्तिपिण्डावयवविभागपिण्डकर्माणि युगपत्, तदनन्तरं परत्वसामान्यज्ञानावयवसंयोगनाश्यादिक्पिण्डविभागाः तदनन्तरमपेक्षाबुद्धिनाशद्रव्यनाश्यादिक्पिण्डसंयोगनाशेभ्यो युगपदुत्पन्नेभ्यः परत्वस्यापरत्वस्य वा दैशिकस्य नाशः। कालिकयोस्तु परत्वापरत्वयोरसमवायिकारणनाशाधीनो नाशो नास्ति दैशिकयोर्दिक्पिण्डसंयोगनाशे सन्निकर्षविप्रकर्षनाशो यथा न तथा कालिकयोरिति तयोः समवायिकारणनाशात्१ अपेक्षाबुद्धिनाशात्२ द्वाभ्यामिति३ त्रयः पक्षाः पूर्ववदूहनीयाः"।

परदार पु० ब०व० इत०। परस्त्रियां मनुः ३।१७४ "परदाररतानैव परद्रव्यहरा च ये। अधोधो नरकं यान्ति वीक्षन्ते यमकिङ्करैः" कर्मलोचनम्। परयोषिदादयोऽप्यत्र "ब्राह्मणैः क्षत्रियो वैश्यो यो रतः परयोषिति" मनुः परदारान् गच्छति ठक्। पारदारिक तद्वत्तरि।

परदेश पु० कर्म०। स्वाधिष्ठितदेशात् भिन्नदेशे ष०स० ३।१२

परद्वेषिन् त्रि० परेभ्यः द्वेष्टि द्विष-णिनि। परदूषके खले शब्दमाला।

परधर्म्म पु० इत०। स्वोचितवर्णाश्रमादिधर्मभिन्ने धर्मे गीता २अ० मनुः १०।९७। कर्म०। तत्कृतधर्मे च

परध्यान कर्म०। ध्यानभेदे "ध्येये मनोनिश्चलतां याति ध्येयं विचिन्तयत्। यत्तत् ध्यानं परं प्रोक्तं मुनिभिर्ध्यानचिन्तकैः" गरुड़पु०।

परनिपात पु० परस्य निपातः उच्चारणम्। योग्यतया विग्रहवाक्ये पूर्वश्रुतस्यापि शब्दस्य समासे परत्वोच्चारणे यथा राजदन्तादिषु दन्तानां राजा इति विग्रहवाक्ये पूर्वश्रुतस्यापि दन्तशब्दस्य परत्वोच्चारणम्। एवं पूर्वं भूत इति वाक्ये भूतपूर्व इत्यादौ।

परन्तप त्रि० परान् शत्रून् तापयति "दिवृतपरयोरुपपे:" पा०खच् "खचि ह्रस्वः" पा०ह्रस्वः हस्। १शत्रुतापके तामसमनोः २दुःखभेदे फरिवं० ७अ०।

परपद न० कर्म०। १उत्कृष्टस्थाने "तद्विष्णोः परं पदम्" ऋ० वैष्णवीनामावली। २मोक्षे च इत०। ३परस्य स्थाने च

परपाकनिष्टप्त पु० पराधात् पाकान्निष्टप्तः। परोद्देश्यक पाकान्निष्टप्ते पञ्चयज्ञाननुष्ठानरि "मटचीत्वाग्निं समारोप्य पचेत्तत्राज्य निर्वपेत्। परपाकनिष्टप्तोऽसौ मुनिभिः परिकीर्त्तितः" मिता० स्मृतिः। तद्भोजननिषेधः यतपाकरतशब्दे दृश्यः।

परपाकरत त्रि० परस्य पाके रतः। परपाकरुचौ "पच यज्ञान् स्वयं कृत्वा परान्नमुपजीवति। सततं प्रातरुत्थाय परपाकरतस्तु सः" मिता० स्मृतिः। "परपाकनिष्टप्तस्य परपाकरतस्य च। अपचस्य च शुक्लान्नं द्विजश्चान्द्रायणं चरेत्" मिता० स्मृतिः।

परपिण्डाद परस्य पिण्डमन्नमत्ति अद-अण् उप०स०। परान्नोपजीविनि अमरः।

परपुरुष पु० कर्म०। १उत्कृष्टपुरुषे पुरुषोत्तमे विष्णौ त्रिका० पुरुषोत्तमशब्दे दृश्यम् स्वभर्तृभिन्ने पुरुषे २उपनायके च।

परपुष्ट पु० परया काक्या पुष्टः पुष-क्त सर्वनाम्नः पुंवत्। १कोकिले। कोकिलया हि डिम्बस्फोटनादनया काकनीड़स्थं काकडिम्बमपसार्य्य स्वडिम्बे तत्र स्थापिते काक्या स्वडिम्बबुद्धाऽसौ पुष्यते इति लोकप्रसिद्धिः। परभृताद्योऽप्यत्र माघे १२।११६। २अन्यपालिते त्रि०। ३वेश्यायाम् स्त्री मेदि०।

परपुष्टमहोत्सव पु० परपुष्टानां महोत्सवो यत्र। आम्रे तस्य स्वपुष्पोद्गमहारा कोकिलानां महोत्सवजननात्तथात्वम्।

परपूर्वा स्त्री परः इतरः पूर्वो यस्याः। "पतिं हित्वापकृष्टं स्वमुत्कृष्टं या निषेवते। निन्द्यैव सा भवेल्लोके परपूर्वेति चोच्यते" मनूक्तायां पुनर्भुवि स्त्रियाम्। तल्लक्षणं नारदेन दर्शितः "परपूर्वाः स्त्रियस्तस्याः सप्त प्रोक्ता यथाक्रमम्। पुनर्भूस्त्रिविधा तासां स्वैरिणी च चतुर्विधा" अन्यपूर्वाशब्दे २१६४० विवृतिः।

परपौरवतन्तव पु० विश्वामित्रपुत्रभेदे भा०अनु० ४अ०।

परप्रतिनप्तृ पु० प्रतिनप्तुः परः अनन्तरः वा० परनि०। दुहितृपौत्रे हेमच०। [दुहितृपौत्रे हेमच०।

परप्रपौत्र पु० प्रपौत्रात् परः अनन्तरः वा० परनिपातः।

परप्रेष्य स्त्री इत०। १दासे २दासायां स्त्री कात्यायन० २७अ०।

परब्रह्मन् न० कर्म०। निर्गुणे निरुपाधिके १ब्रह्मणि तत्प्रतिपादके २उपनिषद्भेदे च।

परभाग पु० परस्य उत्कृष्टस्य भागः भावः। १गुणोत्कर्षे कर्म०। २पश्चिमभागे च हेमच०। उभयत्र माघः १०।८६ श्लोके उदा०। ३छन्दसम्मिते त्रिका० इत०। ४अन्यस्यांशे

परभाषा स्त्री कर्म०। संस्कृतभिन्नायां भाषायामपशब्दे शारा०

परभुक्त त्रि० इत०। १अन्येन भुक्ते २परभोगयुक्तायां स्त्रियां

स्त्री "परभुक्तां च कान्तां च यो भुङ्क्ते स नराधमः। स पच्यते कालसूत्रे यावच्चन्द्रदिवाकरौ" इत्यादिना तत्स्त्रीगमने दोषाः ब्रह्मवै०पु० ब्रह्मख० १८अ०उक्ताः।

परभृत् पु० परं स्वपुत्रबुद्ध्या कोकिलपुत्रं बिभर्त्ति भृ-क्विप् ह्रस्वः। १काके अमरः २स्वेतरपोषकमात्रे त्रि०।

परभृत पुंस्त्री० परेण स्वजनकभिन्नेन काकेन भृतः। १कोकिले अमरः स्त्रियां जातित्वात् ङीष्। २अन्यपुष्टमात्रे त्रि०। [३पचादर्थे च।

परम् अव्य० पृ-अमि। १नियोगे २क्षेपे ३केवले च मेदि०।

परम त्रि० परं परत्वं माति-क। १उत्कृष्टे २प्रधाने ३श्रेष्ठे मेदिनिः ४प्रथमे च विश्वः।

परमक्रान्ति स्त्री ष०वि० उक्रायां खर्यस्य गोलक्रान्तौ।

परमक्रोधिन् पु० १विश्वदेवभेदे भा०अनु० ८३अ०। २अत्यन्तक्रोधान्विते त्रि०।

परमपु(पू)रुष पु० कर्म०। पुरुषोत्तमे विष्णौ [मेदिनिः।

परमम् अव्य० पर+मा-डमि। १अनुत्तायाम् २स्वीकारे च

परममहत् त्रि० परमं सर्वोत्कृष्टं महत्। सर्वापेक्षया उत्कृष्टमहत्त्वगुणयुक्ते व्योमादौ "कालव्योमदिशां सर्वं गतत्वं परमं महत्" भाषा०। भावप्रधानः निर्देशः परममहत्त्वमित्यर्थः। तस्य भावः परममहत्त्व सर्वोत्कृष्टमहत्त्वे "परमाणुपरममहत्त्वान्तोऽस्य वशीकारः" पात०स्०। "सूक्ष्मे निविशमानस्य परमाख्यं स्थितिपदं लभत इति स्थूले निविशमानस्य परममहत्त्वान्तं स्थितिपदं चित्तस्य एवं तासुभयीं कोटिमनुधावतो योऽस्याप्रतिघातः स परो वशीकारः तद्वशीकारात् परिपूर्णं योगिनश्चित्तं न पुनरभ्यासकृतं परिकर्मापेक्षते" भा०।

परमर्षि पु० कर्म०। वेदव्यासादिषु ऋषिषु तन्नामनिरुक्तिः मत्स्यपु० १९५अ० यथा

"ऋषिर्हि सागरौ धातुर्विद्यासत्यतपःश्रुतैः। एष सञ्चिचयो यस्मात् ब्राह्मणश्च ततस्त्वृषिः। विद्वत्तिसमकालन्तु बुद्ध्वा व्यक्तिमधिस्त्वयम्। ब्रूयते परमं यस्मात् परमर्षिस्ततः स्मृतः। गत्वर्थोऽयतेर्धातोर्नामानि हृत्तिकारयम्। यस्मादेष स्वयंभूतस्तस्माच्च ऋषिता मता"।

परमहंस परमः हंस आत्मा यस्य। सन्न्यासिभेदे "कुटीचको बह्वदकः हंसश्चैव तृतीयकः। चतुर्थः परमो हंसो ज्ञेयः पश्चात् स उत्तमः" हारीतः। परहंसोऽत्र "परहंसस्त्रिदण्डं च रज्जुं गोबालनिर्मिताम्। शिखां यज्ञोपवीतं च नित्यं कर्म परित्यजेत्" स्कन्दपु०। "शिखिं वपनं कुर्यात् हंसश्च परहंसकः। शौर्षमाखण्डितं ज्ञेयं वपनं परिकीर्त्तितम्" पुराणसमुच्चये तद्धर्माः स्थिताः। दण्डधारणचाविदुष एव विदुषस्तु तन्नास्ति "न दण्डं न शिखां नाच्छादनं न भैक्षं चरति परमहंसः" मन्त्रोपनिषदुक्तेः "ज्ञानमेवास्य दण्डः" इति तत्त्वाक्यशेषाच्च। अन्येऽपि तद्धर्मा मिता० नि० शि० च उक्ता द्रष्टव्याः। कर्म०। २परमात्मनि ३ततप्रतिपादके उपनिषद्भेदे।

परमाणु पु० कर्म०। सर्वापकृष्टे परिमाणयुक्ते वैशेषिकमतप्रसिद्धे चित्यप्तेजोमरुतां १सूक्ष्मांशभेदे तस्य च नित्यत्वं तैरङ्गीकृतम् तन्नाशकाभावात्। ततो महाभूतारम्भप्रकारस्तु उत्पत्तिशब्दे ११५५ पृ० कणादभाष्यन्यायकन्दल्योरुक्तो दर्शितः। "दोधूयमानास्त्रिवृति प्रथमे पवमाणवः" इत्युक्तिस्तु सर्जनोन्मुखवायुपरमाणुविषया उत्पत्तिशब्ददर्शिते कणादभाष्यवाक्ये वायवीयपरमाणूनां प्रथमं क्रियोत्पत्त्यैव दोधूयमानतोक्तेः अन्येषां च तत्प्रेरणेनैव ततः परं क्रियोत्पत्तेः सम्भवात्। अन्यथा वायवीयपरमाणौ दोधूयमानत्वविशेषणासङ्गत इति विवेच्यम्। २परमाणुवच्छिन्ने कालभेदे "स कालः परमाणुर्वै यो भुङ्क्ते परमाणुताम्। सतो विशेषभुग्वस्तु कालः स परमो महान्" भाग० ३।११।५ "अतः प्रपञ्चस्य परमाणुतां परमाणवस्थां यो भुङ्क्ते स कालः परमाणुः तस्यैव विशेषं साकल्यं यो भुङ्क्ते स परोमहान्। अयमर्थः "यद्वैतारायचक्रस्य" इत्यादिना यत् सूर्य्यपर्य्यटनं वक्ष्यति तत्र सूर्यो यावता परमाणुदेशमतिक्रामति तावान् कालः परमाणुः। यावता च द्वादशराश्यात्मकं सर्वं भुवनकोशमतिक्रामति स परमो महान् संवत्सरात्मकः तस्यैवाढत्या युगमन्वन्तरादिकमेव द्विपरार्द्धान्तमिति" श्रीधरस्वामी।

परमाणुरङ्क पु०परमाणुरङ्कं यस्य। १ईश्वरे विष्णौ शब्दमाला। कर्तुः शरीरावश्यकत्वाङ्गीकारे सर्वकर्तुरीश्वरस्य परमाणूनां तच्छरीरत्वेनाङ्गीकारेण सामञ्जस्यमिति न्यायमते स्थितम्।

परमात्मन् पु० कर्म०। परमेश्वरे "सर्गापवर्गयोर्मार्गमामनन्ति मनीषिणः। यदुपाधिमसावत्र परमात्मा निरुप्यते" कुसुमा०। "परमात्मा परं ब्रह्म निर्गुणं प्रकृतेः परः। कारणं कारणानाञ्च श्रीकृष्णो भगवान् स्वयम्" ब्रह्मवै०पु० प्रकृति० २३अ० गीता १५अ०। [विष्णौ।

परमाद्वैत पु० परममद्वैतं यत्र। सर्वभेदरहिते परमात्मनि

परमानन्द पु० परमः सर्वोत्कृष्ट आनन्दः। सकलानन्दोत्कृष्टानन्दात्मके परमात्मनि "परमानन्दमाधवम्" श्रीधरः। "एतस्यैव मात्रामुपजीवन्ति" इति श्रुतेः तैत्ति०उ० ब्रह्मानन्दवल्ल्यां ८अनुवाके "सैषानन्दस्य मीमांसा" इत्युपक्रमे मानुषानन्दादिभ्यः प्रजापत्यानन्दान्तेभ्य ब्रह्मणः शतगुणानन्दत्वोक्तेश्च तथात्वम्। आनन्दशब्दे ७।८पृ० तदाख्यान्युक्तानि। २तथानन्दयुक्ते परमात्मनि इति नैयायिकाः। तत्रानन्दशब्दस्य दुःखाभावपरत्वम्। इदन्तत्र बोध्यम् "स एको ब्रह्मण आनन्द इत्यत्र ऋभेदे षष्ठी भेदषष्ठीयङ्क्षे आनन्दशब्दस्य दुःखाभावपरत्वकल्पने च अभावस्य निर्विशेषत्वात् स्वल्पत्वस्य प्रजापत्यानन्दाभेदेन शतगुणत्वस्वारस्यभङ्गात् ब्रह्मण आनन्दे प्रजापतिशतगुणत्वोक्तिर्विरुध्यते।

परमान्न न० कर्म०। पायसे दुग्धपक्वेऽन्ने अमरः देवपितृप्रियत्वात् परमत्वमस्य। क्षीरान्नशब्दे २।८।५ तत्प्रकारगुणाद्युक्तं दृश्यम्।

परमापक्रमज्या स्त्री ष०त०। वृत्तायां परमक्रान्तिज्यायां परक्रान्तिशब्दे दृश्यम्।

परमापूर्व न० कर्म०। कलिकापूर्वजन्ये स्वर्गादिफलसाधने अपूर्वभेदे कलिकापूर्वशब्दे १८०८ पृ० दृश्यम्।

परमामुद्रा स्त्री त्रिपुरायाः पूजाङ्गे मुद्राभेदे "मध्यमे कुटिले कृत्वा तर्जन्यौ परिवेष्टिते। अनामिके मध्यगते तथैव हि कनिष्ठिके। सर्वा एकत्र संयोज्य अङ्कुशपरिमोढिताः। एषा तु परमामुद्रा योनिमुद्रेयमीरिता। यतामुद्रा मनेत्यानि। त्रिपुरायामयोदिताः। पूजाकाले प्रयोक्तव्या यथाशक्तियोगतः" तन्त्रसारः।

परमायुष पु० परममायुर्यस्य पृषो०बा० अच्स०। अयनशब्दे शब्दच०।

परमायुस् न० कर्म०। यस्य यावत्कालं जीवनकालः शास्त्रोक्तः तस्य तत्कालपर्य्याप्तजीवनकाले आयुर्दायशब्दे ७७१ पृ० तदानयनाद्युक्तं दृश्यम्। शब्दमालायां प्राणिभेदे परमजीवनकालभेदाश्च उक्ता यथा

"शतं वर्षाणि विंशत्या निशाभिः पञ्चभिः सह। परमायुरिदं प्रोक्तं नराणां करिष्यामिह। अष्टौ दाशिंशदब्दानां गुनां द्वादश वत्सराः। पञ्चविंशतिवर्षाणि खरस्य करभस्य च। चतुर्विंशतिरब्दानां हयस्य महिषस्य च। खगस्यैकरवस्यादिपशूनां षड्दशान्विताः" अधिकमायुस्शब्दे ७८५ पृ० दृश्यम्।

परमार्थ पु० कर्म०। उत्कृष्टवस्तुनि २यथार्थे च मात्रुका वार्त्तिकं तत्र अर्थस्य अबाधितत्वात् परमत्वम्।

परमार्हत पु०परम अर्हन् उपास्यतया अस्यास्य अण्, अर्हन् देवताऽस्य अण् कर्म० वा। जैनराजर्षिभेदे हेमचन्द्रः।

परमीकरणमुद्रा स्त्री देवताह्वानाङ्गे मुद्राभेदे "अन्योन्यग्रथिताङ्गुष्ठप्रसारितकराङ्गुली। मङ्गामुद्रेयमुदिता परमीकरणे बुधैः। प्रयोजयेदिमां मुद्रां देवताह्वानकर्मणि" तन्त्रसा०। इमाः आवाहन्यादिपरमीकरण्यान्ता इत्यर्थः। परमीकरणञ्च अस्यां मुद्रायां देवदर्शनपूर्वं ज्ञानमस्य।

परमृत्यु पु० परश्चासौ मृत्युश्च। काके त्रिका० तस्य रोगादिना स्वतो मृत्योरभावेन परहेतुकमृत्युत्वात्तथात्वम्।

परमेश पु० कर्म०। परमेश्वरे

परमेश्वर पु० कर्म०। जगत्सृष्ट्यादिकारके सगुणे त्रिमूर्त्तिके १ब्रह्मणि २चक्रवर्त्तिनि नृपे च। ३शिवे हेका० ४विष्णौ च।

परमेष्ठ पु० परमे चिदाकाशे सत्यलोके वा तिष्ठति स्था-क अलुक्समा० अम्बाम्बेति षत्वम्। चतुर्मुखे ब्रह्मणि। क्विप्। परमेष्ठा अयत्र यजु० १४।२१ तत्र "स्थास्थिनृस्थूणामिति" षत्वम्।

परमेष्ठिन् पु० परमे व्योमनि चिदाकाशे ब्रह्मणि सत्यलोके वा तिष्ठति "परमे किञ्च" उषा०इनि अलुक्स०"स्थास्थिनृस्थूणाम्" षत्वम्। चतुर्मुखे ब्रह्मणि अमरः २आसमौढ नृपपुत्रभेदे भा०आ०९४अ०। ३जिने पु० हेमच० ४महादेवे भा०व० ३७अ० ५शालग्राममूर्त्तिभेदे "परमेष्ठी च शुक्लस्तु पद्मचक्रसमन्वितः। चिह्नाङ्कितस्तथा पृष्ठे शुषिरं चातिशुक्लकम्" पुराणसर्व्वस्वे। ६गुरुभेदे "मन्त्रदाता गुरुः प्रोक्तो मन्त्रस्तु परमो गुरुः। परात्परो गुरुस्त्वं हि परमेष्ठी गुरुस्त्वहम्" तन्त्रम् परापरेति पाठान्तरम्। ७ब्राह्मां (वामनघाटि) स्त्री राजनि० ङीप् तस्येदं यत् टिलोपे। पारमेष्ठ्य तत्सम्बन्धिनि त्रि०।

परम्परा स्त्री परम् अतिशयेन पृणाति पिपर्त्ति वा पृ-पृ-वा अच्। १वंशे २सन्ततौ अविच्छिन्नधारायाम् हेमच०"एवं परम्पराप्राप्तो योगः प्रोक्तोमयाऽनघ!" गीता ४अ० ३अनुक्रमे च ४मृगभेदे मेदि० प्रपौत्रादौ ६अन्वये ७प्रपौत्रहृते पु० शब्दच०।

परम्पराक न० परम् अतिशयेन परा श्रेष्ठा परम्परा तया धारया आकोर्हिंसनं यत्र अक-कुटिलगतौ वञ् प्रशस्या परम्परा हिंसा अनिष्टजनकत्वात् कन् वा, नपुंसकत्वं

कोणात्। ३यज्ञार्थं पशुहनने अमरः "या वेदविहिता हिंसा नियताऽस्मिंश्चराचरे। अहिंसामेव तां विद्यात्" इति मनूक्तेरहिंसात्वेन हि प्राशस्त्यम्।

परम्परीण त्रि॰ परम्परया धारया आगतः ख। अविच्छेदसन्तत्यागते भट्टिः ५सर्गः। [युगीन तत्र साधौ त्रि॰।

परयुग न॰ कर्म॰। उत्तरवर्त्तियुगे तत्र साधुः खञ्। पार॰

परर पु॰ पृ–वा॰ अरः। केशराजे त्रिका॰।

पररूप त्रि॰ परस्य रूपमिव रूपमस्य। स्वोत्तरवर्त्तिपरस्येव रूपवति "एङि पररूपम्" पा॰।

परलोक पु॰ कर्म॰। लोकान्तरे स्वर्गादौ। तत्र स्थितादि ठञ् अनुशतिका॰दिपदवृद्धिः। पारलौकिक तत्र स्थितादौ त्रि॰

परलोकगम पु॰ परलोकं लोकान्तरं गमयति गम–णिच्–अच्। मृत्यौ हेमच॰।

परवत् त्रि॰ परः नियोजकतयाऽस्त्यस्य मतुप् मस्य वः। पराधीने हेमच॰ स्त्रियां ङीप्।

परवश त्रि॰ परस्य वश आयत्तता यत्र। पराधीने हेमच॰।

परवाणि पु॰ परं वाणयति वण–णिच्–इन्। ३धर्माध्यक्षे २वत्सरे मेदि॰। ३कुमारवाहने मयूरे शब्दमा॰।

परवाद पु॰ ६त॰। ३परक्षापवादे कर्म॰। २उत्तरवादे च।

परवादिन् पु॰कर्म॰। प्रत्यर्थिनि उत्तरवादिनि स्त्रियां ङीप्।

परव्रत पु॰ परं व्रतमस्य। धृतराष्ट्रे शब्दमाला।

परश पु॰ अर्श+पृषो॰। अर्शसो यस्य अर्शांसि इतरस्य धातोः अर्शता ताडये रत्नभेदे वृक्षवै॰जन्माख॰ ४अ॰।

परशव्य त्रि॰ परशौ हितं यत्। परशुहिते

परशु पु॰ परं शृणाति शृ–कु डिच्च। ३परश्वधे (टाङ्गी) अस्त्रभेदे। शृ–अथुन् पृ आदेशः। पर्शुरप्यत्र २अस्त्रभावे च। परशुलक्षणञ्च हेमा॰ औशनसनीतिशास्त्रोक्तं कुठारशब्दे २०७४ पृ॰ दर्शितम्।

परशुराम पु॰ परशुधारी रामः मा॰त॰। जमदग्निजे भगवदवतारभेदे येन परशुना त्रिःसप्तकृत्वो भूमिर्निःक्षत्रिया कृता। अस्योत्पत्त्यादिकं यथा "अथ काले व्यतीते तु जमदग्निर्महातपाः। विदर्भराजस्य सुतां प्रयत्नेन जितां स्वयम्। भार्यार्थे प्रतिजग्राह रेणुकां लक्षणान्विताम्। वरा तस्मात् सुषुवे पुत्रान् चतुरो वेदसम्मतान्। रुक्मवन्तं सुषेणञ्च वसुं विश्वावसुन्तथा। पश्चात्तेषां स्वयं जज्ञे भगवान् मधुसूदनः। कार्त्तवीर्यवधायाशु शक्राद्यैः सकलैः सुरैः। याचितः प्रथमः सोऽभूत्तेषां रामाह्वयस्तु वः। भारावतरणार्थाय जातः परशुना सह। सहजः परशुस्तस्य जहाति स्म कदाचन। अयं निजपितामह्याश्चरुभुक्तिविपर्य्ययात्। ब्राह्मणः क्षत्रियाचारो रामोऽभूत् क्रूरकर्मकृत्। स वेदानखिलान् ज्ञात्वा धनुर्वेदांश्च सर्वशः। कृतात्रः कृत कृत्योऽभूद्दिव्यास्त्रविशारदः" कालिकापु॰ ८५अ॰।

परशुधर पु॰ परशुं धरति धृ–अच्। ३गणेशे हेमाद्रौ। २परशुधारिमात्रे त्रि॰ ३जामदग्न्ये परशुरामे पु॰।

परशुमुद्रा स्त्री मुद्राभेदे "तर्जनीमध्यमानामाकनिष्ठाङ्गुष्ठयष्टिका। अधोमुखी दीर्घरूपा मध्यमा विघ्नयष्टिका। परशुमुद्रा कथिता सिद्धिदा खड्गमुष्टिका" तन्त्रसारः।

परशुवन न॰ परशुवत्पत्रयुक्तं वनम् मा॰त॰। नरकभेदे भा॰व॰ ३२३अ॰।

परश्व(स्व)ध पु॰ वि–ड यो धृषिः परश्वः स्वं धयति, परस्य स्वं काष्ठं धयति वा धे–क। कुठारे अस्त्रभेदे अमरः।

परश्वस् अव्य॰ परःअस्+पृषो॰। आगामिदिनात् परदिने अमरटीका।

परस् अव्य॰ परस्मात् परस्मिन् परो वा पर+पञ्चम्याद्यर्थे वा॰ असि। पञ्चम्याद्यर्थद्योती परशब्दार्थे यजु॰५।४२

परसंज्ञक पु॰ परः संज्ञाऽस्य कप्। देवादिभ्यः परस्मिन् आत्मनि शब्दच॰।

परसवर्ण पु॰ समानवर्णः सवर्णः ३त॰। परेण उत्तरवर्त्तिना वर्णेन समानवर्णे पा॰ ८।४भा॰।

परस्तर त्रि॰ तरप्तरकीयः परः अतिशयेनतृजर्थं तरः पारस्करा॰। अतिशयेन तरकीये ऋ॰ १०।१५५।३

परस्तात् अव्य॰ पर+पञ्चम्याद्यर्थे आतिः। पञ्चम्याद्यर्थद्योती परशब्दार्थे परस्तात् ग्रामः ग्रामात् ग्रामे वा।

परस्त्री स्त्री ६त॰। परकीयायां स्त्रियां तत्र भवादि अण् ननागमः अनुशतिका॰दिपदवृद्धिः। पारस्त्रैण परस्त्रियां भवादौ त्रि॰।

परस्पर त्रि॰ "सर्वनाम्नो हे वाच्ये समासवच्च बहुलम्" वार्त्ति॰ "समासवदुभावे पूर्वपदस्य सुबुत्पत्तव्यः" वार्त्ति॰ सुः। इतरेतरशब्दार्थे अत्र स्त्रीक्लीवयोस्तु "स्त्रीनपुंसकयोरुत्तरपदस्यापि विभक्तेरामभावो वक्तव्यः" वार्त्ति॰ आम् परस्पराभित्येव। भट्टिः २सर्गे उदा॰।

परस्मैपद न॰ परस्मै परोऽर्थफलकं पदम् "वैयाकरणाख्यायां चतुर्थ्याः" अलुक्समा॰। धात्विनिपरिभाषितेषु लकारादेशानामटानां मध्ये प्रथमेषु तिप्तस्झिसिप्थस्थमिब्वस्मस्त्वादिषु नवसु। "शेषात् कर्त्तरि परस्मैपदम्" पा॰

"आत्मनेपदनिमित्तहीनात् धातोः परस्मैपदं स्यात्" सि॰कौ॰ आत्मनेपदनिमित्तं च "कर्त्रभिप्राये क्रियाफले" इत्युक्तं कर्तृगामिक्रियाफलत्वं तच्छून्यत्वेन परगामिक्रियाफलबोधयोग्यत्वादस्य परस्मैपदत्वसंज्ञेति बोध्यम्। एवं परस्मैभाषाऽप्यत्र।

परा अव्य॰ पृ-आ। १प्रातिलोम्ये २प्राधान्ये ३वर्जने ४आभिमुख्ये ५ख्याने ६विक्रमे ७भर्त्सार्थे ८गतौ ९भङ्गे १०अनादरे ११तिरस्कारे १२प्रत्याहृतौ च मेदि॰ "परा बधगतिदर्शनविक्रमाभिमुखभर्त्साधीनभोजनप्रातिलोम्येषु" मथुरटीकोक्तार्थभेदे क्रमादुदाहृतं यथा पराहृतः परागतः पराहृष्टः पराक्रान्तः पराहृत्तः पराजितः पराधीनः पराक्रतः पराङ्मुखः"। १२वन्ध्याकर्कोट्यां "परा वामनपायिनी" इत्युक्ते १३मूलाधारस्थे शब्दभेदे "सा परा यत्राऽक्षरमधिगम्यते" इति सुत्युक्तायां १४ब्रह्मविद्यायाञ्च स्त्री।

पराक पु॰ प्रायश्चित्तरूपे व्रतभेदे यथाह प्राव॰वि॰ "यदात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम्। पराको नाम कृच्छ्रोऽयं सर्वपापापनोदनः" मनुः। "जपहोमरतः कृत्वा दृढादशाहमभोजनम्। पराक एष विख्यातः सर्वपापप्रणाशनः" हरीतिः। "पराके पञ्च धेनवः" इत्युक्तेः पराकस्य पञ्चधेनुतुल्यत्वम्। यथाह अङ्गिराः "षड्भिर्वर्षैः कृच्छ्रचारी ब्रह्महा तु विशुध्यति। मासि मासि पराकेण त्रिभिर्वर्षैर्व्यपोहति"। अत्र षड्भिर्वर्षैः स्वार्थोत्तमप्राजापत्यानि पूर्वसङ्ख्यानि तथा प्रतिमासे चैकपराकेण वर्षे द्वादश पराकाः वर्षत्रये षट्त्रिंशत्पराकाः। ततश्च षट्त्रिंशत्पराकाधोत्तरप्राजापत्यशतयोः प्रत्येकं ब्रह्मवधपापक्षयैककार्यकरत्वात् तुल्यत्वम्। षट्त्रिंशतश्च षड्गुणमधोत्तरशतं भवतीति" प्रा॰त॰।

पराके अव्य॰ परा+अक-बा॰ डे। दूरे निघण्टुः।

पराकाश पु॰ वाचा प्रतिज्ञातस्यार्थस्य कर्मणोऽकृतस्य परीक्षायाम् शत॰ब्रा॰ १४।६।४।११ भाष्यम्। [राजनि॰।

पराकपुष्पी स्त्री पराक् पुष्पं यस्याः ङीप्। अपामार्गे

पराक्रम पु॰ परा+क्रम-करणे घञ् न वृद्धिः। बले देहस्थे अमरः।

पराग पु॰ परागच्छति परा+गम-ड। १धूलिमात्रे २पुष्परजसि माघः ६।१ ३स्वार्थीयद्रव्ये कङ्कुमकर्पूरौ अमरः। ४अपराधे ५बन्धने च मेदि॰ ६छन्दोगतौ शब्द॰।

पराङ्ग न॰ ६त॰। १अन्यस्माङ्गे "पराङ्गवत् स्वरे" पा॰ २श्वेताङ्गे। [१भिन्ने २वत्सदृष्टाङ्गयुक्ते त्रि॰।

पराङ्गद पु॰ परमङ्गदमस्य वत्सदृष्टाङ्गेन दायति दै-क वा।

पराङ्गव पु॰ पराङ्गम् वत्सदृष्टाङ्गं जवत्रह्मा वाति वा-क। बछड़े त्रिका॰।

पराङ्मुख त्रि॰ पराक् मुखमस्य। १विमुखे २क्रियादौ प्रतीपाचारिणि स्त्रियां ङीप्। ३निष्फलत्वे "कामवीजं सुखे माया शिरस्कङ्कुशमेव च। अयो पराङ्मुखः प्रोक्तो मध्ये तु विन्दुलाञ्छितः" तन्त्रसारोक्ते ४मन्त्रभेदे पु॰

पराच् त्रि॰ परा-अञ्चति-क्विप्। १प्रतिलोमगामिनि २अर्वाग्गामिनि च "ये चासुत्रात् पराञ्चो लोकाः" छा॰उ॰। २अप्रत्यक्षगम्ये परस्मादादौ पु॰। पुंसि सर्वनामस्थाने पराङ् पराञ्चौ इत्यादि स्त्रियां ङीप्। पराची। परा-ञ्चति क्विप्। ३परगामिनि बाह्यपदार्थबोधके ४प्रत्यक्षू-पात्मनि च "पराञ्चि खानि व्यतृणत् स्वयम्भूः, तस्मात् पराङ् पश्यति नान्तरात्मन्। कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्" कठोप॰। "पराञ्चि परागच्छन्तीति श्रोत्रादीनीन्द्रियाणि खानीत्युच्यन्ते। तानि पराङ्ञ्चेव शब्दादिविषयप्रकाशनाय प्रवर्त्तन्ते। यस्मादेवं स्वाभाविकानि तानि व्यतृणद्धिंसितवान् हननं कृतवानित्यर्थः। कोऽसौ स्वयम्भूर्यः परमेश्वरः स्वयमेव स्वतन्त्रो भवति सर्वदा न परतन्त्र इति। तस्मात् पराङ् प्रत्यक्षूपलभते नान्तरात्मन् नान्तरात्मानमित्यर्थः। एवं स्वभावेऽपि सति लोकस्य कश्चिद्धीमान् प्रतिस्रोतःप्रवर्त्तनमिव धीरो धीमान् विवेकी प्रत्यगात्मानं प्रत्यक् चासावात्मा चेति प्रत्यगात्मा प्रतीच्येवात्मशब्दो रूढो लोके नान्यत्रेति व्युत्पत्तिं प्रत्येऽपि तत्रैवात्मशब्दो वर्त्तते "यज्ञाप्नोति यदाप्तो यज्ञात्ति विषयानिह। यज्ञास्य सन्ततो भावस्तस्मादात्मेति कीर्त्यते" इत्यात्मशब्दव्युत्पत्तिस्मरणात्। तं प्रत्यगात्मानं स्वभावमैक्षद् प्रपश्यतीत्यर्थः छन्दसि वालामियमात्। कथं प्रपश्यतीत्युच्यते। आवृत्तचक्षुरावृत्तं व्यावृत्तं चक्षुः श्रोत्रादिकमिन्द्रियजातमग्रेषविषयादृष्टस्य आवृत्तचक्षुः स एवं संस्कृतः प्रत्यगात्मानं पश्यति। न हि बाह्यविषयालोचनपरत्वं प्रत्यगात्मैक्षस्यैकस्य सम्भवतीति। किमिच्छन् पुनरित्थं मन्त्रता प्रयासेन स्वभावप्रवृत्तिनिरोधं कृत्वा धीरः प्रत्यगात्मानं

पश्चात्तीलुच्यते अमृतत्वममरत्वधर्मत्वं नित्यस्वभावतामित्यन्यदात्मन इत्यर्थः" भा०।

पराचित त्रि० परेणाचितः। परदृष्टे अमरः।

पराची स्त्री परा-अञ्च-क्विप् ङीप्। अनुलोमेनानाडीत्तायामृचि "तिसृभ्यो द्विदुरोति स पराचीभिः" ताण्ड्य०ब्रा० २परिवर्त्तिन्यां विष्टुतौ च "सैषा पराची" भा० पराचीभिरनाडीत्ताभिः ऋग्भिर्गीयते यथा प्रथमे पर्य्याये अनाडीत्ताभिर्गानं तथोत्तरयोरपीति" भा०।

पराचीन त्रि० पराचि भवः ख। १उत्तरकालभवे २पराङ्मुखे अमरः।

पराचैस् अव्य० परा-चि डैसि। दूरे निघण्टुः ऋ०१।२४।६

पराजय पु० परा+जि-अच्। पराभवे (हारि) अमरः।

पराजित त्रि० परा+जि-कर्म्मणि क्त। पराभूते कृतपराजये।

पराञ्च पु० परतोऽञ्च्यते अनुज-वा० अच्। १तैलयन्त्रफेने २क्षुरिकाफले च शब्दर०। खुट्। पराञ्चनमप्यत्र न०।

पराण् पु० परा+अन-क्विप् "अलः" पा०(पदान्तस्यानितेर्णत्वं व्यादुपसर्गस्थात् निमित्तात् परत्वेन)णत्वम्। जीवनयुक्ते एवं प्राण इत्यादावपि णत्वम्।

परात्पर पु० परस्मात्परः अलुक्स०। १गुरुभेदे परमेष्ठिनि शब्दे दृश्यम्। २परमेश्वरे तस्य सर्वेभ्यः परत्वात् तथात्वम्। "इन्द्रियेभ्यः परे ह्यर्था ह्यर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिः बुद्धेरात्मा महान् परः। महतः परमव्यक्तमव्यक्तात् पुरुषः परः। पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः" कठवल्ली मोक्षे च "परात्परं शाश्वतमेति दिव्यम्" श्रुतिः।

परात्रिय त्रि० परेणाद्यते अद-भावे क्विप् तत्र परस्मादने त्रियम्। (अन्नु) दृश्यभेदे शब्दच०।

परात्मन् पु० कर्म०। १परमात्मनि हेत०। २परस्मात्मनि च।

परादन पुंस्त्री० परस्मात्कृष्टमदनं यस्य। पारस्यदेशोद्भवेऽश्वे (आरबीघोड़ा) त्रिका०।

परादान न० परस्मै आदानं सम्यग् दानम्। परोपकाराय द्रव्यादिना कृपणादिभ्यः सम्यग्दाने वसु० १८।६४ वेददीपे दृश्यम्।

पराधि उ०हेत०। १अन्यस्मिन्धौ कर्म०। २परमसाधनव्यवसायाम्।

पराधीन त्रि० पर+ङि अधि इति अव्ययीभावे समासे अध्युत्तरपदात् ख, परस्याधीनो वा। परायत्ते अमरः।

परान(ण)सा स्त्री परासिञ्चनया परा+अन-करणे वा० अच्। चिकित्सायां शब्दच०। अत्यन्तमध्यस्थे साधुः।

परान्तक पु० परोऽन्तकः। सर्वनाशके महादेवे काशीख० दृश्य०। "ल्युर्यस्योपपदेचनम्" इति स्मृतेः तस्य सत्योनाशकत्वात् परान्तकत्वम्।

परान्तकाल पु० परः संसारोत्तरं अन्तकालः। सकृच्छ्रां संसारहानौ हेतुभूते काले "ते ब्रह्मलोकेषु परान्तकाले परामृताः परिमुच्यन्ति सर्वे" श्रुतेः। संसारिणां ये मरणकालास्ते अन्तकालास्तानपेक्ष्य सकृच्छ्रां संसारहानौ हेतुपरित्यागकालः परान्तकालः" भा०। वस्तुतः कार्य्यब्रह्मणः आयुःकालरूपपरशब्दार्थकालकालः परान्तकालः "कार्य्यात्यये तदध्यक्षेण सहातः परमभ्यानादिति" भा० सूत्रे तत्कालो तेषां क्रमशोन्नेः ब्रह्मलोकेषु इति विभेदभाच्च तत्रैव तेषां मोक्ष इत्येव युक्तम्।

परान्तिका स्त्री "यस्य युग्मरचिता परान्तिका" हरः०उक्ते गीतिरूपमात्राछत्तभेदे अपरान्तिकेति तत्र पाठे तत्रार्थे

परान्न न० हृत०। १अन्यस्वामिकभक्तपिष्टकादौ। २परहस्तपक्वकलद्रव्यमात्रे ३परपक्वान्ने च।

प्रतादौ परान्नस्य त्याज्यत्वं यथा "परान्नं परवासश्च नित्यं धर्मरतस्त्यजेत्" इति स्मृतिः। संयमदिने तस्य त्याज्यत्वं यथा "कांस्यं मांसं मसूरश्च चणकं कोरदूषकम्। शाकं मधु परान्नञ्च त्यजेदुपवसन् स्त्रियम्"। पारणदिने तस्य त्याज्यत्वं यथा "अभ्यङ्गश्च परान्नञ्च तैलं निर्माल्यलङ्घनम्। तुलसीचयनं द्यूतं पुनर्भोजनमेव च। वस्त्रपीड़ां तथा चारं द्वादशैतां वर्जयेद्बुधः" एका०त०। तद्भोक्तुर्योगादिविफलत्वं यथा "परपाकेषु जुष्टञ्च द्विजस्य ब्रह्मभेधिनः। इष्टं दत्तं तपोऽधीतं यस्माच्चं तस्य तद्भवेत्"। तद्भुक्त्वा पुत्रोत्पादने दोषो यथा "यस्मान्नेन तु भुक्तेन भार्य्यां समधिगच्छति। यस्माच्चं तस्य ते पुत्रा अन्नादेतः प्रवर्त्तते" ब्राह्मणादिपरस्वामिकान्नभोजने दोषो यथा "ब्राह्मणान्नेन दारिद्र्यं क्षत्रियान्नेन प्रेष्यताम्। वैश्यान्नेन तु शूद्रत्वं शूद्रान्नैर्नरकं व्रजेत्" इत्येकादशीत०। परान्नभोजनेन तीर्थगमने अनन्तफलत्वं यथा "षोडशांशं स लभते यः परान्नेन गच्छति। अर्द्धं तीर्थफलं तस्य यः प्रसङ्गेन गच्छति" प्राय०त०। महापातकनिपाते तस्य त्याज्यत्वं यथा "अन्नादं परान्नञ्च गर्भं मांसञ्च मैथुनम्। वर्जयेद्यः पतिते तु यावत् पृथ्वी न वत्सरः" शुद्धित०। तद्भोक्तुर्नन्दिहिंसादिनिर्दयता "जिह्वा दग्धा परान्नेन करौ दग्धौ

प्रतिषेधात् । मनो दग्धं परस्त्रीभिः कथं सिद्धिर्वरानने तन्त्र० तद्भोजने प्रतिप्रसवो यथा "सुवर्णं भाजनाद्यं वा शवराद्यं तथैव च । सिद्धः पुनस्तु चैवाद्यं न परान्नमिति स्मृतिः" एकादशीत० ।

परापतन त्रि० परागता आपोयतः अच्समा० वा अतदर्थत्वम् । परागतजलापादने । यज्ञे दैत्ये परेप तत्रार्थे ।

परापर न० परमापिपर्त्तिं या+पृ–अच् । १पश्चके भावप्र० २देवतारूपे शुरुभेदे परात्पर इत्यत्र पाठान्तरम् । परमेष्ठिनृशब्दे ३०३ग्रम् । परश्च अपरश्च द्वन्द्वः । ३परत्वापरत्ववति तस्य भावः त्व परापरत्व तद्भावे न० "परापरत्वधीहेतुरेका नित्या दिगुच्यते" भाषा० ।

परापुर् स्त्री परा स्यूढाः पुः समासान्तविधेरनित्यत्वात् न समासान्तः । स्यूतदेहे यजु० २।२०।

पराभव पु०परा+भू–अप् । १तिरस्कारे २अभिभवे ३विनाशे च मेदि० । आर्षे तु अदोरपं बाधित्वा क्वचित् वञ् । पराभाव तत्रार्थे भा०भी० ४३अ० उदा० ।

पराभिच्च पु० परमाभिच्चते या+भिच्च–अण् उप०स० । परस्य स्टेहे भिक्षाया दैवत्कारके वानप्रस्थभेदे "अग्रसंकुष्टायनाः केचित् पराभिच्चास्तथापरे" हरिवं०२६८अ० ।

परामर्श पु० परा+मृश–भावे घञ् । १युक्तौ २विवेचने ३न्यायोक्ते अनुमितिकारणे ज्ञानभेदे यथोक्तं "व्याप्यस्य पक्षधर्मत्वधीः परामर्श उच्यते" भाषा० "व्याप्यस्य पक्षधर्मत्वधीरिति । व्याप्तिविशिष्टस्य पक्षेण सह वैशिष्ट्यावगाहिज्ञानमनुमितिजनकम् । तच्च व्याप्यः पक्षे इति ज्ञानम् । पक्षो व्याप्यवानिति वा । अनुमितिस्तु पक्षे व्याप्य इति ज्ञानात् पक्षे साध्यम् इत्याकारिका । पक्षो व्याप्यवानिति ज्ञानात् पक्षः साध्यवानित्याकारिका । द्विविधादपि परामर्शात् पक्षः साध्यवानित्येवानुमितिरित्यन्ये । ननु वह्निव्याप्यधूमवान् पर्वत इति ज्ञानं विनापि यत्र पर्वतो धूमवानिति प्रत्यक्षं ततो धूमो वह्निव्याप्य इति स्मरणं भवति तत्र ज्ञानद्वयादनुमितिदर्शनात् व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानं सर्वत्र न कारणं किन्तु व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेन कारणत्वम् आवश्यकत्वात् । विशिष्टवैशिष्ट्यज्ञानकल्पने गौरवाच्चेति चेन्न व्याप्यतावच्छेदकाज्ञानेऽपि वह्निव्याप्यवानिति ज्ञानादनुमित्युत्पत्तेः । लाघवाच्च व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेनैव कारणत्वम् । किन्तु धूमवान् पर्वत इति ज्ञानादनुमित्यापत्तिः व्याप्यतावच्छेदकीभूतधूमत्वप्रकारकधर्मताज्ञानस्य सत्त्वात् । न च तदानीं स्टक्ष्माग्न्यव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्य हेतुत्वमिति वाच्यम् । चैत्रस्य व्याप्तिपक्षे मैत्रस्य पक्षधर्मताज्ञानादनुमितिः स्यादिति । यदि तु तत्पुरुषीयस्टक्ष्माग्न्यव्याप्यतावच्छेदकप्रकारकतत्पुरुषीयपक्षधर्मताज्ञानं तत्पुरुषीयानुमितौ हेतुरुच्यते तदा ज्ञानकार्यकारणभावः । मन्यते तु समवायेन व्याप्तिप्रकारकपक्षधर्मताज्ञानं समवायेनानुमितिं जनयतीत्यतो नानन्तकार्यकारणभावः । यदि तु व्याप्तिप्रकारकं ज्ञानं पक्षधर्मताज्ञानञ्च स्वतन्त्रं कारणमित्युच्यते तदा कार्यकारणभावद्वयं वह्निव्याप्यो धूम आलोकवान् पर्वत इति ज्ञानाद्यनुमितिः स्यादिति । इत्थञ्च यत्र ज्ञानद्वयं तत्रापि विशिष्टज्ञानं कल्पनीयम् फलसख्यगौरवस्यादोषत्वात्" सि०सङ्गा० । परामर्शस्तु अनुमितौ करणं व्याप्तिज्ञानरूपकरणजन्यत्वात् अनुमितिहेतुत्वाच्च यथोक्तं "व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत्" भाषा० "अनुमावाम् अनुमितौ व्याप्तिज्ञानं करणम् परामर्शो व्यापारः । तथा हि येन पुरुषेण महानसादौ धूमे वह्नेर्व्याप्तिर्गृहीता पश्चात् स एव पुरुषः क्वचित् पर्वतादौ अविच्छिन्नमूलां धूमलेखां पश्यति तदनन्तरं धूमो वह्निव्याप्य इत्येवं रूपं व्याप्तिस्मरणं भवति । तस्माच्च वह्निव्याप्यधूमवानयमिति ज्ञानं भवति स एव परामर्श इत्युच्यते । तदनन्तरं पर्वतोऽयं वह्निमानिति ज्ञानं जायते । तदेवानुमितिः" सि०सङ्गा० । तत्र विवेचनं च युक्त्या श्रुताद्यवधारणम् "नोपदेशश्रवणेपि कृतकृत्यता परामर्शादते विरोचनवत्" सा०सू० "परामर्शो गुरुवाक्यतात्पर्यनिर्णयको विचारः" भा० ।

परामृत न० परमृतं यस्मात् । मेघादिवर्षणे त्रिका० ।

परामृष्ट त्रि० परा+मृश–क्त । १संबद्धे "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः" पात०सू० । २कृतपरामर्शे यस्य वाक्यस्य तात्पर्यावधारणं कृतम् तस्मिन् वाक्ये । साध्यव्याप्यतया हेतुत्वेन ज्ञाते ३पक्षे च ।

परायण न० परमयनं यत्नम् । १अत्यन्तासक्तौ २उत्तमाश्रये च हे० । ३अत्यासक्ते यथा धर्मपरायणः धर्मे अत्यन्तासक्तः । ४तत्परे ५श्रेष्ठे च त्रि० मेदि० परमस्तृतं पुनरादृत्तिरहितं स्थानमस्य । ६विष्णौ पु० "निष्ठा शान्तिः परायणः" विष्णुसं० ।

परायति स्त्री परा+अय–गतौ वा० अति । प्रत्यग्गन्तरि

ऋ०८।७१७भाष्ये दृश्यम्। आ+यम–क्त्रिन परस्थायतिः आवर्त्तता यत्र। २पराधीने त्रि० कर्म्म०। ३उत्कृष्टायामायतौ उत्तरकाले स्त्री। बहु० ४तद्युते त्रि०।

परायत्त त्रि०। पराधीने हेमच०।

परारि अव्य० पूर्वतरे वर्षे पूर्वतर+अरि नि० परादेशः। १पूर्वतरवत्सरे गतहलीवत्सरे। अस्य च सप्तम्यर्थमात्रवृत्तित्वम्। ततः भवार्थे त्र। परारित्र तत्र भवे त्रि०। परोऽरिः। २अत्यन्तशत्रौ पु० [ङारा०।

परारु पु०पराञ्चति परा+अञ्च–उप्। कारवेल्लवृक्षे (उच्चा)

परारुक पु० परा+अञ्च–उक। प्रस्तरे त्रिका०

परार्थ त्रि० परस्मै इदम् "अर्धेन सह नित्यसमासोविशेषत्र लिङ्गता च" वार्त्ति० अर्धेन सह नित्यं चतुर्थीति०। १परनिमित्तके। परः अर्थो ऽहेयो यस्य वा तत्रार्थे इति०। २परप्रयोजनादौ पु।

परार्द्ध न० अध–अच् कर्म०। १चरमसंख्यायां "पारे परार्द्धं गणितं यदि स्यात्" नैषधम्। "अवधित्वात्यं मध्यं परार्द्धमिति दशगुणोत्तराः संख्याः" लीला० तस्य सर्वशेषतया उक्तोत्कर्षत्वम्। परस्य ब्रह्मणः आयुषोर्द्धं विपक्षे। ब्राह्मण आयुषो २द्वितीयार्द्धे।

परार्द्धिन् त्रि० परार्द्धं चरमसंख्यामुपचारात् अवधित्वमर्हति णिनि। अर्हे "परार्द्धवर्षाभ्यां चरणे" टञ्। ।

परावत् अव्य० परा+अव–वा० अति। १दूरदेशे निघण्टुः २प्रकृष्टतमे च ऋ०१।३५।३। "परावः परावतोऽयमिति" का०उ० भाष्ये तथा व्याख्यानात्।

परावत न० परा+अव–वा० अतच्। पङ्कजे राजनि०।

परावरा स्त्री परं चावरञ्च विषयत्वेनास्त्यस्या अच्। १विद्याभेदे "भारद्वाजोऽङ्गिरसे परावराम्" हरिवं० "परावरां परस्मात् परस्मादवरेण प्राप्नोति परावरां परावरत्वंविद्याविषयव्याप्नोर्वां तां परावरामङ्गिरसे प्रादेशत्वमृषिः" भा०। परस्मादवरः। २अवेऽतमे त्रि०।

परावर्त्त पु० परा+वृत–घञ्। १परीवर्त्ते २विनिमये हेमच० ३प्रत्याहृत्तौ च।

परावसु पु० परागतं यन्नाम्नं वसु धनं यस्मात् ब्रा०व०। अङ्गिराणां होतृभेदे "निरक्तः परावसुरिति परावसुर्ह वै नामाङ्गिराणां होता स तमेवैतद्होत्रवदनान्निरस्यति" शत०ब्रा० ३।६।१।२३। २रैभ्यसुनिसुतभेदे भा०व०१२५अ०। ३गन्धर्वभेदे भाग० ८।११।२४

परावह पु० परावहति परा+वह–अच्। सप्तवायुमध्ये परिवहवायोरूर्द्ध्वे वायुभेदे अनिलशब्दे १६३ पृ० आवहशब्दे ८२६६० च दृश्यम्। [भावे त्रि०।

पराविद्ध पु० परा+व्यध–क्त। १कुबेरे शब्दमा० २प्रत्याविद्ध-

पराव्रज् पु० पराव्रजन्ति तपसा पापं वर्जयति परा+व्रजो वर्जने क्विप्। ऋषिभेदे ऋ०१।११२।८

पराव्रत्ति स्त्री परा+आ+वृत–क्तिन्। १प्रत्याहृत्तौ येन यथागतिस्तत्प्रत्येन पुनराहृत्तौ हरिवं० ५६अ०। २परिवर्त्ते च परिवर्त्तिनृशब्दे दृश्यम्।

परावेदी स्त्री परस्तत्कर्मणाविन्दति विद–आधे अण् ङीप्०। इष्टकायाम् शब्दरत्नाव०।

पराशर पु० परान् आ+शॄ हिंसायां अच्। १नागभेदे भा०आ० ५७अ०। २इन्द्रे यातूनां पराशरत्वात् तथात्वं "इन्द्रो यातूनामभवत् पराशरः" ऋ० ७।१०४।२१ इति श्रुतेः। "पराशरः पराशीर्णस्य स्वविरस्य वशिष्ठस्य (कुले) जाते" निरुक्तोक्तेः पराशीर्णस्य स्वविरवशिष्ठस्य कुले जातत्वात् वशिष्ठपुत्रशक्तिपुत्रे अदृश्यन्तीगर्भजाते ३ऋषिभेदे तज्जन्मकथा भा०आ० १७८अ०। तन्नामनिरुक्तौ तदाख्याने "पराशुः स यतस्तेन वसिष्ठः स्थापितो मुनिः। गर्भस्थेन ततो लोके पराशर इति श्रुतिः" "पराशोराशासन मवस्थानं येन स पराशरः। आङ्पूर्वाच्छासतेः ऽरन् नीलकण्ठः" शृणो० हलोपः। तालव्यमध्यत्वं वाग्य च च ह्रस्वश्चैपायनस्य पिता द्वैपायनशब्दे दृश्यम्। तेन च धर्मिकर्त्तव्यधर्मसंहितां चक्रे सा च द्वादशाध्यायात्मिका तत्र १अ० युगभेदे धर्मभेदसंहिताभेदादिकथनम्। २अ० कलौ मृदल्पधर्मः। ३अ०अशौचम् आत्मदूरणादिदोषाः। ४अ० प्रायश्चित्तविशेषान्ते धर्मिकर्त्तव्यतोक्तिः। ६अ० प्राणिहत्याप्रायश्चित्तादि। ७अ० द्रव्यशुद्ध्यादि। ८अ० गोवधादिप्रायश्चित्तम्। ९अ० गोवधापवादादि। १०अ० अगम्यागमनादि प्रायश्चित्तम्। ११अ० अमेध्यादिभक्षणप्रायश्चित्तम्। १२अ० प्रायश्चित्ताङ्गस्नानभेदादि। पराशरेण प्रोक्तम् अण्। पाराशर पराशरप्रोक्त त्रि० चक्रदत्तप्रदर्शिते औषधभेदे न० "अष्टौ वका गुडूच्यस्तन्मूली द्वयां पचेत्। शूर्पेऽपामष्टभागस्थे तत्र पात्रे पचेद् घृतम्। धात्रीविदारीक्षुरसे क्षिपात्रे पयसोर्मले। सुपिष्टैर्जीवनीयैश्च पाराशरमिदं घृतम्। स वैत्यं राजयक्ष्माणमन्यञ्चैवति शोणितम्। स्त्रियां ङीप्। "अतो पाराशरी स्मृतिः" पराशरः।

प(पा)रागरिन् ब०व० परागरस्यापत्यम् गर्गा० यत् परागर्ग्यं च व्याप्तेन मोक्षं भिक्षुलक्षं शारीरकसूत्रमधीयते "पारागर्ग्यशिलालिभ्यां भिक्षुनटसूत्रयोः" पा० वक्तव्ये णिनेर्वा लोपः। भिक्षुसूत्राध्येतृषु पृषो० ह्रस्वः इति भरतः तन्त्रसम् मृग्यम्। तथाऽमरे एकवचनलोक्तिर्मूलं वक्तव्ये एव तद्विधानात्।

परायत्त त्रि० परः आयत्तो यस्य। १अन्यायत्ते इच्छोपरिज्ञातायां सतायां २वन्द्यायां स्त्री शब्दच०। [अमरः।

परासन त्रि० परा-अस-ल्युटे भावे ल्युट्। मारणे वधे

परासु त्रि० परागता असवोऽस्य। मृते गतप्राणे अमरः।

पराक्रन्दिन् त्रि० परमाक्रन्दति आ+क्रन्द्-णिनि। चौरभेदे (डाकाइत) अमरः।

पराह्ण पु० परस्तरवर्त्ति अह्नः टच्समा०। "अह्नान्ताः पुंसि" पा० पुंस्त्वम्। परस्मिन् दिने।

पराह्ण पु० परः परभागोऽहः एकदेशिस० टच् अह्नादेशः सत्वञ्च। दिनस्य परभागे अपराह्णे।

परि अव्य० पृ-इन्। १समन्ततोभावे २व्याप्तौ ३दोषकथने ४भूषणे ५वर्जने ६पूजने ७वर्जने ८मर्यादायाम् ९आदाने मुकुटी०। तत्र च क्रमेणोदाहृतं यथा "१परिध्रमति २परिषतः ३परिवादः ४परिष्करोति। ५परिवर्जते ६परिचरति ७परि त्रिगर्त्तान् ८परिक्षिद्यते वासः ९परिदेवनम्" १०व्याप्तौ ११शेषे च मेदि०। १२उपरमे १३शोके हेमच० १४सम्भोषभाषणे शब्दरत्ना० अस्य उपसर्गत्वमर्थभेदे कर्मप्रवचनीयत्वञ्च पा० उक्तं यथा "लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः" पा० "एतेषु विषयभूतेषु प्रभृतयः कर्मप्रवचनीयसंज्ञाः स्युः। लक्षणे इत्थम्भूते पर्यन्तु वा विद्योतते विद्युत्। इत्थम्भूताख्याने भङ्गो विद्युत्यति पर्यन्तु वा। भागे वस्त्रो ह्रैरित्यति पर्यन्तु वा ह्रैरित्यंश इत्यर्थः। वीप्सायाम् वृक्षं वृक्षं प्रति पर्यन्तु वा विद्युति। अतोपसर्गत्वा भावान्न सत्वम्। एषु किम् परिविद्युतिं हि०कौ०। "अधिपरी अनर्थकौ" पा० "उक्तसंज्ञौ स्तः। कुतोऽध्यागच्छति। कुतः पर्यागच्छति। गतिसंज्ञाबाधाद् गतिर्गतावितिं निघातो न" हि०कौ०। "अपपरी वर्जने" पा० एतौ वर्जने कर्मप्रवचनीयौ स्तः "पञ्चम्यपाङ्परिभिः" पा० एतैः कर्मप्रवचनीयैर्योगे पञ्चमी स्यात्। अप हरेः परि हरेः संसारः। परिरत्र वर्जने अत्रयादौ तु द्वितीया हरिं परि। उपरमे परिग्लानः भोगे परिदेवनम्। "अत्यल्पाल्पसंख्याः परिषा" पा० द्यूते व्यवहारे पराजये च अल्पादीनां परिषा समासः। न पूर्वनिपातः द्यूते अयं विपरीतं उत्तमं अत्यपरि। एवं अल्पाकापरि एकपरि इत्यादि। वर्जने परितोषः। "परेश्च घाङ्योः" पा० रस्य वा डः। परिधः परिघः पर्यङ्कः पर्यङ्कः।

परिंश पु० लेशे अ० १।१८७८ भाष्यम्।

परिकथा स्त्री परितः कथा। कथाभेदे "अथ वाक्सम्भेदाः स्युश्चम्पूः सङ्कीर्णकथा कथा। आख्यायिका परिकथा कथाश्चैकविशेषकौ" त्रिका०।

परिकम्म पु० परिक्रम्यते अनेन परि+क्रम-करणे घञ्। १भवे। भावे घञ्। २परितः क्रमे च

परिकर पु० परि+कृ-अप्। १पर्य्यङ्के २परिवारे ३समारम्भे च अमरः ४समूहे ५प्रगाढालिङ्गने हेमच० ६विवेके मेदि० ७वस्त्रकारिणि च विश्वः।

परिकर्त्तृ पु० अनूढज्येष्ठे कनिष्ठस्य विवाहसंस्कारकर्त्तरि याज्ञके परिवेत्तृशब्दे दृश्यम्।

परिकर्मन् न० परि+कृ-मनिन्। १कुङ्कुमाद्यनुलेपादेः २संस्कारे अङ्गानां शुश्रूषादौ च। योगविशेषसम्पन्नभाग वर्णवर्णमूलचन्दनकुलालकं परिकर्मोत्कं तथाविधं भिन्नपरिकर्मोत्कं च लोका० उक्तं दृश्यम्। योगशास्त्रप्रसिद्धे चित्तस्य प्रसादनोपाये ३मैत्र्यादौ उपेक्षाशब्दे दृश्यम् परितः कर्माऽस्य। ४परिचारके त्रि० रत्नमा० परिकर्म कार्य्यं तदाऽस्यास्य ब्रीह्या० इनि। परिकर्मिन् परिकर्म्मकारके आह्निकत्त्व० औ० २।४

परिकर्ष पु० परि+कृष-भावे घञ्। सम्याकर्षणे कर्षणस्य वर्जनम् अव्ययी०। कर्षवर्जने अव्य० निरुदका० तस्मान्नोदात्तता

परिकलित न० परि+कल-भावे क्त। आकलने तत्कृतमनेन दृष्टादि० इनि परिकलिनिन् तस्य कर्त्तरि। स्त्रियां ङीप्।

परिकाङ्क्षित पु० परिवृत्तं काङ्क्षितं कक्षचन्दनाद्यभिलाषो येन प्रा०व०। तथाविधे शब्दच० [हेमच०।

परिकूट न० परिभूषितं कूटम् प्रा०त०। पुरद्वारकूटके हलायुधे

परिकूल न० परितः कूलम्। उभयतस्थितकूले निरुद० अस्यानोदात्तता। [तथाऽस्य। परिकूलेऽपि तथास्वरः।

परिकेश्य अव्य० देशस्योपरि। केशोपरिभागे निरुद० अनोदा-

परिक्रम पु० परि+क्रम-भावे घञ् न वृद्धिः। १समन्तात् भ्रमणे २प्रदक्षिणीकरणे ३क्रीड़ार्थं पद्भ्यां गमने च। यत्र पृथिव्याः परिक्रमे फलादिकमुक्तं वराहपु० "अनु

मद्रे ! महापुण्यं पृथिव्यां सर्वतो दिशम् । परिक्रम्य यथाध्यानं प्रमाणगणितं शुभम् । भूम्याः परिक्रमे सम्यक् प्रमाणं योजनानि च । सप्तकोटिसहस्राणि सप्तकोटीशतानि च । तीर्थान्येतानि देवाश्च तारकाश्च नभस्तले । गणितानि समस्तानि वायुना जगदायुषा । ब्रह्मणा क्रोमशर्मेव नारदेन ध्रुवेण च । जाम्बवता सुषेणेन रावणेन हनूमता । एतैरनेकधा दैवैः सप्तागरवना मही । क्रमिता वालिना चैव बाहुमण्डलरेखया । अन्तरे भ्रमणेनैव सुग्रीवेण महात्मना । तथा च पूर्वदेवेन्द्रैः पञ्चभिः पाण्डुनन्दनैः । योगसिद्धैस्तथा कैश्चिन्मार्कण्डेयसमैरपि । क्रमिता न क्रमिष्यन्ति न पूर्वे नापरे जनाः । अल्पसत्त्वबलोपेतैः प्राणिभिश्चाल्पबुद्धिभिः । मनसापि न शक्यन्ते गमनस्य च का कथा । सप्तद्वीपे तु तीर्थानि भ्रमणादृते फलं भवेत् । प्राप्यते चाधिकं तस्मान् मथुरायाः परिक्रमे । मथुरां समनु प्राप्य वस्तु कुर्यात् प्रदक्षिणम् । प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा । तस्मात् सर्वप्रयत्नेन सर्वकामानभीप्सुभिः । कर्त्तव्या मथुरां प्राप्य नरैः सम्यक् प्रदक्षिणा" । ल्युट् । परिक्रमणं तत्रार्थे न० ।

परिक्रमसह पुंस्त्री परिक्रमं सहते सह–अच् । ङीषि त्रि० स्त्रियां जातित्वात् ङीष् ।

परिक्रय पु० परि+क्री–अच् । १विनिमये तत्स्वरूपदानेन क्रयणे "कोशान् रक्षार्द्धकोशेन सर्वकोशेन वा पुनः । शेषं प्रकृतिरक्षार्थं परिक्रय उदाहृतः" कामन्द० । नियतकालं भृत्या स्वीकरणे स्त्रि०की० तत्रार्थे करणस्य वा सम्प्रदानता यतेन यताय वा परिक्रीतः । ल्युट् । परिक्रयण तत्रार्थे न० "परिक्रयणे सम्प्रदानमन्यतरस्याम्" पा० ।

परिक्रिया स्त्री परितः क्रिया । १परिखादिना वेष्टने अमरः २एकाङ्गयागभेदे "सदाक्रिया चतुष्क्रिया परिक्रिया वा सर्वकामः" आश्व०श्रौ० ९।३।१२ परिक्रियार्थे काण्डो भवति एषामन्यतमेन सर्वकामो यजेतेति" नारा० ।

परिक्षपण पु० परि+क्षप–कर्त्तरि ल्यु । मेघे निघ० १।१०

परिक्षय पु० परि+क्षि–भावे अच् । नाशे मनुः ८।९९

परिक्षाण न० परि+क्षै–भावे ल्युट् । परीक्षायां "यानि परिक्षाणान्यासंस्ते ऋषयोऽभवन्" ऐत०ब्रा० ३।३४

परिक्षित् पु०परिक्षीणे क्षयति वर्त्तते क्षि–क्विप् । १अभिमन्युपुत्रे स्वरूपभेदे तद्जन्मनिरुक्तिः भा०स्त्री०१६अ० "विराटस्य सुतां पूर्वं स्नुषां माञ्जोदधन्वनः । उपयेमे ततो दृष्ट्वा सत्यवाक् ब्राह्मणोऽब्रवीत् । परिक्षीणेषु कुरुषु पुत्रस्तव भविष्यति । एतदस्य परिक्षित्त्वं गर्भस्थस्य भविष्यति । तस्य तद्वचनं साधोः सत्यमेतद् भविष्यति । परिक्षिद् भविता क्षीणां पुनर्वंशकरः सुतः" । क्विपि उपसर्गादीर्घे परीक्षित् अत्रत्र । कर्त्तरि क्त परिक्षितोऽत्यत्र पत्तरः । २कुबेरपुत्रभेदे पु० हरिवं० ३२अ० "दाक्षायणी तव पत्न्यो-ऽक्षिन् द्वावेव च परिक्षितौ" तत्रैवाध्याये । ३अविक्षितः पुत्रे स्वरूपभेदे च "अविक्षितः परिक्षितु यवक्रीतश्च वीर्यवान्" भा०आ०९३अ० ।

परिक्षेप पु० परितः क्षिप्यते विषयग्रासनया जीवात्मा येन परि+क्षिप–करणे घञ् । १इन्द्रिये "एकादशपरिक्षेपं मनोव्याकरणात्मकम्" भा०आश्व० ३६अ० भावे घञ् । २परितक्षालने च ।

परिक्षेपक त्रि०परि+क्षिप–ताच्छील्ये ण्वुल् । परितक्षालनशीले

परिक्षेपिन् त्रि० परि+क्षिप–ताच्छील्ये घिनुण् । परितः क्षेपणशीले स्त्रियां ङीप् ।

परिखा स्त्री परितः खन्यते खन–ड । पुरादौ रिपुप्रभृतीनां दुष्प्रवेशतासिद्धये मर्त्तरूपायां जलाधारस्थाने वेष्टनाकारभूमौ अमरः । परिखामानञ्च ब्रह्मवै०पु० जन्मख० २०२अ० उक्तं यथा "प्रस्थे च परिखामानं शतहस्तं प्रशस्तकम् । परितः शिविराणाञ्च गम्भीरदशहस्तकम् । कृत्वा तत्पूर्वकञ्चैव परिखाद्वारमीप्सितम् । यत्नोरम्यं मित्रस्य सम्यमेव सुखेन च" । ततः भवाद्यर्थे यत्प्रत्यये० अण् । पारिख तद्भवादौ त्रि० तत्र भवे परिखात इति पाठान्तरे पारिखात इत्यपि तत्रार्थे

परिखात न० परितः खातम् । १परिखायाम् । २परिखनकर्मणि त्रि० ।

परिगणन न० परि+गण–भावे ल्युट् । १सर्वतोभावेन गणने २विधिनिषेधशास्त्रयोः विशेषतः कीर्त्तने च

परिगणित त्रि० परि+गण–क्त । १विधिनिषेधयोः विशेषरूपेण कीर्त्तिते च । २संख्याते च

परिगत त्रि० परि+गम–क्त । १व्याप्ते २ज्ञाते ३चेष्टिते च मेदि० । ४गते हेमच० ५वेष्टिते च । कर्त्तरि क्त । ७परितो गन्तरि त्रि० ।

परिगदित न० परि+गद–क्त । परिकथने तत्कृतगमनेन दृष्टः इति परिगदितृ तत्कर्त्तरि स्त्रियां ङीप् ।

परिगहन न० परि+गह-भावे ल्युट् युच्० न वलम् । सम्यग्गहने

परिगूढ़ त्रि॰ परि+गुह क्त। अत्यन्तगुप्ते ततः स्वरूपार्थे कप्रत्यादि॰ क। परिगूढक तत्सादृश्यदेशादौ त्रि॰।

परिगृहीत त्रि॰ परि+ग्रह-कर्मणि क्त। स्वीकृते याचिता॰ नाख्यातोदात्तता।

परिग्रहीति स्त्री परि+ग्रह-क्तिन् हृट्-हटो दीर्घः। परिग्रहे ऐत॰ब्रा॰ २।१५। [स्त्रियां शब्दच॰।

परिग्रहा स्त्री परि+ग्रह-कर्मणि क्यप्। पाणिगृहीतायां

परिग्रह ५॰ परि+ग्रह-अप्। १स्वीकारे। कर्मणि घ। २सैन्यपश्चाद्भागे ३भार्य्यायां परिजने च। करणे घ। ४मूले ५शपथे च अमरः। परितोः ग्रहः। ६राङ्कथा खर्जनोर्ध्वकृष्णे ७विष्णौ पु॰ "परमेष्ठी परिग्रहः" विष्णुसं॰ "शरचापैर्विभिः परितो गृह्णाते सर्वगतत्वात् परितो गृह्यते इति वा पक्षग्रहादिकं भक्तैरर्पितं गृह्णातीति वा परिग्रहः" भा॰।

परिग्राम अव्य॰ ग्रामशब्दस्य ग्रामशब्दे ततः भवार्थे ठञ्। पारिग्रामिक तद्भवादौ त्रि॰।

परिग्राह पु॰परि+ग्रह-"परौ यज्ञे" पा॰ घञ्। यज्ञार्थे स्फ्येन वेदेः स्वीकारे त्रि॰कौ॰।

परि(लि)घ पु॰परिहन्यतेऽनेन "परौ घः" पा॰परौ हन्तेरप् घस्यान्तादेशः रस्य वा लः। १लोहबद्धलगुडे २लोहमयलगुडे च अमरः। विघ्नसादिषु ३उनविंशे योगे ४अर्गले द्वारावरोधिकाष्ठे मेदि॰। ५तद्वरे हस्तिमुखे अजयः। ७अट्टे दुर्गस्थे हट्टाचट्टे शब्दरत्ना॰। १०कुमारानुचरगणभेदे भा॰शल्य॰ ५६अ॰। ११चण्डालभेदे भा॰शा॰ १२८अ॰।

परिघट्टन न॰ परि+घट्ट-भावे ल्युट्। परितश्चालने "आवर्त्तदर्शीपरिघट्टनेन" भा॰व॰ यज्ञप्रश्ने।

परिघर्म पु॰परि+घृ-मन्। यज्ञाङ्गमहावीरपात्रपतितफेनादेः घरघे परिघर्मस्थेदम् यत्। परिघर्म्य महावीराङ्गधर्मसम्बन्धिपात्रे "परिघर्म्यमौदुम्बरम्" कात्या॰श्रौ॰ २६।२।६ "परिघर्म्य" धर्मसम्बन्धि यत् पात्रजातं काश्मर्यखादि तदौदुम्बरम्" देवनाथः।

परिघात पु॰ परिहन्यतेऽनेन घञ्। परिघाताख्ये

परिघातन पु॰ परिघातयति परि+हन-स्वार्थे णिच् कर्त्तरि ल्यु। १परिघाताख्ये अमरः। २सर्वतोहननकर्त्तरि भावे ल्युट्। ३परितोहनने च धरणिः।

परिघ्ट(ष्ट)टिक पु॰ परितः घ्ट(ष्ट)ट याचने नाम्नि ठन्। १स्नानप्रस्थभेदे भा॰आश्व॰ ८२अ॰। नीलकण्ठेन तत्र "परिघ्टिका वैधसिका इति पठित्वा "परिपृष्टमेव गृह्णन्ति नान्यथेति व्याख्यातम्"। तेन तत्र परिघृष्टिका इत्येव पाठः तत्र परिपृच्छिका इति पाठान्तरञ्च तेन तस्या ऐतदर्थकता "परिघृष्टिका वैधसिका" इति "सटिलङ्गे पाठः" अनाकारः परिघृष्टया गृह्णातीति वाच्यम्।

परिचक्षा स्त्री परि+चक्ष-भावे अ स्वार्थधातुकत्वात् न ख्यादेशः। १निन्दायां अत॰ब्रा॰ ३।३।५।१७ भाष्ये ह्यग्रम् परि+दर्शने च। २वर्जने स्त्री।

परिचक्ष्य त्रि॰परि+वर्जने चक्ष-ख्यत् वर्जनार्थत्वात् न ख्यादेशः। वर्जनीये

परिचतुर्दश त्रि॰ परिक्षीण चतुर्दश यतः ब्रा॰व॰ ड समा॰। एकाधिकचतुर्दशरूपपञ्चदशसंख्यान्विते अर्थे तु समासान्तविधेरनित्यत्वात् न ड। "इन्द्रसेनादयश्चैव भृत्याः परिचतुर्दश" भा॰व॰ १अ॰।

परिचय पु॰ परि+चि-अच्। १ज्ञातस्य पौनःपुन्येन ज्ञाने संज्ञने २पूजने च अमरः। २सर्वतश्चयने माघः २।७५।

परिचर त्रि॰परितः चरति चर-ट। १भृत्ये २परप्रहारात् रक्षके पु॰ अमरः। ३प्रजासामन्तादिव्यवस्थापनकारिणि ४राजभृत्यभेदे च।

परिचर्य्या स्त्री परि+चर-क्यप्। सेवायाम् अमरः।

परिचाय्य पु॰ परिचीयते संस्क्रियतेऽसौ परि+चि-ण्यत्। यज्ञाग्नौ अमरः "परिचाय्यं चिन्वीत ग्रामकामः" अत॰ब्रा॰ ५।४।११।२

परिचार पु॰ परि+चर-भावे घञ्। सेवायां भा॰व॰६७अ॰ परिचारे प्रकृतः ठन्। परिचारिकदासे भा॰अनु॰७।८१॰

परिचारक त्रि॰ नि॰ परि+चर-ण्वुल्। सेवके अमरः।

परिचित् त्रि॰ परितश्चीयते चि-कर्मणि क्विप्। १परितः स्थापिते यजु॰ १२।४६ कर्त्तरि क्विप्। २परिचयकर्त्तरि त्रि॰। [कर्मणि।

परिचित त्रि॰ परि+चि-कर्मणि क्त। १परिचययुक्ते २तत्-

परिच्छद त्रि॰ परिच्छादयति परि+छद+णिच्-क्विप् हस्वः। परिच्छदशब्दार्थे "सेनापरिच्छदस्य" रघुः।

परिच्छद पु॰परि+छद-णिच्-घ ह्रस्वः। १उपकरणे २हस्त्यश्वरथपादाते ३वस्त्रादिभूषणे ४परिवारे च हेमच॰। ५आच्छादने च।

परिच्छित्ति स्त्री परि+छिद-भावे क्तिन्। १व्यवधारणे "इयोरेकतरस्य वाप्यसन्दिग्धतथ्यपरिच्छित्तिः प्रमा" सां॰सू॰ "अर्थस्य वस्तुनः परिच्छित्तिरवधारणं प्रमा" भा॰ २परिच्छेदशब्दार्थे च।

परिच्छेद पु० परि+छिद्-भावे करणादौ च घञ्। १अवधौ २सीमायां ३अवधारणे अन्वस्य ४सन्धिभेदे। स च त्रिधा० दर्शितो यथा "सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च। वंशानुचरितं चैव पुराणं पञ्चलक्षणम्। स्थानं प्रकरणं पर्वोच्छ्वासश्च पटलं काण्डमन्वयाः"। तत्र काव्ये सर्गः, कोषे वर्गः, अलङ्कारे परिच्छेदोच्छ्वासौ कथायाम्प्रघातः नाटके अङ्कः, संहितापुराणादौ अध्यायः, तन्त्रे पटलं, ब्राह्मणे काण्डम्, इतिहासे पर्व, भाष्ये आह्निकम्। एवमन्येऽपि मन्वन्तरवंशाः मन्वभेदे ज्ञेयाः यथा पाद्मे कृतरङ्गसकप्रपाठकादयोऽपि यथायथमूह्याः। ३परिमाणे।

परिच्छेद्य त्रि० परि+छिद्-कर्मणि यत्। १परिभेद्ये २अवधार्ये च। [अमरः।

परिजन पु० परिगतो जनः। १परिवारे २प्रतिपाल्ये जने

परिजय्य त्रि० परि+जि-यक्प्रत्यार्थे यत् नि० यालादेशः। परितो जेतुं शक्ये।

परिजल्पित न० "प्रभोर्निर्दयतामात्रचापलाद्युपपादनात्। स्वविचक्षणताख्यापनिर्भङ्क्या स्यात् परिजल्पितम्" उज्ज्वलनाम्न्युक्ते कथनभेदे। [रङ्गनाथः।

परिज्ञान न० परि+ज्ञा ल्युट्। सूक्ष्मज्ञाने सू०सिं०८।१

परिज्वि त्रि० परि+ज्वृ-कि। परितोगन्तरि ऋ०१।६४।६भा०

परिज्वन् पु० परि+ज्वु-औणादिकः कनिन्। १चन्द्रे २अग्नौ च उज्ज्वलदत्तः। अत्र परिज्वन् इति परिजन्मन् इति शब्दद्वयकल्पनं प्रामादिकं "वसुचक्षिस्यादिके उणादिसूत्रे परिज्वन् इत्यस्यैव पाठात्। (शब्दे २४।४४८।३अग्रम्।

परिडीन न० परि+डी-भावे क्त। खगगतिभेदे खगगति०

परिणत त्रि० परि+नम-क्त। १परिपक्वे अमरः। २परिणामयुक्ते "तिर्य्यग्दन्तप्रहारश्च गजः परिणतोमतः" हलायुधोक्ते ३गजभेदे माघः ४।२८ ११।२५ ४सर्वतोनते च ५शेषयुते च। [णत्वे ४परिपाके च माघः १।११।

परिणति स्त्री परि+नम-क्तिन्। १शेषे २अवसाने। ३परि०

परिणय पु० परि+नी-भावे अच्। १विवाहे अमरः भावे ल्युट्। २परिणयन तत्रार्थे न०। परिणयतेर्विवाहार्थत्वात् परिणीता इत्यादौ कृतविवाहाद्यर्थावगमः।

परिणाम पु० परि+नम-घञ्। १प्रकृतेरन्यथाभावे विकारे २शेषे "परिणामेऽमृतोपमम्" गीता। ३अर्थालङ्कारभेदे च। अन्यथाभावश्च प्रकृत्युच्छेदेन प्रकृतेर्वा अन्यराधानेन वा यथा मृदादेर्घटादिरूपेण, काष्ठादेर्मञ्चादिना। "परिणामतापसंस्कारदुःखैः" पात०सू० "परिणामतः सलिलवत्" सां०का० "यथा हि वारिदविसृष्टसदकमेकरसमपि तत्तद्भूमिविकारानाशाद्य नारिकेलतालीविल्वचिरविल्वतिन्दुकामलकप्राचीनामलककपित्थफलरसतया परिणामानुमधुरास्तिक्तकटुकषायतया विकल्पन्ते एवमेकैकगुणसङ्गत्वात् प्रधानं गुणवान्निजाप्रधानगुणाः परिणामभेदान् प्रवर्त्तयन्ति" सांत०कौ०। ४परिपाके "भुक्तस्य परिणामहेतुरौदर्यः (वह्निः) तर्कसंग्रहः।

परिणामदर्शिन् त्रि० परिणामं श्रेयं पश्यति दृश-णिनि ह्रस्व०। श्रेयद्रष्टरि यत्कर्मकरणे यत्फलं तस्य द्रष्टरि।

परिणामशूल न० परिणामे शूलम्। शूलरोगभेदे "स्वैर्निदानैः प्रकुपितो वायुः सञ्चिन्तितो यदा। कफपित्ते समाहत्य शूलकारी भवेद्बली"। तस्य लक्षणं यथा "भुक्ते जीर्य्यति यच्छूलं तदेव परिणामजम्। तस्य लक्षणमप्येतत् समासेनाभिधीयते" वातिकस्य तस्य लक्षणं यथा "आध्मानाटोपविष्मूत्रविबन्धारतिवेपनैः। स्निग्धोष्णोपशमप्रायं वातिकं तदहेर्द्विषक्" पैत्तिकस्य तस्य लक्षणं यथा "क्षुत्पादाहारतिस्वेदकण्ठास्यत्वयोत्तरम्। शूलं शीतशमप्रायं पैत्तिकं लक्षयेद्विषक्" श्लैष्मिकस्य तस्य लक्षणं यथा "छर्दिरुद्वासनस्योद्गं बलस्रग्दीर्घसन्तति। कटुनिक्तोपशान्तौ च तद्विद्येयं कफात्मकम्" त्रिदोषजस्य तस्य लक्षणं यथा "संसृष्टलक्षणं दृष्ट्वा त्रिदोषं परिकल्पयेत्। त्रिदोषजमसाध्यन्तु क्षीणमांसबलाननम्" माधवकरः।

परिणामिन् त्रि० परि+नम-णिनि। परिणामयुक्ते परिणामिकारणत्वञ्च प्रधानस्यैव न पुरुषस्येति निर्णीतं सां० सू० "पूर्वभावित्वे द्वयोरेकतरस्य वा नेऽन्यतरयोगः" सू० "द्वयोरेव पुरुषप्रकृत्योरखिलकार्य्यं पूर्वभावित्वेऽप्येकतरस्य पुरुषस्यापरिणामित्वेन कारणताहान्यान्यतरस्य प्रकृतेः कारणत्वौचित्यमित्यर्थः। पुरुषस्यापरिणामित्वे चेदं बीजम्। पुरुषस्य संहत्यकारित्वे परार्थत्वापत्त्यानवस्थाऽसंहत्यकारित्वे सर्वदा मुक्तादिकार्य्यप्रसङ्गः। प्रकृतिद्वारा परिणामकल्पने च लाघवात् तस्या एव परिणामोऽस्तु पुरुषे तु स्वामित्वेन भृत्योपचारो यथा योधेषु वर्त्तमानौ जयपराजयौ राजन्युपचर्य्येते तत्फलसुखदुःखभोक्तृत्वेन तत्स्वामित्वादिति। किञ्च धर्म्यभ्राहकमानेन कारणतयैव प्रकृतेः सिद्धौ नाम्यकारणाकाङ्क्षास्ति। यथा धर्म्यभ्राहकप्रमाणेन दृष्टत्वा

पुरुषसिद्धौ नान्यदृष्ट्याकाङ्क्षेति। अपि च पुरुषस्य परिणामित्वे कदाचिच्चक्षुर्मनआदिवदन्धत्वमपि स्यात्। तथा च विद्यमानमपि सुखदुःखादिकं न भावेत ततश्चाहं सुखी न वेत्यादिसंशयापत्तिः। ऋतः सदा प्रकाशस्वरूपत्वानपायेन पुरुषस्यापरिणामित्वं सिद्ध्यति। तदुक्तं योगसूत्रेण "सदा ज्ञाताश्चित्तस्य वृत्तयस्तत्प्रभोः पुरुषस्यापरिणामित्वादिति" तद्भाष्ये च "सदाज्ञानविषयत्वं तु पुरुषस्यापरिणामित्वं परिदीपयतीति" भा० उक्तम् संयोगश्च न परिणामः सामान्यगुणातिरिक्तधर्मोपपत्त्यैव परिणामित्वव्यवहारात्" वा०प्र०भा०। तेन पुरुषस्य संयोगवत्त्वेऽपि विकारहेतुसंयोगाभावात् न परिणामित्वम्। स्त्रियां ङीप्। "सती वाऽविद्यमाना वा प्रकृतिः परिणामिनी"इरिका०।

परि(री)णाय पु०न० परि+नी-घञ् उपसर्गस्य वा दीर्घः। शारीणां वामदक्षिणतो नयने अमरः वज्रलत्वेऽपि अभिधानात् स्त्री।

परि(री)णाह पु० परि+नह-घञ् वा दीर्घः। विस्तारे (ओवार) "धनुः शतं परीणाहो यामात् क्षेत्रान्तरं भवेत्" याज्ञ०।

परिणाहवत् त्रि० परिणाह+वत्वा० वा मतुप्। विस्तारयुते स्त्रियां ङीप् पक्षे एकाक्षरत्वदन्तत्वेऽपि वत्वा० इनि। परिणाहिन् तत्रार्थे त्रि० स्त्रियां ङीप्।

परिणेतृ पु० परि+नी-तृच्। १विवाहकर्त्तरि भर्त्तरि राजनि० २परितो नेतरि च।

परिणेय त्रि० परि+नी-यत्। १परितोनयनीये आश्व०श्रौ० ३।३।१५। विवाहयोग्यायां २कन्यायां स्त्री।

परितक्वन् न० तक-क्वनिप् भावे मनिन्। परितोगमने तदर्हति यत्। परितक्व्य परितो गन्तव्ये का०१।२१।६७ भा०इत्यत्रम्। "परित एनां रात्रिं तक्व" निरुक्तोक्तायां रात्रौ च रात्रेरुभयत उपपदोपलक्षात् तथात्वम्।

परितस् अव्य० परि+तसिल्। सर्वतोभावे इत्यर्थे। एतद्योगे सम्बन्धार्हे द्वितीया परितः क्षेत्रं भङ्गाः।

परिताप पु०परितप्यतेऽत्र परि+तप-घाञ्जारे घञ्। १नरके करणे घञ्। २दुःखे मेदि०। ३शोके शब्दच० ४भवे ५कर्मणि विश्वः। इत्यन्युत्पत्तावाद्य "ते क्षीणपरितापफलाः पुण्यापुण्यहेतुत्वात्" पात०भा० "ते जन्मायुर्भोगा पुण्यहेतुका इष्टफलाः अपुण्यहेतुवादुःखफलाः"भा०।

परितोष पु० परि+तुष-भावे घञ्। मनोज्ञे आनन्दभेदे

परित्याग पु० परि+त्यज-भावे घञ्। सर्वतो भावेन वर्जने

परित्राण न० परि+त्रै-ल्युट्। १रक्षणे अनिष्टे प्रवृत्तस्य २निवारणे च "परित्राणाय साधूनाम्" गीता।

परिदंशित त्रि० परिदंशो जातोऽस्य तारा० इतच्। कृतसन्नाहे भा०आ० १३६अ०। [अमरः।

परिदान न० परि+दा-भावे ल्युट्। प्रतिरूपदाने विनिमये

परिदाय पु० परि+दा घञ्। आभोदद्दायिनि शुनश्शेफे ऋ०सं० २।८अ०।

परिदायिन् परिवर्त्त्य शास्त्रदोषं ददाति दा-णिनि। अक्षतविवाहस्य ज्येष्ठस्य कनिष्ठाय कन्यादातरि परिवेत्तृशब्दे द्वारीतवाक्यं दृश्यम्।

परिदेवन न० परि+दिव-ल्युट्। १अनुशोचने कृतस्य कर्मणोऽनुचितत्वधिक्कानुतापे २विलापे च। स्त्रियां-युच्। परिदेवनाप्यत्र स्त्री। "तत्र का परिदेवना"गीता २।२८

परिदेविन् त्रि० परि+दिव-ताच्छील्ये इनि। परिदेवनशीले स्त्रियां ङीप्।

परिद्योप पु० नरकस्यप्रभेदे भा०आ० १००अ०।

परिधान न० परिधीयते परि+धा-कर्मणि ल्युट्। १परिच्छिनवस्त्रे नाभेरधोऽष्टतवस्त्रे अमरः भावे ल्युट्। २वस्त्रादेर्दृढादौ धारणे च।

परिधानीया स्त्री परि+धा-कर्मणि अनीयर्। १यज्ञादिस्थायाङ्गत्तमायाञ्चचि "सर्वोत्तमां परिधानीयेति विद्यात् आश्व०श्रौ० २।६।८ "स यत्रोपाक्रते मातरमुवाके पुरा परिधानीया स्यात्" छान्दो०। २परिधेयवस्त्रादौ त्रि०।

परिधाय पु० परि+धा-कर्मणि घञ्। १परिच्छेदे आधारे घञ्। २नितम्बदेशे ३जघनस्थाने च मेदि० भावे घञ्। परिधाने।

परिधि पु० परि+धा-कि। चन्द्रसूर्य्यसमीपस्थे मेघादिसन्निकर्षात् जायमाने वेष्टनाकारे १मण्डले (सूर्य्यसभा) (चन्द्रसभा) परिवेषशब्दे दृश्यम्। यज्ञियपशुबन्धनार्थं निखातायां यज्ञियतरोः प्रक्षाग्रादेः २शाखायाम् ३गोलमण्डलस्य परितो वेष्टनसूत्रमाने क्षेत्रशब्दे २४०० पृ०दर्शितम्। यज्ञियपरिधिमान च स्रुवशब्दे ८२८ पृ० दृश्यम्। तच्चान्तर्वाह्यविषयम् कर्मप्रदीपोक्तमानन्तु छन्दोगविषयम् यथा "बाह्यमात्राः परिधय अन्तयः सप्तचोऽन्तराः। त्रयो भवन्ति शीर्षण्या एकैकान्तु चतुर्दिशम्। प्राग्वंशावस्थितः पश्चादुदग्वंशमधापरम्। स्थापेत् परिधिमन्त्रेऽदृश्यः स च पूर्वतः"।

परिधिस्थ त्रि॰ परिधौ तिष्ठति स्था–क। १परिचारके युद्धादौ रक्षिणो रक्षार्थं परितः स्थिते २सैन्यादौ च।

परिधिपतिखेचर पु॰ महादेवे भा॰ अनु॰ ६७ अ॰।

परिधूमन सुश्रुतोक्ते व्रणादितस्य उद्धारभेदरूपे उपद्रवभेदे (चोंवा ढेकुर तोला)।

परिधूमायन न॰ सुश्रुतोक्ते उद्धारभेदे (चोंयाढेकुरतोला)

परिधेय त्रि॰ परितो धेयः। परिधिभवे १विश्वदेवादौ यजु॰ २।१८। परि–धा यत्। २परिधातव्ये वस्त्रादौ त्रि॰।

परिनन्दन त्रि॰ परि+नन्द–णिच्–ल्यु चुम्बा॰ न चत्वम्। १सन्तोषकारके भावे ल्युट्। २सन्तोषकरणे न॰।

परिनिष्ठा परि+नि+ष्ठा-भावे अ। पर्य्यवसाने "पारम्पर्येऽप्येकत्र परिनिष्ठा" सां॰सू॰।

परिपक्व त्रि॰ परि+पच–क्त। १परिणाकयुक्ते २परिपक्वते च

परिपण(ण) न॰ परिपण्य(ण्य)ते व्यवह्रियतेऽनेन पण(ण्य)–घञ्। मूल्यधने अमरः।

परिपति त्रि॰ परि+पत–इन्। १सर्वव्यापिनि यजु॰५।५। २अधिपतौ पु॰ निरु॰ १२।१८ अ॰।

परिपन्थ पु॰ पन्थानं वर्जयित्वा व्याप्य वा तिष्ठति पथि–अच्। १पथिवर्जके २पथिव्यापके च "परिपन्थं गच्छति" पा॰ठक्। पारिपन्थिक चौरे त्रि॰की॰।

परिपन्थक पु॰ परिपन्थयति दोषाख्यानं गच्छति परि+पन्थ–ण्वुल् पन्थानं वर्जयित्वा गच्छति वा कन् पन्थादेशः। शठौ यजु॰ ४।२४। हेमच॰।

परिपन्थिन् पु॰परि+पन्थि-इनि। १शठौ २विपरीताचारिणि त्रि॰स्त्रियां ङीप्। "छन्दसि परिपन्थिपरिपरिणौ पर्य्यवस्थातरि" पा॰ वेदे एवास्य प्रयोगः। लोके तूपचारात्।

परिपरिन् पु॰ परिपन्थिनशब्दोक्ते पा॰ नि॰। शठौ वेदे एवास्य योगः। यजु॰ ४।२४।

परिपवन पु॰ परिपूयतेऽनेन परि+पू-करणे ल्युट्। चालन्यां निरु॰ ४।६।

परिपन्थव्य त्रि॰ व्याप्तौ परिः पन्थोरिदं यत् प्रा॰स॰। सर्वपथसम्बन्धिनि काला॰ औ॰ ८।८।२ [३नैपुण्ये च।

परिपाक परि+पच घञ्। १उत्कृष्टपाके २परिणामे।

परिपाकिन् स्त्री परिपाकोऽस्यस्याः एकाचरत्वादन्तत्वेऽपि संज्ञात्वात् इनि ङीप्। त्रिफलायां शब्दच॰।

परिपाटि(टी) स्त्री परि+पुं॰पट-इन्। क्रमे आनुपूर्व्यां अमरः वा ङीप्। [अनोदान्तताऽस्य।

परिपाद अव्य॰ पादं वर्जयित्वा। पादवर्जने निरुदका॰

परिपिष्टक न॰ परि+पिष्ट-कन् संज्ञायां कन्। शोसके राजनि॰। [रथे च

परिपुटन न॰ परि+कुटा॰ पुट-भावे ल्युट् १भेदने २सम्पुटीक॰

परिपुष्करा स्त्री परितः पुष्करं सुखं यस्याः। (गोसुक) गोडुम्बायाम् शब्दच॰।

परिपूत त्रि॰ परि+पू-क्त। १अत्यन्तशुद्धे माषः २।१६। शूर्पादिवातेन तुषनिःसारयुते २धान्यादौ च। "परिपूतेषु धान्येषु" मनुः।

परिपूर्ण त्रि॰ परि-पूर-क्त नि॰। आभोगयुते तस्य भावः तल्। परिपूर्णता आभोगे स्त्री अमरः।

परिपेल न॰ परि+पेल-अच्। कैवर्त्तीसुस्तके शैवलमध्ये जायमाने सुस्ताकारे पदार्थे शब्दमाला।

परिपेलव न॰ परितः पेलवं मृदुता यस्य। १कैवर्त्तीसुस्तके अमरः। २अत्यन्तमृदौ त्रि॰ ह॰सं॰ ८४ अ॰।

परिपोट पु॰ सुश्रुतोक्ते कर्णपाल्योरोगभेदे "परिपोटस्त्रयोत्तात उन्नम्यो दुःखवर्द्धनः। पञ्चमः परिखेही च कर्णपाल्या गदाः स्मृताः" इत्युपक्रमे सौकामार्य्यांश्चिरोत्कृष्टमहसाभिप्रवर्द्धते। कर्णशोफो भवेत् पाल्यां सरुजः परिपोटनात्। क्षणाद्रुधिरभिन्नः स्रव्यः स वातात् परिपोटकः"। परिपोटक स्वार्थे पु॰।

परिपोटन न॰ प+पुट-भेदने ल्युट्। भेदने सुश्रुतः।

परिप्रग्र पु॰ परितः प्रग्रः। युक्तायुक्तत्यक्ते गीता ४।३३अ॰

परिप्लव पु॰ परि+प्लु-अच्। १जले अमरः। भावे अप्। २जलादेरुपरितरणे च।

परिप्लुत स्त्री परि+प्लु-क्त। १जलादिभिरार्द्रीभूते। २मदिरायां स्त्री हेमच॰। मैथुनवेदनायुक्ते ३नार्य्यङ्गभेदे स्त्री "परिप्लुतायां योनौ तु वाय्वधर्मै रजा भवेत्" माधवकरः

परिव(ब)र्ह पु॰ परि+वर्ह-घञ्। स्वपयोग्ये इक्ष्वक्षरथादि परिच्छदे अमरः। अन्यस्यापि मध्य एव न्यायः।

परिभ(भा)व पु॰ परि+भू-अप् घञ् वा। १अनादरे २तिरस्कारे अमरः। [ङीषे स्त्रियां ङीप्।

परिभविन् त्रि॰ परि+भू–ताच्छील्ये इनि। परिभवनपरिभाविन् त्रि॰ परि+भू-णिचा॰ भूतेऽर्थे णिनि। सर्वतोभावेन भवनयुक्ते स्त्रियां ङीप्।

परिभाषण न॰ परि+भाष-ल्युट्। १निन्दया दुष्टवचने आक्षेपे २नियमे च मेदि॰।

परिभाषा स्त्री परि+भाष-अ। आक्षेपतां १लक्षणसंज्ञायाम् अवयवार्थमनादृत्य समुदायार्थे २विधिष्टसंज्ञायाम्।

संज्ञापरिभाषयोस्तु अवान्तरभेदः परिभाषेन्दुशेखरे "यदोद्देशं संज्ञापरिभाषम् "यथाकालं संज्ञापरिभाषम्" अनयोर्व्याख्याने द्रष्टव्यः। "कस्मिंदेकदेशस्थः सर्वशास्त्रमभिव्याप्नोति यथा प्रदीपः सुप्रज्वलितः सर्वं वेश्माभिव्याप्नोतीति "व्याप्तौ ख्याने" इति धातौ भाष्ये उक्तम्। "अधिकारशब्देन पारिशेष्यात् परिभाषाप्युच्यते। क्वचित् परिभाषारूप इति" कैयटः। दीपो यथा प्रभाद्वारा सर्वघटप्रकाशक एवमेतत्। व्युत्पिपादयिषाद्वारा सर्वशास्त्रोपकारकमिति तत्तात्पर्यम्। ४व्याधुनिकसङ्केते परिभाषिकशब्दे द्रष्टव्यम्।

परिभूत त्रि॰ परि+भू-क्त। १तिरस्कृते २अनादृते च हेमच॰

परिभ्रमण न॰ परितो भ्रमणम्। १सर्वतोभ्रमणे २पर्य्यटने च

परिमण्डल त्रि॰ परितो मण्डलम्। १वर्त्तुलाकारे हेमच॰ २अणुपरिमाणयुक्ते च परिमाणशब्दे द्रष्टव्यम्।

परिमर पु॰ परिम्रियन्ते अस्मिन् परि+मृ-आधारे अप्। वायौ "तद्ब्रह्मणः परिमर इत्युपासीत" तैत्ति॰उ॰ ३। १०।४ "ब्रह्मणः परिमरः परिम्रियन्तेऽस्मिन् पञ्च देवताः विद्युद्दृष्टिचन्द्रमा आदित्योऽग्निरित्येताः। अतो वायुः परिमरः व्युत्पन्नरूपत्वेः। "स एवायं वायुराकाशेनानन्त" इत्याकाशो ब्रह्मणः परिमरस्तमाकाशं वाय्वात्मानं ब्रह्मणः परिमर इत्युपासीत" भा॰।

परिमर्द पु॰ परि+मृद-भावे घञ्। १घर्षणे २नाशने ३क्षिंसने च भा॰मा॰२१८३श्लो॰। ल्युट्। परिमर्दन तत्रार्थे

परिमल पु॰ परि+मल-अच्। १कुङ्कुमचन्दनादिमर्दने मर्दनोद्भूते २सुगन्धौ अमरः। ३परितः सम्बन्धे च "सतां परिमलोद्भूतबोधात्मवः" इत्युदयनः ४पण्डितसमूहे शब्दर॰

परिमाण न॰ परिमीयतेऽनेन परि+मा-ल्युट्। यवाङ्कुशप्रस्थादिभिर्गुञ्जादिभिश्च द्रव्यस्य परिच्छेदे (माप) गुञ्जादिपरिमाणभेदविशेषाश्च कर्मशब्दे १७७१ पृ॰ उक्ता द्रष्टव्याः। अङ्कुशादिपरिमाणञ्च वैशेषिकमते द्रव्यगुणभेदसङ्ख्यात्रिविधं बोध्यं यथा "अणोर्महतश्चोपलब्ध्यनुपलब्धी लिङ्गे व्याख्याते।" कणा॰सू॰ "तदेवं स्थूलो नीलः कृष्ण इति प्रात्यक्षिकप्रत्यये यथा नीलं रूपं विषयस्तथा परिमाणमपि तेन च परिमाणेन परमाणुपर्य्यन्तं परिमाणवत्तीयते प्रत्यक्षत्वात् द्रव्यप्रत्यक्षहेतुत्वाच्च। द्रव्यप्रत्यक्षतायां रूपवत् परिमाणमपि कारणं नहि महत्त्वमन्तरेण द्रव्यं प्रत्यक्षं भवति तथा च द्रव्यप्रत्यक्षकारणत्वेन स्वयञ्च प्रत्यक्षतया परिमाणं गुणोऽस्तीति निश्चीयते। यदि हि घटादिरूपं परिमाणं स्यात् तदा महदानयेत्युक्ते घटमात्रमानयेत् तथाच प्रैषसंप्रतिपत्ती विरुध्येयाताम्, एवं घटपटात् परिमाणं प्रतीयेत परिमाणपदाद्वा घट इति। मानव्यवहाराधारत्वकारणत्वं द्रव्यसाक्षात्कारकारणनिष्ठसामान्यगुणत्वं वा महत्त्वम्। मानव्यवहारोहस्वदीर्घादिव्यवहारो नतु पलशङ्खादिव्यवहारः। तच्च परिमाणत्रिविधं महत्त्वमणुत्वं दीर्घत्वं ह्रस्वत्वञ्च, तत्र परममहत्त्वपरमदीर्घत्वे विभुपृथक्त्ववर्त्तिनी परमाणुत्वपरमह्रस्वत्वे परमाणुवर्त्तिनी अवान्तराणुत्वावान्तरह्रस्वत्वे द्व्यणुकवर्त्तिनी त्रसरेणुमारभ्य महापर्य्यन्तं महत्त्वदीर्घत्वे। एवञ्च सर्वाण्यपि द्रव्याणि परिमाणद्वयवन्ति। बिल्वामलकादावणुत्वव्यवहारः समिदिक्षुदण्डादिषु च ह्रस्वत्वव्यवहारोभाक्तः, भक्तिवाद प्रकर्षभावाभावः, आमलके यः प्रकर्षभावस्तदभावः कुवले। बिल्वे यः प्रकर्षभावस्तदभाव आमलके, स च गौणस्तयोभयभागित्वाद्भक्तिपदवाच्यः। दीर्घह्रस्वत्वे नित्ये न वर्त्तेते इत्येके, परिमाण एव ते न भवत इत्यपरे, महत्सु दीर्घमानीयतामितिवत् महत्तरे वर्त्तुलं त्रिकोणञ्चानीयतामिति निर्धारणवाहर्त्तुलत्वादीनामप्यापत्तेरिति तेषामाशयात्। इदानीं परिमाणकारणानि परिदृश्यते। "उप॰ह॰ "कारणबहुत्वाच्च" कणा॰सू॰ "चकारोमहत्त्वप्रचयौ समुच्चिनोति, परिमाणसत्पद्यते इति सूत्रशेषः, तत्र कारणबहुत्वं केवलं त्र्यणुके महत्त्वदीर्घत्वे जनयति महत्त्वप्रचययोस्तत्कारणेऽभावात् तच्च बहुत्वमीश्वरापेक्षाबुद्धिजन्यं तदुद्बुद्धेरनेकविषयत्वेऽपादृष्टविशेषोपयोगी नियामकः, एवं परमाणुद्वयगतं द्वित्वं द्व्यणुके परिमाणोत्पादकं वक्ष्यते द्वाभ्यां तन्तुभ्यामग्रथिताभ्यामारब्धे पटे केवलं महत्त्वमेवासमवायिकारणं बहुत्वप्रचययोस्तत्राभावात्। यत्र च द्वाभ्यां तूलकपिञ्जाभ्यां तूलकपिञ्जारम्भस्तत्र परिमाणोत्कर्षदर्शनात् प्रचयः कारणं बहुत्वस्याभावात् महत्त्वस्य स्वत्वेऽपि परिमाणोत्कर्षं प्रत्यप्रयोजकत्वात्। एवञ्च सति यदि महत्त्वं तत्र कारणं तदा न दोषः तदुक्तं "द्वाभ्यामेकेन सर्वैर्वा" इति। प्रचयश्च आरम्भकसंयोगः, स च स्वाश्रितस्वकिञ्चिदवयवावयवसंयुक्तत्वे सति स्वाश्रितस्वकिञ्चिदवयवसंयोगजन्यः, स चावयवसंयोगः स्वावयवप्रतियोगिसंयोगाभावः परिमाणजनकः "गुणकर्मान्ये

वापेक्षं इति वचनात् उ०इ०। "अतो विपरीतमणु" क०सू० "महत्त्वदीर्घत्वे व्युत्पाद्याणुत्वं व्युत्पादयति। अतः प्रत्यक्षविज्ञानग्रहतः परिमाणादल्पपरिमाणमित्यर्थः। वैपरीत्यञ्चाप्रत्यक्षत्वात् कारणवैपरीत्याच्च, महत्त्वे हि महत्त्वबहुत्वप्रचयानां कारणत्वम्, एतेन दीर्घत्वविपरीतं ह्रस्वत्वमित्यपि द्रष्टव्यम्, वैपरीत्यञ्चात्रापि पूर्ववत् उ०इ० "इदानीं कुवलामलकादावणुत्वव्यवहारो भाक्त इति दर्शयति। "अणु महदिति तच्चिन् विशेषभावात् विशेषाभावाच्च" क०सू० "इतिशब्दो व्यवहारपरतां दर्शयति, तेन बिल्वापेक्षया कुवलमणु, कुवलापेक्षयामलकं महत्, आमलकापेक्षया बिल्वं महदिति तावद्व्यवहारोऽस्ति, तत्र महदिति तेषु व्यवहारो मुख्यः, कुत एवमत आह विशेषाभावात् महत्त्वविशेषस्यैव तरतमादिभावेन भावात्। अणुव्यवहारस्तु तेषु भाक्तः, कुत एवमत आह विशेषाभावात् अणुत्वविशेषस्य तत्राभावात्, अणुत्वं हि कार्यं द्व्यणुकमात्रवृत्ति, नित्यं परमाणुवृत्ति, कुवलादौ तदभावात्। यद्वा विशेषस्य महत्त्वकारणस्यैवावयववद्बहुत्वमहत्त्वप्रचयानां कुवलाद्यवयवेषु भावात् सद्भावात्। विशेषाभावात् विशेषस्य अणुत्वकारणस्य महत्त्वासमानाधिकरणद्रव्यत्वस्य कुवलाद्यवयवेष्वभावादसद्भावादित्यर्थः" उप०इ०। "अणुत्वव्यवहारो भाक्त इत्यत्र हेतुमाह। "एककालत्वात्" कणा०सू० "महत्त्वमणुत्वञ्च द्वयमप्येककस्मिन् काले ऽनुभूयते, ते च महत्त्वाणुत्वे परस्परविरोधिनी नैकत्राश्रये सह सम्भवतः, अतो महत्त्वकारणसद्भावान्महत्त्वप्रत्ययस्तत्र मुख्योऽणुत्वप्रत्ययप्रयोगौ च भाक्तावित्यर्थः" उप०इ० "महत्त्वप्रत्ययस्य मुख्यत्वे हेतुमाह "दृष्टान्ताच्च" कणा०सू० "दृश्यते तथा वस्तुगत्या बहुत्वेन कुवलामलकबिल्वेषु स्थूलस्थूलतरस्थूलतमव्यवहारेष भवितव्यमित्यर्थः यथा वस्तुगत्या शुक्लेष्वेव पटगङ्गस्फटिकादिषु शुक्लशुक्लतरशुक्लतमव्यवहारः" उप०इ०। नन्वणु महत्परिमाणमितिव्यवहारबलान्महत्त्वेऽपि परिमाणे महत्त्वमणुत्वेऽप्यणुत्वमस्तीति प्राप्तं तत् कथं द्रव्यमात्रवृत्तित्वमनयोः कथं वा गुणे गुणवृत्तित्वविरोधो नापद्यत इत्यत आह। "अणुत्वमहत्त्वयोरणुत्वमहत्त्वाभावः कर्मगुणैर्व्याख्यातः" कणा० सू०। "यथा गुणकर्मणी नाणुत्वमहत्त्ववती तथाऽणुत्वमहत्त्वे अपि नाणुत्वमहत्त्ववती इत्यर्थः प्रयोगश्च भाक्तो द्रष्टव्यः" उप०इ०। "नन्वणु यथा गुणवत्तः कथमन्यथा महान् शब्दः द्वौ शब्दौ एकः शब्दः चतुर्विंशतिर्गुणा इत्यादिव्यवहारः, कर्मण्यपि च कर्मवत्ति प्रतीयन्ते कथमन्यथा शीघ्रं गच्छति द्रुतं गच्छतीति व्यवहारः तथाचाणुत्वमहत्त्वे अपि तद्वती ख्यातामित्यत आह। "कर्मभिः कर्माणि गुणैश्च गुणा व्याख्याताः" कणा०सू०। "कर्मभिः कर्माणि न तद्वन्ति गुणैश्च गुणा न तद्वत्तयाऽणुत्वमहत्त्वे अपि न तद्वती, व्यवहारस्तु सर्वत्र भाक्त इत्यर्थः" उप०इ०। ननु महान्ति कर्माणि अणूनि कर्माणि महान्तो गुणाः अणवो गुणा इत्यादिव्यवहारादणुत्वमहत्त्ववन्ति कर्माणि तदुभयवन्तश्च गुणाः प्रसक्ता इत्यत आह। "अणुत्वमहत्त्वाभ्यां कर्मगुणाश्च व्याख्याताः" कणा०सू०। "यथाऽणुत्वमहत्त्वे नाणुत्वमहत्त्ववती तथा न कर्माणि तदुभयवन्ति न वा गुणास्तदुभयवन्त इत्यर्थः, प्रयोगस्तु पूर्ववद्भाक्त इति भावः" उप०इ०। "अणुत्वमहत्त्वप्रक्रियां दीर्घत्वह्रस्वत्वयोरतिदिशति। "एतेन दीर्घत्वह्रस्वत्वे व्याख्याते" क०सू०। "ह्रस्वत्वदीर्घत्वे अपि न ह्रस्वत्वदीर्घत्ववती महत्त्वोत्पादकमेव ह्रस्वत्वोत्पादकम्, कारणैक्यात् कथं कार्यभेद इति चेन्न प्रागभावभेदेन पाकजवदुपपत्तेः यत्रैव महत्त्वं तत्र दीर्घत्वं यत्राणुत्वं तत्र ह्रस्वत्वं यत्र नित्यमणुत्वं तत्र नित्यं ह्रस्वत्वमित्याद्यतिदेशार्थः" उप०इ०। "इदानीं विनाशकमाह "अनित्येऽनित्यम्" क०सू० "एतच्चतुर्विधमपि परिमाणं विनाशिनि द्रव्ये वर्त्तमानमाश्रयनाशादेव नश्यति न तु विरोधिगुणान्तरात्। घटे सत्यपि तत्परिमाणं विनश्यति कथमन्यथा कम्बुग्रीवेऽपि स एवायं घट इति प्रत्यभिज्ञा भवेत्। चेन्न आश्रयनाशेन तत्र घटनाशावश्यकत्वात् न हि परमाणुद्वयसंयोगनाशाद् द्व्यणुके नष्टे तदाश्रितस्य बदरेणोस्तदाश्रितस्य चूर्णमुष्टेरविनाश इति युक्तिरभ्युपगमो वा, कथं तर्हि प्रत्यभिज्ञेति सैवेयं दीपकलिकेति प्रत्यभिज्ञानवदुभ्रान्तित्वात्। प्रदीपप्रत्यभिज्ञाऽपि प्रभैव ह्रस्वत्वदीर्घत्वे परह्रस्वत्वादविनाशाश्रिणी इति चेन्न तद्विनाशस्याश्रयविनाशमन्तरेणानुपपत्तेरुक्तत्वात्" उप० इ०। "नित्ये नित्यम्" कणा०सू०। "तत् किं पार्थिवपरमाणुरूपादिवत् परमाणुगतमणुत्वं शब्दबुद्ध्यादिवदाकाशादिगतं महत्त्वमपि नश्यतीत्यत आह। नित्येष्वाकाशादिषु परमाणुषु च यत् परिमाणं तन्नित्यं विनाशकाभावात्" उप०इ०।

परमाणुपरिमाणस्य वैशेषिकसिद्धां संज्ञामाह "नित्यं परिमण्डलम्" कणा०सू० परिमण्डलमेव परिमाण्डल्यम् (स्वार्थे ष्यञ्) उप०ङी०।

"परिमितिव्यवहारासाधारणं कारणं परिमाणमित्यर्थः" सि०मुक्ता० "अणु दीर्घं महद्ध्रस्वमिति तद्भेद ईरितः। अनित्ये तदनित्यं स्याच्चित्ये नित्यमुदाहृतम्। संख्यातः परिमाणाच्च प्रचयादपि जायते। अनित्यं द्व्यणुकादौ तु संख्याजन्यमुदाहृतम्। परिमाणं घटादौ तु परिमाणजन्यते। प्रचयः सिषिक्षायो यः संयोगस्तेन जन्यते" भाषा० "तच्चतुर्विधम् अणु महद् दीर्घं ह्रस्वञ्च। तत्परिमाणम्। नित्यमित्यत्र परिमाणमित्यनुषज्यते। जावत द्रव्यत्वापि परिमाणमित्यनुवर्त्तते। अनित्यमिति पूर्वेणान्वितम्। तथा चानित्यं परिमाणं सङ्ख्याजन्यं परिमाणजन्यं प्रचयजन्यं चेत्यर्थः। तत्र सङ्ख्याजन्यमुदाहरति। द्व्यणुकादाविति। द्व्यणुकस्य त्रसरेणोश्च परिमाणं प्रति परमाणुपरिमाणं द्व्यणुकादिपरिमाणं वा न कारणम् परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वात्। द्व्यणुकादिपरिमाणन्तु परमाणुत्वापेक्षया नोत्कृष्टम्। त्रसरेणुपरिमाणन्तु न स्वजातीयम्। अतः परमाणौ द्वित्वसङ्ख्या द्व्यणुकपरिमाणस्य द्व्यणुके, त्रित्वसङ्ख्या च त्रसरेणुपरिमाणस्यासमवायिकारणमित्यर्थः। परिमाणजन्यमुदाहरति। परिमाणं घटादाविति। परिमाणञ्च कपालादिपरिमाणजन्यम्। प्रचयजन्यमुदाहर्त्तुं प्रचयं निर्वक्ति प्रचय इति" सि०मुक्ता० "परिमाणं तूलकादौ नाशस्यावनाशतः" भाषा० "नाश इति शेषात् परिमाणस्य। न चावयवनाशः कथं परिमाणनाशकः सत्यवयविनि त्रिचतुरपरमाणुविश्लेषे तदुपचये चावयविनः प्रत्यभिज्ञानेऽपि परिमाणान्तरस्य प्रत्यक्षसिद्धत्वादिति वाच्यम् परमाणुद्विश्लेषे द्व्यणुकस्य नाशोऽवश्यमभ्युपेयस्तस्मिंश्च त्रसरेणुनाशः एवं क्रमेण महावयविनो नाशस्यावश्यकत्वात् सति च नाशकेऽनभ्युपगमात्तेषु नाशस्यापवादितुमशक्यत्वात्। शरीरादावयवापचयेऽवयवाधिक्यारम्भनाशस्यावश्यकत्वादवयविनाशे आवश्यकः। न च घटादिनाशेऽपि तत्परमाणुसंयोगात् परिमाणाधिक्यं स्यादिति वाच्यम् तत्रापि तेषामाद्यमिथातेन समवायिकारणतन्तुसंयोगनाशात् घटनाशस्यावश्यकत्वात्। किञ्च तन्त्वन्तरस्य तत्पटावयवत्वे पूर्वं तत्पट एव न स्यात् तत्तन्तूपकारस्याभावात् तत्तन्तोरवयवत्वाभावे च न तेन परिमाणाधिक्यं संयुक्तद्रव्यान्तरवत्। तस्मात् तत्र तन्त्वन्तरसंयोगे सति पूर्वपटनाशस्ततः पटान्तरोत्पत्तिरित्यवश्यं स्वीकार्य्यम्। अवयविनः प्रत्यभिज्ञानन्तु बाधात्तेन दीपकलिकादिवत्। न च पूर्वतन्तव एव तन्त्वन्तरसङ्कारात् पूर्वपटे सत्येव पटान्तरारम्भस्तावदिति वाच्यम् मूर्त्तयोः समानदेशताविरोधात्। एकदा नानाद्रव्यस्य तवानुपलम्भबाधितत्वाच्च पूर्वद्रव्यस्य प्रतिबन्धकस्य विनाशे द्रव्यान्तरोत्पत्तिरित्यवश्यमभ्युपेयत्वात्" सि०मुक्ता०।

वेदान्तिमते अणुमहदित्येव परिमाणद्वैविध्यम्। तच्च आरम्भवादशब्दे दर्शितम्। एवं सांख्यमतेऽपि परिमाणद्वैविध्यम्। "न परिमाणचातुर्विध्यं द्वाभ्यां तद्योगात्" सा०सू०।

परिमार्जन न० परि+मृज-भावे ल्युट् वृद्धिः। १जलगोमयादिना भूम्यादेः शोधने मधुमस्तकरूपे २भक्ष्यद्रव्यभेदे च "मधुतैलघृतैर्मिश्रे वेष्टिताः सन्तिताक्षवे। मधुमस्तकमुद्दिष्टं तत्स्यात् परिमार्जनम्" शब्दच०।

परिमित त्रि० परि+मा-क्त। १कृतपरिमाणे २यथाकथञ्चित्परिमाणे च त्रिका०।

परिमिति स्त्री परि+मा-क्तिन्। परिमाणे भाषापरिच्छेदः

परिमुख अव्य०मुखस्य वर्त्तनम् अव्ययी० पूर्वनि०। मुखसम्मुखवर्त्तने "परिमुखसंमुखयोर्वर्त्तते ठक्" पा० तत्र वर्त्तते ठक्। पारिमुखिक सेवके परिमुखं भवम् "अव्ययीभावाच्च" पा०परिमुखादिभ्य एवेष्यते इत्युक्तेः अञ्। पारिमुख्य तत्र भवे त्रि०।

परिमुखादि अव्यवयवनिमित्ते शब्दगणे स च गणः "परिमुख परिदृत परिमूढ परिमूर्ण परिसीर उपसीर उपाजुष उपकलाप अनुपथ अनुपद अनुगङ्ग अनुतिल अनुशीत अनुसाय अनुसीर अनुमाष अनुतय अनुदूप अनुवंश प्रतिशाख"।

परिमोक्ष पु० परितो मोक्षः। १सकलमुक्तौ २निर्वाणमोक्षे भाग० २।६।१० श्रीधरः। २मोचने च

परिमोषिन् त्रि० परि+मुष-ताच्छील्ये इनि। परिमोषणशीले चौरे स्त्रियां ङीप्।

परिवक्त्र पु० परितः उभयतो विस्तृतो वक्त्रोऽस्य। उभयतो विस्तृतवक्त्रे वृहत्संहितादौ काश्या० १४।१८। संघ०

परि(री)वोग पु०परि+व्युज-भावे घञ् वा दीर्घः। परितोवोगे

परिरथ्या स्त्री परितो रथ्या। चतुष्पथादौ विस्तृते।

परि(री)रम्भ पु० परि+रभ-घञ् उम् च वा दीर्घः। आ-

परिराटक त्रि॰ परि+रट-ताच्छील्ये वुञ्। सम्यगादृरटनशीले। [रटनशीले स्त्रियां ङीप्।

परिराटिन् त्रि॰ परि+रट-ताच्छील्ये घिनुण्। सम्यगादृ

परिल त्रि॰ परितो लाति ला-क। परितो व्याप्तके ततः शिवा॰ अपत्ये अण्। पारिल तदपत्ये पुंस्त्री॰।

परिलेख त्रि॰ परिलिख्यतेऽनेन परि+लिख-करणे घञ्। परितो लेखनसाधने द्रव्ये। उपरागशब्दे ३१०२ पृ॰ दर्शिते पदार्थे च। [रेखादिकरणे।

परिलेखन परि+लिख-भावे ल्युट्। यन्त्रस्थानेषु परितो

परिवत्सर पु॰ संवत्सरपञ्चकान्तर्गते वत्सरभेदे "प्रभवादात् पञ्चभिः शेषात् समाद्यादीषुवत्सराः। सम्वरीदानुपूर्व्याच तथोद्वाहपूर्वकामताः" मत्स्यमा॰त॰। "परिपूर्वे तथा दानं यज्ञानां च द्विजोत्तम!" विष्णुध॰।

परिवर्जन न॰ परिवर्ज्यतेऽनेन हल-घिच्-ल्युट्। १भारणे। हल-भावे ल्युट्। २त्यागे अमरः। पतितादीनां शय्यासनादौ परिवर्जनसङ्गः यथा

"एकशय्यासनं पङ्क्तिभाण्डपक्वान्नमिश्रणम्। याजनाध्यापने योनिसम्बन्धैव सह भोजनम्। सहाध्यायस्तु दम्भः सहयाजनमेव च। एकादश समुद्दिष्टा दोषाः सांकर्य्यसंज्ञिताः। सभीपे चाप्यवस्थानात् पापं संक्रमते नृणाम्। तस्मात् सर्वप्रयत्नेन सांकर्य्यं परिवर्जयेत्" इति कौर्मे उपरिभागे १५अ०। देशभेदादवर्जनीया यथा "यस्मिन्देशे न सम्मानो न प्रीतिर्न च बान्धवाः। न च विद्यागमः कश्चित् तं देशं परिवर्जयेत्" चाणक्यः। वर्ज्यं मनुष्यादयो यथा "ब्राह्मणं वालिशं क्षत्रमयोद्वारं विषं लड्डम्। भूदमक्षरसंयुक्तं दूरतः परिवर्जयेत्। कुभार्य्यां कुसिलञ्च कुराजानं कुसौहृदम्। कुवन्धुञ्च कुदेशञ्च यत्नतः परिवर्जयेत्" मरुडपु॰

परि(री)वर्त्त परि+वृत-भावे घञ् वा दीर्घः। १विनिमये। आधारे घञ्। २युगान्तकाले क्षेमच॰३यज्ञविच्छेदे अध्यायादौ लटा॰कर्त्तरि अच्। ४कूर्म्मराजे। ५क्षत्रपुत्र॰डःसाध्यपुत्रभेदे मार्कण्डे॰ पु॰ ५१ अ॰। तद्यथा मन्त्रिरक्षिकस्तैव "अन्यगर्भं परान् गर्भान् यदैव परिवर्त्तयन्। रतिमाप्नोति वाक्यञ्च विबुधोरग्यदेव हि। परिवर्त्तन मन्त्रोऽयम्। तस्य सुतौ च विरूपविकृतौ तयोः कर्म्म च तत्रोक्तं यथा "परिवर्त्तसुतौ द्वौ तु विरूपविकृतौ द्विज!। नौ तु दृष्ट्वापरिज्ञानाकारान्नोपिसंश्रयौ। गुर्विण्याः परिवर्त्तं तौ कुरुतः पादपादिषु। क्रौष्टुके परिवर्त्तन्या गर्भस्थान्योदरात्ततः। न हन्यं चैव नैवार्द्धं न प्राकारं सहोदधिम्। परिखां वा समाक्रामेदवज्ञा गर्भधारिणीं। इत्याहतौ "युगानां परिवर्त्तेन स्व॰वि॰। यत् स्थानमारभ्य पङ्क्तयवस्थितः स चेत् पुनस्तत्स्थानमायाति तादृशे राशिचक्रस्य ७परिवर्त्ते च "तेषान्तु परिवर्त्तेन पोष्यान्ते भगणः स्मृतः" सू॰सि॰। परिवर्त्तते परि+वृत-घञ्। ८परिवर्त्तियुक्ते धनादौ ताण्ड्य॰भाष्यम्।

परिवर्त्तन न॰ परि+वृत-भावे ल्युट्। १विनिमये मेदि॰। परि+वृत-णिच्-ल्यु। २दुःसाध्यपुत्रभेदे परिवर्त्तशब्दे दृश्यम्।

परिवर्त्तिका स्त्री मेढ्रगतरोगभेदे "वर्द्दनात् पीड़नाद्वापि तथैवाल्पाभिघाततः। मेढ्रवर्त्म यदा वायुर्भजते सर्वतस्तनु। तदा वातोपसृष्टन्तु वर्त्म प्रतिनिवर्त्तते। वस्तेरधस्तात् कोषस्य मध्यिरुपेत्य तिष्ठते। सवेदनं यदाऽत्यर्थं मारुतश्चानुधावति। मारुतागन्तुसम्भूतां विद्यान्तां परिवर्त्तिकाम्। सकण्डूः कठिना चैव तथाऽत्यर्थरुजान्विता" सुश्रु॰।

परिवर्त्तिन् स्त्री परि+वृत णिनि। १पुनः पुनरावृत्तियुक्ते स्त्रियां ङीप्। सा च त्रिवृत्स्तोमस्य २विष्टुतौ। "त्रिरभ्यो त्रिरुरोति स पराचीभिः" (एवं त्रिरुक्ता) "परिवर्त्तिनी त्रिवृत्विष्टुतिः" ताण्ड्य॰ब्रा॰२।२।१। "परिवर्त्तिनी आवर्त्तिनी" भा॰। [रक्षितच्छत्रादौ अमरः।

परिवर्ह पु॰ परि+वृह घञ्। १परिच्छदे राजचिह्नचामर॰

परिवसथ पु॰ परि+वस-आधारे अथच्। ग्रामे हेमच॰।

परिवह पु॰ परि+वह-अच्। सप्तसंवहमध्यपातिनि वायुभेदे वायुशब्दे दृश्यम्।

परि(री)वाद पु॰ परि+वद-घञ् वा दीर्घः। १अपवादे "गुरोर्यत्र परीवादः" इति मनुः। करणे घञ्। २दोषाद्भावनसाधने च मेदि॰।

परिवादिन् त्रि॰ परि+वद-"संपृचेत्यादि" पा॰ ताच्छील्ये घिनुण्। १परिवदनशीले स्त्रियां ङीप् सा च २सप्ततन्त्रीयुते वीणाभेदे अमरः।

परि(री)वाप पु॰ परि+वप-घञ् वा दीर्घः। १वपने। वप-णिच्-घञ्। २मुण्डने ३जलस्थाने ४परिच्छदे च। ततः चतुरर्थ्यां कुत्सा॰ ठक्। पारिवापिक तस्मादूरदेशादौ त्रि॰। स्त्रियां त्वात् ङीप्। प्रेक्षादि॰ तदर्थे इनि। परिवापिन् तस्मादूरदेशादौ त्रि॰ स्त्रियां ङीप्। ल्युट्। परिवापचमत्र।

परिवापित त्रि॰ परिवापे नियुक्तः। परिवापने नियोजिते अमरः। परि+वप--णिच्--क्त। २क्षौरिते त्रि॰।

परि(री)वार पु॰परिव्रियतेऽसौ अनेन वा परि+वृ-घञ् वा दीर्घः। १परिजने कुटुम्बादौ रघुः ६।१॰ २खड्गकोषे (खाप) मेदि॰ भावे घञ्। परिवरणे च।

परिवासन न॰परिवासयतेऽनेन। यज्ञियवेदाच्छादनकुशविशेषे "शुल्वात् प्राग्रेभे परिवास वेदपरिवासनानि निदधाति" आपस्तम्बसूत्रम्। तानि च वेदाधाधि काण्डीति धूर्त्तस्वामी।

परि(री)वाह पु॰ परि+वह-घञ् वा दीर्घः। जलोच्छ्वासे अमरः। परितः समन्ताज्जलानामुच्छ्वसनात् पात्रवर्जनेन वा वहनात्तथात्वम् रघुः ८।७१ टीका॰

परिविक्त पु॰ परि+विद--क्त न दस्य नः। अक्षतदाराग्न्याधाने पूर्वं कृतविवाहाग्न्याधानस्य कनिष्ठस्य ज्येष्ठे भ्रातरि यजु॰ २०।९

परिविक्ति पु॰ परि+विद्-क्तिच्। अक्षतविवाहाग्न्याधाने पूर्वं कृतविवाहाग्न्याधानस्य कनिष्ठस्य ज्येष्ठे भ्रातरि परिवेत्तृशब्दे दृश्यम्। [हेमच॰।

परिविद्ध त्रि॰ परि+व्यध-क्त। १परितो विद्धे २कुबेरे पु॰

परिविन्दत् पु॰परिवेद्यस्यतिक्रम्य ज्येष्ठं विन्दति भार्यामग्न्याधानं वा विद्--लाभे शत। अक्षतदाराग्न्याधानस्य ज्येष्ठस्य पूर्वं कृतदाराग्न्याधाने कनिष्ठे भ्रातरि अत्र परिवेदने दोषः परिवेत्तृशब्दे दारीतोक्तो दृश्यः। तत्र प्रतिग्रहवादिकं उद्वा॰ निषीतं यथा

अन्दोगपरिशिष्टम् "देशान्तरस्थक्लीवैकदृष्यानसक्षोदरान्। वेदाग्निपरिक्रयपतितम्लुप्तव्यातिरोगिणः। जड़मूकान्धबधिरकुब्जकुण्ठकवामनान्। अतिवृद्धान्भार्य्यांश्च क्षयिरुक्षान् त्यजेच्च। धनवृद्धिप्रसक्तांश्च कामतः कारिणस्तथा। कुचटोन्मत्तचौरांश्च परिविन्दन्न दुष्यति"। धनवार्द्धुषिकं राजसेवकं कर्षकं तथा प्रोषितस्य प्रतीक्षेत वर्षत्रयमपि त्वरन्। प्रोषितं यदाऽक्षयानमवादादतिसमाचरेत्"। जड़ो विकलान्तःकरणः स्थिताक्षितावधारणाक्षम इति यावदिति मिताक्षरा। कुण्ठः सर्वक्रियाऽक्षमः "कुण्ठो मन्दः क्रियासु यः" इत्यमरोक्तेः क्षमाख्यान् शास्त्रनिषिद्धभार्य्यासम्बन्धान् नैष्ठिकब्रह्मचारिवानप्रस्थभिक्षुकान्। त्यजेच्च चेति चकारेण यज्ञानित्यनुकृष्यते। कामतः कारिणः औतस्मार्त्तनिरपेक्षस्वच्छन्दव्यवहारिणः। कुचटः कुत्सान्यटतीति परकुत्साटनशील इति नारायणभट्टकामकोपाध्यायाः तेनाग्नयमाश्रयः कुत्सं परकृत्यं घटति मञ्चति प्राप्नोति यो दुष्टकः स कुचटः इति। चौरानित्यत्र चोरानिति पाठे पुरजनप्रेषयान्। धनवार्द्धुषिकादित्रयं देशान्तरस्थितश्च ज्येष्ठं त्वरन्नपि वर्षत्रयं प्रतीक्षेत। ततश्च पूर्ववचने एतान् परिविन्दन्न दुष्यतीति दृश्यत्वम् अत्र परेच्छयार्थत्वाद्द्वितीया। तत्र देशान्तरस्थक्लीवपतितव्यङ्गधनवृद्धिप्रसक्तान् प्रति वर्षत्रयादूर्द्धमिति बोद्धव्यम्। अत्रापि प्रोषिते यत् तत्रत्प्रतीक्षणं तद्विद्याधर्मधनेतरार्थप्रोषितपरं वक्ष्यमाणयज्ञियगोतमवचनात् अक्षयानं प्रत्ययव्ययेन अभ्यूयमाणमिति परिशिष्टप्रकाशकारः। अक्षयनं च इति पाठस्तु रत्नाकरे प्रोषितस्य कल्याणवार्त्तामक्षयनं वर्षं प्रतीक्ष्य परिणयनं करोति। तत्र समागते ज्येष्ठे कनिष्ठः परिवेदनशुद्धये परिवेदनप्रायश्चित्तस्य कृच्छ्रपादं चरेत् एवमन्यत्रापि प्रायश्चित्तसङ्कलनाऽन्वेषणा। वशिष्ठः "अष्टौ दश द्वादश वर्षाणि ज्येष्ठं भ्रातरमनिर्विण्णमप्रतीक्षमाणः प्रायश्चित्ती भवतीति तत्र श्लोकौ "द्वादशैव तु वर्षाणि ज्यायान् धर्मार्थयोर्गतः। न्याय्यः प्रतीक्षितुं भ्राता अभ्यूयमाणः पुनःपुनः। उन्मत्तः किल्बषी कुष्ठी पतितः क्लीव एव वा। राजयक्ष्मामयावी च न न्याय्यः स्यात् प्रतीक्षितुम्"। गोतमश्च "द्वादश वर्षाणि प्रतीक्ष्यं ब्राह्मणस्य विद्यासम्बन्धे भ्रातरि चैवं ज्यायसि यवीयान् कन्याग्न्युपयमेषु षड्विंशके" इति विद्यार्थं प्रोषितस्य ब्राह्मणस्य दारा अपत्योत्पादनार्थं तदभिगमने द्वादशवर्षाणि प्रतीक्षेरन्निति लुब्धा भ्रातरि चैवमित्यनेन सर्वमतिदिष्टम् एतेनैतदवसीयते विद्याधनधर्मार्थं गतानां ब्राह्मणक्षत्रियवैश्यशूद्राणां क्रमशो द्वादशदशाष्टषड्वर्षाणां प्रतीक्षणमिति प्रायश्चित्तविवेकः। रत्नाकरकृद्भिस्तु अभ्यूयमाणेऽभिमुखगमनं प्रव्रजिते गमनस्य निवृत्तिप्रसङ्गादित्यधिकं गौतमीयं विलिख्य प्रोषिते भ्रातरि ज्येष्ठे विवाहाग्न्याधाने तं कारयितुमभिमुखगमनं यवीयसा कर्त्तव्यं कृतसंन्यासे च ततो निवृत्तिरिति व्याख्यातम्। भ्रातातपः "क्लीबे देशान्तरगते पतिते भिक्षुकेऽपि वा"। योगशास्त्राभियुक्ते विषयात्यन्तविरक्ते इति रत्नाकरः। अत एव दक्षः "वृत्तिहीनं मनः कृत्वा शेषवर्गं परमात्मनि। एकीकृत्य विमुच्येत योगोऽयं मुख्य उच्यते"। तेन विषयानासक्तमनसा जीवपरमात्मनोरभेदचिन्तनविशेषो योग इति। अन्दोगपरिशिष्टम् "भ्रान्वयः परि-

विन्दन्ति न यत्रा न तपांसि च । न च आहुः कनिष्ठस्य या च कन्या विरूपिका"। "विकला या च कन्यकेति" पाठः भ्रातातपोवे । नाग्नयः परिविन्दन्तीति ज्येष्ठानतुमत्या यथाह उशनाः "ज्येष्ठभ्राता यदा तिष्ठेदाधानं नैव कारयेत् । अनुज्ञातस्तु कुर्वीत शङ्खस्य वचनं यथा"। वशिष्ठः "अपजोऽस्य यदानग्निरधिकार्यनुजः कथम् । अपजानुमतः कुर्यादग्निहोत्रं यथाविधि" । एतेन विवाहस्त्वनुमत्यापि दोषायेति प्रायश्चित्तविवेकः" ।

परिविन्न पु० परि+विद्-क्त तस्य दस्य च नः । नकारेण व्यवधानात् न चत्वम् मूर्द्धन्यपाठः प्रामादिकः "क्तत्वचः" पा० अचः परत्वाभावात् नकारेण व्यवधानाच्च अग्राप्ते निर्विण्णोऽसंख्यानात् चत्वम् । विषण्णस्तु उपसर्गस्यनिमित्तत्वाभावात् नात्र प्रवृत्तिः । पूर्वं कृतविवाहान्नाधानस्य कनिष्ठस्य ज्येष्ठे भ्रातरि परिवेत्तृशब्दे दृश्यम् । २तादृशस्त्रियां स्त्री परिवेदनदोषकर्मत्वात् तयोः परिवेदनकर्मत्वम् ।

परिविष्टि स्त्री परि+विश-विष-वा क्तिच् । १परिचर्यायां २व्याप्तौ च ऋ०४।३२।२भा०।

परिवी स्त्री परि+व्ये-क्विप् संप्रसारणे दीर्घः । १परिवारिते २परितः स्यूते च यजु० ६।४

परिवीत त्रि० परि+व्ये-क्त सम्प्र० दीर्घः । परिवेष्टिते ऋ० १०५।४१ [१२।१०६

परिवृंहण न० परि+बृह-णिच्-ल्यु । बहुलीकरणे मनुः

परिवृंहित त्रि० परितो बृंहितम् । १सर्वतोभावेन वर्द्धिते २बहुलीकृते च । भावे क्त । २करिध्वनिभेदे न० । [ज्ञा०उ०

परिवृक्ण त्रि० परि+व्रश्च-क्त । १छिन्ने २छिन्नकृत्तपादे च

परिवृक्त त्रि० परि+व्रज-क्त । परित्यक्ते ऋ० १०।१०२भा०

परिवृढ त्रि०परि+बृह-क्त नि० । १अधिपे प्रभौ । ततः भावे दृढा० ष्ट्यनिच् कृतोरः । परिवृढिमन् आधिपत्ये पु० पक्षे ष्यञ् । पारिवाढ्यं तदर्थे न० ।

परिवृत त्रि० परितो वृतः । परितो वेष्टिते "सभ्यैः परिवृतोऽन्वहम्" कात्या० श्रौतिः ।

परिवृत्त त्रि०परि+वृत-क्त । परितोवृत्ते । ततः चतुरर्थ्यां कुत्सदा० अश्वादि०च क । परिवृत्तक तद्दूरदेशादौ त्रि०

परिवृत्ति स्त्री परि+वृत-क्तिन् । १परिवर्त्ते २अर्थालङ्कार भेदे अर्थालङ्कारशब्दे १८८ पृ० दृश्यम् ।

परिवृत्तिसह त्रि० परिवृत्तिं पराहत्तिंसहते सह-क्विप् । यौगिके शब्दभेदे स च पूर्वोत्तरपदयोः पराहत्त्या योगश्चार्थं बोधयतीति तस्य तथात्वम् । तत्र केचित् पूर्वपदपराहत्त्यायोगलभ्यार्थबोधकाः केचिदुत्तरपदपराहत्तया । केचित्तु नोभयपदपराहत्तिसहा यथाह हेमच०

"स्वस्वामित्वादिसम्बन्धं तत्राहुर्मीमतद्वताम् । स्वात् पालधनभुग्नेहपतिमत्वर्थकादयः । भूपालो भूधनो नृभुग्भूनेता भूपतिस्तथा । भूमांश्चेतिकवेरूह्यात्तेषोदाहरणावली । अन्यात् कृत्कर्तृसृट्तृविधाहकरणक्षमाः । जनकाद्योनिजरुहजन्ममूलत्वादयः । धात्र्यांदुध्वजाक्षपाक्षडुलीक्षिभूषवह्निभाः । शालिशेखरमत्वर्थभागिभर्तृधरा अपि । भोज्याद्भुगग्नेोत्रतल्लिट्यादिग्राह्याद्यनादयः । पत्युःकान्तप्रियतमाबधूप्रणयिनीनिभाः । कलत्राहररमण्यप्रणयीयप्रियादयः । सख्युः सखिसमा वाह्याह्वाभियानासनादयः । जनेः स्वरुहिताजाप्यजावरजादयः । आत्रेयात्सङ्घपर्यायवासिषदादयः । बध्यान्निहन्तृघातिघ्नुघ्यंघिघातनाः । अथनकारिदमनदर्पच्छिन्नयनादयः । विवक्षितो हि सम्बन्ध एकतोऽपि यदात्ततः । प्राक्पदर्थितसम्बन्धिशब्दा योज्या यथोचितम् । इष्यते खलु वाह्यत्वे इषस्य इषवाहनः । स्वत्वे पुनर्धनपतिर्ह्यर्थत्वे इषवाच्छनः । अंशोर्ह्यंशुमाली स्वत्वेऽंशुपतिरंशुमान् । बध्यत्वेऽहेरहिरिपुर्भोज्यत्वे चाहिभुगपि । चिह्नैर्व्यक्तैर्भवेद्व्यक्तेर्जातिशब्दोऽपि वाचकः । तथा ह्यगस्तिपूता दिगुदक्षिणाशा निगद्यते । अयुग्विषमशब्दौ त्रिपञ्चसप्तादिवाचकौ । त्रिनेत्रपक्षेषुसप्तपञ्चाशादिषु योजयेत् । शुक्लशब्दो विरोध्यर्थं नञादिरितरोत्तरः । अभिधत्ते यथाशुक्लः श्वादसितः सितेतरः । वाह्यादिषु पदे पूर्वे वाढ्यवाग्म्यादिपूत्तरे । इष्येऽपि भक्षदाद्येषु पर्य्यायपरिवर्त्तनम् । एवं पराहत्तिसहायोगाः स्युरिति योगिकाः । भिन्नाः पुनः पराहत्त्यसहायोगावयवसन्निभाः" ।

परिवेत्तृ पु० परि+विद-तृच् । अक्षतदाराग्नाधानस्य ज्येष्ठस्य पूर्वं क्षतदाराग्नाधाने कनिष्ठे "ज्येष्ठे अनिर्विष्टे कनीयान् निर्विशन् परिवेत्ता भवति परिविन्नो ज्येष्ठः परिवेदनीया कन्या परिदायी दाता परिकर्त्ता याजकः ते सर्वे पतिताः" उदा०त० हारीतः ।

परिवेदन न० परि+विद-ल्युट् । अक्षतदाराग्नाधाने ज्येष्ठे कनिष्ठस्य पूर्वं १विवाहे २अग्नाधाने च परिवेत्तृशब्दे दृश्यम् । विद-ज्ञाने विद-सत्तायां भावे

ल्युट् । १सर्वतो ज्ञाने १सर्वतो दृष्टौ सर्वत्र स्थितौ च ।

परिवेदनीया स्त्री परि+विद कर्मणि अनीयर् । परिवेत्तृ-भार्यायां परिवेत्तृशब्दे दृश्यम् ।

परिवेदिनी स्त्री परिवेदः अस्त्यस्याम् इनि ङीप् । परिवेत्तृभार्यायां परिवेदनीयायां स्त्रियाम् हेमच० ।

परिवेश(ष) पु० परि+विश–(ष-)घञ् । १परिधौ २वेष्टने सूर्यचन्द्रमण्डलयोर्वेष्टनाकारे २उपसूर्यकमण्डले तच्छब्दार्थकेऽ० सं० उक्तं यथा

"रश्मूच्छ्रिता रवीन्दोः किरणाः पवनेन मण्डलीभूताः । नानावर्णाश्रितवस्त्वभ्रे व्योम्नि परिवेषाः । ते रक्तनीलपाण्डुरकापोताभ्राभशबलहरिशुक्लाः । इन्द्रधनुरुल्कानिर्घातसमधनेशपितामहाग्निजताः । धनदः करोति मेचकमन्योऽन्यगुणाश्चेष्व चाप्यन्धः । प्रविलीयते सकृत्तुङ्गरश्मिफलः सोऽपि वायुजतः । चापशिखिरजततैलक्षीरजलाभः स्वकालसम्भूतः । अविकलवृत्तः स्निग्धः परिवेषः शिवसुभिक्षकरः । सकलगगनानुचारी नैकाभः घृतजसन्निभो रूक्षः । असकलशकटगरासनशृङ्गाटकवत् स्थितः पापः । शिखिगजसमेऽतिवर्षं बहुवर्षं नृपवधो, भयं धूम्रे । हरिचापनिभे युद्धान्यशोककुसुमप्रभे चापि । वर्षेनैकेन यदा बहुशः स्निग्धः क्षुराभ्रकाकीर्णः । क्षतौ सद्योवर्षं करोति पीतश्च दीप्तार्कः । दीप्तविरूक्षरूक्षगरुतः कलुषः सन्ध्यात्रयोत्थितोऽतिमहान् । भवति तडिदुल्कादैर्हतो नृपं हन्ति शस्त्रेण । प्रतिदिनमर्केन्दोरहर्निशं रक्तयोर्नरेन्द्रवधः । परिविष्टयोरभीक्ष्णं क्रमान्नभः-स्वयोरुक्तवत् । सेनापतेर्भयकरो द्विमण्डलो नातिशस्त्रकोपकरः । विप्रकृति शस्त्रकोपं युवराजभयं नगररोधम् । दृष्टिस्त्रुटेश्च मासेन विग्रहो वा यदेन्दुभनिरोधे । क्षोराजन्याधिपयोर्जन्मर्क्षे वाशुभो राज्ञः । परिवेषमण्डलगतो रवितनयः क्षुद्भयान्यनाशकरः । जनयति च वातवृष्टिं स्थापरशस्त्रक्षितिक्षता च । भौमे कुमारबलपतिसैन्यानां विद्रवोऽग्निशस्त्रभयम् । जीवे परिवेषगते पुरोहितामात्यनृपपीड़ा । मन्त्रिस्थावरलेखकपरिदृढिबन्दजे क्षुद्भिये । शुक्रे याचितविप्रराज्ञां पीड़ाऽप्रियं चान्द्रम् । क्षुदनवस्थयुनराधिपशस्त्रेभ्यो जायते भयं केतौ । परिविष्टे गर्भभयं राज्ञो व्याधिर्नृपभयं च । युद्धानि विजानीयात् परिवेषाभ्यन्तरे द्वयोर्वृत्तयोः । दिवसकृतः शशिनो वा क्षुद्दृष्टिभयं त्रिषु क्रोशम् । याति चतुर्षु नरेन्द्रः सामात्यपुरोहितो वधं मृत्योः । ग्रहयमिव विद्धि जगतः पञ्चादिषु मण्डलस्थेषु । तारायुक्तस्य कुर्यात् पृथगेव सस्थितो नरेन्द्रवधम् । नक्षत्रायामश्च यदि केतोर्नोदयो भवति । विप्रक्षत्रियविट्शूद्रहा भवेत् प्रतिपदादिषु क्रमशः । श्रेणीपुरकोशानां पञ्चम्यादिष्वशुभकारी । युवराजस्याष्टम्यां परतस्त्रिषु पार्थिवस्य दोषकरः । पुरारोधो द्वादश्यां सैन्यक्षोभस्त्रयोदश्याम् । नरपतिपत्नीपीड़ां परिवेषोऽभ्युत्थितश्चतुर्दश्याम् । कुर्यात् तु पञ्चदश्यां पीड़ां मनुजाधिपस्यैव । नागरकाणामभ्यन्तरस्थिता यायिनां च बाह्यस्था । परिवेषमध्यरेखा विश्लेषाक्रन्दसाराणाम् । रक्तः श्यामो रूक्षश्च भवति वेषां पराजयस्तेषाम् । स्निग्धः श्वेतो द्युतिमान् वेषां भागो जयस्तेषाम् ।"

परिवेषण न० परि+विष ल्युट् । १परितो वेष्टने घिच् ल्युट् । २भोजनार्थं परितो भक्ष्यादेरर्पणे च । तत्र श्राद्धे परिवेषणप्रकारादि श्रा० उक्तं यथा

मनुः "पार्थिव्यां तूपसंस्पृश्य स्वयमन्नस्य वर्द्धितम् । विप्राग्निके पितृन्यायन् मनसैकेऽपनिःक्षिपेत् । अन्नस्येति षष्ठी तृतीयार्थे वर्द्धितं पूरितं पात्रमिति शेषः । उपनिःक्षिपेत् परिवेषणार्थं समीपे धारयेत् तथा च पाकस्थाल्या आलभ्य प्रथमं भोजनपात्रे न देयं किन्तु स्थाल्यादिकं पार्थिव्यां पात्रसमीपे भूमौ संस्थाप्य पश्चादुभाभ्यां पार्थिव्यां पात्रान्तरिताभ्यां श्राद्धे परिवेषणं कुर्यात् । "उभाभ्यामपि पार्थिव्यामाहृत्य परिवेषयेत्" इति मत्स्यपुराणात् । यत्तु श्राद्धे परिवेषणञ्च दक्षिणपार्थिवात्रेयैवान्यानभिधानादिति भैथिलोक्तं तत्र "एकेन पार्थिना दत्तं शूद्रदत्तं न भक्षयेत्" इत्यादिपुराणीयेनैकपार्थिवदत्तशूद्रदत्तभक्षणनिषेधेन तस्मात्परिवेषणस्यापि निषिद्धत्वात् । पार्थिव्यामपि पात्रान्तरितं कृत्वा देयम् । "क्षत्रदत्ताश्च ये क्षेत्रा लवणं व्यञ्जनानि च । दातारं नोपतिष्ठन्ते भोक्ता भुङ्क्ते तु किल्बिषम् । तस्मादन्तरितं देयं पर्णेनाथ दलेन वा । प्रदद्यात् न तु हस्तेन नायसेन कदाचन" इति वचनेन सामान्यतोऽभिधानात् पितृभक्तितरङ्गिण्यामप्येवम् । मनुः "गुडांश्च सूपशाकाद्यान् पयोदधि घृतं मधु । विन्यसेत् प्रयतः सम्यक् भूमावेव समाहितः । अन्नं भोज्यञ्च विविधं मूलानि च फलानि च । हृद्यानि

चैव मांसानि पानानि सुरौषधि च। उपनीय तु तत्सर्वं मनसैः सुसमाहितः। आमिषं पानपात्रञ्च भोक्तुर्दक्षिणतो न्यसेत्। परिवेष्यञ्च प्रयतो गुणान् सर्वान् प्रचोदयन्"। गुणान् उपकरणानि। भूमावेव न तु व्यञ्जनादिपात्राद्यन्नपात्रोपरि निःक्षिपेत् पात्रासन्ने भोजनपात्रेऽपि"।

परिव्याध परि+व्यध कर्त्तरि घञ्। १व्यध्वतेसे २इक्षुमोत्पले च मेदि० ३परितो वेधनकारके त्रि०।

परिव्रज्या स्त्री परि+व्रज-भावे क्यप्। तपस्यायां हेमच०।

परिव्राज् पु० परिवर्ज्य पुत्रादिकं व्रजति परि+व्रज-क्विप् दीर्घः। पुत्रदारादिकं सर्वकर्माणि च परित्यज्य आश्रमान्तरगामिनि भिक्षौ यतौ अमरः। तल्लक्षणं यथा "सर्वारम्भपरित्यागी भैक्षाश्यं ब्रह्ममुक्तता। निष्परिग्रहताऽद्वेषसमता सर्वजन्तुषु। प्रियाप्रियपरित्यक्ते सुखदुःखाविकारिता। बहिराभ्यन्तरं शौचं सुखदुःखाविकारिता। सर्वेन्द्रियसमाहारो धारणाध्याननित्यता। भावसंशुद्धिरित्येष परिव्राड्वर्य उच्यते"।

परिव्राज पु० परित्यज्य पुत्रादीन् व्रजति परि+व्रज-संज्ञायां कर्त्तरि घञ्। परिव्राजि भिक्षौ

परिव्राजक पु० परित्यज्य पुत्रादीन् सर्वकर्माणि च व्रजति व्रज-घञ् स्वार्थे क ण्वुल् वा। चतुर्थाश्रमिणि यतौ।

परिव्राजि स्त्री परि+व्रज-क्विच्-इन्। श्रावण्यां (पुनर्नवा) क्षुपे राजनि०।

परिशिष्ट त्रि० परि+शिष-क्त। १अवशेषे। ततः स्वार्थे अच्। २तत्पूरकाशकग्रन्थभेदे न० हेमच० यथा सङ्ख्यापरिशिष्टं छन्दोगपरिशिष्टम् इत्यादि।

परिशुष्क त्रि० परि+शुष-क्त तस्य कः। १परितः शोषयुते २नीरसे "मांसं बहुतरैर्भृष्टं सिक्तञ्चेदम्बुना मुहुः। क्षीरकाद्यैः समायुक्तं परिशुष्कं तदुच्यते" भरतः उक्ते ३परिपक्वमांसभेदे न०।

परिशेष पु० परि+शिष-घञ्। अवशेषे

परिशोध पु० परि+भावे घञ्। १ऋणादेः शोधने। णिच् अच्। २परितः शुद्धिसम्पादने च। ल्युट्। परिशोधन तत्रार्थे न०।

परिश्रम पु० परि+श्रम-घञ् न दीर्घः। १व्यायामे क्लेशकारके श्रमे हेमच०। स्वार्थे तु क्वचित् दीर्घः। परिश्राम तत्रार्थे भाग० २।६।२० [च मेदि०।

परिश्रय पु० परि+श्रि-आधारे अच्। १आश्रये २सभायां

परिश्रित् स्त्री परिश्रयत्यनया परि+श्रि-करणे क्विप्। सुखसुप्तायां यत०ब्रा० ७।१।१२ भाष्यम्। २यज्ञियेष्टकासमसंख्यके पाषाणखण्डे च कात्या०श्रौ०१८।६।१२

परिश्रित त्रि० परि+श्रि+क्त। १समाश्रिते भावे क्त। २आश्रये न०। ३परितोवेष्टने ४इक्षुादिपरिष्कारके तिरस्करणादिभिर्वेष्टने यत०ब्रा० ३।१।२।८ भा०। आश्व० श्रौ० २।४।१ नारा०।

परिषद् स्त्री परिषीदत्यस्यां परि+सद-आधारे क्विप्। सभायां धर्मनिर्णयार्थं विद्वद्दैवज्ञावां२ सभायाञ्च यथोक्तं मनुना "अनाम्नातेषु धर्मेषु कथं स्यादिति चेद्भवेत्। यं शिष्टा ब्राह्मणा ब्रूयुः स धर्मः स्यादसंशयः"

प्रायश्चित्तनिर्णयार्थं परिषदुपस्थानप्रकारः परिषद्भेदव्यवस्थादिकं प्रा०वि० उक्तं यथा

"अथ प्रायश्चित्तिनः परिषदुपस्थानम्। तत्राङ्गिराः "कृते निःसंशये पापे न भुञ्जीतानुपस्थितः। भुञ्जानो वर्द्धयेत् पापमस्यं संसदि ब्रुवन्। सचेलं वाग्यतः स्नात्वा क्लिन्नवासाः समाहितः। उपस्थाय ततः शोत्रमार्त्तिमान् धरणीं गतः। गावैव शिरसा चैव न च किञ्चिदुदाहरेत्"। उपस्थानञ्च वस्त्रादिना ब्राह्मणान् तोषयित्वा कार्य्यम् "तोषयित्वा द्विजोत्तमानिति" देवलवचनात्। महत्तञ्च पापेषु राज्ञाप्युपस्थितिः कार्य्येत्याह देवलः "स्वयं वा ब्राह्मणैः क्षत्रमल्पदोषे विधीयते। राज्ञा च ब्राह्मणैश्चैव महत्तञ्च परिचक्षते"। परिषदमाह अङ्गिराः "एकविंशतिसंख्यातैर्भिक्षान्नाद्यावदाप्यारगैः। वेदाङ्गकुशलैश्चैव परिषत्तं प्रकल्पयेत्। चातुर्वेद्यः प्रकल्पी च अक्षुद्विर्द्धर्मपाठकः। त्रयश्चाश्रमिणो ह्याः परिषत् स्याद्दशावरा"। परिषच्छब्दोऽत्र सभार्हपरः। चातुर्वेद्यः चतुर्वेदपारगः। विकल्पी सर्वधर्मप्रमाणज्ञः धर्मपाठकः धर्मशास्त्रज्ञः। मनुः "त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्मपाठकः। त्रयश्चाश्रमिणः पूर्वे परिषत् स्याद्दशावरा"। अङ्गिराः "एषा तु लघुकार्य्येषु मध्यमेषु तु मध्यमाः। महापातकशोध्येषु शतशो भूय एव वा" प्रदर्शनार्थमिदं यावद्भिरेव निरूपणं भवति तावद्भिरेव परिषत् ह्यार्थत्वादस्याः। तथाच यमः "एको द्वौ वा त्रयो वापि यद्ब्रूयुर्धर्मपाठकाः। स धर्म इति विज्ञेयो नेतरेषां सहस्रशः। यद्यदन्ति तमोमूढा मूर्खा धर्मसतद्विदः। तत्पापं शतधा भूत्वा तद्वक्तॄनुगच्छति"। ह्यश्चाता-

तपः "बहुना धर्मशास्त्राणि प्रायश्चित्तं वदन्ति ये। प्रायश्चित्ती भवेत् पूतस्तत् पापं तेषु मज्जति"। अङ्गिराः "ब्राह्मणानां मार्गमाणानां प्रायश्चित्तानि ये द्विजाः। जानतो न प्रयच्छन्ति तेऽपि तद्दोषभागिनः। अनर्द्धितैरनाङ्क्तैरपूर्तैश्चैव संवृतैः। प्रायश्चित्तं न वक्तव्यं जानद्भिरपि जल्पतः"। तथा "न्यायतो मार्गमाणस्य अविद्यादेः प्रधामिनः। अन्तरा ब्राह्मणं लब्धा व्रतमेतत् समाटिशेत्"। [दिरूपकोषः।

परिषद् त्रि॰ परितः सीदति परि+षद-क्विप्। अनुचरे

परिषद्य त्रि॰ परिषदमर्हति यत्। सभार्हे द्विरूप०। स्तोतृसमेतानामृत्विजां सभायोग्ये पवमाने अग्निभेदे यजु॰ ५।३२ वेददीपः।

परिषद्वल त्रि॰ परिषद्+अस्त्यर्थे वलच्। सभासदे तत्र आश्रयत्वेन परिषदः सत्त्वात् तथात्वम्।

परिषीवण न॰ परि+षिव-भावे ल्युट् वत्वं वा दीर्घः नि॰। यन्त्रिकरज्जौ (गाँटदेओया) माघः ८।६।१२ पक्षे परिषेवणमप्यत्र।

परिषूति स्त्री परि+सू-प्रेरणे भावे क्तिन्। १प्रेरणे। कर्त्तरि क्तिच्। २प्रेरके त्रि॰ ऋ॰ १।१८।६

परिषेचक परि+सिच-ण्वुल्। परितः सेचके अकान्तत्वेऽपि याज्ञिका॰ समर्थव्यवहारात् समाधः। अनोदात्तता चास्य।

परिष्कन्द त्रि॰ परि+स्कन्द-क्त तस्य दत्वं च न वा षत्वे षत्वम्। परस्पष्टे षत्वाभावे षत्वाभावात् परिस्कन्न तत्रार्थे।

परिष्क(स्क)न्द त्रि॰ परिष्कद्यते पूर्व्यते परि+स्कन्द घञ् वा षत्वम्। १परस्पष्टे अमरः २परितः स्यायिनि रथगोपके भा॰म॰ ४२अ॰।

परिष्कर पु॰ परि+कृ-भावे वा॰ अप् सुट् षत्वम्। रथस्य रचादौ भा॰क॰ २४अ॰ "अग्निमिमन्थ स्त्रेयं रथस्यासीत् परिष्करः"।

परिष्कार पु॰ परि+कृ-घञ् सुट् षत्वम्। १भूषणे विद्यमानवस्तुनो गुणान्तरस्य २आधानादौ ३संस्कारे च अमरः ४शुद्धौ।

परिष्कृत त्रि॰ परि+कृ-क्त सुट् षत्वम्। १भूषिते २चेष्टिते ३कृतमार्जनादिसंस्कारे च अमरः यज्ञार्थं पशुबन्धनाय-यज्ञपात्रासादनाय च कृतसंस्कारायां ४भूमौ स्त्री अमरः।

परिष्टि स्त्री परि+इष-क्तिन् ऐदे भक॰। अन्वेषणे ऋ॰ १।६६।८। ओके च परीष्टिरित्येव

परिष्टुभ् त्रि॰ परि+स्तुभ-क्विप् षत्वम्। १परितः निरर्थकशब्दरूपस्तोभयुक्ते ऋ॰ १।१६६।११ भा॰। २परितः श्रोतव्ये ऋ॰ ८।६२।२४ भा॰।

परि(ष्टी)स्तोम पु॰परितः स्तूयते उत्तमवर्णयुक्तत्वात् षत्वम्। परिगतः स्तोमम् प्रा॰स॰ तत्र परेः स्तौतिं प्रत्यनुपसर्गत्वात् न षत्वमिति भेदः इति स्वामी। गजपृष्ठान्तरस्थकम्बले (झुल) अमरः। [षत्वम्। परितः स्थले।

परिष्ठल न॰परितः स्थलम् "विकुशमिपरिभ्यः स्थलम्" पा॰

परिष्ठा त्रि॰ परि+स्था-क्विप् षत्वम्। परावस्थायाम् ऋ॰६।

परि(ष्य)स्पन्द त्रि॰ परि+स्पन्द-घञ्। "परिस्पन्दः प्राच्यभरतेषु" पा॰ प्राच्याद्यर्थे न षत्वम् अन्यत्र वा षत्वम्। १परितः स्पन्दनयुक्ते २कृत्रिमादेः पत्रावल्यादिरचनायाम् अमरः। ३परिष्कारे ४परिवारे च हेमच॰।

परिष्वङ्ग पु॰ परि+स्वञ्ज-घञ्। आलिङ्गने अमरः

परिसंवत्सर अव्य॰अर्द्धं संवत्सरात् अव्ययी॰। वत्सरादूर्द्धं "परिसंवत्सरात् पुनः"मनु॰पक्षस्था अनुक्। २परिवत्सरे पु॰

परिसंख्या स्त्री परि+सम्-ख्या-भावे अङ्। १परिगणिते २विधिभेदे नियमशब्दे ४०७८ पृ॰ ऋतुकालशब्दे च १४ १७पृ॰ दृश्यम्।

परिसंख्यात त्रि॰ परि+सम्-ख्या-कर्मणि क्त। परिगणिते

परिसञ्चर पु॰ खण्डिकालादूर्द्धं सञ्चरति परि+सम्-चर-अच्। प्रतिसञ्चरकाले सृष्टिप्रलयकाले "त्रिविधः सर्वभूतानां कीर्त्यते परिसञ्चरः। अनावृष्टिर्भयंकरात्र घोरः संवर्त्तकोऽनलः। मेघो घोरार्द्धबोषायुक्तया रात्रिर्भयात्मनः" वराहपु॰।

परिसमूहन परि+सम्-ऊह भावे ल्युट्। यज्ञादौ अनलोपरि १तृणौ समिदाधाने परितः पतितत्वादेः प्रक्षिप्य अग्निमध्ये २प्रक्षेपरूपव्यापारभेदे च कात्या॰श्रौ॰४।१२। १६। ३क्ष्मेः समन्तात् मार्जने च।

परिसर पु॰ परि+सृ-अप्। १नदीनगरपर्वतादेः पर्य्यन्तभूमौ अमरः २मृत्यौ ३विधाने मेदि॰।

परिसर्प पु॰ परि+सृप-भावे घञ्। १परितो जलादिना वेष्टने २समन्ताद् गमने च हेम॰। ३सारस्वतत्यागभेदे न॰ आश्व॰ १२।६।२२

परिसर्य्या स्त्री परि+सृ-भावे क्यप्। सर्वतो गमने अमरः।

परिसारक त्रि॰ परि+सृ-ण्वुल्। १परितो गन्तरि। ततः मत्वर्थे अण्। पारिसारक तच्छब्दयुक्ते अध्याये अनुवाके च पु॰।

परिस्प(ष्प)न्द पु० परि+स्पन्द-भावे घञ् अप्राणिकर्तृकत्वे वा पत्वम्। इताद्देः चरणे प्राणिकर्तृके कृत्याद्देर्मदचरणे तु न षत्वम्।

परिस्रव परि+स्रु-भावे अप्। परितः चरणे

परिस्राव पु० परि+स्रु-णिच्-अच्। सुश्रुतोक्ते परिस्रवजनके १अपद्रवभेदे "क्रूरकोष्ठस्यातिप्रभूतदोषस्याल्पदोषधमनचारितं सप्तधातूक्ष्म्य दोषान्निःशेषानपकर्षति ततस्ते दोषाः परिस्रावमापादयन्ति तत्र दौर्बल्योदरविष्टम्भारुचिगात्रसदनानि भवन्ति सर्वदा चास्य पित्तश्लेष्माणौ परिस्रवतश्च परिस्रावमित्याचक्षते। परि+स्रु भावे बा० घञ्। २परिचरणे च

परिस्राविन् त्रि० परि+स्रु-णिनि। १चरणयुक्ते सुश्रुतोक्ते पञ्चविधभगन्दरभेदे २तद्भेदे च "श्लेष्मा तु प्रकुपितः समीरणेनाधःप्रेरितः पूर्ववदवस्थितः शुक्लाभासां स्थिरां कण्डूमतीं पिडकां जनयति सास्य कण्डादीन्वेदनाविशेषाञ्जनयत्यतिक्रियमाणा च पारसुपैति ग्रन्थ कठिनः संरम्भी कण्डूप्रायः विच्छिन्नभिन्नसाभासं स्रवत्यूषोपेतञ्च वातमूत्रपुरीषरेतांसि विसृजति तं भगन्दरं परिस्राविणमित्याचक्षते" तत्र तच्चरणशीलम्।

परिस्रुत् स्त्री परि+स्रु-क्विप्। १सुरायाम् अमरः। २परितः चरणयुक्ते त्रि० "अन्नात् परिस्रुतो रसम्" यजु० १९।७५। भावे सम्प० क्विप्। ३चरणे स्त्री।

परिस्रुत त्रि० परि+स्रु-क्त। १पक्वादिभ्यो निःसृतसारूपे पदार्थे "अर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम्" यजु० २।३४ "परिस्रुतं वहन्तीः पक्वेभ्यो निःसृतं सारं वहन्त्यः। तच्च सारं त्रिविधम् अर्जशब्देन घृतशब्देन पयःशब्देन चाभिधेयम्। तत्रोर्जशब्दोऽन्नगतं स्नाद्वम्लमभिधत्ते। घृतपयसी प्रसिद्धे" वेददी०। २मदिरायां स्त्री मेदि०।

परिहृनु अव्य० हन्वोरुपरि अव्ययी०। हन्वोरुपरि ततः परिसुखा० भवार्थे यञ्। पारिहनव्य तत्र भवे त्रि०

परिहस्त अव्य० परिवर्जने अव्ययी०। हस्तस्य वर्जने तस्य निरटकादित्वात् अनोदात्तता।

परि(री)हार पु० परि+हृ-घञ् वा दीर्घः। १अपनयायां अनादरे शब्दरत्ना०। २दोषाद्युद्धारणे च

परिहार्य्य त्रि० परि+हृ-कर्मणि यत्। १परिहर्त्तव्ये २लक्षणीये त्रिरूपकोषः। ३वर्द्धार्य्ये च

परि(री)हास पु०परि+हस-घञ् वा दीर्घः। नर्मणि त्रिका० परिहृत् त्रि० परि+हृ-क्विप्। परिहृत्य गन्तरि ऋ०६।४।६

परीक्षक त्रि० परि+ईक्ष-ण्वुल्। १तर्केण प्रमाणैरनिर्वर्तनिर्द्धारणाय शास्त्रपरिशीलनेन प्राप्तबुद्धिप्रकर्षे हटात्मगन्धे २६७२ पृ० दृश्यम्। २व्यवहारादौ दिव्यभेदपरीक्षाकारके च।

परीक्षण न० परि+ईक्ष-भावे ल्युट्। राज्ञा चमात्यादेः चारादेश्च १दुष्टादुष्टान्निरूपणे तर्कप्रमाणाभ्यां २वस्तुतत्त्वावधारणे च "भेदोपजापापधमाद्यैर्यत् परीक्षणम्" अमरः।

परीक्षा स्त्री परि+ईक्ष-भावे अ। दिव्यशब्दे ३५८६ पृ० आदौ दर्शिते १दिव्यशब्दार्थे तर्कप्रमाणादिना २वस्तुतत्त्वावधारणे च। [व्यवधारके।

परीक्षिन् त्रि० परि+ईक्ष-णिनि। युक्तिप्रमाणैर्वस्तुस्वरूपा-

परीणस् त्रि० परि+नश-औणादिके धातुनामनेकार्थत्वात् व्याप्तौ क्विप् दीर्घः। १व्यापके ऋ०५।१०।१ भा०। परि+नह बा० डसुन् दीर्घः। २परितोनद्धे च ऋ०१।१२६।६

परीणसा अव्य० परि+नश-व्याप्तौ बा० क्वात् दीर्घः। बहुपदार्थे निघण्टुः ऋ०६।६७।६। सदा०।

परीणह् त्रि० परितः नह्यते बध्यते नह-क्विप् दीर्घः। १परितो बन्धने २ततूकर्मणि च। ऋचि पदान्ते हस्व धः।

परीत त्रि० परि+इ-क्त। परितो गते [भा०उ० ११०अ०

परीप्सा स्त्री परि+आप्-सन्-भावे अ। प्राप्तुमिच्छायाम्

परीर न० पूर्वं तेऽनेन पृ-ईरन्। फले उज्ज्वल०।

परीरम्भ पु० परि+रभ-घञ् वा दीर्घः। आश्लिङ्गने अमरः

परीष्टि स्त्री परि+इष-क्तिन्। १अन्वेषणायाम् २परिच्छायाञ्च हेमच०।

परीसार पु० परि+सृ-घञ् दीर्घः। सर्वतोगमने हेमच०।

परु पु० पॄ-उनु। १सन्धौ २खर्गे ३पर्वते ४पर्वते च मेदिनी०

परुच्छेप पु० परुषि शेफोऽस्य पृषो०। ऋषिभेदे निरु०१०।४२

परुत् अव्य० परस्मिन् वर्षे नि०। परस्मिन् वर्षे इत्यर्थे अमरः। तत्र भवः त्र। परुत्न परस्मिन्वर्षभवे त्रि०।

परुद्वार स्त्री परः सन्धौ पर्वतो वा द्वारमस्य। घोटके शब्दमाला स्त्रियां जातित्वात् ङीष्।

परुष न० पॄ-उषन्। १निष्ठुरवचने २नीलोत्पलवृक्षे अमरः ३फलभेदे परूषके भावप्र०। [वर्षे त्रि०।

परुषोक्ति स्त्री कर्म०। १निष्ठुरोक्तौ। बहु०। २कटुवाक्यक-

परस् न० पृ–असि। पर्व्वो (गाँठ) पर्व्वणि अमरः।

परूष न० पृ–कषन्। फलभेदे (फलसा) "परूषकं कषायास्लमाम पित्तकरं लघु। तत् पक्वं मधुरं पाके शीतं विष्टम्भि दुर्जरम्। कृमि कट पित्तदाहास्रज्वरास्रवमीरकृत्" भावप्र०।

परेत त्रि० परा+इ–क्त। मृते अमरः।

परेतराज(ज्ञ) पु० ६त० टच्समा० परेतेषु राजते राज–क्विप् वा। यमे अमरः।

परेतवास पु० ६त०। श्मशाने।

परेद्यवि अव्य० परस्मिन् अह्नि नि०। परदिने इत्यर्थे

परेद्यस् अव्य० परस्मिन् अह्नि पर+एद्युस्। परदिने इत्यर्थे

परेष्टुका स्त्री परैरिष्यते इष–तु स्वार्थे क। बडप्रसवायां गवि अमरः।

परैधित त्रि० परैरेधितः इध+णिच्–क्त ३त०। अन्यपालिते औदासीन्येनापरवर्द्धिते अमरः।

परोक्ष अव्य०अक्षः परम् अव्ययी० टच् नि० पूर्वनिपातः। १इन्द्रियज्ञाने "परोक्षज्ञानमनाप्तार्थं निश्चयरूपेति विद्वान्सः" इत्युक्तेस्तज्ज्ञानस्यानाप्तार्थत्वम् निश्चयरूपत्वञ्च बोध्यम्। अर्थं आद्यच्। २तद्विषये त्रि०। ३तत्पक्षिणि शब्दमात्रे। [स्त्रियाम्।

परोढा स्त्री परेरूढा ३त०। परेण कृतविवाहायां

परोपकार पु० ६त०। परस्य हितादिसम्पादनव्यापारे

परोवाक्षु पु० परोवाक्षर्व्वोरस्य नि० टच्। परमवन्द्यवृक्षे भत०आ०६।५।३।१० [भत०आ० १४।८।१५।

परोरजस् त्रि० रजसः परः टच् नि०। १रागाभावे २विशुद्धे

परोलक्ष न० लक्षात् परः टच् नि०। १लक्षसंख्यातोऽधिकसंख्यायाम् २तदन्विते च।

परोवरीय त्रि० "परांवापरांवाश्नुभवति य अवरश्रोत्रं निणात्यते। भेदाभेदयुक्ते।

परोवरीयस् परश्च परोवाँश्च नि० पूर्वपदे टच्। अत्यन्तभेदे परमात्मनि "परोवरीयसोऽहं लोकान् जयति" छा०उ०।

परोष्णी स्त्री परा+उष्ण–कर्म० गौरा० ङीष्। तैलपाविकायाम् अमरः। [यन्त्रदण्डे अमरः।

पर्कटि(टी) स्त्री पृष–अटि ग्रडका० कृत्वम्। (पाकड़)

पर्कटिन् पु० पृष–अटिनि ग्रडका० कृत्वम्। यज्ञदण्डे (पाकड़) "पर्कटी कटुकः प्रोक्तः शिशिरश्च कषायकः। रक्तदोषक्षयोन्मादप्रलापभ्रमनाशनः" राजनि० तद्गुणा उक्ताः।

पर्जनी स्त्री पृज–करणे ल्युट् ङीष्। दारुहरिद्रायाम् अमरः।

पर्जन्य पु०पृषु–सेचने अन्य आनादेशः। १इन्द्रे २मेघे मेदि० "यज्ञाद्भवति पर्जन्यः" इति मनुः। ३मेघशब्दे विश्वः पर्जन्य इव सर्वान् कामादभिवर्षति। ४विष्णौ पु०। "कुसुदः कुन्दरः कुन्दः पर्जन्यः पावनोऽनिलः" विष्णुस० ५दारुहरिद्रायां स्त्री राजनि०।

पर्जन्यपत्नी स्त्री पर्जन्यः पतिरिवास्याः सपूर्वकत्वात् पत्युर्न ङीष्। वशायां "वशा पर्जन्यपत्नी देवा अस्येति ब्राह्मणाऽधस्ते भद्रे! पर्जन्यो विद्युतस्वती वशे!" अथ० १०।१०।६। ६त०। २इन्द्रपत्न्यां शच्यां च।

पर्ण हरितीकरणे अ०चु० अम०सक०सेट्। पर्णयति-ते अपपर्णत्-त। असनः पर्णयति अस्यकम्।

पर्ण न० पृ–न, पर्ण–अच् वा। १पत्रे २पद्मे च "सुपर्णो गरुडो मतः" इति। ३पलाशवृक्षे पु० ४तालभूजे न० ५पत्रयुक्ते त्रि० अमरः। "पर्णभूजे भवेद्व्याधिः स्वर्णपे प्राणसम्भवः। क्षौर्णं पर्णं हरेदायुः शिरा बुद्धिप्रणाशिनी" आह्निक त०। तन्मूलादिसेवननिषेधः। "अनिधाय मुखे पर्णं पुरुषादयते परम्। सतिलं मांसं दरिद्रः खादन्ने न हरते हरिम्"। अत्र परमिलुक्तेः धन्याकादियोगे न दोषः। पर्णस्येदम् शिवा० अण्। पार्णं तत्सम्बन्धिनि त्रि०। अस्यर्थे नडा० क कुक् च। पर्णकीव तदुपदेशे त्रि०। तस्यादूरभवादि वरणा० अण् पार्ण तस्यादूरदेशादौ त्रि०। बहुत्वे तस्य लुक् पर्णाः इत्येव। तत्र भवः "लुकस्यपर्णात् भरद्वाजे" पा० भवादौ ढक्। पर्णीय भरद्वाजदेशभवे अन्यत्र अणेव पार्णे तत्रार्थे त्रि०। क्षुद्रं पर्णम् ङीष्। २क्षुद्रपर्णे स्त्री स्वार्थे पर्णं अमरादि० वुन्। पर्णिक तद्विक्रेतरि स्त्रियां प्रत्यात् ङीष्।

पर्णक पु० कविभेदे तस्य गोत्रापत्यम् एञ् पार्णकि तद्गोत्रापत्ये बहुत्वे तु उपका० तस्य वा लुक्।

पर्णकार पुंस्त्री० पर्णं करोति उत्पादयति अण् उप०स०। (बारुइ) ख्याते जातिभेदे तान्त्रूलवणिजि स्त्रियां जातित्वात् ङीष्। [रचिते क्षुद्रगृहे (पातेरकुड़े)।

पर्णकुटी स्त्री पर्णनिर्मिता कुटी या०त०। पत्रमात्रेण

पर्णकूर्च पु० पर्णमात्रेणोपलक्ष्यद्रव्याणां त्रिरात्रोपवासान्ते विशेषतो भोजननिष्पादितव्रतभेदे यथाह मिता०। "यदा तु पर्णादीनामेकैकेनात्रान्ते क्रियते तदा

पर्णकूर्चः यथाह यमः "एतान्येव समस्तानि शिरालोमोषितः शुचिः। कार्यित्वा पिबेद्विद्वः पर्णकूर्चो अभिधीयते" इति। एतानि पर्णलक्षोक्तद्रव्याणि।

पर्णकृच्छ्र पु० पञ्चाहसाध्ये व्रतभेदे "पर्णोदुम्बरराजीव बिल्वपत्रकुशोदकैः। प्रत्येकं प्रत्यहं पीतैः पर्णकृच्छ्र उदाहृतः" याज्ञ० 'पलाशोदुम्बराश्वत्थश्रीवृक्षपर्णानामेकैकेन कार्यितमुदकं प्रत्यहं पिबेत्। कुशोदकमेकस्मिन्नहनीति पञ्चाहसाध्यः पर्णकृच्छ्रः' मिता०।

पर्णखण्ड पु० पर्णमेव खण्डः खण्ड्यते यस्य पृषोदरत्वात्। १पुष्पहीने वनस्पतौ डप्रे भवे च०। समूहे खण्डच्। २पर्णसमूहे न०।

पर्णचीरपट पु० महादेवे भा० अ० २८६ अ०।

पर्णचोरक पु० पर्णं चोरयति चुर-ण्वुल्। चोरनामगन्धद्रव्ये राजनि०।

पर्णनर पु० पर्णनिर्मितः नर इव। अस्थ्यलाभे मृतस्य दाहार्थं पर्णनिर्मिते नराकृतौ पुत्तलिकाभेदे तद्विधानं श्रु० त० उक्तं यथा

"अथास्थ्यलाभे पर्णनरदाहः। तत्राश्वलायनसङ्ग्रहपरिशिष्टम् "अस्थिनाशे पलाशानां त्रीणि शतानि च। पुरुषप्रतिकृतिं कृत्वा दहेत् मन्त्रपूर्वकम्। अथौत्पत्तिकेन शिरसि ग्रीवायां दश योजयेत्। उरसि त्रिंशतं दद्यात् त्रिंशतिं जठरे तथा। बाहुभ्यान्तु शतं दद्यात् दद्यात् दशकृत्वस्त्रिभिर्दश। हृदयार्द्धं वृषणयोरर्द्धं शिश्न एव च। ऊरुभ्याञ्च शतं दद्यात्त्रिंशतं जानुजङ्घयोः। पादाङ्गुलिषु च दश एतत् प्रेतस्य लक्षणम्। अथौत्पत्तिकेष्वेवं संवेष्ट्य यवपिष्टेन लेपयेत्"। आदित्यपुराणम् "तदलाभे पलाशोत्थैः पत्रैः कार्यः पुमानपि। शतैस्त्रिभिस्तथा षष्ट्या शरपत्रैर्विधानतः"। तदलाभेऽस्त्रलाभे। अत्र पलाशपत्रशरपत्रयोस्तुल्यत्वेनोपादानात् आश्वलायनसङ्ग्रहोऽपि प्रतिनिधौ शरपत्रस्य लाभः। अत्राधारादीनामत्यन्ताश्च शरपत्रैः पुत्तलकं कृत्वा शिरःप्रभृतिषु पलाशपत्राणि देयानि ततो वेष्टनमूर्णासूत्रेण, लेपनं यवपिष्टेनेति। अत्रास्थ्यौत्पत्तिकेष्वलाभे दाहे प्रेताङ्गेन शुद्धिः तदुत्तरपर्णनरदाहे तु त्रिरात्रम्। "एवं पर्णनरं दग्ध्वा त्रिरात्रमशुचिर्भवेत्" इत्यादिपुराणात्। यत्तु भार्गवः "पुत्राद्यैरुपलभ्येरन् तदस्थीनि कदाचन। तदलाभे पलाशस्य सम्भवे हि पुनःक्रिया"। हि यस्मात् तदलाभेऽस्त्रसंप्राप्तौ पलाशस्य तत्कृतपुत्तलकस्य दाहक्रिया पुनरपि सम्भवे तस्मादस्थिदाहक्रिया विहिता तस्मादृषि पुनरस्थीनि प्राप्यन्ते तदा पुनर्दाहे त्रिरात्राशौचे कर्त्तव्ये न पुनः पिण्डादिदानं वक्ष्यमाणयुक्तेः। "अशौचानन्तरं चेत् स्यादाहः पर्णनरस्य च। त्रयहाच्छुद्ध्यन्ति च तथा सपिण्डाः सगोत्रजाः। दर्भे दहेत् "पर्णनरं दहेच्चैव विना दर्भं कथञ्चन। अस्थ्यलाभे तु दर्भेऽपि ततः पर्णनरं दहेत्" इति दीपकलिकायां शमन्तुवचनात्। दर्भे इत्यत्राष्टम्यामिति क्वचित् पाठः। अष्टमी त्रया सन्देहे पितृकर्मणि त्रयपक्षप्राधान्येनोक्तेः। "नरं पर्णं दहेच्चैव प्राक् त्रिपक्षात् कथञ्चन। त्रिपक्षे तु नवे दद्यात् दर्भे प्राप्ते त्वनन्विकः"। इत्यशौचव्यपगमे बोध्यम्। यथाह शुद्धिरत्नाकरे यमः "अशौचमध्ये यत्नेन दाहयेदुत्तया हता। त्रयपक्षे पञ्चदश्यामष्टम्यां वा समाहितः। एकादश्यां विशेषेण ततः प्रभृति सूतकम्। त्रिरात्रं सर्ववर्णानामेष धर्मो व्यवस्थितः।" त्रयपक्षे इत्यशौचव्यपगमे बोध्यम्। वायुपुराणे "पर्णनरं दहेच्चैव प्राक् त्रिपक्षात् कथञ्चन। पितृहा मातृहाचार्यं चैव दर्भे दहेत् यदि।" विष्णुपु० "त्रिपक्षे तु गते पर्णनरं दहादनन्विकः। त्रिपक्षाभ्यन्तरे राजन्! नैव पर्णनरं दहेत्। तदूर्द्धमष्टमीं प्राप्य दर्भे वापि विचक्षणः।" दहेदिति शेषः। "अशौचाभ्यन्तरे यदि दाहं न कुर्यात् तदा मरणदिनावधि त्रिपक्षानन्तरं दाहः कार्य इत्यर्थः" इति श्रीदासककांचार्याः। "पर्णं नरं दहेच्चैव विना दर्भं कदाचन। अस्थ्यलाभे दर्भे तु ततः पर्णनरं दहेत्" इति दीपकलिकायां शमन्तुवचनादर्भे दाहः। अत्राष्टमीति क्वचित् पाठः। यमः "त्रिपक्षाभ्यन्तरे राजन्! नैव पर्णनरं दहेत्। तदूर्द्धमष्टमीं प्राप्य दर्भे वापि विचक्षणः"। अष्टमीत्यत्र त्रयाष्टमीत्यर्थः। पितृकर्मणि त्रयपक्षप्राधान्येनोक्तेः इति श्रीदासककांचार्यैर्लिखनात्। एतच्चाशौचव्यतिरिक्तविषयम्। अत्र नक्षत्रादिकालभेदः स्मृ० चि० पौ० उक्तो यथा

"शुक्रारार्किषु दर्शभूतमदने मन्दा शुतीज्योऽभे पौष्णे वारुणभे त्रिपुष्करदिने न्यूनाधिमासेऽयने। याम्येऽब्दात् परतश्च यातपरिजे देवेज्यशुक्रास्तगे भद्रावैधृतयोः त्रयप्रतिकृतेर्दोषो न पक्षे सिते। जन्मप्रत्यरितारयोर्मृतिसुखान्त्येऽब्जे च वर्द्धने वनु वध्यो मैत्रभगादितिध्रुवविशाखाद्वयर्क्षभे क्षेऽपि च। क्षेणो-

ऽकैश्वविधोर्दिने श्रुतिकरखात्रिपुष्के तथा त्वाशौचात्परतो विचार्यमखिलं मध्ये यथासम्भवम्" इन्दि० ।

"एवंविधे दिने यस्य मृतस्य प्रतिकृतिः शरपत्रादिना सावयवत्वकल्पनं तस्य दाहो न कार्यः कुतः यतो द्विविधः प्रेतसंस्कारः प्रत्यक्षशरीरसैकः प्रतिकृतेरन्यः तत्र प्रत्यक्षशरीरसंस्कृतौ शुभाशुभदिनविचाराभावः यदाह गार्ग्यः "प्रत्यक्षशवसंस्कारे दिनं नैव विशोधयेदिति" प्रतिकृतिसंस्कारस्तु हि कालत्रयम् अशौचमध्ये वर्षमध्ये वर्षानन्तरं चेति अत्राशौचमध्ये यदि प्रतिकृतिसंस्कारविकीर्तितस्तदा यथासम्भवं दिनशुद्धिर्विचार्या वर्षमध्ये वर्षानन्तरं वा प्रतिकृतिसंस्कारे अवश्यं कालशुद्धिर्विचार्या एतदभिप्रेत्य गार्ग्य एव "आशौचमध्ये क्रियते पुनःसंस्कारकर्म चेत् । शोधनीयं दिनं तत्र यथासम्भवमेवमेव तु । आशौचविनिवृत्तौ चेत् पुनः संस्क्रियते मृतः । संशोध्यैव दिनं पश्चाद्वर्षं संवत्सरादृते" । प्रेतकार्याणि कुर्वीतेति शेषः अतएवोक्तम् "आशौचात्परतो विचार्यमखिलं मध्ये यथासम्भवमिति" । एतदाक्यमत्रैव सूत्रे व्याख्यास्यते तत्र दिनशुद्धिरुच्यते शुक्रारेत्यादिना शुक्रः प्रसिद्धः आरो मङ्गलः आर्किः शनिः एषां वारे प्रतिकृतेर्दाहो नेति प्रत्येकं सम्बन्धः । तथा दर्शोऽमावस्या भूतचतुर्दशी मदनक्षयोदशी नन्दाः प्रतिपत्षष्ठ्येकादश्यः आसु तिथिषु दाहो न कार्यः यदाह भरीचिः "नन्दायां भार्गवदिने चतुर्दश्यां त्रिपुष्करे । पितृश्राद्धं न कुर्वीत दहो पुत्रधनक्षयात् । एकादश्यां तु नन्दायां सिनीवाल्यां रुगोर्दिने । नभस्ये च चतुर्दश्यां ऋक्षेषु त्रिपुष्करे" । द्वितीयवाक्यमतिदुष्टाक्षयनाशं सिनीवाल्यामित्यमावास्यायां रुगोर्दिने शुक्रवारे इति सम्बन्धो व्याख्येयः अत्र श्राद्धं न कुर्वीतेत्यनुषङ्गः श्राद्धशब्देनात्र प्रेतक्रिया विवक्षिता । तथा तीक्ष्णोग्रमृदुक्षिप्रचरक्षाणीक्षाणि उग्राणि पूर्वात्रयभरणीमघाः तीक्ष्णे रेवत्यां वारुणे शततारे त्रिपुष्करदिने भद्रातिथयः सूर्यभौमशनिवाराः ऋक्षेषु पुनर्वसूत्तराफाल्गुनी विशाखोत्तराषाढापूर्वाभाद्रपदाः एतच्चितयसंकृतिरूपे दिने प्रतिकृतेर्दाहो न कार्य इति केचिद्व्याकुर्वते तत्र पूर्वपक्षेणैव निषेधसत्त्वात् नतु प्रत्यक्षमृतौ च निषेधो नतु प्रतिकृतिदाहे एवं तर्हि सम्मतिवाक्याभावाच्चायमर्थ इति ब्रूमः । यदुक्तं ज्योतिःपराशरेण "साधारणध्रुवोग्रे भैत्रे नो शस्यते मनुष्याणाम् । प्रेतक्रिया कथञ्चित् त्रिपुष्करे यमलधिष्ण्येषु" अत्र त्रिपुष्करशब्देन विशिष्टयोगो विवक्षित इति चेत् अत्र ब्रूमः त्रिचरत्वनक्षत्राण्येव त्रिपुष्करपदेनोच्यन्तेऽतो हस्तादिष्वपि कृत्तिकादीन्येव त्रिचरत्वानि भानि त्रिपुष्करशब्देन व्याख्यातानि अतएवाङ्गिरसः "भरण्यार्द्रा मघा श्लेषा मूलं त्रिचरत्वानि च । प्रेतक्रियासु दुष्टानि धनिष्ठादीं च पञ्चकम्" इति पराशरवाक्ये बहुनि प्रेतकृत्ये सामान्यतो निषिद्धानि कश्यपवाक्येऽन्यान्यतिदुष्टान्युक्तानि इदमेवाभिप्रेत्य यत्नतोक्तानि तत्र धनिष्ठाया अपकर्षं मध्यमेषु वक्ष्यमाणत्वात् । अथ न्यूनाधिमासे क्षयमासे अधिमासे च शवप्रतिकृतिदाहो न कार्यः । उक्तञ्च ज्योतिर्निबन्धे गरुडपुराणे "न कुर्यात् गुरुशुक्रास्ते पौषे क्षामे मलिम्लुचे। विलम्बितं प्रेतकार्यं गयां गोदावरीं विनेति" मेधातिथिः "उक्तं गते गुरौ शुक्रे पौषाषाढाधिमासके । प्रेतकार्यं न कुर्वीत गयां गोदावरीं विनेति" अधिमासस्योपलक्षणत्वात् क्षयमासेऽपि न कार्यं प्रेतकार्यमित्यर्थः । अतएव सूत्रे न्यूनमासनिषेधः । अथाद्येकाहर्धात्परतः ऊर्ध्वं याम्येऽयने दक्षिणायने कर्कादिषड्राशिस्थिते सूर्ये न दाहः कार्यः अर्धोत्तरायणं सम्यक्, उपलक्षणत्वादयनदिनमपि निषिद्धम् उक्तञ्च गार्ग्येण च "ऊर्ध्वं संवत्सरादृते" प्रेतकार्याणि कुर्वीत श्रेष्ठं तत्रोत्तरायणम् । क्षयपक्षञ्च तत्रापि वर्जयेत् दिनक्षयम्" । इति गारुडपुराणेऽपि "न कुर्यादृगुरुशुक्रास्ते पौषे क्षामे मलिम्लुचे । विलम्बितं प्रेतकार्यं गयां गोदावरीं विनेति" । अत्र वाक्ये पौषक्षामयोर्निषिद्धत्वान्माघमासौर्ध्वं मध्यमं प्रतीयते तदाश्रयविषयं प्रथमवर्षे तु दक्षिणायनमपि शुभमेव । पातपरिघे व्यतिपाताख्ये योगे गण्डितागते व्यतीपाताख्ये महापाते इत्यपि केचित् परिघाख्ये योगे तथा देवेज्यशुक्रास्ते गुरुशुक्रयोरस्ते अत्र स्वार्थे कः । तथा भद्रावैधृतयोः भद्रावैधृतौ प्रसिद्धौ गण्डितसाध्ये वैधृताख्ये महापाते इत्यपि केचित् । तथा सिते पक्षे शुक्लपक्षे अयप्रतिकृतेर्दाहो न कार्यः । यदुक्तं नारदेन श्राद्धकल्पाध्याये "चतुर्दशीं तिथिं नन्दां शुक्रारार्किवासरम् । सितेज्ययोरस्तमयं ऋक्षर्क्षं विषमाश्रिमम् । शुक्लपक्षं च सन्त्यज्य प्रेतदेहनसच्यते" इति अन्यत्रापि "नन्दा मदनभूतायां पातवैधृतविष्टिषु । शुक्रार्किभौमपरिघव्यतिपातेषु यत्नतः । कर्तव्यन्त्वेष्टवेदान्ते अन्यमन्त्रविवर्जने ।

त्रिपादभे स्थिते पक्षेऽयने वाप्येवमुदितः परम् । अथप्रतिकृतेर्दाहः शुक्लेऽह्नोऽधिकमासके । नेष्टो मध्यो द्विपान्मैत्रहीशादितिभगध्रुवे" इति तथा कर्तुः प्रेतश्राद्धाद्यधिकारिणो जन्मप्रत्यरितारयोः जन्मतारा जन्मनक्षत्रं दशमनैधनविंशं चेति प्रत्यरितारा जन्मात् पञ्चमं चतुर्दशं त्रयोविंशं चेति । कथा कर्तुर्मृतिश्चान्योऽब्दे स्वजन्मराशेरष्टमचतुर्थदशमे चन्द्रे सति दाहो न स्यात् न प्रशस्तः" ।

वराहपुराणे "चतुर्थाष्टमगे चन्द्रे द्वादशे च विवर्जयेत् । प्रेतकर्म व्यतीपाते वैधृतौ परिघे तथा । करणे विष्टिसंज्ञे च शनैश्चरदिने तथा" । विष्टिसंज्ञं करणं भद्रा । महाभारते "नक्षत्रेण न कुर्वीत यस्मिन् जातो भवेन्नरः । न प्रोष्ठपदयोः कार्यं तथाग्नेयेऽपि भारत !। दारुणेषु च सर्वेषु प्रस्तरे च विवर्जयेत्" इति प्रोष्ठपदयोः पूर्वभाद्रपदोत्तराभाद्रपदयोः आग्नेये कृत्तिकायाम् । कालविशेषादिकं नारदेनोक्तम् "दिनोत्तरार्द्धे तत्कर्तुश्चन्द्रतारावलान्विते । पापयुक्ते वर्जयेत् शुक्लभस्थांशवर्जनम् । तत्पुनर्दहनं प्रोक्तमिति "अथ अथप्रतिकृतिदाहे मध्यनक्षत्रागणुच्चन्द्रे मैत्रमनुराधा मृगः पूर्वाफाल्गुनी च्यादितिध्रुवविशाखाः प्रसिद्धाः द्व्यङ्घ्रिभं स्वगचित्रा धनिष्ठा । क्षेऽपि बुधवारेऽपि अथप्रतिकृतिदाहो मध्यमः न शुभफलदो नाप्यनिष्टफलद इत्यर्थः उक्तञ्च कश्यपेन "फल्गुनीहितयं रोहिणमनुराधा पुनर्वसुः । ह्वे आषाढे विशाखा च भानि द्विचरणानि च । एतानि किञ्चिदुदुष्टानि वर्जयेत् सति सम्भवे" इति । "नेष्टो मध्यो द्विपान्मैत्रहीशादितिभगध्रुवः" इति चेत्पूर्वार्धे सम्यक्त्वभावः । अथार्केज्यविधोरर्केज्याभ्यां संहितो विधुरिति मध्यमपदलोपी समासः । सूर्यगुरुचन्द्राणां दिने वारे दाहः श्रेष्ठस्तथा तैन करणेन स्थिरकरणात्मकशिपक्षे ध्रुवे स्थिरनक्षत्रगणाद्रुद्रभूतेषु एषु त्रिधिष्ण्य

वा रज्जुः। १खट्वायाम् (पावड़ु) अमरः। २वीरासनाङ्गे ऊरुस्थापितकरतले यथाह योगसारे वसिष्ठः "एकं पादमधैकस्मिन् विन्यसोरौ तु संस्थितम्। इतरस्मिन् तथैवोरुं वीरासनमिदं स्मृतम्। उत्तानिते करतले करस्योत्तानितं परम्। आधायाङ्गुलं ज्ञात्वा ध्यावेदात्मस्य सोऽन्तरम्"। ३अश्वसिक्थकायाम् हेमच०। ४योगपट्टे च।

पर्य्यङ्कपादिका स्त्री पर्य्यङ्कस्येव पादोऽस्याः ठन् वङ्क० कप् वा कापि अतइत्त्वम्। कोचशिम्बयाम् राजनि०।

पर्य्यङ्कबन्ध पु०पर्य्यङ्कस्य योगपट्टस्य बन्धः बन्ध-घञ्। योगपट्टवस्त्रादिना पृष्ठजानुजङ्घाबन्धने "पर्य्यङ्कबन्धं निबिडं बिभेदेति" कुमारः। ल्युट्। पर्य्यङ्कबन्धन अत्रैव न०।

पर्य्यग्निकृत त्रि०अग्नेः परितः कृतः। "समन्तादग्निवेष्टनेन कृतसंस्कारे "तान् पर्य्यग्निकृतानुत्सृजति"तः खञ्०आ०।

पर्य्यङ्क पु० अश्वमेधीये प्रथमयूपे बध्यनीयेषु पञ्चदशसंख्याकेषु पशुभेदेषु ते च यजु० २४।१ मन्त्रे उक्ताः। "ते वात ते पञ्चदश पर्य्यङ्काः पशवो भवन्ति" शत०ब्रा० १३।२।२।१। "पर्य्यङ्कानन्धे" कात्या०श्रौ० २०।६।४। "कृष्णग्रीवादयः वामनाना: पञ्चदश पर्य्यङ्कमंज्ञा इत्यर्थः" कर्कः।

पर्य्यटन न० परितोऽटनम्। पुनःपुनर्भ्रमणे हेमच०।

पर्य्यनुयोग पु० परितोऽनुयोगः प्रश्नः। दूषणार्थं जिज्ञासायाम् कात्या०। "एतेनाक्षापि पर्य्यनुयोगस्थानवकाशः" इति दायभागः।

पर्य्यनुयोज्य त्रि० परि+अनु-युज-कर्मणि ण्यत्। नियहेऽपच्या चोदनीये (नियहस्थानं प्राप्नोऽसि) इत्येवमनुयोज्ये न्यायभाष्यम्।

पर्य्यनुयोज्योपेक्षण न० गौतमोक्ते नियहस्थानभेदे नियहस्थानप्राप्तस्योपेक्षणे। "अनियहः पर्य्यनुयोज्योपेक्षणम्" गौ०सू०। पर्य्यनुयोज्योपेक्षणं लक्षयति। नियहस्थानं प्राप्तवतोऽनियहः नियहस्थानानुद्भावनमित्यर्थः यत्र त्वनेकनियहस्थानप्राप्ते एकतरोद्भावनं तत्र न पर्य्यनुयोज्योपेक्षणम् अपसरे नियहस्थानोद्भावनत्वावच्छिन्नाभावस्यैव तत्त्वात् अनु वादिना कथमिदमुद्भाव्यं सभ्यैरेवोद्भाव्यं वादे च स्वयमुद्भावनेऽप्यदोषः" इतिः।

पर्य्यन्त पु० परिगतोऽन्तम् प्रा०स०। प्रेक्षणीकाग्रे।

पर्य्यन्तभू स्त्री पर्य्यन्तस्य प्रेक्षणीकायाः भूः। ग्रामादेः प्रेक्षणीकास्थाने परिसरे अमरः।

पर्य्यन्तिका स्त्री परितोऽन्तिका। शुश्रूषायां हारा०।

पर्य्यन्य पु० पर्जन्यः+पृषो०। पर्जन्यशब्दार्थे उणा०।

पर्य्यय पु०परित्यज्य शास्त्रलौकिकमर्य्यादाम् अयः इण-भावे अच्। शास्त्रलोकव्यवहारातिक्रान्ते आचारे अमरः।

पर्य्यवसान न० परि+अव+सो-भावे ल्युट्। १तत्तद्वर्णोच्चारणे २शेषावधौ च।

पर्य्यवसित त्रि० परि+अव+सो-कर्मणि क्त। १पूर्वापरालोचनेन अवधारितेऽर्थे २निष्कृष्टार्थे च।

पर्य्यवस्था स्त्री परि+अव+स्था-अङ्। १विरोधे २प्रतिपक्षवादे च। ल्युट्। पर्य्यवस्थान तत्रैव न०। इन् पर्य्यवस्थातृ तत्कर्त्तरि त्रि०। "परितः विश्वं व्याप्य स्थितः। पर्य्यवस्थित विष्णौ पु०"जीवनः पर्य्यवस्थितः" विष्णुस०।

पर्य्यसन न० परि+अस-क्षेपे-भावे ल्युट्। १अपसारणे २दूरीकरणे परितः ३क्षेपणे च। [२पतिते च मेदि०।

पर्य्यस्त त्रि० परि+अस-क्षेपे कर्मणि क्त। १परितः क्षिप्ते

पर्य्यस्ति स्त्री पर्य्यस्यते शरीरं यत्र परि+अस-क्षेपे आधारे भावे वा क्तिन्। १पल्यङ्के (पावड़ु) त्रिका० तत्रार्थे २दूरीकरणे च स्वार्थे क। पर्य्यस्तिका हेमच०।

पर्य्याचान्त न० परित आचान्तम्। एकपङ्क्तिस्थान् भुञ्जानानन्यानवगम्य यत्रान्येनाद्ये भुञ्जमाने अन्येनाचमनं कृतं तादृशे अद्ये तच्चाचमनमद्यम् "उद्यार्द्धं क्षुतिकाश्रद्धं पर्य्याचान्तमनिर्दशम्" मनुव्याख्यायां कुल्लूकभट्टः। "उदक्यास्पृष्टसंसृष्टं पर्य्याचान्तञ्च वर्जयेत्" याज्ञ०। सङ्क्षिप्तपुस्तके पर्य्यायाचमितिं पाठः प्रामादिकः मनुनैकवाक्यत्वात् तथा पाठस्य युक्तत्वात्।

पर्य्याचित त्रि० परि+आ+चि-क्त। आचिते आचिताक्षान्तोदात्तता।

पर्य्याण न० परि+या-ल्युट् पृषो०। १अश्वसज्जायां २पल्ययने (जिन) इण-ल्युट्। पर्य्ययणमप्यत्र।

पर्य्याणहन न० सोमोऽनसि स्थितः समन्ताद्यानक्षतेऽनेन परि+आ+नह-करणे ल्युट्। सोमशकटोपरिगत षट्कटीरूपे तद्बन्धनोपाये पदार्थे कात्या०श्रौ०७।७।१०

पर्य्याप्त न० परि+आप-भावे-क्त। १यथेष्टे २लब्धौ ३सामर्थ्ये ४निवारणे ५योग्यत्वे च। कर्त्तरि क्त। ६समर्थे ७प्राप्ते च त्रि० मेदि०। ८पर्य्याप्तिसम्बन्धयुक्ते त्रि०।

पर्य्याप्ति स्त्री परि+आप-भावे क्तिन्। १सम्यक् प्राप्तौ न्यायमतसिद्धे २सम्बन्धभेदे तथाहि "द्वित्वादिकं पर्य्याप्तिसम्बन्धेन द्वित्वादिष्वेव वर्त्तते न प्रत्येकम्।

समवायेन तु प्रत्येकवृत्तिः। "प्रत्येकाश्रयैः सकृदायाद्वृत्तित्वनियमस्तु समवायादिनैव न पर्य्याप्तिसम्बन्धेनेति भेदः। स च सर्वेषामेव पदार्थानां विशिष्टबुद्धिनियामकः। पदार्थभेदेन नाना यथा "पर्य्याप्तिसम्बन्धेनैको घट इमौ द्वौ इत्यादि प्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेषः" इति दीधितिः। समवायेन गुणे गुणत्वाश्रयत्वेऽपि चत्वारो गुणा इत्यादिप्रतीत्या गुणादिषु संख्यादिसत्त्वनियामकोऽपि तादृशः सम्बन्धः" इति सामान्यभावे जगदीशः द्वितीयवृत्तिपक्षवादे गदाधरभट्टाचार्यश्च। पर्य्याप्तिर्द्विविधा अर्धपर्य्याप्तिः पूर्णपर्य्याप्तिश्च। तत्र प्रथमा यत्राधिकस्य निरासार्था या पर्य्याप्तिर्निवेश्यते सार्धपर्य्याप्तिः यथा पर्वतो वह्निमान् धूमादित्यादौ साध्यतावच्छेदकवह्नित्वनिष्ठा पर्य्याप्तिः। द्वितीया। यत्र न्यूनवारणाय या पर्य्याप्तिर्निवेश्यते सा पूर्णपर्य्याप्तिः। यथा पर्वतो न महानदीयवह्निमान्नित्यादौ साध्यतावच्छेदकीभूतमहानदीयत्वविशिष्टवह्नित्वनिष्ठा पर्य्याप्तिः"।

पर्य्याप्तावृ पु॰परि+आ–प्तृ घञ्। १अभिप्रवयत्वे धैं तैत्ति॰ स॰ ७।५।७।२। २परित आप्तावे (क्षयेऽपि)।

पर्य्याय पु॰ परि+इण–घञ्। १अनुक्रमे २प्रकारे ३अवसरे ४निर्माणे ५द्रव्यधर्मभेदे ६समानार्थबोधके शब्दे च हेमच॰। [क्रमेण शयने अमरः।

पर्य्यायशयन न॰ पर्य्यायेण क्रमेण शयनम्। याज्ञिकभटानां

पर्य्यायोक्त न॰ अर्थालङ्कारभेदे अलङ्कारशब्दे दृश्यम्।

पर्य्यारिणी स्त्री परि+ऋ–णिनि ङीप्। १परित आर्त्तिमत्यां व्याधिपत्नायां गवि "तस्य दक्षिणा क्षणा गौः परिमूर्णी पर्य्यारिणी" शत॰ब्रा॰५।२।१।१३। २परित आर्त्तियुक्ते त्रि॰।

पर्य्यालि अव्य॰ परि+आ–अल ई अर्य्यादि॰। हिंसायाम् मणिरत्नटी॰ पर्य्यालीकृत्य हिंसित्वेत्यर्थः।

पर्य्यालोचन न॰परि+आ+लोच–भावे ल्युट्। सम्यग्विवेचने

पर्य्यावर्त्तन न॰ परि+आ–वृत–ल्युट्। सूर्य्यस्य पश्चिमवृत्तिस्थायायाः पूर्वदिग्वर्त्तित्वेन परिवर्त्तो "सन्धिवेलं सङ्घवादूर्द्धं प्राक् पर्य्यावर्त्तनाद्वेः" कर्मप्रदीपः।

पर्य्यास पु॰ परि+अस–घञ्। १परिवर्त्ते "पर्य्यासं च परिमाणञ्च गतिं चन्द्रार्कयोरपि" मार्कण्डेयपु॰। २पतने ३क्षेपणे च। वह्निप्रभृतिगतानां त्रयाणां हव्यानां मध्ये ४अग्नौ हव्ये। "लोलोयातुरुपौ हव्यौ भवतो हुतभुजस्तनूनपात्" भवन्ति उत्तमः पर्य्यासः" सा॰ सं॰ भा॰ धृता स्मृतिः।

पर्युक्षण न॰परित उक्षणम्। अन्नादेः मन्त्रवर्जं तूष्णीं जलादेः परितः सेचने। "उदकसंस्पर्शनपूर्वं पर्युक्षणम्" आश्व॰श्रौ॰ १।३।१ "तूष्णीं पञ्चसु मन्त्रवर्जमन्ये समाः अग्निहोत्रहवणी भवन्तीत्येवमर्थम्। त्रिस्त्रिरेकैकं पुनःपुनरुदकमादायादावन्ते च कर्मणां पर्युक्षणम्" नारा॰ एतच्च कर्म्मवेदविषयम् सामगानां तु तत्र गोभिलेनमन्त्रभेदा उक्ता यथा "अग्निमुपसमाधाय परिसमूह्य दक्षिणतोऽग्नौ दक्षिणेनाग्निम् "अदितेऽनुमन्यस्वेति" पश्चात्। "सरस्वत्यनुमन्यस्वेति" उत्तरतः, "देवसवितः प्रसुवेति" प्रदक्षिणमग्निं पर्युक्षेत् सङ्कल्पितां"।

पर्युदञ्चन न॰ पर्युदञ्च्यते उद्धियते परि+उद्–अञ्च कर्मणि ल्युट्। १क्षणे अमरः भावे ल्युट्। २उद्धारे च।

पर्युदय अव्य॰ उदयस्य समीपम् समीपे अव्ययी॰। उदयसमीपे सूर्य्योदयसमीपे काला॰औ॰ ४।७।२५

पर्युदस्त त्रि॰ परि+उद्+अस–क्त। १निवारिते २फलप्रत्यवायशून्यतया बोधिते नञा भेदप्रतियोगिनि "यथा रात्रौ श्राद्धं न कुर्वीत" इति अत्र हि रात्रौ श्राद्धे न फलं न वा प्रत्यवायः इति रात्रिः पर्युदस्ता तद्विधामावस्था नञा बोध्यते। ३परित उत्क्षिप्ते च।

पर्युदास पु॰ परि+उद्+अस–घञ्। १निवारणे फलप्रत्यवायशून्यतया "प्राधान्यं हि विधेर्यत्र प्रतिषेधेऽप्रधानता। पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्" इत्युक्तलक्षणे भेदरूपे नञर्थे। नञ्शब्दे मतभेदेन विस्तरो दृश्यः।

पर्युपवेशन न॰ परित्यक्तं कर्मान्तरसपवेशनम्। सोमाभिषवादिकर्मपरिहारेण उपवेशनमात्रे काला॰औ॰ ६।४।१ व्याख्यायां दृश्यम्।

पर्युप्ति स्त्री परि+वप–भावे क्तिन्। परितो वपने मेदि॰

पर्युषित त्रि॰ परिवृत्त स्वकालमतिक्रम्य उषितम् वस–क्त। (बासि) कालातिक्रान्ते गतरात्रिकालके द्रव्ये। देवेभ्यः पर्युषितपुष्पदानं निषिद्धं यथा

नारसिंहे "अपर्युषितनिर्म्मिद्यैः प्रोक्षितैर्जन्तुवर्जितैः। क्षीराक्षोद्भवैरपि पुष्पैः संपूजयेद्धरिम्" योगिनीतन्त्रे तत्प्रश्नवः "विल्वपत्रञ्च माध्यञ्च तमालामलकीदलम्। अङ्कारतुलसी चैव पद्मञ्च सनिषुष्पकम्। एतत् पर्युषितं न स्यात् यच्चान्यत् कल्पिकाक्षकम्"। पर्युषिताद्या-

दिभक्षणनिषेधो यथा "शुक्तं पर्युषितोच्छिष्टं श्वस्पृष्टं पतितेक्षितम्। उदक्याशुद्धसंसृष्टं पर्य्याचान्तञ्च वर्जयेत्" मरुडपु० "यातयामं गतरसं पूति पर्युषितञ्च यत्। उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्" गीता। "शुक्तं पर्युषितञ्चैव शूद्रोच्छिष्टञ्चैव च" मनुः। अत्र प्रतिप्रवः पर्युषितं रात्र्यान्तरितं तत्तु क्षीरान्नं भक्ष्यमाह मनुः "यत्किञ्चित् क्षीरसंयुक्तं भक्ष्यभोज्यमगर्हितम्। तत् पर्युषितमप्याद्यं हविःशेषञ्च यद्भवेत्" विशेषमाह स एव "चिरसंस्थितमप्याद्यं शुक्तं क्षीरान्नमपि द्विजैः" आह्नत० "मन्त्राभिमन्त्रितं शस्तं न च पर्युषितं क्वचित्"। अन्यत्र फलशाकेभ्यः शुष्कशाकान्विकात्ततः। तद्वदरिकाभ्यश्च गुडपक्वेभ्य एव" याज्ञि० "यत्ते पर्युषितञ्च यत्" ऋत्युक्तनिषेधविषये प्रतिप्रवः उपरागशब्दे दृश्यः।

पर्य्यूहण न० परि+ऊह-भावे ल्युट्। परिवर्हणे अग्नेः समन्तान्मार्जने कात्या० श्रौ० ८।५ २५

पर्य्येषणा स्त्री परितस्तर्कादिना यत्नेन परीक्षा। १तर्कादिना पदार्थपरीक्षायाम् २अन्वेषणायाञ्च अमरः। परि+एषि-भावे ल्युट्। पर्य्येषण० तत्रार्थे। क्तिन्। पर्य्येष्टि स्त्री तत्रार्थे।

पर्य्येहि त्रि० परि+या+ईह-इन्। समन्ताच्चेष्टाकारके स्त्रियां शाङ्करवा० ङीन्। ऋदिकारान्तत्वेन ङीपः प्राप्तावपि नित्स्वरार्थं ङीनोविधानम्।

पर्व पूर्त्तौ भ्वा०पर०सक०सेट्। पर्वति अपर्वीत्। पपर्व।

पर्वक न०पर्वणा कायति कै-क। ऊरुसन्धौ (ऊँहु)शब्दच०

पर्वका(र)रिन् त्रि०अपर्व पर्व तत्तुल्यक्रियं करोति ञ--अण् णिनि वा। धनलोभादिना अपर्वदिने पर्वौक्तकर्मकारिणि

पर्वगामिन् पु० पर्वसु गच्छति स्त्रियं गम+णिनि। पर्वकाले स्त्रीगमनकारिणि पर्वशब्दे तत्र स्त्रीगमननिषेधो दृश्यः

पर्वण पु० १राक्षसभेदे भा०व० २१३अ०। पर्व पूर्त्तौ करणे ल्युट्। २पूर्त्तिकरणे स्त्रियां ङीप् सा च ३पौर्णमास्याम्। "चन्द्रस्येवोदये प्राप्ते पर्वण्यां सरितां पतिः" हरिव० १५२ अ०। पर्वणि सन्धौ जाता अण् संज्ञापूर्वकत्वात् न वृद्धिः ङीप्। सुश्रुतोक्ते ४सन्धिगतरोगभेदे स्त्री "ताम्रा तन्वी दाहशूलोपपन्ना रक्ताज्ञेया पर्वणी वृत्तशोफा"। (सुश्रुतः।

पर्व(णी)णिका स्त्री पर्वणी+स्वार्थे क। पर्वगतरोगभेदे

पर्वत पु० पर्व-अतच्, पर्वाणि भागाः सन्त्यस्य तथा। १गिरौ अमरः दानार्थं कल्पिते पर्वताकारे २धान्यादिशब्दभेदे ३खनिभेदे "कश्यपात् नारदश्चैव पर्वतोऽरुन्धती तथा" तस्य नारदोद्भवत्वमुक्तम्। भा०शा० ३०अ० तु तस्य नारदभागिनेयत्वमुक्तम् तच्च कपिञ्जलशब्दे १६७६ पृ० दर्शितम्। कल्पभेदादविरोधः। ४मत्स्यभेदे (पावदा) ५वृक्षे ६शाकभेदे च मेदिनिः। ७गन्धर्वभेदे भा०आ० १८७अ०। धर्मस्य पुत्रे साध्यायां जाते ८देवभेदे मत्स्यपु० २०३अ०।

सुमेरोः पूर्वे पर्वता यथा "मीनाङ्कचन्द्रसङ्काश कुमुदोऽथ कुमुदवान्। सखिशैलोऽथ वृषवान् महानीलो भवाचलः। सुविन्दुः मन्दरो वेणुः सुमेरो निर्मिमस्तथा। देवशैलस्य पूर्वेण मन्दरश्च महाचलाः सुमेरोः दक्षिणे पर्वता यथा "त्रिकूटः शिखराद्रिश्च कलिङ्गोऽथ सतर्ककः। रुचकः सानुमांश्चैव ताम्रको ऽथ विशाखवान्। श्वेतोदरः शमलयो वसुधारश्च रत्नवान्। एकशृङ्गो महाशैलो मलयैलः शिशाधकः। पञ्चशैलोऽथ कैलासो हिमवांश्चाचलोत्तमः। इत्येते दक्षिणे पार्श्वे मेरोः प्रोक्ता महाचलाः"। सुमेरोः पश्चिमे पर्वता यथा "सुचक्षुः शिशिरश्चैव वैदूर्यः पिङ्गलस्तथा। पिङ्गरोऽथ तथा भद्रः सरसः कपिलो मधुः। अञ्जनः कुक्कुटः कृष्णः प्राक्षुरश्चाचलोत्तमः। शङ्खशिखरश्चाद्रिः पारिपात्रः सप्तकृवान्। पश्चिमेन तथा मेरोर्विष्कम्भात् प्रभृताद्रयः। एतेऽचलाः समाख्याताः कृष्णवातस्योत्तरान्"। सुमेरोरुत्तरे पर्वता यथा "शङ्खकूटोऽथ ऋषभो हंसनाभौ तथाचलौ। कपिलेन्द्रस्तथा शैलः सानुमाञ्शील एव च। शतशृङ्गः स्वर्णशृङ्गः पद्मको मेघपर्वतः। विराजाख्यो वराहाद्रिर्मयूरो रुचिरस्तथा। इत्येते कथिता ब्रह्मन्मेरोरुत्तरतो नगाः" मार्कण्डेय पु०।

श्वेतपर्वता विंशतिर्यथा "हिमवान् हेमकूटश्च निषधो नीलपर्वतः। श्वेतश्च शृङ्गवान् मेरुर्मौल्यवान् गन्धमादनः। महेन्द्रो मलयः सह्यः शुक्तिमानृक्षमानपि। विन्ध्यश्च पारियात्रश्च कैलासो मन्दरस्तथा। लोकालोको महांस्तेषु तथैवोत्तरमानसः। एते विंशतिर्विख्याताः पर्वताश्चक्षुषांवराः"। शिरीषां सपक्षत्व तच्छेदनकथा यथा "ततोऽद्रयो जातपक्षा विष्णोश्चैव तु मायया। प्रस्थिता मेदिनीं लङ्घ्य यथापूर्वं निवेशिताः। तत्स्थानमसुराद्यान्तु धात्रादिष्टं जघा-

र्णाने। प्रतीच्यां पर्वताः सर्वे निमग्नज्वलया गताः। तत्रासुरेभ्यः शंसन्तो आधिपत्यं सुराश्रयम्। तच्छ्रुत्वैव सुराः सर्वे चक्रुरुद्योगमुत्तमम्" इत्युपक्रमे तेषां युद्धवृत्तान्ता युद्धजयानन्तरं तेषां पलायने दक्षस्य यथा "धरणीन्तु गिरीन् स्वाश्च खेषु स्थानेषु गोपतिः। चिच्छेद पक्षिणा यत्नान् सर्वेषां भुविचारिणाम्। एकः सपक्षो मैनाकः सुरैरात्तसमये ततः" अग्निपु०। पर्वतानां स्थावरजङ्गमरूपे द्वे रूपे यथा "नद्यश्च पर्वताः सर्वे द्विरूपाश्च स्वभावतः। तोयं नदीनां रूपन्तु शरीरमपरन्तथा। स्थावरं पर्वतानान्तु रूपं कायसमाश्रयः। एकीनामथ कन्यूनां तथैवान्तर्गता तनुः। बहिरस्थिस्वरूपन्तु सर्वदैव प्रवर्त्तते। एवं ज्ञेयं स्थावरञ्च नदीपर्वतयोर्यथा। अन्तर्वसति कायस्तु सततं नोपलभ्यते। आप्यायते स्थावरेण शरीरं पर्वतस्य तु। तथा नदीनां कायस्तु तोयेनाप्यायते सदा। नदीनां कामरूपित्वं पर्वतानां तथैव च। जगत्स्थित्यै पुरा विष्णुः कल्पयामास यत्नतः। तोयक्षानौ नदीदुःखं जायते सततं द्विजाः!। विशीर्णे स्थावरे दुःखं जायते गिरिकायगम्" कालिकापु० २२अ०।

पर्वतकाक पुंस्त्री० पर्वते भवः काकः। द्रोणकाके हेमच० स्त्रियां जातित्वात् ङीष्।

पर्वतज त्रि० पर्वताज्जायते जन--ड तत०। १गिरिजातमात्रे २नद्यां स्त्री हेमच०। [भेदे राजनि०।

पर्वततृण न० पर्वतभवं तृणं शा०त०। (घण्ड) गिरि तृण

पर्वतपति पु० ६त०। हिमालये पर्वतनाथादयोऽप्यत्र।

पर्वतमोचा स्त्री पर्वतोद्भवा मोचा शा०त०। गिरिकदल्यां राजनि०।

पर्वतराज् पु० पर्वतेषु राजते राज--क्विप्। हिमालये

पर्वतराज पु० ६त० टच्समा०। हिमालये "आरभ्य तस्यां दशमीञ्च यात् प्रपूजयेत् पर्वतराजपत्नीम्" ति०त०।

पर्वतवासिन् त्रि० पर्वते वसति वस--णिनि ७त०। १गिरिवासिनि स्त्रियां ङीष्। स्त्री च २आकाशमांस्यां राजनि०

पर्वतात्मजा स्त्री ६त०। हैमवत्यां दुर्गायां हरिवं०१७६अ० २मैनाके पु० पर्वतसुतादयोऽप्यत्र। [भूधरत्वेन तस्यात्मजात्वम्

पर्वताधारा स्त्री पर्वत आधारो यस्याः। पृथिव्यां नगानां

पर्वतारि पु० ६त०। इन्द्रे शब्दरत्ना०। तस्य तत्प्रच्छेत्तृत्वात् तथात्वम् पर्वतशब्दे दृश्यम्।

पर्वताश्रय पु० पर्वते आश्रयते आ+श्री-अच्। मेघे शब्दच०।

पर्वताश्रय त्रि० पर्वत आश्रयो यस्य। १पर्वतवासिनि २शरभे पुंस्त्री० राजनि० स्त्रियां जातित्वेऽपि योषित्वात् टाप्।

पर्वतासन न० रुद्रयामलोक्ते आसनभेदे यथा "अथ वक्ष्ये महादेव! पर्वतासनमुत्तमम्। यत् कृत्वा स्थिरमूर्त्तिस्याः षट्चक्रादिविशोधनम्। योन्यासनं पर्वतेन योगं योगवतावहम्। तत्कालं च फलं तावत् खेचरो यावदेव हि। पादगोष्ठेन चाक्रम्य लिङ्गपार्श्वौ नियोजयेत्। अन्यत् पदमूरौ दत्त्वा तत्र योन्यासनं भुवि। एतन्मध्ये महेशान! पर्वतासनमुच्यते"।

पर्वतीय पु० पर्वते भवः छ। (पाड़ाड़ोया) १जातिभेदे

पर्वतेष्ठा त्रि० पर्वते स्था--क्विप् षत्वम् धातुलुक्समा०। १पर्वतस्थायिनि ऋ०६।२२।२ श्लोके तु न षत्वम्।

पर्वधि पु० पर्वणि दधाति क्रियाग्रहिं धा-कि। चन्द्रे त्रिका०

पर्वन् न० पॄ--वनिप्। १उत्सवे २ग्रन्थौ (गाँट) ३सन्धिभेदे ४प्रस्तावे ५अन्वविच्छेदस्थाने मेदि०। "चतुर्दश्यष्टमी चैव अमावस्या च पूर्णिमा। पर्वाण्येतानि राजेन्द्र! रविसंक्रान्तिरेव च" इति स्मृत्युक्तेषु पञ्चसु कालभेदेषु च "क्षौरतैलमांससंभोगी पर्वस्वेतेषु वै पुमान्। विण्मूत्रभोजनं नाम प्रयाति नरकं ततः" विष्णुपु०। तत्र कर्त्तव्यमाह "नित्यं द्वयोरयनयोर्नित्यं विषुवतोर्द्वयोः चन्द्रार्कयोर्यत्र्यशीतिगतेषु पर्वसु। अहोरात्रोषितः स्नानं श्राद्धं दानं तथा जपम्। यः करोति पवित्रात्मा तस्य स्यादक्षयं फलम्" ब्रह्मपु०। "अनध्यायस्तु नाकृष्णे नेतिहासपुराणयोः। न धर्मशास्त्रेऽन्येषु पर्वस्वेतानि वर्जयेत्" स्मृतिपु०। ७दर्शान्तपूर्णिमान्तरूपकाले "गतैश्च पर्वनाड़ीनाम्" स्मृ०सि०। "पर्वनाड्यः दर्शान्तपूर्णिमान्तनाड्यस्तासाम्" रघु०। ६ष्ठे भागे "विशेषाविशेषलिङ्गमात्रालिङ्गानि गुणपर्वाणि" पात०सू०। "अविद्या पञ्चपर्वैषा प्रादुर्भूता महात्मनः" विष्णुपु०। "त्रिंशद्भादवांशस्य चतुर्विंशतिपर्वणः" भा०व० १३२अ०। राशिचक्रे खल्ल गत्वा गच्छतोः सूर्य्यचन्द्रयोर्यदाऽन्तरं विप्रकर्षस्तदा पौर्णमासी यदाऽन्तरं सन्निकर्षस्तदा दर्शः ते हे पर्वणी एवं चतुर्विंशत्या पर्वभिरहोरात्रादधिकेन शतत्रयेण चान्द्रो वर्षः" नील०। "पर्वणोऽग्रे चतुर्थे च कर्त्तव्यो दिङ्मोक्षमेः" कालमाधवधृतस्मृतिः। राशिचक्रे अयनसंक्रान्तेर्विषुवद्वयस्य च सन्निवेशत्वात् पर्वत्वमस्य यम। चातुर्मास्ययागे वैश्वदेवरूपपशावग्नीषोमसवनीयेषु १०चतुर्षु यागेषु तेषामुत्सवरूपत्वात्तथात्वमि-

त्वम्ये कात्या० श्रौ० ५।१।१। सूत्रव्याख्याने दृश्यम्। "इयोः प्रणीयन्तीत्यधिकरणे पर्वचतुष्टयविहितायां उत्तरवेदेर्न पर्वद्वये प्रतिषेध उपपद्यते तत्र पर्वद्वये विकल्पसामेच्छं विधानं पर्वद्वये च नियमेच्छमिति" दाशभा० "पर्वचतुष्टयेति चातुर्मास्ययागप्रकरणे वैश्वदेव-वरुणप्रघासशाकमेधशुनासीरीयाख्यास्त्वारो यागाः चातुर्मास्यसाध्या उक्ताः तत्र च "उपांशु यजन्ति न वैश्वदेवे न शुनासीरीये उच्चैर्वा एतौ यज्ञस्य यद्वरुणप्रघासाः शाकमेधश्चेति इयोः प्रणयन्तीति" श्रुतिरस्ति। अस्यार्थः अत्र पर्वसंज्ञके यागचतुष्के उत्तरवेदिम् उपयमन्ति निर्वपन्ति समादयन्तीत्यर्थः इति उत्तरवेदिः अग्निप्रणयनपात्रम् श्रीकण्ठः। एतच्च श्रौतकर्मानभिज्ञानादुक्तम् "उत्तरवेदिं निवपत्युत्तरस्याम्" कात्या०श्रौ० १।३।१६ सूत्रादौ स्थण्डिलभेदस्यैव उत्तरवेदिनामता उक्ता यथा "यज्ञमाखेन प्रकारेण उत्तरस्यां वेदौ उत्तरवेदिं निर्वपति उत्तरवेदिरिति यज्ञमाखसंस्कारसंस्कृतस्य चात्वालदक्षतस्य स्थण्डिलस्य नामधेयम्" कर्कः। तदुत्तरत्र सूत्रेषु तन्निर्माणप्रकार उक्तः चात्वालशब्दे च शत०ब्रा०भाष्यवाक्यं दृश्यम्। १।चन्द्रसूर्ययोरुपरागे च पर्वग्रशब्दे दृश्यम्। १२प्रतिपत्पञ्चदश्योरन्तराले काले पर्वसन्धिशब्दे दृश्यम्। पर्वणि विहितः तत्र भवो वा अण्। पार्वण अमावास्यादिविहिते श्राद्धे पर्वभवे त्रि०

पर्वमूला स्त्री पर्वणि पर्वणि मूलं यस्याः मूलान्तत्वात् जातित्वेऽपि टाप्। श्वेतदूर्वायां राजनि०।

पर्वयोनि पु० पर्व सन्धिर्योनिरुत्पत्तिसाधनमस्य। इक्षादौ क्लीवे च। तस्य सन्धितएवोत्पत्तेस्तथात्वम्।

पर्वरीण पु० पर्वरीण+पृषो०। १पत्रडम्बरे २गर्वे ३भारुते ४पर्वशिरायां ५सूतके ६द्यूतकम्बले ७पत्रचूर्णरसे च ८पर्वणि न० शब्दरत्ना०।

पर्वरुह् पु० पर्वणि रोहति रुह-क्विप्। दाडिमे त्रिका०

पर्ववल्ली स्त्री पर्व प्रधानं यस्यां सा वल्ली। भाङ्गादूर्वायाम् (गाँटदूर्वा) राजनि०।

पर्वसन्धि पु० पर्वणोः सन्धिः। पर्वणोः पञ्चदश्योः प्रतिपदोरन्तादिदण्डचतुष्टयात्मकाले अमरः "वैद्विषो यदा राहुर्ग्रसते पर्वसन्धिषु" यमः। दण्डचतुष्टयोक्तिः प्रायिकी बो०सि० पञ्चदशकालस्य अन्यथा दर्शितत्वात्। तत्र उपरागशब्दे दृश्यम्।

पर्वावधि पु० ६त०। परपक्षौ शारा०।

पर्वास्फोट पु० ६त०। अङ्गुलिपर्वणि आस्फोटने कामन्दकी०

पर्वित पुंस्त्री० पर्व-इत। (पावदा) पर्वतमत्स्ये शब्दच०।

पर्वेश पु० ६त०। पञ्चदशकालभेदानामधिपभेदे स च ह०सं० ५अ० उक्तो यथा

"अग्न्यमासोत्तरद्वया पर्वेशाः क्रमशः। अङ्गप्रणीन्द्रकुबेरा वरुणाग्नियमाश्च विज्ञेयाः। १ब्राह्मे दिव्य पशुद्वित्रिसोमारोग्याणि अश्वसम्पच्च। तद्वत् २त्वाष्ट्रे पीडा विद्युन्नामदृष्टिश्च। ३ऐन्द्रे भयविरोधः शारदसस्यक्षयो न च क्षेमम्। ४कौबेरेऽर्घपतीनामर्थविनाशः सुभिक्षं च। ५वारुणमवनीशानुभयन्त्वां क्षेमसस्यवृद्धिकरम्। ६आग्नेयं मित्राख्यं सस्यारोग्याभयाम्बुकरम्। ७याम्यं करोलूदृष्टिं दुर्भिक्षं सङ्क्षयं च सस्यानाम्। यदतःपरं तदशुभं चुक्कारादृष्टिदं पर्व"।

पर्शन न० पार्श्वस्यानम् पृषो०। १पार्श्वस्थाने ऋ०७।४।६ भा० २पीडयमाने त्रि० ऋ०८।७।३४ भा० ३विमर्दयोग्ये ऋ०८।४५।४१ ४मेघे पु० निघण्टुः पाठान्तरम्।

पर्शु पु०"स्पृशेः शश्च पुश्च वश्च" उणा० स्पृश-शुन् धातोः पु० आदेशः। १आयुधे २परश्वधे हेमच०। ३आयुधजीविसंघभेदे ततः पर्शा० स्वार्थे अण्। पार्शव तत्रार्थे।

पर्शुका स्त्री पर्शुरिव कायति कै-क। पार्श्वास्थि अमरः।

पर्शुपाणि पु० पर्शुः पाणावस्य। १जमदग्नौ हेमच० २परशुरामे च। [शब्दच०। परशुरामशब्दे दृश्यम्।

पर्शुराम पु० पर्शुसहितो जातो रामः ब्रा०त०। जामदग्न्ये

पर्शुल त्रि०पर्शुः तदाकारमस्त्रि ततः सिध्मा०लच्। अस्त्रियुक्ते

पर्श्वध पु० परश्वध+पृषो०। परश्वधे कुठारे जटाध०

पर्श्वादि पु० "पर्श्वादियौधेयादिभ्योऽणञौ" पा० स्वार्थे अण् प्रत्ययनिमित्ते शब्दगणे स च गणः पा० ग०सू० उक्तो यथा "पर्शु अक्षर रक्षस् बाह्लीक वयस् वसु मरुत् मत्स्य दशार्ह तित्तिरि यमुनि कार्णायस"।

पर्ष सौत्रे भ्वा०आत्म०सक०सेट्। पर्षते अपर्षिष्ट पपर्ष।

पर्षद् स्त्री पृष-क्विप्। १सभायाम् २धर्मोपदेशकविद्वत्सभाजे च। ततः अस्त्यर्थे मत्वच्। पर्षदत्र सभासदे त्रि० हेमच०।

पर्षिक त्रि० पर्षः परमस्त्यस्यार्थे ठन्। परिषत्प्रयुक्ते इरोक्षिता० भावादौ यक्। पार्षिक्य तद्भावे न०

पर्षन् त्रि० पृष-क्विनिप्। परिषत्स्थे ऋ० १०।१२६।२०

पल गतौ भ्वा० पर० सक०सेट्। पलति अपालीत्पपाल पेलतुः। जित् उज्ज्वला०पक्षे णाद्यः।

पल रक्षणे चुरा॰उभ॰ सक॰सेट्। पालयति ते अपीपलत्।

पल न॰ पल–अच्। १मांसे न॰ अमरः "दशगुर्वक्षरोच्चारकालः प्राज्ञैः षड़ाक्षैः। तैः पलं क्षान्तु तत्षष्ट्या दण्ड इत्यभिधीयते" ज्योति॰ उक्ते २कालभेदे "पलं तु लौकिकैर्मानैः साष्टरक्तिहिमाधकम्। तोलकत्रितयं ज्ञेयं ज्योतिर्विद्भिः स्मृतिसम्मतम्" ति॰त॰उक्ते ३मानभेदे "पलं कर्षचतुष्टयम्" उक्ते ४कर्षचतुष्टये ५पलाले तुलाधाने पु॰ क्षेम॰ "खाडौद्रवेयौ विषुवद्दिनार्द्धे गतिः पलोऽब्ज स यैव तज्ज्ञैः" सि॰शि॰ उक्तायां विषुवद्दिनार्द्धे अब्जगतौ पु॰। [तम् बा॰ यत्। पालक्षुशाके राजनि॰।

पलक्या स्त्री पल++स्वार्थे क पलकं मांसं तत्पुष्टये हि॰

पलङ्क पु॰ बलच+पृषो॰। १श्वेतवर्षे २श्वेतवर्षयुक्ते त्रि॰ यजु॰ २४,४ वेददी॰।

पलचार पु॰ पलस्य मांसस्य चार इव सदृशकत्वात्। शोणिते त्रिका॰ तत्सदृशेन मांसोत्पत्तेरस्य तथात्वम्।

पलभञ्ज पु॰ पलं मांसमिव सदादित्वा भित्तिं भञ्जति वदनैकदेशमिव करोति भञ्ज–अदनैकदेशे खण्। शेषके (राजे) अमरः।

पलकुट त्रि॰ पलम् कटति आवरणोति भीत्वा कट–आवरणे बा॰ खच् तुम्। भीरौ त्रिका॰ भीत्वा मांसस्यावरणस्येव करणात्तस्य तथात्वम्। [धातौ त्रिका॰।

पलकूर पु॰ पलं करोति कृ–बा॰ खच् तुम्। पित्तास्ये

पलकुष्य पुंस्त्री॰ पलं कषति कष+बा॰खच् तुम्। १राक्षसे भेदि॰ स्त्रियां जातित्वात् ङीष्। २कच्छपगुग्गुलौ पु॰ राजनि॰ ३लाक्षायाम् ४राक्षायां ५तुच्छकीर्य्यां हृकिंशुके ७गुग्गुलुमात्रे ८गोकुरके च पु॰ मेदि॰। ९लघुगोकुरके १०महाश्रावण्यां ११मक्षिकायाञ्च स्त्री राजनि॰।

पलद त्रि॰ पलं मांसं ददाति दा–क। १क्षेपनेन मांसकारके द्रव्यभेदे २देशभेदे ३नगरीभेदे स्त्री। "कन्या पलदनगरग्रामहृदोत्तरपदात्" पा॰ (कन्यादिपल्लकोत्तरपदाद्देशवाचिनो ढक्प्राप्तः) भवार्थे क। दक्षिणपलदीय दक्षिणपलदभवे त्रि॰। पलद्यां भवः पलद्या॰ अण्। पालट तत्र भवे त्रि॰ स्त्रियां ङीप्।

पलद्यादि पु॰ "अस्योत्तरपदस्याद्यादिकोपधादण्" पा॰ अण्–प्रत्ययनिमित्ते अब्दगन्धे स च गन्धः पा॰ग॰ उक्तो यथा "पलदी परिषद् रोमक वाडीक कलकीट बल्लकीट आलकीट कमलकीट कमलकिंजल्क गोजी नैकती परिखा शूरसेन गोमती पटच्चर उदपान बलज्योम"।

पलप्रिय पुंस्त्री॰ पलं प्रियमस्य। १काके राजनि॰ स्त्रियां टाप्। पलप्रियादयोऽप्यत्र २मांसप्रियमात्रे त्रि॰।

पलभा स्त्री पलस्य भस्य भा। विषुवद्दिनार्द्धजायां यष्टुच्छायायाम्। "मेषादिगे सावनसूर्यभागे दिनार्द्धजा भा पलभा भवेत् सा" सिद्धान्तीयम्। अस्याश्चाविषुवद्भादयोऽप्यत्र "भुजोऽथभा कोटिरिनाङ्कुजो वा" सि॰शि॰ "अङ्गुला नाम पलभा" प्रभिता॰ "रेखा प्राक्परा साध्या विषुवच्छा यदृच्छया" सू॰सि॰ रङ्गनाथव्याख्यायां विस्तरो दृश्यः।

पलल न॰पल॰ कलच्। १मांसे २पङ्के ३तिलचूर्णे च "पललं तिलकल्कः स्यात् तिलचूर्णन्तु पिष्टकम्" राजनि॰। पलं लाति ला–क। ४राक्षसे पु॰ स्त्री मेदि॰ स्त्रियां जातित्वात् ङीष्। "पललं मधुरं रुच्यं पित्तास्रवलवर्द्धनम्" पललन्तु समाख्यातं वैद्यकं तिलपिष्टकम्" वैद्यकोक्ते (तिलकुटा) ५पिष्टकभेदे "पललं मललघु हृद्यं वातघ्नं कफपित्तलम्। हृद्यं गुरु हृद्यञ्च स्निग्धं मूत्रनिवर्त्तकम्" तत्र तद्गुणा उक्ताः।

पललज्वर पु॰ पललं ज्वरयति ज्वर–णिच् अच्। कुजः। पित्ते धातौ कृता॰। [ज्वरः।

पललाशय पु॰ पलले आशेते आ+शी-अच्। गण्डरोगे

पलव पु॰ पल+वा॰ भावे अच् पलतो गतितो वाति रक्षति वा–क। जीवतां मृतमत्स्यानां गतिरोधके (पोको) मत्स्यधारणसाधने यन्त्रभेदे त्रिका॰।

पलस्ति त्रि॰पल–वा॰ अस्ति। १पक्षिते २दीर्घायुषि ऋ॰१। ५१।६ भा॰। [सायः।

पलाग्नि पु॰ पलस्य मांसस्य पाचकोऽग्निरिव। पित्ते धातौ

पलाय न॰ पलस्यायं सारांशः। मांससारांशे हरिवं॰ ८३६२ श्लो॰।

पलाङ्क पुंस्त्री॰ पलप्रधानमङ्कं यस्य। शिशुमारे त्रिका॰

पलाण्डु पु॰ पलस्य मांसस्याण्डमिवाचरति अण्ड+आचारे क्विप् मुडागमश्च कु। मूलकभेदे (पेयाज) "पलाण्डुर्वनेष्वपि दुर्गन्धो रसोनसदृशैर्गुणैः। श्लेष्मोत्थो रसोनसदृशैर्गुणैः। स्वादुपाकरसोऽनुष्णः कफरक्तातिपित्तलः। हरते केवलं वातं बलवीर्यकरो गुरुः" भावप्र॰। तद्भक्षणे दोषः "पलाण्डुं विड्वराहञ्च क्षत्रियं ग्रामकुक्कुटम्। लशुनं गृञ्जनञ्चैव जग्ध्वा चान्द्रायणं चरेत्" प्रा॰वि॰। एतज्ज्ञानतः प्रकृत्। अत्र च पुनरुपयमनिषेधाद्विष्णुः "लशुनपलाण्डुगृञ्जनतद्गु-

त्रिविष्टपराष्ट्रयामकुक्कुटनरगोमांसमद्यैर्ये तेषु द्विजातीनां प्रायश्चित्तान्ते पुनः संस्कारं कुर्यात्" ।

पलाद पुंस्त्री पलमत्ति अद् उप०ड० । १राक्षसे हेमच० । स्त्रियां जातित्वात् ङीष् । २मांसभोजिमात्रे त्रि० ।

पलादन पुंस्त्री० पलमदनं यस्य । १राक्षसे हेमच० स्त्रियां जातित्वात् ङीष् । २मांसभोजिमात्रे त्रि० ।

पलाद्य न० पलमिश्रत्वेन पक्वमन्नं या०त० । (पोलाओ) ख्याते मांसादिमिश्रत्वेन पक्वान्नभेदे तत्र द्रव्यादिपाकराजेश्वरे उक्तानि यथा "शरावमात्रं छागमांसं तत्सादृशितं घृतम् त्रिमाषकं त्वचं लवङ्गमेलाफलञ्च । शरावमिताश्चत्वारः । मरिचं तोलकद्वयम् एकमाषकं कुङ्कुमम् । आर्द्रकं तोलकद्वयमात्रं षट्तोलकं लवणम् । शरावार्द्धपादमिता दाक्षा" । तत्पाकप्रकारो यथा "छागमांसं सूक्ष्मं चोरयित्वा शुष्कपलेइपाककरणानन्तरं पात्रान्तरे तैलपत्रोपरि अत्याश्चर्यगन्धद्रव्येण सह प्रथमं सज्जी कर्त्तव्यम् । ततश्चर्यं जलेनार्द्रसिक्तं कृत्वा मद्यगन्धपूर्वकमत्याश्चर्यगन्धद्रव्येण सह तन्मांसोपरि सज्जी कर्त्तव्यम् । एवंप्रकारेण वारंवारं सज्जीकृत्य तदुपरि अवशिष्टतत्तैलेपत्रेण दण्डद्वयं तन्मांसोपरि रचेत्" ।

पलाप पु० पलमाप्यतेऽत्र बाहुलकेन आप–आधारे घञ् । १इक्षिकपोले २कण्डपात्रे च शब्दमाला । [गतौ हेम० ।

पलायन न० परा–अय–ल्युट् रस्य लः । भीत्या स्थानान्तर

पलायित त्रि० परा+अय–मत्वर्थत्वात् कर्त्तरि क्त रस्य लः । १भीत्या पलायनकर्त्तरि २अपयाते च हेमच० ।

पलाल पु०न०पल–कालन् । शस्यशून्ये धान्यकाण्डे (नाड़ा) (पोयाल) अमरः ।

पलालदोहद पु० पलालं दोहदं यस्य । आम्रवृक्षे शब्दमाला पलालवेष्टने हि तस्य वृद्धिरिति तस्य तथात्वम् ।

पलाली स्त्री इत० । मांसमधूके ततः अस्यार्थे पामादि० न ङीषः च । पलालिन तद्युक्ते त्रि० ।

पलाश न० पल–शतौ भावे घञर्थे क पलं गतिं कर्म्मनमश्नुते अश–व्याप्तौ अच् उप०स० । १पत्रे अमरः पलं मांसमर्थं ब्रह्ममांसोत्पन्नत्वेन कारणतया तद्वा अश्नुते अश–व्याप्तौ अच् उप०स० । २वृक्षनामख्याते वृक्षभेदे तत्पुत्पत्तिः यथा० ब्रा० १२।४।४ "मांसेभ्य एवास्य पलाशाः समभवत् । तस्मात् बहुरसो लोहितरसो लोहितमिव हि मांसं तेनैवैनं तद्भूमेध्यं समर्धयत्यन्तरे खादिरा भवन्ति बाह्ये पालाशा अन्तराधि छस्त्रीणि बाह्यानि मांसानि स एवैनांस्तदायतने दधाति" । स च ब्रह्ममांसजत्वात् ब्रह्मरूपः यथोक्तं शत०ब्रा० ६।६। २।७ "ब्रह्म वै पलाशः इति "अश्वत्थरूपो भगवान् विष्णुरेव न संशयः। वृक्षरूपो वटस्तद्वत् पलाशो ब्रह्मरूपकः" पद्मोत्त० १६०अ० । तत्पर्य्यायगुणादि भावप्र० उक्तं यथा "पलाशः किंशुकः पर्णो वात्मिको रक्तपुष्पकः । खारश्रेष्ठो वातपोथो ब्रह्मवृक्षः समिद्वरः । पलाशो दीपनो हृद्यः सरोष्णो व्रणशुद्धजित् । भग्नसन्धानकृद्दोषश्लेष्मार्शःकृमीन् हरेत् । तत्पुष्पं स्वादु पाके तु वृष्यं तिक्तं कषायकम् । वातलं कफपित्तास्रकृच्छ्रजित् प्राहि शीतलम् । वृक्षादाश्मनं वातरक्तकृच्छ्रहरं परम् । फलं लघूष्णं मेहार्शःकृमिवातकफापहम् । विपाके कटुकं रूक्षं कृच्छ्रगुल्मोदरप्रणुत्" । "नवपलाशपलाशवनम्" माघः स्त्रियां ङ्यां च स्त्री । पलं मांसमत्ति अद–भोजने अच् उप० स०। ५राक्षसे पुंस्त्री०मेदि० स्त्रियां जातित्वात् ङीष् । तस्य मांसभोजित्वात्तथात्वम् । ६हरिद्रवर्णे च ७मगधदेशे पु० शब्दरत्ना० पलाशायां स्त्री राजनि० गौरा० ङीष् । [आर्द्धे क । २पलाशवृक्षे शब्दच० ।

पलाशक पु० पलाश+संज्ञायां कन् । १यक्षे जटाधरः । २पलाशवृक्षे च ।

पलाशपर्णी स्त्री पलाशस्येव पर्णमस्याः गौरा० ङीष् । अश्वगन्धायाम् । [नाडीव्रिक्षौ राजनि० ।

पलाशाख्य पु० पलाशं तत्पुष्पमाख्यायते आ+ख्या क । [त्यर्थनिमित्ते शब्दभेदे च गणः पा०ग० उक्तो यथा "पलाश खदिर शिंशपा स्यन्दन पुलाक करीर शिरीष यवास विकङ्कत" पलाशस्य विकारः पालाश इत्यादि ।

पलाशादि पु० "पलाशादिभ्यो वा" पा० विकारे अञ्-

पलाशान्ता स्त्री पलाशानामन्तो मत्वर्थीयोऽस्त्यस्याः । मत्वर्थीयाम् राजनि० ।

पलाशिन् पु०पलाशं विद्यतेऽस्य इनि । १वृक्षे अमरः २पत्रयुक्ते त्रि० स्त्रियां ङीप् । [शादवच्छिन्नदेशादौ ।

पलाशिल त्रि० पलाशस्यादूरदेशादि काशा० इल । पला-

पलाशीय त्रि० पलाशमस्यास्य छत्करा० ङ । पत्रयुक्ते

पलिक त्रि० पलं मानत्वेनास्यास्य ठन् । पलपरिमितद्रव्ये

पलिक्नी स्त्री पलिता इद्धा स्त्री "अन्द्वसि क्न वा ङीष्" पा० क्न ङीष् । १श्वेतजेशायां इद्धायां स्त्रियां वत्स० ३०।१९ बोधेतु न । पलिता रूढ्येव । २बालगर्भिणीनां स्त्रीमात्रासु हेमच० ।

पलिघ पु० परिघवत्। "परेच बाहुयोः" पा० रक्ष कः। १कारुघटे २प्राकारे ३मोटहे च मेदि०। ४परिघशब्दार्थे च।

पलित न०पल्--भावे क्त। १केशादौ जरया जातायां श्वेततायाम् २मांसादेर्वलिपरीतभावे च अमरः २हर्षे त्रि० स्त्रियां पलिता। केई तु पलिक्नीत्युक्तम्। ४तापे ५शिखाजे ६कटमे मेदि०। "फलेरितजादेश्च पः" इत्याफल-इतच् फस्य पः। ७केशपाके उज्ज्वलद० "क्रोधशोकश्रमक्षतः शरीरोष्मा शिरोगतः। पित्तं च केशान् पचति पलितं तेन जायते" माधवकरः। ततः अर्श० अच्। ८तद्युते त्रि०।

पलितङ्करण न० अपलितं पलितं क्रियतेऽनेन-कृ+ल्युट् तुम्। अपलितस्य पलिततोत्पादनसाधने।

पलितम्भविष्णु त्रि० अपलितः पलितो भवति अभूततद्भावे भू-कर्त्तरि खिष्णुच् तुम्। अपलिते पलिततया भूते तदर्थे खुकञ्। पलितम्भावुक तत्रार्थे त्रि०।

पल्य त्रि०पल्+यत्। उत्तमे वर्त्मना शब्देन समाने अच्छमा०। पल्यवर्त्म च उत्तमतेजसि

पल्यङ्क पु०परिगतोऽङ्कं रक्ष कः। शय्यायाम् (पालङ्क) अमरः

पल्ययन न०परि+अय-करणे ल्युट् रक्ष कः। (घोड़ार जिन्) पर्य्याणे हेमच०। [लवति ते अपपल्युलत् त।

पल्यूल छेदने पूतौ च अद०चुरा०उभ० सक० सेट्। पल्युपल्यूल छेदने पवित्रताकरणे च अद० चुरा०उभ०सक०सेट्। पल्यूलयति ते अपपल्यूलत् त।

पल्ल गतौ भ्वा०पर०सक० सेट्। पल्लति अपल्लीत् पपल्ल।

पल्ल पु० पदं लाति ला-क पादस्थाने पत्। (पाबुर) (मराइ) स्थाते धान्याधारभेदे मेदि०।

पल्लव पु०न० अर्द० पल्लते सम्भ० क्विप् पल्, लूयते लू-अप् कर्म०। १अभिनवे पल्लवके २तदुल्लयाख्यायां शब्दारे ४वधे ५अवलम्बकरागे ६वलये मेदि० "पर्वपत्त्रादिसंघाते शाखायाः पल्लवो मतः" इत्युक्ते ७शाखादेः पर्वपत्त्रसमुदाये च। ८नवपत्त्रे मधुसूदनः ९विटपे १०हस्तारे ११चापले शब्दर०।

पल्लवक पु०पल्लव इव कायति कै-क। १भवृक्षभेदे २वैद्यापतौ च हला० स्वार्थे क। ३नवकिसलये पु०न० पल्लवेन कायति कै-क। ४अशोकवृक्षे राजनि०।

पल्लवद्रु पु० पल्लवप्रधानो द्रुः मा०त०। अशोकवृक्षे राजनि०। पल्लवद्रुमादयोऽप्यत्र।

पल्लवाङ्कुर पु० पल्लवश्चासावङ्कुरो वेत्र। शाखायाम् हेमाद्रि०।

पल्लवाधार पु० ईत०। शाखायां मल्लि०।

पल्लविक त्रि० पल्लवः इव अस्त्यस्य ठन्। कासुके हेमच०

पल्लवित त्रि० पल्लवं नूतनपत्त्रं विस्तारो वा जातः अस्य तार० इतच्। १पल्लवयुक्ते २विस्तारयुक्ते च पल्लव+आचारे क्विप् ततः क्त। ३आचारवति त्रि० मेदि०।

पल्लविन् पु० पल्लव+अस्त्यर्थे इनि। वृक्षे शब्दच०।

पल्लि(ल्ली) स्त्री पल्ल-इन् वा ङीप्। १क्षुद्रग्रामे २कटग्रामे ३गेहे च। दीर्घान्तः ४नगरभेदे राजनि०। पल्लं मटङ्गमाश्रयत्यनया श्रि-क गौरा० ङीष्। ५मटङ्गीधिकायाम् स्त्री हेमच०।

पल्लिवाडु पु० पल्लिं क्षुद्रग्रामं वाडयति निवाडयति वाड्+उप०+क०। वृक्षभेदे राजनि०।

पल्वल न० पल्-वल। क्षुद्रजलाशये (डोवा) "वल्लं सरः पल्वलं स्यादल्पं चन्द्रार्कगे रवौ। न तिष्ठति जलं काले तत्तलं वारि पाल्वलम्। पाल्वलं वार्य्यभिष्यन्दि गुरु स्यादु त्रिदोषजित्" भावप्र०। चन्द्रार्कौ मृगशिरर्क्षम्।

पव पु० पू-भावे अप्। १निष्पावे सूर्पवायुना धान्यादेर्निष्पूकरणे शास्त्रादेः शोधने अमरः कर्त्तरि अच्। २वायौ शब्दच०।

पवन न० पू-ल्युट्। १निष्पावे सूर्पवातेन धान्यादेः शोधने आधारे ल्युट्। २कृष्णकारस्य आमघटादिपाकस्थाने (पोवान) मेदि० करणे ल्युट्। ३जले शब्दमा० कर्त्तरि ल्यु। ४वायौ पु० अमरः पवनाद्य आवहादयः सप्त अनिलशब्दे १६३पृ०दर्शिताः। तत्सरभेदे तेषां क्रमेणैकैकवत्सराधिपतित्वम् तच्च ज्योतिस्तत्त्वे उक्तं यथा "आवः परावित्संवुग्घो सनिभिर्भाग प्रारितः। आवहादिक्रमेणैव सप्त वाताः प्रकीर्त्तिताः" गुग्घा शाकाङ्कुः। गुग्घकः४५। शाकुकः ७। ५पवते त्रि० शब्दर०। ६विष्णौ पु० "पवनः पावनोऽनिलः" विष्णुसं०। [ज्यत्र।

पवनतनय पु० ईत०। १हनूमति २भीमे च पवनसुतादयोऽत्र।

पवनविजय पु० पवनः श्वासवायुर्विजीयतेऽनेन। वि+जि-करणे अच्। देहस्थवायोः श्वासप्रश्वासगतिभेदेन शुभाशुभसूचके ग्रन्थभेदे तत्प्रकारो मरुद्वृ० उक्तो यथा

"कुजे वह्नौ रविः पृथ्वी शौरिरापः प्रकीर्त्तिताः।
वायुसंस्थास्थितो राहुर्दशरन्ध्रावभासकः। गुरुः शुक्रस्तथा सौम्यश्चन्द्रश्चैव चतुर्थकः। वामनाड्यास्तु मध्यस्थान् कालवेदाञ्जनस्तथा। वदाचार इडायुक्तवदा

कर्म समाचरेत्। स्नानसेवां तथा ध्यानं वाणिज्यं राज दर्शनम्। कन्यानि शुभकर्माणि कारयेत प्रयत्नतः। दक्षनाडीप्रवाहे तु अग्निर्भौमश्च नैर्ऋतः। एतश्चैव तथाग्नेयं पापानाहुर्बुधो भवेत्। शुभाशुभविवेको हि ज्ञायते तु खरोदयात्। देहमध्ये स्थिता नाड्यो बहुरूपाः सुविस्तराः। नाभेरधस्तादुदयः कन्दो बहुरासत्र निर्गताः। द्वासप्ततिसहस्राणि नाभिमध्ये व्यवस्थिताः। चक्रवच्च स्थितास्तासु सर्वाः प्राणवहाः स्मृताः। तासां तिस्रोमता श्रेष्ठा वामदक्षिणमध्यमाः। वामा सोमात्मिका प्रोक्ता दक्षिणा रविरूपिणी। मध्यमा च भवेदग्निरूपिणी कालरूपिणी। वामा ज्ञानतरूपा च जगदाप्यायने स्थिता। दक्षिणा रौद्रभावेन जगच्छोषयते सदा। द्वयोर्वाहे तु मृत्युः स्यात् सर्वकार्यविनाशिनी। निर्गमे च भवेद्वामा प्रवेशे दक्षिणा स्मृता। कारयेत् क्रूरकर्माणि प्राणे पिङ्गल संस्थिते। दृढाचारे तथा सौम्यं चन्द्रसूर्यगतस्तथा। वामायां सर्वकार्येषु विषयङ्करणे दृढा। भोजने मैथुने युद्धे पिङ्गला सिद्धिदायिका। उच्चाटमारणास्तेषु कर्मस्वेतेषु पिङ्गला। मैथुने चैव संग्रामे भोजने सिद्धिदायिका। शोभनेषु च कार्येषु वामायां विधिकर्मणि। शान्तिसत्त्वार्थसिद्धौ च दृढायोक्ता नराधिपैः। दाम्यास्तैव प्रवाहे च क्रूरसौम्यविवर्जने। विद्वत्तमैस्तु ज्ञातव्यं संचारेषु विचक्षणैः। सौम्येषु शुभकार्येषु लाभादिजयजीविते। गमनागमने चैव वामा सर्वत्र पूजिता। युद्धादिभोजने याते स्त्रीयाने चैव तद्वहे। प्रशस्ता दक्षिणा नाडी प्रवेशे क्षुद्रकर्मणि। शुभाशुभानि कार्याणि लाभालाभौ जयाजयौ। जीवाजीवाय यत् पृच्छेत्र सिध्यति च मध्यमा। वामाचारेऽथ वा दक्षे प्रश्नवे यत्र नायकः। तत्रस्थः पृच्छते वस्तु तत्र सिद्धिर्न संशयः। वैकल्यन्दो वामदेवस्तु यदा वहति चाऽनिलः। तत्र भागे स्थितः पृच्छेत् सिद्धिर्भवति निश्चला। वामे वा दक्षिणे वापि यत्र संक्रमते शिरा। घोरे घोराणि कर्माणि सौम्ये सौम्यानि च। प्रस्थिते भागतो ज्ञेये दाम्यां वै सर्वकार्यिणि। तदा मृत्युं विजानीयात् योगी योगविचारदः। यत्र यत्र स्थितः पृच्छेद्दाम दक्षिणसम्मुखः। तत्र तत्र समं दिद्याद्दातस्रोदयनं तदा। अयतो वामिका श्रेष्ठा पृथ्वतो दक्षिणा शुभा। वामेन वामिका प्रोक्ता दक्षिणे दक्षिणा शुभा। जीवो जीवति जीवेन वक्तव्यं तत्स्वरो भवेत्। यत्किञ्चित् कार्यसहितं लाभादि शुभलक्षणम्। तत्सर्वं पृच्छनाद्यान्तु जायते निर्विकल्पकम्। अन्यनाड्यादिपर्यन्तं पञ्चत्वमुदाहृतम्। यावत् पृथ्वी तु पृच्छायां पृथ्वीवां प्रथमं जयेत्। रिक्तावान्तु द्वितीयन्तु कथयेत्तदनन्तरम्। वामाचारः समं वायुर्जायते कर्मसिद्धिदः। प्रहरे दक्षिणे मार्गे विषमे विषमाचरम्। अन्तत्र वामवाहे तु नाम वै विषमाचरम्। तदाऽसौ जयमाप्नोति शोषः संग्राममध्यतः। दक्षवातप्रवाहे तु यदि नाम समाचरम्। जायते नात्र सन्देहो नाडीमध्ये तु लक्षयेत्। पिङ्गलानलगते प्राणे समानीयाच्चलक्षयेत्। यावच्चाद्रुदयं चारस्तां दिशं यावदाजयेत्। न जातु जयते सोऽपि नात्र कार्या विचारणा। अथ संग्राममध्ये तु यत्र नाडी सदा वहेत्। सा दिशा जयमाप्नोति शून्ये भङ्गं विनिर्दिशेत्। ज्ञातस्वरे जयं विद्यान्मृतके मृतमादिशेत्। जयं पराजयञ्चैव जानाति स पण्डितः। वामे वा दक्षिणे वापि यत्र सञ्चरते शिरा। ज्ञात्वा तत् षटमादौ तु यात्रां नयति शोभनाम्। अग्निस्तत्त्वप्रवाहे तु सति युद्धं समाचरेत्। तत्रस्थः पृच्छते वस्तु स बाधुर्जायते ध्रुवम्। यां दिशं वहते वायुस्तां दिशं यावदाजयेत्। जयते नात्र सन्देहः इन्द्रो यदयतः स्थितः। मेषाद्या दश या नाड्यो दक्षिणा वामसंस्थिताः। चरस्थिरद्विभागैः तास्ताहशे तादृशः क्रमात्। निर्गमे निर्गमं याति संग्रहे संग्रहं विदुः। पृच्छकस्य वचः श्रुत्वा वक्तव्यारेण लक्षयेत्। वामे वा दक्षिणे वापि पथतत्त्वस्थितः शिवे!। अर्द्धं ऽग्निरध आपश्च तिर्यक् संस्थः प्रभञ्जनः। मध्ये तु पृथिवी श्रेष्ठा नभः सर्वत्र सर्वदा। अर्द्धं मृत्युरधः शान्तिस्तिर्यक् चोच्चाटयेत् सुधीः। मध्ये ज्ञानं विजानीयात् मोक्षः सर्वत्र सर्वगे।

पवनव्याधि पु० पवनः वातरोगभेदो व्याधिरस्य। रक्तवे वातरक्तविशेषभेदे स्त्रियाम्।

पवनात्मज पु० हनु० इकुमति शमीमे ३यञ्जी च "वायोरग्निः" इति श्रुतेस्तस्य वायुजातत्वात्तथात्वम्। तत्सम्भवादयोऽस्यत्व।

पवनाल पु० पवनायालति पर्याप्नोति पवन-पर्याप्तौ अच् ४त०। (देधान) धान्यभेदे "पवनालो हिमः स्वादुर्लोहितः श्लेष्मपित्तजित्। बहुपुरीषो रूक्षः स्तोकलघुः कथितो बुधैः" भावप्र०।

पवनाश पुंस्त्री० पवनमश्नाति अश-अण् उप० स०। १सर्पे स्त्रियां जातित्वात् ङीष्। २वायुभक्षके त्रि० ऋषा०।

पवनाशनाश पु०पवनः अशनमस्य पवनाशनं सर्पमश्नाति अश-अण्। १गरुडे २मयूरे ऋषा०स्त्रियां जातित्वात् ङीष्।

पवनेश्वर न०पवनेन स्थापित ईश्वरः ईश्वरलिङ्गम्। काशीस्थे शिवलिङ्गभेदे काशीख० १३अ०।

पवनेष्ट पु० पवने पवनदेवे इष्टः। महानिम्बे रत्नमा०।

पवनाम्बुज न० पवनं पवित्रमम्बुजमिव पृषो०। पद्मपत्रे शब्दच० पवनाम्बुजमित्येव तत्र पाठः साधुः।

पवमान ऽ० पू-ताच्छील्ये चानश्। १वायौ अमरः २गार्हपत्येऽग्नौ "अथ यः पवमानस्तु निर्मन्थ्योऽग्निः स उच्यते। स च वै गार्हपत्योऽग्निः प्रथमो ब्रह्मणः सुतः" मत्स्यपु० ७८अ०। ३सोमे च तदधिकृत्य प्रवृत्तं सूक्तम् अण्। पावमान सोमदेवताके सूक्तभेदे तानि च सूक्तानि क० ६।१सूक्तावधि षट्पटिसूक्तात्मकानि ऋादिदयेत्यादिकानि त्रिष्वन्नीत्याद्यन्तानि।

पवमानात्मज पु० ऋत०। वह्निभेदे "पवमानात्मजो वह्निर्हव्यवाहन उच्यते" मत्स्यपु० ४८अ०। तस्य "वायोरग्निः" इति श्रुतेर्वायुजत्वात्तथात्वम्। [रिक्तेय तदपत्ये पुंस्त्री०।

पवष्टुरिक पु० ऋषिभेदे तस्यापत्यम् शुभ्रा० ढक्। पावष्टुरिक पवाका स्त्री पू-आक। वाल्मायाम् उज्ज्वलदत्तः।

पवि पु०पू-ओघे इ। १वज्रे अमरः २वाचि स्त्री निघण्टुः।

पवित्त त्रि० पूङ् शोधे "पूङश्च" पा० न क्तित्वम्। १पवित्रे २मरिचे न० राजनि०।

पवित्र पु०न० पूयते आत्मनेन पू-करणे इत्र। १आत्मसंस्कारके २कुशग्रहे यत्पवनशब्दे तद्वक्ष्यं ।४२१पृ० दर्शितम् "अनन्तर्गर्भितं वाग्यं कौशं छिद्रसमेव च। प्रादेशमात्रं विज्ञेयं पवित्रं वस्त्र कुत्रचित्" कर्मप्र०। ३अनामिकावेष्टने पवित्रतासाधके त्रिष्वे च ४यज्ञोपवीते त्रिका० पवित्रारोपणशब्दे दृश्यम्। ५विष्णौ "पवित्रं सर्वकं परम्" विष्णुसं०। ६वर्षर्षे ऋताम्बे ७यवसि न०मेदि०। ८वर्षर्षे न० विश्वः ९यज्ञोपकरणे हेमच०। १०घृते ११मणौ च राजनि०। १२तिलवृक्षे १३पुत्रजीववृक्षे पु० राजनि० १४व्रतशौचादिना १५शुद्धे त्रि० अमरः। १६तुलस्यां स्त्री शब्दमा० १७नदीभेदे हेमच० १८हरिद्रायाम् १९यज्ञोपवीतवृक्षे च स्त्री राजनि०।

पवित्रक पु० पवित्रमिव कायति के-क स्वार्थे क, संज्ञायां कन् वा। १पवित्रशब्दार्थे २यज्ञसूत्रवृक्षे ३कुशे ४दमनकवृक्षे राजनि० ५गणसूत्रनिर्मिते जाले मत्स्यधारणसाधने द्रव्यभेदे न० अमरः।

पवित्रधान्य न० नित्यकर्म०। यवे राजनि०।

पवित्रारोप(ह)ण न० ऋत०। विष्णुप्रभृतिदेवसम्प्रदानके यज्ञोपवीतदाने देवभेदेन तिथिभेदादौ तद्दानप्रकारश्च हेमा० ब्र० विष्णुरहस्ये यथा

"तत्राऽऽश्विनसमायुक्तैर्नरैर्विष्णुपरायणैः। वर्षे वर्षे प्रकर्त्तव्यं परित्रारोपणं हरेः। श्रावणस्य सिते पक्षे कर्कटस्थे दिवाकरे। द्वादश्यां वासुदेवस्य पवित्रारोपणं स्मृतम्। सिंहस्थे वा रवौ कार्य्यं कन्यायान्तु गतेऽथ वा। तस्यामेव तिथौ सम्यक् तुलास्थे न कथञ्चन। विष्णोरङ्गस्य सूर्यस्य विरिञ्चेः शक्तिसुखस्य च। दैव्यागमाधिनाथस्य मातृणां धनदस्य च। पवित्रारोपणं कार्य्यमन्येषाञ्च यथाविधि। अकृत्वा फलहानिः स्यात् संवत्सरकृतार्चनात्। सर्वेषान्तु महत् पुण्यं पवित्रारोपणे कृते। नियमस्तत्त्वविन्यासाः पृथगुक्तास्तपोधन!। प्रतिपदनदर्शोक्ता पवित्रारोपणे तिथिः। श्रिया दैव्या द्वितीया तु तिथीनामुत्तमा तिथिः। तृतीया तु भवान्यास्तु चतुर्थी तत्सुतस्य तु। पञ्चमी नागराजस्य षष्ठी प्रोक्ता गुहस्य च। सप्तमी भास्करे प्रोक्ता दुर्गायाष्टमी स्मृता। मातृणां नवमी प्रोक्ता दशमी वासुदेवः स्मृता। एकादशी ऋषीणान्तु द्वादशी चक्रपाणिनः। त्रयोदशी धनदस्य शिवस्योक्ता चतुर्दशी। मम देवगणिश्रेष्ठ! पौर्णमासी तिथिः स्मृता। यथोक्ताः शुक्लपक्षे तु तिथयः श्रावणस्य च। सर्वेषामेव देवानां तथा कार्य्यं यथाविधि। प्रथमं दर्भसूत्रन्तु पद्मसूत्रं ततःपरम्। ततः शौमं सुपुण्यं स्यात् पट्टसूत्रं ततः परम्। शुचि कार्पाससूत्रं च निर्मितं वा शुभाशुभम्। शुचिर्भूत्वा शुचौ देशे कारयीत प्रयत्नतः। तद्विधानोपयुक्तन्तु यथोक्तफलदायकम्। कन्या कर्त्तयते सूत्रं नारी वाथ पतिव्रता। विधवा साधुशीला वा सूत्रमेतत्तु कर्त्तयेत्। दोषयुक्तं क्षतं दग्धं मक्षरक्षादिदूषितम्। मलिनं नीलरक्तं वा प्रयत्नेन विवर्जयेत्। यथोक्तसूत्रमादाय त्रिगुणं त्रिः प्रयोजयेत्। पवित्रं तेन कुर्वीत कनिष्ठोत्तममध्यमम्। कनिष्ठं तन्तुभिर्न्नवं सप्तविंशतिभिः शुभम्। मध्यं लोके तु तत्कीर्त्तिसुखायुर्द्धनप्रदम्। चतुःपञ्चाशता श्रेष्ठं तन्तूनां मध्यमं परम्। दिव्यभोगावहं पुण्यं स्वर्गावासप्रदं परम्। उत्तमं

चैव तन्तूनां शतमष्टोत्तरं शतम्। दत्त्वा तदात्मदेवाय विष्णुलोकं भवेन्नरः। अष्टोत्तरसहस्रं तु तन्तूनां परिसंख्यया। वनमाला स्मृता विष्णोर्दत्ता भक्तिप्रदा हि सा। कनिष्ठं नाभिमात्रं स्यादूरुमात्रन्तु मध्यमम्। पवित्रं चोत्तमं प्रोक्तं जानुमात्रं प्रमाणतः। वनमाला प्रमाणेन प्रतिमायाः प्रशोभते। नराणां जन्मसंसार दुःखस्यैव प्रणाशिनी। कनिष्ठे द्वादशैवोक्ता मध्यमे द्विगुणाः स्मृताः। त्रिगुणास्तूत्तमे प्रोक्ता ग्रन्थयस्तु पवित्रके। शतमष्टोत्तरं कार्यं ग्रन्थीनां तु विधानतः। मुनीन्द्र! वनमालायां विष्णुपूजनतत्पर!। अधिवासनसूत्रे तु ग्रन्थयो द्वादश स्मृताः। तत्त्वन्यास विधानं तु शृणुतां मुद्गलोत्तम। द्रव्यप्रक्रमे तत्त्वन्यास स्मृत उक्तः "पवित्रं तेन विख्यातं ब्रह्मतेजो हि गीयते। विष्णाख्या तु विख्यातं तदा लोके निगद्यते। तदेव सूत्ररूपेण यज्ञेशः कर्मणः प्रभुः। तदेव त्रिगुणीभूतं नारायणसमाख्यया। त्रिवेदात्मा त्रिदेवात्मा त्र्यक्षरः प्रणवः स्मृतः। ते पवित्रात्मसंभूता वराङ्गाङ्गसमाश्रिताः। संघातेन च तन्तूनां नवात्मा परिकीर्त्तितः। तन्तूनां प्रथमो देवो वासुदेवो जगद्गुरुः। द्वितीयस्तु प्रद्युम्नश्च तृतीयकः। अपरे त्वनिरुद्धस्तु ततो नारायणः प्रभुः। ब्रह्माविष्णुस्तथा रुद्रा नृणां वरारोहे समाश्रिताः। अधिदैवेन रूपेण अध्यात्मे च निबोध मे। मनोबुद्धिरहङ्कारस्तन्मात्राणि तथैव च। जीवश्चेति नवैतच्च अध्यात्मे संव्यवस्थितम्। द्यौरन्तरिक्षं पृथिवी भूर्भुवःस्वस्तथैव च। अकारश्चोकारश्च मकारश्चाधिभूतकम्। अग्निश्चयं तथा कर्म श्रवञ्च यदनश्वरम्। ज्ञेयं पवित्रे तद्विद्यानधिदैवसदाहरेत्"। शिवपवित्रलक्षणम् "एकादशाद्य वा स्वल्पैर्न्यूनता वाप्यधिकापि वा। षड्गुणता वा कर्त्तव्यं तत्त्वग्रन्थ्युत्तराङ्कम्। द्वादशाङ्गुलमानानि व्यायामाष्टाङ्गुलानि च। शिक्यविस्तारमानानि चतुरङ्गुलिकानि वा। तथैव शिखिकास्यं चतुर्वं सार्वदैवतम्। साङ्गावतारकं कार्यं पवित्रमतिसुन्दरम्। पवित्रारोहणमत्र "श्राद्धदशुक्लपक्षस्य वाप्यां श्रावणस्य च। पवित्रारोहणं कुर्यात् देवगीतिकरं परम्" कालिकाउ० ५८अ०। [न्द्रायन तद्वोत्तापत्यं युवा०। पविन्द पु० ऋषिभेदे तस्य गोत्रापत्यम् अण्। पाविन्द फञ्। पवीठ त्रि० पू-इच् वेदे इट्टो दीर्घः। गोधके ऋ० ६।४।४

पवीनस पु० गर्भोपद्रावके असुरभेदे अथ० ८।६।२

पवीर न० १आयुधे "पविः शल्यो भवति तद्विदुनास्तिकार्यं तद्वत् पवीरमायुधम्" निरु० १२।२०। पवि+स्वार्थे रः। २वज्रे ऋ० १०।६०।२"पविधारास्त्रासि र पूर्वाणो दीर्घः। ३फाले यजु० १२।७१ वेददी०।

पवीरव पु० पवे रव वेदे दीर्घः। वज्रशब्दे ऋ०१।१७३।४भा०

पव्य त्रि० पू-यत्। १शोध्ये २यज्ञपात्रादौ च ऋ०८।८६।२४ तत्र "पव्यया पात्राणि" भा० यसःस्थाने वाट्।

पश्च(ष-स) बाधे विहतौ भ्वा०उभ०सक० सेट्। पश्च(ष)-(स)ति ते अपश्चीत्(ष्ट)(स्त)त् अपाश्चीत्(ष्ट)(स्त)त् अपश्चिष्यति(ष्यते)(स्यते)ष्ट। पपाश्च(ष)(स) मेशे(ष)(से)। दन्त्यान्त्यस्यैव अभ्यासस्य सम्। यङ्यङ्लुकोः वि० को० पस्मस्कृति-पस्मस्कीति। तालव्यान्त्यस्य तथेत्यन्ये।

पश्च(ष स) स्पर्शे, गतौ अनुपसर्गात् वन्ये बाधे च अद०चु० उभ०सक०सेट्। पश्च(ष)(स)यति ते अपपश्च(ष)(स)त् त।

पश्च(ष-स) बन्धे चुरा० उभ०सक०सेट्। पाश्च(ष)यति ते अपीपश्च(ष)(स) त। [१।२२०श्लो० २पशुसम्बन्धिनि च।

पशव्य त्रि०पशवे हितम् तस्येदं वा यत्। १पशुहिते वाच्य०

पशु पु० सर्वमविशेषेण पश्यति दृश-कु पषादेशः। स्मृतादौ लोभवस्त्वाङ्कुरुते १जन्तुभेदे २दर्शनार्थेऽव्ययम् अमरः। ३प्रभवे ४देवे ५प्राणिमात्रे शब्दर० हेमा० "अनादेये पशुन्यागः" मीमांस०। ७यज्ञभेदे धरणिः तस्य पशुसाध्यत्वात् तथात्वम्। "न तो पशौ करोति "स्तुतौ पशुः पशुसाध्यो यागः। ७यज्ञोदुम्बरे शब्दच०। दृतन्त्रोक्ते साधकानां भावभेदे तत्र जन्तुभेदानां प्राणारक्षभेदा यथा "गोरविरजोऽश्वोऽश्वतरो गर्दभो मनुष्यश्चेति सप्त ग्राम्याः पशवः। सिंहव्याघ्रवानर ऋक्षसरीसृपकुक्कुर शृगाश्चेति सप्तारण्याः पशवः" दुर्गोत्सवतः। स्मार्तादौ पशुपदप्रयोगमाह यज्ञपार्श्वः "छागो वा यदि वा मेषस्छागो वा यदि वा वृषः। पशुस्थाने नियुञ्जानं पशुशब्दोऽभिधीयते"। यद्यधिष्ठातृदेवताभेदा यथा "सिंहे वसति दुर्गा च शरभे च प्रजापतिः। एणे च वसते वायुर्मेषे चैव च चन्द्रमाः। नक्षत्राणि च शशके कृष्णसारे हरिः स्वयम्। शतक्रतुर्गवां पृष्ठे गजे विष्णुर्गणेश्वरः। अश्वे तु द्वादशादित्या महिषे सर्वदेवताः। ब्रह्मा तु चमरे चैव छागले तु तथाऽनलः। एतस्मात् कारणादेते पूज्या वन्द्याः प्रयत्नतः" इति मत्स्यसूक्त-

तन्त्रे २६ पटले। वल्मर्थपशुरुक्षणादि यथा "निवेदयेत् मोषगण्डम् मानुषं वा सुशोभनम्। वराहं वाथ छगलं चमरं वाऽरुणन्तथा। मेषञ्चाथ वराहञ्च गोधिकाञ्च निवेदयेत्" मतङ्गतन्त्रे "लुलायञ्च तथा खड्गं चमरञ्च वराहकम्। कच्छपं शल्लकीं गोधां मानुषं तदनन्तरम्। न दद्याद्ब्राह्मणो मद्यं मानुषञ्च तथा रुरुम्। त्रैपक्षिकान् विवर्णांश्च मानुषान्न कपीनपि। संवत्सरात् परं छागं यावत् स्यात्तु त्रिहायणम्। वराहदन्तसदृशविशाखाभ्यां सुशोभनम्। मदगन्धसमायुक्तं रोमराजिविराजितम्। कृष्णं वाऽरुणकञ्चैव तन्नो ह्यादशवार्षिकम्"। जातिभेदे वर्णविशेषमाह तत्रैव "श्वेतञ्च छागलञ्चैव ब्राह्मणस्य विधिस्मृते। रक्तं श्वेतं क्षत्रियस्य वैश्यस्य गौरमेव च। नानावर्णं हि शूद्रस्य सर्वेषामञ्जनप्रभम्" योगिनीतन्त्रे "पशूनाञ्चैव षण्मासात् परतश्च बलिर्भवेत्। छागलः कृष्णः श्वेतो वा द्विवर्षात् परतो यदि। "तथा चाश्वं मृगञ्चैव छागञ्च पार्वतीयकम्। मूषिकञ्च वराहञ्च क्षुद्रमार्जारमेव च"।

रुद्रयामले उत्तरख०६प० पशुभावलक्षणं यथा

"पशुभावस्थितां नाथ! देवतां श्रृणु विस्तरात्। दुर्गापूजां विष्णुपूजां शिवपूजाञ्च नित्यशः। अवश्यं हि यः करोति स पशुरुत्तमः स्मृतः। केवलं शिवपूजाञ्च यः करोति च स साधकः। पशूनां मध्यमः श्रीमान् शिवभक्तश्च चोत्तमः। केवलं वैष्णवो धीरः पशूनां मध्यमः स्मृतः। भूतानां देवतानाञ्च सेवां कुर्वन्ति ये सदा। पशूनामधमाः प्रोक्ता नरकस्था न संशयः। स्वसेवां मम सेवाञ्च ब्रह्मविष्ण्वादिसेवनम्। कृत्वान्य सर्वभूतानां नाथिकानां महाप्रभो!। यश्चिषीनां भूतिनीनां ततः सेवां शुभावहाम्। यः पशुर्मूलषण्णादिसेवाञ्च कुरुते सदा। तथा श्रीतारकब्रह्मसेवां ये वा नरोत्तमाः। तेषामसाध्यभूतादिदेवताः सर्वकामदाः। वर्जयेत् पशुभावेन विष्णुपूजापरोजनः" द्वितीयपटले। "नित्यं श्राद्धं तथा सन्ध्यावन्दनं पितृतर्पणम्। देवतादर्शनं पीठदर्शनं तीर्थदर्शनम्। गुरोराज्ञापालनञ्च देवतानित्यपूजनम्। पशुभावस्थितो मर्त्यो महाविद्यं लभेद्ध्रुवम्"। यज्ञियपशुलक्षणं च आ०त० ४।८।। स्मृतादौ द्रष्टव्यः। दृश्यैवागमाधिक्ये जीवात्मनि पशुपतिशब्दे द्रष्टव्यम्। १०अग्नौ पशित्रिशब्दे द्रष्टव्यम्।

पशुकल्प पु० पशोः यज्ञाङ्गपशोः कल्पोविधानम्। "अथ पशुकल्पः" आ०श्रौ० १।१।। स्मृत्यादौ विहिते पशूपाकरणादिसंस्कारादिकर्मणि।

पशुगायत्री स्त्री०। पशोः कर्मे जयमन्त्रभेदे च च "पशुपाशाय विद्महे विश्वकर्मणे धीमहि। तन्नो जीवःप्रचोदयात्" इत्येवं रूपः। [आचारे भाग० ६।२६।२२।

पशुचर्या स्त्री पशोरिव चर्याचारः। पशोरिव निर्लज्जतादिरूपे आचारे।

पशुतन्त्र न० पशूनां तन्त्रम्। १अनेकोद्देशेन एकजातीयैक पशुपरूपे आश्व०श्रौ०२ ६।।७ पशोरुत्पत्तम्। २पशुधर्मोक्ते च। कात्या०श्रौ० ६।१।।।६। ३पशुकल्पे च।

पशुद त्रि० पशुं ददाति दा—क। १पशुदातरि २कुमारानुचरभेदे स्त्री भा०म० ४७अ०।

पशुदेवता स्त्री पशुधिष्ठात्री देवता पशुरूपदानं देवता वा। १पशुधिष्ठात्र्यां देवतायाम्। पशुभेदे देवताभेदाश्च पशुशब्दे दर्शिताः। २पशुरूपदाने देवताभेदे च।

पशुधर्म्म पु० पशूनामिव यदेतन्मैथुनादिरूपो धर्मः। यदेतन्मैथुनादिरूपत्वादके पशुतुल्यधर्मे मनुः ८।६६ श्लो०।

पशुनाथ पु० ६त०। १शिवे हेमच०। २पशुस्वामिनि च।

पशुप त्रि० पशून् पाति—क। १पशुपालके २पशूनां पत्यौ च।

पशुपति पु० पशूनां जीवानां पतिः। १महेश्वरे शिवे १पशुस्वामिनि। यजुर्वेदीयरुद्रैकाक्षरपद्धतिकारके इष्टायुधरुद्रोदरे २पशुपतभेदे च। शिवस्य तद्भावनिरूपितं यथा "अथवा सर्वविद्यानां पतिराद्यः सनातनः। अतश्च वै पतितो येन पशुमध्ये (जीवमध्ये) व्यवस्थितः। अतः पशुपतिर्नाम त्वं लोके ख्यातिमेष्यसि" वराहपु०। पशुपतिनोपदिष्टम् अण्। पाशुपत शैवागमभेदे तत्र प्रतिपाद्यविषयाश्च सर्वदर्शनसंग्रहे नकुलीशमतप्रदर्शनानन्तरं दर्शिता यथा

"तत्रेमं परमेश्वरः कर्मादिनिरपेक्षः कारणमिति पक्षं वैशेषिकमेके यदादपदूषितत्वात् प्रतिक्षिपन्तः के चन माहेश्वराः शैवागमसिद्धान्ततत्त्वं यथावदीक्षमाणाः कर्मादिसापेक्षः परमेश्वरः कारणमिति पक्षं कचीकुर्वाणाः पक्षान्तरमुपक्षिपन्ति। तत्र पशुपतिपाशभेदात् त्रयः पदार्था इति। तदुक्तं तन्त्रतत्त्वज्ञैः "त्रिपदार्थं चतुष्पादं महामन्त्रं जगद्गुरुः। मूलेनैकेन संक्षिप्य प्राह विस्तरतः पुनः" इति कक्षार्नैः त्रयः पशुपतिपाशाः पदार्था यस्मिन् सन्ति तच्चिपदार्थं, विद्याक्रियायोगचर्याख्याश्चत्वारः पादा यस्मिन् तच्चतुष्पादं महामन्त्रमिति। तत्र पशूनामरुततन्त्रत्वात्

पाशानामचैतन्यात् तद्विलक्षणस्य प्रभोः प्रथमसङ्ग्रहः। चेतनत्वसाधर्म्यात् पशूनां तदानन्त्यम्। अवशिष्टानां पाशानामन्ते विनिवेश इति क्रमनियमः। दीक्षायाः परमपुरुषार्थहेतुत्वात्तस्याश्च पशुपाशेश्वरस्वरूपनिर्णयोपाय भूतेन मन्त्रमन्त्रेश्वरादिमाहात्म्यनिश्चायकेन ज्ञानेन विना निष्फलत्वितुमशक्यत्वात् तदवबोधकस्य विद्यापादस्य प्राथम्यम्। अनेकविधसाङ्गदीक्षाविधिप्रदर्शकस्य क्रियापादस्य तदानन्तर्यम्। योगेन विना नाभिमतप्राप्तिरिति साङ्गयोगज्ञापकस्य योगपादस्य तदुत्तरत्वम्। विहिताचरणनिषिद्धवर्जनरूपां चर्यां विना योगोऽपि न निर्वहतीति तत्प्रतिपादकस्य चर्यापादस्य चरमत्वमिति विवेकः। तत्र पतिपदार्थः शिवोऽभिमतः। सकलात्मनां विद्येश्वरादीनान्तु यद्यपि शिवत्वमस्ति तथापि परमेश्वरपारतन्त्र्यात् स्वातन्त्र्यं नास्ति। ततश्च तदुपकरणभुवनादीनां भावानां सन्निवेशविशिष्टत्वेन कार्यत्वमवगम्यते। तेन च कार्यत्वेनैषां बुद्धिमत्पूर्वकत्वमनुमीयते इत्यनुमानबलात् परमेश्वरप्रसिद्धिरुपपद्यते। ननु देहस्यैव तावत्कार्यत्वमसिद्धं न हि कश्चित् केनचित् कदाचित् देहः क्रियमाणो दृष्टचरः। सत्यं तथापि न केनचित् क्रियमाणत्वं देहस्य दृष्टमिति कर्तृदर्शनापह्नवो न युक्तो यस्मादनुमेयत्वेनाप्युपपत्तेः। देहादिकं कार्यं भवितुमर्हति सन्निवेशविशिष्टत्वात् विनश्वरत्वाद्वा घटादिवत् तेन च कार्यत्वेन बुद्धिमत्पूर्वकत्वमनुमातुं शक्यमेव। विमतं सकर्तृकं कार्यत्वात् घटवत् यदुक्तसाधनं तदुक्तसाध्यं न यदेवं न तदेवं यथाकाशादि। परमेश्वरानुमानप्रामाण्यसाधनमन्यत्राकारोल्लेखपरत्वे "यत्नो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः। ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा" इति न्यायेन प्राणिप्रयत्नकर्मापेक्षया परमेश्वरस्य कर्तृत्वोपपत्तेः। न च स्वातन्त्र्यविरहितिरिति वाच्यं करणापेक्षया कर्तुः स्वातन्त्र्यविरहितेरनुपलम्भात् कोभाध्वापेक्षस्य राज्ञः प्रसादादिना दानवत् यथोक्तं सिद्धगुरुभिः "स्वतन्त्रस्याप्रयोज्यत्वं करणादिप्रयोक्तृता। कर्तुः स्वातन्त्र्यमेतद्धि न कर्मादानमपेक्षया" इति। तथा च तत्तत्कर्मापेक्षयाऽनुगृह्णतस्तत्साधनतदुपादानादिविशेषवतः। ततश्च कर्तृ अनुमानादिसिद्धं इति सिद्धम्। तदिदमुक्तं तत्रभवद्भिर्दृष्टान्तिभिः "दृष्ट भोग्यभोगसाधनतदुपादानादि यो विजानाति। तस्यैतद्भुवनादि दुःखमयं शरविपाकस्मिति"। अन्यत्रापि "विवादाध्यासितं सर्वं बुद्धिमत्पूर्वकर्तृकम्। कार्यत्वादावयोः सिद्धं कार्यं कुम्भादिकं यथा" इति सर्वोत्कृष्टत्वादेवास्य सर्वज्ञत्वं सिद्धम् चक्षुष्करणासम्भवात्। उक्तञ्च श्रीमत्सूक्ष्मेन्द्रैः "सर्वज्ञः सर्वकर्तृत्वात् साधनाङ्गफलैः सह। यो यज्जानाति कुरुते स तदेवेति सुस्थितम्" इति। अस्तु तर्हि सकलः ईश्वरः कर्ता न तु तावद्शरीरः घटादिकार्यस्य शरीरवता कुलालादिना क्रियमाणत्वदर्शनात् शरीरवत्त्वे चाकाशादिरपीश्वरः क्लेशयुक्तोऽसर्वज्ञः परिमितशक्तिः प्राप्नुयादिति चेन्नैवं मंस्थाः अशरीरस्याप्यात्मनः स्वशरीरसम्बन्धादौ कर्तृत्वदर्शनादभ्युपगम्यमाने ब्रूमहे शरीरवत्त्वेऽपि भगवतो न प्रागुक्तदोषानुषङ्गः। परमेश्वरस्य हि मलकर्मादिपाशजालासम्भवेन प्राकृतं शरीरं न भवति किन्तु शास्त्रं शक्तिरूपैरीशानादिभिः पञ्चभिर्मन्त्रैर्मन्त्रकादिकल्पनायामीशानमन्त्रकल्पतत्पुरुषवक्त्रोऽघोरहृदयोवामदेवगुह्यः सद्योजातपादः ईश्वर इति प्रसिद्धा। यथाऽऽत्मानुग्रहतिरोभावादानलक्षणस्थितिलक्षणोद्भवलक्षणलयपञ्चकारणं क्लेशादिनिर्मितं तच्छरीरं न चाप्राकृतशरीरसदृशम्। तदुक्तं श्रीमत्सूक्ष्मेन्द्रे "अवाङ्मनसगोचरं यदुर्नैतादृशं प्रभोः" इति। अन्यत्रापि "तदयुः पञ्चभिर्मन्त्रैः पञ्चकृत्योपयोगिभिः। ईश तत्पुरुषाघोरवामाद्यैर्मन्त्रकादिवत्" इति। ननु एवञ्चक्षुश्चरणपाणिपादादिना आगमेषु परमेश्वरस्य सकल एव शरीरेन्द्रियादियोगः श्रूयत इति चेत्सत्यं निराकारे ध्यानपूजाद्यसम्भवेन भक्तानुग्रहकरणाय तत्तदाकारपरिग्रहाविरोधात्। तदुक्तं श्रीमत्सौक्ष्मे "साधकस्य तु रक्षार्थं तस्य रूपमिदं स्मृतम्" इति अन्यत्रापि "आकारवांस्तु नियमादुपास्यो न वस्त्वनाकारतयेति बुद्धिः" इति। कृत्यपञ्चकं च प्रपञ्चितं भोजराजेन "पञ्चविधं तत्कृत्यं सृष्टिस्थितिसंहारतिरोभावाः। तदनुग्रहकरणे प्रोक्तं सततोदितस्य" इति। एतच्च कृत्यपञ्चकं शुद्धाध्वविषये साक्षाच्छिवकर्तृकं अशुद्धाध्वविषये स्वसन्तादिद्वारेणेति विवेकः। तदुक्तं श्रीमत्करणे "शुद्धेऽध्वनि शिवः कर्ता प्रोक्तोऽनन्तोचितो प्रभोः" इति। एवञ्च शिवशब्देन शिवत्वयोगिनां मन्त्रेश्वरमन्त्रेश्वरसकलशिवानां स्वाचकानां शिवत्वप्राप्तिसाधनेन दीक्षादिनोपायकलापेन सह पतिपदार्थेन संग्रहः कृत इति बोद्धव्यम्। तदित्थं पतिपदार्थो निरूपितः। सम्प्रति

पशुपदार्थो निरूप्यते। अणुचैतन्यादिपदवेदनीयो जीवात्मा पशुः न तु चार्वाकादिदेहादिरूपः "नान्यदृष्टं स्मरत्यन्यः" इति न्यायेन प्रतिसन्धानानुपपत्तेः। नापि नैयायिकादिवत् प्रकाश्यः अनवस्थाप्रसङ्गात्। तदुक्तम् "आत्मा यदि भवेज्ज्ञेयस्तस्य माता भवेत् परः। पर आत्मा तदानीं स्यात् स परो यदि दृश्यते" इति। न च जैनवदव्यापकः नापि बौद्धवत् क्षणिकः देशकालास्वामनवच्छिन्नत्वात्। तदुक्तम् "अनवच्छिन्नसद्भावं वस्तु यद्देशकालतः। तच्चित्यं विभु चेच्छन्तीत्यात्मनो विभुनित्यता" इति। नाप्यद्वैतवादिनाभिमतैकः, भोगप्रतिनियमस्य पुरुषबहुत्वप्रापकस्य सत्त्वात्। नापि सांख्यानामिवाकर्त्ता भोगप्राप्तापोहने निखिलनिरतिशयदुःक्रियादिरूपचैतन्यात्मकश्चित्वस्यवत्वात्। तदुक्तं "पाशाग्ने शिवतातृतेः" इति "चैतन्यं दुःक्रियारूपं तदात्मनि सर्वदा। सर्वतश्च यतो दुःखी श्रूयते सर्वतो दुःखम्" तत्त्वप्रकाशेऽपि "दुःखात्मानोऽपि शिवाः किन्त्वेते सर्वप्रसादतो दुःखाः। सोऽनादिदुःख एको विज्ञेयः पञ्चमन्त्रतनुः" इति। पशुस्त्रिविधः विज्ञानाकलप्रलयाकलसकलभेदात् तत्र प्रथमो विज्ञानयोगसङ्ख्यासैर्भोगेन वा कर्मक्षये सति कर्मक्षयार्थस्य कलादिभोगवत्त्वाभावात् केवलमलमायायुक्तो विज्ञानाकल इति व्यपदिश्यते। द्वितीयस्तु प्रलयेन कलादेरुपसंहारात् मलकर्मयुक्तः प्रलयाकल इति व्यपदिश्यते। तृतीयस्तु मलमायाकर्मात्मकत्रयसहितः सकल इति संज्ञायते। तत्र प्रथमो द्विप्रकारो भवति समाप्नाकलुषासमाप्नकलुषभेदात्। तत्राद्यान् आलुप्यपरिपाकतः पुरुषधौरेयान् अधिकारयोग्यानतुग्दृष्ट्वानन्तादिविद्येश्वराष्टपदं प्रापयति। तद्विद्येश्वराष्टकं निर्दिष्टं बहुदैवत्ये "अनन्तश्चैव सूक्ष्मश्च तथैव च शिवोत्तमः। एकनेत्रस्त्रयैवैकरुद्रश्चापि त्रिमूर्त्तिकः। श्रीकण्ठश्च शिखण्डी च मोक्षा विद्येश्वरा इमे"। अन्यान् सप्तकोटिसङ्ख्यातान् मन्त्रानुग्रहकरणान् विधत्ते तदुक्तं तत्त्वप्रकाशे "पशवस्त्रिविधाः मोक्षा विज्ञानप्रलयाकलौ सकलः। मलयुक्तस्तत्राद्यो मलकर्मयुतो द्वितीयः स्यात्। मलमायाकर्मयुतः सकलस्तु द्विधा भवेदाद्यः। आद्यः समाप्नकलुषोऽसमाप्नकलुषो द्वितीयः स्यात्। आद्यानतुग्दृष्ट्वा शिवो विद्येशत्वे नियोजयत्यष्टौ। मन्त्रांश्च करोत्यपरान् ते चोक्ताः कोटयः सप्त" इति। सोमयज्वनाप्यभिहितम्। "विज्ञानाकलनामैको द्वितीयः प्रलयाकलः। तृतीयः सकलः शास्त्रेऽनुग्राह्यस्त्रिविधो मतः। तत्राद्यो मलमात्रेण युक्तोऽन्यो मलकर्मभिः। कलादिभूमिपर्यन्ततत्त्वेषु सकलो युतः" इति। प्रलयाकलोऽपि द्विविधः पक्वापक्वभेदः तद्विलक्षणश्च तत्र प्रथमो मोक्षं प्राप्नोति द्वितीयस्तु पुर्यष्टकयुतः कर्मवशाच्चानाविधजन्मभाग् भवति। तदप्युक्तं तत्त्वप्रकाशे "प्रलयाकलेषु येषामपक्वमलकर्मणो व्रजन्त्येते। पुर्यष्टकदेहयुता योनिषु निखिलासु कर्मवशात्" इति। पुर्यष्टकमपि तत्रैव निर्दिष्टम् "स्यात् पुर्यष्टकमन्तःकरणं धीकर्म करणानि" इति विहतं चाघोरशिवाचार्येण "पुर्यष्टकं नाम प्रतिपुरुषनियतः सर्गादारभ्य कल्पान्तं मोक्षान्तं वा स्थितः पृथिव्यादिकलापर्यन्तस्त्रिंशत्तत्त्वात्मकः सूक्ष्मो देहः। तथा चोक्तं तत्त्वसंग्रहे "वसुधाद्यास्तत्त्वगणाः प्रतिपुरुषियतः कलान्तोऽयम्। पुर्यष्टकमन्तःकरणं धीकर्मकरणानि सर्वेषु" इति। तथा चायमर्थः समस्तद्योत अन्तःकरणशब्देन मनोबुद्ध्यहङ्कारचित्तवाचिना अन्तान्यपि पुंसो भोगक्रियायामन्तरङ्गाणि कलाकालनियतिविद्यारागप्रकृतिगुणाख्यानि सप्त तत्त्वानि उपलक्ष्यन्ते धीकर्मशब्देन ज्ञेयानि पञ्चभूतानि तत्कारणानि च तन्मात्राणि क्रियन्ते करणशब्देन ज्ञानकर्मेन्द्रियदशकं संगृह्यते। नन्वत्र श्रीमत्काश्यपोत्तरे "शब्दः स्पर्शस्तथा रूपं रसो गन्धश्च पञ्चकम्। बुद्धिर्मनस्त्वहङ्कारः पुर्यष्टकमुदाहृतमिति" श्रूयते तत्कथमन्यथा कथ्यते। अद्धा अतएव च तत्रभवता रामकण्ठेन तत्सूत्रं भक्तत्वपरतया व्याख्यातौत्पत्तिकमतिप्रपञ्चेन। तथापि कथं पुनरस्य पुर्यष्टकत्वं भूततन्मात्रबुद्धीन्द्रियकर्मेन्द्रियान्तःकरणसप्तैः पञ्चभिर्यैः स्वात्करणेन प्रधानेन कलादिपञ्चकालना वर्गेण चारत्वादिविरोधः। तत्र पुर्यष्टकयुतान् विशिष्टपशुत्वप्रदान् कांश्चिदनुगृह्य भुवनपतित्वभावं महेश्वरोऽनन्तः प्रयच्छति। तदुक्तम् "कांश्चिदनुगृह्य वितरति भुवनपतित्वं महेश्वरस्तेषामिति"। सकलोऽपि द्विविधः पक्वकलुषापक्वकलुषभेदात्। तत्राद्यः परमेश्वरस्तत्परिपाकपरिपाट्या तदनुग्रहशक्तिपातेन सप्तत्रिंशदादशोत्तरशतं मन्त्रेश्वरपदं प्रापयति। तदुक्तम् "त्रेया भवन्ति सकलाः कलादियोगादनन्तसंज्ञे काले। शतमष्टादश तेषां कुरुते स्वयमेव मन्त्रेशान्। तत्राष्टौ मण्डलिनः क्रोधाद्यास्तत्समाष्टधौरेयाः। श्रीकण्ठशतरुद्राः शतमिह्यष्टादशा-

ष्यधिकम्" इति। तत्परिपाकाधिक्यनिरोधेन शक्त्यु-पसंहारेण दीक्षाकरणेन मोक्षपदो भवत्याचार्यमूर्त्ति-मास्थाय परमेश्वरः। तदुक्तम् "परिपक्वमलानेता तत्क्षादनशक्तिपातेन। योजयति परे तत्त्वे च दीक्षया-चार्यमूर्त्तिस्थः" इति। श्रीमृगेन्द्रेऽपि "पूर्वं व्याप्तिं तस्याधोः पाशजालमपोहति" इति। व्याप्ततच्च नारायणकण्ठेन "तत्सर्वं तत एवावधार्यम् यन्नाभिसु विस्तरभिया न प्रस्तूयते। अपक्वकलुषान् बद्धानणून् भोगभाजो विधत्ते परमेश्वरः कर्मवशात्। तदुक्तम् "बद्धान् श्रेयानपरान् विनियुङ्क्ते भोगभुक्तये पुंसः। तत्कर्मेषामनुगमादिदेवं कीर्त्तिताः पशवः" इति। अथ पाशपदार्थः कथ्यते। पाशश्चतुर्विधः मलकर्ममायारोध-शक्तिभेदात्। ननु "शैवागमेषु सुख्यं पतिपशुपाशा इति क्रमात्त्रितयम्। तत्र पतिः शिव उक्तः पशवो ज्ञा-नक्रियोर्ध्वपक्वं पाशाः" इति पाशः पञ्चविधः कथ्यते तत्क-थं चतुर्विध इति गम्यते। उच्यते विन्दोर्नादात्मनः शिवतत्त्वपदवेदनीयस्य शिवपदप्राप्तिहेतुत्वेच्छया पाशत्वेऽपि तद्योगस्य विद्येश्वरादिपदप्राप्तिहेतु-त्वेनापरशक्तित्वात् पाशत्वेनानुपादानमित्यविरोधः। अतएवोक्तं तत्त्वप्रकाशे "पाशाश्चविधाः स्मृः" इति। श्रीमन्मृगेन्द्रेऽपि "प्राहुतीयौ बलं कर्म मायाकार्यं च-तुर्विधम्। पाशजालं समासेन धर्मनाम्नैव कीर्त्तितम्" इति। अस्यार्थः प्राहुणोति प्रकर्षेणाच्छादयत्यात्मनो ऽक्रियत्वे इति प्राहुतिः स्वाभाविकाशुचिर्मलः स च द्वैते स्वातन्त्र्येणेति द्वैधः। तदुक्तम् "एको ह्यनेकशक्तिक-क्रिययोच्छादको मलः पुंसः। तृणतुषकुलवज्ज्ञेयाश्चा-त्मोचितकालिकावहेति"। बलं रोधशक्तिः अस्याः शिवशक्तेः पाशाधिष्ठानेन पुरुषनिरोधायकत्वादुपचारेण पाशत्वम्। तदुक्तम् "तासामहं परा शक्तिः सर्वानुग्रा-हिका शिवा। धर्मोत्तरत्वनादेव पाश इत्युपचर्यते" इति। क्रियते फलार्थिभिरिति कर्म धर्माधर्मात्मकं योज्ञाङ्कुरवत् प्रपाकरूपेणादि। यथोक्तं श्रीमत्-किरणे "यद्यनादिर्मलस्तस्य कर्मात्मकमनादिकम्। यद्यनादि न सिद्धं वैचित्र्यं केन हेतुना" इति। मा-लख्यां शक्त्यात्मना प्रलये सर्वं जगत्, सृष्टौ व्यक्तिं यातीति भावः। यथोक्तं श्रीमत्तौरभेये "शक्तिरू-पेण कार्याणि तस्योनानि सहात्मये। विकृतौ व्यक्ति-मायाति सा कार्येण समादिना" इति। यद्यपि बद्ध वक्तव्यमस्ति तथापि ग्रन्थभूयस्त्वभयादुपरम्यते। तदित्थं पतिपशुपाशपदार्थोल्लेखः प्रदर्शितः। "पतिविद्ये तथाऽविद्या पशुः पाशश्च कारणम्। तच्चिदुक्ताविति प्रोक्ताः पदार्थाः षट्समासतः" इत्यादिना प्रकारान्तर ज्ञानरत्नावल्यादौ प्रसिद्धम्। सर्वं तत एवावगन्तव्यमिति सर्वं समञ्जसम्"।

ओषधौ च। प्रजापतिना रुद्रादिनामकरणप्रसङ्गे शत॰ ब्रा॰ ६।१।३।१२ "तमब्रवीत् पशुपतिरसीति। तदृषदस्य तन्नामाकरोदोषधयस्तद्रूपमभवंस्तोषधयो वै पशुपतिस्त-स्माद्यदा पशव ओषधीर्भक्षयन्ति अथ पतीयन्ति"। [शब्दच॰।

पशुपल्वल न॰ पशूनां प्रियं पल्वलमिव। कैवर्त्तीलतायाम्

पशुपाल त्रि॰ पशून् पालयति पालि—अण् उप॰स॰। १पशूनां पालके इत्यर्थतया मेषादीनां पालके। तस्याभोज्यान्नता मनुनोक्ता ३।१५३ श्लोके। इ॰सं॰ १४अ॰ उक्ते ऐशान्यां स्थिते २दैशभेदे च तद्देशस्थानां च पशुपालनवृत्तिक-त्वात् तथात्वम्। पशुपालस्य भावः ष्यञ्। पाशुपाल्य पशुपालनरूपे वैश्यवृत्तिभेदे "वैश्यानां पाशुपाल्यञ्च कृतिः। ण्वुल्। पशुपालक पशुपालनकर्त्तरि त्रि॰। तस्य पत्नी पाचकादित्वात् पुंयोगेऽपि न ङीष् किन्तु टाप्

पशुपाश पु॰ ६त॰। पशुरूपजीवानां बन्धे पशुपतिभक्ते ऽस्त्रम्।

पशुपाशक पु॰ "स्त्रियमानतपूर्वाङ्गीं खपादान्तःपदह्वयम्। जङ्घाभ्यां रमेत् कामी बन्धोऽयं पशुपाशकः" रतिप्रसङ्ग-व्यूहे रतिबन्धभेदे।

पशुप्रेरण न॰ ६त॰। गवादीनां चालने अमरः।

पशुमारम् अव्य॰ पशुमिव मारयित्वा क्तसुच्। पशोरिव हिं-सायाम् कयादित्वात् मारयतीत्यादेरनुप्रयोगे एवाव्य-यीभावता "पशुमारममारयत्" भा॰व॰ ११अ॰।

यज्ञे पशुमारणं शास्त्ररोधेन गवादिभिन्नौडनेनैव, न गवादिना शमित्रा करणीयमिति श्रौतस्मार्त्तायः।

पशुमोहनिका स्त्री पशुर्मोह्यतेऽनेन मुह—णिच्—ल्युट् स्वार्थे क कापि अतइत्त्वम्। १कड्वां २क्षतायाम् राजनि॰।

पशुयाग पु॰ पशुकरणको यागः ३त॰स॰। पशुद्रव्यके पशु-नामके यागभेदे स च यागः "पशौ" आश्व॰श्रौ॰सूत्रादौ विहितः "ज्ञात्वा दर्भकूर्चेन सर्वत्र श्रोतसं पशोः। हृष्णोमिच्छाक्रमेण स्नाहणार्थं पार्श्वदारुणी। सप्त तावन्-मूर्द्धन्यानि तथा स्रुवचतुष्टयम्। नाभिः श्रोत्रियपा-नञ्च गोश्रोतांसि चतुर्दश। छरो मांसावदानार्थः

क्तस्य खिटक्कदाहता। वपामादाय जुहुयात्तत्र मन्त्रं समाप्नुयात्। कृष्णिङ्गाक्रोडमस्योनि यक्कहुको गुदं खनाः। श्रोणिस्कन्धसटापार्श्वं पक्षकानि प्रपद्यते। एकादशानामङ्गानामवदानानि सङ्ख्यया। पार्श्वस्य वक्तसक्थ्नोश्च दित्वादाङ्यवर्तय। चरितार्थां स्तुतिः कार्या यस्मादयनुकल्पयः। अतोऽत्वेन होमः स्याच्छामपत्रे चरावपि कर्मप्र०। तत्कालः पशित्र्यायन्ते द्रष्टव्यः।

पशुरज्जु, स्त्री ६त०। पशुबन्धसाधनदामनि अमरः।

पशुराज पु० पशूनां राजा ट्यसमा०। सिंहे शब्दच०स्त्रियां जातित्वात् ङीष्।

पशुवर्द्धन न० ६त०। पशोः संपुष्टताविधायके व्यापारभेदे वत्सिवपशुवर्द्धनप्रकारश्च आश्व०गृ०३।६ हस्तादौ दृश्यः।

पशुष पु० पशुषु सीदति सद्-ड षत्वम्। पशुषु स्थायिनि चौरदध्यादौ ऋ० ५।४१।१ तत्र पशुषः स्थत्र यजः सः

पशुसनि वि० पशुं सनोति ददाति सन-इन्। पशुदायके यजु० १८।४८ मन्त्रः। [आख्यातकफले त्रिका०।

पशुहरितकी स्त्री पशूनां हरितकीव हितकारित्वात्।

पश्चा अव्य० पश्चात्+वेदे पृषो०। पश्चादित्यर्थे ऋ० १।१२१।५ आर्षेऽपि क्वचित् अपरशब्दस्थाने पश्चभावः। "पूर्वं पश्चा-यतावेतौ" मार्कण्डपु० ५३अ०।

पश्चात् अव्य० अपर+प्रथमापञ्चमीसप्तम्यर्थे आति पश्चादेशः। १प्रमाद्यर्थडतरेतरपरशब्दस्यार्थे २चरमे १अधिकारे च मेदि०। ततो भवार्थे त्यक्। पाश्चात्त्य पश्चाद्भवे त्रि० स्वार्थे तातिल् पश्चात्तात् तदर्थे अव्य० ऋ० ७।७२।५

पश्चात्ताप पु० पश्चात् चरमस्तापः। अनुतापे कृतस्य कर्मणो ऽनुचितत्वधिया अनुशोचने अमरः।

पश्चार्द्ध पु०अपरश्चार्द्धश्च "अपरश्चार्द्धे पश्चभावः" वार्त्ति० पश्चादेशः। अपरार्द्धे "अर्द्धं नपुंसकम्" पा० एकदेशिस-मासे तु अर्द्धपिप्पल्यादिवत् अर्द्धापरस्मिन्नर्थे वेति भेदः।

पश्चिम त्रि०पश्चाद्भवः डिमच्। १पश्चाद्भवे २प्रतीच्यां दिशि स्त्री

पश्चिमानूपक पु० नृपभेदे "पश्चिमानूपकं विद्धि तं नृपं नृपसत्तम!" भा०शा० ६७अ०।

पश्चिमरात्र पु० पश्चिमं रात्रेः एकदेशिसमा० षष्ठसमा०। रात्रेः शेषभागे "पूर्वापरोत्तरमेकदेशिनैकाधिकरणे" पा० "सर्वोऽप्येकदेशोऽङ्गा समश्नुते सङ्ग्रहाविशेषेति ग्राम-कात् मध्याह्नः सायाह्नः। केचित्तु सर्वमेकदेशः कालेन समश्नुते नत्वङ्गैव ग्रामस्य सामान्यापेक्षत्वात्। तेन मध्यरात्रः "उपरताः पश्चिमरात्रगोचरादित्यादि सिद्ध-मित्याहुः" वि०कौ०। मल्लिनाथेन तु "उपरताः पश्चि-मरात्रिगोचरादिति" पठित्वा समासान्तं निराचक्षे यथा पश्चिमा चासौ रात्रिश्चेति विग्रहः अपररात्र इत्यर्थः। पूर्वा दिक् पश्चिमं नभ इत्यादिवत् एकदेशिशब्दश्चैकदेशिशब्द-सामानाधिकरण्यादेकदेशे पर्य्यवसानं, न तु पश्चिमं रात्रे रित्येकदेशिसमासः तद्विधायके पूर्वापरादिसूत्रे प-श्चिमशब्दाप्रहणादतएव "अर्द्धः सर्वैकदेशेत्यादिना न समासान्तोऽपि तस्यापि पूर्वापरादिसूत्रोक्तसमासविषय-त्वादिति। प्रकाशकर्मस्त्वेकदेशिसमासमेवाश्रित्य समासा-न्तमाह तन्मूलं चिन्त्यम्।

पश्चिमोत्तरा स्त्री पश्चिमाया उत्तरस्या दिशोऽन्तरस्था दिक् "दिङ्नामान्यन्तराले" पा०स०। वायुकोणे विदिशि।

पश्च अव्य०दृश-बा०यः। १प्रशंसायाम् २विस्मये च शब्द-रत्ना० ३यत्नोत्कर्षणि विमर्षे त्रि० क्षी०उ०।

पश्चतोहर त्रि० पश्चात्मनमाहत्य हरति हृ-अच् अनादरे षष्ठी "वाग्दृक्पश्चात्प्रभृतो युक्तिदण्डहरेषु" वार्त्ति० अनुक्त्व०। पश्चात्मनमाहत्य हरे चौरभेदे स्वर्णकारादौ "यः पश्चतो हरेदर्थं स चौरः पश्चतोहरः" हेमच०।

पश्यन्ती स्त्री दृश-शतृ ङीप्। १दर्शिन्यां स्त्रियां २वाग्विशेषे "आत्मोपलब्धान्तरे देशे वाग्वै मित्रं हि तिष्ठति। स्थानेषु विक्ते वायौ कृतवर्णपरिग्रहा। वैखरी वाक् प्रयो-क्तृणां क्रमरूपानुपातिनी। प्राणवृत्तिमनुक्रम्य मध्यमा वाक् प्रवर्त्तते। अविभागा तु पश्यन्ती सर्वतः संहृत-क्रमा। सूक्ष्मज्योतिरिवात्मः परा वागनपायिनी" मञ्जू-षाकृतशब्दार्थः शब्दार्थरत्ने "चेतनेन श्रोतार्थविवक्षया तद्बोधकशब्दनिष्पादनाय प्रेरितमनःकरणं मूलाधार-स्थितमग्निं चालयति तच्चालितस्तत्स्थलस्थानिल-श्चालनाय प्रभवति तच्चालितेन चानिलेन तत्रैव सूक्ष्मरूपे-णोत्पादितः शब्दः परा वागित्यभिधीयते। ततो नाभि-देशपर्य्यन्तं चलितेन तेन तद्देशसंयोगादुत्पादितः शब्दः पश्यन्तीति व्यपदिश्यते एतदुदयस्य सूक्ष्मतरसूक्ष्मतमतया ईश्वरयोगिमात्रगम्यता नाम्नदीयस्तुतिगोचरता। ततस्ते-नैव हृदयदेशं परिसरता हृदयसंयोगेन निष्पादितः शब्दो मध्यमेत्युच्यते सा च सकर्णविधानेन ध्वन्यात्मकतया सूक्ष्मरूपेण कदाचिदाकलयि यमधिगम्या। ततो मुखपर्य्यन्तमागच्छता तेन कण्ठदेशं प्राप्य श्रोत्रेण मू-र्द्धानं तत्प्रतिघातेन पराहत्य च मुखविवरे कण्ठादितत्त-दुत्स्थानेषु स्वाभिघातेनोत्पादितः शब्दो वैखरीत्युच्यते

"वैखरी शब्दनिष्पत्तिर्मध्यमा श्रुतिगोचरा। द्योतितार्था तु पश्यन्ती मूला वामनपायिनी" भट्टिनाधृतवाक्यम्।

पश्चयज्ञ न० यागभेदे शत०ब्रा०३।६।६।१ [क्व० ३।१।१६भा०।

पश्चयन्त्र त्रि०पशोरिदं वा० ङ कर्म०। पशुनिर्गमनार्थयन्त्रभेदे

पश्चवदान न० पशोरङ्गविशेषस्यावदानं छेदनम्। पशोरङ्गविशेषच्छेदने पशुयज्ञे कर्मप्र० वाक्यं दृश्यम्।

पश्चाचार पु० पशूनामधिकारिविशेषाणामाचारः। तन्त्रोक्ते आचारभेदे पशुभावे "वेदोक्तेन यजेद्देवीं कामसंकल्पपूर्वकम्। स एव वैदिकाचारः पश्वाचार स उच्यते"। कुब्जिकातन्त्रे ७प० "भावश्च त्रिविधो देवि! दिव्यवीरपशुक्रमात्। विश्वञ्च देवतारूपं भावयेत् सुरसुन्दरि!। स्त्रीमयञ्च जगत्सर्वं पुरुषं शिवरूपिणम्। यभेदे चिन्तयेत् यस्तु स एव देवतात्मकः। नित्यस्नानं नित्यदानं नित्यञ्च जपार्चनम्। निर्मलं वसनं देवि! परिधानं समाचरेत्। वेदशास्त्रे दृढज्ञानं गुरौ देवे तथैव च। मन्त्रे चैव दृढज्ञानं पितृदेवार्चनं तथा। बलिहैवं तथा श्राद्धं नित्यकार्यं शुचिस्मिते!। शत्रु मित्रसमं देवि! चिन्तयेत्तु महेश्वरि!। अन्यथैव महेशानि! सर्वेषां परिवर्जयेत्। गुरोरन्यं महेशानि! भोक्तव्यं सर्वसिद्धये। कदर्थञ्च महेशानि! मिष्टुरं परिवर्जयेत्। देवतानिन्दकं दृष्ट्वा नालापञ्च समाचरेत्। सत्यञ्च कथयेद्देवि! न मिथ्या च कदाचन" महानिर्वाणतन्त्रे "दिव्यवीरभवो भावः कथं नास्ति कदाचन। केवलं पशुभावेन मन्त्रसिद्धिर्भवेद्ध्रुवम्"।

पश्चिच्या स्त्री पशुना दृश्या। पशुयागभेदे तत्कर्तव्यकालादिः कात्या०श्रौ० ६।४।१ मूलादौ दृश्यः।

पश्चिष्टका स्त्री अग्निचयनार्थे इष्टकाभेदे पशुयागे हि पञ्च इष्टका भवन्ति यथोक्तं शत०ब्रा० ६।२।१।२० "कथमश्वमेधोऽग्निः पञ्चेष्टकः सर्वः पशुभारब्धो भवतीति पुरोडाशः कपालेषु न्येवायत एवं प्रथमा इष्टकायै यत् पशुमालभते तेन पश्चिष्टकायतेऽथ यद्यपामभितो शिरसश्चकर्त्तौ भवतस्तेन शिरश्चेष्टकायतेऽथ यदिडो यूपः परिव्ययति तेन वालस्येष्टकायतेऽथ यदाज्यं प्रोक्षणीः पुरोडाशस्तेनात्रं पक्षमीष्टकायत एवमुपहाश्वमेधोऽग्निः पञ्चेष्टकः सर्वः पशुभारब्धो भवति"।

पश्चिष्टि स्त्री इत०। पशुयागङ्गे इष्टिभेदे सा च इष्टिः "इष्टिपशवोऽन्वहरतो वा" आश्व०श्रौ०२।१।२ क्रमादौ विचिता।

पश्चेकादशिनी स्त्री एकादश परिमाणमस्य डिनि ङीप् पशुना एकादशिनी। शत०ब्रा० ३।८।२ उक्ते एकादश देवताकैकादशपशुसाध्ये यज्ञभेदे ते च पशवः "आग्नेयं प्रथमपशुमालभेत् इत्युपक्रमे १आग्नेयः २सारस्वतः ३सौम्यः ४पौष्णः ५बार्हस्पत्यः ६वैष्णवदेवः ७ऐन्द्रः ८मारुतः ऐन्द्राग्नः १०सावित्रः ११बार्हत्य इत्येते चरमाद्यैकादशदेवताकाः उक्ताः।

पष्ठवाह् पुं० षष्ठेन वहति षष्ठं भारं वा वहति वह-क्विप् षष्ठी०। षष्ठवर्षीये भारसहे वृषे तथावस्थायां स्त्रियां गवि ङीप् वाह आट् षष्ठी यज्ञ० १४।८ "द्वादश षष्ठौक्षो गर्भिण्यो ब्रह्मणः" आश्व०श्रौ०८।४ १३। सम्बोधे प्लुतो दीर्घत्रिकः लोकाभिप्रायेण वेदे तु पष्ठवाट् षष्ठौक्षी इत्येव प्रयोगात्।

पस नाशने चु०उभ०सक०सेट् इदित्। पंसयति ते अपपंसत त

पसस् न० पस-असुन्। राष्ट्रे "मर्मोराष्ट्रं पशोराष्ट्रमेव" शत०ब्रा० १२।२।८।६

पस्त्य न० पस-भावे क्यिन् तत्र साधु यत्। गृहे निघण्टुः अस्त्यमिति पाठान्तरम् अस्तये स्थितये साधु यत्। तत्र हेमच० निघण्टौ तु पस्त्यमित्येव स्तृनामसु पठितम्। पस्त्यमस्यस्येति मतुप् मस्य वः दीर्घः। पस्त्यावत् सदःप्राचीनवंशादिष्टवति ऋ० १।१५।१२भा०।

पस्पश पु० शाखारम्भसमर्थके उपोद्घाते सन्दर्भग्रन्थभेदे स च महाभाष्यस्य प्रथममाह्निकात्मकः शब्दविद्योतनो भाति राजकीतिरपस्पशा" माघः।

पह्लव पु० म्लेच्छधारिते म्लेच्छजातिभेदे काम्बोजशब्दे १६०७पृ० दृश्यम्। स्त्रियां जातित्वात् ङीष्।

पह्लिका स्त्री अप+हृ+वा० ड संज्ञायां कन् कापि अतइत्वम् अपेरल्लोपः। वारिपृश्न्यां शब्दरत्ना०।

पा पाने भ्वा० पर०सक० अनिट्। पिबति पिबादेशः पिबति अपात् अपौ मेवात् पीयते पीत्वा पीतः पायः मेयं प्रपा। पिच् आययति औपचिच्च अपीप्यत्। पिपासति मेपीयते।

पा रक्षणे अदा०पर०सक० सेट्। पाति अपासीत् अपौ। पायात् पिच् पालयति अपीपलत्। पालनम् पालकः।

पांश(स)न त्रि० पंसि-ल्यु वा० दीर्घः पृषो०वा। दूषके त्रिका०

पांश(स)व पु० पां(सोः)गोर्विकारः अण्। (पाङ्गा) लवणभेदे पां(सु)शुक्रादयोऽस्य राजनि०।

पांशु(सु) पु० पंसि-नाशने औणादिकस्यमिसिसाभ्यामुज्जि

पविधाधास्त्रजिपधिमिक्षुक्षुदृद्रोर्हस्वश्च उधा० ङ दीर्घश्च। १धूकौ २शब्दार्थचिरसञ्चितगोभवैश्च विभुः उणादिसूत्रे दन्त्यान्त्य पविधातोरेव उप्रत्ययदीर्घयोर्विधानात् विभुप्रकाशे तालव्यान्ते कीर्त्तनाच्च पूषो॰दन्त्यश्च यः इति बोध्यम्। अतएव "तालव्या अपि दन्त्याः स्युः शंवभूकरपांशवः" शकारभेदे उक्तम्। २लवणभेदे न॰ "औद्भिदं पांसु-(सु)लवणं यज्जातं भूमितः स्वयम्। क्षारं गुरु कटु-स्निग्धं स्वेदनं वातनाशनम्" भावप्र०। ३पर्पटे ५कर्पूरभेदे पु॰ राजनि०। पांसु(सु)तो भवः यत्। पां(सु)-लव्य तत्र भवे त्रि०। रुद्रभेदे पु॰ यजु० १६।५५

पांसु(सु)कासीस न॰ कासीसे राजनि०।

पां(सु)कुली पांसून् कोलति कुल-संक्षेपे क गौरा॰ ङीष्। राजमार्गे त्रिका०।

पांसुकूल न॰ हृत०। निरूपपदशासनभेदे "शासनं धर्म्म-कीर्त्तः स्यात् सङ्कृतिः स्तुशासनम्। पङ्क्तिलिखा क्षुद्र-कीला पांसुकूलं न कस्यचित्" त्रिका०।

पांसु(सु)क्षार न॰ पांसु(सु)रिव क्षारम्। क्षारलवणे (पा-ङ्गालोन) शार॰ निघण्टुः।

पांसु(सु)चत्वर पु॰ पांसुभिश्चत्वर इव। धनोपले शब्दमा०।

पांसु(सु)चन्दन पु॰ पांसुर्भूत्रिचन्दनमिवास्य। विभूतिभूषिते शिवे त्रिका०।

पांसु(सु)चामर पु॰ पांसुश्चामर इवास्य। १जटासे (तौंवु) जटा०। २दूर्वाङ्कितकटोतटे २वस्त्रांचले ३प्रसंवायाम् ४पुरोटौ ५धूलिगुच्छके च मेदि०।

पांसु(सु)ज न॰ पांसु(सु)तो जायते जन-ड। (पाङ्गा) लवणभेदे रत्नमा०। पांसु(सु)भवादयोऽप्यत्र।

पांसु(सु)पत्र न॰ पांसु(सु)भिः सञ्चितगोभवैः पत्रमस्य। वाल्लूकयाके शब्दमा०।

पांसु(सु)मर्दन पु॰पांसु(सुः) सद्यतेऽत्र सद-आधारे ल्युट्। केदारे क्षेत्रभेदे त्रिका०। [(डांश) क्षारा०।

पांसु(सु)र पु॰ पांसु(सुं) राति-क। १खञ्जे २दंशके च

पांसु(सु)रागिणी स्त्री रञ्ज-घिनुण् ङीप्। पांसु(सु)भिः रागिणी इत०। मङ्गामेदायां राजनि०। [५।३य०।

पांसु(सु)राष्ट्र न॰ पांसु(सु)प्रधानं राष्ट्रम्। देशभेदे भा०स०

पांसु(सु)ल त्रि॰ पां(सु)गुरत्वस्य सिध्मा॰ लच्। १धूलियुक्ते तत्तुल्यपापयुक्ते २दुश्चले च स्त्रियां टाप्।

पाक पु॰ पच-भावे घञ्। तण्डुलादिविक्लेदनव्यापारभेदे च च स्थूलीभाजनाधःसन्तापनाद्योदनपरीक्षान्तोव्या-पारसमूहः। पिबति खनम् पा-कन् यदपि धर्मका॰ नि॰ वा। २खलपायिनि त्रिषौ ३परिपचते जरठा ४क्षेत्रादेः शोल्के अमरः। ५मेघभेदे हेराद्रिमन्त्रे ७भीतौ शब्दरत्ना॰ ८दैत्यभेदे हेमच॰ पाकशासनः। द्रव्यादेः पाकप्रकारभेदादिकं पाकराजेश्वरे उक्तं यथा

"भर्जनं तलनं स्वेदः पचनं क्वथनं तथा। तान्दूरं दृढपाकश्च पाकः सप्तविधो मतः"। भर्जनं खेवत्तवाले। तलनं स्नेहद्रव्ये, स्वेदनम् ऊष्मणुत्तापे। पचनं जले। क्वथनं विद्रद्द्रव्यरसपङ्के। तान्दूरं द्वारवद्धतप्रयत्ने, दृढपाक जठराग्नितापे ज्ञेयः"।

श्राद्धे पाकप्रकारादिः नि॰सि॰ उक्तो यथा

देवलः "तथैव यन्त्रितो दाता प्रातःस्नात्वा सङ्गाम्बरः। आरभेत नवैः पात्रैरग्निमाज्यं च बान्धवैः" अत्राग्नेयदात् स्वयमेव पाकः कार्यः अशक्तौ पत्न्या तदभावे बान्धवैः "ततस्तानि यथाशक्ति दीता जनकनन्दिनी" इति पाद्मक्रियादिति हेमाद्रिः। श्राद्धदीपकलिकायामाश्वलायनः "समानप्रवरैर्मित्रैः सपिण्डैश्चैव शुचिभिर्नरैः। होतोपकारिभिर्वैव पाकस्तार्यं प्रशस्यते"। व्यासः "स्व-हिण्डी चैव सुस्नाता पाकं कुर्यात् प्रयत्नतः। भिन्नपात्रेषु च पाकेषु पुनः स्नानं समाचरेत्"। पृथ्वीचन्द्रोदये भाद्धे "रजस्वलां च पापस्थं पुंश्चलीं पतितां तथा। अन्धां क्लीबां तथा वन्ध्यां विधवां बान्धवीमजाम्। अङ्गकर्त्तीं चतुर्थाह्नःस्नातामपि रजस्वलाम्। वर्जयेच्छ्राद्धपाकार्थं-मसापिण्डसगोत्रजाम्" मातृपितृसगोत्रजभिन्नां त्यजेदित्यर्थः। घृतविसारे न पाकं कारयेत् पत्नीमन्यां (अन्यामन्यवर्णाम्) बान्धवगोत्रजाम्। अतवत्सां च गर्भिणीं गर्भिणीं चैव दुर्भगीम्। पाकभाण्डानि तु हेमाद्रौ भागरूपखण्डे "लौ-हभाण्डेषु रौप्येषु कांस्यताम्रोद्भवेषु च। मार्त्तिकेष्वपि भव्येषु नूतनेषु दृढेषु च" तथैवादित्यपुराणे "पक्व-दृढानि सुस्नातः पात्रेषु शुचिषु स्वयम्। खण्डितोपहतेषु च। नायसेषु न भिन्नेषु दूषितेष्वपि कर्हिचित् पूर्वं कृतोपयोगेषु स्वल्पभेदेषु न तु क्वचित्"। वायुपुराणे "न कदाचित्पचेदन्नमयःस्थालीषु पैतृकम्। अयसो दर्श-नादेव पितरोऽपहरन्ति हि। कांस्यायसं विशेषेण निन्दन्ति पितृकर्मणि। फलानां चैव शाकानां कद-लीपत्रजानि च। मङ्गलेऽपि च कार्य्येषु तेषामेव हि संग्रहः। इत्यत्र नेतरस्मात्र यस्मात्तस्य दर्श-

नम्। श्राद्धदेशे तु विदुषा पितृणां तत्प्रियेच्छता। म-
ष्कानसेऽतियुक्तानामपि कार्यं न दर्शनम्"। तत्रैव "पच-
मानस्तु मांसेषु भक्षणा तान्नमयेषु च। सप्तरात्रं वै
घोरात् पितॄन् दुःखमवार्ष्यवात्। तैजसानामभावे तु
पिठरे मृण्मयेऽपि च। नवे शुचौ प्रकुर्वीत पाकं पि-
तृणमादरात्"। तत्रैवादित्यपुराणे "पक्वान्नस्थापनार्थं तु
शस्तानि दारुजान्यपि। दर्व्यादीन्यपि कार्याणि यज्ञि-
यैरपि दारुभिः"। यमः "विवाहे प्रेतकार्ये च माता
पित्रोः क्षयेऽहनि। नवभाण्डानि कुर्वीत यज्ञकाले वि-
शेषतः"। अत्र पाकाग्निमाह हेमाद्रौ प्रजापतिः "लोपा-
मुद्रेनान्नसिद्धिरग्नीकरणमेव च"। पृथ्वीचन्द्रोदये अङ्गिराः
"शालाग्नौ तु पचेदन्नं लौकिके वापि नित्यशः। वह्नि-
ग्नौ पचेदन्नं तस्मात् होमो विधीयते"। मनुः "वैता-
निकेऽग्नौ कुर्वीत गृह्यं कर्म यथाविधि। पञ्चयज्ञ-
विधानञ्च पक्तिं चान्वाहिकीं द्विजः"। श्राद्धस्य गृह्यत्वं
लोकमपरार्केण, अत्र विशेषः कर्मप्रदीपे "प्रातर्होमं तु
निर्वर्त्य समुद्धृत्य कृताग्रतः। शेषं भक्षणसे कृत्वा
तत्र पाकं समाचरेत्। पाकान्नेऽग्निं समाहृत्य गृ-
ह्याग्नौ तु पुनः क्षिपेत्। ततोऽग्निं वैश्वदेवादिकर्म कु-
र्यादतन्द्रितः"। तदभावे लौकिके "ततः पचेयुरन्नानि
निर्वाणान्नार्त्र मनेः। वैवाहिकेऽग्नावन्यत्र लौकिके
वापि संयतः" इति दीपकलिकायां संग्रहोक्तेः"।

पाकभाण्डस्य त्याज्यत्वं यथा "नित्यं नूतनभाण्डेन
कर्त्तव्यः पाक एव च। अथवा पक्षपर्य्यन्तं ततस्त्याज्यं
मनीषिभिः" इति ब्रह्मवैवर्त्ते पु०। पाककाले शूद्रादावग्नि-
दाननिषेधो यथा "शूद्रादाग्निञ्च यो दद्यात् पाककाले
विशेषतः। शूद्रपक्वं भवेदन्नं ब्राह्मणः शूद्रतामियात्"
कर्मलोचनम्। एकोद्दिष्टश्राद्धे तस्य नित्यत्वं यथा
"एकोद्दिष्टन्तु कर्त्तव्यं पाकेनैव सदा क्षयम्। अभावे
पाकपात्राणां तदहः सप्तपोपणम्" श्राद्धत०। शूद्रेण
तत्रापि श्रामाद्धेनैव कार्यम् "श्राद्धं शूद्रस्य पक्वा-
न्नमित्युक्तेः श्रामाद्धेनैव शूद्रेणेत्युक्तेश्च पाकविधिर्यथा

"पूर्वाशाभिमुखो भूत्वा उत्तराशामुखोऽथ वा।
पचेदन्नञ्च मध्याह्ने सायाह्ने च विवर्जयेत्। अन्नाशा-
भिमुखे पक्वमन्नतान्नं विजानता। पूर्वमुखो धर्मकामः
शोकहानिञ्च दक्षिणे। श्रीकामश्चोत्तरमुखः प्रतिकामश्च
पश्चिमे। ऐशान्याभिमुखे पक्वा दरिद्रो जायते नरः।
यदा तु याम्ये पात्रे पक्वमश्नाति वै द्विजः। स पापि-
ष्ठोऽपि मुक्तोऽन्नं रौरवे परिपच्यते। ताम्रे पक्वा
चक्षुर्भामनो वै भवते क्षयम्। पित्तभ्यां पक्वमन्नञ्च
पित्तव्येच वर्द्धनि!। पुण्डरीकस्य यज्ञस्य भवते फ-
लमीप्सितम्। वातलेन तु यत्पक्वं भक्षित्वा च कनि-
ष्ठया। श्वसगोत्रेण यत्पक्वं शोणितं तदपि क्षतम्। श्व-
भक्षेण च यत्पक्वं स्त्रिया पक्वन्नथैव च। पक्वपात्रे
च यत्पक्वं तत्सर्वं निष्फलं भवेत्। षड्भुवरेण काष्ठेन
कदम्बस्य दलेन च। शालेन करमर्हेन उदरावर्त्तकेन
च। पक्वान्नं नैव भुञ्जीत भुक्त्वा रात्रिमुपावसेत्। गर्हि-
तान्नमवीरान्नं भुक्त्वा कृच्छ्रं समाचरेत्। अप्रजा वा
तु वनिता नाश्नीयादेव तद्गृहे। शावकाशस्य पक्वान्नं शि-
रीषकस्य चैव हि। कलिचखातकस्यैव वल्मीकस्यक
च। एरण्डशाल्मलेर्वापि पक्वान्नं गर्हितं स्मृतम्।
यदा मृण्मयपात्रे तु पक्वं वै सर्वकालिकम्। मासे पक्षे
तथाष्टाहे तत्पात्रं विसृजेत् सुधी। धनःपात्रे तथा
सिंहे मिथुने वा वरानने!। यः कुर्य्याद्भोजनं देवि!
लक्ष्मीस्तेन विमुच्यति। एकदा तु जलं दद्याद्दधिवारं न
प्रदापयेत्। त्रिभागं पूरयेत् पात्रं पक्वान्नेयं न दापयेत्"
मत्स्यसूक्ते ४२अ०। जाठराग्निना पाकप्रकारस्तु अन्न-
करशब्दे ६६८पृ० उक्तः

औषधपाकप्रकारस्तु चक्रपाणिदत्तादिग्रन्थे दृश्यः।
पच्यते फलं यत्र काले आधारे यत्। फलपाकादि-
करणे कालभेदे शुभाशुभसूचकग्रहोत्पातादीनां पाक-
कालश्च बृ० सं० ९७ अ० उक्तो यथा

"पक्षाद्वानोः सोमस्य मासिकोऽङ्गारकस्य वक्रस्य।
वा दर्शनाद्व पाको बुधस्य जीवस्य वर्षेण च। षड्भिः सि-
तस्य मासैरब्देन मनेः सुरद्विषोऽब्दाधात्। वर्षाभूर्यं-
पक्वे सद्यः स्यात् त्वाष्ट्रीकवसोः। त्रिभिरेव धूमके-
तोर्मासैः शेतस्य सप्तरात्रान्ते। सप्ताहात् परिवेषेन्द्र-
चापसन्ध्याभ्रसूचीनाम्। शीतोष्णविपर्य्यासः फलपुष्प-
मकालजं दिशां दाहः। स्थिरचरयोरन्यत्वं प्रकृतिवि-
कृतिश्च वृष्टमासात्। अक्रियमाणकरणं भूकम्पोऽनु-
त्सवो दुरितं च। शोषणचाप्योश्चानां स्रोतोऽन्यत्वं च
वर्षाद्यैः। सम्भ्रमरुदितप्रकम्पित-
स्वेदाः। मासत्रयेण कलहेन्द्रचापनिर्घातपाकाश्च।
कीटाखुमक्षिकोरगबाहुल्यं मृगविहङ्गमरुतं च। सो-
दस्य चापसु तरणं त्रिभिरेव विपच्यते मासैः। प्रसवः
शुनामरण्ये वन्यानां ग्रामसञ्चरेषु च। मधुनिलयतोरन्ये-

न्द्रध्वजाश्च वर्षात् समधिकादा । गोमायुष्टप्रसङ्गा दशाह्निकाः सद्य एव तूर्यरवः । चाक्षुषं पक्वफलं वल्मीकविदारणं च भूपाले । खड्गताडप्रक्षालनं शततैलवसादिवर्षणं चापि । सद्यः परिपक्वले मासेऽध्वर्द्धे च जनवादः । क्वचितियूपकृतवह्नीजानां सप्तभिर्भवति पक्वैः । अलक्ष तोरणस्य च केचिन्मासात् फलं प्राहुः । अल्पनविरुद्धानां स्वेदः शब्दश्च विवति भूतानाम् । मार्जारनकुलयोर्भूषणेन सङ्गश्च मासेन । गन्धर्वपुरं मासाद् रसवैक्लव्यं स्थिरगजविक्रतिश्च । ध्वजवेश्मपांशुधूमाकुला दिग्दाघापि मासफलाः । नवकैकाष्टदशकैकषट्त्रिकत्रिकसंख्यमासपाकानि । नक्षत्राणप्रश्निपूर्वकाणि सद्यःपाकाश्लेषा । पित्र्याग्न्यः षट् षट् त्रयोऽर्द्धमष्टौ च त्रिषड्रेकैकाः । मासचतुष्काषाढे सद्यःपाकाभिजित्तारा । सप्ताष्टावध्यर्द्धं त्रयस्त्रयः पञ्च चैव मासाः स्युः । अश्वत्थादीनां पाको नक्षत्राणां यथासंख्यम् । निगदितसमये न दृश्यते चेद् अधिकतरं दिनुषे प्रपच्यते तत् । यदि न कनकरत्नगोप्रदानैरुपशमितं विधिवद्द्विजैश्च शान्त्या" । दशाशब्देऽस्यार्द्धशब्दे च यद्दृश्चितफलपाकभेदो दृश्यः । कर्मणि घञ् । १०परिपक्के ऋ० ७।१०४।६ ११परिणतबुद्धौ च त्रि० पाकस्यत्वनञ्शब्देऽस्यम् । १२अल्पे १३प्रशस्ते च पाकयज्ञशब्दे दृश्यम् । पाकस्य अल्पस्य प्रशस्य वा भावः तृच्या० इमनिच् । पाकिमन् तद्भावे पु० । पाकस्यादूरदेशादिः पञ्चा० फक् । पाकायन पाकस्यादूरदेशादौ त्रि० । [शब्दमाला ।

पाकक्षण पु० पाके फलपाके क्षणः । (पानीयामला) द्रुचभेदे

पाकज न० पाकाज्जायते जन–ड । १काचलवणे । २पाकजातमात्रे त्रि० । "अतृष्णाग्नेरुपाकजः" भाषा । ३परिणामशूलरोगे । [ऋ०८।१८।५ ।

पाकत्रा अव्य० पाकः विपक्वप्रश्नः स्वार्थे त्रा । विपक्वप्रश्ने

पाकदूर्वा स्त्री पाकयुक्ता दूर्वा मा० त० । परिपक्वदूर्वायाम् ऋ० १०।१६।१३ भा० ।

पाकदिष् पु० पाकाय देवाय इष्टिं दिश्–क्विप् ७त० । पाकयागने रुद्रे शेमच० । पाकारिभक्षतयोऽस्यत्व ।

पाकपात्र न० पाकसाधनं पात्रम् शाक० त० । पचनसाधने पात्रे स्थाल्यादौ । तद्भेदाः पाकशब्दे दृश्याः । पाकभाजनशाकभाण्डादयोऽस्यत्व ।

पाकपुटी स्त्री पाकसाधनं पुटी मा० त० । (पोवान) कुम्भपाकार्थमाधारायाम् शेमच० ।

पाकफल न० पाकयुक्तं फलमस्य मा० त० । (पानीयामला) फलपाके शब्दच० ।

पाकमत्स्य पु० पाकः पक्वः मत्स्यः । १पक्वमत्स्ये व्यञ्जनभेदे शब्दच० । २कीटभेदे सुश्रुतः कीटशब्दे २०५८ पृष्ठे दृश्यम् । साहसे ३मत्स्यभेदे सुश्रुतः निरोधशब्दे ४०८६ पृ० दृश्यम् ।

पाकयज्ञ पु० पाकसाध्यो यज्ञः मा० त० । चरुपाकेन कर्त्तव्ये यज्ञभेदे स च यज्ञः हवोत्सर्गादिहोमः । "पाकयज्ञे तु साहस्रम्" ति० त० उक्तेस्तत्राग्निः साहस्रः । पाकः अल्पः बाहुल्यसाम्यात् प्रशस्तो वा यज्ञः । २अल्पयज्ञे ३प्रशस्तयज्ञे च यथाह "त्रयः पाकयज्ञाः" आश्व०गृ०।।१२। स्वे नारायणः ।

"पाकयज्ञास्त्रयस्त्रिविधा इत्यर्थः । कुतः हुताः प्रहुताः ब्राह्मणे हुताः" इत्येकैकस्मिन् बहुवचननिर्देशात् । यदि हि त्रिविधत्वं न स्यात् एकवचनेन निर्देशं कुर्यात् । तस्मात् त्रिविधत्वमिति । पाकयज्ञाः अल्पयज्ञाः प्रशस्तयज्ञा वा । इष्टयोभयत्र पाकशब्दः । योऽस्मात् पाकतरः इत्यत्रास्त्वे पाकशब्दः । तं पाकेन मनसाऽपश्यम् इति यो मा पाकेन मनसा इति च प्रमंशायाम् । तेन श्राद्धहोमेष्वपि पाकयज्ञतन्त्रं सिद्धं भवति । यदि हि पाकशब्दः पक्वौ वर्त्तेत श्राद्धहोमेषु तन्त्रं न स्यात् । दृश्यते च तस्मात्र तत्र वर्त्तते । प्रशस्तयज्ञा इत्युक्तम् । कथं प्रशस्तत्वम् उच्यते यज्ञादेतेषु संस्कारा उच्यन्ते । तेन ब्राह्मणमवाप्यते । के पुनस्ते संस्काराः । गर्भाधानादयः । तस्मात् सर्वेषां पाकयज्ञत्वमिति यदुक्तं तत् सम्यक् । कथं त्रिविधत्वमित्यत आह "हुता अग्नौ क्रूयमाना अनग्नौ प्रहुता ब्राह्मणे (ब्राह्मणभोजने) हुताः" इति० ।

पाकयज्ञिक पु० पाकयज्ञस्य तत्प्रतिपादकग्रन्थस्य व्याख्यानो ग्रन्थः पाकयज्ञे भवो वा ठञ् । १पाकयज्ञप्रतिपादकग्रन्थव्याख्याने ग्रन्थे २पाकयज्ञभवे च । [१।७।४।१६

पाकयज्ञिय त्रि० पाकयज्ञमर्हति घ । पाकयज्ञार्हे शत० ब्रा०

पाकरञ्जन न० पाकं पच्यमानं रञ्जयति रञ्ज–णिच्–ल्यु । तेजपत्रे शब्दच० ।

पाकल न० पाकं लाति ला–क । १कुटौषधौ (कुड़) अमरः २वङ्गे श्यामे च पु० विश्वः । ४कर्कोटक्यां स्त्री गौरा० ङीष् । शब्दमा० १कुक्कुरज्वरे हवोधनद्रव्ये च पु० मेदि० ।

पाकलि स्त्री पा–पाने बाहुलकात् भावे–क्विप् तां पाकं कलयति

कल-कर्त्तरि ट्रन्। रोहिषीति ख्याते हरिणभेदे रत्नमा०।

पाकशाला स्त्री ६त०। पाकस्थाने पाकगृहपाकस्थानादयोऽत्र "प्राच्यां दिशि स्नानगृहमाग्नेय्यां पचनालयम्" पी०धा० धृतवाक्यम् गृहशब्दे दृश्यम्।

पाकशासन पु० पाकं तन्नामदैत्यं शास्ति शास-ल्यु। इन्द्रे तस्य तन्नामकता यथा "पाकं जघान तीक्ष्णाग्रैर्भोगैर्यः कटुवासवैः। तत्र नाम विभुर्लेभे शासनत्वाच्छतैर्दृढैः। पाकशासनतां शक्रः सर्वामरपतिर्विभुः" वामनपु०।

पाकशासनि पु० पाकशासनापत्यम् इञ्। इन्द्रपुत्रे १वैजयन्ते अमरः २अर्जुने ३शक्तिवानरे च। [शब्दच०।

पाकशुक्ला स्त्री पाके परिणामे शुक्ला। (खड़ि)ख्याते पदार्थे

पाकसंस्थ त्रि० पाकः संस्था यस्य। पाकसाध्ये यज्ञभेदे। स च गौतमेन दर्शितः "अष्टका पार्वणश्राद्धं श्रावण्याग्रहायणीचैत्राश्वयुजी चेति सप्त पाकसंस्थाः"। हारीतः "पाकयज्ञानृयज्ञेभ्यं ऋषियज्ञांश्च नित्यशः। सोमांश्च विधिपूर्वेण य इच्छेद्धर्ममव्ययम्"।

पाकसुत्वन् पु० पाकेन परिपक्वेन मनसा सुनोति सोमाभिषवं करोति सु-क्वनिप् तुक् च। परिपक्वमनसा सोमाभिषव कर्त्तरि यजमाने ऋ० १०।८६।१६।

पाकारि पु० पाकमकति अक-इन्। १श्वेतकाञ्चने रत्नमाला। ६त०। २पाकशासने इन्द्रे च।

पाकरु त्रि० पाकेन सुखपाकेन अरत्रं यस्य पाकस्य अन्नादिपाकस्य वा अरः छतम् अक०। १सुखपाकेन छते २अन्नपाकनाशके अग्निमान्द्ये च यजु० १२।८५। वेददी०।

पाकिन् त्रि०पच-घञ् णिनुष् कुत्वम्। १पाककर्त्तरि २पाकयुते च स्त्रियां ङीप् पाकी इत्यादि हस्व०।

पाकिम त्रि० पाकेन निर्वृत्तः भावान्तत्वात् पाक+इमनच्। पाकेन निर्वृत्ते सि०कौ०।

पाकु त्रि० पच-उण् न्यङ्क्वा० कुत्वम्। पाचके [उणादि०

पाकुक त्रि०पच-उकञ् चस्य कत्व। सूपकारे पाचके उणा०।

पाक्य त्रि० पच-कर्मणि यत् चस्य कत्व। १पक्तव्ये पाकेन साध्यम् पाकस्य हितं वा भा० यत्। २विड्लवणे न० अमरः ३पांशुलवणे रत्नमा० ४यवक्षारे पु० अमरः।

पाक्षिक त्रि० पक्षे पक्षदशतिथ्यात्मके काले पक्षान्तरे संभवकोटिभेदे वा भवः ठञ्। १पक्षकालभवे २पक्षान्तरभवे ३संभवैकोटीभवे च "नियमःपाक्षिके सति" मोमांसा।

पाक्षिण्य त्रि० "पाक्षेण त्रयीधर्मः पाक्षिण्य निगद्यते" दक्षुक्तेः पाक्षेति पा-क्विप् पाः त्रयीधर्मः तं क्षपयति खण्ड-क्यप् उप०स०। पाक्षण्ये सर्वविद्विनि अमरटीकायां भानुदीक्षितः। मूर्खन्यसध्यः सर्वसम्मतः।

पागल त्रि० पिबति सुरां पा+कर्त्तरि क्विप् पाः सुरापावीव गलति स्खलति गल-अच्। उन्मत्ते "पागलायाङ्गहीनाय चान्धाय बधिराय च। जड़ाय चैव मूर्खाय क्लीवतुल्याय पापिने। ब्रह्महत्यां लभेत् सोऽपि यः खकन्यां ददाति च" ब्रह्मवै० प्रकृ० १३अ०।

पाङ्क्त त्रि० पङ्क्तौ भवादि वा तत्रेदा० अञ्। १पङ्क्तिभवे २दशाक्षरपादकछन्दोभेदयुते च। पङ्क्तिसंख्याऽस्त्यस्य अण्। ३तत्संख्यायुतावयवयुते पशौ ४पुरुषे च "पाङ्क्ताः पुरुषः पाङ्क्ताः पशवः" ताण्ड्यब्रा० २।३२। "पाङ्क्ताक्षे छन्दसि पङ्क्तसंख्या विद्यते तस्य पङ्क्तिभिः पदैरेवैतत्वात् पुरुषेऽपि हौ हस्तौ हौ पादौ शिरश्चेति पञ्चसङ्ख्या विद्यते पशुष्वपि चत्वारः पादाः पुरुषेति पञ्चसंख्यास्ति" भा० पङ्क्तिश्छन्दसः दशाक्षरपादकत्वात् चतुर्षु चरणेषु चत्वारिंशदक्षराणि सन्ति तेन चतुष्टुपा सहचरत्वा पञ्चपादत्वमिति बोध्यम्।

पाचक त्रि० पच-ण्वुल्। १पाककर्त्तरि तद्वृत्तियुक्ते २रूपकारे च। ३अग्नौ पुंस्यायु०तस्य जठराग्निरूपेण वाड्वाद्यादेश पाचकत्वात्तथात्वम् ४पित्ताख्ये धातौ भावप्र० "पाचकं रञ्जकं चापि साधकालोचके तथा। भ्राजकश्चेति पित्तस्य नामानि स्वानभेदतः" भावप्र०। तत्कार्यभेदेन पित्तशब्दे दृश्यः। अन्नादौ विषदानादिपरिजिहीर्षया स्वयमादिभिर्यथा पाचकः वैद्याद्यधिष्ठितः करणीयत्वेन सुश्रुते कल्पस्थाने दर्शितं यथा "विषैर्मिश्रन्तु निपुणं स्वयमेव दुष्टचेतसः। स्त्रियो वा विविधान् दोषान् कदाचित्सुभगेच्छया। विषक्लेदोपयोगाद्वा यथाच्छन्नादसूत्ररः। तस्माद्देहेन सततं विषादूह्यो नराधिपः। यस्माच्च चेतोऽनित्यत्वमस्यवत् प्रथितं स्वयम्। न विश्वसात्ततो राजा कदाचिदपि कस्यचित्। कुलीनं धार्मिकं स्निग्धं सुश्रुतं सततोत्थितम्। अलुब्धमठं भक्तं शतत्रं प्रियदर्शनम्। क्रोधपारुष्यभाक्षर्यमदाल्स्यविवर्जितम्। जितेन्द्रियं क्षमावन्तं शुचिं शौचसमन्वितम्। मेधाविनमसंभ्रान्तमतुरक्तं स्थितैषिणम्। पटुं प्रगल्भं निपुणं दक्षं मायाविवर्जितम्। पूर्वैश्चैव गुणैर्युक्तं नित्यं सद्भिश्चितासदम्। महानसे प्रयुञ्जीत वैद्यं तद्विद्यपूजितम्। प्रसक्तादिगुणैर्हीनं शुचिभाण्ड

मङ्गल्यम्। सजातकं गवाह्निकमात्रवर्गनिषेवितम्। विकलक्लिष्टसंसृष्टं सवितानं क्षतार्चनम्। परीक्षितस्त्रीपुरुषं भवेद्वापि सङ्कुलसम्। तत्राध्यक्षं नियुञ्जीत प्रायो वैद्यगुणान्वितम्। शुचयो दक्षिणा दक्षा विनीताः प्रियदर्शनाः। संविभक्ताः शुभनखा नीचकेशनखाः स्थिराः। स्नाता दक्षं संयमिनः क्षतोष्णीषाः सुसंवृताः। तस्य चाप्तविज्ञेयाः स्युर्विविधाः परिकल्पिताः। आहारस्तिलवाप्यत्र भवन्ति प्राणिनो यतः। तस्मात्सङ्कुलसंस्थे वैद्यः प्रमादरहितो भवेत्। आहानसिकोदारः सौपौदनिकपौपिकाः। भवेयुर्वैद्यवशगा ये चाप्यन्ये तु केचन। दक्षितस्तो मनुष्याणां वाक्चेष्टासुखवेक्षितैः। विद्याद्विषस्य दातारमेभिर्लिङ्गैश्च बुद्धिमान्। न ददात्युत्तरं पृष्टो विक्षसम् मोक्षमेति च। अपार्थं बहुसङ्कीर्णं भाषते चापि मूढवत्। स्फोटयत्यङ्गुलीर्भूमिमकस्माद्विलिखेद्वसेत्। वेपथुर्जायते तस्य तस्तवान्योऽन्यमीक्षते। घामो विवर्णवक्त्रश्च नखैः किञ्चिच्छिनत्त्यपि। आत्मेतासक्तदीनः करेण च शिरोरुहान्। निर्विद्यासुरपहारैर्वीक्षते च पुनः पुनः। वर्त्तते विपरीतस्तु विषक्षता विचेतनः। जेच्छिद्यात् पार्थिवस्य त्वरिता वा तदाज्ञया। असतामपि सन्तोऽपि चेष्टां कुर्वन्ति मानवाः। तस्मात् परीक्ष्यं कार्यं भक्तानामादितो नरैः। अन्ने पाने दन्तकाष्ठे तथाभ्यङ्गेऽनुलेपने। उत्सादने कषाये च परिषेकेऽन्तलेपने। क्षौद्रे वस्त्रेषु शय्यासु कवचामरवेषु च। पादुकापादपीठेषु पृष्ठेषु गजवाजिनाम्। विषद्युष्टेषु चान्येषु सद्यघ्नाञ्जनादिषु। लक्षणानि प्रवक्ष्यामि चिकित्सामथ कालतः। अभुक्तान्नपाचकौषधादौ त्रि०।

पाचन न०पाचयति कर्त्तरि ल्युट् पाच्यतेऽनेन करणे ल्युट् वा। १पाचनद्रव्यकारके प्रायश्चित्ते मेदि० तस्य फलोत्पादनेन पापस्य नाशनात् तथात्वम्। २दोषपाचनसाधनद्रव्यभेदे तानि च चक्रपाणिदत्तेन रोगभेदे नानाविधान्युक्तानि तत्र द्रव्याणि यथा "ज्वरितं बहुदोषन्तीति लघ्वन्नमतिभोजनम्। यस्माद्धातु पच्यतेऽस्मिन्ने सामे स्यात् पाचनं हितम्"। सर्वपाचनद्रव्यप्रमाणं वैद्यके उक्तं यथा "दशरत्तिकमादेयं गृहीत्वा तोलकद्वयम्। दत्त्वाम्भः षोडशगुणं पाचं पादावशेषितम्" २अम्लो पु० मेदि०। ३अम्लरसे हेमच०। ४रक्तरेखके पु० राजनि०ङीप्। रितक्षां स्त्री ङीप् मेदि०। स्वार्थे क। पाचनक तत्रार्थेषु पाचन+संज्ञायां कन्। टङ्कने (सोहागा) हेमच०।

पाचल न०पाचयति पच–घिच् बा०कलन्। १पाचने हेमच० २पाचके २अम्लो ४रञ्जनद्रव्ये ५वायौ च पु० शब्दर०।

पाची स्त्री पाचयति पाचि–इन् गौरा० ङीष्। मरकतपत्र्यां हरितलतायां (पाच्चे) ख्याते लतामेदे राजनि०

पाच्य त्रि०पच–आवश्यके ण्यत् आवश्यकार्थत्वात् न कुत्वम्। अवश्यपचनीये।

पाजस् न० पाति रक्षत्यनेन पा–असुन् जुट् च। १बले निघण्टुः पृथो० षस्य वः। वाजस् अन्ने निघण्टुः पाजसे हितम् यत्। पाजस्य बलकरे त्रि० यजु० २५।८।

पाञ्चकपाल त्रि० पञ्चाहारहिगुः तस्येदम् अण्। पञ्चकपालसम्बन्धिनि। द्विगुनिमित्तत्वाभावात् "द्विगोर्लुगनपत्ये" पा० न लुक् त्रि०कौ०।

पाञ्चजन्य पु० पञ्चजनस्य दैत्यभेदस्येदम् बा० यञ्। पञ्चजनदैत्यास्थिनिर्मिते १विष्णोः शङ्खे तत्कथा "षष्ठेऽहः प्रत्युवाचेदं दैत्यः पञ्चजनो महान्। तिमिरूपेण तं बालं यत्नवानिति भारत!। स पञ्चजन्यमासाद्य जघान पुरुषोत्तमः। न चाससाद तं बालं गुरुपुत्रं तदाऽच्युतः। स तु पञ्चजनं कृत्वा शङ्खं सेभे जनार्दनः। स च देवमनुष्येषु पाञ्चजन्य इति श्रुतः" हरिवं० ६०अ०। पञ्चभिर्जनैर्निर्वृत्तः अण्। पञ्चजननिष्पाद्ये पञ्चवर्णे काश्यपवासिष्ठप्राचाङ्गिरसच्यवनरूपाग्निपञ्चकसाध्ये २वह्निभेदे यथोक्तं भा०व० २१८अ०। "काश्यपो ह्यथ वासिष्ठः प्राचश्च प्राचपुत्रकः। अग्निराङ्गिरसश्चैव च्यवनश्चाग्निसप्तमकः। अथरत् स तपस्तीव्रं ह्यर्थे वह्नेरथार्थिकम्। ह्यं जगेयं धर्मिष्ठं यशसा ब्रह्मचा यमम्। महाव्याहृतिभिध्यातः पञ्चभिस्तैस्तदा तथ। अग्ने तेजोमहार्चिष्मान् पञ्चवर्णः प्रभावतः। धूमिद्योऽग्निः शिरस्तस्य बाहू सूर्यनिशौ तथा। स्वङ्नेत्रे च सुवर्णाभे जघ्ने जङ्घे च भारत। पञ्चवर्णः स तपसा ह्यतस्तैः पञ्चभिर्जनैः। पाञ्चजन्यः स्मृतोदेवः पञ्चयज्ञकरस्तु सः"। पाञ्चजन्यशब्दोऽस्यादेवादि चतुरर्थ्यां० कर्णा०फिञ्। पाञ्चजन्यादयि तत्सम्बन्धिदेवादौ त्रि०।

पाञ्चजन्यधर पु० पाञ्चजन्यं धारयति धारि–अच् तुक्। विष्णौ हारा०। [प्रवदश्यां भवे

पाञ्चदश्य त्रि० पञ्चदश्यां भवः कालत्वेऽपि सन्निवेशा०यञ्। पाञ्चदश्य पु० पञ्चदशभिः सामधेनीमन्त्रैः प्रकाश्यः यज्ञः। पञ्चदशभिः सामधेनीमन्त्रैः प्रकाश्ये अग्नौकिके यज्ञौ भाग० ६।१।२३।

पाञ्चभौतिक त्रि॰ पञ्चभ्यो भूतेभ्य आगतः ठक् द्विपदवृद्धिः। आकाशादिभूतपञ्चकारब्धे देहादौ "पाञ्चभौतिको देहः" "चातुर्भौतिकमित्येके" "ऐकभौतिकमित्यपरे" सा॰सू॰। "ऐकभौतिकमैकैकिकभौतिकमित्यर्थः तत्र मनुष्यादिशरीरे पार्थिवाधिक्येन पार्थिवता एवं सूर्यादिलोकेषु तैजसाधिक्येन तैजसादिता शरीराणां सुवर्णादीनामिव" भा॰। इत्यनेकेषां मतसङ्गा ५ अ॰ स्वयं निर्णयवक्ष्यतीत्युक्तो यथा "न पाञ्चभौतिकं शरीरं बह्वनासपादानायोगात्" सा॰सू॰ "बह्वनां भिन्नजातीयानां चोपादानत्वं घटपटादिष्वस्ति न इष्टमिति सजातीयमेवोपादानम्। इतरत्र भूतचतुष्टयसपञ्चकमित्याशयेन पाञ्चभौतिकत्वव्यवहारः। एकोपादानकत्वेऽपि पृथिव्येवोपादानं सर्वशरीरस्य शरीरस्यैकमात्रभूतोपादानकत्वं पूर्वोक्तमनेनैव प्रसङ्गेन विशिष्याह" भा॰ "सर्वेषु पृथिव्युपादानमसाधारण्यात् तद्व्यपदेशः पूर्ववत्" सां॰ सू॰ सर्वेषु शरीरेषु पृथिव्येवोपादानम् असाधारण्यात् आधिक्यादिभिरुत्कर्षात्। अत्रापि शरीरे पाञ्चभौतिकादिभौतिकत्वव्यपदेशः पूर्ववत् इन्द्रियाणां भौतिकत्वदुपञ्चकत्वमात्रेणेत्यर्थः" भा॰। अयञ्च सांख्यपक्षः। वेदान्तिमते तु तत्प्रात्मकता कायस्य तत्र कायशब्दे १६२४ पृष्ठादौ दर्शितं तत्र द्रष्टव्यम्।

पाञ्चालिका स्त्री पञ्चाली स्वार्थे कन् ततः स्वार्थे क वापि अतइत्त्वम्। वस्त्रादिनिर्मितपुत्तलिकायाम् हिरू॰।

पाञ्चवर्षिक त्रि॰ पञ्च वर्षाः प्रमाणमस्य ठञ् तस्य वा न लुक्। पञ्चवर्षवयस्के त्रिका॰।

पाञ्चशब्दिक त्रि॰ पञ्चभिः शब्दैर्निर्वृत्तं ठक्। पञ्चभिः शब्दैर्निष्पादिते वाद्यभेदे। पञ्चशब्दाश्च वाद्यभेदाः यथा "अङ्गजं कर्मजं चैव तन्त्रजं कांस्यजं तथा। फुत्कृतं चेति मुनिभिः कथितं पाञ्चशब्दिकम्" स्कन्दे रेवाख॰।

पाञ्चार्थिक पु॰ पञ्च अर्था इत्यादि पाशादिवा यस्य सन्ति ठन् वा॰ इद्धिः। १पशुपतिशब्ददर्शितत्रित्वपञ्चकान्विते २ततोऽपि पञ्चपदार्थयुते च पाशुपतागमे त्रिका॰।

पाञ्चाल त्रि॰ पञ्चालदेशे भवः स्वार्थे वा अण्। १पञ्चालदेशभवे स्त्रियां ङीप्। पाञ्चाली। २पञ्चालदेशे च पुंस्यां बहुत्वाद्यन्यतोऽनवगतानां प्रकाशनायालमिति पृथो॰। ३शास्त्रे "ग्रहणं च निग्रहणं च शास्त्रं पाञ्चालसंज्ञकम्" भाग॰ ४।२६ श्रीधरधृतवाक्यम्।

पाट् अव्य॰ पाट–क्विप् किप्। सम्बोधने मेदि॰।

पाटक त्रि॰ पट–ण्वुल्। १छेदके २मङ्गाकिण्वौ १कटकान्तरे ४वाद्ये ५अन्यादिच्छेदने ६मूलद्रव्यापचये ७रोधे मेदि॰ ८प्यामैकदेशे हेमच॰।

पाटचर पु॰ पटचर एव स्वार्थे अण्आदित्वादण्। चोरे अमरः

पाटन न॰ चु॰ पट–भावे ल्युट। छेदने

पाटल पु॰ पाटयति पट–णिच्–कलच्। १श्वेतरक्तवर्णे। २तद्वति त्रि॰ (पाडल) ख्याते १वृक्षे स्त्री॰ अमरः। ३तत्पुष्पे ४चाशुधान्ये च न॰ "अल्पुष्पं पाटलं बह्वन्दि च त्रिदोषक्रत्" राजनि॰। ५रक्तलोध्रे स्त्री शब्दच॰। पाटलोत्पत्तिर्यथा। "प्रदक्षमानौ चरणौ दृढाऽसौ कुसुमायुधः। उत्ससर्ज धनुः श्वेतं तज्जगामाथ पञ्चधा। यदाशीनृसटिवन्तु रक्तपुष्पं मनोरमम्। स चम्पकतरुर्जातः खगगन्धाढ्यो सुधाकृतिः। नाडस्यानं शुभाकारं यदासीद् वज्रभूषितम्। तत् जातं केसराढ्यं च बकुलो नामतो नगः। या च कोटी शुभाङ्गासीदिन्द्रनीलविभूषिता। जाता सा पाटला रम्या भृङ्गराजिविभूषिता" वामनपु॰ ६अ॰। पाटलवर्णत्वात् ७दुर्गायाम् स्त्री तन्त्रसा॰। पाटलावतीशब्दे दृश्यम्। पाटलानां समूहः पाशा॰ यत्। पाटल्या तत्समूहे स्त्री।

पाटलद्रुम पु॰ मित्यकर्म्म॰। पुन्नागवृक्षे राजनि॰।

पाटलापुष्पसन्निभ न॰ पाटलापुष्पमेव तुल्यम् मित्यस॰। पद्मकाष्ठे राजनि॰।

पाटलावती स्त्री १नदीभेदे भा॰भी॰ ६अ॰। २दुर्गायाञ्च। "अपर्णानेकपर्णा च पाटला पाटलावती" तन्त्रसा॰।

पाटलि स्त्री पट–णिच् अलि। (पाडल) ख्याते १वृक्षे "पाटलिसंसर्गसुरभिवनवाताः" इति शकुन्तला २अष्टापाटलौ च अमरः वा ङीप्। ङीबन्तः ३कटभीवृक्षे ४सुक्ककवृक्षे च राजनि॰। [ङारा॰।

पाटलिक पु॰ पाटि–अलि संज्ञायां कन्। अन्यधर्म्मग्रे

पाटलिपुत्र न॰ (पाटना) ख्याते नगरभेदे कुसुमपुरे हेमच॰

पाटलीपल पु॰ मित्यक॰। श्वेतरक्तवर्णयुक्ते मत्स्यभेदे

पाटव न॰ पटोर्भावः पृथ्वा॰इमनिचोऽभावपक्षे अण्। १दक्षत्वे २आरोग्ये च राजनि॰। पटोरपत्यादिः अण्। पाटवाः तत्पुत्रादौ ब॰व॰। [त्रिका॰।

पाटविक त्रि॰ पाटवमस्त्यस्य ठन्। १पटौ दक्षे २धूर्त्ते च

पाटहिका स्त्री पटहस्येदम् पाटहं तदाकारमस्त्यस्मिन् ठन्। १गुञ्जायां हारा॰ पटहे तद्वादो प्रकृतः ठक्। २पटहवाद्यवादके त्रि॰।

पाटा स्त्री पाठा+पृषो॰ । पाठायाम् अम॰ २।४७।४

पाटित त्रि॰ चुरा॰ पट–क्त । विदारिते हेमच॰ ।

पाटी स्त्री पट–इन् वा ङीष् । १बालाहर्त्ते राजनि॰ २परिपाट्याम् गुणनादीनां ३खण्डक्रमे च "अस्ति त्रैराशिकं बीजं पाटी च विमला मतिः" लीला॰।

पाटीगणित न॰ पाट्या परिपाट्या गणितम् । लीलावत्याद्युक्तगणिते गणितशास्त्रे । "पाटी नाम सङ्कलितव्यवकलितगुणनभजनादीनां क्रमः तया युक्तं गणितं पाटीगणितम्" लीलावती टीका ।

पाटीर पु॰पटीर+स्वार्थे अण् । पटीरे चन्दने विश्वः ।

पाटुपट त्रि॰ "पाठेर्धिलुक् चोक् चाभ्यासस्य वार्त्ति॰ पाटिअच् नि॰ धिलुक् हित्वमभ्यासस्य चक् च । पाटके । स्त्रि॰ङी॰ । पक्षे पाट तत्रार्थे ।

पाटव त्रि॰ चु॰ पट–कर्मणि यत् । १छेदे २पटुत्वके न॰ राजनि॰ । "पाटवञ्चाकन्तु मधुरं दुर्जरं गुरुपाकि च" राजनि॰ ।

पाठ पु॰ पठ–भावे घञ् । १शास्त्रादेरभ्यासे गौनःपुन्येन उच्चारणे । णिच्–भावे अच् । २अध्यापने शिष्येभ्यः प्रतिपादने च पाठस्याष्टादश दोषा यथा "अस्थितं भीतसंदुष्टमव्यक्तमनुनासिकम् । विस्वरं विरसञ्चैव विश्लिष्टं विसमाहतम् । काकस्वरं निरसितं तथा स्थानविवर्जितम् । व्याकुलं तालहीनञ्च पाठदोषाः चतुर्दश । संगीतं शिरसः कम्पमलिकण्ठमनर्थकम्" भार्क॰पु॰। अध्ययनक्रमो यथा "वाचम्य प्रयतो नित्यमधीयीत उदङ्मुखः । उपसंगृह्य तत्पादौ वीक्षमाणो गुरोर्मुखम्" अध्यापनक्रमो यथा "अधीष्व भो इति ब्रूयाद्विरामोऽस्तिति चाचमेत् । प्राक् कूलात् पर्युपासीनः पवित्रैश्चैव पावितः । प्राणायामैस्त्रिभिः पूतस्तत ओंकारमर्हति । ब्राह्मणः प्रणवं कुर्यादन्ते च विधिवद्द्विजाः ! । कुर्यादध्यापनं नित्यं स ब्रह्मादौमि पूर्वतः । सर्वेषामेव भूतानां वेदश्चक्षुः सनातनः । अधीतोऽध्यवसितव्यं ब्राह्मणस्याक्षीयतेऽन्यथा" इति कौर्मे उपरिभागे १३अ॰ ।

पाठक त्रि॰ पठ–ण्वुल् । १पठनकर्त्तरि णिच्–ण्वुल् । पाठके २अध्यापके ३पुराणादिवाचके च । तच्चपाठिकस्तु त्रि॰त॰ यथा

"अविश्रुपुराणम् "इतिहासपुराणानि स्तुत्वा मन्त्रा विशांपते !। श्रूयते सर्वपापेभ्यो ब्रह्महत्यादिभिर्विभो !! ब्राह्मणं वाचकं विद्याद्वान्यवर्णमादरात्। स्तुत्वान्यवर्णजाद्राजन् ! वाचकाद्वरकं व्रजेत्" तथा "देवार्चामग्यतः कृत्वा ब्राह्मणानां विशेषतः । यन्त्रिञ्च शिथिलं कुर्यादाचकः कुरुनन्दन ! । पुनर्बध्नीत तत्सूत्रं न सङ्का धारयेत् क्वचित् । हिरण्यं रजतं गाञ्च तथा कांस्योपदोहनाः । दत्त्वा तु वाचकायेह स्तुतस्याप्नोति तत्फलम् । कांस्योपदोहनाः कांस्यक्रोड़ाः । "वाचकः पूजितोऽनेन प्रसन्नास्तस्य देवताः"। तथा "श्रुत्वा पर्वसमाप्तिं च पूजयेत् वाचकं बुधः । आत्मानमपि विक्रीय, य इच्छेत् सफलं कृतम्" । तथा "विस्तृतमद्भुतं श्राव्यं सदाक्षरपदं तथा । कलस्वरसमायुक्तं रसभावसमन्वितम् । बुध्यमानः स्वयं शुद्धो यन्त्रार्थं कृतलक्षो नृप ! । ब्राह्मणादिषु सर्वेषु यन्त्रार्थं चार्पयन्नृप ! । य एवं वाचयेद्ब्रह्मन् स विप्रो व्यास उच्यते" । "सप्तस्वरसमायुक्तं काले काले विशाम्यते ! । प्रदर्शयन् रसान् सर्वान् वाचयेद्वाचको नृप !"।

पाठच्छेद पु॰ ६त॰ १पाठस्य विच्छेदे २यतौ च त्रिका॰।

पाठन न॰ पाठ–णिच्–भावे ल्युट् । १अध्यापने युच् पाठना तत्रार्थे स्त्री । २कर्त्तरि ल्यु । ३पाठके त्रि॰ स्त्रियां ङीप् ।

पाठभू स्त्री ६त॰ । पाठस्थाने त्रिका॰ पाठशालादयोऽत्र ।

पाठमञ्जरी स्त्री पाठस्याभ्यासस्य मञ्जरीव । शारिकायाम् शब्दमाला । [रिकायाम् शब्दमा॰ २पाठयुक्ते त्रि॰ ।

पाटशालिनी स्त्री पाठेन शलते शल–णिनि ङीप् । १शारिकायाम् शब्दमाला ।

पाठा स्त्री पठ–कर्मणि घञ् टाप् । विश्वकर्म्याम्(आकनादि) अमरः । "पाठोषणा कटुका तीक्ष्णा वातश्लेष्मज्वरी लघुः । हन्ति शूलज्वरच्छर्दि कृमीसारकृदुष्णजः । दाह कण्डूविषश्वासकफमेदोव्रणान्" भावप्र॰ । स्वार्थे क । कापि चतदस्त्यस्य । पाठिका तत्रार्थे भावप्र॰ । पाठकत्र्यां स्त्रियां च ।

पाठाद्यचूर्ण न॰ "पाठा विश्वानलव्योषजम्बूदाड़िमधातकी । कटुकातिविषाभल्लदार्वीमूर्निम्बवल्लकैः । सर्वैरेतैः समं चूर्णं कोटजत्वक्षुधाम्बुना । सक्षौद्रञ्च पिबेच्छर्दि ज्वरातीसारशूलवान् । हृद्दाहपक्वपीदोषारोचकानलसादजित्" चक्र॰ उक्ते चूर्णभेदे ।

पाठि पु॰ पाठ–इन् । पृष्ठे पाठीनशब्दे दृश्यम् ।

पाठिन् त्रि॰ पठ–णिनि । १पाठके स्त्रियां ङीप् । पाठेवाकारोऽस्यास्ति इनि । २चित्रकवृक्षे अमरः । [राजनि॰ ।

पाठीकुट पु॰ पाठेव कुटति कुट–क पृषो॰ । चित्रकवृक्षे

पाठीन पुंक्ली॰पाठिं पृष्ठं नमयति नम–ड दीर्घः । १मत्स्य-

भेदे (बोयाड) अमरः स्त्रियां ङीष्। "पाठीनरोहिता-वाद्यौ" मनुः। "पाठीनः श्वेतवर्णः स्निग्धो मधुरश्च कषायकः। बल्यो दृष्ट्यः कटुः पाके रोचनो वातपित्तहृत्" राजव०पठ-ईनन्। २गुग्गुलुवृक्षे २पाठके त्रि० भेदि०।

पाठेय त्रि० पाठायां भवः नद्या० ढक्। पाठाभवे

पाण पु०पण-भावे घञ्। १व्यवहारे २पणने ३समये च भा० व०६०३८श्लो०। ४पाणौ शब्दच०।

पाणि पु० पण-इण् आत्वाभावः। १करे २कुक्षिके हस्ते च (कुलेखाड़ा) अमरः ३पणप्रदीप्तां ४दृष्टे च स्त्री० उषा०। करश्च मणिबन्धावध्यङ्गुलिपर्य्यन्तः।

पाणिक त्रि० पणेन क्रीतं निष्का० ठक्। १पणेन क्रीते २कुमारानुचरभेदे भा०व० ५५ अ०।

पाणिकच्छपिका स्त्री पाणिभ्यां कृता कच्छपिका कच्छपस्तदाकारोऽस्त्रियाः ठन्। कूर्मसदृशवाद्यम् "पाणिकच्छपिकां कुर्यात् कूर्ममन्त्रेण साधकः" कालिकापु०५६अ०

पाणिकर्मन् पु० पाणिभ्यां वादनरूपं कर्म्मास्य। १नटादिवे भा०आ० २८६। २पाणिभ्यां वादके त्रि०।

पाणिकूर्चा स्त्री कुमारानुचरमातृभेदे भा० श० ४६ अ०।

पाणिखात न० तीर्थभेदे भा०व० ८२ अ०।

पाणिगृहीती स्त्री पाणिर्गृहीतो यस्याः ङीष्। पाणिग्रहणेन कृतसंस्कारायां सवर्णायां स्त्रियाम् अमरः। "पाणिग्रहणसंस्काराः सवर्णास्वुपदिश्यते" मनुना सवर्णायामेव पाणिग्रहणविधानात् तथात्वम्।

पाणिग्रह पु० पाणिर्गृह्यतेऽत्र ग्रह-आधारे अप्। विवाहे "हस्तास्तातिषु षष्ठतौचित्रिषुनेषूद्वहेत्तु पाणिग्रहः" ज्यो० १०० अ०।

पाणिग्रहण न० पाणिर्गृह्यते अत्र ग्रह-आधारे ल्युट्। विवाहे हेमच०। पाणिग्रहणप्रकारः आश्व० गृ० सू० १।७ यथा "पश्चादग्नेर्ब्रह्मणस्थानं प्रतिष्ठाप्योत्तरपुरस्ताद्दक्षम् समन्वारब्धायां जुहोति तिष्ठन् प्रजापतेऽनुत्वा परेहि विश्वहेति सू०। "दक्षिणतः पत्नुप्रविश्रेत् उत्तरतः पतिरिति शास्त्रान्तरे दृष्टम्। "उत्तानेनोत्तानं पाणिं गृह्णीयात्" नारा०।

"अङ्गुलीभिरेव स्त्रीकामः" सू० "एवकारोऽङ्गुलिनिवृत्त्यर्थः। स्त्रीकामो दृष्टिहृदयकाम इत्यर्थः" नारा०"हस्तं गृह्णन्नुभयकामः" सू०। "उभयकामः पुत्रदृष्टिहृदयकामः अङ्गुलीभिः" वह गृह्यादित्यनुषङ्गः नारा०।

पाणिग्रहणिक त्रि०पाणिग्रहणं प्रयोजनमस्य ठक्। विवाहाङ्गे मन्त्रे "पाणिग्रहणिका मन्त्राः कन्यास्वेव प्रतिष्ठिताः" "पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम्। तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे" मनुः ते च मन्त्राः "ॐ मम व्रते ते हृदयं दधामि मम चित्तमनुचित्तं ते अस्तु मम वाचमेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यम्" आश्व० गृ० १।७।१७ सप्तादौ १६ सप्तान्ते पठिता बोध्याः। [पत्नी भा० अनु० २३२ श्लोकः।

पाणिग्रहीत पु० पाणिं गृह्णाति ग्रह-क्त इत०। बेड़रि

पाणिग्राह पु० पाणिं गृह्णाति ग्रह-अण् उप० स०। बोड़रि मनुः ५।१४८।

पाणिघ त्रि० पाणिं पाणिना वा हन्ति "पाणिघताडघौ शिल्पिनि" पा० हन-ट णि०। १पाणिताड़के पाणिना २स्वदङ्गादिपादके च शिल्पिभेदे।

पाणिघात पु० पाणिं हन्ति-अशिल्पित्वात् अण् उप०स०। १पाणिताड़कमात्रे सि०कौ०। हन-भावे घञ्। २पाणिहनने पु०। [हस्तताडवादके यजु० ३५।२०।

पाणिघ्न त्रि० पाणौ हन्ति हन-टक् षेदे शिल्पिनि नि०।

पाणिज पु० पाणौ जायते जन-ड ७त०। नखे हेमच०।

पाणितल न० इत०। १करस्याधोभागे पाणिरेव तलम्। करतले। तच्चितद्रव्ये २तोलके कर्षशब्दे दृश्यम्।

पाणिधर्म्म पु० पाणिग्रहस्याख्यो धर्म्मः मा० स०। पाणिग्रहरूपे धर्म्मे "पाणिधर्मो नाङ्गमात्रं मनुभिः सेवितः सुरा" भा० अ० ८१ आ०।

पाणिन पु० पणिनो सुनेरपत्यम् अण् माधीत्यादित्वात् प्रत्ययो न टिलोपः। पाणिनौ मुनौ त्रिका०।

पाणिनि पु० पणिनो युन्यपत्यम् अण् ततः यूनि इञ् न टिलोपः। पर्णिनिनामके मुनौ "येनाक्षरसमाम्नायमधिगम्य महेश्वरात्। कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः" शेखरः। स च अष्टाध्यायीसूत्रपाठं गणपाठं धातुपाठं शिक्षानुशासनं शिक्षारूपं च ग्रन्थपञ्चकं चकार। पाणिनिमतञ्च सर्वदर्शनसंग्रहे दर्शितं ततो दिङ्मात्रं प्रदर्श्यते।

"भवति च व्याकरणशास्त्रस्य शब्दानुशासनं प्रयोजनं (तस्य तदुद्देशेन प्रवृत्तेः तत्प्रयोजनत्वम्) यथा स्वर्गोद्देशेन प्रवृत्तस्य यागस्य स्वर्गः प्रयोजनं तस्मात् शब्दानुशिष्टिः संस्कारपदपदवीया शब्दानुशासनस्य प्रयोजनम्। नन्वेवमभिमतं प्रयोजनं न लभ्यते तदुपायाभावात्। अत्र प्रति-

पदपाठ एवाभ्युपाय इति मन्येथाः तर्हि स ज्ञानभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठो भवेत् शब्दापशब्दभेदेनानन्त्याच्छब्दानाम् एवं हि समाम्नायते "इन्द्रस्मतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदपाठविधिनानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम" इन्द्रस्तिथ प्रवक्ता इन्द्रोऽध्येता दिव्यं वर्षसहस्रमध्ययनकालः न च पारायणमिदभूत् किमुताद्य यावदिदं न जीवति अधीतबोधाचरणप्रचारणैश्चतुर्भिरुपायैर्विद्योपयुक्ता भवति। तत्राध्ययनकालेनैव सर्वमायुरुपयुक्तं स्यात्तस्मादनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठ इति प्रयोजनं न सिद्ध्येदिति चेन्नैवं शब्दप्रतिपत्तेः प्रतिपदपाठसाध्यत्वानङ्गीकारात् प्रकृत्यादिविभागकल्पनावत्तु लक्षणेषु सामान्यविशेषरूपाणां लक्षणानां पर्जन्यवत् सकृदेव प्रवृत्तौ बहूनां शब्दानामनुशासनोपलम्भात् तथाहि कर्मण्यण्, इत्येतेन सामान्यरूपेण लक्षणेन कर्मोपपदाद्धातुमात्रादण्प्रत्यये कृते कुम्भकारः काण्डलाव इत्यादीनां बहूनां शब्दानामनुशासनमुपलभ्यते एवमातोऽनुपसर्गके इति। प्रतिपदपाठस्याशक्यत्वप्रतिपादनपरोऽर्थवादः। नन्वन्येष्वपि बहुषु किमित्येतदेवाश्रियते। उच्यते प्रधानस्य षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति। तदुक्तम् "यावद्धि ब्रह्मणस्तस्य तपसातुत्तमं तपः। प्रथमं छन्दसामङ्गमाहुर्व्याकरणं बुधाः" इति। तस्मात् व्याकरणशास्त्रस्य शब्दानुशासनं भवति साक्षात् प्रयोजनं पारम्पर्येण तु वेदरक्षादीनि। अतश्चोक्तं भगवता भाष्यकारेण "रक्षोहागमलघ्वसन्देहाः प्रयोजनमिति" साधुशब्दप्रयोगस्यादभ्युदयोऽपि भवति तथाच कथितं कात्यायनेन "शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तुल्यं वेदशब्देनेति"। अन्यैरप्युक्तम् "एकः शब्दः सम्यग्ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग्भवतीति"। तथा "नाकमिष्टसुखं यानि सुयुक्तैर्वेदवाग्यथैः। अथ पत्काग्निषो यानि ये चोत्क्रमणभाग्निषः"। "नन्वचेतनस्य शब्दस्य कथमीदृशं सामर्थ्यमुपपद्यत इति चेन्नैवं मन्येथाः महता देवेन साग्न्यत्वरणात् तदाह श्रुतिः "चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य। त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश"। व्याचकार च भाष्यकारः "चत्वारि शृङ्गाणि चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताः, त्रयो अस्य पादाः भूतभविष्यद्वर्तमानकालाः। द्वे शीर्षे द्वौ नित्यानित्यौ शब्दौ नित्यः कार्यश्च व्यङ्ग्यव्यञ्जकभेदात्, सप्तहस्तासो अस्य त्रिधा सप्त सुविभक्तयः, त्रिधा बद्धः त्रिषु स्थानेषु उरसि कण्ठे शिरसि च बद्धः, वृषभ इति प्रसिद्धवृषभत्वेन रूपणं क्रियते वर्षाण्यधीयन्त ज्ञानपूर्वकानुष्ठानेन फलप्रदत्वं, रोरवीति शब्दं करोति रौतिः शब्दकर्मा। इह शब्दशब्देन प्रपञ्चो विवक्षितः। महो देवो मर्त्यां आविवेश महादेवः शब्दः मर्त्यां मरणधर्माणो मनुष्यानाविवेशेति महता देवेन परेण ब्रह्मणा साम्यमस्य स्यादिति" जगद्विदानं स्फोटाख्यो निरवयवो नित्यः शब्दो ब्रह्मेति स्फरिष्यामाणि ब्रह्मकाण्डे "अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्। विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः" इति। ननु नामाख्यातभेदेन पदद्वैविध्यप्रतीतेः कथं चातुर्विध्यसङ्ख्यमिति चेन्नैवं प्रकारान्तरस्य प्रसिद्धत्वात्। तदुक्तं प्रकीर्णके "द्विधा कैश्चित् पदं भिन्नं चतुर्धा पञ्चधापि वा। अपोद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवदिति"। "कर्मप्रवचनीयेन वै पञ्चमेन सह पदस्य पञ्चविधत्वमिति" हेलाराजो व्याख्यातवान्। कर्मप्रवचनीयास्तु क्रियाविशेषोपजनितसम्बन्धावच्छेदकेतर इति सम्बन्धविशेषद्योतनद्वारेण क्रियाविशेषद्योतनाद्उपसर्गत्वे वाक्यभेदापत्तीत्यभिसन्धाय यदचातुर्विध्यं भाष्यकारेणोक्तं युक्तमिति विवेक्तव्यम्। ननु भवता स्फोटाख्यो नित्यः शब्द इति निजागद्यते तत्र कथमत्र प्रमाणाभावादिति केचित् अत्रोच्यते प्रत्यक्षमेवात्र प्रमाणं गोरित्येकं पदमिति नानावर्णातिरिक्तैकपदावगतेः सर्वक्षणीनत्वान्न क्षपति बाधके पदानुभवः शक्यो मिथ्येति वक्तुं पदार्थप्रतीतेरन्यथानुपपत्त्यापि स्फोटोऽभ्युपगन्तव्यः। न च वर्णेभ्य एव तत्प्रत्ययः प्रादुर्भवतीति परीक्षामं विकल्यासहत्वात् किं समस्ता व्यस्ता वा वर्णप्रत्ययं जनयन्ति ? नाद्यः वर्णानां क्षणिकानां समूहासम्भवात् नान्त्यः व्यस्तवर्णेभ्योऽर्थप्रत्ययासम्भवात्। न च व्यस्तसमाहाराभ्यामन्यः प्रकारः समस्तीति तस्माद्वर्णानां वाचकत्वानुपपत्तौ पदबलादर्थप्रतिपत्तिः स स्फोट इति वर्णातिरिक्तो वर्णाभिव्यङ्ग्योऽर्थप्रत्यायको नित्यः शब्दः स्फोट इति तद्विदो वदन्ति। अतएव स्फुटत्यते व्यज्यते वर्णैरिति स्फोटो वर्णाभिव्यङ्ग्यः स्फुटीभवत्यस्मादर्थ इति स्फोटोऽर्थप्रत्यायक इति स्फोटशब्दार्थोभयथा निराहुः। तथाचोक्तं भगवता पतञ्जलिना महाभाष्ये

"अथ गौरित्यस्य कः शब्दो ? येनोच्चरितेन सास्नालाङ्गूलककुदखुरविषाणानां सम्प्रत्ययो भवति स शब्द इत्युच्यते" इति। विद्वतश्च कैयटेन "वैयाकरणा वर्णव्यतिरिक्तस्य पदस्य वाचकत्वमिच्छन्ति वर्णानां वाचकत्वे द्वित्रीयादिवर्णोच्चारणानर्थक्यप्रसङ्गादित्यादिना तद्व्यतिरिक्तः स्फोटो नादाभिव्यङ्ग्यो वाचको विस्तरेण वाक्यपदीये व्यवस्थापित" इत्यत्नेन प्रपञ्चेन। ननु स्फोटस्यार्थप्रत्यायकत्वं न घटते विकल्पासहत्वात् किमभिव्यक्तः स्फोटोऽर्थं प्रत्याययति अनभिव्यक्तो वा न चरमः सर्वदा अर्थप्रत्ययजनकत्वप्रसङ्गात् स्फोटस्य नित्यत्वाभ्युपगमेन निरपेक्षस्य हेतोः सदा सत्त्वेन कार्यस्य विलम्बायोगात्। अथैतद्दोषपरिजिहीर्षया अभिव्यक्तः स्फोटोऽर्थं प्रत्याययतीति कल्प्यते तथाभिव्यञ्जयन्तो वर्णाः किं प्रत्येकमभिव्यञ्जयन्ति समुदिता वा पक्षद्वयेऽपि वर्णानां वाचकत्वपक्षे भवता ये दोषा भाषितास्त एव स्फोटाभिव्यञ्जकत्वपक्षे आवर्तनीयाः। तदुक्तं भट्टाचार्यैर्मीमांसाश्लोकवार्तिके "यस्यानवयवः स्फोटो व्यज्यते वर्णबुद्धिभिः। सोऽपि पर्यनुयोगेन नैकेनापि विसृज्यते" इति। "विभक्त्यन्तं पदम्" विभक्त्यन्तेष्वेव वर्णेषु पाणिनिना "ते विभक्त्यन्ताः पदमिति" सौत्रेण च पदसंज्ञायाविधितत्वात् सङ्केतग्रहणेनानुपहतशक्तेर्वर्णेष्वेव पदबुद्धिर्भविष्यति। तर्हि सर इत्येतस्मिन् पदे यावन्तो वर्णास्तावन्त एव रस इत्यत्रापि वनं नदं नदी द्वीपो रामो मारो राजा आरेत्यादिष्वर्थभेदप्रतीतिर्न स्यादिति चेन्न क्रमभेदेन भेदसम्भवात् तदुक्तं तौतातितकैः "यावन्तो यादृशा ये च यदर्थप्रतिपादने। वर्णाः प्रज्ञातसामर्थ्यास्ते तथैवावबोधकाः" इति। तस्मादुभयोः समो दोषो न तेनैकतोऽन्यो भवतीति न्यायात् वर्णानामेव वाचकत्वोपपत्तौ नातिरिक्तस्फोटकल्पनाऽवकल्पते इति चेत् तदेतत् कामकुशावलम्बनकल्पं विकल्पानुपपत्तेः किंवर्णमात्रे पदप्रत्ययावलम्बनं वर्णसमूहे वा ? नाद्यः परस्परविलक्षणवर्णानामभिन्नं निमित्तं पुष्पेषु विना स्रजं मालाप्रत्ययवदित्येकं पदमिति प्रतिपत्तेरनुपपत्तेः नापि द्वितीयः उच्चरितप्रध्वस्तानां वर्णानां समूहभावासम्भवात्। तत्र हि समूहव्यपदेशः ये पदार्था एकस्मिन् प्रदेशे सहावस्थिततया बहवोऽनुभूयन्ते यथा एकस्मिन् प्रदेशे सहावस्थिततयानुभूयमानेषु धवखदिरपलाशादिषु समूहव्यपदेशः यथा वा गजनरतुरगादिषु, न च ते वर्णास्तथानुभूयन्ते उत्पन्नप्रध्वस्तत्वात्। अभिव्यक्तिपक्षेऽपि क्रमेणैवाभिव्यक्तौ समूहासम्भवात् नापि वर्णेषु कालनिकः समूहः कल्पनीयः परम्परान्वयप्रसङ्गात्। एकार्थप्रत्यायकत्वसिद्धौ तदुपाधिना वर्णेषु पदत्वप्रतीतिः तत्सिद्धावेकार्थप्रत्यायकत्वसिद्धिरिति। तस्माद्वर्णानां वाचकत्वासम्भवात् स्फोटोऽभ्युपगन्तव्यः। ननु स्फोटवाचकतापक्षेऽपि प्रागुक्तविकल्पप्रसरेण घट्टकुटीप्रभातायितमिति चेत् तदेतन्नानोराज्यनिशृम्भणं वैयात्यमात्रम्। तथाहि अभिव्यञ्जकोऽपि प्रथमो ध्वनिः स्फोटमस्फोटमभिव्यनक्ति उत्तरोत्तराभिव्यञ्जकक्रमेण स्फुटं स्फुटतरं स्फुटतमं, यथा स्वाध्यायः सकृत् पठ्यमानो नावधार्यते अभ्यासेन तु स्फुटावधारणं यथा वा रत्नतत्त्वं प्रथमप्रतीतौ स्फुटं न चकास्ति चरमे चेतसि यथावदभिव्यक्तं "नादैराहितबीजायामन्त्येन ध्वनिना सह। आवृत्तिपरिपाकायां बुद्धौ शब्दोऽवधार्यते" इति प्रामाणिकोक्तेः। तस्मादभ्रान्तादर्थं प्रतिपद्यामहे इति व्यवहारवशाद्वर्णानामर्थवाचकत्वानुपपत्तेः प्रथमे काण्डे तत्रभवद्भिर्भर्तृहरिभिरभिहितत्वात् निरवयवमर्थप्रत्यायकं शब्दतत्त्वं स्फोटाख्यमभ्युपगन्तव्यमित्येतत् सर्वम् "परमार्थसंविदद्वयसत्ता जातिरेव सर्वेषां शब्दानामर्थ इति प्रतिपादनपरे जातिसमुद्देशे प्रतिपादितम्। यदि सत्तैवार्थः सर्वेषां शब्दानां पर्यायता स्यात् तथा च क्वचिदपि युगपच्चतुरपदप्रयोगायोग इति भट्टाचार्यैरायुक्तम्। तदुक्तम् "पर्यायाणां प्रयोगो हि यौगपद्येन नेष्यते। पर्यायेणैव ते यस्माद्दत्यर्थं न संहताः" इति। तस्मादयं पक्षो न शोभन इति चेत् तदेतद्गगनरोमन्थकल्पं नीलपीतादुपरञ्जकद्रव्यभेदेन स्फटिकमणेरिव सम्बन्धिभेदात् सत्तायास्तदात्मना भेदेन प्रतिपत्तिसिद्धौ गोसत्तादिरूपगोत्वादिभेदनिबन्धनव्यवहारवैलक्षण्योपपत्तेः तथाचाप्तवाक्यम् "स्फटिकं विमलं द्रव्यं यथा युक्तं पृथक् पृथक्। नीलपीतादिसम्बन्धैस्तदर्थैरुपलभ्यते" इति। तथा हरिणाप्युक्तम् "सम्बन्धिभेदात् सत्तैव भिद्यमाना गवादिषु। जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः। तां प्रातिपदिकार्थं तु धात्वर्थं च प्रचक्षते। सा सत्ता सा महाजाता तामाहुस्तत्तदादयः" इति। आश्रयभूतैः सम्बन्धिभिर्भिद्यमाना कल्पितभेदा गवाश्वादिषु सत्तैव महासामान्यमेव जातिः गोत्वादिकमपरं सामान्यं परमार्थतस्ततो भिन्नं न भवति गोसत्तैव गोत्वं

नापरमन्वयि प्रतिभासते एवमन्यसत्ता अन्यत्वमित्यादि वाच्यम्। एवञ्च तस्यामेव गवादिभिन्नायां सत्तायां जातौ गोशबलादयो वाचकत्वेन व्यवस्थिताः प्रातिपदिकार्थश्च सत्तामात्रः। भाववचनो धातुरिति पक्षे भावः सत्तैवेति धात्वर्थः सत्ता भवत्येव क्रियावचनो धातुरिति पक्षेऽपि "जातिमन्ये क्रियामाहुरनेकव्यक्तिवर्त्तिनीमिति" जातिपदार्थेनवानुसारेणानेकव्यक्तिक्रियासमवेते क्रियायां जातिरूपत्वप्रतिपादनात् धात्वर्थः सत्ता भवत्येव तस्य भावस्तत्तेति भावार्थे त्वतलादीनां विधानात् सत्तावाचित्वं युक्तं सा च सत्ता उदयव्ययवैधुर्याभ्यां नित्या सर्वस्य प्रपञ्चस्य तद्विवर्त्ततया देशतः कालतो वस्तुतश्च परिच्छेदराहित्यात् सा सत्ता महानात्मेति व्यपदिश्यत इति कारिकाद्वयार्थः। द्रव्यपदार्थसंविज्ञानं तत्त्वमेव सर्वशब्दार्थ इति सम्बन्धसमवेते समर्थितम् "सत्यं वस्तु तदाकारैरसत्यैरवधार्यते। असत्योपाधिभिः शब्दैः सत्यमेवाभिधीयते। अभ्रंलिह निमित्तेन देवदत्तमदत्तं यथा। गृहीतमदृष्टशब्देन गुडमेवाभिधीयते" इति। भाष्यकारेणापि "सिद्धे शब्दार्थसम्बन्धे" इत्येतदाह्निकव्याख्यानावसरे द्रव्यं हि नित्यमित्यनेन यत्नेन अत्यत्योपाध्यपोढं ब्रह्मतत्त्वं द्रव्यशब्दवाच्यं सर्वशब्दार्थः इति निरूपितम्। जातिशब्दार्थवादिनो वाजप्यायनस्य मते गवादयः शब्दाः भिन्नद्रव्यसमवेतां जातिमभिदधति तस्यामवगाह्यमानायां तत्सम्बन्धात् द्रव्यमवगम्यते, गुणादयः शब्दा गुणसमवेतां जातिमाचक्षते गुणे तत्सम्बन्धात् प्रत्ययः द्रव्यसम्बन्धिसम्बन्धात् संज्ञाशब्दानामुत्पत्तिप्रध्वंसाविनाशात् शैशवकौमारयौवनाद्यवस्थादिभेदेऽपि स एवायमित्यभिप्रत्ययवशात् सिद्धा देवदत्तत्वादिजातिरर्थपत्तिलभ्या। क्रियास्वपि जातिराक्षिप्यते सैव धातुवाच्या पचतीत्यादावनुदात्तप्रत्ययस्य प्रादुर्भावात्। द्रव्यपदार्थवादिव्याडिनये शब्दस्य व्यक्तिरेवाभिधेयतया प्रतिभासते जातिस्तूपलक्षयतीति नानन्त्यादिदोषावकाशः। पाणिन्याचार्यस्योभयं सम्मतं ततो जातिपदार्थमभ्युपगम्य "जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्" इत्यादि व्यवहारः, द्रव्यपदार्थमङ्गीकृत्य "सरूपाणामेकशेष एकविभक्तौ" इत्यादिः। व्याकरणस्य सर्वपारंदत्वान्नतदयाभ्युपगमेन क्वचिद् विरोधः। तस्मात् सदयं सत्यं परं ब्रह्मतत्त्वं सर्वशब्दार्थ इति स्थितम्। तदुक्तम् "तस्माच्छक्तिविभागेन सत्यः सर्वः सदात्मकः। एकोऽर्थः शब्दवाच्यत्वे बहुरूपः प्रकाशते" इति। सत्यस्वरूपमपि हरिणोक्तं सम्बन्धसमुद्देशे "यत्र द्रष्टा च दृश्यञ्च दर्शनञ्चाविकल्पितम्। तत्तस्यार्थस्य सत्यत्वमाहुस्तत्त्ववेदिनः" इति। द्रव्यसमुद्देशेऽपि "विकारोपगमे सत्यं ध्रुवं कुण्डले यथा। विकारापगमो यत्र तामाहुः प्रकृतिं पराम्" इति। अभ्युपगताद्वितीयतत्त्वनिर्वाहाय वाच्यवाचकयोरविभागः प्रदर्शितः "वाच्या सा सर्वशब्दानां शब्दाश्च न पृथक् ततः। अपृथक्त्वेऽपि सम्बन्धस्तयोर्नानात्मनोरिव" इति तत्तदुपाधिपरिकल्पितभेदबहुलतया व्यवहारस्याविद्यामात्रकल्पितत्वेन प्रतिनियताकारोपधीयमानरूपभेदं ब्रह्मतत्त्वं सर्वशब्दविषयः अभेदे च पारमार्थिके संवृतिवशाद्व्यवहारदशायां स्वप्नावस्थावदुच्चावचः प्रपञ्चो विवर्त्तत इति कारिकार्थः। तदाहुर्वेदान्तवादिनिपुणाः। "यथा स्वप्नप्रपञ्चोऽयं मयि मायाविजृम्भितः। एवं जाग्रत्प्रपञ्चोऽपि मयि मायाविजृम्भितः" इति। तदित्थं कूटस्थे परस्मिन् ब्रह्मणि सच्चिदानन्दरूपे प्रत्यगभिन्नेऽवगते समाविद्यानिवृत्तौ तादृग्ब्रह्मात्मनावस्थानलक्षणं निःश्रेयसं सेत्स्यति। "शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति" इत्यभियुक्तोक्तेः। तथाच शब्दानुशासनशास्त्रस्य निःश्रेयससाधनत्वं सिद्धम्। तदुक्तम् "तदुद्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्। पवित्रं सर्वविद्यानामधिविद्यं प्रचक्षते" इति। तथा "इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्। इयं सा मोक्षमाणानामजिह्मा राजपद्धतिरिति"। तस्माद्व्याकरणशास्त्रं परमपुरुषार्थसाधनतयाध्येतव्यमिति"।

पाणिनिप्रोक्ताष्टाध्यायीरूपस्य व्याकरणस्य। तत्तात्पर्यञ्च वाक्यपदीये हरिणा ब्रह्मकाण्डे विस्तरत उक्तं द्रष्टव्यम्।

पाणिनीय त्रि॰ पाणिनौ भक्तिरस्य छ। १पाणिनिभक्तियुक्ते तेन ज्ञातेऽधीते वा छ। २पाणिनिना ज्ञाते ३तेनोपज्ञाते च। पाणिनिना प्रोक्तम् अण्। ४पाणिना प्रोक्ते त्रि॰ "अजतद्धूढाः पाणिनीयाः" व्या॰ परिभाषा।

पाणिन्धम(य) पाणिं धमति ध्मा-धयति वा धे-वा खश्। १पाणिवादके यान्तः २पाणितापके सन्धवोऽन्नूनं खम्यम्

पाणिपाद न॰ पाणी च पादौ च समाहृतौ समा॰ह॰। पाण्योः पादयोश्च समाहारे तत अस्त्यर्थे प्राग्वद्वुत्वात् मतुवेव न ठन्। पाणिपादवत् तद्युते त्रि॰ङी॰।

पाणिपीड़न न॰ पाणिः पीड्यते अत्र पीड-आधारे ल्युट्। १विवाहे अमरः। ६त॰। २अन्योन्यं पाण्योर्मर्दने च।

पाणिबन्ध पु० पाणिर्बध्यतेऽत्र बन्ध–आधारे घञ्। विवाहे भा०शा० २६७अ०।

पाणिभुज् पु० पाणिरिव भुज्यते भोज्यते भुज–भोजने किप्। १उदुम्बरवृक्षे। पाणिना भुङ्क्ते भुज–किप्। २हस्तेन भोजके त्रि० शब्दच०।

पाणिमर्द पु० पाणिं मर्दयति मृद–अच् उप०स०। १करमर्दे राजनि०। २करमर्दकमात्रे त्रि०। [अस्ते इडा०।

पाणिमुक्त न०पाणिभ्यां मुक्तम्। हस्तक्षिप्यमाणे आयुधे

पाणिमुख पु० पाणिर्हिप्रयाणिर्तुखमिव होमस्थानं यस्य। पितरि। "अग्निमुखा वै देवाः पाणिमुखाः पितरः हि ब्राह्मणम्" आश्व०श्रौ०४।८।६ "देवानामग्निमुखत्वात्मौ होमः पितॄणां पाणिमुखत्वात् पाणौ होमः" नारा० होमद्वाराग्नौकरणाद्धोमः पाणिहोमशब्दे दृश्यः।

पाणिरुह पु० पाणौ रोहति रुह–क। नखे राजनि०

पाणिवाद् पु० पाणिं पाणिना मृदङ्गादिकं वा वादयति वद–णिच्–क्विप्। १हस्ततालदाने २हस्तेन मृदङ्गादिवादके च अमरः ङीप्। पाणिवादक तत्रार्थे त्रि० हेमच०। [कृत्यम्। रज्ज्वाम् त्रि०कौ०।

पाणिसर्ग्या स्त्री पाणिभ्यां सृज्यतेऽसौ सृज–कर्मणि यत्। हस्ततालदाने पाणिवादके भा०द्रो० ८२अ०।

पाणीतक पु० कुमारानुचरमातृभेदे भा०श० ४६अ०।

पाणिहोम पु० ७त०। पाणिग्राह्मणानां पाणौ कर्त्तव्ये होमे "उद्धृत्य हुताशमन्त्रमनुज्ञापयत्यग्नौ करिष्ये करवै करवाणीति" इत्युपक्रमे "अभ्यनुज्ञायां पाणिग्रहेण वा" आश्व० गृ०१।८।१६अ० "अभ्यनुज्ञायामिति यदि ब्राह्मणाः पाणिषु होममभ्यनुजानन्ति अग्निकार्यकरणं यदि पाणिषु खेषामभ्युपगच्छन्तीत्यर्थः। तथा सति पाणिषु जुहोति। ताभ्यामेव मन्त्राभ्यां पाणिषु जुहुयात्। ब्राह्मणाः पित्रादित्वयार्थम् उपविष्टास्तेषां सर्वेषां पाणिषु जुहोतीति वचनात्, मन्त्रौ च द्वौ तत्रार्थादेकैकाम् आहुतिं विगृह्य विसृज्य सर्वेषां दक्षिणपाणिषु जुहोति" नारा०। कृतब्राह्मणपक्षे जले एव स होमो विधेयः "अन्यभावे तु विप्रस्य पाणावेव जलेऽपि वा" मदनपु० वाक्यात् एतयोः पक्षयोरपि अनूढेनैव अग्नौ करिष्ये" इत्युक्त्वा रज्ज्वानुज्ञापनं आ०ग० रघु०।

पाणीकरण न० पाणौ क्रियतेऽनेन कृ–आधारे ल्युट् अनुक्०। विवाहे अटाध०।

पाण्ड त्रि० पण्डस्येदं स्वार्थे अण्। पण्डे स्त्रियां गौरा० पाठात् ङीषं बाधित्वा ङीष् क्वचिद् भेदः।

पाण्डर पु० पडि–अरन् दीर्घश्च। १मरुवकवृक्षे २श्वेतवर्णे च २तवति त्रि०अमरः। ३कुन्दपुष्पे ४गैरिके च न० शब्दच०

पाण्डरपुष्पिका स्त्री पाण्डरं पुष्पमस्याः कप् टापि अतइत्वम्। श्वेतवाहुके शब्दर०।

पाण्डव पु० पाण्डोरपत्यम् अण्। पाण्डुस्वस्य क्षेत्रजे धर्मादिभ्योजाते युधिष्ठिरादौ "यः स कौरव्यदायादः पाण्डुर्नाम नराधिपः। कामभोगान् परित्यज्य मृतश्चक्रमितो गतः। ब्रह्मचर्य्यव्रतस्यस्य तस्य दिव्येन हेतुना। साक्षाद्धर्मोदयं पुत्रस्तव जातो युधिष्ठिरः। तथैव बलिनां श्रेष्ठं तस्य राज्ञो महात्मनः। मातरिश्वा ददौ पुत्रं भीमं नाम महाबलम्। पुरुहूतादयं जज्ञे कृत्वामेव धनञ्जयः। यस्य कीर्त्तिर्महेष्वासान् सर्वानभिभविष्यति। यौ तु माद्र्यां महेष्वासावस्तां पुरुषोत्तमौ। अश्विभ्यां पुरुषव्याघ्राविमौ तावपि पश्यत" भा०आ० १२६अ०। [अभीक्ष्णोद्यतः। श्रीलक्ष्णे त्रिका०।

पाण्डवाभील पु०अभीः अभयं तानाति ला–क। पाण्डवः

पाण्डवायन पु० पाण्डवानामयनं रक्षणादिकं यतः। श्रीलक्ष्णे हृत०। तत्रार्थे न०। [सम्बन्धिनि।

पाण्डवीय त्रि० पाण्डवस्येदम् "हृदाक्षः" पा०अ। पाण्डव

पाण्डवेय पु०पाण्डोरियम् अञ् ङीप् पाण्डवी कुन्ती माद्री च तयोरपत्यम् ढक्। पाण्डुपत्नीपुत्रेषु युधिष्ठिरादिषु भा०आ० १अ०। तेषां क्षेत्रजत्वात् मातृद्वारेण कीर्त्तनम्।

पाण्डार पुंक्ली० पण्डस्यापत्यम् आरक्। पण्डस्यापत्ये त्रि० को०। [१पण्डितभावे २तत्कर्मणि च न०।

पाण्डित्य न०पण्डितस्य भावः कर्म वा हृदादि० यत्र ष्यञ्।

पाण्डु पु० पडि–कु नि० दीर्घः। "सितपीतसमायुक्तः पाण्डुवर्णः प्रकीर्त्तितः" १शुभ्रवर्णे "पाण्डुस्तु पीतभागार्द्रः केतकीधूलिसन्निभः" इत्युक्ते च २वर्णभेदे २तवति त्रि०। स्त्रियामुदन्तशब्दत्वेऽपि न ङीष् पाण्डुशब्दपर्युदासात्। ४सितवर्णे शब्दरत्ना० ५तवति त्रि० मानुषपुत्रविचित्रवीर्य्यश्च क्षेत्रे व्यासेनोत्पादिते ६तत्पभेदे ७नागभेदे ८श्वेतगजे ९रोगभेदे च शब्दर०। १०पाण्डुरफलीक्षुपे ११पटोले च राजनि०। १२देशभेदे पु० पाण्डुनृपोत्पत्तिकथा भा०आ०१०३अ० तद्राजताकारत्वञ्च उक्तं यथा ततस्तेनैव विधिना महर्षिस्तामविन्दत। अम्बालिकामम्बाञ्चाहृत्य हृदा च सापि

तम्। विवर्णं पाण्डुसङ्काशं समपद्यत भारत!" इत्युपक्रमे "यस्मात् पाण्डुत्वमापन्ना विरूपं प्रेक्ष्य मामिह। तस्मादेव सुतस्ते वै पाण्डुरेव भविष्यति। नाम तस्य तदेवेह भविष्यति शुभानने"। तस्य दिग्विजयादिकथा तदुत्तराध्यायेषु दृश्या। पाण्डुरोगभेदे निदानादिकं भावप्र० उक्तं यथा

"पाण्डुरोगाः स्मृताः पञ्च वातपित्तकफैस्त्रयः। चतुर्थः सन्निपातेन पञ्चमो भक्षणान्मृदः" पञ्चमो भक्षणात् मृद इति नन्वेतत्सन्निपातेऽपि दूषितवातादिदोषद्वारैरेव पाण्डुरोगं जनयतीति मृद्भक्षणजः पाण्डुरोगोदोषजादभिन्न एवैकं पञ्चम इति उच्यते अपरकारणकुपिता वातादयोऽन्यानपि रोगान् कुर्वन्ति। मृत्तिकाभक्षणात् कुपितास्तु वातादयो विशेषतः पाण्डुरोगमेव जनयन्त्येवेति विशेषात् चिकित्साविशेषाच्च पञ्चमः पृथगेवोक्तः। तच्चिकित्सापरकारणकुपितदोषजनितपाण्डुरोगचिकित्सा भवतीति सुश्रुतेन मृत्तिकाजः पृथक् न पठितः। अथ विप्रकृष्टनिदानपूर्विकां सम्प्राप्तिमाह "व्यवायमद्यं लवणानि मद्यं मृदं दिवास्वप्नमतीव तीक्ष्णम्। निषेवमाणस्य विदग्ध रक्तं दोषास्त्वचं पाण्डुरतां नयन्ति" तीक्ष्णं राजिकादि। अथ पूर्वरूपमाह "त्वक्स्फोटनिष्ठीवनगात्रसादसङ्कल्पशैत्यशूटयोषाः। विण्मूत्रपीतत्वमथाविपाको भविष्यतस्तस्य पुरःसराणि" शैत्यशूटयोषः इति सन्धिगोलकशोथः। अथ वातिकस्य पाण्डुरोगस्य लक्षणमाह "त्वङ्मूत्रनयनादीनां रूक्षश्यावारुणामता। वातपाण्डुामये कम्पस्तोदाटोपश्रमादयः"। श्यावारुणामता पाण्डुत्वं नातिक्रामति। अतएव सुश्रुते "सर्वेषु चैतेष्वपि पाण्डुभावो यतोऽधिकोऽतः खलु पाण्डुरोगः" इति। श्रमादय इत्यादिशब्दात् मेदःशूलादयः। अथ पैत्तिकस्य लक्षणमाह "पीतत्वङ्नखविण्मूत्रदाहतृष्णाज्वरान्वितः। भिन्नविट्कोऽतिपीताभः पित्तपाण्डुामये नरः"। भिन्नविट्कः सद्रवमलः। अथ श्लैष्मिकस्य लक्षणमाह "कफप्रसेकः स्वयथुः तन्द्रालस्यातिगौरवैः। पाण्डुरोगी कफात् शुक्लत्वङ्मूत्रनयनाननैः"। अत्रोपलक्षणे तृतीया। सान्निपातिकस्य लक्षणमाह "सर्वान्युपेक्षिणः सर्वे दुष्टा दोषास्त्रिदोषजम्। त्रिदोषलिङ्गं कुर्वन्ति पाण्डुरोगं सुदुःसहम्"। अथ मृज्जस्य सम्प्राप्तिमाह "मृत्तिकादनशीलस्य कृष्णत्वग्यतमो मलः। कषाया सारतं, पित्त मूषरा, मधुरा कफम्। कोपयेत्सहसादौव रौक्ष्यादुभुक्षञ्च जनयेत्। पूरयत्यविपक्वैव स्रोतांसि निरुध्यापि। इन्द्रियार्थां बलं हत्वा तेजो वीर्यौजसी तथा। पाण्डुरोगं करोत्याशु समवर्णाग्निनायनम्"। स्रोतांसि शिरासत्त्वानि। तेजो दीप्तिः ओजः सर्वधातुरसः। अथ मृज्जस्य लक्षणमाह "सङ्कल्पशाल्पवेत्पाण्डुस्तन्द्रालस्यनिपीडितः। सकाश्यश्वासमूर्छार्तः सदाऽरुचि समन्वितः। मूनाक्षिकूटगण्डभ्रूः मूनपाण्यभिमेहनः। क्रिमिकोष्ठोऽतिसार्यते मृज्जं सास्रकफान्वितम्"। क्रिमिकोष्ठः उदराभ्यन्तरस्थक्रिमिभेदविशेषेण सम्बध्यते अतिसार्यते मृज्जमिति कर्मकर्तृ तत्कर्मवत् मन्तव्यम्। तच्चिन्त्यं कर्मण्यर्थेऽत्र यक्प्रत्ययः। अथ साध्यस्य लक्षणमाह "ज्वरारोचकहृल्लासच्छर्दिष्याल्लमान्वितः। पाण्डुरोगी त्रिभिर्दोषैरल्पाल्पः क्षीणो हतेन्द्रियः। पाण्डुरोगविरोत्पन्नः खरीभूतो न सिध्यति। कालप्रकर्षात् मूनाक्षो वो वा पीतानि पश्यति" खरीभूतः अतिरूक्षितः सर्वधातुः "बद्धाल्पविट् सहरितं सकफं योऽतिसार्यते। पीतस्वेदादिदिग्धाङ्गः छर्दिमूर्छातृषान्वितः। पाण्डुदन्तनखो यस्तु पाण्डुनेत्रश्च यो भवेत्। पाण्डुरुक्षातदर्शी च पाण्डुरोगी विनश्यति"। पाण्डुरुक्षातदर्शी पीतवर्णस्य रात्रिं पश्यति। "अन्तेषु मूनं परिहीनमध्यं स्थानं तथान्तेषु च मध्यमस्य। मुहे मुखे मेढ्रशिरोमुखे च मूनं प्रताम्यन्तमसंशयं तम्"। "उरस्यं निष्ठते चैव पाण्डुरोगः प्रजायते" धातो० मेघवधकर्मणोविपाक इत्रोम उक्तः। इमाषपर्णाम् (माषाकी) स्त्री राजनि०। पाण्डोरपत्यम् "ओरञ्" पा० अञ्। पाण्डव पाण्डोरपत्ये युधिष्ठिरादौ। पाण्डोः जनपदभेदस्य राजा "पाण्डोर्धृ" वार्त्ति० अञ्। पाण्डुरिक्षुभेदे रघु० ४।८२। स्वार्थे क पाण्डुक तत्रार्थे ततः अस्त्यर्थे इनि पाण्डुकिन् तद्रोगयुते त्रि०। संज्ञायां कन्। पाण्डुक धान्यभेदे सुश्रुतः। तत्र पृथो० दीर्घमध्यः पाण्डुक तत्रार्थे पङ्कजवद्दे २३८२पृ० सुश्रुतवाक्यं दृश्यम्। पाण्डुकस्य छदिः शौरिकाछदा भवतीत्युक्तं ६०अ० २६अ०।

पाण्डुकण्टक पु० पाण्डुवर्णानि कण्टकानि यस्य। अपामार्गे राजनि० पाण्डुरोगस्य नाशकत्वाद्धा तस्य तथात्वम्।

पाण्डुकम्बल ष० पाण्डुवर्णः कम्बलः निलक०।

१राजाक्षरभेदे कम्बलभेदे (शाल) त्रि०कौ०। २प्रस्तरभेदे मेदि०। ततः "पाण्डुकम्बलादिनिः" पा० अस्यार्थे इनि। पाण्डुकम्बलिन् तद्युक्ते। तत्र इनिग्रहणमधोनिर्देश्यर्थमिति सि०कौ०।

पाण्डुकर्मन् न० ६त०। शुक्लवर्णसम्पादने सुश्रुतोक्ते व्रणस्य उपक्रमभेदे चिकित्साभेदे। पाण्डुकरणमत्र कृष्णकर्मशुक्लकर्मणी तु शब्दे तत्रोक्ते यथा "भल्लातकानि वासवेत्तु क्षीरे प्राङ्मूत्रभावितान्। ततो द्विधा छेदयित्वा लौहे कुम्भे निधापयेत्। कुम्भेऽन्यस्मिंश्चिच्छान्येत तं कुम्भमत्र योजयेत्। सन्धिं रुक्षेण सन्नाव गोमयेनोर्ध्वमेवेत्ततः। यः स्नेहश्यवते तस्मादुपाहरेत्तं यत्नैर्भिषक्। ताम्यानूपमृगान्दग्ध्वा रुक्षचूर्णानि कारयेत्। तेनैनानेन संहृष्टं शुक्लमालेपयेदव्रणम्। भल्लातकविधानेन सारस्तेषांस्तु कारयेत्। ये च केचित्फलस्नेहविधानं तेषु कीर्त्तितम्। रुक्षत्वात्तु कृष्णानां पाण्डुकर्म हितं भवेत्। सप्तरात्रं स्थितं क्षीरे जागले रोहिणीफलम्। तेनैव पिष्टं शुक्लं सवर्णकरणं हितम्"।

पाण्डुतरु पु० कर्म०। धववृक्षे राजनि०।

पाण्डुतीर्थ न० तीर्थभेदे शिवपुराणम्।

पाण्डुनाग पु० नाग इव पाण्डुः राजद०। १पुन्नागवृक्षे २श्वेतहस्तिनि ३श्वेतसर्षपे च शब्दरत्ना०।

पाण्डुपत्री स्त्री पाण्डु पत्रं यस्याः जातित्वात् ङीप्। रेणुकानामवृक्षे राजनि०। [त्रिका०।

पाण्डुपृष्ठ त्रि०पाण्डु पृष्ठं यस्य। दुर्लक्षरूपपक्षे तृष्ठयुक्ते

पाण्डुफल पु० पाण्डूनि फलान्यस्य। १घटोले २चिर्भटवृक्षे स्त्री राजनि०।

पाण्डुभूम त्रि० पाण्डुः भूमिरत्र कृष्णमा०। १पाण्डुवर्णभूमियुक्ते कर्मधारये अपुंस्मा०नेष्यते। २श्वेतमृत्तिकायां श्वटिकायाम् च स्त्री हेमच०। "पाण्डूदकृष्णमृत्तिकाः" हेमचन्द्रोक्तेः। अन्ये तु तत्रापि अपुंस्मा०। सा च तत्रार्थे स्त्रीति भेदः।

पाण्डुमृत्तिका स्त्री नित्यक०। खटिकायाम् हेमच०। पाण्डुमृदादयोऽप्यत्र स्त्री।

पाण्डुर पु० पाण्डुर्वर्णोऽस्यास्ति र। श्वेतपीतमिश्रिते वर्णे अमरः २तद्युति त्रि०। पण्डि-उर पृषो० डस्य डः। श्वेतवर्णे ३तद्युति च त्रिका०। ४कामलाख्ये रोगे हृच्छितरोगे न० शब्दरत्ना०। ७मालतीवृक्षे स्त्री टाप् राजनि०।

पाण्डुरङ्ग पु० पाण्डुरमङ्गमस्य बक०। (पाटराङ्ग) शाके "पाण्डुरङ्गः क्षमिक्षेऽपित्तजित् लघुतिक्तकः" राजवल्लभः

पाण्डुरद्रुम पु० नित्यक०। कुटजवृक्षे (कुडची) त्रिका०।

पाण्डुरपृष्ठ त्रि० पाण्डुरं पृष्ठमस्य। दुर्लक्षरूपपाण्डुरपृष्ठयुते हेमच०।

पाण्डुरफली स्त्री पाण्डुरं फलमस्या रः ङीप्। क्षुद्रक्षुपभेदे। "कच्छाम्रदोषपित्तानां मूत्रघातस्य नाशिनी। वल्या दृष्या च पाण्डुरफली तु शिशिरा तथा" राजनि०

पाण्डुराग पु०० पाण्डूरागोऽस्य। दमनवृक्षे राजनि०।

पाण्डुरेणु पु० नित्यकर्म०। श्वेतेक्षौ राजनि०।

पाण्डुलेख पु०(लवविदा) ख्याते पूर्वपक्षादिलेखनभेदे पाण्डुलेख्यादयोऽप्यत्र। तत्प्रकारादि वीरमि० उक्तो यथा "अथ तु पक्षः प्राक्पाण्डुलेखं भूमिफलकादौ कारयित्वा शोधितः पश्चात्पत्रे लेखनीयः तथा च हारीतः "अधिकाक्षरातिरेफांश्च न्यूनांश्च परिपूरयेत्। भूमौ निवेशयेत्तावद्यावद्यौ विनिश्चितः" ज्ञातवेदुदयेत् भूमाविति पाण्डुलेख्यशोध्याधारोपलक्षणम्। अतएवाह स एव "पूर्वपक्षं स्वभावोक्तं प्राग्विवाकोऽभिलेखयेत्। पाण्डुलेखेन फलके ततः पत्रे विशोधितम्" इति। स्वभावोक्तत्र भवाद्युपाधिनोक्तम्। व्यासोऽपि "पाण्डुलेखेन फलके भूमौ वा प्रथमं लिखेत्। अनाधिकन्तु संशोध्य पश्चात्पत्रे निवेशयेत्"। शोधनञ्चोत्तरशोध्यावधि विधेयम् न ततःपरमनवस्थापत्तेरदृष्टार्थताघाताच्च। तथा च नारदः "शोधयेत्पूर्ववादन्तु यावच्चोत्तरदर्शनम्। अवष्टब्धञ्चोत्तरेण निहृत्तं शोधनमचेत्" अवष्टब्धञ्चोत्तरयोग्यम्। वस्तुतस्तु प्रगल्भत्वात् पक्षदोषगुणज्ञानादानाभ्यां शोधयितुमशक्तस्य वक्तव्यार्थं निर्धार्य्य सभ्यैरेव संशोधनीयः। यथाह हारीतः "अभियोक्ताऽप्रगल्भत्वाद्दक्षं चोत्पद्यते यदा। सभ्यैस्तु शोधनन्तस्य कार्य्यमर्थानुरूपतः" इति। यदि भाषाप्रशोधित्वेवोत्तरन्दापयन्ति सभ्यास्तदा रागाक्षोभाद्भयाद्वाशोत्पादुक्तदण्डेन सभ्यान् दण्डयित्वा पुनः प्रतिज्ञालेखनपूर्वकं व्यवहारः प्रवर्त्तनीयो राज्ञेति तात्पर्य्यम्। यदा स्वधिप्रत्यर्थिनोर्लेखनापाटवाद्राजकीयलेखकद्वारा तौ भाषोत्तरे लेखयतः। स चान्यतरपक्षपातेनान्यथा लिखत्यन्यत् च राज्ञा चौरवद्दण्ड्य इत्याह कात्यायनः "अन्यदुक्तं लिखेदन्यो ऽर्थिप्रत्यर्थिनां वचः। चौरवच्छासयेत्तन्तु धार्मिकः पृथिवीपतिः" इति।

पाण्डुलोमशा स्त्री पाण्डूनि लोमानीवाङ्गानि यस्याः ब० । १माषपर्णाम् । २श्वेतलोमवति त्रि० रत्नमा० । पाण्डुलोमाऽत्र जटा० । [रोगे मरुड्वृ० १८२ अ० ।

पाण्डुशर्करा स्त्री पाण्डुवर्णा शर्करा । सितानामकप्रमेदे

पाण्डुशर्म्मिला स्त्री द्रौपद्यां त्रिका० ।

पाण्डुसोपाक पु० संकीर्णजातिभेदे "चाण्डालात्पाण्डुसोपाकस्त्वक्सारव्यवहारवान् । आहिण्डको निषादेन वैदेशामेव जायते" मनुः। त्वक्सारः वेणुः ।

पाण्ड्य पु० पाण्डुः देशोऽभिजनोऽस्य तस्य राजा वा यञ् । १तद्देशवासिनि २पाण्डुदेशशब्दे च । स च देशः भ०स० १४ अ० मध्यमे भागे उक्तः । दक्षिणदिक्स्थश्च । "दिशि मन्दायतेतेजः दक्षिणस्यां रवेरपि । तस्मादेव रघोः पाण्ड्याः पतार्णं न विषेहिरे" रघु ।

पाण्ड्रवाट पु० पाण्डुदेशस्थे सह्यनामाकरभेदे भ०स० ८। अ०। सह्यशब्दे दृश्यम् ।

पात पु० पातयति यङ्लुत्तरा दक्षिणा वा पाति—यच् । रविभिन्नयङ्लायां दक्षिणोत्तरार्द्धके अदृश्यरूपे कालमूर्त्तिरूपे सू०सि० उक्ते भचक्रस्थिते स्त्रीत्वभेदे तदधिष्ठातृदेवे २राहौ च । पातस्य तथात्वसाधके सू०सि० वाक्ये दर्शितम् । तस्य यङ्लायां दक्षिणोत्तरार्द्धकत्वं च तत्रोक्तं यथा "दक्षिणोत्तरतोऽप्येवं पातो राशेः खरंहसा । विक्षिपत्येष विक्षेपं चन्द्रादीनामपक्रमात्" सू०सि० "चन्द्रादीनां विरविभयङ्लायामपक्रमात् क्रान्तिवृत्तस्थसदृशयङ्लभोगस्थानाद्दक्षिणोत्तरतो दक्षिणस्यामुत्तरस्यां वा दिशि । अपिशब्दः पूर्वापराभ्यां समुच्चयार्थकः । एष गणितागतः पातः पातराशयादिभोगस्थानम् । अत्रापिशब्द एवेन समुच्चयार्थकोऽन्येति । यथोक्तेन. पूर्वापरयोः फलान्तरं भवति तथेत्यर्थः । विक्षेपं विक्षेपणं खरंहसाख्यवेगेन विक्षिपति करोति । विक्षिप्तवाचकानां पदानां विक्षेपणवाचकपदसमवधाने विक्षेपप्रभावार्थत्वात् चन्द्रादीन् विक्षिपतीति तात्पर्यार्थः । ननूक्तेन स्वाधिष्ठितजीवद्वारा यङ्लाकर्षणं क्रियते तथा पातेनाचेतनत्वादेगाभावेन यङ्लविक्षेपणं कर्त्तुमशक्यमित्यत आह राड्डरिति । पातस्थानाधिष्ठाती देवता राड्डरीत्यभिधेयश्चन्द्रपातस्तु दैत्यविशेषो राड्डः । रड्डति त्यजति यङ्लमिति राड्डरिति व्युत्पत्तेः । अथैतद्विशदयति" रङ्ग० "उत्तराभिमुखं पातो विक्षिपत्यपरार्द्धगः । यङ्लं प्राग्भगणार्धस्थो याम्यायामपकर्षति" सू०सि० "अपरार्द्धगो यङ्लस्थानात् पश्चिमविभागस्थितभगणार्द्धात्कराशिषट्कस्थितो राड्डपं ङविम्बं खराश्यादिभोगस्थानीयप्रदेशादुत्तरदिगभिमुखं विक्षिपति विक्षेपान्तरेण त्यजति । प्राग्भगणार्धस्थः यङ्लस्थानात् पूर्वविभागस्थितराशिषट्कमध्यस्थितो दक्षिणस्यां दिशि यङ्लमपकर्षति विक्षिपति । अथ बुधशुक्रयोर्विशेषमाह" रङ्ग० "बुधभार्गवयोः शीघ्रात् तद्वत् पातो यदा स्थितः । तच्छीघ्राकर्षणात् तौ तु विक्षिप्येते यथोक्तवत्" सू०सि० "बुधशुक्रयोः शीघ्रोच्चाख्यात्मभिप्रायेणैकवचनम् । तद्वत् परार्द्धपूर्वार्द्धभगणार्द्धमध्ये यदा तत्काले स्थितस्तुकारात् यत्काले पाताभ्यादिस्यर्थः । तौ बुधशुक्रौ यथोक्तवत् पूर्वार्द्धपरार्द्धक्रमेण दक्षिणोत्तरयोर्विक्षिप्येते विक्षेपान्तरेण त्यज्येते । तथा हि स्वशीघ्रोच्चाद्बुधशुक्रयोर्यदन्तरं राश्यात्मकं तद्वत् पातस्यैवान्तरेण युक्तः पूर्वानीतपात इत्यर्थः । यथा बुधशुक्रयोरपरपूर्वार्द्धक्रमेण स्थितोऽवस्थितस्तुकारात् तथेत्यर्थः । तच्छीघ्रकर्षणात् ताडग्रपाताभ्यां शीघ्रं वेगेनाकर्षणं तस्मात् पातस्थानाधिष्ठातृदेवताभ्यां यङ्लस्थितयङ्लसम्बन्धवायुरूपस्यातिवेगाकर्षणरचनादित्यर्थः । तौ बुधशुक्रावुक्तवदुत्तरदक्षिणक्रमेण विक्षिप्येते । अत्र पातशब्देन चक्रशोधितपातो बोध्यः । अन्यथा यङ्लेन शीघ्रोच्चरूपकेन्द्रयोजनस्योपपत्तिसिद्धत्वेन शीघ्रोच्चोनयङ्लरूपकेन्द्रयोजनोक्त्युपपत्तेः । तथा च सर्वयङ्लाधारत्वं विक्षेपकथनं पातभेददर्शनार्थं बुधशुक्रयोः पृथगुक्तम् । न ह्यन्यस्मिन् पक्ष उक्तयोर्विक्षेपं प्रतीयते येन प्रागुक्तसर्वविलोपापत्तिरुद्भावनीयम् । पातभेदोक्तिकारणं च "ये चात्र पातभगणाः कथिता ग्रहयोः ते शीघ्रकेन्द्रभगणैरधिका यतः स्युः । स्वल्पा युगार्धभणितास्तु केन्द्रयुक्तौ पातौ ततोः पठितचक्रभवौ विधेयौ" इति भास्कराचार्योक्तमिति दिक्" रङ्ग० ।

अत्रेदं बोध्यं रवेः स्वतएव दक्षिणोत्तरयोर्गमनस्वभावात् नास्य पातेन विक्षेपणापेक्षेति विरविभयङ्लायामित्युक्तम् । तत्र युगे चन्द्रपातभगणाः "चन्द्रोच्चस्याग्निभूम्याब्धिसप्तसूर्यैर्वा युगे । वामं पातस्य यत्खाग्निवसाब्धिगिरिदस्रकाः" सू०सि० "चन्द्रमन्दोच्चस्य पूर्वगतेरङ्गयङ्लरूपस्य भगणा महायुगे रामनखाष्टाष्टवेदमिताः । पातस्य चन्द्रयङ्लस्य सद्विक्षिप्ततत्त्वचन्द्रपातस्याष्टयङ्लरूपस्य वामं पश्चिमगत्या द्वादशराशिभोगात्मकपरिवर्त्तरूपभगणा महायुगे यद्व-

रामाह्नतिरामद्विगिताः। अत्र युगपद्वर्षं वक्ष्यमाणपद्मोद्भवपातभगणसम्बन्धिकल्पकालधारणार्थम्। पद्मोद्भवपातभगणास्तु युगे युगे नोत्पद्यन्ते इत्यत्रिन् युगसम्बन्धिप्रवहेनोक्ताः" रङ्ग०। कल्पे भौमादिपातानां भगणास्तु तत्रोक्ता यथा "पातानामथ वामतः" इत्युपक्रमे "अथानन्तरं पातानां भौमादिपातानां वामतः पश्चिमगत्या भगणा उच्यन्त इति शेषः। तान् श्लोकाभ्यामाह" रङ्ग० "भद्रदक्षास्तु कौजस्य-बौधस्याष्टसागराः। लताद्रिचन्द्रा जैवस्य त्रिखाङ्काश्च भृगोस्तथा। शनिपातस्य भगणाः कल्पे यमरसर्तवः। भगणाः पूर्वमेवात्र प्रोक्ताश्चन्द्रोच्चपातयोः" सू०सि० "कौजस्य कुजसम्बन्धिनः। तकारात् पातस्य भौमपातस्य कल्पे भगणाश्चतुर्दशाधिकं शतद्वयम्। बौधस्य बुधसम्बन्धिनः शनिपातस्यैत्यर्थः। एकदेशपातलोपलक्षणमेतत्। बुधपातस्य द्वादशोना षड्शती। जैवस्य गुरुपातस्य चतुःसप्तत्यधिकं शतम्। भृगोः शुक्रस्य तथा सम्बन्धिनश्चकारात्पातस्य शुक्रपातस्येत्यर्थः। त्रयधिका भवति। शनिपातस्य द्विरसघट्का भगणाः कल्पे भवन्ति। तत्रत्रिन् प्रवहे चन्द्रोच्चपातयोर्भगणाः कथं नोक्ता इति मन्दाशङ्कापाकरणाय पूर्वोक्तं स्मारयति भगणा इति। चन्द्रोच्चपातयोश्चन्द्रस्य मन्दोच्चपातयोर्भगणा अत्राग्निमाधिकारे पूर्वं पद्युगभगणकथने उक्ताः" रङ्ग०। पतति चन्द्रार्कयोः क्रान्तिसाम्येन उत्तिष्ठति पत-ज्वला-कर्त्तरि च। सूर्यसिद्धान्तोक्ते चन्द्रार्कयोः क्रान्तिसाम्येनागतीते अशुभसूचके महापातरूपे ग्रहभेदे तथा हि "तत्र भेदद्वयात्मकपातस्य सम्भवं विवक्षुः प्रथमं वैधृतसंज्ञपातस्य सम्भवमाह" रङ्ग० "एकायनगतौ ज्ञातां सूर्याचन्द्रमसौ यदा। तद्युतौ मण्डले कान्त्योस्तुल्यत्वे वैधृताभिधः" सू० सि०। सूर्याचन्द्रौ "सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयदिति" स्मृत्युक्तप्रयोगः। एकायनगतौ अभिन्नदक्षिणोत्तरान्यतरायनस्थौ भवतस्तत्र यदा यस्मिन् काले तद्युतौ सूर्यचन्द्रयोर्भोद्योर्योगे मण्डले द्वादशराशिमिते सति तदा तयोः क्रान्त्योः समत्वे महापातरूपे वैधृतसंज्ञः पातो भवति। अथ व्यतीपातसंज्ञपातस्य सम्भवमाह" रङ्ग० "विपरीतायनगतौ चन्द्रार्कौ क्रान्तिसिप्रिकाः। समात्तदा व्यतीपातो भगणार्द्धं तयोर्युतौ" सू०सि० "चन्द्रार्कौ विपरीतायनगतौ भिन्नायनस्थौ भवतस्तत्र यदा तयोः सूर्यचन्द्रयोर्भोद्योर्योगे भगणार्द्धं राशिषट्के सति तयोः क्रान्तिसाम्यकालासुल्या भवन्ति तदा तस्मिन् काले व्यतीपातसंज्ञकः पातो भवति" "नतु क्रान्त्योः साम्ये कथं पातो भवतीत्यत आह" रङ्ग०। "तल्लांशुजालसम्पर्कात् तयोस्तु प्रवहाहतः। तदुद्भवक्रोधभवो वह्निर्लोकाभावाय जायते" सू० सि०। "तयोश्चन्द्रसूर्ययोः। तकारात् क्रान्तिसाम्यकालिकयोः। तल्लांशुजालसम्पर्कात् समकिरणानां जालं समूहस्तयोरन्योन्याभिमुखयोः सम्पर्कात् एकीभावापन्नत्वात् तदुद्भवक्रोधभवः सूर्यचन्द्रयोरन्योन्याभिमुखयोर्यः क्रोधो बिम्बेन्द्रयोर्यत्पौरुषेयो क्रोधः परस्पराभिमुखेन दीप्राधिक्यं तदुत्पन्नोऽग्निः। प्रवहाहतः प्रवहवायुप्रच्यावितः लोकाभावाय जनानामशुभफलाय जायते। अथायं वह्निर्व्यतीपाताख्यो वैधृताख्यो वेत्यत आह" रङ्गना०। "विनाशयति पातोऽग्निर्लोकानामसदृशतः। व्यतीपातः प्रसिद्धोऽयं संज्ञाभेदेन वैधृतिः" सू० सि०। "अग्निर्क्रान्तिसाम्यकाले प्रसिद्धः पूर्वश्लोकोक्तस्वरूपः पातो वह्निः, यतः कारणात् असदृशं असमत्वेन वारं वारम् लोकानां विनाशयति। नाशं करोति। अतः कारणादयं वह्निर्व्यतीपातसंज्ञोऽयमेवाग्निः संज्ञाभेदेन नामान्तरेण वैधृतिसंज्ञः। तथा चोभयत्र पाताख्यो वह्निर्भवतीति भावः। अथ तत्स्वरूपमाह" रङ्गना०। "स कृष्णो दारुणवपुर्लोहिताक्षो महोदरः। सर्वानिष्टकरो रौद्रो भूयो भूयः प्रजायते" सू० सि०। "स क्रान्तिसाम्यकालोत्पन्न उभयसंज्ञकः पाताख्योऽग्निपुरुषः कृष्णः श्यामः, दारुणवपुः कठिनशरीरः, लोहिताक्ष आरक्तनेत्रः, महोदरः पृथूदरः। अतएव सर्वानिष्टकरः सर्वलोकानामशुभकारकः, रौद्रः क्षयकारकः, भूयोभूयोऽनेकवारम् प्रजायते। प्रत्येकं क्रान्तिसाम्यकाले उत्पन्नो भवतीत्यर्थः" रङ्गना०।

उपयमशब्दे १२६५ पृ० तद्भेदादिकं दृश्यम् भावे यङ्। सि०शि०टी०उक्ते ४प्रतिमण्डलविमण्डलयोः संपाते भेदने च "पातो नाम प्रतिमण्डलविमण्डलयोः संपातः। यस्मादारभ्य विक्षेपप्रवृत्तिः। इह सुरसर्वंशशलाकया कदम्बगोलकं तत्प्रतिमण्डलं च खेदकोक्तविधिना विरचय्य तत्र शीघ्रप्रतिमण्डले मेषादेः प्रतिलोमं पातस्थानं च चिह्नयित्वा तत्र विमण्डलं निवेशयेत्। पातचिह्नाद्राशिषट्कान्तरे विमण्डलप्रतिमण्डलयोरन्यं संपातं कृत्वा पातात् पूर्वतस्त्रिभेऽन्तरे प्रतिविक्षेपप्रमाणेन

प्रतिमण्डलादुत्तरतो विमण्डलं केनचिदाधारेण स्थिरं कृत्वा मेषादेरनुलोमं मन्दस्फुटं यद्दं प्रतिमण्डले विमण्डले च दत्त्वा विक्षेपोपपत्तिं दर्शयेत्। तत्र तयोर्यद्क्षयोर्यावान् विप्रकर्षस्तावांस्तत्र प्रदेशे विक्षेपः। अथ तत्स्थानयनम्। पातस्थाने हि विक्षेपाभावः। ततस्त्रिभेऽन्तरे परमो विक्षेपः। अन्तरेऽनुपातेन। अतः पातयद्दविक्षेपयोरन्तरं तावज्ज्ञेयम्। तच्च तयोर्योगे क्रान्तिर्भवति। यतो मेषादेरनुलोमं यद्दो दत्तः। पातस्तु प्रतिलोमम्। गणितागतपातकाले छायाक्षे "पातस्थितिकालान्तर्भङ्गलब्धं न ग्रस्यते तज्ज्ञैः। स्नानजपहोमदानादिकमक्षोपैति खलु दृष्टिम्" सि० शि० उक्तेः। पत–घञ् भावे। ५पतने। दृष्टिपातः स्रुवपात इत्यादि। पत–ज्वुल० कर्त्तरि ण्वु। ६पतनकर्त्तरि त्रि०। पात्यतेऽस्मिन् कर्म्मणि घञ्। ७व्रणे त्रि०मेदि०।

पातक त्रि० पातयति पाति–ण्वुल्। १पतनकारके नरकरूपपतनस्थानप्रापके नवविधे पापभेदे २अनुपातके च यथोक्तं प्रा० वि० "पातकपदमनुपातकपरं वेदः, ननु नवस्वेव पापेषु पातकशब्दो दृश्यते यथा पैठीनसिः, "स्त्रीगोब्राह्मणबालस्त्रीवधातो सोमविक्रयी सूद्रेण सह भोजी कन्यादूषी अगारदाही इत्येतेषतिरुग्वादी चैव पातकिनः"। नवविधं पापमभिधायाह विष्णुः "एवं पातकिनः पापमनुभूय सुदुःखिताः। तिर्य्यग्योनौ प्रवर्त्तन्ते दुःखानि विविधानि च"। याज्ञवल्क्यः "नीचाभिगमनं गर्भपातनं भ्रूहिंसनम्। विक्षेपपतनीयानि स्त्रीपापसमितान्यपि ध्रुवम्"। पतनीयानि पातकानीत्यर्थः। "ल्युट्यु्टो बहुलमिति" कर्त्तरेऽनीयर्। "महापातकदुःखानि पापान्युक्तानि यानि च। तानि पातकसंज्ञानि तदूनानुपपातकम्"। अतो महापातकदुःखयोरविशेषेऽप्यस्य शक्तिः। "नवविधपातकञ्च विष्णुसं० "तैरायमाक्रान्तोऽतिपातकमहापातकानुपातकोपपातकेषु प्रवर्त्तते। जातिभ्रंशकरेषु सङ्करीकरणेष्वपात्रीकरणेषु च। मलावहेषु प्रकीर्णकेषु च" वक्ष्यम्। ततः स्वार्थे इनि। पातकिन् तद्युक्ते त्रि० स्त्रियां ङीप्।

पातङ्कि पु०पतङ्कस्य सूर्य्यस्यापत्यम् इञ्। १शनैश्चरे २यमे च ३कर्णे ४वैक्लवतनौ ५सपीवे च।

पातञ्जल न० पतञ्जलिना प्रोक्तम् अण्। १पाणिनिसूत्रवार्त्तिकव्याख्यानरूपे "अथ शब्दानुशासनम्" इत्यादिके महाभाष्ये, "पातञ्जले महाभाष्ये कृतमूरिपरिश्रमः" भेश्वरः। "अथ योगानुशासनम्" इत्यादिके २योगशास्त्रे च। पतञ्जलिशब्दे दृश्यम्।

पातञ्जिन् पु० पतञ्जी तच्छब्दोऽस्यास्त्यध्याये अनुवाके वा विनुक्०अण्। पतञ्जिशब्दयुक्ते १अध्याये २अनुवाके च।

पातन त्रि०पातयति पाति–ल्यु। १पतनकारके स्त्रियां गौरा० ङीष्। भावे ल्युट्। २अधोगमने न०।

पातनञ् त्रि०पत–वा० अन्यण्। पतनशीले ऋ०१।५१।७मा०

पाताल न० पतत्यस्मिन्नधर्मेण पत–आलच्। १भुवनस्याधोभागे २सप्तस्वधोभागस्थे स्थानभेदे। तानि च सप्तैव यथा

"पातालानि च सप्तैव सप्तधः संप्रचक्षते। अतलं वितलञ्चैव सुतलञ्च तलातलम्। महातलञ्च विख्यातं ततो ज्ञेयं रसातलम्"। "ततः पातालमित्येवं सप्त पातालसंज्ञकाः। एते स्वर्गाधिकसुखा! विलस्वर्गाः प्रकीर्त्तिताः। सप्तद्वीपवनोद्यानविहारक्रीड़चत्वराः" पाद्मे पातालखण्डे। "अतलं सुतलञ्चैव वितलञ्च गभस्तिमत्। महातलं रसातलं पातालं सप्तमं स्मृतम्। कृष्णमौक्तं शिलाभौमं पातालं नीलरक्तिकम्। रक्तपीतसितकृष्णभौमानि च भवन्त्यपि। पातालानाञ्च सप्तानां लोकानाञ्च यदन्तरम्। शुषिरं तानि कथ्यन्ते भुवनानि चतुर्दश। अष्टाविंशतिसंख्याता ततो नरककोटयः। नरकाणामधस्ताच्च धूमः कालाग्निसन्निभः। तस्माद्यत्नादनन्ताख्यो रुद्रः सर्वमयो महान्। तदधो धर्मचक्रन्तु येनेदं धार्य्यते जगत्" अग्निपु०। २औषधपाकार्थबन्धभेदे "अर्द्धमाषस्तले वह्निर्मध्ये च रससंग्रहः। पाताले चक्रमेतद्धि शोधनेह पारदादिकम्"। ३पड़्वाशब्दे ४पर्वमात्रे च मेदि०।

पातालकेतु पु० दानवभेदे मार्क०पु० २१अ०।

पातालगरुड़ो स्त्री छिलिछिलिगड़ाख्ये लतामेदे राजनि०। भावप्र० अस्य पर्य्यायगुणौ यथा "छिलिछिलिगड़ो महामूलः पातालगरुड़ाह्वयः। छिलिछिलिगड़ः परं ह्रस्वः कफघ्नः पवनापहः"।

पातालनिवास पु० नि+वस–आधारे घञ् पातालं निवासो यस्य। दैत्ये पातालनिवासादयोऽत्र स्था० पातनौकस् तत्रार्थे ङेमत्र०। [णिच च उच्चनद०।

पाति पु० पाति पा–रक्षणे कि। १प्रभौ पत–इण्। २पक्षिणि

पातिक पुंस्त्री० पातः पतनं जलमज्जनं प्रयोजनमस्य वाते साधु वा ठक्। शिशुमारे जलजन्तुभेदे शब्दमाला स्त्रियां जातित्वात् ङीष्।

पातिली स्त्री० पतिः स्वामी पत्नी वा लीयते अत्र लि–वा० ड गौरा०ङीष्। १वासुरायां २नार्य्यां ३मृत्पात्रभेदे (पातिल) भेदि०। [स्त्रियां च भेदि०।

पातुक त्रि० पत–उकञ्। १पतनशीले २पपाते २जलकङ्-

पात्र त्रि०पाति रक्षति पिबति वा पा–ष्ट्रन्। १रक्षके २पात्रिणि च त्रि० स्त्रियां ङीप्। ३गन्धपत्रे ४हरणभेदे पु० हेमच०। [सैनागणककर्मणि तद्भावे च।

पात्तिगणक न० पत्तिगणस्य भावः तद्भावा० वुञ्।

पात्नीवत पु०पत्नी विद्यतेऽस्य मतुप्। "छन्दसीरः" पा०वस्य वः तच्छब्दोऽस्यत्र विसृष्टा० अण्। पत्नीयच्छब्दयुक्ते १अध्याये २अनुवाके च। तत्रानुवाकः "तान् वज्रताम् इत्यादिर्मन्त्रः" आ० १।१३।७। तस्येदम् अण्। ३यज्ञपात्रभेदे यजु० १८।२० कात्या० ६।६।२१ शत०ब्रा० १७।७।२।६।

पात्य न०पत्लुर्यावः यक्। १पतित्वे "भरणाद्धि स्त्रिया भर्त्ता पात्याच्चैव स्त्रियाः पतिः" भा०आ० २६७अ० पत–णिच् यत्, पत–यत् वा। २यातनीये ३पतनीये च त्रि०।

पात्र पु०न० अर्च्चा० पाति रक्षत्यधेयं पिबत्यनेन वा पा–ष्ट्रन्। १जलाद्याधारे भोजनयोग्ये २चमसे अमरः। अस्य स्त्रीत्वमपि विवक्षात् ङीप्। विद्यादियुक्ते दानयोग्ये ३ब्राह्मणे न०"ब्राह्मणं पात्रमाहुः" इति स्मृतिः। ४वस्त्रिवे खुवादौ, तीरद्वयमध्यवर्त्तिनि ५जलाधारस्थाने ६राजामात्ये च मेदि०। नाटकेऽभिनेये ७नायकादौ च न० हेमच० ८मानभेदे वैद्यकम्। यज्ञियचमसादिसाधनपात्रलक्षणम् कात्या० श्रौ० भाष्ये।

"अथ पात्राणां लक्षणमुच्यते खादिरः स्रुवोऽङ्गुष्ठपर्वोन्नत पुष्करो नाभिकावत् पर्वार्द्धोत्तो भवति। अत्रैव खादिरः षडङ्गुलतिररत्निमात्रः। स्रुचो बाहुमात्रो मूलदण्डास्त्रिभिर्वा हंसमुखवदग्रैकप्रणालिकायुक्ताः। पाणिमात्रपुष्करप्रणालोत्तरयुक्ताश्च कार्य्याः। पालाशी जुहूः, उपभृदाश्वत्थी, वैकङ्कतो ध्रुवा "एतेषां वृक्षाणामेषां वा सर्वाः स्रुचः कारयेत्, बाहुमात्रोऽरत्निमात्रो वाप्राप्तालक्षोविला हंसमुखाः" इत्यापस्तम्बः। अग्निहोत्रहवणी वैकङ्कतो, अग्निहोत्रस्रुवो वैकङ्कतः। यैः पात्रैर्होमो न क्रियते तानि सर्वाणि कारयानि भवन्ति तानि चोलूखलमुषलकुर्चेडापात्रीपिष्टपात्रीध्रुरोडाशपात्रीशम्याश्चावदानार्थानि ध्रुवेणान्तर्धानकटप्राग्विलहरणषडवत्तहवनादीनि। तत्रोलूखलादीनि वाक्षाणि। कूर्चो बाहुमात्रः पीठाकारः। इडापात्री पिष्टपात्री चरत्निमात्रौ मध्यसंगृहीते। पुरोडाश पात्री प्रादेशमात्री समचतुरस्रा षड्ङ्गुलहस्तखातवती। शम्या प्रादेशदशाङ्गुला प्राग्विलहरणं हस्तमादर्शाकारं चतुरस्रं चमसाकारं वा तथैव द्वितीयमपिधानपात्रम् षडवत्तं चोभयत्र खातवत्। आसनानि चारत्निमात्र दीर्घाणि प्रादेशमात्रविपुलानि सर्वेषु पात्रेषु मुखाभिघानार्थं हवनानि कार्य्याणि अनादेये होमसाधनभूतानि पात्राणि वैकङ्कतानि भवन्ति यथा सोमयागे यज्ञपात्रहोमकलशादीनि तत्रापि इविर्धानाधिषवणफलकस्मरणीपरिप्लवादीन्यहोमसंयुक्तानि वारण्यान्येव शोडशिनः पात्रं खादिरं चतुरस्रम् खंडदाभ्यपात्रमौडुम्बरं वचनात् वाजपेये सप्तदशानां सोमयज्ञानां पात्राणि वारण्यानि अहोमसंयुक्तत्वात्। सुराग्रहपात्रागण्यपि वारण्यानि शाखान्तरानुमुख्यत्वानि वा इत्येवमादि सर्वमूहनीयम्। मूलं कात्या०श्रौ०१।३।२१ स्रुवादौ द्रष्टव्यम्। कर्मप्रदीपे च "काञ्चस्त्राक्षी च कर्त्तव्या तैजसद्रव्यसम्भवा। मही मयी वा कर्त्तव्या सर्वेष्वाज्याहुतीषु च। काञ्चस्त्राक्ष्याः प्रमाणं तु यथाकामन्तु कारयेत्। स्रुदडामग्रयां भद्रमाञ्चस्त्राक्षीं मन्यन्ते। तिर्यग्गूर्द्धं समिन्नाला दृढा नातिदृहन्मुखी। मृन्मयौडुम्बरी वापि चरुस्थाली प्रशस्यते। स्रुगाखोक्तः प्रसुस्रिस्रो ह्रस्वोऽकठिनः शुभः। न चातिस्थिविलः पाय्यो न चरुस्थालसन्निभा। दण्डजातीयविच्छाद्रं प्रमाणं मेक्षणं भवेत्। हस्तं चाङ्गुष्ठपर्व्वप्रमवदानक्रियाक्षमम्। एवैव दर्वी यत्तत्र विशेषस्तमहं ब्रुवे। दर्वी हस्तद्वयोपा तूरीयोऽनलमेक्षणम्। मूलोलूखले वार्क्षे खातवते दृढे तथा। दण्डाग्रप्रमाणे भवतः शूर्पं वैष वमेव च। दक्षिणं वामतो बाहुमात्राभिमुखमेव च। बाहुमात्राः परिधय ऋजवः सत्वचोऽग्रयाः। त्रयो भवन्ति शीर्षण्या एकैमान्तु चतुर्दिशम्। प्रागग्रावभितः पश्चादुदग्रमथवा परम्। न्यसेत् परिधिमन्यद्वेदुदग्रयः च पूर्वतः" देवपूजाङ्गपात्रमानं देवीपु० उक्तं यथा "षट्त्रिंशदङ्गुलं पात्रमुत्तमं परिकीर्त्तितम्। मध्यमं तत्त्रिभागेन हीनं कन्यसमीरितम्। वसुकुलप्रमाणन्तु ततपात्रं कारयेत् क्वचित्। नानाविधिविचित्राणि पौष्करीकाणतीनि च। शङ्खनीलोत्पलाकारपात्राणि परिकल्पयेत्। रत्नादिरचितानि कुर्यात् काष्ठीमूलसुव-

ञ्जितान्। यथाशोभं यथालाभं तथा पात्राणि कारयेत्। विना पात्रेण यः कुर्यात् प्रतिष्ठां वास्तिकीं क्रियाम्। विफला भवते सर्वंयाज्ञनादिधनापहा" दानशब्दे दानपात्रलक्षणादिकं ३५२० पृ० उक्तम्। पाकपात्रलक्षणादिकं पाकशब्दे ४२८३पृ० दृश्यम्।

पात्रट पु० पात्रेव पिबन्निव घटति घट् क्वच्। १कर्पटे २क्षुद्रे शब्दच०।

पात्रटीर पु० पात्रेव पिबन् रक्षन्निव वा घटति घट बा० ईरन्। १उचितव्यापारयुते मन्त्रिणि २लौहपात्रे ३काष्ठपात्रे ४रजतपात्रे ५पिधाने ६पात्रे च मेदि०। ७पक्षिण्यां टकारे ८क्षुद्रे च पुंस्त्री० शब्दरत्ना स्त्रियां जातित्वात् ङीष्। [रक्षके तु घाटट पु० जटाध०।

पात्रपाल त्रि० पात्रं पालयति पाल–अण् उप०स०। पात्ररक्षके

पात्रसंस्कार पु० ६त०। पात्रशुद्धौ मृज्जलादिना पात्रमार्जने पुरोटौ शब्दच०।

पात्रासादन न० ६त०। यज्ञपात्राणां यथोक्तक्रमेण यज्ञनिष्पादनाय स्थापने यज्ञपात्रासादनक्रमस्तु कात्या० श्रौ० २।२।५ सू० तद्भाष्ये उक्तो यथा

"भूर्यग्निहोत्रहवणीस्रुक्कपालं शम्याकृष्णाजिनसक्तूखलमूषलं दर्वदृषदर्घर्वच" इत्यु० "स्रुक्कपालमित्येकवद्भावादिदमेकं द्वन्द्वम् तेन बहुभिरपि कपालैरेकमेव पात्रमिति द्रष्टव्यम्। कपालानि च भिन्नस्य घटादेर्यानीह यज्ञियान्यपि रौद्दिग्यकपालवत् निर्मितानि भवन्तीत्येके इति धूर्तस्वामिनः। भूर्पं च नडतृणमयमिष्टीकानिर्मितं वेणुदलनिर्मितं वा भवति। यद्यच्च येन येन पात्रेणाज्यं प्रयोजनं तेषां सर्वेषामुपयोगक्रमेणासादनम्। तथा च कात्यायनः "प्राग्धं प्राङ्नसदगन्नेरुदगग्यं समीपतः। तत्तथा सादयेद्द्रव्यं यद्यथा विनियुज्यते" इति तद्यथा "अनो वा पात्री वा द्रोणो यथा वा ततश्चैवम् अनोद्रोणयज्ञानोर्यथा पात्रीद्रोणयः पात्रीयथा" इति वा पवित्रच्छेदनानि पवित्रे च उपवेषः संयवनार्थसदनं च आज्यस्थाली आज्यं च अभावस्थायां दोहन चतुष्टयम्, वेदार्थः कुशस्तृटिः, दक्षिणार्थां अन्वाहार्यं तण्डुलाश्च दर्भस्तृणमध्रिय ध्मो बर्हिश्च स्रुवो लुक्ष्च उपभृद्ध्रुवा च प्राग्धरणे स्थातव्यानं च हे पुरोडाशपात्रे इति" कर्कादयः। तदयुक्तमिति केचित्। खण्डवयाज्यान्तरखण्डेषु सादनप्रतापनोपस्करणादिव्यवस्था एव दर्शनात्। यत्रेडापात्रीपिष्टपात्रोरभेदमाह्यस्तदपि व्यवस्थाभाष्यान्तरखण्डेषु तयोर्भेददर्शनात् तथा च तैत्तिरीयखण्डम् "प्राग्धरणं चेडापात्रं च मेक्षणं च पिष्टपात्रो चेति" विहितो चातुर्मास्यादौ यत्र सर्वादिभिर्व्यवस्थितः पुरोडाशः तत्र भवतु पुरोडाशपात्रीभेदः। याज्ञ वृतक्रुशाश्च परिधयः कुशास्तोर्यं होतृषदनं च रड्डापात्री शकटवत्तं च अन्वाधानकटः पूर्णपात्रं च पक्षे कर्मोपयोगी सन्निध्यासादितो परिधीनामपि प्रथमासादनमष्टादशकाष्टकेध्मपक्षे एकविंशतिकाष्ठेध्मपक्षे तत्कादेध्मात् लौकिकाग्न्यादाय विच्छेदेन परिधिपरिधानविधानात्। एवमत्र पात्राणामुपादानक्रमेणासादनमुक्तम्। यस्य यस्य पात्रस्य येन क्रमेण तत्तासादनम् एवं च सुतरां दर्शार्थता भवति लाघवं च विनियोगक्रमेणासादने च तथा न स्यात् हविर्धानहविष्पात्राणां च देशविप्रकर्षात् आज्यनिर्वापे स्वाम्याज्यस्य च तस्मादुपादानक्रम एव पितृभूतिवाग्निकस्मतः पात्रासादने युक्तः। कर्कोचार्यास्तु विनियोगक्रमेणासादनमाहुः"। सूत्रे चर्थवच्चेत्युक्तेर्यथा यथा यत्र यत्र यस्य यस्योपयोगस्तस्य तत्र तत्रासादनम्। तत्स्थानप्रकारो च तदुत्तरत्र सूत्रेषु दर्शो

पात्रिक त्रि० पात्रस्य वापः ठञ्। पात्रवापपक्षेऽदौ स्त्रियां वित्त्वात् ङीप् पात्रिकी क्षेत्रभक्तिः स्त्रि० ङी०। पात्रं सम्भवति व्यवहरति आहरति वा ठञ्। पात्रावहारकादौ स्त्रियां ङीष्। पक्षे ञ्। पात्रीय तत्रार्थे स्त्रियां टाप्। तत्रार्थे।

पात्रिय त्रि० पात्रमर्हति च। पात्रार्हे पक्षे यत्। पात्र्य

पात्रीय न० पात्रे साधु बा० छ। पात्रसाधौ यज्ञद्रव्ये त्रिका०। [यज्ञद्रव्ये।

पात्रीव(र) पुंन०अर्शआदि०पात्रीं रा(वा)ति रा–(वा) क।

पात्रेबहुल पु० ब० व०। पात्रे भोजनसमये एव बहुलाः न तु कार्ये पात्रेसमिताः आश्वमे मध्ये वक्ष्यन्ते। भोजनसमय एव बहुलीभूतेषु कार्याश्वमेषु युक्तरोक्ताः अक्षाद्यदात्तता।

पात्रेसमित त्रि० पात्रे भोजनकाल एव समितः सङ्गतः पात्रेसमि–क्त० १कार्यकाले अक्षमेषु भोजन एव सङ्गतेषु। युक्तरोक्ताः अक्षाद्युदात्तताः। "न पात्रेसमितोऽन्यत्र भोजनान्निश्चितो नरः" त्रिका० "निधायहृदये पापं यः परं शंसति स्वयम्। स पात्रेसमितोऽत्र स्यादिति" शब्दमा० उक्तलक्षणे पुरुषविशेषे च।

पात्रेसमितादि पु० क्षेपे अनुकसमासादिनिमित्ते शब्दगणे च गणः पा० रू० उक्तो यथा

"पात्रेसमिताः पात्रेबहुलाः उदुम्बरमशकाः उदुम्बरजम्बिः कूपेकच्छपः अवटेकच्छपः कूपमण्डूकः कुम्भमण्डूकः उदपानमण्डूकः नगरकाकः नगरवायसः मातरिपुरुषः पितृष्वोभूरः पितरिभूरः मेहेभूरः मेहेमट्टी मेहेखेड़ी मेहेविजिती मेहेव्याड़ः मेहेमेड़ी मेहेदाड़ी मेहेदग्नः मेहेक्षुण्णः गर्भेतृप्रः आखनिकवकः गोष्ठेभूरः गोष्ठेविजिती गोष्ठेखेड़ी गोष्ठेपटुः गोष्ठेपण्डितः गोष्ठेगल्भः कर्षेटिरिटिरा कर्षे चुरचुरा"।

पात्रोपकरण न० ६त०। पात्राधाराद्युपभूमर्थे "रीतिवर्गादिसञ्जातं पात्रोपकरणादिकम्। दद्यादावसथजन्तु मृण्मयं न कदाचन। घण्टाचामरकुम्भादि पात्रोपकरणादिकम्। तद्भूम्यान्तरे दद्याद्यत्तदुपभूषणम्" कालिकापु० ८६अ०।

पात्र न० पतति पत्–क्विप् पतं पतनं त्रायते त्रै–क आर्द्धं ह्रस्वादेश्च। पात्रिलातरि "सर्वेषामेव पात्राणां परं पात्रं महेश्वरः। पतनं त्रायते यस्मादतीव नरकार्णवात्" नन्दिपु०। महेश्वर इति प्रदर्शकं हेतोरविशेषात् "पात्राणाध्यात्मिका सृष्टा विशुद्धात्मिश्रोत्रियः। देवताश्च तथा सृष्टा गोदानं श्रेष्ठदक्षिणम्" प्रा० त०।

पाथ न० पीयतेऽदः पा–कर्मणि घ। १जले पाति रक्षति च। २अन्नो २रक्षौ च मेदि।

पाथस् न० पाति रक्षति, पीयते वा पा–पाने रक्षणे वा असुन् धुक् च। १जले २अन्ने च उज्ज्वलद० अन्नभोजने क्ली हैमरत्ना २आकाशे च मेदि०। [स्त्रियां ङीप्।

पाथिक पुंस्त्री० पथिकस्यापत्यं शिवा० कञ्। पथिकापत्ये

पाथिक्य न० पथिकस्य भावः धुरोड्ढि० यञ्। पथिकत्वे

पाथिस् पु० पा–पाने इथिन् धुक् च। १बस्तिरोगे २नेत्ररोगे च उज्ज्वलद०।

पाथेय त्रि०पथि तद्व्यवहारे साधु ठञ्। १मार्गेषु आहारोपयोगिद्रव्ये २कन्याराशौ दीपिका कौर्पशब्दे २२७८पृ० दृश्यम्। ३देशभेदे। ततो भवेऽर्थे घूमा० दुञ्। पाथेयक तद्भवे त्रि० [राजनि० २शुक्ले च पाथोजातादयोऽत्र।

पाथोज न० पाथसि जायते जन–ड ७त०। १जलजे कमले

पाथोद पु०पाथो ददाति दा–क। १मेघे त्रिका० मेघनामनामके २सुस्तके अमरः।

पाथोधर पु० पाथो धारयति धारि–अच् हुस्वः। जलधरे १मेघे हला० २सुस्तके च। [जलधौ सप्तदे त्रिका०।

पाथोधि पु० पाथो धीयतेऽत्र धा–आधारे कि उप०स०।

पाथोनिधि पु० पाथो निधीयतेऽत्र नि+धा–कि उप०स०। जलनिधौ सप्तदे शब्दरत्ना०। भवे यजु० ११।१३।

पाथ्य त्रि० पाथसि भवः भवे यत्। पाथसि क्षुद्रजलाशये

पाद पु० पद+घिञ् क्विप्। चरणे पादे जटा०

पाद पु० पद्यते गम्यतेऽनेन करणे कर्मणि वा घञ्। १चरणे अमरः २श्लोकमन्त्रयोश्चतुर्थांशे "सोऽपि सोमे चेत् पादपूरणम्" पा० "पादश्चेत्सोमे सत्वेव पूर्य्येत" सि०कौ०। "पादेन नाक्रमेत् पादसक्षिणं नैव सङ्क्षवेत्। न संहताभ्यां पाणिभ्यां कण्डूयेदात्मनः शिरः" इति कर्मलोचनम्। पादघातनादिनिषेधो यथा "न पादघातनं कुर्यात् पादेन वा कदाचन। नाग्नौ प्रक्षापयेत् पादौ न कांस्ये धावयेदुभौ। नातिप्रसारयेद्वेश्म नाक्षणानासनानि वा। वाय्वग्निसूर्य्यविप्राणां सूर्य्यं वा प्रतिमं प्रति" कौर्मे उपरिभागे १५अ०। सङ्ख्यापूर्वकस्य अन्यतोपः बहु० समा०। द्विपाद् द्विपाद्। उपमानात्तु वा व्याघ्रपाद्(दः)। पादशब्देनैकोपसर्गो अन्यत्रोपविधानम् द्विपादः सुपादः इति प्रयोगवारणार्थम्। पादश्च इन्द्रियभेदः इन्द्रियशब्दे ८५५ पृ० दृश्यः। २छन्दोदैर्घ्ये पादयः। ३चतुर्थभागे ५प्रत्यन्तपर्वते मन्दारिसन्निहितक्षुद्रपर्वते ६किरणे च मेदि० ७ऋग्यांशमात्रे ८अवयवमात्रे। भावे घञ्। ९गमने तत्र कुशलः आकर्मा० कन्। पादक गमनकुशले त्रि०। पादेन चरति पद्भा० डन् पदादेशश्च पदिक पादचारिणि त्रि० स्त्रियां ङीष्। अस्य भत्वे शबादौ च परे वा पदादेशः। पादान् पदः इत्यादि। इषा० आद्युदात्तताऽस्य। १०अङ्घ्रिभेदे

पादकटक पु० पादस्य कटक इव। नूपुरे अमरः।

पादकच्छ पु० व्रतभेदे तल्लक्षणञ्च यथा "एकभक्तेन नक्तेन तथैवायाचितेन च। उपवासेन चैकेन पादकच्छः प्रकीर्त्तितः" व्यास० "एतच्चतुरहसाध्यम्" प्रा०वि०।

पादगण्डीर पु० पादस्य गण्डेः (गुँड) इवस्यामूलाच्छाखावधिभागस्य ईः गोसाख्यत्व बा० र। क्षीपदे (गोद) रोगभेदे त्रिका०।

पादगुह्य पु० गुह्यः पादः मयूर० पूर्वनि०। गुह्ये पादे

पादग्रन्थि पु० पादस्य ग्रन्थिरिव। १गुल्फे २पादसन्धौ च।

पादग्रहण न० पादौ गृह्यते यत्र गृह–आधारे ल्युट्। १चरणस्पर्शपूर्वकप्रणामे। "विप्रोऽथ पादग्रहणमन्वगं

चाभिवादनम्" मनुः अभिवादनशब्दे २८८ पृ० दृश्यम्। तत्र मौचान्तरमाह कूर्म्मपुराणम्: "यस्मिन् स्थाने स्थितं मौचं वारिणा तद्विशोधयेत्"। अनभिवादाच्च हारीतः "धावन्तञ्च प्रमत्तञ्च मूत्रोच्चारक्रतत्तथा। भुञ्जानञ्चाचमनार्हञ्च नाभिवादयेत्। अन्यत्प्रस्थितयत् किञ्चित् चेतसा धर्ममाचरेत्। सर्वं तद्विफलं याति एकस्याभिवादनात्"। "समिद्दाभ्युदकुम्भमुच्चात्रहस्तो नाभिवादयेत् यच्चाप्येवं युक्तम्" इति। बौधायनः। "जपयज्ञजलस्थञ्च समित्पुष्पकुशानलान्। दन्तकाष्ठञ्च भक्ष्यञ्च वहन्तं नाभिवादयेत्" लघुहारीतः। "न ब्राह्मणपार्श्वेगुचिर्नं जपन् न देवपित्रकार्य्यं कुर्वन्" अभिवादयेदित्यनुवृत्तौ मनुलिखितौ।

पादघृत न० पादयोर्लेपनार्थं घृतं मा०त०। पादयोरभ्यङ्गनार्थे घृते भा० व० १६६ अ०।

पादचतुर त्रि०पादे पादव्यापारे चतुरः। १पादव्यापारदक्षे २खागते पुंस्त्री। २लैकते ३पिप्पले ४करञ्जे ६वरदोमेदप्रवक्तृपुरुषे च मेदि०।

पादचारिन् पु० पादेन चरति चर-णिनि ३त०। १प्रहातौ २पद्भ्यां गन्तरि त्रि० हेमच० स्त्रियां ङीप्।

पादज पुंक्ली० पादात् जायते जन-ड ५त०। ब्रह्मणः पदादुत्पन्ने १शूद्रे त्रिका० स्त्रियां जातित्वात् ङीप्। "पद्भ्यां भूमो व्यजायत" यजु० ३१।१३। श्रुतेस्तस्य तथात्वम्। २चरणजातरोगादौ त्रि०।

पादजल न०पादक्षालनं जलम् मा०त०। १पादोदके। पादस्थितं जलं यत्र। २चतुर्थांशघृतजलयुक्ते त्रि०३तक्रे न० अमरः

पादजाह न० पादस्य मूलं जघां० जाहच्। पादस्य मूले।

पादत्र त्रि० पादौ त्रायते त्रै-क। १पादरक्षके २पादुकायाम् स्त्री। [जटाध०। उपानच्छब्दे दृश्यम्।

पादत्राण न० पादत्रायतेऽनेन त्रै-करणे ल्युट्। पादुकायां

पाददाह पु० पादौ दहति-दह् घञ् उप० ६त०। लघुतोक्ते १वातव्याधिभेदे "पादयोः कुरुते दाहं पित्तास्रक्प्रकृतिर्नरः। विशेषतश्चङ्क्रमतः पाददाहं तमादिशेत्"।

पादप पु० पादेन मूलेन पिबति पा-क। १वृक्षे अमरः। पादं पाति रक्षति पा-क। २पादपीठे मेदि०। ३पादुकायां स्त्री मेदि०। पादेन गतम् यत्। ४पादचलिते त्रि०। ततः समूहे यञ्। पादपत्यञ्च तत्समूहे न०। [(परगाछा)। राजनि०।

पादपद्मा स्त्री पादं रोहति रुह-क। वन्दायाम्

पादपाश पु० ६त०। १अश्वपादबन्धनदामनि हेमच० २पद्भ्यां पाशः २पद्भ्यां पाशाभ्यां (जेँ डुवा) ४तायां स्त्री मेदि० गौरा० ङीप्।

पादपीठ पुंन० ६त०। पादस्थापनार्थे पीठे हेमच०। संज्ञायां कन् अपि अतइत्वम्। पादपीठिका० नापितादिश्रिल्पे स्त्री शब्दमा०।

पादप्रक्षालन न० ६त०। पादयोः १क्षालने जले "पादप्रक्षालनं मेधाजनकं सुपवित्रकम्। अकस्मीकविनाशञ्च आयुषो स्थितकारि च" राजनि० "पादप्रक्षालनं विशेषयति देवलः "प्रथमं प्राङ्मुखः स्थित्वा पादौ प्रक्षालयेज्जलैः। उदङ्मुखो वा दैवज्ञे पैतृके दक्षिणामुखः" मनैरत्वरः। दैवपैतृककेतरश्राद्धस्थः "प्रत्यङ्मुखः पादावेचनमिति"। प्रत्यङ् पश्चिमाभिमुखः। क्रमशाह गोभिलः "सव्यं पादमवनेनिजे इति सव्यं पादं प्रक्षालयति"। अर्घ्यादौ तथा दर्शनात् सर्वत्र तथा कल्प्यते। पारस्करः "सव्यं प्रक्षाल्य दक्षिणं प्रक्षालयतीति" "सव्यं प्रथमं प्रक्षालयतीति" सूत्रेण प्राक् सव्यपादप्रक्षालने विहिते सव्यं प्रक्षाल्य दक्षिणं प्रक्षालयतीत्यत्र सव्यग्रहणं सामान्यार्थं तेनान्यत्रापि पादप्रक्षालने सव्यमेव प्राशस्त्यम् अन्यार्थं पूर्ववचनमिति दर्शनात्। "ब्राह्मणस्य तूदक्शिरः प्रवणमिति" सूत्रं तस्य पादौ यदि ब्राह्मणः प्रक्षालयति तदा दक्षिणं द्रावयितव्यमिति न सव्यस्य। यथा प्रक्षालयतीत्यनुवृत्तावाश्वलायनः "दक्षिणपक्षे ब्राह्मणाय प्रयच्छेत् सव्यं मृद्नीयादिति"। सव्यं प्रक्षालने सव्यस्यैव प्राशस्त्यमिति फलितम्। एवञ्च दक्षिणपादप्रक्षालनानन्तरं वामपादप्रक्षालनं वाचस्पतिमिश्रादयुक्तं ज्ञेयमिति श्रा०त० रघुनन्दनः।

पादबन्धन न० पादौ बध्येते अनेन करणे ल्युट् ६त०। १गोरक्षिकादेः पादबन्धने दामनि। भावे-ल्युट्। २गोरक्षिकादिपादयोर्बन्धने जटा०। षष्ठ्यन्तं पादबन्ध तदर्थे पु०।

पादभाग पु० ६त०। १चरणाधोभागे हेमच०। २पादस्य भागः श०त०। ३चतुर्थांशे च।

पादमूल न० ६त०। १चरणस्याधोभागे २चरणसमीपे च।

पादरक्ष त्रि० पादं रक्षति रक्ष-अच् उप०स०। १चरणरक्षके पादुकादौ २रक्षचरणरूपपक्षरक्षके च मा०वि० ६ब०। ल्यु। पादरक्षस्य तदर्थे त्रि०भावे ल्युट्। ६त०। २पादस्य रक्षणे न०। [पादबन्धनार्थे दामनि जटाध०।

पादरज्जु स्त्री पादबन्धनार्थो रज्जुः श०त०। [चरणादेः

पादरथी स्त्री क्षुद्रो रथः ङीप् पादस्य रथीव । पादुकायां त्रिका० । [क्षु । पादरोऽस्य तत्रार्थे राजनि० ।

पादरोह पु० पादेन मूलेन रोहति रुह–अच् । वटवृक्षे

पादवन्दन न० पादयोर्वन्दनम् । पादस्पर्शपूर्वकप्रणामे "कृत्वाऽभ्युपगमं भर्त्तुस्तत्परा पादवन्दनं" याज्ञ० मनुना क्वचिद्विशेष उक्तः "गुरुपत्नी तु युवतिर्नाभिवाद्येह पादयोः । पूर्णेऽष्टवर्षेत्वेष गुरुदोषो विजानता" [हेटच०

पादवल्मीक पु० पादे वल्मीक इव । श्लीपदरोगे (गोद)

पादविक त्रि० पदवीमहरति ठक् । पथिके त्रि०को० ।

पादविग्रह पु०, पादस्यावयवस्य विग्रहः । अवयवभेदे । "वे च विष्णुमधीयते बहुधा पादविग्रहैः" हरिवं० २१७अ० । पादः चतुर्थांशमितो विग्रहो यस्य । पादमितावयवयुक्ते त्रि० "अर्धर्चो पादविग्रहः" १६८अ० ।

पादविरजस् स्त्री पादो विरजाः धूलिहीनो यस्याः । १पादुकायां हारा० । ह्रस्व० । २देवेषु च तेषां विरजस्कपादत्वात्तथात्वम् ।

पादशस् अव्य० पादं पादमित्यादिकारकार्थे वीप्सायाम् शस् अकृपादभिन्नत्वे न पदादेशः । वीप्सायां कारकार्थेऽर्थे पादशब्दार्थे मनुः ११८२ । तु अकृपादे तु पक्षम्

पादशाखा स्त्री पादस्य शाखेव । पादाङ्गुलौ शब्दार्थकल्पत०

पादशैल पु० पादात्मकः शैलः । प्रस्रवणपर्वते शब्दरत्ना० ।

पादशोथ पु० पादजातः शोथः श०त० । पादजाते शोथे रोगभेदे "अन्योन्योपद्रवकृतः शोथः पादसमुत्थितः । पुरुषं क्षिप्रं नारीन्तु सक्थिजो गुह्यजो भयम्" माधवः ।

पादशौच न० ह्रस्व० । पादप्रक्षालने पादप्रक्षालनशब्दे दृश्यम् "वाम्यात्मतः पादशौचम्" श्राद्धप्रयोगः । श्राद्धे दक्षिणासक्थ्नैव तच्च करणं यथोक्तं श्राद्ध०त० "प्रथमं प्राङ्मुखः स्थित्वा पादौ प्रक्षालयेच्छनैः । उदङ्मुखो वा दैवत्ये पैत्र्ये दक्षिणासक्थः" इति देवलवचनात् दक्षिणासक्थः मनु अतएवादशौचेऽपि वामपादादिक्रमः" रघु० ।

पादस्फोट पु० ह्रस्व० । १विपादिकाख्ये २क्षुद्रकुष्ठभेदे अमरः कुष्ठशब्दे २१६५पृ० तस्य लक्षणादि दृश्यम् ।

पादस्वेदन न० ह्रस्व० । पादयोः स्वेदने । ततः अकथ्यूतार्थेऽर्थे ठक् । पादस्वेदनिक तद्विदूरे रोगभेदोऽस्यादौ त्रि० ।

पादहर्ष पु० "क्षतस्वरसौ यस्य भवतश्च प्रसुप्तवत् । पादहर्षः स विज्ञेयः कफवातप्रकोपजः" सुश्रुतोक्ते वातव्याधिभेदे ।

पादहारक त्रि० पादाभ्यां हरति छिनत्ति वा हृ–ण्वुल् कर्मणि वा त्रि० स्वुल् । १पादेन हरणकर्त्तरि २तत्कर्मणि च । [२चरणभूत्ये च ।

पादहीन त्रि० ३त० । १त्रिपादात्मके पदार्थे (तिनशोया)

पादाकुलक "यदतीतकृतविविधलक्षयुतैर्मात्रासमादिपादैः कथितम् । अनियतहृत्तपरिमाणसङ्घटितम् प्रथितं जगतस्तु पादाकुलकम्" छ०र० उक्ते मात्रावृत्तभेदे ।

पादाग्र न० ह्रस्व० । चरणाग्रे प्रपदे अमरः ।

पादाङ्गद न० पादस्य अङ्गदमिव । नूपुरे अमरः गौरा० ङीष् । तत्रार्थे स्त्री टाप् ।

पादाङ्गुलीयक न०ह्रस्व० (छुटकी) चरणाङ्गुलीयके हेमच०

पादात् त्रि० पादाभ्यामतति अत–क्विप् । पद्भ्यां गन्तरि २पदातौ पु० हेमच० ।

पादात न० पदातीनां समूहः अण् । १सैन्यसमुदाये अमरः पादाभ्यामतति गच्छति अत–अण् । २पदातौ सैन्ये पु० पादातिः पादातिकोऽप्यत्र पु० हेमच० ।

पादाम्बु न० पादसिक्तमम्बु यत्र । तक्रे (गोल) अमरः ।

पादाभ्यञ्जन न० ह्रस्व० । पादतैलार्थे द्रव्यादौ काशी०२अ० ।

पादाश्मन् न० पादप्रक्षालनमश्मा । पादशौचजले "दूरादुच्छिष्टविण्मूत्रपादाश्मांसि समुत्सृजेत्" याज्ञ० तस्य दूरं त्यजतोक्ता । [पादविगोत्सर्गशब्दे ।

पादायन पुंस्त्री० पादस्यार्थैः गोत्रापत्यम् फक्ञा० फञ् ।

पादारक पु० पाद इव अञ्चति अञ्च–ण्वुल् । नौकावयवभेदे पोतिन्दे हेमच० । [नौकायां हारा०

पादालिन्दी स्त्री पाद इवालिन्दो यस्याः गौरा० ङीष् ।

पादावर्त्त पु० पाद इवावर्त्तते आ+वृत–घञ् । कूपादितो जलोद्धारके यन्त्रभेदे चरकः हेमच० ।

पादाविक त्रि० पादातिक+पृषो० । पदातौ शब्दरत्ना० ।

पादिक त्रि० पादेन चतुर्थांशेन जीवति वेतना० ठक् । १चतुर्थांशग्रहणशीले । पादः परिमाणमस्य निष्का० ठक् । २पादपरिमाणे मनुः ८।१।

पादिन् त्रि० पादश्चरणोऽस्त्यस्य पादश्चतुर्थांशो यत्नीतुत्वेनास्त्यस्य वा इनि । १पादयुते जलजन्तुभेदे "कूर्म्मीरकुम्भनक्राश्च शोधामकरशङ्खकाः । चक्रिकाः शिशुमाराश्चेत्यादयः पादिनः स्मृताः । पादिनोऽपि च ये ते तु कोष्ठस्थानां शुचैः समाः" भावप्र० । २चतुर्थांशयुक्ते च "सर्वेषामर्द्धिनो मुख्यास्तदर्द्धार्द्धिनोऽपरे । तृतीयिनस्तृतीयांशाश्चतुर्थांशास्तु पादिनः" मत्स्य०त० ऋद्धिन्शब्दे २७८४·दृश्यम् ।

पादु स्त्री भावे उण्। गमने क० १०।२७।२४ भाष्ये दृश्यम्।

पादुक त्रि०पद–उकञ्। १गमनशीले पादु+स्वार्थे क "वेः ण्वः" पा० सुखः। चर्ममयपादत्राणे स्त्री अमरः। तस्या उत्पत्तिकथा छातपत्रशब्दे ६४६ पृ० दृश्या तत्र चातुर्वाशनिकपर्व्वाध्यायसंख्या ६२।६३स्थाने६५।६६संख्या ज्ञेया। "वर्षातपादिके स्त्री दक्षो राजपट्टवीषु च। शरीरत्राणकाभो वै सोपानत्कः सदा व्रजेत्" व्यो०त० "पादप्रधारणं दृष्ट्वभोजस्वं चक्षुषो हितम्। सुखप्रचार-मायुष्यं वस्त्यं पादरक्षाप्रदम्"। तथा अधारणे दोषा यथा "पादाभ्यामनुपानद्भ्यां नर्त्तां च क्रमणं यदा। अनारोग्यमनायुष्यमस्त्रियञ्चमपडस्त्रिलम्" राजनि० अधिकं दिनचर्य्याशब्दे ३१६० पृ० दृश्यम्। "दृष्टमानाय विप्राय यः प्रयच्छत्युपानहौ। ज्ञातकाय महाबाहो! संशिताय द्विजातये। सोऽपि लोकानवाप्नोति देव-तैरपि पूजितान्। मोक्षोके च सदा युक्तो वसति प्रेत्य भारत!" भा०आनु० ६६अ०। क्वचित्पादुकाधारणनि-षेधः "पङ्कपानहौ पङ्क्त्यां वस्तु मानुषसंक्रमेत्। चर्मकारस्तु आसेन वर्षाणान्तु त्रयोदश" वराहपु०। "सोपानत्कश्च यद्भुङ्क्ते तद्वै रक्षांसि भुञ्जते" मनुः। देवतापादुकानिर्माणप्रकारो देवीपु० यथा "अथिरत्नमयी कार्य्या हेमरूप्यमयी तथा। चन्दनेनापि कर्त्तव्या पादुका प्रतिमापि वा। श्रीपर्णी श्रीद्रुमा वापि देवदारुमयी तथा। षडङ्गुला च सा कार्य्या पादुकां पूजयेत् सदा"।

पादुकाकार पु० पादुकां करोति कृ–अण् उप०स०। चर्म-कारे पादुकृतपादुकाकृदादयोऽप्यत्र हेमच०।

पादू स्त्री पद्यते क्षुद्येनानया पद–करणे "क्षिपि कमिपद्य-र्त्तेः" उणा० ऊ–क्षिच्च। चर्ममयपादुकायाम् अमरः।

पादोदक न० पादप्रक्षालनसदृशम् मा०त०। पादप्रक्षालनजले हरिमूर्त्तिपादोदकपानफलं हरिभक्तिविवादादौ दृश्यम्

पादोदर पुंस्त्री० पाद उदरे यस्य। सर्पे प्रज्ञादि० स्त्रियां जातित्वात् ङीष्।

पाद्धत न० पद्धतीनां समूहः गिरा० अण्। पद्धतिसमूहे

पाद्म न०पद्ममधिकृत्य प्रवृत्तम् अण्। "तदधिकृत्य कृते ग्रन्थे" पा० वा अण्। पद्माधिकारेण प्रवृत्ते १ब्रह्मकल्पविशेष-कल्पभेदे तदधिकारेण कृते २पद्मपुराणाख्ये ग्रन्थे च।

पाद्य त्रि०पादार्थं पाद–यत्। १पादशौचार्थे जले अप्सु स्त्री तेन "पाद्याः पाद्याः पाद्याः प्रतिमद्भन्नामिति" विवाहे-ऽर्घ्यीयमन्त्रः। पादं चरणांशमर्हति यत्। २चतुर्थां-शार्हे त्रि०। देवदेवपाद्ये द्रव्यविशेषे उक्तो यथा "पाद्यं श्यामाकदूर्वाजविष्णुक्रान्ताभिरीरितम्"। एतद्द्रव्योक्तं जलमिति देवप० रघु०। तद्दानपात्रलक्षणं यथा "पादा-वसेचनजलपङ्कजं पात्रमङ्गुलम्। सौवर्णं राजतं वा हैमं राजतमेव वा" वैखानससं०। "षडङ्गुलप्रविस्ता-रसप्तसंघे चतुरङ्गुलम्। ओजमेकाङ्गुलं कुर्य्यात् नाविकां चतुरङ्गुलाम्। पृष्ठे पादसमायुक्तं चतुरङ्गुलमानतः। पाद्यपात्रमिति ख्यातं सर्वदेवप्रपूजने" सिद्धान्तशेखरः। पाद्यप्रकारः स्वधा० तन्त्र। पाद्यञ्च पाद्यप्रकारे त्रि०।

पान न० पा–ल्युट्। १द्रवद्रव्यस्य गलाधःसंयोजने २रक्षणे च ३निश्वासे च पु० हेमच०। निश्वासेन प्राणरक्षणात्त-द्वत्वम्। आधारे ल्युट्। ४पानभाजने मेदि० पीय-तेऽत्रात् अपादाने ल्युट्। ५यौण्डिके पु० जटा०। करणे ल्युट्। कर्त्तरि तौल्लादिपानसम्पादने ६व्यापारभेदे (पानदेओया) अमिधान्दे ६६। पु० पावनाग्नौ च दृश्यम्। पीयते कर्म्मणि ल्युट्। ७मद्यादौ।

पानक न० पानार्थं कायति कै–क। अम्बिकानिम्बुरसादि-मिश्रितशर्करादौ क्षुताद्यन्दे २४८पृ० दृश्यम्।

पानगोष्ठिका स्त्री पानार्थं गोष्ठिका। १सभायां स्त्रियादि-पानार्थसभायाम् तन्त्रोक्ते २भैरवीचक्रे च।

पानठ त्रि० पाने कुशलः वा० अठच्। पानकुशले स्त्रियां गौरा० ङीष्। [राघविणि।

पानप त्रि० पानं पेयं मद्यादि पिबति पा–पाने क। सु-

पानपात्र न० पानस्य पेयस्य सुरादेः पात्रम्। पेयसुरादेः पात्रे कंसे अमरः। पानभाजनादयोऽप्यत्र।

पानवणिज् पु० पानस्य पेयस्य सुरादेः वणिज्। यौण्डिके हेमच०। [पङ्क्तिधरः।

पानशौण्ड त्रि० पाने शौण्डः उत०। सुरादिपानदक्षे

पानस न० पनसस्य तत्फलस्य विकारः तस्येदं वा अण्। पनसभवे १मद्यभेदे "पानसं द्राक्षमाधूकम्" हारीतस-ध्योक्तौ या०वि०। २पनसस्वन्धिनि त्रि०।

पानात्यय पु० सुश्रुतोक्ते मद्यपानजे रोगभेदे मद्यस्य पा-नदोषादिकनिरूपणेन तल्लक्षणादिकं तत्रोक्तं यथा "मद्यपेयं तथा तीक्ष्णं रूक्षं विशदमेव। रूक्ष-मायुष्करञ्चैव व्यवायि च विकाशि च। औष्ण्यात्क्षीतो-पचारं तत्तैक्ष्ण्यात्क्षतेषु मनोगतिम्। विशदत्ववत्वात् सौक्ष्म्यादेवद्यात्कफमुल्क्लेशत्। मारुतं कोपयेद्रौक्ष्या-दाशुत्वादाशुमेव च। वर्णदञ्च व्यवायित्वाद्विकाशित्वाद्वि-

सर्पति। तदुक्तं रसतः प्रोक्तं बधु रोचनदीपनम्। केचिद्वयवर्जांस्तु रसानन्यादिशन्ति हि। स्निग्धैस्तदन्नैर्मांसैश्च भक्ष्यैश्च सह सेवितम्। भवेदायुःप्रकर्षाय बलायोपचयाय च। काम्यता मनसस्तुष्टिर्दार्ढ्यं तेजोऽतिविक्रमः। विधिवत्सेव्यमाने तु मद्ये सद्विहिता गुणाः। तदेवानुचितैर्भुक्तैः सेव्यमानमनात्मया। कायाग्निनाशाग्निमदं क्षमेत्य कुरुते मदम्। मदेन करणानान्तु भावान्यत्वे कृते सति। निगूढमपि भावं स्वस्य कामो कुरुतेऽवशः। तत्रवस्त्वत्र मदो नृणां पूर्वो मध्योऽथ पश्चिमः। पूर्वे वीर्यरतिप्रीतिहर्षभावादिवर्द्धनम्। मदापो मध्यमे हर्षो युक्तायुक्तक्रियाज्ञता। विसंज्ञः पश्चिमे शेते नष्टकर्मक्रियायुधः। स्नेहिकानस्यिनांश्च स्निग्धान्मांसोपसेविनः। पानं न बाधतेऽत्यर्थं विपरीतांस्तु बाधते। निर्भक्तमेकान्तत एव मद्यं निषेव्यमाणं मनुजेन नित्यम्। उत्पादयेत् कष्टतमान्विकारानापादयेच्चापि शरीरभेदम्। क्रुद्धेन भीतेन पिपासितेन शोकाभितप्तेन बुभुक्षितेन। व्यायामभाराध्वपरिक्षतेन वेगावरोधाभिहतेन चापि। अत्यम्बुभक्ष्याशयतोदरेण सालीर्यभुक्तेन तथा बलेन। उष्णाभितप्तेन च सेव्यमानं करोति मद्यं विविधान्विकारान्। पानात्ययं परमदस्यानाजीर्णमथापि वा। पानविभ्रमसम्भूतं तेषां वक्ष्यामि लक्षणम्। तस्माद्धुमर्दृदयप्रहतोदकस्याः पानात्ययेऽनिलकृते शिरसो रुजश्च। स्वेदप्रलापसहसा शोषश्च दाहमूर्च्छाः पित्तात्मके वदनशोषणतोक्तता च। श्लेष्मात्मके वमथुगीतकफप्रसेकाः सर्वात्मके भवति सर्वविकारसम्भवः। जन्मा शरीरसुखता विरसाननत्वं श्लेष्मादिकत्वमरुचिर्मलमूत्रभङ्गः। सिद्धं परस्य तु मद्यस्य वदन्ति तज्ज्ञाश्चूषणरजा शिरसि स्थितेषु चापि भेदः। ध्यानासहिष्णुमसहिष्णुरसो विदाहोऽजीर्णस्य पानजनितस्य वदन्ति सिद्धम्। श्लेष्मादि तत्र भिषजा सुविनिश्चितानि पित्तप्रकोपजनितानि च कारयानि। क्षुद्वालतोदवमथुज्वरकण्ठधूमधूमूर्च्छाकफक्षवथुमूर्द्धरुजो विदाहः। हेयः सुराम्नविकृतेषु च तेषु तेषु तं पानविभ्रमसमुत्थमतिप्रखिन्नं धीराः। हीनोत्तरौष्ठमतिशीतमनन्नदाहं तैलप्रभास्थुमतिमात्रकृतं विजह्यात्। जिह्वौष्ठदन्तमसितं स्खलितापि नीलं पीतं च यस्य नयने रुधिरप्रभे च। जिह्वाक्षरौ वमथुवेपथुपार्श्वशूलाः कासश्रमावपि च पानकृतं भजन्ते"। परमदपानाजीर्णपानविभ्रमा अपि तत्रोक्ते मद्यपानजे रोगभेदे तद्वच्चयमत्रैवोक्तम्।

पानिल न॰ पानमाधारत्वादस्यत्र इलच्। अमपात्रे शब्दच॰

पानीय त्रि॰ पा—पाने रुचये वा कर्मणि अनीयर्। १पेये जलादौ २रुचार्थे च १जले न॰ अमरः। तद्गुणभेदादि अम्बुशब्दे दृश्यम्।

पानीयकाकिक पु॰ काकस्येवाकारोऽस्यास्ति ठन् अत॰। (पानकौड़ि) पक्षिभेदे सद्गुणे उत्पलवट॰।

पानीयनकुल पुंस्त्री॰ पानीये जले नकुल इव। (उदिराह) जलविडाले हेमच॰।

पानीयपृष्ठज पु॰ पानीयपृष्ठे जलोपरि जायते जन—ड। (पाना) कुम्भाम् रत्नमाला।

पानीयफल न॰ इत॰। (माखना) जलकन्दफलभेदे भावप्र॰

पानीयभक्तगुड़िका स्त्री भक्तदोषे गुटिकाभेदे

"रसोऽर्द्धभागिकस्तुल्याविडङ्गमरिचाधकाः। भक्तोद्भवेन संमर्द्य कुर्याद्गुञ्जासमां गुड़ीम्। भक्तोदकन्तु पानेच सेव्या वह्निप्रदीपनी। वार्य्यन्नभोजनस्यात्र प्रयोगे सात्म्यमिष्यते"। [शब्दच॰।

पानीयमूलक न॰ पानीयं मूलं यस्य बहु। शोभराङ्गाम्

पानीयवर्त्तिका स्त्री पानीयमिव वर्त्तयति वर्त्ति—स्वुल्। बालुकायां राजनि॰।

पानीयशालिका स्त्री पीयतेऽस्याम् आधारे अनीयर् वाऽस्यां शाला पानीयवितरणार्थं वा शाला ततः स्वार्थे क कापि अतइत्वम्। प्रपायाम् (जलसत्रघरे) अमरः। तद्दानविधिः हेमाद्रिदा॰ भविष्यपु॰ उक्तो यथा

"अतीते फाल्गुने मासि प्राप्ते चैव महोत्सवे। पुण्येऽह्नि विप्रकथिते ग्रहचन्द्रबलान्विते। मण्डपं कारयेद्विद्वान् जनच्छायं मनोरमम्। पुरस्य मध्ये पथि वा चैत्यद्वयतटेऽथ वा। शुभोत्तरतटं रम्यं विधिवासनसंयुतम्। तत्रध्ये स्थापयेद्भव्यान् मणिकुम्भांश्च शोभनान्। आकल्पयुक्तान् करकान् वस्त्रैरावेष्टिताननान्। ब्राह्मणे शौचसम्पन्ने भक्तिं दत्वा यथोदिताम्। प्रपापालः प्रकर्त्तव्यो वस्त्रपात्रपरिच्छदः। पानीयप्रापादध्यान्नान् यः कारयति मानवान्। एवंविधां प्रपां कृत्वा शुभेऽह्नि विधिपूर्वकम्। यथाशक्त्या नरश्रेष्ठ! प्रारम्भे भोजयेद्विज्ञान्। ततोऽन्यजेद्विदाक्षान्ते यानेन मानवः। अग्नेयं सर्वसामान्या भूतेभ्यः प्रतिपादिता। अस्याः प्रदानात् स्त्रिरक्षन्तु च प्रितामहाः। अनिवारितं ततो देयं सत्रं मासचतुष्टयम्। त्रिपक्षं वा महीराज!

जीवानां जीवनं परम्। गन्धाढ्यं सुरसं प्रीतं शोभने राजते स्थितम्। पद्मादप्रतिहतं सर्वज्ञानवलोकयन्। प्रत्यहं कारयेच्छ्राद्धं भोजनं शक्तितो द्विजान्। अनेन विधिना वस्तु यीशे तापसाश्रमम्। पानीयमुत्तमं दत्त्वात्तस्य पुण्यफलं शृणु। कपिलागतदानस्य सम्यग्दत्तस्य यत् फलम्। तत्पुण्यफलमाप्नोति सर्वदेवैः सुपूजितः। पूर्णचन्द्रप्रतीकाशं विमानमधिरुह्य सः। याति देवेन्द्रनगरं पूज्यमानोऽप्सरोगणैः। त्रिंशत्कोट्यो हि वर्षाणां यज्ञगन्धर्वसेवितम्। पुण्यक्षयादिहागत्य चतुर्वेदो द्विजो भवेत्। ततःपरं पदं याति पुनरावृत्तिदुर्लभम्"।

पानीयामलक न० कर्म०। (पानियामला) फलभेदे "पानीयामलकं दोषत्रयज्वरविनाशनम्। अम्लं स्वादु सरं शुद्धिकरं मलविशुद्धिकृत्" राजवल्लभः।

पानीयालु इ० पानीयजात आलुः मा०त०। (पानीआलु) कन्दभेदे राजनि० "पानीयालुस्त्रिदोषघ्नः सन्तर्पणकरः परम्"। [वा० अ टाए्। वल्लजायां राजनि०।

पानीयाम्ला स्त्री पानीयं जलमम्लाति मूलेन अम्—भोजने

पान्थ त्रि० पन्थानं नित्यं गच्छति अण् पन्थादेशः। नित्यं पथि गन्तरि १पथिके अमरः। २वियोगिनि च त्रि०।

पान्थायन त्रि० पथोऽदूरदेशादि पथिन्+पद्धा० फक् पन्थ देशः। मार्गसादूरदेशादौ।

पान्नागारि पुंस्त्री० पद्मागारस्य अपेरपत्यं युवा इञ् "इञः प्राच्यभरतेषु" पा० युवप्रत्ययलुक्। गोत्रप्रवर्त्तकपद्मागारेभ्यः १गोत्रापत्ये २तदीये बह्वपत्ये च।

पाप न० पाति रक्षति आत्मानमस्मात् पा—अपादाने प। १नरकहेतौ दुरदृष्टे तत्साधने २हिंसादौ ज्योतिषोक्तेषु अष्टौनचन्द्ररविभवतिषु षष्ठेषु पापषड्वर्गशब्दे दृश्यम्। पापलक्षणं पापसत्तायां प्रमाणञ्च मा०वि० उक्तं यथा मनु किं पापलक्षणम् उच्यते चोदनालक्षणोऽर्थोधर्म्म इति धर्मलक्षणं कृत्वा सूत्रकारेण जैमिनिना वेदैकप्रतिपाद्योऽनर्थोऽधर्म्म इत्यधर्म्मलक्षणं सूचितम् अनर्थत्वा निष्टसाधनं तथा चोक्तं भाष्यकृता कोऽर्थो योऽभ्युदयाय कोऽनर्थो योऽनभ्युदयाय। मनु पापसत्तायां किं मानं न तावत् वेदः तस्य कार्य्ये कार्य्यान्विते वा प्रामाण्यात् न च दुरितापूर्वं कार्य्यं कार्य्यान्वितं वा। न च नित्यकर्म्माकरणस्य निषिद्धाचरणस्य च वेदोक्तफलव्यवधायकत्वान्यथानुपपत्त्या कल्प्यं तस्य तथाविधशब्दाभावेन अधिकृतेन अवश्यानुभवत्वात्, उच्यते "यो ब्राह्मणायावसुरेत् तं प्रेतेन यातायात्" इति श्रुतौ विहितस्य वृषोत्सर्गस्य तेरवगोरक्षशतदानस्य साध्यसाधनभावोऽवगम्यते "हेतुहेतुमतोर्विधिरिति" पाणिनिस्मरणादिति यदुक्तं ग्रन्थाधिकरणे, तथाप्यपि क्वचित् षष्ठ्या क्वचित् तृतीयया क्वचिद्विशेषेण तदवगम्यते। यथा याज्ञवल्क्यः "विक्रियाज्ञानहानाभ्यां निन्दितस्य च सेवनात्। अनियुक्ताक्षेन्द्रियाणां नरः पतनमृच्छति" (अत्र षष्ठ्या) मनुः "शरीरजैः कर्म्मदोषैर्याति स्थावरतां नरः। वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम्। इह दुश्चरितैः केचित् केचित् पूर्वकृतैस्तथा। प्राप्नुवन्ति दुरात्मानो नरारूपविपर्य्ययम्" (अत्र तृतीयया) विष्णुः "नरकं कर्म्मणां दोषादेवमाद्यमवाप्नुयुः" यमः "सुरापो ब्रह्महा गोघ्न सुवर्णस्तेयकृन्नरः। पतितैः संप्रयुक्तश्च कृतघ्नो गुरुतल्पगः। एते पतन्ति सर्वेषु नरकेष्वनुपूर्वशः"। अत्र ते सुरापादयः पतन्तीति सुरापादीनां पतनकर्तृत्वावगतेः पतनकर्तृत्वञ्च साधनत्वविशेषः। अतः सुरापानादिविशिष्टस्य पुरुषस्य पतनसम्बन्धे विशेषणस्य सुरापानादेः सति सम्भवे पतनसाधनत्वमवगम्यते। "सप्तदशप्राजापत्यानृषभानालभेत" इति वत्। एवं "वारिदस्तृप्तिमाप्नोति" इत्यादिवच्च। नरकसाधनत्वञ्च कार्य्यान्वयाभावात् कथं शब्दादवगतिरिति चेत् शब्दयुक्तविषयविशेषत्वतया इति ब्रूमः। यथा यातनासाधनादवगोरक्षादिवर्त्तितव्यमिति विधिः। तथा नरकसाधनात् सुरापानादेरपि निवर्त्तितव्यमिति। यथा कालान्तरभावि स्वर्गादिसाधनत्वान्यथानुपपत्त्या यागादेर्दारीभूतधर्म्मकल्पकता एवं कालान्तरभाविनरकादिसाधनत्वान्यथानुपपत्त्या सुरापानादेर्दारीभूताधर्म्मकल्पकत्वमिति बोध्यम् पापमस्यास्य अर्श० अच्। ४पापयुक्ते त्रि०। पापं च कायिकादिभेदेन दशविधं दशहराशब्दे २४८३४ पृ०दर्शितम् कायिकादिभेदेनान्यान्यपि पापान्युक्तानि यथा

"प्राणाभिपातनं स्तैन्यं परदारगमनापि च। त्रीण्यपापानि कायेन सर्वतः परिवर्जयेत्। असत्प्रलापं पारुष्यं पैशुन्यमनृतन्तथा। चत्वारि वाचा राजेन्द्र! न जल्पेत न चिन्तयेत्। अनभिध्या परस्वेषु सर्वसत्वेषु सौहृदम्। कर्म्मणां फलमस्तीति त्रिविधं मनसाचरेत्" भा०शा०दानधर्मः। पापञ्च पुरुषत्रयावध्यनुवर्त्तितं यथा "नाधर्म्मचरितो राजन्! सद्यः फलति गौरिव। अने-

रावर्त्तमानस्तु मूढात्मापि निरुध्यति । यदि नात्मनि पुत्रेषु न चेत् पुत्रेषु नप्तृषु । पापमाचरितं कर्म निरयमनुवर्त्तते । फलत्येवं ध्रुवं पापं शुक्लमुल्बणोदरे" मात्स्ये २८अ० । राष्ट्रादिकृतपापेन राजादीनां परस्परं पापित्वं यथा "राजा राष्ट्रकृतात् पापात् पापी भवति वै ध्रुवे!। तथैव राष्ट्रः पापेन तद्राज्यस्थास्तु वै जनाः । यथोश्मादयः सर्वे पापिनो नात्र संशयः । भार्य्यां क्रोडीकृतो स्वामी दुष्कृतात् स्वामिनोऽन्यथा । तथा देशिकपापात्तु शिष्यः स्यात् पातकी सदा । शिष्यादपि पापिनो नित्यं सुरमर्षति दुष्कृती । पातकी यजमानः स्यात् पापिनो ऋत्विगेव हि । पुरोहितस्तथा पापी यजमानांहसो ध्रुवम्" यदृत्तपुण्यपापभागित्वं यथा "यदृत्तानि च पुण्यानि पापानि च यथा प्रिये ! । प्राप्नोति कर्मणा-नेन तद्यथावच्छिशामय । देशग्रामकृतानि सुभागभाञ्जि कृतादिषु । कर्त्तौ तु केवलं कर्त्ता फलमुक् पुण्यपापयोः । ऋत्विगेऽपि च संसर्गे ह्यवश्यं यदुदाहृता । संसर्गात् पुण्य-पापानि यथा यानि निबोध तत् । एकत्र मैथुनाद्यानाद्देवपात्रस्वभोजनात् । फलार्द्धं प्राप्नुयात्कर्त्ता यथावत् पुण्यपापयोः । अर्थनाद्याजयित्वापि परस्य श्रवणादपि । दर्शनं पुण्यपापानां नित्यं प्राप्नोति मानवः । दर्शन-स्पर्शनाच्चैव मनोध्यानात्तथैव । परस्य पुण्यपापानां भागं प्राप्नुयाच्चरः । परस्य निन्दाप्रैशुन्यं धिक्कारञ्च करोति यः । तत्कृतं पातकं प्राप्य स्वपुण्यं प्रददाति यः । कुर्वतः पुण्यकर्मापि देवा यः कुरुते परः । यजीश्वरोऽथ शिष्यो वा यजमानोऽपि मानवः । तस्य सेवानुरूपेण तस्य तत्पुण्यमाप्नुयेत् । एकपङ्क्तौ स्थितो यस्तु चक्षुर्वत् परिवेषयेत् । तस्य पापमृतांश्चन्तु भजते परिवेषकः । स्नानसन्ध्यादिकं कुर्वन् संस्पृष्टेदा प्रमाद्यते । स पुण्यकर्मषष्ठांशं दद्यात्तस्मै सुनिश्चितम् । धर्मो-द्देशेन यो द्रव्यं परं याचयते नरम् । तत्पुण्यं कर्मजं तस्य धनं दत्त्वाप्नुयात् फलम् । अपरस्य परद्रव्यं पुण्य-कर्म करोति यः । कर्मजात् पापभोगात्तु धनिनस्तद्भवेत् फलम् । नापनुद्य स्वयं वस्तु परस्य क्षिपते नरः । धनी तत्पुण्यमाप्नोति स्वधनस्यानुरूपतः । बुद्धिदस्तद्-धनस्य च यथोपकरणप्रदः । बलकृत्तापि भागं प्राप्नुयात् पुण्यपापयोः । प्रजाभ्यः पुण्यपापानां राजा भागांशमु-द्धरेत् । शिष्याद्गुरुः क्रियां भक्तौ प्रिया पुत्रात्तथैव च । ऋत्विगेऽपि पुण्यस्य भागार्द्धं क्रमशाप्नुयात् । पर-स्वत्वेन दानादि कुर्वतः पुण्यकर्मणः । विना स्वत्व-शिष्याभ्यां कर्त्ता भागमाहरेत् । आत्मनो वा पर-स्यापि यदि सेवां न कारयेत्" श्रीमत्स्य उवाच "इत्थं स्वदत्तान्यपि पुण्यपापान्यायान्ति नित्यं परसञ्चितानि । ज्ञात्वेत्थ चाचिन्तितिरस्कृतमयं पुराभवं पुण्यमतिप्र-विद्वम्" पाद्मोत्तरखण्डे ७१।१५७अ० । अत्र कर्त्तौ संस-र्गजपापोक्तिः सङ्घातत्वविवक्षया संसर्गशब्दे दृश्यम् । ६गर्हे त्रि० पापयोनिः मनुः ४।१६६ पाप-नाशित रत्नादि । [विस्फोटिते प्रेते च आ०त०रघु०।

पापकृत् त्रि०पापं कृतवान् कृ-क्विप् । १कृतपापे २चण्ड-

पापग्रह पु०कर्म० । "सूर्य्यौनेन्दुः कुजो राहुः शनिश्चैव तु केतुजः । रविः पापग्रहश्चैते शुभाचान्ये प्रकीर्त्तिताः" ज्योतिषोक्तेषु ग्रहेषु ।

पापघ्न पु०पापं हन्ति हन-टक् । १तिले तस्य हि दानेन पापनाशकत्वमिति तस्य तथात्वम् । २पापनाशके त्रि० राजनि० ।

पापचेली स्त्री पुनःपुनः पचति पा-यङ्-अच् पापश्चोपापु-क्षीरयति वैर-अच् रस्य लः । (आकनादि) पाठान्त-तायाम् अस्यः स्वार्थे क लुप्तः । पापचेलिका तत्रार्थे स्त्री रत्नमाला ।

पापति त्रि० पत-यङ्लुक् इत् । पुनःपुनः पतनशीले

पापनापित पु० कर्म० "कृत्सितानि कुत्सितैः" पा० पाप-त्वेन (गर्हात्वेन)नापितस्य कृत्सनानत्वात् नापितस्य पूर्वं निपाते प्राप्ते "पापाच्चे कुत्सितैः" पा०परनि० धूर्त्तनापिते

पापनाशन त्रि० पापं नाशयति नाशि-ल्यु । १पापनाशके २विष्णौ पु० "क्षितीशः पापनाशनः" विष्णुसं० । भावे ल्युट् इत० । ३पापस्य नाशने च न० । करणे ल्युट् । ४प्रायश्चित्ते न० ।

पापपति पु० पापजनकः पतिः । उपपतौ जारे स्त्रिया० ।

पापपुरुष पु० पापात्मकः पुरुषः पुरुषाकारः । तल्लोके यमकुक्षिस्थे पापात्मके ध्येये नराकारे पदार्थे तन्नराकारे भूतशुद्धिप्र० वस्तुपापावयवभेदयुते २पुरुषभेदे च । पाद्मे क्रिया० २१अ० तत्स्वरूपप्रसङ्गे यथा "ब्रह्मादौ पुरुषश्रेष्ठः संहारं सचराचरम् । सर्वेषां दमनार्थाय सृष्टवान् पापपुरुषम् । द्विजातिहत्यामूर्द्धानं सुरापानमुदीरितम् । सुवर्णस्तेयवदनं गुरुतल्पमतिं स्मृतिम् । स्त्रीहत्यानाभिकञ्चैव गोहत्यादीनवाङ्घ्रिकम् । न्यासापहरणग्रीवं भ्रूणहत्यामलत्वचा । परस्त्रीगति-

वुक्कानं तुष्टुक्कोक्तवधोदरम्। अरक्षापक्षकल्पादिनाभिं गर्वकथाकटिम्। गुरुनिन्दासक्थिभागं कन्याविक्रयशेफसम्। विप्रादिवाक्यकथनपायुं पितृवधाङ्घ्रिकम्। उपपातकरोमाणं भक्षाकायं भवद्धरम्। ब्रह्मवर्चं पिङ्गनेत्रं स्त्रीश्रयात्मनदुःखदम्"।

पापयक्ष्मन् पु० वास्तुमण्डलस्थे पूज्यगणभेदे ह०सं० ६३अ०।

पापमुक्त त्रि० पापात् मुक्तः ६त०। परित्यक्तपापे। पापमोचनहेतवश्च मनुना दर्शिता यथा

"ख्यापनेनानुतापेन तपसाध्ययनेन च। पापकृन्मुच्यते पापात् तथा दानेन चापदि"। अन्ये च तस्य हेतवो वराहपु० दर्शिता यथा "यः सर्वः सर्वभूतेषु जितात्मा शान्तमानसः। स पापेभ्यो विमुच्येत ज्ञानवान् स च वेदवित्। शुभाशुभपरित्राता क्षत्रियस्य त्रयस्य च। ध्याने चैवं समारूढः स पापेभ्यः प्रमुच्यते। सदेहे परदेहे च सुखदुःखेन निस्पृहः। विचारज्ञो भवेद्यस्तु स च मोक्षेतनरो ध्रुवम्। अहिंसः सर्वभूतेषु तृष्णाक्रोधविवर्जितः। क्षतन्यासः सदा यस्य स पापेभ्यः प्रमुच्यते। प्राणायामैश्च निर्दग्धं कंदः, संसारचारतः। अवस्थितमना यस्तु स पापेभ्यः प्रमुच्यते। निराशीः सर्वतश्छिन्नेदिष्टार्थेषु न लोलुपः। पवित्रात्मा त्यजेत् प्राणान् सर्वपापात् प्रमुच्यते। अदृश्यानोजितक्रोधः परद्रव्य विवर्जितः। अनुद्यतश्च यो मर्त्यः स पापेभ्यः प्रमुच्यते। गुरुशुश्रूषया युक्तो ह्यहिंसानिरतश्च यः। क्षुद्रोऽपि क्षुद्रशीलोऽपि स पापेभ्यः प्रमुच्यते। प्रशस्तानि सदा कुर्याद् अप्रशस्तानि वर्जयेत्। योऽभिमन्यति तीर्थानि विशुद्धेनान्तरात्मना। पापादुपरतो नित्यं स पापेभ्यः प्रमुच्यते। उत्थाय ब्राह्मणं गच्छेत्तरो भक्त्या समन्वितः। अभिगम्य प्रयत्नेन स पापेभ्यः प्रमुच्यते"। अन्येऽपि तस्य हेतवः शास्त्रान्तरेषु द्रष्टव्याः।

पापयोनि स्त्री पापा महती योनिः। इतिर्यग्योन्यादौ। पापहेतुका योनिः। २पापहेतुके जन्मभेदे तद्भेदे चारब्धभेदो याज्ञ० उक्तो यथा

"महापातकजान् घोरान्नरकान् प्राप्य महितान्। कर्मक्षयात् प्रजायन्ते महापातकिनस्विह। खगाश्वशूकरोष्ट्राणां ब्रह्महा योनिमृच्छति। चरमुक्षयवेधानां सुरापो नात्र संशयः। कृमिकीटपतङ्गत्वं स्वर्णहारी समाप्नुयात्। क्षपागुल्मलतात्वञ्च क्रमशो गुरुतल्गः"। "तैलकृच्चैलपायी स्यात् पूतिनक्रस्तु सूचकः। परस्त्रीयोषितं कृत्वा ब्रह्मस्वमपहृत्य च। अरण्ये निर्जने घोरे भवति ब्रह्मराक्षसः। क्षीणजातौ प्रजायेत परस्त्रापहारकः। पलाशं शिखी कृत्वा गच्छन्ऋक्षुन्दरिः शुभान्। भूमिको धान्यहारी स्याद् यानसङ्घं फलं कपिः। जलं प्लवः पयः काको मद्गुकारी प्लुपक्षकम्। मधु, दंशः फलं सर्पो, गां गोधाऽग्निं बकस्तथा। शिल्पी वस्त्रं श्वा रसन्तु चोरी जलपहारकः। प्रदर्शनार्थमेतत्तु मयोक्तं नेयकर्मणि। द्रव्यापहारा हि यथा तथैव प्राणिजातयः। यथा कर्मफलं प्राप्य तिर्यक्त्वं वा नरपर्ययात्। जायन्ते बहुशश्चैता दरिद्राः पुरुषाधमाः"। गौतमोऽपि क्वचिदिशेषमाह "विद्याविक्रयी पुरुषशवः वेदविक्रयी दोषी, वस्त्रवाजको जलप्लवः, अयाज्ययाजको वराहः, अनिमन्त्रितभोजी वायसः, भिषक्भोजी वानरः, यतस्ततोऽश्नन् मार्जारः, क्षत्रवदहनात् खद्योतः, दारक्षाधाऽौ सत्यविक्रयिः, पर्युषितभोजी ऋक्षिः, अदत्तादायी वल्मीकी, मद्गरो भ्रमरः, अन्युत्पादी मण्डलकुष्ठी, गूढाचार्यः श्वपाकः, लोकतर्कः सर्पः, क्षेत्रापहारी शलभो, ब्रह्मापहार्यजोर्णी, ज्ञानापहारी मूर्खः, भक्ष्यस्त्रीपुष्पस्त्रीगमनेऽजगरः, प्रव्रजितागमने मक्षिकाशः, गूढागमने दीर्घकीटः, अवर्षाभिगामी दरिद्रः, अन्नहारी मत्स्यः, चीरहारी बलाका। वार्धुषिकोऽकृषीवलः, अधिक्षेपविक्रयी मद्गुः, राजभक्षिभोगामी नकुलकः, राजाक्रोधको गर्दभः, योगामी मण्डूकः, अनध्यायाध्ययने मृगालः परद्रव्यापहारी परप्रेष्यः, मत्सरबधे गर्भघाती, इत्येतैरनुगमना इति। स्त्रियोऽप्येतेषु निमित्तेषु पुंसोक्तास्वेव जातिषु स्त्रीत्वमनुभवन्ति"। विष्णुसं०४३अ० अन्येऽपि पापभेदजन्ययोनिभेदा दर्शिताः। बहु०। शतद्युते त्रि०।

पापरोग पु० पापविशेषजाते रोगभेदे स च विष्णुसं० उक्तो यथा "नरकानुभूतदुःखानां तिर्यक्त्वस्त्रीत्वानां मनुष्येषु लक्षणानि भवन्ति। कुष्ठ्यतिपातकी। ब्रह्महा यक्ष्मी। सुरापः श्यावदन्तकः। स्वर्णहारी कुनखः। गुरुतल्पगो दुष्टार्शाः। पूतिनाशः पिशुनः। पूतिवक्त्रः सूचकः, धान्यचौरोऽङ्गहीनः। मित्रचौरोऽतिरिक्ताङ्गः। अन्नापहारकस्त्वन्धवायी। वागपहारको मूकः। वस्त्रापहारकः श्वित्री। अन्नापहारकः पङ्गुः। देवब्राह्मणक्रोधकोमूकः। लोहलिङ्गो मरद्गः। उन्मत्तोऽग्निदः। गुरुप्रतिकूलोऽपस्मारी। गोघ्नस्त्वन्धः। दीपापहारकश्च

कायच दीपनिर्वापकः। लवणाम्बरसीसकविक्रयी रलकः। एकशफविक्रयी मृगव्याधः। कुक्कुटाभी मगाख्यः, चाष्टिकःक्लेनः। गार्धुपिको भ्रामरी। भिटाख्यैकाकी वातगुल्मी। समयभेत्ता खल्लाटः, स्त्रीपद्यवकीर्षी। परदत्तिग्नो दरिद्रः। परपीडाकरो दीर्घरोगी। एवं कर्मविशेषेण जायन्ते बहुपापान्विताः। रोगान्विताश्च या स्याच कुजखञ्जैकलोचनाः। वामनाबधिरामूका दुर्बलाश्च तथा परे। तस्मात् सर्वप्रयत्नेन प्रायश्चित्तं समाचरेत्"। यद्यपि सर्वेषां रोगाणां दुःखदायकत्वेन पापहेतुकत्वं तथापि उन्मादादयोऽष्टरोगाणां प्राधान्येन महापापजत्वेन पापरोगत्वं यथोक्तं शु०त०रघुनन्दनेन "महारोगिण इति पापरोगाष्टकान्यतमरोगवतः। ते च उन्मादस्त्वगदोषो राजयक्ष्मा श्वासो मधुमेहो भगन्दरः उदरोऽश्मरी इत्यष्टौ पापरोगा नारदोक्ताः। कर्मविपाकशब्दे १७४६ पृ० विस्तरः। २मसुरीरोगे शब्दरत्ना०।

पापरोगिन् त्रि० पापजन्यरोगो निन्द्यत्वेनास्त्यस्य इनि। महारोगयुक्ते ३।१।२ मनुः। [२पापहृद्रो च।

पापर्द्धि स्त्री पापानामृद्धिरिव। १खगयायां हेमच० इत०।

पापल त्रि० पापं लाति ला-क। १पापयाचके पातयति तदादत्ते स्वाधिष्ठानेन वधीनयति पाति-कलच् तस्य पच। २परिमाणभेदे न० उणादिकोषः।

पापशमनी स्त्री पापं शम्यतेऽनया शम-णिच्-करणे ल्युट् ङीप्। १शमीवृक्षे राजनि०। पापं शमयति शमि-ल्यु। २पापनिवारके त्रि०। [तुल्ये।

पापसम अव्य०पापेन तुल्यम् तिष्ठद्० अव्ययीभावः। पाप०

पापहन् त्रि० पापं हन्ति हन-क्विप्। पापनाशके मनुः ७।२५।

पापाख्या स्त्री पापमनिष्टमाख्याति कथयति आ+ख्या-क। ह०सं०७अ०उक्ते वृक्षस्य गतिभेदे "प्राक्तनविमिश्रसंचिप्रतीक्ष्णयोगान्घोरपापाख्याः। पराशरतन्त्रे नक्षत्रैः कीर्त्तितागतयः" इत्युपक्रमे "पापाख्या सावित्रं मैत्रं शक्राग्निदैवतं चेति" सावित्रादिनक्षत्रे तद्गतेः संज्ञासङ्गा "प्राक्तनत्यागारोग्यहृद्विग्रहप्रहृद्भयः क्षेमम्। संचिप्रमित्रयोर्मिश्रमेतदन्यासु विपरीतम्" इति तस्याः शुभफलकथनेन पापस्वरूपत्वात् तथात्वम्।

पापात्मन् त्रि० पापयुक्त आत्मा अन्तःकरणं यस्य। पापान्विते जीवे "पापात्मा पापसम्भवः" इति पुराणम्। तेषां संसरणप्रकारः पाद्मे क्रियायो० २२अ० यथा

"पापात्मनां शृणु गतिं विस्तरेण वदाम्यहम्। षडशीतिं सहस्राणि योजनानि दुरात्मनाम्। प्रोक्तो मार्गश्च विस्तारः सर्वदुःखान्वितश्च सः। क्वचित् क्वचित् ज्वलद्वह्निः सन्तप्तः कर्दमः क्वचित्। क्वचित् क्वचित् हिमश्चैव! सन्तप्तं ताम्रशालुकम्। क्वचित् क्वचित्तीक्ष्णशिलाः क्वचिल्लघ्वशिलास्तथा। क्वचित् क्वचिच्छ्वभ्रदृष्टिः क्वचिदङ्गारवर्षणम्। कुत्रचिद्वह्निदृष्टिश्च कुत्रचित् पङ्कवर्षणम्। उष्णाम्बुवर्षणं क्वापि क्वचित् पाषाणवर्षणम्। ज्वलद्भिरिव क्वापि सन्तप्तो वाति मारुतः। गभीरा अम्बुपाश्च तृष्णार्त्तस्तत्र हे द्विज!। क्वापि कण्टकहृक्षाश्च नाराचसमकण्टकाः। पाषाणश्चयः क्वापि दुरारोहाः सपङ्किलाः। क्वचिद्वाताम्बुकाराश्च क्वचित् श्लेष्मित कन्दराः। क्वचिद्वीरणवृक्षाश्च क्वचित् काशाः क्वचित् शराः। क्वचित् क्वचिच्छर्कराश्च लेष्टवश्च क्वचित् क्वचित्। क्वचिदस्थ्नां राशयश्च दुर्गन्धा मांसराशयः। क्वचित्कण्टकराशिश्च शैवालानि क्वचित् क्वचित्। कीलकावलयः क्वापि क्वचिद्व्याघ्राश्च शिवाः। खड्गिनः करिणः क्वापि क्वचिच्छ्वा भयङ्कराः। एवं बहुविधक्लेशे क्वाया जलविवर्जिते। तस्मिन्मार्गे द्विजश्रेष्ठ! पापिनो यान्ति दुःखिनः। तस्माद्विवस्त्रवेषाश्च प्रेताकारभयङ्कराः। गच्छन्ति पापिनस्तत्र शुष्ककण्ठौष्ठतालुकाः"।

पापान्त न० पृथूदकापरनामके तीर्थभेदे वामनपु० २८अ०।

पापाह पु०पापमशुद्धत्वात् गर्ह्यमहः टच्समा०। अशौचदिने

पापिन् त्रि० पाप+अस्त्यर्थे इनि। पापयुक्ते। अतिशयेन पापी इष्ठन्। पापिष्ठ अतिशयेन पापयुक्ते। ईयसुन् पापीयस् तत्रार्थे त्रि० स्त्रियां ङीप्। [पापे अमरः।

पाप्मन् पु० आप्नोति व्याप्नोति पापिनम् आप-मनिन् नि०।

पाप्मघ्न पु० पाप्म हन्ति हन-टक्। १मन्थके राजनि०। २कटुकायां स्त्री जटाधरः।

पामन् न० पा-मनिन्। विचर्चिकायां (खोस पाचड़ा) स्त्रीत्वमपि मनन्नात् वा ङीप् पामाशब्दश्च अमरः।

पामन त्रि० पामास्त्यस्य मत्वर्थे न। पामरोगवति अमरः पक्षे मतुप् मस्य वः। पामवत् तत्रार्थे त्रि० स्त्रियां ङीप्

पामर त्रि० पाति क्विप् पाः त्रयीधर्म्मः स स्त्रियतेऽनेन स्म-घ। १मूर्खे २नीचे मेदि० २खले हेमच०।

पामरोद्धारा स्त्री पामरमुद्धरति उद्-हृ-अण् अजादित्वात् टाप्। गुडूच्याम् शब्दरत्ना०।

पामादि पु०"पामादिभ्यो नः" पा० अस्त्यर्थे मत्वर्थनिमित्ते

शब्दगन्धे स च गन्धः पा०ग० ङ्० उक्तो यथा "पामन् वामन् वेमन् क्षेमन् कद्रुवलि यामन् जामन् क्रमि-(कृत्वा कल्याणे) (याकोपनाचीदद्व्यां क्षुधत्वञ्च)(विश्वगित्युत्तरपदलोपश्चालतसन्तेः) (लक्षणा यच्च)

पामारि पु० ६त०। गन्धके हेमच०। तत्सेवने हि पामरोगनाशः इति तस्य तथात्वम्।

पायना स्त्री पा–णिच्+भावे युच्। यन्त्रादीनां धाराकरणार्थे व्यापारभेदे तेषां पायना त्रिविधा "क्षारोदकतैलेषु, तत्र क्षारपायितं शरशल्यास्थिच्छेदनेषु। उदकपायितं मांसच्छेदनभेदनपाटनेषु, तैलपायितं सिराव्यधनस्नायुच्छेदनेषु" सुश्रुतः।

पायस त्रि०पयसोविकारः अण्। १दुग्धविकारे २परमान्ने पु० अमरः। तत्पाकप्रकारो यथा "घृतप्रतप्तकुचो धौतः परिभ्रष्टो दृतेन च। खण्डयुक्तेन दुग्धेन पाचितः पायसो भवेत्। पायसः कफलद्रुवल्यो विष्टम्भी मधुरो गुरुः" पाकराजेश्वरः।

पायसिक त्रि० पायसो भक्तिरस्य। पायसभक्तियुक्ते

पायिक पु० पादविक+पृषो०। पदातौ शब्दच०।

पायित त्रि० पा+णिच–क्त। १पानकर्तृभूतोक्ते पदार्थे (पानदेखोवा) २अम्बे च पायनाशब्दे दृश्यम्।

पायु पु० अपेति अनेन वायुः अप+इण करणे–उण् अपेरल्लोपः पिबत्यौषधमनेन पा–उण् वा। १अपानवायुस्थाने २कर्मेन्द्रियभेदे च इन्द्रियशब्दे दृश्यम्।

पाय्य न० पीयतेऽनेन पा–ण्यत् नि० यादेशः। १परिमाणे २पानीये न० ३निन्द्यनीये त्रि० विश्वः। ४पाने उणादि०

पार कर्मसमाप्तौ अद०चु०उभ०सक०सेट्। पारयति ते अपपारत् त।

पार न० परं तीरं परमेव अण्, पृ–घञ् वा। नदीसङ्क्रमेण प्राप्ये १परे तीरे अमरः। २प्रान्तभागे शेषावधौ मेदि०

पारक त्रि० पृ–ण्वुल्। १पूर्त्तिकारके २पालके ३प्रीतिकारके च स्त्रियां गौरा० ङीष्। [साधौ।

पारकुलीन त्रि० परकुले साधु प्रतिजना० खञ्। परकुले

पारक्य त्रि०परस्मै लोकाय हितम् तस्येदं वा यञ् कुक्च। १परलोकसाधने २परलोके च "पारक्यमविरोधि च" कर्मप्रदीपः "उद्धृत्य चतुरः पिण्डान् पारक्ये स्नानमाचरेत्" स्मृतिः। [समाप्तिगन्तरि च।

पारग त्रि० पारं गच्छति गम–ड। १पारगन्तरि २कार्य्य

पारगत त्रि० पारं गतः। १पारगामिनि २शिक्षिते पु० हेमच०

पारज् न० पार–जनि। सुवर्णे उज्ज्वलद०। [गन्तरि।

पारजायिक पु०परजायां गच्छति परदारादि०ठक्। परदार-

पारटौन पु० प्रस्तरे त्रिका०।

पारण न० पार–भावे ल्युट्। १व्रतान्तभोजने युच् पारणा तत्रार्थे। "पारणं पावनं पुंसां सर्वपापप्रणाशनम्। उपवासाङ्गभूतञ्च फलदं शुद्धिकारणम्। सर्वेष्वेवोपवासेषु दिने पारणमिष्यते। अन्यथा फलहानिः स्याद्ते धारणपारणम्। न रात्रौ पारणं कुर्य्याद्ते वै रोहिणीव्रतात्। निशायां पारणं कुर्य्याद्दर्शयित्वा महानिशाम्। पूर्वाह्णे पारणं शस्तं कृत्वा विप्र! सुरार्चनम्। सर्वेषां सम्मतं कुर्य्याद्ते वै रोहिणीव्रतम्" ब्रह्मवै० श्रीकृष्णजन्माखण्डे ८अ०। जन्माष्टमीशब्दे एकादशीशब्दे च दृश्यम्। ल्युट्। २मेघे पु० शब्दमाला। ३रूपभेदे। पारणस्यैरपत्यम् दृञ्। पारणि तदपत्ये। ततः यूनि फञ् पारणायन यूनि तदपत्ये। तौल्वला० फिञो न लुक्।

पार(द)त पु० पृ–णिच्–तन्, पृषो० तस्य दो वा। १रसभेदे (पारा)। पारं ददाति दा–क। २पारदायिनि त्रि०हेमच० "रसायनार्थिभिर्लोकैः पारदो रक्ष्यते यतः। ततो रस इति प्रोक्तः स च धातुरपि स्मृतः"। अथ पारदोत्पत्तिर्लक्षणनामगुणाः "शिवाङ्गात् प्रच्युतं रेतः पतितं धरणीतले। तद्धेमसारजातत्वाच्छुक्रमप्यमभूच्च तत्। क्षेत्रभेदेन विज्ञेयं शिवबीर्य्यं चतुर्विधम्। श्वेतं रक्तन्तथा पीतं कृष्णं तत्तु भवेत् क्रमात्। ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्च खलु जातितः। श्वेतं शस्तं द्विजानाञ्च, रक्तङ्क्षत्रियस्यायनम्। धातुवादे तु तत्पीतं वैश्यतो कृष्णमेव च। पारदो रसधातुश्च रसेन्द्रश्च महारसः। चपलः शिववीर्य्यञ्च रसः स्मृतः शिवाङ्गयः। पारदः षड्रसः स्निग्धश्चिदोषघ्नो रसायनः। योगवाही महातेजाः सदा दृष्टिबलप्रदः। सर्वामयहरः प्रोक्तो विषधातुसंकुलनुत्। अस्यो रसो भवेद्ब्रह्मा बद्धो रुद्रो जनार्दनः। रञ्जितः कामितदायि साक्षाद्देवमहेश्वरः। मूर्च्छितो हरति रुजं बन्धनमस्तुभूय खेचरतिं कुरुते। अजरीकरोति हि सुतः, कोऽन्यः करुणाकरः सुतात्। असाध्यो यो भवेद्रोगो यस्य नास्ति चिकित्सितम्। रसेन्द्रो हन्ति तं रोगं नरकक्षुरवाजिनाम्। मलं विषं वह्निगिरी च चापलन्दैवर्गिकन्दोषसप्तमि पारदे। उपाधिजौ द्वौ त्रिगुणागयोगजौ दोषौ रसेन्द्रे कथितौ

ङ्गीकरैः । अनेन मूर्छा, वरणं विषेण दाहोऽग्निना कटतरः शरीरे। देहस्य जाड्यक्रियेव सदा स्यात् शास्त्रतो वीर्यकृतिश्च हंसाम्। वङ्गेन कुष्ठमुजेन रक्तो भवेदतोऽन्यौ परिशोधनीयः। वङ्गक्रियं सकचेति कुष्ठादोषाक्षयो रसे। एते कुर्वन्ति वनाप्यं स्मृतिं मूर्छां तथा क्लमात्। अन्योऽपि कथिता दोषा त्रिमर्दिनि यादृशे यदि। तथाऽऽते मयो दोषा हरबीजा विशेषतः। संस्कारहीनं खलु सूतराजं यः सेवते तस्य करोति बाधाम्। देहस्य नाशं विदधाति नूनं कष्टांश्च रोगान् जनयेन्नराणाम्"। तस्य शोधनादिविधिः तत्खेदनञ्च "नानाधान्यैर्यवाग्राम्लैस्नुषयज्जैलान्वितैः। खल्वाख्यं पूरितं रन्ध्रे यावदस्तमाप्नुयात्। तन्मध्ये भक्षरा तस्थौ विष्णुक्रान्ता सुनर्धवा। श्रीनाडी चैव वर्षाभूः सहदेवी शतावरी। त्रिफला गिरिकर्णी च हंसपदी च चित्रकम्। समूलं कुट्टयित्वा तु यवाभं विनिक्षिपेत्। पूर्वोक्तभाण्डमध्ये तु धान्याम्लमिदं क्षतम्। खेदनादिषु सर्वत्र रसराजस्य शोधनम्। विष्णुक्रान्ता गिरिकर्णी च अपराजितैव शोधने तथ्यभेदात्। "अलक्षमारनालं वा तदभावे प्रदापयेत्" तदभावे धान्याम्लाभावे "त्रायूषं लवणं राजी रजनी त्रिफलाऽऽर्द्रकम्। भल्लातकी नागवला मेषनादः पुनर्नवा। मेषशृङ्गी चित्रकस्य नवसारं समं समम्। एतत्समस्तं श्लक्ष्णं वा पूर्वोक्तेन मेषेण वेष्टयेत्। प्रक्षिप्योक्तेन कल्केन रक्षमकुलमालकम्। तन्मध्ये निक्षिपेत्सूतं वस्त्रा तत्क्षिप्तं यत्नेत्। दोलायन्त्रेऽम्लसंयुक्ते स्वेदितो रसः" मेषनादः (जवरारं)शालविशेषः। मेषशृङ्गी (मेढाशिंगी)। तदभावे कर्कटशृङ्गी ग्राह्या। नवसारं नवसादरम्। अन्यत्र "मूलकानलविष्मूत्रयवक्षारकराजिका। रसस्य शोडशांशेन द्रव्यं युञ्जात् पृथक् पृथक्। द्वयेकत्रित्रयानेषु मतं मानमिदं बुधैः। षड्गुणेषु चतुर्गुणेषु सूतं प्रक्षिप्य काञ्जिके। स्वेदयेद्दिनमेकन्तु दोलायन्त्रेण बुद्धिमान्। स्वेदाच्छुद्धो भवेत्सूतो मर्दनाच्च सुनिर्मलः"। मूलकम् (मूरा) अनलश्चित्रकम्। मत्रूषं लिकुचराजिका (राई)। अथ मर्दनम् "दृढिकाभूर्खपूर्णाभ्यामादौ मर्दीरसस्ततः। दत्त्वा गुडेन विष्मूत्रराजिकाष्टगुणैः"। अन्यत्र "कुमारिकाचित्रकरञ्जवर्षैः कृतैः क्षाराद्वैर्द्रुतीविधिश्चितैः। कज्जलिकेऽपि विमर्दितो रसो दिनत्रयं सर्वगदैर्विमुच्यते। कुमार्या च निशाजूर्वैर्दिनं सूतं विमर्दयेत्। एवं कदर्थितः सूतो बद्धो भवति निश्चितम्। वङ्गोऽधीकधात्रेण स्वेदितः स बली भवेत्। सर्षपीचित्रिकाबन्धाम्लद्रवैः स्वेदितो बली। तत्र च भावकद्रावैः स्निग्धः स्वादतिदीप्तिमान्"। सर्षपी (नामकची) चित्रिका (अग्निशी) बन्धा (वाकुचेखरा) भल्लः भल्लराजः। अम्लो लवणः पावकः चित्रकम्। अथ रसस्य मारणविधिः "धूमसारं रसं तोरीलवणं नवसादरम्। वासैकं मर्दयेदम्लैर्भागं ज्ञात्वा समं समम्। काचकूप्यां विनिक्षिप्य मुखं रुद्ध्वा दृढं दृढम्। विलिप्य परितो वह्निं दत्त्वा विशोषयेत्। अधःस्थक्षिप्तदृष्टिस्तरीमध्ये चूर्णं निवेशयेत्। पिठरीं वालुकापूर्णां त्वा च कूपिकामुखम्। निवेश्य चुल्ल्यां तदधो वह्निं कुर्यात्क्रमैः शनैः। तस्मादधिकं किञ्चित्यावत्तं ज्वालयेत् क्रमात्। एवं द्वादशभिर्यामैर्म्रियते रस उत्तमः। क्षोटयेत् काचकूपीतं तमूर्ध्वमधरं त्यजेत्। अवस्थ

मृतं स्तं व्यक्षीवाचन्तु शाकवा । यथोचितानुपानेन सर्व-
कर्मसु योजयेत्" भावप्र० । सर्व० सं० रसेश्वरदर्शने तन्त्रिदृष्टिः
"संसारस्य परं पारं दृश्यो पारदः स्मृतः" इति ।
रसार्णवेऽपि "पारदो नदितो यस्मात् पारार्धं साधको-
त्तमैः । सुप्तोऽयं मृतवत् सोऽपि तस्य प्रसवकृत्मवः ।
अस देहरतो यस्मात्तस्मात्सोऽभिधीयते" इति "कर्मयोगेन
देवेशि ! प्राप्यते सिद्धधारणम् । रसस्य प्रथमश्चेति
कर्मयोगो द्विधा स्मृतः । मूर्च्छितेन हरति जीर्णान्
मृतो जीवयति स्वयम् । यद्वः खेचरतां कुर्याद्वपुषो वायुव
भैरवि !" इति । मूर्च्छितलक्षणमुक्तम् "शालावर्णो भवेत्
सूतो निष्प्रभ घनचापलम् । यत्तच्च दृश्यते यच्च मू
र्च्छितं तं वदन्ति हि । आर्द्रत्वच घनत्वच तेजो गौरव
चापलम् । यस्यैतानि न दृश्यन्ते तं विद्यान्मृतसूत-
कम्" इति । अन्यत्र यत्सलक्षणमभ्यधायि "यच्चतच
चपलो तेजस्वी निर्मलो गुरुः । स्फोटनं पुनराहत्तो
यत्सतत्व रसायनम्" इति । "तच्च हरगौरीरुद्रविष्णो
पिष्टस्यैर्यप्रमाणात्तं पार्थ्यते तद्विधिरेव कथ्यति
चेत्र षडादशसंस्कारवशात्तदुपपत्तेः तद्ग्रन्थाचार्यैः
"तस्य हि साधनविधौ सुधियां प्रतिकर्मनिर्णयाः प्रथ-
मम् । षडादशसंस्काराविज्ञातव्याः प्रयत्नेनेति" । ते च
संस्कारानिरूपिताः "स्वेदनमर्दनमूर्ध्वनस्थापनपातननि-
रोधनियमाश्च । दीपनगगनयासप्रमाणमथ जारणाविधा-
नम् । सप्तकृतिवाप्तकृतिजारणसरागजारणाश्चैव क्रमेण
वेधो भक्षणमटाश्चेति रसकर्मेति" । रसेश्वरग्रन्थे विस्तरः

पारतन्त्र्य न० परतन्त्रस्य भावः ष्यञ् । पराधीनत्वे

पारत्रिक त्रि० परत्र भवं, स्थितं वा ठक् । १परलोकस्थित-
कारके कर्मणि २परलोकभवे च ।

पारदण्डक पु० देशभेदे शब्दरत्ना० ।

पारदारिक पु०परस्य दारान् गच्छति "गच्छतौ परदारा-
दिभ्यः" वार्त्ति० ठक् । जारेऽत्र परस्त्रीगामिनि ।

पारदार्य्य न० परस्य दारा दारा वस्तु तस्य कर्म-यञ् ।
परदारगमने । तच्चोपपातकम् याज्ञ० ३।२२६ श्लो० ।

पारदृश्वन् त्रि० पारं दृष्टवान् दृश-भूते क्विप् । पारं
दृष्टवति । स्त्रियां ङीप् रपाभावादेश ।

पारदेश्य त्रि० परदेशे भवः परदेशात् आगतो वा यञ् ।
१परदेशोद्भवे इत्यादौ याज्ञ०२।२५६ । २परदेशागते च ।

पारमार्थिक त्रि० परमार्थाय पारलौकिकधर्माय हितं
ठक् । १परमार्थोपयोगिनि मोक्षसाधने कर्मणि । पर-
मार्थतोऽयः तत आगतो वा ठक् । २वस्तुत आगते स्वा-
भाविके । स्वार्थे वा ठक् । यथार्थे "सत्या त्रिविधा पार-
मार्थिकी व्यवहारिकी प्रातीति की चेति वेदान्तेषु" ।

पारम्परीण त्रि० परम्परया आगतः खञ् । परम्परायाः
क्रमादागते । ["पारम्पर्यक्रमागतः" इति भट्ट ।

पारम्पर्य्य न० परम्परैव स्वार्थे यञ् । कुलादिपरम्परत्वात्

पारम्पर्य्योपदेश पु० पारम्पर्येण पित्रादिपरम्परया उप-
देशः न तु साक्षात्कारादिज्ञानम् । ऐतिह्ये अमरः
(यथा रूढे घटे घटः) इत्यादिरूपदिश्यते एव सर्वैः न
तु तत्र यत्नः केनचित् दृश्यते । [साधौ ।

पारयुगीन त्रि० परयुगे साधु प्रतिजना० खञ् । परयुग-

पारलौकिक त्रि० परलोकाय हितं ठक् द्विपदवृद्धिः । पर-
लोके जन्मान्तरादौ, हिते कर्मणि ।

पारवत पुंस्त्री पारावत+पृषो० । पारावते द्विरूपकोष० ।

पारवश्य न० परवशस्य भावः ष्यञ् । पारतन्त्र्ये त्रिका० ।

पारशव पुंस्त्री "निषाद शूद्रकन्यायां यः पारशव उच्यते ।
स पारशवयोर्यस्मात् पारशवः स्मृतः" इति मनुक्ते
जातायां शूद्रायां ब्राह्मणेनोत्पादिते निषादरूपे १बहीर्ध-
र्मे २परस्त्रीतनये २बौद्धे च मेदि० । परशु+दृष्टवर्मे-
ण्य् । ३परशुधरान्विते त्रि० । ४मध्यमे देशभेदे पु० सं०
१३ब० । पारशवस्य गोत्रापत्यं युवादि०अञ् । ५तद्गोत्रापत्ये
स्त्रियां ङीप् । पारशवाजन तद्दीये बहुषु गोत्रापत्ये ।

पारशीक पु० १देशभेदे तद्देशोद्भवे २घोटके च (पारसी) ।

पारश्वधिक पु० परश्वधः प्रहरणमस्य "परश्वधाट्ठञ्" च
पा० ठञ् । परश्वधास्त्रेण योद्धरि अमरः । पर्से अप्
पारश्वध तत्रार्थे क्षेमच० ।

पारस त्रि०पारस्यदेशभवे अण् वा०यलोपः । १पारस्यदेशोद्भवे
२तद्देशसम्बन्धिनि च स्त्रियां ङीप् । "अश्वेषाश्लेषाभव
पूर्वारेवतीभरणीदिवे । विशाखार्द्रोत्तराषाढाशतभे पा-
रसवरे । लग्ने स्थिरे सचन्द्रे च पारसीमारवीं पठेत्
तज्ज्ञस्तमथपतिः । [स्त्री०शब्दरत्ना० स्त्रियां ङीष् ।

पारसिक पु० पारसीक+पृषो० । १पारस्यदेशे २घोटके पु०

पारसीक पु०१देशभेदे २तद्देशस्थे जने ब०व० । "पारसीका-
स्ततो जेतुम्" रघुः । २तद्देशस्थे घोटके पु०स्त्री (पार-
सीघोड़ा) तद्देशस्थ कुङ्कुमादरता भावप्र० उक्ता कुङ्कु-
मशब्दे २६३० पृ० दृश्या ।

पारस्कर पु०पारं करोति क-ट पारस्करा० सुट् । १देशभेदे
२तद्देशस्थसंस्कारके तद्भिदे च ।

पारस्करादि "पारस्करप्रभृतीनि च संज्ञायाम्" पा० उक्ते षष्ठ्यन्तनिपातनिमित्ते शब्दगणे च च "पारस्करो देशः। कारस्करोऽद्रुमः। रक्षसां नदी। किष्कुः प्रमाणम्। किष्किन्धा गुहा। (तद्धृतोः करपत्योश्चोरदेवतयोः षुट् तलोपश्च) (प्राप्नुमतौ गवि कर्त्तरि)।

पारस्त्रैणेय त्रि० परस्त्रिया अपत्यं ढञ् रलडादेशः। जारजे परस्त्रियाः सुते अमरः स्त्रियां ङीप्।

पारस्यकुलीन त्रि० परस्य कुले भवः प्रतिजना० खञ् तत्र परस्यकुलेति पाठात् अनुकुस०। परकुलोत्पन्ने दत्तकसुतादौ

पारापत पुंस्त्री० पारादप्यापतति प्रेम्णा आ+पत–अच्। पारावते (पायरा) अमरः स्त्रियां ङीष्।

पारावत पुंस्त्री०परं जीवमवति परात् अत्रोर्वा अण्डुगरहा ज्ञानोपदेशद्वारा अवति अव–अण् परावत् तत्त्वज्ञः तस्यायमुपदेष्टा अण्। कपोते अमरः स्त्रियां ङीष्। चतुर्विंशगुरुमध्ये पारावतस्यापि गुरुत्वसङ्गः तत्र प्रसङ्गात् चतुर्विंशतिगुरवोऽत्र प्रदर्श्यन्ते "पृथिवी वायुराकाशमापोऽग्निश्चन्द्रमा रविः। कपोतोऽजगरः सिन्धुः पतङ्गो मधुकृद्गजः। मधुहा हरिणो मीनः पिङ्गला कुररोऽर्भकः। कुमारी शरकृत् सर्प ऊर्णनाभिः सुपेशकृत्। ततो मे गुरवो राजन्! चतुर्विंशतिराश्रिताः। शिक्षाहृत्तिभिरेतेषामन्वशिक्षमिहात्मना" भाग० ११।७ अ०। तत्कथा तदुत्तरत्र दृश्या

पारापा(वा)र न० पारमपारङ्गास्यस्य अर्शा० अच्। १समुद्रे अमरः ह्रस्वः। २तटद्वये द्वि०व०। पारावारशब्दोऽप्युभयत्रार्थे।

पारायण न० पारं समाप्तिमयतेऽनेन अय–ल्युट्। १साकल्ये अमरः २यज्ञादीनामाद्यन्तपाठे च। तत्र वेदपारायणं चतुष्प्रकारम् ऋग्वेदशब्दे १४१२ पृ०दृश्यम्। पुराणस्यापि मूर्त्यन्तपाठेऽपि पारायणव्यवहारः। तत्र भागवतपारायणे कश्चिद्विशेषः पद्म०पाता० ७१अ०उक्तो यथा "ब्रह्मनित्यक्रियः प्रातः कृतहस्तः कृतासनः। देवद्विजगुरूञ्चत्वा ध्यात्वा विष्णुं सनातनम्। द्वैपायनं नमस्कृत्य शुकदेवञ्च भक्तितः। शिरस्याञ्जलिबद्धः सन् यावत् प्रथमेऽङ्घ्रिके कीर्त्तयेत्। चरितं भरतस्यापि द्वितीये,ऽथ तृतीयके। मथनञ्चामृतस्यापि, यत्र जृम्भः स्वयं हरिः। चतुर्थदिवसे, चैव दशमे हरिजन्म च। पञ्चमे तु पठेद्विद्वान् रुक्मिण्या हरणावधि। षष्ठे चोद्धवसंवादं सप्तमे तु समापयेत्। अध्यायं प्राप्य विरमेत् तु मध्ये कदाचन। कृते विरामे मध्ये तु अध्यायादिं पठेत् पुनः। पठेदर्धं बुध्यमानः श्रावयेदर्धमेवोत्तमैः। श्रोता तु प्राङ्मुखो भूत्वा शृणुयाद्वैकचित्तवान्। अध्याये स्वर्णमाषैकं तथा दद्याद्द दक्षिणाम्। समाप्तौ च ततो धेनुं स्वर्णशृङ्गीं निवेदयेत्। कुर्याद्वै वैष्णवं होमं ज्ञातवान् भोजयेत्ततः। एवं यः कुरुते देवि! पाठं भागवतस्य तु। श्रवणं श्रावणं वापि स दृष्टां गतिमाप्नुयात्। एतत् पारायणं नाम सर्वकामफलप्रदम्" तत्र मासभेदाः पाद्मोत्तरखण्डे उक्ता यथा "अथ ते संप्रवक्ष्यामि सप्ताहश्रवणे विधिम्। सहायैर्बन्धुभिश्चैव प्रायः साध्यो विधिः कृतः। दैवज्ञन्तु समाहूय सत्कृत्य पृच्छ्य यत्नतः। विवाहे यादृशं वित्तं तादृशं परिकल्पयेत्। नभस्य आश्विनोर्जौ च मार्गशीर्षः शुचिर्नभाः। एते मासाः कथारम्भे श्रोतॄणां मोक्षदूचकाः"। "ब्रह्मो देव्युतश्चैव प्राणायामत्रयम्। तिलहोमसहस्रन्तु वेदपारायणं भवेत्" इति सिताष्टतषट्त्रिंशन्मतम्।

पारायणिक त्रि० पारायणमावर्त्तयति ठक्। १तदावर्त्तनकारिणि। पारायणमेतं तदधिकृत्य वा प्रकृत्तं "ढक्छः" पा० छ। परायणीय पारायणकर्त्तव्यन्यधिकारेण प्रवृत्ते ग्रन्थभेदे च।

पारारुक पारमृच्छति ऋ–उकञ्। प्रस्तरे शब्दच०

पारावतघ्नी स्त्री पारावारं हन्ति हन–टक् पृषो०। पारवति दूरदेशे भवाऽपि इलादेर्हन्ती। सरय्वां नद्याम् ऋ० ६।६१२। इतोऽन्यत्रकमधिकृत्य निरु०२।२४ उक्तं "पारावतघ्नीं पारावारघातिनी"।

पारावतपदी स्त्री पारावतस्येव पादो मूलमस्य अन्यत्रोपः ङीष् प्रत्ययः। (नया फटकि) १लतायां रत्नमा०। २काकजङ्घायां राजनि०। [अतोलतायाम् अमरः।

पारावताङ्घ्रि पु० पारावतस्याङ्घ्रिरिव मूलमस्य। ज्योति-

पारावताङ्घ्रिपिच्छ पुंस्त्री० पारावताङ्घ्रिरिवाकारयुतं पिच्छमस्य। पारावतभेदे राजनि०।

पारावारीण त्रि० पारमवारञ्च समन्तं सङ्घं वा गच्छति खञ्। १तटद्वयगामिनि २समुद्रगामिनि च। पारापारीणोऽप्यत्र।

पाराशर पु० पराशरस्यापत्यं गर्गा० यञ् पाराशर्य्यः तस्य ज्ञाता० कण्वा० अण् अन्यत्रलोपः। १पाराशर्य्यस्य ज्ञातेषु। पराशरेण प्रोक्तम् अण्। २पराशरप्रोक्ते स्त्रियां ङीप् "कलौ पाराशरी स्मृतिः" पराशरः।

पाराशरकल्पिक त्रि०पाराशरकृतः कल्पः तं वेत्त्यधीते वा

"विद्यावाचस्पतिश्चात्" पार्श्व० ठक्। १पराशरप्रणीतस्मृत्यध्येतरि २तत्कृतग्रन्थाध्येतरि च।

पाराशरि त्रि० पराशरेदम् इञ्। अपत्ये तु यञेव। १पराशरसम्बन्धिनि २शुकदेवे पु० स्त्रियां०।

पाराशरिन् पु० ब०व०। पाराशर्येण प्रोक्तं भिक्षुसूत्रमधीयते इनि यञोपः। वेदव्यासप्रणीतशारीरकसूत्ररूपे भिक्षुसूत्राध्यायिषु चतुर्षाश्रमिषु अमरः।

पाराशरीय त्रि० पराशरादूरदेशा० छशाखा० छ। पराशरसम्बन्धिग्रन्थादौ।

पाराशर्य्य पु० पराशरस्यापत्यं गर्गा० यञ्। पराशरापत्ये वेदव्यासे कैपायनशब्दे दृश्यम्। "यञञोः" पा० ततो यूनि फञ् पाराशर्य्यायण तदीये ग्रन्थभेदे।

पारिकर्म्मिक त्रि० परिकर्मणि नियुक्तः ठञ्। परिकर्मकरणे नियुक्ते।

पारिकाङ्क्षिन् पु० पारयति संसारात् तारयति पारि क्विनि पारि ब्रह्मज्ञानं तत्काङ्क्षति णिनि। यतिभेदे अमरः।

पारिख त्रि० परिखायां भवः पक्षाद्या० अण्। परिखाभवे तद्भेदं "उद्गाद्याः" पा०ङीष्। पारखीव तत्सम्बन्धिनि त्रि०।

पारिखेय त्रि० परिखा प्रयोजनमस्य ढक्। परिखार्थे खनादौ स्त्रियां ङीप् पारिखेयी मूषिः।

पारिग्रामिक त्रि०परिग्रामं भवः ठञ्। ग्रामस्य परितोभवे

पारिजात पु० पारमस्यति पारी वहत्यस्य जातः जनिक्। १देवतरुभेदे "ततोऽभवत् पारिजातः सुरलोकविभूषणम्" भाग० ८।८।५३श्लो०। तस्योत्पत्तिप्रकारादिकं वहत्पाराशरीयोक्तिरत्नाकरे। हरिवंशे तु १८६अ०तस्य कश्यपात् सुरभिरत्नात् तत्प्रादुर्भावनिरूपिणी कथा यथा

"पारिजातं ततोऽक्षीरदिलाः प्रियकाम्यया। सर्वकामप्रदैः पुष्पैराहृतं दिव्यगन्धजैः। त्रिशाखं सर्वदा दृश्यं सर्वभूतमनोहरम्। सर्वपुष्पाणि दृश्यन्ते तस्मिन्नेव महाद्रुमे। ईदृशान्यत्र पुष्पाणि विमर्त्ये नातिरूपिणी। षड्रूपाणि चास्यत्र पद्मानि च तथाऽपरा। मन्दारादपि दृश्यन्ते सारसङ्घा वपुष्पः। तस्यादेव तरोर्हृष्टः सर्वेषां ज्येष्ठतां गतः। ततस्तस्य निवध्याथ कण्ठे प्रददौ शुभा। अदितिर्मम पुत्रार्थं सौभाग्यार्थं तथैव च। निर्ऋतेश्च मया दत्तः कश्यपस्तु तपोधनः। इन्द्रोदत्तस्तथेन्द्राणी सौभाग्यार्थं ततो मम। सोमश्चाप्यत्र रोहिण्या दत्ता च धनदस्तथा। एवं सौभाग्यदो दृक्षः पारिजातो न संशयः। पारिजातो पिष्पुष्पाः पारिजातेति शब्दितः। मन्दारपुष्पैर्बन्धुजो मन्दारस्तेन कथ्यते। कोव्यर्थं दारुरित्याक्षरलाभनन्दो यतो जनाः। कोविदारः इति ख्यातस्ततः स मन्दारः। मन्दारः कोविदारश्च पारिजातश्च नामभिः। स दक्षो गायते दिव्यो यस्तत् कुसुमोत्तमम्"। तस्य हारकायाभानयनकथा पारिजातहरणे तदुत्तराध्यायेषु दृश्या। २नामभेदे भा०आ० ६७अ०। ३वृक्षभिदे भा०स०५अ०। स्वार्थे क। पारिजातक तथार्थे अमरः।

पारिजातसरस्वती स्त्री पारिजातेश्वरी सरस्वती। सरस्वतीभेदे तन्त्रसारादि तन्त्रसारे दृश्यम्।

पारिणायन त्रि० परिणये तत्काले भवम् वा०अञ्। परिणयकाले लब्धे धनादौ "मातुः पारिणाय्यं स्त्रियो विभजेरन्" दायभागे वसिष्ठः।

पारिणाह्य त्रि० परिणाहमर्हति वा० यञ्। दृढीकरणे शयासनादौ मनु ८।११ कुल्लू०।

पारितथ्या स्त्री परितस्या परितथा स्वार्थे अण्। सौवर्चलस्थितायां खर्जादिपङ्क्तिकायां (सिंती) अमरः।

पारितोषिक त्रि० परितोषः प्रयोजनमस्य ठञ्। परितोषार्थे दीयमाने धनादौ।

पारिधेय त्रि० परिधौ भवः शुभा० ढक्। परिधौ भवे।

पारिन्द्र पु०स्त्री०पारीन्द्र+पृषो०। सिंहे हेमच० स्त्रियां ङीप्।

पारिपन्थिक त्रि० पन्थानं वर्त्मयित्वा आस्ते वा परिपन्थम् अव्ययीभा० तत्र तिष्ठति वृत्तिं वा ठक् "परिपन्थञ्च तिष्ठति" पा०सप्तमीनिर्दे० पन्थादेशः। पन्थानं वर्त्मयित्वा व्याप्य वा स्थायिनि वृत्तिकरे च चौरे हेमच०।

पारिपाट्य न० परिपाट्यैव स्वार्थे अण्। परिपाट्याम्।

पारिपा(या)त्र पु० पर्वतभेदे "विन्ध्यवान् पारियात्रश्च" भा० स० १० अ०। स तु भारतवर्षस्थकुलाचलभेदः यथोक्तं "विन्ध्यश्च पारियात्रश्च सह्यते कुलपर्वताः। तेषां बहुविधो राजन्! पर्वतास्ते समीपतः" भा० भी० ६ अ०। "जठरो देवकूटश्च पूर्वस्यां दिशि पर्वतौ। गन्धमादनिधश्चोभौ पारियात्रनिरन्तरौ। निषधः पारियात्रश्च मेरोःपार्श्वे तु पश्चिमे। यथा पूर्वौ तथा चैतावानीलनिषधायतौ" मार्क० पु० ५४अ०। "वेदस्मृतिर्वेदवती त्रिसन्ध्या विष्णुरेव च। वेला सावित्रिका चैव सदानीरा नदी तथा। पारा चर्मण्वती पूर्वा विदिशा वेत्रवत्यपि। शिप्रा चावन्ती च तथा पारियात्रानदाः

स्मृताः" मार्क०पु० ५७ अ०। "मरुकीमालवाश्चैव पारियात्रनिवासिनः" विष्णुपु०। स च पर्वतः ब्र०ब० १४ अ० भूमेर्विभागे मध्यस्थिततयोक्तः यथा "उत्तरस्यामेतस्यां कुरुरकालकोटिकुरुराश्च पारियात्रनगः" स्वार्थे क। पारियात्रक तत्रार्थे क्वचिद् वर्षमध्यपाठस्तत्रार्थे।

पारिपार्श्विक त्रि० परिपार्श्वं पार्श्वं व्याप्य वर्त्तते ठक्। पार्श्वं व्याप्य स्थायिनि १सेवकादौ। स्थापकानुचरे २नटभेदे पु० "नटो विदूषको वाऽपि पारिपार्श्विक एव वा। सूत्रधारेण सहितः संलापं यत्र कुर्वते"। सूत्रधारसदृशत्वात् स्थापकोऽपि सूत्रधार उच्यते तस्यानुचरः पारिपार्श्विकः" सा०द०।

पारिप्लव त्रि० परि+प्लु-अच् स्वार्थेऽण्। १चञ्चले २व्याकुले च अमरः। ३तीर्थभेदे भा० व० ८ अ०। पञ्चममन्वन्तरे ५प्रजापतिभेदे हरिवं० ७ अ०। ६व्याख्यानभेदे यत० ब्रा० १३।४।३।२। तद्व्याख्यानं "पारिप्लवमाख्यानमाख्यास्यन्" इत्युपक्रमे "मनुर्वैवस्वतो राजेत्याह" इत्यादिकं तत्र दृश्यम्

पारिभद्र पु० परितो भद्रमस्यस्य प्रज्ञाद्यच्। (पालदामान्दार) १वृक्षे अमरः। "पारिभद्रोऽनिलस्त्रंशोषभेदः क्रमिप्रणुत्। तस्य पुष्पं पित्तरोगकर्षव्याधिविनाशनम्" भावप्र०। परिभद्राय कायति कै-क। २देवदारुवृक्षे ३निम्बवृक्षे च पु० मेदि०। ४कुशौषधौ न० शब्दच०। ५सरलवृक्षे पु० शब्दच० ६शाल्मलिद्वीपपतिप्रियव्रतभेदे ७तद्वर्षभेदे च पु० भाग० ५।२०।६ श्लो०।

पारिभाव्य न० परिभवाय रोगप्रशमनाय हितः यत्। कुशौषधौ अमरः। परिभुवः प्रतिभुवो भावः यत्। प्रतिभूभवने "वाक्षित्वं पारिभाव्यञ्च" इति स्मृतिः।

पारिभाषिक त्रि० परिभाषात आगतः ठञ्। १परिभाषातः प्राप्ते २परिभाषारूपाधुनिकसङ्केतयुते शब्दे पु० ३तादृशसंज्ञायां स्त्री। "उभयावृत्तिधर्मैव संज्ञा स्यात् पारिभाषिकी"। "उभयावृत्तिधर्म्मावच्छिन्नसङ्केतवती संज्ञा पारिभाषिकी यथाकाशशब्दित्यादि" वा हि द्वितीयावृत्तिनैव शब्दादिना रूपेण तदाश्रयमभिधत्ते न चाकाशादिपदस्य गगनादौ निरवच्छिन्नैव शक्तिः पटादिपदस्यापि पटादौ तादृशशक्त्यापत्तेः पटे शक्तमपि पटपदं न पटत्वावच्छिन्नशक्तमित्यादिप्रबोधोत्तरं ततः पटत्वविशिष्टस्मारनुभवादग्रं तच्छक्तिरवच्छिन्नेति चेत् शब्दवति शक्तमाकाशपदं न शब्दत्वावच्छिन्नशक्तमित्येवं यत्पदजन्यानाकाशादिपदात् शब्दवत्त्वेन गगनस्य प्रतीतिरतस्यापि शब्दत्वावच्छिन्नैव तत्र शक्तिरिति विभावयताम्। "यद्यधुनिकसङ्केतयोगित्वात् पारिभाषिकम्" यत्रार्थे यद्यप्याधुनिकसङ्केतवत्त्वेव तत्र पारिभाषिकं यथा पित्रादिभिः पुत्रादौ सङ्केतितं चैत्रादि यथा च शास्त्रकृद्भिः सिद्धप्रभावादौ पचतादि" शब्दशक्तिप्रका०।

पारिमाण्डल्य न० परितो मण्डलं यस्य सर्वत्र विद्यमानत्वात् परिमण्डलः परमाणुस्तस्य भावः ष्यञ्। ल्यो योऽप्रत्ययवायिकारश्चतामूल्ये परमाणुपरिमाणे। स्वार्थे ष्यञ्। २परिमण्डलशब्दार्थे परिमण्डलशब्दे दृश्यम्।

पारिमुखिक त्रि० परिमुखं वर्त्तते ठक्। मुखसमीपे वर्त्तमाने। [हेमच०। पारिपार्श्वशब्दे दृश्यम्।

पारियात्रिक पु० पारियात्र+स्वार्थे ठक्। कुलाचलभेदे

पारियानिक पु० परियानं प्रयोजनमस्य ठक्। मार्गयानयोग्यरथे हेमच०। [रिथि तापसे हेमच०।

पारिरक्षक पु० परिरक्षा व्रतभेदः प्रयोजनमस्य ठक्। मस्क-

पारिव्राजक न० परिव्राजकस्य भावः युवा० अण्। परिव्राजकस्य भावे सन्यासे। [(पलाशपिप्पल) ख्याते वृक्षे।

पारिश्य पु० पिपृर्त्ति पृ-क्विप् पारी तं श्यति शो-क।

पारिषत्क पु० परिषदं तत्प्रतिपादकं ग्रन्थमधीते वेत्ति वा तद्धा० ठक्। परिषदुपन्यार्थेतरि तद्वेत्तरि च।

पारिषद त्रि० परिषदि साधु अण् भवेऽर्थे पत्रद्धा० अण् वा। १सभासाधौ २सभाभवे च।

पारिषदक त्रि० परिषदा कृतं कृद्धा० वुञ्। परिषदा कृते

पारिषद्य त्रि० परिषदि साधु-यत्। सभायां साधौ

पारिसौर्य्य त्रि० परिसोरं सौरं वर्जयित्वा भवम् परिसरा० ञ्य। सूत्रवर्जनेन भवे।

पारिहनव्य त्रि० परिहनु+परिसरा० ञ्य। हनूपरिभवे

पारिहारिक त्रि० परिहारे साधु ठक्। परिहारकारके शब्दार्थकल्पतरुः। [स्वार्थे यञ्। बलये अमरः।

पारिहार्य्य पु० परिहियतेऽसौ परि+हृ-कर्मणि यञ्

पारी स्त्री पा-याने रक्षणे वा सम्यग्भावे क्विप् तां राति रा-क गौरा० ङीष्। १जलपूरे २कर्णस्थां गलन्तिकायां २क्षिप्तपादबन्धनदामनि च मेदि०। [आग्निकारके च।

पारीण त्रि० पारं गच्छति पार+खञ्। १पारगे २कर्मठ-

पारीन्द्र पु० पृ-पालने कर्मणि रक् पारिः पशुः पारिरिन्द्र इव। १सिंहे २व्याघ्रनखरसर्पे च हेमच०।

पारीरथ पुंस्त्री०पार्श्वां जलपूरे रथति रथ+अच्। जघटे स्त्रियां ङीष्। १दण्डे २घटघाटके च विश्वः। [उणादि०

पारू पु॰पिबति जलं रश्मिभिः पा–क । १आदित्ये २वङ्गे च
पारुच्छेपि पु॰ आषाढभेदे स्वार्थ॰ञौ॰ ७।१२।१।
पारुष्य स्त्री पशुभेदे यजु॰ २४।२४ स्त्रियां ङीष् ।
पारुष्य न॰ परुषस्य भावः परुषि भवो वा ष्यञ् । १निष्ठुरत्वे २दुर्वाक्ये च मेदि॰ । ३रुद्रवने विश्वः ४अशुरुचन्दने शब्दच॰ ५दशरथतो पु॰ मेदि॰ । ६विरुद्धाचरणे दण्डपारुष्यशब्दे ३५२४ पृ॰ दृश्यम् ।
पारेगङ्ग अव्य॰ गङ्गायाः पारम् अव्ययी॰ एदन्तत्वं निपा॰। गङ्गायाः पारे पारेसङ्गादयोऽपि तत्तत्पारे ।
पार्घट न॰ पार्दे घटते घट–अच् वृषो॰ । पांशौ हारा॰ ।
पार्थ पु॰ पृथायाः कुन्त्या अपत्यम् शिवा॰ अण् । १कुन्तीपुत्रे युधिष्ठिरादौ २अर्जुननामवृक्षे शब्दच॰ । पृथोः पृथिव्या ईश्वरः अण् । २पृथिवीपाले
पार्थक्य न॰ पृथक् इत्यस्य भावः ष्यञ् भत्वे अव्ययस्य टिलोपस्थानित्वात् न टिलोपः । पृथक्त्वे
पार्थव न॰ पृथोर्भावः पृथ्वा॰ दमनिजोऽभावपक्षे अण् । १पृथुत्वे । पृथोरयम् अण् । २पृथुसम्बन्धिनि स्त्रियां ङीप् । अस्य कार्त्तकौजपा॰ इत्वे न अनोदात्तता ।
पार्थसारथि पु॰ ६त॰ । १श्रीकृष्णे २भीमांसाग्रन्थकारके मिश्रोपाधिके विद्वद्भेदे च ।
प्रार्थिव पु॰ पृथिव्या ईश्वरः अण् । १राजनि पृथिव्याविकारः इदं वा उत्सा॰अञ् । २भूमिभवे त्रि॰ ३खीतायां स्त्री ङीप् । ४तगरपुष्पे न॰ राजनि॰ । पृथिव्याः निमित्तं संयोग उत्पातो वा अण् । ५पृथिवीनिमित्ते ६तत्संयोगे ७तद्दुत्पाते च दशरीरे पु॰ त्रिका॰ । [६२।१५ मा॰।
पार्थ पु॰पृथोरपत्यं वा॰ अक् । पृथिवंशजे क्षत्रभेदे ब्रह्म॰१॰।
पार्श्व पु॰ पार्श्वे भवः यञ् । रुद्रभेदे यजु॰ १६।४२।
पार्श्वाग्निक त्रि॰ पर्श्वाग्निरेव स्वार्थे क वा अस्यास्य प्रत्ता॰ अण् । १सम्यूर्णे २सगर्भेदे पुंस्त्री॰ शब्द॰ स्त्रियां ङीष् पर्श्वाग्निमाह ठक् । २पर्श्वाग्निर्जातेति वादिनि ।
पार्वण त्रि॰पर्वणि क्रियते पैर्णिकोऽण् पर्वणि भवे तु कालाट्ठञेव स्यात् तेन पार्विक इत्येव अतएव "न शारदः पार्विक मर्हतीश्वरः" इति नैषधे पठित्वा मल्लिनाथेन तथोक्तम् । १पर्वविहिते २अमावास्यानिमित्तके श्राद्धे न॰ तथोक्तं श्रा॰त॰ "अमावास्याकर्त्तव्यपर्वकर्त्तव्ययोः पार्वणत्वात् भविष्यपुराणम् "अमावास्यां यत् क्रियते तत्पार्वणसदाहृतम् । क्रियते वा पर्वणि यत् तत्पार्वणमिति स्मृतिः" । अत्र यद्यप्यादेरुभयलाभिधानेन विकल्पार्वणशब्देन च पार्वणस्य त्रयस्य द्वितीयवृद्धं पर्वणि यत् क्रियते इत्यनेनामावास्यायाः पर्वत्वात्तच्छ्राद्धस्य वैदिकप्रयोगाधीनत्वेन पार्वणत्वप्राप्तौ अमावास्यां यत् पृथगुपादानं तदमावास्याश्राद्धस्य रूढित्वार्थं तेन पार्वणेन विधानेन इत्यादौ यौगिकनानावयवशक्त्यपेक्षया एकस्या एव समुदायशक्तेर्लघुत्वात् अमावास्यापार्वणधर्मातिदेशो लभ्यते न तु पूर्णादिदृष्टाष्टकादिपार्वणधर्मातिदेशः । अतः अमावास्यायामष्टम्यादि पर्वणि च तन्निमित्तकश्राद्धे पार्वणश्राद्धम् अन्यत्र पार्वणविधिना श्राद्धमित्यभिलापे विशेषः" । कालमाधवीये च यातातपः आह "दर्शश्राद्धन्तु यत् प्रोक्तं पार्वणं तत् प्रकीर्त्तितम् । अपराह्णे पितॄणां तु तत् प्रदानं विशेष्यते" इति । यद्यप्येतादृशं पार्वणं प्रतिपदि न प्राप्नोति तथापि तद्विकृतिरूपतया विप्रकृष्टेन हेतुना कर्त्तव्यादिकाम्यश्राद्धादेः पार्वणत्वं व्यवहर्त्तुं शक्यम् । अतएव कात्यवाक्यं पूर्वसदाहृतम् "नैमित्तिकेषु तु यत्तिथि पार्वणं तनयो विदुः" इति । तस्य कालभेदाश्च नि॰शि॰ निर्णीताः यथा हेमाद्रौ व्यासः "श्राद्धं हेमाद्रावन्द्रेभच्छायायामहःक्षयंक्रमे । नवोदके नवान्ने च नवच्छन्ने तथा स्वके । नवैश्वेषु चेहन्ने पितरो हि मघासपि" । "पितरः सूर्यवन्यमदत्ते मघासु च" इति शातातपपाठः नवोदके नवकूपपाषाणादाविति केचित् । वर्षोपक्रमे आर्द्राप्रवेशे इति गौडाः "दर्शके शुक्लपक्षे तु नवान्नं यस्यते बुधैः" अतः कृष्णपक्षे नेति गौडाः मैथिलास्तु "अलाभायवं चैव धान्यजातं नरोत्तम !" इति वाराहोक्तेः प्रतिधान्यं श्राद्धमाहुः तत्र जातपदस्य श्राद्धयोग्यसमूहपरत्वात् । हेमाद्रौ आदित्यपुराणः "यद्वोपरागे च हते च जाते पित्रे गयायामथवाहवे च । नित्यं च शुक्ले च तथैव पक्षे दत्तं भवेच्छ्राद्धसहस्रतुल्यम् । शुक्लं प्राहुरमावास्यां चोषचन्द्रां द्विजोत्तमाः । अष्टकासु भवेत्तत्र तत्र दत्तं तथाऽक्षयम्" । तत्रैव शङ्खः "यदाविदित्यं तीर्थातो मासुवारस्तथैव च । पञ्चकं नाम तत्प्रोक्तमयनाच्च चतुर्गुणम्" । याज्ञवल्क्यः "अमावास्याष्टकाद्वृद्धिः कृष्णपक्षोऽयनद्वयम् । द्रव्यं श्राद्धसम्पत्तिर्विष्णुवत्कुर्वसंक्रमः । व्यतीपातो गजच्छाया महत्यं चन्द्रसूर्ययोः । श्राद्धं प्रति रुचिश्चैव श्राद्धकालाः प्रकीर्त्तिताः" कृष्णपक्षः सर्वोऽपि "शाकेनापरपक्षं नातिक्रमेत् शाकि शाकि वाऽश्नन्निति श्रुतेः "अहं वा चतुर्थी यदहः कृष्णपक्षे

ऋते चतुर्दशीमिति कात्यायनोक्तेः "माघि माघि कार्ष्ण-पक्षापराह्णः श्रेयान्" इत्यापस्तम्बोक्तेश्च वीप्सया सर्वकृष्णपक्षेषु नित्यम् "तेनोपसंहारान्माघकृष्णैकोद्दिष्टपरत्वं पराक्षम् अत्र प्रत्यहं पक्षश्राद्धादि यदहःसम्पत्तिर्वेति त्रयः पक्षाः यदैकैकदिने श्राद्धं तदा दार्शं पृथगेव यावत्पक्षं-नामावास्याया पृथङ्निर्देशात् । एतेन कृष्णपक्षे यदहः सम्पद्यते अमावास्यायां तु विशेषेणेति निर्णयोक्तेर्गुणो-ऽपरपक्षश्राद्धस्यामावास्येति भूयसाधिमतमप्यपास्तम् । अयक्तौ दर्शेनापि माघि श्राद्धसिद्धिरिति नारायणवृत्तिः । निरग्निकानां कर्त्रिच्छिद्दिने आहिताग्नेस्तु दर्शे एव "न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मन" इति मनूक्तेः सर्वकृष्णपक्षाश्रयो मातृके "अनेन विधिना श्राद्धं नि-रग्वदग्नेश्च निर्वपेत् । कन्याकुम्भस्थरवौ कृष्णपक्षे च सर्वदा" । कर्कोऽपि "आहिताग्नेः संवत्सरे त्रिः श्राद्ध-मित्यम" इति । देवलः "अनेन विधिना श्राद्धं कुर्यात् संवत्सरं सतत् । द्विरुक्तवां यथाश्रद्धं माघे माघे दिने दिने" । कृष्णपक्षेष्वपि महालयस्य श्रेष्ठत्वं त-त्रोक्तं प्राक् । व्यतीपाते विशेषमाह हेमाद्रौ यमः "फलं यच्छ्राद्धतत्पक्षे अमये कोटिरुच्यते । पतने शतकोटिस्तु व्यतीपाते वै दत्तमक्षयम्" ज्योतिःशास्त्रे "द्वात्रिंशतिसमोपेतो अमये चैकविंशतिः । पतने दश नाड्यस्तु व्यतिपाते चत्र नाडिकाः" अन्यौ च द्वौ व्यतीपातौ प्राह्यौ । हे-माद्रौ मार्कण्डेयः "यदा च श्रोत्रियोऽभ्येति मद्वंशे वेद-विदग्निचित् । तेनैकेनापि कर्त्तव्यं श्राद्धं च विधव-त्सुधम्" । इदं चापिण्डं कार्यमिति हेमाद्रिः एतच्चैव पिण्डोऽपि "उद्वाहे पुत्रजनने पित्रोर्श्राद्धं सौमिके नखे । तीर्थे श्राद्धत्रयं कार्यं यावते जीवतः पितुः" इति मैत्रायणीयपरिशिष्टोक्तेः । तिथिविशेषे फलवि-शेषो याज्ञवल्क्येनोक्तः "कन्यां कन्यावेदिनश्च पशून् न्यै यतस्तानपि । द्यूतं क्रयिं च वाणिज्यं दिशमैकैकयर्क्षाष्टलया । ब्रह्मवर्चसिनः पुत्रान् वर्षरोग्ये सकृषके ॥११॥१२ । ग्रामिश्रैष्ठ्यं १३ सर्व-कामानाप्नोति १५ श्राद्धदः सदा । प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीम्" एताः कृष्णपक्षस्या एव महालये तु फलभूमेति पृथ्वीचन्द्रोदयः । पौर्णमास्यां हेमाद्रौ पितामहः "अमावास्यामतीपाते पौर्णमा-मष्टकासु च । विद्वान् श्राद्धमकुर्वाणो नरकं प्रतिप-द्यते" एतन्नाध्यादिपरम् "त्रीहिपाके च कर्त्तव्यं यव-पाके च पार्थिव ! । पौर्णमासी तथा माघी श्रावणी च नरोत्तम ! । प्रोष्ठपद्यामतीतायां तथा कृष्णत्रयोदशी । एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः" इति विष्णुधर्मोक्तेः । विष्णुः "माघी प्रौष्ठपदी कृष्णा तयोदशीति" । अत्र माघी पौर्णमासीति कल्पतरुः । श्रावणी-त्वमपि मघायोगसम्भवात्त्रयोदशी विशेषणमिति गौडाः नक्षत्रेष्वपि याज्ञवल्क्यः "स्वर्गं कृत्तिकयोजस्वं रौद्रं वलं तथा । पुत्रान् श्रैष्ठ्यं च सौभाग्यं रुद्रर्क्षे कृत्तिका शुभम् । मृगशिरसि वापि वाणिज्यमभीप्सतोऽपि । आरोग्यं यशोवीतशोकतां परमाङ्गतिम् । धनं वेदान् भिषक्सिद्धिं कुर्यात्कामयजाविकम् । अन्नानायुष विधि वदुयः श्राद्धं संप्रयच्छति । कृत्तिकादिभरण्यन्तं सका-मान् प्राप्नुयादिमान्" । फलान्तराण्यपि महाभारत कौर्मादिष्वेवानि । माधवीये मरीचिः "कृत्तिकादिषु कृ-त्तेषु श्राद्धे यत् फलमीरितम् । विष्कम्भादिषु योगेषु तदेव फलमिष्यते" हरहस्तिः "आरोग्यं चैव सौभाग्यं पत्नूणां च पराजयम् । सर्वान् कामान् प्रियां विद्या धनमायुर्यशोक्रमम् । सूर्यादिदिवसेष्वेतच्छ्राद्धलभ्यते फलम् । ब्रह्मादिकरणेष्वेतच्छ्राद्धलभ्यते फलम् अ-न्यानि च प्रभवतिश्राद्धादीनि प्राग्नुक्तानि भार्कण्डेयपु-राणे "श्राद्धार्हद्रव्यसम्पत्तौ तथा दुःखप्रदर्शने । अन्यत्रैं यदपीहोक्तं श्राद्धं कुर्वीत चेच्छया" ।

"संक्रान्तान्यावपरागे च पर्वण्यपि महालये । निर्वा-प्यास्तु त्रयः पिण्डा एकस्तु त्रयेऽहनि । एकोद्दिष्टं परित्यज्य पार्वणं कुरुते द्विजः । अज्ञानं तद्धीजानीयात् स नरः पितृघातकः । अमावास्या त्रयो यस्य प्रेतपक्षे-ऽथ वा यदि । सपिण्डीकरणाद्ध्वं तस्योक्तः पार्वणो विधिः । त्रिदण्डपक्षयादेव प्रेतत्वं नैव जायते । कृ-त्वैकादशे प्राप्ते पार्वणन्तु विधीयते" त्रिदण्डपः । एतेषां व्याख्यानतात्पर्यकथनपूर्वकं विकृतिपार्वणविधानमु आ०त० निर्णीतं यथा "त्रयं सम्प्राप्तानां त्रयं कुर्यात् त्रिस्रो दद्यादित्यर्थः । मृताहपर्युदस्तत्रिदैवतस्य प्रतिप्रसवमाह अमावास्यायामिति प्रेतपक्षोऽत्र पितृपक्षः अन्ययुक्तकृष्णपक्ष इति यावत् न तु कृष्णपक्षमात्रं कृष्णपक्षसामान्यपरत्वे-ऽमावास्यापदवैयर्थ्यापत्तेः पितृपक्षं विशेषयति हेमाद्रि-माधवाचार्यधृतं नागरखण्डम् "नभो वाथ नभस्यो वा अमावास्या यदा भवेत् । सप्तमः पितृपक्षः स्यादन्यत्रैव तु पञ्चमः" । अत्र श्राद्धभाद्रयोरन्यतरस्य महालयत्वे

आषाढापेक्षया सप्तमपक्षस्य पितृपक्षत्वात् अत्र मृत-स्यैव प्रेतपक्षसूतत्वं न तु मन्वमावसाद्रूक्ष्णपक्षसूतस्य। ततश्च तत्र मृतस्य वर्षान्तरेऽप्यशुक्लपक्षेऽपि तच्छ्रा-द्धकरणे न पार्वणं किन्त्वेकोद्दिष्टमिति। अत्र पार्वणो विधिः पार्वणेतिकर्त्तव्यताकैकोद्दिष्टविधिरिति नव्य-वर्द्धमानप्रभृतयः तत्र पूर्ववचनोक्तलौकिकस्य मृताहे पर्युदस्तस्य पार्वणो विधिरित्यनेन प्रतिप्रसवात् तस्मात् तदेकोद्दिष्टं लौकिकं न तु शाट्यौर्द्धदैहिकं "कर्त्तृसम-न्वितं सञ्चा तथार्द्धं श्राद्धषोड़शम्। प्रत्यब्दिकञ्च शेषेषु पिण्डाः स्युः षड्डिति स्थितिः" इति छन्दोगपरिशिष्टवच-नेन प्रत्यब्दिकव्यतिरेकेण षट् संख्यानियमात्। एवमभा-वास्यादिमरणनिमित्तेन मातुरपि प्रत्यब्दिकं पार्वण-विधिनैव "अपुत्रा ये मृताः केचित् स्त्रियो वा पुरुषाश्च ये। तेषामपि च दातव्यं श्राद्धमेकोद्दिष्टं न पार्वणम्" इति आपस्तम्बवचने अपुत्रा इति विशेषणोपादानात् सपु-त्राणां पार्वणाभ्यनुज्ञानात्। एतच्च मात्रादित्रितयदैवतं कार्य्यम् "मातरं पितामहीं प्रपितामहीं च पूर्ववत् त्रीन् भोजयित्वा" इत्यन्वष्टकायां तथा दर्शनात् अवसा-नदिननिमित्तत्वेन पार्वणविधिना छन्दोगैरपि मात्रादि-त्रिकाणां श्राद्धं कर्त्तव्यं "न योषिद्भ्यः पृथगद्याद्व-सानदिनादृते" इति छन्दोगपरिशिष्टवचने विशेषतः प्रतिप्रसवात्। एवं सपिण्डीकरणेऽपि। एतच्च मृताह पार्वणं मातापित्रोरेव। तथा च हेमाद्रिधृतकात्यायन-वचनं "सपिण्डीकरणादूर्द्धं" पित्रोरेव हि पार्वणम्। पितव्यभ्रातृमातृणामेकोद्दिष्टं सदैव तु"। मातृपदं सपत्नीमातृपरम्। सपत्नीमातृत्वञ्च मातृपदस्य राज-दन्तादित्वात् परनिपातः ततश्च वाक्ये मातृसपत्नीति न प्रयोज्यं किन्तु सपत्नीमातरित्यादिकम्। एवं साग्नि-कौरसक्षेत्रजाख्यां मृताहे पार्वणं कर्त्तव्यम् "औरस-क्षेत्रजौ पुत्रौ विधिना पार्वणेन तु। प्रत्यब्दमितरे कुर्यु-रेकोद्दिष्टं मृता दश" इति आपस्तम्बवचनस्य "यत्र यत्र प्रदातव्यं सपिण्डीकरणात् परम्। पार्वणेन विधानेन देयमस्मिन्मृता सदा" इति मत्स्यपुराणवचनस्य चैकवा-क्यत्वात्। अथना च "प्रत्यब्दं दर्शवच्छ्राद्धं साग्निः कुर्वीत वै द्विजः। एकोद्दिष्टं सदा कुर्यान्निरग्निः श्राद्धदः सुतः"।

पार्वत त्रि॰ पर्वते भवः अण्। १पर्वतजातमात्रे (ओड़ा-निम) २निम्बभेदे ३दुर्गायां स्त्री ङीप् अमरः। ४य-ङ्क्यां ५गोपालपूतिकायां स्त्री मेदि॰ ६जीवन्त्यां विश्वः ७द्रौपद्यां ८सौराष्ट्रमृत्तिकायाम् रत्नमाला ९क्षुद्रपा-षाणभेदायां १०धातक्यां राजनि॰ तत्र दुर्गायां पार्व-तीशब्दनिरुक्तिर्यथा

"तिथिभेदे कल्पभेदे पर्वभेदप्रभेदतः। ख्याती तेषु च विख्याता पार्वती तेन कीर्त्तिता। महोत्सवविशेषश्च पर्वेत्युक्तिः प्रकीर्त्तितम्। तस्याधिदेवी या सा च पार्वती परिकीर्त्तिता। पर्वतस्य सुता देवी साधिभूता च पर्वते। पर्वताधिष्ठातृदेवी पार्वती तेन कीर्त्तिता" इति प्रकृतिखण्डे दुर्गोपाख्याने १४अ०। ११अत्रे स्त्री ब०व० निघण्टुः तत्र पार्वत्यः इति पाठान्तरं तत्रार्थे।

पार्वतायन पुंस्त्री॰ पर्वतस्यर्षेः गोत्रापत्यम् फक् वा। पर्व-तर्षेर्गोत्रापत्ये पक्षे इञ्। पार्वति तत्रार्थे

पार्वतीनन्दन पु॰ इत॰। कार्त्तिकेये अमरः पार्वतीसुता-दयोऽप्यत्र तस्य तत्सुतत्वकथा अग्निकुमारशब्दे ९२पृ॰ भा॰व॰ २२४अ॰ वाक्ये दृश्या। तत्र उमायोन्यां तु रुद्रेणेत्यशुद्धम् उमायोन्यां तु रुद्रेणेत्येव पाठः साधुः।

पार्वतीश्वर न॰ १काशीस्थे शिवलिङ्गभेदे काशीख॰ २अधि॰ पु॰

पार्वतीय न॰ पर्वते भवं ढक्। १सौवीराञ्जने २रक्तपुनर्नवायां स्त्री॰ रत्नमाला।

पार्वायनान्तीया स्त्री पर्वणोऽयनस्य चान्ते विहिता ऋक्। दृष्टिभेदे सा च दृष्टिर्दर्शपौर्णमासाप्रयोगस्य कात्ये विहिता "दृष्टीः पार्वायनान्तीयाः कैवल्या निर्व-पेत् सदा" मनु॰ कुल्लूकव्याख्याने।

पार्श्व पु॰ पर्णुः प्रहरणमस्य। पर्णुप्रहरणयुक्ते

पार्श्व पुन॰ स्पृश–क्वण् धातोः पृ–च। १कक्षाधोभागे अमरः २समीपे च। पर्शूनां पार्श्वेस्थ्रां समूहः पर्शु–क्वण्। पर्शुसमूहे न॰ मेदि॰ ४जिने पु॰ ५वक्षिकटे त्रि॰ हेमच॰। ६छन्दःशास्त्रोपावे शास्त्रे सि॰कौ॰।

पार्श्वक त्रि॰ पार्श्वेन छन्दःशास्त्रोपावेनाधीष्टमिति कन्। शास्त्रेणाधीष्टयुक्ते।

पार्श्वतस् अव्य॰ पार्श्व+सार्वविभक्तिकतसिल्। तत्तद्दिग-र्थयुते पार्श्वशब्दार्थे ततो भवार्थे शश्चा॰ अण् टिलोपः। पार्श्वतीय पार्श्वतोभवे त्रि॰।

पार्श्वद त्रि॰ पार्श्वं ददाति दा–क। पार्श्वचरे भा॰श॰ ३६अ॰

पार्श्वनाथ पु॰ परेशनाथे जैनदेवभेदे

पार्श्वपरिवर्त्तन न॰ पार्श्वेन परिवर्त्तनम्। यत्पार्श्वमधः-स्थापयित्वा शयितः तत्पार्श्वस्योर्द्धीकरणे (पाशमोड़ा)

१पार्श्वस्थ परावृत्तौ । तस्य क्रियः भाद्रशुक्लैकादश्यादौ कर्त्तव्ये पार्श्वपरिवर्त्तनाख्ये २व्रतभेदे च "प्राप्ते भाद्रपदे मासि एकादश्यां सितेऽहनि । कटिदानं भवेदिष्णोर्महापातकनाशनम् । जलाशयान्निकं नीत्वा संपूज्याभ्यर्च्च च प्रभुम् । कर्णिकापरिवर्त्तिच दक्षिणाङ्गे प्रकल्पयेत् हरिभ०भवि०पु० । एकादश्यामिति सम्यायां अत्रयमध्यपादलाभे बोध्यमन्यथा "द्वादश्यामेव कारयेत्" तत्र व्यवस्था उत्थानशब्दे ११०१२पृ०द्रष्टव्या । [भावप्र० ।

पार्श्वपिप्पल न०पार्श्वे पिप्पलमिव । हरीतकीभेदे (गजाठ)

पार्श्वभाग पु० कर्म० । १पक्षभागे इत्यादेः २पार्श्वदेशे अमरः

पार्श्वल त्रि० पार्श्व+अस्त्यर्थे सिध्मा०लच् । पर्शुसन्ततायुते

पार्श्ववक्त्र पु० पार्श्वे वक्त्रमस्य । भङ्गदेवे हरिवं० २१७अ० ।

पार्श्वशय त्रि० पार्श्वाभ्यां शेते शी-अच् । पार्श्वाभ्यां क्रमेण शायिनि ।

पार्श्वशूल पु० सुश्रुतोक्ते शूलरोगभेदे तल्लक्षणादि यथा "रुणद्धि मारुतं श्लेष्मा कुक्षिपार्श्वव्यवस्थितः । स संरुध्य करोत्याशु श्वासं गुडगुडायनम् । सूचीभिरिव निस्तोदः क्षोभोऽङ्गेषु तदा नरः । नाऽऽत्तं वाञ्छति नो निद्रां लभते चार्त्तिपीडितः । पार्श्वशूलः स विज्ञेयः कफानिल समुद्भवः" । [२तथाभूते नटे पारिपार्श्विके हेमच० ।

पार्श्वस्थ त्रि० पार्श्वे तिष्ठति स्था-क ७त० । १समीपस्थिते

पार्श्वादि "पार्श्वादिभ्यश्छस्" वार्त्ति० उक्ते श्रेतेरर्थप्रत्ययनिमित्ते शब्दगणे स च गणः "पार्श्व उदर पृष्ठ उत्तान अवमूर्द्ध" ।

पार्श्वास्थि न० ६त० । देहपार्श्वस्थिते अस्थि (पाँजर) अमरः

पार्श्विक त्रि०पार्श्वे भवः ठक् । १पार्श्वभवे २सन्धिजीवके हारा०

पार्श्वी स्त्री द्वि०व० । द्यावापृथिव्योः निघण्टुः ।

पार्श्वैकादशी स्त्री पार्श्वस्य हरेः पार्श्ववर्त्तनस्य निमित्तमेकादशी । पार्श्ववर्त्तनैकादश्याम् भाद्रशुक्लैकादश्याम् । पार्श्ववर्त्तनशब्दे द्रष्टव्यम् । [क । कर्कटे हेमच० ।

पार्श्वोदरप्रिय पार्श्वोदरस्य ताभ्यां प्रीणाति भोजनं प्री-

पार्षिक पु० श्रोत्रप्रवर्त्तकर्षिभेदे प्रवराध्यायः ।

पार्षत त्रि०पृषतस्य विराट्छन्दस्कोदम् अण् । १विराट्छन्दस्कमन्त्रिणि २ततृप्ते पृषद्युक्ते पु०२द्रौपद्यां स्त्री ङीप् त्रिका०

पार्षद् स्त्री परिषद्+पृषो० । सभायां त्रिका० ।

पार्षद त्रि० पार्षदमर्हति अण् । पारिषद शब्दच० । अञ् । पार्षद्योऽप्यत्रार्थे भरतः । [रंगे भवे ।

पार्षदंश त्रि० पृषदंशे भवः तत्रा० अञ् । पृषदंशे विन्दो-

पार्षदश्व पु० पृषदश्वस्य वायोरर्षभेदस्य वेदम् अण् । १वायुसम्बन्धिनि २ऋषभेदसम्बन्धिनि च ३गोत्रप्रवर्त्तकभेदे पु० आश्व० श्रौ०१२।११ [कात्या०श्रौ० २२।७।१

पार्ष्टिक त्रि० पृष्टे षष्ठे भवः ठञ् । षष्ठसम्बन्धिनि

पार्ष्णि पुंस्त्री० पृष-नि निन्दृद्धिः । १पादप्रन्थेर्गुल्फस्याधोभागे अमरः । (गोडालि) २पृष्ठे मेदि० ३सैन्यपृष्ठे हला० ४जिगीषायाञ्च पु० रत्नकोषः ५उत्तमदक्षिणां स्त्री मेदि० कन्यां स्त्री धरणिः ।

पार्ष्णिक्षेम पु० विश्वेदेवभेदे भा०अनु० ९१अ० ।

पार्ष्णिग्राह पु० पार्ष्णिं पृष्ठपदं गृह्णाति अण् । विजयार्थं जिगमिषोः पश्चात्पदप्रक्षिप्ते पृष्ठस्थे १शत्रौ २द्वादशराजचक्रमध्ये पृष्ठस्थाविन्दमे च अरिशब्दे ३५५पृ०दृश्यम् ।

पार्ष्णिवाह त्रि० पार्ष्णिं वहति वह-अण् । पृष्ठस्थे कार्येनियोढके भा० सौ० १२०अ० ।

पार्ष्णील त्रि०पार्ष्णिरस्त्यस्य सिध्मा०लच् दीर्घश्च । पार्ष्णियुक्ते

पाल रक्षणे चु०उभ०सक०सेट् । पालयति ते अपीपलत् त ।

पाल त्रि० पालयति पाल-अच् । १रक्षके "पालदोषविनाशे च पाले दण्डो विधीयते" इति स्मृतिः । भावे अच् । २रक्षणे पु० ।

पालक पु० पालयति पाल-ण्वुल् । १अश्वरक्षके सटा० २चित्रकवृक्षे पु० राजनि० ३पालनकर्त्तरि त्रि० स्त्रियां टाप् कापि अतइत्त्वम् एतदन्तस्य पुंयोगेऽपि टाप् गोपालकस्य पत्नी गोपालिका इत्येव न ङीष् ।

पालकाव्य पु० १करेणुभूषि सूनिभेदे हेमच० २ततत्रते इक्ष्वाकुप्रभृतिवंशप्रवर्त्तके सूर्य्यवंशभेदे न० [हेमच० ।

पालक्या स्त्री पालाय कायति कै-क । (पालङ्) शाकभेदे

पालघ्न पु० पालं जलादितो रक्षकं अस्त्रं हन्ति हन-टक् । १अस्त्रे २जलजन्तुभेदे अमरः ।

पालङ्क पु० पाल-सम्भ० क्विप् पाला अङ्कते अङ्क-अच् । (पालङ्) १शाकभेदे अमरः । स्त्रीत्वमपि स्त्रियां ङीष् । अत्रैव "पालङ्की कथिता रूक्षा वातादिप्रकोपवर्द्धनी" राजवल्लभः २कुन्दवृक्षे स्त्री अमरः गौरा० ङीष् ।

पालङ्क्य न०पालङ्क+स्वार्थे अञ् । (पालङ्) १शाके राजनि० २कुन्दरौ स्त्री अमरः । "पालङ्क्या वातला शीता श्लेष्मला भेदिनी गुरुः । विष्टम्भिनी मदश्वासपित्तरक्तविषापहा" भावप्र० । ३श्लेष्मणि मेदि० ।

पालन न०पाल-भावे ल्युट् । १रक्षणे करणे ल्युट् । मदाक्रान्तायाः गोः क्षीरे मेयूषे अन्नचन्द्रिका । तत्रत्री-

रस्य पानद्वारा वत्सपालनकरत्वात् तथात्वम्। पालवणिज् पु॰पाले कन्यारक्षणे वणिक्। कन्यापाले त्रिका॰ पालल त्रि॰ पलस्य तिलचूर्णस्य विकारः अण्। तिलचूर्णपिण्डके "पाललाः क्षेत्रजननाः शक्तुल्याः कफपित्तलाः" सुश्रु॰। पालाश्य त्रि॰पलाशस्य विकारः अवयवो वा अण्। १पलाशावयवे २तद्विकारे च "पालाशो दण्ड आषाढः" अमरः। ३तमानपत्रे (तेजपात) राजनि॰तद्वर्णः अस्यास्य अण्। ४हरिद्वर्णे पु॰ ५तद्विशिष्टे त्रि॰ अमरः पलाशेन निर्वृत्तम् सङ्घाशा॰ यञ्। पालाश्य पलाशनिर्वृत्ते त्रि॰। पलाशस्यादूरदेशादि वराड्डा॰ कक्। पालाशक तत्सन्निकृष्टदेशादौ। स्वार्थे क। तत्रार्थे पालाशखण्ड पु॰ मगधदेशे शब्दरत्ना॰। पालाशि पु॰ पलाश गोत्रप्रवर्त्तिभेदे प्रवराध्यायः। पालि(ली) स्त्री पल-वा॰ इण्। १कर्णलतायां २वश्यौ कोषे ३त्रेषौ ४अङ्कभेदे ५ज्ञात्यादिदेये च मेदि॰ ६यूकायां ७पोटायां ८प्रशंसायां ९पत्रे १०वस्त्रसङ्के क्रोडे च हेमच॰ वा ङीप् दीर्घान्तः ११स्यात्याम् शब्दच॰। पालिंहिर स्त्री मस्तकस्थितपेभेदे सुश्रुतः अस्थिशब्दे दृश्यम्। पालिका स्त्री पालि+स्वार्थे क। १पालिशब्दार्थे संज्ञायां कन्। २कर्णपत्रे शब्दच॰ ३दध्यादिच्छेदन्यां हारा॰। ४पालनकर्त्र्यां स्त्रियां च। पालित त्रि॰ पाल-क्त। १रक्षिते क्रोष्टुवंश्ये २नृपभेदे ३देशभेदे च पु॰ हरिवं॰३७अ॰। ४शाखोटवृक्षे पु॰शब्दार्थकल्प॰ ५कुमारानुचरमातृभेदे स्त्री भा॰श॰ ४७अ॰। पालित्य न॰ पलितस्य भावः ष्यञ्। केशादेः शुभ्रतादौ। पलितस्यादूरदेशादि सङ्घाशा॰यञ्। पलितस्य सन्निकृष्टदेशादौ त्रि॰। [न्नृपभेदे पु॰ हरिवं॰ ३अ॰। पालिन् त्रि॰ पालयति पालि-णिनि। १पालके २रक्षणकर्त्तरि पालिन्द पु॰ पालि-वा॰ किन्दच्। १कुन्दुरुष्के राजनि॰। २श्यामालतायां स्त्री अमरः गौरा॰ ङीष्। पलिन्धीति पाठान्तरम् शब्दो॰। श्लिष्टतायां हिरूपकोषः। पालिशायन पु॰ गोत्रप्रवर्त्तिभेदे प्रवराध्यायः। पालीवत काण्डरोग्ये वृक्षभेदे वृ॰सं॰ ५४अ॰। "द्राक्षापालीवतार्कौ बीजपूरातिसञ्जकाः। एते द्रुमाः काण्डरोग्या गोमयेन प्रलेपिताः। मूलच्छेदेऽथ वा स्कन्धे रोपणीयाः प्रयत्नतः"। पालोहय पु॰ गोत्रप्रवर्त्तिभेदे प्रवराध्यायः। पाल्लक त्रि॰ पल्लाद् भवः घूमा॰ वुञ्। पल्लीभवे जानदौ पाल्वलतीर त्रि॰ पल्वलतीरे भवः अञ्। पल्वलतीरभवे पावक पु॰ पुनाति पू-ण्वुल्। १वह्नौ अमरः "अपावनानि सर्वाणि वह्निसंसर्गतः क्वचित्। पावनानि भवन्त्येव तस्मात् स पावकः स्मृतः" इति काशीख॰ ६अ॰ उक्तेस्तस्य तथात्वम्। २वैद्युताग्नौ च "पावकः पवमानश्च शुचिरग्निश्च ते त्रयः। निर्मन्थ्यः पवमानः स्यात् वैद्युतः पावकः स्मृतः। यद्यासौ तपते सूर्यः शुचिरग्निश्च स स्मृतः" कूर्मपु॰। ३सदाचारे ४वह्निमन्थे ५चित्रकवृक्षे ६भल्लातके ७विड्वृक्षे च मेदि॰। ८शोधके त्रि॰ हेमच॰। ९रक्तचित्रके १०कुसुम्भे च पु॰ राजनि॰ ११वस्वे १२सूर्ये च शब्द॰। १।५०।६भा॰तयोर्यं शोधकत्वात् तथात्वम्। १३ऋषिभेदे भा॰व॰१२५अ॰। पावः पवनं शुद्धिस्तं कायति कै-क। १४सरस्वत्यां स्त्री ऋ॰ १।३।२०भा॰। पावकाश्च सप्तविंशतिः "पावकाः सप्तविंशतिः" भा॰व॰ ७अ॰व्याख्यायां नीलकण्ठधृतवाक्येभ्यः तानि च "ब्रह्मणोऽङ्गात् प्रसूतोऽग्निरङ्गिरा इति विश्रुतः। दक्षिणाग्निर्गार्हपत्याहवनीयाविति२।२।४ त्रयी। निर्मन्थ्यो५ वैद्युतः६ सूरः७ संवर्त्तौ८ लौकिकश्चेति। जाठरो१०विषमः११ क्रव्यात्१२ क्षेमवान्१३ वैश्वव१४स्तथा। दहनान्१५ वडवा१६वैव शान्तः१७ पृथो१८विभावसुः१९। ज्योतिष्मान्२० भरतो२१ भट्टः२२ २३श्लिष्टश्च२४मान्२४ क्रतुः२५। सोमश्च२६ पितृमां२७श्चैव पावकाः सप्तविंशतिः"। अन्ये पावकभेदा अग्निशब्दे ५२१पृ॰ दृश्याः। तिं॰त॰श्राद्धपरिशिष्टे कर्मभेदे तस्य नामभेदा उक्ता यथा "लौकिके पावको१ वह्निः प्रथमः परिकल्पितः। अग्निस्तु मारुतो२ नाम गर्भाधाने विधीयते। पुंसवने चन्द्रनामा३ शुङ्गाकर्मणि शोभनः४। सीमन्ते मङ्गलो५ नाम प्रगल्भो६ जातकर्मणि। नाम्नि स्यात् पार्थिवो७ वह्निः प्राशने च शुचिष्टसंज्ञा। सत्यनामाऽथ चूडायां व्रतादेशे समुद्भवः१०। गोदाने सूर्यनामा११ च केशान्ते वह्नि१२रुच्यते। वैश्वानरो१३ विसर्गे तु विवाहे योजक१४स्तथा"। गोदाने गोदानाख्ये संस्कारे। "चतुर्थ्यान्तु शिखी१५ नाम धृति१६रग्निस्तथाऽपरे"। अपरे धृतिहोमादौ। "प्रायश्चित्ते विधु१७श्चैव पाकयज्ञे तु साहसः१८। प्रायश्चित्ते तदाख्यकर्महाव्याहृतिहोमादौ। पाकयज्ञे पाकाङ्गकहुतोत्सर्गसंहहोमादौ। "शतहोमे च वह्नि१९ स्यात् कोटिहोमे शुताश-

नः२०। पुष्पोड्डायां ऋद्धो२१ नाम शान्तिके वरदः२२ सदा। पौष्टिके वरद२२श्चैव क्रोधो२३ऽग्निसाभिचारके। कोष्ठे तु जठरो२५ नाम क्रव्यादो२६ मृतभक्षके। आहव चैव होतव्यो यस्य यो विहितोऽनलः"।

पावकात्मज पु० इत०। १कार्त्तिकेये पावकसुतादयोऽप्यत्र दक्षाकृशाश्वदुर्योधनकन्यवोढरि सुदर्शनाख्ये २मुनिभेदे च

पावकारणि पुंस्त्री० इत०। अग्निमन्थनकाष्ठे शब्दमाला। अरणिशब्दे दृश्यम्।

पावकि पु० पावकस्यापत्यम् इञ्। १कार्त्तिकेये सुदर्शनाख्ये मुनिभेदे च भा० आदि० २अ० तत्सुता दृश्या।

पावकेश्वर पु० १तीर्थभेदे शिवपु०। काशीस्थे पावकस्थापिते २शिवलिङ्गभेदे न०।

पावन त्रि०पावयति पू–णिच–ल्युट्। १पवित्रीकारके २प्रायश्चित्ते ३जले च न० मेदि० ४गोमये न० शब्दच०। ५कदाचे ६कुशौषधे न० राजनि० ७चित्रकवृक्षे ८व्यध्यासे न०विश्वः। पावके ८क्लीवे ९वेदव्यासे पु० मेदि०। १०सिन्धुके विश्वः। ११पीतभङ्गराजे पु०राजनि०। १२सिद्धे १३पावयितरि त्रि० हेमच० १४विष्णौ पु० विष्णुसं० पवनशब्दे दृश्यम् तस्य स्मृतिमात्रेण पवित्रताकरणात् तथात्वम् "पवनः पावनोऽनलः" इति द्विधापाठस्तु पावयतीति "भीषाऽस्माद्वातः पवते" इति श्रुतेः पवनव्यापारनियोक्तृत्वात् पावनत्वम् इति भेदाद्भेदाभेदयम्। करणे ल्युट् ङीप्। १५कुरीतक्यां १६स्त्रीगव्यां १७तुलस्यां च स्त्री राजनि० १८गङ्गायां च स्त्री।

पावनध्वनि पु० पावनो ध्वनिरस्य। १शङ्खे राजनि० २पावनशब्दयुक्ते त्रि०।

पावमान त्रि० पवमानमधिकृत्य प्रकृतम् अण्। १पवमानकाद्याधिकारेण प्रकृते सूक्ते २ऋचि स्त्री ङीप्।

पावित्रायण पुंस्त्री० पवित्रस्यगोत्रापत्यम् अश्वा० फञ्। पवित्रगोत्रापत्ये।

पावीरवी स्त्री १ओषधिभेदां स्त्रियां ऋ०६।४८।७भा०"आयुधवान् पवीरवान् इन्द्रो देवताऽस्य अण् ङीप्। २दिव्यायां २वाचि निरु०१२।२० "इन्द्रः पावीरवान् तद्देवताका पावीरवी पावीरवी च दिव्या वाक्" इत्युक्तम्।

पाश पु० पश्यतेऽनेन पश–करणे घञ्। १व्याधिदुःखादिबन्धने रज्जुभेदे (फाँद) २रज्जुमात्रे च। केशादुत्तरं पाशशब्दः संघार्थः। यथा केशपाशः। कर्णात् परः शोभार्थः यथा कर्णपाशः शोभनकर्ण इत्यर्थः। ज्ञानादिभ्यः पाशण्। ज्ञानपाश ऋषिप्रणीतात् इत्यादयश्च शस्त्रभेदे शब्दरत्ना०। तल्लक्षणं हेमा०परि० औशनसोक्तं यथा "पाशं चौमं कार्पासं क्षौमं तथा रोमाणि चर्म च सर्वकालिकस्य पाशस्य द्रव्याणि भवन्ति तानि द्रव्याणि स्नायुभिर्वाणि यैर्यस्य पाशस्य योग्यानि स्युः। नालिकेरवल्कलादिबन्धनादि ग्राहयेदस्य नारिकेलाक्षनलक तालहन्तवल्कलानि हैमनस्य पाशस्य भवन्ति। त्रिदृताद्दढतन्तुसंयुक्तः पाशः प्रयोजिकः। पाशो भवेदामूलात् सकूपाशः षड्हस्तः स्याद्व्यायतप्रमाणः सुखावहः सुखस्पर्शश्च पाशस्थाने सुखटोऽनुपूर्वबन्धान्वितो भवति। रज्ज्वुपाशस्तु नवकानुवर्त्तितः स्यात्। एकहस्तस्त्रिहस्तः पादहीनः सप्त कर्षाभ्यां च पाशो दशपञ्चिकः पादान्ते पञ्चकार्षिकः श्रेष्ठो भवति षड्दशपलो वा तथा रथाश्वयोरपि विधेयो। विंशतिपञ्चिकः कर्त्तव्यः प्रमाणे सप्तकार्षिकस्त्रिंशत्पञ्चिको वा सुन्दिनां मतङ्गजस्य नवपलिको हस्तिनि मृगे च पाशो भवति भावविज्ञो नागारव्रिसुधः पाशः" इति।

पाशक पु० पश–ण्वुल्। द्यूतक्रीडासाधने गुडिकादौ (पाशा) अमरः। [दृश्यम्।

पाशद्युम्न पु० ययतः पुत्रे एतन्नामके ऋषे ऋ० ७।३३।२भा०

पाशधर पु०पाशं धारयति धारि–अच् मुम्। १वरुणे कुरिवं०४८०अ०तद्देवताके २शततारके ३पाशधारिमात्रे त्रि०

पाशन न० पाशि–भावे ल्युट्। बन्धने भा०द्रो० ५८अ०।

पाशपाणि पु०पाशः पाशो यस्य। १वरुणे कुमा०२शतभे च पाशहस्तादयोऽप्यत्र पाश+अस्त्रार्थे इनि। पाशीत्यप्यत्र

पाशभृत् पु०पाशं बिभर्त्ति भृ–क्विप्। १वरुणे २तद्देवताके शतभिषानक्षत्रे न०। ३पाशधारिमात्रे त्रि०। "कुसारूढः पाशभृद्दण्डः" ह०सं० ५०अ०।

पाशमुद्रा स्त्री तन्त्रसारोक्ते मुद्राभेदे "वामतर्जनीं तर्जन्या दक्षतर्जनीम्। संयोज्याङ्गुष्ठकाभ्यां तर्जन्यग्रे खके क्षिपेत्। एषा पाशाङ्कुशा मुद्रा विद्वद्भिः परिकीर्त्तिता"।

पाशव त्रि०पशोरिदम् अण्। १पशुसम्बन्धिनि तन्त्रोक्ते २पशाचारे च पशूनां समूहः अण्। ३पशुसमूहे न०[शब्दच०

पाशवबालन न०पाशवं पशुसंघं पालयति पाल–ल्युट्। वासे

पाशवासन न० "पाशवासनमाप्यक्षे कृत्वा पशुपतिर्भवेत्। पृष्ठे हस्तद्वयं बद्ध्वा कर्परायै समक्षकम्" रुद्रया० उक्ते आसनभेदे।

पाशबीज न० (क्रों) रत्नाकारके बीजे देवप्र० रघु०।

पाशहस्त पु०पाशः हस्ते यस्य। १वरुणे २शतभे च २हस्तस्थितपाशके त्रि०।

पाशादि (पाशादिभ्योयः) पा० यञ्जयप्रत्ययनिमित्ते शब्दगणे स च गणः "पाश दण्ड धूम वात अङ्गार पाटल पोत गण पिटक पिटाक शकट हस्त नट वन"। तदन्तः स्त्रीलिङ्गः पाशया वाला रत्नादि। [ब०।

पाशान्त पु०पार्श्वस्थान्तः षष्ठी०। वस्त्रस्य पार्श्वान्ते ह०सं०७१

पाशिक त्रि० पाशः प्रहरणमस्य ठक्। पाशबन्धनरूपप्रहरणयुक्ते मृगयौ ह०सं० ७५अ०।

पाशिन् पु० पाशोऽस्यास्ति इनि। १वरुणे २शतभे ३पाशवति त्रि०। स्त्रियां ङीप्। ४व्याधे पु० मेदि० ५क्षत्रराष्ट्रपुत्रभेदे भा०आ० ११७अ०। [क्षत्रदेशादौ।

पाशिल त्रि० पाशस्यादूरदेशादि०काशा०रस्य। पाशस्य सन्नि-

पाशिवाट पु०देशभेदे भा०भी०९अ०। सोऽभिजनोऽस्य अण्। तस्य बह्वृषु लुक्। पित्रादिभ्यमेव तद्देशवासिषु ब०व०।

पाशुक पु० पशोर्यागसाधकपशुस्तस्य व्याख्यानो ग्रन्थः ग्रन्थकत्वात् ठक्। १पशुयागसाधकपशुव्याख्याने। पशोरिदम् ठक्। २पशुसम्बन्धिनि त्रि० काल्या० श्रौ०२१।२०"नानापाशुकमञ्जमांसरुधिरैः क्षत्रा नवम्यां बलिम्" ति०त०।

पाशुपत त्रि० पशुपतिर्देवताऽस्य तस्येदं तेन प्रोक्तम् वा अश्वपत्या०अण्। १पशुपतिदेवताके अस्त्रादौ २तद्देवते ऋषिरादौ ३पशुपतिसम्बन्धिनि ४तेनोपदिष्टे शास्त्रभेदे न० तन्त्रतं पशुपतिशब्दे दर्शितम्। ५वकवृक्षे पु०मेदि० तस्य तत्प्रियत्वात्तथात्वम्। [।।११९

पाशुपाल्य न० पशुपालस्य भावः ष्यञ्। वैश्यवृत्तौ याज्ञ०

पाशुबन्धक त्रि०पशुबन्धः प्रयोजनमस्य ठक्। यज्ञे १आलम्भनार्थपशुबन्धनस्थानादौ २तेषां स्त्री कापि अतश्चत्वम् आश्व०श्रौ० २।।६

पाश्चात्त्य त्रि० पश्चाद् भवः त्यक्। पश्चिमदेशभवे।

पाश्चात्त्याकरसम्भव न०पाश्चात्त्ये आकरे सम्भवति सम्+भू-अच् ७त०। (सामरी) लवणभेदे रत्नमाला।

पाषक न० पष-बन्धे ण्वुल्। पादाभरणभेदे

पाषण्ड त्रि० पाति रक्षति दुरितेभ्यः पा-क्विप् पाः वेदधर्मं षण्डयति निष्फलं करोति। "पालनाच्च त्रयीधर्मः पाशब्देन निगद्यते। षण्डयन्ति च तं यस्मात् पाषण्डस्तेन कीर्तितः" इत्युक्ते वेदाचारत्यागिनि अमरः ण्वुल्। पाषण्डक तत्रार्थे त्रि०।

पाषण्डिन् पु० पां वेदधर्मं षण्डयति षण्ड+णिच्-इनि। पाषण्ड शब्दच० तस्य लक्षणं यथा

"येऽन्यदेवं परत्वेन वदन्त्यज्ञानमोहिताः। नारायणाद् जगद्वन्द्यात् ते वै पाषण्डिनस्तथा। कपालमस्थिधरा ये च वैदिकक्रियावर्जिताः। जटे वल्कलमांसं जटावल्कलधारिणः। सर्ववैदिकक्रियोपेतास्ते वै पाषण्डिनस्तथा। शङ्खचक्रोर्द्धपुण्ड्रादिचिह्नैः प्रियतमैर्हरेः। रहिता ये द्विजा देवि! ते वै पाषण्डिनो मताः। अतिक्रूरमुग्रमाचारं यस्तु नाचरति द्विजः। स पाषण्डीति विज्ञेयः सर्वलोकेषु गर्हितः। समस्तयज्ञभोक्तारं विष्णुं ब्रह्मस्वदैवतम्। उदस्य देवताभ्येभ्यो जुहोति च ददाति च। स पाषण्डीति विज्ञेयः स्वतन्त्रो वापि कर्मसु। स्वातन्त्र्यात् क्रियते यैस्तु कर्म वेदोदितं सदा। विना वै भगवत्पूजां ते वै पाषण्डिनः स्मृताः। यस्तु नारायणं देवं ब्रह्मरुद्रादिदैवतैः। समत्वेनैव जानाति स पाषण्डी भवेत् सदा। अनास्था क्रियते यैस्तु मनोवाक्कायकर्मभिः। वासुदेवं न जानाति स पाषण्डी भवेत् द्विजः। हरेर्नामकमन्त्राभ्यां हीना सङ्विवर्जिताः। यदि वर्णाश्रमाद्या ये ते वै पाषण्डिनः स्मृताः। वर्णानां गुरवो नित्यं शिवे! यद्यप्यवैष्णवाः। भगवद्भक्तिरहिता वैष्णवादिविनिन्दकाः। रजस्तमोमया जीवहिंसका जीवभक्षकाः। असत्प्रतिग्रहरता देवता यागयाजकाः। अनाचारास्तथा त्रात्या नानाविधधनूजकाः। देवतोच्छिष्टभोजादिभोजिनः शूद्रवत्क्रियाः। विविधाखलकर्मरता अभक्ष्याद्यविचारिणः। लोभमोहमदक्रोधकामाहङ्कारिणः सदा। एवंविधाः पारदारिकाद्या वेदत्र शुभानने! अन्येषां का कथा तत्र पाषण्डा त्रात्रुच्याः स्मृताः। वर्णाश्रमाद्या ये सन्तः स्वस्वधर्मविवर्जिताः। ते वै पाषण्डिनो देवि! नारायणबहिर्मुखाः। सर्वाग्निनो द्विजा वेऽपि सर्वक्रियाविवर्जिताः। ये वेदाचाररहितास्ते वै पाषण्डिनो मताः। ये त्वब्रह्मपानादिरता लोका निरन्तरम्। शिवे! पाषण्डिनो ह्येते नात्र कार्या विचारणा। विष्णुवैष्णवभूमिदेवादिषु विशेषतः। अश्वत्थतुलसीतीर्थशेलादिषु मही गुरौ। लक्ष्मीसरस्वतीगङ्गायमुनासु वरानने!। स्मृताः पाषण्डिनस्तेऽपि ये न सेवापरायणाः। रुद्रार्केन्द्रगजब्रह्मस्फटिकाक्षादिधारिणः। जटिला भस्मनिष्ठाङ्गास्ते वै पाषण्डिनः प्रिये!। अग्निहोत्री सहस्रहोमी-

पावकः पाचकस्तथा। एते पाषण्डिनो विप्रा मादक द्रव्यभोजिनः। देवि! काषायांदयो भक्ष्या अनन्यशरणास्तु ये। पाषण्डसङ्गं न कुर्युस्तद्भक्षे पानभोजने। तत् स्पर्शजलपानञ्च चक्रुस्तत्सङ्गमादिकम्। ततपानभोजनालापसङ्गात्तिङ्गनतोऽचिरात्। पाषण्डिनो वैष्णवाः स्युरन्येषामपि का कथा। किञ्च बहुनोक्तेन ब्राह्मणा ये ह्यवैष्णवाः। अवदाचरणाच्चैव स्युस्ते पाषण्डिनः स्मृताः। एतद्भोजनपानादिकर्मभिर्वैष्णवा जनाः। पाषण्डिनस्तथा स्यूर्वै जटाभस्मादिधारिणः" पाद्मोत्तरखण्डे पाषण्डाचरणं नाम ४२अ०। एतच्च वैष्णवप्रशंसार्थमेव लिङ्गधारणस्यापि शास्त्रसिद्धत्वात्। तत्संसर्गादिनिषेधो यथा "तस्मात् पाषण्डिभिः पापैरालापं स्पर्शनं त्यजेत्। विशेषतः क्रियाकाले यज्ञादौ श्राद्धि दीक्षितः। क्रियाहानिर्भवेत्तेषु स्पर्शं यद्येत मतिमान् नरः। किं पुनर्वेदेषु सन्त्यक्ता त्रयी सर्वात्मना द्विज!। पाषण्डभोजिभिः पापैर्वेदवादविरोधिभिः। पाषण्डिनो विकर्मस्थान् वैडालव्रतिकान् शठान्। हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत्। दूरापास्तस्तु संसर्गः सद्भाष्या वापि पण्डितैः। पाषण्डिभिर्दुराचारैस्तस्मात्तान् परिवर्जयेत्। एते नग्नाश्च वाख्याता दृष्ट्वा श्राद्धोपघातकाः। येषां सम्भाषणात् पुंसां दिनपुण्यं प्रणश्यति। एते पाषण्डिनामानो ज्ञेयास्तान् वाक्यमेद्बुधः। पुण्यं नश्यति सम्भाषादेतेषां तद्विनोद्भवम्। पुंसां जटाधरत्वमौद्धत्यवतां हृदैव मोघाग्निनामखिलशौचनिराकृतानाम्। तोयप्रदानपिण्डवह्निकृतानां सम्भाषणादपि नरा नरकं प्रयान्ति" विष्णुपु० २क्रंशे १८अ०।

पाषाण पु० पिनष्टि पिष्ट-संचूर्णने आनच् पृषो०। १प्रस्तरे अमरः अल्पार्थे ङीप्। २पाषाणी (वाटखारा) रत्नमानपाषाणे स्त्री शब्दच०।

पाषाणगर्दभ पु० रत्नतोक्ते क्षुद्ररोगभेदे "हनुसन्धौ यदुद्भूतं शोफमल्परुजं स्थिरम्। पाषाणगर्दभं विद्याद् बलासपवनात्मकम्"।

पाषाणचतुर्दशी स्त्री ऽधिकस्यरविके माघे शुक्लचतुर्दश्याम् तस्यां पाषाणाकारपिष्टकभोजनात्तस्याश्चतुर्दशीत्वं यथोक्तं भविष्ये "ऽधिके शुक्लपक्षे तु या पाषाणचतुर्दशी। तस्यामाराधयेद्धीरो भक्त्या पाषाणभोजनैः"। पाषाणभोजनैः पाषाणाकारपिष्टकभोजनैः" तिथितत्त्वं रघु०।

पाषाणदारक पु०पाषाणं दारयति दारि-ण्वुल्। टङ्कारे (पाथरकाटाछेनी) अमरः। ल्यु। पाषाणदारणोऽप्यत्र।

पाषाणभेदन पु० पाषाणं भिनत्ति ल्यु। (फाडलोडा) १टङ्कभेदे राजनि० ल्युट्। पाषाणभेदकोऽप्यत्र "पाषाणभेदकोऽश्मघ्नो गिरिभिल्लिश्चयोजनी। अश्मभेदो हिमश्लिक्षः कषायो वस्तिशोधनः। भेदनो वृष्य दोषार्शो गुल्मशूलाश्मकृद्गुजः। योनिरोगान् प्रमेहांश्च हन्ति शीघ्रं शूलव्रणानि च" भावप्र०। २प्रस्तरभेदकमात्रे त्रि०।

पाषाणभेदिन् पु० पाषाणं भिनत्ति भिद-णिनि (पाथुरचुर) १टङ्कभेदे रत्नमा० २शिलाभेदके त्रि०स्त्रियां ङीप्।

पाषी स्त्री पाश्यते बध्यतेऽनया पश-बन्धे करणे घञ्। १शक्त्यां २शिलादायुधे अ० १।५६।६भा०। पाषाणवद्दृढ़ायाञ्च अ० ६ १०२।२ भा०। [ऋ० ४।२१।६ भा०।

पाशिक त्रि० पाशहस्ते वसति ठञ्। गृहवासिनि

पाशित पु० अपाशन्ति अप+आ+शद-क्त अपेरलोपः पाशः स इव अतति अत-अच् शक०। ब्रह्मदारुवृक्षे शब्दच०।

पि गतौ हु०अक०पर०अनिट्। पियति। अपैषीत्। पिपाय। पिपतुः। [अमरः स्त्रियां ङीप्।

पिक पुंस्त्री० कपि कायति कै-क अपेरलोपः। कोकिले

पिकप्रिया स्त्री ६त०। मदालम्बुशाम् राजनि०।

पिकबन्धु पु० ६त०। आम्रवृक्षे त्रिका०।

पिकराग पु० पिकोरज्यतेऽत्र रञ्ज-आधारे घञ् कुत्वम्। आम्रवृक्षे राजनि०।

पिकवल्लभ पु० ६त०। आम्रवृक्षे भावप्रकाशः।

पिकाक्ष पु०पिकस्याक्षीवाक्षस्य समानवर्णत्वात् अच्। १रोचन्याम् शब्दच० पिकस्याक्षीवाक्षि अस्य बच् समा०। २पिकतुल्यरक्तनेत्रयुक्ते त्रि० स्त्रियां पिकत्वात् ङीप्।

पिकाङ्ग पुंस्त्री० पिकस्याङ्गमिवाङ्गमस्य। पक्षिभेदे शब्दच०।

पिकानन्द पु० पिकमानन्दयति आ+नन्दि-अण् उप०स०। वसन्तकाले राजनि०।

पिकेक्षणा स्त्री पिकस्येक्षणं तद्वर्णोऽस्त्यस्याः अच्। १कोकिलाक्षे करवीरभेदे राजनि०। पिकस्येक्षणमिवेक्षणमस्य। २रक्तनेत्रे त्रि० स्त्रियां स्वाङ्गत्वेऽपि बहुव्रीहित्वात् न ङीष् किन्तु टाप्।

पिङ्ग पु० पिक इव कायति कै-क पृषो०। १कपिशवर्णे अ० मा०। २शुक्लापरिमाणभेदे स्त्री ह०सं०८।अ०।

पिङ्ग पु० पिजि-वर्णे-अच् नुडागः कुत्वम्। १मूषिके मेदि० स्त्रियां ङीप्। २दीपशिखाभे वर्णे पु० "पिङ्गो दीपशिखाभः स्यात् पिङ्गलः पङ्गुपिङ्गवत्"। ३तद्वति त्रि०

अमरः गौरा० पाठात् स्त्रियां ङीष्। कङ्गारा० पाठात् अस्य पूर्वनिपातः। ४ऋषिभेदे पु०तेन प्रोक्तः कल्पः णिनि प्रैङ्गिन् तत्प्रोक्ते कल्पे। पिङ्ग+अस्त्यर्थे सिध्मा०वा अच्। पिङ्गल तदर्थयुते त्रि० पक्षे मतुप् मस्य वः। पिङ्गवत् तत्रार्थे त्रि० स्त्रियां ङीष्।

पिङ्गकपिशा स्त्री पिङ्गा च कपिशा च "वर्णौवर्णेन" पा० स०। १तैलपायिकायां स्त्री हेमच० २पिङ्गवर्णयुते अथच कपिशवर्णयुते त्रि०। [नेत्रे त्रि०।

पिङ्गचक्षुस् पु० पिङ्गं चक्षुरस्य। कुमीरे हेमच०। २पिङ्ग-

पिङ्गजट पु० पिङ्गा जटाऽस्य। शिवे हेमच०।

पिङ्गतीर्थ न० तीर्थभेदे भा०व० ८२अ०।

पिङ्गल पु० पिङ्ग+सिध्मा०लच् पिङ्गं लाति-क वा। १मीत-पीतमिश्रितवर्णे २तद्वति त्रि०अमरः। अस्मिन् परे घोषा० पूर्वपूर्वपदमाद्युदात्तम्। प्राकृतभाषयाच्छन्दोपन्यकारके ३नागभेदे ४रुद्रे ५सर्वपारिषार्श्विकभेदे ६निधिभेदे ७वानरे नकुले दक्षावरविषभेदे च हेमच०। ८चुङ्गीलूके राजनि०"देशमङ्गोऽथ दुर्भिक्षं समासात् कथयाम्यहम्। पिङ्गले चारुपद्माक्षि! दुर्भिक्षं नर्मदातटे" इति ज्यो०त० उक्ते प्रभवादिषष्टिसंख्ये १०वर्षभेदे च। ११नागराजभेदे भा०आ०३५अ०। १२यक्षभेदे भा०व० २१०अ०। १३रीतौ पित्तले १४शिंशपायां च स्त्री राजनि०। १५यामनदिग्-गजस्य स्त्रियां कुसुदस्य १६करिण्यां मेदि०। १७कर्षि-कायां तन्त्रोक्ते १८नाडीभेदे हेमच०। रङ्गशब्दे उदाहृतम्

पिङ्गलक पु० पिङ्गल+स्वार्थे क। पिङ्गलशब्दार्थे २यक्षभेदे पु० भा०स०१०अ०। ततः उपका० इत्वे अदन्ते च गोत्रप्रत्ययस्य बहुत्वे वुक्।

पिङ्गला स्त्री १वेश्याभेदे संज्ञायां कन्। कापि अतइत्वम्। पिङ्गलिका बलाकायां लिका०

पिङ्गललोह न० नित्यकर्म०। पित्तले राजनि०।

पिङ्गसार पु० पिङ्गं सारमस्य। हरितालेराजनि०।

पिङ्गस्फटिक पु० नित्यकर्म०। गोमेदमणौ राजनि०।

पिङ्गा स्त्री पिङ्ग-अस्त्यर्थे अच्। १गोरोचनायां २स्त्रिङ्गी ३नालिकायां ४अस्थिकायां मेदि० ५हरिद्रायां शब्दच० ६वंशरोचनायां राजनि०।

पिङ्गाक्ष पुंस्त्री० पिङ्गं वर्णमश्नुते अक्ष-व्याप्तौ अच्। (पा-ङ्गाक्ष) १मत्स्यभेदे स्त्रियां ङीष्। २पक्षीपतौ ३उत्तम-वर्णे न० मेदि० ४नीलिकायां स्त्री मेदि०।

पिङ्गाक्ष पुंस्त्री० पिङ्गमाक्षमस्य। (पाङ्गाक्ष) मत्स्यभेदे शब्दच०। स्त्रियां योगधत्वात् टाप्। २पिङ्गलाक्षयुक्ते त्रि०

पिङ्गाक्ष पु० पिङ्गे अक्षिणी यस्य बहुव्रीहौ। १शिवे काशी० ख० १२अ० उक्ते २व्याधभेदे। ३पिङ्गवर्णनेत्रयुक्ते त्रि० स्त्रियां ङीष्। ४कुमारानुचरमातृभेदे स्त्री भा०श० ४७०

पिङ्गी स्त्री पिङ्ग+अस्त्यर्थे अच् गौरा० ङीष्। शमीवृक्षे मेदि०। [नेत्रयुक्ते त्रि०।

पिङ्गेक्षण पु० पिङ्गमीक्षणमस्य। १शिवे हेमच०। २पिङ्ग-

पिचण्ड पु० अपि+चम-ड तस्य नेत्त्वम् अमेरङ्लोपः। १उदरे २प्रशोरवयवे च हेमच०। पृषो०दत्त्वम्। पिचिण्डोऽप्यत्र ततः तुन्दादि० दलच्। पिचण्डिल उदरे तुन्दिले त्रि० पक्षे ठन्। पिचण्डिक तत्रार्थे त्रि०। "भोगाढ्या समजठरा निःस्वाः सुचेटसन्निभाः। सर्पोदरा दरिद्राः स्युः गरुडे तस्मादशुभलक्षकत्वात्तत्त्यक्तम्।

पिचण्डक त्रि० पिचण्डे कुशलः आकर्षा० कन्। औदरिके उदरपूर्तौ कुशले उदरम्भरौ।

पिचय्य पु० पिचवे तूलाय साधुः यत्। कार्पासवृक्षे हेमच०।

पिचु पु० पच-ड पृषो०। १कार्पासतूले (तूला) अमरः २कृत-भेदे ३वर्णे ४अक्षरभेदे मेदि० ५भैरवे ६यक्षभेदे विश्वः।

पिचुक पु० पिचुरिव कायति कै-क। १मदनवृक्षे (मयना) रत्नमाला। ततः अस्त्यर्थे वत्करा० इ। पिचुकीय तद्युते देशादौ त्रि०।

पिचुतूल न० ६त०। तूले (तूला) त्रिका०।

पिचुमन्द(र्द) पु० पिचुं कृत्तं मन्दयति मर्द्नाति वा अच् उप०स०। निम्बवृक्षे(दीलः) अमरः (न्दालः) हेमच०।

पिचुल पु०पिचुं लाति ला-क। १झाबुकवृक्षे (झाउ)२वृक्षले २जलवायसे च मेदि० ४तूले अमरटीका।

पिच्च क्षेपे चु०उभ०सक० सेट्। पिच्चयति ते अपिपिच्चत् त।

पिच्चट न० पिच्च-अटन्। १सीसके २रङ्गे ३नेत्ररोगभेदे पु०

पिच्चा स्त्री तक्रापरिमाणभेदे ह०सं० ८१अ०।

पिच्चिट पु० कीटभेदे कीटशब्दे २०५८पृ० सुश्रुतवाक्यम्।

पिच्चित न० सुश्रुतोक्ते कायखण्डभेदे "पिच्चितं पृथुतां गत-मनल्पशोफम्" इति तल्लक्षणम्।

पिच्छ बाधे तु०पर०सक०सेट्। पिच्छति अपिच्छीत् पिपिच्छ

पिच्छ न० पिच्छ-अच्। १मयूरपुच्छे २चूडायां ३लाङ्गूले पु० मेदि० ४बालभारीवेष्टे स्त्री अमरः। ५पुरे ६कटायां ७कोशे ८मोचायां ९पङ्कौ १०भक्षमण्डे ११क्षयपदाभये च स्त्री मेदि० १२कोशिकायां १३क्षचि-नाडायां स्त्रारा०। १४शिंशपावृक्षे च स्त्री शब्दच०।

पिङ्गवास पु० पिङ्गं वास इव यस्य । श्येनपक्षिणि राजनि०

पिङ्गल पु० वासुकिवंश्ये सर्पभेदे भा०आ० ५७अ० ।

पिङ्गलदला स्त्री पिङ्ग-कलच् तादृशं दलमस्याः । षट्-रोहके लिका० ।

पिङ्गादि अस्त्यर्थे इलच्प्रत्ययनिमित्ते शब्दगणे यथा "पिङ्गा ऊरस् धूवक भ्रुवक (जटाघटाकाशाः क्षेपे) वर्ष उदक पङ्क प्रज्ञा" । [गिंजपाटके शब्दच० ।

पिङ्गितिका स्त्री पिङ्ग-भावे क्तिन् तया कायति कै-क ।

पिङ्गिल त्रि० पिङ्ग-वा० इल । (पिंवल) १पदार्थे २भक्ष-ण्मण्डे तद्युक्ते च ३क्लिन्नखुरपादौ । पिङ्गा+अस्त्यर्थे पिङ्गा० इलच् । ४चूडायुक्ते त्रि० ५श्येनातकवृक्षे पु० राजनि० संज्ञायां कन् । पिङ्गिलक धन्वनवृक्षे पु० राजनि० ।

पिङ्गिलच्छदा स्त्री पिङ्गिलः च्छदोऽस्याः । उपोदक्यां राजनि० । [लिका० ।

पिङ्गिलत्वच् पु०पिङ्गिला त्वक् त्वच् यस्य । नागरङ्गवृक्षे

पिङ्गिलसार पु०पिङ्गिलः सारोऽस्य । मोचरसे राजनि०

पिङ्गिला स्त्री पिङ्ग-इल पिङ्गा+अस्त्यर्थे इलच् वा । १ओतिकायां २सिंग्रपायां ३शाल्मल्यौ ४सिन्धुभेदे मेदि० ५कोकिलाक्षे हृद्यत्रिकाक्षुपे ७अतस्यां दमनीवृक्षे च राजनि० ८कटुकायां शब्दच० ।

पिज दीप्तौ वासे बले (सामर्थ्ये) च अक० हिंसायां दाने च सक०चु०उभ०सेट् इदित् । पिञ्जयति ते अपिपिञ्जत् त ।

पिजवन पु० अर्द्धयोजनये विश्वामित्रयाज्ये लवभेदे निरु० २।२४ ऋग्भाष्ये । [तद्वोत्पन्ने पुंस्त्री० ।

पिञ्जल पु० ऋषिभेदे ततः अपा० गोत्रे फञ् । पैञ्जलायन

पिञ्ज न० पिञ्ज-पृषो० । पिञ्जशब्दार्थे क्षेमच० ।

पिञ्ज न० पिजि-अच् । १बले २व्याकुले त्रि० मेदि० ३वर्णे अमरः ४कर्पूरभेदे पु० ५तृणे ६हरिद्रायां स्त्री मेदि० ७हिंसायां स्त्री लिका० । भावे अच् । ८कटावां स्त्री रत्नमाला ।

पिञ्जट पु० पिजि-अटन् । नेत्ररोगे (पिंचुटी) शब्दरत्ना० ।

पिञ्जन न० पिजि-करणे ल्युट् । तूलस्फोटने १यन्त्रभेदे । भावे ल्युट् । २तूलादेः स्फोटने ।

पिञ्जर न० पिजि-अरच् । १हरितालं अमरः २वर्णे मेदि० ३रागभेदरे राजनि० ४विष्कम्भादिवन्धनस्थाने ५देहास्थि-इन्द्रे च रामाश्रमः । ६अश्वभेदे पु० ७पीतरक्तवर्णे ८पीतवर्णे च पु० क्षेमच० । ९तद्युक्ते त्रि० १०वर्णभेदे पु० भा० आ० २१अ० । स्वार्थे क । पिञ्जरक तत्रार्थे न०।

पिञ्जल न०पिजि-अलच् । १हरितालं २कृमिपर्णे च धरणिः २अल्पलोकसैन्यादौ पु० अमरः ४कृमान्तरवेष्टिते सायकपर्वपक्षद्वये स्त्री ङीप् । "एतदेव पिञ्जल्या लक्षणं यद्दाकृतम् कर्मप्रदीपे तत्र यत्किञ्चिद्विशेषात्तत्सर्वम् ।

पिञ्जाल न० पिजि-बा० आलच् । स्वर्णे राजनि० ।

पिञ्जिका स्त्री पिजि-ण्वुल् अतइत्वम् । तूलनालिकायां (पाँइज) लिका० ।

पिञ्जूल पु० पिजि-ऊलच् । १कृमिपर्णिकायाम् उज्ज्वलद० संज्ञायां कन् । पिञ्जूलक २ऋषिभेदे ततः । उपका० गोत्रप्रत्ययस्य बहुत्वे इञे अहञे च वा लुक् ।

पिञ्जूष पु० पिजि-बा० ऊषन् । कर्षणे क्षेमच० ।

पिञ्जेट पु० पिञ्जे अटति अट् अच अलुक्स० । नेत्ररोगे शब्दरत्ना० ।

पिञ्जोला स्त्री पिजि-बा० ओल । वस्त्रशब्दे द्वारा० [पिपेट ।

पिट संहतौ ध्वनौ च भा०पर०अक०सेट् । पेटति अपेटीत्

पिट न०पिट-क । १चाले लिका०(पेटारा) २पेटके पु०धरणिः

पिटक पु० पिट-बा० कन् । (पेटरा) वेत्रादिविनिर्मिते वस्तुडाकारे उदाहृते अमरः । तेन हरति वहत्यर्थे ठञ् । पैटकिक पेटकेन हारिणि त्रि० । २स्फोटके पु० मेदि० । देहजातस्फोटशुभाशुभादिकं द्व०सं० ५२अ० उक्तं यथा

"सितरक्तपीतलक्ष्मा विप्रादीनां क्रमेण पिटका मे ।
ते क्रमशः शोणफला वर्णानामग्न्यादीनाम् । स्निग्ध-श्लक्ष्णशोभाः शिरसि धनत्वं मूर्ध्नि सौभाग्यमाराद्-दौर्भाग्यं भ्रूभुगोत्थाः प्रियजनघटनासासु दुःशीलतां च । तन्मध्योत्थाश्च शोकं नयनपुटगता नेत्रयोरिष्टदृष्टिं
प्रान्तस्थां शङ्कदेशेऽनुजलनिपतनस्थानगास्वातिचिन्ताम् ।
घोणागण्डे वदनसुतदाचोष्ठयोरन्तराभं कुर्युस्तद्विद्रुकतनुगा भूरि वित्तं ललाटे । इत्थोरेवं गलकृतपदा भूरुहान्यत्रजाने शोके तद्भूषणगणमपि ज्ञानसाम्यस्वरूपम् । शिरःसन्धिग्रीवाहृदयकुचपार्श्वोरसि गता क्षयोत्थातं घातं सुतनयनजाभं शुचमपि । प्रियप्राप्तिं स्वप्ने ऽभटन-मथ भिन्नार्थमसदुदितानां कथोत्था विदधति धनानां नष्टत्वम् । दुःखप्रतुनिचयस्य विप्रातं पृष्ठबाहुजुगजा रक्षन्ति । संयमं च मन्थिबन्धनजाता भूरुहाद्यास्तपबा-हुयुगोत्थाः । धनाप्तिं सौभाग्यं शुचमपि करास्फोटरगाः सुपानान्नं नाभौ तदध इह चौरैर्धनहृतिम् । धनं धान्यं वस्त्रौ युवतिमथ मेढ्रे सुतनयान् धनं सौभाग्यं

वा गुदद्वणजाता विदधति। अर्वाग्यानाङ्गनाभ्यां नाभ्योः यत्नजनात् क्षतिम्। यस्मे च जङ्घयोर्गुल्फे ऽध्वन्यत्यर्थे यदायिनः। स्फिक्पार्ष्णिपादजाता धनना-शागम्यगमनमध्वानम्। बन्धनमङ्गुलिनिचये ऽङ्गुष्ठे च प्रातिलोकतः पूजाम्। उत्पातगण्डपिटका दक्षिणतो वामतस्त्वभीघाताः। धन्या भवन्ति पुंसां तद्विपरीतास्तु नारीणाम्। इति पिटकविभागः प्रोक्त आमूर्द्धतोऽयं व्रणतिलकविभागोऽप्येवमेव प्रकल्प्यः। भवति मशक-लक्षावर्तजन्माणि तद्विगर्दितफलकारि प्राणिनां देह-संस्थम्"।

पिटक्या स्त्री पिटकानां समूहः पाशा० य। पिटकसमूहे

पिटङ्कोकी स्त्री पिटं कोकते कु–वा० क ङीष्। इन्द्रवा-रुणायां रत्नमाला।

पिटाक पु० पिट–वा० काक। १क्षुद्रभेदे ततः शिवा० स्वार्थे पैटाक तदर्थे पुंस्त्री०। २पेटके च तेन हरति वहत्यर्थ० ठञ्। पैटाकिक तेन हारिणि त्रि०। संघार्थे पाशा० ब। पिटाक्या तत्समूहे स्त्री।

पिट्टक न० पिट–स्वुल् पृषो०। दन्तकिट्टके शब्दर०।

पिट्ट कुटनभेदे (पेटा) कुट्टनेनाधःप्रवेशने चु० उभ० सक० सेट्। पिट्टयति ते अपिपिट्टत् त। क्वात्या० त्रौ० ङ्। २।१।१कर्कः।

पिट्टिक त्रि० पिट्ट–इन् स्वार्थे क। कुट्टनेन अधःप्रवे-शिते भेदि०। [प्रवेठ।

पिठ क्षेपे अक० बधे सक० भ्वा०पर० सेट्। पेठति अपेठीत्

पिठर पु० पिठ–करन्। १स्थालभेदे त्रिका० २तस्यार्यां ३भ न्यानदग्धे च न०भेदि०। ४स्थाल्यां पुंस्त्री०स्त्रीत्वे ङीष्। अमरः। ५दानवभेदे पु० भा०स० दश०। संज्ञायां कन्। पिठरक ६नागभेदे पु० भा०आ०३१अ०। पीलुपाकशब्दे दृश्यम्। [पैठीनसि तदपत्ये उपस्कृतिकारके ऋषिभेदे।

पिठीनस पु० ऋषिभेदे ऋ० ६।२६।६भा० तस्यापत्यम् इञ

पिड राशीकरणे भ्वा० आत्म० सक० सेट् इदित्। पिण्डते अपिण्डिष्ट। अयं चुरादिरपि तत्रार्थे उभ०। पिण्डयति ते अपिपिण्डत् त।

पिडका स्त्री पीड्यति पीड–स्वुल् षिपकादि० नि०। कुष्ठाधिकारे पीड़ादाबके क्षुद्रस्फोटके भावप्रका०। क्षुद्र-तादौ रोगभेदे नानाविधैव पिडका उक्ता तत्र भगन्दरे "अपक्वाः पिडकाः पक्वास्तु भगन्दराः" इत्युपक्रमे पि-त्तादिपिड़का उक्ता यथा "पित्तन्तु प्रकुपितमनिलेना-धःप्रेरितं पूर्ववदवस्थितं रक्तां तन्वीमुच्छ्रिताग्रामुष्णवा-कारां पिडकां जनयति। सास्य चोषादीन् वेदनादि-शेषान् जनयत्यप्रतिक्रियमाणा च पाकमुपैति व्रण-वाग्निद्वाराभ्यामिव दहते दुर्गन्धस्रुतिसावं स्रवति" "श्लेष्मजास्तत्रयादिकं तु परिस्राविनृशब्दे दर्शितम् वायुजास्तत्रयादि तत्रोक्तं यथा

"वायुः प्रकुपितः प्रकुपितौ पित्तश्लेष्माणौ परिघट्टाधो गत्वा पूर्ववदवस्थितः पादाङ्गुष्ठमणायां सर्वसिङ्गां पिडकां जनयति सास्य तोददाहस्फुरणादीन् वेदनाविशेषान् जन-यत्यप्रतिक्रियमाणा च पाकमुपैति व्रणत्व नानाविधवर्ण-स्रावं स्रवति पूर्णनदीशम्बूकावर्त्तवच्चास्य सन्ति-ष्ठन्ति वेदनाविशेषाः"। भेषजास्तु भावप्र० उक्ता यथा "शराविका कच्छपिका जालिनी विनताऽलजी। मस्तु-रिका सर्षपिका प्रतिष्ठी सविदारिका। विद्रधिचेति पिडकाः प्रभेदापेक्षया दश। सन्धिमर्मसु जायन्ते मां-सलेषु च धामसु। अल्पोन्नता च तद्रूपा निम्नमध्या शराविकाः। महाद्या कूर्मसंस्थाना ज्ञेया कच्छपिकाः बुधैः। जालिनीश तीव्रदाहा तु मांसजालसमावृता। अविगाढरुजाक्लेदा पृष्ठे बाह्वुदरेऽपि वा। मस्तुरी पिडका नीला सा बुधैर्विनताऽ स्मृता। रक्ताऽसिता स्फोटचिता विज्ञेया सलजोद् बुधैः। मसूरदलसंस्थाना विज्ञेया तु मस्तुरिकाः। गौरसर्षपसंस्थाना तत्प्रमाणा च सर्षपी७। मस्तुल्यचिता ज्ञेया पिडकापि च पु-त्रिणीः। विदारीकन्दसदृक्षा कठिना च विदारिकाः। विद्रधेर्लक्षणैर्युक्ता ज्ञेया विद्रधिका तु सा। ये यन्त्रवाः स्मृता मेदास्तेषामेतासु तन्त्रयाः। विना प्रभेदमर्थेता जायन्ते दुष्टमेदसः। तावच्चैता न लक्ष्यन्ते यावद्यासु परिघट्टः। गुदे वृद्धि शिरस्यंसे पृष्ठे मर्मसु चोत्थि-ताः१०। सोपद्रवा दुर्बलान्नैः पिडकाः परिवर्जयेत्। स्टट्ज्वासमांससङ्कोचमेहच्छिक्कामदज्वराः। विसर्पध-र्मसंरोधाः पिड़कानामुपद्रवाः"।

कुष्ठाधिकारे भावप्र० पिडकानां क्षुद्रत्वे स्फोटत्वमु क्षुद्रत्वे पिडकत्वमुक्ता तद्भेदा उक्ता यथा "यवाकारा सुकठिना ग्रथिता मांससंश्रिता। पिडका श्लेष्मवाताभ्यां व्यपदिश्यति सोच्यते। घनाभवक्त्रां पि-डकामुन्नतां परिमण्डलाम्२। अन्नानलोमलपूयां तां विद्यात् कफवातजाम्। विस्तारां महतीदाहां पक्वो-डुम्बरसन्निभाम्। परिमण्डलां पित्तकृतां विद्रधिः नाम तां विदुः। ग्रथिताः पञ्च वा सप्त दाहरुजाः कफ-

योपमाः । कफानिलाभ्यां पिड़का ज्ञेयाः कच्छपिका४ बुधैः । श्रोवांसकक्षाकरपाददेशे सन्धौ गले वा त्रिभिरेव दोषैः । सन्धिः स वल्मीकवदक्रियायां जातः क्रमेणैव गतप्रवृद्धिः । सुखैरनेकैः सुतितोदसञ्ज्ञिर्विसर्पवत् सर्पति चोष्मतापैः । वल्मीकमाहुर्भिषजोविकारं निरुग्रत्यनीकं चिरजं विशेषात् । पद्मर्कर्णिकवन्मध्ये पिड़काभिः सदाचितम् । इन्द्रवृद्धान्तु तां विद्यादातपित्तोत्थितां भिषक् । मण्डलं वृत्तसूक्ष्मं सरक्तं पिडकाचितम् । रजाकरीं गर्दभिकां७ तां विद्याद् वातपित्तजाम् । वातश्लेष्मसमुद्भूतः श्वयथुर्हेतुसन्निजः । स्थिरो मन्दरुजः स्निग्धो ज्ञेयः पाषाणगर्दभः ८। सर्वसाभ्यन्तरे जातां पिडकासूपवेदनाम् । स्थिरां घनसिकाहन्तान्तु विद्यादन्तःप्रपाकिनीम् । विसर्पवत् सर्पति यः श्रोथस्तुरपाकवान् । दाहज्वरकरः पित्तात् स ज्ञेयो जालगर्दभः१० । पिडकासूत्तमाङ्गस्थां वृत्तामलुपरुग्ज्वराम् । सर्वौत्तिकां सर्वसिङ्गां जानीयादिरिवेल्लिकाम्११ । बाहुपार्श्वांसकक्षेषु कण्ठस्फोटां सवेदनाम् । पित्तप्रकोपप्रभवां कक्षा१२मित्यभिनिर्दिशेत् । एकामेतादृशीं दद्रा पिडकां स्फोटसन्निभाम् । तद्वतां पित्तकोपेन सन्धनामां१३ प्रचक्षते । कक्षभागेषु ये स्फोटा जायन्ते मांसदारुणाः । अन्तर्दाहज्वरकरा दीप्तवाक्यसन्निभाः । सप्ताहाद्दशदाहाद्वा पक्षाद्वा म्रान्ति मानवम् । तामग्निरोहिणीं१४ विद्यादसाध्या सन्निपाततः । नखमांसमधिष्ठाय वातपित्तञ्च देहिनाम् । कुरुते दारुणं पाकौ च व्याधिं विद्या१५दादिशेत् । तदेवाल्पतरैर्दोषैः कुरुते परुषं१६ वदेत् । गम्भीरामल्पसंरम्भां सवर्णां सुपरिस्थिताम् । पादस्थामलसीं१७ तान्तु विद्यादन्तःप्रपाकिनीम् । विदारीकन्दवद्वृत्तां कक्षावङ्क्षणसन्धिषु । विदारी१८मिति तां विद्यात् सर्वजां सर्वलक्षणाम्" ।

पिण्ड त्रि॰पिडि-अच् । १संहते २घने च ततः गौरा॰ स्त्रियां ङीष् । तस्या अल्पत्वं कुत्वा॰ ख्यञ् । पैण्ड्य संहतायाः स्त्रिया अल्पत्वे पुंस्त्री॰ । ३ओले ४बले ५देहैकदेशे ६देहमात्रे ७अवष्टब्धादिभये पितृभ्यो देये गोलाकारे देयपदार्थे १०गोले ११शिलुके १२जलपुष्पे च पु॰ मेदि॰ १३इन्द्रे (अवृदिपिण्डम्)१४कबले पु॰ हेमच॰ १५यज्ञकुम्भे १६अमरः १७भदन्तवृक्षे पु॰ राजनि॰ । १८व्याधिजीवने १९अवयवि न॰मेदि॰। तत्र श्राद्धमेवदृव्याद्यादिनिर्मिते पदार्थे सामगानां पुंस्त्वेन प्रयोगः "पिण्डानोदाहरिष्यामः" छन्दोगपरिशिष्टे पुंस्त्वेन प्रयोगात् । यजुर्वेदिभिः "अमावेतत्ते पिण्डं सुषेति" यजुःश्राद्धप्रयोगात् क्लीवत्वम् । "तेभ्यःपिण्डं मया दत्तमक्षय्यमुपतिष्ठताम्" वायुपु॰प्रयोगः यजुर्वेदिविषयः । तत्र देयद्रव्यादि आ॰त॰निरूपितं यथा "यावदन्नमुपादाय कृविशोऽर्धकमर्धकम् । चरुणा सह सङ्गीय पिण्डदानमुपक्रमेत्" । आद्धार्थंकविशोऽन्नादेः सकाशाद् यावत् भक्ष्यभोजनव्यञ्जनादि तत्तोऽल्पाल्पं गृहीत्वा अन्नोकरणचरुणेव सह मिश्रीकृत्य पिण्डदानप्रकारमेदित्यर्थः । एकस्मिन् पात्रेऽन्नं मध्यादिद्रव्येण मिश्रयेत् । "मध्याज्यतिलसंयुक्तं सर्वव्यञ्जनसंयुतम् । कृत्वादाय पिण्डन्तु कृत्वा बिल्वफलोपमम् । दद्यात् पितामहादिभ्यो दर्भमूले यथाक्रमम्" इति ब्रह्मपुराण वचनात् । अत्र पितामहपदं पितृपरं वचनान्तरैकवाक्यत्वात् । "सपिण्डे प्रथमं पिण्डं दद्यादुच्छिष्टसन्निधौ । पितामहाय चैवाथ तत्पिण्डे च ततःपरम् । दर्भमूले क्षेपभाजस्तर्पयेच्चोपवर्षयेः" ।

अत्र पिण्डमात्रस्य बिल्वफलोपमत्वश्रुतेः छन्दोगपरिशिष्टे च पित्रादीन् मातामहादीनुपक्रम्य "अवनेजनवत् पिण्डानुद्धृत्य बिल्वप्रमाणकानिति" श्रुतेश्च सामग यजुर्वेदिनोर्बिल्वप्रमाणकत्वम् "पृथङ्मातामहानाञ्च केचिदिच्छन्ति सत्तमाः । तीन् पिण्डानतुपूर्व्येण सङ्कुच्य सदृशत्वतः" इति वायुपुराणीयं श्राद्धान्तरीयं आ॰त॰। वायवीये "मधुसर्पिस्तिलयुतांस्त्रीन् पिण्डान्निर्वपेद्बुधः । तिस्रश्चो सेतौ "तिलमद्यं च पानीयं घृतं क्षीरं पयस्तथा । मधु सर्पिः खण्डयुक्तं पिण्डमष्टाङ्गमुच्यते"। याज्ञवल्क्यः "सर्वमन्नमुपादाय सतिलं दक्षिणामुखः । उच्छिष्ट सन्निधौ पिण्डान् दद्याद्वै पितृयज्ञवत्" । केचित्तु पिण्डेषु माषान् वर्जयन्ति "माषाः श्राद्धेषु वै प्रोक्ता वल्लांश्चैवाग्निपिण्डयोः । ब्राह्मणेषु यथा मद्यं तथा माषोऽग्नि पिण्डयोः"इति । स्मृतिसारात् "माषान् सर्वत्र वै दद्यात् पिण्डेऽग्नौ च विवर्जयेत्" इति स्मृतेश्च । अथ पिण्डप्रमाणभेदः हेमाद्रावङ्गिराः "कपित्थबिल्वमात्रान् वा पिण्डान् दद्याद् विधानतः । कुक्कुटाण्डप्रमाणान् वा मलकैर्बदरैः शुभान्" इति । तत्रैव धूम्रः "कपित्थस्य प्रमाणेन पिण्डान् दद्यात् समाहितः । तत्समं विकिरं दद्यात् पिण्डान्ते तु षडङ्गुलैः" । अन्त्येष्टिपद्धतौ भट्टास्तु "एकोद्दिष्टे सपिण्डे तु कपित्थन्तु विधीयते । नारिकेलप्रमाणन्तु प्रत्यब्दे मासिके तथा । तीर्थे दर्शे

च संप्राप्ते कङ्कटाण्डप्रमाणतः। महालये गयाश्राद्धे कर्य्यादामलकोपमम्" इत्याह्निकतत्त्वे कालिकायामाचार्य्यः "यत्र स्युर्बहवः पिण्डास्तत्र बिल्वफलोपमाः। यत्र चैको भवेत् पिण्डस्तत्र स्याद्बदरोपमः"। प्रेतपिण्डस्तु दैर्घ्येण द्वादशाङ्गुल उच्यते" इति। वायवीये "पत्नी पिण्डांस्तु सद्दीयात् त्रिवर्गस्य सहायिनी"। हेमाद्रौ कौर्मे। "महालये गयायां च प्रेतश्राद्धे तथाब्दिके। पिण्डशब्दप्रयोगः स्यादन्यत्र कीर्त्तयेत्" निःसि० पिण्डदानद्रव्यभेदाः आग्नेये उक्ता यथा "पायसेनाज्य युक्तेन सक्तुना चरुणा तथा। पिण्डदानं तण्डुलैश्च गोधूमैस्तिलमिश्रितैः" इति। देवीपुराणे च "सक्तुभिः पिण्डदानञ्च संयावैः पायसेन च। कर्त्तव्यमन्नपिण्डैः प्रोक्तं पिण्याकेन गुडेन वा" अथ प्रेतपिण्डसंख्या यद्यपि हेमाद्रौ पारस्करेण

"ब्राह्मणे दश पिण्डास्तु क्षत्रिये द्वादश स्मृताः। वैश्ये चतुर्दश प्रोक्ताः शूद्रे त्रिंशत् प्रकीर्त्तिता" इत्युक्तं तथापि "प्रेतेभ्यः सर्ववर्णेभ्यः पिण्डान् दद्याद्दशैव तु" इति। तेनैवोक्तेः सर्वेषां दशैव स्युरिति। मदनरत्नेऽप्येवम् तथा च हेमाद्रौ ब्राह्मपाद्मयोः "जात्युक्ताशौचतुल्यांस्तु वर्णानां क्वचिदेव हि। देशधर्मान् पुरस्कृत्य प्रेतपिण्डान् वपन्त्यपि" इत्युक्त्वा विप्रादीषु दशमपिण्डोत्कर्षः उक्तः "देवस्तु दशमः पिण्डो राज्ञां वै द्वादशेऽहनि। वैश्यानां वै पञ्चदशे देयस्तु दशमस्तथा। शूद्रस्य दशमः पिण्डो मासे पूर्णेऽह्नि दीयते"। प्रेतपिण्डदानस्थानम् "असंस्कृतानां भूमौ पिण्डं दद्यात् संस्कृतानां कुशेषु" इति प्राचेतसोक्तम् मिताक्षरायां "कृत्वन्तरे भूमौ माल्यं पिण्डं पानीयसपत्ने वा दद्युः" पिण्डं प्रेतपिण्डम्।

पुनःपुंसः "फलमूलैश्च पयसा शाकेन च गुडेन च। तिलमिश्रान्तु दर्भेषु पिण्डं दक्षिणतो हरेत्। तूष्णीं प्रसेकं पुष्पं च धूपं दीपं तथैव च। शालिनाप्यक्षतैर्वापि शाकैर्वाप्यथ निर्वपेत्। प्रथमे नियतं द्रव्यं तदेव स्याद्द्वयादिकम्"। पिण्डशब्दस्य देहतदेकदेशपरता तु असपिण्डशब्दे उक्ता। दायभागमते तु निर्वाप्यपिण्डपरतेति। भावे घञ्। २संघाते पिण्डारकशब्दे द्रव्यम्

पिण्डक पुं० पिण्ड इव कायति कै-क। १पिण्डाकारे स्वार्थे क। २चिञ्चकगन्धद्रव्ये ३वोले ४पिण्डमूले मूलभेदे राजनि०।

पिण्डकन्द पुं० पिण्डाकारः कन्दः। पिण्डाले राजनि०।

पिण्डखर्जूर पुं० पिण्डाख्यः खर्जूरः। स्वनामख्याते वृक्षे (छोहारा) प्रसिद्धे २खर्जूरे स्त्री ङीष्। अथ पिण्डखर्जूरीभेदः "सुनेपाली तु मदुला बल्लिजीनफला च सा। सुनेपाली भ्रमभ्रान्तिदाहमूर्च्छाक्षपित्ततृट् भावप्र०। "पिण्डखर्जूरिका स्वल्पा सा देशे पश्चिमे भवेत्। खर्जूरी गोस्तनाकारा परादूद्वीपादिहागता। जायते पश्चिमे देशे सा छोहारेति कीर्त्यते। खर्जूरीमितवं शीतं मधुरं रसपाकयोः। स्निग्धं रुचिकरं हृद्यं वृंहणं बलशुक्रकृत्। तर्पणं रक्तपित्तघ्नं पुष्टिविष्टम्भि गुरुदम्। कोष्ठमारुतकृद्वल्यं बाह्यघातक्षयापहम्। ज्वराभिघातक्षुत्तृष्णाकासश्वासनिवारकम्। मद्यमूर्च्छामरुत्पित्तमदोद्भूतगदान्नजित्। मद्यतीभ्यां गुणैरल्पखर्जूरिका स्मृता। खर्जूरी तदतोवल्ली मदपित्तकरी भवेत्। वातश्लेष्मकरं रुच्यं दीपनं बलशुक्रकृत्"।

पिण्डगोस पुं० मां जलं सनोति सन-ड पिण्डः संहतो गोसः। मत्स्यरसे रसनाथः।

पिण्डतर्कुक पुं० पिण्डं तर्कयति तर्क-बा० उक। पिण्डखेपणभागिषु हव्यप्रपितामहादिषु त्रिषु "प्रपितामहाः दक्षिणतः पृष्ठतः पिण्डतर्कुकाः" श्राद्धतत्त्व०।

पिण्डतैलक पुं० पिण्डं संहतं तैलं यस्य कप्। तरक्षे गन्धद्रव्ये राजनि०।

पिण्डद पुं० पिण्डं ददाति दा-क। श्राद्धे पिण्डदातरि पुत्रादौ "पिण्डदोऽंशहरश्चैव पूर्वाभावे परः परः" याज्ञ० दृच् पिण्डदातृ तत्रार्थे "उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः" मनुः।

पिण्डपद् न० पिण्डस्य संहतस्य पदम्। १खड्गभेदे ज्यो०ति० शब्दे दृश्यम्। २पिण्डस्थाने च।

पिण्डपाद पुंस्त्री० पिण्ड इव पादोऽस्य। गजे त्रिका०। स्त्रियां जातित्वात् ङीष्।

पिण्डपितृयज्ञ पुं० पिण्डैः पितॄणां यज्ञः। सांग्निकस्मार्त्तस्य कर्त्तव्ये पित्र्ये हविष्यके पिण्डदानात्मके यज्ञभेदे श्राद्ध० औ० २६ श्लोकादौ कात्या० औ० ३।१।१ श्लोकादौ च दृश्यम्। तत्कालश्च "अपराह्णे पिण्डपितृयज्ञवदर्शनेऽमावास्यायाम्" तत्त्वं प्रथमश्लोके।

पिण्डपुष्प न० पिण्डं संहतं पुष्पम्। १अशोकपुष्पे २जवापुष्पे ३पद्मपुष्पे ४तगरपुष्पे च मेदि० शब्दच०।

पिण्डपुष्पक पुं० पिण्डेन संहतेन पुष्पेण कायति कै-क। वालुकशाके शब्दमाला।

पिण्डफला स्त्री पिण्डमिव फलं यस्याः । कटुतुम्ब्याम् जटा०
पिण्डमुस्ता स्त्री पिण्डा संहता मुस्ता । नागरमुस्तायाम् राजनि० ।
पिण्डमूल न० पिण्डमिव मूलमस्य । गर्जरे (गाँजर) राजनि०
पिण्डयज्ञ पु० पिण्डेन यज्ञः । पिण्डदानरूपे यज्ञरूपे श्राद्धे याज्ञ० १।१६ पिण्डपितृयज्ञे च ।
पिण्डल पिंडि–बा०कलच् । सेतौ हारा० ।
पिण्डलेप पु० पिण्डस्य लेपः करसंस्पर्शमांसभेदः । करसंस्पर्शे पिण्डांशभेदे तद्भागिनश्च दक्षप्रजापतिजामदग्न्यादयः तथाच याज्ञ "लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः" मनुवाक्यम् "लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः । पिण्डदः सप्तमस्तेषां चापिण्डं सप्तपौरुषम्" कुल्लू० धृत मातृश्वचनम् ।
पिण्डस पु० पिण्डं सनति यज्ञे सन–सम्भक्तौ सम्प्रदाने वा० ड । प्रेतपिण्डोपजीविनि भिक्षोपजीविनि शब्दर०
पिण्डसम्बन्ध पु०पिण्डेन देहेन देवपिण्डेन वा सम्बन्धः । देहेन सह अन्वयनकतारूपे १सम्बन्धे मिता० देवपिण्डस्य २दातृत्वभोक्तृत्वान्यतरसम्बन्धे च दायभागादयः ।
पिण्डसेक्तृ पु० सर्पभेदे भा०उ० ५७अ० ।
पिण्डा स्त्री पिण्ड–अच् । १पिण्डाकारे २कस्तूरीभेदे च राजनि० । ३वंशपत्र्यां भावप्र० ।
पिण्डात पु० पिण्ड इवातति अत–मातत्वे अच् । पिण्डं संहननं वा अतति+अत–गतौ अच् । शिम्बुके पु० ।
पिण्डान्वाहार्य्यक न० पिण्डानां पिण्डपितृयज्ञानां पश्चादाह्रियते अनु+आ+हृ–ण्यत् स्वार्थे क । पार्वणश्राद्धे "पिण्डान्वाहार्य्यकं श्राद्धं कुर्यान्नासातुमासिकम्" मनुः ।
पिण्डाभ पु० पिण्डः संघाते इवाभाति आ+भा क । शिम्बुके रत्नमालायां पाठान्तरम् ।
पिण्डाभ्र न० अभ्रस्येदम् अण् आभ्रं पिण्डमिव घनमाभ्रम् । मेघजातकरकायाम् शब्दच० । [राजनि०।
पिण्डायस न० पिण्डं संहतमयः अच् समा० । तीक्ष्णायसे
पिण्डार पु० पिण्डं संघातमृच्छति ऋ–अण् । १विकङ्कतवृक्षे राजनि० २चषके ३गोपे ४मक्षिकीरक्षके ५द्रुमभेदे मेदि० ६शाकभेदे न० "पिण्डारं शीतलं बल्यं पित्तनाशि रुचिप्रदम् । पाके लघु विशेषेण विषघ्नानि करं मतम्" भावप्र० । ७सर्पभेदे पु० भा०उ० १०२अ० स्वार्थे क पिण्डारक तत्रार्थे टनागभेदे भा०आ०२६अ० । देवकरामात्मजभेदे पु० हरिवं० २६अ० १०तीर्थभेदे न०

"पिण्डारके नरः स्नात्वा लभेद्वज्रं त्रिवर्षकम्" भा० व० ८२अ० ।
पिण्डालु पु० पिण्डाकार आलुः । (गोलआलु) राजनि० १कन्दभेदे २कन्दगुडूच्यां स्वार्थे क अत्रैव । "पिण्डालुर्मधुरः शीतः मूत्रकृच्छ्रविनाशनः । दाहशोषप्रमेहघ्नो हृद्यः सन्तर्पणो गुरुः" राजनि० संज्ञायां कन् । (चुकंदि आलु) आलुभेदे न० "पिण्डालुकं कफहरं गुरु वात प्रकोपकृत्" राजवल्लभः ।
पिण्डाह्वा स्त्री पिण्डां कस्तूरीभेदमाह्वयते खर्दते गन्धेन आ+ह्वे–क । नाडीहिङ्गुनि राजनि० ।
पिण्डि(ण्डी) स्त्री पिंडि–इन् यद्वा ङीष् स्वार्थे क वा । सर्वकाष्ठसङ्घातमात्रे रथचक्रमध्ये स्थाने १रथनाभौ अमरः । २पीठे जानुनोऽधःस्थे ३मांसलप्रदेशे च हेमच० ४श्वेतार्कौ राजनि० ५देवादेः पीठिकाभेदे तल्लक्षणादि मत्स्यपु० २५२अ० उक्तं यथा
"पिण्डिकालक्षणं वक्ष्ये यथावदनुपूर्वशः । पीठोच्छ्रायं यथावच्च भागान् षोडश कारयेत् । भूमावेकः प्रविष्टः स्याच्चतुर्भिर्जगती मता । दत्तोभागश्चयैकः स्यात् दत्त षट्स्य भागतः । भागैस्त्रिभिस्तथा कण्ठः कण्ठषट्स्त्रिभागतः । भागाभ्यामूर्द्धषट्स्य षेधभागेन पट्टिका । प्रविष्टं भागमेकैकं जगती यावदेव तु । निर्गमस्तु पुनस्तस्य यावद्वै षेधपट्टिका । वारिनिर्गमनार्थन्तु तत्र कार्या प्रणालिका । पीठिकानान्तु सर्वासामेतत्सामान्यलक्षणम् । विशेषान् देवताभेदान् शृणुध्वं द्विजसत्तमाः ।। स्वस्तिका वाथ वापी वा वृत्ती देवी च भद्रका । पुष्पचन्द्रा च वज्री च पद्मा वार्धयशी तथा । त्रिकोणा दशमी तासां संस्थानं वा निबोधत । स्वस्तिकाः चतुरस्रा तु वलिता मेखलादिभिः । वापी२ द्विमेखला श्रेया वृत्ती२ चैव त्रिमेखला । चतुरस्रायता वेदी४ न तां त्रिषु योजयेत् । भद्रका५ वर्तुला या तु मेखलाभिर्गणप्रिया । रक्ता द्विमेखा मध्ये पूर्णचन्द्राद् तु सा भवेत् । मेखलात्रयसंयुक्ता भद्रका वज्रिका७ भवेत् । षोडशाश्रा भवेत्पद्मा८ किञ्जल्का तु मूलतः । तथैव धनुराकारा सार्द्धचन्द्रा९ प्रशस्यते । त्रिभूलसदृशी१०तद्वत् प्रशस्तलक्षणान्विता । परिवेषं त्रिभागेषु निर्गमं तत्र कारयेत् । विस्तारं तत्प्रमाणस्य मूले स्यात् ततोऽर्द्धतः । जलमार्गस्य कर्त्तव्यस्त्रिभागेण सुशोभनः । त्रिभागार्द्धत्रिभागेण स्थौल्येन समधिष्ठिता । मेखला तत्त्रिभागेण स्यातस्यैव प्रमाणतः । अथ या

दादृशीनन्तु शोभनं कारयेत्सदा । उत्तरस्यं प्रयाजस्तु प्रमाणादधिकारयेत् । स्थण्डिलायामयारोग्यं धनं धान्यञ्च पुष्कलम् । गोप्रदा च भवेद्वेदी वेदी सम्मत्प्रदा भवेत् । मण्डलायां भवेत्कीर्त्तिवरदा पूर्णचन्द्रिका । आयुःप्रदा भवेद्वृत्ता पद्मा सौभाग्यदा भवेत् । पुत्रप्रदार्द्धचन्द्रा स्यात्त्रिकोणा शत्रुनाशिनी । देवस्य यजनार्थन्तु पीठिका दश कीर्त्तिताः । शैले शैलमयीं दद्यात् पार्थिवे पार्थिवीं तथा । दारुजे दारुजां कुर्य्यात् मिश्रे मिश्रां तथैव च । नान्यथैवानिस्तु कर्त्तव्या सदा शुभफलेप्सुभिः । अङ्गैर्यागसमन्दैर्घ्यं विष्कम्भायामसम्मता । यस्य देवस्य या पत्नी तां पीठे परिकल्पयेत् । एतत्सर्वं समाख्यातं समासात् पीठलक्षणम्" ।

पिण्डित त्रि॰ पिण्ड–क्त । १संहते २गणिते मेदि॰ ३शुचिते ४तुरङ्गे पु॰ राजनि॰। [२गणके त्रि॰ उणादि॰ ।

पिण्डिल पु॰पिण्ड+अस्त्यर्थे–इलच् । मेघे शब्दच॰ ।

पिण्डी स्त्री पिण्ड–इन् ङीप् । १पिण्डीतगरे २अलाबुलतायां ३खर्जूरभेदे (छोहारा) मेदि॰ ४तत्त्वज्ञानार्थोपदेशे धरणिः ।

पिण्डोजङ्घ पु॰ ऋषिभेदे । तस्य गोत्रापत्यम् इञ् । पैण्डोजङ्घि तदपत्ये बहुत्वे तु अञ्यां वृद्धा॰ तस्य लुक् ।

पिण्डीतक पु॰ पिण्डीं स्वल्पपिण्डं फलमुद्धारा तनति अनुकरोति तन–डाके अच् । १मदनवृक्षे २तगरे च अमरः ३क्षणिजङ्घके त्रिका॰ ।

पिण्डीतगर पु॰ पिण्डा स्वल्पपिण्डेनोपलक्षितस्तगरः । तगरवृक्षे त्रिका॰ । [अशोकवृक्षे राजनि॰।

पिण्डीपुष्प पु॰पिण्डा उपलक्षितं पुष्पमस्य । संहतस्तबकपुष्पे

पिण्डीर पु॰ पिण्डं पिण्डाकारं फलमीरयति ईर–अण् । १दाड़िमवृक्षे त्रिका॰२नीरमे क्षारा॰।३क्षिप्तक्षीरे रायमु॰

पिण्डोशूर पु॰ पिण्डां भोजने एव नान्यत्र शूरः । मेघेऽर्हणि युद्धादावसमर्थे हेमच॰। भट्टिः ५।८७ उदा॰

पिण्या स्त्री पण्यते क्रूयते रोगहन्तृत्वेन इति पण–ण्यत् इत्वम् ज्योतिष्मतीलतायाम् अमरः ।

पिण्याक पु॰न॰ पिण्य–व्यवहारे आकन् नि॰ । १तिलैकदेशे २खिञ्जनि ३खाङ्गीके च । ४खिञ्जके पुंस्त्री॰ मेदि॰। स्त्रीत्वे ङीप् तस्य व्रतार्थमभक्षणे न दोषः मनुः ११।९२ अन्यत्र दोषो यथा "पिण्याकं भक्षयित्वा तु यो वै मांसमपर्यति । तस्य वै क्रयणं सर्व्वं प्रायश्चित्तं त्रयोमनम् । अनूको दश मासांश्च कच्छ्रपस्तु समाचरेत् । जायते मानवस्तस्य मम कर्म्मपरायणः" वराहपु॰ ।

पितरिश्वन् पु॰ पात्रे समिता॰ अनुक्स॰ । पितृविषयेऽर्थे शुने नान्यत्रेति । छेपेऽस्य प्रयोगः ।

पितापुत्र पु॰द्वि॰व॰ द्वन्द्वे पूर्वपदे आनङ् । पितरि पुत्रे च

पितामह पु॰ पितुः पिता पिह+डामह । पितुः पितरि पितृपितादयोऽप्यत्र । तत्पत्न्यां स्त्री॰ ङीप् अमरः ।

पितु पु॰ पा–रक्षणे तुन् पुगो॰ । अन्ने निघण्टुः । पातेर्वा पिबतेः पायतेर्वा" निरु॰८।२४। ऋ॰ १०।७६।५ उदा॰।

पितुःपुत्र पु॰ ६त॰ अनुक्स॰। विख्यातात् (बापेर मत बेटा) पितरदृशपुत्रे पुत्रे छेपे तु वा अनुक्स॰।

पितुःस्व(स्व)सृ स्त्री ६त॰अनुक्स॰ वा अत्वम् । पितृभगिन्यां तस्या अपत्यं ढक् । पितुःस्व(स्व)सीय तदपत्ये पुंस्त्री॰।

पितृ पु॰ पाति रक्षति पा–तृच् नि॰ । १जनके । मात्रा सहोक्तौ पितृशब्दः द्वि॰व॰। मातापित्रोः अमरः । पक्षे पितृशब्दे ४।८८पृ॰दृश्यम् । पितरः आद्यदेवता इत्युक्तेः आद्योद्देश्ये २प्राग्पितृलोकके । पितृलोकः पितृयाणम्

पितृक त्रि॰ पैतृक+पृषो॰ । १पितुरागते शब्दमा॰। पितृदत्त एव ठञ् वा दत्तलोपः । २पितृदत्ते च ।

पितृकर्मन् न॰ पितृनुद्दिश्य कर्म । श्राद्धादौ मनुः ३।२५२ स्त्री॰। पितृकार्य्यादयोऽप्यत्र ।

पितृकल्प पु॰ पितृनुद्दिश्य कल्पो विधानम् । पितृयाग श्राद्धादिकर्मणि । हरिवं॰ १७अ॰ उक्ते पितृयागतत्त्वादिज्ञापके २ग्रन्थभेदे च हरिवं॰२३अ॰ । दैवदृने कल्पप् । ३पितृतुल्ये च

पितृकानन न॰ ७त॰ श्मशाने जटा॰ ।

पितृकुल्या स्त्री पितृजुता कुल्या । तीर्थभेदे भा॰व॰५७अ॰।

पितृगण पु॰ ६त॰ । अग्निष्वात्तादिषु "मनोर्हैरण्यगर्भस्य ये मरीच्यादयः सुताः । तेषामृषीणां सर्वेषां पुत्राः पितृगणाः स्मृताः । विराट्सुताः सोमसदः साध्यानां पितरः स्मृताः । अग्निष्वात्ताश्च देवानां मारीच्या लोक विश्रुताः । दैत्यदानवयक्षाणां गन्धर्वोरगरक्षसाम् । सुपर्णानां नराणाञ्च स्मृता बर्हिषदोऽत्रिजाः । सोमपा नाम विप्राणां क्षत्रियाणां हविर्भुजः । वैश्यानामाज्यपा नाम शूद्राणान्तु सुकालिनः । सोमपासु कवेः पुत्रा हविष्मन्तोऽङ्गिरःसुताः । पुलस्त्यस्याज्यपाः पुत्रा वशिष्ठस्य सुकालिनः । अग्निदग्धानग्निदग्धान् काव्यान् बर्हिषदस्तथा । अग्निष्वात्तांश्च सौम्यांश्च विप्राणामेव निर्दिशेत् । य एते तु गणा मुख्याः पितृणां परिकी-

स्थिताः । तेषामपीह विप्रेयं पुत्रपौत्रमनन्तकम् । एते च दिव्यपितरः ।

पितृगाथा स्त्री पितृभिः पठिता गाथा । पितृभिः पठिते श्लोकसन्दर्भे मार्क०पु० ३२अ० यथा

"पितृगाथास्तथैवात्र गीयन्ते ब्रह्मवादिभिः । या गीताः पितृभिः पूर्वमेलस्यानीनृमहीपतेः । कदा नः सन्ततावग्र्यः कश्चिद्वंशिता ततः । यो योगिभुक्तपेण्डो भुवि पिण्डं प्रदास्यति । गयायामथ वा पिण्डं खड्गमांसं महाहविः । कालशाकं तिलाढ्यं वा क्षरं वाक्षतपूर्वे । वैश्वदेवन्तु सौम्यञ्च खड्गमांसं परं हविः । विधानवर्जं स्वर्गत्वा आसूर्यंचाक्षयामहे । दद्यात् श्राद्धं त्रयोदश्यां मघासु च यथाविधि । मधुसर्पिः समायुक्तं पायसं दक्षिणायने" । अन्या अपि पितृगाथा शास्त्रान्तरे दृश्याः ।

पितृगृह न० ६त० । श्मशाने हेमच० ।

पितृग्रह पु० स्कन्दानुचरे ग्रहभेदे ग्रहशब्दे २७४५ पृ० शल्यपर्वणि १७७६ भारतवाक्ये च दृश्यम् ।

पितृतर्पण न० ६त० । १पितृणां जलदानरूपे तृप्तिजनकव्यापारभेदे । करणे ल्युट् । २पितृतीर्थे मन्त्रे च० ३तिले राजनि० ।

पितृतिथि पुंस्त्री० पितृप्रिया तिथिः । अमावास्यायाम् ।

पितृतीर्थ न०पितृप्रियं तीर्थम् शा०त० । "अन्तराङ्गुष्ठदेशिन्योः पितृणां तीर्थमुत्तमम्" जूमंपु० उक्ते १तर्जन्यङ्गुष्ठमध्यस्थाने अमरः । २गयादौ तीर्थे च यथोक्तं मत्स्यपु० २२अ० "पितृतीर्थं गया नाम सर्वतीर्थवरं शुभम् । यत्रास्ते देवदेवेशः स्वयमेव पितामहः । तत्रैषा पितृभिर्गीता गाथा भागवतैर्नृभिः । एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् । यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत् । तथा वाराहसो२ पुण्या पितृणां वल्लभा सदा । यत्रादिसूकरक्षेत्रसान्निध्यं मुक्तिमुक्तिफलप्रदम् । पितृणां वल्लभं तद्वत् पुण्यञ्च विमलेश्वरम्३ । पितृतीर्थं प्रयागेऽन्तु सर्वकामफलप्रदम् । वटेश्वर४स्तु भगवान् माधवेन समन्वितः । योगनिद्राक्षयवटस्तद्वत् सदा वसति केशवः । दशाश्वमेधिकं६पुण्यं गङ्गाद्वारं७ तथैव च । नन्दाह्रदञ्च कथितं८ तद्वत्तीर्थं कायापुरी१० शुभा । तथा मित्रपदं११ नाम ततः केदार१२मुत्तमम् । गङ्गासागर१३मित्याहुः सर्वतीर्थमयं शुभम् । तीर्थं ब्रह्मसर१४स्तद्वत्कनखलं हृदे । तीर्थन्तु नैमिषं१५ नाम सर्वतीर्थफलप्रदम् । गङ्गोद्भेदा१६स्तु गोमत्यां यत्रोद्भूतः सनातनः । तथा वाराह१७स्तु देवदेवश्च मूलक्षत् । यत्र तत्काञ्चनं द्वारमष्टादशभुजो हरः । नैमिषं तु हरिश्चक्रं शीर्षं यत्रामवत्पुरा । तदेतन्नैमिषारण्यं १८ सर्वतीर्थनिषेवितम् । देवदेवस्य तत्रापि वाराहस्य तु दर्शनम् । यः प्रयाति स पुताक्षो नारायणपदं व्रजेत् । ऋतञ्चैव महा पुण्यं सर्वपापविशोधनम् । तत्रास्ते नारसिंहस्तु स्वयमेव जनार्दनः । तीर्थमिक्षुमतीं१९ नाम पितृणां वल्लभं सदा । सङ्गमे यत्र तिष्ठन्ति गङ्गायाः पितरः सदा । कुरुक्षेत्रं२० महापुण्यं सर्वतीर्थसमन्वितम् । तथा च सरयूः २१ पुण्या सर्वदेवनमस्कृता । इरावती२२ नदी तद्वत् पितृतीर्थाधिवासिनी । यमुना२३ देविका२४ काम्बी२५ चन्द्रभागा२६ दृषद्वती२७ । नदी वेणुमती२८ पुण्या परा वेत्रवती२९ तथा । पितृणां वल्लभा ह्येताः श्राद्धे कोटीगुणा मताः । जम्बूमार्गं३० महापुण्यं यत्र मार्गो हि लक्ष्यते । अद्यापि पितृतीर्थं तल्लोकानामफलप्रदम् । नीलकण्ठमिति३१ ख्यातं पितृतीर्थं द्विजोत्तमाः ! । तथा रुद्रसरः३२ पुण्यं सरोमानस३३मेव च । मन्दाकिनी३४ तथाऽच्छोदा३५ विपाशा३६ च सरस्वती३७ । पूर्वमित्रपदं३८ तद्वदैद्यनाथं३९ महाफलम् । शिप्रा४० नदी महाकाल४१स्तथाकाङ्क्षरं४२ शुभम् । वंशोद्भेदं४३ क्षरोद्भेदं४४ गङ्गोद्भेदं४५ महाफलम् । भद्रेश्वरं४६ विष्णुपदं४७ नर्मदाद्वार४८मेव च । गयापिण्डप्रदानेन समान्याकुर्मदर्थयः । एतानि पितृतीर्थानि सर्वपापहराणि च । स्मरणादपि लोकानां किमु श्राद्धकृतां नृणाम् । ओङ्कारं४९ पितृतीर्थञ्च कावेरी५० कपिलोदकम्५१ । सप्तगोदं५२ चण्डवेगायास्तथैवामरकण्टकम्५३ । कुरुक्षेत्राक्षतगुणं तत्रिन् स्नानादिकं भवेत् । शुक्रतीर्थं५४ञ्च विख्यातं तीर्थं सोमेश्वरं५५ परम् । सर्वव्याधिहरं पुण्यं शतकोटिफलाधिकम् । श्राद्धे दाने तथा होमे स्वाध्याये जपसिद्धिदौ । कायावरोहणं५६ नाम तथा चर्मण्वती५७ नदी । गोमती५८ वरुणा५९ तत्तद्वत्तीर्थमौशनसह्रदम् । भैरवं६१ भृगुतुङ्ग६२च गौरीतीर्थं६३मनुत्तमम् । तीर्थं वैनायकं६४ नाम भद्रेश्वर६५मतःपरम् । तथा पापहरं६६ नाम पुण्याख्यं तपतीं६७ नदीं । भूतताबीं६८पयोष्णीं६९ च पयोष्णीसङ्गम७०संज्ञया । महाबोधिः७१ पाटला७२ च नागतीर्थं७३मवन्तिकां७४ ।

तथा वेणा७१ नदी पुण्या महाशानं ७६तथैव च। महारुद्रं ७७ महालिङ्गं दशार्णा७८ च नदी शुभा। शतरुद्रा७९ शताङ्गा८० च तथा विश्वपदं८१ परम्। अङ्गारवाहिका८२ तद्वन्दी च शोण८३ वर्षरी८४। कालिका८५ च नदी पुण्या वितस्ता८६ तो नदी तथा। एतानि पितृतीर्थानि शस्यन्ते स्नानदानयोः। श्राद्धमेतेषु यद्दत्तन्दत्तमक्षयं स्मृतम्। द्रोणी८७ वाटनदी८८ धारा८९सरित् क्षीरनदी९० तथा। गोकर्णं९१ गजकर्णं९२च तथा च पुरुषोत्तमः९३। द्वारका९४ ऋणतीर्थंच९५ तथावुंदरस्रतीं९६। नदी मणिमतीं९७ नाम तथा च गिरिकर्णिका९८। धूतपापं९९ तथा तीर्थं सप्तर्षी१०० दक्षिणस्तथा। एतेषु पितृतीर्थेषु श्राद्धमानन्त्यमश्नुते। तीर्थं मेघङ्करं१०१ नाम स्वयमेव जनार्दनः। यत्र शार्ङ्गधरो विष्णुर्मेघनादाभवस्थितः। तथा मन्दोदरीतीर्थं१०२ तीर्थं चम्पा१०३नदी शुभा। तथा सामलनाथ१०४च महाशालनदी१०५ तथा। चक्रवाकं१०६ चर्मकोटं१०७ तथा जम्बेश्वरं१०८ महत्। अर्जुनं१०९ त्रिपुरं११० चैव सिद्धेश्वर१११मतःपरम्। श्रीशैलं११२ शाङ्करं११३ तीर्थं नारसिंह११४मतःपरम्। महेन्द्र११५च तथा पुण्यमथ श्रीरङ्गसंज्ञितम्११६। एतेष्वपि सदा श्राद्धमनन्तफलदं स्मृतम्। दर्शनादपि चैतानि सद्यः पापहराणि वै। भद्रभद्रा११७ नदी पुण्या तथा भीमरथी११८ सरित्। भीमेश्वरं११९ ऋण वेणा१२० कावेरी१२१ कुडमला१२२ नदी। नदी गोदावरी१२३ नाम त्रिसन्ध्यातीर्थं१२४मुत्तमम्। तीर्थं त्र्यैम्बकं१२५ नाम सर्वतीर्थनमस्कृतम्। यत्रास्ते भगवानीशः स्वयमेव त्रिलोचनः। श्राद्धमेतेषु सर्वेषु कोटिकोटिगुणं भवेत्। स्मरणादपि पापानि नश्यन्ति शतधा द्विजाः!। चोपर्णी१२६ ताम्रपर्णी१२७ च जयातीर्थं१२८मनुत्तमम्। तथा मत्स्यनदी१२९ पुण्या त्रिधारं१३० तथैव च। भद्रतीर्थं१३१च विख्यातं पम्पातीर्थं१३२च शाश्वतम्। पुण्यं रामेश्वरं१३३ तद्वदेलापुरं१३४मतस्मृपुरं१३५म्। शुक्लभूत१३६च्च विख्यातमानन्दकमलं पुरम्१३७। आख्यातकेश्वरं१३८ तद्वदेकाम्रक१३९मतःपरम्। गोवर्धनं१४० हरिश्चन्द्रं१४१ ऋषुचन्द्रं१४२ पृथूदकम्१४३। सङ्खाचं१४४ हिरण्याचं१४५ तथा च कदली१४६ नदी। रामाधिवास१४७ स्त्वापि तथा सौमित्रिसङ्गमः१४८। इन्द्रकीलं१४९महानादं१५०तथा च त्रियमेत्तकम्१५१। एतान्यपि सदा श्राद्धे प्रशस्तान्यधिकानि तु। एतेषु सर्वदेवानां सान्निध्यं श्रूयते यतः। दानमेतेषु सर्वेषु दत्तं कोटिगताधिकम्। बाहुदा१५२ च नदी पुण्या तथा सिद्धवनं१५३ शुभम्। तीर्थं पाशुपतं१५४ नाम नदी पार्वतिका१५५ शुभा। श्राद्धमेतेषु सर्वेषु दत्तं कोटिशतोत्तरम्। तथैव पितृतीर्थन्तु यत्र गोदावरी नदी। युता त्रिकूटसङ्खेन सर्वान्तरजलावहा१५६। आमट-म्यख्य तत्तीर्थं१५७क्रमादायातसत्तमम्। प्रतीकस्य भयाद्विप्रा यत्र गोदावरी नदी। तत्तीर्थं ऋष्यकण्यानामप्सरोयुगसंज्ञितम्१५८। श्राद्धाग्निकार्यदानेषु तथा कोटिशताधिकम्। तथा सङ्गमलिङ्ग१५९च्च राघवेश्वर१६० सत्तमम्। सेन्द्रफेना१६१ नदी पुण्या यत्रेन्द्रः पतितः पुरा। निहत्य नमुचिं शक्रस्तपसा स्वर्गमाप्तवान्। तत्र दत्तं नरैः श्राद्धमनन्तफलदं भवेत्। तीर्थन्तु इक्षुकरं१६२ नाम शालग्रामं१६३ तथैव च। सोमपान१६४च विख्यातं यत्र वैश्वानरालयः। तीर्थं सारस्वतं१६५ नाम स्वामितीर्थं१६६ तथैव च। मन्दरा१६७ नदी पुण्या कौशिकी१६८ चन्द्रिका१६९ तथा। वैदभी१७०वाथ वेरा१७१ च पयोष्णी१७२ प्राङ्मुखा परा। कावेरी१७३ चोत्तरा पुण्या तथा जाबालपरी१७४ गिरिः। एतेषु श्राद्धतीर्थेषु श्राद्धमानन्त्यमश्नुते। कोङ्कदखण्डं१७५ तथा तीर्थं चित्रकूट१७६ मथैव च। विन्ध्ययोग१७७च गङ्गायास्तथा नदीतटं१७८ शुभम्। कुशाम्ब१७९न्तु तथा तीर्थं सर्वशोकविनं१८० तथा। संसारमोचनं१८१ तीर्थं तथैव ऋणमोचनम्१८२। एतेषु पितृतीर्थेषु श्राद्धमानन्त्यमश्नुते। अट्टहासं१८३ तथा तीर्थं गौतमेश्वर१८४मेव च। तथा वशिष्ठतीर्थं१८५न्तु फारीतं१८६ तु ततःपरम्। ब्रह्मावर्तं१८७ कुशावर्तं१८८ ऋषितीर्थं १८९ तथैव च। विष्णुपदञ्च १९०विख्यातं शङ्खोद्धारं १९१ तथैव च। घण्टेश्वरं१९२ विल्वकेश्च १९३नीलपर्वत१९४ मेव च। तथा च धरणीतीर्थं१९५ रामतीर्थं १९६ तथैव च। ऋषितीर्थं१९७च्च विख्यातमनन्तं श्राद्धदानयोः। तीर्थं वेदगिरो१९८ नाम तथैवौघवती १९९ नदी। तीर्थं वसुप्रदं२०० नाम आगलाखण्डं २०१तथैव च। एतेषु श्राद्धदातारः प्रयान्ति परमं पदम्। तथा च बदरीतीर्थं२०२ गयातीर्थं२०३ तथैव च। ऋषभं२०४

विल्वं२०५ चैव शुक्लतीर्थं२०६ तथैव च। श्रीपतेश्च२०७ तथा तीर्थं तीर्थं रैवतकं२०८ तथा। तथैव भारदातीर्थं२०९ भद्रकालेश्वरं२१० तथा। वैकुण्ठतीर्थं२११ च परं श्रीमेश्वर२१२मथापि वा। एतेषु श्राद्धदातारः प्रयान्ति परमां गतिम्। तीर्थं मातृष्टङ्कं२१३ नाम करवीरपुरं२१४ तथा। कुबेरेश्वर२१५ञ्च विख्यातं गौरीशिखरं२१६मेव च। नकुलेशञ्च२१७ तीर्थञ्च कर्दमालं २१८ तथैव च। दक्षिणपुण्यकरं२१९ तद्वत् पुष्करीकपुरं२२० तथा। सप्तगोदावरीतीर्थं२२१ सर्वतीर्थेश्वरेश्वरम्२२२। तत्र श्राद्धं प्रदातव्यमक्षयफलमीप्सुभिः"।

पिढदान न० पिण्डे दानम्। निवापे श्राद्धे अमरः स्वार्थे क। पितृदानक तत्रार्थे न० मन्त्रच०।

पिढदिन न० ६त०। १अमावास्यायाम्। पञ्चदश्यात्मके २तत्सम्बन्धिदिने च "मानेनानेन यो मासः पञ्चदशसमन्वितः। पितृणां तदहोरात्रमिति कालविदो विदुः। कृष्णपक्षस्त्वहस्तेषां शुक्लपक्षस्तु शर्वरी। कृष्णपक्षे त्वहः श्राद्धं पितृणां वर्त्तते नृप!" हरिवं० ७अ०।

पिढपक्ष पु० पितृणां प्रियः पक्षः। गौणाश्विनकृष्णपक्षे "नभो वाथ नभस्यो वा मलमासो यदा भवेत्। सप्तमः पितृपक्षः स्यादन्यत्र तु च पञ्चमः" नागरख०। २पितृकुलजे च "पिढपक्षः प्रभुः स्त्रियाः" हारावल्यां नारदः पार्श्वादौ ३पित्रादिनिबन्धे च।

पिढपति पु० ६त०। यमे अमरः।

पिढपिढ पु० ६त०। पितामहे अमरः।

पिढप्रसू स्त्री ६त०। १पितामह्याम् पितृणां प्रसूरिव। २सन्ध्यायाम् अमरः। पितृजन्ये सन्ध्यागामित्वेर्ण्यङ्लात् तस्याः प्रसूत्वं पाचकत्वात् तथात्वम्।

पिढप्रिय पु० ६त०। कङ्कराजे राजनि०।

पिढबन्धु पु० ६त०। "पितुः पितृव्यस्य सुतायाः पितुर्मातुः स्वसुःसुताः। पितुर्मातृव्यपुत्राश्च विज्ञेयाः पितृबन्धवः" इत्युक्तेषु पितुः पितृव्यपुत्रादिषु।

पिढभोजन पु०पितृभिर्भुज्यते कर्मणि ल्युट्। १श्राद्धे श्राद्धे तद्दानस्य प्रशस्तत्वात् तथात्वम्। भावे ल्युट् ६त०। २पितृभक्षणे न० राजनि०।

पिढमेध पु०कात्या०श्रौ०२१।२१।१ऋत्वादिषु पित्र्यु हेषु कर्मभेदे। [पितृतर्पणे "पितृयज्ञस्तु तर्पणम्" मनुः।

पिढयज्ञ पु०पित्र्यु हेष्वङ्गो यज्ञः श्रा०त०। पञ्चमहायज्ञान्तर्गते

पिढयाण पु० पितरो यान्ति अनेन या-करणे ल्युट् संज्ञा-त्वात् णत्वम्। पितृणां चन्द्रलोकगमनमार्गे। तत्प्रापककर्मरूपहेतुसहितः तदुत्थानप्रकारः छान्दो०५।३लक्षो यथा "अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति धूमाद्रात्रिं रात्रेरपरपक्षमपरपक्षाद्यान् षड्दक्षिणैति मासांस्तान् नैते संवत्सरमभिप्राप्नुवन्ति। मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चन्द्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति" तथा "य इमे ग्रामे इष्टापूर्ते। ग्राम इति इष्टापूर्तानामसाधारणं विशेषणमरण्यवासिभ्यो व्यावर्त्तकम्। यथा वानप्रस्थपरिव्राजकानामरण्यं विशेषणं इष्टापूर्तेभ्यो व्यावर्त्तकं तद्वत्। इष्टापूर्ते इष्टमग्निहोत्रादि वैदिकं कर्म। पूर्तं वापीकूपतडागारामादिकरणम्। दत्तं च ब्रह्मविदे यथाशक्त्या ब्रह्मभ्यो द्रव्यसम्भावो दत्तम्। इत्येवंविधं परिचरणपरित्राणादुपासते इतिशब्दस्य प्रकारदर्शनार्थत्वात्। ते दर्शनजितत्वाद्धूमं धूमाभिमानिनीं देवतामभिसम्भवन्ति प्रतिपद्यन्ते। तथाऽनिवार्चिता धूमाद्रात्रिं रात्रिदेवतां, रात्रेरपरपक्षदेवतास् एवमेव कृष्णपक्षाभिमानिनीमपरपक्षाद्यान् षण्मासान् दक्षिणा दक्षिणां दिशमेति गच्छति। तान् मासान्, दक्षिणायन षण्मासाभिमानिनीर्देवताः प्रतिपद्यन्त इत्यर्थः। बहुवचनविरोधो हि षण्मासदेवता इति मासानिति बहुवचनप्रयोगात्। नैते कर्मिणः पुण्यकृतः संवत्सरं संवत्सराभिमानिनीं देवतामभिप्राप्नुवन्ति। कुतः पुनः संवत्सरप्राप्तिप्रसङ्गो यतः प्रतिषिध्यते। यस्मि हि संवत्सरस्य प्रसङ्गोक्तेऽक्षायवयवभूते दक्षिणोत्तरायणे तत्रार्चिरादिमार्गप्रस्तावानुदयनमासेभ्योऽवयविनः संवत्सरस्य प्राप्तिरुक्ता। अत इहापि तदवयवभूतानां दक्षिणायनषण्मासानां प्राप्तिं श्रुत्वा तदवयविनः संवत्सरस्यापि पूर्ववत्प्राप्तिरापन्नेत्यतस्तत्प्राप्तिः प्रतिषिध्यते नैते संवत्सरमभिप्राप्नुवन्तीति। मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चन्द्रमसम्। कोऽसौ यस्तैः प्राप्यः चन्द्रमा य एष दक्षप्रजेतरीक्षे सोमो राजा ब्राह्मणानां तद्वं देवानां तं चन्द्रमसमन्नं देवता इन्द्रादयो भक्षयन्ति। अतस्ते धूमादिनो भूत्वा चन्द्रभूताः कर्मिणो देवैर्भक्ष्यन्ते अन्नवर्षोषेष्टादिकरणं यद्यद्भूता देवैर्भक्ष्येरन् नैष दोषः अल्पशिलुपकरणमात्रस्य विवक्षितत्वात्। न हि ते कवलोत्क्षेपेण देवैर्भक्ष्यन्ते। किं तर्ह्यल्पोपकरणमात्रं ते देवानां भवन्ति स्त्रीपशुभक्षादिवत्। इष्टवाच्यन्न

उपकरणेषु स्त्रियोऽङ्गं पशवोऽङ्गं विशोऽङ्गं राज्ञामित्यादि। न च तेषां स्त्र्यादीनां पुरुषोपभोग्यत्वेऽप्युपभोगो नास्ति। तस्मात्पितरो देवतानामुपभोग्या अपि सन्तः सुखिनो देवैः क्रीडन्ते। शरीरञ्च तेषां सुखोपभोगयोग्यं चन्द्रमण्डले आप्यमारभ्यते। तदुक्तं पुरस्ताच्छ्राद्धशब्दे आपोद्युलोकाग्नौ हुताः सोमो राजा सम्भवतीति। ता आपः कर्मसमवायिन्य इतरैव भूतैरनुगताः द्युलोकं प्राप्य चन्द्रत्वमापन्नाः शरीराद्यारम्भका इष्टाद्युपासकानां भवन्ति" भाष्करभाष्यम्।

पितृराज पु० इत० टच्समा०। यमे भा०स० ६ब०।

पितृरूप पु०ऐषदून० जनकः पिता पितृ+रूपप्। शिवे भा० अनु०१५०अ०। तस्य सर्वजनकत्वेन पितृतुल्यत्वात् तथात्वम्

पितृलोक पु० इत०। चन्द्रलोकोपरिस्थे १भुवनभेदे "विधुर्ध्वभागे पितरो वसन्तः स्वाधः सुधादीधितिमामनन्ति। यद्यन्ति तेऽर्कं निजमण्डलोर्ध्वं दर्शे ततोऽधादु द्युदयं तदेषाम्। भागान्तरत्वाद्र विधोरधस्तं तस्मान्निशीथः खलु पौर्णमास्याम्। अस्ते रविः पञ्चदशेऽभ्युदेति शुक्ले ऽसमेत्यर्धत एव सिद्धम्" सि०शि०। पितृयाणशब्दे दृश्यम्। कर्म०। २पितृरूपे लोके ३अग्निष्वात्तादौ च।

पितृवन न०इत०। प्रेतावासे श्मशाने शब्दार्थक०। [शिवे।

पितृवनेचर त्रि० पितृवने चरति चर-ट। श्मशानवासिनि

पितृवर्त्तिन् पु० ब्रह्मदत्तनामके नृपभेदे हरिवं० २०अ०।

पितृव्य पु० पितृभ्राता पितृ+व्यत्। ज्येष्ठे कनिष्ठे वा पितृभ्रातरि। [स्फुट् वेदे यत्वम्। कृत्ये यङु० ६।२६

पितृषदन न० पितरः सीदन्ति उपविशन्त्यत्र सद-आधारे

पितृष्व(स्व)सृ स्त्री इत० वा यत्वम्। पितुर्भगिन्याम्।

पितृष्वस्रीय पुंस्त्री०पितुः स्वसुरपत्यम् छ। पितृष्वसुरपत्ये

पितृसन्निभ पु० पित्रा गुरुणा सन्निभा तुल्यता यस्य। पितृतुल्ये गुरुतुल्याच्च प्रा०वि० देवलोक्ता यथा "आचार्यश्च पिता ज्येष्ठो भ्राता चैव महीपतिः। मातुलः श्वशुरश्चाता मातामहपितामहौ। वर्णज्येष्ठो पितृव्यश्च पुंस्येते गुरवो मताः"। [शब्दरत्ना।

पितृसू स्त्री पितरं सूते सू-क्विप्। १पितामह्यां २सन्ध्यायां

पितृहू पु०"पितृहूर्दक्षिणः कर्ण उत्तरो देवहूः स्मृतः"भाग० ३।१८। उक्ते दक्षिणकर्णे तस्य तथात्वञ्च समर्थितं "शास्त्रश्रवणकाले बलाधिक्यात् दक्षिणकर्णः प्रथमं प्रवर्त्तते। शास्त्रे च प्रथमं श्रोतव्यं कर्मकाण्डम् इत्येतावता शास्त्रेण प्रदत्तसंग्रहं कर्मकाण्डस्य दक्षिणकर्णेन श्रवणमिष्यते। अथ तदर्थमनुष्ठाय पितृभिराहूतः पितृलोकप्राप्तकं पितृयाणं प्रपद्यते। तदनेन प्रकारेण पितृयाणाह्वानं भवतीति पितृहूर्दक्षिणकर्णः"३।१५।८८ श्रीधरे च

पित्त न० अपि+दो-क्त तादेशः अद्योपः न दीर्घः। देहस्थे धातुभेदे तल्लक्षणादि भावप्र० उक्तं यथा

"पित्तस्थानं द्रवं पीतं नीलं सत्त्वगुणोत्तरम्। सरं कटु लघु स्निग्धं तीक्ष्णमम्लन्तु पाचनः"। पीतस्थिरामम् नीलं शामम्। एकं पित्तं वातवह्न्याख्यानकर्मभेदैः पञ्चविधम्। तेषां पित्तानां नामान्याह "पाचकं रञ्जकञ्चापि साधकालोचके तथा। आलक्ष्येति पित्तस्य नामानि स्थानभेदतः" अथ पाचकादीनां स्थानान्याह "आम्याशये यकृत्प्लीहोर्ध्वदये लोचनद्वये। त्वचि सर्वशरीरेषु पित्तं निवसति क्रमात्" अथ तेषां कर्माण्याह। "पाचकं पचते भुक्तं शेषाग्निबलवर्द्धनम्। रसमूत्रपुरीषाणि विरेचयति नित्यशः"। पाचकं पित्तमामाशयमध्यस्थं षड्विधमाहारं भोज्यं भक्ष्यं चर्व्यं लेह्यं चूष्यं पेयं पचति दोषरसमूत्रपुरीषाणि पृथक्करोति च। तदग्न्याशयस्थमेव स्वगुणैरा रसरञ्जनकृदस्यकृतमोपनोदनरूपयकृत्प्लीहप्रभाप्रकाशनाभ्यङ्गेषादिपाचनाद्यग्निकर्माणां विशेषाणां पित्तस्थानानामनुग्रहं करोति। शेषाण्यपि पित्तस्थानानि यकृत्प्लीहादीनि भागेन गत्वा तत्र तत्र रसरञ्जनादिकर्मभिरुपकरोतीत्यर्थः। कथम्भूतं पाचकं पित्तं शेषाग्निबलवर्द्धनम् शेषा अग्नयः पृथिव्यादिमहाभूतगताः। यत उक्तं चरकेण "भौमाप्याग्नेयवायव्याः पञ्चोष्माणः शरीरिणाम्" इति। ऊष्माणः अग्नयः। यत उक्तं वाग्भटेन "दोषधातुमलादीनामूष्मेत्यग्नेरुपदेशनम्" इति। दोषधातुमलादीनामूष्माग्निरित्यर्थः। रसादिसप्तधातुगताः तेषां बलवर्द्धनम् यथा लोके स्थापितानि रत्नानि खद्योतवद्दूरभास्वराणि तान्यपि दीपज्योतिषा दूरप्रकाशकानि भवन्ति तथा अग्न्याशयस्थपाचकाग्नितेजसा सर्वे अग्नयो बलवन्तो भवन्ति तथा च वाग्भटः "अग्नेस्तु पक्वाशयं सर्वेषां पक्तृ चामधिको मतः। तन्मूलास्ते च तद्वृद्धिक्षयवृद्धिक्षयात्मकाः" इति। ननु पित्तादन्योऽग्निराकाशित्यत्तमेवाग्निरिति सन्देहः। उच्यते पित्तस्योष्णादिगुणहाराकारपाचनरञ्जनदर्शनादिकर्माणि न खलु पित्तव्यतिरेकेणान्योऽग्निः। तस्मादग्निरूपश्चैव पित्तस्य स्थानभेदात्साधकरञ्जकसाधकालोचकभ्राजकसंज्ञाः। तथा च

वाग्भटः "पाचकं तिलमात्रं स्यात् काठिन्याद्यास्य दोषता । अनुष्णशीतमविस्रं पित्तं पाकोष्मदर्शनैः । बुद्धिमेधाधीधैर्यतनुमार्दवैः । पित्तं पचाम्यं तत्र पक्वामाशयमध्यगम् । यद्यप्यतात्मकत्वेऽपि यत्तैजसगुणोदयम् । त्वक्चक्षुष्यं पाचकादिकर्मधानसमन्वितम् । पचत्यन्नं विभजते सारकिट्टौ पृथक् तथा । तत्स्थमेव पित्तानां शेषाणामप्यनुग्रहम् । करोति बलदानेन पाचकं नाम तत्स्मृतम्" । नन्वत्र यदि पित्ताग्नेरभेदस्तदा कथं इतं पित्तस्य धमनभस्मेदीपकमिति । तथा मनुष्याः पित्तं कुर्वन्ति न च तेऽग्निदीप्तिकरा इति । तथा समदोषः समाग्निश्चेत्यपि वक्तुं न युज्यते । तथा "द्रवं स्निग्धमधोगञ्च पित्तं वह्निरतोऽन्यथेति" । अत्रोच्यते । पित्तमग्नेः सन्ततानुधावनम् । तथा चोक्तं तन्त्रान्तरे "अग्निर्भिन्नगुणैर्युक्तः पित्तं भिन्नगुणैस्तथा । द्रवं स्निग्धमधोगञ्च पित्तं वह्निरतोऽन्यथा । तस्मात्तेजोभवं पित्तं पित्तोष्मा दः स अग्निमान् । स वस्तुरति कुक्षिस्थः सर्वतो धमनीमुखैः । स कायाग्निः स कायोष्मा स पक्ता स च जीवनम् । अनन्यगतिरित्येवं देहे कायाग्निरुच्यते" अन्यच्च "यामपार्श्वाश्रितं नाभेः किञ्चित् सोमस्य मण्डलम् । मन्दाग्नेः मण्डलं सौम्यं" तस्माच्चेऽग्निर्यं वस्थितः । जरायुमात्रप्रच्छन्नः काचकोशस्य दीपवत्" । तथा च मधुकोषे "द्रवतेजःसमुदायात्मकस्यापि पित्तस्य तेजो भागोऽग्निरिति" । तेन पित्तमग्निवन्मन्यते अतितापितायोगोलकवत् । परमार्थतस्तु अग्निः पित्ताश्रित एवेति सिद्धान्तः । अतएवाह रसप्रदीपे "जाठरो भगवानग्निरीश्वरोऽन्नस्य पाचकः । सौम्यप्राड्ज्ञानाऽऽददानो विभक्तुं नैव शक्यते । नाभौ मध्ये शरीरस्य विशेषात् सोममण्डलम् । सोममण्डलमध्यस्थं विद्यात्तत्सूर्यमण्डलम् । प्रदीपवत्तत्र नयां स्थितो मध्ये हुताशनः । सूर्यो दिवि यथा तिर्यक्तेजोयुक्तैर्गभस्तिभिः । विशोषयति सर्वाणि पल्वलानि सरांसि च । तद्वच्छरीरिणां मुक्तं ज्वलनो नाभिमाश्रितः । मधुरैः पचते स्निग्धान्नाद्यञ्जनसंस्कृतम् । स्थूलकायेषु सत्त्वेषु यवमात्रः प्रमाणतः । क्षुद्रकायेषु सत्त्वेषु तिलमात्रः प्रमाणतः । कृमिकीटपतङ्गेषु वालमात्रोऽवतिष्ठते" इति । पुनः प्रकृतमनुसरति "रञ्जकं नाम यत्पित्तं तद्रसं शोणितं नयेत् । यत्तु साधकसंज्ञं तत्कर्मबुद्धिं धृतिं स्मृतिम्" । धृतिं मेधाम् "यदालोचकसंज्ञं तद्दृग्गतस्वकारणम् । "भ्राजकं का-

निकारि स्यात्सौम्यकादिपाचकम्" वातपित्तादिनिरूपणे । स्थानान्तरे तत्रैव पित्तप्रकृतिक उक्तो यथा "पित्तप्रकृतिको यादृङ् नाहमोऽत्र निगद्यते । अकालपलितो मौरः क्रोधी क्लेदी च बुद्धिमान् । बहुभुक् ताम्रनेत्रश्च स्वप्ने ज्योतींषि पश्यति । मध्याह्नेऽर्कः क्षणौ स्फूर्जो वह्निवीर्यो महाबलः । पित्तं वह्निर्द्रवश्चिल्लं वा तदस्मात् पित्तोद्भिन्नक्षीणतृष्णो बुभुक्षुः । गौरोष्णाङ्गस्ताम्रकेशोऽल्परक्तः शूरोमाणी पिङ्गदृग्भोऽल्पलोमा" । पित्तकोपप्रशमेऽन्नरक्तस्तथैव "तिक्तस्वादुकषायशीतपवनक्षायाग्निसादीजनक्षीणतृष्णाभूष्टदग्धान्नगरिजदक्षीणात्ययसंस्पर्शनम् । सर्पिःक्षीरविरेकसेकरुधिरस्रावप्रदेहादिकं पानाहारविहारभेजज्जिदं पित्तं प्रशान्तिं नयेत्" । पित्तप्रकोपकारणान्युक्तानि "कटूष्णाम्लविदाहितीक्ष्णलवणक्रोधोपवासातपक्षोभक्षुधाभिघननव्यायाममद्यादिभिः । भुक्तेऽजीर्यति भोजने च शरदि क्षीणे तथा प्राणिनां मध्याह्ने च यथार्द्धरात्रसमये पित्तप्रकोपो भवेत्" भावप्र० "पित्तञ्च तिक्ताम्लरसञ्च सारकं तूष्णं द्रवं स्नेहसमिद्धं मधौ वहु । वर्षान्तशरदि भयमर्द्धरात्रे मध्यन्दिने ऽह्याप्युदिते च कुप्यति" राजनि० ।

पित्तघ्न त्रि० पित्तं हन्ति हन–टक् । १पित्तनाशकद्रव्ये स्त्रियां ङीप् । सा च २गुडूच्यां शब्दच० ।

पित्तज्वर पु० पित्तनिमित्तो ज्वरः शाक० त० । पैत्तिके ज्वरे ज्वरशब्दे २१७१ पृ० माधवकरोक्तं तल्लक्षणं द्रष्टव्यम् ।

पित्तद्राविन् पु० पित्तं द्रावयति द्रु–णिच् णिनि । मधुरजम्बीरे राजनि० ।

पित्तधरा स्त्री सुश्रुतोक्ते कलाभेदे "सप्तमी पित्तधरा नाम या कला परिकीर्तिता । पक्वामाशयमध्यस्था यकृत्प्लीहा सा प्रकीर्त्तिता" । [रक्तपित्तशब्दे लक्षणादि द्रष्टव्यम् ।

पित्तरक्त न० पित्तसंसृष्टं रक्तम् । रक्तपित्ते रोगे राजनि०

पित्तल त्रि० पित्तमस्त्यस्याधिक्येन सिद्धा० लच् । १पित्तवर्द्धके । पित्तं लाति ला–क । २धातुभेदे रीतौ ३भूर्जपत्रे शब्दमा० ४तोयपिप्पल्यां स्त्री मेदि० । रीतिश्च द्विविधा यथोक्तं राजनि० "शुक्ला स्निग्धा मृदुः शीता सुरङ्गा स्फटपत्रिणी । श्वेतोपमा शुभा स्वच्छा ज्ञात्वा रीतिः प्रकीर्त्तिता" । "रीतिरप्युपधातुः स्यात्ताम्रस्य सदृशश्च । पित्तस्य गुणा तेव स्वयोनिसदृशा जनैः । संयोगस्य प्रभावेन तस्यान्येऽपि गुणा स्मृता । रीतिरायुष्यं रूक्षं तिक्तञ्च लवणं रसे । शोधनं शाङ्गरो-

गन्नं क्रमिन्नं नातिलेखनम्" भावप्र०। तस्यारभ्यशोधनविधिः कांस्यशब्दे १८४२ पृ० दृश्यः।

पित्तातिसार पु० पित्तजनितोऽतिसारः शाक०त०। पित्तजनिते अतिसाररोगभेदे अतिसारशब्दे १०७५०दृश्यम्।

पित्ताभिष्यन्द पु० पित्तजतः अभिष्यन्दः शाक०त०। पित्तजते नेत्रजलस्रावरूपे रोगभेदे अभिष्यन्दशब्दे २०४५०दृश्यम्

पित्तारि पु० ६त०। १पर्पटे (क्षेतपापड़ा) २कट्फलायां ३वरुणे च राजनि०।

पित्र्य त्रि० पितुः इदं प्रियं वा पितृत आगतं वा यत्। १पितृसम्बन्धिनि। २पितृतीर्थे तर्जन्यङ्गुष्ठयोर्मध्यस्थाने ३मघासु ४मघानक्षत्रे च राजनि०। तस्य पितृदैवतत्वात्तत्सम्बन्धित्वम्। ५पितृप्रिये माघे पु० ६अमावास्यायां तिथौ स्त्री हेमच० ७ऋक्षेऽश्वातरि पु० ८पौर्णमास्यां स्त्री शब्दच०।

पित्र्यावत् त्रि० पित्र्यः तत्सम्बन्धि अस्यास्ति मतुप् मस्य वः दीर्घः। १पितृसम्बन्धियुक्ते २कन्यायां स्त्री ङीप्। ऋ०८।३६।२ भा०।

पित्सत् त्रि० पतितुमिच्छति पत-सन् दस् अभ्यासलोपः। १पतितुमिच्छायुते २खगे पुंस्त्री० अमरः।

पित्सल पु० पतितुमिच्छत्यत्र पत-सन् पिद्ध+आधारे क-अच्। पक्षि मार्गे उणादि०।

पिद्ध पु० खगभेदे यजु० २४।३२ [२खड्गफले च हेमच०।

पिधान न० अपि+धा-ल्युट् अल्लोपः। १आदने अमरः

पिधानक पु०पिधानाय कायति कै-क। खड्गकोषे हेमच०

पिनद्ध त्रि० अपि+नह-क्त अल्लोपः। परिच्छिते वस्त्रादौ हेमच०।

पिनाक पु०न० पा-रक्षणे आकन् नुट् धातोरात इत्वम्। १शिवधनुषि उज्ज्वलद०। २मूलाख्ये अमरः ३दिग्ग उत्तरनामस्व निघण्टुः।

पिनाकिन् पु० पिनाक+अस्यर्थे इनि। अष्टादेवे अमरः पिनाकधृगादयोऽप्यत्र। [जटा०।

पिन्यास न० अपिगतो न्यासोऽत्र प्रा०व०अल्लोपः। हिङ्गुनि

पिपतिषत् त्रि० पतितुमिच्छति पत-सन्-शतृ। १पतितुमिच्छति। २खगे भेदि०। [२खगे राजनि०

पिपतिषु त्रि० पतितुमिच्छुः पत-सन उ। १पतितुमिच्छौ

पिपासा स्त्री पातुमिच्छा पा-पाने सन् भावे च। पातुमिच्छायाम् सा च प्राणहरिः ऊर्मिभेदः "बुभुक्षा च पिपासा च प्राणस्य, मनसः ऋतौ। शोकमोहौ, शरीरस्य ज्वरास्त्रयः षडूर्मयः" भा०ति०। तद्धेतुः पित्तभेदश्चशब्दे दृश्यम्। तारका०इतच्। पिपासित संजातपिपासे त्रि०।

पिपीतक पु०ब्राह्मणभेदे येन पिपीतकीद्वादशीव्रतमाचरितम्

पिपीतकी स्त्री पिपीतको ब्राह्मणभेदः स प्रवर्त्तकतयाऽस्यास्त्य च गौरा० ङीप्। वैशाखशुक्लद्वादश्याम् तद्विधानं भविष्यपु० "वैशाखे शुक्लपक्षस्य द्वादशी वैष्णवी तिथिः। तस्यां सुशीतलजलैः स्नापयेत् केशवं प्रभुम्। पूजयेद्गन्धपुष्पाद्यैर्धूपदीपैर्विधानतः। नैवेद्यैर्विविधैश्चैव ताम्बूलैरथ वासवा। ब्रह्मा तु वैष्णवं मन्त्रं दद्यात् प्रथमेततः। दद्याद्विप्रेभ्यो विधिवत् कुम्भाँल्लोपस्वसंयुतान्। प्रथमेऽब्दे चतुःकुम्भान् दद्याद्वस्त्रसंयुतान्। आज्याभिरक्षितक्षीरान् सुशीतलजलान्वितान्। शुक्लवस्त्रावृतमुखान्नवनीतसंयुतान्। धेनुसंचसवायुक्तान् सभोज्यदक्षिणान्वितान्। द्वितीयेऽब्दे घटान् दद्याद्धिसकरसंयुतान्। तृतीये द्वादश घटान् तिलमोदकसंयुतान्। चतुर्थे षोडश घटान् दुग्धखण्डयुतान्। दद्याद् संपूज्य देवेशं द्विजातिभ्यः प्रयत्नतः। दक्षिणां शक्तितो दद्याद् भोज्यञ्चैव विशेषतः" पिपीतकव्रतञ्चैवं प्रति यमोपदेशः। तत्फलञ्च ति०त०उक्तः द्वादशीशब्दे ३७८८ पृ० दृश्यः। अधिकं तत्कथायां दृश्यम्।

पिपीलक पु० अपि-पील-ण्वुल् अल्लोपः। (डेंगोपिपड़ा) ख्याते १कीटे (छुटेपिपड़ा) २ख्याते कीटे स्त्री टाप्। हेमच०। अच्-पिपीलोऽत्र शब्दच० गौरा० ङीष् पिपीलीत्यत्र हेम०। क्षुद्रकीटे राजनि०।

पिपीलिकामध्य न० पिपीलिकायामध्यमिव मध्यमस्य। चान्द्रायणभेदे पुंस्त्री० चान्द्रायणशब्दे २८।२ पृ०दृश्यम्।

पिप्पक पुंस्त्री०शरव्यादेवतोद्देशेन आलभ्ये पक्षिणि अजादि० टाप्। स्त्रीपक्षिभेदे स्त्री यजु० २४।४०।

पिप्पटा स्त्री खाद्यभेदे त्रिका०।

पिप्पल न० पा-अलच् पृषो०। १जले निघण्टुः २वृक्षभेदे च मेदि० ३अश्वत्थवृक्षे अमरः ४वन्यनपुंसके पक्षिणि च पु०शब्दच० ५कक्षायां (पिपुल) स्त्री गौरा० ङीष् हस्वः पिप्पलिः पिप्पली चात्र। तस्याः फलम् अस्य करीतक्या० तस्य लुप्। तत्फलेऽपि स्त्री। अस्यर्थे तत्करादि०अ। पिप्पलीय तद्युते त्रि०। रेवत्यां जाते ६भित्रपुत्रभेदे पु० भाग०६।१८।६

पिप्पलाद पु० ऋषिभेदे भाग० १।१८।८ [३।११।

पिप्पलायन पु० भरतान्वये भागवतप्रधाने ऋषिभेदे भाग०१।

पिप्पलीघृत न० चक्रदत्तोक्ते घृतभेदे "पिप्पलीगुडसंयुक्तं

क्षारक्षीरद्रुतं हृतम् । एतदग्निविवृद्ध्यर्थं वर्षिष्ठं त्रयका-
शिनाम् ।

पिप्पलीश्रोणि स्त्री नदीभेदे मार्क०पु० ५७अ०

पिप्पलीमूल न० पिप्पल्या इव मूलमस्य । (पिपुलमूल)ख्याते
वृक्षे राजनि० "दीपनं पिप्पलीमूलं कटूष्णं वातनं लघु । रूक्षं
पित्तकरं भेदि कफवातोदरापहम् । वा-
नाऽऽर्द्रोष्णगुणत्वेन क्रमिवातक्षयापहम्" भावप्र० । ततः
मत्वर्थे ठक्करा० क । पिप्पलमूलीय तद्युते त्रि० ।

पिप्पलु पु० ऋषिभेदे तस्य गोत्रापत्यं गर्गा० यञ् । पैप्प-
लव्य तद्गोत्रापत्ये पुंस्त्री० ।

पिप्पलाद्य न० चक्रदत्तोक्ते तैलभेदे "पिप्पलीं मधुकं बिल्वं
शताह्वां मदनं वचाम् । कुष्ठं शटीं पुष्करास्यं चित्रकं
देवदारु च । पिष्ट्वा तैलं विपक्तव्यं द्विगुणक्षीरसंयु-
तम् । अर्शसां कृच्छ्रवातानां तच्छ्रेष्मतुवाशनम् । गुद-
निःसरणं शूलं मूलतक्षं प्रवाहिकाम् । कण्डूदृष्टिदौर्ब-
ल्यमानाहं वङ्क्षणाश्रयम् । पिच्छास्रावं गुदे शोथं
वातवर्चोविनिग्रहम् । अन्यानं बलदोषञ्च जयेत्तैलात-
वाशनात्" ।

पिप्पिका स्त्री दन्तमले रोगभे० । [गुप्तरुचकत्वरुक्षम् ।

पिप्पीक पुंस्त्री० खगभेदे ह०सं०८ह्य०तस्य दक्षिणदिक्स्थत्वे

पिप्रु पु० असुरभेदे भा० १।५१।५ भा० ।

पिप्लु पु० ऋषि+प्लु–डु ऋषेरल्लोपः । जटुले अमरः ।

पिप्लुमाना स्त्री ऋषि+शब्द–शानच् ङीष् । शब्दायमाने

पिप्लुन त्रि० ऋषि+शब्द–क्युट् पृषो० । १अव्यक्तं शब्दाय-
माने २रक्षोभेदे पु० हरि०६।४६।१

पिबारु पी–हिंसायां बा० आरुक् । हिंसके उ०१।१८०।१
"पीयतिर्हिंसाकर्मेति" निरु० ४।२५

पिबाल पु०पी–पाने कालन् । पीतसाले (पेयासाल) (मर-
सा) वृक्षभेदे अमरः "पियालस्तु खरःस्वस्यसारो व-
ह्वस्थिवल्कलः । राजादनस्तापसेष्टः सञ्चकद्रुर्बहुमटः ।
सारः पित्तकफास्रघ्नस्तत्फलं मधुरं गुरु । स्निग्धं सरं
मरुत्पित्तदाहज्वरहरमापफलम् । पियालमज्जा मधुरो
हृद्यः पित्तानिलापहः । बृंहणोऽतिदुर्ज्जरः स्निग्धो वि-
ष्टम्भी चाप्यवृष्यकः" भावप्र० ।

पिल प्रेरणे चु०उभ०सक०सेट् । पेलयति ते अपीपिलत् त ।

पिलिप्यनी स्त्री पिलिप्यां भवि । यजु० २३।२ "ओषं
पिलिप्यनी" मत० ब्रा० १३।२।६।१६ "अयमेवाग्निरि
त्योषधीरेव पुनरिति" वेददीपः ।

पिलु पु० ऋषि+ला–बा० डु । पीलुवृक्षे शब्दरत्नावली ।

पिलुनी स्त्री ऋषि+ला बा० डुन गौरा० ङीष् । मूर्वायां
रत्नमाला । [टाकतायां रत्नमाला ।

पिलुपर्णी स्त्री पीलोरिव पर्णमस्याः ङीष् पृषो० । मोर-

पिल्ल न० क्षिद–क पिलादेशः । १क्लिन्नचक्षुषि । २तद्युते
त्रि० अमरः ।

पिल्लका स्त्री पिल्ला इव कायति कै–क । कृत्रिमायां शब्दमा०

पिव सेचने भ्वा०पर०सक० सेट् इदित् । पिन्वति अपिन्वीत् ।
पिपिन्व पिन्वतुः । पिन्वनम्

पिश अवयवे समूहस्यांशभावे रुक० दीपनायां सक० तुदा०
तुचा० पर० सेट् । पिंशति घटः समूहीभवतीत्यर्थः ।
"त्वदा रूपाणि पिंशतु" ऋ०१०।८४।१ दीपयतु रूपयतु
अपेशीत् पिपेश ।

पिश(स) त्रि० पिश–क । १यावनिर्वृक्षे २बहुरूपे न० ।

पिशङ्ग पु० पिश–अङ्गच् किच्च । पद्मधूलितले १पिङ्गवर्णे
२तद्युति त्रि० अमरः ।

पिशङ्गक पु० पिशङ्ग+स्वार्थे क । १पिशङ्गवर्णार्थे पिशङ्गेन
कायति कै–क । २विष्णौ ब्रह्मपु० ।

पिशङ्गभृष्टि त्रि० भ्रस्ज–कर्मणि क्तिच् पिशङ्ग इव भृष्टिः
सारभूतोऽस्य । शुद्धपिङ्गलवर्णे ऋ० १।३३।५ भा० ।

पिशङ्गरति त्रि० पिशङ्गः बहुरूपो रातिर्धनमस्य । बहुध-
नस्वामिनि ऋ० ६।३।२ भा० । [पिङ्गले ।

पिशङ्गिला स्त्री पिशं बहुरूपं गिलति क डस् । रोहो

पिशाच पु० पिशितमाचामति आ+चम–बा० ड पृषो० ।
१देवयोनिभेदे २प्रेते च अमरः "अन्तरीक्षचरा ये च
भूतप्रेताः पिशाचकाः । वर्त्तयित्वा वह्निमध्यांस्ते तत्रैव
चरन्ति हि । नोर्द्ध विक्रमणे शक्तिस्तेषां वह्नितपा-
दनात् । अत ऊर्द्धं हि विप्रेन्द्र ! राक्षसा ये क्रतै-
नसः । ते तु स्वर्गादिदेवैः सर्वे विहरन्त्यूर्द्धवर्जिताः" इति
वाय्वे स्वर्गखण्डे १६अ० । प्रेते यथा "अशौचान्ताद्दि-
तीयेऽह्नि यस्य नोत्सृज्यते वयः । पिशाचत्वं भवेत्तस्य
दत्तैः आब्दशतैरपि" शु० त० । तद्विचारके कुशलः
आर्कादि० कन् । पिशाचक तद्विचारकुशले त्रि० स्वार्थे
कन्० अच् । पैशाच तदर्थे पिशाच इव कायति
कै–क । पिशाचतुल्ये यक्षगुह्यकादौ ।

पिशाचकिन् पिशाचक यक्षादिरूपस्य स्वत्वेन पिशाचक+
इनि । यक्षेश्वरे कुबेरे हेमच० । [शाखोटवृक्षे त्रिका० ।

पिशाचद्रु पु० पिशाचप्रियः घनान्धकारत्वात्तद्रुः शा०त० ।

पिशाचमोचन न० स्वनामख्याते तीर्थभेदे स्कान्दपुराणम्।
पिशाचसभ न० ईत०क्लीवता। पिशाचानां सभायाम्
पिशाची स्त्री पिशाचजातिः स्त्री ङीष्। १पिशाचजाति स्त्रियां तद्वद्गन्धयुक्तायां २गन्धमांस्यां राजनि०। [कुत्साः।
पिशिक पु० देशभेदे स च ह०सं० १४भूभविभागे दक्षिणस्वा-
पिशित न०पिश–क्त। १मांसे अमरः। २जटामांस्यां स्त्री वा ङीष् भेदि०। [चसादौ पिशितादयोऽप्यत्र।
पिशितभुज् त्रि० पिशितं भुङ्क्ते भुज–क्विन्। क्रव्यादे रा-
पिशी स्त्री पिश–क गौरा० ङीष्। जटामांस्यां राजनि०।
पिशील न० पिस–बा०इलच्। शराबे शब्दमयपात्रे शत०ब्रा० २।५।२।६ मा० काण्वा० ५।२।४२ कर्कः।
पिशुन न० पिश–उनन् किच्च। १कङ्कुभे अमरः। २नारदे ३काके च पु० ४खलचके ५क्रूरे च त्रि० (पिशिङ्) ६शाकभेदे स्त्री० टाप् भेदि०।
पिष चूर्णने रु० पर०सक० अनिट्। पिनष्टि रुदित् अपिषत् पिपेष पेष्टा पिष्टः पेषः पेषणम्। "शुष्कचूर्णरूक्षेषु पिषः" पा० एषुपपदेषु कर्मसु खसल् कृपा० यथाविध्यनुप्रयोगः "शुष्कपेषं पिनष्मीमं" भट्टिः "क्षेपणे पिषः" पा० क्षेपसाधने करणे उपपदे खसल्। उदपेषम् पिनष्टि उदकेन पिनष्टीत्यर्थः पेषमादिपरे उदकस्योदादेशः।
पिष्ट न० पिष–क्त। १घीकुमारे रत्नमाला २पिष्टके पु०न० "चत्वारादशगुणं पिष्टं पिष्टादशगुणं पयः। पयसोऽष्टगुणं मांसं मांसादष्टगुणं हृतम्। हृताष्टगुणं तैलं मर्दनाच्च भक्षणात्" वैद्य० अस्य गुणाः "पिष्टं ग्राहकरं रूक्षं विदाहि गुरु दुर्जरम्। शालिपिष्टमया भक्ष्याः कफपित्तविनाशनाः। वैदला गुरवो भक्ष्या विष्टम्भिरुक्षदारुताः। मुद्गाः सर्पिर्युताश्चैव सक्षौद्रक्षारशर्कराः। भक्ष्या बल्याश्च हृद्याश्च गुरवोऽङ्गपुष्टिदा परम्। सक्षौद्राः क्षौद्रसिक्ताश्च भक्ष्या गोधूमसम्भवाः। गुरवस्तर्पणा हृद्या बल्योपचयवर्द्धनाः। मर्दितां मथितां क्षीरं नारिकेलहृतादिभिः। अवस्थाद्य हृते पक्वा हृतपूरोयमुच्यते। हृतपूरो गुरुर्ह्यः कफरक्तकृमिप्रदः। रक्तपित्तहरो हृद्यः स्वादुः पित्तहरोऽग्निदः"। गोधूमचूर्णं समिता। "समिता मधुदुग्धेन खण्डेनामरिचादिभिः। हृते पक्वा क्षिपेत् खण्डे संवावे हृङ्गयो गुरुः। समिता वेष्टिता मध्ये मधु दत्त्वा हृते पृथा। मधुसक्तरुहिष्टं तद्धृद्यं गुरु दुर्जरम्" राजवल्लभः। २रूपे न०निघण्टुः ३चूर्णिते त्रि० ४क्षविभेदे पु०। तस्यापत्यम् शिवा०अण्। पैष्ट तदपत्ये पुंस्त्री०। ततः गोत्रप्रत्ययस्य बहुत्वे बहुत्वे च उपका० लुक्।
पिष्टक त्रि० पिष्टस्य विकारः कन्। १पिष्टस्य विकारभेदे संज्ञायां कन्। २अपूपे स्त्री अमरः। ततोऽस्यार्थे भावप्र० वाक्यं द्रष्टव्यम्। ३तिलचूर्णे न०राजनि०। ४नेत्ररोगभेदे भेदि० "क्षेप्या मारुतकोपेन रक्ते पिष्टसन्निभम्। पिष्टवत् पिष्टकं विद्धि मलाक्षादर्शसन्निभम्" माधवकरः।
पिष्टप न० विशेषेण पिश–कप निपा०। मुखे अमरः।
पिष्टपचन न० पिष्टं पच्यतेऽनेन पच–करणे ल्युट्। पिष्टकपाकपात्रे कटाहादौ अमरः।
पिष्टपाककृत् न० पिष्टस्य पाकं करोति आधारस्य कर्तृत्वविवक्षायां क–कर्तरि क्विप् तुक् च। १पिष्टपाकाधारे पात्रे हेमच० कर्तरि क्विप्। २पिष्टपाचके त्रि०।
पिष्टपूर पु० पिष्ट इव पूर्यते पूरि–कर्मणि अच्। वटके शार्ङ्गधरे हेमच०।
पिष्टपाकभृत् न० पिष्टपाकं बिभर्त्ति भृ–क्विप्। पिष्टपाकपात्रे हेमच०। [त्रि०ङीप्।
पिष्टमय त्रि० पिष्टस्य विकारः मयट्। पिष्टविकारे मण्डादौ
पिष्टमेहिन् पु० पिष्टमिव मेहति मिह–णिनि। सुश्रुतोक्ते प्रमेहभेदरोगयुते "पिष्टरसलसं पिष्टमेही मेहति" सुश्रुतः। [(धूमसी) हेमच०।
पिष्टवर्त्ति पु० पिष्टं वर्त्तयति वर्त्ति–इन्। सूक्ष्मार्थादिचूर्णे
पिष्टसौरभ न० पिष्टस्येव सौरभमस्य। चन्दने शब्दर०।
पिष्टात पु०पिष्टमितातति अत–अच्। १पटवासे पटवासनार्थे सुगन्धद्रव्ये (बाबीर) ख्याते २पदार्थे च अमरः।
पिष्टिक न० पिष्टमस्त्यस्य उत्पत्तिसाधनत्वेन ठन्। तण्डुलचूर्णभवे दूरालभे (पिठालि) ख्याते पदार्थे राजनि० (पिठो) प्रसिद्धायां पिष्टद्विदले स्त्री "दालिः संस्थापिता गोले ततोऽपक्वतकक्षुका। शिलायां साधु संपिष्टा पिष्टिका कथिता बुधैः" भावप्र०।
पिष्टोडी स्त्री श्वेतास्विकायां राजनि०।
पिष्टोदक न० पिष्टमिश्रितमुदकं शत०त०। चूर्णमिश्रितजले भा० वा० १३।क०। [अपिषेषत्-त।
पिस गतौ भ्वा०पर०सक०सेट्। पेसति अपेसीत् पिपेस अदित्
पिस दीप्तौ वा चु० उभ०पक्षे भ्वा० पर०अक० सेट् उदित्। पिंसयति ते अपिपिंसत् त। पक्षे पिंसति अपिंसीत्।

पिस गतौ वधे च अक०-सके दाने सतौ च सक० चु० उभ० सेट्। पेषयति-ते अपीपिषत् त।

पिसङ्ग पु० पिस-अङ्गच् किच्च। पिशङ्गशब्दार्थे

पिहित त्रि०-अपि+धा-क्त अपेरछोपः। १तिरोहिते २आच्छादिते च हेमच०।

पी पाने दि० सक०-आत्म० अनिट्। पीयते अपेट। स्वप् "निपीय यस्य सिरिरश्चिधः कषाम्" नैषधः पिबतेस्तु निपाय इत्येव।

पीठ पु० न० पीयते पिबते वा अत्र घा-ठक् पिठ-क वा दीर्घः। (पीढ़े) १आसनभेदे अमरः। २व्रतिनामासने त्रिका० तलार्थे स्त्री रत्नमाला गौरा० ङीष्। पीठलक्षणादिकं युक्तिकल्पतरौ दर्शितं यथा "धातुपाषाणकाष्ठैश्च पीठस्त्रिविध उच्यते। धातवश्च त्रिधार्थेषु कांस्यानि विविधानि च। तदत्र संप्रवक्ष्यामि यद्दृष्टेष्वासनेषूक्तम्"। तत्र आसनम् "दक्षहस्तस्तु दैर्घ्ये च तदर्द्धे परिकीर्त्तितः। तदर्द्धोन्नतः पीठः सुख इत्यभिधीयते। दक्षहस्तवदाधिक्यात् पञ्च पीठा भवन्ति हि। सुखो जयः शुभः सिद्धिः सम्पदेति यथाक्रमम्। धनभोगसुखैश्वर्यवाञ्छितार्थप्रदायकः। समदीर्घे सुखा वाप्तिर्विषमे विघ्नमापदः। आयामपरिणाहाभ्यां दक्षहस्तमितो हि यः। सर्वदक्षोन्नतः पीठो आरको नाम विश्रुतः। दैर्घ्यौन्नत्यपरीणाहैश्चतुर्हस्तमितो हि यः। राजपीठ इति ज्ञेयः सकलार्थप्रसाधकः। आत्माभिषेकमिच्छन्ति क्षितिपस्य पुराविदः। दैर्घ्यौन्नत्यविपरीणाहैः षड्हस्तसंमितो हि यः। राज्ञां चित्तप्रसादार्थं लोकपीठाभिधानकः। दैर्घ्यौन्नत्यपरीणाहैरष्टहस्तमितो हि यः। शक्रपीठो जयं नाम्ना भवेत् स च सुखप्रदः। कानको राजपीठः स्याज्जयो वा राजतः सुखः। राज्ञामेवोपयोक्तव्यो सवयवोत्तरोत्तरम्। राजपीठे चिरायुः स्याज्जये सर्वां मही जयेत्। आरको जायवेच्छूनू सुखे सुखमवाप्नुयात्। राजतः कीर्त्तिजननो धनवृद्धिकरः परः। ताम्रः प्रतापजननो विपक्षक्षयकारकः। लोहपट्टासने सार्वः सर्वकर्मसु युज्यते। लघुपीठवरकाद्याः शत्रुक्षयफलप्रदाः" इति धातुपीठाः। अथ शिलापीठाः "वज्रपीठो वज्रपाषैरेव नान्यस्तु दृश्यते। पद्मरागो दिनेशस्य चान्द्रकान्तो विधोरपि। राहोर्गोमेदकः पीठः शनैश्चरसुतस्य तु। गोमेदकस्तु सौम्यस्य स्फाटिकस्तु बृहस्पतेः। शुक्रस्य वैदूर्यवरः प्रावाणो बुधसत्तम हि। इत्याद्यशिलाः। "यो यस्य हि दशाजातः पीठस्तस्य हि तत्क्षयः। स्फटिकस्तु महीन्द्राणां सर्वेषामेव युज्यते। अभिषेके च यात्रायामुत्सवे जयवर्द्धनि। जयस्तम्भोपघटितः संग्रामे पीठ इष्यते। मत्तोद्धारसंचिते वर्षांसु ऋतिसंक्षेत्। शुक्लवस्त्रवृतं पीठं भद्रके जनसंकुले। वाराह्यः प्राकारः पीठो विजयाय महीभुजाम्। एवं दानं सुखादापि विशेषो धातुपीठवत्। काष्ठपीठानां दानं पूर्ववदेव। "सम्पत्तिसुखदद्यर्थं च आरजनितो जयः। आरको रोगनाशाय सुखः शत्रुविनाशनः। सिद्धिः सर्वार्थसंसिद्ध्यै विजयाय च वैरिणाम्। शुभः स्नादभिषेके च सम्पदैरिनिवारिणी। वाराणो आरकः पीठः सुखसम्पत्तिकारकः। जयः स्नादभिषेके च शुभः शत्रुविनाशनः। सुखो रोगविनाशाय सिद्धिः सर्वार्थदायिका। सम्पदुच्चाटनविधौ विघ्नेशा पीठलक्षणम्। चान्द्रस्तु सुखः पीठो अभिषेके महीभुजाम्। जयः स्याद्रोगनाशाय शुभः सौख्यं प्रयच्छति। आरको यद्दृष्टद्यर्थसन्धे तु रतिदुस्मराः। यत्नतो निर्मितास्ते तु सार्वाल्लफलदायकाः। बालेयको जायको हि भूभुजामभिषेचने। पीठानशुष्कादीनामन्ये चन्दनवद्विदुः। बाकुलस्तु शुभः पीठो भूभुजामभिषेचने। जयो रोगविनाशाय सुखः सम्पत्तिकारकः। सिद्धिः सिद्धिप्रदा सम्पत् संग्रामे विजयप्रदा। आरको जरणाय स्यादिति भोजस्य सम्मतम्। एवं सुगन्धिकुसुमाः सुसारा ये च पादपाः। बाकुलेन समः कार्य एवं पीठस्य निर्णयः। ये शुष्ककाष्ठा दृश्यन्ते स्फटवो लघवोऽथ वा। गाम्भरीसदृशः पीठस्तेषां कार्यः सदा शुभः। खदिरस्य सुसारस्य रक्तसारस्य ये नगाः। तेषां पानसवत् पीठस्तथैव शुभदायकः। अथ निन्द्यपीठाः "विल्वो निन्दितः पीठो सौम्योत्थः सर्वधातुजः। शिलोत्थः शार्करो वर्ज्यः काष्ठेषु विशेषतः। काष्ठेषु च पीठेषु नासारा नातिसारिणः" तथा च "आम्रजम्बुकदम्बानामासनं वंशजासनम्" भोजराजः "शुष्कः पीठो गौरवाय सुखसौघवकारकः" पराशरस्तु "नाग्न्यश्मनौतिपत्त्यश्च नाशुष्कौषमाकृतिः। पीठः स्यात् सुखसम्पत्त्यै नातिदीर्घो न वामनः। ये चान्ये पीठसदृशा दृश्याः शिल्पिविनिर्मिताः। गुणान् दोषांश्च मानञ्च तेषां पीठवदादिशेत्। विद्याकौशेन

विधिना यः शुद्धं पीठमाचरेत् । तस्य लक्ष्मीः सदा वेश्म कदाचित्र विमुञ्चति । अज्ञानादथ वा मोहाद्दोषोऽन्यथा पीठमाचरेत् । एतानि तस्य नश्यन्ति लक्ष्मीरायुर्बलं कुलम् । २संज्ञायाम् पु० हरिवं० १६१अ० ३अक्षरभेदे पु० भा० द्रो० १७अ० । ५देवतामूर्त्तिस्थापनाधारे पिण्डिकायां स्त्री ङीप् स्वार्थे क पीठिका तत्रार्थे पिण्डिकाशब्दे दृश्यम् । ६देवतापूजनाङ्गे हृदयरूपे आधारे तत्र पूज्यपदार्थाः पूज्यदेवताश्च तन्त्रसारे उक्ता यथा "पीठपूजां ततः कुर्यात् आधारशक्तिपूर्वकम् । प्रकृतिं कमठञ्चैव शेषं पृथ्वीं तथैव च । सुधाम्बुधिं मणिद्वीपं चिन्तामणिगृहं तथा । कल्पवृक्षं पारिजातञ्च तन्मूले रत्नवेदिकाम्" । शारदायाम् "अनन्तं हृदये पद्मं तस्मिन् सूर्य्येन्दुपावकान् । एषु खस्वकलां न्यस्य नामाद्यक्षरपूर्वतः । सत्त्वादीन् त्रिगुणाञ्चैव यथैवात्म गुरूनपि । आत्मानमन्तरात्मानं परमात्मानमेव च । ज्ञानात्मानं प्रविन्यस्य न्यसेत् पीठमनुक्रमात्" ।

पीठमन्त्रवच्च देवताभेदे दृश्यानादयश्चक्तृकल्पोक्ताः शारदादौ दृश्याः । उक्तमन्त्रविशेषजपस्थानभेदे तत्रापि विष्णुचक्रेण विभक्तस्य सतीदेहस्य तत्तदङ्गभेदपतनात् तत्तत्स्थानस्य पूज्यता तत्र पीठानि चाङ्गप्रत्यङ्गभेदपतनं च तन्त्रचूडामणावुक्तं यथा

"एकपञ्चाशत पीठाः शक्तिभैरवदेवताः । अङ्गप्रत्यङ्गपातेन विष्णुचक्रक्षतेन च । ममाङ्ग वसुधे देवि ! स्थिताय त्वयि कथ्यते । अङ्गुरुयं शिवकुलायां भैरवो भीमलोचनः । कोट्टरीशा महादेव ! त्रिगुणा या दिगम्बरी ।। करवीरे त्रिनेत्रं मे देवी महिषमर्द्दिनी । क्रोधीशो भैरवस्तत्र २, सुनन्दायाञ्च नासिका । देवस्यम्बकनामा च सुनन्दा तत्र देवता ३। काश्मीरे कण्ठदेशश्च त्रिसन्ध्येश्वरभैरवः । महामाया भगवती सुधातीता वरप्रदा४ । ज्वालायुग्मां महालिङ्गा देव उन्मत्तभैरवः । अम्बिका सिद्धिदानाम्नी५, स्तनौ जालन्धरे मम । भीमाख्यो भैरवस्तत्र देवी त्रिपुरमालिनी६ । हृत्पीठं वैद्यनाथे वैद्यनाथस्तु भैरवः । देवता जयदुर्गाख्या७, नेपाले जातु ते शिव ! । कपाली भैरवः श्रीमान् महामाया च देवता८ । माल्यवे दन्तपङ्क्तौ मे देवी दामोदरी हर ! । अमरो भैरवस्तत्र सर्वसिद्धिप्रदायकः९ । उत्कले नाभिदेशस्तु विरजाक्षेत्रमुच्यते । विमला सा महादेवी जगत्स्तस्तु भैरवः१०। गण्डक्यां गण्डपातश्च तत्र सिद्धिर्न संशयः । तत्र या गण्डकी चण्डी चक्रपाणिस्तु भैरवः११ । वङ्गदायां वामगण्डस्थलाख्या च देवता । भीरुको भैरवस्तत्र सर्वसिद्धिप्रदायकः १२ । उड्डियान्यां दूरस्य जानुन्यपतिताम्बरः । भैरवः सिद्धिदः सा जाहेली परमेश्वरी१३ । चट्टले दक्षबाहुर्मे भैरवश्चन्द्रशेखरः । व्याघ्ररूपा भगवती भवानी तत्र देवता । विशेषतः कलियुगे यत्रास्ति चन्द्रशेखरः १४। त्रिपुरायां दक्षपादो देवी त्रिपुरसुन्दरी । भैरवस्त्रिपुरेशश्च सर्वाभीष्टप्रदायकः१५ । त्रिस्रोतायां वामपादो भ्रामरी भैरवेश्वरः१६। योनिपीठं कामगिरौ कामाख्या तत्र देवता । यत्राद्ये त्रियुगातीता रत्नपाषाणरूपिणी। यत्राद्ये माधवः साक्षादुमानन्दोऽथ भैरवः । सर्वदा विहरेद्देवी तत्र सन्निहितं संशयः । तत्र श्रीभैरवी देवी तत्र च क्षेत्रदेवता । प्रचण्डचण्डिका तत्र मातङ्गी त्रिपुरालिका । यत्रत्या कमला तत्र भुवनेशी सभूमिनी । एतानि नवपीठानि सन्ति नव भैरवाः१७। अङ्गुल्यग्रेण कण्ठस्य प्रयागे ललिता भवः१८ । जयन्त्यां वामजङ्घा च जयन्ती क्रमदीश्वरः १९। भूतधात्री महामाया भैरवः क्षीरकण्टकः । युगाद्या सा महामाया दक्षाङ्गुष्ठः पदो मम२० । मङ्गलीशः कालिपीठे दक्षपादाङ्गुली च मे । सर्वसिद्धिकरी देवी कालिका तत्र देवता २१ । भुवनेशी सिद्धिरूपा किरीटस्था किरीटनः । देवता विमलानाम्नी संवर्त्तो भैरवस्तथा२२ । वाराणस्यां विशालाक्षी देवता कालभैरवः । मणिकर्णीति विख्याता कर्णकल्पश्च मम स्तेः२३। कन्याश्रमे च मे पृष्ठं निमिषो भैरवस्तथा । सर्वाणी देवता तत्र २४, कुरुक्षेत्रे च गुल्फतः । स्थाणुनाम्ना च सावित्री२५ मणिवेदिकदेवतः । मणिबन्धे च गायत्री सर्वानन्दस्तु भैरवः२६। श्रीशैले च मम ग्रीवा महालक्ष्मीस्तु देवता । भैरवः संवरानन्दो देशेदेशे व्यवस्थितः २७। कांचीदेशे च कङ्कालो भैरवो रुरुनामकः । देवता देवगर्भाख्या२८स्थितस्यः कालमाधवे । भैरवश्चासिताङ्गश्च देवी काली सुसिद्धिदा२९ । इदं इदं नमस्कृत्य मन्त्रसिद्धिमवाप्नुयात् । शोणाख्ये नदसैनस्तु नर्मदाख्या सितम्बकम् ३० । रामगिरौ तथा माता शिवानी चण्डभैरवः ३१। इन्द्रवने केशजाले उमानाम्नी च देवता । भूतेशो भैरवस्तत्र सर्वसिद्धिप्रदायकः ३२। एकाराख्ये चट्टहासे देवी नारायणी शुभा ३३। अधोदन्ते महारुद्रो वाराही पक्षयोरुभे ३४। करतोयातटे

तत्र वामे वामनभैरवः। जयन्ती देवता तत्र ब्रह्मरूपा करोद्भवा३५। श्रीपर्वते दक्षगुल्फं तत्र श्रीसुन्दरी परा। सर्वसिद्धीश्वरी सर्वा सुनन्दानन्दभैरवः३६। कपालिनि भीमरूपा वामगुल्फविभागतः। भैरवश्च महादेव! सर्वानन्दः शुभप्रदः३७। उदरे च प्रभासे मे चन्द्रभागा वरूथिनी। वक्रतुण्डो भैरवोऽट्टहासो भैरवपर्वते। अवन्त्यान्तु महादेवी लम्बकर्णस्तु भैरवः३८। शिवके शाम्भरी देवी विक्रताख्या जलेस्थले। भैरवः सर्वसिद्धीश्वरस्तत्र सिद्धिरनुत्तमा ४०। गण्डोगोदावरीतीरे विश्वेशो विश्वमातृका। दण्डपाणिर्भैरवस्तु४१ वामगण्डे तु राकिणी। भैरवो वत्सनाभस्तु तत्र सिद्धिर्न संशयः४२। रत्नावल्यां दक्षस्कन्धे कुमारी भैरवः शिवः४३। मिथिलायां महादेवी वामस्कन्धे महोदरः४४। नलाटाट्टां नलापातो योगीशो भैरवस्तथा। तत्र सा कालिका देवी सर्वसिद्धिप्रदायिका४५। कर्णाटे चैव कर्णौ मे त्वभीरुर्नाम भैरवः। देवता जयदुर्गाख्या नानाभोगप्रदायिनी ४६। वक्रेश्वरे मनःपातो वक्रनाथस्तु भैरवः। नदी पापहरा तत्र देवी महिषमर्दिनी४७। वशोरे पाणिपद्मञ्च देवता वशोरेश्वरी। चण्डश्च भैरवस्तत्र यत्र सिद्धिमवाप्नुयात्४८। चट्टहासे ओष्ठपातो देवी सा फुल्लरा स्मृता। विश्वेशो भैरवस्तत्र सर्वाभीष्टप्रदायकः४९। द्वारपातो नन्दिपुरे भैरवो नन्दिकेश्वरः। नन्दिनी सा महादेवी तत्र सिद्धिर्न संशयः५०। मङ्गायां नूपुरश्चैव भैरवो राक्षसेश्वरः। इन्द्राणी देवता तत्र इन्द्रेणोपासिता पुरा५१। विराटदेशमध्ये तु पादाङ्गुलिनिपातनम्। भैरवस्त्वमृताख्यश्च देवी तत्राम्बिका स्मृता ५२। मागधे दक्षजङ्घा मे व्योमकेशस्तु भैरवः। सर्वानन्दकरी देवी सर्वानन्दफलप्रदा५३"। (पुस्तकान्तरपाठसंवादात् पीठदयाधिक्यं लिपिकरप्रमादात् पीठदयस्य निर्मूलता तत्र कवीनिर्मूलता तत्र शक्तुमोविवेचयितुम्)। एतावदुक्त्वा कथिता पुनः! पीठनाथाधिदेवताः। क्षेत्राधीशं विना देवि! पूजयेद्वाञ्छितं देवताम्। भैरवैर्हीयते सर्वं जपपूजादिसाधनम्। अज्ञात्वा भैरवं पीठे पीठशक्तिञ्च शङ्कर!। प्राणनाथ! न सिध्येत तु कल्पकोटिजपादिभिः"। अन्यान्यपि सिद्धपीठानि कुलिकातन्त्रे ७पटलोक्तानि यथा "शृणुष्व सावधानेन सिद्धपीठं पतिव्रते!। यस्मिन् साधनमात्रेण सर्वसिद्धीश्वरी भवेत्। काञ्चनी मधुपुरी काशी मोरञ्चवारिणी। चिञ्चुका च महापीठं तथा आलम्बरं पुनः। ज्वालामुखी महापीठं पीठं नगरसम्भवम्। रामगिरिर्महापीठं तथा गोदावरी प्रिये!। नेपालं कर्कशलञ्च महाकर्णं तथा प्रिये। अयोध्या च कुरुक्षेत्रं सिंहलाख्यं मनोरमम्। मणिपुरं हरीशैलं प्रयागञ्च तपोवनम्। बदरी च महापीठमम्बिका कर्दमालकम्। त्रिवेणी च महापीठं गङ्गासागरसङ्गमम्। नारिकेलञ्च विरजा उड्डीयानं महेश्वरी। कमला विमला चैव तथा माहेश्वती पुरी। वाराही त्रिपुरा चैव वाग्मती नीलवाहिनी। गोवर्द्धनो विन्ध्यगिरिः कामरूपं कलौ पुरे। घण्टाकर्णोऽक्षयवटो माधवश्च सुरेश्वरि!। क्षीरग्रामं वैद्यनाथं जानीयाद्वामलोचने!। कामरूपं महापीठं सर्वकामफलप्रदम्। कलौ श्रीफलकं देवि! कामरूपे जपः कृतः"। "पीठमङ्गलाहेवेशि! पीठानि शृणु भैरवि!। शृणु तानि महाप्राज्ञे! श्रेयस्यानानि यानि च। सिद्धिप्रदानि साधूनां महद्भिः सेवितानि च। पुष्करञ्च गयाक्षेत्रं अक्षयाक्षवटस्तथा। वराहपर्वतश्चैव तीर्थं श्रीमरकण्टकम्। नर्मदां यमुनां पिङ्गां गङ्गाद्वारं तथा प्रिये!। गङ्गासागरसङ्गञ्च कुशावर्त्तञ्च बिल्वकम्। श्रीशैलपर्वतश्चैव कलञ्जकुञ्जिके तथा। भृगुतुङ्गञ्च केदारं सर्वप्रियमहाचलम्। कपिला च सुगन्धा च शालग्रामीपुरुप्रियम्। कर्णतीर्थं महागङ्गा तथिकाश्रम एव च। कुमाराख्यप्रभासो च तथा धन्या सरस्वती। अगस्त्याश्रममिष्टं मे कन्याश्रममतःपरम्। कौशिकी सरयूश्चाथज्योतिःसरःपुरःसरम्। कालोदकं प्रियं श्रीमत् प्रियङ्गुत्तरमानसम्। मतङ्गाश्रमं सम्प्राप्तिं महाविष्णुपदं महत्। वैद्यनाथं महातीर्थं प्रियः कालञ्जरो गिरिः। रामोद्भेदं गङ्गोद्भेदं हरोद्भेदं महावनम्। भद्रेश्वरमहातीर्थं वक्त्रमण्डोद्भेदमेव च। जानीहि प्रियश्रेष्ठा च कावेरी कपिलोदका। सोमेश्वरं शुक्लतीर्थं कृष्णवेण्यासमेदकम्। पाटला च महाबोधिनगतीर्थं मदन्तिके। पुण्यं रामेश्वरं देवि! तथा मेघवनं हरेः। शैलेश्वरवनञ्चैव गोवर्द्धनमतःप्रियम्। हरिश्चन्द्रं पुरश्चन्द्रं ध्रुवं टङ्कमथ प्रिये। इन्द्रनीलं महानादं तथैव प्रियमैनकम्। पञ्चाप्सरं पञ्चवटी वटी वर्वटिका तथा। गङ्गाविल्वप्रसङ्गञ्च प्रियनादवटं तथा। गङ्गारामाश्रमञ्चैव तथैव क्षेममोक्षनम्। गौतमे हरतीर्थञ्च पशिष्टतीर्थमेव च। हारीतञ्च तथा देवि! ब्रह्मावर्त्तं शिवप्रियम्। कुशावर्त्तमभिश्रेष्ठं हंसतीर्थं

तथैव च। पिण्डारकवने ख्यातं हरिद्वारं तथैव च। तथैव बदरीतीर्थं रामतीर्थं तथैव च। जयन्ती विजयन्तञ्च सर्वकल्याणदं शिवे!। विजया शारदातीर्थं भद्रकालेश्वरं तथा। अच्युतीर्थं सुविख्यातं तथा देवि! शिवप्रियम्। कोटवती नदी चैव तीर्थमत्यमदं तथा। व्याघ्रसिंहसमाकीर्णं करवीरपुरं तथा। सप्तगोदावरं तीर्थं सिद्धाख्यं सर्वमोहनम्। किरीटसुन्दरं तीर्थं दक्षिणे तीर्थमुत्तमम्। विशालतीर्थं काल्याञ्च वनं वृन्दावनं तथा। ज्वालामुखी सिद्धलता च महातीर्थं गयेश्वरम्। जानीहि सर्वतीर्थानां श्रेष्ठस्थानानि सुन्दरि!। यत्र सन्निहिता नित्यं सर्वदेवा महर्षयः। पितरो योगिनश्चैव ये ये सिद्धिपरायणाः। यानि सिद्ध्यन्ति कर्माणि श्रद्धाभक्तियुतां प्रिये!। पुष्यकाले पठेद्यस्तु तत्तुल्यमक्षयं भवेत्। श्राद्धकाले पठेद्यस्तु तृप्तयेऽपि भक्तितः। अक्षयं तद्भवेत् सर्वं पितृणां परमं सुखम्। किंवा स्नाने पठेद्यस्तु सिद्धिर्भवति तत्क्षणात्। अथ वक्ष्ये महेशानि! यत्र यत्र देवता श्रृणु। यत्र ते यानि नामानि कथयिष्यामि तत् श्रृणु। मन्त्रोऽहं परमानन्दे तत्कथामृतवारिधौ। पुष्करे कमलाक्षी च गयायाञ्च गयेश्वरी। अक्षया वाक्षयवटेऽमरेशोऽमरकण्टके। वराहपर्वते च त्वं वराही धरणीप्रिया। नर्मदा नर्मदायाञ्च कालिन्दी यमुनाजले। शिवामृता च गङ्गाया मद्रा देहलिकाश्रमे। शारदा सरयूतीरे गोष्ठे च कनकेश्वरी। अप्रकाशा सदा देवी ज्योतिर्मण्डलसङ्गमे। शोणाक्षी शोणितीरे च कालो कालोदके तथा। महोदरी महातीर्थे नीला चोत्तरमानसे। मातङ्गिनी मतङ्गे च गुह्यार्चिर्विष्णुपादके। स्वर्गदा स्वर्गमार्गे च गोदावर्यां गयेश्वरी। विशुद्धिश्चैव गोमत्यां विपाशायां महाबला। शतद्रुं शतरूपा च चन्द्रभागा च तत्र वै। ऐरावत्याञ्च दैनाम सिद्धिदा सिद्धितीरके। दृषद्वत्यां च देवेशि दक्षिणा त्वं प्रकीर्तिता। कौशिकी तीर्थदा चैव त्वं मुक्ता तीर्थसङ्गमे। वाह्लदायामनन्ता त्वं कुरुक्षेत्रेऽरुणेश्वरा। तपस्विनी पुण्यतमा भारती भारताश्रमे। शुक्ला नैमिषारण्ये पाण्डरी च पाण्डुरानना। विशालायां विशालाक्षी सुरसुन्दरे शिवात्मिका। श्रद्धा कनखले तीर्थे शुद्धबुद्धिर्नगेश्वरी। सुवेणा सुमना गोरी मानसे च सरोवरे। नन्दापुरे महानन्दा ललिता ललितापुरे। ब्रह्माणी ब्रह्मशिरसि महापातकनाशिनी। पूर्णिमा चेन्दुमत्याञ्च विन्ध्योरन्तप्रिया सदा। जाह्नवी सङ्गमे तृप्तिः स्वधा च पितृतृप्तिदा। पुण्या बहुविनायाञ्च प्रभावां पापनाशिनी। अङ्गुष्ठहरणे चैव घोररूपा महोदरी। स्वर्गद्वारे महाकाली प्रबला च महाबले। भद्रा च भद्रकाली च भद्रेश्वरी शिवप्रिया। भद्रेश्वरे रमा विष्णुप्रिया विष्णुपदे तथा। दारुणा नर्मदोद्भेदे कावेर्यां कपिलेश्वरी। मेदिनी कृष्णवेण्यायां संभेदे सुखवासिनी। श्रद्धा च भद्रकाली च प्रभासे चेश्वरी तथा। महाबोधौ महाबुद्धिर्पाटले पाटलेश्वरी। सुवर्णा नागतीर्थे च नागेशी नागवन्दिता। मदनी च मदनी च प्रमदा च मदलिका। मेघस्वना मेघवासे विद्युत्सौदामनीच्छदा। रामेश्वरे महाबुद्धिर्गौरी चैलापुरे वसौ। प्रियामार्गके दुर्गा सुवेषा सुरसुन्दरी। कालावती महादेवी गोवर्द्धनेऽखिलात्मिका। सुमेश्वरी हरिश्चन्द्रे, पुरुषन्द्रे पुरेश्वरी। पृथूदके महावेगा मैनाकेऽखिलवर्द्धिनी। रुद्रकोले महाकाला रत्नवेगा सुशोभना। माहेश्वरी महानादे, महातेजा महाबले। पञ्चाप्सरसि सारङ्गा, पञ्चस्थां तपस्विनी। वटीशी वटिकायाञ्च सर्वदर्पा सुरङ्गिणी। सङ्गमे विन्ध्यगङ्गाख्या, विन्ध्ये श्रीविन्ध्यवासिनी। महानन्दा नन्दवटे, गङ्गाटाचले शिवा। काश्यांवर्त्ते महाश्यां त्वं, विसङ्गिर्ऋणमोचने। अट्टहासे च चामुण्डा, तन्त्रे श्रीगौतमेश्वरी। वेदमयी ब्रह्मविद्या वाशिष्ठे त्वमरुन्धती। हारीते हरिधात्री च ब्रह्मावर्त्ते ब्रजेश्वरी। गायत्री चैव सावित्री कुशावर्त्ते कुशप्रिया। हंसेश्वरी महातीर्थे परहंसेश्वरेश्वरी। पिण्डारकवने धन्या सुरसा सुखदामिनी। नारायणी वैष्णवी च गङ्गाद्वारे विसङ्गिदा। श्रीविद्या बदरीतीर्थे, रामतीर्थे महाद्युतिः। जयन्ती च जयन्ते त्वं, विजयन्तेऽपराजिता। विजया च महाबुद्धिः, सारदायाञ्च सारदा। सुभद्रे भद्रदा, भद्रा भद्रकालेश्वरे तथा। महाभद्रा महाकाली ह्यच्युतीर्थे गयेश्वरी। वेदवेदा वेदमाता च विदेशे वेदसम्भवे। युवत्याञ्च महाविद्या, महानद्यां महोदया। चण्डा च त्रिपदे चैव शालग्रामे बलिप्रिया। माहदेये जगन्माता, करवीरपुरे वसौ। माधवे रङ्गिणी रामा परमा परमेश्वरी। सप्तगोदावरे तीर्थे देवमातर्यखिलेश्वरी। अयोध्यायां भवानी च जयदा जयमङ्गला। माधवी मथुरायाञ्च देवकी यादवेश्वरी। वृन्दागोपेश्वरी राधा रासवृन्दावने रमा!।

कात्यायनी महामाया भद्रकाली कलावती। चन्द्रभागा महायोगा महायोगिन्यधीश्वरी। वज्रेश्वरी यशोदेति वज्रश्रोणीकुलेश्वरी। कान्यां कनककाञ्ची स्यादवन्त्यामतिशोभनी। विद्या विद्यापुरे चैव विमला नीलपर्वते। रामेश्वरी सेतुबन्धे, विमला पुरुषोत्तमे। विरजा नागपुर्यान्तु भद्रावे भद्रकर्णिका। तमोलिप्ते तमोघ्नी च स्याद्वा सागरसङ्गमे। कुलश्रीर्वटवृक्षे च माधवी माधवप्रिया। मङ्गला मङ्गले कोटे, राढे मङ्गलचण्डिका। ज्वालामुखी शिवापीठे मन्दरे भुवनेश्वरी। काश्मीरपीठे गुह्यकाली, किरीटे च महेश्वरी। किरीटेश्वरी महादेवी, सिद्धाख्ये सिद्धयोगिनी। साक्षात् सर्वत्र भद्राणाम भद्राणां कुतोऽपि न। यथान्यत्संप्रवक्ष्यामि सिद्धस्थानानि सुन्दरि!। सर्वपापविनाशार्थं सर्वसिद्धिप्रदं नृणाम्। निर्मितानि शिवेनेह सिद्धस्थानानि यानि च। श्रुत्वा मनसि भाव्यानि प्रकाश्यान्यधिकारिषु। अमरेश महापीठे कृतशृङ्गारसंज्ञकः। तत्र दुर्गोदयं नाम चण्डिका च महेश्वरी। प्रभासे सोमनाथोऽसौ देवी च पुष्करेक्षणा। देवदेवाधिपः शम्भुर्नैमिषे च महेश्वरः। तत्र लिङ्गा च देवी च शिवाभी सिद्धधारिणी। पुष्करे च राजगन्धिः पुरुहूता महेश्वरी। श्रीपर्वते शिवा नाम्ना शङ्करस्त्रिपुरान्तकः। माधवी भद्रुरी तत्र भद्राणामखिलार्थदा। जयेश्वरे महास्थाने शङ्करी च त्रिशूलिनी। त्रिशूली शङ्करस्तत्र सर्वपापविमोचकः। आम्रातकेश्वरे क्षेत्रे क्षेमाख्या परमेश्वरी। गण्डकीक्षेत्रे महानाख्या शिवो वः प्रथितामहः। कुरुक्षेत्रे शिवःस्थाणुः शिवा स्थाणुप्रिया परा। दक्षनाभे स्वयम्भूश्च देवी स्वायम्भुवा मता। उमाः कनखले प्रोक्ताः शिवोऽग्ने शिवदूतिका। विमलेश्वरे विश्वयमुरिता विश्वप्रिया सदा। कुब्जाग्रे महानन्दो महानन्दा महेश्वरी। महालक्ष्मी महेन्द्रे च पार्वती च महालया। भीमेश्वरो भीमपीठे शिवा भीमेश्वरी तथा। वस्त्रापदे भवो नाम भवानी भुवनेश्वरी! अद्रिकूटे महादेवो विशालाक्षी शिवा परा। महामाये हरश्रेष्ठो महाभागा शिवा तथा। महावक्त्रे लोकर्णे शिवमुद्रा च चर्चिका। भद्रकर्णे महादेवो भद्रा च कर्णिका तथा। सुपार्श्वे सहस्राक्षः सत्यता परमेश्वरी। स्थाणुसंज्ञे शिवः स्थाणुरीश्वरा श्रीधरा शिवा। कायावरोहे महास्थाने कमलाक्षो महेश्वरः। कमलाक्षी महेशानी सकलार्थप्रदायिनी। हालासा तु कपर्दी च प्रभासा च महेश्वरी। अर्हरेता करवीरे च सन्ध्याख्या परमेश्वरी। शालीटे च महाकोटः शिवा च सुखदेश्वरी। मातृतेश्वरपीठे च करवीरार्च्चनेश्वरा। श्रीमद्धाम्रपुरे साक्षाद्धरनामा सभापतिः। शिवः सभापतिर्नाम यत्र तत्रेति शङ्करः। आत्मानन्दमहानादः पूर्णानन्दमहार्णवम्। यत्रैनं यत्र देवेशं देवेशी परिपश्यति। तत्र चापि महादेवो भक्तानां वरदो भवेत्। यत्रैनं यत्र सर्वेशं वीक्ष्य लोको विमुच्यते। पुण्यस्थानेषु सर्वेषु स्थानमेतन्मनोरमम्। यद्यत्कर्माणि सर्वाणि सफलान्यपि भवन्ति वै। तस्मिन् महोत्तमे स्थाने शिवशङ्कराख्यमद्भुतम्। तडागमस्ति तत्तीरे दक्षिणे त्रैयतीश्वरः। तटाकेऽस्मिन् वसन् स्नात्वा सभानाथं सभीक्ष्य च। अष्टोत्तरसहस्रन्तु जपेच्छ्रद्धासमन्वितः। यानि ते कथितान्यत्र सदा तिष्ठन्ति देवताः। शिवतः सिद्धगन्धर्वा सिद्धयः सर्वसिद्धिदाः। यत्र दत्तं हुतं जप्तं ज्ञानयज्ञप्रपुण्यदम्। यद्यत्प्रकीर्त्तितं नाम तैरेव परिपूज्य च। प्रणवादिहृदन्तेन नमतेऽभीष्टसिद्धिदम्। भोजयेद्ब्राह्मणान् योऽत्र यथेष्टं फलमश्नुते। इह नानासुखं भुक्त्वा हरगौरीपुरं व्रजेत्। शोकदुःखविनाशोऽयं कल्पानिधिरीश्वरः। निर्ममे सर्वसम्पत्त्यै पुण्यक्षेत्राणि भूतले। यत्काले पुण्यमुद्दानामनेकपुण्यसाधनैः। आत्मिकानां भवेदत्र निवासः साधनं प्रति। तस्माद्यत्नेन कर्त्तव्यमत्र साधनसत्तमैः"।

कालिकापु० १८अ० एकपञ्चाशत्पीठोत्पत्तिर्यथा।

पीठकेलि पु० पीठमर्दे नायकसहायभेदे त्रिका०।

पीठगात्र न० वेल्लव्रताङ्गाष्टलक्षमन्त्रावयवभेदे व्रत०त०।

पीठचक्र न० पीठ इव चक्रमस्य। शकटादौ "पीठचक्रेण गोयुक्तेनेत्येके" आश्व०श्रौ० ४।२।६ "गोयुक्तेन पीठचक्रेण शकटादिना" नारा०।

पीठन्यास पु०पीठे न्यासः। पीठदेवतानां आधारशक्तिप्रकृत्यादीनां प्रणवादिनमोऽन्तेन हृदये न्यासभेदे तन्त्रसारः

पीठभू स्त्री प्राकारसमीपस्थे भूभागे वप्रे हेमच०।

पीठमर्द पु० नायकसहायभेदे "दूरावर्त्तिनि स्यात् तस्य प्रासङ्गिकेतिवृत्ते तु। किञ्चित्तद्भूपकीनः सहाय एवास्य पीठमर्दाख्यः"। "तस्य नायकस्य बहुव्यापिनि प्रबन्धागतेतिवृत्ते ऽनन्तरोक्तैर्नायकसामान्यगुणैः किञ्चिदूनः पीठमर्दनामा सहायो भवति। यथा राम-

चन्द्रादीनां सुपीवादयः" सार्वधातुकार्धधातौ उक्तम्। पीठसर्प त्रि॰पीठे सर्पति रूप-क्विप्। खञ्जे भा॰व॰२५अ॰। विनि पीठसर्पिन् तत्रार्थे हारा॰।

पीड वधे विलोडने च चु॰उभ॰सक॰सेट्। पीडयति ते अदित् अपिपीडत् त। पीडा पीडनम्। धान्यादेर्मर्दने च। आ+भूषणे सक॰। आपीडयति आपीडा।

अवादिपूर्वकस्तु तत्तदुपसर्गयोगार्थयुक्ते विलोडने।

पीडन न॰ पीड+भावे ल्युट्। १दुःखोत्पादने २धान्यादीनां मर्दने (माडा) (टेपा) ३व्यापारभेदे "गर्भोऽभिघातविषाशनपीडनाद्यैः पक्वं द्रुमादिव फलं पतति स्वयेन" माधवकरः।

पीडा स्त्री पीड-भावे भिदा॰ अङ्। १व्यथायां २दुःखे च ३रुजायां ४शिरोमालायां ५धरणद्वये च मेदि॰।

पीडित त्रि॰पीड-क्त। १व्यथिते २मर्दिते ३स्त्रीणां करणभेदे मेदि॰"सङ्ख्यार्थाधिका मन्त्रा दण्डकाः पीडिताह्वयाः" तन्त्रसारोक्ते ४मन्त्रभेदे पु॰ भावे क्त। ५पीडायां न॰।

पीत त्रि॰पा-कर्मणि क्त। १पानकर्मणि भावे क्त। २पाने न॰ पिबति वर्णान्तरं पा-अण्वा॰ कर्त्तरि क्त। ३वर्णभेदे पु॰ ४तद्वति त्रि॰ अमरः। ५हरितालेन॰ मेदि॰। पीतं पानमस्त्यस्य अच्। ६पानकर्त्तरि त्रि॰ "वनाय पीत प्रतिवद्धवत्सामृषभः। काव्ये वर्णनीयपीतवर्णद्रव्यादि कविकल्पलतायामुक्तानि यथा "पीतानि ब्रह्मा जीवेन्द्र१ गरुडे४धरण५गजटाः६। गौरी७ द्वापरट गोभूस्व८ मधु॰ पीररसा॥ रजः १२। हरिद्रा११ रोचना१४ रीति१५गन्धके१६ दीप१७ चम्पके१८। किञ्जल्क१९ वल्कले२० शालि२१ हरिताल२२ मनःशिलाः २३। कर्णिकार२४ चक्रवाक२५ वानरी२६ शारिकासक्थम्२७। केशरांशुक२८ मण्डूक२९ सराग३० कनकादयः३१।

पीतक त्रि॰ पीत+स्वार्थे क। १पीतशब्दार्थे संज्ञायां कन्। २हरितालेऽमरः ३कुसुम्भे जटाधरः। ४अक्षरभेदे ५पद्मकाष्ठे ६हरीतक्यां पित्तले ७माक्षिके ८पीतचन्दने न॰ राजनि॰ ९नन्द्यावर्त्ते १०पीतशाले च पु॰ रत्नमाला। ११श्योनाकभेदे १२हरिद्रुवृक्षे १३अशोकवृक्षे च पु॰ राजनि॰। पीतेन हरितालेन रक्तं "तेन रक्तं रागात्" पा॰ इत्यधिकारे "पीतात् कन्" वार्त्ति॰कन्। १४हरितालेन रक्ते त्रि॰। १५अव्यक्तरागे संज्ञाभेदे बीजगणितम्। अव्यक्तशब्दे दृश्यम्।

पीतकदली स्त्री नित्यकर्म॰। स्वर्णकदल्याम् (चंपाकेला) राजनि॰।

पीतकद्रुम पु॰ नित्यकर्म॰। हरिद्रुवृक्षे राजनि॰।

पीतकन्द न॰ पीतः कन्दो यस्य। गर्जरे (गाँजर) राजनि॰

पीतकरवीरक पु॰ नित्यकर्म॰ स्वार्थे क। पीतवर्णकरवीरवृक्षे राजनि॰।

पीतकावेर न॰कुत्सितं वेरं कावेरं पीतं कावेरं यस्मात् यस्य वा। कुत्सितार्थे पीतं कुर्वति १कुङ्कुमे २पित्तले च मेदि॰।

पीतकाष्ठ न॰नित्यकर्म॰। पीतचन्दने पीतागुरुणि राजनि॰।

पीतकाला स्त्री पीता चासौ च कालाचा। आवर्त्तकलतायां राजनि॰। [चैव पीतकुष्ठं प्रजायते" भाता॰।

पीतकुष्ठ न॰ नित्यकर्म॰। पीतवर्णकुष्ठरोगे "भगिनी गमने

पीतगन्ध न॰पीतमयश्च गन्धं गन्धयुक्तम्। पीतचन्दने राजनि॰

पीतघोषा स्त्री नित्यकर्म॰। पीतपुष्पवत्यां घोषातक्याम् राजनि॰। [राजनि॰।

पीतचन्दन न॰ नित्यकर्म॰। काश्मेयजेतिप्रसिद्धे चन्दनभेदे

पीतचम्पक पु॰ पीतः चम्पक इव। प्रदीपे जटा॰।

पीततण्डुल पु॰पीततण्डुलो यस्य। (काकुनी) १धान्यभेदे हेमच॰। २क्षीरिकावृक्षे स्त्री टाप्। राजनि॰। [ङीष्।

पीततुण्ड पु॰पीतं तुण्डमस्य। कारण्डवपक्षिणि त्रिका॰ स्त्रियां

पीततैला स्त्री पीतं तैलं यस्याः। १ज्योतिष्मतीलतायां जटा॰ २सहाज्योतिष्मतीलतायां राजनि॰। पीतं तैलं येन राजद॰वा परनि॰। पीततैल तैलपीत वा तैलपायिनि त्रि॰

पीतदारु न॰ नित्यकर्म॰। १धरणद्वये रत्नमाला २देवदारुणि २हरिद्रुवृक्षे च राजनि॰। तस्य विकारः रजतादि॰ अञ्। पैतदारव तद्विकारे त्रि॰ स्त्रियां ङीप्।

पीतदुग्धा स्त्री पीतं दुग्धं यस्याः। इक्षिपरिवर्त्तनेन इक्षिरूपेण यस्या दुग्धवत्तमर्थेन पीयते तस्याम् गवि खाण्डितगव्यां धेनुष्यायां हेमच॰।

पीतद्रु पु॰नित्यकर्म॰। १धरणद्वये २दारुहरिद्रायाञ्च अमरः।

पीतन न॰ पीतं करोति पीत-क्विप्-ल्यु। १कुङ्कुमे २हरितालेऽपि दारुणि च मेदि॰। ३अङ्गे ४आम्रातके च पु॰ मेदि॰ स्वार्थे क। आम्रातके (आमडा) पु॰ राजनि॰।

पीतनील पु॰ "वर्णो वर्णेन" पा॰ कर्म॰। १नीलपीतमिश्रिते हरिद्वर्णे हेमच॰। २तद्वति त्रि॰। [अल्पच॰।

पीतपर्णी स्त्री पीतं पर्णं यस्याः ङीप्। (विलिटी)लतायाम्

पीतपायि पु॰ पीतः पायिरस्य। रोगभेदेन पीतवर्णकुष्ठयुक्ते "मार्जारे निकृते चैव पीतपायिः प्रजायते" भाता॰

पीतपादा स्त्री पीतौ पादौ यस्याः । शारिकाभेदे हेमच० ।
पीतपुष्प त्रि० पीतं पुष्पमस्य । १पीतवर्णपुष्पयुक्ते २कर्णिकारवृक्षे पु० शब्दच० । ३चम्पकवृक्षे पु० राजनि० । ४पीतशिखिष्टायां ५पिण्डीतकभेदे पु० रत्नमाला । पीतं पुष्पमस्याः अच् टाप् । ६इन्द्रवारुण्यां ७अम्बष्ठरिकालुब्धे टबाडक्यां च स्त्री राजनि० । पीतं पुष्पं यस्याः जातित्वात् ङीष् । ८अम्बष्ठपुष्प्यां १०कट्वेड्यां ११महाकोशातक्यां १२वसुपुष्पाञ्च स्त्री राजनि० ।
पीतप्रसव पु० पीतः प्रसवः पुष्पमस्य । पीतकरवीरे राजनि०
पीतफल(क) पु० पीतं फलं यस्य वा कप् । १आखोटवृक्षे राजनि० २कर्मारवृक्षे त्रिका० । [त्रिका०
पीतबालुका स्त्री पीता बालुकेव चूर्णकात् । हरिद्रायाम्
पीतबी(बी)जा स्त्री पीतं बी(बी)जमस्याः । मेथिकायां राजनि० । [युक्ते अङ्गराजभेदे राजनि० ।
पीतभृङ्गराज पु० कर्म० । (पीलाभेंगरिया) ख्याते पीतवर्ण०
पीतमणि पु० नित्यकर्म० । पुष्परागमणौ राजनि० ।
पीतमस्तक पु० पीतं मस्तकं यस्य । खगभेदे मेदि० ।
पीतमाक्षिक न० नित्यकर्म० । माक्षिके राजनि० ।
पीतमुञ्ज पु० कर्म० । (सोनामुञ्ज) मुञ्जभेदे हेमच० ।
पीतमूलक न०पीतं मूलमस्य कप् । (गाँजर) गर्जरे राजनि०
पीतयूथी स्त्री नित्यकर्म० । स्वर्णयूथ्यां राजनि० ।
पीतरक्त न० "वर्णो वर्णेन" पा० कर्म० । १रक्तवर्णे अथच पीतवर्णे च पीतेन रक्तं ततरागम् । २पुष्परागमणौ न० राजनि० ।
पीतराग न० पीतो रागो वर्णो यस्य । १किञ्जल्के २शिरीषे च कर्म० । ३पीतवर्णे पु० ततीति त्रि० ।
पीतरोहिणी स्त्री पीता सती रोहति रुह-णिनि ङीप् । काञ्चन्याम् भावप्र० । [द्युते त्रि० ।
पीतल पु०पीतं वर्णान्तरं याति या-क । १पीतवर्णे २तपीतलक न०पीतेन वर्णेन जायते कै-क । पित्तले राजनि०
पीतलोह न०नित्यकर्म० पित्तले राजनि० [द्राभवस्त्रयुते त्रि०
पीतवासस् पु०पीतं वासो यस्य । १श्रीकृष्णे हला० २हरिपीतवृक्ष पु० नित्यकर्म० । श्लोनाकभेदे राजनि० ।
पीतशाल पु० पीतं फलं शलति याति शल-अच् उपस० । आसनवृक्षे (पियासाल) अमरः ।
पीतसार न० पीतं सारं यस्य । १पीतवर्णचन्दनकाष्ठे मलयजे शब्दच० २हरिचन्दने च ३गोमेदमणौ पु०मेदि० ४वटाडवृक्षे जटा० ५तरक्षौ बीजके च पु० राजनि० कप् । पीतसारक निम्बे शब्दच० । [शब्दच० ।
पीतसारि न० पीतं सारयति सृ-णिच्-इन् । श्वेतोऽङ्कने
पीतसालक पु० कर्म० संज्ञायां कन् । (पियासाल) पियालवृक्षे अमरः । [वृक्षभेदे शब्दार्थकल्प० ।
पीतस्कन्ध पु० पीतः स्कन्धोऽस्य । हरिद्राभस्कन्धयुक्ते
पीतस्फटिक पु० नित्यकर्म० । पुष्परागमणौ राजनि० ।
पीतहरित पु० "वर्णो वर्णेन" पा० १पीतवर्णे अथच हरिद्वर्णे २ततद्युते त्रि० हेमच० । [द्राभमात्रे त्रि० स्त्रियां ङीष् ।
पीताङ्ग पु०पीतमङ्गमस्य । १शङ्खनाकभेदे राजनि० । २हरिपीताब्धि पु० पीतोऽब्धिः समूहो यत्र । अष्टसमुद्रेषु हेमच० तत्कथा भा०व० १०५अ० दृश्या ।
पीताम्बर पु०पीतमम्बरं यस्य । १श्रीकृष्णे अमरः २शैलूषे नटे च मेदि० ३हरिद्राभवस्त्रयुक्ते त्रि०कर्म० । ४पीतवसने न० । [वर्णयुक्ते २ततद्युति त्रि० ।
पीतारुण पु० "वर्णो वर्णेन" पा०कर्म० । १पीतरक्तमिश्रित०
पीताश्मन् पु० नित्यकर्म० । पुष्परागमणौ राजनि० ।
पीति पु० पा-क्तिच् । १घोटके अमरः पा-भावे क्तिन् । २पाने ३गतौ च करणे क्तिन् । ४गुरुतायाम् मेदि० ।
पीतिका स्त्री पीतैव स्वार्थे क अतइत्त्वम् । १दारुहरिद्रायां रत्नमाला २स्वर्णयूथ्यां अटा० ।
पीतिन् स्त्री पीतमनेन इतादित्वादिनि । घोटके रायमुकुट०
पीतु पु०पा-पाने पा-रक्षणे वा तन् किच्च । १वह्नौ २दिवाकरे च उज्ज्वलद० सूर्य्येण रश्मिभिर्जलस्य पानात् वह्निना स्वदाहसामायोयुक्तजलस्य पानात्तथात्वम् । २युवपतौ संक्षिप्तसारः ।
पीतुदारु पु० पीतुरिव अस्तितलं सूर्य्यांशं वा दारु यस्य । १उदुम्बरे शत०ब्रा० ३।५।२।१५ माधवः । २देवदारुणि काला०औ० २४।३।१२ कर्कः । [स्थिरीभूते ।
पीत्वास्थिरक त्रि० पीत्वा स्थिरः भवू० स० । पानोत्तरं
पीथ न० पा-पाने कर्मणि थक् । १क्षीरे २जले च १सूर्य्ये ४वह्नौ च पु० उज्ज्वलद० ।
पीथि पु० पीति+पृषो० । घोटके शब्दरत्नावली
पीन त्रि०प्याय-क्त संप्रसारणे दीर्घः । १स्थूले २दृढे बलवति च अमरः । भावे क्त । ३स्थूलतायां न० । पीनसादूरदेशादि अञ्गादि०र । पीनर पीनस सन्निकटदेशादौ त्रि० ।
पीनस पु० पीनं पीनतां स्थितिं सो-क । १नासिकारोगभेदे प्रतिश्याये अमरः तद्रोगस्य निदानादि माधवकरोक्तं यथा "आनह्यते यस्य विमुच्यते च प्रक्लिद्यते धूप्यति चैव

भाषा। न वेत्ति यो मन्त्ररसांश्च जन्तुर्दुष्टं व्यवस्येत् खलु पीनसेन। तत्रानिलश्लेष्मभवं विकारं ब्रूयात् प्रतिश्यायसमानलिङ्गम्"। आमपीनसलक्षणं यथा "शिरोगुरुत्वमरुचिर्नासास्रावस्तनुस्वरः। घ्राणः क्षीयति चाभीक्ष्णमामपीनसलक्षणम्"। पक्वपीनसलक्षणं यथा "आमलिङ्गान्वितः श्लेष्मा घनः खेषु निमज्जति। स्वरबर्णविशुद्धिश्च पक्वपीनसलक्षणम्"। २कर्कट्यां स्त्री राजनि० गौरा० ङीष्। [धस्त्रावां नवि अमरः।

पीनोध्नी स्त्री पीनमूधोऽस्याः ङीष् अनङादेशः। पीवरो

पीपर याच्ञायां भ्वा०अक०पर०सेट्। पीपरति निघण्टुः।

पीपरि इ०अपि+पृ-इन् अक्षोपः दीर्घः। क्षुरप्रभेदे राजनि०

पीय प्रीचने भौ०पर० सक० सेट्। पीयति अपीपीत् पिपीय। अयं हिंसायां निरु० ४।२५

पीयत्नु त्रि० पीय-हिंसायां बा० कत्नु। हिंसाशीले यजौ ऋ० ८।२।१५ [१रवौ ४भूके च मेदि०।

पीयु इ० पा-पाने कु नि०। १काले २काके च उज्ज्वल०।

पीयूक्षा स्त्री वृक्षभेदे ततः चतुर्थ्यां क्षाया० ढक्। पीयूक्षिक तत्सन्निकृष्टदेशादौ त्रि०, तस्याः विकारः तालाo अण्। पैयूक्ष तद्विकारे त्रि०। एतत्परस्य वनस्य फलं पीयूक्षावत्फलम्।

पीयूष न०पीय-ऊषन्। देवानां पेयभेदे १अमृते। नवप्रसूतायाः गोः आद्यप्रस्रावभवे २दुग्धे च अमरः। तत्पेयूषमपि

पीयूषमहस् पु०पीयूषमिव आह्लादकं महो यस्य। सुधाकरे १चन्द्रे शब्दरत्ना० २कर्पूरे च। पीयूषरुचिप्रभृतयोऽत्र।

पीयूषवर्ष पु० पीयूषं वर्षति वृष्टिद्वारा हन्ति-अण् उप०स०। १चन्द्रे २कर्पूरे ३चन्द्रालोकालङ्कारपन्यासभेदे च

पील रोधे भ्वा०पर०सक०सेट्। पीलति अपीलीत् पिपील।

पीलक त्रि०पील-स्वुल्। १रोधके २पिपीलिकायां हेमच०।

पीला स्त्री पीलनाच्छ्रां क्षियाम् तस्या अपत्यं "पीलाया वा" पा०अण् पक्षे "ह्रस्वः" इति ढक्। पैल पैलेय तदपत्ये पुंस्त्री०।

पीलु इ० पील-उ। १परमाणौ पीलुपाकः इति वैशेषिकादयः। पीलुपाकप्रकारः कणादसूत्रोपस्कारटीकायां ७।१ आह्निके दृश्यः औलुक्यशब्दे सर्वदर्शनसंग्रहोक्तं १५८७ पृ० दर्शितम्। २गजे ३क्षत्रियवरुणे ४तालवृक्षे ५कुसुमे च मेदि० ६वरे ७क्षमौ धरणिः। कोङ्कणदेशख्याते दन्तुरफलवृक्षे राजनि०। तस्य गुणाश्च राजनि० उक्ता यथा "पीलुः स्वेद्य वातगुल्मनाशनः पित्तदो मतः। यत् स्वादु तिक्तं तद्योज्यं त्रिदोषहरणं फलम्"। तत्फलमस्य तस्य लुक्। इतत्फले न०।

पीलुक पु० पीलुरिव कायति कै-क। क्षुद्रभेदे हेमच० स च द्वीन्द्रियः "क्षुद्रपीलुकलूताद्याः क्षुद्रद्विचतुरिन्द्रियाः" हेमच०।

पीलुकृष न० पीलूनां पाकः पीलादि० कृषच्। पीलुपाके तत्क्षेदम् तत्सा०अञ्। पैलुकृष तत्सम्बन्धिनि त्रि०।

पीलुनी स्त्री पील-उन गौरा० ङीष्। मूर्वायाम् रत्नमा०।

पीलुपत्र पु० पीलुयुक्तं क्षुद्रकुटितं पत्रं यस्य। शोरटालतायां राजनि०।

पीलुपर्णी स्त्री पीलुकुटितानि पर्णान्यस्याः ङीष्। १मूर्वायाम् २विम्बिकायाम् ३ओषधिभेदे च मेदि०।

पीलुमूल न०६त०। १पीलोर्मूले २शतमूल्यां स्त्री रत्नमाला ३श्यामलतायां भावप्र० ४तरुणायां गवि च संक्षिप्तसारः। ५अश्वगन्धायां ६शतावर्यां च स्त्री टाप् राजनि०। तत्र दीव्यते व्युट्-अण्। पैलुमूल। तत्र देये। "तेनैकदिक्" पा० अधिकारे तसिः। पीलुमूलतस् पीलुमूलैकदिशि अव्य०।

पीलुवह त्रि०पीलुं वहति वह-अच् पीलादीनां पर्युदासात् "दृको वहे" पा० न दीर्घः। पीलुवाहिनि जलादौ।

पीलुसादि पु०पाके कृषच्प्रत्ययनिमित्ते शब्दगणे स च पा० ग०स्त्र०उक्तो यथा "पीलु कर्कन्धू प्रमी करीर कुवल बदर अश्वत्थ खदिर"।

पीव स्थौल्ये भ्वा०पर०अक०सेट्। पीवति अपीवीत् पिपीव।

पीवन् त्रि० पीव-कनिप् सम्प्र०दीर्घः। १स्थूले अमरः। २बलवति त्रि० शब्दार्थौ पु० संक्षिप्तसारः।

पीवर त्रि०पीव-अरच् सम्प्र० दीर्घः। १स्थूले उपचितावयवयुक्ते (मोटा) अमरः स्त्रियां ङीष्। तामसमन्वन्तरे २सप्तर्षिभेदे पु० मार्क०पु० ७३अ०। [इत्यादि।

पीवस् त्रि० पीव-स्थौल्ये असुन्। स्थूले। पीवान् प्रीवांसौ

पीवा स्त्री पी-पाने बा० व। जले संक्षिप्तसारः।

पीवोपवसन त्रि० पीवसः उपवसनं अधीयस्थितिरस्य ब्रुवो० समासः। स्थूले यजु० २१।४१ वेददीपः।

पुंयोग पु० ६त०। पुरुषयोगे "स्त्रीपुंयोगमाशंसुः"।

पुंराशि पु० कर्म०। विषमे राशौ मेषमिथुनसिंहादौ।

पुंलिङ्ग न० ६त०। १पुरुषचिह्ने शिश्ने। पुंस इव लिङ्गमस्य। २पुंस्त्वबोधके शब्दभेदे पु०।

पुंवत् अव्य०पुंसइव वर्तते। पुंसा तुल्ये। तस्य भावः। पुंवद्भाव पुंलिङ्गस्य शब्दस्येव भावे पुंसइव रूपे।

पुंवत्स पु० कर्म०। १पुरुषरूपे वत्से। पुमान् वत्सो यस्याः। २पुंरूपवत्सयुक्तायां गव्यादौ स्त्री काल्या० श्रौ०३।१४।१

पुंश्चल पु०पुमानिव चरति चल-क। ऊजून्दरे (चुँहा)शब्दमा०

पुंश्चली स्त्री पुंसो भर्तुः सकाशात् चलति पुरुषान्तरं गच्छति चल गौरा० ङीष् पुंसोन्यलोपे चमपरे खयिश्चस्य "संयोगानाम् सः" वा० सः च तत्सम्। १असत्यां स्त्रियाम् अमरः। उपचारात् २प्रारदारिकपुरुषेऽपि। "अरेरे-यायुर्नश्यतिर्विच्छिन्नाभिव पुंश्चलाः" गरुड़पु० ६६अ०। पुंश्चलीनिन्दा ब्रह्मवै०पु० श्रीकृष्णजन्मख० २१।२४।१२अ० यथा "अहो कोवेद भुवने दुर्ज्ञेयं पुंश्चलीमनः। पुंश्चल्यां को हि विश्वस्तो विधिना स विडम्बितः। बहिश्चलत्व यशसा धर्मेण सकुलेन च। वाञ्छितं नूतनं प्राप्य विस्मरति पुरातनम्। सदा सकर्मणाध्या सा को वा तस्याः प्रियोऽप्रियः। दैवे कर्मणि पैत्रे च पुत्रे बन्धौ च भर्तरि। दारुणं पुंश्चलीचित्तं सदा प्रहार कर्मणि। प्राप्याधिकं रतिञ्च साऽस्मृतदृष्ट्वा हि पुंश्चली। रत्नप्रदं रत्नविज्ञं विषदृष्ट्वा हि पश्यति। सर्वेषां खलमस्त्रेव पुंश्चलीनां न कुत्रचित्। दारुणा पुंश्चली जातिर्नरजातिभ्य एव च। निष्कृतिः कर्मभोगान्ते सर्वेषामस्ति निश्चितम्। न पुंश्चलीनां विप्रेन्द्र! यावच्चन्द्रदिवाकरौ। अन्यासां कामिनीनाञ्च कीर्तिं कृन्तञ्च वा दया। सा नास्ति पुंश्चलीनान्तु कान्तं कृन्तुं पुरातनम्। रतिञ्च नूतनं प्राप्य विस्मरत्यं पुरातनम्। कान्तं दृष्ट्वा छिनत्त्येव सोपायेनावलीलया। पृथिव्यां यानि पापानि पुंश्चलीष्वेव भारते। तिष्ठन्ति ताभ्यो न पराः पापिष्ठाः सन्ति कोचन। पुंश्चलीपरिपक्वान्नं सर्वपातकमिश्रितम्। दैवे कर्मणि पैत्रे च देवं न च तया जलम्। अन्नं विष्ठा पयो मूत्रं पुंश्चलीनाञ्च निश्चितम्। दत्त्वा पितृभ्यो देवेभ्यो भुक्त्वा च नरकं व्रजेत्। अतएवं कालकल्पे पचत्येव सदारके। घोरान्धकारे क्रमयक्षदन्ति दिवानिशम्। पुंश्चलन्नञ्च यो भुङ्क्ते दैवात्पित्र्ये नराधमः। सप्तजन्मकृतं पुण्यं तस्य नश्यति निश्चितम्। आयुःश्रीयशसां हानिरिह लोके परत्र च। तस्मादुत्तमाद्वत्तमोयं पाकपात्रं कलत्रकम्। पुंश्चलीदर्शने पुण्यं यात्राविधिर्भवेद्ध्रुवम्। स्पर्शने च सहापापं तीर्थस्नानाद्विशुद्धति। स्नानं दानं व्रतञ्चैव जपश्च देवपूजनम्। निष्फलं पुंश्चलीनाञ्च भारते जीवनं वृथा"। "अहो सैवैः परित्याज्या पुंश्चली च विशेषतः। धनायुःप्राप्ययशसां नाशिनी दुःखदायिनी। स्वकार्यतत्परा सत्यं परकार्यविघातिनी। निष्ठुरा नरजातिभ्यः सर्वापहारिरूपिणी। विद्युद्दीप्तिर्जले रेखा लोभानुमैत्री यथा भवेत्। परद्रोहादृते वश्यं कलटा प्रेम तत्परम्। सर्वेभ्यो हिंस्रजन्तुभ्यो विषदुर्जा सदैव सा। दोषिसेवां संमूढो विपत्तस्य पदे पदे"।

पुंश्चलू स्त्री पुंश्चलति चल-ऊ पुंश्चलीवत् सन्धिकार्यम्। पुंश्चल्यां स्त्रियाम् "कामस्य पुंश्चलूम्" यजु०२०।५०वेददी०

पुंश्चिह्न न० ष० पुंश्चलीवत् सन्धिकार्यम्। पुरुषचिह्ने भिन्ने शेषच०।

पुंस अर्दे चु० उभ०सक० सेट्। पुंसयति ते अपुपुंसत् त।

पुंसवन न०पुमान् स्रवते अनेन सू-करणे ल्युट्। स्त्रीणां गर्भपातसंस्कारभेदे तच्च कर्म द्विविधम् यथाह व्यो०त०गोभिलः "तृतीयस्य गर्भमासस्यादिमदिने पुंसवनस्य कालः"। गर्भे सति तृतीयमासस्य आदिमदिने दशमदिनाभ्यन्तरे ज्योतिःशास्त्रोक्तकाले पुंसवनं कार्यम्। "प्रातः स्नात्वा शिरस्स्नाप्लुता पश्चादग्नेरुदगयनेषु कृष्णेषु प्राच्युपविशति" गो०। आप्लुता स्नाता पश्चात् पश्चिमदिशि प्राङ्मुखी उपविशति "पत्युर्दक्षिणतः पाणिपादवत्योपविशति" दर्शनात्। पश्चादित्यभिधानात् अग्निस्थापनं लभ्यते। तत् सार्थकत्वाय "आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते। मन्त्रस्य देवताऽलाभे प्रजापतिरिति स्थितिः" इति छन्दोगपरिशिष्टोक्तद्रव्यादि लभ्यते। जुहोतिषु हवनेषु मन्त्रस्यानादेशे प्रजापतिः प्राजापत्योमन्त्रः। स च मन्त्रः व्याहृत्यात्मकः। ततश्च विरूपाक्षजपान्तां कुशण्डिकां समाप्य घृतप्रक्षेपादिमद्भाव्याहृतिभिर्होमं कृत्वा प्रजापतिदेवताकसप्तसप्तमद्भाव्याहृतिहोमं कुर्यात्। ततः प्रकृतं कर्म। तत्र गोभिलः "पश्चात् पतिरवस्थाय दक्षिणेन पाणिना दक्षिणमंसमन्ववमृश्यानाभिं नाभिदेशमभिमृशेत् पुमांसौ मित्रावरुणावित्यृचौ"। उपविष्टायां पत्न्यां पश्चिमदेशं गत्वात्युपविष्टः पतिर्दक्षिणहस्तेन तूष्णीं तस्या दक्षिणस्कन्धमवमृश्य वस्त्राद्यव्यवहितं नाभिं पुंसाविति मन्त्रेण स्पृशेत्। अथ तदनन्तरं वामदेव्यगानान्तं समापयेत्। यदि स्वगृह्यदेशाचारात् कुलाचाराद्वा एकस्मिन् दिने द्वितीयपुंसवनमपि क्रियते तदा सर्वेषामेकं परिसमूहनम् "दग्धोबर्हिःपर्युक्षणमाज्यभागः सर्वेभ्यः समवदाय सकृदेव सौविष्टकृतं जुहोतीति" गोभिलस्मरणात्। उभय-

कर्मान्ते वामदेव्यगानादुदीच्यं कर्म कर्त्तव्यम् । अतएव सरलायां दिनद्वये भद्रभाद्रपदवैधयोरेकदिने उभयकरणं लिखितम् । "अथापरम्" गो० अथ प्रथमपुंसवनसमाप्तिकालानन्तरं तदानीमपरमन्यत् पुंसवनं कार्य्यम् "प्रागुदीच्यां दिशि न्यग्रोधशुङ्गात्तदभयतःफलासन्नानामक्ष्णि-परिमृष्टां त्रिःसप्तभिर्यवैर्माषैर्वा परिक्रीय उत्थापयेत् । यद्यसि सौमी सोमाय त्वा वप्त्रे परिक्रीणामि, यद्यसि वारुणी वारुणाय त्वा वप्त्रे परिक्रीणामि, यद्यसि वसुभ्यः वसुभ्यस्त्वापरिक्रीणामि, यद्यसि रुद्रेभ्यो रुद्रेभ्यस्त्वा परिक्रीणामि, यद्यसि आदित्येभ्य आदित्येभ्यस्त्वा परिक्रीणामि, यद्यसि मरुद्भ्यो मरुद्भ्यस्त्वा परिक्रीणामि, यद्यसि विश्वेभ्यो देवेभ्यस्त्वापरिक्रीणामि ओषधयः सुमनसो भूत्वा यस्यां वीर्य्यं समाधत्त एवं कर्म करिष्यतीत्युत्थाप्य दर्भैः परिधायाङ्गुल्या वैङ्कावतीं निदध्यात्" इ० । वटतरोः पूर्वस्यां दिशि शुङ्गा सङ्कलितप्लवः । "सताम्रस्रुग्भुवो गूढः शुङ्गेति परिकीर्त्त्यते । पतिव्रता व्रतवती ब्रह्मबन्धुस्तथाऽस्तृतः" इत्युक्तेः । अस्तृतो वेदहीनः तां फलयुग्मसयुतामसन्नानां ऋषिभिरव्याप्तां त्रिराहृत्तैः सप्तभिर्यवैर्माषैर्वा त्रिराहृत्तैः क्रीत्वा सङ्गृह्यात् । क्रयश्च दक्षैस्वामिनौ, न इच्छात् तेन उक्तस्वामिने यवा माषा वा देयाः यद्यपीत्यादि सप्तभिर्मन्त्रैः । प्रतिमन्त्रञ्च शुङ्गाक्षयम् दद्यात् । ओषधय इति मन्त्रेणोत्थाप्य दर्भैर्वेष्टयित्वा आनीयाकाशस्थां निदध्यात् । इदं प्रक्षाल्य ब्रह्मचारीव्रतवती वा ब्रह्मबन्धुः कुमारी वा अप्रक्षाल्य अप्रक्षालयन्ती पिनष्टि इदं पिष्टां मेषद्वयेन सयुतां कुमारी अनूढा व्रतवती पतिव्रता अप्रक्षालयन्ती तिर्यक्प्रक्षेप मेषद्वयमकुर्वती किन्तु ऋजुप्रक्षेप पुनःपुनः मेषद्वयं कुर्वती प्रातःस्थिरस्नायुता उदग्यवेषु कुशेषु प्राङ्मिराः संविशति शेते शेषं सुगमम् । "पश्चात् पतिरवस्थाय दक्षिणस्य प्राग्वेरङ्गुलेनोपकनिष्ठयाऽङ्गुल्या अभिसंस्पृश्य दक्षिणनासिकायाश्च तस्या नवेत् । पुमानसि पुमानिन्द्र इत्येतयर्चा" इ० । पश्चादवधाः पश्चिमदिशि उपकनिष्ठयानामिकया तेनाङ्गुष्ठानामिकाभ्याम् । पिष्टां शुक्लं वस्त्रखण्डं सङ्गृह्य निर्गृह्य दक्षिणनासारन्ध्रे क्षिपेत् पुमानस्मिरिति मन्त्रेण । अथ अनन्तरं दक्षिणादुदीच्यं कर्म कुर्यात् । पुंसवनकर्माधानकर्त्तरक्षिप्तानेऽन्येनापि कर्त्तव्यम् "अतो संस्कारकर्माणि गर्भाधानवित्" अत्र । पिता कुर्यात्तदभावे वा तस्याभावेऽपि तत्क्रमात्" इति स्मृतेः । भुजबले "शुष्कबल्ल करे कृत्वा क्षिरे तत्राक्षणे तथा । सङ्घोदितेन होमञ्च शान्तिञ्चैव च कारयेत् । अर्णोसूत्रेण संपाद्य जीवं जातीञ्च विक्रमम् । सुवर्णं रजतं हेम दद्यात् स्नात्र तटान्तरे । तत्प्रभृति नदीतीरं देवखातोदकं त्यजेत् । सन्ध्याटनं तरोर्मूलं तथा देवगृहं त्यजेत्" ।

पुंसवन शुक्लपक्षादिकं स्मृ०चि०धृ० उक्तं यथा

"पूर्वोदितैः पुंसवनं विधेयं मासे तृतीये त्वथ विष्णुपूजा" स्मृ०चि० "पूर्वोदितैरिति । पूर्वं सीमन्तोन्नयने उदितैः प्रोक्तैस्तिथिवारनक्षत्रलग्नैरुपलक्षिते तृतीये मासि पुंसवनाख्यं कर्म विधेयम् । पुमान् सूयतेऽनेन कर्मणेति व्युत्पत्त्या पुंसवनकर्मणा पुंस्त्वहेतुना । यदाह शौनकः "व्यक्ते गर्भे तृतीये तु मासे पुंसवनं भवेत् । गर्भेऽव्यक्ते तृतीये चेत् चतुर्थे मासि वा भवेत्" इति । "सीमन्तोन्नयनस्योक्तितिथिवासरराशिषु । पुंसवं कारयेद्विद्वान् सर्वैवैकदिनेऽथ वा" इति । विशेषमाह वसिष्ठः "कुर्यात्पुंसवनं प्रसिद्धविधिवे गर्भे तृतीयेऽथ वा मासि स्फोतनवैतुषारकिरणे पुष्येऽथ वा वैष्णवे । स्थित्वा कर्कटके ऋक्षे शुभवल्लाभसंज्ञेऽथरिक्ते तिथौ शुक्ले नैधनधान्ये शुक्रशनिक्षान्त्रिषां वासरे" इति । नैधनधान्ये अष्टमस्थाने शुक्रे सर्वग्रहरहिते । यदाह वसिष्ठः "अष्टमस्थाग्रहाः सर्वे नेष्टास्तेऽस्ते शुभावहाः । एवं सम्यक् परीक्ष्यैव कुर्यात्पुंसवनक्रियाम्" इति । वाराश्चात्र सौम्यषड्वाशुक्राः । इज्यतिरत्र विशेषमाह "गुरुशुक्रबुधेन्दूनां ईक्षाचदिवसांशकाः । तेषामुदयहोराश्च पुंसवेऽतिशुभावहाः" इति अन्यैस्तु ओषध्यादिभिः पुंवारा एव प्रशस्ता अभिहितात्तत्फलात्त्याह गर्गः "सौम्ये सुतप्रदा मन्दे मृत्युर्वन्ध्या च भार्गवे । सोमे दुग्धविहीना स्यात् शेषाः सर्वार्थसिद्धिदा" इति । अत्र वचनद्वयप्रामाण्यादिकल्पः । केचित्तु यदा तृतीये मासि पुंसवनं चिकीर्षितं तदा सौम्यवारा एव ग्राह्याः । यदा तु चतुर्थे मासि गर्भस्य व्यक्तत्वात् पुंसवनं चिकीर्षितं तदा पुंवारा एव ग्राह्या इत्याहुः । नक्षत्राण्यपि ह्यत्र पुंनामानि ग्राह्याणि तानि "अश्वः करः" इति श्रीपतिनोक्तानि । वसिष्ठेन तु पुंनामान्यभिहितानि यथा "पुंनाम श्रवणं तिष्यः स्वाती हस्तः पुनर्वसुः । मूलं श्रोणपदं चानुराधा अग्निरोऽश्विनौ" । विशेषमाह अत्रोशनाः । "हस्ताद्रौतिश्रमूलानि सौम्यो विष्णुः पुन-

वैद्युः। षोडशदादयं प्रोक्तमाषाढ्यमेव च। त्रयोदशानि कथितान्येव त्रिष्णुग्रान्येकादशैव तु। स्वातौ तथा मघायां च रेवत्यां फल्गुनीदये। अस्मिन्यां चैव नक्षत्रे यदा पुंसवनं भवेत्। नरः सम्पद्यते दैवाद्यदा स्याद्रुद्रतत्परः। क्रव्योद्भवतनुः क्रूरो नारी चेत् कुचटा भवेत्। शेषाण्यि दश त्रिष्णुग्रानि निन्दितानि विशेषतः" तदेतयोर्हि स्वार्थयोर्वाक्ययोर्देशाचारतो व्यवस्था। तत्र वसिष्ठवाक्येन दाक्षिणात्या व्यवहरन्ति। प्राच्यास्तु ऋक्षोद्भववाक्येन। अथ लग्नशुद्धिमाह ऋक्षोद्भवः "सौनहस्तिककुम्भेषु चापमीनेऽङ्गनाकाः। लग्नाः पुंसवनादीषु सूचपुत्रादिवाञ्छया। केन्द्रत्रिकोणभवनेषु शुभस्थितेषु पापेषु षट्त्रिदशलाभगतेषु तेषु। जीवेन्दुभानुभृगुभूमिजमन्दिरेषु लग्नेषु लग्नपरिशुद्धशुभांशकेषु"। अत्रापि स्त्रीपुंसयोरुद्भवसमावयवकमित्याह ऋक्षिंहः "अपि पुंसवनं कार्यं दम्पत्योरनुकूलभे। अन्यादि वर्जवेद्राशिं चांगकं विषदादिषु" इति पी०धा०।

"कुर्यात् पुंसवनं सुयोगकरणे नन्दे समद्रे तिथौ भाद्राषाढ्यमेश्वरेषु ऋदिने वेधं विनेन्दौ शुभे। अब्जीये नवपञ्चकण्टकगते सौम्ये शुभे ऋक्षिषु स्त्रीगुह्या घटयुग्म सूर्यगुरुभेषूद्यतस्य भवतये" ज्यो०त०। ऋदिने पुंसवारे। वेधो दशयोगभङ्गः। ऋक्षिरूपचयनस्थानम्। अण्। पुंसवोऽत्र पु०।

पुंसवनव्रतन्तु भाग० ६स्कन्धे १८अ० "शुक्ले मार्गशिरे पक्षे योषिद्भर्तृरनुव्रता। आरभेत व्रतमिदं सार्वकामिकमादिमेत्" इत्युपक्रम्योक्तं दृश्यम्। [तद्धिनि वि०कौ०।

पुंसानुज पु० पुंसानुजः अनुकृ०। यस्यानुजः पुमान्

पुंस्कामा स्त्री पुमांसं कामयते कामि-अच् पुंसोऽम्लोपे रूपे "संपुंकामामिति" वा० रोः सः। पुरुषकामायां स्त्रियाम्। [कोकिले कुमा० ३।३२।

पुंस्कोकिल पु० कर्म०। पुंस्कामावत् सन्निकार्यम्। पुरुष-

पुंस्त्व न० पुंसोभावः त्व रूपत्वे। १पुरुषत्वे तदुपनिबन्धिते २शुक्रे वीर्ये हेमच०। [राजनि०।

पुंस्त्वविग्रह पु० पुंस्त्वस्य शुक्रस्येव विग्रहोऽस्य। भूतृणे

पुक पु० पु-बा० कक्। पवित्रे तस्यादूरदेशादि प्रेचा० इनि। पुकिन् तत्सन्निकृष्टदेशादौ।

पुक्कस(स) पुंस्त्री०पुक् कुत्सितं कसति कस-गतौ अच् पृषो० वा सः। १चण्डाले २अधमे त्रि०अमरः "नृणां स्युर्वर्णसंक्रमाज्जातः पुक्कस(स) उच्यते" उशनसोक्ते १संकीर्ण-जातिभेदे स्त्रियां जातित्वात् ङीष्। ङीबन्तः ४कालिकायां ५नीलाम्लोषधौ च मेदि०।

पुंचीर न० पुंग्रियं चीरम् या०त० खयः अमूपरत्वाभावात् न रुः। पुरुषग्रिये चीरे। [अमरः।

पुङ्ख पु०न० पुमांसं खनति खन-ड। १बाणमूले २पुङ्खले

पुङ्खतीर्थ न० रामक्षेत्रे तीर्थभेदे शिवपु०।

पुङ्ग पु० पुग-पृषो०। समूहे शब्दच०।

पुङ्गव पु० पुमान् गौः कर्म०+अच् समा०। १वृषे २ऋषभौषधौ च मेदि० उत्तरपदस्य श्रेष्ठवाचकः। यथा नरः पुङ्गव इव उपमितसमासवाक्यम्। नरपुङ्गव नरश्रेष्ठार्थे।

पुङ्गवकेतु पु० पुङ्गवः वृषः केतुरस्य। वृषध्वजे शिवे।

पुच्छ प्रसादे भ्वा०पर०अक० सेट्। पुच्छति अपुच्छीत् पुपुच्छ रावणकुटः।

पुच्छ पु०न०अर्द्धर्चा०। पुच्छ-अच्। १लाङ्गूले अमरः। २पक्षाङ्गे न०मेदि० ३लोमवल्लाङ्गूले ४कलापे च पु०इषादि० बहुव्रीहौ एतदन्तात् ङीष् कवरपुच्छी।

पुच्छकण्टक पु० पुच्छे कण्टको यस्य। वृश्चिके हेमच०।

पुच्छटि(टी) स्त्री पुच्छ-अटि वा ङीप्। अङ्गुलिमोटने (आङ्गुलमटकान) त्रिका०।

पुच्छदा स्त्री पुच्छमिव दायति दै-क। लक्ष्मणावन्दे राजनि०

पुच्छण्डक पु० तक्षकवंश्ये नागभेदे भा०आ० ५७अ०

पुच्छिन् पु० पुच्छ+अस्यर्थे इनि। १कुक्कुटे शब्दच० २वर्कटवृक्षे च राजनि०। ३लाङ्गूलयुक्ते त्रि०।

पुच्छ पु० पिच्छि-अच् पृषो०। उद्वत्या पुमांसं जयति जि-ड वा। राशौ चक्रे अमरः।

पुच्छातुक पु० वृक्षभेदे रत्नमा०।

पुच्छि पु० पिच्छयति पिच्छि-छिंसावरणदानलिखितने इन् पृषो०। समूहे। तत्र तिष्ठति स्था-क। अम्बाम्बेत्यादिना षत्वम्। पुंल्लिङ्गा पक्षिपुच्छघातके यजु० १६।२७।

पुच्छिकास्तना स्त्री अप्सरोभेदे मार्क०पु० ५४अ०।

पुच्छिकास्थला स्त्री अप्सरोभेदे यजु० १५।१५ वेददी०।

पुच्छिल पु० पिच्छि-बा० इल पृषो०। पिच्छिले (पाँज) तैत्ति० ६।१।१।८। [वृषोट।

पुट दीप्तौ चक०चुरा०उभ० सेट्। पोटयति-ते

पुट श्लेषे तु०क्र०पर०अक० सेट्। पुटति अपुटीत् पुपोट।

पुट संश्लेषे भ्वा०चु०उभ०अक०सेट्। पुटयति ते अपुपुटत् त।

पुट न०पुट-क। १जातीफले राजनि० २वर्णसंघोभावापन्नेन कदादिकपाकद्वयेन निर्मिते औषधपाकपात्रभेदे च पु०

२अक्षपुरे पु०न० मन्दरः। ३अक्षिगोलमध्ये ४व्याच्छादने च पुटभेदनमिलमरत्नाख्यायां सङ्कटः। ६पत्रादिरचिते दुग्धादिधारणपात्रे त्रि० (दोना) स्त्रियां ङीष्। औषधपाकपात्रप्रकारः भावप्र० उक्तो यथा

"धात्वादिभारशोषयुक्तात् पुटप्रकाराच्च रसप्रदीपे "लोहादेरुत्तमौषधद्रुचूर्णं सुधाऽऽतपे। स्थिते तत्रचूर्णापि तत्त्रिभिः पुटनाद्भवेत्। मन्दीरे विधृते कृष्णे छिद्रिते मृत्तरम्बके। घनोपलसङ्कृष्णे च पूरितं पुनरौषधम्। कोष्ठे दृढे प्रयत्नेन लोष्टोपरि धारयेत्। घनोपलसङ्घातं कोष्ठिकोपरि निःक्षिपेत्। यन्त्रं विनिःक्षेपेत्तत्र मध्यपुटमिति स्मृतम्। कोष्ठं सत्त्वमूषा लोष्टिका (लोदटा)। मध्यपुटम्। "यवाद्यं कृष्णमानेन कृष्णे निम्ने तथायते। घनोपलसङ्कृष्णे च पूर्वं मध्ये विधारयेत्। पुटनद्रव्यसंयुक्तां कोष्ठिकां छादितां दृढे। यथाङ्गानि करणानि यन्त्राण्युपरि निःक्षिपेत्। एतद्गजपुटं प्रोक्तं ख्यातं सर्वपुटोत्तमम्। कृष्णवर्णमित्यत्र कृष्णप्रमाणः स यवादः तेन त्रिंयदङ्गुलप्रमाणेनेत्यर्थः अतएवोक्तम् "साधारणनराङ्गुल्या त्रिंयदङ्गुलको गजः" इति गजपुटम्। "अरत्निमात्रके कृष्णे पुटं वाराहमुच्यते। वितस्तिमात्रके खाते कथितं कौक्कुटं पुटम्"। अरत्निस्तु "निष्पन्निर्देन छदिना" रत्नाकरः। निःसृतनिष्टया छदप्रोपवर्त्तिनो हस्तोऽरत्निरित्यर्थः। "लोहयाङ्गुलके खाते वस्त्रचित् कौक्कुटं पुटम्। यत्पुटं दीयते खाते षट्संख्यैर्नोपलैः। कथितं पुटमेतत्तु कथितं पुटपण्डितैः। लोहान्नलौंकुरक्षुद्रं शुल्वं चूर्णितलोष्टवम्। लोवरं तत्समाख्यातं वरिष्ठं रससाधने। दृढङ्गाख्यस्थितैर्यत्र लोवरैर्दीयते पुटम्। तद्लोवरपुटं प्रोक्तं भिषग्भिः सूतभक्षणे। दृढङ्गाख्ये तथैः पूर्वं मध्यं भूमां विधारयेत्। चित्राग्निं छदयेत् भाण्डं तद्भाण्डं पुटमुच्यते"। "वसुयुगविरतिर्नौ स्यो पुटोऽयम्" इ०र० उक्ते ७द्वादशाक्षरपादके छन्दोभेदे पु०

पुटक न० पुट इव कायति कै-क। १पद्मे मेदि० रत्नाव०। "पुटके पुटके मधु भाण्डो० ६।८५०। ततः स्वार्थे क। २पुटशब्दार्थे। पुटकिनी तत्समत्वे पक्षिण्याञ्च। स्वार्थे क। २पुटशब्दार्थे।

पुटकन्द पु०पुटमिव कन्दोऽस्य। कोलकन्दे राजनि०। [मेदिनी

पुटग्रीव पु० पुटमिव ग्रीवाऽस्य। १गर्दभ्यां २ताम्रकुम्भे च

पुटपाक पु०पुटेन पाकः। पुटपाकेन औषधपाके तद्विधिभेदो भावप्र०उक्तो यथा

"अथ पुटपाकविधिः। पुटपाकस्य कल्पस्य सारो गृह्यते यतः। अतस्तु पुटपाकानां युक्तिरत्रोच्यते मया। पुटपाकेन पाकोऽयं लेपक्षाराग्निवर्जितः। लेपस्य द्रव्यकुर्यं स्थूलं कुर्याद्द्रव्यमालवम्। क्षाराग्निरोटजस्वादिसम्बेदनसंज्ञकम्। पक्वमात्रो रसो याह्यः कर्षमात्रं मधु क्षिपेत्। कल्कचूर्णद्रवाद्यास्तु देयाः कोलमिता बुधैः"। नेत्ररोगचिकित्साधामन्यत्रप्रकार उक्तस्तत्र दृश्यः। चक्रपाणिना तु अन्यथोक्तो यथा

"इक्षुप्रमाणवदनं वृत्तं कृत्वैकजातसमनध्यम्। कृत्वा कटाहसदृशं तत्र करीषं तुषञ्च कारयेत्। अन्तर्मृत्तरं परिपूर्य दहनमाशोऽत्र। यवादयस्तूर्णं कृष्णं पङ्कोपमं कुर्यात्। त्रिकटुकाम्लकुलत्थसुरायावरिकाकन्दमानसङ्कजरसैः। भल्लातकरिकर्षाद्यमूलपुनर्नवाक्षरसैः। क्षिप्त्वा लोष्टपात्रे भाण्डे वा लोष्टभाण्डाभ्याम्। तत्कृत्वा पृष्ठे भाण्डाद्यान्ते रज्जुभाक्षिप्य। तत्पुटपात्रं तत्र वस्त्रवलये निधाय भूरोमिः। कारकरोन्तरैस्तत्कृत्वाद्यर्निशं दहेत् प्राज्ञः। एवं नवभिर्भेषजराजैः पचेत् पुटपाकम्। प्रत्येकमेकमेकैर्भिन्नैर्वा त्रिचतुरान् वारान्। प्रतिपुटनं तत् पिण्डात् स्नायीपात्रं विधाय तथैव। तादृशि दग्धे न पिण्डात् विगलज्जसा तु मुच्यते यत्र। तदवश्यं पिष्टं घृष्टं घनकल्कमसक्ति कल्कम्। यदि रजसा सदृशं स्यात् केवलमास्यं तद्वटम्। पुटने स्नायोपात्रेऽधिकतमपुरुषे स्वभावगधिगमात्। कथितमपि हेयमौषधकथितसुपादेयमन्यदपि"।

पुटभेद पु० पुटं संश्लेषं भिनत्ति भिद-घञ्। १नखादेरुत्पाटकारे २अक्षाक्षे ३पत्रने ४नगरे ५व्याजोक्तौ च मेदि०।

पटभेदन न० पुटानि पात्राणि भिद्यन्तेऽत्र भिद-आधारे ल्युट्। नगरे अमरः।

पुटापुटिका स्त्री पूर्वं पुटा संश्लिष्टा पश्चात् अपुटिका या० त०। पूर्वं संश्लिष्टायां पश्चात् असंश्लिष्टायाम्।

पुटालु पु० पुटः संश्लिष्टोऽस्त्यालुः। कोलकन्दे राजनि०।

पुटिका स्त्री पुटमस्त्यर्थेऽच् ठन्। १लतायां स्त्रियां टाप्। २पुटाकारतां प्राप्ते १भल्लभेदे यथा (कंराम के) इत्यादि

पुटित त्रि०पुटोजातोऽस्य पुट+इतच्। आद्यन्तयोः भल्लभेदेन पुटाकारतां प्राप्ते १भल्लभेदे यथा (कंराम के) इत्यादि २स्फुटिते ३स्फुते च त्रि० मेदि०।

पुटी स्त्री पुट-ङीष्। १पत्रादिरचिते पात्रभेदे (दोना) भरतः। २कौपीने जटा०।

पुटोटज न० पुटं संश्लिष्टजमिव । श्वेतच्छदे त्रिकाण्डशेषः ।
पुटोदक पु० पुटं संश्लिष्टदर्कं यत्र, पुटे कपालाकारपात्रभेदमध्ये उदकं वा यस्य । नारिकेले त्रिका० ।
पुट्ट अनादरे चु०उभ०सक० सेट् । पुट्टयति-ते अपुपुट्टत्-त ।
पुड मर्दने भ्वा०पर०सक० सेट् इदित् । पुण्डति अपुण्डीत् ।
पुण धर्माचरणे तु०पर०अक०सेट् । पुणति अपोणीत् पुपोण ।
पुण्ड पु० पुडि-अच् । तिलके जटा० ।
पुण्डरिन् पु० पुण्डं तिलकमस्यति अस्-णिनि शक० । (पुण्डरिया) ख्याते शालपर्णीतुल्यपत्रे क्षुपभेदे शब्दर० ।
पुण्डरीक न० पुडि-ईक नि० । १श्वेतपद्मे २चन्द्रिकोक्तस्वेदिग्गजे पु० ३व्याघ्रे पुंस्त्री० अमरः स्त्रियां जातित्वात् ङीष् । ४श्वेतपद्मे ५भेषजे च न० । ७आम्रे दराजिनवर्षे ८वृक्षिश्वरे पु० हेमच० । १०दमनकवृक्षे राजनि० । ११कमण्डलौ १२श्वेतवर्षे अनेकार्थकोषः १३श्वेतवर्षवति त्रि० १४कुञ्जरभेदे पु० । "सश्वेतं रक्तपर्यन्तं पुण्डरीकदलोपमम् । सोत्सेधञ्च सरागञ्च पुण्डरीकं प्रचक्षते" माधवकरः । १५कोषकारभेदे पु० मेदि० ।
पुण्डरीकप्लव पुंस्त्री० पुण्डरीकमिव प्लवते जले प्लु-अच् । उक्तपक्षिके संघातचारिणि खगभेदे स्त्रियां जातित्वात् ङीष् । [जलायुकाभेदे शब्दतः ।
पुण्डरीकमुखा स्त्री पुण्डरीकमिव मुखं यस्याः । निर्विषे
पुण्डरीकाक्ष पु० पुण्डरीकमिवाक्षि यस्य अच् समा० वृद्धय पुण्डरीकम् अक्षोति अक्ष-व्याप्तौ अच् उप०स० वा । १विष्णौ "अमोघः पुण्डरीकाक्षः" विष्णुसं० "वृत्तपुण्डरीकपुरमध्यसंस्थितम्" श्रुतेस्तस्य तथात्वम् भाष्यम् । २पुण्ड्रार्थे (पुण्डरिया) ख्याते क्षुपे शब्दच० ।
पुण्डरीयक न० पुण्डरीकाचरति पुण्डरिन्+आचारे कच् ततः स्वार्थे कन् । १स्वनामख्यातपद्मे शब्दच० २पद्मपौण्डरीके राजनि०
पुण्ड्र्य न० पुण्ड्रयति पुडि-अण्डने अच् तस्यार्थः प्रधानम् अक० । (पुण्डरिया) ख्याते शालपर्णीतुल्यपत्रे क्षुपभेदे अमरः ।
पुण्ड्र पु०पुडि-भेदने रक् । (पुंड्रिया) १इक्षुभेदे अमरः । इक्षुशब्दे दृश्यम् अर्हादिगणे पुण्ड्रादौ इक्षुभेदतुल्याकारतया प्रयोगः २देशभेदे ३क्षत्रियजातौ ४चित्रके ५क्रमौ ६पुण्ड्रपुरीके ७देशभेदे पु० मेदि० । स च देशः ह० १४अ० उदयगिरिभद्र गौडकपौण्ड्रोत्कलकाशिमेकलास्तथाः" पूर्वोक्तवत्तः । तेन तस्य प्राक्त्यत्वात् नगरान्तत्वे द्विपदवृद्धिः पौण्ड्रनागर तत्र भवे त्रि० "पुण्ड्रः कक्षि-

कृत्य तथा वाहे च चलत्यते" हरिवं० २१८अ० सोऽभिजनोऽस्य तस्य राजा वा अण् । पौण्ड्र त्रिलादिकमेण तद्देशवासिनि तद्भूपे च । बहुत्वे तस्य लुक् । "श्रुतेर्मागधपुण्ड्रैश्च गीयमानस्ततस्ततः" हरिवं० २११अ० । दतिवक्त्रस्य हेमच० । दन्तवक्त्रपुत्रे राजनि० । स्वार्थे क । पुण्ड्रक माधवीलतायाम् अमरः । इक्षुभेदादौ च ।
पुण्ड्रकेलि पु० पुण्ड्रः इक्षुभेदः केलिः केलिसाधनमस्य । गजे शब्दमाला । तस्य इक्षुप्रियत्वात् तथात्वम् ।
पुण्य न० पू-डुण्य । १शुभादृष्टे धर्मे २तद्वति त्रि० अमरः । ३शोभनकर्मान्विते ४पावने ५सुन्दरे च त्रि० हेमच० ६सुगन्धौ त्रि० जटाध० । चन्द्रमासधिके ७नवमस्थाने ज्यो०त० मीन०ता० उक्ते वर्षमासादीने ८वृक्षभेदे पुण्यद्रुमशब्दे दृश्यम् । धर्मरूपपुण्यस्य गङ्गास्नानादिजन्यं कर्मनाशजलसर्जनाद्यत्व । कीर्त्तनादपि तस्य नाशयता "दृष्टं श्रुतमधीतं वा विनश्यत्यनुकीर्त्तनात् । ज्ञानाज्ञानोद्भवाद्यस्य भस्मतेजो विभिद्यते । तस्मादात्मकृतं पुण्यं दत्त्वा न परिकीर्त्तयेत्" शु०त० देवीपुराणेः । यागदानाध्ययनादीनामानुविनाशित्वात् तज्जन्यं पुण्यमेव विनश्यतीति बोध्यम् । तस्मादात्मकृतं पुण्यमित्युत्तरत्र निर्देशाच्च । तत्र प्रारब्धभिन्नानामेव तत्त्वज्ञाननाश्यत्वम् प्रारब्धपुण्यानां तु भोगादेव क्षयः "क्षीणे पुण्ये मर्त्यलोकं विशन्ति" इति श्रुतेः "तद्यथेह कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयते" इति श्रुतेः । "पुण्यश्च पुष्करश्चैव आधानाख्यकश्चैव च । चत्वारस्ते भवन्त्येते नित्यं द्वादश राशयः" ज्यो०त० उक्ते मेषकर्कटतुलामकररूपे राशौ पु० ।
पुण्यक न० पुण्याय कायति कै-क । १पुण्यार्थे उपवासादौ व्रते हरिवं० १२६अ० उक्ते २व्रतभेदे । अन्यत्र पुण्यकव्रतं ब्रह्मवै०पु० २।४अ० उक्तम् दृश्यम् । २विष्णौ पु० "पूर्णः पूरयिता पुण्यः" विष्णुस० "अत्यन्तेन सर्वेषां पापनाशनेन पवित्रतासाधनत्वात् पुण्यः" भाष्यम् ।
पुण्यकर्मन् न० पुण्यजनकं कर्म । १पुण्यजनके कर्मणि । पुण्यं कर्म यस्य । २पुण्यकर्मकारिणि त्रि० भा० शा० २६६अ० ।
पुण्यकाल पु० पुण्यनिमित्तं कालः कालभेदः । रवेः स्थिरसंक्रान्तौ रव्यादीनां चलसंक्रान्तौ च विहितस्नानदानादौ पुण्यजनके कालभेदे तत्र रवेः स्थिरसंक्रान्तिपुण्यकालनिर्णयः स्मृ०सि०रत्नु० दर्शितो यथा

"कर्कमानकलाः षट्त्रा गुणिताभुक्तिभाजिताः। तदर्द्धनाड्यः संक्रान्तेरर्वाक् पुष्यं तथापरे" सू०सि० "सूर्यस्य बिम्बप्रमाणकलाः षट्त्रा गुणिताः सूर्यगत्या भक्तासत्फलस्यार्द्धं तत्सङ्ख्यका घटिका इत्यर्थः। संक्रान्तेः सूर्यस्य राशिप्रवेशकालादित्यर्थः। अर्वाक् पूर्वं पुष्यं स्नानादिधर्मकृत्ये पुष्यघटिकाः पुष्यघड्डिकारिकाः। अपरे संक्रान्त्युत्तरकाले तथा स्नानादिधर्मकृत्ये पुष्यघड्डिदा इत्यर्थः। अत्रोपपत्तिः। सूर्यबिम्बकेन्द्रस्य राश्यादौ सचरणकालः संक्रमणकालसम सूक्ष्मत्वेन दुर्ज्ञेयत्वात् स्थूलकालः कोऽप्यभ्युपेयः स तु राश्यादौ बिम्बसचरणकृपोऽङ्गीकृतो बिम्बसम्बन्धात्। अतः सूर्यगत्या यदि घटिकावणघटिकासदा सूर्यबिम्बकलाभिः का इत्यनुपातेनोता बिम्बघटिकाः संक्रान्तिकालः स्थूलः प्राङ्नेभिसचरणकालात् पश्चिमनेभिसचरणकालपर्यन्तं तदर्द्धघटिका व्यासार्द्धघटिका इति संक्रान्तिकालात् नाभिः पूर्वमपरत्र काले प्रागपरनेम्योः क्रमेण सचरणात् पूर्वोत्तरकाले पुण्या इति" रङ्ग०। स च सौरमासेन "सौरेण द्युनिशोर्यमम्" इत्युपक्रमे "संक्रान्तेः पुण्यकालता" इति तत्रोक्तेः। तत्र संक्रान्तिविशेषे कालविशेषस्य पुण्यपुण्यतरत्वादिकं सप्रमाणं कालमाधवीये निर्णीतं यथा यातातपः "संक्रान्तौ यानि दत्तानि हव्यकव्यानि दातृभिः। तानि नित्यं ददात्यर्कः पुनर्जन्मनि जन्मनि। रविसंक्रमणे पुत्रो न स्यादायुः यदि मानवः। सप्तजन्मसु रोगी स्यादुःखभागेव जायते" इति। स्नानदानादेश्च भूते संक्रान्तिकाले सूक्ष्मकालस्यासम्भवादल्पकालएवार्त्तव्यः। तदाह देवलः "संक्रान्तिसमयः सूक्ष्मो दुर्ज्ञेयः पिशितेक्षणैः। तद्योगादग्रपश्चार्द्धं लिंशन्नाड्यः पवित्रता" इति देशाव्यवधानादत्यन्तसंश्लिष्टयोः पूर्वोत्तरराश्योर्मध्ये सूर्यः पूर्वराशिं परित्यज्य यावत्कालभेदेनोत्तरराशिं प्रविशति स वेधो योगदृष्टिं विना सांसद्दृष्ट्या दुर्ज्ञेयः। अतोऽनुष्ठाने सूक्ष्मसंक्रान्तिकालासम्भवात् संक्रान्तिसम्बन्धिनौ पूर्वोत्तरकालौ गृहीतव्यौ। संक्रान्तेः पूर्वोत्तरयोरेकैकस्मिंस्त्रिंशत् घटिकाः पुण्या इति सामान्येनोक्तम् तत्र विशेषमाह बृहद्यवसिष्ठः "अतीतानागते पुण्ये दे षडशीतिसमन्विते। विंशत्कर्कटके नाड्यो मकरे विंशतिः स्मृताः" इति। षडशीतिसमतीतं सत्पुण्यं भवति। दक्षिणायनसम्बन्धागतं पुण्यं त्रिंशदित्यादिना तदेव स्पष्टीक्रियते। कर्कटाख्यादक्षिणायनात् प्राचीनास्त्रिंशद्घटिकाः पुण्याः। मकराख्यादुत्तरायणादूर्द्ध्वकालीना विंशतिघटिकाः पुण्याः। बृहस्पतिरपि "अयने त्रिंशतिः पूर्वा मकरे विंशतिः परा। वर्त्तमाने तुलामेषे नाड्यस्तूभयतो दश" इति वचनात्। न चात्र त्रिंशद्घटिकावादिना सामान्यवचनेन विरोधः शङ्कनीयः सामान्यवचनस्याभ्यहितापरत्वात् विशेषवचनोक्तो घटिकासङ्कोच एव प्रयुक्तः। "यावाः सन्निहिता नाड्यस्ताः पुण्यतमाः स्मृताः" इति देवलेनोक्तत्वात्केनापि निमित्तेन सन्निहितघटिकासत्त्वानासत्त्वे त्रिंशद्घटिकाः परा अवधित्वेनातुष्ठातव्ये। षडशीतिस्तु ततोऽपि दीर्घमवधिमाश्रित्य बृहद्यवसिष्ठः "षडशीत्यामतीतायां घटिकास्तु नाडिकाः" इति। विष्णुपद्यां प्रयुक्तकालं स एवाह "पुण्यायां विष्णुपद्यां च प्राक् पश्चादपि षोडश" इति संक्रान्तीनां पूर्वोत्तरौ पुण्यकालौ निर्णीतौ। तत्र संक्रान्तयः कदाचिदहश्च भवन्ति कदाचिद्रात्रौ भवन्ति तद्भेदादनुष्ठानभेदमाह बृहद्यवसिष्ठः "अह्नि संक्रमणे पुण्यमहः सूर्यस्य प्रकीर्त्तितम्। रात्रौ संक्रमणे भानोर्दिनार्द्धं स्नानदानयोः। अर्द्धरात्रादधस्तनि मध्याह्नस्योपरि क्रिया। अर्द्धं संक्रमणे चोर्द्धं सदयात् प्रहरद्वयम्। पूर्वे चेदर्द्धरात्रे तु यदा संक्रमते रविः। प्राङ्मध्यदिनमर्द्धं पुण्यं सङ्ख्या मकरकर्कटौ" इति। अह्नि यदा संक्रान्तिर्भवति तदा तत्सम्बन्धात् पुण्यत्वम्। रात्रौ संक्रमणे पूर्वोत्तरदिनार्द्धयोः पुण्यत्वं विदधता वचनेनार्द्धरात्रौ स्नानदानादिकं प्रतिषिध्यते। एवं सत्युदयानन्तरभाविनि दक्षिणायने पूर्वभागे प्राशस्त्यं बाधित्वोत्तरभागेऽनुष्ठानं भवति। अस्तमयप्राचीनलग्नभाविन्युत्तरायणे चोत्तरभागप्राशस्त्यं परित्यज्य पूर्वभागेऽनुष्ठातव्यम्। उत्तरभागप्राशस्त्यं तु मध्याह्नादिसंक्रमणविषयम्। तदाह स्वेव ज्ञेयोपादेययोः पूर्वोत्तरभागयोः सम्भवात्, दक्षिणेनैव न्यायेन कर्कटेऽपि मध्याह्नभाविनि पूर्वभागप्राशस्त्यं भवति अस्तमयप्राचीनभाविषु षडशीतिसंख्येष्वुत्तरभागप्राशस्त्यं परित्यज्य मकरन्यायेन पूर्वभागप्राशस्त्यं विधातव्यम्। उदयानन्तरभाविषु वचनान्तराविरोधेनोत्तरभाग एवानुष्ठानसम्भवात् तद्विहितं पूर्वभागप्राशस्त्यं न विधीयते। उभयभागप्राशस्त्योपेतेषु विष्णुपदीष्वपदेषु मध्याह्नभाविषु पूर्वोत्तरत्र वा ज्ञेयत्वादनुष्ठातव्यम्। उदयानन्तरभाविषु तेषु पूर्वभागप्राशस्त्यं बाध्यते अस्त-

नयप्राप्तेषु तेषु उत्तरप्राशस्त्यं वाध्यते इति विवेकः। एतद्वचनानुसारेण यस्य संक्रमस्य यस्मिन् भागेऽनुष्ठानं तस्मिन्नेव भागे व्यवस्थिता नाड्यः पुण्याः। तस्मिन्निश्चिताः पुण्यतराः अत्यन्तसन्निहिताः पुण्यतमा द्रष्टव्याः। यदा रात्रौ भानोः संक्रमणं भवति तदा तस्या रात्रेः पूर्वस्या उत्तरस्या वा दिनार्द्धप्रहरद्वयं स्नानदानयोः पुण्यम्। तत्र पूर्वदिनं कुत्र परदिनमिति विचिन्त्यायां तद्भवमर्द्धरात्रादिति वचनेन व्यवस्थाप्यते। अर्द्धं रात्रेः अर्द्धरात्रः, द्वितीयप्रहरस्य चरमघटिका तृतीयप्रहरस्य प्रथमघटिकेत्येवं घटिकाद्वययुक्तः यावत्तस्मादर्द्धरात्रादधः संक्रमणे सति पूर्वदिनमध्याह्नोपरितने प्रहरद्वये क्रियाकार्या। अर्द्धरात्रादूर्द्धं संक्रमणे सति उत्तरकालीनादुदयादूर्द्धं प्रहरद्वयं पुण्यं पूर्वेद्युरर्द्धरात्रे घटिकाद्वये संक्रान्तौ पूर्वोत्तरदिनद्वयं कृत्यं पुण्यम्। तदुक्तं भविष्योत्तरे "संक्रमस्तु निशीथे स्यात् षड्याम्याः पूर्वसञ्ज्ञिताः। संक्रान्तिकालो विप्रेयत्र स्नानादिकं चरेत्" इति। अत्रेदं व्यवस्थ्यं। अर्द्धरात्रे यदा षडशीतिसदानीमेतद्वचनानुसारेण पूर्वोत्तरदिनद्वयस्य पुण्यत्वात् यद्यर्थोक्तिको विकल्पः प्राप्नोति। तथाप्युत्तरदिने घटिकाप्रतिपादकप्रातिस्विकवचनानुपलब्धाभावस्यैवानुष्ठातव्यम्। विष्णुतोऽविष्णुपदेषु च प्रातिस्विकवचनं न नियामकम्, तस्य वचनस्य पूर्वोत्तरभागयोः शास्त्रेण प्राशस्त्यप्रतिपादकत्वात्। प्रकृतं वचनं पूर्वोत्तरदिने शास्त्रेण विधत्ते। तस्मात् पूर्वस्मिन्नुत्तरस्मिन् वा कस्मिन्नानुष्ठानमिति विकल्प्यते। अयनयोरस्तु प्रकारान्तरं वक्ष्यते। अयनव्यतिरिक्तेषु दक्षस्य संक्रान्तिषु मध्यरात्रादूर्द्धं प्रहरात्तु परेद्युरनुष्ठानमित्यत्रापि नास्ति सन्देहः। षडशीत्यान्तु प्रकृतवचनेन पूर्वेद्युरनुष्ठानं प्राप्तम्। घटिकाप्राप्तस्यैतत्प्रतिपादकप्रातिस्विकवचनेन परेद्युः प्राप्नोति। अतः सन्देहे सति पूर्वेद्युरनुष्ठानमिति निर्णयो द्रष्टव्यः। कुतः "विष्णुपद्यां धनुर्भोनिष्टयुक्तस्यात्तु वै तदा। पूर्वोत्तरगतं रात्रौ भानोः संक्रमणं भवेत्। पूर्वाह्णे षड् नाड्यस्तु पुण्याः प्रोक्ता मनीषिभिः। अपराह्णे तु षड्यैव ज्ञेते स्नाने च कर्मणि" इति स्मृतेः। यदा रात्रौ पूर्वभागगतं विष्णुपदी धनुर्भोनिसंक्रमणं भवेत्। तदा पूर्वेद्युरपराह्णे षड् नाड्यः पुण्याः उत्तरभागगते संक्रमणे परेद्युः पूर्वाह्णे षड् नाड्यः पुण्याः। न चैवं सति प्रहरद्वयपुण्यत्वविरोध इति वाच्यम्। षड्नाडिकावचनेषु पुण्याधिक्यस्य विवक्षितत्वात्। अतः प्रहरद्वयवाक्यं पुण्यत्वमात्राभिप्रायम्। एतत्सर्वेषु विषये देवीपुराणे पठ्यते "अर्द्धपूर्वेऽर्द्धरात्रे तु उदयेऽस्तमयेऽपि च। भानार्द्धं भास्करे पुण्यमपूर्वे चरमेदले। अर्द्धरात्रे त्वसंपूर्णे दिवा पुण्यमनागतम्। संपूर्णे उभयोर्नैवमतिरिक्ते परेऽहनि" इति। भास्करशब्देन सूर्ययुक्तं दिनमुपलक्ष्यते। यद्वा भास्करशब्दो न सूर्ये रूढः किन्तु यौगिकः भासं करोतीति व्युत्पत्तिसम्भवात्। तथा च सूर्य इव भास्करशब्दो दिनेऽपि रूढः तस्यापि भासं प्रत्यधिकरणकारकत्वेन कर्तृत्वात्। भास्करे दिवसे विद्यमानं प्रहरषट्कं तस्यार्द्धं प्रहरद्वयम् आदित्यास्तमयस्योपरितन कालाभिरूप्योदयात् प्राचीनः कालो रात्रिः। उदयोपरि अस्तमयात् प्राचीनः कालो दिनम्। उदयास्तमयकालौ तस्मिन्नुपलक्षणतया प्रोक्ताभ्यां रात्रिदिवाभ्यां पृथगग्रिमे। रेखामात्रस्यापि सूर्यमण्डलांशस्य दृश्यमानतया दिवसान्तःपातित्वाविवक्षणात्। सर्वथापि न रात्रौ तयोरन्तर्भावः। या च रात्रिस्त्रेधा भिद्यते मध्यमर्द्धघटिकाद्वयात्मक एको भागस्तस्मात् पूर्वोत्तरौ द्वौ भागौ। तत्र पूर्वभागे संपूर्णेऽर्द्धरात्र इत्यनेन विवक्ष्यते तस्मिन् यदा संक्रान्तिस्तदानीं सूर्यास्तमये सत्यासन्नं यत् पूर्वदिनस्योत्तरार्द्धं तत्पुण्यम्। अपूर्वे चरमेदल इत्यनेनार्द्धरात्रादनन्तरभागो रात्रिभागो विवक्षितः। पूर्वोत्तरदलयोरेकैकस्यापि घटिकाया अर्द्धरात्रकालार्द्धस्य पृथक् कृतत्वादसंपूर्त्तिरवगन्तव्या। तस्मिन् घटिकाऽभ्यूने परभागे यदा संक्रान्तिस्तदानीं भाविसूर्योदये सत्यासन्नं दिनार्द्धं पुण्यम्। अयमेवार्थो द्वितीयश्लोके प्रपञ्च्यते। घटिकान्यूनत्वेनासम्पूर्णार्द्धरात्रे पूर्वभागे यदा संक्रमणं भवति तदा यद्यपि दिवासंक्रमणमागतं तथापि तस्य दिवसस्य उत्तरार्द्धं पुण्यं यदा सम्पूर्णेऽर्द्धरात्रे घटिकाद्वयात्मके निशीथे संक्रमणं भवेत्तदानीं पूर्वोत्तरयोर्दिनयोः पुण्यं श्रेयसम्। अतिरिक्ते परभागे संक्रान्तौ परेऽहनि पूर्वार्द्धं पुण्यम्। देवलोऽपि "यावत्संक्रमणं पुण्यं दिनार्द्धं स्नानदानयोः। रात्रौ संक्रमणे भानोर्विषुवत्ययने दिने" इति। अयमर्थः। रात्रौ भानोः संक्रमणे विषुवत्संक्रमणे जाते सति संक्रमणप्राप्यासन्नदिनार्द्धं पुण्यम्। पूर्वरात्रसंक्रमणे पूर्वदिनस्योत्तरार्द्धं पुण्यम्। अपररा-

त्रसंक्रमणे परदिनस्य पूर्वार्द्धमित्यवगन्तव्यम्। अयने अयननामके भानोः संक्रमणे दिवा ज्ञाते सति यथायोगं तद्दिनार्द्धं तु पुण्यं द्रष्टव्यम्। कर्कटे पूर्वार्द्धं मकरे उत्तरार्द्धम्। एतच्च मध्यंदिनायनविषयम्। उदयास्तमयप्रत्यासन्ने अयने पूर्वोत्तरभागप्राशस्त्यबाधया ज्ञातस्तदिवसपुण्यत्वनिर्णयः पूर्वमेवोक्तः। अयनव्यतिरिक्तेषु दशसु संक्रमणेषु रात्रिगतेषु यो निर्णयस्तं सर्वं पर्युदसितुं तद्दशमेषः "शुक्ला मकरकर्कटाविति वर्णितः। "यायाः सन्धिक्षिता नाड्यस्तास्ताः पुण्यतमाः स्मृताः" इत्युक्तेन सामान्यवचनेन रात्रिसंक्रमणेषु रात्रावेवानुष्ठानं प्रसक्तं तदपोह्य दशसु संक्रान्तिषु दिवानुष्ठानं विधाय मकरकर्कटयोस्तत्पर्युदासे सति पूर्वप्रसक्तं रात्रावनुष्ठानमेव पर्य्यवस्यति। एवं सति रात्रौ स्नानमभ्युपगच्छतो याज्ञवल्क्यवचनस्यापि कश्चिद्विषयः सम्भवति। तथा च याज्ञवल्क्यः "राहुदर्शनसंक्रान्तिविवाहात्ययदक्षिषु। स्नानदानादिकं कार्यं निशि काम्यव्रतेषु च" इति। तमन्तरेण "रात्रौ स्नानं न कुर्वीत दानं चैव विशेषतः। नैमित्तिकं च कुर्वीत स्नानं दानं च रात्रिषु। यज्ञे विवाहे यात्रायां तथा पुत्रकवाचने। दानान्येतानि शस्तानि रात्रौ दैवाहते तथा। अर्कक्षोडाहसंक्रान्तियात्रार्क्षग्रसनेषु च। अयने चेतिहासस्य रात्रौ दानं प्रशस्यते" इति। नन्वेवं यथोक्तपर्युदासानुसृतेः पुण्यतमत्वादिदेवज्ञवाक्यबलकल्पनमन्तु वचनैर्मकरकर्कटयोर्नित्यानुष्ठानप्राप्तयं शास्त्रान्तरेण विरुद्धम्। तथा च भविष्योत्तरे "मिथुने कर्कसंक्रान्तिर्यदि स्यादंशुमालिनः। प्रभाते वा निशीथे वा कुर्यादहनि पूर्वतः। कार्मुकं तु परित्यज्य यदर्कं (मकरम्) संक्रमते रविः। प्रदोषे चार्द्धरात्रे वा स्नानं दानं परेऽहनि" इति। ब्रह्मगाय्यौंऽपि "यदास्तमयवेलायां मकरं याति भास्करः। प्रदोषे चार्द्धरात्रे वा स्नानं दानं परेऽहनि" इति। "अर्द्धरात्रे तदूर्द्धं वा संक्रान्तौ दक्षिणायने। पूर्वमेव दिनं पाह्यं यावन्नोदयते रविः" इति। भविष्योत्तरब्रह्मगाय्यवचनेषु रात्र्यनुष्ठानप्रतिषेधस्यातीतेदिवसानुष्ठानप्रतिषेधकल्पने पर्युदासानुसृतीतवचनानामानर्थक्यं प्राप्नोति। तस्माच्छास्त्रद्वयेन विकल्पप्राप्तौ तत्तद्देशप्रसिद्धशिष्टाचारेण व्यवस्था द्रष्टव्या"। अयनसंक्रान्तिशब्दे च १३०पृ० रव्यादिग्रहाणां चलसंक्रान्तेः पुण्यकालता दर्शिता।

पुण्यकीर्त्तन पु० पुण्यं पुण्यजनकं कीर्त्तनं यस्य। १विष्णौ "पुण्यश्रवणकीर्त्तनः" विष्णुसं०। २पुण्यजनककीर्त्तनयुक्ते त्रि० ६त०। ३पुण्यश्रवणे न०। पुण्यश्रवणोऽपि विष्णौ।

पुण्यकीर्त्ति पु० पुण्या कीर्त्तिर्यस्य। १पुण्यश्लोके यस्य कीर्त्तने पुण्यं जायते तस्मिन्। कर्म०। २पुण्यजनिकायां कीर्त्तौ च।

पुण्यकृत् त्रि० पुण्यं कृतवान् कृ-भूते क्विप् "सुकर्मपापमन्त्रपुण्येषु कृञः" पा० त्रिविधः नियमः क्विबेवेति नियमात् कर्म कृतवानित्यत्रावाङ् न। कृञ एवेति नियमान्मन्त्रमधीतवान् मन्त्राध्यायः स्वत न क्विप्। भूत एवेति नियमात् मन्त्रं करोति करिष्यति वेति विवक्षायान्न क्विप्। स्वादिष्वेवेति नियमाभावादन्यस्मिन्नप्युपपदे क्विप्। शास्त्रकृत् भाष्यकृत्" सि०कौ०। धर्मं कृतवति।

पुण्यक्षेत्र न०पुण्यस्य क्षेत्रम्। पुण्यभूमौ आर्य्यावर्त्ते हेमा०

पुण्यगन्ध पुण्यः सुन्दरः गन्धो यस्य। चम्पके त्रिका०।

पुण्यगन्धि त्रि० पुण्यः शुभावहः गन्धोलेशोऽस्य इतच्समा०। शुभावहलेशयुक्ते भा०उ० १८२अ०।

पुण्यजन पुंस्त्री० पुण्यः विरुद्धलक्षणया पापी जनः कर्म०। १राक्षसे अमरः। २यक्षे मेदि०स्त्रियां जातित्वात् ङीष्। ३यज्ञजने पु० मेदि० ४दशसु प्राचेतसेषु पुत्रेषु "दश प्राचेतसाः पुत्राः सर्वे पुण्यजनाः स्मृताः" भा०खा० १अ०।

पुण्यजनेश्वर पु० ६त०। कुबेरे अमरः।

पुण्यजित पु० पुण्येन जितः आवर्त्तीकृतः। चन्द्रलोकादौ "एवमेतत् पुण्यजितो लोकः क्षीयते" श्रुतिः।

पुण्यतरु न० नित्यकर्म०। श्वेतकुशे राजनि०।

पुण्यदर्शन पुंस्त्री पुण्यं दर्शनमस्य। १चाम्पेये राजनि०। स्त्रियां जातित्वात् ङीष्। यस्य दर्शने पुण्यं भवति तस्मिन् २देवप्रतिमादौ त्रि०।

पुण्यनामन् पु० १कुमारानुचरभेदे भा०श०४६अ०। २पुण्यसाधननामके त्रि० स्त्रियां वा डाप्।

पुण्यफल पु० पुण्यानि शुभानि फलान्यस्य। १लक्ष्मणावासेवनभेदे शब्दमा० कर्म०। २पुण्यरूपे फले न० मनुः १२।५

पुण्यभाज् त्रि० पुण्यं भजते भज-क्विप् उप०स०। पुण्ययुक्ते

पुण्यभूमि स्त्री पुण्यस्य पुण्योत्पादनार्हा भूमिः। आर्य्यावर्त्तदेशे अमरः। "या सरस्वत्या तु वै पूर्वादा संसरात्तु पश्चिमात्। तयोरेवान्तरं गिर्योरार्य्यावर्त्तं विदुर्बुधाः"

मतना तत् सोमोक्ता । (तयोर्विन्ध्यहिमाचलयोः)। पुष्पभूमप्रभृतयोऽत्र ।

पुष्परात्र पु॰पुष्पा रात्रिः कच् समा॰रात्रान्तत्वात् पुंस्त्वम् । पुष्पावां रात्रौ । [चन्द्रलोकादौ कर्म॰। २धर्मिष्ठजने च।

पुष्पलोक पु॰ पुष्पप्राप्योलोकः शा॰त॰ । १पुष्पेनप्राप्ये

पुष्पवत् त्रि॰ पुष्प+भूमार्थे मतुप् मस्य वः । वक्तृपुष्पयुक्ते अमरः । स्त्रियां ङीप् ।

पुष्पशकुन न॰ पुष्पसूचकं शकुनम् । १शुभसूचके शकुने साध्यतया तदस्त्यस्मि अच् । २तत्साधने त्रि॰ "मधुराः पुष्पशकुनाः हंससारसचातकाः" भा॰उ॰१४२अ॰ ।

पुष्पशील त्रि॰ पुष्पं शीलयति शील–अच् उप॰स॰ । नियतपुष्पानुष्ठायिनि ।

पुष्पश्लोक त्रि॰ पुष्पः पुष्पदायकः श्लोको यशश्चरित्रं वा यस्य । "पुष्पश्लोको नलो राजा पुष्पश्लोको युधिष्ठिरः । पुष्पश्लोका च वैदेही पुष्पश्लोको जनार्दनः" रत्युक्तेषु १नलादिषु । २पुष्पचरितयुक्तमात्रे च ३स्त्रीपदार्थे स्त्री शब्दमा॰ ४वैदेह्यां स्त्री ।

पुष्पसम अव्य॰पुष्पं समं यत्र तिष्ठद्ग्र॰अव्ययी॰। तुल्यपुष्पे

पुष्पसहस्र न॰ शौण्ड॰ता॰ उक्ते सहस्रभेदे तदानयनप्रकारस्तत्रोक्तो यथा "खर्वोनचन्द्रान्वितमब्धि लग्नं रवीन्दुयुक्तं निधि पुष्पसंज्ञम् । शोध्यर्क्षगुद्धाम्बयभानरान्ते लग्नं न चेत् वैकमभेदुलग्नम्" । "यत्रावदे पुष्पसहस्रमेषु शोऽवदः शुभावहः" । अनिष्टेऽस्मिन् शुभं नेति पुष्पमादौ विचारयेत् ।

पुष्पस्थान न॰पुष्पनिमित्तं स्थानम् । १पुष्पोत्पादनसाधने स्थानभेदे २लग्नावधिके नवमस्थाने च ज्यो॰। [भावे च ।

पुष्पा स्त्री पुष्प–टाप् । १तत्रस्यां शब्दमा॰। २पुष्पजनकस्त्री

पुष्पात्मन् त्रि॰ पुष्प आत्मा यस्य । पुष्पस्वभावे तेषां परलोकगतिप्रकारः पद्मपु॰ क्रिया॰ उक्तो यथा

"सनत्कोवाच शृणु विप्र ! प्रवक्ष्यामि यत्त्वया श्रोतुमिच्छते । पुष्पात्मनां पापिनाच पन्थानं सुखदुःखदम् । यादौ ब्रवीमि पन्थानं नृणां पुण्यवतामहम् । शृणुष्व द्विजशार्दूल ! शृण्वतां प्रीतिवर्द्धनम् । प्रस्तरैरिष्टकैर्बद्धो दिव्यवस्त्रैः समावृतः । भाति पुष्पात्मनां पन्थाः सर्वोपद्रवर्जितः । कचिद्वन्यैर्वनन्याभिर्गीयते गानसत्तमम् । कचिच्छुशरीराभिरप्सरोभिश्च नृत्यते । कचिच्च वीणावादनं नानावाद्यं मनोहरम् । कचित् कुसुमवृष्टिश्च कचिदायुः सुशोभनः । कचित् कचिद्दीर्घिकाश्च फुल्लपद्मसुशोभिताः । कचित्पुष्पाः शीततोयाः कचित् भक्षशालिकाः । कचिद्वै वाश्च गन्धर्वाः पठन्तस्तवमुत्तमम् । सुच्छायाः पादपाः कापि पुष्पिता वल्लुवादयः । समस्तसुखसम्पन्ने पथि गच्छन्ति मानवाः । पुण्यात्मानो द्विजश्रेष्ठ ! सुखमत्यन्तमाप्य च । केचित्तु रत्नमारूढा नानालङ्कारभूषिताः । महाध्वजपताच्छत्रैर्गच्छन्त्याहत मस्तकाः । केचिद्यान्ति गजारूढा रथारूढाश्च केचन । यानारूढा जनाः केचित् सुखेन यममन्दिरम् । केचिद्वाल्गुनाङ्गस्पर्शचामरवायुभिः । गच्छन्ति वीजिता मर्त्याः स्तूयमानाः सुरर्षिभिः । केचिद्दिव्याम्बरधराः सुचन्दनविभूषिताः । भुञ्जतो यान्ति ताम्बूलं पुण्यात्मानो यमालयम् । निजगात्रत्विषा केचिज्ज्वालयन्तो दिशो दश । ज्वलन्ति यमनागारं चलदुष्टफनिवासिनः । केचिच्च पायसं दिव्यं भुञ्जन्तो यान्ति सत्तमाः । सुधापानं प्रकुर्वन्तः पथि गच्छन्ति केचन । केचिद्दुग्धं पिबन्तश्च केचिदिक्षुरसं तथा । केचित्तक्रं पिबन्तश्च गच्छन्ति यममन्दिरम् । केचिद्धीनि खादन्तः केचिन्नानाफलानि च । केचिन्मधु पिबन्तश्च पुण्यवन्तो व्रजन्ति वै । तानागतांस्ततो दृष्ट्वा नरान् धर्मपरायणान् । भास्करिः प्रीतिमासाद्य स्वयं नारायणो भवेत् । चतुर्बाहुः श्यामवर्णः प्रफुल्लकमलेक्षणः । शङ्खचक्रगदापद्मधारी गरुडवाहनः । स्वर्णयज्ञोपवीती च क्षीरचारुतराननः । किरीटी कुण्डली चैव वनमालाविभूषितः । चित्रयुग्मो महापात्रचक्षुष्टाद्या यमकिङ्कराः । सर्वे नारायणाकारा बभूवुर्मधुरोक्तयः । ततः स्वयं धर्मराजस्तान् सर्वान् मनुजोत्तमान् । परमां प्रीतिमासाद्य विधिवत् पूजयेद्द्विज ! । दिव्यैर्वस्त्रैः फलैश्चैव तेषां पुण्यवतां नृणाम् । भोजनं कारयित्वा तु तानुवाचाथ भास्करिः । यम उवाच "यूयं सर्वे महात्मानो नरकक्लेशभीरवः । निजपुण्यप्रभावेन गम्यतां परमं पदम् । संसारे जन्म संप्राप्य पुण्यं यः कुरुते नरः । स मे पिता स मे भ्राता स मे बन्धुः स मे सुहृत् । इत्युक्त्वा धर्मराजेन ते सर्वे द्विजसत्तम ! । दिव्यं रथं समारुह्य नारायणपुरं ययुः" ।

पुष्पाह्न न॰ पुष्पमह्नः टच् समा॰ अह्नान्तत्वेऽपि पुण्याहदिनाभ्यामह्नः" अमरोक्तेः क्लीवता । पुण्यदिने

पुष्पाहवाचन न॰ ६त॰। पुण्यदिनस्य विप्रद्वारा वाचने तत्प्रकारः "पुष्पाहवाचनं दैवे ब्राह्मणस्य विधीयते । एतदेव निरोङ्कारं कुर्यात् क्षत्रियवैश्ययोः । सोङ्कारं

ब्राह्मणे ब्रूयात् निरोङ्कारं महीपतौ । उपांशु च तथा वैश्ये शूद्रे स्त्रिया प्रयोजयेत्" उद्वा०त० यमोक्तः ।

पण्योदका स्त्री पण्यजनकं स्नानदानाद्युदकं यस्याः । नदीभेदे भा०अनु० १२०अ० । [पुन्नामनरशब्दे तद्देतुर्दृश्यः ।

पुत् न०"निपरणाद्वा पुतँ निरु०पृ-वा०डुति पृषो०। नरकभेदे

पुत्त गतौ सौ०भ्वा०पर०सक० सेट् । पुत्तति अपुत्तीत् पुपुत्त ।

पुत्तलक पु० पुत्त-वा० ल स्वार्थे क । पत्रादिनिर्मिते शवादि प्रतिमूर्त्तिभेदे पर्णनरशब्दे दृश्यम् शुद्धि०त० ।

पुत्तली स्त्री पुत्त-ङ गौरा० ङीष् । वस्त्रपत्रकदादिनिर्मिते (पुँतुल) ख्याते पदार्थे "अमावास्यां समासाद्य मध्यरात्रे विचक्षणः । पुत्तलीं मृण्मयीं कृत्वा दीपादिभिरलङ्कृताम्" उत्तरकामाख्यातन्त्रम् । स्वार्थे क अतइत्त्वम् । पुत्तलिका तत्रार्थे स्त्री ।

पुत्तिका स्त्री पुत् इति शब्दं तनोति तन-ड स्वार्थे क ह्रस्वः अत इत्त्वम् । क्षुद्रमक्षिकायाम् अमरः ।

पुत्र(त्र) पु० पू-क्त्र हस्वश्च पुतो नरकभेदात् त्रायते त्रै-क वा । १स्वजन्यपुरुषे २स्वजन्यायां स्त्रियां स्त्री ङीष् । निरुक्ते तु २।११अन्या व्युत्पत्तिरुक्ता "पुत्र पुरु त्रायते निपरणाद्वा पुत् नरकं तस्मात् त्रायते वा" पृषो० । "पुन्नाम्नो नरकादुयस्मात् पितरं त्रायते सुतः । तस्मात् पुत्र इति प्रोक्तः" मनुः । तेनास्य एकतकारता हितकारता च । तस्यापत्यं विदा०अञ् । पौत्र तदपत्ये पुंस्त्री० इतरितादि०यूनि फक् । पौत्रायण पुत्रस्य यून्यपत्ये पुंस्त्री० राजदन्ता० पतिपशुशब्दाभ्यां समासे पतिपशुशब्दयोः परनि० पत्युः पुत्रः पुत्रपतिः पशोः पुत्रः पुत्रपशुः । स च औपसख्यभेदेन द्वादशविधः द्वादशपुत्रशब्दे ८०१पृ० दृश्यम् अन्यथापि ते चतुर्विधाः यथा "ऋणसम्बन्धिनः केचित् केचिच्छापहारकाः । रिपवश्च प्रियाश्चेति स्वकर्मवशवर्त्तिनः । भेदैरेतैर्भजन्ते पुत्रा मित्राः स्त्रियस्तथा । भार्य्या पिता च माता च भ्रात्राः स्वजनबान्धवाः । स्वेन स्वेन हि जायन्ते सम्बन्धेन महीतले । न्यासापहरणं पूर्वं यस्य यस्य कृतं भुवि । न्यासस्वामी भवेत् पुत्रो गुणवान् रूपवान् भुवि । येन चापहृतो न्यासस्तस्य गेहे न संशयः । न्यासापहरणाद्दुःखं स दत्त्वा दारुणं गतः । न्यासस्वामी स पुत्रोऽभून्न्यासापहारकस्य च । गुणवान् रूपवांश्चैव सर्वलक्षणसंयुतः । भक्तिञ्च दर्शयेत्तस्य पुत्रो भूत्वा दिने दिने । प्रियवाक्यधरो वापि वञ्चनेहं प्रदर्शयेत् । स्वीयं द्रव्यं समुद्धार्य्य प्रीतिमुत्पाद्य चात्मनाम् । भुक्त्वा तु पोषणाल्लेन तदादाय पुनर्व्रजेत् । यथा तेन प्रदत्तं तद्ग्रासापहरणात् पुरा । दुःखमेवं महत् कृत्वा दारुणं प्राणनाशनम् । तादृशं तस्य दद्यात् स पुत्रो भूत्वा महागुणैः । अल्पायुषस्तथा भूत्वा नरकं यान्ति ते तथा । दुःखं दत्त्वा प्रयान्त्येवं प्रकृत्यैवं पुनः पुनः । यदाहं पुत्र पुत्रेति प्रलापं हि करोति सः । तदा हार्द्दं करोत्येष कः स पुत्रो हि कस्य च । अनेनापि हृतो न्यासो मदीयः परिचारिणा । द्रव्यापहारोऽपि पिता पूर्वमदौव तस्य च । पिशाचत्वं मया दत्तमदौव हि दुरात्मनः । द्रव्यापहरणेनापि मम प्राणा गताः किल । दुःखेन महता चैव यथाहं पीडितः पुरा । तथा दुःखं प्रदत्त्वाहं द्रव्यं सदाऽद्भुतमम् । भोगेन सर्वमादाय चिरादिह्यास्य सौख्यवत् । ततोऽस्मि खण्डशाद्य कस्याहं सुत दैवतः । न चैषोऽपि पिता पूर्वमदौव न च कस्यचित् । पिशाचत्वं मया दत्तमदौव च दुरात्मनः । एवञ्चक्रा प्रयात्येवं तं प्रहृत्य पुनः पुनः । प्रयात्यनेन मार्गेण दुःखं दत्त्वा सुदारुणम् । एवं न्यासस्य सम्बन्धात् पुत्राः केचित् भवन्ति वै । संसारे दुःखबहुला इत्यन्ते यत्र तत्र हि ॥ ऋणसम्बन्धिनः पुत्रान् प्रवक्ष्यामि तवाग्रतः । ऋणं यस्य गृहीत्वा यः प्रयाति मरणं किल । अतस्तस्य सुतो भूत्वा भ्राता वाथ पिता प्रियः । मित्ररूपेण वर्त्तेत अन्तर्दुष्टः सदैव सः । गुणं नैव प्रपश्यन्ति न क्रूरो निष्ठुराकृतिः । अश्नुते निष्ठुरं वाक्यं सदैव स्वजनेषु च । नित्यमिष्टं समश्नाति भोगान् भुङ्क्ते नित्यशः । द्यूतकर्मरतो नित्यं चौरकर्मणि नित्यशः । गृहाद्द्रव्यं बलाद्गृह्य वार्यमाणः प्रकुप्यति । पितरं मातरञ्चैव कुरुते च दिने दिने । द्रावकस्त्रावकश्चैव बहुनिष्ठुरजल्पकः । वञ्चयित्वैव सद्भाव हृत्वा सुखेन तिष्ठति । ज्ञातकर्मादिभिर्ज्ञेयो द्रव्यं गृह्णाति दारुणः । पुनर्विवाहसंयोगाज्ज्ञानाभेदैरनेकधा । एवं संजायते द्रव्यं नैवमेतदहात्यपि । गृहक्षेत्रादिकं सर्वं ममैव हि न संशयः । पितरं मातरञ्चैव वदत्येवं दिने दिने । सुदण्डैर्मूर्ध्नि चैवं कशाघातैस्तु दारुणैः । सते तु तस्मिन् पितरि तथा मातरि निष्ठुरम् । निःस्नेहो निर्दयश्चैव जायते नात्र संशयः । एवंविधास्ततः पुत्रा भवन्ति च महीतले २। रिपुपुत्रं प्रवक्ष्यामि तवाग्रे द्विजपुङ्गव ! । बाल्ये वयसि सम्प्राप्ते रिपुवद्वर्त्तते सदा । पितरं मातरञ्चैव क्रीड़मानो हि ताड़येत् । ताड़यित्वा प्रयात्येवं

प्रहरत्येव पुनःपुनः। पुनरायाचितं तत्र पितरं मातरं पुनः। सक्रोधो वर्त्तते नित्यं वैरकर्मणि सर्वदा। पितरं मारयित्वा तु मातरञ्च पुनःपुनः। प्रयात्येवं स दुष्टात्मा पूर्ववैरानुभावतः ३। अथातः संप्रवक्ष्यामि यस्माद्भ्यं भवेत् प्रियम्। जातमात्रः प्रियं कुर्य्याद्बाल्ये रमनक्रीड़नैः। वयः प्राप्य प्रियं कुर्य्यान्मातापित्रोरनन्तरम्। भक्त्या सन्तोषयेत् नित्यं तावुभौ परिपालयेत्। स्नेहेन वचसा चैव प्रियसत्यापनेन च। मृतौ गुरु समाधाय स्नेहेनरुदते पुनः। श्राद्धकर्माणि सर्वाणि पिण्डदानादिकां क्रियाम्। करोत्येवं सदुःखार्त्तस्तेभ्यो वाक्यं प्रयच्छति। ऋणत्रयान्वितः स्नेहात्क्रियां पवति निश्चितः। तस्माद्भ्यं भवेत् कान्तं प्रयच्छति न संशयः। पुत्रो भूत्वा महाप्राज्ञ अनेन विधिना किल ४। उदासीनं प्रवक्ष्यामि तवाग्रे द्विज! साम्प्रतम्। उदासीनेन भावेन स देव परिवर्त्तते। ददाति नैव गृह्णाति न क्रुध्यति न तुष्यति। नैवोपयाति संत्यज्य उदासीनो द्विजोत्तम!। तवाग्रे कथितं सर्वं पुत्राणां गतिरीदृशी। यथा पुत्रास्तथा भ्रातॄं पिता माताच बान्धवाः। भृत्याश्चान्ये समाख्याताः पशवस्तुरगास्तथा। गजाश्चमहिष्यो दासश्च अणसम्बन्धिनस्त्वमी" पाद्मे भूमिख०११।१२।

तत्रैव १८।२०अ० सुपुत्रलक्षणं यथा

"पुत्रस्य लक्षणं पुण्यं तवाग्रे प्रवदाम्यहम्। पुण्यप्रसक्तो यस्माच्च सत्यधर्मरतः सदा। बुद्धिमान् ज्ञानसम्पन्नस्तत्त्वज्ञो वाग्विदांवरः। सर्वकर्मसु सन् धीरो वेदाध्ययन तत्परः। सर्वशास्त्रप्रवक्ता च देवब्राह्मणपूजकः। याजकः सर्वयज्ञानां दाता त्यागी प्रियंवदः। विष्णुध्यानपरो नित्यं शान्तो दान्तः सुहृत् प्रियः। पितृभक्तिपरो नित्यं सर्वस्वजनवत्सलः। कुलस्य तारको विद्वान् कुलस्य परिपोषकः। एवं गुणैः समायुक्तः सुपुत्रः सुखदायकः"।

वैष्णवपुत्रस्य पूर्वपुरुषत्रातृत्वं यथा "वैष्णवो यदि पुत्रः स्यात् तावते हि स पूर्वजान्। पितृनधस्तनान् वंश्यांस्तारयति च पावनः" कुपुत्रजनने पितॄणां नरकगमनं यथा "तथा यदि कुपुत्रः स्यात्तेन मज्जन्ति पूर्वजाः। घोरे नरके दीनाः शपन्ति च सुदुःखिताः। यथा जले कुपुत्रेण तरन्मज्जति मूढधीः। तथा पिता कुपुत्रेण तमस्यन्धे निमज्जति। जातमात्रे कुले जन्मे संशेरते पितामहाः। किमेषोऽधो नयेदस्मानूर्द्धं वा वैष्णवो भवेत्"। इत्यादिविधिके पञ्चमस्थाने नीच०ता० वर्षकालीने ४सङ्गमभेदे च। पुत्रसङ्गमशब्दे दृश्यम्।

पुत्रक पु० पुत्र+अनुकम्पायां संज्ञायां वा कन् स्वार्थे क वा। १अनुकम्पितपुत्रे २पुत्रमात्रे च अल्पार्थे ३शरभे प्रसूभेदे पुंस्त्री०। ४धूर्त्ते ५शैलभेदे ६इक्षुभेदे च मेदि० ७पतङ्गे ८अनुकम्पाजनने च शब्दरत्ना०।

पुत्रकन्दा स्त्री पुत्र इव स्निग्धत्वात् कन्दोऽस्याः। लक्ष्मणाकन्दायां राजनि०।

पुत्रका स्त्री पुत्र इव कायति कै-क। क्षीरशुक्लायां पुत्रिकायां शब्दरत्ना०। [भिक्षायुक्ते।

पुत्रकाम त्रि० पुत्रं कामयते काम्-अच् उप०स०। पुत्राभिलाषयुक्ते।

पुत्रकाम्या स्त्री आत्मनः पुत्रमिच्छति पुत्र+काम्यच्-भावे च। आत्मनः पुत्रेच्छायाम् भट्टिः २।४२ [६।२।२१

पुत्रक्रथ पु० क्रन्+वा० भावे थक् ह्रस्व०। पुत्रस्योत्पादने अ०५।

पुत्रघ्नी स्त्री पुत्रं हन्ति हन-टक्। सुश्रुतोक्ते योनिरोगभेदे "स्थितं स्थितं हन्ति गर्भं पुत्रघ्नी रक्तसंस्रवात्"।

पुत्र(त्र)जग्धी स्त्री पुत्रो जग्धोयया ङीप्। "वा ह्रतजग्धयोः" वार्त्तिकोक्तेः त्रकारस्य वा द्वित्वम्। पुत्रभक्षणकर्त्र्यां स्त्रियां तथा पुत्र(त्र)घ्नीशब्देऽपि वा तस्य द्वित्वं ङीप् च। सा च पुत्रहन्त्र्यां स्त्रियां स्त्री।

पुत्रजीव पु० पुत्रं गर्भं जीवयति जीव-णिच् उप० स०। (जियापुता) वृक्षे "पुत्रजीवो स्त्रिणो वृक्षः श्लेष्मदो गर्भजीवनः। चक्षुष्यः पित्तशमनः दाहतृष्णानिवारकः" राजनि० "पुत्रजीवो गुरुर्वातकारी वृक्षो मतो बुधैः। स्वल्पमूलमलः स्वादुः पटुः कटुरपि स्मृतः" भावप्र०। [पुत्रजीववृक्षे रत्नमा०।

पुत्रञ्जीवक पु० पुत्रं गर्भं जीवयति जीव+वा० ण्वुल्। पुत्रदा स्त्री पुत्रं गर्भं ददाति सेवनात् दा-क। १वन्ध्याकर्कट्यां २लक्ष्मणाकन्दे च राजनि० गर्भधारके त्रि०।

पुत्रदात्री स्त्री पुत्रं ददाति दा-तृच् ङीप्। भावप्रसिद्धे लतामेदे "पुत्रदात्री वातकफकटूष्णानाशिनी मता। सुरभिः सर्वदा पथ्या वन्ध्यादोषविनाशिनी" राजनि०।

पुत्रपौत्र न० समाहारादि० समा० द्व०। पुत्रपौत्रयोः समाहारे तदनुभवति ख। पुत्रपौत्रीण पुत्रपौत्रपर्य्यन्तगामिनि भट्टि ५।१५। [राजनि० २पुत्रदातृवृक्षे त्रि०।

पुत्रप्रदा स्त्री पुत्रं प्रददाति प्र+दा-क। १स्त्रीवृक्षायां क्षुपभेदे

पुत्रप्रिय पु० ह्रत०। खगभेदे भा०व० १०८अ०।

पुत्रभद्रा स्त्री पुत्रस्य भद्रं यस्याः ब०व०। इक्ष्वाकुपत्न्यामृतवतायां राजनि०।

पुत्रभाव पु०पुत्रस्य भावः। १पुत्रत्वे ज्योतिषोक्ते २पञ्चमे भावे द्वादशभावशब्दे ३८०२ पृ० दृश्यम्। तत्र षष्ठादिस्थित्यादिफलादि जातकपद्धतावुक्तं यथा

"शुभखगवसतिः सुतालयस्थे क्षुभवनिताहितः शुभैरपीक्षितोऽपि वा स्यात्। कथयति शुभसन्ततिं नराणां स च विपरीतफलः खलस्य योगात्। चन्द्राद्विलग्नादपि पुत्रभावे वर्गौ यदैकोऽपि च सौम्यतेः स्यात्। तदा वदेदौरसमेव पुत्रं बलावलोकस्य हि तारतम्यात्। तनौ धने वा सहजे विलग्ननाथे सुतः स्यात् प्रथमं चतुर्थे। पुत्रो भवेत्तत्परतश्च पुत्रात् द्विकन्यकानां जननप्रदः स्यात्। चन्द्रौमभृगवोदितेक्षणा आदिमे वयसि सन्ततिप्रदाः। ते पुनर्धनुषि नालिमे तथा प्राचि सन्ततिकरा मता विदाम्। सन्तानभावे षष्ठदृष्टियोगो नवांशयोगोऽथ वाङ्कयोगः। यावन्मितः स्यात् खलु तत्प्रसंख्या स्यात् सन्ततिस्तत्प्रनवांशतो वा। अपत्यसंख्या सुतभे नवांशाद्याद्या दिनिघ्ना शुभदृष्टियोगात्। शुभांशतो जीववती च कन्या पापांशतः पापखगप्रदृष्टेः। कलिवित्क्रूरकवयः क्रमोन्मुहिकलत्रगाः। क्रमात् कुर्वन्ति मनुजं तोकतोकवर्जितम्। कविकलानिधिवर्गयुते सुते कविकलानिधियुक्तनिरीक्षिते। समभवर्गगते खलु कन्यका विषमभे तु सुतान् प्रदिशन्ति हि। दारोभवान्यपत्यानि सितांशे सुतभावगे। सितदृष्टे च केचित्तु चन्द्रादयेवमूचिरे। शनिसंख्याः शनिभं सुतभे यदा शशिसुतेन दृशा प्रविलोकितम्। कुरुकुजार्कदृशा न युतं तदा प्रतनुते तनयं निजभूमिजम्। सुतभं शनिभं चेत् स्याच्छनियुक् शनिनेक्षितम्। दत्तात्मजाग्निसदृबोध्यं तदृक्षेत् क्रोतपुत्रदम्। सन्तानभावे कुजवर्गभांशे मन्दान्वितेऽन्यषड्दृष्टिहीने। पुत्रो भवेत् क्लिमकोऽथ कुष्ठः पापैर्युते पापयुते सुतर्क्षे। चन्द्रे कुजांशे सुतगे सदृष्टे मन्देन नान्यैः खलु सङ्गजातः। मन्यंशगे सूर्यनिरीक्षिते च कुजे सुतस्थे च सुतोऽपविद्धः। शनिवर्गगते चन्द्रे शनियुक्ते च षष्ठगे। सदृष्टे रविशुक्राभ्यां भवेत् पौनर्भवः सुतः। रविचन्द्रमसोर्वर्गः सुतभे च तयोर्युतिः। शुक्रेण केवलं दृष्टे सङ्गोढः कथितः सुतः। सुतालये भूसुतसंस्थितिश्चेत् संजातसंजातसुतक्षतिः स्यात्। यदा न दृष्टिर्गुरुदैत्यगुर्वोर्दृष्टा तयोः स्यात् प्रथमोत्थनाशः। सन्तानभावे नवमांशको यः पापैः सदृष्टः खलु यन्नितैः स्यात्। गर्भा विनश्यन्ति हि तत्प्रसाधा यदा न दृष्टिः शुभखेचराणाम्। काव्ये कुजे नीचरिपोर्नवांशे पराजिते वापि सुतप्रजः स्यात्। स्त्रीखेटभांशे तु सुताप्रजः स्यादन्यांशकस्थे पुमपत्यभाक् ना। पापैः सुतस्थानगतैर्धनैः स्वजनैः सुखैर्नो रहितः कुजे तु। वैकल्यभाग् व्याधियुतः शनौ तु शुभग्रहैः पुत्रधनैः प्रपूर्णः"। वर्षलग्नतः पुत्रभावफलं नी०ता० उक्तं यथा

"पुत्रायगो वर्षपतिर्युतश्चेत् सूर्यारसौम्योशनसोऽथ चेत्यम्। सत्पुत्रसौख्याय खलार्हितास्ते दुःखप्रदाः पुत्रत एव चिन्त्याः। पुत्रे सुतस्थ सहमे सबले सुताप्तिः सौम्येक्षितेऽथातिसुखं यदि तत्र वर्षे। सौम्येक्षिते शुभगृहे सकुजो बुधश्चेत् पुत्रायगः सुतसुखं विबले सुतार्त्तिः। जीवो जनुर्नि यद्राशावद्देऽत्र सुतप्रदो बली। पुत्रसौख्याय भौमो ग्रो वर्षेशोऽत्र सुताप्तिदः। यत्तेज्यो जनुषि स्वहे विलग्नमेवत् पुत्राप्तये बुधसितयोरपीत्यमूचुः। यद्राशौ जनुषि शनिः कुजश्च सोऽब्दे पुत्रार्त्तिं तनुसुतगः करोति नूनम्। पुत्रे पुण्यस्य सहमं पुत्राप्तये शुभदृष्टियुक्। लग्नपुत्रेश्वरौ पुत्रे पुत्रदौ बलिनौ यदि। चन्द्रो जीवोऽथ वा शुक्रः स्वोच्चगः सुतदः सुते। यक्षो भौमः सुतस्थश्चेदुत्पन्नसुतनाशनः। सुताधिपो जनुर्नि भार्गवोऽब्दे पुत्रे विलग्नाधिपतीत्यब्रान्दः। पुत्रप्रदो मन्दस्थस्पुत्रे पापाधिकारीक्षित स्वात्मजार्त्तिः। यद्राशिगोपश्चः सुतौ स राशिस्तत्प्रदाभिधः। बली जन्मोत्थसौख्याय वर्षे तद्दुःखदोऽन्यथा"

पुत्रवत् त्रि० पुत्रोऽस्यास्ति "अन्यतरापि दृश्यते" वार्त्ति० वतच्। पुत्रयुक्ते पत्ये मनुष् मस्य वः। पुत्रवत् तथार्थे त्रि० स्त्रियां ङीप्।

पुत्रशृङ्गी स्त्री पुत्रं पवित्रं शृङ्गमिव पुष्पमस्याः ङीप्। अजशृङ्ग्यां राजनि०। इयं सुश्रुते श्यामादिगणे पठिता।

पुत्रश्रेणी स्त्री पुत्रा पवित्रा श्रेणिरत्र ङीप्। मूषिककर्ण्यां रत्नमाला।

पुत्रसङ्करिन् पु० पुत्रे पुत्रोत्पादने सङ्करो। भिन्नवर्णायां स्त्रियां पुत्रोत्पादनेन वर्णसङ्करकारके भा०क० ४४अ०।

पुत्रसहम न० नील०ता० उक्ते सहमभेदे। तदानयनन्तु तत्रैव दर्शितं यथा "सुतोऽर्कनिशसिन्दुभीज्यात्"। स्फुटजीवादिन्दुं त्यक्त्वा दिवारात्रौ लग्नयोगे पुत्रसहमं भवति। तत्र च पुण्यसहमवत् सैकतादि ज्ञेयम्।

पुत्रसू स्त्री पुत्रं सूते सू-क्विप्। पुत्रप्रसवकर्त्र्याम्।

पुत्राचार्य्य पु० पुत्र आचार्य्योऽध्यापको यस्य। पुत्रतोऽध्यापयिनि। मनुः ३।१६२

पुत्रा(त्रा)दिन् पु० पुत्रमत्ति अद–णिनि आक्रोशे गम्ये तकारस्य वा दित्वम्। (वेटाखेक) पुत्रभक्षकत्वेन आक्रुश्यमाने १पुत्रघे २तथाभूतायां स्त्रियां स्त्री ङीप्।

पुत्रात्मज पु० पुत्रस्य पुत्रोपहृतमन्नमत्ति अद–क्विप् उप०स०। कुटीचके सन्न्यासिभेदे त्रिका० कुटीचकशब्दे दृश्यम्।

पुत्रिक त्रि० पुत्रोऽस्यास्ति ठन्। पुत्रयुक्ते। ततः पुरोहिता० भावे यक्। पौत्रिक्य तद्युक्तत्वे न०।

पुत्रिका स्त्री पुत्री+स्वार्थे क।१कन्यायाम् शब्दर०।२पुत्तलिकायां श्यावकन्दले च मेदि०। अपुत्रेण समयभेदेन ४कृतायां सुतायां स्त्री। सा च समयः तद्विभागादिश्च मनुनोक्तो यथा "अपुत्रोऽनेन विधिना सुतां कुर्वीत पुत्रिकाम्। यदपत्यं भवेदस्यां तन्मम स्यात् स्वधाकरम्। अनेन तु विधानेन पुरा चक्रेऽथ पुत्रिकाः। विश्वम्भरं स्वंशस्य स्वयं दक्षः प्रजापतिः। ददौ च दश धर्माय, कश्यपाय त्रयोदश। सोमाय राज्ञे यत्तस्य प्रीतात्मा सप्तविंशतिम्। यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा। तस्यामात्मनि तिष्ठन्त्यां कथमन्यो धनं हरेत्" "दौहित्रो ह्यखिलं रिक्थमपुत्रस्य पितुर्हरेत्। स एव दद्याद्दौ पिण्डौ पित्रे मातामहाय च। पौत्रदौहित्रयोर्लोके न विशेषोऽस्ति धर्मतः। तयोर्हि मातापितरौ सम्भूतौ तस्य देहतः। पुत्रिकायां कृतायान्तु यदि पुत्रोऽनुजायते। समस्तत्र विभागः स्याज्ज्येष्ठता नास्ति हि स्त्रियाः" "मातुः प्रथमतः पिण्डं निर्वपेत् पुत्रिकासुतः। द्वितीयन्तु पितुस्तस्तृतीयं तत्पितुःपितुः"। अधिकं पुत्रिकापुत्रशब्दे दृश्यम्।

पुत्रिकापुत्र पु० पुत्रिकैव पुत्रः, ६त० वा। १पुत्रिकारूपपुत्रे २पुत्रिकाया पुत्रे च यथाह वशिष्ठः "अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलङ्कृताम्। अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति"। "अथ वा पुत्रिकैव सुतः पुत्रिकासुतः सोऽप्यौरससम एव पितृव्यवयानामल्पत्वान्मातृव्ययानां बाहुल्याच्च यथाह वशिष्ठः "द्वितीयः पुत्रिकैवेति। द्वितीयः पुत्रः कन्यैवेत्यर्थः इति, मिताक्षरा। अत्र विशेषो दायभागोक्तो यथा "तत्र पुत्रिकौरसयोस्तुल्यांशित्वं न पुनः पुत्रिकाया ज्येष्ठत्वेन विंशोद्धारार्हता तदाह मनुः "पुत्रिकायां कृतायान्तु" (इत्यादि अनुपदमुक्तम्) यतो ज्येष्ठपुत्रकार्यकरणात् स्वपुत्रद्वारेण पुत्रिकायाः पिण्डदातृत्वात्। तदाह मनुः "अपुत्रोऽनेन विधिना" (इत्यादि उक्तम्)। न च पुत्रिकायामेव प्रथमं पुत्रे जाते तदनन्तरमौरसपुत्रोत्पत्तौ पुत्रिकापुत्रस्य ज्येष्ठांशता भवेदिति वाच्यं तस्य पौत्रत्वात् तदाह मनुः "अक्षता वा क्षता वापि यं विन्देत पतिः सकृत्। पौनर्भवेन भर्त्रा सा पुनःसंस्कारमर्हति। पौनर्भवेन भर्त्रेह सक्षेत्रेण संस्कृता। पुत्रं उत्पादयेद्यन्तु पौनर्भवमुच्यते। यस्या मृतो गतः क्लीबो व्याधितो वा पतिर्भवेत्। सा नियुक्ता यथान्यायं पुत्रं उत्पादयेत्सुतम्। पौनर्भवो भ्रातृसुतो मातामहधनं हरेत्"। पुत्रिका हि पुत्रसमा पुत्रः पौत्र एव भवति तद्वांच पौत्रो भवति न च ज्येष्ठत्वेन पौत्रसंज्ञातिरेकः श्रुतोऽस्ति"। यत्तु वशिष्ठवचनम् "अभ्रातृकां प्रदास्यामि" (इत्यादि उक्तम्)। पुत्रिकापुत्रस्यैव पुत्रत्वं वदति तेन पुत्रिकायास्तत्सुतस्य च पुत्रत्वं तन्न मनुविरोधात् पिण्डदानमात्रयोगात् पुत्रत्वमस्य गौणं तद्द्वारेणैव पुत्रिकायाः पिण्डदातृत्वात् एकस्य श्रुतोऽन्यस्य तदुयोगात्। पुत्रिकौरसयोस्तु सवर्णत्वे सति पूर्वोक्तविभागो बोद्धव्यः असवर्णत्वे तयोरसवर्णौरसपुत्रवदेव विभागः पुत्रिकौरसयोः समानत्वात्। यदि च कृतापि पुत्रमनुत्पाद्यैव विधवा मृता बन्धुत्वेनवाऽवष्टब्धा तदा तस्याः पितृधनेऽनधिकारः स्वधाकरपुत्रार्थं पुत्रिकायाः कृतत्वात् तदभावे दुहित्रन्तरवत्त्वात् दा०भा०। व्याकृतं चैतत् श्रीकृष्णेन "ज्येष्ठता श्रेष्ठता सा च पुन्नामनरकत्राणनिबन्धना तदभावात् श्रेष्ठत्वाभाव इत्याह स्वत इति साक्षादित्यर्थः। ज्येष्ठत्वेनेति। ज्येष्ठपुत्रकार्यं पुन्नामनरकत्राणं तत्करणात्। तर्हि पुत्रिकाकरणं किमर्थमत आह स्वपुत्रद्वारेणेति। स्वधाकरं त्रिविधक्रियाकरम् अन्यथा स्वधाकरशब्दस्य श्राद्धकरणमात्रार्थत्वे दौहित्रान्तरसाधारण्यात् पुत्रिकाकरणवैयर्थ्यापत्तेः। एतेन पुत्रिकापुत्रसत्त्वेऽपि पुत्रिकाया एव प्रेतत्वाद्यधिकार इति मतमपि निरस्तमिति वेदितव्यं तथा च परम्परयोपकारार्थमेव पुत्रिकापुत्रकरणमिति भावः। ज्येष्ठांशतेति। तस्य साक्षादेव ज्येष्ठपुत्रकार्यकरणादिति भावः। पौत्रत्वादिति ज्ञातिदेशिकपौत्रत्वादित्यर्थः। मनुविरोधादिति। न च विनिगमनाविरहः किं मनुविरोधात् वशिष्ठोक्तं पुत्रत्वं गौणं, किं वा वशिष्ठविरोधात् मनूक्तं पौत्रत्वमेव गौणमिति वाच्यं मनुस्मृतेः सर्वस्मृतिप्रबलत्वस्यैव विनिगमकत्वात्। पुत्रत्वं पुत्रव्यपदेशः। गौणमिति पिण्डदातृत्वस्य मुख्यपुत्रगुणस्य योगात् गौणता बोध्या। पिण्डदानयोगमेवोपपादयति तदुद्वारेणैवेति। एकस्य पुत्रिकापुत्रस्य, अन्यस्य पुत्रिकासुतरूपस्य तदुयोगात् पुत्रत्वयोगात्। न च परम्परया पिण्डदानापेक्षया साक्षात् पिण्डदानस्य बलवत्त्वेन पुत्रिकापुत्रस्यैव पुत्रत्वं स्याद्यं

न तु पुत्रिकाया इति वाच्यं पुत्रिकाया अङ्गजत्वात् तदधीनजन्मतया च तत्पुत्रस्य पिण्डदानयोगात् तस्या एवोत्कर्षेण पुत्रत्वौचित्यात्। एतन्न्यायादेव अपुत्रिकाया अपि दुहितुरभाव एव दौहित्रस्यैव प्राप्तेरधिकारोपपत्तिः। अतएव समस्तलोत्त्वनेन पुत्रिकौरसयोरेव समभागिता मनूक्ता न तु तस्याः पुत्रस्य औरससमकिता केनाप्युक्तेति। इत्यलं "पुत्रिकापुत्र एव चेति" द्वादशविधपुत्रगणनायां कर्मधारयो न तु तत्पुरुष इति विभावनीयम्। पूर्वोक्तविभाग इति समभाग इत्यर्थः"। अपत्यधनाधिकारे च दाय०मा० कश्चिद्विशेष उक्तो यथा "अतएव स्वपुत्रद्वारेण पितृदौहित्रस्तथा दुहितुः पितृधनाधिकारः अतएव पुत्रिकाया अपि पितुरमजातधनसम्बन्धायाः पश्चाद्वन्ध्यात्वेन तद्भर्तुर्वा प्रव्रज्यासामर्थ्येन विपर्यस्तपुत्राया मरणे तद्धनं न भर्तुः। यथा शङ्खलिखितौ "प्रेतायाः पुत्रिकायास्तु न भर्ता द्रव्यमर्हत्यपुत्रायाः"। तथा पैठीनसिः "प्रेतायां पुत्रिकायान्तु न भर्त्ता द्रव्यमर्हति। अपुत्रायां, कुमार्यां वा स्वसा यात्तां तदन्वया"। ततः कुमार्यां स्वसा अन्वया वा पुत्रवत्या सम्प्रदत्तपुत्रया स्वसा तद्धनं याचम्। अतः स्त्र्यधिकारे व्याहृत्तिरन्याधिकारस्य। यत्तु मनुवचनम् "अपुत्रायां मृतायान्तु पुत्रिकायां कथञ्चन। धनं तत् पुत्रिकाभर्त्ता हरेतैवाविचारयन्"। तदविपर्यस्तपुत्रायाः अनुत्पन्नमृतपुत्रायाः पुत्रिकाया मरणे वेदितव्यम्" "विपर्यस्तपुत्रायाः पुत्रात्मन्याभावस्यात्। तद्धनं याचमिति। तदपि पत्न्यभावे कुमार्यादीनां पत्नीवाध्यादिति बोध्यम्। अत इति उक्तोभयस्थानाभ्यां विपर्यस्तपुत्रायाः पुत्रिकायामरणे कुमार्यादीनामधिकारे प्राप्ते भर्तुरधिकारस्य व्याहृत्तिरिति समुदायसंहारः। प्राञ्चस्तु यतः पुत्रिकाया एव विपर्यस्तपुत्रायामरणे न तत्संक्रान्तदाये भर्तुरधिकारोऽतः स्त्र्यधिकारे अन्यासां दुहित्रादीनामर्थाधिकारेऽनन्तरं विपर्यस्तपुत्रायां तस्यां मरणे भर्तुरधिकारस्य व्याहृत्तिरिति व्याचक्षते। तदविपर्यस्तपुत्राया इति। एतच्चैव विवरणम् अनुत्पन्नमृतपुत्राया इति। अत्र पक्षान्तराभावात् चकारः क्वचित् क्व पाठः प्रामादिकः। यत्तु शङ्खलिखितादिवचनमेव उत्पन्नमृतपुत्राविषयं मनुवचनन्तु अनुत्पन्नपुत्राविषयमिति वैपरीत्यमेव न कुतः? उत्पन्नपुत्रायाः, इवाविपर्यस्तपुत्रायाः पुत्रोत्पत्त्यैव पितुः पुन्नामनरकनिवर्त्तकत्वेन कृतोपकारकतया स्वामित्वे निर्व्यूढे पितृरिक्तराशेरुचया तस्या एवाधिकोपकारित्वात् तद्भर्तुरधिकारो युक्तः अतएव "दौहित्रस्य मुखं दृष्ट्वा किमर्थमनुशोचसि" इत्यनेन दौहित्रमुखदर्शनस्यापि नरकनिस्तारकतेति। पुत्रानुत्पत्तौ तु पितृपकाराभावात् तस्या एव न स्वामित्वं कृतस्तत्यत्वुरिति तत्पितृधनाधिकारित्वं कन्यादीनामेव तदानीं तत्राधिकारस्य न्याय्यत्वात्। यद्यपि बन्ध्यात्वेनावधृतायां जीवन्यामप्यस्यां तस्यां मृतायां पुत्रिकायां जीवन्यामप्यस्यां तस्याम् अन्यदुहित्रादीनामधिकार इति" श्रीकृष्णव्याख्या।

पुत्रिन् पुंस्त्री पुत्र+अस्त्यर्थे इनि। पुत्रयुक्ते स्त्रियां ङीप्

पुत्री स्त्री पुत्र+गौरा० ङीष्। १बन्ध्यायां २दृष्टभेदे हेमा०।

पु(त्रीय)त्र त्रि० पुत्रस्य निमित्तं संयोग उत्पातो वा "पुत्राच्छ च" पा०छ पक्षे यत्। १पुत्रनिमित्ते संयोगे २तदीयोत्पाते च। पुत्रस्येदम् अ। ३पुत्रसम्बन्धिनि त्रि०। "धन्यं यशस्यं पुत्रीयमायुष्यं विजयाय च" भा०शा० ६७अ०। ४दृष्टिभेदे स्त्री रामा०अयो० १६।२

पुत्रेष्टि स्त्री पुत्रकाम कर्त्तव्या इष्टिः या०त०। पुत्रकामकार्य्ये दृष्टिभेदे सच याज्ञ०औ०२।१०,८सङ्ख्यादो दृश्यः। "दृष्ट्वीवा पञ्चवर्षीयं पुत्रेष्टिं प्रथमं चरेत्" दत्तकमीमांसाधृतवाक्यम्। स्वार्थे क। तत्रार्थे जटाध०।

पत्रैषणा स्त्री ६त०। पुत्रेच्छायां शत०ब्रा० १३।६।१।१

पुथ हिंसे दि०पर०सक०सेट्। पुथ्यति अपोथीत्। पुपोथ।

पुथ वधे सक० क्रैये अक०भ्वा०पर०सेट् इदित्। पुन्थति अपुन्थीत् पुपुन्थ पुन्थ्यते।

पुथ दीप्तौ चु०उभ०सक० सेट्। पोथयति-ते अपूपुथत्-त।

पुद्गल पु० पूरणात् पुद् गलतीति गलः कर्म०। १परमाणौ "पूरणाद्गलनात् देहे पुद्गलाः परमाणवः" इति विष्णुपु० टीकायां श्रीधरधृतवाक्यम्। २बौद्धमतप्रसिद्धे स्कन्धकादिपदार्थभेदे च। पुद् क्लिन्नो गलो यस्मात्। ३सुन्दराकारे त्रि०शब्दर०। रूपादिविशिष्टे त्रि०हेमच०[श्रीक्षे अमरः।

पुनःपुनर् अव्य०पुनर्+वीप्सायां द्वित्वम्। १सङ्ख्यार्थे २अभीक्ष्ण्ये

पुनःपुना स्त्री पु० पुनः पुनाति पू-नक् पृषो०। नदीभेदे "कीकटेषु गया पुण्या नदी पुण्या पुनःपुना" वायुपु०।

पुनःसंस्कार पु० पुनर्वारः संस्कारः। १द्वितीयोपनयनसंस्कारे गोमांसादिभक्षणे प्रायश्चित्तनिमित्ते पुनर्वारोपयनभेदे "पुनर्दत्तो व्रतो विप्रः पुनःसंस्कारमर्हति" इत्युक्ते उपनयने ज्यो०त० "अज्ञानात् प्राश्य विण्मूत्रं सुरासं-

स्पृष्टमेव च। पुनःसंस्कारमर्हन्ति यथा वर्णा द्विजातयः। वपनं मेखलादण्डो भैक्षचर्याव्रतानि च। निवर्त्तन्ते द्विजातीनां पुनःसंस्कारकर्मणि" मनुः। "विड्वराहादीनां वक्ष्यमाणत्वात् मनुष्यसम्बन्धि क्लृप्तं पुरीषं वा अबुद्धिपूर्वकं प्राश्य सुरासंस्पृष्टञ्च भक्षादिरसं वा प्राश्य द्विजातयस्त्रयोवर्णाः पुनरुपनयनमर्हन्ति। वपनमिति "शिरोमुण्डनं मेखलाधारणं दण्डधारणं भैक्ष्याणि च मधुमांसस्त्रीवर्जनयुतानि प्रायश्चित्तार्थं पुनरुपनयने द्विजातीनां न भवन्ति" कुल्लू०।

पुनः(न)स्तोम पु०वा विसर्गलोपः। उक्थ्यसंस्थे यज्ञभेदे "बृहत्प्रतिष्टुभ गरगीरिथ योमन्वेत तस्य पुनःस्तोम उक्थ्यः" कात्या०२२।६।१६ "बृहत्प्रतिष्टुभ गरगीरथन्तरमित्यादानं यो मन्यते तस्य पुनःस्तोमसंज्ञक उक्थ्यसंस्थो भवति" कर्कः।

पुनर् अव्य० पन–सुतौ वा० अरि पृषो०। १द्वितीयवारे अग्रथमेऽर्थे च अमरः। ४अधिकारे ५पक्षान्तरे मेदि० "पुनरित्यग्रथमे हविशेषे च" मधुरः० उक्ते विशेषे च पुनरिति भूयोऽर्थविशेषयोः" मधुरस्तटीका।

पुनरस्तु पु० पुनरस्तु जीवनं समयोऽस्य। पुनर्जाते शत०ब्रा०१। ५।२।१४।

पुनरागत त्रि० पुनर्वारमागतः। प्रत्यागते मनुः ११।१६६।

पुनरागमन न० पुनर्वारमागमनम्। प्रत्यागमने

पुनराधान न० पुनर्वारमाधानम्। श्रौतस्मार्त्ताग्नेर्द्वितीयाधाने "पुनर्दारक्रियां कुर्य्यात् पुनराधानमेव च" मनुः ५।१६८। "अरणोरल्पमप्यङ्गं यावत्तिष्ठति पूर्वयोः। न तावत् पुनराधानमन्यारण्योर्विधीयते" कर्मप्रदीपः। "नाशवदाद्यादिनिमित्तेष्वन्ययोः परिसङ्ख्योपदेशाच्च" कात्या०श्रौ०४।७।२२ "अरणोर्दग्धयोर्वापि नष्टयोः क्षीणयोस्तथा। आहृत्यान्ये समारोप्य पुनस्तत्रैव निर्मथेत्" इति "अरणोः क्षयनाशाग्निदाहेष्वग्निं समाहृतः। पात्रेष्वुपस्थान्तेऽग्निन् पुनराधानमिष्यते" कर्मप्रदीपः।

पुनराधेय न० पुनर्वारमाधेयसम्बन्धाधानम्। श्रौते कर्मभेदे तच्च "पुनराधेय आधानाप्रतिष्ठातस्य" कात्या०श्रौ०४।११। स्वाद्यौ तन्त्राम्नाये च पठितौ क्रमप्रयम्।

पुनरावर्त्तिन् त्रि० पुनःपुनर्वारमावर्त्तते आ+वृत्–णिनि। भूयो भूय आगन्तरि "आ ब्रह्मभुवनात् लोकाः पुनरावर्त्तिनोऽर्जुन!" गीता।

पुनराहार पु० पुनर्वारमाहारो भोजनं या०त०। द्वितीयवारभोजने भूयस्त्वदर्शकरणे च कात्या०श्रौ०२५।११।१०

पुनरुक्त त्रि० पुनर्वारमुक्तम्। पुनर्वारं कथिते १कर्मणि २शब्दे च। तत्र शब्दस्य पुनरुक्तत्वे तदर्थस्यापि पुनरुक्तत्वं नियतम् ततः उक्थ्या० तद्वेत्त्योत्सर्गे ठक् पौनरुक्तिक तद्वेत्तरि त्रि०। शब्दपरत्वे अकथनयनादित्वात् ण्यत्। पौनरुक्त्य तच्छब्दाध्येतरि त्रि० भावे क्त। १पुनरुक्तकथने न०

पुनरुक्तजन्मन् पु० पुनरुक्तं द्वितीयवारं जन्म यस्य। १द्विजातौ २ब्राह्मणे त्रिका० "द्वितीयं मौञ्जीबन्धने" मनूक्ते अस्य तथात्वम्। [इयम्।

पुनरुक्तवदाभास पु० अलङ्कारभेदे अलङ्कारशब्दे ३८८ पृ०

पुनरुत्पत्ति स्त्री उत्पन्नस्य पुनरुत्पत्तिः। असत्ये उत्पन्नस्य पुनरुत्पादे च न सम्भवति उत्पन्नस्य पुनरुत्पादासम्भवात् इति सिद्धान्तः।

पुनरुत्सृष्ट पु० पशुभेदे। पूर्वं वाञ्छितः दौर्बल्यात् स उत्सृष्टः पुनरपि सबलो जातः पुनरपि वाञ्छितः पुनश्च दौर्बल्याद् उत्सृष्टत्वाद्ये पशौ" कात्या०७।१।५ सूत्रभाष्यम्। [तु कौन्तेय! पुनर्जन्म न विद्यते" गीता

पुनर्जन्मन् न० पुनर्भूयोजन्म। भूयोजन्मनि "मासमेव

पुनर्ण(न)व पु० पुनरपि नवः "पूर्वपदात् संज्ञायामगः" पा० संज्ञायां णत्वम् अन्यत्र नत्वम्। १नक्ते हेमच० तस्य क्षिप्रवृद्धत्वात्तथात्वम्। २भूयोनवे त्रि० णत्वम्।

पुनर्नवा स्त्री पुनर्नवा पुनर्नूयते नू–अप् वा ङीप्आदेराकृति गणत्वात् न णत्वम्। शोथघ्न्यां (पुनर्पुना) शाकभेदे अमरः। सा च द्विविधा श्वेता रक्ता च तयोर्गुणादि भावप्र० उक्तं यथा

"पुनर्नवा श्वेतमूला शोथघ्नी दीर्घपत्रिका। कटुः कषायाऽरुच्यर्शःपाण्डुहृद्दीपनी परा। शोफानिलगरश्लेष्म हरी व्रणोदरप्रणुत्। पुनर्नवाऽपरा रक्ता रक्तपुष्पानि वाटिका। शोथघ्नी क्षुद्वर्षाभूर्वर्षकेतुः कटिल्लकः। पुनर्नवाऽरुणा तिक्ता कटुपाका हिमा लघुः। वातला श्लेष्मपित्तरक्तविनाशिनी"।

पुनर्नवामण्डूर न० चक्रपाणिदत्तोक्ते औषधभेदे

"पुनर्नवात्रिदण्डीपिप्पलीमरिचानि च। विड्डङ्गं देवकाष्ठञ्च चित्रकं पञ्चकारकम्। त्रिफलां द्वे हरिद्रे च दन्तीञ्च चविकान्वया। कुटजस्य फलं तिक्तां पिप्पलीं मूलसंयुतम्। एतानि समभागानि सर्वतुल्यं द्विगुणं ततः। गोमूत्रेऽष्टगुणे पक्त्वा स्थापयेत् शिल्पभाजने। पाण्डुरोगोदरानाहगुल्मार्शःक्रिमिकुष्ठनुत्"।

पुनर्भव पु० क्षिप्रोऽपि पुनर्भवति भू–अप्। १नक्ते अमरः

२भूयोजाते त्रि० । भावे क्यप् । ३पुनरुत्पादे पु०कुमा०३समा०
पुनर्भू स्त्री पुनर्भवति जायात्वेन भू–क्विप् । एकेन व्यूढायां पुनरन्यस्तरीतायां भार्यायाम् अन्यपूर्वायाम् अन्यपूर्वशब्दे २।२ पृ० दृश्यम् । [२।२।२०।
पुनर्मृत्यु पु० भूयोभूयो मृत्युः । भूयोभूयोमरणे शत०ब्रा०
पुनर्यज्ञ पु०भूयः कार्ये यज्ञे । कात्या०श्रौ०२५।१।२०भाष्यम् ।
पुनर्यात्रा स्त्री १प्रत्यागतौ जगन्नाथस्य पुनर्वारं २रथयात्रायाञ्च "पुनर्यात्रा विधातव्या तथैव नवमेऽहनि" तिथितत्त्व० सा च द्वितीयातो नवमदिने दशम्यां कर्त्तव्याऽहनूशब्दस्य चान्द्रदिनपरत्वात् । ३पुनर्वारगमने च ।
पुनर्वत् त्रि० पुनः पुनःशब्दोऽस्त्यस्य मतुप् मस्य वः । पुनः शब्दयुक्ते कात्या० २१।१०।२७ भाष्यम् ।
पुनर्वसु पु०पुनर्+वस–उ । १विष्णौ "विश्वयोनिः पुनर्वसुः" विष्णुस० पुनः पुनः सर्वशरीरेषु चेतनरूपेण वसतीति पुनर्वसुः, भाष्यम् । २शिवे च अश्विन्यधिके सप्तमे ३नक्षत्रे द्वि०व० ४कात्यायनसूत्रौ ५श्लोकभेदे हृषीकारम्भे च यज्ञेषु० । अश्विन्यादिषु मध्ये सप्तमनक्षत्रस्वरूपादिर्देवादि यज्ञेषुशब्दे ४८७४पृ०दर्शितम् । तदीयाद्यचरणत्रयं मिथुनराशिघटकम् शेषपादस्तु कर्कटराशिघटकः । तस्य द्विवचनान्तत्वं तु प्राविकं "पुनर्वसू ह्यतो विप्रः" इत्यादिप्रयोगात् । नक्षत्रार्धे तिष्यश्चेष सप्त इन्दे अस्य द्विवचनान्तता, तिष्यश्च पुनर्वसु च तिष्यपुनर्वसू पुनर्वसुनक्षत्रस्य द्विवचनत्वेन बहुत्वे प्राप्ते द्वित्वविधानम् । कुकुरवंशभे ४ऋषभेदे हरिवं०३२अ० ।
पुन्नाग पु० पुमान् नाग इव श्रेष्ठत्वात् स इव वा । १वृक्षनाम ख्याते पुष्पप्रधाने वृक्षे अमरः "पुन्नागपुंस्यं मधुरं सुगन्धि शीतलं तथा । मनःप्रसादनकरं चित्तनाशनमेव तत्" राजनि० । २शिवोत्पन्ने ३जातीफले ४नरश्रेष्ठे ५पाण्डुनागे च मेदि० ।
पुन्नाट(ड) पु० पुमानिव नाटयति नाटि–अच् । चक्रमर्दे राजनि० नाडि–अच् । पुन्नाडोऽप्यत्र ।
पुन्नामन् पु० पुदिति नामास्य । १नरकभेदे "पुंनाम्नो नरकात् यस्मात्" मनुः । तन्नरकगतिकारणञ्च औडवविधं यथोक्तं वामनपु० ५८अध्याये
"परदाराभिगमनं वृथामांसोपसेवनम् । भ्रूणहत्यं सर्वभूतानां प्रथमं नरकं स्मृतम् । फलस्तेयं मद्यपानं फलाहृत्य च पाटनम् । पाटनं वृक्षजातीनां द्वितीयं परिकीर्त्तितम् । वह्न्यादानं तथा द्विष्टमवध्यवधबन्धनम् । विषादित्वमहेतुत्वं तृतीयं नरकं स्मृतम् । मद्यं सर्वप्राणानां नरमूत्रविनाशनम् । भ्रूणं निजवपोर्वां चतुर्थं नरकं स्मृतम् । मारणं मित्रकौटिल्यं मिथ्याभिशपनञ्च यत् । मिष्टैकाशनमित्युक्तं पञ्चमञ्च विधाचनम् । परोक्षं यन्त्रकरं दमनं योगनाशनम् । यान शय्यास्त्रियं पञ्चक्रं स्वपाचनम् । राजभागस्य हरणं राजजायानिषेवणम् । राज्ये सन्धितकारित्वं सप्तमं नरकं स्मृतम् । सत्यत्वं लोकुपत्वञ्च सत्यधर्मविनाशनम् । नानाकर्मकरं प्रोक्तमष्टमं नरकं स्मृतम् । ब्रह्मस्वहरणञ्चैव ब्राह्मणानां विनिन्दनम् । विरोधो ब्राह्मणैश्चोक्तो नवमो नरकस्त्वयम् । शिष्टाचारविनाशञ्च मिलदेवं शिवार्चनम् । शास्त्रस्तेयं धर्मभूत्यं दशमं परिचक्षते । षडङ्गनिधनं घोरं ब्राह्मणप्रतिषेधनम् । एकादशमभेयोक्तं नरकं सङ्गिरुत्तम ! । सङ्गिरुक्तं सदाचारं विना चारोक्षसत्क्रिया । संस्कारपरिहीनत्वमिष्टं द्वादशमं स्मृतम् । ज्ञानिधर्मार्थकामानामपवर्गस्य चारणम् । स्वर्गस्वर्गं मतिदं त्रयोदशमसञ्ज्ञते । समस्तं धर्महीनत्व यद्वर्ज्यं यच्च दोषजम् । चतुर्दशकमेवोक्तं नरकं सङ्गिरर्हितम् । अज्ञानज्ञाप्यनिष्टत्वमशौचमशुभावहम् । गर्हां तत्पञ्चदशकमसत्यवचनानि च । आत्मस्तुतातताधित्वमगारेष्वग्निदापनम् । इच्छा च परदारेषु नरकाय निगद्यते । ईर्ष्याभावस्य सर्वेषु क्रौडत्यन्तु विगर्हितम् । एतैस्तु पापैः पुरुषः पुन्नामनरके पतेत् । पुन्नामनरकं घोरं विनाशं प्राह सर्वतः । एतस्मात् कारणात् त्राता ततः पुत्रो निगद्यते" । पुमान् पुंशब्दनामाख्यनक्षत्रगणभेद "हस्तो मूलश्रवश्चपुनर्वसुमृगशिरस्तथा पुष्यः । गर्भाधानादिकार्यपुंषु पुन्नामाद्यं गणः शुभदः" ज्यो० त० ।
पुप्पुट पु० "दन्तवेष्टः सोपकुशः पीताभो दन्तपुप्पुटः" इति सुश्रुतोक्ते १क्षुद्ररोगे "नीरुक् स्यायी क्रोडमात्रः कफात् स्यात् मेदोयुक्तात् पुप्पुटस्तालुदेशे" तत्रोक्ते २तालुगते रोगभेदे च ।
पुप्पुस पु० (फोफरा) ख्याते १क्लोमे पद्मबीजाधारे २बीजकोषे च हेमच० । फुप्फुस इति पाठान्तरं तत्रार्थे ।
पुमस् पु० पाति पा–पाचने "पातेर्डुमसुन्" उणा०डुमसुन् । १पुरुषे २मनुष्यजातिमात्रे च अमरः । सत्त्वप्रधानत्रिगुणकार्ये शब्दसंस्कारविशेषयुक्ते शब्दे च । सर्वनामस्थाने परे असुन् पुमांसौ पुमांस इत्यादि समासे यदान्तत्वे अम्-

परे खरि परे वः तस्य च वः। पुंस्कोकिल इत्यादि। बहुव्रीहौ वरःपदत्वात् नित्यं वप्। स पुंस्का खपुंस्का इत्यादि।

पुमनुजा स्त्री पुमांसमनुरुध्य जायते "खनौ कर्मणि" पा० (अनुपूर्वाज्जनेः कर्मण्युपपदे डः स्यात्) अनु+जन-ड पुमांसमनुरुध्य जाता पुमनुजा" सि०कौ०। "दृढ जनिः सर्वधैकः अनुरोधविशिष्टजननवृत्तित्वात्" तत्त्वकौ० पदान्तरेण अन्वयोपः। पुरुषानन्तरजातायां भगिन्याम्।

पुमपत्य न० पुंरूपमपत्यम्। पुंरूपापत्ये अमरः।

पुमाख्या स्त्री ६त०। १पुरुषसंज्ञायां पुमांसमाख्याति ख्या+ख्या-क। "जातिभेदाः पुमाख्याच" अमरोक्ते २पुरुषवाचकशब्दे पु०।

पुमभूमन् पु० ६त०। पुंत्वबहुत्वे अमरः।

पुर अग्रगतौ तु०पर०सक० सेट्। पुरति अपोरीत्। [ङीप्।

पुरःसर त्रि० पुरोऽग्रे सरति सृ-ट। अग्रगामिनि स्त्रियां

पुर न० पुर-अग्रगमने क। १गेहे २देहे पाटलिपुत्रे ३नगरभेदे ४कुलमदलक्ष्मी भेदि० ५नागरङ्गायां रत्नमा० ६चर्मणि शब्दर० ७मदकोपरिस्थे च त्रिका। दक्षुद्यामीखव्यवहारस्थाने बहुकुटुम्बादियुक्ते प्रधानग्रामे न० स्त्री श्रीधरः। स्त्रीत्वे ङीप्। ८पीतशिग्रुवृक्षे अमरः घान्यादिवर्गे १०राशौ ११गुग्गुलौ च पु० शब्दच० पॄ-क। १२पूर्णे प्रचुरे त्रि०। नगरशब्दे २८१६ पृ० पुरीशब्दे च दृश्यम्। पुरे वर्त्तनीयपदार्थाः कविकल्पलतादावुक्ता यथा "पुरे कृतघ्नतोजी च परिखातोरुखञ्जाः। प्राचादाश्वपचाराजवापीवेश्यावतीश्वरौ"।

पुरग त्रि०पुरं गच्छति गम-ड। नगरगामिनि ततः क्रमाद्वा० यत्तदर्थ्यां कप्। पौरगेव तत्तद्विशिष्टदेशादौ। कोटरादि० वनशब्दे परे दीर्घः, ऋतदीर्घात् परस्य वनस्य चत्वम्। पुरागवच नगरगतवने।

पुरजित् पु०पुरं त्रिपुरासुरं जितवान् जि-भूते क्विप्। १त्रिपुरारौ शिवे त्रिपुरघ्नशब्दे २२७पृ० दृश्यम् २चन्द्रवंश्ये नृपभेदे च "बलोऽथ पुरजित्सुतः" भाग०९।२१।१२श्लो०।

पुरज्योतिस् पु० पुरं प्रचुरं ज्योतिरस्य। बह्वौ शब्दार्थके

पुरञ्जन पु० पुरं देहरूपपुरं जनयति जनि-वा० ल्यु। जीवे तद्देहे जीवे "पुरुषं पुरञ्जनं विद्याद् यदुच्यनक्त्यात्मनः पुरम्। एकद्वित्रिचतुष्पादं बहुपादमपादकम्" भाग०४।२९। ३श्लो० १तदधिष्ठानरूपायां २बुद्धौ स्त्री ङीप् भाग०४।२५ २९ अध्याये पुरञ्जनोपाख्याने दृश्यम्।

पुरञ्जय पु० ऋक्षेयुवंशभेदे १नृपभेदे हरिवं०२१अ० २सूर्य्यवंश्ये काकुत्स्थे त्रिका०। "पुरञ्जयस्य सुत इन्द्रवाह इतीरितः। काकुत्स्थ इति चाप्युक्तः" भाग० ९।६।१२ श्लो०।

पुरट न०पुर-वा०अटन्। सुवर्णे "पुरटघटाकूटस्खलविकटकुम्भिघुमैः" भाग० ५।२।५ "पुरटघटा सुवर्णघटाः" श्रीधरः

पुरण पु० पॄ-क्यु। वसुदेवे उज्ज्वलदत्तः।

पुरतटी स्त्री पुरस्या तटीव। क्षुद्रदुर्गे हारा०।

पुरतस् अव्य० पुर-अतसुच्। अग्रत इत्यर्थे अमरः।

पुरद्वार न० ६त०। गोपुरे नगरप्रवेशद्वारे अमरः।

पुरदिव् पु० पुराणां मयनिर्म्मितानां नगरभेदानां दाहकत्वात् दिव-क्विप् ६त०। शिवे जटा०। त्रिपुरघ्नशब्दे २२७२पृ०

पुरन्दर पु० पुरः शत्रूणां दारयति "पूःसर्वयोर्दारिसहोः" पा खच्। "वाचंयमपुरन्दरौ" पा०नि०। १इन्द्रे अमरः। तस्य शत्रुपुरदारकत्वात् तथात्वम्। स च वैवस्वतमन्वन्तरे इन्द्रभेदः भाग०८।१३।३क्रमेण ३ऋग्वेदभाष्ये। ४विष्णौ "आदिदेवः पुरन्दरः" विष्णु स०। ५चक्रे (चट) ख्याते न० शब्दच० ६नद्यां स्त्री हारा०।

पुरन्धि स्त्री द्वि०व० १द्यावापृथिव्योः निरुक्तुः। बहु दृष्टकालातं दधति पुरुधा बहुधा धीयते स्थाप्यते वा धा-कि पृषो०। २दृष्टकालभेदे यजु०१४।२ वेददी० ३बहुबुद्धौ स्त्री "कवीयते वरदतं पुरन्धिम्" ऋ० १।११६।७ पुरन्धिर्बहुधिरिति यास्कः पृषोदरादित्वात् पुरन्धिभावः। यद्वा पुरं पूरयितव्यं सर्वविषयजातमस्यां धीयतेऽवस्थाप्यत इति पुरन्धिर्बुद्धिः कर्मण्यधिकरणे चेति धाधातेः किन्प्रत्ययः। "तत्पुरुषे कृति बहुलमिति" पा०बहुलवचनादलुक् इदं तु व्युत्पत्तिमात्रं वस्तुतः पृषोदरादिरेव" माधव० भाष्यम्। पुरन्धिः अस्त्यस्य मतुप् "अन्धेरः पा०मत्व वः पुरन्धिवत् ऋ०६७।२।४ तद्युते त्रि०।

पुरन्ध्रि(स्त्री) पुरं गेहस्थजनं धारयति पालयति ॄ-क्विप् ङीप् पृषो० वा हुस्वः। बहुकुटुम्बवत्याम्, पतिपुत्रवत्याच स्त्रियां, "गृहेगृहे सार्वपुरन्ध्रिवर्गम्" कुमा०।

पुरपाल पु० पुरं नगरं देहं वा पालयति पाल-क्विप्। १नगरपाले २देहपालके जीवे च।

पुरभिद् पु० पुराणि त्रिपुरासुरपुराणि भिनत्ति-भिद-क्विप्। महादेवे शिवे ३क्षेमच० त्रिपुरघ्नशब्दे दृश्यम्। पुरभेदनादयोऽस्य।

पुरमथन पु० पुरं त्रिपुरासुरं मथ्नाति मथ-ल्यु। शिवे

पुरमार्ग पु० ६त० । नगरमार्गे कुमा० ४।११ श्लो० ।
पुरमानिनी स्त्री नदीभेदे भा०भी० ६च० ।
पुरय पु० ऋषभेदे ऋ० ६।६३।६ भा० ।
पुररक्ष पु० पुरं रक्षति रक्ष–क्विप् ष० त० । नगररक्षके
णिनि ६त० । पुररक्षिन् तत्रार्थे ।
पुरला स्त्री पुर–कलच् । दुर्गायां हेमच० ।
पुरवासिन् त्रि० पुरे वसति णिनि । नगरवासिनि पौरे
जने स्त्रियां ङीप् ।
पुरश्चासन पु० पुरं शास्ति शास–ल्यु । महादेवे कुमा०७।२०
पुरश्चरण न० पुरस्+चर–भावे ल्युट् । १जपत आचरणे
तन्त्रोक्ते २गृहीतमन्त्रसिद्धिहेतुप्रयोगभेदे तत्प्रकारादि
तन्त्रसारे उक्तं यथा
"अथ पुरश्चरणं योगिनीहृदये "गुरोरात्मां समादाय शुद्धान्तःकरणो नरः । ततः पुरश्क्रियां कुर्यान्मन्त्रसंसिद्धिकाम्यया" । तच्च नित्यतामाह "जीवद्दीनो यथा देही सर्वकर्मसु न क्षमः । पुरश्चरणहीनोऽपि तथा मन्त्रः प्रकीर्त्तितः । तस्मादादौ स्वयं कुर्याद्गुरुं वा कारयेद्बुधः" योगिनीहृदये "गुरोरभावे विप्रं वा सर्वप्राणिहिते रतम् । शिष्यं शास्त्रविदं भिन्नं नानागुणसमन्वितम् । स्त्रियं वा बहुभोगेतां सुपुत्रां विनियोजयेत् । आदौ पुरश्क्रियां कर्त्तुं स्थाननिर्णय उच्यते" । योगिनीहृदये "पुण्यक्षेत्रं नदीतीरं गुहा पर्वतमस्तकम् । तीर्थप्रदेशाः सिद्धानां सङ्गमः पावनं वनम् । उद्यानानि विचित्राणि बिल्वमूलं तटं गिरेः । तुलसीकाननं गोष्ठं सप्तसन्ध्यं शिवालयम् । अश्वत्थामलकीमूलं गोशाला जलमध्यतः । देवतायतनं कूलं यत्रेष्टस्य निजं गृहम् । साधनेतु प्रशस्तानि स्थानान्येतानि मन्त्रिणाम् । अथ वा निवसेत्तत्र यत्र चित्तं प्रसीदति" । वायवीयसंहितायामपि "सर्वस्मात्पे गुरोरिन्दोर्दीपस्य च जलस्य च । विप्राणाञ्च गवां चैव सन्निधौ शस्यते जपः" । तथा "गृहे शतगुणं विद्याद्गोष्ठे लक्षगुणं भवेत् । कोटिर्देवालये पुण्यमनन्तं शिवसन्निधौ । सद्मे गोष्ठे तडागे च नदीनदशिवालये । गुरोर्वा सन्निधिर्यत्र स जपः परमोमतः । म्लेच्छदुष्टजनस्थानः क्षुद्रदुर्विजितो । एकान्तप्रवणे निर्द्वारक्षिते भक्तिसंयुते । सदेशे धार्मिके देशे सुभिक्षे निरुपद्रवे । रम्ये भक्तजनस्थाने निवेशितापसः प्रिये ! । गुरूणां सन्निधाने च चित्तैकाग्र्यञ्च जायते तथा । प्रेतभूम्यादिकञ्चैव तत्तत्कल्पप्रकाशितम् । एषामन्यतमं स्थानमाश्रित्य जपमाचरेत् । यत्र ग्रामे जपेन्मन्त्री तत्र कूर्मं विचिन्तयेत् गौतमीये "पर्वते सिन्धुतीरे वा पुण्येऽरण्ये नदीतटे । यदि कुर्यात् पुरश्चर्यां तत्र कूर्मं न चिन्तयेत् । ग्रामे वा यदि वा वाटो गृहे तत्र विचिन्तयेत्" रुद्रयामले "जपमेकगुणं गेहे गोष्ठे दशगुणं भवेत् । वनान्तरे शतगुणं तडागे च सहस्रकम् । नदीतीरे लक्षगुणं नगाग्रे कोटिसम्मितम् । शिवालये कोटिगुणमनन्तं सुरसन्निधौ" । अथ पुरश्चरणे भक्ष्यादिनियमाः गौतमीये "पुरश्चरणकर्त्ता तत्र भक्ष्यं विवेचयेत् । अन्यथा भोजनाद्दोषात् सिद्धिर्हानिः प्रजायते । यस्यास्तु समशीलान्नं सिद्धिस्तस्य भवेद्ध्रुवा । तस्मादित्यं प्रयत्नेन यस्यान्नाशी भवेन्नरः" । अगस्त्यसंहितायाम् "तिलाश्चैव सितारुद्राः कन्दः केतक वर्जितः । नारिकेलफलञ्चैव कदली लवणी तथा । आम्रमामलकञ्चैव पनसञ्च हरीतकी । व्रतान्तरे प्रशस्तञ्च हविष्यं मन्यते बुधैः" । व्रतान्तर इति "हैमन्तिकं सितासितं धान्यं सुद्गास्तिला यवाः । कलायकङ्गुनीवारा वास्तूकं सितमोचिका । घृतिकाः कालशाकानि मूलकं केसुकेतरत् । लवणे सिन्धुसम्भूते गव्ये च दधिसर्पिषी । पयोऽनुद्धृतसारञ्च पनसं हरीतकी । पिप्पलीजीरकञ्चैव नागरङ्कृतसैन्धवी । कदली लवणी धात्री फलान्यगुडमैक्षवम् । घृतेसक्तं समयो हविष्यान्नं प्रचक्षते । भुञ्जानो वा हविष्यान्नं शाकं यावकमेव वा । यवोभूतं फलं वापि यत्र यत्रोपलभ्यते । रम्भाफलं तिन्तिडीकं कमलानागरङ्कृतम् । फलान्येतानि भोज्यानि एभ्योऽन्यानि विवर्जयेत्" यत्तु योगिनीतन्त्रे "चिञ्चाञ्च मालिकाशाकं कलायं सक्तुचनका । कदम्बं नारिकेलञ्च व्रते कृच्छ्रसमं त्यजेत्" इति तत्तु व्रतान्तरे बोद्धव्यम् । तथा तत्रैव "विवर्जयेन्मधुचारं लवणं तैलमेव च । ताम्बूलं काँस्यपात्रञ्च दिवाभोजनमेव च" । तथा "क्षारञ्च लवणं मांसं मद्यं कांस्यभोजनम् । माषाढकीमसूरांश्च चनकान् कोद्रवानपि । कौटिल्यं क्षौरमभ्यङ्गमनिवेदितभोजनम् । अप्रदक्षिणं लङ्घनञ्च वर्जयेन्मर्दनादिकम् । स्नायाच्च यत्नतश्चैव शीतलाम्बुकेन वा । मन्त्रजाप्यसपानीयैः स्नानाचमनभोजनम् । कुर्यादाद्योक्तविधिना नित्यं देवतार्चनम् । अपवित्रकरो नग्नः शिरसि प्राहृतोऽपि वा । प्रलपन् प्रजपेद्यावत्तावच्चिरफलप्रदम्" । नारदीये "मद्य मांसं

सुपक्वञ्च कृत्वाहै चरुभोजनम्। नेन्द्रियाणां यथाशक्ति-सेवा भुञ्जीत साधकः"। कुलार्णवेऽपि "यस्मात्तपान-पुटाकृः कृते धर्मसञ्चयम्। अन्नदातुः फलञ्चार्द्धं कर्त्तुश्चार्द्धं न संशयः। तस्मात्सर्वप्रयत्नेन परान्नं वर्जये-देत् सुधीः। पुरश्चरणकाले तु सर्वकर्मसु शाम्भवि!। भिक्षा दग्धा परान्नेन करी दग्धो प्रतिग्रहात्। मनो-दग्धं परस्त्रीभिः कथं सिद्धिर्वरानने!" परान्नं भिक्षे-तरविषयम्। भिक्षायां तस्य सत्वोत्पादात् तथा च "वैदिकाचारयुक्तानां शुचीनां श्रीमतां सताम्। सत्कु-लस्थानजातानां भिक्षा स्यादयजन्मनाम्" योगिनीहृदये "भिक्षाय वह्निं न हि वस्तु किञ्चित् याच्ञां परेभ्यः सति सम्भवे च। असम्भवे तीर्थबहिर्हिरण्यात् पर्वातिरिक्ते प्रतिगृह्य जह्यात्। तत्रासमर्थोऽहरहर्विशुद्धादुपाचेत-यावद्धनमात्रमभीप्सम्। स्पृशति रागादधिकं न विद्वि: प्रजायते कल्पतरैरतुल्य"। सकृदुच्चरिते ब्रह्मे प्रथमं स शरीरवेत्। प्रोक्ते पारम्भे ब्रह्मे प्राणायामं समाच-रेत्। षड्ब्रह्मापी प्राणायम्य न्यासाङ्गानि ततो जपेत्। ऋष्यादेर्न्यासं तथाऽन्यत्कल्पानानां स्मरणेन च। एवमादौच नित्यमान् पुरश्चरणमाचरेत्। विष्णुमन्त्रोक्तमेवाङ्गादियुक्तः कर्म करोति यः। जपार्चनादिकं सर्वमपवित्रं भवेत् प्रिये!। अग्निनाम्बरजेत्यादिसप्तदौर्गन्ध्यसंयुतः। यो जपेत्तं दहत्याशु देवता गुप्तिसंस्थिता। आलस्यं जृम्भणं निद्रां क्षुतं निष्ठीवनं भयम्। नीचाङ्गस्पर्शनं कोपं जपकाले विवर्जयेत्। एवमुक्तविधानेन विलम्बं त्वरितं विना। कृत्वा सङ्ख्यं जपं कुर्यात् पुरश्चरणसिद्धये। देवतागुरु-मन्त्राणामैक्यं सम्भावयन् धिया। जपेदेकमनाः प्रातः-कालान्मध्यन्दिनावधि। यत्सङ्ख्या समारब्धं तत्कर्त्तव्य मतन्द्रितम्। यदिन्यूनाधिकं कुर्यात् व्रतभ्रष्टो भवेन्नरः"। सङ्केतमाचारयाम् "यत्सङ्ख्या समारब्धं तत्सङ्ख्यं दिने दिने। न्यूनाधिकं न कर्त्तव्यमासमाप्तं सदा जपेत्। प्रजपेदुक्तसंख्यायाश्चतुर्थं जलदं कलौ"। अन्यत्रापि "कृते जपस्तु कथितः त्रेतायां द्विगुणो जपः। द्वापरे त्रिगुणः प्रोक्तश्चतुर्थं जलदः कलौ"। कुलार्णवेऽपि "न्यूनातिरि-क्तकर्माणि न फलन्ति कदाचन। यथाविधि कृतान्येव तत्कर्माणि फलन्ति हि। भूमध्याब्रह्मचारित्वं मौन-माचार्य सेविता। नित्यं त्रिसवणं स्नानं जुहूकर्मविध-र्जनम्। नित्यपूजा नित्यदानं देवतास्तुतिकीर्त्तनम्। नैमित्तिकार्चनञ्चैव विप्राणां गुरुदेवयोः। जपनिष्ठा द्वा-दशैते धर्माः स्युर्मन्त्रसिद्धिदाः। स्त्रीशूद्रपतितव्रात्य नास्तिकोच्छिष्टभाषणम्। असत्यभाषणं निष्ठभाषणं परि-वर्जयेत्। सर्वेणापि न भाषेत जपहोमार्चनादिषु। अन्यथानुष्ठितं सर्वं भवत्येव निरर्थकम्"। तन्त्रे "ऋतु-कालं विना मन्त्री स्त्रीस्थं नापि संस्पृशेत्। मैथुनं तत्फलाकाङ्क्षं तद्गोष्ठीः परिवर्जयेत्। पुरश्चरणकाले तु यदि स्यान्मृतसूतकम्। तथापि कृतसंकल्पो व्रतं नैव परित्यजेत्" योगिनीहृदये "शयीत कुशशय्यायां शुचि-र्वस्त्रधरः सदा। प्रत्यूषे चोत्थितः प्रथमेकाकी निर्भयः स्थिरः। असत्यभाषणं वाचं कुटिलां परिवर्जयेत्। वर्ज-येद्दुर्गीतवाद्यादिश्रवणं नृत्यदर्शनम्। अभक्ष्यं गन्धलेप-मद्य पुष्पधारणमेव च। त्यजेदुच्छोदकस्नानमन्यदेव विपूजनम्"। तत्रैव "नैकवासा जपेन्मन्त्रं वस्त्रवासा-कुलोऽपि वा"। वैशम्पायनसंहितायाम् "विण्मूत्रं न कुर्याच्च कदाचिदपि मोक्षतः। उपर्यधो बहिर्वस्त्रे प-रश्चरणतत्परः। विनियोगविधाने तु भवेदनियमः क-चित्। पतितानामन्त्यजानां दर्शने भाषणे श्रुते। श्रुतेऽधो वायुगमने जृम्भणे जपमुत्सृजेत्। तथा तस्य च तत्-प्राप्तौ प्राणायामं षडङ्गकम्। कृत्वा सम्यग् जपेच्छेषं यद्वा सूर्यादिदर्शनम्"। आदिशब्दाद्विप्राक्रुष्टौ। तन्त्रान्तरे "मनःसंहरणं शौचं मौनं मन्त्रार्थचिन्त-नम्। अव्यग्रत्वमनिर्वेदो जपसम्पत्तिहेतवः। उष्णीषी कञ्चुकी नग्नो मुक्तकेशो मलाहतः। अपवित्रकरोऽशुद्धः सर्वत्र जपेत् क्वचित्। अनासीनः अयानो वा गच्छन् भुञ्जान एव वा। अप्राहतौ करौ कृत्वा शिरसि प्राह-तोऽपि वा। चिन्ताव्याकुलचित्तो वा क्षुब्धो ध्यानः क्षु-धान्वितः। रथ्यायामशिवे स्थाने न जपेत्तिमिरान्तरे। उपानद्गूढपादो वा यानशय्यागतस्तथा। प्रस्थार्थ न जपेत् पादावुत्कटासन एव वा। न यत्रकुत्रे पाषाणे न भूमौ नासने स्थितः। माञ्जीरं कृकुटं क्रौञ्चं स्थानं गृहं कपिं खरम्। दृष्ट्वाचम्य जपेच्छेषं स्नात्वा स्नानं विधीयते"। "एवं जपं पुरा कृत्वा तेजोरूपं समर्पयेत्। देवस्य दक्षिणे हस्ते कुशपुष्पाक्षवारिभिः। सफलं तद्विधायैव प्राणायामं समाचरेत्। जपस्यादौ जपान्ते च त्रितयं त्रितयञ्चरेत्"। अस्त्रविषये देव्या वामकर्णे तथा च "एवं जपं पुरा कृत्वा गन्धाक्षतकुशोदकैः। जपं सम-र्पयेद्देव्या वामकर्णे विचक्षणः"। "जपान्ते प्रत्यहं मन्त्री होमयेत्तद्दशांशतः। तर्पणञ्चाभिषेकञ्च तत्तद्दशांशतो सुने!।

प्रत्यहं भोजयेद्विप्रान् न्यूनाधिक्यप्रशान्तये। अथवा सर्वसम्पूर्त्तौ होमादिकमथाचरेत्"। सनत्कुमारसंहितायाम् "तस्य यावान् जपः प्रोक्तस्तद्दशांशमहक्रमात्। तत्तद्द्रव्यैर्जपस्यान्ते होमं कुर्याद्दिने दिने"। पुरश्चरणचन्द्रिकायाञ्च "ततो जपदशांशेन होमं कुर्याद्दिने दिने। अथवा लक्षसंख्यायां पूर्णायां होममाचरेत्"। तथा होमाद्यशक्तौ सनत्कुमारीये "यद्यदङ्गं भवेद्धीनं तत्तत्संख्याद्विगुणो जपः। होमाभावे जपः कार्य्यो होमसंख्याचतुर्गुणः। विप्राणां, क्षत्रियाणाञ्च रसषड्गुणा गुणः स्मृतः। वैश्यानां वसुसंख्याकमेवं स्त्रीणामयं विधिः। यं वर्णमाश्रितः शूद्रः स च तस्य विधिश्चरेत्। अनाश्रितस्य शूद्रस्य दिक्संख्याकः समीरितः। शूद्रस्य विप्रभृत्यस्य तत्तत्यागः सदो जपः"। अत्राद्यशक्तेर्दुर्योगिनीहृदये "होमकर्मण्यशक्तानां विप्राणां द्विगुणो जपः। इतरेषान्तु वर्णानां त्रिगुणादिः समीरितः। त्रिगुणादिः होमसंख्यात्रिगुणजपः क्षत्रियेण कार्य्यः। वैश्येन चतुर्गुणः। शूद्रेण पञ्चगुणः कार्यः। तदुक्तं कुलप्रकाशे "यद्यदङ्गं विहीनं स्यात्तत्संख्याद्विगुणो जपः। कुर्वीत त्रिचतुःपञ्च यथासख्यं द्विजादयः"। एतेन स्त्रीशूद्रादीनां होमाधिकारः। तथा च शूद्राणां त्र्यक्षमिति कुलप्रकरणे शारदायाम्। स्त्रीणां होमाधिकारश्च तत्रैव "नाजैस्त्रिमधुरोपेतैर्होमः कन्यां प्रयच्छति। अनेन विधिना कन्या वरमाप्नोति वाञ्छितम्"। अतः स्त्रीणां होमाधिकारः। तच्च ब्राह्मणद्वारा तथा च तन्त्रे "ओङ्कारोच्चारणाद्धोमात् शालग्रामशिलार्चनात्। ब्राह्मणीगमनाच्चैव शूद्रस्याप्नोति सद्गतिं व्रजेत्"। तथा स्त्रीणामपि सर्ववैदिककर्मसु शूद्रतुल्यत्वप्रतिपादनात् यथा "स्त्रीशूद्रकरसंस्पर्शो वज्रपातसमो मम" इति भगवद्वचनात् तथा नारायणकल्पे "अष्टाक्षरो महामन्त्रः सर्वप्राप्तः शूद्रयोषितः। प्रणवादिस्तु यो मन्त्रो न स्त्रीशूद्रे प्रशस्यते" इति सर्वत्र स्त्रीणां शूद्रवद्व्यवहारः। सर्वेषां वा द्विगुणो जपः। तथा च तन्त्रान्तरे "यद्यदङ्गं विहीनेत तत्संख्याद्विगुणो जपः। कर्त्तव्यश्चाङ्गसिद्ध्यर्थं तदशक्तेन भक्तितः। न चेदङ्गं विहीनेत तद्विशिष्टमवाप्नुयात्" तथागस्त्यसंहितायाम् "यदि होमेऽप्यशक्तः स्यात् पूजायां तर्पणेऽपि वा। तावत्संख्यजपेनैव ब्राह्मणाराधनेन च। भवेदङ्गहवेनैव पुरश्चरणमाप्यते"। तत्र ब्राह्मणभोजनमावश्यकमेव "सर्वथा भोजयेद्विप्रान् व्रतसाङ्गत्वसिद्धये। विप्राराधनमात्रेण व्यङ्गं साङ्गं भवेद्ध्रुवम्। दीक्षाहीनान् पशून् वस्तु भोजयेदा स्वमन्दिरे। स याति परमेशानि! नरकानेकविंशतिम्"। पशुर्द्विधा अदीक्षितः कुलाचारनिन्दकश्च यथा कुलार्णवे "अदीक्षितः कुलाचारनिन्दको द्विविधः पशुरिति"। नैवेद्यदानेऽपि "न पशुभ्यो न वाऽद्विजे" इति निन्दाश्रवणाच्च सर्वत्रायं विधिरिति सम्प्रदायः। "एवं यः कुरुते देवि! पुरश्चर्यादिकं प्रिये। सर्वपापविनिर्मुक्तो देवसायुज्यमाप्नुयात्"। ततश्च "गुरवे दक्षिणां दद्याद्भोजनाच्छादनादिभिः। गुरुसन्तोषमात्रेण मन्त्रसिद्धिर्भवेत् ध्रुवम्। सम्यक्सिद्धैकमन्त्रस्य पश्चाद्धोपासनेन च। सर्वे मन्त्राश्च सिद्ध्यन्ति तत्प्रसादात् सुरेश्वरि!। गुरुमूलमिदं सर्वमित्याह्यन्यवेदिनः। एकग्रामे स्थितो नित्यं गत्वा वन्देत वै गुरुम्। गुरुरेव परं ब्रह्म तस्मादादौ तमर्चयेत्। तदन्ते महतीं पूजां कुर्यात् साधकसत्तमः। स्वयोषितं कुमारीञ्च भूषणैरभिभूषयेत्। मिष्टान्नं वटुकः कार्य्यं भुञ्जीत बान्धवैः सह। एवंविधमनुष्ठाता साधयेत् सकलेप्सितान्"। तन्त्रे "अथ वान्यप्रकारेण पुरश्चरणमिष्यते। यद्यर्केऽर्कस्य चेन्दोर्वा शुचिः पूर्वमुपोषितः। नद्यां सप्तद्रगामिन्यां नाभिमात्रोदके स्थितः। यावदिष्टक्षिपर्यन्तं जपेन्मन्त्रमनन्यधीः। इति कृत्वा न सन्देहो जपस्य फलभाग् भवेत्"। नद्यभावे "यदा पुष्योदके स्नात्वा शुचिः पूर्वमुपोषितः। यद्यदादिविमोक्षान्तं जपेन्मन्त्रं समाहितः" उपवासासामर्थ्ये तु तत्रैव "अथ वान्यप्रकारेण पौरश्चरणिको विधिः। चन्द्रसूर्योपरागे च स्नात्वा प्रयतमानसः। स्वयोदिमोक्षपर्यन्तं जपेन्मन्त्रं समाहितः। जपाद्दशांशतो होमं तथा होमात्तु तर्पणम्। एवं कृत्वा तु मन्त्रस्य जायते सिद्धिरुत्तमा। चन्द्रसूर्योपरागे तु ये मन्त्राः परमेश्वरि! तेषां विद्या न सिद्ध्यन्ति परं नरकगामिनः। सूर्यचन्द्रमसोः पर्व प्राप्यापि च पुरस्क्रियाम्। ये मूढा न च कुर्वन्ति ते भवन्ति कुलद्रुहाः" इति कुलार्णववचनात् पुरश्चरणस्यावश्यकत्वमेवेति। गोपालमन्त्रतर्पणं तु होमसमसंख्यकं यथा "इह गोपालमन्त्राणां तर्पणं होमसंख्यया" इति। "इहा स्नात्वा सप्तद्रुखो विमोक्षान्तं जपेच्चरेत्। तावद्दयष्टादिकं कुर्याद्दशदिक्षान्ते शुचिः पुमान्। एवंजपे मन्त्रसिद्धिर्भवत्येव न संशयः"। यद्यपि

जपस्यावश्यकत्वम् "आद्यादेरनुरोधेन यदि जाप्यं त्यजेन्नरः । स भवेद्देवताद्रोही पितॄन् सप्त नयत्यधः" इति वनदुर्गारीयवचनादिति केचित् । वस्तुतस्तु आरब्ध पुरश्चरणविषयमिदम् । तथा हि "आरब्धे पुरश्चरणे यदि ग्रहो भवेत् तदा । आद्यादेरनुरोधेन जपं नैव त्यजेत् नरः" । एवं रात्रावपि पुरश्चरणे बोद्धव्यम् इति सर्वसमञ्जसम् । नारदतन्त्रे "रोहिणी श्रवणार्द्रा च धनिष्ठा चोत्तरात्रयम् । पुष्या शतभिषा हस्ता पुरश्चरणकर्मणि । पूर्णिमा पञ्चमी चैव तिस्रोऽपि सप्तमी तथा । त्रयोदशी च दशमी प्रशस्ता सर्वकर्मणि । सप्तवर्षेऽर्कविधुवाचे तन्तुदामनपर्वणि । पुरश्चर्यां प्रकुर्वाणो मासचांद्रान् न शोधयेत्" । योगिनीहृदये "कल्पोक्तविधिना मन्त्री कुर्याद्धोमादिकन्ततः । अथ वा तद्दशांशेन होमादींश्च समाचरेत्" तथा "अनन्तरं दशांशेन क्रमाद्धोमादिकञ्चरेत् । तदन्ते महतीं पूजां कुर्यात् ब्राह्मणभोजनम् । ततो मन्त्रस्य सिद्ध्यर्थं गुरुं संपूज्य तोषयेत् । एवञ्च मन्त्रसिद्धिः स्याद्देवता च प्रसीदति । दीनदरिद्रान् पन्थनं यस्तु भोजयेद्वा स्वमन्दिरे । स याति परमेशानि ! नरकानेकविंशतिम्" । यद्यपि पुरश्चरणपदं पञ्चाङ्गपरं तथा च "जपहोमौ तर्पणञ्चाभिषेको विप्रभोजनम् । पञ्चाङ्गोपासनं प्रोक्तं पुरश्चरणमिष्यते" तथापि ग्रहणादौ पुरश्चरणपदं गौणं जपमात्रम् "सूर्योदयं समारभ्य यावत् सूर्योदयान्तरम्" इत्यादौ तथादर्शनात् तत्र होमादेरभावात् । तर्हि कथं ग्रहणे पुरश्चरणे होमादिरिति चेत् । वचनादेव जायते न च पुरश्चरणस्य पञ्चाङ्गत्वात् सर्वत्र तदेव स्यादिति वाच्यम् । ग्रहणे पुनस्तद्विधानमनर्थकं स्यात् । किञ्च ग्रहणे होमादिनियमान् नान्यत्र होमादिः । ग्रहणपुरश्चरणे होमादिविधानन्तु प्रकृतीभूतपञ्चाङ्गपुरश्चरणतुल्यताबोधनाय । अतएव ग्रहणे पञ्चाङ्गरूपपुरश्चरणप्रकृतौ तुल्यप्रयोगेऽधिकार इति प्रकटीकृतम् । तत्करणे पुनः केवलजपमात्रपुरश्चरणे नाधिकार इति सर्वसम्मतम् । पुरश्चरणकालस्तु वाराहीतन्त्रे "चैत्रे माघेऽथ वा कुर्यात् शुभदं गुरुशासनात् । दादश्यां शुक्लपक्षे तु माधवे भानि तत्तिथौ । आरभेत्मासार्द्धं वै पुरश्चर्यां विशुद्धये" । इदन्तु गोपालविषयम् । वैशम्पायनसंहितायाम् "चन्द्रताराहकूले च शुक्लपक्षे शुभेऽहनि । आरभेन्मकरादौ च रवौ शुभे न चारभेत्" । प्रतिप्रसवो रुद्रयामले "कार्त्तिकाश्विनवैशाखमाघेऽथ मार्गशीर्षके । फाल्गुने श्रावणे दीक्षा पुरश्चर्या प्रशस्यते । रवौ गुरौ सिते सोमे कर्त्तव्यं बुधवासरे । चन्द्रताराबलोपेते च पुरश्चरणकर्म तत् । ग्रहणे च महातोयें न कालमवधारयेत्" । ग्रहान्ते ग्रहोदये च दीक्षा पुरश्चरणयोर्निषेधमाह तन्त्रान्तरे "ग्रस्तेऽस्ते ह्युदिते नैव दीक्षां कुर्याच्छ्रियं प्रिये ! । ऋते नाशोऽभवेद्दाम्नः स्त्रीसुतस्वस्वदामृ" । क्यप् । पुरश्चर्यायत्र स्त्री । [त्रिका०]

पुरश्छद पु०पुरश्छादयति छदि णच् छुगच । (जतु) लक्षभेदे

पुरस् अव्य० प्रथमापञ्चमीसप्तम्यर्थवृत्तेः पूर्वशब्दात् दिग्देशकालवाचकात् असि पुर् आदेशः । १पूर्वस्यां दिशि पूर्वस्मिन् २काले ३देशे च । तथा च पूर्वा दिक् पूर्वः कालो देशो वा तथा पूर्वस्या दिश आगच्छति पूर्वस्मादागच्छति पूर्वस्यां दिशि वर्त्तते पुरो वर्त्तते एवं देशे काले च । ४अग्रत इत्यर्थे अमरः । "पुरोऽव्ययम्" पा० अस्य च समर्थेन सह समासः ऊङ्योगे भूषणादियोगे च उपपदसंज्ञायाम् पुरस्कृत्य पुरोभूय पुरोगत्येति प्रयोगः ।

पुरसंस्कार पु० ६त० । नवदुर्गस्य संस्कारे शारा० ।

पुरस्कार पु० पुरस्+कृ-भावे घञ् । १पूजने २अग्रिमपदे ३अभिशापे ४अग्रतः करणे ५ओंकारे ६वेके च । पुरस्+कृ-भावे श । पुरस्क्रिया तथार्थे पुरश्चरणे च स्त्री ।

पुरस्कृत त्रि० पुरस्+कृ-क्त । १पूजिते २अभिशप्ते ३अग्रिमपदीकृते ४अग्रतः कृते च मेदि० । ५ओंकृते ६क्षिप्ते च हेमच० ।

पुरस्तात् अव्य०दिग्देशकालपरात् पूर्वशब्दात् प्रथमापञ्चमीसप्तम्यर्थे अस्ताति पुर् आदेशः । दिग्देशकालवृत्तौ प्रथमापञ्चमीसप्तम्यर्थवृत्तौ पूर्वशब्दार्थे, पुरोवत् उदाहरणम् बोध्यम्

पुरहन् पु० पुरं त्रिपुरं हन्ति क हन-भूते किप् । १महादेवे शतपुराणां हन्तरि २विष्णौ च भाग० ७।१०।६८ तस्य महादेवे स्वशक्त्याः संक्रमणात् त्रिपुरनाशकत्वम् तत्कथा तत्र अध्याये दृश्या ।

पुरा अव्य०पुर-का ।१अविच्छेदेन क्रियाकरणे २पुराणे ३अतीते ४भाविनि ५निकटे पुराणे च अमरः । पुर+क टाप् । ७पूर्वस्यां दिशि ८समुद्रविशेषभेदे च स्त्री०राजनि० "पुरा तिक्ता कटुः शीता कषायकफपित्तनुत् । पित्तदाह श्रमविषप्रदाहमूर्च्छाव्रणापहा" तद्गुणाः तत्रोक्ताः ६भीरौ अव्य० शब्दरत्ना० ।

पुराकथा स्त्री पुरा प्राचीना कथा। इतिहासे भाग० २।१२।४६

पुराकल्प पु० पुरा पुराणः कल्पः। प्राचीने कल्पे मनुः ८। २२अ०। "स्तुतिर्निन्दापुराकल्पपरकृतिपुराकल्पः" इत्यर्थवादः गौ०।१।२।६०उक्ते २अर्थवादभेदे। अर्थवादशब्दे ३६६ पृ० उदा० दृश्यम्।

पुराकृत त्रि० पुरा पूर्वं कृतम्। पूर्वकृते दृढ जन्मनि जन्मान्तरे कृते पापपुण्यादौ "अक्षाणे दर्शनं विष्णोर्ज्ञेयं पण्यं पुराकृतम्" स्मृतिः। प्रारब्धकर्मभोगान्तु भोगादेव क्षयो न तेषां केनापि नाश्यतेति सिद्धान्तः।

पुराग त्रि० पुरा गच्छति गम-ड। पूर्वगामिनि ततः कृत्या० चतुरर्थां०ढक्। पौरागीय तत्रभवितृदेशादौ त्रि०

पुराण आख्याने कल्पादेराकृतिगणत्वात् यक् पर० सक० सेट्। पुराण्यति अपुराणीत्।

पुराण त्रि० पुरा भवः शु नि० टुट् न, पुरा भीयते भी ड वा पूर्व०त्वम्। १पुराभवे "सर्गश्च प्रतिसर्गश्च वंशोमन्वन्तराणि च। वंशानुचरितञ्चैव पुराणं पञ्चलक्षणम्" इत्युक्तलक्षणे व्यासादिप्रणीते २शास्त्रभेदे न०।

तच्च द्विविधं महापुराणोपपुराणभेदात् तत्र उपपुराणशब्दे तद्भेदादिकञ्च महापुराणं च दशलक्षणकम् "सर्गोऽस्याथ विसर्गश्च वृत्तीरक्षान्तराणि च। वंशोवंशानुचरितं संस्था हेतुरपाश्रयः। दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः। केचित् पञ्चविधं ब्रह्मन्! महदल्पव्यवस्थया। अव्याकृतगुणक्षोभान्महतस्त्रिवृतोऽहमः। भूतसूक्ष्मेन्द्रियार्थानां सम्भवः सर्ग उच्यते। पुरुषानुगृहीतानामेतेषां वासनामयः। विसर्गोऽयं समाहारो बीजाद्बीजं चराचरम्। वृत्तिर्भूतानि भूतानां चराणामचराणि च। कृता स्वेन नृणां तत्र कामाद्योदनयापि वा। रक्षाऽच्युतावतारेहा विश्वस्यानुयुगे युगे। तिर्यङ्मर्त्यऋषिदेवेषु हन्यन्ते यैस्त्रयीद्विषः। मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वराः। ऋषयोंऽशावताराश्च हरेः षड्विधमुच्यते। राज्ञां ब्रह्मप्रसूतीनां वंशस्त्रैकालिकोऽन्वयः। वंशानुचरितं तेषां वृत्तं वंशधराश्च ये। नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको लयः। संस्थेति कविभिः प्रोक्तचतुर्धास्य स्वभावतः। हेतूतीवोऽस्य सर्गादेरविद्याकर्मकारकः। यं चानुशयिनं प्राहुरव्याकृतगुणाश्रयं। व्यतिरेकान्वयो यस्य जायदाद्यासु सुप्तिषु। मायामयेषु तद्ब्रह्म जीववृत्तिष्वपाश्रयः। पदार्थेषु तथा द्रव्यं तन्मात्रं रूपनामसु। बीजादिपञ्चतान्तासु ह्यवस्थासु युतायुतम्" भाग०१२।७अ०। तच्चाष्टादशविधम्। विष्णुपुराणे तद्भेदा उक्ता यथा

"अष्टादश पुराणानि पुराणज्ञाः प्रचक्षते। ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा। तथान्यच्चारदीयञ्च मार्कण्डेयञ्च सप्तमम्। आग्नेयमष्टमञ्चैव भविष्यं नवमं स्मृतम्। दशमं ब्रह्मवैवर्त्तं लैङ्गमेकादशं स्मृतम्। वाराहं द्वादशञ्चैव स्कान्दञ्चैव त्रयोदशम्। चतुर्दशं वामनञ्च कौर्मं पञ्चदशं स्मृतम्। मात्स्यञ्च गारुडञ्चैव ब्रह्माण्डञ्च ततःपरम्"। हेमाद्रिः ब्र० उक्तं तेषां श्लोकसंख्यादि तत्तत्पुराणशब्दे दृश्यम्। तेषां तामसत्वादिभेदाः पद्मपु० उत्तरख० ४२अ० दर्शिता यथा

"मात्स्यं कौर्मं तथा लैङ्गं शैवं स्कान्दं तथैव च। आग्नेयञ्च षडेतानि तामसानि निबोधत"। "वैष्णवं नारदीयञ्च तथा भागवतं शुभम्। गारुडञ्च तथा पाद्मं वाराहं शुभदर्शने!। सात्त्विकानि पुराणानि विद्ध्येतानि शुभानि वै"। "ब्रह्माण्डं ब्रह्मवैवर्त्तं मार्कण्डेयं तथैव च। भविष्यं वामनं ब्राह्मं राजसानि निबोधत। सात्त्विका मोक्षदा देवि! निर्वाणप्राप्तिहेतवः"। अयीति वराटकमिते २पथे ४कार्षापणे च पु०न० शब्दरत्ना०।

पुराणग पु० पुराणैः गीयते गै-कर्मणि क, पुराणं गायति गै-क वा। १ब्रह्मणि परात्मनि हेमच० २पुराणगायके त्रि०।

पुराणपुरुष पु० पुराणैरुपलक्ष्यः पुरुषः शाक०त० कर्म० वा। १विष्णौ २ब्रह्मे च त्रिका०।

पुराणान्त पु० पुराणान् पुरातनान् अन्तयति अन्त+णिच्-अच् उप०स०। १यमे हेमकरः। ६त०। २पुराणशेषे च

पुरातन त्रि० पुराभवः पुरा+शु-टुट् च। १पुराभवे अमरः स्त्रियां ङीप्। २विष्णौ पु० "ज्ञानगम्यः पुरातनः" विष्णुसं०। "कालेनावरिच्छिन्नत्वात् पुराऽपि भवतीति पुरातनः" भा०। [देशाधिगे जीवे पुरञ्जनशब्दे दृश्यम्

पुराधिप पु० ६त०। १नगराधिपे। पुराध्यक्षादयोऽप्यत्र।

पुरायोनि पु० पुरा प्राचीना योनिरस्य महादेवे। "पुरायोनिर्युधाजिच्च अभिवा सदितो भवः" भा०व०१८५अ०।

पुराराति पु० ६त०। त्रिपुरभेदके शिवे पुरारिप्रभृतयोऽपि

पुरार्द्धविस्तार पु० पुरा प्राग्वर्त्ती अर्द्धविस्तारोऽस्य। १खेटके २अस्त्रभेदे हेमच०।

पुरावती स्त्री नदीभेदे भा०भी० ६अ०।

पुरावसु पु० पुरा पूर्वं वसुः। वसुभेदांशजाते भीष्मे त्रिका०।

द्युनामवसोर्वसिष्ठशापेन भीष्मरूपेणाविर्भवकथा भा०आ० ९७अ० ३अ०। [भिक्षु।

पुराविद् त्रि० पुरा पुरावृत्तं वेत्ति विद्-क्विप्। पुराद्वत्ता-

पुराद्वत्त न० पुरा पूर्वकालिकं द्वत्तम् यत्र। १इतिहासे पूर्वतनकथने भारतादौ अमरः। कर्म०। २पूर्वतनद्वत्तान्ते च।

पुरासाह् पु० पुराणि शत्रुपुराणि सहते अभिभवति सह-क्विप् पूर्वपददीर्घः। १शत्रुपुराभिभावके २इन्द्रे च। ऋक्षि पदान्ते च "सहेः साडः सः" पा० षत्वम् ऋ०१०।७४।४ अन्यत्र न षत्वम्। [तावां राजनि०।

पुरासिनी स्त्री पुरं सृष्टमस्यति अस-णिनि। सप्तदैवीच-

पुरासुद्वृद् पु० पुरस्य त्रिपुरस्यासुहृत् शत्रुः। त्रिपुरारौ महादेवे हेमच०।

पुरि(री) स्त्री पूर्य्यते पॄ-इ किच्च। १नगरे २नद्याञ्च उज्ज्वलद०। वा ङीप्। २राजनि वि०कौ०। तत्र जिगीषु नगरे वर्णनीयपदार्थाः भा०व० दर्शिता यथा

"अभिसारेण सर्वेण तत्र युद्धमवर्त्तत। पुरो समन्ताद्विहिता पताका शतोरणा। सचक्रा सशड्घा चैव सयन्त्रशतका तथा। सोपशल्यप्रतोलीका साट्टाट्टालकगोपुरा। सचक्रपट्टिशी चैव सोल्काघातावपोथिका। सोष्ट्रिका भरतश्रेष्ठ! समेरीपशुवानका। सतोमराङ्कुशा राजन्! सशतघ्नीकलाङ्गला। सभुशुण्ड्यश्मगुडका सायुधा सपरश्वधा। सोष्टचर्मवती चापि सास्निः सगुडहस्तिका। शास्त्रदृष्टेन विधिना सयुक्ता भरतर्षभ!। रथैरनेकैर्विविधैर्गजाश्वोष्ट्रादिभिः। पुरुषैः कृतशार्दूल! समर्थैः प्रतिवारणे। अतिख्यातकुलैर्वीरैर्दक्षैर्दक्षैश्च संयुगे। मध्यमेन च गुल्मेन रक्षिभिः सा सुरक्षिता। उत्क्षिप्तगुलनैव तथा दृढैव सपताकिभिः। आघोषितञ्च नगरे न पातव्या सुरेति वै। प्रमादं परिरक्षद्भिरप्रमेयादृवादिभिः। प्रमत्तेष्वभिघातं हि कुर्य्युश्चाल्पा नराधिपः। इति ज्ञात्वाऽप्रमत्तास्ते सर्वे युध्यन्त्रकाः स्थिताः। यानतश्च, तथा सर्वे नट नर्त्तकगायनाः। बहिर्निवासिताः क्षिप्रं रक्षद्भिर्वित्तसञ्चयम्। संक्रमा भेदिताः सर्वे नावश्च प्रतिषेधिताः। परिखाश्चापि कौरव्य! कीलैः सुनिचिताः कृताः। उद्यानाः कृतश्रेष्ठ! तथैवाम्रवरोपकाः। समन्तात् क्रोशमात्रञ्च कारिता विषमा च भूः। प्रकल्प्य विषमं दुर्गं प्रकल्प्य च सुरक्षितम्। प्रकल्प्य चायुधोपेतं विशेषेण तदाऽनघ!। सुरक्षितं सुगुप्तं च सर्वायुधसमन्वितम्। तत्पुरं भरतश्रेष्ठ! यथेन्द्रभवनं तथा। न चासद्ग्रोभिनियोति न चासद्भिः प्रवेश्यते। इष्वायुधकपुरी राजं स्तदा सौभसमागमे। अतुरङ्गासु सर्वासु चत्वरेषु च कौरव!। बलं बभूव राजेन्द्र! प्रभूतगजवाजिमत्। दत्तवेतनभक्तं च दत्तायुधपरिच्छदम्। ज्ञतोपधानं च तदा बलमासीन् महाभुज!। न कृत्यवेतनी कश्चित् चातिक्रान्तवेतनी। नानुप्रहृष्टतः कश्चित् चाहृष्टपराक्रमः। एवं सुविहिता राजन् द्वारका भूरिदक्षिणा। चाक्रूरेण सुगुप्ता च राज्ञा राजीवलोचन!" भा०व०१५अ०। "अभितः परित उपरितश्चायुधानां सरणं निःसरणमभिसारस्तेन सर्वेणाच्छिद्रेण सर्वास्यो दिग्भ्यो युगपदविरतायुधसमूहागमनेत्यर्थः। पताका ध्वजाश्चतोरणानि बहिर्द्वाराणि चक्राणि योधगणाः शुण्डाशतघ्नयन्त्राणि भाषायां (तुरुज)इति संज्ञानि। अन्ये तु विष्णुमूलोत्सर्जनशङ्खाणि शुण्डा इत्याहुः उदाहरन्ति च "कल्पान्ते शुण्डशङ्खाणि रथस्योपरि धूरपि विष्णुमूलमूर्ध्वगुद्धर्वं करादिस्पर्शं उद्यते" इति। वन्त्राण्याग्नेयौषधबलेन दशसूपिण्डोत्क्षेपणानि महान्ति(कमान) इति संज्ञानि शुण्डाणि शीर्षगुलिकोत्क्षेपणानि (बन्दुक) इति संज्ञानि। खनकाः सुरङ्गद्वारा गुप्तमार्गकर्त्तारः। उपशल्या लोहशलाकाः कीलाश्चादृशाः प्रतोल्यो रथ्यामार्गा यस्यां सा अट्टालिका उपरिस्थाः गोपुराणि साट्टानि अट्टेनाट्टेन सहितानि अट्टालकादीनि यस्यां सा साट्टेति विशेषणम् उपशल्यस्य यामानस्य रथ्यायाश्चाट्टत्या संबध्यते। चक्रपट्टिशी सैन्यनिर्याहिका (मोर्चा) इति ख्येऽप्रसिद्धा। सोल्काघातावपोथिका सोल्कलातं ज्वालासहितगुलकं यस्यां सा सोल्काघाता अवबद्धाः पोथिकायन्त्रबद्धाः काष्ठपाषाणादयो रिपूणामुपरिपातनाय यस्यामिति प्राहुः। उष्ट्रकोलूका प्राचरत्वाद्यन्त्रोत्क्षिप्तो गोलः अलातं सकाष्ठदण्डलोहमयभाग्नेयं प्रहरणं (बाण) इति भाषायां प्रसिद्धं तयोरप्रख्याख्येयगुल्मोरवपोथिकाः पातयित्रयो मन्त्रभग्नाः शतघ्नयः कथ्यन्तेन्द्रदत्तशक्तिसदृशास्तदुक्ताः सोल्काघातापपोथिकाः। चक्रिका सूक्ष्मसमाधि भाषायां सप्टिंकेति पाठे क्षेपण्य आयुधविशेषाः। अश्मगुडका यन्त्रोज्झिताः पाषाणाः लोहमयानि चर्माणि कमठपृष्ठाकाराणि प्रहारवारकाणि (ढाल) सास्निः चाग्नेयौषधसहिता गुडागोलकः ऋष्टिकास्तदुत्क्षेपकयन्त्राणि शत्रूणामुपरिपातनाय तप्तोगुडो ऽयोभूतो

यत्र शिखरे स्थाप्यते तच्छिखित्वेत्यन्ये। मध्यमो गुल्मः यत्र स्थितेन योधसङ्घेन चतुर्दिगवस्थिता रिपवोऽहर्तुं बाधादिना प्रहर्तुं च शक्यन्ते तादृशस्थानम्। उत्तिप्रगुल्मैः परकीयगुल्मोच्चाटनकरैः। अप्रमत्ता दृतिच्छेदः। संक्रमा नदीसेतवः। कीलैः शूलैः सुनिचिता व्याप्ताः। "उदपानाः कूपाः "अम्बरीषो भवेदुभ्राड्" इति विश्वः गुप्ताग्निरित्यन्ये। विषमलोष्टकण्टकाद्याकीर्णा। अनुरथ्यासु प्रतिरथ्यम्। वेतनं धनं भक्तं नित्यभोजनं ऋतोपधानं ऋतविशेषम्। कृत्यं स्वर्णरूप्येतरधनं ताच्चादि। यद्वोरणोद्यानसमत्तलक्षीकृत्य भतोऽनुपरुद्धस्तत्कालक्षीकृतो न क्वचित् किन्तु चिरसंभृत एव। कृपा भृतो न किन्तु शौर्यं एवेति वा। भूरिदक्षिणा बहवो दाक्षिण्ययुक्ता यस्याम् आङ्डेन यज्ञेनेन" नीलः। ४मध्याह्निनासुराधिभेदे स्त्री "त्रानरत्नेन सम्मूर्णा पूर्णतत्त्वपदास्थितः। परब्रह्मरतो नित्यं पुरीनाथा स उच्यते" भङ्गानिर्वा० ५देहे च स्त्री।

पुरि(री)तत् स्त्री पुरीं देहं तनोति तन-क्विप्। १देहारक्षके (झाँत) कलाक्षे नाडीभेदे। पुरि देहे तनोति आच्छादयति हृदयादि अनुकस० तुरुमध्यः। २हृदयाच्छादके मांसभेदे यजु० ३१।९ दीर्घपाठः अन्यत्र तुरुपाठः। ३देहे च "यदा सुप्तो न कञ्चन वेद हिता नाम नाड्यो द्वासप्ततिः सहस्राणि हृदयात् पुरीततमभिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेते" बृह०आ० १४।५।१।२१ "यस्मिन् काले जाग्रत्स्वप्नरोर्द्वैता दर्शनवृत्तिं स्वप्नं हित्वा सुषुप्तः विशेषज्ञानाभावेन सम्यक्सादृश्यरूपं ब्रह्मैक्यं गतो भवति। हृदयं नाभीदरवक्षःपदेशयोर्मध्यस्थितः पुण्डरीकाकारो मांसपिण्डस्तत्परिवेष्टनं पुरीतदित्युच्यते इह पुनस्तदुपचितं शरीरं पुरीतच्छब्देनाभिप्रेतम्। तथा च हृदयात् पुरीततं शरीरमभिप्रतिष्ठन्ते इति ऋत्वं शरीरं व्याप्नुवन्त्योऽत्यं पर्यन्तं यस्य स इव बहिर्मुखाः सभितो निःसरन्ति। ताभिर्नाडीभिः कृत्वा आत्मदृष्टिविषयाया बुद्धेः कर्मवशात् प्रत्यवसर्पणमनु विज्ञानमय आत्मा प्रत्यवसृप्येन्द्रियाण्युपसंहृत्य पुरीतति शेते यस्मिन्वत् तत्र लोहपिण्डवदविशेषेण संव्याप्य वर्तते" भा० बृह०आ०१४।५।१८ [शब्दमाला

पुरीष न० पृ-ईषन् किच्च। १विष्ठायाम् अमरः २उदके निघण्टुः पुरीषिनृशब्दे दृश्यम्। विष्ठात्यागप्रकारादिकं यथा "मूत्रं रात्रौ उत्थाय रात्रिशेषं परित्यजेत्। परिधाय परं वस्त्रं शयनस्थानतोऽन्यतः। सखाङ्कुरुस्थान् प्रक्षाल्य हिराचम्य ततो द्विजः। कृष्ण! कृष्ण! क्षितिं कृत्वा खनित्वा नैर्ऋतीं दिशम्। खनित्रखननेनैव हादशाङ्गुल्यधोमुखम्। स्पृष्ट्वोदकपात्रञ्च मितं गच्छेदनुःशतम्। यामाद्वा शरविक्षेपमात्रमनुदितो रवौ। मैत्रमावश्यकं कर्तुं नगराच्च चतुर्गुणम्। तत्रिखनित्रायतं गर्तं तथा कृत्वा गभीरकम्। कृत्वा खड्गैः खनित्रेण कुशैराच्छाद्य तत्क्षणम्। शुष्कैः काष्ठैरथोवैर्भूगर्तं-मवगुण्ठितः। संवीताङ्गो वेणुदलैः पत्रैर्वृक्षमयभाजनैः। कृत्वं खनित्रं संस्थाप्य वारिपात्रमुपानहौ। ततो द्विजस्तूपविशेदुत्तरेणाच्छाद्य मस्तकम्। यज्ञोपवीतं कर्णेऽथ धृत्वा मौनी च दक्षिणे। अयतो द्विजमिं नो प्रथमं मनश्च भास्करम्। गुरुं समीरथं सर्वदेवतामूर्त्तिमेव च। मातरं पितरं चन्द्रं सर्वं गुरुजनं स्त्रियम्। उदङ्मुखस्त्रिसन्ध्यासु दिवसे च यदा निशि। दक्षिणासुख उत्सर्गं कुर्यान्मूत्रपुरीषयोः। पूर्वाह्णे तु द्विजः कुर्यात् पश्चिमाभिमुखोऽथ वा। अपराह्णे पश्चिमुखो मूत्रपुरीषविसर्जनम्। मध्याह्ने प्रयतः कुर्यादुदयतवामुत्तरासुखः। दक्षिणाभिमुखो रात्रौ द्विजो मैत्रं प्रयत्नतः। निशायामन्धकारे तु छायायां दिवसे तथा। यथेच्छं सुमुखो भूत्वा मैत्रं कुर्यात् द्विजो भयात्। दिग्भ्रमाच्च मनोदुःखाद्विण्मूत्रस्य विसर्जनम्। मोहाद्वाऽधोमुखः कुर्यादुदयतकाक्षयतो द्विजः। सन्यासी ब्रह्मचारी च वानप्रस्थो मृदो द्विज!। शाखाध्यायी च वेदानां सर्वयज्ञेषु दीक्षितः। सुनित्यं सर्वधर्मज्ञो दान्तः शान्त उदारधीः। मदोत्तरसुखः कुर्याद्वैष्णवो नात्र एव च। मातरं मैत्रं सायाह्णे दक्षिणाभिमुखो निशि। योगिनान्तु तथा स्त्रीणां मूढादीनामयं क्रमः। न देवायतने शुक्लमूले च न जले नदे। न नदीकूपमार्गेषु न वापीगोष्ठभस्मसु। न चितास्निह्नाशानेषु गोखरे न द्विजालये। नाग्न्यःसर्मे न पुण्ड्रे नाङ्गारे न च शादूवले। न रथ्यहे न काम्ये च न तीर्थं न द्विजान्तिके। न यज्ञवृक्षमूलेषु गोपहारे चतुष्पथे। न शस्यक्षेत्रे न पथि इष्योद्याने न चत्वरे। गोपानत्कोन सम्मत्र न रथ्या-

देवभूतले। न वैष्णवानां गोत्रे न सूर्याभिमुखस्थाः। न ज्ञानलुप्तदेहारे न तिष्ठेच्च कदाचन। न गच्छेच्च वल्मीके न च पर्वतमस्तके। न जलं न दिशोभागान्नाकाशमवलोकयन्। न गोव्रजे नदीतीरे निवासस्थाने न गोमये। न यज्ञभूमौ न हट्टे न पवित्रीकृतस्थले। द्विजो न देवच्छायायां यज्ञकूपविधर्जनम्। कुर्यादू यज्ञेष्टकाकूटे न च सप्राणिसङ्गके। उद्धृतास्मोक्तिकाभ्यामित्यं नारद! यत्नतः। कृत्वोत्सर्गं ततः कुर्यात् शौचं मूत्रपुरीषयोः। शुष्ककाष्ठेन लोष्टेनायसीयेन दलेन वा। प्रमार्ज्य गुह्यमुत्तिष्ठेत् शिश्नस्यैव विशेषतः। विधृत्य वामहस्तेन शिश्नं तूपविशेद्विधि। चेद्दक्षिणासुखः सन्ध्यां दिवोत्तरमुखस्तदा। पूतिगन्धि जलं दुष्टं सफेनञ्च सबुद्बुदम्। तोयौदकं सलवणं पाथो वर्षान्तरन्तथा। सप्तद्रुगा नदीवारः सासृक्च सकर्दमम्। यवनान्त्यजखाताम्भः सप्तद्रुगनगोदकम्। धान्यचेलस्य सलिलं सकीटञ्च परित्यजेत्। मानवो देवखाताम्भः सकले शौचकर्मणि"। "सदः सकीटाकीर्णानां देवायतनगोष्ठयोः। नदीदधिनदीदेवखाततीरस्य मृत्तिकाः। मृल्लोष्टकाष्ठयोः चैव कूपयोः सिकताश्च याः। अन्तर्जला घूर्णिसदो वल्मीकस्य च कर्दमाः। उवराश्च हलोत्खाता मृत्तिका भवनस्य च। अश्वत्थतुलसीधात्रीमूलादीनां च या सदः। श्मशानभूमेः शैलस्य तथाऽपूतस्थलस्य च। शौचावशिष्टा मार्गस्य खानूत्खाताश्च मृत्तिकाः। यज्ञस्थानस्य विप्राणां साधूनामालयस्य च। मृत्तिका वर्जयेदेता देवर्षे! शौचकर्मणि। पवित्रस्थानतो मृद्वा द्वादशाङ्गुल्यधोसदः। द्विजः सकलशौचार्थं शर्करादिविवर्जिताः। प्रथमेऽङ्घ्रिनरः शौचं कुर्यान्नूपुरिरतःपरम्। पुनर्जलैः पुरीषस्य यथा गन्धक्षयो भवेत्। मृत्तिका प्रथमा शौचे सर्वं प्रकृतिसञ्ज्ञिता। पूर्वप्रकृतिमात्रा तु द्वितीया सजला तथा। तृतीया प्रमिता शौचे सार्द्धप्रकृतिमृत्तिका। चतुर्थ्याद्याः क्रमादेवमर्द्धप्रकृतिवर्द्धिताः। यदा मृत्तिकया पूर्वं त्रिवर्षं शौचकारिणः। सार्द्धप्रकृतिमात्रा वा मुनिभिः परिकीर्त्तिता। गुदे दद्यान्मृदन्तिस्रः पञ्च वा सप्त वा तथा। सदमेकां तथा शिश्ने तिस्रो वा मृत्तिकादयम्। सप्त वामकरे दद्यान्मृदस्त्रिंशत्तदर्धकम्। तिस्रो वा पञ्चवो सप्त सप्तदश च षोडश। पाण्योरेकां मृदं पृष्ठे षड् वा तिस्रश्च मृत्तिकाः। कृत्तदयनखेष्वेकां तिस्रश्च षड् मृदस्तथा। मैथुने रेतःस्खलने मूत्रोत्सर्गे च मृद्द्वयम्। दद्यात्तिस्रश्च शिश्ने च तिस्रो वामकरे मृदः। कृत्ते च मृद्द्वयं सप्तैत्तिस्रो वा गुदितत्परः। यादृक्तैले द्विजस्तिस्रो मृदोत्थं शौचमाचरेत्। मृद्भिस्रो द्विगुणं शौचं यतस्रो ब्रह्मचारिणाम्। मृद्भस्त्राद्यं वानप्रस्थानां प्रोक्तं द्विगुणमेव च। सन्यासिनां वैष्णवानां शौचं तेभ्यं चतुर्गुणम्। कृतपादारिपात्रेषु मृद्भिरद्भिश्च गोमयैः। दिवा यद्विहितं शौचं निशायामर्द्धकं भवेत्। एतदर्द्धमशौचे तु जातके मृतकेऽपि च। चोरादिबाधिते मार्गे शौचमर्द्धमाचरेत्। योषितामेतदर्द्धन्तु शूद्रादीनाञ्च नारद!। व्याधिभिरातुरो मर्त्त्यो आर्त्तो यदि यथाबलम्। शौचं कुर्यात्तु कृतं यत्र तत् स्थानं शोधयेज्जलैः। वेदस्मृतिपुराणानि धर्मशास्त्राणि नैत्यिकम्। नैत्यादिकर्म यः कुर्यादिहाय मन्दधीर्द्विजः। प्रतिग्रहानमायुश्च पत्नीं पुत्रान् श्रियः श्रियम्। बलमाचारहीनस्य सदा तस्यापवित्रता। सात्वताचेदृद्विजा भूपा वैश्यशूद्रास्त्यजाः स्त्रियः। कुर्वन्ति शौचं यत्नेन यावच्चेतःपवित्रता। येषां कृष्णस्य मननं तथा नामप्रकीर्त्तनम्। सदैव स्मरणं भागवतानां साधुसेवनम्। भक्तिप्रधौतमनसां गोविन्दार्पितकर्मणाम्। बाह्यान्तःकृष्णचित्तानां शुचिता तदृनिश्चयम्। मृद्गोमयजलैः शौचमनेकैः कुरुते यदि। मनोऽपवित्रता यस्य कदाचिद्वै न शुध्यति। गोविन्ददासता नास्ति यस्य लोकस्य जन्मनि। सोऽपि देहाशुचिः कृत्वा शौचं नैत्यादिकर्मसु। शतधा यदि देवर्षे! शौचं कुर्यात् सहस्रधा। मृद्वारिगोमयैर्लोको भावदुष्टो न शुध्यति। सदा चित्तापवित्रत्वमकार्ष्णां भुवि यो नरः। तस्य तु स्नान नैत्यादिशौचेनैव न शुध्यति। पर्वताकारकूटैश्च गोविट्सर्वनदीजलैः। शौचं कृत्वा न शुध्येत दुष्टचित्तो भवेद् यदि" पाद्मोत्तरखण्डे १०६अ०। शुचीषत्तुल्यायां ऋदि ३यवसे च वेदटी० पुरीषवाहनशब्दे दृश्यम्। [त्युट्। पुरीषे विष्ठायां त्रिका०।

पुरीषण पु० पुरीतो देहात् ईष्यते ईष-दाने (त्यागे) कर्मणि

पुरीषम पु० पुरीषं मिमीते मा-क। मर्दंजङ्घे साधे त्रिका०।

पुरीषवाहन पुरीषमिव पांशुरूपां मृदं यवसं वा वहति वह-ल्युट्। १पांशुरूपमृद्वाहके २यवसवाहके गर्दभे यजु० ११।३। वेदटी०

पुरीषाधान न० पुरीषमाधीयतेऽत्र आ+धा–आधारे ल्युट्। देहस्थे पुरीषाशयस्थाने "पुरीषाधानमेव च" याज्ञ० ३।९५। "पुरीषाशयः" इति मिता०पुरीषाशयशब्दाद्योऽप्यत्र।

पुरीषिन् त्रि० पृषाति प्रीणातीति पुरीषसुदकं ततः मत्वर्थे इनि। जलयुक्ते ऋ० ५।५५।५।

पुरीष्य त्रि० पुरीषाय हितम् यत्। पुरीषहिते।

पुरु त्रि० पॄ–पालनपोषणयोः कु। १प्रचुरे अमरः २देवलोके मेदि० तस्य कर्मभिः पूरणात् तथात्वम्। ३ययातिपुत्रभेदे हरिवं०३०अ०।तद्वंशकथा २१अ०; ४तन्नामके युधिष्ठिरसभ्ये नृपभेदे भा० स० ४अ०। ५परागे मेदि०। ६दैत्यभेदे पुरुहूतशब्दे दृश्यम्। ७नदीभेदे स्त्री शब्दच०।

पुरुकुत्स पु० मान्धातुः पुत्रभेदे हरिवं० १२अ०। तस्यै। यत्नो मानसी कन्या नर्मदा ऋषिशापेन नदीत्वमाप्ता।

पुरुकुत्सन पु० १दैत्यभेदे "इन्द्रो विपश्चिद्देवानां तद्विषु पुरुकुत्सनः। जघान कृष्णरूपेण भगवान् मधुसूदनः" गारुडे ८७ अ०।

पुरुकुत्सानी स्त्री पुरुकुत्सस्य पत्नी वा० आनङ् ङीष्। पुरुकुत्सपत्न्यां ऋ०४।४२।९।

पुरुक्षु त्रि० पुरवः क्षुधोऽन्नान्यस्य छान्दसः अन्यत्वोप०। बहुद्रव्यस्वामिनि ऋ०३।५।२। पुरुषु क्षीयते क्षि–निवासे डु। २बहुनिवेतने यजु० २७,२० वेददी०।

पुरुज पु० भरतवंश्ये सुधान्नेः पुत्रे नृपभेदे भाग० ९।२१।२२ हरिवंशे "पुरुजातिः सुधान्ने च" १२अ०। पाठान्तरात् सोऽपि तत्रार्थे

पुरुजित् त्रि० कुन्तिभोजे नृपभेदे भा० स० ८अ०। स च अर्जुनमातुलः यथोक्तं "पुरुजित् कुन्तिभोजश्च मातुलः सव्यसाचिनः" भा० क० ६अ०। २यदुबिन्दुवंश्ये रुचकपुत्रभेदे भाग० ९।२३।१५ ३विष्णौ पु०। "पुरुजित् पुरुषोत्तमः" विष्णुस०। बहूनां जेतृत्वात्तस्य तथात्वम्।

पुरुणा(ना)य पु०पुरूणां नायोनेता संज्ञायां यत्वम्। १यतन्नामके नृपभेदे ऋ०१५९।७। २बहुनेतरि त्रि०अयत्वम्

पुरुत्मन् पु० पुरुरात्मा यस्य पृषो०। प्रचुरात्मके ऋ०१।२।२८।

पुरुत्रा अव्य० द्वितीयासप्तम्यर्थकतसेः पुरुशब्दात् त्रा। बहुकर्मके बहुधिकरणे च ऋ० १।२२।७

पुरुद त्रि० पुरु–प्रचुरं ददाति दै–क। बहुदे अमरः। पुरुदंशक पु० पुरवो दंशा यस्य सन्ति कप्। कृष्णे त्रिका०।

पुरुदंशस् पु० पुरं तन्नामानमसुरं दष्टवान् दंश–असुन्। इन्द्रे उज्ज्वल० असम्बुद्धौ सौ परे आनङ्। पुरुदंशा

पुरुदंसस् त्रि०पुरूणि दंसांसि कर्माणि यस्य। बहुकर्मयुक्ते। पुरं तन्नामानं दैत्यभेदं दंसयते पर्यति यत्नेन चुरा० दंसि–दर्शने भूते असुन्। २इन्द्रे पु० उज्ज्वलदत्तः।

पुरुदत्र पु० दीयते दा–कत्र दत्रं धनम् पुरु दत्रमस्य। बहुधने इन्द्रे ऋ० ६।१८।६ भा०।

पुरुदम्म त्रि० पुरु दसति दस–वा० मन्। बहुनाशके २बहुकर्मके च ऋ० ३।५४।८।

पुरुद्रुह् त्रि० पुरुभ्यो बहुभ्यः, पुरवे दैत्याय वा द्रुह्यति द्रुह–क्विप्। १बहूनां द्रोहकारके ऋ०२।१८।१। २पुरञ्जते इन्द्रे च। झलि पदान्ते च वा धत्वढत्वे।

पुरुहत् पु० वैदर्भ्यां जाते क्रोष्टुवंश्ये मधुसूते नृपभेदे हरिवं० ३७ अ०। [प्रकारे ऋ०१।१२२।२

पुरुधा अव्य० बहुत्वेन संख्याशब्दत्वात् प्रकारे धाच्। बहुपुरुभूत पु० पुरुहूत+पृषो०। इन्द्रे हरिवं०१५अ०। पुरुहूत इत्येव तत्र पाठः साधुः।

पुरुभोजस् पु० पुरून् भुङ्क्ते भुज–असुन्। १मेघे त्रिक० २प्रचुरभोजके त्रि०। [३धृतराष्ट्रपुत्रभेदे च

पुरुमित्र पु० १भङ्कारशब्दनृपभेदे भा०व०६अ०। भा०आ० ६३अ०

पुरुमीढ ऐक्ष्वाक्यां सुहोत्रात् जाते अजमीढानुजे कौरवनृपभेदे भा० आ० ९९ अ०।

पुरुरथ पु० रथा रंहतेः पुरुः रथो रंहणं यस्य। प्रत्ययभक्तिभेदात् बहुरंहणे आदित्ये ऋ० १०।६४।५। भा०

पुरू(रु)रवस पु० सोमवंश्ये नृपभेदे "तयेति ताभ्यामुक्ते तु दैवाभ्यां सैव कन्यका। इडा समभवत् यद्याः सुद्युम्न इति विश्रुतः। पुनश्चेश्वरशापेन स्त्रीत्वमाप्तोऽता वने। स्त्रीत्वमासादितस्तेन मनुपुत्रेण धीमता। पुरू(रु)रवसनामानं चक्रवर्त्तिनमूर्जितम्। जनयामास तनयं यत्र सोमसुतो बुधः" मार्क०पु०११३अ०। पुरू(रु)रवस् पृषो० तत्रार्थे

पुरुरावन् त्रि० इरं फलं ददाति रा–दाने वनिन्। बहुविधफलदातरि यजु० ५।७ स्त्रियां ङीप् वनोरच्।

पुरुवर्मन् त्रि० पुरुवर्मगोऽस्य। बहुमाने ऋ०१०।१२०।५।

पुरुषन्द्र त्रि० पुरुः चन्द्र आह्लादकत्वात् दीप्तिरस्य पृषो०। "हलश्चन्द्रोत्तरपदे मन्ले" वा० षट्। बहुदीप्तिके ऋ० १।२७।१। अमन्ले तु न षट् पुरुचन्द्र इत्येव

पुरुष पु० पुर–अपगतौ कुमन् पुरिदेहे शेते शी–ड पृषो०। १मनुष्ये २पुंसि च अमरः। ३आत्मनि सांख्यमतसिद्धे पञ्चविंशे ४तत्त्वे ५पुन्नागवृक्षे च मेदि०। ६विष्णौ शब्दच०

७मेषमिथुनादौ विषमराशौ। "भौमारजोवाः पुरुषाः" ज्यो॰त॰ दर्शाभादिषु यद्देषु। पुरुषाणां शुभाशुभलक्षणं बृ॰सं॰ ६८अ॰ उक्तं यथा

"उन्नानमानगतिसंहतिसारवर्णसंहेक्षणप्रकृतिसत्त्वमनूरुबाहौ। चेलं स्रजां च विधिवत् कुशलोऽवलोक्य सामुद्रविद्वदति यातमनागतं च। अक्षेदनौ मृदुतलौ कमलोदराभौ स्निग्धाकुलौ रुचिरताम्रनखौ सुपार्ष्णी। उष्णौ सिराविरहितौ सुनिगूढगुल्फौ कूर्मोन्नतौ च चरणौ मनुजेश्वरस्य। मूर्णाकारविरूक्षपाण्डुरनखौ वक्रौ सिरासन्ततौ संशुष्कौ विरलाकुलौ च चरणौ दारिद्र्यदुःखप्रदौ। मार्गौयोत्कटकौ कषायमदगौ संगस्य विच्छित्तिदौ नग्नौ परिपक्वस्फुटितौ घोंतावसम्यारतौ। प्रविरलतनुरोमदत्तजङ्घा दिरदकरप्रतिमैर्वरोरुभिश्च। उपचितसमजानवस्तु भूपा धनरहिताः खलु गोनतुल्यजङ्घाः। रोमैकैकं कूपके पार्थिवानां द्वे द्वे क्षेत्रे पण्डितत्रोत्रियाणाम्। त्रयादौर्निःस्वा मानवा दुःखभाजः क्लेशाश्चैवं निन्दिताश्च पूजिताश्च। निर्मांस जानुसन्धिर्यते प्रवासे सौभाग्यसख्यैर्विकटैर्दरिद्राः। स्त्रीनिर्जिताश्चापि भवन्ति निम्नै राज्यं समांसैश्च महद्भिरायुः। सिङ्घेऽस्थि धनवानपत्यरहितः स्थूले विहीनो धनैर्मेढे वामनते सुतार्थरहितो वक्रेऽन्यथा पुत्रवान्। दारिद्र्यं विनते स्वधोऽवतनयो सिङ्घे सिरासन्तते स्थूलपन्थियुते सुखी महुकरोऽवन्तं प्रमेहादिभिः। कोषनिगूढैर्भूपा दीर्घैर्मध्यैश्च वित्तपरिहीनाः। ह्रस्वोन्नतोष्ठो बहुसिराचित्राश्च धनवन्तः। जलस्थलव्योमचरेष्वधो विषमैः स्रोचक्षुषः समैः क्षितिपः। सुखायुषोदृग्भिः प्रथमद्वयस्य शतमायुः। रक्तैराद्या मणिभिर्निर्ध्याः पाण्डुरैश्च मलिनैश्च। सुखिनः सगर्भसूत्रा निःस्वा निःसन्धिधारा च। द्विस्त्रिचतुर्धारिभिः प्रदक्षिणावर्तैरवलितसूत्राभिः। पृथ्वीपतयो नेत्रा विकीर्णसूत्राश्च धनहीनाः। एकैव सूत्रधारा वलिता रूपप्रधानसुतदात्री। स्निग्धोन्नतसमपर्वयवो धनवलितारत्नभोक्तारः। मणिभिश्च माल्यनिभैः कन्यापितरो भवन्ति निःस्वाश्च। बहुपशुभाजो मध्योन्नतेन नाल्पकुलपोषिणः। परिशुष्कवल्लिपर्वैर्धनरहिता दुर्भगाश्च विज्ञेयाः। कृशसमगम्भीरगुल्फा विज्ञातव्या महीपालाः। मधुमन्ते बहुविद्या मद्यमगन्धे बहुप्रजानि। तनुरुचकः स्त्रीजनको मांसगन्धो महाभोगी। मदिरागन्धे वक्ता चारगन्धे च रेतसि दरिद्रः। क्षीद्रं पैशुनगामी दीर्घायुरतोऽन्यथाऽल्पायुः। निःस्रोऽतिस्थूलस्फिक् समांसस्फिक् सुखान्वितो भवति। व्याघ्राभाध्यर्धस्फिगमखड्गस्फिग्नराधिपतिः। सिंहकटिर्मत्तेन्द्रः कपिकरभकटिर्धनैः परित्यक्तः। समजठरा भोगयुता घटपिठरनिभोदरा निःस्वाः। अविकलपार्श्वा धनिनो निम्नैर्वक्रैश्च भोगसन्त्यक्ताः। समकक्षा भोगाढ्या निस्नाभिर्भोगपरिहीनाः। उन्नतकक्षाः क्षितिपाः कुटिलाः स्युर्मानवा विषमकक्षाः। सर्पोदरा दरिद्रा भवन्ति बह्वाशिनश्चैव। परिमण्डलोन्नताभिर्विस्तीर्णाभिश्च नाभिभिः सुखिनः। अल्पा खड्गनिम्ना नाभिः क्लेशावहा भवति। वलिमध्यगता विषमा स्थूलावर्ता करोति नैःस्व्यं तु। शार्ङ्गं वामावर्तां करोति मेधां प्रदक्षिणतः। पार्श्वायता चिरायुरसुपरिष्टाच्चेश्वरं गवाक्षमधः। शतपत्रकर्णिकाभा नाभिर्मनुजेश्वरं कुरुते। यस्यान्तः स्रोभोगिनमाचार्यं बहुश्रुतं यशसङ्घम्। एकद्वित्रिचतुर्भिर्वलिभिर्विद्याभूपं त्वतिभिम्। विषमवलयो मनुष्या भवन्त्यगम्याभिगामिनः पापाः। ऋजुवलयः सुखभाजः परदारद्वेषिणश्चैव। मांसलमृदुभिः पार्श्वैः प्रदक्षिणावर्तरोमभिर्भूपाः। विपरीतैर्निर्द्रव्याः सुखपरिहीनाः परप्रेष्याः। सुभगा भवन्त्यनुद्वद्धचुचुका निर्धना विषमदीर्घैः। पीनोपचितनिमग्नैः क्षितिपतयश्च चूचुकैः सुखिनः। हृदयं मसृतं पृथु न वेपनं मांसलञ्च नृपतीनाम्। अधमानां विपरीतं खररोमचितं सिराजालम्। समपक्षकोऽर्धवलः पीनैः शूराश्चक्षिणास्तनुभिः। विषमं वक्षो येषां ते निःस्वाः शस्त्रनिधनाश्च। विषमैर्विषमो जत्रुभिरवनतैर्विहीनोऽक्षिसन्निपरिपण्डैः। उन्नतजत्रुर्भोगी निम्नैर्निःस्वोऽर्धवानुपीनैः। चिपिटग्रीवो निःस्वः शुष्का सिरा च यस्य वा ग्रीवा। महिषग्रीव शूरः शस्त्रान्तो वृषभसमग्रीवः। कम्बुग्रीवो राजा प्रलम्बकण्ठः प्रभञ्जनो भवति। पृथुसमभस्मरोमशमर्धवताम्रशुभटमतोऽन्यत्। अश्वेदनपीनोन्नतसुनिम्नसमरोमकङ्कुषाः कक्षाः। विज्ञातव्या धनिनामतोऽन्यथा दैन्यहीनानाम्। निर्मांसौ रोमचितौ कम्पावल्यौ च निर्धनस्यांसौ। विपुलाग्र्यपिण्डितौ वृत्तिदौ सौख्यदीर्घवताम्। करिकरसदृशौ वृत्तावाजानुबाहवनिबिडौ यशौ पीनौ। बाहू पृथिवीशा-

नामधमानां रौमशो हुडो । हस्ताङ्गुलयो दीर्घाश्चिरायुषामवलिताश्च सुभगानाम् । मेधाविनां च सूक्ष्माश्चिपिटाः परकर्मनिरतानाम् । स्थूलाभिर्धनरहिता बहिर्नताभिश्च मध्यनिर्याथाः । कपिसदृशकरा धनिनो व्याघ्रोपमपार्श्वयः पापाः । मणिबन्धनैर्निगूढैः सुश्लिष्टसन्धिभिर्भूषाः । क्षीणैर्हस्वच्छेदैः स्थूलैः सशब्दैश्च निर्दुःखाः । पिङ्गविरलेन विक्षीणा भवन्ति निम्नेन करतलेन नराः । संहतनिम्नैर्धनिनः प्रोत्तानकराश्च दातारः । विषमैर्विषमा निःस्वाश्च करतलैरीश्वरास्तु लाक्षाभैः । पीतैरगम्यवनिताभिगामिनो निर्धना रूक्षैः । हृषसदृशनखाः क्लीवाश्चिपिटैः स्फुटितैश्च विक्तसन्धयः । कुनखविवर्णैः परतर्ककाश्च ताम्रैश्च भूपतयः । अकुण्यवैराग्याः, सुतवन्तोऽकुण्डमूलगैश्च यवैः । दीर्घाङ्गुलिपर्वाणः सुभगा दीर्घायुषश्चैव । स्निग्धा निम्ना रेखा धनिनां तद्विपर्ययेण निःस्वानाम् । विरलाङ्गुलयो निःस्वा घनसञ्चयिनो घनाङ्गुलयः । तिस्रो रेखा मणिबन्धनोत्थिताः करतलोपगा नृपतेः । मीनयुगाङ्कितपार्श्वनित्यं सत्प्रदो भवति । मत्स्याकारा धनिनां विद्यामानां च मीनपुच्छनिभाः । मत्स्यातपत्रशिबिकागजाश्वपद्मोपमा नृपतेः । कलसस्थालपतकाङ्कुशोपमाभिर्भवन्ति निधिपालाः । दामनिभाभिश्चाधाः स्वस्तिकरूपाभिरैश्वर्यम् । चक्राब्धिपुरयुतोभरयज्ञिधनुःकुन्तसन्निभाः रेखाः । कुर्वन्ति चमूनाथं वज्रानलसूचकाकाराः । मकरध्वजकोष्ठागारसन्निभाभिर्महाधनोपेताः । वेदीनिभेन चैवाग्निहोत्रिणो ब्रह्मतीर्थेन । वापीदेवकुलाद्यैर्धर्मं कुर्वन्ति च त्रिकोणाभिः । अकुण्डमूलरेखाः पुत्राः स्युर्दारिकाः कृच्छ्राः । रेखाः प्रदेशिनीगाः शतायुषां कल्पनीयमूलाभिः । छिन्नाभिर्मूलमतन बहुरेखारेखिणो निःस्वाः । अतिक्रमदीर्घैश्चिबुकैर्निर्दुःखा मांसलैर्घनोपेताः । बिम्बोपमैरवक्रैरधरैर्भूपास्तनुभिरल्पाः । ओष्ठैः स्फुटितविच्छिन्नतनुविवर्णरूक्षैश्च धनपरित्यक्ताः । स्निग्धा घनाश्च दशनाः शुक्लोच्चदंष्ट्राः समाश्च शुभाः । जिह्वा रक्ता दीर्घा श्लक्ष्णा सुसमा च भोगिनां श्रेष्ठा । श्वेता कृष्णा परुषा निर्दुःखाश्चां तथा तालु । वक्त्रं सौम्यं संहतसमसं सूक्ष्मं समं च भूपानाम् । विपरीतं क्लेशभुजां महाहवं दुर्भगानां च । श्लोणसदृशमनपत्यानां शाठ्यवतां मध्यहवं परिज्ञेयम् । दीर्घं निर्दुःखाणां मीरुसदृशाः पापकर्माणः । बहुरक्तं धूतानां निम्नं वक्त्रं च तनयरहितानाम् । कृष्णानामतिहस्वं सम्मूर्खं भोगिनां क्लान्तम् । अस्फुटिताग्रं स्निग्धं श्लक्ष्णं शुभं मृदु च दन्तवस्त्रं चैव । रक्तैः परुषैश्चौराः श्लक्ष्णैरल्पैश्च विज्ञेयाः । निर्मांसैः कर्णैः पापस्तवबर्पटैः सुदुःखभोगाः । कृष्णाश्च हस्वकर्णाः शङ्खश्रवणाश्च भूपतयः । रोमशकर्णा दीर्घायुषस्तु धनभागिनो विपुलकर्णाः । क्रूराः शिरावनद्धैर्व्यौढस्वैर्मांसलैः सुखिनः । भोगी स्वनिम्नगण्डो मन्त्री सम्मूर्खमांसगण्डो यः । सुखभाक् शुकसमनासश्चिरजीवी शुष्कनासश्च । छिन्नानतोपवाऽगम्यगामिनो दीर्घया च सौभाग्यम् । वाकुञ्चितया चौरः श्लोणाक्ष्णुः क्षाक्षिपिटनासः । धनिनोऽपवक्रनासा दक्षिणवक्राः प्रभक्षणाः क्रूराः । कृष्णो स्वल्पच्छिद्रा सुपुटा नासा सभाग्यानाम् । धनिनां च्युतं सदृङ् द्विलिपिखिलं च्छादि स्वानुनादं च । दीर्घायुषां प्रसक्तं विज्ञेयं संहतं चैव । मद्गदवाक्याधनिनो रक्तान्तविलोचनाः स्त्रियोभाजः । मधुपिङ्गलैर्मेहाढ्या मार्जारविलोचनाः पापाः । हरिणाक्षा मण्डलविलोचनाश्च स्निग्धैश्च लोचनैश्चौराः । क्रूराः केकरनेत्रा गजसदृशदृशश्च भूपतयः । ऐश्वर्यं गम्भीरैर्नीलोत्पलकान्तिभिश्च विद्वांसः । अतिलोहितसारकाणामल्पायुस्त्वमटनं भवति । मन्त्रित्वं स्थूलदृशां श्यावाक्षाणां च भवति सौभाग्यम् । दीना दृङ् निःस्वानां स्निग्धा विपुलार्थभोगवताम् । अभ्युन्नताभिरल्पायुषो विशालोन्नताभिरतिरतिसुखिनः । विषमभ्रुवो दरिद्रा बालेन्दुनतभ्रुवः सधनाः । दीर्घासंसक्ताभिर्धनिनः खण्डाभिरर्थपरिहीना । मध्यविनतभ्रुवो मे ते सक्ताः स्त्रीवशगस्याश्च । उन्नतविपुलैः शङ्खैर्धन्या निम्नैः कृतार्थसन्धयः । विषमललाटा विधना धनवन्तोऽर्धेन्दुसदृशेन । शुक्तिविशालैराचार्यता शिरासन्ततैरधर्मरताः । उन्नतशिराभिराढ्याः स्वस्तिकवत्संस्थिताभिश्च । निम्नललाटा सधनत्वभागिनः क्रूरकर्मनिरताश्च । अभ्युन्नतैश्च भूपाः कृपणाः स्युः सङ्कटललाटाः । उदितमदीनमनस्त्वं स्निग्धं च शुभावहं मनुष्याणाम् । रूक्षं दीनं प्रचुरास्तु चैव न शुभदं पुंसाम् । कुत्सितं शुभदुष्कर्म सूचयिभिश्चितलोचनं च पापस्य । कुत्सस्य कुत्सितमसदृत् सोत्कादस्थासदृत् प्राप्तो । तिस्रो रेखाः शतजीविनां ललाटायताः स्थिता यदि ताः । चतसृभिरनीशत्वं भवतिद्वाभ्यां कृपणाढ्यता । विच्छिन्नाभिश्चा-

त्यगामिनो नवतिरध्वरेखेण । केशान्तोपगताभी रेखाभिरशीतिवर्षायुः । पञ्चभिरायुः सप्ततिरेकाग्रावस्थिताभिरपि यदिः । बङ्गरेखेण शतार्धं चत्वारिंशच्च वक्राभिः । त्रिंशद्भ्रूसम्भाभिर्विंशतिकर्णैव वामवक्राभिः । क्षुद्राभिः खल्वायुर्न्यूनाभिश्चान्तरे कल्प्यम् । परिमण्डलैर्भोगाढ्यास्त्वक्काकारैः शिरोभिरवनीशाः । चिपिटैः पिटमालम्बाः करोटिशिरसां चिरानुवृत्त्यः । घटमुखी ध्यानरुचिर्भिन्नकः पाण्डुरनेत्रकः । निम्नं तु शिरो मङ्गतां बन्धनिम्नमनर्थदं भवति । एकैकभवैः स्निग्धैः कृष्णैराकुञ्चितैरभिताम्रैः । मृदुभिर्न चातिबहुभिः केशैः सुखभाग् नरेन्द्रो वा । बहुमूलविषमक्षिप्ताः स्थूलस्फुटितायपरुषत्वाच्च । अतिकुटिलाश्चातिघनाश्च मूर्धजा वित्तक्षीणानाम् । यद्यद्गात्रं रूक्षं मांसविहीनं सिरावनद्धं च । तत्तदनिष्टं प्रोक्तं विपरीतमतः शुभं सर्वम् । त्रिषु विपुलो गम्भीरः स्निग्धेषु बहुप्रतरदुर्लक्ष्यः । सप्तसु रक्तो राजा पञ्चसु दीर्घश्च रूक्षश्च । उरो ललाटं वदनं च पुंसां विस्तीर्णमेतत्त्रितयं प्रशस्तम् । नाभिः स्वरः सत्त्वमिति प्रदिष्टं गम्भीरमेतत्त्रितयं नराणाम् । वक्षोऽथ कक्षा नखनासिकास्यं ककाटिका चेति बहुप्रतानि । सूक्ष्माणि चत्वारि च जिह्मपृष्ठं ग्रीवा च जङ्घे च हितप्रदानि । नेत्रान्तपादकरतालुधरोष्ठजिह्वा रक्ता नखाश्च खलु सप्त सुखावहानि । स्थूलाक्षि पञ्च दशनाङ्गुलिपर्वकेशाः सार्धं त्वचा करुरुहाश्च न दुःखितानाम् । हनुलोचनबाहुनासिकाः श्रवणयोरन्तरमत्र पञ्चमम् । इति दीर्घमिदं तु पञ्चकं न भवत्येव नृणामभूद्यताम्" (इति क्षेमम्) । "छाया शुभाशुभफलानि निवेदयन्ती लक्ष्मा मनुष्यपशुपक्षिषु लक्षणज्ञैः । तेजोगुणान् वह्निरपि प्रविकाशयन्ती दीपप्रभा स्फटिकरत्नघटस्थितेव । स्निग्धद्विजत्वङ्नखरोमकेशच्छाया सुगन्धा च महीसतत्वा । तच्छ्रेष्ठताभाग्युदयान् करोति धर्मस्य चाङ्गस्य च नित्यमेव । स्निग्धा सिताच्छहरिता नयनाभिरामा सौभाग्यमार्दवसुखाभ्युदयान् करोति । सर्वोत्तमद्विजननी जननीव चाया२ छाया फलं तनुभृतां शुभमादधाति । चक्रा ऽष्टधा पद्महेमाग्निवर्णा युक्ता तेजोविक्रमैः सप्रतापैः । आग्नेयीति२ प्राणिनां क्षात्रयाय क्षिप्रं सिद्धिं वाञ्छितार्थस्य धत्ते । मलिनरूक्षच्छाया पापगन्धाऽनिलोत्था२ जनयति वधबन्धव्यसनार्थनाशान् । स्फटिकसदृशरूपा भाग्ययुक्तात्युदारा निधिरिव गगनोत्था२ श्रेयसां सच्छवर्षा । छायाः क्रमेण कृष्णताम्रनिलाम्बरोत्थाः वेत्तिहदन्ति दश ताश्च यथानुपूर्व्या । सर्वाञ्जनाभपुरुहूतयमोडुपानां तुल्यास्तु सत्त्वफलैरिति तत्त्वभावः" (इति छाया) । "करिहयरथौघभेरीसदृङ्निःस्वना भूपाः । गर्दभजर्जरस्वराश्च धनसौख्यसत्यक्ताः" (इति स्वरः) । "सप्त भवन्ति च सारा मेदोमज्जात्वगस्थिशुक्राणि । रुधिरं मांसं चेति प्राणभृतां तत्त्वमासफलम् । ताम्रोष्ठदन्तपाली-जिह्वानेत्रान्तपायुकरचरणैः । रक्तैस्तु रक्तसारा बहुसुखवनितार्थपुत्रयुताः । स्निग्धत्वक्का धनिनो मृदुभिः सुभगा विचक्षणाश्चतुर्भिः । मज्जामेदःसाराः सुशरीराः पुत्रवित्तयुक्ताः । स्थूलास्थिरस्थिसारो बलवान् विद्वान्नगः सुरूपश्च । बहुगुरुशुक्राः सुभगा विद्वांसो रूपवन्तश्च । उपचितदेहो विद्वान् धनी सुरूपश्च मांससारो यः । (इति सारः) सङ्घात इति च सुश्लिष्टसन्धिता सुखभुजो ज्ञेयाः" (इति संहतिः) । स्निग्धः पञ्चसु लक्ष्मोवागञ्जिह्वादन्ननेत्रनखसंस्थः । सुतधनसौभाग्ययुताः स्निग्धैस्त्रिभिर्नरा रूक्षैः" (इति स्निग्धः) । "द्युतिमान् वर्णः स्निग्धः क्षितिपानां मध्यमः सुतार्थवताम् । रूक्षो धनहीनानां शुद्धः शुभदो न सङ्कीर्णः" (इति वर्णः) । "साध्यमनूकं वक्त्राद् गोदशयार्द्धं ससिंहगरुडसुखाः । अप्रतिहतप्रतापा जितरिपवो मानवेन्द्राश्च । वानरमहिषवराहाजतुल्यवदनाः सुतार्थसुखभाजः । गर्दभकरभप्रतिमैर्मुखैः शरीरैश्च निःसुखाः" (इत्यनूकम् ।) "अष्टशतं पलवतिः परिमाणं चतुरशीतिरिति पुंसाम् । उत्तमसमहीनानामङ्गुलसङ्ख्या स्वमानेन" (इत्युन्मानम्) । "भारार्धतनुः सुखभाक् तुलितोऽतो दुःखभागभवत्यूनः । भारोऽतीवाद्यानामध्यर्धः सर्वधरणीशः । विंशतिवर्षा नारी पुरुषः खलु पञ्चविंशतिभिरब्दैः । अर्हति मानोन्मानं जीवितभागे चतुर्थे वा" (इति मानम्) । "भूजलशिखिनिलाम्बरसुरनररक्षःपिशाचकृतिरक्षाम् । सत्त्वेन भवति पुरुषो लक्षणमेतद्भवत्येषाम् । महीक्षभावः शुभपुष्पगन्धः सम्भोगवान् सुखसनः स्थिरश्च । तोयक्षभावो बहुतोयप्रियाभिलाषी रसभोजनश्च । वायोः क्षभावेन चलः क्षुधश्च क्षिप्रं च कोपस्य वशं प्रयाति । खमूर्तिर्निपुणो विदृताक्षः शब्दगतौ कुशलः सुनिराङ्गः ।

त्यागयुतो पुरुषो मृदुकोपः क्षेत्ररतश्च भवेत् तुरसत्त्वः। सर्वसत्त्वसंयुतो गीतभूषणप्रियः। संविभागशीलवाञ्छित्यमेव मानवः। तीक्ष्णप्रकोपः खलचेष्टितश्च पापश्च सत्त्वेन निशाचराणाम्। पिशाचसत्त्वयुक्तो मलाक्तो वक्रप्रलापी च सशब्दखाङ्गः। भीरुः क्षुधालुर्वक्रमुक् च यः स्याज्ज्ञेयः स सत्त्वेन नरक्षितरणाम्। एवं नराणां प्रकृतिः प्रदिष्टा यक्षोरगाणां प्रवदन्ति सत्त्वम्" (इति प्रकृतिः)। "शार्दूलहंसमदविहगोपतीनां तुल्या भवन्ति गतिभिः शिखिनां च भूपाः। वेषां च शब्दरहितं स्तिमितं च वातं तेऽपीश्वरा हुतपरिप्लुतगा दरिद्राः"। (इति गतिः)। "श्रान्तस्य यानमयनं च बुभुक्षितस्य पानं क्षुधापरिगतस्य भवेषु रक्षा। एतानि यस्य पुरुषस्य भवन्ति काले धन्यं वदन्ति खलु तं नरलक्षणज्ञाः। पुरुषलक्षणसङ्गमिदं मया सुनिमतान्यवलोक्य समासतः। इदमधीत्य नरो रूपसम्मतो भवति सर्वजनस्य च वल्लभः"। प्रकृत्यादिभ्योऽतिरिक्तत्वेन साङ्ख्यकारिकया पुरुषस्यास्तित्वं समर्थितं यथा "सङ्घातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्। पुरुषोऽस्ति भोक्तृभावात्कैवल्यार्थं प्रवृत्तेश्च॥" का० "पुरुषोऽस्त्यव्यक्तादेर्व्यतिरिक्तः कुतः सङ्घातपरार्थत्वात् अव्यक्तमहदहङ्कारप्रभृतयः परार्थाः सङ्घातत्वात् शयनासनाद्यङ्गवत् सुखदुःखमोहात्मकतया अव्यक्तादयः सर्वे सङ्घाताः। स्यादेतत् शयनासनादयः सङ्घाताः सङ्घातशरीरादयश्च दृष्टा न तु चात्मानं व्यक्ताव्यक्तव्यतिरिक्तं प्रति परार्थाः तस्मात्सङ्घातान्तरमेव परं गमयेयुर्नत्वसङ्घातमात्मानमित्यत आह त्रिगुणादिविपर्ययात्। अयमभिप्रायः सङ्घातान्तरार्थत्वे हि तस्यापि सङ्घातत्वात् तेनापि सङ्घातान्तरार्थेन भवितव्यमेवं तेन तेनेत्यनवस्था स्यात्। न च अवस्थायां सत्यामनवस्थाकल्पना युक्ता गौरवप्रसङ्गात्। न च प्रमाणवत्त्वेन कल्पना गौरवमपि दूषयत इति युक्तं संहतत्वस्य परार्थ्यमात्रेणान्वयात्। दृष्टानुश्रविकदोषदौस्थ्यानुरोधेन त्वनुमानमिच्छतः सर्वानुमानोच्छेदप्रसङ्ग इत्युपपादितं न्यायवार्त्तिकतात्पर्यटीकायामस्माभिः। तस्मादनवस्थामिषा अस्मासंहतत्वमिच्छता त्रिगुणत्वमविवेकित्वमविषयत्वमसामान्यत्वं चेतनत्वमप्रसवधर्मित्वं चाभ्युपेयं त्रिगुणत्वादयो हि धर्माः सङ्घातत्वेन व्याप्ताः। तत् संहतत्वमक्षिनु परे निवर्त्तमानं त्रिगुणत्वादि व्यावर्त्तयति ब्राह्मणमिव निवर्त्तमानं कठत्वादिकं तस्मादाचार्यैश्च त्रिगुणादिविपर्ययादिति वदता असंहतः परोविवक्षितः स चात्मेति सिद्धम्। इतश्च पुरुषोऽस्ति अधिष्ठानात् त्रिगुणात्मकानामधिष्ठीयमानत्वात् यद्यत् सुखदुःखमोहात्मकं तत्सर्वं परेणाधिष्ठीयमानं दृष्टं यथा रथादि यन्त्रादिभिः, सुखदुःखमोहात्मकश्चेदं बुद्ध्यादि तस्मादेतदपि परेणाधिष्ठातव्यम्। स च परस्त्रिगुणादन्य आत्मेति। इतश्चास्ति पुरुषः भोक्तृभावात् भोक्तृभावेन भोग्ये सुखदुःखे उपलक्ष्यति। भोग्ये हि सुखदुःखे अनुकूलप्रतिकूलवेदनीये प्रत्यात्मसनुभूयेते तेनानवोरनुकूलनीयेन प्रतिकूलनीयेन च केनचिदन्येन भवितव्यं नचानुकूलनीयाः प्रतिकूलनीयाः वा बुद्ध्यादयस्तेषां सुखदुःखाद्यात्मकत्वेन स्वात्मनि वृत्तिविरोधात्। तस्माद्योऽनुकूलनीयः प्रतिकूलनीयो वा स चात्मेति। अन्ये त्वाहुः भोग्या इमा बुद्ध्यादयः न च द्रष्टारमन्तरेण दृश्यता युक्ता तेषां, तस्मादस्ति द्रष्टा दृश्यबुद्ध्यादतिरिक्तः, स चात्मेति। भोक्तृभावात् दृश्येन दृष्टृत्वानुमानादित्यर्थः। दृश्यत्वं च बुद्ध्यादीनां सुखाद्यात्मकतया पृथिव्यादिवदनुमितम् तं० कौ० अधिकम् आत्मशब्दे ६६२ पृष्ठादौ दर्शितम्

रतिमधुर्यां पुरुषचातुर्विध्यसङ्गा तेषां लक्षणसङ्गं यथा "यशो स्मो दृश्यवाग्मो स्मो जातिचतुष्टयम्। मदुवचनसुशीलः कोमलाङ्गः सुकेशः सकलगुणनिधानः सत्यवादी शशोऽयम्॥१ वदति मधुरवार्णीं दीर्घनेत्रोऽतिभीरुश्चपलमतिरुदेहः शीघ्रवेगो मृगोऽयम्॥२ बहुगुणबहुवस्तुः शीघ्रकामो नताङ्गः सकलरुचिरदेहः सत्यवादी हयोऽयम्॥३ उदरकटिकरः स्थादुग्रकण्ठाधरौष्ठो दशनवदनानः श्रोत्रदीर्घौ हि वाजी॥" तत्र विष्णौ "अव्ययः पुरुषः साक्षी विष्णुरेकः" आसीत् पुरा पूर्वमेवेति" विग्रहं कृत्वा व्युत्पादितः पुरुषः पूर्वमेवाहमिहासमिति तत् पुरुषस्य पुरुषत्वमिति" श्रुतेः पुरुषु पुरीषु शयनकर्मणाशिषु सत्त्वेष्ववसीदतीति वा, पुरुषि बहूनि फलानि मनोऽभिलषितानि सनोति ददाति वा, पुरुषि भुवनानि संहारसमये स्थिते सन्तं करोतीति वा पूरणात् सदनाद्वा पुरुषः, "पूरणात् सदनाच्चैव ततोऽसौ पुरुषो मतः" इति महाभारतम्" भाष्यम्। "पुरं शरीरं ब्रह्म पुरं वा शेते इति पुरुषः। नवद्वारं पुरं पुण्यमेतैर्भूयः समन्वितम्। व्याकरोति महात्मा यत्तस्मात् पुरुष उच्यते" इति महाभारते वहा यद् शरणगत्यवसादनेषु

वध दाने वो वलकर्मणि इत्येषां धातूनां रूपाणि पूरयात् पृ-भावनपूरयवोरिति धातोरिदं रूपं पुरः। वीदति गच्छति द्युलोकान्तरिक्षपृथिवीषु सूर्य्यवाक्यात्मना गतवर्षकसदेरिदं रूपम्" आनन्दगि० "पुरा-खनेन सृष्टानि ऋतिर्यग्मिथुनदेवताः "शेते जीवेन रूपेण पुरेषु पुरुषो ह्यसौ" भाग०७।१४।२७ "पुरः स चक्रे द्विपदः पुरस्कृत" इत्यु पक्रमे "पुरः पुरुष आविशत्" इति श्रुतेश्च सर्वपुरप्रवेशात् तथात्वम्।

पुरुषक न० पुरुष इव कायति कै-क। अश्वानामूर्ध्वस्थितौ (शिरपासोत्रा) त्रिका०।

पुरुषकार पु० क-भावे घञ् ह्रस्व०। पुरुषचेष्टिते पौरुषे दैवात् पुरुषकारस्य प्राधान्यसूक्तं मत्स्यपु० १९५ अ० यथा "क्षमेव कर्म दैवाख्यं विद्धि देहान्तरार्जितम्। तस्मात् पौरुषमेवेह श्रेष्ठमाहुर्मनीषिणः। प्रतिकूलतया दैवं पौरुषेण विहन्यते। मङ्गलाचारयुक्तानां नित्यसत्त्वानुसारिणाम्। येषां पूर्वकृतं कर्म सात्त्विकं मनुजोत्तम!। पौरुषेण विना तेषां नैवाप्तिर्दृश्यते फलम्। कर्मणा प्राप्यते लोके राजसस्य तथा फलम्। क्लेशेन कर्मणा विद्धि तामसस्य तथा फलम्। पौरुषेणाप्यते राजन्! प्रार्थितव्यं फलं नरैः। दैवमेव विजानन्ति नराः पौरुषवर्जिताः। तस्मान्निष्कालसंयुक्तं दैवं न सफलं भवेत्। पौरुषं दैवसम्पत्त्या काले फलति पार्थिव!। दैवं पुरुषकारश्च कालश्च मनुजोत्तम!। त्रयमेतन्मनुष्यस्य सिद्धिकृत् स्यात् फलावहम्। क्लेशेनाप्तिसमायोगाद्दृश्यन्ते फलसिद्धयः। तासु काले प्रदग्रन्थे नैवाकाले कथञ्चन। तस्मात् सदैव कर्त्तव्यं सधर्मं पौरुषं नृभिः। एवन्ते प्राप्नुवन्तीह परलोकफलं ध्रुवम्। नालसाः प्राप्नुवन्त्यर्थान्न च दैवपरायणाः। तस्मात् सर्वप्रयत्नेन पौरुषे यत्नमाचरेत्। त्यक्त्वालसान् दैवपरान् मनुष्यान्नयुक्तान् पुरुषान् हि लक्ष्मीः। अन्विष्य यत्नाद्वृणुते नरेन्द्र! तस्मात् सदोत्थानवता हि भाव्यम्"।

पुरुषच्छन्दस् स्त्री पुरुष इव द्विपादत्वात् छन्दो यस्याः। द्विपदाख्ये छन्दोभेदे "अथ द्विपदाः पुरुषच्छन्दसं वै द्विपदा द्विपाद्या अयं पुरुषः" शत०ब्रा०२।२।४।

पुरुषत्रा अव्य० द्वितीयासप्तम्यर्थेऽतेः पुरुषशब्दात् त्राच्। द्वितीयासप्तम्यर्थौ पुरुषशब्दार्थौ पुरुषत्रा वन्दे रमे वा

पुरुषदघ्न त्रि० पुरुषः पुरुषपरिमाणं परिमाणमस्य। ऊर्द्ध-विस्तृतबाहुकनरपरिमाणवति पञ्चहस्तपरिमाणे स्त्रियां ङीप्। तदर्थे दघ्नच्। पुरुषदघ्नस्य तदर्थे त्रि०स्त्रियां ङीप्। एवं मात्रच्। पुरुषमात्रस्तदर्थे त्रि०स्त्रियां टाप्।

पुरुषदन्तिका स्त्री पुरुषस्येव दन्तो दन्ताकारोऽस्याः कप् कापि अतइत्त्वम्। मेदायां राजनि०।

पुरुषधर्म पु०ष०त०। पुरुषमात्रधर्मे न वस्तुधर्मे। "धेन्वनड्वाहोर्मांसं नाश्नीयात्" इत्युपक्रमे "पुरुषधर्मो वाऽसम्भवात्" काल्या०श्रौ०७।२।२४। "क्रतमध्ये समाम्नानात् क्रतुधर्मोऽयमिति प्राप्ते इदमुच्यते पुरुषमात्रधर्मोऽयम् न क्रतुधर्मः कुतः क्रतावसम्भवात् न हि क्रतौ धेन्वनड्वान्मांसभोजनस्य प्राप्तिः या निषिध्येत यतो दीक्षितस्य पयोव्रतता विहिता तच्चिकित्स्यनन्तरं ऋषिःशेषमश्च उक्तः यतो निषेधस्यासम्भवात् पुरुषमात्रधर्म एवायमिति" कर्कः

पुरुषनाथ पु० पुरुषान् नयति नी-थक् उप०स०। १नरपाले २सेनापतौ च ज्ञान्दो० ६।८।२।

पुरुषपुण्डरीक पु० पुरुषः पुण्डरीकः व्याघ्रभेद इव उपमितस०। १मनुष्यश्रेष्ठे २जिनराजभेदे च हेमच०।

पुरुषमेध पु० पुरुषेण परमपुरुषेण इष्टो मेधः, पुरुषा नरजातीया मिध्यन्ते हिंस्यन्तेऽत्र वा मिध-आधारे घञ्। स्वनामख्याते यज्ञभेदे तदुक्तं शत०ब्रा०१३।६।१।१। "पुरुषो ह नारायणोऽकामयत। अतितिष्ठेयं सर्वाणि भूतान्यहमेवेदं सर्वं स्यामिति स एतं पुरुषमेधं पञ्चरात्रं यज्ञक्रतुमपश्यत्तमाहरत्तेनायजत तेनेष्ट्वात्यतिष्ठत् सर्वाणि भूतानीदं सर्वमभवत् अतितिष्ठति सर्वाणि भूतानीदं सर्वं भवति य एवं विद्वान् पुरुषमेधेन यजते यो वैतदेवं वेद"। यजु० ३० अ० व्याख्यायाञ्च तत्कालादुक्तं यथा "इत उत्तरं पुरुषमेधो व्याख्यायते "नारायणः पुरुषोऽपयजत्। ब्राह्मणराजन्ययोरतिष्ठाकामयोः पुरुषमेधसंज्ञको यज्ञो भवति। सर्वभूतान्यतिक्रम्य स्थानमतिष्ठा। चैत्रशुक्लदशम्यामारम्भः। अत्र त्रयोविंशतिर्दीक्षा भवन्ति द्वादशोपसदः पञ्च सुत्या इति चत्वारिंशद्दिनैः सिध्यति अत्र यूपैकादशिनी भवति एकादशान्योन्योमीयाः पशवो भवन्ति तेषां च प्रतियूपं मध्यमे वा यूपे यथेच्छं नियोजनम्। आद्येन सकृदुदीतेन "देव सवितरिति" प्राजापत्यं तिस्र आहुतीराहवनीये जुहोति" वेददी०। तत्र चाध्याये चतुर्थ्यन्तेन देवताभेदा द्वितीयान्तेन पशुभेदा उक्ताः।

पुरुषवाच् स्त्री पुरुषस्येव वाक् यस्याः। शारिवाख्ये वयु० २४।३६। वेददी०।

पुरुषवाह पु० पुरुषेण नरेण ह्यते वह-कर्मणि घञ्। नरवाहने १कुबेरे। पुरुषमादिपुरुषं वहति-वह-अण् उप०स०। २गरुडे। भाग० ५।२४ २६ श्लो०।

पुरुषवाहम् अव्य० पुरुष+वह-घञन्त। पुरुषकर्मके वहने पुरुषवाहं वहति पुरुषं वहतीत्यर्थः कर्मादि० यथाविध्यनुप्रयोगः।

पुरुषविध त्रि०पुरुषस्येव विधा यस्य। पुरुषप्रकारे निरु०७।६

पुरुषव्याघ्र पु० पुरुषः व्याघ्र इव उपमितस०। श्रेष्ठपुरुषे एवं पुरुषपुङ्गवादयोऽपि व्याघ्रादित्वात् उपमितस०। नरश्रेष्ठे "श्रुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः। सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः" अमरः। व्याघ्रादितुल्यत्वेन नरस्य प्रशंसनात् श्रेष्ठत्वं गम्यते।

पुरुषसिंह पु० उपमितस०। १पुरुषश्रेष्ठे अमरः। २जिनराजभेदे हेमच०।

पुरुषसूक्त न० परमपुरुषप्रतिपादकम् सूक्तम्। ऋ०१०६०पठिते सहस्रशीर्षेत्यादिके षोड़शर्चात्मके सूक्तभेदे।

पुरुषांशक पु० कृत०स्वार्थे क। १पुरुषांशभेदे २तत्प्रतिपादके ग्रन्थे च। ततः शौनकादि० तद्वेत्त्यधीते वेत्यर्थे छन्दसि णिनि। पौरुषांशकिन् तदध्येतरि तद्वेत्तरि च त्रि० ब० व०।

पुरुषाद पु० पुरुषमत्ति अद-क्विप्। राक्षसे।

पुरुषाद पु०स्त्री पुरुषमत्ति अद-अण् उप०स०। १राक्षसे स्त्रियां जातित्वात् ङीष्। २मध्यदेशभेदे ह०सं०१४अ० दर्शनम्। [आद्योऽस्य। २राक्षसे च।

पुरुषाद्य पु० पुरुषेणाद्यः। १विष्णौ २जिनभेदे। पुरुषो नर

पुरुषायण त्रि० पुरुष आत्मा अयनं प्रतिष्ठा यस्य पूर्वप० णत्वम्। आत्मप्रतिष्ठे प्राणादौ। "षोड़श कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति" प्रश्नोप०६।५। "षोड़श कलाः प्राणाद्या उक्ताः कलाः पुरुषायणा नदीनामिव समुद्रः पुरुषोऽयनमात्मभावगमनं यासां कलानां ताः पुरुषायणाः पुरुषं प्राप्य पुरुषात्मभावमुपगम्य यथैवास्तं गच्छन्ति" भाष्यम्। [रघुः १।६२।

पुरुषायुष न० कृत० ऋक्समा०। पुरुषस्यायुःकाले

पुरुषार्थ पु० कृत०। १धर्मार्थकाममोक्षरूपेषु पुरुषस्य दृष्टेषु "धर्मार्थकाममोक्षाय पुरुषार्था उदाहृताः" अग्निपु०। वैष्णवमते भक्तिरपि पुरुषेष्टत्वात् पुरुषार्थः। २पुरुषप्रयोजनमात्रे च ऋक्सर्वानुक्र० २२८५ पृष्ठादौ दृश्यम्। ३साङ्ख्यमते पुरुषाय बुद्धेरिष्टे भोगेऽपवर्गे च।

पुरुषाशिन् पु० पुरुषमत्ति अद-णिनि हृत०। नरतक्षके राक्षसे राजनि० स्त्रियां ङीप्।

पुरुषास्थिमालिन् पु० पुरुषास्थिमाला साऽस्यास्त इति। महादेवे हेम०।

पुरुषोत्तम पु० पुरुषेषु उत्तमः। नारायणे "यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः" गीता। अत्र समासादिविवेकः गुरुत्तमशब्दे २६२४ पृ० दृश्यः।

पुरुष्य त्रि० पुरुषाय हितं यत्। पुरुषहिते ऋ० ७।२८।४

पुरुह त्रि० पुरुं पुरुत्वं हन्ति गच्छति हन-गतौ ड। प्रचुरे अमरः। हन-बा० डु अमरे पुरुड इति पाठान्तरं तत्रार्थे क्षीरस्वामी।

पुरुहूत पु० पुरूणि प्रचुराणि हूतानि नामान्यस्य पुरुदैर्घ्यभेदो हूतो युद्धार्थं येन वा। इन्द्रे अमरः।

पुरुहूति स्त्री दाक्षायण्यां १पुरवो हूतयो नामान्यस्य। २विष्णौ पु० भाग० ६।६।२६।

पुरुहोत्र पु० अंगुल्यपुत्रभेदे भाग० ६।२४।४।

पुरूद्रह पु० पुरून् पौरवस्वपान् तद्भारसहद्रहति उद्+वह। १पौरवं ग्रन्थपञ्चके २त्रयोदशमन्वन्तरे रुद्रसावर्णमनोः पुत्रभेदे च मार्कं० ९४ अ०।

पुरूरवस् पु० पुरु रौति रु-असि दीर्घश्च। सोमवंश्ये बुधस्य पुत्रे १राजभेदे तज्जन्मकथा यथा

"इलोवाच। मित्रावरुणयोरंशे जातोऽसि वदतां वर!। तयोः सकाशं यास्यामि न मां धर्मो हतोऽवधीत्। सैवमुक्ता सुतं देवं मित्रावरुणयोरिला। गत्वाऽन्तिकं वरारोहा प्राञ्जलिर्वाक्यमब्रवीत्। अंशेऽस्मिन् युवयोर्जाता देवौ किं करवाणि वाम्। सुतेना चाद्यमुक्ता वै अनुगच्छस्व मामिति। तां तथा वादिनीं साध्वीमिलां धर्मपरायणाम्। मित्रश्च वरुणश्चोभावूचतुर्यच्छिवोदयं तत्। अनेन तव धर्मेण प्रश्रयेण दमेन च। सत्येन चैव सुश्रोणि! प्रीतौ स्वो वरवर्णिनि!। आवयोस्त्वं महाभागे! ख्यातिं कन्येति यास्यसि। मनोर्वंशकरः पुत्रस्त्वमेव च भविष्यसि। सुद्युम्न इति विख्यातस्त्रिषु लोकेषु शोभने!। जगत्प्रियो धर्मशीलो मनोर्वंशविवर्द्धनः। निदेशा वां तु तच्छ्रुत्वा गच्छन्ती पितरन्तिकम्। बुधेनान्तरमासाद्य मैथुनायोपसन्निता। सोमपुत्राद्बुधाद्राजन्! तस्यां जज्ञे पुरूरवा। जनयित्वा ततः सा तं पुनः सुद्युम्नतां गता" हरिवं०२७अ०। २विश्वदेवभेदे जटा०।

च च पार्वणे वज्रनीवदेवः। "पुरुरवामार्द्रवाच्च पार्वणे वसदाकृतौ" आश्व० श्रौ०सू०।

पुरुवसु त्रि० पुरु प्रचुरं वसु धनं यस्य सेरे दीर्घः। बहुधने ऋ०१।८।८। [अमरः। २प्रधाने च हेमच०

पुरोग त्रि० पुरोऽग्रे गच्छति गम-ड। १अग्रगामिनि

पुरोगति पु० पुरोऽग्रे गतिरस्य। १कुक्कुरे धरणिः। २पुरोगन्तरि त्रि०।

पुरोगम त्रि०पुरो गच्छति गम-खच्। पुरोगन्तरि ऋ०६।८५।८

पुरोऽग्निः पु० पुरोऽग्रे अङ्गति अह्व-नि त्रि०। अग्रगामे यजु० १७।६६।

पुरोचन पु० अहमेवेऽग्न्याधानं दाक्षार्थं नियोजिते दुर्यो-धनविप्रभेदे तत्कथा भा० आ० ६१ अ० दृश्या।

पुरोजन्मन् त्रि० पुरोऽग्रे जन्म यस्य। १अग्रजन्मनरि २अग्र-जन्मनिन्द्यां स्त्री वा ङीप्।

पुरोटि पु० पुरोऽटति+अट-इन्। पत्रशब्दे त्रिका०।

पुरोडाश(ग्र)पु०पुरोदाश्यते दाश-दाने कर्मणि क्विप्, षत्वं वा दस्य डः। कृविपि वलिलुप्ते। पदत्वे वनु। पुरोडा इत्येव। पुरोडाशमन्त्रचरितो मन्त्रः अण्। यदन्तः २पुरोडाशमन्त्रचरिते मन्त्रे। तस्य व्याख्यानो ग्रन्थः ठन्। पुरोडाशिक तद्व्याख्याने ग्रन्थे। यदन्तः ३यवचूर्णनिश्चितरोटिकाभेदे ४लड्डुकभेदे ५पिष्टक-धूमक्यां च मेदि०।६वोमरवे हेमच०।

पुरोडाशीय त्रि० पुरोडाशाय हितं छ। पुरोडाशर्हिते यवतण्डुलादौ पचे यत्। पुरोडाशभ्र तत्रार्हे त्रि०।

पुरोद्भवा स्त्री पुरे उद्भवति उद्+भू-अच्। १अङ्गमेदायां रत्नमाला। २नगरभवे त्रि०। [पुरोहिते अमरः।

पुरोधस् पु० पुरोऽग्रे धीयते धा-कर्मणि असि किञ्च।

पुरोधा स्त्री पुरस्+धा-अच्० भावे क्विप्। धौरहित्ये "एतामेव पुरोधाकामस्य कुर्यात्" यजु भौ० २।१६।३

पुरोऽनुवाक्या स्त्री पुरोऽग्रेऽनुवाक्या। कर्मभेदे यजु०२१।१२

पुरोभागिन् त्रि०पुरः पूर्वं भजते भज-घिनुण्। १सुखलाभेन दोषवाक्यवाक्षिणि। २अग्रभागवति त्रि०। कर्त्तरि घञ्। पुरोभाग तत्रार्हे तस्य भावः ष्यञ्। पौरोभाग्य दोषदर्शने दुष्टत्वे च। [पूर्वदिग्भवे वायौ।

पुरोमारुत पु० पूर्वो मारुतः पूर्वशब्दादपि पुर् आदेशः।

पुरोयावन् त्रि० या-वनिप् ७त०। पुरोगते ऋ० ६।६५।

पुरोरवस् पु० इडरवस्+पृषो०। इडरवसि ऋ०८३ अ०।

पुरोरुच् स्त्री पुरोऽग्रे रोचते रुच-क्विप्। १अग्रभेदे यजु० २०।२६। "वायुरस्येति यज्ञानां पुरोरुचं तस्मात्तस्या उपरिष्टात् त्रयं त्रयं शंसेत्" आ० श्रौ० ५।१०।३।"एताः सप्त पुरोरुचो नाम ऋचः"नारा०मन्त्र-पर्यन्तग्रन्थे अन्यापि ऋग् यत०ब्रा०६।३।३।२०भा०टीका, यजु०७।२६ मन्त्रे च तदन्यापि ऋक् तत्संज्ञा बोध्या।

पुरोवात पु० पूर्ववर्त्ती वातः। पौरस्त्यवायौ आत्मा०श्रौ० ३।५।१८। "वापवति वायवति वा भाः पुरोवातः" त्रि० श्रौ०। रघुः १७।१८ श्लो०।

पुरोहित पु० पुरो धीयतेऽसौ धा-क्त। देवज्ञत्वादौ यज्ञे कार्ये १पुरोधसि तद्धर्मं कविकल्पतावाक्यं यथा "पुरोहितो हितो वेदस्मृतिशः शुचिवाक् शुचिः। ब्रह्मण्यो विनयाचारः प्रतिकर्त्ताऽऽपदाक्षयः"। "वेदवेदाङ्ग तत्त्वज्ञो जपहोमपरायणः। आधीर्वादपरोयुक्त एव राजपुरोहितः" चाणक्यः। "तस्मात् धर्मप्रधानाद्धा वेदधर्मविदीक्षितः। ब्राह्मणो गुणवान् कश्चित् पुरोधाः प्रतिगृह्यताम्। अग्निवेश्यामिजातेन पृथिवीं जेतुमिच्छता। पूर्वं पुरोहितः कार्यः सार्वं! राज्याभिवृद्धये। सर्वौ जिगीषता राज्ञा ब्रह्म कार्यं पुरःसरम्" भा०आ०१७१अ०। भा०आ०७१ अ० "राज्ञा पुरोहितः कार्यो अथर्ववेदविद्यावान् वहुश्रुतः। उभौ दण्डौ धर्मार्थावप्यभेद्यावबन्धनरम्। धर्मज्ञा मन्त्रविद्वेषां राज्ञां राजन्! पुरोहितः। राजा चैव गुणो वेषां कृत्स्नं तेषु वर्त्तते। उभौ प्रजा वर्द्धयतो देवान् सर्वान् सुतान् पितॄन्। अन्योन्यतां क्षितौ धर्मं ब्रह्मत्रे सुतपक्षिणौ। परस्परस्य गुप्तौ विक्षितो समचेतसौ। ब्रह्मक्षत्रस्य सम्भावात् प्रजा-सुखमवाप्नुयात्। विप्रानलात् तयोरेव प्रजा सर्वा युरेव हि। ब्रह्म क्षत्रं च सर्वेषां वर्णानां सूयतेऽग्र्यं" इत्यु-क्रमे "राज्ञां पुरोहिताधीनः विजयादिः तत्रोक्तो यथा। तत्रैव "तथाच दण्डनीत्यां च कृत्यः स्यात् पुरोहितः" "यथा च वेदविहितं कर्माऽग्निकार्यादिकम्"। "कार्यं व्यङ्गमपुत्रं वाऽनभिज्ञमजितेन्द्रियम्। न दुष्टं व्याधितं वापि त्यजेत् कुर्यात् पुरोहितम्" याज्ञवल्क्यः। तदीयदोषा यथा। २यज्ञधारिते त्रि०। पुरोहितस्य धर्म्यं यत्रिका० ष्यञ्। ३पुरोहितधर्म्ये।

पुरोहितादि पु०"पुरोहितादिभ्यो यक्" पा०यक्प्रत्ययनिमित्ते २ब्रह्मचर्ये च च मधः पा०म०सू०उक्तो यथा "पुरोहित (राजाऽयं)पाणिग्रहणं विधिवत् सुहृदां वाचयन्ति यज्ञियं यजमानं यजमानं धर्मेण विधिवत् क्षत्रियं क्षत्रियं विधिवत्

अञ्जलिक अञ्जलिक पुलिक चलिक हलिक पलिक पलिक चलिक प्रतिक धारवि चालिक खलिक संरब्ध खलक चालिक चलालिक शाङ्कर नागर चूड़िक'। पुरोहितस्य भावः कर्म वा यक्। पौरहित्य तद्भावे तत्कर्मणि च न०

पुरोहितिका स्त्री पुरोहितस्य पत्नी ङीष् पुरोहितो तत आर्षे ञ चतुरर्थ्यां कन् वा। चतुरर्थ्यां पुरोहित-पत्न्याम्। ततः शिवा० अपत्ये यञ् न स्त्रीभ्यो ढक्। पौरोहितिक तदपत्ये पुंस्त्री। [ऽधिकारान्ते

पुर्व निवासे भा०प०सक०सेट्। पूर्वति अपूर्वीत् ओष्ठ्योपधो-

पुर्व पूरणे भा० प० सक० सेट्। पूर्वति अपूर्वीत् अन्तःस्थो-पधोऽयम्।

पुल महत्त्वे भा० प० सक० सेट्। पोलति ते अपोलीत्। पुपोल अयं ज्वलादिरपि तेन पुलयति पोलयतीति भेदः

पुल उद्गूर्णौ चु० उभ०सक० सेट्। पोलयति ते अपूपुलत् त

पुल पु० पुल-क। १पुलके २विपुले त्रि० मेदि०।

पुलक न० पुल+संज्ञायां कन्। १रुजुके २पर्वतीयवस्तिकाभेदे राजनि०,३रोमाञ्चे पु० त्रिका०। ४देहात् बहिर्भूतकीटभेदे हेमच०। ५प्रस्तरभेदे तल्लक्षणादि माहुडे ७७ अ० उक्तं यथा "पुलकेषु पर्वतवरेषु च सिन्धुगासु स्थानान्तरेषु च तथोत्तरदेशगर्त्ते। संस्थापितावनकरा भुजगैः प्रकाशं संपूज्य दानवपतिं प्रविशे प्रदेशे। दाशार्हवामदशमेकल कालगाङ्गो शुक्लाञ्जनश्चौद्रमधावधर्षाः। मन्वर्-वल्लिकदलीखदशावभासा एते प्रशस्ताः पुलकाः प्रस्तुताः। शङ्खाजभद्रार्कविचित्रभद्रा सूत्रेक्षणेताः परमाः पवित्राः। मङ्गल्ययुक्ता वसुभक्तिचित्रा इन्द्रिप्रदास्ते पुलका भवन्ति। काश्मरारक्षभङ्गावटकोपरूपैर्भद्रैः समांसरुधिरार्द्रचर्मैः क्षेत्राः। क्षुद्रप्रदासु विदुषा परिवर्जनीया मूल्यं यथेप्सु कथितञ्च शतानि पञ्च। ६मणिदीपभेदे ७हरितालै दनवर्ण-भेदे ८गजाञ्जपिण्डे मेदि०। १०असुराणां ११वर्णे च हेम०

पुलकिन् त्रि० पुलक+अस्त्यर्थे इनि। १रोमाञ्चयुते स्त्रियां ङीप्। २धाराकदम्बे पु०राजनि०। [इनौ उक्तव०]

पुलस्ति पु० पुलं महत्त्वमस्यते गच्छति अस-क्तिच्। पुलस्ये

पुलस्त्य पु० सप्तर्षिभेदे ब्रह्मणः कर्णतो जातः तस्य भार्या कर्दमकन्या हविर्भूः। तस्य पुत्रौ कणस्वः विश्रवाश्च तत्कथा भाग० ३।१२।०।

पुलह पु० सप्तर्षिभेदे ब्रह्मणोनाभितो जातः तस्य पत्नी कर्दमकन्या गतिः वर्णभेदः वरीयान् हविष्मान् च तत्कथा भाग० ३।१२।

पुलाक पु०पुल+कन्+अकाक०नि०।१संक्षेपे २अल्पधान्ये (चानड़ा) धान्ये १मल्लसिक्थके मल्लगुलिकायां ४क्षिप्ते च अमरः।

पुलाकिन् पु० पुल-मा० आकिनि। इक्षे हेमच०।

पुलालिका स्त्री सस्तुतोक्ते नाट्यपटांशे विशेषद्रव्यभेदे। "मोदक कण्डुच पुलालिका च धूमावनं चैव नाट्यपटांशे"।

पुलायित न० पुल+क्यच्-क्त। अश्वगतिभेदे क्रिया०। अर्थ-पुलावितशब्दे २२६ पृ० दृश्यम्। [अमरः।

पुलिन न० पुल-इनन् किच्च। तोयादुत्थिते तटे (चड़ा)।

पुलिनवती स्त्री पुलिन+अस्त्यर्थे मतुप् मस्य वः अजिरा० न पूर्वपददीर्घः ङीप्। नद्याम्।

पुलिन्द पु०स्त्री पुल-किन्दच्।१चाण्डालभेदे स्त्रियां जाति-त्वात् ङीष्। तदुत्पत्तिकथा वामनपु०७२अ० उक्ता ततः संक्षेपः। अदितिगर्भनिक्षिप्तेन जातमृषभस्यापत्य शतस्य तपस्यर्थानन्तरं पुलिन्दाः देशाद् जाताः ते च किराताद्याङ्गनासम्भोगेनराक्षसाश्चाः। भा० आ०।७५ अ० तु वसिष्ठधेनो फेनतस्ते शबरपल्लिकाः। २तदाख्ये देशभेदे भा० भी० ९ अ०।

पुलिश पु० ज्योतिर्विद्।ज्ञानारके ऋषिभेदे तस्यैदमण्। पौलिश तद्ज्ञतद्विज्ञाने "तस्य यद्गणचिते पौलिशरोमक-वासिष्ठवौरपैत्रामहेषु पञ्चसिद्धेषु सिद्धान्तेषु बृ०सं०२अ०

पुलुकाम पु० पुल-कामयते कामि-अच् उप० स० रक्ष वः। यज्ञकामे निरु० ६।४ ऋ०१७८।५।

पुलोमन् पु० दैत्यभेदे। हरिवं० ६अ०। स च इन्द्रस्य श्वशुरः। "पुलोमानं जघानाजौ जामाता वज्र यत-क्रतुः" हरिवं २० अ०। तेन पुलोमजित् पुलोमहिट् पुलोमारिप्रभृतयः इन्द्रे। २राक्षसभेदे भा० आ० ६अ०। च्यवनशब्दे २८७२ पृ० दृश्यम्। [पत्न्याम् अमरः।

पुलोमजा स्त्री पुलोमनो जायते जन-ड ५त०। शच्याम्।

पुलोमा स्त्री भृगुभार्यायाम् च्यवनमातरि २८७२ पृ० दृश्यम्

पुल्कस पु०स्त्री० ब्राह्मण्यात् क्षत्रियायां जाते वर्णसङ्कर-भेदे यत०ब्रा०१३।७।१।२२ भाष्ये दृश्यम्। स्त्रियां जातित्वात् ङीष्।

पुल्य त्रि० पुल+चतुरर्थ्यां यञादि० यः। पुलनिर्वृत्तादौ।

पुल्ल त्रि० पुल+पृषो०। विकसिते मन्दार्वल्लतरुः।

पुल्लव पु० पुल वल्ल अति वद-अच्-पृषो० रक्ष वः। वल्ल-भजाते खगभेदे ऋ० १०।८६।२२। स्वामिभाष्यञ्च "ह च पुल्लवो खग क च वल्लादौ खगः" निरु०१२।३। उक्तम्

पुष पुषौ दिवा० पर०अक०सनिट्। पुष्यति दुदुषे अपुषत्

पुरोष । "क्ते पुषः" पा० षत्वम् कसादिषु यथादिष्व-नुपसर्गात् खरोषं पुष्यति आत्मानं पुष्यतीत्यर्थे ।

पुष पुष्टौ अक०पोषणे सक०क्र्या०प०सेट् । पुष्णाति अपोषीत् पुष पुष्टौ भ्वा०पर०अक०सेट् । पोषति अपोषीत् । पुष पुष्टौ चु०उभ०सक०सेट् । पोषयति ते अपुपुषत् त ।

पुषा स्त्री पुष्णाति पुष-क टाप् । लाक्षलीवृक्षे शब्दच० ।

पुष्क न० पुष-वा० भावे क किच्च आद्य० नेत्वम् । १पुष्टौ ततः सिध्मा०मत्वर्थे मत्व् । पुष्कल तद्युते त्रि० ।

पुष्कर न० पुष्कं पुष्टिं राति रा-क । १वक्षिणगुरुद्वीपे २वाद्यभाण्डमुखे ३जले ४आकाशे ५कमलिफले ६पद्मे ७तीर्थभेदे ८कुशद्वीपाधो चमरः । ९आकाशे १०द्वीपभेदे च मेदि० । ११रोगभेदे १२नागभेदे १३सारसपक्षिणि नक्षत्रराज आतरि १४रूपभेदे १५ वरुणपुत्रे पुष्करद्वीपस्थ १६राजभेदे च पु०मेदि० । १७मेघाधिपभेदे १८त्रिपुष्करयोगे त्रिपुष्कर-शब्दे ३३३१ पृ० दृश्यम् । १९असुरभेदे हरिवं० २०विष्णौ भा० शा० ४२ अ० । तीर्थभेदश्च त्रिपुष्करशब्दे दृश्यः । २१ब्रह्मणस्तपस्तीरभेदे न० । "पितामहसरः पुण्यं पुष्करं नाम नामतः" भा० व० ८५ अ० । २२पुष्करद्वीपस्थे पर्वतभेदे पु० "पुष्करे पुष्करो नाम पर्वतो मणिधातुमान्" भा०भी० १२अ० । २३पुष्कर-द्वीपाधिपतिभेदे "द्वीपे शुभे पुण्यजनैरुपेते बभास राजा स तु पुष्कराख्यः । तेनैव नाम्नासतु पुष्करोऽपि सदोच्यते देवगणैः ससिद्धैः" अग्निपु० । तस्य पुष्कर (पद्म) तुल्यवर्णत्वात् वा तथात्वम् "तेनैव यानेन तथाम्बुजेन बभूव नाम्ना तमथाह्वयन्ति" अग्निपु० ।

१७मेघाधिपभेदानयनञ्च ज्यो०त० उक्तं यथा "त्रिघ्नते शाकवर्षं तु चतुर्भिः शेषिते क्रमात् । आवर्तः विद्धि संवर्तः पुष्करं द्रोणमम्बुदम् तस्य फलम् "पुष्करे दुष्करं वारि शस्यहीना वसुन्धरा । विप्रक्षोपहता लोकाः पुष्करे जलदाधिपे" ।१०द्वीपभेदेच "यत एव क्षता: सप्त भुवोद्वीपाः जम्बुप्लक्षशाल्मलिकुशक्रौञ्चशाकपुष्कर-संज्ञाः" भाग०५।१।३२ । विष्णुपु० तस्य प्रमाणादुक्तं यथा "शाकद्वीपप्रमाणेन वलयेनैव वेष्टितः । क्षीरोदधिः समन्तो ब्रह्मन् ! पुष्करास्येन वेष्टितः । द्वीपेन शाकद्वीपात्तु द्विगुणेन समन्ततः । तद्द्वीपाधिपतेश्चैव महावीतोऽभवत् सुतः । धातकिश्च तयोस्तत्र हे वर्षे नाम चिह्निते । महावीतं तथैवान्यत् धातकीषण्डमण्डितम् । एकशत्र महाभाग ! प्रख्यातो वर्षपर्वतः । मानसोत्तरसंज्ञो वै मध्यतो वलयाकृतिः । योजनानां सहस्राणि ज्ञेयं पञ्चाशदुच्छ्रितः । तावदेव च विस्तीर्णः सर्वतः परि-मण्डलः । पुष्करद्वीपवलयं मध्ये च विभजन्निव । स्थितोऽसौ पर्वतस्तेन ज्ञातं तद्वर्षकद्वयम् । वलयाकार-मेकैकं तयोर्वर्षं तयो गिरिः । दशवर्षसहस्राणि यत्र जीवन्ति मानवाः । निरामया विशोकाश्च रागद्वेष विवर्जिताः । अधर्मोत्तमौ न तेषान्तां न वध्यवधकौ द्विज ! । नेष्टानिष्टयोर्भयं रोगो दोषो लोभादिको न च । महावीतं महावर्षं धातकिसंज्ञकलतः । मानसोत्तर शैलस्य देवदैत्यादिसेवितम् । सप्तान्ते न तत्र को द्वीपे पुष्करसंज्ञिते । न तत्र शैलनद्यो वा द्वीपे वर्षद्वयान्विते । तुल्यवेशास्तु मनुजा देवैस्तत्रैकरूपिणः । वर्णाश्रमाचार-स्थिति धर्माचरणवर्जितम् । त्रयीवार्तादण्डनीति-युक्त्याचारस्थितिश्च तत् । वर्षद्वयस्य मैत्रेय ! भौमः स्वर्गोऽय-मुत्तमः । सर्वत्र सुखदः कालो जरारोगादिवर्जितः । पुष्करे धातकीषण्डे महावीते च वै मुने ! । त्रयोधः पुष्करद्वीपे ब्रह्मणः स्थानमुत्तमम् । तस्मिन्निव सति ब्रह्मा पूज्यमानः सुरासुरैः । स्वादूदकेनोदधिना पुष्करः परिवेष्टितः । समेन पुष्करस्यैव विस्तारान् मण्ड-लात्तया" ।१४नलस्वप्नभ्रातरि "पुष्कर ! त्वं हि मे भ्राता सञ्जीव शरदः शतम् । एवं नलः सान्त्वयित्वा भ्रातरं सत्यविक्रमः । स्वपुरं प्रेषयामास परिष्वज्य पुनः पुनः । सान्त्वितो नैषधेनैवं पुष्करः प्रत्युवाच तम्" भा०व०७८ अ० । भगवतः २२यज्ञरूपेण प्रादुर्भावे हरिवं०२०२अ० ।

पुष्करकर्णिका स्त्री पुष्करं पद्ममिव कर्णः पुष्पं यस्याः कप् कापि अत इत्त्वम् । स्वनामख्यातायां राजनि० ।

पुष्करचूड पु० लोकालोकपर्वतोपरिस्थे दिग्गजभेदे भाग० २।१०। [गौरा० ङीष् । स्वनामख्यातायां राजनि०।

पुष्करनाड़ी स्त्री पुष्करं नाडयति नाडि+अच् उप०स०

पुष्करनाभ पु०पुष्करं पद्मं नाभौ यस्य बहुव्री० पद्मनाभे विष्णौ पु० ।

पुष्करप्रादुर्भावः पु०पुष्करस्याकारः प्रादुर्भावः । भगवतः पद्मा-कारेण प्रादुर्भावे तद्विवरणम् ।

"अथ योगविदां श्रेष्ठं सर्वभूतमनोमयम् । स्रष्टारं सर्वभूतानां ब्रह्माणं सर्वतोमुखम् । तस्मिन् हिरण्-मये पद्मे सङ्गोजनविस्तृते । सर्वतोयुगमये मार्दवैश्चैवकैर्वृते । तच्च पद्मं पुराणज्ञाः पृथिवीरूप-मुत्तमम् । नारायणात् समुत्पन्नं प्रवदन्ति मनीषिणः ।

वा तु पद्मासना देवी तां पृथ्वीं परिचक्षते। ये तु गर्भाङ्कुराः सारास्तान् दिव्यान् पर्वतान् विदुः। हिमवन्तश्च मेरुश्च नीलं निषधमेव च। कैलासं क्रौञ्चवन्तश्च तथाऽञ्जिं गन्धमादनम्। पुष्पं त्रिशिखरं चैव कालं मन्दरमेव च। उदयश्च गिरिश्रेष्ठ विन्ध्यप्रस्थश्च पर्वतम्। एते देवगणानाञ्च सिद्धानाञ्च महात्मनाम्। आश्रयाः सर्वभूतानां पुण्याः कामयुजोऽद्रयः। एतेषामन्तरो देशो जम्बूद्वीप इति स्मृतः। जम्बुद्वीपस्य संस्थानं यास्किका यत्र कुर्वते। गर्भोदात्तः स्रवेत् तोयं देवास्तत्तरसोपमम्। दिव्यतीर्थगतापाङ्क्तया दिव्याः सरितः कृताः। अन्येतानि तु पद्मस्य केसराणि समन्ततः। असंख्याता पृथिव्यान्तु सर्वे ते धातुपर्वताः। यानि पद्मस्य पत्राणि भूरीण्यूर्द्धं नराधिप!। ते दुर्गमा म्लेच्छचिता म्लेच्छदेशा विकल्पिताः। यान्यधः पद्मपत्राणि निवासार्थं विभागशः। दैत्यानासुरगाणाञ्च पातालं तन्महात्मनाम्। तेषामधोगतं यत्तदुदकेत्यभिसंज्ञितम्। महापातकर्कर्माणो मज्जन्ते यत्र मानवाः। पद्मस्यान्ते कृतं यत्तदैकार्ण्यजलं महत्। प्रोक्ताश्चे दिक्षु सङ्घाताश्चत्वारो जलसागराः। एष नारायणस्याद्यो महापुष्करसम्भवः। प्रादुर्भावोऽव्ययस्यात्मा पुष्करसंज्ञितः। एतत्तात कारणात् तज्ज्ञैः पुराणैः परमर्षिभिः। यास्किकैर्वेदतत्त्वार्थैर्यत्ते पद्मविधिः कृतः। एवं भगवता पद्मविधया परया विधिः। पर्वतानां नदीनाञ्च देशानाञ्च विनिर्मितः। विभुक्तया चाप्रतिमप्रभावः प्रभाकरो योगिवरोऽमिततद्युतिः। स्वयं स्वयम्भूः शयनेऽब्जजत्तदा जगन्मयं पद्मनिधिं महार्णवे" हरिवं० २०२ अ०।

पुष्करमालिन् त्रि० पुष्करमाला+अस्त्यर्थे इनि। १पद्ममालायुक्ते स्त्रियां ङीप्। २हिमवत्कन्याभेदभर्त्तरि पु० मार्कपु० २१ अ०।

पुष्करमूल न० पुष्करमिव मूलमस्य। १कुष्ठौषधे राजनि०। इत०। २पद्ममूले च स्वार्थे क। तत्रार्थे स्त्रिका०।

पुष्करवी(बी)ज न० इत०। पद्मबीजे।

पुष्करशायिका स्त्री सङ्कुचारिखगभेदे ध्रुवे सुश्रुतः।

पुष्करशिफा पुष्करस्य शिफा जटेव। पुष्करमूले राजनि०। पुष्करजटाप्यत्र।

पुष्करसद् त्रि० पुष्करे सीदति सद-क्विप्। १पद्मवासिनि। २गोत्रप्रवर्त्तकर्षिभेदे पु०, तस्य गोत्रापत्यम् बाह्वा० दञ् अनुप्रतिका० हिपदृद्धिः पौष्करसादि तदपत्ये पुंस्त्री। ततो यूनि फञ् पौष्करसादायन तदीये यूनिन्यपत्ये बहुत्वे तु यञो लुक्।

पुष्करसागर पु० पुष्करं सागर इव। १कुष्ठौषधे नैघण्टुप०।

पुष्करसाद पु० पुष्करं पद्मं सीदति भक्षयति धातूनामनेकार्थत्वात् सद-भक्षणे अण् उप०स०। कमलभक्षके पक्षिभेदे यजु० २४।२।

पुष्करस्थपति पु० महादेवे भा० आनु० १७ अ०।

पुष्करस्रज् स्त्री इत०। १पद्ममालायाम्। पुष्करस्रजी अक् यस्य। २पुष्करमालायुक्ते त्रि० २अश्विनीकुमारयोः पु० द्वि० व०। यजु० २।२२।

पुष्कराक्ष पु० पुष्करमिवाक्षि यस्य बहुस०। १पद्मतुल्यनेत्रे स्त्रियां ङीष्। २विष्णौ पु० "पुष्कराक्षो महाहनुः" "पुष्कराक्षो महामनाः" इति च विष्णुस०। "पुष्करं हृदयपुण्डरीकमश्नोति व्याप्नोति अच-उप०स० अण्। हृदयपुण्डरीकव्यापितया तस्य तथात्वम् व्युत्पत्तिभेदाच्च नामद्वयम्।

पुष्कराख्य पु० पुष्करस्य पद्मस्याख्या आख्या यस्य। पद्मतुल्यनामके १सारसे अमरः। पुष्कराङ्गे २कुष्ठौषधे राजनि०। (मूले कुष्ठौषधे नैघण्टुप०)

पुष्कराङ्घ्रिज न० पुष्कराङ्घ्रिरिव जायते जन-ड। पुष्कर-

पुष्करादि पु० "पुष्करादिभ्यो देशे" पा० देशे गम्ये मत्वर्थे इनिप्रत्ययनिमित्ते शब्दगणे स च गणः पा० ग० उक्तो यथा "पुष्कर पद्म उत्पल तमाल कुसुद नड कपित्थ बिल मृणाल कर्दम शालूक विगर्ह करीष शिरीष यवास प्रवाह स्थिरगय कैरव कह्लार तट तरङ्ग पङ्कज सरोज राजीव नालीक सरोरुह पुटक अरविन्द अम्भोज अब्ज कमल पयस"

पुष्करारुणि पु० पुरुवंश्ये गर्गपौत्रे ऋषभेदे भाग० ९।२१।१५

पुष्करावती स्त्री पुष्कराणि सन्त्यत्र मतुप् मस्य वः दीर्घः। नदीभेदे।

पुष्करावर्त्तक पु० पुष्करं जलमावर्त्तयति वा+इत-णिच्-ण्वुल् उपस०। मेघाधिपभेदे "पुष्करावर्त्तका नाम ये मेघाः पद्मवर्णाः। संयोगाद्दायुनोच्छ्वासाः पर्वतानां महौजसाम्। कामगानां महद्वानां लोकानां शिवमिच्छताम्। पुष्करा नाम ते मेघा दृप्ततोयमदोत्कराः। पुष्करावर्त्तकास्तेन कारणेनेह सङ्गिताः" विष्णुपु०। भीमो भीमसेनवत् उत्तरपदलोपे पुष्करोऽप्यत्र २०६२पृष्ठे दृश्यम्।

पुष्कराङ्ग पु० पुष्करमाङ्गं आङ्गं यस्य। सारसपक्षिणि अमरः पुष्कराङ्गयमयत्न। तच्च पुष्करमूले कुष्ठौषधे न० राजनि०।

पुष्करिका स्त्री पुष्करं तदाकारोऽस्त्यस्य ठन्। शूकदोषनिमित्ते रोगभेदे "पित्तशोणितसम्भूता पिडका पिडकानिता। या पुष्करसमानाभा सैया पुष्करिकेति सा" सुश्रुतः

पुष्करिन् पु० पुष्करं शुण्डायमस्त्यस्य इनि। १गजे हारा० स्त्रियां ङीप्। पुष्करादि० देशे गम्ये इनि ङीप्। २पद्मकमूले १पुष्करमूले कुष्ठौषधे राजनि०। ४पक्षिण्यां ५जलाशयभेदे मेदि०। जलाशयशब्दे २०७५ पृ० तद्भेदादि द्रष्टव्यम्। ६चाक्षुषमनोःपत्नीभेदे हरिवं० २अ०। ७अक्षीकमातरि भूमन्युपत्नीभेदे भा० आ० ६४ अ०। समृद्धार्थे इनि। ८पद्मसमूहे हेम०।

पुष्कल त्रि०पुष्-कलच् किच्च आदेरस्य नेत्त्वम् पुष्क+विघ्ना, लच् वा। १श्रेष्ठे अमरः २उपचिते जटा० ३बहुत्वयुक्ते च। "अष्टहस्तैर्भवेत् कुक्षिः कुक्षयोऽष्टौ च पुष्कलम्" इत्युक्ते ४परिमाणे न० ५भिक्षार्द्धदेये अन्नमानभेदे न०। "भिक्षामाढकषोडशमात्रमन्नं तत्राऽऽढकं तुर्यमम्। पुष्कलं त्वत्रकारन्तु तत्तुर्यमभिधीयते" कूर्मपु०। ६अक्षरभेदे पु०। हरिवं० ४२अ०। ७भरतपुत्रे पु० भाग० ९।१२।७।

पुष्क(ष्प)लक पु० गन्धद्रव्ये त्रिका० रघुः १५।८। "सौक्ष्मिपुष्क(ष्प)कोद्गतः" शि० को०। यमध्यपाठस्तत्रैव

पुष्कलावत पु० १उत्तरस्थे देशभेदे ह०स०१४अ०। २भरतपुत्रपुष्कलस्य राजधान्याम् स्त्री।

पुष्ट त्रि० पुष्-क्त। यज्ञ पोषणं कृतं तस्मिन् १कृतपोषणे अमरः। भावे क्त। २पुष्टौ न०। तत् कार्य्यतया अस्त्यस्य अच्। ३विष्णौ पु० "तुष्टः पुष्टः पुष्टिकरः" विष्णुस०।

पुष्टावत् त्रि० पुष्टं पोषणं कार्य्यत्वेनाऽस्त्यस्य मतुप् मस्य वः वेदे दीर्घः। पोषणकर्त्तरि सम्बृतधातौ ऋ० ८।४५।१६

पुष्टि स्त्री पुष्-भावे क्तिन्। १पोषणे अन्नादि नोपचयकरणे २वृद्धौ च मेदि०। कर्त्तरि क्तिच्। ३अन्नगन्धायां राज्ञ्यां श्यादिषु ४भाद्रकाभेदे ५योगिनीभेदे ६धर्मस्य पत्नीभेदे भा० ६६अ०। [राजनि०।

पुष्टिका स्त्री पुष्ट्यै कं जलमस्याः। जलपुष्पिकायां

पुष्टिकान्त पु० ६त०। गन्धाधिपे गन्धेशे।

पुष्टिद त्रि० पुष्टिं ददाति दा-क। १पोषणकारके २अन्नगन्धायां स्त्री राजनि०।

पुष्टिपति पु० १अग्निभेदे भा० व० २२० अ०। २सरस्वत्यां च शत०ब्रा० ११।४।२।१६।

पुष्प विकासे दि०पर०सक०सेट्। पुष्पति अपुष्पीत्। पुष्पुष्प "यदि पुष्पति सम्प्रच्छदाः"। कण्ड्वा०अपुष्पीत्।

पुष्प न० पुष्पति पुष्प-विकासे अच्। (फुल) ख्याते १कुसुमे २स्त्रीरजसि। भावे घञ्। ३विकासे पु० मेदि० ४कुबेरविमाने न० नेत्ररोगभेदे हेमच०। "पुष्पञ्च पत्रं च फलं तथैव यथोत्तरं ते लघवः प्रदिष्टाः तेषां तु पुष्पं कफपित्तघ्नं फलं निहन्यात् कफमारुतौ च" सुश्रुते सामान्यतस्तस्य गुणा उक्ताः। विशेषतः पुष्पवर्गे अन्येषां गुणा तत्रोक्ताः। स्त्रीरजसि "शुक्रं दुष्टं शोणितं चाङ्गनानां पुष्पोद्रेकं तस्य नाशञ्च कृत्स्नम्। पुष्पकाले शुचिस्नानादपत्यार्थी स्त्रियं व्रजेत्" इति सुश्रुतः। पुष्पशब्दनिरुक्तिस्तद्गतविशेषादिकं नानातन्त्रे उक्तं यथा तत्र पुष्पशब्दव्युत्पत्तिः कुलार्णवे "पुष्पसंज्ञं नाङ्गमपि पापौघपरिहारतः। पुष्पलाभप्रदानाच्च पुष्पमित्यभिधीयते"। प्रपञ्चसारे "तुलस्यौ पङ्कजे जात्यौ केतक्यौ करवीरके। यानि दश पुष्पाणि तथा रक्तोत्पलानि च। पत्राणि च नीलानि कह्लारकुशदानि च"। विश्वसारतन्त्रे "बकुलं कुसुमानि च" इति पाठः। "मालतीं कुन्दमन्दारं नन्द्यावर्त्तादिकानि च। पलाशपाटलापद्मजयन्त्यावर्त्तकानि च। चम्पकानि सनागानि रक्तमन्दारकाणि च। अशोकोद्भवबिल्वाख्य कर्णिकारोद्भवानि च"। विश्वसारतन्त्रे यक्तिविषये विशेष उक्तो यथा "अथ देव्यर्चने वक्ष्ये पुष्पाणि शृणु पार्वति!। इत्युपक्रमे तत्रैवादौन्युक्त्वा "एतान्यन्यानि तन्त्रेऽस्मिन् पुष्पाणि शस्तानि वै प्रिये!। नानादेशोद्भवानि स्युः सर्वकालोद्भवानि च। फलानि चैव पुष्पाणि दद्याद्देव्यै विशेषतः। अथ पुष्पं प्रवक्ष्यामि कर्मयोगे मनेश्वरि! शृणुष्व परया भक्त्या यथोक्तं ब्रह्मणा पुरा। कमले करवीरे द्वे कुसुमे तुलसीद्वयम्। जातीषु मे केतकीद्वे कुमारीषण्मकोत्पलम्। कुन्दमन्दारपुन्नाग-पाटलानागचम्पकम्। आरग्वधं कर्णिकारं पावनी नवमल्लिका। सौगन्धिकं सकोरण्टं पलाशाशोकवर्जकाः। अपामार्गः सिन्धुवारो वायुवीकञ्च कामजम्। आम्रचेलं दमनकं मरुवकं ततःपरम्। लवङ्गं जलकर्पूरं तगरञ्च जवा तथा। शिवपुष्पं द्रोणपुष्पं कामराजं सुकेतकम्। अन्यानि वनपुष्पाणि जलजस्थलजानि च।

निरिजानि देवजानि नानापुष्पाण्यतःपरम्।" शारदायाम् "कमले करवीरे द्वे कुसुदे तुलसीद्वयम्। जातीद्वयं केतके द्वे कह्लारं चम्पकोत्पले। कुन्दमन्दार-पुन्नागपाटलानागचम्पकम्। शारंगधं कर्णिकारं अवन्ती नवमालिका। सौगन्धिकं सकोरण्टं पलाशाशोकमल्लिकाः। धुस्तूरं सर्जकं बिल्वमर्जुनं सनिपुष्पकम्। अन्यान्यपि सुगन्धीनि पत्रपुष्पाणि देशिकैः। उपदिष्टानि पूजायामाददीत विचक्षणः"। योगिनीतन्त्रे ७ पटले "शृणु देवि! प्रवक्ष्यामि पुष्पाध्यायं समासतः। ऋतुकालोद्भवैः पुष्पैर्मल्लिकाजातिकुङ्कुमैः। सितरक्तैश्चवापुष्पैर्नीलपद्मैश्च पाण्डुरैः। किंशुकैस्तगरैश्चैव जवाकनकचम्पकैः। बकुलैश्चैव मन्दारैः कुन्दपुष्पैः कुरण्टकैः। धुस्तूरकादियुक्तैश्च बन्धूकागस्त्यसम्भवैः। मदनैः सिन्धुवारैश्च दूर्वाङ्कुरसकोमलैः। मञ्जरीभिः कृशानाञ्च बिल्वपत्रैः सुकोमलैः" तत्रैव ८ पटले "तुलसीद्वे मालतीद्वे तथालाभलकी तथा। पुन्नागं सुनिपुष्पञ्च मल्लिकाञ्च निवेदयेत्। करवीरञ्च कुसुमैर्देवयन्ति जनार्दनम्। दर्शनात्तस्य देवेशि! नरकान्निः प्रमुच्यते"। करवीरादिमाहात्म्यं पूरश्चरणप्रयोगे १० पटले "करवीरं जवा देवि! स्वयं काली न चान्यथा। तारा च अपरा चैव स्वयं त्रिपुरसुन्दरी"। तथा "करवीरजवामूले तुलसी नगनन्दिनि। यदि प्राप्यांस्यजेद्देवि! माहात्म्यं तस्य सुन्दरि!। वक्त्रकोटिशतेनापि जिह्वाकोटिशतेन च। वर्णितुं तस्य माहात्म्यं न शक्नोमि कदाचन"। "शुक्लं कृष्णं तथा पीतं हरितं लोहितं तथा। करवीरं भवेद्यानि! जवापुष्पं तथैव च। स्वयं काली महामाया स्वयं त्रिपुरसुन्दरी। अनादरं न कर्त्तव्यं कृत्वा च नरकं व्रजेत्"। दशमपटले "कृष्णापराजिता साक्षाद्भद्रकाली न संशयः। करवीरञ्च भुवना द्वेषं भुवनसुन्दरी। जवा साक्षाद्भगवती सर्वविद्यास्वरूपिणी। ये साधका जगन्मातरर्चयन्ति शिवप्रियाम्। एतैश्च कुसुमैश्चण्डि! स शिवो नात्र संशयः। येनार्चिता जगद्धात्री द्वेषकृष्णजवादिभिः। राजसूयाश्वमेधाद्यैर्वाजपेयाग्निहोत्रकैः। फलं यच्छायते चण्डि! तत् सर्वं कुसुमार्चनात्। जवाद्वेषं तथा कृष्णामालूरं करवीरकम्। साक्षाद्भद्रस्वरूपञ्च महादेव्यै निवेदयेत्। श्वेतचन्दनसंयुक्तं रक्तचन्दनलेपितम्। यो ददाल्लक्षिभावेन स विष्णो न संशयः"। अथ कामनाभेदे पुष्पविशेषः तत्रैव "करवीरस्य माल्यस्य सहस्राणि ददाति यः। न कामान् प्राप्य चाभीष्टान् देवीलोके महीयते। तथैकरवीरेण पद्मानां हे सहस्रके। महाघोरे महोत्पाते महापदि च सङ्कटे। महादुःखे महारोगे महाशोके महाभये। पूजयेत् कालिकां तारां भुवनां षोडशीं शिवाम्। बालां छिन्नाञ्च वगलां धूमां भीमां करालिनीम्। कमलामत्र पूर्णाञ्च दुर्गां दुःखविनाशिनीम्। सर्वविद्या जवाद्वेषं करवीरैर्मनोहरैः। मालूरपत्रैः कृष्णाभिः कृष्णां संपूज्य भूतले। साधकेन्द्रो महेशानि! भवेन्मुक्तो न संशयः"। षष्ठमाम्नायां दशमपटले "जवापुष्पैर्द्वेषपुष्पैः करवीरैर्मनोहरैः। कृष्णापराजितापुष्पैरर्चयेत् सुनिपुष्पकैः। पूजयेत् परया भक्त्या चण्डिकां परमेश्वरीम्"। योगिनीतन्त्रमतसङ्गतयोः "येऽर्चयन्ति जनाध्यक्षं करवीरैः सितासितैः। चतुर्युगानि देवेशि! प्रीतो भवति माधवः। "वकपुष्पं च जातिस्तु तथा रुद्रजटस्य च। वाजपेयस्य यज्ञस्य फलं प्राप्नोति नान्यथा। सर्वेषामेव पुष्पाणां प्रवरं नीलसत्पलम्। नीलोत्पलसहस्रेण यत्तु मालां प्रयच्छति। दुर्गायै विधिवद्देवि! तस्य पुण्यफलं शृणु। वर्षकोटिसहस्राणि वर्षकोटिशतानि च। देव्या अनुचरो भूत्वा रुद्रलोके महीयते"। षष्ठमाम्नायाम् "कृष्णायां मल्लिकैर्मेरुजैर्दामैर्मल्लैः शुभैः। पूजिता सा जगद्धात्री यद्येषा कुसुमार्चिता। माहात्म्यञ्चैव कृष्णायाः कृष्णा जानाति तत्त्वतः। तदर्द्धाञ्चं देवि! तदर्द्धं श्रीपतिः सदा। तदर्द्धमजजन्मा वै तदर्द्धं वेदसाधकः। अन्यपुष्पस्य माहात्म्यं संक्षेपाद्वच्मि शङ्करि!। पृथिव्यां मर्त्यलोके स्वर्गे वैकुण्ठे कालिकापुरे। जवादिकरवीरैश्च दलैः किं किं फलं लभेत्। न जानाति जगद्धात्री को वेद पार्वतीं विना। करवीरैः श्वेतरक्तैश्चन्दनमिश्रितैः। पूजयेत् कृष्णतटे यस्तु स विष्णोर्भवेद्ध्रुवम्। कृष्णापराजितापुष्पैर्यस्तु देवीं प्रपूजयेत्। सोऽश्वमेधसहस्राणां फलं प्राप्य शिवं व्रजेत्। महाविपत्तौ यो दद्याज्जवां कृष्णापराजिताम्। द्वेषं वा करवीरं वा स गच्छेत् कालिकापुरम्"। तत्रैव "किञ्च पाद्यैः किञ्च वाद्यैर्नैवेद्यैः किञ्च पूजनैः। मधुदानैर्मधुपर्कैः कुम्भकैः किञ्च रेचकैः। पूरकैः किञ्च वा ध्यानैः प्राणायामैश्च किञ्च वा। किं जपैः किं तपोभिर्वा मत्स्यैर्मांसैश्च पायसैः। किमन्यमन्त्रैः किं

तन्त्रैः किं यन्त्रैः किञ्च साधनैः। किं वेदैरावैः किं वा श्मशानैर्मन्त्रसाधनैः। किमध्वरैर्मन्त्रपूतैर्मन्त्रैर्मन्त्रजीवनैः। किं योनिमुद्रया किं वा तीर्थैः किं ब्रह्मसाधनैः। किं मातृकान्यासगणैः किं कटैः किं घटैः पटैः। किं काकचञ्चुभिः शोढान्यासैः किं धर्मसाधनैः। जेनार्चिता मङ्गलदेवी करवीरैर्जलादिभिः। क्षणापराजितापुष्पैः करवीरैर्मनोहरैः। द्रोणैस्तु केतकीपुष्पैर्जेषामालूरपत्रकैः। पूजिता यैर्भगवती तेषां किं कर्म साधनैः"। नित्यातन्त्रे एकादशपटले "न तुलसा यजेत् काली नाचतैर्विष्णुमर्चयेत्। अपराजितायादानेन साक्षात्तुष्टा भवेच्छिवा। कालिकायास्तारायाः करवीरमतिप्रियम्। जवापुष्पं महेशानि! दद्यान्न धारयेत् क्वचित्। रक्तोत्पलेन देवेशि! कालिकां पूजयेत् सकृत्। शतवर्षसहस्राणां पूजायाः फलमाप्नुयात्"। तथा "दुर्गापि गर्भसंयुक्ता देवी तुष्टिकरी भवेत्"। पुरश्चरणोल्लासे "मञ्जरीं सहकारस्य केशवाय निवेदयेत्। रुद्रजटां शिरोयुक्तं दाढ़िमं कार्त्तनं तथा। नीलकण्ठं मयूरञ्च योन्याकारञ्च वर्जयेत्। पुष्पदाने काम्यफलं नित्यातन्त्रे ईश्वर उवाच। "ब्रह्महत्यादिपापानां प्रायश्चित्तं सुरेश्वरि। रक्तपुष्पैर्महादेवि! चक्रराजं प्रपूजयेत्। कुलाचारक्रमेणैव कर्पूरचोदमण्डितम्। "महापातककोटिञ्च जन्मान्तरकृता अपि। मासमात्रेण हन्यन्ते सत्यं सत्यं न संशयः। लक्ष्मीस्तस्य भवेद्गेहे सुस्थिरा वीरवन्दिते!। जवापुष्पैर्महेशानि! पूर्ववद् यदि पूजयेत्। मासमात्रेण नश्यन्ति सप्तजन्मकृतान्यपि। ब्रह्महत्यादिपापानि धनवान् जायते कविः। पूर्ववत् केतकीपुष्पैः पत्रैर्वा यदि पूजयेत्। मासमात्रेण देवेशि! उपपातककोटयः"। (नश्यन्तीति पूर्वोक्तेनान्वयः)। "लभते राजसौभाग्यं साधको नात्र संशयः। शतपत्रैर्महेशानि! पूर्ववत् पूजयेच्छिवाम्। मासमात्रेण देवेशि! सर्वपापं विनाशयेत्। चम्पकैः पूजयेद्देवीं पूर्ववन्मासमात्रकम्। निष्फलं परमेशानि! पातकं शतजन्मजम्। सौभाग्यं लभते मन्त्री त्रिषु लोकेषु पार्वति!। श्वेतपद्मैर्महेशानि! मासमात्रं प्रपूजयेत्। त्रिंशज्जन्मकृतं पापं नाशयेन्नात्र संशयः। बन्धूकैः पूर्ववद्देवि! मासमात्रं प्रपूजयेत्। निष्फलं सर्वपापानि राजानं वशमानयेत्। मालतीमल्लिकाजातीकुन्दैः श्वेतोत्पलैः सह। सुमित्रैः पूर्ववद्देवि! मासमात्रं प्रपूजयेत्। ब्रह्महत्यादिपापानि शतजन्मकृतान्यपि। नाशयेत् परमेशानि! सन्निधस्य करे स्थिता। रक्तोत्पलजवाबन्धूकागस्त्यकैः शिवाम्। पूर्ववत् परमेशानि! मासमात्रं प्रपूजयेत्। पातकं नाशयित्वाऽसौ मम तुल्यो भवेन्नरः। नागकेशरकह्लारबकुलैः सिन्धुवारकैः। पाटलैः पूजयेद्देवि! श्रीपीठान्तर्निवासिनीम्। पूर्ववत् पूजयेद्देवि! मासमात्रं प्रसन्नधीः। सहस्रजन्मजं पापं नाशयेन्नात्र संशयः। सौभाग्यमतुलं तस्य भवेद्देवी प्रसादतः"। योगिनीतन्त्रे "नोत्पलञ्च दद्यात् पुष्पाणि वनस्थानि कदाचन। न शङ्खवन्ति वै देवाः समाकर्षितुमुद्यताः। एकैकं कुसुमं यत्रा रक्षन्ति दंश वै यतः। तथा यत्राङ्गनाः सर्वतः कुसुमाहृताः। तस्मादाहृत्य कुसुमं यजेद्देवान् पितॄनपि" इति हस्तस्थपुष्पदाननिषेधः। मत्स्यसूक्ते "स्नात्वा मध्याह्नसमये न छिन्द्यात् कुसुमं नरः। तत्पुष्पैरर्चने देवि! रौरवे परिपच्यते" मध्याह्न इत्युपादानात् प्रातःस्नातस्य पुष्पाहरणे न दोषः। अथ पुष्पमाला विश्वसारतन्त्रे "नीलोत्पलसहस्रेण यस्तु मालां प्रयच्छति। दुर्गायै विधिवद्देवि! तस्य पुण्यफलं शृणु। वर्षकोटिसहस्राणि वर्षकोटिशतानि च। देव्या अनुचरो भूत्वा रुद्रलोके महीयते"। योगिनीतन्त्रे नवमपटले "मालतीमालया विष्णुरर्चितो येन कार्त्तिके। पापाचरकृता माला नाशिता तस्य विष्णुना"। तथा "करवीरकृतां मालां माधवाय प्रयच्छति। देवेन्द्रोऽपि महेशानि! करोति करसंपुटम्"। तत्रैव "न भेदयेद् बकपुष्पं मालाश्चैव न भेदयेत्। विशिष्य मालतीमालां व्याघ्रचर्म तथैव च"। हरहस्यतन्त्रे द्वितीयपटले "कोकणदस्य बन्धूकं कर्णिकारद्वयस्य च। वकमन्दाररक्तानि करवीराणि शस्यते। मल्लिकातिलकं जाती चौरपुष्पं जयन्तिका। बिल्वपत्रं कुरुवकं सिन्धुपुष्पञ्च केसरम्। यावन्ती चैव सौमन्यं कान्तपुष्पं मनोहरम्। आमलकञ्च कादम्बं बकुलं यूथिका तथा। बिल्वैर्भैरवकादौर्घ तुलसीवर्जितैः शुभैः। ओड्रपुष्पैर्विशेषेण यज्ञपुष्पेण शोभितम्। सर्वं पुष्पं प्रदद्याच्च भक्तियुक्तेन चेतसा। जवापुष्पं महेशानि! दद्याद्देव्यै विशेषतः। पद्मं प्रियतरं देव्या शेफाली बकुलं तथा। रक्तोत्पलेन देवेशि! पूजयेत् परमां शिवाम्। लक्षवर्षसहस्राणां पूजायाः फलमाप्नुयात्। शिरीषं परमं

देव्याः प्रीतिदं तगरं तथा। स्वल्पं क्षुद्रतरं सर्व-संख्यक्रमेण तु। यदि दद्यान्महेशानि! सर्वसिद्धिः सुरेश्वरि!। तदैव मन्त्रसिद्धिः स्यान्नात्र कार्या विचारणा। द्विजातीं तुलसीं रम्यां तस्याः प्रीतिकरीं पराम्। काञ्चनं रक्तवर्णञ्च अतिप्रियतरं महत्। भक्तियुक्तो महेशानि! सर्वपुष्पं निवेदयेत्"। डङ्कीतन्त्रे "चातुर्मास्ये तु सञ्चैकमालत्या योऽर्चयेद्धरिम्। शतजन्मकृतं पापं तत्क्षणादेव नश्यति। करवीरस्य कुसुमैर्यो ऽर्चयेत्परमेश्वरीम्। दर्शनात्तस्य देवेशि! नरकाग्निः प्रणश्यति"। वर्ज्यपुष्पाणि "नार्चयेत् भ्रिष्टपुष्पेण पीतैश्च तगरैस्तथा। श्वेतेनोड्डीयकृष्णेन विजयेन नचार्चयेत्"। प्रपञ्चसारे शब्दपटले "कङ्कने पतितैर्मास्यैः श्रीर्यैर्वा जन्तुदूषितैः। आघ्रातैरङ्गसंस्पृष्टैः क्षुधितैर्नापि चार्चयेत्"। सारदायाम् "मक्षिकं भूमिसंस्पृष्टं कृमिकेशादिदूषितम्। कुक्कुरस्पृष्टं सघातं त्यजेत् पर्युषितं तथा"। मन्त्रमहार्णवे चतुर्दशपटले "शेफालिका तु कङ्कारं शरत्काले प्रशस्यते। अन्यत्र न स्पृशेद्देवि! प्रायश्चित्तन्तु पूजनात्। नार्चयेद्रक्तकृष्णेन तथोग्रगन्धिकेन च। करवीरस्य माध्यस्य बन्धूजीवस्य चैव हि। केशरस्य सवल्कस्य रक्तं देवि! प्रशस्यते"। योगिनीतन्त्रे "बिल्वपत्रं शमीपत्रं तमालामलकीदलम्। अपामार्गस्य पत्रञ्च कुशं दूर्वास्तथैव च। पुष्पाणामप्यभावे तु फलान्यपि निवेदयेत्। फलानामप्यभावे तु तत्पत्रैः पूजयेद्धरिम्। सुप्तपूजापुष्पञ्च तथैव सिंहाखञ्चैव मालूरं धत्तूरञ्च चतुर्विधम्। तथा रुद्रजटे हे च गुलपुष्पञ्च शङ्करि। पद्मे नीलोत्पले देवि! वकमन्दारकाञ्चने। माधवीहे तमालञ्च सुप्तमेतद्वरार्चने"। दिवारात्रिभेदेन पुष्पविशेषेण पूजनन्तत्रं तथैव "कनकानि सुगन्धीनि रात्रौ देयानि शङ्करि!। दिवा चान्यानि पुष्पाणि दिवा रात्रौ च मल्लिका। देवालयस्य पुष्पेण यो देवं प्रतिपूजयेत्। अन्यत्वं प्राप्नुयात् सोऽपि दश वर्षाणि पञ्च च"। देवताविशेषे पुष्पविशेषवर्जनमपि तत्रैव "शिवे विवर्जयेत् कुन्दं माधे माध्यं प्रशस्यते। मधेशे वर्जयेन्माध्यमशोकं तगरन्तथा। सूर्ये माध्यञ्च मन्दारं कनकञ्च तथैव च। महालक्ष्म्यै च तुलसीं भ्रिष्टकां काञ्चनन्तथा। बन्धूजीवञ्च द्रोणञ्च सरस्वत्यै न दापयेत्। यक्षाणां बिल्वपत्रञ्च शमीपत्रं तथैव च। ब्रह्मणे वर्जयेत् काशं कौसुम्भं शमीपुष्पकम्। धात्रीपुष्पं कुरण्टञ्च जवपुष्पं तथैव च। दुर्गायै न प्रदद्याच्च सोमपुष्पं तथैव च। त्रिपुरायै काञ्चनञ्च कनकं वासकं तथा। किंशुकं कृष्णकान्नाञ्च इन्द्राण्यै वर्जयेत्तथा"। अकर्मण्यपुष्पदाने दोषो यथा "वराह उवाच "अकर्मण्येन पुष्पेण यो मामर्चयते भुवि। पातकं तस्य वक्ष्यामि तच्छृणु त्वं वसुन्धरे!। नाहं तत् प्रतिगृह्णामि न च ते वै, मम प्रियाः। मूर्खैर्मानवतैर्दत्तं मम विप्रियकारिणः। पतन्ति नरके घोरे रौरवे तदनन्तरम्। अज्ञातस्य च दोषेण दुःखान्यनुभवन्ति च। वानरो दश वर्षाणि मार्जारश्च त्रयोदश। मूषकः पञ्चवर्षाणि बलीवर्दश्च द्वादश। छागश्चैवाष्ट वर्षाणि वर्षं वै श्यामकुक्कुटः। त्रीणि वर्षाणि महिषो भवत्येव न संशयः। एतत्ते कथितं भद्रे! पुष्पं यन्मेऽत्र रोचते। अकर्मण्यं विशालाक्षि! पुष्पं यो न ददाति वै" वराहपु०। देवी प्रियपुष्पाणि यथा "पुष्पाणि देव्या वैष्णव्याः प्रियाणि शृणु संप्रति। बकुलैश्चैव मन्दारैः कुन्दपुष्पाक्षुरक्षतैः। करवीरार्कपुष्पैश्च शालमलीवापराजितैः। दमनैः सिन्धुवारैश्च वकैर्मरुवकैस्तथा। लताभिर्नक्षतश्चैव दूर्वाङ्कुरैश्च कोमलैः। मञ्जरीभिः कुशानाञ्च बिल्वपत्रैः सुशोभनैः। पूजयेद्वैष्णवीं देवीं कामाख्यां त्रिपुरां तथा। अन्याश्च याः शिवाप्रीत्यै जायन्ते पुष्पजातयः। ता इमाः शृणु कीर्त्यन्ते मया वेताल! भैरव!। मालती मल्लिका जाती यूथिका माधवीलता। पाटला करवीरश्च जया तर्कारिका तथा। कुब्जकं तगरश्चैव कर्णिकारोऽथ रोचनः। चम्पकाशातको वाणवर्वरी मल्लिका तथा। अशोका सोमवल्लिकावटरूषशिरीषजे। शमीपुष्पञ्च द्रोणश्च पद्मोत्पलबकारुणाः। श्वेतारुणे सिन्धुवे च पलाशः खदिरस्तथा। वनमालाऽथ सेवन्ती कुसुदोऽथ कदम्बकः। चक्रं कोकणदश्चैव भल्लिको गिरिकर्णिका। नागकेशरपुन्नागो केतक्यञ्जलिका तथा। दोहदा बीजपूरश्च नमेरुः शालमेव च। त्रयोदशी चक्रसिन्धुश्च भिण्टी पञ्चविधा तथा। एवमाद्युक्तकुसुमैः पूजयेत् वरदां शिवाम्"। वर्जनीयपुष्पं यथा "पुष्पञ्च कृमिसंसृष्टं विशीर्णं भग्नसंहतम्। सकेशं भूमिकाधूतं यत्नेन परिवर्जयेत्। याचितं परकीयञ्च तथा पर्युषितञ्च यत्। अन्यस्पृष्टं पदास्पृष्टं यत्नेन परिवर्जयेत्" कालिका पु० ६८।५४अ०। केशवपूजने प्रशस्तपुष्पाणि यथा "मालतीमल्लिका चैव यूथिका चातिमुक्तिका। पाटलाकरवीरश्च जयासेवतिरेव

च। कुब्जकत्तगरश्चैव कर्णिकारः कुरण्टकः। चम्पकः कुत्तगरः कुन्दो वाणवर्वरमल्लिकाः। अशोकतिलककदम्बसहा चैवाटरूषकः। अमी पुष्पप्रकारास्तु प्रशस्ताः केशवार्चने। केतकीपत्रपुष्पञ्च पुष्पं भृङ्गारकञ्च च। तुलसामलकी चैव सदास्तुष्टिकरं हरेः। पद्मान्यम्बुसमुत्थानि रक्तनीले तथोत्पले। सितोत्पलञ्च कृष्णस्य दयितानि सदा नृप!। तानि पुष्पाणि देयानि विष्णवे प्रभविष्णवे चाग्निपु०। किन्तु "जाती मताङ्गा सुमना कुन्दं बकुपुटं तथा। वाणञ्च पङ्कजाशोकं करवीरञ्च यूथिका। पारिभद्रं पाटला च बकुलं गिरिशायिनी। तिलकं वनजञ्चैव पीतकं तगरन्त्वपि। एतानि हि प्रशस्तानि कुसुमान्यच्युतार्चने। तुरभीणि तथान्यानि वर्जयित्वा तु केतकीम्। तेषामपि हि पुष्पाणि प्रशस्तान्यच्युतार्चने। पल्लवान्यपि तेषां स्युः प्रशस्तानि महासुर!। वीरुधानां प्रधानेन वर्हिभाङ्गार्चनेन तथा। नानारूपैश्चाम्बुभवैः कमलेन्दीवरादिभिः। प्रवालैः शुचिभिः शुद्धैर्जलप्रक्षालितैर्दले!। वनस्पतीनामर्चेत तथा दूर्वादिपल्लवैः" वामनपु० ९१। विष्णो पुष्पविशेषदानस्य फलं यथा "आरामप्रभवैः पुष्पैरक्षिद्रैः कीटवर्जितैः। तथाऽपर्युषितैर्नित्यं कार्त्तिके विष्णुमर्चयेत्। वर्णानां हि यथा विप्रस्तीर्थानां जाह्नवी यथा। देवानाञ्च यथा विष्णुः पुष्पाणां मालती तथा। मालतीमालया देवं योऽर्चयेद् गरुडध्वजम्। जन्मदुःख जरारोगैः कर्मभिर्मुक्तिमाप्नुयात्। मालतीमालया येन पूजितः कार्त्तिके हरिः। पापलक्षायुतं तस्य वत्स! यौरिः प्रमार्जति। मालतीपुष्पमालाभिः कार्त्तिके पुष्पमण्डपम्। विष्णोर्गेहे कृतं यैस्तु ते यान्ति परमां गतिम्। जातिपुष्पैर्विरचितां मालां यः कमलेक्षति। विष्णवे विधिवद्भक्त्या तस्य पुण्यफलं शृणु। कल्पकोटिसहस्राणि कल्पकोटिशतानि च। वसेद्विष्णुपुरे श्रीमान् विष्णुतुल्यपराक्रमः। यः स्वर्णकेतकैः पुष्पैः पूजयेद् गरुडध्वजम्। अब्दकोटिशतं यावत्तुष्टः स्यात्तस्य वै हरिः। दामोदरं पूजयेद्याः कुसुमैः केतकोद्भवैः। स याति विष्णुनिलये देवैरपि स मोदते। मल्लिका कुसुमैर्देवं योऽर्चयेत् त्रिदशेश्वरम्। कार्त्तिके परया भक्त्या दहेत् पापं त्रिधार्जितम्। सुगन्धैर्मल्लिकापुष्पैरच्युतं योऽर्चयेन्नरः!। स सर्वपापनिर्मुक्तो विष्णुलोके महीयते। वेदधर्मैश्च केनापि संप्राप्ते मधुमाधवे। योऽर्चयेत् स सुनिश्चेत! जपते वैष्णवं पदम्। यः पुनः पाटलापुष्पैरर्चयेद् गरुडध्वजम्। सुपुण्यात्मा परं स्थानं स प्रयाति हरेर्गृहे!। जगत्स्वपुष्पैर्देवेशं येऽर्चयन्ति जनार्दनम्। देवर्षे! दर्शनात्तेषां नरकाग्निः प्रणश्यति। न तत् करोति विप्रेन्द्र! तपसा तोषितो हरिः। यत् करोति हृषीकेशो सुनिपुष्पैरलङ्कृतः। विहाय सर्वपुष्पाणि सुनिपुष्पेण केशवम्। कार्त्तिके योऽर्चयेद्भक्त्या वाजिमेधफलं लभेत्। सुनिपुष्पलतां मालां ये यच्छन्ति जनार्दने। भक्तोऽपि तैः समं वत्स! कुरुते ह्यभिभाषणम्। ददात्यभीप्सितान् कामान् इह चिन्तामणिर्यथा। कार्त्तिके सुनिपुष्पेण पूजितो गरुडध्वजः। गवामयुतदानेन यत् फलं कार्त्तिके सुने!। सुनिपुष्पेण चैकेन कार्त्तिक्यां तत् फलं श्रुतम्। येऽर्चयन्ति सुराध्यक्षं करवीरैः सितासितैः। तेषां वर्षशतं यावत् प्रभुर्भवति केशवः। बकुलाशोककुसुमैर्येऽर्चयन्ति जगत्पतिम्। निर्भीकास्ते भवन्तीह यावच्चन्द्रदिवाकरौ। अशोककुसुमैरभ्यर्चेज्जन्मशोकभयापहम्। पूजयित्वा हरिं याति पदं विष्णोरनामयम्। सुगन्धैः सितैर्वत्स! कुसुमैः पङ्कजोद्भवैः। अधोक्षजं समभ्यर्च्य नरो याति हरेः पदम्। अभ्यर्च्य कौमुदैः पुष्पैः केशवं त्रिदशैरपि। चटरूषकपुष्पैश्च पूजयेद्यो जगत्पतिम्। स पुष्पवाहनो याति तद्विष्णोः परमं पदम्। कार्त्तिके योऽर्चयेद्विष्णुं तुलसीबिल्वपल्लवैः। त्रिदशैरपि पूज्यः स न शक्यो यमकिङ्करैः। माधवे योऽर्चयेद्विष्णुं तुलसीबिल्वपल्लवैः। त्रिदशैरपि पूज्यः स न शक्यो यमकिङ्करैः। माधवे योऽर्चयेद्विष्णुं सुपुष्पैस्तिलकोद्भवैः। घृतपापो निरातङ्कः स याति विष्णोर्यातं तत् पदम्। समित्पुष्पकुशादीनि श्रीः स्त्रियः स्वयमाहरेत्। सूदानीतैस्तथैव हरेः पूजां कुर्वन् व्रजत्यधः। तस्माद्विप्रो सुनिश्रेष्ठ! शिष्येण स्वयमेव वा। पुष्पादीनि समाहृत्य पूजयेत् परमेश्वरम्। विप्रो दूर्वामयैः पुष्पैस्तथा काशकुशोद्भवैः। तुलसीबिल्वपत्रैश्च पूजयेद्देवताः पितॄन्। मार्कवेत्तगरैः सूर्यं धूर्तपुष्पेण केशवम्। देवीं सकुचपुष्पैश्च शङ्करं नागकेसरैः"। कालविशेषे तस्य पर्युषितत्वं यथा "प्रहरं तिष्ठते जाती प्रहरार्द्धन्तु मल्लिका। त्रियामं सुनिपुष्पञ्च करवीरमहर्निशम्"। चाम्पमञ्जरीबिल्वपत्रदानफलं यथा "मञ्जरीं चम्पकारस्य ये प्रयच्छन्ति वैष्णवाः। कार्त्तिके

सप्तजन्मे स्युर्गोकोटीफलभागिनः। कार्त्तिके योऽर्चयेद्भक्त्या बिल्वपत्रैश्च केशवम्। ददाद् यज्ञायुतफलं केशवस्य वै शृणु!। बिल्वपत्रैश्च ये कृष्णं कार्त्तिके कलिमर्दनम्। पूजयन्ति महाभक्त्या मुक्तिस्तेषां करे स्थिता। नागकेशरपुष्पैर्वैः पूजयेद् गरुडध्वजम्। स याति वैष्णवं स्थानं यत्र गत्वा न शोचते। कदम्बकुसुमैर्यो वै पूजयेन्मधुसूदनम्। जन्मायुतार्जितं पापं स्फोटितं तेन नारद!। न तथा केतकीपुष्पैर्मालती कुसुमैस्तथा। तोषमायाति देवेशः कदम्बकुसुमैर्यथा। अहो कदम्बपुष्पाणि तोषमायाति माधवः। किं पुनः पूजितो देवः सर्वकामप्रदो हरिः। हरिं किंशुकपुष्पैर्वैः पूजयेत् त्रिदशाधिपम्। वैकुण्ठे रमते यद्वत् विष्णुना सह वैष्णवः। वर्षाकाले च देवेशं कुसुदैश्चन्द्रनाचितैः। योऽर्चयेत् परमं विष्णुं संसारे न पुनर्विशेत्। कुन्दपुष्पैश्च विप्रर्षे! योऽर्चयेद् गरुडध्वजम्। कोटिजन्मार्जितं पापं तत्क्षणादेव नश्यति। शमीपुष्पैश्च देवेशं पूजयेदसुरद्विषम्। यमं न पश्येद्विप्रर्षे! न याति दुर्गतिं नरः" पाद्मोत्तरख० १२१ अ०। लक्ष्मीतुल्यप्रियपुष्पाणि नारदीयसं० "मालती बकुलाशोक मेफालीनवमालिकाः। चम्पानतगराङ्कोठमल्लिका मधुपिण्डिकाः। यूथिकाष्टापदं कुन्दं कदम्बं मधुपिप्पलम्। पाटलाचम्पकं कृष्णं सवल्कमनिसल्लकम्। केतकं च कुरुवकं बिल्वं कह्लारकं द्विज!। पञ्चविंशतिपुष्पाणि लक्ष्मीतुल्यप्रियाणि मे"। केशवार्चने निषिद्धपुष्पाणि विष्णुधर्मोत्तरे। "वयसन्धीन्यगन्धीनि कुसुमानि न दापयेत्। अन्यायतनजातानि कण्टकीनि तथैव च। रक्तानि यानि धर्मज्ञे! चैत्यवृक्षोद्भवानि च। श्मशानजातान्यन्यानि यानि चाचालजानि च"। तथा "कुटजं शाल्मलीपुष्पं शिरीषञ्च जनार्दने। निवेदितं भयं रोगं निःस्वत्वञ्च प्रयच्छति। वन्यजीवकपुष्पाणि रक्तान्यपि च दापयेत्। अन्यरक्तकपुष्पाणां दानात् दौर्भाग्यमाप्नुयात्"। परारोपितवृक्षस्य पुष्पग्रहणे दोषः। यमस्मृतिः "परारोपितवृक्षेभ्यः पुष्पाण्यानीय योऽर्चयेत्। अविज्ञाप्य च तस्यैव निष्फलं तस्य पूजितम्"। एतद् द्विजेतरपरम् "द्विजस्तूभयैः पुष्पाणि सर्वतः स्वयमाहरेत्" इति याज्ञवल्क्यात्। "देवाद्यर्थन्तु कुसुममन्यैर्यं मतरत्नयोः" इति वचनात्। "गोऽन्यर्थं हस्तमेधांसि शीलनम्यतीनां पुष्पाणि स्वयमादद्यात् फलानि चापरिक्षितानि" इति गौतमवचनाच्च। द्विजेतरस्य दण्डोऽपि "हस्तं वा यदि वा काष्ठं पुष्पं वा यदि वा फलम्। अनापृच्छन् द्विजस्यानो हस्तच्छेदनमर्हति" इति स्मृतेः। "देवोपरिधृतं मस्तकोपरिधृतम् अधोवस्त्रधृतम् अन्तर्जलस्थितञ्च पुष्पं दुष्टमिति" हरिभक्तिनामके ग्रन्थे। अभिवाद्याभिवादकस्करस्थपुष्पं भोजनात् कर्मण्यम्" इति केचित्। याचितादिपुष्पदानस्य निष्फलत्वम्। "याचितं निष्फलं पुष्पं क्रयक्रीतञ्च निष्फलम्" इति वदन्ति। वामहस्तस्थितादि पुष्पस्यादेयत्वं यथा "न पुष्पच्छेदनं कार्यं देवार्थं वामहस्ततः। न दद्यात्तानि देवेभ्यः संस्थाप्य वामहस्ततः। समित्पुष्पादीनां स्वयमाहरणीयत्वं हारीतशातातपौ "समित्पुष्पकुशादीनि ब्राह्मणः स्वयमाहरेत्। भृत्याहृतैः क्रयक्रीतैः कर्म कुर्वन् पतत्यधः"। क्रये प्रतिग्रहमाह ब्रह्मपु० "पुष्पैर्धूपैश्च नैवेद्यैर्वीरक्रयविवर्जितैः"। वीरक्रयो वीरत्वं याच्ञामूल्येन विक्रेतरन्यस्तमूल्येन क्रयः। पुष्पदानप्रकारो ज्ञानमालायां "पुष्पं वा यदि वा पत्रं फलं नेष्टमधोऽक्षम्। पुष्पाञ्जलिविधिं हित्वा यथोत्पन्नं तथार्पयेत्"। मध्याह्नस्नानानन्तरं पुष्पचयनस्य दोषो यथा "स्नानं कृत्वा तु ये केचित् पुष्पं गृह्णन्ति वै द्विजाः। देवतास्तन्न गृह्णन्ति भस्मीभवति दारुवत्"। एतत्तु द्वितीयस्नानाभिप्रायम्। इति रत्नाकरः। व्यक्तं मत्स्यसूक्ते "स्नात्वा मध्याह्नसमये न छिन्द्यात् कुसुमं नरः। तत्तत्पुष्पार्चने देवि! रौरवे परिपच्यते"। पुष्पाभावे देवानि विष्णुधर्मोत्तरे "पुष्पाभावेऽपि देवानि पत्राणि च जनार्दने। पत्राभावे जलं दद्यात्तेन पुष्पमवाप्यते"। पुष्पदानमाहात्म्यं यथा "न रत्नैर्न सुवर्णेन न वित्तेन च भूरिणा। तथा प्रसादमायाति यथा पुष्पैर्जनार्दनः"। देवताविशेषे वर्जनीयपुष्पं यथा शातातपः "शिवे विवर्जयेत् कुन्दमन्यत्तञ्च हरेस्तथा। देवीनामर्कमन्दारौ सूर्यस्य तगरन्तथा"। पुष्पविशेषाणां कालभेदे पर्युषितत्वं भविष्ये "पद्मानि सितरक्तानि कुसुदान्युत्पलानि च। एषां पर्युषिताशङ्का कार्या पञ्चदिनोत्तरम्"। पुष्पविशेषस्यापर्युषितत्वं यथा "तुलसीकमलानां न च पर्युषितार्हता"। योगिनीतन्त्रे "बिल्वपत्रञ्च माघ्यञ्च तमालामलकोदकम्। कह्लारं तुलसीञ्चैव पद्मञ्च सुनिपुष्पकम्। एतत् पर्यु-

भितं न स्यात् यच्चान्यत् कलिकात्मकम्।" कलिकात्मकं प्रस्फुटनयोग्यम् एका०त०। अन्यत् पर्युषितशब्दे दृश्यम्।

पुष्पक न० पुष्पमिव पुष्पेण वा कायति कै-क स्वार्थे क वा। १पुष्पशब्दार्थे २रीतिपुष्पे ३कुबेरविमाने ४नेत्ररोगभेदे ५रक्तकुष्ठे ६रसाञ्जने ७कौड़कांस्ये दक्षत्तिकाङ्गारवाङ्गकाख्ये मेदि०। ८कासीसे हेमच०।

पुष्पकरण्डक न० अवन्तिस्थे शिवोद्यानभेदे "महाकालस्योज्जयिन्यां विशालाऽवन्तिका तथा। तस्योद्यानं तु विज्ञेयं नाम्ना पुष्पकरण्डकम्" शब्दमा०। ततः अस्त्यर्थे इनि ङीष्। पुष्पकरण्डिका उज्जयिन्यां स्त्री हेमच०। इत०। (चाङ्गेरि) २पुष्पचयनपात्रभेदे न०।

पुष्पकाल पु० पुष्पस्य कालः। १स्त्रीणामृतुसमये द्वादशवर्षादौ काले पुष्पप्रधानः कालः मा०त०२कुसुमप्रधाने २वसन्तकाले।

पुष्पकासीस न० पुष्पमिव कासीसम्। कासीसभेदे राजनि०। "कासीसं धातुकासीसं पांशुकासीसमित्यपि। तदेव किञ्चित् पीतन्तु पुष्पकासीसमुच्यते" भावप्र० कासीसशब्दे दृश्यम्

पुष्पकीट पु० पुष्पप्रियः कीटः। १भ्रमरे त्रिका० ७त०। २कुसुमस्थितक्षुद्रकृमिमात्रे च।

पुष्पकेतन पु० पुष्पं केतनं यस्य। कामदेवे हेमच०।

पुष्पकेतु न० पुष्पनिर्मितः केतुरिव। १कुसुमाङ्कने अमरः ६व०। २कामदेवे च। [२कुसुमनामके त्रि०।

पुष्पघातक पु० पुष्पं हन्ति हन-ण्वुल्। १वंशे शब्दमा०।

पुष्पचाप पु० पुष्पमयं चापमस्य। कामे पुष्पधन्वादयोऽप्यत्र।

पुष्पचामर पु० पुष्पं चामर इव यस्य। १मदनवृक्षे त्रिका०। २वेतसवृक्षे शब्दमाला०।

पुष्पज न० पुष्पाज्जायते जन-ड इत०। १पुष्परसे राजनि०। २पुष्पजातमात्रे त्रि० "अपारयन्तं किल पुष्पजं तेजः" मा०८०

पुष्पद पु० पुष्पं ददाति दा-क उप०स०। वृक्षे हेमच०।

पुष्पदंष्ट्र पु० पुष्पमिव दंष्ट्राऽस्य। नागभेदे हरिवं०३अ०।

पुष्पदन्त पु० पुष्पमिव दन्तो यस्य। १वायुकोणस्थे दिग्गजभेदे अमरः। २विद्याधरभेदे मेदि०। ३जिनभेदे हेमच०। ४नागभेदे धरणिः। ५वैष्णवानुचरभेदे भाग०८।२१।१०। ६पुरद्वाराधिपभेदे "गुहराजमैन्द्रं भल्लाटं पुष्पदन्तं तथैव च" हरिवं० ११६ अ०।

पुष्पदन्तक पु० महिम्न इत्यादिस्तवकर्त्तरि गन्धर्वभेदे।

पुष्पदाम न० पुष्पनिर्मितं दाम। १पुष्पनिर्मितमाल्ये भूतात्मानं मलयरुरमै कीर्त्तितं पुष्पदाम" इ०र०टी०चक्रे जनविंशत्यक्षरपादके २छन्दोभेदे च।

पुष्पद्रव पु० इत०। कुसुमरसे मकरन्दे राजनि०।

पुष्पध पुंस्त्री "ब्रात्यात् तु जायते विप्रात् पापात्मा भुर्जकण्टकः। आवन्त्यवाटधानौ च पुष्पधः शैख एव च" मनूक्ते ब्रात्यविप्रजाते जातिभेदे स्त्रियां जातित्वात् ङीष्।

पुष्पधनुस् पु० पुष्पं धनुरस्य "वा संज्ञायाम्" पा० पक्षे संज्ञात्वे न अनङ्। कामदेवे माघः ६।४।

पुष्पधन्वन् पु० पुष्पं धनुरस्य संज्ञात्वात् वा अनङ्। कामदेवे अमरः। धन्वनशब्देन समासेनैव प्रयोगोपपत्तौ अनङ्-विधानम् असंज्ञायां धनुःशब्दप्रयोगनिवृत्त्यर्थम्।

पुष्पधारण पु०पुष्पं धारयति धारि-ल्यु। विष्णौ भा०७अ०।

पुष्पनिक्ष पुंस्त्री पुष्पं निक्षति निक्ष-चुम्बने अण् उप०स०। भ्रमरे पु०स्त्रियां जातित्वात् ङीष्।

पुष्पनिर्यास पु० इत०। पुष्परसे मकरन्दे राजनि०। "पुष्पनिर्यासकः शीतः कषायः स्त्रीष्वकारकः। दाहभ्रमार्त्तिवमितृट् शोफवक्त्रामयप्रणुत्। तृष्णार्त्तिकफपित्तघ्नः शिरारोचकनाशनः। तर्पणः सुरभिः सारो भिषग्भिः परिकीर्त्तितः" राजनि०।

पुष्पनेत्र न० पुष्पनिर्मितं नेत्रम्। पुष्पनिर्मिते वस्त्रयन्त्राकाऽवयवभेदे नेत्रशब्दे ४१४० पृ० दृश्यम्। "चारट्टचकपायन्तु पुष्पनेत्रेण योजितम्" सुश्रुतः।

पुष्पपवय पुंस्त्री० पुष्पं धवति धे-खश् मुम्। १भ्रमरे राजनि० स्त्रियां जातित्वात् ङीष्। २कुसुमरसपायिनि त्रि० स्त्रियां धेटः टित्त्वात् ङीष्।

पुष्पपत्र न० इत०। (फुलेर पापड़ि) नवदले वृक्षा०।

पुष्पपत्रिन् पु० पुष्पं तन्नयः पत्री वाणोऽस्य। कुसुमशरे कामे।

पुष्पपथ पु० इत०। स्त्रीणामृतुरजोनिर्गमद्वारे योनौ त्रिका०।

पुष्पपाण्डु पु० मण्डलिसर्पभेदे सुश्रुतः अहिशब्दे दृश्यम्।

पुष्पपुर न० पाटलिपुत्रनगरे कुसुमपुरे (पाटना)।

पुष्पप्रच(चा)य पु० प्र+चि-"हस्तादाने चेरस्तेये" पा० घञ् "हस्तादान इत्यनेन प्रत्यासत्तिरादेयस्य गम्यते" सि०कौ० प्रशब्देन तादृशी प्रत्यासत्तिर्नोच्यते। हस्तेन कुसुमानां चयने। चौर्य्यं तु अच्। चौर्य्येण कुसुमहरणे। हस्तादान इत्यस्योः यदृच्छादिना चयने तु चञेव।

पुष्पप्रचायिका स्त्री पर्य्यायेण पुष्पाणां चयनम् प्र+चि-पर्य्याये ण्वुच् तदस्य स्त्रीत्वम् क्रीड़ात्वात् निम्न०। आद्युदात्तता च। परिपाट्या कुसुमानां चयने।

पुष्पफल पु०पुष्पयुक्तं फलमस्य । १कपित्थे अमरः २कुष्माण्डे शब्दमाला ।

पुष्पभूषित त्रि० ३त० । १कुसुमेनालङ्कृते । २वणिग्नायके रूपकप्रकरणभेदे सा० द० प्रकरणोदाहरणम् ।

पुष्पमास पु० पुष्पप्रधानो मासः शाक०त० । चैत्रे माघि २वसन्तसमये राजनि० ।

पुष्परक्त पु० पुष्पं रक्तं यस्य । स्वर्णमक्षिकायां राजनि० ।

पुष्परजस् न० ६त० । कुसुमपरागे हेमच० ।

पुष्परथ पु० पुष्पनिर्मितो रथः । पुष्पनिर्मिते रथभेदे हेमच०

पुष्परस पु० ६त० । मकरन्दे कुसुमनिर्यासे अमरः ।

पुष्परसाढ्य न०पुष्पस्य रस आढ्यो यस्य । मधुनि राजनि०

पुष्पराग पु० पुष्पस्येव रागो वर्णो यस्य । १मणिभेदे (पोकराज) तस्य लक्षणादि युक्तिकल्पतरावुक्तं यथा "सुच्छायपीतगुरुगात्रसुरङ्गयुक्तं स्निग्धञ्च निर्मलमतीव सुवृत्तगीतम् । यः पुष्परागशकलं कलयेदमुष्य पुष्णाति कीर्त्तिमतिशौर्य्यसुखायुरर्थान्" । तस्य दोषलक्षणं यथा "कृष्णबिन्दुङ्कितं रूक्षं धवलं मलिनं लघु । विच्छायं शर्कराकारं पुष्परागं सदोषकम्" । तस्य परीक्षालक्षणे यथा "घृष्टो विकाशयेत् पुष्परागमधिकमालीयम् । न खलु पुष्परागो जात्यतया परीक्षकैरुक्तः" राजनि० । तस्योत्पत्त्यादि यथा "सूत उवाच । पतिता या हिमाद्रौ हि त्वचस्तस्याः सुरद्विषः । प्रादुर्भवन्ति तास्वस्तु पुष्परागा महागुणाः । आपीतपाण्डुरुचिरः पाषाणः पुष्परागसंज्ञस्तु । कौरण्टकनामा स्यात् स एव यदि लोहितापीतः । आलोहितस्तु पीतः स्वच्छः काषायकः स एवोक्तः । श्यामीलशुक्लवर्णः स्निग्धः सोमालकः स्वगुणैः । अल्पललोहितो यः स एव खलु पद्मरागः स्यात् सुनीलः सन् । मूल्यं वैदूर्य्यमणेरिव गदितं तस्य रत्नशास्त्रविदा । धारणफलञ्च तदुवत् किन्तु स्त्रीणां शुभप्रदो भवति" गारुडे ७५ अ० । प्रकारान्तरम् अणपुष्पसमः कान्त्या स्वच्छभावस्तु चिक्कणः । पुष्पदो धनदः पुष्पः पुष्परागो मणिर्मतः । दैत्यधातुसमुद्भूतः पुष्परागमणिर्द्विधा । पद्मरागाकरे कश्चित् कश्चित्सौगन्धिकाकरे । रेणुपीतच्छविच्छायं स्वच्छं कान्त्या मनोहरम् । पुष्परागमिति प्राहुः रङ्गशोभमहीभुजाः । ब्रह्मादिजातिभेदेन तद्विज्ञेयं चतुर्विधम् । छाया चतुर्विधा तस्य सिता पीता सितासिता" । क्लीवत्वमपि । [राजनि०

पुष्पराज पु० पुष्पमिव राजते राज–क्विप् । पुष्परागमणौ ।

पुष्परेणु पु० ६त० । परागे कुसुमरजसि शब्दर० ।

पुष्परोचन पु० पुष्पं रोचनेव यस्य । नागकेशरे । त्रिका०

पुष्पलाव त्रि० पुष्पं लुनाति मालारचनायै लू–अण् उप०स० । मालाकारे त्रिका० । णिनि । पुष्पलाविन् तत्रार्थे जटा० ।

पुष्पलिह् पु० पुष्पं लेढि लिह–क्विप् ६त० । मधुकरे । क । पुष्पलिढोऽप्यत्र अमरः ।

पुष्पवन्त(त्) पु० द्वि०व० । पुष्प+मत्वर्थे मतुप् मस्य वः । १रविशशिनोः । पृषो० अदन्तोऽयं तयोरर्थयोः । अत्र "रविचन्द्रताभ्यामेकशक्तिमदेव नियतद्विवचनाकाङ्क्षम्" शब्द०प्र०द्वन्द्वक० विस्तरस्तु मदाधर शक्तिवादे दृश्यः । २कुसुमयुक्ते त्रि० । [छत्रमत्यां स्त्रियाम् अमरः ।

पुष्पवती स्त्री पुष्पं स्त्रीरजः अस्यास्त मतुप् मस्य वः ।

पुष्पवर्ग पु० ६त० । सुश्रुतोक्ते कुसुमविशेषसङ्घाते तेषां विशेषगुणाश्च तत्रोक्ता यथा "कोविदारशणशाल्मलीपुष्पाणि मधुराणि मधुरविपाकानि रक्तपित्तहराणि च । इक्षुशस्त्रयोः पुष्पाणि तिक्तानि कटुविपाकानि वातकराणि मूत्रपुरीषाणि च । "आम्रस्य नातिशीतोष्णं नक्तान्धानी प्रशस्यते । रक्तदोषस्य निम्बस्य शुष्ककाकोदुम्बरस्य च । कफपित्तहरं पुष्पं कुष्ठघ्नं कुटजस्य च । सुतिक्तं मधुरं शीतं पद्मं पित्तकफापहम् । मधुरं पिच्छिलं स्निग्धं कुसुदं हृद्यादि शीतलम् । तस्मादल्पान्तरगुणे विद्यात् कुवलयोत्पले । स्निग्धवारं विजानीयाद्धितं पित्तविनाशनम् । मालतीमल्लिके तिक्ते सौरभ्यात् पित्तनाशने । सप्तच्छिवशदं हृद्यं बकुलं पाटलानि च । श्लेष्मपित्तविषघ्नन्तु नागं तद्वच्च कुङ्कुमम् । चम्पकं रक्तपित्तघ्नं शीतोष्णं कफनाशनम् । किंशुकं कफपित्तघ्नं तद्वदेव कुरण्टकम् । यथादृष्टं विजानीयात् पुष्पं दृष्टोचितं तथा । मधुशिग्रुकरीराणि कटुश्लेष्महराणि च" । अन्येषां गुणा भावप्र० विशेषत उक्तास्तत्र द्रष्टव्याः ।

पुष्पवाटी स्त्री० ६त० । पुष्पोद्याने । स्वार्थे क । तत्रार्थे अमरः । "दक्षिणेन पुष्पवाटिकामालाप इव श्रूयते" शकुन्तला ।

पुष्पवा(बा)ण पु० पुष्पं बाणोऽस्य । १कन्दर्पे २कुशद्वीपस्थपर्वतभेदे भा०व० १२ अ० । ३दैत्यभेदे भा०शा०२२७अ० । ४नायकभेदे पुष्पबाणचरिते दृश्यम् ।

पुष्पवाहन पु० राजभेदे अग्निपु० ।

पुष्पवाहिनी स्त्री नदीभेदे हरिवं० २६६ अ०।
पुष्पशकटी स्त्री देवताख्याम् डारा०। [ङ्यप्।
पुष्पशकलिन् पु० निर्विषसर्पभेदे सुश्रुतः। अहिशब्दे
पुष्पशर पु० पुष्पं शरोऽस्य। कुसुमेषौ कामदेवे।
पुष्पशरासन पु० पुष्पमयं शरासनं धनुर्यस्य। कामे [त्रि०
पुष्पशून्य पु० ३त०। १उडुम्बरे राजनि०। २पुष्परहितमात्रे
पुष्पसमय पु० ६त०। वसन्ते अटौ अमरः।
पुष्पसार पु० ६त०। १कुसुमरसे राजनि०। ७त०। २तत्तुल्यां ब्रह्मवै०पु०। [कर्बिकारीवृक्षे राजनि०।
पुष्पसौरभा स्त्री पुष्पे सौरभमस्याः। कुसुमे सौरभान्विते
पुष्पस्वेद पु० ६त०। कुसुमरसे मकरन्दे राजनि०।
पुष्पहासा स्त्री पुष्पं हास इव यस्याः। १रजस्वलायां स्त्रियां शब्दच०। सकुलाम्बना स्त्रितानां पुष्पाणां हास इव प्रपञ्चरूपेण प्रकाशोऽस्य। २विष्णौ पु०। "पुष्पहासः प्रजागरः" विष्णुस०। ६त०। ३कुसुमविकासे पु०।
पुष्पहीन पु० ३त० १कुसुमरहिते द्रुमे। २उडुम्बरवृक्षे स्त्री ङीष्। रजःशून्यायां स्त्रियां स्त्री हेम०।
पुष्पा स्त्री चम्पापुर्य्याम् (भागलपुर) त्रिका०।
पुष्पागम पु०पुष्पाणामागमोऽत्यत्र या+गम आधारे घञ्। वसन्ते पुष्पाकरादयोऽप्यत्र। [माकाकारे हेमच०।
पुष्पाजीव पु० पुष्पमाजीवति या+जीव-अच् उप०स०।
पुष्पाञ्जन न० ६त०। कुसुमाञ्जने (कोषकालक)। राजनि०
पुष्पानन पु० पुष्पमिव विकसितमाननमस्य। बहुव्रीहौ भा० स० १०अ०।
पुष्पाम्बुज न० पुष्पस्याम्बुजो जायते जन-ड ६त०। मकरन्दे राजनि०। [दवोऽप्यत्र।
पुष्पायुध पु० पुष्पमायुधमस्य। कुसुमायुधे कामदेवे पुष्पास्त्रा-
पुष्पार्ण पु० राजभेदे भाग० ४।१२।११।
पुष्पावचायिन् पु० पुष्पमवचिनोति आत्मार्थम् अव+चि-णिनि ६त०। आकाकारे हेमच०। [दादकत्वात् तथात्वम्।
पुष्पासव न० ६त०। बकुले राजनि० तस्य पुष्पोद्भवत्वात्
पुष्पास्त्र पु० पुष्पमस्त्रमस्य। कुसुमायुधे कामे हेमच०।
पुष्पाङ्गा स्त्री पुष्पमित्याङ्गा यस्याः। मतपुष्पायाम् राजनि०
पुष्पिका स्त्री पुष्प+स्वार्थे कन्। १दन्तमले डारा०। २क्लिङ्गमले हेम०। ग्रन्थाध्यायसमाप्तौ तत्प्रतिपाद्यकथने ग्रन्थांशभेदे यथा "इति महाभारते शतसाहस्र्यां संहितायामि-त्यादि"। [क। २विकसिते च।
पुष्पित त्रि०पुष्प+तार०इतच्। १संजातकुसुमे। पुष्प-कर्तरि
पुष्पितायी स्त्री "अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पितायाम्" छ०र०उक्ते अर्द्धसमवृत्तभेदे।
पुष्पिन् त्रि० पुष्प+अस्त्यर्थे इनि। १कुसुमयुक्ते वृक्षे स्त्रियां ङीप्। वा च २रजस्वलायां स्त्रियां स्त्री।
पुष्पेषु पु० पुष्पमिषुर्यस्य। कुसुमबाणे कामे हेम०।
पुष्पोत्कटा स्त्री राक्षसीभेदे वा च रावणकुम्भकर्णयोर्माता "पुष्पोत्कटायां जज्ञाते द्वौ पुत्रौ राक्षसेश्वरौ। कुम्भ-कर्णदशग्रीवौ" भा० व० २७३ अ०। [अपुष्पप्रीत्।
पुष्प्य पुष्प विकसने कण्ड्वा० पाठान्तरम् अक०सेट्। पुष्प्यति
पुष्य पुंक्लो० कार्यं पुष्यति पुष-कर्तरि यत् नि०। अश्विन्यादि २७ नक्षत्रमध्ये १अष्टमे नक्षत्रे, स्त्रीत्वे टाप्। तदधिपतिः जीवः। तद्योगतारादिकम् अश्वीशब्दे दृश्यम्। २गौरमार्षे ऋषिवृक्षे च पु० मेदि०।
पुष्यनेत्रा स्त्री पुष्यः नक्षत्रं नेता प्रथमावधिभेषपर्य्यन्तं यस्याः सा बहुव्री०। यस्यां रात्रौ प्रथमावधि-भेषपर्य्यन्तं पुष्यनक्षत्रस्य दर्शनं तादृश्यां रात्रौ। [तत्रार्थे
पुष्यरथ पु० यात्रार्थे रथे अमरः। पुष्यरथेति तत्र पाठान्तरं
पुष्यलक पुंक्लो० पुष-कि पुषिः पुष्टिस्तुष्टौ यजति पर्य्याप्नोति यज-अच् स्वार्थे क। गन्धप्रधाने सुयभेदे। "बीज्जि पुष्यलकोद्भवः" सि०कौ०। स्त्रियां जातित्वात् ङीष्। २चम्पकवृक्षे १कोले च पु० मेदि०।
पुष्यस्नान न० पुष्यनक्षत्रकाले स्नानम्। शास्त्रोक्तविधानेन पुष्यनक्षत्रयुक्तकाले रूपलावण्याभिषेकभेदे तद्विधानं ह०चं०३८ अ०दृश्यम्। तत्फलञ्च तत्रोक्तो यथा "शुभे शुक्लपक्षे संप्राप्ते पुष्ययुक्ते निशाकरे" पुष्याभिषेकोऽप्यत्र।
पुस गतौ अ्वे क्षानौ च चुरा०उभ०सक०सेट्। पोसयति ते अपुपुसत् त। [पुसत् त।
पुस्त वस्त्रे चनादरे च चु०उभ०सक०सेट्। पुस्तयति ते अपु-
पुस्त न० पुस-अच्। "चर्म्मा वा दारुणा वापि वस्त्रेणाथव कर्म्मणा। लोहरत्नैः कृतं वापि पुस्तमित्यभिधीयते" इत्युक्ते क्रियादिनिष्पन्नकर्मणि। स्वार्थे क। २क्रियाधारे ग्रन्थे पुंक्लो० स्त्रीत्वे गौरा० ङीष्। पुस्तकमानलेखनप्रकारादिकं योगिनीतन्त्रे उक्तं यथा "मानं वक्ष्ये पुस्तकस्य शृणु देवि! समासतः। मानेनाल्पं भवेद्विघ्नादधमे श्रीर्हता भवेत्। कुसुमात् सप्तिमात्रमावाच्च द्वादशाङ्गुलम्। दशाङ्गुलं तथाष्टौ च ततो हीनं न कारयेत्"। तस्य लेखो यथा "लेखदर्यं सप्तिकृते वाङ्मात्रे लिखेत्सुकम्। समभागे सदैवानि।

दृक्षादौ रूप(?)रम्भकम्। अष्टाङ्गुलं परित्यज्य मध्ये वेधं तु कारयेत्। प्रादेशादौ भवेद्रन्ध्रं द्व्यङ्गुले वा समाचरेत्। पुस्तकस्य च बाहुल्ये यन्त्रवेधं विकल्पयेत्। भाग्यौषधानिभेदाश्च धनानां वा क्षयो भवेत्। दग्धरन्ध्रे भवेत् पीड़ा वर्त्तुलं शुभदं भवेत्। चतुष्कोणे विभुवस्तु त्रिकोणे मरणं भवेत्"। पुस्तकलेखनपत्रं यथा "भूर्जे वा तैलपत्रे वा ताले वा तालिपत्रके। अनन्तचापि देवेशि! पुस्तकं कारयेत् प्रिये!। सम्यगे वर्णपत्रे च ताम्रपात्रे च शङ्करि!। अन्यद्दुष्टत्वचि देवि! तथा केतकीपत्रके। भार्ज्जपत्रे रौप्ये वा वटपत्रे वरानने!। अन्यपत्रे वस्तुदत्ते लिखित्वा यः समभ्यसेत्। स दुर्गतिमवाप्नोति धनहानिर्भवेद्ध्रुवम्। पुस्तके यावदेहलिखननिषेधो यथा "वेदस्य लिखनं कृत्वा यः पठेद् ब्रह्मवित् भवेत्। पुस्तकं वा गृहे स्थाप्यं वज्रपातो भवेद् ध्रुवम्"। युगभेदे पुस्तकाचरस्य देवा यथा "सत्येऽक्षरे स्थितः शम्भुः शूलपाणिस्त्रिलोचनः। मन्वादितिर्द्वापरे च त्रेतायां सूर्य्य एव च। कलौ युगे पिनाकी च कल्पौ विष्वक्षरे हरिः"। तत्तेखकपूजाफलं यथा "आरम्भे च समाप्तौ च लेखकं प्रतिपूजयेत्। हरिश्च गन्धपुष्पाद्यैर्वस्त्रैश्च सुमनोहरैः। यावदक्षरसंख्यानं प्रतिपत्रं च सुन्दरि!। तावद्युगसहस्राणि ब्रह्मलोके वसेन्नरः"। लेखकस्य वेतनपत्रके दोषो यथा "वेतनं यस्तु गृह्णीयात् लिखित्वा पुस्तकं च तु। यावदक्षरसंख्यानं तावन्नरकं व्रजेत्"। भूमौ पुस्तकलेखनस्थापननिषेधो यथा "न भूमौ लिखितेद्वर्षं यन्त्रं न पुस्तकं लिखेत्। न भूमौ पुस्तकं स्थाप्यं न तन्त्रमाहरेत्तु तत्। भूपृष्ठपट्टके चैव अक्षरं वाऽथ पुस्तकम्। भूमौ तिष्ठति देवेशि! जन्मजन्मनि मूर्खता। तदा भवति देवेशि! तत्कालात् परिवर्जयेत्"। तस्य दानफलं यथा "विप्राय पुस्तकं दत्त्वा धर्मशास्त्रस्य च द्विज। पुराणस्य च यो दद्यात् स देवत्वमवाप्नुयात्। शास्त्रदृष्ट्या जगत्सर्वं सन्ततञ्च शुभाशुभम्। तस्मात् शास्त्रं प्रयत्नेन दद्याद्विप्राय कार्त्तिके। वेदविद्यासु यो दद्यात् स्वर्गे कल्पत्रयं वसेत्। शास्त्रविद्यासु यो दद्यात्तस्य संख्या न विद्यते। त्रीणि तल्पप्रदानानि त्रीणि तल्पफलानि च। शास्त्रं कामदुघा धेनुः पृथिवी चैव शाश्वती" इति शब्दोत्तरखण्डे ११७ अ०। वेदशास्त्रादिदानफलं यथा "वेदार्थवप्रशास्त्राणि धर्मशास्त्राणि चैव हि। मूल्येन लेखयित्वा यो दद्याद् याति स वैदिकम्। इतिहासपुराणानि लिखित्वा यः प्रयच्छति। ब्रह्मदानसमं पुण्यं प्राप्नोति द्विगुणोत्तमम्" इति गारुड़े २१६ अ०। पुराणादिपुस्तकदानविधिः हेमा० दा० चण्डीशब्देऽधिकं द्रष्टव्यम्।

पुस्तकमुद्रा स्त्री "वामसक्थिं समाश्रित्य मुद्रां कृत्वा पुस्तकसंज्ञिका" तन्त्रसारोक्ते मुद्राभेदे। [कर्मधारयेऽपि कृता०।

पुस्तकर्म्मन् त्रि० पुस्तं यन्त्रलेखनं कर्म्माऽस्य। लेखादि-

पू शोधे दि०आत्म०सक०सेट्। पूयते अपविष्ट। पुपुवे पूतः।

पू शोधे भ्वा०आ०सक०सेट्। पवते अपविष्ट। पुपुवे पूतः पवित्रः।

पू शोधे क्र्यादि०प०उभ०सक०सेट्। पुनाति पुनीते अपावीत् अपविष्ट पुपाव पुपुवे। आर्षे क्वचित् आत्मनेप० हस्वः। "अरुषात् पुनते पापं भारुषात् पूर्वसञ्चितम्"।

पूग पु० पू-गन् किच्च। (सुपारि) १वृक्षे २समूहे अमरः ३इन्द्रवि ४भावे ५वृक्षाकृतौ च शब्दरत्ना०। ६पूगफले न०। समूहार्थात् तस्मात् पूरणे डट् तिलुक् च। पूगति स्म पूगपूरणे त्रि०स्त्रियां ङीप्। पूगे भवः दिगा० यत्। पूग्य तद्भवे त्रि०। समासे वाद्युदात्तताऽस्य।

पूगपात्र न० पूगस्य दलचर्वित तद्रसस्य आधारभूतं पात्रम्। (पिकदानी) पतद्ग्रहे शब्दर०।

पूगपीठ पु०न० ६त०। पतद्ग्रहे त्रिका०।

पूगपुष्पिका स्त्री पूगसदृशं पुष्पमस्य कप् कापि अत इत्त्वम्। विवाहोत्सवे दीयमाने गुवाकयुक्तताम्बूलदानकर्म्मणि त्रिका०।

पूगरोट पु० पूगः पूगवृक्ष इव रोटति द्योतते रुट-द्युतौ क्विप्। हिन्तालवृक्षे त्रिका०।

पूज पूजने चु०उभ०सक०सेट्। पूजयति ते अपूपुजत् त।

पूजक त्रि० पूज-ण्वुल्। पूजाकारके। अकारान्तत्वेऽपि याजकादि० षष्ठीसमासः देवपूजकः इत्यादि।

पूजन न० पूज-भावे ल्युट्। १अर्चने। पूज्यतेऽनेन कर्म्मणि ल्युट् ङीप्। २यज्ञभिविशेषभेदे भा०शा०३१६ अ० तद्विधाख्यानं दृश्यम्।

पूजनीय त्रि० पूज+कर्म्मणि अनीयर्। १पूजार्हे। २पूजन्यां यतमयोभिद्भेदे स्त्री हरिवं० २० अ० दृश्यम्।

पूजा स्त्री पूज-भावे च। अर्चने। ल्युट्। पूजनमत्र न०। उपचारशब्दे तद्भेदा उक्ताः

देवीपूजायां तद्भेदनिरूपणं यथा

"दिग्विभागे तु कौवेरी दिक् शिवाप्रीतिकारिणी। तस्मात्तन्मुखमासीनः पूजयेच्छिवकां सदा" पूजास्थानानि यथा "लिङ्गस्थां पूजयेद्देवीं पुस्तकस्थां तथैव च। स्थण्डिलस्थां महामायां पादुकाप्रतिमासु च। चित्रे च त्रिशिखे खड्गे जलस्थां वापि पूजयेत्। पञ्चाशद्दङ्गुलं खड्गं त्रिशिखञ्च त्रिमूलकम्। शिलायां पर्वतस्थायां गङ्गायामपि तत्समम्। आर्य्यावर्त्ते मध्यदेशे तथा पर्वतगह्वरे। देवीं संपूजयेच्चित्तं भक्तिश्रद्धासमन्वितः। वराणाञ्च सदा पूजा सम्पूर्णफलदायिनी। तस्तु द्विगुणा प्रोक्ता पुरुषोत्तमसन्निधौ। ततोऽपि द्विगुणा प्रोक्ता द्वारवत्यां विशेषता। सर्वक्षेत्रेषु तीर्थेषु पूजा द्वारवतीसमा। विन्ध्ये शतगुणा प्रोक्ता गङ्गायामपि तत्समा। आर्य्यावर्त्ते मध्यदेशे ब्रह्मावर्त्ते तथैव च। विन्ध्यवत्फलदा पूजा प्रयागे पुष्करे तथा। ततश्चतुर्गुणं प्रोक्तं करतोयानदीजले। तस्माच्चतुर्गुणफलानन्दिकुण्डे च भैरव!। ततश्चतुर्गुणा प्रोक्ता जल्पेशेश्वरसन्निधौ। तत्र सिद्धेश्वरीयोनौ ततोऽपि द्विगुणा स्मृता। ततश्चतुर्गुणा प्रोक्ता लोहित्यनदपार्श्वसे। तत्समा कामरूपे तु सर्वत्रैव जले स्थले। सर्वश्रेष्ठो यथा विष्णुर्लक्ष्मीः सर्वोत्तमा यथा। देवीपूजा तथा श्रेष्ठा कामरूपे वरानने। देवीक्षेत्रं कामरूपं विद्यतेऽन्यत्र तत्समम्। अन्यत्र विरला देवी कामरूपे गृहे गृहे। ततः शतगुणं प्रोक्तं नीलकूटस्य मस्तके। ततोऽपि द्विगुणं प्रोक्तं क्षीरके शिवलिङ्गके। ततोऽपि द्विगुणा प्रोक्ता शैलपुत्रादियोनिषु। ततः शतगुणा प्रोक्ता कामाख्या योनिमण्डले" कालिकापु० ५४।५७ अ०। पूजासनानि तत्फलानि च यथा "कुशविष्टरासने रम्ये कृष्णाजिनकृतोत्तरे। राङ्कवे कम्बले वापि काष्ठादौ व्याघ्रचर्मणि। न कुर्य्यादर्च्चनं विष्णोः शिवे! काष्ठासनादिषु। काष्ठासने कृता पूजा पाषाणे रोगसम्भव। भूम्यासने गतिर्नास्ति वस्त्रासने दरिद्रता। कुशासने ज्ञानसिद्धिः कम्बले सिद्धिरुत्तमा। कृष्णाजिने धनी पुत्री मोक्षः स्याद्व्याघ्रचर्मणि। मन्त्रयोगं प्रकुर्वीत भोगार्थं सुखमासने" इति पाद्मोत्तरखण्डे ७४ अ०। पूजाधिकारिताप्रयोजकदेवषट्कपूजाऽऽदौ कार्य्या "गणेशञ्च दिने शक्तिं विष्णुं शिवं शिवाम्। संपूज्य देवषट्कञ्च षोडशिकारी च पूजने। गणेशं विघ्ननाशाय सिद्ध्यर्थाय दिवाकरम्। शक्तिं गुह्याय विष्णुञ्च मुक्तये पूजयेद्धरः। शिवं ज्ञानाय ज्ञानेशं शिवाञ्च बुद्धिहेतवे। संपूज्य तान् लभेत् प्राज्ञो विपरीतमतोन्यथा" इति ब्रह्मवै० प्रकृतिखण्डे ८ अ०। सामान्यतस्तन्त्रोक्तपूजाप्रकारस्तु "आदाङ्गन्यादिकन्यासः करशुद्धिस्ततःपरम्। अङ्गुलिव्यापकन्यासौ हृदादिन्यास एव च। ध्यानं पूजा जपश्चेति सर्वतन्त्रेष्वयं विधिः" तन्त्रसारः।

पूजाधार पु० ष० त० देवतानां पूजनाधारे जलादौ यथोक्तं तन्त्रसारे नारदीये "आपोऽग्निर्हृदयं चक्रं विष्णोः क्षेत्रसमुद्भवम्। यत्तच्च प्रतिमास्थानं अर्चने सर्वदा हरेः" गौतमीये "शालग्रामे मनौ यन्त्रे प्रतिमामण्डलेषु वा। नित्यं पूजा हरेः कार्या न तु क्वापि भूतले। शालग्रामशिलास्पर्शात् कोटिजन्माघनाशनम्। किं पुनरर्चनं तत्र हरिसान्निध्यकारणम्। बहुभिर्जन्मभिः पुण्यैर्यदि कृष्णशिलां लभेत्। गोप्पदेनैव चिह्नेन तेन जन्म समाप्यते"। एतेन विष्णुपूजायां शिलाया अतिप्राधान्यम् मण्डलादीनान्तु सर्वसाधारण्यात्" योगिनी तन्त्रे "लिङ्गस्थां पूजयेद्देवीं पुस्तकस्थां तथैव च। मण्डलस्थां महामायां यन्त्रस्थां प्रतिमासु च। जलस्थां वा शिलास्थां वा पूजयेत् परमेश्वरीम्"। कौलावल्यां "यत्रापराजितापुष्पं जवापुष्पञ्च विद्यते। करवीरे शुक्लरक्ते द्रोणे वा यत्र तिष्ठति। तत्र देवी वसेच्चित्तं यद्यन्त्रे चण्डिकार्चनम्"। एतत् सर्वं यन्त्राभावे तथा च "यन्त्रं मन्त्रमयं प्रोक्तं मन्त्राणां देवतैव हि। देवात्मनोर्यथाऽभेदो यन्त्रदेवतयोस्तथा। तथा। आदौ लिखेद्यन्त्रराजं देवतायाश्च विग्रहम्। कामक्रोधादिदोषोत्थं सर्वदुःखनियन्त्रणात्। यन्त्रमित्याहुरेतत्तु देवः प्रीणाति पूजितः। विना यन्त्रेण पूजायां देवता न प्रसीदति। दुःखनिर्यन्त्रणात् यन्त्रमिति वाऽऽहुस्तन्त्रवेदिनः"। [२मान्ये च शब्दर०।

पूजार्ह त्रि० पूजामर्हति अर्ह-कर्त्तरि अण्। १पूजायोग्ये

पूजित त्रि० पूज-कर्मणि क्त। यस्य पूजा कृता तस्मिन् अर्चिते अमरः। [२देवे उषा०।

पूजिल पु० पूज-कर्मणि इलच् किच्च। १पूज्ये त्रि०।

पूज्य पु० पूज-यत्। १गुरौ। २पूजनीयमात्रे त्रि०।

"य एव विद्यातपसा च वृद्धः स एव पूज्यो भवति द्विजानाम्" मत्स्यपु० ६अ०।

पूण राशीकरणे चु०उभ०सक०सेट्। पूणयति ते अपुपूणत् त

पूत न० पू-क्त। अपनीतवुधे (आगड़ारहित) २वह्नौ जीवते

धान्ये अमरः। २व्रतादिना शुद्धे त्रि॰ जटाध॰। ३सत्ये। ४शङ्खे ५श्वेतकुशे ६विकङ्कतवृक्षे च पु०। ७दूर्वायां स्त्री टाप् राजनि॰ ८पवित्रे त्रि॰।

पूतक्रतु पु॰ पूतः शुद्धः क्रतुरस्य। इन्द्रे जटा॰। तस्य पत्नी ङीष् ऐङ्। पूतक्रतायी तत्पत्न्यां अच्यां स्त्री।

पूतगन्ध पु॰ पूतः पवित्रो गन्धो यस्य। वर्बरे (वावुइतुलसी) राजनि॰।

पूतत्रण न॰ नित्यक॰। श्वेतकुशे राजनि॰।

पूतद्रु पु॰ नित्यक॰। पनसवृक्षे राजनि॰।

पूतधान्य न॰ नित्यक॰। तिले राजनि॰।

पूतना स्त्री पूतयति पूत+णिच्-ल्यु। १हरीतक्यां भेदे सा च सिन्धुदेशजादलत्वक् इक्षती च लेपने प्रशस्ता राजनि॰। २गन्धमांस्यां राजनि॰। ३कंसस्य धात्रीभेदे सा च शकुनी रूपं कृत्वा कृष्णस्य विषाक्तं स्तनं ददौ। कृष्णेन च तस्याः प्राणेन सह स्तनं पपाविति कथा हरिवं॰ ६२अ॰। भाग॰ १०।६। कंसेन प्रहिता सा राक्षसीरूपा बालघातिनी सौम्यरूपं कृत्वा कृष्णाय विषाक्तं स्तनं पातुं ददौ कृष्णेन च तस्याः स्तनपानमिषेण प्राणाकर्षणेन सा निहतेति स्थितम्। ४बालग्रहभेदे सुश्रुतः तल्लक्षणादिकं ग्रहशब्दे २७६४पृ॰ दृश्यम्। ५बालानां क्षुद्ररोगभेदे अक्षिपूतनशब्दे ५८४ पृ॰ तल्लक्षणादि। ६बालमारकभेदे "सप्तमे दिवसे मासे वर्षे वा स्पृशति पूतना नाम मारका। तया स्पृष्टमात्रेण प्रथमं भवति ज्वरः। मांसशोणितं खाद्यं न मुञ्चति दृष्टिं बध्नाति क्रन्दति जृम्भं निरीक्षते" चक्रपाणिदत्तः।

पूतनारि पु॰ हृत॰। वासुदेवे श्रीकृष्णे शब्दर॰ पूतनारात्वादयोऽप्यत्र। पूतनाशब्दे दृश्यम्।

पूतफल पु॰ पूतानि फलान्यस्य। पनसे (कांटाल) राजनि॰

पूतभृत् पु॰ पूतं शुद्धं सोमरसं बिभर्त्ति भृ-क्विप् हृत॰। सोमरसाधारे पात्रभेदे यजु॰ १८।२२ वेददी॰।

पूतयव अव्य॰ पूता निर्लूनीकृता यवा यत्र तिष्ठद्गु॰ अव्ययी॰। पूतयवाधारे खलादौ।

पूतात्मन् त्रि॰ पूत आत्मा यस्य। १शुद्धान्तःकरणे २शुद्धदेहे च। ३विष्णौ पु॰ "पूतात्मा परमात्मा च" विष्णुस॰।

पूति न॰ पू-कर्त्तरि क्तिच्। १रोहिषतृणे। भावे क्तिन्। २पवित्रतायाम् राजनि॰। पूय विस्रगन्धे दुर्गन्धे च क्तिच्। ३दुर्गन्धे ४दुर्गन्धवति त्रि॰ रायमुकुटः।

पूतिक न॰ पूया दुर्गन्धेन कायति कै-क। १विड्जायाम् २पूतिकरञ्जे पु॰। ३शाकभेदे स्त्री (पुँइ) "पूतिका ब्रह्मघातिका"दिति स्मृतिः। ४मार्जारास्त्रे राजनि॰। पूतिका च सोमांशुतो जातेति सोमस्त्रासामे प्रतिनिधित्वेन याज्ञा तदेतत् ताण्ड्यब्रा॰ ८।४।५।२ उक्तं यथा "तस्य ये क्षियमाणस्यांशवः परापतंस्ते पूतीका अभवन्" छान्दसो दीर्घः। "क्षियमाणस्य सोमस्य पतिताः अंशवः पूतिका अभवन्" तस्मात् सोमाभावे पूतीकादीनां प्रतिनिधित्वेन स्त्रीकर्त्तव्यतामभिधातुं प्रासङ्गिकानामेषाम् उपन्यासः" भा॰।

पूतिकरज(ञ्ज) पु॰ पूतियुक्तः करजः(ञ्जः)। (नाटाकरमजा) करञ्जभेदे अमरः। करञ्जशब्दे १६८८ पृ॰ दृश्यम्।

पूतिकर्णक पु॰ पूतिः कर्णौ यस्य कप्। कर्णरोगभेदे "कर्णविद्रधिपाकाद्वा जायते चास्रपूरणात्। पूयं स्रवति वा पूति स ज्ञेयः पूतिकर्णकः" इति माधवकरः। [शब्दरत्ना॰।

पूतिकामुख पु॰ पूतिका तत्फलमिव मुखमस्य। शम्बूके

पूतिकाष्ठ न॰ पूतेः पावनार्थं काष्ठम् चतुर्थ्यर्थे अलुगुत्तरपदत्वात्। देवदारुवृक्षे शब्दच॰। संज्ञायां कन्। पूतिकाष्ठक सरलवृक्षे पु॰ अमरः।

पूतिकीट पु॰ कर्म॰। (गँधोपोका) कीटभेदे सुश्रुतः।

पूतिकेश्वरतीर्थ तीर्थभेदे शिवपु॰।

पूतिगन्ध पु॰ पूतिर्दुष्टो गन्धो यस्य। १गन्धके अमरः। २इक्षुदीपवृक्षे राजनि॰। ३रक्ते न॰ कर्म॰। ४दुर्गन्धे पु॰ वा रत्नमा॰। पूतिगन्धि दुष्टगन्धयुक्ते त्रि॰। स्वार्थे क। पूतिगन्धिकटुद्गन्धान्विते। पूतिगन्धे वाकुच्यां स्त्री राजनि॰

पूतिघास पु॰ "मद्गुमधिकवल्लयाविकाऽजकुशपूतिघासवानरप्रभृतयः खगाः" सुश्रुतोक्ते जन्तुभेदे।

पूतितैल स्त्री पूति दुर्गन्धं तैलं यस्याः। ज्योतिष्मत्याम् (वनाकटकी) रत्नमा॰।

पूतिनस्य न॰ नसि भवं यत् कर्म॰। "दोषैर्विदग्धैर्गलतालुमूले संवासितो यस्य समीरणस्तु। निरेति पूतिर्मुखनासिकाभ्यां पूतिनस्यं प्रवदन्ति रोगम्" सुश्रुतोक्ते नासारोगभेदे

पूतिनासिक त्रि॰ पूतिर्नासिकाऽस्य। दुर्गन्धनासायुक्ते "शिशुनः पूतिनासिकः" याज्ञ॰ शिशुनताकर्मविपाकतया पौतनासिक्यसङ्गम्।

पूतिपत्र पु॰ पूतीनि पत्राण्यस्य। शोभाञ्जनभेदे राजनि॰।

पूतिपुष्पिका स्त्री पूतीनि पुष्पाण्यस्याः कप् कापि अत इत्त्वम्। माहनुङ्गायाम् रत्नमा॰।

पूतिफला(ली) स्त्री पूतीनि फलान्यस्याः वा ङीप्। सोमराज्याम् अमरः। ङीवन्तः जटाध॰।

पूतिमयूरिका स्त्री पूतिर्मयूरीव ततः स्वार्थे क। अजमोदायाम् राजनि०।

पूतिमाष पु० गोत्रप्रवरर्षिभेदे "संकृतिपूतिमाषतक्षिशङ्खपुष्पैव गवानामाङ्गिरसगौरिवीतसाङ्कृत्येति" आश्व० श्रौ०।१२।१२।५ ततः गर्ग०अपत्ये यञ्। पौतिमाष्य तदपत्ये पुंस्त्री०।

पूतिसृक्तिक न० ७त०। नरकभेदे याज्ञ० ३।२।२ स्मृ०।

पूतिमेद पु० पूतिर्मेदोऽस्य। खदिरभेदे विट् खदिरे। राजनि०

पूतिवक्त्र पु० पूति वक्त्रमस्य। दुर्गन्धमुखयुक्ते "पूतिवक्त्रस्तु खरकः" याज्ञ०३।२११ स्मृ० तच्छिदानकर्मभेद उक्तः।

पूतिवात पु० पूते पवित्रभावे वातोऽस्य। १विल्वदले रत्नमा० कर्मणि। २दुष्टगन्धयुक्तवायौ पु०।

पूतिवृक्ष पु० कर्म०। अम्लोनाकदले रत्नमा०।

पूतिशारिका स्त्री पूतिः शारीव जायते जन-ड। खट्टाके (खटासे) वनजन्तुभेदे त्रिका०।

पूतीक पु० पूतिक+पृषो०। पूतिकरञ्जे अमरः।

पूतीकरञ्ज पु० पूतिकरञ्ज+पृषो०। करञ्जभेदे रत्नमाला।

पूतीका स्त्री पूतिका+पृषो०। (पुँई) ख्याते लताभेदे पूतिकशब्दे तात्पर्य्य० ना० वाक्ये दृश्यम्।

पूत्यण्ड पु० पूति दुर्गन्धमण्डमस्य। (गँधीपोका) १गन्धकीटे २क्षुद्रजन्तुभेदे च पुंस्त्री०मेदि०। भा०शा०२२४अ०

पूथिका स्त्री पूतिका+पृषो०। पूतिकायां शाकभेदे सुश्रुतः। चुच्चुशब्दे २८५६ पृ० दृश्यम्।

पून त्रि० पू-क्त "पूञो विनाशे" पा० क्तस्य नः। विनष्टे।

पूप पु० पू-पक्। १पिष्टके अमरः। पूपाय हितम् अपूपा० क यत्। पूपीय पूप्य तदर्थे तण्डुलादौ त्रि०।

पूपला स्त्री पूपं तदाकारं लाति ला-क। पोलिकायां हेमच० स्वार्थे क। पूपलिका तत्रार्थे टाप्रा०। [कायां त्रिका०।

पूपाली स्त्री पूपाय अलति अल-अच् गौरा०ङीष्। पोलि-

पूपाष्टका स्त्री अष्ट परिमाणं यस्याः कन् अष्टका अष्टमी उपचारात् तत्कर्त्तव्यं श्राद्धम् पूपद्रव्यसाधनाष्टका कर्म०। आषाढ्यास्याः परतः कृष्णाष्टमीविहिते श्राद्धे। "श्राद्धाः पूपैः सदा कार्य्या मांसैरन्या भवेत्तया। शाकैः कार्य्या हतीया स्यादेष द्रव्यगतो विधिः" ति०त०।

पूपिका स्त्री पूपस्तदाकारोऽस्त्यस्याः ठन्। पोलिकायां हेम०

पूय दुर्गन्धे अक० भेदने विशरणे च सक०दिवा०आत्म०सेट्। पूयते अपूयिष्ट। अपूयिढ्वं (ध्वम्) पुपूये।

पूय न० पूय-अच्। व्रणादिनिःसृते रक्तविकारभेदे (पूँज)। हेमच०। भावे क्युट्। पूयन तत्रार्थे न० शब्दच०।

पूयमानयव अव्य० पूयमाना निस्तुषीक्रियमाणा यवा यत्र। तिलहु० अव्ययी०। परिक्लिन्नमाषयवाधारे खलादौ।

पूयरक्त पु० पूययुक्तं रक्तमत्र। "दोषैर्विदग्धैरथ वापि जन्तोर्ललाटदेशेऽभिहतस्य तैस्तु। नासा स्रवेत् पूयसमृग्विमिश्रं तं पूयरक्तं प्रवदन्ति रोगम्" सुश्रुतोक्ते नासारोगभेदे पूयशोणितादवोऽत्र।

पूयवर्द्धन पु० पूयं वर्द्धयति धा-णिच्-ल्यु। सुश्रुतोक्ते नवधान्यादौ द्रव्यवर्गभेदे।

"नवधान्यमाषतिलकलायकुलत्थनिष्पावहरितकशाकालुकवल्लचणकटुकगुडपिण्डविल्लतिक्तालुरसुष्कशाकाजाविकानूपौदकमांसवसामार्द्रोदकजशरपायसदधिदुग्धतक्रप्रभृतीन् परिहरेत्। तक्रान्नोनवधान्यादिर्योऽयं वर्ग उदाहृतः। दोषसङ्जननो ह्येष विज्ञेयः पूयवर्द्धनः"। [दवोऽत्र।

पूयारि पु० ६त०। निम्बवृक्षे राजनि०। पूयनाशका-

पूयालस पु० "पक्वः शोफः सन्निजः संश्रवेद्यः स्राव्यं पूयं पूति पूयालसः सः" सुश्रुतोक्ते सन्निपातरोगभेदे।

पूयोद न०पूयमेवोदकमत्र उदादेशः। नरकभेदे भाग०५।२।७।

पूर पूर्त्तौ प्रीणने च दिवा०आत्म०सक०सेट्। पूर्य्यते अपूरिअपूरिष्ट। पुपूरे पूरिता। पूर्णः। [पूरितः।

पूर पूर्त्तौ प्रीणने चु० उभ०सक०सेट्। पूरयति अपूपुरत् त।

पूर पु० पूर-क। १जलसमूहे २खाद्यभेदे २त्रयस्त्रिंशौ च मेदि०। ४दाहाशुरक्षि न० राजनि०।

पूरक त्रि०पूरयति पूरि-ण्वुल्। १पूरणकर्त्तरि २गुणके अङ्के च। ३बीजपूरे राजनि०। ४वह्निर्दृत्तिकस्य प्राणस्य वायोः नासयाकृष्य देहान्तःप्रवेशनरूपव्यापारभेदे। प्राणायामशब्दे दृश्यम्। स्नानौचकालमध्ये देवे प्रेतस्नातिवाहिकदेहनाशनेन प्रेतदेहपूरके पिण्डे तत्कर्त्तव्यतादिषु०त०यथा "अत्रेदं बीजं पूर्वक्रियाया आतिवाहिकदेहत्यागोत्तरं देहान्तरजननं, मध्यक्रियाया अपि प्रेतत्वपरिहारोत्तरं देहान्तरजननं ततश्चैकयैव तृप्त्या पुनस्तत्करणं वचनाभावेऽनर्थकम्। तथा च विष्णुधर्मोत्तरे "तत्तच्छ्राद्धेन तृप्तात्मा शरीरमातिवाहिकम्। चतुर्विधन्तु भूतानि लोकस्थानस्य विग्रहम्"। तीणि भूतानि तेजोवाय्वाकाशानि पृथिवीजले तु अधो गच्छतः। तत्तच्छ्राद्धात् स्थूलत्वात्। तथा "आतिवाहिक संज्ञोऽसौ देहो भवति भार्गव!। केवलं तन्नतृप्त्यानां नान्येषां प्राणिनां क्वचित्"। तथा "प्रेतपिण्डैकया दत्तै-

देहमाप्नोति भार्गव ! । भोगदेहमिति प्रोक्तं क्रमादेव न संशयः । प्रेतपिण्डा न दीयन्ते यस्य तस्य विमोचनम् । श्राद्धादिभ्यो देवेभ्य आकल्पं नैव विद्यते । तस्मात्स यातना घोराः प्रतयातातपोद्भवाः । ततः सपिण्डीकरणे बान्धवैः स कृते नरः । पूर्वं संवत्सरे देहमतोऽन्यं प्रतिपद्यते । ततः स नरके याति स्वर्गे वा स्वेन कर्मणा" । तथा च वायुपुराणम् "पूरकेण तु पिण्डेन देहो निष्पाद्यते यतः । अतस्य करणायोगात् पुनर्नावर्त्तयेत् क्रियाम्" । अत एवातिवाहिकदेहपरित्यागाय तत्कालीनकर्माऽसमर्थपुत्रसत्त्वेऽन्येन दाहादि क्रियते "पिण्डसाहसपिण्डेषु समानसन्निधैर्नरैः । संघात्मगतैर्वापि राज्ञा वा धनहारिणा । पूर्वाः क्रियास्तु कर्त्तव्याः पुत्राद्यैरेव चोत्तराः" शुद्धित० ।

तेन दाहादिपूरकपिण्डदानान्तमाद्यक्रिया तया आतिवाहिकदेहनिवृत्तिपूर्वकं प्रेतदेहप्राप्तिः आद्यश्राद्धादि सपिण्डान्ता मध्यक्रिया तया प्रेतदेहवस्तुनिवृत्तिपूर्वकं भोगदेहप्राप्तिः तदुत्तरवार्षिकादिश्राद्धादि उत्तरक्रिया तया भोगमाप्नोतीति भेदः । पूरकपिण्डदानकालादिश्च शुद्धित०निर्णीतो यथा

"प्रथमेऽहनि यो दद्यात् प्रेतायान्नं सधारिणः । यत्तस्य वस्तु चान्येषु स एव प्रददात्यपि । अश्मनश्च भाण्डमादाय नवं स्नातः सुसंयतः । शुद्धं सर्वदोषघ्नं गृहीत्वा तोयमानयेत् । ततश्चोत्तरपूर्वस्यामग्निम् प्रज्वालयेद्दिशि । तण्डुलप्रस्थं तत्र प्रक्षाल्याद्भिः पचेत् स्वयम् । सपवित्रैस्तिलैर्मिश्रां केशकीटविवर्जिताम् । द्वारोपान्ते ततः क्षिप्त्वा शुद्धां वा गौरसन्निकाम् । तप्तदर्वे प्रकारेदभान् यास्यायान् देयसम्भवान् । ततोऽवनेजनं दद्यात् संस्करन् गोत्रनामनी । तिलसर्पिर्मधुक्षीरैः सक्तिं तप्तमेव हि । दद्यात् प्रेताय पिण्डन्तु दक्षिणाभिमुख स्थितः । फलमूलगुडक्षीरतिलमिश्रन्तु कुत्रचित् । खर्ज्जैः पुष्पैस्तथा धूपैर्दीपैश्चोदैः सुशीतलैः । अर्घ्यान्तु-दकैः शुद्धैर्दोषाभिः पिण्डमर्चयेत् । प्रयाति यावदाकाशं पिण्डादुद्वाष्पसम्भवो शिखा । तावत्तत्सम्मुखस्तिष्ठेत् सर्वं तोये ततः क्षिपेत् । दिवसे दिवसे देयः पिण्ड एवं क्रमेण तु । सद्यःशौचेऽपि दातव्याः सर्वेऽपि युगपत्तथा । अशौचायोचे प्रदातव्याः प्रथमे त्वेक एव हि । द्वितीयेऽहनि चत्वारस्तृतीये पञ्च चैव हि" । दैवात् अग्निदाता पूरकपिण्डस्यादाने आद्यश्राद्धाधिकारिणा अग्निमदिने आद्यश्राद्धदिने वा तत् करणीयमिति व्यवस्था शुद्धित०स्थिता ।

पूरण न० पूर–भावे ल्युट् । अङ्कशास्त्रप्रसिद्धे १गुणने २दत्तौ ३कुटत्वटे शब्दमा० । करणे ल्युट् । ४वायतन्तुषु हेम० ५सेतौ ६वसुदेवे च पु० ७सङ्ख्यापूरणे मेदिनिः । यथा द्वयोः पूरणः द्वितीयः । कर्त्तरि ल्यु । ८पूरयितरि त्रि० ९विष्णुतैले धरणिः । करणे ल्युट् ङीप् वा संख्या पूर्यते ऽनया तस्यां संख्यायां स्त्री त्रयाणां पूरणी तृतीयेत्यादि । कर्मणि ल्युट् ।१२शाकमल्लिकायां पु०अमरः

पूरयितृ त्रि० पूर–तृच् । १पूरणकर्त्तरि त्रि० स्त्रियां ङीप् । २विष्णौ पु० । "पूर्णः पूरयिता पुण्यः" विष्णुस० ।

पूरास्य पु० पूरमस्यं यस्य । इक्ष्वाकौ राजनि० ।

पूरिका स्त्री पिष्टकभेदे लताशब्दे २।८२पृ० दृश्यम् ।

पूरित त्रि० पूर–क्त । १पूर्णे २गुणिते च अमरः ।

पूरु पु० ब०व० । पॄ–वा० कु । १मनुष्ये निघण्टुः ऋ०६।२०।१ वैराजस्य मनोः नड्वलायां जाते २पुत्रभेदे हरिवं०२अ० ३अजमीढपुत्रभेदे भाग०९।२१।३ । ४राक्षसभेदे यजु०१२।२४ वेददी० । ५ययातिपुत्रभेदे भा० आ० ७५ अ० । तस्यापत्यं अण् । पौरव तदपत्ये पुंस्त्री० स्त्रियां ङीप् ।

पूरुष पु० पूर–उषन् । १पुरुषे २नरे च अमरः तस्य शुभाशुभलक्षणं पुरुषशब्दे उक्तं किञ्चिदधिकमत्रोच्यते

"कटिर्विशाला वक्षःपुत्रभागी विशालवक्षो नरमुत्तमः स्यात् । उरो विशालं धनधान्यभागी शिरोविशालं नरपूजितः स्यात् । न श्रीस्त्यजति रक्षाढ्यं नार्यः कनकपिङ्गलम् । दीर्घबाहुं न चैश्वर्यं न मांसोपचितांसकम् । कदाचिद्दन्तुरो मूर्खः कदाचिद्धीमयः सुखी । कदाचित् तुन्दिलो दुःखी कदाचिच्छुद्धया सती । नेत्रस्नेहेन सौभाग्यं दन्तस्नेहेन भोजनम् । त्वक्स्नेहेन चैश्वर्यं पादस्नेहेन वाहनम् । अकर्मकठिनौ हस्तौ पादावध्वनि कोमलौ । यस्य पाणितले रक्ते तस्य राज्यं विनिर्दिशेत् । दीर्घस्निग्धेन दारिद्र्यं स्थूलस्निग्धेन निर्धनः । क्षयस्निग्धेन सौभाग्यं तुङ्गस्निग्धेन भूपतिः । रेखाभिर्बहुभिर्दुःखं स्वल्पाभिर्धनहीनता । रक्ताभिः श्रियमाप्नोति शुभाभिर्लोकपूजितः । अङ्गुष्ठोदरमध्ये तु यवो यस्य विराजितः । अन्नतं भोजनं तस्य शतं जीवति मानवः । अङ्गुष्ठं कुक्षिगं छत्रं यस्य पाणितले भवेत् । ऐश्वर्यञ्च विनिर्दिष्टमीदृशायुर्भवेद्ध्रुवम् । धनुर्यस्य भवेत् पार्श्वे पङ्कजं वाथ तोरणम् ।

तस्यैश्वर्यं च राज्यं च अशीत्यायुर्भवेद् ध्रुवम् । कनिष्ठा तर्जनीं यावत् रेखा भवति चाञ्चता । विंशत्यब्दाधिकं शतं नरा जीवन्त्यनामयाः । कनिष्ठामध्यमां यावत् रेखा भवति चाञ्चता । शताब्दं वाथ वाभीतिर्नरो जीवेच्च संशयः । कनिष्ठानामिकायाञ्चेत् रेखा भवति चाञ्चता । विंशत्यब्दाधिकं शतं नरा जीवन्त्यनामयाः । कनिष्ठानामिकायाञ्चेत् रेखा भवति चाञ्चता । यदिमध्या-मदङ्गं वा नरा जीवन्त्यसंशयम् । रेखया भिद्यते रेखा खल्पायुश्च भवेन्नरः । कनिष्ठायां स्थिता रेखा संख्या यावतिका क्षता । तावती पुरुषाणान्तु नारी भवति निश्चितम् । करमध्यगता रेखा ध्रुवा जङ्घां भवेद् यदि । नृपो वा नृपतुल्यो वा चिरं क्षातोऽर्थवान् भवेत् । सत्पुत्रपुत्रप्रकीर्त्तेन विद्यावित्तसमन्वितः । पितामहस्य वा किञ्चित् धनञ्च लभते ध्रुवम् । मध्यमायां यदि यवा दृश्यन्तेऽत्यन्तशोभनाः । तदान्यसञ्चितं वित्तं प्राप्नोत्यङ्कुशके यवे । यस्याश्च चक्रमङ्कुशे यवाद्वयञ्च दृश्यते । तदा वै पामरादीनामर्ज्जितं धनमाप्नुयात् । तर्जन्यामथ चक्रञ्च मित्रद्वारा धनं भवेत् । तेनैव विप-रीतन्तु व्ययो भवति निश्चितम् । अनामायां भवेत् चक्रं सर्वद्वारा भवेद्धनम् । तेनैव विपरीतन्तु व्ययो भवति निश्चितम् । कनिष्ठायां भवेच्चक्रं वाणिज्येन धनं भवेत् । तेनैव विपरीतन्तु व्ययो भवति निश्चितम् । ललाटे दृश्यते यस्य चक्ररेखाचतुष्टयम् । अशीत्यायुः समा-प्नोति पञ्च रेखाः शतं समाः । यस्योच्चतं ललाटञ्च ताम्रवर्णञ्च दृश्यते । रेखाहीनञ्च कक्षञ्च स चोन्नतो महीं भजेत् । यस्य जिह्वा भवेद्दीर्घा नासाग्रं लेढि सर्वदा । भोगी भवति निर्विघ्नः पृथ्वीं भ्रमति सर्वदा । ललाटे विरला यस्य नीचवक्रीचक्रमेव च । प्रमत्तो दुष्टुरः खलं वेदान्तपारगो भवेत्" । प्राकारान्तरम् । "ललाटे विरला यस्य गण्डे कूपोऽपि जायते । परस्त्री रमणो नित्यं परवित्तेन वित्तवान् । दीर्घलिङ्गे च सौभाग्यं ह्रस्वलिङ्गे नृपो भवेत् । वक्रस्य कठिने-लिङ्गे प्रमाणाद्विगतेऽपि सदा । रमते च सदा दास्यां निर्धनो भवति ध्रुवम् । अग्रलिङ्गेन सूक्ष्मेण रक्तवर्णेन भूपतिः । बहुक्षीरस्रवो नित्यं नारीणां वल्लभो भवेत् । अग्रलिङ्गेन रक्तेन लभते चोत्तमाङ्गनाम् । राज्यं सुखञ्च दिव्याङ्गाः कन्यकायाः पतिर्भवेत् । यस्य पाद-तले पद्मं चक्रं वाथ तोरणम् । अङ्कुशं कुलिशं वापि स राजा भवति ध्रुवम् । अग्रनिर्लोमशा ये स्युः केकराक्षाः कुचेलकाः । कातरा व्याकुलिङ्गाश्च ते दरिद्रा न संशयः । कपिला मलिनाङ्गाश्च क्षुद्राश्चैव दृढव्रताः । अग्रातिदीर्घा मनुजास्ते दरिद्रा न संशयः । चिपिटे भ्रमुखुन्या ये निर्लोमच्छदवाश्च ये । ते धूर्त्ता नैव सन्देहः सत्यवचनं यथा । खलीखलाः भग्नपृष्ठाः क्षणदत्ताः कुचेलकाः । वक्रनासा वक्रनासास्ते नरा दुष्टमानसाः । दयावन्तश्च दातारो रूपवन्तो जितेन्द्रियाः । परोपकारिणश्चैव तेऽपूर्वा मानवाः क्षताः" ।

पूर्ण त्रि॰ पूर–क्त नि॰ । १पूरिते २सकले ३समग्रे च ज्योति-ष्टोमेषु चमयपञ्चयो॰ ४पञ्चमीदशमीपञ्चदशीतिथिषु च स्त्री मेदि॰ ५आप्तकामे पु॰ खेचरावच्छिन्ने (चमेचाम्नूने) गदाधरः । ६॰सं॰८८अ॰ चक्रे पक्षिभेदानां ६स्वरभेदे पु॰ तत्र दृश्यम् ७नागभेदे पु॰ भा॰ आ॰५७ अ॰ । ८प्राधेये देवगन्धर्वभेदे पु॰ ६५ अ॰ । ९घटके न॰ निघण्टुः ।

पूर्णक पुंस्त्री॰ पूर्ण+संज्ञायां कन् । खर्णचूड़खगे मेदि॰ । स्त्रियां जातित्वात् ङीष् । स्वार्थे क । पूर्णशब्दार्थे स्त्रियां टाप् अत इत्त्वम् ।

पूर्णककुद् पु॰ पूर्णं ककुदमस्य अस्यायाम् अन्यलोपः समा॰। तारुण्यावस्थे वृषे । अनवस्थायां तु नान्यलोपः ।

पूर्णकाकुद त्रि॰ पूर्णं काकुदं तालु यस्य न अन्यलोपः समा॰। पूर्णतालुकमात्रे ।

पूर्णकाम पु॰पूर्णः कामोऽस्य । आप्तेच्छे परमेश्वरे मार्क॰३३अ॰

पूर्णकू(कु)ट पुंस्त्री पक्षिभेदे "मण्डूटपूरिकरवकचरायिकाः पूर्णकूटसंज्ञाः स्युः" ह॰ सं॰ ८८ अ॰ । तत्रैव २५श्लोके ह्रस्वमध्यतया पठितः तत्रार्थे ।

पूर्णकुम्भः पु॰ जलादिभिः पूर्णः कुम्भः । १जलादिभिः पूरिते घटे अमरः । २दानवभेदे पु॰ हरिवं॰२४२ अ॰ ।

पूर्णकोशा ओषधिभेदे ह॰स॰ ४८।४० ।

पूर्णकोष्ठा स्त्री पूर्णं कोष्ठं यस्याः । नागरसञ्ज्ञायाम् राजनि॰

पूर्णपर्वेन्दु स्त्री पूर्णः पर्वणि इन्दुः पर्वेन्दुः यत्र । पौर्णमास्यां हे हे चित्रादितारायां पूर्णपर्वेन्दुसङ्गते" सङ्गर्षणकाण्डम् । "पूर्णपर्वेन्दुसङ्गते पौर्णमासीयुते" मल॰त॰ रघुनन्दनः ।

पूर्णपात्र न॰ निलक॰ । यज्ञोपके वस्तुपूर्णे १पात्रे मेदि॰ । "इष्टौदुत्सवकाले यदलङ्कारांशुकादिकम् । आलभ्य यद्दीयते पूर्णपात्रं पूर्णकरञ्च तत्" जटाधरोक्ते २पुत्रजन्मोत्सवादिषु दाये स्वामिनोऽङ्गात् यस्मादेर्यत्वे । होमान्ते ब्रह्मणे देये दक्षिणारूपे २द्रव्यभेदे "होमान्ते पूर्णपात्रं दक्षिणां

ब्रह्मणे दद्यात् गोमिथुनं। तस्मात्तत्र स्वल्पसंयुक्ते "अष्टसुष्टिर्भवेत् कुक्षिः कुक्षयोऽष्टौ च पुष्कलम्। पुष्कलानि च चत्वारि पूर्णपात्रं विधीयते"। तेन २५६ मुष्टिभिः पूर्णपात्रम्। तत्सदृश्यद्रव्येऽपि "पूर्णपात्रो दक्षिणा" कात्या०श्रौ०६।१।२७। कर्केण। "पाकयज्ञेषु तण्डुलसक्तुगोधूमादिवस्तुप्रियधान्यपूर्णः पूर्णपात्रो दक्षिणा धान्यस्य मानपात्रम्" कर्कः। तेनाम्र पुंस्त्वमपि। छन्दोगपरिशिष्टे (कर्मप्रदीपे) २।५।२ कात्यायनस्तु प्रकारान्तरमाह "यावता वस्तुभोक्तुस्तु तृप्तिः पूर्णेन विद्यते। तावरार्ध्यमतः कुर्यात् पूर्णपात्रमिति स्थितिरिति"। ४जलपूर्णपात्रे च कात्या०श्रौ० ३।८।८।

पूर्णप्रज्ञ त्रि० पूर्णा प्रज्ञाऽस्य। सम्पूर्णबुद्धौ वायोस्तृतीयावतारे मध्वापरनामके आनन्दतीर्थे २वैष्णवमतभेदप्रस्थापकाचार्यभेदे। तन्मतन्तु सर्व० सं० न्यरूपि यथा "तदेतद्रामानुजमतं जीवाणुत्वदासत्ववेदापौरुषेयत्वसिद्धार्थबोधकत्वस्वतःप्रमाणत्वप्रमाणत्रितयपराक्षरात्मोपजीव्यत्वपञ्चभेदसत्यत्वादिसाम्येऽपि परस्परविरुद्धभेदादिपञ्चत्रयकथनेन अपेक्षकपक्षनिक्षिप्तमिति मेक्षमाणः स आत्मा तत्त्वमसीत्यादैर्वेदान्तवाक्यजातस्य भक्तप्रत्यरेणावौत्तरपरत्वमुपपाद्य ब्रह्ममीमांसाविवरणव्याजेनानन्दतीर्थः प्रस्थानान्तरमास्थित। तन्मते हि द्विविधं तत्त्वं स्वतन्त्रास्वतन्त्रभेदात्। तदुक्तं तत्त्वविवेके "स्वतन्त्रमस्वतन्त्रञ्च द्विविधं तत्त्वमिष्यते। स्वतन्त्रो भगवान् विष्णुर्निर्दोषोऽशेषसद्गुणः" इति। ननु सजातीयविजातीयस्वगतनानात्वशून्यं ब्रह्म तत्त्वमिति प्रतिपादकेषु वेदान्तेषु आगरूढेषु कथमशेषसद्गुणत्वं तस्य कथ्यत इति चेन्नैवं भेदप्रमापकवस्तुप्रमाणविरोधेन तेषां तत्र प्रामाण्यानुपपत्तेः तथा हि प्रत्यक्षं तावदिदमस्माच्चित्रमिति नीलपीतादेर्भेदमध्यवस्यति। अत्र मन्वेधाः किं प्रत्यक्षं भेदमेवावगाहते किं वा धर्मिप्रतियोगिघटितम्। न प्रथमः धर्मिप्रतियोगिप्रतिपत्तिमन्तरेण तत्सापेक्षस्य भेदस्याशक्याध्यवसायत्वात्। द्वितीयोऽपि धर्मिप्रतियोगिस्वरूपपुरःसरं भेदस्वरूपमथ वा युगपत् तत्सर्वस्वरूपम्। न पूर्वः बुद्धेरिमस्य व्यापाराभावात् अन्योन्याश्रयप्रसङ्गाच्च। नापि चरमः कार्यकारणभङ्ग्या सौगतपक्षाभावात् धर्मिप्रतीतिर्हि भेदप्रत्ययस्य कारणं सन्निहितेऽपि धर्मिणि व्यवहितप्रतियोगिज्ञानमन्तरेण भेदस्याज्ञातत्वेनान्वयव्यतिरेकाभ्यां कार्यकारणभावावगमात्। तस्मान्न भेदप्रत्ययं सुप्रसरमिति चेत् किं वस्तुस्वरूपभेदवादिनं प्रति इमानि दूषणान्युद्भाव्यन्ते किं वा धर्मिभेदवादिनं प्रति। प्रथमे चोरापराधान्नाम्नष्ठव्यनिग्रहन्यायापातः भवदभिधीयमानदूषणानां तदविषयत्वात्। ननु वस्तुस्वरूपस्यैव भेदत्वे प्रतियोगिसापेक्षत्वं न घटते घटादितत्तत्प्रतियोगिसापेक्ष एव सर्वत्र भेदः प्रथत इति चेन्न प्रथमं सर्वतो विलक्षणतया वस्तुस्वरूपे भासमाने प्रतियोग्यपेक्षया विशिष्टव्यवहारोपपत्तेः तथा हि परिमाणघटितं वस्तुस्वरूपं प्रथममवगम्यते पश्चात् प्रतियोगिविशेषापेक्षया ह्रस्वं दीर्घमिति तदेव विशिष्य व्यवहारभाजनं भवति। तदुक्तं विष्णुतत्त्वनिर्णये "न च विशेषणविशेष्यतया भेदसिद्धिः विशेषणविशेष्यभावश्च भेदापेक्षः, धर्मिप्रतियोग्यपेक्षया भेदसिद्धिः भेदापेक्षश्च धर्मिप्रतियोगित्वमित्यन्योन्याश्रयतया भेदस्यासिद्धेः पदार्थस्वरूपत्वाद्भेदस्येत्यादिना"। अत एव भवार्थिनो भवदर्शनान्न प्रवर्त्तन्ते गोशब्दस्य न स्खलन्ति। न च नीरक्षीरादौ स्वरूपे भासमाने भेदप्रतिभासोऽपि स्यादिति भवनीयं समानाभिहारादिप्रतिबन्धकत्वाद्भेदभानव्यवहाराभावोपपत्तेः तदुक्तम् "अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात्। सौक्ष्म्याद्व्यवधानादभिभवात् समानाभिहाराच्चेति" अतिदूराद् गिरिशिखरवर्त्तिनि तरौ, अतिसामीप्यादक्षिलोचनाञ्जनादौ, इन्द्रियघातादिन्द्रियादौ, मनोऽनवस्थानात् कामाद्यपप्लुतमनस्कस्य स्खलितालोकवर्त्तिनि घटादौ, सौक्ष्म्यात् परमाण्वादौ, व्यवधानात् कुड्याद्यन्तरिते, अभिभवात् दिवाप्रदीपप्रभादौ, समानाभिहारात् नीरक्षीरादौ यथावदुपलक्षणं नास्तीत्यर्थः। भवतु वा धर्मभेदवादस्यापि न कश्चिद्दोषः धर्मिप्रतियोगिस्वरूपे सति धर्मभेदभानसम्भवात्। न च धर्मभेदवादे तस्य तस्य भेदस्य भेदान्तरभेदत्वेनानवस्था दुरवस्था स्यादित्यास्थेयं भेदान्तरपक्षतो मूलाभावात् भेदभेदिनोरभिन्नावितिव्यवहारदर्शनात्। न चैकभेदबलेनान्यभेदानुमानं दृष्टान्तभेदाविघातेनोत्थानदोषाभावात्। सोऽयं पिष्टाकथाचनाय गतस्य खारिकातैलवदाख्यातमेव दृष्टान्तभेदविमर्दे त्वतुत्थानमेव। न हि वरविघाताय कन्योद्वाहः। तस्मान्मूलक्षयाभावादनवस्था न दोषाय। अनुमानेनापि भेदोऽवगीयते। परमेश्वरो जीवाद्भिन्नः तं प्रति सेव्यत्वात् यो यं प्रति सेव्यः स तस्माद्भिन्नः यथा भृत्याद्राजा। न हि सुखं मे स्यात् दुःखं मे न स्यादपि इति

पुरुषार्थसर्वस्वानाः पुरुषाः स्वपतिपदं कामयमानाः सत्कारभाजो भवेयुः। प्रत्युत सर्वानर्थभाजनं भवन्ति। यः स्वात्मनो हीनत्वं परस्य गुणोत्कर्षञ्च कथयति स स्तुत्यः प्रीतः सावकस्य तस्मायेष्टं प्रयच्छति। तदाह "ज्ञातयन्ति हि राजानो राजाहमिति वादिनम्। तद्वत्सर्वमिष्टञ्च स्वगणोत्कर्षवादिनामिति"। एवञ्च परमेश्वरामेदख्यापया विष्णोर्गुणोत्कर्षस्य स्वगतणिकासमत्वाभिधानं विष्णुसकाशफलसिद्धयया जिह्वाच्छेदमनुस्मरति एतादृशविष्णुविद्वेषाद्दन्तमसप्रवेशप्रसङ्गात्। तदेतत् प्रतिपादितं मध्यमन्दिरेण महाभारततात्पर्यनिर्णये "अनादिहेतिभिर्दैत्यैर्विष्णोर्द्वेषो विवर्द्धितः। तमस्यन्धे पातयति दैत्यानन्धे विनिश्चयादिति"। सा च सेवा श्रवणनामकरणभजनभेदात्त्रिविधा। तत्राद्यं नारायणायुधादीनां,तद्रूपस्मरणार्थमपेक्षितार्थसिद्ध्यर्थञ्च। तथा च भागवतसंहितापरिशिष्टम् "चक्रं विभर्त्ति पुरुषोऽभितप्तं बलं देवानामसुरस्य विष्णोः। स याति नाकं दुरितं विधूय विशन्ति यद्यतयो वीतरागाः। देवासो येन विष्टुतेन वाजिना सुदर्शनेन प्रयातास्तमायुम्। येनाद्विषा मनवो लोकसृष्टिं वितन्वन्ति ब्राह्मणास्सहस्रम्। तद्विष्णोः परमं यद्धि येन ब्रह्मन्ति वाङ्छिताः। उरुक्रमस्य चिह्नैरङ्किता लोके सुभगा भवाम" इति "ऋतायतनुर्नदानो अज्यते क्षितास दृढहन्मत्तः समासतेति" तैत्तिरीयकोपनिषच्च। स्मरणविशेषस्याग्नेयपुराणे दर्शितः "दक्षिणे तु करे विप्रो बिभ्रद्वाहे सुदर्शनम्। सव्येन शङ्खं बिभ्रदादिति ब्रह्मविदो विदुरिति"। अन्यत्र चक्रधारणे मन्त्रविशेषश्च दर्शितः "सुदर्शन! महाज्वाल! कोटिसूर्यसमप्रभ!। अज्ञानान्मम मे नित्यं विष्णोर्मार्गे प्रदर्शय। त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे। नमितः सर्वदेवैश्च पञ्चजन्य! नमोऽस्तु ते इति"।नामकरणं पुत्रादीनां केशवादिनाम्ना व्यवहारः सर्वदा तन्नामाक्षरस्मरणार्थम्। भजनं दशविधं वाचा सत्यं हितं प्रियं स्वाध्यायः, कायेन दानं परित्राणं परिरक्षणं, मनसा दया स्पृहा श्रद्धा चेति। चतुर्धैकैकं निष्पाद्य नारायणे समर्पणं भजनम्। तदुक्तम् "श्रवणं नामकरणं भजनं दशधा च तदिति"। एवं ज्ञेयत्वादिनापि भेदोऽनुसन्धातव्यः तथा श्रुत्यापि भेदोऽवगन्तव्यः सत्यमेतमनुविद्वे यदस्मि रात्रिं देवस्य पश्यतोमघोनः सख्युर्न यस्य महिमा रुरोध रजोयुजेषु विमराज्वे सत्य आत्मा सत्यो जीवः सत्यं भिदा सत्यं भिदा मयि वाक्पत्यौ मयि वाक्पतिः" इति मोक्षानन्दभेदप्रतिपादकश्रुतिभ्यः। "इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः। सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च" "जगद्व्यापारवर्जम्" "प्रकरणासन्नित्वाच्चेत्यादिभ्यश्च। न च "ब्रह्म वेद ब्रह्मैव भवतीति" श्रुतिबलाज्जीवस्य पारमैश्वर्यं शङ्क्यम् "सम्पूज्य ब्राह्मणं भक्त्या शूद्रोऽपि ब्राह्मणो भवेदितिवत् इंप्सितो भवतीत्यर्थपरत्वात्। "नन्वयं प्रपञ्चो यदि वर्त्तेत निवर्त्तेत न संशयः। मायामात्रमिदं हैतमद्वैतं परमार्थतः" इति वचनात् द्वैतस्य कल्पितत्वमवगम्यत इति चेत् सत्यं भावसमनभिसन्धायाभिधानात् तथा हि यद्यपसत्यद्येत तर्हि निवर्त्तेत न संशयः। तस्मादनादिरेवायं प्रकृष्टः पञ्चविधो भेदप्रपञ्चः। न चायमविद्यमानः मायामात्रत्वान्मायेति भगवदिच्छोच्यते। "महामायेत्यविद्येति निर्यतिर्मोहिनीति च। प्रकृतिर्वासनेत्येव तवेच्छातन्न! कथ्यते। प्रकृष्टत्वात् प्रकृतिर्वासना वासयेद्यतः। अत एवास्य स्फुरिताख्य मायाऽविद्येति संज्ञिता। मायेत्युक्ता प्रकृष्टत्वात् प्रकृष्टे हि मयाभिधा। विष्णोः प्रकृष्टरूपेण शब्दैरेतैरुदीर्यते। प्रकृष्टरूपो हि हरिः सा च ज्ञानन्दलक्षणा" इत्यादिवचननिचयप्रामाण्यवत्त्वात्। सैव प्रज्ञा ज्ञानत्वाच्चकर्त्री च यस्य तन्मायायाश्चं ततश्च परमेश्वरेण ज्ञातत्वाद्भुक्षितत्वाच्च न हैतं स्वाप्निकल्पितं न वोश्वरे सर्वज्ञ स्वाप्निः सम्भवति विशेषादर्शननिबन्धनत्वाद्भ्रान्तेः। तर्हि तद्व्यपदेशः कथमित्यत्रोत्तरम् अद्वैतं परमार्थत इति परमार्थत इति परमार्थापेक्षया तेन सर्वज्ञादुत्तमस्य विष्णुतत्त्वस्य समाभ्यधिकशून्यत्वसङ्गः भवति। तथा च परमा श्रुतिः "जीवेश्वरभिदा चैव जडेश्वरभिदा तथा। जीवभेदो मिथश्चैव जडजीवभिदा तथा। मिथश्च जडभेदो यः प्रपञ्चो भेदपञ्चकः। सोऽयं सत्योऽप्यनादिश्च सादिश्चेत्यागमाद्भुवात्। न च नाशं प्रयात्येष न चासौ स्वाप्निकल्पितः। कल्पितश्चेद्विवर्त्तेत न चासौ विनिवर्त्तते। द्वैतं न विद्यत इति तत्त्वाद्ज्ञानिनां मतम्। मतं हि ज्ञानिनामेतन्मितं त्रातं हि विष्णुना। तस्मान्मायेति प्रोक्तं परमो हरिरेव तु"इत्यादि। तस्माद्विष्णोः सर्वोत्कर्ष एव तात्पर्यं सर्वागमानाम्। एतदेवाभिसन्धायाभिहितं भगवता। "द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च। क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते। उत्तमः पुरुषस्त्वन्यः

परमात्मेत्युदाहृतः। यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः। यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः। यो मामेवमसंमूढो जानाति पुरुषोत्तमम्। स सर्वविद्भजति मां सर्वभावेन भारत!। इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ!। एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत!"। महाभारतेऽपि "सत्यस्य सर्ववेदानां तात्पर्यं श्रीपतौ परे। तत्कर्म तु तदन्यत्र तात्पर्यं स्यादवान्तरम्" इति। युक्तश्च विष्णोः सर्वोत्कर्षे महातात्पर्यम्। "मोक्षो हि सर्वपुरुषार्थोत्तमः धर्मार्थकामास्त्वनित्याः मोक्ष एव नित्यः तस्मान्नित्यं तदर्थाय यतेत मतिमान्नर" इति भागवेयस्मृतेः। मोक्षश्च विष्णुप्रसादमन्तरेण न लभ्यते। "यस्य प्रसादात् परमा यत्स्वरूपात् तस्मात् संसारान्मुच्यते नावरे सुरानाराधयन्नोऽसौ परमो विचिन्त्यो मनुजैः कर्मणाशादनाद्यादिति" नारायणस्मृतिः। "तस्मिन् प्रसन्ने किमिहास्त्यलभ्यं सर्वार्थकामैरलमल्पकामैः। समाश्रिताद्ब्रह्मतरोरनन्तात् निःसंशयं सिद्धिफलं प्रयातः" इति विष्णुपुराणोक्तेश्च। "प्रसादश्च गुणोत्कर्षज्ञानादेव नाभेदज्ञानादित्यृजुः। न च तत्त्वमस्यादितादात्म्यव्याकोपः श्रुतितात्पर्यापरिज्ञानविजृम्भणात्। "आह नित्यपरोक्षान्तु तच्छब्दो ह्यविशेषतः। त्वंशब्दापरोक्षार्थं तयोरैक्यं कथं भवेत्। आदित्योयूप इतिवत् गौणस्यार्थो तु वा श्रुतिरिति"। तथाच परमा श्रुतिः। जीवस्य परमैक्यञ्च बुद्धिसारूप्यमेव वा। एकस्थाननिवासे वा व्यक्तिस्थानमपेक्ष्य वा। न खरूपैकता तस्य तत्रापि विरूपतः। ज्ञातन्यपूर्णतेऽल्पत्वधारतन्त्ये विरूपता" इति। अथ वा तत्त्वमसीत्यत्र य एवात्मा ज्ञातन्यादिगुणोपेतत्वात् अतत्त्वमसि त्वं तत्र भवसि तद्रहितत्वादित्यैक्यमतिशयेन निराकृतम्। तदाह "अतत्त्वमसि वा ह्येतदैक्यं श्रुतिराकृतम्" इति। तस्मात् दृष्टान्तवक्त्रेऽपि "स यथा शकुनिः सूत्रेण बद्धः" इत्यादिना भेद एव दृष्टान्ताभिधानाच्च अयमभेदोपदेश इति तत्त्ववादरहस्यम्। तथाच कठोपनिषत् "यथा शुद्धो च स्वच्छ नानाशब्दरसा यथा। यथा नद्यः स्वदन्ताश्च गुडोदनवधे यथा। चारापचायौ च यथा यथा दृष्टिप्रयावपि। तथा जीवेश्वरौ भिन्नौ सर्वदैव विलक्षणौ। तथापि स्वच्छरूपत्वात्र जीवात् परमो हरिः। प्रेरेण मन्दृष्टीनां दृश्यते प्रेरकोऽपि सन्। वैलक्षण्यं तयोक्त्वा सूच्यते बध्यतेऽन्यथेति। ब्रह्मा शिवः सुराद्याश्च शरीरत्वरणात् क्षराः। लक्ष्मीः शरीरदेहत्वादक्षरात्मः परो हरिः। ज्ञातन्यत्रयशक्तिविज्ञानसुखाद्यैरखिलैर्गुणैः। निःसीमत्वेन ते सर्वे तदन्याः सर्वदेवता" इति। विष्णुं सर्वगुणैः पूर्णं ज्ञात्वा संसारवर्जितः। निर्दुःखानन्दभुगनित्यं तत्समीपे स मोदते। सङ्कानाच्चयो विष्णुरधिकाधिपतिस्तथा। तद्वशा एव ते सर्वे सर्वदैव स ईश्वरः इति च। एकविज्ञानेन सर्वविज्ञानञ्च प्रधानत्वकारणत्वादिना युज्यते न तु सर्वमिथात्वेन। न हि सत्यज्ञानेन मिथ्याज्ञानं सङ्गच्छति यथा प्रधानपुरुषाणां ज्ञानाज्ञानाभ्यां क्षयो ज्ञातः अज्ञात इत्येवमादिव्यपदेशो दृष्ट एव। यथा च कारणे पितरि ज्ञाते जानात्यस्य पुत्रमिति। अन्यथा "यथा सौम्यैकेन मृत्पिण्डेन विज्ञातेन सर्वं मृण्मयं विज्ञातमित्यत्र एकपिण्डशब्दौ वृथा प्रसज्येतां सदा विज्ञातवेद्यत्वावतैव वाक्यस्य पूर्णत्वात्। न च वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्येतत् कार्यस्य मिथ्यात्वमाचष्टे इत्येतत् वाचारम्भणं विकारो यस्य तत् वाचितं नित्यं नामधेयं मृत्तिकेत्यादिकमित्येतद्वचनं सत्यमिति तथ्यस्य स्वीकारात्। अपरथा नामधेयमेवेति शब्दयोर्वैयर्थ्यं प्रसज्येत। अतो न कुत्रापि जगतो मिथ्यात्वसिद्धिः। किन्तु प्रपञ्चो मिथ्येत्यत्र मिथ्यात्वं तथ्यमतथ्यं वा। प्रथमे सत्याद्वैतभङ्गप्रसङ्गः चरमे प्रपञ्चसत्यत्वापातः। नन्वनित्यत्वं नित्यमनित्यं वा उभयथाप्यनुपपत्तिरित्याक्षेपवदयमपि नित्यसमजातिभेदः स्यात्। तदुक्तं न्यायनिर्णयवेधसा "नित्यमनित्यभावादनित्यनित्यत्वोपपत्तेर्नित्यसमः" इति। तार्किकरक्षायाञ्च "धर्मेण तदतद्रूपविरुद्धत्वानुपपत्तितः। धर्मिणस्तद्विशिष्टत्वभङ्गो नित्यसमो भवेत्" इति। अस्याः संज्ञायाः उपलक्षणत्वमभिप्रेत्याभिहितं प्रबोधसिद्धौ "अन्वर्थित्वात्तु परब्रह्मधर्मसमेति"। तस्मादसदुत्तरमेतदिति चेत् अभिहितत्रासनमेतत् दुष्टत्वमूलानिरूपणात्। तदुक्तं त्रिविधं साधारणमसाधारणञ्च तत्राद्यं खण्डाघातकं द्वितीयं त्रिविधं युक्ताकुशीनत्वमयुक्ताकुशिकत्वमविषयदृष्टित्वञ्चेति। तत्र साधारणमसम्भावितमेव ब्रह्मण्याक्षेपस्य ब्रह्मव्यापनानुपलम्भात्। एवमसाधारणमपि घटस्य नास्तितायां नास्तितोल्लासित्ववत् प्रमातेऽनुपपत्तेः। ननु प्रपञ्चस्य मिथ्यात्वमभ्युपेयते नासत्त्वमिति चेत्

तदेतत् सोऽयं जिरञ्छेदेऽपि भर्तं न ददाति विंशति-प्रस्थकन्तु प्रयच्छतीति शाकटिकदृष्टान्तमनुस्मरेत् मिथ्या-त्वासत्त्वयोः पर्य्यायत्वादित्यलमतिप्रपञ्चेन । तत्र "अथातो ब्रह्म जिज्ञासेति" प्रथमसूत्रस्यायमर्थः तत्राथशब्दो मङ्ग-लार्थोऽधिकारानन्तर्य्यार्थश्च स्वीक्रियते । अतःशब्दो हेत्वर्थः तदुक्तं गारुडे "अथातःशब्दपूर्वाणि सूत्राणि निखिलान्यपि । प्रारभेत नियत्यैव तत्किमत्र नियामकम् । कथार्थस्तु तयोर्विद्वान् कथसूत्रमता तयोः । एतदाख्याहि मे ब्रह्मन् ! यथा ज्ञास्यामि तत्त्वतः । एवमुक्तो नारदेन ब्रह्मा प्रोवाच सूत्तमः । आनन्तर्य्याधि-कारे च मङ्गलार्थे तथैव च । अथशब्दस्ततःशब्दो हेत्वर्थे समुदीरितः" इति । यतो नारायणप्रसादमन्तरेण न मोक्षो लभ्यते प्रसादश्च ज्ञानमन्तरेण अतो ब्रह्म जिज्ञासा कर्त्तव्येति सिद्धम् । जिज्ञास्यब्रह्मणो लक्षण-सूत्रं "जन्माद्यस्य यतः" इति । सृष्टिस्थित्यादि यतो भवति तद्ब्रह्मेति वाक्यार्थः । तथाच स्कान्दे पद्मः "उत्पत्तिस्थितिसंहारा नियतिर्ज्ञानमादितः । बन्धमोक्षौ च पुरुषाद् यस्मात् स हरिरीश्वराट्" इति । "यतो वा इमानीत्यादि" श्रुतिभ्यश्च । तत्र प्रमाणमप्युक्तं यथा "शा-स्त्रयोनित्वादिति" । "नावेदविन्मनुते तं बृहन्तम्" "तन्वोप-निषदम्" इत्यादिश्रुतिभ्यः तस्यानुमानिकत्वं निराक्रियते न चानुमानस्य स्वातन्त्र्येण प्रामाण्यमस्ति । तदुक्तं कौर्मे "श्रुतिसाङ्ख्यरहितमनुमानं न कुत्रचित् । निश्च-यात् साधयेदर्थं प्रमाणान्तरमेव च । श्रुतिस्मृतिसहायं यत् प्रमाणान्तरसत्तमम् । प्रमाणपदवीं गच्छेन्नात्र कार्य्या विचारणा" इति शास्त्रस्वरूपमुक्तं स्कान्दे "ऋग्-यजुः सामाथर्वाश्च भारतं पाञ्चरात्रकम् । मूलरामा-यणश्चैव शास्त्रमित्यभिधीयते । यच्चानुकूलमेतस्य तच्च शास्त्रं प्रकीर्त्तितम् । अतोऽन्यो ग्रन्थविस्तारो नैव शास्त्रं कुवर्त्मतः" इति । तदनेनानन्यलभ्यः शास्त्रार्थ इति न्यायेन भेदस्य प्राप्तत्वेन तत्र न तात्पर्यं किन्त्वैत एव वेदवाक्यानां तात्पर्यमिति अद्वैतप्रत्याशा प्रतिक्षिप्ता अनुमानादीश्वरस्य सिद्धभावेन तद्भेदस्यापि ततः सिद्ध-भावात् । तस्माच्च भेदानुवादकत्वमिति तत्परत्वमवगम्यते अत एवोक्तम् "सदागमैकविज्ञेयं समतीतगुणाश्रयम् । नारायणं सदा वन्दे निर्दोषाशेषसङ्ग्रहम्" इति । शा-स्त्रस्य तत्र प्रामाण्यमुपपादितं "तत्तु समन्वयादिति" सम-न्वय उपक्रमादिसिद्धम् उक्तं हरसंहितायाम् "उप-क्रमोपसंहारावभ्यासोऽपूर्वता फलम् । अर्थवादोपपत्ती-च लिङ्गं तात्पर्यनिर्णये" इति । एवं वेदान्ततात्पर्य-वशात्तदेव ब्रह्म शास्त्रगम्यमित्युक्तं भवति । दिङ्मात्र-मत्र प्रादर्शि शिष्टमानन्दतीर्थभाष्यव्याख्यानादौ द्रष्टव्यं ग्रन्थविस्तरभियोपरम्यते इति । एतच्च रहस्यं पूर्णप्रज्ञेन मध्यमन्दिरेण वायोस्तृतीयावतारं मन्त्रेण निरूपित-मिति । "प्रथमस्तु हनूमान् स्यात् द्वितीयो भीम एव च । पूर्णप्रज्ञस्तृतीयश्च भगवत्कार्यसाधकः" इति । एत-देवाभिप्रेत्य तत्र तत्र ग्रन्थसमाप्तावित्थं पद्यं लिख्यते "यस्य त्रीण्युदितानि वेदवचने दिव्यानि रूपाण्यलं स्तौत-र्हर्षितमित्यमेतदखिलं वेदस्य गर्भं महः । वायो राम-वचोनतं प्रथमकं हृद्यो द्वितीयं वपुर्मध्वो यस्तु तृतीय-मेतदसुना ग्रन्थः कृतः केशवे" । तस्मात् सर्वस्य शास्त्रस्य विष्णुतत्त्वं सर्वोत्तममित्यत्र तात्पर्यमिति सर्वं निरवद्यम्"

पूर्णबीज पु० पूर्णं बीजं यस्य । बीजपूरे राजनि० ।

पूर्णभद्र पु० १नागभेदे भा०आ०३५ अ० । २यक्षभेदे हरिवं० ३१ अ० । स च रत्नभद्रसुतः तस्य पुत्रः हरिकेशः तत्कथा काशीख० ३२ अ० ।

पूर्णमा स्त्री पूर्णः कलापूर्णश्चन्द्रो मीयतेऽस्यां मा-बाहुलकात् डः । पूर्णमासां तिथौ ।

पूर्णमास् स्त्री पूर्णाः कलाभिः पूर्णोमाचन्द्रमा यत्र । १पूर्णि-मायाम् । पूर्णं मासं मिमीते मा-असुन् । २सूर्ये ३चन्द्रे च "एष वै पूर्णमाः । य एष तपत्यहरहर्ह्येवैष पूर्णोऽथैष एव दर्शो यद्वन्द्रमा दृश्य इव ह्येष अथो इतरथाऽसः एष एव पूर्णमा यद्वन्द्रमा एतस्य ह्यनुपूर्वं पौर्णमासीत्याचक्षते" शत०ब्रा०११।२।३१ "एषः ह्यर्थ्यतपति एष खलु पूर्णमाः स पूर्णमाः दृश्य इव अमावास्यायामविद्यमानः प्रतिपदि यथाऽदृश्यमानो भवति । एतच्च पूरयमनुलक्ष्य पौर्णमासीत्याचक्षते" भा० ।

पूर्णमास पु० पूर्णमासो विधानकालत्वेनास्त्यस्य अच् । १पूर्णिमायां कर्त्तव्ये यागभेदे "दर्शपूर्णमासाभ्यां यजेत" "सर्वेभ्यो दर्शपूर्णमासौ" श्रुतिः । आदित्यभेदस्य धातुरनुमतिभार्य्यायां जाते २पुत्रभेदे । "धातुः कुहूः सिनीवाल्यौ२ राकाऽ३ चानुमतिऽसूया । सायं१ दर्शमथ-प्रातः२ पूर्णमास४ मनुक्रमात्" भाग० ६।१८।३। अमूते-त्यनुषङ्गः । पूर्णमासयागविधानञ्च शत०ब्रा० ११।२।४।८ । पूर्णोमासचान्द्रमासौ यत्र गौरा०ङीष् । २पूर्णिमातिथौ स्त्री शब्दमाला ।

पूर्णमुख पु० जनमेजयसर्पसत्रे दग्धनागभेदे भा० आ० ५७अ०।
पूर्णयोग पु० बाहुयुद्धभेदे तत्प्रकारः भा०व० २२अ०उक्तो यथा "ततस्तौ नरशार्दूलौ बाहुयुद्धौ समीयतुः। वीरौ परमसंहृष्टावन्योऽन्यजयकाङ्क्षिणौ। करप्रहरणपूर्वं तु कृत्वा पादाभिवन्दनम्। कक्षैः कक्षां विधुनुवानावास्फोटं तत्र चक्रतुः। स्कन्धे दोर्भ्यां समाहत्य निहत्य च शङ्खसंधौ। अङ्गप्रहारैः समाश्लिष्य पुनरास्फालनं विभो!। चिलहस्तादिकं कृत्वा कक्षाबन्धं च चक्रतुः। गल-गण्डाभिघातेन सस्फुलिङ्गेन चाशनिम्। बाहुपाशादिकं कृत्वा पादाहतशिरोधरौ। उरोहस्तं ततश्चक्रौ पूर्णकुम्भौ प्रयुज्य तु। करसंपीडनं कृत्वा गर्जन्तौ वारणाविव। नर्दन्तौ मेघसङ्घाशौ बाहुप्रहरणायुधौ। तलेनाहन्यमानौ तु अन्योऽन्यं कृतवीक्षणौ। सिंहा-विव समंकृद्धावालग्नप्रालग्नायुध्यतम्। अङ्गेनाङ्गं समापीड्य बाहुभ्यामुभयोरपि। आहत्य बाहुभिश्चापि उदरं च प्रचक्रतुः। उभौ कक्षां सुपार्श्वं तु तत्रवन्तौ च शिक्षितौ। अधोहस्तं सकण्ठे तूरस्युरसि चा-क्षिपत्। सर्वातिक्रान्तमर्यादं युद्धमङ्गं च चक्रतुः। स पूर्णमुखं बाहुभ्यां पूर्णकुम्भं प्रचक्रतुः। तथापीडं यथाकामं पूर्णयोगं ससृष्टिकम्। एवमादीनि युद्धानि प्रकुर्वन्तौ परस्परम्" भू०। "कक्षैर्दोर्मूलैः कक्षां प्रकोष्ठगतां रज्जुं पुनानौ यत्र यत्र कक्षे आस्फोटं चक्रतुः बाहु-मूलास्फालनेनाकृष्टबन्धरज्जुरूपं कक्षबन्धाविशेषः। चि-लहस्तादिकं हस्तलाघवेनेवाकृष्टनप्रसारणोपर्यधोवलन सङ्कोचनानि चिलहस्ताः। आदिपदात् पादलाघवा-कृष्टनादि। कक्षाबन्धं परस्परकक्षायां हस्तौ कृत्वा बन्धनम् गले गण्डेन भालदेशेनाभिघातेन पार्श्व-सन्धाकृत्वासयोरभिघातेन विस्फुलिङ्गोत्पत्त्याऽशनिं वज्रमिव सङ्घातयितारौ। बाहुपाशादिकं चरणपाश आदिशब्दार्थः। पादाभ्यामाहृताः शिराःस्कन्धयो याभ्या-मौ तदप्रकारेण बाहोपर्यन्तमपि बेदनावन्तावित्यर्थः। उरोहस्तसरसि चपेटाप्रकारं पूर्णकुम्भौ पथिताकुञ्चि-भ्यां हस्ताभ्यां परशिरसः पीडनं पूर्णकुम्भः हितं पर-स्परं द्वावपि चक्रतुरिति वक्तुम्। तलेन चपेटया, आ-हत्य जानुदेशे प्रहृत्य बाहुभिर्वक्षस्थौ द्वावपि मिथ उदरमादाय प्रचक्रतुः प्रक्षिप्तिपतुः कृ विक्षेपेऽस्य रूपम्। एवं कक्षां सुपार्श्वं च प्रचक्रतुः। तत्रवन्तौ तत्रसनु-करणं गात्रसङ्कोच इत्यर्थः तद्वन्तौ। अधोहस्तोदरस्था-धस्ताद्धस्तं कृत्वा हस्ताभ्यामुदरमाबेष्ट्य सकण्ठे शीरसि च कण्ठोरःसमीपे आनीयाक्षिपदास्फालितवान्। पृ-ष्ठस्य भूमस्पर्शेन जातं भङ्गं पराभवं बाहुभ्यामुदरा-दीनि पीड़ने सम्पूर्णमुखं नीलकण्ठः।

पूर्णवैनाशिक पु० सर्ववैनाशिके सर्वशून्यत्ववादिनि बौद्धभेदे सर्ववैनाशिकोऽत्र।

पूर्णहोम ३० पूर्णो होमः। पूर्णाहुतौ।

पूर्णा स्त्री "नन्दा भद्रा जया रिक्ता पूर्णा प्रतिपदः क्रमात्" ज्यो०त०उक्ते पञ्चयोः पञ्चमीदशमीपक्षदशीरूपे तिथिभेदे

पूर्णाङ्क पु० नामभेदे भा० आ० ५७ अ०।

पूर्णान(ल)क न०। वह्नीपनायाग्ने पूर्णपात्रे मेदि० पूर्ण-पात्रशब्दे दृश्यम्। [कारे विहङ्गे च।

पूर्णानन्द पु० पूर्णे आनन्दो यत्र। १परमेश्वरे २तन्त्रप्रकरण-

पूर्णाभिषेक पु० कर्म०। तन्त्रोक्ते कौलाभिषेकभेदे।

पूर्णायुस् पु० १प्राधेये गन्धर्वभेदे भा०आ०६५अ०। पूर्णमायु-रस्य। २शतायुक्ते कर्म०। ३शतवर्षमिते जीवनकाले न०।

पूर्णावतार पु० कर्म०। १नृसिंहे २रामे ३श्रीकृष्णे च तेषां भगवतः संपूर्णावतारत्वात् तथात्वं अन्येषान्तु कलावतार-त्वम्। "पूर्णो नृसिंहो रामश्च श्वेतद्वीपविराड् विभुः। परिपूर्णतमः कृष्णो वैकुण्ठे गोकुले स्वयम्। वैकुण्ठे कमलाकान्तो रूपभेदाच्चतुर्भुजः। गोलोके गोकुले राधाकान्तोऽयं द्विभुजः स्वयम्" ब्रह्मवै०जन्मख०१६ अ० उक्तेरेषां तथात्वम्।

पूर्णाशा स्त्री नदीभेदे भा० भी० ९ अ०।

पूर्णाहुति स्त्री पूर्णा आहुतिः। होमसमाप्तौ होत्र्यावा-मन्त्रितौ शत०ब्रा० २।२।।१।

पूर्णि स्त्री पृ-क्विप्। पूर्तौ पूर्णिमा।

पूर्णिका स्त्री नासाक्षिरोगीनामकरोगे त्रिका०।

पूर्णिमा स्त्री पूर्णि पूर्त्तिं मिमीते मा-क। १पौर्णमास्यां तिथौ मरीचेः कलायां पत्न्यां जाते २कन्याभेदे "भार्य्यौ मरीचेस्तु कला सुषुवे कर्दमात्मजा। कल्पं पूर्णिकाञ्चैव ययोरापूरितं जगत्। पूर्णिकाऽस्तत विरजं विश्वगञ्च परन्तप!।। भाग०३।२।१२ तत्तिथिस्वरूपं हैवे खण्ड-भेदश्च कर्मभेदे श्राद्धतादिकं च कालमा० न्यरूपि यथा "तत्र शुक्लायां पञ्चदश्यां चन्द्रमण्डलं स्वकलाभिः सर्वा-त्मना पूर्यते सैवं मण्डलपरिपूर्त्तिः पूर्णिमेत्यनेन नाम्ना ज्ञायते। तदुक्तं ब्रह्मखण्डतत्सङ्गराधयोः "कालत्रये व्यतिक्रान्ते दिवापूर्णौ परस्परम्। चन्द्रादित्यौ य-

राज्ञे तु पूर्णत्वात् पूर्णिमा स्मृता" इति। अङ्गः परो भागः पराङ्गः सूर्यांशसकाश इत्यर्थः। तत्र यद्यादित्यः संपूर्णमण्डलः सकलमेति तयोत्तरत्वेन चन्द्रः सम्पूर्णमण्डलः सकृदेतीति। दृष्टान्तदार्ष्टान्तिकभावस्य विवक्षितत्वाद् इयोरादित्यचन्द्रयोरुपन्यासः। यथा मण्डलपूर्णत्वविवक्षया पूर्णिमाशब्दः प्रयुज्यते तथा मासपूर्णत्वविवक्षया पौर्णमासीशब्दः प्रयुज्यते। तदुक्तं भविष्योत्तरे "पौर्णमासी महाराज! सोमस्य दयिता तिथिः। पूर्णो मासो भवेद् यस्मात् पौर्णमासी ततः स्मृता" इति। पूर्णिमामावास्ययोर्विकलेन मासान्तत्वं मासप्रस्तावे दर्शितम्। अतएव पौर्णमास्यामन्त्यविप्रकर्षे सत्यनभिभूतत्वाच्चन्द्रमण्डलः सम्पूर्णो दृश्यते। तावेतौ सन्निकर्षविप्रकर्षौ गोभिल आह "यः परो विप्रकर्षः सूर्याचन्द्रमसोः सा पौर्णमासी। यः परः सन्निकर्षः सामावास्येति"। तदेवं पर्वाभिधायाः पञ्चदश्याः पूर्णिमादिनामनिर्वचनेन स्वभावविशेषो ज्ञापितो भवति। ते च पूर्णमास्यामावास्ये प्रत्येकं द्विविधे। तत्र पुराणे दर्शितम् "राका चानुमतिश्चैव पौर्णमासी द्विधा स्मृता। सिनीवाली कुहूश्चैवममावास्या द्विधैव तु" इति। एतासां चतसृणां स्वरूपं काठकशाखायां विस्पष्टं श्रूयते "या पूर्वा पौर्णमासी सानुमतिर्योत्तरा सा राका। या पूर्वाऽमावास्या सा सिनीवाली योत्तरा सा कुहूः" इति। ऋग्विधिरपि "राका चानुमतिश्चैव पौर्णमासीदयं विदुः। राका संपूर्णचन्द्रा स्यात् कलोनाऽनुमतिर्मता। पौर्णमासी दिवा दृष्टे यस्मिन्ननुमतिः स्मृता। रात्रिदृष्टे पुनस्तस्मिन् सैव राकेति कीर्तिता"। अतस्तत्प्रशस्तपुराणयोः "अत्रात्तामनुमन्यन्ते पितरो देवतैः सह। तस्मादनुमतिर्नाम पूर्णिमा प्रथमा स्मृता। चत्वार्यं राजते यस्मात् पौर्णमास्यां निशाकरः। रक्षनाम्नैव चन्द्रस्य राकेति कवयो विदुः" इति। "अथ पञ्चदशी निर्णीयते। सा द्विविधा पौर्णमास्यमावास्या च। तत्र पौर्णमास्यां परस्परविरुद्धानि वाक्यान्युपलभ्यन्ते। तत्र परविद्धाया याज्ञत्वं विष्णुधर्मोत्तरे "एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी। अमावास्या तृतीया च उपोष्या स्युः परान्विताः"। परविद्धानिषेधः पूर्वविद्धाविधिश्च ब्रह्मपुराणपद्मपुराणयोः "षष्ठ्येकादश्यमावास्या पूर्वविद्धा तथाऽष्टमी। पूर्णिमा परविद्धा च नोपोष्यं तिथिपञ्चकम्। पूर्वविद्धा तु कर्त्तव्या सप्तमी प्रतिभिर्नरैः। पौर्णमासी, सकीपाख्या नियमाकृता" इति। पूर्वविद्धात्वाद्यर्थं च युग्मवाक्ये। "चतुर्दश्या च पूर्णिमेति"। एवं परस्परविरोधे सति वा व्यवस्था वा ब्रह्मवैवर्ते दर्शिता "पूर्वविद्धा न कर्त्तव्या अमावास्या च पूर्णिमा। वर्जयित्वा सनिश्चेत! सावित्रीव्रतसप्तमम्" इति। सावित्री राजकन्या तया चीर्णं व्रतं सावित्रीव्रतम्। तच्च भविष्योत्तरपुराणे दर्शितम् "कथयामि कुरुश्रेष्ठ सर्वपापप्रणाशनम्। सर्वेषां वर्द्धनं परम्। यया चीर्णं व्रतं पूर्वं सावित्र्या राजकन्यया" इति। एतच्च पौर्णमास्यामावास्यायां च विहितम्। तस्मिन् व्रते पूर्वविद्धा त्याज्या। व्रतान्तरे पूर्वविद्धा न कर्त्तव्या किन्तु परविद्धैव कर्त्तव्येति परस्परविरुद्धस्य शास्त्रद्वयस्य व्यवस्था। यदा तु चतुर्दश्यादित्यास्तमनादिका भवति तदा सावित्रीव्रतमपि तत्र परित्याज्यम्। "भूतोऽहोरात्रमात्रोऽभिर्दुर्मयस्तूत्तरां तिथिमिति" श्रुतेः। सोऽयं पौर्णमासीनिर्णयः स एवामावास्यायामवगन्तव्यः। तत्रापि सावित्रीव्रतं पूर्वदिने कर्त्तव्यं व्रतान्तरान्यूत्तरदिने। अस्यां च व्यवस्थायां ब्रह्मवैवर्तवचनं पूर्वमुदाहृतम्। स्कन्दपुराणेऽपि "भूतविद्धा सिनीवाली न तु तत्र व्रतं चरेत्। वर्जयित्वा तु सावित्रीव्रतं तु त्रिविधानघ!" इति। एवं च सति युग्मशास्त्रं सावित्रीव्रतव्यतिरिक्तेषु व्रतेषु द्रष्टव्यम्। प्रचेता अपि "नागविद्धा तु या षष्ठी सप्तम्या च युताष्टमी। दशम्येकादशीविद्धा त्रयोदश्या चतुर्दशी। भूतविद्धाप्यमावास्या न त्याज्या मुनिपुङ्गवैः। उत्तरोत्तरविद्धास्याः कर्त्तव्याः काठकी श्रुतिः" इति। पद्मपुराणेऽपि "षष्ठ्यष्टमी तथा दर्शः सप्तम्यां च त्रयोदशी। एताः परयुताः कार्याः पराः पूर्वैश्च संयुताः" इति। यत्तु नारदीयपुराणे "दर्शं च पौर्णमासं च विद्यः संवत्सरं दिनम्। पूर्वविद्धमकुर्वाणो नरकं प्रतिपद्यते" इति तत् सावित्रीव्रतविषयं श्राद्धविषयं वा। अमावास्यायामिव पौर्णमास्यामपि श्राद्धं विहितम् तथाच पितामहः "अमावास्याव्यतीपातपौर्णमास्यष्टकासु च। विद्वान् श्राद्धमकुर्वाणः प्रायश्चित्तीयते हि सः" इति। अमावास्याश्राद्धस्य च पार्वणस्यापराह्णस्य तत्कर्मकालत्वं कुतपस्य प्रारम्भकालत्वमित्येतत्तिथितत्वं प्रतिपत्प्रकरणे प्रत्यादिनिर्णये प्रपञ्चितम्"।

"सा चतुर्दशीयुता ग्राह्या युग्मात्। यमः "पञ्चाग्नौ जो-

तस्मिं स्नायात् तेन नायाति मत्पुरम्" विष्णुः "इयग्रे ते सङ्क्रान्तौ यस्यां दिवि चन्द्रदर्शनतो। पौर्णमासी त महती ज्ञेया संवत्सरे तु सा। तस्यां स्नानोपवासा श्यामलयं परिकीर्त्तितम्"। सङ्क्रान्ती मासमंस्नानिमित्तलक्षिकादिनक्षत्रगतौ महाकार्त्तिक्यादिदर्शनात्। तथा च राजमार्त्तण्डः "मासमंते यदा कृष्णे चन्द्रः सम्पूर्णमण्डलः। मुक्त्वा याति संयोगं सा तिथिर्महती मता"। स्कान्दमात्स्ययो "पौर्णमासीषु चैतासु मासर्क्षसङ्गतासु च। एतासु स्नानदानाद्यं फलं दशगुणं कृतम्" तिथितत्त्वम्।

पूर्णेन्दु पु० कर्म०। पञ्चदशभिः कलाभिः पूर्णे चन्द्रे।

पूर्णोत्कट पु० पु० प्राच्ये देशभेदे मार्क०९८अ०। [ष्यम्।

पूर्णोपमा स्त्री उपमालङ्कारभेदे अलङ्कारशब्दे २६६ पृ०

पूर्त्त त्रि० पूर-क्त नि०। १पूरिते २कृत्ते विश्वः। पॄ-पालने कर्मणि क्त।१पालिते। भावे क्त। ३पालने न०५ शब्दर०। ६खातादिकर्मणि न० अमरः। आह्निकसूत्रे "वापी कूपतड़ागादिदेवतायतनानि च। अन्नप्रदानमारामः पूर्त्तमित्यभिधीयते"। आरामः पुष्पफलोपायहेतुर्भागः। "अग्निहोत्रं तपः सत्यं वेदानामनुपालनम्। आतिथ्यं वैश्वदेवञ्च इष्टमित्यभिधीयते। अहोरात्रे ब्रह्मदानं पूर्त्तमित्यभिधीयते। इष्टापूर्त्तं द्विजातीनां धर्मः सामान्य उच्यते। अधिकारी भवेच्छूद्रः पूर्त्ते धर्मे न वैदिके"। वैदिके वेदाध्ययनसाध्ये अग्निहोत्रादाविति" रत्नाकरः। एवं स्त्रीणामपि पूर्त्ताधिकारः। यथा नारीत्वनुक्तौ हरदत्तः "पितृव्यगुरुदौहित्रान् भर्तुः स्त्रीयमातुलान्। पूजयेत् कव्यपूर्त्तीभ्यां ब्रह्मणाधातिथीन् स्त्रियः"। एतेन "अलाभयोत्सर्गे गोरवतरणादुमन्त्रणयोर्यजमानकर्त्तृकमन्त्रपाठः तत्रामन्त्रकतया स्त्रीशूद्रयोरनधिकारेण तद्वति यागेऽनधिकारः विशेषोपदेशविरुद्धादिति" दैतनिर्बन्धोऽपि निरस्तम्। अतएव तयोर्जलाशयोत्सर्गादिपद्धत्यन्तरवेदी होमादिसमाचारः। अत्र होमो वह्नौ न स्वाचार्यात् कल्पतरुरत्नाकरधृतापस्तम्बवचनात्। तदुक्तं चारुत्वबादुपक्रम्य "तदुतमङ्गतस्वाग्नौ न स्त्री जुहुयात्पतिः पेतः इति" अनुपेतः अनुपनीतः, किन्तु ब्राह्मणद्वारा करणीयः। "औतस्मार्त्तक्रियाहेतोर्ह्युत्थाद्यत्विजः स्वयम्" इति याज्ञवल्क्योक्तेः "ऋत्विग्वादे नियुक्तौ च सभौ संपरिकीर्त्तितौ। वन्ध्ये स्वाम्यानुयात् पुत्रं स्त्रानिं वादेऽथ वा जयम्" इति हरदत्तोक्तेः। वैदिकेतर मन्त्रपाठे शूद्रादेरप्यधिकारः। "वेदमन्त्रवर्जं शूद्रस्येति" छन्दोगाह्निकाचारचिन्तामणिधृतस्मृतौ वेदेतिविशेषणात्। "शूद्रोऽप्येवंविधः प्रोक्तो विना मन्त्रेण संस्कृतः। न केनचित् समस्रजत् छन्दसा तं प्रजापतिः" इति यमस्मृतौ छन्दसा वेदेन इत्युक्तेश्च। तं शूद्रम्। पञ्चयज्ञस्नानश्राद्धेषु वैदिकेतरमन्त्रोऽपि निषिद्धः। शूद्रमधिकृत्य "नमस्कारेण मन्त्रेण पञ्चयज्ञान् यापयेत्" इति याज्ञवल्क्यीयेन "ब्रह्मक्षत्रविशामेव मन्त्रवत् स्नानमिष्यते। तूष्णीमेव हि शूद्रस्य नमस्कारकं मतम्" इति योगियाज्ञवल्क्यीयेन श्राद्धमधिकृत्य "अयमेव विधिः प्रोक्तः शूद्राणां मन्त्रवर्जितः। अमन्त्रञ्च तु शूद्रस्य विप्रो मन्त्रेण भक्षयेत्" इति वराहपुराणीयेन च नमस्कारेणेति तूष्णीमिति मन्त्रवर्जित इत्यभिधानात्"।

पूर्त्ति स्त्री पॄ-भावे क्तिन्। १पूरणे "कृत्तिः पूर्तिश्च पूरणे" ज्योत्स्नोक्तेः २सुधने च। [ङीप्।

पूर्त्तिन् त्रि० पूर्त्तमनेन इष्टा० इनि। कृतपूरणे। स्त्रियां

पूर्द्वार न० इत०। पुरस्य द्वारे गोपुरे अमरः। [ऋपूर्धांदीर्घात्।

पूर्धि याच्ञायां भ्वा०प०सक०सेट्। निघण्टुः। पूर्धयति

पूर्व निमन्त्रणे सक० निवासे अक० चु०उभ० सेट्। पूर्वयति ते अपूपूर्वत त। ओष्ठ्यान्तोऽयम्।

पूर्व्य त्रि० पॄ-क्यप् पूर-यत् वा। १पूरणीये २परिपाल्ये च

पूर्व निवासे अक० निमन्त्रणे सक० भ्वा० प० सेट्। अन्तस्थान्तोऽयम्। पूर्वति अपूर्वीत्।

पूर्व(र्वं)त्रि०पूर्व(र्वं)-अच्।१प्रथमे आद्ये यस्यां दिशि देशे वस्तु प्रथमं दृष्टिः तेषां तस्यां २दिशि स्त्री तदुपलक्षिते ३देशे वस्तु यदपेक्षया प्रथमं जन्मादि तस्य ४तादृशकाले ५तदुपलक्षिते च। तस्य दिग्देशकालव्यवस्थायाञ्चिते सर्वनामकार्य्यं पूर्वस्मै इत्यादि अस्मि ङिङसोस्तु वा पूर्वे पूर्वा पूर्वस्मात् पूर्वात् पूर्वे पूर्वस्मिन्। स्त्रियां तु न विभाषा पूर्वस्यै पूर्वस्याम् इत्यादि। सर्वनामत्वेन इत्तिमात्रेऽस्य पुंवद्भावः। पूर्वस्यां स्त्रियां पूर्वस्त्रियम्। पूर्वस्या रूपं पूर्वरूपम् इत्यादि।

पूर्व(र्वं)कर्मन् न० कर्म०। प्रथमे कर्मणि "कर्म त्रिविधं पूर्वकर्मप्रधानकर्म पश्चात्कर्मेति" श्रुतेः। पूर्वभागे।

पूर्व(र्वं)काय पु० पूर्व(र्वं) कायस्य एकदेशित०। कायस्य

पूर्व(र्वं)कालिक त्रि० पूर्वः(र्वं)कालः साधनतयाऽस्यास्ति ठन्। पूर्व(र्वं)कालसाध्ये "दर्शनं पूर्व(र्वं)कालिकम्"

मा०सौ०ट०। पूर्व(र्व)काले भवः ठञि ठद्वि०। पौर्व्य(र्व)-कालिक इत्येव तत्रार्थे त्रि० स्त्रियां ङीप् इति भेदः।

पूर्व(र्व)कृत् पु० पूर्वं(र्वां) करोति कृ-क्विप् तत्पु० वत्। १पूर्व(र्व)दिग्रक्षके आदित्ये २तदधिपे इन्द्रे च यजु० १०।२६। ३पूर्व(र्व)कारकमात्रे त्रि०।

पूर्व(र्व)कोटि स्त्री विप्रतिपत्तौ पूर्वोपाक्ते विषये पूर्वपक्षे

पूर्व(र्व)गङ्गा स्त्री नित्यक०। नर्मदानद्यां हेम०।

पूर्व(र्व)चित्ति त्रि०चित-भावे क्तिन् पूर्व(र्वं) चित्तिः स्मरणं यस्य। १पूर्वानुभवविषये यजु०१२।११।१२।४२। २अप्सरोभेदे स्त्री हरिवं० १२अ०।

पूर्व(र्व)ज पु० पूर्वस्मिन् काले जायते जन-ड। १ज्येष्ठभ्रातरि रघुः १०।२६। २ज्येष्ठभगिन्यां स्त्री अमरः। ३पूर्वकालजातमात्रे त्रि०। "ज्येष्ठामूलीयमिच्छन्ति मासमाषाढ़ पूर्व(र्व)जम्"। ४चन्द्रलोकस्थे दिव्यपितृगणे "अथ पूर्व(र्व)जाः" पितरश्चन्द्रगोलस्था न्यक्षयक्षाः सुधाभुजः। कव्यवाहादयश्च" त्रिका०। ५पितामहादौ "स पूर्व(र्व)जानां कपिलेन रोषात्" रघुः। [त्रिका०

पूर्व(र्व)जिन पु० कर्म०। प्राचीने जिनभेदे मङ्गुघोषप्रभृतौ

पूर्व(र्व)दक्षिणा स्त्री पूर्व(र्व)स्या दक्षिणस्याश्चानराला दिक् "दिङ्नामान्यनराले" पा०स०। पूर्वदक्षिणयोर्दिशोरन्तराळायां दिशि १अग्निकोणे २तद्दिक्स्थे देशे च मार्क० पु० ५८ अ०।

पूर्व(र्व)दिक्पति पु० कर्म०तत्०। इन्द्रे हेम०। पूर्व(र्व)दिशो यादयोऽस्य। २मेषसिंहादिराशिषु। "प्राग्दिगादिक्रमां नाधा यथासंख्यं प्रदक्षिणम्। मेषाद्या राशयो ज्ञेया स्थिराद्यत्तिपरिभ्रमात्" ज्यो०त०।

पूर्व(र्व)दिग्बल न० दिग्बलशब्दे २५७२ पृ० उक्ते सूर्यादिग्रहाणां कालभेदे पूर्वस्यां दिशिभवे बलभेदे

पूर्व(र्व)दिग्वदन न० पूर्वदिशि वदनमस्य। दिग्वदनशब्दे २५७१ पृ० उक्ते मेषसिंहधनूरूपराशित्रिके

पूर्व(र्व)दिश् स्त्री कर्म०। प्राच्यां दिशि यस्यां दिशि येषां सूर्यस्य प्रथमदृष्टिः तेषां सा दिक्प्राची। तज्ज्ञानो पायश्च दिग्ज्ञानशब्दे २५७४ पृ० दृश्यः।

पूर्व(र्व)दिष्ट त्रि० पूर्व(र्वं) दिष्टं भाग्यं साधनत्वेनास्त्यस्य अच्। पूर्वभाग्यानुरूपेण लाते १ढ़ःखादौ "दैवैर्मत्यैश्च यत्प्रोक्तं पूर्व(र्व)दिष्टं हि तत् स्मृतम्" भाग० ६।१७ श्लो०। पूर्व(र्वं) दिष्टम्। २पूर्वविहिते त्रि०।

पूर्व(र्व)देव पु० पूर्वे(र्वे) देवाः। १असुरे अमरः। तेषां प्रथमं देवत्वेन जायमानत्वेऽपि अन्यायाचरणात् ततो भ्रष्टानां दैत्यभावं प्राप्निरिति पौराणिकी कथानुसन्धेया। कर्म०। पूर्वतनयोः देवयोः २नरनारायणयोः हि० व०। भा० उ० ४८ अ०।

पूर्व(र्व)देवता स्त्री कर्म०। अनादिदेवभावेषु पितृषु "अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः। व्यक्षयक्षा महाभागाः पितरः पूर्व(र्व)देवताः" मनुः। तदधिकं पितृशब्दे दृश्यम्।

पूर्व(र्व)देश पु० पूर्व(र्व)स्यां देशः। जम्बुद्वीपस्थे देशभेदे स च देशः ब्र० खं० १४ अ० कूर्मविभागे दर्शितः।

पूर्व(र्व)नदी स्त्री कर्म०। कूर्मविभागे उक्तायां पूर्वदिक्स्थायां नद्याम् ततो नद्यन्तत्वात् ढक् उत्तरपदवृद्धिः पूर्वनादेश तत्र-भवे त्रि०।

पूर्व(र्व)पक्ष पु० कर्म०। १शुक्लपक्षे अमरः। शास्त्रीयसंशयनिराकार्यप्रस्तावे २पक्षिकायाम्। ३सिद्धान्तविरुद्धकोटौ "विषयो विषयश्चैव पूर्वपक्षस्तथोत्तरम्" इत्युक्ताधिकरणावयवभेदे व्यवहारे प्रतिज्ञापरपर्य्याये भाषापत्ररूपे ४प्रथमावयवभेदे। तल्लक्षणादिकं वीरमि० उक्तं यथा "पूर्वपक्षः स्मृतः पादो द्वितीयस्तूत्तरस्तथा। क्रियापादस्तृतीयस्तु चतुर्थो निर्णयस्तथा" इति वृद्धस्मृतिवचनस्थं निर्णयफलकपरामर्शरूपप्रज्ञाकलितपरमेव निर्णयपदस्योपचारादित्याह "इतरथा पूर्वोदाहृततद्वचनविरोधः स्यात्। तत्र प्रतिज्ञावादी कः स्यादित्यपेक्षिते नारदः "राज्ञे कुर्यात् पूर्वभावेदनं यस्तस्य क्षेत्रः पूर्ववादो विधिज्ञैः" इति पूर्ववादः प्रतिज्ञा। पूर्ववादकस्यैव प्रतिज्ञावादितेत्यपवादमाह स एव "यस्य वाभ्यधिका पीड़ा कार्य्यं वाभ्यधिकक्षमावेत्। तस्यार्थिवादो दातव्यो न वः पूर्वं निवेदयेत्"। अर्थिवादः प्रतिज्ञा। वृद्धस्मृतिः "अहंपूर्वि(र्व)का यातावर्थिप्रत्यर्थिनौ यदा। वादो वस्तूपपूर्वश्च स्यात्तः पीड़ामवेक्ष्य चेति"। मनुरपि "सर्वान्नर्थाँस्तुभौ वृद्धा धर्मार्थौ च क्रमेण तौ। वर्णक्रमेण सर्वाणि प्रश्नेत् कार्याणि कार्यिणाम्"। ब्राह्मणादीनां युगवदुपर्यधिकरणं प्राप्तानां वर्णानुक्रमेण ब्राह्मणस्यादौ ततः क्षत्रियस्येत्येवमादिक्रमेण चतुष्पाद्व्यवहारः प्रवर्त्तनीयो राज्ञा पीड़ाधिक्यकार्य्यगौरवं चेदर्थिप्रत्यर्थिनोरन्यतरस्य तदा न पूर्ववेदनक्रमो नापि वर्णक्रमः। यदा तु सर्वे सवर्णास्तदा ज्यावेदनक्रमः। युगपदावेदने समानवर्णत्वे समानपीड़त्वे च दृष्टभयस्वभावतोऽन्येति

निर्मलितोऽर्थः । प्रतिज्ञातलक्षणमाह यज्ञवल्क्यः "प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदितमर्थिना । समाप्तावतदर्हाक्षरोज्झितमादिचिह्नितम्" । अर्थ्यत इत्यर्थः साध्यः सोऽस्यास्तीत्यर्थी तद्विपरीतः प्रत्यर्थी तस्याग्रतः पुरतो लेख्यं लेखनीयं समक्षेण सभापतिना यथावेदितं पूर्ववेदनमनतिक्रम्य येन प्रकारेणावेदनसमये स्ववचनं लेखितं तथैव प्रत्यर्थिसमक्षमपि न पुनरन्यथा । तथा सत्यन्यथादित्वेन भङ्गप्रसङ्गात् । अन्यथादीत्यादि क्षीरलक्षणे वक्ष्यते । प्रागेवार्थिना स्वप्रतिज्ञातार्थस्य लिखितत्वादधुना लेखनमनर्थकमित्याशङ्कानिरासायाह समाप्तावेति । संवत्सरमासपक्षतिथिवारादिप्रत्यर्थिनामतदीयजातिभिरादिशब्दोपात्तैश्च हृद्यसङ्ग्राह्यज्ञाति क्षणपक्षणादिस्थानवेलाग्रामाक्षिकुलादिभिर्योपयोगं चिह्नितमिति कार्यमित्यावेदनकाले लिखितमधुनोपयुक्तसंहितं लिख्यत इति नानर्थक्यमिति भावः । आदिशब्दाच्चाक्षि च कालायन आह "निवेश्य कालं वर्षं च मासं पक्षं तिथिं तथा । वेलां प्रदेशं विषयं स्थानं ज्ञात्वाज्ञतो वयः । साध्यं प्रमाणं हृद्यञ्च सङ्ग्रहा नाम तत्त्वतः । राज्ञां च क्रमशो नाम निवासं साध्यनाम च । क्रमात् पितॄणां नामानि पौड़ामार्हदायकौ । ग्रामाक्षिकुलानि चान्यानि पक्षं सङ्कल्प्य कीर्त्तयेत्" । कालो धनप्रयोगादिकालः । वर्षं पत्रलिखनकालीनम् एवं मासपक्षतिथयोऽपि सन्ध्यावन्दनादिक्रियोपलक्षितः कालो वेला । प्रदेशः क्षेत्रादिस्थलविशेषः । विषयोऽन्तर्वेद्यादिविषयः स्थानं विवादास्पदीभूतमर्हदादियामादि आकृतिरवयवसंस्थानविशेषः वप्रप्राकारादि प्रमाणं निवर्त्तनमस्यादि । ज्ञातेनो राज्ञां च क्षेत्रादिभोगकालीनानां बन्धवचनं तदीयपित्रादिप्राप्त्यर्थं निवासो निकटस्थादिः । पितरोऽत्रैवप्रत्यर्थिनोः । पौड़ा प्रतिभूप्रभृतीनां धनिकादिज्ञता । आहर्त्ता प्रतिपक्षादिविषयवस्तूनि आनेता दायको दाहपिक्षेत्रादिः । ग्रामाक्षिकुलान्यार्त्तायैधनादेः परोपभोगाद्यपराधलक्षनचिह्नानि । अन्यत् सुबोधम् । संग्रहकारोऽपि "अर्थवद्धर्मसंयुक्तं परिपूर्णमनाकुलम् । साध्यवद्वाचकपदं प्रज्ञताद्यैस्तवन्वि च । प्रसिद्धमविरुद्धञ्च लिखितं साधनक्षमम् । संक्षिप्तस्फुटितार्थं च देशकालाविरोधि च । वर्षर्तुमासपक्षाह्नवेलादेशप्रदेशवत् । स्थानावयवसाध्याख्याज्ञात्याकारवयोयुतम् । साध्यप्रमाणं सङ्ग्रहावदाज्ञप्रत्यर्थिनाम च । परापूर्वज्ञानेकराजनामभिरङ्कितम् । ग्रामाक्षिकुलाक्षपीड़ावत् कथिताहर्दायकम् । यदावेद्यते राज्ञे तल्लाभेत्यभिधीयते" इति । अर्थवत् प्रयोजनवत् । धर्मसंयुक्तम् अल्पाक्षरप्रभूतार्थत्वादिगुणयुक्तम् । परिपूर्णमध्याहारालाघनमेकम् । अनाकुलमसन्दिग्धाक्षरम् । साध्यवत् साधनीयार्थयुतम् । वाचकपदम् गोणवाक्षिकपदरहितम् । प्रज्ञतार्थाविरोधि प्रागावेदितार्थेन सह संवादि । प्रसिद्धं लोकप्रसिद्धनतिक्रान्तम् अविरुद्धं पुरराष्ट्रग्रामविवाकराजाद्यविरुद्धम् । पूर्वापराविरुद्धं व्यवहारिकधर्मविरुद्धञ्च । लिखितं संशयरहितम् । साधनक्षमम् साधनार्हम् । संक्षिप्तं शब्दाडम्बरशून्यम् । लिखितार्थं निरवशेषवक्तव्यार्थप्रतिपादकम् । देशलोकाविरोधि मध्यदेशीयमस्तकक्षेत्रम् शरत्कालीनयस्याढ्यं मदीयमपक्षतमित्यादिदेशकालविरोधविधुरम् । परावरोः प्रतिवादिवादिनोर्वे पूर्वजाः पित्रादयस्तयः अनेके राजानः क्षेत्रादिभुक्तिकालीनास्तेषामभिरङ्कितं युक्तम् । अत्रार्थवत्त्वादीनि देशकालविरोधित्वमर्थिप्रत्यर्थिनामाभूतत्वं चेति सर्वत्र भाष्यामवयवसाध्यादीनि तैर्विना साध्यनिर्देशाविद्धेः । वर्षादीनि तु यत्र यावन्त्युपयुज्यन्ते तत्र तावन्त्येव निवेशनीयानि सर्वाणि न सर्वत्र अहर्दायत्वमङ्गात् । तत्र वर्षादीनां कालानां हृद्विधसङ्गुण्यादिविवादेन प्रतिपक्षक्रयादिपौर्वापर्यवादे वोपयोगः । देशप्रदेशस्थानानामार्हदायकयोराज्ञादिपूर्वजराजादिनाम्नां च स्थावरक्षेत्रादिविवादेषु । साध्याख्याज्ञात्याकारवयसां पौर्वादिक्राम्यविक्रयादिविवादेषु । प्रमाणसंख्ययोर्मेयतुलितादिद्रव्यविवादे चौर्यादिविवादे च ग्रामाक्षिकुलानामपेक्षितपरोक्षभुज्यमानभूम्यादिविवादे । आक्षपीड़ाया ऋणिकप्रतिभ्वादिविवादे एवमन्यदप्यूह्यम् । अतएवाग्रवादाह कात्यायनः "देशस्यैव तथा स्थानं सन्निवेशस्तथैव च । जातिः संज्ञाधिवासश्च प्रमाणं क्षेत्रनाम च । पितृपैतामहश्चैव पूर्वराजानुकीर्त्तनम् । स्थावरेषु विवादेषु दशैतानि निवेशयेत्" इति । एतेषां तत्रोपयोगित्वात् । क्षारीतोऽपि "आसनं शयनं यानलाभं कांस्यमयोमयम् । धान्यमन्नमयं यच्च दिग्दृष्टं चतुष्पदम् । मणिमुक्ताप्रवालानि क्षीरक्षौद्रघृतकाञ्चनम् । यदि द्रव्यसमूहः स्यात् संख्या कार्या तदैव तु । यस्मिन् देशे च यद्द्रव्यं तेन मानेन मीयते । तेन तस्मिंस्तदा सङ्ग्रहा कर्त्तव्या व्यवहारिभिः" इति ।

मानसंख्याशब्दावलान्योऽन्योपलक्षणम्। अनैतावदुविवक्षितं यत्र यावदुपयुज्यते तत्र तावच्छिष्टेभ्यः भाषापत्ते। अन्यथा साध्यनिर्देशस्यापूर्णत्वात् पक्षाभासतापत्तेरधिकनिर्देशेऽनर्थतापत्तेरिति। कात्यायनोऽर्थत एवाह "देशकालविहीनश्च द्रव्यसङ्ख्याविवर्जितः। क्रियामानविहीनश्च पक्षो नादेय इष्यते"। क्रिया प्रमाणम्। मानं साध्यपरिमाणम्।" यद्यपि पूर्वोक्तपक्षलक्षणरहितानां पक्षाभासत्वमर्थसिद्धं तथापि नारदादिभिः स्पष्टार्थं प्रपञ्चितम्। तत्र नारदः "अन्यार्थमर्थहीनञ्च प्रमाणागमवर्जितम्। लेख्यहीनाधिकं भ्रष्टं भाषादोषा उदाहृताः"। एतदनु स एव विवृतवान्। "अर्थं साधारणेऽर्थे को सम्बन्धोऽर्थानियुक्तकः। लेखयेद् यत्तु भाषार्थमन्यार्थं तं विदुर्बुधाः"। सम्बन्धार्थमेको वा यदसम्बन्धी तदनियुक्तो वा लेखयेद् यस्यां भाषायामित्यर्थः। "ब्रह्मक्षत्रमिति द्वेधात् क्रोधाद्वापि वदेत्तु यः। साध्यं च मोचयेत् पक्षादर्थहीनान्तु तां विदुः"। उक्तं साध्यं वादिना यस्मान्न्यूनते सा भाषार्थहीनेत्यर्थः। "गणिते लिखिते लेखे तथा क्षेत्रस्फुटादिषु। यत्र सङ्ख्या न निर्दिष्टा सा प्रमाणविवर्जिता"। सङ्ख्यानं सङ्ख्येति व्युत्पत्त्या सङ्ख्याशब्देन गणनतोलनमानानां परिग्रहः। "विद्यया प्राप्तमर्थं वस्त्रं क्रीतं क्रमागतम्। नत्वेवं लिख्यते यत्र सा भाषा स्यादनागमा। समासमक्षया पक्षस्त्रिविधैरक्षरैश्च यः। यत्रैतानि न लिख्यन्ते लेखहीनान्तु तां विदुः"। अवश्यं यद् यत्र पूर्वोक्तरीत्या लेख्यं तद्रहिता लेख्यहीनेत्यर्थः। "लेखयित्वा तु तां भाषामनिर्दिष्टे तथोत्तरे। निर्दिशेत् साक्षिणः पूर्वमधिकां तां विनिर्दिशेत्"। साक्षिण इति प्रमाणोपलक्षणम्। व्युत्क्रमादसाधिकत्वेनाप्राप्तकालता फलिता। "यत्र स्यात्तु यथापूर्वं निर्दिष्टं पूर्ववादिना। सन्दिग्धमेव लेखेन भ्रष्टां भाषान्तु तां विदुः" उभयं पूर्वमिति पाठे पक्षद्वयमपि प्रतिज्ञादिनैव निर्दिष्टं स्यादित्यर्थः"। प्रसङ्गात् पक्षाभासोऽपि तत्र निर्णीतोऽत्र प्रदर्श्यते। तत्र कात्यायनः "अप्रसिद्धं निरावाधं निरर्थं निष्प्रयोजनम्। असाध्यं वा विरुद्धं वा पक्षाभासं विवर्जयेत्"। अप्रसिद्धमाह स्फुरतिः "न केनचित् क्वतो यस्तु सोऽप्रसिद्ध उदाहृतः। यथा फलमस्फलस्फुटक्षेत्रमपक्वमिति मदीयं मयविषाणं स्फोटयित्वा न प्रयच्छतीत्याद्यप्रसिद्धमित्याह विज्ञानेश्वरः। स्फुरतिना त्विदमसाध्योदाहरणसङ्गं तच्च वक्ष्यते। निराबाधस्त्विदमेव मम मन्दिरे दीप्यमानदीपकप्रकाशेनायं स्वमन्दिरे व्यवहरतीतिप्रभृति निरर्थमभिधेयहीनं मदीयं कचटतपञ्चवगडदशं वा स्फोटयित्वा न ददातीत्यादि विज्ञानयोगी। स्फुरतिवचनात् त्वन्यथा निरर्थकपदार्थः प्रतीयते यथाह "स्वल्पापराधः स्वल्पार्थो निरर्थक इति स्मृतः" इति। एतदुदाहरणं स्मृतिचन्द्रिकायाम् "अस्मभ्यमेनं सक्षिणमीक्षितः। मामकी शिक्षाऽनेनापस्मृतेत्यादि निष्प्रयोजनं यथायं देवदत्तोऽनदृष्टस्वसन्निधौ स्वरमधीते इत्यादि मिताक्षरास्मृतिचन्द्रिकयोरुदाहृतम्। स्फुरतिना तदेव लक्षितम्। "कार्यबाधाविहीनस्तु विज्ञेयो निष्प्रयोजनः" इति। स एव प्रकारान्तरेणापि निरर्थनिष्प्रयोजनौ लक्षितवान् "कुसीदादौः पदैर्हीनो व्यवहारो निरर्थकः। वाक्पारुष्यादिभिश्चैव विज्ञेयो निष्प्रयोजनः"। कुसीदस्यदानं तत्प्रभृतिभिश्चतुर्दशभिरर्थविषयव्यवहारैर्हीनो निरर्थकः। वाक्पारुष्यादिभिर्हिंसात्मकैश्चतुर्भिर्हीनो निष्प्रयोजनः इत्यर्थः। अष्टादशपदाविषयः पक्षो दुष्ट इत्याशयः। असाध्यविरुद्धावाह स एव "समानेन प्रदातव्यं यस्मरुक्तं धनुः। असम्भाव्यमसाध्यमं पक्षमाहुर्मनीषिणः। यस्मिन्नावेदिते पक्षे प्राड्विवाकोऽव राजनि। पुरराष्ट्रे विरोधः स्याद्विरुद्धः सोऽभिधीयते" इति। मिताक्षरायामसाध्यविरुद्धावन्योन्यौ "देवदत्तेनाहं सभ्यभङ्गुरपक्षसित इत्याद्यसाध्यसाधनासम्भवात् अत्यन्ताभावत्वाच्च साध्यादिसम्भवो लिखितं दूरतोऽस्खलत्वाच्च दिव्यमिति। भूतेनाहं यम इत्यादि विरुद्धमिति"। पुरराष्ट्रादिविरुद्धमपि विरुद्धपदेन व्याख्याय राज्ञा विवर्जित इत्यादिग्रन्थान्तरञ्च तदर्थतयोदाहृतमत्र पूर्वमस्माभिरादेयव्यवहारनिरूपणे लिखितम्। अन्येऽपि पक्षाभासाः स्मृतिचन्द्रिकोदाहृतवचनोक्ता ज्ञेयाः। यथा "भिन्नक्रमो व्युत्क्रमार्थः प्रकीर्णार्थौ निरर्थकः। अतीतकालो विहितः पक्षो नादेय इष्यते। यथास्थानानिवेशेन नैव पक्षार्थकल्पना। यस्यते तेन पक्षः स भिन्नक्रम उदाहृतः"। अत्यक्षाक्षरसन्निवेशो भिन्नक्रम इति यावत्। व्युत्क्रमार्थौ व्यवहितान्वयेनार्थाबोधकः। प्रकीर्णार्थौऽसङ्गतार्थः। "मूलमर्थं परित्यज्य तदनुगो यत्र लिख्यते। निरर्थकः स वै पक्षो भूतसाधनवर्जितः। भूतकालमतिक्रान्तं द्रव्यं यत्र हि लिख्यते। अतीत-

कालः पक्षोऽसौ प्रमाणे सत्यपि स्थितः। यस्मिन् पक्षे द्विधा साध्यं भिन्नकालविभर्शनम्। विरुद्धयते क्रियाभेदः स पक्षोदित उच्यते"। भूतसाधनं भूतभूतं साधनं तेन वर्जितः। भूतकालः साध्यकालः। अन्यानपि पक्षाभासानाह स एव "अन्याक्षरनिवेशेन अन्यार्थगमनेन च। आकुलन्तु भवेल्लेख्यं क्रिया चैवाकुला भवेत्। साधनं सह साध्येन निर्दिष्टं यत्र लेखयेत्। एकक्रमविहीनत्वात् सोऽपि पक्षो न सिध्यतीति। विरुद्धावविरुद्धश्च द्वावप्यर्थौ निवेशितौ। एकस्मिन् यत्र दृश्यते तं पक्षं दूरतस्त्यजेत्। परस्परविरुद्धानि यः पदानि निवेशयेत्। विरुद्धपदसङ्कीर्णा भाषा तस्य न सिध्यतीति"। यत्तु "पुरराष्ट्रविरुद्धश्च यश्च राज्ञा विवर्जितः। अनेकपदसङ्कीर्णः पूर्वपक्षो न सिद्ध्यतीति" स्मरणात् तस्यायमर्थः। राज्ञा विवर्जितो राजत्वक्रुल्कादिविषयकर्षादानादिपदमिश्रितस्तु क्रियाभेदेन युगपच्च सिद्ध्यतीति मदीया रूपका दृश्यन्तेऽनया दृष्ट्याऽनेन गृहीताः सुवर्णश्च मया निक्षेपोऽतमवमिदं मदीयक्षेत्रमपहरतीत्यनेकपदविषयस्यापि पक्षस्य क्रमेणाप्यनुपादेयत्वे तत्त्वनिर्णयाभावप्रसङ्गेन युक्तिविरोधात्। "बहुप्रतिज्ञं यत्कार्यं" व्यवहारेषु निश्चितम्। कार्यं तदपि गृह्णीयाद्राजा तत्त्वबुभूत्सयेति" कात्यायनवचनविरोधाच्च। तस्मादुयुगपत् पक्षाभासतैवेव रमणीयम्। अनेकवस्तुसङ्कीर्णत्वापक्षत्वन्तत्पदस्यत्वम्। स्थिरयक्रुल्कवासांसि वानेन मत्तो दृष्ट्वा गृहीतान्यस्य कृत्ते मया चिह्नप्रान्यनेनापहृतानि वेत्येकस्मिन्नपि पदे युगपदपोद्यपक्षोपन्यासस्यादुष्टत्वात्। साध्यञ्च विधिरूपेण प्रतिषेधरूपेण वा पक्षनिक्षेपणीयमित्याह कात्यायनः "न्यायं संयच्छते कर्तुमन्यायं वा करोत्ययम्। न लेखयति यस्त्वेवं तस्य पक्षो न सिद्ध्यति"। न्यायं समित्यनेन समेतावज्ञनमादाय न ददातीत्यादि प्रतिबन्धरूपताऽपि सूचिता। अन्यायं वेत्यनेन ममेदमपहरतीत्यादि विधिरूपता प्रदर्शिता। दृष्टस्मृतिरपि "प्रतिज्ञादोषनिर्मुक्तं साध्यं सत्कारणान्वितम्। निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदुः" इति। प्रतिज्ञादोषैः प्रतिज्ञासंन्यासादिभिर्मुक्तं रहितम्। ते च दर्शिताः प्राक्। साध्यं साधनार्हम्। सत्कारणान्वितं स्फुटदोषरहितहेतुसहितम्। निश्चितं सन्देहाजनकवाक्यदृष्टान्तायुक्तं न तु स्वयमेव निश्चितं विप्रतिपत्त्यभावनिश्चयाभावात्। लोकसिद्धं व्यवहारिकधर्मविरुद्धम्। अतएव मनुः "सत्या न भाषा भवति यद्यपि स्यात् प्रतिष्ठिता। बहिश्चेद्दुष्यते धर्मात्त्रियतादव्यवहारिकात्"। प्रतिष्ठिता प्रसिद्धत्वादिदोषनिर्मुक्ता। भाषा प्रतिज्ञा व्यवहारिकधर्मादविरुद्धा च सत्या याद्या न भवति राजादोषाभित्यर्थः। भवदेवस्तु "यत्र श्रुतमात्र एव सति लोकानां सम्प्रत्ययस्तल्लोकसिद्धं तेन निर्धनत्वतो लक्षादिसङ्ख्यधनाक्षेपो न पक्ष इति व्याचख्यौ तद्दुष्टरूपप्रतिज्ञादोषवत्त्वेनैव ताडग्यपक्षस्य निराकरणात्। प्रतिज्ञादोषनिर्मुक्तमित्यनेनैव गतार्थम्"। ततः मत्वा० भावार्थे क्त। पूर्वपक्षीय तद्भवे त्रि०।

पूर्व(र्वं)पद न० कर्म०। पूर्ववर्त्तिनि विभक्त्यन्ते पदे "पूर्वपदात् संज्ञायामगः" पा०। २पूर्ववर्त्तिस्थाने च। पूर्वपदमधीते "पूर्वोत्तरपदात्" वार्त्ति० ढक्। पूर्वपदिक तद्हेत्तरि तदध्यायिनि च।

पूर्व(र्वं)पर्वत पु० नित्यक०। उदयाचले अमरः।

पूर्व(र्वं)पाञ्चालक त्रि० पूर्वस्मिन् पञ्चाले भवः वुञ् उत्तरपदवृद्धिः। पूर्वपञ्चालभवे। पूर्वं पञ्चालानाम् एकदेशिस० तत्र भवः अपि तु नोत्तरपदवृद्धिः। पौर्वपञ्चाल इत्येव त्रि० कौ०।

पूर्व(र्व)पाटलिपुत्रक त्रि० पूर्वपाटलिपुत्रे भवः वुञ् न पूर्वपदवृद्धिः। पूर्वपाटलिपुत्रनगरभवे। [औ०४।६।४

पूर्व(र्वं)पाद पु०पूर्वं पादस्य एकदेशिस०। अग्रचरणे काल्या०

पूर्व(र्वं)पालिन् पु०पूर्वं देशं दिशं वा पालयति पालि-णिनि। १पौरस्त्यदेशपतिस्तत्पभेदे २पूर्वदिग्गोपे इन्द्रे च। [१ज०]

पूर्व(र्वं)पितामह पु०पूर्वः पितामहात्। प्रपितामहे भा०वि०

पूर्व(र्वं)पोठिका स्त्री कर्म०। कथाग्रन्थावतरणिकाभेदे।

पूर्व(र्वं)पुरुष पु० कर्म०। पित्रादित्रिके पुरुषे।

पूर्व(र्वं)पूर्व(र्वं) त्रि० पूर्व+वीप्सायां द्वित्वम्। वीप्सार्थके पूर्वशब्दार्थे। [अक्षेपशब्दे तदीयादि दृश्यम्।

पूर्व(र्वं)फल्गुनी स्त्री अश्विन्यादिषु एकादशे नक्षत्रे।

पूर्व(र्वं)फल्गुनीभव पु० पूर्व(र्वं)फल्गुन्यां भवति भू-अच्। दृष्टस्मृतौ शब्दभाषा।

पूर्व(र्वं)भ(भा)द्रपदा स्त्री भद्रस्य इदमस्येव पदं चरणमस्य तस्येदमण् वा कर्म०। अश्विन्यादिषु पञ्चविंशतितमनक्षत्रे तत्स्वरूपादिकं अक्षेपशब्दे उक्तम्।

पूर्व(र्वं)भाव पु० पूर्वो भावः। १पूर्ववर्त्तित्वे कारणत्वे "येन सह पूर्वभावः कारणमादाव वस्तु" माधा० कर्म०।

२पूर्ववर्त्तिनि भावे पदार्थधर्ममेदे अङ्गारस्य पूर्वरागापरपर्य्याये ३भावभेदे ।

पूर्व(र्वं)भाविन् त्रि० पूर्वं भवति भू-णिनि । १कारणे २पूर्ववर्तिनि पदार्थमात्रे च सा०द० १ ७५ ।

पूर्व(र्वं)यत्त पु० नित्यक० । मधिमद्रादौ जिनोत्तमे त्रिका०

पूर्व(र्वं)रङ्ग पु०पूर्वं रज्यतेऽस्मिन् रज-आधारे घञ् । "यद्यास्य वस्तुनः पूर्वं रङ्गविघ्नोपशान्तये । कुशीलवाः प्रकुर्वन्ति पूर्व(र्वं)रङ्गः स उच्यते" दशरूपकोक्ते नान्दीपाठादौ ।

पूर्व(र्वं)राग पु० पूर्वो रागः । नायकयोर्मेलनात् पूर्वजाते अहरागभेदे "अवणाद्दर्शनाद्वापि मिथःसंवृद्धरागयोः । दशाविशेषो योऽप्राप्तौ पूर्वरागः स उच्यते । अवणन्तु भवेत्तत्र दूतवन्दिसखीमुखात् । रन्ध्रजाले च चित्रे च साक्षात् स्वप्ने च दर्शनम् । अभिलाषचिन्ता स्मृतिगुणकथनोद्वेगसंप्रलापाश्च । उन्मादोऽथ व्याधिर्जड़ता मृतिरिति दशास्य कामदशाः । अभिलाषः स्पृहा चिन्ता प्राप्त्युपायादिचिन्तनम् । उन्मादस्तापरिच्छेदशून्येतनाचेतनेष्वपि । अनवस्थावाक् प्रलापः स्यात् चेतसो भ्रमणादूहनम् । व्याधिस्तु दीर्घनिःश्वासः पाण्डुताकृशतादयः । जड़ता हीनचेष्टत्वमङ्गानां मनसस्तथा । रसविच्छेदहेतुत्वान्मरणं नैव वर्ण्यते । जातप्रायन्तु तद्वाच्यं चेतसा चापि काङ्क्षितम् । "वर्ण्यतेऽपि यदि प्रत्युज्जीवनं स्यादुरतः" । "आदौ वाच्यः स्त्रिया रागः पुंसः पश्चात्तदिङ्गितैः । लौकीकस्तुल्यमञ्जिष्ठः पूर्वरागोऽपि च त्रिधा । न चातिशोभते यत्नादैति प्रेम मनोगतम् । तद्धीरोदात्तमाख्यान्ति यथा श्रीरामसीतयोः । कुसुम्भरागं तं प्राहुर्यदपैति च शोभते । मञ्जिष्ठरागमाहुस्तं यत्नापैत्यतिशोभते" सा० द० ।

पूर्व(र्वं)रात्र पु० पूर्वं रात्रेः एकदेशिस० अच्समा० रात्रान्तत्वात् पुंस्त्वम् । रात्रेः पूर्वभाग्ये ।

पूर्व(र्वं)रूप न० कर्म० अर्थालङ्कारभेदे अवङ्कारशब्दे ४००पृ० दृश्यम् । भविष्यद्भोगस्य प्रागज्ञातरूपे तस्य लक्षणविशेषो भाविरोमञ्चत्वं चोक्तं यथा

"प्राप्यूपं येन लक्ष्यते । उत्पतितसुरामयो दोषविशेषेऽनधिष्ठितः । लिङ्गमव्यक्तमत्यत्वादित्यस्यार्थमाह स एव "प्राप्यूपमित्यनेन पूर्वोक्तेन सम्बन्धि लिङ्गं लक्षणम् अव्यक्तं नाभिव्यक्तं तत्र हेतुरल्पत्वात् नत्वावरणादिदोषादव्यक्तत्वमित्यर्थः । अन्ये तु पूर्वरूपलक्षणमाहुः "स्वानसंश्रियवः कृत्वा भाविव्याधिप्रबोधनम् । दोषाः कुर्वन्ति यल्लिङ्गं पूर्वरूपं तदुच्यते" इति । संक्षेपतस्तु लक्षणं भाविव्याधिबोधकमेव लिङ्गं पूर्वरूपम्" इति माधवकरविजयरक्षितौ ।

पूर्व(र्वं)वत् अव्य० पूर्वमेव पूर्वेण तुल्यं वा क्रियायते । १पूर्वेण तुल्यक्रियान्वितभेदे पूर्वस्य २तुल्ये च । पूर्वं कारणं विषयतयास्त्यस्य मतुप् मस्य वः । १कारणेन कार्य्यानुमाने न० । "अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत्सामान्यतोदृष्टञ्च" गौत० सू० । "पूर्वं कारणं तद्वत् कारणलिङ्गकम् यथा मेघोन्नतिविशेषेण कार्य्यानुमानमिति" गौत० वृत्तिः । "तत्रैकं दृष्टलक्षणसामान्यविषयं यत् तत् पूर्ववत्, पूर्वं प्रसिद्धं दृष्टलक्षणसामान्यमिति यावत् तदस्य विषयत्वेनास्त्यनुमानज्ञानमिति पूर्ववत् यथा धूमादग्निरित्यसामान्यविशेष पर्वतेऽनुमीयते तस्य च वह्निसामान्यविशेषस्य सलक्षणो वह्निविशेषो दृष्टो रसवत्याम्" सां०त०कौ० ।

पूर्व(र्वं)वयस् त्रि० पूर्वं वयः बाल्यावस्थाभेदोऽस्य । १बाल्यावस्थान्विते । कर्म० । २बाल्यावस्थायाम् न० । वेदे बा० अच्समा० । पूर्ववयस वाल्यवयसि न० । शत०ब्रा०१२।२।३।४।

पूर्व(र्व)वर्त्तिन् त्रि॰ पूर्वं वर्त्तते वृत-णिनि। व्यवधा-रिद्विभूम्ये १प्राग्वर्त्तिनि कारके २प्राग्वर्त्तिमात्रे च त्रि॰।

पूर्व(र्व)वाद पु॰पूर्वो वादः। व्यवहारे प्रथमावेदने पक्षभाषा-ऽपरपक्षीये पूर्वपक्षवादे। "पूर्ववादं परित्यज्य योऽन्य-मालम्बते पुनः। पदसंक्रमणात् स्रेयो हीनवादी स वै नरः" मिताक्षरा।

पूर्व(र्व)वादिन् त्रि॰ पूर्वं वदति वद-णिनि। पूर्ववादकारके व्यवहारे प्रथमावेदनकर्त्तरि ऋर्थिनि। "मिथ्योक्तौ पूर्व-वादी तु प्रतिपत्तौ न सा भवेत्"। "मिथ्योत्तरे पूर्ववादी कारके प्रतिवादिनि च" मिता॰।

पूर्व(र्व)वार्षिक त्रि॰पूर्वं वर्षाणाम् एकदेशिस॰ ततः "कालात् ठञ्" पा॰ ठञ् "अव्ययवाडतोः" पा॰ उत्तरपदवृद्धिः। वर्षाणां पूर्वभागभवे अव्ययवादिलुक्तेः पूर्वासु वर्षासु भवः इत्यर्थे ठञि पूर्वपदवृद्धिः पौर्ववर्षिक इत्येव सि॰ कौ॰।

पूर्व(र्व)वाह पु॰ पूर्वं वयसि वहति वह-णिच ७त॰। पूर्व-वयसि वाहके शत॰ब्रा॰ २।१।४।१७।

पूर्व(र्व)वृत्त न॰पूर्वं वृत्तम्। कर्म॰। प्राचीने वृत्ते वृत्तिहासे।

पूर्व(र्व)शारद त्रि॰ पूर्वं शरदः एकदेशिस॰। तत्र भवः अण् "अव्ययवाडतोः" पा॰ उत्तरपदवृद्धिः। शरदः पूर्वभवे।

पूर्व(र्व)शैल पु॰ कर्म॰। पूर्वाचले जटा॰। पूर्वाचलादयोऽप्यत्र।

पूर्व(र्व)शकथ्य न॰ पूर्वं शकथ्नः एकदेशिस॰अच्समा॰। शकथ्नः पूर्वभागे। [दयोऽप्यत्र।

पूर्व(र्व)समुद्र पु॰ कर्म॰। पूर्वदिग्भिनि समुद्रे पूर्वसागरा-

पूर्व(र्व)सर त्रि॰ पूर्वः सृ सरति कर्त्तरि अप पदे एव स+ट अप॰ स॰। पूर्वभूयगामिनि स्त्रियां ङीप्। अन्यत्र पूर्वं सरतीति वाक्ये अण् पूर्वसार अप-गामिनि त्रि॰।

पूर्वा(र्वा)तिथि पु॰ गोलप्रवर्द्धिभेदे।

पूर्वा(र्वा)दि पु॰ पूर्वः आदिर्यस्य। व्यवस्थावाससंज्ञायां सर्व-नामकर्मनिमित्ते १शब्दगणे स च गणः"पूर्व पर अवर द-क्षिण उत्तर अपर स्व-अन्तर।"पूर्वादिभ्यो नवभ्यो वा"पा॰ पूर्वे पूर्वा इत्यादि। पूर्वा आदिर्येषाः।२पूर्वादिकुक्षि स्त्री

पूर्वा(र्वा)निलः पु॰ कर्म॰। पूर्वदिक्प्रवायौ तद्गुणाद्य "पूर्वस्तु मधुरो वातः स्निग्धः कटुरसान्वितः। गुरुर्विदाह-श्रमनो वातदः पित्तनाशनः" राजनि॰। "प्राग्वातो मधुरः स्निग्धो बल्यिमान्द्यकरो गुरुः। वैरस्यगौरवो-ष्णत्वानि करोत्यश्लोषधौषु च। भग्नोत्पिष्टक्षतार्त्तेषु रागशोथप्रदाहकृत्। सन्निपातज्वरश्वासकासमेदोऽर्शो विषक्रिमीन्। कोपयेदामवातञ्च घनसंघातकारणम्" राजवल्लभः।

पूर्वा(र्वा)नुयोग पु॰ दृष्टिवादभेदे "प्रतिकर्मस्तवपूर्वानुयोग पूर्वगतचूलिकाः। पञ्च श्रुतदृष्टिवादभेदाः" हेम॰।

पूर्वा(र्वा)पर त्रि॰द्वन्द्व॰। पूर्वश्चिन् अपरश्चिन् च देये तयो-र्भावः ष्यञ्। पौर्वापर्य्य तद्भावे न॰। क्वचित्र पूर्वपद वृद्धिः। पूर्वापर्य्य तत्रार्थे न॰।

पूर्वा(र्वा)पहाना स्त्री पूर्वमपक्षीयते अप-हा-कर्मणि ल्युट् अजा॰ टाप्। पूर्वापहानकर्मणि अजादिगणः।

पूर्वा(र्वा)ह्णिक त्रि॰ पूर्वाह्णे भवः पचे यत्। पूर्वाह्णभवे। पचे ठञ्। पौर्वा(र्वा)ह्णिक तत्रार्थे त्रि॰।

पूर्वा(र्वा)षाढा स्त्री कर्म॰। अश्विन्यादिषु विंशे नक्षत्रे तत्-स्वरूपादिकमक्षेषाशब्दे उक्तम्।

पूर्वा र्वा)ह्ण पु॰ पूर्वभागः एकदेशिस॰ टच्समा॰ अह्नादेशः "रात्राह्नाह्नाः पुंसि" पा॰ पुंस्त्वम्। दिनस्य पूर्वभागे पूर्वाह्णश्च त्रिधा विभक्तदिनस्य प्रथमभागः। "पूर्वाह्णो वै देवानां मध्याह्नो मनुष्याणामिति"श्रुतिः। अह्नः प्रथम-प्रहरद्वयकालश्च। "आवर्त्तनात्तु पूर्वाह्णो ह्यपराह्णस्ततः परम्"स्कन्दपु॰। "आवर्त्तनात् पश्चिमदिग्वर्त्तिभायायाः परिवर्त्तनम्"। अतएव "अश्वत्थं वन्द्येद्विप्रं पूर्वाह्णे प्रहरद्वये" भक्त॰त॰।

पूर्वा(र्वा)ह्ण(ह्णे)तन त्रि॰ पूर्वाह्णे काले भवः ट्यु तट् च "कालतनेति" सप्रत्ययानलुक्। १पूर्वाह्णभवे स्त्रियां ङीप्। पूर्वाह्णः षोडाऽस्य इति विग्रहे तु पूर्वाह्णतन इत्येव। २पूर्वाह्णसङ्घनकर्त्तरि त्रि॰।

पूर्वा(र्वा)ह्णिक त्रि॰ पूर्वाह्णः साधनतयाऽस्त्यस्य ठन् पूर्वाह्ण-साध्ये कर्मणि। "देवं पूर्वाह्णिकं कुर्यादपराह्णे तु पैत्रकम्" भा॰ श्रा॰ २५ अ॰।

पूर्वि(र्वि)न् त्रि॰पूर्वं कृतमनेन "पूर्वादिनिः"पा॰इनि। १पूर्व क्रियाकारके। भेदे तु "पूर्वैः कृतमिनयौ च" पा॰ इन। पूर्वेण पूर्वैः कृते "आयान्तु नः पितरः सोम्यासो गम्भी-रेभिः पथिभिः पूर्विभिः" पित्रावाहनमन्त्रः। छान्दसी रूपसिद्धिः। [स्मिन् दिने इत्यर्थे।

पूर्वे(र्वे)द्युस् अव्य॰ पूर्वस्मिन् अहनि पूर्व(र्व)+एद्युस्। पूर्व-

पूर्वे(र्वे)धुकामशमी स्त्री कर्म॰। पूर्वदिग्वर्त्तिनगरभेदे अनोदात्तताऽस्य। पूर्वेधुकामशम्यां भवः अण् उत्तरपद-वृद्धिः पूर्वेधुकामशम तद्भवे त्रि॰। [ईशानकोणे विदिशि।

पूर्वी(र्वी)त्तरा स्त्री पूर्वस्याः उत्तरस्यामालराला दिक् ब॰स॰।

पूर्व्य(र्य्य) त्रि॰ पूर्वैः कृतम् "पूर्वैः कृतमिनयौ" पा॰ यत्ने य। पूर्वैः कृते पुराणे निघण्टुः।

पूल संहतौ (राशीकरणे) वा चु॰ उभ॰ पक्षे भ्वा॰पर॰सक॰ सेट्। पूलयति ते पूलति। अपुपूलत् त अपूलीत्।

पूलक पु॰ पूल-ण्वुल्। १हरिद्रादेशभेदे २धान्यतृणादिमुष्टौ कात्या॰श्रौ॰ २२।३।१०।

पूलाक पु॰ पूलाक+पृषो॰। तृणधान्ये। तस्य विकारः अवयवो वा पलाशा॰ अञ्। पौलाक तदवयवे तस्य विकारे च त्रि॰।

पूलास त्रि॰ पूल-राशीकरणे घञ् तमस्यति अस-क्षेपे अण्। तृणादिस्तूपविक्षेपके तेन निर्वृत्तम् सङ्घा॰ अण्। पौलास तन्निर्वृत्ते त्रि॰।

पूलासककुण्ड न॰ कुण्डस्य पूलासकः राजद॰ परनि॰। कुण्डस्य तृणादेर्निरासके।

पूलिका स्त्री पूरिका+रस्य लः। पूपभेदे हेमच॰।

पूष इङौ अक॰भ्वा॰पर॰सेट्। पूषति अपूषीत्। पुपूष।

पूष पु॰ पूष-इङौ क। ब्रह्मदारुदण्डे (तत) अमरः।

पूषक पु॰ पूष-ण्वुल्। ब्रह्मदारुदण्डे राजनि॰।

पूषणा स्त्री पूष-ल्यु। कुमारानुचरमातृभेदे भा॰शा॰३७अ॰। पूष्णः पृथिव्याः इदम् अण् वेदे न वृद्धिः नोपधा लोपः। पार्थिवे पदार्थे त्रि॰ ऋ॰१०।५।६।

पूषदन्तहर पु॰ पूष्णः सूर्यभेदस्य दन्तं हरति हृ-अच। दक्षयज्ञकाले पूष्णो दन्तोत्पाटके शिवांशे वीरभद्रे शब्दरत्ना॰ ११३ पृ॰ दृश्यम्।

पूषघ्न पु॰ वैवस्वतमनोः पुत्रभेदे। मार्कण्डे॰ १११ अ॰।

पूषन् पु॰ पूष-कनिन्। १सूर्य्ये आदित्यभेदे भा॰ आ॰ ६ अ॰ ऊदे तु पूष्णि पूषणि पूषि। २पृथिव्यां स्त्री निघण्टुः। पूषणा शब्देऽस्यार्थः। अयमन्तोदात्तः। आर्द्धधा॰ क। तत्रार्थे। पूषा अस्यास्य सदृप् वेदे क्विप् वत्वम्। पूषवत् सूर्य्ययुक्ते पृथिवीयुक्ते च त्रि॰। ऋ॰१।८२।६।भा॰ [जटाध॰।

पूषभासा स्त्री पूषेव भासते भास-अच्। इन्द्रनगर्य्याम्

पूषराति पु॰ पूषा तदाख्यो देवो रातिर्दाता यस्य। सूर्य्यदेवे वसुनि ऋ॰ १।२१।८।

पूषाजज पु॰ ६त॰। १मेघे २रुद्रे देवे च। "आदित्याज्जायते वृष्टिरित्युक्तेर्वृष्ट्यधिपमेघस्य आदित्याज्जायमानत्वात् तथात्वम्। "वृष्टिम् पूषानुजो यथा" भा॰ व॰२० अ॰। तत्र पूषाजजेति पाठान्तरं वृष्ट्यधिपस्य मेघस्य सूर्य्याज्जातत्वात् तथात्वम्।

पूषासुहृत् पु॰ ६त॰। शिवे तस्य सांशवीरभद्रेण पूष्णो दन्तोत्पाटनात् तथात्वम्। अदन्तशब्दे दृश्यम्।

पृ व्यापारे तु॰आत्म॰अक॰ अनिट् प्रावेण्यार्थम् आङ्पूर्वः। व्यापियते व्यापृत। व्यापपिरे। व्यापियते। व्यापृतः व्यापारः। [अपारीत्। पपार।

पृ प्रीतौ अक॰ प्रीणने सक॰ भ्वा॰ पर॰ अनिट्। पृणोति

पृ पालने पूरणे च जुहो॰ पर॰ सक॰अनिट् वा दीर्घे सेट्। पिपर्त्ति पिपृतः पिपूर्त्तः। अपारीत्-अपारीत्। पपार पप्रतुः पपरतुः। पूर्णः।

पृ पूर्त्तौ चु॰ उभ॰ सक॰ सेट्। पारयति ते-अपीपरत्-त।

पृक्का स्त्री पृच-कनृ न्यङ्क्वा॰ कुत्वम्। (पिड़िङ्) शाकभेदे रत्नमाला।

पृक्त त्रि॰ पृच-क्त। १सम्बन्धे २अन्ने न॰ हेमच॰।

पक्ति स्त्री पृच-भावे क्तिन्। १सम्पर्के २स्वर्गे च अमरः।

पृक्षस् पु॰ पृच-क्सि सुट् च। अन्ने निघण्टुः। ऋ॰ १।७।१०।

पृक्षे अव्य॰ पृच-क्सि। संग्रामे निघण्टुः ऋ॰ १।६१।२

पृक्षुध् स्त्री प्र+क्षुध्-क्विप् वेदे वा॰ प्रस्य सम्प्रधारणम्। प्रकृष्टक्षुधायाम् ऋ॰ १।१४१।४। [दैदित्। पुक्ष्णः।

पृच सम्पर्के अदा॰आत्म॰अक॰सेट्। पृक्ते अपर्चिष्ट। पपृचे

पृच संयमने सक॰ सम्पर्के अक॰चु॰उभ॰पक्षे भ्वा॰पर॰सेट्। पर्चयति-ते पर्चति। अपीपृचत्-त अपप्रर्चत्-त अपचीत्। [कथनाय प्रेरणे अमरः।

पृच्छा स्त्री प्रच्छ-अङ् संप्रसारणम्। प्रश्ने ज्ञातुमिच्छया

पृच्छ त्रि॰ प्रच्छ-वा॰ कर्मणि क्यप् सक्॰। जिज्ञासे।

पृज सम्पर्के, अदा॰ वा॰ अक॰ सेट्। पृक्ते अपर्जिष्ट। दैदित् पृग्ण्वः।

पृड भर्त्सने तु॰पर॰अक॰सेट्। पृडति। अपर्डिष्ट पपृडे।

पृण तर्पणे तु॰पर॰सक॰सेट्। पृणति अपर्णीत्। पपर्ण।

पृत् स्त्री पृ-पालने क्विप्। सेनायाम् ऋ॰ २।२७।१५।

पृतना स्त्री पृ-तनन्-किच्च। १सेनायाम् २सङ्ग्रामविशेषान्वितरथहस्त्यश्वादिसैन्यभेदे च (रथाः २४१ मताः २४३ अश्वाः ७२६ पदातयः १२१५)। अमरः। अनीकिनी शब्दे १६६ पृ॰ रथादिसंख्या दृश्या। ३संग्रामे ४मनुष्ये च निघण्टुः।

पृतनाज्य न॰ संग्रामे निघण्टुः। "पृतनाषाळजनाद्वा पृतनाज्यं जयनाद्वा" निरु॰ ६।२४।

पृतनासाह् पु॰ पृतनां सहते सह-क्विप्। इन्द्रे त्रिका॰।

ऋस्य ऋति पदान्ते च सस्य षत्वम्। पृतनाषाट् अन्यत्र न षत्वम् पृतनासाहम् इत्यादि।

पृत्सुधः पु० पृत्सु धीयते धा-कर्मणि घञर्थे क अलुक्स०। १संग्रामे निघण्टौ पाठान्नरम्।

पृथ प्रक्षेपे चुरा०उभ०सक०सेट्। पार्थयति-ते अपीपृथत् त अपपर्थत्-त। [अमरः।

पृथक् अव्य०पृथ-वा०ककि। १भिन्ने २नानारूपे ३विनार्थे च।

पृथक्त्व न० पृथक् इत्यस्य भावः त्व। वैशेषिकोक्ते पृथक्त्वबुद्धिसम्पादके गुणभेदे। तत्परीक्षा च कणा० सू० इत्यादर्शिता यथा "तथा पृथक्त्वम्" सू०। "एकत्वतुल्यतयैकपृथक्त्वमपि साधयितुमाह अपोद्धार व्यवहारस्तावदस्ति इदमस्मात् पृथगन्यदर्थान्तरमित्याकारः अपरिच्छिन्नावधिमपेक्ष्य य उद्धारो निर्द्धारणं सत्तापोद्धारः तत्र च न रूपादि तन्त्वं व्यभिचारादवध्यनिरूप्यत्वाच्च। नन्वन्योन्याभाव एव पृथक्त्वम् इदमस्मात् पृथगन्यदर्थान्तरमितिपद्धिन्नमिति प्रतीतेरन्योन्याभावावलम्बनत्वात्, न, पृथगादिशब्दानां पञ्चम्यन्तेऽपि नान्योन्याभावार्थत्वं तत्र पञ्चमीप्रयोगानुपपत्तेः इदमस्मात् पृथक् इदमिदं न भवतीति प्रतीत्योर्भिन्नविषयत्वात्, न चान्योन्याभावानर्थः पृथक्त्वम् अघटः पट इत्यत्रापि पञ्चमी प्रयोगापत्तेः। ननु पृथमिति विशिष्ट इति प्रतीत्योरेकाकारत्वाद्वैशिष्ट्यमेव पृथक्त्वमिति चेन्न मैत्रस्य दण्डवैशिष्ट्यदशायां मैत्रात् पृथगयं मैत्र इत्यपि प्रतीत्यापत्तेः। एवं शब्दविशिष्टे व्योम्नि बुद्धिविशिष्टे चात्मनि पृथक्त्वव्यवहारापत्तेः। अतएव वैधर्म्यमपि न पृथक्त्वं पाकरक्ते घटे शुक्लाभावात् पृथगयं घट इति व्यवहारापत्तेः तद्विरोधिधर्मवत्त्वमेव हि तद्वैधर्म्यं तच्च शुक्लाभावनान्तरं रक्तताद्दशायामपि। न च सामान्यमेव पृथक्त्वं सामान्यस्यावध्यनिरूप्यत्वात् जातिसङ्करप्रसङ्गाच्च। सत्तामात्रवृत्तित्वे सत्तया, द्रव्यमात्रवृत्तित्वे द्रव्यत्वेनान्यूनानतिरिक्तवृत्तित्वापत्तेः" इत्तिः। "एकत्वैकपृथक्त्वयोरेकत्वैकपृथक्त्वाभावोऽणुत्वमहत्त्वाभ्यां व्याख्यातः" क०सू०। "नन्वेकमेकत्वं रूपादिभ्यः पृथक्पृथक्त्वमिति व्यवहारादेकत्वेऽप्येकं पृथक्त्वेऽपि पृथक्त्वमेवं तत्र तत्राभीष्टत आह यथाऽणुत्वमहत्त्वे नाणुत्वमहत्त्ववती तद्व्यवहारस्तत्र भाक्तस्तथैकत्वैकपृथक्त्वे नैकत्वैकपृथक्त्ववती तद्व्यवहारस्तत्र भाक्त इत्यर्थः। कर्मभिः कर्माणि गुणैर्गुणाः इत्यपि दृष्टान्तसङ्गतिरयं पूर्वदृष्टान्तसङ्गत्यैकवाक्यतापन्नमेवात्र भासते यथा कर्माणि न कर्मवन्ति गुणाश्च न गुणवन्तस्तथैकत्वैकपृथक्त्वे न तद्वतो इत्यर्थः" इत्तिः।

पृथक्त्वचा स्त्री पृथक् त्वचा यस्याः। अजमोदायाम्। रत्नमा०

पृथक्पर्णी स्त्री पृथक् पर्णान्यस्याः ङीप्। (चाकुलिया) क्षुपभेदे अमरः।

पृथक्क्षेत्र पु० पृथक् भिन्नं क्षेत्रमुत्पत्तिस्थानमस्य। एकस्मात् पितुर्विभिन्नमातृजाते पुत्रे मिता०। [१भेदे २विशेषे।

पृथगात्मता स्त्री पृथक् आत्मा स्वरूपं यस्य तस्य भावः तल्। पृथगात्मिका स्त्री पृथक् आत्मा स्वरूपं यस्याः कप् नलोपे कापि अत इत्त्वम्। व्यक्तौ। बहुत्वे नैकरूपाणामपि वृक्षीणां महानसीयत्वादिरूपेण तेषां स्वरूपभेदात् तथात्वम्।

पृथग्जन पु० पृथक् भिन्नो जनो महाजनो यस्मात्। १नीचे २मूर्खे ३शत्रौ च अमरः। [अमरः।

पृथग्विध त्रि० पृथक् भिन्ना विधा यस्य। नानारूपे

पृथग्बीज पु०पृथक् बीजान्यस्य। भल्लातवृक्षे (भेला) राजनि०

पृथा स्त्री कुन्तिभोजकन्यायाम् कुन्त्याम् जटाधरः।

पृथाज पु० पृथायां जायते जन-ड उत०। १युधिष्ठिरादौ कुन्तीपुत्रे २अर्जुनवृक्षे राजनि०।

पृथापति पु० ६त०। पाण्डुराजे त्रिका०।

पृथिका स्त्री पृथ्यधर्मे-क स्वार्थे क यतपद्यास्तु अत इत्त्वम्। यतपद्यास् शब्दमाला।

पृथिन् पु० प्रथ-वा० किनि संप्र०। वेनपुत्रे नृपनामके नृपे "पृथी ह वै वैन्यो मनुष्याणां प्रथमोऽभिषिषेचे" शत०ब्रा०५।३।५।४ "पृथी यद्वां वैन्यः" ऋ०८।८।१०"लोकेऽस्य पृथुसंज्ञा"।

पृथ्व(थि)वी स्त्री प्रथते विस्तारमेति प्रथ-क्विन् (प्रथन्) वा नि० संप्रसारणं पित्त्वात् ङीष् पृथो० वा ह्रस्वः। धरायाम् क्षितौ तद्गुणादिकं यथा

"रूपद्रव्यत्वप्रत्यक्षयोगि स्यात् प्रथमत्विकम्। गुरुत्वी हे रसवती द्वयोर्नैमित्तिकोद्भवः। स्पर्शादयोऽन्ये वेगश्च द्रव्यत्वञ्च गुरुत्वकम्। रूपं रसस्तथा स्नेहो वारिण्यन्ते चतुर्दश। स्नेहहीना गन्धयुता क्षितावेते चतुर्दश"। "तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता। षड्विधस्तु रसस्तत्र गन्धोऽपि द्विविधो मतः। स्पर्शस्तु तत्रा विज्ञेयो ह्युष्णाशीतपाकजः। नित्या नित्या च सा द्वेधा नित्या स्यादणुलक्षणा। अनित्या तु तदन्या स्यात् सैवावयवयोगिनी। सा च त्रिधा भवेद्देहेन्द्रियं विषयस्तथा। योनिजादिभेदेद्देहमिन्द्रियं ग्राणलक्षणम्।

विषयो द्व्यणुकादिषु ब्रह्माण्डान्त उदाहृतः" भाषाप० तस्या अध्यात्मादिभेदा यथा "पृथिवी पञ्चमं भूतं ब्राह्मणाध्यात्मसञ्ज्ञते। अधिभूतं तथा गन्धो वायुस्तत्राधिदैवतम्" भा०आश्व० ४२ अ०। तस्या उत्पत्तिकारणं यथा "श्रूयतां वसुधाजन्म सर्वमङ्गलकारणम्। विघ्नविघ्नकरं पापनाशनं पुण्यवर्द्धनम्। अहो केचिदहंमोति मधुकैटभमेदसा। बभूव वसुधा जन्म तद्विरुद्धमतं शृणु। जघतस्तौ पुरा विष्णुं क्षुब्धौ युद्धेन तेजसा। आवां जहि न यत्नोर्वी पाथसा संप्लवेति च। तयोर्जीवनकाले च प्रलयो साऽभवत् स्फुटम्। ततो बभूव मेदश्च मरणस्थान्तरत्नयोः। मेदिनीति च विख्यातेत्युक्ता यैस्तन्मतं शृणु। जलौता तथा पूर्वं वर्द्धिता मेदसा यतः। कथयामि च तज्जन्म सार्थकं सर्वसम्मतम्। पुरा सुतं यत् सुमुखं धर्मवक्त्राच्च पुष्करे। महाविराट् शरीरस्य जलस्थस्य चिरं स्फुटम्। मलो बभूव कालेन सर्वाङ्गव्यापको ध्रुवम्। स च प्रविष्टः सर्वेषां तल्लोम्नां विवरेषु च। कालेन महता तस्माद्बभूव वसुधा सुने!। प्रलये प्रतिलोम्नाञ्च कूपेषु सा स्थिरा स्थिता। आविर्भूता तिरोभूता सा जले च पुनःपुनः। आविर्भूता सृष्टिकाले तज्जलोपर्यवस्थिता। प्रलये च तिरोभूता जलाभ्यन्तरवस्थिता। प्रतिविश्वेषु वसुधा सैलकाननसंयुता। सप्तसागरसंयुक्ता सप्तद्वीपयुता सती। हिमाद्रिमेरुसंयुक्ता सप्तचन्द्रार्कसंयुता। ब्रह्मविष्णुशिवाद्यैश्च सुरैर्लोकैस्सदाऽन्वये। पुण्यतीर्थसमायुक्ता पुण्यभारतसंयुता। पातालसप्त तदधस्तद्वूर्द्धं ब्रह्मलोकतः। ब्रह्मलोकश्च तत्रैव सर्वविश्वञ्च तत्र वै। एवं सर्वाणि विश्वानि पृथिव्यां निर्मितानि च। जह्नौ गोलोकवैकुण्ठौ शिवौ विश्वपरौ च तौ। नक्षत्राणि च विश्वानि सर्वाणि क्षितिमाणि च। प्रलये प्राकृते ब्रह्मन्! ब्रह्मणश्च निपातने। महाविराड़ादिसृष्टौ सृष्टेः क्षणेन चाज्ञया। नित्यैः स्थिता च प्रलये कालाकाशेश्वरैः सह। शिवाधिष्ठातृदेवी सा वाराहे पूजिता सुरैः। मुनिभिर्सिद्धिभिर्विप्रैर्गन्धर्वादिभिरेव च। विष्णोर्वराहरूपस्य पत्नी सा श्रुतिसम्मता। ततपुत्रो मङ्गलो देवो यष्टेशो मङ्गलाग्रजः। भवनं यत्र सर्वेषां भूमिरिक्तेन कीर्त्तिता। वसुरत्नं सा दधाति वसुधा सा वसुन्धरा। धरेरूरौ च या जाता सा चोर्वी परिकीर्त्तिता। धरा धरित्री धरणी सर्वेषां धारणात्तु या। इलायां यामाधाराच्च चौणी क्षोणा क्षये च या। महाक्षये क्षयं याति क्षितिस्तेन प्रकीर्त्तिता। काश्यपी कश्यपस्येवमचला स्थिररूपतः। विश्वम्भरा तद्धरणाज्जानन्नानन्तरूपतः। पृथिवी पृथुकन्यात्वादुर्विस्तृतत्वात् महासने!" ब्रह्मवै०प्र०ख०३अ०।

तस्याः सर्वसङ्ख्येऽपि केषाञ्चित् भारासङ्कनकथा यथा "कृष्णभक्तिविहीना ये ये च तद्भक्तनिन्दकाः। तेषां महार्त्तकिनामशक्ता भारधारणे। स्वधर्माचारहीना ये नित्यकृत्यविवर्जिताः। श्रद्धाहीनाश्च वेदेषु तेषां भारेण पीड़िता। पितृमातृगुरुस्त्रीणां पोषणं पुत्रपोष्ययोः। ये न कुर्वन्ति तेषाञ्च न शक्ता भारधारणे। ये मिथ्यावादिनस्तात! दयासत्यविहीनकाः। निन्दका गुरुदाराणां तेषां भारेण पीड़िता। मित्रद्रोही कृतघ्नश्च मिथ्यासाक्ष्यप्रदायकः। विश्वासघ्नः स्थापहारी तेषां भारेण पीड़िता। कल्याणयुक्तनामानि हरेर्नामैकमङ्गलम्। कुर्वन्ति विक्रयं ये वै तेषां भारेण पीड़िता। जीवघाती गुरुद्रोही ग्रामयाजी च लुब्धकः। शूद्राद्रोही शूद्रभोजी तेषां भारेण पीड़िता। पूजाव्रतोपवासादि व्रतानि नियमानि च। ये ये मूढा विकुर्वन्ति तेषां भारेण पीड़िता। सदा हिंसन्ति ये यज्ञा गोविप्र सुरवैष्णवान्। हरिं हरिकथां भक्तिं तेषां भारेण पीड़िता। शङ्खादीनाञ्च भारेण पीड़िताऽहं यथा विधे!। ततोऽधिकेन दैत्यानां तेषां भारेण पीड़िता" ब्रह्मवै० जन्मख० ४ अ०।

पृथिवीचित् पु० चि–ऐश्वर्य्ये क्विप् ह्रस्व०। भूमीशे क्षत्रिये।

पृथिवीक्षय पु० पृथिवीं क्षयति क्षि-बा० क्षय् सम् च। दानवभेदे हरिवं० २३२ अ०।

पृथिवीतीर्थ न० तीर्थभेदे भा० वन० ८२ अ०।

पृथिवीपति पु० ६त०। १भूमिपतौ राजनि २क्षत्रियनामोषधौ च मेदि०। ३यमे हेम०। पृथिवीनाथादयोऽपि राजनि।

पृथिवीपाल पु० पृथिवीं पालयति पालि–अण् उप०स०। भूमिपाले। ख्वुञ्। पृथिवीपालक तत्रार्थे पु०।

पृथिवीभुज् पु० पृथिवीं भुनक्ति भुज पालने क्विप्। भूपाले क०। पृथिवीभुजोऽपि तत्रार्थे।

पृथिवीरुह पु० पृथिव्यां रोहति रुह–क। भूमिरुहे वृक्षे।

पृथिवीशक्र पु० पृथिव्यां शक्र इव। राजनि हेमक०। पृथिवीन्द्रभूभीन्द्रादयोऽत्र।

पृथु त्रि॰ प्रथ–कु नुम॰। १विस्तीर्णे स्त्रियां गुणवचनोदन्तत्वात् ङीप्। २आदिराजे वेनपुत्रे सूर्य्यवंशजे नृपभेदे पु॰ तदुत्पत्तिकथा भाग॰ ४।१५ अ॰।

अथ तस्य (वेनस्य) पुनर्विप्रैरपुत्रस्य महीपतेः। बाहुभ्यां मथ्यमानाभ्यां मिथुनं समपद्यत। तदृष्ट्वा मिथुनं जातमृषयो ब्रह्मवादिनः। ऊचुः परमसन्तुष्टा विदित्वा भगवत्कलाम्। एष विष्णोर्भगवतः कला भुवनपालिनी। इयञ्च लक्ष्मीः संभूतिः पुरुषस्यानपायिनी। अत्र यः प्रथमो राज्ञां पुमान् प्रथयिता यशः। पृथुर्नाम महाराजो भविष्यति पृथुश्रवाः"। तेन च भगवदवतारेण पृथिवी समीकृता नानोषधीश्च मथिता दुहितृत्वेन कल्पिता च। तत्कथा उत्तरखण्डाध्याये दशमा ४।१८ अ॰।

"एवं पृथ्वादयः पृथ्वीं दुदुहुः स्वसमाश्रयात्। दोहवत्सादिभेदेन क्षीरभेदं कुरूद्वह!। ततो महीपतिः प्रीतः सर्वकामदुघां पृथुः। दुहितृत्वे चकारेमां प्रेम्णा दुहितृवत्सलः। चूर्णयन् स्वधनुःकोट्या गिरिकूटानि राजराट्। भूमण्डलमिदं वैन्यः प्रायश्चक्रे समं विभुः" श्रीमद्देवे भा॰ स्कान्द॰ ६ अ॰। चतुर्थमन्वन्तरे काक्षे ४सप्तर्षिभेदे हरिवं॰ ७अ॰। काकुत्स्थे अनेनसः पुत्रे ५नृपभेदे १७अ॰। अजमीढवंशजे पारपुत्रस्य ६पुत्रभेदे हरिवं॰ २० अ॰। क्रोष्टुवंशजे चित्ररथपुत्रे ७नृपभेदे ३५ अ॰। ८दानवभेदे २६अ॰। ९यमौ मेदि॰। १०कृष्णजीरके पु॰ अमरः ११त्वक्पत्रयां १२रिङ्गुपत्रायाञ्च स्त्री मेदि॰ १३खड़िफेने शब्दरत्ना॰ १४मङ्गति त्रि॰ शब्दर॰ १५विष्णौ पु॰। "प्राणदः प्रणयः पृथुः" विष्णुस॰।

पृथुक पु॰ पृथु कं जलं पेयत्वेनास्त्यस्य अच्। १चिपिटके अमरः। तस्य चर्वणे बहुजलशोषणात् तस्य तथात्वम्। अस्य क्लीवत्वमपि "द्विःखण्डमन्नं पृथुकं गुडं देयविशेषके" ब्रह्मवै॰ख॰२१अ॰। पृथु कं शिरोऽस्य। २बालके पुंस्त्री॰ मेदि॰। ३रिङ्गुपत्र्यां स्त्री शब्दरत्ना॰।

पृथुकीय त्रि॰ पृथुकाय हितं छ पृथुकादेशः। पृथुकहिते। पक्षे यत् पृथुक्य तत्रार्थे त्रि॰।

पृथुकीर्त्ति स्त्री पृथानुजायां वसुदेवभगिनीभेदे "पृथुकीर्त्त्यां तु संजज्ञे तनयो दन्तवक्रधृक्। करूणाधिपतिर्वीरो दन्तवक्त्रो महाबलः"। हरिवं॰ २७ अ॰ पृथुः कीर्त्तिरस्य। २बहुयशस्के त्रि॰।

पृथुकोल पु॰ कर्म॰। राजबदरे राजनि॰।

पृथुग्रीव पु॰ १राक्षसभेदे रामा॰आ॰६स॰। २विस्तीर्णग्रीवे त्रि॰

पृथुच्छद पु॰ पृथु छदोऽस्य। १हरिद्रे राजनि॰। २बहुपत्रयुक्ते त्रि॰।

पृथुपत्र पु॰ पृथूनि पत्राण्यस्य। रक्तसुने राजनि॰।

पृथुपलाशिका स्त्री पृथूनि पलाशान्यस्याः कप् आपि अत इत्वम्। शल्याम् राजनि॰।

पृथुरुक्म पु॰ क्रोष्टुवंशजे रुक्मवक्षपुत्रभेदे हरिवं॰ ३७अ॰।

पृथुरोमन् पु॰ पृथूनि रोमाणि रोमस्थानीयगलूकाण्यस्य। १मत्स्ये अमरः। २बहुरोमयुक्ते त्रि॰ स्त्रियां वा ङीप्।

पृथुल त्रि॰ पृथ+स्वार्थे लच पृथोः पृथुत्वमस्त्यस्य मिथ्या॰ लच् वा। १स्थूले अमरः। २रिङ्गुपत्र्यां स्त्री जटाध॰।

पृथुलाक्ष त्रि॰ पृथुले अक्षिणी यस्य बहुव्री॰। १बहुनेत्रयुक्ते २पुरुवंश्ये चतुरङ्गपुत्रभेदे पु॰ हरिवं॰ ३१ अ॰।

पृथुवक्त्र त्रि॰ पृथु वक्त्रमस्य। १बहुमुखयुक्ते। २कुमारानुचरमातृभेदे स्त्री भा॰ श॰ ४७ अ॰।

पृथुशिम्ब पु॰ पृथ्वी शिम्बा यस्य। श्योनाकभेदे राजनि॰।

पृथुशेखर पु॰ पृथु शेखरं यस्य। पर्वते त्रिका॰।

पृथुश्रव(स) त्रि॰ पृथु श्रवः कर्णोऽस्य। १बहुकर्णे बहुलः २कुमारानुचरभेदे भा॰ श॰ ४६ अ॰। सान्तस्तु। २यमविन्दुवंशपुत्रभेदे पु॰ हरिवं॰२६अ॰।

पृथुसेन पु॰ अनुवंशजे रुचिरद्रथपुत्रभेदे हरिवं॰ २० अ॰।

पृथुस्कन्ध पुंस्त्री पृथु स्कन्धोऽस्य। शूकरे राजनि॰ स्त्रियां जातित्वात् ङीष्।

पृथूदक न॰ तीर्थभेदे भा॰ व॰ ६८ अ॰।

तच्च सरस्वत्यां देशस्थितम् यथोक्तम् "जातिस्मरोऽथ द्रुस्तु गङ्गाद्वारे तदास्थितः। अनलार्कं ततो दृष्ट्वा पुत्रान् वचनमब्रवीत्। इह त्रयो न पश्यामि नयध्वं मां पृथूदकम्। विज्ञाय तस्य तद्भावं ऋषयोऽस्मे तपोधनाः। तं वै तीर्थमुपानिन्युः सरस्वत्यास्तपोधनम्। स तैः पुत्रैः समानीतः सरस्वत्यां समीपतः। स्नात्वा तीर्थगुणान् सर्वान् प्राप्तेदस्त्रिमत्तमः। सरस्वत्यास्तु तीरे यः संत्यजेदात्मनस्तनुम्। पृथूदके जप्य परो नैनं शोचे मरणं व्रजेत्। तत्रैव ब्रह्मयोन्यस्मि ब्रह्मणा यत्र निर्मिता" वामनपु॰ २८ अ॰।

पृथूदर पु॰स्त्री॰ पृथु उदरं यस्य। १मेषे स्त्रियां जातित्वात् ङीष्। २बहूदरयुक्ते त्रि॰ हारा॰। स्त्रियां स्वाङ्गत्वात् वा ङीष्।

पृष्ठ्यादि पु॰ "पृष्ठ्यादिभ्य इमनिच् वा" पा॰ भावे इमनिच्प्रत्ययनिमित्ते शब्दगणे स च पा॰ग॰ उक्तो यथा

"पृथु मृदु मरुत् पटु तनु लघु वक्र साधु आशु जरद् गुरु बहुल खण्ड दण्ड चण्ड कठिन क्रोड पाक वल्ल मन्द साढ हस दीर्घ स्निग्ध दृप्त ऋजु क्षिप्र क्षुद्र वर्षु"।

पृथ्वी स्त्री पृथुत्वगुणयुक्ता स्त्री ङीष्। १पृथुत्वयुक्तायां स्त्रियां २भूमौ ३छिकुपत्न्यां ४लक्ष्मणजीरके च। ५स्थूलैलायाम् ६पुनर्नवायाम् मेदि०। ७वृत्तार्हत्वात्भेदे हेम० स्वार्थे क। पृथ्वीका। ८वृहदेलायाम् छिकुपत्न्यां लक्ष्मणजीरके च। तस्य पृथिव्या पृथुराजेन दुहितृत्वस्य कल्पनात् पुंयोगे ङीष्। "दुहितृत्वमनुप्राप्ता देवी पृथ्वी तथोच्यते" वह्निपु०। "अस्यै जगत्यावृत्यक्षरत्वेन च पृथ्वी गुरुः ह० र० उक्ते दशप्रदशाक्षरपादके छन्दोभेदे।

पृथ्वीकुरवक पु० पृथ्व्यां भूमौ कुरवक इव शुभत्वात्। श्वेतमन्दारके राजनि०। [२गवेधे हेमच०।

पृथ्वीगर्भ पु० पृथ्वीव जन्यमानो गर्भ उदरमस्य। १जम्बोदरे

पृथ्वीज त्रि० पृथ्व्यां जायते जन-ड ७त०। १भूमिजाते २गडजन्यवृक्षे न० राजनि०।

पृथ्वीधर पु० पृथ्वीं धरति धृ-अच्। महीधरे पर्वते।

पृदाकु पु० स्पर्द-वा० आकु रुमागमश्च। सर्पे अमरः १डविके २व्याघ्रे शब्दरत्ने मेदि०। ४गजे ५डक्के च। संज्ञिप्रसारोषादिवृत्तिः। [वा०।७।१५।

पृदाकुसानु पु० पृदाकुः गज इव सानु रुन्नतः। इन्द्रे ऋ

पृश्न्य पु० स्पृश-भावे क्यु पृषो० सलोपः पृश्नं स्पर्शः तत्र साधु यत्। स्पर्शसाध्ये ऋ० १।७१।५ भाष्ये। पृश्नयति क्यच् उ। पृश्नायु तद्विच्छौ ऋ० १।८४।११।

पृश्नि त्रि० स्पृश-प्रच्छ-वा नि किच्च पृषो० सलोपः। १स्वल्पे २दुर्बलास्थियुक्ते ३खर्वे च अमरः। ४रङ्गौ श्रीकृष्णस्य जन्मान्तरे मातृभूतायां देवकीरूपेण द्वापरे प्रादुर्भूतायां ५वसुदेवपत्न्याञ्च स्त्री। "त्वमेव पूर्वसर्गे भूः पृश्निः स्वायम्भुवे सति!। तदायं सुतपा नाम प्रजापतिरकल्मषः। अहं सुतो वामभवं पृश्निगर्भ इति श्रुतः। तयोर्वां पुनरेवाहमदित्यामस्म कश्यपात्। उपेन्द्र इति विख्यातो वामनत्वाच्च वामनः। तृतीयेऽस्मिन् भवेऽहं वै तेनैव वपुषा हि वाम्। जातौ भूयस्तयोरेव" भाग०१०।३ अ०। देवकीं प्रति वासुदेववाक्यम्। ६साधरणे त्रि० निघण्टुः ७सवितृपत्नीभेदे स्त्री भाग० ६।१८।१। ८अग्निभेदे पु०भा० द्रो० १६१अ०। युधाजिद्वृषस्य मातृभ्यां जाते ८पुत्रभेदे वह्निपु०। [शब्दमाला।

पृश्निका स्त्री पृश्नि स्वार्थे क जातित्वात्। कुम्भिकायां (पाना)

पृश्निगर्भ पृश्नेः सुतपःप्रजापतिपत्न्याः गर्भः साधनत्वेनास्य अच्। नारायणे पृश्निशब्दे दृश्यम्।

पृश्निगु त्रि० पृश्नियोनानावर्णत्वात् साधरण्या गावो रञ्जयोऽस्य। नानावर्णदोग्ध्रिके ऋ० १।११२।७। वेदे क्वचित् "गोश्नियोरुपसर्जनस्येति न ह्रस्वः" ऋ० ७।१८।१०। उदा० दृश्यम्। [विख्यातायां लतायाम् अमरः।

पृश्निपर्णी स्त्री पृश्नि स्वल्पं पर्णमस्याः ङीष्। (चाकुलिया)

पृश्निभद्र पु० ७त०। पृश्निगर्भजाते नारायणांशभेदे।

पृश्निमात्र पु० पृश्निः नानावर्णा भूमिर्मातेव जन्मभूमिर्यस्य समासान्तविधेरनित्यत्वात् न कप्। नानावर्णभूमिजाते ऋ० १।२३।७।

पृश्निशृङ्ग पु० पृश्नि इङ्गमपमस्य। मयूरे त्रिका०। तस्य सुखे मजसद्भावेन इङ्काकारत्वात् तथात्वम्। पृश्निः इङ्गोऽस्मिन्नस्त्युपत्तिस्थानत्वेन। पृश्निगर्भजाते २विष्णौ शब्दमाला। [(पाना) शब्दमाला।

पृश्नी स्त्री पृश्नि+ऋदिकारादित्वात् वा ङीष्। कुम्भिकायां

पृष सेके भ्वा०आ०सक०सेट्। पर्षते अपर्षिष्ट। पपृषे।

पृषत् न० पृष-अति कित् षत्वञ्च कार्यं तेन पृषन्ति। १बिन्दौ अमरः। २सेकयुक्ते त्रि०। अस्य बिन्दौ बहुत्वमिच्छन्त्येके।

पृषत पुंस्त्री० पृष-अतच् किच्च। १शुभ्रबिन्दुमति मृगभेदे स्त्रियां जातित्वात् ङीष्। २बिन्दौ पु० अमरः। ३वायुवाहने मृगे पुंस्त्री निघण्टुः। "पृषत्यो मरुताम्" इत्यत्र स्त्रीत्वमविवक्षितम्। भरद्वाजसुते ४नृपभेदे पु० भा० आ० १३ अ०।

पृषतांपति पु० ६त० अलुक्स०। वायौ जटा०।

पृषताश्व पु० पृषतो मृगभेदोऽश्व इव गतिसाधनं यस्य। वायौ अमरः।

पृषत्क पु० पृषन्ति बिन्दव इव को वायुरत्र। बाणे अमरः।

पृषदंश पु० पृषति बिन्दौ अंशोऽस्य। वायौ ततः उत्सा० भवादौ अञ्। पार्षदंश तद्भवादौ त्रि०। [वायौ अमरः

पृषदश्व पु० पृषन् मृगभेदोऽश्व इव वाहकत्वात् यस्य।

पृषदाज्य न० पृषद्युक्तं दधिबिन्दुयुक्तं दधिसेकयुक्तं वा आज्यम् शाक०त०। दधिसिक्ते घृते अमरः।

पृषद्बल पु० पृषन्नेव बलमस्य। वायोरत्रे शब्दमाला।

पृषदश्व पु० वैवस्वतमनोःपुत्रभेदे हरिवं १० अ०। [५६अ०

पृषद्ध्रु पु० द्वापरयुगीये युधिष्ठिरपक्षस्थे नृपभेदे भा०द्रो०

पृषन्ति पु० पृष-वा झि। बिन्दौ। "पवः पृषन्तिभिः सृष्टा

यानि वाताः शनैः शनैः" भाम्बवतोविजयपद्धम् ।

पृषभाषा स्त्री पृष–सेके क तादृशी भाषा यस्याः । अमरावत्यामिन्द्रनगर्यांम् शब्दमाला० ।

पृषाकरा स्त्री पृषदिवाल्यते खा+कृ–कर्मणि अच् पृषो० । क्षुद्रशिलायाम् (वाट्खारा) शब्दच० ।

पृषातक न० पृषन्तं पृषदाख्यं तकते हसति तक-अच् । पृषो० । दधियुक्तहरीतक्याम् हेमच० ।

पृषोदर त्रि० पृषदिवोदरं यस्य पृषो० तत्पुरुषः । १स्वल्पोदरे पृषन्ति उदरे यस्य । २वायौ पु० ।

पृषोदरादि "पृषोदरादीनि यथोपदिष्टम्" पा० विहित लोपादिनिमित्ते शब्दगणे स च गणः पा० ग० सू० उक्तो यथा "पृषोदर पृथोत्थान वलाहक जीमूत प्रस्थान वल्लूक पिशाच वधो मयूर" । "वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ । धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्" । एतच्च समासविषयकमेवेति नियमो न प्राचीनकारिकायां हंसवंशादिशब्दानामपि पृषोदरादित्वात् सिद्धत्वोक्तेः । अस्यार्थः त्रि० कौ० मनोरमाटी० यथा

"पृषोदरप्रकाराणि शिष्टैर्यथोच्चारितानि तथैव साधूनि स्युः । पृषत् उदरम् पृषोदरम् । तत्पुरुषः । वारिवाहको बलाहकः । पूर्वपदस्य वः उत्तरपदादेश्च लत्वम् । "भवेद्वर्णागमात् हंस सिंहो वर्णविपर्ययात् । गूढोत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरम्" दिक्शब्दे भ्यक्तीरस्य तारभावो वा । दक्षिणतारम् दक्षिणतीरम् । उत्तरतारम् उत्तरतीरम् । दुरो दाशनाशब्दयोर्ध्रुवस्योत्तरपदादेर्दुत्वम् । दुःखेन दाश्यते दूडाशः । एवं दुःखेन नाश्यते दुणाशः दुःखेन दश्यते दूडभः । खल् त्रिभ्यः । दम्भेर्नलोपो निपात्यते । दुष्टं ध्यायतीति दुध्यः । आतश्चेति कः । ब्रुवन्तोऽस्यां वीट्लोति ढ्रवी । ब्रुवच्छब्दस्य ढ आदेशः । अदेरधिकरणे ढट् । आज्ञतिगणोऽयम्" । छन्दोः प्रत्ययादौ सुमागमे हंस इति सिंहेषु प्रत्ययादौ हकारसकारयोः व्यत्ययात् सिंह इति गूढोत्मेत्यत्र आकारविलोपा उकारादेशः पृषोदरमित्यत्र तकारवर्णलोपः इत्येवं रीत्या सर्वत्र बोध्यम् । एतन्मूलकमेव "लुप्तेदवयवः क्वचे तम् कामनसोरपि । समो वा छिततयोर्मांसस्य पचियुज्यजोरिति" । अन्तमिति शेषः क्वचप्रत्ययान्ते उत्तरपदे अवश्यमशब्दस्यान्यमकारं लुप्तं स्यात् । अवश्यपेक्ष्यः । तथा कामशब्दमनशब्दयोः परतः तमशब्दस्यान्तम् । इन्तुकामः गन्तुमनाः । इच्छिति षष्ठ्यर्थे प्रथमा । छिततत्शब्दयोः परतः समोऽन्त्यं मकारम् वा लुप्येत् । खण्डितः संखितः सतः सन्तः । युजधजपरपचिधातौ परे मांसशब्दान्त्याकारं लुप्येत् । मांसपचनः मांसपचनः मांसपाकः मांसपाक इत्यादि ।"

पृष्ट त्रि० पृछ सेके प्रच्छ–वा क्त । १जिज्ञासिते–यजु०२३।८ । २जिज्ञासिते "नापृष्टः कस्यचित् ब्रूयात्" मनुः ।

पृष्टहायन पु० नित्यक० । १धान्यभेदे २गजे पुंस्त्री मेदि० । स्त्रियां जातित्वात् ङीष् ।

पृष्टि स्त्री पृछ+सेके भावे क्तिन् । सेके शत०ब्रा० ७।५।१।१२। २।१।१५। प्रच्छ–क्तिन् । २जिज्ञासायाञ्च । पृष–कर्त्तरि क्तिच् दीर्घः । २पार्श्वस्थे स्त्री अ०१०।८।१० पृष्टीः पार्श्वस्थान् भा० । ३पृष्ठदेशे यजु० २।८ । "पृष्टीः पृष्ठदेशः" वेददीप० । पृष्टिवह पृष्ठ्यावहः । पृष्ठवहे क्यप् १८।४।१०

पृष्ठ न०पृष–स्पृश–वा थक् नि० तनोः पश्चाद्भागे अमरः । निरुक्ते ४।१"पृष्टं संस्पृष्टमङ्गैः" इत्युक्तं युक्तञ्चैतत् पृषधातोस्तदुपसिङ्गेः निपातनानुपपत्तेः अतः स्पृशधातोरेव निपा० । २स्तोत्रविशेषे स च सा०सं० भाष्ये उक्तो यथा "एकस्मिन् सूक्ते विद्यमानानां तिसृणामृचां ब्राह्मणोक्तविधानेन समुदायाभ्यासः समुदायसोमः ताडशेषु स्तोत्रेषु पृथशब्दः श्रूयते "सप्तदशानि पृष्ठानि इति" तानि पृष्ठानि किंरूपाणीति चोदकप्राप्तत्वात् सर्वपृष्ठशब्देनानूद्यन्ते एकैकः पक्षः । रथन्तर पृष्ठ बृहत्पृष्ठयोर्ज्योतिष्टोमे विकल्पितयोरिहापि चोदकेन विकल्पप्राप्तौ सर्वशब्देन सहचर्यो विधीयते । तथा सत्यनुवादकत्वं वैयर्थ्यं न भविष्यति इति द्वितीयः । सर्वत्वं बहुषु सख्यं न तु द्वयोः । तस्मादनेन सर्वपृष्ठशब्देन षट् संख्याकानि पृष्ठान्यतिदिश्यन्ते षड्रूपे प्रतिदिनमेकैकं पृष्ठं विहितम् । तानि च पृष्ठानि षट् रथन्तरबृहद्वैरूपवैराजशाक्वररैवतसामभिः निष्पाद्यानि" ।

पृष्ठगोप पु० पृष्ठं गोपायति पृष–वा क्वचाभावे खुल् । पृष्ठदेशरक्षके योधभेदे भा० आ० २०१ अ० ।

पृष्ठग्रन्थि त्रि० पृष्ठे ग्रन्थिर्यस्य । (कुबो) कुब्जे हेमच० ।

पृष्ठचक्षुस् पु० पृष्ठे पश्चाद्भागे चक्षुः दृष्टिः तद्व्यापारोऽस्य । पश्चाद्दृष्टियुक्ते भल्लूके शब्दार्णवः ।

पृष्ठज त्रि० पृष्ठे पश्चात् जायते जन–ड । पश्चाद् जाते भा० आ० ६३ अ० ।

पृष्ठजाह त्रि॰ पृष्ठस्य मूलं कर्म्मा॰ मूले जाहच्। पृष्ठमूले।

पृष्ठतल्पन न॰तल्पमिवाचरति तल्प+क्विप् ल्यधातोः भावे ल्युट्। पृष्ठस्य तल्पनं तल्पवदाचरणम्। (पिठे शोओया) प्रवेष्टे त्रिका॰।

पृष्ठतस् अव्य॰ पृष्ठ+तसिल्। पश्चाद्भागे इत्यर्थे।

पृष्ठदृष्टि पु॰ पृष्ठे दृष्टिर्व्यापारोऽस्य। भल्लूके राजनि॰।

पृष्ठमर्म्मन् न॰ ७त॰। सुश्रुतोक्ते पृष्ठस्थमर्म्मभेदे स च तत्रोक्तो यथा

"अत ऊर्द्धं पृष्ठमर्म्माण्यनुव्याख्यास्यामः। तत्र पृष्ठवंशसुभयतः प्रतिश्रोणीकाण्डमस्थिनी कटीकतरुणे नाम मर्म्मणी तत्र शोणितक्षयात् पाण्डुविवर्णौ हीनरुपश्च म्रियते। पार्श्वजघनबस्तिभागे पृष्ठवंशसुभयतो नातिनिम्ने कुकुन्दरे नाम मर्म्मणी तत्र स्पर्शोज्ञानमधःकाये चेष्टोपघातश्च। श्रोणीकाण्डयोरुपर्य्यंशयाख्यादनौ पार्श्वान्तरप्रतिबद्धौ नितम्बौ नाम तत्राधःकायशोषो दौर्ब्बल्यात्तु मरणम्। अधःपार्श्वान्तरप्रतिबद्धौ जघनपार्श्वमध्ययोस्तिर्य्यगूर्द्ध्वञ्च जघनात् पार्श्वसन्धी नाम तत्र लोहितपूर्णकोष्ठतया म्रियते। स्तनमूलाद्वहिरुभयतः पृष्ठवंशस्य हृदती नाम तत्र शोणितातिप्रवृत्तिर्निमित्तैरुपद्रवैर्म्रियते। पृष्ठोपरि पृष्ठवंशसुभयतस्त्रिकसम्बद्धे अंसफलके नाम तत्र बाह्वोः स्रावः शोषो वा। बाहुमूर्द्धशीर्षास्थ्यंसपीठस्कन्धनिबन्धनावंसौ नाम तत्र स्कन्धबाहुता। एवमेतानि चतुर्दश पृष्ठमर्म्माणि व्याख्यातानि"।

पृष्ठमांस न॰ पृष्ठस्य मांसम्। पक्षादीनां पृष्ठस्थे मांसे। तस्याभक्ष्यता मार्कण्डेयपु॰ उक्ता यथा "पृष्ठमांसं हयामांसं गर्द्दभांसं च पुत्रक!। न भक्षयेत सततं प्रत्यक्षलवणानि च"।

पृष्ठमांसाद त्रि॰ पृष्ठे परोक्षे मांसादः इव। १परोक्षे ग्राम्येण वाक्याभिधायिनि पुरुषे दोषोद्भावके त्रिका॰। "कृत्वा विभाव्येत्यतः कृत्वेति समाकर्णात् वाक्याभिधानेऽन्यत्र तथार्थत्वम्। पृष्ठमांसादनशब्दे दृश्यम्। पक्षादेः २पृष्ठमांसभक्षके त्रि॰।

पृष्ठमांसादन न॰पृष्ठे परोक्षे मांसादनमिव। "पृष्ठमांसादनं तत्र यत् परोक्षे दोषकीर्त्तनम्" हेमच॰ उक्तेऽर्थे १पक्षादीनां पृष्ठमांसस्य भक्षणे च।

पृष्ठयज्वन् पु॰ पृष्ठैः रथन्तरादिभिरिष्टवान् यज–क्वनिप्। रथन्तरादिभिः षड्भिःस्तोत्रसमूहैरिष्टवति ऋ॰ ५।५४।१

पृष्ठयान न॰ पृष्ठेन यानं गमनम्। (पिठे याओया) पृष्ठेन गमने। तच्च ऊर्द्धोरोगे निदानं सुश्रुते उक्तं ऊर्द्धगशब्दे दृश्यम्।

पृष्ठवंश पु॰ ६त॰। (पिठेर दाँडा) पृष्ठास्थि। हेमच॰। "चतुर्विंशतिः पृष्ठवंशे" सुश्रुतोक्तेः तत्र चतुर्विंशतिरस्थीनि। पृष्ठमर्म्मनशब्दे दृश्यम्।

पृष्ठवास्तु न॰ ७त॰। बलिदातुः पृष्ठभागस्थे वास्तुनि "पृष्ठवास्तुनि कुर्वीत बलिं सर्वात्मभूतवे" मनुः। स्पष्टो परिस्पृष्टं पृष्ठवास्तु" २कुक्कुरभक्षोक्तेऽर्थे च।

पृष्ठवाह् त्रि॰ पृष्ठं पश्चाद्भागं वहति वह–क्विप्। १पश्चाद्भागवाहके हरिवं॰ १६६ श्लो॰। भत्वे वाहुवह्। प्रष्ठौहः। स्त्रियां ङीप्। पृष्ठं युगपार्श्वं वहति वह–क्विप्। २युगपार्श्ववाहकवृषे [वृषे हेमच॰।

पृष्ठवाह्य पु॰ पृष्ठेन वाह्यं वहनं यस्य। पृष्ठेन भारवाहके

पृष्ठशय त्रि॰ पृष्ठे शेते पृष्ठरूपाधिकरणोपपदे कर्त्तरि अच्। पृष्ठे शायिनि उत्तानशये।

पृष्ठशृङ्ग पुंस्त्री पृष्ठे शृङ्गमस्य। वनच्छागे हेमच॰। स्त्रियां जातित्वात् ङीप्। [मेदि॰।

पृष्ठशृङ्गिन् पु॰ ७त॰। १महिषे २नपुंसके ३भीमसेने च

पृष्ठसुख पु॰ पृष्ठे सुखमस्य ब॰व्र॰। कुमारानुचरभेदे भा॰श॰४६अ॰।

पृष्ठोदय पु॰ पृष्ठेनोदयो यस्य। ज्योतिषोक्ते पृष्ठेनोदययुक्ते राशिभेदे "अजो गोपतियुग्मञ्च कर्किधन्विसृगास्तथा। निशासंज्ञाः स्मृतास्तेऽमी शेषाराश्यो दिनात्मकाः। निशा संज्ञा विमिश्रुनाः स्मृताः पृष्ठोदयास्तथा। शेषाः शीर्षोदया ज्ञेते मीनस्त्रोभयसंज्ञकः"।

पृष्ठ न॰ पृष्ठानां स्तोत्रभेदानां समूहः "पृष्ठस्तोपसंख्यानम्" वार्त्ति॰ समूहे यत्। १स्तोत्रसमूहे। पृष्ठे भवः यत्। २पृष्ठभवे त्रि॰। "स्तोमवाग्रेषु छन्दोगैः क्रियमाणाः पृष्ठ्यादिसंज्ञिका स्तुतिः स्तोमः" मि॰कौ॰। पृष्ठेन वहति यत्। ३पृष्ठेन भारवाहके अश्वे (घेटोघोड़ा) अमरः।

पृष्ठ्यस्तोम पु॰ पृष्ठ्यस्तोमः साधनतयाऽस्यास्य अच्। साम-वेदप्रसिद्धेषु षट्सु क्रतुभेदेषु "पृष्ठ्यस्तोमाख्यिहतृपञ्चदशसप्तदशैकविंशत्रिनवत्रयस्त्रिंशाः" कात्या॰श्रौ॰२२।६।२६ "पृष्ठस्तोमसंज्ञकाः षट् क्रतवो भवन्ति त्रिवृदादयः" कर्कः।

पृथ्वि पु॰ पृथ्वि+पृषो॰। नानावर्णयुक्ते भरतः २पार्श्वभागे स्त्री उणादि॰।

पृ पालने पूर्त्तौ च क्र्या॰ भ्वा॰ पर॰ सक॰ सेट् आमन्त्रणे परे

हुस्वः। पृषोदरा० अपारोत्। पपार पपरतुः पपरुः।

पॄ पूर्त्तौ चु० उभ० सक०सेट्। पारयति-ते अपीपरत् त।

पेचक पु०क्ली० पच-युन् अतएच्। (पेँचा) १वलूके स्त्रियां जातित्वात् ङीष्। २गजपुच्छमूलोपाने ३गुदाच्छादकमांसपिण्डभेदे पु० अमरः। ४पर्य्यङ्के ५युके पु० विश्वः। ६मेघे शब्दर०। [शब्दरत्ना० स्त्रियां ङीप्।

पेचकिन् पु० पेचकः पुच्छमूलोपान्तोऽस्यास्ति इनि। गजे

पेचिल पुंस्त्री० पच+वा० इलच् अतएच्। गजे त्रिका०। स्त्रियां जातित्वात् ङीष्।

पेचु न० पचि-उनु अत एत्वम्। पेचुल्या त्रिका०। [त्रिका०

पेचुलो स्त्री पच-उलच् अतएत् गौरा० ङीष्। शाकभेदे।

पेट पु० पिट-अच्। १प्रच्छदे राजनि०। २संहतिकारके त्रि०

पेटक पु०न० पिट-ण्वुल्। पुस्तकादीनां स्थापनार्थे वेत्रादिनिर्मिते १पदार्थे २कटम्बके ३समूहे च मेदि०। ४वंशादिनिर्मिते वसदृगकाकारे (पेटारा) पदार्थे पु० अमरः।

पेटाक पु० पेटक+पृषो०। पेटके हिरूपकोषः।

पेटिका स्त्री पिट-ण्वुल् कापि अत इत्वम्। (टेपारि) चुपभेदे रत्नमाला।

पेटी स्त्री पिट-अच् स्वल्पार्थे ङीप्। क्षुद्रपेटके अमरः।

पेडा स्त्री पेट+पृषो०। क्षुद्रपेटिकायां भरतः।

पेठान पु० अवसर्पिण्यां जिनोत्तमभेदे हेमच०।

पेण गतौ पेणे च सक० क्षेपे अक० भ्वा० पर० सेट्। पेणति अपेणीत्। क्वचित् चङि न हुस्वः अपिपेणत् त।

पेत्व न० पा-त्वाने कर्मणि इत्वन्। १अक्षते २क्षते च उज्ज्वल०

पेदु पु० राजभेदे ऋ० १।११६।१० भा०।

पेय त्रि०पा-पाने कर्मणि यत्। १पातव्ये २जले मेदि०।२दुग्धे शब्दच०। ३अष्टविधान्नान्तर्गते तरलद्रवाद्यादौ अन्नभेदे "भोज्यं पेयंतथा चूष्यं लेह्यं खाद्यञ्च सप्तमम्। निष्पेव क्षैव भक्ष्यं खाद्यमष्टविधं स्मृतम्" राजनि०। ४सिक्थयुक्तपेयद्रव्ये स्त्री। "पेया खेदाग्निजननी वातवर्चोऽनुलोमनी। तृष्णाग्लानिदौर्बल्यकृच्छिरोगविनाशिनी" राजव०। ५आषाढ्यां मेदि०।

पेयूष पु०न० पीय-ऊषन् बाहुलकात् पच्चे गुणः। १अक्षते २क्षतवति। "क्षुत्परीतस्यक्षुतायाः क्षीरं पेयूषमुच्यते" क्षारा० उक्ते आसन्नप्रसवाभ्यन्तरकालीने २दुग्धे च।

पेरज न० उपसर्गभेदे राजनि०। पिरोजशब्दे दृश्यम्।

पेरा स्त्री पि-वा० रे। वाद्यभेदे भट्टिः १७।७।

पेरु पु०पीयते रक्षार्थं पी-रु। १स्थादिके २वृक्षे च उज्ज्वल०। पुर-उ ह्रस्वादेरात्वनिषेधात् नि०। २सप्तद्वीपे त्रिका०।

पेरुक पु० राजभेदे ऋ० ६।६३।६

पेरोज न० उपसर्गभेदे (पोरोजा) राजनि०। तच्च द्विविधं पीताभं हरिताभञ्च। तस्य गुणाः "पेरजं सुकषायं स्यान्मधुरं दीपनं परम्। स्यावरं जङ्गमञ्चैव संयोगाच्च यथाविधम्। तत्सर्वं नाशयेत् शीघ्रं शूलं भूतादिदोषजम्। पाठान्तरं यथा "पेरजं सुकषायं स्यान्मधुरं दीपनं द्वयोः। स्यावरादिविभक्तं स्याद्धरितञ्चापरं स्मृतम्। पीताभं नाशयेच्छीघ्रं शूलं तिमिरभूतजम्" राजनि०।

पेल क्षेपे अक०गतौ सक०भ्वा०पर०सेट्। पेलति अपेलीत्। क्वचित् चङि न हुस्वः अपिपेलत् त। निघण्टौ अयं गतिकर्मतया चुरादित्वेन पठितः। तेन पेलयति ते

पेल न० पेल-अच्। पुंचिह्ने अङ्गभेदे (अण्डकोष) हेमच०।

पेलव त्रि० पेल-अच् पेलं याति वा-क। १कोमले त्रिका० २क्षये हेमच०। ३विरले अमरः।

पेलि पु०पेल-इन्। गन्तरि हृत०। तत्परं शाखायाः न स्त्रीत्वम्। आद्युदात्तता चास्य।

पेव सेवने भ्वा०सक०आत्म०सेट्। पेवते अपेविष्ट। क्वचित् चङि न हुस्वः। अपिपेवत् त। ओदान्त्यतयाऽयं धातुपाठे पठितस्तेनोभयरूपता।

पेश पु० पिश-अच्। रूपे निघण्टुः पेशलशब्दे दृश्यम्।

पेश ष)(स)ल त्रि० पिश(ष)(स)-अलच्। १सुन्दरे २दक्षे ३कोमले च अमरः। मूर्द्धन्यदन्त्यमध्योऽयुक्तार्वसु भरतः। ४धूर्त्ते शब्दर०। पेशोरूपमस्यास्ति सिध्मा०लच्। ६विष्णौ पु०। "अक्रूरः पेशलो दक्षः" विष्णुस०

पेशस् न० पिश-असुन्। १रूपे २हिरण्ये च निघण्टुः। ३कोशे च।

पेशस्कार त्रि०पेशो रूपान्तरं करोति खट्टकीटस्य ल-अण् उप०स०। खट्टकरे कीटभेदे स्त्रियां ङीप्। यजु०३०।८।

पेशस्कृत् त्रि० पेशो रूपान्तरं खट्टकीटस्य करोति ल-क्विप्। कीटभेदे (काँचपोका) "कीट पेशस्कृतं ध्यायन् कुड्यां तेन प्रवेशितः। याति तत्सात्मतां राजन्! पूर्वरूपमसंत्यजन्" भाग० ११।९।२४

पेशि(शी) स्त्री पिश-इन् वा ङीप्। १वज्रे २मांसविदले च उज्ज्वलादिः। दीर्घान्तः ३अण्डे अमरः। ४सुपक्वकस्तिकायां ५मांसे ६खड्गपिधाने (खाप) ७मांसपिण्डयां च मेदि०। ८नदीभेदे ९पिशाचीभेदे १०राक्षसीभेदे शब्दरत्ना०। ११गर्भ-

वेष्टनचर्ममये कोशे च "बिन्दुर्मांसादवोऽवस्थाः शुक्रशोणितसम्भवाः। यासामेव निपातेन कलिलं नाम जायते। कलिलात् बुद्बुदोत्पत्तिः पेश्यो च बुद्बुदात् घनाः। पेश्यास्वकप्रतिनिर्वृत्तिः" भा० शा०३२२अ०। दृढावयवभेदे "तथा मेद्यं च पेश्यश्च क्रकचा गोविषाणिकाः" भा०भी०४२अ०।

पेशीकोष पु० हृत०। अण्डकोषे हेमच०।

पेष सेवने निष्पेषे च भ्वा०चु०सक०सेट्। पेषते अपेषिष्ट पिपेषे अदित् चङि न हृस्वः। अपिपेषत् त।

पेषण न० पिष-भावे ल्युट्। १अवयवविभागेन चूर्णने। आधारे ल्युट्। २खले औषधादेर्मर्दनपात्रभेदे (तेकाटा-पिज) ३दृढभेदे पु० शब्दच०।

पेषणि(णी) स्त्री पिष-करणे अनि। (शिल) ख्याते हरिद्रादेश्चूर्णनसाधने शिलामये द्रव्यभेदे वा ङीप्।

पेषाक पु० पिष-आकन्। पेषणशीले त्रिका०।

पेषि पु० पिष-इन्। वज्रे उज्ज्वलदत्तः।

पेस गतौ भ्वा० पर० सक०सेट्। पेसति अपेसीत् पिपेसे। अदित् चङि न हृस्वः। अपिपेसत् त। [१८] भा०

पेसुक त्रि० पिस-बा० उक। अभिवर्द्धनशीले शत०ब्रा०१।७।१

पेस्वर त्रि० पिष-ओलार्थे वरच्। गतिशीले।

पै शोषे भ्वा०पर०सक०अनिट्। प्रायति अप्रासीत् पपौ।

पैङ्ग पु० ऋषिभेदे भा०स० ४अ०।

पैङ्गराज पु० पक्षिभेदे यजु० २४।२३ मा०।

पैङ्गल्य पु० ङ०व०। पिङ्गलस्यापत्यं गर्गा० यञ्। पैङ्गल्य तस्य छात्राः कण्वा० छण् बलोपः। पिङ्गलस्यापत्यस्य छात्रेषु। [फक्। तद्गामकर्षेरपत्ये।

पैङ्गरा(त्रा)यन पुंस्त्री० पिङ्गर(त्र)ऋषेः गोत्रापत्यम् भडा०

पैङ्गलोदायनि पुंस्त्र० पैङ्गलोदायनस्यापत्यम् इञ्। प्राच्यभवे तद्गामकर्षिगोत्रापत्ये ततः यूनि फक् तस्य पैङ्गा० लुक्। तदीये युन्यपत्ये। [गोत्रापत्ये।

पैङ्गल्य पुंस्त्री० पिङ्गलस्य गोत्रापत्यं गर्गा०यञ्। पिङ्गलर्षे-

पैङ्गि पुंस्त्री० पिङ्गस्यापत्यमिञ्। पिङ्गर्षेः पुत्रे स्त्रियां ङीप्। "पैङ्गीपुत्रात् पैङ्गीपुत्रः" शत०ब्रा०१४।८।४।२०।

पैङ्गिन् पु० पिङ्गेनर्षिणा प्रोक्तः कल्पः इनि। पिङ्गर्षिप्रोक्ते कल्पशास्त्रे। [प्रवरर्षिभेदः।

पैङ्गय पु० पिङ्ग बा० अपत्ये यञ्। पैङ्गर्षिपुत्रे स च गोत्र-

पैयवन पु० पीयवनस्यापत्यमृष्यण्। पैयवने ऋषे मनुः ८।११० पैयवन इति पाठान्तरम्।

पैङ्ग्य पु० पिङ्ग-जस आर्षे ष्यञ्। वर्षे ज्योत्षे हेमच०।

पैठर त्रि०पिठरे संस्कृतं पक्वम्। स्थालीपक्वमांसादौ अमरः।

पैठिक पु० असुरभेदे हरिवं १६१ अ०। [प्रवरा०।

पैठिनसि पु० ऋषिकृतिकारके ऋषिभेदे ऋषिभेदे च

पैण्डायन पुंस्त्री पिण्डस्यगोत्रापत्यम् नड्०फक्। पिण्डर्षि-गोत्रापत्ये।

पैण्डिक्य(न्य) पिण्डं परपिण्डं भक्षयतयाऽस्यास्य ठन् इनि वा पिण्डिक पिण्डिन् वा तस्य भावः पुरोडिता० यक् ष्यञ् वा। परपिण्डोपजीविते भिक्षोपजीवने त्रिका०।

पैण्ड्य त्रि० पिण्ड्यां भवः कुर्वा० ष्य। पिण्डीभवे।

पैतरावण पु० गोत्रप्रवर्षिभेदे प्रवरा०।

पैतृक त्रि० पितृत आगतं पितुरिदं वा ठञ्। १पितृत आगते २पितृसम्बन्धिनि च। पैतृकभूमिसाहात्म्यं ब्रह्मवै० जन्मख० १०२ अ० दर्शितं यथा

"वासुदेव! न यास्यामि भूमिं तां, पैतृकी पुनः। सर्वतीर्थपरा शुद्धा दैवे कर्मणि पैतृके। पारक्ये भूमिदेशे च पितृणां निर्वपेत्तु यः। तद्भूमिस्थैः पितृभिः श्राद्धकर्म निरूप्यते। पितृणां निष्फलं श्राद्धं देवानामपि पूजनम्। किञ्चित्फलप्रदञ्चैव सम्मुखं पैतृके स्थले। पुत्रपौत्रकलत्रेभ्यः प्राणेभ्यः प्रेयसी सदा। दुर्लभा पैतृकी भूमिः पितृमातृगरीयसी। तत्क्षणञ्च पवित्रञ्च दैवे कर्मणि पैतृके। क्रीतञ्च तदृते दानं परदत्तमशुद्धकम्। क्षियते पैतृकभूम्यां तीर्थतुल्यफलं लभेत्। गङ्गाजलसमं पूतं पितृस्नानोदकं हरे!। पितृणां तर्पणं तत्र पवित्रं देवपूजनम्। पैतृकी जन्मभूमिश्चेत् पूर्वं तद्दृष्टिगुणं लभेत्। पैतृकभूमितुल्या न दानभूमिः शतामपि"।

पैतृमत्य त्रि० पितृमत्यां अनूढायां कन्यायां भवः कुर्वा० ष्य। कन्यायां भवे कानीने। [पितृश्वसुरपत्ये।

पैतृष्वसेय पुंस्त्री पितुः श्वसुरपत्यम् ढक् अन्यलोपः अत्वम्।

पैतृष्वस्रीय पुंस्त्री०पितुः श्वसुरपत्यम् छण्। पितृश्वसुरपत्ये

पैत्त त्रि०पित्तात् आगतः अण्। धातुविशेषपित्तजाते ज्वरादौ

पैत्तिक त्रि० पित्तेन निर्वृत्तः ठञ्। धातुविशेषपित्तजाते व्याधौ।

पैत्र त्रि०पितरिदम् अण्। १पितृसम्बन्धिनि श्राद्धादौ। अकृतजन्योर्मध्यस्थाने २पितृतीर्थे न०। ३पितृसम्बन्धिदिने च तत्रानं च अहनशब्दे ५७६पृ० उक्तं दृश्यम्।

पैद पुंस्त्री अश्वे निघण्टु। ऋ० ६।८८।४। स्त्रियां जातित्वात् ङीप्।

पैनद्धक त्रि॰ पिनद्ध+चतुरर्थ्यां वराड॰कक्। पिनद्धसभीपादौ।

पैप्पलाद पु॰ब॰व॰। पिप्पलादेन ऋषिणा प्रोक्तमधीयते अण्। १पिप्पलर्षिप्रोक्ताध्यायिषु तदर्थस्य २वेत्तृषु च कार्त्स्न्यौज॰सौभेन सह इन्द्रे पूर्वं प्रकृतिस्वरः।

पैप्पलादि पुंस्त्री पिप्पलादस्यर्षेरपत्यम् इञ्। पिप्पलादर्षेरपत्ये स च गोत्रप्रवरर्षिभेदः प्रवराध्यायः स्त्रियां ङीष्।

पैल(लेय) पुंस्त्री॰ पीलाया अपत्ये "पीलाया वा" पा॰ अण् पक्षे ढक्। पीलाया अपत्ये स्त्रियां ङीष्। युन्यपत्ये तु "अनोदृचः" पा॰ फिञ् तस्य पैलादि॰ लुक्। तस्य युन्यपत्येऽपि। तथा च पैलः पिता पुत्रश्च।

पैलगर्ग पु॰ कर्म॰। ऋषिभेदे तदाश्रमस्य च तीर्थत्वम् भा॰ च॰ १८७ अ॰।

पैलव त्रि॰ पीलौ दीयते कार्य्यं वा व्यु॰टा॰ अण्। पीलौ १दीयमाने २कार्य्ये च। व्यु॰टा॰ गणे पीलुमूलेति व्यस्तमित्येके समस्तमित्यन्ये। दृदर्थेऽण्। पीलुसम्बन्धिनि त्रि॰ मनुः २।४०। [जलादिभवे।

पैलवक त्रि॰पीलुवृक्षे भवः वृक्षान्तत्वात् वुञ्। पीलुवृक्ष-

पैलादि "पैलादिभ्यश्च" पा॰ युवप्रत्ययलुगनिमित्ते शब्दभेदे स च गणः "पैल प्रालदि शालकि मालडामि राडवि रावणि कौदंशी कौदञ्जी कौदमेडि कौदमल्लि कौदमल्लि दैवस्थानि पैङ्गलोदायनि राडक्षति भौलिङ्गि रायि कौदन्ति कौद्दालमानि कौल्लिङ्गानि कौदण्डि (तद्राजा चाचः) (आकृतिगणोऽयम्)। तद्राजसंज्ञकात् परस्य युवप्रत्ययस्य लुगित्यर्थः।

पैशाच पु॰ पिशाचेन निर्वृत्तः अण्। "सुप्तं मत्तं प्रमत्तं वा रहो यत्रोपगच्छति। स पापिष्ठो विवाहानां पैशाचः" मनूक्ते १विवाहभेदे २पिशाचक्षेत्रेऽतत्सम्बन्धिनि च त्रि॰। स्त्रियां ङीप् "पैशाचीं योनिमापन्नाः" पुरा॰। "यश्चाक्रुश्य ददाति दत्त्वा वा क्रोशति अश्रुकृतं पैशाचमिति" धारीतोक्ते ३दानभेदे स्वार्थे अण्। ५पिशाचशब्दार्थे पु॰ पक्षे॰अण्। ६आयुधजीविसङ्घभेदे। बहुषु तस्य लुक्।

पैशुन(न्य) न॰ पिशुनस्य भावः गुणा॰अण् ब्राह्मणा॰ ष्यञ् वा। पिशुनत्वे

पैष्ट त्रि॰पिष्टस्येदम्। अण् १पिष्टसम्बन्धिनि स्त्रियां ङीप् सा च २सुराभेदे। "पैष्टी कट्वम्लतीक्ष्णा स्यादोषघ्नी दीपनी परा। वातकृत् कफजित्तीव्रपित्तलक्नोदनी च सा" राजनि॰।

पैसुकायन पु॰ गोत्रप्रवर्षिभेदे प्रवराध्यायः।

पो त्रि॰ पवते पुनाति वा पु-पू-वा विच् १शुद्धे २शोधके च।

पोगण्ड पु॰ पौः शुद्धो गण्ड एकदेशो यस्य। १विंशत्यङ्के २न्यूनाधिकाङ्के। स्वार्थे कण्। "पौगण्डः पञ्चमादब्दादर्वाक् च दशमाब्दतः" इत्युक्तवयस्के बालके पु॰ङीप्॰।

पोट पु॰ पुट-अच्। १संश्लेषे-आधारे घञ्। २वेश्मभूमौ जटा॰।

पोटगल पु॰ पोटेन संश्लेषमात्रेण गलति गल-अच्। १मले २काये च अमरः। ३मत्स्यभेदे पुंस्त्री मेदि॰ स्त्रियां ङीष्।

पोटलक न॰ पोटेन लीयते ली-ड स्वार्थे क। (पुँटलि) ख्याते संश्लिष्टवस्त्रादौ काल्या॰ श्रौ॰ ७।६।४। कर्त्रं॰। तत्रार्थे स्त्री कापि अत इत्त्वम् पोटलिका। [अमरः।

पोटा स्त्री पु॰ पुट-अच्। पुरुषलक्षणयुक्तायां स्त्रियाम्।

पोट्टलिका स्त्री पोटलिका+पृषो॰ (पुँटलि) ख्याते पदार्थे पोट्टलीत्यपि तत्रार्थे "गुह्यवं त्रिफलाक्वाथे गुडूच्याः क्वाथ एव वा। दोषान्ते पुरः पाच्यः पोट्टल्या वस्त्रबद्धया" वैद्यक॰।

पोट्टिल पु॰ अवसर्पिण्यां जिनोत्तमभेदे हेमच॰।

पोडु पु॰ पुड-उनु। कपालास्थितले राजनि॰।

पोत पुंस्त्री पू-तन्। १बालके २वस्त्रिते च अमरः। ३स्टङ्स्थानभेदे (पोता) ४वस्त्रे च मेदि॰। ५दशवर्षैंवगले हेमच॰। ६समुद्रयाने नौकाभेदे (जाहाज) ततः समूहे पाशा॰ य। पोत्या पोतसमूहे स्त्री।

पोतक पु॰पोत इव कायति कै-क स्वार्थे क वा। १पोतपदार्थे २नागभेदे भा॰उ॰१०२अ॰। गौरा॰ ङीष्। ३पूतिकाशाके स्त्री ४श्योनाके च स्त्री राजनि॰।

पोतज पु॰ पोतः सन् जायते जन-ड। शिशुभूततया जायमाने गजाश्वादौ हेमच॰। [गौरा॰ ङीष्।

पोतन त्रि॰ पू-तन। १पवित्रे २पवित्रताकारके च स्त्रियां

पोतप्लव पु॰ पोतेन प्लवते प्लु-अच्। नौकया तारके ह॰सं॰ १०।१०। [अमरः।

पोतवणिज् पु॰ पोते वणिक्। नौकया वाणिज्यकारके

पोतरत्न पु॰ पोतं रक्षति अण् उप॰स॰। (झाजि) ख्याते पदार्थे कैनिपातके शब्दमा॰।

पोतनकप्रिय त्रि॰ वृक्षभेदे त्रिका॰।

पोतवाह पु॰ पोतं नावं वहति वह-अण् उप॰स॰। नौकावाहके (दाँडि) अमरः।

पोताच्छादन न॰ पोतस्येवाच्छादनम्। वस्त्रकुटीरे हारा॰।

पोताधान पु॰पोतानां शिशूनामण्डजातमत्स्यानामाधानम्। क्षुद्रमत्स्यबद्धे (पोनारभाँक) अमरः। [राजनि॰।

पोतास पु॰ पोत इवासति अस-दीप्तौ अच्। कर्पूरभेदे

पो(पौ)तिमत्स्यक पु॰ नृपभेदे भा॰ उ॰ ३अ॰।

पोतिका स्त्री पूतिका+पृषो॰। पूतिकायां १शाकभेदे भरतः २शतपुष्पायां ३मूलपोत्तां च राजनि॰।

पोतु पु॰ पू-तुन्। मानभाण्डशोधके शैवच॰।

पोत्त पु॰ पुनाति पू-तृन्। क्षत्रियभेदे अच्छावाकशब्दे ८५ पृ॰ दृश्यम्। होतादिशब्देन द्वन्द्वे ऋत आत्।

पोत्र न॰ पू-त्र। १यज्ञे २शूकरसुखाग्रे ३क्षाकूलसुखाग्रे, ४वह्निले च मेदि॰। [स्त्रियां जातित्वात् ङीष्।

पोत्रायुध पुंस्त्री पोत्रमायुधमिवास्य। शूकरे राजनि॰।

पोत्रिन् पु॰ पोत्रमस्त्यस्य इनि। शूकरे अमरः। पोत्रयुक्ते त्रि॰। स्त्रियां ङीप्। [यक्तिभेदे त्रिका॰।

पोत्रिरथा स्त्री पोत्री रथ इव गतिसाधनमस्याः। जिन-

पोत्रीय त्रि॰ पोतः कर्म ऊ। पोतृकर्त्तव्ये कर्मणि। कात्या॰ श्रौ॰ २४।३।४२।

पोथकी स्त्री "कण्डूलावान्विता गुर्व्वी रक्तसर्षपसन्निभाः। पिड़काश्च रुजावत्यः पोथक्य इति सञ्ज्ञिताः" सुश्रुतोक्ते पिड़कामेदे। [स्त्री गौरा॰ङीष्।

पोल त्रि॰ पुल-ज्वला॰ण। १भङ्गयुक्ते। २पिष्टकभेदे

पोलिका स्त्री पूरिकाभेदे ऋतान्नशब्दे २१८१ पृ॰ दृश्यम्।

पोलिन्द पु॰ पोतस्यालिन्द इव पृषो॰। नौकांशभेदे त्रिका॰।

पोषविद् त्रि॰ पुष-क्विप्-दृक्। १पोषके २काकपोषके पिके च उज्ज्वल॰।

पोषुक त्रि॰ पुष-आ॰ उक। पोषणकरणशीले "तमनुपोषं पोषको भवति" षड्विंशब्रा॰। [यजे त्रि॰ शब्दच॰।

पोष्टृ पु॰ पुष-तृच। (काँटा करवज्ञः) १करञ्जभेदे। २पो-

पोष्य त्रि॰पुष-कर्म्मणि यत्। १पोषणीये। आवश्यके यत्। २अवश्यपोष्ये। अवश्यपोष्यत्व दर्शितो यथा "भरणं पोष्यवर्गस्य दृष्टादृष्टफलोदयम्। प्रत्यवायोऽत्यभरणे कर्त्तव्यत्वात् प्रयत्नतः। माता पिता गुरुः पत्नी स्वपत्यानि समाश्रिताः। अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्गो मतो नव" कालीका॰ ४५ अ॰। "ज्ञातिबन्धुजनः पोष्यस्तथाऽनाथः समाश्रितः। अन्येऽप्यधनयुक्ताश्च पोष्यवर्गः उदाहृतः" दक्षसं॰।

पोष्यपुत्र पु॰ कर्म॰। पालनादिना दृढ़त्वापन्ने "अधुना

क्षत्रिकादीनां स्वां यः पोष्यपुत्रकः। तन्नाम चक्रुस्तां प्रेम्णा कार्त्तिकेयेति कौतुकात्" ब्रह्मवै॰गण॰ख॰१४अ॰। अधुना दत्तकपुत्रस्य पोष्यपुत्रत्वं व्यवच्छिद्यते तद्विधानं दत्तकशब्दे २४२८पृ॰ दृश्यम्।

पौंश्चलेय पुंस्त्री पुंश्चली+अपत्ये ढक्। पुंश्चल्या अपत्ये

पौंश्चल्य न॰ पुंश्चल+भावे ष्यञ्। १असतीत्वे परपुरुष-गामित्वे २पुंश्चिह्नयोनिभोज्यभिचारे च मनुः ८।१५।

पौंसायन पु॰ सौत्रामण्यां याज्ञके दुष्टरीतौ राजभेदे शत॰ब्रा॰ १२।८।३।२

पौंस्न न॰ पुंसो भावः कर्म्म वा ष्ण्यञ्। पुंस्त्वे।

पौंस्य न॰ पुंस अभिमर्दने यत्। तस्य साधु वा॰ यत्। १बले निरु॰। २संग्रामे च निघण्टुः ऋ॰१।१८०।१०।

पौगण्ड न॰ पौगण्डस्य भावः। १पञ्चमावधिदशमवर्षीया-वस्थाभेदे पौगण्डशब्दे दृश्यम्। स्वार्थे अण्। २तद-वस्थायुते त्रि॰।

पौच्चिष्ठ पुंस्त्री अन्त्यजातिभेदे यजु॰ ३०।८। वेददी॰।

पौटायन पुंस्त्री पुटायनर्षेरपत्यम् अण्। पुटायनर्षेः गोत्रापत्ये। [गोत्रस्त्रियाम्।

पौण्डिका स्त्री पुण्ड्रगोत्रस्य स्त्री अण् स्त्रियां यञ्। पुण्ड्र-

पौण्डरीक न॰ पुण्डरीकमिव शर्करा॰ अण्। पुण्डरीक-तुल्ये प्रपौण्डरीके राजनि॰।

पौण्ड्यं न॰पुण्ड्रस्यैव अण्। पुण्ड्रे भरतः।

पौण्ड्र पु॰ १देशभेदे स च द्र॰स॰१४॰ पूर्व्वाभिमुखः भा॰भी॰९अ॰ सोऽस्य अभिजनः तस्य राजा वा अण्। २तद्देशशब्दे ३पि-त्तादिरोगभेद तद्देशवासिनि च। "पौण्ड्रश्च बलिनां वरः" हरिवं॰९।अ॰। स च कृष्णेन निहतः "पाण्ड्रं पौण्ड्रं कलिङ्गञ्च मातृस्वञ्चैव जनार्दनः। जघान सहितान् सर्वान्" हरिवं॰ १६१ अ॰। "वसुदेवस्य सुतनूपत्नीजाते ४पुत्रभेदे। "सुतनूञ्च नराची च गौरेरास्तां परिग्रहः। पौण्ड्रञ्च कपिलञ्चैव वसुदेवस्य तौ सुतौ। नराच्यां कपिलो जज्ञे पौण्ड्रञ्च सुतनूसुतः। तयोर्ज्येष्ठोऽभवत् पौण्ड्रः कपिलश्च यवीयसी" हरिवं॰१६२ अ॰। ५भीम-सेनयुद्धे हृद्रुभेदे पु॰ शब्दमा॰। ७क्षत्रियात्तोपेन इष-त्तत्वप्राप्ते क्षत्रियभेदे मनुः १०।४४ स्वार्थे क। तत्रार्थे हृद्रुभेदे (पुड़ि)।

पौण्ड्रनागर पु॰ पौण्ड्रनगरे भवः अण् तस्य प्राच्यदेशत्वे-ऽपि नगरान्तत्वेन उत्तरपदवृद्धिः। पौण्ड्रनगरभवे।

पौण्ड्रमात्स्यक पु॰ राजभेदे भा॰ आ॰ ३७ अ॰।

पौण्ड्रवर्द्धन पु०(बेहार) ख्याते देशभेदे शब्दर० तत्र पौण्ड्रेषु प्राच्यत्वात् तथात्वम्। [२गोत्रप्रवरर्षिभेदे प्रवराध्यायः।

पौण्ड्रिक पु० पुण्ड्र+स्वार्थे ठञ्। १इक्षुभेदे शब्दमा०।

पौण्ड्र त्रि० पुण्ड्रेषु भौतिकातकर्मसु साधु अण्। पूर्वकर्मकारके काल्या० २१।२।५।

पौतव न० पौतव-पृषो०। परिमाणे हेमच०।

पौतिक त्रि० पूतिकेन दुर्गन्धिना निर्वृत्तम् सङ्घा० अण्। पूतिकद्रव्यनिर्वृत्ते।

पौतिमाष पु० ब०व०। पूतिमाषस्यार्घैः गोत्रापत्यं गर्गा० यञ्। तस्य छात्राः कण्वा० अण् यलोपः। पौतिमाषप्रच्छात्रेषु।

पौत्तक न० पोतृरिदं ठञ्। ऋत्विग्भेदपोतृसम्बन्धिनि।

पौत्तिक न० पुत्तिकाभिर्मधुमक्षिकाभेदैर्निर्वृत्तम् ठञ्। मधुनि रत्नमा०।

पौत्र पुंस्त्री० पुत्रस्यापत्यं शिवा०अण्। पुत्रस्य पुत्रे नप्तरि "पौत्रेणानन्त्यमश्नुते" इति स्मृतिः। स्त्रियां ङीप्।

पौदन्य पु० अश्मकस्थपनगरे भा० आ० १७७ अ०।

पौनःपुनिक त्रि०पुनःपुनर्भवः ठञ् टिलोपः। पुनःपुनर्भवे।

पौनःपुन्य न० पुनः पुनरेव स्वार्थे चतुर्वर्णा ष्यञ् टिलोपश्च। १पुनःपुनरित्यर्थे भावे ष्यञ्। २आभीक्ष्ण्ये

पौनरुक्त न० पुनरुक्तस्य भाव अजयनाअण्। पुनर्वारोक्तौ

पौनरुक्तिक न० पुनरुक्तमर्थं वेत्ति तत्पदं वाऽधीते वक्त्या० ठक्। १पुनरुक्तार्थाभिज्ञे २पुनरुक्तपदाध्येतरि च।

पौनर्भव पुंस्त्री पुनर्भू+विदा० अपत्ये अण्। पुनर्भूपत्ये १द्वादशपुत्रमध्ये पुत्रभेदे "पत्या वा च परित्यक्ता विधवा वा स्वयेच्छया। उत्पादयेत् पुनर्भूत्वा स पौनर्भव उच्यते" मनुः। २तथाविधकन्यायां स्त्री स्वार्थे अण्। तत्रार्थे "सप्त पौनर्भवाः कन्या वर्जनीयाः कुलाधमाः। वाचादत्ता मनोदत्ता कृतकौतुकमङ्गला। उदकस्पर्शिता या च या च पाणिमटौलिका। अग्निं परिगता या च पुनर्भूप्रभवा च। दत्तेताः काश्यपेनोक्ता दहन्ति कुलमग्निवत्" काश्यपोक्ते सप्तविधे २कन्याभेदे च। आर्षत्वात् ङीषभावः। अजादेराकृतिगणत्वात् वा टाप् दत्तेजे। पुनर्भुवं विन्दति अण्। ३पुनर्भूवेदके भर्तरि। "सा चेदक्षतयोनिः स्यात् गतप्रत्यागताऽपि वा। पौनर्भवेन भर्त्रा सा पुनःसंस्कारमर्हति" मनुः।

पौर त्रि० पुरे वसति भवे ठक्। १पुरवासिनि २रोहिषघटके न०(रामकर्पूर) अमरः। पूरः पूरक एव स्वार्थे अण्। २उदरपूरके त्रि०ऋ०२।११।१।भा०। पुरोभवः पुरस्+अण् टिलोपः। ३पूर्वदिग्देशकालभवे "पौरा ऊषगुरविज्ञा नित्यम्" इ०सं० १७ अ०।

पौरक न० पौर इव वायति के-क। सप्तपर्णोद्याने हेम०।

पौरकुत्सी स्त्री पुरकुत्सापत्यं स्त्री इञ् ङीप्। गाधिराजमातरि हरिवं० २७ अ०। [सभीयादौ।

पौरगीय त्रि० पुरग+ङयाप्० चतुरर्थां छण्। पुरगते०

पौरञ्ज पु० "पूरञ्जयारिप्रायव्यानां वैश्वामित्रदेवरातपौरञ्जयि आश्व०श्रौ०१२।१४।५ उक्ते गोत्रप्रवरर्षिभेदे। पूरञ्ज+स्वार्थे अण्। २पूरञ्जे स्त्रियां ङीप्। "पौरञ्जीं भूषणक्रियाम्" हरिवं० ९८अ०।

पौरन्दर त्रि० पुरन्दरस्येदम् पुरन्दरोदेवताऽस्य वा अण्। १शक्रसम्बन्धिनि २छत्रे डानच्छत्रे च ह०सं०१५अ०।

पौरव पुंक्लो० पु(पू)रोरपत्यमण्। १ययातिपुत्रभेदस्य पु(पू)रोरपत्ये २ततृसम्बन्धिनि च। ३उत्तरीय्यदेशभेदे ह० सं०१४अ०। मार्क०पु०५८ अ० तस्य पूर्वोत्तरदिक्स्थत्वसङ्ख्या यथा "विनेतोः पौरवाश्चैव गन्धर्वाश्च द्विजोत्तम!। पूर्वोत्तरन्तु कूर्मस्य पादमेते व्यवस्थिताः" सोऽभिजनोऽस्य तस्य राजा वा अण्। पित्रादिक्रमेण ४तद्देशवासिनि ५तद्भृत्ये च। [भक्तियुक्ते त्रि०कौ०।

पौरवीय त्रि० पौरवो राजा भक्तिरस्य छ। पौरवद्भक्ते

पौरस्त्यरणिक त्रि०पुरस्त्यरणस्य व्याख्यानस्तत्र भवो वा ठञ्। १पुरस्त्यरणप्रतिपादकग्रन्थव्याख्यानग्रन्थे २तत्र भवे च।

पौरस्त्य त्रि०पुरस्+भवार्थे ष्यञ्। १पुरोभवे २प्रथमे च अमरः

पौराणीय त्रि० पुराण+ङयाप्० चतुरर्थां छण्। पूर्वकालगतसुदूरदेशादौ। [१क०।

पौराण त्रि० पुराणे पठितः अण्। पुराणपठिते भा० आ०

पौराणिक त्रि० पुराणं वेत्त्यधीते वा "आख्यानाख्यायिकेतिहासपुराणेभ्यश्च" वार्त्ति० ठक्। १पुराणार्थाभिज्ञे २तदध्येतरि च। पुराणे पठिता ठक्। ३तत्र पठिते त्रि० स्त्रियां ङीप्।

पौरिक पु० दाक्षिणात्ये देशभेदे मार्क०पु० ५७ अ०।

पौरुकुत्स पु० गोत्रप्रवरर्षिभेदे प्रवराध्यायः।

पौरुष न० पुरुषस्य भावः कर्म वा युवा० अण्। १पुरुषत्वे २विक्रमे ३शक्तौ च। पुरुषस्येदम् अण्। ४जङ्गलिकतावाङ्गणिकमनुष्यपरिमाणे अमरः। "जलेऽपि भाने-ऽपि च पौरुषाधिकम्" नैष०। स्वार्थे अण्। ५पुरुषशब्दार्थे शत०ब्रा० १४।७।१।१२।

पौरुषांशकिन् पु० ब०व०। पुरुषांशकेन अधिका प्रोक्त-

अधीयते वेदनका० ठिनि। पुरुषांशकर्त्रिया प्रोक्ता-ध्येष्वर्थेषु।

पौरुषेय पु० पुरुषस्य अपत्ये यादि "पुरुषाद्वधविकारसमूहतेन कृतेषु" या० ठञ्। पुरुषस्य १वधे २विकारे ३समूहे ४तेन कृते च।

पौरेय त्रि० पुरस्यादूरदेशादि सख्या० ढञ्। नगरसमीपादौ

पौरोगव पु० पुरोऽग्रे याज्ञियवस्तुषु गौर्नेत्रं यस्य पुरोगुः ततः स्वार्थे प्रज्ञा० अण्। याज्ञिकाङ्गाध्वर्यौ अमरः।

पौरोहित त्रि० पुरोहितस्य धर्म्यम् भक्षिष्यादि० अण्। पुरोहितस्य धर्म्ये। [कर्मभेदे आश्व०श्रौ०२।१८।६।

पौर्णदर्वि न० पूर्णा दर्वी निष्पाद्यं कर्म अण्। वैदिके

पौर्णमास पु० पौर्णमास्यां भवः सम्भवेद्या० अण्। १पौर्णमासीविहिते याने "दर्शपौर्णमासाभ्यां यजेत" श्रुतिः स च द्विविधः यावज्जीवकालिकः पञ्चदशीप्रतिपत्सम्बन्धिकाले कर्त्तव्यश्च। तत्कालादिविधानं काल्या० श्रौ० २।१ कण्डिकादौ दृश्यम्। पूर्णौमासेन्द्रमासस्येयम् अण् पूर्णौ मासो यस्यां वर्त्तते "पूर्णमासादण् वक्तव्यः" वा० अण् वा। २शुक्लपक्षीयपञ्चदशकलात्रियायां तदुपलक्षितकालरूपायां वा ३तिथौ स्त्री ३तदुत्तरप्रतिपदि च "द्वे ह वै पौर्णमास्यौ पूर्वा उत्तरा च तत्र पञ्चदशी पूर्वा प्रतिपदुत्तरा" इति श्रुतेः तत्र पञ्चदशी सख्या प्रतिपदुत्तरा इत्यर्थः।

पौर्णमासिक त्रि० पूर्णमास्यां भवः कालाट् ठञ्। पौर्णमासभवे यागादौ वा० यत्। पौर्णमास्य तत्रार्थे।

पौर्णमी स्त्री पूर्णतया चन्द्रो-ऽवयवेनात्र मा-आधारे घञर्थे क स्वार्थे अण् ङीप्। पूर्णिमातिथौ त्रिका०। [२।१७८

पौर्त्तिक त्रि० पूर्त्ताय साधु ठक्। पूर्त्तसाधने कर्मणि मनु०

पौर्य्य पुंस्त्री०पुरस्यापत्यं कुर्वा०यञ्। पुरनामकस्य क्षत्रस्यापत्ये

पौर्वनगरेय त्रि० पूर्वनगर्यां भवः तत्रा०ढक्। पूर्वनगरीभवे

पौर्वपदिक त्रि० पूर्वपदं मन्त्रजातं ठञ्। पूर्वपदमाहके।

पौर्वातिथ पु० गोत्रप्रवरर्षिभेदे आश्व० श्रौ० १२।१४।१।

पौर्वापर्य्य न० पूर्वापरयोर्भावः ष्यञ्। पूर्वापरत्वे।

पौर्वाह्ण(ह्णिक)ह्ण त्रि० पूर्वाह्णे भवः यत् खञ् ठञ् वा पूर्वाह्णभवे। [च। पूर्वाह्णेतन तत्रार्थे त्रि०।

पौर्वाह्णिक त्रि० पूर्वाह्णे भवः ठञ्। पूर्वाह्णभवे पद्ये शु ट्ट्

पौर्विक त्रि० पूर्वस्मिन् काले भवः ठञ्। पूर्वकालभवे स्त्रियां ङीप्। "जातिं स्मरति पौर्विकीम्" मनुः ४।१४८।

पौलस्त्य पुंस्त्री० पुलस्त्यस्यापत्यं गर्गा०यञ्। पुलस्त्यापत्ये १कुबेरे २रावणादौ च मेदि०। स्त्रियां ङीप् यञोपः। पौलस्ती सूर्यभगिन्याम्। [विकारे।

पौलाक त्रि० पुलाकस्य विकारः पलाशा० अञ्। पुलाक-

पौलि पु०पुल--इन् वा० इञ्च। १ईषद्दग्धे धान्यपक्वावस्थे कलायादौ अमरः। स्वार्थे क। तत्रार्थे हेमच०।

पौलुषि पु० पुलुषवंशजे सत्ययज्ञे ऋषिभेदे शत०ब्रा०१०।६।१।१

पौलोमी स्त्री पुलोम्नोऽपत्यम् अण् अनोङोपः। पुलोमजायां शच्यां हेमच०।

पौष पु० पुष्येण युक्ता पौर्णमासी पुष्य-अण् यञोपः ङीप् पौषी सा यत्र मासे अर्द्धमासे वर्षे वा तुनरण्। १पुष्यनक्षत्रयुक्तपौर्णमासीयुक्ते १मासे २पक्षे ३अहोरात्रे वर्षभेदे कार्त्तिकशब्दे १६४६पृ० दृश्यम्। "मीनादिस्थो रविर्यैर्मासारम्भः प्रथमश्चैत्रादिरीत्या धनुःस्थरव्यारब्धः शुक्लप्रतिपदादिदर्शान्तात्मको मुख्यचान्द्रपौषः कृष्णपक्षादिपौर्णमासान्तः गौणः पौषः, धनूराशिस्थरविकः सौरः पौष इति भेदः तेनान्यत्र भक्तिः।

पौष्कर न०पुष्करस्याकारोऽस्यत्व मूले प्रज्ञा०अण्। १पुष्करमूले राजनि० पुष्करस्येदम् अण्। २पुष्करसम्बन्धिनि त्रि० विष्णोः पद्मतया प्रादुर्भावभूते ३पद्मे कल्पे पु०।

पौष्करमूल न०स्वार्थे अण्। पुष्करमूले सुगन्धिद्रव्यभेदे भरतः

पौष्करिणी स्त्री पुष्कराणां समूहः अण् स्वार्थे अण् वा ततोऽस्यर्थे इनि ङीप्। पुष्करिण्यां शब्दच०।

पौष्करेयक न० पुष्करे जातादि कत्त्र्या० ढकञ्। पुष्करे जातादौ स्त्रियां ङीप्।

पौष्कल त्रि० पुष्कलेन निर्वृत्तम् सङ्ख्या० अण्। १पुष्कलनिर्वृत्ते २सामभेदे न० "अथाहि शर्कं ककुभि पौष्कलम्" सामसं०भा०धृता श्रुतिः "तच्च गीतं पवस्व मधुमत्तम" इति प्रगाथे (उत्तरा० १म०१६) तस्मिन् पूर्वा ककुप् उत्तरा पङ्क्तिः। तत्र (ककुभि) पौष्कलं साम। (तच्च) अस्य गा०१म-१६ दर्शितम्।

पौष्कलावत पु० दिवोदासधन्वन्तरिं प्रति आयुर्वेदज्ञानार्थं प्रश्नकारके सुश्रुतसङ्ख्याध्यायिभेदे सुश्रुते १।१अ० दृश्यम्।

पौष्कलेयक त्रि० पुष्कले जातादि कत्त्र्या०ढकञ्। पुष्कले जातादौ स्त्रियां ङीप्।

पौष्टिक त्रि० पुष्टौ हितम् ठक्। पुष्टिसाधने कर्मभेदे "पुष्टिधनजनादीनां वृद्धिरित्यभिधीयते। तद्धेतुभूतं यत् कर्म पौष्टिकं तदिहोच्यते" स्मृतिर्गर्गभङ्गनः।

पौष्टी स्त्री पुरोर्नेत्रस्य स्त्रीभेदे भा० आ० ८३ अ०।

पौष्ण त्रि॰ पुषा देवताऽस्य तस्येदं वा अण् यस्येतलोपात् उप॰धालोपः। १पूषदेवताके श्रवणादौ २रेवतीनक्षत्रे न॰ ३पूषसम्बन्धिनि त्रि॰ स्त्रियां ङीप्।

पौष्य न॰ पुष्येण निर्वृत्तः तस्येदं वा अण्। १पुष्यसाध्ये २मद्यभेदे स्त्री। ३कृतपुष्यसम्बन्धिमात्रे त्रि॰ स्त्रियां ङीप्। ४पाटलिपुत्रनगर्यां स्त्री ङीप् शब्दरत्ना॰।

पौष्य पु॰करवीरपुराधिपे पुष्यः पुत्रे १स्वपभेदे तत्कथा "पुष्यः पुत्रोऽभवत् पौष्यः सर्वशास्त्रार्थपारगः" काशिकापु॰। उतङ्कनर्थिना गुरुदक्षिणार्थं याचिते तस्मै कृष्णकुण्डलादानरि २स्वपभेदे भा॰आ॰३अ॰। तदधिकृत्य कृतो ग्रन्थः अण्। भा॰ आ॰ पर्वान्तर्गते ३पर्वभेदे न॰।

प्याट् अव्य॰ प्याय–वा॰ डाटि। सम्बोधने अमरः।

प्याय्य इधौ भा॰आ॰अक॰सेट्। प्यायते, अप्यायि, अप्यायिष्ट इदित् ओदित्च पीनः।

प्यायस्थूण पु॰ गोत्रप्रवर्त्तकभेदे।

प्युक्ष न॰ अपि–उक्ष–वा॰ नक् अपेरलोपः। १क्षायुक्ते २अजगरसर्पे कर्मणि च कात्या॰स्रौ॰ १५।२।२१ कर्कः।

प्युष उत्सर्गे चु॰उभ॰सक॰सेट्। प्योषयति ते। अपुप्युषत् त

प्युष विभागे दाहे च दि॰ पर॰ सक॰ सेट्। प्युष्यते इदित् अप्युषत् अप्योषीत् पुष्प्रोष। [अप्योषीत् पुष्प्रोष।

प्युस विभागे दिवा॰पर॰सक॰सेट्। प्युष्यते इदित् अप्युषत्

प्यै इधौ भ्वा॰आ॰अक॰अनिट्। प्यायते अप्यास्त।

प्र अव्य॰प्रच–ड। १आरम्भे २गतौ ३उत्कर्षे ४प्राबल्ये ५सर्वतोभावे ६उत्पत्तौ, ७ख्यातौ ८व्यवहारे च पुरुषोत्तमः। अस्य क्रियायोगे उपसर्गत्वम्। गतित्वञ्च। अस्यार्थभेदोदाहरणानि गदाधरभट्टो॰ उक्तानि यथा

"प्र आदिकर्मदीक्षाभक्षणसम्भवतृप्तिवियोगशुद्धिमक्षीक्षाप्राप्तिपूजाप्रदर्शनेषु" प्रयातः। प्रबालमूषिकः प्रभुर्देवस्य। प्रवदन्ति दायादाः। क्षिप्तवतो गङ्गा प्रभवति। प्रभुक्तवत्। प्रोक्षितः। प्रसन्नं जलम्। प्रयक्तः। प्रार्थयते। प्रधानोऽग्निः। प्राङ्मुखः। प्रवासम्। प्रस्रोकयति"।

प्रउग न॰ प्राग्युगम् पृषो॰। १प्रागवर्त्तिनि युगे देवान्तरे कात्या॰ ७।६।५। कर्कः। तत्र चीयमानस्तोमः प्रउगचित्संज्ञा कात्या॰ १६।५।६। २यज्ञविशेषे प्रउगशस्त्रकथनमन्यत्रार्थे यजु॰१५।११। "प्रउगं शंसति निष्केवल्यं शंसति" सा॰स॰भाष्यधृता श्रुतिः "प्रउगनिष्केवल्यशब्दौ यज्ञविशेषनामनी" इत्युक्त्वा "अप्रगीतमन्त्रसाध्या स्तुतिः शस्त्रमिति माध्ये शस्त्रशब्दार्थमाह भाष्यकृत्।

प्रकङ्कत पु॰ १प्रकटविधे २प्रकटगमने सर्पभेदे अ॰ ।।१६।७।

प्रकट त्रि॰ प्र+कट–अच्। स्पष्टे।

प्रकटित त्रि॰ प्र+कट–क्त। प्रकाशिते हेमच॰।

प्रकण्व पु॰ प्रकटाः कण्वा यत्र। ऋष्यभिन्नत्वात् न टच्। देशभेदे स्त्रि॰कौ॰। अयोत टच् प्रकण्व इत्येव।

प्रकम्पन पु॰ प्र+कपि–णिच्–युच्। १वायौ "प्रकम्पनेनानु चक्रुस्थिरे धुराः" माघः। २नरकभेदे च शब्दरत्ना॰। ३प्रकम्पनकारके त्रि॰।

प्रकर पु॰ प्र+कृ–भावे अप्। १समूहे २व्याप्तिक्षेपे च। कर्मणि अप्। ३प्रकीर्णे पुष्पादौ त्रि॰। ४गुरुचन्दने न॰ मेदि॰

प्रकरण न॰ प्र+कृ–ल्युट्। १प्रस्तावे २अभिनेयनायकादिके दृश्यकाव्यभेदे हेमच॰। ३अन्यसन्धौ ४एकार्थप्रतिपादकग्रन्थांशे च त्रिका॰। नाटकादिनी दृश्य दृश्यकाव्यरूपकाणि विभज्य सा॰द॰ तल्लक्षणमुक्तं यथा

"भवेत् प्रकरणे वृत्तं लौकिकं कविकल्पितम्। मुद्राराक्षसवन्नाम्ना नायकस्तु विप्रोऽमात्योऽथ वा वणिक्। सापाय धर्मकामार्थपरो धीरप्रशान्तकः"। विप्रनायकं यथा मृच्छकटिकम्। अमात्यनायकं मालतीमाधवम्। वणिङ्नायकं पुष्पभूषितम्। "नायिका कुलजा क्वापि वेश्या क्वापि द्वयं क्वचित्। तेन भेदाश्चयस्तस्य तत्र भेदश्चतुर्विधः। कितवद्यूतकारादिविटचेटकसङ्कुलः"। कुलजो पुष्पभूषितो। वेश्या तरङ्गदत्ते द्वे अपि मृच्छकटिके। अस्य नाटकप्रकृतित्वात् शेषं नाटकवत्"। कर्त्तव्यस्य कृतिकर्त्तव्यताकाङ्क्षस्य वचनं प्रकरणम् इति भवरभाष्योक्तेऽर्थे च "स्तुतिविधिवाक्यप्रकरणस्थानसमाख्यानां पारदौर्बल्यमर्थविप्रकर्षात्" जै॰ ३।३।१५। तत्र विनियोगसाधने तस्य स्तुतिविधिवाक्यबाध्यत्वं स्थानसमाख्यायोर्बाधकत्वञ्च स्थितम्। "स्तुतिर्हितोया जगता च विधिं वाक्यं पदान्येव तु संहतानि। सा क्रिया या क्वचिदित्यपेक्षा स्थानं क्रमो योगवलं समाख्या" पार्थसारथिमिश्रः। शास्त्रसिद्धान्तप्रतिपादके ग्रन्थभेदे "अस्य च च वेदान्तप्रकरणत्वात्" वेदान्तसा॰।

प्रकरणसम पु॰गौतमोक्ते षट्पदार्थान्तर्गते १हेत्वाभासभेदे "यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः" गौ॰सू॰। "क्रमप्राप्तं प्रकरणसमं लक्षयति। स हेतुः स्वसाध्यस्य परसाध्याभावस्य वा निर्णयार्थमपदिष्टः प्रयुक्तः प्रकरणसम उच्यते स क इत्याकाङ्क्षायामाह यस्मात् प्रकरणचिन्तेति करणं "पक्षप्रतिपक्षाविति" भाष्यं

साध्यतदभावाविति तदर्थं तथा च निर्णयार्थं हेतुर्यत्र निर्णयं जनयितुमशक्तस्तुल्यबलेन परेण प्रतिबध्नात् किन्तु धर्मिणः साध्यवत्त्वं तदभावत्त्वं वेति चिन्तां जिज्ञासां प्रवर्त्तयति स प्रकरणसमः। यद्वा प्रकृष्टं करणं विकल्पं परामर्शो वा को हेतरनयोः साधकदूषकयोः कः परामर्शः प्रमेति वा यत्र जिज्ञासा भवतीत्यर्थः। यद्वादित्वादि वस्तुस्थितिमात्रं यत्तथन्तु तुल्यबलविरोधिपरामर्शकालीनपरामर्शविषयत्वं स्वसाध्यपरामर्शकालीनतुल्यबलविरोधिपरामर्शो वा। विरोधिपरामर्शस्य च हेत्वनिश्चयैकज्ञानविषयत्वसम्बन्धेन अन्यथा हेतोर्दुष्टत्वं न स्यात्। अयञ्च दशाविशेषे दोषः दुष्टतः सद्धेतोरपि विरोधिपरामर्शकाले दुष्टत्वमिष्टमेवेत्यवधेयम्" इत्तिः।

२जातिरूपाष्टमोत्तरभेदे गौ० ५।१।३६।८८ सू०।

"उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसमः" सू०

"उभयसाधर्म्यात् स्वयमसङ्कारादुतिरेकसङ्कारादा प्रक्रिया प्रकर्षेण क्रिया साधनं विपरीतसाधनमिति यावत्। तत्सिद्धेस्तस्य पूर्वमेव सिद्धेः तथाचाधिकबलत्वेनारोपितप्रमाणान्तरेण बाधेन प्रत्यवस्थानं प्रकरणसमः यथा शब्दोऽनित्यः कृतकत्वादित्युक्तेनैतदेवं स्यादपक्षत्वेन नित्यत्वसाधकेन बाधात् बाधादेशनाभासा चेयम्। इ०। "प्रतिपक्षात् प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः" सू०। अथोत्तरमाह प्रतिपक्षादिपरीतसाध्यसाधकत्वेनाभिमताच्छ्रावणत्वादितः प्रकरणसिद्धिद्वारा सदीयसाध्यस्य यः प्रतिषेधः त्वया क्रियते तस्यानुपपत्तिः कुतः प्रतिपक्षोपपत्तेः त्वत्पक्षापेक्षया प्रतिपक्षस्य मदीयपक्षोपपत्तेः साधनात्। अयमाशयः श्रावणत्वेन पूर्वं नित्यत्वस्य साधनाद्यो बाध उच्यते स नोपपद्यते पूर्वं साधितस्य बलवत्त्वाभावात् कदाचित् कृतकत्वेनानित्यत्वस्यापि पूर्वं साधनादिति त्वत्पक्षप्रतिषेधोऽपि स्यात्" इत्तिः।

प्रकरणी न० नाटिकाभेदे "नाटिकैव प्रकरणी स्यादार्यावाक्रादिनायका। समानवंशजा नेतुर्भवेद्यत्र च नायिका" सा०द०

प्रकरी स्त्री १नाट्याङ्गभेदे २चत्वरभूमौ च शब्दरत्ना०।

प्रकर्ष पु० प्र+कृष-घञ्। १उत्कर्षे २प्रकृष्टतया कर्षणे च।

प्रकर्षण न० प्र+कृष-ल्युट्। १उत्कर्षे २आकर्षणे च।

प्रकर्षविद् पु० प्रकृष्टां कलां वेत्ति विद-क्विप् तुको० हुखः। १विघ्नज्ञाने निरु०६।६। २अज्ञातरि त्रि०ऋ०७।८८।५भा०

प्रकाण्ड पु०प्रकृष्टः काण्डः प्रा०त०। १वृक्षस्य मूलादारभ्य शाखान्ते भागे। २प्रशस्ते न०। ३विटपे पु० मेदि०।

प्रकाण्डर पु० प्रकाण्ड+अस्त्यर्थे वा० र। वृक्षे शब्दच०।

प्रकाम त्रि०प्रगतः कामम् प्रा०स०। १यथेष्टे अमरः। प्रा०ब०। २प्रकृष्टकामके त्रि०। ३देवभेदे पु०यजु० २०।१२।

प्रकामम् अव्य०प्र+काम-अमुच्। अत्यर्थे अनुमतौ च अमरः।

प्रकामोदा पु० देवभेदे यजु०२०।८

प्रकार पु० प्र+कृ+घञ्। १भेदे २सादृश्ये च अमरः। ३विशिष्टज्ञाने विशेषणतया भासमाने पदार्थे "स्वाधिकरणप्रकारावच्छिन्ना या या विषयता तदनिरूपकत्वम् सर्वांशे भ्रमभिन्नत्वमिति" गदाधरः।

प्रकारता स्त्री प्रकारस्य भावः तल्। १विषयताभेदे भासमानविशेषणप्रतियोगिकसंसर्गावच्छिन्नविषयत्वे।

प्रकालन त्रि० प्रकालयति प्र+कालि ल्यु। १क्षिंसके २मर्दभेदे पु० भा०श्रा०७५ अ०। भावे ल्युट्। ३मार्जने न०।

प्रकाश पु०प्र+काश-घञ्। १आतपे २विकाशे च। कर्त्तरि कच्। ३विकाशयुक्ते त्रि०अमरः। प्रकाशश्च सत्त्वगुणतेजःसाधारणः यथोक्तम्"जड़प्रकाशायोगात् प्रकाशः" सां०सू० "वैशेषिका आहुः। प्राग्प्रकाशरूपस्य जड़स्यात्मनो मनःसंयोगाज्ज्ञानाख्यप्रकाशो जायत इति तन्न। लोके जड़स्यापि प्रकाशस्य लोष्टादेः प्रकाशोत्पत्त्यदर्शनेन तदयोगात्। अतः सूर्यादिवत् प्रकाशस्वरूप एव पुरुषः इत्यर्थः। तथा च श्रुतिः "यथा प्रकाशतमसोः समन्वयो नोपपद्यते। तद्वदैक्यं न संसर्गः प्रपञ्चपरमात्मनोः"। इति। "यथा दीपः प्रकाशात्मा ह्यनो वा यदि वा सहान्। ज्ञानात्मानं तथा विद्यात् पुरुषं सर्वजन्तुषु" इति च। प्रकाशत्वं च तेजःसमवैतन्ये अनुगतमस्वच्छोपाधिरनुगतव्यवहारादिति। ननु प्रकाशस्वरूपत्वेऽपि तेजोवद्धर्मधर्मिभावोऽस्ति न वा तत्राह सां०प्र०भा० "निर्गुणत्वाच्च चिद्धर्मा" सू० "पुरुषस्य प्रकाशरूपत्वे सिद्धे तत्सम्बन्धात्तेऽन्यव्यवहारोपपत्तौ प्रकाशात्मकधर्मकल्पनागौरवमित्यपि बोध्यम्। तेजसस्तु प्रकाशात्मकरूपविशेषायोगेऽपि स्वर्णसुरस्कारेण यद्वात् प्रकाशतेजसोर्भेदः सिद्धयति। आत्मनस्तु ज्ञानाख्यप्रकाशायोगे यद्वर्णं नास्तीत्यतो स्वयमाद्यर्मधर्मिभावशून्यं प्रकाशरूपमेवात्मद्रव्यं कल्प्यते। तस्य च न गुणत्वम् संयोगादिमत्त्वात् अनाश्रितत्वाच्चेति। तथा च स्मर्यते "ज्ञानं नैवात्मनो धर्मो न गुणो वा कथञ्चन। ज्ञानस्वरूप एवात्मा नित्यः

पूर्णः सदा शिवः" सां॰प्र॰भा॰। वैवस्वतमनोः २पुत्रभेदे हरिवं॰७अ॰।

प्रकाशक त्रि॰ प्रकाशयति प्र+काश-णिच् ण्वुल्। १प्रकाशकारके चन्द्रार्कादौ सांख्यमतसिद्धे २सत्त्वगुणे च "तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम्" गीता।

प्रकाशककाल पु॰ प्रकाशकश्चासौ कालश्चेति। कुक्कुटे शब्दच॰। तस्य प्रथमं प्रकाशकस्यार्थस्यातृत्वात्तत्त्वात्तथात्वम्।

प्रकाशन त्रि॰ प्रकाशयति प्र+काश-णिच्-ल्यु। १प्रकाशकारके २विष्णौ पु॰। "नैकरूपो बहुरूपः शिपिविष्टः प्रकाशनः" विष्णुस॰।

प्रकाशात्मन् पु॰प्रकाश आत्मा स्वरूपमस्य। १विष्णौ "प्रकाशात्मा प्रतापनः" विष्णुस॰। २व्यक्तस्वभावे त्रि॰।

प्रकाशित त्रि॰प्र+काश+णिच्-कर्मणि क्त। १प्रकटिते हेम॰ प्र+काश-कर्त्तरि क्त। २प्रकाशयुते त्रि॰। भावे क्त। ३प्रकाशे न॰।

प्रकाश्य त्रि॰ प्र+काशि-कर्मणि यत्। १प्रकाशनीये २प्रायोग्यर्थगुणवादौ नवके न॰ शार्ङ्गी॰ ए॰ ब॰। नवनवकशब्दे २८८८ पृ॰ दृश्यम्।

प्रकीर्ण न॰ प्र+कृ-कर्मणि क्त। १चामरे जटा॰। २पत्रविच्छेदे त्रिका॰। ३विक्षिप्ते ४मिश्रिते विभिन्नजातीये त्रि॰। ५पूतिकरञ्जे पु॰ राजनि॰। भावे क्त। भिन्नजातीयानां ६मिश्रणे ७विक्षेपे ८विस्तारे च न॰। स्वार्थे क। तत्रार्थे। अनुक्तप्रायश्चित्तविशेषे प्रायश्चित्तविशेषे प्रायश्चित्तशब्दे ४२६६ पृ॰ विष्णुवाक्यम् दृश्यम्। "अनुक्तं तत्प्रकीर्णकम्" अनुक्तमनुक्तनिष्कृतिकं पापं प्रकीर्णकमित्यर्थः। "अनुक्तनिष्कृतीनां तु पापानामपलुत्तये। शक्तिञ्चावेक्ष्य पापञ्च प्रायश्चित्तं प्रकल्पयेत्" विष्णुसंहितः "प्रकीर्णपातके ज्ञात्वा गुरुत्वमथ लाघवम्। प्रायश्चित्तं बुधः कुर्यात् प्राङ्मुखात्तुमतः सदा" विष्णुः। "क्षयविक्षयदुष्टभोजनप्रतिषेधेषु अनादिष्टप्रायश्चित्तेषु चान्द्रायणं प्रजापत्यं वा" शङ्खलिखितौ। भट्टिकाव्ये नानाजातीयप्रत्ययोदाहरणबोधकत्वात्तं प्रकीर्णकाख्यम्। संज्ञायां कन्। तरङ्गिते पुंस्त्री॰ स्त्रियां जातित्वात् ङीष्।

प्रकीर्य पु॰ प्रकीर्यतेऽसौ प्र+कृ-क्यप्। (छाटाकरमचा) १करञ्जभेदे अमरः। २छतकरञ्जे (रोठाकरमचा) राजनि॰। ३विक्षेपे ४व्याप्ते च त्रि॰।

प्रकुञ्च पु॰"प्रकुञ्चः कोड्डयी विश्वं प्रथमेवास्य कीर्त्यते" भावप्र॰ उक्ते प्रथमरूपे मानभेदे। "चूर्णप्रकुञ्चम्" इत्यादि सुश्रुतः

प्रकुल न॰ प्र+कुल-कर्त्तरि क। प्रथमदेहे त्रिकाण्डशेषः।

प्रकूष्माण्डी स्त्री दुर्गायां हेमच॰।

प्रक्रान्त त्रि॰ प्र+क्रम-क्त। १व्यधिक्रान्ते २आरब्धे ३प्रकरणप्राप्ते च। ४ऋषिभेदे पु॰। प्रक्रान्तायन तद्गोत्रापत्ये पुंस्त्री॰।

प्रक्रान्ति स्त्री प्र+क्रम-कर्त्तरि क्तिच् मादादौ क्तिन् वा। १क्षमाभावे २योनौ ३चिह्ने ४स्त्रीसम्भोगादौ राज्ञाङ्के अमरः। ५गिल्लिनि हेम॰। ६शक्तौ ७वोधिति शब्दर॰। ८परमात्मनि धरणिः। १०आकाशादिभूतप्रभवे ११करणे १२गुह्ये १३जन्तौ च १४एकविंशत्यक्षरपादके छन्दोभेदे। १५मातरि १६प्रत्ययनिमित्ते शब्दभेदे तद्बोधकं शब्द॰प्र॰ शब्दं यथा "क्षोपस्त्याध्ययदर्शस्य बोधने यस्य निश्चयः। तत्त्वेन हेतुरूपेण वा प्रक्रान्तिः सा तदर्थिका। तत्त्वेन यच्चिह्नत्वेन क्षोपस्त्याध्ययाद्यर्थस्यान्वयबोधं प्रति स्त्याद्यवच्छिन्नोत्तरत्वसंसर्गेण आद्यशब्दोक्तानियत्वेन हेतुत्वं तादृश एव शब्दस्तथाविधार्थे प्रक्रान्तिरिति तु फलितार्थः। बहुगुडो द्राक्षेत्यादौ बहुजाद्यर्थस्यान्वयबोधं प्रति गुडादिपदधर्मिकबहुजादिनिरूपत्वेन न हेतुत्वमपि तु सुबादिधर्मिकबहुगुडादिपदनिरूपत्वेन अन्यथा केवलादपि बहुगुडादिशब्दाद् द्राक्षादौ बहुजाद्यर्थस्यान्वयबोधापत्तेरिति न तत्र प्रसङ्गः"। "निरुक्ता प्रक्रान्तिर्द्विधा नामधातुप्रभेदतः। यत् प्रातिपदिकं प्रोक्तं तच्चाम्नो नातिरिच्यते। निरुक्ता न तु सांख्यानामिव जगदुपादानभूता। यच्च पाणिनिप्रभृतिभिः प्रातिपदिकं प्रक्रान्तिरित्युक्तं तदपि नाम्नो नातिरिच्यते नामतो विभागमन्वभूतत्वात्"। वैयाकरणमते तल्लक्षणन्तु शब्दार्थरत्नेऽस्माभिरुक्तं यथा "एवं प्रक्रान्तिप्रत्ययादिस्वरूपपदस्वरूपे तद्विभागे च दर्शिते इदानीं तदवयवस्वरूपप्रक्रान्तिप्रत्ययस्वरूपविभागौ प्रदर्श्येते। तत्र प्रक्रान्तिर्नाम अर्थावबोधहेतुः प्रत्ययविधानावधिभूतः शब्दविशेषः सर्वेषामेव च प्रत्ययानां प्रकृतिं निमित्तीकृत्यैव विधानात्। प्रत्ययानान्तु प्रत्ययस्वरूपेणैव निर्देशः न तु वस्तुतोऽपि प्रत्ययत्वेनैव नान्योन्याश्रयः। अवधित्वञ्च पूर्वापरत्वरूपं ज्ञाप्यं तेन बहुजादेर्निमित्तप्रक्रान्तौ नाप्रसङ्गः। वस्तुतस्तु सिद्धान्ते क्तिशब्दानां वस्तुदावशक्तिस्वीकारात् तद्धितादीनां निरर्थकत्वान्न तत्र प्रक्रान्तिप्रत्ययादिविभागः। अत एव भाष्ये "तावेव सुप्तिङौ यौ तत्र परौ सैव प्रक्रान्तिरादेशेति" सुप्तिङ्मात्रयोरेव प्रत्ययत्वमित्युक्तम्।

तरोविधानावधेः यौ परौ तावेव सुप्तिङौ वा च तयोराद्या विधानावधिभूता सैव प्रकृतिरिति तदर्थः। यतदभिप्रायेणैव कृत्स्ना "यः शब्दः स्वेतरस्यार्थे स्वार्थस्यान्वयबोधने। यदपेक्षत्वयोः पूर्वा प्रकृतिः प्रत्ययः परः" इति प्रकृत्यादिलक्षणमुक्तम्। अत्र च पूर्वत्वं बोधकशब्दविधानावधित्वमेव बोध्यं भाष्यैकवाक्यत्वात् नत्वेतत्कारिकोपात्तपूर्वापरत्वं तथासति पचतीत्यादौ तिङादेरेव धात्वर्थे स्वार्थप्रकारकान्वयबोधजनकत्वस्वीकारात् तत्रातिव्याप्तेः। एवञ्च निरुक्तपूर्वत्वरूपलक्षणेनैव प्रसङ्गातिप्रसङ्गादिवारणसम्भवे प्रकृतिप्रत्ययबोधकत्वसाकाङ्क्षत्वद्योतनायैव यः शब्द इत्यादिकथनं बोध्यमेवञ्च यस्यार्थे इत्यत्र विशेष्यतया विशेषणतया वान्वयबोधने इत्यर्थः तेन सिद्धान्ते तिङर्थप्रकारकान्वयबोधेऽपि न क्षतिः। तथा च तदर्थान्वितस्वार्थबोधने तदपेक्षत्वे सति तद्विधानावधिभूतत्वं तत्प्रकृतित्वमिति फलितम्। एवञ्चावयवशक्तिस्वीकारेऽपि वञ्चजादावतिप्रसङ्गादिवारणमपि नोदेति वञ्चजादेः प्रकृतिविधानावधित्वाभावात् अवधित्वस्य पूर्वापरत्वरूपस्य निवेशात्। अत एतत्सूत्रे भाष्ये सुप्तिङ्शब्दौ प्रत्ययान्तरस्याप्युपलक्षकाविति द्रष्टव्यम्। तथा शेखरकारेणापि प्रत्ययविधानुद्देश्यतावच्छेदकाक्रान्तत्वमेव प्रकृतित्वमित्यभिदधे पूर्वसिद्धवस्तुन एव उद्देश्यत्वसम्भवात् पूर्वत्वमर्थाद्यात बञ्चजादेरपि सुप उद्देश्यत्वान्न किञ्चिदनुपपन्नमवशेषीति। एवञ्च प्रकरोति प्रत्ययं बोधयतीत्युत्पत्तिसत्त्वात् प्रकृतिशब्दो योगरूढ इति बोध्यम्"। १७उपादानकारणे "प्रकृतिश्च दृष्टान्तानुपरोधात्" शा॰सू॰ "सती ह्यविद्यमाना वा प्रकृतिः परिणामिनी" कारि॰। १८उपदिश्यमानेऽङ्गे कर्मभेदे। तदेतत् नागेशभा॰निर्णीतं यथा "नन्वत्र का प्रकृतिः का विकृतिरिति चेत् उच्यते यत्र कर्त्तव्यं सर्वं प्रकर्षेण कर्मान्तरनैरपेक्ष्येणोपदिश्यते सा प्रकृतिः यत्र विशेषरूपमेव कर्त्तव्यं स्वल्पोपदिश्यते इतरत् सर्वं कर्मान्तरादतिदिश्यते सा विकृतिः। सचातिदेशः प्रत्यक्षवचनाद्वा सामर्थ्याद्वा लिङ्गाद्वाऽवगन्तव्यः। तत् सर्वं चतुर्थाध्यायाद्यां बहुधा विचारितम्। प्रकृतिश्च द्विविधा मूलप्रकृतिरवान्तरप्रकृतिश्चेति। सर्वाङ्गेषु कर्मान्तरनिरपेक्षा मूलप्रकृतिः कतिपयेष्वङ्गेषु कर्मान्तरं चापेक्षते सावच्च कैश्चित् कर्मभिरपेक्षणीया भवति सैवमवान्तरप्रकृतिः। तत्र तिस्रोमूलप्रकृतयः तासाञ्चतुर्थाध्यायस्य प्रथमपादे तृतीयाधिकरणस्य द्वितीयवर्णके विचारिताः। "दध्नस्निहोत्रसोमानां मूलप्रकृतिता न हि। अस्ति वा नालौकिकत्वादियत्तानवधारणात्। लोकवत् सन्निपात्यारादुपकारिद्वयश्रुतेः। दृष्टत्वायानिश्चितत्वान्मूलप्रकृतिता त्रिषु। अलौकिकत्वेनैतावद्भिरङ्गैः सम्पूर्ण उपकार इति निश्चेतुमशक्यत्वात् दध्यादीनां नास्ति मूलप्रकृतित्वमिति चेत् कथं लौकिकसदृशत्वात्। यथा लोके भुञ्जक्रियायामोदनः कर्म तस्य सन्निपत्योपकारिणः शाकसूपादयः, आरादुपकारिणः पीठप्रदीपादयः। तथा भावनायां यागः कर्मणः अवघातादयः सन्निपातिनः, प्रयाजादयः आरादुपकारिणः। अतो नात्यन्तिकमलौकिकत्वम्। दृष्टत्वं लौकिके यथा प्रत्यक्षेण निश्चीयते तथा श्रौते श्रुत्या निश्चीयतां तस्मादिष्वग्निहोत्रसोमानां मूलप्रकृतित्वमस्ति"।

१९सत्त्वरजस्तमसां साम्यावस्थायां साम्यावस्थोपलक्षिते सत्त्वादिगुणे। "सत्त्वं रजस्तमश्चैव गुणत्रयमुदाहृतम्। साम्यावस्थितिरेतेषां प्रकृतिः परिकीर्त्तिता। केचित् प्रधानमित्याहुरव्यक्तमपरे जगुः। एतदेव प्रजासृष्टिं करोति विकरोति च" मात्स्ये ४अ०।

"सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः" सा सू०। "तेषां सत्त्वादिद्रव्याणां या साम्यावस्थाऽन्यूनानतिरिक्तावस्थान्यूनाधिकभावेनासंहतावस्थेति यावत् सकार्य्यावस्थेति निष्कर्षः। सकार्य्यावस्थोपलक्षितं गुणसाम्यान्यं प्रकृतिरित्यर्थः। यद्यप्युते वैषम्यावस्थायां प्रकृतिनाशप्रसङ्गात् "सत्त्वं रजस्तम इति एषैव प्रकृतिः सदा। एषैव संसृतिर्जन्तोरस्या पारे परं पदम्" इत्यादि स्मृतिभिर्गुणसामान्यस्यैव प्रकृतित्ववचनाच्च। सत्त्वादीनामनुगमाय सामान्येति। पुरुषव्यवर्त्तनाय गुणेति। महदादिव्यावर्तनाय चोपलक्षितान्यमिति। महदादयोऽपि हि कार्य्यं सत्त्वादिद्वयाः पुरुषोपकरणतया गुणाश्च भवन्तीति। तदत्र प्रकृतेः स्वरूपमेवोक्तम्। अस्या विशेषस्तु पश्चादुच्यते" प्र०भा०। "मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकस्तु विकारो न प्रकृति र्न विकृतिः पुरुषः" सां० का०। "सर्वेषतो हि शास्त्रार्थश्च चतस्रो विधाः। क्वचिदर्थः प्रकृतिरेव, क्वचित् विकृतिरेव, क्वचित् प्रकृतिविकृतिः क्वचिदनुभयरूप इति। तत्र का प्रकृतिरेवेत्यत उक्तम् मूलप्रकृतिरविकृतिरिति प्रकरोतीति प्रकृतिः प्रधानं सत्त्वरज-

क्षणवां साम्यावस्था सा कविकृतिः। प्रकृतिरेवेत्यर्थः कस्मादित्यत उक्तम् मूलेति मूलस्यासौ प्रकृतिश्चेति मूलप्रकृतिः विश्वस्य कार्यसंघातस्य सा मूलं सत्वस्था मूलान्तरमस्तीति भावः। कतमाः पुनः प्रकृतिविकृतयः कियत्वस्तत्वेवत उक्तम् महदाद्याः प्रकृतिविकृतयः सप्तेति प्रकृतयश्च ता विकृतयश्च ता इति। तथा हि महत्तत्त्वमहङ्कारश्च प्रकृतिर्विकृतिश्च मूलप्रकृतेः। एवमहङ्कारतत्त्वं तन्मात्राण्यभिन्द्रियाण्याद्यश्च प्रकृतिर्विकृतयश्च महतः। एवं पञ्चतन्मात्राण्यि भूतानामाकाशादीनां प्रकृतयो विकृतयश्चाहङ्कारश्च। कथं विकृतिरेव कियती चेत्यत उक्तं षोड़शकस्तु विकार इति। षोडशसंख्यापरिमितो गणः षोडशकः तुशब्दोऽवधारणे भिन्नक्रमश्च पञ्चमहाभूतान्येकादशेन्द्रियाणि चेति षोड़शको गणो विकार एव "न प्रकृतिरिति। यद्यपि च पृथिव्यादीनामपि गोघटहस्त्यादयो विकाराः एवं तद्विकारभेदानां दध्यङ्कुरादयस्तस्यापि गवादयो बीजादयो वा न पृथिव्यादिभ्यस्तत्त्वान्तरं तत्त्वान्तरोपादानत्वञ्च प्रकृतित्वमिहाभिप्रेतमिति न दोषः सर्वेषां गोघटादीनां स्थूलतेन्द्रियग्राह्यता च सामेति न तत्त्वान्तरत्वम्। अनुभवरूपमुक्तं तदाह न प्रकृतिर्न विकृतिः पुरुषः इति त०कौ०। शब्दस्पर्शविहीनं तदादिभिरसंयुतम्। त्रिगुणं तत् जगद्योनिः" स्मृतिः। तदनुमापका कार्यभेदाः तद्भेदाश्च सा०सू० भाष्यादुक्ता यथा "ततः प्रकृतेः" सा० सू० "ततो महत्तत्त्वात् कार्यात् कारणतया प्रकृतेरनुमानेन बोध इत्यर्थः। अन्तःकरणसामान्यस्यापि कार्यत्वं तावदेकदा पञ्चेन्द्रियज्ञानानुत्पत्त्या मध्यमपरिमाणतया देहादिवदेव सिद्धं स्मृतिश्रुतिप्रमाण्याच्च। तस्य च प्रकृतिकार्यत्वेऽयं प्रयोगः। सुखदुःखमोहधर्मिणी बुद्धिः सुखदुःखमोहधर्मकद्रव्यजन्या कार्यत्वे सति सुखदुःखमोहात्मकत्वात् कान्तादिवदिति कारणगुणानुसारेणैव कार्यगुणौचित्यं चात्रानुकूलतर्कः स्मृतिश्रुतयोऽप्येतदभिप्रायाः भा० "हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्" सू० कारणानुमापकत्वाच्च गमनादात्र लिङ्गं कार्यजातम् न तु महत्तत्त्वमात्रमत्र विवक्षितं हेतुमत्त्वादीनामखिलकार्यसाधारण्यात्। "हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्। सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्" इति कारिकायामयत एव व्यक्ताख्यं सर्वं कार्यमेव लिङ्गमित्युक्तम्। तथा च तल्लिङ्गं हेतुमत्त्वादिधर्मकमिति वाक्यार्थः। तत्र हेतुमत्त्वं कारणवत्त्वम् अनित्यत्वं विनाशिता प्रधानस्य या व्यापिता पूर्वोक्ता तद्विपरीतमव्यापित्वम्। सक्रियत्वमध्यवसायादिरूपनियतकार्यकारित्वम्। प्रधानस्य तु सर्वक्रियाधाराश्रयत्वेन कारणत्वान्न कार्यैकदेशमात्रकारित्वम्। न च क्रिया कर्मैव वक्तुं शक्यते प्रकृतित्वोभावात् सृष्टित्वरूपेण प्रकृतेरपि कर्मवत्तया सक्रियत्वापत्तेरिति। अनेकत्वं सर्गभेदेन भिन्नत्वम्। सर्गद्वयाधारत्वमिति यावत्। न पुनः सजातीयानेकव्यक्तिकत्वम् प्रकृतावति व्याप्तेः प्रकृतेरपि सत्त्वाद्यनेकरूपत्वात् "सत्त्वादीनामतद्धर्मत्वं तद्रूपत्वात्" इत्यागामिसूत्रादिति। आश्रितत्वं चावयवेष्विति सा०प्र०भा०) एतद्विपरीतत्वमेव तद्धर्मत्वम्। २०प्रकृत्यंशदेवीपञ्चकरूपशक्तिभेदे "गणेशजननी दुर्गा१ राधा२ रमा३ सरस्वती४। सावित्री५ च सृष्टिविधौ प्रकृतिः पञ्चमी स्मृता"। प्रकृतिशब्दनिरुक्तिर्यथा "प्रकृष्टवाचकः प्रश्च कृतिश्च सृष्टिवाचकः। सृष्टौ प्रकृष्टा या देवी प्रकृतिः सा प्रकीर्तिता। गुणे प्रकृष्टे सत्त्वे च प्रशब्दो वर्त्तते श्रुतौ। मध्यमे रजसि ज्ञेय तिशब्दस्तामसः स्मृतः। त्रिगुणात्मस्वरूपा या सर्वशक्तिसमन्विता। प्रधाना सृष्टिकरणे प्रकृतिस्तेन कथ्यते। प्रथमे वर्त्तते प्रश्च कृतिश्च सृष्टिवाचकः। सृष्टेराद्या च या देवी प्रकृतिः सा प्रकीर्तिता"। तस्या आविर्भूतिः स्वरूपञ्च यथा "योगेनात्मा सृष्टिविधौ द्विधारूपो बभूव सः। पुमांश्च दक्षिणार्द्धाङ्गात् वामार्द्धात् प्रकृतिः स्मृता। या च ब्रह्मस्वरूपा च यथा नित्या सनातनी। यथात्मा च यथाशक्तिर्यथाग्नौ दाहिका स्मृता। अत एव हि योगीन्द्रः स्त्रीपुंभेदं न मन्यते। सर्वं ब्रह्ममयं ब्रह्मन्! पश्यति पश्यति नारद!। स्वेच्छामयं स्वेच्छया च श्रीकृष्णस्य विग्रहवयो। साविर्बभूव सहसा मूलप्रकृतिरीश्वरी। तथा प्रेता पञ्चविधा सृष्टिकर्मणि भेदतः। सर्वाः प्रकृतिसम्भूता उत्तमाधममध्यमाः। सत्त्वांशादेवोत्तमा प्रेताः सुखीलाश्च प्रतिग्रहाः। मध्यमा राजसांशाश्च भोग्याः प्रकीर्तिताः। सुखसम्भोगवश्याश्च स्वकार्ये तत्पराः सदा। अधमास्तामसांशाश्च जाताः कुलसम्भवाः। दुर्लङ्घ्याः कुलटा धूर्ताः स्वतन्त्राः कलहप्रियाः। पृथिव्यां कुलटा याश्च स्वर्गे चाप्सरसां गणाः। प्रकृतेस्तामसांशास्ताः पुंश्चल्यः परिकीर्तिताः। एवं निगदितं सर्वं प्रकृतेः परिकीर्तनम्"।

इति स्त्रीभावस्य प्रकृत्यंशतया प्रकृतिवाचकशब्दस्यैव प्राधान्यकीर्त्यत्वं निर्णीतं यथा
"आदौ राधां समुच्चार्य्य पश्चात् कृष्णं विदुर्बुधाः। विपरीतमस्य मां भक्तं वद भक्तजनप्रिय!" श्रीनारायण उवाच "विपरीतमस्य त्रिविधं कथयामि निशामय। जगन्माता च प्रकृतिः पुरुषस्य जगत्पिता। नरीयर्तीति जगतां माता श्रुतिषुधैः पिता। राधाकृष्णेति गौरीशेत्येवं शब्दः श्रुतौ श्रुतः। कृष्णराधेशगौरीति लोके न च कदा श्रुतः। प्रसीद रोहिणीचन्द्र! मदाराध्यमिदं मम। मदाराध्यं यथादत्तं संत्यज्य मह भास्कर!। प्रसीद कमलाकान्त! मदाराध्य मम प्रभुम्। इति दत्तं सामवेदे कौथुमे मुनिसत्तम!। राधाशब्दोच्चारणादेव स्त्रीतो भवति माधवः। धाशब्दोच्चारतः पश्चाद्भावलेव ससम्भ्रमः। आदौ पुरुषमुच्चार्य्य पश्चात् प्रकृतिमुच्चरेत्। स भवेन्मदाराध्यो च वेदातिक्रमणे मुने!" ब्रह्मवैव० जन्म० ख० ५० अ०।

प्रकृतिज त्रि० प्रकृत्या जायते जन-ड। १स्वभावजे। प्रकृतिरूपेण जायते जन-ड। प्रकृतिस्वभावरूपे सांख्यमतसिद्धे सत्त्वादिगुणे "गुणाः प्रकृतिजामताः" गीता।

प्रकृतिधर्म्म पु० ६त०। सांख्यमतसिद्धे प्रकृतिधर्मभेदे स च प्रकृतिशब्दे हेतुमदनित्यादिविपरीतधर्मरूपेण दर्शितः। सम्प्रति तु "अत ऊर्द्धं" प्रकृतिपुरुषयोः साधर्म्यवैधर्म्ये व्याख्यास्यामः। तद्यथा "उभयव्यक्तादौ उभयव्यक्तज्ञौ उभयव्यक्तिकृतौ उभयेऽपि नित्यौ उभयव्यापरौ उभौ च सर्वगतावितिः। एका तु प्रकृतिरचेतना त्रिगुणा बीजधर्मिणी प्रसवधर्मिण्यमध्यस्थधर्मिणी चेति। बहवस्तु पुरुषार्थेतनावन्तोऽगुणा अबीजधर्मिणोऽप्रसवधर्मिणो मध्यस्थधर्मिणश्चेति"।

प्रकृतिमण्डल न० ६त०। १राज्याङ्गेषु स्वाम्यमात्यादिषु २प्रजासमुदाये च रघुः ८।२ लोकमा० मल्लिनाथः।

प्रकृतिवत् अव्य० प्रकृत्या तुल्यम् प्रकृति+वति। व्याकरणप्रसिद्धे आदिश्यमानस्य प्रकृतिभूतस्यानितुल्यकार्य्ये।

प्रकृत्यादि पु० प्रकृतिशब्द आदिर्यस्य। सर्वविभक्तिप्रपदात् तृतीयादिभिन्ने शब्दगणे स च यथा "प्रकृति प्राप गोत्र सम विषम हिरोध पङ्क साधस्व"। प्रकृत्या प्रायेण यात्रिकः इत्यादि। यात्रतिगणोऽयम्। तेन नाम्ना कृतीच्छाचरितेन दासः" भट्टिः इत्यादि।

प्रकृष्ट त्रि० प्र+कृष-क्त। उत्कर्षयुक्ते हेमच०।

प्रकृष्य त्रि० प्र+कृष-कर्मणि क्यप्। भूमिसंलग्नतया कर्षणीये "उलूखलमुशो यूपः प्रकृष्यः" कात्या० श्रौ० २४।६।२७। प्रकृष्यः देशान्तरनयनेन प्रकर्षणीयः भूमिसंलग्नतया प्रेरणीयो न तु वृत्पाठेनेति तदर्वः।

प्रकृ॒ति स्त्री प्र+कृप-भावे क्तिन्। उपकृतौ विद्यमानतायां कात्या० १।८।२२

प्रकेत त्रि० प्र+कित-घिच्-अच्। १प्रकर्षेण ज्ञापके ऋ०१।११२।१भा०। प्रकर्षेण कं सुखमीयतेऽनेन प्र-कै-वा०करणे क्त। २प्रकृष्टसुखसाधने यजु० १५।६०वेददीपः।

प्रकोप पु० प्र+कुप-पतितत्वे भावे घञ्। १प्रकृष्टपतने २संक्षोभे च "शीघ्रं स्रुतो हि महतां सतयोपनद्धः सर्वं प्रकोपसदवाल्यवदीर्यते च" सुश्रुतः।

प्रकोष्ठ पु० प्रगतः कोष्ठं मा०स०। भूपरस्याधोभागस्थे मणिबन्धपर्यन्ते १हस्तावयवे २मदहारधिखण्डे च अमरः। मदाभ्यन्तरप्रदेशभेदे शकटः।

प्रक्क(च्च)र पु० प्रकर+पृषो०प्र+चर अच् वा। १अश्वशब्दे शब्दमाला तत्र द्विधा पाठः। २कुक्कुरे ३अश्वतरे च ४अल्पनखीत्रे त्रि० मेदि०।

प्रक्रम पु० प्र+क्रम-भावे घञ्। १उपक्रमे अमरः २प्रथमारम्भे ३अवसरे मेदि० भव्यप्रक्रमः काव्यदोषभेदः। भावे ल्युट्। प्रक्रमण-तत्रार्थे प्रकर्षेण क्रमणे न०।

प्रक्रान्त त्रि० प्र+क्रम-क्त। १आरब्धे २प्रकरणप्राप्ते

प्रक्रिया स्त्री प्र+कृ-भावे श। १प्रकरणे "सा प्रक्रिया या कर्त्तुमित्यपेक्षा" पार्थसारथिमिश्रः। २अधिकारे न्यादीनां धातूनां अजनच्छेदधारणादिव्यापारे च ३शब्दप्रयोगसाधनावस्थायाम् ४पक्षप्रतिपक्षयोः ग्रहणे गोतमसू० ५।१।१६ अन्नम्भा०। [वृक्षे त्रि०।

प्रक्लिन्न त्रि० प्र+क्लिद-कर्त्तरि क्त। इतुप्रे जटा० २बहुक्लेदे

प्रक्ष(क्षा)ण पु० प्र+क्षण-भावे घञ् ल्युट् वा। धौतादेः क्षपिते शब्दे अमरः।

प्रक्षाल त्रि० प्रक्षालयति क्षालि-अच्। धोधके प्रायश्चित्ते न०"परिष्टिका वैद्यधिकाल्यप्रक्षालाकार्यं च"(यतयः) भा० आश्व० ६२अ०। "अप्रक्षालाः (निष्क्रापतया) धोधकहीनाः"नीलकण्ठः। अत्र परिष्टिपुरुषे "परिष्टिका वैद्यधिकाल्यप्रक्षालाकार्यं च" इत्यपपाठः।

प्रक्षेप पु० प्र+क्षिप-भावे घञ्। १अर्पणे २बहुद्रव्यमध्ये अपरद्रव्यांशनिवेशने च।

प्रक्ष्वेड॒न पु० प्र+क्ष्वेड-ल्यु। नाराचास्त्रे हेमच०।

प्रख्या स्त्री प्र+ख्या-भावे अङ्। १विख्यातौ २उपमायां च

उत्तरपदस्थः बहु० । उपमायुक्ते यथा वज्रप्रख्य इत्यादि

प्रख्यात त्रि० प्र+ख्या--क्त । विख्याते सुप्रसिद्धे ।

प्रख्यातवसृक पु० प्रख्यातो वप्रा जनयिता यस्य कप् । विख्यातपितृके अस्मद्प्रभृतौ शेषच० ।

प्रख्यास् पु०प्र+चक्ष० असि "बहुलं शिच्" इत्युक्तेर्न शित्त्वेन ख्यादेशः । प्रजापतौ उज्ज्वल० ।

प्रगण्ड पु० गडि–वदनैकदेशे अच् प्रकृष्टो गण्डः अवयवः प्रा०स० । १कूर्परोपरिकक्षपर्य्यन्तभागे अमरः । दुर्गप्राकारभित्तौ २शूराणां निवेशनस्थाने च स्त्री गौरा० ङीष् । "सङ्कीर्णो यत्र लोकानां दूरादेवावबुध्यते । प्रगण्डी सा च विज्ञेया बहिःप्राकारसंज्ञिता । प्रणिधिस्तत्र यत्नेन कर्त्तव्यो मूतिमिच्छता । स एवाकाशरक्षीति ह्युच्यते शस्त्रकोविदैः" भा०टी०धृतवाक्यम् । "प्रगण्डीकारयेत् सम्यगाकाशजननीस्त्रियाः" भा० आ० ६९ अ० । "प्रगण्डोर्द्वगंप्राकारभित्तौ शूराणामुपवेशनस्थानानि । आकाशजननीस्त्रीवैककक्षायां भित्तौ तत्स्थानां रक्षणभूतायां बाह्यार्थदर्शनार्थानि चतुरश्रिद्राणि बहुद्वारा आग्नेयास्त्रगुलिकाः प्रक्षिप्यन्ते" नीलकण्ठः ।

प्रगतजानु(क) त्रि० प्रगते परस्परमसंश्लिष्टे जानुनी यस्य वा कप् । असंहतजानुके प्रभौ यस्य जानुनोर्मध्ये भङ्गदलाख्यं तल्लिङ् अमरः । युक्ते त्रि० ।

प्रगन्ध पु० प्रकृष्टो गन्धोऽस्य । १पर्पटे राजनि० । २प्रकृष्टगन्ध-

प्रगल्भ त्रि० प्र+गल्भ–अच् । १प्रत्युत्पन्नमतौ २प्रतिभान्विते च अमरः । २नायिकाभेदे स्त्री तल्लक्षणादि नायिकाशब्दे ४०४१ पृ० दृश्यम् ।

प्रगल्भता स्त्री प्रगल्भस्य भावः तल् । १औद्धत्ये २उत्साहे च हेमच० । "निःशङ्कता प्रयोगेषु बुधैरुक्ता प्रगल्भता" उज्ज्वलभक्त्युक्ते प्रयोगेषु १निःशङ्कत्वे च ३प्रतिभान्वितत्वे च ।

प्रगाढ त्रि० प्रकर्षेण गाढम् गाढ–क्त । १अत्यन्तभये २अत्यन्ते च अमरः । ३दृढे भरतः ।

प्रगात त्रि० प्र+गै क्त । उत्तमगायके शब्दरत्ना० ।

प्रगाथ पु० प्र+गन्ध–घा० आधारे घञ् "छन्दसः प्रगाथेषु" निर्देशात् नि०नरयोर्लोपे उपधावृद्धिः । वेदे दे ऋचौ यत्र तिस्रः ऋचस्ते १तत्रार्थे विस्तरस्तु सामसंहिताभाष्ये द्रष्टव्यः । दिङ्मात्रं ततः समाहृत्योच्यते । "बार्हतः प्रगाथः" इत्यत्र प्रगाथशब्दार्थपर्य्यालोचनेनापि यजनं गम्यते प्रकर्षेण यजनं यत्र स प्रगाथः प्रकर्षो नाम आस्वातादृक्पाठादाधिक्यम्, तच्च पूर्वोत्तरीत्या पादाभ्यासपुरःसरद्वयगतरसम्पादनेनोपजायते । तस्मात्तदुत्पत्तिकृतौ यत्नौ तत्र विधेयौ किन्तर्हि प्रयत्नेन ते उत्तरे ऋचौ सम्पाद्य तासु तिसृषु रचनां मातव्यम् । रौधसनामकं किञ्चित् साम तथा यौधाजयनामकमपरम् तयोः साम्नोर्ऽहतोरन्द्रस्तृच आश्रय इति उत्तरार्धे तु तस्य सामद्वयस्याश्रय एकः प्रगाथः आम्नातः तत्रैव प्रगाथे पुनानः सोमेत्यक्षरैः प्रथमा सा च ऽहती "इन्द्राय मदिन्यमिति" द्वितीया सा तु विष्टारपङ्क्तिः तामेतां विष्टारपङ्क्तिमपनीय तस्याः स्थाने चत्वारिंशदक्षरौ तावेतस्यां ऽहतौ योजयितव्यौ इति पूर्वपक्षः । ऽहतीविष्टारपङ्क्त्योः प्रयत्नविशेषेण हे ऽहत्यावुत्तरे सम्पादनीये इति राद्धान्तः । प्रगाथत्वेन ध्येये २मन्त्रे च यजु०१८।३३वेददी०

प्रगुण त्रि० प्रस्तुतो गुणो यस्य प्रकृष्टो गुणो यस्य वा प्रा०ब० । १ऋजुतायुक्ते २दक्षे च अमरः । प्रकृष्टगुणोऽन्यत्र ।

प्रगृह्य न० प्र+ग्रह–क्यप् । व्याकरणोक्ते स्वरसन्धिराहित्ययोग्ये १पदभेदे २ऋतौ ३वाक्ये च अमरः ।

प्रगे अव्य० प्रगीयतेऽत्र प्र+गै–के । अतिप्रातःकाले अमरः । तत्र भवः अण् वृद्ध च । प्रगेतन प्रातर्भवे त्रि० राजनि०

प्रगेनिशा त्रि०प्रगे प्रातःकाले निशेव स्वापहेतुर्यस्य । प्रातःकालस्वापिनि । "उत्तस्थुर्ये प्रगेनिशाः सर्वे वासन्तु प्रगेनिशाः" भा०आ० २२८अ० ।

प्रग्रथन न० प्रकर्षेण ग्रथने । प्रगाथग्रन्थे हेमाद्रिः ।

प्रग्रह पु०प्र+ग्रह कर्मकरणादौ पचे अप् । १लगामरज्जौ २हस्तादिसंयमनरज्ज्वो ३वल्गायां च अमरः । ४नियमने ५भुजे ६सुवर्णालङ्कारे मेदि० । ७कर्षिकारवृक्षे राजनि० । प्र+ग्रह–कर्त्तरि अच् । ८विष्णौ "प्रग्रहो नियहो यमः" विष्णुस० "भक्तैरुपाहृतं पत्रपुष्पादिकं प्रगृह्णातीति प्रग्रहः" भा० । [२हस्तादिसंयमनदामनि च अमरः ।

प्रग्राह पु० प्र+ग्रह–कर्मकरणादौ घा घञ् । १लगामरज्जौ

प्रग्रीव पु०न०प्रकृष्टा ग्रीवा यस्य । १घटादौ प्रान्तभागे दारुषण्डभेदे २वीतावने स्मृतिः ३ऊर्ध्वग्रीवे गोवर्द्धनः । ४प्रकृष्टग्रीवान्विते त्रि० ।

प्रघटाविद् पु०प्रकृष्टा घटा आडम्बरः तां वेत्ति विद्–क्विप् । भाल्लवितके भावप्रकाशे त्रिका० ।

प्रघट्टक पु० प्र+घट्ट–ण्वुल् । एकार्थप्रतिपादनार्थं सम्बन्धबन्धभेदे सां०प्र०भाष्ये दृश्यम् ।

प्रघ(घा)ण(न) पु० प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यते

कृत-कर्मणि घञ् अप् वा साधुत्वम् । १अविन्दे अमरः । २प्रकोष्ठे त्रि॰ को॰ । अवनतः २ताम्रकुम्भे ३कोष्ठसङ्करे च मेदि॰ । शकटमतेऽयमप्यत्रमध्यः ।

प्रघस पु॰ प्र+अद-अप् घसादेशः । १प्रकृष्टभक्षणे २राक्षसभेदे पु॰ भा॰ व॰ २८३अ॰ ३अक्षरे ४दैत्ये च त्रिका॰ कुमारानुचरमातृभेदे स्त्री भा॰श॰ ४७अ॰ ।

प्रघात न॰ प्रहन्यतेऽत्र हन-आधारे घञ् । १युद्धे हेमच॰ भावे घञ् । २प्रहणने पु॰ ।

प्रघास पु॰ प्र+घस-कर्मणि घञ् । प्रकर्षेण भक्षणीये हविरादौ वस्वग्न्यासवातसौम्ययागभेदः । प्रघासोऽस्यास्ति मत्वा इनि । प्रघासिन् मरुत्सु "प्रघासिनोऽहवामहे मरुत्सु" यजु॰ २।४४ वेददीपे उवटः ।

प्र(प्रा)घुण पु॰ प्र(+आ+वा) घुण-क । अतिथौ हेमच॰ ।

प्रघूर्ण पु॰ प्र+घूर्ण-अच् । अतिथौ हेमच॰ ।

प्रघोष पु॰ प्र+घुष-भावे घञ् । १प्रकृष्टघोषणे स्वार्थे कन् । २अव्यक्तशब्दे ध्वनौ घटा॰ ।

प्रचक्र न॰ प्रगतचक्रं प्रा॰ स॰ । स्वचक्रात् परचक्रं प्रति चलिते सैन्ये अमरः ।

प्रचक्षस् पु॰प्र+चक्ष-असि न ख्यादेशः । इक्षणतौ ख्यादि॰

प्रचण्ड त्रि॰ प्रकर्षेण चण्डः प्रा॰स॰ । १दुर्धर्षे २दुर्वचे ३दारुणे ४प्रतापान्विते च ५श्वेतकरवीरे पु॰मेदि॰ ६दुर्गायां नायिकाभेदे स्त्री "उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका" कालिकापु॰। ७श्वेतदुर्वायां स्त्री राजनि॰।

प्रचण्डमूर्त्ति पु॰ प्रचण्डा मूर्त्तिरस्य । १वस्वष्टमे २भवानकदैत्ये त्रि॰ शब्दच॰ ।

प्रच(चा)य पु॰ प्र+चि-"कृञादाने चेरकौ" पा॰कृञादाने अस्मात् घञ् अन्यत्र "एरच्" पा॰ अच् । तत्र अज्ञानतः यज्ञादिना इज्यास्थानां पुष्पाणां १चयने २समूहे शब्दच॰ ३उपचये ४शिथिलसंयोगभेदे परिमाणशब्दे ७२५॰पृ॰ दृश्यम् "संघातः परिमाणाच्च प्रचयादपि जायते । प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते । परिमाणन्तूत्कादौ नाशस्तात्रयनाशतः" भाषा॰ कृञादाने ल घञ् । कृञेन पुष्पप्रचाय इत्येव चौर्य्ये ल अच् । प्रचय इत्येव चौर्य्येण कृञेन पुष्पादेश्चयने । [धरणिः ।

प्रचर पु॰ प्र+चर+गोचरप्रचरौ नि॰ आधारेऽप् । मार्गे

प्रचल त्रि॰ प्र+चल-अच् । प्रकृष्टचलनयुक्ते चञ्चले ।

प्रचलक पु॰ प्र+चल+वा कुन् । कीटभेदे सुश्रुतः कीटशब्दे २५८पृ॰ दृश्यम् ।

प्रचलाक पु॰ प्र+चल-वा॰ आकन् । १खराघाते २अयूरशिखण्डे २मुञ्जकुम्भे पुंस्त्री॰ मेदि॰ स्त्रियां ङीप् ।

प्रचलाकिन् पु॰ प्रचलाक +मत्वर्थे इनि । अयूरे त्रिका॰ ।

प्रचलाय नामधातुः प्रचल+भृशा॰ अभूततद्भावे क्यङ् आ॰ अक॰सेट् । प्रचलायते अप्रचलायिष्ट प्राचलायिष्ट इत्यन्वे

प्रचलायित त्रि॰ प्रचलाय+नामधातुः कर्त्तरि क्त । निद्रादिना घूर्णिते अमरः ।

प्रचायिका स्त्री प्र+चि+भावे ण्वुच् । १परिपाट्या पुष्पादेश्चयने । प्र+चि-ण्वुल् टाप् कापि अत इत्त्वम् । प्रचयनकर्त्र्यां २स्त्रियां स्त्री ।

प्रचार पु॰ प्र+चर-भावे घञ् । १प्रसरणे २गतौ ३प्रकाशे च । ततः तारका॰ इतच् । प्रचारित अज्ञातप्रचारे त्रि॰ । प्रकाशिते च ।

प्रचाल पु॰ प्रकृष्टचालः । यूपस्य खटकभेदे । भा॰द्रो॰६१ अ॰।

प्रचिकीर्षु त्रि॰प्र+कृ-सन्+उ । प्रतीकारेच्छौ भाग॰३।१॰।१

प्रचित त्रि॰ प्र+कर्मणि क्त । १कृतप्रचयने पुष्पादौ स्वार्थे क तत्रार्थे । २प्रचयस्वरयुक्ते त्रि॰। संज्ञायां कन् । दण्डकभेदे "प्रचितकसमभिधो धीरधीभिः कृतो दण्डको नवयाद्यक्षरैः" ह॰र॰ । [चुञ्चुः ।

प्रचीवल न॰ पृचेर्वलं वत्वं यत्र पृषो॰। वीरत्वे (वेषार मूल)

प्रचीर पु॰ वस्त्रप्रान्तपक्ष १छन्दोभागभंजाते २पुत्रे व्रतभेदे मार्कपु॰ ११८ अ॰ । [२वस्त्रे अमरः ।

प्रचुर त्रि॰ प्र+चुर-क प्रगतश्चुरावा वा प्रा॰त॰ । १चौरे

प्रचुरपुरुष पु॰ प्र+चुर-क निन्द्यक॰ । चौरे त्रिका॰ ।

प्रचेतसी स्त्री प्रकर्षेण चेतयति मूर्च्छितं चित-क्विप्-असच् गौरा॰ङीष् । वट्यक्षे राजनि॰ तद्यूर्च्छा हि मूर्च्छाः नाशकता वैद्यकप्रसिद्धेति तस्यास्तथात्वम् ।

प्रचेतस् पु॰ प्र+चित-असुन् । १वरुणे अमरः । २मुनिभेदे ३प्रकृष्टहृदये त्रि॰मेदि॰ । ४बहुवंश्ये नृपभेदे हरिवं॰ १२ अ॰ । ५प्राचीनबर्हिःप्रभृतिसप्तदशभार्य्यायां जातेषु पुत्रेषु राजभेदेषु ब॰व॰ । हरिवं॰१२अ॰ । ६प्रकृष्टज्ञानयुक्ते ऋ॰ २।२१।२ भा॰ ।

प्रचेढ त्रि॰प्र+चि-ढच् । १प्रचयनकर्त्तरि २सारथौ पु॰हेमच॰

प्रचेतुन त्रि॰ प्र+चित-उन । प्रकृष्टज्ञानयुक्ते ऋ॰१।२१।६

प्रचेल न॰ प्र+चिल-चेल-वा अच् । पीतकाष्ठे शब्दच॰ ।

प्रचेलक पुंस्त्री॰ प्र+चेल-गतौ ण्वुल् । १क्षोटके शब्दमा॰ । स्त्रियां जातित्वात् ङीष् । २प्रकृष्टगतियुक्ते त्रि॰ स्त्रियां टाप् ।

प्रचोदक त्रि० प्र+चुद–णिच्–ण्वुल्। १प्रेरके स्त्रियां टाप् अत इत्त्वम्। प्रचोदिका। सा च दुःसहस्य नियोजिताख्यायां कन्यायां जाते २कन्याभेदे मार्कण्डु० ५१अ०।

प्रचोदनी स्त्री प्रचोद्यते अपसार्य्यते रोगोऽनया चुद–णिच् ल्युट् ङीप्। १कण्टकारिकायाम् अमरः। भावे ल्युट्। २प्रेरणे न०।

प्रच्छ जिज्ञासायां तु०पर०सक०अनिट्। पृच्छति अप्राक्षीत्। पप्रच्छ। दिकर्मकत्वेन दुहादि०गोणे कर्मणि चकारादि। पृच्छ्यते शिष्येण गुरुः धर्मं, जिज्ञासाविषयकज्ञानानुकूलव्यापारः कर्त्तृ धर्मं आचरितत्व इत्यभिलाषादिः पृच्छेरर्थः, ज्ञानविषयत्वेन धर्मस्य, तज्ज्ञानाश्रयत्वाच्च गुरोः कर्मत्वम्।

प्रच्छद् न० प्रच्छादयति प्र+छादि–क्विप् तुक्। वस्त्रे "वस्त्रं वा प्रच्छदन्नोऽस्त्रं प्रच्छद इति स्मृतेः" यजु० १५।५ वेददीपे दृश्यम्। [आच्छादने वस्त्रादौ।

प्रच्छद् पु०प्रच्छाद्यतेऽनेन प्र+छद–णिच्–करणे घ तुक्। प्रच्छदपट पु०प्रच्छाद्यतेऽनेन प्र+छद–णिच्–च तुक्। कर्म०। (प्राचुडि) प्रावरणवस्त्रे अमरः।

प्रच्छना स्त्री प्रच्छ+ना० ल्यु। आमन्त्रणे अटा०।

प्रच्छन्न न० प्र+छद–क्त। १गुप्तप्रकारे २वञ्चनद्वारे। ३आच्छन्ने त्रि० अमरः।

प्रच्छर्दन न० प्र+छर्द–भावे ल्युट्। १वमने २औषधस्य वायोर्नासिकापुटाभ्यां निःसारणप्रयत्नभेदे रेचने "प्रच्छर्दनविधारणाभ्यां वा प्राणस्य" पात० सूत्रे भाष्यं दृश्यम्। कर्म्मकर्त्तरि २।१।४ पु० दृश्यम्।

प्रच्छर्दिका स्त्री प्र+छर्द–रोगाख्यायां ण्वुल् पा० ण्वुल् तृचः स्त्री। १वमनरोगे अमरः। कर्त्तरि ण्वुल्। २प्रच्छर्दके वमनकारके त्रि०स्त्रियां टाप् काप् अत इत्त्वम्।

प्रच्छादन न० प्रच्छाद्यतेऽनेन छद–णिच्–ल्युट्। १उत्तरीयवस्त्रे हेमच० भावे ल्युट्। २आच्छादने "नवोद्वहे नवश्राद्धे च नवप्रच्छादने तथा" स्मृतिः।

प्रच्छान न०प्र+क्षो–भावे ल्युट्। १प्रक्षालने २शुश्रुतोक्ते शस्त्रविस्रावणभेदे "तत्र द्विविधं शस्त्रविस्रावणं शिराव्यधनञ्च" सुश्रुतः।

प्रच्छिल त्रि० प्रच्छ वा० इलच्। निर्लज्जे जडमूर्खे हेमच०

प्रच्यव पु० प्र+च्यु–अच्। १प्रच्युतियुते। भावे अप्। २प्रच्यरणे स्वभावच्यरणे "प्रकृतेः स्वभावप्रच्यव" इति सां० प्र०भाष्यम्। भावे ल्युट्। प्रच्यवन च्यरणे न०।

प्रज पु० प्रविश्य जायायां जायते जन–ड। पत्यौ भरतः

प्रजङ्घ पु० प्रकृष्टा जङ्घाऽस्य। राक्षसभेदे रामा०ब०।८सर्गे०।

प्रजग्मि त्रि० प्र+गम–ज्ञाने कि द्वित्वम् उपधालोपः। प्रज्ञाशीले शत०ब्रा० ५।१।१।१५

प्रजन पु० प्र+जन–घञ् न डिद्वः। १प्रजनने। प्रजायतेऽनेन करणे घञ्। स्त्रीगम्यादिषु २शुक्रवादीनामभिगमने गर्भग्रहणार्थमैथुने २उपस्थरे (पाखदेखोवा) अमरः।

प्रजनन न० प्रजायतेऽत्र प्र+जन–आधारे ल्युट्। १योनौ भावे ल्युट्। २जन्मनि मेदि०। करणे ल्युट्। ३उपस्थरे विश्वः। जनयति जनि–ल्यु। ४जनके त्रि० यजु०१८।३८

प्रजनिका स्त्री प्रजनयति प्र+जनि–ण्वुल्। मातरि अटा०।

प्रजनिष्णु त्रि०प्र+जन–ष्ण्युच्। जनने शत०ब्रा०६।४।१७

प्रजनुक त्रि० प्र+जन वा० उक। प्रजननशीले हेमच०।

प्रजनू स्त्री प्र+जन–वा० ऊ। प्रजनने तैत्ति०३।१।१।४२

प्रजय पु०प्र+जि–अच्। प्रकृष्टजये चादादि०अन्तोदात्तश्च।

प्रजल्प पु०प्र+जल्प–भावे घञ्। "अस्मन्मेधांसदवृजा योऽयधीरयसद्वा। प्रियस्य कौशलोद्गारः प्रजल्पः स तु कथ्यते" उज्ज्वलनीलमणिधृते १वाक्यभेदे २प्रकृष्टकथाभेदे च।

प्रजविन् त्रि० प्र+जू–इनि। प्रकृष्टवेगयुक्ते अमरः।

प्रजहित पु० १पुराणे २गार्हपत्ये वह्नौ तास्यु० ब्रा० १।४।१० भाष्यधृतवाक्यं दृश्यम्।

प्रजा स्त्री प्र+जन–ड। १जनतौ २जने च अमरः "नजद्वःसुभ्यः परस्य वहु०असिच्समा०। अप्रजाः दुःप्रजाः। ३जनने च

प्रजागर पु० प्र+जागृ–अप्। प्रकर्षेण जागरणे १निद्राक्षये हला०। कर्त्तरि अच्। २विष्णौ "पुष्पहासः प्रजागरः" विष्णुस० "नित्यं प्रबुद्धत्वात् प्रजागर्त्तीति प्रजागरः" भा० प्रजागरयति णिच्–अच्। ३अप्सरोभेदे स्त्री भा०व०४३अ०।

प्रजाता स्त्री प्रजातं प्रजननं गर्भमोचनमस्त्यस्याः अर्श आद्यच्। १प्रसूतायां स्त्रियाम् हला०। प्र+जन–क्त। प्रकर्षेण २जाते त्रि०। ३अश्वभेदे पु० "बडवायां जातरेतस्कन्दनः प्रजात इत्युच्यते" काल्या०श्रौ०२०३।२०भाष्यधृ

प्रजातन्तु पु० प्रजायाः प्रजननस्य तन्तुरिव। सन्ताने तैत्तिरीय०।

प्रजाति स्त्री प्र+जन–क्तिन्। १प्रजायां २प्रजनने च शौनकोत्पत्तौ "प्रजा च स्वाध्यायवचने च प्रजननञ्च स्वाध्यायवचने च प्रजातिश्च स्वाध्यायवचने च" तैत्तिरीय० "तत्र प्रजा स्वयमुत्पाद्या प्रजननञ्च प्रजननसूतौ भार्यां

गमनं प्रजातिः पौत्रोत्पत्तिः" भा० । ४पुत्रादिसङ्घे यत० ब्रा०७।३।१।४६। ५प्रांशुवृक्षपुत्रभेदे पु० मार्क०पु०११८अ०

प्रजादा स्त्री प्रजां वडवेतरगर्भं ददाति दैवनात् दा--क । गर्भधात्रीवडवे राजनि० ।

प्रजादान न० ६त० । १प्रजाया दाने २त्यादाने च । प्रजातः जन्मतः दानं शुद्धिरस्य । ३रजते न० शब्दच० ।

प्रजानाथ पु० ६त० । लोकनाथे रुद्रे प्रजापालादयोऽप्यत्र ।

प्रजाप पु० प्रजां पाति पा--क । रुद्रे हेमच० ।

प्रजापति पु० ६त० । १चतुर्दशे ब्रह्मणि अमरः । २दक्षादौ रुद्रे च मेदि० । ३जामातरि ४सूर्ये ६वह्नौ ७त्वष्टरि हेमच० । प्रजापतयश्च बहुविधाः यथोक्तम् "आत्मार्थं चाऽसृजत् पुत्रान् लोककर्तॄन् पितामहः । विश्वे प्रजानां पतयो देवा लोका विनिःसृताः । विश्वेयं प्रथमं नाम महातपसमात्मजम् । सर्वात्मभवदं पुत्रं नाम्ना धर्मं स सृष्टवान् । दक्षं मरीचिमत्रिञ्च पुलस्त्यं पुलहं क्रतुम् । वशिष्ठं गौतमञ्चैव भृगुमङ्गिरसं मनुम् । अयर्वभूता ह्येते ख्याताश्चैव महर्षयः । त्रयोदश सुता येषां धर्मास्तु संप्रतिष्ठिताः" हरिवं० २०४अ० "ससर्ज सृष्टिं तद्रूपं सृष्टुमिच्छन् प्रजापतीन् । मरीचिमत्र्यङ्गिरसं पुलस्त्यं पुलहं क्रतुम् । वशिष्ठञ्च महातेजाः सोऽसृजत् सप्त मानसान् । सप्त ब्रह्माण इत्येते पुराणे निश्चयं गताः" हरिवं० १अ० । एकविंशतिः प्रजापतयो यथा "ब्रह्मा स्थाणुर्मनुर्दक्षो भृगुर्धर्मस्तथा यमः । मरीचिरङ्गिरात्रिश्च पुलस्त्यः पुलहः क्रतुः । वशिष्ठः परमेष्ठी च विश्वात्मा सोम एव च । कर्दमश्चापि यः प्रोक्तः क्रोधोऽवौक्कीत एव च । एकविंशतिरित्येता ते प्रजापतयः स्मृताः" महाभारते मोक्षधर्मः । अन्येऽपि प्रजापतयः पुराणादौ प्रसिद्धा यथा "भंयुः प्रजापतिः" श्रुतिः । ८विष्णौ पु० "पद्मनाभः प्रजापतिः" विष्णुस० । ९यज्ञे निघण्टुः । १०स्वनामख्याते कीटभेदे ।

प्रजापतिहृदय न० सामभेदे "प्रजापतेर्हृदयं गायति" श्रुत०ब्रा० ६।१।२।४० "प्रजासु च प्रजापतौ च गायति प्रजापतेर्हृदयमिति किञ्चित् साम तदप्यत्र गायेत्। प्रजापतेर्हृदयं गायत्रादि सामवत् कस्यांचिदपि न श्रूयते अपि तु केवलं प्रजाशब्दे प्रजापतिशब्दे च श्रूयते" भा० ।

प्रजावत् पुंस्त्री० प्रजाऽस्यास्ति मतुप् मस्य वः । १सन्ततियुक्ते त्रिषु स्त्रियां ङीप् । २वन्ध्यायां स्त्री अमर० । ३प्रकृतियुक्ते त्रिषु पु० । [ऋचे यजु० १६।४८]

प्रजासनि त्रि० प्रजां सनोति ददाति सन--इन् । सन्तानदा-

प्रजाहित त्रि० प्रजायै हितम् । सन्तानजनयोर्हितकारके जले न० शब्दमाला ।

प्रजिन पु० प्र+व्रज-घञ् नक् सम्प्र० । वायौ शब्दमा० ।

प्रजेश पु० ६त० । रुद्रे प्रजेश्वरादयोऽप्यत्र त्रिका० ।

प्रज्ञ त्रि० प्रजानाति प्र+ज्ञा कर्त्तरि क । १प्रज्ञायुते प्रज्ञ एव प्रज्ञादि० स्वार्थे अण् । प्राज्ञ तत्रार्थे त्रि० भावे अङ् । २बुद्धौ स्त्री । पृषो० अलोपस्य पृज्ञा० ष । प्राज्ञ पृज्ञावति त्रि० ।

प्रज्ञप्ति स्त्री प्र+ज्ञपि--भावे क्तिन् । १बुद्धौ हेमच० "ऋतम्भरा तत्र प्रज्ञा" पात०सू० "तत्र सम्प्रधा प्राग्भूमिः प्रज्ञा" पात०सू० । २सङ्केते २देवीभेदे च त्रिका० ।

प्रज्ञाकाय पु० प्रज्ञा काय इव यस्य । मक्षुचोषे त्रिका० ।

प्रज्ञाचक्षुस् पु० प्रज्ञैव चक्षुरिवास्य । धृतराष्ट्रे शब्दर० ।

प्रज्ञादि पु० स्वार्थेऽण्प्रत्ययनिमित्ते १शब्दगणे स च गणः "प्रज्ञ वयिज वयिज वयिज प्रत्यय विदस् विदत् योडनृ विद्या मनस् (श्रोत्र शरीरे) (जुहुत ऋणान्तगे) चिकीर्षत् चोर यत्नु योध चक्षुस् वसु एनस् मरुत् क्रुञ्च सत्वत् दयार्ह वयस् व्याकृत अक्षर रक्षस् पिशाच अग्नि कर्मपथ देवता बन्धु !। अस्यार्थे स्वप्रत्ययनिमित्ते २शब्दगणे च । स च गणः प्रज्ञा ऋचा (ऋक्षा आर्च्छः) (इक्षेव वार्क्षः)" वार्त्ति० ।

प्रज्ञान न० प्र+ज्ञा--भावे ल्युट् । १बुद्धौ । करणे ल्युट् । २चिह्ने अमरः । प्रज्ञानमस्यास्ति अच् । ३परिज्ञाते द्विरूपकोषः ।

प्रज्ञाल त्रि० प्रज्ञाऽस्यास्ति विद्या० लच् । बुद्धियुते त्रि० ।

प्रज्ञिन् त्रि० प्रज्ञाऽस्त्यस्य इनि । परिज्ञाते द्विरूपकोषः पक्षे मतुप् मस्य वः । प्रज्ञावत् तत्रार्थे उभयतः स्त्रियां ङीप् ।

प्रज्ञिल त्रि० प्रज्ञा+अस्त्यर्थे विद्या० इल । बुद्धियुते

पज्ञु त्रि० प्रगते विरले जानुनी यस्य जानुनोर्वा ज्ञुः । विरल-जानुके जने अमरः ।

प्रडीन न०प्र+डी--क्त । खगगतिभेदे खगगतिशब्दे दृश्यम् ।

प्रण त्रि० पुराभवः प्र+"नव पुराणात् प्रातृ" ५।४।२० वार्त्ति० न । पुराणे प्राचीने चकारात् पक्षे त्र प्रत्र+क प्रीण तत्रार्थे त्रि० ।

प्रणख पु०प्रकृष्टः नखः पूर्वपदात् सत्वम् । नखाग्रे "काम-खखात् खे एव सुवर्णः" ऋग्वे० । [२विनयवति च ।

प्रणत त्रि० प्र+नम-क्तरि त्त। क्षतप्रणामे त्रिका०। प्रह्वे
प्रणति स्त्री प्र+नम-भावे क्तिन्। प्रणामे करशिरःसंयोगादिरूपे स्वापकर्षबोधकव्यापारे।
प्रणदन पु० प्र+नद-भावे ल्युट्। प्रणादे अमरः।
प्रणपात् त्रि० प्रकर्षेण नयात् नश्वाडिलादिना नस्य प्रकृतिभावः पूर्वपदात् सत्वम्। प्रकर्षेण न पातयितरि ऋ० ८।१७।१२ [श्विप्रणे ४निर्णये च मेदि०।
प्रणय पु० प्र+नी-अच्। १प्रेमणि अमरः २प्रार्थनायां
प्रणयन न० प्र+नी-भावे ल्युट्। १प्रकर्षेण नयने २करणे च ३अग्नेः संस्कारभेदकरणे कात्या० श्रौ० ६।१०।१४।
प्रणयनीय त्रि०प्र+नी-कर्मणि अनीयर्। १प्रकर्षेण नेतव्ये २संस्कार्ये वह्नौ च प्रणयनस्य वह्निसंस्कारस्यैदमर्थे छ। ३वह्निसंस्कारसम्बन्धिनि द्रव्यकालादौ कात्या० १।३।२१
प्रणयिन् त्रि० प्रणयोऽस्त्यस्य तारा० गणे पाठात् "मेधाऽऽशरात् क्षतोजातेरिति" निषेधस्यापवादत्वेः इनि। १प्रणयवति २स्वामिनि पु० हेमच०। ३भार्यायां स्त्री ङीप्।
प्रणव पु० प्रकर्षेण नूयतेऽनेन प्र-नू-अप्। १ओङ्कारे वेदादौ जपे ब्रह्मभेदे अमरः। १५९८ पृष्ठादौ द्रव्यम्। ब्रह्मादीनां मानारम्भात् प्राक् यजमानेन ओमित्युक्त्वा गेये २सामावयवभेदे च। प्रणूयते प्र+नू-कर्मणि अप्, प्रणववाच्यत्वाद्वा। ३परमेश्वरे पु० "प्राणदः प्रणवः पृथुः" "प्राणदः प्रणवः पणः" विष्णुस०। द्विधा व्युत्पत्तियोगात् द्वे नामनी। [सत्वम्। प्रगतनासिके
प्रणस त्रि० प्रगता नासिका अस्य नस्यादेशः बहुव्री०
प्रणाडी स्त्री प्रणाली+नुक् डः। १प्रणालीशब्दार्थे २हारभाले च "तस्यां स्थितो व्याधियमाद्यं धनं प्रणाडया प्रतिपद्यं निष्पादयति" दायभागः।
प्रणाद पु० प्र+नद-घञ्। अनुरागजे रोदनादौ १शब्दे अमरः। "अनुरागजते शब्दे प्रणादः रोदनादिषु शब्दार्थवः। २तारशब्दे ३अवधारणे च मेदि०। अवधारणञ्च कर्णनादः "कर्णस्रोतःस्थिते वाते ह्यणादि विविधान् स्वरान्। भेरीशङ्खादिशब्दानां कर्णनादः स उच्यते" स्मृतः।
प्रणाम पु०प्र+नम-भावे घञ्। नम्रतौ १स्वापकर्षबोधकव्यापारे करशिरःसंयोगादौ "पद्भ्यां कराभ्यां जानुभ्यामुरसा शिरसा दृशा। वचसा मनसा चैव प्रणामोऽष्टाङ्ग उच्यते" इत्युक्ते २अष्टाङ्गप्रणिपातभेदे च। प्रणामश्च चतुर्धा अभिवादनम् अष्टाङ्गः पञ्चाङ्गः करशिरःसंयोगश्च। तत्राभिवादनशब्दे अभिवादनलक्षणं दृश्यम्। अष्टाङ्गलक्षणमुक्तं हारीतो यथा "बाहुभ्यामथ जानुभ्यां शिरसा वचसा दृशा। पञ्चाङ्गोऽयं प्रणामः स्यात् पूजासु प्रवरः स्मृतः"। नतिविशेषस्तु आगमे "त्रिकोणाकारा सर्वत्र नतिः शक्तेः समीरिता। दक्षिणाहावनीं गत्वा दिशं तस्माच्च गार्हपत्यीम्। ततश्च दक्षिणां गत्वा नमस्कारस्त्रिकोणवत्" एकहस्तप्रणामनिषेधो यथा "एकहस्तप्रणामस्तु एकं वापि प्रदक्षिणम्। अकाले दर्शनं विष्णोर्नन्ति पुण्यं पुराकृतम्" इति तन्त्रसारः। स च कायिकवाचिकमानसभेदेन प्रत्येकं त्रिविधः यथा "कायिको वाचिकश्चैव मानसस्त्रिविधः स्मृतः। नमस्कारस्तु तत्रोत्तमाधममध्यमः। प्रसार्य पादौ हस्तौ च पतित्वा दण्डवत् क्षितौ। जानुभ्यामवनीं गत्वा शिरसाऽस्पृश्य मेदिनीम्। क्रियते यो नमस्कार उत्तमः कायिकस्तु सः। जानुभ्यां क्षितिमस्पृष्ट्वा शिरसाऽस्पृश्य मेदिनीम्। क्रियते यो नमस्कारो मध्यमः कायिकस्तु सः। पुटीकृत्य करौ शीर्षे दीयते यदृयवा तथा। अस्पृष्ट्वा जानुशीर्षाभ्यां क्षितिं सोऽधम उच्यते। यः स्वयं मस्तकाभ्यां घटिताभ्यां नमस्कृतिः। क्रियते भक्तियुक्तैर्वा वाचिकस्तूत्तमः स्मृतः। पौराणिकैर्वैदिकैर्वा मन्त्रैर्वा क्रियते नतिः। मध्यमोऽसौ नमस्कारो भवेद्वाचनिकः सदा। स वाचिकोऽधमो ज्ञेयो नमस्कारेषु पुत्रकौ!! दृष्टमध्यानिष्टगतैर्मनोभिस्त्रिविधं पुनः। मनसं मानसं प्रोक्तमुत्तमाधममध्यमम्। त्रिविधे च नमस्कारे कायिकश्चोत्तमः स्मृतः। कायिकैस्तु नमस्कारैर्देवास्तुष्यन्ति नित्यशः। स्वयमेव नमस्कारो दक्षाद्यैरतिपत्तिभिः। प्रणाम इति विप्रेन्द्रैः सूर्यं प्रतिपादितः" कालिकापु० ७०अ०। मूढसंस्कृतपूजितदेवताप्रणामनिषेधो यथा "यः मूढेनार्चितं लिङ्गं विष्णुं वा प्रणमेद्यदि। निष्कृतिस्तस्य नास्त्येव प्रायश्चित्तायुतैरपि" इति कर्मलोचनम्। "नमेत् यः मूढसंस्कृतम्" इत्यादि च।
प्रणाय्य त्रि० प्र+नी-यत् "प्रणाय्योऽसम्मतौ" पा०नि०। १चोरे २प्रोज्झ्ये ३विरक्ते च मि०को०, ४अभिलाषवर्जिते मेदि०। ५साधौ त्रिका० ६प्रिये च। अस्मृतिभिन्नेषु प्रणेय इत्येव।
प्रणाली स्त्री प्र+नल-वङ्गौरा०ङीष् सत्वम्। १जलवहनमार्गे (पयनाला) अमरः २परम्परायाञ्च। प्रणालोऽप्यत्र पु०।
प्रणिधान न० प्रणिधीयते प्र+नि+धा-ल्युट्। १प्रयत्ने २अ-

धिनिवेशे २योगशास्त्रोक्ते चित्तनविशेषरूपे समाधिभेदे ३भक्तिविशेषे च "ईश्वरप्रणिधानाद्वा" पात० "प्रणिधानात् भक्तिविशेषात्" भाष्यम्। ५अर्पणे ६कर्मणां फलत्यागे च "तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः" पात० "ईश्वरप्रणिधानं सर्वक्रियाणां तस्मिन् परमगुरावर्पणं फलसन्न्यासो वा" भा० ७मनसो विषयान्तरप्रचाराभावरूपे ऐकाग्र्ये च गौत० ३।२।३६ स्तवस्तुतिः।

प्रणिधि पु० प्रणिधीयते प्र+नि+धा-कि। १गुप्तचरे अमरः। २अनुचरे च। भावे कि। ३याचने ४अवधाने च मेदि०। आश्रयस्य ६दूतस्य ५पुत्रभेदे भा०व० २।६अ०।

प्रणिपात पु० प्र+नि+पत-घञ्। प्रणामे हेमच०। "तद्विद्धि प्रणिपातेनेति" गीता। [क्षिप्ते च मेदि०।

प्रणिहित त्रि० प्र+नि+धा-क्त। १प्राप्ते २स्थापिते ३समाप्रणी त्रि० प्रणयति प्र+नी-क्विप्। १कारके २ईश्वरे च "शाश्वतीं तिसृषु प्रणीः" भट्टिः।

प्रणीत त्रि०प्र+नी-कर्मणि क्त। पाकेन रूपरसान्यथाभावापादिते १पदार्थे २क्षिप्ते ३निवेशिते ४विरचिते च हेमच०। ५यज्ञे संस्कृतान्नो पु०अमरः। ६यज्ञपात्रभेदे स्त्री मेदि०। अग्निपदसन्निधौ ७मन्त्रसंस्कृतपात्रे "यदाध्वरे यज्ञिरभिप्रणीतः" भट्टिः। ८मन्त्रसंस्कृतास्तु षण्ण स्त्री ब०व०। तदाधारपात्रो तु उपचारात् प्रणीताशब्दवाच्या। "प्रणीतानाम आपो मन्त्रसंस्कृता आहवनीयोत्तरतो निहिताः" आश्व०श्रौ०१।१।५ नारा०। "तदापः प्राणसंस्कारादापः प्रणीतासु प्रणीतानां प्रणीतात्वम्" भत० ३ प्रा० १२।६।२।८।

प्रणीय त्रि० प्र+नी-कर्मणि वेदे क्यप्। यज्ञे मन्त्रेण संस्कारः कर्तव्यस्मिन्। लोके तु प्रणेय इत्येव।

प्रणुत त्रि० प्र+णु-स्तुतौ कर्मणि क्त। स्तुते अमरः।

प्रणेय त्रि० प्र+नी-यत्। १यज्ञे अधीने २क्षतलौकिकसंस्कारे च हेमच० ३प्रापणीये।

प्रतङ्कन पु० प्र+तक-गतौ वनिप्। प्रकर्षेण गतियुक्ते "नभोऽक्ति प्रतङ्का" ता०ब्रा०१।३।२२ "प्रकर्षेण प्रतङ्का आवयवैः पांशुभिः सर्वान् विष्वग्वान् प्रति गन्ता तङतिर्गतिकर्मा" भा०।

प्रतति स्त्री प्र+तन-भावे क्तिन्। १विस्तारे। कर्तरि क्तिच् वा ङीप्। २वस्त्रेच अमरः।

प्रतदसु पु० प्रतत् प्राप्तं वसु धनं येन। १प्राप्तधनके २विशोषणे त्र ऋ० ६।१२।२७।

प्रतन त्रि० प्र+"नव पुराणात् प्राक् वार्त्ति० चकारात् ख्युट् च। पुरातने अमरः।

प्रतनु त्रि० प्रकृष्टस्तनुः प्रा०ब०। १अतिसूक्ष्मे २अतिसूक्ष्मे च

प्रतमा(रा)म् अव्य०प्र+आम तरप् तमप् वा। अत्यन्तपूर्णे

प्रतर पु० प्र+तॄ-भावे अप्। प्रकर्षेण १तरणे आधारे अप्। २प्लवनाधारे नौपतरणशब्दे ३अग्रम्। [प्रतर्के तत्रार्थे।

प्रतर्कण न० प्र+तर्क-भावे ल्युट्। वितर्के शब्दर०। बल्।

प्रतर्दन न० प्र+तृद-भावे ल्युट्। १ताडने। कर्तरि ल्यु। २ताडके त्रि० ३दिवोदासपुत्रभेदे पु० हरिवं० २९अ०। ४इन्द्रोपदेशप्रभेदे प्रतर्दनं प्रति इन्द्रेण ब्रह्मविद्योपदिष्टेति वेदान्ते प्रसिद्धम्।

प्रतल न० न० प्रकृष्टं तलम्। १पातालभेदे मेदि०। प्रकृष्टं तलमस्य। २विस्तृताङ्गुलिके पार्श्वौ चपेटे पु० अमरः।

प्रतान पु० प्र+तन-घञ्। १विस्तारे २ऋग्भिभेदे च तस्य गोत्रापत्यम् इञ्। प्रातानि तद्गोत्रापत्ये बहुत्वे तु तस्य उपका० लुक्। प्रताना इत्येव। ३तन्तुयुक्ते अवादू त्वणादौ। "गुच्छगुल्मन्तु विविधं तत्रैव तृणजातयः। वीरुत्काण्डरुहाण्येव प्रताना वल्ल्य एव वा" अतः। "प्रतानात्तन्तुयुक्तात्तृणादावुपसंख्यानम्" कुलू०।

प्रतानिन् त्रि० प्र+तन-णिनि। १विस्तीर्णे २विस्तृतलतायाम् स्त्री ङीप् अमरः।

प्रताप पु० प्र+तप-घञ्। १क्लेशदग्धजाते व्यपदेशे तेजसि अमरः। २तापे ३सूर्यकेतुके च राजनि०।

प्रतापन पु० प्रतापयति तप-णिच्-ल्यु। १नरकविशेषे २तापके त्रि० शब्दरत्ना० भावे ल्युट्। ३पीडने शब्दर०। कर्तरि ल्यु। ४विष्णौ पु०। "प्रकाशात्मा प्रतापनः" विष्णुस०"सूर्यप्रभृतिभिर्विश्वं प्रतापयतीति प्रतापनः" भा०

प्रतापवत् त्रि० प्रताप+अस्त्यर्थे मतुप् मस्य वः। १प्रतापयुक्ते २स्कन्दानुचरगणभेदे पु० भा० श० ४६ अ०।

प्रतापस पु० तपसि साधु अण् प्रकृष्टस्तापसः प्रा०स०। १प्रकृष्टतापसे २शुक्राङ्कवृक्षे च अमरः।

प्रतास् अव्य० प्र+तस बा० स्त्रि-अरादि। ग्लानौ मनोरमा।

प्रतारक त्रि० प्र+तॄ-णिच्-ण्वुल्। १वञ्चके २धूर्ते च।

प्रतारण न० प्र+तॄ-णिच्-भावे ल्युट्। १वञ्चने अन्यपदार्थस्य अन्यत्वारोपेण ज्ञापने। वुच्। प्रतारणाऽपि तत्रार्थे स्त्री। "प्रतारणासमर्थस्य विद्यया किं प्रयोजनम्" भट्टटः।

प्रतारित त्रि० प्र+तॄ-णिच्-क्त। १वञ्चिते लिङ्गा०।

प्रति अव्य० प्रच-डति। १व्याप्तौ २लक्षणे ३कथित्प्रकारमाप्यस्य कथने ४भागे ५प्रतिदाने ६प्रतिनिधीकरणे मेदि० ७लोके ८क्षेपे ९निश्चये १०व्याप्तौ ११आभिमुख्ये १२समाधौ च मुग्धः। अस्य निपातत्वेऽपि क्रियायोगे उपसर्गत्वम् गतित्वञ्च। अस्यार्थभेदोदाहरणादि नक्षत्रशब्दोदधिटी० उक्तं यथा "प्रति वाप्तेऽदानविनिमयाक्षोक्तिप्रतिनिधिव्याप्त्यभिमुख्यव्याप्तिवारणेषु। प्रतिदेवता। प्रतिगृह्णाति। प्रतिगृह्णन्ति प्रतिग्रहान्। अभिमन्युरर्जुनतः प्रति। प्रतिश्रायः। प्रतिसूर्यं गतः। प्रतिकीर्णम् पांशुभिः। प्रतिपिष्टः। तत्र लक्षणेत्थम्भूताख्यानभागवीप्सायासु कर्मप्रवचनीयसंज्ञा तद्योगे द्वितीया परिग्रहे उदा० इत्थम्। प्रतिनिधिप्रतिदानयोः कर्मप्रवचनीयसंज्ञा तद्योगे पञ्चमी। प्रद्युम्नः कृष्णात्प्रति प्रतिनिधिरित्यर्थः। तिलेभ्यः प्रतियच्छति माषान्, माषान् गृहीत्वा प्रतिरूपतया तिलान् ददातीत्यर्थः। मात्रार्थेऽव्ययीभावे परनिपातः। माक्रप्रतिमाकस्य लोप इत्यर्थः। कर्मप्रवचनीयत्वे नोपसर्गसंज्ञा तेन इत्थं इत्थं कृतिसिद्धतीत्यादौ न धत्वं तथा गतिसंज्ञापि न, तेन गतिर्गतावितिनिघातो न।"प्रतेरंश्वादयस्तृतीयेषु" पा० प्रतेः परस्यांश्वादेः अन्तोदात्तता अंश्वादिशब्दे ३७पृ० इत्थम्।

प्रतिक त्रि०कार्षापणेन क्रीतः ठिठन् (इकार उच्चारार्थः) प्रतिरा देशश्च। कार्षापणेन क्रीते स्त्रियां टिड्ढात् ङीप्। ततः पुरोहिता० भावे यक्। प्रातिक्य तद्भावे न०

प्रतिकण्ठ अव्य० वीप्सार्थे समीपे वा अव्ययीभावः। १कण्ठे कण्ठे इत्यादौ २कण्ठसमीपे च। प्रतिकण्ठं स्वरूपाति ठक्। प्रातिकण्ठिक कण्ठसमीपव्याहिणि।

प्रतिकर पु० प्रति+कृ-विक्षेपे भावे अप्। १स्त्रीशोभनायां २विक्षेपे च। [प्रतीकारकर्त्तरि।

प्रतिकर्त्तृ त्रि० प्रति+कृ-तृच्। कृतप्रत्यपकारके प्रत्यपकारके

प्रतिकर्म्मन् न० प्रति+कृ-मनिन्। १विद्यमानस्य गुणान्तराधाने २कृत्रिममण्डायां प्रसाधने अमरः।

प्रतिकर्ष पु० प्रति+कृष-भावे घञ्। १समाकर्षणे अन्यार्थं पूर्वोपात्तस्य पदार्थस्य कृषे काल्या० १५।८।१० कर्कः।

प्रतिक(ष्क)ष अव्य प्रति+कष-गतिशातनयोः कच् षुट् नि०। षुड्भक्ष्यः। १सङ्घाते २पुरोगे च त्रि०कौ०। ३वार्त्ताक्षरे मेदि०। प्रतिगतः कषाम् प्रा०स०। प्रतेः न कर्षि प्रत्युपसर्गत्वम् किन्तु गमेरेवोपसर्गत्वमतो न षुट्। ४कषाघातप्राप्ते त्रि०कौ०। [२तर्कितौ च।

प्रतिकष्ट न० प्रतिरूपं कष्टं प्रा०त०। १कर्मातिरूपकष्टे

प्रतिकाम अव्य० कामं कामं प्रति अव्ययी०। प्रत्येककामे

प्रतिकाय पु०प्रति+चि-घञ् क्यादेशः। १प्रतिरूपके २शरीरे वस्त्रे च जटा०।

प्रति(ती)कार पु० प्रति+कृ-घञ् वा दीर्घः। १वैरनिर्यातने कृतस्यापकारस्य तुल्यरूपापकारकरणेन २शोधने ३रोगादेश्चिकित्सायाञ्च शब्दर०।

प्रति(ती)काश पु० प्रतिरूपः काशः प्र+काश-घञ् वा प्रा०स० दीर्घः। तुल्यत्वे अस्य निभ० निलयः। अमरटीकायां रमानाथेनायं दन्त्यान्ततया पठितः।

प्रतिकितव पु०प्रतिकूलः कितवः प्रा०त०। द्यूतकारस्य प्रतिकूले द्यूतकारे येन सह द्यूतप्रवृत्तिस्तस्मिन्।

प्रतिकूप पु० प्रतिरूपः कूपः प्रा०त०। परिखायां खाराः।

प्रतिकूल त्रि० प्रतिरूपं कूलं पक्षोऽस्य प्रा०व०। १अनुकूले विरुद्धपक्षावलम्बिनि प्रतीपे अमरः प्रा०ब०। २विपरीताचरणे न०।

प्रतिकृति स्त्री प्र+कृ-क्तिन्दौ क्तिन्। १प्रतिमायां २सादृश्ये ३प्रतिनिधौ अमरः। ४प्रतिकारे मेदि०।

प्रतिकृष्ट त्रि० प्रति+कृष-क्त। १गर्ह्ये २हिराडलजा ३कुट्टनेत्रादौ च मेदि०। [प्रति कोपे च

प्रतिकोप पु०प्रतिरूपः कोपः। १रोगस्यानुरूपे कोपे २विपक्षे

प्रतिक्रिया स्त्री प्रति+कृ-भावे श। प्रति(ती)कारे

प्रतिक्षण अव्य०क्षणं क्षणं व्याप्य व्याप्तौ अव्ययी०। आभीक्ष्ण्ये

प्रतिक्षय पु० प्रति+क्षि-ऐश्वर्ये अच्। रक्षके शब्दर०

प्रतिक्षिप्त त्रि० प्रति+क्षिप-कर्मणि क्त। १प्रेषिते २वारिते मेदि०। ३बाधिते ४तिरस्कृते च अमरः। "आकूय प्रेषितो यस्तु प्रतिक्षिप्तः स उच्यते" इत्युक्ते २आकूयप्रेषिते कल्पतरुः। [३तिरस्कारे च।

प्रतिक्षेप पु० प्रति+क्षिप-भावे घञ्। १निराशे मेदि०।

प्रतिखुर पु० शुश्रुते एकीयमतोक्ते मूढगर्भभेदे "निःसृतहस्तपादशिरःकायमङ्गी प्रतिखुरः" इति तत्र दर्शितम्।

प्रतिख्याति स्त्री प्रति+ख्या-भावे क्तिन्। १विख्यातौ २अतिख्यातौ अमरः।

प्रतिगत न० प्रति+गम-भावे क्त। "गतागतप्रतिहतसम्याताद्याश्च पञ्चधाम्" जटाधरोक्ते १खगगतिभेदे २परावृत्तगमने च। कर्त्तरि क्त। ३परावृत्ते त्रि०।

प्रतिगर पु०प्रतिगीर्यते प्रत्युच्चार्यते प्रति+गृ-भावे अप्। वैदि-

कमन्त्रभेदस्य उच्चारणभेदे। तस्य प्रकार आश्व०औ०१।८।४ सूत्रादौ दर्शितो यथा "यज्ञक्षरः प्रतिगर ओषामो देवेति" सू० "यज्ञस्य खर इव खरो यस्य स यज्ञक्षरः। उत्तरपदलोपोऽत्र द्रष्टव्यः। यज्ञतुल्यस्वर इत्यर्थः। सवनस्वरसाविधेयत्वादन्योऽपि यो विशिष्टः स्वरो विहितः यज्ञस्य तस्य प्रापणार्थं वचनम्। ओषामोदेव इत्ययं प्रतिगरसंज्ञो भवति प्रतिगीयते प्रत्युच्चार्यते इति प्रतिगरः। यज्ञमात्रविशेषविशिष्टतया सकृदेव विधातुं शक्येऽपि सामान्यस्य पृथग्विधानं प्रतिगरशब्दव्यवहारेऽपि सामान्येनास्य यज्ञस्यार्थम्" नारा० इ० "ओंसामो देवेत्याहावे" सू० "प्रतिगरो भवतीति शेषः। यः पुनरयं प्रतिगरोऽपरो विधीयते तज्ज्ञापयति। प्रतिगरान्तरमध्यवर्त्तिन्याहावेऽयं निमज्जति। तेन यज्ञमध्येऽयमेव स्यात् यज्ञादावयं ब्राह्मणोक्तः ओंसामोदेवेति वा" ना०इ०। "प्लुतादिः प्रणवेऽप्लुतादिरवसाने" सू०। "व्यवहितस्थो वा विशेषविधी। अनन्तरस्य प्रणवावसानरूपेण विषयभेदासम्भवात्" इ०। "प्रणवे प्रणव आहावोत्तरे" सू०। "प्लुतादेरयमपवादः। आहावोत्तरे प्रणवे प्रणव एव प्रतिगरो भवति"। "अवसाने च" सू०। प्रणवः प्रतिगरो भवतीति शेषः। यज्ञान्तरे यज्ञमध्ये चावसानेऽयं विधिर्भवति" इत्तिः। "प्रणवान्तो वा" सू०। विभवद्वयेऽयं विकल्पः यत्र यत्र चान्तःस्थं प्रणवेनावसाति। प्रणवान्त एव तत्र प्रतिगरः" इत्तिः। यज्ञान्ते तु प्रणवः" इ०।

प्रतिग्रह पु० प्रति+ग्रह–अप्। १स्वीकारे २यदर्थंदत्तद्रव्यस्य ग्रहणे ३सैन्यभेदे ४यतद्ग्रहे च मेदि०। प्रतिग्रहशब्दार्थस्यद्रव्यस्वीकारः। तत्र दानस्यैव स्वस्वत्वध्वंसमित्र परस्वत्वोत्पत्तिं प्रति हेतुता प्रतिग्रहस्य तु यज्ञेदविनियोगार्हतापर्योजकस्वत्वं प्रति कारणता यथोक्तं दायभागे

"दत्त्वा स्वोऽपि दाने हि चेतनोऽचेतनेऽपि वा। अविशिष्टत्वमादेव दातृव्यापारात् सम्प्रदानस्य द्रव्ये स्वामित्वम्। न च स्वीकरणात् स्वत्वं स्वकर्तुरेव दातृत्वापत्तेः परस्वत्वापत्तिफलेन हि दानरूपता तच्च फलं सम्प्रदानाधीनं यथा देवतोद्देशेन द्रव्यत्यागं कुर्वन्नपि यजमानो न होता किन्तु यज्ञेन त्यागस्य होमाभिधाननिमित्तं प्रक्षेपं कुर्वन् स्रुचि क्षेव होतेत्युच्यते तद्वदत्रापि स्यात्। किञ्च मनसा पात्रसादिप्रक्षेत्रादिशास्त्रे स्वीकारात् प्रागेव दानपदं दृष्टम्। ननु यद्यं स्वीकारः अभूततद्भावे चिप्रयोगात् अस्वं स्वं कुर्वन् व्यापारः स्वीकारो भवति कथं तत् प्रागेव स्वत्वम्। उच्यते उत्पन्नमपि स्वत्वं सम्प्रदानव्यापारेण ममेदमिति ज्ञानेन यज्ञेदव्यवहारार्हं क्रियत इति स्वीकारशब्दार्थः। याजनाध्यापनसाहचर्य्याच्च प्रतिग्रहस्य स्वत्वजननवतोऽपि यजनरूपता न विरुद्धा याजनादौ दक्षिणादानादेव स्वत्वात् मूलम्। व्याख्यातमेतत् श्रीकृष्णेन यथा "ननु त्यागात् केवलं स्वत्वनाशः सम्प्रदानस्वत्वं तु ममेदमिति भाविस्वत्वावगाहितत्स्वीकारादेवेति मतं निराकरोति नचेति। स्वीकर्तुरेवेत्येवकारेण त्यक्तुर्व्यवच्छेदः। दत्तुपपादयति परस्वत्वापत्तिफलेन हीति। स्वत्वायनाशयः धात्वर्थतावच्छेदकफलानुकूलव्यापारवत एव दानत्वतद्वत्तव्यपदेश्यत्वं यथा धात्वर्थतावच्छेदकोत्तरदेशसंयोगानुकूलव्यापारवति चैत्रे गच्छतीति व्यवहारः। स्वीकारस्य स्वत्वहेतुत्वे धात्वर्थतावच्छेदकपरस्वत्वानुकूलस्वीकाररूपव्यापारवतः स्वीकर्तुरेव दातृपदव्यपदेश्यत्वापत्तिरिति दूषणस्वभ्रंसरूपफलस्य न तद्व्यपदेशनियामकता तथात्वे उपेक्षितेऽपि दातृपदव्यपदेश्यत्वापत्तिरिति। केचित्तु स्वीकारस्य स्वत्वहेतुत्वे परस्वत्वफलोपहितत्यागात्कदाने सर्वांशे एकस्यापि कर्तृत्वासम्भवात् एकांशमादायैव दत्तस्वव्यवहारे कर्त्तव्ये प्रधानीभूतफलांशानुकूलव्यापारवत्त्वेव दातृव्यवहारः स्यादिति व्याचक्षुः। इदानीमेतं दूषयति यथा हीति। होमाभिधाननिमित्तमिति। विशिष्टदेशावच्छिन्नप्रक्षेपोपहितत्यागस्य होमत्वात् प्रक्षेपस्य तदभिधाननिमित्तत्वमित्यर्थः। तेन ऊर्ध्वधात्वर्थतावच्छेदकप्रक्षेपानुकूलव्यापारवति स्रुचि होतेति व्यपदेशो यथा तथेत्यर्थः। त्यागस्य स्वत्वहेतुत्वे स्फुटमेव शास्त्रं प्रमाणयति किञ्चेति। स्रादिना भूमौ तोयं विनिःक्षिपेदित्युत्तरप्रतीकपरिग्रहः। शास्त्रे शास्त्रबोधितत्यागे। दानपदं दृष्टमिति। "विद्यते सागरस्यान्तो दानस्यान्तो न विद्यते" इति तद्वचनस्योत्तरार्द्धे दानपदं प्रयुक्तमित्यर्थः। तथाच निरन्तरयोरेव सस्वत्वध्वंसपरस्वत्वोत्पत्तिफलयोर्दात्यर्थधात्वर्थतावच्छेदकत्वात् दानस्य परस्वत्वहेतुता शास्त्रसिद्धेति भावः। स्वीकारात् प्रागेव स्वत्वे ग्रहणस्य स्वीकारपदार्थत्वासम्भवमाशङ्क्य ननीति। स्वीकारशब्दार्थं दृढयति। तथाच स्वपदस्य यज्ञेदविनियोगार्हत्वविशिष्टे सत्त्वेति भावः। ननु यज्ञ-

ताध्यापनप्रतिग्रहैर्ब्राह्मणो धनमार्जयेदित्यत्र राजन्यवैश्येन वर्जनीयत्वादिवत् याजनाद्यात्मकैर्धनमर्जयेदित्यनुवादात् प्रतिग्रहस्यार्जनरूपता सिद्धा प्रतिग्रहस्य स्वत्वहेतुत्वे च तदिदं स्वत्वहेतुव्यापारस्यैवार्जनत्वात् आह याजनेति। अर्जनरूपता अर्जनपदव्यपदेशः। अविरोधस्तथोपादयति याजनादाविति तथा च याजनादीनां स्वत्वहेतुत्वेन तदनुरोधात् अर्जयेदित्यत्रार्जनं न स्वत्वजनकत्वं किन्तु स्वत्वप्रयोजकत्वमेव तच्च प्रतिग्रहेऽक्षतं दत्ते सत्यं प्रतीष्टस्वीकारोत्तरमवधारण एव तदङ्गेन दातुस्वामात् तत्स्वत्वोदयात् प्रतिग्रहस्वीकरणे तद्व्यतिरेकाच्चेति भावः"।

"न च दानस्य स्वत्वहेतुत्वे प्रमाणाभावः "सप्त वित्तागमा धर्म्यादयो लाभः क्रयो जयः। प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च" इत्यादिमन्वादिवचनैश्च स्वत्वहेतुत्वाप्रतिपादनादिति वाच्यं ब्राह्मणाय त्यक्तायां गवि मौरिक्यं ब्राह्मणस्य न तु ममेत्यादिसार्वजनीनप्रतीतेरेव तत्र प्रमाणत्वात् प्रदानं स्वाम्यकारणमितिवचनाच्च अत एव विदेशस्थं पात्रसद्भिद्य त्यक्तधने स्वीकारमन्तरेणैव पात्रस्य मरणश्रवणे पिण्डदायत्वेन तद्धनं पुत्रादिभिर्विभज्य गृह्यते अन्यथा तैरिव यदासीनैरपि तद्धनस्वीकारेण कृतार्थैरिवोपादाने यथेष्टनियोगे च प्रत्यवायो न स्यात्। नन्वेवं दानादेव स्वत्वसिद्धेर्दत्तस्वीकारो व्यर्थ इति चेन्न "लब्ध्वा चाष्टगुणं फलमित्यादिश्रुतेः प्रतिग्रहीतरि द्रव्यदानस्य फलविशेषं प्रति हेतुत्वेन तादृशफलसम्पत्त्यर्थमेव प्रतिग्रहोपयोगात् याजनाध्यापनप्रतिग्रहैर्द्विजो धनमर्जयेदित्यादिश्रुत्या प्रागुक्तकृत्या च प्रतिग्रहस्यापि स्वत्वहेतुत्वबोधनाच्च स्वत्वजनकव्यापारस्यैवार्जनपदार्थत्वात् "मन्दयज्ञिप्रभ्रष्टाधिकं दानशब्दे द्रष्टव्यम्। द्रव्यदेवतानिष्ठे दोषस्तु यथालाभशब्दे वक्ष्यते

यथोचितस्य विषयभेदे प्रतिग्रहे न दोषः यथा "यथोचितोपपन्ने तु नास्ति दोषः प्रतिग्रहे। अज्ञातं तं विदुर्देवास्तत्कालज्ञैव निर्णुदेत्। गुरुश्चाप्यवलिप्तेर्वुरचिरप्रव्रजितेषु च। सर्वतः प्रतिगृह्णीयान्न तु दद्येत् कथंचन। साधुतः प्रतिगृह्णीयादथ वाऽसाधुतो द्विजः। ज्ञानवानल्पदोषेण निर्मुच्यो हि निलिम्पति। एवं तस्करदत्ता वा क्रयाभरणमात्मनः। कृत्वादिशुद्धिं परतः प्रायश्चित्तं द्विजोत्तमः"। गारुडे २१५ अ०। अधिकम् अत्रैव दर्शविषयमाधे शु०तत्त्वमन्त्रे द्रष्टव्यम्। तीर्थप्रतिग्रहनिषेधो यथा "स्वकार्ये पितृकार्ये वा देवताभ्यर्चनेऽपि वा। निष्फलं तस्य तत्तीर्थं यावत् तद्नमश्नुते। यतस्तीर्थं न गृह्णीयात् पुरुषोऽतपसेषु च" कौर्मे ३२अ०। राजादितः प्रतिग्रहनिषेधो यथा "न राज्ञः प्रतिगृह्णीयाद्ब्रह्मप्रतिहतादपि। न चान्त्यजादशस्त्रञ्च निन्दितात् वर्जयेद्बुधः" कौर्मे १६अ०। आपदि गर्हितप्रतिग्रहादोषः दृश्यतरा० "प्रोक्तप्रतिग्रहाभावे आपायां दृढदापदि। विप्रोऽग्रतः प्रतिगृह्णन् वा यतस्ततोऽपि नाधभाक्। सुवर्णादिशुद्ध्यर्थं देवाद्यर्थञ्च सर्वतः। प्रत्यादद्याद्दृढिजो वस्तु स्वस्यैवमात्मनोऽपि च। दधिक्षीरान्नमांसानि गन्धपुष्पाम्बुभक्ष्यजातम्। यथामांसाशनं श्राद्धं प्रत्याख्येयं न कर्हिचित्। अपि दुष्कृतकर्मभ्यः सकाशादादयाचितम्। पतितेभ्यस्तथाऽन्येभ्यः प्रतिग्राह्यमवश्यम्"। प्रतिग्रहीतुं शक्तस्य तत्त्यागे तत्रैव स्थानान्तरे स्वर्गं उक्तो यथा "शक्तःप्रतिग्रहीतुं यो वेदवित्तः सुसंयतः। अश्वमानं न गृह्णाति स्वर्गस्तस्य सुनिश्चितम्। प्रतिग्रहस्वं वापि याचितं यो न यच्छति। तत्कोटिगुणितपशो स्वतो दासत्वमश्नुते"। दाता च न कस्यचिन्न प्रतिग्राही न याचते। तावुभौ नरकं यातो दाता चैव प्रतिग्रही। यदन्ति कवयः केचिद्दानमप्रतिग्रहे प्रति। प्रत्यक्षं हिङ्गमेवेह दातृयाचकयोर्वचः। दातृदत्तो भवेद्दुर्गमयक्षिप्तेह प्रतिग्रही। यद्दानं प्रतिगृह्णीयात् प्रतिग्राही ब्रह्मवधः।" तस्य प्रकारमाह शु०त० विष्णुधर्मोत्तरे "भूमेः प्रतिग्रहं कुर्याद्भूमेः कृत्वा प्रदक्षिणम्"। प्रदक्षिणं न सर्वस्याभूमेः किन्तु तत्स्थस्य प्रदक्षिणावर्त्तनमात्रं, भूमेरसन्निधाने तात्पर्यम् प्रदक्षिणम्। "करे गृह्य तथा कन्यां दासदासौ द्विजोत्तमाः!। करन्तु चेदि विन्यस्य धर्मो ज्ञेयः प्रतिग्रहे" "आरुह्य च गजस्योक्तः कर्णे चाश्वस्य कीर्तितः। तथा चैवश्वकानान्तु सर्वेषामविशेषतः। प्रतिगृह्णीत गां पुच्छे पुच्छे कृष्णाजिनं तथा। धारणाः पयसश्चान्ये गावः पुच्छे विचक्षणैः। प्रतिग्रहमयोक्ष्य धारुह्य च तथाऽऽचरेत्। बीजानां सप्तिमादाय रत्नान्यादाय सर्वशः। वस्त्रं दशान्न चादद्यात् परिधाय तथा पुनः। आरुह्योपानहौ यानमारुह्यैव च पादुके। छत्रायान्तु रथं यान्तं छत्रं दण्डे च धारयेत्। आयुधानि समादाय तथाऽऽभूषणं विभूषणम्। वर्मध्वजौ तथा गृहा प्रविशन्न च तथा गृहम्। अवतीर्य च सर्वाणि जल-

स्थानानि वै द्विजाः। दृष्ट्वाग्नन्याम्बयादाय मृदा यो ब्राह्मणः पठेत्। प्रतिग्रहीता सावित्रीं सर्वत्रैव प्रकीर्त्तयेत्। ततस्तु सार्द्धं दृष्ट्वेष तस्य दृष्टस्य देवताम्" भूमिविष्णुदेवताकेत्यादि कीर्त्तयेदित्यर्थः। "समाप्नुयात्ततः पश्चात् कामस्तुत्या प्रतिग्रहम्। विधिं धर्मं अथो ज्ञात्वा यस्तु कुर्य्यात् प्रतिग्रहम्। दात्रा सह तरत्येव नान्यादृगांघ्रसौ द्विजः"। ब्रह्मपुराणे "ब्राह्मणः प्रतिगृह्णीयादृष्ट्यर्थं साधुतत्त्वतः। अव्यङ्गमपि मातङ्गतिलकौशं च वर्जयेत्। अध्याजिनदृषच्यादौ न भूयः प्रग्रहो भवेत्। अश्वालङ्कारवस्त्रादि प्रतिगृह्य हतस्य च। नरकान्न निवर्त्तन्ते धेनुं तिलमयीं तथा"। तथा "ब्रह्महत्या सुरापानमपि स्तेयं तरिष्यति। आत्मरादृ यद्गृहीतन्तु तत्क्षयं वै करिष्यति" एतदादिदृष्ट्यदानं यद्गृहीतदोषजनकम्। अनिच्छे विद्यारहितत्वेनासमर्थाय च दातुरपि दोषजनकमाह दक्षः "न केवलं हि तद्धरति प्रेषस्य च नयत्यधः"। तत् दृष्ट्यं प्रेषं दृष्ट्यस्य अतएव याज्ञवल्क्यः "विद्यातपोभ्यां हीनेन न तु याच्ञाः प्रतिग्रहः। स्वजनं प्रदातारमधोनयत्याददानमेव च"। अधो नरकम्। एतद्दानप्रतिग्रहोत्तरं तपोजपादिभिरात्मतारणत्वमाह स्वेच्छया प्रतिगृहीते दानं न दोषावेत्याह विष्णुः "एतानि यदि गृह्णाति स्वेच्छयाभ्यर्थितो न तु। तत्रैव दाने न दोषोऽस्ति यस्तत्क्षालनन्तु तारयेत्"। तारणप्रकारमाह हारीतः "मधिपाशोषणादीनां प्रतिग्रहे सावित्र्यष्टसहस्रं जपेत् पञ्चमध्यमे दशोत्तमे द्वादशरात्रं पयोव्रतं अष्टसहस्रं भवत्प्रतिग्रहेषिति" अष्टसहस्रमष्टाधिकसहस्रम् अभवत्प्रतिग्रहेषु उभयतोऽक्षादिप्रतिग्रहेषु तथाचादिपुराणे "किं करिष्यत्यसौ मूढो गृह्णात्युभयतोऽक्षीम्। सहस्रं वारुणाः पाशाः क्षुरधाराऽग्निसन्निभाः। पूर्वं यः सहस्रे तु पाश एवः प्रमुच्यते"। अत एव देवलः "प्रतिग्रहसमर्थो हि कृत्वा विप्रो यथाविधि। निःसारवति दातारमात्मानञ्च समुद्धरेत्"। स्कान्दे "वेदाङ्गपारगो विप्रो यदि कुर्य्यात् प्रतिग्रहम्। न स प्रापेन लिप्येत पद्मपत्रमिवाम्भसा" एवं "तीर्थे न प्रतिगृह्णीयात् दुर्भिक्षायतनेषु च। निमित्तेषु च सर्वेषु न मनस्तो भवेद्धरः" इति भट्टाभारतवचनम्। प्रतिगृहीतृदोषजनके गङ्गातीरादिदेशप्रतिग्रहादिकाले दानेऽपि बोध्यम्। किन्त्विदानीन्तनाविधपात्राभावात् "मनसा पात्रमुद्दिश्य" इत्यादि प्रागुक्तवचनात्तद्देशकालयोरत्यन्तदूरे देशान्तरे कालान्तरे च प्रतिपादनाभावः सर्वथा समीचीनः। गङ्गावाक्यावलीधृतमेवम्। याज्ञवल्क्यः "प्रतिग्रहसमर्थो हि नादत्ते यः प्रतिग्रहम्। ये लोका दानशीलानां स तानाप्नोति दुष्कृतात्"। अपवादमाह स एव "कृशाः श्रोत्रिय पक्षे वा गत्वा पुष्पं दधि क्षितिः। सांसश्रयाश्च धानाः प्रतीच्छेयं न वारि च"। चकारादृष्टादि "अश्वाष्टकान् कृशान् गव्यानपः पुष्पं मधोर्दधि। सक्तून् धानाः पयोमांसं शाकञ्चैव न निर्णुदेत्" इति वचनवत्। मधोर्न विशादिनिवारकात्। तथा "एधोदकं फलं मूलमन्नमभ्युद्यतञ्च यत्। सर्वतः प्रतिगृह्णीयात् भक्ष्याभयदक्षिणाम्"। अभयदक्षिणाम् अभयदानं अभयप्रद इति वक्ष्यमाणवचनात्। अभ्युद्यतम् अभय्यं दत्तम्। किमिति प्रतीच्छेयम् इत्याह। तथा च मनुः "अयाचितादाहृतं याज्ञमपि दुष्कृतकर्मणः। अन्यत्र कृषटाषण्डपतितेभ्यस्तथा द्विजः" एतद्वचनं याज्ञवल्क्योक्तेति मिताक्षराकल्पतरुकल्पद्रुमाधवाचार्यैः। मनोरिति भूरिषेणः। भरद्वाजः "अयाचितोपपन्ने तु नास्ति दोषः प्रतिग्रहे। अयाचितं तद्विदुर्देवास्तस्मात्तं नैव निर्णुदेत्"। अपवादान्तरमाह स एव "देवातिथ्यर्थनक्षते गुरुस्वार्थमेव च। सर्वतः प्रतिगृह्णीयादात्मत्यर्थमेव च" इत्या भरद्वाजीयाः भार्य्यापुत्रादयः। तथा च मनुः "दद्यो न मातापितरौ साध्वी भार्य्या सुतः शिशुः। अप्रदाप्यौ यतं कृत्वा भर्त्तव्या मनुरब्रवीत्"। आत्मत्यर्थं जीवनमात्रम्। "न तु क्षयेत् स्वयं ततः" इति मनुक्तेः। प्रयोगसारे "प्रतिग्रहं न गृह्णीयादात्मभोगोपलिप्सया। देवतातिथिपूजार्थं धनं याचाद्युपार्जयेत्"। अङ्गिराः "कुटुम्बार्थं द्विजः शूद्राद् प्रतिगृह्णीत याचितम्। क्रतुर्वंशात्मने चैव न हि याचेत कञ्चित्"। अत एव यज्ञार्थं याचकत्वे निन्दामाह याज्ञवल्क्यः "याच्ञाजीवो जायते यज्ञकरणाच्छूद्रमित्रत्वात्" शूद्रस्यापि अयाचितदातृत्वमाह वसिष्ठपुराणम् "अयाचितप्रदाता च अग्निं इत्यर्थमाश्रयेत्। पुराणं श्रृणुयान्नित्यं नरसिंहस्य पूजनम्

प्रतिग्रहीतृ त्रि॰ प्रति+ग्रह+तृच्। प्रतिग्रहकर्त्तरि प्रतिग्रहीत्वमेव दानशब्दे १४॰ पृष्ठे दर्शितम्।

प्रतिग्राह त्रि॰ प्रति+ग्रह-कर्त्तरि घ। १प्रतिग्रहकारके २पतद्ग्रहे (पिकदानी) पु॰ अमरः।

प्रतिघ पु॰ प्रति+हन-ड नुट्च॰ कुत्वम्। १प्रतिघाते मेदिः

२कोपे अमरः । कामप्रतिघातेन तस्य जातत्वात्तथात्वम् । ३मूर्च्छायां शब्दर० ।

प्रतिघात पु० प्रति+हन–घञ् भावे अप् । १मारणे २क्षतक्षित् विघाते च । ल्युट् प्रतिघातन तत्रार्थे न०अमरः ।

प्रतिघ्न न० प्रति+हन–घञर्थे क । अङ्के शब्दच० ।

प्रतिचक्ष्य त्रि० प्रति+चक्ष–ल्यत् वा ख्यादेशाभावः । प्रकर्षेण दृश्ये ऋ०१।११२।११भा० ।

प्रतिच्छन्दस् त्रि० छन्दांसि अभिप्रायः प्रतिगतश्छन्दः अत्या०स० । १अभिप्रायानुरूपे २प्रतिरूपे ३अनुरोधे च त्रिका० । वेदश्छन्दः शाकल्ये अव्ययी० । ४प्रतिवेदमित्यर्थे अव्य० ।

प्रतिच्छन्दक त्रि० प्रति+छन्द–ण्वुल् । प्रतिनिधौ ६।१८० स्मृतौ कुल्लूकभट्टः ।

प्रतिच्छाया स्त्री प्रतिरूपा छायायाः मा०स० । प्रतिरूपायां १प्रतिमायां २सादृश्ये च अमरः । [हेमच० ।

प्रतिजङ्घा स्त्री प्रतिगता जङ्घाम् अत्या०स० । अपजङ्घायाम्

प्रतिजन अव्य० वीप्सायाम् अव्ययी० । जनं जनं प्रतीत्यर्थे तस्य अंशा० अलोदात्तता । तत्र साधु प्रतिजना० खञ् । प्रातिजनीन प्रत्येकजनसाधौ त्रि० ।

प्रतिजनादि "प्रतिजनादिभ्यः खञ्" पा० उक्ते खञ्प्रत्ययनिमित्ते शब्दगणे स च गणः पा०ग० उक्तो यथा "प्रतिजन इदंयुग कंयुग सवयुग परयुग परकुल परस्मैकुल अस्मत्कुल सर्वजन विश्वजन महाजन पञ्चजन"

प्रतिजन्य न० प्रतिभूतं जन्यं युद्धं यस्य, प्रतिजने विषयजनपदे भवः यत् वा । १प्रतिवैरे २प्रतिपक्षजनपदभवे च ऋ०४।५।७ भा० ।

प्रतिजल्पक पु० "दुरुक्तशङ्कभावेऽप्यात्मनोर्हेत्यनुद्धतम् । दूतस्य वचनेनोक्तं यत्र स प्रतिजल्पकः" उज्ज्वलभरतयुक्तलक्षणे दूतवाक्यभेदे ।

प्रतिजागर पु० जागरस्य प्रतिनिधिः । १प्रत्यवेक्षणाय सदृशवेक्षकेति निर्णये अमरटी० रायमुकुटः । ल्युट् । प्रतिजागरण तत्रार्थे न० मार्क०पु० ९९अ० ।

प्रतिजिह्वा स्त्री प्रतिरूपा जिह्वा मा०स० । तालुमूलस्थे जिह्वाकारे मांसपिण्डे (आनजिब) स्वार्थे क । तत्रार्थे त्रिका० ।

प्रतिज्ञा स्त्री प्रति+ज्ञा–भावे "आतश्चोपसर्गे" पा० अङ् । १कर्त्तव्यतयाऽङ्गीकारे ज्ञानानुकूलव्यापारे स च करिष्यामीत्यादिवाक्यरूपः "साध्यनिर्देशः प्रतिज्ञा" गौ०सू०उक्ते साध्यत्वेन पक्षनिर्देशरूपे २पञ्चावयवन्यायावयवभेदे "यथा पर्वतो वह्निमान् इत्यादिवाक्यम् तत्र भाष्यम् "प्रज्ञाप-नीयेन धर्मेण विशिष्टस्य परिग्रहवचनम् साध्यनिर्देशः प्रतिज्ञा यथा शब्दोऽनित्य इति" । अवयवपक्षे अनुमानचिन्तामणयादिदीधितौ विस्तारः । व्यवहारे पक्षाभिधायके १पूर्वपक्षभाषाद्यपरपर्य्याये वाक्ये यथा नमेदं दृश्यमनेन मदीयं न ददातीत्यादि । पूर्वपक्षशब्दे ४४०।२ पृ० दृश्यम् । ४अङ्गीकारे अमरः भावे ल्युट । प्रतिज्ञानं तत्रार्थे न० ।

प्रतिज्ञात त्रि० प्रति+ज्ञा–क्त । प्रागुक्तप्रतिज्ञाविषये "ततोऽर्थी लेखयेत् सद्यः प्रतिज्ञातार्थसाधनम्" इति स्मृतिः ।

प्रतिज्ञान्तर न० अन्या प्रतिज्ञा मयू०स० । "प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात्तदर्थनिर्देशः प्रतिज्ञान्तरम्" गौ०सू० उक्ते निग्रहस्थानभेदे विवृतं चेदं दृष्टौ "प्रतिज्ञान्तरं लक्षयति । प्रतिज्ञातस्यार्थस्य प्रतिषेधे कृते तदर्थप्रत्यनीकधर्मोपपत्तेर्या धर्मस्य धर्मान्तरस्य विशिष्टः कल्पोविकल्पः तस्मादिग्रहणान्तरविशिष्टतया प्रतिज्ञातार्थस्य कथनमिति फलितार्थः । प्रतिषेध इत्यनेन झटितिसंवरणे विलम्बेनापि स्वयं दूषणं विभाव्य विशेषणे न दोष इत्युक्तं, प्रतिज्ञातार्थस्येत्युपलक्षणम् हेत्वन्तरनिरूपार्थस्येति तत्त्वं तेन उदाहरणान्तरमुपनयान्तरञ्च प्रतिज्ञान्तरत्वेन संगृहीतं भवति । इदञ्च पक्षसाध्यविशेषणभेदात् प्रत्येकं त्रिविधं यथा शब्दोऽनित्य इत्युक्ते ध्वनौ वाचेन परेण पुनरुक्ते वर्णात्मकः शब्दः पक्ष इति प्रतिज्ञान्तरं, न चेदमधोन्तरं एकतोपयोगात् न चेयं प्रतिज्ञाहानिः पूर्वोक्तस्यापरित्यागात् एवं पर्वतो वह्निमान् सुरभिमलिनधूमवत्त्वादित्युक्ते अवयवे विशेषणत्वेन च परेण पुनरुक्ते लक्षणासुरूपमवह्निमानित्यत्र, एवं तादृशपक्षे साध्ये यः सुरभिमलिनधूमवान् स वह्निमानित्युदाहरणे न्यूनत्वेन पुनरुक्ते स तादृशवह्निमानित्यत्र, एवमन्यदप्यूह्यम् ।

प्रतिज्ञापत्र न० प्रतिज्ञालेखकं पत्रम् मा०त० । भाषापत्रभेदे ।

प्रतिज्ञाविरोध न० "प्रतिज्ञाहेत्योर्विरोधः प्रतिज्ञाविरोधः" गौ० सू० उक्ते निग्रहस्थानभेदे विवृतञ्चेदं दृष्टौ "प्रतिज्ञाविरोधं लक्षयति यत्र च प्रतिज्ञाहेतुपदे कथाकालीनवाक्यपरे तथा च कथायां स्ववचनार्थविरोधः प्रतिज्ञाविरोधः यद्यपि काञ्चनमयः पर्वतो वह्निमान् पर्वतः काञ्चनमयवह्निमान् ह्रदो वह्निमान् ह्रदत्वात् पर्वतो वह्निमान् काञ्चनमयधूमादित्यादौ हेत्वाभासान्तरसाङ्कर्यं तथाप्युपाधेयसङ्करेऽप्युपाधेरसाङ्कर्यात्र दोषः । न चासङ्कीर्णस्वभावः पर्वतो न वह्निमान् धूमात् यो

को धूमवान् स निरग्निरित्युदाहरणे निरग्निहायमित्युपनये तत्सत्त्वात् एवं निगमनेऽपि बोध्यम्।

प्रतिज्ञाभ्यास न० "पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञाभ्यासः" गौ०सू०उक्ते निग्रहस्थानभेदे विवृतत्वेदं दुष्टो "प्रतिज्ञाभ्यासं लक्षयति। पक्षस्य साभिप्रेतस्य परेण प्रतिषेधे कृते सति तत्परिजिहीर्षया प्रतिज्ञातार्थस्यापनयनमपलाप इत्यर्थः यथा शब्दोऽनित्य ऐन्द्रियकत्वादित्युक्ते सामान्ये व्यभिचारेण परेण प्रत्युक्ते क एवमाह शब्दोऽनित्य इति।

प्रतिज्ञाहानि न० "प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः" गौ०सू० उक्ते निग्रहस्थानभेदे विवृतत्वेदं दुष्टो "प्रतिज्ञाहानिं लक्षयति प्रतिकूलो दृष्टान्तो यस्य स प्रतिदृष्टान्तः परपक्षः स्वः स्वीयः दृष्टान्तो यस्य स स्वदृष्टान्तः स्वपक्षः तथा च स्वपक्षे परपक्षधर्माभ्यनुज्ञा प्रतिज्ञाहानिः स्वयं विशिष्याभिहितपरित्याग इति फलितार्थः अपसिद्धान्तस्तु स्वयं विशिष्य नाभिधीयते इति नापसिद्धान्तसाङ्कर्यं सैवं पक्षप्रतिदृष्टान्तसाध्यतदन्यहानिभेदात् षड्विधा भवति यथा शब्दोऽनित्यः कृतकत्वादित्युक्ते प्रत्यभिज्ञया बाधितविषयोऽयमित्युच्चरिते यस्तु तर्हि घट एव पक्ष इति, एवं तत्रैव ऐन्द्रियकत्वादिति हेतोरनैकान्तिकत्वमिति प्रत्युक्ते यस्तु कृतकत्वादिति हेतुरिति, एवं पर्वतो वह्निमान् धूमादयोगोलकवदित्युक्ते दृष्टान्तः साधनविकल इति प्रत्युक्ते यस्तु तर्हि महानसवदिति, एवम् तत्रैव सिद्धसाधने च प्रत्युक्ते यस्तु तर्हि इन्धनवानिति अन्यहानिस्तु विशेषणहान्यादिः यथा तत्रैव नीलधूमादित्युक्ते असमर्थविशेषणत्वेन प्रत्युक्ते यस्तु तर्हि धूमादिति हेतुरित्यादि।

प्रतितन्त्र न० प्रतिकूलं तन्त्रं शास्त्रम् मा०स०। स्वमतविरुद्धे शास्त्रे तन्त्रान्तरेतरसंमतसम्बद्धस्यार्थस्योपदेशः शास्त्रमिति।

प्रतितन्त्रसिद्धान्त पु० "समानतन्त्रसिद्धः परतन्त्रसिद्धः प्रतितन्त्रसिद्धान्तः" गौ०सू०उक्ते सिद्धान्तभेदे विवृतं चेदं दुष्टो "प्रतितन्त्रसिद्धान्तं लक्षयति। समानशब्द एकार्थको नैकतन्त्रसिद्ध इत्यर्थः स्वतन्त्रसिद्ध इति पर्यवसितोऽर्थः तथा च वादिप्रतिवाद्येकतरमात्राभ्युपगतस्तदेकतरस्य प्रतितन्त्रसिद्धान्त इति फलितार्थः। यथा मीमांसकानां शब्दनित्यत्वम्। उदाहृतं च भाष्ये यथा नास्त आत्मा नास्त आत्महानं निरतिशया चेतना दृष्टेन्द्रियमनःसु विषयेषु तत्तत्कारणेषु च विशेष इति सांख्यानाम्। पुरुषकर्मनिमित्तो भूतसर्गः कर्महेतवो दोषा प्रवृत्तिश्च स्वगुणविशिष्टाचेतनाः अस्तदुत्पद्यते तत्प्रत्यक्षं निरुध्यते इति योगानाम्"।

प्रतितर पु० प्रतितीर्यतेऽनेन प्रति+तॄ-करणे अप्। तरणसाधने नौकाप्लवनदण्डादौ सुश्रुतः।

प्रतिताल पु० संगीतसा० उक्ते तालभेदे तल्लक्षणभेदादिकं तत्रोक्तं यथा "कालारः समराख्यश्च वैकुण्ठो वाल्हितस्तथा। कथिताः शङ्करेणैव चत्वारः प्रतितालकाः। कालारः प्रतितालस्तु चन्द्रक्रीडे द्रुतद्वयम्। दशाक्षरपदैर्नाम झङ्कारे वर्त्तते रसे॥१ लघुद्रुतौ लघुश्चान्ते स्यपनाम्ना प्रदाहृतः। रुद्रसंख्याक्षरपदः समरो वीरके रसे"।२ "रुद्रलघुस्तु वैकुण्ठे प्रतिताले प्रकीर्तितः। अर्कसंख्याक्षरैः पादो झाझे त्रिपुटतालके"।३ "वाल्हितस्त्रितीय ताले लघुरेको द्रुतत्रयम्। त्रयोदशाक्षरैर्युक्तो रसेऽद्भुते प्रकीर्तितः"।

प्रतिताली स्त्री प्रतिगता तालं गौरा० ङीष्। (चावि) तालकोड्डाटके यन्त्रभेदे हेमच०।

प्रतितृष्णी स्त्री सुश्रुतोक्ते वातरोगभेदे "वाहत्व वायुः सकफा धमनीः शब्दवाहिनीः। नरान् करोत्यक्रियकान् मूकमिन्मिषगद्गदान्। अधिका वेदना यत्र वर्त्मोन्मुखाक्ष्योत्थिता। भिद्यन्तीव गुदोपस्थं सा तृष्णीत्युपदिश्यते। गुदोपस्थोत्थिता सैव प्रतिलोमविसर्पिणी॥ वेगैः पक्षाशयं याति प्रतितृष्णी तु सा स्मृता"। तृष्णीशब्दोऽत्र तत्र लक्षितवातरोगभेदे स्त्री।

प्रतिदान न० प्रतिरूपं तुल्यरूपं दानम् मा०स०। विनिमये तुल्यरूपदाने न्यासस्य द्रव्यस्य २प्रत्यर्पणे च अमरः।

प्रतिदारण न० प्रति-दॄ+णिच्-आधारे ल्युट्। युद्धे शस्त्रमात्रे भावे ल्युट्। भेदने।

प्रतिदिवन् पु० प्रतिदीव्यति दिव-कनिन्। प्रत्यहं १दीप्रिशीले स्त्रियां ङीप् अस्य भत्वेऽङ्गोपे दीर्घविधौ परनिमित्तलोपरूपाजादेशस्य स्थानिवत्त्वाभावात् दीर्घः। प्रतिदीव्नः प्रतिदीव्नेत्यादि। शब्दरत्ना० प्रतिदीवन् इति शब्दान्तरं क्वचित्तत्र पृषो० तत्साधुः। [३१०१ पृ०३७३स्त्म्।

प्रतिदृष्टान्तसम पु० गौ०सू० उक्ते जात्युत्तरभेदे जातिशब्दे

प्रतिद्वन्द्व न० प्रतिरूपं द्वन्द्वम् मा०स०। तुल्ययुद्धे भार्क०१६अ०।

प्रतिद्वन्द्विन् त्रि० प्रतिद्वन्द्वप्रत्ययस्य इनि। १तुल्यरूपे येन सह द्वन्द्वं युद्धं क्रियते २तस्मिंश्च।

प्रतिधर्त्तृ त्रि॰ प्रति+धृ-तृच्। निराकारके यजु॰१५।१॰वेददी॰

प्रतिधा स्त्री प्रति+धा-भावे किप्। प्रतिविधाने भावे क्युट्। प्रतिधान निराकरणे न॰।

प्रतिधि पु॰ पु॰ प्रतिसृत्यं धीयते प्रति-धा कर्मणि कि। प्रातःसवनान्ते पात्रे १स्तोत्रभेदे ताण्ड्य॰ब्रा॰ भा॰। २दैवातिथ्यगृहतक्षणे क॰ १८।८५।८ भा॰। ३यज्ञे यजु॰ ६८ वेददी॰। [आयजाने यज्ञे प्रतिग्रहे हेम॰।

प्रतिध्वनि पु॰ प्रतिरूपोध्वनिः प्रा॰ स॰। शब्दानुसारेण

प्रतिध्वान पु॰ प्रति+ध्वन-घञ्। प्रतिशब्दे अमरः।

प्रतिनन्दन न॰ प्रति+नन्द्-भावे ल्युट्। आशीर्वादादिना सम्भावने। [हेम॰।

प्रतिनप्तृ पु॰ प्रतिनिप्तो नप्ता पौत्रः प्रा॰स॰। प्रपौत्रे

प्रतिनव त्रि॰प्रतिगतो नवं नूतनत्वम् अत्या॰स॰। नूतने जटा॰

प्रतिनाद पु॰ प्रतिरूपो नादः प्रा॰स॰। प्रतिध्वनौ

प्रतिनायक पु॰ प्रतिकूलो नायकः प्रा॰स॰। वीररसादौ प्रतिकूले नायके नायकस्य यं प्रति कोपादि तच्छिन् "धीरोद्धतः पापकरी व्यसनी प्रतिनायकः" सा॰द॰। यथा रामस्य रावण इत्यादि।

प्रतिनिधि पु॰ प्रतिरूपं निधीयते तुल्यरूपतया स्थाप्यते प्रति+नि+धा-कि। १प्रतिरूपे तुल्यरूपे अमरः। वैदिककर्माङ्गद्रव्यादीनां मुख्यानामभावे २तुल्यरूपतयान्यस्मिन् निधीयमाने। कुत्र प्रतिनिधिर्भवति कुत्र वा न भवति तत्सर्वं विशेषसहितं कात्या॰श्रौ॰१।३ कल्पिकायां व्यवस्थापितं तत्र संक्षिप्तमार्षत्वेन कात्यायनशब्दे १८६५ पृष्ठादौ दर्शितः। तदनुसारेण स्मार्त्तादिकर्म्मतद्व्यवस्था प्रदर्श्यते तत्र एकादशीतत्त्वे ब्रह्म यथा स्कन्दपुराणम् "पुत्रस्तु विनियोक्तेतं भगिनीं भ्रातरन्यथा। एवमभाव एवान्यं ब्राह्मणं विनियोजयेत्"। नरसिंहपुराणम् "भार्यां भर्त्रा व्रतं कुर्याद्भार्यायाश्च पतिस्तथा। असामर्थ्ये द्वयोस्ताभ्यां व्रतभङ्गो न जायते"। वराहपुराणे "पितृमातृपतिभ्रातृसुतपत्नीर्दिमूढ्जाम्। अदत्तार्क्षमुपोषित्वा सकलस्य फलम् भवेत्"। अत्रैव विष्णवे कात्यायनः "इच्छया नात्र कर्त्तव्या शुक्लपक्षे विधिता च सा" नतु प्रतिनिधौ समेऽपि धर्मे इत्यादिमन्त्रस्यफलं कुत्रान्वेतु इति चेत् प्रधान एव। तथाच शारीरकभाष्ये श्रुतिः "यां वै कञ्चन यज्ञं ब्राह्मणमाशासते यजमानायैव तामाशासते इति क्षोवाच इति। ब्राह्मण इत्यत्र यजमानोऽत्रत्य यजमानस्येति पाठः। शरत्कायां स्मृतं "यां वै कञ्चन ऋत्विगाशिषमाशास्ते सा यजमानस्यैवेति"। अत्र ऋत्विग्यजमानपदे प्रतिनिधिप्रधानपरे आकाङ्क्षितत्वात्। अतएव प्रतिनिधिपुत्रादिना "आयान्तु नः पितरः" इत्यादिरनूह एव पठ्यते वाक्यस्य कालनिकत्वात्र तथेति। कालमाधवीये "काम्ये प्रतिनिधिर्नोक्तो नित्ये नैमित्तिके हि सः। काम्येष्वुपक्रमाद्दुष्टं मध्ये प्रतिनिधिं विदुः" यथा नित्यं नैमित्तिकञ्च प्रतिनिधिनाप्युपक्रम्य कारयेत् काम्ये तु स्वसामर्थ्यं परीक्ष्य स्वयमेवोपक्रम्य कुर्य्यात्। असामर्थ्ये उपक्रमादुर्द्धं प्रतिनिधिनापि कारयेत्। एतच्च श्रौतकाम्यपरं स्मार्त्तकाम्यन्तु अन्यद्वारान्युपक्रम्य कार्यम्। तथा च पराशरभाष्ये शातातपः "श्रौतं कर्म स्वयं कुर्यादन्योऽपि स्मार्त्तमाचरेत्। अशक्तौ श्रौतमप्यन्यः कुर्यादाचारमेनतः"। अनेन उपक्रमात् परतः। एतच्च काम्येऽपि प्रतिनिधिविधायकं नैमित्तिकमात्रपरत्वे श्रौतस्मार्त्तभेदोपादानं व्यर्थं स्यात् तयोरविशेषादेव प्रतिनिधिलाभात्। अत एव भारतपाठादौ तथा समाचारः। कृत्यसारे "नाभावस्य प्रतिनिधिरभावान्तरमिष्यते"। सज्ञानीयत्वेऽप्यभावान्तरमभावस्य प्रतिनिधिर्नेष्यते। भावस्तु कदाचिद्दयोपवासादौ ब्राह्मणभोजनादीति। "नापि प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित्। श्रोत्रियागममोक्षं यद्दुष्टं हि तदशेषतः। स्मार्त्तं प्रतिनिधित्वेन होमकार्यं न कुत्रचित्। दुष्टं वैकल्पिकं विद्धि यत्र सद्दुल्लिखितं भवेत्। तदभावे सदग्र्याद्यं न तु वैकल्पिकान्तरम्। उपात्ते तु प्रतिनिधौ मुख्यार्थो लभ्यते यदि। तत्र मुख्यमनादृत्य गौणेनैव समाप्यते। संस्काराङ्गमयोर्योऽपि मुख्य एव हि लभ्यते। न तु संस्कारयोर्योऽन्यो मुख्यते प्रतिरूपकः। मुख्ये कार्यासमर्थे तु मुख्येऽप्येतस्य नादरः। प्रतिरूपकमादाय यत्नमेवोपजायते। कार्यैरूपैस्तथा पत्रैः शोरैः पुष्पैस्तथा फलैः। गन्धै रसैः सदग्र्याद्यं पूर्वाभावे परं परम्। प्राप्याप्राप्तौ भवेद्दूर्व्याप्रभृतीनामरण्यजम्। अलाभे तु गोधूमाद्यैश्च रेणुयवादयः। क्वचिन्मूले गोदंतं प्राह्यं तदभावेऽपि माहिषम्। प्राह्यं वा तदभावे तु साक्षात्तैलं प्रयुज्यते। तैलाभावे घृतीकृत्यं तैलजं तिलसम्भवम्"। तैलजं तैलवृक्षं तिलसम्भवम् तिलपिष्टादि। "तदभावे तु सर्वेषां कौशुम्भं सर्वयोग्यकम्। इच्छेदिच्छया प्राह्यः पूर्वाभावे

वरः परः। तदभावे गवादीनां क्रमात् क्षीरं विधीयते। तदभावे दधि याज्ञमलाभे तिल दृश्यते। यत्र सख्यं दधि क्षीरं तत्रापि तदलाभतः। अजादेः क्षीरदध्यादि तदभावेऽपि मोक्षतम्। सख्याक्षोऽथ वा याज्ञः कार्य्यकारणसन्ततौ"। अत एव हतामावे पूर्वं दधि ततः पयः। तथा "सर्वत्र गौणकालेषु कर्मचोदितमाचरेत्। प्रायश्चित्तं व्याहृतिभिर्हुत्वा कर्म समाचरेत्"। अतएव छन्दोगपरिशिष्टे "हतं न लभ्यते यत्र शुष्कक्षीरेण होमयेत्। क्षीरस्य च दधि क्षेयं मधुनश्च गुडो भवेत्"। आयुर्वेदेऽपि "मधु यत्र न लभ्येत तत्र क्षीरं गुडो भवेत्"। काष्ठमूलपर्णपुष्पफलप्ररोहरसगन्धादीनां सादृश्येन प्रतिनिधिं कुर्यात्। सर्वाभावे यवप्रतिनिधिर्भवतीति" काण्डं नालं प्ररोहोऽङ्कुरः। सर्वाभावे यव इति कल्पतरुः अयवः इति नारायणोपाध्यायः। शान्तिदीपिकायां नारदीयपचरात्रम् "अभावे चैव धातूनां हरितालं विधीयते। बीजानामप्यभावे तु यव एकः प्रशस्यते। ओषधीनामभावे तु सक्तूदेवी प्रशस्यते। रत्नानामप्यभावे तु सक्ताफलमनुत्तमम्। क्षौद्रानामप्यभावे तु क्षेममात्रं प्रकल्पयेत्"। क्षौद्रानं तैजसपात्राणाम्। न्यायप्राप्तप्रतिनिधिमधिकृत्य जैमिनिः "न देवताग्निशब्दक्रियाणामिति"। अस्यार्थः देवताया अग्नेश्च याज्ञवल्क्यादेः शब्दस्य मन्त्रस्य क्रियायाश्च प्रयाजाद्यङ्गार्थकर्मणश्चाङ्गमात्रार्थकत्वेनाराद्गुपकारकत्वान्न प्रतिनिधिः, क्षौद्रादीनान्तु सन्निपत्योपकारकाणां घृतोङ्गसाधनं दृष्टमेव प्रयोजनमिति तत्र प्रतिनिधिरुचित इत्युक्तम्। परिशिष्टम् "सख्यकाले तु सख्यक्षेत्र साधनं नैव लभ्यते। तत्कालद्रव्ययोः कस्य गौणता सख्यतापि वा"। तत्र भरद्वाजः "सख्यकालसधाश्रित्य गौणमप्यस्तु साधनम्। न सख्यद्रव्यलाभेन गौणकालप्रतीक्षणम्। गौणेषु तेषु कालेषु कर्म चोदितमारभेत्। प्रायश्चित्तप्रकरणोक्तां निष्कृतिमाचरेत्"। उत्तरमतं सिद्धान्तमिति केचित्। तदभिप्रायकं मीमांसाषष्ठाध्यायप्रकरणम्। "पौर्वापर्येऽपि पूर्वदौर्बल्यं प्रकृतिवदिति"। ज्योतिष्टोमेऽन्योन्यं सम्बध्य यज्ञशालातो बहिर्निर्गच्छता ऋत्विजां विच्छेदनिमित्तं प्रायश्चित्तं श्रूयते यद्युद्गाता विच्छिन्द्याद्दक्षिणेन यजेत यदि प्रतिहर्त्ता सर्वस्वदक्षिणेनेति"। तत्र उद्गातृप्रतिहोतोःक्रमेण विच्छेदे विरुद्धप्रायश्चित्तयोः सङ्कटयाजस्त्वात्। किं पूर्वं कार्य्यम् उत वा परमिति संशये हि अनुपजातविरोधात् पूर्वमिति पूर्वपक्षे राद्धान्तः पौर्वापर्ये सति निमित्तयोः पूर्वस्यैव निमित्तस्य दौर्बल्यम्। उत्तरस्य पूर्वनिरपेक्षस्य तद्बाधकतया उदितत्वात् पूर्वोदयकाले उत्तरस्याप्राप्तत्वेन पूर्वेण बाध्यत्वायोगात्। उक्तं हि "पूर्वं परमजातत्वादबाधित्वैव जायते। परस्यानन्तर्योत्पादादुत्तरबाधेन सम्भवः" इति प्रकृतिवदिति यथा हि प्रकृतौ क्रत्वपकारारः कृशः प्रथममतिदेशेन विहितावुपकाराकाङ्क्षिणौ प्राप्तः कस्यचोपकारतया चरमभाविभिरपि चरैर्निरपेक्षैर्बाध्यते तद्वदिति। अत एव शारीरकभाष्यटीकायां वाचस्पतिमिश्राः "ज्येष्ठत्वज्ञानापेक्षितस्य बाध्यत्वे हेतुर्न बाधकत्वे रजतज्ञानस्य ज्यायसः शुक्तिज्ञानेन कनीयसा बाधदर्शनात् तदनपबाधने तद्बाधाक्षमत्वोत्पत्तेरनुत्पत्तेः तथाच "पूर्वापरबलीयस्त्वं तत्र नाम प्रतीयताम्। अन्योन्यनिरपेक्षाणां यत्र जन्मधियां भवेत्" इति। यदि च पूर्ववचनस्य पूर्वपक्षत्वे वैयर्थ्यं स्यात् अत उभयवचनार्थौ विवक्षणीयौ तदा विषयभेदेन व्यवस्थापनीयौ। तथाहि यत्राष्टकाश्राद्धादौ कालान्तराभावस्तत्र तत्कालानुरोधादिहितद्रव्यलाभेऽपि प्रतिनिहितद्रव्यमादाय सख्यकाल एव तत्करणं न तु वचनानुपात्तस्वेच्छाकल्पगौणकालप्रतीक्षणम्। तथाच छन्दोगपरिशिष्टम् "स्थालीपाकं पशुस्नाने कुर्याद्यद्यानुकल्पिकम्। अपवेत्तं सवत्सायास्तरुणायोः पयस्तनु" इत्यादि। यत्राब्दिकश्राद्धादौ क्षणैकादश्यादिगौणकालोऽस्ति तत्र सतिलादावश्राद्धाभावे तदनुरोधेन उपवासादिरूपं प्रायश्चित्तं कृत्वा गौणकाले तत् कर्त्तव्यम्। तथाच बभ्रुहारीतः "एकोद्दिष्टन्तु कर्त्तव्यं पार्वणेन सदा स्वयम्। अभावे याज्यपात्राणां तदहः सदुपोषणम्"। तथाच छन्दोगपरिशिष्टम् "संस्कारा अतिपत्त्येरन् स्वकालाद्येत कथञ्चन। कृत्वैतदेव कुर्वीत ये द्रुपनयनादधः"। यत्र तु विनिगमकवचनाभावस्तत्र यद्यपि क्रियायाः प्राधान्यात् कालो द्रव्यं इयमपि गुणभूतमेव तथाप्युभयोपसंहारासामर्थ्यं द्रव्यादेः कालस्य च क्रियादिक्रियावटितस्य कर्मधीनत्वाभावादर्जनीयत्वसिद्धिः सन्निधिकत्वान्निमित्तत्वमात्रेण बहिरङ्गत्वात्। कालस्य निमित्तत्वं व्यक्तं भविष्ये "अतः कालं प्रवक्ष्यामि निमित्तं कर्मणामिह"। द्रव्यस्य तु यागस्वरूपनिर्वाहकत्वेनाभ्यर्हितत्वात् कर्मणः कारकत्वेनान्तरङ्गत्वाच्च। दध्यादि-

प्रतिनिध्यभावे तु ब्रह्मवैवर्त्तः "उपवासासमर्थश्चेदेकं विप्रन्तु भोजयेत्। तावद्धनानि वा दद्याद् यद्भक्ताद्द्विगुणं भवेत्। सङ्कल्पसम्मितां देवीं जपेद्वा प्राणसंयमान्। कृच्छ्रादुद्दादशसंख्याकान् यथाशक्ति व्रते नरः"। देवीं गायत्रीम्। अत्र चान्द्रायणादौ परिसंख्या। काश्यपपुराणे "मज्जने मद्दाने मत्पार्श्वपरिवर्त्तने। ऋतमूलजलाहारी हृदि शल्यं समर्पयेत्। अत्र यो दीक्षितः कश्चिद्वैष्णवो भक्तितत्परः। निर्निमित्तमदीक्षायां न च चान्द्रायणोद्यतः। अन्नं वा यदि भुञ्जीत मूलं ऋतमथापि वा। अपराधसहस्रं तस्य न क्षमामि न कश्यप!। क्षिपामि नरके घोरे कृच्छ्रलक्षं मम जायते"। निमित्तं प्रारब्धचान्द्रायणादिव्रतविरोध इत्यादि, दीक्षायां चरुश्रपणस्य विहितत्वाददीक्षायामित्युक्तम्। चान्द्रायणेन पीडितः सर्वमेतत्प्रदर्शनमात्रं शल्यो निर्विरोध इत्यर्थः। अन्नादिकमप्युपलक्षणमिति जीमूतवाहनः। अत्र निमित्तं प्रारब्धचान्द्रायणादीति यदुक्तं तत्र चान्द्रायणादौ भोजनस्यावश्यकत्वाभावात् किन्तु निमित्तं रविवाराद्युपवासपारणं जपणानरूपं दीक्षायामपि चरुश्रपणं प्राप्तरूपम् अन्यथा "पुरोडाशोऽपि होमो वा संप्राप्ते हरिवासरे। अभक्ष्येव समः प्रोक्तः किं पुनश्चपणक्रिया" इति नारदीयं विरुध्येत। तद्भोजनस्य भोजनरूपतामाह कालादर्शे श्रुतिः "पित्रभावे तथैवं तच्चैवं प्राशितं भवति" इति पित्रनुपलक्षणम् आकाङ्क्षाया अवशिष्टत्वात्। तेनैकादश्यां तदुभयोर्जलपारणं चरुश्रपणाभ्यां कृत्वा उपवासः कार्यः"।

आरब्धकार्त्तिकादिस्नाने तु व्याधादिनाऽसामर्थ्ये पुत्रादिभिः प्रतिनिधिना कारयितव्यं नानुकल्पविधिना नित्यस्नान एव तद्विधानादिति" इति मल०तत्त्व स्वयं करणाऽसामर्थ्ये अन्यद्वारा कारयितव्यं यथा दक्षः "स्वयं होमे फलं यच्च तदन्येन न जायते। ऋत्विक् पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः। एभिरेव हुतं यत्तु तद्धुतं स्वयमेव हि" विट्पतिर्जामाता। एवञ्च ऋत्विगादीतरत्र फलन्यूनता। अत्राशौचाशङ्कया बोधनदिनात् पूर्वं शुचितत्कालजीवित्वरूपाधिकाराभावेऽपि यद्वरणादिकं क्रियते तत्कर्मकाले तस्य नारदोक्तफलसंपत्तेनवत् प्रवर्त्तनाय न तु तदानीं प्रतिनिधीयते अथ वा "निःचिह्नाम्नि खदारेषु परिकल्पयेत्तिलं जलम्। प्रवसेत् कार्यवान् विप्रो दक्षैव न चिरं वसेत्" इति छन्दोगपरिशिष्टवदत्रापि प्रतिनिधीयते एवं वरणं विनापि क्वचिद्यदि ऋत्विक् प्रवर्त्तते तथापि तत्कर्मसिद्धिः। दक्षिणा च तत्रैव शुक्लिकाले दातव्येति तथा च नारदः "ऋत्विक् च त्रिविधो दृष्टः पूर्वैर्जुष्टः स्वयं कृतः। यदृच्छया वा यः कुर्यादार्त्विज्यं प्रीतिपूर्वकम्" यदृच्छया स्वेच्छया" ति०त०। परार्थस्नाने स्वयमशक्तौ कुशमयप्रतिमूर्त्तिस्नानेऽपि फलविशेषः प्रा०त० उक्तो यथा "प्रतिकृतिं कुशमयीं कृत्वा तीर्थवारिषु मज्जयेत्। यस्मिन्नि निमज्जेत षोडशभागं फलं लभेत्। मातरं पितरं वापि भ्रातरं वृद्धं गुरुम्। यस्मिन्नि निमज्जेत द्वादशांशं फलं लभेत्"। "अप्रवेष्यैव कर्त्तव्यः पुत्रप्रतिनिधिः सदा। पिण्डोदकक्रियाहेतोर्यस्मात्तस्मात् प्रयत्नतः" दत्तकमी०।

प्रतिनियम पु० प्रत्येकं नियमः। १एकमेकं प्रति नियमे २व्यवस्थायाम् "प्रतिनियमाद्युगपत्पुरुषेच पुरुषबहुत्वं सिद्धम्" सा० का०।

प्रतिनिर्देश त्रि० प्रति+निर्-दिश-कर्मणि घञ्। पूर्वमनिर्दिष्टस्य पुनर्निर्देशान्तरविधानार्थे" क्षुत्तृषितार्थप्रतिपादनार्थे च निर्देशविषये यथा "उदेति सविता ताम्रस्ताम्र एवास्तमेति च" अत्र ताम्रतयोदितस्य पुनस्ताम्रगुणविशिष्टतयास्तत्वकीर्त्तनाय पुनर्निर्देशः। तत्र च कथित पदता न काव्यदोषः तदुक्तं काव्यप्रकाशे

"उद्देश्यप्रतिनिर्देश्यव्यतिरिक्तो विषय एकपदप्रयोग निषेधश्च, तद्धिते विषये प्रत्युत तस्यैव पदस्य सर्वनाम्नो वा प्रयोगं विना दोषः। तथा हि "उदेति सविता ताम्रस्ताम्र एवास्तमेति च। सम्पत्तौ च विपत्तौ च महतामेकरूपता"। अत्र रक्त एवास्तमेतीति यदि क्रियते तदा पदान्तरप्रतिपादितः स एवार्थोऽर्थान्तरतयेव प्रतिभासमानः प्रतीतिं स्खलयति"। "तद्धतीति उद्देश्य प्रतिनिर्देश्यत्वयतीत्यर्थः दोष इति व्यापाततोऽर्थान्तरतावभासरूप इत्यर्थः। अयं भावः "न सोऽस्ति प्रत्ययो लोके यत्र शब्दो न भासते" इति नियमाच्छब्देनोपस्थाप्यमानोऽर्थः शब्दविशिष्ट एव भासते अतः शब्दभेदेनोपादाने तच्छब्दविशिष्टेऽर्थे भासमाने विभिन्नशब्दरूपविशेषणभेदाद्भेदावभास इति। सर्वनाम्नापि पूर्वोपात्तशब्दविशिष्टभासनाद्भेदावभास इत्याह सर्वनाम्नोवेति" नागेशः।

प्रतिनिवर्त्तन न० प्रति+निर्-वृत-भावे ल्युट्। १स्वभीष्टवस्तुतः निवृत्तौ णिच्-ल्युट्। २निवारणे

प्रतिन्याय अव्य० प्रति+नि+अय ड-वा यञ्। न्यायो

बुद्धिभेदो वा अनुक्रमे अनतिक्रमे वा अव्ययी० वा। १यथागतं प्रत्यागमने "पुनः प्रतिन्यायं यथा योन्या इवति" छ०उ० "प्रतिन्यायम् यथागतम् नि+आयो न्यायः। अयनमायो निगमनं पुनः पूर्वगमनवैपरीत्येन यदागमनं स प्रतिन्यायः यथागतं पुनरागच्छतीत्यर्थः" भाष्यम्। २युक्तिमनतिक्रम्येत्यर्थे च।

प्रति(ती)प पु० प्रति–पाति+पा–क वा दीर्घ। यान्नहुराज पितरि भा०आ० ९३अ०। दुरभध्यः मल्लरात्रा०।

प्रतिपक्ष पु० प्रतिकूलः पक्षः प्रा०स०। १विरुद्धपक्षे "विरुद्धं पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः" गौत०सू०। निर्णयशब्दे ४५९१ पृ० अस्यार्थो दृश्यः। प्रतिकूलः पक्षो यस्य प्रा०ब०। २शत्रौ ३सदृशे च त्रि०। ४व्यवहारे प्रतिवादिनि विपक्षे च।

प्रतिपक्षित पु० प्रतिपक्षो जातोऽस्य तारका० इतच्। १सत्प्रतिपक्षरूपदोषयुक्ते हेतौ हेत्वाभासभेदे "अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः। कालात्ययापदिष्टश्च हेत्वाभासाश्च पञ्चधा" भाषा०। "सत्प्रतिपक्षे तु प्रतिहेतुः साध्याभावसाधकः। यत्र तु हेतुरेवेति विशेषः। साध्याभावसाधक एव साध्यासाधकत्वं न तूपन्यस्त दत्यशक्तिविशेषोपस्थापकत्वात् विशेषः। सत्प्रतिपक्षः साध्याभावव्याप्यवान् पक्षः। अन्यद्दोषाप्रामाण्यकतया साध्यव्याप्यत्वेनोपस्थितिकालीनावाः साध्याभावव्याप्यत्वेनोपस्थितेर्विवक्षितत्वात् दत्यन्ये। यत्र च परस्परसाभावव्याप्यवत्ताज्ञानात् परस्परानुमितिप्रतिबन्धः फलम्। यत्र केचित् यथा घटाभावव्याप्यवत्ताज्ञाने विद्यमानेऽपि घटचक्षुःसंयोगे सति घटवत्ताज्ञानं जायते। यथा च कल्पि पीतत्वाभावव्याप्यशुक्लवत्ताज्ञाने पित्तादिदोषेण पीतः शङ्ख इति धीर्जायते एवं कोटिद्वयव्याप्यवत्तादर्शने कोटिद्वयप्रत्यक्षरूपः संशयो भवति तथा सत्प्रतिपक्षस्थले संशयरूपानुमितिर्भवत्येव यत्र चैककोटिव्याप्यदर्शनं तत्राधिक्यवत्तया द्वितीयकोटिभानप्रतिबन्धात् संशयः फलत्वेन चाधिकसमयत्वभावः कल्प्यते इति वदन्ति। तन्न तदभावव्याप्यवत्ताज्ञाने सति तदुपनीतभावविशेषशब्दबोधादेरनुदयात् लौकिकसन्निकर्षजन्यदोषविशेषाजन्यत्वज्ञानमात्रे तस्य प्रतिबन्धकता लाघवात्। न तूपनीतभावविशेषे शाब्दबोधे च पृथक् प्रतिबन्धकता गौरवात्। तथा च प्रतिबन्धकत्वात् कथमनुमितिः। न हि लौकिकसन्निकर्षस्थले प्रत्यक्षमिव सत्प्रतिपक्षस्थले संशयानुमितिः प्रामाणिकी येनानुमितिभिन्नत्वेनापि विशेषणीयम् यत्र कोटिद्वयव्याप्यवत्ताज्ञानं तत्रोभयत्र प्रामाण्यग्रहात् संशयो नान्यथाऽन्यदोषाप्रामाण्यस्यैव विरोधित्वात्तस्य प्रतिबन्धकत्वादिति" कि०मु०।

प्रतिपण पु० प्रतिरूपः पणः प्रा०स०। १तुल्यरूपे पणे मूल्ये अम० २।१५।३।

प्रतिपत्ति स्त्री प्रति+पद–क्तिन्। १प्रवृत्तौ २प्राप्तौ ३गौरवे ४प्राप्तौ ५पदप्राप्तौ ६कर्त्तव्यतायाञ्च मेदि०। "विवादलुप्तप्रतिपत्तिविक्लिवम्" इति रघुः। मीमांसकमते ७फलशून्यकर्मोद्भवे यथा श्राद्धादौ दत्तद्रव्यस्य कृपणब्राह्मणपक्षे जलादौ निक्षेपः। पूजितप्रतिमादेव जलादौ निक्षेपः। दत्त्वापनमात्रे च काला०श्रौत०

प्रतिपत्तिपटह पु० वाद्यभेदे (नागरा) ढक्कारा०।

प्रतिपत्तुर्य न० द्रुमडवाद्ये (दगडकाडा) त्रिका०।

प्रतिपत्रफला स्त्री प्रतिपत्रं फलं यस्याः। क्षुद्रकारवेल्ले (छोटपल्ले) राजनि०।

प्रतिपद् स्त्री प्रतिपद्यते उपक्रम्यते पक्षोमासो वाऽनया प्रति+पद–करणे क्विप्। पक्षयोः प्रथमायां १तिथौ तिथिशब्दे तत्स्वरूपं ३२८१पृ० दर्शितं कर्मभेदे तत्कालव्यवस्था च ३२८३ पृ० दर्शिता। २द्रुमडवाद्ये त्रिका०। भावे क्विप्। ३दाने ४उपक्रमे कालमा० तच्छब्दोपक्रमार्थत्वञ्च यथा

"तत्र प्रतिपच्छब्द उपक्रमे वर्त्तते। चान्द्रः पक्षो मासो वा प्रतिपद्यते प्रारभ्यते यस्यां तिथौ सा तिथिः प्रतिपत्। प्रारम्भवाचित्वं प्रतिपच्छब्दस्य बह्वृचब्राह्मणानुवाक सूक्तेषु प्रयोगादवगम्यते तथा च श्रुतिः "आत्मारथं यथोतय इदं वसोस्तमच्छ इति मरुत्वतीयस्य प्रतिपदनुचरावितिं"। अयमर्थः मरुत्वतीयं नाम किञ्चिदुक्थम्। तस्यात्मारथमित्यादं मन्त्रः प्रतिपत् प्रथमं पाठ्यः। इदं वसोस्तमच्छ इत्यं मन्त्रोत्तरः पश्चात् पाठ्य इति। तथा तैत्तिरीया आश्वमेधब्राह्मणे आमनन्ति। "एवस्व वाजसातय इत्यनुष्टुप् प्रतिपद्भवतीति" तथा त एव दर्शपूर्णमासब्राह्मणे पठन्ति "सामिधेनीरनुवक्ष्यन्ते ताभ्याहुतीः जुहोत्याद्ध्यात् मरुत्वँ इति प्रतिपदं कुरुतः" इति।

तच्चौ वक्ष्यमेव यथोक्तं वराहपु०

"देवानामथ यज्ञानां गन्धर्वाणाञ्च सत्तम!। आदौ प्रतिपदो येन त्वमुत्पन्नोऽसि पावक!। तत्प्रदात् प्रातिपादिकं

संभविष्यन्ति देवताः। यतस्ते प्रतिपद्याम तिथिरेषा भविष्यति"। ४वह्निध्यमानस्तोत्रस्य प्रथमस्तुतौ ताण्ड्य०ब्रा० ४।२।१५ यथा "कवन्ने वाजसातये सोमाः बहवः पवस्व इति बहवत्यो प्रतिपदृक्षाः"। "प्रतिपद्यते प्रक्रम्यते वह्निध्यमानस्तोत्रे एषा प्रतिपत् सा बहवत्यो बहवशब्दोमेता एषा ऋचो" भा०। या टाप् तत्रार्थे

प्रतिपन्न त्रि० प्रति+पद्-क्त। १अवगते ऽवगतः २स्वीकृते मेदि० "प्रतिपन्नं हि विद्वेतनैरपि" कुमारः। ३विक्रान्ते च हेमच० आचिता० अस्य गतिपूर्वकत्वेऽपि नान्तोदात्तता। [राजनि०।

प्रतिपर्णशिफा स्त्री प्रतिपर्णं शिफाऽस्याः। द्रवन्तीवृक्षे

प्रतिपाद्य पु० प्रति+पद्-णिच्-यत्। प्रतिरूपदेशने

प्रतिपादक त्रि० प्रति+पद्-णिच्-ण्वुल्। बोधके।

प्रतिपादन न० प्रति+पद्-णिच्-भावे ल्युट्। १दाने २बोधने ३प्रतिपत्तौ च मेदि०।

प्रतिपाद्य त्रि० प्रति+पद्-णिच् कर्मणि यत्। बोधनीये

प्रतिपूजन न० प्रतिरूपं पूजनं प्रा०स०। केनचित् पूजने कृते तदनुरूपे तेन पूजकस्य १पूजने २अभिमुखत्वेन पूजने च।

प्रतिप्रदान न० प्रति+प्र+दा-भावे ल्युट्। १प्रतिदाने २प्रत्यर्पणे च।

प्रतिप्रसव पु० प्रति+प्र+सू-अप्। १निषिद्धस्य पुनःप्राप्तिस्वीकारायाम्। साकल्येऽव्ययी०। २प्रसवसाकल्ये प्रतिजन्मनीत्यर्थे। [भेदे कर्मधारयशब्दे ८५१०द्वयम्।

प्रतिप्रस्थाता पु० प्रति+प्र+स्था-तृच्। सोमयागीये ऋत्विग्-

प्रतिप्रस्थान न० प्रतिकूलं प्रस्थानम् प्रा०स०। १विरुद्धपक्षाश्रये प्रतिकूलं प्रस्थानं यस्य प्रा०ब०। २तद्वति त्रि० ३निषाक्षे यजु०१८। १६ वेददी०।

प्रतिप्रहार पु० प्रतिरूपः प्रहारः प्रा०स०। १कृतप्रहारानुरूपप्रहारे २प्रतिघातभेदे च।

प्रतिप्रेष पु०प्रतिरूपः प्रेषः प्रा०स०। नियोजितेन नियोक्तारं प्रति पुनःप्रेषणे कात्या० २५।१०।२ कर्कः।

प्रतिफल त्रि० प्रतिफलति प्रति+फल-अच्। १प्रतिबिम्बे तेन यत्कर्म कृतं २तत्तादृरूपप्रतीकारे। साकल्ये अव्ययी०। ३फलसाकल्ये अव्य०।

प्रतिफलन न०प्रति+फल-भावे ल्युट्। प्रतिबिम्बने दर्पणे

प्रतिफुल्लक त्रि० प्रति+फुल्ल-विकाशे स्वुल्। प्रफुल्ले शब्दच०

प्रतिबद्ध त्रि०प्रति+बन्ध-कर्मणि क्त। १प्रतिरुद्धे २साकल्येन सम्बन्धे व्याप्ते च प्रतिबन्धशब्दे द्वयम्।

प्रतिबन्ध पु०प्रति+बन्ध-भावे घञ्। १प्रतिरोधे २साकल्येन सम्बन्धे व्याप्तौ च "प्रतिबन्धदृढः प्रतिबद्धज्ञानमनुमानम्" सा०सू० "प्रतिबन्धो व्याप्तिर्व्याप्तिप्रदर्शनादनुव्यापकज्ञानमनुमानम्" प्र०भा०।

प्रतिबन्धक त्रि० प्रतिबध्नाति प्रति+बन्ध+ण्वुल्। १प्रतिरोधके। स्त्रियां टाप् क्वापि यत इत्वम्। "बलवद्विहितहेत्वभावः स्यात् प्रतिबन्धिका" भाषा०। २विघ्ने शब्दच० प्रतिबन्धकत्वञ्च कारणीभूताभावप्रतियोगित्वम् तच्च मणाद्यभावत्वेन न तु प्रतिबन्धकाभावत्वेनेति नान्योन्याश्रयः। एवं प्रतिबन्धकाभावकूट एव कारणं तेन मणिसद्भावे मणाद्यभावेऽपि न कार्यमिति" वस्तुमा० चि०व्यतिरिक्तयक्तिनिरासे। तच्च पञ्चधा भवति यथा तदज्ञानवृत्तिं प्रति तदभाववत्तानिश्चयत्वेन प्रतिबन्धकत्वम्१। तदभावव्याप्यवत्तानिश्चयत्वेन२ तदभावावच्छेदकतया गृहीतधर्मवत्तानिश्चयत्वेन३। तदसमानाधिकरणधर्मवत्तानिश्चयत्वेन४। तदव्यापकतावच्छेदकतया गृहीतधर्मावच्छिन्नाभाववत्तानिश्चयत्वेन५ चेति। तत्राद्यं यथा ह्रदो वह्निमानिति बुद्धिं प्रति ह्रदो न वह्निमानिति निश्चयस्य प्रतिबन्धकत्वम्। द्वितीयं ह्रदो वह्न्यभावव्याप्यवानिति निश्चयस्य। तृतीयं जलवान्वह्न्यभाववानिति निश्चयविशिष्टस्य जलवान् ह्रदः इति निश्चयस्य। चतुर्थं वह्न्यसमानाधिकरणजलवान् ह्रद इति निश्चयस्य। पञ्चमं ह्रदो धूमवानिति बुद्धिं प्रति धूमव्याप्यवत्तावच्छेदकतया गृहीतं यद्वह्नित्वं तादृशवह्नित्वावच्छिन्नाभाववान् ह्रद इति निश्चयस्येति। कार्यमात्रं प्रति तु कारणीजिज्ञासाया स्वातन्त्र्येण प्रतिबन्धकत्वम्। क्वचित् मणिजन्मादिस्थाने प्रतिबन्धकत्वम् यथा दाहं प्रति मणेः प्रतिबन्धकत्वम् इति।

प्रतिबन्धि(न्धी) प्रति+बन्ध-इनि वा ङीप्। प्रकृतैककार्ये प्रवृत्तं पुरुषमुद्दिश्याप्रकृतकार्यान्तरापादने प्रतिबन्दिभूतेऽनिष्टान्तरप्रसञ्जकवाक्ये तत्रार्थे प्रतिबन्दीशब्दोऽपि तत्रूलं सभ्यम्। [वादौ भा० स० १२०अ०।

प्रतिबन्धु पु० प्रतिरूपो बन्धुः प्रा०स०। बन्धुतुल्ये दोषि-

प्रतिबल पु०प्रतिकूलं बलं यस्य। १शत्रौ "प्रतिबलजयैरिति" वेणी०। प्रतिरूपं बलं यस्य। २तुल्यबले त्रि० "दो मे प्रतिबलो लोके" इति भट्टौ। प्रतिगतं बलम् प्रा०स०। ३सामर्थ्ये न० त्रिका०।

प्रतिबाहु पु० प्रतिगतो बाहुम् अत्या०स०। बाहोरग्रे ह०सं०

५८।२५ श्वफल्कस्य २सुतभेदे यजु० रभातरि भाग०९।२४।९

प्रतिबुद्ध त्रि० प्रति+बुध-कर्त्तरि क्त। १जागरिते। कर्मणि क्त। २ज्ञाते च।

प्रतिबोध पु० प्रति+बुध-भावे घञ्। १जागरणे २ज्ञाने च कर्त्तरि क्च्। ३जागरिते ४ज्ञानिनि च त्रि०। तस्यापत्यम् विदा०अञ्। प्रातिबोध तदपत्ये यूनि तु फक्। प्रातिबोधायन तदीये युन्यपत्ये पुंस्त्री०।

प्रतिबोधिन् त्रि० प्रति+बुध-भविष्यति णिनि। भाविप्रतिबोधयुते गम्यादि० द्वितीयात०। मासप्रतिबोधी

प्रतिभट पु० प्रतिकूलो भटः प्रा० स०। प्रतियोधे येन सह युध्यते तस्मिन्।

प्रतिभय त्रि० प्रतिगतं भयमस्मात् निरा०स०। १भयहेतौ भयङ्करे अमरः। प्रतिगतं भयम् प्रा०स०। २भये न०।

प्रतिभा स्त्री प्रति+भा-भावे अङ्। १बुद्धौ २प्रत्युत्पन्नबुद्धौ च हेम० "प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता" रुद्रः २दीप्तौ च। [प्रदीप्तियुते च।

प्रतिभात त्रि० प्रति+भा-कर्त्तरि क्त। १ज्ञानेभासमाने

प्रतिभान्वित त्रि० इत०। प्रतिभायुक्ते प्रगल्भे अमरः।

प्रतिभामुख त्रि० प्रतिभान्वितं मुखं मुखव्यापारोऽस्य। प्रतिभान्विते हेमच०। [अच्। २प्रकाशमाने च।

प्रतिभास पु० प्रति+भास-भावे घञ्। १प्रकाशे कर्त्तरि

प्रतिभू पु० प्रतिरूपो भवति प्रति+भू-क्विप्। (जामिन) ख्याते पदार्थे स्त्री। दर्शनप्रतिभूशब्दे ३४७५ पृष्ठादौ दृश्यम्। [२भेदने च।

प्रतिभेदन न० प्रति+भिद-भावे ल्युट्। १नेत्रादेरुत्पाटने

प्रतिमण्डल त्रि० प्रतिरूपं मण्डलं प्रा०स०। सूर्य्यादिमण्डलस्य १परिधौ परिवेषे हरिवं० २०६अ०। अव्ययी०। २प्रत्येकमण्डले अव्य०।

प्रतिमल्ल पु० प्रतिकूलो मल्लः प्रा०त०। प्रतियोधे

प्रतिमा स्त्री प्रति+मा-भावे अङ्। १सादृश्ये। करणे अङ्। २मृदादिनिर्मितदेवतादिमूर्त्तौ तन्त्रानादि देवताप्रतिमाशब्दे ३६८५ पृष्ठादौ दृश्यम्। ३अनुकृतौ ४गजदन्तबन्धे हेमच० उत्तरपदस्थः। ५सदृशार्थे त्रि० हेमच०। यथा देवप्रतिमः।

प्रतिमान न० प्रतिमीयतेऽनेन प्रति+मि-मा-वा ल्युट्। १प्रतिबिम्बे २प्रतिमायां ३गजकुम्भस्थाधोभागे ४तद्वत्तोमध्यस्थाने च अमरः।

प्रतिमार्गक पु० सौभपुरे व्योमचारिपुरे त्रिका०।

प्रतिमित्र पु० १सप्तमेदे भा०द्रो० १०२अ०। अव्ययी०। २सख्यौ कमित्रे अव्य०। [अमरः।

प्रतिमुक्त त्रि० प्रति+मुच-क्त। १परित्यक्ते २परित्यक्ते च

प्रतिमुख न० सा०द० उक्ते नाटकाङ्गसन्धिभेदे यथा "यथासङ्ख्यमवस्थाभिरभियोगात्तु पञ्चभिः। पञ्चधैवेति० इतस्य भागाः स्युः पञ्च सन्धयः" इत्युपक्रमे तल्लक्षणमाह "अन्तरैकार्थसम्बन्धः सन्धिरेकान्वये सति"। एकेन प्रयोजनेनान्विताना कथाङ्गानामवान्तरैकप्रयोजनसम्बन्धः सन्धिः। तद्भेदानाह "मुख प्रतिमुख गर्भो विमर्श उपसंहृतिः। इति पञ्चास्य भेदाः स्युः क्रमाल्लक्षण मुच्यते"। तत्र प्रतिमुखाङ्गलक्षणं भेदोदाहरणादि यथा "विलासः परिसर्पश्च विधूतं तापनं तथा। नर्म नर्मद्युतिश्चैव तथा प्रगमनं पुनः। विरोधश्च प्रतिमुखे तथा स्यात् पर्युपासनम्। पुष्पं वज्रमुपन्यासो वर्णसंहार इत्यपि"। तत्र "समीक्षा रतिभोगार्था विलास इति कथ्यते"। रतिलक्षणस्य भावस्य यो हेतुभूतो भोगोऽस्य विषयः प्रमदा पुरुषो वा तदर्था समीक्षा विलासः यथा शाकुन्तले "काम प्रिया न सुलभा मनस्तु तद्भावदर्शनाश्वासि। अकृतार्थेऽपि मनसिजे रतिफलभवप्रार्थना कुरुते"। "दृष्टनष्टानुसरणं परिसर्पश्च कथ्यते" यथा शाकुन्तले राजा। भवितव्यमत्र तथा। तथा हि "अलक्तसता पुरस्तादवगाढा जघनगौरवात्पश्चात्। दारोरस्य पार्श्वविकसिते पदपङ्क्तिर्दृश्यतेऽभिनवा"। "कृतस्यानुनयस्यादौ विधूतं त्वपरिच्युतः" यथा तत्रैव "अलं वो अलयविरहपज्जुस्सुएण राएसिणा उवरुज्झेण"। केचित्तु "विधूतं स्यादरतिरिति" वदन्ति। "उपायादर्शनं यत्तु तापनं नाम तद्भवेत्" यथा रत्नावल्यां सागरिका "इह्मि जणसामुराओ लज्जा गुरुई परवसो अप्पा। पियसहि! विसमं पेम्मं मरणं सरणं वरइ एक्कं"। "परिहासवचो नर्म—यथा रत्नावल्याम् सुसङ्गता। "सहि जस्स किदे तुमं आवदा सो अयं दे पुरदो चिट्ठदि। सागरिका साध्वसूयम्। कस्स किदे अहं आवदा। सुसं। अह अत्तसंकिदे णं चित्तफलअस्सु"।—धृतिस्तु परिहासजा"। "नर्मद्युतिः—यथा तत्रैव। सुसङ्गता "सहि अदक्खिणा दाणिं सि तुमं जा एवं भट्टिणा हत्थावलम्बिदाबि कोवं ण गच्छसि"। सागः। सम्भूभङ्गमीषदिति अस्य "सुसङ्गदे दाणिं वि कीलिदुं ण विरमसि"। केचित्तु "दोषसाच्छादनं प्राज्ञैर्नर्मद्युतिरिति" वदन्ति।—प्रग-

मर्म वाक्यं स्यादुत्तरोत्तरम्"। यथा विक्रमोर्वश्याम् उर्वशी "जयउ जयउ भट्टारओ। राजा। भवा नाम जितं यस्य त्वया जय इदीर्यते इत्यादि"। "विरोधो व्यसनप्राप्तिः—यथा चण्डकौशिके राजा "नूनमसमीक्ष्यकारिणा भवान्नेनेव स्फुरच्छिखाकलापो ज्वलनः पङ्क्त्यां समाक्रान्तः"—ऋतस्यानुनयः पुनः" "स्यात्पर्युपासनं—रत्नावल्याम् विदू "भो मा कुप्प एसा हि कदलीघरन्तरं गदेत्यादि" —कुप्यं विशेषवचनं मतम्"। यथा तत्रैव राजा "इत्ते गहीत्वा स्वयं नाटयति" विदू "भो वअस्स एसा अवरेण्ह सिरी तए साभासादिदा" राजा। वयस्य सत्यम् "श्रीरेषा पाणिरम्यस्याः प्रतिजातस्य पल्लवः। कुतोऽन्यथा पतत्येष स्वेदच्छद्मामृतद्रवः"। "प्रत्यक्षनिष्ठुरं वज्रं—यथा तत्रैव राजा "कथमिह सोऽहं त्वया ज्ञातः" इत्यं। न केवलं त्वं चित्तकलत्थ ता जाव गदुअ देवीए णिवेदइस्सं"। —उपन्यासः प्रसादनम्"। यथा तत्रैव इत्यं। भट्टा अलं सङ्काए मएवि भट्टिणीए पसादेण कीदिदं ज्जेव एदिणि ता किं कञ्चाभरणेण। अदोवि मे अरुअरो पसादो एसो जं तए अहं एत्थ आणिहिदात्ति कुविदा मे पियसही सागरिका एसा ज्जेव पसादी दुअ"। केचित्तु "उपपत्तिजतो योऽर्थ उपन्यासः स कीर्तितः" इति वदन्ति उदाहरन्ति च। तत्रैव "अदिसुहरा क्खु सा गव्भदासीति। "चातुर्वर्ण्यप्रोपगमनं वर्णसंहार इष्यते" यथा वीरभिते तृतीयेऽङ्के "परिपदिय अथीषामेष वीरो युधाजित् समस्तधिभिरमात्यैर्लोभपादव हृदः। अयमविरतयज्ञो ब्रह्मवादी पुराणः प्रभुरपि जनकानामद्य वो याजकास्ते"। [प्रतिमायाम्।

प्रतिमूर्त्ति स्त्री प्रतिरूपा मूर्त्तिः प्रा॰स॰। देवादिमूर्त्तिसदृशि-

प्रतियत्न पु॰ प्रति+यत-नङ्। १वाञ्छायाम् २उपपदे ३नियमादौ ४वन्द्यायाम् अमरटीकायां भरतसुकुटादयः। ततो गुणान्तराधानरूपे ५संस्कारे मेदि॰ हेमचन्द्रे ७प्रतिपक्षे च त्रिका॰। प्रतिरूपो यत्नो यस्य ब्राव॰। ८प्रतियत्नयुक्ते त्रि॰। ९रचनायां जटाधरः।

प्रतियातना स्त्री प्रति+यात्यतेऽनया चु॰ यत-युच्। १प्रतिमायाम् प्रा॰स॰। २तुल्यरूपयातनायाम् अमरः।

प्रतियायिन् त्रि॰ प्रति+या-भविष्यति गम्या॰णिनि। भावितायुते भा॰ब॰ ५७७१श्लो॰। [मन्त्रे च।

प्रतियोग पु॰ प्रति+युज-भावे घञ्। १विरोधे २विरुद्धस-

प्रतियोगिन् त्रि॰ प्रतिरूपं युज्यते प्रति+युज-घिनुण्। १प्रतिकूलसम्बन्धवति। यथा अभावस्य प्रतिकूलसम्बन्धवत्त्वात् घटादिकस्य प्रतियोगी। २विरुद्धरूपे विशिष्टबुद्धिनियामकसंसर्गस्य १सम्बन्धिभेदे यथा संयोगेन घटवद्भूतलमित्यादौ संयोगस्य घटः प्रतियोगी भूतलमनुयोगि। चन्द्रतुल्यसुखमित्यादौ सादृश्यस्य चन्द्रः प्रतियोगी सुखमनुयोगि। तत्र विशिष्टबुद्धौ प्रकारतया भासमानं संसर्गस्य प्रतियोगि विशेष्यतया भासमानं संसर्गस्यानुयोगीति भेदः। तस्य भावः त्व प्रतियोगित्व न॰ तत् प्रतियोगिता स्त्री तद्भावे। सा च "अभावविरहात्मत्वं वस्तुनः प्रतियोगिता" इत्याचार्योक्ता। स्वरूपसम्बन्धविशेषरूपा दीधितिकारः। यथा घटो नास्तीत्यादौ घटेऽभावप्रतियोगिता। यथा वा घटवद्भूतलमित्यादौ घटे भूतलानुयोगिकसंयोगसम्बन्धप्रतियोगिता। अखण्डोपाधिर्धर्मविशेष इति सम्प्रदायः। वित्तिवेद्यत्वमित्यन्ये यथा चन्द्रवन्मुखमित्यादौ चन्द्रस्य सादृश्यप्रतियोगित्वम्। अन्यवित्त्वमित्यपरे। यथा चैत्रस्य पुत्र इत्यादौ षष्ठ्यर्थस्य चैत्रे प्रतियोगित्वम्। घटाभावादिबुद्धे र्विशिष्टवैशिष्ट्यावगाहिबुद्धित्वया अभावबुद्धिः विशेष्यविशेषणसंसर्गावगाहिनी विशिष्टबुद्धित्वात् संयोगेन घटवद्भूतलमित्यादिबुद्धिवत् इत्यनुमानेन अभावे घटादिविशिष्टबुद्धौ सम्बन्धतया अतिरिक्तप्रतियोगितासिद्धिरिति नव्यनैयायिकाः। श्रीहर्ष खण्डनादौ तस्य स्वरूपसम्बन्धविशेषरूपत्वेन प्रतियोगिस्वरूपत्वमनुयोगिस्वरूपत्वं वा स्वीकार्यं तेनैवोपपत्तौ नातिरिक्तपदार्थकल्पनेति स्थितम् विस्तरभयान्नोक्तम्।

प्रतियोगितावच्छेदक त्रि॰ ६त॰। येन रूपेण यस्या भावादौ प्रतियोगिता १ताद्दशे धर्मे यथा घटाभावे घटस्य घटत्वरूपेण प्रतियोगिता अतस्तत्र घटत्वं प्रतियोगितावच्छेदकं तच्च क्वचित् एकं क्वचिदनेकं तत्र वह्निनास्तीत्यत्र वह्नित्वमेकं महानसीयवह्निनास्तीत्यादौ महानसीयत्वं वह्नित्वञ्चेत्यादिकमनेकमित्याकरे दृश्यम्।

येन सम्बन्धेन प्रतियोगितायाः अभावांशे भानं २ताद्दशसम्बन्धे च यथा संयोगेन घटो नास्तीत्यादौ संयोगेन घटस्याभावांशे प्रतियोगिताभानं तत्र संयोगसम्बन्धः प्रतियोगितावच्छेदकसम्बन्ध एवमन्यत्रापि ज्ञेयम्।

प्रतिर अठरे चिरकालावस्थाने ऋ॰ ८।४८।१०।

प्रतिरथ पु॰ प्रतिकूलो रथो यस्य प्रा॰ब॰। १प्रतियोधे नाट्यवंशे तंशुभ्रातरि नृपभेदे हरिवं॰१२अ॰। यदु

वंश्ये २वज्राङ्गपुत्रे हरिवं० १६२अ०। अव्ययी०। ३प्रत्ये करणे अव्य०।

प्रतिरश्म पु० प्रतिगतो रश्मेः+समा० रः। प्रतिसूर्ये हिरूपकोषः।

प्रतिरव पु०प्रतिरवन्ति प्रति+रु-कर्त्तरि अच्। १प्राणेषु यजु० १८।५५ "प्राणा वै प्रतिरवाः" शत०ब्रा० १४।२।२।२४। भावे अप् प्रतिकूलो रवः प्रा०स०। २प्रतिकूलशब्दे मदीयं धनं न मोक्तव्यमनेन मदीयं धनं बलाद्भुज्यते इत्यादि लोकेषु तद्बोधके प्रतिरवः।

प्रतिरूप न०प्रतिगतं रूपम् प्रा०स०। १तुल्यरूपे प्रतिमायाम् त्रिका०। २दानभेदे पु० भा०शा०२८७अ०। ३मेरुसावर्णेर्मनुभेदे स्त्री भाग० ५।२।२१ प्रतिगतं रूपं येन प्रा०व०। ४तुल्यरूपयुते त्रि० "रूपं रूपं प्रतिरूपो बभूव" श्रुतिः। [प्रतिबिम्बे जटा०।

प्रतिरूपक न० प्रतिगतं रूपं बिम्बस्य येन प्रा०व० कप्।

प्रतिरोध पु० प्रति+रुध-भावे घञ्। १निरोधे। स्वार्थे क। २प्रतिबन्धे ३तिरस्कारे भरतः। कर्त्तरि अच्। ४प्रकृत साध्यानुमितिनिरोधके सत्प्रत्यवोभ्रुदे हेतौ "पक्षसाध्यसाधनाप्रसिद्धिरूपासिद्धिबाधप्रतिरोधानां निरासः" दीधितिः। भावे घञ्। ५कठचौर्ये।

प्रतिरोधक पु०प्रति+रुध-ण्वुल्। १प्रतिबन्धके (डाकायित) २कठचौरे हेमच०। तस्करोधनेन स्तेयकर्तृत्वात् तथात्वम्।

प्रतिरोधिन् त्रि० प्रति+रुध-णिनि। १प्रतिबन्धके २प्रतिरुध्य कठहारिणि चौरे अमरः। [तस्य" नैष०।

प्रतिलम्भ पु० प्रति+लभ-अप् सुट्। लाभे "कथमदः प्रति-

प्रतिलोम त्रि० प्रतिगतं लोम आनुकूल्यमस्मात् प्रा०व० अच् समा०। वामे विपरीते हेमच०।

प्रतिलोमज पुंस्त्री० प्रतिलोमात् जातः जन-ड। उत्तमवर्णस्त्रियाम् अधमवर्णात् जाते सङ्कीर्णवर्णे ते च मनुरुक्ता १०।२५ षट्। तथा याज्ञ० "ब्राह्मण्यां क्षत्रियात् सूतो वैश्याद्वैदेहकस्तथा। शूद्राज्जातस्तु चण्डालः सर्वधर्मबहिष्कृतः। क्षत्रिया मागधं वैश्या-च्छूद्रात् क्षत्तारमेव तु। शूद्रादायोगवं वैश्या जनयामास वै सुतम्"। विष्णुना नामान्तरं दत्तिश्चैषामुक्ता यथा "तत्र वैश्यापुत्रः शूद्रेचायोगवः१। पुक्कसमागधौ२।३ क्षत्रियापुत्रौ वैश्यशूद्राभ्याम्। चण्डालवैदेहकसूताश्च ४।५।६ ब्राह्मणीपुत्राः शूद्रविट्क्षत्रियैः सङ्करसङ्करा-र्यास्वेवाः। रङ्गावतरणमायोगवानाम्। व्याधता पुक्क-सानाम्। सूतक्रिया मागधानाम्। वधप्रधानित्वं चाण्डालानाम्। क्षौरचर्या तक्षीवनस्तु वैदेहकानाम् अश्वसारथ्यं सूतानाम्। चाण्डालानां बहिर्ग्रामनिवसनं मृतचेलधारणमिति विशेषः"। कर्त्तरि क्त। प्रतिलोम-लातोऽप्यत्र।

प्रतिवचन न०प्रतिरूपं वचनम् प्रा०स०। १प्रतिवाक्ये २उत्तरे ३विरुद्धवाक्ये च त्रिका०। प्रतिकथादयोऽप्यत्र स्त्री।

प्रतिवसथ पु० प्रति+वस-आधारे अथच्। ग्रामे संवसथे हेमच०।

प्रतिवस्तु न० प्रतिरूपम् वस्तु प्रा०स०। तुल्यरूपे वस्तुनि।

प्रतिवस्तूपमा स्त्री अर्थालङ्कारभेदे अलङ्कारशब्दे ६०।३अ०।

प्रतिवात त्रि० प्रतिगतो वातो यतः प्रा०व०। यस्मात् प्रदेशात् वायुः आगच्छति तस्मिन् देशे "प्रतिवातेऽनुवाते च" मनुः। अव्ययी०। २वाताभिमुखे अव्य०।

प्रतिवाद पु० प्रति+वद-भावे घञ्। वादिप्रयुक्तन्यायवि-रुद्धन्यायवाक्यप्रयोगे प्रतिवादिनशब्दे ६अ०।

प्रतिवादिन् त्रि० प्रतिकूलं वदति वद-णिनि। १वादिप्र-युक्तन्यायवाक्यविरुद्धवाक्यवादिनि यथा पर्वतो वह्नि-मान् भूमादित्यादौ साध्यसिद्धये वादिना प्रयुक्ते येन पर्वतो न वह्निमान् पाषाणमयत्वात् इत्यादि वाक्यं प्रयुज्यते तस्मिन्। व्यङ्गारे २प्रत्यर्थिनि (आसामी)"कार-णे प्रतिवादिनि" याज्ञ०।

प्रतिवारण त्रि० प्रति+वारि-कर्त्तरि ल्यु। १निवारके २दैत्यभेदे पु०भाग०५।१८।२६ भावे ल्युट्। ३निवारणे न०

प्रतिवार्त्ता स्त्री प्रा०स०। प्रत्युत्तरस्थानीये वृत्तान्तभेदे

प्रतिवासिन् त्रि० प्रत्यासन्नं वसति प्रति+वस-णिनि। (पड़शि) गृहासन्नवासिनि स्त्रियां ङीप्।

प्रतिवाह पु० शफलकपुत्रभेदे अक्रूरानुजे हरिवं० ३२अ०।

प्रतिविधान न०प्रति+वि+धा-ल्युट्। १प्रतिकारे २प्रकृतस्यो-पपादनार्थसुपायावलम्बने च। [६२अ०।

प्रतिविन्ध्य पु० १युधिष्ठिरस्य पुत्रे २क्षत्रियभेदे च भा०शा०

प्रतिविम्ब प्रति+चाचारे क्विप् नामधातुः पर०अक० सेट्। प्रतिविम्बति अप्रतिविम्बीत्। प्रत्यविम्बीत् इत्यपरे।

प्रतिविम्ब पु०न०वी+गतौ स्वा०नि०अन् नुट्च विम्ब प्रति-रूपं विम्बम् प्रा०स०। बिम्बानुरूपे प्रतिच्छायायुक्ते प-दार्थे। तस्य बिम्बाद्भेदोऽभेदो वेतिसंशये विवरणप्रमेयसं-निरूपायि यथा

"ननु लोकस्याहङ्कारस्यप्रतिबिम्बत्वे बिम्बाद्भेदः स्यात् दर्पणगतमुखप्रतिबिम्बवत् तत्र हि पौरुषेयदर्पणक्षयो-

संसर्गयोरन्योन्याभिसम्बन्धत्वेन भेदोऽनुभूयते, नैवं मदीयमिदं सुखमित्यैक्यप्रत्यभिज्ञया भेदानुभवस्य बाधात्। न च प्रत्यभिज्ञैवेतरेण बाध्येति वाच्यं सति भेदे प्रतिबिम्बासम्भवात् किं प्रतिबिम्बोनाम सुखवाञ्छितसङ्गः ? उत दर्पणावयवा एव बिम्बस्य सन्निधिवशात्तथा परिणमन्ते ? नाद्यः दर्पणस्यासुखत्वेतरत्वादसम्भवात् यत्र तु गौढदर्पणे गोढं सुखमुपलभ्यते तत्रापि तस्य न सङ्गत्वम् दर्पणसुखयोः संयोगाभावात्। न द्वितीयः निमित्तकारणस्य बिम्बस्यापायेऽपि तत्कार्यस्यानपसङ्गात् न हि तथाऽवतिष्ठते। तेनैव पुरुषेण दर्पणे तिर्यङ्निरीक्षिते पुरुषान्तरेण सम्यगवलोकिते वा तन्मुखानुपलम्भात्। न चैवं मन्तव्यं क्वचिन्निमित्तापाये कार्यमप्यपैति इक्षुसंयोगजन्यस्य गुडप्रसारणस्य इक्षुसंयोगापायेऽपायदर्शनात्। न तत्र निमित्तापायात् कार्यापायः चिरकालसंवेष्टनाहितेन संस्कारेण संवेष्टनलक्षणविरुद्धकार्योत्पादात् अन्यथा चिरकालप्रसारणेन संवेष्टनसंस्कारे विनाशितेऽपि इक्षुापाये प्रसारणमपेयात् न चैवमपैति। इह तु चिरकालबिम्बसन्निधावभ्युत्पन्ने बिम्बापाये प्रतिबिम्बोऽपि गच्छत्येवेति न बिम्बः परिणामस्य निमित्तम्। अथ मन्यसे चिरकालस्थितोऽपि कमलविकाशः सवितृकिरणस्य निमित्तस्यापायेऽप्यपगच्छतीति। तत्र तत्रापि प्राथमिकसङ्कुचत्वहेतुभिः पार्थिवैराप्यैश्च कमलावयवैः पुनरपि रात्रौ सङ्कुचत्वे विरुद्धकार्ये जनिते विकाशापायात् अन्यथा तादृशावयवरहिते स्थाने कमलेऽपि रात्रौ विकाशोऽपगच्छेत्। आदर्शे तु सुखाकारपरिणते पुनः केन हेतुना समतलाकारपरिणामः स्यात् तदवयवानां कारकसंव्यतिरेकेणाकिञ्चित्करत्वात्। अतएव बिम्बसन्निधिमात्रेण सादर्शावयवा सुखाकारेण परिणमेरन् अन्यथा दर्पणद्रव्ये प्रतिभासुखे कर्तव्ये सति लौकिका बिम्बमेव सन्निधापयेयुः न तु कांस्यकारमपेक्षेरन्। दर्पणद्रव्यस्यान्याकारपरिणामे कारकसंपेक्षायामपि प्रतिबिम्बपरिणामे पुनःस्वरूपपरिणामे वा न तदपेक्षेति चेत् एवमपि न सुखप्रतिबिम्बाकारपरिणामो युक्तिसहः चक्षुर्नासिकादिनिम्नोन्नतभागस्य स्वयंनानुपलम्भात् समतलमेव हि पाणिनाभ्युपगम्यते। समतलेन व्यवहितं सुखमिति चेत् तर्हि चाक्षुषमपि न स्यात्। तत एतत् सिद्धं बिम्बतः आदर्शोसुखस्वरूपान्तररहितत्वज्जन्यकारकशून्यत्वात् यथा विषाण जन्यकारकशून्यं विषाणरहितं शशशृङ्गमिति। ननु तर्हि शुक्तिरजतवन्मिथ्यात्वापत्तेर्न बिम्बैकत्वसिद्धिः प्रत्यभिज्ञा तु व्यभिचारिणी मिथ्यारजतेऽपि मदीयमिदं रजतमिति तद्दर्शनादिति चेत् विषमो दृष्टान्तः नेदं रजतमिति हि तत्र रजतस्वरूपबाधया रजतभिन्नाया भ्रमत्वे तत्प्रत्यभिज्ञाया अपि भ्रमत्वमुचितम् अत्र न तथा नेदं सुखमिति स्वरूपबाधः किन्तु नात्र सुखमिति देशसम्बन्धमात्रबाधे सति तत्सत्ता मदीयमेव सुखमिति प्रत्यभिज्ञा कथं भ्रमः स्यात्। न च सुखावयवानामचाक्षुषत्वात् कथं प्रत्यभिज्ञानमिति वाच्यं नासाद्यादिवत्यवयवदर्शनादपि घटादिवदवयविनश्चाक्षुषत्वोपपत्तेः। यः पुनर्दर्पणापगमे प्रतिबिम्बापगमः नासौ स्वरूपबाधः दर्पणेऽपि तत्प्रसङ्गात्। ननु तत्त्वमसिवाक्येन जीवरूपः प्रतिबिम्बो बाध्यते यथा स्थाणुरसौ न पुरुष इति बह्वाधायां सामानाधिकरण्यदर्शनात् संसार्थविनाशे च मोक्षानुपपत्तेः सोऽयं देवदत्त इति वदैक्यपरत्वेनापि सामानाधिकरण्यसम्भवात् विरुद्धांशबाधमात्रेण मोक्षोपपत्तेः अतस्तस्य जीवस्य बाधे मोक्षस्याद्दुरर्थत्वात्। यस्तु मन्यते प्रतिबिम्ब एव नास्ति दर्पणप्रतिफलिता नेत्ररश्मयः पराङ्मुख्य बिम्बमेव दर्पणादविविक्तं स्पृशन्तीति सदं प्रत्यक्षसुखत्वाद्यनुभवेनासौ निराकरणीयः। कथं तर्हि मूर्तद्रव्यस्य सुखस्यैकस्य भिन्नदेशद्वये युगपत् कारणत्रयेण वृत्तिः, दर्पणदेशवृत्तेर्मायात्वात्तदादिति ब्रूमः। न हि मायायामसम्भावनीयं नाम स्थिरस्थूलादिकमपि स्वप्ने माया दर्शयति। नन्वेवमपि जलमध्येऽधोमुखस्य वृक्षप्रतिबिम्बस्य तीरवृक्षेणैक्ये सति तीरस्थवृक्षोऽधिष्ठानं तत्र च मायया जलगतत्वमधोमुखत्वमध्यस्तमिति वक्तव्यं न चाध्यासहेतुरस्ति अधिष्ठानस्य साकल्येन प्रतीतेः तत्कथमसावध्यासः, उच्यते किमत्र वृक्षावरणाभावादध्यासाभावः ? किं वा दोषाभावात् ? उतोपादानाभावात् ? आद्यो खिदध्यासविरोधिनोऽधिष्ठानतत्त्वज्ञानस्य सद्भावात् ? नाद्यः चैतन्यावरणस्यैवाध्यासोपादानतया जड़े पृथगावरणानुपयोगात्। एतेन द्वितीयोऽपि निरस्तः। न द्वितीयः सोपाधिकभ्रमेष्वुपाधेरेव दोषत्वात्। न चतुर्थः निरुपाधिकभ्रमस्यैवाधिष्ठानतत्त्वज्ञानविरोधित्वात्। तर्हि सोपाधिकभ्रमस्य कर्तृत्वादेः नात्मतत्त्वज्ञानाच्छित्तिः किन्तु अहङ्कारोपाध्यपगमादिति चेत् बाढं पारमार्थिकदर्पणाद्युपाधेरुत्कृतभ्रमस्य च ज्ञानादनिवृत्तावप्यज्ञानज-

न्योपाधेरङ्गारस्य निरुपाधिकब्रह्मरूपत्वात्तत्त्वज्ञानाच्चिदृष्टौ कर्तृत्वादेर्ज्ञानाच्चिदृष्टिरयात् सिध्यति। ननु कथं तत्त्वज्ञानं जीवोनाऽनात्मतादात्म्यं जानाति न विरुद्धात्मतामात्मनोऽवगन्तुमर्हं प्रतिबिम्बत्वात् दर्पणगतप्रतिबिम्बवदिति चेत् न अचेतनत्वोपाधित्वात्। यत्तु लोकायतः शरीरस्यैव चैतन्यं मन्यते तं प्रति दर्पणगत जाड्येन प्रतिरूढत्वात् प्रतिबिम्बस्याचेतनत्वं सुसम्पादं चेतनत्वे तु बिम्बचेष्टया विनापि स्वयं चेष्टेत जीवस्य तु प्रतिबिम्बत्वेऽपि नोपाधिजाड्येन प्रतिबन्धरूपत्वानुभवसिद्धं, यद्यपि लोके बिम्बभूतस्यैव देवदत्तस्य भ्रमनिवर्त्तकतत्त्वज्ञानाश्रयत्वम् दृष्टम्। तथापि न तत्र बिम्बत्वं प्रयोजकं किन्तु भ्रमाश्रयत्वं जीवस्य भ्रमाश्रयः अविद्यायाश्चिन्मात्राश्रयत्वेऽपि जीवपक्षपातित्वेन भ्रमोत्पादनात्। ननु ब्रह्म यस्य जीवैक्यं न जानाति चेत् असर्वज्ञं स्यात् जानाति चेत् जीवगतभ्रमं स्वगतत्वेन पश्येदिति चेत् न स्वस्वतत्प्रतिबिम्बयोरैक्यं जानतापि देवदत्तेन स्वस्थे प्रतिबिम्बगताल्पत्वमलिनत्वाद्य दर्शनात्। न च जीवस्य प्रतिबिम्बत्वे मानाभावः श्रुतिस्मृतिसूत्रेभ्यस्तत्सिद्धेः "रूपं रूपं प्रतिरूपो बभूवेति" श्रुतिः "एकधा बहुधा चैव दृश्यते जलचन्द्रवत्" इति स्मृतिः। "अतएव चोपमा जीवस्यैकादिवदिति सूत्रम्। न चामूर्त्तस्य ब्रह्मणः प्रतिबिम्बासम्भवः अमूर्त्तस्याप्याकाशस्य स्वाश्रिताभ्रनक्षत्रादिविशिष्टस्य जले प्रतिबिम्बभावदर्शनात्। जलान्तराकाश एवाभ्रादिप्रतिबिम्बाधार इति चेत् न जातुमात्रेऽपि जले दूरविशालाकाशदर्शनात्। जीवो घटाकाशवदुपाध्यवच्छिन्नो न प्रतिबिम्ब इति चेत् न तथा सति जीवोपाधिमध्ये ब्रह्मणोऽपि सत्त्वे चैतन्यं तत्र द्विगुणं स्यात् न चैवमाकाशस्य घटे द्वैगुण्यं दृष्टं ब्रह्मणस्तत्रासत्त्वे च सर्वगतत्वनियन्तृत्वादिहानिः। उभयानुगतचिद्रूपाकारस्यैव सर्वगतत्वनियन्तृत्वादि न ब्रह्मण इति चेत् न "य आत्मानमन्तरो यमयतीति" श्रुतौ प्रकरणबलेन ब्रह्मण एव जीवमध्ये नियन्तृत्वेनावस्थानश्रवणात्। अतः श्रुत्या सर्वत्र घटाकाशदृष्टान्तोऽसङ्गत्वसाधको न जीवत्वसाधकः। प्रतिबिम्बपक्षे तु द्विगुणोक्त्य दुक्तिर्न दोषाय जलमध्ये स्वाभाविकजात्वन्तरमाकाशस्य प्रतिबिम्बितविशालाकाशस्य च दृष्टेः। तस्मादङ्गारोपाधिस्थतो ब्रह्मप्रतिबिम्बो जीवः"।

प्रतिविम्बन न० प्रतिबिम्ब+स्वार्थेऽण्। प्रतिबिम्बे

करणे "दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्" सा० द०

प्रतिविम्बवाद पु० ६त०। जीवस्य ईश्वरप्रतिबिम्बतास्थापनार्थे वादे। द्विधा हि वेदान्तिमते जीवेश्वरयोर्विभागकल्पना प्रतिबिम्बभावेन तत्तदवच्छिन्नभावेन च। तत्राद्यः पक्षः विवरणानुसारिभिर्मन्यते द्वितीयः पक्षोऽन्यैर्मन्यते तदेतत् विद्वान्तलेशे प्रदर्शितं यथा

विवरणानुसारिणस्त्वाहुः। "विभेदजनके ऽज्ञाने नाशमात्यन्तिकं गते। आत्मनो ब्रह्मणोभेदमन्यत्वं कः करिष्यतीति" श्रुत्या एकस्यैवाज्ञानस्य जीवेश्वरविभागोपाधित्वप्रतिपादनाद्बिम्बप्रतिबिम्बभावेन जीवेश्वरयोर्विभागः। नीभयोरपि प्रतिबिम्बभावेन उपाधित्वयमन्तरेणोभयोः प्रतिबिम्बत्वायोगात्। तत्रापि प्रतिबिम्बो जीवः बिम्बस्थानीय ईश्वरः। तथा सत्येव लौकिकबिम्बप्रतिबिम्बदृष्टान्तेन स्वातन्त्र्यमीश्वरस्य तत्परतन्त्र्यं जीवस्य च युज्यते। "प्रतिबिम्बगताः पद्मस्य जुवक्रादिविक्रियाः। पुमान् क्रीडेत् यथा ब्रह्म तथा जीवस्यविक्रियाः" इति कल्पतरुकरोक्त्या "लोकवत्तु लीलाकैवल्यमिति" सूत्रमपि संगच्छते। अज्ञानप्रतिबिम्बे तस्य जीवस्यान्तःकरणरूपोऽज्ञानपरिणामभेदोविशेषाभिव्यक्तिस्थानम् सर्वतः प्रकृतस्य सविदप्रकाशस्य दर्पण इव। अतस्तस्य तदुपाधिकत्वव्यवहारोऽपि न तावताऽज्ञानोपाधिपरित्यागः। अन्तःकरणोपाधिपरिच्छिन्नस्यैव चैतन्यस्य जीवत्वे योगिनः कायव्यूहाधिष्ठानानुपपत्तेः। न च योगप्रभावादुयोगिनोऽन्तःकरणं कायव्यूहाभिव्यक्तियोग्यं वैपुल्यं प्राप्नोतीति तदवच्छिन्नस्य कायव्यूहाधिष्ठातृत्वं युज्यत इति वाच्यम्। "प्रदीपवदावेशस्तथा हि दर्शयतीति" शास्त्रोपान्त्याधिकरणभाष्यादिषु कायव्यूहे प्रतिदेहमन्तःकरणस्य चक्षुरादिवदभिन्नस्यैव योगप्रभावात् सृष्टेरुपवर्णनात्। प्रतिबिम्बे बिम्बाभेदमात्रसाध्यत्वेन स्वरूपेण तस्य सत्यत्वात् न प्रतिबिम्बरूपजीवस्य स्वतन्त्रत्वासम्भव इति न तदतिरेकेण स्वतन्त्रत्वावच्छिन्नरूपं जीवान्तरं वा प्रतिबिम्बजीवातिरिक्तं जीवेश्वरविलक्षणं कूटस्थचिदितं चैतन्यान्तरं कल्पनीयम् "अविनाशी वाऽरे अयमात्मेति" श्रवणाच्चैतन्यस्य तदुपाधिनिवृत्तौ प्रतिबिम्बभावापगमेऽपि स्वरूपं न विनश्यतीत्येतत्परं, न तदतिरिक्तकूटस्थनामकचैतन्यान्तरपरम्। जीवोपाधिनाऽन्तःकरणादिनावच्छिन्नं चैतन्यं बिम्बभूत ईश्वर एव "यो विज्ञाने तिष्ठन्नित्यादि" श्रुत्या ईश्वरस्यैव जीवसन्निधानेन तदन्तर्यामिभावेन

विकारान्तरस्यानभ्युपगमादिति"। अतः परमवच्छिन्नवाद-स्यात्र दर्शितः प्रसङ्गात् पूर्वमनुक्तत्वाच्चात्रोच्यते "अन्ये तु रूपाद्युपहितप्रतिबिम्बो न युक्तः सुतरां नीरूपे गगन प्रतिबिम्बोदाहरणमप्ययुक्तं गगनाभोगव्यापिनि सविद्रु-करमण्डले सलिले प्रतिबिम्बिते गगनप्रतिबिम्बत्वव्यवहा-रस्य भ्रममात्रमूलत्वात्। ध्वनौ वर्णप्रतिबिम्बत्ववादो-ऽप्ययुक्तः व्यञ्जकतया सन्निधानमात्रेण ध्वनिधर्माणा-मुदात्तादिस्वराणां वर्णेष्वारोपोपपत्तेर्ध्वनेर्वर्णप्रतिबिम्ब-त्वप्राप्तिकल्पनायामनिःप्रमाणकत्वात्। प्रतिध्वनिरपि न पूर्वशब्दप्रतिबिम्बः पक्षीकरणपक्रियया षट्टपयो-निधिप्रभृतिशब्दानां क्षितिसलिलादिशब्दत्वेन प्रतिध्व-नेरेवाकाशशब्दत्वेन तस्यान्यशब्दप्रतिबिम्बत्वायोगात्। वर्ण रूपप्रतिशब्दोऽपि न पूर्ववर्णप्रतिबिम्बः वर्णाभिव्यञ्जक-ध्वनिनिमित्तकप्रतिध्वनेर्मूलध्वनिवदेव वर्णाभिव्यञ्जकत्वेनो-पपत्तेस्तस्माद्घटाकाशवदन्तःकरणावच्छिन्नं चैतन्यं जीवः तदनवच्छिन्नमीश्वरः। न चैवमखण्डान्तर्वर्त्तिनश्चैतन्यस्य तत्तदन्तःकरणोपाधिभिः सर्वात्मना जीवभावेनावच्छेदा-त्तदवच्छेदरहितचैतन्यरूपेश्वरस्याखण्डादुद्धरिरेव स्यात्' स्यादिति "यो विज्ञाने तिष्ठन्नित्यादावन्तर्यामिभावेन वि-कारान्तरवस्थानश्रवणं विरुध्यते। प्रतिबिम्बपक्षे तु जलगतस्याभाविकाकाशे सत्येव प्रतिबिम्बाकाशदर्शनादेकत्व द्वित्वोक्तेश्च दृष्टिरूपपद्यत इति वाच्यम्। यतः प्रतिबिम्ब-पक्षेऽपि उपाधावनन्तर्गतस्यैव चैतन्यस्य तत्र प्रतिबिम्बो वाच्यः। न तु जलचन्द्रन्यायेन बहिरुपप्रतिबिम्बं तदन-न्तर्गतभागस्य तत्र प्रतिबिम्बासम्भवात्। न हि मेघा-वच्छिन्नस्याकाशस्यालोकस्य वा जले प्रतिबिम्बवज्जलान्त-र्गतस्यापि तत्र प्रतिबिम्बो दृश्यते। न वा सुखादीनां बहिःक्षितिसमय इव जलान्तर्निमज्जनेऽपि प्रतिबि-म्बोऽस्ति। अतो जलप्रतिबिम्बं प्रति मेघाकाशादेरि-वान्तःकरणाद्युपाधिप्रतिबिम्बं प्रति तदनन्तर्गतस्यैव बि-म्बत्वं स्यादिति बिम्बभूतस्य विकारान्तरवस्थानायोगात् ईश्वरेऽन्तर्यामिब्राह्मणाद्यसङ्गतिप्रसङ्गः। एतेनावच्छि-न्नस्य जीवत्वे कर्तृभोक्तृसमयोक्तेस्तदान्तःकरणाव-च्छेद्यचैतन्यप्रदेशस्य भिन्नत्वात् कृतहानाकृताभ्यागम-प्रसङ्ग इति निरस्तम्। प्रतिबिम्बपक्षेऽपि स्वानन्तर्गतस्य स्ववच्छिन्नस्य चैतन्यप्रदेशस्यान्तःकरणे प्रतिबिम्बस्य वक्तव्यतया तत्र तदान्तःकरणस्य गमने बिम्बभेदात् तद्-प्रतिबिम्बस्यापि भेदावश्यम्भावेन दोषतौल्यात्। न चान्तःकरणप्रतिबिम्बो जीव इतिपक्षे दोषतौल्येऽप्यविद्याप्रतिबिम्बो जीवस्तस्य च तत्र गतिहारम-न्तःकरणं जलाशयव्यापिनो महाभेघमण्डलप्रतिबिम्बस्य तदुपरि विस्तृतरश्मीतावोक इव तत्र विशेषाभिव्यक्ति-हेतुरिति पक्षे नायं दोषः। अन्तःकरणवद्विद्यायागत्व-भावेन प्रतिबिम्बभेदानापत्तेरिति वाच्यम्। तथैवावच्छेद पक्षेऽप्यविद्यावच्छिन्नो जीव इत्युपगमसम्भवात् तत्ता-प्यैक्यस्य जीवस्य क्वचित्प्रदेशे कर्तृत्वं प्रदेशान्तरे भोक्तृ-त्वमित्येवंकृतहानाकृताभ्यागमदोषापत्तुल्ये वस्तुतो जीवैक्यस्य श्रवणेकरणोपयत्वेन तत्प्रयोजनान्तःकरणोपाधि-पक्षेऽपि वस्तुतश्चैतन्यैक्यस्य तदवच्छेदकोपाध्यैक्यस्य च तत्राभ्युपगमेन दोषनिराकरणसम्भवात्। न चावच्छेदपक्षे "यथाह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्। उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा"। "अतएवोपमाजलसूर्यकादिव-दिति" श्रुतिसूत्राभ्यां विरोधः। "कम्बुवदयवाच्च तथा त्वम्" इत्युदाहृत सूत्रानन्तरसूत्रेण यथा सूर्यस्य रूपवतः प्रतिबिम्बोदययोग्यता ततो विप्रकृष्टदेशं रूपवज्जलं गच्छति नैवं सर्वगतस्यात्मनः प्रतिबिम्बोदययोग्यं किञ्चि-दस्ति ततो विप्रकृष्टमिति प्रतिबिम्बासम्भवसङ्गः "दृष्टिसाम्याच्च भाक्तम् अन्तर्भावादुभयसामञ्जस्यादेवमिति" तदनन्तरसूत्रेण यथा जलप्रतिबिम्बितः सूर्यो जलहृदे वर्त्तत एव जल-स्यासे चलतीव जलचलने चलतीवेति तस्याध्यासिकतद्-धर्माधिष्ठद्दष्टिसाम्यादिभाक्तमित्येवं दृष्टान्तदार्ष्टान्तिकयोः साम्यसूत्रादविरोध इति स्वयंसूत्रकृतैवावच्छेदपक्षे तयोक्तात्यर्थकथनात्। "घटसंवृतमाकाशं नीयमाने यथा घटे। घटो नीयेत नाकाशं तद्वज्जीवो नभोपमः"। "अंशो नानाव्यपदेशादिति" श्रुतिसूत्राभ्यामवच्छेदपक्ष-स्यैव परिपक्वात्। तस्मात् सर्वगतस्य चैतन्यस्यान्तःकरणा-दिनावच्छेदोऽवश्यं भावीत्यावश्यकत्वादवच्छेदो जीव इति पक्षं रोचयन्ते"।

प्रतिविम्बित त्रि॰ प्रतिबिम्ब+तारः इतच्। जातप्रतिबिम्बे दर्पणादौ—प्रतिफलिते प्रतिच्छायापन्ने सुखादौ।

प्रतिविम्बा स्त्री प्रतिविम्बं बिम्बं यया प्रा॰ब॰। प्रतिबिम्बायाम् (आतइच्) अमरः।

प्रतिविष्णुक पु॰ प्रतिकूलो विष्णुर्यस्य प्रतिविष्णुः सुचुकु-न्दपक्षान्मा कायति शब्दायते कै—शब्दे क। सुच-कुन्दृक्षे राजनि॰।

प्रतिवेश्म पु० प्रत्यासन्नो वेश्मः प्रा०स०। प्रत्यासन्ने प्रतिवासिगृहे शब्दरत्ना०। प्रति+विश–आधारे घञ् वा दीर्घः। तत्रार्थे।

प्रतिवेश्मिन् त्रि० प्रत्यासन्नं विशति प्रति+विश–णिनि। प्रत्यासन्नगृहवासिनि स्त्रियां ङीप् "दृष्टं हि प्रतिवेश्मिनि! त्वयमिहाभ्यस्तङ्कृते दाक्षसि" मा०द०।

प्रतिव्यूह पु०प्रतिरूपः व्यूहः प्रा०स०। बलविन्यासस्य प्रतिरूपे व्यूहे भा०भी० ५०अ०।

प्रतिशब्द पु० प्रतिरूपः शब्दः प्रा०स०। प्रतिध्वनौ शब्दानुरूपे शब्दजन्ये शब्दभेदे। प्रतिबिम्बवादशब्दे दृश्यम्।

प्रतिशयन न० प्रति+शी–भावे ल्युट्। प्रतिलाभे अभीष्टलाभाय प्रत्यादेशाशया दैवोद्देशेन स्नानभोजनादिवर्जनपूर्वकस्थापि (इत्यादेओया) दशकृ० ५ उ०।

प्रतिशयित त्रि०प्रति+शी+क्त। प्रतिशयनकारिणि

प्रतिशासन न० प्रति+शास–भावे ल्युट्। श्रुत्यादिभिरुक्तस्य नियोगे अमरः। [ख्याते च त्रिका०।

प्रतिशिष्ट त्रि० प्रति+शास–कर्मणि क्त। १प्रेषिते २प्रत्या-

प्रतिश्या स्त्री प्रति+श्यै–वा० करणे अङ्। प्रतिश्राये पीनसे रोगभेदे शब्दच०।

प्रतिश्याय पु० प्रति+श्यै–करणे घञ्। पीनसे रोगभेदे तल्लक्षणादि सुश्रुतोक्तं यथा

"अथातः प्रतिश्यायप्रतिषेधं व्याख्यास्यामः। नारीप्रसङ्गः शिरसोऽभितापो धूमो रजः शीतमतिप्रतापः। सन्धारणं मूत्रपुरीषयोश्च सद्यः प्रतिश्यायनिदानसङ्गम्। त्वक्चक्षुषी मूर्द्धनि मारुतादयः पृथक्समस्ताश्च तथैव शोणितम्। प्रकोप्यमाना विविधैः प्रकोपणैर्नृणां प्रतिश्यायकरा भवन्ति हि। शिरोगुरुत्वं त्वचयोः प्रवर्त्तनं तथाङ्गमर्दः परिहृष्टरोमता। उपद्रवास्त्वाश्यपरे पृथग्विधा नृणां प्रतिश्यायपुरःसरा मताः। आनद्धा पिहिता नासा तनुस्रावप्रवर्त्तिनी। गलतालोष्ठशोषश्च निस्तोदः शङ्खयोस्तथा। स्वरोपघातश्च भवेत्प्रतिश्यायेऽनिलात्मके। तृष्णा सपीतकः स्रावो घ्राणात् स्रवति पैत्तिके। क्लोमोऽतिपाण्डुः सलिलो भवेत्तृष्णाभिपीडितः। सधूमं सहसा वह्निं वमतीव च मानवः। कफः कफक्लेदो घ्राणाच्छुक्लः शीतः स्रवेन्मुहुः। शुक्लावभासः शूनाक्षो भवेद्रुधिरोक्षणः। शिरोगलौष्ठतालूनां कण्डूयनमतीव च। भूत्वा भूत्वा प्रतिश्यायो योऽकस्मादभिनिवर्त्तते। सम्यक्को व्याप्यको वा स सर्वप्रभवः स्मृतः। लिङ्गानि चैव सर्वेषां पीनसानां च सर्वजे। रक्तजे तु प्रतिश्याये रक्तस्रावः प्रवर्त्तते। ताम्राक्षश्च भवेज्जन्तुरुपघ्राते प्रतीड़ितः। दुर्गन्धोच्छ्वासवदनस्तथा गन्धञ्च वेत्ति च। मूर्च्छन्ति चास्य सवयः श्वेताः कृष्णास्तथाऽसवः। क्रमिमूर्द्धविकारेण समानं चास्य लक्षणम्। प्रक्लिद्यति पुनर्नासा पुनश्च परिशुष्यति। सङ्घरानद्धते चापि सङ्घर्षिण्यिते तथा। निश्वासोच्छ्वासदौर्गन्ध्यं तथा गन्धञ्च वेत्ति च। एवं दुष्टं प्रतिश्यायं जानीयात्कृच्छ्रसाधनम्। सर्व एव प्रतिश्याया नरस्याप्रतिकारिणः। कालेन रोगजनना जायन्ते दुष्टपीनसाः। बाधिर्य्यनाश्यमघ्राणं चोरांश्च नयनामयान्। कासाग्निसादशोफांश्च कृच्छ्राः कुर्वन्ति पीनसाः"।

प्रतिश्रय पु०प्रतिश्रीयते प्रति+श्रि–आधारे अच्। १यज्ञगृहे जटा० २सभायां २आश्रये च मेदि० ४गृहे हेमच०।

प्रतिश्रव पु० प्रति+श्रु–भावे अप्। स्वीकारे अमरः।

प्रतिश्रवण न०प्रति+श्रु–भावे ल्युट्। १अङ्गीकारे। प्रतिगतः श्रवणं कर्णम् अत्या०स०। २श्रवणानुगते त्रि० अस्य तत्पुरुषे अच्। अनोदात्तता प्रतिगतं श्रवणं येन प्रा०व०। ङ न। [रूपभेदे भा०आ० ६५अ०।

प्रतिश्रवस् पु०१गोत्रप्रवर्त्तकभेदे। २परिच्छिन्नपुत्रभीमसेनात्मजे

प्रतिश्रुत् स्त्री प्रतिरूपं श्रूयते श्रु–सम्प० वा०कर्मणि क्विप्। प्रतिशब्दे प्रतिध्वनौ अमरः।

प्रतिश्रुत्का स्त्री देवताभेदे यजु०२४।३२। २।१९ [नौ च।

प्रतिश्रुति स्त्री प्रति+श्रु–भावे क्तिन्। १अङ्गीकारे २प्रतिध्व-

प्रतिषिद्ध त्रि० प्रति+सिध–कर्मणि क्त। निषिद्धे

प्रतिषेध पु०प्रति+सिध–भावे घञ्। १निषेधे 'मा कुरु इत्यादिना निवारणे "प्राधान्यं हि विधेर्यत्र प्रतिषेधेऽप्रधानता" मीमांसकका०। २अर्थालङ्कारभेदे अर्थालङ्कारशब्दे ४०० दृश्यम्। ३दूषणाभिधाने च। ल्युट्। प्रतिषेधन तत्रैव न०

प्रतिषेधोपमा स्त्री "न जातु शक्तिरिन्दोस्ते सखेन प्रतिगर्जितुम्। कलङ्किनो जड़स्येति प्रतिषेधोपमैव सा। काव्याद०। उक्ते अर्थालङ्कारभेदे सादृश्यप्रतिषेधेन अधिक्वैचित्र्य प्रकटनात् तथात्वमस्याः।

प्रतिष्कन्द पु०प्रति+स्कन्द–वा०ड घत्वम्। दूते शब्दर०। [जटा०।

प्रतिष्कम्भ पु० प्रति+स्कम्भ–अच् वा०सुट् षत्वम्। चर्मरज्ज्वो

प्रतिष्कस पु०प्रति+स्कस–अच् वा० सुट् षत्वम्। चरे शब्दर०

प्रतिष्टम्भ पु०प्रति+स्तभ–भावे घञ् षत्वम्। १प्रतिबन्धे अमरः २क्रियाराद्धिलाभादने 'बाङ्प्रतिष्टम्भविडङ्गमन्थुः' रघुः

प्रतिष्टुति स्त्री प्रति+स्तु-क्तिन्। पुनरुच्चारितस्य स्तुतेः ऋ० ८।१२।१

प्रतिष्ठ त्रि०प्रतिष्ठा अस्त्यस्य अच् प्रति+स्था-क वा। १ख्यातियुक्ते २जैनभेदे पु० हेमच० २कुमारानुचरमातृभेदे स्त्री भा०श०४७अ०। ३चतुरक्षरपादके वर्णवृत्तभेदे स्त्री ह०र०।

प्रतिष्ठा स्त्री प्रति+स्था-भावाधारादौ अङ्। १स्थितौ २स्थाने ३गौरवे ४यागादिसमाप्तौ कर्त्तव्ये कर्मभेदे मेदि०। देवादीनां पूज्यतादिप्रयोजके ५संस्कारभेदे देवताप्रतिष्ठाशब्दे तद्विवरणं दृश्यम्। ६स्थैर्ये ७क्षुद्रे स्त्री निघण्टुः पात० स्थैर्यभेदे फलभेद उक्तो यथा

"अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः" सू०। "सर्वप्राणिनां भवति" भा०"सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्" सू०"धार्मिकोभव इति भवति धार्मिकः, स्वर्गं प्राप्नुहीति स्वर्गं प्राप्नोति अमोघास्य वाग्भवति" भा० "अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्" सू० "सर्वदिक्स्वान्यक्षोपतिष्ठन्ते रत्नानि" भा० "ब्रह्मचर्य्यप्रतिष्ठायां वीर्य्यलाभः" सू० "यस्य लाभादप्रतिघात् सुखानुत्कर्षयति विद्वत्व विनेयेषु ज्ञानमाधातुं समर्थो भवति इति" भा०। ८ब्राह्मणे "ब्रह्म पुच्छं प्रतिष्ठा" श्रुतिः।

प्रतिष्ठान न० प्रति+स्था-भावे ल्युट्। १व्रतादेः समाप्तौ कर्त्तव्ये कर्मभेदे देवादीनां पूज्यताप्रयोजके २संस्कारभेदे ३विख्यातौ च। आधारे ल्युट्। (विठोर) ख्याते ४नगरभेदे "गङ्गायमुनयोर्मध्ये प्रयागं जघनं स्मृतम्। प्रयागं जघनस्थानमृषयो विदुः। प्रयागं सप्रतिष्ठानं कम्बलाश्वतरौ तथा। तीर्थं भोगवती चैव वेदिरेषा प्रजापतेः" भा०व० ८५अ०। "प्रतिष्ठाने नरपतिर्ययातिः प्रत्युपस्थितः" भा०उ०११२०अ०।

"एवंप्रभावो राजासौदैलस्तु पुरुषोत्तम!। देशे पुण्यतमे चैव महर्षिभिरभिष्टुते। राज्यं स कारयामास प्रयागे पृथिवीपतिः। उत्तरे जाह्नवीतीरे प्रतिष्ठाने महायशाः" हरिवं०२६अ०। ५स्थाने च

प्रतिष्ठित त्रि० प्रतिष्ठा जाताऽस्य तारका० इतच्। १जातप्रतिष्ठे देवादौ २विख्यातियुक्ते च। ३विष्णौ पु० "अग्र मत्तः प्रतिष्ठितः" विष्णुस०।

प्रतिष्ठिका स्त्री प्रति+स्था-क स्वार्थे क कापि अत इत्त्वम् सुधामा० अत्वम्। प्रतिष्ठानकर्त्र्यां स्त्रियाम्।

प्रतिसङ्क्रम पु० प्रतिरूपः संक्रमः मा०स०। १प्रतिच्छायायाम् मा०व०। २प्रतिसंक्रान्ते प्रतिच्छायापन्ने त्रि०। ३सञ्चारे च "चित्तस्यक्रियपरिणामित्वप्रतिसंक्रमा दर्शनविषया गुडाऽनन्ता चेति" पात०भा०। "प्रतिसंक्रमः संचारः" विवरणम्।

प्रतिसंख्या स्त्री प्रति+सम्+ख्या-भावे अङ्। १प्रसङ्ख्याने २सांख्यादिसिद्धे ज्ञानभेदे च तस्य पञ्चविंशतिसंख्यान्विततत्त्वनिरूपणात् तदीयज्ञानस्य संख्यानियतत्वेन तथात्वम्।

प्रतिसंख्यानिरोध पु० प्रतिसङ्ख्यापूर्वकोनिरोधः मा०त०। बुद्धिपूर्वके भावानां नाशे बौद्धमतसिद्धे पदार्थभेदे अप्रतिसंख्यानिरोधशब्दे ५६१पृ० दृश्यम्।

प्रतिसञ्चर पु० प्रतिसञ्चरन्ति क्रियाभूयत्वया विलीयन्तेऽस्यां प्रति+सम्+चर-आधारे अप्। १प्रलयभेदे "यदा तु प्रकृतौ याति लयं विश्वमिदं जगत्। तदोच्यते प्राकृतोऽयं विद्वद्भिः प्रतिसञ्चरः" मार्क०पु०६५अ०। २संसारमात्रे च।

प्रतिसन्देश पु० प्रतिरूपः सन्देशः मा०स०। सन्देशात्मके प्रत्युत्तररूपतया वाचिकसन्देशभेदे।

प्रतिसन्धान न० प्रति+सम्+धा-भावे ल्युट्। १अनुसन्धाने अनुचिन्तने ज्ञानभेदे नष्टस्य द्रव्यस्योपलब्धिहेतुव्यापारे २अन्वेषणे च।

प्रतिसन्धि पु० प्रतीपः सन्धिः मा०स०। १वियोगे २उत्तरमेले "अदृष्टतोऽनुपायाच्च प्रतिसन्धिश्च कर्मणः" भा०शा०२०६अ० टी० नील० प्रति+सम्+धा-कि। ३प्रतिसन्धाने च वीप्सायाम् अव्ययी०। ४सन्धौ सन्धौ इत्यर्थे।

प्रतिसन्धेय त्रि० प्रति+सम्-धा-कर्मणि यत्। प्रतीकार्य्ये भा०उ० ६६अ०।

प्रतिसम त्रि० प्रतिकूलः समः। विसदृशे

प्रतिसमन्त त्रि० प्रतिगतं समन्तात् येन मा०व० ब्रुवो०। मा० प्रसमन्ताद्भावे गत०मा० ३।७।१२ भा०।

प्रतिसमासन न० प्रति+सम्+आ+अस-घञ् भावे ल्युट्। निरसने निवारणे भा०व० १८३१ श्लो०।

प्रतिसर पु० प्रति+सृ-अच्। १सैन्यपश्चाद्भागे २हस्तसूत्रे च त्रिका०। ३मन्त्रभेदे ४माल्ये ब्रणगुडौ च मेदि०। ६भूषणे ७रक्षाबन्धनसूत्रे पु० न० अमरः। ८नियोज्ये त्रि० मेदि० स्त्रीत्वमपि। "प्रतिसरया तुरगाणां भक्षातरुशालिकुशविद्धार्थं कण्ठेषु निबध्नीयात्" ह०सं०४२अ०।

प्रतिसर्ग पु०प्रतिरूपः प्रतिकूलो वा सर्गः। १ब्रह्मणः सृष्टितुल्यायां मरीच्यादिसृष्टौ २प्रलये च "आदिसर्गस्तु यः प्रोक्त! कथितो विस्तरेण च। प्रतिसर्गश्च ये येषामधिपास्तान् वदस्व नः" इति प्रश्ने प्रतिसर्ग उक्तः कालिकापु०।

"प्रतिसर्गे तु सूत्रिखण्डं हेमपिण्डं वा घटकुण्डलसुकुटादयो विशन्तोऽव्यक्तीभवन्ति तत्कारणरूपमेवाभिव्यक्तं कार्यमपेक्षाव्यक्तम् भवति । एवं पृथिव्यादयस्तन्मात्राणि विशन्ति स्वापेक्षया तन्मात्राण्यव्यक्तयन्ति एवं तन्मात्राण्यहङ्कारं विशन्ति अहङ्कारमव्यक्तयन्ति एवमहङ्कारो महान्तमाविशन्महान्तमव्यक्तयति महान् प्रकृतिं स्वकारणं विशन् प्रकृतिमव्यक्तयति प्रकृतेस्तु न कचिच्चिवेश इति सा सर्वकार्याणामव्यक्तमेव" सा०त०कौ०

प्रतिसर्य्य पु० प्रतिसरे भवः यत् । रुद्रभेदे यजु०१६।२२

प्रतिसव्य न० प्रतिगतं सव्यं वामं येन प्रा०ब० । १प्रतिकूले २विरुद्धाचारिणि जटा० ।

प्रतिसान्वानिक पु० सन्धानं प्रयोजनमस्य ठक् प्रतिरूपः सान्वानिकः प्रा०स० । मागधे स्तुतिपाठके शब्दरत्ना० ।

प्रतिसाम वीप्सायाम् अव्ययी० अच् समा० । प्रत्येकसामनि

प्रतिसारण त्रि० प्रतिसारयति प्रति+सृ-णिच् ल्युट् । १अपसारके २दूरीकारके । भावे ल्युट् । २दूरीकरणे । करणे ल्युट् । सुश्रुतोक्ते ३अग्निकार्यभेदे । वलयबिन्दुविलेखा प्रतिसारणानीति दृढनविशेषाः । व्रणचिकित्साङ्गे ४उपक्रमभेदे "भाषादुर्वं" ततस्तेन क्षणमालेपयेद्व्रणम् । कुक्कुटाण्डकपालानि कृतं मधुकं समम् । तथा सप्तदशखण्डकौं मणिचूर्णञ्च दापयेत् । गुटिकामूलपिष्टाभ्यां व्रणानां प्रतिसारणम्" सुश्रुतः । प्रतिसारणं व्रणस्य स्वस्थानात् स्थानान्तरनयनम् इत्यर्थः "दन्तजिह्वास्थानां यच्चूर्णकल्कावलेहकैः । अनेर्घर्षणसङ्घात्या तद्धि प्रतिसारणम् । वैरस्यं सुखदौर्गन्ध्यं सुखशोषं तथा क्षयम् । अरुचिं दन्तपीडाञ्च निहन्ति प्रतिसारणम् । क्षीणे जाड्यकफोत्क्लेशावरसंज्ञानमेव च । अतियोगान्न सुखे पाकः शोषस्तृष्णा बलिः क्रमः" भावप्र० उक्ते ४दन्तघर्षणभेदे ।

प्रतिसारणीय त्रि० प्रति+सृ-णिच्-कर्मणि अनीयर् । स्थानान्तरनयनीये सुश्रुतोक्ते चारपाकविधिभेदे "स द्विविधः प्रतिसारणीयः प्रानीयश्च । तत्र प्रतिसारणीयः कुक्कुटिभदट्टुकिलासमण्डलभगन्दरार्बुददुष्टव्रणनाडीचर्मकीलतिलकालकन्यच्छव्यङ्गमशकबाह्यविद्रधिक्रमिविषार्शःसूपदिश्यते" ।

प्रतिसारिन् त्रि० प्रतीपं सरति सृ-णिच्-णिनि । १प्रतीपगामिनि २नीचगामिनि स्त्रियां ङीप् । भा०व० ६१अ० ।

प्रतिसीरा स्त्री प्रतिसिनोति सीयते वा प्रति+सि-रक् दीर्घश्च । जवनिकायाम् (परदा) अमरकोषः ।

प्रतिसूर्य्य पुंस्त्री०प्रतिरूपः सूर्यः प्रा०स० । १ऋक्षभेदे त्रिका० । २द्वितीयसूर्यसादृश्यरूपे आन्तरीक्षोत्पातभेदे च । स्वार्थे क । तत्रार्थे तच्छुभाशुभसूचकं बृ०सं०३७अ० यथा "प्रतिसूर्यकः प्रथमो दिवसकृतवर्णसप्रभः स्निग्धः । वैदूर्यनिभः स्वच्छः शुक्लश्च क्षेमसौभिक्षः । पीतो व्याधिं जनयत्यशोकरूपश्च शस्त्रकोपाय । प्रतिसूर्यौघां मालादण्डभयात्कुरुपञ्चाली । दिवसकृतः प्रतिसूर्यो जनक्षुदृग्दक्षिणे स्थितोऽनिलकृत् । उभयस्थः सलिलभयं रूपसुपरि निहन्त्यधो जनहा" ।

प्रतिसृष्ट त्रि० प्रति+सृज-कर्मणि क्त । १प्रेरिते २प्रत्याख्याते च मेदि० । ३मक्ते धरणिः । [स्त्रियवल्लाम् राजनि० ।

प्रतिसीमा स्त्री प्रतिरूपा सीमा सीमवद्भो यस्याः प्रा०ब० । स०

प्रतिस्कन्ध पु० १कुमारानुचरभेदे भा०श० ४६अ० । २नियमसन्ध्यङ्गभेदे पु० "परिच्छिन्नं फलं यत्र प्रतिस्कन्धेन दीयते । स्कन्धोपनेयं तं प्राहुः सन्धिं सन्धिविदो जनाः" कामन्द० ।

प्रतिस्त्री स्त्री प्रतिरूपा स्त्री प्रा०स० । १परनार्याम् आभिमुख्ये अव्य० । २स्त्रिया आभिमुख्ये अव्य० । "उपमन्त्रयते स हिङ्कारोन्नयते स प्रस्तावः स्त्रिया सह शेते स उद्गीथः प्रतिस्त्रि सह शेते स प्रतिहारः कालं गच्छति तच्छिवनं पारं गच्छति तच्छिवनमेतत् सामदैव्यं मिथुने प्रोतम्" छा०उ० । "प्रतिस्त्रियशयनम् स्त्रियोऽभिमुखीभावेन शयनम् । सहशयनमेकपर्यङ्के शयनम्" भा० ।

प्रतिस्पर्द्धा स्त्री प्रति+स्पर्द्ध-भावे अङ् । प्रतिरूपस्पर्द्धायां प्रतिकक्षतायाम् शब्दरत्ना० ।

प्रतिस्पश पु० प्रतिरूपः स्पशः । प्रतिदूते

प्रतिस्रोतस् न० प्रतीपं स्रोतः प्रा०स० । स्रोतसोगमनप्रतिकूले

प्रतिस्वर पु० प्रति+स्वृ-शब्दोपतापयोः भावे आधारे वा घञ् । १प्रतिशब्दे २उपतापाधारे आदित्यात् अग्निस्माद्नसाधने शुष्कगोमयादौ च । तत्प्रकारः निरुक्ते उक्तः यथा "उदीचि प्रथमसमाहृत्य आदित्ये वंसं वा मथिं वा परिस्तृत्य प्रतिस्वरे यत्र शुष्कगोमयं संस्पर्शयन्धारयति तत्प्रदीप्यते सोऽयमेव संपद्यते" । प्रतिस्वरे उपतापाधारे सूर्यकिरणसम्पर्कस्थाने इत्यर्थः ।

प्रतिहत त्रि० प्रति+हन-क्त । १हिंसिते २रुद्धे ३निरस्ते ४प्रतिस्खलिते च मेदि० । भावे क्त । ५निरासे न०अमरः ।

प्रतिहति स्त्री प्रति+हन-भावे क्तिन् । १प्रतिघाते आकस्म-

पराङ्मुखो २रोषे च। तस्य कामप्रतिहत्या जायमानत्वात् तथात्वम्।

प्रतिहर्त्तृ त्रि॰ प्रति+हृ-तृन्। १पुनराहरणकर्त्तरि २यज्ञियमेदे पु॰ यज्ञावाकशब्दे ८२६ पृ॰ दृश्यम्। स च प्रतिरूपसामभेदगाता प्रतिहारशब्दे दृश्यम्।

प्रतिहर्षण न॰प्रतिरूपं हर्षणम् प्रा॰स॰। १हर्षानुरूपे हर्षे णिच्-ल्युट्। २प्रतिरूपसन्तोषसम्पादने च।

प्रतिहस्तक पु॰ प्रतिरूपः हस्तो यस्य प्रा॰ब॰ कप्। हस्तसाध्यक्रियाप्रतिरूपक्रियाकारिणि प्रतिनिधौ स्त्रियां टाप्।

प्रति(ती)हार पु॰ प्रत्येकं हरति स्वामिपार्श्वमानयति अण् वा दीर्घः। १द्वारपाले अमरः। स्त्रियां ङीष् गौरा॰ङीष् वा। आधारे घञ्। तदधिष्ठानस्थाने २द्वारे च शब्दर॰। प्रतिरूपं हरति हृ-अण् उप॰स॰। ३मायाकारे भरतः। साम्नस्तृतीयभागे उद्गात्रा गेये ४सामावयवभेदे उद्गीथशब्दे १।७०पृ॰दृश्यम्। तस्य देवता च अत्र यथोक्तं ऋ॰भ॰ "अथ हैनं प्रतिहर्तोपससाद प्रतिहर्तर्यां देवता प्रतिहारमन्वायत्ता ताञ्चेदविद्वान् प्रतिहरिष्यसि मूर्द्धा ते विपतिष्यतीति सा भगवानवोचत्कतमा सा देवतेति। अन्नमिति होवाच सर्वाणि ह वा इमानि भूतान्यन्नमेव प्रतिहरमाणानि जीवन्ति सैषा देवता प्रतिहारमन्वायत्ता ताञ्चेदविद्वान् प्रत्यहरिष्यो मूर्द्धा ते व्यपतिष्यतयोक्तस्य मयेति"।

प्रतिहारक पु॰प्रति+हृ-ण्वुल्। १मायाकारे भरतः २स्थानान्तरप्रापके त्रि॰ ३प्रतिहारस्वरूपसामावयवमातरि पु॰।

प्रति(ती)हास पु॰प्रतिरूपः हासः प्रा॰स॰ वा दीर्घः। १येन हासः कृतः तं प्रति हासे प्रा॰ब॰। २तत्कारके त्रि॰। ३करवीरवृक्षे पु॰ अमरः।

प्रतिहृर पु॰ प्रति+हृ-आधारे अप्। समीपे ऋ॰७।६६।१४

प्रतीक पु॰प्रति+कन् नि॰ दीर्घः। १अवयवे अमरः। २प्रतिरूपे शब्दचन्द्रिकोक्ते च मेदि॰ प्रतीकोपासनं च ब्रह्मप्रतीकानामादित्यादीनां ब्रह्मदृष्ट्युपासनं तच्च शा॰सू॰भा॰ दर्शितं यथा

"न प्रतीके न हि सः" सू॰ "मनो ब्रह्मेत्युपासीतेत्यध्यात्ममथादिदैवतमाकाशो ब्रह्म" (छा॰ ३।१८) इति, तथा "आदित्यो ब्रह्मेत्यादेशः,(छा॰३।१९) स यो नाम ब्रह्मेत्युपास्ते" (छा॰।७।५) इत्येवमादिषु प्रतीकोपासनेषु संशयः, किमेष्वप्यात्मपक्षः कर्त्तव्यो न वेति। किं तावत् प्राप्तमेतेष्वप्यात्मपक्ष एव युक्तः, कस्मात्, ब्रह्मणः स्तुतिपात्रत्वेन प्रसिद्धत्वात्। प्रतीकानामपि ब्रह्मविकारत्वात् ब्रह्मत्वे सत्यात्मत्वोपपत्तेरित्येवं प्राप्ते ब्रूमः। न प्रतीकेष्वात्मदृष्टिं कुर्य्यात्, न हि स उपासकः प्रतीकानि व्यस्तान्यात्मत्वेनाकलयेत्। यत्पुनर्ब्रह्मविकारत्वात् प्रतीकानां ब्रह्मत्व तत्त्वात्मत्वमिति। तदसत् प्रतीकाभावप्रसङ्गात्। विकारस्वरूपोपमर्देन हि नामादिजातस्य ब्रह्मत्वमेवाश्रितं भवति, स्वरूपोपमर्दे च नामादीनां कुतः प्रतीकत्वमात्मत्वं वा। न च ब्रह्मण आत्मत्वात् ब्रह्मदृष्ट्युपदेशेष्वात्मदृष्टिः कल्प्या, कर्त्तृत्वादिनिराकरणात्, कर्त्तृत्वादिसर्वसंसारधर्मनिराकरणेन हि ब्रह्मण आत्मत्वोपदेशस्तदनिराकरणेन चोपासनविधानम्, अतश्चोपासकस्य प्रतीकैः समत्वादात्मपक्षो नोपपद्यते, न हि रज्वरुक्तिकयोरितरेतरात्मत्वमस्ति, सर्वात्मनैव तु ब्रह्मात्मत्वैकत्वे प्रतीकाभावप्रसङ्गमवोचाम। अतो न प्रतीकेष्वात्मदृष्टिः क्रियते" भा॰ "ब्रह्मदृष्टिरुत्कर्षात्" सू॰ "तेष्वेवोदाहरणेषु अन्यः संशयः, किमादित्यादिदृष्टयो ब्रह्मण्यध्यसितव्याः किंवा ब्रह्मदृष्टिरादित्यादिष्विति। कुतः संशयः, सामानाधिकरण्ये कारणानवधारणात्। अत्र हि ब्रह्मशब्दस्यादित्यादिशब्दैः सामानाधिकरण्यमुपलभ्यते, "आदित्यो ब्रह्म प्राणो ब्रह्म विद्युद्ब्रह्म" इत्यादिसमानविभक्तिनिर्देशात्। न चात्रान्यत्वं सामानाधिकरण्यमवकल्पते अर्थान्तरवचनत्वात् ब्रह्मादित्यादिशब्दानां, न हि भवति गौरश्व इति सामानाधिकरण्यम्। नन्व प्रकृतिविकारभावात् ब्रह्मादित्यादीनां स्वच्छरावादिवत् सामानाधिकरण्यं स्यात्, नेत्युच्यते, विकारप्रविलयोक्तेर्व प्रकृतिसामानाधिकरण्यात् स्यात्, ततश्च प्रतीकाभावप्रसङ्गमवोचाम, परमात्मवाक्यत्वेदन्तादीनां स्यात्, ततश्चोपासनाधिकारो बाध्येत, परिमितविकारोपासनस्य व्यर्थम्। तस्मात् ब्राह्मणोऽग्निर्वैश्वानर इत्यादिवदन्यतरत्वान्यतरदृष्ट्यध्यासे सति क्व किंदृष्टिरध्यवसातव्येति संशयः तत्रानियमः, नियमकारिणः शास्त्रस्याभावादित्येवं प्राप्तम्। अथ वाऽऽदित्यादिदृष्टय एव ब्रह्मणि कर्त्तव्या इत्येवं प्राप्तम्। एवं हि आदित्यादिदृष्टिभिर्ब्रह्मोपासनञ्च फलवदिति शास्त्रमर्य्यादा। तस्मात् न ब्रह्मदृष्टिरादित्यादिष्वित्येवं प्राप्ते ब्रूमः। ब्रह्मदृष्टिरेवादित्यादिषु स्यादिति। कस्मात् उत्कर्षात्, एवमुत्कर्षेणादित्यादयो दृष्टा भवन्त्युत्कृष्टदृष्टेश्चोपपत्तेः। तथा च

लौकिको न्यायोऽनुगतो भवति, यत्कलहदृष्टिर्हि निकृष्टेऽध्यवसितव्येति लौकिको न्यायः। यथा राजदृष्टिः क्षत्तरि, स चानुगन्तव्यो विपर्यये प्रत्यवायप्रसङ्गात्। न हि क्षत्तृदृष्टिपरिग्रहीतो राजा निकर्षं नीयमानः श्रेयसे स्यात्। नन्वेवं शास्त्रप्रामाण्यादनाश्रयणीयोऽत्र प्रत्यवायप्रसङ्गः, न च लौकिकेन न्यायेन शास्त्रीया दृष्टिर्नियन्तुं युक्तेति। अत्रोच्यते, निर्द्धारिते शास्त्रार्थे एतदेवं स्यात्, सन्दिग्धे तु तस्मिन् तन्निर्णयं प्रति लौकिकोऽपि न्याय आश्रीयमाणो न विरुध्यते, तेन चोत्कलहदृष्ट्याश्रिते शास्त्रार्थेऽवधार्यमाणे निकृष्टदृष्टिमध्यस्य प्रत्यवैदादिति सिध्यति। प्राचुर्याच्छादिस्यादिगब्दानां सख्यार्थत्वमविरोधात् परीतव्यम्। तैः स्वार्थदृष्टिभिरवरुद्धायां बुद्धौ पश्चादवतरतो ब्रह्मगब्दस्य सख्यदृष्ट्या सामानाधिकरण्यप्रसञ्जनात् ब्रह्मदृष्टिविधानार्थतैवावतिष्ठते। इतिपरत्वादपि ब्रह्मगब्दस्यैव एवार्थो न्याय्यः। तथा हि ब्रह्मेत्यादेयः ब्रह्मेत्युपासीत ब्रह्मेत्युपास्त इति च सर्वत्रेतिपरं ब्रह्मगब्दमुच्चारयति गुडांस्त्यादित्यादिगब्दान्। ततश्च यथा शुक्तिकां रजतमिति प्रत्येतीत्यत्र शुक्तिवचन एव शुक्तिकागब्दः रजतगब्दस्तु रजतप्रतीति लक्षणार्थः प्रतीत्यैव हि केवलं रजतमिति न तु तत्र रजतमस्ति, एवमत्राप्यादित्यादीत् ब्रह्मेति प्रतीयादिति गम्यते। वाक्यशेषोऽपि च द्वितीयानिर्देशेनादित्यादीनेवोपास्तिक्रियया व्याप्यमानान् दर्शयति "स य एतदेवं विद्वानादित्यं ब्रह्मेत्युपास्ते" (छा०३।१९) "यो वाचं ब्रह्मेत्युपास्ते"(छा०७।६।१) "यः सङ्कल्पं ब्रह्मेत्युपास्ते" (छा०७।६।३) इति। यत्तूक्तं ब्रह्मोपासनमेवात्रादरणीयं फलवत्त्वायेति, तदयुक्तं यस्मेन न्यायेनादित्यादीनामेवोपास्यत्वावगमात्। फलन्त्वतिव्याद्युपासन इवादित्याद्युपासनेऽपि ब्रह्मैव दास्यति सर्वाध्यक्षत्वात्। वर्णितञ्चैतत्, "फलमत उपपत्तेः" इत्यत्र (वे०सू०३।२।३८)। ईदृशत्वात्र ब्रह्मण उपास्यत्वं यत्प्रतीकेषु तद्दृष्ट्यारोपणं प्रतिमादिष्विव विष्ण्वादीनाम्।

तत्फलविशेषोऽपि तत्र निर्णीतो यथा "अप्रतीकालम्बनान्नयतीति बादरायण उभयथाऽदोषात् तत्क्रतुश्च" सू० "स्थितमेतत् कार्यविषया गतिर्न परविषयेति। इदमिदानीं सन्दिह्यते, किं सर्वान् विकाराल्लम्बनानविशेषेणैवामानवः पुरुषः प्रापयति ब्रह्मलोक उत कांश्चिदेवेति। किं तावत् प्राप्तं सर्वेषामेवैषां विदुषामन्यत्र परत्वात् ब्रह्मणो गतिः स्यात्। तथा हि "अनियमः सर्वेषाम्" इत्यत्राविशेषेणैषा विद्यान्तरेष्ववतारितेत्येवं प्राप्ते प्रत्याह अप्रतीकालम्बनानिति। प्रतीकालम्बनान् वर्जयित्वा सर्वानन्यान् विकारालम्बनान्नयति ब्रह्मलोकमिति बादरायण आचार्यो मन्यते। न ह्येवमुभयथाभावाभ्युपगमे कश्चित् दोषोऽस्ति। अनियमन्यायस्य प्रतीकव्यतिरिक्तेष्वभ्युपासनेषूपपत्तेः। तत्क्रतुश्चास्योभयथाभावस्य समर्थको हेतुर्द्रष्टव्यः। यो हि ब्रह्मक्रतुः स ब्राह्मणैरर्थ्यमासीदेतदिति शिष्यते "तं यथा यथोपासते तदेव भवन्ति" इति श्रुतिः। न तु प्रतीकेषु ब्रह्मक्रतुत्वमस्ति प्रतीकप्रधानत्वादुपासनस्य। नन्वब्रह्मक्रतुमानमपि ब्रह्म गच्छतीति श्रूयते यथा पञ्चाग्निविद्यायाम् "स एतान् ब्रह्म समयति" इति। भवतु यत्रैवमपवाद उपलभ्यते, तदभावे स्वौत्सर्गिकेन तत्क्रतुन्यायेन ब्रह्मक्रतुनामेव तत्प्राप्तिर्नेतरेषामिति मन्यते" भा० "विशेषञ्च दर्शयति" सू० "नामादिषु प्रतीकोपासनेषु पूर्वस्मात् पूर्वस्मात् फलविशेषस्तत्तरस्मिंस्तत्तरस्मिंश्चोपासने दर्शयति "यावन्नाम्नो गतं तत्रास्य यथा कामचारो भवति" "वाग्वाव नाम्नो भूयसी यावद्वाचो गतं तत्रास्य यथा कामचारो भवति" "मनो वाव वाचो भूयः" इत्यादिना। स चायं फलविशेषः प्रतीकतन्त्रत्वादुपासनानामुपपद्यते, ब्रह्मतन्त्रे तु ब्रह्मणोऽविशिष्टत्वात् कथं फलविशेषः स्यात्। तस्मात्र प्रतीकालम्बनानामितरेष्वनुल्यफलत्वमिति" भा०। वसुदेवस्य ४पुत्रभेदे भाग० ९।२४।१२

प्रती(ति)कार पु०प्रति+कृ घञ् दीर्घः। १कृतापकारस्य प्रत्यपकारे वैरनिर्यातने अमरः २रोगनिवारणोपाये चिकित्सायाम् शब्दमा०, [अमरः। अस्य नित्यसमासः। मेघप्रतीकाशः।

प्रती(ति)काश पु० प्रति+काश-घञ् वा दीर्घः। उपमायाम्

प्रतीकाश्व पु० भानुमच्छ्वपुत्रभेदे भाग० ९।१२।६

प्रतीक्षा स्त्री प्रति+ईक्ष-भावे अङ्। अपेक्षायाम्। भावे ल्युट्। प्रतीक्षण तत्रार्थे न०।

प्रतीक्ष्य त्रि० प्रति+ईक्ष-कर्मणि यत्। १पूज्ये २अपेक्षणीये च "प्रतीक्ष्यं तत् प्रतीक्ष्यायै पिहध्वञ्चे प्रतिश्रुतम्" इति भावः।

प्रती(ति)घात पु०प्रति+हन-भावे घञ् वा दीर्घः। प्रतिघाते

प्रतीची स्त्री प्रत्यच्+स्त्रियां ङीप् अञ्चोपे दीर्घः। पश्चिमायां दिशि यदपेक्षया सूर्यास्ताचलसन्निहिता या दिक् सा तदपेक्षया तस्य प्रतीची कथा० उप० इत्तिः।

प्रतीचीन त्रि॰ प्रतीचि भवः प्रत्यच्+ख अञ्जोपे दीर्घः। १प्रत्यगभवे २पश्चिमदिग्भवे च। स्वार्थे ख। ३प्रतीचि पदार्थे हेमच॰। अत॰ब्रा॰ ५।२।४।२॰ प्रतीचीनफल्गुम्।

प्रतीच्य त्रि॰ प्रतीचि भवः प्रत्यच्-भवार्थे यत्। १प्रत्यगभवे २पुत्रस्त्रीमातरि स्त्री भा॰ब॰।१६ऋ॰। ३अन्तर्हिते त्रि॰ निघण्टुः। [मनुः ४।१६।४ स्त्री॰।

प्रतीच्छक त्रि॰ प्रतिगता इच्छा यस्य प्रा॰ब॰ कप्। याचके

प्रतीत त्रि॰ प्रति+इण-क्त। १ख्याते २ज्ञाते अमरः। ३हृष्टे ४सादरे च राजनि॰। ५विश्वेदेवगणभेदे पु॰भा॰अनु॰९१ऋ॰

प्रतीति स्त्री प्रति-इण-भावे क्तिन्। १ज्ञाने २ख्यातौ ३आदरे ४हर्षे च।

प्रतीतोद पु॰ "अर्द्धं शाकरमटाक्षरमभ्यासवत् तस्य ह्रस्वरान् पदादीन् प्रतीतोदा ह्रस्वाचक्षते" ह्रस्वुक्के अर्थे।

प्रतीन्धक पु॰ विदेहदेशे रामा॰ अयो॰ ७१।९ स्त्री॰।

प्रतीप त्रि॰ प्रतिगता आपोऽत्र अच्समा॰ नि॰ प्रतिप+पृषो॰ वा। १प्रतिकूले चन्द्रवंश्ये २नृपभेदे पु॰ हेमच॰। प्रतिपशब्दे दृश्यम्। ३अलङ्कारभेदे अलङ्कारशब्दे २८८पृ॰ दृश्यम्। ज्ञाने परेऽन्योदात्तताश्च वा परनिपातः प्रतीक्षतः ज्ञतप्रतीप इति वा। स्वार्थे क। ४तत्रार्थे। ऋर्य्यश्वन्दपपुत्रवदोः पुत्रे भाग॰ ९।१२।१२ तत्र प्रतिपक्ष इति पाठान्तरम् तत्रार्थे। ततः सुखा॰ अच्प्रत्ययः टिलोपः। प्रतीपकिन् तद्युते त्रि॰ स्त्रियां ङीप्। सुखादिपाठात् ततः ठन्मतुपौ न स्तः।

प्रतीपदर्शिन् त्रि॰प्रतीपं वामं पश्यति दृश-णिनि। १प्रतिकूलदर्शके स्त्रियां ङीप्। सा च २स्त्रियाम् अमरः।

प्रतीपाक्ष पु॰ राजभेदे विष्णुपु॰।

प्रतीर न॰ प्रतीर्य्यते प्र+तीर-क। १तटे तीरे अमरः। २भौत्यमनुपुत्रभेदे मार्क॰पु॰ १००अ॰।

प्रतीवाप पु॰ प्रति+वप-घञ् दीर्घः। १गलितस्त्रर्थादेरवचूर्णने अमरः। २पेयौषधिभेदे औषधविशेषसंयोगभेदे च "तत्र वीरतर्वादिसिद्धं जलमूषकादि प्रतीवापं पाययेत्" सुश्रुतः। [भाग॰ ५।१५।२

प्रतीह पु॰ भरतवंशजे सुवर्चलायां जाते परमेष्ठिनः पुत्रभेदे

प्रतुद पु॰ प्र+तुद-क। खगभेदे "हारीतो धवलः पाण्डुश्चित्रपक्षो दृढच्छदः। पारावतः खञ्जरीटः पिकाद्याः प्रतुदाः स्मृताः"। "प्रतुद्य भक्षयन्त्येते तुण्डेन प्रतुदास्ततः" "प्रतुदा मधुराः पित्तकफघ्नास्त्रुवरा स्निग्धाः। लघवो बहुवर्च्चसा किञ्चिद्वातकराः स्मृताः" भावप्र॰।

प्रतूर्त्त त्रि॰ प्र+तॄर-वेगे क्त। १प्रकृष्टवेगान्विते भावे क्त। २प्रकृष्टवेगे न॰। ततो गोपदादि॰मत्वर्थे वुन्। प्रतूर्त्तक तद्युते त्रि॰

प्रतूलिका स्त्री प्रकृष्टं तूलमत्र कप् आपि ह्रस्वश्च (तोषक) शय्याभेदे स्त्रीपी॰ङीष्। [नदखुरे (चाबुक) अमरः।

प्रतोद पु॰ प्रतुद्यतेऽनेन प्र+तुद-करणे घञ्। अश्वादिताड़े॰

प्रतोली स्त्री प्र+तुल-अच् गौरा॰ङीष्। १रथ्यायाम् २पुराभ्यन्तरवर्त्मनि अमरः हड्डादौ निर्मिते ३पथि च मेदिनिः।

प्रतोष पु॰प्र+तुष-भावे घञ्। १सन्तोषे प्रकृष्टस्तोषोऽस्य प्रा॰ब॰। २सन्तोषयुते त्रि॰। ३स्त्रायम्भुवमनोः पुत्रभेदे पु॰ भाग॰ ४।१।७ स्त्री॰। [पुराणनामसु निघण्टुः।

प्रत्न त्रि॰ पुराणार्थे प्र+भवार्थे त्न। १पुराणे अमरः।

प्रत्यंशुलि॰प्रतिगतोऽंशुम् अत्ता॰स॰। १प्राप्तांशुके। तत्पुरुषे कृत्ता॰ अन्तोदात्तताश्च। प्रतिगतोऽंशुर्येन प्रा॰ब॰। २प्रतिगतांशुके त्रि॰ तत्पुरुषे ह्रस्वुक्लोः बहुव्रीहौ नान्तोदात्तता।

प्रत्यक्चेतन पु॰प्रतीपं विपरीतमर्थजातं जानाति प्रति+अञ्च-क्विप् कर्म॰। १सांख्यमतसिद्धे पुरुषे। "ततः प्रत्यक्चेतनाधिगमः अन्तरायाभावश्च" योगसू॰ भाष्यम्। प्रत्येकम् अञ्चति अञ्चते कर्म॰। सर्वेषु २अन्तरात्मनि परमेश्वरे तदभिन्ने ३जीवे च प्रत्यक्शब्दे दृश्यम्। [अमरः

प्रत्यक्पर्णी स्त्री प्रत्यचि पर्णान्यस्याः ङीप्। १अपामार्गे

प्रत्यक्पुष्पी स्त्री प्रत्यक् पुष्पमस्याः ङीप्। अपामार्गे अमरः

प्रत्यक्श्रेणी स्त्री प्रतीची श्रेणीव अस्याः समासान्तविधेरनित्यत्वात् न कप्। १दन्तीवृक्षे २भूम्यिकपर्णाञ्च अमरः।

प्रत्यक्ष अव्य॰ अक्ष्णः सप्तमम् "सप्तम्येनाभिप्रती" पा॰ सप्तम्यर्थे प्रतिनाऽव्ययी॰ अरदा॰ अच्समा॰ अक्षिशब्देन इन्द्रियमात्रम् उच्यते।१इन्द्रियसप्तमे ततोऽस्यर्थे अच्। २इन्द्रियसन्निकर्षजन्ये ज्ञाने न॰। इन्द्रियाणाञ्च ज्ञानमात्रं प्रत्येव सन्निकर्षद्वारा हेतुत्वात् तथात्वम्। ततः अस्यर्थे पुनः अर्थे आदाच्। ३प्रत्यक्षविषये त्रि॰। प्रत्यक्षत्वं च ज्ञानत्वव्याप्यजातिविशेषः तल्लक्षणन्तु इन्द्रियार्थसन्निकर्षोत्पन्नज्ञानत्वमिति नैयायिकाः। अधिकमपरोक्षशब्दे २१५ पृ॰ दृश्यम् प्रत्यक्षशब्दे च २६७२ पृ॰ दृश्यम्। वेदान्तमते तल्लक्षणन्तु "तत्तदिन्द्रियवोन्मवर्त्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं तत्तदाकारवृत्त्यवच्छिन्नज्ञानस्य तत्तदंशे प्रत्यक्षत्वम्। स्वाकारवृत्त्युपहितप्रमाणचैतन्यसत्तातिरिक्तसत्ताकत्वशून्यत्वे सति वर्त्तमानयोगित्वं विषयस्य प्रत्यक्षत्वम्" वेदा॰प॰। तच्च लौकिकालौकिकभेदात् द्विधा।

प्रत्यक्षदर्शन वि० प्रत्यक्षेण पश्यतीति दृश्—ल्यु। साक्षिणि साक्षाद्दर्शिनि शब्दमाला। णिनि। प्रत्यक्षदर्शिन् तत्रार्थे वि० स्त्रियां ङीप्।

प्रत्यक्षलक्षण न० प्रत्यक्षं पृथक्तयोपलभ्यमानं लक्षणम्। पाकनिष्पत्त्युत्तरं व्यञ्जनादौ दीयमानलक्षणे। तस्य श्राद्धे यदेवतोक्ता यथा श्रा०त० ब्रह्मपु० "सिद्धाः कृताश्च ये भक्ष्याः प्रत्यक्षलक्षणोक्ताः" श्राद्धे तस्य वर्ज्यतयोक्तेः "सिद्धाः कृताः सिद्धपुरस्कारं प्रत्यक्षलक्षणमुपेक्षिताः" श्रा०त० रघु०। तत्रैव विष्णुना श्राद्धवर्ज्येषु "आरक्षाः क्षैव निर्यासाः प्रत्यक्षलक्षणानि च" इत्युक्तम्। शु०त० ब्रह्मपु० "सैन्धवं लवणं चैव यच्च साक्षाद्भवेत्। पक्वेऽपरमे क्षीते प्रत्यक्षेऽपि च नित्यशः"। "पृथक्तयोपलभ्यमानं लवणं प्रत्यक्षलवणं न तु व्यञ्जनादिसंस्कारकं संस्कारप्रत्यक्षयोर्भेदात्" शु०त०रघु०। वस्तुतः सैन्धवादेरपि प्रत्यक्षलवणत्वेऽभक्ष्यता आर्द्रकादियोगे प्रतिप्रसवः न तु सिद्धपुरस्कारप्रक्षेपेऽपि प्रतिप्रसवः। अतः सिद्धपुरस्कारं लवणमात्रस्यैव प्रक्षेपे सर्वत्र भक्षणे दाने च निषेधः इति बोध्यम्।

प्रत्यक्षवादिन् पु०प्रत्यक्षमेव प्रमाणतया वदति वद्—णिनि। चार्वाके चार्वाकशब्दे २६२१पृ० दृश्यम्।

प्रत्यक्षिन् त्रि० प्रत्यक्षमस्यास्ति इनि। १साक्षाद्दृष्टरि व्यक्तं दृष्टार्थे त्रिका० स्त्रियां ङीप्।

प्रत्यक्स्रोतस् पु० प्रत्यक् प्रतीचीगामि स्रोतो यस्य। १पश्चिमदिग्वाहिनि नदे "प्राक्स्रोतसो नदाः प्रत्यक्स्रोतसो नदा नर्मदां विना" भाग ४।६६ श्लो० श्रीधरीयायां भक्तिमाधवृतवाक्यम्। २नर्मदायां स्त्री भा० व० ८६अ०। प्रतीचि प्रत्यगात्मनि स्रोतश्चित्तप्रवाहोऽस्य। प्रत्यगात्मैकपरचित्तवृत्तियुते ३यतिभेदे पु०।

प्रत्यगात्मन् प्रतीचो जीवस्यात्मा स्वरूपम्। १परमेश्वरे ब्रह्मचैतन्ये भागव०३।२३।३५ श्रीधरः। "कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्" कठो० भाष्ये च अन्यत्रोक्तं यथा "प्रत्यक् चासावात्मा चेति प्रत्यगात्मा प्रतीच्येवात्मशब्दो रूढो लोके नात्मन्निव व्युत्पत्तिपक्षेऽपि तत्रैवात्मशब्दो वर्त्तते। "यच्छ्नोति यदादत्ते यच्चात्ति विषयानिह। यच्चास्य सन्ततो भावस्तस्मादात्मेति कीर्त्यते" इत्यात्मशब्दव्युत्पत्तिस्मरणात्। तं प्रत्यगात्मानं स्वस्मादभेदेनात्मत्वेनोत्पश्यतीत्यर्थः" "स्वस्मादभिन्नं स्वरूपमित्यर्थः" आनन्दगिरिः।

प्रत्यगाम्नायपति पु० ६त०। पश्चिमदिक्पाले वरुणे वृक्षायुधः

प्रत्यगुदच् स्त्री प्रतीच्या उदीच्याश्च अन्तराला दिक् ब०व०। पश्चिमोत्तरदिशोरन्तरालायां विदिशि वायुकोणे आग्ने० स्त्री० २६।४।

प्रत्यग्र त्रि० प्रतिगतमग्रमस्यत्वम् अव्या०स०। १नूतने २शोभिते च अमरः। उपचरितचरन्तपर्वतभेदे १७६६पद्मजे ऋषभेदे पु० भाग० ६।२२।४

प्रत्यग्रथ पु० अग्निच्छन्दसि ग्रेमच०। तत्र भवः तस्य राजा वा "साल्वावयवप्रत्यग्रथकैकयकुटाग्रकादिञ्" पा० ६ञ। प्राग्रथीयेऽपि तत्र भवे तद्भूपे च।

प्रत्यग्रह पु० केदिदेशराजे ऋषभेदे भा०आ० ६३अ०।

प्रत्यङ्ग न०प्रतिगतमङ्गम् अव्या०स०। अङ्गानुगताङ्गभेदे अङ्गशाङ्गभेदे कर्णादौ "तलाङ्गान्यन्तराधिसक्थिबाहुशिरांसि तदवयवाः प्रत्यङ्गानि" इत्युक्तेः। अङ्गशब्दे ७०१पृ० दृश्यम्। [भेदे हरिवं० ३अ०।

प्रत्यङ्गिरस् पु० चाक्षुषमन्वन्तरे आङ्गिरसे ऋक्स्वरूपे ऋषि-

प्रत्यङ्गिरा स्त्री देवीभेदे "अथ प्रत्यङ्गिरां वक्ष्ये परकृत्यानिवर्हिणीम्" इत्यादिना मन्त्रमहौषधौ दक्षरक्षे तत्प्रयोग उक्तः।

प्रत्यङ्मुख त्रि० प्रत्यङ्मुखं यस्य। पश्चिमाभिमुखे "स्त्रियं प्रत्यङ्मुखो भुङ्क्ते" मनुना तन्मुखभोजने स्त्रीलाभः फलमुक्तम्। कर्मविशेषे सायंसन्ध्यावन्दने च तन्मुखता विहिता स्मृतौ दृश्या।

प्रत्यच्(ञ्च्) पु० प्रत्यञ्चति अनुभ—क्विप् विच् वा। १स्वात्मनि प्रत्यगात्मनृशब्दे दृश्यम्। २पश्चिमे देशे ३काले च ४पश्चिमायां दिशि स्त्री ङीप् भवे अञ्चोमे दीर्घः प्रतीची। एवं यशादयश्चि प्रतीचः प्रतीचेत्यादि। विचि तु नलोपाभावात् न तथा प्रत्यङ्चः प्रत्यङ्चौ इति। ततः सप्तम्यर्थे ऋचि तस्य लोपः। प्रत्यच् ५सप्तम्यर्थवृत्तौ पश्चिमदिग्देशकालादौ अव्य०। [दृश्यतः।

प्रत्यञ्जन न० प्रतिरूपमनुरूपमञ्जनं प्रा०स०। अनुरूपाञ्जने

प्रत्यनन्तर त्रि० प्रतिप्राप्तमनन्तरम् अव्या०स०। प्रत्यासन्ने कर्त्तव्ये मनुः १०८।

प्रत्यनीक पु०प्रतिकूलमनीकं यस्य प्रा०व०। १रिपौ २विघ्ने च हेम० उपचारात् ३प्रतिवादिनि ४अलङ्कारभेदे न० अलङ्कारशब्दे ४०१ पृ० दृश्यम्।

प्रत्यनुमान न० प्रतिरूपमनुमानं प्रा०त०। प्रतीपानुमाने यथा पर्वतो वह्निमान् धूमादिति वादिनोक्ते पर्वतो वह्न्यभा-

वयात् पाषाणमयत्वादिति" प्रतिवादिनः प्रतिपत्त्यनुमानम् ।

प्रत्यन्त पु० प्रतिगतोऽन्तम् अन्ता०स० । १रूक्षेऽरुक्षे २सन्निकृष्टे त्रि० अमरः । [पक्षे पर्वते हेमच०।

प्रत्यन्तपर्वत पु० प्रत्यन्तः सन्निकृष्टः पर्वतः । इकृत्पर्वतसमो-

प्रत्यभिज्ञा स्त्री प्रतिगता अभिज्ञाम् अन्ता०स०। १अभिज्ञातरूपे तज्जन्यसंस्कारसहकारेण जनिते प्रत्यक्षभेदे यथा सोऽयं देवदत्त इत्यादि । तत्स्वरूपादिकं विवरणप्रमेय संक्षेपे निर्णीतं यथा

"ननु केयं प्रत्यभिज्ञा नाम न तावदेकस्यातीतवर्त्तमानकालद्वयसम्बन्धविषयं प्रत्यक्षज्ञानं प्रत्यभिज्ञा, प्रत्यक्षज्ञानस्य वर्त्तमानमात्रार्थग्राहित्वात् । पूर्वानुभवसंस्कारसहितादिदानीन्तनवस्तुप्रमितिकारणाज्जातस्य तस्य तथात्वमिति चेत् एवमप्यात्मनि सोऽहमिति प्रत्यभिज्ञा न सिद्धेत् नित्ये स्वयंप्रकाशे तस्मिन् संस्कारस्य जन्यज्ञानस्य वाऽसम्भवात् । नापि स्वरूपज्ञानमेव प्रत्यभिज्ञा तस्य प्रदीपप्रभावत् वर्त्तमानार्थप्रकाशिनः पूर्वापरपरामर्शकत्वायोगात्, अवगच्छते तु सोऽहमित्याकारद्वयोपप्लुतं ज्ञानद्वयमेतत्र प्रत्यभिज्ञा । तस्मादनया दृशिरूपया प्रत्यभिज्ञया कथमैक्यसिद्धिः । उच्यते । केवले चिदात्मनि जन्यज्ञानतत्संस्कारयोरसम्भवेऽन्तःकरणविशिष्टे तत्सम्भवाद्भवत्या प्रत्यभिज्ञा किं न स्यात् । न च विशिष्टस्य प्रत्यभिज्ञाविषयत्वे तस्यैव प्रत्यभिज्ञातृत्वमपीति कर्मकर्तृविरोधः शङ्कनीयः, सर्ववादिनां देहव्यतिरिक्तात्मानुमानविषयतयात्मनि कर्मकर्तृभावस्य संप्रतिपन्नत्वात् । अथ मतं नानुमानादौ विषयस्य कर्मकारकत्वम् अतीतादेरनुमाने विषयस्याविद्यमानस्य ज्ञानजनकत्वायोगात् विषयत्वन्त्वविद्यमानस्यापि कथञ्चित् सम्भविष्यति ज्ञानस्य तदाकारत्वात् अतोऽनुमानादौ कर्मत्वमेवात्मनः, प्रत्यक्षे तु विषयस्य ज्ञानजनकतया कर्मकारकत्वम् अतो विरोधस्तदवस्थ इति नैवम् अन्तःकरणविशिष्टतयैवात्मनः प्रत्यभिज्ञात्वं पूर्वापरकालविशिष्टतया च प्रत्यभिज्ञेयत्वमित्युपाधिभेदेनाविरोधात् । किमेतावता प्रयासेन प्रत्यभिज्ञैव मा भूदिति चेत् न, सोऽहमिति प्रत्यभिज्ञायाः स्वानुभवसिद्धत्वात् स्वविसंवादित्वेन च भ्रान्तित्वायोगात् । यदुक्तं सोऽहमित्याकारद्वयोपप्लुतं ज्ञानद्वयमिति तदसत् तव मते विज्ञानं क्षणिकमित्यत्रापि ज्ञानद्वयप्रसङ्गेन विज्ञानस्य क्षणिकत्वासिद्धिप्रसङ्गात् । विज्ञानमात्रवादिनां क्षणिकत्वादिधर्मा अवास्तवाएवेति चेत् तर्हि स्थायित्वादिधर्मा एव वास्तवा उपादीयन्तां सोऽहमित्याद्यनुभवानुसारित्वात् । यच्च प्राभाकरा मन्यन्ते सोऽहमितिप्रत्यभिज्ञायां विषयत्वेनाश्रयोनात्मा सिद्धति किं तर्हि सोऽयं घट इत्यादि प्रत्यभिज्ञाश्रयत्वेनेति, तदयुक्तं पूर्वापरकालविशिष्टस्य क्षणमात्रवृत्तिप्रत्यभिज्ञाश्रयत्वासम्भवेन प्रत्यभिज्ञया स्थायित्वाविद्धिप्रसङ्गात् । अथ मतं मम संवेदनं जातमिति इदानीमनुभूयमाणया पूर्वकालीना घटादिसंवित् स्वाश्रयं तदानीन्तनमात्मानं साधयति स्मृतिश्च स्वाश्रयमिदानीन्तनमात्मानं साधयति ततश्च स्वाश्रयसिद्धिः न पुनरप्रामाणिकं सोऽहमित्यात्मविषयकं प्रत्यभिज्ञानं किञ्चित् कल्पनीयमिति चेत् नैतत् सारम् स्मृतिपूर्वानुभवौ स्वाभिज्ञाद्वयवर्त्ततत्कालीनमात्मानं यद्यपि साधयतः तथाप्येकस्यात्मनः कालद्वयसम्बन्धो न केनापि सिध्यति । संवित्तद्वयमेव सम्बन्धस्यापि साधकमिति चेत् तर्हि तथैव घटादिष्वपि स्थायित्वसिद्धौ ततस्सिद्धये प्रत्यभिज्ञा नापेक्ष्येत । दार्ढ्याय प्रत्यभिज्ञेति चेत् एवमपि प्रकृते संवित्तद्वयं किं साक्षात्सम्बन्धस्य साधकमुत प्रत्यभिज्ञोत्पाद्य, आद्ये न तावदेकैकं तत्साधकम् एकैकस्य कालद्वयविशिष्टात्मन्यनाश्रितत्वात् नापि संभूय तत्साधकम्, अतीतानुभवस्य वर्त्तमानस्मृतेश्च योगपद्यायोगात् । द्वितीये स्वाश्रयात्मविषयं सोऽहमिति प्रत्यभिज्ञानं त्वयैवाङ्गीकृतं स्यात् । न च वाच्यं क्वचिदपि न ज्ञानविषयत्वमात्मनस्तत्कर्तृत्वं प्रत्यभिज्ञाविषयत्वमिति । मम संवेदनं जातमिति स्मृतिज्ञानविषयत्वात् यद्यप्यनेन स्मृतिज्ञानेन स्वोत्पत्तिकालीन आत्मा स्वाश्रयत्वेनैव प्रकाशते न विषयत्वेन तथापि अयं मामसंवेदनाश्रयभूतस्तत्संवेदनकालीन आत्मा विषयीक्रियत एव । अथोच्यते स्मृत्या संवेदनमेव विषयीक्रियते तच्च संवेदनं स्मृतं सत् स्वाश्रयमात्मानमाश्रयत्येव प्रत्याययितुमीति तदसत् स्मृतिकाले संवेदनस्याविद्यमानस्य स्वाश्रयसाधकत्वायोगात् । स्वसंवेद्यप्रकाशमानं हि संवेदनमाश्रयं साधयति न तु स्मृतिविषयतया परप्रकाश्यम् अन्यथा धर्मादीनामपि परतः सिद्धानां स्वाश्रयात्मसाधकत्वप्रसङ्गात् । तस्मादतीतकालीन आत्मा स्मृतिविषय एवेत्यभ्युपेयम् । तथाच सोऽहमिति प्रत्यभिज्ञायात्मानं विषयीकरिष्यतीति प्राभाकरैरभ्यात्मविषयप्रत्यभिज्ञयैव संविदात्मना क्षणिकत्वं निराकरणीयम् ।

प्रत्यभिज्ञादर्शन न० प्रत्यभिज्ञायाः दर्शनम् ष०त०। शाङ्-

श्वरशास्त्रभेदे तन्मतं च सर्वदर्शनसंग्रहे दर्शितं यथा "अनापेक्षाविहीनानां जडानां कारणत्वं दुरुपपादमित्यपरितुष्यन्तो मतान्तरमन्विष्यन्तः परमेश्वरेच्छावशादेव जगद्विसर्गं परिकल्पयन्तः स्वसंवेदनोपपत्त्यागमसिद्धप्रत्यगात्मतादात्म्यो, नानाविधभानभेदाभेदशाली परमेश्वरोऽनन्तसुखप्रेक्षित्वलक्षणस्वातन्त्र्यभाक् स्वात्मदर्पणे भावान् प्रतिबिम्बवदभासयेदिति भक्तो बाह्याभ्यन्तरस्यार्थग्रामस्यामादिकेशप्रयासकलावैधुर्येण सर्वसुखमभिनवं प्रत्यभिज्ञामात्रं परापरसिद्ध्युपायमभ्युपगच्छन्तः परे माहेश्वराः प्रत्यभिज्ञाशास्त्रमभ्यरुन्धि। तत्रेदमपि न्यरूपि परीक्षकैः "सूत्रं वृत्तिर्विवृतिर्वार्त्तिको वृहतीत्वमे विमर्शिन्यौ। प्रकरणविवरणपञ्चकमिति शास्त्रं प्रत्यभिज्ञायाः" तत्रेदं प्रथमं सूत्रम्। "कथञ्चिदासाद्य महेश्वरः शास्त्रार्थं जनस्याप्युपकारमिच्छन्। समस्तसम्पत्समवाप्तिहेतुं तत्प्रत्यभिज्ञास्तवमुपादयामि" इति। कथञ्चिदिति परमेश्वराभिन्नगुरुचरणारविन्दद्वयसमाराधनेन परमेश्वरघटितेनैवेत्यर्थः आसाद्येति वा समन्तात् परिपूर्णतया सादयित्वा स्वात्मोपभोग्यतां निरर्गलां गमयित्वा तदनेन विदितवेद्यत्वेन परार्थशास्त्रकरणेऽधिकारो दर्शितः अन्यथा प्रतारणमेव प्रसजेत्। मायोत्तीर्णा अपि महामायाधिकृता विष्णुविरिञ्चाद्या यदीवैश्वर्यलेशेनेश्वरीभूताः स भगवाननवच्छिन्नप्रकाशानन्दस्वातन्त्र्यपरमार्थो महेश्वरः तस्य दास्यं दीयतेऽस्मै स्वामिना सर्वं यथाभिलषितमिति दासः परमेश्वरस्वरूपस्वातन्त्र्यप्राप्तिमित्यर्थः। जनशब्देनाधिकारिविषयनियमाभावः प्रादर्शि। यस्य यस्य हीदं स्वरूपकथनं तस्य तस्य महाफलं भवति प्रधानस्यैव परमार्थफलत्वात्। तथोपदिष्टं शिवदृष्टौ परमगुरुभिर्भगवत्सोमानन्दनाथपादैः "एकवारं प्रमाणेन शास्त्राद्वा गुरुवाक्यतः। ज्ञाते शिवत्वे सर्वत्वे प्रतिपत्त्या दृढात्मना। करणेन नास्ति कृत्यं क्वापि भावनया सकृत्। ज्ञाते सुवर्णे करणं भावनां वा परित्यजेत्" इति। अपिशब्देन स्वात्मनस्तदभिन्नतामाविष्कुर्वता पूर्णत्वेन स्वात्मनि परार्थसम्पत्त्यतिरिक्तप्रयोजनान्तरावकाशश्च पराकृतः। परार्थश्च प्रयोजनं भवत्येव तद्धि तथयोगात् न त्वयं देवशापः, स्वार्थ एव प्रयोजनं न परार्थ इति। अत एवोक्तमत्रपादेन "यमर्थमधिकृत्य प्रवर्त्तते तत्प्रयोजनम्" इति। उपशब्दः सामीप्यार्थः तेन जनस्य परमेश्वरसमीपताकरणमात्रं फलम् अत एवाह समश्नुते परमेश्वरतालाभे हि सर्वाः सम्पदश्चिच्चमत्कृत्यः सम्पन्ना एव रोहणाचललाभे रत्नसम्पद एव। एवं परमेश्वरतालाभे किमन्यत् प्रार्थनीयम्। तदुक्तमुत्पलाचार्यैः "भक्तिलक्ष्मीसमृद्धानां किमन्यदुपबृंहितम्। एतया वा दरिद्राणां किमन्यदुपबृंहितम्" इति। इत्थं षष्ठीसमासपक्षे प्रयोजनं निर्दिष्टम्। बहुव्रीहिपक्षे तु पायः समस्तस्य बाह्याभ्यन्तरस्य नित्यसुखादेर्या सम्पत्सिद्धिः तथात्वप्रकाशः तस्याः सम्यगवाप्तिर्यस्याः प्रत्यभिज्ञायाः हेतोः सा तथोक्ता तस्य महेश्वरस्य प्रत्यभिज्ञा प्रतिसन्धानाभिमुख्येन ज्ञानम्। लोके हि स एवार्थं चैत्र इति प्रतिसन्धानेनाभिमुखीभूते वस्तुनि ज्ञानं प्रत्यभिज्ञेति व्यवह्रियते इहापि प्रसिद्धपुराणसिद्धागमानुमानादिज्ञातपरिपूर्णशक्तिके परमेश्वरे सति स्वात्मन्यभिमुखीभूते तच्छक्तिप्रतिसन्धानेन ज्ञानमेतेति नूनं स एवेश्वरोऽहमिति। तामेतां प्रत्यभिज्ञामुपादयामि उपपन्नः सम्भवतीति तत्समर्थाचरणेन प्रयोजनव्यापारेण सम्पादयामीत्यर्थः। यदीश्वरस्वभाव एवात्मा प्रकाशते तर्हि किमनेन प्रत्यभिज्ञादर्शनप्रयासेनेति चेत् तत्रायं समाधिः स्वप्रकाशतया सततमवभासमानेऽप्यात्मनि मायावशात् भानेन न प्रकाशते पूर्णतावभाससिद्धये इच्छाक्रियाज्ञानशक्त्याविष्करणेन प्रत्यभिज्ञा प्रदर्श्यते। तथा च प्रयोगः स्वयमात्मा परमेश्वरो भवितुमर्हति ज्ञानक्रियाशक्तिमत्त्वात् यो यावति ज्ञाता कर्त्ता च स तावतीश्वरः प्रसिद्धेश्वरवत् राजवदात्मा च विश्वज्ञाता कर्त्ता च तस्मादीश्वरोऽयमिति अत्रयवपञ्चकस्याश्रयणं मायावादेन नैयायिकमतस्य रुचीकारात्। तदुक्तमुदयकरशुक्लेन "कर्त्तरि ज्ञातरि स्वात्मन्यादिसिद्धे महेश्वरे। अजडात्मा निषेधं वा सिद्धिं वा विदधीत कः। किन्तु मोहवशादस्मिन् दृष्टेऽप्यनुपलक्षिते। शक्त्याविष्करणेनेयं प्रत्यभिज्ञोपदर्श्यते"। तथा हि "सर्वेषामपि भूतानां प्रतिष्ठा जीवदाश्रया। ज्ञानं क्रिया च भूतानां जीवतां जीवनं मतम्। तत्र ज्ञानं स्वतः सिद्धं क्रिया कार्यान्विता मतौ। परैरप्युपलक्ष्येत तयाऽन्यज्ञानसच्यते" इति। "या चैषां प्रतिभा तत्तत्पदार्थक्रमरूपिता। स्वक्रमानन्दचिद्रूपः प्रमाता स महेश्वरः" इति च। सोमानन्दनाथपादैरपि "सदा शिवात्मना वेत्ति सदा वेत्ति सदात्मना" इत्यादि। ज्ञानाधिकारपरिसमाप्तावपि "तदैक्येन विना नास्ति संविदां लोकपद्धतिः। एकात्मैक्यात्तदैक्यं

मातैकः स इति स्थितः। स एवार्थभरत्वेन नियतेन महेश्वरः। विमर्श एव देवस्य शुद्धे ज्ञानक्रिये यतः" इति। विवृतं चाभिनवगुप्ताचार्यैः "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति" श्रुत्या प्रकाशचिद्रूपमहिम्ना सर्वस्य भावजातस्य भासकत्वमभ्युपेयते ततश्च विषयप्रकाशस्य नीलप्रकाशः पीतप्रकाश इति विषयोपरागभेदाद्भेदः। वस्तुतस्तु देशकालाकारसङ्कोचैकल्याद्भेद एव स एव चैतन्यरूपः प्रकाशः प्रमातेत्युच्यते। तथा च पठितं शिवसूत्रेषु "चैतन्यमात्मेति"। तस्य चिद्रूपत्वमनवच्छिन्नविमर्शत्वमनन्तोल्लसदानन्दैकघनत्वं माहेश्वर्यमिति पर्यायः स एव शुद्धं भावात्मा विमर्शः शुद्धे पारमार्थिक्यौ ज्ञानक्रिये तत्र प्रकाशरूपता ज्ञानं, यतो जगद्विमर्शनत्वं क्रिया। तच्च निरूपितं क्रियाधिकारे "एष चानन्दशक्तित्वादेवमाभासवत्वमपि। भावनिच्छावशादेषा क्रिया निर्भरतास्य तु"। उपसंहारेऽपि "इत्थं तथा घटपटाद्याकारजगदात्मना। तिष्ठासोरेवमिच्छैव हेतुकर्तृकता क्रियेति। तस्मिन् सतीदमश्नोति कार्यकारणतापि या। साप्यपेक्षाविहीनानां जडानां नोपपद्यते" इति न्यायेन यतो जडस्य न कारणता न वा स्वतोऽस्वतन्त्रस्य चेतनस्यापि तथाभूतेन तेन जगदहंतन्मयस्वित्वादिभावविकारतत्तद्भेदक्रियासङ्कुचद्रूपेण स्वातन्त्र्यमिच्छोः स्वतन्त्रस्य भगवतो महेश्वरस्योत्तरोत्तरमच्छस्वभावा क्रिया विश्वकर्तृत्वं वोच्यते इति। इच्छामात्रेण जगन्निर्माणमित्यत्र दृष्टान्तोऽपि स्पष्टं निर्दिष्टः "योऽभिनाभपि मृद्बीजे विनैवेच्छावशेन यत्। घटादि जायते तत्तत् स्थिरस्वार्थक्रियाकरम्" इति। यदि घटादिकं प्रति मृदादेः परमार्थतः कारणं स्यात्तर्हि कथं योगीच्छामात्रेण घटादिजन्म स्यात्। अयोच्येत अन्य एव मृद्बीजादिजन्या घटाङ्कुरादयो योगीच्छाजन्यास्त्वन्या एवेति तत्रापि बोध्यते सामग्रीभेदात्तावत् कार्यभेद इति सर्वजनप्रसिद्धम्। ये तु वर्षवह्नि नोपादानं विना घटाद्युत्पत्तिरिति योगी त्विच्छया परमाणून् व्यापारयन् सङ्कुटयतीति तेऽपि बोधनीयाः। यदि परिदृष्टकार्यकारणभावविपर्ययो न लभ्येत तर्हि घटे मृद्दण्डचक्रादिदेहे स्त्रीपुरुषसंयोगादि सर्वमपेक्ष्येत तथा च योगीच्छासमनन्तरसञ्जातघटदेहादिसम्भवो दुःशक्य एव स्यात्। चेतन एव तु तथा भाति भगवान् भूरिभगो महादेवो नियत्यतुवर्त्तनोल्लङ्घनपरतरस्वातन्त्र्य इति पक्षे न काचिदनुपपत्तिः। अत एवोक्तं वसुगुप्ताचार्यैः "निरूपादानसम्भारमभित्तावेव तन्वते। जगच्चित्रं नमस्तस्मै कलाकौशलाय सूत्रिने" इति। ननु प्रत्यगात्मनः परमेश्वराभिन्नत्वे संसारसम्बन्धः कथं भवेदिति चेत्तल्लोकागमाधिकारे "एष प्रमाता मायान्धः संसारी कर्मबन्धनः। विद्यादिपञ्चपित्तेश्वर्यचिद्घनो मुक्त उच्यते" इति। ननु प्रमेयस्य प्रमात्रभिन्नत्वे बद्धमुक्तयोः प्रमेयं प्रति को विशेषः? अत्राप्युत्तरसूत्रं तत्त्वार्थसंग्रहाधिकारे "मेयं साधारणं सूत्रैः स्वात्मभेदेन मन्यते। महेश्वरो यथा बद्धः पुनरत्वनभेदवदिति" नन्वात्मनः परमेश्वरत्वं स्वाभाविकं चेत्तदर्थः प्रत्यभिज्ञाप्रार्थनया न हि बीजमप्रत्यभिज्ञातं सत् सङ्कारिसाकल्ये अङ्कुरं नोत्पादयति। तस्मात् कस्माद्धात्मप्रत्यभिज्ञाने निर्बन्ध इति चेदुच्यते। श्रृणु तावदिदं रहस्यं विविधा स्वातन्त्र्यक्रिया बाह्याङ्कुरादिका प्रमातृविश्रान्तिचमत्कारसारा प्रीत्यादिरूपा च तत्राद्या प्रत्यभिज्ञानं नापेक्षते द्वितीया तु तदपेक्षत एव। दृष्टान्तश्चमीश्वर इत्थंभूतचमत्कारसारा परापरसिद्धिचक्रचक्रजीवात्मैकत्वयक्षिविभूतिरूपार्थक्रियेति स्वरूपप्रत्यभिज्ञानमपेक्षत एव। ननु प्रमातृविश्रान्तिसारार्थक्रिया प्रत्यभिज्ञानेन विना दृष्टा सती तस्मिन् दृष्टेति कः दृष्टम्। अत्रोच्यते बालकगुणयशःसंश्रवणप्रहृष्टानुरागा का चन कामिनी मदनविह्वला विरहक्लेशमसहमाना मदनलेखावलम्बेन स्वावस्थानिवेदनादि विधत्ते तथा वेगात्तस्निकटमटत्यपि तस्मिन्नवलोकितेऽपि तदवलोकनं तदीयगुणपरामर्शाभावे जनसाधारण्यं प्राप्ते हृदयङ्गमभावं न लभते। यदा तु मूर्त्तिवचनात्तदीयगुणपरामर्शं करोति तदा तत्तच्चमत्कारमेव पूर्णभावमश्नुते। एवं स्वात्मनि विश्वेश्वरात्मना भासमानेऽपि तस्मिन्भासनं तदीयगुणपरामर्शविरहसमयं पूर्णं भावं न सम्पादयति यदा तु गुरुवचनादिना सर्वज्ञत्वसर्वकर्तृत्वादिचमत्कारपरमेश्वरीत्वैपरामर्शो जायते तदा तत्तच्चमत्कारं पूर्णात्मतालाभः। तदुक्तं चतुर्थे विमर्शे "तैस्तैरनुपयाचितैरुपनतसत्ताः स्थितोऽप्यन्तिके ज्ञानो लोकस्थान एवमपरिज्ञाता न रन्तुं यथा। लोकस्यैव तथानपेक्षितगुणः स्वात्मापि विश्वेश्वरो नैवायं निजवैभवाय तदियं तत्प्रत्यभिज्ञोदिता" इति। अभिनवगुप्तादिभिराचार्यैर्विवृतप्रतानोऽपि अयमर्थः संग्रहसंपल्लभमानैरस्माभिर्विस्तरभिया न प्रतानित इति सर्वं शिवम्।

प्रत्यभियोग पु० प्रतिरूपोऽभियोगः प्रा०स०। अभियुक्तेन प्रतिवादिना स्वाभियोगिनं प्रति अभियोगान्तरकरणे।

प्रत्यभिवाद पु० प्रति+अभि+वद्–घञ्। अभिवादकस्य तत्प्रतिरूपे आशीर्वचनादौ। भावे ल्युट्। प्रत्यभिवादन तत्रार्थे क०। तत्प्रकारः मनुना कुल्लूकभट्टेन च दर्शितो यथा "आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने। अकारवाच्य नाम्नोऽन्ते वाच्यः पूर्वाक्षरः प्लुतः। यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम्। नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः" "अभिवादने कृते प्रत्यभिवादविधा अभिवादको विप्रादिः आयुष्मान् भव सौम्येति वाच्यः। अस्य चाभिवादकस्य यद्यस्य तस्यान्ते योऽकारादिः स्वरो नाम्नामकारान्तत्वनियमाभावात् स प्लुतः कार्यः स्वरापेक्षत्वेदकारान्तत्वं व्यञ्जनान्तेऽपि नाम्नि सम्भवति स्वरान्तस्य च व्यञ्जनान्ते नाम्नोऽसम्भवात् आह पूर्वाक्षर इति। पूर्वनामगतमक्षरं संज्ञितं यस्य स पूर्वाक्षरः तेन नामाक्षरं पठित्वा चाकारादि स्वरः प्लुतः कार्यः। एतच्च वाक्यस्य टेः प्लुत उदात्तः इत्यस्यानुवृत्तौ "प्रत्यभिवादेऽशूद्रे" इति प्लुतं स्वरन् पाणिनिः स्फुटमुक्तवान्। व्याख्यातस्तु दक्षिणात्यो वामनेन टेरिति किं व्यञ्जनान्तस्यैव टेः प्लुतो यथा स्यादिति। तस्मादीदृशं प्रत्यभिवादनवाक्यम् आयुष्मान् भव सौम्य! गुप्तशर्मंस्त्वम्! एवं क्षत्रियस्य वसुवर्मंस्त्वम् एवं वैश्यस्य वसुभूतेस्त्वं "प्लुतो राजन्यविशां वेति कात्यायनवचनात् क्षत्रियवैश्ययोः पक्षे प्लुतो न भवति। शूद्रस्य प्लुतो न कार्यः अशूद्र इति पाणिनिवचनात्। "स्त्रियामपि निषेधः" इति कात्यायनवचनात् स्त्रियामपि प्रत्यभिवादनवाक्ये न प्लुतः"। [भियोगे लिका०।

प्रत्यभिस्कन्दन न० प्रति+अभि+स्कन्द्–भावे ल्युट्। प्रत्यय पु० प्रति+इण–भावकरणादौ अच्। १अधीने २यत्यये ३स्थाने ४विश्वासे प्रामाण्येन निश्चये ६हेतौ ७ज्ञप्तौ ८शब्दभेदे अमरः। ९आचारे १०ख्यातौ मेदि०। ११निश्चये १२आदानि हेमच० १३षड्विधकारिकारूपे लिका०। शब्दभेदप्रत्ययस्वरूपन्तु शब्द० प्रका० उक्तं' यथा "वाचस्पत्यादयस्तु निर्वक्ति "इतरार्थान्वयिन्यर्थे यो बोधनाममः। तिङन्तस्य निपातस्य स वा प्रत्यय उच्यते"। यः शब्दः शब्दान्तरार्थान्वितेऽर्थे यदर्थस्यार्थे धर्मिणि तिङन्तस्यान्वयबोधने स्वरूपायोग्यः स वा निपातिशब्देभ्यो भिन्नस्याऽर्थे प्रत्यय इत्यर्थः। चैत्रोऽस्तीत्यादावर्थान्तरान्वयिन्यर्थे नाम्नां तिङर्थान्वयबोधकत्वम्। एवं यजेत स्वर्गकामेत्यादौ यजादिधात्वर्थस्य। पचतीत्यादौ तिङां पाचकोऽस्तीत्यादौ कृतां कार्यादिपरिच्छादौ च तद्धितानाम् प्रकृत्यर्थान्वयिन्यर्थे एव स्वार्थे कृत्यादौ तिङर्थस्य वर्त्तमानत्वादेर्बोधकत्वं न तु तदन्वयिन्यर्थे इति न तेऽप्यस्वरूपः। निपातिपातादिस्तु यद्यप्यन्यार्थान्वयिन्यर्थे यदप्यस्वरूपत्वादिस्वार्थे तिङर्थान्वयं प्रति स्वरूपायोग्योऽपि निपातिरेवेति न तत्र प्रसक्तः"।

वैयाकरणमते तु यत्राभिधेयत्वेन शब्दार्थस्तत्रैव उक्तं यथा "प्रत्ययस्तु प्रकृतिमवधीकृत्य विधीयमानः स्वार्थबोधकः शब्दविशेषः प्रकृतिशब्दप्रतिपाद्यार्थोक्तेः। "स्त्रीयमर्थं प्रत्यायतीति" पुत्रवत्तत्रैव भाष्योक्तेश्च तथैवावगम्यते। अवधिश्च पूर्वापररूपो यादृशः तेन वस्तुनि नायुक्तः तथापि प्रकृत्यवधिकत्वेन विधीयमानत्वात्। शिष्टान्ते तु इत्यिशब्दानां समुदायशक्तिस्वीकारेण वस्तुजातैर्विरचितया सुब्रह्मण्यत्वयत्वाभावादेव पूर्वत्वरूपावधित्वप्रवेशेऽपि न क्षतिः। अतएव प्रकृतिशब्दोक्तपरिकारिकायां "पुत्रयः पर" इत्यनेन परत्वेन विधीयमानत्वं पुत्रयत्वस्य तस्य च सुब्रह्मण्यद्योतनार्थं स्वार्थकत्वसाकाङ्क्षत्वकथनाय च इतरत् द्वितीयम् तथा च तदर्थान्वितस्वार्थबोधने तदपेक्षत्वे सति तदवधिकत्वेन विधीयमानत्वं तत्पुत्रयत्वमिति फलितोऽर्थः। अन्वितत्वञ्च विशेष्यतया विशेषणतया वा स्यात् तेन तिङां धात्वर्थविशेष्यकान्वयस्य बोधकत्वेऽपि न क्षतिः। यदि चावयवशक्तिस्वीकारात्तदा परपदेनावधिमात्रं लक्ष्यीयम् अवधिश्च पूर्वापरान्यतरएव निवेशनीयः। एवञ्च प्रत्ययनिमित्तकप्रकृत्यनुकार्यविशेषे विकरणागमादीनां प्रत्ययत्वस्वीकारेण परत्वमात्रं प्रत्ययत्वमिति बोध्यम्। अथवा प्रत्यय इत्यधिकृत्य पञ्चमाध्यायसमाप्तेर्विधीयमानत्वं पारिभाषिकप्रत्ययत्वं तत्रैव स्वार्थबोधकत्वे सतीति विशेषणे सुब्रह्मण्यत्वसामान्यलक्षणं पर्य्यवस्यति तत्तत्प्रत्ययत्वन्तूक्तमेव। स्वार्थिकप्रत्ययानामपि प्रकृत्यर्थानुवादितया स्वार्थबोधकत्वमतएवाभिप्रेतं वाक्यपदीये "स्वार्थिकाः प्रत्ययाः केचित् प्रकृत्यर्थानुवादिनः" इति। एतदनुरोधेनैव शेखरादौ सुब्रह्मण्यान्यतरप्रत्ययकत्वं प्रत्ययानामुक्तम्। विकरणादयः पुनः सर्वथा निरर्थकाः तेषां द्योतकत्वादानङ्गीकारात् तद्व्यतिरेकेणापि ऊहादौ धात्वभावादेवार्थप्रतीतेर्दर्शनात्। उक्तञ्च वाक्यपदीये "यत्र वाऽन्यनिमित्तेन तयोः शक्तिप्रकल्पनम्। निवृत्तेऽन

नियमो न त्वेवं स्मृत्यवादिचिति"। यत्र ययोरन्यभिचारेऽन्वयव्यतिरेकाभ्यां, नियमः अर्थप्रतीतिनियमत्वयोः प्रकृतिप्रत्ययवयोः यत्किञ्चित्वम्। यत्र चैवं न नियमस्तत्र स्मृत्यवादिषु नेत्यस्मादत्या यत्किञ्चित्वं नेत्यर्थः"। १२विष्णौ पु० "प्रत्ययः सर्वदर्शनः" विष्णुसं०। तस्य ज्ञानरूपत्वात् तथात्वम् भाष्ये दृश्यम्। प्रत्ययश्च बुद्धिरात्मगुण इति नैयायिकाः। महत्तत्त्वधर्म इति सांख्याः। "एष प्रत्ययसर्गो विपर्ययाशक्तितुष्टीनाम्" सा०का०। "प्रतीयतेऽनेनेति प्रत्ययो बुद्धिस्तस्य सर्गः तत्र विपर्ययोऽज्ञानमविद्या च बुद्धिधर्मः अयमित्यपि करणवैकल्यहेतुका बुद्धिधर्म एव तुष्टिसिद्धी अपि वक्ष्यमाणे बुद्धिधर्मावेव, तत्र विपर्ययाशक्तितुष्टिषु कषायोगं सप्तानां धर्मादीनां ज्ञानवर्जनमन्यभावः सिद्धौ च ज्ञानमेति" त०कौ०। "तदभिहितो भावो द्रव्यवत् प्रकाशते" इति न्यायात् सर्गपदं सृज्यमानपरं तथा चाविद्यादेर्बुद्धिधर्मत्वात् तत्सृष्टत्वम्।

प्रत्ययकारिन् त्रि०प्रत्ययं करोति ञ-णिनि। १विश्वासकारके स्वमतत्वस्थापके २सङ्घामेदे(मोक्टर)त्रिका०। [च अमरः

प्रत्ययित त्रि० प्रति+अय-क्त। १आप्ते २विश्वस्ते ३प्रतिगते

प्रत्यरा स्त्री प्रतिनिक्षिप्ताः अराः प्रा०स०। अरादाढ्यार्थे उपनिक्षिप्ते कीलके "मताङ्गैरं विंशतिप्रत्यराभिः" श्वेताश्व०उ०"पूर्वोक्तानामराणां दाढ्यार्थे ये प्रतिविधीयन्ते कीलकास्ते प्रत्यरा इत्युच्यन्ते" भाष्ये उक्तम्।

प्रत्यरि पु०प्रति+अ-इन्। १यतौ २जन्मतारातः पञ्चमषष्ठदशमत्रयोविंशतितारके "जन्म सम्पद्विपत् क्षेमं प्रत्यरिः साधकोवधः। मित्रं परममित्रं च जन्मर्क्षात्तु त्रिधा पुनः" ज्यो०त०। "तारा पुनः पापाख्या त्रिविधा पञ्चचतुर्दशविंशतिस्थिता। चित्रिफला हन्त्रिकरी विनाशसंज्ञा क्रमात् कथिता" ज्यो०त०। तेन तृतीयस्यैव विशेषत आवश्यकत्वादौ निषेधात् त्याज्यता आद्ययोर्नैवेति प्रतिप्रसवः इति द्रष्टव्यम् "प्रत्यरौ जयवधं दद्यादिति" दानमपि तृतीयप्रत्यरावेवेति विवेचनीयम्।

प्रत्यर्थिन् त्रि० प्रत्यर्थयते प्रति+अर्थ-णीञ्ने णिनि। १यतौ अमरः। प्रतिकूलमर्थयते णिनि, प्रतिपक्षः अर्थिनः प्रा०स० वा। व्यवहारे २प्रतिवादिनि भरतः। "प्रत्यर्थिनोऽप्यतो लेख्यं प्रतिज्ञातार्थसाधनम्" याज्ञ०।

प्रत्यर्पण न० प्रति+ऋ-णिच्-युच्-ल्युट्। प्रतिदाने स्वकीयस्य धनादेः पुनर्दाने प्रतिसमर्पणे।

प्रत्यवनेजन न० प्रतिरूपमवनेजनम् प्रा०स०। श्राद्धाङ्गे प्रथमजलादिदानरूपात्तरूपे पिण्डोपरि क्रियमाणे पुनरवनेजने तच्च छन्दोगेतरपरं यथोक्तम् "छन्दोगानान्तु पिण्डपात्रप्रक्षालनेन पूर्वदवनेजनम्। यथा छन्दोगपरिशिष्टं "तत्पात्रक्षालनेनाथ पुनरभ्यवनेजयेत्" अत्राभ्यवनेजयेदिति श्रुतेर्द्विर्दोषावनेजनेऽपि अवनेनिक्ष्वेति वक्तव्यं न तु प्रत्यनेनिक्ष्वेति" श्रा०त० रघु०।

प्रत्यवमर्श पु० प्रति+अव-मृश-भावे घञ्। अनुसन्धाने "स्मृतिः प्रत्यवमर्शश्च तेषां जात्यन्तरेऽभवत्" हरिवं०२१अ०

प्रत्यवमर्ष पु० प्रति+अव+मृष-घञ्। सङ्घर्षे "स्वल्पसङ्करः सपरिहारः सप्रत्यवमर्षः" पञ्चशिखाचार्यः। "स्वल्पसङ्करः ज्योतिष्टोमादिजन्मनः प्रधानापूर्वस्य स्वल्पेन पशुहिंसादिजन्मनाऽनर्थहेतुना अपूर्वेण सङ्करः, सपरिहारः क्रियतापि प्रायश्चित्तेन परिहर्तुं शक्यः। अत्र प्रमादतः प्रायश्चित्तमपि नाचरितं प्रधानकर्मविपाकसमये च पश्यते तथापि यावदनावर्तं स्थिते तावत् स प्रत्यवमर्शः प्रत्यवमर्षश्च सङ्घिष्णुतया सङ्घ वर्तत इति स्मर्यते हि पुण्यसञ्चारोपनीतस्वर्गसुधामदात्तुदावगाहिनः कृतघ्नाः पापमात्रोपपादितां दुःखवह्निकणिकामपि तं०कौ०। भावे ल्युट्। प्रत्यवमर्षश्च तत्रार्थे न०।

प्रत्यवर त्रि० प्रतिरूपोऽवरः प्रा०स०। अतिनिकृष्टे "प्रतिपक्षाद्याजनाद्या तथैवाध्यापनादपि। प्रतिपक्षः प्रत्यवरः प्रेत्य विप्रस्य गर्हितः" मनुः।

प्रत्यवरोह पु० प्रति+अव+रुह-घञ्। (नाभा) अवरोहे ल्युट्। प्रत्यवरोहश्च तत्रार्थे न०।

प्रत्यवसान न० प्रति+अव+सो-ल्युट्। भोजने हेमच०।

प्रत्यवसित त्रि० प्रति+अव+सो-कर्मणि क्त। भुक्ते अमरः।

प्रत्यवस्कन्द पु० प्रति+अव+स्कन्द्-करणे घञ्। व्यवहारे उत्तरभेदे उत्तरशब्दे १०८पृ० दृश्यम्। करणे ल्युट्। प्रत्यवस्कन्दन तत्रार्थे न०।

प्रत्यवस्था स्त्री प्रति+अव+स्था-भावे अङ्। १प्रतिपक्षतया अवस्थाने। भावे ल्युट्। प्रत्यवस्थान तत्रार्थे न०। "साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानम्" गौ०त०

प्रत्यवस्थातृ त्रि० प्रति+अव+स्था-तृच्। १प्रतिपक्षतया अवस्थातरि प्रतिवादिनि। २यतौ हेम०।

प्रत्यवहार पु०प्रति+अव-हृ-भावे घञ्। १संहारे रघुः ४।४४ २युद्धार्थसङ्युक्तानां सैन्यानां युद्धात् निवारणे भा०व० २८३अ०।

प्रत्यवाय पु॰ प्रति+अव–इण–करणे घञ्। १पापे "अनुत्पत्तिं तथा चान्ये प्रत्यवायञ्च मन्यते" आग्नेयादिः। भावे घञ्। २वैगुण्याचरणे मनुः ४।२४६।

प्रत्यवेक्षण न॰ प्रति+अव+ईक्ष–भावे ल्युट्। पुनरीक्षणे २एतावदुक्तमेतावत् न उक्तमित्यर्थानुसन्धाने च। प्रति+अव+ईक्ष–भावे अ। प्रत्यवेक्षा तत्रार्थे स्त्री रघुः १७।५३।

प्रत्यक्कन् पु॰ प्रतिरूपः अक्षा प्रा॰स॰। गैरिके हेम॰।

प्रत्यष्ठीला स्त्री सुश्रुतोक्ते अष्ठीलातुल्ये रोगभेदे "अष्ठीलावदृजुनं यन्मिमूर्द्धमायतसन्नतम्। वातार्ष्ठीलां विजानीयाद्वह्निमांसोपरोधिनीम्। एतामेव रुजायुक्तां वातविण्मूत्ररोधिनीम्। प्रत्यष्ठीलामिति वदेल्लठरे तिर्य्यगुत्थिताम्"।

प्रत्याकार प्रतिगत आकारः खड्गाकारो येन प्रा॰ब॰। खड्गकोषे त्रिका॰। [२दूरीकृते अमरः।

प्रत्याख्यात त्रि॰ प्रति+आ+ख्या–कर्मणि क्त। १निराकृते

प्रत्याख्यान न॰ प्रति+आ+ख्या–भावे ल्युट्। निराकरणे अमरः। [(फिरे आया) हरिवं॰ १२५ अ०।

प्रत्यागति स्त्री प्रति+आ+गम–भावे क्तिन्। प्रत्यागमने

प्रत्यागम पु॰ प्रति+आ+गम–भावे घञ्। (फिरे आया) यस्मात् गतस्तस्मिन् पुनरागमने "तीर्थात् प्रत्यागमेऽपि च" प्रा॰त॰। भावे ल्युट्। प्रत्यागमन तत्रार्थे न॰।

प्रत्यादिष्ट त्रि॰ प्रति+आ+दिश–कर्मणि क्त। निरस्ते अमरः

प्रत्यादेय पु॰प्रति+आ+दिश–भावे घञ्। १निराकरणे अमरः भक्तान् प्रति आदेयः। २भक्तान् प्रति अभीष्टसिद्ध्यर्थं देयनादेये च।

प्रत्याधान न॰ प्रतिपत्त्या धीयते प्रति+आ+धा–कर्मणि ल्युट्। १मस्तके "यो ह वै शिरसः साधानं प्रत्याधानम्" शत॰ब्रा॰ १४।५।२।१ भाष्यम्। "मस्तकस्य सर्वदेहेष्ववयवेषु आधीयमानत्वात् तथात्वम्। भावे ल्युट् प्रा॰स॰। २द्वितीयाधाने न॰।

प्रत्याधमान पु॰ वातव्याधिभेदे। तस्य लक्षणमाह "विसक्तपार्श्वहृदयं तद्वेगमाशयोत्थितम्। प्रत्याध्मानं विजानीयात् कफव्याकुलितानिलम्"। विसक्तपार्श्वहृदयं पार्श्वे हृदयं च विहाय ज्ञातं तद्वेगाध्मानम्। कफव्याकुलितानिलं कफेनावरुद्धवातम्" भावप्र॰।

प्रत्यापत्ति स्त्री प्रति+आ+पद–भावे क्तिन्। १वैरात्ये आ॰ या॰ २८२ अ॰ नीलकण्ठः। २पुनरागमने च।

प्रत्याख्यान त्रि॰ प्रतिरूपतया आम्नायते प्रति+आ+म्ना–कर्मणि ल्युट्। प्रतिनिधौ "यजमानकर्तृत्वेन विधीयमाने प्रत्याम्नानाच्च ऋत्विजो निवर्त्तन्ते" कात्या॰ श्रौ॰ १।६।१२ पद्धतौ।

प्रत्याम्नाय पु॰ प्रतिरूपतया आम्नायते प्रति+आ+म्ना–कर्मणि घञ्। प्रतिनिधित्वेन विधीयमाने।

प्रत्यायक त्रि॰प्रति+इ–ण्वुल्। १विश्वासकारके २बोधके च।

प्रत्यायन न॰ प्रति+आ+इ–णिच् "स्मो गमिरबोधने" पा॰ च्लेः न समादेशः भावे ल्युट्। १बोधने २विश्वासजनने भा॰अनु॰२४४८ श्लो॰।

प्रत्यारम्भ पु॰ प्रतिरूप आरम्भः प्र॰स॰। आरम्भात् पक्वात् आरम्भे भक्षपक्वशब्दे २५६२ पृ॰दृश्यम्।

प्रत्यालीढ न॰ धनिनां युद्धावसरस्थितिभेदे आलीढविपरीतरूपतया स्थितौ आलीढशब्दे ८२४ पृ॰ दृश्यम्।

प्रत्यावर्त्तन न॰ प्रति+आ+वृत–णिच्–ल्यु भावे ल्युट्। १प्रतिनिवृत्तौ २प्रतिनिवारणे च।

प्रत्याशा स्त्री किञ्चित् वस्तु प्रति+आशा प्रा॰स॰। किञ्चिद्वस्तु प्रति वाञ्छायाम्।

प्रत्याश्राव पु॰ प्रति+आ+श्रु–णिच्–घञ्। १चरुद्रव्य आवपने कर्मणि घञ्। २अस्तुश्रौषड्वितिशब्दे यजु॰१६।२४वेददी॰

प्रत्याश्रावण न॰ प्रति+आ+श्रु–णिच् भावे ल्युट्। अग्नीध्रकर्त्तृके अध्वर्यु प्रति मन्त्रविशेषस्य आश्रवणे शत॰ब्रा॰ १२।२।६ भाष्ये दृश्यम्। [नार्थमाज्यावेक्षणे।

प्रत्याश्वासन न॰प्रति+आ+श्वस–णिच्–भावे ल्युट्। सान्त्व-

प्रत्यासत्ति स्त्री प्रति+आ–सद–भावे क्तिन्। १नैकट्ये न्यायमते २अलौकिकप्रत्यक्षजनके सम्बन्धभेदे "आसत्तिरावाप्यान्तु" भाषा॰ "आसत्तिः प्रत्यासत्तिः" शि॰स॰।

प्रत्यासन्न त्रि॰ प्रति+आ+सद–क्त। १अतिनिकटस्थे जटा॰ २सम्बद्धे च।

प्रत्यास(सा)र पु॰ प्रति+आ+सृ–आधारे घञ् अप् वा। कवलः १सैन्यपश्चाद्भागे घञन्तः तत्रार्थे अमरः। यत्र व्यूहस्य पश्चाद्व्यूहान्तरं क्रियते २तत्रार्थे भरतः।

प्रत्यास्वर पु॰ प्रत्यास्वरति प्रति+आ+स्वृ–अच्। १प्रत्यागते अस्तभावात् पुनः २प्रत्यागते आदित्ये च "स्वर इतीमं (प्राणम्) आचक्षते स्वर इति प्रत्यास्वर इति चादित्यम्" (आदित्यम्) छा॰उ॰। "किञ्च स्वर इतीमं प्राणमाचक्षते कथयन्ति तथा स्वर इति प्रत्यास्वर इति चादित्यं सवितारम्। यस्मात् प्राणः स्वरयेव न पुनर्हेतः प्रत्यागच्छति।

र्थविना त्वक्तमिच्छा पुनरभ्यङ्गनङ्गनि प्रत्याहरति । अतः प्रत्याहरोऽप्यङ्गादुद्धरणो नामतश्च समानमितरेतरं प्राप्ताद्दित्वौ" भा० । [विषयेभ्यो निवारणे ।

प्रत्याहरण न० प्रति+आ+हृ–भावे ल्युट् । १चित्तेन्द्रियादेः

प्रत्याहार पु० प्रति+आ+हृ–भावे घञ् । चित्तेन्द्रियादेः विषयेभ्यो निवारणे योगाङ्गभेदे तल्लक्षणं च अष्टाङ्गयोग शब्दे ६२४४ पृ० उक्तं तत्कालमानञ्च "प्राणायामेन्द्रियजयौ तेन प्रत्याहार उदाहृतः" याज्ञवल्क्य० ४१ अ० उक्तम् । "स्वविषयासम्प्रयोगे चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः" पात० सू० "स्वविषयसम्प्रयोगाभावे चित्तस्वरूपानुकार इवेति चित्तनिरोधे चित्तवन्निरुद्धानीन्द्रियाणि नेतरेन्द्रियजयवदुपायान्तरमपेक्षन्ते । यथा मधुकरराजं मक्षिका उत्पतन्तमनूत्पतन्ति निविशमानमनुविशन्ते तथेन्द्रियाणि चित्तनिरोधे निरुद्धानीत्येष प्रत्याहारः" भा० । "ततः परमा वश्यतेन्द्रियाणाम्" पात० सू० शब्दादिष्व असक्तमिन्द्रियजयं इति केचित् मन्यन्ते तन्न श्रेयः इति अविरुद्धा प्रतिपत्तिस्थैर्या शब्दादिष्वसम्प्रयोगः खेऽप्यवेक्षन्ते रागद्वेषाभावे सुखदुःखशून्यं शब्दादिज्ञानमिन्द्रियजयं इति केचित् चित्तैकाग्र्यादप्रवृत्तिरेवेति जैगीषव्यः । ततश्च परमा स्थिरं वश्यता यच्चित्तनिरोधे निरुद्धानीन्द्रियाणि नेतरेन्द्रियजयवत् प्रयत्नकृतमुपायान्तरमपेक्षन्ते योगिनः इति" भा० ।

अत्र चित्तस्यैव प्रत्याहारेऽन्येन्द्रियस्य प्रत्याहारोऽर्थसिद्ध इति बोध्यम् तदफलत्वञ्च । अतुना उक्तम् "प्रत्याहारेण वर्तमानं ध्यानेनानीश्वरान् शृणु" । प्रत्याहियन्ते संक्षिप्य गृह्यन्ते यथा धनेन प्रति+आ+हृ–करणे घञ् । "आदिरन्त्येन सहेता" पा० सूत्रेण २अन्तसंज्ञायां च यथा "अण् इति च इ ञ्" इति वर्णानां षट्त्वम् एवं लृप् तिङ्प्रभृतिष्वपि स्वादीनां तिबादीनाञ्च षट्त्वमिति । "प्रत्याहारेष्विति न षट्त्वमिति" तेन यच् प्रत्याहारे षकत्वं न षट्त्वम् बोध्यम् । भावे घञ् । ३उपादाने पु० अमरः । [वाक्येन २निराकृते च ।

प्रत्युक्त त्रि० प्रति+वच–कर्मणि क्त । १उत्तरिते प्रतिवाक्ये

प्रत्युक्ति स्त्री प्रति+वच–भावे क्तिन् । प्रतिवाक्यकथने शब्दर०

प्रत्युज्जीवन न० प्रति+उद्+जीव–भावे ल्युट् । पुनर्जीवने मरणोत्तरं पुनर्जीवने । "रक्तबिन्दोर्हतत्वात् मरणं नैव वर्ण्यते । वर्ण्यतेऽपि यदि प्रत्युज्जीवनं स्यादद्भुतः" काद० । यथा कादम्बरीप्रबन्धे तद्वर्णनम् ।

प्रत्युत अव्य० प्रति–उत द० । १स्वपक्षस्थापनाय परपक्षनिराकरणाय वा उक्तस्य तदैपरीत्यभावे २वैपरीत्यभावे च "न दोषः पुनरुक्तोऽपि प्रत्युतैवमवस्थितौ" काव्याद० ।

प्रत्युत्क्रम पु० प्रति+उद्+क्रम–घञ् न ह्रस्वः । १युद्धार्थोद्योगे २प्रधानप्रयोजनोद्देशेनाप्रधानारम्भे च अमरः । क्लिन् । प्रत्युत्क्रान्ति तत्रार्थे स्त्री चौरस्वामी ।

प्रत्युत्तर न० प्रतिरूपमुत्तरम् प्रा० स० । उत्तरोत्तरवाक्ये वादिनोपन्यस्तपक्षस्य तद्विरुद्धपक्षप्रतिपादके वाक्ये ।

प्रत्युत्थान न० प्रति+उद्+स्था–ल्युट् । अभ्युत्थाने आगतस्य सम्माननार्थमाह्वानादुत्थितौ "प्रत्युत्थानाभिवादाभ्यां पुनस्तत्प्रतिपद्यते" मनुः ।

प्रत्युत्पन्नमति त्रि० प्रत्युत्पन्ना तत्कालोचिता मतिर्यस्य । १तत्कालोचितबुद्धौ हेमच० । २प्रतिभान्विते जटा० । अनागतविधातृशब्दे १६४८ पृ० दृश्यम् ।

प्रत्युदाहरण न० प्रतिकूलमुदाहरणं प्रा० स० । उदाहरणस्य वैपरीत्येन उदाहरणे । "अन्वयेतरयोर्मध्ये" भा० सू० उक्तौ अन्वयो प्रतिपक्षीत्युदाहृत्य "प्रत्युदाहरणन्तु अन्वयस्यार्थस्यासत्त्वे यत्रासत्त्वं प्रतिपक्षी पृथिवी" वि० कौ० ।

प्रत्युद्गम पु० प्रति+उद्+गम–घञ् न ह्रस्वः । १प्रत्युत्थाने (आसनादेरुत्थाय) प्रतिगमने २च भावे ल्युट् । प्रत्युद्गमन तत्रार्थे न० ।

प्रत्युद्गमनीय न० प्रति+उद्+गम–अनीयर् । १धौतवस्त्रयुग्मे अमरः "स्फटीतप्रत्युद्गमनीयवस्त्रा" इति कुमारे पाठान्तरं प्रच्छे वेति न हृस्वत्वम् । २सत्कारस्थानयोग्ये पूजनीये च त्रि०

प्रत्युद्गमन न० प्रतिकूलमुद्गमनं प्रा० स० । उद्गमनप्रतिकूले अवनमने । "अकृत्वाऽभ्यर्चयित्वा प्रत्युद्गमनम्" सुश्रुतः व्रणचिकित्साकुक्रियोक्तौ ।

प्रत्युपकार पु० प्रतिरूपः उपकारः प्रा० स० । १कृतोपकारेण कृते उपकारस्य उपकारानुरूपे क्रियाचरणे ।

प्रत्युपदेश पु० प्रतिरूपः उपदेशः प्रा० स० । १उपदेशस्य प्राप्तोपदेशेन कृते शिक्षाभेदे कुमा० १।२३

प्रत्युपहार पु० प्रतिरूप उपहारः प्रा० स० । कृतरूपे उपहारे उपढौकनीये द्रव्ये ।

प्रत्युरस अव्य० उरसि विमक्त्यर्थेऽव्ययी० । "प्रतेरुरसः सप्तम्यास्" पा० अच् समा० । उरसीत्यर्थे । सप्तम्यादित्युक्तेः कृत्यार्थं प्रतेर्न अच् । प्रत्युरस् इत्येव ।

प्रत्युलूक पु० प्रतिकूल उलूकस्य प्रा० स० । १काके भाग० १।

१४।१४। "प्रलुलूक: काक:" श्रीधर:। प्रतिरूप: च-लूको यस्य कप्। प्रलुलूक उलूकानुरूपे पक्षिभेदे "उलूका प्रलुलूकान्" हरिवं० २अ०।

प्रत्यव पु०प्रति+अव-दाहे आधारस्य कर्त्तृत्वविवक्षायां क। प्रातःकाले मथुरेशः।

प्रत्युषस् न०प्रति+उष-आधारे कसुन्। प्रातःकाले अमरः। "याति अर्कि पुरस्ताद्दक्षकिसखे प्रत्युषः पारिजातः" सूर्य्यशतकम्।

प्रत्यूष पु० प्रत्यूषति रुजति कालुकान् प्र+उष-रुजायां क। १प्रभाते अमरः "प्रत्यूषवनवासारैः" हरिवं० ८१अ०। अष्टवसुमध्ये २वसुभेदे च जटा०। धरशब्दे २८७७पृ० दृश्यम्। ३सूर्य्ये शब्दर०।

प्रत्यूषस् न० प्रति+उष-रुजायाम् असुन् ऋषि वा। प्रभाते अमरः "स्नानमत्यधिकं कार्य्यं प्रत्यूषस्यार्कनो जले" हरिवं० १४अ०। [प्रतिबन्धकत्वात्तद्वत्वम्।

प्रत्यूह पु० प्रति+ऊह-घञ्। विघ्ने अमरः तस्य ऊहां प्रति

प्रत्यृच अव्य०ऋचमृचं प्रति वीप्सायाम् अव्ययी०अच् समा०। एकैकस्यामृचौ आश्व० ६।४

प्रत्येक अव्य० एकमेकं प्रति वीप्सायामव्ययी०। एकैकस्मिन् वीप्सायुते एकशब्दार्थे।

प्रत्येकबुद्ध पु० बुद्धभेदे त्रिका०।

प्रत्वचस् त्रि० प्र+त्वच्-तनूकरणे असुन्। प्रकर्षेण तनूकारके प्रत्वक्षतिनि भट्ट० १,८।१ भा०।

प्रथ ख्यातौ भ्वा०आ०अक० सेट्। प्रथते अप्रथिष्ट घटा०णिच् प्रथयति। भावे अञ् प्रथा। [ति अपप्रथत् त।

प्रथ ख्यातौ अक०विच्छे सक०चुरा०उभ०सेट् घटा०। प्रथयति-

प्रथम त्रि० प्रथ-अमच्। १प्रधाने २आद्ये च अमरः। अथि वा सर्वनामतास्य प्रथमे प्रथमाः। तस्य भावः ष्यञ्। प्राथम्य आद्यत्वे प्राधान्ये च न०।

प्रथमज त्रि०प्रथमं जायते जन-ड। १पूर्वजाते २प्रथमगर्भजाते पुंस्त्री० यजु०१६।२५ जन-क। प्रथमजात तत्रार्थे त्रि०

प्रथमवयसिन् त्रि० प्रथमवयोऽस्यास्ति वा० इनि सान्तत्वात् न पदत्वम्। प्रथमवयोयुक्ते मत०मा० ११।१।७।८स्त्रियां ङीप्।

प्रथमविद्या स्त्री प्रथमं विद्या विद्या सञ्ज्ञा। प्रथमपरिचीतायां स्त्रियां मक्षिकायां काला० १६।३।२१।५

प्रथमसाहस पु० "प्रधानां हे यते साहे प्रथमः साहसः ऋतः" विष्णु० उक्ते सार्द्धशतपणद्वयरूपे दण्डभेदे

प्रथमाङ्गुलि पुंस्त्री० कर्म०। डाकुडे "यद्दमयं मङ्गा-प्राप्तं प्रथमाङ्गुलियोगतः" प्रथमाङ्गुलिर्डाकुडिः तन्त्रसारः।

प्रथमाश्रम पु०न०कर्म०, ब्रह्मचर्य्याश्रमे "शरीरबन्धः प्रथमाश्रमो यथा" कुमा०।

प्रथा स्त्री प्रथ-घटा० भावे अङ्। ख्यातौ अमरः।

प्रथित त्रि० प्रथ-क्त। १ख्याते अमरः। २सारोचिषमनोः पुत्रभेदे पु० हरिवं० ७अ०। ३विष्णौ पु० "अच्युतः प्रथितः प्राणः" विष्णुस०।

प्रथिमन् पु० पृथोर्भावः पृथु+इमनिच् प्रथादेशः। पृथुत्वे स्थूलत्वे। अतिशयेन पृथुः इमनिच्। अतिशयेन पृथुत्वयुते

प्रथिमिनी स्त्री पृथिमाऽस्यस्याः "संज्ञायां मन्माभ्याम्" पा० इनि टिलोपः। पृथुत्वयुतस्त्रीभेदे। असंज्ञायां तु मतुप् मस्य वः। पृथिमवत् रत्वेव स्त्रियां ङीप्।

प्रथिवी स्त्री पृथिवी+पृषो०। पृथिव्यां भा०वि०४३अ०।

प्रथिष्ठ त्रि० अतिशयेन पृथु-इष्ठन् प्रथादेशः। पृथुतरे। तत्रार्थे ईयसुन् प्रथीयस् पृथुतमे स्त्रियां ङीप्।

प्रथु पु० प्रथते प्रथ--उनु। विष्णौ "प्राग्रहः प्रथयः पृथुः" विष्णुस०।

प्रथुक पु० प्रथ-बा० उक। पृथुके चिपिटके राजनिघण्टुः।

प्रदक्षिण न० प्रगतो दक्षिणम् अत्रा०स०। दक्षिणपार्श्वान्तुगते देवेभ्यः स्वदक्षिणदर्शनेन प्रणामभेदे तल्लक्षणफलादिकं यथा "प्रणामार्थं दक्षिणं पृक्षं स्वयं नक्षशिराः पुनः। दक्षिणं दर्शयन् पार्श्वं मनसापि च दक्षिणः। सक्षत्रियां वेदवेत्तु देव्याः प्रीतिः प्रजायते। स च प्रदक्षिणो श्रेयः सर्वदेवोपतर्पितः। अष्टोत्तरशतं वस्तु देव्याः कुर्य्यात् प्रदक्षिणम्। सर्वान् कामान् समासाद्य पश्चान्मोक्षमवाप्नुयात्। मनसापि च यो दद्याद्देव्यै भक्त्या प्रदक्षिणम्। प्रदक्षिणाद्दशगुणे नरकाणि न पश्यति" कालिकापु० ७०अ०। "एकं देव्यां रवौ सप्त त्रीणि कुर्य्याद्विनायके। चत्वारि केशवे कुर्य्यात् शिवे चार्द्धं प्रदक्षिणम्" कर्मलोचनम्। "दक्षिणाहावधीं गत्वा दिशं तस्याश्च शाम्भवीम्। ततश्च दक्षिणां गत्वा नमस्कारक्षितोषवत्। अर्द्धचन्द्रं महेशस्य पृष्ठतश्च समीरितम्। शिवप्रदक्षिणे मन्त्रो अर्द्धचन्द्रक्रमेण तु। सव्यासव्यक्रमेणैव सोमसूत्रं न लङ्घयेत्"। सोमसूत्रं जलनिःसरणस्थानम्। "प्रणामार्थं दक्षिणं पृक्षं स्वयं नक्षशिराः पुनः। दर्शयेद्दक्षिणं पार्श्वं मनसापि च दक्षिणः। त्रिधा च वेष्टयेत् सम्यक् देवतायाः प्रदक्षिणम्" तन्त्रसारः।

प्रदक्षिणित् न० प्रदक्षिण+इनो०। प्रदक्षिणशब्दार्थे अ०२।४३। १। भाष्ये दृश्यम्। [प्रदत्ते प्रकर्षेण दत्ते।

प्रदत्त त्रि० प्र+दा–कर्मणि क्त वा तादेशाभावे दद्भावः।

प्रदर पु० प्र+दृ–भावादौ अप्। १भङ्गे दारणसाधने २बाणे अमरः। ३विदारे ४स्त्रीणां योनिरोगभेदे मेदि० तच्चिदानकर्म च भ्वादिभारतोक्तं कर्मविपाकशब्दे १७६८ पृ० दर्शितम्। स च अस्रगद्राख्यः स्त्रीणां योनिरोगभेदः। तल्लक्षणादि माधवनिदाने उक्तं यथा

"विरुद्धमद्याध्यशनादजीर्णादृगर्भप्रपातादतिमैथुनाच्च। वातोऽवशोकादतिकर्षणाच्च भाराभिघाताच्चयनाद्विषाच्च। अस्रगदरं भवेत् सर्वं साक्रमद्यं सवेदनम्। तस्यातिदाहो दौर्बल्यं भ्रमो मूर्च्छा मदस्तृषा। दाहः प्रलापः पाण्डुत्वं तन्द्रा रोगाश्च वातजाः"। स च चतुर्विधो यथा "तं श्लेष्मपित्तानिलसन्निपातैश्चतुःप्रकारं प्रवदन्ति वैद्याः। श्यामं सपिच्छाप्रतिमं सफाण्डुपुलाकतोयप्रतिमं कफात्तु। सपीतनीलासितरक्तवर्णं पित्तार्तियुक्तं क्रमवेगि पित्तात्। रूक्षारुणं फेनिलमल्पमल्पं वातार्त्तिवातात् पिच्छितोदकाभम्। सक्षौद्रसर्पिर्हरितालवर्णं क्षतप्रकाशं कृपणं त्रिदोषात्। तच्चाप्यसाध्यं प्रवदन्ति तज्ज्ञा न तत्र कुर्वीत भिषक् चिकित्साम्"।

प्रदल पु० प्रकर्षेण दलति प्र+दल-अच्। बाणे जटा०

प्रदव पु० द्रवोति द्रु-अच् "द्रुस्रोरुपसर्गे" पा० अनुसर्गे र-लुक्तिः न च। १प्रकृष्टतापके। भावे अप्। २प्रकृततापे पु०

प्रदाय पु० प्रदाव क्षिप्तं वा० यत्। १दावाग्नौ कात्या० श्रौ० २६।३।३२ कर्के। [२प्रकृष्टदायके त्रि०।

प्रदा स्त्री प्र+दा–भावे अङ्। प्रकृष्टदाने। कर्तरि क।

प्रदान न० प्र+दा–भावे ल्युट्। प्रकृष्टदाने "प्रदानं स्वात्यकारथम्" मनुः।

प्रदि त्रि० प्र+दा–"उपसर्गे घोः किः" पा०कि। प्रदानकर्त्तरि

प्रदिग्ध त्रि० प्र+दिह–कर्मणि क्त। १क्षिप्ते २भर्जनविशेषयुते मांसे न०"मांसं बहुघृतैर्भृष्टं सिद्धा क्षोद्माम्बुना सह। क्षीरकाद्यैः समायुक्तं परिशुष्कं तदुच्यते। तदेव घृत तक्राढ्यं प्रदिग्धं सन्निजातकम्" भरद्वा०।

प्रदिव् त्रि०प्रकर्षेण दीव्यति प्र+दिव–क्विप्। १प्रकर्षेण द्योतमाने अ० १।२८।५ भा०स०। २प्रकृष्टदिने स्त्री २पूर्वदिने अ० २।३७।१। ३पुरातने निघण्टुः वङ्गव०।

प्रदिश् स्त्री दिशोरन्तराले प्रगता दिक् मा०स०। विदिशि दिशोरन्तराले दिशि जटा०।

प्रदीप पु० प्र+दीप–अच्। दीपे अमरः। दीपशब्दे १६०५ पृ० दृश्यम्। तत्र स्थितः अपूपा० क। प्रदीपोव तद्धिते त्रि० पक्षे यत्। प्रदीप्य तत्रार्थे

प्रदीपन पु० प्रदीप्यते प्र+दीप–ल्यु। १क्षारवरे २विल्वभेदे तद्वृक्षश्च राजनि० उक्तं यथा "वर्षतो बोधितो यः स्यात् दीप्तिमान् दहनप्रभः। भल्लातकरः पूर्वैः कथितः स प्रदीपनः"। णिच्–ल्यु। ३पक्षाशये त्रि०।

प्रदुह् त्रि० प्र+दुह–क्विप्दिर्लोपादिना क्विप् पा० प्रकर्षेण दोग्धरि पदत्वेऽस्य हस्य घत्वे दस्य धः। प्रधुक् प्रधुग्भ्यामित्यादि। [न्यकृष्णदिते देये श्रित्तौ च मेदि०।

प्रदेश पु० प्रा०व०। १एकदेशमात्रे राजनि० २स्थाने तज्ज्ञे

प्रदेशन न० प्र+दिश–भावादौ ल्युट्। १उपदेशे कर्मणि ल्युट्। २राजादेरुपढौकने उपहारे(भेटि) द्रव्ये अमरः

प्रदेश(शि)नी स्त्री प्रदिश्यतेऽनया प्र+दिश-करणे ल्युट् ङीप्। तर्जन्यां तया हि वस्तु निदिश्यते। प्रदेशः अङ्गुष्ठादिमध्यस्थानमस्यस्य इनि ङीप्। अत्रैव अमरः।

प्रदेह पु० प्र+दिह–भावे घञ्। १प्रलेपे व्रणादुपशमार्थं द्रव्यविशेषस्य व्रणादौ २लेपने सुश्रुतः।

प्रदोष पु० प्रकान्ता दोषारात्रिरत्र काले प्रा०स०। रात्रेः प्रथमभागभेदे तिथिभेदस्य पूर्वोक्तेऽनध्यायः ति०त०उक्तो यथा "सारस्वतादिपूर्वोक्तमाह स्मृतिः "त्रयोदश्यादितस्त्रय्यां सप्तम्यां हादशीतिथेः। पूर्वोक्तेऽध्ययनं धीमान् न कुर्वीत यथाक्रमम्। सारस्वतो माथवतः सौरश्च वैष्णवस्तथा" प्रदोषशब्दोऽत्र प्रथमपूर्वर इति हेमाद्रिः। रात्रिपर इति निर्णयामृतकृत्। तथा व्रतभेदे रात्रिप्रथमयामपरता हेमाद्रौ व्रत०उक्ता "त्रयोदश्यां तथा रात्रौ सोपहारं त्रिलोचनम्। दद्यं प्रथमे यामे सर्वपातकैः"। इदं प्रदोषव्रतमिति हेमाद्रिः। शिवरात्रिव्रते तु "प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतुर्दशी" हेमाद्रिस्मृतिः। तत्रैव यत्तः "प्रदोषोऽस्तमयादूर्द्धं घटिकाद्वयमिष्यते"। घटिकाद्वयम् "त्रयोदश्यास्तमे सूर्ये चतस्रश्चापि नाडिषु। भूतविद्धा तु सा तत्र शिवरात्रिव्रतं चरेत्" ति०त० वायुपु० शब्दैकवाक्यत्वात्। तथा च प्रदोषशब्दस्य रात्रिमात्रं रात्रेः प्रथमयामः प्रथमदण्डचतुष्टयं चार्थः कर्मभेदे तस्य ग्राह्यता। तत्रानध्याये प्रथमरात्रिमात्रपरता प्रदोषव्रते प्रथमयामपरता शिवरात्रिव्रतादौ दण्डचतुष्टयपरतेति विवेकः। "प्रदोषोरजनीमुखम्" इत्यमरोक्तिः रात्रेः प्रथमप्रहरप्रथमदण्डचतुष्ट-

अपरत्वाभिप्रायेण रात्रिभागे भङ्क्ते इति बोध्यम्।

प्रदोषक त्रि० प्रदोषे भवः कालात् ठञं बाधित्वा पूर्वोक्ते त्यादिना वुञ्। प्रदोषकालभवे।

प्रद्युम्न पु० प्रकृष्टं द्युम्नं बलं यस्य। १कन्दर्पे अमरः। स च वासुदेवस्य रुक्मिण्यां जातः हरिवं० ११८अ०। सनत्कुमारांशजातत्व भा० आ० ६७अ०। २वैष्णवास्त्रभेदे चतुर्व्यूहात्मकविष्णोरंशभेदे च अनिरुद्धशब्दे १६२पृ० चतुर्व्यूहशब्दे २८७६ पृ० च दृश्यम्। अनोर्नडादायां जाते ३क्षत्रभेदे पु० भाग० ४।१२।१४

प्रद्यो त्रि० प्रकृष्टा द्यौर्दिनं यस्य। प्रकृष्टदिने क्लीवत्वे तुअः प्रद्युतस्य क्लीव एव तुअत्वेन गन्तव्येऽपि भाषितपुंस्कत्वाभावात् टाद्यचि न पुंवत् पुद्युना इत्यादि त्रि०कौ०-तुअ० पुद्यकाप्रद्युनेत्युदाहृतं तच्चिन्त्यम्। [भा०स० १६अ०।

प्रद्योत पु० प्र+द्युत-अच्। १रक्षो हन्त्रा०। २यवभेदे पु०

प्रद्योतन पु० प्र+द्युत-"अनुदात्तेतश्च हलादेः" पा० युच्। १स्वर्णे हला०। २द्योतनशीले त्रि०। भावे ल्युट्। ३दीप्तौ न०।

प्रद्रव पु० प्रकृष्टो द्रवः भा०स०। पलायने अमरः।

प्रद्राणक त्रि० प्र+द्रा-कुत्सितायां गतौ क आर्थे क। कुत्सितां गतिं प्राप्ते अन्यावस्थां प्राप्ते "उपस्थिते चाक्रोशेच दृश्यपामे प्रद्राणकउवास" छा०उ० "प्रद्राणकः कुत्सितां गतिं गतोऽन्यावस्थां प्राप्त इत्यर्थः" भा०।

प्रद्राव पु० प्र+"प्रदुरुपसर्गात्" पा० अर्थं बाधित्वा घञ्। पलायने अमरः। याचादि० अनोदात्तत्वात्।

प्रद्राविन् त्रि० प्र+द्रु-ताच्छील्ये णिनि। पलायनशीले।

प्रद्वार न० प्रकृतं द्वारं भा०स०। द्वारप्रान्तभागे

प्रधन न० प्र+धा-क्यु। १युद्धे अमरः। प्रकृष्टं धनमस्य। २प्रकृष्टधनयुक्ते त्रि०। निघण्टौ संग्रामनामसु सङ्ग्रामे इत्यत्र प्रधने" पाठान्तरम्। एदन्तमव्ययं तत्रार्थे।

प्रधमन न० प्र+ध्मा० धम-ध्माने भावे ल्युट्। सुवर्णमाकरव्यापारभेदे सुवर्णतः।

प्रधा स्त्री प्र+धा-भावे अङ्। १निधाने २दत्तसुतायां कन्यायां यदुभेदे भा०आ०६५अ०। प्रधाया अपत्यं ढञ्। प्राधेय तदपत्ये पुंस्त्री०। "प्राधेयाम्बष्ठसांगण्याः" मार्क० तत्कन्यायां चाम्बुवादयोऽप्यपत्यः भा०आ० ६५अ०।

प्रधान न० प्र+धा-ल्युट्। सांख्यमतसिद्धायां सत्त्वरजस्तमोरूपगुणत्रयसाम्यावस्थायां १प्रकृतौ प्रकृतिशब्दे दृश्यम्। तत्कार्ये २बुद्धितत्त्वे ३परमात्मनि ४प्रधाने ५सचिवे च। ६सेनापत्यध्यक्षे पु० ७श्रेष्ठे त्रि० अमरः "सेनाध्यक्षः प्रधानः स्यात्" तस्य पुंस्त्वमिति बोपालितः।

प्रधानधातु पु० कर्म०। चरमधातौ वीर्ये शुक्रे त्रिका०। शुक्रस्य चरमधातुत्वम् अष्टकरगब्दे ६२८पृ०उक्तं दृश्यम्

प्रधि पु० प्रधीयन्ते काष्ठान्यत्र प्र+धा-आधारे कि। चक्रावयवकाष्ठसङ्घनस्थाने रथनाभौ अमरः।

प्रधी त्रि० प्रकृष्टा धीर्यस्य। १प्रकृष्टबुद्धियुक्ते भा०स०। २प्रकृष्टायां बुद्धौ स्त्री। प्रकृष्टं ध्यायति ध्यै-कर्त्तरि क्विप्। ३प्रकृष्टध्यानकर्त्तरि त्रि०। तत्र तृतीयार्थे गतिपूर्वकत्वात् यण् प्रध्यः प्रध्या इत्यादि याज्ञवल्क्ये प्रशब्दस्य क्षयार्थं प्रत्ययोपसर्गत्वात् न यण् किन्तु इयङ्। प्रधिया इत्यादीत्यन्ये त्रि०को० तु "हस्तिकरादीनां मते ऊङ्कीवद्रूपम् पदान्तरं विनाऽपि स्त्रियां वर्त्तमानत्वं नित्यस्त्रीत्वमिति स्त्रीकारात् स्त्रिङ्गान्तरमभिधायकं तदिति कैयटमते पुंवद्रूपम् प्रकृष्टा धीरिति विग्रहे तु ऊङ्कीवत् यणि यणि च पुंवद्भावे प्रध्यं प्रध्य इति विशेषः" इत्युक्तम्।

प्रधूपित त्रि० प्र+धूप-क्त। सन्तापिते "व्यसनप्रधूपिताम्" इति कुमारः। ज्योतिर्भोक्तायां २स्वर्ण गन्तव्यायां दिशि स्त्री। तत्र प्रधूपिता इति पाठान्तरम्। [तावस्थायाञ्च।

प्रध्वंस पु० प्र+ध्वनस-भावे घञ्। १नाशे सांख्यमते २अतौ-

प्रध्वस्त त्रि० प्र+ध्वनस-क्त। १नाशप्रतियोगिनि २अतीते च ३मन्त्रभेदे पु० "एकोनविंशत्यर्णो वा यो मन्त्रस्तारसंयुतः। वृत्ते खाङ्गयवीनाढ्यं प्रध्वस्तं तं प्रचक्षते" तन्त्रवा०।

प्रनप्तृ पु०प्रगतो नप्तारं अनकतया स्वसा०स०। पौत्रपुत्रे प्रपौत्रे उच्चवद०। [प्रकर्षेण नर्त्तकत्वे रि।

प्रनर्त्तक त्रि०प्र+नर्त-ण्वुल् योपदेशत्वाभावात् न णत्वम्।

प्रनष्ट त्रि०प्र+नश-क्त यान्तत्वाभावात् न णत्वम्। नाशप्रतियोगिनि "प्रनष्टस्वामिकं द्रव्यं राजा तद्गृहे निधापयेत्" मनुः।

प्रना(णा)यक त्रि०प्रकृष्टो नायकोऽस्य प्रशब्दस्य नवतिं प्रति उपसर्गत्वाभावात् न णत्वम्। प्रकृष्टनायकयुक्ते। प्र+नी-ण्वुलि तु णत्वम्। प्रणयकारके इति भेदः।

प्रपच्च पु०प्रगतः पचम् अत्या०स०। पलाये भा०द्रो० २०अ०।

प्रपञ्च पु० प्र+पचि-आधारे घञ्। १विस्तारे २वैपरीत्ये ३प्रतारणे। कर्त्तरि पचा०अच्। ४संसारे च अमरः। तत्र वैपरीत्यं भ्रमो माया वेति स्वामी।

प्रपञ्चित प्र+पञ्च-णिच्-कर्मणि क्त। १विस्तारिते २प्रतारिते भ्रान्तिज्ञानविषयतया ३सम्पादिते च भाग० १०।१४अ०

प्रपतन न॰ प्रपतत्यस्मात् प्र+पत–भीमा॰ अपादाने ल्युट्। १पतनापादाने इत्यादौ। भावे ल्युट्। प्रकर्षेण २पाते तत्प्रयोजनमस्य क॰। प्रपतनीय प्रपातसाधने त्रि॰।

प्रपथ पु॰ प्रकृष्टः पन्थाः प्रकृष्टः पन्था यत्र वा अच्समा॰। १प्रकृष्टमार्गे २तद्युक्ते त्रि॰ अ॰१।१६।६ [स्त्री राजनि॰]

प्रपथ्य त्रि॰ प्रकृष्टं पथ्यं प्रा॰स॰। १अत्यन्तहिते २हरीतक्यां

प्रपद् न॰ प्रारब्धं पदम् प्रा॰स॰। पादस्याग्रभागे अमरः। प्रपदं व्याप्नोति ख। प्रपदीन पादाग्रव्यापके त्रि॰ अपप्रपदीनशब्दे माघः ३।१२उदा॰ दृश्यम्। [इति चण्डी।

प्रपन्न त्रि॰प्र+पद–क्त। शरणागते "प्रपन्नार्त्तिहरे! देवि!"

प्रपन्नाड पु॰ प्रपन्नान् अत्ति भूषयति अद–अच् उप॰स॰ अस्य डः। १चक्रमर्दे रत्नमा॰। तस्य दद्रुरोगिभिः सेवने तेषां रोगनिवारणेन भूषकत्वात्तथात्वम्।

प्रपा स्त्री प्रपीयतेऽस्यां प्र+पा–अजर्थे क। पानीयशालायाम्। पानीयशालिकाशब्दे ४२०६ पृ॰ दृश्यम्।

प्रपाठक पु॰प्रकृष्टः पाठोऽत्र कप्। १वेदस्याध्यायांशभेदे २श्रौतसूत्रस्यांशभेदे च। [तत्रे राजनि॰।

प्रपाणि पु॰ प्रकृष्टः पाणिः प्रा॰स॰। करस्याधोभागे पाणि-

प्रपात पु॰ प्रपतत्यस्मात् पत–अपा॰घञ्। १तटरहिते २निरवलम्बे ३पर्वतस्थानभेदे अमरः। ४निर्झरे ५कूपे च मेदि॰ यस्मात् पतने अवस्थानाय क्रियाभेदो न भवति हृताद्यर्थे स्थाने। भावे घञ्। ७अवस्कन्दे हेमच॰।

प्रपानक न॰ प्रकृष्टं पानमस्य कप्। खण्डमरिचादिभिश्चिते पानीयद्रव्यभेदे "प्रपानकरसन्यायाद्वर्ण्यमानो रसो भवेत्" यथा खण्डमरिचादीनां सम्भेलनादपूर्व इव कश्चिदास्वादः प्रपानकरसे जायते विभावादिसम्भेलनादिहापि तथेत्यर्थः" सा॰द॰। ऋतान्नयशब्दे २०८४पृ॰दृश्यम्।

प्रपापूरणीय त्रि॰ प्रपापूरणं प्रयोजनमस्य "तत्प्रकरणे विधि पूरिपतिरुद्धिप्रकृतेरनात्" वार्त्ति॰ छ। प्रपापूरणप्रयोजनके। [शब्दमाला।

प्रपावन न॰ प्रपैव कामपूरकं वनम्। कामारण्ये वनभेदे

प्रपितामह पु॰ प्रगतः पितामहं कार्य्यत्वेन अत्या॰स॰। १पितामहपितरि अमरः। तस्य पत्नी ङीप् २प्रपितामही तत्पत्न्यां स्त्री "स्वेन भर्त्रा सह आद्धं माता भुङ्क्ते स्वधामयम्। पितामही च स्वेनैव स्वेनैव प्रपितामही" दायभागधृतवचनम्। पितामहस्य प्रजापतिजनकस्य चतुर्मुखब्रह्मणः जनके ३परब्रह्मणि "भूर्भुवः स्वस्तरस्कारः स पिता प्रपितामहः" विष्णुस॰।

"यो वै ब्रह्माणं विदधाति पूर्वम्" श्रुतेस्तस्य पितामहब्रह्मसृष्टृत्वात्तथात्वम्। "सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः। अप एव ससर्जादौ तासु वीजमवासृजत्। तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्। तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः" मनुना सर्वपितामहस्यापि तेन सृष्टत्वात्तस्य तथात्वम्।

प्रपित्वे अव्य॰ उत्तरायणे निपातः।

प्रपुन्नाड(ट) पु॰ पुमांसं नाटयति नडयति नड–घञर्थे नट-अवस्कन्दने वा अच् प्रकृष्टः पुन्नाडः (पुन्नाटः) प्रा॰स॰। १चक्रमर्दे (चाकुन्दा) इत्ये। डस्य लत्वे प्रपुन्नालोऽप्यत्र। २दद्रुमर्दने अमरः। पृषो॰ प्रपुनाड (पुन्नड) इत्येतावपि तत्रार्थे अमरे पाठान्तरम्।

प्रपूरिका स्त्री प्रकर्षेण पूर्य्यते खण्डैः पूर–कर्मणि घञ् स्वार्थे क टाप् आपि अत इत्त्वम्। १खण्डकार्य्यांशे हेमचन्द्रः २प्रकर्षेण पूरके त्रि॰।

प्रपूर्वग पु॰ प्रकृष्टः पूर्वगः पूर्ववर्त्ती प्रा॰स॰। खण्डेः प्राग्वर्त्तिनि १परमेश्वरे "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति श्रुतेः तस्य तथात्वम्। तद्रूपेण ध्येये २कश्चिन्नीकुमारह्वये द्वि॰व॰। भा॰आ॰२अ॰ अश्विनीकुमारस्तुतिः।

प्रपौण्डरीक पु॰ पुण्डरीक+स्वार्थेऽण् प्रकृष्टं तादृक् पुण्ड्रं यस्य। गजमनुष्याणां चक्षुर्द्वितीयकारके श्वेतपद्मीतुल्यपत्रके क्षुपभेदे अमरः।

प्रपौण्डरीकाद्य न॰ "प्रपौण्डरीकमधुकपिप्पलीचन्दनोत्पलैः। सिद्धं घृतक्षीरे तैलं नस्येनाभ्यञ्जनेन वा। सर्वान्मूर्द्धगदान् हन्ति पलितानि च शोणितम्" चक्रपाणिदत्तोक्ते तैलभेदे।

प्रपौत्र पुंस्त्री॰अमतः कारणतया पौत्रम् अत्या॰स॰। पौत्रस्य १पुत्रे तत्कन्यायां स्त्री ङीप्।

प्रफर्वी स्त्री प्रकृष्टं पर्व नितम्बस्थानं यस्याः स्त्रियां ङीप् पृषो॰। प्रशस्तनितम्बायां स्त्रियां अ॰१०।८५।१२ भा॰। फर्वति गतिकर्मा इति वेददीपः। २प्रकृष्टगतियुक्ते त्रि॰ यजु॰१२। ७६ वेददीपः।

प्रफुल्त(ल्ल) त्रि॰ प्र+फल–क्त आदित्वात् डटोऽभावे अत इत्त्वम् प्र+फुल्ल–विकाशे अच् वा (उदययुतः)। विकाशयुते अमरः। "सौप्रफुल्लं सानुमतः प्रफुल्त(ल्ल)म्" रघुटीकायां मल्लिनाथेन द्विधापाठः समर्थितः। [त्रिका॰।

प्रबन्ध पु॰ प्र+बन्ध–भावे घञ्। १सन्दर्भे ग्रन्थादेः २रचने च

प्रवन्धन न० प्र+बन्ध–भावे ल्युट्। प्रकर्षेण बन्धने बन्धने
प्रवन्धकल्पना स्त्री ६त०। "प्रवन्धकल्पनां श्लोकसत्तां प्राज्ञाः कथां विदुः" दण्डिकृतचतुर्थ्यामत्यसत्तायां वङ्गभिन्नाकथायाम् अमरः। [अमरः।
प्रव(व)र्हं त्रि० प्र+वर्ह स्तुतौ (हृष) बहौ वा अच्। प्रधाने
प्रवल त्रि० प्रकृष्टं बलमस्य। १प्रकृष्टबलयुते। प्रकृष्टं बलति बल–धान्यावरोधे अच्। २पल्लवे शब्दमाला ३प्रसारिण्यां लतायां स्त्री राजनि०।
प्रवल्हिका स्त्री प्रवल्ह-आच्छादने ण्वुल् प्रज्ञेडिकायाम् अम० अयमोष्ठादिः इत्। प्रवल्हि वा ङीप् प्रवल्ही च तत्रार्थे।
प्रवाल न० प्र+वल–धान्यावरोधे अच्लादि० घञ्। १किसलये नवपल्लवे २वीणादण्डे च अमरः। ३रत्नभेदे पु० किं रत्नं कस्य प्रकृष्टस्य प्रीतिकारित्वेन दोषहरं भवतीति प्रश्ने तदुत्तरमाह ज्यो० रत्नमालायां "माणिक्यमन्तरक्षेः सुजातमसलं, मुक्ताफलं शीतगोभोद्भवस्य तु विद्रुमो निगदितः, सौम्यस्य मारकतम्। दैवेज्यस्य च पुष्यराग मसुराचार्य्यस्य वज्रं, मनेर्नीलं निर्मलमन्ययोर्निगदिते गोमेदवैदूर्य्यके"। "पुंसि क्लीवे प्रवालः स्यात् पुमानेव तु विद्रुमः" भावप्र० अस्यार्हत्वेऽस्य पुंनपुंसकत्वञ्च रत्नानां गुणास्तत्रोक्ता यथा "रत्नानि भक्षितानि सुमधुराणि खराणि च। चक्षुष्याणि च शीतानि विषघ्नानि धृतानि च। मङ्गल्यानि मनोज्ञानि सर्वदोषहराणि च"। युक्तिकल्पतरौ तस्योत्पत्त्यादिकं भेदादिकञ्चोक्तं यथा "श्रुत उवाच आदाय श्रेष्ठसत्त्वानां यमाशाकम्बलादिषु। चिक्षेप तत्र जायन्ते विद्रुमाः सप्तधातुगाः। तत्र प्रधानं प्रणवोद्भिताभं शुक्लाजवापुष्पनिभं प्रदिष्टम्। सनीलकं देवकरोमकञ्च स्थानानि तेषु प्रभवं सुरागम्। अन्यत्र जातच्च न तत् प्रधानं मूल्यं भवेच्छिल्पिविशेषयोगात्। प्रसन्नं कोमलं स्निग्धं सुरागं विद्रुमं हि तत्। धनधान्यकरं लोके विघातिभयनाशनम्। परीक्षा पुष्पहेनोक्ता रुधिराक्षस्य वैमथेः। स्फटिकस्य विद्रुमस्य रत्नज्ञानाय शौनक!" इति गारुडे ८८अ०। "क्षीरसागरमध्ये तु जायते वल्लरी तु या। विद्रुमा नाम रत्नाख्या दुर्लभा वज्रूरिणी। पाषाणं प्रभजत्येषा प्रवलात् कथिता सती। विद्रुमं नाम यद्रत्नमामनन्ति मनीषिणः। ब्रह्मादिजाति भेदेन तच्चतुर्विधमुच्यते। चरणं शशरक्ताख्यं कोमलं स्निग्धमेव च। प्रवालं विप्रजातिः स्यात् दृश्यवेध्यं मनोरमम्। ज्ञवाबन्धूकसिन्दूरदाडिमीकुसुमप्रभम्। कठिनं स्निग्धदुर्वेधं क्षत्रजातिः तदुच्यते। पलाशकुसुमाभासं तथा पाटलसन्निभम्। वैश्यजातिर्भवेत् स्निग्धं वर्णाढ्यं मन्दकान्तिमम्। विद्रुमं शूद्रजातिः स्यादायुर्वेध्यं तथैव च। रक्तता स्निग्धता दार्ढ्यं चिरद्युति सुवर्णता। प्रवालानां गुणाः प्रोक्ता धनधान्यकराः वराः। स्निग्धादौ यत्तु संजातं तद्रूक्षमतिनिष्ठुरम्। तत्र स्निग्धो भवेच्छिल्पिकलकोऽतिमधुरः स्मृतः। तस्य धारणमात्रेण विषवेगः प्रशाम्यति। विवर्णता तु खरता प्रवाले दूषणद्वयम्। रेखा काकपदी विन्दुर्यवा वज्रेषु दोषकृत्"। तथा प्रवाले सर्वत्र वर्जनीयं विचक्षणैः। रेखा कृम्यादुयशो, बुद्धीभावर्त्तः कुलनाशनः। पङ्कतो रोगकृत् ख्यातो विन्दुर्धनविनाशकृत्। त्रासः संजनयेत् यासं नीलिका कलुषकारिणी। मूल्यं शुद्धप्रवालस्य रूपद्विगुणमुच्यते। धारणेऽप्यपि नियमो जातिभेदेन पूर्ववत्। तथा हि "विप्रजातिं विषमं विवर्णं खरप्रवालं प्रवदन्ति ये वै। ते मूलमेवाखनि वै वहन्ति सत्यं वदत्येव श्रुती मुनीन्द्रः'। तस्य शुभाशुभलक्षणे राजनि० उक्ते यथा "शुद्धं दृढं घनं वृत्तं स्निग्धं प्रातसरङ्गकम्। समं गुरु सिराहीनं प्रवालं धारयेत् शुभम्। गौरं रक्तजलाक्रान्तं रक्तरेखं सकोटरम्। रूक्षकृष्णं लघु श्वेतं प्रवालमशुभं त्यजेत्"।
प्रवालक पु० यज्ञभेदे भा०श० १०अ०।
प्रवालफल न०प्रवाल इव रक्तं फलमस्य। रक्तचन्दने भावप्र० तत्फलस्य प्रवालतुल्यरक्तत्वात् तथात्वम्।
प्रवालाश्मन्तक पु० प्रवाल इवाश्मन्तकः रक्तत्वात्। रक्ताश्मन्तकवृक्षे शब्दच०। [राजनि०।
प्रवालिक पु०प्रवालो नवपल्लवोऽस्यास्ति भूम्ना ठन्। जीवशाके
प्रवाहु पु० प्रगतो बाहुम् अत्या०स०। बाहुमूले ह०सं०५८अ०।
प्रवाहुक अव्य० प्रकृष्टो बाहुरत्र कप् स्वरादि०। १समकाले २अर्द्धार्थे च मनोरमा। पृषो०प्रबाहुक प्रबाहुम् पाठान्तरम् तत्रार्थे अव्य० "प्रबाहुगं जुहोति" तैत्ति०२।६।१।
प्रबुद्ध त्रि०प्र+बुध–कर्त्तरि क्त। १प्रबोधयुते २पण्डिते ३प्रफुल्ले पुष्पादौ च हेमच०। ४जागरिते आपरक्षिते ५भागवतधर्मप्रधाने ऋषभदेवपुत्रभेदे पु० भाग०५।४।११
प्रबोध पु० प्र+बुध–भावाधारादौ घञ्। १निद्रापगमे तस्य प्रकृष्टज्ञानाधारत्वात् तथात्वम्। २यथार्थज्ञाने च।
प्रबोधन न० प्र+बुध–भावे ल्युट्। १यथार्थज्ञाने २निद्रा-

पगमे। प्र+बुध-णिच्-भावे ल्युट्। २प्रकटबोधने ३सद्बोधने ४पूर्वगन्धस्य न्यूनतायां पुनः सौगन्ध्योत्पादनाय व्यापारभेदे अमरः।

प्रबोधनी स्त्री प्रबोध्यते हरिरत्र प्र+बुध-णिच्-आधारे ल्युट् ङीप्। कार्त्तिकशुक्लैकादश्याम् तत्र यवितस्य हरेरुत्थापनानुकूलव्यापारस्याचरणात्तथात्वम्। तस्यानेकादशीशब्दे तथाः खण्डभेदश्च पाद्मता दर्शिता। तन्माहात्म्यं च पद्मपु०उ०ख०१२६अ० उक्तं यथा "ब्रह्मोवाच प्रबोधन्याश्च माहात्म्यं पापघ्नं पुण्यवर्द्धनम्। सक्रिदं शृण्वतां पुंसां हरेश्च सन्निधिप्रद! तावद्गर्जन्ति तीर्थानि पुण्यान्यायतनानि च। यावत् प्रबोधनी विष्णोस्तिथिर्नायाति कार्त्तिके। अश्वमेधसहस्राणि वाजपेयशतानि च। एकेनैवोपवासेन प्रबोधन्यां भवन्ति हि। मेरुमन्दरतुल्यानि पापानि सुबहून्यपि। भस्मसात् कुरुते सद्यो हरिबोधन्युपोषणात्। पूर्वजन्मसहस्रेषु यत्पापं समुपार्जितम्। जागरं प्रबोधन्यां दहते तूलराशिवत्। उपवासं प्रबोधन्यां यः करोति समाहितः। विधिवच्च सन्निधेह! यथोक्तं लभते फलम्। यानि कानि च तीर्थानि त्रैलोक्ये संवसन्ति वै। तानि तस्य गृहे सम्यक् कृता येन प्रबोधनी। किं तस्य बहुभिः पुण्यैः सुरलोकसुखप्रदैः। जर्जे बध्नोत्थिता येन संपूर्णा हरिबोधनी। बोधनीं समुपोष्यैव सुस्थितागी भवेन्नरः। प्रबोधन्यां नरश्रेष्ठ! न पुनर्गर्भमाविशेत्। स्नानं दानं जपो होमः सहस्रगुणमुच्यते जनार्दनम्। नरैर्यत् क्रियते जर्जे प्रबोधन्यां तदक्षयम्। येऽर्चयन्ति नरास्तत्रां भक्त्या विष्णुं जगत्पतिम्। स्थित्वा बोधनीं ते तु प्रयान्तेयुर्हरौकसः। महत्पातकिभिर्दत्त! महापापौघनाशनम्। प्रबोधन्यां सुने! विष्णोर्विधिवत् सुसमोषणम्। स ज्ञानी च स योगी च स तपस्वी जितेन्द्रियः। स्वर्गमोक्षौ च तस्यास्तां य उपास्ते प्रबोधनीम्। यत्तु जन्मशतं पापं स्वल्पं वा यदि वा बहु। करोति मनसादिष्णुः प्रबोधन्यां प्रपूजितः। हरिपूजा विधातव्या कार्त्तिके बोधवासरे। गीतशास्त्रविनोदेन प्रबोधन्यान्तु जागरात्। चन्द्रसूर्योपरागे च यत् फलं परिकीर्त्तितम्। तत्तात् सहस्रगुणितं प्रबोधन्यां हि जागरात्। स्नानं दानं जपो होमः स्वाध्यायस्तर्पणं हरेः। एतस्मात् कोटिगुणितं प्रबोधन्यां हि जागरात्"। स्कान्दे "जन्मप्रभृति यत्पुण्यं नरैरुपार्जितं भुवि। हृत्वा भवति तत्सर्वं न कृत्वा बोधवासरम्"। "प्रबोधन्याश्च माहात्म्यं पापघ्नं पुण्यवर्द्धनम्। सक्रिदं शृण्वतां पुंसां हरेश्च सन्निधिप्रद!। तावद्गर्जन्ति तीर्थानि पुण्यान्यायतनानि च। यावत् प्रबोधनी विष्णोस्तिथिर्नायाति कार्त्तिके। अश्वमेधसहस्राणि वाजपेयशतानि च। एकेनैवोपवासेन प्रबोधन्यां भवन्ति हि। मेरुमन्दरतुल्यानि पापान्यल्पजितान्यपि। एकेनैवोपवासेन दहते हरिबोधनी। पृथिव्यां यानि दानानि दत्त्वा यत् फलमाप्नुते। एकेनैवोपवासेन ददाति हरिबोधनी" हरिभ०वि०।

प्रभञ्जन न० प्रभञ्जति वृक्षादीन् प्र+भञ्ज-युच्। वायौ अमरः। [शतायां स्त्री राजनि०।

प्रभद्र पु० प्रकटं भद्रमस्मात् ब०व०। १निम्बवृक्षे २प्रसारिण्यां

प्रभद्रक न० "भवति नजौ भजौ रसयतिौ प्रभद्रकम्" छन्दोर० उक्ते चतुर्दशाक्षरपादके छन्दोभेदे।

प्रभर्मन् पु० भृ-भावे कर्त्तरि वा मनिन् प्रकृष्टं भर्म भरणं प्रकृष्टो भर्मा भर्त्ता ऋत्विक् वा यस्मिन्। १यज्ञे ऋ०८। ८२।१ भाष्ये दृश्यम्। प्र+भृ-भावे मनिन्। २प्रकर्षेण भरणे सम्पादने न० ऋ० १।७८।७

प्रभव पु० प्रभवत्यस्मात् "भुवः प्रभवः" पा० भूकर्त्तरि अपादाने बाहुलके अप्। १प्रथमप्रकाशस्थाने २उत्पत्तेः विद्वत्प्रथमोपलब्धिस्थाने हेमच० ३मूले ४सन्निभेदे ५जन्महेतौ। भावे अप्। ६जन्मनि। करणे अप्। ७पराक्रमे मेदि०। दशदिग्गजेषु वामनभेदे तत्फलञ्च ज्यो०त० भविष्यपु० "वङ्गतोयास्तथा मेघा वङ्गस्त्रीश्च मेदिनी। वङ्गचोराश्च मानो व्याधिरोग विवर्जिताः। प्रशान्ताः पार्थिवाश्चैव प्रभवे परिकीर्त्तिता"। ८विष्णौ पु० "संभवो भावनो भर्त्ता प्रभवः प्रभुरीश्वरः" विष्णुस०

प्रभवादि पु० प्रभव आदिर्येषाम्। प्रभवप्रभृतिषष्टिसंवत्सरेषु च च गुरुमध्यभोगात् गणनीये। "ज्योतिर्विद इत्थं मध्यात् प्रभवादेश्च सम्भवम्। उच्यतेऽद्य समाद्यादि वर्षाणामपि सम्भवम्" ज्यो०त०। ते च ज्यो०त० फलसहिताः दर्शिता तच्छब्दे तद्राक्यञ्च वक्ष्यते च तदानयनञ्च

ज्यो॰त॰ "ग्रहेन्द्रकालः पृथगाकृति २२ ग्नः शशाङ्कनन्दा-ग्नियुगैः ४२९१ समेतः। ग्रहाद्विखेन्दु१८७५हृतः स लब्धः षष्ट्यादिशिष्टाः प्रभवादयोऽब्दाः। वर्षवर्जन्तु यच्छेषं खर्थैः१२ संपूर्य खोर्मिभिः६॰"(भक्तम्)। प्रभवादिवर्षा-नयनपक्षस्य "आद्या तु विंशतिर्ब्राह्मी द्वितीया वैष्णवी स्मृता। तृतीया रुद्रदैवत्या श्रेष्ठा मध्याधमा भवेत्"। इ॰सं॰८अ॰अन्यथोक्तं गुरुवर्षशब्दे २६२२पृष्ठादावुक्तम्।

प्रभविष्णु त्रि॰ प्र+भू-शीलार्थे इष्णुच्। १प्रभावशीले २विष्णौ पु॰ भा॰अनु॰ ७१अ॰।

प्रभा स्त्री प्र+भा-भावे अङ्। १दीप्तौ राजनि॰। प्र+भा-क। २प्रदीप्तियुते त्रि॰ २कुबेरपूर्व्यां स्त्री हेमच॰। ४दुर्गायां स्त्री "प्रभा प्रभानशीलत्वात् ज्योत्स्ना चन्द्रार्कमालिनी" देवीपु॰ तन्नामनिरुक्तौ। ५सूर्य्यपत्नीभेदे "विश्वस्वान् कश्यपात् पूर्वमदित्यामभवत् सुरा। तस्य पत्नीत्रयं तद्वत् संज्ञा राज्ञी प्रभा तथा। रेवन्तस्य सुता राज्ञी रेवन्तं सुषुवे सुतम्। प्रभा प्रभावं सुषुवे त्वाष्ट्री संज्ञा तथा मनुम्" मत्स्यपु॰ ११अ॰। ६कृष्णस्नोः कन्याभेदे नक्तजमातरि हरिवं॰ ३अ॰। ७अप्सरोभेदे भा॰अनु॰ १४२५ श्लो॰ दक्षोपीभेदे "इष्ट्वा प्रभया सोमा युक्तो वृन्दावने वने। प्रभा देहं परित्यज्य जगाम सूर्यमण्डलम्" ब्रह्मवै॰प्र॰ख॰ ६अ॰।

प्रभाकर पु॰ प्रभां करोति कृ-ट। १सूर्य्ये २वह्नौ ३चन्द्रे ४मयूरे च मेदि॰। ५सूर्य्यवंशे ७मुनिभेदे हरिवं॰ २१अ॰। ८कुशद्वीपस्थे वर्षभेदे भा॰भी॰ १२अ॰। अष्टम-मन्वन्तरे ९देवगणभेदे मार्क॰पु॰ ८॰अ॰।

प्रभाकोट पु॰ प्रभान्वितः कोटः मा॰त॰। खद्योते राजनि॰।

प्रभाञ्जन पु॰ शोभाञ्जने त्रिका॰।

प्रभात न॰प्र+भा--भावे क्त प्रकृष्टं भातमत्र वा। १प्रातःकाले अमरः। प्र+भा कर्त्तरि क्त। २प्रभायुक्ते त्रि॰ ३वसुभेदे पु॰। प्रभास इत्यत्र प्रभात इति मिता॰ पाठः। धरशब्दे २८४७पृ॰ दृश्यम्। प्रभातकाले दृष्ट्वा उक्ता राजवल्लभेन "वेद्यः पुरोहितो मन्त्री दैवज्ञोऽथ चतुर्थकः। प्रभात-काले द्रष्टव्यो नित्यं क्षत्रियसिद्धता" छन्दोगपरि॰ तत्र दृश्यादृश्यानाह यथा "श्रोत्रियं सुभगामग्निं गान्धै-वाम्भिचितनद्यः। प्रातरुत्थाय यः पश्येदापद्भ्यः स विमुच्यते। पापिष्ठं दुर्भगां भद्रां नग्नसत्त्वत्तनासिकम्। प्रातरुत्थाय यः पश्येत् कलेरपहरत्यघम्"।

प्रभातकाले खारणीयाः काशीखण्डे ३५अ॰ दर्शिता यथा "खचितं चित्रवेद्यं प्राग्यत्किंचोत्थाय सर्वदा। गजाश्वं संस्मरेदादौ ततः स्त्रैणं सहाम्बया। श्रीकान्तं श्रीसमेतं तु ब्रह्माणं कमलोद्भवम्। इन्द्रादीन् सकलान्देवान् वसिष्ठादीन् मुनीनपि। गङ्गाद्या सरितः सर्वाः क्षी-रैलाद्याखिलान् गिरीन्। क्षीरोदादीन् समुद्रांश्च मा-नसादिसरांसि च। वनानि नन्दनादीनि धेनूः काम-दुघादिकाः। कल्पद्रुमादिवृक्षांश्च धातॄन् कालनरुक्षतः। दिव्यस्त्रीरप्सरोमुख्या गरुडादीन् पतत्त्रिणः। नागांश्च शेषप्रमुखान् गजानैरावतादिकान्। अश्वानुच्चैःश्रवो मुख्यान् कौस्तुभादीन् मणीन् शुभान्। ऋरेदस्मृती मुख्याः पतिव्रतवतीर्वधूः। मैथिलादीन्यरण्यानि पुरीः काशीपुरीमुखाः। विश्वेशादीनि लिङ्गानि वेदान्वक्-प्रमुखानपि। गायत्रीप्रमुखान् मन्त्रान् योगिनः स-नकादिकान्। प्रणवादिमहाबीजं नारदादींश्च वैष्ण-वान्। शिवभक्तांश्च वाचादीन् प्रह्लादादीन् दृढव्रतान्। वदान्यांश्च दधीच्यादीन् हरिश्चन्द्रादिभूपतीन्। जननी चरणौ स्मृत्वा सर्वतीर्थात्तमोत्तमौ। पितरं च गुरु-स्त्वापि हृदि ध्यात्वा प्रयत्नधीः। ततश्चावश्यकं कर्त्तुं नैर्ऋतं दिशमाश्रयेत्"। "प्रभातायां तु शर्वर्यामृ" भार॰नानाख्याने।

प्रभातीर्थ तीर्थभेदे शिवपु॰।

प्रभातोर पु॰ नागभेदे भा॰आ॰ ३५अ॰।

प्रभाव पु॰ प्र+भू-घञ्। राज्ञां कोषदण्डजाते १तेजसि अमरः २तेजसि शक्तिमात्रे हेमच॰ ४विक्रमे ५ज्ञानौ ६उत्पत्तौ च मेदि॰। ७स्वारोचिषमनोः पुत्रभेदे मार्क॰पु॰ ६६अ॰। ८वसुभेदे प्रभास इत्यत्र पाठान्तरम्। ९प्रमागर्भ-जाते सूर्य्यपुत्रभेदे प्रभाशब्दे दृश्यम्।

प्रभावज न॰ प्रभावात् जायते जन-ड। प्रभुशक्तिभेदे कोषदण्डाभ्यां साध्ये तेजसि।

प्रभावत् त्रि॰प्रभा+अस्त्यर्थे मतुप् मस्य वः। १दीप्तियुक्ते स्त्रियां ङीप्। सा च वज्रनाभाहरस्य २कन्याभेदे। प्रद्युम्नेन तस्या हरणकथा च हरिवं॰ १५२अध्यायादौ दृश्या। ३तापसीभेदे भा॰व॰२८४अ॰। ४कुमारानुचरमातृभेदे भा॰ श॰ ४७अ॰। ५चक्रेश्वरस्य चित्ररथस्य भार्य्यायाम् भा॰ अनु॰ ४२अ॰। ६मरुत्तस्यपत्न्यां विदर्भराजदुहितरि मार्क॰ ११२३ अ॰। ७अष्टनामकोनविंशदक्षरच्छन्दोमातरि दशम्यां वीणावाद्ये स्त्री हेमच॰। ८त्रयोदशाक्षरपादके छन्दोभेदे "यस्यां प्रिये प्रथमकमक्षरद्वयं तूर्य्यत्रया गुरु-

भयम् देशान्तिमम् । सान्त्वं भवेद्यतिरपि चेदृग्युगपद्दैः सा लक्षितास्तरुचिरे ! प्रभावती" इति श्रुतबोधः ।

प्रभाव पु० प्र+भाव–अच् । १अद्भुतवस्तुमध्ये वस्तुभेदे २प्रकृष्टकर्त्रे त्रि० जटा० । धरणद्वे १८।७पृ० दृश्यम् । तत्र भा० त्वेन पाठः जटाधरसम्मतः ।

प्रभास त्रि०प्रभासते प्र+भास–अच् । १प्रकृष्टदीप्तियुते २जैनगणाधिपभेदे पु० हेमच० । २कुमारानुचरगणभेदे पु०भा० श०४६अ० । ४ऋषिभेदे पु० भा०शा० १६६अ० । ५वसुभेदे पु० हरिवं० ३अ० सान्ततया पाठः । अष्टममन्वन्तरे ६देवगणभेदे पु० मार्क०पु०८०अ० । ७सोमतीर्थभेदे त्रिका० "पुण्यं प्रभासं सप्तपाजगाम यत्रोडुराट् यक्ष्मणा क्लिश्यमानः" इत्युपक्रमे एवं तु तीर्थप्रवरं पृथिव्यां प्रभासनात्तस्य तु सः प्रभासः" इत्यादिना तत्तीर्थोत्पत्तिमाहात्म्यादिकथा भा०श०३६अ० आदौ दृश्या ।

प्रभासन्त पु० प्र+भास–बा० झ । १परमेश्वरे २रुद्रे च हरिवं० १२अ० । [त्वात् चरन्भदे २गजे पु० अमरः ।

प्रभिन्न त्रि० प्र+भिद्-क्त । १प्रकृष्टभेदयुक्ते प्रभिन्नकटादिरस्य-

प्रभु त्रि०प्र+भू–डु । १स्वामिनि २कार्यसम्पादनशक्तियुते "निग्रहानुग्रहे शक्तः प्रभुरित्यभिधीयते" इत्युक्ते शक्तिनिग्रहानुग्रहसमर्थे ३विष्णौ पु० "प्रभवः प्रभुरीश्वरः" विष्णुसं० "कामः कामप्रदः प्रभुः" तत्रैव नामान्तरं तत्र प्रकर्षेण भवनात् प्रभुरितिति भाष्योक्तेः "सर्वासु क्रियासु सामर्थ्यातिशयात् प्रभुः" भाष्योक्तेश्च व्युत्पत्तिभेदात् नामद्वयम् । ५अष्टमन्वन्तरे देवगणभेदे मार्क०पु० ८०अ० ।

प्रभुत्वाक्षेप पु० अर्थालङ्कारभेदे "धनञ्च बहु लभ्यते सुखञ्च क्षेमञ्च वर्त्मनि । न च मे प्राणसन्देहस्तथापि प्रिय ! मा स्म गाः । इत्याचक्षाणया हेतून् प्रियप्रत्यागमनविघ्नकान् हेतून् आचक्षाणया कीर्त्यमानया कयाचित् स्वाधीनपतिकयेति श्लेषः प्रभुत्वेन स्वाधीनतया एव पतिः रुद्धः विदेशगमनात् निवर्त्तितः तस्मात् एषः प्रभुत्वाक्षेप उच्यते" प्रेम० टीका ।

प्रभुभक्त त्रि० ७त० १स्वाम्यनुरक्ते । "बह्वाशी स्वल्पसन्तुष्टः सुनिद्रः शीघ्रचेतनः । प्रभुभक्तश्च शूरश्च षडेते श्वानतो गुणाः" चाणक्यः । कुक्कीने उत्तमे २खोटके पु० शब्दच० ।

प्रभूत त्रि० प्र+भू-क्त । १पुष्कले अमरः २उद्भूते मेदि० ३भूते ४उद्भते च शब्दर० । ततः सोपदा०अस्यर्थे वुन् । प्रभूतक प्रचुरवचनादियुक्ते त्रि०प्रभूतमाढ्य "आढ्यो प्रभूतमादिभ्यः" वार्त्ति० ठक् । प्राभूतिक प्रचुरवस्तुकारि त्रि० । द्वितीयान्तात् प्रभूतशब्दात् आढ्यो परे धातुनिर्देशे ठक् ठञ् । एवम् आदिपदात् पर्य्याप्रमाढ्य पार्य्याप्रिक तदस्तुकारि त्रि० ।

प्रभूति स्त्री प्र+भू–भावे क्तिन् नित्तकारादिप्रत्यये परे पुरुषगतेः प्रकृतिस्वरः । प्रकर्षेण भवने ।

प्रभुवन् त्रि० प्र+भू–क्वनिप् । सामर्थ्ययुते स्त्रियां ङीप् "वनोर च" पा० नस्य रः । प्रभूवरी यजु०२१।२२

प्रभूष्णु त्रि० प्र+भू–ष्णु । १प्रभावशीले २क्षमे समर्थे

प्रभृति अव्य० प्र+भृ-क्तिच् । तदारभ्यार्थे । बहु०समासे उत्तरपदस्थः । तदादिके त्रि० अमरः ।

प्रभृत्य त्रि० प्र+भृ–बा० यक् । प्रकृष्टभरणे ऋ० १।१५२।१२

प्रभेद पु० प्रभिद्यतेऽनेन प्र+भिद–घञ् । १प्रकारे विशेषे । भावे घञ् । २भेदे अमरः ।

प्रभेश्वर पु० तीर्थभेदे शिवपु० ।

प्रम्लंग्रथु पु० "प्रम्लंग्रथुते नासिकयैव यत्र सान्द्रो विदग्धो बलवः कफस्तु । प्राक्सञ्चितो मूर्ध्नि च पित्तयुग्मं प्रम्लंग्रथुं व्याधिसदाहरन्ति" सुश्रुतोक्ते नासागतरोगभेदे ।

प्रम्लष्ट त्रि० प्र+म्लृष्-क्त । म्लंशयुक्ते संज्ञायां कन् । शिखावलम्बिमाल्ये चूड़ातोलम्बमानमाल्ये अमरः ।

प्रमगन्द पु० दैगुण्यादिलक्षणयुक्तयुतोर्वी मामेव गमिष्यतीति बुद्धा परेभ्यो ददातीति मगन्दो बाडुंधिकः निरु० प्रगतो मगन्दं कारणतया अस्या०स० । बाडुंधिकपुत्रे ऋ० १।५२।१४ भा० ।

प्रमण(न)स् त्रि० प्रकृष्टं मनोऽस्य संज्ञाने यत्वम् अन्यत्रा-णत्वम् । १हर्षयुते अमरः । २सुमनस्के च ।

प्रमति पु० प्रतीचीश्वरसुनयन्नदपत्न्या पुरोहिते कश्यपवंश्ये १ऋषिभेदे मार्क०पु०११८अ० । २च्यवनर्षेः पुत्रभेदे भा०आ० ५अ० । स्कन्दसमदर्शिवंशे वागिन्द्रर्षेः १पुत्रे ऋषिभेदे भा०अनु०१०अ० । स्कन्दस्य पुत्रे ४नदभेदे । तद्वंश्ये वसुप्रीतेः ५पुत्रे नदभेदे भाग० ६।२।१६। ६प्रकृष्टमतियुक्ते त्रि० ।

प्रमत्त त्रि० प्र+मद्-क्त । १अनवधानतायुक्ते प्रमादयुक्ते कर्त्तव्येऽकर्त्तव्यताज्ञानेन अकर्त्तव्ये वा कर्त्तव्यताधिया तत्रावधानशून्ये "मत्तं प्रमत्तमुन्मत्तं सुप्तं बालं स्त्रियं

जड़म्। प्रपन्नं विरथं भीतं न रिपुं हन्ति धर्मवित्" भाग० १।७अ० "मत्तं मद्यादिना, प्रमत्तमनवहितम्" स्वामी "मत्तं मदवतादिना जड़म् अनुद्यमम्। प्रपन्नं शरणागतम्, विरथं भग्नरथम्" श्रीधरस्वामी। "सुप्तं मत्तं प्रमत्तं वा रहो यत्रोपगच्छति" मनुः। "सन्ध्या पूजाविहीनश्च प्रमत्तः परिकीर्त्तितः" ब्रह्मवै०पु० ७अ० उक्ते २सन्ध्यादिहीने च।

प्रमत्तगीत न० प्रमत्तेन गीतम् तत्र "इत्यभ्यूतेन ऋतमिति च" पा० क्तानसुत्तरपदभन्योदात्तम्। प्रमत्तेन गीते।

प्रमथ पु० प्रमथ्नाति प्र+मथ-अच्। १भूतराड्भुजभेदे भा० श्वा०११७अ०। २शोटके ३शिवपारिषदभेदे च शब्दरत्ना० तत्स्वरूपसंख्यादि यथा

"नानारूपधरा ये वै जटाचन्द्रार्द्धमण्डिताः। ते सर्वे सकलैश्वर्य्ययुक्ता ध्यानपरायणाः। योगिनो मदमात्सर्य्य दम्भाहङ्कारवर्जिताः। शीघ्रपापा महाभागाः शम्भोः प्रीतिकराः पराः। न ते परिग्रहं रामं काङ्क्षन्ति क्व कदाचन। संसारविमुखाः सर्वे यतयो योगतत्पराः। ध्यानावस्थं महादेवं परिवार्य्य स्थिताव्रताः। त्यक्त्वा परिग्रहं स्थित्वा तिष्ठन्ति विगतक्लमाः। यदैव परमं ज्योतिः चिन्तयन्त्यम्बिकापतिः। तदैव ते पारिषदाः सर्वे संवेष्टयन्ति तम्। ते षोड़श समाख्याताः कोटयो वै भुतव्रताः। सिंहव्याघ्रादिसदृक्षा अणिमादिसमायुताः। अपरे कामिनः शम्भोः सुनर्म्मसचिवाः स्मृताः। विचित्रवेषाभरणा जटाचन्द्रार्द्धमण्डिताः। स्मरस्य तुल्याः रूपेण विशदा दशभुजाः। उमासङ्गसदृक्षाभिः प्रमदाभिः समागताः। विचित्रमाल्याभरणा दिव्यस्रग्गन्ध भूषणाः। उमासङ्गं क्रीड़न्तमनुगच्छन्ति भूमिताः। शृङ्गारवेषाभरणा अष्टौ ते कोटयो गणाः। अर्द्धनारीश्वराख्यान्ये अर्द्धनारीश्वरं स्मरम्। अनुयान्ति महाभागास्तुल्यरूपा स्मरस्य ये। उमासङ्गो हि यदा रमते स्म सुखं स्मरः। अर्द्धनारीशरीरास्तु द्वारपाला भवन्ति ते। आकाशमार्गे गच्छन्तमनुगच्छन्ति नित्यशः। ध्यानस्थं परिचर्य्यन्ति सखिलादिभिरीश्वरम्। नानाशस्त्रधराः शम्भोर्गणास्तु प्रमथाः स्मृताः। प्रमथन्ति च युद्धेषु युध्यमानान्महाबलान्। ते वै महाबलाः शूराः संख्याता वसुकोटयः। अपरे गायनास्तालज्ञदक्षरूपधारिणः। वाद्यं कुर्वन्तो गायन्ति मधुरस्वरम्। नानारूपधरास्ते वै संख्या कोटयस्त्रिंशाः। सततं चानुगच्छन्ति विचरन्तं महेश्वरम्। सर्वे मायाविनः शूराः सर्वे शास्त्रार्थपारगाः। सर्वे सर्वत्र सर्वज्ञाः सर्वे सर्वत्रगाः सदा। सङ्कल्पात् सर्वभुवनं नयन्त्यन्यान् पुनःपुनः। अणिमाद्यष्टकैश्वर्य्ययुक्ताश्चैव महाबलाः। अपरे रुद्रनामानो जटाचन्द्रार्द्धमण्डिताः। देवेन्द्रस्य नियोगेन वर्त्तन्ते त्रिदिवे सदा। तेषां संख्या चैककोटिस्ते सर्वे बलवत्तमाः। कुर्वन्ति हि सदा सेवां हरस्य सततं गणाः। विघ्नं घ्नन्ति पापिष्ठान् धर्मिष्ठान् पालयन्ति च। अनुगच्छन्ति सततं भुतपाशुपतव्रतान्। विघ्नांश्च सततं घ्नन्ति योगिनां प्रयतात्मनाम्। षट्त्रिंशत् कोटयश्चैते हरस्य सकला गणाः" कालिकापु० २८अ०। तेषामुत्पत्ति कथा तत्रैवाध्याये दृश्या। ४हरीतक्यां स्त्री मेदि०।

प्रमथन न० प्र+मथ-भावे ल्युट्। १वधे २क्लेशने ३विलोड़ने च अमरः।

प्रमथाधिप पु० ६त०। शिवे अमरः प्रमथपत्यादयोऽप्यत्र।

प्रमथित न० प्रकर्षेण मथितम्। १निर्जलतक्रे राजनि०। २प्रकर्षेण मथिते त्रि०।

प्रमद पु०प्र+मद-अप्। १हर्षे अमरः। प्रमाद्यत्यनेन करणे अप्। २धुस्तूरफले न० शब्दच०। कर्त्तरि अच्। ३प्रमत्ते त्रि० मेदि०। ४दैत्यभेदे पु० हरिवं० ३अ०। ५तीव्रमन्त्वरे वाजिनि ६सप्तर्षिभेदे पु०।

प्रमदक पु० "प्रमदको योऽयमेव लोकोऽस्ति न परः" इति प्रेयुस्तुरिति निरु० ६।२२ उक्ते परलोकाभावत्ववादिनि नास्तिकभेदे।

प्रमदकानन न०प्रमद्यतेऽनेन प्र+मद-करणे घञ्। या०त०। ६त० "ऊधसोः संज्ञाछन्दसोः" पा० नुक्वो वा। प्रमदावने राज्ञामन्तःपुरोचिते उद्याने भरतः प्रमदावनादयोऽप्यत्र अमरः।

प्रमदा स्त्री प्रमाद्यत्यनया प्र+मद-करणे अप्। १उत्तमयोषिति अमरः। "नलसजला गुरुश्च भवति प्रमदा" छन्दः उक्ते एकादशाक्षरपादके २वर्णवृत्तभेदे।

प्रमदाकानन न० प्रमदोचितं काननं वनं या०त०। १राज्ञामन्तःपुरोचितवने भरतः। २प्रमदावन तत्रार्थे शब्दरत्ना०

प्रमदरा स्त्री गुणकर्म्मातिरि हरोर्म्मांयां भा०आ० ५अ०।

प्रमन्यु पु० प्रियव्रतवंश्ये वीरव्रतस्य भोजायां भार्य्यायां जाते पुत्रे नृपभेदे भाग० ५।१५।१५

प्रमय पु० प्र+मी-वधे-भावे अच्। वधे हेमच०।

प्रमयु त्रि० प्र+मी-वधे-कर्त्तरि उन्। हिंसके अथ०८।१।६।

प्रमर्दन त्रि॰ प्रमृद्नाति+प्र+मृद-ल्यु। १प्रकर्षेण मर्दके २दैत्यभेदे पु॰ हरिवं॰ १६४अ॰। ३विष्णौ पु॰ "बोद्धिताक्षः प्रमर्दनः" विष्णुस॰। तत्र प्रतर्दन इति पाठान्तरं तत्रार्थे "प्रलये सर्वभूतानां नाशकत्वात्" भाष्योक्तेस्तस्य तथात्वम्। "दयित! मद्दातुयित! प्रमर्दन" भा॰आ॰ २४अ॰विष्णुस्तुतौ।

प्रमा स्त्री प्र+मा--भावे अङ्। १यथार्थज्ञाने भ्रमभिन्ने ज्ञाने तल्लक्षणं तदुत्पत्तौ गुणाश्च भाषा॰ उक्ता यथा "दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत्। प्रत्यक्षे तु विशेषणं विशेष्यवता समम्। सन्निकर्षो गुणस्तु स्यादथ व्याप्तिमतो पुनः। पक्षे साध्यविशिष्टे च परामर्शो गुणो भवेत्। शाब्दबोधे योग्यतायास्तात्पर्यज्ञानं वा प्रमा। गुणः स्यादभ्रमभिन्नस्तु ज्ञानमुच्यते प्रमा। अथ वा तत्प्रकारं यत् ज्ञानं तद्विशेष्यकम्" भाषा॰। दोषशब्दे १७६६पृ॰ भ्रमकारणं दृश्यम् तथा च तद्वति तत्प्रकारकज्ञानत्वं प्रमात्वं प्रामाण्यापरपर्यायम् तच्च मतभेदेन स्वतोग्राह्यं परतोग्राह्यञ्च तच्च परतोग्राह्यशब्दे ४२२४पृ॰ उक्तम्। तच्च विस्तरस्त्वोच्यते। तत्र न्यायमते "प्रमात्वं न स्वतोग्राह्यं संशयानुपपत्तितः" भाषा॰ व्याख्यातञ्च सि॰मु॰ यथा "मीमांसका हि प्रमात्वं स्वतोग्राह्यमिति वदन्ति। तन्न गुरूणां मते ज्ञानस्य स्वप्रकाशरूपत्वात् तज्ज्ञानप्रामाण्यं तेनैव गृह्यते इति। भट्टानां मते तु ज्ञानमतीन्द्रियम्। ज्ञानजन्या ज्ञातता प्रत्यक्षा। तया च ज्ञानमनुमीयते। मुरारिमिश्राणां मतेऽनुव्यवसायेन ज्ञानं गृह्यते। सर्वेषामपि मते तज्ज्ञानविषयकज्ञानेन तज्ज्ञानप्रामाण्यं गृह्यते। विषयनिरूप्यं हि ज्ञानम्। अतो ज्ञानविशिष्टवेद्यो विषयः। तन्नार्त दूषयति। न स्वतोग्राह्यमिति। संशयेति। यदि ज्ञानप्रामाण्यं स्वतोग्राह्यं स्यात् तदाभ्यासदशोत्पन्नज्ञाने तत्संशयो न स्यात्। तत्र हि यदि ज्ञानं ज्ञातं तदा प्रामाण्यं ज्ञातमेवेति कथं संशयः। यदि तु ज्ञानं न ज्ञातं तदा धर्मिज्ञानाभावात् कथं संशयः। तस्माज्ज्ञानप्रामाण्यमनुमेयम्। तथा हि इदं ज्ञानं प्रमा संवादिप्रवृत्तिजनकत्वात् यद्यैवं तत्तथैवं यथाऽप्रमा। इदं पृथिवीत्वप्रकारकं ज्ञानं प्रमा गन्धवति पृथिवीत्वप्रकारकज्ञानत्वात्। एवम् इदं जलज्ञानं प्रमा क्षेत्रवति जलत्वप्रकारकज्ञानत्वात्। न च हेत्वज्ञानं कथं ज्ञातमिति वाच्यम्। पृथिवीत्वप्रकारकत्वस्य स्वतोग्राह्यत्वात् तत्र गन्धवद्विशेष्यकत्वस्यापि तथात्वात्। तत्प्रकारकत्वावच्छिन्नतद्विशेष्यकत्वं परं न गृह्यते संशयानुरोधात्। न च प्रमात्वस्य साध्यस्य प्रसिद्धिः कथमिति वाच्यम् इदंज्ञानप्रमात्वस्य स्वतोग्राह्यत्वात्। न च प्रकारभेदेन प्रामाण्यभेदात् घटत्ववति घटत्वप्रकारादेः कथं प्रसिद्धिरिति वाच्यम् घटत्वप्रकारकत्वस्य स्वविशेष्यकत्वस्य च स्वतोग्राह्यत्वात्। घटस्य च पूर्वसंसर्गित्वात् घटविशेष्यकं घटत्वप्रकारकमिति ज्ञाने प्रामाण्यस्य बाधकाभावः। व्यवसायपरन्तु प्रामाण्यं न गृह्यते। तत्र संशयसामग्रीसत्त्वे संशयस्यैवोपपत्तेः। किञ्चाभ्यासदशायां स्वतोऽनुव्यवसायादिना प्रामाण्यस्य स्वत एव गृहीतत्वात् प्रथमानुव्यवसायपरं न तद्ग्राहकत्वमिति कल्प्यते संशयानुरोधात्। अथ प्रामाण्यानुमितौ प्रामाण्यग्रहे न तस्य विषयनिश्चयरूपत्वात् तत्र प्रामाण्यसंशयो वाच्यः सोऽप्यनुमित्यन्तरेक्षेति फलसंशयो कारणसंशयो वा नानवस्थेति चेन्न अगृहीतप्रामाण्यकस्यैव निश्चयरूपत्वात्। यत्र च प्रामाण्यसंशयस्तत्रैव परं प्रामाण्यानुमितेरपेक्षया यावदाद्यं प्रामाण्यानुमितिरित्यत्र एव सर्वत्र तु न संशयः क्वचित् कोऽप्यनुपस्थितेः क्वचिद्विशेषदर्शनादितः क्वचिदिन्द्रियान्तरसङ्कारादिति सङ्क्षेपः। ननु सर्वेषां ज्ञानानां यथार्थत्वात् प्रमालक्षणे तद्विशेष्यकत्वं विशेषणं व्यर्थम्। न च रङ्के रजतार्थिनः प्रवृत्तिर्भ्रमजन्या न स्यात् तव मते भ्रमत्वाभावादिति वाच्यम्। तत्र हि दोषाधीनस्य पुरोवर्त्तिनि स्वतन्त्रोपस्थितरजतभेदाग्रहस्य हेतुत्वात्। सत्यरजतस्थले तु विशिष्टज्ञानस्य सत्त्वात् तदेव कारणम्। अस्तु वा तत्रापि भेदाग्रह एव कारणमिति। न चाऽन्यथाख्यातिः सम्भवति रजतप्रत्यक्षकारणस्य रजतसदृशधर्मस्याभावात् रङ्के रजतबुद्धेरनुपपत्तेरिति चेन्न सत्यरजतस्थले प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुतायाः कल्पितत्वात् अन्यत्रापि तत्कल्पनात्। न च संवादिप्रवृत्तौ तु भेदाग्रहः कारणमिति वाच्यम् लाघवात् प्रवृत्तिमात्रे तस्य हेतुत्वकल्पनात्। इत्थञ्च रङ्के रजतत्वविशिष्टबुद्ध्यनुरोधेन ज्ञानलक्षणाप्रत्यासत्तिकल्पनेऽपि न क्षतिः। फलसंशयगौरवस्यादोषत्वात्। किञ्च यद् रङ्करजतयोरिमे रजते इति ज्ञानं जातं न कारणबोधोऽपि। अपि च यत्र रङ्करजतयोरिमे रजतरङ्के इति ज्ञानं तत्रोभयत्र युगपत्प्रवृत्तिनिष्पत्तौ स्यातां रङ्के रङ्क-

भेदग्रहे रजते रजतभेदग्रहेऽन्यथाख्यातिभयात् । तन्मते रङ्के रङ्कभेदाग्रहस्य रजते रजतभेदाग्रहस्य च सत्त्वात् किञ्चात्रमिति प्रति भेदाग्रहस्य हेतुत्वे जलह्रदे वह्नि-व्याप्यधूमवद्भेदाग्रहाद् अनुमितिर्निर्बाधा । यदि च विशिष्टज्ञानं कारणं तदाऽयोगोलके वह्निव्याप्यधूमज्ञान-मनुमित्यनुरोधादापतितम् । इत्थम् अन्यथाख्यातौ प्रत्य-क्षमेव प्रमाणम् । रङ्कं रजततया जानामीत्यनुभवा-दिति सङ्क्षेपः" ।

वेदान्तिमते तस्य स्वतोग्राह्यता वेदान्तपरिभाषायां व्यवस्था-पिता यथा "एवञ्चानां प्रमाणानां प्रामाण्यं स्वतएव स्वत्यद्यते ज्ञायते च तथा हि स्वत्वनुभवसाधारणं संवा-दादिप्रवृत्त्यनुकूलं तद्वति तत्प्रकारकज्ञानत्वं प्रामाण्यं तच्च ज्ञानसामान्यसामग्रीप्रयोज्यं न तदधिकं गुणमपेक्षते प्रमामात्रेऽनुगतगुणाभावात् । नापि प्रत्यक्षप्रमायां भू-योऽवयवेन्द्रियसन्निकर्षः, रूपादिप्रत्यक्षे आत्मप्रत्यक्षे च तदभावात् सत्यपि तस्मिन् भीतः शङ्ख इति प्रत्यक्षस्य भ्रमत्वाच्च । अतएव न सन्दिग्धरूपरसादिकमपि अनुमि-त्यादिप्रमायां गुणः असन्दिग्धरूपरसादिस्थलेऽपि विषया-बाधेनानुमित्यादेः प्रमात्वात् । न चैवमप्रमापि प्रमा स्यात् ज्ञानसामान्यसामग्र्यविशेषादिति वाच्यं दोषाभावस्यापि हेतुत्वाङ्गीकारात् । न चैवं परतस्त्वम् "आगन्तुकभावका-रणापेक्षायामेव परतस्त्वात्" ज्ञायते च प्रामाण्यं स्वतः, स्वतोग्राह्यत्वञ्च दोषाभावे सति यावत्स्वाश्रयग्राहकसा-मग्रीग्राह्यत्वम् । स्वाश्रयो ह्यत्तिज्ञानं तद्ग्राहकं सा-क्षिज्ञानं तेनापि ह्यत्तिज्ञाने गृह्यमाणे तद्गतं प्रामाण्य-मपि गृह्यते । न चैवं प्रामाण्यसंशयानुपपत्तिः तत्र संशयानुरोधेन दोषस्यापि सत्त्वेन दोषाभावघटितस्वा-श्रयग्राहकाभावेन तत्र प्रामाण्यस्यैवाग्रहात् । यद्वा यावत्स्वाश्रयग्राहकग्राह्योन्यत्वं स्वतस्त्वं संशयस्थले प्रामाण्यस्योक्तयोग्यतासत्त्वेऽपि दोषवशेनाग्रहात् न संशयानुपपत्तिः । अप्रामाण्यन्तु न ज्ञानसामान्यसामग्री प्रयोज्यं प्रमायामप्रमाण्यापत्तेः किन्तु दोषप्रयोज्यं नाग्राह्यं यावत्स्वाश्रयग्राहकग्राह्यम् अप्रामाण्या-ग्रहकतदभावत्वादेर्ह्यत्तिज्ञानानुपनीतत्वेन साक्षिणा ग्रहीतुमशक्यत्वात् किन्तु विसंवादिप्रवृत्त्यादिलिङ्गकानु-मित्यादिविषय इति परत एवाप्रामाण्यग्रहसम्भवते ज्ञायते चेति" । अधिकं प्रमाणशब्दे द्रष्टव्यम् ।

प्रमाण न० प्र+मा-भावे करणे वा ल्युट् । १प्रमारूपज्ञाने २विष्णौ "प्रमाणं प्राणनिलयः" विष्णुस० । प्रमार्थं "प्रज्ञानं ब्रह्मेति" श्रुतेस्तस्य ज्ञानरूपत्वात् तथात्वम् "प्र-माणं बीजमव्ययम्" विष्णुस० प्रत्यक्षादिप्रमाणरूपत्वात्तथा तथात्वं व्युत्पत्तिद्वययोगात् नामद्वयम् । ३सत्यवादिनि ४दयावति परिच्छेदे ५हेतौ ६प्रमातरि च मेदि० । ७प्रमितिकरणे चक्षुरादौ "यस्येष्टाजिघ्रासाप्रयुक्तस्य प्रवृत्तिः स प्रमाता स वेनार्थं प्रमिणोति तत्प्रमाणम्" वात्स्या० "तच्च साधनाश्रयव्यतिरिक्तत्वे सति प्रमाव्याप्यं प्रमाणमिति" सर्वद० उक्तपादर्शने । "तद्वति तत्प्रकार-कत्वरूपप्रकर्षविशिष्टज्ञानकरणत्वम्" गौ० ङ० । "अनुभव-त्वव्याप्यजात्यवच्छिन्नप्रमाहेतित्वकार्यतानिरूपितकारणता-श्रयत्वे सति व्यापारवत्त्वम् तत्त्वम्" तर्कप्रकाशे शिति-कण्ठः । प्रमाणत्वं च अनधिगतार्थकानुभवकारणत्वम् । तच्च गृहीतग्राहीतरानुभवकारणत्वम् । स्वसमानाधि-करणस्वाव्यवहितपूर्ववर्त्तिस्वसमानाकारनिश्चयविषयविषय-केतरतद्विशेषप्रकृतप्रकारकानुभवकारणत्वमिति या-वत् न्यायकुसुमाञ्जलिटी० । "यज्जातीयविशिष्टज्ञानत्वा-वच्छेदेन समानाकारनिश्चयोत्तरत्वं तज्जातीयान्यथा-र्थज्ञानस्यैवाग्रहीतग्राहित्वेन प्रमात्वात् अतएव धारा-वाहिप्रत्यक्षव्यक्तीनां समानाकारपूर्वोत्तरवर्त्तित्वेऽपि न तासां प्रमात्वहानिः हानिस्तु समानाकारानुभवसंस्का-रानां स्मृतीनामिति" शब्दप्र० । न्यायमते चत्वारि-प्रमाणानि । प्रत्यक्षम् । अनुमानम् । उपमानम् । शब्दः गौ० ङ० प्रकारान्तरेण प्रमाणं द्विविधम् "शब्दोपजीव्य-शब्दानुपजीवि" कुसुमाञ्जलिटी० । प्रत्यक्षमेकमेव प्रमा-णमिति चार्वाकाः सङ्गिरन्ते । प्रत्यक्षमनुमानं चेति द्वे प्रमाणे इति वैशेषिका बौद्धा आर्हताश्च । प्रत्यक्षं शब्दश्चेति द्वे प्रमाणे इति श्रीमदानन्दतीर्थभगवत्पादाचार्याः । प्र-त्यक्षमनुमानमाप्तवचनमिति त्रीणि प्रमाणानीति सांख्या वेदान्तिनश्च । प्रत्यक्षानुमानोपमानानि त्रीणीति नैया-यिकैकदेशिनः । प्रत्यक्षानुमानोपमानशब्दा अर्थापत्तिश्चेति षड् प्रमाणानीति प्राभाकराः । प्रत्यक्षानुमानोपमानशब्दा अर्थापत्तिरनुपलब्धिश्चेति षट्प्रमाणानीत्यपरे भाट्टवेदा-न्तिभेदाश्च । सम्भवैतिह्ये अव्यतिरिक्ते प्रमाणे इति पौ-राणिकाः । चेष्टाव्यतिरिक्तं प्रमाणमिति तान्त्रिकाः । तत्र सांख्यपातञ्जलवेदान्तिमते अन्तःकरणवृत्तीनां पौरु-षेयचित्तवृत्तिप्रकाशरूपबोधे करणत्वम् अन्तःकरण-वृत्तिषु च ज्ञानत्वारोपेण तत्करणत्वमिन्द्रियाणामिति

भेदः । यथोक्तं सां०प्र०भा० "प्रमाता चेतनः शुद्ध प्रमाणं वृत्तिरेव नः । प्रमाऽर्थाकारवृत्तीनां चेतने प्रतिबिम्बनम् । प्रतिबिम्बितवृत्तीनां विषयो मेय उच्यते । साक्षाद्-र्शनरूपं च साक्षित्वं वक्ष्यति स्वयम् । अतः स्यात् कार-णाभावाद्वृत्तेः साक्ष्येव चेतनः । विष्णादेः सर्वसाक्षित्वं नोक्तं लिङ्गाद्यभावतः" । "प्रमाणविपर्ययविकल्पनिद्राः स्मृतयः" पात०सू० "इन्द्रियप्रणालिकया चित्तस्य बाह्य-वस्तूपरागात् तद्विषयसामान्यविशेषात्मनोऽर्थस्य विशेषाव-धारणं प्रधाना वृत्तिः प्रत्यक्षं प्रमाणं, फलमविशिष्टः पौ-रुषेयश्चित्तवृत्तिबोधः" भाष्यम् "अनधिगततत्त्वबोधः पौरुषेयो व्यवहारहेतुः प्रमा तत्करणं प्रमाणम् । ननु पुरुषवर्त्ती बोधः कथं चित्तगतायावृत्तेः फलं न हि खदिरगोचरव्यापारेण परशुना पलाशे छिदा क्रियते इत्यत आह अविशिष्ट इति । न हि पुरुषगतो बोधो जन्यते अपि तु चैतन्यमेव बुद्धिदर्पणप्रतिबिम्बितं बुद्धि-वृत्त्या अर्थाकारया तदाकारतापादनमानं फलम् । तच्च तथाभूतं बुद्धेरविशिष्टं बुद्ध्यात्मिका वृत्तिः वृत्तिश्च बुद्ध्यात्मिकेति सामानाधिकरण्यादयुक्तः प्रमाणफलभाव इत्यर्थः" विव० । प्रमाणस्य भावः ष्यञ् प्रामाण्य न० तत् प्रमाणता स्त्री त्व प्रमाणत्व न० प्रमाणभावे प्रमितिकर-णत्वे प्रमात्वे च । उद्देश्यविधेयभावेनान्वयस्थले प्रमाण-शब्दस्य प्रमाकरणपरत्वे क्वचिदेकवचनता यथा "वेदाः प्रमाणं स्मृतयः प्रमाणम्" इत्यादौ । क्वचित्तु बहुवचनता यथा "प्रत्यक्षानुमानोपमानागमाः प्रमाणानि गो०सू० । तत्र पू-र्वत्र शाब्दत्वरूपप्रमात्वजातेरेकत्वात् एकवचनत्वम् । उत्तरत्र प्रत्यक्षत्वादिजातिचतुष्टयकरणानां बहुत्वात् बहुवचनता इति प्रथमाव्युत्पादे मदाधरेण प्रपञ्चितम् तत्र द्रष्टव्यम् । सामान्यत्वात् क्लीवत्वेऽपि । क्वचित्तु विशेषपरत्वे स्त्रीत्व-परता यथा प्रमाणी । स्त्री प्रमाणी यस्य ब०व्री० "अप् पूरणीप्रमाणीभ्यः" पा०अप्समा० न कप् । श्रीप्रमाण इत्येव सि०कौ० । ऽपरिमाणभेदे च । "प्रमाणे मात्रजुदयसज-दघ्नचः" पा० ङ्यौ द्रष्टव्यम् ।

प्रमाणबाधितार्थक पु० प्रमाणेन बाधितोऽर्थो यस्य कप् । तर्कभेदे तर्कशब्दे ३२५५ पृ० द्रष्टव्यम् ।

प्रमाणिक त्रि० प्रमाणं सिद्धिहेतुत्वादस्त्यस्य ठन् । प्रमाण-सिद्धे "प्रमाणिका जरौ सगौ" छं०र० उक्ते अष्टाक्ष-रपादके २छन्दोभेदे स्त्री । ३परिमाणभेदयुते मध्यमा-ङ्गुलमूर्धपरान्तरमितपरिमाणयुते हस्ते हेमच० ।

प्रमातामह पु०प्रमातो मातामहं कार्यत्वेन व्याप्नो०अ० । मा-तामहस्य पितरि अमरः । तस्य पत्नी ङीष् । प्रमाता-महो २तत्पत्न्यां स्त्री ।

प्रमाद त्रि० प्रमिनोति प्र+मि-अच् । प्रमाज्ञानकर्त्तरि । न्यायनये "यस्येन्द्रियाजिघृक्षायाप्रयुक्तस्य प्रवृत्तिः स प्र-माता" वात्स्या० सांख्यमते शुद्धचेतनो वृत्तिसाक्षी स० । प्रमाणशब्दे तल्लक्ष्यम् द्रष्टव्यम् । वेदान्तिमते "मेयातीतो विशुद्धो मुनिभिरभिहितो मोहसंक्रान्तमूर्त्तिः साक्षी संवित् प्रमा तत्प्रतिफलितचिदुर्गोवृतोऽसौ प्रमाता" इत्यु-क्तदिशा अन्तःकरणवृत्तिप्रतिबिम्बितं तदवच्छिन्नं वा चैतन्यमेव प्रमाता ।

प्रमाथ पु०प्र+मथ-भावे घञ् । १वधादौ हरणे २प्रपीडने च । वा० कर्त्तरि च । ३कुमारानुचरभेदे भा० श० ४६अ० । स्वार्थे अण् । ४शिवपारिषदप्रमथगणे पु०हरिवं०१८।अ० ५श्रेष्ठतराष्टपुत्रभेदे पु० भा०द्रो० १५७अ० ।

प्रमाथिन् त्रि० प्रमन्थति प्र+मथ-णिनि । १वधादौ हरणे २पीडके च । "इन्द्रियाणि प्रमाथीनि" गीता । स्त्रियां ङीष् । सा च १अपस्मरोभेदे भा०आ० १२४अ० । २रा-क्षसभेदे पु० भा० व० २८४अ०

प्रमाद पु० प्र+मद-घञ् । १कर्त्तव्ये अकर्त्तव्यबुध्या ततो निवृत्तौ अकर्त्तव्ये कर्त्तव्यबुध्या तत्र प्रवृत्तौ वा अनव-धानतायाम् अमरः । अनवधानताशब्दे १५२४पृ०द्रष्टव्यम् । स च तमोगुणकार्य्यः तमस्शब्दे ३२३५ पृ० द्रष्टव्यम् । तस्य तमोरूपत्वात्तत्कार्य्यत्वं बोध्यम् ।

प्रमादवत् पु० प्रमादोऽस्यास्त्यस्य मतुप् मस्य वः । १प्रमादयुते २असमीक्ष्यकारिणि जटा० ।

प्रमादिन् त्रि० प्रमादः नित्ययोगे इनि न तु अस्त्यर्थे एकाक्षरछन्दसात् तस्य निषेधात् । नित्यप्रमादयुक्ते "एकः प्रमादी स वधं न हन्यते" श्रीधरधृतवाक्यम् ।

प्रमापण न० प्र+मीञ्-हिंसायां स्वार्थे णिच्-भावे युक् ल्युट् । मारणे अमरः ।

प्रमायुक त्रि०प्र+मी-तान्छील्ये उकञ् । प्रकरणशीले "न चास्य प्रियं प्रमायुकं भवति" छ०उ० । "प्रमायुकं मर-णशीलम्" भा० । [च जटा० । २परिमिते ।

प्रमित त्रि० प्र+मि-भी वा क्त । १ज्ञाते २प्रमाभावधारिते

प्रमिताक्षरा स्त्री प्रमितानि परिमितानि अक्षराणि य-स्याम् । सिद्धान्तशिरोमणिव्याख्यानरूपायां टीकायां सङ्कर्षचिन्तामणिटीकाभेदे च "प्रमिताक्षरा सजसजै-

रदिता" इ०र० उक्ते द्वादशाक्षरपादके २वर्णवृत्तभेदे।

प्रमिति स्त्री प्र+मि–भा–वा क्ति। प्रमात्ज्ञाने अमरः।

प्रमीढ त्रि० प्र+मिह–क्त। १मूत्रिते २चने च मेदि०।

प्रमीत त्रि० प्र+मीञ्–हिंसायां क्त। १मृते "प्रमीतौ पितरौ यस्य" इति श्रुतिः। २वत्सायां स्त्रियां पु० अमरः।

प्रमीला स्त्री प्र+मील–भावे अ। तन्द्रायाम् अमरः।

प्रमुख न० प्रकृष्टं मुखमारम्भः। १तदादित्वे त्रिका० प्रकृष्टं मुखमस्य। २प्रथमे १प्रधाने अमरः ३मान्ये ४श्रेष्ठे च त्रि० मेदि० ५उपायभेदे पु० शब्दरत्ना० ७समूहे पु० शब्दच०। बहु०। उत्तरपदस्थः। तदादिके त्रि०।

प्रमुच पु० १ऋषिभेदे भा०शा० २०८अ०। प्रमुञ्चति प्र+मुच–क। २प्रकर्षेण मोक्तरि त्रि०।

प्रमुच्चु ऋषिभेदे भा०अनु० १५०अ०।

प्रमुद् त्रि० प्रकृष्टा मुद् यस्य। १हृष्टे २हर्षयुक्ते अमरः। २देवभेदे पु० यजु० २०।१०। प्रा०स०। ३प्रकृष्टहर्षे स्त्री।

प्रमुदित त्रि०प्र+मुद्–कर्तरि क्त।१हृष्टे २हर्षयुक्ते अमरः।

प्रमुदितवदना स्त्री "प्रमुदितवदना भवेद्यो च रौ" छ०र० उक्ते द्वादशाक्षरपादके छन्दोभेदे। [युक्ते स्याने

प्रमृग अव्य० प्रकृष्टा मृगा यत्र तिङ० अव्ययी०। प्रकृष्टमृग-

प्रमृत न० प्रकृष्टं मृतं प्राणिविशेषितं यत्र। मनुक्ते कर्मण्यरूपे जीवनोपायभेदे "मृतन्तु याचितं भैक्षं प्रमृतं कर्षणं मृतम्" मनुः। "कर्षणञ्च भूमिगतप्रचुरप्राणिमरणनिमित्तत्वात् बहुदुःखफलकं प्रकर्षेण मृतमिव प्रमृतम्" कुल्लू०।

प्रमेय त्रि० प्र+मा–कर्मणि यत्। १प्रमात्ज्ञानविषये पदार्थे २परिच्छेद्ये ३अवधार्ये च। तत्र वेदान्ते शुद्धचैतन्यं प्रमेयम् अन्यस्याध्यासमूलकत्वेन व्यवहारिकप्रमात्ज्ञानविषयत्वेऽपि न परमार्थप्रमेयत्वम्। न्यायमते "आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्" गौ०सू० उक्ताः आत्मादयः। प्रमेयत्वं च केवलान्वयि सर्वैरभीष्टत्वात्ज्ञानरूपप्रमाविषयत्वात्।

प्रमेह पु० प्र+मिह–आधारे करणे वा घञ्। रोगभेदे तच्छब्दभेदादिकं भावप्र० उक्तं यथा

"आस्वाद्वम्लं लवणं दधीनि माष्यौदनानूपरसः पयांसि। नवान्नपानं गुडवैकृतं च प्रमेहहेतुः कफजञ्च सर्वम्। मेदश्च मांसञ्च शरीरजञ्च क्लेदं कफोवस्तिगतं प्रदुष्य। करोति मेहान् सकलीर्विंशतौत्वानेव पित्तं परिदुष्य चापि। दोषेषु दोषैरवलम्ब्य धातून् संदूष्य मेहान् कुरुतेऽनिलश्च। साध्याः कफोत्था दश पित्तजाः षट् याप्यान साध्या पवनात्ज्ञतत्ज्ञाः। समक्रियत्वादिह सक्रियत्वान्मन्दात्ज्ययत्वाच्च यथाक्रमन्ते। कफश्च पित्तं पवनश्च दोषा-मेदोऽस्रशुक्राम्बुवसालसीकाः। मज्जारसौजःपिशितञ्च दूष्याः प्रमेहिणां विंशतिरेव मेहाः। दन्तादीनां मलाढ्यत्वं प्राप्नुयुः पाणिपादयोः। दाहश्चिक्कणता देहे तट्स्थाहारस्य जायते। सामान्यं लक्षणं तेषां प्रभूताविलमूत्रता। दोषदूष्यविशेषेऽपि तत्संयोगविशेषतः। मूत्रवर्णादिभेदेन भेदो मेहेषु कल्प्यते। बद्धं बहुतरं शीतं निर्गन्धबुदबोपमम्। मेहत्यूदकमेहेन विच्छिन्नाविलपिच्छिलम्। इक्षोरसमिवात्यर्थं मधुरञ्चेक्षुमेहतः। सान्द्रो भवेत् पर्युषितं सान्द्रमेहेन मेहति। सुरामेहि सुरातुल्यसपर्यन्तमधोघनम्। संसृष्टरामा विष्टेन पिष्टवद्बहलं सितम्। शुक्लाभं शुक्लमिश्रं वा शुक्लमेही प्रमेहति। मूत्रौकस्त्वं सितामेही सिक्तारुपिण्डो मलात्। शीतमेही सुबहुशो मधुरं मधुशीतलम्। अनैःअनैः अनैर्मेही मन्दं मन्दं प्रमेहति। क्षारातन्तुयुतं मूत्रं क्षारमेहेन पिच्छिलम्। गन्धवर्णरसस्पर्शैः क्षारेण क्षारतोवत्। नीलमेहेन नीलाभं क्षारमेही मसीनिभम्। हारिद्रमेही कटुकं हरिद्रासन्निभं दहत्। विस्रं माञ्जिष्ठमेहेन मञ्जिष्ठाक्षालिकोपमम्। विस्रगन्धं सलवणं रक्ताभं रक्तमेहिनः। वसामेही वसाभिन्नं वसाभं मूत्रवेन्मुहुः। मज्जाभं मज्जमिश्रं वा मज्जमेही सुबहुशुक्लं। कषायं मधुरं रूक्षं सौद्रमेहं वदेत् बुधः। हृद्धी मत्त इवाजस्रं मूत्रवेगविवर्जितम्। क्षालसीकं विबद्धञ्च क्षिप्तमेही प्रमेहति। अविपाकोरुचिस्वप्नदिनिद्राकासः सपीनसः। उपद्रवाः प्रजायन्ते मेहानां कफजन्मनाम्। वस्तिमेहनयोस्तोदो सुष्कावदारणं ज्वरः। दाहस्तृष्णाग्निकाम्लौविड्भेदः पित्तजन्मनाम्। वातजानान्तु दावर्त्तकम्पहृद्ग्रहशोषताः। मूत्रक्षुद्विग्रहता शोषः श्वासः कासश्च जायते। यथोक्तोपद्रवाविष्टमतिप्रभुतमेव च। पिडकापीडितं गाढं प्रमेही क्षिति मानवम्। मूर्च्छाज्वरदाह्यरक्तासकासक्षयैरुरैः। उपद्रवैरुपेतो यः प्रमेही दुःप्रतिक्रियः। रजः प्रवर्त्तते यस्मात् मासि मासि विशोषयेत्। सर्वान् शरीरदोषांश्च न प्रमेहन्त्यतः स्त्रियः। जातः प्रमेही मधुमेहिनो वा न साध्यरोगः सहि बीजदोषात्। ये चापि केचित्कुशला विकारा भवन्ति तां-

ऽपि वदन्त्यसाध्यान् । सर्वेष्वेव प्रमेहेष्वासु क्रोडेनाप्रतिकारिणः । मधुमेहत्वमायान्ति तदाऽसाध्या भवन्ति च । मधुमेहो मधुनिभो जायते स किल द्विधा । कुपिते धातुषट्कादौ दोषाद्यतपथेऽथ वा । आहतो दोषलिङ्गानि सोऽनिमित्तं प्रदर्शयन् । क्षीणक्षीणात् क्षणात् पूर्वो भजते लक्ष्मसाध्यताम् । मधुरं यच्च सर्वेषु प्रायो मध्विव मेहति । सर्वेऽपि मधुमेहाख्यं माधुर्याच्च तनोरतः । शराविकाकच्छपिका जालिनी विनतालजी । मसूरिका सर्षपिका पुत्रिणी सविदारिकाः । विद्रधिर्येति पिडकाः प्रमेहोपेक्षया दश ।

तद्रोगनिमित्तकर्मभेद शा० त० उक्तः । कर्मविपाकशब्दे १०७६ पृ० दृश्यम् । तत्र मधुमेहस्यैव महारोगभेदत्वता "मधुमेहमगन्दरौ" इत्युक्तेः ।

प्रमेहिन् पु० प्र+मिह्-णिनि । प्रमेहरोगयुते ।

प्रमोचनी स्त्री प्रकर्षेण मुच्यते निस्त्वचीक्रियते भोजनार्थम् मुच-कर्मणि ल्युट् ङीप् । १गोडुम्बायाम् (गोलक) जटा० २प्रमोचनसाधने त्रि० । भावे ल्युट् । ३प्रकर्षेण-मोचने न० ।

प्रमोद पु० प्र+मुद-हर्षे भावे घञ् । १हर्षे प्रियलाभनिमित्ते प्रहृष्टहर्षे आनन्दशब्दे ७।७पृ० तैत्ति०उ० भाष्यवाक्यं दृश्यम् । प्रहृष्टो मोदोयस्य प्रा०व० २प्रमोदयुते त्रि० ३नागभेदे पु० भा०आ०५७अ० ४स्कन्दानुचरभेदे पु० भा०श० ४६अ० सा०त०कौ० उक्ते ५मुख्यसिद्धिभेदे "तिस्रश्च मुख्याः सिद्धयः प्रमोदमुदितमोदमानाः" । तत्राध्यात्मिकदुःखविघातस्य सर्वोत्कर्षेण हृष्टत्वात् प्रमोदत्वं बोध्यम् । आधिभौतिकदुःखविघातस्य मोदाधारत्वात् मुदितत्वम् आधिदैविकदुःखविघातस्य मोदमानत्वं मोदस्य मानं भानं वक्तेति व्युत्पत्त्येति विवेकः ।

प्रमोदन त्रि० प्रमोदयति प्र+मुद-णिच्-ल्यु । १हर्षकारके २विष्णौ पु० "जितामित्रः प्रमोदनः" विष्णुस० । भावे ल्युट् । ३हर्षमात्रादने न० । [४कुंकरे पु० शब्दमाला ।

प्रमोदित त्रि० प्रमोदो जातोऽस्य तारा० इतच् । १जातप्रमोदे

प्रमोदिन् त्रि० प्रमोदयति प्र+मुद-णिच्-णिनि । १प्रहर्षजनके । स्त्रियां ङीप् । सा च २जिह्वितीडके भावप्र० ।

प्रमोहन न० प्रमुह्यतेऽनेन प्र+मुह-करणे ल्युट्, प्रमोहयति प्र+मुह+णिच्-ल्यु वा । १प्रमोहसाधने प्रमोहकारके २अस्त्रभेदे च यदस्त्रप्रयोगे विपक्षस्य प्रमोहो जायते तद्विशेषे । भा०भी०७३अ० ३प्रमोहकारकमात्रे त्रि० ।

प्रमोचन्ती स्त्री प्रमोचति नरं प्रति स्वात्मानं दर्शयति प्र+मुच-शतृ-ङीप् । अप्सरोभेदे वसु० १५।१७

प्रमोचा स्त्री प्रमोचति नरं प्रस्वात्मानं दर्शयति प्र+मुच-अच् । अप्सरोभेदे गरुडपु० २०अ० ।

प्रयज्यु त्रि० प्र+यज "यजिमनिशुन्धिदसिदनिभ्यो युच्" उणा० युच् निरनुनासिकत्वात् अनादेशो न । अध्वर्यौ शुक्ल० यजु० ।२९।९

प्रयत त्रि०प्र+यम-कर्तरि क्त । १पवित्रे संयते अमरः । प्र+यत-क्त । २प्रयत्नविशिष्टे त्रि० । प्रपूर्वक यमेर्दानार्थकात् कर्मणि क्त । २दत्ते च । "प्रयतदक्षिणम्" श्रु० १२।१५

प्रयत्न पु० प्र+यत-भावे नङ् । प्रयासे । स च व्याख्यायते त्रिविधः यथा "प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम् । एवं प्रयत्नवैविध्यं तान्त्रिकैः परिदर्शितम् । चिकीर्षाकृतिसाध्येष्टसाधनत्वमतिस्तथा । उपादानञ्च साध्यस्य प्रवृत्तौ जनकं भवेत् । निवृत्तिस्तु भवेद्दुःखात् दृष्टसाधनताधियः । यत्नो जीवनयोनिस्तु सर्वदाऽतीन्द्रियो भवेत् । शरीरे प्राणसञ्चारे कारणं तत्प्रकीर्त्तितम्" भाषा० 'प्रयत्नस्तु फलावाप्त्यै व्यापारोऽतित्वरान्वितः' सा०द० उक्ते २फलाधिभिः प्रारब्धस्य कर्मणोऽवस्थापङ्क्तेर्गतेऽवस्थाभेदे ततोऽस्यार्थे मतुप् मस्य वः । प्रयत्नवत् तद्युक्ते त्रि० त्रिका० स्त्रियां ङीप् ।

प्रयत्नवैशिष्ट्य ६त० स्वाभाविकप्रयत्नस्योपरमपूर्वकप्रयत्नभेदे-तच्च योगाङ्गसनसिद्धिकारणं यथोक्तं "प्रयत्नवैशिष्ट्यानन्तसमापत्तिभ्याम्" पा०सू० "भवतीति शेषः प्रयत्नो परमात् सिद्धासनं येन नाड्यमेजयो भवति अनन्ते वा समापत्तिं चित्तमासनं निर्वर्त्तयतीति" भा० "सा सिद्धिकोऽपि प्रयत्नः शरीरधारको न योगाङ्गस्योपदेष्टव्यासनस्य कारणं तस्य तत्कारणत्वे उपदेशवैयर्थ्यात् शरीरस्त एव तत्सिद्धेः तस्मादुपदेष्टव्यस्यासनस्यायमसाधकः विरोधी च स्वाभाविकः प्रयत्नः । तस्य च यादृच्छिकासनहेतुतयासननियमोपक्षेपत्वात् । तस्मादुपदिष्टनियमासनमभ्यस्यता स्वाभाविकप्रयत्नवैशिष्ट्यात्मा प्रयत्न आस्थेयो नान्यथोपदिष्टमासनं सिध्यतीति स्वाभाविक प्रयत्नवैशिष्ट्यमासनसिद्धिहेतुः अनन्ते वा नागनायके स्थिरतरफणासहस्रविधृतविश्वम्भरामण्डले समापत्तिं चित्तमासनं निर्वर्त्तयतीति" विव० [१।९।१५ भाष्यम् ।

प्रयन्तृ त्रि०प्र+यम-तृच् । प्रकर्षेण १यन्तरि २दातरि च ऋ०

प्रयस् न०प्रयसतेऽत्र प्र+यस-आधारे क्विप्। यज्ञे निघण्टुः पय इत्यत्र प्रय इति पाठान्तरं क०१।४५।८ पदा०।

प्रयस्त वि०प्र+यस-आधारे क्त। १प्रयासेन कृते एतच्छब्दार्थतत्कादिना द्रव्येण च प्रयत्नसंकृते २व्यञ्जने न० अमरः।

प्रयाग पु० प्रकृष्टो यागो यागफलं यस्य यस्मात् वा। गङ्गायमुनयोः सङ्गमजाते १तीर्थभेदे २यतक्रतौ इन्द्रे च। ३यज्ञे अश्वमेधाङ्गखाण्डस्य यज्ञसाधनत्वात् तथात्वम्। कर्म०। ४प्रकृष्टे यज्ञे अमरः। तत्र तीर्थभेदे पुंन० पुराणे तथा प्रयोगात्। तन्माहात्म्यञ्च मत्स्यपु०१०२अध्यायादिके १०७अध्यायान्ते उक्तम् एवमन्यान्यपुराणेऽप्युक्तम्। ततो दिग्मात्रं पुराणसङ्गत्ये दर्शितमत्र प्रदर्श्यते।

"एतत् प्रजापतेः क्षेत्रं त्रिषु लोकेषु विश्रुतम्। न शक्यं कथितुं राजन्! फलं वर्षशतैरपि। संक्षेपेण तु वक्ष्यामि तस्य तीर्थस्य यत् फलम्। षष्टिर्वीरसहस्राणि तत्र रक्षन्ति जाह्नवीम्। यमुनां रक्षति सदा सविता सप्तवाहनः। तं वटं रक्षति शिवः शूलपाणिर्महेश्वरः। स्थानं रक्षन्ति वै देवाः सर्वपापहरं शुभम्। प्रयागं कारणाख्यं यान्ति पापानि संक्षयम्। दर्शनात्तस्य तीर्थस्य सर्वपापैः प्रमुच्यते। मृत्तिकालम्भनादापि नरः पापात् प्रमुच्यते। पञ्च कृष्णानि राजेन्द्र! तेषां मध्ये तु जाह्नवी। प्रयागस्य प्रवेशाद्वै पापं नश्यति तत्क्षणात्। मनसा चिन्तितान् कामान् सर्वान् प्राप्नोति पुष्कलान्। ततो गत्वा प्रयागन्तु सर्वदेवाभिरक्षितम्। ब्रह्मचारी शुचिर्भूत्वा पितॄन् देवांश्च तर्पयेत्। तपनस्य सुता देवी त्रिषु लोकेषु विश्रुता। समागता महाभाग! यमुना यत्र निम्नगा। तत्रोपस्पृश्य राजेन्द्र! स्वर्गलोकमवाप्नुते। व्याधितो यदि वा क्षीणः क्रुद्धो वापि भवेन्नरः। गङ्गायमुनमासाद्य यस्तु प्राणान् परित्यजेत्। दीप्यमानैर्विमानैः सूर्यवर्चसैः। नन्दनादप्सरसां मध्ये स्वर्गे तिष्ठति मानवः"।

"देशस्थो यदि वाऽरण्ये विदेशे यदि वा गृहे। प्रयागं स्मरमाणोऽपि यस्तु प्राणान् परित्यजेत्। ब्रह्मलोकमवाप्नोति यदत्रि मुनिपुङ्गवाः। सर्वकामफलैर्युक्ता मन्दाकिन्याश्च ते शुभे। मोदते ऋषिभिः सार्द्धं स्वर्गे तेनैव कर्मणा। विद्याधरगणैर्युक्ते पूज्यते दिवि दैवतैः। ततः स्वर्गात् परिभ्रष्टो जम्बुद्वीपपतिर्भवेत्। ततः शुभानि कर्माणि चिन्वानः पुनःपुनः। शुचिवान् वित्तसम्पन्नो भवतीह न संशयः। सर्वमङ्गलसम्पूर्णे कुलेजातो नरोत्तमः। प्रयागे त्रिरात्रं साधु स्नात्वा यथाविधि। स्वर्गे च तत्फलं भुङ्क्ते प्रदाता पञ्चकोटिषु। पुत्रान् दारांस्तथा ज्ञातान् गौरेका प्रतितारयेत्। ऐश्वर्यलोभमोहाद्वा मच्छेदुयानेन यो नरः। निष्फलं तस्य तत्तीर्थं तस्मादुयानन्तु वर्जयेत्। तत्र दानं प्रदातव्यं यथाविभवसम्भवम्। तेन तीर्थफलं चैव वर्द्धते नात्र संशयः। स्वर्गे तिष्ठति राजेन्द्र! यावदाभूतसंप्लवम्। वटमूलं समासाद्य यस्तु प्राणान् परित्यजेत्। सर्वलोकानतिक्रम्य रुद्रलोकं स गच्छति। तत्र ते द्वादशादित्यास्तपन्ते रुद्रमाश्रिताः। निर्दहन्ति जगत्सर्वं वटमूलं न दह्यते। नष्टचन्द्रार्कपवनं यदा चैकार्णवं जगत्। स्थिते तत्र वै विष्णुर्यतमानः पुनःपुनः। देवदानवगन्धर्वा ऋषयः सिद्धचारणाः। यदा सेवन्ति तत्तीर्थं गङ्गायमुनसङ्गमम्। ततः पुण्यतमं नास्ति त्रिषु लोकेषु भारत!। अक्षयात्तस्य तीर्थस्य नामसङ्कीर्त्तनादपि। मृत्तिकालम्भनादापि नरः पापात् प्रमुच्यते। तुल्यं फलमवाप्नोति राजसूयाश्वमेधयोः। न देववचनात्तात न लोकवचनादपि। मतिरुत्क्रमणीया ते प्रयागमरणं प्रति। दश तीर्थसहस्राणि ऋषिलोकस्तथा वराः। तेषां सान्निध्यमत्रैव साधे वै कुरुनन्दन!। या गतिर्योगयुक्तस्य संयतस्य च धीमतः। सा गतिस्त्यजतः प्राणान् गङ्गायमुनसङ्गमे। कम्बलाश्वतरौ नागौ विपुले यमुनातटे। तत्र स्नात्वा च पीत्वा च सर्वपापैः प्रमुच्यते। तत्र गत्वा च संस्थानं महादेवस्य धीमतः। नरस्तारयते पूर्वान् पुरुषानेकविंशतिम्। स्नात्वाभिषेकन्तु नरो ह्यश्वमेधफलं लभेत्। स्वर्गलोकमवाप्नोति यावदाभूतसंप्लवम्। पूर्वपार्श्वे च गङ्गायास्त्रिषु लोकेषु विश्रुतम्। कूपश्चैव तु साहस्रं प्रतिष्ठानस्य नामतः। तत्र स्नात्वा विशुद्धात्मा अश्वमेधफलं लभेत्। उत्तरेण प्रतिष्ठानादुभागीरथ्यास्तु पूर्वतः। हंसप्रपतनं नाम तीर्थं त्रैलोक्यविश्रुतम्। अश्वमेधमवाप्नोति स्नानमात्रेण भारत!। यावच्चन्द्रश्च सूर्यश्च तावत्स्वर्गे महीयते। सर्वशोभासमिते रम्ये विपुले हंसपाण्डुरे। परित्यजति यः प्राणान् गृहे तस्यापि यत् फलम्। षष्टिं वर्षसहस्राणि षष्टिं वर्षशतानि च। मोदते पितृभिः सार्द्धं स्वर्गलोके नरोत्तमः। ततः स्वर्गात् परिभ्रष्टः लोकेऽस्मिं दिवश्च्युतः। सर्वशीलगुणोपेतः

कन्यानां दिव्यतेजसाम्। मध्ये नारीसहस्राणां वह्नेराज्ञ पतिर्भवेत्। दशग्रामसहस्राणां भर्त्ता भवति भूमिपः। काञ्चीनूपुरशब्देन सुप्तोऽसौ प्रतिबुध्यते। अथ सन्ध्यावटे रम्ये ब्रह्मचारी जितेन्द्रियः। उपासीतशुचिः सन्ध्यां ब्रह्मलोकमवाप्नुयात्। कोटितीर्थं समासाद्य यस्तु प्राणान् परित्यजेत्। कोटिवर्षसहस्राणि स्वर्गलोके महीयते। ततः स्वर्गात् परिभ्रष्टः चोक्तकर्मादिवच्युतः। सुवर्णमणिसुकाढ्ये कुले जायेत रूपवान्। ततो भागीरथीं गत्वा वासुकेरुत्तरेण तु। दशाश्वमेधिकं नाम तत्र तीर्थं परं भवेत्। स्नात्वाभिषेकन्तु नरो ह्यश्वमेधं फलं लभेत्। धनाढ्यो रूपवान् दक्षो दाता भवति धार्मिकः। चतुर्वेदिषु यत् पुण्यं सत्यवादिषु यत्फलम्। अहिंसायाच्च यो धर्मो गमनादेव तत् फलम्। तथैव मानसं नाम गङ्गाया दक्षिणे तटे। त्रिरात्रसुषितः स्नात्वा सर्वान् कामानवाप्नुयात्। पृथिव्या आसप्तद्वीपा मद्भागः पतिर्भवेत्। षष्टितीर्थसहस्राणि षष्टितीर्थशतानि च। माघे मासि गमिष्यन्ति गङ्गायमुनसङ्गमम्। गवां शतसहस्रस्य सम्यग्दत्तस्य यत् फलम्। प्रयागे माघमासे वै त्र्यहं स्नातस्य तत् फलम्। गङ्गायमुनयोर्मध्ये योऽग्नौ स्वाङ्गं परित्यजेत्। अहीनाङ्गोऽथरोगश्च पक्वेन्द्रियसमन्वितः। यावन्ति रोमकूपाणि तस्याङ्गेषु च धीमतः। तावद्वर्षसहस्राणि स्वर्गलोके महीयते। जलप्रवेशं यः कुर्यात् सङ्गमे लोकविश्रुते। राजसूयो यथा यज्ञो विसृष्टः सर्वपातकैः। सोमलोकमवाप्नोति सोमेन सह मोदते। षष्टिं वर्षसहस्राणि षष्टिं वर्षशतानि च। स्वर्गलोकमवाप्नोति ऋषिगन्धर्वसेवितः। परिभ्रष्टश्च राजेन्द्र! समृद्धे जायते कुले। अधःशिरास्तु यो ज्वालामूर्ध्वपादः प्रवेक्ष्यति। शतं वर्षसहस्राणां स्वर्गलोके महीयते। परिभ्रष्टश्च राजेन्द्र! अग्निहोत्री भवेन्नरः। यस्तु खड्गेन कर्त्तित्वा शकृन्निभ्यः प्रयच्छति। विघसैरुपभुक्तस्य शृणु तस्यापि यत् फलम्। शतं वर्षसहस्राणि सोमलोके महीयते। तस्मादपि परिभ्रष्टो राजा भवति धार्मिकः। यामुने चोत्तरे कूले प्रयागस्य च दक्षिणे। अश्वमोचनकं नाम तत्तीर्थं परमं स्मृतम्। एकरात्रोषितः स्नात्वा अश्वैः सर्वैर्विमुच्यते। अश्वमेधफलं तस्याद्भक्षतस्तु पदे पदे। पुरुषांस्तारयेद्राजन्! दश पूर्वान् दशापरान्॥ अतीतान् पुरुषान् सप्त भविष्यांश्च चतुर्दश। नरस्तारयते सर्वान् यस्तु प्राणान् परित्यजेत्। अश्रद्धधानाः पुरुषा पापोपहतचेतसः। न प्राप्नुवन्ति तत् स्थानं प्रयागं देवरक्षितम्। अज्ञानेन तु यस्नेह तीर्थयात्रादिकं भवेत्। सर्वकामसमृद्धन्तु स्वर्गलोके महीयते। अग्नितीर्थमतिख्यातं यमुनादक्षिणे तटे। उत्तरेण तु वक्ष्यामि आदित्यस्य महात्मनः। तीर्थं निरुदकं नाम यत्र देवाः सवासवाः। उपासते सदा सन्ध्यां नित्यकालं युधिष्ठिर!। गङ्गा च यमुना चैव उभे तुल्यफले स्मृते। केवलं ज्येष्ठभावेन गङ्गा सर्वत्र पूज्यते। नैमिषं पुष्करञ्चैव गोमती सिन्धुसागरम्। गया च धेनुकञ्चैव गङ्गासागरएव च। एते चान्ये च बहवो ये च पुण्याः शिलोच्चयाः। दश कोटिसहस्राणि षष्टिकोट्यस्तथा पराः। प्रयागे संस्थिता नित्यमेवमाहुर्मनीषिणः। कुरुक्षेत्रसमा गङ्गा यत्र तत्रावगाहिता। तस्माद्दशगुणा प्रोक्ता यत्र विन्ध्येन सङ्गता। तस्माच्छतगुणा प्रोक्ता काञ्चासुत्तरवाहिनी। काञ्चाः शतगुणा प्रोक्ता गङ्गायमुनसङ्गमे। सहस्रगुणिता चापि भवेत् पश्चिमवाहिनी। सा राजन्! दर्शनादेव ब्रह्महत्यापहारिणी। पश्चिमाभिमुखी गङ्गा कालिन्द्या सह सङ्गता। हन्ति कल्मषजं पापं सा माघे नृप! दुर्लभा। अस्तं कथ्यते राजन्! सा वेणी परिकीर्त्तिता। तस्यां माघे सङ्गमन्तु देवानामपि दुर्लभम्। षष्टितीर्थसहस्राणि षष्टितीर्थशतानि च। माघे मासि गमिष्यन्ति गङ्गायमुनसङ्गमम्। ब्रह्मविष्णुमहादेवरुद्रादित्यमरुद्गणाः। गन्धर्वा लोकपालाश्च यक्षकिन्नरगुह्यकाः। ऋषिभादित्यपुत्रैः सिद्धा ये चान्ये तत्त्वदर्शिनः। ब्रह्माणी पार्वती लक्ष्मीः शची मेधावती रतिः। सर्वास्ता देवपत्न्यश्च तथा नागाङ्गना नृप। एताश्चो मेनका रम्भा उर्वशी च तिलोत्तमा। नथाचाप्सरसां तद्वत् पितृणाञ्च गणाश्च ये। स्नातुमायान्ति ते सर्वे माघे वेण्यां नराधिप!। कृते युगे सङ्गमेषु कलौ प्रच्छन्नरूपिणः। वसतीर्थानि तुल्यानि यमुनागङ्गयोरतः। भवन्ति शुक्लवर्णानि प्रयागे माघमज्जनात्। स्वर्णभारसहस्रेण कुरुक्षेत्रे रविग्रहे। यत् फलं लभते माघे वेण्यां तच्च दिने दिने। यत्तीर्थतपोभिश्च न तत् प्राप्नोति मानवः। यत् फलं समवाप्नोति वेण्यां स्नानान्न संशयः। प्रयागे माघमासे तु यस्त्र्यहं स्नाति मानवः। पापं त्यक्त्वा दिवं याति जीर्णं त्वचमिवोरगः। प्रयागे माघमासे तु त्र्यहं स्नातस्य यद्भवेत्॥

नाश्वमेधसहस्रेण तत् फलं लभते भुवि। त्रिरहस्नान-फलं माघे पुरा काञ्चनमालिने। राजसाय ददौ भूप! तेन मुक्तः सपातकात्। योगाभ्यासेन यत् पुण्यं संवत्सर शतेन च। गवां कोटिप्रदानस्य सम्यग्दत्तस्य यत् फलम्। प्रयागे माघमासे तु त्रिरहं स्नातस्य तत् फलम्। किं गवाधिखण्डदानेन काश्यां वा मरणेन किम्। किं कुरुक्षेत्रदानेन प्रयागे वपनं यदि। प्रयागे वपनं कृत्वा गवां शिरसपातनम्। दानं दद्यात् कुरुक्षेत्रे वारा-णस्यां तनुं त्यजेत्। त्रिषु त्रिषु ये स्नान्ति माघे माघि युधिष्ठिर!। न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि। स्वल्पं स्वल्पतरं पापं यद्वा यस्य नराधिप!। प्रयागं स्मरमाणस्य सर्वमाशाति संशयम्। दर्शनात्तस्य तीर्थस्य नामसंकीर्त्तनादपि। मृत्तिकालम्भनादापि नरः पापात् प्रमुच्यते। प्रयागस्य प्रवेशात्तु पापं नश्यति तत्क्षणात्। कीर्त्तनान्मुच्यते पापाद्दृष्ट्वा भद्राणि पश्यति। अवगाह्य च पीत्वा च पुनात्यासप्तमं कुलम्। गङ्गायमुनयोर्मध्ये स्नातो मुच्येत किल्बिषात्। मनसा चिन्तितान् कामां-स्तांस्तान् प्राप्नोति पुष्कलान्। प्रयागन्तु ततो गत्वा सर्व-देवाभिरक्षितम्। ब्रह्मचारी भवेन्नित्यं पितॄन् देवांश्च तर्प-येत्। ईप्सितान् लभते कामान् यत्र कुत्रापि जायते। तत्राभिषेकं यः कुर्यात् सकृत्ते संयितव्रतः। स प्राप्नोति फलं तुल्यं राजसूयाश्वमेधयोः। पञ्चयोजनविस्तीर्णं प्र-यागस्य च मण्डलम्। प्रवेशाद्दूयस्य भूमौ तु अश्वमेधः पदे पदे। प्रयागमनुगच्छेद्वा वसते वापि यो नरः। सर्व-पापविशुद्धात्मा विष्णुलोके महीयते। मकरस्थे रवौ माघे गोविन्दाच्युत! माधव!। स्नानेनानेन मे देव! यथोक्त फलदो भव। तत्र दानं प्रदातव्यं यथाविभवविस्तरम्। तेन तीर्थफलञ्चैव वर्द्धते नात्र संशयः। स्वर्गे तिष्ठति रा-जेन्द्र! यावदाभूतसंप्लवम्। योजनानां सहस्रेषु गङ्गां यः स्मरते नरः। अपि दुष्कृतकर्माऽपि लभते परमां गतिम्। स्नातास्तु ये माकारमाघ्करोदये तीर्थे प्रयागे सुरसिद्धसङ्गमे। तेषां षडङ्गारमलङ्करोति षडङ्गवेदी कुञ्जरकर्णताडिता" मत्स्यपु०।

तत्र मुण्डनविधिर्यथा "गङ्गायां माघ्करक्षेत्रे मातापि-त्रोर्गुरौ मृते। आधाने सोमपाने च वपनं सप्तसु स्मृतम्" इति स्मृतिसङ्ग्रहलिखितवचनं प्रयागावच्छिन्नम-न्यत्रा विधायकम्। माघ्करक्षेत्रं प्रयागः अपि च प्रयागमधिकृत्य "केशानां यावती संख्या छिन्नानां जा-ह्नवीजले। तावद्वर्षसहस्राणि स्वर्गलोके महीयते"। प्रयागे स्त्रीणामपि मुण्डन न तु केशानां ह्रस्वच्छेदन-मात्रं यथा "केशमूलसमाश्रित्य सर्वपापानि देहिनाम्। तिष्ठन्ति तीर्थस्नानेन तस्मात्तान्यत्र वापयेत्। प्रयागे मु-ण्डनाकरणे दोषोऽपि "गङ्गायां माघ्करक्षेत्रे मुण्डनं यो न कारयेत्। स कोटिकुलसंयुक्त आकल्पं रौरवे वसेत्" इति प्रा०त०।

प्रयागभय पु० प्रयागात् प्रह्लादयागकर्त्तृत्वात् भिभेति स्वप्र-दत्त्युतिभङ्गया भी-अच्। इन्द्रे शब्दमाला।

प्रयागसेतु पु० त्रिस्रवीसेतुपञ्चाशे प्रयागमाहात्म्यादिप्रति-पादके ग्रन्थे।

प्रयाज पु०प्र+यज-घञ् यज्ञाङ्गत्वात् न कुत्वम्। दर्शपौर्णमा-स्याद्यङ्गे यागभेदे। प्रयाजाश्च यथा "समिधो यजति तनू-नपातं यजति इडो यजति बर्हिर्यजति स्वाहाकारं यजतीत्येवं रूपाः सुलक्षाः। "पञ्च प्रयाजान्" कात्या० श्रौ०१।२।१।१७। आपस्तम्बोऽपि "पञ्च प्रयाजान् प्राचः प्रतिदिशं वा, समिधः पुरस्तात्, तनूनपातं दक्षिणतः, इडः पश्चात्, बर्हिरुत्तरतः, स्वाहाकारं मध्ये" तत्कर्मस्थान-माह। कर्मभेदे तेषां मध्ये कस्यचिदाहत्या षट्सप्तनवै-कादशसंख्याऽपि कात्या०श्रौ०भाष्ये दृश्या। विस्तरभयात् नोक्ता। प्रयाजादयश्चाराडुपकारका यथोक्तं लौकाक्षि० "द्रव्यादानुद्दिश्य केवलं विधीयमानं कर्म स्वाराडुपकारकम् यथा प्रयाजादि। स्वाराडुपकारकञ्च परमापूर्वोत्पत्तावेवो पयुज्यते। सन्निपत्योपकारकन्तु द्रव्यदेवतासंस्कारद्वारा यागस्वरूपेऽप्युपयुज्यते। इदमेव चाग्नेयिकर्मेत्युच्यते"।

प्रयाजवत् पु० प्रयाज+अस्त्यर्थे मतुप् मस्य वः। प्रयाजरूप-कर्मभेदपञ्चकयुते प्रधानयागे दर्शादौ।

प्रयाण न० प्र+या-भावे ल्युट्। प्रस्थाने पुरादितो बहि-र्गमने हेमच०। राज्ञां प्रयाणे वर्णनीयपदार्थाः कविकल्प-लतायामुक्ता यथा "भेरीशब्दः भूमिकम्पः सैन्यधूलिप्रसर-णं करभः हयः (द्रव्याहरणार्थं) ध्वजः छत्रं वणिक् शकटमित्यादयः। स्वार्थे क। तत्रार्थे हेमच०।

प्रयात त्रि० प्र+या-कर्त्तरि क्त। १प्रकर्षेण गन्तरि कर्मणि क्त। २प्रयाणप्राप्ते ३भग्नो ४छन्दोभेदे च पु०हेम०

प्रयाम पु०प्र+यम-घञ्। महार्घ्यतावशात् धान्यादौ १जना-नामादरातिशये अमरः। २क्रयदेये द्रव्यमूल्ये ३मूल्याधि-क्यपरिच्छेदने भरतः।

प्रयास पु० प्र+यस-भावे घञ्। १प्रयत्ने २परिश्रमे ३क्लेशे च

क्षेमच०। प्रयस्यतेऽनेन करणे घञ्। ४क्षविद्यादिषु पञ्चसु क्लेशदायकेषु। [युते ऋ० ८।६।२७

प्रयियु त्रि०प्र+या–या०कु द्वित्वे अभ्यासस्यात इत्वम्। प्रयाय्य

प्रयुक्त त्रि०प्र+युज–क्त। १प्रकर्षेण संयोगयुते २प्रेरिते ३प्रयोज्ये परम्परया कार्ये च। तस्य भावः प्रयुक्तत्व तल्लावे न०। स च स्वरूपसम्बन्धभेदः कारणाभावेन कार्याभाव इत्यादिप्रतीतिसिद्धः गौ०स्व०।

तदुक्तं गौ०स्व० १।१।२। इत्तौ प्रयोज्यत्वं प्रयोजकत्वं वा यत्नजन्यधीः दण्डाभावात् घटाभाव इतिवत् स्वरूपसम्बन्धविशेष एव तत्।

प्रयुक्ति स्त्री प्र+युज–भावे क्तिन्। १प्रयोगे २शब्दोच्चारणभेदे "अङ्गस्य राजमातङ्गा इति न स्युः प्रयुक्तयः" ब्या० कारिका ३प्रेरणे प्रा०म०। ४प्रकृष्टायां युक्तौ च।

प्रयुत न० १दशलक्षसंख्यायां २तत्संख्याते च "लक्षप्रयुतकोटयः" क्रमशः इति लीला०। १प्रकर्षेण युते त्रि०।

प्रयुति स्त्री प्र+यु–भावे क्तिन्। १प्रकर्षेण योगे २प्रयोगे ऋ० १०।२७।१२

प्रयुतेश्वर पु० तीर्थभेदे स्कन्दपु०।

प्रयोक्तृ त्रि० प्र+युज–तृच्। १प्रयोजकर्त्तरि २ऋणदानादौ धनप्रयोगकर्त्तरि उत्तमर्णे ३प्रयोजकभावे च अमरः।

प्रयोग पु० प्र+युज–भावकर्मकरणेषु यथायथं घञ् कुत्वम्। १अनुष्ठाने २शब्दादीनामुच्चारणभेदे ३वशीकरणाद्युपाये कामर्णे कर्मणि। ४घोटके च मेदि०। प्रयोगैर्निर्वृत्तः ठञ्। आनुशतिक० द्विपदबहुव्रीहिः। प्रायौगिक प्रयोगसाध्ये त्रि० स्त्रियां ङीप्। तस्य वाक्योच्चारणं च अनुमानाङ्गपञ्चावयववाक्योच्चारणं यथा "अत्रायं प्रयोगः पर्वतो वह्निमान् धूमादित्यादि" यथायोगं समभिव्याहृतत्वेनोच्चारणं प्रयोग इति याज्ञिकाः। यज्ञादिक्रियाकलापेतिकर्त्तव्यतावोधकानां मन्त्राणां मन्त्रत्वप्रतिपादके पद्यत्वपरपर्याये मन्त्रे इति याज्ञिकाः। भूतप्रेतादुच्चाटनादिसाधने मन्त्रोच्चारणभेदे तान्त्रिकाः। ५शस्त्रादिमोचने योद्धारः। ६नायकयोर्मेलने स्त्रियामेदे इत्यालङ्कारिकाः।

प्रयोगविधि पु०प्रयोगज्ञापकोविधिः श०त०। प्रयोगस्यापि लक्ष्यज्ञापके विधिभेदे तल्लक्षणादि लौगाक्षि० उक्तं यथा "प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः। स च वाक्यैकवाक्यतापन्नः प्रधानविधिरेव। स हि साङ्गप्रधानमनुष्ठापयन् विलम्बे प्रमाणाभावादविलम्बापरपर्यायं प्रयोगप्राशुभावं विधत्ते। न च तदविलम्बेऽपि प्रमाणाभाव इति वाच्यं विलम्बे साङ्गप्रधानविध्येकवाक्यतावगततत्साकाङ्क्षत्वानुपपत्तेः विलम्बेन क्रियमाणयोः पदार्थयोः इदमनेन सह क्रियतमिति साकाङ्क्षत्वव्यवहाराभावात्। स चाविलम्बो नियते क्रमे सान्निध्यमापन्ने भवति। अन्यथा हि किमेतदनन्तरमेतत् कर्त्तव्यमेतदनन्तरं वेति प्रयोगविच्छेदापत्तेः। अतः प्रयोगविधिरेव स्वविषये प्रयोगप्राशुभावसिद्ध्यर्थं नियतं क्रममपि पदार्थविशेषेण तया विधत्ते। अतएवाङ्गानां क्रमबोधको विधिः प्रयोगविधिरित्यपि लक्ष्यते। तत्र क्रमोनाम विततिविशेषः पौर्वापर्यरूपो वा। तत्र षट् प्रमाणानि। शब्दार्थपठनस्थानमुख्यप्रवृत्त्याख्यानि। क्रमप्रापकहेतवश्च क्रमशब्दे २२६० पृष्ठादावुक्ताः।

प्रयोगातिशय पु० सा०द० नाटकाङ्गप्रस्तावनाभेदे "यदि प्रयोग एकस्मिन् प्रयोगोऽन्यः प्रयुज्यते। तेन पात्रप्रवेशश्चेत् प्रयोगातिशयस्तदा"। यथा कुन्दमालायाम् "नेपथ्ये हतोऽवतरत्यार्यः। सूत्रधारः। कोऽयं खलु आर्याङ्गुलेन साक्षायकं मे सम्पादयति। विलोक्य। कष्टमतिकरुणं वर्त्तते। अङ्गुलस्य भवने सुचिरं स्थितेति रामेण लोकपरिवादभयाकुलेन। निर्वासितां जनपदादपि गर्भगुर्वीं सीतां वनाय परिकर्षति लक्ष्मणोऽयम्"। अत्र लवप्रयोगार्थं स्वमार्याङ्गुलमिच्छता सूत्रधारेण सीतां वनाय परिकर्षति लक्ष्मणोऽयमिति सीतालक्ष्मणयोः प्रवेशं सूचयित्वा निष्क्रान्तेन स्वप्रयोगमतिशयान एव प्रयोगः प्रयोजितः"।

प्रयोगार्घ पु०प्रयोगस्यार्धम् "अर्धेन सह नित्यसमासोविभक्त्यलोपश्च" वार्त्ति०स०प्रयोगोऽर्धः प्रयोजनमस्य वा। प्रधानप्रयोगानुष्ठानानुकूले व्यापारभेदे प्रवृत्तुत्क्रमे अमरः।

प्रयोगिन् त्रि० प्र+युज–णिनि्। प्रयोगकर्त्तरि।

प्रयोग्य त्रि०प्रयुज्यते प्रयुज–कर्मणि यत्। १प्रयोज्ये २कर्त्तरि च "यथा प्रयोग्य आचरणे(रणे)नियुक्तः" भा०व०भाष्यम्।

प्रयोजक त्रि०कार्यादौ स्वादीन् प्रयुनक्ति प्र+युज–ण्वुल्। निजेष्टस्य स्वादेः १प्रेरके व्याकरणोक्ते हेतुसंज्ञे २कर्त्तरि च। "तत्प्रयोजको हेतुश्च" पा० तस्य स्वतन्त्रसंज्ञा विहिता। प्रयोजकस्य कृन्तृत्वं प्रा०वि० निर्णीतं यथा "नरान्तरव्यापाराव्यवधानेन बधनिष्पादकः कर्त्ता, यः कर्त्तारं कारयति स प्रयोजकः। सोऽपि द्विविधः एकः स्वतोऽप्रवृत्तं पदातिं वेतनादिना बधार्थं प्रवर्त्तयति अपरः स्वतः प्रवृत्तमेव मन्त्रोपायोपदेशादिना प्रोत्साहयति"।

तस्य मूलञ्च आपस्तम्बवाक्यं यथा "प्रयोजयिता अनुमन्ता कर्त्ता चेति सर्वे स्वर्गनरकफलभोक्तारो वो भव आरभते तस्मिन् फले विशेषः"। तस्य भावः त्व प्रयोजकत्व न० तद्भावे तस्य स्वरूपसम्बन्धभेदः तद्भिन्नान्यथासिद्धिभिन्नान्यथासिद्धिशून्यत्वे सति कार्य्याव्यवहित पूर्ववर्त्तित्वम्"।

प्रयोजन न० प्रयुज्यतेऽनेन प्र+युज-करणे ल्युट्। यमधिकृत्य प्रवर्त्तते १तस्मिन् प्रवर्त्तयितृज्ञानविषये यमर्थमाश्रित्य ज्ञातव्यं वा यत्नवान् तदाप्तिप्रहाणोपायमनुतिष्ठति प्रयोजनं तद्वेदितव्यम्। प्रवर्त्तिहेतुत्वाद् इममर्थमाप्स्यामि हास्यामि वेति व्यवसायोऽर्थस्याधिकारः। एवं व्यवसीयमानोऽर्थोऽधिक्रियते इति" वात्स्या० १।१।२४। करणे ल्युट्। २हेतौ। कर्मणि ल्युट्। ३कार्य्ये च मेदि०। प्रयोजनञ्च द्विविधं सुख्यं गौणं च। यत्र अन्येच्छानधीनेच्छाविषयत्वं सुख्यप्रयोजनत्वम् अन्येच्छाधीनेच्छाविषयत्वं गौणप्रयोजनत्वम्। तत्राद्यम् दुःखाभावः सुखञ्च द्वितीयं तदुपकारित्वयजनभोजनादिः। तस्य सुख्यप्रयोजनेच्छयैव जन्याया इच्छाया विषयत्वात् तथात्वम्। "येन प्रयुक्तः प्रवर्त्तते तत्प्रयोजनम्। यमर्थमभीप्सन् जिहासन् वा कर्मारभते तेनानेन सर्वे प्राणिनः सर्वाणि कर्माणि सर्वाश्च विद्याव्यायामाः। तदाश्रयश्च न्यायः प्रवर्त्तते" वात्स्या० १।१।१

प्रयोज्य त्रि०प्र+युज-ण्यत्। प्रयोक्तुंशक्ये १भृत्यादौ २मूलधने न० "प्रयोज्यस्यास्तु कर्त्तृत्वं गत्यादेर्विधितोचिता" कर्त्तुरुक्ते ३णिजन्तधातुप्रकृत्यर्थकर्त्तरि च। तस्य भावः त्व प्रयोज्यत्व. स्वरूपसम्बन्धभेदे न० प्रयुक्तशब्दे दृश्यम्।

प्ररय अव्य० प्रगतो रयो यत्र तिबहु०. अव्ययी०। प्रगतरययुक्ते देशे। [क० ११।१०।१५।

प्ररिचन् त्रि० प्र+रिच-ल्युनिप्। प्रकर्षेण विरेचनकर्त्तरि

प्ररुज त्रि० प्र+रुज-क। १प्रकटरोगकारके २देवसैन्याधिपभेदे ६० भा०आ०२२अ० ३राक्षसभेदे पु० भा०व०२८४अ०।

प्ररुह त्रि० प्र+रुह-क। प्ररोहणकर्त्तरि अदु०रादौ

प्ररूढ त्रि० प्र+रुह-क्त। १प्ररोहणकर्त्तरि २संजाते दृढमूले च ३जटरे न० मेदि०। ४जाते ५प्रवृद्धे त्रि० शब्दमा०।

प्ररोचन न० प्र+रुच-णिच्-भावे ल्युट्। १रुचिसम्पादने यथाऽश्वादीनां विध्यर्थानुष्ठाने प्ररोचनार्थो प्रवृत्तिः। युच् प्ररोचना तत्रार्थे स्त्री। सा च २प्रस्तावनाङ्गभेदे।

"तस्याः प्ररोचना वीथी तथा प्रहसना सखे। अङ्गान्यत्रोन्मुखीकारः प्रशंसातः प्ररोचना" सा०द० यथा "श्रीहर्षोनिपुणः कविरित्यादि रत्नावल्याम्। ३नाटकाङ्गविमर्शाङ्गभेदे स्त्री "प्ररोचना विमर्शे स्यात्" विमर्शोपक्रमे "प्ररोचना तु विज्ञेया संहारार्थप्रदर्शिनी" इति तत्र लक्षिता यथा वेणीसंहारनाटकाङ्के देवेन चक्रपाणिना सहित इत्युपक्रमे कृतं सन्देहेन पूर्व्वानां सखिसेनेत्यादि।

प्ररोह पु० प्र+रुह-अच्। १अङ्कुरे "मूलप्ररोह इव सौधतलं विभेद" इति रघुः। २आरोहे च हेमच०। भावे घञ्। ३तत्पक्षौ पु०। भावे ल्युट्। प्ररोहण तत्पक्षौ न०

प्रलपन न० प्र+लप-भावे ल्युट्। १प्रलापे २अनर्थकवाक्ये सा०द० १८८ कारिकायां दृश्यम्। भावे क्त। प्रलपित तत्रार्थे न०। "प्रलपितमिदं केनापि मिता० कथितं

प्रलम्ब त्रि० प्रलम्बते प्र+लम्ब-अच्। १प्रलम्बमाने २दनुपुत्रे असुरभेदे पु०-अग्निपु०। ३वपुषे(यशो)४पयोधरे ५लताङ्कुरे ६गाथायां ७हारभेदे मेदि०। भावे घञ्। ८प्रलम्बने

प्रलम्बघ्न पु० प्रलम्बमसुरं हन्ति हन-क। १बलरामे अमरः तेन तस्य हननकथा हरिवं० ७१अ० दृश्या। प्रलम्बमिदादयोऽप्यत्र।

प्रलम्बाण्ड पु० प्रलम्बः अण्डोऽस्य। दीर्घाण्डकोशयुते हेम०।

प्रलम्भ पु०प्र+लभ-घञ् सुम्। प्रकर्षेण लाभे। भावे ल्युट्। प्रलम्भन तत्रार्थे भाग० ५।२५।११।

प्रलय पु० प्रलीयतेऽस्मिन् प्र+ली-आधारे अच्। भूतादिः स्वाधारे कालभेदे स च चतुर्विधः नित्यनैमित्तिकप्राकृतात्यन्तिकभेदात् यथोक्तं कूर्मपु० ४२।४१ अ०

"कूर्म उवाच नित्यं नैमित्तिकञ्चैव प्राकृतात्यन्तिकौ तथा। चतुर्धायं पुराणेऽस्मिन् प्रोच्यते प्रतिसञ्चरः"। नित्यो यथा "योऽयं संदृश्यते नूनं नित्यं लोके जयन्तिह। नित्यं संकीर्त्यते नाम्ना मुनिभिः प्रतिसञ्चरः" नैमित्तिको यथा "ब्राह्मो नैमित्तिको नाम कल्पान्ते यो भविष्यति। त्रैलोक्यस्यास्य कथितः प्रतिसर्गो मनीषिभिः" प्राकृतो यथा "सहस्रादास्त्रिशेषान्तं यदा संयाति संक्षयम्। प्राकृतः प्रतिसर्गोऽयं प्रोच्यते कालचिन्तकैः" आत्यन्तिको यथा "ज्ञानादात्यन्तिकः प्रोक्तो योगिनः परमात्मनि। प्रलयः प्रतिसर्गोऽयं कालचिन्तापरैर्द्विजैः। आत्यन्तिकश्च कथितः प्रलयो जयसाधन"। नैमित्तिकप्रलयविस्तारो यथा तत्रैव "नैमित्तिकमिदानीं वः

कीर्तयिष्ये समासतः। चतुर्युगसहस्रान्ते संप्राप्ते प्रतिसञ्चरे। आत्मसंस्थाः प्रजाः कर्तुं प्रतिपेदे प्रजापतिः। ततोऽवर्षनाडहिन्नीद्रा सा शतवार्षिकी। भूतक्षयकरी घोरा सर्वभूतभयङ्करी। ततो यान्यत्रसाराणि शस्यानि पृथिवीतले। तानि चापे प्रलीयन्ते भूमित्वमुपयान्ति च। सप्तरश्मिरथो भूत्वा संवर्तकदिवाकरः। असङ्ख्यरश्मिर्भवति पिबन्नम्भोगभस्तिभिः। ततस्ते रश्मयः सप्त पिबन्त्यम्बु महार्णवे। तेनाहारेण ते रश्म्यो दीप्ताः सप्त भवन्ति हि। तस्य ते रश्मयः सप्त रश्म्यो भूत्वा चतुर्दिशम्। चतुर्लोकमिदं कृत्स्नं दहन्ति शिखिनो यथा। व्याप्नुवन्तश्च ते विप्रास्तूर्ध्वाधश्च रश्मिभिः। दीप्यन्ते भास्कराः सप्त दहनोऽग्निप्रतापिनः। ते रश्म्यो वह्निवत् दीप्ता बहुसाहस्ररश्मयः। खं समाहत्य तिष्ठन्ति निर्दहन्तो वसुन्धराम्। ततस्तेषां प्रतापेन दह्यमाना वसुन्धरा। सार्द्रनद्यर्णवद्वीपा निःस्नेहा समपद्यत। दीप्तैः सन्ततार्चिश्च ज्वालाभिश्च समाहतः। अधश्चोर्ध्वं च तिर्यक् च समाहत्य सहस्रशः। रश्म्यग्निना प्रदग्धानां संदग्धानां परस्परम्। एकत्वमुपजातानामेकज्वालो भवेत् प्रभुः। सर्वलोकप्रघातश्च सोऽग्निर्भूतान्तदृक्वली। चतुर्लोकमिदं कृत्स्नं निर्दह्यात्मतेजसा। ततः प्रलीने सर्वस्मिन् जङ्गमे स्थावरे तथा। निर्दग्धा निस्तृणा भूमिः कूर्मपृष्ठे प्रकाशते। अम्बरीषमिवाभाति सर्वमापूरितं जगत्। सर्वमेव तदार्चिर्भिः पूर्णं जाज्वल्यते नभः। पातालेषु यानि तोयानि महोदधिगतानि तु। तत्र तानि प्रलीयन्ते भूमित्वमुपयान्ति वै। द्वीपांश्च पर्वतांश्चैव वर्षाण्यथ महोदधीन्। तान् सर्वान् भक्षयित्वा तु कृत्स्नम्। सप्तार्चिः प्रभुः। सप्तद्वीपेभ्यो नदीभ्यश्च पातालेभ्यश्च सर्वशः। पिबन्नपः समिद्धोऽग्निः पृथिवीमाश्रितोऽज्वलत्। ततः संवर्तकः शैलानतिक्रम्य महांस्तथा। लोकान् दहति दीप्तात्मा रश्मितेजोविजृम्भितः। स दग्ध्वा पृथिवीं देवो रसातलमगोचयत्। अधस्तात् पृथिवीं दग्ध्वा दिवमूर्ध्वं दहिष्यति। योजनानां शतानीह सहस्राण्ययुतानि च। उत्तिष्ठन्ति शिखास्तस्य वायुः संवर्तकस्य च। गन्धर्वांश्च पिशाचांश्च सयक्षोरगराक्षसान्। तदा दहत्यसौ दीप्तः कालरुद्रप्रचोदितः। भूर्लोकम्। भुवर्लोकं२ स्वर्लोकञ्च३ तथा महः४। दहेदेषं कालाग्निः कालो विश्वतनुः स्वयम्। व्युष्टेषु तेषु लोकेषु तिर्यगूर्ध्वमधोऽग्निना। तत् तेजः समनुप्राप्य कृत्स्नं जगदिदं शनैः। क्षयोल्काहनिभं सर्वं तदेवैकं प्रकाशते। ततो गजकुलोद्गादाः क्षान्तैः समवृताः। उत्तिष्ठन्ति तदा व्योम्नि घोराः संवर्तका घनाः। केचिन्नीलोत्पलश्यामाः केचित् कृष्णदसन्निभाः। धूम्रवर्णास्तथा केचित्तथा पीताः पयोधराः। केचिद्रक्ताभवर्णाश्च स्यूनाः शारनिभास्तथा। शङ्खकुन्दनिभाश्चान्ये जात्यञ्जननिभाः परे। मनःशिलानिभास्त्वन्ये कपोतसदृशाः परे। केचित् कृष्णाञ्जवर्णाभास्तथान्ये क्षीरसन्निभाः। तथा कर्बुरवर्णाभा भिन्नाञ्जननिभास्तथा। इन्द्रगोपनिभाः केचिद्धरितालनिभास्तथा। काकाण्डकनिभाः केचिदुत्तिष्ठन्ति घना दिवि। केचित् पर्वतसङ्काशाः केचिद्गजकुलोपमाः। कूटागारनिभाश्चान्ये केचिन्नीलकुलोदहाः। बहुरूपा घोररूपा घोरस्वरनिनादिनः। तदा जलधराः सर्वं पूरयन्ति नभस्तलम्। ततस्ते जलदा घोरा वारिधा भास्करात्मजाः। सप्तधा संहतात्मानस्तमग्निं शमयन्त्युत। ततस्ते जलदा वर्षं वर्षन्तीह हिमौघवत्। सुघोरमशिवं सर्वं नाशयन्ति च पावकम्। प्रदग्धेन तदात्मर्धमात्रया पूर्यते खिल। अग्निसंक्षोऽभिभूतत्वात्तदाग्निः प्रविशत्यपः। नष्टे चाग्नौ पर्वतैः पयोदा जलसम्भवाः। प्लावयन्तो ऽथ भुवनं महाजलपरिप्लवैः। धाराभिः पूरयन्तीदं क्षोद्यमानाः स्वयम्भुवा। क्षुब्धाः सलिलौघैश्च वेला इव महोदधेः। सार्द्रद्वीपा तथा पृथ्वी जलैः संप्लाव्यते शनैः। आदित्यरश्मिभिः पीतं जलमब्धेषु तिष्ठति। पुनः पतति तद्भूमौ पूर्यन्ते तेन चार्णवाः। ततः सप्तद्वाः खां वेलामतिक्रान्तास्तु कृत्स्नशः। पर्वताश्च विलीयन्ते महो चाप्सु निमज्जति। तस्मिन्नैकार्णवे घोरे नष्टे स्थावरजङ्गमे। योगनिद्रां समास्थाय शेते देवः प्रजापतिः। चतुर्युगसहस्रान्तं कल्पमाहुर्मनीषिणः। वाराहो वर्त्तते कल्पो यस्य विस्तार ईरितः। असंख्याताश्चथा कल्पा ब्रह्मविष्णुशिवात्मकाः। कथिता हि पुराणेषु मुनिभिः कालचिन्तकैः। सात्त्विकेष्वथ कल्पेषु माहात्म्यमधिकं हरेः। तामसेषु शिवस्योक्तं राजसेषु प्रजापतेः। सोऽयं प्रवर्त्तते कल्पो वाराहः सात्त्विको मतः। अन्ये च सात्त्विकाः कल्पा मम तेषु परिग्रहः। ध्यानलब्धया ज्ञानं लब्ध्वा तेनैव योगिनः। आराध्य गिरिशं यत्नात् याति तत् परमं

पदम्। सोऽहं सत्त्वं समाधाय सायौ मायामयं त्वयम्। एकार्णवे जगत्यस्मिन् योगनिद्रां व्रजामि तु। मां पश्यन्ति महात्मानः सुप्तं काले महर्षयः। जनलोके वर्त्तमाना-स्तपसा योगचक्षुषा। अहं पुराणपुरुषो भूर्भुवःप्रभवो विदुः। सहस्रचरणः श्रीमान् सहस्राक्षः सहस्रपात्। मन्वोऽस्मिन्नौक्षुवा गावः कृष्णाश्च सलिलो ह्यहम्। औक्षवो च शुक्लश्चैव सोमो दक्षमयोऽक्षरम्। संवर्तको महानात्मा पवित्रं परमं यशः। वेदवेद्यः प्रभुर्गोप्ता गोपतिर्ब्रह्मणोऽहम्। अनन्तस्तारको योगी गति-मतिमतांवरः। हंसः प्राणोऽथ कपिलो विश्वमूर्त्तिः सनातनः। चेतसः प्रकृतिः कालो जगद्बीजमयाव्ययम्। माता पिता महादेवो मत्तो ह्यन्यन्न विद्यते। आदित्य-वर्णो भुवनस्य गोप्ता नारायणः पुरुषो योगमूर्त्तिः। मां पश्यन्तो बहवो योगनिद्रा त्वात्मानमव्ययं ब्र ह्मन्। प्राकृतप्रलयविस्तारो यथा तत्रैव "कूर्म उवाच ऋतःपरं प्रवक्ष्यामि प्रतिसर्गमनुत्तमम्। प्राकृतं च समा-सेन शृणुध्वं गदतो मम। मते परार्द्धसहिते काले लोक-महालयः। कालाग्निर्भक्षयात् कर्त्तुं करोति निखिलं मतिम्। कालत्वात्मानमावेश्य भूत्वा देवो महेश्वरः। दहेदशेषं ब्रह्माण्डं सदेवासुरमानुषम्। तमाविश्य महादेवो भगवान्नीललोहितः। करोति लोकसंहारं भीषणं लोकमाश्रितः। प्राविश्य मण्डलं सौरं ज्ञात्वा-ऽग्नौ बहुधा पुनः। निर्दहत्यखिलं लोकं सप्तसप्तिस्वरूप धृक्। स दग्ध्वा सकलं सत्त्वं मज्जं ब्रह्म शिरो महत्। देवतानां शरीरेषु क्षिपत्यग्निवदाहकः। दग्धेष्वशेष-देहेषु देवी गिरिवरात्मजा। एका सा साक्षिणः सम्यो क्षिप्यते वैदिकी श्रुतिः। शिरःकपालैर्देवानां कृत मुण्डरभूषणः। आदित्यब्रह्मादिगणैः पूरयन् व्योम-मण्डलम्। सहस्रमूर्द्धचरणः सहस्राग्रैर्महाभुजः। दंष्ट्राकरालवदनः प्रदीप्तानलोचनः। त्रिभुवी क्रान्ति-वपुषो योगमैश्वरमास्थितः। पीत्वा तत् परमानन्दं प्रभूतममृतं शुभम्। करोति ताण्डवं देवोमालोक्य परमेश्वरः। पीत्वा ब्रह्मामृतं देवी भर्तुः परममङ्गला। योगमास्थाय देवस्य देहमायाति सूक्ष्मिनः। ध्रुवं त्यक्त्वा ताण्डवरसं खेऽक्षयैव पिनाकधृक्। याति स्वभावं भग-वान् दग्ध्वा ब्रह्माण्डमण्डलम्। संस्थितेष्वग्र देवेषु ब्रह्मविष्णुपिनाकिषु। शुष्कैरनेकैः पृथिवी विलयं याति वारिषु। स वारितत्त्वं सकलं पिबते हव्यवाहनः। तेजसं शुष्कसंयुक्तं वायौ संयाति संक्षयम्। आकाशे शुष्को वायुः स्वयं याति सत्तमाः!। भूतादौ च तथा-ऽऽकाशं लीयते शुष्कसंयुतम्। इन्द्रियाणि च सर्वाणि तैजसे यान्ति संक्षयम्। वैकारिके देवगणाः प्रलयं यान्ति सत्तमाः!। वैकारिकस्तैजसश्च भूतादिर्येति सत्तमाः!। त्रिविधोऽयमहङ्कारो महति प्रलयं व्रजेत्। महान्तमेभिः सहितं ब्रह्माण्यमितौजसम्। अव्यक्तं जगतो योनिः संहरेदेकमव्ययम्। एवं संहृत्य भूतानि तत्त्वानि च महेश्वरः। नियोजयत्यव्ययात्मानं प्रधानं पुरुषं परम्। प्रधानपुंसोरुभयोरेष संहार ईरितः। महेश्वरेच्छाजनितो न क्षयं विद्यते क्वचित्। शुष्कसाख्यं तदव्यक्तं प्रकृतिः परिगीयते। प्रधानं जगतो योनि-र्मायातत्त्वमचेतनम्। कूटस्थचिन्मयो ह्यात्मा केवलः पञ्चविंशकः। गीयते मुनिभिः साक्षी महानेकः पिता-महः। एवं संहारकरणो भक्तिमाँश्वेश्वरी प्रभुः। प्रधानाद्यं विशेषान्तं दहेद्रुद्र इति श्रुतिः। योगिना-मथ सर्वेषां ज्ञानविज्ञानचेतसाम्। आत्यन्तिकश्चैव लयं विधातीह शङ्करः"। आत्यन्तिकप्रलयविस्तारो यथा विष्णु पु० पराशर उवाच "आध्यात्मिकादि भैदेव ज्ञात्वा तापत्रयं बुधः। उत्पन्नज्ञानवैराग्यः प्राप्नोत्यात्यन्तिकं लयम्। आध्यात्मिको द्विविधः शारीरो मानसस्तथा। शारीरो बहुभिर्भेदैर्भिद्यते सूयतां सः। शिरोरोग-मतिख्यातज्वरशूलभगन्दरैः। शुक्रार्शःश्वयथुश्वासकुष्ठाद्यै-र्दिभिरनेकधा। तत्राशिरोऽतीसारकुष्ठाक्षिभवसंज्ञकैः। भिद्यते देहजस्तापो मानसं श्रोतुमर्हसि। कामक्रोध-भयद्वेषलोभमोहविषादजः। योऽकस्मादवमानेर्ष्यासाधु-सूयादिभवस्तथा। मानसोऽपि द्विजश्रेष्ठ! तापो भवति नैकधा। एतैवमादिभिर्भेदैस्तापो ह्याध्यात्मिकः स्मृतः। खगपक्षिमनुष्याद्यैः पिशाचोरगराक्षसैः। सरीसृपा-दीश्च तथा जन्यते चाधिभौतिकः। शीतोष्णवातवर्षाम्बु वैद्युतादिसमुद्भवः। तापो द्विजवरश्रेष्ठ! कथ्यते चाधि-दैविकः। तदस्य त्रिविधस्यापि दुःखजालस्य पण्डितैः। गर्भजन्मजरादीषु स्थानेषु प्रभविष्यतः। निरस्यादि-मयाच्छादसुखभावैकलक्षणा। भेषजं भगवत्प्राप्तिरेका-त्यन्तिकी मता। तस्मात् तत्प्राप्तये यत्नः कर्त्तव्यः पण्डितैर्नरैः। तत्प्राप्तिहेतुर्ज्ञानञ्च कर्म चोक्तं महा-मुने!। आगमोत्थं विवेकाच्च द्विधा ज्ञानं तथोच्यते। यद्ब्रह्मागमजन्यं पुरं ब्रह्म विवेकजम्। अस्यन्तस्य द्वयो-

ज्ञानं दीपवच्चेन्द्रियोद्भवम्। यथा सूर्यस्तथा ज्ञानं यद्-विप्रर्षे! विवेकजम्। मनुरप्याह वेदार्थं स्मृत्वा वस्तुनि-श्चयम्॥ तदेतच्छ्रूयतामत्र साधु ते गदतो मम। हे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च यत्। शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति। हे विद्ये वेदितव्ये वै इति चाथर्वणी श्रुतिः। परया स्वरप्राप्तिर्ऋग्वेदादि-मयाऽपरा। यत्तद्व्यक्तमजरमचिन्त्यमजमव्ययम्। अनिर्देश्यमरूपञ्च पाणिपादाद्यसंयुतम्। विभुं सर्व-गतं नित्यं भूतयोनिमकारणम्। व्याप्यव्याप्यं यतः सर्वं तं वै पश्यन्ति सूरयः। तद्ब्रह्म परमं धाम तद्ध्येयं मोक्षकाङ्क्षिणाम्। श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम्। तदेव भगवद्वाच्यं स्वरूपं परमात्मनः। वाचको भगवच्छब्दस्तस्यापि सह तत्त्वतः। एवं निगदितार्थञ्च सतत्त्वं तस्य तत्त्वतः। ध्यायते येन तज्ज्ञानं परब्रह्मत्रयीमयम्। यच्छब्दगोचरस्यापि तस्यैव ब्रह्मणो द्विज!। पूजार्थो भगवच्छब्दः क्रियते लोकोपचारिकः। शुद्धे महाविभूत्याख्ये परे ब्रह्मणि वर्त्तते। मैत्रेय! भगवच्छब्दः सर्वकारणकारणे। सर्वाणि तत्र भूतानि वसन्ति परमात्मनि। भूतेषु च स सर्वात्मा वासुदेवस्ततः स्मृतः। व्यक्तिरूपः जनकायाच्च पूर्वः श्रेयश्चलः पुरा। नामव्याख्यामनन्तस्य वासुदेवस्य तत्त्वतः। भूतेषु वसते योऽन्तर्वसन्त्यत्र च तानि यत्। धाता विधाता जगतां वासुदेवस्ततः प्रभुः। स सर्व-भूतप्रकृतिविकारगुणांश्च दोषांश्च सदा! व्यतीतः। व्यतीतसर्वावरणादिशक्तात्मा तेनासौ तं यद्वृणान्तरात्मम्। समस्तकल्याणगुणात्मको हि स्वशक्तिलेशावृतभूतसर्गः। दुरन्तशक्तीच्छाभिमतोरुदेहः संधारिताशेषजगद्धितोऽसौ। तेजोबलैश्वर्यमहावबोध स्ववीर्यशक्त्यादिगुणैकराशिः। परः पराणां सकलो न यत्र क्लेशादयः सन्ति परावरेशे। स ईश्वरो व्यष्टिसमष्टिरूपो व्यक्तस्वरूपः प्रकट-स्वरूपः। सर्वेश्वरः सर्वदृक् सर्ववेत्ता समस्तशक्तिः परमे-श्वराख्यः। स ज्ञायते येन तदस्तदोषं शुद्धं परं निर्मल-मेकरूपम्। संदृश्यते ह्यवगम्यते वा तज्ज्ञानमज्ञानमतोऽन्यदुक्तम्" विष्णु पु०। "नारद उवाच। कृतं त्रेता द्वापरञ्च कलिश्चेति चतुर्युगम्। दिनमेकं युगं ज्ञेयं तस्य वा चैकसप्ततिः। मन्वन्तरन्तु तज्ज्ञेयं तेऽपि वक्ष्ये चतुर्दश। स कल्पो नाम वै कालस्तदन्ते प्रलयस्तु यः। सा ब्रह्मरात्री राजेन्द्र! यत्र शेतेऽम्बु-जासनः। त्रयोलोकास्तदा राजन्! लीयन्ते तत्रिभि-स्ततः। नैमित्तिको लयो नाम दैनन्दिन इतीर्यते। एवं दिनप्रमाणेन ब्रह्मणः शतवार्षिकम्। आयुः पूर्वपरार्द्धं तु परार्द्धं ह्युत्तरं स्मृतम्। द्विपरार्द्धं व्यतीतं तु ब्रह्मणो जगदात्मनः। तदा प्रकृतयः सप्त प्रलयं यान्ति भूमिप! त्रयः प्राकृतिको ह्येष लीने ब्रह्मणि भूपते!। अव्यक्तोपोऽपि सकलः प्रलयं याति सर्वशः। पूर्वम्-न्तु वक्ष्यामि प्रलयस्यास्य भूपते!। शतवर्षाणि भूमौ हि पर्जन्यो नैव वर्षति। दुर्भिक्षे निर्घृणे लोके प्रजाः सर्वाः क्षुधार्दिताः। परस्परं भक्षयन्त्याशाः क्षयं यास्यन्ति भूमिप!। सप्तार्चे च धरण्यास्तु दह्यमाने च सर्वतः। देहे च यो रसस्तं हि रविर्हरति रश्मिभिः। ततः संवर्त्तको नाम व्योमाग्नी ह्युत्थितोऽनलः। सङ्घर्ष-णात्तयोत्पन्नो दह्यदनिलसारथिः। सर्वं ब्रह्माण्ड-माशु वै तत्कालश्चोभगर्जितः। एवं दग्धं महाराज! वज्रकोट्या सनन्ततः। दग्ध्वा लोकत्रयमिदं ब्र-ह्माण्डं सार्वजनिकम्। प्रचण्डः पवनो राजंस्ततोवर्ष-शतं पुनः। संवर्त्तको नाम महान् ब्रह्माण्डं घात-यिष्यति। ततो मेघा महाघोरा नानावर्णा भयङ्क-राः। शतं वर्षाणि वर्षन्ति गर्जन्ति च महास्वनाः। एकोदकं ततो विश्वं निर्गुणं निर्विकारकम्। भूमेर्गन्ध-गुणं राजन्! ग्रसन्त्याप: समन्ततः। गुणत्वाद्यात् क्षयं दृष्ट्वा प्रलयं प्राप्नुते तदा। तेजस्त्वपां रसगुणं ग्रसत्ये-षते बलात्। ततः प्रलयमायान्ति राजन्नापोऽपि तद्गुणात्। तेजस्तु ततो रूपं रसमात्रसमन्वितम्। वायुर्हरति चक्षुष्मा, तेजः प्रलयमृच्छति। आकाशस्तु ततो वायोः स्पर्शं परगुणैः सह। समादत्ते महा-राज! अम्बरेऽथ प्रलीयते। आकाशस्य गुणं शब्दं गुणैरन्यैः समन्वितम्। अहङ्कारः समादत्ते नभस्यस्मिन् प्रलीयते। तैजसेन्द्रियदेवाश्च देवा वैकारिका यथा। अहङ्कारे प्रलीयन्ते जगदेतच्चराचरम्। अह-ङ्कारं भक्षयन्ति ततः सत्त्वादयो गुणाः। यस्ते तान् महाराज! आद्या प्रकृतिरुच्यते। न तस्याः काल-दोषेण परिणामो नरर्षभ!। आद्यन्तरहिता सा हि नित्यं कारणमव्ययम्। शक्तिर्भगवतः सा हि तदेक-परमा च सा। इत्युक्ताः प्रलयो राजन्! विस्तराच्छृणु महामते!। यथोत्पत्तिक्रमेणाशु व्युत्क्रमेण लयस्तथा" स च प्रलयो न्यायादिमते त्रिविधः नित्यप्रलयो महा-

प्रलयश्च तत्र जन्यद्रव्यानधिकरणकालत्वं खण्डप्रलयत्वं जन्यभावानधिकरणकालत्वं महाप्रलयत्वं महाप्रलयश्च न प्रमाणसिद्ध इति नव्यनैयायिकाः। तत्र नैमित्तिकप्रलयकालश्च कल्पतुल्यः "यदा स देवो जागर्त्ति तदेदं चेष्टते जगत्। यदा स्वपिति शान्तात्मा तदा सर्वं प्रलीयते" इति स्मृतेः हिरण्यगर्भस्य निद्रासमये तत्प्रलयस्योक्तेः "सर्वरी तस्य तारतौ" इति तत्कालस्य च कल्पतुल्यकालत्वस्योक्तम्। एतदभिप्रायेण अमरे "प्रलयो नष्टचेष्टता" इत्युक्तम् नैमित्तिकप्रलयकाले सर्वभूतानां चेष्टाशून्यत्वात्। "प्रलयः सुखदुःखाभ्यां चेष्टाज्ञानतिरोधतिः" सां० द० उक्ते २सात्त्विकभावभेदे।

प्रलवः पु० प्र+लू–भावे अप्। १प्रकर्षेण छेदने वाचा० अनोदात्तताऽस्य। प्रलूयते। कर्मणि अप्। २खण्डभेदे २लेशे च कात्या० श्रौ० २६।१।१० (सङ्गप्रलवान्) सङ्गलेशान्।

प्रलवित्र न० प्रलूयतेऽनेन प्र+लू+करणे इत्र। छेदनसाधने अस्त्रादौ वाचा० अनोदात्तताऽस्य।

प्रलाप पु०प्र+लप–भावे घञ्। १अनर्थकवाक्ये २निष्प्रयोजने जल्पादिवाक्ये च अमरः। ३रोगाणामुपसर्गभेदे "मूर्च्छा मांसक्षयोमोहः प्रलापो मरणमिति त्रये" सुश्रुते त्रयोपसर्गोक्तौ। [राजनि०।

प्रलापिन् प्रलापं करोति कृञ–णिनि। कुलत्थजातेऽङ्गने

प्रलापिन् त्रि० प्र+लप–ताच्छील्ये णिनुण्। प्रलपनशीले

प्रलीन त्रि० प्र+ली–कर्त्तरि क्त। १प्रलयं प्राप्ते २चेष्टाशून्ये च। तस्य भावः तल्। प्रलीनता चेष्टानाशे इन्द्रियनाशे च।

प्रलेप पु० प्र+लिप–भावे घञ्। व्रणादिशोधनार्थं द्रव्यविशेषेण लेपनविशेषे। सुश्रुते आलेपोपक्रमे "स त्रिविधः प्रलेपः प्रदेह आलेपश्चेति। तेषामन्तरं, प्रलेपः शीतस्तनुरविशोषी विशोषी च। प्रदेहस्त्वणः शीतो वा बहुलोऽवहरविशोषी च। रक्तपित्तप्रसादनश्चदालेपः" इति आलेपनभेदलक्षणान्युक्तानि तत्र द्रव्यभेदात्तत्रोक्ता दशप्रा०

प्रलेपक त्रि० प्र+लिप–ण्वुल्। १प्रलेपकर्त्तरि स्त्रियां टाप् कापि अत इत्वम् प्रलेपिका तस्या धर्म्यम् मक्षिकाद्यण्। २प्रलेपिकाधर्म्ये त्रि०। सुश्रुतोक्ते २ज्वरभेदे पु० "तथा प्रलेपको नेत्रः शोषिणां प्राणनाशनः। दृष्टिक्षितस्तमो मन्द सुकटो धातुशोषजत" प्रलेपकं वातवलासकफकृकाधिक्यत्वेन श्रदति तज्ज्ञाः" सुश्रुते तच्चणाद्युक्तम्।

प्रलेह पु० प्रलिह्यतेऽसौ प्र+लिह–कर्मणि घञ्। व्यञ्जनभेदे (कोरमा) पाकराजेश्वरः।

प्रलोलुप त्रि० प्रा०स०। १अत्यन्तलोलुपे गरुडवंश्ये कृत्तिपुत्रे २पक्षिभेदे पु० मार्क०पु० ७अ०।

प्रवक त्रि०प्र+गतौ साधुकारित्वे द्योत्ये वुन्। भूयोगतियुते तत्र साधुकारिणि तत्त्वबोधिनी।

प्रवक्तृ त्रि०प्रवक्ति प्र+वच–ट्टच्। प्रकर्षेण वक्तरि १यथानुसन्धानपूर्वकवेदादिवाक्ये २तदर्थोपदेशके च मनुः ६।१८ याज्ञ० २।३५२

प्रवग पुंस्त्री० प्रवग+अच् रः। खगे अमरटीका। एवं प्रवङ्ग प्रवङ्गमावपि रस्य लत्वे तत्रार्थे। सर्वत्र जातित्वात् स्त्रियां ङीष्।

प्रवचन न०प्रोच्यते प्र+वच–कर्मणि ल्युट्। १वेदादौ शास्त्रे भावे ल्युट्। २यथानुसन्धानपूर्वकथने च "नायमात्मा प्रवचनेन लभ्यः" कठोप०। अस्य तिङः परस्य गोत्रादुत्त्वायाम् उदात्तता।

प्रवचनीय त्रि० प्र+वच–कर्मणि अनीयर्। प्रकर्षेण यथानुसन्धानेन १वाच्ये। "भव्य गेयेत्यादि" पा० कर्त्तरि अनीयर्। प्रवक्तरि कर्मप्रवचनीयाः तच्छब्दे दृश्यम्।

प्र(प्रा)वट पु०प्र+वा०अट–स्वार्थे अण् वा। वर्षे जटाधरः।

प्र(व)वण पु०प्र+व(ब)ण–अच्। १चक्षुष्यरोगे अमरः २निम्नस्थाने ३उदरे ४नखे मेदिनिः। ५आयते ६प्रगुणे ७लघौ यद्दर०। दद्यते ६क्लिन्ने त्रि० विश्वः १०क्षीणे च त्रि० धरणिः। ११आसक्ते त्रि० हेमच०।

प्रवत् त्रि० प्रवणे वाति वा–वा० क्विप्। १प्रवणदेशे निम्नस्थाने गन्धारि ऋ०७।६०।३ अतोऽस्यर्थे मतुप् मस्य वः तान्तत्वात् न पदत्वम्। प्रवच्चत् तद्युक्ते त्रि०। ऋ० १।१८३।३भाष्यम्। स्त्रियां ङीप्। सोपसर्गे धात्वर्थे वर्त्तमानात् प्रोपसर्गात् वति। २प्रकृष्टगमनादौ च।

प्रवत्स्यत्पतिका स्त्री प्रवत्स्यन्पतिर्यस्याः। यस्याः पतिः परदेशं गमिष्यति तादृश्यां स्त्रियां रसमञ्जरौ। तस्या लक्षणभेदादिकमुक्तं यथा "यस्याः पतिरभिमतमेव देशान्तरं यास्यतीव सा प्रवत्स्यत्पतिका। अस्यार्थे हा कान्तवचनश्रवणप्रेक्षणगमनविघ्नोपदर्शननिर्वेदसन्तापसम्मोहनिश्वासवाष्पादयः। सा च सम्भ्रमाग्रौढापरकीया धारणीभेदात् षड्विधा तदुदाहरणानि तत्र दृश्यानि।

प्रवद्यामन् त्रि० वा–भावे वा० मनिन् प्रवत् प्रकृष्टगतियुक्तः यामा गतिर्यस्य। प्रकृष्टगमनेन शीघ्रयायिनि ऋ० १।१

१८।२ भावे ल्युट्। तत्र टाप्स्याने "सुपांसुलोपः" इत्यादिना षा० आत्। आतो लोपधालोप इति बोध्यम्।

प्रवयन न० प्र+वय–भावे ल्युट्। १प्रकर्षेण २गमने करणे ल्युट्। २प्रतोदे हेमच०। [२पुराणे निघण्टुः

प्रवयस् त्रि० प्रकृष्टं वयोऽस्य। १वृद्धे स्त्रियां ङीप् हेमच०।

प्रवय्या स्त्री प्र+वि–यत् "अयप्रवये छन्दसि" पा०णि०। प्रकर्षेण गतियुतायां स्त्रियां स्त्रियामेवार्थे निपातः पुंसि कर्मणि तु यत् प्रवेय इति त्रि०कौ०।

प्रवर पु० प्र+वृ–अप्। १यज्ञतौ २गोत्रे गोत्रप्रवर्तकऋषिनिश्चायके ३ऋषिभेदे च। ४श्रेष्ठे त्रि० ५अगुरुचन्दने न०। मेदि०। गोत्रभेदे गोत्रप्रवर्तकऋषिनिश्चायके आर्षशब्दे ८।३७० दृश्याः। तदधिकं प्रवराध्यायादौ दृश्यम्।

प्रवरललित न० "यमौनः सो रोगः प्रवरललितं नाम बोध्यम्" इ०र० टीकोक्ते षोडशाक्षरपादके छन्दोभेदे।

प्रवरवाहन पु० द्वि०व०। प्रवरं वाहनं ययोः। अश्विनीकुमारयोः हेमच०।

प्रवर्ग पु० प्रकृष्टश्चासौ प्र+वृज–घञ्। १विष्णौ हरिवं० ४२ अ०। २प्रवर्ग्ये महावीरे हेमच०। तत्र प्रवर्ग्यं दृश्येव पाठो न्यायः।

प्रवर्ग्य पु० प्र+वृज–कर्मणि यत् कृत्यम्। १महावीरे तत्प्रकारः कात्या० श्रौ० २६अ० प्रवर्ग्याध्याये दृश्यम्। अस्यार्थे मतुप्। प्रवर्ग्यवत्। २तद्युते २यज्ञभेदे पु० शत०ब्रा० २।४।४।१

प्रवर्त्तक त्रि० प्रवर्तयति प्र+वृत–णिच्–ण्वुल्। प्रवृत्तिजनके "बलवदनिष्टानुबन्धीष्टसाधनत्वे सति कृतिसाध्यताविषयकं ज्ञानम् इष्टसाधनताविषयकं कृतिसाध्यताज्ञानं वा प्रवर्तकमिति नव्यनैयायिकाः। यद्वा वा अविशेषेच्छाप्रतिसन्धानजन्यं कार्य्यताज्ञानं प्रवर्तकमिति गुरवः। "चोदनेति क्रियायाः प्रवर्तकं वचनम्" चोदनाशब्दे शबरभाष्यम् "क्रियायां नियोगस्य ज्ञानद्वारा प्रवर्तकं वाक्यं चोदनेत्यर्थः।

प्रवर्त्तना स्त्री प्र+वृत–णिच्–युच्। प्रवृत्तिजनकव्यापारे विध्यादौ "अस्ति प्रवर्तनारूपमनुरूपं चतुर्ष्वपि" इति भर्तृहरिः। भावे ल्युट् तत्रार्थे आरम्भे च न०।

प्रवलाकिन् पु० १मुञ्जे २चिल्लमेखलके च विश्वः।

प्रवल्गु पु० इक्ष्वाकुपुत्रे हरिवं० भा०आ० ८३अ०।

प्रवह पु०प्र+वह–अच्। "यस्मात् ज्योतींषि वहति प्रवहस्तेन कीर्तितः" उक्ते १वायुभेदे। भावे अप्। २नगरादुद्वहिर्गमने

प्रवहण न० प्र+वह–करणे ल्युट्। १मनुष्यवाह्ये २यन्त्रादिते स्त्रीवाहने कर्णैरवे (मल्लाक) अमरः।

प्रवह्लि स्त्री प्रवह्लि–पृषो०अलच्आदि०वर्णव्यत्ययेन। पृष्ठेकायां भरतः वा ङीप् तत्रार्थे स्वार्थे क। तत्रार्थे अम०

प्रवा पु० प्रकर्षेण वाति गच्छति वा–क्विप्। अश्वे यजु०१५।६ वेददी०।

प्रवाच त्रि० प्रकृष्टा वाक् यस्य। युक्तियुक्तवाक्यवक्तरि जटा०।

प्रवाणी स्त्री प्र+वे–ल्युट् ङीप्। १तन्तुवायशलाकायाम् (माकु) निष्क्रान्ता प्रवाण्याः निरा०स० गौणत्वे प्रवाणिशब्दस्य ह्रस्वे सम्भवति भरतेन यत् वाणिशब्दस्यापि ह्रस्वान्तत्वं कल्पितं तच्चिन्त्यम्।

प्रवात त्रि० प्रकृष्टो वातो यत्र। १सुखसेव्यवातयुक्तदेशादौ प्र+वा–क्त। २निम्ने प्रवणे च प्रवातेजसशब्दे दृश्यम्।

प्रवाट त्रि० प्रकर्षेण वाति प्र+वा–अट। १प्रकृष्टगतियुते २प्राणे पु० "प्राणो वै प्रवाट्" शत०ब्रा० १।४२।२

प्रवातेजस् त्रि०प्रवातं प्रवणं तेज ओजो यस्य। प्रवाततेजसि निरु० ९।८ [लोकवादे २परस्परकथोपकथने च।

प्रवाद पु०प्र+वद–घञ्। १परम्परागतवाक्ये लोकेषु २प्रसिद्धे

प्रवादिन् त्रि० प्र+वद–ताच्छील्ये णिनि। परस्परकथनकारके स्त्रियां ङीप्।

प्रवार पु० प्र+वृ–आच्छादने करणे घञ्। आच्छादने वस्त्रे विभाषेत्यनुवर्तमानात् अपि प्रवर तत्रार्थे त्रि०कौ०।

प्रवारण न०प्र+वृ–णिच्–ल्युट्। १काम्ये दाने २काम्यस्य उत्तमवस्तुनो दाने च अमरः। ३प्रकर्षेण वारणे मेदि०। ४महादाने त्रिका०तस्य उत्तमवस्तुनो दानरूपत्वात्तथात्वम्

प्रवास पु० प्रस्थितस्य वासः। सप्ताहात् प्रस्थितस्य भिन्नदेशे वासे चिरप्रवासगतस्य पुनर्गमनस्य वार्त्तादाश्रवणे कालविशेषे तस्य प्रेतत्वावधारणसञ्ज्ञं त्रि०त० "सन्देहे त्वाह यमः "गतस्य न भवेत् वार्त्ता यावत् द्वादशवार्षिकी। प्रेतावधारणस्यैष कर्त्तव्यं सुतबान्धवैः। यस्मिन् यद्दिवसे प्राप्ते यस्य वार्त्ता न लभ्यते। तस्मिन् तस्य दिनाद्याने कृच्छ्रस्य चाचरेत्। दिनाद्याने कृच्छ्रस्य आदिशब्दाच्च वा कृच्छ्रः"। त्रि०शि० तद्वचनम् "प्रोषितस्य तथा कालो गतस्य द्वादशाब्दिकः। प्राप्ते त्रयोदशे वर्षे प्रेतकार्य्याणि कारयेत्"। हरीतः "यस्य न न श्रूयते वार्त्ता यावद्द्वादश वत्सरान्। कृत्वोर्द्धदैहिकं तस्य स्यादवधारणा"। भविष्ये "पितरि प्रोषिते यस्य न वार्त्ता नैव चागमः। जन्तुं षड्दशाब्दान्तं कृत्वा तत्प्रतिरूपकम्। कर्य्यात्तस्य तु संस्कारं यथोक्तविधिना

ततः । तदादीन्येव सर्वाणि प्रेतकर्माणि कारयेत् । द्वादशाब्दप्रतीक्षा पित्रभिन्नविषयेति मदनरत्ने उक्तम् । मदपारिजातकारिकायान्तु "तस्य पूर्वत्रयस्यस्य विंशत्यब्दोर्ध्वतः क्रिया । जर्द्धं पञ्चदशाब्दात्तु मध्यमे वयसि मृता । द्वादशादब्दपरादूर्ध्वं तरुणे वयसि मृता । चान्द्रायणत्रयं कृत्वा त्रिंशत् कृच्छ्राणि वा ततः । कृत्वैः प्रतिकृतिं दग्ध्वा कार्याः शौचादिकाः क्रियाः" इत्युक्तम् पराशरः "देशान्तरगतो नष्टश्चिरेण श्रूयते यदि । तस्याष्टमी कृष्णमावास्या तस्या चैकादशी च वा । तदकं पिण्डदानं च तस्य श्राद्धं तु कारयेत्" । इदं मासतत्त्वे प्रवासादागतेन गुर्वादेः पादयोर्यत्कृष्णपूर्वकम् पुण्याहो विधितः यथा "विप्रोष्य पादयुगलकृष्णाभिवादनम् । गुरुदारेषु कुर्वीत सतां धर्ममनुस्मरन् । मातृष्वसा मातुलानी श्वश्रूश्चाथ पितुः स्वसा । प्रपूज्या गुरुपत्नीव समाश्चा गुरुभार्य्यैव । भ्रातृभार्य्योपसंग्राह्या सवर्णाऽन्यापि । विप्रोष्य तूपसंग्राह्या भ्रातिसम्बन्धि योषितः । पितृमातृस्वसृणां तु ज्यायस्त्वात् क्षमयैव । मातृवद्वृत्तिमातिष्ठेन्नाता ताभ्यो गरीयसी" कौर्मेपु०१२अ०

प्रवासन न० प्र+वस-णिच्-भावे ल्युट् । १विदेशवासने "सीताप्रवासनपटोः करुणा कुतस्ते" उत्तरचरितम् । २वधे अमरः । ३निर्वासने पुराद् बहिर्यापने ।

प्रवासिन् त्रि० प्र+वस-णिनि । १विदेशे वासिनि हेमच० । "प्रवासी सुखमायाति" भट्टपद्धतिः । स्त्रियां ङीप् ।

प्रवास्य त्रि० प्र+वस-णिच्-कर्मणि यत् । पुरान्निर्वास्ये मनुः ८।२८४

प्रवाह पु० प्र+वह-घञ् । १प्रकृष्टो २जलादिस्रोतसि भेदि० ३व्यवहारे त्रिः ४उत्तमार्थे नानार्थरत्नमा० । ५सन्ततौ कालेन देशेन वा विच्छेदाभावे "प्रवाहरूपेणानादि" प्रवाहक त्रि० प्र+वह-ण्वुल् । १प्रकर्षेण वोढरि २राजसे पुंस्त्री० शब्दमाला ।

प्रवाहण पु० १जैवले ऋषिभेदे शत०ब्रा० १४।६।१। तस्यापत्यं युवा० दक् पूर्वपदस्य वा दृद्धिः । प्राचाङ्क्ष्येय प्रवाङ्क्ष्येय तदपत्ये पुंस्त्री० ततोऽपत्ये दक् प्राचाङ्क्ष्येयि प्रवाङ्क्ष्येयि प्रवाङ्क्ष्यायेयश्चापत्ये पुंस्त्री० । प्रवाङ्क्षयति प्र+वह-णिच्-क्षु । २प्रवाङ्क्षयितरि "विभुरसि प्रवाङ्क्षयः" यजु० ५।२१

प्रवाहिका स्त्री प्र+वह-रोगाख्यायाम् ण्वुल् । अक्षीरोगे अमरः अक्षीशब्दे २७५२४० दृश्यम् । ततः अपनयने तसि । प्रवाहिकातः कृ प्रवाहिकायाः प्रतीकारं कुर्विन्नर्थः सि०कौ० ।

प्रवाहिन् त्रि० प्र+वह-णिनि । १प्रवाहयुते त्रि० । प्रवाह+ष्फारा०देये इनि ङीप् । २प्रवाहिणी प्रवाहयुतदेये स्त्री

प्रवाही स्त्री प्र+वह-णिच्-अच् गौरा० ङीष् । वालुकायां राजनि० ।

प्रवाह्य पु० प्रवाहे भवः यत् । १स्रष्टृभेदे यजु० १६।४१ प्र+वह-कर्मणि ण्यत् । २प्रकर्षेण वाह्ये च । [अमरः

प्रविख्याति स्त्री प्र+वि+ख्या-भावे क्तिन् । अतिप्रसिद्धौ

प्रविदारण न०प्रविदारयत्यत्र प्र+वि+दृ-णिच्-आधारे ल्युट् । १युद्धे अमरः । भावे ल्युट् । २चयदारणे मेदि० । कर्मणि ल्युट् । ३आकीर्णे त्रि० शब्दर० । कर्त्तरि ल्यु ४प्रविदारणकारके त्रि० ।

प्रविवर न० प्रकृष्टं विवरं छिद्रमस्य । १प्रीतकाण्डे शब्दच० । २प्रकृष्टच्छिद्रयुते त्रि० । [छिद्रयुते च अमरः ।

प्रविश्लेष त्रि० प्रकर्षेण विश्लेषो यस्य । १विधुरे २परमवि-

प्रविषा स्त्री प्रकृतं विषं यथा । अतिविषायाम् (आतरच्) अमरः ।

प्रविष्ट त्रि०प्र+विश-कर्त्तरि क्त । १कृतप्रवेशे २मैथुनादिकैर्-शिक्योर्मातरि स्त्री हरिवं० १६१अ० ।

प्रवीण त्रि० वीणया प्रवादयति प्र+वीणा+णिच्-अच् । १निपुणे वीणया गायकस्य नैपुण्यप्रसिद्धेः तत्तुल्यनैपुण्यवत्त्वात्तथात्वम् । भौत्यस्य मनोः २पुत्रभेदे पु०हरिवं०७अ० ।

प्रवीर पु० प्रा०ब० । १प्रकृष्टवीरे २सुभटे ३उत्तमे त्रि०धरणिः ४कर्दमवन्दपुत्रभेदे पु०विष्णुपु० ५पूरोः पौष्ट्यां भार्य्यायां जाते पुत्रभेदे पु० भा०आ०८३अ० । ऐलस्य उपदानव्यां जाते ६पुत्रभेदे पु० हरिवं०३२अ० । ७पुरुवंश्ये प्रचिन्वतः पुत्रे नृपभेदे पु० हरिवं० २१अ० ।

प्रवीरबाहु पु० राजभेदे रामा० ६।२५ स० ।

प्रवृञ्जनीय पु० प्र+वृञ्ज-कर्मणि अनीयर् । १प्रवर्ग्ये २महावीरे कात्या० २६।७।१४ [वेददीपः ।

प्रवृत् न० प्रवर्त्तयति भूतानि प्र+वृ-क्विप् । अन्ने यजु०१५।९

प्रवृतहोम पु० होमभेदे कात्या०श्रौ० ९।८।१६८

प्रवृत्त त्रि० प्र+वृत-कर्त्तरि क्त । १जातप्रवृत्तिके प्रवृत्तियुते २व्यारब्धे च "प्रवृत्तमन्यथा कुर्यात् यदि मोहात् कथञ्चन" छन्दोगप० । ३प्रवृत्तिलक्षणे धर्मभेदे । भावे क्त । ४प्रवृत्तौ न० ।

प्रवृत्तक न० "यदा समाप्तोऽयुग्मकौ पूर्वबोधवति तदप्रवृत्त-

कर्म० ष० त० वैतालीयप्रवरच्छंदे मात्राष्टत्रिंशद्भेदे।

प्रवृत्तचक्र पु० प्रवृत्तं स्वात्मानुसारेण चक्रं राष्ट्रादि यस्य। राष्ट्रादिस्वप्रतिकूलत्वे, "प्रवृत्तचक्रतां चैव वाधिर्ज्यं प्रभुतां तथा" याज्ञ० व्या० मिताक्षरा।

प्रवृत्ति स्त्री प्र+वृत-क्तिन्। १प्रवाहे २वार्त्तायाम् ३स्वजन्यादिदेशे मेदि० ४इच्छाभेदे हेमच०। ५व्यापोद्यते क्रियाश्राध्यत्वाज्ञानाधीने ६प्रयत्नभेदे च प्रयत्नशब्दे उदाहृतम्। "क्रियीर्षाकृतिसाध्येष्टसाधनत्वमतिस्तथा। स्वयादानस्य चाध्यक्षं प्रवृत्तौ जनकं मतम्" भाषा०।

"दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः" गौत०सू० "यतस्तान्मिथ्याज्ञानादनुकूलेषु रागः प्रतिकूलेषु द्वेषः रागद्वेषाधिकाराच्चास्त्रवेष्वासक्तालोभादयो दोषा भवन्ति। दोषैः प्रयुक्तः शरीरेण प्रवर्तमानो हिंसास्तेयप्रतिषिद्धमैथुनान्याचरति वाचाऽनृतपरुषसूचनासम्बद्धानि, मनसा परद्रोहं परद्रव्याभिध्यां नास्तिक्यञ्चेति सेयं पापात्मिकाऽधर्माय च यथा शरीरेण दानं परित्राणं परिचरणञ्च। वाचा सत्यं हितं प्रियं स्वाध्यायञ्चेति मनसा दयामस्पृहां श्रद्धाञ्चेति सेयं धर्माय। अत्र प्रवृत्तिसाधनौ धर्माधर्मौ प्रवृत्तिशब्देनोक्तौ। यथा चक्षुरादयः प्राणाः। अत्रं वै प्राणिनः प्राणा इति। सेयं कृत्सितत्वाभिपूजितत्व च लक्षणः कारणम्" भाष्यम्। "पूर्वोत्तरयोरशुद्धिशरीरारम्भः" गौ० सू० "प्रवृत्तिदोषजनितोऽर्थः फलम्" गौ०सू० "प्रवृत्तिनिवृत्ती च पुरुषाश्रिते दृष्टे परत्र निवृत्तम्" कणा०। "पुरुषाश्रिते इति स्वात्मनीत्यर्थः इच्छाद्वेषजनिते प्रवृत्तिनिवृत्ती प्रयत्नविशेषौ ताभ्याञ्च क्षितादितप्राप्तिपरिहारफलके शरीरकर्म्मणी चेष्टालक्षणे जन्येते तथा च परशरीरे चेष्टां दृष्ट्वा इयं चेष्टा प्रयत्नजन्या चेष्टात्वात् मदीयचेष्टावत् स च प्रयत्न आत्मजन्य आत्मनिष्ठो वा प्रयत्नत्वात् मदीयप्रयत्नवदिति परात्मनोऽनुमानम्" उप०इ०। "इच्छाद्वेषपूर्विका धर्माधर्मप्रवृत्तिः" गौ०सू० "विहितकर्मणि रागनिबन्धना निषिद्धे कर्मणि हिंसादौ द्वेषनिबन्धना प्रवृत्तिः। तत्र रागनिबन्धना वाङ्मनादौ प्रवृत्तिर्धर्मं प्रसूते द्वेषनिबन्धना हिंसादौ प्रवृत्तिरधर्मम्। तावेतौ रागद्वेषौ संसारमनुवर्त्तयतः" वात्स्या०। प्रवृत्तिस्तु द्विधा। कारणरूपा कार्य्यरूपा च। तत्राद्या यत्नत्वजातिमती प्रत्यक्षसिद्धा। द्वितीया तु धर्माधर्मरूपा यागादेरनुष्ठानादेव विरुद्धस्य व्यापारतया कर्मनाशाजनकस्यादृष्टस्य प्रायश्चित्तादेश्च नाशकतया सिध्यतीति। (गौ०इ० ४।१) भट्टमते प्रवृत्तिर्द्विधा। स्वेच्छाधीना परप्रेरणाजन्या। तत्राद्यायां प्रवर्त्तनाया अनुपयोगोऽपि द्वितीयप्रवृत्तौ सा प्रयोजिका। यथा आचार्य्यप्रेरणयेदं करोमीति" दि०क०।

७शब्दानामर्थबोधनशक्तिभेदे "प्रवृत्तिराकाङ्क्षादीनां चरितार्था चतुष्टयी" कुमा०। ८लक्षणविषये इन्द्रियादीनां व्यापारे च। [भिन्ने २चरभेदे पु० स्त्रिया०।

प्रवृत्तिज्ञ त्रि० प्रवृत्तिं इत्तान्तं जानाति ज्ञा-क। इत्तज्ञा०

प्रवृत्तिनिमित्त न० इत०। १शब्दानां बोधनायशक्तेर्निमित्ते शक्यतावच्छेदके। यथा घटशब्दस्य प्रवृत्तिनिमित्तं घटत्वमेवं शुक्लादिशब्दस्य शुक्लत्वं पाचकादेः पाकः ईश्वरादेः तत्तत्तत्क्रियादि। "सङ्केतो यदवृत्ते जातौ गुणदूव्यक्रियासु च" काव्यप्र०।

प्रवृद्ध त्रि० प्र+वृध-क्त। १वर्द्धियुक्ते २प्रौढे च हेमच०।

प्रवृद्धादि न० उत्तरपदस्थोदात्तनिमित्ते शब्दभेदे स च भेदः पा०ग० उक्तो यथा "प्रवृद्ध प्रयुत अवस्थित अभवस्थित खड्गारूढ कविशस्तः आलतिगणः"।

प्रवेक त्रि० प्र+विच-कर्मणि घञ्। प्रधाने अमरः।

प्रवेट पु० प्र+वेट-अच्। यवे त्रिका०।

प्रवेणि(णी) स्त्री प्र+वेण-इन् वा ङीप्। १गजस्कन्धस्थे कूपे चित्रकम्बले २वेणायां जलादिप्रवाहे च मेदि०।

प्रवेल पु० प्र+वेल-घञ्। पीतसट्टे (सोनासग) हेमच०।

प्रवेश पु० प्र+विश-घञ्। अन्तर्गमने हेमच०।

प्रवेशक त्रि० प्रविशति प्र+विश-ण्वुल्। १मध्ये मलरि या०द० उक्ते अर्थोपक्षेपके २रूपकाङ्गभेदे "अर्थोपक्षेपकाः पञ्च विष्कम्भकप्रवेशकौ" इत्युपक्रमे "प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः। अङ्गद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा"। अङ्गद्वयान्तरित्युक्तेः प्रथमाङ्के चरमाङ्के चास्य प्रतिषेधः। यथा वेणीसंहारस्य प्रथमाङ्के राक्षसमिथुनप्रयोजितः" एवमन्यत्रापि।

प्रवेशन न० प्रविशत्यनेन प्र+विश-करणे ल्युट्। १प्रधानद्वारे २सिंहद्वारे च। भावे ल्युट्। ३प्रवेशे हेमच०। प्र+विश+णिच्-ल्युट्। ४प्रवेशसम्पादने। प्रवेशनं प्रवेशनमस्य क। प्रवेशनीय प्रवेशनसाधने त्रि०।

प्रवेष्ट पु० प्र+वेष्ट-अच्। १बाहौ अमरः २बाहुभूषणभागे शब्दच० ३हस्तिदन्तमांसे हारा०। ४गजपृष्ठस्थाने त्रिका०स्थाने प्राप्तस्थे क। प्रवेष्टक दक्षिणबाहौ "प्रविश्य

प्रवेष्टकेन निर्मितं स्तवित्वा म०कु०"प्रवेष्टकेन दर्भिय-वाष्टना तत्सन्देन निर्मितं क्षौमाभरूपशुमस्तकं यजनं स्तवित्वा "वामेतरभुजस्तम्भोवरक्षौमचक्रः" माकनोक्तेः तत्कर्मस्थ क्षौमाभशुचकत्वम् ।

प्रव्यक्त त्रि० प्रकर्षेण व्यक्तः । स्फुटे अमरः ।

प्रव्याध पु०प्रकृष्टो व्याधो यत्र । वस्त्राधिक्येन शिप्रगरस्य पतनं यत्र ताडये स्थाने यत०ब्रा० ५।१।५।१३। काल्या०१३।२।१६

प्रव्रजन न० प्राप्य स्वदादि व्रजनम् । स्वदस्यात्मं पुत्रादीन् च परित्यज्य व्रजने सन्यासे ।

प्रव्रजित पु० प्र+व्रज-क्त । १सन्यासिनि त्रिका० २मांसां ३स्वस्त्रीयां ४तापस्यां स्त्री ५दण्डभिक्षुकीभेदे मेदि० । परनिपाते प्रव्रजितादयश्च पाठात् कुमारप्रव्रजिता पुंसि द्व न प्रव्रजितकुमार इत्येव ।

प्रव्रज्या स्त्री प्राप्य पुत्रादीन् व्रज्या व्रज-भावे क्यप् । पुत्रादीन् परित्यज्य गमने सन्यासाश्रमे ।

प्रव्रज्यावसित पु० प्रव्रज्यातोऽवसितः । सन्यासच्युते "प्रव्र-ज्यावसिता यत्र त्रयो वर्णा द्विजोत्तमाः । निर्वासं कार-येद्विप्रं दासत्वं क्षत्रवैश्ययोः" काल्यायनवचनम् । तत् प्रायश्चित्तशब्दे दृश्यम् । श्रा०क्रि० भाष्यधृतस्मृतौ "वानप्रस्थो दीक्षाभेदे कृच्छ्रं द्वादशरात्रं चरित्वा महाकृच्छ्रं वर्त्तयेत् भिक्षुर्वानप्रस्थवत् क्षौमद्विवर्जम्" । प्रतप्तायश्चित्तानामपि तेषामव्यवहार्यता यथोक्तम्

"वह्निसूर्यसमापि स्तेराचाराद्" श्रा० स्तु० । यद्यूर्ध्व-रेतसां खाश्वमेध्यः प्रव्रज्यनं महापातकं यदि वोपपातक-सूर्यस्यापि शिष्टैस्ते वह्निः कर्त्तव्यः "आरूढपतितं विप्रं मद्यस्पृष्टाञ्च विनिःक्षुतम् । उदकुम्भं जलिदत्त्व स्नात्वा चान्द्रायणं चरेत्" इति चैवमादिनिन्द्यातिशयस्मृतिभ्यः शिष्टाचाराच्च । न हि यज्ञाध्ययनविवाहादीनि तैः सदाचरन्ति शिष्टाः भाष्यम् ।

प्रव्राज पु० प्र+व्रज-आधारे घञ् । १व्रजनकर्त्तरि देवे भा० ७।६०७ भा० । भावे घञ् । २सन्यासे च ।

प्रशंसन न० प्र+शंस-भावे ल्युट् । गुणकीर्त्तनेन स्तुतौ । युच् । प्रशंसनाऽप्यत्र स्त्री ।

प्रशंसा स्त्री प्र+शंस-भावे अ । गुणविष्कारेण स्तुतौ हेम० प्रशंसोपमा स्त्री काव्यादर्शोक्ते अर्थालङ्कारभेदे यथा

"चन्द्रोऽयं चन्द्रवः पद्मचन्द्रः कस्य मुखं शिरोधृतः । तौ तुल्यौ तव मुखेनेति सा प्रशंसोपमोच्यते" । तौ पद्मचन्द्रौ तव मुखेन तुल्यौ इति पद्मचन्द्रयोः प्रशंसितयोरपि तव मु-खस्याद्येन प्रशंसातिशयात् तस्य च तदधिकोत्कर्ष-व्यञ्जनात् प्रशंसोपमा उच्यते ।

प्रशस्तृन् पु०प्र+शंस-क्तनिप् तुट् च । १यज्ञे ऋत्विग्भे० स्त्रियां ङीप् वनोर च । प्रशस्तरी २नद्यां उज्ज्वल० ।

प्रशम पु० प्र+शम-घञ् न वृद्धिः । १शान्तौ २निवृत्तौ च । प्रशाम्यति प्र+शम-अच् गौरा०ङीष् । ३वपुसरोभेदे स्त्री भा०वन० १९अ० ४रन्तिदेवस्य पुत्रे पु० भाग० ९।२४।२९

प्रशमन न०प्र+शम-णिच्-ल्युट् । १वधे २शान्तताकरणे च "कथ्यप्रशमनस्थानम्" रघु० "सर्वाबाधाप्रशमनम्" चण्डी शम-भावे ल्युट् । ३शान्तौ हेमच० । [शब्दच० ।

प्रशस्त त्रि० प्र+शंस-क्त । १प्रशंसनीये २श्रेष्ठे ३क्षेमे च

प्रशस्तादि पु० द्व०स० १अ० उक्ते मध्यदेशस्थे गिरिभेदे ।

प्रशस्ति स्त्री प्र+शंस-भावे क्तिन् । १प्रशंसायाम् २स्तुतौ ऋ०१।७३।२

प्रशस्य स्त्री प्र+शंस-कर्मणि क्यप् । १प्रशंसनीये । तस्य दृष्टेयसुनोः परता अतिशयेन प्रशस्यः श्रेष्ठः श्रेयान् भावे क्यप् । २प्रशंसने न० ।

प्रशाखा स्त्री प्रगता शाखाम् अत्या०स० । अवशाखायाम् भा०कर्ण० १०६८ श्लोक० ।

प्रशान् अव्य० प्र+शो वा० अनि खरादि० । सामर्थ्ये

प्रशासन न० प्र+शास-भावे ल्युट् । शिष्यादीनामिष्टादि-बोधनाय कर्त्तव्यताबोधकवाक्योच्चारणे "ज्ञातस्तेन प्रशा-सनमभूत्" भा०स० ।

प्रशास्तृ पु० प्र+शास-तृच् स्तुन् संज्ञायां अनिट् च । यज्ञरूपशंसनकर्त्तरि ऋत्विग्भेदे असंज्ञायान्तु तृच्-इट् । प्रशासिट् । प्रशासनकर्त्तरि राजादौ ।

प्रशास्त्र त्रि० प्रशास्तुसिद्धम् अण् संज्ञापूर्वविधेरनित्यत्वात् न वृद्धिः । यज्ञरूपशंसनकर्त्तृसम्बन्धिनि ।

प्रशिष्य पु० प्रगतः शिष्यम्मन्योऽध्यापकत्वेन अत्या०स० । शिष्यस्य शिष्ये "शिष्यप्रशिष्यैरुपगीयमानचरित्र तन्मथनमि-त्यधाम" भट्टारदिग्विजयः ।

प्रश्न पु० प्रच्छ-भावे नङ् । जिज्ञासायाम् ज्ञातुमिच्छया १क-थनाय प्रेरणे अमरः । अविज्ञातार्थज्ञानार्थम् इच्छाप्रयो-ज्यवाक्ये "अविज्ञातप्रवचनं प्रश्न इत्यभिधीयते" । जि-ज्ञासाशब्देन तत्प्रयोज्यकथानुकूलव्यापारोलक्ष्यते को भवान् ? किमेतस्य लक्षणम् ? इत्यादि । २ज्योतिषशास्त्रे पु० दैवज्ञं प्रति भाविशुभाशुभज्ञानाय दैवज्ञस्य वचनानु-कूले व्यापारे तद्बोधकशास्त्रे च यथा मुहूर्त्तचिन्तामणौ ।

प्रश्नदूती स्त्री प्रश्नस्य दूतीव। प्रश्नेलिकायाम् त्रिका०।

प्रश्नविवाक पु० ज्ञातान् प्रश्नान् विवक्ति उत्तरयति वि+वच--कर्त्तरि संज्ञायां घञ्। प्रश्नोत्तरदायके ज्योतिर्विद्भेदे "मध्यादावे प्रश्नविवाकम्" यज्ञ० २०।१० वेददी०।

प्रश्नव्याकरण पु० प्रश्नान् शिष्यप्रश्नप्रश्नान् व्याकरोति उत्तरयति वि--या ञ्च--ल्यु ह्रस्व०। १जैनभेदे हेमच०। भावे ल्युट्। २दृष्टार्थोत्तरज्ञापने न०।

प्रश्नि पु०।१ऋषिभेदे भा०शा०२६अ०। प्रश्न--वा-नि वा ङीप्। २कृष्णिपाकायां (घाना) त्रिका०।

प्रश्नोपनिषद् प्रश्नाधिकारेण प्रवृत्ता उपनिषत्। अथर्वोपनिषद्भेदे "भगवन्! कुतो वा इमाः प्रजाः प्रजायन्ते" इत्यादि पञ्चप्रश्नाधिकारेण तत्त्वाः प्रवृत्तेस्तथात्वम्।

प्रश्रय पु० प्र+श्रि-करणे अच्। प्रणये अमरः।

प्रश्रित त्रि० प्र+श्रि-क्त। १विनीते अमरः शान्तिदेवस्य २पुत्रभेदे पु० भाग० ६।२३।२५

प्रश्रय त्रि० प्रकृष्टः स्रवः प्रा०स०। प्रकृष्टे शिथिले त्रिका०।

प्रश्लिष्ट त्रि० प्र+श्लिष--क्त। सुसम्बद्धे युक्तियुक्ते आचिता० नाख्यान्तोदात्तता।

प्रश्वास पु० प्र+श्वस--भावे घञ्। कोष्ठस्य वायोर्बहिर्निःसारणे "श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः" पा०त० वृ० भाष्यम्। कुम्भकशब्दे २११४पृ० दृश्यम्।

प्रष्टृ त्रि० प्रच्छ--तृच्। प्रश्नकारके स्त्रियां ङीप्।

प्रष्टि पु० प्रच्छ--कर्त्तरि वा क्तिच्। वाहनतलयमध्यवर्त्तिनि खगभेदे अ० १।२६।६

प्रष्ठ त्रि० प्र+स्था क "प्रष्ठोऽग्रगामिनि" पा० सूत्रम्। १अग्रगामिनि। २श्रेष्ठे च अमरः। तस्य पत्नी ङीप्। २तत्पत्न्यां स्त्री। गौरा०ङीष्। ३चण्डकौशिकौ स्त्री राजनि०।

प्रष्ठवाह् त्रि०प्रष्ठं वहति वह--क्विप्। १युगपार्श्वगे पृथमयोजिते दम्ये गवादौ अमरः युगपार्श्वं योजिते गवादिके शिल्पार्थं यं प्रष्ठं वाहयति तस्मिन्। भत्वे वाह जट् प्रष्ठौहः प्रष्ठौहा इत्यादि। स्त्रियां ङीप् प्रष्ठौही तत्राविधस्त्रियाम् २प्रथमगर्भिण्यां गवि धरणिः।

प्रस प्रसवे तनौ च सक०दिवा० आ० सेट्। प्रसते अप्रसिष्ट। मित् घटादि स्वित् प्रसवति ते।

प्रसक्त त्रि० प्र+सृज--क्त। १प्रसङ्गविषये "प्रसक्तं हि प्रतिषिध्यते" मीमांस०। २नित्ये नित्यतायुक्ते त्रि०जटा०

प्रसक्ति स्त्री प्र+सृज-भावे क्तिन्। १प्रसङ्गे २व्याप्तौ ३अनुमितौ दीधितिः। ४व्याप्तौ च "अतिप्रसक्तिरन्यधर्मत्वे" सा०सू०। अतिव्याप्तिशब्दे दृश्यम्। [१०] भाष्ये दृश्यम्।

प्रसक्तिन् पु० प्र+सृज--वा० णिनि। प्रसङ्गशीले अ०८।१।

प्रसंख्यान न० प्र+सम्+ख्या--भावे ल्युट्। १सम्यग्ज्ञाने "हरः प्रसंख्यानपरो बभूव" कुमा०। प्रा०व०। २प्रकर्षेण संख्यायते क्रि० भा० व० १२१अ०।

प्रसङ्ग पु० प्र+सृज--भावे घञ्। १प्रकृष्टसङ्गे २व्याप्तिरूपे सम्बन्धे यथाऽग्नितप्रसङ्गः अयसङ्ग इत्यादौ ३अनुमितिभेदे "प्रसङ्ग उपोद्घातो हेतुनावसरस्तया। निर्वाहकैककार्यत्वे योढ़ा सङ्गतिरिष्यते"। तत्र "प्रसङ्गत्वम् श्रुतत्वे सत्यप्रेक्षानर्हत्वं तच्च श्रुतिविषयतापन्नत्वे सति हेत्वविषयतानापन्नत्वम्" अनुमितौ गदाधरः। ४अनुरक्तत्वे ५प्रस्तावे ६मैथुनासक्तौ ७व्याप्तौ च "कृताकृतप्रसङ्गि नित्यं तद्विपरीतमनित्यम्" व्या०परिभाषा। तत्र प्रसङ्गः प्राप्तिरेव "शब्दान्तरम् प्राप्नुवन् विधिरनित्यो भवति शब्दान्तरात् प्राप्नुवतः शब्दान्तरेऽप्राप्नुवतश्च लक्षणान्तरेण प्राप्नुवन् विधिरनित्यः" नागेशः। क्वचित् कृताकृतप्रसङ्गे नित्येऽपि नित्यता" व्या० परिभाषा। प्रसङ्गशब्देन प्राप्तिरेव व्याख्याता। अन्योन्याश्रयेण एकस्यां अन्यस्यापि दृष्टौ तत्र यत्रान्यस्य सिद्धिस्तत्रा तदुदाहरणादिकञ्च पा०त० उक्तं यथा "अन्योन्याश्रयेण एकस्यां अन्यस्यापि सिद्धिः प्रसङ्गः यथा पशुधर्मवतिक्तेन घृताज्ञादिना पशुतन्त्रमध्यपातिनः पुरोडाशस्यापि उपकारः सिध्यति। यथा वा "तप्ते घृते दध्यानयति सा वैश्वदेव्यामिक्षा भवति वाजिभ्यो वाजिनम्" इत्यत्रामिक्षार्थं प्रवृत्तौ अनुद्देश्यवाजिनस्यापि सिद्धिः"। यथा वा काम्ययागनिष्पत्त्यर्थमनुष्ठितैरान्नेयादिभिर्नित्ययागादिसिद्धिरिति मिताक्षरोक्तम्। यथा दण्डनिपातप्रायश्चित्तेनैव गुरुणा तल्पारोपकावगोरपप्रायश्चित्तमपि सम्पद्यत इति प्रायश्चित्तविवेकोक्तम्। तथा ब्राह्मणवधोद्देशेन द्वादशवार्षिके कृते च क्षत्रियवधनिमित्तकत्रैवार्षिकप्रायश्चित्तस्य सिद्धिः। एवञ्च तत्प्रसङ्गयोरनाद्यत्तेनैव कर्मणा नानादण्डकसिद्धौ नाघवमेव हेतुः। नन्वगोरथकक्षियवधप्रायश्चित्तयोः कथं प्रसङ्गेन सिद्धिः सङ्कल्पादेरभावात्, तयोः सङ्कल्पादिः कृत इति चेत् प्रायश्चित्तत्वात् तयोरप्यसौ कथं सङ्कल्प इति चेत् काम्यत्वात्"। "एवञ्च काम्यस्य सर्वाङ्गाधिकरणे सर्वाङ्गोपेतस्यैव फलवत्त्वाभिधानात् तथापि प्रसङ्गविषयत्वे काम्ये हि काम्यानिष्पादकसङ्कल्पतिरस्कारस्वभावरूपः सङ्कल्पः शास्त्रार्थ इति पङ्क्तिपाविद्ध-

रणोक्तेन "प्रत्येकं नियतं कालमात्मनो व्रतमादिशेत्। प्रायश्चित्तोपपन्नो वाग्यतश्चिरुपवसेत्" इति लिखितवचने प्रत्येकं नियतं कालमिति तत्तद्व्रतकाल संख्याम् आत्मनो व्रतम् आत्मसम्बन्धित्वेन आत्मकर्तृत्वेन इति यावत्। तेनात्मकव्रतमकुर्वन्विप्रे इति चादिशेदुक्तं कुर्यात् इत्यनेन प्राप्तस्य सङ्कल्पस्य बाधः" इत्यादिकञ्च तत्र समाहितं यथा "प्रायश्चित्तस्य नित्यत्वेनाकुर्वैकल्येऽपि फलसिद्धिः"। अत्रेदं बोध्यम् प्रसङ्गशब्देन व्याप्तिरेवोच्यते तथा चोद्दिष्टकर्मणा व्याप्तस्य यत्र विहितत्वं तत्रैवास्य प्रवृत्तिः। उद्दिष्टकर्मणः व्याप्यञ्च देशकालकलादीनां प्रयोगानुवन्धिनां वैधहेतुभूतानामेवैक्ये भवति अतस्तन्मात्रवृत्तयापि कालदेशाद्यन्तर्भावेनैव व्याप्तता"।

प्रसङ्गसम पु० स्थापनाहेतुप्रयोगे प्रतिषेधहेतूपन्यासात्तुत्तरभेदे "दृष्टान्तस्य कारणानपदेशात् प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रसङ्गप्रतिदृष्टान्तसमौ" गौ०सू० १।२।६"साधनस्यापि साधनं वक्तव्यमिति प्रसङ्गे प्रत्यवस्थानं प्रसङ्गसमः प्रतिषेधः क्रियाहेतुगुणयोगी क्रियावाङ्नोष्ट इति हेतुर्नोपदिश्यते। न च हेतुमन्तरेण सिद्धिरस्तीति। दृष्टान्तस्य कारणं प्रमाणं तदनपदेशोऽनभिधानम् अभिधानं चानतिप्रयोजनकं तथा च दृष्टान्तस्य साध्यधर्मे प्रमाणाभावात् प्रत्यवस्थानमयुक्तं। यद्यपीदं सदुत्तरमेव तथापि दृष्टान्ते प्रमाणं वाच्यं तत्रापि प्रमाणान्तरमित्यनवस्थया प्रत्यवस्थाने तात्पर्यं तदुक्तप्रमाणाद्यैरनवस्थाभासप्रसङ्गः प्रसङ्गसम इति एतन्मते हेतोर्हेत्वन्तरमित्यनवस्थाऽपि प्रसङ्गसम एव पूर्वमते तु हेत्वनवस्थादिकं वक्ष्यमाणान्तिमपक्षेष्वन्तर्भूतमिति विशेषः। अनवस्थादेशनाभासा चेयं प्रतिदृष्टान्तसमः प्रत्येतव्यः" इत्तिः। अस्योत्तरं तत्रोक्तम्। "प्रदीपादावप्रसङ्गनिवृत्तिवत्तन्निवृत्तिः" गौ०सू० "इदं तावदयं पृष्टो वक्तुमर्हति अथ के प्रदीपस्योपादत्ते किमर्थं वेति दिदृक्षमाणाः दृष्टदर्शनार्थमिति। अथ प्रदीपं दिदृक्षमाणाः प्रदीपान्तरं कस्मान्नोपादत्ते अन्तरेणापि प्रदीपान्तरं दृश्यते प्रदीपः तत्र प्रदीपदर्शनार्थं प्रदीपोपादानं निरर्थकम्। अथ दृष्टान्तः स किमर्थमुच्यत इति। अप्रज्ञातस्य ज्ञापनार्थमिति अथ दृष्टान्ते कारणापदेशः किमर्थं दृश्यते यदि प्रज्ञापनार्थम् प्रज्ञातो दृष्टान्त न खलु लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्त इति तत्प्रज्ञानार्थः कारणापदेशो निरर्थक इति प्रसङ्गसमस्योत्तरम्"। प्रसङ्गसमे प्रत्युत्तरमाह। दृष्टान्तो हि निदर्शनस्थानत्वेनसाध्यनिश्चयार्थमपेक्ष्यते न तु दृष्टान्तदृष्टान्ताद्यनवस्थितपरम्परा लोकसिद्धा युक्तिसिद्धा वा अन्यथा घटादिप्रत्यक्षाय प्रदीप एव प्रदीपप्रत्यक्षार्थमनवस्थितप्रदीपपरम्परा प्रसज्येत तदीयसाधनमपि व्याहन्येत" वात्स्या०।

प्रसज्य पुं० भीमो भीमसेनवत् प्रसज्यप्रतिषेधस्यान्यत्वोपः। प्रसज्यप्रतिषेधे अत्रनाभावे अत्र रोगीति निन्दाश्रयणात् प्रसज्यता" मल०त० रघु०।

प्रसज्यप्रतिषेध पु० प्रसज्य प्रसक्तिं कृत्वाद्यारोप्येति यावत् प्रतिषेधः। अत्रनाभावे "प्रसक्तं हि प्रतिषिध्यते" इति न्यायेन आरोपितप्रसङ्गस्यैव निषेधः तेन वायौ रूपं नास्तीत्यादावपि वायौ रूपारोपं कृत्वैव निषेधो नञा बोध्यते इति विवेकः। कलङ्काधिकरणशब्दे १७७७पृ० नञ्शब्दे ३।४२ पृष्ठादौ मतभेदेन नञः पर्युदासप्रसज्यप्रतिषेधपरता दृश्या। "अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता। प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ्" भाट्टदीकाः। न कलङ्कं भक्षयेदित्यत्र बलवदनिष्टासाधनत्वविशिष्टेष्टसाधनत्वरूपस्य विध्यर्थस्याभावो नञा बोध्यते तेन विधेरप्राधान्यं नञर्थाभावस्य च प्राधान्यं तेन तत्र क्रियापदान्वयिनञ्प्रसज्यप्रतिषेधार्थकः। गुरुमते तु कलङ्कभक्षणाभावविषयकं कार्यमिति बोधेन अभावविशेषप्रकबोधेऽपि प्रतिषेधस्य प्राधान्यात् तथात्वं तथा च तन्मते क्वचित् विधेरप्राधान्येन क्वचिच्च प्रतिषेधस्य प्राधान्येन इति व्यवस्थैव प्रसज्यप्रतिषेधप्रबोधकप्रयोजकमिति बोध्यम्।

प्रसत्ति स्त्री प्र+सद्-क्तिन्। १नैर्मल्ये २प्रसन्नतायाम् जटा०

प्रसत्वन् पु०प्र+सद-क्वनिप्। १धर्मे २प्रजापतौ च मे०उज्ज्वा०। ३प्रतिपत्तौ स्त्री ङीप् क्वनोर च। [न्यौ च।

प्रसन्धि पु० १मनुपुत्रभेदे भा०आश्व०३अ०। प्रा०त०। २प्रकृष्ट-

प्रसन्न त्रि० प्र+सद्-कर्मणि क्त। १निर्मले २अनुद्विग्ने ३क्षतात्यङ्गभेदे अमरः। ४सुरायां स्त्री मेदि० "प्रसन्ना गुरुमवातार्शोविबन्धानाहनाशिनी। सूक्ष्मप्रवाहिकाटोपकफवातार्तिहरा हिता" राजवल्लभः। तस्य भावः तल् प्रसन्नता स्त्री त्व प्रसन्नत्व न० तद्भावे प्रसादे नैर्मल्ये च।

प्रसन्नात्मन् त्रि०प्रसन्नो निर्मल आत्मा यस्य। १प्रसन्नान्तःकरणे २विष्णौ पु० "सुप्रसादः प्रसन्नात्मा" विष्णुस०। तद्रूपत्वं निर्दोषत्वात्तथात्वम्।

प्रसन्नेरा स्त्री कर्म्म०। मदिरामेदे भरतः।

प्रसभ त्रि०प्रगता सभा सभाधिकारोऽस्मात् प्रा०व०। बलात्कारे अमरः "प्रसभोद्भूतारिः" रघुः।

प्रसयन न०प्र+सि-बन्धने करणे ल्युट्। बन्धनसाधने १तन्त्रौ २जाले च "प्रसितिः प्रसयनात् तन्तुर्वा जालं वा" निरु० ६।१२।

प्रसर पु० प्र+सृ-भावाधारादौ यथायथम् अप् कर्त्तरि अच् वा। तन्तुविटपादेः प्रकर्षेण १सर्पणे प्रकर्षेण २सरणे अमरः ३वेगे ४प्रलये च मेदि०। ५समूहे शब्दर० ६युद्धे विश्वः। ७नाराचास्त्रे दविसर्पणकर्त्तरि त्रि०।

प्रसरण न० प्र+सृ-भावे ल्युट्। १सैन्यादेः सर्वतो गमने तथाह्याहरत्यार्थं सैन्यानामभितस्ततो गतौ २व्यापारे अमरः। अनि प्रसरणि तयार्थे स्त्री रामाश्रमः वा ङीप्

प्रसर्पण न० प्र+सृप-ल्युट्। सैन्यानां सर्वतोव्याप्तौ अस्य स्त्रीत्वञ्च तत्र ङीप्। [काले हेमच०।

प्र(प्र)सल पु० प्र+सल-अच् पृषो० अस्य (सोवा) हेमन-

प्रसलवि अव्य० प्रदक्षिणे शत०ब्रा० २।६।१।१५ भाष्यम्।

प्रसव पु०प्र+सू-भावादौ अप्। १गर्भमोचने २उत्पत्तौ ३कार्य्ये ४फले ५कुसुमे ६अपत्ये च मेदि० नारीणां गर्भच्युति कालज भावप्र० उक्तो यथा

"नवमे दशमे मासि नारी गर्भं प्रसूयते। एकादशे द्वादशे वा ततोऽन्यत्र विकारतः"। वैकृतं यथा "गर्भं स्रवाच "अकालप्रसवा नार्य्यः कालातीताः प्रजास्तथा। विकृतप्रसवाश्चैव युग्मप्रसवनास्तथा। अमासुता अवस्त्राश्च नलातव्यङ्गनास्तथा। क्षीणाङ्गा अधिकाङ्गाश्च जायन्ते यदि वा स्त्रियः। पशवः पक्षिणश्चैव तथैव च सरीसृपाः। विनाशं तस्य देशस्य नृपस्य च विनिर्दिशेत्। निर्वासयेत्तां नृपतिः स्वराष्ट्रात् स्त्रियश्च, पूज्याश्च ततो द्विजेन्द्राः। विभिन्निकैर्ब्राह्मणतर्पणञ्च लोके ततः शान्तिमुपैति पापम्" मात्स्ये २०६अ०। "भानौ सिंहगते यस्य गोः संप्रसूयते। मरणं तस्य निर्दिष्टं षड्भिर्मासैर्न संशयः। अत्र शान्तिं प्रवक्ष्यामि येन सम्यगवाप्यते शुभम्। प्रसूतां तत्क्षणादेव तां गां विप्राय दापयेत्। ततो होमं प्रकुर्वीत घृताक्तैराजसर्षपैः। आहुतीनां घृताक्तानामयुतं जुहुयात्ततः" नारदः। "प्रसवविकारे स्त्रीणां द्वित्रिचतुःप्रभृति सप्तरात्रौ वा। क्षीणातिरिक्तकाले च देशकालसङ्करो भवति। वडवोष्ट्रमहिषगोऽश्विनीषु यमलोद्भवे मरणमेषाम्। प्रसूनात् स्रुतिफलं शान्तौ होमो च गर्भोक्तौ "नार्य्यः परस्य विषये त्यक्त्वात्मा क्षितार्थिना। तर्पयेद्द्विजान् कामैः शान्तिं चैवात्र कारयेत्। चतुष्पदाः खलूलूखलाद्याः परभूमिषु। नगरं स्वामिनं यूथमन्यथा हि विनाशयेत्" ह०सं० ४६अ०। सुखप्रसवप्रकारः स्त्री० त० उक्तो यथा "अस्ति गोदावरीतीरे जम्बुला नाम राक्षसी। तस्याः स्मरणमात्रेण विशल्या गर्भिणी भवेत्"। "यस्य रेखाः समुल्लिख्य तिर्य्यगूर्द्धक्रमेण हि। पदानि१६ षड्दशाशद्य त्रयोदशौ७ त्रयम्। नवमे सप्त दद्यात्तु वार्धं५ पञ्चदशे तथा। द्वितीयेऽष्टावष्टमे षट् दिशि१०दौ षोड़शे स्मृतिम्। एकादिना समं देयमिच्छाङ्कं त्रिकोणके। तदा दास्यिंशदादिः स्यात् चतुःकोष्ठेषु सर्वतः। दर्शनाद्वारणात्तासां शुभं स्यादेषु कर्मसु। दास्यिंशत् प्रसवे नार्य्यास्तस्त्रिंशद्भमे त्रयम्। भूतारिष्टेषु पञ्चाशद्धृतापत्यासु वै शतम्। दासप्रतिस्तु सन्ध्यायां चतुःषष्टेरथाध्वनि। विषे विंशो धान्यकीटे-ष्वष्टाविंशतिरेव च। चतुरष्टौ१२ च बालानां रोदने परि कीर्त्तिता"। स्थानविशेषादिस्थपङ्क्तिभेदानां विकृत-प्रसवसूचकताभेदः ह०मा० उक्तो यथा

"उदयस्थेऽपि वा मन्दे कुजे वासं७ समागते। स्थिते वाऽन्त्यांशपानाथे यथाङ्कसुतशुक्रयोः। अथाङ्के पाप-लग्ने वा दृश्चिकेश(कुज)त्रिभागगे। शुभैःखाय२।११। स्थितैर्जातः सर्वसङ्क्षेपितोऽपि वा। चतुष्पदे गते भानौ मेषैर्वीर्य्यसमन्वितैः। हितस्थस्थैश्च यमलौ भवतः कोशवेष्टितौ। छागसिंहवृषैर्लग्ने तत्स्थे सौरेऽथ वा कुजे। राशद्यंशत्रये गाढे जायते नालवेष्टितः"।

स्थानभेदे प्रसवसूचकयोगः ह०मा० उक्तो यथा

"पूर्णे शशिनि खराशिगे सौम्ये लग्नगते शुभे सुखे। लग्नः जलजेऽङ्गगेऽपि वा चन्द्रे पोतगता प्रसूयते। खाद्योदयमाश्रगः शशी सम्पूर्णः लग्नवेक्षतेऽथ वा। मेषूरण बन्धुलग्नः ग स्यात् स्रुतिः सुखिते न संशयः। उदयोदुपयोर्व्ययेऽस्थिते शुभ्रौ पापनिरीक्षिते यमे। अस्तकर्किवृते विलग्नगे सौरे शीतकरेक्षितेऽथवा। मन्देऽङ्गगते विलग्नगे बुधलग्नेन्दू निरीक्षिते क्रमात्। क्रीड़ाभवने सुरालये शेखरभूमिषु च प्रसूयते। लग्नगं प्रेक्ष्य कुजः श्मशाने रन्ध्रे स्थितेन्दू गुरुरन्त्यहोत्रे। रविर्नरेन्द्रामरगो-कुलेषु शिल्पालये शः प्रसवं करोति। राशद्यंशगानगो-चरे मार्गे जन्म चरे स्थिरे स्थिते। खर्क्षांशगते खमन्दिरे

बलयोगात् फलमंशकर्णयोः। चारार्कजबोधिकोधने चन्द्रेऽस्ते च विरुद्धतेऽन्यया। दृष्टेऽमरराजमन्त्रिणा दौर्भाग्युः सुखभाक् च स सुतः। पापेक्षिते तद्दिनगा युदये कुजेऽस्ते॥ स्वको विनयप्रति कुजार्कजयोस्तथावे। सौम्येऽपि पश्यति तथाविधदृक्समेति सौम्येतरेषु परदृक्समतोऽन्यनायुः। पित्रमात्मदृष्टेषु तदुक्तात्तदृग्भावादिषु नीचगैः शुभैः। यदि नैकमतौ व वीक्षितौ लग्नेन्दू विजने प्रसूयते। मन्दर्क्षांशे शशिनि स्थिते मन्ददृष्टेऽजगे वा तद्युक्ते वा तमसि शयने नीचसंस्थैव भूमौ। यद्दृग्योगिर्जनति हरिजं गर्भमोक्षस्तु तद्वत् पापैरन्द्रात् करुखखगतैः क्लेशमाङ्गर्जनन्याः"। अथ सूतिकाष्टदमानम् "अष्टहस्तावतस्तार चतुर्हस्तविशालकम्। प्राचीद्वारतद्गृहार्द्धं विदध्यात् सूतिकाख्यकम्"। आसन्नप्रसवायास्तत्पत्नाह "याते हि शिशिरे कुक्षौ सक्ते हृदयबन्धने। सशूले जघने नारी विन्देया प्रसवोत्सुका। आसन्नप्रसवायास्तु कटीपृष्ठन्तु सव्यथम्। भवेन्मुहुः प्रदत्तिश्च मूत्रस्य च मलस्य च"। अथासन्नप्रसवाया उपचारः "तैलेनाभ्यक्तगात्रायां संस्कृतायां गारिण्या। उष्णाम्भसावसेत् कोष्णं मात्रया हतसंयुताम्। ततोपधाने मृदुभिर्विस्तीर्णे शयने शनैः। आभुग्नसक्थि चोत्तानां नारीं विन्देदुपस्थिताम्"। (अभुग्नसक्थि असङ्कोचितोरुः) अथ धात्री "ततोऽभ्यङ्गनीयाश्च स्नाप्ये कुशला हिताः। वृद्धाः परिचरे युक्ताः सम्यक् छिन्ननखाः स्त्रियः"। अथ ततकृत्यम् "अपत्यमार्गं तैलेन समभ्यक्ष्य समन्ततः। एका तासु सुभगे! प्रवाहस्वेति तां वदेत्। अन्यथा मा प्रवाहिष्टाः प्रवाहेथा अथा यदि। प्रवाहेथाः शनैः पूर्वं प्रवाहस्व ततःपरम्। ततो गर्भेतरं गर्भं योनिद्वारमुपागते। अपरावहितो गर्भो यावत् पतति भूतले"। अथावहितायाः प्रवाहणादौ गुणमाह "मूकं वा बधिरं कुब्जं श्वासकासज्वरान्वितम्। क्षते क्षततनुं बालमकाले च प्रवाहणात्" भावप्र०। नवममासादिप्रसवकालश्च नारीणामन्यजन्तूनां मासभेदादन्यथा ज्ञेयः

प्रसवक पु० प्रसवेन पुष्पादिना कायति कै-क। पियालवृक्षे शब्दमाला। [छन्ने (नेटा) अमरः।

प्रसवबन्धन न०-बन्ध-करणे ल्युट् प्रसवस्य पुष्पादेः बन्धनम्। [छन्ने (नेटा) अमरः।

प्रसवस्थली स्त्री ङीप्। प्रसवस्य स्थलीव वा। उत्पत्तिस्थाने २मातरि च।

प्रसविष्ट पु० प्रसूते उत्पादयति प्र+सू-सूतेः उत्पादनानुकूलव्यापारार्थत्वात् इष्च्। १पितरि भरतः। निरु० ६।२१। प्रसूतौ २मातरि स्त्री ङीप्।

प्रसविन् त्रि० प्र+सू-णिनार्थे इनि। प्रसवशीले।

प्रसह्य त्रि० प्रगतं सह्यं बलत्वम्। १प्रतिकूले अमरः। कर्मणि यत्। २प्रसवनीये त्रि०।

प्रसह त्रि० सहति प्र+सह-खच्। १प्रकर्षेण सोढरि प्रसह्य बलात्कारेण भक्षयतीति प्रसहः। बलात्कारेण भक्षके २खगभेदे "काको मद्र बलूकश्च चित्रश्च शशघातकः। चाषो भासश्च कुरवः इत्याद्याः प्रसहाः स्मृताः" शशघातकः (बाज) इति लोके "प्रसहाः कीर्त्तिता एते प्रसह्याद्यिन्न भक्षणात्। प्रसहाः खलु यौर्व्याप्यान्नांसं भक्षयन्ति ये। ते शोषमक्षकोन्नेदैः शुक्रक्षीणा भवन्ति हि" भावप्र०।

प्रसहन त्रि० प्रगतं सहनं यस्य। १क्षमारहिते २हिंस्रपशुभेदे पुंस्त्री० "शार्दूलसिंहशरभल्लतरक्षुसंख्यातेऽन्यान् प्रसह्य विनिहत्य निवर्त्तयन्ते। ते कीर्त्तिताः प्रसहनाः पललं तदीयमर्थैः प्रमेहजठरामयवाद्यहारि" राजनि०। भावे ल्युट्। ३क्षान्तिकरणे प्रकर्षेण ४क्षमायां च।

प्रसह्य अव्य० प्र+सह-ल्यप्। १हठादित्यर्थे अमरः "प्रसह्य तेजोभिरसंख्यतां गतैः" माघः। प्र+सह-कर्मणि शक्यार्थे यत्। प्रकर्षेण २सोढुंशक्ये त्रि०। [गचौरे त्रिका०।

प्रसह्यचौर पु०प्रसह्य बलात्कारेण चौरः। (डाकाइत)प्रकारे

प्रसह्यहरण न० प्रसह्य बलात्कारेण हरणम्। १चतुर्विधे कन्यायाः बलाद्धरणे भा०शा० २१८अ०। २कठेन हरणे (डाकाइति) प्रसह्यहरणं च साहसभेदः। [२१।४।२१।

प्रसहन् त्रि० प्र+सह-बनिप्। प्रसहनकर्त्तरि चमे कात्या०

प्रसातिका स्त्री सो-क्तिन् प्रगता सातिरस्याः कप् पा०ब०। क्षुद्रधान्ये सूक्ष्मधान्ये रत्नमाला।

प्रसाद पु०प्र+सद-भावे घञ्। १नैर्मल्ये २अनुग्रहे ३काव्यगुणभेदे ४खाख्ये ५प्रसन्ने हृद्देवनैदेद्ये ७गुरुजनभुक्तावशिष्टे च अमरः। काव्यगुणभेदश्च रसस्यैव धर्मभेदः शब्दानां तत्तत्सम्पदुपचारात् यथोक्तं सा०द० "रसमात्रस्य धर्माः शौर्यादयो यथा" गुणाः यथा खल्वक्लिष्टत्वमात्रस्यात्मन उत्कर्षहेतुत्वात् शौर्यादयो गुणशब्दवाच्याः तथा काव्येऽक्लिष्टत्वमात्रस्य रसस्य धर्माः। स्वरूपविशेषाः माधुर्यादयोऽपि स्वसम्बन्धिपदसन्दर्भस्य काव्यव्यपदेशभाजौपाधिकानुगुणभाज इत्यर्थः। यथा चैषां

रसमात्रस्य धर्मत्वं तथा दर्शितम्। "एवं माधुर्यौजोऽथ प्रसाद इति ते त्रिधा" इत्युपक्रमे "चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः। स प्रसादः समस्तेषु रसेषु रचनासु च"। व्याप्नोति व्याविश्कारोति। "शब्दार्थसहयुक्तौ शब्दबोधकौ श्रुतिमात्रतः" यथा "कुशीलवेन सकलैव कृतघ्न! त्वं सङ्गकलाप। कुटिल सनयो: प्रियायाः। वाचैः करस्य यतयो विनिकृत्तमर्मा क्षपेऽपि तां कथमहं न विलोकयामि" सा०द०"प्रसादवत् प्रसिद्धार्थमिन्दोरिन्दीवरद्युति। चक्षुश्चक्षीं तनोतीति प्रतीतिं सुभगं वचः" काव्यादर्शः। धर्मस्य पत्न्यां मूर्त्तौ स्त्रियां ङीप्सप्तमेदे भाग० ४। १।२६।

प्रसादना स्त्री प्र+सद-णिच्-युच्। १सेवायां हेमच०। भावे ल्युट्। २प्रसादन तत्कर्त्रे न०"मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनाश्चित्तप्रसादनम्" पा०सू०। चित्तप्रसादनयुक्ते २८।३ पृ०दर्शम्।

प्रसादपट्ट पु० प्रसादसूचकः पट्टः या०त०। अनुग्रहसूचके ह०सं०५०अ० उक्ते पट्टभेदे ४२०।१पृ० दर्शम्।

प्रसाधक त्रि० प्रसाधयति प्र+साधि-ण्वुल्। १भूषके स्त्रियां कापि ङीप्। २व्यवहारकर्त्रां ३सेवकभेदे पु० "लुटव्यञ्जनकर्त्तारस्तल्पका व्यवहारकाः। प्रसाधका भोजकाश्च गायनसंवाहका अपि। जलताम्बूलकुसुमगन्धभूषणदायकाः" कामन्द०।

प्रसाधन न० प्र+सिध-णिच्-साधादेशः ल्युट्। १क्लिममूषणे वेशे। करणे ल्युट्। २वस्तुतिकायाम् स्त्री ङीप् अमरः। ३निष्पादने ४सिद्धौ च मेदि०।

प्रसाधित त्रि०प्र+साधि-क्त। १व्यवहृते २निष्पादिते च।

प्रसारण न० प्र+सृ-णिच्-ल्युट्। १विस्तारकरणे २क्रियाभेदे च भाषा० कर्मनृपवदे १७२०पृ०दर्शम्। विप्रकृष्टदेशसंयोगहेतुक्रियः प्रसारणम्। करणे ल्युट् ङीप्। (गन्ध भादाल) ३लताभेदे स्त्री राजवल्लभः।

प्रसारिन् त्रि० प्र+सृ-णिनि। १विस्तारयुते स्त्रियां ङीप्। सा च २वल्लालुलतायां स्त्री राजनि०।

प्रसित त्रि० प्र+सो-क्त। १आसक्ते अमरः तद्भोगे विषयाधारे वस्तुरसस्पृहत्वात् आसक्तार्थपरत्वे हती आसक्तस्त्री स्मरिष्या स्मरो वा प्रसित इति तत्त्वदो। भा०म०। २प्रकटगुम्फे त्रि० ३पूये न० यज्ञच०। तस्य प्रकटगुम्फत्वात् तथात्वम्।

प्रसिति स्त्री प्र+सि-क्तिन् बन्धने करणे क्तिन्। बन्धनसाधने १निगड़ादौ अमरः। २तन्त्रौ ३जाले च प्रसयनशब्दे निरु०।

प्रसिद्ध त्रि० प्र+सिध-क्त। १मुक्तिते २ख्याते च मेदि०।

प्रसिद्धि स्त्री प्र+सिध-भावे-क्तिन्। १ख्यातौ २दृष्टान्ते त्रिका० ३मूषणे च।

प्रसुप्त पु० १सुप्तदेशसमीपस्थे देशे २तद्गते च भा०स०२८अ०।

प्रसू स्त्री प्र+सू-क्विप्। १मातरि अमरः २घोटक्यां च ३कदल्यां ४ओषधि च मेदि०। स्वार्थे क। प्रसूका वाजिन्यां राजनि०।

प्रसूत त्रि० प्र+सू-कर्मणि क्त। १कृतप्रसवे कर्त्तरि क्त। २संजाते ३प्रकटीकृते त्रि०। ४कुङ्कुमे न० मेदि०। ५जातापत्यायां स्त्रियां स्त्री अमरः। चाक्षुषमन्वन्तरे देवगणभेदे पु०मार्क०पु० ७६अ०।

प्रसूति स्त्री+सू-क्तिन् क्तिच् वा। १प्रसवे अमरः २सन्ततौ ३तनये ४दुहितरि च मेदि० ५मातरि। स्वार्थे क। प्रसूतिका जातप्रसवायां स्त्रियाम् अमरः।

प्रसूतिज न० प्रसूतेः पञ्चमादारभ्य जायते जन-ड। १दुःखे अमरः। २प्रसवजातमात्रे त्रि०।

प्रसून न० प्र+सू-क्त ओदित्त्वात् तस्य नः। १कुसुमे २फले च अमरः। ३जाते त्रि०मेदि०। [नगराद्योऽप्यत्र।

प्रसूनेषु पु० प्रसूनमिषुर्यस्य। पुष्पशरे कामे त्रिका० प्रसू-

प्रसृत न० प्र+सृ-क्त। १पलदये यज्ञभा० २अञ्जलौ न०। कर्त्तरि क्त। ३प्रसरणयुते त्रि० अमरः। ४विस्तृते ५वेगिते त्रि० मेदि०। ६गते त्रि० त्रिका० ७नियुक्ते त्रि० हला०। ८व्याप्तायां स्त्री मेदि०।

प्रसृतज पु० १कण्डयोनिकरूपे कृमिभेदे "आत्मा कृमिश्च विष्ठोद्भवस्तत्स्थानसन्नरजश्च सः। निरुक्तजश्च विष्ठेयः स्मृतः प्रसृतजस्तथा" भा०अनु० ४६अ०। "निरुक्तजः स्वमेवेऽन्योरेतःसेकार्थसङ्गमात् (शेषजः) प्रसृतोऽनिरुक्तो यो योन्यात् परत्रेतः क्षिपति तज्जः प्रसृतजः" (कण्डयोनिकरूपः) नीलक०।

प्रसृति स्त्री प्र+सृ-क्तिन्। प्रसृते अञ्जलिमाने रायस०।

प्रसृष्ट त्रि० प्र+सृज-क्त। १प्रकर्षेण सृष्टे "तत्रैवंजातिपाठेन प्रसृष्टाभिरुतैर्यथा च" भा०वि० १२अ० व्याख्याने "कङ्कुल्यः प्रसृता यासु ताः प्रसृष्टा उदीरिताः" नीलकण्ठोक्तायां २प्रसृतायामङ्कुशी स्त्री।

प्रसेक पु०+सिच-भावे घञ्। १आसिक्तौ २च्युतौ च मेदि०

प्रसेकिन् पु० प्र+सिच–घञ्+ इनुच् । १प्रसेचनशीले प्रसेक-युक्ते २व्रणभेदे सुश्रुतः "मांस-पिण्डवदुन्नताः प्रसेकिनोऽन्तःपूयवेदनावन्तोऽश्वाऽयानव-दुन्नतोष्ठाः" (व्रणभेदाः)।

प्रसेदिका स्त्री क्षुद्रारामे क्षेमच० ।

प्रसेन पु० १व्यनसिलयोनौ सत्राजित्पभ्रातरि यदुक्षत्रियभेदे हरिवं० २६अ० "सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः" क्षमन्तकोपाख्यानम् । [पत्तिर्दृश्या ।

प्रसेनजित् पु० नृपभेदे भा०अ० ८अ० । हरिवं०१२अ० तदु-

प्रसेव पु० प्र+सिव–कर्मणि घञ् । १वीणाङ्गे २सूते ३यधिते च मेदि० । प्र+सेव–भावे घञ् । ४प्रकृष्टसेवने पु० ।

प्रसेवक पु० प्र+सिव–ण्वुल् । वीणाप्रान्तबद्धे १काष्ठे वीणा-दण्डाधः शब्दगाम्भीर्यार्थम् अलाबुमयं भाण्डं यच्च-मादिना आच्छाद्य दीयते तस्मिन् पदार्थे अमरः । २सूत्ररचितपात्रे (धोकड़ा) ३प्रकृष्टसूतिकारके त्रि० ।

प्रस्कण्व पु० प्रगतः कण्वं कारणत्वेन नि० अञो लुट् । कण्वपुत्रे ऋषिभेदे च च बह्वृचां वेदमन्त्राणां द्रष्टृत्वात् ऋषिः ।

प्रस्कन्दन न० प्र+स्कन्द–भावे ल्युट् । १आस्कन्दने 'कर्म्मि-प्रस्कन्दनपरः" भा०आ० ८४अ० । आदाने ल्युट् । आस्कन्दनादाने यत आस्कन्दनं क्रियतेऽतस्मिन् । भावे ल्युट् । ३विरेके रत्नमा० तत्रार्थे प्रस्यन्दनमित्येव न्याय्यः पाठः स्यन्देर्धातोरर्थानुगमात् तत्रार्थे प्रस्क-न्दनमिति पाठस्तु लिपिकरप्रमादात् । कर्त्तरि ल्यु । ४प्रस्कादेवे भा० अ० १७अ० ।

प्रस्कुन्द पु०प्रगतः कुन्दम् चक्रम् अत्या०स० पारस्करा०सुट् । कुन्दाख्यचक्राकारवेदिकायाम् "प्रस्कुन्देन प्रतिष्ठन्ति" भा०अ०७२अ० । "प्रस्कन्देनेति पाठे मध्यमशिफयेत्यर्थः" नीलकण्ठः ।

प्रस्तर पु०प्र+स्तृ–अच् । १पाषाणे (पातर) २शस्त्रवाद्यैरचिते शयनीये शब्दर० ३सर्षौ मेदि० ४दर्भमुष्टौ "अध्वर्युः प्रस्तरं प्रहरति" तैत्तिरी०ब्रा० ६।७।१६ "प्रस्तरो दर्भ-मुष्टिः" भाष्यम् । तं प्रशंसति "यजमानो वै प्रस्तरः" १७ । "प्रस्तरस्य कविरासादनादिद्वारा यागसाधन-त्वात् यजमानोऽपि यज्ञसाधनमिति यागसाधनत्वसाम्यात् प्रस्तरो यजमानत्वेन स्तूयते" भा० ।

प्रस्तरिणी स्त्री प्रस्तरस्तदाकारोऽस्त्यस्य इनि ङीप् । गो-धोमिश्रायां राजनि० ।

प्रस्तरेष्ठा पु०प्रस्तरे तिष्ठति स्था–क्विप् अलुक्स० । विश्वदेवभेदे यजु० २।१७।

प्रस्तार पु० प्र+स्तृ–घञ् । १दर्भप्रधानवने क्षेमच० । २पङ्क्त्या-दिरचितशयनीये शब्दर० । ३शय्यामात्रे धरणः । प्रस्तार्य्यन्ते विस्तार्य्यन्ते गुरुलघुरूपतया वर्णा मात्रा वा अनेन प्र+स्तृ–णिच्-करणे घञ् । ४लघुगुरुवर्णमात्रा-पतक्रियाभेदे तत्प्रकारश्च छन्दः शब्दे उक्तो यथा

"पादे सर्वगुरावाद्याद्गुरुं न्यस्य गुरोरधः । यथोपरि तथा शेषं भूयः कुर्यादतं विधिम् । अन्ते दद्याद्गुरु-मेव यावत् सर्वलघुर्भवेत् । प्रस्तारोऽयं समाख्यातश्छन्दो-विचितिवेदिभिः" । "प्रस्तारणीयवृत्तादीनां सर्वगुरुके पादे पाद इत्युपलक्षणं वर्णानामपि । प्रथमपङ्क्तौ लिखिते आद्यात् प्रथमगुरोरुत्तमारभ्येत्यर्थः । द्वितीयप-ङ्क्तौ अधः तस्यैव अधस्तात्पङ्क्तौ प्रथमं लघुं न्यस्य यथा उपरि ऊर्द्ध्वपङ्क्तौ उपरे अवशिष्टाः सन्निवि-ष्टास्तथा तस्य दक्षिणपार्श्वेषु गुर्वादयो लेख्याः । तृतीय-पङ्क्तौ तु प्रथमाया गुरव्यक्षरेऽधस्तात् लघुं न्यस्य शेषान् उपरिस्थद्वितीयपङ्क्तिस्थान् गुर्वादीन् न्यसेत् एवञ्च तृतीयपङ्क्तौ आद्यस्थानस्य न्यूनता तत्र किं देयमि-त्याकाङ्क्षायामाह, अन्ते प्रस्तार्यसंख्यातो न्यूने सति वामभागे गुरून् दद्यात् एवं भवो लघुः कुर्यात् यावच्च सर्वलघुकः पादो भवेत्, तावदेवं कुर्यादित्यर्थः । तत्र-प्रस्तारे लघुगुर्वोः क्रमवक्रतया तदाकारेणोदाहरणम् प्रथमः भेदः ऽऽऽ मगणः द्वितीयो भेदः ।ऽऽ यगणः तृतीयो भेदः ऽ।ऽ रगणः चतुर्थो भेदः ।।ऽ सगणः पञ्चमो भेदः ऽऽ। तगणः षष्ठो भेदः ।ऽ। जगणः सप्तमो भेदः ऽ।। भगणः अष्टमो भेदः ।।। नगणः मात्राप्रस्तारे विशेषस्तु पिङ्गलादौ द्रष्टव्यः ।

मात्रावृत्तप्रस्तारेऽयं विशेषः अन्ते गुर्वादिक्रमेण वर्णा देयाः । मात्रार्द्धे अवशेषे एको गुरुः त्रिमात्रावशेषे एको गुरुः तदासे एको लघुरेवं रीत्या वृत्तमात्रासंख्यया न्यून मात्रार्द्धारा संख्यापूरणार्थं गुरुलघुदानमिति बोध्यम् ।

प्रस्तारपङ्क्ति स्त्री छन्दोभेदे छन्दश्शब्दे २६७८पृ०दृश्यम् ।

प्रस्तार्य्यकर्म्म न० "क्षमनाद्यिक्तृतः श्यावो रक्तो वा मांस-सञ्चयः । सन्निपातेन दोषाणां प्रस्तार्य्यकर्म्म तदुच्यते" वैद्यकोक्ते नेत्ररोगभेदे ।

प्रस्ताव पु० प्र+स्तु– "प्रे द्रुस्तुस्रुवः" पा० भावकरणादौ घञ् । १प्रकर्षेण स्तवे २अवसरे अमर । ३प्रस्तुते भाषु-

दीक्षितः ४प्रकरणे काव्यप्र० । ६सामावयवभेदे स च प्रस्तोतृनामकेन ऋत्विजा गेयः साम्नः प्रथमो भागः । "प्रस्तोतव्यौ देवता प्रस्तावसमवायसाँ ज्ञा०ञ्०। तस्य देवता च ब्रह्मरूपः प्राचस्तत्रैवोक्तः ।

प्रस्तावना स्त्री प्र+स्तु-णिच्-ल्युट् । १आरम्भे अटा० "आर्यावालचरितप्रस्तावनादिश्लिष्टम्" वीरच०। प्रस्तावयति प्र+स्तु-णिच्-ल्यु । नाटकाङ्गे आरम्भार्थके आमुखे स्त्री तल्लक्षणभेदादिकं सा०द०उक्तं तच्च आमुख शब्दे ७३६ पृष्ठादौ द्रष्टव्यम् ।

प्रस्तिर न० प्र+स्तृ बा० क किच्च दीर्घं रपरत्वं च । पल्लवादिरचिते शयनीये शब्दर० । [संस्तृते २ध्वस्तिते च ।

प्रस्तीत(म) त्रि० प्र+स्तै-क्त तस्य नीवा सम्प्रसारणञ्च ।

प्रस्तुत त्रि० प्र+स्तु-कर्मणि क्त । १प्रकरणप्राप्ते २प्राक्तनिके ३उपस्थिते ४उद्यते ५प्रतिपन्ने ६प्रकर्षेण स्तुते च ।

प्रस्तृत त्रि० प्र+स्तृ-क्त । १धन्तरिते त्रिका० । २प्रकर्षेण विस्तारिते त्रि० ।

प्रस्तोत्र त्रि०प्रकर्षं स्तौति प्र+स्तु-तृच् । १प्रकर्षेण स्तोतरि २साम्नः प्रथमभागगायके ऋत्विग्भेदे पु० यज्ञवाक्यशब्दे ८६१ पृ० दृश्यम् । प्रस्तोत्रर्चितं तद्वेदं वा ष । प्रस्तोत्रिय तत्साध्ये सामप्रथमभागे तत्सम्बन्धिनि च त्रि० ।

प्रस्थ त्रि०प्र+स्था-क । १प्रकर्षेण स्थितियुते २गन्तरि च प्रपूर्वकतिष्ठतेर्गत्यर्थत्वात् । २आढकचतुर्थांशरूपे परिमाणभेदे पु० आढकशब्दे ६६६ पृ० दृश्यम् । ३द्विशरावपरिमाणे मेदिनिकम् । आधारे घञर्थे क । ५पर्वतसमभूभागे स्थितियोग्यस्थाने रानौ पु०न० । ६उन्नितवस्तुनि मेदिनिः ७विस्तारे च "दीर्घस्थे समानञ्च न कुर्यान्मन्दिरं बुधः" ब्रह्मवै०पु०ब्र०ख० १०३अ० । प्रस्थं पचति पच-ड सुप् । प्रस्थम्पच प्रस्थमितपाचके त्रि० ।

प्रस्थपुष्प पु०प्रस्थमिव पुष्पमस्य । १मरुवके अमरः २खल्लपत्र वृक्षे शब्दरत्नावली ३लक्ष्मीरभेदे त्रिका० ।

प्रस्थल धर्मराजसम्बन्धिनि देशभेदे भा०भी० ७५अ० ।

प्रस्थान प्र+स्था-भावे ल्युट् । १त्रिगीषोर्द्वारगमने २गमनमात्रे च प्रस्थानं वर्त्मतयाऽस्त्यत्र ठन् । प्रस्थानप्रतिपादके ग्रन्थे यथा युधिष्ठिरादीनां महाप्रस्थानप्रतिपादकः भारतान्तर्गतपर्वभेदः ।

कार्य्यवशात् यात्रादिने स्वयंगमनासम्भवे द्रव्यभेदानां विप्रादिभेदे प्रस्थापनमाह स्मृ०चि०पी० यथा वसिष्ठः "तस्मिन् मुहूर्त्ते स्वयमप्रयाणे प्रयोजनापेक्षितया च देवात् । तत्रैव तन्निर्गमनं च कार्य्यं क्षीवाशानाद्यपि तदुच्यमानम् राजमार्त्तण्डः । "प्रस्थाने ब्राह्मणादीनां यत्प्रशस्तमथोऽयुधम् । मध्यामलफलं चैव प्रशस्तं दधिकारणम्" वसिष्ठः "श्वेतातपत्रध्वजचामरान्वितमुपस्थोपगजाम्बराणि । आन्दोलिका रत्नरथाश्वदारान् शय्यासनाद्यं मनसस्त्वभीष्टम्" इति भारतोऽपि "अप्रयाणे स्वयं कार्य्यमपेक्ष्य भूपतिस्त्वया । कुर्य्यात्तिर्गमनं ध्वजवाहनसंयुतमिति" "गेहाद्गेहान्तरमपि गमस्तर्हि यात्रेति गर्गः क्षीम्नः क्षीमान्तरमपि भृगुर्वाग्विक्षेपमात्रम् । प्रस्थानं स्वादिति कश्यपोऽत्रो भरद्वाज एवं यात्रा कार्य्या बर्हिरिह इरात् स्वादहिरो ब्रवीति" । "प्रस्थानमत्र धनुषां हि शतानि पञ्च केचिच्चतुस्त्रयशतानि दशैव चान्ये । संप्रस्थितो व दृढ मन्दिरतः प्रयातो गन्तव्यदिक्षु तदपि प्रयतेन कार्य्यम्" । "प्रस्थाने भूमिपालो दशदिवसमिभ्याश्च नैकत्र तिष्ठेत् सामन्तः सप्तरात्रं तदितरमनुजः पञ्चरात्रं तथैव । जङ्घं गच्छेच्चभाडेऽप्यथ गमनदिनात् सप्तरात्रादि पूर्वं चायच्छो तद्दिनेऽसौ रिपुविजयमनामैषुणं नैव कुर्य्यात्" स०चि० । औशनसोऽपि "वसेच्च चैकत्र दश क्षितीशो दिनान्यतो सप्त च मध्यलोकः । यः प्राकृतः सोऽपि न पञ्चरात्रं भद्रेण यात्रा परतः प्रयोज्या" । राजमार्त्तण्डः "प्राच्यामहानि सप्तनयः प्रवदन्ति सप्त याम्यामतीव शुभदानि दिनानि पञ्च । सौम्येव पश्चिमदिशि क्षितिनायकानां प्रस्थानकेषु दिवसत्रयमुत्तरस्याम्" प्रस्थानप्रकारमाह गुरुः "पूर्वं दक्षिणसङ्गत्य पार्श्वं यायाद्वराधिपः । ह्यालिंगितं पदं गत्वा यानमारुह्य संव्रजेत्" । करणे ल्युट् । ३मार्गे ४उपदेशोपाये च यथा श्रुतिस्मृतिन्यायप्रदर्शकम् उपनिषद्गीताशारीरकसूत्रपत्रयभाष्यरूपं प्रस्थानत्रयम् । यथा वा भाष्यटीकायां पञ्चपादिकाभामतीविवरणप्रस्थानत्रयम् ।

प्रस्थापित त्रि० प्र+स्था-णिच्-क्त कर्मणि क्त । १प्रेरिते प्रेषिते च । २प्रकर्षेण स्थापिते त्रि० ।

प्रस्थायिन् त्रि० प्र+स्था-णच् भविष्यति णिनि । १भाविगमनकर्त्तरि । "प्रे स्थः" इत्यादि णिच् । २गन्तुमनसि च तत्त्वबोधः । [भाषाप्र० ।

प्रस्थिका स्त्री प्रस्थसदाकारोऽस्त्यस्याः ठन् । अम्बष्ठजातायां

प्रस्नुषा स्त्री स्नुषायाः स्नुषा पृषो० । नप्तृवध्वाम् । "स्नुषाच प्रस्नुषायैव दुहितृश्च विदुर्बुधाः" भा०श०

ई० च०। नीलकण्ठः। [जलादौ काला० औ० २०।२।१२।

प्रक्षेय त्रि० प्रक्षातुमर्हति प्र+क्षा–अर्हार्थे यत्। क्षानार्हे

प्रस्यन्दन न० प्र+स्यन्द–भावे ल्युट्। प्रकर्षेण स्यन्दने चलनक्रियाभेदे तच्च कुपिते देहे वायुलक्षणतया लक्षम् "तत्र प्रस्यन्दोद्वहनपूरणविरेकधारणलक्षणो वायुः पञ्चधा प्रविभक्तः शरीरं धारयति"।

प्रस्फुट त्रि० प्र+स्फुट–क। १प्रफुल्ले विकसिते पुष्पादौ शब्दरत्ना०। २कुक्कुटे कुक्कुके च।

प्रस्फोटन न० प्रस्फुट्यते अनेन प्र+स्फुट–करणे ल्युट्। १भ्रूक्षेपे (कला) ख्याते अमरः। भावे ल्युट्। २ताडने ३प्रकाशे च मेदि०।

प्रस्यन्द पु०प्र+स्यन्द–भावे घञ्। १प्रकर्षेण क्षरणे "हृदभिहितो भावो द्रव्यवत् प्रकाशते" सङ्केः २स्यन्दमाने द्रव्ये ३ताटो कर्त्तरि अच्। ४प्रस्खरणकर्त्तरि त्रि० "प्रस्यन्दमाश्रीकमूः" कुसुमा०।

प्रस्रवण न०प्र+स्रु–भावे ल्युट्। १अविच्छेदेन जलादिस्रवणे २क्षरे च। आधारे ल्युट। यत्र स्थाने अवश्यं निपत्य बहुलीभवति तादृशे १स्थाने पर्व्वते पु० क्षेमच०। प्रस्रव तत्रार्थे क्षेमच०। माल्यवति पर्व्वते पु० क्षेमच०।

प्रस्राव पु०प्र+स्रु–भावे घञ्। १प्रकर्षेण क्षरणे हृदभिहितभावस्यद्रव्यपरत्वेन २मूत्रे अमरः।

प्र(स्रा)स्खन पु० प्र+स्खन–भावे अप् पक्षे घञ्। उच्चैःशब्दे

प्रस्वादस् त्रि० प्र+स्वद–विच्–असुन्। प्रकर्षेण स्वादयितरि ऋ० १०।१२।६६

प्रस्वाप पु० प्रस्वाप्यते शब्दरूपेण प्र+स्वप–घञ्–करणे घञ्। शब्दोः प्रस्वापनसाधने अस्त्रभेदे भा० उद्यो० १८३अ०। करणे ल्युट्। प्रस्वापन तत्रार्थे भा०व० ४१अ०।

प्रस्वापिनी स्त्री स्वप्नमायायाः भगिन्यां जृम्भणाख्यायां देवतायां हरिवं० १८अ०। [१६८अ० चक्रम्।

प्रस्वेद पु०प्र+स्विद–भावे घञ्। अङ्गस्यन्दने तत्सौधर्म्य शरदृतौ०

प्रहत त्रि० प्र+हन–क्त। १क्षिप्ते २क्षुण्णे च शब्दरत्ना०।

प्रहनेमि पुं० प्रहन्ति प्र+हन–ड तादृशो नेमिरिवाग्रं यस्य सः। चन्द्रे त्रिका०। [दिवसस्याष्टमे भागे अमरः।

प्रहर पु०पह्रियते यामिकैर्घटकादिरस्मिन् प्र+हृ–आधारे अप्। प्रहरकुटुम्बी स्त्री कुटुम्बिनीभेदे राजनि०।

प्रहरण न० प्रह्रियतेऽनेन हृ–करणे ल्युट्। १अस्त्रे २कार्य्यारम्भे च अमरः। आधारे ल्युट्। २युद्धे। भावे ल्युट्। ३प्रहारे हृदये च।

प्रहरणकलिका स्त्री "नसमनलघुगैः प्रहरणकलिका" छ०र० उक्ते चतुर्दशाक्षरपादके छन्दोभेदे।

प्रहरिन् पु० प्रहरोऽधिकारकालत्वेनास्त्यस्य इनि। १याभिके २प्रहरकालाधिकृते ३सैन्यभेदे।

प्रहर्षण त्रि० प्रहर्षयति प्र+हृष–णिच्–ल्यु। १प्रकर्षेण हर्षकारके २वृषभेदे पु० त्रिका० करणे ल्युट्। ३प्रहर्षसाधने त्रि०। स्त्रियां ङीप्। क्वा च ४हरिद्रायां शब्दर०। "स्त्री स्त्री गस्त्रिदशश्रेष्ठयतिः प्रहर्षणीयम्" छ०र० उक्ते त्रयोदशाक्षरपादके छन्दोभेदे च।

प्रहस पु० राक्षसभेदे रामा०उ० ३६अ०।

प्रहसन न०प्र+हस–भावे आधारे वा ल्युट्। १प्रकर्षेण हासे परिहासे २दृश्यकाव्यरूपकभेदे मेदि०। ३आख्येये क्षेमच० रूपकभेदस्य लक्षणसूत्रं सा०द० यथा "भाणवत् सन्धिसन्ध्यङ्गवाक्षाङ्कैर्विनिर्मितम्। भवेत् प्रहसनं हृद्यं निन्द्यानां कविकल्पितम्। अत्र नाऽरभटी नापि विष्कम्भकप्रवेशकौ। अङ्की हास्यरसस्तत्र वीथ्यङ्गानां स्थितिर्न वा"। तत्र "तपस्विभगवद्विप्रक्षत्रिय नायक। एको यत्र भवेद्धृष्टो हास्यं तच्छुद्धस उच्यते" यथा कन्दर्पकेलिः।

प्रहसन्ती स्त्री प्र+हस–शतृ ङीप्। १युग्यां त्रिका० २स्वामिनीभूतायां राजनि०। प्रा०व०। २प्रकटाङ्कारधान्याम्।

प्रहस्त पु० प्रगतो हस्तो यस्य। १विष्णुताक्ष्यिणाख्ये चमेटे अमरः। रावणसैन्याधिपे २राक्षसभेदे भा०व० २७३अ०।

प्रहाणि प्र+हा–नि यत्वम्। अपकर्षे।

प्रहार पु० प्र+हृ–भावे घञ्। आघाते।

प्रहारण न० प्र+हृ–णिच्–ल्यु। काम्यदाने शारदातन्त्रादौ।

प्रहारवल्ली स्त्री प्रहारस्य वेदनोपशमनार्थं वल्ली शाक०त०। मांसरोहिण्याम् भावप्र०। [रामा०आर० ३।।१८

प्रहारिन् त्रि०प्र+हृ–णिनि। १प्रहारकर्त्तरि पु०२राक्षसभेदे

प्रहास पु० प्रकटो हासोऽत्र। १शिवे त्रिका० २नटे धरणि० ३शोभनीयें जटा०। प्रा०व०। ४अट्टहासे पु०शब्दर०। ५नागभेदे पु० भा० आ० ५७अ०।

प्रहासिन् त्रि० प्रकटं हास्यति हसति वा हासि–हस–वा णिनि। १परस्य हासस्य कारके (भाँड) २स्वयं हासके ३विदूषके पु० क्षेमच०।

प्रहि पु०पृच्छ्यते अत्र प्र+हृ–आधारे इन् डिच्च। कूपे अमरः

प्रहित त्रि०प्र+हि–क्त। १प्रेरिते २क्षिप्ते ३क्षुण्णे न०क्षेमच०

प्रहुत न० प्र+हु-भावे क्त। भूतयज्ञे अटा०। "अहुतञ्च हुतञ्चैव तथा प्रहुतमेव च। ब्राह्म्यं हुतं प्राशितञ्च दत्तञ्च यच्चान् प्रचक्षते" इत्युपक्रम्य "प्रहुतो भौतिको बलिः" मनुनाऽस्य पारिभाषिकत्वोक्तम् आर्षं दृश्यम् "देवानभाजयत् हुतञ्च प्रहुतञ्च यद्देवेभ्यो जुह्वति प्रहुन्वन्ति" इ०व०

"ये हे अन्ने मृडा देवानभाजयत् के ते हे इत्युच्यते हुतञ्च प्रहुतञ्च। हुतमित्यग्नौ हवनम्। प्रहुतं हुत्वा बलिहरणम्। यस्माद्धे एते अन्ने हुतप्रहुते देवानभाजयत्। तस्मादेतर्ह्यपि गृहिणः काले देवेभ्यो जुह्वति देवेभ्य इदमन्नमस्माभिर्दत्तमिति मन्वानाः एव जुह्वति प्रजुह्वति च हुत्वा बलिहरणञ्च कुर्वते इत्यर्थः" भा०।

प्रहृत न० प्र+हृ-भावे क्त। १प्रहारे २आघाते। कर्मणि क्त। ३क्षतप्रहारे त्रि० ४ऋषिभेदे पु०। तस्यापत्यम् अश्वा० फञ्। प्राहृतायन तदपत्ये पुंस्त्री०।

प्रहेण(ल)क न० पिष्टकभेदे हारा०।

प्रहेलिका स्त्री प्र+हेल-इन् संज्ञायां कन्। दुर्विज्ञानार्थप्रश्ने (हेँयालि) अमरः। तल्लक्षणादि विदग्धमु०उक्तं यथा "व्यलीकस्य कस्यचिं स्वरूपार्थस्य गोपनात्। यत्र वाक्यान्तरार्थौ कथ्येते सा प्रहेलिका। सा द्विधार्थी च शब्दी च विख्याता प्रश्नगोचने। आर्थी स्यादर्थविज्ञानात् शाब्दी शब्दस्य भङ्गतः" आर्थी यथा "तरुण्यालिङ्गितः कण्ठे नितम्बस्थलमाश्रितः। गुरुणां सन्निधानेऽपि कः शृणोति सुदुर्बुद्धिः"(देवदूतजलपूर्णकुम्भः उत्तरम्) शाब्दी यथा "सदारिमध्यापि न वैरियुक्ता नितान्तरक्ताप्यसितैव नित्यम्। यशोज्ज्वलादित्यपि नैव दूती का नाम कान्तेति निवेदयन्ती" (सारिका उत्तरम्) काव्यादर्शे तु "प्रहेलिका प्रकाराणां पुनरुद्दिश्यते गतिः। क्रीडागोष्ठीविनोदेषु तज्ज्ञैराकीर्णमन्त्रणे। परव्यामोहने चापि सोपयोगाः प्रहेलिकाः। चाडुः समाप्ततां नाम गूढार्थां पदसन्धिना। वञ्चिता२ऽन्यत्वरूढेन यत्र शब्देन वचना। व्युत्क्रान्ता२ऽतिव्यवस्थितप्रयोगान्मोहकारिणी। सा स्यात् प्रसृप्ता४ यस्यां दुर्बोधार्थां पदावली। समानरूपा गोप्यार्थैरोपितैर्यत्र चिता पदैः। पक्षप्रा६क्षरच्युतासिद्धमात्रव्युत्पादितश्रुतिः। संख्याता७ नाम संख्यानं यत्र व्यामोहकारणम्। अन्यथा भासते यत्र वाक्यार्थः सा प्रकल्पिताद। सा नानान्तरिता८ नाम यस्यां नानार्थकल्पना। निभृता९० निभृतान्यार्थां तुल्यधर्मस्य या गिरा। समानशब्दो११ऽन्यस्यशब्दप्रच्छादसाधिता। संमूढा१२ नाम सा यत्रान्निर्दिष्टार्थापि मूढधी। योगमालाङ्किता नाम वा स्यात् सा परिकारिका१३। एकच्छन्ना१४ऽन्यचित्तं व्यक्तं यस्यामाश्रवगोपनम्। सा भवेदुभयच्छन्ना१५ यस्यामुभयगोपनम्। सङ्कीर्णा१६ नाम सा यस्यां नानालक्षणसङ्करः। एताः षोड़श निर्दिष्टाः पूर्वाचार्यैः प्रहेलिकाः। दुष्टप्रहेलिकाश्चान्याः सौरभीतश्चतुर्दश" इति। एताः समागताश्चतुःषष्टिः षोड़श प्रहेलिकाः पूर्वाचार्यैः निर्दिष्टाः सदुक्तत्वेन कथिताः इत्यर्थः, तैः पूर्वाचार्यैरेव अन्याः चतुर्दश दुष्टाः प्रहेलिकाः च्युताक्षरादिकाः अधीता पठिताः सदोषत्वेन कीर्त्तिता इत्यर्थः। एतासांसदाहरणानि तत्र द्रष्टव्यानि। ताश्चतुर्दश सरस्वतीकण्ठा० दृश्याः। "काव्यानर्घभूतत्वात् नालङ्कारः प्रहेलिका" सा०द०।

प्रहोषिन् त्रि० प्र+हु-वा० इनि सुडागमश्च। प्रकर्षेण हवनकर्त्तरि ऋ० ८८२।४

प्रह्ला(ह्ला)द पु० १हिरण्यकशिपोः पुत्रभेदे भा०आ० ६५अ०। तच्चरितं भाग० ७५ अध्यायादौ दृश्यम्। तस्य पूर्वजन्मकथा पाद्मे भूमि०५अ० २नागभेदे भा०स०८अ०। ह्लाद-भावे घञ्। ३नमोदे विश्वः ह्लाद-भावे घञ्। ४शब्दे धरणिः। त्रिका०। २आसक्तौ हेमच०।

प्रह्व त्रि० प्र+हृ-त्वच् नि० साधोपः। १नम्रे उज्ज्वलद०।

प्रह्वलीका स्त्री प्रवल्लिका+पृषो०। प्रहेलिकायां हेका०।

प्रा पूर्त्तौ अदा० प०सक० अनिट्। प्राति अप्रासीत् पप्रौ कविकल्पद्रुमे प्रा इति पाठः तत्रार्थे।

प्रांशु त्रि० प्रकृष्टा अंशवोऽस्य। १उच्चे उन्नते अमरः। वैवस्वतमनोः २पुत्रभेदे पु० हरिवं०१०अ०। वत्सप्रीस्तस्य सदक्षिणायां जाते ३पुत्रभेदे पु० मार्क०पु० ११८अ०।

प्राकर पु० द्युतिमद्भूपस्य पुत्रभेदे मार्क०पु० ९१अ०।

प्राकरणिक त्रि० प्रकरेण प्राप्तं ठक्। प्रकरणप्राप्ते।

प्राकर्षिक त्रि०प्रकर्षे नित्यमर्हति छेदा०ठञ्; नित्यप्रकर्षार्हे

प्राकषिक पु० प्र+आ+कष-किकन्। १स्त्रीणां नर्त्तके २परदारोपजीविनि च उज्ज्वलद०।

प्राकाम्य न० प्रकामस्य भावः ष्यञ्। १अष्टविधैश्वर्यमध्ये इच्छानभिघातरूपे ऐश्वर्ये २आशीर्वादातुमतौ च हेमच० "प्राकाम्यं ते विभूतिषु" कुमारः। अस्मिन्नर्थे इन् पु० ऐश्वर्यशब्दे १५४८ पृ० दृश्यम्।

प्राकार पु०प्रकीर्यते प्र+कृ-आधारे घञ् दीर्घः। इष्टादि-

रचिते वेष्टनाकारे प्राचीरादौ "अर्हं" विंशतिहस्तेभ्यः प्राकारं न शुभावहम्। प्रस्थे हस्तद्वयात् पूर्वं दीर्घे हस्तत्रयं तथा। यष्टिषां शुभदं द्वारं प्राकारस्य यष्टयस्य च। न मध्यदेशे कर्त्तव्यं किञ्चिच्छ्रेयाधिके शुभम्" ब्रह्मवै० पु० ११३अ० तन्मानाद्युक्तम्। अस्य स्त्रीत्वमार्षम्। भावे घञ्। २सर्वतो विस्तारे पु०।

प्राकारमर्दिन् त्रि० प्राकारं मृद्नाति मृद्-णिनि ह्रस्व०। प्राकारभेदके। ततः बाहु० अपत्ये इञ् संयोगोपधेत्यन्त्यत्वात् न टिलोपः। प्राकारमर्दिनि तदपत्ये पुंस्त्री०।

प्राकारीय त्रि० प्राकारायाम् छ। १प्राकारप्रकृतौ इष्टकादौ। प्राकार आवासिष्टकानां स्यात् प्राकारोऽस्त्रिन् वा स्यात् छ। २सप्तवत्प्राकारायामिष्टकायाम् ३सप्तवत्प्राकारे देशे च।

प्राकृत त्रि० प्रकृष्टसंस्कृतसंस्कार्य्यं यस्य। १नीचे। प्रकृतेरवम् अण्। २प्रकृतिसम्बन्धिनि। प्रकृत्या स्वभावेन निर्वृत्तः अण्। ३स्वभावसिद्धे "बभूव प्राकृतः शिशुः" भाग० १०। प्रकृतेः संस्कृतशब्दात् आगतः अण्। ४नाटकादौ प्रसिद्धे अपभ्रंशशब्दभेदे अमरः। प्राकृतभाषायाः संस्कृतशब्दप्रकृतिकत्वात् तथात्वं प्राकृतलङ्केश्वरादौ वररुचिप्रादिप्रणीते यन्थेऽस्य विस्तरो द्रष्टव्यः। स्वभावतः सिद्धयोः पूर्वनिष्पन्नयोः। स्वदेशानन्तरदेशवर्त्ती रूपः प्राकृतः अत्र यत्र सन्निकृष्टविप्रकृष्टविषयप्राप्तित्वसम्भवात्तस्य तथात्वम् तत्रानन्तरविषयस्थो रूपः प्राकृतं मित्रं मध्यवर्त्तिरूपविषयस्य उभयोः निष्टशासम्भवात् तथात्वम्। "स्वाताम्भित्रौ मित्रे च सङ्कल्पप्राकृतावपि" माघ २यसर्गश्लोकव्याख्याने मल्लिनाथः।

प्राकृतज्वर पु० "वर्षाशरदसन्तेषु वातादेः प्राकृतः क्रमात्" ज्वराधिकारे माधवोक्ते ज्वरभेदे।

प्राकृतप्रलय कर्म०। प्रलयभेदे प्रलयशब्दे दृश्यम्।

प्राकृतमित्र न० कर्म०। स्वभावसिद्धे मित्रे विषयानन्तरस्य रूपस्यात् प्राकृतत्वात् अव्यवहितोत्तरविषयस्थे रूपे।

प्राकृतयत्नु पु० कर्म०। विषयानन्तरवर्त्तिनि रूपे। [सिद्धे

प्राकृतिक त्रि० प्रकृत्या निर्वृत्तः ठञ्। प्रकृतिसाध्ये स्वभाव-

प्राक्काय त्रि० प्राक् पूर्ववर्त्ती कायो यत्र दिने। इक्षिनः इक्षनक्षत्रस्य पूर्ववर्त्तिकायायुते दिने "प्राक्काये कुञ्जरस्य च" मतुः। कुञ्जरच्छायशब्दे २०६८पृ०दृश्यम्।

प्राक्तन त्रि० प्राचि काले देशे प्राच्यां दिशि वा भवः ट्यु तट्च। प्रागभवे "प्रमेदिरे प्राक्तनजन्मविद्याः" कुमा०। स्त्रियां ङीप्। २पूर्ववर्त्तिनि कारणे च।

प्राक्तनकर्म न० प्राक्तनं कारणं कर्म यस्य। कर्मरूपकारणहेतुके अदृष्टे १धर्मे २पुण्ये च अदृ०।

प्राक्पद पु० कर्म०। पूर्ववर्त्तिनि पदे।

प्राक्पुष्पा स्त्री प्राक् पुष्पं यस्याः अजा० टाप्। प्राग्वर्त्तिपुष्पान्वितलतायाम्। (काँटाल) जटाधरः।

प्राक्फल्गु पु० प्राक्फल्गुनस्य। पुष्पं विना फलयुते वनस्पतौ

प्राक्फल्गुनी स्त्री कर्म०। पूर्वफल्गुनीनक्षत्रे तत्र भवः ठञ्। प्राक्फल्गुनिक इक्षस्तौ। [इक्षस्तौ शब्दे।

प्राक्फल्गुनीभव पु० प्राक्फल्गुन्यां भवति भू-अच्।

प्राक्फाल्गुन पु०प्राक्फाल्गुन्यां भवः अण्। इक्षस्तौ शब्दे।

प्राक्शङ्कवत् पु० ऋषिभेदे भा०अ०५३अ०। [सन्ध्यायाम्।

प्राक्सन्ध्या स्त्री कर्म०। पूर्वसंध्यायां सूर्य्योदयात्पूर्वायां

प्राक्सवन न० प्राक्कालिकं सवनम्। यज्ञिये प्रथमसवने।

प्राक्सौमिक त्रि०सोमात् सोमयागात् प्राक् अव्ययी० प्राक्सोमं तत्र भवः ठञ् उत्तरपदवृद्धिः। सोमयागात् प्राक्कर्त्तव्ये अग्निहोत्रदर्शपौर्णमासपशुयागचातुर्मास्ययागरूपे १क्रियाकलापे २वृद्धौ स्त्री ङीप्। "प्राक्सौमिकीः क्रियाः कुर्यात् यस्याङ्गं वार्षिकं भवेत्" याज्ञ० वाक्यालङ्कारायां मिता० दृश्यम्।

प्राक्स्रोतस् स्त्री प्राग्वाहि स्रोतोऽस्याः। १नद्यां "प्राक्स्रोतसो नद्यः प्रत्यक्स्रोतसो नदा नर्मदां विनेत्याहुः" भल्लि० धृतवाक्यम्।

प्रागग्र त्रि० प्राक् अग्रं यस्य। पूर्वाभिमुखे।

प्रागग्र्य त्रि० प्रशस्यो दूरदेशादि प्रगस्या० चतुरर्थ्यां ञ्य। प्रशस्यो दूरदेशादौ।

प्रागभाव पु० प्राग्वर्त्ती अभावः। इह कपाले घटो भविष्यतीत्यादिप्रतीतिसिद्धे संसर्गाभावभेदे "प्रागभावस्तया ध्वंसोऽप्यत्यन्ताभाव एव च। एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते" भाषा०। तल्लक्षणन्तु ध्वंसप्रतियोगित्वे सत्यभावत्वम्। स च उपादानदेशः एव वर्त्तते नान्यत्र। तस्य च सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वं नास्ति किन्तु तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वम्। स च प्रतियोगिजनकः इति न्यायमते। सांख्यादिमते भावस्यानागतावस्थैव प्रागभावपदवाच्येति भेदः।

प्रागल्भ्य न० प्रगल्भस्य भावः ष्यञ्। १प्रगल्भतायां "प्रागल्भ्यहीनस्य नरस्य विद्या शस्त्रं यथा कापुरुषस्य हस्ते"

ब्यो० त०। "निःसाध्यत्वं प्रागभ्यम्" सा० उक्ते
२भवगून्यत्वरूपे स्त्रीणां सात्त्विकभावभेदे च।

प्रागुदीची स्त्री प्राच्या उदीच्या मध्यराला दिक् ब०स०। पूर्वोत्तरदिशोरन्तरालायां दिशि विदिशि ईशानकोणे।

प्राग्ज्योतिष पु०कामरूपदेशे हेमच०। तत्र पूर्वं नरकासुरस्य पुरी आसीत् यथा कालिका० २७अ० "करतोया सरित्तत्र गङ्गा पूर्वभागावधिस्थिता। यावल्लिखितकान्तास्ति तावद्देशं पुरं तव। तत्र देवी महामाया योगनिद्रा जगत्प्रसूः। कामाख्यारूपमास्थाय सदा तिष्ठति योगिनी। तत्रास्ति नदराजोऽयं लौहित्यो ब्रह्मणः सुतः। तत्रैव दश दिक्पालाः स्वे स्वे पीठे व्यवस्थिताः। तत्र स्वयं महादेवो ब्रह्मा वाऽऽस्ते(स्थिरः)सर्वदा। चन्द्रः सूर्यश्च सततं वसेत् तत्रैव पुत्रक!। सर्वं क्रीडार्थमायाता रुद्रस्यैवेशसत्तमम्। तत्र श्रीः सर्वतो भद्रा भीष्मक त्वं सदा वस। अत्रैव हि स्थितो ब्रह्मा प्राङ् नक्षत्रं ससर्ज ह। ततः प्राग्ज्योतिषाख्येयं पुरी शक्रपुरीसमा। अत्र त्वं वस भद्रन्ते ह्यभिषिक्तो मया स्वयम्"। नरकं प्रति भगवदुक्तिः। द्वापरे तत्र भगदत्तो नृप आसीत् यथोक्तम् "तेनैव सहितः सैन्यैः प्राग्ज्योतिषिपुराद्वसु। यत्र राजा महानासीद्भगदत्तो विशाम्पते!" भा०स०२८अ०।

प्रागभक्त न० सप्तमीतोऽन्ते भक्तभक्षणात् प्राक्कालरूपे औषधसेवनकालभेदे "अत ऊर्द्धं दशौषधकालान्वक्ष्यामः। तत्र त्रिभक्तं। प्रागभक्त२मधोभक्तं३ मध्येभक्त४मन्तराभक्तं५ सभक्तं६ सासृग्७ सुक्तं८ ह्यर्धं (सभक्तमभक्तं वा) ८।६ पाश्चान्तरा।१०इति दशौषधकालाः" इत्युपक्रमे "प्रागभक्तं नाम यत्तु प्रागभक्तस्योपयुज्यते। शीघ्रं विपाकमुपयाति बलं न हिंसादाहृतं न च सुखवेदनाश्चिरेति। प्रागभक्तसेवितमधो बलमादधाति दद्याच्च दृढगिरुभीरुवराङ्गनाभ्यः"।

प्रागभार पु०प्रकृष्टो भारः प्रा०स०। १उत्कर्षे २परभागे "मांसमस्मिन्कपङ्क प्रागभारः" प्रबोधचन्द्रोदयः। ३पर्वतस्याग्रभागे त्रिका०। प्रागभाव तदार्थे त्रिका० पाठान्तरम्। स च प्राग्वर्त्तिनि च।

प्राग्रहर त्रि० प्राग्रे प्रकृष्टाग्रे स्थितेऽर्थे रुह-अच्। श्रेष्ठे

प्राग्राट न० प्राग्रे अटति अट-अच्। अघनदभि (पातादृ) त्रिका०।

प्राग्र्य त्रि० प्रकर्षेणाग्रे भवः यत्। श्रेष्ठे अमरः।

प्राग्वंश पु० प्राक् वंशः सपत्नीकयजमानादिसदनादयोऽत्र। ऋविर्द्धानात् पूर्वभागस्थे यजमानादिस्थित्यर्थे गृहे अमरः। २विष्णौ च "प्राग्वंशो वंशवर्द्धनः" विष्णुसं०। "अन्यस्य वंशः पाश्चात्त्यः अस्य तु वंशः प्रपञ्चः प्रागेव न पाश्चात्त्यः" भा०।

प्राग्वचन न०प्रागुक्तं वचनम्। मन्वादिभिः पूर्वसूक्ते वचने। "यथोक्तमेतद्वचनं प्रागेव मनुना पुरा। प्रागिदं वचनं प्रोक्तमतः प्राग्वचनं विदुः" भा० शा० १२।अ०।

प्राग्वत् अव्य० प्रागिव वति। पूर्वदेशकालतुल्ये। [हेमच०।

प्राघात पु० प्रहन्यतेऽत्र प्र+आ+हन-आधारे घञ्। वृक्षे

प्राघार पु० प्र+हृ-चरणे भावे घञ् दीर्घः। यज्ञादौ वह्नेरुपरि घृतादेःक्षरणे अमरः।

प्राघुण पु० प्र+आ-घुण-क। अतिथौ त्रिका०।

प्राघुणिक पु० प्रघुण+स्वार्थे ठक्। अतिथौ [तिथौ हेमच०

प्राघूर्णिक पु० प्र+आ+घूर्ण-भावे घञ् तत्र साधु ठञ्।

प्राङ् न०प्रकृतं प्रकृष्टं वाऽङ्गमस्य प्रा०ब०। १पश्चवादौ शब्दर० २प्रकृष्टदेशयुते त्रि० स्त्रियां स्वाङ्गत्वात् ङीष्।

प्राङ्गण न० प्रकृष्टमङ्गनं पूर्वं० यत्वम्। १गृहभूमौ शब्दर० (उठान) २अजिरे १पश्चवादौ च हेमच० "अभ्रङ्कषं सूर्यवेधं प्राङ्गणञ्च तथैव च" ब्रह्मवै०ब्र०ख०१०३अ०उक्तेः तस्य सूर्यविद्धत्वमशुभम्। पूर्वपश्चिमायतत्वे हि तस्य सूर्यविद्धत्वं दक्षिणोत्तरायतत्वे च चन्द्रविद्धत्वमिति भेदः।

प्राङ्न्याय पु० "आचारेणावसन्नोऽपि पुनर्लेखयते यदि। सोऽभियोगो जितः पूर्वं प्राङ्न्यायस्य स उच्यते" स्मृक्ते व्यवहारविषये उत्तरभेदे १०६० पृ० दृश्यम्।

प्राङ्मुख त्रि० प्राक् पूर्वदिक्स्थं मुखमस्य। पूर्वदिङ्मुखे स्त्रियां ङीप्। यत्र विशेषो नोक्तः तत्र प्राङ्मुखत्वं आश्वलायनसङ्कल्पादौ द्रष्टव्यम्।

प्राच् अव्य० प्राचि सप्तम्यर्थे अञ्चि तस्य लुक्। प्राचीत्यर्थे।

प्राच् त्रि०प्र+अञ्च-क्विप्। पूर्वे १दिशे २काले च १दिशि स्त्री ङीप्। ४पूज्यपूजयोरन्तरालदिशि स्त्री "यत्रैव भानुस्तु विभात्युदेति प्राचीति तां वेदविदो वदन्ति। तथा पुरः पूजकपूज्ययोश्च सदागमज्ञा प्रवदन्ति तज्ज्ञे" तिं०त० धृतवाक्यम्। एतच्च "शिवपूजाव्यतिरिक्तविषयम्" वाचस्पतिमिश्राः। इकारान्तत्वात् वा टाप्। "प्राचाजिह्मम्" ऋ० १।१४०।२। "प्राचामन्युः" ऋ०८।६१।६ "प्राची वै दैवी दिक् पुरस्ताद् देवाः, प्रत्यञ्चो मनुष्यास्ताहुपाद्दक्षाः तस्मात्तेभ्यः प्राङ्तिष्ठन् जुहोति" श्रुतः २।१।१।६

प्राच पु०प्र+अञ्च-भावे घञ्। १प्रकर्षेण रञ्जने "प्राचो-

उच्यते" ताण्ड्य॰ ब्रा॰ १।८२ सू॰। प्र+अनच्-वञ्चार्थे भावे वञ्। २प्रकृष्टगमने प्राचैःशब्दे ऋ॰भाष्ये दृश्यम्।

प्राचिका स्त्री प्राचिनोति मधु प्र+आ+चि-ड स्वार्थे कापि अत इत्त्वम्। वनमक्षिकायाम् अमरः।

प्राचिन्वत् पु॰ राजभेदे "जनमेजयः खल्वनन्तां नामोपयेमे भार्यां तस्यामस्य जज्ञे प्राचिन्वान्नाम। यः प्राचीं दिशं जिगाय यावत् सूर्योदयात् ततस्तस्य प्राचिन्वत्त्वम्" भा॰ आ॰ ६५ अ॰।

प्राचीन त्रि॰ प्राक्+भवार्थे ख। १पूर्वदिग्देशादौ भवे। २वनस्पतिभेदायाम् (आकनादि) अमरः ३राज्ञायाञ्च स्त्री शब्दच॰ टाप्।

प्राचीनगर्भ पु॰ ऋषिभेदे भा॰आ॰ ३५१अ॰।

प्राचीनपनस पु॰ नित्यकर्म॰। बिल्वे त्रिका॰।

प्राचीनबर्हिस् पु॰। १रुद्रे २स्वयंभुवमनुपुत्रभेदे च हेमच॰। "अत्रिवंशे समुत्पन्नो ब्रह्मयोनिः सनातनः। प्राचीनबर्हिर्भगवां स्वयात् प्रचेतसो दयं" भा॰आ॰ २०८अ॰। "प्राचीनबर्हिर्भगवान् महानासीत् प्रजापतिः। यज्ञविद्यानात् द्विजश्रेष्ठ! येन संवर्द्धिताः प्रजाः। प्राचीनाग्राः कुशास्तस्य पृथिव्यां विश्रुता भुवि!। प्राचीनबर्हिर्भगवान् स्वयातो भुवि महाबलः" अग्निपु॰ उक्ते १ऋषिधर्म्मभेदे पुत्रे भा॰अनु॰ १४७ अ॰।

प्राचीनयोग पु॰ प्राचीनो योगोऽस्य। ऋषिभेदे तस्य गोत्रापत्यं गर्गा॰यञ्। प्राचीनयोग्य तद्गोत्रापत्ये पुंस्त्री॰

प्राचीनयोगिनीपुत्र यजुर्वेदवंश्यस्थे ऋषिभेदे शत॰ब्रा॰ १४।८।४।२२।

प्राचीनामलक न॰ नित्यकर्म॰। पानीयामलके अमरः।

प्राचीनावीत न॰ "सव्यं बाहुं सकृत्कृत्य दक्षिणे तु दिजातयः!। प्राचीनावीतमित्युक्तं पैत्र्ये कर्मणि योजयेत्" इत्युक्ते बाह्वादौ कर्त्तव्ये वामकरे बहिष्कृते सति दक्षिणस्कन्धार्पिते यज्ञोपवीतादौ।

प्राचीनावीतिन् पु॰ प्राचीनावीतमस्यास्ति इनि। तद्युते "सकृत्कृते दक्षिणे बाहावुपवीत्युच्यते द्विजः। सव्ये प्राचीनावीती निवीती कण्ठसज्जने" मनुः। गोभिलः "दक्षिणं बाहुमुद्धृत्य शिरोऽवधाय सव्येऽंसे प्रतिष्ठापयति दक्षिणं कक्षमवलम्बं भवति एवं यज्ञोपवीती भवति। सव्यं बाहुमुद्धृत्य शिरोऽवधाय दक्षिणेऽंसे प्रतिष्ठापयति सव्यं कक्षमवलम्बं भवत्येवं प्राचीनावीती भवति"।

प्राचीपति पु॰ इन्द्र॰। इन्द्रे त्रिका॰।

प्राचीर न॰ प्राचीयते प्र+चा-चि-ऋत् दीर्घश्च। सर्वतो वेष्टनाकारे इष्टकादिनिर्मिते आवरणे (पाँचिर) अमरः अस्य पुंस्त्वं तन्नामादि च युक्तिकल्पतरावुक्तं यथा "गजैरभेद्यामनुजैरलङ्घ्याः प्राचीरखण्डा ऋषतेर्भवन्ति। राजदण्डोद्यताः सर्वे प्राचीराः पृथिवीभुजः। विंशतिस्ते तु पञ्चाग्ने पार्श्वयोः पञ्च पञ्च च। पञ्चात् पञ्च च विज्ञेयाः प्राचीराः पृथिवीभुजः। सर्वप्रान्ते त्वावरणो नाम प्राचीर उच्यते। प्रतिप्राकारसंस्थानं द्वारं नाभिसुखस्थितम्"। "राजच्छत्रान्तरे पञ्च राजद्वारे महीपतेः। राजदण्डत्रये सार्द्धे जयद्वारे प्रतिष्ठिताः। अद्वारे राजदण्डार्द्धे प्राचीराः पृथिवीपतेः। एवं व्यवस्थिते स्थाने मध्यमे तद्धि तिष्ठति। राजच्छत्रद्वयं सार्द्धमायामे जयवस्तुनि। परिखाढ्ये पञ्च राजदण्डान्तिष्ठन्ति मध्यतः। राजपट्टाभिधानेन स्थानमेतद्विगद्यते। अस्मिन् स्थिते नृपः कृत्वा सुचिरं सुखमश्नुते"

प्राचेतस पु॰ प्रचेतस्+अपत्यादौ अण्। १वाल्मीकिमुनौ २प्राचीनबर्हिषो ऋषस्य पुत्रे ३दक्षस्य पुत्रे च।

प्राचैस् न॰ प्र+आ+चि-आ॰डैसि। प्राचीने ऋ॰१।८३।२भाष्यम्। तत्र च पक्षान्तरे प्राचैरित्यत्र प्राचशब्दकृतीयाबन्तवचनान्न इत्युक्त्वा प्राचैः प्राञ्चनैरित्युक्तम्।

प्राच्य त्रि॰ प्राचि भवः यत्। १शरावत्या नद्याः प्राग्दक्षिणे देशे अमरः। प्राच्यां दिशि प्राचि देशे काले वा २भवे त्रि॰। "प्राच्यैर्बालका कर्त्तव्या" दायभा॰।

प्राच्यवाट न॰ प्राच्यो वाटो यत्र। प्राग्देशस्थे दयभा॰।

प्राच्यवृत्ति स्त्री "पूर्वेण युतोऽव पञ्चपः प्राच्यवृत्तिरुदितेऽष्ट युग्मगः" छन्॰उक्ते १छन्दोभेदे। कर्म॰। २प्राचीनावां वृत्तौ स्त्री ब॰स॰। शतबाढवृत्तियुते त्रि॰।

प्राच्यसप्तसम त्रि॰ सप्त समाः प्रमाणमस्य मात्रच् तस्य द्विगुत्वात् लुक् कर्म॰। प्राचीने सप्तसमे "द्विगौ प्रमाणे" पा॰ तस्य प्रकृतिस्वरः।

प्राच्यायन पुंस्त्री॰ प्राचश्च गोत्रापत्यम् अश्वा॰ फञ्। प्राचश्च गोत्रापत्ये। [प्राङ्विवेकः।

प्राच्छ् त्रि॰ पृच्छति प्रच्छ-क्विप् निपा॰ दीर्घश्च। शिल्पभेदे

प्राजक पु॰ प्र+अज-ण्वुल् वृद्धिभावाभावः। सारथौ "बलाय वर्त्तते युग्यं वैगुण्याद् प्राजकस्य च" मनुः।

प्राजन न॰प्र+अज-करणे ल्युट् व्यभावः। तोदने पश्वादेर्यष्टयादौ (पाचनी) अमरः। [प्राजयाजञ्च प्रजया कृत्वा या।

प्राजया अव्य॰ प्राजनक्रियायाम् वाचा॰ वा गतिसंज्ञा।

प्राञ्च [४५०७] प्राड्

प्राजरहा अव्य० रहिक्रियायाम् साक्षा० वा गतिसंज्ञा। प्राजरहाकृत्य प्राजरहा कृत्वा वा।

प्राजहित पु० गार्हपत्येऽग्नौ काला० औ० ८।६।१२

प्राजापत त्रि० प्रजापतेः धर्म्यं मह्यिका० अण्। प्रजापतेर्धर्म्ये

प्राजापत्य पु० प्रजापतिर्देवताऽस्य यक्। १अष्टविवाहमध्ये विवाहभेदे "आर्षो दैवस्तथैवार्षः प्राजापत्यस्तथाऽऽसुरः" मनुना अष्ट विवाहानुद्दिश्य "सहोभौ चरतां धर्ममिति वाचानुभाष्य च। कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः" इति लक्षितः "ब्रह्मचर्यं समाप्तस्नातं सदृशं ब्रह्मचर्यादयाचितम्। ब्रह्मचर्यं परञ्च नाश्नीयात् प्राजापत्यमिति स्मृतम्" इति व्यासोक्ते द्वादशाहसाध्ये २व्रतभेदे न०। ३प्रजापत्यधिदेवताके चरौ पौ त्रि०। ४प्रव्रज्याश्रमाङ्गे सर्वस्वदक्षिणकेष्टिभेदे स्त्री "प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणाम्। आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद्गृहात्" याज्ञ०। ५रोहिणीनक्षत्रे न० ६प्रयागतीर्थे न० त्रिका० ७जैनभेदे पु० हेमच०। [जायाया धर्म्ये।

प्राजावत त्रि० प्रजावत्या धर्म्यं मह्यिका० अण्। स्वार्थे

प्राजिन् पु०प्र+अज–णिनि अभावः। पक्षिभेदे मेदि० अमरः

प्राजिष्ठ पु० प्र+अज–इष्ठच् वीभावाभावः। सारथौ।

प्राजेय न०प्रजेशो देवताऽस्य अण्। १रोहिणीनक्षत्रे २प्रजापतिदेवताके चरौ पौ त्रि०। प्राजेश्वरादयोऽप्यत्र भवत्र।

प्राज्ञ पु०प्रकर्षेण जानाति प्र–ज्ञा–क स्वार्थे अण्। १पण्डिते अमरः २राजगुरौ राजनि०। प्रज्ञाऽस्त्यस्य अण्। २बुद्धिमति ३दक्षे च त्रि०। प्रज्ञा+स्वार्थे अण्। ४बुद्धौ स्त्री टाप्। प्राज्ञस्य पत्नी ङीप्। प्राज्ञी ७प्राज्ञपत्न्यां स्त्री। ७कङ्किनो ख्येऽम्भातरि पु० कङ्किपु० २अ०। प्रकर्षेण अज्ञः। वेदान्तसारोक्ते दृश्यत्वपरिच्छिन्नचैतन्ये एकाज्ञानभासके जीवचैतन्ये पु० "एतदुपहितचैतन्यस्यसत्त्वज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञ इत्युच्यते। एकाज्ञानावभासकत्वादस्य प्राज्ञत्वम् अस्यैवोपाधितयाऽनतिप्रकाशकत्वम्" वेदान्तसारः। प्रज्ञा+स्वार्थे अण् स्त्रियां ङीप्। प्राज्ञी ६प्रकर्षपत्न्याम् स्त्री। [त्रि० हेमच०।

प्राज्य न०प्रकृष्टमाज्यं प्र+अञ्ज–क्यप् वा। १प्रकृष्टदीप्तौ २प्रचुरे

प्राञ्च् त्रि० प्र+अञ्च्+क्विप्। पूर्वदेशकालवर्त्तिनि। कक्षेनखोपाभावात् भत्वे प्राञ्चः प्राङ्ङ इत्येव।

प्राञ्चल त्रि० प्र+अञ्ज–अलच्। १सरले २ऋजौ च जटा०।

प्राञ्जलि त्रि० प्रवृद्धोऽञ्जलिर्येन प्रा०ब०। १बद्धाञ्जलिपुटे प्रा०स०। २बद्धाञ्जलौ पु०।

प्राञ्जलिन् त्रि० प्राञ्जलिरस्त्यस्य ब्रीह्या० इनि। बद्धाञ्जलियुक्ते स्त्रियां ङीप्।

प्राडाहत पु० हृत०। प्रश्नकारकेणाहृते तस्यापत्यमिञ् प्राडाहति तदपत्ये ततः यूनि फक् तौल्व० न लुक्। प्राडाहतायन तदीये यून्यपत्ये पुंस्त्री०।

प्राड्वि(वा)वेक पु० अर्थिप्रत्यर्थिनौ पृच्छति प्रच्छ–क्विप् प्राट्, तयोर्वाक्यं विरुद्धाविरुद्धतया विवेचयति वक्ति वा वि+विच–वि+वच–वा संज्ञायां घञ् कर्म०। व्यवहारदर्शनाय राजनियुक्ते १विचारके स्वयं विचारक २न्यायसभाये च तद्भक्षणादिकं वीरमि० उक्तं यथा "विवादे पृच्छति प्रश्नं प्रतिप्रश्नं तथैव च। क्रियापूर्वं प्राग्वदति प्राड्विवाकस्ततः स्मृतः" हरिस्मृतिः। व्यासोऽपि "विवादानुगतं पृष्ट्वा सभ्यस्तत् प्रयत्नतः। विचारयति येनासौ प्राड्विवेकस्ततः स्मृतः" गौतमेन तु हरिस्मृतिवदुद्योगार्थः प्राड्विवाकशब्दस्य दर्शितः। "प्राड्विवाको वादिप्रतिवादिनौ पृच्छतीति प्राट् ताभ्यामुक्तं सभ्यैः सह विविच्य वक्तीतिप्राड्विवाकः" इति हरिस्मृतिना। विचारयतीत्यभिधानाद्विवेकशब्दस्य व्युत्पत्तिरुक्ता। विविच्य वक्तीति विवाक इति। इति गौतमेन। नारदशारीतौ "यथा शल्यं भिषक्कायादुद्धरेदुद्धृतञ्च तत्। प्राड्विवाकस्तथा शल्यमुद्धरेदुद्धृतञ्च तत्" इति। शल्यञ्च धर्मेऽधर्मेमिश्रणम्। यथा च मनुः "त्रिषु धर्मेषु यत्पापं तत्तेषूपदिशेत्फलम्। शल्यवाञ्छ निष्क्रन्तिं विद्वांसञ्च समाप्नुयात्" इति। अयञ्च राज्ञा स्वयंव्यवहारदर्शने त्रियमाणेऽस्य सहायः "सप्राड्विवाकः" इति स्मरणात्। यदा तु राजा कार्यान्तरव्यग्रतया स्वास्थ्याभावेन वा स्वयं व्यवहारदर्शनासमर्थस्तदा तत्प्रतिनिधिः। "यदा स्वयं न कुर्यात् तु नृपतिः कार्यदर्शनम्। तदा नियुञ्ज्याद्विद्वांसं ब्राह्मणं कार्यदर्शने। सोऽस्य कार्याणि संपश्येत्सभ्यैरेव त्रिभिर्वृतः। सभामेव प्रविश्याग्र्यामासीनः स्थित एव वा" इति मनुवचनात्। सभ्यसङ्ख्यादसाधारणनिर्वृत्तिः त्रिपदत्वात् संख्यान्तरनिवृत्तिः। अत्र भ्यामाभिति स्मृतिचन्द्रिकाकारः। तत्र हरेरर्थत्वप्रदर्शनादयुक्तमित्युपलक्षणत्वमेव न्याय्यम्। "अपश्यता कार्यवशाद्व्यवहारान्नृपेण तु। सभ्यैः स च नियोक्तव्यो ब्राह्मणः सर्वधर्मवित्" इति याज्ञवल्क्यवचनात्। "यदा न कुर्यान्नृपतिः स्वयं कार्यविनिर्णयम्। तदा तत्

नियुञ्जीत ब्राह्मणं शास्त्रपारगम्। दान्तं कुलीनं मध्यस्थमतहेगकरं स्थिरम्। परलोकभीरुं धर्मिष्ठमदुष्टं क्रोधवर्जितम्" इति कात्यायनस्मरणात्। शास्त्रपारगं बहुशास्त्राभियोगशालिनम्। यथा च स एव "एकं शास्त्रमधीयानो न विद्यात् शास्त्रनिश्चयम्। तस्माद्बहुशास्त्रमः कार्यो विचारेष्वतमो मुनेः"। एवंविधब्राह्मणाभावे क्षत्रियं वैश्यं वा प्रतिनिदधीत न शूद्रम्। तथा च स एव "यत्र विप्रो न विद्वान् स्यात् क्षत्रियं तत्र योजयेत्। वैश्यं वा धर्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत्" मनुः "जातिमात्रोपजीवी वा कामं स्याद्ब्राह्मणब्रुवः। धर्मप्रवक्ता नृपतेर्न तु शूद्रः कथञ्चन। यस्य राष्ट्रे तु कुरुते शूद्रो धर्मविवेचनम्। तस्य सीदति तद्राष्ट्रं पङ्के गौरिव पश्यतः"। व्यासः "द्विजान् विहाय यः पश्येत् कार्याणि वृषलैः सह। तस्य प्रसुप्यते राष्ट्रं बलं कोशश्च नश्यति"। इदं वचनं स्मृतिचन्द्रिकायाममात्यादिस्थानेऽपि शूद्रं वर्जयेत् किन्तु धर्मनिर्णय एवेदंपरस्मृतम् दोषातिशयकीर्त्तनात्। कल्पतरौ तिथितु प्रकरणाद्व्यवहारदर्शन एव शूद्रवर्जकत्वेन लिखितम्। अयञ्च प्रतिषेधोऽदृष्टार्थ एव राष्ट्रक्षोभादेरदृष्टद्वारकफलस्यैव कल्पितत्वात्। चण्डेश्वरेण तु शूद्रस्य धर्मज्ञानेऽपि वेदाविरोधप्रतिसन्धानविरहात् तत्प्रतिसन्धानस्य च सम्यगनिर्णयोपायत्वात् त्याग इति युक्तिरप्युक्ता। सा चिन्तादिप्रतिप्रसक्तेत्यन्वाचयभाक्तम्। एते च सर्वे व्यवहारसम्बद्धाः प्रतिषेधा अभिषिक्तक्षत्रियाधिकारिकास्तत्स्थानापन्नाद्यधिकारिकाश्च। प्राड्विवाकादयस्त्वर्थोचितया ऋत्विक्स्थानीयाः। यप्राड्विवाक इत्यादिना तेषां गुणभावावगमाश्रियोगोक्तेश्च। "राजाभिषेकसंयुक्तो ब्राह्मणो वा बहुश्रुतः। धर्मासनगतः पश्येद्व्यवहाराननुक्रमः" इति प्रजापतिवचनात्। अत्र राजशब्दोऽवयुत्पत्त्यधिकारप्राप्त्याद्येन क्षत्रियजातिवचनः। अभिषेकसंयुक्त इति वचनात् क्वचिदराज्यभिषिक्तक्षत्रियं प्रकृत्य तदभिधानाद्राज्यभिषिक्तक्षत्रियस्य चाधिकारः। अतश्च तत्प्रयुक्तगुणाद्गुणकल्पयोस्तदुक्तमितैव। प्राड्विवाकादीनान्तु प्राक्प्रदर्शितेभ्यो न्यायेनापि तं वाक्यविशेषादि वाक्येभ्यो राज्ञोऽनिवारणे परं दृष्टादृष्टदोषभागिता। अनियुक्तानान्तु न तत्तापीत्यादि मिताक्षरादौ व्यक्तम्। ब्राह्मणो वेत्यनुकल्पत्वाभिप्रायको वाशब्दो न तूक्तकक्षाधिकारपरः। अतुल्यश्चोहृतः"।

प्राण् पु० प्राणिति प्र+अन–क्विप् पदान्तत्वेऽपि चत्वम्। प्राणे

प्राण पु० प्र+अच–करणे घञ्। १ब्रह्मणि लिङ्गा० "अतएव प्राणः" भा०सू०१।२।१२ अतएव तल्लिङ्गात् प्राणशब्देन ब्रह्मैव तथा हि "सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते" इति छन्दो०४०। सर्वभूतोत्पत्तिप्रलयहेतुरूपलिङ्गात् ब्रह्मण एव प्राणशब्दवाच्यता १।१।१२ शब्दभाष्ये दृश्यम्। २पञ्चवृत्तिके देहस्थे वायौ ३बोधे काव्यजीवने ४रसे ५अग्निभेदे च ७पूरिते त्रि० मेदि०। ८लक्ष्मदेहसमष्ट्युपहितचैतन्ये पु० वेदान्तसा०। ९प्राणोपाधिके जीवे "प्राणोऽहं माता प्राणः पितेति" श्रुतिः। भावे घञ्। १०जीवने च नासाग्रवर्त्तिनि प्राणनवति ११वायौ 'तस्य कर्म नासाग्रतो बहिर्गतिः' श्रीधरस्वामीः। देहस्थः पञ्चवृत्तिकः वायुश्च प्राणापानसमानोदानव्यानरूपः तत्कार्ये ब०व०। तेषां रूपादि शा०ति०व्या० योगार्थवे उक्तं यथा "इन्द्रगोपप्रतीकाशं प्राणरूपं प्रकीर्त्तितम्। आस्यनासिकयोर्मध्ये हृन्मध्ये नाभिमध्यगे। प्राणालय इति प्राज्ञैः पादाङ्गुष्ठेऽपि के चन। अपानयत्प्राणोऽयमाहारं च मलार्पितम्। शुक्रं मूत्रं तथोत्सर्गमपानस्तेन भारत। इन्द्रगोपप्रतीकाशः सन्ध्याभ्रसदृशप्रभः। स च मेढ्रे च पायौ च ऊरुवङ्क्षणजानुषु। जङ्घोदरे कुक्षौ च नाभिमूले च तिष्ठति। व्यानोव्यानयते चाङ्गं सर्वव्याधिप्रकोपनः। मलारजनसंपृक्तो ज्ञानोपादानकारकः। स चाक्षिकर्णयोर्मध्ये कण्ठौष्ठे गुल्फयोरपि। ग्रीवास्थाने स्थिरगुदे तिष्ठत्यत्र निरन्तरम्। अन्द्यत्यधरं पक्वं गात्रनेत्रप्रकोपनः। उद्धेजयति सर्वाणि उदानो नाम मारुतः। विद्युत्पाकसवर्णः स्याद्भक्ष्यान्नपचनकारकः। पादयोर्हस्तयोश्चापि तत्सन्धिषु च वर्त्तते। पीतं भक्षितमात्रं रक्तपित्तकफान्वितम्। समं नयति सर्वाणि समानो नाम मारुतः। गोक्षीरसदृशाकारः सर्वदेहे व्यवस्थितः"। स च सांख्यमते इन्द्रियाणां सामान्यकरणवृत्तिरूपः न तु वायुविकारः यथोक्तं सां०सू० प्र०भा०

"सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च" सू०। "प्राणादिरूपाः पञ्च वायुवत्संचारात् वायवो ये प्रसिद्धास्ते सामान्या साधारणी करणस्यान्तःकरणस्य वृत्तिः परिणामभेदा इत्यर्थः। तदेतत् कारिकयोक्तम्। "सामान्यकरणवृत्तिस्तस्य भेदास्तु भवन्त्यसामान्या। सामान्यकर-

वृत्तिः प्राणाद्या वायवः पञ्चः"। इति क्वाऽपि कश्चित् प्राणाद्या वायुविशेषा एव ते चान्तःकरणवृत्त्या जीवनयोनिप्रवृत्तरूपया व्याप्नियन्त इति कृत्वा प्राणाद्यात्मनः करणवृत्तिरित्यभेदनिर्देशः इत्याह। तत्र। "न वायुक्रिये पृथगुपदेशादिति" वेदान्तसूत्रेण प्राणस्य वायुत्ववायुपरिस्पन्दत्वयोः स्फुटं प्रतिषेधादत्रापि तदेकवाक्यतौचित्यात् मनोधर्मस्य कामादेः प्राणशोभकतया सामानाधिकरण्येनैवौचित्याच्च। वायुप्राणयोः पृथगुपदेशश्रुतयस्तु "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापश्च पृथ्वी विश्वस्य धारिणी" इत्याद्याः। अतएव विकृशरीरमध्ये प्राणानामगच्छनेऽपि न न्यूनता बुद्धेरेव क्रियाशक्त्या स्वतन्त्रप्राणादिनामकत्वादिति। अन्तःकरणपरिणामेऽपि वायुतुल्यसञ्चारविशेषादायुदेवताधिष्ठितत्वाच्च वायुव्यपदेशोपपत्तिरिति" प्र०भा०। १२इन्द्रियस्थाने "सप्त शिरसि प्राणाः प्राणाः इन्द्रियाणि" ताण्ड्य० ब्रा० १।१६।२ "सप्त शीर्षण्याः प्राणाः खं नासिके चक्षिणी इन्द्रियाधिष्ठानत्वात्" भा०। १३प्राणे यजुर्वेदे २७३६पृ० मू०। १४देवृत्त्यक्षिष्टे च

तत्र प्राणोत्पत्तिमभिधाय तस्य नौपसङ्ख्यभावः संख्याविशेषावधारणम् इन्द्रियसामान्यवृत्तितो भेदादिकञ्च भा०सू०भा० २।४ पादे समर्थितं यथा

"सप्त गतेर्विशेषितत्वाच्च सू० "उत्पत्तिविषयः श्रुतिविप्रतिषेधः प्राणानां परिकृतः, संख्याविषय इदानीं परिक्रियते। तत्र खल्वयं प्राप्तपरिष्टाद्व्यवस्थति। सप्तेति तु कतीतरे प्राणा इति सम्यधारयति। श्रुतिविप्रतिपत्तेश्चात्र विषयः। क्वचित् सप्त प्राणाः सङ्कीर्त्यन्ते "सप्त प्राणाः प्रभवन्ति तस्मात्" इति। क्वचिदष्टौ प्राणा समूलेन गुणेन सङ्कीर्त्यन्ते "अष्टौ यक्षा अष्टावतियक्षाः" इति, क्वचिन्नव "सप्त वै शीर्षण्याः प्राणा द्वावधाञ्चौ" इति। क्वचिदेव "नव वै पुरुषे प्राणा नाभिर्दशमी" इति। क्वचिदेकादश "दशेमे पुरुषे प्राणा आत्मैकादशः" इति। क्वचिद्द्वादश "सर्वेषां खल्वेषां लोकानां लोकायतनम्" इत्यत्र। क्वचित्त्रयोदश "चक्षुष्य द्रष्टव्यम्" इत्यत्र। एवं हि विप्रतिपन्नाः प्राणेयत्तां प्रति श्रुतयः। किं तावत् प्राप्तं सप्तैव प्राणा इति। कुतः गतेः, यतस्तावन्तोऽवगम्यन्ते "सप्त प्राणाः प्रभवन्ति तस्मात्" इत्येवंविधासु श्रुतिषु। विशेषिताश्चैते "सप्त वै शीर्षण्याः प्राणाः" इत्यत्र। ननु "गुह्याश्चया निहिताः सप्त सप्त" इति वीप्सया श्रूयते, सा सप्तभ्योऽतिरिक्तान् प्राणान् गमयतीति। नैष दोषः, पुरुषभेदाभिप्रायेण वीप्सा प्रतिपुरुषं सप्त सप्त प्राणा इति न तत्त्वभेदाभिप्राया सप्त सप्तान्येऽन्ये प्राणा इति। नन्वष्टत्वादिकापि संख्या प्राणेषूद्दाहृता कथं सप्तैव स्युः। सत्यमुदाहृता विरोधाभावमात्रेण संख्याध्यवसायात्मा, तत्र लोकसञ्चयनोपरोधात् सप्तसंख्याध्यवसानं वृत्तिभेदापेक्षञ्च सङ्घातान्तरत्वमवसेयमिति गम्यते। अत्रोच्यते भा० "इन्द्रादयस्तु स्थितेऽतो नैवम्" सू० "इन्द्रादयस्त्वपरे सप्तभ्योऽतिरिक्ताः प्राणाः श्रूयन्ते, "इन्द्रो वै यज्ञः स कर्मणातिपदेन गृहीतः, इन्द्राभ्यां हि कर्म करोति" इत्येवमाद्यासु श्रुतिषु। एवं स्थिते च (अष्टादिसंख्यासु) सप्तत्वमन्तर्भावाच्चक्ष्यते सम्भावयितुम्। हीनाधिकसङ्घातविप्रतिपत्तौ ह्यधिका सङ्घाता संघाद्या भवति, तस्यां हि हीनानन्तर्भवति, न तु हीनायामधिका। अतश्च नैवं मन्तव्यं लोकसञ्चयानुरोधात् सप्तैव प्राणाः स्युरिति। उत्तरसङ्घातानुरोधात्त्वेकादशैव ते प्राणाः स्युः। तथा चोदाहृता श्रुतिः "दशेमे पुरुषे प्राणा आत्मैकादशः" इति। आत्मशब्देन चान्तःकरणं परिगृह्यते करणाधिकारात्। ननु एकादशत्वादप्यधिके द्वादशत्वोदयत्वे उदाहृते, न त्वेकादशभ्यः कार्यजातेभ्योऽधिकं कार्यजातमस्ति यदर्थमधिकं करणं कल्प्येत। यद्यप्यर्थरूपरसगन्धविषयाः पञ्च बुद्धिभेदास्तदर्थानि पञ्च बुद्धीन्द्रियाणि, वचनादानविहरणोत्सर्गानन्दाः पञ्च कर्मभेदास्तदर्थानि च पञ्च कर्मेन्द्रियाणि, सर्वार्थविषयं त्रैकाल्यवृत्ति मन एकमनेकवृत्तिकं तदेव वृत्तिभेदात् क्वचिद्भिन्नवद्व्यपदिश्यते "मनो बुद्धिरहङ्कारश्चित्तञ्च" इति। तथा च श्रुतिः कामाद्या नानाविधा इत्तीरनुक्रम्याह "एतत् सर्वं मन एव" इति। अपि च सप्तैव शीर्षण्यान् प्राणानभिमन्यमानस्य चत्वार एव प्राणा अभिमताः स्युः स्थानभेदाद्यते चत्वारः खलु सप्त गच्छन्ति, "द्वे श्रोत्रे द्वे चक्षुषी द्वे नासिके एका वाक्" इति। न च तावतामेव वृत्तिभेदा इतरे प्राणा इति शक्यते वक्तुं, इन्द्रादिवृत्तीनामत्यन्तविजातीयत्वात्। तथा "नव वै पुरुषे प्राणा नाभिर्दशमी" इत्यत्रापि देहच्छिद्रभेदाभिप्रायेणैव दश प्राणा उच्यन्ते, न प्राणतत्त्वभेदाभिप्रायेण "ना-

भिर्देशभी" इति वचनात्। न हि नाभिनाम कश्चित् प्राणः प्रसिद्धोऽस्ति, तस्मात्र तु प्राणस्य भवति, नाभिरपि एवं विशेषावतनमित्यतो नाभिर्देशभीत्युच्यते। क्वचिदुपासनार्थं कतिचित् प्राणा गण्यन्ते, क्वचित् प्रदर्शनार्थम्। तदेवं विचित्रे प्राणेवत्ताज्ञाने सति क किं परमात्मानमिति विवेक्तव्यम्। कार्यजातवशात्त्वेकादशत्वात्मानं प्राणविषयं प्रमाणयति स्थितम्। इदमपरा सूत्रावयवयोजना। सप्तैव प्राणाः स्युः यतः सप्तानामेव गतिः श्रूयते "तस्मात्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति" इत्यत्र। ननु सर्वशब्दोऽत्र पठ्यते कथं सप्तानामेव गतिः प्रतिपाद्यत इति, विशेषितत्वादित्याह। सप्तैव हि प्राणाश्चक्षुरादयः स्वकृत्यैर्ताः विशेषिताः इह प्रकृताः, "स यत्रैव चाक्षुषः पुरुषः पराङ् पर्यावर्त्तते अथारूपज्ञो भवति एकीभवति न पश्यतीत्याहुरित्येवमादिनानुक्रमेण। प्रकृतगामी च सर्वशब्दो भवति। यथा सर्वे ब्राह्मणा भोजिता इति ये निमन्त्रिताः प्राकृता ब्राह्मणास्त एव सर्वशब्देनोच्यन्ते नान्ये, एवमिहापि ये प्रकृताः सप्त प्राणास्त एव सर्वशब्देनोच्यन्ते नान्ये इति। ननु च विज्ञानसप्तममनुक्रान्तं कथं सप्तानामेवानुक्रमणं नैष दोषः। मनोविज्ञानयोस्तत्त्वाभेदादुक्तिभेदेऽपि सप्तत्वोपपत्तेः। तस्मात् सप्तैव प्राणा इत्येव प्राप्ते ब्रूमः। कुतादवत्तत्परे सप्तभ्योऽतिरिक्ताः प्राणाः प्रतीयन्ते "कस्मै वै सप्तधा" इत्यादिश्रुतिषु। षड्त्वञ्च बन्धनभागी गृह्यते बध्यते क्षेत्रज्ञोऽनेन षड्संख्यकेन बन्धनेनेति। स च क्षेत्रज्ञो नैकस्मिन्नेव शरीरे बध्यते शरीरान्तरेष्वपि तुल्यत्वादुक्तवत्। तस्माच्छरीरान्तरसञ्चारीदं षड्संख्यकं बन्धनमित्यर्थादुक्तं भवति। तथा च स्मृतिः "पुर्यष्टकेन लिङ्गेन प्राणाद्येन स युज्यते। तेन बद्धस्य वै बन्धो मोक्षो मुक्तस्य तेन च" इति। प्राङ्मोक्षादुषड्संख्यकेनानेन बन्धनेनावियोगं दर्शयति। आथर्वणे च विद्येन्द्रियानुक्रमणे "चक्षुष द्रष्टव्यम्" इत्यत्र तत्त्वबद्धत्वादीन्द्रियाणि सविषयाण्यनुक्रामति "कस्मै चादातव्यम् उपस्थानन्दयितव्यम् पायुष विसर्जयितव्यम् पादौ च गन्तव्यम्" इति। तथा "दशेमे पुरुषे प्राणा आत्मैकादशः ते यदाक्माच्छरीरान्मर्त्यादुत्क्रामन्त्यथ रोदयन्ति" इत्येकादशानां प्राणानामुत्क्रान्तिं दर्शयति। सर्वशब्दोऽपि च प्राणशब्देन सम्बध्यमानोऽप्येषान् प्राणानभिदधानो न प्रकरणवशेन सप्तस्वेव व्यवस्थापयितुं शक्यते, प्रकरणाच्छ्रुतेश्च बलीयस्त्वात्। सर्वे ब्राह्मणा भोजिता इत्यत्रापि सर्वेषामेव अवनिवर्त्तिनां ब्राह्मणानां षड्त्वं न्याय्यं सर्वशब्दसामर्थ्यात्। सर्वभोजनासम्भवात् तु तत्र निमन्त्रितमात्रविषया सर्वशब्दस्य वृत्तिराश्रिता, इह तु न किञ्चित् सर्वशब्दार्थसङ्कोचकारणमस्ति, तस्मात् सर्वशब्देनाम्नायेषां प्राणानां परिपठ्यप्रदर्शनार्थं सप्तानामनुक्रमणमित्यनवद्यम्। तस्मादेकादशैव प्राणाः शब्दतः कार्यतश्चेति सिद्धम्" भा० "अणवश्च" सू० "अधुना प्राणानामेव स्वभावान्तरमभ्युपगच्छति। अणवश्चैते प्रकृताः प्राणाः प्रतिपत्तव्याः। अणुत्वञ्चैषां सोष्मप्रविच्छेदो न परमाणुतुल्यत्वं, तत्तुल्यदेहव्याप्तिकार्यानुपपत्तिप्रसङ्गात्। सूक्ष्मा एते प्राणाः स्थूलाश्चेत् स्युः मरणकाले शरीरान्निर्गच्छतो बिलादहिरिवोपलभ्येरन् अविद्यमाश्च पार्श्वस्थैः। परिच्छिन्नाश्चैते प्राणाः सर्वगताश्चेत् स्युः उत्क्रान्तिगत्यागतिश्रुतिव्याकोपः स्यात्, तद्गुणसारत्वञ्च जीवस्य न सिध्येत्। सर्वगतानामपि वृत्तिलाभः शरीरदेशे स्यादिति चेत्, न, वृत्तिमात्रस्य करणत्वोपपत्तेः। यदेव हृषीकाख्यं वृत्तिः लब्धवृत्ति तस्यैव नः करणत्वं तेन संज्ञामात्रे विवाद इति करणानां व्यापित्वकल्पना निरर्थिका। तस्मात् सूक्ष्माः परिच्छिन्नाश्चैते प्राणा इत्यध्यवस्यामः" भा० "श्रेष्ठश्च" सू० "सूक्ष्मश्च प्राणः इतरप्राणवद्ब्रह्मविकार इत्यतिदिशति। ननु विशेषेणैव सर्वप्राणानां ब्रह्मविकारत्वमाख्यातम्, "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च" इति, मेन्द्रियमनोव्यतिरेकेणापि प्राणस्योत्पत्तिश्रवणात्, "स प्राणमसृजत" इत्यादिश्रवणेभ्यश्च। किमर्थः पुनरतिदेशः, अधिकाशङ्काकारणार्थः। नासदासीयो हि ब्रह्मप्रधाने सूक्ते मन्त्रवर्णो भवति, "न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत् प्रकेतः आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परं किञ्च नास" इति। आनीदिति प्राणकर्मोपादानात् प्राणोत्पत्तेः सन्निव प्राणं सूचयति। तस्मात् सदः प्राण इति जायते कस्यचिन्मतिः, तामतिदेशेनापनुदति। आनीच्छब्दोऽपि न प्राणोत्पत्तेः प्राणसद्भावं सूचयति। अवातमिति विशेषणात् "अप्राणो ह्यमना शुभ्रः" इति च मूलप्रकृतेः प्राणादिसमस्तविशेषरहितत्वञ्च दर्शितत्वात्। तस्मात् कारणसद्भावप्रदर्शनार्थं प्रशंसनानीच्छब्द इति। श्रेष्ठ इति च सूक्ष्मं प्राणमभि-

दधाति, "प्राणो वाव ज्येष्ठः श्रेष्ठश्च" इति श्रुतिभिर्दैवात् भा० "ज्येष्ठश्च प्राणः" सू० "शुक्रनिषेककालादारभ्य तस्य वृत्तिलाभात्, न चेत् तस्य तदानीं वृत्तिलाभः स्यात् योनौ निषिक्तं शुक्रं पूयेत न सम्भवेद्, श्रोत्रादीनान्तु कर्णशष्कुल्यादिस्थानविभागनिष्पत्तौ वृत्तिलाभात् ज्येष्ठत्वम्" भा० "श्रेष्ठश्च प्राणः शुभाधिकात्" सू० "न वै भक्षाभक्षौ लभते जीवितम्" इति श्रुतेश्च भा० । "न वायुक्रिये पृथगुपदेशात्" सू० "स पुनर्वृत्तेः प्राणः किंस्वरूप इतीदानीं जिज्ञास्यते । तत्र प्राप्तं तावत् श्रुतेर्वायुः प्राण इति, एवं हि श्रूयते, "यः प्राणः स एव वायुः पञ्चविधः प्राणोऽपानो व्यान उदानः समानः" इति । अथ वा तन्त्रान्तरीयाभिप्रायात् समस्तकरणवृत्तिः प्राण इति प्राप्तं, एवं हि तन्त्रान्तरीया आचक्षते । "सामान्या करणवृत्तिः प्राणाद्या वायवः पञ्च" इति । अत्रोच्यते । न वायुः प्राणः नापि करणव्यापारः कुतः पृथगुपदेशात् । वायोस्तावत् प्राणस्य पृथगुपदेशो भवति, "प्राण एव ब्रह्मणश्चतुर्थः पादः, स वायुना ज्योतिषा भाति च तपति च" इति । न हि वायुरेव सन् वायोः पृथगुपदिश्यते तथा करणवृत्तेरपि पृथगुपदेशो भवति, वागादीनि करणान्युद्दिश्य तत्र तत्र पृथक्प्राणस्योद्गमनात् । न हि करणव्यापार एव सन् करणेभ्यः पृथगुपदिश्येत । तथा "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुः" इत्येवमादेश्चोऽपि वायोः करणेभ्यश्च प्राणस्य पृथगुपदेशा उद्गन्तव्याः । न च समस्तानां करणानामेका वृत्तिः सम्भवति, प्रत्येकमेकैकवृत्तित्वात्, बहुत्वस्य चाकारकत्वात् । नन्वेकपञ्जरचालनन्यायेन एतद्विधृतिं कर्त्रैकपञ्जरवर्त्तिना एकादश पक्षिणः प्रत्येकं प्रतिनियतव्यापाराः सन्तः समूयैकं पञ्जरं चालयन्ति एवमेकशरीरवर्त्तिनः एकादश प्राणाः प्रत्येकं निजतत्तद्वृत्तयः सन्तः समूयैकां प्राणाख्यां वृत्तिं प्रतिपद्यन्ते इति । नेत्युच्यते, युक्तम् तत्र प्रत्येकवर्त्तिभिरवान्तरव्यापारैः पञ्जरचालनानुरूपैरेवोपेताः पक्षिणः समूयैकं पञ्जरं चालयेयुरिति तथा दृष्टत्वात् । इह तु श्रवणादयश्चान्तरव्यापारोपेताः प्राणा न समूय प्राणयन्तीति युक्तं, प्रमाणाभावात् अत्यन्तविजातीयत्वाच्च श्रवणादिभ्यः प्राणस्य । तथा प्राणस्य श्रेष्ठत्वाद्यर्थं शुभाशुभोपनमनार्थं तं प्रति वागादीनां न करणवृत्तिभावे प्राणोऽवकल्पते, तस्मादन्यो वायुक्रियाभ्यां प्राणः" अथ तर्हीयं श्रुतिः, "यः प्राणः स वायुः" इति, उच्यते । वायुरेवायमध्यात्ममापन्नः पञ्चव्यूहो विशेषात्मनावतिष्ठमानः प्राणो नाम लभते न तत्त्वान्तरं नापि वायुभावं, अतश्चोभे अपि भेदाभेदश्रुती न विरुध्येते । स्यादेतत्, प्राणोऽपि तर्हि जीववदक्षिणे शरीरे स्वातन्त्र्यं प्राप्नोति, श्रेष्ठत्वात् शुभभावोपगमाच्च तं प्रति वागादीनामिन्द्रियाणाम् । तथा हि अनेकविधा विभूतिः प्राणस्य श्राव्यते "सप्तेषु वागादिषु प्राण एकैको जातश्चित्ते प्राण एकैको ह्यल्पनाऽनाप्नः प्राणः संवर्गो वागादीन् संहरन्ते प्राण इतरान् प्राणान् रक्षति मातेव पुत्रान्" इति । तस्मात् प्राणस्यापि जीववत् स्वातन्त्र्यप्रसङ्गः, तं परिहरति" भा० "चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः" सू० "तुशब्दः प्राणस्य स्वातन्त्र्यं व्यावर्त्तयति । यथा चक्षुरादीनि राजप्रकृतिवत् जीवस्य कर्तृत्वं भोक्तृत्वं च प्रत्युपकरणानि न स्वतन्त्राणि तथा श्रेष्ठोऽपि प्राणो राजमन्त्रिवत् जीवस्य सर्वार्थत्वेन उपकरणभूतो न स्वतन्त्रः । कुतः तत्सहशिष्ट्यादिभ्यः तैश्चक्षुरादिभिः सहैव प्राणः शिष्यते, प्राणसंवादादिषु समानधर्मोपन्यासश्च सह आसनं युक्तं दृष्टदृष्टवत्तरादिवत् । आदिशब्देन संहतत्वाचेतनत्वादीनां प्राणस्य स्वातन्त्र्यनिराकरणहेतून् दर्शयति । स्यादेतत् यदि चक्षुरादिवत् प्राणस्य जीवं प्रति करणभावोऽभ्युपगम्येत विषयान्तरं रूपादिवत् तस्य प्रसज्येत रूपालोचनाद्याभिर्वृत्तिभिर्यथा चक्षुरादीनां जीवं प्रति करणभावो भवति । अपि चैतावदेव कार्यजातानि रूपालोचनादीनि परिगणितानि यदर्थमेकादश प्राणाः संहृताः न तु तदुपयोगि कार्यजातमवगम्यते यदर्थमयं तावदेव प्राणः प्रतिष्ठायत इति । अत उत्तरं पठति" भा० "अकरणत्वाच्च न दोषस्तथा हि दर्शयति" सू० "न तावदियमवान्तरप्रसङ्गो दोषः अकरणत्वात् प्राणस्य । न हि चक्षुरादिवत् प्राणस्य विषयपरिच्छेदेन करणत्वमभ्युपगम्यते । न चास्तावता कार्याभाव एव । कस्मात्, तथा हि श्रुतिः प्राणान्तरेभ्यस्तस्याव्यमानं श्रेष्ठप्राणस्य वैशेषिकं कार्यं दर्शयति । प्राणसंवादादिषु "अथ ह प्राणा अहं श्रेयसि व्यूदिरे" इत्युपक्रम्य "यस्मिन् व उत्क्रान्ते इदं शरीरं पापिष्ठतरमिव दृश्यते स वः श्रेष्ठः" इति चोपन्यस्य प्रत्येकं वागाद्युत्क्रमणेन तद्वृत्तिमात्रहीनं यथापूर्वं जीवनं श्रेष्ठप्राणस्य वैशेषिकं कार्यं दर्शयित्वा

प्राणोत्क्रमिष्यतां वागादिवैशिष्ट्यापत्तिं शरीरपात-प्रसङ्गञ्च दर्शयन्ती श्रुतिः प्राणनिमित्तां शरीरेन्द्रिय-स्थितिं दर्शयति। "तान् वरिष्ठः प्राणः उवाच मा मोऽहमाप्तद्याढ्मेवैतत् पञ्चधात्मानं प्रविभज्यैतद्बाणमव-ष्टभ्य विधारयामि" इति च। एतमेवार्थं श्रुतिराह। "प्राणेन रक्षन्वरं कुलाये" इति च। सुप्तेषु चक्षुरादिषु प्राणनिमित्तां शरीररक्षां दर्शयति। "यद्वाव कच्चा-च्छ्वात् प्राण उत्क्रामति तदेव उच्छ्वयति तेन यदश्नाति यत् पिबति तेनेतरान् प्राणानवति" इति च प्राणनि-मित्तां शरीरेन्द्रियवृद्धिं दर्शयति। "कस्मिन्नहमुत्क्रान्ते उत्क्रान्तो भविष्यामि ? कस्मिन् ? वा प्रतिष्ठितेऽहं प्र-तिष्ठास्यामीति स प्राणमसृजत" इति प्राणनिमित्ते एव जीवस्योत्क्रान्तिप्रतिष्ठे दर्शयति भा०। "पञ्चवृत्तिर्मनो वदव्यपदिश्यते" सू०। "इतश्चास्ति सूक्ष्मप्राणस्य वैशेषिकं कार्यं यत्कारणं पञ्चवृत्तिरयं व्यपदिश्यते श्रुतिषु "प्रा-णोऽपानो व्यान उदानः समानः" इति। वृत्तिभेदश्चायं कार्यभेदापेक्षः। प्राणः प्राग्वृत्तिरुच्छ्वासादिकर्मा, अपानोऽवाग्वृत्तिर्निश्वासादिकर्मा, व्यानः तयोः सन्धौ वर्त्तमानो वीर्यवत्कर्महेतुः, उदानः ऊर्ध्ववृत्तिरुत्-क्रान्त्यादिहेतुः, समानः समं सर्वेष्वङ्गेषु योऽन्नरसा-नयति इति। एवं पञ्चवृत्तिः प्राणः मनोवत् यथा मनसः पञ्च वृत्तयः एवं प्राणस्यापीत्यर्थः। श्रोत्रादिनि-मित्ताः शब्दादिविषयाः मनसः पञ्च वृत्तयः प्रसिद्धाः। न तु कामः सङ्कल्प इत्याद्याः परिपठिताः परिसङ्ख्ये-यत्वं, पञ्चसङ्ख्यातिरेकात्। नन्वत्रापि श्रोत्रादिनिर-पेक्षा भूतभविष्यदादिविषयाऽपरा मनसो वृत्तिरस्तीति समानः पञ्चसङ्ख्यातिरेकः। एवं तर्हि परमतमप्रति-षिद्धमनुमतं भवतीति न्यायादिष्टापि योगशास्त्रप्रसिद्धा मनसः पञ्च वृत्तयः परिसङ्ख्याने प्रमाणविपर्ययविकल्प-निद्रास्मृतयो नाम। बहुवृत्तित्वमात्रेण वा मनः प्राणस्य निदर्शनमिति द्रष्टव्यम्। ओपोपकरणत्वमपि प्राणस्य पञ्चवृत्तित्वान्मनोवदिति योजयितव्यम्" भा०। "अणुश्च" सू०। "अणुश्चायं सूक्ष्मः प्राणः प्रत्येतव्यः इतरप्राणवत्। अणु-त्वेऽपि सौक्ष्म्यपरिच्छेदो न परमाणुतुल्यत्वं, पञ्च-भिर्वृत्तिभिः कृत्स्नशरीरव्यापित्वात्। सूक्ष्मः, प्राण उत्क्रान्तौ पार्श्वस्थेनानुपलभ्यमानत्वात्, परिच्छिन्न-त्वोत्क्रान्तिमत्त्वागतिश्रुतिभ्यः। ननु विभुत्वमपि प्राणस्य श्रुत्याम्नायते, "यमः कस्मिन्ना समो यमेन समो नागेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेण" इत्येवमादिषु प्रदेशेषु। तदुच्यते, आधिदैविकेन यमस्थिरूपेण चैरण्यगर्भेण च प्राणात्मना एतदुविभुत्वमाम्नायते नाध्यात्मिकेन। अपि च यमः मृत्युधिष्ण्यादिना साम्यवचनेन प्रतिप्राणिवर्त्तिनः प्राणस्य परिच्छेद एव प्रदर्श्यते ब्रह्मा-दयोऽपि" भा०। "ज्योतिराद्यधिष्ठानन्तु तदामननात्" सू०। "ते पुनः प्रकृताः प्राणाः किं स्वमस्त्रिष्वेव स्वेषु स्वेषु कार्येषु प्रभवन्ति आहोस्विदेवताधिष्ठानाः प्रभवन्तीति विचार्यते। तत्र प्राप्तं तावदुच्यते, स्वकार्यशक्तियोगात् स्वमस्त्रिष्वेव प्राणाः प्रवर्तेरन्निति। अपि च देवता-धिष्ठितानां प्राणानां प्रवृत्तावभ्युपगम्यमानायां तासा-मेवाधिष्ठात्रीणां देवतानां भोक्तृत्वप्रसङ्गात् शारीरस्य भोक्तृत्वं प्रक्षीयेत, अतः स्वमस्त्रिष्वेवैषां प्रवृत्तिरिति, एवं प्राप्ते उदसुच्यते। ज्योतिराद्यधिष्ठानन्त्विति। तुशब्देन पूर्वपक्षो व्यावर्त्यते। ज्योतिरादिभिरग्न्या-द्यभिमानिनीभिर्देवताभिरधिष्ठितं वागादिकरणजातं स्व-स्वकार्येषु प्रवर्तत इति प्रतिजानीते। हेतुञ्च व्याचष्टे तदामननादिति। तथा ह्यामनन्ति "अग्निर्वाग्भूत्वा मुखं प्राविशदित्यादि"। अग्नेश्चायं वाग्भावो मुखप्रवेशश्च देवतात्मनोऽधिष्ठातृत्वमङ्गीकृत्योच्यते। नहि देवता-सम्बन्धं प्रत्याख्यायाग्नेर्वाचि मुखे वा कश्चिदंशेः सम्बन्धो दृश्यते। तथा "वायुः प्राणो भूत्वा नासिके प्राविशत्" इत्येवमाद्यपि योजयितव्यम्। तथान्यत्रापि "वागेव ब्रह्मणश्चतुर्थः पादः सोऽग्निना ज्योतिषा भाति च तपति च" इत्येवमादिना वागादीनामग्न्यादिज्योति-रुक्तवचनेनैतमेवार्थं द्रढयति। "स वै वाचमेव प्रथममसृ-जत सा यदा मृत्युमत्यक्रामत् सोऽग्निरभवत्" इति च। एवमादिना वागादीनामग्न्यादिभावापत्तिवचनेनैतमेवार्थं द्योतयति। सर्वत्र चाध्यात्माधिदैवतविभागेन वागाद्य-न्याद्यनुक्रमणमनयैव प्रक्रियया भवति। श्रुतावपि "वागध्यात्ममिति प्राहुः ब्राह्मणास्तत्त्वदर्शिनः। वह्निव्य-धिभूतन्तु वह्निस्त्वाधिदैवतम्" इत्यादिना वागादी-नामग्न्यादिदेवताधिष्ठितत्वं सम्प्रपञ्चं प्रदर्शितम्। यदुक्तं स्वकार्यशक्तियोगात् स्वमस्त्रिष्वेव प्राणाः प्रवर्त्ते-रन्निति तदयुक्तम् अशक्तानामपि शकटादीनामनड्वा-द्याधिष्ठितानां प्रवृत्तिदर्शनात्। उभयथोपपत्तौ वाग-द्याद्देवताधिष्ठितत्वमेव निश्चीयते। यदप्युक्तं देवताना-मेवाधिष्ठात्रीणां भोक्तृत्वप्रसङ्गो न शारीरस्य जीवस्येति

तत् परिच्छिद्यते" भा०। "प्राणवता शब्दात्" सू०। "इतीन्द्रियेषु प्राणानामधिष्ठातृषु देवतासु प्राणवता कार्यकरणसङ्घातस्वामिना शारीरेणैवैषां प्राणानां सम्बन्धः श्रुतेरवगम्यते। तथा हि श्रुतिः "अथ यत्रैतदाकाशमनुविषण्णं चक्षुः स चाक्षुषः पुरुषो दर्शनाय चक्षुरथ यो वेदेदं जिघ्राणीति स घ्राता गन्धाय घ्राणम्" इत्येवंजातीयका शारीरेणैव प्राणानां सम्बन्धं दर्शयति। अपि चानेकत्वात् प्रतिकरणमधिष्ठातॄणां देवतानां न भोक्तृत्वमेकस्मिन् शरीरेऽवकल्पते। एको ह्यवयविन् शरीरे शारीरो भोक्ता प्रतिसन्धानादिसम्भवादवगम्यते" भा०। "तस्य च नित्यत्वात्" सू०। "तस्य च शारीरस्यास्मिन् शरीरे भोक्तृत्वेन नित्यत्वं पुण्यपापोपलेपसम्भवात् सुखदुःखोपभोगसम्भवाच्च न देवतानाम्। ता हि परस्मिन्नर्थे प्रेष्यतिष्ठमाना न क्वचिदस्मिंश्छरीरे भोक्तृत्वं प्रतिलब्धुमर्हन्ति। श्रुतिश्च भवति "पुण्यमेवासुं गच्छति न ह वै देवान् पापं गच्छति" इति शारीरेणैव च नित्यः प्राणानां सम्बन्धः" भा०। "उत्क्रान्त्यादिषु तदनुवृत्तिदर्शनात्" सू०। "तत्तत्क्रामन्तं प्राणोऽनुत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति" इत्यादिश्रुतिभ्यः। तस्मात् सतीष्वपि करणानां नियन्तृषु देवतासु न शारीरस्य भोक्तृत्वमपगच्छति, करणपतयश्चैव हि देवता न भोक्तृत्वपतयश्चेति" भा०। "त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्" सू०। "सप्तानां खलु रश्मीनां सप्तैवैकादश प्राणा अनुक्रान्ताः, तत्रेदमपरं सन्निष्कृष्टं किं सप्तानामेव प्राणानां वृत्तिभेदा इतरे प्राणा आहोस्वित् तत्त्वान्तराणीति। किन्तावत् प्राप्तं सप्तानामेवेतरे वृत्तिभेदा इति। कुतः श्रुतेः। तथाहि श्रुतिर्ह्यमितरांश्च प्राणान् सन्निधाय सप्तानामितरेषां ख्यापयति "सप्तानामेव सर्वे रूपमसामेति तत्र तस्यैव सर्वं रूपमभवत्" इति। प्राणैकशब्दत्वाच्चैकत्वाध्यवसायः, इतरथा ह्यनामनेकार्थत्वं प्राणशब्दस्य प्रसज्येत एकत्र वा सप्तत्वमितरत्र वा लाक्षणिकत्वमाश्रयेत। तस्माद् यथैकस्यैव प्राणस्य प्राणाद्याः पञ्च वृत्तयः एवं वागाद्या अप्येकादशेत्येवं प्राप्ते ब्रूमः। तत्त्वान्तराण्येव प्राणाद्वागादीनीति कुतः व्यपदेशभेदात्। को ह्यं व्यपदेशभेदः, ते प्रकृताः, प्राणाः श्रेष्ठं वर्जयित्वाऽवशिष्टा एकादशेन्द्रियाणीत्युच्यन्ते श्रुतावेवं व्यपदेशभेददर्शनात्। "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च" इत्येवं जातीयकेषु श्रुतिप्रदेशेषु पृथक् प्राणो व्यपदिश्यते पृथक् चेन्द्रियाणि। ननु मनस्योऽप्येवं वर्जनम् इन्द्रियत्वेन प्राणवत् स्यात् "मनः सर्वेन्द्रियाणि च" इति पृथक् व्यपदेशभेददर्शनात्। सत्यमेतत् श्रुतौ तु एकादशेन्द्रियाणीति मनोऽपीन्द्रियत्वेन घ्राणादिवत् संगृह्यते, प्राणस्य त्विन्द्रियत्वं न श्रुतौ स्मृतौ वा प्रसिद्धमस्ति। व्यपदेशभेदश्चायं तत्त्वभेदपक्षे उपपद्यते। तत्त्वैकत्वे तु स एवैकः सन् प्राण इन्द्रियव्यपदेशं लभते न लभते च इति विप्रतिषिद्धं, तस्मात्तत्त्वान्तरभूता एव सप्तादितरे। कुतश्च तत्त्वान्तरभूता एव सप्तादितरे"भा०। "भेदश्रुतेः" सू०। "भेदेन च वागादिभ्यः प्राणः सर्वत्र श्रूयते "ते ह वाचमूचुः" इत्यनुपक्रम्य वागादीनामुत्तरोत्तरविध्वंसिभ्यो विध्वंसानुपलम्भोपसंहृत्य वागादिप्रकरणम्, "अथ हैनमाहन्यं प्राणमूचुः" इत्यनुत्तरविध्वंसिभ्यो विध्वंसस्य प्राणस्य पृथगुपक्रमात्, तथा "मनो वाचं प्राणं तान्नाम्नेऽकुरुत" इत्येवमाद्या अपि भेदश्रुतय उदाहर्तव्याः। तस्मादपि तत्त्वान्तरभूता एव सप्तादितरे। कुतश्च तत्त्वान्तरभूता एव सप्तादितरे"भा०। "वैलक्षण्याच्च"सू०। "वैलक्षण्यञ्च भवति सप्तप्राणस्येतरेषाञ्च सप्तसु वागादिषु सप्तस्व एको जागर्त्ति "य एव चैको मुख्यनाम्नः। प्राणास्त्वितरे" तस्यैव प्राणस्यावस्थित्युत्क्रान्तिभ्यां देहधारणपातनहेतुत्वं नेन्द्रियाणां विषयालोचनहेतुत्वञ्चेन्द्रियाणाम्। न प्राणस्यैवंजातीयको भूयान् कश्चिद्भेदः प्राणेन्द्रियाणाम्। तस्मादप्येषां तत्त्वान्तरभावसिद्धिः। यदुक्तं "तत्र तस्यैव सर्वं रूपमभवत्" इति श्रुतेः प्राणएवेन्द्रियाणीति तदयुक्तम् तत्रापि पौर्वापर्यालोचनाद्भेदप्रतीतेः। तथा हि "वदिष्याम्येवाहमिति वाग्ब्रुवे" इति वागादीनीन्द्रियाण्यनुक्रम्य "तानि ह्यूचुः त्वमो भूयोपयेमे तस्माच्छ्रेष्ठ्यत्वेव वाक्" इति च श्रमरूपेण ह्यनुना यत्नवं वागादीनामभिधाय "अथैनमेव नाशक्नोत् योऽयं मध्यमः प्राणः" इति पृथक्प्राणं ह्यनानभिभूतमनुक्रामति। "अयं वै नः श्रेष्ठः" इति च श्रेष्ठतामस्यावधारयति। तस्मात्तदविरोधेन वागादिषु परिस्पन्दाभस्य प्राणायत्तत्वं तद्रूपभवनं वागादीनामिति मन्तव्यं न तु तादात्म्यम्। अत एव प्राणशब्दस्येन्द्रियेषु लाक्षणिकत्वसिद्धिः। तथा च श्रुतिः "तत्र तस्यैव सर्वं रूपमभवत् तस्मादेते एते नाम्नायन्ते प्राणाः" इति सप्तप्राणविषयस्यैव प्राणशब्दस्य इन्द्रियेषु लाक्षणिकीं वृत्तिं दर्शयति। तस्मा-

तत्त्वान्तराणि प्राणादुवागादीन्द्रियाणीति" शाङ्करभा०। अतएव वेदान्तसारादौ वाक्पाणिपादपायूपस्थमनोबुद्धिरहङ्कारेभ्यः पञ्चवृत्तिकप्राणस्योत्पत्तिमङ्गीकृत्य तेनापि इन्द्रियेभ्यस्तस्य पृथक्त्वं गम्यते। १५देहस्थे दशवृत्तिके वायुभेदे प्राणकर्मनृशब्दे दृश्यम्। १६ धातुः पुंभेदे पु० "भाव्यं धातुविधातोक्तं तयोर्जातौ सुतावुभौ। प्राणश्चैव सुकक्षुर्भार्के०५२अ०। वैवस्वतमन्वन्तरे १७सप्तर्षिभेदे पु० हरिवं० ३अ०। धरायाम्बसोः १८पुत्रभेदे पु०हरिवं०६अ०। १९विष्णौ पु०"ईशानः प्राणदः प्राणः" विष्णुस०। 'प्राणस्य प्राणः' इति श्रुतेस्तस्य तथात्वम्। प्राणयति प्राणः "अच्युतः प्रचितः प्राणः" विष्णुस०। "सूत्रात्मना प्राणयति चेष्टयति प्रजाः प्राणः" भा० व्यु० वृत्तिहृदयोगात् नामद्वयम्।

प्राणस्य जलेनैवोपचयस्य करणात् जलमयत्वम् यथोक्तं छा० उ० "आपः पीतास्त्रेधा विधीयन्ते तासां यःस्थविष्ठो धातुस्तन्मूत्रं भवति यो मध्यमस्तल्लोहितं योऽणिष्ठः सः प्राणः" इत्युक्त्वा "अन्नमयं हि सोम्य! मन आपोमयः प्राणस्तेजोमयी वाक्" इति च संक्षिप्योक्त्वा तत्समर्थितं यथा "यथा दध्नः सोम्य! मथ्यमानस्य योऽणिमा ऊर्द्धः समुदीषति तत्सर्पिर्भवति" इतिदृष्टान्तीकृत्य "एवमेव खलु सोम्य! पीयमानानां योऽणिमा स ऊर्द्धः समुदीषति स प्राणो भवतीति" छा०उ०।"यथायं दृष्टान्तः एवमेव खलु सोम्यान्नादेरस्य भुज्यमानस्यौदर्येणाग्निना वायुसहितेन खजेनैव मध्यमानस्य योऽणिमा स ऊर्द्धः समुदीषति तन्मनो भवति मनोऽवयवैः सह सम्भूय उपचिनोति तदेतत्तथाऽपां सोम्य! पीयमानानां योऽणिमा स प्राण इत्यादि" भाष्यम्। २०मूलाधारस्थे वायौ च "मूलाधारोद्गतः प्राणः" शा०ति०। [इच्। स्वार्थे क। २वोधे च भेदि०।

प्राणक पु० प्राणेन कायति कै-क। १जीवमात्रे २जीवक-

प्राणकर त्रि० प्राणं बलं करोति कृ-ट। बलकारके "सद्योभक्तं नवान्नञ्च बाला स्त्री क्षीरभोजनम्। घृतञ्चोदकं चैव सद्यः प्राणकराणि षट्" चाणक्यः।

प्राणकर्मन् न० ६त०। प्राणानां दशानां कर्मभेदे तानि च कर्माणि "सर्वाण्येन्द्रियकर्माणि, प्राणकर्माणि चापरे" गीता भाष्ये टी० आनन्दगिरिणोक्तानि यथा "प्राणानान्तु दशानां कर्माणि, प्राणस्य बहिर्गमनम् अपानस्याधोगमनं व्यानस्य व्यायामाकुञ्चनप्रसरणादीनि समानस्याशितपीतादीनां समनयनं उदानस्योर्द्धनयनम् "उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः। कृकरः क्षुत्करो ज्ञेयो देवदत्तो विजृम्भणे। न जहाति मृतञ्चापि सर्वव्यापी धनञ्जयः" इत्येवं रूपाणि।

प्राणग्रह पु० "प्राणो वै यवः" तैत्ति० उक्ते प्राणाख्ये इन्द्रिये यवशब्दे २७३६ पृ० दृश्यम्। तत्र प्राणशब्देन घ्राणस्योच्यते इति भाष्ये समर्थितम्।

प्राणजीवन त्रि०प्राणं जीवयति जीवि-ल्यु। १प्राणस्यापके २प्राणपोषके विष्णौ पु०"प्राणभृत्प्राणजीवनः" विष्णुस० "प्राणयति प्राणिनो जीवान् जीवयति प्राणजीवनः "न प्राणेन नापानेन मर्त्यो जीवति कश्चन। इतरेण तु जीवेत यस्मिन्नेतावुपाश्रितौ" मन्त्रवर्णान्" भा०।

प्राणतज पु० कल्पभवे दैमानिकभेदे क्षेमच०। प्राणयज इत्येव साधुःपाठः। [व्यव०।

प्राणद पु० प्र+अन-अच। १प्राणशब्दार्थे २वलवति च उ०

प्राणद न० प्राणं प्राणनं बलं वा ददाति पुष्णाति द्यति वा दा दो-वा-क। १जले तस्य यथा प्राणोपकारकत्वं तथा प्राणशब्दे छा०उ०वाक्ये दर्शितम्। २रक्षे च क्षेमच०। ३जीवकवृक्षे पु० राजनि० ४हरीतक्याम् ५खदिरवृक्षे च स्त्री राजनि०। ६प्राणदाहभावे त्रि० "किमाश्चर्यं चारदेशे प्राणदा यमदूतिका" तन्त्रटः। ७विष्णौ पु० तस्य प्रलये सर्वप्राणच्छेदकत्वात्तद्दातृत्वमिति नामद्वयम् प्राणशब्दे उदा० दृश्यम्।

प्राणदा स्त्री चक्रदत्तोक्ते गुटिकाभेदे "सनागरास्त्रिकटुकदारकं गुडेन या मोदकमत्युदारकम्। अशेषदुर्नामकरोगदारकं करोति दृढं सङ्घसेव दारकम्। चूर्णं चूर्णसमो ज्ञेयो मोदके द्विगुणो गुड़ः। त्रिपलं शङ्खवेरस्य चतस्रः मरिचस्य च। पिप्पल्याः कुड़वार्द्धञ्च चव्यायाः पलमेव च। तालीशपत्रस्य पलं पलार्द्धं जीरकस्य च। द्वे पले पिप्पलीमूलादर्द्धकर्षन्तु पत्रकात्। सूक्ष्मैलाकर्षमेकन्तु कर्षं त्वक्क्षीरयोः। गुड़ात् पलानि तु त्रिंशद्भूर्णमेकत्र कारयेत्। चक्रप्राणाख्या गुटिका प्राणदेति च सा ख्याता। [क्युट्। २जले पु० शब्दच०।

प्राणन न० प्र+अन-भावे ल्युट्। १जीवने जटा०। करणे

प्राणनाथ पु० ६त०। पत्यौ शब्दरत्ना०। प्राणपत्यादयोऽप्यत्र

प्राणनिग्रह पु०प्राणो निगृह्यतेऽनेन नि+ग्रह-करणे घञ्। प्राणायामे प्राणनिरोधादयोऽप्यत्र।

प्राणन्त पु० प्र+अन-करणे भा०। १वायौ उज्ज्वल० २रसा-

ञने अञ्जनभेदे ३सुधायां ४हिङ्गायाञ्च स्त्री उणादि० ।

प्राणप्रद त्रि० प्राणं बलं प्रददाति प्र+दा–क । १बलदायके २ऋद्धिनामकौषधौ स्त्री रत्नमा० ।

प्राणभक्ष पु० प्राणेन प्राणेन भक्षः ३त० । प्राणेनावप्राणमात्रे कात्या० १०।२६ कर्कः । [यद्भक्ष० ।

प्राणभास्वत् पु० प्राणेन वायुना भास्वान् उद्दीप्तः । ससट्टे

प्राणभृत् त्रि० प्राणं बिभर्त्ति भृ–क्विप् ६त० । १प्राणिनि जीवे जन्तुमात्रे २प्राणपोषके त्रि० ३विष्णौ पु० "प्राणभृत् प्राणजीवनः" विष्णुस०।

प्राणमय पु०प्राण+प्राचुर्य्ये मयट् । "कर्मेन्द्रियैः पञ्चभिरञ्चितोऽयं प्राणो भवेत् प्राणमयस्तु कोषः" विवेकच० उक्ते जीवस्वरूपावरके कोषभेदे "नैवात्मापि प्राणमयो वायुविकारो गन्धाऽऽगन्धा वायुवदलर्वाङ्निरेष । यस्मात् किञ्चित् क्वापि न वेत्तीष्टमनिष्टं स्वं वाऽन्यं वा किञ्चन नित्यं परतन्त्रः" तस्य तत्रैवात्मनोभेदे हेतुरुक्तः ।

प्राणयम पु० प्राणो यम्यतेऽनेन यम–करणे घञ् अदुपधः । प्राणायामे हेमच० प्राणरोधप्राणनियमप्राणसंयमादयोऽप्यत्र ।

प्राणयात्रा स्त्री ६त० । प्राणस्य श्वासप्रश्वासादिके १व्यापारे उपचारात् तत्साधने २भोजनादौ । भोजनेन हि देहे प्राणयात्रानिर्वाहोऽन्यथा मरणेनोत्क्रान्तिः प्राणस्य भोजनं विना स्थित्यभावात् । प्राणयात्राऽस्यास्य प्रयोजनत्वेन ठञ् । प्राणयात्रिक प्राणधारणभोजनयुक्ते विशिष्टभोगपरे मनुः ६।५७

प्राणयोनि पु० ६त० । १परमेश्वरे जगत्प्राणे २वायौ च ।

प्राणवत् त्रि०प्राण+मतुप् मस्य वः । प्राणिनि जीवे जन्तुमात्रे

प्राणशरीर पु० प्राणः शरीरं स्वरूपं यस्य । प्राणात्मत्वेन ध्येये परमेश्वरे "स कृतं क्रतौत मनोमयः प्राणशरीरः" छा० उ० "प्राणो हिङ्कृत्य विज्ञानक्रियाशक्तिद्वययुतः "यो वै प्राणः सा प्रज्ञा या प्रज्ञा स प्राणः" इतिश्रुतेः" च शरीरं यस्य सः" माधवः ।

प्राणसंवाद पु० ६त० । प्राणानामिन्द्रियाणां तत्प्राणस्य च अहं श्रेष्ठत्वविषयके विवादे । स च छा०उ० "अथ ह प्राणा अहं श्रेयसि व्यूदिरेऽहं श्रेयानस्मीत्यूचुरमे दर्शितः ।

प्राणसंशय पु० ६त० । १प्राणस्य स्थितिस्थितिसन्देहे उपचारात् २मरणफलकव्यापारभेदे च ।

प्राणसङ्गन् न० ६त० । प्राणायतने देहे ।

प्राणसम पु०६त० । १प्राणतुल्ये मित्रे २पत्नौ ३पत्न्यां स्त्री ।

प्राणहर त्रि० प्राणं हरति देहात् देहान्तरं प्रापयति बलं वा हरति हृ–अच् । १प्राणस्य देहात् देहान्तरप्रापके २बलनाशके । "शुक्लं मांसं स्त्रियो दृष्ट्वा बालार्कसदृशं दधि । प्रमादे मैथुनं निद्रा सद्यः प्राणहराणि षट्" चाणक्यः । ३विषादौ च याज्ञ० २।२२७।

प्राणहारक त्रि०प्राणं हरति हृ–ण्वुल् । १देहात् प्राणस्य हारके २नाशके ३वधसमानविधे न० राजनि० ।

प्राणाग्निहोत्र न० प्राणरूपेऽग्नौ होत्रम् । १वैश्वानरविदः प्राणानां पञ्चाहुतिरूपेऽग्निहोत्राख्ये भोजने । तस्य यथा कर्त्तव्यता तथा छा० उ० "तदप्येतदृक्तं प्रथममागच्छेत् तद्धोमीयं स यां प्रथमामाहुतिं जुहुयात् तां जुहुयात् प्राणाय स्वाहेति" इत्युपक्रम्य दर्शितम् । तच्च प्राणाहुतिशब्दे दृश्यम् । तत्प्रतिपादके ३कृष्णयजुर्वेदीयोपनिषद्भेदे च ।

प्राणात्यय पु० ६त० । १प्राणधारणाऽसम्भावनायाम् । ब०व० २तदुपलक्षिते काले च "प्राणात्यये च संप्राप्ते योऽन्नमत्ति यतस्ततः । न स पापेन लिप्येत पद्मपत्रमिवाम्भसा" स्मृतिः "सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्" शा०सू० ।

प्राणाधिनाथ पु० ६त० । पत्यौ दुर्गा० ।

प्राणान्त पु० ६त० । मरणे । प्राणान्तः प्रयोजनमस्य ठञ् । प्राणान्तिक । मरणफलके प्रायश्चित्तादौ ।

प्राणापान पु०द्व०वि०व० । प्राणे अपाने च १वायौ "प्राणापानान्तरे देवी वाग्वै नित्यं प्रतिष्ठिता" मन्त्रभाष्यतत्त्वाख्यम् । २अश्विनीकुमारयोः "तस्यां त्वाष्ट्रामसदृश्यां मार्त्तण्डस्त्रीव्रतेजसा । बीजं निर्वापयामास तच्चक्रं तद्द्विधाऽपतत् । तत्र प्राणस्त्वपानश्च यौ चाश्विनौ पुरा । वरदानेन च पुनर्मूर्त्तिमन्तौ बभूवतुः । तौ त्वाष्ट्रासदृशरूपिण्यां जातौ येन नरोत्तमौ । ततस्तावश्विनौ देवौ कीर्त्येते रविनन्दनौ" वराहपु० ।

प्राणायतन न० ६त० । "अक्षिणी कर्णरन्ध्रे च पादुपस्थास्य नासिकाः । नवच्छिद्राणि तान्येव प्राणस्यायतनानि तु" याज्ञ० उक्ते प्राणस्य छिद्ररूपस्वस्थानभेदे

प्राणायन पुंस्त्री० प्राणस्यापत्यं नडा० फक् । प्राणस्यापत्ये

प्राणायाम पु० प्राण आयम्यतेऽनेन आ+यम–करणे घञ् । प्राणवायोर्गतिविच्छेदकारकव्यापारभेदे तद्विधिस्तत्फलादेशो यथा "तत्र प्राणायामेऽङ्गुलिनियमो ज्ञानार्थके "भूतशुद्धिं ततः कुर्यात् प्राणायामक्रमेण च । कनि-

ङानाभिकाकुकुदैर्वक्षासापुटधारणम्। प्राणायामः स विच्छेदस्तज्जनीमध्यमे विना'। प्राणायामो द्विविधः सगर्भो निर्गर्भश्च। तथा च "सगर्भो मन्त्रजापेन निर्गर्भो मात्रया भवेत्"। मात्रा च "वामजानुनि तद्वत्प्रामर्शं यावता भवेत्। कालेन मात्रा सा ज्ञेया सन्निर्भेदपारगैः"। तत्र च मूलमन्त्रस्य बीजस्य प्रणवस्य वा षोडशवारादिजपेन वामनासापुटादिना वायुपूरकादिकं कुर्यात्। तथा च कालीकुलार्णवे "प्राणायामत्रयं कुर्यात् मूलेन प्रणवेन वा। अथ वा मन्त्रबीजेन यथोक्तविधिना सुधीः"। तथा तस्य षोडशवारजपेन वायुं रेचयेत्। तस्य चतुःषष्टिवारजपेन वायुं कुम्भयेत्। तस्य द्वात्रिंशद्वारजपेन वायुं रेचयेत्। पुनर्दक्षिणेनापूर्य उभाभ्यां कुम्भयित्वा वामेन रेचयेत्। पुनर्वामेनापूर्य उभाभ्यां कुम्भयित्वा दक्षिणेन रेचयेत्। त्रिपुराकारे तन्त्रान्तरे "विपरीतमतो विद्वान् कुर्यात् वुधः पुनरेव वा तद्विपरीतमिति"। यौगिके पुनर्भावनिषेधः। तथा च गौतमीये "मन्त्रप्राणायामः प्रोक्तो यौगिकं कथयामि ते। पूरयेद्वामया विद्वान् मात्राषोडशसंख्यया" इत्यादि। अथ वा चतुःषोडशद्वात्रिंशद्वारजपेन पूरकादिकं कुर्यात्। तथा च तन्त्रान्तरे "पूरयेत् षोडशमितैर्वायुं धारयेत्तु चतुर्गुणैः। रेचयेत् कुम्भकार्द्धेन क्रमशश्चा तन्नरीवकम्। तदशक्तौ तत्तदर्धमेव प्राणस्य संयमः। अस्य नित्यता माह "प्राणायामं विना मन्त्रपूजने न हि योग्यता" मन्त्याङ्गप्राणायामस्वरूपफलादिकं ब्राह्मणसर्वस्वे दर्शितं यथा तत्राग्निपुराणे "गायत्री प्रति ब्रह्मवाक्यम् "कुर्वन्तोऽपीह पापानि ये त्वां ध्यायन्ति पावनि!। उभे सन्ध्ये न तेषां हि विद्यते तु विपातकम्। त्रिः षठेदायतप्राणः प्राणायामेन यो द्विजः। दह्यते न च विध्येत पातकैरुपपातकैः"। वह्निपुराणे "प्राणायामान् द्विजः कुर्यात् सर्वपापापनुत्तये। दह्यन्ते सर्वपापानि प्राणायामैर्द्विजस्य तु"। विष्णुधर्मोत्तराग्निपुराणयोः "सर्वदोषकरः प्रोक्तः प्राणायामो द्विजन्मनाम्। ततस्तस्याधिकं नास्ति प्रायश्चित्तकारणम्"। यमिः "कर्मणा मनसा वाचा यच्चा पापं कृतं मया। त्रीनेतान् सन्ध्यां प्राणायामैर्व्यपोहति"। अग्निपु० "प्राणायामत्रयं कृत्वा प्राणायामैस्त्रिभिस्त्रिभिः। अहोरात्रकृतात् पापात्मुच्यते नात्र संशयः"। वशिष्ठः "प्राणायामान् धारयेत् त्रीन् यथाविधि दयन्वितः। अहोरात्रकृतं पापं तत्क्षणादेव नश्यति"। हारीतस्मृतः "पूर्वसन्ध्यासु चैतेषु तथान्येष्वपि सर्वशः। प्राणायामास्त्रयोऽभ्यस्ताः सूर्योदयनं प्रति। जायन्ते तदिनाशाय तमसामिव भास्करः। सूर्योदयनं प्राप्य निर्मला धूतकल्मषाः। भवन्ति भास्काकारा विधूमा इव पावकाः"। योगियाज्ञवल्क्यः "यदह्ना कुरुते पापं कर्मणा मनसापि वा। त्रिभिस्तस्मात्प्रमुच्येत प्राणायामैर्व्यपोहति"। हारीतस्मृतिः "प्राणायामैर्दहेद्दोषान् मनोवाग्देहसम्भवान्"। प्राणायामातुलत्वं बौधायनः "एतदाद्यं तपः श्रेष्ठमेतद्धर्मस्य लक्षणम्। सर्वदोषोपघातार्थमेतदेव विशिष्यते"। अत्रिरपि "प्राणायामेन युक्तः प्राणायामान् पुनःपुनः। आकेशाग्रान्नखाग्राच्च तपस्तप्येत चोत्तमम्"। विष्णुधर्मोत्तराग्निपुराणयोः "आकेशाग्रान्नखाग्राच्च तपस्तप्येत चोदारधम्। आत्मानं शोधयत्येव प्राणायामः पुनःपुनः। दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः। तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात्। प्राणायामैर्दहेद्दोषान् प्राणायामः परं तपः"। हारीतः "यथा हि सैसधातूनां ध्मायतां ध्मायते रजः। इन्द्रियाणां तथा दोषान् प्राणायामेन निर्दहेत्"। हारीतः "ध्मायमानं यथा ह्येतद्धातूनां संकुलं मलम्। तथेन्द्रियकृतो दोषः प्राणायामेन दह्यते"। योगियाज्ञवल्क्यः "यथा पर्वतधातूनां दोषान् दहति पावकः। एवमन्तर्गतश्चैनः प्राणायामेन दह्यते"। अत्रिवशिष्ठौ "निरोधाच्छ्वसते वायुर्वायोरग्निः प्रजायते। अग्नेरापो व्यजायन्त तैरन्नं पच्यते त्रिभिः"। विष्णुधर्मोत्तराग्निपुराणयोः "निरोधाच्छ्वसते वायुस्तस्मादग्निस्ततो जलम्। त्रिभिः शरीरं सकलं प्राणायामैर्विशुध्यति"। योगियाज्ञवल्क्यः "तथा निरोधसंयोगाद्देवतात्मयचिन्तनात्। अग्नेर्वायोरपां योगात्ते शुध्यन्ति वै त्रिभिः"। मनुः "प्राणायामा ब्राह्मणस्य त्रयोऽपि विधिवत् कृताः। व्याहृतिप्रणवैर्युक्ता विज्ञेयं परमं तपः" विष्णुधर्मोत्तराग्निपुराणयोश्च "प्राणसंधारणं मार्गं कृत्वाग्र्यं तु विचक्षणः। यः कुर्यादन्यथा राजन्! प्राणायामं तदुत्तमः"। हारीतः "सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह। त्रिः षठेदायतप्राणः प्राणायामः स उच्यते। गायत्रीं शिरसा सार्द्धं जपेदुच्चाहृतिं विना। प्रतिप्रणवसंयुक्तां शिरसं प्राणसंयमः"। योगियाज्ञवल्क्यः "भूर्भुवः स्वर्मनोजन्यं सत्यं तथैव च। प्रणवोङ्कारसंयुक्तं तत्त्वचिन्तनरेचकः।

ओमापोज्योतिरित्येतच्छिरः पश्चात् प्रयोजयेत्। एवं सप्तप्रयोगस्तु प्राणायामनिवेशने। शिरावर्त्तनयोगेन प्राणायामस्तु शब्दितः"। योगियाज्ञवल्क्यः "षोडशाक्षरकं ब्रह्म गायत्र्यास्तच्छिरः स्मृतम्। ओमापोज्योतिरित्येव मन्त्रो यस्तु प्रकीर्त्तितः। तस्य प्रजापतिर्ऋषिर्यजुश्छन्दस्तथा विराट्। ब्रह्माग्निवायुसूर्य्याश्च देवताः परिकीर्त्तिताः। प्राणस्यायमने चैव विनियोग उदाहृतः। गायत्रीशिरसा सार्द्धमेवं स्तुतिनिदर्शनम्। प्रणव व्याहृतियुतां गायत्रीं शिरसा सह। त्रिःपठेदायतप्राणः प्राणायामः स उच्यते। आदानं रोधसंसर्गं वायोस्त्रिः समभ्यसेत्। ब्रह्माणं केशवं शम्भुं ध्यायेत्तेनानुक्रमात्। रक्तं प्रजापतिं ध्यायेत् विष्णुं नीलोत्पलप्रभम्। शङ्करं त्र्यम्बकं श्वेतं ध्यायन्मुच्येत बन्धनात्। पूरके ब्रह्मसायुज्यं कुम्भके ब्रह्मणोऽन्तिकम्। रेचकेनाद्वितीयन्तु प्राप्नुयादैश्वरं पदम्" अथ प्राणायामविधिः तत्र व्यासपद्यम् "आदौ छन्द ऋषिदेवताविनियोगादिरुच्यते "गायत्रीं शिरसा सार्द्धं सप्तव्याहृतिपूर्विकाम्। प्राणायामेन शिरावर्त्तयेत् ततः शनैः प्रणवेन्द्र प्राणायामैरेभिरहोरात्रकृतं यत् श्रेयः तत् सकलं भवति"। व्यासः "गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च। त्रिष्टुप् च जगती चेति छन्दांस्याहुरनुक्रमात्। अग्निवायुर्यमसोमा बृहस्पतिमतक्रतू। विश्वेदेवाः प्राहुतीनां देवतानि यथाक्रमम्। विनियोगः कृतस्नानां प्राणायामे महर्षिभिः"। योगियाज्ञवल्क्यः "व्याहृतीनान्तु सर्वासामार्षमेव प्रजापतिः। सप्त छन्दांसि प्रोक्तानि आदानादि तु सर्वशः। गायत्र्युष्णिगनुष्टुप् च बृहती बृहदेव च। पङ्क्तिश्च जगती चैव सप्त छन्दांसि तानि वै। अग्निवायुसवित्रादित्यो बृहस्पतिस्तथाप एव च। इन्द्रश्च विश्वेदेवाश्च देवताः परिकीर्त्तिताः। अनाम्नातेषु नित्येषु प्रायश्चित्तेषु सर्वदा। प्राणायामप्रयोगे च विनियोग उदाहृतः"। बृहस्पतिः "ब्रह्मासनं नियम्याक्षनृ कृत्वा ब्रह्मादिकं तथा। संनिमीलितदृङ् नासौ प्राणायामं समभ्यसेत्"। विष्णुधर्म्मोत्तरे "सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह। त्रिः पठेदायतप्राणः प्राणायामः स उच्यते। आदानं रोधसंसर्गं मनसा त्रिः समभ्यसेत्। ब्रह्माणं केशवं शम्भुं ध्यायन्मुच्येत बन्धनात्। रक्तं पितामहं ध्यायेद्विष्णुं नीलोत्पलप्रभम्। शुक्लं त्र्यम्बकमेव ईश्वरार्च्चितविग्रहम्"। योगियाज्ञवल्क्यः "बाह्यस्तितं नासापुटेन वायुमाक्रम्य तेनैव शनैः समस्तम्। नाड़ीच सर्वाः प्रतिपूरयेयुः स पूरको नाम महाशिरोधः। न रेचकोनैव च पूरको वा नासापचारी स्थित एव वायुः। अनिस्वनं धारयति क्रमेण कुम्भाख्यमेतं प्रवदन्ति तज्ज्ञाः। निष्क्रम्य नासाविवराद्यथेष्टं प्राणं बहिः सूक्ष्ममिवानिलेन। निरुध्य संस्थापयति चोर्द्ध्ववायुः स रेचको नाम महाशिरोधः। नासिकयाऽऽक्रम्योच्छ्वासं ध्यानं पूरक उच्यते। कुम्भोनिश्चलनिश्वासो रिच्यमानस्तु रेचकः"। योगियाज्ञवल्क्यः "प्राणेनापूरयेदेन वेगवायुं समुत्सृजेत्। येन शब्दो न श्रूयेत न च निश्वासेन च चालयेत्। शनैर्नासापुटे वायुमुत्सृजेच्च तु वेगतः"। यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि" पात०सू०। तस्य योगाङ्गतोक्ता। तस्य च योगाङ्गप्राणायामस्य लक्षणादिः पात०सू०भा० विवरणेऽुक्तं यथा "तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः" सू०। "सत्यासनजये बाह्यस्य वायोराचमनं श्वासः। कोष्ठ्यस्य वायोर्निःसरणं प्रश्वासः, तयोर्गतिविच्छेद उभयाभावः प्राणायामः" भा०। स तु "बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसङ्ख्याभिः परिदृष्टो दीर्घसूक्ष्मः"सू०। "यत्र प्रश्वासपूर्वको गत्यभावः स बाह्यः यत्र श्वासपूर्वको गत्यभावः स आभ्यन्तरः तृतीयस्तम्भवृत्तिर्यत्नोभयाभावः सकृत्प्रयत्नाद् भवति यथा तप्ते लोहपिण्डे जलं सर्वतः सङ्कोचमापद्यते। तथा द्वयोर्युगपद्गत्यभाव इति त्रयोऽप्येते देशेन परिदृष्टाः दृश्यानुविषयो देश इति। कालेन परिदृष्टाः कृत्स्नाभिव्याप्तावधारणेनावच्छिन्ना इत्यर्थः। सङ्ख्याभिः परिदृष्टाः, एतावद्भिः श्वासप्रश्वासैः प्रथम उद्घातस्तावद्भिरेवोत्कर्षैस्तावद्भिः द्वितीय उद्घातः एवं तृतीयः एवं मृदुरेवं मध्य एवं तीव्र इति सङ्ख्यापरिदृष्टः स खल्वयमेवमभ्यस्तो दीर्घसूक्ष्मः" भा० "बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः"सू०। "देशकालसङ्ख्याभिर्बाह्यविषयः परिदृष्ट आक्षिप्तः तथाभ्यन्तरविषयः परिदृष्ट आक्षिप्तः उभयथा दीर्घसूक्ष्मः ततःपूर्वको भूमिजयात् क्रमेणोभयोर्गत्यभावश्चतुर्थः प्राणायामः। तृतीयस्तु विषयानालोचिनो गत्यभावः सकृदारब्ध एव देशकालसङ्ख्याभिः परिदृष्टो दीर्घसूक्ष्मश्चतुर्थस्तु श्वासप्रश्वासयोर्विषयावधारणात् क्रमेण भूमिजयाद्बाह्याक्षेपपूर्वको गत्यभावश्चतुर्थः प्राणायामः इत्ययं विशेष इति" भा०। "ततः क्षीयते प्रकाशावरणम्" सू०। "प्राणायामानभ्यस्तोऽस्य

योगिनः क्षीयते विवेकज्ञानावरणीयं यत्तदाच्छाद्यते महामोहमयेन इन्द्रजालेन प्रकाशशीलं सत्त्वमाहत्य तदेवार्थाय नियुङ्क्ते इति तदस्य प्रकाशावरणं कर्म संसारनिबन्धनं प्राणायामाभ्यासात् दुर्बलं भवति प्रतिक्षणं च क्षीयते। तथा चोक्तम् "तपो न परं प्राणायामात्ततो विशुद्धिर्मलानां दीप्तिश्च ज्ञानस्येति"। किञ्च धारणासु च योग्यता मनसः प्राणायामाभ्यासादेव। "प्रच्छर्दनविधारणाभ्यां वा प्राणस्येति" वचनात्" भा०।

"प्राणायामविशेषस्त्रयलक्षणपरं सूत्रमवतारयति मूलमिति। इत्तिशब्दः प्रत्येकं संबध्यते। रेचकमाह यत्र पूरयतीति। पूरकमाह यत्र श्वसितीति। कुम्भकमाह स्तोभ इति। तदेव स्फुटयति यत्रोभयोः श्वासप्रश्वासयोः सकृदेव विधारकात् प्रयत्नादभावो भवति न पुनः पूर्ववदापूरणप्रयत्नौघप्रविधारकः प्रयत्नो नापि रेचकप्रयत्नौघविधारणप्रयत्नोऽपेक्ष्यते किन्तु यथा तप्ते घृतादौ निक्षिप्तं जलं परिशुष्यत् सर्वतः सङ्कोचमापद्यते एव मयमपि मारुतो बहुप्रयोगो बलवद्विधारकप्रयत्न निरुद्धक्रियः शरीर एव क्षुब्धोभूतोऽवतिष्ठते न तु रेचयति येन रेचक इति। इयानस्य देशो विषयः पूर्वदेशवर्तिस्तादिपरिमितो निवाते प्रदेशे दैर्घिका ह्रस्वादिक्रियानुमितो बाह्य एवमान्तरोऽप्याप्रादतलमामस्तकं पिपीलिकास्पर्शसदृशेनानुमितः। स्पर्शननिमेषक्रियावच्छिन्नस्य कालस्य चतुर्थो भागः क्षणस्तेषामियत्तावधारणेनावच्छिन्नः खजानुमण्डलं पाणिना त्रिः परामृश्य क्षोटिकावच्छिन्नः कालो मात्रा तामिः षट्त्रिंशन्मात्राभिः परिमितः प्रथम उद्घातो मन्दः। स एव द्विगुणोक्ततो द्वितीयो मध्यमः स एव त्रिगुणोक्ततस्तृतीय उत्तमस्तमिमं सङ्घातपरिदृष्टं प्राणायाममाहुः सङ्घातमिति। खस्थस्य हि पुंसः श्वासप्रश्वासक्रियावच्छिन्नेन कालेन यथोक्तक्षोटिकाकालः समानः प्रथमोद्घातः कर्मेति नीतः उद्घातो विजितो वशीकृतो निष्टङ्कीतः क्षयानाभियत्ताकालो विवक्षितः श्वासप्रश्वासेयत्ता संख्येति कथञ्चिद्भेदः। स खल्वयं प्रत्यहमध्यर्धो दिवसपक्षमासादिक्रमेण देशकालप्रचयव्यापितया दीर्घः परमनैपुण्यं समधिगमयेत् तदा च सूक्ष्मो न तु मन्तव्या" विज्ञप्तिः। योगाङ्गप्राणायामविधिः दत्तात्रेयसंहितायामुक्तो यथा "तस्मिन् यत्नं सदाकुर्य्यात् आसनं विटपादिकम्। तत्रोपविश्य मेधावी पद्मासनसमन्वितः। समकायः प्राङ्मुख उदङ्मुखो वा प्रणम्य चेष्टदेवताम्। ततो दक्षिणहस्ताभ्यकुर्ष्टेन तु पिङ्गलाम्। निरुध्य पूरवेद्वायुमिडया तु शनैः शनैः। यथाशक्त्या निरोधेन ततः कुर्य्याच्च कुम्भकम्। ततस्त्यजेत् पिङ्गलया शनैरेव न वेगतः। पुनःपिङ्गलयाऽऽदाय पूरवेदुदरं शनैः। धारयित्वा यथाशक्ति रेचयेन्मारुतं शनैः। यया त्यजेत्तयाऽपूर्य धारयेदविरोधतः। एवं प्रातः समासीनः कुर्य्यादृर्विंशतिकुम्भकान्। कुम्भकः सहितो नाम सर्वपापविवर्जितः। मध्याह्नेऽपि तथा कुर्य्यात् पुनर्विंशतिकुम्भकान्। एवं सायं प्रकुर्वीत पुनर्विंशतिकुम्भकान्। कुर्वीत रेचकुम्भाभ्यां सहितान् प्रतिवासरम्। कुर्य्यादेवं चतुर्वारमनालस्यो दिने दिने। एवं मासत्रयं कुर्य्यान्नाडीशुद्धिस्ततो भवेत्"। षट्त्रिंशमते त्रयोदशपटले "प्राणायामस्त्रिधा प्रोक्तो रेचकुम्भकपूरकैः। सहितः केवलश्चेति कुम्भको द्विविधो मतः। रेचपूरणयुक्तो यः स वै सहितकुम्भकः। यावत् केवलसिद्धिः स्यात् सहितं तावदभ्यसेत्। रेचकं पूरकं त्यक्त्वा सुखं यद्वायुधारणम्। प्राणायामोऽयमित्युक्तः स वै केवलकुम्भकः। गुरूपदिष्टमार्गेण प्राणायामं समाचरेत्। यावद्वायुः स्थितो देहे तावज्जीवितमुच्यते। मरणं तस्य नास्तीति ततो वायुं निबन्धयेत्। मलाकुलासु नाडीषु मारुतो नैव मध्यगः। कथं स्यान्निर्मलीभावः कायशुद्धिः कथं भवेत्। शुद्धिमेति यदा सर्वं नाडीचक्रं मलाकुलम्। तदैव जायते योगी प्राणसंग्रहणे क्षमः। प्राणायामं ततः कुर्य्यान्नित्यं सात्त्विकया धिया। यथा सुषुम्णापार्श्वस्था मलाः शोषं प्रयान्ति हि। षड्दशद्वादशोद्घातं प्राणं चन्द्रेण पूरयेत्। धारयित्वा यथाशक्ति पुनः सूर्येण रेचयेत्। प्राणं सूर्येण चाकृष्य पूरयेदुदरं शनैः। विधिवत् कुम्भकं कृत्वा पुनश्चन्द्रेण रेचयेत्। येन त्यजेत् तेनैव पूरयेदविरोधतः। रेचयेच्च ततोऽन्येन रेचयेन्न वेगतः" चन्द्रेण वामनासया सूर्येण दक्षिणनासया। "प्राणं चेदिडया पिबेन्नियमितं भूयोऽन्यया रेचयेत् पीत्वा पिङ्गलया समीरणमथो बद्ध्वा त्यजेदन्यया। सूर्याचन्द्रमसोरनेन विधिना विम्बदयं ध्यायतः शुद्धा नाडिगणा भवन्ति मासत्रयादूर्ध्वतः। प्रातर्मध्यन्दिने सायं मध्यरात्रे च कुम्भकान्। चतुरश्चोतिपर्य्यन्तं चतुर्वारं समभ्यसेत्। प्राणायामे सहानू धर्मो योगिनो मोक्षदायिनि। प्राणायामे दिवारात्रौ देहजाड्यं महि-

त्यजेत्। अधमे द्वादशी मात्रा मध्यमे द्विगुणा कृता। उत्तमे त्रिगुणा ज्ञेया प्राणायामस्य निर्णये। कनीयसि भवेत् स्वेदः कम्पो भवति मध्यमे। उत्तित्वा उत्तमे प्राणी वज्रपद्मासनो भवेत्। जवेन अमजातेन गात्रमार्जनमाचरेत्। दृढता वपुषा दीप्तिस्तेन गात्रस्य जायते। यदा तु नाडीशुद्धिः स्यात्तदा चिह्नानि बाह्यतः। जायन्ते योगिनो देहे तानि वक्ष्याम्यशेषतः। शरीरलघुता दीप्तिर्जठराग्निविवर्द्धनम्। कृशत्वच शरीरस्य तस्य जायेत निश्चितम्। पूर्वोक्तकाले कुर्वीत परमाभ्यासमेव च। ततःपरं यथेष्टन्तु शक्तिः स्याद् वायुधारणे। यथेष्टधारणादायोः सिद्धिः कुम्भस्य केवला। केवले कुम्भके सिद्धे रेचपूरकवर्जिते। न तस्य दुर्लभं किञ्चित् त्रिषु लोकेषु विद्यते"। [हेमच०।

प्राणावाय न० प्राणेनावेति अव–इ अच्। क्रियाविशाले

प्राणासन न० "एतत् प्राणासनं नाम सर्वसिद्धिप्रदायकम्। वायुं मूले समारोप्य ध्यात्वाऽऽकुञ्च प्रसारयेत्। केवलं पादमेकञ्च स्कन्धे चारोप्य यत्नतः। एकपादेन भगने तिष्ठेत् स दण्डवत् प्रभो!। प्राणानासनमेतत् हि सर्वेषां पूरकाश्रयम्"। कृत्वा सुकुम्भयोर्मध्ये समारोप्याथ वायुभिः। तदासिद्धो भवेत् मर्त्यः प्राणापानसमागमम्। अपानासनयोगेन कृत्वा योगेश्वरो भुवि" इत्यागमोक्ते पूजाङ्गे आसनभेदे।

प्राणाहुति स्त्री प्राणरूपेभ्योऽग्निभ्य आहुतिः। भोजनात् प्राक् स्वकृतकर्म्मणे प्राणरूपाग्न्युद्देश्काहुतौ तत्प्रकारश्च आह्निक० दर्शितो यथा

छन्दोगपरिशिष्टे "प्राणेभ्यस्तय पञ्चभ्यः स्वाहा प्रथमसंयुताः। पञ्चाहुतीस्तु जुहुयात् प्रत्यग्नित्रिभेषु च"। प्राणाहुतिसङ्ख्यामाह यौनकः "तर्जनीमध्यमाङ्गुष्ठैर्मुद्रा प्राणाहुतिर्भवेत्। मध्यमानामिकाङ्गुष्ठैरपाने जुहुयात्ततः। कनिष्ठानामिकाङ्गुष्ठैर्व्याने च जुहुयाद्बुधिः। तर्जनीन्तु बहिष्कृत्य उदाने जुहुयात्ततः। समाने सर्वदण्डेन सप्तदायाहुतिर्भवेत्"। कल्पान्तरे "प्राणाहुतौ हुतायाञ्च पश्चात् भुञ्जीत नो हुतम्" अत्र पाठक्रमेण प्राणापानव्यानोदानसमानरूपेभ्य आहुतिरुक्ता। वैश्वानरविद्यास्तु छान्दो० उ० अन्यक्रम उक्तो यथा "तद्यद्भक्तं प्रथमामाहुतिं जुहोमीयं, स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात् प्राणाय स्वाहेति प्राणस्तृप्यति"। "अथ यां द्वितीयां जुहुयात्तां जुहुयाद्व्यानाय स्वाहेति व्यानस्तृप्यति"। "अथ यां तृतीयां जुहुयात्तां जुहुयादपानाय स्वाहेत्यपानस्तृप्यति"। "अथ यां चतुर्थीं जुहुयात्तां जुहुयात् समानाय स्वाहेति समानस्तृप्यति"। "अथ यां पञ्चमीं जुहुयात्तां जुहुयादुदानाय स्वाहेत्युदानस्तृप्यति"।

प्राणिद्यूत न० ६त०। समासोक्ते विवादपदभेदे अमरः। द्यूतशब्दे २७७१ पृ० दृश्यम् "एष एव विधिर्द्यूतः प्राणिद्यूते समासतः" याज्ञ० द्यूतधर्मोऽतिदिष्टः। [मात्रे।

प्राणिन् त्रिलिङ्ग त्रि० प्राणोऽस्यास्त इनि। जीवे चेतने जन्तु-

प्राणिमात्र स्त्री प्राणिनो मात्रेव। गर्भदात्रीवृक्षे राजनि०।

प्राणिहित त्रि० ६त०। १प्राणिनो हितसाधने २पादुकायां स्त्री त्रिका०। [प्राणीत्य तत्रार्थे पाठान्तरम्।

प्राणीत्य न० प्रणीतस्य प्रयुक्तस्य भावः ष्यञ्। कर्मणि त्रिका०

प्राणेश पु० ६त०। १पत्यौ जटा०। २भार्यायां स्त्री हेमच०। श्वायौ पु० त्रिका०। प्राणेश्वरादयोऽत्र।

प्राणेशङ्ग न० ६त०। प्राणिनोऽङ्गे अवयवे हस्तपादादौ तत्र उपसर्जने "अङ्गं मूर्तिमत् स्नाङ्गं प्राणिस्थमविकारिजम्। अतत्स्थं तत्र दृष्टञ्च तेन तद्वत् तथा युतम्" इत्युक्तलक्षणस्नाङ्गरूपकत्वे असंयोगोपधत्वे ङीष्। तत्र क्रोडादिवङ्गवो नासिकोदरजङ्घादन्यस्नाङ्गाम् पुच्छस्य च विशेषोक्तेः संयोगोपधत्वेऽपि ङीष् स्यात्।

प्रातःकृत्य न० ७त०। शास्त्रविहिते प्रातःकर्त्तव्ये कर्म्मणि तच्च आचारशब्दे ६२२५पृ०दर्शितम्। एवमन्यत्रापि यथायथं नानाशास्त्रे उक्तं द्रष्टव्यम्।

प्रातःकाल पु० कर्म०। १प्रभातकाले "प्रातःकालो मुहूर्त्तौ द्वौ मुहूर्त्तावशेषतो रवेः" स्मृतिपरिभाषिते सूर्योदयावधि मुहूर्त्तत्रयमिते २काले च।

प्रातःसन्ध्या स्त्री सन्धौ भवः यत् सन्ध्या ७त०। १रात्रेरनन्तरं मुहूर्त्तात्मके भाविसूर्योदयस्य मध्यवर्त्तिनि २दण्डचतुष्टयात्मके वा काले "त्रियामां रजनीं प्राहुरुषाद्यामचतुष्टयम्। नाडीनां तद्भवे सन्धे दिवसाद्यन्तसंज्ञिते" ति०त०। सन्ध्या च ब्रह्मणो मनोजाता कन्या सा च वसिष्ठोपदेशेन तपः कृत्वा पूर्वप्रतिज्ञातस्वाम्नौ शरीरत्यागस्य सम्यङ्नार्थं विष्णुवरेण पुरोडाशमयं देहमवाप्य मेधातिथियज्ञाग्नौ शरीरं जुहाव। तस्याः पूर्वाह्णे प्रातःसन्ध्या। इतश्च तत्कथा कालिकापु० २२अ० यथा "तदा विष्णोः प्रसादेन सा विवेश विधेः सुता। वह्निशुद्धाः शरीरं तद्गत्वा स्वर्गञ्च मण्डले। गृहं प्रवेश-

यामास विष्णोरेवाज्ञया पुनः। सूर्यौ द्विधा विभज्याथ तच्छरीरं तदा रचे। खके संस्थापयामास प्रीतये पितृदेवयोः। यदर्द्धभागसंज्ञास्तु शरीरस्य द्विजोत्तमाः!। प्रातःसन्ध्याभवत् सा तु अहोरात्रान्तमध्यगा। यः शेषभागसंज्ञास्तु अहोरात्रान्तमध्यगः। स सायमभवत् सन्ध्या पितृप्रीतिप्रिया सदा। सूर्योदयाच्च प्रथमं यदा स्यादरुणोदयः। प्रातःसन्ध्या तदोदेति देवानां प्रीतिकारिणी। अस्तं गते ततः सूर्ये शोषयन्निभा सदा। उदेति सायंसन्ध्यापि पितृणां मोदकारिणी। सन्धौ काले उपास्या सन्ध्या ऽत० पूर्वसन्ध्याकाले उपास्यायां गायत्रीप्रतिपाद्यपरमेश्वररूपायां इदेवतायाञ्च यथोक्तं भरद्वाजकृतौ ७अ० यथा

"गायन्तं त्रायते यस्मात् गायत्रीति ततः स्मृता ततः। प्राणा गया इति प्रोक्तास्त्रायते तानपापि वा। गायत्रीति भवेन्नाम केवलं त्रायतीति वा। व्याने प्राणजिह्वासु सदा वायसवर्तनात्। सरस्वतीति नाम्ना च समाख्याता मनीषिभिः। सवितृप्रकाशकरत्वात् सावित्रीत्यभिधा भवेत्। जगतः प्रसवित्रीति हेतुनानेन वापि च। तस्मादियं सदोपास्या निशादिवसयोर्द्विजैः। गायत्री सन्धिवेलायां सैव सन्ध्येति कीर्त्तिता। यो जपेदनं ज्ञात्वा नश्यन्त्यंहांसि तत्क्षणात्। ऋषिश्छन्दो देवताश्च जपेत्तान्विताः क्रमात्। ज्ञात्वा पदानि त्रीण्याथ तुरीयं पादमव्ययम्। ब्रह्मणा याति तत्साम्यं पदं ज्ञात्वा तुरीयकम्। या गायत्री त्रिचरणा सा त्रिमूर्त्तिस्वरूपिणी। उपास्यानन्तरं विप्रैस्त्रिसन्ध्यासु त्रिमूर्त्तिषु। तुरीयपादमेतस्या ज्ञात्वा योपास्तिमाचरेत्। सा रत्नपूर्णां पृथिवीं सप्तद्वीपां सदोषभागभवेत्। ब्रह्मकेशवरुद्रादिदेवताभिरुपासिता। सन्ध्यानां कोन सेवेत विप्रः स्यादभिलाषुकः। प्रातः सतारकां सन्ध्यां सायं सन्ध्यां सभास्कराम्। स्नानकर्मणि तन्मध्यासुपासीत यथाविधि। प्रातरेवसुपास्यैव प्रकुर्यात् हवनं जपम्। स्नानस्यानन्तरं कुर्यात् तर्पणञ्च मनाक्रतून्। सायं सन्ध्यासुपासीत होमं कुर्वीत यत्नवान्। सन्ध्योपासनहीनो यो न योग्यः सर्वकर्मसु। तस्मादुपास्य विधिना सन्ध्यामन्यक्रियाचरेत्। नोपासयेद्द्विजः सन्ध्यां योऽसौ शूद्रत्वमाप्नुयात्। कर्माण्यन्यानि संत्यज्य सन्ध्यां यः केवलं द्विजः। उपास्ते, सर्वपुण्यानि लभतवान् स भवेदजम्। सन्ध्योपासिं विना विप्रः पुण्यान्यन्यानि चाचरेत्। यस्य तानि पापानि भवन्त्येव न संशयः। नाशयेत् जन्मजनितं पापं दशजपादतु। पुराकृतं शतजपाद्धावत्प्राप्तु द्विजन्मनः। कृतं युगेऽपि चैकस्मिन् सहस्रेण जपेन तु। सङ्कल्प्या जपतस्तस्माद्यावीं सर्वदा जपेत्। समस्तमप्रतन्तुभ्यो जपयज्ञः परं कृतः। हिंसया ते प्रवर्तन्ते जपयज्ञो न हिंसया। यावन्तः कर्मयज्ञाश्च दानानि च तपांसि च। ते सर्वे जपयज्ञस्य कलां नार्हन्ति षोडशीम्। जपेन देवता नित्यं स्तूयमाना प्रसीदति। प्रसन्ना विपुलान् भोगान् दद्यान्मुक्तिञ्च शाश्वतीम्। वचराक्षसवेतालमेतभूतपिशाचकाः। जपाध्यं द्विजं दृष्ट्वा दूरतो यान्ति भीतितः। तस्माज्जपः सदा श्रेष्ठः सर्वस्मात् पुण्यसाधनात्। इत्येवं सर्वथा ज्ञात्वा विप्रो जपपरो भवेत्। एवं जपपरः सन्ध्यां भक्त्योपासीत यो द्विजः। नियमेन सदा गच्छेदक्षयत्वं नात्र संशयः। तस्माज्जितेन्द्रियो नित्यं सन्ध्योपासिं समाचरेत्। स सर्वलोकान् जित्वाऽथ विप्रः स्वयमानयेत्। तदन्ते ब्रह्मभावेन यावदाभूतसंप्लवम्। तावच्चित्तो निरातङ्को भवेदत्र न संशयः। एवं सन्ध्योपासिविधिं सर्वं यो विप्रोऽध्यापयेत् द्विजः। अध्यापको यथावत्सः श्रोता चैकाग्रमानसः। स सर्वपापनिर्मुक्तः सर्वविद्याविशारदः। अथ धान्यधनोपेतो जीवेद्वर्षशतं सुखी। एतद्विधानं योऽधीत्य श्रावयेत् ब्राह्मणोत्तमान्। प्रीतिपूर्वं प्रयत्नेन ब्राह्मणो नियमेन च। अज्ञानेन प्रमादेन दुरितं यत् समुत्थितम्। तच्च तत् सकलं नाशं व्रजेदत्र न संशयः। याः सन्ध्योपासयश्चित्तो यस्य स्नानं विधीयते। सर्वस्मि श्रावणो यस्य तत् सर्वं पूर्णतामियात्। कामान्मोहाच्च लोभाच्च सन्ध्यां नातिक्रमेद् द्विजः। सन्ध्यातिक्रमणाद्विप्रो ब्राह्मण्याच्च्यवते यतः। अनागतां तु ये पूर्वामतीतां पश्चिमाम्। सन्ध्यां नोपासते विप्राः कथं ते ब्राह्मणाः स्मृताः?। सायं प्रातः सदा सन्ध्यां ये न विप्रा उपासते। कामतान् धार्मिको राजा शूद्रकर्मसु योजयेत्। विधानमेतत्तो देयं रहस्यं यस्य कस्यचित्। वेदाध्यायाभिजातायं प्रदेयं स द्विजन्मने"। ब्राह्मणस० योगियाज्ञवल्क्यः "अतःपरं प्रवक्ष्यामि सन्ध्योपासनमुत्तमम्। अहोरात्रकृतैः पापैर्यैरुपास्य प्रमुच्यते"। तथा "यावन्तोऽक्षा पृथिव्यां हि विकर्मस्थास्तु वै द्विजाः। तेषां वै यावनाचार्य सन्ध्या सदा क्षयमृता। या सन्ध्या सा तु गायत्री

द्विधा भूता प्रतिष्ठिता"। तथा "सा सन्ध्यं कर्म विप्राणाम-क्षोरात्रस्तस्य तु। पापापहन्त्रये यस्मात् तस्मात्क्रियं समाचरेत्" यमः "सन्ध्याहीनाशुचिर्नित्यमनर्हः सर्वकर्मसु। यदन्यत् कुरुते किञ्चित् न तस्य फलभाग्भवेत्"। यमः "अनागतान्तु यो पूर्वामतीतां चापि पश्चिमाम्। यो विप्रो नानुतिष्ठेत्ति सन्ध्यां ते वृषलाः स्मृताः"। छन्दोगपरिशिष्टे काण्वायनः "सन्ध्यां नोपास्य चाकर्त्ता स्नानदानस्य यः सदा। तं दोषा नोपसर्पन्ति वैनतेयमिवोरगाः" तथा "एतत् सन्ध्यात्रयं प्रोक्तं ब्राह्मण्यं यदधिष्ठितम्। यस्य नाध्यादरस्तस्य न स ब्राह्मण उच्यते"। कूर्मपुराणे "न तिष्ठति तु यः पूर्वां नोपास्ते यस्तु पश्चिमाम्। स शूद्रेण समो लोके सर्वधर्मविवर्जितः"। सूत्रकाले सन्ध्यावन्दनाकरणे प्रायश्चित्तमाह। व्यासः "आदित्योऽभ्युदियाद्यस्य सन्ध्योपास्तिमकुर्वतः। स्नात्वा प्राणांस्त्रिराचम्य गायत्र्यष्टशतं जपेत्" पारिजाते तु "कालातिक्रमणे चैव चतुर्व्यार्घ्यं प्रदापयेत्" इत्युक्तम्। मलमासतत्त्वे तु "कालातीता तथा सन्ध्या सन्ध्यास्नाभैथुने यथा। गायत्रीं दशधा जप्त्वा पुनःसन्ध्यां समाचरेत्" काशीखण्डोक्तं प्रायश्चित्तान्तरमुक्तम्। अत्र यथाचारं व्यवस्था। सङ्कल्पपूर्वमनातः सन्ध्यायां गौणकालः आद्यदोषावसानं सायंसन्ध्यायाः इति सङ्ग्रहः। "उदयास्तमयादूर्द्धं यावत् स्यादटिकात्रयम्। तावत् सन्ध्यामुपासीत प्रायश्चित्तमतःपरम्" इति स्कान्दे विशेष उक्तेः। मध्याह्ने तु दक्षः "आध्यर्द्धयामादासायं सन्ध्या माध्याह्निकीस्मृते। अर्घ्यप्रदानतः पूर्वमुदयास्तमयेऽपि वा। गायत्र्यष्टशतं जप्यं प्रायश्चित्तं द्विजा-

र्मणः"। व्यासः "बहिः सन्ध्यां दशगुणा गोप्रसवणादिषु। स्नाते तीर्थे दशगुणा साङ्गोपाङ्गे" । बहिरिति स्वनाड्यादिस्थाने ग्राह्यादौ। यातातपः "स्थलेषु प्राकृती सन्ध्या गोप्रे शतगुणा स्मृता। नदीषु शतसाहस्रा अनन्ता शिवसन्निधौ"। स्थलेषु मृत्स्नीयादौ। योगियाज्ञवल्क्यः "सन्ध्यां सन्ध्यासुपासीत नास्तमे नोदिते रवौ। सन्ध्यात्रयन्तु कर्त्तव्यं द्विजेनाकविदा सदा"। संवर्त्तः "प्रातःसन्ध्यां सनक्षत्रामुपासीत यथाविधि। सादित्यां पश्चिमां सन्ध्यामर्कोस्तमितभास्कराम्"। नरसिंहपुराणे "पूर्वां सन्ध्यां सनक्षत्रामुपक्रम्य यथाविधि। गायत्रीमन्यसेत्तावद्यावदादित्यदर्शनम्"। मनुः "ऋग्यजुः सामवेदवि

तिभिः" इति। नैमित्तिकेऽप्यसम्भवे यमः "दिवोदितानि कर्माणि प्रमादादकृतानि चेत्। सर्वथाः प्रथमे यामे तावत् कुर्यादुपाक्रमम्"। अत्र सङ्कल्पकालानुरोधात् कार्यसम्बन्धोपासनं पूर्वं कृत्वा "आगन्तूनामन्ते निवेशः" इति न्यायेनातीतकालं कर्म पश्चात् कार्यमिति न्यायतः प्राप्तं तस्य निषेधार्थं यथाक्रममिति वचनमिति। "दिवोदितानि कर्माणि प्राप्नुवन्तीतराणि च। दिवोदितानि कृत्वैव विदध्यादुत्तराणि तु" मदनपरिजाते वसिष्ठोक्तेः। सूतके विशेषः सूतके दत्तहुतौ "अवगाहं ब्रह्मयज्ञं सौरजप्यञ्च वर्जयेत्" इति "स्नानं सन्ध्यां त्यजन् विप्रः सप्ताहाच्छूद्रतां व्रजेत्। तस्मात् स्नानञ्च सन्ध्याञ्च सूतकेऽपि न सन्त्यजेत्। सूतके सूतके चैव सन्ध्याकर्म समाचरेत्। मनसोच्चारयेन्मन्त्रान् प्राणायामस्तु द्विजः" इत्यनयोरविरोधाय न मानससन्ध्यानिषेध इति कल्प्यम्। किन्तु प्राणायाममन्त्रा मनसापि नोच्चार्य्यां इत्यर्थः। पैठिनसिस्तु "सूतके सावित्र्याञ्जलिं प्रक्षिप्य प्रदक्षिणं कृत्वा सूर्यन्ध्यायन्नमस्कुर्यात्" इत्यर्घ्यदानानां सन्ध्यामाह। अन्ये तु तच्चार्घं वाचा गायत्रीं दद्यादध्यौङ्कारेण। अष्टविंशतिकृत्वोऽत्र गायत्रीं मनसा जपेत्" इति गायत्रीजपमयाह्नः। "सूतके कर्मणां त्यागः सन्ध्यादीनां विधीयते" इति यद्यपि सन्ध्यादीनामिष्टिः श्रूयते तथाप्यञ्जलिप्रक्षेपादिकं कार्यम्। "सूतके सावित्र्या चाञ्जलिमक्षिप्य प्रदक्षिणं कृत्वा सूर्यं ध्यायन्नमस्कुर्यादिति" पैठिनसिस्मरणात् इति मिताक्षरा सन्ध्यादीनामप्यपवादमाहापरार्के पुलस्त्यः "सन्ध्यामिष्टिं चरुं होमं यावज्जीवं समाचरेत्। न त्यजेत् सूतके वापि त्यजन् भक्षेदधो द्विजः। सूतके सूतके चैव सन्ध्याकर्म समाचरेत्। मनसोच्चारयेन्मन्त्रान् प्राणायामस्तु द्विजः" ?। यत्तु चन्द्रिकायां जाबालः "सन्ध्यां यज्ञ महायज्ञान् नैत्यिकं स्मृतिकर्म च। तन्नाध्ये ह्यापवेत्तेषां दशाहान्ते पुनः क्रिया" यच्च संवर्त्तः "सूतके कर्मणां त्यागः सन्ध्यादीनां विधीयते" यच्च विष्णुः "सर्वकालसुपस्पृश्य तु सन्ध्ययोः पार्थिवेष्यते। अन्यत्र सूतकाशौचविप्रमातुरभीतितः" इति। तत् सम्पूर्णसन्ध्यानिषेधपरम्। "अर्घ्यान्ता मानसी सन्ध्या कृष्णवारिविवर्जिता" इति शुद्धितत्त्वे व्यवनोक्तेः। पैठीनसिरपि सन्ध्योच्चारणमप्याह" सूतके सावित्र्याञ्जलिं प्रक्षिप्य सूर्यं ध्यायन्नमस्कुर्यात्"। प्रयोगपरिजाते भरद्वाजोऽपि "सूतके सूतके कुर्यात् प्राणायाममनन्त्रकम्। तथा मार्जनमन्त्रांस्तु मनसोच्चार्य मार्जयेत्। सावित्रीं सम्यगुच्चार्य सूर्यार्घ्यं निवेदयेत्। मार्जनं तु न वा कार्यं सूपस्थानं न चैव हि"। इत्येवं मिताक्षरापरिजातादौ अशौचे सन्ध्याकरणविशेषोक्तेः गौडानां तदाचरणमनाचार एव तस्य शौतत्वेन कृत्वा बाधानुचितत्वादपि मिताक्षरायुक्तं युक्तमिति दृष्टव्यम्।

प्रातःसवन न० सवनं यज्ञाङ्गकर्मभेदः सोमाभिषवादि प्रातः कर्त्तव्यम् सवनम्। प्रातःकर्त्तव्ये यज्ञाङ्गकर्मभेदे। ष्ठञ् प्रातःसव तत्रार्थे पु०।

प्रातःस्नान ७त०। प्रातःकर्त्तव्ये जलावगाहनादिरूपे स्नाने तस्य कर्माङ्गतादर्शनं मरुत्तपु० "अथः काले तु संप्राप्ते कृत्वा चावश्यकं बुधः। स्नायाद्नदीषु गुहाषु शौचं कृत्वा यथाविधि। प्रातःस्नानेन पूयन्ते देऽपि पापकृतो जनाः। तस्मात् सर्वप्रयत्नेन प्रातःस्नानं समाचरेत्। प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टशुभं हि तत्। कुरुक्षेत्रस्य सततं वासाद्याः संभवन्ति हि। अतो नैवाचरेत् कर्मोपवासकृत्वा स्नानमादितः। अनच्छोः वालकर्णौ च दुःस्वप्नं दुर्विचिन्तितम्। प्रातःस्नानेन पापानि प्लवन्ते नात्र संशयः। न च स्नानं विना पुंसां प्राशस्त्यं कर्म संस्कृतम्। होमे जप्ये विशेषेण तस्मात् स्नानं समाचरेत्। अशक्तावधिरस्तन्तु स्नानमस्य विधीयते"।

प्रातःस्मरणीय त्रि० ७त०। प्रातःकीर्त्तनीये देवादौ पुण्यचरिते। प्रभातशब्दे ४४७५ पृ० दृश्यम्।

प्रातर् अव्य० प्र+अत—अरु। प्रभाते अमरः "प्रातःकालो मुहूर्त्तौ द्वौ" इत्युक्ते सूर्योदयावधिमिमुहूर्त्तकाले च

प्रातर त्रि०प्रकृष्ट आतरो यत्र। प्रकृष्टातरूपतरूपदपद्यप्रयुक्ते देशे ततः क्रमात्त०चतुरर्थ्यां अण्। प्रातरीय तत्रादूरदेशादौ त्रि०।

प्रातरर्चक पु० सर्पभेदे भा०आ० ५७अ०।

प्रातरनुवाक पु० प्रातःपाठे अनुवाके वेदांशभेदे यत्ते "प्रातरनुवाकं जापदुपास्ते" काला० श्रौ० ८।१।१२ "पुरा प्रातरनुवाकस्य" आ०ब्र० "प्रातरनुवाकस्य प्रारम्भात्" भा० "अप्रगीतस्तुतशस्त्रं यत् प्रातःकाले यत्ते प्रातरनुवाकस्तत्ते इति यावत्" आनन्द०। [त्रिका०

प्रातराश पु० अश+भावे घञ् ७त०। प्रातःकालिके भोजने

प्रातर्गेय पु० प्रातर्गेयमन्त्र। स्तुतिपाठके त्रिका० २प्रातःकाले गातव्ये सामादौ च त्रि०।

प्रातर्दिन न० कर्म०। पूर्ववर्त्तिनि दिवसे क्रियाफलभेदे।
प्रातर्भोक्तृ पु० ७त०। काले भक्षके।
प्रातर्भोजन न० ७त०। प्रातराशे जटाध०।
प्रातस्तरा(रा)म् अव्य० प्रातर्+तरप् तमप् वा आद्ये। अत्यन्तप्रातःकाले "प्रातस्तरां पतत्रिभ्यः" भट्टिः।
प्रातस्त्रिवर्गा स्त्री प्रातः प्रातःस्नानेन त्रिवर्गो यस्याः। गङ्गायां भा०अनु० २६अ०।
प्रीति स्त्री प्रा+भावे क्तिन्। १पूर्त्तौ २लाभे च मेदि०।
प्रातिकण्ठिक त्रि० प्रतिकण्ठं गृह्णाति प्रतिकण्ठ+ठक्। प्रतिकण्ठग्राहके।
प्रातिका स्त्री प्र+अत-खुल् टाप्। जवाङ्कुरे राजनि०।
प्रातिकामिन् दुर्योधनस्य दूतभेदे भा०भी० ६५अ०।
प्रातिकूलिक त्रि०प्रतिकूलं वर्त्तते प्रतिकूल+ठञ्। प्रतिकूलं वर्त्तमाने स्त्रियां ङीप् "तां प्रातिकूलिकीं मत्वा" भट्टिः
प्रातिकर्य न० प्रतिकस्य भावः पुरोहिता० यक्। प्रतिकभावे
प्रातिजनीन त्रि० प्रतिजनं साधु प्रतिजना० खञ्। प्रतिजनं साधौ। काला०औ०२५।१२।४
प्रातिनिधिक पु० प्रतिनिधि+स्वार्थे ठक्। प्रतिनिधौ
प्रातिपथिक त्रि०प्रतिपथमेति ठञ्। प्रतिपथं गन्तरि स्त्रियां ङीप्। [तिथौ भवे।
प्रातिपद त्रि० प्रतिपदि भवः तत्रिवेदा० अण्। प्रतिपदि-
प्रातिपदिक त्रि० प्रतिपदायां तिथौ भवः "कालाट् ठञ्" पा०ठञ्। १प्रतिपदायां तिथौ भवे शतपथब्राह्मणे पशौ पु० "आदौ प्रतिपदा येन स्वस्तपश्चोऽसि पावक!। त्वत्प्रसादात् प्रातिपदिकं संभविष्यन्ति देवताः" वराहपु०। २नाम्नि शब्दभेदे "यत् प्रातिपदिकं नाम तदाख्यो नातिरिच्यते" शब्दर०। तल्लक्षणन्तु "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" "कृत्तद्धितसमासाश्च" पा०व्याख्याते चैते सरलायामस्माभिः "अधातुरप्रत्यय इति पुंलिङ्गनिर्देशस्तु परलिङ्गं इन्द्र तत्पुरुषयोरित्यभिधानात्। एतत्सूत्रे परसूत्रे चार्थवत्त्वमेतत्सूत्राक्षेपीभूतविभक्तीतरसमभिव्याहारानपेक्षया लोके ऽर्थबोधजनकत्वम् अन्यथाऽधातुरिति पर्युदासेन व्याख्यानाद्धातोरर्थवत्त्वे सादृश्यप्रत्ययेन सिद्धे उत्तरसूत्रे कृदादीनामनर्थकानामसिद्धे चार्थवत्त्वपक्षे व्यर्थं स्यात्। अदृत्तिति धातौ साध्ये इत्यादि प्रत्ययान्ते च एतत्साध्यविभक्त्यनपेक्षत्वेऽपि तदितरानपेक्षत्वसत्त्वेऽपि अधातुरप्रत्यय इति तत्पर्युदासः। एतद्देशवर्त्तिनोऽर्थबोधजनकत्वसाक्षात्प्रातिपदिकम्। अत्र प्रत्ययपदं प्रत्ययप्रत्यान्तपरं तन्त्रावृत्त्यैवोभयपरत्वादित्याहुः (प्रत्ययं प्रत्ययान्तञ्चेति) त्रि०कौ०)। अतएव भाष्ये "न लोके केवलेन प्रत्ययेनार्थोऽवगम्यते केन तर्हि संघातिकेन" इत्युक्तम् हरिणाप्युक्तम्। "धात्वादीनां विभक्तीनां लौकिकार्थो न विद्यते। कृत्तद्धितानामर्थश्च केवलानामलौकिकः। प्रातिपदिकत्वलक्षणश्च तयोरर्थो न विद्यते" इति। भू सत्तायामित्यादौ कर्मण्यणित्यादौ चार्थकथनन्तु अलौकिकार्थकथनमात्रं प्रक्रियादशायामिति वेदितव्यम् "ब्राह्मणार्थो यथा नास्ति कश्चिद् ब्राह्मणकम्बले। देवदत्तादयो वाक्ये तथैव स्युर्निरर्थकाः" इत्युक्तेरवयवशक्त्यापि बोधकत्वात्तस्यापि प्रातिपदिकत्वापत्त्या तदुत्तर स्वादिप्रसङ्ग इति तन्निवारणायेदं निरूपणमित्याहुः "पूर्वसूत्रे चेति" त्रि०कौ०। प्रत्ययपरके यस्मात् च विहितस्तदादेस्तदन्तस्य पदसंज्ञमिति न्यायादेव प्रत्ययान्तत्वलाभात् कृत्तद्धितादीनामपि प्रत्ययत्वात् पूर्वसूत्रेण च संज्ञासिद्धेरिति भावः। पदमिति व्याकरणे च प्रयोगार्हमर्थवदित्यर्थः। अनुकरणस्य शब्दमात्रपरतया न प्रातिपदिकत्वमनुकरणस्यानितिपरस्य प्रयोगार्हत्वेऽपि इतिपरस्य पृथक् प्रयोगार्हत्वादिति नवित्यत्र प्रयोगार्हेत्वादौ न प्रसङ्गः" हरिणाप्युक्तम्। अतएव "भविष्यद्भू सत्तायामितीदमपि। न प्रातिपदिकं नापि पदं साधु च तत् स्मृतम्"। प्रातिपदिकार्थे लोके प्रयोग एव। तदुक्तं नामार्थाः "स्वार्थो द्रव्यञ्च लिङ्गञ्च संख्या कर्मादिरेव च। अमी पञ्चैव नामार्थास्त्रय कोषाच्चिदन्तिमाः" इत्युक्ताः। तत्र व्यक्तिश्च, नियतलिङ्गाश्च प्रातिपदिकार्थे प्रथमाया उदाहरणम् त्रि० कौ०।
प्रातिपीय पु० ऋषभेदे भा०द्रो०१९७अ०। २गोत्रप्रवरर्षिभेदे च प्रवराध्यायः।
प्रातिपेय पु० ऋषभेदे भा०शु० ६८अ०।
प्रातिभ त्रि० प्रतिभाऽस्यास्य प्रज्ञा० अण्। १प्रतिभान्विते योगिनां योगविघ्नकारके २उपसर्गभेदे मार्कण्डेयपु० ४० अ० यथा "प्रातिभः श्रावणो दैवो भावनौ तथापरौ। एते योगिनां योगविघ्नाय कुकोदयाः। वेदाद्याः शास्त्रशास्त्राद्याः विद्याः शिल्पाद्यपेक्षतः। प्रतिभान्ति यदर्थं ताः प्रातिभः स तु योगिनः। शब्दाद्यैर्नखिलान् वेत्ति शब्दं गृह्णाति चैव यत्। योजनानां सहस्रेभ्यः श्रावणः स उदाहृतः। मनसाहीयते चार्थो न यदा देवतोपमः। उपसर्गस्तमश्चाद्यैर्दैवश्चेत्थं तत्त्ववेदिनः। भाव्यते यच्छरीरस्थं मनो रोगेण योगिनः। तस्य

चारविभ्रंशाद् भ्रमः४ च परिकीर्त्तितः। आवर्त्त इव तोयस्य ज्ञानावर्त्तो यदाकुलः। नाभ्येवेच्छितभावर्त्तः५ उपसर्गः स उच्यते। एतैर्नीतियोगास्तु सकला देवयोनयः। उपसर्गैर्मेघाधोरैरावर्त्तन्ते पुनःपुनः"।

प्रातिभाव्य न० प्रतिभुवो भावः ष्यञ् द्विपदवृद्धिः। (ज्ञानिनि) १प्रतिभूभावे प्रतिभूत्वेन देये २धने च मनुः ८।५५। ५६ दर्शनप्रतिभूशब्दे २४७५ पृ० दृश्यम्।

प्रातिभासिक त्रि० प्रतिभासादागतः ठक्। प्रतिभासाधीन सत्त्ववति मिथ्यारजतादौ वेदान्तमते हि सत्त्वं त्रिविधं पारमार्थिकं व्यवहारिकं प्रातिभासिकं च तत्र ब्रह्मणः सत्त्वं पारमार्थिकं त्रिकालाबाध्यत्वात्, घटादीनां सत्त्वं व्यवहारिकं व्यवहारकालेऽबाध्यत्वात्, शुक्तौ रजतादेः सत्त्वं प्रातिभासिकम् अधिष्ठानज्ञानबाध्यत्वात् प्रतिभासकालमात्रसत्त्वाच्चेति वेदान्तपरिभाषायां स्थितम्।

प्रातिशाख्य त्रि० प्रतिशाखं भवः परिषद्वा० ञ्य। प्रतिशाखं भवे व्याकरणभेदे न०।

प्रातिश्रुत्क पु० प्रतिश्रुति तत्समये भवः ठञ्। प्रतिश्रवणवेलायां भवे पुरुषे "यत्र वायं चौत्रः प्रातिश्रुत्कः पुरुषः" छ० उ०। [२प्रतिव्यक्तिभवे च।

प्रातिस्विक त्रि०प्रतिस्वं भवः ठक्। १व्यवहारधर्मे त्रिका०।

प्रातिहर्त्त न० प्रतिहर्त्तुर्भावः कर्म वा तल्लक्षा० अञ्। प्रतिहर्त्तृरूपस्य ऋत्विग्भेदस्य कर्मणि १प्रतिहरणे २तद्भावे च।

प्रातिहारक पु० प्रतिहारक एव स्वार्थे अण्। प्रतिहारकशब्दार्थे अमरः। [कारके अमरः।

प्रातिहारिक त्रि० प्रतिहारः प्रयोजनमस्य ठक्। मायाकारके अमरः।

प्रातीतिक त्रि०प्रतीत्या निर्वृत्तः ठञ्। प्रातिभासिके पदार्थे

प्रातीप प्रतीपस्यापत्यम् अण्। प्रतीपपुत्रापत्ये शान्तनौ रूपे त्रिका०। [कुलाचारिणि।

प्रातीपिक त्रि० प्रतीपं वर्त्तते ठञ्। प्रतीपं वर्त्तमाने प्रतिकूले

प्रातृद पु० ऋषिभेदे शत०ब्रा० १४,८।१२।२

प्रात्ययिक त्रि० प्रत्ययाय स्थितः ठक्। प्रतिभूभेदे "दर्शनप्रतिभूर्यत्र स्थितः प्रात्ययिकोऽपि वा" याज्ञ०। दर्शनप्रतिभूशब्दे २४७८ पृ०दृश्यम्।

प्राथमकल्पिक त्रि० प्रथमकल्पे भवः ठक्। १प्रथमारम्भोचिते वेदाध्ययनादौ। प्रथमं कल्पमधीते कल्पादित्वात् ठक्। २प्रथमकल्परूपशास्त्राध्यायिनि अमरः।

प्राथमिक त्रि० प्रथमे भवः ठञ्। १प्रथमभवे स्त्रियां ङीप्। प्रथममधीते प्रथम+ठक्। वेदादेः २प्रथमाध्येतरि च।

प्रादि पु० उपसर्गसंज्ञार्थं या०उक्ते शब्दभेदे स च गण: या० ग०उक्तो यथा "प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत्(द्) अभि प्रति परि उप" एते प्रादयः। निस् दुस् शब्दौ "निसस्तपतावनासेवने दति (८।३।१२०) सूत्रे निस इति निर्देशात् निष्कृतं दुष्कृतमित्युदाहृत्य "दुरुपधस्य यो विसर्जनीयः" इति भाष्योक्तेश्च। निरः कुषः इति (७।२।४६) "सुदुरोरधिकरणे" इति च निर्देशात् रान्तावपि मनो०। उदिति दान्तोऽपि "उदोऽनूर्ध्वे चेष्टायामिति"। "उपसर्गाः क्रियायोगे" या० "गतिश्च" या० प्रादयः क्रियायोगे उपसर्गसंज्ञा गतिसंज्ञाश्च स्युः" सि०कौ०।

प्रादुराच्चि पु० गोत्रप्रवरविभेदे प्रवराध्यायः।

प्रादुर्भाव पु० प्रादुस्+भू–भावे घञ्। आविर्भावे प्रथमप्रकाशे

प्रादुस् अव्य० प्र+अद्–डुसि। प्राकाश्ये अर्थात् अस्य क्रियायोगे गतिसंज्ञा प्रादुष्कृत्य प्रादुर्भूय। स्वार्थे यत् न टिलोपः प्रादुष्य प्रादुर्भावे न० उज्ज्वलदत्तः।

प्रादेश पु० प्र+दिश–घञ् दीर्घः। १तर्जनीसङ्कितविस्तृताङ्गुष्ठे अमरः २देशमात्रे मेदि० "अङ्गुष्ठस्य प्रदेशिन्या व्याप्तः प्रादेश उच्यते" इत्युक्ते ३परिमाणभेदे च हेमाद्रौ०।

प्रादेशन न० प्र+आ+दिश–ल्युट्। दाने अमरः।

प्रादेशिक त्रि० प्रदेशे भवः ठक्। प्रदेशभवे [स्त्रियां ङीप्।

प्रादोष(षि)क त्रि० प्रदोषे भवः वा अण्ठञौ। प्रदोषभवे

प्रादोहनि पु०स्त्री प्रदोहनस्यापत्यम् इञ्। तदपत्ये। ततः यूनि फञ् तौल्व० तस्य न लुक्। प्रादोहनायनि तदीये यून्यपत्ये पुंस्त्री०। [करणे भाग०३,८।२१।

प्राधनिक त्रि० प्रधनं संग्रामः प्रयोजनमस्य ठक्। युद्धोप-

प्राधा स्त्री प्रधैव स्वार्थे अ। दक्षकन्याभेदे काश्यपकुलभेदे हरिवं०२२६अ०। तस्याः अपत्यं ठक्। प्राधेय तदपत्ये पुंस्त्री० तदपत्यानि च देवगन्धर्वादयः भा०आ०६५ अ०। अग्निपुराणे प्राधेया इत्येव पाठः शब्दकल्पद्रुमे प्राधेय शब्दकल्पनं लिपिकरप्रमादजतपाठदर्शनात् इति बोध्यम्।

प्राधानिक त्रि० प्रधान+स्वार्थे ठक् तल्लेटं ठक् वा। १प्रधानशब्दार्थे २प्रधानसम्बन्धिनि च "प्राधानिकरहस्यञ्च" इत्यादि देवीभागवतव्याख्यायां सुप्रवत्यां स्थितम्।

प्राधान्य न० प्रधानस्य भावः ष्यञ्। श्रेष्ठत्वे। भावे त्वप्रधानत्व न० तल् प्रधानता स्त्री तत्रार्थे। "अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता" शाब्दिकन्यायिका।

प्राध्व त्रि० प्रकृष्टोऽध्वा अध्वसमा० । १दूरपथे २प्रकृष्टे मार्गे ३वहे च हेमच० ब० स्त्री० । ४वक्रदूरगामिनि रथादौ च ।

प्राध्वम् अव्य० प्र+आ+ध्वन-डमि । १आनुकूल्ये २वन्धने ३मन्थनावाप्त्रे अमरः ।

प्रान्त पु० प्रकृष्टोऽन्तः । १शेषसीमायाम् हेमच० । २क्षयिभेदे पु० । ततः गोत्रापत्ये कण्वा० फञ् । प्रान्तायन तदपत्ये पुंस्त्री० । [शब्दार्थक० ।

प्रान्तदुर्ग न० प्रान्ते दुर्गं रूपाद्यवस्थानभेदः । दुर्गभेदे

प्रान्तर न० प्रकृष्टमन्तरं व्यवधानं यत्र । १दूरगम्ये पथि । २वृक्षादिछायाशून्ये पथि ३वने ४कोटरे च मेदि० ।

प्रान्तशून्य पु० प्रान्ते शून्यमस्य । छायादिरहिते पथि शब्दर०

प्रापणिक पु० प्र+आ+पण-"प्रापि पणिभ्यः" ठण्० किकन् । पण्यविक्रेतरि उज्ज्वलद० ।

प्राप्त त्रि०प्र+आप-कर्मणि क्त । १लब्धे २आसादिते ३भूते अमरः । ४उपस्थिते च ।

प्राप्तकाल पु० प्राप्तः कालोऽस्य । करणयोग्ये काले २।२।१२१ पा० स्त्रे इष्टम् ।

प्राप्तपञ्चत्व त्रि० प्राप्तं पञ्चत्वं मरणं येन । मृते अमरः । मरणे देहस्य पञ्चभूतात्मकतापाप्तेस्तस्य तथात्वम् । प्रेतशब्दे दृश्यम् । [इषादौ शब्दरत्ना० ।

प्राप्तभार पु० प्राप्तः भारः तद्वहनकालोऽस्य । भारसह-

प्राप्तरूप त्रि० प्राप्तं रूपं येन । १मनोहरे २पण्डिते अमरः । ३रूपवति च ।

प्राप्ति स्त्री प्र+आप-भावे क्तिन् । १उदये २धनादिलाभे ३लाभे च अमरः । ४प्रापणे ५संहतौ शब्दरत्ना० अणिमाद्यष्टविधैश्वर्यमध्ये ६ऐश्वर्यभेदे ऐश्वर्यशब्दे दृश्यम् । बाहेऽथजरासन्धप्रकृष्टसुतभेदे ७कंसकलत्रभेदे भा० स० १२अ० । हरिवं० ६१अ० "अप्राप्तस्यैव या प्राप्तिः सैव संयोग उच्यते" भाषा० उक्ते ८संयोगस्वरूपे द्रव्यगुणभेदे च । सा०द०उक्ते ९सत्त्वाङ्गभेदे "युक्तिः प्राप्तिः समाधानमिति" सत्त्वाङ्गान्वुद्दिश्य "संप्रधारणा चार्थानां युक्तिः, प्राप्तिः सत्त्वागमः" लक्षिता । कामस्य भार्याभेदे भा० आ० २६७० । नील०ता० उक्ते ८सहस्रभेदे ।

प्राप्तिसम न० गौ०उक्ते जात्युत्तरभेदे "प्राप्य साध्यमप्राप्य वा हेतोः प्राप्त्या विशिष्टत्वात् प्राप्तिसमः" सू० । "हेतुः प्राप्य वा साध्यं साधयेदप्राप्य वा ? । न तावत् प्राप्य । प्राप्त्याविशिष्टत्वादसाधकः द्वयोर्विद्यमानयोः प्राप्तौ सत्यां किं कस्य साधकं साध्यं वा ? । अप्राप्यसाधकं न भवति । नाप्राप्तः प्रदीपः प्रकाशयतीति । प्राप्त्या प्रत्यवस्थानं प्राप्तिसमः" वात्स्या० "प्राप्त्या विशेषादनिष्टापादनेन प्रत्यवस्थानम्" गौ०इ० ५।७ यथा आत्मा सक्रियः क्रियाहेतुगुणवत्त्वादित्यादौ क्रियाहेतुगुणवत्त्वमेव किमिति क्रियावत्त्वं साध्यते । किमिति क्रियावत्त्वेन तादृशगुणवत्त्वं न ? उभयोरविशेषादिति" ।

प्राप्त्याशा स्त्री ६त० १लाभेच्छायाम् २प्रारब्धकार्यस्यावस्थाभेदे "अवस्थाः पञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः । आरम्भो यत्न प्राप्त्याशा नियताप्ति फलागमौ" इत्युद्दिश्य "उपायापायशङ्काभ्यां प्राप्त्याशा प्राप्तिसम्भवा" इति सा०द० लक्षिता ।

प्राप्य त्रि० प्र+आप-ण्यत् । १गम्ये २लभ्ये च २व्याकरणोक्ते "क्रियाजन्यविभेषाणां सिद्धिर्यत्र न विद्यते । दर्शनादनुमानाद्वा तत्प्राप्यमिह कथ्यते" इत्युक्ते ३कर्मभेदे कर्मनृशब्दे १७२०पृ० दृश्यम् । प्र+आप-ल्यप् । लभ्ये त्रि० अव्य० ।

प्राप्यकारिन् त्रि० प्राप्य विषयदेशं गत्वा करोति विषयप्रकाशम् कृ-णिनि । विषयदेशं गत्वा विषयप्रकाशकारके चक्षुरादौ इन्द्रिये । तत्र न्यायमते चक्षुष एव प्राप्यकारिता नान्यस्य । वेदान्तमते सर्वस्यापीति भेदः ।

प्राबोधिक पु० प्रबोधाय हितं ठक् । १जपःकाले शब्दमा० प्रबोधः प्रबोधनं तत्र नियुक्तः तत्प्रयोजनमस्य वा ठञ् । २मागधे प्रातःस्तुतिपाठकभेदे ।

प्राभञ्जन न० प्रभञ्जनो देवताऽस्य अण् । जातिनक्षत्रे तस्य तद्देवताकत्वात् तथात्वम् । तस्यापत्यम् इञ् । प्राभञ्जनि स्मृतौ "आयूंषि त्वतु निर्भिद्य प्राभञ्जनिरमोचयत्" भट्टिः ।

प्राभव न० प्रभोर्भावः अण् । १प्रभुत्वे २ऐश्वर्ये च ।

प्राभवत्य न० प्रभवतो भावः ष्यञ् । विभुत्वे मनुः ८।१२

प्राभाकर न० प्रभाकरस्य इदम् तन्मतं वेत्ति वा अण् । १मीमांसकभेदप्रभाकरसम्बन्धिनि २तन्मतज्ञे च ।

प्राभृत न०प्र+आ+भृ-कर्मणि क्त । उपढौकनद्रव्ये अमरः । स्वार्थे क । २प्राभृतक तत्रार्थे स्त्रियां टाप् ।

प्रामधि पु० पौलस्त्ये सप्तर्षिसभ्ये ऋषिभेदे हरिवं० ७अ० ।

प्रामाणिक त्रि० प्रमाणेन निर्वृत्तः सिद्धः ठञ् । १प्रत्यक्षादिप्रमाणसिद्धे २शास्त्रसिद्धे च स्त्रियां ङीप् । ३हैतुके ४अर्थादाभिज्ञे ५शास्त्रज्ञे ६परिच्छेदके ७प्रमाणकर्त्तरि च ।

प्रामाण्य न० प्रमाणस्य भावः । तद्वति तत्प्रकारकत्वरूपे

प्रायधर्मभेदे तच्च व्यवस्थते परतोपाह्यं मीमांसकादिमते स्वतः, स्वसमयप्रा वा प्राह्यमिति भेदः। प्रमात्वशब्दे दृश्यम्। [इत्ये शब्दच० भावे क्यप्। २प्रमादे न०।

प्रामाद्य पु०प्रमाद्यत्वेन प्र+मद वा० करणे ण्यत्। १दासक-

प्रामील्य न० प्र+मील–भावे क्विन् तत्र साधु ष्यञ्। १क्षणे त्रिका०पाठान्तरम्। प्रमीलस्य भावः ष्यञ्। २भरणे न०।

प्राय पु० प्र+अय–क्रिए–वा घञ्–अच् वा। १क्षये २अन-शनक्षये श्वाङ्क्षये च मेदि० "प्रायेण सामपाविधौ गुणानाम्" कुमारः। ततः प्रज्ञादि० सर्वविभक्ति-पवादस्तृतीया प्रायेण मार्ग्यः सि०कौ०।

प्रायण न०प्र+अय–भावे ल्युट्। १देहत्यागेन स्थानान्तरगमने मनुः ८।३२१ श्लो० उदा०। २प्रारम्भे च "वैश्व त्रि-वृत्प्रायणा" ताण्ड्य०ब्रा० २।१५।१ "त्रिवृत् स्तोमश्चक्षुष्टव-प्रायणे प्रारम्भे यज्ञाः" भा०।

प्रायणीय त्रि० प्रायणं आरम्भदिनं तत्र विहितः छ। १प्रारम्भदिने २गवामयनप्रथमाहादौ च विहिते अतिरात्रे यागभेदे च "प्रायणीयेऽह्न सुत्यामेके" कात्या० श्रौ० १२।६।२६ 'प्रायणीयोऽतिरात्र एवाह्न साध्यः" देव-नाथः। ताण्ड्य० ब्रा०४।२।१।२ भाष्ये द्वितीयाह-स्यैव प्रायणीयसंज्ञा तन्निरुक्तिश्च दर्शिता यथा "प्रायणीयमेतदहर्भवति" मू०। "एतद्ध्यस्माद्यज्ञमुखः प्रा-यणीयं प्रयन्ति यान्ति यज्ञमुखं स्वर्गमनेनेति व्युत्-पत्तेः। एतत्संज्ञं गवामयनस्य द्वितीयमहरतुत्वेयं भ-वति। यद्यपि सुत्यान्तरे प्रथमविहितत्वादतिरात्रस्यैव प्रायणीय इति संज्ञा प्रसिद्धा तथापि प्रथमोत्तमयोरति-रात्रयोः सर्वत्र साधारण्यादस्यैवाङ्गो गवामयने यथा-धारणं प्रायण्यमिति ज्ञापनाय एतदादिकं गवायनस्वरूप-मित्यस्मिन् द्वितीयेऽहनि प्रायणीयशब्दोऽत्र प्रयुज्यते। उत्तमस्याहर्नामनिर्वचनद्वारा प्रशंसति" भा० "प्रायणीयेन वा यज्ञा देवाः स्वर्गं लोकं प्रायन् यत् प्रार्यंस्त प्रायणीयस्य प्रायणीयत्वम्" मू० "पुरा देवाः प्रायणीयेन प्रायणीया-ख्येन यज्ञेन स्वर्गं लोकं प्रायन् प्राप्ताः यद्यस्मात् प्रायन् स्वर्गं प्रागमन् तस्मादस्याङ्गः प्रायणीयत्वं प्राय-णीयसाधारण्यात् प्रायणीयमिति नाम सम्पद्यम्" भा०। तदहः कर्त्तव्यत्वादतिरात्रस्य प्रायणीयसंज्ञेति बोध्यम्।

प्रायश्चित्त न० पापक्षयमात्रसाधनत्वेन विधिबोधिते कर्म-भेदे यथोक्तं प्रा०वि०

तत्राङ्गिराः "प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते। तपो निश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम्। निश्चयसंयुक्तं पापक्षयसाधनत्वेन निश्चितमित्यर्थः। तथा हारीतः "प्रयतत्वाद्दोषचितमशुभं नाशयतीति प्राय-श्चित्तम्"। एतेन पापक्षयमात्रसाधनं कर्म प्रायश्चित्त-मिति तल्लक्षणम्। मात्रशब्दात् तत्तापुरुषाश्वमेधादिव्या-वृत्तिः। तत्र पापविशेषस्यैव कामाकामजातस्य शक्तिविशेषस्य ततो नाशः मतभेदेन व्यवहार्यशब्दे ४७०।७दर्शितः। "प्रायश्चित्तैरपैत्येनो यदज्ञानं कृतं भवेत्। कामतो व्य-वहार्यं तु वचनादिह जायते" याज्ञ० वचनस्य प्रा०वि० व्याख्यानं मतभेदेन दर्शितं यथा

"कामत इति यज्ञानजातपापप्रायश्चित्तेन कामजातपापप-गमो न भवति। किन्तु व्यवहार्यतामात्रम्। नन्वेवं सति पापे कथं व्यवहार्यतामात्रम् यस्माह वचनादिति। अय-मभिप्रायः यद्यपि प्रायश्चित्तानुष्ठानेनार्द्धपापक्षयात् संभा-षणस्पर्शनदर्शनादिसद्व्यवहारो न दुष्टः न तु भोजन-परिणयनव्यवहारोऽपि वचनादेव यथा कुनखित्वादि-दूषितमहापापशेषसद्भावे व्यवहार्यतेति। अथ वा यकारपृष्ठेयादृयधोक्तेन प्रायश्चित्तेन कामतोऽपि पापक्षयो भवत्येव किन्त्वव्यवहार्यः पापाभावेऽपि वचनात्। अत एव मनुः "बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्मतः। शरणागतहन्तॄंश्च स्त्रीहन्तॄंश्च न संवसेत्"। याज्ञवल्क्यः "शरणागतबालस्त्रीहिंसकान् संवसेन्न तु। चौर्येऽकृतानपि यदा कृतघ्नसदृशानिमान्। कृतनिर्णेजनांश्चैव न जुगु-प्सेत कर्हिचित्" इति मनुवचनं स्वज्ञानकृतमहापापे बो-द्धव्यमिति। भवदेवस्तु सर्वत्र "कृतः शुद्ध्यत्यृजुरिति" दर्शनादभाव्यव्यवहार्यतावचनं निन्द्यार्थमित्याह। लिङ्-गस्तु पापकर्मणा हि हयं जन्यते शरीरगतमप्रायश्चित्तमा-त्मगतञ्च पापं तच्च स्नानादौ वैहिककर्मणि यानर्हत्वलक्षणं तेनात्र कामनाकृते केवलशरीरदोषः प्रायश्चित्तेनापनीयते जन्मान्तरकृतदुरितक्षयेवात्मनः शरीरान्तरस्य व्यवहारा-धिकारित्वम् यात्मगतञ्च पापं भोगादेव क्षीयते" तत्र काम-कारकृतेऽप्याङ्गिरसे स्मृतिनिदर्शनात् इति मनुवचनादुक्त-स्मृतिविरोधाच्च। मिताक्षरामतन्तु व्यवहार्य शब्दे दर्शितम्। प्रायश्चित्तस्य काम्यत्वं नैमित्तिकत्वं नित्यत्वञ्च यथाह जाबालः "काम्यानां सफलार्थत्वं दोषघातार्थमेव च। अतः काम्यं नैमित्तिकञ्च प्रायश्चित्तमिति स्थितिः। क-रितव्यमतो नित्यं प्रायश्चित्तं विशुद्धये। निन्द्यैश्च क-र्मभिर्युक्ता जायन्तेऽनिष्कृतैनसः"। ज्ञानाज्ञानकृत-

दोषयोः प्रायश्चित्तभेदो यथा अङ्गिराः "अकामतः कृते पापे प्रायश्चित्तं, न कामतः। कामकृते यत्तु द्विगुणं बुद्धिपूर्वके"। प्रायश्चित्ताकरणे दोषो यथा "आत्तानां मार्गमाणानां प्रायश्चित्तानि ये द्विजाः। जानन्तो न प्रयच्छन्ति तेऽपि तद्दोषभागिनः। अनर्हितैरनाक्षतैरदृष्टैश्चैव संवदि। प्रायश्चित्तं न वक्तव्यं जानद्भिरपि जल्पतः। न्यायतो मार्गमाणस्य क्षत्रियादेः प्रधानिनः। अन्तरा ब्राह्मणं कृत्वा व्रतमेतत् समादिशेत्" हारीतः "यथावयो यथाकालं यथाप्राणञ्च ब्राह्मणे। प्रायश्चित्तं प्रदातव्यं ब्राह्मणैर्धर्मपाठकैः। तस्मात् कृच्छ्रमथार्धं वा पादं वापि (पादमिव मतो न्यूनम्) विधानतः। ज्ञात्वा वयोबलं कालं प्रायश्चित्तं प्रकल्पयेत्। अशक्तावनुपकल्पमाह पराशरः। "दुर्बलेऽनुपकल्पः कार्यस्त्रयो वै शिशुवृद्धयोः। अतोऽन्यथा भवेद्दोषस्तस्मात्तूपकल्पो भवेत्"। क्षेत्रादिनानुपकल्पे दोषो यथा "क्षेत्राद्वा यदि वा गोत्रात् गोत्रादन्यतोऽपि वा। कुर्वन्त्यनुपकल्पं ये न तत् पापं तेषु गच्छति। शास्त्रीयप्रायश्चित्तसदाकृत्य पश्चादनुपकल्पः कार्य इत्याङ्गिराः "कृत्वा पूर्वसदाकारं यथोक्तं धर्मवेदिभिः। पश्चात् कार्योऽनुपकल्पेन शक्त्या कुर्वन्त्यनुपकल्पम्"। कृच्छ्रादिभेदात् प्रायश्चित्तं यथा "यतीनितिर्वेश्य वधोचि बालो वाप्यूर्ध्वगोऽथवा। प्रायश्चित्तार्धमर्हन्ति स्त्रियो रोगिण एव च"। पापनिष्क्रयणोपायानाह मनुः "ख्यापनेनानुतापेन तपसाऽध्ययनेन च। पापकृन्मुच्यते पापात्तथा दानेन चापदि"। ख्यापनेन अध्ययनतपसोर्दानमनुकल्प इत्युक्तम्। एतद्धिंसाव्यतिरिक्तविषयम्। हिंसायान्तु दानं मुख्यम्। यथा भविष्ये "हिंसाक्रोधानां सर्वेषां कीर्तितानां मनीषिभिः। प्रायश्चित्तकदम्बानां दानं प्रथममुच्यते"। तथा मनुः "दानेन वधनिर्वेशं सपादोनामशक्नुवन्। एकैकमवरेत् कृच्छ्रं द्विजः पापापनुत्तये"। यमान्यप्रायश्चित्तान्याह संवर्तः "हिरण्यदानं गोदानं भूमिदानं तथैव च। नाशयन्त्याशु पापानि महापातकजान्यपि"। यमः "योगेन मनसश्चैव तपसाऽध्ययनेन च। पापकृन्मुच्यते पापात् दानेन च दमेन च"। मनुः "कृत्वा पापं हि कृत्स्नं तस्मात् पापात् प्रमुच्यते। नैवं कृत्वा पुनरिति निष्कृत्या पूयते नरः"। विष्णुपुराणम् "प्रायश्चित्तान्यशेषाणां तपःकर्मात्मकानि वै। यतस्तस्मात् तपःप्रायं प्रवदन्ति मनीषिणः। तपसा किल्बिषं पुंसां दुरितं नाशमेति वै। तपोमूलं तथा दानं तस्मात् दानं परं स्मृतम्"। यमः "गवाह्निकं देवपूजा नैत्यश्राद्धः सरिद्व्रतः। नाशयन्त्याशु पापानि महापातकजान्यपि"। गौतमः "हिरण्यं गौर्वासोऽश्वो भूमिस्तिला घृतमन्नमिति देयानि"। एनस्यानादेशे विकल्पेन क्रियेरन् एनसि बहुनि बहूनि गुरुणि गुरूणि" विष्णुपुराणम् "एवं विषयभेदाद्वै व्यवस्थाप्यानि पण्डितैः॥ प्रायश्चित्तानि सर्वाणि गुरूणि च बहूनि च। अन्यथा हि महाभागाः! बहूनामुपदेशतः। गुरूणामुपदेशो हि निष्प्रयोजनतां व्रजेत्"। महाभारते "यदकार्यं कृतं कृत्वा कृते सङ्कीर्तनं हरेः। सर्वं दहति सङ्कीर्त्यमानस्तूराग्निरिवानलः"। शुद्धिकारणानि व्रतान्याह विश्वामित्रः "कृच्छ्रचान्द्रायणादीनि शुद्ध्युदकारणम्। प्रकाशे वा रहस्ये वा संयमेऽहनके स्फुटे। प्राजापत्यं सान्तपनं शिशुकृच्छ्रं पराककः। अतिकृच्छ्रः पर्णकृच्छ्रः सौम्यकृच्छ्रोऽतिकृच्छ्रकः। महासान्तपनः शुद्धौ तप्तकृच्छ्रस्तु पावनः। उपोषणं कृच्छ्रं ब्रह्मकूर्चस्तु शोधकः। एते समस्ता व्यस्ता वा प्रत्येकमेकशोऽपि वा। पातकादिषु सर्वेषु पापेषु प्रयुक्ततः। कार्यश्चान्द्रायणैर्युक्तो देवत्वा वा विशुद्धये। शिशुचान्द्रायणं प्रोक्तं यतिचान्द्रायणं तथा। यवमध्यं तथा प्रोक्तं तथा पिपीलिकामतिं। उपवासस्त्रिरात्रं वा मासं पक्षं तदर्धकम्। मासकृच्छादमाकृच्छं कार्यं शुद्धिफलार्थिना। उपपातकयुक्तानामनादिष्टेषु वै हि। प्रकाशे च रहस्ये च अभिसन्ध्याद्यपेक्षया। जातिशक्तिगुणान् दृष्ट्वा सकृद्दुष्टिकृतं तथा। अनुबन्धादिकं दृष्ट्वा सर्वं कार्यं यथाक्रमम्"। प्रकाशकृते पापे व्रतानि लघूनि रहस्यकृते लघूनि यथा प्राजापत्यादीन्यभिधाय मनुः "एतैर्द्विजातयः शोध्या व्रतैरापादितैनसः। अनाविष्कृतपापांस्तु मन्त्रैर्होमैस्तु शोधयेत्"। देवलः "प्रकाशं यत्कृतं किञ्चित् त्रिभागो रहसि स्मृतः। त्रिभागः सप्तभागः स्यात्रयो जात्याद्युपेक्षया" प्रा॰ वि॰। क्वचिद्विषयभेदे प्रायश्चित्ताभावः यथोक्तं प्रा॰त॰

अथ गोवधाद्यपवादः। पराशरः "धूम्रेषु रक्तमानेषु दष्टेनाभिहतस्य च। काष्ठेन लेष्टुना वापि पाषाणेन तु ताडितः। मूर्च्छितः पतितश्चैव स्रुतो वा रक्त एव च। एवं गतानां धूम्राणां प्रवक्ष्यामि यथाविधि। उत्थितस्तु पदं गच्छेत् पञ्च वप्र दशाथ वा। यदि वा स्पन्दते तोयं वा पिबति स्वयम्। पूर्वव्याधिविनष्टानां प्रायश्चित्तं न विद्यते" यदि व्याधिप्रयुक्तानां उत्थानं

क्रोशयोजनमात्रेण च स्वल्पतरदण्डाघातेन वा मूर्च्छया पतनं भवति अनन्तरं गमनं यावादौ कृते मरणं भवति तदा गमनयावत्पतनतोयपानैस्तदानीन्तनमरणे हेत्वभावं निश्चित्य पूर्वव्याधिविनष्टत्वं ज्ञायते। यदि तु पूर्वव्याधिरहित एव प्रहारजनितव्याधिना यावादि कृत्वापि म्रियते तदा प्रायश्चित्तमस्त्येव। संवर्त्तः "वत्सरे गोचिकित्सायां मूढगर्भविमोचने। यज्ञे कृते विपत्तिः स्यात् प्रायश्चित्तं न विद्यते। औषधं क्षेत्रमाहारान् दद्याद् गोब्राह्मणेषु च। प्राणिनां प्राणरक्षार्थं प्रायश्चित्तं न विद्यते। दारुकर्षदरिराभेदप्रबलेरपकर्षताम्। द्विजानां गोहितार्थं वा प्रायश्चित्तं न विद्यते" मूढगर्भः अन्तर्मृतगर्भः सन् वैचित्त्ये दृष्टनेन तथात्वात्। याज्ञवल्क्यः "क्रियमाणोपकारे तु कृते विप्रे न पातकम्। विपाके गोदशायाञ्च भेषजाग्निक्रियासु च"। विश्वरूपमाहाङ्गिराः "मूकमूके ऽन्धमूके च धर्मनिर्मोचनेऽपि वा। दशरात्रं चरेत् कृच्छ्रं कृत्वा वा यदि गौर्भवेत्"। द्विजानां गवाञ्च हितार्थमित्यर्थः। अत्र प्रायश्चित्तार्थमाहारादिदानैर्मरणे दोषाभावस्य वाचनिकत्वात् गवालम्भान्न मरणे नालघातादि। एवं "गोपालको गवां गोष्ठे धूमं वस्तु न कारयेत्। मक्षिकाजीवनरक्षे मक्षिकाभिः स भक्ष्यते" इति देवीपुराणानुसारादग्निं प्रज्वाल्य तत्रैव स्थितस्य देवात्तदग्निना मरणे दोषाभावः। तत्रास्थितस्य तु अपालननिमित्तगोवधजन्यदोषः। मिताक्षरायां पराशरः "कूपे क्षाते च धर्मार्थं मूढदाहे च वै कृते। यामदाहे तथा घोरे प्रायश्चित्तं न विद्यते" इदन्तु बन्धनरहितस्य पशोः कदाचित् दाहादिना मृतविषयम्। इतरत्रापरुद्धोक्तम् "कान्तारेष्वथ वा दुर्गे मूढदाहावटादिषु। यदि तत्र विपत्तिः स्यात् पाद एको विधीयते"। इति क्षेयम्। एतद्वचनं यमस्येति भवदेवभट्टः। चिकित्सायां पापाभावो यथावदुपचारे बोध्यः। न पुनः यष्टिपातादिभूतस्फोटकादानादिना। अतएव मनुः "चिकित्सायाञ्च सर्वेषां मिथ्याप्रचरतां दमः"। काश्यपोऽप्यत्र प्रायश्चित्तमाह "दोग्ध्री दमनातिदोहात्रासाघातदामबन्धाभरणयोजनात् तैलपानौषधविनियोगाद्व्यापन्नानां प्रायश्चित्तं ब्राह्मणेभ्यो विनिवेद्य सशिखवपनं कृत्वा प्राजापत्यकृच्छ्रमाचरेत्। चौर्याद्गां दक्षिणां ब्राह्मणाय दद्यात् क्षेत्रं लिखेत् क्षेत्रि"।

प्रायश्चित्तपूर्वकृच्छ्रत्वम्। अङ्गिरसि तु "वाग्यो क्षेमनक्षात् पूर्वं हतं प्राज्ञ वक्ष्यमिति। प्रत्यहं निशत्रं कायमात्मनो व्रतमादिशेत्। प्रायश्चित्तप्रपाहीनो वाग्यतस्त्रिसवनं स्नृशेत्"। क्षेत्रधारणेच्छायां द्विगुणव्रतादिकमाह हारीतः "राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः। क्षेत्रार्थं वपनं कृत्वा प्रायश्चित्तं समाचरेत्। क्षेत्रार्थं धारणार्थं तु द्विगुणं व्रतमाचरेत्। द्विगुणे तु कृते चौर्ये द्विगुणा दक्षिणा भवेत्। विद्वद्विप्रवरक्षोत्रां क्षेत्रभूते क्षेत्रवापनम्। कृते सङ्गापतत्रिणो गोकन्धुरापक्षीक्षिणः"। अथवाक्षीक्षां विशेषमाह भवदेवभट्टस्तु वपनम्। "वपनं नैव नारीणां नातुप्रव्रज्या क्षयादिकम्। न गोदे प्रथमं तासां न च दध्याद्गवाह्निकम्। सर्वान् क्षेत्रान् समुद्धृत्य क्षेदयेदङ्गुलिद्वयम्। सर्वत्रैवं हि नारीणां शिरसो मुण्डनं स्मृतम्"। पापभेदेषु प्रायश्चित्तभेदाः प्रायश्चित्तविवेकादौ दृष्टाः विस्तरभयान्नोक्ताः। तत्रेदं बोध्यं। प्रायश्चित्तीय तदाचरणे न०।

प्रायश्चित्ति स्त्री प्रायः (अल्पयम्) । तपश्चित्तिः चित्-भावे क्तिन् ह्रस्वः । प्रायश्चित्तशब्दार्थे

प्रायश्चित्तिन् त्रि०प्रायश्चित्तं कर्त्तव्यतयेनास्यास्ति इनि । प्रायश्चित्ताहें स्त्रियां ङीप् । "प्रायश्चित्ती भवेत् सूतश्चत्वारिंशत्तु षष्टितः" प्रा०त० । ठन् प्रायश्चित्तिक तत्रार्हे

प्रायस् अव्य० प्र+अय-असि । प्रकर्षे २तपसि व्रतादौ च "प्रायः पयोधरसङ्गतिरत्र हेतुः" उद्भटः । "प्रायो नाम तपः प्रोक्तम्" स्मृतिः ।

प्रायाणिक त्रि० प्रयाणाय हितं ठक् । यात्रिकद्रव्ये मङ्गलचामरादौ प्रायात्रिकादयोऽप्यत्र ।

प्रायिक त्रि० प्रायेण भवः ठक् । प्रायभवे । [शब्दच० ।

प्रायुडे यिन् पु०प्रायुधि प्रकृष्टयुद्धार्थं क्षेमते क्षेम-णिनि । अश्वे

प्रायोग पु० प्रयुज्यते शकटादौ प्र+युज-कर्मणि घञ् कुत्वम् दीर्घः । शकटादौ नियोगार्हे ऋचे ऋ० १०।१०६।२ भा० ।

प्रायोगिक त्रि० प्रयोगं नित्यमर्हति क्षेदा० ठञ् । नित्यप्रयोगार्हे ।

प्रायोज्य न० प्र+आ+युज-णिच्-कर्मणि यत् । प्रयोजनीये "प्रायोज्यं न विभज्येत" काला०स० । "प्रायोज्यम् प्रयोजनार्हं यथा पण्डितस्य पुस्तकादि न तत्पुत्रैर्विभजनीयमिति" दायभागः ।

प्रायोपविष्ट त्रि० प्रायाय अनशनाय उपविष्टः उप+

विग-क्त। अनशनेन मरणायोद्युक्ते भा०आश्व०८०अ०।

प्रायोपवेश पु० प्रायाय अनशनस्वरूपे उपवेशः स्थितिः। सङ्कल्पपूर्वकम् सकलकार्यत्यागेन अनशनमरणार्थमुपवेशने भा०व० २५० श्लो०। भावे ल्युट्। प्रायोपवेशन तत्रार्थे न०। भा०व० १६१२८ श्लो०।

प्रायोपेत त्रि० भीमो भीमसेन वत् प्रायः प्रायोपवेशः तेन उपेतः। प्रायोपवेशनयुते भा०द्रौ० १६ अ०।

प्रारब्ध न० प्र+आ+रभ-क्त-प्रारम्भे क्त प्रकृष्टमारब्धं सकार्यं जनयितुं कृतारम्भं येन। १देहाद्यारम्भके २अदृष्टभेदे तच्च भोगेनैव क्षय इति शास्त्रे प्रसिद्धम्। "अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्। नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि" शास्त्रेण प्रारब्धकर्मणो भोगं विना नाशाभावस्योक्तेः "ज्ञानानि सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन!" गीतायां ज्ञानस्य सर्वकर्मनाशकत्वोक्तिः प्रारब्धकर्मातिरिक्तविषयेत्याकरे दृष्टव्यम्। २कृतारम्भे त्रि०।

प्रारब्धि स्त्री प्र+आ+रभ-करणे क्तिच्। १गजबन्धनदामनि त्रिका०। भावे क्ति। २आरम्भे।

प्रारम्भण न०प्र+आ+रभ-ल्युट् नुम्। प्रकर्षेणारम्भे। प्रारम्भं प्रयोजनमस्य अतुप्र०क्त। प्रारम्भणीय तत्प्रयोजनके त्रि०। प्र+आ+रभ-भावे घञ् नुम्। प्रारम्भ प्रकर्षेण आरम्भे पु० [स्त्रियां टाप्।

प्रारोह त्रि० प्ररोहः शीलमस्य इञ्च०। प्ररोहणशीले

प्रार्घ न०प्रकृष्टमर्घं इष्टिः। १प्रकृष्टे अर्घे प्रा०व०। २तद्युते त्रि०

प्रार्थना स्त्री प्र+अर्थ-युच्। १याच्ञायां २क्रियायाञ्च। ३गर्भाङ्कभेदे सा०द० "संयङ्नयानुमानञ्च प्रार्थना क्रियिरेव च" गर्भाङ्कान्युद्दिश्य "रतिर्नवौत्सवानान्तु प्रार्थनं प्रार्थना भवेत्" इति लक्षिता। ल्युट्। प्रार्थन याचने क्रियने च न०। ४छन्दोभेदे "प्रस्तुताङ्कुरिको ध्रुवो मिथःश्लिष्टौ च सम्मुखे। कुर्यात् सङ्कटके वेर्वं छन्दा स्यात् प्रार्थनाभिधा" तल्लक्षा०।

प्रार्थनीय त्रि० प्र+अर्थ-कर्मणि अनीयर्। १याचनीये अर्थयतेर्याचनार्थत्वेन द्विकर्मकत्वात् गौणे कर्मणि अनीयर्। यतोयाच्यते २तस्मिन् तस्याविषयायां स्त्रियां याचनाकर्मणि इति मेदिनी। ३द्वापरयुगे शब्दर०।

प्रार्थित त्रि० प्र+अर्थ+क्त। १याचिते २अभिलषिते मेदि० ३अनुसंयते च त्रिका०।

प्रालम्ब न० प्रकर्षेणालम्बते प्र+आ+लम्ब-अच्। १ऊर्ध्वतया लम्बात् लम्बमाने मालादौ अमरः। २प्रकर्षेण लम्बमाने त्रि०। संज्ञायां कन् अत इत्वम्। प्रालम्बिका अर्थादिरचितलम्बनिकायां अर्थालङ्कारभेदे स्त्री अमरः।

प्रालेय न०प्रकर्षेण क्षीयते प्र+आ-ली-यत्। आप्ते एतम्, प्रलयाय हितम् यञ् नि० एयम् वा। हिमे अमरः।

प्रालेयांशु पु० प्रालेयमंशौ यस्य। १चन्द्रे हेका०। तत्सामवायिके २कर्पूरे च। प्रालेयकरादयोऽप्यत्र पु०।

प्रावट पु० प्र+वव-क्विट्। वर्षे जटा०।

प्रावण न० प्र+आ+वन संभक्तौ करणे च। प्रनिरित्यादि यत्नम्। खनित्रे। प्रकर्षेणावन्यते संक्षिप्यते खननेन क०२।२२।४भाष्ये इत्यत्रम्। वर्णं समासे अनोदात्तत्वम्

प्रावणि स्त्री प्र+वव-अनि। "क्षिनुमीनानि क्षोट्" च ८।३। १५।१६। क्षिनुमीनानीति क्षित्वा उज्ज्वलदत्तेन पठित्वा तत्र यत्नसाध्यम्। प्रकृतावनौ तत्त्वावमाशयः "क्षीनुमीना अनि क्षोट्" सूत्रद्वये सन्वद्भावेन क्षिनुमानीति जायते क्षिनुमीना अनि इत्येषां यत्नम्। योगविभागाच्च अनि क्षोट् इत्यप्यापीति।

प्रावर पु० प्र+वृ+अ-करणे अप्। १प्राचीरे शब्दरत्ना०। २देशभेदे भा०भी० १२अ०। [२उत्तरीयवस्त्रे हेमच०।

प्रावरण न० प्र+वृ+अ-करणे ल्युट्। १आच्छादनवस्त्रे

प्रावार पु० प्र+वृ+अ-करणे घञ्। १उत्तरीयवस्त्रे अमरः भावे घञ्। २प्रकर्षेण आवरणे पु०।

प्रावारकर्ण पु० वस्त्रभेदे भा० व० १६८अ०।

प्रावारकोट पु० ७त०। कोटभेदे जटाधरः।

प्रावास त्रि० प्रवासे दीयते कार्यं वा दा-क-घञ्। १प्रवासे दीयमाने २तत्र कार्ये च।

प्रावासिक त्रि० प्रवासाय प्रभवति वसतीति ठञ्। १प्रवाससाधने। प्रवासे साधु युक्तो ठञ्। प्रवासे साधौ च।

प्रावृट्काल पु०कर्म०। ऋतुवा। वर्षाकाले प्रावृट्समयादयोऽप्यत्र।

प्रावृट्कालवहा स्त्री ७त०। नदीभेदे मार्कण्डेयपु०६७अ०।

प्रावृडुत्सव पु०ष्ठत०। १वर्षोतिक्रमे वर्षोपगमे ब०व०। २शरत्काले राजनि०। [प्रकर्षेण २आवृतमात्रे त्रि०।

प्रावृत न० प्र+वृ+अ-कर्मणि क्त। १प्रकर्षेण आवृते वस्त्रे

प्रावृति स्त्री प्र+वृ+अ-करणे क्तिन्। प्राचीरे शब्दर०।

प्रावृत्तिक पु० प्रवृत्तौ तत्करणे हितः ठक्। प्रवृत्तिसाधके दूतभेदे हरिवं० १०३अ०।

प्रावृष्(षा) स्त्री प्रवृष्यतेऽत्र प्र+वृष-आधारे क्विप् दीर्घः षत्वलत्वात् वा टाप्। वर्षाकाले स च श्रावणभाद्रात्मकः

"नमश्च नमश्चेति वार्त्तिकाद्वै यजुः। अनुशब्दे १४२२ पृ० यस्य सौरचान्द्रत्वविकल्पस्य दृश्यः।

प्राट्पायणी स्त्री प्राट्पाया अयनं यस्याः गौरा०ङीष्। वर्षिकच्छाम् (बालकुमी) अमरः।

प्राट्षिक पुंस्त्री प्राट्षि वायति गायते कै-क अनुकरणे मयूरे धरणिः। स्त्रियां जातित्वात् ङीष्। प्राट्षि भवः ठञ्। २वर्षाकालभवे त्रि० स्त्रीयां ङीष्।

प्राट्षिज पु० प्राट्षि जायते जन-ड अनुक् स०। १भद्रमुस्तके त्रिका०। २वर्षाकालजाते त्रि० "जे विभाषा" वा अनुक् स०। तेन प्राट्षज तत्रार्थे त्रि०।

प्राट्षीण त्रि० प्राट्षि भवः वा० ख। वर्षाकालभवे भा०७। १०२।७ भाष्य।

प्राट्षेण्य त्रि० प्राट्षि भवः एन्य। १वर्षाकालजाते २कदम्बवृक्षे पु० मेदि०। ३कुटजवृक्षे ४धाराकदम्बे च पु० राजनि० ५कपिकच्छाम् ६रक्तपुनर्नवायां स्त्री राजनि०। प्राट्षि दीयते कार्यं वा एन्य। ७वर्षाकाले देये करादौ दत्तञ कार्ये च त्रि०। ८पुराणार्थे न० अमरः।

प्राट्षेय पु० १देशभेदे भा०भी०६अ०। प्राट्षायां भवः ढक्। २वर्षाकालभवे त्रि० स्त्रियां ङीष्।

प्राट्ष्य पु० प्राट्षि भवः वा० यत्। १धाराकदम्बे २कुटजे ३विकङ्कतवृक्षे च राजनि०।

प्रावेशन त्रि० प्रवेशने दीयते कार्यं वा व्युटा० यञ्। १प्रवेशने दीयमाने शतत्रकार्य्ये च। [ङीप्।

प्रावेशिक त्रि० प्रवेशाय साधुः ठञ्। प्रवेशसाधने स्त्रियां

प्राशन न० प्र+अश-भावे ल्युट्। अन्नादेः प्रकर्षेण भोजने अन्नप्राशनम्।

प्राशास्त्र न० प्राशास्तुभावः कर्म वा उक्षा० अञ्। प्राशास्तुकर्त्तृत्विजः कर्मणि १शस्त्रसंस्कारे २तद्भावे च।

प्राशित त्रि० प्र+अश-भोजन कर्मणि क्त। १भक्षिते। भावे क्त। २भक्षणे न० ३पितृयज्ञे तर्पणे जटा० "प्राशितं पितृतर्पणम्" मनुना तत्रार्थे परिभाषितत्वात्।

प्राशित्र न० यज्ञिये यवमात्रं पिण्डमात्रं वाऽवत्ते ब्रह्मोद्यज्ञे भागे शित्रांशभेदे "शित्रात् प्राशित्रावदानम्" कात्या० १११७। "शित्रस्य वा चक्षुषा प्रतीक्ष इति प्राशित्रं प्रतीक्षते" २।२।१५ "प्राशित्रमवदीयमानमाच्छिद्यमाणं च प्राशित्रं ब्रह्मणो भागः यवमात्रं पिण्डमात्रं वाऽवत्तः" कर्कः "स यत् प्राशित्रमवद्यति" इत्युपक्रमे। यद्यस्य ब्रह्मभागं पर्याहरन्ति। ब्रह्मा वै यज्ञस्य दक्षिणतो क्षोऽभिगोप्ता स एतं भागं प्रतिविद्वान् याज्ञे यत् प्राशित्रं तदस्मै पर्याहार्षुस्तत्प्राशीदथ यमस्मै ब्रह्मभागं पर्याहरन्ति तेन भागी स यदतब्रह्मसंस्थितं यज्ञस्य तदभिगोपायति तस्माद्धा अस्मै ब्रह्मभागं पर्याहरन्ति" शत०ब्रा० १।७।४।१८

प्राशित्राहरण प्राशित्रं स्त्रियतेऽनेन हृ-करणे ल्युट्। प्राशित्रहरणभागहरणसाधने गोकर्णाकृतिपात्रभेदे शत० ब्रा० १।३।१।६ भाष्यम्।

प्राश्य पु०प्र+अश-भोजने ण्यत्। भक्षणे प्राप्ये स्थितः यत्। प्राप्तव्य पुरुषभक्षणस्थिते ऋ० ८।२१।६ भा०। प्रा०स०। २पुरुषशीर्षे निघण्टुः। [यजु०२४।२७

प्राशृङ्ग त्रि० प्रशस्तं शृङ्गमस्य बहु० दीर्घः। प्रशस्तशृङ्गयुक्ते

प्राश्निक पु०प्रश्नाय तदुत्तरदानाय साधु ठक्। १सभ्ये त्रिका० २प्रश्नोत्तरदानाय साधौ त्रि०।

प्राश्नीपुत्र पु०यजुर्वेदर्षिभेदे शत०ब्रा० १४।६।४।१२

प्राष्टवर्ण पु०प्रकर्षेण अष्टः प्राप्तो वर्णः। पृश्निवर्णे नानावर्णे निरु० १०।३६

प्रास पु० प्रासते प्र+अस-घञे कर्मणि घञ्। कुन्तास्त्रे अमरः। कुन्तशब्दे २००१८ पृ० दृश्यम्।

प्रासक पु०प्रास+अर्शआद्यां कन्। पार्श्वे हेमच० तस्य देवकैः शिष्यमाणत्वात् तथात्वम्। स्वार्थे क। २प्रासास्त्रे पु०।

प्रासङ्ग पु० प्र+सञ्ज-कर्मणि घञ् दीर्घः। दम्पत्योरन्यान्यं स्वस्मे शिक्षार्थमासञ्जनाने युगभेदे अमरः। तं वहति वत्। प्रासङ्ग्य तद्वाहके दम्पत्ये अमरः।

प्रासङ्गिक त्रि०प्रसङ्गादागतः ठञ्। प्रसङ्गागते स्त्रियां ङीप्।

प्रासाद पु० प्रसीदत्यस्मिन् प्र+सद-आधारे घञ् दीर्घः। देवस्थयोर्गृहे अमरः देवगृहशब्दे ३६७८ पृ० दृश्यम्

प्रासादकुक्कुट पुंस्त्री० प्रासादे कुक्कुट इव। शारावते त्रिका० स्त्रियां जातित्वात् ङीष्।

प्रासिक पु०प्रासः प्रहरणमस्य ठक्। कुन्तेन योद्धरि अमरः

प्रास्तारिक त्रि० प्रस्तारे व्यवहरति ठक्। प्रस्तारे व्यवहारिणि। [आदौ अनुकृतत्वे स्त्रियां ङीप्।

प्रास्थानिक त्रि० प्रस्थाने साधु ठञ्। यात्रिके अनुद्दिष्टे

प्रास्थिक त्रि०प्रस्थस्य वापः ठञ्। १प्रस्थमितधान्यवपनाधारे क्षेत्रे २भूमौ स्त्री ङीप्। प्रस्थं वपति (अस्मिन् वपयति) अवहरति पचति वा ठञ्। प्रस्थमितधान्यादेः अस्मिन् ३वपनाधारके ४अवहारके ५पाचके च त्रि० स्त्रियां ङीप्। प्रस्थः परिमाणमस्य ठञ्। ६प्रस्थपरिमाणयुक्ते

धान्यराश्यादौ त्रि० प्रस्थेन क्रीतम् ठञ्। ७प्रस्थेन क्रीते त्रि० स्त्रियां ङीप्। प्रस्थस्य निमित्तं संयोग उत्पातौ वा ठञ्। प्रस्थस्य दनिमित्ते दसंयोगे १०उत्पाते वा।

प्राह्ण पु० प्रकर्षेण आह्नेति शब्दोऽत्र। ह्नस्योपदेशे शब्दमा०।

प्राह्ण पु० प्रारम्भोऽङ्गः प्रा०स०ह्नस्यमा० णत्वादेशः णत्वञ्च। त्रिधाविभक्तदिनस्य पूर्वभागे १पूर्वाह्णे अमरः। प्रशस्तमह्नयत्र तिङ्ग० अव्ययी०। २प्रशस्तदिनयुते अव्य०।

प्राह्णेतन त्रि०प्राह्णे भवः खु, ट्ट च निपात्यते। पूर्वाह्णभवे स्त्रियां ङीप्।

प्राह्णेतरा(मा)म् अव्य० अतिशयेन प्राह्णे तरप् तमप् वा आम् अजादेशादिना डागमश्च अव्ययम्। अत्यन्तप्रातःकाले दत्यर्थे।

प्रिय त्रि० प्रीणाति प्री-तर्पणे क। १भर्त्तरि पत्यौ अमरः २भार्य्यायां स्त्री। ३प्रियके स्वगभेदे पु०स्त्री जटा०४ऋद्धिनामौषधौ ५हृद्ये त्रि० मेदि०। ६जीवकौषधौ राजनि०।

प्रियंवद त्रि०प्रियं वदति वद-खच् मुम्। १प्रियकरवादिनि मधुरभाषिणि। २खेचरे ३गन्धर्वभेदे पु० शब्दमा० वदेरन्नःस्यवादित्वात् प्रियमुवदेति मयुक्तयङ्कल्पनं प्रामादिकमेव। "भृवि भवेऽमजरैः प्रियंवदा" छ०र० उक्ते द्वादशाक्षरपादके ४अक्षरोभेदे स्त्री। ५शकुलाशफरीभेदे स्त्री शक्र० ङीष्।

प्रियक पु० प्रिय+स्वार्थे क संज्ञायां कन् वा। १पीतसालके (पियासाल) २नीपे ३चित्रमृगे ४अम्बरे ५प्रियङ्गौ ६कङ्कुमे मेदि० ७धाराकदम्बे दक्षसगडस्थे राजनि०। दक्षस्कन्धानुचरभेदे भा०श० ४६अ०। तस्यापत्यं विदा० अञ्। प्रैयक चित्रमृगापत्ये पुंस्त्री०।

प्रियकृत् त्रि० प्रियं करोति कृ-क्विप् तुक्च्। १प्रियकारिणि २विष्णौ पु० "प्रियकृत् प्रीतिवर्द्धनः" विष्णुस०।

प्रियङ्कर त्रि० प्रियं करोति कृ-खच् मुम्। १प्रियकारिणि २शंतनुकटार्य्यां १६कन्यायाम् ४अङ्गजन्मायाञ्च स्त्री राजनि० गौरा० ङीष्।

प्रियङ्करण त्रि० अप्रियं प्रियं करोत्यनेन कृ-करणे ल्युट्। अप्रियस्य प्रियताकरणसाधने।

प्रियङ्गु स्त्री प्रिय+गम-डु नि०मुम् च। १लतामख्याते वृक्षे अमरः "प्रियङ्गुः गौरतरा शिखा तुवरानिलपित्तकृत्। रक्तादियोगदौर्गन्ध्यस्वेददाहज्वरापहा। गुरुमदङ्विषमोऽङ्गो तद्दृगन्धप्रियङ्गुका। तत्फलं मधुरं रूक्षं कषायं शीतलं गुरु। विबन्धाध्मानवातकृत् संग्राहि कफपित्तजित्" भावप्र०। "प्रियङ्गुकलिकारम्" इति वृत्तप्रणाममन्त्रः। २राजिकायां राजनि० ३पिप्पल्याम् ४कङ्कुमे (काङ्गनी) धान्ये मेदि० ५कटुक्यां धरणिः। [त्रमणिः।

प्रियजन पु०कर्म०। १हृद्ये जने। २प्रौढभावानुवित्ते च।

प्रियजीव पु०प्रियो जीवो यस्मिन्। श्लोनाकवृक्षे राजनि०।

प्रियतम पु० अतिशयेन प्रियः तमप्। १मयूरशिखावृक्षे २अतिप्रिये त्रि० शब्दच०।

प्रियता स्त्री प्रियस्य भावः तल्। १स्नेहे २धर्म्मणि अमरः। त्व। प्रियत्व तत्रार्थे न० शब्दर०।

प्रियतोषण त्रि० प्रियं तोषयति तुष-णिच् ल्यु। १प्रियसन्तोषकारके "नारीधादौ स्वङ्कस्थेन धारयेत् जघनोपरि। स्तनापीड़करः कामी जायतेऽत्र प्रियतोषणः" रतिमञ्जर्य्युक्ते २रतिबन्धभेदे।

प्रियदत्ता स्त्री दीयमानपृथिव्याम् "नामाख्याः प्रियदत्तेति सुखं देव्याः सनातनम्। दाने वाऽप्यथ वाऽऽदाने नामाख्याः प्रथमं प्रियम्। य एतां विदुषे दद्यात् पृथिवीं पृथिवीपतिः। पृथिव्यामेतदिष्टं स राजा राज्ञामितो व्रजेत्" भा०अनु० ६२अ०।

प्रियदर्शन पु० प्रियं दर्शनमस्य। १चोरिकावृक्षे २सुदर्शने च जटा० ३सुदृश्ये त्रि०। [त्रैमच०।

प्रियप्रायस् न० प्रियस्य प्रायः बाहुल्यं यत्र। प्रियबाहुल्ये

प्रियप्रेप्सु त्रि० ७त०। इष्टार्थीयुक्ते जटा०। [प्रिये त्रि०।

प्रियमधु पु०प्रियं मधु मद्यं यस्य। १वकुलवृक्षे हेमच० २मद्यप्रियमाल्यानुलेपन त्रि० प्रियं माल्यमनुलेपनं च यस्य। १माल्यानुलेपनप्रिये २स्कन्धानुचरभेदे पु०भा०श० ४६अ०।

प्रियमेध पु० १अजमीढस्य सुतभेदे "अजमीढस्य वंश्याः सुः प्रियमेधादयो द्विजाः" भाग० ६।२१।१७श्लो०। २यज्ञोपेते ऋषिभेदे ऋ० १।४६।४ भा०।

प्रियम्भविष्णु त्रि०प्रियः प्रियो भवति भू-कर्त्तरि खिष्णुच्। अप्रिये प्रिये भवितरि। स्वार्थे कन् प्रियम्भावुक तत्रार्थे त्रि०।

प्रियरूप त्रि०प्रियं रूपमस्य। १हृद्यरूपे। तस्यभावः मनोज्ञा० अञ्। प्रैयरूपक तस्य भावे न०। कर्म०। २हृद्ये रूपे न०।

प्रियवचन त्रि०प्रियं वचनं वैद्यकवचनं वा यस्य। १प्रियवादिनि वैद्यकोक्तवाक्ये अस्मिन्नर्थे २रोगिणि राजनि०। कर्म०। ३हृद्ये वाक्ये न०।

प्रियवर्णी स्त्री प्रियो वर्णो यस्याः गौरा० ङीष्। प्रियङ्गौ जटाधरः। [लतायाञ्च।

प्रियवल्ली स्त्री नित्यकर्म०। १प्रियङ्गौ राजनि० २हृद्यायां

प्रियवादिन् त्रि॰ प्रियं वदति वद–णिनि। प्रियवाक्यभाषके स्त्रियां ङीप् "भार्य्या चाप्रियवादिनी" चाणक्यः।

प्रियव्रत त्रि॰ प्रियं व्रतमस्य। १व्रतप्रिये स्वायम्भुवमनोः २पुत्रभेदे पु॰ हरिवं॰ २अ॰। [१।६।२२।

प्रियश्रवस् पु॰ प्रियं श्रवः श्रवणं यस्य। परमेश्वरे भाग॰

प्रियसख पु॰ कर्म॰ इत॰ वा, अच्समा॰। १कृष्णे सख्यौ २प्रियश्च सखा च। स्त्रियां ङीप्। २खदिरे शब्दच॰।

प्रियसङ्गमन त्रि॰ प्रिययोः सङ्गमनं यत्र। १प्रिययोर्मेलनस्थाने २कक्षपादिषोर्मेलनस्थाने देशभेदे पु॰ "अत्रादितिः कश्यप अङ्गारानौ तदन्तरौ। प्रियसङ्गमनं नाम तं देशं सनयोऽवदन् हरिवं॰ १२अ॰।

प्रियसत्य न॰ कर्म॰। १तथ्ये यथार्थे च प्रिये सुन्दरवाक्ये हेमच॰ प्रियं सत्यं यस्य। २सत्यप्रिये त्रि॰।

प्रियसन्देश पु॰ प्रियं सन्दिश्यते सम्+दिश–घञ् उप॰स॰। १चम्पकवृक्षे भावे घञ् इत॰। २प्रियसंवादे शब्दच॰।

प्रियसाल(क) पु॰कर्म॰-सालं क वा। ऋसनवृक्षे (पियासाल) राजनि॰।

प्रियादि विशेष्यवाचिनि समानाधिकरणस्त्रीलिङ्गशब्दे परे व॰स्त्री॰ पूर्वस्य पुंवद्भावे पर्य्युदस्ते शब्दगणे स च गर्गः या॰ग॰सू॰ उक्तो यथा "प्रिया मनोज्ञा कल्याणी सुभगा दुर्भगा अक्रि सचिवा स्त्री सखा कान्ता ज्ञान्ता यवा अपत्या दुहिता वामना तनया"। सुन्दरी प्रिया यस्य। सुन्दरी प्रिय इत्यादि।

प्रियाम्बु पु॰ प्रियं पितॄणां प्रियमम्बु मूले यस्य। १प्रियालवृक्षे राजनि॰। २जलप्रिये त्रि॰।

प्रियार्ह त्रि॰ प्रियमर्हति अर्ह–अण् उप॰स॰। १प्रियवाक्यादियोग्ये २विष्णौ पु॰ "अभिप्रायः प्रियार्हाणां विष्णुः स॰।

प्रियाल पु॰ प्रियाय अलति पर्य्याप्नोति अल–अच्। प्रियवाले (पियासाल) २द्राक्षायां स्त्री राजनि॰ भावप्र॰ पियाल इत्येव पाठः "पियालस्तु खरस्कन्धचारो बहुलपल्लवः। राजादनस्तापसेष्टः सञ्चकट्टुर्दुष्पटः। चारः पित्तकफाक्षिघ्नस्तत्फलं मधुरं गुरु। स्निग्धं सरं मलस्तम्भदाहज्वररक्तप्रकोपहृत्। पियालमज्जा मधुरो हृद्यः पित्तानिलापहः। कृच्छ्रोऽतिदुर्जरः स्निग्धो विष्टम्भी चाधमर्द्दनः" भावप्र॰।

प्रियोदित न॰ कर्म॰। चाटुवाक्ये शब्दरत्ना॰।

प्री तर्पणे भा॰उभ॰सक॰अनिट्। प्रयति ते अप्रैषीत् अप्रैष्ट प्रिप्राय पिप्रिये।

प्री प्रीतौ कान्तौ (दक्षायाम्) सक॰ दिवा॰ आत्म॰ अनिट्। प्रीयते अप्रैष्ट पिप्रिये।

प्री तर्पणे सक॰ कान्तौ तृप्तौ च क्र्या॰उभ॰अनिट्। प्रीणाति प्रीणीते अप्रैषीत् अप्रैष्ट पिप्राय पिप्रिये। प्रीतः। क्विप् नुक्। प्रीणवति ते। [अत्रापि नुक् प्रीणवतीत्येके।

प्री तर्पणे सक॰च॰उभ॰अनिट्। प्रावयति ते अपिप्रयत्-ते।

प्रीण त्रि॰ प्री–क्विप् कर्त्तरि कर्म्मणि च। १प्रीणनकारके करणे च। २नर्म्मणि मेदि॰। पुरुषार्थप्रशब्दात् स्वार्थे क। २पुराणे त्रि॰ त्रिका॰।

प्रीणन न॰ प्री–क्विप्–नुक्–ल्युट्। तर्पणे अमरः।

प्रीणस पु॰ प्रीणि–वा॰ असच्। मण्डके राजनि॰।

प्रीत त्रि॰ प्री–कर्त्तरि क्त। हृष्टे अमरः।

प्रीति स्त्री प्री–भावे क्तिच्। १हर्षे २आमोदे २रतौ च। विष्कुम्भादियोगेषु ३हितीययोगे। ४कामस्य पत्नीभेदे रत्नाः सपत्न्यश्च "वेद्याऽनङ्गवती नाम विभूतिर्दयीव्रतम्। समाप्य माघमासस्य द्वादश्यां सवधाचलम्। निवेदयन्ती गुरवे सर्व्वाङ्गोपस्करान्विताम्। अनङ्गभूमीवेद्यं सौवर्णीमरपादपम्। स चानङ्गवती वेद्या कामदेवश्च साम्प्रतम्। पत्नी, सपत्नी ख्याता रत्नाः प्रीतिरिति स्तुता" मात्स्ये ८२अ॰।

प्रीतिजुष त्रि॰ प्रीतिं जुषते जुष–क। १प्रीतिभाजि २खनिरङ्गमत्स्याख्यायां स्त्री शब्दरत्ना॰ "विश्वकेतोः प्रीतिजुषः सुतः" त्रिका॰ तत्पुत्रोक्तौ। [प्रङ्खाविनि पु॰ हेमच॰।

प्रीतिद त्रि॰ प्रीतिं ददाति दा–क। प्रीतिदायके (माँड़)

प्रीतिदत्त त्रि॰ष॰त॰। १प्रीत्या दत्ते २स्त्रीधनभेदे न॰ यथाह मिता॰ याज्ञवल्क्यः "प्रीत्या दत्तं तु यत्किञ्चित् वधूवा श्वशुरेण वा। पादवन्दनिकं चैव प्रीतिदत्तं तदुच्यते"। भर्तृप्रीतिदत्तस्त्रीधने तु विशेषः दाय॰ उक्तो यथा "भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन् मृते तत्। स्त्रीयात् दद्याद्वा स्त्रीधनादृते"।

प्रीतिदाय पु॰ प्रीत्या दीयते दा–कर्म्मणि घञ्। प्रीत्या दत्ते "श्वशुरात् प्रीतिदायं तु प्राप्य सा प्रीतमानसा" भा॰आश्व॰ ८६ अ॰।

प्रीतिभोज्य न॰ प्रीत्या भोज्यम्। प्रीत्यैव भोज्ये अन्नादौ "अन्नानि प्रीतिभोज्यानि चापद्भोज्यानि वा पुनः। न च संप्रीयसे राजन्! न चैवापद्गतावयम्" भा॰उ॰ ८० अ॰। "संप्रीतिभोज्यान्यन्नानि" इति सटिप्पणपुस्तके पाठः।

प्रीतिवर्द्धन त्रि॰ प्रीतिं वर्द्धयति वृध–क्विच्–नुक्। १सन्तोष-

वर्द्धके २विष्णौ पु० "प्रियक्रत् प्रीतिवर्द्धनः" विष्णुस० ।

प्रु सर्पणे भ्वा० आत्म०सक० अनिट् । प्रवते अप्रोष्ट प्रुप्रुवे ।

प्रुट मर्दने भ्वा० पर०सक० सेट् । प्रोटति अप्रोटीत् प्रुप्रोट । अयं धातुपाठे पठितः ।

प्रुष भस्मीकरणे भ्वा० पर० सक० सेट् । प्रोषति अप्रोषीत् प्रुप्रोष । उदित् ङ्ग्रा वेट् । प्रुष्ट्वा प्रुष्य प्रुषः ।

प्रुष सेके पूर्त्तौ च सक० क्षरे अक० क्र्या० पर०सेट् । प्रुष्णाति अप्रोषीत् प्रुप्रोष ।

प्रुष्ट त्रि० प्रुष-क्त । दग्धे । [विन्दो त्रि०को० ।

प्रुष्व प्र० प्रुष-क्वन् । १ऋतौ २स्वर्गे च उज्ज्वल० । २अज०

प्रेक्षा स्त्री प्र+ईक्ष-भावे अङ् । १विषयगुणागुणपर्य्यालोचनायां २दृष्टिपूर्वकमीक्षणे ततः प्रेक्षादि० चतुरर्थ्यां इनि । प्रेक्षिन् आलोचनानिर्दृत्तादौ । अस्मिन्शब्दे परे घोषादि० पूर्वपदस्यदात्तम् । [प्रेक्षाष्टकादयोऽत्र ।

प्रेक्षागार न० ६त० । रात्रौ मन्त्रणार्थमृष्टे हरिवं० ८५अ० ।

प्रेक्षादि चतुरर्थ्यामिनि प्रत्ययनिमित्ते शब्दगणः स च गणः पा०ग० शुक्लो यथा "प्रेक्षा इक्षा वल्गुका प्रुवका क्षिपका न्यग्रोध इक्षट कक्षुट कक्षुट कटकूप घुक घुक घुट मक्ष परिवाप वकास धुवका मर्त्त क्षुपक क्षिरण्य" ।

प्रेक्षावत् त्रि०प्रेक्षा अस्त्यर्थे मतुप् मस्य वः । समीक्षकारिणि ।

प्रेङ्खण न० प्र+ईङ्ख-ल्युट् नत्वम् । १प्रकर्षेण चलने अदादयश्चुरादयश्चान्तर्गते २कन्दुकभेदे तच्चायं शा०द० शुक्लं यथा "ग्रन्थिसन्धिरहितं प्रेङ्खणं क्षौमनाभकम् । अक्षुद्रतन्धारमेकाङ्गुलविस्तृतम् प्रतोदकम् । त्रिवृद्वस्त्राटयुतं सर्वदृत्तिसमाश्रितम् । नेपथ्ये गीयते नान्दी तथा तत्र प्ररोचना" ।

प्रेङ्खा स्त्री प्र+ईङ्ख वा० आधारे अङ् । १दोलायाम् अमरः भावे अङ् । २परिभ्रमणे ३स्वार्थेकतौ अजगतौ इति पाठान्तरम् । ४गृहभेदे मेदि० ५स्वर्गे च धरणिः ।

प्रेङ्खित त्रि० प्र+ईङ्ख-क्त । कम्पिते अमरः ।

प्रेङ्खोल दोलने भ्वा०चुरा०उभ०सक० सेट् । प्रोङ्खोलयति ते अपिप्रेङ्खोलत् त । प्रत्योपवर्त्तनमपीच्छन्त्यन्ये तेन प्राङ्खिखालत् त इत्यन्येऽत्र ।

प्रेष गतिप्रेरणाज्ञेषणेषु भ्वा०पर० सक० सेट् माधवः । प्रेषति अप्रेषीत् ऋदित् अपिप्रेषत् त ।

प्रेषि त्रि० प्रेष-इन् । प्रेरके अजः १।११२।१० भा० ।

प्रेत त्रि० प्र-इ-क्त । १मृते अमरः । २नरकस्थे जीवभेदे ३पिशाचभेदे आतिवाहिकदेहोत्तरं ४जीवमानदेहभेदयुते और्द्धदेहिकक्रियाऽभावे तद्भूयाप्रिक्रया पाद्मोत्त०ख० १६अ० यथा "ततो वह्नितिथे काले स राजा पथताङ्कृतः । वैदिकेन विधानेन न चेमे और्द्धदेहिकम् । विष्णुप्रदेषमाश्रेष्य युगानां सप्तविंशतिम् । भुक्त्वा च यातनां वामीं निर्दोषनरको भवः । समया गिरिराजस्तु विशाखोऽभूत्तदा महान् । तस्य रूपं यथा "देवद्युतिरधीयानः शुभाक्ष करुणस्वनम् । समागत्य ततस्तस्य पिशाचं ददर्श सः । विकरालमुखं दीनं पिशङ्गनयनं भयम् । ऊर्द्धमूर्द्धजलम्बाक्षं वसदृतनिवापरम् । चलजिह्वञ्च कम्बोदं दीर्घजङ्घशिराकुलम् । दीर्घाङ्गुष्ठतलञ्च गर्त्तांसं शुष्कपञ्जरम् ।

और्द्धदेहिकरूपेऽपि कोषाश्चित् कर्मविशेषेण प्रेतत्वप्राप्तिरुक्ता यथा "कविर्जुहुति नाम्नो ये गोविन्दं नार्चयन्ति ये । अधमे नात्मविद्याश्च सुतीर्थविमुखाश्च ये । सुवर्णं वस्त्रताम्बूलं रत्नमन्नं फलं जलम् । याचकेभ्यो न यच्छन्ति सर्वेषु ऋतदारकाः । ब्रह्मस्वञ्च स्त्रीधनानि लोभादेव हरन्ति ये । बलेन छद्मना वापि धूर्त्ताश्च परवञ्चकाः । नास्तिकाः कुहकाश्चोरा ये चान्ये वकवृत्तयः । बालद्वादशरक्षीषु निर्दयाः सत्यवर्जिताः । अग्निदा गरदा ये च ये चान्ये कूटसाक्षिणः । अगम्यागामिनः सर्वे ये चान्ये ग्रामयाजिनः । आधाधरणसम्पन्ना वर्णादिधर्मवर्जिताः । ये चोपदेवदनुजरक्षोयक्षादिसेविनः । सर्वदा मादकद्रव्यपानमत्ता हरिद्विषः । देवतोद्दिश्यपतितमद्यपाद्यन्नभोजिनः । असत्कर्मरता नित्यं सर्वपातकपापिनः । पाषण्डधर्मचरणाः शूद्रोच्छिष्टभोजिनः । पितृमातृस्वसृदारत्यागिनश्च ये । ये कदर्याश्च लुब्धाश्च नास्तिका धर्मदूषकाः । त्यजन्ति स्वामिनं युद्धे त्यजन्ति शरणागतम् । गवां भूमेश्च हर्त्तारो ये चान्ये रत्नदूषकाः । महाक्षेत्रेषु दुर्बुद्धि प्रतिग्रहरताश्च ये । परद्रोहरता ये च तथा ये ग्रामयाजिनः । पराधवादिनः पापा देवतागुरुनिन्दकाः । कुमतिप्रापिणः सर्वे वसन्ति पुनःपुनः । प्रेतराजवशंयान्ति तिर्यग्गर्दभकूकरयोनिषु । न तेषां मुक्तिलेशोऽस्ति इह लोके परत्र च" । पाद्मोत्तरखण्डे १८ अ० । पञ्चप्रेतोपाख्यानं तत्रैव यथा "ब्राह्मण उवाच प्रेतानां नाम जातीनां युष्माकं सम्भवः कथम् । किं तत् कारणमुद्दिश्य यूयमीदृशतां गताः" । प्रेता ऊचुः "अहं खादु सदा भुक्त्वा दध्यां प्रवुंषितं

यदा। एतत्कारणसद्दिष्ट्य नाम पर्य्युषितं मम। सूचिता बहवोऽनेन विमाद्या ह्यन्नकाङ्क्षिणः। एतत्कारणसद्दिष्ट्य सूचीमुखमिमं विदुः। शीघ्रं गच्छति विप्रेण याचितः क्षुधितेन वै। पश्चाद्भुङ्क्ते द्विजः स्निग्धमेष शीघ्रक इष्यते। स्निग्धोपरि यदा भुङ्क्ते स्वाद्वन्नं द्विजभवेन हि। द्विजाय कुत्सितं दत्त्वा एष रोधकः उच्यते। मौनेनापि स्थिरो नित्यं याचितो विलिखन्भूमीम्। अस्माकमपि पापिष्ठो लेखको नाम एष वै। मेढ्रेण लेखकी याति रोधकः पार्वतःशिराः। शीघ्रकः पङ्कतां प्राप्तः सूची सूचीमुखोऽभवत्"। प्रेताहारश्लोको यथा"द्विज उवाच "ये जीवा भुवि तिष्ठन्ति सर्वे आहारभक्षकाः। युष्माकमपि चाहारं श्रोतुमिच्छामि तत्त्वतः" प्रेता ऊचुः "शृणु आहारमस्माकं सर्वसत्त्वविगर्हितम्। श्लेष्ममूत्रपुरीषेण योषितान्तु भगेन च। स्पृष्टानि त्यक्तशौचानि प्रेता भुञ्जन्ति तत्र वै। स्त्रीभिर्जग्धानि क्षीणानि संक्षीणोपहतानि च। मद्येनातिलुप्तानि प्रेता भुञ्जन्ति तत्र वै। भयलज्जाविहीनानि पतिभिः सेवितानि च। अन्योन्यदत्तयुक्तानि प्रेता भुञ्जन्ति तत्र वै। कलहान्वितशोकानि त्यक्तशोभानि सर्वतः। सपर्यस्तानि भाण्डानि प्रेता भुञ्जन्ति तत्र वै। बलिमन्त्रविहीनानि द्विजाहुतानि यानि तु। नियमव्रतहीनानि प्रेता भुञ्जन्ति तत्र वै। गुरवो नैव पूज्यन्ते क्षोजितानि सतानि च। सक्रोधान्यपवित्राणि प्रेता भुञ्जन्ति तत्र वै। भुञ्जन्ति भिन्नभाण्डेषु मर्यादारहितेषु च। अन्योन्योच्छिष्टयुक्तेषु तत्र प्रेतास्तु भुञ्जते। सकेशभाजिकोच्छिष्टं पूति पर्युषितं तथा। सक्रोधञ्च सशोकञ्च तत्र प्रेतेषु भोजनम्। सनग्नं भोजनं यच्च नोत्तरीयं प्रदापनम्। सोष्णीषं सासुरीकञ्च तत्र प्रेतेषु भोजनम्। सर्वमांसं महामांसं सोत्तिप्रं पतितं तथा। दुर्भुक्तं सौष्टिकञ्चैव तत्र प्रेतेषु भोजनम्। सौतिकं सूतकञ्चैव राजसं कटुभोजनम्। निर्दोषं लक्षिवर्षाणे यद्भुक्तं प्रैतिकन्तु तत्। एतत्ते कथितं सर्वं यत् प्रेतेष्वेव भोजनम्। निर्वाणाः प्रेतजात्या वै युष्मास्वां द्विजोत्तम"। प्रेतत्वाभावकारणं यथा न प्रेतो जायते येन येन चैवेह जायते। एतत्सर्वं समासेन ब्रूहि मे वदतां वर!" ब्राह्मण उवाच "एकरात्रं त्रिरात्रं वा कृच्छ्रं चान्द्रायणादिकम्। प्रेतेष्वपि मतो नित्यं न प्रेतो जायते नरः। निष्कारणदाताथ सततं सदयान्वितः। देवपूजापरो नित्यं न प्रेतो जायते नरः। त्रिरग्निरेवपञ्चाग्निर्निरग्निर्वाप्युपासकः। सर्वभूतदयापन्नो न प्रेतो जायते नरः। तुल्यमानापमानश्च तुल्यः काञ्चनलोष्टयोः। तुल्यः शत्रौ च मित्रे च न प्रेतो जायते नरः। देवतातिथिपूजासु गुरुजातिषु नित्यशः। वेदशास्त्ररतो नित्यं न प्रेतो जायते नरः। जितक्रोधो मदेर्ष्यादम्भासङ्गविवर्जितः। क्षमाऽक्रोधसुशीलश्च न प्रेतो जायते नरः। देवतातिथिपूजासु पर्वतांश्च महोत्सवा। पञ्चदेवालयांश्चैव न प्रेतो जायते नरः"। प्रेतत्वकारणं यथा "शूद्रान्नं यो द्विजो भुङ्क्ते यः क्रामति द्विजोत्तमम्। दत्त्विड़ा द्विजदेवेषु स प्रेतो जायते नरः। मातरं पितरं हित्वा ज्ञातिं बान्धवजनं तथा। लोभात् त्यजति यः स्निग्धं स प्रेतो जायते नरः। अयाज्ययाजकश्चैव याज्यान्तु परिवर्जयेत्। शूद्रान्नयाजकश्चैव स प्रेतो जायते नरः। कुज्योतिषी कवित्वन्तु कुजनेषु कुदेशकः। शूद्रसेवाकरो रात्रौ स प्रेतो जायते नरः। सेवनायाहृतो यः सेवकस्त्वरिपक्षः। तावुभावपि जायेते प्रेतौ कालाद्ध किल्बिषौ। द्विजान्नमश्नितो भुङ्क्ते शूद्रान्नं वा द्विजस्य तु। शूद्रेष्वेव द्विजः प्रेतो निरयानुपगच्छति। गीतवाद्यरतो नित्यं मद्यपस्त्रीनिषेवणात्। द्यूतमांसप्रियो वस्तु स प्रेतो जायते नरः। दुरारेता दुरामांसो दुरावादो दुरासतिः। निन्दको द्विजदेवानां स प्रेतो जायते नरः। दुष्टं वाक्यं गुरुं विप्रं क्रोधमन्यं भुनक्ति वै। कन्यां ददाति शुल्केन स प्रेतो जायते नरः। न्यासापहर्त्ता मित्रघ्नः परपाकरतस्तथा। विश्वस्तघातो कूटश्च स प्रेतो जायते नरः। निर्दोषान् सुहृदो नारीत्यजेत् कालाद्य पाति यः। धनमीक्षेत यक्षेषां स प्रेतो जायते नरः। कृत्स्नस्वरथयानानि सूतशय्यासनादि यः। कन्याजिनञ्च गृह्णाति धनापत्सुगतो द्विजः। तथोभयसुखी कालं सर्वेषां मेदिनीं द्विजः। कृच्छ्रोत्सृष्ट यहानं पाखण्डात् पतितात्तथा। भार्यिकेऽपि नवश्राद्धे भुञ्जन् प्रेतान्नभुङ्मतः। ब्रह्महा गोवधी स्त्रीयो सुरापो गुरुतल्पगः। भूमिकन्यापहर्त्ता यः स प्रेतो जायते नरः। नानासङ्करजन्त्वित्यं वर्णसङ्करजस्तथा। योनिसङ्करजश्चापि स प्रेतो जायते नरः। विक्रीणाति विषं यद्वै तिलानां लवणस्य तु। गवां केशरिणां मोहात् विक्रयात् प्रेततां व्रजेत्। कूटमानेन तौलेन व्रजं क्री-

यातिवाहिकम्। मद्यतक्रपयोदध्नां स प्रेतो जायते नरः। क्षीरक्षो मद्यपाने तु श्वगवामनुधावति। नि-त्यनैमित्तिकेऽदाता स प्रेतो जायते नरः" अग्निपु०। मनुष्याणाञ्च दाहादिक्रियया आतिवाहिकदेहानन्तरं प्रेत-देहो भवति यथाह विष्णुधर्मोत्तरे

"ततक्षणादेव गृह्णाति शरीरमातिवाहिकम्। आतिवाहिकसंज्ञोऽसौ देहो भवति भार्गव!। केवलं तन्मनुष्याणां नान्येषां प्राणिनां क्वचित्। प्रेतपिण्डे-क्षतो दत्तैर्देहमाप्नोति भार्गव!। भोगदेहमिति प्रोक्तं क्रमादेव न संशयः। प्रेतपिण्डा न दीयन्ते यस्य तस्य विमोक्षणम्। ब्रह्मशानिकेभ्यो देवेभ्य आकल्पं नैव विद्यते। तस्माच्च यातना घोराः शीतवातातपोद्भवाः। ततः सपिण्डीकरणे बान्धवैः स कृते नरः। पूर्वं संवत्सरे देहमतोऽन्यं प्रतिपद्यते। ततः स नरकं याति स्वर्गं वा स्वेन कर्मणा" गु०त०। ५प्राप्तपितृलोके "यत्र क्वचिं" संवत्सरे संवत्सरे प्रेतायान्नं दद्यात्" गोभिलः "प्रेतलोकं परित्यज्य आगता ये महालये" ति०त०।

प्रेतकर्मन् न० ६त०। इतोद्देशेन कर्त्तव्ये दाहादि स-पिण्डनान्तकर्मणि भा०द्रो०५२अ०। प्रेतकार्य्यादयोऽत्यन्त। २प्राप्तपितृलोकोद्देशकृतकार्य्ये श्राद्धादौ च "यत्नतः प्रेतकार्य्येषु प्रेतस्य धनहारकः। वर्षाणां यद्वधे प्रोक्तं तद्व्रतं नियतश्चरेत्" दाय०त० वचनम्।

प्रेतगृह न० प्रेतस्य मृतस्य गृहमिव। मृतस्य शरीराधारे श्मशाने हेमच०। प्रेतावासादयोऽत्यन्त।

प्रेततर्पण न० ६त०। मृतोद्देशेन वर्षपर्य्यन्तं प्रेतशब्दोल्लेखेन कर्त्तव्ये तर्पणविशेषे तद्विधानं गु०ति० यथा

मित्राचार्य्यधृतोशनोधरधृतविष्णुवचनम् "यतः सर्वे श्रवस्यर्थिनो मत्वा पितृपदस्थाने प्रेतपदोल्लेखेन द्वितीयान्तं तर्पयेयुः पितृशब्दोच्चारेण पितृत्वा भवति"। शातातपः "प्रेतान्तनामगोत्राभ्यामृतसङ्ज्ञेऽपतिष्ठताम्" इति प्रेतान्तेति तत्पुरुषः न बहुव्रीहिः सर्वजन्यत्वात् तेन प्रेतान्तनाम गोत्रञ्चेति समासः एतद्वचनाच्चितापि-ण्डदाने उपतिष्ठतामिति पितृदयितायामप्युक्तम्। एतेन प्रेतकार्ये समस्तार्थकपदप्रयोगो मैथिलोक्तो हेयः। एते-नामुकगोत्रममुकदेवशर्माणं तर्पयामीति भाट्टगानां प्र-योगः। यत्र प्रेततर्पणे सपिण्डीकरणे विशेषोपादानात् कृत्यादिद्वारेऽपि तिलैरेव तर्पणं प्रतीयते। व्यक्तमाह ब्रह्मपारिजातधृता स्मृतिः "यदने विष्णवे चैव संक्रान्त्यां ग्रहणेषु च। उपाकर्मणि चोत्सर्गे युगादौ मृतवा-सरे। सर्वर्क्षकादिवारे च न दोषस्तिलतर्पणे"। तथा "तीर्थे तिथिविशेषे च कार्ये" प्रेते च सर्वदा"। तिथिवि-शेषे अमावस्यादयश्चरादौ। यत्र दक्षिणाकुशसहित-मध्यमादिना वामहस्ते तिलदानं "वामहस्ते तिलान् दत्वा जलमध्ये तु तर्पयेत्। सव्यहस्तन्तु कर्त्तव्यं न सद्भिस्तत्र दर्शयेत्" इति विद्याकरधृतवचने वामहस्त इति सप्तम्यन्तपदात् "तिलान् संमिश्रयेज्जले" इति तिलाधिकरणसप्तम्यभिधानाच्च। "सव्येन च तिलाः पात्राः" इत्यत्रापि वामहस्ते स्थाप्या इत्यर्थः। सव्येनेति स्थाप्या पदतीतिवदधिकरणे तृतीया "विवक्षातो हि कारकाणि भवन्ती"त्युक्तेः। सद्भिः कुशतर्जन्यात्मकयोग-रूपा तिलग्रहणावेति शेषः"।

प्रेतधूम पु०ह०। चिताधूमे मनुः ४।६८। [नदीभेदे शब्दच०।

प्रेतनदी स्त्री प्रेतस्य नदी। यमद्वारस्थे वैतरणीनामके

प्रेतनिर्हारक पु०प्रेतं निर्हरति गृह्णात् श्मशानभूमिं निर्+हृ-ण्वुल्। यमद्वारके "प्रेतनिर्हारकार्य्येव वर्जनीयाः प्रयत्नतः" तस्य अपाङ्क्तेयता मनुनोक्ता। तत्र कुल्लू० धनग्रहणपूर्वकरक्षणपरतया व्याख्यातं यथा "प्रेतनिर्हारको धनग्रहणेन न तु धर्मार्थम्। "एतद्वै परमन्नपो यत् प्रेतमरण्यं हरन्तीति"श्रुत्या विहितत्वात्"

प्रेतपक्ष पु० प्रेतानां पितॄणां प्रियः पक्षः श्रा०त०। नौचा-श्विनकृष्णपक्षे यत्र मृतयोः पित्रोः पार्वणविधिना नैपुरुषिकं श्राद्धं कर्त्तव्यं यथाह श्रा०त० यमः

"सपिण्डीकरणाद्ऊर्द्धं यत्र यत्र प्रदीयते। तत्र तत्र त्रयं कुर्यात् वर्जयित्वा मृताहनि। अमावस्यां त्रयो यस्य प्रेतपक्षेऽथ वा पुनः। सपिण्डीकरणाद्ऊर्द्धं तस्योक्तः पार्वणो विधिः"। त्रयं सप्तदानानां त्रयं कुर्यात् त्रिभ्यो दद्यादित्यर्थः। मृताहपर्युदासविधे-यतत्वञ्च प्रतिपक्षवचनाच्च अमावस्यामिति प्रेतपक्षोऽत्र पितृपक्षः अश्वयुक्कृष्णपक्ष इति यावत् न तु कृष्ण-पक्षमात्रं कृष्णत्वसामान्यपरत्वे ऽमावास्यापदवैयर्थापत्तेः पितृपक्षं विशेषयति हेमाद्रिमाधवाचार्य्यधृतं नाग-रखण्डम् "नभो वाऽथ नभस्यो वा मघासंस्थे रवौ यदा भवेत्। सप्तमः पितृपक्षः स्यादन्यत्रैव तु पञ्चमः"। यत्र श्राद्धमाश्वयुजोरन्यतरस्य मघासत्वे श्राद्धादिपक्षयो-सप्तमपक्षस्य पितृपक्षत्वात् यत्र मृतस्यैव प्रेतपक्षमृतस्य न तु मघासंभवाद्भाद्रकृष्णपक्षे मृतस्य। ततश्च तत्र मृतस्य

वर्षान्तरेऽप्ययुक्तत्वाच्चैतदपि तच्छाद्धकरणे न पार्वणं किन्त्वेकोद्दिष्टमिति। अत्र पार्वणो विधिः पार्वणेतिकर्तव्यताकैकोद्दिष्टविधिरिति नव्यपक्षमानपक्षतयः। तत्र पूर्ववचनोक्तवैपूरविकस्य मृताहे पर्युदस्तस्य पार्वणोविधिरित्यनेन प्रतिप्रसवात्। तस्मात् सदैकोद्दिष्टं वैपूरुषिकं न तु षाट्पौरुषिकं "कर्तृसमन्वितं सङ्घा तथार्घं श्राद्धभोजनम्। प्रत्यब्दिकस्य शेषेषु पिण्डाः स्युः षडिति स्थितिः" इति छन्दोगपरिशिष्टवचनेन प्रत्यब्दिकव्यतिरेकेण षट्संख्यानियमात् एवमभावस्यादिमरणनिमित्तेन मातरपि पुत्रावृदिकं पार्वणविधिनैव "अपुत्रा ये मृताः केचित् स्त्रियो वा पुरुषाश्च ये। तेषामपि च देवं स्यादेकोद्दिष्टं न पार्वणम्" इति आपस्तम्बवचने अपुत्रा इति विशेषणोपादानात् सपुत्राणां पार्वणाभ्यनुज्ञानात्। एतच्च मात्रादित्रितयदैवतं कार्यम्। "मात्रे पितामह्यै प्रपितामह्यै पूर्ववत् ब्राह्मणान् भोजयित्वा" इत्यन्वष्टकायां तथादर्शनात् अवस्थानदिननिमित्तत्वेन पार्वणविधिना छन्दोगैरपि मात्रादित्रिकाणां श्राद्धं कर्तव्यम् "न योषिद्भ्यः पृथग् दद्यादवस्थानदिनादृते"। इति छन्दोगपरिशिष्टवचने विशेषतः प्रतिप्रसवात्। एवं सपिण्डीकरणेऽपि। एतच्च मृताहपार्वणं मातापित्रोरेव। तथा च हेमाद्रिधृतकात्यायनवचनम् "सपिण्डीकरणादूर्ध्वं पित्रोरेव हि पार्वणम्। पितृव्यभ्रातृमातृणामेकोद्दिष्टं सदैव तु" इति। मातृपदं सपत्नीमातृपरम्। सपत्नीमातृत्वञ्च मातृपदस्य राजदन्तादित्वात् परनिपातः ततश्च वाक्ये मातृसपत्नीति न प्रयोक्तव्यं किन्तु सपत्नीमातरित्यादिकम्। एवं माम्निकौरसक्षेत्रजाभ्यां मृताहे पार्वणं कर्तव्यम् "औरसक्षेत्रजौ पुत्रौ विधिना पार्वणेन तु। प्रत्यब्दमितरे कुर्युरेकोद्दिष्टं मृता दश" इति जाबालवचनस्य "यत्र यत्र प्रदातव्यं सपिण्डीकरणात् परम्। पार्वणेन विधानेन देवमग्निमता सदा" इति मत्स्यपुराणवचनस्य चैकवाक्यत्वात्। उक्तञ्च "प्रत्यब्दं दर्शवच्छ्राद्धं साग्निः कुर्वीत वै द्विजः। एकोद्दिष्टं सदा कुर्यान्निरग्निः श्राद्धदः सुतः"। अत्र निरग्नि० विशेषभाङ्गद्वयपराशरः "संग्रामे संस्थितानाञ्च प्रेतपक्षे मृतिञ्च ये। तेषां पार्वणमेवोक्तं चयाहेऽपि च सत्तमैः"। "चन्द्रसूर्यानाशकसंयुगेषु यः प्रेतपक्षे म्रियते सपिण्डः। सुपिण्डितानामपि चाब्दिकानि भवन्ति तेषामिह पार्वणानि"। तथा "भ्रातुर्ज्येष्ठस्य कुर्वीत ज्येष्ठो भ्रातानुजस्य च। दैवहीनं तु तत्कुर्यादिति धर्मविदब्रवीत्"। दैवहीनमेकोद्दिष्टम् ज्येष्ठो भ्राताऽनाद्यग्नभंजः तथा च तत्रैव यातातपः "अनाद्यग्नर्भोज्येष्ठोऽपि भ्राता सद्भिर्निगद्यते। ऋते सपिण्डनात्तस्य नैव पार्वणमाचरेत्"। आद्यग्नर्भे तु पार्वणमेकोद्दिष्टं वेत्यर्थः। मातृस्तु हेमाद्रौ कात्यायनः "प्रत्यब्दं यो यथा कुर्यात् पुत्रः पित्रे सदा द्विजः। तथैव मातुः कर्तव्यं पार्वणं चान्यदेव वा"। यत्तु तेनैवोक्तम् "सपिण्डीकरणादूर्ध्वं" पित्रोरेव हि पार्वणम्। पितृव्यभ्रातृमातृणामेकोद्दिष्टं सदैव तु" इति तत् सापत्नमातृपरम्। यत्तु हेमाद्रौ पराशरः "अपुत्रस्य पितृव्यस्य तत्पुत्रो भ्रातृजो भवेत्। स एवास्य तु कुर्वीत पिण्डदानादिकक्रियाम्। पार्वणं तेन कार्यं" स्यात् पुत्रवद्भ्रातृजेन तु। पितृस्थाने तु तं कृत्वा श्रेष्ठं पूर्ववदाचरेत्" इति तत्पितृवद्देशाचारवद्व्यवस्थितमिति पृथ्वीचन्द्रः। श्राद्धदीपकलिकायां चतुर्विंशतिमते तु "पितृव्यभ्रातृमातृणां ज्येष्ठानां पार्वणं भवेत्। एकोद्दिष्टं कनिष्ठानां दम्पत्योः पार्वणं मिश्रः। अपुत्रस्य पितृव्यस्य भ्रातुर्वाप्यजन्मनः। भ्रातामहस्य तत्पत्न्याः श्राद्धं पार्वणवद्भवेत्" इत्युक्तं तत्पत्न्याः कर्तृत्वेऽपि पार्वणमेव "स्वर्गीभावे स्वयं पत्न्याः स्वभर्तृणामसम्भवे। सपिण्डीकरणं कुर्युस्ततः पार्वणमेव च" इति शौनकोक्तेः। "ततः पत्न्यपि कुर्वीत सापिण्डयं पार्वणं तथेति" सुमन्तूक्तेश्च निर्णयामृते उक्तम्। अन्ये त्वेतत्पार्वणं पार्वणपरमाहुः अतएव "भर्तुः श्राद्धं तु वा नारी भोक्तात्पार्वणमाचरेत्। न तेन तृप्यते भर्त्ता कृत्वा तु नरकं व्रजेत्" इति वचनं चयाहे पार्वणैकोद्दिष्टप्रशंसार्थं न पार्वणनिषेधार्थमित्युक्तं तिथ्यतीतौ भट्टचरणैः। स्वभर्तृप्रकृतिभिन्न इत्यनेन विरोधाच्च अपुत्राणाम् श्राद्धं हेमाद्रावापस्तम्बः "अपुत्रा ये मृताः केचित् स्त्रियो वा पुरुषाश्च ये। तेषामपि च देवं स्यादेकोद्दिष्टं न पार्वणम्। पितृवत्सुपिण्डेभ्यः स्त्रीकुमारीभ्य एव च। दद्याद्वै मासिकं श्राद्धं सांवत्सरमतोऽन्यथा"। पारिजाते तु अन्यथा पार्वणमित्युक्ता सर्वत्र पार्वणमित्युक्तम् एकोद्दिष्टवाक्यानि तु तीर्थमहालयपराण्युक्तम्। पृथ्वीचन्द्रोदये हरिवंशः "मातुः सहोदरा या च पितुः सहभवा च या। तयोश्च नैव कुर्वीत पार्वणं पिण्डनादृते" प्रचेताः "सुपिण्डीकरणादूर्ध्वं

मेकोद्दिष्टं विधीयते। अपुत्राणां च सर्वेषामपत्नीनां तथैव च"। अपत्नीनां ब्रह्मचर्य्यादीनाम्। मार्कण्डेयपुराणे "प्रतिसंवत्सरं कार्यमेकोद्दिष्टं नरैः स्त्रियाः। कृताकृतिं यथान्यायं तथा यद्दिष्टोदितम्"। तथेति इष्टत्वात् गोविप्रकृतपार्वणश्राद्धादीनां सपिण्डनाभावेऽपि सांवत्सरमेकोद्दिष्टं कार्यमेवेति मूलपाठिः। अत्रिसंहितायाम् "सपिण्डीकरणादूर्ध्वं यत्र यत्र प्रदीयते। भ्रात्रे भगिन्यै पुत्राय स्वामिने मातुलाय च। पितृव्यगुरवे श्राद्धमेकोद्दिष्टं न पार्वणम्"। यत्तु जातूकर्ण्यः "पितृव्यभ्रातृमातृणामपुत्राणां तथैव च। मातामहस्यामातुश्च श्राद्धादि पितृवद्भवेत्" इति तदावश्यकत्वार्थं न तु पार्वणार्थमिति हेमाद्रिः। युक्तञ्चैवम् "मातुः पितरमारभ्य त्रयो मातामहाः स्मृताः। तेषां तु पितृवच्छ्राद्धं कुर्युर्दौहित्रकादयः" इति पुलस्त्योक्तेः मातामहस्य पार्वणमेव तत्साहचर्य्यात् पितृव्यादौ तथा "पितृव्यभ्रातृमातृणामेकोद्दिष्टं च पार्वणमिति" जयाद्योक्तमेव पुलस्त्योक्तेश्च विकल्पः। देवलेनापस्तम्बादिवाक्यानि "व्युत्क्रमाच्च प्रमीतानां नैव कार्या सपिण्डता" इत्यस्य पितृव्यादिपरत्वादकृतसपिण्डनपितृव्यादिपराणीत्याहुः। माता सपत्नीभ्राता। एकोद्दिष्टं तु कनिष्ठपरमिति पृथ्वीचन्द्रोदयेऽप्येवम्। विशेषस्त्वधिकारिनिर्णये वक्ष्यते। केचित्पुत्राभावेऽपि पितामहपार्वणैकत्वावबोधकम् "पुत्राभावे च तत्पुत्रः पत्नी माता तथा पिता। वित्ताभावेऽपि सञ्चित्यः कुर्य्यात्तत्रौर्ध्वदैहिकम्" इति मार्कण्डेयपुराणादिवाक्यतत्र "पौत्रे चैकादशाहादि कर्त्तव्यं श्राद्धषोडशमिति" जातीवे विशेषोक्तेः।

प्रेतपक्षे श्राद्धकालादिनिरूपणम् आ०वि० यमः ब्रह्मपुराणे "अथयुक्कृष्णपक्षे तु श्राद्धं कुर्याद्दिनेदिने। त्रिभागहीनं पक्षं वा त्रिभागं त्वर्द्धमेव वा। न सन्ति पितरश्चेति कृत्वा मनसि यो नरः। श्राद्धं न कुरुते तस्य रक्तं पिबन्ति ते। यावच्च कन्यातुलयोः क्रमादास्ते दिवाकरः। तावत् श्राद्धस्य कालः स्याच्छून्यं प्रेतपुरं तदा"। दिने दिने इति वीप्सया पक्ष श्राद्धार्थो तेन पञ्चदश श्राद्धानि दर्शितानि। नन्तु तिथिक्षयादेकस्मिन्नेव पक्षे चतुर्दशत्वाद्वा चतुर्दश श्राद्धानि प्राप्नुवन्ति। एवं तिथिक्षयाद्वृद्धौ षोडशस्युः। न पञ्चदशतिथ्यात्मकत्वाच्चान्द्रपक्षस्य दिने दिने पञ्चदशतिथिसिद्धेः तथा च एकस्मिन् दिने श्राद्धयोग्यतिथिद्वयलाभे श्राद्धद्वयम् अहोरात्रवृद्धौ न श्राद्धवृद्धिः। तथा च विष्णुधर्मोत्तरप्रथमकाण्डम् "तिथिनैकेन दिवसश्चान्द्रमानेन कीर्त्तितः। अहोरात्रेण चैतेन सावनो दिवसः स्मृतः"। त्रिभागहीनं पक्षं वा इति यमादिकल्पे उक्तः त्रिभागमित्येकादश्यादिकल्पे उक्तः अर्द्धमेवेति त्रयोदश्यादिकल्पः। न तु अर्द्धमिति पक्षार्द्धमिति व्याख्यानं कल्पतरुकृतं युक्तम् उत्तरोत्तरबहुकालोपदेशात् सन्धिधानाच्च त्रिभागार्द्धप्रतीतेः। त्रिभागहीनत्रिभागपदयोरपि पञ्चम्यादिविवेचनं कल्पतरोर्न युक्तमेव पञ्चामेत्यया पञ्चम्यादेस्त्रिभागहीनादिपदार्थत्वानुपपत्तेरसङ्गत्वात्। मौतमोक्तपञ्चम्यादिकल्पस्य सामान्योपक्रमाश्वयुक्परत्वम्। अतएव विष्णुधर्मोत्तरप्रथमकाण्डम् "उत्तराद्ययनात् श्राद्धे श्रेष्ठं स्याद्दक्षिणायनम्। आसौनस्य तथापि प्रथमे केशवे स्थितम्। प्रौष्ठपद्याः परः पक्षस्तथापि च विशेषतः। पक्षस्यूर्ध्वं च तत्रापि दशम्यूर्ध्वमतोऽपि। मघायुक्ता च तत्रापि श्रद्धा राजसूयोदयी"। पक्षस्यूर्ध्वं दशम्यूर्ध्वमित्यनेन षष्ठ्यादेकादश्यादिकल्पावुक्तौ। न सन्तीत्यनेनाकरणे प्रत्यवायदर्शनं नित्यत्वज्ञापनार्थं तत्र च पक्षश्राद्धादिकल्पानां विषमशिष्टत्वेनेच्छाविकल्पाऽसम्भवादेकादेवा तिस्रो देवाः षड्देवा इतिवत् फलभूमा कल्पनीयः। एतेषामेव कल्पानां दर्शितत्वादाश्विने कृष्णपक्षे एकस्मिन्नपि दिने श्राद्धं कर्त्तव्यमिति पक्षचिन्तनीयः सामान्यमासविहितन्तु श्राद्धादेव। अत्र संशयः प्रौष्ठपद्यूर्ध्वं यः कृष्णपक्षः स पौर्णमास्यन्तमासव्यवस्थयाऽश्वयुक्कृष्णपक्षो भवति स यदा कन्योपक्रमः कन्यासमाप्तश्च तदा तत्र पक्षश्राद्धमविवादमेव यदा सिंहोपक्रमः कन्यासमाप्तश्च समस्त एव वा सिंहसमाप्तः तदा कीदृशः शास्त्रार्थः। अत्र त्रिवचनप्रभृतयः ब्रह्मपुराणादिवचनैरेवात्र व्यवस्थां द्रष्टव्यामाहुः। यथा ब्रह्मपुराणम् "यावच्च कन्यातुलयोः क्रमादास्ते दिवाकरः। तावत् श्राद्धस्य कालः स्यात् शून्यं प्रेतपुरं तदा"। तथा भविष्यपुराणे "कन्यां गते सवितरि पितराज्ञानुशासनात्। तावत् प्रेतपुरी शून्या यावद्वृश्चिकदर्शनम्। ततो वृश्चिक आघाते निराशाः पितरो नृप!। पुनः स्वभवनं यान्ति शापं दत्त्वा सुदारुणम्। इंसे वसौ कन्यास्थे शाकेनापि स्वके वसन्। पक्षस्या उत्तरे दद्यादुभयोर्वंशयोर्जलम्। सूर्ये कन्यास्थिते श्राद्धं यो न कुर्याद्दुष्टहाशयी। कुतस्तस्य धनं

पुत्राः पितृनिःश्वासपीड़नात्"। इत्ये स्त्र्यं इति। कृष्ण-मिव कृष्णं पितृमातृकुलस्त्रेदमवश्यं परित्योज्यम् इत्यर्थः ऐवमादिवचनैः कन्यासम्बन्धेनैव श्राद्धप्रतिपादनात् एत-स्यापि वचनस्य तदैकवाक्यतया सौरान्विनपरत्वम्। सौर-परत्वे कथं स्यादिति चेन्न पौर्णमास्यन्तेऽपि तथात्वात्। अतः सिंहोपक्रमे कृष्णपक्षे कन्यासम्बन्धिन्येव भाद्रे श्राद्धं स्यात् न सिंहसम्बन्धिनि अतः पञ्चश्राद्धं तत्र निवर्त्तते एव त्रिभागहीनमित्यादयः पक्षाक्षरा यथा-सम्भवं योजनीयाः। कन्यासम्बन्धिन्यपरपक्षे श्राद्ध-विधानात् उपक्रमे सिंहसम्बन्धेऽपि पक्षस्य कन्यासम्ब-न्धोऽस्त्येवेति चेन्न एकस्य पक्षावयविनः पञ्चदशतिथ्या-त्मकस्याभावात् अत एव पञ्चदशत्रात्मकसमुदायमध्ये एकस्य पुरुषोत्तमस्थे न सर्वेषां पुरुषभागिता एतन्मूलमे-वेदं वचनं "ऋतिकादिभरश्लेषा वारा वा रविसप्तकाः। नैते संयोगमात्रेण पुनन्ति सकलं तिथिम्"। एकस्य तिथ्यवयविनोऽभावादित्यर्थः इतरथा तु पूर्वदिने रात्रौ चतुर्दशीभौमवारयोगे बुधवारेऽपि भौमयुक्तचतुर्दशीं विहितस्नानदानाद्यापत्तेः। यदा समस्त एवापरपक्षः सिंहार्के निपतेत् तदा तं पक्षं विहाय कन्यागतापर-पक्ष एव श्राद्धम्। नन्वेवं पञ्चमपक्षविरोधः। तथा काण्वौजिनिः "शक्रध्वजनिपाताङ्को यः स्यात् पक्षस्तु पञ्चमः। स विज्ञेयोऽपरः पक्षः श्राद्धं तत्र विधीयते। पुत्रमायुर्धनं धान्यं भूतिमारोग्यमेव च। प्राप्नोति पञ्चमे दत्त्वा श्राद्धं कामांस्तथा परान्। एतानेव हि सिंहस्थे पञ्चमं यो व्यतिक्रमेत्। तस्माद्व्यतिक्रमेद्विद्वान् पञ्चमे चैकके विधिम्"। तथा जाबालकण्वैः "आषाढीभवधिं कृत्वा यः स्यात् पक्षस्तु पञ्चमः। तत्र श्राद्धं प्रकुर्वीत कन्यां गच्छतु वा न वा"। जाबालः "अगतेऽपि रवौ कन्यां श्राद्धं कुर्वीत यत्नतः। आषाढ्याः पञ्चमः पक्षः प्रशस्तः पितृकर्मणि"। उच्यते एतेषां वचनानां भोजदेवप्रभृतिभि-रविचिन्तितत्वेन प्रामाण्याभावात् प्रस्तुत पुत्रादिफलसम्ब-न्धावगमात् काम्यं तद्विधत्ते। कन्यागतस्य च नित्यत्वं प्रागेव दर्शितम्। न च काम्याधिकारनित्याधिकारयो-रेकशास्त्रार्थत्वं यावज्जीवाधिकरणविरोधात्। तदयदि कथञ्चित्तया कन्यासम्बन्धरहित एव श्राद्धं कृतं तथापि कन्यायामवश्यं कर्त्तव्यम्। वस्तुतस्तु श्राद्धभेदे विधिगौरवापत्तेः कन्यागतश्राद्ध एव कथञ्चित्तया पञ्चम-पक्षाक्षगुणफलविधिः तदा च केवलपञ्चमपक्षे श्राद्ध-मसङ्कुतमेव "कन्यां गच्छतु वा नवेति" पञ्चमपक्षस्तुत्यर्थं न तु कन्यासम्बन्धाभावेऽपि श्राद्धविधानपरं प्राप्ते कन्या-गतश्राद्धे गुणफलविधित्वात् तदसङ्कुतं ब्रह्मपुराणे "पौर्णमास्यन्तमासेनैव समाप्तितिथित्वाभिधानात् अश्वयुक् शब्दस्यापि पौर्णमास्यन्तपरत्वात् न सौरान्विनपरत्वम् "आश्वयुज्यां तु कृष्णायां त्रयोदश्यां मघासु च" इति ब्रह्मपुराण एव अश्वयुक्शब्दस्यापि पौर्णमास्यन्तपरत्वावधा-रणाच्च पौर्णमास्यन्तान्विन एव मघा त्रयोदशी भवति न दर्शान्ते, तत्रैव च सौरेऽप्यविशिष्टा। अतएव न मुख्य-त्वाय दर्शान्तपरतापि कृष्णतातृपक्षोनुपपत्त्या कृष्णायां धान्यमसधिकरणे दर्शितत्वात्। इदन्तु उच्यते अश्वयुक्शः पौर्णमास्यन्तान्विनपरत्वे कन्यानिरपेक्षपञ्चमपक्षे पञ्चश्रा-द्धादिकस्य नित्यतयाऽवश्यत्वे न कन्याविशिष्टा निरपेक्ष-श्रुतेः अत एव न गुणफलविधिः। अत एव कन्यासम्बन्धा-भावेनैव प्रौष्ठपद्यूर्ध्वं पञ्चमपक्षे कृष्णपञ्चश्राद्धादिकं दर्श-यति विष्णुधर्मोत्तरप्रथमकाण्डम् "उत्तरायणात् श्राद्धं श्रेष्ठं स्यात् दक्षिणायनम्। चातुर्मास्यञ्च तत्रापि प्रसूते केशवे स्थितम्। प्रौष्ठपद्याः परः पक्षस्तत्रापि च विशेषतः। पञ्चम्यूर्द्धं तत्रापि दशम्यूर्द्धमतोऽपरे। मघा युक्ता च तत्रापि शस्ता राजन्त्रयोदशी। तत्राप्यर्द्धं भवेत् श्राद्धं मधुना पायसेन तु। सर्वस्वेनापि कर्त्तव्यं श्राद्धमत्र नराधिप!। पराह्णभोजी त्वपरः श्राद्धमत्र तु कारयेत्"। यानि च कन्याविषयाणि वचनानि तानि पञ्चमपक्षानपेक्षश्राद्धान्तरविधायकान्येव। कन्या प्रौष्ठपद्यूर्द्धं पञ्चमपक्षसङ्कुचेऽपि कन्यागतस्यापि श्राद्धस्य नित्यत्वेनावगम्यमानस्य तस्मादेव सिद्धेर्न पृथक्करणम्। यदा न कन्यासङ्कुचस्तदा कन्यायामपि नित्यत्वात् कर्त्त-व्यमेव परन्तु पञ्चश्राद्धादिकल्पेषु प्रामाण्याभावात् सङ्कु-चते अतः शास्त्रार्थ इति न्यायात् सकृदेव श्राद्धं कर्त्त-व्यम्। अधिमासपाते तत्र श्राद्धं न कर्त्तव्यं यथा स्मृ-त्यन्तरे "अधिमासोकरणाद्धूर्द्धं यत्किञ्चित् श्राद्धिकं भ-वेत्। दृष्टं वाप्यथ वा पूर्तं तत्र कार्यं न संशयः"। एवमधिमासदोषेणापाटवादिना च तत्र श्राद्धाकरणे तु-ल्यायां कर्त्तव्यतायामाह ब्रह्मपुराणे "यावच्च कन्यातुलयोः क्रमादर्के दिवाकरः। तावत् श्राद्धस्य कालः स्यात् शून्यं प्रेतपुरं तदा"। यत्र कन्यातुलयोर्दिवाकरावस्थितेः क्रमादेव प्राप्तत्वात् क्रमात् श्राद्धस्य कालः स्यादित्यन्वयः शुक्लकृष्णानुकूलभावेनेत्यर्थः।

वस्य वा मृततिथिस्तस्य प्रेतपक्षे तत्सञ्ज्ञातीयतिथिः पौर्णमासीमृतस्य तु प्रौष्ठपद्यैव पार्वणश्राद्धकालः इति हेमाद्रिप्रभृतिव्यवस्थेति पाश्चात्यदक्षिणात्यानां तथाचारः। प्रा॰वि॰ तन्मूलवचनानामसूचकत्वतुल्यमतोवङ्गानां न तथाचार इति बोध्यम्। अधिकमपरपक्षशब्दे २११ पृ॰ दृश्यम्। [वाद्यभेदे त्रिका॰।

प्रेतपटह प्रेतस्य प्रेतत्वसूचकः पटहः। मरणकालवादनीये

प्रेतपति पु॰ ६त॰। यमराजे

प्रेतपर्वत पु॰ प्रेतोद्धारार्थः पर्वतः। गयातीर्थस्थे स्वनामख्याते पर्वते वायुपु॰ गयाप्र॰।

प्रेतपिण्ड पु॰ प्रेताय देयः पिण्डः। पूरकपिण्डे तस्य प्रेतस्य पिण्डरूपदेहविशेषपूरकत्वात् पूरकसंज्ञा यथोक्तं ब्रह्मपु॰ "शिरस्त्वाद्येन पिण्डेन प्रेतस्य क्रियते सदा। द्वितीयेन तु कर्णाक्षिनासिकास्तु समाश्रितः। गलांसभुजवक्षांसि तृतीयेन तथा क्रमात्। चतुर्थेन तु पिण्डेन नाभिलिङ्गगुदानि च। जानुजङ्घे तथा पादौ पञ्चमेन तु सर्वदा। सर्वमर्माणि षष्ठेन सप्तमेन तु नाड्यः। दन्तलोमाष्टमेनैव वीर्यं च नवमेन तु। दशमेन तु पूर्णत्वं तृप्तता तुष्टिपर्ययः"।

प्रेतपुर न॰ ६त॰। यमालये "भूम्यं प्रेतपुरं भवेत्" ब्रह्मपु॰

प्रेतमेध पु॰ ६त॰। पित्रुद्देश्यके श्राद्धरूपे यज्ञे।

प्रेतराक्षसी स्त्री प्रेतस्य भूतभेदस्य राक्षसीव दूरतोऽपसर्पणकारित्वात्। तत्सदृशी स्त्री वा।

प्रेतराज पु॰ ६त॰ टच्समा॰। यमे तस्य मृतस्य शुभाशुभकर्मविभजनेन शासनात् तथात्वम्।

प्रेतलोक पु॰ ६त॰। यमलोके "प्रेतलोकं परित्यज्य आगता ये महालये" उल्कादानमन्त्रः।

प्रेतवन न॰ प्रेतानां मृतानां वनमिवाधारत्वात्। श्मशाने हेमच॰। प्रेतकाननादयोऽप्यत्र।

प्रेतवाहित त्रि॰ ३त॰। भूताविष्टे त्रिका॰।

प्रेतशिला स्त्री गयातीर्थस्थे प्रेतोद्धारार्थे शुक्लपृष्ठपर्वतादिस्थे शिलाभेदेवायुपु॰गयाप्र॰। गरुडपु॰८८ अ॰ तन्माहात्म्यादि यथा "ज्ञेयं प्रेतशिला ख्याता गयायां सा त्रिधा स्थिता। प्रभासे प्रेतकुण्डे च गयासुरशिरस्यपि। धर्मेण धारिता भूत्वै सर्वदेवमयी शिला। प्रेतत्वं ये गता मर्त्या पित्राद्या बान्धवादयः। तेषामद्यैरणार्थाय यतः प्रेतशिला ततः। अतोऽत्र सुनयो भूपा राजपात्रादयः सदा। तस्यां शिलायां श्राद्धादिकर्त्तारो ब्रह्मलोकगाः। गयासुरस्य यन्मुण्डं तस्य दक्षे शिला यतः। सप्तपृष्ठो गिरिस्तस्मात् सर्वदेवमयो ह्ययम्। सप्तपृष्ठस्य पादेषु यतो ब्रह्मसरोऽस्त्यतः। अरविन्दवनस्थेषु तेन चैवोपलक्षितः। अरविन्दगिरिर्नाम क्रौञ्चपादाद्विनिर्गतः। तस्माद्गिरिः क्रौञ्चपादः पितॄणां ब्रह्मलोकदः। गदाधरादयो देवा आद्या आदौ व्यवस्थिताः। शिलारूपेण च व्यक्तास्तस्माद्देवमयी शिला। गयाशिरस्त्वादयित्वा गुरुत्वादास्थिता शिला। स्नात्वा प्रेतशिलादौ तु चरणाम्बुप्लुतेन च। पिण्डं दद्यादिमैर्मन्त्रैराद्यं च पितॄन् परान्"।

प्रेतशुद्धि स्त्री प्रेते सति कालविशेषे शुद्धिः। विप्रादीनां मृतानां मरणनिमित्तकाशौचापगमे शुद्धौ "प्रेतशुद्धिं प्रवक्ष्यामि" मनूपक्रम्याशौचरूपतद्विरोधिनो दर्शनेन तदपगमे शुद्धिः प्रतिपादिता।

प्रेतशौच न॰ प्रेते सति शौचम् ६त॰। प्रेते सति तच्चिन्ताशौचापगमे १शौचे २प्रेतसंस्कारभेदे च तत्प्रकारः गरुड़पु॰ १०६अ॰ उक्तो यथा

"प्रेतशौचं प्रवक्ष्यामि तच्छृणुध्वं यतव्रताः!। अनहिर्यं निखनेच्च कुर्यादुदकनत्तः। आस्रवणादनुब्रज्य इतरो ज्ञातिभिर्वृतः। यमसूक्तं तथा जप्यं जपद्भिर्लौकिकाग्निना। स दग्धस्य उपेतवे दाक्षिताग्न्याहुतार्थवत्। स्नानाद्दशमाहापि ज्ञातयो ह्युपयन्त्यपः। अप नः शोशुचदघमेन पितृदिङ्मुखाः। एवं मातामहाचार्यप्रेतानामोदकक्रियाः। नामगोत्रेण चोदकं सकृत् सिञ्चन्ति बान्धवाः। पाषण्डपतितस्त्रीणां न कुर्युरुदकक्रियाम्। न ब्रह्मचारिणो नात्मा योषितः कामगा सुरापास्त्वात्मघातिनो नाशौचोदकभाजनाः। अतो न रोदितव्यं हि स्वनित्वा जीवसंस्कृतिः। क्रिया कार्या यथाशक्ति ततो गच्छेद् गृहान् प्रति। विदग्ध निम्बपत्राणि नियता द्वारि वेश्मनः। आचम्याग्निसदर्कं गोमयं गौरसर्षपान्। प्रविशेयुः समाक्रम्य ह्यश्मानि पदं मनैः। प्रवेशनादिकं कर्म प्रेतसंस्थेनापि। दैवतां तत्तच्छाखाद्धिः परेषां स्नानसंयमात्। क्रीतलब्धाप्तना भूमौ स्वपेयुस्ते पृथक् पृथक्। पिण्डयज्ञादता देवं प्रेतावाह्नं दिनत्रयम्। जलमेकाहमाकाशे स्थाप्यं क्षीरञ्च षण्मये। वैतानोपासनाः कार्याः क्रियाश्च श्रुतिचोदिताः"।

प्रेतश्राद्ध न० प्रेतोद्देश्यकं श्राद्धम् । प्रेतोद्देश्यके आद्यश्राद्धादिसपिण्डीकरणान्तश्राद्धे तस्य गौणकालादि तिथ्यन्तं उक्तम् यथा "मासेऽन्यस्मिन् तिथौ तस्मिन् तदा दद्याद्विचक्षणः" । तथा श्राद्धतत्त्वं दर्शितं यथा "प्रोष्ठपदश्राद्धानां यत्पतितं तच्चैकादश्यां तत्कर्त्तव्यम् । तथा च लघुहारीतः "श्राद्धविघ्ने समुत्पन्ने मृताहरविदिते तथा । एकादश्यां प्रकुर्वीत तत्पक्षे विशेषतः" । विशेषत इत्यभावस्तोपेक्षया तस्यामपि विघ्नादौ विधानात् । यथा हेमाद्रिधृतं षट्त्रिंशन्मतम् "मासिके चाब्दिके त्वब्दि संप्राप्ते मृतवासरे । यदग्नि गुह्यौ तत्कार्यं दर्शे चापि विचक्षणैः" । राजमार्त्तण्डे "श्राद्धविघ्ने समुत्पन्ने मृताहरविदिते तथा । एकादश्यां प्रकुर्वीत तत्पक्षे विशेषतः । श्राद्धविघ्ने समुत्पन्ने मृताहरविदिते तथा । अमावस्यां प्रकुर्वीत वदन्त्येके मनीषिणः" । अत्र मृताहरविदितेऽपदानात् तत्पक्षद्वयवचनेऽशौचपदमेतत्परम् । यत्त्वनारा मृताहरविदितेऽप्येकादश्यां श्राद्धविधानं तत् "दैवे पितृव्यं श्राद्धे तु यद्यौचं जायते यदि । तदौचे व्यतीते तु तेषां श्राद्धं विधीयते । शुचीभूतेन दातव्यं या तिथिः प्रतिपद्यते । सा तिथिस्तस्य कर्त्तव्या नत्वन्या वै कदाचन" इति तद्वचनविरोधात् अशौचान्तदिने मलमासादिरूपविघ्नान्तरेण तत्करणे । अतएव श्राद्धविवेके उपाटवाद्यशौचाभ्यामपि पतितमेकोद्दिष्टमेकादश्यामशौचान्ते च मलमासे न कर्त्तव्यं किन्तु मलमासाद्याप्रलयैकादश्यामेवेत्युक्तम्" ।

प्रेति पु० प्रकर्षेण इतिर्गमनं देहेऽस्य । १ऊर्द्धे यजु० १५।६ वेददी० । प्र+इ–भावे क्तिन् । २मरणे स्त्री अ० १।२२।४भा०

प्रेतीयति त्रि० प्राप्तगमने अ० ६।१।८

प्रेत्य अव्य० प्र+इ–ल्यप् । १लोकान्तरे अमरः "प्रेत्य संज्ञा नास्ति" श्रुतिः । २मृत्वेत्यर्थे प्रकर्षेण देहत्यागेन जन्मदेहे गत्वेत्यर्थे च । प्रेत्यजातिः प्रेत्यभावः ।

प्रेत्यजाति स्त्री प्रेत्य मृत्वा जातिर्जन्म । मृत्वा जन्मनि ।

प्रेत्यभाव पु० प्रेत्य मृत्वा भावः । मरणोत्तरं पुनर्जन्मनि । "पुनरुत्पत्तिः प्रेत्यभावः" गौ०सू० ।।१।१८ "उत्पन्नस्य कर्म्मनिकाये मृत्वा या पुनरुत्पत्तिः स प्रेत्यभावः । उत्पन्नस्य सम्बद्धस्य सम्बन्धस्तु देहेन्द्रियमनोबुद्धिवेदनाभिः पुनरुत्पत्तिः पुनर्देहादिभिः सम्बन्धः पुनरित्यभावाभिधानम् यत्र क्वचित् प्रायश्चित्तकाये कर्त्तव्यतः पूर्वोपात्तान् देहादीन् जहाति तद् प्रैति यत् ततोऽन्यत्र देहादीनन्यानुपादत्ते तद्भवति प्रेत्यभावो भूत्वा पुनर्जन्म सोऽयं जन्ममरणप्रबन्धाभ्यासोऽनादिरपवर्गान्तः प्रेत्यभावो वेदितव्य इति" वात्स्या० । प्रवाहरूपेणानादिसम्बन्धः संसारः प्रेत्यभावः यथोक्तं कणा० सू० उप०ह० "दृष्टादृष्टपूर्विका धर्माधर्मप्रवृत्तिः" "तत्संयोगो विभागः" सू० "इदानीं धर्माधर्मयोः प्रयोजनं प्रेत्यभावश्च । ताभ्यां धर्माधर्माभ्यां संयोगोजन्म अपूर्वाभिः शरीरेन्द्रियवेदनाभिः सम्बन्धः संयोग इत्युच्यते विभागस्तु शरीरमनोविभागो मरणम् तथा चायं जन्ममरणप्रबन्धः संसारः प्रेत्यभावापरनामा धर्माधर्माभ्यामित्यर्थः अस्यैव च प्रेत्यभावस्याजरञ्जरीभाव इति वैदिकी संज्ञा" । "जातस्य च ध्रुवोमृत्युर्ध्रुवं जन्म मृतस्य च" गीतायां च जन्ममरणप्रवाहस्य ध्रुवत्वमुक्तम् ।

प्रेत्वन् पु० प्र+इ–क्वनिप् । १इन्द्रे २वाते मेदि० ।

प्रेमन् पु०न०प्रियस्य भाव इमनिच् आदेशः एकाचकत्वात् न टिलोपः । १सौहार्दे २स्नेहे ३हर्षे मेदि०(यायौ ९न्द्रे) शब्दसोमोक्तिः प्रामाणिकी । "उद्भावबन्धनं यूनोः स प्रेमा परिकीर्त्तितः" उज्ज्वलमणौ ४भावबन्धभेदे पु०

प्रेमपातन न० प्रेम्णा स्नेहेन पातनं यस्य । १नेत्रजले २तदुपलक्षिते शोचने शब्दच० ।

प्रेमबन्ध पु० ६त० । गाढानुरागे ।

प्रेमभक्ति स्त्री प्रेम्णा भक्तिः । श्रीकृष्णे प्रेम्णा स्नेहेन भक्तौ तल्लक्षणं नारदपञ्चरात्रे उक्तं यथा "अनन्यममता विष्णौ ममता प्रेमसंयुता । भक्तिरित्युच्यते भीष्मप्रह्लादोद्धवनारदैरिति" । प्रेमभक्तेश्च माहात्म्यं भक्तेर्माहात्म्यतः परम् । सिद्धमेव यतो भक्तेः फलं प्रेमैव निश्चितम्" । तच्चिह्नानि भाग०उक्त० उक्तानि यथा "निशम्य कर्माणि गुणानतुल्यान् वीर्याणि लीलातनुभिः कृतानि । यदातिहर्षोत्पुलकाश्रुगद्गदं प्रोत्कण्ठ उद्गायति नृत्यते च । यदा यदभ्यर्च इव क्वचिद्धसति क्रन्दते ध्यायति वन्दते जनः । उद्गः वदन् वक्ति हरे ! जगत्पते ! नारायणेत्यात्ममतिर्गतत्रपः । तदा पुमान् मुक्तसमस्तबन्धनस्तद्भावभावानुभयाकृताकृतिः । निर्दग्धबीजानुशयो महीयसा भक्तिप्रयोगेण समेत्यधोक्षजम्" ।

प्रेमिन् त्रि० प्रेमास्त्यस्य व्रीह्या० इनि टिलोपः । प्रेमयुते

प्रेयस् त्रि० अतिशयेन प्रियः प्रिय+ईयसुन् आदेशः एकाचकत्वात् न टिलोपः । प्रियतमे स्त्रियां ङीप् "प्रेयस्यपि प्रोच्यते" प्रबोधच० । २पत्यौ पु० १मात्रोर्वां स्त्री हेम० ।

प्रेरक त्रि॰ प्र+ईर–ण्वुल्। प्रयोजके प्रवर्त्तयितरि कर्त्तरि व्यापारसाधके।

प्रेरण न॰ प्र+ईर–णिच्–ल्युट्। प्रेषणे निजस्य भृत्यादेः कार्य्यादौ नियोगे। णिच्–युच्। प्रेरणाप्यत्र स्त्री।

प्रेत्वन् पु॰ प्र+ईर–क्वनिप् डुट् च। १सागरे २नद्यां स्त्री ङीप् वनोर च। प्रेर्वरी उज्ज्वलट॰।

प्रेष गतौ भ्वा॰पर॰ सक॰ सेट्। प्रेषति अप्रेषीत्। अदित् चाङि न वृद्धः। अपिप्रेषत् त।

प्रे(प्रै)ष पु॰ प्र+इष–घञ् डुद्वृद्धिः ऐष–वा घञ् गुणः। १प्रेषणे २पीडने च जटा॰।

प्रेषण न॰ प्र+इष–ल्युट्। प्रेरणे नियोगे। णिच्–युच्। प्रेषणाऽप्यत्र स्त्री। प्रेषणेन जीवति वेतना॰ ठक्। प्रैषणिक तदुपजीविनि त्रि॰। प्रेषणं नित्यमर्हति छेदा॰ ठक्। प्रैषणिक नित्यप्रेषणार्हे त्रि॰।

प्रेष्ठ त्रि॰ अतिशयेन प्रियः प्रिय+इष्ठन् प्रादेशः एकाच्कत्वात् न टिलोपः। १प्रियतमे अमरः। स्त्रियां टाप्। सा च २प्रियतमायां २जङ्घायाञ्च शब्दच॰।

प्रे(प्रै)ष्य त्रि॰प्र+इष–कर्म्मणि यत् डुद्वृद्धिः ऐष–वा यत् गुणः। १प्रेरणीये नियोज्ये २दासे अमरः। भावे यत्। ३प्रेरणे न॰ तत्करोति ञ–ट। प्रेष्यकर नियोगकारके "अन्तः पुरेष्यकराद्यैः" भा॰टी॰ २१अ॰।

प्रेहिकटा स्त्री प्रेहि कट रक्षुच्यते यस्यां क्रियायाम् मयू॰ स॰। कटसम्बोधनक प्रगमनार्थक्रियानियोगे।

प्रेहिकर्दमा स्त्री प्रेहिकर्दम रक्षुच्यते यस्यां क्रियायाम् मयू॰स॰। कर्दमसम्बोधनकप्रगमननियोगे। एवं प्रेहिहिलीला प्रेहिबाधिला एतावपि मध्यौ मयू॰ समा॰। हितयबाधिलसम्बोधनकप्रगमननियोगक्रिययोः। [पृष्ठे

प्रेय न॰ प्रियस्य भावः पृथ्वा॰ दृनिघाऽभावे यण्। प्रियत्वे

प्रेयव्रत त्रि॰ प्रियव्रतस्येदम् अण्। प्रियव्रतसम्बन्धिनि वैवस्वतमनोः पुत्रभेदे अपत्ये त्र दृञ् प्रैयव्रति तत्रार्थे पु॰।

प्रैष पु॰ प्र+इष घञ् वा परद्रूपाभावः। १क्षेपे २मर्दने ३उन्नाहे ४प्रेरणे च मेदि॰।

प्रोक्त न॰ प्र+वच–क्तोक्ते कर्म्मणि, तच्छब्दविषयायां सख्यै वा कर्म्मणि क्त। १कथिते यं प्रति किञ्चित् वस्तु कथ्यते तस्मिन् २यच्चेत्युक्तकर्म्मणि पदार्थे च।

प्रोक्षण न॰ प्र+उक्ष–भावे ल्युट्। १यज्ञार्थं पशुहनने अमरः। २वधे ३सेचने च मेदि॰। ४उक्तानुरूपेण जलादेः सेचने अस्मच्छब्दे २१२पृ॰ दृश्यम्। प्रोक्षतेऽनया करणे ल्युट् ङीप्। ५प्रोक्षणसाधनेषु अपसु। स्त्री "अमङ्गुरे प्रोक्षणीर्निधाय" काला॰ श्रौ॰ २।१४॰ "वाभिरद्भिर्हविषः पुरोडाशानाञ्च प्रोक्षणं क्रतं ताः प्रोक्षणाः" कर्कः। उपचारात् ७तदाधारपात्रेऽपि स्त्री।

प्रोक्षित त्रि॰ प्र+उक्ष–कर्म्मणि क्त। १सिक्ते २निरुक्ते मेदि॰ यज्ञार्थं संस्कृते ३पश्वादौ च "भक्षयेत् प्रोक्षितं मांसम्" इति स्मृतिः "आरण्याः सर्वदैवत्याः प्रोक्षिताः सर्वतो मृगाः। अगस्त्येन पुरा राजन्! मृगया येन पूज्यते" ति॰त॰।

प्रोज्जासन न॰ प्र+उद्+जस–णिच्–ल्युट्। मारणे हेमच॰

प्रोञ्छन न॰ प्र+उञ्छ–ल्युट्। मार्जने (पोँछा)।

प्रोज्झित त्रि॰ प्र+उज्झ–कर्म्मणि क्त। प्रकर्षेण त्यक्ते "धर्मः प्रोज्झितकैतवोऽत्र" भाग॰१।१।२ श्लो॰ "तत्र प्रयत्नेन योजामिसन्धिरपि निरासितः" श्रीधरः।

प्रो(प्रौ)ढ त्रि॰ प्र+वह–क्त वा डुद्वृद्धिः। १दक्षे अमरः २प्रगल्भे हेमच॰ ३निपुणे राजनि॰। ४प्रकर्षेण ऊढे च। स्त्रियां टाप्। सा च ५नायिकाभेदे नायिकाशब्दे ४०४२ पृ॰ दृश्यम्। "त्रिंशद्वर्षोद्भवं यस्तु उद्यानग्रहणक्षमं प्रौढावस्था यथा"या षोडशात् भवेद्वर्षा तरुणी त्रिंशता भता। पञ्चषड्यावता प्रौढा भवेद्वृद्धा ततःपरम्"। अस्या वस्त्रालङ्कारार्थं यथा "अलङ्कारादिभिर्हीना तरुणी रतियोगतः। प्रौढतादादिभिः प्रौढा दृढा च दृढताडनात्"। तस्या रमणे दोषो यथा "बाला तु प्राणदा प्रोक्ता तरुणी प्राणहारिणी। प्रौढा करोति हृदयं दृढा मरणदा भवेत्" रतिम॰। अत्र त्रिंशद्वर्षयुक्ते ६मन्वे "षोडशार्धो युवा प्रौढस्त्रिंशद्विर्षमतः" तन्त्रसा॰। "अर्थवद् ग्रहणेनार्थकस्येति" परिभाषया ऊढेः पृथग्ग्रहणाद्वा क्त यति न डुद्वृद्धिः किन्तु यथाश्रुत एव प्रोढवान् इत्येव।

प्रो(प्रौ)ढपाद त्रि॰प्रौढः पादो यस्य। आसनारोपितपादादिके "आसनाद्दृढपादस्तु जानुनोर्जङ्घयोरधः। कृतावकुञ्चितो यस्तु प्रौढ़पादः स उच्यते। स्नानमाचमनं होमं भोजनं देवतार्चनम्। प्रौढ़पादो न कुर्वीत स्वाध्यायं पितृतर्पणम्" इति छन्दोगप॰। "अनेकवाक्ये दाक्षिण्ये भूमिग्रामे दृष्टकाव्ये संकीर्णीभूता" इति बोधायनवचनात्तथाविधे काद्दृढ़पादोऽपि न कुर्यात्" श्रा॰त॰।

प्रो(प्रौ)ढि स्त्री प्र+वह–क्तिन् वा डुद्वृद्धिः। १सामर्थ्ये २सामर्थ्यहेतुके क्रियासु योग्यताध्यवसाये २दक्षोक्तौ च प्रौढिवादः।

प्रोष्ट पु॰ प्र+वृष्ट–गतौ क्त पृषो॰। पतद्ग्रहे शारा॰।

प्रोत वि॰ प्र+वे–क्त तो ङ्त्व सम्प्रसारणम्। १प्रकर्षेण स्यूते २ग्रथिते वस्त्रे न॰ जटा॰। भावे क्त। ३स्त्रीत्वे न॰।

प्रोतोत्सादन न॰ प्रोतं सद् उत्सादयति उत्+सादि-ल्यु। १वस्त्रकुक्षिमे शस्त्रे च त्रिका॰।

प्रोत्फल्ल पु॰ प्रकर्षेण उत्फलति प्र+उद्–फल–अच्। विं-फलाङ्कुराकारपुष्पवति द्रुमभेदे शब्दमाला।

प्रोत्फुल्ल त्रि॰ प्र+उत्+फुल्ल–विकाशे अच्। विकसिते।

प्रोत्साहन न॰ प्रकर्षेण उत्साहनम्। प्रहर्तव्ये कर्त्तव्ये कर्मणि १प्रकर्षेण यत्नसम्पादने सा॰द॰उक्ते २नाट्याङ्गभे-दभेदे। प्रोत्साहनञ्च दत्यादिना तान्युदिश्य "प्रोत्सा-हनं स्यादुत्साहगिरा कर्मणि योजनम्" इति लक्षि-तम्। यथा "कातरान्निकरालेयं स्त्रीति किं विचिनित् ससि। तज्जगच्चित्तयं त्रातुं तात! ताडय ताडकाम्"।

प्रोथ परिपूर्णतायाम् सामर्थ्ये च भ्वा॰उभ॰अक॰सेट्। प्रो-थति ते अप्रोथीत् अप्रोथिष्ट पुप्रोथ थे। ऋदित् चङि न हस्वः। अपुप्रोथत् त।

प्रोथ पु॰न॰ प्रु+थक्। १प्रस्थिते "दन्तान्तरदलान्तञ्च प्रियं प्रोथमनुव्रजेत्"। २अश्वनासिकायाम् अमरः। ३कच्छां पु॰ मेदि॰ ४भाटके पु॰ त्रिका॰। ५स्त्रीगर्भे पु॰ विश्वः ६गर्त्ते ७ओष्ठे ८स्किग्देशे ९अश्वस्कन्धे च संज्ञिप्रसारः १॰पथिके त्रि॰ ११ग्रथिते त्रि॰ त्रिका॰ १२स्थापिते त्रि॰ त्रि॰कौ॰।

प्रोथथ पु॰ प्रोथ–बा॰ थथ। तृणशब्दे ऋ॰ १॰।८४।६भा॰।

प्रोष पु॰ प्रुष–दाहे भावे घञ्। सन्तापे राजनि॰।

प्रोषक पु॰ देशभेदे भा॰ भी॰ ६अ॰।

प्रोषित त्रि॰ प्र+वस–क्त ट्। प्रवासं गते विदेशं गते। "आर्त्ताऽऽर्त्ता सदिना क्षुद्रे प्रोषिते मलिना क्षया" कामीक्ष॰ पतिव्रतालक्षणम्।

प्रोषितभर्तृका स्त्री प्रोषितः भर्त्ता यस्याः कप्। यस्याः पतिः विदेशं गतस्तस्यां स्त्रियाम् "नानाकार्य्यवशाद् यस्यादूरदेशं गतः पतिः। सा मनोभवदुःखार्त्ता भवेत् प्रोषितभर्तृका" सा॰द॰।

प्रो(प्रौ)ढ पु॰प्रकृष्ट ओढांऽस्य वा ढक्। (पुँटि) मत्स्यभेदे राजवल्लभः। स्त्रियां ङीप्। २देशभेदे भा॰भी॰ ६अ॰। ३वयसि च पुंस्त्री॰ वि॰कौ॰। प्रौढपदशब्दे ऽदृश्यम्।

प्रो(प्रौ)ढपदा स्त्री प्रो(प्रौ)ढो नौलक्षणेव पदं यस्याः। नक्षत्रविशेषे। तद्युक्ता पौर्णमासी अण् सा यत्र मासे ऽनुरुध्यते वा न ढक्। १चान्द्रभाद्रमासे अमरः। प्रोढ-पदाद् जातः अण् उत्तरपदवृद्धिः। प्रोष्ठपाद तज्जे ३भाद्रयुक्ते। "जे प्रोष्ठपदानाम्" पा॰ उक्तेः भवादौ नोत्तरपदवृद्धिः प्रोष्ठपद इत्येव।

२अश्विन्यादिषु पञ्चविंशनक्षत्रयोः स्त्री ब॰व॰ पूर्वोत्तरभाद्रपदयोः प्रत्येकं द्वित्वेन चतुष्कत्वात् बहुत्वम्। प्रोष्ठपदाभिर्युक्ता पौर्णमासी अण्। प्रौष्ठपदी चान्द्र-भाद्रपौर्णमास्यां स्त्री ङीप् "प्रौष्ठपद्यामतीतायाम्"। प्रेतशब्दे ऽदृश्यम्।

प्रोष्य अव्य॰ प्र+वस–ल्यप्। विदेशं गत्वेत्यर्थे तस्य पापीयसा सह मयू॰ समा॰ प्रोष्यपापीयस्। विदेशं गत्वा पापव-त्तरे वि॰स्त्रियां ङीप्। "राघवः प्रोष्यपापीयान्" भट्टिः

प्रो(प्रौ)ह्य पु॰ प्र+ऊह–क्य वा ढक्। प्रकृष्टवाहके

प्रोह्यकरटा पु॰ प्रोह्य करट इव उच्यते यस्यां क्रियायाम् मयूर॰ समा॰। करटसम्बोधनकप्रकृष्टोहार्थनिदेशक्रि-यायाम्। एवं प्रोह्यकर्टमा इत्यपि तत्र पाठान्तरे कर्द-मसदृशदानकोऽनिदेशक्रियायाम्।

प्रोह्यपदि अव्य॰ प्रोह्यौ पादौ यत्र प्रकरणे बहुव्रीहि॰ स॰दच् समा॰ पद्भावः। प्रकर्षेण हाभ्यां पादाभ्यां प्रकरणे

प्रौढमनोरमा प्रौढानां प्रगल्भानां मनोरमयति रम॰ णिच् अच्। भट्टोजिदीक्षितकृतायाम् सिद्धान्तकौमुदी-व्याख्यायाम्। [२निपुणे च धरणिः।

प्रौण त्रि॰ प्र+वीण्–अपसारणे अच्। १प्रकर्षेण अपसारणे

प्रौष्टिक त्रि॰ प्रोष्ठोऽस्यास्य ठन्। प्रकृष्टोष्ठयुते ततः शिवा॰ अपत्ये अण् प्रौष्टिक तदपत्ये। [भाष्यम्।

प्लक्ष पु॰प्र+क्षै–क रस्य लः। स्रोवामधोऽङ्गभेदे ऋ॰८।२१।१६

प्लच भक्षणे भ्वा॰उभ॰सक॰ सेट्। प्लुचति ते अप्लुचीत् अप्लु-चिष्ट प्लुप्त्व क्त्वे। प्लुचः।

प्लच्च पु॰ प्लुच्यते कीटैः प्लुच–कर्मणि घञ्। (पाकुड़) १वृक्षे अमरः। प्लक्षसमीपस्थानात् २निःसृतायां सरस्वत्यां च भा॰व॰ ८४अ॰। तस्याः प्लक्षप्रस्रवत्वात् जातत्वात् तथात्वम्"प्रभवश्च सरस्वत्याः प्लक्षप्रस्रवणं मतम्" भा॰अ॰ ६॰अ॰। ३प्लक्षद्वीपवर्त्तिनि द्वीपभेदे पु॰

"प्लक्षो जम्बूप्रमाणो द्वीपः स्वादुरसोदधिः परिक्षिप्तो यत्राग्निरुपास्ते सप्तजिह्वः। तस्याधिपतिः प्रियव्रता-त्मज इध्मजिह्वः स्वं द्वीपं सप्त वर्षाणि विभज्य सप्तवर्ष-नामभ्य आत्मजेभ्य आकल्प स्वयमात्मयोगेनोपरराम। शिवं यवसं सुभद्रं शान्तं क्षेममभयमिति वर्षा-णि। तेषु गिरयो नद्यश्च सप्तैवाभिज्ञाताः मणिकूटो

वज्रकूटः शतशृङ्ग इन्द्रसेनो ज्योतिष्मान् सुपर्णो हिरण्यष्ठीवो मेघमाल इति सेतुनेताः। अरुणा नृम्णाऽऽङ्गिरसी सावित्री सुप्रभाता ऋतम्भरा सत्यम्भरेति महानद्यः। यासां जलोपस्पर्शनविधूतरजस्तमसोहंसपतङ्गोर्ध्वायनसत्याङ्गसंज्ञाश्चत्वारो वर्णाः सहस्रायुषो विबुधोपमसन्दर्शनप्रजननाः स्वर्गद्वारं त्रया विद्यया भगवन्तं त्रयीमयं सूर्यमात्मानं यजन्ते" भाग० ५।२०। "क्षारोदेन यथा द्वीपो जम्बुसंज्ञोऽभिवेष्टितः। संवेष्टयति क्षारसदृशं प्लक्षद्वीपस्तथा स्थितः। जम्बुद्वीपस्य विस्तारः शतयोजनसंस्थितः। स एव द्विगुणो ब्रह्मन् ! प्लक्षद्वीपोऽप्युदाहृतः। सप्त मेधातिथेः पुत्राः प्लक्षद्वीपेश्वरस्य वै। ज्येष्ठः शान्तभयो नाम शैशिरस्तदनन्तरः। सुखोदयनन्दनन्दः शिवः क्षेमक एव च। ध्रुवश्च सप्तमस्तेषां प्लक्षद्वीपेश्वरा इमे। पूर्वं शान्तभयं वर्षं शिशिरं सुखदं तथा। आनन्दञ्च शिवञ्चैव क्षेमकः ध्रुवएव च। मर्यादा कारकास्तेषां तथान्ये वर्षपर्वताः। सप्तैव तेषां नामानि शृणुष्व मुनिसत्तम !। गोमेदश्चैव चन्द्रश्च नारदो दुन्दुभिस्तथा। सोमकः सुमनाः शैलो वैभ्राजश्चैव सप्तमः। वर्षाचलेषु रम्येषु सर्वत्रैतेषु चानघाः। वसन्ति देवगन्धर्वसहिताः सततं प्रजाः। तेषु पुत्राः जनपदाश्चिराञ्च जियते जनः। नाधयो व्याधयो वापि सर्वकालसुखं हि तत्। तेषां नद्यश्च सप्तैव वर्षाख्यान्तु सप्तगाः। नामतस्ताः प्रवक्ष्यामि शृणुताः पापं हरन्ति वाः। अनुतप्ता शिखा चैव विपाशा त्रिदिवा क्रमुः। अमृता सुकृता चैव सप्तैतास्तत्र निम्नगाः। एते शैलास्तथा नद्यः प्रधानाः कथितास्तव। क्षुद्रनद्यस्तथा शैलास्तत्र सन्ति सहस्रशः। ताः पिबन्ति सदा हृष्टा नदीर्जनपदास्तु ते। अपसर्पिणी न तेषां वै न चैवोत्सर्पिणी प्रजा। न तत्रास्ति युगावस्था तेषु स्थानेषु सप्तसु। त्रेतायुगसमः कालः सर्वदैव महामुने !" विष्णुपु०। कल्पभेदात्रामभेदः। तदुत्तरं वनस्य चत्वम् प्लक्षत्वम्। प्लक्षादूरदेशादि त्व तद्धि० ङीप्। प्लक्षीय तत्समीपादौ त्रि०।

प्लक्षजाता स्त्री प्लक्षात् तत्समीपस्थप्रस्रवणात् जाता। सरस्वत्यां नद्यां भा०आ० १७०अ०। [२६अ०।

प्लक्षतीर्थ न०प्लक्षसमीपस्थं तीर्थं शाक०त०। तीर्थभेदे हरिवं०

प्लक्षप्रस्रवण न० प्लक्षस्य समीपस्थं प्रस्रवणम्। सरस्वत्युत्पत्तिस्थाने भा०व० ५०अ०।

प्लक्षराज पु० ६त०। सोमतीर्थस्थिते प्लक्षवृक्षे भा०व०४३अ०

प्लक्षादि पु०फले वण्प्रत्ययनुगनिमित्ते शब्दगणे स च गणः पा० ग० उक्तो यथा "प्लक्ष न्यग्रोध अश्वत्थ रक्षुदोशिपु रूर कक्षत्तु इङ्गतो"।

प्लक्षावतरण न० अवतरत्यस्मात् अव-तॄ-अपादाने ल्युट् प्लक्षः तन्निकटस्थितप्रस्रवणरूपमवतरणम्। सरस्वत्या अवतरणस्थाने प्लक्षप्रस्रवणे भा०व० ८६अ०।

प्लति पु० प्लु-बा० डति। ऋषिभेदे ऋ० १०।८४।१७

प्लव न०प्लु-अच्। १कैवर्त्तीसुतके २गन्धद्रव्ये मेदि०। प्लुत्वा ३गन्तरि त्रि०। भावे अप्। ४प्लवने (भासा) कर्त्तरि करणे वा अप्। ५भेके ६भेलके (भेला) ७मेघे ८अश्वपुच्छे ९वानरे १०जलकाके ११कङ्के १२प्रवणे १३पर्कटीवृक्षे १४कारण्डवपक्षिणि १५गन्धे १६प्रतिगतौ च पु० मेदि०। जातित्वे स्त्रीत्वमपि स्त्रियां ङीप्। १७प्रेरणे १८अश्वतरौ च पु०शब्दरत्ना०। १९जालभेदे हेमच०२०पक्षिणे (पोतो) मत्स्यधारणबन्धभेदे त्रिका०। २१जलकङ्कुटे मिता० २२जलचरपक्षिगणभेदे यथोक्तं भावप्र० "हंससारसकाचाह्वचक्रीक्षवरारिकाः। नान्दीमुखी सकादम्बा बलाकाद्याः प्लवाः स्मृताः। प्लवन्ते सलिले यस्मादेते तस्मात् प्लवाः स्मृताः"। एतेषां मांसगुणाः। "प्लवाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः। वातश्लेष्मप्रदाश्चापि बलशुक्रकराः स्मराः"।

प्लवक त्रि० प्लु-बा० अक। १प्लुतगतिकारके २खड्गधारादौ नर्त्तके त्रिका० ३चण्डाले हला० ४भेके ५प्लक्षे राजनि०

प्लवग पु० प्लवन् सन् गच्छति गम-ड नि०। १वानरे २भेके ३सूर्य्यसारथौ मेदि० ४प्लवसंज्ञखगे शब्दर०। ५शिरीषवृक्षे राजनि०। [भेकानां गतौ स्त्री।

प्लवगति पु० प्लवेन गतिरस्य। १भेके शब्दच०। ६त०। प्लवानां

प्लवङ्ग पु० प्लवन् सन् गच्छति गम-ड खच् मुम् नि०। १वानरे २खगे शब्दच०। ३प्लक्षवृक्षे राजनि०। [३वानरे अमरः।

प्लवङ्गम पु० प्लवन् सन् गच्छति गम-खच् मुम् नि०। १भेके।

प्लवन त्रि० प्लु-ल्यु। १निम्ने प्रवणे क्रमनिम्नतां गन्तरि "प्रागुदक् प्लवनां भूमिं कारयेत् यत्नतो नरः" ति०त० मत्स्यपु०। भावे ल्युट्। जलोपरि गतौ न० (भासा)।

प्लविक त्रि० प्लवेन तरति ठन्। प्लवेन तारिणि।

प्लाक्ष न० प्लक्षस्य समूहः, तस्य विकारस्तस्य फलं वा अण् न लुप्। १प्लक्षवृक्षफले २तद्विकारे ३तत्समुदाये च।

प्लायोगि पु० प्रयोगनाम्नः राज्ञः पुत्रः इञ् वेदे रक्ष ञः। प्रयोगनाम्नः राज्ञः पुत्रे ऋ० ८।१।२२

प्लावन न० प्लु–णिच्–ल्युट् । (उद्धान) द्रवद्रव्यस्य समन्ताद्गतौ "तापनं दहनैलादेः प्लावनं गोरसस्य च । तन्मात्रखण्डनं कुर्यात् कठिनं तु पयोदधि" गु०त० । २निमज्जनस्नादने २बहुतरजलसंयोजने च । करणे ल्युट् ङीप् । ४भूतानां धारणाभेदे स्त्री "स्तम्भनी प्लावनी चैव शोषणी भामनी तथा । क्षोचनी च भवन्त्येताः भूतानां पञ्च धारणाः" कामीख० ४४अ० । [भावः १२२६ ।

प्लावित त्रि० प्लु–णिच्–क्त । जलादिना समन्तात् व्याप्ते

प्लाशि स्त्री प्रकर्षेणाश्नाति भुङ्क्तेऽनया प्र+अश–करणे ६ वेदे रक्षुः । शिरमूलस्नायुभेदे यजु० २१।७

प्लाशुक पु० प्रकर्षेण आशु आवति भवति कै–क वेदे रक्षुः । प्रकर्षेणाशु पच्यमाने व्रीहौ "प्लाशुकानां व्रीहीणां सविता वै देवानां प्रसविता सवितृप्रसूत एव एतत् प्लाशुकानां व्रीहीणां क्षिप्रे मा प्रसुवानिति" शत० ब्रा० ५।२।१।२ "प्लाशुनां श्रीवैं गार्हपतं यावत् क्षुद्रं तदेनमग्निरेव गार्हपतिर्गार्हपतमभिपरिणयत्येव एवा प्लाशुनां क्षिप्रे मा परिणयानिति" श्रु० "प्लाशुकानाम् प्रकर्षेण आशु शीघ्रं पच्यमानानां पुनः प्ररूढानां व्रीहीणाम्" रेफस्य छान्दसो लत्वनिर्देशः । प्रसुवात् प्रसुवन्तु प्रेरयन्तु । प्लाशुकाः पुनःप्ररूढव्रीहय एतदुक्तम् ततोऽप्यधिककाले पञ्चत्वे पाच्यमानाः यष्टिका व्रीहयःआशवः तेषामाशुत्वं च त्रिचतुरमासनिवर्तपरिपाकव्रीह्यपेक्षम् भा० ।

प्लाशुचित् क० शीघ्रे प्राशु इत्यत्र पाठान्तरं निघण्टुः ।

प्लिह गतौ भ्वा०पर०सक०सेट् । प्लेहति अप्लेहीत् प्लिप्लेह ।

प्लीह(प्लीहन्) पु० प्लि–कनिन् पृषो० वा दीर्घः । (पिला) १वामकुक्षिपार्श्वस्थे मांसखण्डे तद्दुष्टिहेतुके २रोगभेदे च तन्निदानादि भावप्र० उक्तं यथा

"विदाह्यभिष्यन्दिरसस्य जन्तोः प्रदुष्टमल्पैर्मसृक्प्रकोपैः । प्लीहानिवृद्धिं कुरुतः प्रवृद्धौ तं प्लीहसंज्ञं गदमामनन्ति । वामे च पार्श्वे परिवृद्धिमेति विशेषतः सीदति चातुरोऽत्र । मन्दज्वराग्निः कफपित्तलिङ्गैरुपद्रुतः क्षीणबलोऽतिपाण्डुः" । विदाहि कुलत्थमाषसर्षपशाकादि । अभिषन्दि माहिषं दध्यादि । कफपित्तलिङ्गैरुपद्रुत इत्यर्थः । प्रदुष्टमल्पैर्मसृक्प्रकोपैरिति संप्राप्तिः असृजः पित्तस्य च समानधर्मत्वात् । रक्तजमाह "क्षामो भ्रमो विदाहश्च वैवर्ण्यं गात्रगौरवम् । सीदो रक्तोदरत्वञ्च प्लेवं रक्तजलक्षणम्" । पैत्तिकस्य लक्षणमाह "ज्वरः सपिपासश्च सदाहो मोहसंयुतः । पीतगात्रो विशेषेण प्लीहा पैत्तिक उच्यते" । श्लैष्मिकलक्षणमाह "प्लीहा मन्दज्वरास्यूनः कठिनो गौरवान्वितः । अरोचकेन संयुक्तः प्लीहा कफज उच्यते" । वातिकमाह "निस्तुदानद्धकोष्ठः स्यात्प्लीहोदावर्त्तपीडितः । वेदनाभिः परीतश्च प्लीहा वातिक उच्यते" । तमसाध्यमाह "दोषत्रितयरूपोऽन्यः प्लीहाऽसाध्यो भवत्यपि" भावप्र० । तत्रैवान्यत्र तत्स्थानसङ्गं यथा "अथ शरीरावयवविशेषस्य यकृत्प्लीहसदृक्षमाह"अधो दक्षिणतश्चापि हृदयादुपजायतः स्थितिः । तत्तु रक्तकफस्य स्थानं शोणितजं मतम्"

प्ली गतौ क्र्या० पर० सक० अनिट् । प्लीनाति अप्लैषीत् । अयं धातुः कविकल्पद्रुमे न दृश्यते धातुपाठे पाठान्तरेऽस्ति । [कृष्णवर्णे इत्यभेदे शब्दच० ।

प्लीहघ्न पु० प्लीहानं हन्ति हन–क । (रोहा) दाडिमवृक्षे

प्लीहशत्रु पु० ६त० । प्लीहघ्नवृक्षे अमरः ।

प्लीहा स्त्री प्लिह–क पृषो० दीर्घः । प्लीहरोगे भरतः ।

प्लीहारि पु० ६स० । अश्वत्थवृक्षे शब्दच० ।

प्लीहोदर न० उदररोगभेदे उदरशब्दे ११४६ पृ० दृश्यम् ।

प्लु गतौ च भ्वा०आत्म०सक० अनिट् । प्लुते अप्लोष्ट प्लुवे । अयं त्रिमात्रतयोच्चारणे च प्लुतशब्दे सि०कौ० प्लुवते इति निर्देशात् । गतौ निघण्टुः ।

प्लुक्षि पु० प्लुष–दाहे क्विप् । १वह्नौ उज्ज्वलद० । २वृक्षे २अट्टदाहे संक्षिप्तसारः ।

प्लुत न० प्लु–भावे क्त । १अश्वगतिभेदे अमरः । २तिर्य्यग्गतौ ३खण्डेन गतौ त्रिमात्रकालेनोच्चार्ये वर्णे पु० "एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते । त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्द्धमात्रकम्" प्रबोधकारिका । अत्र ह्रस्वदीर्घाणामिवाकारभेदाभावेन तदुत्तरवर्त्तित्वमेव तथात्वसूचनं न तु लेखनेऽप्याकारविशेषोऽस्ति । प्लुतत्वविधायकानि पा०सूत्राणि सङ्क्षिप्तानि सोदाहरणान्यत्र प्रदर्श्यन्ते "वाक्यस्य प्लुत उदात्तः" पा० इत्यधिकृत्य "प्रत्यभिवादेऽशूद्रे" पा० "अशूद्रविषये प्रत्यभिवादे यद्वाक्यं तस्य टेः प्लुतः स्यात् । अभिवादये देवदत्तोऽहम् । भो आयुष्मानेधि देवदत्त ३ । स्त्रियाञ्च अभिवादये गार्ग्यहं भो आयुष्मानेधि गार्गि ३ । नामगोत्रं वा यत्र प्रत्यभिवादवाक्यान्ते प्रयुज्यते तत्रैव प्लुत इष्यते नेह आयुष्मानेधि भोः । राजन्यविशामिति वाच्यम् । आयुष्मानेधि भोः । आयुष्मानेधीन्द्रवर्मन्३ आयुष्मानेधीन्द्रपालित३ ।

सि॰कौ॰ "दूराद्धूते च" पा॰ । 'दूरात् सम्बोधने यदाव्यन्तस्य टेः प्लुतः स्यात् । सक्तून् पिब देवदत्त३ !' "हे हे प्रयोगे हैहयोः" पा॰ । एतयोः प्रयोगे दूराद्धूते यदाव्यन्तस्य हैहयोरेव प्लुतः स्यात् । हैहे राम ! राम ! हैहे "गुरोरनोऽनन्त्यस्याप्येकैकस्य प्राचाम्" पा॰ दूराद्धूते यदाव्यन्तस्य अन्त्यस्यानन्त्यस्यापि गुरोर्वा प्लुतः स्यात् । देवदत्त । देवदत्त । देवदत्त३ । गुरोः किम् । वकारात् परस्य अकारस्य मा भूत् । अन्ततः किम् । क्रमशः एकैकग्रहणं पर्यायार्थम् । इह प्राचामिति योगो विभज्यते तेन सर्वः प्लुतो विकल्प्यते "ऋत्यवृदुपस्थिते" पा॰। उपस्थितोऽनार्षं इतिशब्दस्तस्मिन् परे प्लुतोऽप्लुतवद्भवति । ऋप्लुतकार्यं यथादिकुरुते । कुरु३ इति । कुरुतेति । वत् किम् ऋप्लुत इत्युक्ते प्लुत एव निषिध्येत तथा च प्रश्नाख्याये प्रकृतिभावे प्लुतस्य श्रवणं स्यात्। अग्नी३ इति। "इ३ याज्ञवल्क्येषु" पा॰इ३ प्लुतोऽचि परेऽप्लुतवद्वा स्यात् । चिनुहीति चिनु हि३ इति । चिनु हि३ इदं चिनुहीदम् । उभयत्र विभाषेयम् "ओमभ्यादाने" पा॰ ओंशब्दस्य प्लुतः स्यात् आरम्भे । ओ३म् अग्निमीळे पुरोहितम् । अभ्यादाने किम् ओमित्येकाक्षरम् "वे यज्ञकर्मणि" पा॰ वे३ यजामहे । यज्ञेति किम् वे यजामहै३ "प्रश्नान्ताः" पा॰ यज्ञकर्मणि टेरोमित्यादेशः स्यात् । अपां रेतांसि जिन्वतो३म् । टेः किम् कुरून् अनयत मा भूत् ।"याज्ञान्ताः" पा॰ वे याज्ञान्ता मन्त्राक्षेषामन्त्यस्य टेः प्लुतो यज्ञकर्मणि । जिह्वामग्ने ! चकृषे हव्यवाहम्। अन्तः किम् । याज्ञानामृचां वाक्यसदायरूपाणां प्रतिवाक्यं टेर्न स्यात् । सर्वान्त्य चेष्यते "ब्रूहिप्रेष्यश्रौषड्वौषडावाहनाभाहे:" पा॰ एषामादेः प्लुतो यज्ञकर्मणि । अग्नयेऽनुब्रूहि३ । अग्नये गोमयानि प्रेष्य३ । अस्तु श्रौ३षट् । सोमस्याग्ने ब्रूहि वौ३षट् । अग्निमा३वह "अग्नीत् प्रेषणे परस्य च" पा॰ अग्नीधः प्रेषणे आदेर्यः प्लुतस्तस्मात् परस्य च । ओ३ आवह नेह अग्नीदग्नीत् विधत्ते । बर्हिस्तृणोहि३ । "विभाषा पृष्टप्रतिवचने हेः" पा॰प्लुतः । अकार्षीः कटम् अकार्षं हि३ । अकार्षं हि । पृष्टेति किम् कटं करिष्यसि हि३ । हेः किम् करोमि ननु "निगृह्यानुयोगे च" पा॰ अत्र यदाव्यन्तस्य टेः प्लुतो वा । अद्यामावास्येत्येवंरूपं वृक्त्वा क्षमतात् प्रच्याव्य एवमनुयुज्यते । "आचेडितमन्त्रणे" पा॰ दक्षो दक्षो३ घातयिष्यामि त्वाम्। आचेडितग्रहणं किमुच्चोपलक्षणम् । चोर३ चोर । "अङ्गयुक्तालिङाकाङ्क्षम्" पा॰ अङ्गेत्यनेन युक्तालिङन्तं प्लुतं भवति । अङ्ग कुरु३ इदानीं त्वाक्षमि जानम् ! । तिङ किम्? अङ्ग देवदत्त! मिथ्या वदसि३। आकाङ्क्षं किम् अङ्ग पच । नेतदपरमाकाङ्क्षति । अर्थमन एवेदं । अङ्गाधीष्व भक्तलव दास्यामि । "विचार्यमाणानाम्" पा॰ वाक्यानां टेः प्लुतः । होतव्यं दीक्षितस्य गृहऽइ३ । (वक्ष्यमाणेन एतः स्थाने इः) न होतव्यऽमिति । होतव्यञ्च होतव्यमिति विचार्यते । प्रमाणैर्वस्तुतत्त्वपरीक्षणं विचारः । "पूर्वन्तु भाषायाम्" पा॰ विचार्यमाणानां पूर्वमेव प्लुतः । अहिर्नु३ रज्जुर्नु । प्रयोगापेक्षत्वं पूर्वत्वम् । इह भाष्यग्रहणात् पूर्वयोगस्यानुवृत्तिरिति ज्ञायते । "प्रतिश्रवणे च" पा॰ वाक्यस्य टेः प्लुतोऽभ्युपगमे प्रतिज्ञाने श्रवणाभिमुख्ये च । गां मे देहि भो इलशते ददामि३ । नित्यः शब्दो भवितुमर्हति३ । देवदत्त! किमात्थ३ ।"अनुदात्तं प्रश्नान्ताभिपूजितयोः" पा॰ अनुदात्तः प्लुतः स्यात् । दूराद्धूतादिषु सिद्धस्य प्लुतस्यानुदात्तत्वमात्मनेनं विधीयते । अग्निभूत३ इ । पटा३ उ । अग्निभूते पटो एतयोः प्रश्नान्तेरनुदात्तः प्लुतः । ओमनः खल्वस्मि३माणवक३। "चिदिति चोपमार्थे प्रयुज्यमाने" पा॰ वाक्यस्य टेरनुदात्तः प्लुतः । अग्निचिद्वाया३त् । अग्निचिदिव भायात् उपमार्थे किम् क्वचिदाह । प्रयुज्यमाने किम् अग्निर्माणवको भायात् "उपरिस्विदासीति च" पा॰ टेः प्लुतोऽनुदात्तः स्यात् । उपरिस्विदासीत्३त् । अधःस्विदासीदिति तु विचार्यमाणानामित्युदात्तः प्लुतः । "स्वरितमाम्रेडितेऽसूयासम्मतिकोपकुत्सनेषु" पा॰ स्वरितः प्लुतः स्यादाम्रेडिते परेऽसूयादौ गम्ये । अश्वावाम् अभिरूपक३ अभिरूपक रिक्त्रन आभिरूप्यम् । मन्यतौ । अभिरूपक३ अभिरूपक शोभनोऽसि । कोपे । अविनीतक३ अविनीतक इदानीं त्वाक्षमि जानम् ! । कुत्सने । शाक्तीक३ शाक्तीक रिक्षा ते यक्तिः । "चिन्ताशीःप्रैषेषु तिङाकाङ्क्षम्" पा॰ आकाङ्क्षस्य तिङन्तस्य टेः स्वरितः प्लुतः स्यात् आचारभेदे आशिषि प्रैषेषु गम्यमानेषु । स्वयं ह रथेन यातिः उपाध्यायं पदाति गमयति । प्रार्थनायाम् । पुत्रांश्च शिष्यीष्ट३ धनञ्जय तात । व्यापारणे । कटं कुरु३ यामं मन्त्र । आकाङ्क्षं किम्

दीर्घोऽयुरसि अस्मीदमौत्विहर। "अनन्त्यस्यापि प्रश्नाख्यानयोः" पा० अनन्त्यस्यान्त्यस्यापि पदस्य टेः स्थितः प्लुत एतयोः। प्रश्ने। अगमश्चः पूर्वांश्च आमाश्च। सर्वपदानामवम्। आख्याने अगमश्चम् पूर्वांश्च आमाश्च। "प्लुतावैचइदुतौ" पा० यत्र दूराद्धूतादिषु प्लुतो विहितस्तत्रैव ऐचः प्लुतप्रसङ्गे तदवयवाविदुतौ प्लवेते। ऐ ३ तिकायन !। औ ३ पगव। चतुर्मात्रावत्र ऐचौ सम्मतौ। "एचोऽप्रगृह्यादूराद्धूते पूर्वस्यादुत्तरस्येदुतौ" पा० अप्रगृह्यस्य एचोऽदूराद्धूते प्लुतविषये पूर्वस्यार्द्धस्याकारः प्लुतः स्यादुत्तरस्य त्वर्द्धस्य इदुतौ स्तः। प्रश्नाख्याभिपूजितविचार्यमाणप्रत्यभिवादयाख्यानेष्वेव। प्रश्ने। अगमश्चः पूर्वांश्च आमाश्च अग्निभूतश्च इ। अभिपूजिते। भद्रं करोषि पटश्च। विचार्यमाणे। श्रोतव्यन्दीक्षितस्य गृहाश्च इ। प्रत्यभिवादे। आयुष्मानेधि अग्निभूतश्च इ। आख्याने। सोमैर्विधेमाग्नयश्च इ। परिगणनं किम् विष्णुभूतेश्च धातविष्यामि त्वाम्। अदूराद्धूत इति न वक्तव्यम्। पदान्तग्रहणन्तु कर्त्तव्यम्। इह मा भूत् भद्रं करोषि गोश्चरिति। अप्रगृह्यस्य किम् श्रोभने माभेः। "आमन्त्रिते छन्दसि प्लुतविकारोऽयं वक्तव्यः। अग्नश्च इ पत्नीव"श्चि० कौ०

प्लुति स्त्री प्लु–भावे क्तिन्। प्लवने उत्प्लुत्यगमने। प्लुतिश्च शशादीनामिव गतिः (ऋक्सामे) सप्तम्यात् जसादेर्गतिश्च। त्रिमात्रतयोच्चारणे च।

प्लुष दाहे भ्वा०पर०सक० सेट्। प्लोषति अप्लोषीत्। प्लुष्टोष अदित् क्त्वा वेट्। प्लुषित्वा प्लुष्ट्वा।

प्लुष दाहे दिवा०पर०सक० सेट्। प्लुष्यति अदित् अप्लुषत्।

प्लुष सेके पूर्त्तौ च सक० स्वेदे अक० क्र्या० पर० सेट्। प्लुष्णाति अप्लोषीत् उप्लोष।

प्लुषि पु० प्लुष–बा० कि। वकतल्यतण्डयुक्ते शकभेदे यजु० २४।२६ वेददीपः। २दाहके सर्पभेदे अ० १।६।१।भा०। ३अल्पपरिमाणपुत्तिकादेहे शत०ब्रा० १४।४।१।२४ भाष्ये दृश्यम्। [अदङ्गम्"भाग०

प्लुष्ट त्रि० प्लुष–क्त। दग्धे अमरः। "द्रोणस्त्वविप्लुष्टमिदं

प्लुस दाहे विभागे च दिवा०पर०सक० सेट्। प्लुष्यति दरित् अप्लुषत् अप्लोषीत् उप्लोष। [तैत्ति० ७।५।८।५

प्लेङ्ख पु० प्र+इङ्ख–घञ् वेदे रस्य लः। प्रेङ्खणे प्रकटकरणे

प्लेव सेवने भ्वा०आत्म०सक०सेट्। प्लेवते अप्लेविष्ट। पिप्लेवे अदित् च ङ न हुझः।

प्लोत न० प्र+वे–क्त संप्र०रस्य लः। शस्तोक्ते यज्ञकर्मोपकरणभेदे "अतोऽन्यतमं कर्म चिकीर्षता वैद्येन पूर्वमेवोपकल्पयितव्यानि तद्यथा वस्त्रयज्ञसारान्निग्रलाका शङ्कुजलौकालावुजाम्बवोष्ठपिचुप्लोतसूत्रपत्रपट्टमधुघृतवसापयस्तैलतर्पणकषायालेपनकल्कव्यजनशीतोष्णादकघटादीनि"। [दाहे न०

प्लोष पु०प्लुष–भावे घञ्। दाहे अमरः। भावे ल्युट्। प्लोषण

प्सा भक्षणे अदा०पर०सक० अनिट्। प्सातति अप्सासीत्। प्सत्सौ। गतौ निघण्टुः।

प्सा स्त्री प्सा–भावे अङ्। भक्षणे त्रिका०।

प्सात त्रि० प्सा–कर्मणि क्त। भक्षिते अमरः।

प्सान न० प्सा–भावे ल्युट्। भोजने हेमच०।

प्सु पु० प्सा–बा कु। रूपे निघण्टुः।

प्सुर त्रि० प्सु+बा० अस्त्यर्थे र। रूपवति ऋ०१०।२६।२भाष्ये

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यसंकलिते वाचस्पत्ये
पकारादिशब्दार्थसङ्कलनम्।

पकारादिषु शब्देषु केचित् शब्दा न सङ्कलिता केषाञ्चिच्चार्थभेदा भ्रमाद्वोक्तास्ते
इतःपरं परिशिष्टे प्रदर्श्यन्ते।

परिशिष्टम्

४२२५पृ०पद्मशब्दपरिशिष्टम्

"षट्काश्च भवेत् पद्मं तत्र दत्तं तथाऽक्षयम्" हेमा० श्रा० आदित्यपु० १५ षट्काश्राद्धे ।

४२२५पृ०पद्मकशब्दपरिशिष्टम्

"यदा विष्टिर्व्यतीपातो भानुवारस्तथैव च । पद्मकं नाम तत्प्रोक्तमयनाच्च चतुर्गुणम्" हेमा०श्रा० यद्धोक्ते श्राद्धकालभेदे न० ।

४२१४पृ० पारावतशब्दस्य परिशिष्टम्

सर्वार्थचिन्तामणौ क्षेत्रक्षोराष्टकाष्टादिग्रहवर्गमध्ये केषु केषु चित् षट्सु शुभांशेषु । प्रसङ्गात् क्षेत्रादिग्रहवर्गनिरूपणेन तत्र द्विग्रहादिवर्गे एकैकस्य योगे नव विशेषसंज्ञाः तत्फलञ्च तत्रोक्तं प्रदर्श्यते तत्र क्षेत्रशब्दे क्षेत्रपतय उक्ताः इष्टाष्टादयोधीश्वराः सर्वार्थ०उक्ता यथा "राशिं त्रिघ्नाक्षत्र्यं इष्टाष्टमाङ्कसंदोग्ध्र इत्येव२ शुभाधिनाथाः८ । युग्मीन्दुसूर्यौ भवने रवीन्दू नाथौ त्रयुग्मे भवनस्य चार्के" । चरेऽर्कजानामधिपास्तदंशा राशौ स्थिरे तद्वयमेश्वराद्याः । द्विर्द्वेऽम्बे तत्सुतराशिनाथाद्दन्ति ग्राह्यार्थविदो महान्तः । तत् क्षेत्रपा द्वादशभागनाथा लग्नस्य वर्गाधिपतिस्तदोशात् । त्रिशांशपा भौमयमेज्य सौम्यशुक्रा भवन्त्योजगृहे समे तु । विलोमतः पन्नगराक्षसप्रेताः क्रमादुचरनेकशास्त्रैः । सप्तांशपास्त्रोजगृहे तदीशाद्युग्मे गृहे सप्तमराशिपात्तु । दशांशपानामधिपास्तदीशादोजे समे तद्दशमेश्वराद्याः । खोजे १५ क्षजानामधिपास्तदीशाद्यत्तर्क्षो (ऋंश) विष्णु३५ हरो दिनेश५० । युग्मे क्रमाद्व्यत्ययमेव राशौ षष्ट्यंश६०कानामधिपास्त्रयुग्मे । घोरांशको१ राक्षस२ देवभागौ३ कुबेर४ रक्षोगण५ किन्नरांशाः६ । भट७ कुलघ्नोट८ गरलाहिमंत्री९० मावांशकः११ प्रेतपुरीशभागः१२ । अपां पति१३र्देवगणेशभागः१४ कालः१५ शिभागा१६वस्तांशु१७ चन्द्रौ१८ । सहंशकः१९ कोमल२० पद्मभागौ२१ च क्ष्मोश२२ वागीश२३ दिगम्बरांशाः२४ । देवार्हभागौ२५ २६। कलिनाथभागः२७ पितॄरश्वांशः२८ कमलाकरांशः २९ । क्रमेण मन्दात्मज३० सूनु३१ काल३२ दावाग्निघोराऽ३३मव३५ कष्टकाद्य३६ । सुधाप्लुतांशुः३८ परिपूर्णचन्द्र३९ विप्रप्रदग्धो४० कलिनाथ४१ सख्यौ४२ । वंशक्षयोत्पातकुलक्षयरूपाः ४३।४४।४५ सौम्य४६च सहंश ४७ सुधीतप्लांशू ४८। दंष्ट्रा४९ कराले५०न्दुसुख५१ प्रतीपाः ५२ कालाग्नि५३दण्डायुध५४निमेषांशाः५५ । शुभाशुभांशा५६।५७ धृतिगीतलांशः५८ सुधापयोधिध्वसमथेन्दुरेखाः५९।६० श्रेयाः क्रमाद्व्यत्ययमेव युग्मे शुभान्वितांशो यदि शोभनाग्निः । क्रूराः षडग्नि(३०)गा सर्वे नाशयन्ति स्वचारिणः । परिपूर्णबलैर्युक्ता क्षोद्मूलविशोषगाः । खर्जेन्द्रोत्तमांशस्था मित्रक्षेत्रविशोषगाः । सप्तवर्गोद्भवाः खांशाः खाधिमित्रांशकान्विताः । वर्गांस्तु ये दश प्रोक्ताः पूर्वाचार्यैर्महर्षिभिः । भवन्ति वर्गसंयोगे पारिजातादिसंज्ञकाः१० दुःस्थारिनीचमूढस्था मन्दा बलविवर्जिताः । मरुत्वत्स्यगाश्चेत्तु पारिजातादिनायकाः" । अयं पक्षो नादरणीयः । सख्यपक्षस्तु स्वर्गांशे स्वनवांशके स्वभवन इति याज्ञाः।"उत्तमं तु त्रिवर्गेक्यं चतुर्वर्गन्तु गोपुरम्२। वर्गपञ्चकसंयोगे सिंहासनमिहोच्यते । वर्गेदयं पारिजातं४यस्यां पारावतांशकः५ । सप्तमं देवलोकः६स्यादष्टमं च तथा भवेत् । ऐरावतं तु नवमं फलं तेषां पृथक् पृथक् । दशवर्गस्य संयोगे विद्वद्भिर्विशेषिकांशकान् १० । ऐरावते सार्वभौमः सर्वैश्वर्यसमन्वितः । देवलोके६ महादानकर्त्ता राजा क्षितीश्वरः । पारावते५ मातङ्गिकः सर्वशास्त्रविशारदः । सिंहासने४ भवेद्भूमिपतिः सैन्यैः स्तुतो महान् । गोपुरे२ धनवाक्षित्वं सर्वविद्याविशारदः । उत्तमे१ सकला सम्पत् पारिजाते३ धनान्वितः । खांशे १० यशस्वी मतिमान् सर्वसौख्यसमन्वितः" ।

४२२८पृ० पिण्डशब्दपरिशिष्टम् ।

तत्र संहतत्व एकीकृतः यथा "अणूनां तु संपिण्ड्य कालं तत्सन्धिभिः सह" सू०सि० व्याख्याने "संपिण्ड्य एकीकृत्य रङ्गनाथः । संपिण्डं मिश्रितं मिलितं कृत्वेत्यर्थः । तथा च षट्त्रिंशन्नयने प्रथममवदानां छन्दमेकत्र कार्यमिति बोध्यम् । केवलशब्दे २२४१पृ० प्रथमतोरमादर्शिते "वर्गवर्गप्रमाणञ्च सकलं ताडितं मिथः । पिण्डसंज्ञा भवेत् तत्र यथाभागैस्तु कल्पना" इत्युक्ते २१पदार्थे च ।

४२२४पृ० पित्तपक्षशब्दपरिशिष्टम्

गौणाश्विनकृष्णपक्षे ४प्रेतपक्षे तच्छब्दे द्रष्टव्यम् ।

४२२६ पृ०स्यपित्तशब्दपरिशिष्टम् ।

सुश्रुतोक्ते योनिरोगभेदे स्त्री स्त्रीणां ५योनिरोगा विंशतिविधा उदावर्त्तशब्दे ११६२ पृ० सुश्रुतोक्ता दर्शिताः । तेषां लक्षणान्यत्रोच्यन्ते "सफेनिलसुदावर्त्ता रजःकृच्छ्रेण सृजति । वन्ध्यां नष्टार्त्तवां विद्याद्विद्यात्तां२निलवेदनाम् । परिप्लुतायां४ भवति पात्यधर्मं स्त्रजा सृजम् । वातलाय५

कर्कशत्वका शूलनिस्तोदपीडिता। चतस्रष्वपि चाद्यासु भवन्त्यनिलवेदनाः। सदाहं प्रकिरत्यक्षं यस्याः सा लोहितक्षरा६। सवातसृक्षरेद्दीप्तं वामिनी ७रजसा युतम्। प्रसंसिनीऽस्रन्दते तु लोभिता दुःप्रसूत्र वा। स्वितं स्वितं स्रवति गर्भं पुत्रघ्नी८ रक्तसंक्षयात्। अत्यर्थं पित्तसा९० योनिर्दाहपाकज्वरान्विता। चतस्रष्वपि चाद्यासु पित्तलिङ्गोच्छ्रयो भवेत्। अत्यानन्दा११ न सन्तोषं याम्यधर्मैष गच्छति। कर्कन्धूर्या१२ कर्कशा योनौ क्षेम्यासृग्भ्यान्तु जायते। मैथुनाचरणात् पूर्वा १३ पुरुषादतिरिच्यते। बहुशत्वातिचरणादन्या१४ बीजं न विन्दति। क्षेमला१५ पिच्छिला योनिः कफशुक्लातिशीतला। चतस्रष्वपि चाद्यासु क्षेम्यलिङ्गोच्छ्रितिर्भवेत्। अनार्तवत्वना षण्ढी १६ खरस्पर्शा च मैथुने। अतिकायगृहीतायाश्चरणाः फलिनी१७ भवेत्। विद्वता भङ्गतो१८योनिः क्षुचीवक्त्रा१९ ऽतिसंवृता। सर्वलिङ्गसमत्वाना सर्वदोषप्रकोपना २०। चतस्रष्वपि चाद्यासु सर्वलिङ्गोच्छ्रितिर्भवेत्"।

४३१९ पृ० पिष्टपचनशब्दात् परत्र परिशिष्टम्

पिष्टपशु पु० पिष्टमयः पशुः। यज्ञे पशुस्थाने पिष्टमये पशौ तथा हि पिष्टपशुमीमांसायाम् अनिष्टसाधनस्यापि हिंसाया वैदिकमन्त्रद्वारा संस्कारविशेषे सति इष्टसाधनत्वं यथा विषादेरनिष्टसाधनस्यापि वैद्योक्तसंस्कारभेदे कृते इष्टसाधनत्वम्। एवञ्च वैद्योक्तविषसंस्कारस्य किञ्चिदङ्गवैगुण्ये यथा नेष्टसाधनत्वमेवं वैदिकप्रयोगे मन्त्रादीनां यथोक्तस्वरादिवैगुण्येऽपि न हिंसाया इष्टसाधनत्वम्। विशेषतः सांख्यमते हिंसाया इष्टसाधनत्वेऽपि अनिष्टान्तरसाधनत्वस्वरीकृतम्। तथा च वेदोद्धारणादौ सामर्थ्यहीनानामिदानीन्तनानां तुतरां पशुयागादौ पिष्टपशुनैव यागो विधेयः न तु साक्षात् पशुनेति व्यवस्थापितम्। मनुनापि "कुर्य्यात् इतपशुं सङ्गे कुर्य्यात् पिष्टपशुं तथा इत्यनेन कामनाङ्गपशौ पिष्टपशोरेव विधानस्मरणम्। एतच्चायानुसारेणैव भा० आश्व० ६।अ० "आत्मप्रमवे तस्मिन् गृहीतेषु पशुष्वथ। मरुत्तयो मरुद्राज! बभूवुः क्रुद्धयान्विताः। ततो दीनान् पशून् दृष्ट्वा क्रुद्धयन्ते तपोधनाः। ऊचुः यज्ञं समागम्य नायं यज्ञविधिः शुभः। अपरिज्ञानमेतत्ते मरुत्तं धर्मविच्युतः। न हि यज्ञे पशुगणा विधिदृष्टाः पुरन्दर!। धर्मोपघातस्तस्यैष समारम्भश्च प्रभो!। नायं धर्मकृतो यज्ञो न हिंसा धर्म उच्यते। आगमेनैव ते यज्ञं कुर्वन्तु यदि वेच्छसि। विधिदृष्टेन यज्ञेन धर्मज्ञो सुमहान् भवेत्। यज्ञ बीजैः सहस्राच्च! त्रिवर्षपरमोषितैः। एष धर्मो महान् यज्ञ! महागुणफलोदयः"।

४३९२ पृष्ठस्यपुरुषज्ञानशब्दात् परत्र परिशिष्टम्।

पुरुषानुग न० चक्रदत्तोक्ते चूर्णभेदे "शम्बूकीमोचरसो समङ्गापद्मकेशरान्। वाट्यालोकातिविषासुस्तं बिल्वं लोध्रं सगैरिकम्। कट्फलं मरिचं गुडूचीं वहीकां रक्तचन्दनम्। कङ्कुष्ठवल्लकालान्धातकीमधुकार्जुनम्। पृथक्षोडशतुल्यानि चूर्णानि कारयेत्। तानि चौद्रेण संयुक्त्य पाययेत् तण्डुलाम्बुना। अङ्गगुदरातिसारेषु रक्तं वक्षोपवेशयते। दोषागन्तुजता ये च बालानां तांश्च नाशयेत्। योनिदोषं रजोदोषं क्षेतं नीलं सपीतकम्। स्त्रीणां भावाश्रयं यच्च तत् प्रसह्य निवर्त्तयेत्। चूर्णं पुरुषानुगं नाम क्षितमात्रेयमूजितम्"।

४४२७पृ० प्रकृतिशब्दस्य परिशिष्टम्

राज्ञां पुरोहितादिषु२१ दण्डस्य सुमन्त्रादिषु२२ अष्टासु च यथोक्तं शुक्रनीतिशास्त्रपरिशिष्टे

"पुरोधाश्च प्रतिनिधिः प्रधानः सचिवस्तथा। मन्त्री च प्राड्विवाकश्च पण्डितश्च सुमन्त्रकः। अमात्यो दूत इत्येता राज्ञः प्रकृतयो दश। दशमांशाधिका पूर्वा दूतान्ता क्रमशः स्मृताः। अष्टप्रकृतिभिर्युक्तो नृपः कैश्चित् स्मृतः सदा। सुमन्त्रः पण्डितो मन्त्री प्रधानः सचिवस्तथा। अमात्यः प्राड्विवाकश्च तथा प्रतिनिधिः स्मृतः। एताश्चतिसमाख्यातो राज्ञः प्रकृतयः सदा"। एतेषां लक्षणानि तत्तच्छब्दोक्तानि दृश्यानि विस्तरभयान्नोक्तानि।

४४२१ पृष्ठस्यप्रगल्भशब्दात् पूर्वत्र परिशिष्टम्

प्रगदिन् त्रि० प्रगदति वा० णिनि। प्रकर्षेण कथनशीले स्त्रियां ङीप् ततः प्रगद्या० चतुरर्थ्यां अत्र। प्रागाद्य तदूरदेशादौ त्रि०।

प्रगद्यादि पु० चतुरर्थ्यां अत्रप्रत्ययनिमित्ते शब्दगणे स च गणः पा०ग० उक्तो यथा "प्रगदिन् प्रगदिन् प्रगदिन् वचिल खचिल गदिल चूडार मडार मन्दार कोविदार"

४४९६पृष्ठस्यप्रसाधनशब्दस्य परिशिष्टम्

प्रसाधनीकरणप्रकारश्च युक्तिकल्पतरावुक्तो यथा

"प्रसाधनी दिङ्नवनागसप्तसंख्याभिरुक्ताकुलिभिः क्रमेण। चतुर्विधानां पृथिवीपतीनां सम्पत्तिसौभाग्ययशःसहत्विदा। काष्ठजा धातुजा चैव शृङ्गजा च यथाक्रमम्। जाङ्गलानूपसामान्यदेशजानां मही भुजाम्।

अलदक्खवइत्तेवः काव्यादौ विनियोगः। कनकं रजतं ताम्रं पित्तलं सीसकं तथा। लौहं सर्वञ्च सर्वार्द्धमादित्यादिदयाभुवाम्। राज्ञामेवोपयुज्यते कालकीर्त्तिप्रसाधनी। खगानां मक्षिकाणाञ्च मक्षकजाता प्रसाधनी। गजदन्तसमद्भूता राज्ञामेवोपयुज्यते। अत्रापि रत्नविन्यासो ध्रुवयामरदक्खवत्"।

४५०४ पृष्ठस्थप्राकृतशब्दस्य परिशिष्टम्

प्राकृतभाषा च अष्टादशभाषामध्ये भाषाभेदः। तासां लक्षणं सा०द० उक्तं यथा "दुरूहाक्षरनीचानां संस्कृता स्यात् कृतात्मनाम्। शौरसेनी२ प्रयोक्तव्या तादृशीनाञ्च योषिताम्। तासामेव तु गाथासु मक्षाराष्ट्रीं३ प्रयोजयेत्। अत्योक्ता मागधी४ भाषा राजान्तःपुरचारिणाम्। चेटानां राजपुत्राणां श्रेष्ठिनां चार्द्धमागधी५। प्राच्या६ विदूषकादीनां धूर्त्तानां स्यादवन्तिका७। योधनागरिकादीनां दाक्षिणात्याऽपि दीव्यताम्। शकाराणां शकादीनां शाकारीं८ तत्प्रयोजयेत्। बाह्लीकभाषा१० दिव्यानां द्राविड़ी११ द्रविडादिषु। आभीरेषु तथाऽऽभीरी१२ चाण्डाली१३ पुक्कसादिषु। आभीरी शाबरी१४ चापि काष्ठपत्रोपजीविषु। तथैवाङ्गारकारादौ पैशाची१५ स्यात् पिशाचवाक्। चेटीनामन्यनीचानामपि स्यात् शौरसेनिका१६। बालानां खल्लकानाञ्च नीचयन्त्रविचारिणाम्। उन्मत्तानामातुराणां सैव स्यात् संस्कृता क्वचित्। ऐश्वर्य्येण प्रमत्तस्य दारिद्र्योपस्कृतस्य च। भिक्षुबन्धकरादीनां प्राकृतां१७ तत्प्रयोजयेत्। संस्कृतं तत्प्रयोक्तव्यं क्षिप्तनीचोत्तमासु च। देवीमन्त्रिसुतावेश्याप्यपि कैश्चित्तथोदितम्। यद्देयं नीचपात्रन्तु तद्देयं तस्य भाषितम्१८। काव्यं तथोत्तमादीनां कार्य्यं भाषाविपर्य्ययः। योषिन्नपुंसकावेश्या कितवाप्सरसां तथा। वैदग्ध्यार्थं प्रदातव्यं संस्कृतं चान्तरान्तरा"। तत्तद्भाषालक्षणानि भाषार्णवे द्रष्टव्यानि।

४५२२ पृष्ठस्थ प्रातर्शब्दस्य परिशिष्टम्

"प्रकरोऽर्थं संयुक्तः प्रातरित्यभिधीयते" नि०शि० गार्ग्यौक्ते द्वित्राद्यङ्के २सार्द्धप्रहरात्मके काले।

फ

फकारः पञ्चमवर्गस्य द्वितीयवर्णः अर्द्धवर्णेषु द्वाविंशतितमः। अस्योच्चारणस्य स्थानमोष्ठौ तस्योच्चारणे आभ्यन्तरः प्रयत्नः जिह्वायाश्च ओष्ठाभ्यां सह स्पर्शः अतएवास्य स्पर्शवर्णता। बाह्याः प्रयत्नाः विवारश्वासाघोषाः महाप्राणश्च। अस्मिन् परे विसर्गस्य स्थाने उपाध्मानीयः। तन्त्रे वर्णाभिधाने अस्य वाचकशब्दा उक्ता यथा "फः खड्गी दुर्गिणी धूम्रा वामपार्श्वो जनार्दनः। जया पादशिखा रौद्री फेत्कारः शाखिनी प्रियः। दक्षा विरूपाक्षः कण्ठः कुञ्जिनी प्रियपावकौ। प्रलयाग्निर्नीलपादोऽधरः पशुपतिः प्रभौ। फुत्कारो यामिनी भल्लापवनो मोहवर्द्धनः। निष्कलशमहङ्कारः प्रयागो यामघो फलम्"। तदीयदेवताध्यानं यथा "प्रलयाम्बुदवर्णाभां खड्गखेटधरां चतुर्भुजाम्। भक्ताभयप्रदां नित्यां नानालङ्कारभूषिताम्। एवं ध्यात्वा फकारन्तु तन्त्रन्तं दशधा जपेत्" वर्णोद्धारतन्त्रम्। अस्य ध्येयस्वरूपं यथा "फकारं शृणु चार्वङ्गि! रक्तविद्युल्लतोपमम्। चतुर्वर्गप्रदं वर्णं पञ्चदेवमयं सदा। पञ्चप्राणमयं वर्णं सदा त्रिगुणसंयुतम्। आत्मादितत्त्वसंयुक्तं त्रिबिन्दुसहितं सदा" कामधेनुतन्त्रम्। मातृकान्यासेऽस्य वामपार्श्वे न्यासः। काव्यादावस्य प्रथमविन्यासफलं फकारशब्दे उक्तं द्रष्टव्यम्।

फ न० फल्ग-ड। १कुत्सिते २निष्फलवाक्ये ३फुत्कारे च मेदि० ४भल्लातपाते ५वर्द्धके ६जूम्भाविस्तारे ७फलभागे च पु० विश्वः।

फकार पु० फ+स्वरूपे कार। फस्वरूपे वर्णे।

फक्क अवदाचारे भ्वा०पर०अक० सेट्। फक्कति अफक्कीत् पफक्क।

फक्किका स्त्री फक्क-धातुनिर्देशे भावे ण्वुल्-टाप् अतइत्वम्। १अवज्ञाप्रकारे (फाँकि) २तत्त्वनिर्णयार्थं पूर्वपक्षे च "फक्किकाप्रितमाल्यफक्किका" इति नैषधम्।

फगुन पु० गोत्रप्रवर्त्तकभेदे प्रवराध्यायः।

फञ्जिका स्त्री भञ्जति रोगान् भञ्ज-भर्त्सने ण्वुल् पृषो०। (वामनहाटि) १वृक्षे अमरः। २देवताडे ३दूराह्वभावां शब्दरत्ना०।

फञ्जिपत्रिका स्त्री भञ्जि पृषो० फञ्जि रोगमर्दि-पत्रं यस्याः। आखुकर्ण्यां (छन्दुरकानि) रत्नमा०।

फञ्जि(ञ्जी) स्त्री भञ्ज–इन् पृषो० वा ङीप्। भाग्यांम् (वामनहाटि) राजनि०।

फट पुंस्त्री० स्फुट–विकाशे अच् पृषो०। १सर्पाणां फणायाम् अमरः स्त्रियां टाप्। सा च २दले मेदि० ३कितवे पु० हेमच०।

फट् अव्य० स्फुट–क्विप् पृषो०। १योगे तन्त्रोक्ते २अस्त्रनामके मन्त्रभेदे च। ३अनुकरणशब्दे तस्य नम आदिवद् द्रव्यविशेषस्य त्यागार्थताऽपि। शालिकुम्भक्षालने, अर्घ्यपात्रक्षालने, अर्घ्यजलेन पूजोपकरणाभ्युक्षणे, अन्तरीक्षगविघ्नोत्सारणाय विकिरक्षेपणे, गन्धपुष्पाद्यां करशोधने, अघमर्षणे पापपुरुषताडने, कराङ्गन्यासे, नैवेद्यप्रोक्षणे, होमाग्नेः क्रव्यादांशत्यागे, होमाग्न्याद्याहुने, तदग्निप्रोक्षणादौ च द्रव्यादौषु कर्मसु अस्य प्रयोगः नानातन्त्रेषु दर्शितः। [ख्यातायां झिल्लिकायां शब्दच०।

फडिङ्गा स्त्री फडिति स्फुरते स्फुर–अच्। (फड़िङ)

फण अनादरेनोत्पत्तौ भ्वा०पर० सक० सेट् फणति अफाणीत्-अफणीत् पफाण। फणा० फेणतुः पफणतुः।

फण गतौ भ्वा०पर०सक० सेट्। फणति अफाणीत् अफणीत् मितु वा घटादि०। णिचि फाणयति फणयति फणादि०।

फण पुंस्त्री० फण–अच्। दर्व्याकारे सङ्घाचविकाशयति सर्पभक्षके अमरः।

फण(णा)कर पु०फणः(णा) कर इव यस्य। सर्पे शब्दरत्ना०।

फणादि न० "फणाञ्च सप्तानाम्" पा० क्ति क्तिच् क्तिन् च परे एत्वाभ्यासलोपनिमित्ते धातुसप्तके तस्य धातुपाठे उक्तं यथा "फण राज भ्राज भ्राश भ्राष भ्रम क्षन" वि०स्त्री० भ्वादौ दृश्यः।

फण(णा)धर पुंस्त्री० फणं(णां) धरति धृ–अच्। सर्पे शब्दरत्ना०। स्त्रियां जातित्वात् ङीप्। फण(णा)भृदादयोऽप्यत्र।

फणाभर पुंस्त्री० फणां बिभर्त्ति भृ–अच्। सर्पे शब्दार्था० स्त्रियां जातित्वात् ङीप्। [उक्तः।

फणिकार पु० देशभेदे स च देशः उ०सं० १४अ० दक्षिणस्था-

फणिकेसर पु० फणिनामकः केसरः। नागकेसरे राजनि०।

फणिखेल पुंस्त्री० फणिना खेलति खेल–अच्। (भारद्र) अगे शिखा० स्त्रियां ङीप्।

फणिचक्र न० फणाकारं चक्रम्। विवाहादौ शुभाशुभसूचकनाडीकूटज्ञापनार्थे चक्रभेदे उपयमशब्दे १२९३ पृ० दृश्यम्।

फणिजा स्त्री फणीव जायते जन–ड। (फणिमनसा) हर्षे नैषधटी०। [शतावर्य्याम् २मङ्गलसमङ्गायाञ्च राजनि०।

फणिजिह्वा स्त्री फणिजिह्वा आकारेऽस्त्यस्य अच्। १लता

फणिज्झक पु० फणिनमुज्झति त्यजति उज्झ् पृषो०। १तुलसीभेदे २जन्तीरसामान्ये च अमरः।

फणितल्पग पु० फणिरूपे तल्पे गच्छति तिष्ठति गम–ड। शेषशायिनि विष्णौ शब्दार्थकल्प०।

फणिन् पु० फणा अस्त्यस्य इनि। दर्वीकरे सर्पभेदे अमरः। अहिशब्दे ५८१ पृ० तद्भेदाः दृश्याः। २सर्पिणीनामकौषधौ स्त्री राजनि०। ३शेषावतारे पतञ्जलमुनौ पु० स च पाणिनीयभाष्यप्रकारकः योगसूत्रकारश्च तयोर्भेद ऐक्यं वा

फणिप्रिय पु० फणिनां प्राणप्रदत्वात् प्रियः। वायौ शब्दर० सर्पाणां वायुभक्षकत्वेन वायोस्तत्प्रियत्वम्।

फणिफेन न०फणिनां फेन इव। (आफिङ)अहिफेने रत्नमा०

फणिभुज् पु०फणिनं भुङ्क्ते भुज–क्विप्। पन्नगाशने गरुडे

फणिमुख न०फणिन इव मुखमस्य। स्नेहबाधनोपयोगिनि स्नुक्तिकाक्षेपणार्थे यज्ञभेदे दशकर्मा०।

फणिवल्ली स्त्री फणिसदृशी दीर्घा, फणिलोकस्था वा वल्ली। नागवल्लाम् (पानलता) फणिलतादयोऽप्यत्र हेमच०।

फणिहन्त्री स्त्री फणिनं हन्ति हन–हच् ङीप्। गन्धनाकुल्याम् राजनि०। [हुरहलभावां राजनि०।

फणिहृत् स्त्री फणिनं हरति अपसारयति हृ–क्विप्। चु-

फणीन्द्र पु० इत०। सर्पेश्वरे अनन्ते २वासुकौ च।

फणीश्वर पु० इत०। १अनन्ते २वासुकौ शब्दरत्ना०।

फणीश्वरचक्र न० नक्षत्रभेदे गणित्वा सप्तद्वीपस्य शुभाशुभसूचके चक्रभेदे चक्रशब्दे २८२० दृश्यम्।

फण्ड पु० फण-गतौ ड तस्य नेत्वम्। जठरे उणादिकोषः।

फत्कारिन् पु० फदित्यव्यक्तं करोति कृ–णिनि। खगपाले शब्दच०।

फर न० फल+अच् लस्य रः। फलके भरतः।

फरुवक न० पूगपाले हारा०। [अफरी फर्फरायते उद्भटः।

फर्फर त्रि० स्फुर–अच् पृषो०। अत्यन्तचले "गच्छत्फलसमालेख

फर्फरीक न० स्फुट–ईकन् "फर्फरीकादयश्च" उणा० नि०। १नवपल्लवे उज्ज्वल०। २चपेटे पु० ३क्षुद्रत्वे न० मेदि० ४पादुकायां स्त्री संज्ञिप्रसादः।

फर्व गतौ भ्वा०पर०सक० सेट्। फर्वति अफर्वीत् पफर्व। "प्रफर्व्यं च पौंस्नी"यजु० १२।७। वेददी०"फर्वतिः पूरणार्थः" ऋ० १०।१०६।२ भा० दृश्यम्।

फलेर त्रि० फल–पूरणे अरन्। पूरके ऋ० १०।१०६।२भा०।

फल भेदने भ्वा०पर०सक सेट्। फलति अफालीत् अफाल फलितुः आदित् आरभ्य भावे क्त वा इट्। फुल्लतः फलितः। फुल्लतम् फलितम् अन्यत्र फलितः इत्येव। ओत् वर्त्तमाने क्त। फलितः।

फल निष्पत्तौ भ्वा०पर०अक०सेट्। फलति अफालीत्। अफाल फेलतुः। क्त फलितः।

फल गतौ भ्वा०पर०सक० सेट्। फलति अफालीत्। ज्वला० कर्त्तरि वा ष। फलः फालः। फलयति फालयति।

फल न०फल–अच्। इष्टादीनां भक्षे २काम्ये ३फलके (ढाल) ४कार्य्ये ५उद्देश्ये ६प्रयोजने अमरः ७जातीफले ८त्रिफलायां ९कक्कोले मेदि० १०बाणाग्रे ११आर्त्तवे मुद्गर० १२फाले हेम० १३दाने धर० १४शुक्के च। १५कुटजवृक्षे पु०मुद्गर०। १६धात्वर्थनिष्पाद्ये प्रधानोद्देश्ये प्रयोजने "स्वरितञित आत्मनेपदं कर्त्तृभिप्राये क्रियाफले" पा०। "यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते प्रचादयः। तत् प्रधानं फलं तेषां न शाभादि प्रयोजनम्" हरिः। तेन पाकादिजन्यं भोजनं यागादिजन्यश्च पुण्यमेव फलम्। न चेतनादिलाभरूपं फलं तेन सूदकस्य क्षत्रियादेर्वा न धात्वर्थजन्यफलभागित्वम्। धात्वर्थजन्ये १७संयोगादौ च "फलव्यापारयोर्धात्वर्थयोस्तु तिङः श्रुताः। फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्" हरिः। धात्वर्थशब्दे दृश्यम्। मोक्षे १८प्रमेयभेदे तल्लक्षणञ्च तल्लोक्तं यथा

"आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्" गो० सू०। "प्रवृत्तिदोषजनितोऽर्थः फलम्" गो० सू०। "सुखदुःखसंवेदनं फलम् सुखविपाकं कर्म दुःखविपाकञ्च तत् पुनर्देहेन्द्रियविषयबुद्धिषु सतीषु भवतीति सह देहादिभिः फलमभिप्रेतम् तथा हि प्रवृत्तिदोषजनितोऽर्थः फलमेतत् सर्वं भवति तदेतत् फलमुपात्तमुपात्तं हेयं, त्यक्तं त्यक्तमुपादेयमिति नास्ति हानोपादानयोर्निष्ठा, पर्य्यवसानं वाऽस्ति न खल्वयं फलस्य हानोपादानस्रोतसोच्छेद एव इति" वात्स्या०। "अनिष्टमिष्टं मिश्रञ्च त्रिविधं कर्मणः फलम्। भवत्यागिनां प्रेत्य न तु सन्न्यासिनां क्वचित्" गीता। सन्न्यासादिसंयोगे फलत्यागसमत्वं यथा "तस्तुलोऽग्न्यभिसंयोगाद्यथैव न च पिष्टकम्। फलं त्रितयसंयोगादस्तं भवति तत्त्वतः" रामायणचन्द्रिकाधृतवचनम् १९निष्पन्ने त्रि०।

फलक न० स्वार्थे क। (ढाल) इति ख्याते चर्म्मभये अस्त्रप्रतिघातनिवारके १पदार्थे। २अस्थिखण्डे जटाध० ३नागकेसरे ४काष्ठादिपट्टके च मित्रा०।

फलकच्छद पु० वृक्षभेदे भा०म० १०अ०।

फलकण्टक पु०फले कण्टकं यस्य। कण्टकिफलवृक्षे नैषधट०।

फलकपाणि पु०फलकं पाणौ यस्य। (ढालि) चर्म्मिणि त्रिका०।

फलपुर न० पुरभेदे तस्य नामोदाहृतता।

फलकयन्त्र न० त्रि०मि० उक्ते यन्त्रभेदे यथा

"कर्त्तव्यं चतुरस्रकं शुभफलं खाङ्गाहतैर्भुजैर्विस्तृतं विद्वारादृद्विगुणा१८यतं शुभफलैनाभ्यामध्ये तथा। आधारः खयहङ्गुलादिघटितः कार्य्यो च रेखा ततस्तिर्य्यग्धारादलम्बसूत्रसहगो सा लम्बरेखोच्यते। लम्बं नवत्रिहतैर्भुजैर्विभज्य प्रत्यङ्गुलं तिर्य्यगतः प्रसार्य्य। तत्रापि तत्तावत्सूत्ररेखा जीवाभिधानाः सुधिया विधेयाः। आधारतोऽधः खगुणा३०हुलेषु व्यालम्बयोगे सुधिरं च सूक्ष्मम्। दृष्टप्रमाणा सुधिरे शलाका चेष्याऽभिसंज्ञा खलु सा प्रकल्प्या। षड्भिर्भुजव्यासमतस्तु रज्ज्वा कला सूत्रं परिधौ तदङ्कम्। षष्ट्या घटीनां भगणांश २६० कैश्च भलंशकं चाम्बुपलैश्च दिग्भिः। कृत्वा शरञ्च तनुपट्टिकैका षड्भुजा दीर्घतया तथाङ्का मूलं "यदादौ धातुमयं श्रीपर्णादिदारुमयं वा फलकं चतुरस्रं सूक्ष्मं समं कर्त्तव्यम्। तत्र नवत्रिभुजविस्तारं विगुणा१८विस्तारदैर्घ्यम्। तन्मध्ये दैर्घ्यमध्ये तदाधारः सुधिरः सूक्ष्मजादिः कार्य्यः। आधारे धृतं यन्त्रं यथा लम्बमानं स्यात् तथा धृते फलके आधाराद्यः सूत्रसमलम्बरेखा कार्य्या। सा च लम्बसंज्ञा। तं लम्बं नवतिभागं कृत्वा भागे भागे तिर्य्यग्रेखा दीर्घा कार्य्या। तिर्य्यक्त्वं तु लम्बभवान्मत्स्यात्। सा रेखा ज्यासंज्ञा ज्ञेया। आधारादधश्चिंशदङ्गुलान्तरे वा ज्या तस्याः लम्बश्च लम्बायते सुधिरम्। तत्रेष्टप्रमाणा शलाका चेष्या बाहुसंज्ञा। तस्माद्भ्रात् त्रिंशदङ्गुलेन कर्कटकेन इष्टरेखा कार्य्या। सा षष्टि६० घटिकाभिर्भगणांशकैः खण्डज्यासंख्यैः २६० प्रत्यंशं दशभिर्दशभिः पानीयफलैश्चाङ्का। अथ ताम्रादिमयी वंशजा काष्ठमयी वा पट्टिका षड्भुजाङ्ग० दीर्घतया तैरेव फलशङ्कुभिश्चैवाङ्किता कार्य्या। सा पट्टिकार्धाङ्गुलविस्तृता। एकस्मिन्नग्रे ऽङ्गुलविस्तृता कुठाराकारा कार्य्या। तत्र विस्तारमध्ये छिद्रं कार्य्यम्। अक्षगोतायाः पट्टिकायाः लम्बो-

रिव धृतावा एकं पार्श्वं यथा कम्परेखां न अङ्गति तथा सरलप्रा कार्यो लक्षणः त्रि० शि० व्याख्या प्रमिताक्षरा।

फलकर्कशा स्त्री फलेन कर्कशा कठोरा। कर्मधो० टाप्।

फलकसक्थ त्रि० फलकमिव सक्थि यस्य बहुव्री०। फलकतुल्यसक्थियुक्ते स्त्रियां ङीप्। फलकमिव सक्थि। कर्म० स० टच् समा०। फलकतुल्यसक्थिनि न०।

फलकाम त्रि० फलं कामयते कमि-अच् उप० स०। विहितकर्मणां फलकामनायुक्ते। तस्य निन्दा भग० त० विष्णु धर्मोत्तरे उक्ता यथा "धर्मबाधिजका मूढाः फलकामा नराधमाः। अर्थयन्ति जगद्धात्रं ते कामं नाप्नुवन्त्युत"। "कामात्मता न प्रशस्ता" मनुना "कर्मण्येवाधिकारस्ते मा फलेषु कदाचन" गीतया च।

फलकिन् पु० फलकं तद्व्याकारोऽस्यास्य इनि। (फलुर) १वत्सभेदे २फलकान्विते त्रि० मेदि०। फला अस्त्यर्थे इष्ट इव स्वार्थे क। फलका ततः चतुरर्थां छ। फलकिक। १तद्वत्सभीपादौ त्रि० स्त्रियां ङीप्।

फलकीवन न० वनस्पतीर्थभेदे भा० व० ८२अ०।

फलक्षण पु० फलेन क्षणः। १पानीयासवके शब्दर०। फलं लक्षणमस्य। २लक्षणफलयुक्ते त्रि०।

फलकेशर पु० फले केशरा इवास्य। नारिकेलवृक्षे जटाधरे।

फलकोष पु० फलस्य शुष्कस्य कोष इव। शुष्कावरकवर्मयुते वस्तुकोषे तद्दृष्टिहेतुमाह सुश्रुतः "वातपित्तश्लेष्मोल्बणमेदोमूत्रान्त्रनिमित्ताः षण्ण दृष्टयः। तासां मूत्रान्त्रनिमित्ते द्वे वातबहुले केवलबहुलनिमित्तेतरत्रयतमः खधः प्रकुपितोऽन्यतमो हि दोषः फलकोषवाहिनीरभिप्रपद्य धमनीः फलकोषयोर्द्वि जनयति तां दृष्टिमित्याचक्षते"।

फलकोषक पु० फलं शुष्क एव कोषोऽस्य कप्। शुष्के वस्तुकोषे त्रिका०।

फलग्रहि पु० ग्रह-इन् हृत०। खण्डितकाष्ठफलधरे द्वले भरतः

फलग्राहिन् पु० फलं गृह्णाति ग्रह-णिनि। १द्वले धरणिः ३व्याधां २फलग्राहके त्रि० स्त्रियां ङीप्।

फलघृत न० फलजनकं घृतम् मा० त०। शुक्रादिदूषिकारके चक्रदत्तोक्ते घृतभेदे "अश्विना मधुकं कुष्ठं त्रिफला मधुरा बला। मेदा पयस्या काकोली मूलकैर्वाजसम्मितम्। अजमोदा चरिष्टे द्वे त्रिकण्टं कटुरोहिणी। चत्वार कुडवं द्राक्षाकाकोल्यौ चन्दनद्वयम्। एतेषां कार्षिकैर्भागैर्घृतप्रस्थं विपाचयेत्। अनावरीरसक्षीरं घृताद्देयं चतुर्गुणम्। सर्पिरेतद्वरः पीत्वा नित्यं स्त्रीषु प्रधावते। पुत्रान् जनयते नारी मेधावद्वान् प्रियदर्शनान्। वा वैवास्थिरगर्भा स्यात् या वा जनयते मृतम्। वन्ध्यायुवं वा जनयेत् या च कन्यां प्रसूयते। योनिदोषे रजोदोषे परिस्रावे च शस्यते। प्रजावर्द्धनमायुष्यं सर्वपक्षनिवारणम्। नाम्ना फलघृतं ह्येतत् ऋषिभ्यां परिकीर्त्तितम्। अनुफलघृते मूलं क्षिपन्त्यन्ये चिकित्सकाः। श्रीवल्लैवमथोवा घृतमत्र प्रशस्यते। आरण्यगोमयेनापि वह्निज्वाला प्रदीयते"।

फलचमस पु० १दधिमिश्रितवटत्वक्चूर्णे तदधिकलवणढक्ते २न्यायभेदे च "फलचमसमक्षैभक्षं ददातीति" श्रुत्या क्षत्रियभक्षत्वेन फलचमसविधानात् क्षत्रियभक्षस्य च यज्ञियवृक्षत्वेन तद्वृद्धेः यज्ञेऽपि फलचमसलाभः। फलचमसस्य दधिमिश्रितवटत्वक्चूर्णमिति" भग० त० रघु०।

फलचोरक पु० फलं चोर इव वस्य कप्। चोरनामगन्धद्रव्ये राजनि०। [रूपकाश्चोरकेषु च त्रिषु फलेषु।

फलत्रय न० द्वन्द्व०। १त्रयाणामभयाकोशरीतकीरूपेषु २द्राक्षादिफलत्रिक न० द्वन्द्व०। त्रिफलायाम् गुडूचीविल्वशीमरिचरूपायाम् अमरः। त्रि०।

फलद पु० फलं ददाति दा-क। १वृक्षभाते २फलदातरि

फलपञ्चक न० कर्म० पञ्चफले तच्छब्दे २२१ पृ० दृश्यम्।

फलपाक पु० फलेषु पाको यस्य। १करमर्दवृक्षे भरतः २पानीयासवके शब्दच०। द्वन्द्व०। १फलस्य पाके च।

फलपाकान्त स्त्री फलपाकेनान्तो नाशोऽस्याः। कदलीधान्योषधौ अमरः। [रत्नमा०।

फलपाकिन् पु० फलपाकोऽस्त्यस्य इनि। मदनवृक्षे वृक्षे

फलपुच्छ पु० फलं पुच्छ इवास्य। वरणवृक्षे त्रिका०।

फलपुष्पा स्त्री फलानि पुष्पाणीव यस्याः। पिण्डखर्जूर्यां राजनि०। [तत्पर्याये अमरः।

फलपूर(क) पु० फलेन पूरः पूर्णः। बीजपूरे स्वार्थे क।

फलप्रिया स्त्री फलेन प्रीणाति प्री-क। प्रियङ्गौ राजनि०

फलबन्ध्य पु० फले बन्ध्यः। अवश्यंभिनि फलशून्यवृक्षे हेमच०।

फलभूमि स्त्री फलभोगार्थं कर्मफलभोगार्थं भूमिः। कर्मभूमिव्यतिरिक्ते भूदेशे "भारताद्वैरवतानि विदेहाच्च कुरून् विना। वर्षाणि कर्मभूम्यः स्युर्भोगाच्च फलभूमयः" हेमच०। [भोगे अनुभवे

फलभोग पु० द्वन्द्व०। फलानां कर्मफलानां सुखदुःखादीनां

फलमुखा स्त्री फलेन मुखमस्या श्रेष्ठा। अजमोदायाम् राजनि०

फलमुद्गरिका स्त्री मुद्गं गिरति गृ-इन् कं मुद्गगरि

वस्याः कप्। पिण्डखर्जूर्याम् (पिण्डीखेजुर) शब्दमा०
फलयोग पु०ई०त०। फलसम्बन्धे नाटकाङ्कार्थांशे अवस्था
"वावस्था फलयोगः स्याद् ग्रः सप्तफलागमः सा० द०
घटिते २अवस्थाभेदे च।
फललक्षणा स्त्री फलहेतुका लक्षणा। प्रयोजनहेतुकायां
लक्षणायाम् "अङ्गस्य गूढागूढत्वाद्दृढिमा स्तुः फललक्ष-
णाः" सा०द०।
फलवत् त्रि० फल+अस्त्यर्थे मतुप् मस्य वः। १फलयुते पुरुषे
२तत्साधने यागादौ च "फलवत्सन्निधावफलं तदङ्गमिति
न्यायः। २फलयुते इत्थे पु० अमरः। [न० राजनि०।
फलवर्त्तुल पु०फलं वर्त्तुलं यस्य। १कार्पासवृक्षे। २तत्फले
फलवृक्षक पु० फलप्रधानो वृक्षः संज्ञायां कन्। पनसवृक्षे
राजनि०।
फलशाक न० "पत्रं पुष्पं फलं नालं कन्दं संक्षेदजं तथा।
शाकं षड्विधसंछिन्नं गुरु विद्याद्यथोत्तरम्" भावप्र०उक्ते
षड्विधशाकमध्ये फलरूपशाके तस्य गुणादिकं तदुक्तम्
फलशाडव पु० दाडिमवृक्षे राजनि०।
फलशालिन् त्रि०फलेन शालते शाल-णिनि। फल-
युक्ते स्त्रियां ङीप्। [वदरवृक्षे राजनि०।
फलशैशिर पु० शिशिरं आम्रस्य अण् फलं शैशिरं यस्य।
फलश्रुति स्त्री श्रु-अरप्रत्ययादौ क्तिन् इत्व०। १वैदिककर्मणां फल-
प्रतिपादनार्थमन्त्रे २फलप्रत्यये च "फलश्रुतिरियं नृणां
न श्रेयो रोचनं परम्। श्रेयो विवक्षया प्रोक्तं यथा
भैषज्यरोचनम्"। अपिच "वेदोक्तमेव कुर्वाणो निःश-
ङ्कोऽर्पितमीश्वरे। नैष्कर्म्यां लभते सिद्धिं रोचनार्थां
फलश्रुतिः" भाग०११स्क०अ०त० श्रुतप्रकाशनम्।
फलश्रेष्ठ पु० फलेन श्रेष्ठः प्रशस्तनरः। आम्रवृक्षे शब्दच०।
फलस पु० फल+दृश्या० स। १फलयुक्ते २पनसे भरतः फलस
इति पाठान्तरं तत्रार्थे।
फलस्थापन न० फलयोरौडम्बरफलयोः स्थापनमत्र।
सीमन्तोन्नयनसंस्कारे "फलस्थापनात् मातापितृजं पा-
प्मानमपोहति" हारीतः "फलस्थापनात् फलस्थाप-
नाङ्कुरसीमन्तोन्नयनात्" सं०त० रघु०। तत्र प्रथात् पति-
रवस्थाय युगप्रान्तमौडुम्बरं शलाटु पत्नयवघ्राति" गोभि-
लेन औडुम्बरफलयुगस्थापनस्य विधानात् तथात्वम्।
फलस्नेह पु० फले स्नेहो यस्य। अक्षोटवृक्षे राजनि०।
फलहारिन् त्रि० फलं हरति हृ-णिनि। फलहारके।
फलहारी स्त्री फलानां हारो हरणं यस्यै गौरा० ङीष्।
कालीभेदे तत्पूजादिनञ्च "ज्येष्ठे मासि चमावां वै
मध्यरात्रे महेश्वरि!। पूजयेत् कालिकां देवीं नाना-
द्रव्योपहारकैः। तत्रैवासिपत्रं तु यद्दक्षप्रां निशा-
र्द्धके। पूजयेच्च फलैर्भक्ष्यैः पक्वितो वापि कालिकाम्"
मायातन्त्र १७पटले। [राजनि०। २फलयुक्ते त्रि०
फलाढ्या स्त्री फलेनाढ्या सम्पन्ना ३त०। १आम्रवृक्षायाम्।
फलादन पुंक्ली० फलमदनमस्य। १शुकपक्षिणि हेमच० स्त्रियां
जातित्वात् ङीष्। फलाशन तत्रार्थे त्रिका०। २फल-
भक्षके त्रि० स्त्रियां टाप्।
फलाध्यक्ष पु० फलमध्यक्षमिव यस्य। १राजादने अमरः।
२फलदाता-अर्थे ईश्वरे च। फलमाधीत्यादयोऽपीश्वरे।
फलान्त पु० फलेनान्तोऽस्य। १बंधे शब्दमा०। ३त०। २फल-
काले च।
फलाफलिका स्त्री फलसहितमफलं मा०त०ततस्वार्थे कन् टाप्
कापि अत इत्वम्। फलसहितफलयुतायां स्त्रियाम्।
फलाबन्ध्य पु० फलेनाबन्ध्यः। फलयोग्ये इत्थे हेमच०।
फलाम्ल न० फलमम्लं यस्य। १दधाम्ले २अम्लवेतसे पु०
राजनि०।
फलाम्लपञ्चक न० अम्लपञ्चके तच्छब्दे दृश्यम्।
फलि पु० फल-इन्। (फलुर) वृक्षभेदे रायमु०।
फलिका स्त्री फल+अस्त्यर्थे ठन् टाप्। निष्पाव्याम् राजनि०
फलिग पु० फलिनं गच्छति गम-ड। मेघे त्रिकाण्ड०।
फलित त्रि० फल-निष्पत्तौ क्त फलं जातमस्य तारं० इतच्
वा। १निष्पन्ने २जातफले इत्थे पु० धरणिः। ३ज्योतिषे
न० राजनि०।
फलिन् त्रि० फल+अस्त्यर्थे इनि। १फलयुते स्त्रियां ङीप्
२इत्थे पु०अमरः ३प्रियङ्गौ स्त्री ङीप् अमरः। [अमरः।
फलिन पु०फल+अस्त्यर्थे इनच्। १फलयुक्ते २ताडवृक्षे इत्थे पु०
फली स्त्री फलमस्त्यस्याः अच् गौ० ङीष्। प्रियङ्गुवृक्षे अमरः
फलीकार पु० फल+च्वि-कृ कर्मणि घञ्। फलेच्छायां भाग०
३।८।२६ श्रीधरः। आत्वे घञ्। २विद्यमीकरणे अफलस्य
१फलसम्पादने [वल्लिफलादौ च।
फलीय त्रि०फल+छत्करा०अतुरर्थे छ। १फलयुक्ते २फल-
फलेग्रहि पु० फले फलं (कर्मणि आधारत्वविवक्षा) गृह्णाति
धारयति स्वीकरोति वा इनि अलुक्स०। १योग्यकाले फल-
धारके इत्थे तथात्वं फलग्रीवारिति च। 'फले-
ग्रहीनृ रुंधि वनस्पतीनाम्' भट्टिः। लुचि तु फलग्राहि
तच्छब्दे दृश्यम्। पुंयो० फलेग्राहिरपि शब्दरत्ना०।

फलेन्द्र पु० फलेन इन्द्र ऐश्वर्यान्वितः। राजजम्बूवृक्षे। "फलेन्द्रा कथितानन्दा राजजम्बूमहाफला" भावप्र०।

फलेपुष्पा स्त्री फले फलसदृशे पुष्पमस्याः। द्रोणपुष्पीवृक्षे भावप्र०

फलेरुहा स्त्री फले तन्निमित्तं रोहति रुह-क। पाठलिवृक्षे अमरः।

फलोत्तमा स्त्री फलेन उत्तमा। १द्राक्षाभेदे राजनि०। २त्रिफलायां नैघण्टुप्र०। [हृत०। २फलस्योत्पत्तौ स्त्री।

फलोत्पत्ति पु० फलाय उत्पत्तिरस्य। १वाससृक्षे शब्दच०।

फलेच्छक पु० १यज्ञभेदे भा० स० १०अ०। २फलकामे त्रि०।

फलोदय पु०हृत०।१फलोत्पत्तौ २लाभे ३सर्गे ४वर्षे च शब्दर०

फल्क पु० फल-क नेत्त्वम्। विशोधिताक्षे उज्ज्वलद०।

फल्गु त्रि०फल-उगुक् च। १रम्ये मेदि० २असारे अमरः। ३निरर्थके त्रिका०४मिथ्यावाक्ये शब्दर०५गवातीर्थस्थनद्यां स्त्री। मेदि० (फागु) इति ख्याते धूलिरूपे हुपटार्थे ७वसन्तसमये, जटा०। दक्षाकोड्म्बरिकायाम् अमरः। फल्गुतीर्थमाहात्म्यं यथा "फल्गुतीर्थं व्रजेत् तस्मात् सर्वतीर्थोत्तमोत्तमम्। सन्निधत्ते पितॄणां कर्तृणां श्राद्धतः सदा। ब्रह्मणा प्रार्थितो विष्णुः फल्गुरूपो ह्यभवत् पुरा। दक्षिणाग्निर्हुतं न्यूनं तद्रजः फल्गुतीर्थकम्। तीर्थानि यानि सर्वाणि भुवनेष्वखिलेष्वपि। तानि स्नातं समायान्ति फल्गुतीर्थं हरेः सह। गङ्गापादोदकं विष्णोः फल्गुस्तोयादिगदाधरः। सर्वं हि ह्यरूपेण तस्मात्फल्गुतीर्थकं विदुः। अश्वमेधसहस्राणां सहस्रं यः समाचरेत्। नासौ तत्फलमाप्नोति फल्गुतीर्थं सदाप्नुयात्" वायुपु० गयामा०।

फल्गुदा स्त्री फल्गुनद्यां "तत्र देवे गया नाम पुण्यदेशोऽस्ति भावनः। नदी च फल्गुदा नाम पितॄणां स्वर्गदायिनी" ब्रह्मधर्म पु०। [साधि २अर्जुने च भरतः।

फल्गुन पु० फल्गुचूर्णभेदो नीयतेऽस्मिन् नी-ड। १फाल्गुने

फल्गुनी स्त्री फल्ग-ल्युनन् गुक् च गौरा०ङीष्। १काकोड्म्बरिकायाम् राजनि०। अश्विन्यधिपे एकादशे द्वादशे च २नक्षत्रे च ब०व० भरतः।

फल्गुलुका वायुकोणस्थे देशभेदे ह०सं० १४अ०।

फल्गुवाटिका स्त्री फल्गुनां वाटीव इवार्थे कन्। काकोड्म्बरिकायाम् राजनि०।

फल्गुव्रतालु पु० फल्गुना रम्येण व्रतेन आलयति या-ले-क। स्त्रीनाकभेदे। राजनि०।

फल्गूत्सव पु० फल्गुनिमित्तक उत्सवः। फाल्गुनपौर्णमास्यादिषु कर्त्तव्ये (आबीर)फल्गुद्रव्यकरणे उत्सवे "गोविन्दानुमतीतन्तु यात्राङ्गं तत्प्रकीर्तितम्। फल्गुनस्यं प्रकर्वीत पञ्चाहानि त्रयाहानि वा" दोलयात्रापद्धतिः।

फल्ग्य न० फलाय हितं यत्। पुष्पे शब्दच०।

फल्गुकिन् पु० फल्गक+पृषो० तदाचारोऽस्यास्ति इनि। (अंजुर) मत्स्यभेदे शब्दार्थकल्प०।

फल्गुफल पु० भूर्णवाते जटाधरः।

फा पु० फल-बा० डा। १निष्फलभाषणे शब्दर०। २सत्यापे ३डाके ४पर्वते च विश्वः। [उपधातुभेदे राजनि०।

फाटकी स्त्री स्फुट स्वुल् पृषो० गौरा० ङीष्। (फटकिरी)

फाणि स्त्री स्फाय-नि पृषो०। १गुडविकारे, २खरण्डे (दधिमिश्रितसक्तौ) च उणादिकोषः।

फाणित न० फण-णिच्-क्त। गुडविकारभेदे (फेणी) अमरः "इक्षोः रसस्तु यः किञ्चिद्घनाढ्यो बहुद्रवः। स एवेक्षुविकारेषु ख्यातः फाणितसंज्ञया" भावप्र०। "फाणितं गुर्वभिष्यन्दि दंहणं कफशुक्रकृत्। वातपित्तश्रमहरं मूत्रवस्तिविशोधनम्" तद्गुणास्तत्रोक्ताः।

फाण्ट न०फण-क्त नि०। १अनायासेन क्षते अमरः। "क्षिप्तोष्णतोये स्रुदितः फाण्ट इत्यभिधीयते" इत्यु० २क्वाथभेदे पु०। "क्षुण्णद्रव्यफले सम्यक् जलसृष्टं विनिःक्षिपेत्। पात्रे चतुःपलमितं ततस्तु सुधयेज्जलम्। शीतं चूर्णदृशः फाण्टः भिषग्भिरभिधीयते" वैद्यक०।

फाल न० फलाय शस्त्राय हितम् अण्, फल्यते विदार्यते भूमिरनेन वा घञ्। १स्वनामख्याते लाङ्गलमुखस्थे लौहभेदे अमरः। फालमस्यास्ति अच्। २बलदेवे शब्दार्णवे च पु०। फलस्य विकारः अण्। ४कार्षापणसंज्ञके मेदि०। ५तप्तफालकरणपरीक्षाभेदे न०। फलेषु भवः अण्। ६जम्बीरवृक्षे पु० कृत्यचन्द्र। फालटिव्यप्रकारश्च विश्वत०उक्तो यथा "दृढस्मृतिः "आयसं दारुपत्रघटितं फालमुच्यते। षडङ्गुलं भवेद्दीर्घं चतुरङ्गुलविस्तरम्। अस्मिन्वर्षे ततश्चौरो लिङ्गवा लेढ्यते बलात्। न दग्धक्षुद्विषादन्यथा च स छोयते" चौरोऽत्र गोचौरः "गोचौरश्च प्रदातव्यं तप्तफालावलेहनम्" इति स्मृतेरिति मैथिलाः। अत्रापि लक्षणं दग्धादिमन्त्रानन्तरम्। "आयसं लेलिहानस्य जिह्वयापि समादिशेत्" इति पितामहोक्तेः प्राङ्निबन्धोक्तायोध्याम्यामन्यभिमन्त्रणं कार्यम्। अत्र प्रयोगः लौकिकचत्वारिंशत्पलोन्मितं लौहघटितमदग्धमध्यात्मकाङ्गुलाष्टदीर्घम् तथाविध-

चतुरङ्गुलप्रसारं फालमग्नौ तापयेत्। तत्र प्राङ्-विवाकोधर्मावाङ्नादिदक्षणान्तं कर्म कृत्वा दक्षिणां दत्त्वा समन्त्रकं प्रतिग्रापयं शोध्यगिरसि निधाय ओम् "त्वमग्ने वेदाश्चतारस्तुभ्यं यज्ञेषु हूयसे। त्वं मुखं सर्वदेवानां त्वं मुखं ब्रह्मवादिनाम्। जठरस्थो हि भूतानां ततो वेत्सि शुभाशुभम्। पापं पुनासि वै यस्मात् तस्मात् पावक उच्यसे। पापेषु दर्शयात्मानमर्चिष्मान् भव पावक!। अथ वा शुद्धभावेषु शीतो भव हुताशन!। त्वमेव सर्वभूतानामन्तश्चरसि साक्षिवत्। त्वमेव देव! जानीषे न विदुर्यानि मानवाः। व्यवहारान्निशस्तोऽयं मानुषः शुद्धिमिच्छति। तदेनं संयवाद्ब्राह्मणमस्मात्पापमर्हसि"। इत्येतैः फालस्थमग्निमभिमन्त्रयेत्। शोध्यस्तु "त्वमग्ने सर्वभूतानामन्तश्चरसि पावक!। साक्षिवत् पुण्यपापेभ्यो ब्रूहि सत्यं कवे! अथ" इत्यनेनाभिमन्त्र्याग्निवर्णं फालं जिह्वया सप्त लिह्यात्। न दह्यते शुद्धः"।

फाल्गुन पु० फल्गुनीयुक्ता पौर्णमासी अण् वा यत्र मासे जेये वर्षे अर्कमासे वा अण्। चैत्रावधिके द्वादशे ज्ञनामख्याते मासभेदे २ताद्यर्थे पक्षे १जैत्रे वर्षभेदे च कालिकापुराणे १६३६ पृ० दृश्यम्। "अन्योपान्यो विभौ श्रेयो फाल्गुन विभोषत" इत्युक्तेः पौर्णमास्यां फाल्गुनीरूपनक्षत्रसम्बन्धयोगात् तथात्वम्। स च मासः त्रिविधः सूर्यसौम्यचान्द्रसौरभेदात् तत्र कृष्णस्यरभ्यारभ्य शुक्लप्रतिपदादिदर्शान्तो सूर्यचान्द्रः। तथाभूतकृष्णप्रतिपदादिपौर्णमास्यन्तो सौम्यः, कृष्णस्यरविकः सौरः इति। अयञ्च शब्दः दत्यनाम्नि मेदिनिकोषे पठितः। फाल्गुने नगने फेने चलभिच्छन्ति वर्वराः" कारिकायाम् अणन्तमिति-कल्पनं मेदिनिविरोधात् प्रामादिकमेव। ४ततः पौर्णमास्यां स्त्री ङीप्। ५अर्जुनाख्ये पादपे तन्नामकत्वे कारणम् भा०वि०३३अ०उक्तं यथा "उत्तराभ्यां फल्गुनीभ्यां नक्षत्राभ्यामहं दिवा। जातो हिमवतः पृष्ठे तेन मां फाल्गुनं विदुः"। ६अर्जुनवृक्षे पु० मेदि०।

फाल्गुनानुज पु० फाल्गुनादनुजायते अनु+जन-ड। १चैत्रे मासि २वसन्तकाले हारा०। ३लक्ष्मणदेवयोः हि० व०।

फाल्गुनिक पु० फाल्गुनीनक्षत्रयुक्ता पौर्णमासी अस्मिन् मासे ठक्। चैत्रावधिके द्वादशे मासे। [३लोके शब्दर०

फि पु० फल-वा०डि। १निष्कलयाक्षे २पाशे च एकाक्ष०को०

फिङ्क पु० वल्गि+पृषो०। (पिङ्का) पक्षिभेदे शब्दमा०।

फिरङ्ग पु० ज्ञनामख्याते क्षुद्ररोगे१ रोगविशेषे२ भावप्र०

तत्र फिरङ्गस्य निरुक्तिमाह। "फिरङ्गसंज्ञके देशे बाहुल्येनैव यद्भवेत्। तस्मात् फिरङ्ग इत्युक्तो व्याधिर्व्याधिविशारदैः"। तस्य विप्रकृष्टं निदानमाह गन्धरोगः फिरङ्गोऽयं जायते देहिनां ध्रुवम्। फिरङ्गि-णोऽतिसंसर्गात् फिरङ्गिण्याः प्रसङ्गतः। व्याधिरागन्तुको ह्येष दोषाणामनुसंक्रमः। भवेत्ता वत्सरेकेषां वत्सरैर्भिषजां वरः"। फिरङ्गिण्याः प्रसङ्गत इति विशेषार्थम्। रूपमाह "फिरङ्गिविधौ श्रेयो बाह्याभ्यन्तरतस्तथा। बहिरन्तर्भवत्यापि तेषां लिङ्गानि च ध्रुवम्। तत्र बाह्यः फिरङ्गः स्याद्विस्फोटसदृशोऽल्पकः। स्फुटितो व्रणवद्वेदः सुखसाध्योऽपि स स्मृतः। सन्धे-राभ्यन्तरः स स्यादुभयोर्जत्रुसन्धितः। कष्टदोऽतिचिर-स्थायी कष्टसाध्यतमश्च सः"। उपद्रवानाह "काश्यं बलक्षयो मांसाभक्षो वह्नेश्च मन्दता। सन्धिशोथो-ऽस्थिवक्रत्वं फिरङ्गोपद्रवा अमी। साध्यत्वादिकमाह बहिर्भवो भवेत् साध्यो नूतनो निरुपद्रवः। आभ्य-न्तरस्तु कष्टेन साध्यः स्यादयमामयः। बहिरन्तर्भवो जीर्णः शोषक्षोपद्रवैर्युतः। बोध्यो व्याधिरसाध्योऽय-मित्याचुर्भिषजः पुरा"। ततोऽस्यर्थे इनि। फिरङ्गिन् तद्रोगयुते त्रि०स्त्रियां ङीप्। [त्रिषु०।

फु पु० फल-डु। मन्त्रोच्चारणपूर्वके १फुत्कारे २तच्छब्दे च

फुक पु० वेगे शब्दच०। [फक्कायां पु०ह्रस्वश्च०]

फुट त्रि० स्फुट-क पृषो०। १विदीर्णे २प्रस्फुटिते च। ३सर्षे-

फु(फू)त् अव्य० फल-डुति पृषो०वा दीर्घः। अनुकरणशब्दे।

फुत्कर पु०फुदित्यव्यक्तं शब्दं करोति क-ट। वङ्गे शब्दच०

फुत्कार पु० क-भावे घञ् फुदित्यव्यक्तशब्दस्य कारः। फुदित-व्यक्तशब्दकरणे। फुत्कारयुक्ते वङ्गौ व्याहृतिनिषेधो यथा "अन्ये कन्ये सस्फुलिङ्गे वामावर्त्ते भयानके। व्याहृताद्यैः सप्तपत्रे फुत्कारवति पावके। ब्रह्मार्चिषि सदुर्गन्धे तथा लिङ्गति मेदिनीम्। व्याहृतिं शुद्धवाद्-यस्तु तस्य नाशो भवेद् ध्रुवम्" ति०त०।

फुप्फुस पु०सन्ततोऽन्ते हृदयस्य वामपार्श्वस्थिते (फुस्फुसा) इति ख्याते कोशभेदे "स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च। हृदयञ्च फुप्फुसश्च कोम इत्यभिधीयते" व्याख्यातो चेदम्"आमस्य स्थानमामाशयः नाभेरूर्द्धम्। पक्वस्य स्थानं पक्वाशयः नाभेरधः। मूत्रस्य स्थानं वस्तिः। रुधिरस्य स्थानं यकृत्प्लीहानौ। हृद् हृदयम्। स्फुरसपाशमसदृशं यः

शोणितमलक्लाज्ञः वक्षुकः स चान्त्रदेशे व्यवस्थितः पुरीषाधानम्। फुप्फुसः हृदयस्य वामपार्श्वे स्थितः (फुक्का) इति ख्यातः इति विजयरक्षितः।

फुल्ल(ल्ल) त्रि॰ फल-आरम्भे भावे क्त वा तयोर्नेट् च्वौ इत्वम्। फलनारम्भयुते २फलने च। पक्षे फलित इति। अन्यत्र फलित इत्येव। भावे क्तिन् फुल्लि फलने स्त्री।

फुल्ल विकाशे भ्वा॰पर॰अक॰सेट्। फुल्लति अफुल्लीत् पुफुल्ल।

फुल्ल त्रि॰ फुल्ल-विकाशे अच्। विकसिते पुष्पे अमरः।

फुल्लकाल पु॰ फुल्लं फलति फल-अण्। भूपिप्पलीवृक्षे त्रिका॰।

फुल्लदामन् न॰ ६त॰। १फुल्लानां दामनि "भोगो नौ नौ गौ भरङ्यवतरगैः फुल्लदाम प्रथितम्" छ॰र॰ उक्ते जगतिवंश-लक्षरपादके छन्दोभेदे।

फुल्लनेत्र त्रि॰फुल्लं विकसितं नेत्रमस्य। १विकसितनेत्रे स्त्रियां ङाङ्लक्षेऽपि बहुव्रीहित्वात् टाप्। २मृगभेदे पुंस्त्री॰शब्दच॰ स्त्रियां जातित्वात् ङीष्। [संक्षिप्तसा॰।

फुल्लरीक पु॰ फल-फर्फरीकादि॰ नि॰ १देशभेदे २वर्षे च

फेण(न) पु॰ स्फाय-न पृषो॰ मतान्तरे चत्वम्। दुग्धजलादि-वप्यु परिस्थे बुद्बुदाकारे पदार्थे (फेना) अस्य आन्तत्व-मपि "हंसश्रेण्यो नदीतीरे निनदैः संप्रतीक्षिरे। यथा सारस्वता मत्ता अन्तरे फेनसङ्गता" इत्युक्तौ पक्षे अन्त-रेफेण अन्तःस्थकारेण संयुता इत्यर्थः। २हिमे च शुद्धविकारभेदे स्त्री ङीप्। "वटो वेशवारात् लवङ्गेन फेणो यमं पर्पटः शिखुबीजेन याति"जीर्णमञ्जरी। "बा-हीरं गगनं फेनमूनञ्च दन्त्यनान्वितम्। चाङ्गः फाल्गुन-मिच्छन्ति केचिन्मूर्ध्वन्यषान्वितम्" भरतधृतवाक्यम्।

फेण(न)क स्वार्थे क संज्ञायां कन् वा। १फेनशब्दार्थे २पिष्टकभेदे त्रिका॰।

फेण(न)नका स्त्री फेण(न) इव कायति के-क। जल-पक्वतण्डुलचूर्णे (काई) शब्दच॰।

फेण(न)दुग्धा स्त्री फेणः(नः) इव दुग्धं निर्यासोऽस्य। (दुधफेणा) क्षुपभेदे राजनि॰।

फेण(न)वाहिन् पु॰ (फेण(न)मिव वहति श्वेततया। वह-णिनि। ब्रह्मे शब्दमाला। [राजनि॰।

फेणा(ना) स्त्री फेण(न) अल्पार्थे अच्। सातलाक्षुपे

फेणा(ना)म्र न॰ ६त॰। बुद्बुदे। हारा॰।

फेणि(नि)निका स्त्री (खाजा) इति ख्याते पक्वान्नभेदे क्रताक्ष शब्दे २।८३।२४ पृ॰ दृश्यम्।

फेणि(नि)ल त्रि॰ फेन-(ण)+अस्त्यर्थे इलच्। फेन(ण)वि-शिष्टे। २क्षोलिफले ३मदनवृक्षफले च न॰मेदि॰। ४वदरवृक्षे राजनि॰ ५चरिष्टवृक्षे च पु॰ अमरः।

फेत्कारिणी स्त्री तन्त्रभेदे।

फेत्कारीय पु॰ तन्त्रभेदे। [स्त्रियां जातित्वात् ङीष्।

फेर पुंस्त्री॰ फे इत्यव्यक्तं रौति रु-वा॰ ड। शृगाले शब्दर॰

फेरण्ड पुंस्त्री॰ फे इत्यव्यक्तं रण्डति रण्ड-अच्। शृगाले हेमच॰ स्त्रियां जातित्वात् ङीष्।

फेरव पुंस्त्री फे इत्यव्यक्तो रवोऽस्य। १शृगाले अमरः। २राक्षसे मेदि॰। स्त्रियां ङीष् १क्षुद्रे त्रि॰ शब्दर॰।

फेरु पु॰ फे इत्यव्यक्तं रौति रु-डु। १शृगाले अमरः।

फेल गतौ भ्वा॰पर॰सक॰सेट्। फेलति अफेलीत् पिफेल। अदित् चङि न हुझः। अपिफेलत् त।

फेल(ला) न॰स्त्री॰ फेल-अच् वा टाप्। १मुक्तसंसृज्यते उज्झिते शब्दरत्ना॰ न॰। अमरे स्त्री।

फेलि स्त्री फेल-इन्। उज्झिते मुक्तावशिष्टे जटाध॰ स्वार्थे क फेलिका तत्रार्थे

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य-सङ्कलिते वाचस्पत्ये फकारादिशब्द-सङ्कलनम्।

फाल्गुशब्दपरिशिष्टम्—"तद्वै नवनीतं भवति एतं देवानां फाल्गुं मनुष्याणाम्" शत॰ब्रा॰ "नवनीतभावात् प्रागवस्थापन्नं द्रव्यं फाल्गुमित्युच्यते" भाष्यम्।

ब

बकारः पवर्गस्य तृतीयवर्णः कादिषु त्रयोविंशतितमो व्यञ्जनवर्णः जिह्वाग्रेण ओष्ठ्यौ स्पर्शेन उच्चार्यत्वात् स्पर्शवर्णः। अस्योच्चारणस्थानमोष्ठौ। उच्चारणे ओष्ठ-जिह्वाग्रेण स्पर्शः आभ्यन्तरप्रयत्नः। बाह्यप्रयत्नाः संवा-रनादघोषाः अल्पप्राणश्च। अस्य वाचकशब्दाः तन्त्रे वर्णा-भिधानोक्ता यथा "बो वनी भूधरो मार्गो धर्धरो लोचन-प्रियः। प्रचेताः कलसः पक्षी स्वलगण्डः कपर्दिनी। पृथ्वंशोऽभवा भक्तः शिखिवाहो युगन्धरः। सख-विन्दुर्वनी घण्टा योद्धा त्रिलोचनप्रियः। क्रोदिनी तापिनी भूमिः सुगन्धिश्चिबलिप्रियः। सुरभिर्ब्रह्म-विष्णुश संहारो वसुधाधिपः। बली पुरं चपेटा च मोदको गगनं पतिः। पूर्वाषाढा मध्यशिक्षः शनिः क्रूर तृतीयको"। तस्याधिष्ठातृदेवताध्यानं यथा "नीलवर्णो

त्रिनयनां नीलाम्बरधरां पराम्। नागहारोज्ज्वलां देवीं द्विभुजां पद्मलोचनाम्। एवं ध्यात्वा वकारन्तु तन्मन्त्रं दशधा जपेत्" वर्णोद्धारतन्त्रम्। अस्य ध्येयरूपं यथा "वकारं शृणु चार्वङ्गि! चतुर्वर्गप्रदायकम्। शरच्चन्द्र प्रतीकाशं पञ्चदेवमयं सदा" कामधेनुतं०। मातृन्यासेऽस्य पृष्ठवंशे न्यसता। काव्यादौ प्रथमप्रयोगे वकारशब्दोक्तं फलम्।

व पु० वल–ड। "वः पुमान् १वरुणे २विष्णौ ३भये ४तोये ५गते तु वा। इगन्वने ७तन्तुसन्ताने पुंस्येव ८वपने स्मृतः" मेदि०। ६कृष्णे शब्दर०।

वंहिष्ठ त्रि० अतिशयेन बलवः इष्ठन् बंहादेशः। अतिशयबलवति अमरः। [बलवे स्त्रियां ङीप्।

वंहीयस् त्रि० अतिशयेन बलवः ईयसु बंहादेशः। अतिशयबलवति अमरः।

वकुर त्रि० भास्कर+भयङ्कर+वा पृषो०। १भास्करे २भयङ्करे च हः १।११७।२१ भा०।

वठ स्तम्भे सामर्थ्ये च भ्वा०पर०सक०सेट्। वठति अवठीत् अवाठीत्। ववाठ वेठतुः। [अमरः।

वड़वा स्त्री वलं वाति वा–क वस्य डः। १घोटक्याम्, २अश्विनीनक्षत्रे ज्यो०। ३दास्याञ्च। वड़वाव्रतशब्दे उदा०

वड़वाव्रत(ह्व)त न० वड़वया दास्या व्रतः (ह्वतः) वा। दासभेदे "भक्तदासश्च विप्रेयस्तथैव वड़वाव्रत(ह्व)तः" स्मृतिः।

वडवाग्नि पु० वड़वायाः शिरस्थटाश्वायास्तस्योऽग्निः। समुद्रस्थिते घोटकीमुखस्थे कालानले। कालिकापु०४१अ०। तयोत्पत्तिरुक्ताऽस्य। और्वशब्दे १५८।८२ पृ० अस्योत्पत्तिरुक्ता दक्षा। वड़वानलादयोऽप्यत्र।

वड़वामुख पु० वड़वाया मुखं स्थानत्वेनास्यास्य अर्थ आदित्वादच्। समुद्रस्थे कालानले हेमच०।

वड़वासुत पु० द्वि० व० ह्तं०। अश्विनीकुमारयोः। अश्विनीकुमारशब्दे दृश्यम्। [वेगतः

वण शब्दे भ्वा०पर०सक०सेट्। वणति अवार्षीत्–अवणीत्

वण पु० वण–कच्। शब्दे भरतः।

वणिक्पथ पु० ह्तं० कच्समा०। हट्टे। [शब्दच०

वणिग्बन्धु पु० वणिजां बन्धुरिव पोषकत्वात्। नीलीवृक्षे

वणिग्भाव पु० ह्तं०। वाणिज्ये आजीवनार्थं क्रयविक्रयकरणे अमरः।

वणिग्वह पु० वणिजं वहति वह–अच्। वृक्षे शब्दच०

वणिज्(ज) पु० पण्यायते व्यवहरति पण–इञि इजो वा पस्य वः। आजीवनार्थं क्रयविक्रयव्यवहारकर्त्तरि अमरः। २ज्योतिषोक्ते वणादितः मूले करणे च ४वाणिज्ये स्त्री मेदि०। स्वार्थे अण् वाणिज तत्रार्थे अमरः।

वणिज्य न० वणिजो भावः कर्म वा यत्। वाणिज्ये आजीवनार्थं क्रयविक्रयादिव्यवहारे भरतः स्त्रीत्वमपि। "चतुरेष चतुर्वर्गचिन्तामणिवणिज्यवेति" सङ्क्षिप्तम्। अञ्। वाणिज्य तत्रार्थे न०।

वद स्वैर्ये निशब्दभवने भ्वा०पर०सक०सेट्। वदति अवादीत् अवदीत्। ववाद वेदतुः।

वद भाषणे वा चु०उभ०पक्षे भ्वा०पर०सक०सेट्। वादयति ते अबीवदत्-त। पक्षे वदतीत्यादि।

व(व)दर पु० वदति स्थिरीभवति छिन्नस्यापि पुनः प्ररोहेण वद+स्वैर्ये अरच्। १कोलिवृक्षे २देवसर्षपवृक्षे राजनि०। तस्य फलम् अण् तस्य लुक्। १कोलिफले राजनि०। कर्कन्धुशब्दे दृश्यम्। ४कार्पासफले ५कोलिफले न० ६कोलिभेदे (वेरोवाकुल) कार्पासास्थि पु० मेदि०। अन्तस्यादित्वमस्यान्यत्रैवम्। टवराहक्रान्तायां १कार्पासवृक्षे स्त्री अमरः।

वदर(प)पाचन न० तीर्थभेदे भा०श०४८अ०। तत्र इन्द्रोपदेशेन कुमार्यां पञ्चवदराणां पचनात्तथात्वम्।

व(व)दरफली स्त्री व(व)दरस्येव फलमस्याः ङीप्। भूमिव(व)दर्यां राजनि०।

व(व)दरवल्ली स्त्री व(व)दरफलप्रधाना वल्ली मा०त०। भूमिव(व)दरीतिख्याते लतामेदे राजनि०।

व(व)दरामलक न० व(व)दरमिवामलकम्। १प्राचीनामलके हारा०। समा०द्व०। २वदरामलकफलयोः समाहारे न०

व(व)दरिकाश्रम पु० न०। वदरी+स्वार्थे क तस्याः समीपे तच्छिक्षितोवाश्रमः। तीर्थविशेषे। व(व)दरीशब्दे दृश्यम्। भा० व० ९२ अ० दृश्यम्। वदरिकावनमप्यत्र तच्च हिमालयपर्वतैकदेशे श्रीनगराख्यदेशसमीपे अलकनन्दानदीपश्चिमभागे स्थितम्।

व(व)दरी स्त्री व(व)दर+गौरा०ङीष्। १कोलिवृक्षे अमरः २कार्पासे शब्दर० कपिकच्छाम् राजनि०। ततः पीलादाके कृणच्। वदरीकृष तत्पाके न०।

व(व)दरीच्छदा स्त्री व(व)दर्या इव छदो यस्याः। १हस्तिकोलिवृक्षे २शङ्खनख्याञ्च राजनि०।

ववदरीपत्र पु० व(व)दर्या इव पत्रमस्याः। नखीनामगन्धद्रव्ये जटा०। स्वार्थे क। तत्रैव। [शिखायाम् शब्दमा०

ववदरीफला स्त्री व(व)दर्या इव फलमस्याः। नीलझिण्टिकायाम्।

वद्ध त्रि० बन्ध–कर्मणि क्त। बन्धनकर्मणि अमरः।

बडगुद न० बडं गुदमस्य । कोऽवन्त्यकारके रोगभेदे "यस्या-न्त्रमलैरवलेखिभिर्वा बालाग्रमिवाविहितं यथावत् । सञ्जीवते तस्य मलः सदोषात् शनैः शनैः सङ्घटवच्च नाद्यात् । निरुध्यते तस्य गुदे पुरीषं निरेति कृच्छ्रादपि चाल्पमल्पम् । कृच्छ्राभिमर्श्ये परिवर्द्धमेति तत्तोदरं बडगुदं वदन्ति" भावप्र० ।

बडफल पु० बडानि फलान्यस्य । करञ्जवृक्षे राजनि० ।

बडमुष्टि त्रि० बडः दानायोपकारितो मुष्टिर्यस्य । कृपणे ।

बडमूल त्रि० बडं मूलमस्य । दृढमूले ।

बडरसाल पु० नि०क० । राजाम्रभेदे राजनि० ।

बडशिख त्रि० बडा शिखा येन यस्य वा । "सदोपवीतेन भाव्यं सदा बडशिखेन च" प्रा०त०उक्ते शिखावन्धन-युक्ते २उच्चटायां स्त्री मेदि० ।

बध पु० हन-घञ् । वधादेशः । हनने प्राणवियोगसाधने व्यापारे अमरः । बधपदार्थविशेषं बधिभेदञ्च प्रा० वि० उक्तो यथा

"अथ बधो निरूप्यते । तत्र कोऽयं बधः किं बधित्वं कति विधं च तत्, ? उच्यतेप्राणवियोगफलकव्यापारो बधः तन्नि-त्यादृष्टत्वञ्च साक्षात्परम्परोद्देशेन श्रुतिस्मारपरिगणितं बधित्वम् अतो नेष्टकारादिव्यतिव्याप्तिः तच्च पञ्चविधं श्रुतिस्मरणात् कर्त्ता प्रयोजकोऽनुमन्ता अनुपाहको निमित्ती चेति यथाह आपस्तम्बः "प्रयोजयिता अनुमन्ता कर्त्ता चेति सर्वे स्वर्गनरकफलभोक्तारो यो मूय आर भते तस्मिन् फले विशेषः" । अनुपाहकमाह याज्ञ-वल्क्यः "चरेद्व्रतमहत्वापि चतार्थञ्चेत् समागतः" । तथा मनुः "बहूनामेककार्याणां सर्वेषां शस्त्रधारिणाम् । यदेको घातकस्तत्र सर्वे ते घातकाः स्मृताः" । भविष्ये "यदेकं बहवो विप्रा घ्नन्ति विप्रमनागसम् । तदैषां निष्कृतिं वक्ष्मि शृणुध्वमकृता गुरु ! ! तेषां यस्य प्रहा-रेण स विप्रो निधनं गतः । सरस्वतीं प्रतिस्रोतः सचरेत् पापशुद्धये" । स च द्विविधः । एको बध्यप्रति-रोधकः अन्यः शस्त्रप्रहर्त्ता । निमित्तिनमाह विष्णुः "अन्यायेन गृहीतस्तो न्यायमर्थयते तु यः । यस्तद्धि त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्" । अत्र नरान्तर-व्यापाराध्यधानेन बधनिष्पादकः कर्त्ता, यः कर्त्तारं कारयति स प्रयोजकः सोऽपि द्विविधः । एकः स्वतो-ऽप्रवृत्तमेव पदातिं वेतनादिना बधार्थं प्रवर्त्तयति अपरः स्वतः प्रवृत्तमेव मन्त्रोपायोपदेशादिना प्रोत्साहयति । अनुमतिदाता अनुमन्ता । अनुमतिश्च द्विविधा । एका बन्दिरोधाङ्गनं न सम्भवति तस्य विरोधिनो बधा नि-रोधः कर्त्तव्य इति प्रवृत्तिः । अपरा एनं हन्तीति वचने प्रवृत्त्याप्रतिषेध एव" । हिंसायाः पापाद्यनिष्टजनक-त्वेऽपि वैदहिंसादा दृष्टफलजनकत्वात् तन्नानिष्टजन-कता "यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयम्भुवा । अतस्त्वां घातयिष्यामि तस्माद्यज्ञे बधोऽबधः" इति त० उक्तेः मनुनापि "या वेदविहिता सा नियताऽस्मिंश्चराचरे । अहिंसामेव तां विद्याद् वेदाद् धर्मो हि निर्बभौ" उक्तेश्च । अबधः अहिंसा च तत्तन्यपापाजनकत्वेन तद्विरो-धीत्यर्थः । बहूनां रक्षणार्थमेकस्य बधेऽपि पुण्यजनकत्व-मुक्तम् "एकस्य यत्र निधने प्रवृत्ते दृष्टकारिणः । बहूनां भवति क्षेमं तत्र पुण्यप्रदो बधः । ब्रह्मघ्नश्चैव सुरापश्च ब्रह्मघ्नो गुरुतल्पगः । आत्मानं घातयेद्यस्तु तस्य पुण्य-प्रदो बधः" कालिका०२०अ० । ब्रह्मघ्नस्य बधेऽपि न राज्ञो दोषः प्रा०वि०स्थितः "तथा चाततायिबधे दोषो हन्तुर्भवति कथन" स्मृतेः आततायिबधेऽपि नानिष्टफलमिति यथायथं बोध्यम् ।

बध संयमने चु०उ०सक०सेट् । बाधयति-ते अबीबधत्-त ।

बध निन्दायां बन्धने च भ्वादि०आत्म०सक०सेट् । बीभत्सते अबीभत्सिष्ट । निन्दनेऽर्थे एव स्वार्थे सन् बन्धने तु न तेन तत्र बधते अबधिष्ट इत्येव ।

बधक त्रि० बध-ण्वुल । १बधकर्त्तरि स्त्री० । २हिंसके ३व्याधौ ४म्लेच्छे च मेदिनी० ।

बधत्र न० बध-करणे ष्ट्रन् । चर्म्मणि उणादि० । [ङीप् ।

बधस्थली स्त्री ६त० । श्मशाने त्रिका० । बधस्थानमप्यत्र न० ।

बधाङ्क न० बधः अङ्कोऽत्र कप् । कारागृहे त्रिका० ।

बधार्ह त्रि० बधमर्हति अर्ह-अण् उ०स० । बधदण्डार्हे ।

बधिर त्रि०बन्ध-किरच् । श्रोत्रेन्द्रियरहिते अवयवशक्तिशून्ये । तस्यानंशिता मनुनोक्ता यथा "अनंशौ क्लीवपतितौ जात्यन्धबधिरौ तथा" । ततः बधीरस्या० चतुरर्थ्यां ष्यञ् । बाधिरक तन्निकटदेशादौ त्रि० । ततः दृढ०भावे वा ष्यञ्निच् पक्षे ष्यञ् । बधिरिमन् पु० बाधिर्य्य न० तद्भावे तद्धितादि साधवकरेणोक्तं यथा "यदा शब्दवहं वायुः स्रोतसाद्दत्य तिष्ठति । शुद्धः क्षेत्रा-न्वितो वापि बाधिर्य्यं तेन जायते" ।

ब(व)धू स्त्री बध्नाति ममतया बन्ध-ऊ सलोपः, उद्धते बह-ऊ धत्वान्तादेशो वा । १भार्य्यायाम्, २पुत्रजायायाञ्च अमरः

श्रुणयां, ४नबोढायाम्, भार्य्यायां ५प्रारिप्सोत्पधौ ६गङ्गायाम्, च मेदि०।

ब(व)धूटी स्त्री वध्वा ब(व)धूः वध्वार्थे टि वा ङीप्। वध्वस्वस्त्रोर्भावां नार्य्याम् "गोपवधूटीडङ्गूलचौराय" भाषाप०।

ब(व)धूत्सव पु०ष(ष)ष्ठा उत्सव आर्त्तवे रजः स इव प्रसवः पत्वादिर्थञ्च। रक्षास्थाने राजनि०।

बधोद्यत त्रि०बधाय उद्यतः। मारणार्थमुद्युक्ते आततायिनि अमरः। आततायिनशब्दे ६४७ पृ० दृश्यम्।

बध्य त्रि०बधमर्हति बध+यत्। १बधार्हे अमरः। बन्ध-कर्मणि क्यप्। २कारारोद्धव्ये। आधारे क्यप्। ३बन्धनस्थाने च

बध्यपाल पु० बध्यं कारागारं पालयति पालि-अण् उप० स०। कारारक्षरक्षके। विष्णु० पु० २अंशे ६अ०।

बध्यभूमि स्त्री हन-भावे यत् बधादेशः बध्यस्य भूमिः। श्मशाने बधस्थाने बध्यस्थानादयोऽप्यत्र [तद्गोत्रापत्ये पुंस्त्री०

बध्योग पु०ऋषिभेदे ततो विदा० गोत्रापत्ये अञ्। बाध्योग

बध्न न० बन्ध-ड्तृ नलोपः। १चोरके, २चर्ममयरज्ज्वां स्त्री ङीप्। पृषो० नस्य रः। बह्वीत्यत्र स्त्री अमरः।

बन याचने तना० आत्म० सिक० सेट्। बनुते अबनिष्ट। बेने ऽदित्त्वाद् वेट् बनित्वा बान्त्वा बान्तः। [बबन्ध बध्यते।

बन्ध बन्धने क्र्या०पर०सक०अनिट्। बध्नाति अबान्त्सीत् बद्ध+उत्तोल्य बन्धने "बद्धबन्धनस्थता ये च" स्मृतिः। अनु+नियतपूर्ववर्त्तित्वे अनुगमने च। "तेषु किं भवतः स्नेहमनुबध्नाति मानसम्" देवीभा०।

नि+नियमेन बन्धने निबन्धशब्दे दृश्यम्।

निर्+आत्यन्ते निर्बन्धशब्दे दृश्यम्।

प्र+प्रत्यने कालनिष्कर्षणे च प्रबन्धशब्दे दृश्यम्।

प्रति+निरोधे "प्रतिबध्नाति हि श्रेयः" रघुः। व्याप्तौ च प्रतिबन्धशब्दे दृश्यम्।

सम्+सम्यक्बन्धे संसर्गे च।

बन्ध संयमने चुरा०उभ०सक०सेट्। बन्धयति ते अबबन्धत् त

बन्ध पु०बन्ध-घञ्। १संयमने निगडादिना गतिरोधने २स्टक्काटिबेष्टनसूत्रे च। स्टक्शब्दे २६३५पृ०दृश्यम्। करणे कर्मणि वा घञ्। ३देहे ४ऋणशोधनविश्राणाय स्थापिते द्रव्ये आधौ च। आधिशब्दे ७११पृ०दृश्यम्। करणे घञ्। ५गतिरोधसाधने शब्दर०। रतिबन्धभेदाश्च रतिमञ्जर्य्युक्ता यथा "पद्मासनो नागपदो लतावेष्टोर्द्धसंपुटः कुक्षिमं सुन्दरश्चैव तथा केसर एव च। छिन्नोरो नरसिंहोऽपि विपरीतस्तथाऽपरः। शुष्को वै धेनुकश्चैव समुत्कण्ठसतः परम्। सिंहासनो रतिनागो विद्याधरस्तु षोड्शः" तत्तच्छब्दे तेषां लक्षणानि दृश्यानि। अरदीपिकोक्ता अन्येऽपि बन्धाः सन्ति यथा

"कामप्रदो विपरीतो नागरो रतिपाशकः। केसूरः प्रियतोषश्च ततः समपदस्तथा। ततश्चैकपदो ज्ञेयः सम्पुटार्द्धसम्पुटः। ततः स्तनभरश्चैव ततोऽनुरतिसुन्दरः। अरपीडामरुचक्रौ ततश्चोरुक्रमः स्मृतः। वेष्टको हंसकौलस्तु ततो नीवासनस्तथा। अष्टादश क्रमाद्बन्धाः स्त्रीणां वल्लभसुखप्रदाः। पुंसां सुखकरावेव कथितास्तु क्रमात्ततः"। प्रवाहरूपेण सततं देहादेहान्तरगतिरूपे संसारे च।

बन्धक न० बन्धे स्थापितं धनमस्त्यनेन कन्। ऋणशोधार्थम् विश्वासहेतुतया आधीक्रियते १पदार्थे शब्दर०। स्वार्थे क। २विनिमये पु० मेदि०। ३रतबन्धभेदे नानार्थमाला। ४पुंश्चल्यां स्त्री अमरः। ५कुत्सितायां मेदि० उभयत्र गौरा० ङीष्। ६पङ्गुपुरुषगामिन्यां स्त्रियाम् भा० आ० १२२अ०।

बन्धन न० बन्ध-भावे ल्युट्। १निगडादिना २संयमने अमरः ३बधे मेदि०। करणे ल्युट्। ४तद्धेतौ रज्ज्वो। हेमच०

बन्धनवेश्मन् न० ६त०। कारागारे हारा०। बन्धनागारादयोऽप्यत्र। बन्धनालयोऽपि तत्रार्थे अमरः।

बन्धनस्तम्भ पु० ६त०। हस्तिसंयमनकाष्ठे आलाने अमरः।

बन्धित्र पु०बन्ध इत्र। १कामदेवे उणादि०। २चर्मव्यञ्जने संज्ञि०

बन्धु पु० बध्नाति मनः स्नेहादिना बन्ध-उ। १भ्रातरि मातुलपुत्रादौ अमरः। "२बन्धुभ्यः पितृमातृतः" इति स्मृतिः बान्धवे ३मित्रे ४पितरि ५मातरि ६श्वशुरे ७बन्धुजीववृक्षे च स्वार्थे अण्। बान्धव तत्रार्थे बन्धवश्च त्रिविधाः पारिभाषिका आत्मबन्धुशब्दे पितृबन्धुशब्दे चोक्ता मातृबन्धुशब्दे वक्ष्यमाणाश्च दृश्याः। अतएव "तत्सुतो गोत्रजो बन्धुरिति" याज्ञ० तथैव व्याख्या इति मिता०। दायभागमते तु मातामहादयोऽपि बन्धवः अतएव "तत्सुतो गोत्रजो बन्धुरिति" याज्ञ०व्या० तेन बन्धुपदेन असगोत्राणां मातामहादीनां परिग्रहणमित्युक्तम्। अतो मतभेदेन धनग्रहणे व्यवस्थाभेद।

बन्धुक पु० बन्ध-उक। बन्धुजीववृक्षे शब्दरत्ना०।

बन्धुजीव(ब) पु०बन्धुरिव जीवयति जीवि-अच् ण्वुल् वा। बन्धुजीववृक्षे। (बांधुलीगाछ) वृक्षे अमरः। [च अमरः

बन्धुता स्त्री बन्धु+ष्वे भावे तल् वा। १बन्धुसमूहे, २तद्भावे

बन्धुदत्त न० ३त०। १स्त्रीधनभेदे "बन्धुदत्तं तथा शुल्क

कन्याधिवक्तमेव च। अप्रजायामतीतायां बान्धवास्तद्-बान्धवः" यात्त०। "बान्धवा भ्रातरः बन्धुदत्तप्रदेन कन्या-दशायां यत् पितृभ्यां दत्तं तदुच्यते" दायभागः। तत्रैव कन्यादशायां बन्धुभ्यां पितृभ्यां दत्ते स्त्रीधने च।

बन्धुर न० बन्ध-उरच्। १सकटे शब्दर० २स्त्रोचिह्ने ३तिल-कल्के ४बन्धुजीववृक्षे ५वधिरे हृद्रोगे च मेदि० ७विदूरे ८क्षमभौषधौ राजनि० ९रम्ये १०नम्रे ११वेशग्रायां स्त्री १२सङ्कटे पु० ब०व० मेदि०। १३उन्नतानते च त्रि० अमरः पाठान्तरम्।

बन्धुल पु०बन्ध-उलच्। १असतीपुत्रे अमरः २बन्धुके शब्दर० ३सुन्दरे ४रम्ये ५नम्रे च त्रि० अजयपालः।

बन्धूक पु०बन्ध-ऊक। (बन्धुजी)वृक्षे अमरः"बन्धूकपुष्पसङ्का-शम्" रविप्रणाममन्त्रः। रक्तपीतादिपुष्पे मध्याह्ने प्रकाश-वति पुष्पवृक्षे २पीतशालके मेदि०। "ऋतितपीतकोद्भितपुष्प विशेषाश्रुतविधो बन्धूकः। ज्वरहारी विषहारी अक्षपि आचमनः प्रसादनः सचिवः स्यात्" राजनि०। "बन्धूकः कफकृद्व्याही रक्तपित्तहरो लघुः" भावप्र०। (बन्धुक) रति ख्याते २क्षुपे न० क्षेमच०।

बन्धूर पु०बन्धू-अरच्। १क्लिष्टे त्रिका०। २रम्ये ३नम्रे च त्रि० रभसः ४उन्नतानते क्वचिदुन्नते क्वचिच्च नते त्रि० अमरः।

बन्धुलि पु० बन्ध-अलि। बन्धुजीववृक्षे शब्दर०।

बन्ध्य त्रि० बन्ध-यत्। कालप्राप्तावपि १ फलशून्ये वृक्षे अमरः। २निष्फले राजनि० "बन्ध्यकोपस्य निष्फन्त-रापदाम्" किरा०। ३बन्धनीये च त्रि०। ४अपुत्रायां स्त्रीजातौ स्त्री शब्दच०। ५वाक्याख्ये गन्धद्रव्ये स्त्री मेदि०। प्रा०वि० बन्ध्यायाः दशलौत्तसङ्ख्यं यथा "बन्ध्या च दशमी श्रेया दशमी च रजस्वला। अथ या दशमी श्रेया कुमारी या रजस्वला" द्वयोर्निरोगभेदे स्त्री भावप्र०। ४५।७पृ० पित्तशब्दे परिशिष्टे दृश्यम्।

बन्ध्यफल पु०फले बन्ध्यः पूर्वनि०। फलहीने वृक्षे अमरः।

बन्ध्याकर्कटी स्त्री बन्ध्राया उपकारिणी पुत्रप्रदत्वात् कर्कटी। तिक्तकर्कट्याम् अस्याः पुत्रदायित्वेन बन्ध्रो पकारित्वम्। स्वार्थे क। बन्ध्राकर्कटिका बन्ध्रैव भावप्र० "बन्ध्याकर्कटिका तिक्ता कटूष्णा च कफा-पहा। स्त्रावरादिविषघ्नी च रसायनकरी परा" तत्रामत्र तस्य पुत्रदेति कीर्त्तनात् तस्य बन्ध्रोपकारित्वं बोध्यम्।

बन्ध्यातनय पु० बन्ध्रायाश्चनय इव। अलीके पदार्थे बन्ध्रा सुतादृष्टान्तः।

बभ्र गतौ भ्वा०पर०सक०सेट्। बभ्रति अबभ्रीत् बबभ्र।

बभ्रु पु० भृ-कु-ह्रित्वम् बभ्र-उ वा। १शिवे २विष्णौ ३नकुले ४बभ्रौ, ५विशाले देशभेदे हृतहृद्देशवासिनि ब०व० मेदि०। ७मुनिभेदे च ८पिङ्गलवर्णे पु०। हृतहृति त्रि० अमरः। स्त्रियाम् ऊङ्। १०खलपौ वङ्गकरे पु०क्षेमच०। ११सिता-वरकशाये राजनि०। गर्गा० अपत्ये यञ्। बाभव्य तन्नु-नेरपत्ये पुंस्त्री०। स्त्रियां ङीष् यञोपः बाभ्री।

बभ्रुधातु पु० कर्म०। १स्वर्णे २गैरिके च राजनि०।

बभ्व गतौ भ्वा०पर०सक०सेट्। बभ्वति अबभ्वीत् बबभ्व।

बभ्वारि त्रि० भृ-इन् हित्वं अभ्यासे सम्। सर्वस्व भर्त्तरि "बभ्वारिरवसुरपि" ताण्ड्यब्रा०।

बर न० वृ-अच् १कङ्कुमे। २आदृते ३वरे ४वाञ्छिते गन्ध-द्रव्ये राजनि०। कर्मणि अच्। ५जामातरि देवादिभ्यः ६वाशाखे ७विदूरे जारे च पु०। भावे अप्। ८वरणे ९क्लिवफलायां मेदि०। १०गुडूच्यां, ११मेदायां १२ब्राह्मण्याम् १३विदूरे १४पाठायां १५कुरिण्टायाञ्च स्त्री टाप् राजनि०। १६शतावर्य्यां स्त्री मेदि० गौरा० ङीष्।

बरम् अव्य०वृ-बा० असुन्। श्रेष्ठदिष्टे अयमन्यस्मादतिशयेके।

बर्जह न० गवादीनां दुग्धक्षोत्पत्तिस्थाने अज० १।८२।४ भा०

बर्ब गतौ भ्वा०पर०सक०सेट्। बर्बति अबर्बीत् बबर्ब।

बर्बट पु०बर्ब-अटन्। १राजमाषे (बरबटी) त्रिका०। गौरा० ङीष्। २तत्फलेऽपि स्त्रीत्वे ३वेशग्रायाञ्च स्त्री मेदि०।

बर्बणा स्त्री बर्ब-ल्युट्। नीलमक्षिकायाम् अमरः।

बर्बुर न० न० बर्ब-उरच्। वदके निघण्टुः।

बर्ह दाने वधे स्तुतौ वाचि च भ्वा०आ०सक०सेट्। बर्हते अबर्हिष्ट "विगर्हितं धर्मधनैर्निबर्हणम्" नैष०।

बर्ह न० बर्ह-अच्। १मयूरपिच्छे अमरः। २पत्रे ३परीवारे क्षेमच० मयूरपिच्छे पुंस्त्वमपि। "कं बर्हरेव बर्हः" इति विक्रमो० प्रयोगात् "यथा बर्हाणि चित्राणि बिभर्त्ति भुजगाशनः" क्लीबे प्रयोगः। [पु०८३अ०

बर्हकेतु पु०बर्हं केतुचिह्नं यस्य। नवममनोः पुत्रभेदे मार्क०

बर्हवत् पु० बर्ह+अस्त्यर्थे मतुप् मस्य वः। मयूरपिच्छयुक्ते ततः विसङ्कादि० कप्। बार्हवत तत्सम्बन्धिनि त्रि०।

बर्हस् न० बर्ह-असुन्। आकारभेदे ऋ० १।११३।१०।

बर्हि न० बर्ह-इन्। कुशे।

बर्हिण पु० बर्ह+इनच्। मयूरे अमरः।

बर्हिन् पु० बर्ह+अस्त्यर्थे इनि। मयूरे अमरः।

बर्हिवाहन पु० बर्हौ मयूरो वाहनमस्य। कार्त्तिकेये।

वर्हिपुष्प पु० वर्हि वर्हवृक्षमिव पुष्पमस्य । मयूरपिच्छवृक्षे वर्हिकुसुमादयोऽप्यत्र ।

वर्हिर्मुख पु० वर्हिर्वर्हिरिव मुखमस्य । देवे अमरः ।

वर्हिःशुष्मन् पु० वर्हिः कुशः बलमस्य । वह्नौ अमरः ।

वर्हिषद् पु० ब०व० वर्हिषि सीदति सद्-क्विप् षत्वम् । पितृगणभेदे पितृशब्दे दृश्यम् ।

वर्हिष्केश पु० वर्हिः केश इव यस्य । वह्नौ ।

वर्हिष्मत् त्रि० वर्हिरस्यास्य मतुप् । कुशयुक्ते स्त्रियां ङीप् ।

वर्हिष्य त्रि० वर्हिषि दत्तम् यत् । कुशे दत्ते पिण्डादौ ।

वर्हिष्ठ त्रि० वर्हिषि कुशे तिष्ठति स्था-क ७त० वा विसर्गलोपः षत्वम् । कुशस्थिते ।

वर्हिस् न० वर्ह-कर्मणि इसि । कुशे १यज्ञिये कुशे "निरोता सन्ति वर्हिषि" सामाचिकम् ।।।।। "उपमूलन्नं वर्हिः पितृणां पर्यसूनं देवानाम्" कौ० त० । प्राचीनवर्हिस्शब्दे दृश्यम् २दीप्तौ ३अग्नौ च "वर्हिषि रक्तं न देवम्" श्रुतिः ।

वल ओघने, धान्यावरोधे च भ्वा०पर०सक०सेट् । वलति । अवालीत् अवलीत् । वेवलतुः । ज्वलादि०कर्त्तरि घ । वलः वालः ।

वल दाने वधे निरूपणे च भ्वा०उभ०सक०सेट् । वलति-ते अवालीत् अवलिष्ट । वेवलतुः वेवले । [वलत् त ।

वल ओघने चु०उभ०सक०सेट् मित् घटा० । वलयति-ते अवीवलत् ।

वल निरूपणे चु०आत्म०सक०सेट् । वालयते अवीवलत ।

वल न० वल-अच् । १सैन्ये २देहजे सामर्थ्ये ३ओजसे ४गन्धरसे ५रूपे मेदि० ६शुक्ले हेमच० ७देहे जटा० ८पङ्कवे शब्दर० ९रक्ते च शब्दच० । १०बलयुक्ते त्रि० मेदि० ११काके १२बलदेवे अमरः । १३वरुणदण्डे शब्दच० । १४दैत्यभेदे पु० मेदि० । तस्य पारिभाषिकबलानि ब्रह्मवै० २५ अ० उक्तानि यथा

"क्षत्रियाणां बलं युद्धं व्यापारश्च बलं विशाम् । भिक्षाबलं भिक्षुकाणां शूद्राणां विप्रसेवनम् । हरौ भक्तिर्हरेर्दास्यं वैष्णवानां बलं हरिः । हिंसा बलं खलानाञ्च तपश्चा च तपस्विनाम् । बलं वेशश्च वेश्यानां योषितां यौवनं बलम् । बलं प्रतापो भूपानां ब्राह्मणानां हरेर्बलम् । सतां सत्यं बलं, मिथ्या बलमेवासतां सदा । अनुमानमनुमतः शास्त्रज्ञानाञ्च सञ्चयः । विद्या बलं पण्डितानां वाग्मित्वं वणिजां बलम् । शस्त्रशास्त्रकर्मयोगानां नाम्नीत्यं साहसं बलम् । धनं बलं च धनिनां शूचीनां शौचमेव च । बलं विवेकः शान्तानां तुष्टिनां बलमेकता । शुष्को बलं च शुष्किनां चौराणां चौर्यमेव च । विप्रलम्भश्च कापट्यमधर्मस्थिनां बलम् । हिंसा च हिंसजन्तूनां स्तेनानां पतिसेवनम् । वरायाश्च सुरायाश्च शिष्याणां गुरुसेवनम् । बलं धर्मो दृढस्थानां भक्तानां राजसेवनम् । बलं स्तवः स्तावकानां ब्रह्म च ब्रह्मचारिणाम् । यतीनाञ्च सदाचारो न्यासः सन्न्यासिनां बलम् । पापं बलं पातकिनां शुभक्षानां हरिर्बलम् । पुण्यं बलं पुण्यवतां प्रजानां नृपतिर्बलम् । फलं बलञ्च वृक्षाणां जलधीनां जलं बलम् । जलं बलञ्च शस्यानां मत्स्यानाञ्च जलं बलम् । शान्तिर्बलञ्च भूपानां विप्राणाञ्च विशेषतः । "विद्याभिजनभिक्षापि बुद्धिसत्त्वं धनानि च । तपःसहायवीर्याणि दैवञ्च दशमं बलम्" । भा० शा० ।

वैद्यके सद्योबलकरपदार्थाः संक्षेपेण दर्शिता यथा "सद्यो बलकरं क्षीरं वाताभ्यङ्गः सुभोजनम् । सद्यो बलकरं क्षीरं सर्पिश्च मांसमप्युत" । "धातूनां यत् परं तेजस्ततश्चौजस्ततश्च बलमित्युच्यते" वैद्य० वायुदत्ते १५स्कन्दानुचरभेदे पु० । "बलञ्चातिबलञ्चैव महाबलो महाबलौ" भा० श० २५/२६ श्लो० । असुरभेदश्च इन्द्रेण हतः इन्द्रपर्व्वणि बलारातिशब्ददर्शनात् देवीपु० ४७अ० तु स विष्णुना हतः "तदा दत्ता तनुस्तेन दानवेन महात्मना । विष्णुनापि स्वचक्रेण शिरश्छित्त्वा बलः । प्राक्तनं देहसन्दोहं दिव्यकायस्वभूत्तदा । तस्यास्थिसञ्चयस्तातो बलाद्या रत्नजातयः । लोचने सूर्य्यतेजांसि पद्मरागाणि चाभवन् । विष्णुदण्डप्रहारेण कायो रत्नाकरोऽभवत्" । [अमरः । अत्यस्यवादिरयमिति स्वामी ।

बलज पु० बलं शुक्लत्वात् जे-क ।१शुक्लवर्णे । २तडिति त्रि० ।

बलज न० बलात् जायते जन-ड । १क्षेत्रे २पुरद्वारे ३अस्त्रे ४युद्धे च । ५बलजाते त्रि० मेदि० । ६वरयोषायां ७यूथिकायां च स्त्री मेदि० ।

बलद पु० बलं ददाति दा-क । "पौष्टिके बलदः कृतः" १ पौष्टिककर्म्मोक्ते बलिभेदे । २ अस्त्रनाम्न्यां स्त्री । राजनि० ३बलदातरि त्रि० । ४जीवके पु० राजनि० ।

बलदीनता स्त्री ३त० । ग्लानौ हेमच० ।

बलदेव पु० बलेन दीव्यति दिव-अच् बलोद्रिक्तो देवो वा शाक०त० । १बलरामे "बलदेवो बलोद्रेकात्" ब्रह्मवै० ब्र०ख० ४२ अ० । २बलप्रधानौषधौ स्त्री अमरः । ३बाहौ पु० मेदि० ।

बलप्रसू स्त्री ६त०। रोहिण्यां वसुदेवभार्य्याभेदे स्त्री शब्दच० तज्जननात्तस्या०।

बलभद्र पु०बल+अर्श आद्यच बलो बलवानपि भद्रः सौम्यः। १बलदेवे, अमरः। २गवये राजनि०। ३अनन्ते पु० ४बलयुते त्रि० हेमच०। ५लोध्रे शब्दच०। बलेषु भद्रा। ६वायमाणौषधौ ६दृतकुमार्य्यां च स्त्री मेदि०। स्वार्थे क। बलभद्रिका तत्रार्थे स्त्री अमरः।

बलराम पु० बलेन रमते रम-संज्ञायां कर्त्तरि घञ् बलोपपदको वा रामःशा०त०। ज्यायसि रोहिणीनन्दने संकर्षणे रामश्च दाशरथिपरशुरामबलरामभेदेन त्रित्वात् अस्य बलोपपदकत्वात्तथात्वम्। [भरतः।

बलल पु० बलं लाति ला-क बल-कलच् वा। बलराशौ

बलवत् अव्य० बल+अतिशये मतुप् मस्य वः। १अतिशये अमरः। "बलवदपि शिक्षितानाम्" शकुन्तला। २बलविशिष्टे मांसले त्रि० अमरः स्त्रियां ङीप्। [जटाधरः।

बलवर्द्धिनी स्त्री० बलं वर्द्धयति वृध-णिनि। जीवकौषधौ

बलविन्यास पु० बलानां सैन्यानां विन्यासेन दुर्भेद्यतायै न्यासः स्थापनम्। व्यूहे सैनासन्निवेशविशेषे अमरः।

बलशालिन् त्रि० बलेन शालते शाल-णिनि। बलविशिष्टे स्त्रियां ङीप्। [इन्द्रे हला०। बलनिसूदनोऽत्र।

बलसूदन पु० बलं तन्नामकमसुरं सूदयति सूद-ल्यु।

बलस्थिति स्त्री स्था-आधारे क्तिन् ६त०। शिबिरे त्रिका०।

बलहन् पु०बलनामासुरं बलं वा हन्ति हन-क्विप्। बलारातौ १इन्द्रे २क्षेत्रधातौ शब्दर०। ३बलरामे हरिवं० १११ अ०।

बला स्त्री० बलं कार्य्यत्वेनास्त्यस्याः। (बालियड़ा) १क्षुपभेदे, अमरः। "बलाचतुष्टयं शीतं मधुरं बलकान्तिकृत्। स्निग्धं वातहरं सारं पित्तासृक्षतनाशनम्। बलामूलत्वचूर्णं पीतं सशीरशर्करम्। भूत्वातिसारं हरति दुष्टमेतन्न संशयः" भावप्र०। विश्वामित्रेण रामाय दत्ते २अस्त्रविद्याभेदे अतिबलशब्दे दृश्यम्।

बलाका स्त्री० बल-संवरणे आक। १वकपङ्क्तौ २वके विषकण्ठिकायां ३वकभेदे ४कासक्यां च शब्दत०।

बलाकाश्व पु० यजकन्दपुत्रे ऋषभेदे हरिवं० ७अ०।

बलाकिन् त्रि० बलाका+व्रीह्यादित्वात् इनि। १बलाकायुक्ते स्त्रियां ङीप् २धृतराष्ट्रपुत्रभेदे पु० भा० आ० ६७अ०।

बलाङ्क पु० बलयुक्तमङ्कमस्य कप्। वस्त्रकाके हेमच०।

बलाढ्यिता स्त्री ३त०। बलरामपीड़ायां शब्दरत्ना०।

बलाट पु०बलाय तद्दानाय घटति गच्छति घट-अच्। कुहे (छग) हेमच०।

बलात् अव्य० बलं सामर्थ्यं कारयत्वेनास्यति अस-क्विप्। पृषोदित्वाद्धः। पञ्चम्यन्तबलशब्देनास्य न समानार्थता बलात्कार इत्यादिसिद्धये तस्यावश्यमङ्गीकार्य्यत्वात्। [च।

बलात्कार पु०बलात्+कृ-घञ्। बलपूर्वककरणे, हठात्करणे

बलात्मिका स्त्री० बलमेवात्मा स्वरूपं कारयत्वात् यस्याः कप् अत इत्त्वम्। (हातिशुड़ा) वृश्चिकपत्नीवृक्षे शब्दर०

बलादि पु० चतुर्थ्यां यः प्रत्ययनिमित्ते १शब्दगणे स च गणः पा०ग०उक्तो यथा "बल चुल नख दल वट वकुल उरच पुल मूल उल डुल वन कूल"। अस्यार्थे या १मतुप्प्रत्यय निमित्ते २शब्दगणे च स च गणः पा०ग०सूत्रे उक्तो यथा "बल उत्साह उद्भास उद्हास उद्हास शिखा कुल चूड़ा सुख कूल व्यायाम व्यायाम उपयाम आरोह अवरोह परिघाह युद्ध"।

बलाढ्या स्त्री० बलाय आढ्या। (बेलियाड़ा) क्षुपभेदे राजनि

बलाध्यक्ष पु० ६त०। सेनापतौ मनु० ७।८६।

बलानुज पु० अनुजायते अनु+जन-ड ६त०। श्रीकृष्णे।

बलाबलाधिकरण न०बलञ्च अबलञ्च ते अधिक्रियेते अस्मिन् अधि+कृ-आधारे ल्युट्। आकाङ्क्षानाकाङ्क्षारूपबलाबलयोर्निर्णायके जैमिन्युक्ते न्यायभेदे यथा "सा वैश्वदेव्यामिक्षा भवति वाजिभ्यो वाजिनम्" इत्यत्र वैश्वदेवयागसाधिक्षात्वितत्वेन वाजिनाकाङ्क्षेति न तत्र तद्गान्वयः वेदान्तप०।

बलामोटा स्त्री० बलमामोटयति आ+मुट-अच्। नागदमन्याम् भावप्र०

बलाय पु० बलस्यायः स्थानम्। बदरवृक्षे शब्दच०।

बलारांति पु० बलस्य तन्नामासुरस्यारातिः। इन्द्रे अमरः। बलशत्रु प्रभृतयोऽत्र। [ण्वुल्। पानीयामलके शब्दच०।

बलालक पु० बलाय सामर्थ्याय लसति पर्य्याप्नोति लस-अण् उप०सम०। कफधातौ हेमच० "गौरवं कफसंस्रावोऽरुचिस्तम्भोऽग्निमार्दवम्। माधुर्य्यमपि चास्यस्य बलासावस्ते हृदि स्थिते"

बलाहकन्द पु० बलं सामर्थ्यमाहरति आ+हृ-क तादृशः कन्दः। गुलञ्चकन्दे राजनि०।

बलि पु० बल-इन्। १ पूजायाम् २उपहारे, "दद्यात् स्त्री बलिं चैव निजगात्रासृगुक्षितमिति" चण्डी ३राजग्राह्ये अमरः ४चामरदण्डे, ५दक्षस्यकर्त्तव्यपशुयज्ञमध्ये भागे, ६भूतयज्ञे, हेमच०। "बलिकर्म ततः कुर्य्यादिति" स्मृतिः।

विरोचनसुते दैत्यभेदे च "येन बद्धो बलीराजा दानवेन्द्रो महाबलः" रघावन्यनमन्तः। ओजरया स्रवत्यर्मणि स्त्री० ङीप्। "षट्त्रयस्तु यदा पश्येत् बलीपलितमात्मनः" इति मनुः। ओदरावयवभेदे "बलिवयं चारु बभार बाला" इति कुमारः। दनुपुत्रे कङ्कराकारे मांसपिण्डे, वैद्यकम् चर्मणशब्दे दृश्यम्। दृष्टदारुभेदे च (पाड़)स्त्री० स्वार्थे क। बलिका तत्रार्थे अतिबलायाञ्च राजनि०। १०ययातिवंशप्रसूतपौरवपुत्रे विष्णु पु०। दानवभेदेषु भाग० ४स्क० दशमा।

वैश्वदेवबलिकरणप्रकारः मार्क० पु० उक्तो यथा। "ततोऽग्नेस्तर्पणं कुर्याद्दद्याच्च बलिमित्यथ। ब्रह्मणे षट्समध्ये तु विश्वेदेवेभ्य एव च। धन्वन्तरिं सहस्रिद्य प्रागुदीच्यां बलिं क्षिपेत्। प्राच्यां शक्राय, याम्यायां यमाय बलिमाहरेत्। प्रतीच्यां वरुणायैव सोमायोत्तरतो बलिम्। दद्याद्वास्तु विधात्रे च बलिं द्वारे षडस्य च। अर्यम्णे च बलिं दद्यात् षट्टेभ्यश्च समन्ततः। नक्तञ्चरेभ्यो भूतेभ्यो बलिमाकाशतो हरेत्। पितृणां निर्वपेच्चैव दक्षिणाभिमुखस्थितः। षड्डस्यत्परो भूत्वा शुचिमाहितमानसः। ततस्तोयसमादाय तिलैराचमनाय वै। स्वानेषु निक्षिपेत् प्राज्ञस्तान् तद्दिश्य देवताः। एवं षट्बलिं हुत्वा षट्टे षट्टपतिः शुचिः। आप्यायनाय भूतानां कुर्याद्दुत्सर्गमादरात्। श्वभ्यश्च श्वपचेभ्यश्च बलीभ्यश्च वपेद्भुवि। वैश्वदेवं हि नामैतत् सायं प्रातरुदाहृतम्"।

देवोद्देश्यकबलिविशेषादिकं यथा

"साधकैर्बलिदानेषु याज्याः सर्वसुरस्य तु। पक्षिणः कच्छपा याज्या मत्स्या नवविधा मृगाः। महिषो गोधिका गावश्छागो वभ्रुश्च शूकरः। खड्गश्च कृष्णसारश्च गोधिका शरभो हरिः। शार्दूलश्च नरश्चैव खगाश्चरुधिरन्तथा। चण्डिकाभैरवादीनां बलयः परिकीर्तिताः। बलिभिः साध्यते शक्तिर्बलिभिः साध्यते सुखम्। बलिदानेन सततं जयेत् शत्रून्नृपान्नृपः। मत्स्यानां कच्छपानाञ्च रुधिरैः सततं शिवा। मासैकं तृप्तिमाप्नोति याज्यैर्मांसांस्तु त्रीनथ। मृगाणां शोणितैर्देवी नराणामपि शोणितैः। अष्टौ मासानवाप्नोति तृप्तिं कल्याणदा च सा। गोगोधिकानां रुधिरैर्वार्धिकीं तृप्तिमाप्नुयात्। कृष्णसारस्य रुधिरैः शूकरस्य च शोणितैः। आप्नोति सततं देवी तृप्तिं द्वादशवार्षिकीं। महिषाणाञ्च खड्गानां रुधिरैः शतवार्षिकीम्। तृप्तिमाप्नोति परमां शार्दूलरुधिरैस्तथा। सिंहस्य शरभस्याथ खगानाञ्च च शोणितैः। देवी तृप्तिमवाप्नोति सहस्रं परिपत्सरान्। मांसैरपि तथा प्रोक्तैरुधिरैर्वेश्च यावती। कृष्णसारस्तते खड्गं तथा मत्स्यञ्च रोहितम्। वार्धीनसयुगञ्चापि फलं तेषां पृथक् शृणु। कृष्णसारस्य मांसेन तथा खड्गेन चण्डिका। वर्षाणि पञ्च शतान्येव तृप्तिमाप्नोति केवलाम्। रोहितस्य तु मत्स्यस्य मांसैर्वार्धीनसस्य च। तृप्तिमाप्नोति वर्षाणां शतानि त्रीणि सत्तमा। त्रिःपिबेच्छोणितं यस्तु त्रीणि वर्षाणि मानवः। वार्धीनसः प्रोच्यतेऽसौ हव्ये कव्ये च सत्कृतः। नीलयोर्वो रक्तयोर्वा कृष्णवर्णाद्विनिःसृतः। वार्धीनसः स्मृत एषोऽयो मम विष्णो रतिप्रियः। "मन्त्रपूतं शोणितन्तु पीयूषं जायते सदा। मस्तकस्थापि तस्यापि मांसस्थापि सदा शिवा। तस्मात् पूजने दद्याद्बलेः शोणितं शोणितम्। भोज्ये होमे च मांसानि नियुञ्जीयाद्विचक्षणः। पूजासु नाऽऽमं मांसानि दद्याद्वै साधकः क्वचित्। कृते तु शोणितं शोणमसृक् तत्तु जायते। कृष्णाखुसिन्धुदण्डञ्च मत्स्यमांसमेव च। एते बलिसमाः प्रोक्ता देव्यै नित्यं सदा। चन्द्रहासेन कर्त्रा वा छेदनं तस्य मिष्यते। दात्रासिधेनुकक्रकचसङ्घातेषु मध्यमम्। क्षुरक्षुरप्रभल्लैश्चाधमं परिकीर्त्तितम्। एभ्योऽन्यैः शक्तिबाणप्रायैर्बलिश्छेद्यः कदापि न। नास्ति देवी बलिं तन्तु दाता स्वयमवाप्नुयात्। छागेन चण्डेदेवेद्यस्तु प्रोक्तिं साधकः पशुम्। पक्षिणं वा ब्रह्मरन्ध्रां सोऽवाप्नोति सुदुःसहाम्। नामन्त्र्य खड्गन्तु बलिं नियुञ्जीत विचक्षणः।" "पशूनां पक्षिणाञ्चापि नराणाञ्च विशेषतः। स्त्रियं न दद्यात्तु बलिं दत्त्वा नरकमाप्नुयात्। सङ्घातबलिदानेषु योक्तिं पशुपक्षिणोः। बलिं दद्यान्नात्मनोन्तु स्वस्रा सङ्घातपूजितम्। न त्रिमासीयकाच्यूनं पशुं दद्यात् शिवाबलिम्। न च त्रिपक्षकाच्यूनं प्रदद्याद्वै पतत्रिणम्। काणाभ्यङ्गादिदुष्टन्तु न पशुं पक्षिणन्तथा। देव्यै दद्याद्यथामन्त्रं तथैव पशुपक्षिणौ। छिन्नलाङ्गूलकर्णादिभग्नदन्तन्तथैव च। भग्नशृङ्गादिकञ्चापि न दद्यात्तु कदाचन।" "नारं सव्ये शिरोरक्षं देव्याः सम्यक् निवेदयेत्। खागन्तु वामतो दद्यान्न शिरं वितरेत् पुरः। पक्षिणं वामतो दद्यादन्यतो देह

शोणितम्। क्रव्यादीनां पशूनान्तु पक्षिणाञ्च शिरोऽञ्जनम्। वामे निवेदयेत् पार्श्वे जलजानाञ्च सर्व्वशः। कृष्णसारस्य कूर्मस्य खड्गस्य शशकस्य च। याङ्घाया-मथ मत्स्यानामथ एव निवेदयेत्। सिंहस्य दक्षिणे दद्यात् खड्गिनोऽपि च दक्षिणे। पृष्ठदेशे न दद्यात्तु शिरो वा स्कंधरं बलेः" कालिकापु० नानास्थानीयम्।

"बलिदानेन विप्रेन्द्र! दुर्गाप्रीतिर्भवेन्नृणाम्। हिंसाजन्यञ्च पापञ्च लभते नात्र संशयः। छत्मर्गकर्त्ता दाता च होता भोक्ता च रक्षकः। चत्वारश्चाङ्गिरोद्वा च सप्तैते बधभागिनः। यो यं घ्नन्ति स तं घ्नन्ति चेति वेदोक्तमेव च। कुर्व्वन्ति वैष्णवीं पूजां वैष्णवास्तेन हेतुना" ब्रह्म० ब्रह्म० ६१। ६२ अ०। बलिदाननिन्दा यथा

"पार्वत्युवाच। ये त्वमार्चनमिच्छन्ति प्राणिहिंसन तत्पराः। तत् पूजनं ममामेध्यं यद्दोषात्तदधोगतिः। मदर्थं शिव! कुर्वन्ति तामसा जीवघातनम्। चाकल्पकोटि निरये तेषां वासो न संशयः। मम नाम्नाथ वा यज्ञे पशुहत्यां करोति यः। क्वापि तन्निष्कृतिर्नास्ति कुम्भीपाकमवाप्नुयात्। दैवे पैत्रे तथात्मार्थं यः कुर्य्यात् प्राणिहिंसनम्। कल्पकोटिशतं यावत्तो! रौरवे स वसेत् ध्रुवम्। यो मोहान्मानवैर्दैहिंस्यां कुर्य्यात् सदाशिव!। एकविंशतिजन्यः स तत्तद्योनिषु जायते। अस्तु यज्ञे पशून् हत्वा कुर्य्यात् शोणितकर्दमम्। स पचेन्नरके तावद् यावच्छोणानि तस्य वै। हन्ता कर्त्ता तथोत्सर्गकर्त्ता धर्त्ता तथैव च। हत्वा भवन्ति सर्व्वे ते ध्रुवं नरकगामिनः। ममोद्देशे पशून् हत्वा सरक्तं पातयत्क्षितौ। यो मूढः स तु पूयोदे वसेद् देव! न संशयः। देवतान्तरमुद्दिश्याजेन खेच्छया तथा। हत्वा जीवांस्ततो मोहात् नित्यं नरकमाप्नुयात्। यूपे बद्धा पशून् हत्वा यः कुर्य्याद्रक्तकर्दमम्। तेन चेत् प्राप्यते स्वर्गो नरकं केन गम्यते। उपदेष्टा वधे हत्वा कर्त्ता धर्त्ता च विक्रयी। उत्सर्गकर्त्ता जीवानां सर्व्वेषां नरकं भवेत्। मध्यस्थस्य वधावापि प्राणिनां क्रयविक्रये। तथा दृष्ट्वा सूनायां कुम्भीपाकोभवेद् ध्रुवम्। स्वयंकामाशयो भूत्वा मोहज्ञानेन विमोहितः। हन्त्यन्यान् विविधान् जीवान् कुर्य्यान्नरक्षम यद्धर!। तद्वाक्यंश्रवणस्यैव तत्रातिदारुणस्यदाम्। क्षणिरादुर्वे भवेद्यावो मृतः स नरकं व्रजेत्। देवयज्ञे पितृश्राद्धे तथा नाकृत्यकर्मणि। तस्यैव नरके वासो यः कुर्य्या-ज्जीवघातनम्। मद्याजेन पशून् हत्वा यो भक्षेत् सह बन्धुभिः। तद्गात्रलोमसंख्याब्दैरसिपत्रवने वसेत्। चावयोरन्यदेवानां नाम्ना च परकर्मणि। यः संपोष्य पशून् हन्यात् सोऽन्धतामिस्रमाप्नुयात्। पशून् हत्वा तथा त्वां मां योऽर्चयेन्मांसशोणितैः। तावत्तन्नरके वासो यावच्चन्द्रदिवाकरौ। निर्विघ्नमस्तु तत्सर्व्वं तत् बह्वल्पेषु यत् कृतम्। यज्ञिनं यज्ञे प्रभो! प्रभो! जीवहत्या भवेद्ध्रुवम्। यज्ञमारभ्य चेत् यज्ञः कुर्य्याद्वै पशुघातनम्। स तदाऽधोगतिं गच्छेदितरेषान्तु का कथा। चावयोः पूजनं मोहाद्ये कुर्य्युर्मांसशोणितैः। पतन्ति कुम्भीपाके ते भवन्ति पशवः पुनः। फलकामास्तु वेदोक्तैः पशोरालभनं मखे। पुनस्तत्तत् फलं भुक्त्वा ये कुर्वन्ति पतन्त्यधः। स्वर्गकामोऽश्वमेधं यः करोति निगमाज्ञया। तद्भोगान्ते पतेद्भूयः स जन्मनि भवार्णवे। ये हताः पशवो लोकैरिह स्वार्थेषु कोविदैः। ते परत्र तु तान् हन्युस्त्वा खड्गेन शङ्कर!। चात्मपुत्रकलत्रादिसम्पत्तिकुलेच्छया। यो दुरात्मा पशून् हन्यात् चात्मादीन् यातयेत् स तु"। जानन्ति नो वेद पुराणतत्त्वं ये कण्ठाः पण्डितमानयुक्ताः। लोकाधमास्ते नरके पतन्ति कुर्वन्ति मूर्खाः पशुघातनञ्चेत्। वेदज्ञानिनो मन्दधियोऽज्ञताया भवे पशुं घ्नन्ति न धर्मशास्त्रम्। जानन्ति नार्कं नरकं न सक्तिं गच्छन्ति घोरं नरकं नराक्षे। मूढा अकार्य्यां न विदन्ति यात्रा न धर्ममार्गं परमार्थतत्त्वम्। पापं न पुण्यं पशुघातका ये पूयोदवासो भवतीह तेषाम्। जीवात्मकर्म्मां न विदन्ति मूढा ज्ञानाच्च वेदस्तृपचिनोन धर्मम्। चार्त्तां भवे प्राणिवधं तु कुर्य्युस्ते यान्ति मर्त्याः खलु रौरवाख्यम्। ततस्तु खलु जन्तूनां घातनं नो करिष्यति। मुक्तात्मा धर्मवान् ज्ञानी प्राणान्नैव मानवः। यदीच्छेदात्मनः क्षेमं त्यक्त्वाऽज्ञानं तदा नरः। जीवान् जानपि नो हन्यात् बहुटापत्र एव चेत्। सम्पत्तौ च विपत्तौ वा परलोकेच्छुकः पुमान्। कदाचित् प्राणिनो हन्यां न कुर्य्यात् तत्त्ववित् सुधीः। मानवो यः परत्रेह तर्त्तुमिच्छेत् सदाशिव!। सर्वविघ्नमयत्नेन न कुर्य्यात् प्राणिनां वधम्। वधाद्रक्षति यो मर्त्यो जीवान् तत्त्वज्ञ! धर्मवित्। किं पुण्यं तस्य वक्ष्येऽहं ब्रह्महत्यं स तु रक्षति। यो रक्षेत् घातनाद्यज्ञे! जीवमात्रं दयापरः। कृष्णप्रियतमो नित्यं सर्व्वरक्षां करोति यः। एकस्मिन्रक्षिते जीवे त्रैलोक्यं तेन रक्षि-

तम्। यथात् शङ्कर! यैर्येन तस्माद्दत्तम् यातयेत्। पशुहिंसाविधिर्यत्र पुराणे निगमे तथा। उक्तो रजस्तमोभ्यां स केवलं मनसापि वा। नरकक्लमसेवार्थं संसारीव प्रवर्त्तितः। तयोक्तकर्मभोगेन गमनागमनं भवेत्। सत्त्वेन सात्त्वतप्रन्थे स विधिर्नैव शङ्कर!। प्रवृत्तितो निवृत्तिस्तु यद्यपि सात्त्विकी क्रिया। एवं नानाविधं कर्म पशोरालभनादिकम्। कामाशयः फलाकाङ्क्षीकृत्वाऽज्ञानेन मानवः। पशून्ज्ञानाग्निना क्षित्वा भक्त्याग्नौ तामसीं सदा। यमभीतिहरं भक्त्या यदि गोविन्दमाप्नुयात्।" पाद्मोत्तरखण्डे १०४ १०५ अ०।

बलिध्वंसिन् पु० बलिं ध्वंसयति खस्थानात् पातयति ध्वंस-णिच्-णिनि। विष्णौ वामनावतारेण हि तस्य तथात्वम्। तत्कथा च वामनपु० २२ अ० दृश्या।

बलिनन्दन पु० ह्रत० बाणासुरे शब्दर०। [चर्मवति अमरः।

बलिन(भ) त्रि० बलि+अस्त्यर्थे-इन भ वा। जरया शिथिल-

बलिन् त्रि० बलमस्त्यस्य इनि। १बलवति। २वृद्धे, ३महिषे, ४वृषभे, ५शूकरे, ६कन्दहृक्षे, ७कफे पु० जटा० टप्रामे पु० हेम०। ८बलरामे शब्दर० (वेलियाड़ा) १०युवे स्त्री ङीप् शब्दच०।

बलिपुष्ट पु० बलिना वैश्वदेवबलिद्रव्येण पुष्टः पुष-क्त १त०। काके अमरः स्त्रियां ङीप्।

बलिपोदकी स्त्री उपोदक्यां राजनि०।

बलिप्रिय पु० बलिनं प्रीणाति प्री-क। लोध्रवृक्षे शब्दच०।

बलिबिम्ब पु० रैवतकमनोःपुत्रभेदे भाग०८।१३।२।

बलिभुज् पु० बलिं वैश्वदेवद्रव्यम् अदनस्यदत्तबलिं भुङ्क्ते भुज-क्विप्। काके अमरः।

बलि(ली)मुख पु० बलि(ली)युक्तं सुखमस्य बाक०त०। वानरे अमरः। [वति। २वृद्धे पु० राजनि०।

बलिष्ठ त्रि० अतिशयेन बली बलिन्+इष्ठन्। १अतिबलवति

बलिष्णु त्रि० बल-संवरणे इष्णु। अपमानिते उणा०।

बलिसद्मन् न० ह्रत०। पातालेअमरः बलिमन्दिरादयोऽप्यत्र।

बलीक पु० न० बालयति आदत्तेति बल-ईकन् नि०। पटस्य प्रान्ते (आँच) अमरः। [युते स्त्रियां ङीप्।

बलीयस् त्रि० अतिशयेन बली बलिन्+ईयसु। अत्यन्तबल-

बलीवर्द पु० ईं लक्ष्मीः व-विच् वरौ ईवरौ ददाति दा-क ईवर्दः बली चासौ ईवर्दश्चेति। वृषे अमरः। ततः शुभ्रा० अपत्ये ढक्। बालीवर्देय तदपत्ये पुंस्त्री०

बलूल त्रि० बल+विच्छा० वा ऊच् ऊठ्। बलयुक्ते।

बलोत्कटा स्त्री १स्कन्दानुचरमातृकाभेदे भा० शा०४५ अ०। २बलेनोत्कटे त्रि०।

बल्य न० बलाय हितं बल+यत् १प्रधानधातौ शुक्रे, २बल-साधने च १अश्वगन्धायाम्, ४अतिबलायां, ५शिखण्डीवृक्षे ६प्रसारिण्यां च स्त्री राजनि०। बला०चतुरर्थ्यां यत्। ७बल-निर्हरे त्रि० ८बहुबलभुक्ते पु० त्रिका०। [तृणभेदे हेमच०

बल्लजा स्त्री० बल-कप् तं वल्लति वल्ल-गतौ अच्। उक्षणे

बल्ह भृतौ दाने, वधे, च सक० याचने दिक० भ्वा० आत्म० सेट्। बल्हते अबल्हिष्ट बबल्हे।

बल्हि पु० बल्ह-इन्। १क्षत्रियभेदे २जनपदभेदे स्वार्थे क तत्रार्थे। ततः कोपधत्वात् भवे अण्। बाल्हिक त्रिकुनि न०।

बव पु० प्रथमे तिथ्यर्द्धरूपे करणभेदे करणशब्दे दृश्यम्।

बष्क(ल्क)यि(यो)नी स्त्री बष्क गतौ अयन् पृषो० मस्य वः सस्य वा णत्वम्। बष्क(ल्क)योऽस्त्यस्यां इनि ङीप् वमध्यत्वे णत्वम्। चिरप्रसूतायां गवि अमरः। बष्क(ल्क)वं नयतीति नी-ड नौ० ङीप् वमध्यत्वे पूर्व० णत्वम्। बष्क(ल्क)वयी(नी) रत्यर्थत्व स्त्री।

ब(व)ह ह्रस्वौ भ्वा० आत्म० अक० सेट् इदित्। बं(वं)हते अबं(वं)हिष्ट। बबंहे महिषाश्वादयोऽप्यादिरिति पाणिनीयाः। दन्त्योष्मादिरिति बोपदेवः।

बहुल त्रि० बहि-कलच् नलोपश्च १प्रचुरे २बहुशब्दार्थे च।

ब(व)हु त्रि० बं(व)हि-कु नलोपः। १विप्रकृष्टजनेकसङ्ख्यान्विते, २विपुले च। ब(व)ह्वादि० स्त्रियां वा ङीप्।

बहुत्वं च त्रित्वपर्य्यवसायि कपिञ्जलन्यायात् अपेक्षाबुद्धि-शेषजन्यत्वं तच्च पर्य्याप्त्या सर्वत्र वर्त्तते समवायेन प्रत्येकं वृत्तिमत्। अस्य संख्यावत् कार्य्यम् तेन बहुयः बहुत्व बहुतिथ इत्यादि। [४दात्यूहे खगे ५जलखातके च मेदि०

बहुक पु० बह+संज्ञायां कन्। १कर्कटे २खर्ये ३खर्जूरवृक्षे

ब(व)हुकण्टक पु० ब(व)हूनि कण्टकान्यस्य। १क्षुद्रगोक्षुरे। २यवासे (गोखुरी) ३छिन्नाशे ४चन्द्रिकायां स्त्री ङीप्-भेदे राजनि०। [कण्टकारिकायाम् राजनि०।

ब(व)हुकण्टा स्त्री ब(व)हवः कण्टाः कण्टकाः यस्याः।

ब(व)हुकन्द पु० ह्रस०। १शूरणे २कर्कट्यां स्त्री० राजनि०।

बहुकर त्रि० ब(व)हूनि किरति कृ-अच्। (फराश) १सभामार्जनकरे खनपो अमरः। करणे अण्। २सम्मार्जन्यां स्त्री हेम० गौरा० ङीष्। क-अच् ह्रस्व०। २बहुके त्रिका०। ४अनेककार्य्यकरे त्रि०। [कण्टकीम् राजनि०।

ब(व)हुकर्णिका स्त्री० ब(व)हव कर्णा इव पर्णान्यस्य। वायु

बहुकूर्च पु० बहूनि कूर्चान्यस्य । मधुनालिकेविडे राजनि० ।

ब(व)हुगन्ध पु० ह्व० । १कन्दुरुके । २रक्तके, (तैलपात्रे) न० । ३चम्पकलिकायां ४यूथिकायां ५कृष्णजीरके च स्त्री राजनि०

बहुगन्धदा स्त्री० ब(व)हुगन्धं ददाति दा–क । मुरामदे । राजनि० ।

ब(व)हुग्रन्थि पु० ह्व० । झाबुके (झाऊ) । शब्दर०

बहुच्छिद्रा स्त्री ब(व)हु यथा स्यात् छिद्यते या छिद–क्त तस्य दस्य च नः । कन्दगुडूच्याम् राजनि० ।

बहुतरकणिश पु० ह्तत० । रागौधान्ये राजनि० ।

बहुतिक्ता स्त्री ब(व)हुतिक्तो रसोऽस्याः । काकमाच्याम् राजनि० ।

ब(व)हुतिथ त्रि० ब(व)हूनां पूरणः ब(व)हु+डट् तिथुक् च । अनेकसंख्याते, "काले गते बहुतिथे" रघुः ।

ब(व)हुत्र अव्य० ब(व)हुषु त्रल् । अनेकेषु दिग्देशकालेषु ।

ब(व)हुत्वच(क्) पु० ह्व० वा कप् । भूर्जपत्रवृक्षे शब्दर० कबलः हेमच० ।

ब(व)हुदुग्ध पु० ब(व)हूनि दुग्धानीव चूर्णानि शुभ्रवर्णत्वात् यस्य । १गोधूमे राजनि० । २ प्रचुरक्षीरवत्यां स्त्रियां, स्त्री हेमच०।वा कप् अत इत्त्वम् । बहुदुग्धिका क्षुद्रक्षीरवृक्षे स्त्री शब्दच० ।

ब(व)हुधा अव्य० ब(व)हु+प्रकारे–धाच् । अनेकप्रकारे

ब(व)हुधार न० ह्व० । यज्ञपात्रे राजनि० तस्य षट्कोणत्वात् सर्वत्र कोणेषु धारायुक्तत्वात्तथात्वम् ।

बहुनाड़ीक पु० ह्तत० । अस्थाङ्गत्वात् कप् । १अनेकदण्डयुते २दिवसे ३शस्त्रे च त्रि०कौ०।स्वार्थे न कप् न वा ह्रस्वः । बहुनाड़ी इत्येव अनेकान्तयुते एवं तन्त्रीशब्देऽपि ह्रस्वकपोर्भावाभावौ उह्यौ ।

बहुनाद पु० ह्व० । शङ्खे राजनि० ।

ब(व)हुपत्र पु० ह्व० । १पनसवृक्षे २अनेकपर्णयुक्ते त्रि० । ३सिद्धिन्यां ४शतमूलायां ५तुलस्यां ६बृहत्यां,७गोरक्षदुग्धायां, ८जतुकायाच स्त्री राजनि० । गौरा० ङीष् । ९तरुणीपुष्पे स्त्री टाप् । ततः संज्ञायां क । बहुपत्रिका भूम्यामलक्यां, मेषिकायां, सप्तायतावर्त्यां च राजनि० ।

ब(व)हुपर्ण पु० ह्व० । १सप्तच्छदवृक्षे तस्य प्रतिपर्णं सप्तसप्तपर्णत्वात् तथात्वम् । २अनेकपर्णयुक्ते त्रि०३मेषिकायां स्त्री ङीष् । ततः संज्ञायां क । बहुपर्णिका भूम्यामलक्यां स्त्री टाप् । राजनि० ।

ब(व)हुपाद(द्) पु० ह्व० वा अन्त्यलोपः । वटवृक्षे हलायु० अमरः । यदलः राजनि०।तस्यानेकशिफावत्त्वात्तथात्वम् ।

ब(व)हुपुत्र ब(व)ह्वः पुत्रा–इव पर्णान्यस्य ।१सप्तच्छदे शब्दच० अनेके पुत्रा इव मूलान्यस्य ।२शतमूल्यां स्त्री ङीष् रत्नमा० ह्व० । ३अनेकतनयान्विते त्रि० ।

ब(व)हुपुष्प पु०ह्व० । निम्बवृक्षे । संज्ञायां कन् अत इत्त्वम् । बहुपुष्पिका धातक्यां स्त्री राजनि० ।

ब(व)हुप्रज त्रि० ह्व० । १बहुसन्तानवति । २शूकरे पु० हेम० प्रजातल्पप्रचुरदृष्टत्वात् ३सप्तच्छदे पु० राजनि० ।

बहुप्रतिज्ञ पु०७त० । अनेकविषयकप्रतिज्ञायुक्ते व्यवहारे यथा मदीयं रूपकमनेन गृहीतं, सुवर्णंहार्य, कस्मै निश्चित्य न ददाति,मदीयं क्षेत्रमपहरतीत्येवमादीनां पञ्चत्वमिष्यत एव किन्तु क्रियाभेदात् क्रमेण व्यवहारो न युगपदित्येव "बहुप्रतिज्ञं यत् कार्यं व्यवहारेषु निश्चितम् । कामं तदपि गृह्णीयात् राजा तत्त्वबुभुत्सया" कात्यायनोक्तेः मिता० [अमरः ।

बहुप्रद त्रि०बहूनि प्रददाति प्र+दा–क । दानशौण्डे वदान्ये

ब(व)हुफल पु०ह्व० । १कदम्बवृक्षे मेदि०२विकङ्कते, ३तेजःफले च राजनि० । ४अनेकफलयुक्ते त्रि०।५माषपर्ण्यां,६कपिकायां, ७काकमाच्यां, ८त्रिपुस्यां,(यशा)९क्षुद्रकारवेल्लयां, स्त्री राजनि० १०भूम्यामलक्यां भावप्र०स्त्री । ११आमलक्यां स्त्री ङीष् मेदि० १२कदलेवृक्षे राजनि० । संज्ञायां कन् इत्त्वम् । बहुफलिका । भूमिवर्द्धां स्त्री राजनि० ।

बहुफेना स्त्री ह्तत० । शातलायां राजनि० । [बले त्रि०

बहुबल पु० ह्व० । १सिंहे राजनि० स्त्रियां ङीष् । २अतिबहुबली स्त्री निश्चक० । डोडिचुपे राजनि० ।

ब(व)हुमञ्जरी स्त्री० ह्व० संज्ञात्वात् न कप् । हलक्षाम् भावप्र० । [युक्ते त्रि० ।

ब(व)हुमल पु० ह्व० । १सीसके रत्नमा० । २अनेकमलबहुमार्ग न० ७त० । १चत्वरे हेमच० । २अनेकपथयुते त्रि० ।

ब(व)हुमूर्त्ति स्त्री ह्व० । १वनकार्पासे शब्दच० । २नानाकारयुते त्रि० । [तथात्वम् ।

बहुमूर्ध्वन् पु० ह्व० । विष्णौ सहस्रशीर्ष्णत्वात्तस्य

ब(व)हुमूल त्रि० ह्व० । १अनेकमूलयुते । २शिग्रौ ३क्षुद्रसरे पु०राजनि० । ४भाकन्द्यां ५शतावर्य्यां स्त्री टाप् । ६वनजागले त्रि० ङीष् राजनि० । ७नागभेदे भा० आ० ३५अ० । संज्ञायां कन् । बहुमूलक उशीरे न० भावप्र० ।

बहुमूल्य त्रि० ह्व० । महार्घे महाधने अमरः । [राजनि०।

बहुरन्ध्रिका स्त्री ह्व० वा कप् अत इत्त्वम् । मेदायाम्

ब(व)हुरसा स्त्री० ह्व० । १मङ्गल्यौषधिभेदे राजनि० । २नानारसवति त्रि० ।

बहुरुहा स्त्री बहु रोहति रुह-क । वन्द्यगुडूच्यां राजनि०

ब(व)हुरूप पु० ह्व० । १सर्जरसे (धुना) अमरः । २शिवे, ३विष्णौ ४सरटे ५कामे मेदि० ६केशे ७अक्षणि शब्दर० । ८बहुभेदे त्रिका० ९नानारूपवति त्रि० ।

बहुरेतस् पु० ह्व० । अक्षणि चतुर्मुखे शब्दरत्ना० । [ङारा

ब व)हुरोमन् त्रि०ह्व० । १अनेकरोमवति रोमशे । २मेषे पु०

ब(व)हुल त्रि०ब(व)हि-कुलच् त्रि० नलोपः । १अनेकसंख्यान्विते २प्रचुरे । ब(व)हुनि लाति ला-क । ३अग्नौ ४कृष्णपक्षे पु० मेदि० "ब(व)हुलेऽपि गते निशाकरः" कुमारः । ५आकाशे हृषितमरिचे न० ७कृष्णवर्णे ८तद्वति त्रि० ९एलायां १०भीलिकायां ११गवि स्त्री मेदि० । १२देवीभेदे स्त्री कालिकापु० २३अ० अग्निदैवतत्वात् १३कृत्तिकानक्षत्रे स्त्री ब०व० मेदि० ।

बहुलगन्धा स्त्री० ह्व० । एलायाम् राजनि० ।

ब(व)हुलच्छद पु० ह्व० । रक्तगोभाङ्गने राजनि० ।

बहुलवर्ण न० नित्य०क० । जघरमृगजे लवणभेदे राजनि० ।

बहुलाश्व पु० मैथिलवंश्ये नृपभेदे भाग० ९।१३।१६ ।

ब(व)हुलीकृत त्रि० ब(व)हुल+च्वि-कृ-क्त । (आगड़ा) बृषलोपसारणेन राशीकृते कलस्थे १धान्ये, अमरः । २राशीकृतमात्रे च ।

बहुवचन न० बहुत्वं वक्ति वच-ल्यु । "द्वयेकयोर्द्विवचनैकवचने बहुषु बहुवचनम्" पा० उक्ते बहुत्वबोधके जस् प्रभृतौ सुब्विभक्तौ शिप्रभृतौ २तिङ्विभक्तौ च ।

ब(व)हुवल्क पु० ह्व० । प्रियाले । (पियासाल) राजनि० ।

ब(व)हुवारक पु० ब(व)हुनि वारयति वृ, ण्वुल् वा । क्षेत्रजातके (खोना धाता) शब्दर० ।

बहुविध त्रि० ह्व० । नानाप्रकारे अमरः ।

ब(व)हुविस्तीर्णा स्त्री० ब(व)हु यथा तथा विस्तीर्णा वि+स्तृ-क्त । (कुचुर) १कुचिकाद्रवे शब्दच० । २अनेकविस्तारयुते त्रि० । [वीजवति त्रि०

ब(व)हुवीज पु०ह्व० । १धात्रे द्रवे (धाता) शब्दच० । २प्रचुर-

ब(व)हुवीर्य्य पु० ह्व० । १विभीतके, (बयड़ा) जटा० । २तण्डुलीयशाके, (नटेशाक) ३वालुकिद्रवे ४मरुवके च राजनि । ५भूम्यामलक्यां स्त्री राजनि० ।

ब(व)हुव्रीहि त्रि० ह्व० । १अनेकधान्यादियुक्ते "तत्पुरुष ! कर्म धारय येन यस्यां सदा बहुव्रीहिः" उद्भटः । व्याकरणोक्ते प्रादेश अन्यपदार्थप्रधाने २समासभेदे पु० । तल्लक्षणादिकं शब्दशक्तिप्रकाशिकायामुक्तं यथा बहुव्रीहिं बक्ष्यति । "बहुव्रीहिः स्वगर्भैकसम्बन्धित्वेन बोधकः । निरूढया लक्षणया स्वांशत्यागकशब्दवान्" समास इति प्रकृतं तथा च स्वांशस्य निरूढलक्षणया त्यागेन शब्देन घटितः स्वगर्भस्य बाह्यार्थस्य सम्बन्धित्वप्रकारेणान्वयबोधं प्रति समर्थः समासः स्वगर्भतादृशार्थसम्बन्धिबोधेन बहुव्रीहिरित्यर्थः । आरूढवानरोढश्च इत्यत्रारूढोवानरो यमिति व्युत्पत्त्या स्वकर्मकारोढृत्वकर्तृवानरसम्बन्धित्वेन दृश्यं, पीतपयस्कं पात्रमित्यत्र पीतं पयोऽनेन इति रीत्या स्वकरणकपानकर्मजन्यसम्बन्धित्वेन पात्रम्, एकतण्डुलश्चैत्र इत्यत्र एकतण्डुलो येनेति दिशा स्वकर्तृकपाककर्मतण्डुलसम्बन्धित्वेन चैत्रं, दत्तदक्षिणोद्विज इत्यत्र दत्ता दक्षिणा यस्मै इति क्रमेण स्वस्मदानकर्तृदानकर्मदक्षिणासम्बन्धित्वेन द्विजं, पतितपत्रस्तरित्यत्र पतितं पत्रं यस्मादिति विग्रहेण स्वापादानकपतनाश्रयपत्रसम्बन्धित्वेन तरुं, चित्रगुरित्यत्र चित्रा गौर्यस्येति वाक्यानुसारेण चित्राभिन्नस्वगोसम्बन्धित्वेन चैत्रम् रक्तपटः काय इत्यत्र रक्तः पटो यस्येति व्युत्पत्त्या रक्ताभिन्नस्वकर्तृकपटसम्बन्धित्वेन कायम् एवं वाणच्छिन्नकरोनर इत्यादावपि । वाणेन छिन्नः करो येन यस्य वा इत्यादि विग्रहे वाणकरणकस्वकर्तृकच्छिदाकर्मकरसम्बन्धित्वादिना नरादिकं बहुव्रीहिर्बोधयतीति सर्वत्र स्वगर्भतत्तदर्थसम्बन्धित्वेन धर्मिणामवगमः । दक्षिणपूर्वा पूर्वोत्तरेत्यादिदिग्बहुव्रीहिस्थले दक्षिणया पूर्वा यस्या इत्यादिविग्रहेण स्वपार्श्वस्थदक्षिणसहितपूर्वदिक्सम्बन्धित्वादिना आग्नेयीप्रभृतीनां विदिशां बोधः । अस्तिक्षीरा गौरीत्यादावस्ति क्षीरं यस्या इत्यादिविग्रहेणास्तित्ववत्क्षीरसम्बन्धित्वादिप्रकारेण गवादेरवगतिः । इदमंशे विशेषो यत्तत्रैकेषामाप्तेऽस्तीत्यादिकं तिङन्तमन्येषां मते तत्प्रतिरूपकाव्ययमिति । उप समीपे दश येषामिति समीपगणितत्वार्थकषष्ठ्या विग्रहादुपदशाः शकुनय इत्यादौ स्वसमीपगणितदशसम्बन्धित्वेन नवानामेकादशानाञ्च पक्षिणामवगमस्तत्र दशशब्दस्य दशत्वलक्षणया स्वपर्य्याप्तसंख्यासमीपगणितदशत्वसम्बन्धित्वेनैव नवादेर्बोध इति दुर्गप्रभृतयः । अधिका दश येषामित्यादिविग्रहे अधिकदशाः पुरुषा इत्यादावपि स्वपर्य्याप्तसंख्याधिकदशत्वसंख्या-

पर्य्याप्तप्रधिकरणदशसम्बन्धित्वेन नवादिषुंसां प्रत्ययः। द्वौ त्रयो वा वेषां इत्यन्तरार्थकवाशब्देन विषये द्विवाः त्रिवाः इत्यादौ। द्वित्रान्यतरपर्य्याप्तपर्य्याप्तसंख्यासम्बन्धित्वेन हयोक्तयाद्यां वा त्रिवाद्यां बोधः। घटे घटे वा घटत्वमित्यादावतुरोधेन वाकारस्यान्यतरार्थकतया व्युत्पाद्यत्वात् तस्य च द्वयो गतार्थत्वादनुक्तिः पञ्च षड् वा वेषामित्यादिविषयेतु पञ्चधाः पृथग्वा इत्यादावप्युक्तरीत्यैवान्वयोद्वूह्यः। यत्रे तु द्वौ वा त्रयो वा वेषामित्यादिविषये वाशब्दस्य संशयकोटिघटकतया द्विवा इत्यादि बहुव्रीहेः स्वधर्मिकसंशयकोटिनापन्नद्वित्रिसम्बन्धित्वेन द्वित्रभ्रतिबोधकत्वमित्याहुः। वैयाकरणास्तु बहुव्रीहित्रिकरणपठितत्वमेव तत्त्वमित्याहुः तेन उन्मत्तगङ्गाद्यव्ययीभावे नातिव्याप्तिः। तद्भेदौ च तदुक्तातदुक्तसंविज्ञानौ तदुक्तसंविज्ञानशब्दे ६२।७ पृ० उक्तौ तत्र समानाधिकरणपदघटितत्वेव प्रायेण साधुत्वम्।

बहुअत्र पु० ६त०। १घटके शब्दच०। २अनेकप्रत्ययुते त्रि०। "बहुअत्रः घटोले स्यात्" ति० त०। [वृक्षे त्रि०।

ब(ब)हुअल्ल पु० ६त०। १रक्तखदिरे राजनि०। २अनेककीलके

ब(ब)हुअस् अव्य० ब(ब)हु+अस। अनेकवारार्थे 'सुपकले ब(ब)हो नियोजिता' इति कुमारः।

ब(ब)हुआल पु० ब(ब)हुभिः आलते आल-संज्ञायां कर्त्तरि घञ्। १क्षुद्रोदुम्बरे राजनि०। [२अनेकशिखायुक्ते त्रि०

ब(ब)हुशिखा स्त्री० ६त०। १जलपिप्पल्याम्। राजनि०।

बहुशिरस् पु० ६त०। विष्णौ "बहुशिरा बभ्रुः" विष्णुस०।

बहुशृङ्ग पु० ६त०। विष्णौ हेमकरः "चत्वारि शृङ्गा" "त्रयो अस्य पादाः" इत्यादिश्रुत्या तस्य तथात्वम्।

बहुश्रुत त्रि० श्रु-भावे क्त ६त०। अनेकशास्त्रश्रुतियुक्ते मनु ४।१२५। [अनेकशब्देयशीयुक्ते।

बहुश्रेयसी त्रि०। ६त० ईयसुनन्तत्वात् न कप् न वा ह्रस्वः।

बहुसन्तति पु० बहुः सन्ततिर्विस्तारोऽस्य (बेड़वाँस) १संज्ञभेदे शब्दच०। २अनेकसन्तानयुक्ते त्रि०।

बहुसम्पुट पु० ६त०। विष्णुकन्दे राजनि०।

ब(ब)हुसार पु०६त०। १खदिरे राजनि० २अनेकसारवति त्रि०

ब(ब)हुसुता स्त्री० ब(ब)हवः सुता इव मूलान्यस्याः। १यतमूल्याम् अमरः। २अनेकपुत्रयुते त्रि०।

बहूक् स्त्री बहून् स्तुते स्तु-क्विप्। १शूकर्यां शब्दर०। २अनेकप्रशंसकवाचां स्त्रियाञ्च।

ब(ब)हुस्तुति स्त्री० ६त०। १अनेकप्रस्तवयुक्तायां २गवि अमरः। २ब(ब)हुप्रस्तवयुते स्त्रीमात्रे च।

ब(ब)हुस्रवा स्त्री० ब(ब)हु यथा तथा स्रवति स्रु-अच्। १शल्लकीवृक्षे शब्दच०। २अनेकधा स्रावयति त्रि०।

बहूदक न० बहूनि उदकानि यौगपद्यतया यस्य। सन्धानिभेदे कुटीचकशब्दे दृश्यम्। [कालजयुते त्रि०।

बहूपत्य पु० ६त०। १शूकरे २मूषिके च राजनि०। २अने-

बह्वादि विभाषया स्त्रियां ङीष्प्रत्ययनिमित्ते शब्दगणे च गणः पा० ग० उक्तो यथा "बह्व बह्वति अह्वति अंहति अकटि अक्षि (अक्षे) भारि वारि रात्रि रात्रि अहि कपि यदि स्तनि (इतः प्राग्गणात्) अक्ष अराल कपर्द कमल विकट विशाल विस्रुट मस्तु ध्वज चन्द्रभाग (अनद्याम्) कल्याण उदार पुराण अङ्गन् क्रोड़ नख क्षुर शिखा बाल अक्ष शुद" आकृतिगणोयम् "तेन भग गल राग इत्यादि पठ्यम्"।

बह्वाशिन् त्रि० बह्व अत्राति अद-णिनि। १बहुभोजनशीले स्त्रियां ङीप्। "बह्वाशी अल्पहृदय सुनिद्रः शीघ्रचेतनः। प्रभुभक्तश्च शूरश्च ज्ञातव्याः षट् शुनो गुणाः" चाणक्याः। २क्षुत्तरादुपुलभेदे पु० भा० आ० ६७ अ०।

ब(ब)ह्वृच् (च)त्रि०६त०अध्येतर्थे वच्समा०नान्तत्व।।ऋग्वेदे २शास्त्रे न०। ३तदध्येतरि पु०। ४तत्तात्र्यां स्त्री।

बा(वा)ड च प्रावणे सक०स्नाने अक०भ्वा०आ०सेट्। बा(वा)ड़ते अबा(वा)ड़ट। चन्द्रित् चङि न ह्रस्वः अवबाड़त्त।

बाड़व न० बड़वानां समूहः अण्। १घोटकीसमुदाये। बाड़ घञ् वल-घञ् लक्ष ड़ो वा बाड़ो ड़ङ्गिः तं वाति वा-क वा। २आङ्गिरसे पु०। बड़वायां जातः अण्। ३ओर्व्वे वडवाग्नौ कालाग्निभेदे पु०हेमच०। बाड़वाग्न्यादयोऽप्यत्र पु०। [शब्दमा०।

बाड़वेय पु०द्वि०बड़वायाः अपत्यम्-ढक्। अश्विनीकुमारयोः

बाड़व्य न० बाड़व+संज्ञे-यत्। विप्रसमुदाये। [रत्नमा०।

बाडिङ्गन पु० बाड़े डङ्गे रङ्गते रङ्ग-क्यु। वास्तौ

बा(वा)ण पु०वण-शब्दे वण-गतौ वा संज्ञायां कर्त्तरि घञ्। १शरे, २शोभने, (बांट) शविरोधनद्युते ३दैत्यभेदे, ४त्रैवर्णिके च ५शरपुङ्खे ७नीलझिण्टयाम् पुंस्त्री० अमरः टाबपूर्व्वे स्त्री भेदि०। भेदिन्यां दण्डोऽयादिषु पठितः रावणकुटादयश्च वण शब्दे इति धातुप्रकृतिकत्वमाङ्करतोऽस्योभवविधादित्वम्। वल-भावे घञ्। ६शब्दे १०तदधिशब्दैक्यां शरसञ्ज्ञायां स्त्री उपचारात् ११बाणे अमरः।

वाणगङ्गा स्त्री रावणबाणनिर्भेदेन प्रवृत्तायां नद्याम् "सोमेशाद्दक्षिणे भागे बाणेनाभिविभिद्य वै। रावणेन प्रकटिता जलधारातिपुण्यदा। बाणगङ्गेतिविख्याता या स्नानादघहारिणी" वराहपु०। [२८७ पृष्ठे हेमच०।

वाणधि पु० बाणाधीवन्नेऽस्मिन् धा-आधारे कि। इषुधौ

वाणपङ्क्ता स्त्री बाणस्य पङ्क्तोऽवा:५त०। शरपङ्क्तायां राजनि०

वाणपुर न० ६त०। बाणासुरनगरे शोणितपुरे त्रिका०।

वाणमुद्रा स्त्री "यवा हस्तमता बाणास्तवा हस्ताङ्गुरं त्रिदे!। बाणमुद्रा समाख्याता रिपुवर्गनिकृन्तनी" तन्त्रसा० उक्ते षड्भेदे।

वाणयुद्ध न० ६त०। कृष्णेन सह शिवबाणयोश्च बाणस्य युद्धे तच्च युद्धं भाग० १०।६१ अध्यायादौ दृश्यम्।

वा(व)णलिङ्ग।बाणदैत्येन संपूज्य सरिसृज्य नर्म्मदायां निक्षिप्ते शिवलिङ्गभेदे। नर्म्मदासम्भवशब्दे २६८७ पृ० विवृतिः।

वाणवार न० बाणं वारयति वारि-अण् उप०स०। १कञ्चुके शब्दरा० हारा०।

वाणिज्य न०वणिजो भावः, कर्म वा ब्राह्मणादित्वात् यञ्। क्रयविक्रयादौ 'वाणिज्येन गतस्य मे षट्पतेर्वार्त्तापि न श्रूयते' सा०२ परि०।

तत्र विहितनिषिद्धानि भिता० उक्तानि यथा "ज्ञानेन तुलया वापि योऽन्यमर्घं हरेत्। दण्ड्यो दाप्यो हियतं द्विगुणो हानौ च कल्पितम्"। यः पुनर्वणिक् प्रौढिकाप्यासादेः पण्यस्याष्टमभागं कूटमानेन कूटतुलया वाऽन्यथापहरत्यसौ पण्यानां हियतं दण्डनीयः। अपहृतस्य पुनर्द्रव्यस्य द्विगुणो हानौ च दण्डस्यापि द्विगुणहानौ कल्प्ये। "भेषजक्षेत्रबणगन्धधान्यगुडादिषु। पण्येषु प्रक्षिपन् क्षीरं पण्यात् दाप्यस्तु षोडशं" याज्ञ०। भेषजमौषधद्रव्यं क्षेत्रो दृतादिः। गन्धद्रव्यकर्पूरादि आदिशब्दाद्धिङ्गुमरिचादि। एतेषव्यवहारद्रव्यं विक्रयार्थं मिश्रयतः षोडशपणो दण्डः। किञ्च। "सूक्ष्मभाण्डविक्रयायःकाष्ठवल्कलवाससाम्। चलातो जातिकरणे विक्रेयाष्टगुणोदमः" याज्ञ०। "न विद्यते यस्य मूल्यात्तिर्यस्मिन् सूक्ष्मादिके तदजाति तस्मिन् जातिकरणे विक्रयार्थं गन्धवर्णरसान्तरसंस्कारेण वस्तुमूल्यजातीय वादन्यसम्पादने यथा मल्लिकामोदसंस्कारेण कुलिकायां सुगन्धापादनमिति। माजारचर्मणि यवौत्कर्षापादनेन व्याघ्रचर्मेति स्फटिकमणौ यवान्तरकरणेन पद्मराग इति कार्षापणिके स्वर्णे सुवोत्कर्षाधानेन षट्सुवर्णमिति कार्षापणे यवौत्कर्षाधानेन रजतमिति विल्वकाष्ठे चन्दनामोदसंस्कारेण चन्दनमिति कङ्कोले त्वगाख्यं संस्कृतमिति कार्षापणिके वापणि सुवोत्कर्षाधानेन कौशेयमिति विक्रेयस्यापादितस्य दण्डस्य सूक्ष्मादेः पण्यस्याष्टगुणो दण्डो वेदितव्यः। "षड्गुणपरिवर्त्तश्च सारभाण्डस्य लक्षितम्। आधानं विक्रयं वापि नयतो दण्डकल्पना। भिन्ने पण्ये तु षड्भागपण्ये तु शतमुच्यते। द्विपण्ये द्वियतो दण्डो मूल्यद्वयो च द्विगुणमान्" याज्ञ०। षड्गुणं विधानं षड्भेन षड् वर्त्तन इति षड्गुणं करणकम्। परिवर्त्तनं व्यत्ययः। योऽन्यदेयसंज्ञानां पूर्वं करणकं दर्शयित्वा कृत्रिमत्वेनान्यदेव स्फटिकानां पूर्वकरणकं समर्पयति यश्च सारं भाण्डं कस्तूरिकादिकं कृत्रिमं ज्ञात्वा विक्रयणार्थं वा नयति तस्य दण्डकल्पना वक्ष्यमाणा वेदितव्या। कृत्रिमकस्तूरिकादेर्मूलभूते पण्ये भिन्ने न्यूने न्यूनपण्यमूल्यमिति"।

"लोकेऽस्मिन् द्विविधं पण्यं जङ्गमं स्थावरं तथा। षड्विधस्तस्य तु बुधैर्दानादानविधिः स्मृतः। गणिकन्तु क्षितं मेयं क्रियया रूपतः स्त्रियेति" गणितं क्रमुकफलादि क्षितं कुङ्कुमादि मेयं धान्यादि क्रियया वाहदोहादिरूपयोपचयितमन्यमहिष्यादि। रूपतः पण्यस्त्र्यादि स्त्रिया दीप्त्यामरकतपद्मरागादि। इत्येतत् षट् प्रकारमपि पण्यमुक्तं मिता०। तस्य विप्रैरापदि स्वयं कार्य्यत्वं विदधे दक्षः "कुशीदकृषिवाणिज्यं प्रकृतीनां स्वयं कृतम्। आपत्काले स्वयं कुर्वन् नैनसा लिप्यते द्विजः। स्वबन्धूनः पितॄन् देवान् ब्राह्मणांश्चैव पूजयेत्। ते ह्यस्य तं दोषं शमयन्ति न संशयः। वणिक् कुशीदोदयात्तु वस्त्रगोकाष्ठनादिकम्। क्षीरलोऽन्नपानादि यानशय्यासनानि च। पण्येभ्यो विंशकं दत्त्वा पशुस्वर्णादिकं यतम्। वणिक् कुशीदवोषः स्यात् ब्राह्मणानान्तु पूजनात्। राज्ञे दत्त्वा तु षड्भागं देवतानान्तु विंशकम्" आ०त०। अधिकं क्रयविक्रये २२०१६पृ०दृश्यम्।

वाणिनी स्त्री वण-णिनि ङीप्। १विदग्धायां स्त्रियां २नर्त्तक्याम् १शब्दमञ्जर्यां वाच्यवत्वात् वाचयपाठः।

वा(वा)दर पु० व(व)दर+स्वार्थेऽण्। १कार्पासवृक्षे, मेदि०। व(व)दरस्येदं तस्य विकारो वा अण्। २कार्पासवस्त्रे न०। ३तद्वस्त्रादौ त्रि०अमरः। ४कार्पासवृक्षे स्त्री अमरत्वेऽपि अजादेराकृतिगणत्वात् टाप् शब्दच०। [वा(वा)दरिरत्र।

वा(वा)दरायण पु०व(व)दर्य्यां भवः फक्। वेदव्यासे। दञि।

बादरिक त्रि० बदराण्युच्छति बदर-ठक्। बदरफलस्य भूमौ पतितस्यैकैकस्याहर्त्रि।

बाध विलोडने भ्वादि०आत्म०सक० सेट्। बाधते अबाधिष्ट। क्वचित् चङि न ह्रस्वः अबबाधत् त।

बाध पु० बाध भावे-घञ्। १प्रतिरोधे। २प्रतिबन्धे, पीड़ने, ३उपद्रवे च। न्यायमते ४साध्याभाववत्यर्थाद्यें यथा वह्नयनुमितौ वह्न्यभाववान् ह्रदो बाधः। "साध्याभाववत्त्वप्रमाविषयमपक्षत्वम्" तल्लक्षणम्। ५हेतुदोषभेदे अनुचिन्ता० बाध-कर्त्तरि घञ्। १प्रतिबन्धके त्रि०।

बाधक त्रि० बाध-ण्वुल्। १प्रतिबन्धके। २स्त्रीणामृतुकाले प्रजाजननशक्तिप्रतिरोधके रोगभेदे पु०।

स च रोगश्चतुर्विधस्तल्लक्षणं वैद्यके उक्तं यथा "व्यथा कटयां तथा नाभेरधः पार्श्वे स्तनेऽपि च। रक्तमाद्रीप्रदोषेण जायते फलहीनता। मासमेकं द्वयं वापि ऋतुयोगो भवेद्यदि। रक्तमाद्री१प्रदोषेण फलहीना तदा भवेत्। नेत्रे हस्ते भवेज्ज्वाला योनौ चैव विशेषतः। लालासंयुक्तरक्तञ्च स्त्री बाधकयोगतः। आमेनैव भवेद् वर्त्म ऋतुस्नानदयं तथा। मलिना रक्त योनिः स्यात् स्त्रीबाधक योगतः। वह्नेर्गो गुरुतादेहे रक्तस्रावो भवेद् बहुः। नाभेरधो भवेत् शूलं चाङ्गुरः२ स च बाधकः। ऋतुहीना चतुर्मासं त्रिमासं वा भवेद् यदि। ज्वराङ्गी करणादे च ज्वाला चाङ्गुरयोगतः। शूला च सगर्भा च गुल्किहालरक्तिका। जलकुमारस्य३ दोषेण जायते फलहीनता। या ज्वराङ्गी भवेत् स्थूला बहुकालऋतुस्तथा। गुरुस्तनी स्वल्परक्ता जलकुमारस्य दूषणात्" वैद्यकम्। [बन्धे च।

बाधन न० बाध-भावे ल्युट्। १पीड़ायां शब्दर०। २प्रतिबन्धे च।

बाधा स्त्री बाध-भावे १अपीड़ायां २निषेधे ३प्रतिबन्धे च।

बाधित त्रि०बाध-कर्म्मणि क्त।१प्रतिरुद्धे।२बाधज्ञानविषये च

बाधिर्य्य न० बधिरस्य भावः ब्राह्मणादित्वात् ष्यञ्। श्रवणशक्तिराहित्ये रोगभेदे बधिरशब्दे दृश्यम्।

बान्धकिनेय पु०स्त्री०बन्धक्याः अपत्यं ढक् ढिनङ् च। अबन्धायां अपत्ये अमरः।

बान्धव पु० बन्धु+स्वार्थे, तदर्थे वाञ्। १बन्धुशब्दार्थे, २पितृमातृसम्बन्धिनि ३भ्रातरि ४मातुलादौ च। "बान्धवाश्चतदाप्नुयुः" कात्या० स्मृतिः। [स्त्रियां ङीप च०

बाबंटोर पु० १रङ्गे धातौ २काम्पिल्ये ३खड्गुरे ४गणिकायाम्

बार्हत न० बृहत्याः फलम् अण्। १बृहतीफले बृहतिभवः अण्। २बृहतिभवे त्रि०।

बार्हद्ग्न पुंस्त्री० बृहद्ग्नेरपत्यम् कण्। बृहद्ग्निनामकर्षेर्गोत्रापत्ये। [न्यङ्क्षुते २तत्सम्बन्धिनि त्रि०।

बार्हद्रथ पुंस्त्री० बृहद्रथस्यापत्यम् अण्। बृहद्रथ-

बार्हस्पत पु० बृहस्पतेरिदम् सर्वदेवताऽस्य वा-अण्। गुरुसम्बन्धिनि १वत्सरे २चरौ च। पत्यन्तत्वात् पुरोहिता०अक्। बार्हस्पत्य तदर्थे त्रि०। "बार्हस्पत्येन यद्ब्रह्म क्षेयं नान्येषु नित्यशः" स्मृ०सि०।

बार्हिण त्रि० बर्हिणो विकारः ताला० अण्। बर्हिविकारे।

बाल पु०न० बालाख्ये १गन्धद्रव्यभेदे। २मूर्खे ३शिशौ मेदि० "बाल स्यादोड़शात् वर्षात्" स्मृतिपरिभाषित ४षोड़शवर्षावधिकवयस्के च त्रि०। ५केशे पु० अमरः। अर्श आदित्वादस्यर्थे अच्। ६अश्वशिशौ अमरः ७अश्वबालधौ ८हस्तिबालधौ ९नारिकेले मेदि० १०पशुपुच्छे च पु० हेमच०। मतान्तरभेदे शब्दच०। "पञ्चवर्षो गता बालः" हेम० उक्ते पञ्चवयस्कपदे।

"बालाचतुष्टयं शीतं मधुरं बलकान्तिकृत्। स्निग्धं वातहरं पित्तासृक्क्षयनाशनम्"। "बालामूलत्वचचूर्णं पीतं सक्षीरशर्करम्। मूत्रातिसारं हरति दुष्टमेतत्र संशयः। हरेन्मूत्रावहा ह्येषा भवेद्वातानुलोमनी। इत्यादिति बालामोक्तं पयसा सितया सह" भावप्र०।

बालादेरवधिमाह सुश्रुतः "वयस्तु त्रिविधं बाल्यं मध्यमं वार्द्धकं तथा। जनयोड़शवर्षन्तु नरो बालो निगद्यते। त्रिविधः षोड़शोऽपि दुग्धाशी दुग्धान्नाशी तथान्नभुक्। दुग्धाशी वर्षपर्य्यन्तं दुग्धान्नाशी शरद्द्वयम्। तदुत्तरं स्यादन्नाशी एवं बालस्त्रिधामतः"।

"यथोक्त विधिना बालं मासि षष्ठेऽष्टमेऽपि च। अन्नं सम्प्राशयेत्किञ्चित् ततस्तद्वर्द्धयेत् क्रमात्" अथ बालस्य परिचर्य्याविधिः। "बालमङ्के सुखन्दध्या नचैनन्तर्जयेत् क्वचित्। सहसा बोधयेच्चैव नायोग्यं सुपवेशयेत्" अयोग्यं सुपवेशनासमर्थम्। "नाऽऽत्मन स्वापयेत् क्रोड़े न चिप्रं शयने क्षिपेत्। रोदयेच्च क्वचित् कार्य्यं विधिसावश्यकं विना" आवश्यको विधिः भेषज दान तैलाभ्यङ्कोद्वर्त्तनादिः। "तच्चित्तमनुवर्त्तेत तं सदैवानुमोदयेत्। निर्मोक्षस्यानतश्चापि रक्षेद् बालं प्रयत्नतः" बालस्य स्वभावश्चिन्त्याह। "अभ्यङ्कोद्वर्त्तनं स्नानं नेत्रयोरञ्जनन्तथा। वसनं चेद् यत् तच्च तथा सहतुलेपनम्। जन्मप्रभृतिपर्य्यन्तं बालचैतानि सर्वथा

बालस्य कवलादेः समयमाह। "कवलः पञ्चमादर्वाङ्दन्तमात्रस्य कर्म च। विरेकः षोड़शादर्वाङ्विंशतेश्चैव नैशुनम्"। ततः पृष्ठ्या० इमनिच् वालिमन् बालभावे पु० पक्षे ष्यञ् बाल्य तत्रार्थे न०।

बालक पु० बाल+स्वार्थे क। १शिशौ (बाला) २नखदन्तौ न० राजनि०। ३क्षौद्रे ४अङ्कुरीयके ५पारिहार्य्ये न०विश्वः। ६अश्वकरिपुच्छयोः ७वलये मेदि० ८क्षेत्रे च पु० विश्वः।

बालकप्रिया स्त्री बालकं प्रीणाति प्री-क। १इन्द्रवारुण्यां (राखालशसा) २कदल्यान्च राजनि० ३शिशुप्रियमात्रे त्रि०।

बालकुमि पु० ह्रस्व०। केशकीटे (उकुन) जटा०।

बालक्रीड़नक पु० बालः क्रीड्यतेऽनेन क्रीड्-करणे ल्युट्। स्वार्थे क। कपर्दके (कड़ि) राजनि० २तत्क्रीड़ासाधनमात्रे त्रि०।

बाल(लि)खिल्य पु० ब० अङ्गुष्ठपर्व्वमितेषु षष्टिसहस्रसंख्येषु "ऋतोच सन्ततिर्भौमी बालखिल्यानसूयत। षष्टिर्यानि सहस्राणि ऋषीणामूर्ध्वरेतसाम्" मार्कण्ड०पक्षेषु १सनिभेदेषु। तेषां परिमाणञ्च अङ्गुष्ठमात्रं यथोक्तं भा० व० २१ अ०। "अथाप्रणयतस्तीव्रान् हृस्वान् अङ्गुष्ठोदरवर्च्चसः। पलाशदलिकामेकां सक्थितान् वहतः पथि। प्रक्षीणान् खेचिराङ्गेषु निराहारांस्तपोधनान्। क्लिश्यमानान् मनस्विनान् गोष्पदे संप्लुतोदके"। "ग्राम्या वै बालखिल्याः" चरणव्यूहभाष्योक्तेषु २ग्राम्येषु च। [अमरः।

बालगर्भिणी स्त्री बालैव गर्भिणी। प्रथमगर्भवत्यां गवि

बालगोपाल पु० कर्म०। श्रीकृष्णमूर्त्तिभेदे शिशुरूपे गोपाले नारदपञ्चरात्रे दृश्यम्।

बालग्रह पु० ह्रस्व०। बालानां पीड़के उपसृष्टभेदे 'बालग्रहाभिभूतानां बालानां शान्तिकारकमिति' चक्री। कुमारशब्दे २१०८ पृ० दृश्यम्। [२शिशुचर्य्यायां स्त्री

बालचर्य्य पु० बालस्येव चर्य्याऽस्य। १कार्त्तिकेये त्रिका० ह्रस्व०।

बालतरय पु० बालतरुणा इव पत्त्राण्यस्य। १खदिरे अमरः २शिशुतरौ पु०स्त्री०।

बालतन्त्र न० बालार्थं तद्रक्षार्थं तन्त्रमुपायः।

गर्भिणीचर्य्यायाम् कुमारशब्दायां त्रिका० २१०८पृ०दृश्यम्

बालतृण न० कर्म०। नवतृणे शब्दे अमरः।

बालदलक पु० बाल इव दलं दलमस्य कप्। खदिरे भरतः

बालधि पु० बाला धीयतेऽत्र धा-आधारे कि। केशयुक्तलाङ्गूले अमरः।

बालपत्र पु० बाल इव पत्रं पत्रमस्य। १वकुले राजनि०।

२खदिरवृक्षे भरतः। ३नवपत्रयुते त्रि० कर्म०। ४नवीने पत्रे न० वा कप्। बालपत्रक खदिरे त्रिका०।

बालपाश्या स्त्री बालस्य केशस्य समीपस्था पाश्या। सीमन्तनिकृत्यस्त्रयोदिरचितपङ्क्तिरूपे भूषाभेदे (सिँती) अमरः।

बालपुष्पी स्त्री० बालानि क्षुद्राणि पुष्पाण्यस्याः ङीप्। यूथिकायाम् राजनि०। कप् बालपुष्पिका तत्रार्थे जटाधरः।

बालभद्रक पु० बालेऽपि भद्र इव कायति कै-क। विल्वभेदे शब्दच०। [पक्षे च।

बालभैषज्य न० ह्रस्व०। १रसाञ्जने राजनि० २शिशुनामौषधे

बालभोज्य पु० ह्रस्व०। १चणके राजनि० २बालकभक्षणीये त्रि०

बालमूषिका स्त्री० कर्म०। क्षुद्रमूषिकायां सिरिलायाम् अमरः।

बालयज्ञोपवीतक न० बालस्य यज्ञोपवीतमिव कायति कै-क। खरस्कटे (खुकवाछाड़ि) त्रिका०। [शब्दर०।

बालराज न० बालः स्वल्पोऽपि राजते राज-अच। वैदूर्य्यमणौ

बालरोग पु० भावप्र० चक्ते बालस्य रोगभेदे तन्निदानादि तत्रोक्तं यथा

"अथ बालरोगाणां निदानानि लक्षणानि च। "धात्रास्तु गुरुभिर्भोज्यैर्विषमैर्दोषलैस्तथा। दोषा हेतुं प्रकुर्व्वन्ति ततः स्तन्यं प्रदुष्यति। मिथ्याहारविहारिण्या दुष्टा वातादयस्त्रयः। दूषयन्ति पयस्तेन जायन्ते व्याधयः शिशोः। क्षौद्रेरं शर्करा चौद्रं क्षौद्रं तृप्या इरं परम्।" इति तृप्यायाम्। "वातदुष्टं शिशुः स्तन्यं पिबन् वातगदातुरः। श्यामस्करः क्षयाक्षः स्याद्वविण्मूत्रमारुतः। क्षिप्तो भिन्नमलो बालः कामलापित्तरोगवान्। तृष्णालुरूष्मसंक्षुब्धः पित्तदुष्टं पयः पिबन्। श्लेष्मदुष्टं पिबन् क्षीरं लालायुक् श्लेष्मरोगवान्। निद्राहितो जड़ः स्तब्धो वक्राक्षस्तर्दनः शिशुः। ज्वराद्या व्याधयः सर्व्वे वक्ष्यन्ते महान्तु ये। बालानामपि ते तद्वदुद्दिष्टा भिषगुत्तमैः। बालानामेव ये रोगा भवन्ति महतां न च। तालुकण्टकसंख्यांस्तानधारस्य वक्ष्यतः।" तत्रादौ तालुकण्टकमाह। "तालुमांसे कफः क्रुद्धः कुरुते तालुकण्टकम्। तेन तालुप्रदेशस्य निम्नता मूर्द्धि जायते। तालुपातात् स्तनद्वेषः क्षुच्छ्वासः पानं शब्दोद्भवम्। तृड्वैचक्षण्यसंज्ञा योगाद्धर्त्तरा वदिः।" पानं स्तनस्य, शब्दोद्भवं द्रवरूपम्। महापद्मे माह। "वीसर्पस्तु शिशोः प्राणनाशनः शीर्षसञ्जिजः। अङ्गमर्दो महापद्मरोगोऽरुषत्रयाद्भवः। अङ्गाख्यां

हृदयं याति हृदयाच्च गुदं व्रजेत्।" पद्मवर्णः लोहित वर्णः तत्र श्रीघ्रगो दोषः। शङ्खाभौ हृदयं याति हृदयाच्च गुदं व्रजेत् एवं वस्तिगो गुदं याति गुदतः हृदयं हृदयाच्छिरो याति इति बोद्धव्यम्। कुकूणकमाह "कुकूणकं तु लीघ्रदोषाक्षिमूत्रनामेव वर्त्मनि। जायते सरजं नेत्रं कण्डूरं प्रस्रवेद्बहु। शिशुः कुर्यात्तुलाटा-चिकूटनासाप्रघर्षणम्। यस्मो नाकैरभं दृष्ट्वं न चाक्ष्णुन्मीलनक्षमः।" कुकूणकं (कोचु) इति लोके। अथ तण्डीगुदपाकमाह। "वातेनाध्मापिता नाभिः सरुजा दण्डिरुच्यते। बालस्य गुदपाकाख्यो ह्याधिः पित्तेन जायते।" अक्षिपूतनमाह। यज्ञभूमूलसमायुक्तं धौते पाने शिरोभवेत्। क्षिप्ते वा क्षाप्यमाणस्य कण्डूरक्तकमाक्षिवा। कण्डूयनात्ततः क्षिप्रं स्फोटः सावश्च जायते। एकीभूतं व्रणं घोरं तं विद्यादक्षिपूतनम्।" क्षिप्ते क्षेदिते। अजगल्लीमाह। क्षिप्ता सवर्णा ग्रथिता गोरुजा सदृशच्छिभा। कफवातोत्थिता ज्ञेया बालानामजगल्लिका। ग्रथिता गुम्फितेव सदृशच्छिभा सदृशाकृतिः। परिगर्भिकमाह मातृः। कुमारो गर्भिण्या: स्तन्यं भावः पिबन्नपि। कासाग्निसादवमथुतन्द्राकाश्यो-ऽरुचिभ्रमैः। युज्यते कोष्ठदग्धा च तमाहुः परिगर्भिकम्७। रोगं परिभवाख्यञ्च तत्र युञ्जीत दीपनम्। पिबन्नपीत्यपिशब्दादपिबन्नपि परिगर्भिकः (कहोडोति) लोके। परिभवाख्यं परिभवेति नामान्तरम्। अथ दन्तो-द्भेदजान् रोगानाह "दन्तोद्भेदः शिशोः सर्वं रोगाणां कारणं स्मृतम्। विशेषात् ज्वरविड्भेदकासच्छर्दिशिरो-रुजाम्। अभिष्यन्दस्य शोथस्याक्षीणां च जायते"। कारणमित्यन्वयः शोथक्षा वर्त्मरोगविशेषस्य।"

बालव पु० तिथ्यङ्गभेदेषु करणेषु द्वितीये करणे स्त्री० त०।

बालवायज न० वैदूर्यमणौ त्रिका०।

बालवाद्य पु० बालो बाद्यो यस्य। दक्षकटे वनजागे हारा०

बालव्यजन न० बाला एव व्यजनम्। चामरे हेमच०।

'कुर्वन्ति बालव्यजनैकमर्म्याः' इति कुमारः। [हेमच०।

बालसन्ध्याभ पु० बाल सन्ध्याया इवाभा यस्य। अरुणवर्णे

बालसूर्य्य न० बालः सूर्य्य इवाऽस्य। १वैदूर्यमणौ त्रिका० कर्म०। २अधिरोदिते सूर्य्ये पु०। [शब्दर०।

बालसूर्य्यक न० बालसूर्य्य इव कायति कै-क। वैदूर्यमणौ

बालहस्त पु० बालः केशो हस्त इव यत्र। १शमीवृक्षे अमरः। बाल+संज्ञे हस्तप्र०। २केशसंज्ञे च पु०।

बाला स्त्री० बालाः केशाकाराः पदार्थाः सन्त्यस्य अच्। १नारिकेले २कुरिरायां ३मल्लिकाभेदे, ४बलये, ५मेघे च हेमटो स्त्री मेदि० ७दशवर्षाया (बाला) दशवर्षदेश्यभेदे, शब्दच०। ८चक्रवर्त्तायां, ९नीलझिण्टिकायां स्त्री राजनि० ११षोड़शवर्षीयायां स्त्रियां १२कन्यायाञ्च "वर्षमाला भवेद् बाला" प्रा० त० उक्तावामेकवर्षीयायां १३गवि स्त्री १४देवी मूर्त्तिभेदे तन्त्रसारः। स्वार्थे क अत इत्वम्। बालिका तत्रैव। बालुकायां, पत्रकाष्ठलतायां मेदि० कर्णभूषणे (कानबाला) मेदि० एलायां शब्द०।

बालाकि पु० बलाकाया अपत्यम् वा० इञ्। "इन्द्रबालाकि हानूचानो माण्डूकायनः" इ० उ० उक्ते गार्ग्ये ऋषिभेदे।

बालाक्षी स्त्री बालः केश इवाविद्यमानं पुष्पफलाः अक्षमा० स्त्रियां ङीष्। केशपुष्पोपेते शब्दच०।

बालायनि पुंस्त्री० बालाया अपत्यं तिका० फिञ्। बालाया अपत्ये स्त्रियां ङीष्। [पाणिनि।

बालार्क पु० कर्म०। प्रातःकालीनसूर्य्ये "बालार्कसदृशं दधि"

बालि पु० बाले केशे जातः इञ्। केशे इन्द्रलुप्तयुक्तजाते वानरभेदे। बालः सदृपत्तिस्थानत्वेनाऽस्यास्ति इनि। बालिन् तत्रार्थे त्रिका०।

तदुत्पत्तिकथा रामा० उत्तरा० ३७ स० यथा

"अथ तुल्ये तयोस्तस्मात् स हृदादुत्थितः प्लवगः पुनः। तस्मिन्नेव क्षणे राम! स्त्रीत्वं प्राप स वानरः। तदूपमद्भुतं दृष्ट्वा लज्जितौ धैर्य्यमात्मनः। ततस्तां सुरेन्द्रेण स्वर्णं शिरसि पातितम्। अनासाद्यैव तां नारीं सञ्जिहृक्षमया भवत्। ततः सा वानरपतिं जगाम वानरीश्वरम्। अ-मोघरेतसस्तस्य वालयस्य महात्मनः। बालेषु पतितं बीजं बाली नाम बभूव ह। भास्करेणापि तस्यां वै कन्दर्प-वशवर्त्तिना। बीजं निषिक्तं योषायां विधानमनुवर्त्तता। योषायां पतितं बीजं सुग्रीवः समजायत"।

बालिश त्रि० बाल-इनि बालिं ज्ञानं अस्ति शो-क डस्य नः। १मूर्खे, २शिशौ च मेदि० "बालिशमामि! शयानम्" भट्टिः। बालाः सन्त्यस्य इनि बालो मूर्खो शेतेऽत्र शी-घा० आधारे ड। २उपधाने न० शब्दमा०।

बालीश पु० मूलकशरीरे शब्दर०।

बालिहन् पु० बालिं बालिनं वा हन्ति हन-क्विप्। रामे बालिहन्नादयोऽप्यत्र पु०। तत्कथा रामा० सुन्दराकाण्डे दृश्या।

बालु पु० बल-उण्। १एलबालुकनामगन्धद्रव्ये उणादि०।

वालुक न॰ वालु+स्वार्थे क। १तत्रैव अमरः। पु॰ वालु-कक। २पानीयामलके पु॰ राजनि॰। ३सिकतासु स्त्री। ४कर्कट्यां जटा॰ ५कर्पूरे ६यन्त्रभेदे शब्दच॰।

वालुकायन्त्र न॰ ६त॰। १ओषधपाकार्थे यन्त्रभेदे। "भाण्डे पितत्रिगव्योरे मध्ये निक्षिप्तकूपिके। कूपिका कण्ठपर्य्यन्तं वालुकाभिश्च पूरिते। मेषजं कूपिकासंस्थं वह्निना यत्र पच्यते। वालुकायन्त्रमेतद्धि यन्त्रतन्त्रबुधैः कृतम्" भावप्र॰। २कालज्ञापने रङ्गना॰ प्रदर्शिते यन्त्र-भेदे "सक्षत्ररेणुमर्मैश्च सम्यक् कालं प्रसाधयेत्" सु॰ वि॰ व्याख्यायां "क्षुत्राकारेण रेणवः सिकतांशागमें उदरे यस्यैतादृशं यन्त्रं वालुकायन्त्रं प्रसिद्धम्" रङ्गनाथः।

वालुकास्वेद पु॰ ३त॰। भावप्र॰ उक्ते तप्तवालुकाभिः स्वेदने। "वातश्लेष्मजते स्वेदान् कारयेद्भूचनिर्मितान्। स्निग्धः स्वेदो निषिद्धोऽत्र विना केवलवातजान्। खर्परेष्टपटस्थितकाञ्जिकसंसिक्तवालुकास्वेदः। शम-यति वातकफामयमस्तकशूलाङ्गभङ्गादीन्। कोतसी आर्द्रं कृत्वा नीत्वा पावकमाप्रयत्। कृत्वा वातकफत्वग्भं स्वेदो ज्वरमपोहति"। [पृषो॰तुक्। वालुङ्गीत्यपि तत्रिका॰

वालुकी स्त्री॰ पु॰ङ्गल-ङीष् गौरा॰ङीष्। कर्कोटीभेदे राजनि॰

वालूक पु॰ पु॰ वालु-अक। विल्वभेदे हेमच॰।

वालेय पु॰वलेरपत्यं, वलये हितं वा ढक्। १राक्षसे, अमरः २दैत्यभेदे, धरणिः ३अङ्गारवल्ल्यां विश्वः। ४वा-यसमूलके पु॰ ५वाजिहिते च त्रि॰मेदि॰। [अमरः।

वालेयशाक पु॰वलये हितं ढक् कर्म॰(वासनकाटि) शाकभेदे

वालेष्ट पु॰ वालानामिष्टः ३त(त)दरे राजनि॰। २वाल-कानामभीष्टे त्रि॰।

वालोपवीत न॰६त॰ उरस्कटे वालयज्ञोपवीतशब्दार्थे द्वारा॰

वाल्वजभारिक त्रि॰ वल्वजानां भारं वहति वंश॰ ठक्। वल्वजभारवाहके।

वाल्य न॰ वालस्य भावः, कर्म वा वयोवचनत्वात् यञ्। 'आ षोडशाद्भवेद्बाल्यं' इत्युक्ते अवस्थाभेदे।

वाल्हक न॰ वल्हिदेशे भवः वा॰ वुञ्। कुङ्कुमे अमरः पाठान्तरम्। [हिङ्गुनि न॰।

वाल्हायन त्रि॰ वल्हौ जातम् फक्। १वल्हिदेशोद्भवे

वाल्हि(ही)क पु॰ वल्हि+स्वार्थे ठञ्। रैक वा।१कुङ्कुमे हिङ्गुनि च न॰ मेदि॰२हयभेदे ३तद्देशीये च पु॰मेदि॰। ४तद्देशभवे हरिवं॰६अ॰। दीर्घबध्नः गन्धर्वभेदे पु॰शब्दर॰

वाल्वल पु॰ ऋषिभेदे आश्व॰श्रौ॰ ३।४।४।

वाव्य(स्य) पु॰वाव-दृषो॰ वत्वं यत्वं वा। १नेत्रजले, २जङ्घायां च अमरः लोष्ठे च मेदि॰ तत्र वयमन्यस्यवादितयोक्तः।

वाष्कल पु॰ दैत्यभेदे हरिवं॰ ३अ॰।

वा(वा)ह्र प्रयत्ने भ्वादि॰ आत्म॰ अक॰ सेट्। वा(वा)ह्रते अवा(वा)ह्रिष्ट। कहित् चङि न ह्रस्वः अवावाहत् त।

वाह पुंस्त्री वाह्+घञ्। बाहुशब्दार्थे रत्नमालाधृतः।

वाहा(ह्व)वाहवि अव्य॰ वाह्वोर्भ्यां बाहुभ्यां प्रहृत्य प्रहृत्तस्य युद्धम् दृश्यमा॰ पूर्वपदे वाह् दीर्घो वा। वाह्वोर्भ्यां वाहुभ्यां प्रहृत्य प्रहृत्ते युद्धे। [अमरः।

वाहु पु॰ वाध-कु धस्य हः। भुजे कक्षाविधृकुक्षिपर्य्यन्तेऽवयवे

वाहुक पु॰ ऋतपर्णनलस्य सूतपालत्वादिरूपेण स्थिते नल-रूपे तत्कथा भा॰व॰६७अ॰दृश्या। २नागभेदे भा॰आ॰ ५७ अ॰।

वाहुकुण्ठ त्रि॰ ३त॰। कुण्ठितबाहुके (लोपा) जटा॰।

वाहुकुन्य पु॰ वाह्वोरिव कुन्यति कुन्य-अच्। विहगानां वाह्वस्थीवे पक्षे शब्दच॰। [जाते।

वाहुकुलेयक त्रि॰ वहुकुले जातादि ठक्। वहुकुल॰

वाहुज पु॰वाह्वोर्भ्यां त्र(त्र)कुवाह्वोर्भ्यां जायते जन॰ड।१चत्रिये अमरः। 'वाहुज राजन्यादि'ति स्मृतिः। २कीरे ३स्वर्णे जातरिते च मेदि॰ ४वाहुजातमात्रे त्रि॰।

वाहुत्र पु॰न॰वाह्वं त्रायते त्रै-क। कक्षाजातवारणार्थे कव-चे कौटवर्मादौ हेमच॰।

वाहुत्राण न॰वाहू त्रायते अनेन त्रै-करणे ल्युट्। यत्ना-घात वारणार्थे वाहुकवचेऽपि हेमच॰।

वाहुदन्तक पु॰ वहवश्चत्वारो दन्ता अस्य कप् ऐरावतः उप-चारात् तद्वत्तेन प्रोक्तमण्। पुरन्दरप्रोक्ते पशुचिकित्साशास्त्रे नीतिशास्त्रभेदे भा॰शा॰५८अ॰। [दन्ते हेमच॰।

वाहुदन्तेय पु॰ वहुदन्तशब्देन ऐरावतस्मर्यते या॰ ढ।

वाहुदा स्त्री खनामख्याते १नदीभेदे। सा च प्रसेनजिद्वाक्यां गौरी नाम, भक्त्यां अग्रा नदीरूपा ज्ञाता हरिवं॰१२अ॰। सा हि शङ्खस्य स्नातः मलहरणे सुधुम्नशपदखनेन छिद्रं विखितस्य खनेः हस्तम् अवगाहनात् खनदेवादिति कथा भा॰शा॰ २९ अ॰ यथा "स तस्या वाहुदां गीत्वा तर्पयत्वा यथाविधि। देवान्पितॄंश्च मा चार्थं मनः कृत्वाः। तस्य तद्वचनं श्रुत्वा शङ्खस्य खिखितस्तदा। अवगाह्यापगां पुण्यामुदकार्थं प्रचक्रमे। मादुरासां ततस्तस्य करौ जलजसन्निभौ। ततः स खिखितो भ्रातु-र्दैवमासाद्य तौ करौ"।

श्वरीछिन्नार्थभेदे भा० आदिपर्वणि ८६ अध्याये।

बाहुबल न० ६त०। युद्धोपयोगिनि बाहुविक्रमे।

बाहुभूषा स्त्री ६त०। केयूरे हेमच०।

बाहुमात्र त्रि० बाहुः प्रमाणमस्य बाहु+मात्रच्। बाहुपरिमाणे स्त्रियां ङीप् "बाहुमात्रः स्तुच" कात्या० श्रौ० ११२१७।

बाहुमूल न० ६त०। कक्षे (काँख) (बगल) ख्याते अवरः।

बाहुयुद्ध न० ३त०। नियुद्धे अमरः।

तत्प्रकारः भा० वि० १३ अ० यथा

"क्षतप्रतिक्षतैश्चित्रैर्बाहुभिश्च सुसङ्कटैः। सन्निपातावधूतैश्च प्रमाथोन्मथनैस्तथा। क्षेपणैर्दन्तिभिश्चैव वराहोद्धूतनिःस्वनैः। तलैर्वज्रनिपातैश्च प्रसृताभिश्च सर्वशः। शलाकानखपातैश्च पादोद्धूतैश्च दारुणैः। जानुभिश्चाञ्चनिर्घातैः शिरोभिश्चावघट्टनैः। तद्बाहुसमरं घोरमभवत् बाहुतेजसा। बलप्राणेन शूराणां समाक्षोभ्य च द्विधौ। अराजत जनः सर्वः क्षोभ्यक्षुभितदोषितः। सन्धिनोः संयुगे राजन्! इत्वासयोरिव। प्रकर्षाकर्षयोरभ्याकर्षविकर्षयोः। आकर्षैतुरबान्योन्यं जानुभिश्चापि जघ्नतुः"। मू०"क्षतं कचिद्दृश्ये निपीडनं प्रतिक्षतं तस्य शोधनम्। सुसङ्कटैः सङ्घिपङ्क्तेन ओजोक्षतैः सकङ्कटैरिति पाठे सकवचैः सकिणैर्वा "कङ्कटो बाहुवरत्रे कवचे कठिने किणे" इति विश्वः सन्निपातोऽङ्गसंघट्टनम् अवधूतं तेनैव दूरीकरणं प्रमाथादय उक्ता मल्लशास्त्रे "निपात्य भेषणं भूमौ प्रमाथ इति कथ्यते। यत्पूर्वाङ्गमथनं तदुन्मथनमुच्यते। क्षेपणं कथ्यते यत्तु स्थानात् प्रच्यावनं हठात्। उभयोर्भुजयोर्दृष्टिकरोमध्ये निपात्यते। सृष्टिरित्युच्यते तज्ज्ञैर्मल्लविद्याविशारदैः। अधोऽङ्गुष्ठं स्कन्धगतं व्यामथित्वा तथैव च। क्षिप्रञ्च मुष्टेश्च भवेद्वराहोद्धूतनिःस्वनः। तलैर्वज्रनिपातैर्वज्रदृढपातैश्चपेटैः। "बाहुल्यः प्रसृताश्चास्तु प्रसृता या उदीरिताः। कक्षौ दृढौ कृशौ चिह्नगात्रौ काङ्क्षौ स्मृतौ"। तलाभिघातैः पादोद्धूतैः पादप्रसारणाक्षेपैः जानुभिः शिरोभिश्च क्रमैरवघट्टनैरास्फालनैः अश्वनिर्घोषैरित्युभयविशेषणम्। यशस्तं निन्द्यं यशोऽत्र तत्रैव "बाहुयुद्धं हि मल्लानामयशस्करमिति" स्मृतम्। स्मृतञ्च तत्र स्वर्गो यशोलेशोऽपि विद्यते" इति। बलप्राणेन बलेन शारीरबलेन प्राणेन आत्मबलेन च। क्षोभ्यक्षुभितदोषितः क्षोभ्यशब्दोच्चारणेन यच्चित्तस्य सङ्क्षोभणम्। तत्सहितः। "आक्षेप्य क्रोडीकरणं प्रकर्षणघट्टाकृतम्। आकर्षणं क्षोभयैव सन्मुखीकरणं स्मृतम्। पुरः पश्चात् पार्श्वयोश्चाभ्याकर्षो भ्रमणं तथा। पश्चात् प्रपातनं वेगादिकर्षणघट्टाकृतम्" नीलक०।

बाहुल पु० बहुलानां छत्रिकानामयं स्वामी अण्। १यज्ञे शब्दच०। बहुलाभिर्युक्ता पौर्णमासी अण्। २कार्त्तिकपौर्णमास्यां स्त्री ङीप्। सा यत्र मासे पुनरेव्। ३चान्द्रकार्त्तिकमासे पु० अमरः। ४बाहुलाश्वे हेमच०। बहुलेन निर्वृत्तम् बहुला०अण्। ५अनेकसाध्ये त्रि०। गृह्या०दमनिषोऽभावे भावे अण्। ६बाहुल्ये न०।

बाहुलक न० बहुलेन बहुलग्रहणेन निर्वृत्तं बहुला०अण् संज्ञायां कन्। व्याकरणोक्तसर्वधातुरहिते विधानादौ अत्र यद्विधीयते तत्र क्वचिन्न स्यात् क्वचिद्वा स्यात् क्वचित्ततोऽन्यत्रापि स्यादित्येवं परे विधाननिषेधादौ। मनोज्ञा० भावे कुञ्। २बाहुलिका बहुलभावे स्त्री।

बाहुलेय पु० बहुलानामपत्यं ढक्। कार्त्तिकेये अमरः

बाहुशालिन् त्रि० बाहुभ्यां शालते तदुचितमाधिक्येन शालते शाल-णिनि। बाहुवीर्याधिक्ययुते स्त्रियां ङीप्।

बाहुसम्भव पु० बाहू मल्लबाहू सम्भवोऽस्य। १बाहुजे क्षत्रिये हेमच०। २बाहुजातमात्रे त्रि०।

बाहुसहस्रभृत् पु० बाहुसहस्रं बिभर्त्ति भृ-क्विप् तुक् च। कार्त्तवीर्ये त्रिका० कार्त्तवीर्यशब्दे दृश्यम्।

बाह्य त्रि० बहिर्भवः यञ् टिलोपः। बहिर्भवे

बाह्यकर्ण पु० नागभेदे भा० आ० ३१अ०।

बाह्यकुण्ड पु० नागभेदे भा० उ० १०२ अ०।

बाह्वादि पु० दञ् प्रत्ययनिमित्ते शब्दगणे स च गणः पा०ग० स्त्री यथा "बाहु उपबाहु उपबाक् निबाक् शिबाक् वराक् उपबिन्दु हलो हलका चूड़ा बलाका मूषिका कृपला कृपाला ध्रुवका धुवका सुमित्रा दुर्मित्रा पुष्करसद् अन्तरत् देवशर्मन् अग्निशर्मन् भद्रवर्मन् सुयर्मन् कुनामन् सुनामन् यज्ञन् सप्तन् वज्रन् अमितौजसः (सलोपश्च) सुधावत् वटङ्कु शिरस् साम अरावित् मरीची चेमवद्विन् महाकुलतोदिन् खरनादिन् नगरमर्दिन् प्राकारमर्दिन् लोमन् अजीगर्त्त कृष्ण युधिष्ठिर अर्जुन साम्ब गद प्रद्युम्न राम उदङ्कु उदङ्कः (संज्ञायाम्) सम्भूयोऽम्भसोः (सलोपश्च) बाह्वादिः। बाह्विः कार्त्तिः।

बिट(ि)ट आक्रोशे भ्वा०पर०सक०सेट्। बेटति अबेटीत्

बिटङ्क पु० पिटक+पृषो०। पिटके अवरे प्राङ्गान्तरम्।

बिं(वि)ठ न० विट-क पृषो० अलरीत्वे निरुक्तारः ६।२०।
बिट् अवयवे भा०पर०सक० सेट् इदित्। बिन्दति अबिन्दीत्
बिंदल न०बिदि-अलच् नि०नलोपः।हिंदले अमरः २अंशे च
बिन्दवि पु० विदि-अवयवे वा० अवि। बिन्दो अंशे। ततः गड़ा०ङीप्। बिन्दोरिव तत्सम्बन्धिनि।
बिन्दु पु०विदि-उ। १लक्षेऽंशे अमरः। २राजभेदे ततोऽपत्ये विदा० अञ्। बैन्दव तदपत्ये पुंस्त्री०। २रेखागणित प्रसिद्धे स्थूलत्वदीर्घत्वहीने लक्षयितुं शक्ये २पदार्थे शेषशब्दे २२८६ पृ० दृश्यम्। ३वा०द० उक्ते २अर्थप्रकृतिभेदे "बीजं बिन्दुः पताका च प्रकरी कार्यमेव च। अर्थप्रकृतयः पञ्च"उद्दिश्य "अवान्तरार्थविच्छेदे बिन्दुरुच्छेदकारणम्" लक्षितम्। ४अनुस्वारमूचके रेखाभेदे। "बिन्दुर्द्विबिन्दुमात्रौ" सुग्धबो० शा०ति० उक्ते ५नादजन्ये क्रियाप्राधान्यलक्षणे चिच्छक्तेरवस्थाभेदे यथा "सच्चिदानन्दविभवात् सकलात् परमेश्वरात्। आसीच्छक्तिस्ततो नादो नादात् बिन्दुसमुद्भवः"। तद्व्याख्यायां राघवभट्टधृतम् "सा तत्त्वसंज्ञा चिन्मात्रज्योतिषः सन्निवेशदा। विचिकीर्षुर्घनीभूता क्वचिदभ्येति बिन्दुताम्" "अभिव्यक्ता परा शक्तिरविभागावलक्षणा। अखण्डपरचिच्छक्तिजीवता चिद्रूपिणी विभुः। सकलतत्त्वभावेन विवर्त्तेच्छासमन्विता। प्रयाति बिन्दुभावञ्च क्रियाप्राधान्यलक्षणम्"। तस्मादेव रौद्रीरुद्रशोरविभोः यथोक्तं शा० ति० "रौद्री बिन्दोस्ततो नादात् ब्रह्मा बीजादजायत। समेताभ्यः समुत्पन्ना रुद्रब्रह्मरमाधिपाः"। ६बीजभेदे "बिन्दुः शिवात्मको बीज शक्तिर्नादस्तयोर्मिथः। समावायः समाख्यातः सर्वागमविशारदैः" शा० ति०।
बिन्दुचित्रक पु० बिन्दुरूपं चित्रमस्य कप्। मृगभेदे शब्दर०
बिन्दुजाल न० ६त०। १बिन्दुसमूहे २कृत्तिमगण्डोपरिस्थ बिन्दुसमूहे हेमच०। संज्ञायां कन्। बिन्दुजालक मज्जसम्मुखादिस्थे तत्समूहे पद्मके अमरः। [२पाशके हारा०
बिन्दुतन्त्र पु०। १शारीफलके २चतुरङ्गक्रीडने च मेदि०।
बिन्दुदेव पु० ६त०। बिन्दुवर्णेश्वरे शिवे मेदि०।
बिन्दुपत्र पु० बिन्दुचिह्नितं पत्रमस्य। भुजपत्रवृक्षे रत्नमा०।
बिन्दुमाधव पु० काशीस्थे वेणीमाधवे वार्षीश०।
बिन्दुरेखक पु० बिन्दुरूपा रेखा सूचिकाऽस्य कप्। १क्षुद्रे खारे वर्षे २पक्षिभेदे शब्दच०।
बिन्दुसरस् न० बिन्दुज्ञातं सरः शा०त०। सरोवरभेदे यत्र गङ्गावतारार्थं भगीरथेन तपस्तेपे तत्कथा "अथोत्तरेण कैलासात् मैनाकं पर्वतं प्रति। हिरण्यशृङ्गः सुमहान् महामणिमयो गिरिः। रम्यं बिन्दुसरो नाम यत्र राजा भगीरथः। दृष्ट्वा भागीरथीं गङ्गामवास बहुलाः समाः" भा० व० २अ०। मातृके १०। स० तदुत्पत्तिकथा उक्ता यथा "तत्र त्रिपथगा देवी प्रवमन्तु प्रतिष्ठिता। सोमपादात् प्रसृता सा सप्तधा प्रविभज्यते। वसुधा मणिमयाश्चल चितयच्च हिरण्मयाः। तत्रेदा ऋतुभिः सिद्धः शक्रः सुरगणैः सह। दिव्यस्थावापयत्तत्र नक्षत्राण्यन्तु मण्डलम्। दृश्यते भास्करो रात्रौ देवो त्रिपथगा तु सा। अलरीत्वं दिवत्वेव भावयित्वा भुवङ्गता। अवोत्तमाङ्गे पतिता संहृता योगमायया। तस्या ये बिन्दवः केचित् च्युत्वायाः पतिताभुवि। अतस्तु तैर्बिन्दुसरस्ततो बिन्दुसरः स्मृतम्। बिन्दुच्छेदोऽत्र पु०।
बिल भेदने वा चुरा०उभ०पक्षे तु०पर०सक० सेट्। बेलयति ते बिलति। अबीबिलत् त अबेलीत्।
बिल न०त०बिल+क। रन्ध्रे १छिद्रे अमरः।२गुहायाम् २पातालेऽवसि पु० मेदि०। ३वेतसे शब्दच० ५गर्त्ते च। ततः इषा० चतुरश्रौ स। बिलस तदाकारदेशादौ त्रि०।
बिलकारिन् त्रि० बिलं करोति कृ-णिनि। १गर्त्तकारके स्त्रियां ङीप्। २मूषके पुंस्त्री० राजनि०।
बिलवास पु० बिले वासोऽस्य। जाहकजन्तौ राजनि०।
बिलवासिन् पु० बिले वसति वस-णिनि। १सर्पे शब्दरत्ना० २गर्त्तवासिनि त्रि० स्त्रियां ङीप्। अनुकम्प० बिलेवासिन् तत्रार्थे। [स्त्रियां योपधत्वात् टाप्।
बिलशय पुंस्त्री० बिले शेते शी-अच्। सर्पे शब्दरत्ना०।
बिलेशय पुंस्त्री० बिले शेते शी-अच् अनुकम्प०। १सर्पे अमरः २मूषिके जटा० ३गोधायां ४गजे ५यक्षकर्दमे च भावप्र०। "गोधायामुलूकेषु यक्षकर्दमे बिलेशयाः। बिलेशया वातहरा मधुरा रसपाकयोः। दृष्ट्वा बहुविधमूत्रा बीर्योष्णा अपि कीर्त्तिताः" तत्र तन्मांसगुणा उक्ताः।
बिल्ल न० त०बिल-बा०मन्। मासने निरु० १।२०। का०२।३६ १२। २शिरस्त्राणे यजु०१६।३५। तदस्त्यस्मिन् इनि। बिल्लिन् तद्वति त्रि०स्त्रियां ङीप्। बिल्व पु०यजु०तन्नाम्नि द्रव्यम्।
बिल्व न० बिल्वं क्विप् तं वाति वा-क। १श्रीवृक्षे त्रिका० २स्त्रीकुचे शब्दच०।
बिल्वमूला स्त्री बिल्वस्य मूलमस्याः। वाराहीकन्दे शब्दच०

बिल्वमू स्त्री "बिल्वस्तदेमपुत्रा स्यादिति" अमरः उक्तायां प्रस्तटदशपुत्रायां स्त्रियाम्।

बिल्व पु० बिल्व-उच्च०नि०। १ फलनामख्याते वृक्षे अमरः "श्रीफलः शल्यशिल्लो याण्डीरः कूपोऽग्निशिखश्च। बालः शैलूषरो बल्यो मालूरश्च पाचनः" भावप्र०। "बिल्वं बालं कषायोष्णं पाचनं वह्निदीपनम्। संग्राहि तिक्तकटुकं तीक्ष्णं वातकफापहम्। पक्वं गुरुस्निग्धं मधुरं दुर्जरं याहि दोषलम्। फलेषु परिपक्वेषु यो गुरुः सन्नदाहृतः। बिल्वादन्यत्र सर्वेषां बिल्वनामं गुणोत्तरम्। कफवातामपित्तघ्नो याहिणी बिल्वपेशिका" राजवल्लभः। "काञ्जिके संस्थितं बिल्वमग्निसन्दीपनं परम्" इति वैद्यकम्। २तत्फले न० भेदि०। ३पक्वपरिमाणे न० शब्दमाला। तद्वृक्षोत्पत्त्यादिर्यथा "दृगोर्लक्ष्मीश्च या धेनुर्गौरूपा सा मता मही। तद्गोमयभवो बिल्वः श्रीश्च तस्मादजायत। "बिल्वदलैः शिवः सम्पोक्षव योनिभेविष्यति। सर्वपुष्पोत्तमः श्रेष्ठो देवाहारो मनोरमः। यच्छेद्यः सर्वलोकानां छेदाद्यायः सदा स्मृतम्। ये च पापा दुराचाराः श्रीतरोश्छेदकारिणः। ते स्वर्गेऽप्यादिनरके पात्यन्ते ब्रह्मणोदितम्। दुःखिता भविष्यन्ति नरा दुष्कृतिनः सदा। तस्य देशे भयं नित्यं चिरं राजा न जीवति। न च दुष्यपतिः कश्चिद् बिल्वदलस्य छेदकः। क्रियते यत्र विच्छेदः सपुष्पफलिनस्तरोः। अनाद्दिभयं घोरं तस्मिन् देशे प्रजायते"। अग्निपु० १०७ अ० अथोत्पत्तिरस्यथोक्ता "लक्ष्म्या शिवाराधनार्थं स्वैरक्षनस्योत्पाटने कृते तुष्टेन शिवेन लक्ष्मीं प्रत्युक्तं यथा "मातः शृणुष्व तनये! मामा बिल्वितनं परम्। यस्ते बिल्वः स्तनो वामो जायतां पुनरेव सः। ज्ञाता ते परमा भक्तिः पूर्णस्तेन मनोरथः। यश्च बिल्वस्तनोभूता मल्लिङ्गोपरि ते शुभे। सोऽस्तु वृक्षः क्षितौ पुण्यो नाम्ना श्रीफल इत्यतः। मूर्त्तिमांस्तव वै भक्तिर्वृक्षः श्रीफलनामकः। तत्कीर्त्तने चितावाप्तां यावच्चन्द्रदिवाकरौ। य तद्धर्मम वै लक्ष्मि! परमः प्रियो भवेत्। तत्पत्रैश्चैव मे पूजा भविष्यति न चान्यथा। स्वर्गेऽप्यादिप्रसादादि पुष्पाण्यन्यानि च ध्रुवम्। श्रीफलच्छदनेनैव कर्त्ता नार्हन्ति कोटिकाम्। यथा मे श्रीफलतरुर्मया लक्ष्मालवं मम। तथा प्रियतमं लक्ष्मि! विल्वः श्रीफलच्छदः" तत्रैव ११अ०। "धनुः शतत्रयात्र कूपात् षड्हस्तं तीर्थमुच्यते। अधो भूमेस्तथा तीर्थमतस्तीर्थत्रयं सखि!। ऊर्द्धपत्रं हरो ज्ञेयः पत्रं याम्यं विधिः स्मृतम्। ऊर्द्धदक्षिणपत्रन्तु त्रिपत्रदलमित्युत। अस्य त्रायाच्च पत्रस्य नङ्गुष्ठेन पदा स्पृशेत्। हरते सङ्कटादाहुः पदा स्पर्शात् त्रिवं हरेत्"। रत्नादिना तन्माहात्म्यमुक्त्वा तत्पत्रहरणविधानादि तत्रोक्तं यथा "प्रक्षालनाद्गन्धमाल्यधूपदीपनिवेदनात्। शाखाभङ्गो न कर्त्तव्यो नैवारोहेत्तथा तरुम्। वरमारुह्य चिनुयात्र शाखाभङ्गं कदाचित्। खण्डितैश्च शिवः पूज्यः पत्रैरन्यैश्च खण्डितैः। स्नानमाशानन्तरं बिल्वपत्रं पवित्रं भवेत्। पूजा एतेन वै देवाः सर्वसम्पोदरौ विना। बिल्वदलवनं यत्र वा तु वाराणसी पुरी। पद्मबिल्वद्रुमा यत्र तत्र तिष्ठेत् स्वयं हरिः। मद्मबिल्वद्रुमा यत्र तत्र दुर्गायुतो हरः। एको बिल्वतरुर्यत्र तत्र यज्ञ शतैर्मया वृतः। बिल्वदलानि यत्र दश तत्र यज्ञसहस्रैः वृतः। एतान्युक्तानि तीर्थानि देवाः सर्वे मदुक्तैः। यत्र वाशां स्टक्स्रुक् कोश्च ईशाननामके। जायते श्रीफलतरुर्न तत्र विपदः क्वचित्। पूर्वेशां दुखदः स्याद्विल्वे यत्नभीतिदा। पश्चिमे च प्रजादायी दक्षो बिल्व उदाहृतः। श्मशाने च नदीतीरे प्रान्तरे वा वनान्तरे। बिल्वदलतलं प्रोक्तं शिवपीठस्थलं समम्। न मध्याह्नात्परे दद्यं स्नापयेत् श्रीफलाख्यकम्। दैवाद् यदि प्रजायेत तदा शिववदर्चयेत्। चैत्रादिचतुरो मासान् यजेत परमात्मने। दत्तं स्याद् बिल्वपत्रैकं सहस्रधेनुसमं नरः। मध्याह्नकाले ये मर्त्या बिल्वं कुर्युः प्रदक्षिणम्। तैः सुमेरुर्गिरिवरः कृतएव प्रदक्षिणम्। न छिन्द्यात् श्रीफलतरुं न दहेत् काष्ठमेव च। विना ब्राह्मणवस्त्वर्थं पतितो बिल्वविक्रयी। एकबिल्वस्तु दत्तं यो धत्ते भूम्नि मानवः। यमाधिकारो नास्यास्ति कृतः पापोपपातकैः। बिल्वपत्रं फलं बीजं भूमौ पतितमीश्वरः। स्वयं गृह्णाति शिरसा वैवर्ण्यभयशङ्कितः। चैत्रादिचतुरो मासान् शिवेदुबिल्वतरुं क्षती। यथा स्निग्धो भवेद्दत्तस्तथा तत्पितरोऽपि च। चैत्रादिचतुरो मासान् यदा भ्रमति भास्करः। नवीनबिल्वपत्रार्थी मुक्तिमुक्तिप्रदायकः। इदिदानगरे यत्र वैद्यनाथो महेश्वरः। तत्राश्रयो बिल्वतरुः स्वर्गस्य उदाहृतः। कामरूपे कामतरुः काश्यामक्षतरुर्यथा। काञ्चीपुरे हरः प्रोक्तः श्रीफलोऽत्रयपुण्यदः। तेऽपि तीर्थविशेषाः स्युस्तीर्थैरपि यदार्चिताः।" हेमाद्रौ पु० ११अ०। "तत्फलैस्तत्प्रसूनै-

वा तत्पत्रैः प्रपूजयेत् । तत्काष्ठचन्दनैर्वापि स मे भक्तः स मे प्रियः । तत्काष्ठचन्दनं भक्त्या यो धारयति सन्मुखात् । तत्तनुं शिवमुद्रा सा नमेद्देवी सदान्विता । अतस्तच्चन्दनं देवि ! न धारयति कश्चन । तत्पत्रं तत्फलं वा कदापि धारयेन्न हि । तत्कमूले महेशानि ! प्राणांस्त्यजति यो नरः । रुद्रदेहो भवेत् सद्यं पापकोटियुतोऽपि सन्" योगिनीतन्त्रे पटले ।

"बिल्वशाखं तथा देवि ! भगवान् शङ्करः स्वयम् । बिल्वशाखतले स्थित्वा यदि प्राणांस्त्यजेत् सुधीः । तत्क्षणात्कोटिमाप्नोति शिवलोके तीर्थकोटिभिः । यत्र ब्रह्मादयो देवास्तिष्ठन्ति सुस्थिरेच्छवे । बिल्वशाखतले स्थानं यदि विद्यादिदूरितम् । तदेव शाङ्करं क्षेत्रं सर्वतीर्थमयं सदा । सर्वपीठमयं तत्तु सर्वदेवमयं सदा । न त्यजेत् शाङ्करं क्षेत्रं न च गङ्गां त्यजेत् प्रिये !। यमीशे च च चार्वङ्गि ! बिल्वशाखा यदि प्रिये !। काशीपुरसमं तत्तु तत्र प्राणान् त्यजेद् यदि । किमत्र कोटितीर्थेन काशीवासेन किं प्रिये !। पुरश्चरणसोल्लासे १० पटले । तद्दानविधिर्यथा

"पत्रं वा यदि वा पुष्पं फलं नेष्टमधोक्षजम् । यथोत्पन्नं तथा देयं बिल्वपत्राण्यधोक्षजम् ।" मातृकातन्त्रे ५५ पटले । "शिव उवाच । शृणु देवि ! प्रवक्ष्यामि रहस्यं त्रिजटाह्वयम् । पत्रं ब्रह्ममयं देवि ! ब्रह्मत्वं वरवर्णिनि !। श्रीवैल्वशिखरे जातः श्रीफलः श्रीनिकेतनः । विष्णुप्रीतिकरश्चैव मम प्रीतिकरः सदा । ब्रह्मविष्णुशिवाः पत्रे फलस्य शक्तिरूपकम् । फलमूले तु यज्ञं स्यात् पत्रे ब्रह्मपदं प्रिये !। त्रिजटापत्रकैवल्येन हरं वा हरिमर्चयेत् । कैवल्यं तस्य तेनैव भक्तिपूजा विशेषतः । पत्रं पुष्पं फलं तोयं नैवेद्यं धूपदीपकम् । दत्त्वा यद्यत् फलं प्राप्तं तस्मात् कोटिगुणं भवेत् । सर्वैरर्चनतो देवि ! त्रिजटाबलमर्पणात् । कैवल्यादो हरिश्चैव दास्येऽहं तत्सरूपताम् । त्वयि कैवल्यदं ज्ञानं धर्मज्ञानार्थदं प्रिये !। वज्रहीनमिदं देवि ! प्राप्नुयादाच्छितं फलम् । सवज्रं शिवते न्यूनं वज्राघातेन पार्वति !। तस्मात्तु साधकेन्द्रेण वज्रहीनं प्रदीयते । 'ज्ञात्वं छेदयित्वा यो गच्छेत् सर्वसिद्धिमवाप्नुयात् । ऊर्ध्वं छेदर्शनं रन्ध्रेदधः पशुपतिस्तथा । पुरो माहेश्वरी रन्ध्रे पृष्ठे च गूढधारिणी । दक्षपार्श्वे च श्रीनाथो वामपार्श्वे प्रजापतिः । चन्द्रः सूर्यौ स्थितौ सततमुभादक्षरौ सदा' । ज्ञानभैरवतन्त्रे ६ पटले । बिल्वपत्रस्य सर्वमेवोपयोगेऽपि छेदादरे तादृशवस्तुनो भावात् अन्यस्यैवोपयोगं पूजितं सर्वत्र तथाग्रहणं बोध्यम् । [आ० ३५ अ० ।

बिल्वक न० १तीर्थभेदे भा०वनु० २५ अ० । २नागभेदे भा० बिल्वकादि पु० "बिल्वादिभ्यश्चस्य लुक्" पा०उक्ते अपत्यत्व लुगनिमित्ते यञ्जगणे स च पा० ग० उक्तो यथा "बिल्व वेणु वेत्र वेतस दन्तु काश कपोत दक्ष क्रुञ्चा (क्रुञ्चस्य)। तत्र (नलोपश्च)" वैल्वकीवायां भूमौ भवाः वैल्वकाः तस्य लुक् न कृतो निदर्शनं । बिल्वकीय त्रि० बिल्वाः सन्ति यस्यां नडा० छ कृत्व । बिल्वयुक्तभूमौ ततो बहुत्वे बिल्वा० अणादेश्च लुक् । बिल्वज त्रि०बिल्वात् जायते जन–ड । मालूरजाते । बिल्वस्य विकारः राजन्या० वुञ् । वैल्वक तद्विकारे । बिल्वतेजस् पु० नागभेदे भा० आ० ५७ अ० । बिल्वपत्र पु०नागभेदे भा०भी० १०२ । ६त०२मालूरस्य पत्रे न० "बिल्वपत्रलता पीठे दुर्गोत्सवपद्धतिः । बिल्वपाण्डर पु० नागभेदे भा०आ० ३५अ० । बिल्वपेषिका स्त्री बिल्वस्य पेषः साधनत्वेन अस्त्यस्याः ठन् । (वेलघंट) शुष्कबिल्वखण्डे राजनि० । बिल्ववन न० ६त० । मालूरवृक्षदाये तस्य विकारः राजन्या० वुञ् । वैल्वनक तद्विकारे । बिल्वा स्त्री० बिल–भेदने क्वा०नि० । हिङ्गुपत्र्यां राजनि । बिल्वेश्वर पु० । शिवमूर्त्तिभेदे तत्प्रादुर्भावकथा हरिवं० १२६ अ० । [अवेशीत् विवेश । बिस क्षेपे दि० पर०सक०सेट् । बिसति । हरिः अबिसत्- बिस न० विस–क । मृणाले अमरः । [अमरः । बिसकण्ठिका स्त्री बिसमिव कण्ठोऽस्याः कप् । बलाकायाम् बिसकण्ठिन् पु०बिसमिव कण्ठोऽस्यास्ति इनि । बके राजनि० बिसकुसुम न० बिसस्थितं कुसुमम् मा०त० । कमले राजनि० बिसप्रसून तत्रार्थे अमरः । [खनकर्त्तरि । बिसखा त्रि० प्रियं मृणालं खनति खन–विट् डा । मृणाल बिसग्रन्थि पु० ६त० । मृणालग्रन्थौ । तस्य खलकालुष्यनिवारकता उक्तते उक्ता यथा "सप्त कल्पस्य प्रसाधनानि भवन्ति । तद्यथा कतकशोभेदकबिसग्रन्थिशैवालमूलवल्कानि सल्लामञ्जिष्ठेति" । बिसनाभि स्त्री प्रियं नाभिरिवास्याः । पद्मिन्यां त्रिका० बिसनालिका स्त्री बिसस्य नालिकेव । मृणाले शब्दार्थकल्प० । तस्य सच्छिद्रकनालत्वात् तथात्वम् । बिसल न०ह्रस्व–कलच् । बिसदण्डे त्रिका० ।

बिसवत् त्रि॰ बिस+चतुरर्थे मतुप् मस्य वः। मृणाल-युक्तादौ स्त्रियां ङीप्।

बिसवर्त्मन् पु॰न॰ बिसानां नेलवर्त्मगतरोगभेदे सुश्रुतः। "शून्यं यदर्त्म बहुभिः सूक्ष्मैश्छिद्रैः समन्वितम्। बिसमन्तर्लेख इव बिसवर्त्मेति तन्मतम्"।

बिसिनी स्त्री बिस+पुष्करा॰ इनि। १पद्मिन्याम् अमरः। २मृणालादियुक्ते देशे ३ततूसदृशे च। [यादौ।

बिसिल त्रि॰ बिस+चतुरर्थाम् काश्या॰ इल। मृणालसमी-

बीभत्स त्रि॰बध-निन्द्यां स्वार्थे सन् कर्मणि यत्। १घृणिनि २जुगुप्सिते, ३रसाविशेषे च ४तद्वति तो त्रि॰ मेदि॰। ५नाट्यादौ प्रसिद्धे जुगुप्साख्यभावजे रसभेदे, पु॰अमरः तदुपविषये ६विकृतमांसादौ त्रि॰। "रुद्रोत्साहात्मकरसरौद्रवीरभयानकाः। बीभत्सोऽङ्गुत इत्यष्टौ रसाः शान्तसहा मतः" रसानुद्दिश्य सा॰द॰ लक्षितो यथा "जुगुप्साख्यविभावस्तु बीभत्सः कथ्यते रसः। नीलवर्णो महाकालदैवतोऽयमुदाहृतः। दुर्गन्धमांसपिशितमेदोमज्जासमुद्भवं मतम्। तत्रैव कृमिपातादयुद्वेगोपनयदाहृतम्। निर्वाहनाक्षिवदननेत्रसङ्कोचादयः। अनुभावास्तत्र मतास्तथा व्यभिचारिणः। मोहापस्मारादिरोगः। व्याधिश्च मरणादयः" तन्निरुक्तिः। ७अर्जुने पु॰ मेदि॰।

बीभत्सु पु॰ बध-निन्दने स्वार्थे सन् उ। १अर्जुने। भा॰ वि॰ ४४अ॰ अस्यनिरुक्तिरन्यथोक्ता यथा "न कृत्वा कर्म बीभत्सं युध्यमानः कथञ्चन। तेन देवमनुष्येषु बीभत्सुरिति विश्रुतः"। बीभत्सुरिति भवि कल्याणे सुखे चेत्यस्य सनि रूपम्" नीलक॰। तत्र घृणोः इटोऽभावो नशोपश्च। अन्ये तु बीभत्सकर्मरहितत्वात् विरोधिकथया तन्निन्दनकारित्वाद्वा तथात्वनिन्द्यात्।

बुक्क त्रि॰बुक-अच् घृणोः उपधालोपः। भक्षणशब्दकारके ततः प्रेक्षा॰ चतुरर्थाम् इनि। बुक्किन् भक्षणशब्दकारकस्त्रीपादौ त्रि॰।

बुक्क कुक्कुरादिशब्दे कथने च वा पु॰अक॰पक्षे स्वा॰ पर॰सक॰ सेट्। बुक्कयति ते बुक्कति अबुक्कत् त ङरित् अबुक्कत् अबुक्कीत्। "कथने चुरा॰कत्थादिगणे तु भ्वा॰ रमाभाषः।

बुक्क न॰ बुक-अच्। १हृदयस्थे मांसपिण्डे २अयमांसे ३हृदये च अमरः अस्य स्त्रीत्वमपि स्त्रीत्वे टाप् गौ॰ङीष् वा। "बुक्कावतैर्वृतिनिकटे प्रौढ़राक्षेव राधा" चक्रदः। ४आगे पु॰(गेका)त्रिका॰ ५समये च पु॰ हेमचन्द्रे भरत स्त्री टाप्। घृणो॰ बुक्कबुक्के अपि हृदये।

बुक्कन न॰ बुक-भावे ल्युट्। भक्षणे कुक्कुरादिशब्दे

बुक्कन् पु॰ बुक-कनिन्। बुक्कशब्दार्थे भरतः।

बुक्कस पुंस्त्री॰पुक्कस+पृषोदरादि। वर्णसङ्करे हेमचन्द्र। [सङ्कटः।

बुक्काग्रमांसन॰ष॰त॰। हृदयस्थे मांसपिण्डाकारे अग्रमांसे राय-

बुक्कार पु॰ बुक्कं भक्षणशब्दं करोति कृ-अण्। सिंहध्वनौ हारा॰

बुट छिंसायां चुरा॰उभ॰ सचे भ्वा॰पर॰सक॰सेट्। बोटयति ते। बोटति। अबुबुटत्-त। अबोटीत्। [बुबोड़

बुड स्वागे संवरणे च तु॰क्रटा॰सक॰ सेट्। बुडति अबुडीत्

बुड़िल पु॰उदा॰बुड-इलच्। अश्वतराश्वापत्ये राजभेदे भा॰ उ॰५।१०।१। [अबुदत्-अबोदीत् अबोदिष्ट। उदित्त्वा वेट्।

बुद् निशामने (अवबोधने) भ्वा॰उ॰सक॰सेट्। बोदति ते। ङरित्

बुद्ध पु॰बुध क्त। १भगवतोऽवतारभेदे येन वेदतत्कर्मणोर्निन्दाकृता। २जागरिते, ३ज्ञातवति च त्रि॰ ४पण्डिते पु॰मेदि॰। बुद्धश्च विष्णोः चतुर्विंशत्यवतारमध्ये एकविंशोऽवतारो यथोक्तं "ततः कलौ संप्रवृत्ते सम्मोहाय सुरद्विषाम्। बुद्धो नाम्नाञ्जनसुतः कीकटेषु भविष्यति" भाग॰१।३॥ बुद्धेन प्रोक्तम् अण् तद्देवता अण्। बौद्धप्रोक्तग्रन्थे तद्भिन्ने च त्रि॰। तद्दर्शनभेदस्तन्मतादिकं सर्वदर्शनसंग्रहे दर्शितं यथा "अत्र चैतैरभिधीयते यदभ्यर्थादि अविनाभावो दुर्बोध इति तदसाधीयः तादात्म्यादुत्पत्तिभ्यामविनाभावस्य सुज्ञानत्वात्। तदुक्तम् "कार्यकारणभावाद्वा स्वभावाद्वा नियामकात्। अविनाभावनियमो दर्शनान्नादर्शनादिति" अन्यथाव्यतिरेकाविनाभावनिश्चायकाविति। नन्वेवं पक्षे साध्यसाधनयोरव्यभिचारो दुरवधारणो भवेत्, भविष्यति, भूते अनुपलभ्यमाने च व्यभिचारशङ्काया अनिवारणात्। नन्वेवंविधस्थले तावदेऽपि मते व्यभिचारशङ्का दुष्परिहरेति चेत् मैवं वोचः विनापि कारणं कार्यं सत्पद्यतामित्येवंविधायाः शङ्काया आधातावधिकतया निरुक्तत्वात्। तदेव ह्याशङ्क्येत यत्किञ्चिदाशङ्क्यमाने व्याघातादयो नावतरेयुः तदुक्तम्। "व्याघातावधिराशङ्केति" तस्मात् तदुत्पत्तिनिश्चयेन अविनाभावो निश्चीयते तदुत्पत्तिनिश्चयश्च कार्यहेतोः प्रबन्धोपलम्भात्तदुपलम्भपञ्चकनिबन्धनः। कार्यस्योत्पत्तेः प्रागनुपलम्भः१ कारणोपलम्भे २सत्यनुपलम्भः३उपलब्धेश्च पश्चात् कारणानुपलम्भात्४ अनुपलम्भ५ इति पञ्चकारणा धूमध्वजयोः कार्यकारणभावो निश्चीयते। तथा तादात्म्यनियमेनाप्यविनाभावो निश्चीयते यदि शिंशपा इत्यस्यतिपतेत् वृक्षादन्यमेव अङ्गादिति विपक्षे बाधकमङ्गेः ? अप्रङ्गे

यं बाधते भूयःसहभावोपलम्भेऽपि व्यभिचारशङ्कायाः को निवारयिता। शिंशपात्वस्यैव तादात्म्यनिश्चयो हेतोरयं शिंशपेति सामानाधिकरण्यप्रबन्धादुपपद्यते। न चात्मनाभेदे तत् सम्भवति प्रत्यात्मवेद्येन युष्मदपि प्रयोगायोगात् नाप्यात्मनाभेदे गवाश्वयोरिवातुपलम्भात्। तस्मात् कार्यात्मानौ कारणमात्मानमनुमापयत इति सिद्धम्। यदि कश्चित् प्रामाण्यमनुमानस्य नाङ्गीकुर्यात् तं प्रतिब्रूयात् अनुमानं न भवतीत्येतावन्मात्रं प्रमाणं तत्र न किञ्चन साधनमुपन्यस्यते उपन्यस्यते वा। न प्रथमः एकाकिनी प्रतिज्ञा हि प्रतिज्ञातं न साधयेदिति न्यायात्। नापि चरमः अनुमानं प्रमाणं न भवतीति ब्रुवाणेन त्वया चिरन्तनवचनमेवोपन्यासे अम्मा वन्ध्येतिवद् व्याघातापातात्। किन्तु प्रमाणतदाभासव्यवस्थापनं तत् समानजातीयत्वादिति वदता भवतैव स्वीकृतं स्वभावानुमानम्। परगता विप्रतिपत्तिस्तु वचनविक्रमेनेति ब्रुवता कार्यविक्रमोऽनुमानम्। अनुपलब्धा क्वचिदर्थं प्रतिषेधयतानुपलब्धिविक्रमोऽनुमानम्। तथाचोक्तं तथागतैः "प्रमाणान्तरसामान्यस्थितत्वान्यधियां गतेः। प्रमाणान्तरभावः प्रतिषेधाच्च कस्यचिदिति" परार्थानुमानं सूरिभिरिति मन्यभूयस्त्वमयादुपन्यस्यते। ते च बौद्धा अनुविधया भावनया परमनुग्रहार्हं कथयन्ति। ते च माध्यमिकयोगाचारसौत्रान्तिकवैभाषिकसंज्ञाभिः प्रसिद्धा बौद्धा यथाक्रमं सर्वशून्यत्व-बाह्यशून्यत्वबाह्यार्थानुमेयत्व बाह्यार्थप्रत्यक्षत्वाद्वानातिष्ठन्ते। यद्यपि भगवान् बुद्ध एक एव बोधयिता तथापि बोद्धव्यानां बुद्धिभेदाच्चातुर्विध्यं यथा मतोऽप्रमत्तं इत्युक्ते आरण्यौरानूधानादयः स्वेदाहसारेणाभिसरन्यपरस्परस्वरूपमदाचरन्त्यादिसमयं बुध्यन्ते। सर्वं क्षणिकं क्षणिकम्, दुःखं दुःखं, स्वलक्षणं स्वलक्षणं, शून्यं शून्यमिति भावनाचतुष्टयमुपदिष्टं द्रष्टव्यम्। तत्र क्षणिकत्वं सौत्रान्तिकवैभाषिकानां सत्त्वेनानुमातव्यं यत् यत् तत् क्षणिकं यथा जलधरपटल सलक्षणो भावा इति। न चायमसिद्धो हेतुः अर्थक्रियाकारित्वलक्षणस्य सत्त्वस्य सौत्रान्तिकवैभाषिकाणां प्रत्यक्षसिद्धत्वात् व्यापकव्याहत्या व्याप्यव्याहत्तिन्यायेन व्यापकक्रमाक्रमव्याहृत्यावधिकात् सत्त्वव्याहृत्तेः सिद्धत्वाच्च। तच्चार्थक्रियाकारित्वं क्रमाक्रमाभ्यां व्याप्तं न च क्रमाक्रमाभ्यामन्यः प्रकारः सम्भवति "परस्परविरोधे हि न प्रकारान्तरस्थितिः। नैकतापि विरुद्धानामिति न्यायेन व्याघातस्योद्भटत्वात्। तौ च क्रमाक्रमौ स्वाश्रयिणः सकाशाद् व्यावर्त्तमानौ अर्थक्रियामपि व्यावर्त्तयन्तौ अधिकृतपक्ष एव सत्त्वं व्यवस्थापयत इति सिद्धम्। नन्वधिकस्यार्थक्रियाकारित्वं किं न स्यादिति चेत् तदयुक्तं विरुद्धत्वात् तथा हि वर्त्तमानार्थक्रियाकरणकाले अतीतानागतयोः किमर्थक्रिययोः स्वाश्रयिणः सामर्थ्यमस्ति ? नो वा ? आद्ये तयोरनिराकरणप्रसङ्गः समर्थस्य चेपायोगात् यत् यदा यत्करणसमर्थं तत् तदा तत्करोत्येव यथा सामग्री स्वकार्यं समर्थस्यायं भावः इति प्रसङ्गाद्वानाच्च। द्वितीयेऽपि कदापि न कुर्यात् सामर्थ्यमात्राहृत्वेनात्वादर्थक्रियाकारित्वस्य यत् यदा यच्च करोति तत् तदा तत्रासमर्थं यथा हि शिलायकुलसङ्कुरे, न चैव वर्त्तमानार्थक्रियाकरणकाले इत्तर्त्तिभ्रमाभ्यां अर्थक्रिये करोतीति तद्विपर्ययाच्च। नन्वेवं क्रमवत्सहकारिणः स्थायिनः अतीतानागतयोः क्रमेण क्रमवत्त्वमुपपद्यते इति चेत् तत्रेदं भवान् पृष्टो व्याचष्टां सहकारिणः किं भावस्योपकुर्वन्ति ? न वा ? न चेत् नापेक्षणीयास्ते किञ्चित्कुर्वतां तेषां नादर्थापेक्षात्। उपकारकत्वपक्षे सोऽयमुपकारः किं भावाद्भिद्यते ? न वा ? भेदपक्षे आगन्तुकस्यैव तस्य कारकत्वं स्यात् न भावस्याधिकस्य, आगन्तुकातिशयव्यतिरेकानुविधायित्वात् कार्यस्य। तदुक्तम् "वस्तुतोऽर्थात् किं व्योम्नश्चर्मण्यक्षिणि तयोः फलम् ?। चर्मोपमश्च सोऽनिष्टः सहस्रत्वेऽपि तत्त्वत इति"। अथ भावैः सहकारिभिः सहैव कार्यं करोतीति स्वभाव इति चेत् अत्र तर्हि सहकारिणो न ज्ञाताः प्रत्युत पदार्थमानानपि पामरो नूनं सर्वं कार्यं कुर्यात् स्वभावस्यानपायात्। किञ्च सहकारिजन्योऽतिशयः किमतिशयान्तरमारभते न वा समर्थोऽपि प्राक्तनदुष्पपायाभावर्थप्रसङ्गः। अतिशयान्तरारम्भपक्षे बहुतरस्थानवस्थादोषोऽपि स्यात् अतिशये जनयितव्ये सहकार्यन्तरापेक्षायां तत्परम्परायाः इत्येकानवस्थाऽऽस्थेया, तथाहि सहकारिभिः कश्चिदवनादिभिः प्रदार्थसार्थैराधीयमाने बीजस्यातिशये बीजतदादनमभ्युपेयम् अपरथा तदभावेऽतिशयः प्रादुर्भवेत् बीजस्यातिशयमादधानं सहकारिसार्थमेवाधत्ते अन्यथा सर्वदोपकारापत्तौ अङ्कुरस्यापि सदोदयः प्रसज्येत। तस्मादतिशयार्थमपेक्षमाणैः सहकारिभिरिति-

अथान्तरमाधेयं बीजे, तस्मिन्नुपकारे पूर्वन्यायेन षड्कारिसामर्थ्यस्य बीजस्य जनकत्वे षड्कारिसम्बाद्यबीजगतातिशयानवस्था प्रसक्ता व्यवस्थिता। अथोपकारः कार्यार्थमपेक्षमाणोऽपि बीजादिनिरपेक्षं कार्यं जनयति तदपेक्षो वा। प्रथमे बीजादेरहेतुत्वमापद्येत्। द्वितीये ह्यपेक्षमाणेन बीजादिना उपकारे अतिशय आधेयः एवं तत्र तत्रापीति बीजादिजन्यातिशयविशेषातिशयपरम्पराघात इति द्वितीयानवस्था दुरवस्था स्यात्। अथ भावाद्भिन्नोऽतिशयः षड्कारिभिराधीयत इत्यभ्युपगम्यते तर्हि प्राचीनो भावोऽनतिशयात्मा निष्टप्तः अन्यथातिशयात्मा कुविन्दादिपटवेदनीयो जायत इति स्थितं समापि मनोरथदुर्गेण। तस्मादसिद्धत्वादर्थक्रिया दुर्घटा। नाप्यक्रमेण घटते विरुद्धत्वात्। तथा हि युगपत्सकलकार्यकरणसमर्थः स भावस्तदुत्तरकालमनुवर्त्तते न वा। प्रथमे तत्कालवत् कालान्तरेऽपि तावत्कार्यकरणमापतेत्। द्वितीये ह्यविशिष्टत्वाद्या कुविन्दभवितव्यतोत्पादयद्भिरादिजननप्रार्थनामनुकरेत्। यत् विरुद्धधर्माध्यस्तं तत्तथा यथा शीतोष्णे। विरुद्धधर्माध्यस्तत्वायमिति अत्रधरे प्रतिबन्धसिद्धिः। न चायमसिद्धो हेतुः, स्थायिनि कालभेदेन सामर्थ्यासामर्थ्ययोः प्रसक्ततद्विपर्ययसिद्धत्वात्। तत्रासामर्थ्यसाधको प्रसक्ततद्विपर्ययौ प्रागुक्तौ सामर्थ्यसाधकावभिधीयेते यदा यज्जननासमर्थं तत् तदा तन्न करोति यथा शिलाशकलमङ्कुरम्, असमर्थश्चायं वर्त्तमानार्थक्रियाकरणकाले अतीतानागतयोरर्थक्रिययोरिति प्रसङ्गः यदा यत् करोति तत् तदा तत्र समर्थं यथा सामर्थ्यो स्वकार्यं करोति, करोति चायमतीतानागतकाले तत्कालवर्त्तिन्यावर्थक्रिये भाव इति प्रसङ्गव्यत्ययः विपर्ययः। तस्माद् विपक्षे क्रमयौगपद्याभ्यामित्या व्याप्तेरुपलम्भेनाधिगतव्यतिरेकव्याप्तिकं प्रसक्ततद्विपर्ययवत्। स्वहेतोरन्वयव्याप्तिकं सत्त्वं सधिकत्वमेव एव व्यवस्थाप्यतीति सिद्धम्। तदुक्तं धानक्रियया "यत् सत्तत् क्षणिकं यथा जलधरः सत्त्वं भावा अमी सत्तामक्रमिरिष्टार्थक्रियेति सिद्धेः सिद्धेषु सिद्धा न वा। साध्येष्वेव विधाऽन्यथा परजनेनापि क्रियादिभेदेन द्वेधापि अथमङ्कुरकृतिरतः साध्ये च विश्राम्यतीति"। न च कथमक्षणिकस्याद्यक्षणकारेण सत्तासामान्ययोगित्वमेव सत्त्वमिति अनवद्यं सामान्यविशेषसमवायानामसत्त्वप्रसङ्गात्। न च तत्र स्वरूपसत्तानिबन्धनः सदुव्यवहारः प्रदीपकलिकारावाप्तेः अनुगतत्वानुगतत्वविकल्पपराहतेश्च, सर्वथाक्षीणक्षणादिषु विलक्षणेषु चक्षेऽनुगतसाकारस्य भणिषु स्वबहुभूतगणेषु मुखस्याप्रतिभासनाच्च। किञ्च सामान्यं सर्वगतं स्वाश्रयसर्वगतं वा प्रथमे सर्ववस्तुसङ्करप्रसङ्गः अपसिद्धान्तापत्तिश्च यतः प्रोक्तं प्रशस्तपादेन "स्वविषयसर्वगतमिति। किञ्च विद्यमाने घटे वर्त्तमानं सामान्यमन्यत्र आवयवेन संबध्यमानं तस्मादागच्छत् संबध्यते अनागच्छत् वा आद्ये दृष्टव्यापत्तिः द्वितीये सम्बन्धानुपपत्तिः। किञ्च विनष्टे घटे सामान्यमवतिष्ठते, विनश्यति, स्थानान्तरं गच्छति वा प्रथमे निराधारत्वापत्तिः, द्वितीये नित्यत्वाद्योयुक्तयुक्तिः, तृतीये दृष्टव्यत्वप्रसक्तिः दृश्यादि दृश्यपक्षप्रसक्तत्वात् सामान्यप्रामाणिकैरम्। "अन्यत्र वर्त्तमानस्य ततोऽन्यस्थानजन्मनि। तस्मादसतः स्थानाद् दृत्तिरित्यतियुक्तता। यस्मादौ वर्त्तते भावस्तेन संबध्यते नेतरत्। तद्देशेनस्य आप्नोति किमन्येतन् मतान्तरम्। न याति न च तत्रासीदस्ति पश्चान्न चांशवत्। जहाति पूर्वं नाधारमहो व्यसनसन्ततिरिति" अनुदात्तप्रलयः किमालम्बन इति चेत् अङ्कुर आलम्बन एवेति सन्तोऽभ्युपगन्तव्यमिति अलमतिप्रसङ्गेन। सर्वस्य संसारस्य दुःखात्मकत्वं सर्वतोऽकरणप्रसक्तम् अन्यथा तद्विनिवर्त्तयितृणां तेषां तद्विनिवृत्त्युपाये प्रवृत्त्यनुपपत्तेः। तस्मात् सर्वं दुःखं दुःखमिति भावनीयम्। नन्वेवं किमिदमिति पृष्टे दृष्टान्तः कथनीय इति चेन्नैवं अलक्षणानां लक्षणानां लक्षितया लक्षणस्याभावात् नैतेन लक्षणमपरमिति वक्तुमशक्यत्वात्। ततः स्वलक्षणं स्वलक्षणमिति भावनीयम्। एवं शून्यं शून्यमपि भावनीयं अत्रे आगरचे च न मया दृष्टमिदं रजतादीति विधिनिषेधलोपलम्भात्। यदि दृष्टं वस्तु तदा तद्विधिष्टस्य दर्शनच्छेदनाद्वा अधिष्ठानस्य च तस्मिन्नध्यस्तस्य रजतादेस्तत्सम्बन्धस्य च समवायादेः सत्त्वं ज्ञातुं न चैतदिदं कस्यचिद् वादिनः। न चार्द्धजरतीयमेतच्च हि कुड्यादा एको भागः प्रावाद्य अपरो भागः प्रद-

वाय कल्पतामिति कल्पते। तस्मादध्यक्षाधिगत-तत्सम्बन्धदर्शनदृष्टयां मध्ये एकस्यानेकस्य वा व-स्तुनो निषेधविषयत्वेन सर्वशून्यत्वं बलादापतेदिति।

(माध्यमिकाः) भगवतोपदिष्टे माध्यमिकास्तावदुत्तमप्रज्ञा इत्य-न्वीक्षयन् भिक्षुपादप्रसारणन्यायेन चक्षुरुन्मीलनाद्यभिधान-सूत्रेण ख्यापितत्वात्सूत्रवेदनीयत्वात्तुगतसर्वसत्त्वभव्यभाव-र्त्तनेन सर्वशून्यतायामेव पर्य्यवसानम्। अतस्तत्त्वं सदस-दुभयानुभयात्मकचतुष्कोटिविनिर्मुक्तं शून्यमेव। तथा हि यदि घटादेः सत्त्वं स्वभावस्तर्हि कारकव्यापारवैयर्थ्यम्। असत्त्वं स्वभाव इति पक्षे प्राचीन एव दोषः प्रादु-र्भावात्। यदोक्तम् "न सतः कारणापेक्षा व्योमादेरिव युज्यते। कार्यस्वभावभावो हेतुः खपुष्पादेरिवासतः" इति विरोधादितरौ पक्षावनुपपन्नौ तदुक्तं भगवता सङ्गारतारे "बुद्धा विविच्यमानानां स्वभावो नावधार्यते। अतो निरभिलप्याश्च निःस्वभावाश्च देशिताः" इति। "इदं वस्तु यथायतं यद्दृष्टं विपश्चितः। यथा यथार्थाभिनिवेशो विशीर्य्यते तथा तथेति" च। न क्वचिदपि पक्षे व्यवतिष्ठत इत्यर्थः। इत्थंव्यवहारश्च न स्वप्नव्यवहार-वत् संवृत्त्या सङ्गच्छते। अतएवोक्तम् "परिव्राट्स्वाप्तक सुनामेकस्यां प्रमदातनौ। कुणपः कामिनी भक्ष्य इति तिस्रो विकल्पना इति।" तदेवं भावनाचतुष्टयवशाच्चि-त्तविषयवासनानिवृत्तौ निर्बीजं शून्यरूपं हेयस्वतोति यथं ज्ञतार्थाः नाक्षाक्षपदेशं किञ्चिदस्तीति। शिष्यै-स्तावद्योगाचारश्चेति इयं करणीयम्। तत्रौपाय्य-स्यार्थस्य प्राप्तये पर्य्यनुयोगो योगः शुक्लस्यार्थस्याङ्गीकर-णमाचारः शुक्लस्याङ्गीकरणादुत्तमाः पर्य्यनुयोगस्या-करणाद्धमाश्च यतस्तेषां माध्यमिका इति प्रसिद्धिः।

(योगाचाराः) शुक्लभावनाचतुष्टयं बाह्यार्थस्य शून्यत्वं चाङ्गीकृत्याऽन्तरस्य शून्यत्वस्याङ्गीकृतं कथमिति? पर्य्यनुयोगस्य करणात् तेषामिदं योगाचारत्वम्। एवं हि तेषां परिभाषा स्वसंवेदनं तावदङ्गीकार्यम् अन्यथा जगदान्ध्यं प्रसज्येत। तत्कीर्त्तितं धर्म्मकीर्त्तिना "ग्राह्यग्राहकसंवित्ती नार्थतत्त्वतः प्रविभ्यतीति।" बाह्यं ग्राह्यं नीलादिकं एव विकल्पानुपपत्तेः। अथो ज्ञान-ग्राह्यो भावादुत्पन्नो भवति अनुत्पन्नो वा, न पूर्वः उत्प-न्नस्य क्षणिकत्वात् नापरः अनुत्पन्नस्यासत्त्वात्। अथ-वान्येषां अतीत एवार्थो ज्ञानग्राह्यः तज्जनकत्वादिति यदपि बाह्यमभिमतं वर्त्तमानत्वमात्रविरोधात् इन्द्रियाः-दैरपि ग्राह्यत्वप्रसङ्गाच्च। किञ्च ग्राह्यः किं परमाणु-रूपोऽर्थः अवयविरूपो वा। न चरमः अतीन्द्रियत्वात् षट्केन युगपद्योगस्य बाधकत्वाच्च। यदोक्तम् "षट्केन युगपद् योगात् परमाणोः षडंशता। तेषामप्येकदेशत्वे पिण्डः स्यादणुमात्रकः" इति। तस्मात् स्वव्यतिरिक्त-ग्राह्यविरहात्तदाकारा बुद्धिः स्वयमेव स्वात्मरूपप्रका-शिका प्रकाशवदिति सिद्धम्। तदुक्तम् "नान्योऽनुभाव्यो बुद्धेस्ति तस्या नानुभवोऽपरः। ग्राह्यग्राहकवैधुर्यात् स्वयं सैव प्रकाशते इति।" ग्राह्यग्राहकयोरभेदस्तानु-मानतश्चः यद्वेद्यते येन वेदनेन तत्ततो न भिद्यते यथा ज्ञानेनात्मा, वेद्यन्ते तैश्च नीलादयः। भेदे हि सत्य-पुना अनेनार्थस्य सम्बन्धित्वं न स्यात् तादात्म्यस्य नि-यमहेतोरभावात् तदुत्पत्तेरनियामकत्वात् यश्चायं ग्राह्य-ग्राहकसंवित्तीनां पृथगवभासः स एकस्मिंश्चन्द्रमसि द्वित्वावभास इव भ्रमः अनाद्यनादिविचित्रवासनाबला भेद-वानमेव निमित्तम्। यदोक्तम् "सङ्ख्योपलक्षणनियमा-दभेदो नीलतद्धियोः। भेदश्च भ्रान्तिविज्ञानैर्दृश्येतेन्दा-विवाद्वये" इति। "अविभागोऽपि बुद्ध्यात्मा विपर्य्यासित-दर्शनैः। ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते" इति च। न च रसवीर्य्यविपाकादिसमानभागाभोदभोपार्जितभो-दकानां स्यादिति वेदितव्यं वस्तुतो वेद्यवेदकाकार-विधुरायां अपि बुद्धेर्व्यवहारपरिज्ञानानुरोधेन विभिन्न-ग्राह्यग्राहकाकाररूपवत्तया तिमिरादुपप्लुतानां केशो-ण्डुकनाडीज्ञानानामेकदनाद्युपप्लववासनाबलाच्चन्द्रे द्वित्वा-दिवत्तेषां ग्राह्यग्राहकसंवित्तिभेदवत्तोपपत्तेः पर्य्यनुयोगायोगात्। यदोक्तम् "वेद्यवेदका-कारा यथा भ्रान्तैर्निरीक्ष्यते। विभक्तैकस्वभावाग्राह्यग्राह-काकारविप्लवा। तथा ज्ञातव्यस्त्वेतं केशादिज्ञानभेद-वत्। यदा तदा न सङ्कीर्णा ग्राह्यग्राहकवत्तयेति" तस्माद् बुद्धिरेवानादिवासनावशादनेकाकारावभासत इति सिद्धम्। ततश्च प्रागुक्तभावनाप्रचयबलाच्चित्तविषयवास-नोच्छेदविगलितविविधविषयाकारोपप्लवविप्लुतविज्ञानोदयो महोदय इति।

(सौत्रान्तिकाः) चक्षे तु मन्यन्ते यदोक्तं बाह्यं वस्तु-जातं नास्तीति तदयुक्तं प्रमाणाभावात्। न च सङ्कोपलक्षणनियमः प्रमाणमिति वक्तव्यं वेद्यवेदकयो-रभेदसाधकत्वेनाभिमतस्य तस्याप्रयोजकत्वेन सन्दिग्ध-विपक्षव्यावृत्तिकत्वात्। ननु भेदे सङ्कोपलक्षणनियमात्तं

साधनं न स्यादिति चेत्र ज्ञानस्यालम्बितया च भेदेन प्रतिभासमानतया एकदेशत्वैककालत्वसङ्ख्यसङ्ख्यत्वनियमासम्भवाच्च नीलार्थस्य ज्ञानाकारत्वे सङ्गमिति प्रतिभासः स्यात् नत्विदमिति प्रतिपत्तिः प्रत्ययाव्यतिरेकात्। अथोच्यते ज्ञानस्वरूपोऽपि नीलाकारो भ्रान्त्या बहिर्देशेन प्रतिभासत इति न च तत्साङ्कर्यं च इति यथोक्तम् "परिच्छेदात्मरादू योऽयं भागो बहिरिव स्थितः। ज्ञानस्याभेदिनो भेदप्रतिभासोऽभ्युपप्लवः" इति। "यदन्तर्ज्ञेयतत्त्वं तद् बहिर्वदवभासत इति च" तदयुक्तं बाह्यार्थाभावे तदुत्पत्तिरहिततया बहिर्वदिति दृष्टान्तोक्तेरयुक्तेः न हि वन्ध्यासुतवदवभासत इति प्रेक्षावानाचक्षीत। भेदप्रतिभासस्य भ्रान्तत्वे ऽभेदप्रतिभासस्य प्रामाण्यं, तत्प्रामाण्ये च भेदप्रतिभासस्य भ्रान्तत्वमिति परस्पराश्रयप्रसङ्गाच्च। अविसंवादात्नीलतादिकमेव संविदाना बाह्यमेवोपादत्ते जनस्तु भेदेऽपि चान्तरमिति व्यवस्थादर्शनाच्च। एवञ्चायमभेदसाधको हेतुर्नीलमयमायसीवन्ध्यायदाभासतां भजेत् अतो बहिर्वदिति वदता बाह्यं बाह्यमेवेति भावनीयमिति भवदीय एव बाधो भवन्तं प्रहरेत्। नन्वाकाशस्य बाह्यत्वमसदप्रसक्तमिति चेत् तदप्यसम्यक् इन्द्रियसन्निकृष्टस्य विषयस्योत्पाद्ये ज्ञाने आकारसमर्पकतया समर्पितेन चाकारेण तस्यार्थस्यानुमेयतोपपत्तेः अतएव पर्यनुयोगपरिहारो समर्थयिष्यताम्। "भिन्नकालं कथं ग्राह्यमिति चेत् ग्राह्यतां विदुः। हेतुत्वमेव च व्यक्तेर्नीलाकारार्पणक्षममिति" तथा च यथा दृष्ट्वा भोजनमनुमीयते यथा च भावना देवदत्तः यथा वा सङ्केतेन क्षेत्रः तथा ज्ञानाकारेण ज्ञेयमनुमेयम्। तदुक्तम् "अदृष्टेन घटयितुं न हि सक्यो ऽर्थरूपता। तस्मात् प्रमेयाधिगतेः प्रमाणं मेयरूपतेति" न हि विज्ञप्तिरेव तदुपेदना युक्ता तस्याः सर्वत्राविशेषात् तान्तु साकल्यमाविशत् सङ्कर्षितुं घटतेदिति च। तथा च बाह्यार्थसद्भावे प्रयोगः ये यस्मिन् सत्यपि कादाचित्काः ते सर्वे तदतिरिक्तसामेक्षाः यथा ज्ञप्तिरूपाः, अस्मिन्नसिषति मयि वचनमसनमिति भावा विज्ञप्तिरूपाः प्रवृत्तिप्रत्यया इति च व्याप्त्या ज्ञप्तिप्रत्ययाः सत्यपालम्बविज्ञाने कदाचिदेव नीलादयुल्लेखिना इति। तस्मादालम्बविज्ञानं बाह्यार्थमात्रं विज्ञानं, नीलाद्युल्लेखि च प्रवृत्तिविज्ञानम्। यथोक्तम् "तत् स्यादालम्बविज्ञानं यद्भेदेऽप्यसदात्मनि। तत् स्यात् प्रवृत्तिविज्ञानं यन्नीलादिसमुल्लेखि" तस्मादालम्बविज्ञानसन्तानातिरिक्तः कादाचित्कः प्रवृत्तिविज्ञानहेतुर्बाह्योऽर्थो व्याकृत एव न वासनापरिपाकप्रत्ययः कादाचित्कत्वात् कदाचिदुत्पाद इति वेदितव्यम्। विज्ञानवादिनये हि वासनानामेकसन्तानवर्त्तिनामालम्बविज्ञानानां तत्तत्प्रवृत्तिजननशक्तिः तस्माच्च स्वकार्योत्पादं प्रत्याधिक्षिप्तं परिपाकः तस्य च प्रत्ययः कारणं सजातीयसन्तानवर्त्तिपूर्वक्षणः कथमुच्यते सन्तानान्तरनिबन्धनत्वानङ्गीकारात्। ततश्च प्रवृत्तिज्ञानजननायालम्बविज्ञानवृत्तिवासनापरिपाकं प्रति सर्वेऽप्यालम्बविज्ञानवर्त्तिनः क्षणाः समर्था एवेति वक्तव्यम्। न चैवं कोऽपि न समर्थः स्यादालम्बविज्ञानसन्तानवर्त्तित्वाविशेषात्। सर्वे समर्था इति पक्षे कार्यक्षेपानुपपत्तिः ततश्च कादाचित्कत्वनिर्वाहाय शब्दस्पर्शरूपरसगन्धविषयाः सुखादिविषयाः षडपि प्रत्ययाश्चतुरः प्रत्ययान् प्रतीत्योत्पद्यन्ते इति चतुरेवानिच्छताप्यङ्गीकर्तव्या ज्ञानुपलम्भनाच्चाद्य परिच्छेत्तव्यम्। ते चत्वारः प्रत्ययाः आलम्बनसमनन्तरहेतुकार्याधिपतिरूपाः तत्र ज्ञानपदवेदनीयस्य चित्तस्य नीलालम्बनप्रत्ययात् नीलाकारता भवति, समनन्तरप्रत्ययात् प्राचीनज्ञानाद् बोधरूपता, सहकारिप्रत्ययादालोकात्, चक्षुरोऽधिपतिप्रत्ययादिन्द्रियप्रकृष्टप्रदेशनियमः सिद्धेश्च ज्ञानस्य रक्षादिसाधारणप्राप्तेर्नियामकं चक्षुरधिपतिमर्हति लोके नियामकस्याधिपतित्वोपलम्भात्। एवं चित्तचैत्तानामेकानां सुखादीनां चत्वारि कारणानि द्रष्टव्यानि। एवं चित्तचैत्तालम्बनः पञ्चविधः रूपविज्ञानवेदनासंज्ञासंस्कारसंज्ञकः। तत्र रूपस्कन्धः एथिविविषया इति च व्युत्पत्त्या सविषयाणीन्द्रियाणि रूपस्कन्धः। आलयविज्ञानप्रवृत्तिविज्ञानप्रवाहो विज्ञानस्कन्धः। प्रागुक्तस्कन्धत्रयसम्बन्धजन्यः सुखदुःखादिसंवेदनप्रवाहो वेदनास्कन्धः। गौरित्यादिशब्दोल्लेखिविज्ञानप्रवाहः संज्ञास्कन्धः। वेदनास्कन्धनिबन्धना रागद्वेषादयः क्लेशा उपक्लेशाश्च भद्रसानादयो धर्माधर्मौ च संस्कारस्कन्धः। तदिदं सर्वं दुःखं दुःखस्यायतनं दुःखसाधनञ्चेति भावयित्वा तन्निरोधोपायं तत्त्वज्ञानं समादद्यात्। अत एवोक्तं "दुःखसमुदायनिरोधमार्गास्चत्वारः सत्यानि तत्त्वानि"। तत्र दुःखं स्कन्धाः, समुदायो दुःखकारणं,

तद् द्विविधं प्रत्ययोपनिबन्धनो हेतूपनिबन्धनश्च। तत्र प्रत्ययोपनिबन्धनस्य संग्राहकं सूत्रम् "इदं कार्यं ये अन्ये हेतवः प्रत्ययन्ति गच्छन्ति तेषामवयवानां हेतूनां भावः प्रत्ययत्वं, कारणसमवायः तन्मात्रस्य फलं, न चेतनस्य कस्यचिदिति सूत्रार्थः। यथा बीजपितरङ्कुरो धातूनां यस्यां समवायाज्जायते। तत्र पृथिवीधातुरङ्कुरस्य काठिन्यं गन्धञ्च जनयति, अप्धातुः स्नेहं रसञ्च जनयति, तेजोधातुः रूपमौष्ण्यञ्च, वायुधातुः स्पर्शनं चलनञ्च, आकाशधातुरवकाशं शब्दञ्च ऋतुधातुर्वयोयोगं पृथिव्यादिकम्। हेतूपनिबन्धनस्य च संग्राहकं सूत्रम् "उत्पादाद् वा तथागतानामनुत्पादाद् वा स्थितैवैषा धर्माणां धर्मता धर्मस्थितिता धर्मनियामकता च प्रतीत्य समुत्पादानुलोमतेति"। तथागतानां बुद्धानां सतां धर्माणां कार्यकारणरूपाणां या धर्मता कार्यकारणभावरूपा एतेषामादानुत्पादाद् वा स्थिता, यस्मिन् सति यदुत्पद्यते तत् तस्य कारणस्य कार्यमिति धर्मतेत्यस्य विवरणं, धर्मस्य कार्यस्य कारणानतिक्रमेण स्थितिः स्वार्थिकस्तलप्रत्ययः। धर्मस्य कारणस्य कार्यं प्रति नियामकता। नन्वयं कार्यकारणभावश्चेतनमन्तरेण न सम्भवतीति कुत उक्तं कारणे सति तत्प्रतीत्य प्राप्य समुत्पादे अनुलोमता अनुसारिता वा सैव धर्मता उत्पादादनुत्पादाद् वा धर्माणां स्थिता। न चात्र कश्चिच्चेतनोऽधिष्ठातोपलभ्यत इति सूत्रार्थः। यथा प्रतीत्य समुत्पादस्य हेतूपनिबन्धः बीजादङ्कुरोऽङ्कुरात् काण्डं काण्डात्रालो नालादूर्ध्वतः सूकं ततः पुष्पं ततः फलम्। न चात्र बाह्ये समुदाये कारणं बीजादि कार्यमङ्कुरादि चेतायते अहमङ्कुरं निर्वर्त्तयामि अहं बीजेन निर्वर्त्तित इति। एवमध्यात्मिकेष्वपि कारणद्वयमवगन्तव्यम्। सुरःस्थिते प्रमेयाणौ यत्किञ्चरमियोपरुध्यते। तदभवनिरोधः तदनन्तरं विमलज्ञानोदयो वा सन्ति सन्तिरोधोपायो मार्गः स च तत्त्वज्ञानं तच्च प्राचीनभावनाबलाद् भवतीति परमं रहस्यम्। सूत्रान्तं पृच्छता कथितं भवत्व सूत्रान्तं पृष्टवतः सौत्रान्तिका भवन्तिति भगवताभिहितत्वया सौत्रान्तिकसंज्ञाः सञ्जाताः।

(वैभाषिकाः) केचन बौद्धाबाह्येषु रूपादिषु ज्ञानेषु सुखादिषु स्कन्धेषु सत्स्वपि तत्तानास्थासत्यादयित्वं सर्वं शून्यमिति, प्राथमिकान् विनेयानधीकृत्य भगवान्, द्वितीयांस्तु विज्ञानमात्रपदविदान् विज्ञानमेवैकं सदिति, तृतीयानुभयं सत्यमित्याश्रितान् विज्ञेयमनुमेयमिति, सैवं विरुद्धा भाषेति वर्षयन्तो वैभाषिकाख्या ख्याताः। एषा हि तेषां परिभाषा समुन्नमति। विज्ञेयानुमेयत्वादे प्रामाण्यिकस्य कस्यचिदप्यर्थस्याभावेन व्याप्तिसंवेदनस्थानाभावेनानुमानप्रवृत्त्यनुपपत्तिः सकललोकानुभवविरोधश्च। ततश्चार्थो द्विविधः बाह्योऽध्यक्षमेयश्च तत्र षड्धं निर्विकल्पकरूपं प्रमाणं कल्पनापोढत्वात्, अध्यवसायः सविकल्पकरूपोऽप्रमाणं कल्पनात्मकत्वात्। तदुक्तम् "कल्पनापोढमभ्रान्तं प्रत्यक्षं निर्विकल्पकम्। विकल्पो वस्तुनिर्भासादसंवादादुपप्लवः" इति। "बाह्यं वस्तु प्रमाणं हि षड्धं यदितोऽन्यथा। न तद्वस्तु न तज्ज्ञानं शब्दलिङ्गेन्द्रियादिजमिति च" ननु सविकल्पकस्याप्रामाण्ये कथं ततः प्रवृत्तस्यार्थप्राप्तिः संवादश्चोपपद्येतामिति चेन्न तद्वृत्तं मणिप्रभाविषयमणिविकल्पस्यावेन पारम्पर्येणार्थप्रतिलम्भसम्भवेन तदुपपत्तेः। अवधिष्टं सौत्रान्तिकप्रस्तावे प्रपञ्चितमिति नेह प्रतन्यते। न च विनेयाशयानुरोधेनोपदेशभेदः साम्प्रदायिको न भवतीति भणितव्यं यतो भणितं बोधिचित्तविवरणे "देशना लोकनाथानां सत्त्वाशयवशानुगाः। भिद्यन्ते बहुधा लोके उपायैर्बहुभिः किल। गम्भीरोत्तानभेदेन क्वचिद्भेदवचस्यताः। भिन्ना हि देशनाऽभिन्ना शून्यताहृदयङ्गमेति।

द्वादशायतनपूजा श्रेयस्करीति बौद्धागमे प्रसिद्धम्। "अर्घानुपार्ह्य बहवो द्वादशायतनानि वै। परिनः पूजनीयानि किमन्यैरिह पूजितैः। घ्राणेन्द्रियादि पञ्चैव तथा कर्मेन्द्रियाणि च। मनोबुद्धिरिति प्रोक्तं द्वादशायतनं बुधैरिति"। विवेकविलासे बौद्धमतमित्यमध्यधायि। "बौद्धानां सुगतो देवो विज्ञप्तं क्षणभङ्गुरम्। आर्यसत्त्वाख्यया तत्त्वचतुष्टयमिदं क्रमात्। दुःखमायतनञ्चैव ततः समुदयो मतः। मार्गश्चेत्यस्य च व्याख्या क्रमेण श्रूयतामतः। दुःखं संसारिणः स्कन्धाश्च पञ्च प्रकीर्तिताः। विज्ञानं वेदना संज्ञा संस्कारो रूपमेव च। पञ्चेन्द्रियाणि शब्दाद्या विषयाः पञ्च सामान्यम्। धर्मायतनमेतानि द्वादशायतनानि तु। रागादीनां गणोऽयं स्यात् समुदेति यतां हृदि। आत्मात्मीयस्वभावाख्यः स स्यात् समुदयः पुनः। क्षणिकाः

वर्णसंस्कारो इति या शासना स्थिरा। स मार्ग इति विशेषः स च बोद्धोऽभिधीयते। प्रत्यक्षमनुमानञ्च प्रमाणद्वितयं तथा। चतुःप्रस्थानिका बौद्धाः ख्याता वैभाषिकादयः। अर्थौ ज्ञानान्वितो वैभाषिकैश्च बहुमन्यते। बौद्धानिकेन प्रत्यक्षपाङ्क्तोऽर्थो न बहिर्मतः। आकारसहिता बुद्धिर्योगाचारस्य सम्मता। केवलां संविदं स्वस्थां मन्यन्ते मध्यमाः पुनः। रागादिज्ञानवासनाच्छेदसम्भवा। चतुर्णामपि बौद्धानां सङ्क्षिप्तेयं प्रकीर्त्तिता। क्षत्तिः कमण्डलुर्भैक्ष्यं चीरं पूर्वाह्णभोजनम्। सङ्घो रक्ताम्बरत्वञ्च शिष्यिये बौद्धभिक्षुभिरिति"।

बुद्धगया स्त्री (बुधगया) प्रसिद्धे बौद्धटीर्थे बुद्धानां सप्तमेदे।

बुद्धद्रव्य न० स्तौपिके स्तूपीकृते द्रव्ये तिका०।

बुद्धधर्म्म पु० ६त०। बुद्धानामर्हंत्वादौ धर्मे।

बुद्धपुराण न० बुद्धस्यावितीयत्वादिज्ञापके पुराणभेदे।

बुद्धान्त पु०बुध-भावे क्त तस्यान्तः परिच्छेदः। जीवस्यावस्थाभेदे आपदवस्थावाम् शत०ब्रा०१४। ७।१।१८।

बुद्धि स्त्री०बुध-क्तिन्। १ज्ञाने, २सांख्योक्ते सप्तदशादष्टविधधर्मयुते प्रकृतिपरिणामभेदे "महत्तत्त्वमिति प्रोक्तं बुद्धितत्त्वं तदुच्यते" सां० प्र० भा० धृतवाक्यम्। वेदान्तोक्ते निश्चयात्मकवृत्तियुते २अन्तःकरणे च। "मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरम्। संशयो निश्चयो गर्वः स्मरणं विषया इमे" वेदान्तप०। ४धर्मपत्नीभेदे भा०आ०६६अ०। कणा०सूत्रोपस्कारवृत्तौ सांख्यमतसिद्धमहत्तत्त्वरूपबुद्धितत्त्वनिराकरणेन बुद्धेर्ज्ञानपर्य्यायता तद्भेदाश्चोक्ता यथा "द्रव्येषु ज्ञानं व्याख्यातम्" सू० "विषयेषु विषयिणं तृतीयाध्यायस्थसूत्रद्वयति। "इन्द्रियार्थप्रसिद्धिरिन्द्रियार्थेभ्योऽर्थान्तरस्य हेतुः" "आत्मेन्द्रियार्थसन्निकर्षाद् यन्निष्पद्यते तदन्यत्व" रत्नेताभ्यां सूत्राभ्यां ज्ञानं व्याख्यातमित्यर्थः"। तत्र "बुद्धिरूपलब्धिर्ज्ञानं प्रत्यय इति पर्य्यायाः" गौ०सू० समानतन्त्रे बुद्धिसूत्रे वात्सूत्रमतनिरासार्थं पर्य्यायाभिधानम्। सांख्या हि बुद्ध्यादिशब्दानामर्थभेदमाचक्षते तथा हि सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः, सा चैकैव पुरुषास्तु परं भिद्यन्ते ते च कूटस्था नित्या अपरिणामिनो नित्यचैतन्यस्वभावाः ते च पङ्गवोऽपरिणामित्वात् प्रकृतिस्तस्या जडत्वात् यदा विषयभोगेच्छा प्रकृतिपुरुषभेददृष्टिर्वा च प्रकृतेर्भवति तदा सा पुरुषोपरागवशात् परिणमेत् तस्याद्याद्यः परिणामो ऽन्तःकरणविशेषः बुद्धिरेव महत्तत्त्वं तद्रूपम् "प्रकृतेर्महान्" इति सां०सू०। सा च बुद्धिर्दर्पणवच्छिन्नेन्द्रियप्रणालिकया विषयाकारो यः परिणतिभेदो घट इति पट इत्याद्याकारस्तज्ज्ञानं वृत्तिरिति चाख्यायते तस्यां बुद्धौ वर्त्तमानेन ज्ञानेन चैतन्यस्य पुरुषस्य भेदाग्रहादहं जानामीति बोऽभिमानविशेषः सैवोपलब्धिः। शब्दस्पर्शादिविषयसन्निकर्षादिन्द्रियप्रणालिकयैव सुखदुःखाद्याकारो बुद्धेरेव यः परिणामविशेषः स प्रत्ययः। अतएव ज्ञानसुखदुःखेच्छादेषप्रयत्नसंस्कारधर्माधर्माः सर्वएव बुद्धेः परिणामविशेषाः सूक्ष्मावस्था प्रकृतावेव वर्त्तमाना अवस्थाभेदादाविर्भवन्ति तिरोभवन्ति च। पुरुषस्तु पुष्करपलाशवल्लेपः प्रतिबिम्बते परं बुद्धावितिं यन्मन्यन्ते। तदनेन पर्य्यायाभिधानसूचितप्रमाणेन निराक्रियते तथा हि बुद्धिशब्दो यदि बुध्यतेऽनयेति करणव्युत्पत्त्याश्रयणात् तदा मन एव तत्सर्व्वं वक्ष्यति नच मनः प्रत्यक्षम् बुद्धिस्तद्वं बुध्ये इति प्रत्यक्षवेद्यत्वेन। नचान्तःकरणस्य ज्ञानाद्याधर्माः कर्तृधर्मत्वेनैव तेषां सिद्धेः भवति हि अहं जाने अहं प्रमेमि अहमुपलभे इत्यहङ्कारसामानाधिकरण्येन प्रतिभासः। अभिमानोऽहंधीरिति चेन्न तात्त्विकत्वे बाधकाभावात्। पुरुषस्यागन्तुकधर्मानाधारत्वं कूटस्थत्वं तदेव बाधकमिति चेन्नागन्तुकधर्माधारत्वेऽपि नित्यत्वसम्भवात् न हि धर्मी धर्मस्वरूपं तत्त्वं येन धर्मोत्पादविनाशाभ्यामेव धर्म्युत्पादविनाशौ स्यातां तथा च यएव चेतयते स एव बुध्यते जानात्युपलभते प्रमेति चेति नानान्तरकल्पना युक्तेति दिक्। तच्च ज्ञानं द्विविधं विद्या चाविद्या च विद्या चतुर्विधा प्रत्यक्षैक्यिकलिङ्गार्षलक्षणा। अविद्याऽपि चतुर्विधा संशयविपर्य्ययस्वप्नाध्यवसायलक्षणा। तत्र यद्वैक्यिकं तदनिन्द्रियजम् कृतएतदित्याह" उप० ह०। "तत्रात्मा मनश्चाप्रत्यक्षे" कणा०सू०। "आत्मात्र परात्मा ज्ञात्मा वा ज्ञात्मनि मानसस्य ज्ञानस्य कादाचित्कत्वमात्मत्वाद् गौरः शुक्लो महाबाह्वरित्यादि प्रत्ययवितरक्तत्वात् ज्ञानस्योऽप्रत्यक्षतोक्ता। चकाराद्ज्ञानवदिच्छा वायोः परमाणुत्वं द्रव्यारम्भकत्वं च। इन्द्रियजमपि द्विविधं सर्वज्ञीयमसर्वज्ञीयञ्च सर्वज्ञीयं योगजधर्मजन्यया प्रत्यासत्त्या तत्तत्पदार्थसाक्षात्कारं तथा हि परमाणवः प्रत्यक्षप्रसङ्गाः प्रमेयत्वादभिधेयत्वात् सत्त्वात्। रूपवत्त्वाविरहात् रूपमेवं महत्त्वेऽपि प्रत्यक्षं प्रति कारणत्वात् न च परमाणवो महान्तः रूपवत्त्वेऽपि चाक्षुषप्रत्यक्षकारणत्वात् न च दिगादयोऽरूपवत्त्वे

इति चेन्न योगजधर्मसहकारिण्या मनसैव तत्सम्भवात् तदुपपत्तेश्चक्षुरादिना वा। अचिन्त्यप्रभावोहि योगजो धर्मो न सहकार्यन्तरमपेक्षते। विवादाध्यासितः पुरुषो न सर्वज्ञः पुरुषत्वादस्मिदादिवत् इत्यपि प्राभाकरो न मीमांसाभिज्ञः पुरुषत्वादस्मिदादिवदिपक्षबाधकतर्कोन्मूल्यत्वादप्रयोजकम्। अवर्जनीयश्च प्रत्यक्षं द्विधं सविकल्पकं निर्विकल्पकञ्च सविकल्पकं ज्ञानं न प्रमाणमिति कीर्त्तिदिङ्नागादयः तथा हि अभिलापसंसर्गयोग्यप्रतिभासं हि तत् नह्यभिलापेन नाम्ना सम्बध्यमानेन सम्बन्धो येन घट इति पट इति वा नामान्तरञ्जितः प्रत्ययः स्यात् नच जात्यादि परमार्थसत् येन तदैशिष्ट्यं विषयेण इन्द्रियगोचरः तस्मादिन्द्रियेणालोचनं जन्यते आलोचनमङ्गिकृत्य च सविकल्पकमुत्पद्यमानं तत्रार्थे प्रवर्त्तयत् प्रत्यक्षमिति चोच्यते इति। तच्चैतदनुपपन्नमभिलापसंसर्गयोग्यप्रतिभासञ्च भवेत् प्रमाणञ्चेन्द्रियार्थसन्निकर्षजन्यं स्यादिति इन्द्रियव्यतिरेकित्वं नामवैशिष्ट्यञ्च चानुपपन्नानि सम्भवन्त्येव सुरभि चन्दनमितिवदुपनीतभानसम्भवात्। यद्वा संज्ञावैशिष्ट्यं प्रत्यक्षज्ञाने न भासते संज्ञायाः शब्दधर्मत्वात् स्वतैव शब्दार्थव्यावर्त्तिका अभावज्ञाने प्रतियोगिस्मरणवत् जात्यादिकञ्च वस्तुभूतं साधितमेवातः सविकल्पकमपीन्द्रियार्थसन्निकर्षजत्वात् प्रत्यक्षम् प्रमाणम्। ननु निर्विकल्पकं न व्यवहारप्रवर्त्तकं न वा व्यवहारविषय इति किन्नात्र प्रमाणमिति चेत् सविकल्पकमेव तद्विशिष्टज्ञानम् न च विशेषणज्ञानमन्तरेण तदुत्पद्यते विशिष्टज्ञाने हि विशेषणज्ञानविशेष्येन्द्रियसन्निकर्षतदुभयासंसर्गाणां कारणत्वावधारणात् उपस्कारकृत्तिः।

"सा च सात्त्विकराजसतामसभेदेन त्रिविधा। तत्र सात्त्विकी यथा "प्रवृत्तिञ्च निवृत्तिञ्च कार्य्याकार्य्ये भयाभये। बन्धं मोक्षञ्च या वेत्ति बुद्धिः सा पार्थ! सात्त्विकी"। राजसी यथा "यया धर्ममधर्मञ्च कार्यञ्चाकार्यमेव च। अयथावत् प्रजानाति बुद्धिः सा पार्थ! राजसी"। तामसी यथा "अधर्मं धर्ममिति या मन्यते तमसावृता। सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ! तामसी" गीता० तस्याः पञ्चगुणा यथा। "इष्टानिष्टविपत्तिश्च व्यवसायः समाधिता। संशयप्रतिपत्तिश्च बुद्धेः पञ्च गुणान् विदुः" सङ्ग्रहभारते मोक्षधर्मः "इष्टानिष्टविपत्तिः इष्टानिष्टानां वस्तुविशेषाणां विपत्तिर्नाशः निश्चयरूपा वृत्तिरित्यर्थः। व्यवसायः उद्योगः। समाधिता चित्तस्यैर्य्यं चित्तवृत्तिनिरोध इत्यर्थः संशयः द्वयस्पृक् ज्ञानम्। प्रतिपत्तिः प्रत्यक्षादिप्रमाणवृत्तिः" तट्टीका। तस्याः सप्त गुणा यथा। "शुश्रूषा श्रवणञ्चैव ग्रहणं धारणन्तथा। ऊहापोहोऽर्थविज्ञानं तत्त्वज्ञानञ्च धीगुणाः" हेमच०। तस्या वृत्तिः पञ्चधा यथा। "प्रमाणविपर्य्ययविकल्पनिद्रास्मृतयः" पात०सू० तद्भाष्यं च तत्तच्छब्दे द्रष्टव्यम्।

बुद्धिक्षयकरा यथा "शोकः क्रोधश्च लोभश्च कामो मोहः पराहता। ईर्ष्या मानो विचिकित्सा हिंसाऽसूया जुगुप्सता। द्वादशैते बुद्धिनाशहेतवो मानसा मलाः"। कालिकापु० १८अ०। "बुद्धिक्षयकरा एते मानसाः परिकीर्त्तिताः"। बुद्धिदूषिकरा यथा "निम्बाटरूषद्मलाश बुद्धिदूषिकरा मताः। बुद्धिक्षयकराश्चिन्त्या त्यजेद्राजा च भोजने। भोजयेदन्यकं बुद्धिदूषिहेतुं नरोत्तमः। कालिकापु० ८६ अ०।

बुद्धिकामा स्त्री कुमारानुचरमातृभेदे भा० श० ४७ अ०।

बुद्धिजीविन् पुंस्त्री बुद्ध्या जीवति जीव-णिनि। बुद्धिरूपोपायेन जीविनि। "भूतानां प्राणिनां श्रेष्ठा प्राणिनां बुद्धिजीविनः" मनुः।

बुद्धिसहाय पु० ७त०। धीसचिवे अमात्यभेदे हारा०।

बुद्धीन्द्रिय न०ष०त०। "मनः कर्णौ तथा नेत्रे रसना त्वक् च नासिके। बुद्धीन्द्रियाणि प्रोक्तानि" इत्युक्तेषु इन्द्रियेषु उभयोः ज्ञानकर्मेन्द्रिययोरुपकारकत्वात् मनसो ज्ञानमात्रसहकारित्वविवक्षया बाह्यान्तरज्ञानकरत्वतया च तथात्वम् "चक्षुः श्रोत्रे स्पर्शनञ्च रसनाघ्राणमेव च। बुद्धीन्द्रियाणि जानीयात्" इत्यत्र बाह्यग्राह्यतया पञ्चत्वसङ्ख्यम्।

बुद्बुद न०बुद्-क पृषो०दित्वम्। जलस्य लोकाकारे विकारभेदे अमरः। "पवनात्रेव जलं बुद्बुदाकारतां व्रजेत्"। सुश्रुतोक्ते रसभौतिकत्वाभेदे च।

बुध ज्ञाने भ्वा०प०सक०अनिट्। बोधति अबौत्सीत् शिष्यं गुरुः। बोद्धा बुद्धः।

बुध ज्ञाने भ्वा०उभ०सक०सेट्। बोधति ते। ररिव अबुधत् अबोधीत् अबोधि अबोधिष्ट। अबुधा० या च पक्षे क। बोधः बुधः।

बुध ज्ञाने दि० आ०सक० अनिट्। बुध्यते अबोधि अबोधिष्ट। बुबुधे। बुद्+बुध-आगरणे विषयस्फुरणाभिसन्धीभावरूपे संस्कारनिष्ठे व्यापारभेदे बुद्बुदसंस्काराद्येव स्मृतिर्भवतीति शास्त्रे स्थितम्।

बुध पु० बुध-क। १पण्डिते, बृहस्पतिभार्य्यायां तारायां चन्द्रेण जनिते २सुते तस्य रोहिण्या प्रतिपालनात् रौहिणेयत्वम्। ३ग्रहभेदे। तस्योत्पत्तिकथा शिवरहस्ये तस्य ग्रहत्वप्राप्तिकथा च काशीख० १५अ०। "बृहस्पतेः स वै भार्य्यामैत्यर्थ्यमदशोचितः। पुरोहितस्यापि गुरोर्भ्रातुरङ्गिरसश्च वै। जहार तरसा ताराम् इत्युपक्रमे। "ददावाङ्गिरसे तारां स्वयमेव पितामहः। अथान्तर्गर्भमालोक्य तारां प्राह बृहस्पतिः। मदीयायां न ते योनौ गर्भो धार्य्यः कथञ्चन। रेतिकाख्यमासाद्य सा गर्भं चोत्ससर्ज ह। जातमात्रः स भगवान् देवानामात्रिमर्दनः। ततः संशयमापन्नास्तारामूचुः सुरोत्तमाः। सत्यं ब्रूहि सुतः कस्य सोमस्याथ बृहस्पतेः। पृच्छ्यमाना यदा देवैर्नोच्चैस्तारातिसत्रपा। तदा तां शप्तुमारब्धः कुमारः सोऽतितेजसा। तच्छ्रुत्वार्थं तदा ब्रह्मा तारां पप्रच्छ संशयम्। प्रोवाच प्राञ्जलिः सा तं सोमस्येति पितामहम्। तदा स मूर्ध्न्युपाघ्राय तारागर्भं प्रजापतिः। बुध इत्यकरोन्नाम तस्य बालस्य धीमतः। ततः स सर्वदेवेभ्यस्तेजोरूपबलाधिकः। बुधः सोमं समाप्रच्छ्य तपसे कृतनिश्चयः। जगाम काशीं निर्वाणराशिं विश्वेशपालिताम्। तत्र लिङ्गं प्रतिष्ठाप्य स्वनाम्ना तु बुधेश्वरम्। तपश्चचार चात्युग्रं संशोषयन् वृषिं। इति तत्तप उक्तं तत्तपसा च तुष्टेन शिवेनोक्तं यथा "रौहिणेय! महाभाग! सौम्य! सौम्यश्चोनिधे!। नक्षत्रलोकादुपरि तव लोको भविष्यति। मध्ये सर्वग्रहाणाञ्च सपर्यां लप्स्यसे पराम्"। बुधग्रहस्य कन्याभगणादिकं खगोलशब्दे दृश्यम्।

बुधचक्र न० बुधस्य राश्यन्तरसञ्चारकाले खनक्षत्रस्य सकादिस्थानस्थितिभेदेन शुभाशुभसूचके चक्रभेदे "भोगोऽष्टकैकमथ मूर्ध्नि चतुर्थे रोगः षट् पाणिभेऽसुखहृतं सुखदं सुतेऽब्ज। दुःखं षडाख्ये सुखगो हृदि मग्न राज्यं नाभीन्दुभे द्विप गते निधनं बुधस्य" इति समयाकृतम्।

बुधचार पु० ६त० ब० व० ७अ० उक्ते बुधग्रहस्य शुभाशुभसूचके सञ्चारे यथा

"नोत्पातपरिलक्षः कदाचिदपि चन्द्रजो व्रजत्युदयम्। खलदहनपवनभयक्षुद्व्याधिक्षयविग्रहैर्वा। विचरन् स्वपथनिष्ठाप्राजापत्येन्दु३।२विश्वदैवानि२।।स्वदन् स्निग्धकरतनयः करोत्यहिं नरोगभयाम्। रौद्राहीनि मघाश्लेषान्वुपाश्रिते चन्द्रजे प्रजापीडा। यक्षनिपातक्षुद्भयरोगानाद्दिष्टनाशैः। हस्तादीनि विचरन् षड्भाग्नेयुपगीडयन् नगानशुभः। क्षेमरसार्घविहिंसं करोति चोर्वीं प्रभूताद्याम्। आर्यमृक्ष१२ सौतभुजं२ भद्रपदात्तरां यमेयं२ च। चन्द्रस्य सुतो निघ्नन् प्राणभृतां धातुषड्भवकृत्। आश्विनवारुण२४भूनान्युपसृत्य रेवतीं च चन्द्रसुतः। षण्ण्यभिघ्नन्नोजोविक्रमक्षितिजतुरगोपघातकरः। पूर्वादृच११।२०।२६त्रितयादेकमपीन्दोः सुतोऽभिसृत्रीयात् शुक्लसितरक्तरामयभयप्रदावी चरन् जगतः"। इतःपरं तस्य गतिविशेषात्तदाभिहितात्तत्फलञ्च तत्र दर्शितं तच्च गतिशब्दे २५।१५पृ० दर्शितम्। अध्यायशेषे च।

"प्रौष्ठपाढ्याश्वयुक्वैशाखेष्विन्दुजः समाखेषु। दृष्टो भयाय जगतः शुभफलदः प्रोक्षितस्तेषु। कार्त्तिकेऽश्वयुजि वा यदि मासे दृश्यते तनुभवः शिशिरांशोः। यक्षचोरदुर्भुगदतोयक्षुद्भयानि च तदा विदधाति। क्षत्रनिधौ क्षमिते पुराणि यान्युदिते तान्युपयान्ति नीचम्। अन्ये तु पश्चादुदिते वदन्ति लाभः पुराणां भवतीति तज्ज्ञाः। क्षेमकालिरथ वा शुक्लवर्णः सङ्कीर्णेन मणिना सदृशो वा। स्निग्धमूर्तिरतिशुभ्र हिताय व्यत्यये न शुभकृच्छिखिपुत्रः"। [सुतादयोऽप्यत्र।

बुधतनय पु० ६त०। पुरूरवसि दृष्टाशब्दे दृश्यम् बुध-

बुधतात पु० ६त०। चन्द्रे शब्दच०।

बुधरत्न न० बुधप्रियं रत्नं शाक०त०। मरकतमणौ शब्दरत्ने राजनि०। ग्रहयन्त्रे २७३१ पृ० दृश्यम्।

बुधवार पु०६त०। बुधपतिकदिवसे दिनपशब्दे २५८२पृ०दृश्यम्

बुधसानु पु०बुध-सानुक् सुक् च। यज्ञपुरुषे पर्वते च संक्षिप्तसा०

बुधा स्त्री बोधयति ज्ञापयति रोगिणं सेवनात् बुध-ज्ञापने क। जटामांसाख्ये शब्दच०।

बुधादित्य पु० बुधसहित आदित्यः। जन्मकाले एकस्मिन् राशौ बुधादित्ययोर्योगे स च तयोरन्यतरस्थ एव भवतीति सम्प्रदायः।

बुधान पु० बुध-आनच् किच्च। १आचार्ये गुरौ २विप्रे मेदि०। ३कवौ जटा०। ४ब्रह्मणादिनि ५प्रियवादिनि त्रि० उणादिकोषः।

बुधाष्टमी स्त्री० बुधवारयुताष्टमी शाक०त०। चैत्रपौषहरिशयनादीतरत्र शुक्लकाले बुधवारयुतायां १शुक्लपक्षाष्टम्यां, २तत्कर्त्तव्ये व्रते च। तस्याः पूजाप्रकारः क्षेमा० ब्र० भविष्योत्तरे उक्तो यथा

"पुरा कृतयुगस्यादौ दक्षो राजा बभूव ह। बहुश्च-

वुतो मित्रमन्त्रिभिः परिवारितः। जगाम हिमवत्पार्श्वं महादेवाभिशापतः। सोऽसौ प्रविशते भूतौ स स्त्री भवति निश्चितम्। स राजा स्वगणैश्च प्राविशत्तुमावने। एकाकी तुरगोपेतः अथात् स्त्रीत्वं जगाम ह। सा बभाम वने मूढे पीनोन्नतपयोधरा। का त्वं कस्य कुतः प्राप्ता इत्तरोधोऽस्ति कथम। तां दृष्ट्वा बुधस्तत्रौ रूपौदार्यगुणान्विताम्। अतस्तां बुधवारेण तस्यां तत्तो बुधो यहः। ददौ स्वर्गात्मनस्तस्या मानीवत प्रतोषितम्। पुत्रस्तत्सादवामास सोऽसौ ख्यातः पुरूरवाः। चन्द्रवंशकरो राजा आद्यः सर्वमहीक्षिताम्। ततः प्रभृति पूर्वेषामष्टमी बुधसंयुता। सा च सम्पूर्णा आह्या न भिन्ना यत्नोक्तं तत्रैव "बुधाष्टमी शुभा पूर्णा यत्नोक्तफलदायिनी" तत्र व्रतपदवर्णं कार्यं तत्र भक्ष्यभेदादिकं च तत्रैवोक्तं यथा

"अष्टम्यष्टविधानेन विचित्रान्नैः पृथक् पृथक्। प्रथमा मोदकैर्भक्ष्यैः द्वितीया धानकैस्तथा। तृतीया दध्यूरैव चतुर्थी षटकैर्नृप!। पञ्चमी गुडधानारैः षष्ठी खोडाकैः शुभैः। अशोकवर्त्तिभिः सप्तैः स्वर्गी याति नराधिपैः। अष्टमी फाणितैः पूर्णैः सर्वान्नैर्नृपसत्तम!।" अत्र विहितनिषेधव्यत्यादि राजमार्त्तण्डे उक्तं यथा "एतत्ते सकलं प्रोक्तं देवे आषाढि मासके। बुधाष्टमीं प्रकुर्वीत वर्जयित्वा तु चैत्रकम्। प्रतिपत्ते च जगन्नाथे सम्प्राप्ते सर्षपौ तथा। बुधाष्टमीं न कुर्वीत यता कृष्णे पुराकृतमिति"। एतद्व्रतमारब्धमपि चैत्रादौ न कर्त्तव्यं यतोऽत्रोक्तं "चैत्रे भाद्रपदे देवेऽप्यश्वयुक्तिदिने तथा। बुधाष्टमीं न कुर्वीत पूर्वविद्धामपि क्वचित् अष्टमीदिने सप्तमीविद्धदिने।

बुधित त्रि॰ भा॰ बुध-क्त दृट्। ज्ञाते अमरः।

बुधिल त्रि॰ बुध-विलच्। विदुषि उणादि॰।

बुध्न पु॰ बन्ध-नक् बुधादेशः। १मूले अमरः २शिवे भरतः ३अन्तरीक्षे ऋ॰ ३।१८।४ भाष्यम्। "प्रथमबुध्नोदराततिः" वेदान्तप॰। "अवांग्विलश्चमस ऊर्ध्वबुध्नः" या॰मा॰ श्रुतिः। निरूढे तु यज्ञा अस्मिन् श्रुता आप इति अन्तरिक्षं बुध्नम्" तत्र निरूढिरुक्ता।

बुध्न्य पु॰ बुध्ने मूले भवः यत्। १मन्त्रैपत्ये अग्नौ "अहिरिव बुध्न्यः" ताण्ड्यब्रा॰१।३।११ "अहिरिव भूत्वा रथःप्रस्तौतां बुध्न्यः बुध्ने मूले आदौ यागानङ्गत्वे प्रथमं जातोऽसि" २अन्तरिक्षभवे २रुद्रभेदे च। "बुध्ने निषदति बध्न्यः योऽहि॰ यस्मि बुध्नः बुध्नमन्तरीक्षं अन्तरिक्षे च तस्मिन्यासाद्यं निरू०। "यानोऽहिर्बुध्न्यो रिषे तद्दृष्टा स्तुतिः।

बुन्द् निशामने-भ्वा॰ उभ॰ सक॰ सेट्। बुन्दति ते दरित् अबुदत् अबुन्दीत्। अबुन्दिष्ट। उदित् ङ्ग वेट्। निशामनमालोचनम् प्रविधानमिति यावत्।

बुन्ध निशामने भ्वा॰ उभ॰ सक॰ सेट्। बुन्धति ते दरित् अबुधत्-अबुन्धीत् अबुन्धिष्ट। निशामनमालोचनम्। उदित् ङ्ग वेट्।

बुन्ध बन्धे चु॰उभ॰सक॰ सेट्। बुन्धयति ते अबुबुन्धत् त।

बुबुर न॰ उदके निघण्टौ वर्गेऽस्मिन्न पाठान्तरम्।

बुभुक्षा स्त्री॰ भुज-सन्-भावे अ। भोजनेच्छायां क्षुधायाम्। सा च प्राणधर्मः यत्नोक्तं या॰ति॰"बुभुक्षा च पिपासा च प्राणस्य" अग्निमन्दे दग्धम्। अजीर्णेऽपि च सा न भवति अथ भवति चेत् अनिष्टदा यत्नोक्तं तत्रैव "बुद्धारुग्वापि भक्तेच्छा न जायते कृद्गुरुता च यस्य" "अन्नं यदा दोषविदह्यमानं क्षीणं न तेजः पचनाद्यतीति। भवत्यजीर्णेऽपि तदा बुभुक्षा सा मन्दवृद्धिं विनश्यन्निजनिं। ऊषादि॰योगार्थे अण्। बौभुक्षस्तत्रोक्ते त्रि॰

बुभुक्षित त्रि॰ बुभुक्षा+तारं॰ इतच्। क्षुधार्त्ते "बुभुक्षितः किं द्विरेफ भुङ्क्ते" इत्युक्तेः।

बुल मज्जने चु॰ उभ॰ अक॰ सेट्। बोलयति ते अबूबुलत्। बोलयति प्रायः पदमि मज्जतीत्यर्थः।

बुल्लि स्त्री तदा॰ बुड-इन् डित्व डस्य लः। अम्बे शेषभ॰।

बुल्ल त्रि॰ बुड्-क डस्य ल॰ नि॰। तिरस्कारे भरतः॰ ११।६।१३।

बुष(स) न॰ बुष्यते अदृश्यते बुष-उत्सर्गे क पृषो॰ वा मत्वम्। (आगड) १तुच्छधान्ये फल्गुरहितधान्ये अमरः। अयं वापः २उदके वेदनिघण्टुः ततः इत्वा॰ अत्वर्थो व। बुषस तत्सम्पादी त्रि॰। पृषो॰ दीर्घः। बूसयत्र। [अयोबोध बुबोध

बुस उत्सर्गे दि॰पर॰सक॰सेट्। बुस्यति। दरित् अबुसत्

बुस्त आदरे अनादरे च चु॰उभ॰सक॰सेट्। बुस्तयति ते अबुबुस्तत् त।

बुस्त न॰ बुस्यते नाद्रियते आद्रियते वा बुस-बस्त्। १पशादिफलक त्वाच्छे शौचे (भूमि) २आसपिण्डभेदे च अमरभरतौ।

बूह न॰ बुक+पृषो॰ दीर्घः। बुकणङ्गार्थे रभसाद्यः।

बृबदुक्थ न॰ पदे निघण्टुः।

बृषी स्त्री ब्रुवन्योऽस्यां षीदन्ति पृषो० ब्रुवो वृ वद-ड गौरा० ङीषन्तश्च । अजीघामासने अमरः ।

बृ(ब्रु)ह इडो भ्वादि० पर० अक० सेट् व(ब)र्हति अव(व)रीत् । हरित् इत्येके तेन अबृ(ब्रु)हदित्यपि । कविकल्पद्रुमे बृहधातुमात्रस्य अन्तस्थादित्वसङ्गम् मेदि० "प्रोक्षितं निहते सिक्ते बृहती वसनान्तरे । छन्दोभित्तुदुवार्त्ताकीवारिधानीषु वाचि च । कण्टकारीमहत्तोच" "ब्रह्मतत्त्वतपोवेदे न द्वयोः पुंसि मेधयि" । कात्यिगयोगभिदोर्विप्रे बन्धनं बधबन्धयोः" । बृहप्रकृतिबृहती ब्रह्मशब्दयोः ओदित्वोक्तत्वादस्य उभयादित्वम् ।

बृ(ब्रु)हक पु० बृ(ब्रु)ह-कन् । देवगन्धर्वभेदे भा० आ० १२१अ०

बृ(ब्रु)हच्चक्षु पु० ६त० । महाचक्षुष्मति राजनि० ।

बृ(ब्रु)हच्चित्र पु० ७त० । फलपूरे बीजपूरे शब्दच० ।

बृ(ब्रु)हच्छल्क पु० ६त० । विकटमत्स्ये जटा० ।

बृ(ब्रु)हच्छ्रवस् त्रि० ६त० । महाश्रवस्के भाग० १।४।१ ।

बृ(ब्रु)हज्जातक न० कर्म० । वराहमिहिरकृते जातकग्रन्थभेदे ।

बृ(ब्रु)हज्जावाल पु० कर्म० । उपनिषद्भेदे उपनिषच्छब्दे दृश्यम् ।

बृ(ब्रु)हज्जीवन्ती स्त्री कर्म० । महाजीवन्त्याम् राजनि० ।

बृ(ब्रु)हड्ढक्का स्त्री कर्म० । १भेरीवाद्ये जटा० ।

बृ(ब्रु)हत् त्रि० बृह-अति शतवत् कार्य्यम् । १महति स्त्रियां ङीप् । सा च २उत्तरीयभेदे ३नवाक्षरपादके २छन्दोभेदे ४बृहद्वार्त्ताकीं ५वारिधान्यां ६वाचि ७कण्टकार्य्यां च स्त्री मेदि० । ८विष्णौ पु० । "बृहद्भृ(ब्रु)हन् छशः स्फूर्जः" विष्णुस० । आच्छादनपरत्वे कन् । बृहतिका उत्तरीयवस्त्रे अमरः । स्वार्थे क । बृहतीशब्दे च स्त्री ।

बृ(ब्रु)हतीपति पु० बृ(ब्रु)हत्या वाचः पतिः । पारस्करा० "तद्बृहत्योः करपत्योर्देवयोः" वार्त्ति० देवतायामेव षट् तत्पुरुषे नान्यत्र वाक्पतौ केनच० ।

बृ(ब्रु)हत्क त्रि० बृहत्प्रकारः कन् । बृहत्प्रकारे

बृ(ब्रु)हत्कथा स्त्री वरकृचिप्रणीते कथाभेदे ।

बृ(ब्रु)हत्कन्द पु० ६त० । १मुस्तके रत्नमाला । २विष्णुकन्दे राजनि० । [पु० हरिवं० २१अ०

बृ(ब्रु)हत्कर्मन् त्रि० ६त० । १महाकर्मयुते २बृहद्रथपुत्रभेदे

बृ(ब्रु)हत्काय पु० यादवभोजवंशजे नृपभेदे भाग० २।।७ । ६त० । २महादेहे त्रि० । [शाकभेदे त्रिका० ।

बृ(ब्रु)हत्कालशाक पु० त्रि० अक० महति (कालकासुन्निवा)

बृ(ब्रु)हत्काम पु० त्रि० अक० बडगटे वृक्षभेदे धारा० ।

बृ(ब्रु)हत्कीर्त्ति त्रि० ६त० । १महाकीर्त्तियुक्ते २आङ्गिरसाग्निपुत्रभेदे पु० भा० व० २१७अ० ३अक्षरभेदे पु० हरिवं० ३२अ०

बृ(ब्रु)हत्कुक्षि त्रि० ६त० । दम्भिले अमरः । [आ० ६त०]

बृ(ब्रु)हत्केतु त्रि० ६त० । १महाध्वजयुते २राजभेदे पु० भा०

बृ(ब्रु)हत्क्षत्र पु० अजमीढवंशजे नृपभेदे भाग० ९।२१ ।

बृ(ब्रु)हत्साल पु० त्रि० अक० छिन्नाखडके राजनि० ।

बृ(ब्रु)हत्सिता स्त्री बृहत् सितो रसोऽस्याः । पाठायाम् राजनि० ।

बृ(ब्रु)हत्तथ पु० ६त० । वंशे शब्दच० ।

बृ(ब्रु)हत्त्वच् पु० ६त० । (छातिम) वृक्षभेदे रत्नमा० ।

बृ(ब्रु)हत्पत्र त्रि० ६त० । १महापत्रयुक्ते वृक्षे २वृक्षिकन्दे राजनि० । ३स्त्रियपर्षिकायां स्त्री राजनि० ।

बृ(ब्रु)हत्पाटलि पु० त्रि० अक० । धूस्तूरे त्रिका० । [शब्दच०

बृ(ब्रु)हत्पाद त्रि० ६त० । १महाचरणयुक्ते वृक्षे २वटवृक्षे पु०

बृ(ब्रु)हत्पारेवत न० कर्म० । महापारेवते राजनि० ।

बृ(ब्रु)हत्पालिन् पु० बृ(ब्रु)हन्तं पालयति पालि-णिनि । वनजीरके राजनि० ।

बृ(ब्रु)हत्पीलु पु० त्रि० कर्म० । महापीलौ राजनि० ।

बृ(ब्रु)हत्पुष्पी स्त्री ६त० ङीप् । १घण्टारववृक्षे जटा० । २महापुष्पयुतवृक्षमात्रे त्रि० स्त्रियां टाप् ।

बृ(ब्रु)हत्फल त्रि० ६त० । १महाफलयुते । २कटुतुम्ब्यां ३माङ्गेन्द्रवारुण्यां ४कुष्माण्ड्यां ५महाजम्बूवृक्षे च स्त्री टाप् राजनि० । [भेदे ।

बृ(ब्रु)हत्संहिता स्त्री वराहमिहिरप्रणीते ज्योतिषग्रन्थ-

बृ(ब्रु)हत्सामन् न० त्रि० अक० । सामभेदे तच्च साम "त्रायन्तिं त्रिवृत्पञ्चदशे" इत्यत्रोक्तं तच्च तुलादानादिपद्धतावस्माभिः १९।८२ पृ० दर्शितम् । "वामदेव्यं बृ(ब्रु)हत्साम ज्येष्ठसाम रथन्तरम्" सामग्रहारपाठात्तथा विधानपारि० उक्तम् । "बृ(ब्रु)हत्साम तथा साम्नाम्" गीता० । तच्च साम ब्रह्मप्रतिपादकमिति तद्भाष्यकारेणोक्तं समर्थितञ्चानन्दगिरिणा "इन्द्रः सर्वेश्वरत्वेनानेन स्तूयते इति तच्च तथेत्युक्तम्" ।

बृ(ब्रु)हत्सेन त्रि० ६त० । १महासेनायुक्ते । २भावितृवंशजे नृपभेदे पु० भाग० ९।२२।२ ३मागधदेशीये नृपभेदे भा० आ० ६७अ० । कर्म० । ४महत्यां सेनायां स्त्री ।

बृ(ब्रु)हद्भानु पु० ६त० । १नानाविधाभियुते ततः शोभा-

मत्ते मर्गा० यञ्। बार्हदश्व तदपत्ये तस्य जाताः क्षत्रा० अण् यञोपः। बार्हदश्व तस्य छात्रेषु व० व० वि०कौ०। [स्त्रियां स्वाङ्गत्वात् ङीष्।

बृ(बृ)हदङ्ग पुं स्त्री द्व०। १गजे शब्दच० २मङ्गलावे त्रि०।

बृ(बृ)हदम्बालिका स्त्री कुमारानुचरमातृभेदे भा०शा०४७अ०

बृ(बृ)हदश्व पु० बृहत् अश्वो रथोऽस्य। (कामराजा) कामरङ्गे शब्दच०। [नृपभेदे हरिवं०११अ०।

बृ(बृ)हदश्व पु० १ऋषिभेदे भा०व०५२अ०। २नावश्वस्य पुत्रे

बृहदारण्यक न०। उपनिषद्भेदे।

बृहदिषु पु० आजमीढपुत्रे १नृपभेदे हरिवं०२०अ०। २अजमीढवंशजे २नृपभेदे च ६२ अ०।

बृ(बृ)हदुक्थ न० कर्म०। १महति उक्थे २ऋग्विधंशजे तपस्य पुत्रे २ऋग्भिदे पु० भा० व० २१८ अ०। "बृ(बृ)हदुक्थोह वै वामदेव्यः" शत० ब्रा० ३।२।२।१४। तदुक्थेन साध्ये २यज्ञे ऋग्भेदे पु०। [वेददीपे इयम्।

बृ(बृ)हदुक्थ पु० १जगत्सृष्टिकारके २प्रजापतौ च यजु०८।८।

बृ(बृ)हदुत्तरतापनी स्त्री कर्म०। उपनिषद्भेदे।

बृ(बृ)हदेला स्त्री कर्म०। स्थूलेलायां राजनि०।

बृ(बृ)हद्गर्भ पु०शिविनृपपुत्रे यो हि ब्राह्मणभोजनार्थं प्रस्थाप्य संस्कृतः पुनरपि जीवितः मत्स्यपु० भा० व० ११७ अ०।

बृ(बृ)हद्गु पु० राजभेदे भा० आ० ६अ०।

बृ(बृ)हद्(गु)ग्रह पु० काम्बुजदेशे क्षेमच० स च देशः विन्ध्यपर्वतस्य पश्चात्यमालवदेशसमीपे स्थितः (बड़दुगड़) इति त्रिकाण्डशेषः। [शब्दच०।

बृ(बृ)हद्गौल न० नित्यक०। (तरसज) क्षत्रप्रधानशब्दे

बृ(बृ)हद्गर्भ पु० कक्षेयुवंशजे नृपभेदे हरिवं० ३२अ०।

बृ(बृ)हद्दल पु०द्व०। १छिन्नाले २पद्मिकाबोड्रे च राजनि०

बृ(बृ)हद्द्युम्न पु०नृपभेदे भा०व०१२८अ० [महाचार्यपुत्ते त्रि०

बृ(बृ)हद्धनुस पु० आजमीढवंशजे नृपभेदे हरिवं० २०अ०।

बृ(बृ)हद्धर्मन् पु० आजमीढवंशजे नृपभेदे। हरिवं०२०अ०।

बृ(बृ)हद्धर्मपुराण न० उपपुराणभेदे।

बृ(बृ)हद्धन त्रि० बृहत्धनमस्य। १महाधने २इक्ष्वाकुवंशे नृपभेदे पु० हरिवं०१५अ०।

बृ(बृ)हद्धल न० कर्म०। महाबाकुले त्रिका०।

बृ(बृ)हद्ब्रह्मन् पु०आङ्गिरसे ऋषिभेदे। "ब्रह्मणो यस्य तीव्रेण प्रजाः कुरुकुलोद्वह!। तथाभवत् सुता भार्या प्रजासक्तां च मे शृणु। बृहत्कीर्त्तिर्बृहज्ज्योतिर्बृहद्ब्रह्मा बृहन्मनाः। बृहन्मन्यु बृहद्भासस्तथा राजन्! बृहस्पतिः" भा०व० २१७ अ०। बृहज्ज्योतिरादयस्तत्पुत्रे

बृ(बृ)हद्भटारिका स्त्री० कर्म०। दुर्गायां शब्दमाला।

बृहद्(बृ)भय पु० सावर्णिमनोः पुत्रभेदे मार्कण्डेय पु०८१अ०।

बृ(बृ)हद्भानु पु० द्व०। १अग्नौ २शिवकल्पे च अमरः। ३आङ्गिरसे वह्निभेदे भा०व० २२०। इन्द्रसावर्णिमन्वन्तरे ४हरेरवतारभेदे भाग० ८।१३ अ

बृ(बृ)हद्भ्रण पु०इक्ष्वाकुवंशजे भाविनि नृपभेदे भाग०९।१२।६।

बृ(बृ)हद्भ्रय पु० भौर्य्य १नृपभेदे भाग०१२।१। २आङ्गिरसे वह्नेः पुत्रभेदे भा०३१९ ३मागधराजभेदे जरासन्धतातेे हरिव० २अ०। ४चेदिराजवसोःपुत्रभेदे हरिवं० ११७अ०।

बृ(बृ)हद्भयन्तर न० सामभेदे १आङ्गिरसवंशजे वह्निभेदे भा०व०२१९अ०।

बृ(बृ)हद्राज पु० इक्ष्वाकुवंशजे भाविनि नृपभेदे भाग० ९।१।२

बृ(बृ)हद्राविन् पु० बृहत् यथा तथा रौति रु-णिनि। चुद्रोलुके राजनि०।

बृ(बृ)हद्रूप पु० मरुद्गणभेदे हरिवं० २०४ अ०।

बृ(बृ)हद्रथ पु० बृहत् बृहत्साम तदस्यास्ति क्षीरतया मतुप् मस्य वः। बृहत्सामस्तोमसुत्वे इन्द्रे मत्स्य०७।२२ २तत्साध्ये यज्ञे च ३नदीभेदे स्त्री ङीष् भा०भी०९अ०।

बृ(बृ)हद्वल्क पु० द्व०। पङ्क्तिराजोद्भे राजनि०।

बृ(बृ)हद्वात पु०७अ०। अग्नीरोहरे धान्यभेदे (देधान) रत्नमा०

बृ(बृ)हद्वारुणी स्त्री कर्म०। महेन्द्रवारुण्याम् राजनि०।

बृ(बृ)हद्बीज द्व०। महाबिम्बे आम्रातवृक्षे शब्दच०।

बृ(बृ)हद्वल्ल पु० बृहद्बलेति आख्यात्येन बलस्य अण्। अर्जुने क्षेमच० "आदाव ग्रयौ वीरः स बृहद्बलसारथिः" भा० वि०१७अ०। "अर्जुन उवाच। प्रतिज्ञा मधुसूदनोऽस्मीति करिष्यामि मही पते!। ज्यायांसौ हि महान्तौ मे संयुगे नृप! दुष्करौ। बलवैरूप्यादविषह्यामि बाह्वक्षिपक्षतावितौ। कर्णवोः प्रतिसख्याहं कृष्णले ज्वलनप्रभे। पितृवक्त्रः पाण्डिक्यां तृतीयां प्रकृतिं गतः। वेणीकृतगिरा राजन्! नाम्ना चैव बृहद्बला" इति तस्य च अज्ञातवासकाले तथाख्यात्वम् भा०वि० १२अ० उक्तम्।

बृहद्वारदीय न० उपपुराणभेदे।

बृहद्वारायणोपनिषद् स्त्री०उपनिषद्भेदे। [शब्दे दृश्यम्।

बृहद्वीका स्त्री० चतुरङ्गशब्दोक्ते क्रीडनभेदे। चतुरङ्ग-

बृहस्पति पु० बृहत्या वाचः पतिः पारस्क०। गुडादिबृहत्नौ-पतिशब्दे दृश्यम्। आङ्गिरसे १ऋषिभेदे बृहद्ब्रह्मन्शब्दे दृश्यम्। २देवगुरौ ३ग्रहभेदे च। तस्य गतिभग-

स्वादिकं खगोलशब्दे दर्शितम्। तत्रैव गुरुवर्षशब्दे २६२१ पृ० तस्य षष्टिसंवत्सरात्मकचक्रेण गुरुशब्दे दर्शना।

बृहस्पतिचक्र न० बृहस्पतेः वक्रारम्भादौ नराकारचक्रस्य मूर्द्धादिषु खनक्षत्रस्य पातेन शुभाशुभसूचके चक्रभेदे तच्च ज्यो०त० उक्तं यथा "शीर्षे चत्वारि राज्ञः जलधिरपि करे दक्षिणे चापि सौख्यं वैरं कण्ठे विभूतिं मदनशरसितं वक्षसि प्रीतिविद्विम्। पादस्थाः षट् च पीड़ां पुनरपि जलधिर्मस्तके च क्षयं नेत्रे त्रीणि प्रदद्युः सुखमथ निजभे वाक्पतेः संक्रमस्थाः"।

बृहस्पतिपुरोहित पु०ई० १इन्द्रे २देवराजे च यजु०२।११।

बृहस्पतिवार पु० ई०। जीवाभिधत्वयुक्ते दिने तदाख्यनाक्षत्रिकं दिनपञ्चशब्दे दृश्यम्।

बृहस्पतिसव पु० यज्ञभेदे "राजसूयेनेष्ट्वा राज्ञा राजसूयेन यजेत ब्राह्मणो बृहस्पतिसवेन" आश्व० श्रौ० ६।६।

बृ(बृ)हस्पतिस्तोम पु० यज्ञभेदे ताण्ड्य० २६।१।१।

बृ वृत्तौ भ्वौ प० अक०-सक०-सेट्। बृ(बृ)णाति अवारीत् अवार वरि(री)ता विवरो(रि)षति बुबूर्षति बूर्णः।

बेकनाट पुं०बे रत्नपर्व्वतः दिवबोधकः एकं सुपं दूरव्यञ्जकविशेषं दृष्ट्वा द्विगुणं भद्रं देवमिति मनसेन नाटयति व्याकरति नाटि-अच् बे एकशब्दयोः पृषो० बेनमावः। कृषोदिनि उ० ८।६६।१० आम्रे दृश्यम्।

बेकुरा स्त्री वाचि त्रिषष्टु०।

बे(बे)ङ् प्रवृत्ते आ० अक० सक० सेट्। बे(बे)ङते अबे(बे)ङिष्ट बे(बे)ङे। अदित् चङि न हुस्वः।

बोकड़ी स्त्री वस्तान्त्र्यां राजनि०।

बोध पु० बुध-भावे घञ्। १ज्ञाने त्रिका०। २ज्ञानरे च २देवभेदे भा०भी०६अ०। [चक्रे वैतालिके शब्दमा०।

बोधक त्रि० बुध-णिच्-ण्वुल्। १ज्ञानजनके बोधकरे च-

बोधकार त्रि० बोधं ज्ञानं जागरणं वा करोति कृ-ट। १ज्ञानकारके निद्राने जागरणकारके२वैतालिके च अमरः

बोधन न० बुध-णिच्-ल्युट्। १विज्ञापने कालवशात् सम्भावितायां २तद्द्वीपने ३जागरणे च। "प्रथमं बोधनं कुर्यात्" इति पुराणम्। "वासन्ते बोधनं कुर्यात्" इति स्मृतिः। देवीबोधकल्पादिः तिं०त०प्रदर्शितो यथा विष्णुपुराणम् "कन्यायां कृष्णपक्षे तु पूजयित्वार्द्रभे दिवा। नवम्यां बोधयेद्देवीं महाविभवविस्तरैः" "इदे आश्विने पक्षे नवम्यामार्द्रयोगतः। श्रीदेवे बोधयामि त्वां यावत् पूजां करोम्यहम्। ऐं रावणस्य वधार्थाय रामस्यानुग्रहाय च। अकाले ब्रह्मणा बोधो देव्यास्त्वमि कृतः पुरा" इति मन्त्रश्चिन्त्यः। अकाल इति तु रात्रित्वेन दक्षिणायनस्य तथा च स्मृतिः "तपस्तप्तौ शिशिरादृतुः। अधुक्ष माधवश्च वासन्तिकादृतुः। शुक्रश्च शुचिश्च ग्रैष्मादृतुः। अथैतदुत्तरायणं देवानां दिनं, नभश्च नभस्यश्च वार्षिकादृतुः दृषश्च ऊर्जश्च शारदादृतुः। सहश्च सहस्यश्च हैमन्तिकादृतुः। अथैतद्दक्षिणायनं देवानां रात्रिः" इति एवञ्च "रात्रावेव महामाया ब्रह्मणा बोधिता पुरा। तथैव च नराः कुर्युः प्रतिसंवत्सरं नृप!" इति अकाल्यत्वोक्तिः प्रवत्सम्। अतएव विष्णुपुराणे दिवेत्युक्तम्। एवञ्च कालिकापुराणेऽपि बोधने रात्रावितिपदं देवतारात्रिपरम्। ततश्च पूर्वाह्णे नवम्यामार्द्रानक्षत्रयुक्तायां बोधनं पूर्वाह्णेतरकाले आर्द्राभावे नवम्यामार्द्रभे दिवैवत्र दिवापदात् तत्रापि बोधनम्, अन्यथा दिवापदं व्यर्थं स्यादिति। ज्योतिषार्णवे व्यक्तमुक्तं वराहेण "कन्यादिमीनपर्यन्तं यत्र संप्राप्यते शिवः। तत्र बोधः प्रकर्त्तव्यो देव्या राज्ञा शुभप्रदः"। शिव आर्द्रा। एवञ्चोक्तवदिने पूर्वाह्णे नवमीयोगे परत्रार्द्रायोगे परत्र बोधनं न युक्तात् पूर्वत्र, युक्तबाधकपूर्वाह्णस्य बाधकत्वमात्तरोधात् दिवानक्षत्रायोगे तु पूर्वाह्ण एव नवम्यां सम्भवत्र पूर्वाह्णयोगे तु पूर्वदिन एव युक्तात्। अत्र केवलनवम्यां बोधनविधेर्नक्षत्रस्यापि गुणकल्पत्वात्। "श्रावे वा फाल्गुने वापि भवेद् वै श्रावणप्रभौ। आकरीति च यद् प्रोक्तं तद् प्रायो दृष्टिदर्शनात्" इति सौरागमाम्राकरीतिवत् आर्द्रायोगतः दृश्यस्य प्राधिक्यत्वेनाभिधानं प्रतीयते। ततश्चार्द्रारहितबोधने मन्त्रान्तराद्दपदेशात् तद्दृश्यमन्त्रः प्रथमयुक्तत्वेन प्रयुज्यते। "मन्त्रन्यूनातिरिक्तञ्च यच्छिद्रं यदयक्तिकम्। तदेश्वर्यमयद्यच्च यातयामञ्च यद् भवेत्। तदोद्धारप्रयुक्तेन सर्वमाविकलं भवेत्" इति योगिनीतन्त्रवचनात्। अतो बोधनेऽप्येवं नवम्यां बोधनासामर्थ्ये तु षष्ठ्यां सायं बोधनं तथाच भविष्ये "षष्ठ्यां बिल्वतरौ बोधं सायं सन्ध्यासु कारयेत्"। सन्ध्योक्ता वराहमिहिरेण "अर्द्रांशसमात् सन्ध्या अक्षीभूता न तारका यावत्"। षष्ठ्यां बोधने तु प्रागुक्तः "ओं रावणस्य वधार्थाय" इति "अकालब्रह्मबोधिते षष्ठ्यां सायाह्ने बोधयाम्यहम्" इति च पठेत्। अत्र बोधनामन्त्रयोः पृथक्त्वं तन्त्र-

प्रकाशकमन्त्रभेदात् अत्र बोधनमन्त्रावुक्तावेव आमन्त्रणमन्त्रो तु "मेरुमन्दरकैलासहिमवच्छिखरे गिरौ" इत्यादौ प्रागुक्तदेवीपुराणे नवमीषष्ठ्योर्बोधनामन्त्रयोः पृथक्त्वाभिधानाच्च। ततश्च षष्ठ्यासभयकरयोरपि यत्नो-प्रवेशपूर्वदिने सायंषष्ठीलाभे एकदैवोभयकरत्वम्। यदा तु पूर्वदिने सायंषष्ठीलाभः न परदिने सायंषष्ठी-लाभः तदा पूर्वेद्युर्बोधनं परदिने सायमामन्त्रणम्। यदा तूभयदिने सायंषष्ठ्यलाभस्तदा परदिने पूर्वाह्णे षष्ठ्यां बोधनं "बोधयेद् बिल्वशाखायां षष्ठ्यां देवीं फ-लेषु च। सम्पूज्यां बिल्वशाखां तामाहृत्य प्रतिपूजयेत्"।

बोधनी स्त्री बोध्यतेऽनया बुध-णिच्-करणे आधारे वा ल्युट्। १पिप्पल्यां तथा हि मूर्च्छितो बोध्यते। २कार्त्तिकशुक्लैकादश्यां तत्र हि हरेर्बोधनम्। "श्रवणोबोधनी-मध्ये या कृष्णैकादशी भवेत्। सैवोत्थोत्था मुहूर्त्तेन नान्या कृष्णा कदाचन" इति तिथ्यादित०। "तावद्गर्जन्ति तीर्थानि वाजिमेधादयो मखाः। मथुरायां प्रिया विष्णो-र्यावन्नु नावति बोधनी" हरिभक्तिविलासे वह्निपु०वचनम्।

बोधवासर पु० ६त०। १हरिबोधनदिने कार्त्तिकशुक्लैकादश्याम् २तत्कर्त्तव्ये कृत्ये च। "जन्मप्रभृति यत् पुण्यं नरेणोपार्जितं भुवि। तथा भवति तत् सर्वं न कृत्वा बोधवासरम्" हरिभक्तिविरसमुच्चयस्कन्दपु०।

बोधान त्रि० बुध-आनच्। १विज्ञे २गीष्पतौ शब्दर०।

बोधि पु० बुध-इन्। १समाधिभेदे २पिप्पलवृक्षे ३बुद्धभेदे मेदि० ४बोधे त्रिका०। ५भ्रातरि त्रि०। [ऽथत्र पु०

बोधितरु पु० कर्म०। अश्वत्थवृक्षे हेमच०। बोधिद्रुमादयोऽ-

बोधिसत्त्व न० बोधि बोधयुतं सत्त्वम्। बुद्धभेदे हेमच०।

बौद्ध न० बुद्धेन प्रोक्तमण्। १बुद्धशास्त्रभेदे तच्च शास्त्रं प्रथमं बुद्धसूतिना प्रयुक्तं तच्च बुद्धावतारे प्रपञ्चितम्। यथोक्तं मत्स्यपु० २४ अ०।

"आयुषो नवमः पुत्रो बुद्धधर्मा तथैव च। रजिर्दम्भो विपाप्मा च वीराः पञ्च सुदारवाः। रजेः पुत्रशतं जज्ञे राजेयमिति विश्रुतम्" इत्युपक्रमे "रजिपुत्रैस्तदा-ज्ञिप्तं चक्रादिन्द्रस्य वैभवम्। यज्ञभागच राज्यञ्च तपोबल सुखानिच। राज्याद् भ्रष्टस्तदा शक्रो रजिपुत्रैर्निपी-ड़ितः। प्राह वाचस्पतिं दीनः पीड़ितोऽस्मि रजेः सुतैः। न यज्ञभागो राज्यं मे निर्जितस्य वृहस्पते!। राज्य-लाभाय मे यत्नं विधत्स्व धिषणाधिप!। ततो बृहस्पतिः यज्ञमकरोद्बुद्धरूपेण दर्शितम्। अतएवाग्निविधानेऽग्नौ-

केन च कर्मणा। गत्वाथ मोहयामास रजिपुत्रान् बृहस्पतिः। जिनधर्मं समास्थाय वेदबाह्यं स वेदवित्। वेदत्रयीपरिभ्रष्टांश्चकार धिषणाधिपः। वेदबाह्यान् परिज्ञाय हेत्वादसमन्वितान्। जघान शक्रो वज्रेण सर्वान् धर्मबहिष्कृतान्"। तदधीते वेत्ति वा पुनः अण्। २तच्छास्त्राध्यायिनि ३तद्वेत्तरि च त्रि०। बुद्धशब्दे तन्मतं दर्शितम्।

बौध पु० बुधस्यापत्यम् गोत्रिकोऽण्। बुधात्मजे ग्रहरत्नादि हेमच०।

बौधायन पु० बोधस्य गोत्रापत्यम् आङ्गिरसभिन्नम् इञ्। ततो यूनि ष्फञन्तत्वात् फक्। यूनि बोधगोत्रापत्ये ऋषिभेदे तेन च कल्पसूत्रप्रवक्तरि तस्य ग्रन्थाः।

बौधि पु० बोधस्य गोत्रापत्यमाङ्गिरसभिन्नम् इञ्। बोधस्यगोत्रापत्ये आङ्गिरसभिन्ने आङ्गिरसे तु यञ्। बौध्य इत्येव

बौध्य पु० बोधस्य गोत्रापत्यमाङ्गिरसः यञ्। आङ्गिरसे बोधगोत्रापत्ये तद्गोत्रा च भा० शा० १७८अ० दर्शिता यथा "बौध्य उवाच। "उपदेशेन वक्ष्यामि नानुशासीऽहं त्वया। त्वयापि तत्र वक्तव्यं तत्त्वं परिदिदृक्षता। पिङ्गला कुररः सर्पः शरकृन्नैषधं वने। इषुकारः कुमारी च षड़ेते गुरवो मम"। भीष्म उवाच "आशा-वतवती राजन्नैराश्यं परमं सुखम्। आशां निराशां कृत्वा तु सुखं स्वपिति पिङ्गला। आमिषं कुररं दृष्ट्वा ध्यमानं निरामिषैः। आमिषस्य परित्यागात् कुररः२ सुखमेधते। परिग्रहो हि दुःखाय न सुखाय कदाचन। सर्पः३ परकृतं वेश्म प्रविश्य सुखमेधते। मुधा जीवन्ति मुनयो भैक्षवृत्तिं समाश्रिताः। अल्पोद्देगैर्यथा भूतानां शरकृ४ इव षट्पदाः। इषुकारो५ नरः कश्चि-दिशावत्कृतमानसः। समीपेनापि सञ्चरन्तं राजानं नाबुबुधत्। बहूनां कलहो नित्यं द्वयोः सङ्घर्षणं ध्रुवम्। एकाकी विचरिष्यामि कुमारीशङ्खको६ यथा"। बोधो देवभेदोऽभिजनोऽस्य यञ्। पित्रादि-क्रमेण २तद्देवयुक्ते त्रि०।

बध्(ध्य)ध ताड़ने दिवा० पर० सक० सेट् बि(वि)ध्यति अध्यात्(ध्यात्) बिधीत् बि(वि)ध्या(ध्या)त् बध्यादिसने सति बिभ्रत्सयति। [अबुध्यत त।

बुध अवगमे विभाषे च भ्वा०उभ०सक० सेट्। बोधयति-ते अबुद्ध मन्थे भ्वा०पर०अक०सेट्। (ब्र)भवति। अब्रु(ब्रू)-धीत्-अ(ब्रू)ब्राधीत्। अविवक्षसदुमेऽयमन्यत्रादि।

ब्रह्म पु० बन्ध-नक् बृवादेशः। १स्रष्टरि २चतुर्मुखे अमरः। ३शिवे ४वेदे च। ५दिने ६अन्ने त्रिषद्भुः इक्षुभिदेदे

तस्य गोत्रापत्यम् कुञ्चा० फक्। आश्वायन तद्गोत्रापत्ये पुंस्त्री०। ७भौत्यमनोः पुत्रभेदे मार्कपु० १००अ०। दरीगर्भेदे "अभ्यभिष्यन्दिगुर्वोर्मसेवनाच्चिरवं मतः। करोति यन्विवच्छोषं दोषो वङ्क्षणसन्धिषु। ज्वरगुल्माङ्गसादाद्यं तं ब्रह्मेति निर्दिशेत्" माधवनि०

ब्रह्मखड पु० खण्डभेदे भा०व० ६८अ०।

ब्रह्मकन्यका स्त्री ६त०। १सरस्वत्यां त्रिका० (वामनझाटी) २ब्राह्म्यां राजनि०। [च०२६अ०। २ईश्वरार्पितकर्मफलेत्रि०

ब्रह्मकर्मन् न० ब्रह्मविहितं कर्म०। १वेदविहिते कर्मणि भा०

ब्र(ब्र)ह्मकर्मसमाधि पु०ब्रह्मणि कर्मणां समाधिः "ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम्। ब्रह्मैव तेन गन्तव्यम् ब्रह्मकर्मसमाधिना" गीतोक्ते सर्वकर्मणां कर्त्रादेर्ब्रह्मात्मत्व ब्रह्मरूपेण चिन्तने।

ब्र(ब्र)ह्मकुण्ड न० ब्रह्मनिर्मितं कुण्डम् या० त०। सरोवरभेदे तदाविर्भवकथा।

"पाण्डुनाथस्योत्तरस्यां ब्रह्मकुण्डाह्वयं सरः। ब्रह्मणा निर्मितं पूर्वं स्नानाय स्वर्गवासिनाम्। आयामेन शतव्यामं विस्तीर्णेन तदर्द्धकम्। सर्वपापहरं पुण्यं देवलोकात् समागतम्" तत्र स्नानमन्त्रः। "कमण्डलु समुद्भूतः ब्रह्मकुण्डास्ततश्च्युतः। हर मे सर्वपापानि पुण्यं स्वर्गञ्च साधय। इत्यनेन तु मन्त्रेण स्नायात् तस्मिन् सरोजले। पाण्डुनाथञ्च संपूज्य विष्णुसायुज्यमाप्नुयात्। ब्रह्मकुण्डजले स्नात्वा पूजयित्वा उमापतिम्। ब्रह्मकूटं समारुह्य मुक्तिमेवाप्नुयान्नरः" कालिकापु०८१ अ०।

ब्र(ब्र)ह्मकूट पु० पर्वतभेदे ब्रह्मकुण्डशब्दे दृश्यम्।

ब्र(ब्र)ह्मकूर्च न० "अहोरात्रोषितो भूत्वा पौर्णमास्यां विधेयतः। पञ्चगव्यं पिबेत् प्रातः ब्र(ब्र)ह्मकूर्चमिति स्मृतम्" इत्युक्ते १पञ्चगव्यपानरूपे व्रतभेदे। २कुशोदकसहित पञ्चगव्ये च नारसिंहपु० "पञ्चगव्येन देवेशं यः स्नापयति भक्तितः। ब्रह्मकूर्चविधानेन विष्णुलोके महीयते" "ब्र(ब्र)ह्मकूर्चविधानेन कुशोदकयुतेन" देवी० त०रघु० प्रायश्चित्ताङ्गे ब्र(ब्र)ह्मकूर्चप्रमाणादि तत्तद्दानादिपदतो २२६१पृ० अस्माभिर्दर्शितम्।

ब्र(ब्र)ह्मकृत् त्रि०ब्र(ब्र)ह्म तपः करोति कृ-क्विप्। १तपःकर्त्तरि २विष्णौ पु० "ब्र(ब्र)ह्मण्यो ब्र(ब्र)ह्मकृत् ब्रह्मा" विष्णुस०

ब्र(ब्र)ह्मकृत त्रि० ३त०। ब्रह्मणा कृते। ततः शुक्रा०अण्यत्ये ढक्। ब्राह्मकृतेय तदपत्ये पुंस्त्री०। [राजनि०।

ब्र(ब्र)ह्मकोशी पु० ब्र(ब्र)ह्मणः कोशीव। वल्मीकायाम्

ब्र(ब्र)ह्मगर्भा स्त्री ब्र(ब्र)ह्मेव गर्भोऽस्य। आदित्यभक्तायां राजनि०।

ब्र(ब्र)ह्मगार्ग्य पु० ऋषिभेदे हरिवं० १५८ अ०।

ब्र(ब्र)ह्मगिरि पु० कामाख्यातीर्थपूर्वस्यां स्थिते गिरिभेदे "ततस्तु नीलकूटाख्यं कामाख्यानिलयं परम्। तत्पूर्वभागे वसति ब्रह्मा ब्रह्मगिरिः पुनः" कालिकापु०८अ०

ब्र(ब्र)ह्मगीता स्त्री ६त०। भा० शान्तु० ३५ अ० दर्शितायां ब्रह्मणा कथितायां अनुशासनरूपगीतायाम्।

"यत्र गाथाः पुरा गीताः कीर्त्तयन्ति पुराविदः। तदहं द्विजातीनां धाता हि यथापूर्वं समादधत्। न चान्यदिह कर्त्तव्यं किञ्चिदूर्द्धं यथाविधि। शुक्लो मोक्षायते ब्रह्म श्रेयो वक्त्रेण शोभनम्। क्षमेव कुर्वतां कर्म श्रीर्वा ब्राह्मी भविष्यति। प्रमाणं सर्वभूतानां प्रसादश्च भविष्यत। न मौढ्यं कर्म कर्त्तव्यं ब्राह्मणेन विपश्चिता। मौढ्यं हि कुर्वतः कर्म धर्मः सम्परिध्यते। ओज बुद्धिश्च तेजश्च विभूतिश्च प्रतापिनी। स्वाध्यायं चैव साङ्गाख्यं विपुलं प्रतिपद्यत्व। इत्या चाङ्गवतीमस्य ब्रह्मशास्त्रे प्रतिष्ठिताः। यमयोक्ता ब्रह्मतानां क्रिया ब्राह्मप्राउन्नकल्पिताः। अक्षया धरया युक्ता कृत्स्नमिहोहलक्षया। दमस्वाध्यायनिरताः सर्वान् कामानवाप्स्यथ। यच्चैव सानुगे लोके यच्च देवेषु किञ्चन। सर्वं तत् तपसा साध्यं ज्ञानेन नियमेन च। इत्येतं ब्रह्मगीताख्यं समाख्याता मयाऽनघ"।

ब्र(ब्र)ह्मग्रन्थि पु० यज्ञोपवीतस्य ग्रन्थिभेदे

ब्र(ब्र)ह्मघातक पु० ब्रह्मणं विप्रं हन्ति हन-ण्वुल्। ब्रह्महत्याकारके "षड्विप्रभेदी हत्या याकी नित्यं ब्राह्मणनिन्दकः। आदेशी वेदविक्रेता पञ्चैते ब्रह्मघातकाः"। आसोक्ते पारिभाषिके २पापभेदयुक्ते त्रि०। ब्रह्मन् शातोऽस्यस्यां "भक्षणेन ठन्। द्वादश्यां भक्षणे ब्रह्महत्यापापयुतायां पूतिकायां "पूतिका ब्रह्मघातिका" ति०त०।

ब्र(ब्र)ह्मघोष पु० ६त०। वेदध्वनौ।

ब्र(ब्र)ह्मघ्न त्रि० ब्रह्मणं ब्राह्मणं हन्ति हन-क। ब्रह्महत्याकारके "ब्रह्मघ्नमपि चण्डालं कं पतन्तं पुनीमहे" मनु० त०। स्त्रियां ङीप्।

ब्र(ब्र)ह्मचक्र न० ब्रह्मनिर्मितं चक्रम्। १ब्राह्मणकरचालिते संसाररूपे चक्रे। "सर्वाजीवे सर्वसंस्थे बृहन्ते तस्मिन् हंसो भ्राम्यते ब्रह्मचक्रे" श्वेताश्वतरोप०। कट्टजासवोक्ते २दीक्षोपयोगिचक्रभेदे च।

ब्र(ब्र)ह्मचर्य्य न॰ ब्रह्मणे वेदपठनार्थं चर्य्यम्। द्विजानां वेदपठनार्थव्रतभेदे। "प्रतिवेदं ब्रह्मचर्य्यं द्वादशाब्दानि षड् वा। षट्त्रिंशदब्दिकमिकं गुरुवृ॰ ६३अ॰। तत्प्रकारो मनुनोक्तो यथा

"ऋतोपनयनस्यास्य व्रतादेशनमिष्यते। ब्रह्मणो ग्रहणं चैव क्रमेण विधिपूर्वकम्। यद् यस्य विहितं कर्म यच्च स्तं वा च मेखला। यो दण्डो यच्च वसनमत्तदस्य व्रतेष्वपि। सेवेतेमांस्तु नियमान् ब्रह्मचारी गुरौ वसन्। संनियम्येन्द्रियग्रामन्तपोवृद्ध्यर्थमात्मनः। नित्यं स्नात्वा शुचिः कुर्याद्देवर्षिपितृतर्पणम्। देवताभ्यर्चनञ्चैव समिदाधानमेव च। वर्जयेन्मधुमांसञ्च गन्धं माल्यं रसान् स्त्रियः। शुक्तानि यानि सर्वाणि प्राणिनाञ्चैव हिंसनम्। अभ्यङ्गमञ्जनञ्चाक्ष्णोरुपानच्छत्रधारणम्। कामं क्रोधञ्च लोभञ्च नर्त्तनं गीतवादनम्। द्यूतञ्च जनवादञ्च परिवादन्तथाऽनृतम्। स्त्रीणाञ्च प्रेक्षणालम्भनोपघातम्परस्य च। एकः शयीत सर्वत्र न रेतः स्कन्दयेत् क्वचित्। कामाद्धि स्कन्दयन् रेतो हिनस्ति व्रतमात्मनः। स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः। स्नात्वार्कमर्चयित्वा त्रिः पुनर्मामित्यृचं जपेत्। उदकुम्भं सुमनसो गोशकृन्मृत्तिकाकुशान्। आहरेदप्रयावद्यानि भैक्षचाहरहश्चरेत्। वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्मसु। ब्रह्मचार्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहम्। गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु। अलाभे त्वन्यगेहानां पूर्वं पूर्वं विवर्जयेत्। सर्वं वापि चरेद् ग्रामं पूर्वोक्तानामसम्भवे। नियम्य प्रयतो वाचमभिशस्तांस्तु वर्जयेत्। दूरादाहृत्य समिधः सन्निदध्याद्दिवातिथौ। सायम्प्रातश्च जुहुयात्ताभिरग्निमतन्द्रितः। अकृत्वा भैक्षचरणमसमिध्य च पावकम्। अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत्। मैक्षेण वर्त्तयेन्नित्यं नैकान्नादी भवेद् व्रती। मैक्षेण व्रतिनो दृत्तिरुपवाससमा स्मृता। वृतयद्देवदैवत्ये पित्र्ये कर्मण्यथर्षियत्। कामसम्प्रार्थितोऽश्नीयाद्दु व्रतमस्य न लुप्यते। ब्राह्मणस्यैव कर्मैतदुपदिष्टं मनीषिभिः। राजन्यवैश्ययोस्त्वेवं नैतत् कर्म विधीयते"। ततः गुरुवृत्तिरुक्ता सा च गुरुवृत्तिशब्दे २६२२ पृ॰दर्शिता। २योगाङ्गयमभेदे च "अहिंसासत्याऽस्तेय ब्र(ब्र)ह्मचर्य्याऽपरिग्रहा यमाः" भात॰। तत्र ब्र(ब्र)ह्मचर्य्यं व्याख्यातं भाष्यविवरणाभ्यां यथा "ब्र(ब्र)ह्मचर्य्यं गुप्तेन्द्रियस्योपस्थसंयमः" भा॰। "संयमोपस्थोऽपि हि स्त्रीपुंसयोरतिदाक्षायकन्दर्पवर्द्धनतदङ्गस्पर्शनसङ्गो न ब्र(ब्र)ह्मचर्य्यवान् तन्निरासायोक्तं गुप्तेन्द्रियस्येति इन्द्रियान्तराण्यपि तत्र कोतुपानि रक्षणीयानि"विव॰। तत्र अष्टाङ्गमैथुनशब्दे ५२३ पृ॰ दर्शितवाक्येन मैथुनस्य स्मरणाद्यष्टाङ्गतया तदुपयोगीन्द्रियाणि संयम्यानीत्यर्थः। तत्फलञ्च तत्रोक्तं यथा "ब्र(ब्र)ह्मचर्य्यप्रतिष्ठायां वीर्य्यलाभः" पात॰। "यस्य खलु भाष्यप्रतिघात् सुखानुत्कर्षवति विद्वेष विनेयेषु ज्ञानमाधातुं समर्थो भवति" भा॰। "वीर्य्यं सामर्थ्यं यस्य खलु भाष्यप्रतिघात् सुखानस्थिमादीन् विनेयेषु शिष्येषु ज्ञानं योगतदङ्गविषयमाधातुं समर्थो भवति" विव॰। तथाच अष्टाङ्गमैथुनवर्जनमेव ब्र(ब्र)ह्मचर्य्यं तच्च स्त्रीपुंसयोः साधारणं पुंसः स्त्रीस्मरणाद्यष्टाङ्गराहित्यमेव स्त्रीणां पुंस्मरणादिशून्यत्वमपि तथात्वम्"अतएव ब्र(ब्र)ह्मचर्य्यं तदभ्यासरोधकं वा" विष्णुसू॰। विधवानामपि ब्र(ब्र)ह्मचर्य्यं विहितम् "मृते भर्त्तरि साध्वी स्त्री ब्र(ब्र)ह्मचर्य्यव्यवस्थिता। स्वर्गं गच्छत्यपुत्रापि यथा ते ब्र(ब्र)ह्मचारिणः" मनुव्याख्यायां ब्र(ब्र)ह्मचर्य्ये व्यवस्थिता यज्ञतपुरुषान्तरमैथुना"कुल्लू॰उक्तम्। भावे ष्यञ् ब्रह्मचर्य्यं तत्रार्थे स्त्री।

ब्र(ब्र)ह्मचारिन् पु॰ब्र(ब्र)ह्म वेदस्तद्ग्रहणार्थं चरति व्रतभेदम् चर+णिनि। १उपनयनानन्तरमाद्याश्रमयुते द्विजातौ उपचारात् २तदाश्रमे च। तस्य कर्त्तव्यादिकं मनूक्तं ब्र(ब्र)चर्य्यशब्दे दर्शितम्।

ब्र(ब्र)ह्मचारिणी स्त्री "वेदेषु चरते यस्मात् तेन सा ब्रह्मचारिणी" देवीपु॰४५अ॰ निरुक्तियुक्तायां वेदमात्रगम्यायां चिच्छक्तिरूपायां १दुर्गायां २ब्रह्मचर्य्ययुतायां स्त्रियाञ्च "आसीतामरणात् यान्ता नियतं ब्र(ब्र)ह्मचारिणी" मनुः। ३वारुण्यां वृक्षे राजनि॰। ४ब्राह्मीयाके रत्नमाला।

ब्र(ब्र)ह्मज पु॰ब्रह्मणो जायते जन-ड। १हिरण्यगर्भे "यो वै ब्र(ब्र)ह्माणं विदधाति पूर्वं यस्मै वेदान् प्रहिणोति तस्मै" श्रुतेः "सोऽभिध्याय शरीरात् स्वात् विसृजमानाः सदृक्षीः प्रजाः" इत्युपक्रमे "तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्। तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः" इति मनूक्तेश्च तस्य तथात्वम्। २ब्रह्मजातमात्रे पञ्चभूतादौ च "यतो वा इमानि भूतानि जायन्ते" इत्युपक्रमे "तद् विजिज्ञासस्व ब्रह्मेति श्रुतौ ब्रह्मतः सर्वभूतोत्पत्तिश्रवणात्।

ब्र(ब्र)ह्मज्ञ त्रि॰ ब्रह्म जानाति ज्ञा–क। १ब्रह्मवेत्तरि २विष्णौ पु॰ "ब्रह्मज्ञो ब्राह्मणप्रियः" विष्णुस॰। [राजनि॰

ब्र(ब्र)ह्मजटा स्त्री ब्रह्मणो जटेव संहतत्वात्। दमनवृक्षे

ब्र(ब्र)ह्मजा(या)मल न॰ यामलभेदे तन्त्रे।

ब्र(ब्र)ह्मजिज्ञासा स्त्री इत॰। ब्रह्मावगतिफलके विचारे। शारीरकतभाष्ये १म्रत्रे तत्राधिकार्यादिकं दृश्यम्।

ब्र(ब्र)ह्मजीविन् पु॰ ब्रह्म वेदस्तदिहितेन श्रौतकर्मणा जीवति जीव–णिनि। इत्यर्थं परकीयश्रौतादिकर्मकारके

ब्र(ब्र)ह्मज्ञान न॰ ब्रह्मणो ज्ञानं तेन सह आत्माभेदज्ञानम्। ब्रह्मविद्यायां तच्च अहं ब्रह्मास्मीत्येवंरूपम् "आत्मानं चेत् विजानीयादयमस्मीति पुरुषः। किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत्" श्रुत्या तदभेदज्ञानस्यैव मोक्षहेतुत्वश्रुतेः "वेदान्तसाङ्खसिद्धान्तब्रह्मज्ञानं वदाम्यहम्। अहंब्रह्म परं ज्योतिः विष्णुरित्येव चिन्तयेत्। सूर्य्यं हृदब्योम्नि वह्नौ च ज्योतिरेकं त्रिधा स्थितम्। यथा सर्पिः शरीरस्थं गवां न कुरुते बलम्। निर्गतं कर्मसंयुक्तं दत्ते तासां महाबलम्। तथा विष्णुः शरीरस्थो न करोति हितं नृणाम्। विनाऽऽराधनतो देवः सर्वेषां परमेश्वरः। आरुरुक्षुयतीनाञ्च कर्मज्ञानसदाहृतम्। आरूढ़योगडचार्यां ज्ञानं योगः परं मतम्" मरुड़पु॰ २४॰ अ॰। न्यायादिमते तद्वारोपज्ञानं वेदान्तिमते प्रमारूपम्। तत्त्वमसि अहंब्रह्मास्मीत्यादिवाक्यजन्यमपि तज्ज्ञानं मननिदिध्यासनादिना पश्चात् प्रत्यक्षतामेति। तज्ज्ञानाभिलाषादिकं विवेकचू॰ दर्शितं यथा "अव्यक्तादिस्थूलपर्य्यन्तमेतद्विश्वं यन्मायामात्रं प्रतीतम्। व्योमप्रख्यं सूक्ष्ममाद्यन्तहीनं ब्रह्माद्वैतं यत्तदेवाहमस्मि। सर्वाधारं सर्वसत्त्वप्रकाशं सर्वाकारं सर्वगं सर्वशून्यम्। नित्यं शुद्धं निष्कलं निर्विकल्पं ब्रह्माद्वैतं यत् तदेवाहमस्मि। यस्मिन्नित्यानेकमायाविशेषं प्रत्यग्रूपं प्रत्यवाभात्यभिन्नम्। सत्यज्ञानानन्दमानन्दरूपं ब्रह्माद्वैतं यत् तदेवाहमस्मि। निष्क्रियोऽहमविकारोऽहमस्मि निष्कलोऽस्मि निरञ्जनः। निर्विकल्पोऽहमस्मि निरालम्बोऽस्मि निर्भयः। सर्वात्मकोऽहं सर्वोऽहं सर्वातीतोऽहमद्वयः। केवलाखण्डबोधोऽहमात्मानन्दोऽहं निरन्तरम्"।

ब्र(ब्र)ह्मण्यति पु॰ इत॰ अनुकृ॰ निघण्टौ तस्य यदृच्छात्वाद्धेः एकयदत्वम्। १ब्राह्मणजातिज्ञानिनि यजु॰ १३।२८। २यज्ञज्ञानिनि च "परित्रं विततं ब्रह्म यत्र यन्ति मनीषिणः"। ३।२।८। "हे ब्रह्मण्यते! मन्त्रस्वामिन्" भा॰

ब्र(ब्र)ह्मण्य पु॰ ब्रह्मणे हितः। १विष्णौ "ब्रह्मण्यो देवकीसुतः" विष्णुस॰। २ब्राह्मणहितमात्रे त्रि॰ ३ब्रह्मदारुवृक्षे पु॰ अमरः। ४सङ्गवृक्षे ५तालवृक्षे राजनि॰। ६शनैश्चरे ७ब्रह्मणि तपसि साधौ त्रि॰ मेदि॰।

ब्र(ब्र)ह्मतीर्थ न॰। १पुष्करमूले राजनि॰ २पुष्करतीर्थे च। ३तीर्थभेदे यत्र स्नाने "तत्र वर्षवरः स्नात्वा ब्राह्मण्यं लभते नरः। ब्राह्मण्ये विशुद्धात्मा गच्छेत परमां गतिम्" भा॰ व॰ ८३अ॰। फलमुक्तम्।

ब्र(ब्र)ह्मत्व न॰ ब्रह्मणो भावः त्व। १ब्रह्मत्वविशेषे ब्रह्मणो धर्मे २शुद्धतरीयब्रह्मभावे च।

ब्र(ब्र)ह्मतुङ्ग पु॰ कालपर्वतभेदे। "स्निग्धाञ्जनचयाकारं संप्राप्तः कालपर्वतम्। ब्रह्मतुङ्गं नदीद्वान्यान्सधा जनपदानपि" भा॰ द्रो॰ ८अ॰।

ब्र(ब्र)ह्मद पु॰ ब्रह्म वेदं ददाति। उपनीय वेददातरि आचार्य्ये "यत्पादब्रह्मदाद्गोमरीयान् ब्रह्मदः पिता" मनुः दा–क ब्रह्मदातृ तत्रार्थे पु॰।

ब्र(ब्र)ह्मदण्ड पु॰ ब्रह्मणो दण्डः। १ब्राह्मणदण्डे २अभिशापरूपे दण्डे "ब्रह्मदण्डहता ये च विद्युदग्निहताश्च ये" ति॰ त॰ प्रोढ़गीयाङ्गमन्त्रः। ३यज्ञियदण्डवदिष्टरूपे दण्डे च। "धिग्बलं क्षत्रियबलं ब्रह्मतेजो बलं परम्। एकेन ब्रह्मदण्डेन हतो नाशित सर्वं रामा॰ अयो॰ विश्वामित्रवाक्यम्। ४ब्राह्मणयष्टिदले यद्भच॰। ५विप्रस्य यष्टौ च। ६केतुभेदे ह॰व॰ ११अ॰। केतुशब्दे दृश्यम्।

ब्र(ब्र)ह्मदण्डी स्त्री वृद्धो दण्डः कोप् ब्रह्मोपसनाद्दण्डी। वृद्धत्वभेदे कण्टकपत्रफलायामजगण्डयां राजनि॰।

ब्र(ब्र)ह्मदत्त स्वायम्भुवमन्वन्तरे नृपभेदे इत॰। २हिरण्यगर्भेच दत्ते त्रि॰ ३त॰। ३विप्राय दत्ते त्रि॰। ४शुकदेवस्य कन्यायां कृत्वीसमाख्यायां चक्षुषस्य पुत्रभेदे पु॰ तत्कथा हरिवं॰ ११ अ॰ दृश्या। [याम् अमरः।

ब्र(ब्र)ह्मदर्भा स्त्री ब्रह्मणो दर्भो यत्र यज्ञे। यज्ञानिकायाम्

ब्र(ब्र)ह्मदाय पु॰ ब्र(ब्र)ह्म द(दे) वा वेदाध्ययनसमाप्तौ, विप्राय वा राज्ञा दीयते दा–कर्मणि घञ्। समाप्तवेदविप्राय देये धने "ब्र(ब्र)ह्मदायमतं भूमिं हरेद्यस्तामकामतः" दायभागधृतस्मृतिः। [इभेदे अमरः।

ब्र(ब्र)ह्मदारु पु॰ ब्रह्मणो विप्रस्य हितः दारुः। यज्ञपात्रकारे

ब्र(ब्र)ह्मदिव् त्रि॰ ब्रह्मणे वेदाय विप्राय द्यति दिव–क्विप्। १वेदविप्रद्वेष्टरि २वेदनिन्दके च मनुः ९।२५।

ब्र(ब्रा)ह्मन् न० ङ्यप्-मनिन् "ह्मन्नेर्नौऽङ्चेति" वचा० नकारस्याकारे ऋतो रत्वम्। १वेदे "तस्मादेतद् ब्रह्म नाम रूपमन्नञ्च जायते श्रुतिः"। "तेन ब्रह्म हृदा" भाग० १।१।१। २तपसि, २सत्ये ४तत्त्वे यथार्थे अमरः। सर्वगुणातीते विशुद्धे तुरीये ५चित्स्वरूपे च। हृद्धिरण्यगर्भे ७विप्रे ८ब्रह्मत्वजातिविशेषे च पु० अमरः। विल्वादिषु पञ्चविंशे ६योगे मेदि०। उब्बटदत्तेन टनोऽत्रादित्वेन साधितम् मेदिनीकरेण खोऽत्रादित्वेन कीर्त्तनात्तथापि। ब्रह्म च सच्चिदानन्दात्मकम्। तच्च तस्य स्वरूपलक्षणम्। विवरणानुसारिणस्तु "आनन्दो विषयानुभवो नित्यत्वञ्चेति सन्ति धर्मा अपृथक्त्वेऽपि पृथगिवावभासन्ते" इति तत्रोक्तौ मिथ्याभावः सत्यत्वम् अज्ञानभावश्चित्त्वम्। दुःखाभाव आनन्द इत्याहुः। तेषामभावान्नाच्च ब्रह्मस्वरूपाधिकरणे स्थितत्वात् स्वभावस्याधिकरणस्वरूपतया ब्रह्मस्वरूपत्वमिति। तस्य तटस्थलक्षणञ्च जगज्जन्मस्थिति प्रलयानां प्रत्येकमुपादानप्रत्यक्षचिकीर्षाकृतिमत्त्वं तेन नवलक्षणवत्त्वम् "वेदान्तप०। अतएवोक्तं श्रीधरेण "विसर्गविसर्गादिनवलक्षणलक्षितमिति"। तच्च ब्रह्म द्विविधं निर्गुणं सगुणञ्च। सच्चिदानन्दात्मकस्यैव निर्गुणत्वं जगज्जन्मादिकर्त्तृत्वं च सगुणत्वम्। जाग्रदाद्यवस्थात्रयसाक्षित्वञ्च सगुणत्वं अवस्थात्रयातीतञ्च चतुरीयसंज्ञा "शिवमद्वैतं चतुर्थं मन्यन्ते" इति श्रुतेस्तत्त्वम्। तत्र तस्य तटस्थलक्षणाभिप्रायेण "जन्माद्यस्य यतः" भा० सु० "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व ब्रह्मेति" श्रुतिश्च प्रवृत्ते तस्य स्वरूपलक्षणाभिप्रायेण "निर्गुणं निष्कलं शान्तं निरवद्यं निरञ्जनम्" इत्याद्याः श्रुतयः प्रवृत्ताः। आत्मबोधे तु तस्य ब्रह्मणोऽखिलवस्त्वपेक्षया श्रेष्ठत्वाद्ब्रह्मत्वमुक्तं यथा "यद्भावाद्भावरो भावो यत्सुखाद्भावरं सुखम्। यज्ज्ञानाद्भावरं ज्ञानं तद्ब्रह्मेत्यवधारयेत्। यद् दृष्ट्वा नापरं द्रष्टव्यं भवति न पुनर्भवः। यज्ज्ञात्वा नापरं ज्ञेयं तद्ब्रह्मेत्यवधारयेत्। तिर्यगूर्द्ध्वमधः पूर्णं सच्चिदानन्दमद्वयम्। अनन्तं नित्यमेकं यत्तद्ब्रह्मेत्यवधारयेत्। अतद्व्यावृत्तिरूपेण वेदान्तैर्लक्ष्यतेऽद्वयम्। अखण्डज्ञानानन्दमेकं यत् तद्ब्रह्मेत्यवधारयेत्। दृश्यते श्रूयते यद्यद्ब्रह्मणोऽन्यच्च तद्भवेत्। तत्त्वज्ञानाच्च तद्ब्रह्म सच्चिदानन्दमद्वयम्। सर्वगं सच्चिदात्मानं ज्ञानचक्षुरिरीक्षते। अज्ञानचक्षुर्नेक्षेत भास्वन्तं भानुमन्यवत्"। तच्च निर्गुणमपि गुणभेदेन नानारूपं यथोक्तम् "ब्रह्मैकं मूर्त्तिभेदस्तु गुणभेदेन सनातनम्। तद्ब्रह्म द्विविधं वस्तु सगुणं निर्गुणं शिव!। मायान्वितो यः सगुणो मायातीतश्च निर्गुणः। स्वेच्छामयश्च भगवानिच्छया विकरोति च। इच्छाशक्तिश्च प्रकृतिः सर्वशक्तिप्रसूः सदा। केचिदेकं वदन्त्येवं ब्रह्म ज्योतिः सनातनम्। केचिद्वदन्ति द्विविधं ब्रह्मप्रकृतिपूर्वकम्। श्रुणु ये च वदन्त्येकं प्रकृतिपुरुषयोः परम्। तस्माद्भवति तौ द्वौ च तद्ब्रह्म सर्वकारणम्"। अथवैकं परं ब्रह्म द्विविधं भवतीच्छया। इच्छाशक्तिश्च प्रकृतिः सर्वशक्तिप्रसूः सदा" ब्रह्मवैवर्त्ते जन्मख० ४१ अ०। तस्य नवधा रूपं यथा "योगिनो यं वदन्त्येवं ज्योतीरूपं सनातनम्। ज्योतिरभ्यन्तरे नित्यं रूपं२ भक्ता वदन्ति यम्। वेदा वदन्ति सत्यं३ यं नित्यमाद्यं४ विचक्षणाः। यं वदन्ति सुराः सर्वं परं स्वेच्छामयं प्रभुम्५। सिद्धेन्द्रासुरयः सर्वं सर्वरूपं६ वदन्ति यम्। यमनिर्वचनीयञ्च योगीन्द्रः शङ्करोवदेत्७। स्वयं धाता च प्रवदेत् कारणानाञ्च कारणम्८। शेषो वदेदनन्तं९ यं नवधारूपमीश्वरम्। तर्काणामेव सर्वेषां यं षड्विधं रूपमीश्वरम्। वैशेषानामेकरूपं वेदानामेकमेव च। पुराणानामेकरूपं तन्त्राच्चैवविधं स्मृतम्। न्यायोनिर्वचनीयञ्च यन्तं शङ्करोऽब्रवीत्। नित्यं वैशेषिकास्त्वन्यं वदन्ति च विचक्षणाः। सांख्यो वदति तं देवं ज्योतीरूपं सनातनम्। मीमांसा सर्वरूपञ्च वेदान्तः सर्वकारणम्। पातञ्जलोऽप्यनन्तञ्च वेदाः सत्यस्वरूपकम्। स्वेच्छामयं पुराणञ्च भक्ताश्च नित्यविग्रहम्" इति तत्रैव १०८अ०। अन्यथाऽपि सत्त्वादिगुणभेदेन तस्य चतुर्धारूपं यथा "चतुर्विभागः संस्थो चतुर्धा संस्थितः स्थितौ। प्रलयस्तु करोत्यन्ते चतुर्भेदो जनार्दनः। एकेनांशेन ब्रह्माऽसौ भवत्यव्यक्तमूर्त्तिमान्। मरीचिमिश्राः पतयः प्रजानामन्यभागतः। कालस्तृतीयस्तस्यांशः सर्वभूतानि चापरः। इत्थं चतुर्धा संस्थो वर्त्ततेऽसौ रजोगुणः। एकांशेन स्थितो विष्णुः करोति परिपालनम्। मन्वादिरूपी चान्येन कालरूपी परेण च। सर्वभूतेषु चान्येन संस्थितिं कुरुते स्थितः। सत्त्वं गुणमुपाश्रित्य जगतः पुरुषोत्तमः। आश्रित्य तमसो वृत्तिं मन्वन्ते तथा प्रभुः। रुद्रस्वरूपो भगवानेकांशेन भवत्यजः। अन्यूनकालादिरूपेण भागेनान्येन वर्त्तते।

कालस्वरूपो भगोऽन्तः सर्वभूतानि चापरः। विनाशं कुर्वतस्तस्य चतुर्वैवं महात्मनः" विष्णुपु० १अंशे २१अ०। वेधाश्च रजोगुणप्रधानोपाधिकः कार्य्यब्रह्मा। ऋत्विग्भेदश्च यज्ञावाकशब्दे ८५ पृ० दर्शितेषु प्रधानेषु चतुर्षु ऋत्विक्षु मध्ये एकतमः। "ब्रह्मणामपराधे तु ब्रह्मा परिहरेत् सदा" वामा० भाष्यधृतकारिका। "ब्रह्मणामध्वर्य्वादीनामृत्विजां वेदत्रयविदां मध्ये ऋत्विगेको ब्रह्मनामको वेदत्रयमन्त्रतद्विहितकर्मविषये अपराधो न्यूनभावो यदि जायते तस्यापराधस्य परिहारं प्रतीकारं कुर्य्यात्" इति तदर्थः। "यत्तस्य कैष भिषक् ब्रह्मेति" भाष्यधृतश्रुत्यन्तरम्। अतएवास्य कृताकृतावेक्षणार्थं वरणमन्त्रोऽपि। १०हस्पतौ च ब्रह्मपुरोहितशब्दे ३अग्रम्।

ब्र(ब्र)ह्मनाल न० ब्रह्मणो नालमिव। काश्यां मणिकर्णिकासमीपस्थे तीर्थभेदे। "पितामहेश्वरं लिङ्गं ब्रह्मनालोपरि स्थितम्। पूजयित्वा नरो भक्त्या ब्रह्मलोकमवाप्नुयात्। ब्रह्मलोकःसमीपे तु कृतं कर्म शुभाशुभम्। परमक्षयतामेति शुभमेव ततश्चरेत्। अल्पमपि यत् कर्म कृतमत्र शुभाशुभम्। प्रलयेऽपि न तस्यास्ति प्रलयो मुनिसत्तम!। नाभीतीर्थमिदं प्रोक्तं नाभीभूतं यतः क्षितेः। अपि ब्रह्मात्मजोत्पत्तेरेषा शुभोदया। सा मणिकर्णिकेयीयं नाभिगाम्भीर्य्यभूमिका। ब्रह्मात्मजोत्पत्तिकं सर्वं यस्मादेति लये लयम्। ब्रह्मनालं परं तीर्थं त्रिषु लोकेषु विश्रुतम्। तत्सङ्गमे नरः स्नातः कोटिजन्ममलं हरेत्। ब्रह्मनाले पतेद्देहोऽपि कोकसमात्मकम्। ब्रह्मात्मजसरस्यान्ते न विद्यन्तिकदाचन" काशीख० ६१अ०।

ब्र(ब्र)ह्मनिर्वाण न० ब्र(ब्र)ह्मणि निर्वाणं निर्वृतिः। ब्र(ब्र)ह्मभावापन्ने सच्चिदानन्दैकस्वरूपे परमानन्दे "एषा ब्राह्मी स्थितिः पार्थ! नैनां प्राप्य विमुह्यति। स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति" गीता।

ब्र(ब्र)ह्मपत्र न०ब्रह्मणः तन्नामकस्यर्षेः पत्रम्। पलाशपत्रे। "भोजनं ब्रह्मपत्रेषु कदया लोचनं हरेः। दर्शनं वैष्णवानाञ्च महापातकनाशनम्" पाद्मोत्तरख०११८अ०।

ब्र(ब्र)ह्मपर्णी स्त्री ब्र(ब्र)ह्मेव विस्तीर्णानि मूलादारभ्य स्थितानि पर्णान्यस्याः ङीप्। वृश्चिकपर्य्याम् राजनि०।

ब्र(ब्र)ह्मपवित्र पु०ब्र(ब्र)ह्मेव वेदोक्तकर्मणि वा पवित्रः। कुशे राजनि०।

ब्र(ब्र)ह्मपादप पु० ब्र(ब्र)ह्मणः प्रियः वैदिककर्मयोग्यत्वात् विप्रब्र(ब्र)ह्मचारिधार्य्यदण्डार्थत्वाद्वा ब्रह्मनामकत्वाद्वा पादपः। पलाशवृक्षे हेमच०। "पलाशो वै ब्रह्म" शत०ब्रा० पलाशशब्दे ३अग्रम्।

ब्र(ब्र)ह्मपुत्र पु० ब्र(ब्र)ह्मणः पुत्र इव कपिलवर्णत्वात्। १विषभेदे अमरः। तद्विषस्य लक्षणं भावप्र० उक्तं यथा "वर्णतः कपिलो यः स्यात्तथा भवति सारकः। ब्रह्मपुत्रः स विज्ञेयो जायते मलयाचले"। २उत्तरदेशप्रसिद्धे १नदभेदे ४क्षेत्रभेदे च। ५सरस्वत्यां नद्यां स्नो। तस्याः पितामहजातत्वं ब्रह्माणीशब्दे ३अग्रम्। तस्य नदरूपोत्पत्तिकथा "हरिवर्षे महावर्षे ग्रावनामेति नामतः। मुनिरासीन्महाभागो ज्ञानवान् सुतपोधनः। तस्य भार्य्या महाभागा अमोघाख्या महाव्रती। हिरण्यगर्भस्य सुतेत्यृचन्द्राभूद्भुवा। तया सार्द्धं स कैलासमध्यादपर्वतेऽवसत्। सौहित्यास्तस्य सरसीरे वै गन्धमादने। एकदा स तपोनिष्ठो निजघुष्मादिमोचरे। जगाम वनमध्यन्तु चिन्वन् वन्यफलानि च। तस्मिन्नवसरे ब्रह्मा सर्वलोकपितामहः। तत्राजगाम यत्रास्ति अमोघा ग्रावनोः प्रिया। तां दृष्ट्वा देवगर्भाभां युवतीमतिसुन्दरीम्। मोहितो मदनेनाशु तया ऽभूत् कृष्टेन्द्रियः। सदीरितेन्द्रियो भूत्वा जिघृक्षुस्तां महाव्रतीम्। ययाधावत्तदा ब्रह्मा सम्मुखो मदनार्दितः। धावमानं विधातारं दृष्ट्वाऽमोघा महाव्रती। मैवं मैवमिति प्रोच्य पर्णशालां व्यलीयत। ददूषोवाच धातारममोघा कुपिता तदा। पर्णशालान्तरगता दारग्राहस्य तत्त्वतः। अकार्य्यं न मया कार्य्यं मुनिपत्न्या विगर्हितम्। बलात् प्रमथ्य चाहं चेत्त्वया त्याज्य मपान्यरूपम्। अमोघा चैवमुक्त्वा विधातुश्च तदा नृप!। रेतश्चस्कन्द च तदैवाश्रमे ग्रावनोर्मुनेः। च्युते रेतसि धातापि हंसयानं समास्थितः। लज्जयातिपरीताङ्गो द्रुतं वै स्वाश्रमं ययौ। गते वेधसि ग्रावनुर्निजमाश्रममागतः। आगत्य दृष्ट्वा हंसानां पदचोभं तथा भुवि। तेजश्च पतितं भूमौ विधातुर्ज्वलनोपमम्। अमोघां परिपप्रच्छ पर्णशालान्तरस्थिताम्। किमेतदत्र शुभगे! प्रदृष्टं दृश्यते तु यत्। पद्मिन्याश्च पदचोभस्तेजश्चेदञ्च वीदृशम्। सा तस्य वचनं श्रुत्वा ग्रावनुं मुनिसत्तमम्। अमर्षितेव सगद्दाकुला विकलानना। हंसयुक्तस्यन्देन रोषागत्य महर्षये च।

कमण्डलुकरो भीरु रतिं मां समयाचत। ततो मया भर्त्सितः स कुटलान्तरजीनया। प्रध्याय्य तेजः स गतो मम शापभयार्दितः। कुरु तत्र प्रतीकारं यदि शक्नोषि शान्तनो!। न हि तां धर्षणां सोढुं कश्चित् शक्नोति जीवन्नत्। स तस्या वचनं श्रुत्वा स्वयं ब्रह्मा समागतः। इति निश्चित्य मनसा तत्र ध्यानपरोऽभवत्। दिव्यज्ञानेन स ज्ञात्वा देवकार्यमुपस्थितम्। तीर्थावतारश्चाप्यासीत् क्षितौ जगतां हितः। ज्ञात्वोदकं चिन्तयित्वा स्वभार्यामिदमब्रवीत्। इदं तेजो ब्रह्मपत्नं पिबामीहे! समाज्ञया। क्षितौ सर्वजगतां देवकार्यार्थसिद्धये। भवत्या निकटे ब्रह्मा स्वयमेव समागतः। त्वमप्राप्य स महात्मा आवयोः स समर्थ च। गतो निजाश्रमं तस्मात् कर्त्तुमर्हसि सद्वचः। तत् श्रुत्वा शान्तनोर्वाक्यमभीषातीव लज्जिता। सान्त्वयन्तीव तं प्राह प्रतिं नत्वा महासती। नान्यच्च तेजो धास्यामि न चेत्ते विमनस्कता। अवश्यं यदि कर्त्तव्यं पीत्वा त्वं मयि चोत्सृज। ततस्तस्या वचः श्रुत्वा युक्तं तथ्यञ्च शान्तनुः। स्वयं पीत्वा च तत्तेजस्तस्या गर्भेऽध्यधेचयत्। संक्रामितैः शान्तनुना तेजोभिर्ब्रह्मणः सती। गर्भं दधारामोघाख्या क्षितौ जगतां ततः। तस्यां काले तु संप्राप्ते संजातोज्वलसद्वयः। तन्मध्ये तनयश्चापि नीलवासाः किरीटधृक्। रक्तमाल्यसमायुक्तो रक्तगौरश्च ब्रह्मवत्। चतुर्भुजः पद्मविद्यावरयष्टिधरस्तथा। शिशुमारशिरस्थश्च तुल्यकायो जलोत्करैः। तं जातञ्च तथाभूतं शान्तनुर्लोकशान्तनुः। चतुर्णां पर्वतानाञ्च मध्यदेशे न्यवेशयत्। कैलासश्चोत्तरे पार्श्वे दक्षिणे गन्धमादनः। जारुधिः पश्चिमे शैलः पूर्वे संवर्त्तकाह्वयः। तेषां मध्ये स्वयं कुण्डं पर्वतानां विधेः सुतः। ज्ञात्वाऽतिवृद्धये नित्यं वरदोऽयं निशाकरः। तं तोयमध्यगं दृष्ट्वा पर्वतानामधो गतः। ऋषिभिः स्वयम्। क्रमतस्तस्य संस्कारान्करोद्वेदव्रतेन च। अथ काले बहुतिथे व्यतीते ब्रह्मणः सुतः। तोयराशिस्वरूपेण वृद्धये पञ्च योजनान्। तस्मिन् देवाः पपुः सर्वे दिनेदिनेऽथ वारिणि। शीतामलजले हृद्ये देव्यश्चाप्सरसां गणैः। तस्मिन्नवसरे रामो जामदग्न्यः प्रतापवान्। चक्रे मातृवधं घोरमत्युग्रं पितुराज्ञया। तस्य पापस्य मोक्षाय स्वपितृश्चोपदेशतः। स जगाम महाकुण्डं ब्रह्माख्यं ज्ञातमिच्छया। तत्र स्नात्वा च पीत्वा च पापदुःखं व्यपानयत्। पीत्वा परशुना जत्वा तस्य च्छायावतारयत्" तदुत्तरञ्च "ब्रह्मकुण्डात् सुतः सोऽथ कासारे लोहिताह्वये। कैलासोपत्यकायान्तु न्यपतद् ब्रह्मणः सुतः। तस्यापि सरसस्तीरं सस्तत्याज्य महाबलः। कुठारेण दिशं पूर्वामनयद्ब्रह्मणः सुतम्। ततोऽपरत्रापि गिरिं क्रौञ्चरन्ध्रं विभिद्य च। कामरूपान्तरं पीठमवाङ्मुखदृष्टिः। तस्य नाम विधिश्चक्रे स्वयंलोहितगङ्गकम्। लौहित्यात् सरसो जातो लौहित्याख्यस्ततोऽभवत्। स कामरूपमखिलं पीठमाप्लाव्य वारिणा। सोपयन् सर्वतीर्थानि दक्षिणं याति सागरम्। प्रागेव दिव्यसरितां संत्यज्य ब्रह्मणः सुतः। पुनः पतति लौहित्ये गत्वा द्वादशयोजनम्। चैत्रे मासि सिताष्टम्यां यो नरो नियतेन्द्रियः। स्नाति लौहित्यतोयेषु स याति ब्रह्मणः पदम्। चैत्रन्तु सकलं मासं शुचिः प्रयतमानसः। लौहित्यतोये यः स्नाति स कैवल्यमवाप्नुयात्" कालिकापु० ८३,८४ अ० "मीने मधौ शुक्लपक्षे अशोकाख्यां तथाष्टमीम्। विवेदशोककलिकाः स्नायाल्लौहित्यवारिणि। पुनर्वसौ दृशे स्नस्ते चैत्रे मासि सिताष्टमीम्। लौहित्ये विरजे स्नात्वा सर्वपापैः प्रमुच्यते" ति० त०।

ब्र(ब्र)ह्मपुर न० ६त०। ब्रह्मण उपासनार्थं हृदयस्थाने "अथ यदिदं ब्रह्मपुरे दहरं पुण्डरीकम्" छा० उ०। दहरशब्दे ३६१० पृ० दृश्यम्। "यः सर्वज्ञः सर्वविद्यस्यैष महिमा भुवि। दिव्ये ब्रह्मपुरे ह्येष व्योम्न्यात्मा प्रतिष्ठितः" स्मृतिः। "ब्रह्मणोऽत्र चैतन्यस्वरूपेण नित्याभिव्यक्तत्वाद्ब्रह्मणः पुरं हृदयपुण्डरीकं तस्मिन्" भा०। २विधाहनगर्यां स्त्रियाञ्च या स्त्रीत्वेऽपि तत्रार्थे। ब्र०सं०१४अ०उक्ते वैशालदिक्स्थे ४देशभेदे पु० (बरमा) देशे ख्यातौ क०। तत्रार्थे मार्कपु० पूर्वोत्तरकूर्मभागस्थदेशोक्तौ।

ब्र(ब्र)ह्मपुराण न० वेदव्यासप्रणीते महापुराणभेदे तत्प्रतिपाद्यविषयाश्च हरिवंशादौ ४पा० ८२अ० उक्ता यथा "ब्राह्मं पुराणं तत्रादौ सर्वलोकहिताय वै। व्यासेन वेदविदुषा समाख्यातं महात्मना। तद्धि सर्वपुराणाग्र्यं धर्मज्ञानार्थगोचरम्। नानाख्यानेतिहासाढ्यं दयासङ्कल्पकल्पितम्" तत्पूर्वभागे "देवानामसुराणाञ्च वंशोत्पत्तिः प्रकीर्त्तिता। प्रजापतीनाञ्च तथा दक्षादीनां सुनीश्वर!। ततो लोकेश्वरस्यात्र सूर्यस्य परमात्मनः। वंशानुकीर्त्तनं पुण्यं महाभागतमाश्रमम्। तत्रावतारः कथितः परमानन्दरूपिणः। श्रीमतो रामचन्द्रस्य चतुर्भूतावत-

तारिणः । ततश्च सोमवंशस्य कीर्त्तनं यत्र वर्णितम् । कृष्णस्य जगदीशस्य चरितं कल्मषापहम् । द्वीपानाञ्चैव सिन्धूनां वर्षाणां चाप्यशेषतः । वर्णनं यत्र पातालस्वर्गाणाञ्च प्रदृश्यते । नरकाणां समाख्यानं सूर्य्यस्तुतिकथानकम् । पार्वत्याश्च तथा जन्म विवाहश्च निगद्यते । दक्षाख्यानं ततः प्रोक्तमेकाम्रक्षेत्रवर्णनम् । पूर्वभागोऽयमुदितः पुराणस्यास्य मानद !" । तदुत्तरभागे ।"अस्योत्तरे विभागे तु पुरुषोत्तमवर्णनम् । विस्तरेण समाख्यातं तीर्थयात्राविधानतः । यत्रैव कृष्णचरितं विस्तरात् समुदीरितम् । वर्णनं मम लोकस्य पितृश्राद्धविधिस्तथा । वर्णाश्रमाणां धर्माश्च कीर्त्तिता यत्र विस्तरात् । विष्णुधर्मयुगाख्यानं प्रलयस्य च वर्णनम् । योगानाञ्च समाख्यानं सांख्यानां चापि वर्णनम् । ब्रह्मवादसमुद्देशः पुराणस्य च शंसनम् । एतद्ब्रह्मपुराणन्तु भागद्वयसमाचितम् । वर्णितं सर्वपापघ्नं सर्वलोकप्रदायकम् तत्फलश्रुतिः । "सूतसौनकसंवादं भुक्तिमुक्तिप्रदायकम् । लिखित्वैतत् पुराणं यो वैशाख्यां क्षेमसंयुतम् । अलंकृत्युतञ्चापि भक्त्या दद्याद्द्विजातये । पौराणिकाय सम्पूज्य वस्त्रभोज्यविभूषणैः । स वसेद् ब्रह्मणो लोके यावच्चन्द्रार्कतारकम् । यः पठेच्छृणुयादापि ब्रह्मानुक्रमणीं द्विज ! । सोऽपि सर्वपुराणस्य श्रुतेर्वक्तुः फलं लभेत् । इत्येतत् यः पुराणन्तु ब्राह्मं सर्वं जितेन्द्रियः । इदमध्यायतो च नियमात् स लभेद् ब्रह्मणः पदम् । किमत्र बहुनोक्तेन यद्यदिच्छति मानवः । तत् सर्वं लभते वत्स ! पुराणस्यास्य कीर्त्तनात्"

ब्र(ब्र)ह्मपुरुष पु॰ ब्रह्मणः पुरुष इव । ब्रह्मप्रापकेषु द्वारपालरूपेषु चक्षुः वाङ्मनःप्राणेषु । चक्षुरादीनि प्रकल्प्यन्ते वा एते पञ्च ब्रह्मपुरुषाः स्वर्गस्य लोकस्य द्वारपालाः" छा॰ उ॰। देवतामूर्त्तिरहस्ये २७४५।२७४६ पृ॰ एतद्भाष्यञ्च द्रष्टव्यम् ।

ब्र(ब्र)ह्मपुरोहित पु॰ बृहच्छब्दस्य पुरोहितो यस्य देवे । तस्मिंश्चेद्धि देवाः ब्रह्म पुरोहिता इति बृहच्छब्दस्य बृहस्पतिर्ब्रह्मपुरोहितः" शत॰ब्रा॰१२।८।२।२९ ।

ब्र(ब्र)ह्मप्रसूत त्रि॰ १तत्। १बृहच्छब्दजाते जगति २ब्राह्मणारब्धे कर्म्मणि नपुं "यत् क्षत्रियोऽब्राह्मणो भवति स यद्य किं च कर्म कुरुतेऽप्रसूतं ब्रह्मणा सिलेव न हैवास्मै तत् समृध्यते तस्माद् क्षत्रियेण कर्म करिष्यमाणेनोपसर्त्तव्य एव ब्राह्मणः यं हैवास्मै तद्ब्रह्मप्रसूतं कर्माध्यति" शत॰ब्रा॰ ३।१।४।६ ।

ब्र(ब्र)ह्मबन्धु पु॰ ब्रह्मा विप्रो बन्धुरुत्पादको यस्य ब्रह्मणो विप्रस्य बन्धुरिव वा ।१विप्राचाररहिते निन्द्यकर्म्मकारिणि जात्या विप्रे २विप्रतुल्ये भट्टादौ च । "कक्षवृक्षलीनोऽनूचश्च ब्रह्मबन्धुरिव भवति" छा॰उ॰ । "हे सौम्यानूचानधीत्य ब्रह्मबन्धुरिव भवतीति ब्राह्मणान् बन्धून् व्यपदिशति न स्वयं ब्राह्मणवृत्तः" इति भा॰ । विप्रवंश्यापकृष्टब्राह्मणस्यापि दैहिकदक्षनिषेधो यथा "वपनं दुर्विवाहानं स्थानाद्विर्वासनन्तथा । एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिकः" भाग॰१स्क॰

ब्र(ब्र)ह्मबिन्दु पु॰ ब्रह्मर्षि वेदाध्ययनकाले बिन्दुः । वेदाध्ययनकाले मुखनिःसरद्भाललेखे ।

ब्र(ब्र)ह्मबध्या स्त्री बध–भावे क्यप् टाप्त॰। ब्रह्महत्यायाम् ।

ब्र ब्र ह्मब्रुवाण पु॰आत्मानं ब्रह्मार्थं ब्रूते ब्रू–शानच्, विप्रतया आत्मनः कथके । यथा कर्णः आत्मानं विप्रं कथयित्वा परशुरामादस्त्रशास्त्रमधीतवान्" भा॰ उद्योग॰ ६१अ॰ । ब्रह्मबन्धुवि २अपकृष्टब्राह्मणे च । [नैषधचरिते प्र॰ ।

ब्र(ब्र)ह्मभद्रा स्त्री ७त॰ । विप्रस्थितावां लायमाणोषधौ

ब्र(ब्र)ह्मभाग पु॰ ६त॰ । ब्रह्मरूपत्विजे ऋत्विजे यज्ञद्रव्यस्य भागभेदे "अथास्मै ब्रह्मभागं पर्य्याहरन्ति । ब्रह्मा वै यज्ञस्य दक्षिणत आस्ते ऽभिगोप्ता स एतं भागं प्रतिविदान आस्ते यत् प्राग्गित्रं तदस्मै पर्य्याहार्षुस्तत् प्राग्दीक्ष्य यमस्य ब्रह्मभागं पर्य्याहरन्ति तेन भागो समदत जर्हृषमं खित्वं यज्ञस्य तदभिगोपायति तस्माद्ब्रह्मै ब्रह्मभागं पर्य्याहरन्ति" शत॰ब्रा॰१।७।४।१८ ।

ब्र(ब्र)ह्मभूति स्त्री ब्रह्मणो भूतिरिवास्याः । १सन्ध्यायां शब्दच॰। २ब्रह्मजातमात्रे त्रि॰ । [राजनि॰ ।

ब्र(ब्र)ह्मभूमिजा स्त्री ब्रह्मभूमितो जायते जन–ड। सिंहल्यां

ब्र(ब्र)ह्मभूय न॰ भू–भावे क्यप् ६त॰ । ब्रह्मभावे शुद्धचैतन्यस्वरूपप्राप्तौ कवरः । [२५।७।१७ संक्षेपव्याख्या ।

ब्र(ब्र)ह्ममण्डुकी स्त्री मध्यखाय्यां ओषधीभेदे वाला॰श्रो॰

ब्र(ब्र)ह्ममय त्रि॰ब्रह्मात्मकं ब्रह्मन्+मयट् । ब्रह्मात्मके "दर्शनं तस्य लाभः स्यात् स्वं हि ब्रह्ममयो निधिः" भा॰श्रा॰४६अ॰। स्त्रियां ङीप् । कान्तौ ब्रह्ममयीत्यादि । २ब्रह्मात्मके च भा॰ उ॰ ६१अ॰ ।

ब्र(ब्र)ह्ममह पु॰६त॰। विप्रानुद्दिश्य चतुरस्रे । भा॰श्रा॰१६३अ॰

ब्र(ब्र)ह्ममित्र पु॰ ब्रह्म मित्रमस्य । सनिभेदे भार्गवे॰ ६२अ॰।

ब्र(ब्र)ह्ममीमांसा स्त्री ६त॰ । ब्रह्मज्ञानार्थं वेदान्तवाक्यविचारात्मके व्यासप्रणीते ग्रन्थभेदे तद्व्याख्याविवरणादि

वैयाधिकरण्यायमाम्नायासक्तं यथा "शास्त्रं ब्रह्मविचाराख्यमध्यायाः षट्चतुर्विधाः। समन्वयाविरोधौ २हौ साधनश्च फलं४ तथा। समन्वये पञ्चलिङ्गाःसङ्गतत्वे २ऽष्टपादकम्१। ज्ञेयगं४ पदमात्रञ्च चिन्त्यं पादेऽनुक्रमात्। द्वितीये स्मृतितर्काभ्यामविरोधो३ऽन्यदुष्टता२। भूतभोक्तृश्रुते३र्विक्रश्रुते४रव्यविरुद्धता। तृतीये विरति३स्तत्त्वमर्थपरिशोधनम्२। गुणोपसंहृति३र्ज्ञाने बहिरङ्गादिसाधनम्४। चतुर्थे जीवतोऽक्षि३रुत्क्रान्ति२र्गतिरुत्तरा१। ब्रह्मप्राप्तिब्रह्मलोकाविति ४पादार्थसंग्रहः। तेन तत्र प्रत्येकं चतुष्टयपादयुताः चत्वारोऽध्यायाः। तच्च शास्त्रं बहुभिः स्वमतानुसारेण व्याख्यातम् तत्र गौड़पादाचार्यशङ्कराचार्यादिभिरद्वैतपरतया व्याख्यातं रामानुजादिभिश्च विशिष्टाद्वैतपरतया, वल्लभाचार्यादिभिश्च विशुद्धाद्वैतपरतया माध्वाचार्यादिभिश्च द्वैतपरतया व्याख्यातं तत्तन्मतञ्च प्रायेण तत्तच्छब्दे दृश्यम्।

ब्रह्म(ब्र)ह्मयज्ञ पु० ब्रह्मनिमित्तकस्तदध्ययनतदध्यापननिमित्तको यज्ञः। वेदाध्ययनाध्यापनादौ अमरः। "अध्यापनं ब्रह्मयज्ञः" मनुः। "स्वाध्यायोब्रह्मयज्ञः" विष्णुसू०। तेन वेदाध्ययनाध्यापनयोर्ब्रह्मयज्ञता।

ब्रह्म(ब्र)ह्मयष्टि स्त्री ब्रह्मणो यष्टिरिवालम्बनत्वात्। (वामनहाटि) इति शब्दरत्ना०।

ब्रह्म(ब्र)ह्मयुग न० ब्रह्मा विप्रस्तदुपलक्षितं युगम्। हिरण्यगर्भस्य विप्रस्वरूपप्रधाने कालभेदे। तच्च हरिवं० २१८।२०९ अध्याये ततः कलादिरूपेण पतितं तदुक्तं २१०अ०उक्तम्

ब्रह्म(ब्र)ह्मयोग पु० ब्रह्मतत्त्वसाक्षात्कारस्य योगः समाधिः। ब्रह्मसाक्षात्कारसाधने १समाधिभेदे हरिवं० २१० अ० "एष ब्रह्ममयो यज्ञो योगः सांख्यश्च तत्त्वतः। विज्ञानञ्च स्वभावश्च क्षेत्रं क्षेत्रज्ञ एव च। एकत्वञ्च पृथक्त्वञ्च सम्भवं निधनं तथा। कालः कालज्ञयश्चैव ज्ञेयो विज्ञानमेव" च विष्णुधर्मादिषु पञ्चविंशे योगे च।

ब्रह्म(ब्र)ह्मयोनि पु० ब्रह्मणो योनिरुत्पत्तिरत्र। १ब्रह्मगिरौ शब्दर०। २ब्रह्मप्राप्त्युपायज्ञाननिष्ठायाञ्च "ब्राह्मणा ब्रह्मयोनिस्थाः" मनुः ३ब्रह्मोत्पत्तौ त्रि०। ४सरस्वत्यां स्त्री ङीप्। "सरस्वास्तु तीरे यः संध्यजेदात्मनस्तनुम्। पृथूदकं जपपरो नैनं स्रोमरयं स्पृशेत्। तत्रैव ब्रह्मयोन्यस्ति ब्रह्मणा यत्र निर्मिता। पृथूदकं समाश्रित्य सरस्वत्यास्तटे स्थितः। चतुर्वर्षेण स्वल्पेनैवात्मज्ञानपरोऽभवत्। तस्याभिधा यतः सृष्टिर्ब्रह्मणोऽव्यक्तजन्मनः। सृष्टवतो ब्राह्मणा जाता बाहुभ्यां क्षत्रियास्तथा। तस्यां वैश्यजातीयाः पद्भ्यां शूद्रास्ततोऽभवन्। यातुर्वेण्यं ततो हित्वा आश्रमस्थान् सुतांस्ततः। एवं प्रतिष्ठितं तीर्थं ब्रह्मयोनीति संज्ञितम्। तत्र स्नात्वा सङ्क्रामः पुनर्योनिं न पश्यति" वामनपु० २८अ० उक्ते तीर्थभेदे स्त्री वा ङीप्।

ब्रह्म(ब्र)ह्मरन्धु न० उत्तमाङ्गस्थ रन्ध्रभेदे। "तयोर्द्वमायस्यृततमेति" श्रुत्या तद्भेद्य प्राणोत्क्रमणे ब्रह्मलोकप्राप्तेरुक्तत्वात् तथात्वम्।

ब्रह्मराक्षस पु० ब्रह्म(ब्र)ह्मा विप्रोऽपि कुकर्मभिः राक्षसः। कुकर्मणा विप्रयोनितो राक्षसरूपतां प्राप्ते भूतभेदे "संयोगं पतितैर्गत्वा परस्य योषितं तथा। अपहृत्य च विप्रस्वं भवति ब्रह्मराक्षसः" इति मनुः। पतितप्रतिग्रहेऽपि तद्योनिप्राप्तिः भा० आनु० ११अ० दर्शिता। तत्र वाक्यं अधर्मशब्दे १२१ पृ० दर्शितं तत्र न हरिवंशवाक्यं किन्तु अनुशासनपर्वेति बोध्यम्। पारिभाषिकब्रह्मराक्षसा यथा "मूर्खः स्त्री कक्षपश्चैव वाजी बधिर एव च। स्टहीतार्थं न सञ्जन्ति पञ्चैते ब्रह्मराक्षसाः" व्यवहारप्रदीपः। २शिवानुचरभेदे भाग० १०।६२अ०।

ब्रह्म(ब्र)ह्मरात न० ब्रह्म तज्ज्ञानं रातं यस्मै १शुकदेवे "ब्रह्मरातो भवं प्रोक्तो विष्णुरातेन संसदि" भाग०२।८।२७। २याज्ञवल्क्ये ऋषौ च "ब्रह्मरातिरिति वा पाठः। तेन हि जनकाय ब्रह्मविद्यायादानात् तथात्वम् बृहदारण्यकोपनिषदि तत्कथा दृश्या।

ब्रह्म(ब्र)ह्मरात्र पु० रात्रेरयम् अण् ब्रह्मणः रात्रिरिव योगमाये सङ्कर्षणे "उपाहृते ब्रह्मरात्रे" भा० १०।२३।२९। व्याख्यायां श्रीधरः।

ब्रह्म(ब्र)ह्मरीति ब्रह्मरूपा रीतिः। पित्तभेदे हेमच०।

ब्रह्म(ब्र)ह्मर्षि पु० बृ(ब्र)ह्मा विप्रः चतुर्वेत्तुल्यो वा ऋषिः वेदस्य वा ऋषिः कर्त्ता। ब्रह्मतुल्येषु वशिष्ठादिषु १वेदकर्तृषु २ऋषिषु हेमच०।

ब्रह्म(ब्र)ह्मर्षिदेश पु० "कुरुक्षेत्रञ्च मत्स्याश्च पाञ्चालाः शूरसेनकाः। एष ब्रह्मर्षिदेशो वै ब्रह्मावर्तादनन्तरम्" मनूक्ते कुरुक्षेत्रादिदेशचतुष्टये। [ब्रह्मतृशब्दे दृश्यम्।

ब्रह्म(ब्र)ह्मलक्षण न० ६त०। ब्रह्मणः स्वरूपतटस्थलक्षणे

ब्रह्म(ब्र)ह्मलोक पु० ६त०। १ब्रह्माधिष्ठाने भुवने सत्यलोके "सत्यस्तु सप्तमो लोको ब्रह्मणस्तेजसाधिकः।

ब्रह्मलोकः समाख्यातो ह्यप्रतीघातलक्षणः" देवीपु०। "ब्रह्मणेन तपोलोकात् सत्यलोको विराजते। अधुनमो-रक्षां यत्र ब्रह्मलोको हि स स्मृतः"। ब्रह्मणो लोकः। २तरीयब्रह्मस्वरूपे च ब्रह्मानन्दशब्दे दृश्यम्।

ब्र(ब्र)ह्मवर्चस न० ब्रह्मणा वेदाध्ययनेन वर्चः यच् समा०। वेदाध्ययनजनिते तेजसि "तपःस्वाध्यायजं यच्च तेजस्तु ब्रह्मवर्चसम्" जटा०। "ब्रह्मवर्चसकामः सुयीत" तारुब्रा०२।५।२"ब्रह्मवर्चसकामस्य कुर्यात् विप्रस्य पञ्चमे" मनुः तदस्यास्ति इनि। ब्रह्मवर्चसिन् तद्युते त्रि० "ब्रह्मवर्चस-वादो भवति" छा० उ०। "उक्तस्वाध्यायजं तेजः ब्रह्म-वर्चसम्" शाङ्करभाष्यम्।

ब्र(ब्र)ह्मवर्चस्विन् पु०६त०। ब्रह्मणवोर्चः समासान्तविधेरनित्य त्वात् न यच्समा० ततोऽस्यर्थे विनि। ब्रह्मवर्चस्विनि। "ब्रह्मवर्चस्विनः पुत्रा जायन्ते शिष्टसम्मताः" मनुः।

ब्र(ब्र)ह्मवर्त्त पु० ब्रह्मणो वर्त्तो वर्त्तनं यत्र। ब्रह्मावर्त्ते देशे मन्दर०। [तान्ते देशभ०।

ब्र(ब्र)ह्मवर्द्धन न० ब्रह्मा वेधो रूपमिव वर्द्धते वृध-ल्यु।

ब्र(ब्र)ह्मवाटीय पु० ऋषिभेदे हरिवं० १४१।

ब्र(ब्र)ह्मवाद पु० ६त०। १वेदपाठे हारा०। २ब्रह्माधिकारेण तत्त्वनिर्णयार्थे वादे कथाभेदे च।

ब्र(ब्र)ह्मवादिन् पु० ब्रह्म वेदं वदति पठति वद-णिनि। १वेदपाठके। ब्रह्म शुद्धं चैतन्यं सर्वात्मकतया वदति वद-णिनि। २वेदान्तप्रतिपाद्यसर्वात्मकब्रह्मनिर्णयार्थकथा-भेदरूपवादयुते। "ब्रह्मवादिनो वदन्ति" छा०उ०। शुद्धचै-तन्यं वदति बोधयति। ३ब्रह्मबोधके ग्रन्थे जटा०। ४गायत्र्यां स्त्री ङीप्। या च निर्गुणब्रह्मप्रतिपादिकेति तन्त्रग्रन्थात्। "सावित्रि वरदे! देवि! ब्रह्मवरे! ब्रह्मवादिनि!" मायातन्त्रादाकृतमन्त्रः।

ब्र(ब्र)ह्मवालुक न० तीर्थभेदे भा० व० ८२ अ०।

ब्रह्मवास पु० ६त०। ब्रह्मलोके हरिवं० २।२ अ०।

ब्रह्मवाहस् त्रि० ब्रह्मणा मन्त्ररूपवेदेन वह्यते वह-कर्मणि वा० असिच् णिच्च। मन्त्रेण प्राप्यमाणे ऋ०१।१०।६।

ब्र(ब्र)ह्मविद् ब्रह्मस्वरूपतया वेत्ति आत्मानम् विद-क्विप्। आत्मात्मैक्यवेत्तरि "ब्रह्मविद् ब्रह्म भवति" श्रुतिः। २विष्णौ पु० "ब्रह्मविद् ब्राह्मणो ब्रह्मी" विष्णुस०। वेदं वेदार्थं यथावत् वेत्तीति ब्रह्मविद्" भा० २वेदार्थज्ञातरि त्रि०। [ऐक्येन ज्ञाने।

ब्र(ब्र)ह्मविद्या स्त्री ६त०। शुद्धचैतन्यात्मकस्य ब्रह्मणः आत्मा-

ब्र(ब्र)ह्मविवर्द्धन पु० ६त०। १तपोवर्द्धके विष्णौ "यत्तं ब्रह्मविवर्द्धनम्" विष्णुस०। वृध-णिच् भावे ल्युट्। २तप आदीनां विशेषेण वर्द्धने न०।

ब्र(ब्र)ह्मवृक्ष पु०। पलाशवृक्षे हलायुधः। "ब्रह्म वै प-लाशः" शत०ब्रा०१२।८।३। तपःसाधने २उदुम्बरवृक्षे रत्नमाला।

ब्र(ब्र)ह्मवृत्ति स्त्री ६त०। १ब्राह्मणस्य जीवनोपाये "स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत् यः। अविष्मूत्रकृमिर्भूत्वा पितृभिः सह मज्जति" भाग०। २ब्रह्माकारान्तःकरण-वृत्तौ च। [वेदान्ते च।

ब्र(ब्र)ह्मवेद पु० ६त०। १ब्रह्मज्ञाने २ब्रह्मप्रतिपादके वेदभागे

ब्र(ब्र)ह्मवेदि स्त्री ब्रह्मणो वेदिरिव। "ब्रह्मवेदिः कुरुक्षेत्रं देवयजनमुदाहृतम्" इत्युक्ते देशे हेमच०।

ब्र(ब्र)ह्मवेदिन् त्रि० ब्रह्म वेत्ति आत्मभेदेन विद-णिनि। ब्रह्मात्मैक्यवित्ते "ब्राह्मणेषु च विद्वांसो विद्वत्सु कृत-बुद्धयः। कृतबुद्धिषु कर्त्तारः कर्त्तृषु ब्रह्मवेदिनः" मनुः।

ब्रह्मवैवर्त्त न०अष्टादशमहापुराणमध्ये अष्टादशसहस्रसंख्के १महापुराणभेदे तत्प्रतिपाद्यविषयादिकं देवीभागवते ४ पादे १०१अ० उक्तं यथा

"ब्रह्मा उवाच। शृणु वत्स! प्रवक्ष्यामि पुराणं दशमं तव। ब्रह्मवैवर्त्तकं नाम वेदसारोत्तमोत्तमम्। व्यासर्षिर्यत्र भगवान् साक्षाद्वेदमयोऽर्चितः। नारदाय पुराणार्थं प्राह सर्वमलौकिकम्। धर्मोऽत्रकाममोक्षाणां सारः श्रीतिर्हरौ हरे। तयोरभेदविषयं ब्रह्मवैवर्त्त-मुत्तमम्। रथन्तरस्य कल्पस्य वृत्तान्तं यत्रयोदितम्। यतकोटिपुराणं तत् संक्षिप्य प्राह वेदवित्। व्यासश्चतुर्भिः संश्रुत्य ब्रह्मवैवर्त्तसंज्ञितम्। अष्टादशसहस्रन्तत् पुराणं परिकीर्त्तितम्। ब्रह्मप्रकृतिरविप्रे यश्चाख्यानयुक्तः समा-श्रितम्। तत्र सृष्टिप्रकरणं स्याद्यं ततो नारद-वेधसोः। विवादः समभूत् यत्र द्वयोरासीत् पराभवः। शिवलोकगतिः पश्चाज्ज्ञानलाभः शिवाज्ञुनेः। शिव-वाक्येन तत् पश्चात् करीषेनीरदस्य। तु मननञ्चैव व्यासर्षिसंवादं शिवसेवितं। आत्मने समभूत्पुत्रं त्रैलोक्याचार्यकारिणि। यतश्चि ब्रह्मखण्डं हि श्रुतं पाप-विनाशनम्"। द्वितीये प्रकृतिखण्डे "ततः व्यासर्षि-संवादो नारदस्य समीरितः। कृष्णमाहात्म्यसंयुक्तो नानाख्यानकयोत्तरः। प्रकृतेरंशभूतानां कथनाच्चा पि

वर्णितम्। वाङ्मात्रं, पूजनाद्यञ्च विस्तरेण यथास्थितम्। एतत् ब्रह्मतिखण्डं हि श्रुतं भूतिविधायकम्। तृतीये मधुखण्डे। "मधोश्चलन्नसंग्रन्थः बहुपल्लवसङ्गतम्। पार्वत्याः कार्त्तिकेयेन सह विघ्नेशसम्भवः। चरितं कार्त्तवीर्यस्य जामदग्न्यस्य चाद्भुतम्। विवादः समहान् पश्चाज्जामदग्न्यगणेशयोः। एतद्विघ्नेशखण्डं हि सर्वविघ्नविनाशनम्" चतुर्थे श्रीकृष्णजन्मखण्डे "श्रीकृष्णजन्मसम्भ्रो जन्माख्यानं ततोऽद्भुतम्। गोकुले गमनं पश्चात् पूतनादिवधोऽद्भुतः। बाल्यकौमारजा लीला विविधास्तत्र वर्णिताः। रासक्रीड़ा च गोपीभिः शारदी बहुदाहृता। रहस्ये राधया क्रीड़ा वर्णिता बहुविस्तरा। मथुराङ्गरेण तत्पश्चान्मथुरागमनं हरेः। कंसादीनां वधे हत्ते बहुदक्षिणसंस्कृतिः। काश्यं सान्दीपनेः पश्चादिद्योपादानमद्भुतम्। यवनस्य वधः पश्चाद्द्वारकागमनं हरेः। नरकादिवधश्चात्र ऋणेन विस्तरोऽद्भुतः। ऋणखण्डमिदं विप्र! कथां संसारखण्डनम्" तत्फलश्रुतिः "पठितञ्च श्रुतं ध्यातं पूजितं चाभिवर्णितम्। दत्त्वेतद्ब्रह्मवैवर्त्तं सुराणं चालौकिकम्। व्यासोक्तं वादिसम्भूतं पठन् श्रृण्वन् विशुद्धते। विघ्नानष्टानमनात् घोरात् संसारसागरात्। विधिलोदत्त यो दद्याच्छ्राद्धे धेनुसमान्वितम्। ब्रह्मलोकमवाप्नोति स सप्तोऽप्तानबन्धनात्। यत्तानुक्रमणीं वापि पठेद् वा श्रृणुयादपि। सोऽपि ब्रह्मप्रसादेन लभते वाञ्छितं फलम्"। विवर्त्त उपादान विषमसत्ताकं कार्य्यं खार्थे अण् हृत०। २वृक्षभेदेऽल्पसत्ताके कार्य्ये च। [भेदे भा० ब० ११अ०।

ब्र(ब्र)ह्मव्रत न० सङ्करवर्णभाध्ये ब्रह्मलोकदर्शनफलके व्रतभेदे।

ब्र(ब्र)ह्मयज्ञ पु० ब्रह्मैव सर्व्वां श्रेष्ठं यज्ञं यज्ञकार्यं यज्ञ। (वेदपा) इज्यभेदे रत्नमाला। [गायत्र्याद्य।

ब्र(ब्र)ह्मशाला स्त्री १तीर्थभेदे भा० ब० ८७अ०। २वेदपाठार्थं

ब्र(ब्र)ह्मासन न० हृत०। तत्तत्कार्य्येषु ब्रह्मवर्त्तृके १नियोजने। तेन च यथा यज्ञ शासनं हृतं यथा पृथिव्या धारणाय वायोर्वहनाय सूर्य्यादीनां प्रकाशनाय इत्यादि तत्तद्वैदेः शासनमनुशास्यते एवं वर्णाश्रमादिकमीनुशासनमपि तेनैव कृतमिदम् "श्रुतिस्मृती ममैवाज्ञे यस्ते उल्लङ्घ्य वर्त्तते। आज्ञाच्छेदी मम द्वेषी नरकं प्रतिपद्यते" भगवदुक्तेः। ब्रह्मणो वेदशास्त्रशासने २कर्त्तव्यतोपदेशे च। अधिकरणे ल्युट्। ३ब्रह्मविचारस्थले मल्लिना०।

ब्र(ब्र)ह्मिरस् न० यज्ञभेदे तत्प्रकारं द्रोणेन सहताय कथयित्वा कर्त्तुनाय याज्ञवल्क्येन याज्ञापितं तदङ्गप्रयोगसंस्कारादिकथा भा० शां० १२अ०। [ऋते अ० ६।७५।१६

ब्र(ब्र)ह्मसंयित त्रि० २त०। ब्राह्मणा सन्त्येन संयिते तोषणे।

ब्र(ब्र)ह्मसंहिता स्त्री वैष्णवाचारविद्यानां अध्यायशतात्मके ग्रन्थभेदे। [निघण्टुः।

ब्र(ब्र)ह्मसती स्त्री ब्रह्मरूपा ब्रह्मणो वा जाया सती। सरस्वत्यां

ब्र(ब्र)ह्मसत्ता स्त्री० हृत०। बृंहद्रूपजगदधिष्ठानसत्तायाम्। शुक्तिसत्तया रजतसत्तावत् तत्सत्तयैव जगतःसत्त्व वेदान्तमतम्।

ब्र(ब्र)ह्मसत्र न० ब्रह्म वेदस्तत्पाठरूपं सत्रम्। ब्रह्मयज्ञशब्दार्थे "नैत्तिके नास्त्यनध्याया ब्रह्मसत्रं हि तत्स्मृतम्" मनुः।

ब्र(ब्र)ह्मसदन न० षोडश्यग्निं सद-आधारे ल्युट् हृत०। ब्रह्मत्व ऋत्विग्भेदस्य वारषोडशादिजाते क्रमात्मृते प्रागग्ने १आसने काल्या० श्रौ० २।१।२ सूत्रादौ उपयुक्ते। २क्रिरथ्यगर्भसदने च।

ब्र(ब्र)ह्मसरस् न० तीर्थभेदे तत्कथा भा० व० ८१अ० दृश्या।

ब्र(ब्र)ह्मसर्प पु० ब्रह्मैव हृत्वा सर्पः। सर्पभेदे त्रिका०।

ब्र(ब्र)ह्मसात् अव्य० ब्रह्माधीनं करोति याति। ब्रह्माधीने क्रियादिव्याप्ये प्रयोगः ब्रह्मसात्-करोति भवति सम्पद्यते वा

ब्र(ब्र)ह्मसामन् न० सामभेदे तच्च साम ताण्ड्यब्रा० ७।२।१ दर्शितं यथा "अथाभिप्लवे षाडहिके मध्यन्दिनसवने ब्राह्मणाच्छंसिनः पृष्ठस्तोत्रियवर्त्तनिमेकं साम विवर्त्तते भा० "अभीवर्त्तो ब्रह्म साम भवति" ताण्ड्यब्रा० "तद्वोदक्षतीरुपसृष्टिमत्यां योनावुत्सृजं साम अभीवर्त्तोऽसृज एतत् साम ब्राह्मणाच्छंसी पृष्ठस्तोत्रमनुसंयति, तच्च ब्रह्मणाच्छंसी ब्रूयात् कर्त्तव्यम्" अथैतन्नामनिर्वचनेन प्रशंसति भा०। "अभीवर्त्तेन वै देवाः स्वर्गं लोकमभ्यवर्त्तन्त तदभीवर्त्तो ब्रह्म साम भवति स्वर्गस्य लोकस्याभिवृत्त्यै" ब्रा०। "अभीवर्त्तोक्तेन साम्ना देवाः स्वर्गं लोकमभ्यवर्त्तन्त अगच्छन् यतएवास्याभिवृत्तिसाधनत्वादस्य साम्नोऽभीवर्त्त इति संज्ञा निरुक्ता। अतएव ब्राह्मायनकं "तदभ्यवर्त्तन्त तदभीवर्त्तस्याभीवर्त्तत्वमिति"। अभिपूर्वाद्वृत वर्त्तने हृत्वात् करणे घञ्। उपसर्गस्य घञ्यमनुष्ये बहुलमिति पूर्वपदस्य दीर्घः। एवं सति अभिवर्त्तनि अभीवर्त्तो ब्रह्मणः पृष्ठसाम भवतीति यत् तत् स्वर्गस्य लोकस्याभिवृत्तये अभिवर्त्तनायाभिगमनाय श्रुतिर्यां

भवति" भा०। तच्च सामजङ्गमाने। ६प्र०१४क०दर्शितम्।

ब्र(ब्र)ह्मसायुज्य न० षष्ठ युनक्ति युज-क्विप् तस्य भावः ष्यञ्। सायुज्यं ६त०। ब्र(ब्र)ह्मभावे।

ब्र(ब्र)ह्मसार्ष्टिता स्त्री ६त०। ब्रह्मतुल्यगतित्वे मनुः ४।२३२।

ब्र(ब्र)ह्मसावर्णि पु० दशमे मनुभेदे "दशमो ब्रह्मसावर्णि रुपश्लोकश्रुतो महान्। तत्सुता भूरिषेणाद्या हविष्मत्प्रमुखा द्विजाः। हविष्मान् सुकृतः सत्यो जयो मूर्त्तिस्तदा द्विजाः। सुखासनविरुद्धाद्या देवाः शम्भुः सुरेश्वरः। विषक्सेनो विषुच्यान्तु शम्भोः सख्यं करिष्यति। जातः खांशेन भगवान् स्वक्षे विश्वसृजां प्रभुः" भाग० ८।१३।१० [वसिष्ठादौ च।

ब्र(ब्र)ह्मसम्भव पु०६त०। १जैनभेदे हेम०। २ब्रह्मणो जाते

ब्र(ब्र)ह्मसिद्धान्त ६त०। पैतामहे ज्योतिषसिद्धान्तभेदे "पौलिशरोम(मी)क वासिष्ठसौरपैतामहेषु पञ्चसिद्धान्तेषु सिद्धान्तेषु" ज्यो०त०१अ०। [दृश्यम्। २मरीच्यादौ च

ब्र(ब्र)ह्मसुत पु० ६त०। १केतुभेदे ज्यो०त० १। अ० केतुशब्दे

ब्र(ब्र)ह्मसुवर्चला स्त्री ओषधिभेदे तत्स्थानलक्षणादिकमुक्तं तन्त्रे "देवतुन्दे तुदयरे तथा सिन्धौ महानदे। दृश्यते च जलान्तेषु मध्ये ब्रह्मसुवर्चला"। "कनकाभा जलान्तेषु सर्वतः परिसर्पति। सन्नीरा पद्मिनीमध्या देवी ब्रह्मसुवर्चला"। तत्कथिते २जले च "विन्देत् ब्रह्मसुवर्चसम्" मनुः।

ब्र(ब्र)ह्मसू पु० ब्रह्माणं सूतवान् सू-क्विप्। चतुर्व्यूहात्मकस्य विष्णोर्मूर्त्तिभेदे अनिरुद्धे तस्यावतारभेदे २ऋषौ पुनौ च अमरः। "अनिरुद्धात्ततो ब्रह्मा तस्माच्चक्रमलोद्भवः" ब्रह्मपु०। ब्रह्माणि तपसि सुवति प्रेरयति सू-प्रेरणे क्विप्। तपःप्रवर्त्तके २काम च कामेनैव सर्वतपसु प्रेरणात्तस्य तथात्वम्। तदभिमानिदेवे ३कन्दर्पे च अमरः।

ब्र(ब्र)ह्मसूत्र न० ब्रह्मणि वेदपरुषकाले रचितं सूत्रम्। १यज्ञोपवीते त्रिका०। २ब्रह्मप्रतिपादके शारीरकसूत्रे च। "ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितम्" गीता।

ब्र(ब्र)ह्मसूनु पु० ६त०। दक्षाकुर्वंशोद्भवे १राजभेदे ब्रह्मदत्ते हेमच० २वसिष्ठादौ च।

ब्र(ब्र)ह्मस्तेय ६त०। स्वार्थमधीयानात् ततोऽनुत्तामपाठ्य तदाध्यापनेन वेदाध्येतरि। "ब्रह्म यस्त्वननुज्ञातमधीयानादवाप्नुयात्। स ब्रह्मस्तेयसंयुक्तो नरकं प्रतिपद्यते" मनुः

ब्र(ब्र)ह्मस्थान न० ६त०। तीर्थभेदे भा० व० ८१ अ०।

ब्र(ब्र)ह्मस्व ६त०। ब्रह्मस्वामिके धने। "ब्रह्मस्वं वा सुरस्वं वा देवस्वं वापि यो हरेत्। स जीवन्नेव रौरवे महापापी च भारत!। षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः। ततो भवेत् सुरापीति ततः शूद्रस्ततः शुचिः"। ब्रह्मवै० प्रकृ० ४८अ०।

ब्र(ब्र)ह्महत्या स्त्री० हन-क्यप् ६त०। विप्रहनने। तस्य महापातकत्वमुक्तं मनुना "ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः। महान्ति पातकान्येव संसर्गश्चापि तैः सह" तदधिष्ठातृस्वरूपमुक्तं ब्रह्मवै० पु० जन्म० ४७ अ० यथा "रक्तवस्त्रपरीधाना दृढा स्त्रोवेषधारिणी। सन्तताश्रुप्लावा सा शुष्ककण्ठौष्ठतालुका। दैत्याग्रसाच्छ्रमेणा महाभीतञ्च कातरम्। धावन्तं परिधावन्ती वह्निशुद्धांशुकान्वितम्। खड्गहस्ता दृढाङ्गं तं दधावीना च मूर्च्छितम्। इन्द्रो दृष्ट्वा च तां घोरां क्षारं क्षारं गुरोः पदम्। विवेश मानससरो मृणालच्छद्मरूपतः। तत्र न्तुं न शक्ता सा ब्रह्मणः शापकारणात्"। हत्या सुरवधनिमित्तकब्रह्महत्यापनोदनार्थं यज्ञेऽश्वमेधे-कृते तस्या विभज्य स्थानविशेषे संक्रामणकथा भा० उ० ७२अ० यथा "तत्राश्वमेधः सुमहान् मघोन्द्रस्य महात्मनः। वर्त्तते पाकनाशं वै ब्रह्महत्यापहो नृप!। विभज्य ब्रह्महत्यां तु वृक्षेषु च नदीषु च। पर्वतेषु पृथिव्याञ्च स्त्रीषु चैव युधिष्ठिरः!" आतिदेशिकब्रह्महत्याः कतिचित् ब्रह्मवै० प्रकृ० २७अ० ब्रह्मा यथा

"श्रीकृष्णे च तदर्द्धाङ्गे तन्मन्त्रे प्रकृतौ तथा। शिवे च शिवभक्ते वा सूर्य्ये सूर्य्यतनौ तथा। मन्त्रेशे वा तदङ्गेषामेवं सर्वत्र सुन्दरि!। यः करोति भेदबुद्धिं ब्रह्महत्यां लभेत् तु सः। स्वगुरौ स्वेष्टदेवेषु जन्मदातरि मातरि। करोति भेदबुद्धिं यो ब्रह्महत्यां लभेत् तु सः। वैष्णवेषु च मन्त्रेषु, ब्राह्मणेषितरेषु च। करोति समतां यो हि ब्रह्महत्यां लभेत् तु सः। हरेः पादोदकेऽन्यदेवपादोदके तथा। करोति समतां यो हि ब्रह्महत्यां लभेत् तु सः। विष्णौ विष्णुनैवेद्ये चान्यनैवेद्यके तथा। करोति समतां यो हि ब्रह्महत्यां लभेत् तु सः। सर्वेश्वरेश्वरे कृष्णे सर्वकारणकारणे। सर्वात्मे सर्वदेवानां सेव्ये सर्वात्मनात्मनि। भावना भेदरूपे याप्येकत्वेन हि निर्गुणे। करोत्यनेन समतां ब्रह्महत्यां लभेत् तु सः। पितृदेवार्चने नौचैरपरं वेदविनिर्मितम्। यः करोति तस्मिन्भेदं ब्रह्महत्यां स विन्दति। ये निन्दन्ति हरेर्भेदं तन्मन्त्रोपासकं तथा।

पवित्राणां पवित्रञ्च ब्रह्महत्यां लभन्ति ते । ये निन्दन्ति विष्णुमायां विष्णुभक्तिप्रदां सतीम् । सर्वशक्तिस्वरूपाञ्च प्रकृतिं सर्वमातरम् । सर्वदेवस्वरूपाञ्च सर्वाद्यां सर्ववन्दिताम् । सर्वकारणरूपाञ्च ब्रह्महत्यां लभन्ति ते । कृष्णजन्माष्टमीं रामनवमीं पुण्यदां पराम् । शिवरात्रिं तथा चैकादशीं वारं रवेस्तथा । पञ्च पर्वाणि पुण्यानि ये न कुर्वन्ति मानवाः । लभन्ते ब्रह्महत्यां ते चाण्डालाधिकपापिनः । अम्बुवाच्यां भूखनने जले शौचादिकञ्च ये । कुर्वन्ति भारते वर्षे ब्रह्महत्यां लभन्ति ते । गुरुञ्च मातरं तातं साध्वीं माध्वीं सुतं सुताम् । अनाथां यो न पुष्णाति ब्रह्महत्यां लभेत् तु सः । विवाहो यस्य न भवेत् न पश्यति सुतन्तु यः । हरिभक्तिविहीनो यो ब्रह्महत्यां लभेत् तु सः । हरेर्नैवेद्यभोजी नित्यं विष्णुं न पूजयेत् । पुण्यं पार्थिवलिङ्गं वा ब्रह्महत्यां लभेत् तु सः" । अतिदैशिक्याः स्वस्या विनायनं हरिस्मरणगङ्गास्नानादि ।

ब्र(ब्र)ह्महत्यासम न० "अन्तत्र सप्तकर्मे राजगामि च पैशुनम् । गुरोरलीकनिर्बन्धः समानि ब्रह्महत्यया" मनूक्ते अनुपातकभेदरूपे मिथ्याभिदूषणादौ ।

ब्र(ब्र)ह्महन् त्रि० ब्र(ब्र)ह्मणं हतवान् हन-क्विप् । १विप्रहत्याकारिणि । "ब्र(ब्र)ह्महा न भवत्यन्यो ब्र(ब्र)ह्महा हृषीकपतिः । यस्यात्मानाश्रितोगर्भः स तेन ब्रा(ब्रा)ह्मणो हतः" इत्युक्ते २हृषीकपतौ च । "च्युतोत्पतनलिङ्गास्तु जीवोत्क्षिप्ताङ्कुलिध्वनिः । गुरोरपि च कर्त्तव्यमन्यथा ब्रह्महा भवेत्" ३हत्यादिस्मृत्युक्तातिदैशिकब्र(ब्र)ह्महत्यापापयुक्ते च । तत्प्रायश्चित्तं मनूक्तं यथा

"ब्रह्महा द्वादश समाः कुटीं कृत्वा वने वसेत् । भैक्षाशी ब्रह्मविशुद्ध्यर्थं कृत्वा शवशिरोध्वजम् । लक्ष्यं ब्रह्मध्नतां वा स्यादिदृक्षामिच्छयात्मनः२ । प्राक्षेदात्मानमग्नौ वा समिद्धे त्रिरवाक्शिराः३ । यजेत वाश्वमेधेन स्वर्जिताम् गोसवेन वाट् । अभिजिद्विश्वजिद्भ्यां४ वा ष्टवा त्रिवृताग्निष्टुताप्टि वा । जपन् वान्यतमं५ वेदं योजनानां शतं व्रजेत्१। ब्रह्महत्यापनोदाय मितभुङ् नियतेन्द्रियः । सर्वस्वं वेदविदुषे ब्राह्मणायोपपादयेत्१२ । धनं वा जीवनायालं स्वं वा सपरिच्छदम्१३ । हविष्यमग्नावाज्यवरेत् प्रतिस्रोतः सरस्वतीम्१४ । जपेद्वा नियताहारस्त्रिवृं वेदस्य संहिताम्१५ । व्रतवापनो निवसेत् ग्रामान्ते गोव्रजेऽपि वा । आश्रमे वृक्षमूले वा गोब्राह्मणहिते रतः । ब्रह्मणार्थे गवार्थे वा सद्यः प्राणान् परित्यजन्१६ । उच्यते ब्रह्महत्यायां गोघ्ना गोब्राह्मणस्य च । तयोर्वा प्रतियोद्धा वा७ सर्वस्वमवजित्य वा । विप्रस्य तन्निमित्ते वा प्राणत्यागे विशुध्यते" ।

ब्र(ब्र)ह्माङ्गभू पु० ब्रह्मणोऽङ्गात् भवति भू-क्विप् । चोटके डाकर० । ब्रह्माङ्गभूशब्दे दृश्यम् ।

ब्र(ब्र)ह्माञ्जलि पु० ब्र(ब्र)ह्मणे वेदपाठाय अञ्जलिः गुरौ कृतोविनयाञ्जलिः, स्वरविशेषज्ञापनार्थं वा कृतोऽञ्जलिः संकुचितपाणिः । वेदपाठार्थं गुरुनिकटे कार्य्ये १विनयाञ्जलौ स्वरविशेषार्थज्ञापनाय कृतसङ्कोचे २पाणिद्वये च अमरः ।

ब्र(ब्र)ह्माणी पु० बृ(ब्र)ह्मणम् आनयति जीवयति अनङ्णिच्-अण् पृषो०यत्वम् । ब्रह्मशक्तौ "हंसयुक्ते विमानस्था ब्राह्मीरूपधरा प्रभुः । आयाता ब्रह्मणः शक्तिः ब्रह्माणी साऽभिधीयते" इति देवीभा० । "ब्रह्माणी ब्रह्मजननाद्" देवीपु० । ब्रह्मशब्दात् ङीष् आनङ् चेति त्वपाणिनीयम् । २रेणुकानामगन्धद्रव्ये रत्नमा० । ३राजरीतौ राजनि० । ४ब्रह्मणोऽर्द्धशरीरादुत्पन्नायां शतरूपायाम् । "ततः संजपतस्तस्य भित्त्वा देहमकल्मषम् । स्त्रीरूपमर्द्धमकरोद्वां पुरुषरूपवत् । शतरूपा च सा ख्याता सावित्री च निगद्यते । सरस्वत्यथ गायत्री ब्रह्माणीत्युच्यते च सा" मत्स्यपु० १अ० ।

ब्र(ब्र)ह्माण्ड न० ६त० । "तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् । तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः" इति मनूक्ते ब्रह्मणा उत्पादिते अण्डाकारे १भुवनकोषे "ब्रह्माण्डभाण्डोदरभ्रान्त्यत्रिखण्डचण्डिमेति" वीरचरितम् ।

ब्रह्माण्डसंस्था स्त्री० दर्शिता यथा

"वासुदेवः परं ब्रह्म तन्मूर्त्तिः पुरुषः परः । अव्यक्तो निर्गुणः शान्तः पञ्चविंशात् परोऽव्ययः । प्रकृत्यन्तर्गतो देवो बहिरन्तश्च सर्वगः । सङ्कर्षणोऽप्यः स्रष्टादौ तासु वीजमवासृजत् । तदण्डमभवद्धैमं सर्वत्र तमसावृतम् । तत्रानिरुद्धः प्रथमं व्यक्तीभूतः सनातनः । हिरण्यगर्भो भगवानेष वेदेषु पठ्यते । आदित्यो ह्यादिभूतत्वात् प्रसूत्या सूर्य उच्यते । परं ज्योतिस्तमःपारे सूर्योऽयं सवितेति च । पर्येति भुवनान्येष भावयन् भूतभावनः" इत्युक्ते "गुणकर्मविभागेन सृष्ट्वा प्राग्वदनुक्रमात् । विभागं कल्पयामास यथावत् वेददर्शनात् । यद्दृश्यन्ते तारारूपा भूमेर्विवरस्था वा विभुः । देवा-

सुरमनुष्याणां विद्यानां च व्यवहारकम्। ब्रह्माण्डमेतत् सु-षिरं तत्रेदं भूर्भुवादिकम्। कटाहस्थितयस्चैव सम्पुटं गोलकाकृति(१)। ब्रह्माण्डमध्ये परिधिर्भौमकक्षाऽभिधी-यते। तन्मध्ये भ्रमणं भानामधोऽधः क्रमशस्तथा। मन्दामरेज्यभृगुसूर्यशुक्रेन्दुजेन्द्वः। परिभ्रमन्त्यधो-ऽधस्थाः सिद्धविद्याधरा घनाः। उपरिष्टात् स्थितास्तस्य सेन्द्रा दैवा महर्षयः। अधस्तादसुरास्तद्वदिन्दोरुन्यो-न्यमाश्रिताः। ततः समन्तात् परिधिः क्रमेणार्यं महा-र्णवः। मेरुस्तेव स्थितो धात्रा देवासुरविभागकृत्। यमनान्मेरुमध्यात् तु तुल्यभागेषु तोयधेः। द्वीपेषु दिक्षु पूर्वादिनगर्यौ देवनिर्मिताः। भूवृत्तपादे पूर्वस्यां यमकोटीति विश्रुता। मध्याह्नवर्त्मे नगरी स्वर्णप्राकार-तोरणा। याम्यायां भारते वर्षे लङ्का तद्वन्महापुरी। पश्चिमे रोमकाख्ये रोमकाख्या प्रकीर्त्तिता। उदक् सिद्धपुरी नाम कुरुवर्षे प्रकीर्त्तिता। तस्यां सिद्धा म-हात्मानो निवसन्ति मतत्रयाः" सू० सि०।

(१)"एतत् प्रागुक्तं ब्रह्मणाभिहितं सुवर्णाख्यं सुषिरमवकाशात्मकं तत्रावकाशे दृष्टं जगत् भूर्भुवादिकं भूर्भुवःस्व-र्लोकमवस्थितं न बहिः। नन्वण्डस्य गोलाकारत्वेना-न्तरवकाशात्मकत्वमसम्भवतीत्यत आह कटाहस्थित-यश्चेति। कटाहोर्द्ध्वगोलाकारं यावकाशं प्राग्रं तस्य स्थितयः इयं समं तस्य। एवकारो न्यूनाधिकव्यवच्छेद-कार्थः। सम्पुटमाभिरूपेण भिन्नितं गोलकाकृतिर्गोला-कारः स्यात्। तथाच न क्षतिः" रङ्गना०।

"भूधरस्तिद्यदानवमानवाद्या देवाश्च यिष्यूगगने-श्वरचक्रवर्त्तः। लोकव्यवस्थितिरुपर्युपरि प्रदिष्टा ब्र-ह्माण्डभाण्डजठरे तदिदं समस्तम्" सि०शि०। इदानी-मस्योदितं ब्रह्माण्डमानं पूर्वं कथितमपि प्रसङ्गादनुव-दति खं प्रमिता०। "कोटिघ्नैर्नवनन्दषट्कनखभूभूरुद्र-जङ्घेन्दुभिः८७।२०६६२०००००००खर्क्षोतिः शास्त्रविदो वदन्ति नभसः कक्षामिमां योजनैः। तद्ब्रह्माण्डकटाहसंपु-टतटे केचिज्जगुर्वेष्टनं केचित् प्रोचुरदश्यदृश्यकगिरिं पौरा-णिका सूरयः। करतलकलितामलकवदमलं सकलं विदन्ति ये गोलम् दिनकरकरनिकरनिहततमसो नमसः स परिधिरुदितस्तैः। ब्रह्माण्डमेतन्मितमस्तु नो वा कल्पे यतः क्रामति योजनानि। यावन्ति पूर्वैरिह तत्प्रमाणं प्रोक्तं खकक्षाख्यमिदं मतं नः"। प्रमाणशून्यत्वात् प्रयो-जनाभावाच्चाभिर्ब्रह्माण्डमानं न कथितमित्यर्थः प्रभि०।

दानार्थकल्पिते महादानान्तर्गते ब्रह्माण्डात्मकस्वर्णादि-घटिते २पदार्थे तत्स्वरूपादि हेमा०दा०ख०मत्स्यपु०उक्तं यथा "अथातः संप्रवक्ष्यामि ब्रह्माण्डं विधिपूर्वकम्। यच्छ्रुत्वा सर्वभूतानां महापातकनाशनम्। पुण्यं दिनमथासाद्य तुलापुरुषदानवत्। ऋत्विग्गणस्य-पस्कारभूषणाच्छादनादिकम्। लोकेशावाहनं तद्वदधि-वासनकं तथा" तुलापुरुषदानवदिति, काञ्चनेशहरि-ब्राह्मशिवादिपूजाब्राह्मणवाचनगुरुऋत्विग्वरणमधुपर्कदा-नकुण्डमण्डपवेदिकासंस्कारलोकेशावाहनाधिवासनादि सर्वं मत्स्यपुराणोक्ततुलापुरुषदानविधिवत् वेदितव्यमित्यर्थः। "कुर्याद्विंशत्पलादूर्द्धं नाधश्चास्य प्रकल्पितः। प्रकल-दयसंयुक्तं ब्रह्माण्डं काञ्चनं बुधः"। प्रकलद्वयं, खण्डद्व-यम्। तल्लक्षणन्तु ब्रह्माण्डपुराणे "कुम्भच्छाया भवेद्-याम्यात् प्रतीच्यां दिशि चन्द्रमाः। उदितः शुक्लपक्षादौ वसुरन्ध्रस्य तादृशमिति" कुम्भच्छाया इति, कुम्भच्छाया सौवाङ्गीनकुम्भादिजेत्यर्थेयम्। "दिग्गजाष्टकसंयुक्तं ष-ड्वेदाङ्गसमन्वितम्। लोकपालाष्टकोपेतं मध्यस्थितचतु-र्मुखम्। शिवाच्युतार्कशिखरसमालक्ष्मीसमन्वितम्। वह्न्यादित्यमरुद्भं मङ्गारब्रह्मसमन्वितम्। ऋग्वैतेषां दिग्-गजप्रकृतीनां क्रमेण लक्षणान्युच्यन्ते व्यादिपुराणे "शुभ्रमभ्र चतुर्दन्तः श्रीमानैरावतो गजः। पुष्पदन्तो दन्तवासुः पुष्पदन्तवान्। सामान्यगजरूपेण शेषा दिक्करिणः स्मृताः"। तन्मात्रानि भाविष्यान्तरे "ऐरावतः पुष्करीको वामनः कुमुदोऽञ्जनः। पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः"। वेदाङ्गानि स्कन्द-पुराणे "शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषा-स्थिति। छन्दसेति षडेतानि वेदाङ्गानि प्रचक्षते। मन्त्रौघानि ब्रह्मणो लोके यानस्त्रयाणि तानि तु। द्विजातिभिः शुभाख्यानि वासे दधति कृष्णिकाम्"। तानि च पश्चिमदिशि वेदसन्निधौ निवेशनीयानि. दिग्वि-शेषानाम्नानात् प्रधानं नीयमानं हि तत्राङ्गान्यपकर्ष-तीतिन्यायात्, वक्ष्यते च, "पश्चिमे चतुरोवेदानिति"। लोकपालरूपाच्च विष्णुकर्मा "चतुर्दन्तो गजारूढो वज्रपाणिः पुरन्दरः। प्राचीपतिः प्रकर्त्तव्यो नाना-भरणभूषितः। पिङ्गश्मश्रुजटाभारो मौञ्जाङ्गजठरो-ऽरुणः। छागस्थः शक्तिखड्गाग्निः यज्ञोपवीतधारकः। रक्त-दक् पाशदक् क्रुद्धो निर्ऋतिर्विद्रुताननः। दुःखितः

षड्गङ्गस्तव भूतवान् राजसाद्वतः। वरुणः पाशभृत् सौम्यः प्रतीच्यां मकराश्रयः। धावद्वरिणपृष्टस्थो ध्वजधारी समीरणः। दशाश्वरथगः सोमो गदापाणिरुदङ्मुखः"। "शंखकर्णश्च" इत्यागमान्तरम्। "पूर्वोत्तरे त्रिनेत्रश्च वृषभस्त्रिशूलभृत्। कपालपाणिश्चन्द्रार्द्धभूषणः परमेश्वरः"। चतुर्मुखरूपन्तु विष्णुधर्मोत्तरात् "पद्मपत्रासनस्थश्च ब्रह्मा कार्यश्चतुर्मुखः। अक्षमालाकमण्डलुं बिभ्रत् पुस्तकञ्च कमण्डलुम्। वामः कृष्णाजिनं तस्य पार्श्वे हंसस्तथैव च"। शिवलक्षणञ्च वायुपुराणे "पञ्चवक्त्रो वृषारूढः प्रतिवक्त्रं त्रिलोचनः। कपालशूलखट्वाङ्गी चन्द्रमौलिः सदाशिवः"। विष्णुलक्षणञ्च तत्रैवोक्तम्। सूर्य्यलक्षणञ्च विष्णुधर्मोत्तरे "रविः कार्य्यः शुभ्रवस्त्रः सिन्दूरारुणसन्निभः। पद्मासनः पद्मकरो भूषितो रत्नभास्करैः"। उमालक्ष्मीसमन्वितमित्यत्र, शिवाच्युतयोः सन्निधिते उमालक्ष्म्यौ विधेये। उमालक्षणञ्च देवीपुराणे "गौरीं शङ्खेन्दुवर्णाभां सर्वाभरणभूषिताम्। इक्षुपद्मासनासीनां साक्षसूत्रकमण्डलुम्। वरदोद्यतरूपाढ्यां सर्वमाल्यविभूषिताम्"। वरदोद्यतरूपाढ्यां, वरदाभयपाणिकामित्यर्थः। लक्ष्मीलक्षणञ्च पञ्चरात्रे "पद्मासनस्थां कुर्वीत श्रियं त्रैलोक्यमातरम्। गौरवर्णां सुरूपाञ्च सर्वालङ्कारभूषिताम्। रौक्मपद्मकरद्वयां वरदां दक्षिणेन तु"। वस्वादित्यरूपाणि, नारदीये, "प्रसन्नवदनाः सौम्या वरदाः शक्तिपाणयः। पद्मासनस्था द्विभुजाः कर्त्तव्या वसवः सदा। पद्मासनस्था द्विभुजाः पद्मगर्भनिभप्रभाः। करादिरक्षान्यर्य्यन्तनानापङ्कजधारिणः। अधःसंस्थितभेषादिराशयः प्राप्ततार्क्ष्यकाः। इन्द्राद्या द्वादशादित्याश्चोर्ध्वमध्यगाः" तथा। वायुतत्त्वेन रूपेण मरुतो नाम देवताः"। कर्त्तव्या इति शेषः, वस्वादिनामानि, तत्तद्रूपोक्तानि वेदितव्यानि। मकारलक्षणमन्वितमिति, मकारलक्षणानि परिभाषायामुक्तानि, चन्द्रमण्डलान्वितमिति क्वचित्पाठः। "कथासप्राप्तिनोऽनन्तः पृथ्वी स्त्रीरूपधारिण्यनन्तमिथुनम्। अथ प्रकृतमुच्यते "वितस्तेरङ्गुलशतं यावदायामविस्तरम्। कौशेयवस्त्रसंवीतं तिलद्रोणोपरि न्यसेत्। तत्राष्टादश धान्यानि समन्तात्परिकल्पयेत्"। वितस्तेरङ्गुलशतमिति, द्वादशाङ्गुलमारभ्याङ्गुलशतं यावच्छक्त्यनुसारेण कार्य्यमित्यर्थः। द्रोणमानमष्टादश धान्यानि च परिभाषायां द्रष्टव्यानि। स च तिलद्रोणो वेदिकायां लिखितचक्रोपरि स्थापनीयः। "पूर्वस्यामनन्तयजनं प्रद्युम्नं पूर्वदक्षिणे। प्रकृतिर्दक्षिणे देशे संकर्षणमतः परम्। पश्चिमे चतुरोवेदाननिरुद्धमतः परम्। अस्मिन्नुत्तरतो भूमे वासुदेवमतः परम्। समन्ताद्दशपीठस्थानर्चयेत् कालवित्तवान् बुधः। स्थापयेदक्षसंवीतान् पूर्वकुम्भान् दशैव तु"। पूर्वेत्यादि, ब्रह्मखण्डात् पूर्वदेशे अनन्तयजनं शेषशायिनं गुण(सत्त्वादि)पीठे स्थापयेत्, तन्मूर्त्तिलक्षणं विष्णुधर्मोत्तरात् "देवदेवस्य कर्त्तव्यः शेषस्तुप्रवदुर्भुजः। एकपादोऽस्य कर्त्तव्यो वक्ष्यमाणसमुद्भवः प्रभोः। तथाऽपरश्च कर्त्तव्यः शेषभोगाङ्कसंस्थितः। एकोभुजोऽस्य कर्त्तव्यस्तत्र जानौ प्रसारितः। कर्त्तव्यो नाभिदेशस्थस्तथा तस्यापरः करः। तथैवान्यः करः कार्य्यो देवस्य तु शिरोधरः। सन्तानमञ्जरीधारी तथाचाद्यः करः परः। नाभिसम्भूतकमले सुखासीनः पितामहः। नाकनम्नौ तु कर्त्तव्यौ पद्मस्थौ मधुकैटभौ। शङ्खचक्रगदादीनि मूर्त्तानि परितो न्यसेदिति"। प्रद्युम्नलक्षणं पञ्चरात्रादिषु "दक्षिणोर्द्धकरे पद्मं दद्याच्छङ्खमधः करे। चक्रमूर्द्धे ततो वामे गदां दद्यात् तथा द्विज!। वामेषुष्ट्वा प्रद्युम्नो रूपवान् विश्वमोहनः" इति। अत्र यद्यपि प्रकृतेरव्यक्तरूपतया विधानमशक्यं तथापि चक्रादिशब्दव्यपदेश्यं सुकरमस्ति तद्रूपमित्यतस्तदन्यतमरूपनिर्माणमेव न्याय्यम्। तदुक्तं मार्कण्डेयपुराणे "सर्वेषाद्या महालक्ष्मीस्त्रिगुणा परमेश्वरी। मातुलुङ्गं गदां खेटं पानपात्रञ्च बिभ्रती। नागं योनिञ्च बिभ्रती नृप! मूर्द्धनीति"। संकर्षणरूपम् विष्णुधर्मोत्तरे "वासुदेवस्य रूपेण कार्य्यः संकर्षणः प्रभुः। स तु शुक्लवपुः कार्य्यो नीलवासा बलोत्तम!। गदाख्याने च मुसलाङ्कस्थाने च बाहुलमिति"। वेदमूर्त्तयो भूतघटे वक्ष्यन्ते। अनिरुद्धरूपं नारदीये। "कृष्णं चतुर्भुजं दक्षे शरं खड्गं तदुत्तरे। धनुःखेटधरं वीरमनिरुद्धं प्रचक्षते"। अस्मिन्नुक्तलक्षणञ्च। वासुदेवरूपमपि नारदीये "वासुदेवः शिवः शान्तः सिताभश्च चतुर्भुजः। योगमूर्द्धोर्द्धसङ्कल्पे शार्ङ्गपाणिरुदङ्मुखः। धारयेदुत्तरे चक्रं करे वै दक्षिणे गदामिति"। एते च देवताविशेषा, ब्रह्माण्डनिर्माणकृत्प्रलयत्राणात् पृथक् स्तवर्चैव घटनीयाः ब्रह्माण्डस्य किञ्च विंशतिपदात्मकस्य पञ्चसङ्ख्यावधिरिह नियमः, पुराणेषु दृश्यते ततोऽवश्य-

माषकाञ्चने तस्मिन् न्यूनसंख्यत्वादयथावद्विहितत्वमापद्यते। न च दिग्गजाष्टकसंयुक्तं लोकपालोपेतमित्यादिना एक एव तावद्भिरङ्गैरङ्गी निष्पाद्यत इति ब्रह्माण्डवत्कल्पप्रस्तवर्षेणैव दिग्गजादिप्रतिमानिर्मितौ न कश्चिद्बाध इति वाच्यं, "ब्राह्मणान् कारयेदिति" पुनः काञ्चनोपदेशानार्थक्यापत्तेः। अत्र यमाद्यपरिमाणानां प्रतिमानामकुष्ठपर्वप्रभृतिवितस्तिपर्यन्तं यथाशक्ति परिमाणं कल्पनीयम्। "पूर्णकुम्भान् स्थापयेदित्यत्र समन्तादिति शेषम्। "दशैव धेनवो देया सङ्घेमाम्बरदोहनाः। पादुकोपानहच्छत्रचामरासनदर्पणैः। भक्ष्यभोज्यान्नदीपेषु फलमाल्यानुलेपनैः। होमाधिवासनान्ते च स्थापितो वेदपुङ्गवैः। इत्यलङ्कारयेन्मन्त्रं त्रिःकृत्वाच प्रदक्षिणम्"। सङ्घेमाम्बरदोहना इति, क्षेमश्चङ्घ्रः ताम्रदोहनाः सवत्साः पार्श्वतो दक्षिणार्धसुपकल्पनीयाः। तत्राचार्यायैव हे, ऋत्विग्भ्योऽष्टौ संप्रदेया, जापकादीनां चान्यैव यथाशक्ति दक्षिणेति,। भविष्योत्तरे तु "श्रेयं निष्क्रयतं पार्थेत्यादिना सुवर्णमेव दक्षिणार्धसुपकल्पनीयमित्युक्तं, श्राद्धाधिवासनदिनादन्येष्वुरुमिकुण्डेषु ऋत्विगुपवेशनादिकर्मशेषसमाप्तौ तत्रापूरुषदानवद्विहितायां, पूर्ववदेव स्थापितः शुक्लमाल्याम्बरधरो वृषोत्तकृतमाङ्गल्यैर्यजमानो ब्रह्माण्डं त्रिःप्रदक्षिणीकृत्य मन्त्रमुच्चारयेत्। मन्त्रः। "नमोऽस्तु विश्वेश्वर! विश्वधामन्! जगत्सवित्रे भगवन्नमस्ते। सप्ताधिलोकामरभूतलेन गर्भेण सार्द्धं वितराभिरक्षाम्। ये दुःखितास्ते सुखिनो भवन्तु प्रयान्तु पापानि चराचराणाम्। त्वद्दानयज्ञाहृतपातकानां ब्रह्माण्डदोषाः प्रलयं व्रजन्तु। एवं प्रणम्यामरविश्वगर्भं दद्याद् द्विजेभ्यो दशधा विभज्य। भागद्वयं तत्र गुरोः प्रकल्प्य समग्रजेष्वेषमतः क्रमेण"। दानवाक्यं तुलापुरुषवद्वेदितव्यं तच्च दशधा विभज्य गुरोर्भागद्वयं प्रकल्प्य अवशिष्टाष्टभागानामेकैकं भागं त्रिधा विभज्य चतुर्विंशतिसंख्येभ्य ऋत्विगादिभ्यः समं दद्यात्, तदनुत्तरान्येभ्योऽपि ब्राह्मणेभ्यो दद्यात्। "स्वल्पं होमं गुरुरेक एव कुर्यादेकाग्निविधानयुक्त्या। स एव संपूज्यतमोऽल्पवित्तैर्यथोक्तवस्त्राभरणादिकेन"। विंशतिपलादारभ्य पलसङ्ख्यावधिरहिते ब्रह्माण्डे सङ्ख्यातदङ्गौदित्युत्तममध्यमादिवैविध्यकल्पनायां कनीयोभागस्यालाघवमवधेयं, विंशतिपलनिर्मितब्रह्मत्वमित्येके उक्तविंशतिपलादर्वाक् यथाशक्तिविधाने स्वल्पत्वमवगन्तव्यमिति केचित्। एकाग्निविधानम् एकस्मिन्नेव कुण्डे होमकरणम् कुण्डमपि वक्ष्यदिग्भागस्थितं हस्ताकारञ्च कार्यं तदेतत्परिभाषाबाहुल्यादितम्। अथ पुण्याहवाचने कृते देवतावेदीसमीपं गत्वा पूर्ववद्यजमानेन देवतापूजायां विहितायामाचार्यो विसर्जनं विदध्यात्। "इत्थं य एतदखिलं पुरुषोत्तम कृत्वा दद्ब्रह्माण्डदानमधिगम्य महद्विमानम्। निर्धूतकल्मषविशुद्धतनुर्नरेरानन्दकृत् पदमुपैति सहाप्सरोभिः। सन्तारयेत् पितृपितामहपुत्रपौत्रबन्धुप्रियातिथिकुलशतादकं सः। ब्रह्माण्डदानयकलीकृतपातकौघमानन्देन जननीकृतमभ्युपैषम्। इति पठति शृणोति वा य एतत् सुरभवनेषु सद्मेषु धार्मिकाणाम्। मतिमपि च ददाति मोदते सोऽमरपतिभवने सहाप्सरोभिः"। "राजोवाच विधिं ब्रह्माण्डदानस्य कृत्वा यं मोक्षभाग्भवेत्। कालं देशं द्विजं तीर्थं सर्वमेतदशेष मे। कृतेन येन सर्वस्य फलभागी भवाम्यहम्। कृत्सितस्याप्य भावस्य मोक्षः स्यादचिराद्ध मे। वशिष्ठ उवाच "एवं श्रुत्वा ततो राजन्! पुरोधास्तस्य तं द्विजः। ब्रह्माण्डं कारयामास सौवर्णं सर्वधातुभिः। पीठं निष्कसहस्रेण पद्मं तत्र प्रकल्पयेत्। तत्र ब्रह्मा तस्य मध्ये पद्मरागैरलङ्कृतः। सावित्र्या चैव गायत्र्या ऋषिभिर्मुनिभिः सह। नारदाद्यैः सुतैः सर्वैरिन्द्राद्यैश्च सुरैस्तथा। सौवर्णविग्रहाः सर्वे ब्रह्मणस्तु पुरःसराः। वाराहरूपो भगवान् लक्ष्म्या सह सनातनः। नीलान्मरकतांश्चैव भूषावान्तस्य कारयेत्। रजतस्य विशुद्धस्य देहं रुद्रस्य कारयेत्। गोमेदकैस्तस्य शोभाङ्गारयेद्बुद्धिमान्। मौक्तिकैश्चापि सोमस्य शोभां वज्रकैर्दिवाकरैः"। सावित्रीगायत्र्यौ तु, ब्रह्मणः पार्श्वभागे स्थापनीयौ। तदाह नारदः "सावित्री दक्षिणे पार्श्वे गायत्री नाम वामतः। विलोकयन्त्यौ ब्रह्माणं साक्षसूत्रकमण्डलुम्"। ऋषयः सप्त गोतमाद्याः तद्ब्रह्मादित्यपुराणे "गोतमश्च भरद्वाजो विश्वामित्रश्च काश्यपः। जमदग्निर्वसिष्ठोऽत्रिः सप्त वैवस्वतेऽन्तरे"। सप्तर्षिलक्षणमाह यमः "सप्तर्षयस्तु जटिलाः कमण्डलुसुस्रिणः। ध्याननिष्ठा वशिष्ठस्तु कार्यो भार्यासमन्वितः"। सनको वानप्रस्थाः, नारदाद्यैरिति तेषां विशेषणम्"। तानाह मनुः "अहं प्रजाः सिसृक्षुस्तु तपस्तप्त्वा सुदुश्चरम्। पतीन् प्रजानामसृजं महर्षीनादितो दश। मरीचिमत्र्यङ्गिरसं पुलस्त्यं पुलहं क्रतुम्। प्रचेतसं वशिष्ठञ्च

मृगुद्वारदमेव च"। तद्वत्पक्षमाह विश्वकर्मा "जटिलाः मुकुटाः शान्ता दशाऽऽधमनिषेवनाः। कुक्षम्भराधराः कार्या उनयो द्विभुजाः सदा। तेषु सव्यभुजामूर्ध्वस्थितः वीरस्तु नारदः। कर्पूरगौरदेहश्च वामपुत्रकमण्डलुः"। इत्यादिरूपाण्यपि प्रागभिहितानि। वाराहरूपं विष्णुधर्मोत्तरे "वाराहरूपः कार्यस्तु शेषोपरिगतः प्रभुः। शेषवद्भुजः कार्यश्चक्रगदान्वितः। कर्त्तव्यौ वीरवत्सौ करयोस्तस्य वादव!। सर्वरूपेण कर्त्तव्यश्चैव रचिताञ्जलिः। आलीढस्थानसंस्थानस्तत्पृष्ठे भगवान् भवेत्। वामारम्भिनता तस्य योषिद्रूपा वसुन्धरा। नमस्कारपरा तस्य कर्त्तव्या द्विभुजा शुभा। यस्मिन् भुजे धरा देवी तस्य यज्ञः करे भवेत्। अन्ये तस्य कराः कार्याः पद्मचक्रगदाधराः। पद्मासनस्थां कुर्वीत श्रियं त्रैलोक्यमातरम्। गौरवर्णां सुरूपाञ्च सर्वालङ्कारभूषिताम्। रौक्मपद्मकरव्यग्रां वरदां दक्षिणेन तु"। रूपं प्रागभिहितं षड्लक्षणानि तदर्थाश्च नवषड्दाने वक्ष्यन्ते। सर्ववर्णानि षड्लक्षणानि, रत्नानि भूषणार्थं दापयेदित्यर्थः। सर्वधातुभिः ब्रह्माण्डं कर्त्तव्यमित्युक्तं, तत्र सुवर्णस्य पीठनिर्माणादिविनियोगमभिधायेदानीं धातान्तरैः कर्त्तव्यं तदुच्यते "पीठात् षड्गुणं रौप्यं रौप्यात्ताम्रं तथाविधम्। ताम्रात् षड्गुणं कार्यं कांस्यमत्र नराधिप!। त्रयुणः परतः सीसं लाक्षोक्तं च कारयेत्। षड्गदीयाः सदङ्काश्च षड्वै कुलपर्वताः। अन्या संख्या ज्ञात्वा निपुणैः शिल्पिभिः कृताः"। तथाविधं षड्गुणमित्यर्थः षड्गदीया इत्यादि इतेषामेकैकधातुना एकैकं द्वीपं सदङ्कं कुलाचलञ्च रचयेदित्यर्थः। "वादशानि च भूतानि राजतान्येव कारयेत्। कारणानि च सप्तानि सौवर्णानि च कारयेत्। इक्षून् वनस्पतींश्चात्र हव्यवाहीः क्रमेण्यः"। वादशानि, जलसम्भवानि, पुष्पफलवन्तो वृक्षाः कुसुमाः कलिनोवनस्पतयः, वीरुधोगुच्छगुल्मादयः। "सर्वं प्रकल्प्य विधिवत्तीर्थे देयं विचक्षणैः। कुरुक्षेत्रे गयायां च प्रयागेऽमरकण्टके। द्वारवत्यां प्रभासे च गङ्गाद्वारे च पुष्करे। तीर्थेष्वेतेषु वै देयं षड्रसे सोमसूर्ययोः। दिनक्षयेषु सर्वेषु अयने दक्षिणोत्तरे। व्यतीपाते वसुगुणं विष्णवे च विशेषतः। दातव्यमेतद्राजेन्द्र! विचारं नैव कारयेत्। दानाग्निहोत्रिणं विप्रं सुरूपञ्च गुणान्वितम्। उपस्थीकं च संपूज्य भूषयित्वा विभूषैः। पुरोहितं सुलक्षणं कृत्वान्यांश्च तथर्त्विजः। चतुर्विंशद्गुणोपेतान् सपत्नीकान्निमन्त्रितान्। कृतास्त्ररक्षकान् सम्यक् सुविभूषितान्। अङ्गुलीयकरत्नानि कर्णवेष्टांश्च दापयेत्। एवंविधांश्च संपूज्य तेषामग्रे स्वयं स्थितः। अष्टाङ्गप्रणिपातेन प्रणम्य च पुनः पुनः। पुरोहिताय पुरतः कृत्वा वै करसंपुटम्। यूयं वै ब्रह्मणा पाता, मैत्रेणानुग्रहव्रताम्। सौख्येनेह भवताच्चेत् पूतोनरः क्षयम्। भवतां प्रीतियोगेन स्वयं प्रीतः पितामहः। ब्रह्मरूपेण तु दत्तेन तेषां प्रीतो जनार्दनः। पिनाकपाणिर्भगवान् यज्ञश्च त्रिदशेश्वरः। एते वै तोषमायान्ति यतध्याता द्विजोत्तमैः। एवं स्तुत्वा ततो राजा ब्रह्मणान् वेदपारगान्। ब्रह्माण्डं गुरवे प्रादात् सविधानं पुनः पुनः। सर्वकामैस्ततस्तृप्तो ययौ स्वर्गं नराधिपः। तेनापि गुरुणा तच्च विभक्तं ब्रह्मचैः सह। दत्तस्तैरपि चान्येभ्यो ब्रह्माण्डांशो नराधिप!। ब्रह्माण्डं भूमिदानं च पाद्मं नैवेन तद्भवेत्। सङ्क्षेपमवाप्नोति वृद्धत्वां न संशयः। सर्वैर्वाञ्छैव प्रत्यक्षं दातव्यं तन्नराधिप!। दीयमानञ्च पश्यन्ति तेऽपि पूता भवन्ति हि। दर्शनादेव ते पूता भवेयुर्नात्र संशयः"। पद्मपुराणोक्तस्तद्विधिर्यथा

"शृणु वत्स! प्रवक्ष्यामि ब्रह्माण्डाख्यं पुरातनम्। तस्य दानस्य चाङ्गं भाविकल्पकथाश्रुतम्। प्रक्रियाख्यो ऽनुषङ्गाख्य उपोद्घातश्चतुर्विधः। चतुर्थं वपसंहारः इत्यादावुक्तवान् हि। पूर्वपादद्वयं पूर्वो भागोऽत्र सदाहृतः। ततीयो मध्यमो भागस्तुर्यस्तूत्तर इष्यते। तत्र पूर्वभागे प्रक्रियापादे "आदौ कल्पसहस्रेषु नैमित्याख्यानकं ततः। हिरण्यगर्भोत्पत्तिश्च लोककल्पनमेव च। एष वै प्रथमः पादो द्वितीयं शृणु मानद"। पूर्वभागे चतुष्पादे "कल्पमन्वन्तराख्यानं लोकज्ञानं ततः परम्। मानससृष्टिवर्णनं रुद्रप्रसववर्णनम्। महादेवविभूतिश्च ऋषिवंशस्ततःपरम्। अग्नीनां विजयाद्याश्च कालसङ्ख्यावर्णनम्। प्रियव्रतायोद्देशः पृथिव्यायामविस्तरः। वर्णनं भारतस्याथ ततोऽन्येषां निरूपणम्। ज्ञानादिषड्गदीयाख्या ततोऽधोलोकवर्णनम्। ऊर्ध्वलोकानुकथनं षड्वारस्ततःपरम्। आदित्यब्रह्मकथनं देवमहात्मकीर्तनम्। नीलकण्ठाख्यानं महादेवस्य वैभवम्। अमावास्यानुकथनं युगतत्त्वनिरूपणम्। यज्ञप्रवर्त्तनं चाथ युगयोरन्तयोः स्थितिः। युगप्रलयसंख्यञ्च ऋषि-

प्रवरवर्णनम्। वेदानां व्यसनाख्यानं स्वायम्भुवनिरूपणम्। प्रेषमन्वन्तराख्यानं पृथिवीदोहनन्ततः। चाक्षुषेऽद्यतने सर्गो द्वितीयोऽङ्गिरः पुरोदये"। मध्यभागे उपोद्घातपादे "अथोपोद्घातपादे तु सप्तर्षिपरिकीर्त्तनम्। प्राजापत्यचयसंस्काद्देवादीनां सत्तोद्भवः। ततो जयाभिव्याहारौ महदुत्पत्तिकीर्त्तनम्। काश्यपेयानुकथनम् ऋषिवंशनिरूपणम्। पितृकल्पानुकथनं चाक्षुषस्यान्ततः परम्। वैवस्वतसर्गोत्पत्तिः सृष्टिसर्ग ततः परम्। मनुपुत्राचयवातो गान्धर्वस्य निरूपणम्। इक्ष्वाकुवंशकथनं वंशोऽत्रेः सुमहात्मनः। ममावसोश्चयस्य रजेश्चरितमद्भुतम्। ययातिचरितञ्चाथ यदुवंशनिरूपणम्। कार्त्तवीर्य्यस्य चरितं जामदग्न्यं ततः परम्। हैहयवंशानुकथनं सगरस्याथ सम्भवः। भार्गवस्यानुचरितं तथार्ष्टिषेणाश्रयम्। सगरस्याथ चरितं भार्गवस्य कथा पुनः। देवासुरादवकथा कृष्णाविर्भाववर्णनम्। एतस्य च सुतः पुण्यः शुक्रेण परिकीर्त्तितः। विष्णुमाहात्म्यकथनं बलिवंशनिरूपणम्। भविष्यराजचरितं संप्राप्तेऽस्य कलौ युगे। एवमुद्घातपादोऽयं तृतीयो मध्यमे दले। उत्तरभागे उपसंहारपादे "चतुर्वक्त्रोपसंहारं वक्ष्ये खण्डे तथोत्तरे। वैवस्वतान्तराख्यानं विस्तरेण यथातथम्। पूर्वमेव समुद्दिष्टं संक्षेपादिह कथ्यते। भविष्याणां मनूनाञ्च चरितं हि ततः परम्। कल्पप्रलयनिर्देशः कालमानं ततः परम्। लोकावतारदेश ततः कथिता मानसैः। वर्णनं नरकाणाञ्च विकर्माचरणैस्ततः। मनोमयपुराख्यानं लयः प्राकृतिकस्ततः। शैवस्याथ पुरस्यापि वर्णनञ्च ततः परम्। त्रिविधादुगुणसम्बन्धाज्जन्तूनां कीर्त्तिता गतिः। अनिर्देश्याप्रतर्क्यञ्च ब्रह्मणः परमात्मनः। अन्वयव्यतिरेकाभ्यां वर्णनं हि ततः परम्। इत्येष उपसंहारः पादो ह्यत्तः स चोत्तरः। चतुष्पादं पुराणं ते ब्रह्माण्डं समुदाहृतम्। अष्टादशसहस्रीयं द्वारात् सारतरं द्विज!। ब्रह्माण्डञ्च चतुर्लक्षं पुराणत्वेन पठ्यते। तदेव व्यस्य गदितमष्टादशधा पृथक्। पाराशर्य्येण मुनिना सर्वेषामपि मानद!। वस्तुदृष्ट्वाथ तेनैव मुनीनां भावितात्मनाम्। मतः श्रुत्वा पुराणानि लोकेभ्यः प्रचकाशिरे। मुनयो धर्मशीलाश्च दीनानुग्रहकारिणः। मया चेदं पुराणन्तु वशिष्ठाय पुरोदितम्। तेन शक्तिसुतायोक्तं जातूकर्ण्याय तेन च। व्यासो लब्ध्वा ततश्चैतत् प्रसङ्गेनाखिलोदितम्। एषा चीतस्य लोकैरक्षिन् प्रावर्त्तयदनुत्तमम्"। तत्स्तवस्तुतिः "य इदं कीर्त्तयेद्वत्स! शृणोति च समाहितः। स विष्णुयेऽपापानि याति लोकमनामयम्। लिखित्वैतत् पुराणन्तु सर्वसिद्धासनस्थितम्। पात्रेभ्यश्चादितं यस्तु ब्रह्मणाय प्रयच्छति। स याति ब्रह्मणो लोकं नात्र कार्य्या विचारणा। मरीचे! कथितादेतानि मया प्रोक्तानि यानि ते। पुराणानि तु संक्षेपाच्छ्रोतव्यानि च विस्तरात्। अष्टादश पुराणानि यः शृणोति नरोत्तमः। कल्पवेदा विधानेन नेह भूयः स जायते। सूतमेतत् पुराणानां यत्प्रयोक्तं त्वयाधुना। तत्सिद्धं श्रोतुमीयं हि पुराणफलमिच्छता। न दाम्भिकाय पापाय देवगुर्वनसूयवे। देयं कदापि साधूनां द्वेषिणे न शठाय च। शान्ताय दान्तचित्ताय शुश्रूषाभिरताय च। निर्मत्सराय शुचये देयं सद्वैष्णवाय च" नारदीयपु० ४पा० १०६ अ०।

ब्र(ब्र)ह्मात्मभू पु० ब्रह्मण आत्मनः देहात् भवति भू-क्विप्। अजे शब्दमाला तस्य ब्रह्मदेहजातत्वं ह० उ० उक्तं यथा "प्राणा वै यशोवीर्य्यं तत् प्राणेषूत्क्रान्तेषु शरीरं श्वयितुमध्रियत तस्य शरीर एव मन आधीत्। सोऽकामयत मेध्यं स्यादात्मन्वनेन स्यामिति। ततोऽश्वः समभवद्यदश्वत्सन्मेध्यमभूदिति तदेवाश्वमेधस्याश्वमेधत्वम्" भू०। "तदेवं यशोवीर्य्यभूतेषु प्राणेषूत्क्रान्तेषु शरीरान्निष्क्रान्तेषु तच्छरीरमजायतेः श्वयितुच्छूनभावकुन्तमध्रियतामेध्यत्वाभवत्। तस्य प्रजापतेः शरीरान्निर्गतस्यापि तस्मिन्नेव शरीरे मन आधीत्। यथा कस्मिंश्चित् प्रिये विषये दूरङ्गतस्यापि मनो भवति तद्वत्। स तस्मिन्नेव शरीरे गतमनाः सन् किमकरोदिति। उच्यते सोऽकामयत कथं मेध्यं मेधार्हं यज्ञियं मे समेदं शरीरं स्यात्। किन्नात्मन्वी स्यात्मवांश्चानेन शरीरेण शरीरवान् स्यामिति प्रविवेश। यस्मात्तच्छरीरं मेदियोगात् मृतयशोवीर्य्यमदश्वयत ततश्चमादश्व समभवत्। ततोऽश्वनामा प्रजापतिरेव साक्षादश्व सूयते। यस्माच्च पुनस्तत् प्रवेशाद्धतयशोवीर्य्यत्वादमेध्यं सन्मेध्यमभूत्तदेव तस्मादेवाश्वमेधस्याश्वमेधनाम्नः श्रुतेरश्वमेधत्वमश्वमेधनामलाभः" भा० भा०।

ब्र(ब्र)ह्मादनी स्त्री ब्रह्मा ब्रह्मत्वादनं हंसे तस्यैवादनं पाद्रूपं यस्याः गौरा० ङीष्। हंसपद्यां राजनि०।

ब्र(ब्र)ह्माभिजाता स्त्री गोदावर्य्यां राजनि०।

ब्र(ब्र)ह्मानन्द पु० ब्रह्मस्वरूपानन्दे तस्य सत्यादी-

नामानन्देभ्यः श्रेष्ठत्वम् श्रुतः ब्रा० १३।७।१।२१ वा ब्रह्मादौ उक्तं यथा
"एषोऽस्य परमो लोक एषोऽस्य परम आनन्द एतस्यै-वानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति । स यो मनुष्याणां राद्धः समृद्धो भवति । अन्येषामधिपतिः सर्वैर्मानुष्यकैः कामैः सम्पन्नतमः स मनुष्याणां परम आनन्दः । अथ ये शतं मनुष्याणामानन्दाः । स एकः पितॄणां जितलोकानामानन्दः । अथ ये शतं पितॄणां जितलोकानामानन्दाः । स एकः कर्मदेवानामानन्दो ये कर्मणा देवत्वमभिसम्पद्यन्ते । अथ ये शतं कर्म-देवानामानन्दाः । स एक आजानदेवानामानन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः । अथ ये शतमाजान-देवानामानन्दाः । स एको देवलोक आनन्दो यश्च श्रो-त्रियोऽवृजिनोऽकामहतः । अथ ये शतं लोक आ-नन्दाः । स एको गन्धर्वलोक आनन्दो यश्च श्रोत्रि-योऽवृजिनोऽकामहतः । अथ ये शतं गन्धर्वलोक आ-नन्दाः । स एकः प्रजापतिलोक आनन्दः अथ ये शतं प्रजापतिलोक आनन्दाः स एको ब्रह्मलोक आ-नन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः एष ब्रह्मलोकः सम्राडिति" भृ० । "परमो मोक्षलक्षणो लोकः स्वयं-ज्योतिःस्वभावो लोकशब्दस्य सुखविशेषविषयः-स्वाभाविकः । परमः स्वरूपानुभवलक्षणो सुखो निर-तिशय आनन्दः पूर्णानन्दः । किं च वस्तुतो नास्ये-वात्मसुखातिरिक्तं वैषयिकमपि सुखमित्याह एतस्यैव ब्रह्मानन्दस्य मात्रां कलामं अन्यानि अविद्यया ब्रह्मणो-ऽन्यत्वेन परिकल्पितानि ब्रह्मादिस्तम्बपर्यन्तानि भूता-न्युपजीवन्ति उपभुञ्जते तावन्मात्रमेवानन्दोनि भव-तीत्यर्थः । मानुषानन्दमारभ्य ब्रह्मानन्दपर्यन्तसत्तरो-त्तरशतगुणितातिशयशालिनां परब्रह्मानन्दावयववानां प्रतिपादनद्वारेणावयविनं निरुत्तरातिशयभेदमनतिशयं ब्रह्मानन्दं दर्शयितुत्तरा श्रुतिः प्रवर्त्तते" भा० ।

ब्र(ब्र)ह्मापेत पु० स्वर्गभ्रष्टत्वस्वराज्यभेदे "त्वष्टा च यम-दग्निश्च कण्वोऽथ त्रिशोकसा । ब्रह्मापेतोऽथ क्षत-जिद्धृतराष्ट्रश्च सप्तमः । माघमासे वसन्त्येते सप्त मैत्रेय भास्करे" विष्णुपु० २अंशे १०अ० ।

ब्र(ब्र)ह्मारण्य न० ब्रह्मणोऽरण्यमिव । वेदपाठभूमौ त्रिका० ।

ब्र(ब्र)ह्मार्पण न० १सर्वकर्मफलत्यागात्मकतया ब्रह्मचिन्तने ब्रह्मणि परमात्मनि ईश्वरे २सर्वकर्मफलानां सन्न्यासे च तत्-प्रकारः भगी०१अ०उक्तो यथा "ब्रह्मणा दीयते देयं ब्रह्मणे संप्रदीयते । ब्रह्मैव दीयते चेति ब्रह्मार्पणमिदं परम् । नाहं कर्त्तासर्वमेतद्ब्रह्मैव कुरुते तथा । एतत् ब्रह्मार्पणं प्रोक्तं ऋषिभिस्तत्त्वदर्शिभिः । प्रीयतां भगवानीशः कर्मणा-ऽनेन शाश्वतः । करोति सततं बुद्धा ब्रह्मार्पणमिदं परम् । यदा फलानां सन्न्यासं प्रकुर्यात् परमेश्वरे । कर्मणामेत-दप्याहुर्ब्रह्मार्पणमनुत्तमम् ।

ब्र(ब्र)ह्मावर्त्त पु० "सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् । तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते" मनूक्ते १देशभेदे २तत्रस्थे तीर्थभेदे च भा०व० ८३अ० ।

ब्र(ब्र)ह्मासन न० क्लीवे । ब्रह्मणः कर्त्तृत्वभेदस्य १आसने ब्रह्मात्मरथादयोऽत्र । ब्रह्मणस्तदुपासनाङ्गमासनम् । २पद्मखस्तिकादौ आसने । "ब्रह्मासनं तदाख्यं यत् कृत्वा ब्राह्मणो भवेत् । एकपादमूरौ दत्त्वा तिष्ठेदृज्वा-कृतिर्भवेत्" स्मृत्या० उक्ते देवपूजाङ्गे २आसनभेदे च ।

ब्र(ब्र)ह्मास्त्र न० क्लीवे । अस्त्रभेदे भा० आ० १६६ अ० ।

ब्र(ब्र)ह्माहुति न०ब्रह्मैवाहुतिः । वेदाध्ययने "ब्रह्माहुतिस्तृतं पृथ्यमनध्यायवषट्कृतम्" मनुः ।

ब्र(ब्र)ह्मिन् पु० ब्रह्मवेदस्तपो वाऽस्यास्ति श्रेयतया ब्रह्मा० इनि टिलोपः । वेदतपसोः श्रेयोभूते १परमेश्वरे । तदाराधनार्थमेव तयोरनुष्ठानात् तस्य तच्छब्दितम् । "ब्रह्मविद् ब्राह्मणो ब्रह्मो" विष्णुस० । ब्रह्म वेदो वेद्यतयाऽस्यास्ति इनि । २वेदतदर्थाभिज्ञे ।

ब्र(ब्र)ह्मिष्ठ त्रि०अतिशयेन ब्रह्मी इष्ठन् टिलोपः । अतिशयेन ब्रह्मज्ञे । "ब्राह्मणा भगवन्तो यो ब्रह्मिष्ठः स इता (ज्ञाः) सदमताम्" ह०व० "ब्राह्मणाः श्रुताध्यायाननिष्ठाश्चतुर्थ-निष्ठाः सर्वे यूयं ब्रह्मणोऽतिशयेन ब्रह्मिष्ठाः" भा० । "ब्रह्मिष्ठमाधाय निजेऽधिकारे ब्रह्मिष्ठमेव श्रुतमुग्रमन्तम्" रघु । २दुर्गायां स्त्री "ब्रह्मणा वेदमाश्रित्वात् गायत्री चरणाश्रिता । वेदेषु चरते यस्माच्चेन सा ब्रह्मचारिणी" देवीपु० ४६अ० ।

ब्र(ब्र)ह्मी स्त्री ब्रह्मणे हिता ब्रह्मा जनकतया अण् टिलोपः ङीष् । (वामनहाटि) खनामख्याते लताभेदे त्रिका० ।

ब्र(ब्र)ह्मीघृत न० क्षारखतक्तमिति ख्याते औषधविशेषे यथा "कमूलपत्रात्तत्पाद्य ब्रह्मीं प्रक्षाल्य वारिणा । चतुर्गुणे क्षोदयित्वा रसं तस्मिंश्च गालयेत् । रसे चतुर्गुणे तस्मिन् घृतप्रस्थं विपाचयेत् । कुरिण्टा

आवर्तीकृतं हरितो च हरीतकी। एतेषां पाक्तिकैर्भागैः श्रेष्ठास्तु कार्षिकाः स्मृताः। पिप्पल्योऽथ विड़ङ्गानि वैल्वं मर्करा वचा। सर्वमेतत् समांशेन मतैर्ब्रह्मसिना पचेत्। एतत् प्राशितमात्रेण वाग्विशुद्धिः प्रजायते। सप्तरात्रप्रयोगेण किन्नरैः सह गीयते। अर्द्धरात्रप्रयोगेण सरो भवति कोकिलः। मासमेकं प्रयोगेण भवेत् श्रुतिधरो नरः। षष्ठं गुल्मान् प्रमेहांश्च कासं पञ्चविधं जयेत्। वन्ध्यायाश्चैव नारीणां नराणामूरुरेतसाम्। इतं खारवतं नाम बलवर्णकरं परम्" चिकित्सारत्नसंग्रहः।

ब्र(ब्र)ह्मय ब्रह्मणि तपसि येते यौ-अच् पृषो०।१ऋक्षिभेदे भा०व० २११ अ०। २विष्णौ च भा०शा०२४०अ०।

ब्र(ब्र)ह्मोज्झ पु० ब्रह्म वेदमुज्झति उज्झ-अच् उप० स०। वेदत्यागिनि "ब्रह्मोज्झता वेदनिन्दा कौटसाक्ष्यं सुहृद्वधः। मद्विताद्ययोर्जन्धिः सुरापानसमानि षट्" मनुना तत्प्रायश्चित्तोपातकत्वसङ्ख्यम्।

ब्र(ब्र)ह्मोड़(ढ्र)म्बर न० तीर्थभेदे भा० व० ८२ अ०।

ब्र(ब्र)ह्मोत्तर त्रि० ब्रह्मा ब्राह्मणः उत्तरोऽधिकारी यस्य। ब्रह्मोत्तरभिक्षे भूम्यादौ। २ब्रह्मोत्तरधाने च।

ब्र(ब्र)ह्मोद्य न० वद-भावे क्यप् तुट्। ब्रह्मप्रतिपादकवाक्ये काल्या० श्रौ० १२।३।२०। २ब्रह्मकथने च "ब्राह्मणा भगवन्तो वृत्राद्भियं (यात्रप्रम्) हो अन्नो ब्रह्मोद्यमि तो चेनूमे वक्ष्यति न वै जातु युष्माकमिमं कश्चित् ब्रह्मोद्यम् जेतेति" ह०उ०।

ब्र(ब्र)ह्मोपनेतृ पु० ब्रह्मार्थं विप्रमुपनयते तत्रेतदण्डहेतुत्वात् उप-नी-तृच्। यज्ञोपवीते "विप्रस्य पालाशो दण्ड" स्मृतिः।

ब्र(ब्र)ह्मोपनिषद् स्त्री उपनिषद्भेदे उपनिषच्छब्दे दृश्यम्।

ब्र(ब्र)ह्मौदन पुंन० ब्रह्मार्थमोदनम्। यज्ञे अस्मिन्भेदार्थे कर्म्मणि। "ब्रह्मौदनं पचति चतुर्थां पालाशमङ्गिप्रस्तानाञ्च" काल्या०श्रौ० २०।१।४। "चतुर्थां पालाशां चतुर्थीमङ्गलीनां चतुर्थां प्रस्तानां च प्रस्तर्त्तव्यां कुशानि कोशः। "ब्रह्मौदनमाद्यर्त्विग्भ्यः प्रयच्छति" श्रुतेः। "एतमोदनम्" कर्त्तव्यः।

ब्रा(ब्रा)ह्म न०ब्रह्मण इदम्, तेन प्रोक्तम् वा अण् टिलोपः। १यज्ञमूले तीर्थे, तेन हि तीर्थेन द्विजाचमनं विहितमिति तस्य तत्सम्बन्धित्वम् "प्राग्वा ब्रा(ब्रा)ह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत्" इति स्मृतेः "अङ्गुष्ठोत्तरजतो रेखा वा पाणेर्देक्षिणस्य च। एतद्ब्राह्ममिति ख्यातं तीर्थमाचमनाय वै" स्मृतिः। २नारदे पु०अष्टा० ब्र(ब्र)ह्मणोक्ते अष्टादशपुराणान्तर्गते १महापुराणभेदे न०। ३विवाहभेदे ५पारदे च पु०। ४सरस्वत्यां तद्धिष्ठातृदेवतायां ७यामि दक्षोमसुतायां ८ब्रह्मलोकाके (वामनहाटि) ग्रामभेदे च स्त्री। "आहूतानां गुरुकुलात् विद्यार्थं पूजको भवेत्। ऋषीणामृषयो होष ब्राह्मो धर्मो विधीयते इति मनुक्ते राज्ञां १०धर्मभेदे पु०। ११मातृभेदे स्त्री ङीप्। "ब्राह्मी नारायणी तद्वेति" कालिकापुरम्। "इन्द्रस्याः शरीरं यदप्रमेयं प्रभाषतः। इन्द्रहिलोर्थमित्युक्तं ब्राह्मी देवी ततः स्मृता देवीपु० उक्तनिर्वचनायां १२देव्यान्तु स्त्री १३ब्रह्मसम्बन्धिनिभात्रे त्रि० स्त्रियां ङीप् "एषा ब्राह्मी स्थितिः पार्थ!" गीता। सरस्वत्या ब्रह्मजातत्वं च ब्राह्मीशब्दे दर्शितं तत्र दृश्यम्। "ब्राह्मी हिमा सरा तिक्ता लघुर्मेध्या च शीतला। कषाया मधुरा स्वादुपाकायुष्या रसायनी। स्वर्या कृतिप्रदा कुष्ठपाण्डुमेहाश्मकार्शजित्। विषगोधव्ररहरी तद्वत्पञ्चाङ्गमपि" भावप्र० ब्राह्मीशाकस्य गुणा उक्ताः। १४वाराहीकन्दे १५हिलमोचिकायां स्त्री राजनि०। १६रोहिण्यां स्त्री १७नक्षत्रे न० तयोर्ब्रह्माधिष्ठातृदेवताकत्वात् तथात्वं "रात्रेश्च पश्चिमे भागे सङ्क्रान्तौ ब्राह्म उच्यते" पितामहोक्ते रात्रिशेषयामार्द्धस्थिते वस्तूदयकालात् प्रागद्यत्वहयात्मके।८ काले पु०।१९ब्रह्मसम्बन्धिदिने २०तन्त्राने च अहन्शब्दे दृश्यम्।

ब्रा(ब्र)ह्मक त्रि० ब्रह्मणा कृतं कृताद्यण्। विप्रेण कृते।

ब्रा(ब्र)ह्मगुप्त पु० आयुधजातिवर्गभेदे त्रिगर्त्तशब्दे दृश्यम् स वर्गो येषां त्रिगर्त्ता० यादौ ञ। ब्राह्मगुप्तीय तत्रार्थे।

ब्रा(ब्रा)ह्मण पुंस्त्री० ब्रह्म वेदं गुणं चैतन्यं वा वेत्त्यधीते वा अण् "ब्रह्मणो जातावि" पा० न टिलोपः ब्रह्मणो ब्रह्मजातत्वात् ब्रह्मणोऽपत्यम् वा अण्। १विप्रे जातिभेदे स्त्रियां जातित्वात् ङीप्। २ब्रह्मायां स्त्री ङीप्। "ब्रह्म जानाति ब्राह्मणः" स्मृतौ ३परब्रह्मज्ञे त्रि०। ब्राह्मणशब्देन ब्राह्मणाख्यातदेहे तद्ब्रह्मजातदेहे च ब्राह्मणत्वजातिः स्त्रीक्रियते यथा गोत्वजातिको भक्षजातदेहस्य दुहितृत्वं तद्वत्। तत्र ब्रह्मजातदेहे ब्राह्मणत्वं यथा नारदस्त्रीत्वादौ। इदानीन्तु ब्राह्मणत्वब्रह्मसंबन्धत्वाभावान्न तथात्वम्। किन्तु कलौ अवर्णा विवाहनिषेधादपि न तथात्वम्।

"ब्राह्मणां ब्राह्मणाज्जातो ब्राह्मणः स्यात्र संशयः। अस्त्रियायां तथैव स्याद्वैश्यायामपि चैव हि" भा०दानधर्म० वाक्यस्यापि संकल्पभेदादेव तथात्वेन युगान्तरविषयत्वम्। तस्य लक्षणं यथा "ज्ञात्वा कर्मेण दृष्टेन स्वाध्यायेन श्रुतेन च। एभिर्युक्तो हि यस्तिष्ठेत्त्रिवं स द्विज उच्यते" यज्ञिय०। "न क्रुध्येन्न प्रहृष्येच्च मानितोऽमानितश्च यः। सर्वभूतेष्वभयदस्तं देवा ब्राह्मणं विदुः। अक्षेरिव गणाज्ञोतः सौक्षित्याक्षरकादिव। कृष्णादिव च क्लीभ्यस्तं देवा ब्राह्मणं विदुः। येन केनचिदाच्छन्नो येन केनचिदाशितः। यत्र क्व चन शायी च तं देवा ब्राह्मणं विदुः। त्रिसुक्तं सर्वसङ्कल्पैः सुनिर्माकाशवत् स्थितम्। अक्षमेकक्षरं शान्तं तं देवा ब्राह्मणं विदुः। जीवितं यस्य धर्मार्थं धर्मो रत्यर्थमेव च। अहोरात्रच पुण्यार्थस्तं देवा ब्राह्मणं विदुः। निराशिषमनारम्भं निर्नमस्कारमस्तुतिम्। अक्षीणं क्षीणकर्माणं तं देवा ब्राह्मणं विदुः" भा० मोक्षध०। "विश्वावसुरुवाच। विप्रस्य लक्षणं ब्रूहि तद्भक्तिः का च तत्कृता। यतस्तत्रातुपश्येम वाग्वाधाः ब्राह्मणाः कृताः"। कल्किरुवाच "वेदाक्षमीश्वरं प्राहुरक्षञ्च अक्षितं परम्। ते वेदा ब्राह्मणत्वे नानाधर्मैः प्रकाशिताः। यो धर्मो ब्राह्मणानां हि स मद्भक्तिमम पुष्कला। तयाहं तोषितः श्रीशः संभवामि युगे युगे। अतुलं त्रिदशं स्वल्पं सर्ववाङ्मिनितं मनैः। तन्तुवयमधोदृत्तं यज्ञसूत्रं विदुर्बुधाः। त्रिगुणं तदुपवीतयुक्तं वेदप्रवरसम्मितम्। शिरोधराजाभिमध्यात् पृष्ठार्द्धपरिमाणकम्। यजुर्विदां नाभिमितं सामगानामयं विधिः। वामस्कन्धेन विधृतं यज्ञसूत्रं वरप्रदम्। अङ्गुष्ठचन्द्रनाद्यैस्तु धारयेत्त्रिसूत्रकं द्विजः। भाले त्रिपुण्ड्रं कर्माङ्गं केशपर्यन्तसंज्ञकम्। शुक्लमृत्तिकामानन्तु त्रिपुण्ड्रं तत्त्रिधा कृतम्। ब्रह्मविष्णुशिवावासं दर्शनात् पापनाशनम्। ब्राह्मणानां शुक्ले स्वर्गो वाचि वेदाः करे हरिः। गात्रे तीर्थानि यागाश्च नाड़ीषु प्रकृतिश्चिरत्। वासिनी कण्ठकुहरा हृदयं ब्रह्मसंज्ञितम्। तेषां सनातनो धर्मः पृष्टेऽधर्मः प्रकीर्तितः। भूदेवा ब्राह्मणा राजन्! पूज्या वन्द्याः सदुक्तिभिः। चातुराश्रम्यकृत्यज्ञा मम धर्मप्रवर्त्तकाः। न त्यजापि ज्ञानदण्डासपोदण्डा मम प्रियाः। तेषां वचः पालयितुमवतारा कृता मया। ब्राह्मणानां सर्वपापप्रशमनम्। कल्किदेवस्य स्तुत्या उच्यते सर्वतोभयात्" कल्किपु० ४अ०। "कर्म्मणा ब्रह्मणो जातः करोति ब्रह्मभावनाम्। स्वधर्मनिरतः शुद्धस्तस्माद्ब्राह्मण उच्यते" ब्रह्मवै० गणेशख० २५अ०।

"जातकर्मादिभिर्यस्तु संस्कारैः संस्कृतः शुचिः। वेदाध्ययनसम्पन्नः षट्सु कर्मस्वस्थितः। शौचाचारपरो नित्यं विघसाशी गुरुप्रियः। नित्यव्रती सत्यरतः स वै ब्राह्मण उच्यते। सत्यं दानमथाद्रोहः आनृशंस्यं क्षमा घृणा। तपश्च दृश्यते यत्र स ब्राह्मण इति स्मृतः"। तस्य धर्मो यथा "ब्राह्मण्य तु वो धर्मस्तं ते वक्ष्यामि केवलम्। दममेव महाराज! धर्ममाहुः पुरातनम्। स्वाध्यायाभ्यसनञ्चैव तत्र कर्म समाप्यते। तच्चेदिज्यायागश्चेद्दृश्यमानं स्वकर्मणि। अकार्यं विकर्माणि त्यजेत्प्रायनतर्पितम्। कुर्वीतोपेत्य सन्मानमथ दद्याद्यजेत च। संविभज्यापि भोक्तव्यं धनं सद्भिरितीष्यते। परिनिष्ठितकार्यस्तु स्वाध्यायेनैव ब्राह्मणः। कृयादन्यन्न वा कृयान्नैवो ब्राह्मण उच्यते" पाद्मे स्वर्गख० २६ अ०। तस्य माहात्म्यादि यथा। "सर्वेषामेव वर्णानां ब्राह्मणः परमो गुरुः। तस्मै दानानि देयानि भक्तिश्रद्धासमन्वितैः। सर्वदेवमयो विप्रः प्रत्यक्षत्रिदशो भुवि। स तारयति दातारं दुस्तरे विश्वसागरे। हरिरुवाच। सर्ववर्णगुरुर्विप्रस्त्वया प्रोक्तः सुरोत्तम!। तेषां मध्ये च यः श्रेष्ठः कस्मै दानं प्रदीयते। ब्रह्मोवाच। सर्वेऽपि ब्राह्मणाः श्रेष्ठाः पूजनीयाः सदैव हि। अविद्या वा सविद्या वा नात्र कार्या विचारणा। क्षेत्रादिदोषरहिता ये ब्राह्मणा ब्राह्मणोत्तम!। आत्मभ्यो देवभक्तेभ्योऽपि परेभ्यो न कदाचन। अनाचारा द्विजाः पूज्या न च मूढा जितेन्द्रियाः। अध्यक्षमक्षका गावः कोद्राः सुमतयो न च। माहात्म्यं भूमिदेवानां विशेषादुच्यते मया। तव स्नेहाद्द्विजश्रेष्ठ! निशामय समाहितः। अस्त्रियाणाच वैश्यानां मूढाणां गुरवो द्विजाः। अन्योऽन्यं गुरवो श्रेष्ठाः पूजनीयाश्च भूसुर!। ब्राह्मणं प्रथमेदृष्ट्वा विष्णुब्रह्मा नरोत्तमः। आयुः प्रजाश्च कीर्त्तिश्च सम्पत्तिस्तस्य वर्द्धते। न च भीतिर्द्विजं यस्तु मूढधीर्मानवो भुवि। सदर्शनेन तच्छीघ्रं हन्तुमिच्छति केशवः"। पुण्यादिहेतुत्व विप्रस्य प्रणामनिषेधो यथा। "पुण्यहेतुं पयोहेतुं देवहेतुञ्च भूसुर!। न नमेद्ब्राह्मणं प्राज्ञो ब्राह्मणाभ्यर्चितविग्रहम्। अतस्तं देवदेवेशं ध्यान-

मन्त्रितचेतसम् । देवपूजाञ्च कुर्वन्तं न नमेद् ब्राह्मणं बुधः । बर्हिःस्थां प्रकुर्वन्तं भुञ्जानञ्च द्विजोत्तम ! । तथा सामानि गायन्तं न नमेद् ब्राह्मणं बुधः । ब्राह्मणा यत्र तिष्ठन्ति बह्वृचो द्विजसत्तम । प्रत्येकन्तु नमस्कारस्तत्र कार्यो न धीमता । क्षत्रियाभिवादनं विप्रं भक्त्या यो नाभिवादयेत् । स चाण्डालसमो ज्ञेयो नाभिवाद्यः कदापि च । क्षतप्रणामं तनयं नमेतां पितरौ न च । क्षतप्रणामाः सर्वेऽपि नमस्कार्या द्विजैर्द्विजाः । क्षतदोषान् द्विजान् गाश्च न द्विषन्ति विचक्षणाः । द्विषन्ति यापि मोहेन तेषां रुष्टः सदा हरिः । याचकान् ब्राह्मणान् यस्तु कोपदृष्ट्या प्रपश्यति । सूचीप्रवेषणं तस्य नेत्रयोः कुरुते यमः । विप्रनिर्भर्त्सनं मूढो येन यज्ञेषु कुर्वते । तस्मिन् यज्ञे यमस्तस्य कौक्षपिण्डं ददाति वै । ब्राह्मणा यद्दृष्टे भुक्ते तद्दृष्टे केशवः स्वयम् । देवताः सकला एव पितरश्च सुरर्षयः" । तस्य पादोदकादिमाहात्म्यं यथा "विप्रपादोदकं यस्तु कथमात्रं पिबेद्बुधः । देहस्थं पातकं तस्य सर्वमेवाशु नश्यति । कोटितीर्थाम्भसध्येषु सन्ति तीर्थानि यानि च । तानि सर्वाणि तीर्थानि वसन्ति द्विजपादयोः । विप्रपादोदकैर्नित्यं सिक्तं स्याद् यस्य मस्तकम् । स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः । सर्वपापानि घोराणि विप्रपादादिकानि च । सद्य एव विनश्यन्ति विप्रपादाम्बुधारणात् । व्याधयः सर्वे परमङ्के ददायकाः । यच्छन्ति विजयं सद्यो विप्रपादाम्बुभक्षणात् । पितरं यानि तोयानि दीयन्ते विप्रपादयोः । तैस्तृप्ताः पितरः स्वर्गे तिष्ठन्त्याचन्द्रतारकम् । प्रक्षाल्य विप्रचरणौ दूर्वाभिर्योऽर्चयेद्बुधः । तेनार्चितो जगत्स्वामी विष्णुः सर्वसुरोत्तमः । विप्राणां पादनिर्माल्यं यो मर्त्यः शिरसा वहेत् । सर्वं कल्मषं वह्निं तस्य सक्तिर्हि शाश्वती" । तस्य प्रदक्षिणफलम् "विप्रं प्रदक्षिणीकृत्य वन्दते यो नरोत्तमः । प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा" । तस्य पादसेवनफलम् "यो दद्यात् फलताम्बूलं विप्राणां पादसेवने । इह लोके सुखं तस्य परलोके ततोऽधिकम् । पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम् । मोक्षार्थी लभते मोक्षं विप्रपादस्य सेवनात् । रोगी रोगात् प्रमुच्येत पापी मुच्येत पातकात् । मुच्येत बन्धनाद्बद्धो विप्राणां पादसेवनात् । अनपत्याश्च वा नार्यो लभन्ते पुत्रमुत्तमम् । बन्धुपत्या लोकवत्सा सुविप्रपादसेवनात्" पाद्मे क्रियायोगसारे २७० । तस्य सन्ध्यावन्दनाकरणे दोषो यथा "नोपतिष्ठति यः पूर्वां नोपास्ते यस्तु पश्चिमाम् । स शूद्रवद्बहिष्कार्यः सर्वस्माद् द्विजकर्मणः" इत्युक्तः । अन्यत्र च "न स्पृशन्ति सुरास्तेषां पितरः पितृतर्पणम् । स्नेच्छया च द्विजातेश्च त्रिसन्ध्यरहितस्य च" । तस्य सन्ध्यावन्दनफलं यथा "यावज्जीवनपर्यन्तं यस्त्रिसन्ध्यं करोति हि । स च सर्वक्रतुभिर्विप्रस्तेजसा तपसा सदा । तत्पादपद्मरजसा सद्यः पूता वसुन्धरा । जीवन्मुक्तः स तेजस्वी सन्ध्यापूतो हि यो द्विजः । तीर्थानि च पवित्राणि तस्य संस्पर्शमात्रतः । ततः पापानि यान्त्येव वैनतेयादिवोरगाः" । तस्य निन्द्यकर्माणि यथा "विष्णुभक्तिविहीनश्च त्रिसन्ध्यरहितो द्विजः । एकादशीविहीनश्च विप्रहीनो यथोरगः । हरेर्नैवेद्यभोगी न धारको हरवासकः । शूद्रान्नभोजी विप्रश्च विप्रहीनो यथोरगः । शवदाही च शूद्राणां यो विप्रो वृषलीपतिः । शूद्राणां सूपकारो च शूद्रयाजी च यो द्विजः । असिजीवी मसीजीवी विप्रहीनो यथोरगः । यो विप्रोऽवीरान्नभोजी क्षत्रक्षतान्नभोजकः । । भगजीवी बाडवधिको विप्रहीनो यथोरगः । यः कन्याविक्रयी विप्रो यो हरेर्नामविक्रयी । यो विद्याविक्रयी विप्रो विप्रहीनो यथोरगः । सूर्योदये च दिवसो मत्स्यभोजी च यो द्विजः । शिवपूजादिरहितो विप्रहीनो यथोरगः" । ब्रह्मवै० प्र० २१ अ० । अन्यत्र च "यदि शूद्रां व्रजेद्विप्रो वृषलीपतिरेव सः । स स्पृष्टो विप्रजातेश्च चाण्डालात् षोऽधमः स्मृतः । विण्मत्रं तत्पिण्डो मूत्रं तस्य च तर्पणम् । ततपितृणां सुराणाञ्च पूजने तत् समं भवति ! । कोटिजन्मार्जितं पुण्यं सन्ध्याचारतपसार्जितम् । द्विजस्य वृषलीभोगान्नश्यत्येव न संशयः । ब्राह्मणश्च सुरापीतः विण्मूत्रभोजी वृषलीपतिः । हरिवासुरभोजी च कुम्भीपाकं व्रजेद्ध्रुवम् । "करोत्यशुद्धां सन्ध्यान्तु सन्ध्यां वा न करोति यः । त्रिसन्ध्यं वर्जयेद् यो वा सन्ध्याहीनश्च द्विजः" । नारायणक्षेत्रादितीर्थे तस्य प्रतिग्रहदोषो यथा "तत्र नारायणक्षेत्रे कुरुक्षेत्रे हरेः पदे । वाराणस्यां वटस्यैव गङ्गासागरसङ्गमे । पुष्करे भास्करक्षेत्रे प्रभासे रामतीर्थके । हरिद्वारे च केदारे सोमे बदरपाचने । सरस्वतीनदीतीरे पुण्ये वृन्दावने वने । तीर्थावर्त्तेच कौशिक्यां त्रिवेण्यान्तु हिमा-

खये। एतेष्वन्येषु वो दानं प्रतिगृह्णाति कामतः। स च तीर्थप्रतिग्राही कृमीपाकं प्रयाति च"। पारिभाषिकमहापातकिब्राह्मण्या यथा "सप्तोद्दिष्टमुद्दवाजी ग्रामयाजीति कीर्त्तितः। देवोपजीवजीवी च देवलश्च प्रकीर्त्तितः। सूदपाकोपजीवी यः सूपकारः प्रकीर्त्तितः। ब्रह्मवापूजाविहीनश्च प्रमत्तः पतितः स्मृतः। एते महापातकिनः कृमीपाकं प्रयान्ति ते" ब्रह्मवै॰ब्र॰ख॰२७अ॰। "ब्राह्मणस्य स्वधर्मेण त्रिसन्ध्यमर्चनं हरेः। तत्पादोदकनैवेद्यभक्षणञ्च सुधाधिकम्। सर्व्वं विप्रा जलं मूत्रमनिवेद्य हरेर्नृप। भवन्ति सूकराः सर्व्वे ब्रह्मघ्ना यदि भुञ्जते। श्राद्धीयं भुञ्जते विप्रा एकादश्यां न भुञ्जते। जन्माष्टम्यां शिवरात्रौ सुनिश्चितम्। तथा रामनवम्यान्तु यतयः पूर्णवासरे। ब्राह्मणानां स्वधर्म्मश्च कथितो वेधसा नृप!" ५६ अ०। शूद्रस्यब्राह्मणनियमा यथा "वेदं वेदौ तथा वेदानधीत्य तु समाहितः। तदर्थमभिजन्याच्च ततः स्नायाद् द्विजोत्तमः। गुरवे तु धनं दत्त्वा स्नायीत तदनुज्ञया। शीर्णव्रतोऽग्नि सुक्लात्मा स्नातकः स्नातमर्हति। वैणवीन्धारयेद्यष्टिमन्तर्वासमधोत्तरम्। यज्ञोपवीतसहितं शोदकञ्च कमण्डलुम्। जटाश्चोष्णीषमथवा मुण्डं चाप्युपानहौ। रौक्मे च कुण्डले धार्य्ये क्षौमवेषनखः शुचिः। स्वाध्याये नित्ययुक्तः स्याद्वर्हि स्नौल्यं न धारयेत्। अन्यत्र काञ्चनाद्दिभो न रक्षां विभृयात् क्वचित्। शुक्लाम्बरधरो नित्यं सुगन्धः प्रियदर्शनः। न जीर्णमलवद्वासा भवेच्च विभवे सति। न रक्तं वस्त्रमुत्सृष्टं वासो न कुत्सितक्वचित्। नोपानहौ क्वचिद्याच्य पादुके च प्रयोजयेत्। उपवीतमलङ्कारं कुर्य्यान्मृगाजिनानि च। नाधरेद्यं परीदध्याद्वासो न विलुतं क्वचित्। आचरेद्विधिवद्वीमान् सदाचारान्नयः शुभान्। अपतत्पक्षसंयुक्तां योनिदोषविवर्जिताम्। समानगोत्रप्रभवामसमानार्षगोत्रजाम्। आचरेद्ब्राह्मणो भार्य्यां शीलशौचसमन्विताम्। ऋतुकालाभिगामी स्याद् यावत् पुत्रोऽभिजायते। वर्जयेत् प्रतिषिद्धानि प्रयत्नेन दिनानि तु। अष्टम्यां पञ्चदश्यां द्वादश्यां च चतुर्दश्यां। ब्रह्मचारी भवेन्नित्यं तदभ्यासपरायणः। आदधीतावसथ्याग्निं जुह्वाज्ज्ञातवेदसम्। व्रतानि स्नातको नित्यं पावनानि च पालयेत्। वेदोदितं स्वकं कर्म्म नित्यं कुर्य्यादतन्द्रितः। यजमानः पतत्याशु नरकान्नात्रभीरुयात्। अभ्यसेत् प्रयतो नित्यं वेदं यज्ञान्न हापयेत्। कुर्य्यात् सदाग्नि कर्म्माणि सन्ध्योपासनमेव च। सख्यं समाधिकैः कुर्य्यादुपेयादीश्वरं सदा। देवतान्यपि गच्छेत् तु कुर्य्यान्नाभिषोषणम्। न धर्म्मख्यापयेद्विद्वान् न पापं गूहयेदपि। कुर्वीतान्वीक्षितं नित्यं सर्व्वभूतानुकम्पकः। वपसा कर्म्मणाऽर्जञ्च श्रुतस्याभिजनस्य च। देशवागबुद्धिसारूप्यमाचरन् विचरेत् सदा। श्रुतिस्मृत्युदितं सम्यक् साधुभिर्यच्च सेवितः। तमात्मवन्निषेवेत नेहेतान्यत्र कर्हिचित्। येनास्य पितरो याता येन याता पितामहाः। तेन यायात् सतां मार्गं तेन गच्छन्न रिष्यति। नित्यं स्वाध्याय शीलः स्यात्नित्यं यज्ञोपवीतवान्। सत्यवादी जितक्रोधो ब्रह्मभूयाय कल्पते। सन्ध्यास्नानरतो नित्यं ब्रह्मयज्ञपरायणः। ऋतुस्नुर्युर्दुर्दान्तो मृदुस्वः प्रत्ययान्वितः। वीतरागभयक्रोधो लोभमोहविवर्जितः। सावित्रीजापनिरतः श्रद्धावान् सत्यते मृदी। मातापित्रोर्हिते युक्तो गोब्राह्मणहिते रतः। दाता यज्वा देवभक्तो ब्रह्मलोके महीयते। त्रिवर्गसेवी सततं देवतानाञ्च पूजनम्। कुर्य्यादहरहर्नित्यं नमस्येत् प्रयतः सुरान्। विभागशीलः सततं क्षमायुक्तो दयालुकः। मृदुस्वस्तपसा युक्तो न मृदेऽपि मृदी भवेत्। क्षमादया च विज्ञानं सत्यञ्चैव दमः शमः। अध्यात्मनित्यता ज्ञानमेतद्ब्राह्मणलक्षणम्। एतस्माच्च प्रमाद्येत विशेषेण द्विजोत्तमः। यथाशक्ति चरन् कर्म्म निन्दितानि विवर्जयेत्। विधूय मोहकलिलं लब्ध्वा योगमनुत्तमम्। मृदुस्यो सत्यते ब्रह्मात्मात्र कार्य्या विचारणा। विगर्हितक्रमत्यक्तिंसाब्रह्मवधात्मकान्। अन्यमन्युसमुत्थानां दोषाणां वर्जनं क्षमा। मृदुः खेष्विव कारुण्यं परदुःखेषु सौहृदात्। दया यां सुनयः प्राहुः साक्षाद्धर्मस्य साधनम्। चतुर्दशानां विद्यानां धारणं हि यथार्थतः। विज्ञानमेतच्च विद्याद् देन धर्म्मो विवर्द्धते। अधीत्य विधिवद्विद्यामर्थञ्चैवोपलभ्य तु। धर्म्मकार्य्याण्यिहत्तश्चेद्व तद्विज्ञानमिष्यते। सत्येन लोकं जयति सत्यमन्तं परमं पदम्। यथाभूत प्रसादन्तु सत्यमाहुर्मनीषिणः। दमः शरीरावनतिः शमः ब्रह्मप्रसादजः। अध्यात्मगोचरं विद्याद्यत्र गत्वा न शोचति। यया स देवो भगवान् विद्यया शिव! वेद्यते। साक्षादेव महादेव! तज्ज्ञानमिति कीर्त्तितम्। तद्विज्ञानपरो विद्वान्निर्ममक्रोधनः शुचिः। महायज्ञपरो

विप्रो लभते तदनुत्तमम्। धर्मस्यायतनं यत्नाच्छरीरं परिपालयेत्। न हि देहं विना रुद्र! पुरुषैर्विद्यते परः। नित्यं धर्मार्थकामेषु युञ्जीत नियतो द्विज। न धर्मवर्जितं कामफलं वा मनसा स्मरेत्। लोदयेऽपि स्वधर्मेण न स्वधर्मं समाचरेत्। धर्मो हि भगवान् देवो गतिः सर्वेषु जन्तुषु। भूतानां प्रियकारी स्यान्न परद्रोहकर्मधीः। न वेददेवतानिन्दां कुर्यात्तैश्च न संवदेत्। यस्मिन् नियतो विप्रो धर्माध्यायं पठेत् शुचिः। स्वाध्यायेच्छाफलेहा ब्रह्मलोके महीयते"। कूर्मपु० १४अ०। "सूत उवाच। स्वाध्यायस्तु जपो यज्ञमक्षिंसा दमआर्जवम्। ध्यानं प्रसादो माधुर्यं मार्दवं लौकमेव च। इज्या दानं तपः सत्यं स्वाध्यायोऽात्मनिग्रहः। व्रतोपवासौ मौनञ्च स्नानं शैशुन्यवर्जनम्। एभिर्युक्तो द्विजश्रेष्ठा! यः सदा वर्त्तते द्विजः। श्रुत्वा तु पावकं पूर्वं परं ब्रह्माधिगच्छति। सविद्यो वा सविद्यो वा निरग्निः साग्निकोऽपि वा। यो विप्रस्तपसा युक्तः स परं स्वर्गमाप्नुयात्। सर्वेषामुत्तमं श्रेष्ठं विमुक्तिफलदायकम्। ब्राह्मणस्य तपो यज्ञे तस्मे निगदतः शृणु। स्नायं प्रातश्च यः सन्ध्यामुपास्तेऽखिन्नमानसः। जपन् हि पावनीं देवीं गायत्रीं वेदमातरम्। तपसा भावितो देह्या ब्राह्मणः पूतकिल्बिषः। न लोदेत् प्रतिगृह्णन् स त्वपि पृथ्वीं ससागराम्। हे सन्ध्ये शृणुतिष्ठेत गायत्रीं प्रयतः शुचिः। यत्तस्य दुष्कृतं नास्ति पूर्वतः परतोऽपि वा। यत्नदानरतो विद्वान् साङ्गवेदस्य पाठकः। गायत्री ध्यानपूतस्य कलां नार्हति षोड़शीम्। एवं किल्बिषयुक्तस्य विनिर्दहति पातकम्। उभे सन्ध्ये शृणुपासीत तस्माद्विप्रो द्विजोत्तमः"। तस्य देहापवित्रताहेतुः यथा "यथा देहापवित्रत्वं विप्रादीनां यतो भवेत्। देवर्षे! शृणु तत् सर्वं नराणामानुपूर्विकम्। जातके मृतके स्नाते जलौकाभिः कृते तथा। अपवित्रो द्विजादीनां देहः सन्ध्यादिकर्मसु। अपूततनूरुत्सर्गे नरो मूत्र पुरीषयोः। अस्पृश्यस्पर्शने चैव ब्रह्मयज्ञजपादिषु। रक्तपाते नखच्छेदनखड्गादिभिः कृते। विप्रादेरशुचिः कायः मस्त्रस्रैः कण्टकादिभिः। भुक्तवस्त्रानलोच्छिष्टेऽपवित्रः मैथुने। शयने ब्राह्मणादीनां शरीरं क्षुरकर्मणि। ज्वरादिभिरतः शरीरोगैर्युक्ते द्विजन्मनाम्। वस्तुरप्यतं पूजादानहोमजपादिषु। घूमोद्गारे वमौ भाद्रपतितान्नादिभोजने। तथा च रेतस्त्यजने मत्वा, देहापवित्रता। अपवित्रं द्विजातीनां वपुः स्नाद्धादिदर्शने। गर्हितदानग्रहणे पतिते पातकादिभिः। अशौचान्तेन शुद्धिः स्नाप्लावते शेषते द्विज!। सर्ववर्णाश्रमादीनां ततोः सन्ध्यादिकर्मसु" पाद्मोत्तरखण्डे १०६अ०। २मन्त्रेतरवेदभागे न०ऋ०भाष्योपोद्घाते सायणाचार्यः तद्यथा "तत्र ब्राह्मणस्य लक्षणं नास्ति। कुतः? वेदभागानामियत्तानवधारणेन ब्राह्मणभागेष्वन्यभागेषु च लक्षणस्याव्याप्त्यतिव्याप्त्योः बाधयितुमशक्यत्वात्। पूर्वोक्तमन्त्रभाग एकः। भागान्तराणि च कानिचित् पूर्वेरुदाहृतं संदृब्धोतानि "हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः। परक्रिया पुराकल्पो व्यवधारणकल्पनेति"। "तेन ब्रह्म क्रियत" इति हेतुः। "तद्दध्नो दधित्वमिति निर्वचनम्२। "अमेध्या वै आपः" इति निन्दा३। "आयुर्वै घेषिष्ठेति" प्रशंसा४। "तद्रुचिकित्सा जुहवानीह मा क्षोदाइमिति संशयः५। "यजमानेन सम्मितोदुम्बरी भवतीति" विधिः६। "आपानेव ब्रह्म पचन्तीति" परक्रियः७। "पुरा ब्राह्मणा अभैषुः" इति पुराकल्पः८। "यावतोऽश्वान् परिस्रष्टोवाताद्यावतो वाहश्वांवतष्कशावान्विर्यावेदिति" विशेषावधारणकल्पना९। एवमन्यदप्युदाहार्यम्। न च हेत्वादीनामन्यतमं ब्राह्मणमिति लक्षणम्। मन्त्रेऽपि हेत्वादिसद्भावात्। "इन्द्रो वा एतमिति हीति" हेतुः। "उदानिषुर्मरीरिति तस्मादुदकमुच्यत इति" निर्वचनम्। "मोघमन्नं विन्दते अप्रचेताः" इति निन्दा। "अग्निर्मूर्धा दिवः ककुदिति" प्रशंसा। "अधः स्विदासीदुपरि स्विदासीदिति" संशयः। "वसन्ताय कपिञ्जलानालभेत" इति विधिः। "सहस्रमयुतं ददाविति" परक्रियः। "यज्ञेन यज्ञमयजन्त देवाः" इति पुराकल्पः। इतिकरणवच्छब्दं ब्राह्मणमिति चेत् न "इच्छदा इच्छयजया इच्छपच इति "ब्राह्मणो भवेत्" इत्यस्मिन् ब्राह्मणेन भाव्ये मन्त्रेऽतिव्याप्तेः। इत्याद्येतेनैव वाक्येनोपनिबद्धं ब्राह्मणमिति चेत् न "राजा चिदह भगं भक्षीत्याह यो मायाद्यं यातुधानेत्याह यो वा रक्षः। "शुचिरसीत्याहैते अनयोर्मन्त्रयोरतिव्याप्तेः। आख्यायिकाद्यं ब्राह्मणमिति चेत् न। यमयमीसंवादशुक्लादावतिव्याप्तेः। तस्मान्नास्ति ब्राह्मणलक्षणमिति प्राप्ते ब्रूमः मन्त्रब्राह्मणरूपौ हावेव वेदभागाविति स्वीकारात् मन्त्रलक्षणस्य पूर्वमभिहितत्वादशिष्टो वेदभागो ब्राह्मणमित्येतल्लक्षणं भविष्यति"।

ब्रा(ब्रा)ह्मणक पु॰कुत्सितार्थे कन्। कुत्सितब्राह्मणे। ब्राह्मणकर्मोक्तञ्च "एवमन्यो ब्राह्मणः स्यादन्यो ब्राह्मणको भवेत्" भा॰शा॰२७१अ॰उक्तेः। ब्राह्मणेन जातिमात्रेण कायति कै-क। २ब्राह्मणजात्यरहिते विप्रबन्धौ। संज्ञायाम् कन्। आयुधजीविब्राह्मणप्रधाने १देशे स्त्रि॰ ङीप्। ततः कोपधत्वात् क्व। ब्राह्मणकीय ततस्तस्मिन्नि त्रि॰।

ब्रा(ब्रा)ह्मणकाम्या स्त्री ६त॰। १विप्रेच्छायाम् उपचारात् २तद्विषये च "अष्टौ तान्यप्रतन्नानि आपो मूलं फलं पयः। हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम्" प्रा॰त॰।

ब्रा(ब्रा)ह्मणचक्षुस् न॰ ब्राह्मणस्य सर्वार्थप्रकाशकत्वात् चक्षुरिव। "श्रुतिस्मृतो च विप्राणां चक्षुषी देवनिर्मिते। काणत्वमेकया हीनो द्वाभ्यामन्धः प्रकीर्त्तितः" हरीतोक्ते सर्वार्थप्रकाशकत्वेन विप्रस्य चक्षुस्त्वख्ये वेदस्मृतिरूपे पदार्थे।

ब्रा(ब्रा)ह्मणचाण्डाल पु॰ ब्राह्मणचाण्डाल इव। शास्त्रनिषिद्धकर्मकारिणि अपकृष्टब्राह्मणे मनुः ६।८७।

ब्रा(ब्रा)ह्मणजातीय पु॰ ब्राह्मणजाति+स्वार्थे वन्धनि आत्वात् क्व प्रकृतिलिङ्गत्वातिक्रमः। ब्राह्मणजातियुक्ते

ब्रा(ब्रा)ह्मणजीविका स्त्री ६त॰। याजनाध्यापनप्रतिग्रहरूपायां ब्राह्मणवृत्तौ "ब्राह्मणा ब्रह्मयोनिस्था ये स्वकर्मण्यवस्थिताः। ते सम्यगुपजीवेयुः षट् कर्माणि यथाक्रमम्। अध्यापनमध्ययनं यजनं याजनन्तथा। दानं प्रतिग्रहश्चैव षट्कर्माण्यग्रजन्मनः। त्रयाणान्तु कर्मणस्त्रीणि कर्माणि जीविका। याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः" मनुः। ब्राह्मणवृत्तिरत्र स्त्री।

ब्राह्मणत्व अव्य॰ब्राह्मणाय देयम् त्व। विप्राय देयभिक्षार्थे

ब्रा(ब्रा)ह्मणप्रिय ६त॰। १विष्णौ "ब्रह्मण्यो ब्राह्मणप्रियः" विष्णुस॰। २विप्रहिते त्रि॰।

ब्रा(ब्रा)ह्मणब्रुव पु॰ ब्राह्मणं विप्रजातिमात्रतया आत्मानं ब्रवीति ब्रू-क वा॰ण वच्याटेशः। वेदतत्कर्महीने जातिमात्रोपजीविनि विप्रे "गर्भाधानादिसंस्कारैर्यो वेदोपनयनेन च। नाध्यापयति नाधीते स भवेद्ब्राह्मणब्रुवः" व्यासस॰। "जातिमात्रोपजीवी च कामं स्याद् ब्राह्मणब्रुवः। धर्मप्रवक्ता त्वतेन न तु मूढः कथञ्चन" मनुः। "समसत्र क्षत्रे दानं द्विगुणं ब्राह्मणब्रुवे" मनुः।

ब्रा(ब्रा)ह्मणयज्ञ पु॰ब्राह्मणमात्रकर्तृको यज्ञः या॰त॰। विप्रमात्रकर्तृके सौत्रामणीयज्ञे "ब्राह्मणयज्ञः सौत्रामण्यृद्धिकामस्य" कात्या॰श्रौ॰ १९।१।१। "ब्राह्मणयज्ञत्वं चास्य वेदैकयोनित्वार्थम् ऋद्धिकामस्य ब्राह्मणस्य नेतरयोर्वर्णयोरिति सौत्रामणीति कर्मनामधेयम्" कर्कः। "तस्मादेष ब्राह्मणयज्ञो यत् सौत्रामणी" श्रुतः ब्रा॰ १२।६।१।१।

ब्रा(ब्रा)ह्मणयष्टि स्त्री ६त॰वा ङीप्। (वामनहाटी) १हस्तभेदे २विप्रदण्डे च स्वार्थे क। अत्रैव अमरः।

ब्रा(ब्रा)ह्मणलक्षण न॰६त॰। विप्रत्वाधारत्वे धर्मभेदे तच्च वसिष्ठोक्तं यथा "योगस्तपोदमोदानं सत्यं शौचं दया श्रुतम्। विद्या विज्ञानमास्तिक्यमेतद्ब्राह्मणलक्षणम्। सर्वत्र दान्ताः श्रुतपूर्णकर्णा जितेन्द्रियाः प्राणिवधे निवृत्ताः। प्रतिग्रहे सङ्कुचितापहस्ताः ते ब्राह्मणास्तारयितुं समर्थाः"।

ब्रा(ब्रा)ह्मणयज्ञ न॰ ब्राह्मणस्य यज्ञमिव तत्कार्यकारित्वात्। अभिचारादिमन्त्रोच्चारणात्मके विप्रवाक्ये "वाक् यज्ञं वै ब्राह्मणस्य तेन इन्यादरीन् द्विजः" मनुः। "यस्मादभिचारमन्त्रोच्चारणात्मिका ब्राह्मणस्य वागेव यज्ञं यज्ञसाध्यकार्यकारि" कुल्लू॰।

ब्रा(ब्रा)ह्मणसम पु॰ ६त॰। "ब्रह्मणीजन्मतत्पन्नो मन्त्रसंस्कारवर्जितः। जातिमात्रोपजीवी च स भवेद् ब्राह्मणः समः" व्यासोक्ते क्रियारहिते विप्रे

ब्रा(ब्रा)ह्मणाच्छंसिन् पु॰ब्राह्मणे मन्त्रेतरवेदभागे विहितानि यज्ञादि उपचारात् ब्राह्मणानि तानि शंसति हितोपायार्थं पठत्यनुसंस्थानम् तच्छः "ब्राह्मणाच्छंसिन उपसंख्यानम्" वार्त्ति॰ अनुक्। ब्रह्मरूपस्य ऋत्विजः सहकारिणि ऋत्विग्भेदे यज्ञावाकशब्दे ८५पृ॰दृश्यम्। अत्र कचिद्विशेषोऽभिधीयते। षोडर्त्विजां मध्ये प्रधानभूतान् चतुर उक्त्वा कात्या॰श्रौ॰७।१।८-१०। उक्तं यथा "तत्पुरुषा इतरे यथावेदम्" सू॰। "इतरे द्वादशर्त्विजो तेषामाद्यानां ब्रह्मादीनां चतुर्णां पुरुषाः आदेशकारिणोऽनुचराः सेवकाः यथावेदमिति ये यद्वेदविहितस्य कर्मणः कर्त्तारस्ते तत्पुरुषाः यथावेदमिति ये ब्रह्मपुरुषा न भवन्ति इति तान् स्वयमेवाह" कर्कः "ब्राह्मणाच्छंस्यग्नीत्पोतारो ब्रह्मणः" सू॰। प्रधानपुरुषवरणेन तदङ्गवर्त्तित्वात्तेऽपि इता एव भवन्ति प्रधानपुरुषे कार्यान्तरासक्तेऽन्यान् गते वा तदीयं कर्म तत्पुरुषैरेव कर्त्तव्यम् नान्यपुरुषैरिति पुरुषार्थानपि पूर्वपूर्वेण करणसम्बन्धे नोत्तरेण। तस्य भावः कर्म वा "ब्रह्मणस्त्वः" पा॰ त्व। ब्राह्मणाच्छंसीय तद्भावादौ

ब्रा(ब्रा)ह्मणादि पु॰ भावे कर्मणि चार्थे ब्रह्मणस्त्वतलौ निमित्ते शब्दगणे स च गणः "ब्राह्मण बाडव माणव (ब्रह्मणोऽस्य

व) चोर धूर्त्त आराधय विराधय अपराधय उपराधय एकभाव द्विभाव त्रिभाव अन्यभाव अचेतन संवादिन् संवेशिन् संभाषिन् वडभाषिन् शौण्डातिन् विघातिन् समस्य विषमस्य परमस्य मध्यमस्य अनीश्वर कृपण चपल निपुण विपुल कृतज्ञ क्षेत्रज्ञ मित्र वाक्षिय अलम दुःपुरुष कापुरुष राजन् गणपति अधिपति गडुल टावाट विशस्ति विषम विपात निपात (सर्ववेदादिभ्यः स्वार्थे) (चतुर्वेटश्चोभयपदवृद्धिश्च) शौटीर° पा०म०सू०। ब्राह्मणादिराकृतिगणः। तेन चौचित्यादि।

ब्रा(ब्रा)ह्मणायण पुंस्त्री० ब्राह्मणापत्यं नडा० फक्। विप्रगोत्रापत्ये गुरुवंशजाते विप्रे त्रिका०।

ब्रा(ब्रा)ह्मणिक त्रि० ब्राह्मणस्य मन्त्रेतरवेदभागस्य व्याख्यानो ग्रन्थः ठक्। मन्त्रेतरवेदभागव्याख्याने ग्रन्थे।

ब्रा(ब्रा)ह्मण्य न० ब्राह्मणानां समूहः भावो वा ष्यञ्। १विप्रसमूहे। २ब्राह्मणधर्मे ३विप्रत्वे च।

आत्मन्तरगतस्य कारणविशेषाभावे ब्राह्मण्यप्राप्तिर्नास्तीति ब्राह्मण्यस्य दुष्प्रापत्वम् भा० २८ अ० मतङ्गोपाख्याने विस्तरेण उक्तं यथा "तिर्य्यग्योनिगतः सर्वो मानुष्यं यदि गच्छति। स जायते पुक्कशो वा चाण्डालो वाऽथ संशयम्। पुक्कशः पापयोनिर्यः कश्चिदिह जायते। स तस्यामेव सुचिरं मतङ्ग! परिवर्त्तते। ततो दशसते काले लभते शूद्रतामिति। शूद्रयोनावपि ततो बहुशः परिवर्त्तते। ततस्त्रिंशद्गुणे काले लभते वैश्यतामपि। वैश्यतायां चिरं कालं तत्रैव परिवर्त्तते। ततः षष्टिगुणे काले राजन्यो नाम जायते। ततः षष्टिगुणे काले लभते ब्रह्मबन्धुताम्। ब्रह्मबन्धुश्चिरं कालं तत्रैव परिवर्त्तते। ततस्तु त्रिंशते काले लभते क्षत्रपूर्वताम्। क्षत्रपूर्वश्चिरं कालं तत्रैव परिवर्त्तते। ततस्तु त्रिंशते काले लभते विप्रतामपि। तत्र प्राप्य चिरं कालं तत्रैव परिवर्त्तते। ततश्चतुःशते काले श्रोत्रियो नाम जायते"। एतच्च जात्यभिप्रायं संस्कारादिना तु विशिष्टब्राह्मण्यलाभः यथोक्तमङ्गिरसा "चित्रं कर्म यथाऽनेकैरङ्गैरुत्पद्यते नरैः। ब्राह्मण्यमपि तद्वत् स्यात् संस्कारैर्विधिपूर्वकैः"। २अनित्यत्वे पु० यज्ञदत्तादौ। तादृग्ब्राह्मण्यत्वाभिस्तु कर्मभेदात् यथा "मूर्द्धावसेचनमारोग्य ब्राह्मण्यादेव क्षीयते" इत्यादि।

ब्रा(ब्रा)ह्मणी स्त्री ब्राह्मणस्य पत्नी ङीप्। १ब्राह्मणस्य पत्न्यां ब्राह्मण्येयम् यञ् ङीप्। २ब्रह्मसम्बन्धिन्यां स्त्रियाम्। श्रुतौ च। "मनो मे ब्राह्मणं विद्धि वुद्धिं मे विद्धि ब्राह्मणीम्"। "ऋषीं ब्राह्मणीं विद्धि पुरश्चोत्तरारणिम्। तपःश्रुते चाभिमथ्नीतो ज्ञानाग्निर्जायते ततः" भा०आश्व०२४अ०।

ब्रा(ब्रा)ह्मीकन्द पु० ब्राह्म्या इव कन्दोऽस्य। १वाराहीकन्दे राजनि०। २ब्रह्मवांट्कायां स्त्रियाम्।

ब्रा(ब्रा)ह्म्य त्रि० ब्रह्मण इदं यञ्। १ब्रह्मसम्बन्धिनि स्त्रियां ङीप्। २विस्तरे २दक्षे च धरणिः।

ब्रा(ब्रा)ह्ममुहूर्त्त पु० ब्रह्मा देवताऽस्य अण् टिलोपः कर्म०। ऋक्षोदयात् प्रागवर्त्तिनि "रात्रेश्च पश्चिमे यामे मुहूर्त्तौ ब्राह्म उच्यते" "रात्रेश्च पश्चिमे यामे मुहूर्त्तौ यस्तृतीयकः। स ब्राह्म इति विख्यातो विहितः संप्रबोधने" आ० त० सुमन्तुना उक्ते दण्डद्वयात्मके काले

ब्रू कथने अदा०उभ०हिक०सेट्। ब्रवीति आह ब्रूते। अवोचत् अवोचत। उवाच ऊचतुः। अस्माद्धातोर्वचादेशोऽनित्यः तेन "विब्रूतिः कटके कृता"। ब्रूञ्+क्त इत्यादि सिद्धम्। अनु+पश्चात् कथने अनुवादे। वि+विरुद्धतया कथने विवादे च।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यसङ्कलिते वाचस्पत्याभिधाने वकारादि शब्दार्थसङ्कलनम्।

भ

भकारः पवर्गीयचतुर्थोवर्णो व्यञ्जनवर्णभेदः। तस्योच्चारणस्थानमौष्ठौ। अस्योच्चारणे आभ्यन्तरप्रयत्नः ओष्ठाभ्यां वक्तव्यस्य सर्वः अतस्तस्य सर्ववर्णता। बाह्यप्रयत्नाश्च संवारनादघोषाः महाप्राणश्च। तस्य ध्येयरूपं यथा "भकारं शृणु चार्वङ्गि! स्वयंपरमकुण्डली। महाशोभप्रदं वर्णं तरुणादित्यसंप्रभम्। पञ्चप्राणमयं वर्णं पञ्चदेवमयं यदा" कामधेनुतन्त्रम्। अस्य अधिष्ठातृदेवताध्यानं यथा "तडित्प्रभां महादेवीं नागकुण्डलशोभिताम्। षड्भुजां वरदां भीमां रक्तपङ्कजलोचनाम्। रक्तवस्त्रपरीधानां रक्तोत्पलशोभिताम्। पद्म-

वैर्गप्रदां देवीं साधकाभीष्टसिद्धिदाम्। एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्"। अस्य वाचकशब्दाः यथा "भः क्षिप्रा भ्रमरो भीमो विश्वमूर्त्तिर्निशाभवम्। हिरण्डो भूयोभूर्भः यत्सवितृप्रकाशकः। नक्षत्रं भमथा दीप्तिर्योभूमिः पयो नभः। नाभिर्भद्रं महाबाहुर्विश्वमूर्त्तिर्विनायकः। प्राणात्मा तापिनी वज्रा विश्वरूपी च चन्द्रिका। भीमसेनः सुधासेनः सुखी मायापुरं हरः"। वर्णाभिधानम्। माहकान्यासेऽस्य नाभौ न्यास्यता काव्यादावस्य प्रयोगे "सुखमयमरथक्लेशदुःखं पवर्गः" इ०टी० शक्तेः क्लेश फलम्।

भ्रु म० भाति भा–क। १नक्षत्रे अमरः। २यक्षे शब्दरत्ना०। ३राशौ ज्यो०त०। ४शुक्राचार्ये पु० मेदि०। तेषां दीप्तिमत्त्वात् तथात्वम्। ५भूधरे एकाक्षरकोषः। ६भ्वान्तौ पु० शब्दरत्ना०। इ०र०शक्तौ ओजादिगुणके अन्यलक्षणे वर्णितवे। तस्य काव्यादौ प्रयोगे फलं यशः देवताचन्द्रः यथोक्तं इ०र० टीकायाम् "भचन्द्रो यश उच्यतम्"। [पाठौ क्ष० १०।१६३।

भंसस् पु० भवत् कटिदेशः पृषो०। उपचारात् तत्सम्बन्धिनि

भकार पु० भ+स्वरूपे आर। भस्वरूपे वर्णे।

भक्तशा स्त्री इत०। नक्षत्रकक्षायाम्।

"भवेत् भक्तशा तिगमांशोर्भमण्डं मरितार्द्धितम्। सर्वोपरिष्टाद्भ्रमति योजनैर्भूमण्डलम्" सू० सि०। "सूर्यस्य भ्रमणं कक्षापरिधिमानं योजनात्मकम्" "खखार्थैकसुरार्णवाः" ४३१ १२०० इति वक्ष्यमाणं षट्त्रागुणितं सत् नक्षत्राणां कक्षा नक्षत्राधिष्ठितगोलस्य मध्यवृत्तं स्यात्। तैर्नक्षत्रकक्षाभितैर्योजनैर्भमण्डलं नक्षत्राधिष्ठितगोलमध्यवृत्तं सर्वोपरिष्टाच्चन्द्रादिसप्तग्रहेभ्य उपरि दूरं भ्रमति भूगोलाद्भितः परिभ्रमति"रङ्गना०।

भकूट न० इत०। विवाहे दम्पत्योः शुभाशुभसूचके राशिसमूहे तस्य शुभाशुभत्वं च उपयमशब्दे १२६१ पृ०दृश्यम्। "खेटारित्वं नाशयेत् सत् भकूटम्"। "प्रोक्ते दुष्टभकूटके परिणयः" सङ्ग० तत्रैव दृश्या। [शब्दार्थकल्पतरुः।

भक्तिका स्त्री फक्किका+पृषो०। (फक्कि) ख्याते कीटभेदे

भक्त पुंन० भज–क्त। १अन्ने ओदने अमरः। २भक्तियुक्ते शतदालके तण्डुले ३विभक्ते ज्ञातभागे च त्रि०"भक्तो हरः शुध्यति यदशुद्धः स्यात्" वीरा। अन्नपाकप्रकारस्तद्गुणश्च भावप्र० उक्तो यथा

"सुधौतांस्तण्डुलान् स्वीतांस्तोये पञ्चगुणे पचेत्। तद्वत्तं प्रहतक्लेदं विशदं सुखवन्नतम्। भक्तं वह्निकरं पथ्यं तर्पणं रोचनं लघु। अधौतमहतं शीतं गुर्वरुच्यं कफप्रदम्"।

भक्तियुक्तत्वाद्यादिकं तद्भेदश्च शक्त्याफले उक्तं यथा "सकलमनः कृष्णपदारविन्दयोर्निवेशितं तद्गुणरागि यैरिह" "ते भक्ताः इति लक्षणं च नवधाश्रवणादिनवविधरसास्वादमूलत्वेन नवविधत्वात्"। रसभेदे भक्तिविशेषाः शक्त्याफले दर्शिताः यथा "तस्य तत् खेलनं दृष्ट्वा गोप्यः प्रेमपरिप्लुताः। द्रोहिताः प्रेक्ष्य चान्योऽन्यं जातहासा न निर्ययुः"भाग०१०।१२अ०तथाच हासे गोप्यः सम्भोगशृङ्गारे गोप्यादयस्तत्र दर्शिताः। विप्रलम्भशृङ्गारेऽपि गोप्य स्तत्र दर्शिताः। "अलब्धेङ्गताः काश्चिद्गोप्योऽलब्धविनिर्गमाः। इत्यादितद्भावनायुक्ता दध्युर्मीलितलोचनाः। दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः। ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या क्षीणमङ्गलाः। तमेव परमात्मानं जारबुद्ध्याऽपि सङ्गताः। जहुर्गुणमयं देहं सद्यः प्रक्षीणबन्धनाः। अन्यानि रासपञ्चाध्यायीवाक्यानि तत्तोदाहृतानि द्रष्टव्यानि। करुणरसेऽर्जुनादयः। वाक्यानि तत्र द्रष्टव्यानि। रौद्ररसे शिरच्छ्रकपिशुपिशुपालादयः। भायानकरसे कंसादयः। बीभत्सरसे दुरुदरवाःपिङ्गलादयश्च। शान्तरसे नारदादयः। अद्भुतरसे श्रीदामब्रह्मादयः। वीररसे बलिप्रह्लादयः। तत्र दानवीरे बलिः धर्मवीररसे कपिध्वजादयः। युद्धवीरे शिशुपालादयः। एतेषां मूलवाक्यानि तत्र द्रष्टव्यानि। अधिकं भक्तिशब्दे द्रष्टव्यम् "भक्तानां लक्षणं लक्ष्मि! गूढं श्रुतिपुराणयोः। पुण्यस्वरूपं पापघ्नं दुष्टदं भक्तिवर्द्धिदम्। सारभूतं गोप्यजीवं न वक्तव्यं खलेषु च। गुरुब्रह्मविष्णुमन्त्रो यस्य कर्णे विराजते। वेदवेदाङ्गवेदान्तास्तं पवित्रं वदन्ति हि। पुरुषाणां शतं पूर्वं पूतं तज्जन्ममात्रतः। स्वर्गस्थं नरकस्थं वा मुक्तिमाप्नोति तत्क्षणात्। यैः कैश्चिद् यत्र वा जन्म दत्तं देवेषु च जन्तुषु च। जीवन्मुक्तास्ते च पूता यान्ति काले हरेः पदम्। मद्भक्तियुक्तो मत्पूजानियुक्तो मद्गुणाश्रितः। मद्गुणश्रवणीयश्च सन्निविष्टश्च सततम्। सगद्गदः साश्रुनेत्रः स्वात्मविस्मृत एव च। न वाञ्छति सुखं मुक्तिं यावोक्तादिचतुष्टयम्। ब्रह्मत्वममरत्वं वा तद्वाञ्छा मम सेवने। इन्द्रत्वञ्च मनुत्वञ्च देवत्वञ्च सुदुर्लभम्। स्वर्गराज्यादिभोगांश्च स्वप्ने च न हि वाञ्छति। ब्रह्मज्ञानानि विनश्यन्ति देवा ब्रह्मादयस्तथा।

कल्याणभक्तिवृक्षस्य मङ्गलो न प्रसज्यति। भवन्ति भारते भक्ता लब्ध्वा जन्म सुदुर्लभम्। तेऽपि यान्ति मर्त्यीं पूत्वा परं तीर्थं मनोलयम्" ब्रह्मवै० प्र० ५ अ०। "रतिः कृष्णकथायाञ्च यस्यास्तु पुलकोद्गमः। मनो निमग्नं यस्यैव स भक्तः कथितो बुधैः। पुत्रदारादिकं सर्वं जानाति श्रीहरेरपि। आत्मना मनसा वाचा स भक्तः कथितो बुधैः। दयास्ति सर्वभूतेषु सर्वं कृष्णमयं जगत्। यो जानाति महाज्ञानी स भक्तो वैष्णवोत्तमः" ब्रह्मवै० जन्म० १अ०। त्रिविधभक्तलक्षणं यथा "भक्तानां त्रिविधानाञ्च लक्षणं श्रूयतामिति। हरणस्मारको भक्तो मङ्गलं गुणकीर्त्तिषु। मनोनिवेशयेत् लब्ध्वा संसारसुखकारणम्। दास्यं विना नरीच्छेत्तु सालोक्यादिचतुष्टयम्। नैव निर्वाणसक्तिञ्च सुधापानमभीप्सितम्। ध्यायते मत्पदाब्जञ्च पूजयेद्भक्तिभावतः। श्रीहेतुकास्तस्य देवा मङ्गलपरस्तितस्य च। सर्वसिद्धिं न वाञ्छन्ति तेऽणिमादिकमीप्सितम्। ब्रह्मत्वममरत्वञ्च सुखं मुक्तिकारणम्। न वाञ्छन्ति निजां भक्तिं मदीयामतुलामपि। स्त्रीपुंविभेदो नास्त्येव सर्वजीवेषु भिन्नता। तेषां सिद्धेश्वराणाञ्च प्रवराणां व्रजेश्वर!। क्षुत्पिपासादिकं निद्रां लोभमोहादिकं रिपुम्। लब्ध्वा दिवानिशं भाव ध्यायते च दिगम्बरः। स भक्तश्रेष्ठमोनन्द! श्रूयतां मध्यमादिकम्। नाशुभः कर्मसु रतो पूर्वप्राक्तनतः शुचिः। करोति सततञ्चैव पूर्वकर्मनिकृन्तनम्। न करोत्यपरं यस्मात् मङ्गल्यरक्षितस्तथः। सर्वं कृष्णस्य यत्किञ्चिद्दत्तं च कर्मणः। कर्मणा मनसा वाचा सततं चिन्तयेदिति। न्यूनभक्तश्च तस्यूनः स च प्राकृतिकः स्मृतः। यमं वा यमदूतं वा स्वप्नेन च न पश्यति। पुरुषाणां सहस्रञ्च पूर्वं भक्तः समुद्धरेत्। तुसां शतं मध्यमस्य तत्तुल्यञ्च प्राकृतः। भक्तश्च त्रिविधस्तात! कथितस्ते तवाग्रतः" इति तत्रैव ८३ अ०। भावे क्त। ५भजने न०।

भक्तकंस पुं० भक्तार्थः कंसः। भक्ताहरणार्थे कंसे "भक्ताख्यास्तदर्थेषु" पा० आद्युदात्तत्वम्।

भक्तकार पुं० भक्तं भजनं करोति कृ-ट। भूमे कृत्रिमभूमे यज्ञटच्०। [सूपकारे हेमच०।

भक्तकार त्रि० भक्तं करोति कृ-अण् उप०स०। पाचके

भक्ततूर्य्य न० भक्ते तद्भोजनकाले वादनीयं तूर्यम् मा०त०। भोजनकाले वादनीये वाद्यभेदे त्रिका०।

भक्तदास पुं० भक्तेन अन्नमात्रलाभेन दासः अङ्गीकृतदासभावः। पञ्चदशदासान्तर्गते दासभेदे। "भक्तदासश्च विज्ञेयः" इति स्मृतिः। दासशब्दे दृश्यम्।

भक्तपुलाक पुं० भक्तस्य पुलाक इव। सिक्थे अन्नमण्डे (माँड़) त्रिका०।

भक्तमण्ड पुं० ६त०। भक्तस्य निस्रावे (माँड़)। हेमच०।

भक्तवत्सल त्रि० ६त०। १भक्तेषु स्निग्धे २विष्णौ पु०। "माधवो भक्तवत्सलः" विष्णुस०।

भक्तसिक्थ पु० ६त०। भक्तमण्डे अमरः।

भक्ति स्त्री भज-क्तिन्। १सेवायाम् आराधनायां, २तद्देकताने चित्तवृत्तिभेदे ३विभागे ४गौरव्यां इष्टौ ५उपचारे ६व्यवहारे ७भङ्ग्याम् ८रचनायाञ्च "भवति विरलभक्तिः" रघुः। भक्तिलक्षणञ्च शाण्डिल्यसूत्रटीकायां यथा "सा परानुरक्तिरीश्वरे" सू० "अत्र सा परेति लक्ष्यनिर्देशः। शेषं लक्षणम्। परेति गौणीं व्यावर्त्तयति। ईश्वर इति प्रकृताभिप्रायम्। आराध्यविषयकरागत्वमेव भक्तित्वम्। इदं तु परमेश्वरविषयकानाद्यरण्यवृत्तिविशेष एव भक्तिस्तदैक्यं च लौकिकानुरागादौ उपचरम्। यदोक्तं परमभक्तिमता प्रह्लादेन। (विष्णु० । अंशे १।अ०२०। श्लो० १७)। "या प्रीतिरविवेकानां विषयेष्वनपायिनी। त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु"। अत्र प्रीतिपदेन सुखनियतो राग एव लक्षितः। अन्यथा प्रीतेः सुखरूपाया निर्विषयत्वेन विषयसम्प्रमो न स्यात् तस्याः सुखज्ञानरूपत्वेऽपि तज्ज्ञानस्य सुखविषयत्वाद्विषयविषयत्वासम्भवात्। तस्मादनुरक्तिरेव सविषयिणी लक्षिता। न च विषयजन्यप्रीतिरर्थः अनुक्तप्रश्न्या अननुगमनात्। किञ्च "अच्युतासु सदा त्वयि" इत्यत्र भक्तेरीश्वरविषयतासिद्धौ प्रीतिपदेनापि तदेकवाक्यतया सैवोच्यते। पूर्वं प्रतिजन्म भक्तिप्रार्थनसिद्धं तु विषयरागदशायां न तस्या एव सर्वान्यपरिहार्यत्वप्रार्थनमिति विशेषः। विषयजन्यप्रीतिरपि रागं विना न सम्भवतीति रागालक्ष्यत्वम्। तथा च पातञ्जलसूत्रम्। (पा०२।सू० ७प्र०७८) "सुखानुशयी रागः" इति। तत्रैव वक्ष्यमाणचित्तेषु व्यापनाद्व्याप्यत्वाच्च भक्तित्वम्। न तु क्वचित् स्मरणत्व, क्वचिच्च कीर्त्तनादेः अननुगमात्। न च तज्ज्ञानस्य तत्त्वं ईक्षादिमत्त्वञ्च तत्प्रसङ्गात्। नाथाराध्यत्वेन ज्ञानं सा पूजानमस्कारादाराधनाश्चननुगमात्। अपि च बलाद्व्याद् वा नमस्कार्यत्वादिज्ञानवत्यपि भक्तोऽयमनुरक्तोऽयमिति व्यवहारापत्तेः। अत-

रागादिसहितारोध्यत्वज्ञानमिति चेत् अनुराग एवास्तु अतएव गो०।अ०१०। श्लो०६) । "मच्चित्तामद्गतप्राणा बोधयन्तः परस्परम्। कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च। तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्। ददामि बुद्धियोगं तं येन मामुपयान्ति ते" इत्यादौ मद्गतचित्तप्राणादीनां भजनसङ्गं नाराध्यत्वेन ज्ञानवताम्। अतएव च लक्ष्मण कमनीयाकृतिदर्शनेनानुरक्तानां गोपतरुणीनामपि भक्तिफलं मुक्तिः श्रूयते। अत्रस्तु न लक्षणान्तर्गतः किन्तु भगवन्मुखादिज्ञानादनुपपद्यमानत्वादनुरक्तिरित्युक्तम्। ननु पित्रादिगोचरानुरागस्यापि प्रकृतभक्तित्वं प्रसज्येत जगत एव परमेश्वरात्मकत्वात्। अथ विकारादिशिष्ट एव तथात्वं वाच्यं तथापि गोपीप्रभृतीनां प्रादुर्भावावच्छिन्नेश्वरभक्तावव्याप्तम्। उच्यते जीवोपाध्यनवच्छिन्नचेतनविषयिणी अनुरक्तिरेव येति। एवञ्च प्रादुर्भावावच्छिन्ने परिपूर्णे च भक्तिः संपद्यते भवति" टीका। "ततसंख्यस्यामृतत्वोपदेशात्" १सू० "तच्छ्रोत्रेश्वरे संस्था भक्तिर्यस्य स तथोक्तः। तस्यामृतत्वं फलमुपदिश्यते (छा०।पृ० १२७) "ब्रह्मसंस्थोऽमृतत्वमेतीति"। तत्रानित्यफलत्वगोचफलत्वनिबन्धना तदजिज्ञासा परिहृता भवतीति" टी०। "ज्ञानमिति चेन्न द्विषतोऽपि ज्ञानस्य तदवस्थितेः" ४सू० "ननु ब्रह्मसंस्थाशब्देन ब्रह्मज्ञानमेवोच्यते न तु तद्भक्तिः। तथाचामृतत्वफलं तस्यैवेति चेदुच्यते। नैष दोषः। संस्था भक्तिरेव न ज्ञानं द्विषतस्तज्ज्ञानवतोऽपि तत्संस्थत्वव्यवहारानुपपत्तेः। राजाद्यनुरक्ताः खल्वमात्यमित्रादयस्तत्संस्था इति व्यपदिश्यन्ते न पुनः प्रतिपक्षभूपालाः। शब्दार्थनिर्णयो हि लोकवदेव वेदेऽपीति। अतएव चिरकालिकोपाख्याने "विस्मृयते न कालेन पत्नीसंस्था व्यतीक्रमः। सोऽग्नीन्न्यं तप्तो दुःखेनाभूषि वर्तयन्" । (महाभा० शा० अ० २६७ श्लो० ५५२६) इत्यनेन पतिभक्त्यतिक्रम उक्तः। तस्मात् संस्था भक्तिरिति एवञ्च (ब्रह्मसू०।अ०१।पृ०७)"तच्छ्रुतेः शब्दादिति बादरायणोऽवस्तुतत्साध्यमेवार्थोऽध्यवस्येत्" टी० "तयोपपत्तेश्च ६सू०। "तया भक्त्या मुक्तिं प्रति ज्ञानस्यापीष्टं यस्माद्वक्ष्यति उक्तयुक्तिसमुच्चयार्थः (गी०।अ०७।श्लो० ११)। "यदा ते निश्चलं चेतो मयि भक्तिसमन्वितम्। तदा त्वं मत्प्रसादेन निर्वाणमपि यास्यसि" इति स्मृतम्। ननु (श्वे०।पृ०।७२) "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इत्यत्र वेदनफलं मुक्तिः श्रुता तद्विरोधेन श्रुतीनामन्यार्थत्वं स्यादिति चेन्न अत्रापि तयैवोपपत्तेः। तथा हि अतिमृत्युपदं न मुक्तौ रूढं किन्तु यस्मात् मृत्योरतिक्रम इति व्युत्पत्त्या तदपेक्षया यतो भक्तेर्मृत्यतिक्रम इति व्युत्पाद्य भक्तिमेवातिमृत्युपदेनाभिधत्ताम् उपपदविभक्त्यर्थापेक्षया कारकविभक्त्यर्थस्य बलवत्त्वात्। (गी०।अ०१२पृ०७)। "तेषामहं समुद्धर्ता मृत्युसंसारसागरात्। भवामि न चिरात् पार्थ! मय्यावेशितचेतसाम्"। इत्यादिना भक्तितो मृत्योरतिक्रमोक्तेः। अन्यत्र च भवति (तैत्तिरीयब्राह्मणभागे) "अग्न्यकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतादिति"। अत्र यजनं भक्तिः तथैव तत्कल्पव्याख्यानात् नचास्यां श्रुतौ भक्तेरसन्निधानं शङ्कावपि तुल्यत्वात्। तस्मादनयापि श्रुत्या ज्ञानस्योपक्षय एव प्रतीयत इति। ननु तथापि भक्तेरागरूपत्वे किं कारणमित्यपेक्षायामाह"टी०। "द्वेषप्रतिपक्षभावाद्वृषवद्वाच्च रागः"सू०। "भक्तिः खलु राग एव भवितुमर्हति कुतः द्वेषविरोधित्वात्। लोके हि द्वेष्टारं भक्तोऽयमिति विरोधिधर्मवति व्यवस्थियते तत्र द्वेषविरोधी च राग एव प्रसिद्धो न ज्ञानादिः। एवञ्च भगवति शिशुपालस्य द्वेषानुबन्धमभिधाय विष्णु पु० अ० ४ १५ गद्येन । "अयं हि भगवान् कीर्त्तितः संस्मृतश्च द्वेषानुबन्धेनापि अखिलसुरासुरदुर्लभं फलं प्रयच्छति किमुत सम्यगभक्तिमताम्" इत्युक्तम्। तथा चात्रिस्मृतौ "विद्वेषादपि गोविन्दं दमघोषात्मजः स्मरन्। शिशुपालो गतः स्वर्गं किं पुनस्तत्परायणः" इति अत्रापि द्वेषविरोधित्वेन भक्तेरभिधानात्। तथा च गीतासु (गी०अ०१६। श्लो०१८)। "अहङ्कारं बलं दर्पं कामं क्रोधं संश्रिताः। मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः। तानहं द्विषतः क्रूरान् संसारेषु नराधमान्। क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु। आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि। मामप्राप्यैव कौन्तेय! ततो यान्त्यधमां गतिम्। इति। तद्विरोधिनी च भक्तिरीश्वरविषयैवानुरक्तिरिति युक्यते। किञ्च (तैत्ति०। पृ०१००) "रसं ह्येवायं लब्ध्वानन्दीभवतीत्यत्रादृ ब्रह्मानन्दाविर्भावसङ्केतं ब्रह्मगोचरस्य रसस्य हेतुतावगम्यते। रसश्च रागः (गी०।अ० २। श्लो० ५६)। "रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्त्तते" इत्यादौ प्रसिद्धः। अत

रसो विषयरागः। अत एव च (विष्णु० अं० ४। अ० ४ मन्त्रम्) रामलक्ष्मणादीनां खलौकारोऽपशब्दा "येऽपि तेषु भगवद्द्वेषानुरागिणः कोशलनगरज्ञानपदार्थेऽपि तन्मनस्कतत्सलोकतामापुरिति" साक्षादेव भक्तावनुरागशब्दः प्रयुक्त इति। तस्मादपि न ज्ञानं किन्त्वनुरागरूपैव भक्तिर्निःश्रेयसफलेति। ननु द्वेषविरोधित्वं न रागत्वे सिद्धम् उदासीनत्वेनानैकान्त्यादिति चेत् उच्यते द्वेषकार्यं हि निवृत्तिस्तद्विरोधिनी प्रवृत्तिरिति। भवति च भक्तानां भजनीयानुवर्त्तनादौ प्रवृत्तिस्तद्विरोधिनां तदनुवर्त्तनादौ निवृत्तिः। एवञ्च कार्यसख्येन विरोधमभिप्रेत्य द्वेषवदिति पक्षेत्युक्तम्। तथा च प्रयोक्तव्यं भक्तिर्भजनीयगोचररागरूपा तदनुवर्त्तनादिहेतुश्चित्तसाधनताधीभिन्नाश्रयविशेषगुणत्वाद् यत्रैवं तत्रैवं यथा द्वेषः। रागोत्कर्षेण तदनुवर्त्तनादुत्कर्षस्य दृष्टत्वाच्च। किन्तु यो यस्मिन् भक्तस्तत्र तदौदासीन्याभावेऽपि भक्तिस्तादृशानुवर्त्तनाद्यनुकूलद्वेषविरोधिगुणरूपा अनुवर्त्तनहेतुत्वाद्विशेषगुणत्वाच्चित्तसाधनताधीवदिति हितसाधनताधीत्वाधसङ्कारेण परिशेषाद्रागत्वसिद्धिः। किञ्चात्र भक्तिमतामिमित्तैतत्कैतुतिकन्यायो विरोधिन्येव दृष्टव्यः। (गी० । अ० ६। श्लो० ३२)। "मां हि पार्थ! व्यपाश्रित्य येऽपि स्युः पापयोनयः"। "किं पुनर्ब्राह्मणाः पुण्याः" इत्यादौ च। एवं (गी० अ० १६ । श्लो०१८) "मामात्मपरदेहेष्वित्यनेन द्वेषस्य संसारहेतुत्वात् तद्विरोधिगुणो जीवोपाधिपरिहारेण परात्मगोचरो राग एव भक्तिरूपः संसारनाशहेतुः। एतदेवोक्तं मामप्राप्यैवेति। चकारात् पुलकादिरागलिङ्गेनापि रागत्वम्। प्रसिद्धं हि "पुलकाद्यङ्कितेन कथयति मय्यनुरागं कोपेन" इत्यादौ। भक्तेर्गुणान्तरत्वे तु पृथगुल्लिङ्गताकल्पने गौरवात्। स च रागः क्वेषाद्विदिष्टसाधनताज्ञानजन्योऽपि यागादिवदिच्छारूप एव। अत्राकं तु प्रोक्षाम्यनुरक्ष्यामि नेच्छामीत्यादिप्रतीतेरागः पृथगेव द्वेषवत्। इच्छाया अविद्यमानविषयत्वाद्रागस्य सिद्धासिद्धविषयत्वाच्च। प्रत्युत तस्येच्छात्वादिव्यावृत्तकल्पनागौरवाच्चेति दिक्। तस्मान्न तद्व्यवधिर्विरिति। ननु भक्तिः क्रियात्मिका सा च निःश्रेयसाय न क्षमते (तैत्ति०। आरण्य०। त्रिशप्रश्ने वाक्य २१) "न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः" इत्यादिश्रुतिभ्य इत्याशङ्क्य परिहरन्नाह टी०। "न क्रिया ज्ञानमेवाज्ञानवत्" ७सू०। या भक्तिर्न क्रियात्मिका भवितुमर्हति प्रयत्नानुविधानाभावात्। यत्र प्रयत्नानुविधायि तत्र क्रियात्मकं यथा ज्ञानम्। तद्धि प्रमाणसम्बन्धधीनं न पुरुषेच्छया कर्तुमकर्तुमन्यथा कर्तुं शक्यते। तथा भक्तिरपि न हि रागिणां प्रमदापुत्रादिविषयिणी पुंव्यापारेण तथा भवति भक्तिः किन्तु पूर्वसुकृतगौणभक्त्यादिसाधनाधीनेति टी०। "अतएव फलानन्त्यम्" ८सू०। "यतः सा न क्रियात्मिका अतएव तत्फलस्य निःश्रेयसज्ञानत्वमुपपद्यते। अन्यथा (छा०। पृ०५३८) "तदयमेव कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयते" इत्यनेनाक्षतत्वमपि क्षयित्वं प्रसज्येतेति टी०। "ततः प्रवृत्तिशब्दाच्च न ज्ञानमिवरप्रवृत्तिवत्" ९सू०। "भवति हि भगवद्वाक्यं (गी०। अ० ७। श्लो० १९) "बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते। वासुदेवः सर्वमिति स महात्मा सुदुर्लभः" इति। ज्ञानवतः प्रवृत्तिरुक्ता भक्तेर्ज्ञानहेतुत्वे नेदमुपपद्यते इतरप्रवृत्तिवदिति। यदा तदनन्तरं (गी०। अ० ७। श्लो०२०)। "कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः"। इत्यनेन देवतान्तरप्रवृत्तिनिन्दासङ्गेनैव प्रवृत्तिः स्तूयते। तत्र देवताभक्तेरेव प्रवृत्तिशब्देन कथनं न तज्ज्ञानस्य। तस्या एव प्रवृत्तेरुभयत्र प्रत्यक्षितत्वात् इति। ज्ञानाज्ज्ञानानन्त्यमेवमपि ज्ञानत्वाभावे निदानम्। यथा (गी०।अ०१५। श्लो०१९)। "यो मामेवमसंमूढो जानाति पुरुषोत्तमम्। स सर्वविद्भजति मां सर्वभावेन भारत!" इति। तथा (गी०। अ०८। श्लो० १३)। "भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्। इति सत्वा भजन्ते मां बुधा भावसमन्विताः"। इति च। तस्माच्च ज्ञानात्मिका। यद्यपि रागत्वेनैव ज्ञानभेदः सिद्धस्तथापि भक्तिशब्दो ब्रह्मज्ञाने गौण इति शङ्कानिरासार्थमेतत्। इदन्तु चिन्त्यते भगवद्गीतावाक्यानि न शब्दविधया वेदवत् प्रमाणम्। किन्तु भारतस्मृतित्वेन तथा च कथं शब्दादिति निर्देशः। अत्रैकेऽनुमितशब्दादिति व्याचक्षते। अत्रोच्यते अदृष्टार्थकभगवद्वाक्यत्वमेव वेदत्वं तच्च गीताग्रन्थविशिष्टम्। अतएव भगवद्गीताशब्दयनिरुक्तिरिति दृश्यते, केवलं त एव श्लोका व्यासेन निबद्धाः तथा च पुराणान्तरम्। "गीता सुगीता कर्त्तव्या किमन्यैः शास्त्रविस्तरैः। या स्वयं पद्मनाभस्य मुखपद्मा-

द्विनिःसृता"। न च गूढार्थामश्रवणप्रसङ्गः भारतश्रवणाभ्यनुज्ञानेनैव तदुपपत्तेः प्रथमादिस्मृत्यादिवत्। तद्विज्ञावेति चेन्न तच्छ्रवणाऽपरिपूर्त्तेः। तथाचोक्तमाचार्यैः। "तानेव वैदिकान् मन्त्रान् भारतादिनिवेदितान्। स्वाध्यायनियमं कृत्वा श्रोकबुद्ध्या प्रयुञ्जते" टी०। (आ०। "एवमस्तत्वं प्रत्यनन्यसिद्धायां भक्तौ लक्षितायां ज्ञानयोगभक्तीनामङ्गप्रधानभावविवेकाय द्वितीयाद्विरारम्भः। "या तुल्येतरापेक्षितत्वात्" १० सू०। यद्विरुक्तमाप्तुं लक्षयितुं पुनः स्मरणाय सेति निर्देशः। सा परा भक्तिर्मुख्या प्रधानम् इतरैरात्मज्ञानयोगादिभिः स्वोपकार्यतयापेक्षितत्वादित्यर्थः। छान्दोग्ये (८।७।१) "यो भूमा तत्सुखम्" इत्याद्युपक्रम्य श्रावते "आत्मैवेदं सर्वमिति स य एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवतीति" तत्रात्मरतिरूपायाः परभक्तेः पश्यन्निति दर्शनमप्रियत्वादिस्मरणिरासमुखेनाङ्गं भवति। यथा "दक्षो प्रैषमन्वाह प्राचीनावीती दीक्षयति अभिजानन् जुहोति मनवान् सुखवानित्यादौ दक्षाद्यङ्गं तथा "दर्शनमपि रतेरङ्गं मननविज्ञानयोरुक्तप्रियदर्शनार्थतया न्यायप्राप्तयोरनुवादः। एवमात्मक्रीड़ादेरतिनैयत्यादसंप्राप्तोऽनुवाद एव। अन्यथा रत्युद्देशेन दर्शनादिविधौ दर्शनाद्युद्देशेन वा रत्यादिविधौ वाक्यानि भिद्येरन्। तथात् (पूर्वमीमांसायाम्। अ० ३। पा०१। सू० २) "शेषः परार्थत्वादिति" न्यायाद्दर्शनमङ्गमिति। अतएव भगवान् मनुरपि। (महाभार०। शान्ति०।अ०१८४। श्लो० ७१११।७११२)। "यस्मङ्गा प्राप्तुं कर्म नित्यमात्मरतिर्नित्यः। सर्वभूतात्मभूतात्मा स्वाच्चैव परमा गतिः"। इत्यनेनात्मरतेः प्राधान्यमाहेति टी०। "प्रकरणाच्च" ११सू०। "प्रकरणं रतेरेव फलत्वात् तच्छास्तत्प्रकरणस्थं दर्शनमङ्गं भवितुमर्हतीति टी०। "दर्शनफलमिति चेन्न तेन व्यवधानात्" १२सू०। "अथ दर्शनस्यैव फलं स्वाराज्यलक्षणमस्तत्वं तथा च तस्यैव प्रकरणमिति वैपरीत्यमिति चेन्न तेन तच्छब्देन व्यवधानात् (छां०। उ०८।१।७) स स्वराड् भवतीत्यत्र तच्छब्देन सन्निहितात्मरतिमानेवोपस्थाप्यते न विप्रकृतः पश्यन्निति व्यवहितोपस्थितौ कारणाभावात्। प्रकरणमेव कारणमिति चेन्न अन्योन्याश्रयात्" टी०। "दृष्टत्वाच्च" १३सू० "दृष्टं हि लोके सौन्दर्यादिज्ञानस्य तरुण्यादौ रतिहेतुत्वं न तु रतेस्तज्ज्ञानहेतुत्वमिति दृष्टोपकारत्वादप्यङ्गत्वमवसीयते। दृष्टं च प्राकृतनिष्कृष्टत्वात्त्वमक्षिमत्वादिप्रियत्वादिज्ञानं मनोमालिन्यकारणं भूतेषु करुणाबहुलाद्याकृतैश्वर्यातिशयितरूपाद्यज्ञ आत्मेति ज्ञानमालिन्यनिवृत्तिस्ततः परा भक्तिरिति। अतएव गीयते (गी०।अ०६। श्लो० १७)। "तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः। गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः। इति। तथा आयुर्वेदेऽपि (अष्टाङ्गहृदये। अ० १। श्लो० २१)। धीधैर्यात्मादिविज्ञानं मनोदोषौषधं परम्" टी०। "अतएव तदभावाद्बहुनीनाम्" १४सू०। "यतो ज्ञानं दृष्टोपकारकमङ्गमत एव दृष्टोपकारं निरस्य मनोमालिन्यादिबाधात् प्रधानभगवदनुरागमात्रेण बहुनीनां मुक्तिः श्रूयते। (विष्णुपुराणे। अंशे ५। अ० १३। श्लो० १४। १५। "तच्चित्तमाविशन्नात्मन्नीषत्पुण्यचया सती। तदाप्रभृत्यघविलीनाशेषपातका। चिन्वती जगतस्तुतिं परब्रह्मस्वरूपिणम्। निरूच्छ्वासतया मुक्तिं गतान्या गोपकन्यका" इति। अत्र सुखदुःखनिष्ठेनानुरागोऽनुभूयते न मुक्तिरिति वाक्यार्थः। द्वारबाधादनवच्छेदलक्षणेनापि कर्मणा फलविशेषेरिव तासां रागान्मुक्तिरुदाहरणमस्यते ज्ञानमङ्गमेव प्रधानत्वे तु तदभावे फलं न स्यात् चिन्ता च न ब्रह्मात्मैक्यज्ञानं तत्कारणश्रवणमननाद्यसम्भवात्। किन्त्वनुरागनियतानुमुक्षतिरेव। नचायमर्थवादः अपूर्वार्थत्वाभावात् सन्निधौ विध्यभावाच्चेति"टी०। "भक्त्या जानातीति चेन्नाभिप्रायाज्ञाब्दाच्चात्" १५सू०"इदानीं श्रुतिविरोधेन प्रकरणस्यानङ्गत्वबाधमाशिष्य समाधीयते। यथा श्रुतं (गी०। अ० १८। श्लो० ५५। "भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः। ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्"। इति। तत्र (तैत्तिरीयसं०। अ०१। प्र०५। अनुवाक०८) "ऐन्द्र्या गार्हपत्यमुपतिष्ठते" इतिवत् कारकश्रुत्या बलीयस्या भक्तेर्ज्ञानहेतुत्वमवसीयते। यद्यपि दृष्टत्वादित्यनेन दृष्टोपकारे प्रत्यक्षगम्ये न श्रुते, रुक्षाशः तथापि ब्रह्मविषयिण्या रतेर्ब्रह्मविषयज्ञानोपकार्यत्वं न प्रत्यक्षगम्यम्। किन्तु तरुण्यादे रतौ तथा दर्शनेन ब्रह्मगोचरायामप्यनुमातव्यम्। तथाच सिद्धत्वे पर्यवसानादिति चेन्न दोषः। तथाहि यदि केवलं जानातीति वदेन्न त्वेवम्। किन्त्वभिजानातीति। अभिज्ञा पूर्वज्ञातज्ञानमुच्यते। तथा च भक्त्युपकारिपूर्व-

ज्ञानं तत्फलरूपभक्तिप्रवर्त्तकम्। अनन्तरं यावत् तदर्थं भक्तेरभिन्नप्रभावेनाभेद्यते त्रीह्यवघातनेनावघातवदिति। कार्यसाङ्गाद्यार्थत्वं ततो ज्ञानदार्ढ्येन भक्तिदार्ढ्यं सति विस्मृत इति। तस्मात्रेयं श्रुतिः किन्तु न्यायप्राप्तानुवाद इति। एतमेवार्थं स्फुटीकरोति "टी०। "प्रागुक्तं च "१६सू०।"भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः। ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्" इत्यादिना। तस्य तु ज्ञानब्रह्मणो ज्ञानप्रयोजनाभावादनुवादत्वमिति "टी०। "एतेन विकल्पोऽपि प्रत्युक्तः" १७सू०। "एतेन ज्ञानब्रह्मत्वनिर्णयेन ज्ञानभक्त्योरत्र विकल्पपक्षोऽपि प्रत्युक्तः निराकृत इति मन्तव्यम्। नह्यङ्गाङ्गिनोरेकत्र विकल्पो भवतीति। कश्चिच्छब्दात् समुच्चयोऽपीति" टी०। "देवभक्तिरितरस्मिन् साहचर्यात्" १८सू०। "क्वचिदेवं श्रूयते (श्वेताश्व० पृ०११७) "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः" इति। अत्र देवभक्तिरीश्वरेतरस्मिन् देवे मन्तव्या कुतः गुरुभक्तिसाहचर्यात्। साहचर्यं हि नास्तफलायां भक्तौ घटते। इन्द्रादि देवताराधिताः शुभवज्ज्ञानफलाय भवन्तीति साहचर्यमपि निर्बीजम्। साहचर्यादुक्तशब्दवदुपयुक्तेरुपलक्षकमेतत्"११टी०। "योगस्तु भवार्थमपेक्षत्वात् प्रयाजवत्"१९सू०। "योगः पुनर्ज्ञानार्थं भक्त्यर्थं च भवति। समाहितमनस्कतायां उभाभ्यामपेक्षणात्। नन्तु (पूर्वमीमांसायाम्। अ०२। पा० १। सू० २१) "गुणानां च परार्थत्वादसम्बन्धः समत्वात् स्यादिति" न्यायात् प्रधानाङ्गं योगः कथमङ्गाङ्गिभिन्नत्व आह प्रयाजवदिति यथा प्रयाजो वाजपेयाद्यङ्गं तदीयदीक्षणीयादेरप्यङ्गं तद्वत्। तदङ्गत्वोधकप्रमाणाविशेषात्। केवलं ज्ञानार्थं योगानुष्ठानप्रसङ्गेन भक्तिमुपकरोतीति। एवं विषयवैराग्यमपि उभयार्थं मन्तव्यम्। ननु योगे पातञ्जलदर्शने २३सू०) "ईश्वरप्रणिधानादिति" पतञ्जलिकरणं "ईश्वरप्रणिधानं तत्र प्रणिधानाभिधेयस्य भगवद्भजनस्य समाधिसिद्ध्यर्थत्वमिति कथं भक्तेः प्राधान्यमिति चेत्आह"टी०।"गौणत्वात्तु समाधिसिद्धिः"२०सू०। तत्र प्रणिधानं गौणभक्तिरेव न प्रधानं तथा समाधिसिद्धिरिति न श्रुतिविरोधोऽपीति। भवति च वाक्यशेषत्वमेव (पा०द०३०.४१सू०) "तस्य वाचकः प्रणवः" "तज्जपस्तदर्थभावनमिति"टी०। "हेया रागत्वादिति चेन्नोक्तमाश्रयत्वात् सङ्गवत्"२१सू०।"योगशास्त्रप्रस्तावादिदं सूत्रम्। योगशास्त्रोक्तरागत्वाविशेषाद्भक्तिरपि सुतरां हेयैव। तथा च सूत्रं पा० द० ७२सू०) "हेयाः रागद्वेषाभिनिवेशाः क्लेशाः" इति। एवमुच्यते। नैवं वाच्यम् उत्तमाश्रयत्वाद्भक्तेः परमेश्वरविषयत्वादिति यावत्। न हि रागत्वमात्रेण हेयत्वं किन्तु संसारानुबन्धिरागत्वेनैव। यथा सङ्गत्वमात्रेण न त्याज्यता किन्तु असत्सङ्गत्वेन तद्वत्। तथा चेश्वरभक्तिर्हेया रागत्वादित्यत्र संसारानुबन्धित्वं मोक्षानुगुण्यं चोपाधिः। नच सात्त्विकी सा (गी०। अ० १७। श्लो०४) "यजन्ते सात्त्विका देवान्" इत्यादिना सात्त्विकत्वकीर्त्तनादिति"टी०। "तदेव कर्मज्ञानियोगिभ्य आधिक्यश्रवणात्" २२सू०"तदेव भजनं श्रेष्ठं तस्माद्भक्तेर्वैशिष्ट्यम्। एतत् सर्वत्रैव निश्चितं यस्मादेवं श्रूयते (गी०। अ० ६। श्लो० ४६। ४७)। "तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः। कर्मिभ्यश्चाधिको योगी तस्माद् योगी भवार्जुन। योगिनामपि सर्वेषां मद्गतेनान्तरात्मना। श्रद्धावान् भजते यो मां स मे युक्ततमो मतः" इति। अत्र विशेषज्ञानां तपआदीनामाधिक्यनिश्चये विशेषज्ञानामाधिक्यं क्रमादिति मन्तव्यम्। न चैतत्सूत्रं सुखादाधिक्यसूपपद्यते। तस्माद्भक्तिः प्रधानमिति। सुखार्थेनापि तदुत्पत्तिपरिहारार्थं पठति" टी०। "प्रश्ननिरूपणाभ्यामाधिक्यसिद्धेः" २३सू०। अत्र ज्ञातृत्वोऽपि दादशाध्याय उदाहरणम् (गी०। अ० १२। भक्तियोगशब्दे स च अध्यायो द्रष्टव्यः।

तल्लिङ्गानि च तत्रैवोक्तानि यथा

"तत्परिशुद्धिश्च तस्या लोकवल्लिङ्गेभ्यः" ४२ सू०।

"यद्यपि ज्ञानमोक्षादीत्यादिपदं भक्तेऽनुरक्ते इत्येवं ज्ञानादिना प्रत्यक्षगम्यैव भक्तिस्तथापि तस्या दृढतरसंस्कारवैशिष्ट्यसत्तया परिशुद्धिं प्रत्यक्षतो निर्णेतुं शक्यते ज्ञानप्रामाण्यवत्। तस्मात् तन्निर्णयो लोकवज्ज्ञातलिङ्गेभ्य एव। यथा लोकेऽनुरागतारतम्यं तत्कृतादाक्षुपुलकादिविकारैरनुमीयते तद्वदिति। न केवलं लोकवल्लिङ्गानि भवन्ति मद्भक्तैर्यां श्रुतिभ्योऽपि तानि लिङ्गानि वाहुल्येन लक्ष्यन्त इत्याह" टीका। "सम्मानबहुमानप्रीतिविरहेतरविचिकित्सामहिमख्यातितदर्थप्राणस्थानतदीयतासर्वतद्भावाप्रातिकूल्यादीनि च

ऽन्येभ्यो बहुत्वात् ४४ सू०। "यथार्जुनस्य सम्मानः। "अन्यत्स्थानं तु कृष्णस्य सर्वास्वो धनञ्जयः। न वक्तुयति धर्मात्मा भक्त्या प्रेम्णा च सर्वदा"। बहुमानःयथा दृश्यते (स्मृसिंहपु०अ०२५श्लो०२२) "पक्षपातेन तस्मिन्नि स्नेहे पद्मे च तादृशि। बभार मेघे तद्वर्णं बहुमानमतिं ऋषः"। प्रीतिर्यथा विदुरस्य। (भट्टाभारते। उद्यो०अ० ८८श्लो०२१।४)। "या प्रीतिः पुण्डरीकाक्ष! तवागमनकारणात्। सा किमाख्यायते तुभ्यमन्तरात्मासि देहिनाम्"। विरहो यथा गोपीनाम् (विष्णुपु०। अंशे५। अ०१८। श्लो०१७)"शुष्काभ्यतो वक्तुं किं ब्रवीमि न नः क्षमम्। गुरवः किं करिष्यन्ति दग्धानां विरहाग्निना"। इतरविचिकित्सा यथा श्वेतद्वीपनिवासिनाम्। नारददर्शनेऽपि विप्रवृद्धिः यथोपमन्योः (भट्टाभरते। अनुशा० अ० १४। श्लो० ७०७७)। "अपि कीटपतङ्गो वा भवेयं मधुराक्षर। न तु शक्र! त्वया दत्तं त्रैलोक्यमपि कामये"। भक्तिमस्त्वातो यथा यमस्य। (स्मृसिंहपुरा० अ०८श्लोक० २१) "नरके पच्यमानस्तु यमेन परिभाषितः। किं त्वया नार्चितोदेवः केशवः खेदनाशनः"। (विष्णुपु०। अंशे ३।अ७। श्लो०१०)। "अनुस्मरमभिद्योक्ष पाशच्छेदम्। वदति यमः किल तस्य कर्णमूले। परिहर मधुसूदनप्रपन्नान् प्रभुरहमन्यदृशां न वैष्णवानाम्" तदर्थपार्थस्थितिर्यथा हनूमतः। तेनैवोक्तम् (वाल्मीकीये उत्तरकाण्डे। स०१०७श्लो०२१२१)। "यावत् तव कथा लोके विचरिष्यति पावनी। तावत् स्थास्यामि मेदिन्यां तवाज्ञामनुपालयन्"। अथ वा ज्ञातज्ञानानामपि नारदादीनां तदेकाराधनार्थं प्राणधारणम्। अतएव स्मृतिः। (स्मृसिंहतापिनी। खं०६)"यं सर्वेदेवा नमन्ति मुमुक्षवो ब्रह्मादिनखेति"। तदीयतामात्रस्तु वसोरुपरिचरस्य (भट्टाभारते। शां०। अ० ३३७। श्लो० १३७।८) "आत्मराज्यं धनं चैव कलत्रं बान्धवं तथा। यत्किञ्चागतवत्तं सर्वमिति तत् प्रयते यदा" इति। सर्वभूतेषु तद्भावो यथा प्रह्लादस्य प्रसिद्धः। उक्तञ्च तेनैव। (विष्णुपु०। अंशे १। अ० १९। श्लो०५) "एवं सर्वेषु भूतेषु भक्तिरव्यभिचारिणी। कर्तव्या पण्डितैर्ज्ञात्वा सर्वभूतमयं हरिम्"। तस्मिन्नप्रतिकूलत्वं यथा कृतु भागतेऽपि भगवति भीष्मस्य। तेनैवोक्तम्। (भट्टाभारते भीष्मप०। अ० ५८ श्लो० २६४) "एष्यन्हि देवेश! जगन्निवास! नमोऽस्तु ते चाक्रगदाधराच्युत!। प्रसन्न मां पातय लोकनाथ। रथादुदग्रादुतधौर्य संख्ये"। आदिशब्दादुद्धवाक्रूरादिचेष्टितान्यपि दृष्टव्यानि। यद्यपि हेयविषयभावादित्यत्रेदमुक्तं तथापि तत्र रागलिङ्गत्वेनात्र च बहुभक्तिपरिशुद्धिलिङ्गतयेति विशेष इति। ननु स्वामिन्यनुरागिणां तदनुपकारतारतम्यवतश्च हेयोपादेयौ भवन्ति तेऽपि किं लिङ्गानि नेत्याह टीका। "हेयादयस्तु नैवम्" ४५सू०। "तदस्माद्देव। यथोक्तं भगवता द्वैपायनेन महाभारते अनुगी०। अ० १४६। पृ० १४६। श्लो० ७६६) "न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः। भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे" इति। शिशुपालस्य तु द्वेषात् स्मरणं ततः परा भक्तिस्ततो मुक्तिरित्येव क्रमः इति" टीका।

अत्रेदमवधेयम् शाण्डिल्यसूत्रादौ "भक्तेर्ज्ञानाङ्गत्वं यदुक्तं तद् भक्तेः प्रशंसार्थं तत्त्वज्ञानेनाज्ञानविनिवृत्तौ अज्ञानकार्यानुरागविशेषान्तःकरणवृत्तिरूपाया भक्तेः कृतरां सम्भवोऽतो ज्ञानस्यैव भक्तिरङ्गम्। अतएव पात०सू० ईश्वरप्रणिधानात् योगसिद्धिरुक्ता "तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगाः" क्रियायोगस्येश्वरप्रणिधानस्य योगाङ्गत्वसूत्रम् अतएव भक्तिर्ज्ञानाय कल्पते इति सूत्रकृतां योपदेव उदाजहार। दृश्यंस्तु भक्तौ रसास्वादसूत्रौ सुखरूपतेति।

तेन च सूत्रकृतापि भक्तिलक्षणं तद्भेदाश्चान्योक्ता यथा "तत्र विष्णुभक्तिर्लक्षणं भेदाश्च। "तस्मात् केनाप्युपायेन मनः कृष्णे निवेशयेत्" मू० "यस्मात् कृष्ण एव कैवल्यप्रदः यद्वा तस्मात् उपायविशेषत्वाविवक्षितत्वात्। केनापि विहितेन अविहितेन वा उपायेन साध्यसिद्धावभूतसामर्थ्येन, न तु ब्रह्मादिदिना कृष्णे सत्त्वोपाधौ ब्रह्मणि निवेशयेत् स्थिरीकुर्यात् लिङ्गनिर्देशस्त्वाविवक्षितत्वात् उपायपूर्वं भगवति मनःस्थिरीकरणं भक्तिरिति लक्षणार्थः। न तावदुपायसम्भवः ब्रह्मादौ सुप्रसिद्धत्वात्। न च कर्मज्ञानयोर्विधिसिद्धत्वयोः भक्तेरप्राप्तिः तयोरन्तःकरणशुद्धिहेतुत्वेन मनोनिवेशहेतुत्वात्। नाप्युपायादावभक्तिभूतेऽतिव्याप्तिः तस्यानुपायत्वेन निरस्तत्वात्। नापि शुद्धायां भक्तौ उपायानिर्देशादुपायेनेति लक्षणेऽनन्वयभूतमिति वक्तुम्। औत्तामावेऽप्यानुमानिकस्य सम्भवात्। सा द्वेधा विहिता अविहिता च। तत्र विहिता "देवानां गुणलिङ्गानामानुश्रविककर्मणाम्। सत्त्व एवैकमनसो वृत्तिः स्वाभाविकी तु या।

कनिमित्ता भागवती भक्तिः सिद्धेरपीयसी। जरयत्याशु या कोशं निगीर्णमनलो यथा"। सा द्वेधा मिश्रा शुद्धा च। मिश्रा त्रेधा। कर्ममिश्रा कर्मज्ञानमिश्रा ज्ञानमिश्रा च। कर्ममिश्रापि त्रेधा। तामसी राजसी सात्त्विकी च तामसी च त्रेधा। हिंसायां दम्भाद्यौ मात्सर्य्यायां च। "अभिसन्धाय यद्धिंसां दम्भं मात्सर्यमेव वा। संरम्भी भिन्नदृगभावमपि कुर्यात्स तामसः। राजसी त्रेधा। विषयार्थी यशोऽर्थी ऐश्वर्यार्थी च। "विषयानभिसन्धाय यश एश्वर्यमेव वा। अर्चायामर्चयेद् यो मां पृथग्भावः स राजसः। सात्त्विकी त्रेधा कर्मत्यागार्थी विष्णुप्रीत्यर्थी विधिसिद्ध्यर्थी च। "कर्मनिर्हारमुद्दिश्य परस्मिन् वा तदर्पणम्। यजेत यष्टव्यमिति वा पृथग्भावः स सात्त्विकः"। कर्मज्ञानमिश्रा त्रेधा उत्तमा मध्यमाऽधमा च सत्त्वतारतम्यात्। तत्रोत्तमा "सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः। भूतानि भगवत्यात्मन्येष भागवतोत्तमः। मध्यमा "ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च। प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः"। अधमा "अर्चायामेव हरये पूजां यः श्रद्धयेहते। न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः"। ज्ञानमिश्रा "मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये। मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ। लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम्। अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे। सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत। दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः। स एव भक्तियोगाख्य आत्यन्तिक उदाहृतः। येनातिव्रज्य त्रिगुणान् मद्भावायोपपद्यते"। अविहिता चतुर्धा, कामजा द्वेषजा भयजा स्नेहजा च। "कामाद् द्वेषाद् भयात् स्नेहाद् यथा भक्त्येश्वरे मनः। आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः"। भक्तिबाधकारित्वेन तत्रोक्ता यथा "गोप्यः कामाद्भयात् कंसो द्वेषाच्चैद्यादयो नृपाः। सम्बन्धाद् वृष्णयः स्नेहात् यूयं भक्त्या वयं विभोः"। सम्बन्धात् स्नेहाद्वृष्णयो यूयं चेत्येकम्। भक्त्या विहित या वयमित्यत्र विभागः। "निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु। तेष्वनिर्विण्णचित्तानां कर्मयोगस्तु कामिनाम्। यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान्। न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः। य एतान् मे पथो हित्वा भक्तिज्ञानक्रियात्मकान्। क्षुद्रान् कामान् चलैः प्राणैर्जुषन्तः संसरन्ति ते। स्वेऽधिकारे या निष्ठा स्वतः स प्रकीर्तितः"। एवं सति कर्ममिश्रा नव स्टहस्थानाम्। कर्मज्ञानमिश्राश्चित्रो वनस्थानाम्। ज्ञानमिश्रैका भिक्षूणाम्। शुद्धैका सर्वेषां स्वतन्त्रेऽनुरागे। स्वतन्त्रो हि यथा संमिश्रा। अविहिताश्चतस्रो गोप्यादीनाम् एवमष्टादश भेदाः। "यावद् जायेत परावरेऽस्मिन् विश्वेश्वरे द्रष्टरि भक्तियोगः। तावत् स्वीयः पुरुषस्य रूपं क्रियावसाने प्रयतः करेत। नैष्कर्म्यमप्यच्युतभाववर्जितम् न शोभते ज्ञानमलं निरञ्जनम्। कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम्"। विष्णुभक्त्यङ्गवर्गलक्षणं भेदाश्च तत्रोक्ता यथा "कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वानुसृतस्वभावात्। करोति यद् यत् सकलं परस्मै नारायणायेति समर्पयेत्तत्" इत्युपक्रमे स एकोनविंशतिधा। षड्विंशद्वर्गः१। त्रिंशद्वर्गः२। षड्विंशतिवर्गः३। पञ्चविंशतिवर्गः४। चतुर्विंशतिवर्गः५। त्रिंशतिवर्गः६। एकोनविंशतिवर्गः७। अष्टादशवर्गः८। पञ्चदशवर्गः९। त्रयोदशवर्गः१०। द्वादशवर्गः११। एकादशवर्गः१२। दशवर्गः१३। नववर्गः१४। सप्तवर्गः१५। षड्वर्गः१६। पञ्चवर्गः१७। चतुर्वर्गः१८। त्रिवर्गः१९। एते च यथोत्तरमन्तरङ्गवर्गाः। तत्र षड्विंशद्वर्गः "तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम्। शाब्दे परे च निष्णातो ब्रह्मण्युपशमाश्रयम्। तत्र भागवतान् धर्मान् शिक्षेद्गुर्वात्मदैवतः। अमाययानुवृत्त्या च यैस्तुष्येदात्मदो हरिः। सर्वतो मनसोऽसङ्गादौ सङ्गञ्च साधुषु। दयां मैत्रीं प्रश्रयञ्च भूतेष्वद्धा यथोचितम्। शौचं तपस्तितिक्षां च मौनं स्वाध्यायमार्जवम्। ब्रह्मचर्यमहिंसां च समत्वं द्वन्द्वसंज्ञयोः। सर्वत्रात्मेश्वरान्वीक्षां कैवल्यमनिकेतताम्। विविक्तचीरवसनं सन्तोषं येन केनचित्। श्रद्धां भागवते शास्त्रे निन्दान्यत्र चापि हि। मनोवाक्कर्मदण्डञ्च सत्यं शमदमावपि। श्रवणं कीर्तनं ध्यानं हरेरद्भुतकर्मणः। जन्मकर्मगुणानाञ्च तदर्थेऽखिलचेष्टितम्। इष्टं दत्तं तपो जप्तं वृत्तं यच्चात्मनः प्रियम्। दारान् सुतान् सदान् प्राणान् यत् परस्मै निवेदनम्। एवं कृष्णात्मनाथेषु मनुष्येषु च सौहृदम्। परिचर्या चोभयत्र महत्सु नृषु साधुषु। परस्परानुकथनं पावनं भगवद्यशः। मिथोरतिर्मिथस्तुष्टिः निवृत्तिर्मिथ आत्मनः। स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरं

हरिम्। भक्त्या संजातया भक्त्या बिभ्रत्युत्पुलकां तनुम्। क्वचिद्रुदन्त्यच्युतचिन्तया क्वचिद्धसन्ति नन्दन्ति वदन्त्यलौकिकाः। नृत्यन्ति गायन्त्यनुशीलयन्त्यजं भवन्ति तूष्णीं परमेत्य निर्वृताः। इति भागवतान् धर्मान् भक्त्या विश्वेनदुत्यया। नारायणपरो मायामञ्जस्तरति दुस्तराम्" भाग०११।३७०।

त्रिंशद्वर्गः "सत्यं दया तपःशौचन्तितिक्षेक्षा शमोदमः। अहिंसा ब्रह्मचर्यञ्च त्यागः स्वाध्याय आर्जवम्। सन्तोषः समदृक्सेवा ग्राम्येहोपरमः शनैः। नृणां विपर्ययेहेक्षा मौनमात्मविमर्शनम्। अन्नाद्यादेः संविभागो भूतेभ्यश्च यथार्हतः। तेष्वात्मदेवताबुद्धिः सुतरां नृषु पाण्डव!। श्रवणं कीर्त्तनं चास्य स्मरणं महतां गतेः। सेवेज्यावनतिर्दास्यं सख्यमात्मसमर्पणम्। नृणामयं परो धर्मः सर्वेषां समुदाहृतः। त्रिंशल्लक्षणवान् राजन् सर्वात्मा येन तुष्यति" भाग०७।११च०।

द्वात्रिंशतिवर्गः। "हरौ गुरौ मयि भक्त्यानुवृत्त्या विचक्षणया इन्द्रतितिक्षया च। सर्वत्र जन्तोर्व्यसनावगत्या जिज्ञासया तपसेहानिवृत्त्या। मत्कर्मभिर्मत्कथया च नित्यं महेश्वरात्मादृगुपाकीर्त्तनान्मे। निर्वैरसाम्योपशमेन प्रज्ञा! जिज्ञासया देहगेहात्मबुद्धेः। अध्यात्मयोगेन विविक्तसेवया प्राणेन्द्रियात्माभिजयेन सश्वक। सच्छ्रद्धया ब्रह्मचर्य्येण शश्वत्संप्रमादेन यमेन वाचाम्। सर्वत्र मद्भावविचक्षणेन ज्ञानेन विज्ञानविराजितेन। योगेन पृथुद्यमसत्त्वयुक्तो लिङ्गं व्यपोहेत् कुशलोऽहमाख्यम्" भाग०६।५च०।

षड्विंशतिवर्गः "स्वधर्माचरणं भक्त्या विधर्मान्नि वर्त्तनम्। दैवलब्धेन सन्तोष आत्मविद्वरपार्चनम्। श्रास्यधर्मनिवृत्तिश्च मोक्षधर्मरतिस्तथा। मितमेध्यादनं शश्वत् विविक्तक्षेममाचरनम्। अहिंसा सत्यमस्तेयं यावदर्थपरिग्रहः। ब्रह्मचर्य्यं तपः शौचं स्वाध्यायः पुरुषार्चनम्। मौनं सदासनजयः स्थैर्य्यं प्राणजयः शनैः। प्रत्याहारश्चेन्द्रियाणां विषयान्मनसो हृदि। दिष्यानामेकदेशे च मनसः प्राणधारणा। वैकुण्ठलीलाभिध्यानं समाधानं तथात्मनः। एतैरन्यैश्च पथिभिर्मनो दुष्टमसत्पथे। बुद्ध्या युञ्जीत शनकैर्जितप्राणो ह्यतन्द्रितः" भाग०२।२८च०।

सप्तविंशतिवर्गः "अहिंसासत्यास्तेयजनदर्शनस्पर्शनार्चनम्। प्रदक्षिणा स्तुतिः प्रह्वगुणकर्मानुकीर्त्तनम्। सत्कथाश्रवणे श्रद्धा मदनुध्यानमुद्धव!। सर्वलाभोपहरणं दास्येनात्मनिवेदनम्। मज्जन्मकर्मकथनं मम पर्वानुमोदनम्। गीतताण्डववादित्रगोष्ठीभिर्मदगृहोत्सवः। यात्राबलिविधानं च सर्ववार्षिकपर्वसु। वैदिकी तान्त्रिकी दीक्षा मदीयव्रतधारणम्। ममार्चास्थापने श्रद्धा स्वतः संहत्य चोद्यमः। उद्यानोपवनाक्रीडपुरमन्दिरकर्मणि। संमार्जनोपलेपाभ्यां सेकमण्डलवर्त्तनैः। गृहशुश्रूषणं मह्यं दासवद्वदमायया। अमानित्वमदम्भित्वं कृतस्यापरिकीर्त्तनम्। अपि दीपावलोके मे नोपयुञ्जाद्निवेदितम्। यद्यदिष्टतमं लोके यच्चातिप्रियमात्मनः। तत् तन्निवेदयेन्मह्यं तदानन्त्याय कल्पते। मद्वां सम्प्रतिष्ठाप्य मन्दिरं कारयेद्दृढम्। पुष्पोद्यानानि रम्याणि पूजायात्रोत्सवाश्रितान्। पूजादीनां प्रवाहार्थं मदा पर्य्यवहान्वहम्। क्षेत्रापणपुरग्रामान् दत्त्वा मत्सार्ष्टितामियात्। प्रतिष्ठया सार्वभौमं सप्तद्वीपं भुवनत्रयम्। पूजादिना ब्रह्मलोकं त्रिभिर्मत्सान्यतामियात्" भाग०११।२७६०।

त्रिंशतिवर्गः "सेवितेनानिमित्तेन स्वधर्मेण मदीयसा। क्रियायोगेन शस्तेन नातिहिंस्रेण नित्यशः। मद्भिश्चादर्शनस्पर्शपूजास्तुत्यभिवन्दनैः। भूतेषु मद्भावनया सत्त्वेनासङ्गमेन च। महतां बहुमानेन दीनानामनुकम्पया। मैत्र्या चैवात्मतुल्येषु यमेन नियमेन च। आध्यात्मिकानुश्रवणान्नामसंकीर्त्तनाच्च मे। आर्जवेनार्य्यसङ्गेन निरहङ्क्रियया तथा। मद्धर्माचरणैरेतैः परिसंशुद्धआशयः। पुरुषत्वाञ्जसाभ्येति श्रुतमात्रगुणं हि माम्" भाग०३।२८च०।

एकोनत्रिंशतिवर्गः "श्रद्धया भगवद्धर्मचर्यया जिज्ञासयाऽऽध्यात्मिकयोगनिष्ठया। योगेश्वरोपासनया च नित्यं पुण्यश्रवःकथया पुण्यया च। ब्रह्मेन्द्रियारामसगोष्ठ्यलक्षया तत्सम्मतानामपरिग्रहेण। विविक्तरुच्या परितोष आत्मन् विना हरेर्गुणपीयूषपानात्। अहिंसया पारमहंस्यचर्य्यया कृत्या सकन्दाचरितात्प्रमोषुना। यमैरकामैर्नियमैरनिन्द्या निरीहया इन्द्रतितिक्षया च। हरेर्गुणोत्तत्परकर्णपूरगुणाभिधानेन विजृम्भमाणया। भक्त्या हृषद्रुः सदसन्मनात्मनि स्वाप्नियुंधे ब्रह्मणि चाञ्जसा रतिः" भाग०३।२२च०।

अष्टादशवर्गः "मयि भावेन सत्येन मत्कथाश्रवणेन च। सर्वभूतसमत्वेन निर्वैरेणाप्रसङ्गतः। ब्रह्मचर्य्येण मौ-

नेन स्वधर्मेण मद्दीयसा। यदृच्छयोपपन्नेन सन्तुष्टो मितभुक् मुनिः। विविक्तशरणः शान्तो मैत्रः करुण आत्मवान्। सानुबन्धे च देहेऽस्मिन् कुर्वन्नसदाग्रहम्। ज्ञानेन दृष्टतत्त्वेन प्रकृतेः पुरुषस्य च। निवृत्तबुद्ध्यवस्थानो दूरीभूतान्यदर्शनः। उपलभ्यात्मनात्मानं चक्षुषेवार्कमात्मदृक्। सङ्गिभिर्मद्भावमसंगति प्रतिपद्यते। सतो बन्धुमसद्बुद्धिः सर्वानुस्यूतमद्वयम्" भाग० २ २७अ०।

एकादशवर्गः "श्रद्धामृतकथायां मे शश्वन्मदनुकीर्त्तनम्। परिनिष्ठा च पूजायां स्तुतिभिः स्तवनं मम। आदरः परिचर्यायां सर्वाङ्गैरभिवन्दनम्। मद्भक्तपूजाभ्यधिका सर्वभूतेषु मन्मतिः। मदर्थेष्वङ्गचेष्टा च वचसा मद्गुणेरणम्। मय्यर्पणञ्च मनसः सर्वकामविवर्जनम्। मदर्थेऽर्थपरित्यागो भोगस्य च सुखस्य च। इष्टं दत्तं हुतं भुक्तं मदर्थं यद्व्रतं तपः। एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदनम्। मयि सञ्जायते भक्तिः कोऽन्योऽर्थोऽस्यावशिष्यते" भाग० ११।१६अ०।

त्रयोदशवर्गः "कुर्यात् सर्वाणि कर्माणि मदर्थं शनकैः स्मरन्। मय्यर्पितमनश्चित्तो मद्धर्मात्मनोरतिः। देशान् पुण्यानाश्रयेत मद्भक्तैः साधुभिः श्रितान्। देवासुरमनुष्येषु मद्भक्ताचरितानि च। पृथक्सत्त्वेषु वा मह्यं पर्वयात्रामहोत्सवान्। कारयेद्गीतनृत्याद्यैर्भक्तिराजविभूतिभिः। मामेव सर्वभूतेषु बहिरन्तरपावृतम्। ईक्षेतात्मनि चात्मानं यथाखममलाशयः। इति सर्वाणि भूतानि मद्भावेन महादृते। सभाजयन् मन्यमानो ज्ञानं केवलमाश्रितः। ब्राह्मणे पुक्कसे स्तेने ब्रह्मण्येऽर्के स्फुलिङ्गके। अक्रूरे क्रूरके चैव समदृक् पण्डितो मतः। विसृज्य स्वयमन्यां स्वां दृशं क्रीडां च दैविकीम्। प्रपञ्चमेवृग्यवदुपारमेत्साखिलोदयम्। यावत सर्वेषु भूतेषु मद्भावो नोपजायते। तावदेवमुपासीत वाङ्मनःकायवृत्तिभिः। नरेष्वभीक्ष्णं मद्भावं पुंसो भावयतोऽचिरात्। स्पर्द्धासूयातिरस्काराः साहङ्कारा वियन्ति हि" भाग० ११।२६अ०।

द्वादशवर्गः "गुरुशुश्रूषया भक्त्या सर्वलाभार्पणेन च। सङ्गेन साधुभक्तानामीश्वराराधनेन च। श्रद्धया तत्कथायाञ्च कीर्त्तनैर्गुणकर्मणाम्। तत्पादाम्बुरुहध्यानात् तल्लिङ्गेक्षार्हणादिभिः। हरिः सर्वेषु भूतेषु भगवानास्त ईश्वरः। इति भूतानि मनसा कामैस्तैः साधु मानयेत्। एवं निर्जितषड्वर्गैः क्रियते भक्तिरीश्वरे। वासुदेवे भगवति यया संलभते रतिम्। निःश्रेयसं तत्किमपि कर्माणि गुणवत्तमान्। वीर्याणि श्लोकतीर्थेभिः कीर्तितानि। यदातिहर्षोत्पुलकाश्रुगद्गदं प्रोत्कण्ठ उद्गायति रौति नृत्यति। यदा यदृच्छया स्व क्वचिद्रुदत्याक्रन्दते ध्यायति वन्दते जनम्। तद्भक्तियोगं भगवत्प्रयुङ्क्ते हरेः। जगत्पते! नारायणेत्यात्ममतिर्गतत्रपः। तदा पुमान् मुक्तसमस्तबन्धनस्तद्भावभावानुकृताशयाकृतिः। निर्दग्धबीजानुशयो महीयान् भक्तिप्रयोगेण समेत्यधोक्षजम्" भाग० ७ ७।

एकादशवर्गः "स वै मनः कृष्णपदारविन्दयोर्वचांसि वैकुण्ठगुणानुवर्णने। करौ हरेर्मन्दिरमार्जनादिषु श्रुतिं चकाराच्युतसत्कथोदये। मुकुन्दलिङ्गालयदर्शने दृशौ तद्भृत्यगात्रस्पर्शेऽङ्गसङ्गमम्। घ्राणं च तत्पादसरोजसौरभे श्रीमत्तुलस्या रसनां तदर्पिता। पादौ हरेः क्षेत्रपदानुसर्पणे शिरो हृषीकेशपदाभिवन्दने। कामं च दास्येन तु कामकाम्यया यथोत्तमश्लोकजनाश्रया रतिः" भाग० ६।४।

दशवर्गः "आयुर्हरति वै पुंसामुद्यन्नस्तं च यन्नसौ। तस्य नैयंत् वृथा नीत उत्तमश्लोकवार्त्तया। तरवः किं न जीवन्ति भस्त्राः किं न श्वसन्त्युत। न खादन्ति न मेहन्ति किं ग्रामपशवोऽपरे। श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः। न यत्कर्णपथोपेतो जातु नाम मदायजः। विले बतोरुक्रमविक्रमान् ये न शृण्वतः कर्णपुटे नरस्य। जिह्वासती दार्दुरिकेव सूत! न चोपगायत्युरुगायगाथाः। भारः परं पट्टकिरीटजुष्टमप्युत्तमाङ्गं न नमेन्मुकुन्दम्। शावौ करौ नो कुरुतः सपर्यां हरेर्लसत्काञ्चनकङ्कणौ वा। बर्हायते ते नयने नराणां लिङ्गानि विष्णोर्न निरीक्षतो ये। पादौ नृणां तौ द्रुमजन्मभाजौ क्षेत्राणि नानुव्रजतो हरेर्यौ। जीवञ्छवो भागवताङ्घ्रिरेणुं न जातु मर्त्योऽभिलभेत यस्तु। श्रीविष्णुपद्यास्तुलसीरसायाः श्वसन्नपो वस्तु न वेद गन्धम्। तदश्मसारं हृदयं बतेदं यद्गृह्यमाणैर्हरिनामधेयैः। न विक्रियेताथ यदा विकारो नेत्रे जलं गात्ररुहेषु हर्षः" भाग० २।२अ०।

नववर्गः "श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम्। अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्। इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा। क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम्" भाग० ७।५अ०।

चतुर्वर्गः "अनिमित्तनिमित्तेन स्वधर्मेणामलात्मना। तीव्रया मयि भक्त्या च श्रुतसम्भृतया चिरम्। ज्ञानेन दृष्टतत्त्वेन वैराग्येण बलीयसा। तपोयुक्तेन योगेन तीव्रेणात्मसमाधिना। प्रकृतिः पुरुषस्येह दह्यमाना त्वहर्निशम्। तिरोभविष्यती शनकैरग्नेर्योनिरिवारणिः" भाग०३।२७अ०।

षड्वर्गः "वाणी गुणानुकथने, श्रवणौ कथायां, हस्तौ च कर्मसु, मनस्तव पादयोर्नः। स्मृत्यां, शिरस्तव निवास जगत्प्रणामे, दृष्टिः सतां दर्शनेऽस्तु भगवत्तनूनाम्" भाग० १०।११ अ०।

पञ्चवर्गः "शृण्वतां गृणतां शश्वदर्चतां त्वाभिवन्दताम्। नृणां संवदतामन्तर्हृदि भास्यसतामृतम्" भाग०१०।८६अ०।

चतुर्वर्गः "तस्मादेकेन मनसा भगवान् सात्वतां पतिः। श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नित्यदाः" भाग० २।२ अ०।

त्रिवर्गः "तस्माद्भारत! सर्वात्मा भगवान् हरिरीश्वरः। श्रोतव्यः कीर्तितव्यश्च स्मर्तव्येच्छताऽभयम्" भाग०२।१अ०। "तस्मात् सर्वात्मना राजन्! हरिः सर्वत्र सर्वदा। श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान्नृणाम्" भाग०२।२अ० पुनर्वचनं त्रिवर्गव्यान्तरव्युदासमात्रार्थम्"।

"भज इत्येष वै धातुः सेवायां परिकीर्तितः। तस्मात् सेवा बुधैः प्रोक्ता भक्तिः साधनभूयसी" गारुडे २३१अ०। अथ विशेषलक्षणानि। गौतमीयतन्त्रे "दैवतायाञ्च मन्त्रे च तथा मन्त्रपदे गुरौ। भक्तिरष्टविधा यस्य तस्य कृष्णः प्रसीदति। तद्भक्तजनवात्सल्यं१ पूजायाञ्चानुमोदनम्२। सुमना अर्चकेच्छित्वं३ तदर्थं दम्भवर्जनम्४। तत्कथाश्रवणेरागस्तदर्थे चाङ्गविक्रिया५। तदनुस्मरणं७ नित्यं यत्तच्चाम्नोपजीवति८। भक्तिरष्टविधा ह्येषा यस्मिन् म्लेच्छेऽपि वर्त्तते। स मुनिः सत्यवादी च कीर्त्तिमान् स भवेन्नरः"। पाद्मे कार्त्तिकमाहात्म्ये यमधूद्धवसंवादे। "श्रवणं कीर्त्तनं पूजा सर्वकर्मार्पणं स्मृतिः। परिचर्या नमस्कारः प्रेम स्वात्मार्पणं हरौ"। तत्रैवोत्तरे शिवपार्वतीसंवादे "आद्यन्तु वैष्णवं प्रोक्तं यच्चक्राङ्कनं हरेः। धारणञ्चोर्द्धपुण्ड्राणां तन्मन्त्राणां परिग्रहः। अर्चनञ्च जपोध्यानं तन्नामस्मरणं तथा। कीर्त्तनं श्रवणञ्चैव वन्दनं पादसेवनम्। तत्पादोदकसेवा च तन्निवेदितभोजनम्। तदीयानाञ्च संसेवा द्वादशीव्रतनिष्ठता। तुलसीरोपणं विष्णोर्देवदेवस्य शार्ङ्गिणः। भक्तिः षोढ़शधा प्रोक्ता भवबन्धविमुक्तये"। किञ्च। "दर्शनं भगवन्मूर्त्तेः स्पर्शनं चेतसेवनम्। आघ्राणं धूपशेषादेर्निर्माल्यस्य च धारणम्। स्वयं भगवदर्थे च तथा वीणादिवादनम्। कृष्णलीलाद्यभिनयः श्रीभागवतसेवनम्। पद्माक्षमालादिधृतिरेकादश्यादिजागरः। प्रासादरचनाद्यन्यज्ज्ञेयं शास्त्रानुसारतः। लिखिता भगवद्धर्मा भक्तानां लक्षणानि च। तानि श्रेयांसि सर्वेषां भक्तैर्यै लक्षणानि च। तेषु श्रेयांसि सौख्यानि सख्यानि च विवेकिभिः। बहिरङ्गान्तरङ्गाणि प्रेमसिद्धौ च तानि यत्। भेदास्तु विविधाभक्तेर्भक्तभावादिभेदतः। सत्ताश्रद्धादिपर्यन्तेभ्यो श्रेयोलिप्सुभिरत्नम" "प्रेमभक्तौ च सिद्धायां सर्वेऽर्थाः सेवकाः स्वयम्। भगवांश्चातिवश्यः स्यात्सिध्यतेऽस्याः सुलक्षणम्। अथ प्रेमभक्तिलक्षणम्। नारदपञ्चरात्रे "अनन्यममता विष्णौ ममता प्रेमसङ्गता। भक्तिरित्युच्यते भीष्मप्रह्लादोद्धवनारदैः। प्रेमभक्तेश्च माहात्म्यं भक्तेर्माहात्म्यकं परम्। सिद्धमेव यतो भक्तेः फलं प्रेमैव निश्चितम्। चिह्नानि प्रेमसम्पत्तेर्बाह्यान्याभ्यन्तराणि च। अथ प्रेमसम्पत्तिचिह्नानि उज्ज्वले प्रह्लादश्च बालानुशासने। "निशम्य कर्माणि गुणानतुल्यान् वीर्याणि लीलातनुभिः कृतानि" इत्यादि ४६२६ पृ० दर्शितम्।

एकादशे च कविर्योगेश्वरोत्तरे "शृण्वन् सुभद्राणि रथाङ्गपाणेर्जन्मानि कर्माणि च यानि लोके। गीतानि नामानि तदर्थकानि गायन् विलज्जो विचरेदसङ्गः। एवंव्रतः स्वप्रियनामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः। हसत्यथो रोदिति रौति गायत्युन्मादवन्नृत्यति लोकबाह्यः"। श्रीभगवद्भववसंवादे च "कथं विना रोमहर्षं द्रवता चेतसा विना। विनानन्दाश्रुकलया शुध्येद्भक्त्या विनाऽशयः। वाग्गद्गदा द्रवते यस्य चित्तं रोदित्यभीक्ष्णं हसति क्वचिच्च। विलज्ज उद्गायति नृत्यते च मद्भक्तियुक्तो भुवनं पुनाति। यथोक्तभक्त्यश्रयौ तु भगवच्चरणाम्बुजम्। शरण्यागतभावेन कृत्स्नभीतिभ्रमाश्रयेत्" हरिभक्तिविलासे ११विलासः। उत्तमभक्तेर्लक्षणं यथा "कृष्णाभिलाषिताशून्यं ज्ञानकर्माद्यनावृतम्। आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा"। तथा नारदपञ्चरात्रे। "सर्वोपाधिविनिर्मुक्तं तत्परत्वेन निर्मलम्। हृषीकेण हृषीकेशसेवनं भक्तिरुच्यते" भाग० २स्क० च।सा उत्तमा भक्तिः षड्विधा यथा "क्लेशघ्नी

शुभदा मोक्षवदाद्रत् सुदुर्लभा। सान्द्रानन्दविशेषात्मा श्रीकृष्णाकर्षणी च सा"। तस्याः क्रमेणत्वम् "क्रमेण तारं तद्बीजमविद्या चेति ते त्रिधा"। शुभदत्वं यथा "शुभानि मोक्षवं सर्वजगतामनुरक्तता। सद्गुणा सुखमित्यादीन्याख्यातानि मनीषिभिः" मोक्षवदाद्रत्वं यथा "मनागेव प्रस्फुरायां हृदये भगवद्रतौ। सुदुर्लभा अपीमे स्युः चत्वारस्तृणवन्ने समन्तत"। सुदुर्लभा यथा "साधनौघैरनासङ्गैरलभ्या सुचिरादपि। हरिणा चाशुदेयेति त्रिधा सा स्यात् सुदुर्लभा। सान्द्रानन्दविशेषात्मा यथा "ब्रह्मानन्दो भवेदेष चेत्परार्द्धगुणीकृतः। नैति भक्तिसुधाम्भोधेः परमाणुतुलामपि"। श्रीकृष्णाकर्षणी यथा "कृत्वा हरिं प्रेममाजं प्रिय मेवमन्वितम्। भक्तिर्वशीकरोतीति श्रीकृष्णाकर्षणी च सा"। सा चतुर्धा भक्तिस्त्रिधा यथा "सा भक्तिः साधनं भावः प्रेमा चेति त्रिधोदिता"। साधनभक्तिर्यथा। क्रतिसाध्या भवेत् साध्यभावा सा साधनाभिधा। नित्यसिद्धस्य भावस्य प्राकट्यं हृदि साध्यता"। भावभक्तिर्यथा "शुद्धसत्त्वविशेषात्मा प्रेम सूर्यांशुसाम्यभाक्। रुचिभिश्चित्तमासृण्यकृदसौ भाव उच्यते"। प्रेमभक्तिर्यथा "सम्यङ्मसृणितस्वान्तो ममतातिशयाङ्कितः। भावः स एव सान्द्रात्मा बुधैः प्रेमा निगद्यते" भक्तिरसामृतसिन्धौ पूर्वविभागः।

भक्तियोग पु० भक्तिरूपो योगश्चित्तैकाग्र्यतासाधनम् उपायभेदः। भक्तिरूपे योगे भक्तियोगस्य ज्ञानात् श्रेष्ठत्वम् सुखसाध्यत्वात् गीतायाम् उक्तं यथा

"एवं सततयुक्ता ये भक्तास्त्वां पर्य्युपासते। ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः" मू०। "द्वितीयप्रभृतिषडध्यायेषु विभूत्यन्तेषु परमात्मनो ब्रह्मणोऽक्षरस्य विशुद्धसर्वविशेषरूपोपासनमुक्तं सर्वयोगैश्वर्यसर्वज्ञानशक्तिमत्सत्त्वाधारेश्वरस्य तव चोपासनम्। तत्र तत्रोक्तं विश्वरूपाध्याये त्व मसाधारणदात्मरूपं विश्वरूपं त्वदीयं दर्शितवानसि मत्कर्मकृदित्यादिना सुकरमनयोरुभयोः पक्षयोर्विशिष्टतरबुभुत्सया त्वां पृच्छामीति अर्जुन उवाच। एवमिति। एवं सततयुक्ता नैरन्तर्येण भगवत्कर्मादौ यथोक्तेऽर्थे समाहिताः सन्तः प्रवृत्ता इत्यर्थः ये भक्ताः अनन्यशरणाः सन्तस्त्वां यथादर्शितं विश्वरूपमर्य्युपासते ध्यायन्ति ये चाप्यक्षरमिति ये चापि त्वत्तस्सर्वैश्वर्याः सत्यसत्यसंकल्पोऽयमविशेषितं ब्रह्माक्षरं निरस्तसर्वोपाधित्वादव्यक्तमकरणगोचरं यद्वि लोके करणगोचरत्वादुच्यते अक्षरोपासनात्कर्मकत्वादिदं त्वक्षरं तद्विपरीतं भिन्नैश्चोच्यमानैर्विशेषणैर्विशिष्टं तद्वे चापि पर्य्युपासते तेषामुभयेषां मध्ये के योगवित्तमाः के अतिशयेन योगविद इत्यर्थः" भा०।

"श्रीभगवानुवाच। मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते। श्रद्धया परयोपेतास्ते मे युक्ततमा मताः" मू०। "ये त्वक्षरोपासकाः सम्यग्दर्शिनो निष्कल्मषास्ते तावत्तिष्ठन्तु तान् प्रति यदक्ष्यं तदुपरिष्टाद्वक्ष्यामः ये त्वितरे मदीति। मयि विश्वरूपे परमेश्वरे चावेश्य समाधाय मनः, ये भक्ताः मनो मां सर्वयोगेश्वराणामधीश्वरं सर्वज्ञं विष्णुनारायणादिकेशवतिरिक्तं नित्ययुक्ता अतीतानन्तराध्यायान्तोक्तश्लोकार्थन्यायेन सततयुक्ताः सन्त उपासते श्रद्धया परया प्रकृष्टया उपेताः मे मम मताः अभिप्रेता युक्ततमा इति नैरन्तर्येण हि ते मच्चित्ततयाहोरात्रमतिवाहयन्ति अतो युक्ततमा तान् प्रति युक्ततमा इति वक्तुम् भा०। 'ये त्वक्षरमनिर्देश्यमव्यक्तं पर्य्युपासते। सर्वत्रगमचिन्त्यञ्च कूटस्थमचलं ध्रुवम्"। "किमितरे युक्ततमा न भवन्ति न, किन्तु तान् प्रति यदक्ष्यन्तत् शृणु ये तु अक्षरमनिर्देश्यमव्यक्तमव्यक्तत्वादशब्दगोचरमिति न निर्देष्टुं शक्यते अतोऽनिर्देश्यमव्यक्तं न केनापि प्रमाणेन व्यक्तं इत्यव्यक्तं पर्य्युपासते परिसमन्तादुपासते उपासनं नाम यथाशास्त्रमुपास्यस्य विश्वीकरणेन सामीप्यमुपगम्य तैलधारावत् समानप्रत्ययप्रवाहेण दीर्घकालं यदासनन्तदुपासनमाचक्षते। अक्षरस्य विशेषणमाह सर्वत्रगं व्योमवदापि अचिन्त्यं चाव्यक्तत्वादचिन्त्यं यद्धि करणगोचरं तन्मनसापि चिन्त्यं तद्विपरीतत्वादचिन्त्यमक्षरं कूटस्थं दृश्यमानसुखमलदोषं वस्तु कूटरूपं कूटसाक्ष्यभित्यादौ कूटशब्दः प्रसिद्धो लोके तथा चाविद्यानेकसंसारबीजमलदोषं मायोपलक्षणादिशब्दवाच्यतया "मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्" "मम माया दुरत्यया" इत्यादौ प्रसिद्धं यत्तत् कूटं तस्मिन् कूटे स्थितं तदध्यक्षतया। अथ वा राशिरिव स्थितं कूटस्थमत एवाचलं यस्मादचलं तस्मात् ध्रुवं नित्यसिद्धमित्यर्थः" भा०।

"संनियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः। ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः" भू०। "संनियम्येति। संनियम्य सम्यक् नियम्य संहृत्य इन्द्रियग्रामं इन्द्रियसमुदायं सर्वत्र सर्वस्मिन् काले समबुद्धयः समा तुल्या बुद्धिर्येषामिष्टानिष्टप्राप्तौ ते समबुद्धयः ते समबुद्धयः ते ये एवंविधाः ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः न तेषां वक्तव्यं किञ्चित् मां ते प्राप्नुवन्ति इति ज्ञानित्वादात्मैव मे मतमित्युक्तत्वात् न हि भगवत्साक्षात्कारार्थां सतां युक्ततमत्वमयुक्ततमत्वं वा वाच्यम्" भा०।

"क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्। अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते" भू०। "किन्तु क्लेशोऽधिकतरो यद्यपि मत्कर्मादिपराणां क्लेशोधिक्तत्वापि अधिकतरस्तत्तरात्मनाम्। परमार्थदर्शिनां देहाभिमानपरित्यागनिमित्तः अव्यक्तासक्तचेतसामव्यक्ते आसक्तं चित्तं येषां ते अव्यक्तासक्तचेतसाम् अव्यक्ता हि यस्मादया गतिरक्षरादिका दुःखं देहवद्भिर्देहाभिमानवद्भिरवाप्यते यतः क्लेशोऽधिकतर" भा०। "ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः। अनन्येनैव योगेन मां ध्यायन्त उपासते" भू०। "अक्षरोपासकानां यद्दर्शनं तदुपरिष्टाद् वक्ष्यामः ये त्विति। ये तु सर्वाणि कर्माणि मय्यीश्वरे सन्यस्य मत्परा अहं परो देवो येषां ते मत्पराः सन्तः अनन्येनैव अविद्यमानमन्यदालम्बनं विश्वरूपं देवमात्मानं सङ्गा यस्य सोऽनन्यस्तेनानन्येनैव केवलेन योगेन समाधिना मां ध्यायन्तश्चिन्तयन्त उपासते" भा०। "तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात्। भवामि न चिरात् पार्थ! मय्यावेशितचेतसाम्"। "तेषां किमित्याह तेषामिति। तेषां मदुपासनैकपराणाम् अहमीश्वरः समुद्धर्त्ता कृत इत्याह मृत्युसंसारसागरात् मृत्युयुक्तः संसारो मृत्युसंसारः स एव सागरवत् सागरो दुस्तरत्वात् तस्मान्मृत्युसंसारसागरादहं तेषां समुद्धर्त्ता भवामि न चिरात् किं तर्हि क्षिप्रमेव हे पार्थ! मय्यावेशितचेतसां मयि विश्वरूपे आवेशितं समाहितं चेतो येषां ते मय्यावेशितचेतसस्तेषाम्" भा०।

"मय्येव मन आधत्स्व मयि बुद्धिं निवेशय। निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः। अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम्। अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय!। अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव। मदर्थमपि कर्माणि कुर्वन् सिद्धिमवाप्स्यसि। अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः। सर्वकर्मफलत्यागं ततः कुरु यतात्मवान्। श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते। ध्यानात् कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम्। अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च। निर्ममो निरहङ्कारः समदुःखसुखः क्षमी। सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः। मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः। यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः। हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः। अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः। सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः। यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति। शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः। समः शत्रौ च मित्रे च तथा मानापमानयोः। शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः। तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित्। अनिकेतः स्थिरमतिर्भक्तिमान् मे प्रियो नरः। ये तु धर्मामृतमिदं यथोक्तं पर्युपासते। श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः" भू० गीता० १२ अ०।

भक्तिरस पु० भक्तिः ईश्वरविषया रतिरेव रसः। तत्स्थायिभावके रसभेदे विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः। आद्यत्वं हृदि भक्तानामानीता श्रवणादिभिः। एषः श्रवणरतिस्थायिभावो भक्तिरसो भवेत् इति भक्तिरसामृतसिन्धुः। सङ्क्षिप्ते तद्दोकावाच भक्तेरसत्वम् व्यवस्थापितं यथा "भक्तिरसश्चैव हास्यशृङ्गारकरुण रौद्रभयानकबीभत्सशान्ताद्भुतवीरद्वेषानुभावात् व्यासादिभिः वर्णितस्य विष्णोर्विष्णु भक्तानां वा चरितस्य नवरसात्मकस्य श्रवणादिना जनितस्वमत्कारो हि भक्तिरसः" सङ्गा० "भक्तिर्विच्छिताऽविच्छिता च सैव परां प्रकर्षरेखामापन्ना रसः। यदाहुः। "भावा एवातिसम्पन्ना प्रयान्ति रसतामसौ" इति। भक्तिरसानुभावाश्च भक्तः यथा अप्राप्तभवात् तत्र दत्युच्यते सचानुभवो नवधा हास्यादि भक्तिभेदेन हास्यादय एव हि भगवति प्रयुज्यमानाः "तस्मात् केनाप्युपायेन मनः कृष्णे निवेशयेदिति" भक्तिलक्षणाक्रान्तत्वात् भक्तिरसपदवीमासाद्यन्तीति भावः। हास्यादिलक्षणं तु वक्ष्यते। ते चामी नवापि सुखदुःखमोहात्मकैस्सुखव्यतिकरोद्भवाः तथा हि। प्रथमे त्रयो रजोमूलाः, मध्यास्तु तमोमूलाः, चरमे सत्त्वमूलाः। रतिहासादयो हि रजःप्रभृतीनां विकारा रत्युद्रेकादयश्च पञ्चविंशाध्याये। तत्रापि प्रथमेषु त्रिषु

क्रमात् सत्त्वसंभिन्नं तमःसंभिन्नं रजस्तमःसंभिन्नं च रजोमूलम्। मध्येषु रजोभिन्नं सत्त्वभिन्नं रजः सत्त्वभिन्नच तमः। चरमेषु तमोभिन्नं रजोभिन्नं रजस्तमोभिन्नं च सत्त्वम् ज्ञेयाभिधानक्रमेण चैष क्रमः"। व्याक्षेपपूर्वकं तस्या रसरूपत्वं तत्र व्यवस्थापितं यथा "तस्माद्विभावादिरसतामप्योविरुद्धात्र भक्तौ रसत्वम् अतएवायमन्यैः "एवं भक्तावपि वाच्यमिति" वद्भिः खल्वादिष्टः। अत उत्तरं पठति। व्यासादिभिरिति। वर्णितस्य चरित्रस्य विष्णुभक्ताः मोद्यादयः अवणादिनेत्यादिशब्दादृर्शनकीर्त्तनस्मरणाभिनयात् चमत्कारः सामाजिकानां हि यस्मादेवंसामग्रीको भक्तिरसस्तस्मादनपह्नवनीय इत्यर्थः। तत्रैषा सामग्री केनाप्युपायेन मनोनिवेशः स्थायी चरित्रश्रवणादय उद्दीपनविभावा विष्णुविष्णुभक्ताश्चालम्बनम् अनुभावास्तु तस्मादयो वक्ष्यमाणा यथायोग्यं हृत्यादिका व्यभिचारिणश्च। उपायस्तु रतिस्थायादिः। कविभिर्वर्णितस्योल्लेखेन मद्भक्तविप्रलम्भसमर्थमाधेयेव रसव्यवहारो नान्यत्रेत्युक्तम्। एवमेवैतत् अनुकार्येषु हि जानकीरामभद्रादिषु रत्यादिभावं चमत्कारच यद्यपि हङ्कारादौ क्वचिदस्ति। तथापि तस्य भयानकादावनुपकत्वान्न तत्र रसव्यवहारः। अतएव च "तानि चेन्नाटकाख्यस्य" इत्यादीनि विशेषणानि। अभिनयैरुपदर्श्यमानादपि सन्दर्भः समर्थमाधो रसोऽतिरिच्यते अतएवोक्तं "कविवाग्भनेयच तदुपायो विधीयते। वस्तुयत्किमपिच्छा तु प्रथमोऽत्र विधीयते" इति। यत्त्व भिनवगुप्तपादैरुक्तम् "एवं भक्तावपि वाच्यम्" इत्युक्तं तदसत् रसत्वस्य दर्शितत्वात्। सामग्रीसद्भावेऽपि प्रत्याख्यानमरोचकतामात्रशरणम्। न च संगच्छमानोऽयं यमसर्वविषयत्वात् रसत्वात्चर्व्वतामिति चोद्यं तथा सति सर्वरसोच्छेदापातात्। तथा हि शृङ्गारिवशरभीभांसकादयो हि नाटकप्रबन्धान्तःप्रविष्टा अपि चमत्कारामावात् कीशप्राया एव। एवं प्रधानब्रह्मचारिप्रभृतयः हङ्कारसाह्लादे वाचानां गाढरागाणाञ्च शान्तरसचर्वणानभिज्ञत्वम्। अनुभूतशोकस्मर्तॄणां च करुणरसाह्लादावसरे प्राधान्यप्रख्यत्वम् तस्मात् सर्वासनस्थैव रसचर्वणेति भक्तिरसदर्शनम्"।

भक्तिमत् पु० भक्तिं भक्तीं वाति वा-क। साधुदेवे शब्दच०

भक्तिसूत्र न० "अथातो भक्तिजिज्ञासेत्यादिके शाण्डिल्यमुनिप्रणीते सूत्रात्मकग्रन्थे।

भक्ष अदने चु० उभ०सक०सेट्। भक्षयति-ते अबभक्षत्-त तस्य भ्वादित्वमपीत्येके भक्षति अभक्षीत्। उभयपदित्वमस्येत्यन्ये भक्षते अभक्षिष्ट।

भक्ष पु० भक्ष-भावे कर्मणि वा घञ्। १अशने २भक्ष्ये च। "वषट् कर्त्तुः प्रथमभक्षः" श्रुतिः उच्छा० अनोदात्तताच्च "गावः सोमस्य प्रथमस्य भक्षाः" सि०कौ० धृतश्रुतिः।

भक्षक त्रि० भक्ष-ण्वुल् भक्षणकारके अमरः।

भक्षिका स्त्री भक्ष अड्डादौ सञ्ज्ञायां भावे ण्वुच्। भक्षणाड्डादौ "अवानित्वभक्षिकामर्हति अत्रे दधुभक्षिकां मे धारयति" सि०कौ०।

भक्ष(क्ष्य)कार पु० भ(क्ष)क्ष्यं वा करोति ज्ञ-अण्। भक्ष्यपिष्टकादिविक्रयोपजीविनि आपूपिके भरतः।

भक्षटक पु० भक्ष-वा०अटन् संज्ञायां कन्। गोक्षुरे राजनि०

भक्षण न० भक्ष-भावे ल्युट्। कठिनद्रव्यस्य गलाधःकरणव्यापारे भक्षणप्रकारः सुश्रुतोक्तः आहारशब्दे ८६७ पृष्ठादौ दृश्यः। [राजनि०।

भक्ष(क्ष्य)पत्रा स्त्री भक्ष्यं पत्रमस्याः। ताम्बूलीलतायाम्

भक्षालि पु० भक्षाणामालिर्यत्र। देशभेदे ततो भवार्थे वुञ्। भाक्षालिक तद्देशभवे त्रि०।

भक्षिवस् त्रि० भक्ष-क्वसु वेदे न ह्रित्वम्। भक्षणे ऋग्वे० ६।१६। लोके तु बिभक्षिवस् इत्येव त्रि० स्त्रियां ङीप् बिभक्षुषी।

भक्ष्य त्रि० भक्ष-कर्मणि यत्। १अदनीये "कठिनं विशदमव्यवहार्य्यं भक्ष्यम्" भट्टाभाष्योक्ते विविक्तावयवे कठिने २खाद्ये च "भक्ष्येण मिश्रीकरणम्" पा० मिश्रीकरणद्वारा सामर्थ्यम् इत०। गुडधानाः।

भक्ष्यालाबू स्त्री कर्म०। राजालाबूलतायां राजनि०।

भग पु०न० भज+घ। १सूर्य्ये २चणिमादाष्टविधैश्वर्य्ये ३वीर्य्ये ४यशसि ५श्रियां ६ज्ञाने ७वैराग्ये ८योनौ ९इच्छायाम् १०माहात्म्ये ११यत्ने मेदि० १२धर्म्मे १३मोक्षे १४सौभाग्ये १५काम्यौ १६चन्द्रे च। ज्योतिषोक्ते योनिनक्षत्रदैवते १७पूर्वफल्गुनीनक्षत्रे १८शुक्रसख्ययोर्मध्यस्थाने च पु० आदुदात्तताच्च ।।६धने २०पदे च न०निघण्टुः। भगवच्छब्दे दृश्यम्। स्त्रीचिह्नस्य लक्षणभेदादिकं यथा "विस्तीर्णञ्च गभीरञ्च द्विविधं भगलक्षणम्" "कूर्म्मपृष्ठं गजस्कन्धं पद्मगन्धं सुकोमलम्। अकोमलं सुविस्तीर्णं यद्वेते च भगोत्तमाः। गीतलं निम्नमत्युष्णं गोजिह्वासदृशं परम् रतिमञ्जरी।

भगघ्न पु० भगं तच्चेतं हन्ति हन-टक् । १महादेवे "नमस्ते त्रिपुरघ्नाय भगघ्नाय नमो नमः" भा० द्रो० २०३अ० तस्य दक्षयज्ञकाले तच्चेतहारित्वात् तथात्वम् ।

भगण पु० ६त० । १द्वादशराशीनां समूहे २तद्भोगकाले च । यथोक्तं सू० सि० "यद्यादृग्ग्रहजोऽतिजवाच्चक्रैः सतं यद्याः । जीवमानास्तु चक्रन्ते तुल्यमेव स्वमार्गगाः । प्रागगतित्वमतस्तेषां भगणैः ग्रन्थकृतं गतिः । परिघाद्य वशाद्भिन्ना तद्वशाद्वानि भुञ्जते । शीघ्रमन्दान्यथाखेन कालेन भगताल्लगः । तेषां तु परिवर्त्तेन पौष्णान्ते भगणः स्मृतः । विकलानां कला कृत्वा तत षष्ट्या भाग उच्यते । तच्चिंशता भवेद्राशिर्भगणो द्वादशैव ते" सू० सि० । "शीघ्रगतिर्यच्छनानि स्वान्यखेन कालेन भुनक्ति ग्रहमण्डलगतिर्यच्छो बहुकालेन भुनक्ति, तुल्यराश्यादिभोगो मन्दशीघ्रगतिग्रहयोस्तुल्यकालेन न भवतीति विशेषार्थः । तेषां राशीनां परिवर्त्तेन भ्रमणेन । तकाराद् यद्यादिगतिभोगजनितेन भगणः प्राप्तैरुक्तः । क्रान्तिवृत्ते द्वादशराशीनां सत्त्वात् तद्भोगेन चक्रभोगसमाप्तेर्यत् स्थानमारभ्य चलितो ग्रहः पुनस्तत् स्थानमायाति स चक्रभोगः परिवर्त्तशब्दोऽपि द्वादशराशिभोगाद्भगण एवार्थः । ननु क्रान्तिवृत्ते सर्वप्रदेशेभ्यः परिवर्त्तसम्भवादत्र कः परिवर्त्तादिभूतः प्रदेश इत्यत आह पौष्णान्त इति । सृष्ट्यादौ ब्रह्मणा क्रान्तिवृत्ते रेवतीयोगतारासत्त्वप्रदेशे सर्वग्रहाणां निवेशितत्वात् तदवधितो ग्रहचलनाच्च पौष्णश्च रेवतीयोगतारायाश्चान्ते निकटे प्रदेशे तथा च रेवतीयोगतारासन्निधिमत्स्थानमेवादिस्थानाधिभूतमिति भावः" रङ्गनाथः । [२६ अ० ।

भगदत्त पु० प्राग्ज्योषपुराधीशे नरकासुरसुतभेदे कालिकापु० ।

भगदा स्त्री स्कन्दानुचरमातृभेदे भा० व० ४७अ० । [४२अ० ।

भगदेव पु० भगेन दीव्यति दिव-अच् । कामुके भा० आश्व० ।

भगदैवत न० भगो योनिः दैवतं यस्य । पूर्वफल्गुनीनक्षत्रे तस्य योनिदैवताकत्वात् तथात्वम् । अर्शोपायशब्दे दृश्यम् । तच्च ह्रस्वज्योतिर्जातकोक्तं यथोक्तं वृद्धगर्गेण "विशाखानक्षत्रतोयानि२४ वैश्वं२२ भगदैवतम्११। पुष्या पौष्णो२७ यमः२ सर्पो८ जन्मभान्यर्कतः क्रमात्" । [दृश्यम् ।

भगनन्दन पु० ३त० । ऐश्वर्येणानन्दयुक्ते विष्णौ भगवच्छब्दे ।

भगनन्दा स्त्री कुमारानुचरमातृभेदे भा० श० ४७ अ० ।

भगनेत्रघ्न पु० भगनेत्रं हन्ति दक्षयज्ञकाले हन-टक् । रुद्रादेवे भा० अनु० १४२अ० । भगनेत्रापहादयोऽत्र ।

भगन्दर पु० भगं गुह्यसक्थमध्यस्थानं दारयति इ-खिच्-खश् मुम् खचि ह्रस्वश्च । स्वनामख्याते रोगभेदे । भावप्र० तच्चिदानिरुक्त्यादिकमुक्तं यथा

"अथ भगन्दरस्य पूर्वरूपसहितं स्वरूपमाह । "कटीकपालयोरुद्दाहकण्डूरुजादयः । भवन्ति पूर्वरूपाणि भविष्यति भगन्दरे । गुदस्य द्व्यङ्गुले क्षेत्रे पार्श्वतः पीडकार्त्तिकृत् । भिन्नो भगन्दरो ज्ञेयः स च षड्विधो भवेत्" । आर्त्तिकृत् पीडाकृत् । षड्विधः वातिकपैत्तिकश्लैष्मिकसान्निपातिकशल्यजभेदैः । अथ भगन्दरशब्दस्य निरुक्तिमाह भोजः "भगन्दरः भगनाम्नः गुदस्य वर्त्म तथैव च । भगवद्वारयेद्दुष्यात् तस्मादेष भगन्दरः" । भजन्त्यनेनेति भगो मेढ्रवृषणम् । भजन्त्यस्मिन्निति भगं योनिः । अत्र भगशब्देन द्वयमपि कथ्यते । भगवत् योनिवत् । अथ वातिकं गतपोनकसंज्ञं भगन्दरमाह । "कषायरूक्षैरतिकोपितोऽनिलस्त्वपानदेशे पिडकां करोति याम् । सरुजां खादातसुप्तेति दारुणं रुजा च भिन्नारुणफेनवाहिनीम् । तत्त्यागमो मूत्रपुरीषरेतसां व्रणैरनेकैः गतपोनकं वदेत्" । दारुणम् अतिदारुणकम् । व्रणैरनेकैः सूक्ष्मरन्ध्रैः । गतपोनकं गतपोनकत्वानी ततस्तथात्वम् । अथ पैत्तिकमुद्दीपसंज्ञमाह "प्रकोपणैः पित्तमतिप्रकोपितं करोति रक्तां पिडकां गुदे नृताम् । तदाशुपाकां क्रिमिपूतिवाहिनीं भगन्दरं चोष्ट्रशिरोधरं वदेत्" । आशुपाकां क्रिमिपूतिवाहिनीं शीघ्रपाकात्युद्गन्धवाहिनीं च । तद्वा भगन्दरमुष्ट्रशिरोधरं वदेत् । उष्ट्रग्रीवसंज्ञा च पिडकागतेन वक्रतयोष्ट्रग्रीवाकत्वेन । अथ श्लैष्मिकं परिस्रावसंज्ञमाह । "कण्डूयनो घनस्रावी कठिनो मन्दवेदनः । श्वेतावभासः कफजः परिस्रावी भगन्दरः" । कठिनः पिडकावस्थायाम् । परिस्रावी निरन्तरस्रावशीलः । अथ सान्निपातिकं शम्बूकावर्त्तसंज्ञमाह । "बहुवर्णरुजा स्रावा पिडका शोफसंयुता । शम्बूकावर्त्तवत्तिकः शम्बूकावर्त्तशोभतः" बहुवर्णबहुस्रावा बहुवेदो यथोदितैः प्रत्येकं संबध्यते गतिः स्रावमार्गः । अथ शल्यजशल्यमार्गसंज्ञमाह । "क्षतादृगतिः प्रायुगता विवर्द्धते श्लथेलणात् व्यूः क्रमयो विदार्य ते । प्रकुर्वते मार्गमनेकधा नखैर्वपैस्तत्सशल्यमार्गभगन्दरं वदेत्" । क्षतात् कण्टकादिना नखेन कण्डूयनादिना वाऽभिघातात् । गतिः स्रावः तन्मार्गभगन्दरम् एतच्च तिर्यञ्चतमार्गैः मुरी-

दानीं क्रान्तिं विक्षेपं चाह । "नाड़िकामण्डलात् तिर्यगग्रागमः क्रान्तिवृत्तावधिः क्रान्तिवृत्ताक्षरः । क्षेपद्वावधिस्तिर्यगेवं स्फुटो नाड़िकावृत्तखेटान्तरालेऽग्रमः" । इदानीं क्रान्तिपातानां विषुवत्क्रान्तिवलययोः सम्पातः क्रान्तिपातः स्यात् । तद्भगणाः सौरोक्ता व्यस्ता व्युतत्वं कल्पे । यदनयोर्वलनं यद्वृत्तं सङ्क्षाताद्यैः स एवाग्रम् । तत्फले तद् भगणाः कल्पे गोऽङ्कार्कनन्दगोचन्द्राः । तत् संजातं पातं छित्वा खेटेऽग्रमः साध्यः । क्रान्तिवशाद्वरत्तदयोरन्तरवलम्बापमे ततः क्षेप्यः" । इदानीं विक्षेपपातानाह । "एवं क्रान्तिविमण्डलसंपाताः क्षेपपाताः स्युः । चन्द्रादीनां व्यस्ताः क्षेपानयने तु ते योज्याः । मन्दस्फुटो द्राक् प्रतिमण्डले हि यतो भ्रमत्वं च तस्य पातः । पातेन युक्ताद्गणितागतेन मन्दस्फुटात् खेचरतः ग्रहोऽस्मात् । पातेऽथ वा शीघ्रफलं विलोमं कृत्वा स्फुटात् तेन युताच्छरोक्तः । चन्द्रस्य कक्षावलये हि पातः स्फुटादिधोर्ध्वमपातयुक्तात्" । इदानीं शशुक्रयोर्विशेषमाह "ये चात्र पातभगणाः पठितास्तद्भग्नोक्ते शीघ्रकेन्द्रभगणैरधिका यतः स्युः । स्वल्पाः स्वार्धमुदितात्खकेन्द्रयुक्तौ पातौ तयोः पठितचक्रभगौ विधेयौ । यस्माद्विशेष्याः किल केन्द्रविद्भ्रे सपातेदुचरस्तु योज्यः । यतस्ततः पातयुताज्जगद्भग्नोः सुधीभिराद्यैः ग्रहशिक्षिरुक्ता । स्फुटो न शीघ्रोद्भयुतौ स्फुटौ तयोः पातौ भगोले स्फुट एव पातः" । इदानीं यद्भगोले विशेषमाह । यद्भ गोले कथितापमण्डलं प्रकल्प्य कक्षावलयं यथोदितम् । निबध्य शीघ्रप्रतिवृत्तमस्मिन् विमण्डलं तत्पठितैः ग्रहार्धैः । मध्येऽत्र पातोद्भुवदां तद्भग्नोः स्वशीघ्रकेन्द्रेण युतस्तु देयः" । इदानीमहोरात्रवृत्तमाह । "दृक्क्षितिजक्रान्तितुल्येऽन्तरे सर्वतो नाड़िकाखाद्दोरात्रवृत्तात्तुवस् । तत्र बद्धा घटीनां च षष्ट्याहतेदृश्यस्य विक्षेपखण्डं द्युजीवा मता । इदानीमन्यदाह । "अथ कल्प्यामेषाद्या अनुलोमं क्रान्तिपाताद्भात् । एवं मेषादीनां द्युरात्रवृत्तानि वक्ष्यन्ते । नाड़ीवृत्तोभयतस्त्रीणि त्रीणि क्रमोत्क्रमात् तानि" । इदानीमस्योपसंहारमाह "एव भगोलः कथितः खेचरगोलोऽयमेव विज्ञेयः । यत्रापमण्डले वा स्वकाधारैरेव तत्रैव । मन्दादीनां कक्षा वक्ष्यीवादूर्ध्वनाभजाश्चाभाः । बद्धा भगोलमेवं यदृग्वृत्तं यत्र खगोलसन्धिष्कान्तः । प्रविश्य भ्रमयेत् तं यस्याधारं स्थिरो खट्वगोलौ" सि० शि० ।

भग्न त्रि० भञ्ज-क्त । क्षतावयवभेदे २रोगभेदे ३ेमच० ।

तद्विदानभेदादिकं सुश्रुते उक्तं यथा

"अथातो भग्नानां निदानं व्याख्यास्यामः । पतनपीड़नप्रहारक्षेपणव्यालमृगदशनप्रभृतिभिरभिघातविशेषैरनेकविधमस्थां भङ्गमुपदिशन्ति तत्र तु भङ्गजातमनुसार्थमार्यं द्विविधमेवोपपद्यते सन्धिसक्तं काण्डभग्नञ्च । तत्र सन्धिसक्तमुत्क्षिप्तं विश्लिष्टं विवर्त्तितमवक्षिप्तमतिक्षिप्तं तिर्य्यक्क्षिप्तमिति षड्विधम् । तत्र प्रसारणाकुञ्चनविवर्त्तनाक्षेपणाऽभिरूपरूपत्वं स्वाभाविकत्वं चेति सामान्यं सन्धिसक्तलक्षणमुक्तम् । विशेषस्तूत्क्षिप्ते सन्धावुभयतः शोफो वेदनाप्रादुर्भावो विशेषतश्च नानाप्रकारा वेदना रात्रौ प्रादुर्भवन्ति । विश्लिष्टेऽल्पशोफो वेदनाधिक्यं सन्धिविक्रिया च । विवर्त्तिते तु सन्धिपार्श्वोपगमनाहिष्माकुला वेदना च । अवक्षिप्ते सन्धिविश्लेषसौत्रैरुजत्वञ्च । अतिक्षिप्ते द्वयोः सन्ध्यस्थ्नोरतिक्रान्तता वेदना च । तिर्य्यक्क्षिप्ते त्वेकास्थिपार्श्वोपगमनमत्यर्थं वेदना चेति । काण्डभग्नमत ऊर्द्धं वक्ष्यामः कर्कटकमुष्कर्षं चूर्णितं पिच्छितमस्विच्छ्रितं काण्डभग्नं मज्जानुगतमतिपातितं वक्रं छिन्नं पाटितं स्फुटितमिति द्वादशविधम् । तत्र बाहुल्यं स्पन्दनं विवर्त्तनस्वाभाविष्णुत्वमवपीड्यमाने शब्दः सन्नाकुलता विधवेदनाप्रादुर्भावः सर्वोत्तरस्थासु न शब्दलाभ इति समासेन काण्डभग्नलक्षणमुक्तम् । विशेषतस्तु संमूढमुभयतोऽस्थिमध्यभग्नं यन्निरीक्षितं कर्कटकम् । चूर्णितमस्थि तत्तु शल्यस्वाभ्यां बोद्धव्यम् । पिच्छितं पृष्ठताकुलमनल्पशोफम् । पार्श्वयोरस्थीनोद्वर्तनसिच्छ्रितम् । वेल्लत प्रकम्पमानं काण्डभग्नत्वम् । तस्यावयवोऽस्थिमध्यमनुप्रविश्य मज्जानमनुसरतीति मज्जानुगतम् । यस्मिं निःसेवतस्त्रिरुक्तमतिपतितम् । आमुक्तमस्थिसक्थास्थि वक्रम् । अन्यतरपार्श्वावशिष्टं छिन्नम् । पाटितमपि वल्कविदारितं वेदनावच्च । स्फुटपूर्णसिवाभ्यातं विद्यात् विस्फुटीकृतं स्फुटितमिति । तेषु चूर्णितच्छिन्नातिपातितमज्जानुगतानि कृच्छ्रसाध्यानि कृच्छ्रद्रवाणानां शतकौषकुडवाशिनां सन्ध्युपगतस्येति । भवन्ति चात्र "भिन्नं कपालं कटशान्तु सन्धिसक्तं तथा च्युतम् । अथवा प्रतिपिष्टञ्च वर्जयेत् तद्भिषक्सदा । अर्जुष्टं कपालन्तु ललाटे चूर्णितञ्च यत् । सक्थं

वादिनिगमादुन्मार्गसंस्थं"। कष्टसाध्यमसाध्यवाह "घोराः साधयितुं दुःखा सर्वं एव भगन्दराः। तेष्वसाध्यश्चिदोषोत्थः चतसश्च विशेषतः। वातमूत्रपुरीषाणि वक्त्रञ्च क्रमवस्तया। भगन्दरात् स्रवन्त्यस्तु नाशयन्ति तमातुरम्"।

भगभक्त त्रि॰ भगे धने भक्तः। धनरते ऋ॰ १।२४।२।

भगभक्तक पु॰ भगेन तद्व्यापारोपपादनेन भक्तति भज-ण्वुल्। (कोटना)ख्याते नायकयोर्मेलके।

भगल त्रि॰ भगं तद्व्यापारं लाति-ला-क। भगव्यापार याहके ततः अरीहया॰ चतुरर्थ्यां वुञ्। भागलक तद्विद्यादौ त्रि॰।

भगशास्त्र न॰ भगव्यापारबोधकं शास्त्रम् शा॰त॰। कामशास्त्रे

भगवत् पु॰ भगम् "ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गनेत्वुक्रम् अस्यस्य मतुप् मस्य वः।१ऐश्वर्यादियुक्ते परमेश्वरे २बुद्धे अमरः तस्य बहुभित्तत्वात् भगरूपैश्वर्यादियोगाच्च तथात्वम्। अस्य संबोधने भगोः रत्वेव अत्रादौ तस्य विसर्गस्य लोपः। ङ्यां स्त्री ङीप्। "सेव्यते या सुरैः सर्वैस्तस्यैव भजते यतः। धातुर्भजेति सेवायां भगवत्येव सा स्मृता" देवीपु॰ ४५ अ॰।

भगवद्गीता स्त्री ३त॰। भीष्मपर्वान्तर्गते अष्टादशाध्यायात्मके कर्मयोगज्ञानयोगभक्तियोगसूचके ग्रन्थे।

भगवद्दृश्य त्रि॰ भगवानिव दृश्यते दृश-कर्मणि क्यप्। भगवत्तुल्ये। "श्रुतं मे भगवद्दृश्येभ्यस्तरति शोकमात्मवित्" छा॰ उ॰। [विष्णो "भगहा भगनन्दनः" विष्णुस॰।

भगहन् पु॰ भगमैश्वर्यं संहारकाले हन्ति-हन-किप्।

भगाङ्कुर पु॰ भगे गुह्यस्थानेऽङ्कुर इव। अर्शोरोगे शब्दार्थकः

भगाधान न॰ ६त॰। १भाड़ाव्यापाने २सौभाग्ये च हरिवं॰ १२४ अ॰।

भगाल न॰भज-कालन् नलुक्।ह्रस्वत्वम्। १नरमस्तके २नरकपाले उज्ज्वलः। ततः अस्त्यर्थे इनि। भगालिन् कपालधारके त्रिषु त्रिका॰ भगालशब्दे परे हिमो पूर्वपदप्रकृतिस्वरः पञ्चभगालः। द्विगुत्रिके तत्पुरुषे प्रकृतिस्वरत्वेन अन्तोदात्तताच्च।

भगिनी स्त्री भगं यज्ञः पित्रादीनां द्रव्यादानेऽस्त्यस्याः इनि ङीप्। १सोदरायाम् स्वसरि अमरः। "भगिनीपुत्रकं सोदर्यीयाम्" दायभागः। २स्त्रीमात्रे च शब्दच॰ १भाग्यान्वितस्त्रीमात्रेऽपि तेन सर्वस्त्रीणां तत्पदेन संबोधनं विहितम्। "परपत्नी तु या स्त्री स्यादसम्बन्धा च योनितः। तां ब्रूयाद्भवतीत्येवं सुभगे भगिनीति च" मनुः।

भगीरथ पु॰ सूर्यवंशजे नृपभेदे "अंशुमद्भगस्तु तनयो दिलीपस्तु भगीरथः। येन भागीरथी गङ्गा तपःकृत्वाऽवतारिता" मत्स्यपु॰ १२ अ॰। [श्वेता॰ ७०।

भगीश पु॰ ६त॰। ऐश्वर्यादेरीश्वरे "धर्मांश्चैव पापहरं भगेशम्"

भगोल पु॰ भानां नक्षत्राणां गोलाकारः पदार्थः। राशिचक्रे तस्य भ्रमणभेदादिकं सू॰ सि॰ उक्तं यथा "ध्रुवं भ्रमति देवानामपसव्यं सुरद्विषाम्। उपरिष्टाद् भगोलोऽयं व्यक्षे पश्चान्मुखः सदा" सू॰सि॰। "अयं प्रत्यक्षो भगोलो नक्षत्राधिष्ठितमूर्त्तगोलो देवानां मेरोरुत्तरापवर्तिनां सव्यम् पूर्वादिक्रमार्गेणेत्यर्थः। भ्रमति भ्रमं परिवर्तं करोतीत्यर्थः। दैत्यानां मेरोर्दक्षिणापवर्तिनामपसव्यं पूर्वादिदिग्व्युत्क्रममार्गेण। पूर्वोत्तरपश्चिमदक्षिणक्रमेणेत्यर्थः। नक्षत्राधिष्ठितगोलो भ्रमति। व्यक्षे निरक्षदेशेषु क्षात्यभिप्रायेणैकवचनम्। उपरिष्टान्मस्तकोर्ध्वमध्यभागो भगोलः पश्चान्मुखः पश्चिमदिगभिमुखः सदा नित्यं परिभ्रमति भगोलस्य ध्रुवमध्यस्थत्वेन भ्रमणात् तयोस्तत्र स्थितिजडत्वस्वभावाच्च रङ्गः। तस्य प्रत्यक्षदर्शनार्थं सि॰ शि॰ भगोलबन्धप्रकारमाह यथा "इदानीं भगोलबन्धमाह। "याम्योत्तरस्थितिजवृत्तं सुदृढं विदध्यादाधारदण्डयुगलं ध्रुवयष्टिवद्वम्। यष्ट्युद्भमात्रसमखण्डवृत्तं शीतांशुकक्षं च विधुवद्वलयं तदेव" मू॰। इदानीं क्रान्तिदण्डमाह। "क्रान्तिदण्डं विधेयं स्वबाहुं ध्रुवयष्टेर्भानुरन्ध्रे भानुतः। क्रान्तिपातः प्रतीयं तथा प्रस्फुटाः क्षेपपाताश्च तत्स्थानकान्यङ्कयेत्"। इदानीं क्रान्तिदण्डस्य निवेशनमाह। "क्रान्तिपाते च पाताङ्कयष्टकालरे नाड़िकादण्डखण्डम् विदध्यादिदम्। पातेतः प्राक्त्रिभे खेटभागैरदग् दक्षिणे तैव भागैर्विभागेऽपरे"। इदानीं विषमखण्डमाह। "नाड़िकामण्डले क्रान्तिदण्डे तथा क्षेपदण्डं न्यसेत्। क्षेपदण्डं व राश्यङ्कितं तत्र च क्षेपपातेषु चिह्नानि कृत्वोक्तवत्। क्रान्तिदण्डस्य विक्षेपदण्डस्य च क्षेपपाते सयष्टे च कृत्वा युतिम्। क्षेपपातात्पतः पृथक्तत्र त्रिभे क्षेपभागैः स्फुटैः सौम्ययाम्ये न्यसेत्। शीघ्रकर्मेन भक्तास्त्रिभज्यायुताः स्युः परक्षेपभागा यदाशां स्फुटाः। क्षेपदण्डानि यस्यां विदध्यात् पृथक् खण्डदण्डे भ्रमन्तीन्दुपूर्वा यदाः"।

क्षनान्तरे शङ्के पृष्ठे मूर्द्धि च वर्जयेत्। आदितो यच्च दुष्टौतमस्थिसन्धिरवापि वा। सम्यक् संक्षितमध्यस्थि दुष्टौसाद् दुर्निबन्धनात्। सङ्कोभाद्यापि यद्भग्नक्षेद्धि क्रियां तत्र तु वर्जयेत्। मध्यस्य वयसोऽवस्थास्तिस्रो याः परिकीर्त्तिताः। तत्र स्थिरो भवेज्जन्तुरुपक्रान्तो विजानता। तरुण्यास्थीनि नम्यन्ते भज्यन्ते नवकानि तु। कपालानि विशिद्यन्ते स्फुटन्ति स्थवकानि च"।

भग्नपाद न० ब्यो०त० शङ्के क्षत्तिकादिनक्षत्रे यस्य नक्षत्रस्य तृतीयपादस्य आद्यपादस्य वा राशेरन्तरघटकता तादृशे नक्षत्रे। "पुनर्वसूत्तराषाढाक्षत्तिकोत्तरफल्गुनी। पूर्वभद्रा विशाखा च षड्ऐते पुष्कराः स्मृताः भग्नपादर्क्षसंयोगात्"।

भग्नपृष्ठ त्रि० भग्नं पृष्ठं यस्य। १मुटितपृष्ठवति २सम्मुखे च त्रिका०।

भग्नप्रक्रम पु० भग्नः प्रक्रमो यत्र। काव्यगते वाक्यदोषभेदे २७६।३६४ पृ० दोषशब्दे दृश्यम्। तदुदाहरणं सा०द० "एवमुक्तो मन्त्रिसख्यैरावणः प्रत्यभाषत" अत्र वच-धातुना प्रकान्तं प्रतिवचनमपि तेनैव वक्तुमुचितं तेन "रावणः प्रत्यवोचतेति" पाठो युक्तः। एवञ्च सति न कथितपदत्वदोषः तस्योद्देश्यप्रतिनिर्देश्यव्यतिरिक्तविषयत्वात् दृष्ट हि वचनप्रतिवचनयोरुद्देश्यप्रतिर्देश्यत्वम्। यथा "उदेति सविता ताम्रस्ताम्र एवास्तमेति च" इत्यत्र। यदि पदान्तरेण स एवार्थः प्रतिपाद्यते तदान्योऽर्थ एव प्रतिभासमानः प्रतीतिं स्खलयति। यथा वा। "ते हि-मालयमासाद्य पुनः प्रेक्ष्य च मूलिनम्। सिद्धाश्चौ निवेद्यार्थं तद्दिष्टा खमुदायुः"। अत्र "तथा दृति" दृष्टमा प्रक्रान्तस्य तेनैव तत्समानाभ्यामेतदादिशब्दाभ्यां वा परामर्शो युक्तो न तच्छब्देन। यथा वा। "दत्त्वा क्षिप्रा भूः स च पतिरणां योजनशतम्"। अत्र "मिता भूः पत्त्वाणां स च पतिरणामिति" युक्तः पाठः। एवं "यशोऽधिगन्तुं सुखविप्रया वा मनुष्यसंख्यामतिवर्त्तितुं वा। निरन्तुकानामभियोगभाजां मनस्तुलेवाङ्कुशमैति सिद्धिः" अत्र सुखमीप्सितमित्युचितम्। अत्रादयोः प्रक्रमभेदः। तृतीये पदार्थविषयः चतुर्थे प्रत्ययविषयः"।

भग्नसन्धि पु० भग्नः सन्धिरत्र। रोगभेदे माधवनि० १६।७अ०

भग्नसन्धिक न० भग्नः सन्धिः सन्धानमवयवयोजनमत्र कप्। तक्रे (घोल) शब्दच०।

भग्ना अन् उ० ६ व०। चन्द्रे शब्दचन्द्रिका। तस्य ऊर्ध्वगति-पदादिक्रमेण एकैकनक्षत्रविक्षेपेण भग्नदेहत्वात् तथात्वम्

भग्नाश त्रि० हृत०। १हताशे दृष्टविषयाया इच्छायाः प्रति-घातयुक्ते।

भग्नी स्त्री भगिनी+पृषो०। भगिन्यां द्विरूपकोषः।

भङ्कारी स्त्री भमित्यव्यक्तशब्दं करोति कृ-अण् गौरा०ङीष्। भ्रमराधिकायां दंशे त्रिका०।

भङ्ग पु० भनज्-भावादौ घञ्। १तरङ्गे अमरः २पराजये। ३खण्डे ४रोगभेदे मेदि०। ५कोटिल्ये ६भये ७पत्ररचनाभेदे हेम०। ८गमने ९जलनिर्गमे च अजयपालः १०मातुला-न्याम्, अमरः। ११भङ्गाख्ये १२शस्ये त्रिकाण्डशेषे (तेउडी) १३विजयायाञ्च (भाङ्) स्त्री। १४रोगमात्रे पु०राजनि०।

भङ्गकार पु० चर्चिकतो रूपस्य १पुत्रभेदे भा० आ० ६४अ०। २सत्राजित्पुत्रभेदे हरिवं २८ अ०।

भङ्गवासा स्त्री भङ्गे सति वासः सौरभं यस्याः। हरिद्रायां शब्दरत्ना०। तस्याः मेघरूपे एव वासनावत्त्वात्तथात्वम्।

भङ्गसाथं त्रि०भङ्गस्यूतः सार्थः मायायुतत्वात् सप्रयोजनः। कुटिले हारा०। [रजंस

भङ्गाकट न० भङ्गाया रजः भङ्गा+रजसि कटच्। भङ्गौषधे।

भङ्गान पुंस्त्री भङ्गेन तरङ्गेण अनिति अन-अच्। (भा-ङ्गन) मत्स्यभेदे शब्दमा० स्त्रियां जातित्वात् ङीष्।

भङ्गारी स्त्री भमित्यव्यक्तं गिरति गृ-अण् गौरा० ङीष्। दंशे त्रिकाण्डे पाठान्तरम्।

भङ्गासन पु० रूपभेदे तत्कथा भा० अनु० १२अ०।

भङ्गि(ङ्गी) स्त्री भनज्-इन् नुडागमः कुत्वम् वा ङीष्। १वि-च्छेदे २कोटिल्ये ३विन्यासे ४कल्लोले ५भेदे ६व्याजे च।

भङ्गिमन् पु० भङ्ग+वा० स्वार्थे इमनिच्। भङ्गग्राम।

भङ्गुर त्रि०भनज्-उरच्। १स्वयं भञ्जनशीले जटा०। २कुटिले ३नदीनां वक्रे च शब्दमा०। ४प्रियङ्गौ ५क्षतिविषायाम् च (खातरच्) स्त्री राजनि०।

भङ्ग्य न० भङ्गानां भवनं क्षेत्रं तमर्हति वा यत्। भङ्गाभवनयोग्ये क्षेत्रे २भङ्गार्हे त्रि०।

भचक्र न० भानां नक्षत्राणां राशीनां वा चक्रम्। १राशि-चक्रे २नक्षत्रचक्रे च "भ्रमावर्त्तौ भचक्रेऽस्मिन् ध्रुवौ नाभौ व्यवस्थितः। धारायक्षे स्थिन्दुभौमौ शुक्रज्ञौवगनैश्चराः। राहुः केतुरमस्यैव नक्षत्राणस्य राशयः। यदा दिशु च षट्सु मेरोर्भूगोलकोद्भवा। छाया भवेत्तदा रात्रिः स्यात् तद्विरुद्धदिनम्। सूर्येन्दोरुपरागस्तु गोलक-च्छायया भवेत्। अन्योन्ययोस्तयोरेव व्यासयोरेव कार-

घात्। यासमोचौ तु जायेते तस्मात् पूर्वपक्षिभौ। तस्य पुत्रपक्षाङ्गागः कृतो राङ्गोस्तु विष्णुना" वह्निपु०। अधिकं भगोत्तशब्दे दृश्यम्।

भज्ज भागे पृथक्करणे सेवायाञ्च भ्वा० उभ० सक० अनिट्। भजति-ते अभाक्षीत् अभक्तभाज भेजतुः भेजे। [त

भज पाके दाने च चु०उ०सक०सेट्। भाजयति-ते अबीभजत्

भज दीप्तौ चु०उभ०सक०सेट् इदित्। भञ्जयति-ते अबभञ्जत्-त

भजमान त्रि० भज-शानच्। १न्यायागतद्रव्यादौ २विभाजके ३सेवके च। साध्यतो नृपस्य कोशस्यागर्भजाते ४पुत्रभेदे पु० हरिवं० १८अ०।

भजि पु०भज-भावनिर्देशे क्तिन्। १भजधातौ। क्तिन्। सत्वतो नृपस्य २पुत्रभेदे भाग० ९।२४।४गुणो०। हरिवं०३८ अ०। भञ्जिन् इति पाठान्तरम् तत्रार्थे

भजेन्य त्रि० भज-वा०कर्मणि एन्य। भजनीये भाग०५।१७।२०

भजेरथ पु० राजभेदे अ०।।६०२।

भञ्जनक पु० कुष्ठरोगभेदे "वक्त्रं वक्रं भवेद्यस्य दन्तभङ्गश्च जायते। कफवातकृतो व्याधिः स भञ्जनकसंज्ञितः" माधवकरः।

भञ्जनागिरि पु० ६त०। किंगुलुका० टीर्थः। पर्वतभेदे

भञ्जरु पु० भञ्ज-वा० उरु। देवकुलोद्भवे वृक्षे त्रिका०।

भञ्जा स्त्री अभ्रपूर्णायाम् वृद्धायाम्बे।

भट भर्तौ कर्ममूल्यग्रहणे भ्वा०पर०सक०सेट् भटति। अभाटीत्-अभटोत्। यो भाटयित्वा शकटं नीत्वा चान्यत्र गच्छति। भाटं न दद्यात् दाप्योऽवरुद्धस्यापि भाटकम् इत्यमरः।

भट भाषणे भ्वा० पर० सक० सेट्। भटति अभा(भ)टीत्।

भट पु० भट-अच्। १योद्धरि अमरः "तद्भटाचतुरोद्धुरौ" मेद० २रुद्रे ऋभेदे क्षेम० ३वीरे ४नीचभेदे ५रात्रिञ्चरे च मेदि० ६इन्द्रवारुणग्राम (राचालग्राम) स्त्री रत्न०।

भटित्व न० भट-त्व। शूलपक्के मांसादौ (कावाब) अमरः।

भट्ट पु० भट-तन्। स्तुतिपाठकृत्तियुते (भाट) १जातिभेदे "वैश्यायां मूढवीर्य्येण पुमानेको बभूव ह। स भट्टो यावदुक्त सर्वेषां स्तुतिपाठकः" ब्रह्मवै० ब्रह्मख० ७अ० "क्षत्रियाद्विप्रकन्यायां भट्टो जातोऽस्तुवाचकः"। तेन-द्विविधा जातिः। २स्तुतिभेदे, ३वेदाभिज्ञे ४पण्डिते च। भट्टश्च स्तुतार्थभिधः कौमांसकभेदः तन्मतं च १०१ पृ० दर्शितम्। दिङ्मात्रं कौमारिलभाष्यरेव दर्शितं यथा "स च यागादिर्यजेत स्वर्गकाम इत्यादि वाक्येन स्वर्गमुद्दिश्य पुरुषं प्रति विधीयते। तथाहि यजेतेत्यस्याख्यातशब्दस्य यजिधातुः प्रत्ययश्च। प्रत्ययेऽप्यस्याख्यातशब्दस्याख्यातत्वं लिङ्त्वञ्च। तत्राख्यातत्वं दशलकारसाधारणं, लिङ्त्वं पुनर्लिङ्मात्रे। उभाभ्यामर्थशाभ्यां भावनेत्युच्यते। भावना नाम भवितुर्भवनानुकूलोव्यापारविशेषः। सा द्विधा—शाब्दी आर्थी चेति। तत्र पुरुषप्रवृत्त्यनुकूलो भावयितव्यापारविशेषः शाब्दी भावना। सा च लिङ्गेवोच्यते लिङ्श्रवणेऽयं मां प्रवर्त्तयति मत्प्रवृत्त्यनुकूलव्यापारवानिति नियमेन प्रतीतेः। यद्यपाच्छब्दाश्रितं प्रतीयते तत् तस्य वाच्यं यथानयेत्यत्रिन् वाक्ये यथा गोशब्दस्य गोत्वम्। स च व्यापारविशेषो लौकिकवाक्ये पुरुषाभिप्रायविशेषः वैदिकवाक्येषु पुरुषाभावात् लिङादिशब्दनिष्ठ एव। अतएव शाब्दी भावनेति व्यपदिश्यते। सा च भावनांशत्रयमपेक्षते—साध्यं साधनमितिकर्त्तव्यतान्तु। किं भावयेत्? केन भावयेत्? कथं भावयेत्?—इति तत्र साध्याकाङ्क्षायां वक्ष्यमाणांशत्रयोपेता आर्थी भावना साध्यत्वेनान्वेति, एकप्रत्ययगम्यत्वेन समानाभिधानत्वेतः सङ्ख्यादीनामेकप्रत्ययगम्यत्वेऽप्ययोग्यत्वान्न साध्यत्वेनान्वयः। साधनाकाङ्क्षायां लिङादिज्ञानं करणत्वेनान्वेति, तस्य च करणत्वं न भावनोत्पादकत्वेन तत्पूर्वमपि तस्याः सत्त्वात् किन्तु भावनाव्यापकत्वेन शब्दभावनाभाव्यनिर्वर्त्तकत्वेन वा। इतिकर्त्तव्यताकाङ्क्षायामर्थवादश्राप्राप्तत्वमितिकर्त्तव्यत्वेनान्वेति। प्रयोजनेच्छाजनितक्रियाविषयव्यापार आर्थी भावना। सा चाख्यातवाच्या, आख्यातसामान्यस्य व्यापारवाचित्वात्। साध्यांशत्रयमपेक्षते साध्यं साधनमितिकर्त्तव्यताञ्च। किं भावयेत्? केन भावयेत्? कथं भावयेत्? इति। तत्र साध्याकाङ्क्षायां स्वर्गादिफलं साध्यत्वेनान्वेति। साधनाकाङ्क्षायां यागादिः करणत्वेनान्वेति, इतिकर्त्तव्यताकाङ्क्षायां प्रयाजाद्यङ्गजातमितिकर्त्तव्यत्वेनान्वेति"।

भट्टाचार्य्य पु० भट्टस्तुतातभट्टश्च आचार्य्य उदयनाचार्य्यश्च तौ तुल्यतया तन्मताभिज्ञतया वाऽस्यास्य। तुतातभट्टेन उदयनाचार्य्येण च १तुल्ये २तयोर्मतानभिज्ञे च। इनः। २तयोः हि० व०। "नास्तिकानां निरासाय भट्टाचार्य्यौ भविष्यतः"।

भट्टार त्रि० भट्टं स्वामित्वमृच्छति ऋ अण्। १पूज्ये

त्रिका० मूर्खे पु० स्वार्थे क० पूज्ये त्रि० जटा०। नाट्योक्तौ रूपे संज्ञायां कन्। देवे तपोधने पु० मेदि० अमरः। "सखे! स्वायुर्निमिताः पाशास्तदद्य भट्टारकवारे कथमेतान् दलैः स्थगयामि" हितो०।

भट्टि पु० १द्वाविंशतिसर्गात्मके महाकाव्यभेदे तच्च जयमङ्गलेन श्रीधरस्वामिसूनो महाब्राह्मणस्य महावैयाकरणस्य भट्टेः कृतिरित्युक्तं भरतमल्लिकेन भर्तृहरिणा कृतमित्युक्तं तच्चिन्त्यं "काव्यमिदं विहितं मया वलभ्यां श्रीधरसेनराजपालितायाम्" तत्र द्वाविंशसर्गश्लोके उक्तेः न भर्तृहरिकृतत्वम् भर्तृहरेरुज्जयिनीवास्तव्यत्वेन तद्भूपतित्वेन च वलभीराजधानीवास्तव्यत्वोक्तेरनुचितत्वात्। भट्टिनी स्त्री भट्ट स्वामित्वमस्त्यस्याः इनि ङीप्। नाटकोक्तौ १अभिषेकायां राज्ञः स्त्रियाम् अमरः। २विप्रभार्य्यायाम् मेदि०।

भट्टोजि पु० विद्वान्कौमुदीशब्दकौस्तुभादिप्रन्थकारके दीक्षितोपनामके वैयाकरणभेदे। [वलभ्ये।

भड परिभाषणे भ्वा०आ०सक०सेट् दृदित्। भण्डते अभिभण्डत

भड कल्याणभाषणे चु० उ०सक० सेट् दृदित्। भण्डयति-ते अबभण्डत्-त। प्रतारणे च भण्डयति प्रतारको मन्त्रं धनदानाङ्गीकारेण, सनिन्दोपलम्भे परिहासे च उषा० सू० भडिभण्डोः पृथग्निर्देशात् अयमिदित्त्वेऽपि।

भड पु० भडि-अच्। वर्षासङ्करभेदे "लेटलीवरकन्यायां जनयामास षड् नरान्। मातृं मातृं मातरं च भड़ं कोलं च कन्दरम्" ब्रह्मवै०ब्रह्मख०२०अ०।

भडिल पु० भड-इलच्। १वीरे २सेवके उज्ज्वलः। २ऋषिभेदे ततः गर्गा० यञ्। भाडिल्य तदपत्ये अश्वा० फञ्। भाडिल्यायन तदपत्ये बहुत्वे तस्य लुक्।

भण कथने भ्वा०पर०हिक०सेट्। भणति। अभाणीत्-अभणीत्। भडि वा ह्रस्वः। अबीभणत्-त अबभाणत्-त। कथनमिह व्यक्तवाक्यम्।

भणिति स्त्री भण-क्तिन् पक्षादित्वादिट्। कथने। गौडोर्वीशकुलप्रशस्तिभणितेः" नैष०। [२हस्तिन्यां रत्नमाला।

भणाकी स्त्री भटि-वाकन् ङीप्। १वार्त्ताकीख्यात्, अमरः।

भण्टु(ण्ट्)क पु०भटि-उक अक वा। यद्योनाकृतौ रत्नमा०

भण्ड पु० भडि-अच्। अश्लीलवाक्यभाषके (भाँड़) "त्रयो वेदस्य कर्त्तारो भण्डधूर्त्तनिशाचराः" सर्व०सं०चार्वाकदर्शनम्

भण्डक पुंस्त्री० भण्ड+संज्ञायां कन्। खञ्जनखगे अटा०। स्त्रियां जातित्वात् ङीष्।

भण्डन न० भडि-भावाधारादौ ल्युट् १अवीकारे (प्रतारणे) २कवचे मेदि०। [वैद्यायां शब्दर०।

भण्डहासिनी स्त्री भण्डेन वह्नं हसति णिनि ङीप्।

भण्डि स्त्री भडि-इन्। १वीचौ हारा०। वा ङीप् ङीवन्तः २शिरीषवृक्षे राजनि०। [शब्दर०

भण्डिका स्त्री भण्ड-एवुल् कापि अत इत्त्वम्। भण्डिकायां

भण्डित पु०भडि-क्त। १ऋषिभेदे ततः गर्गा० यञ्। भाण्डित्य तद्गोत्रापत्ये पुंस्त्री अश्वा०फञ्। भाण्डित्यायन तद्गोत्रापत्ये पुंस्त्री०। तस्य बहुत्वे वा लुक्।

भण्डिर(ल) पु०भण्ड-इरच् पृषो०रस्य वा डः १शिरीषवृक्षे अमरः। राल्लः वाचस्पतिः। डाल्लः शुभे दूते त्रि० उणादिको०।

भण्डीतकी स्त्री भण्डो सतो तनति तक-आने अच् गौरा० ङीष्। भण्डिकायां भावप्र०।

भण्डीर पु० भण्डि वा०ईरच्। १वटवृक्षे २तण्डुलीयशाके ३शिरीषवृक्षे च राजनि०हरिवं०६५ अ०। तद्गुणवर्णनम्

भण्डीरलतिका स्त्री भण्डीर इव लतते लत-अच् स्वार्थे क कापि अत इत्त्वम्। भण्डिकायां राजनि०।

भण्डीरी स्त्री भण्डि। वा० ईर गौरा० ङीष्। भण्डिकायाम् अमरः। रस्य डः। तत्रार्थे पु० शब्दच०।

भण्डु पु० भडि-उण्। देशभेदे ततः तस्यास्मा० चतुरर्थ्यां अण्। भाण्डव तद्दूरदेशादौ त्रि०।

भण्डु(ण्डू)क पु० भडि-उक अक वा। (भाङ्गन) मत्स्यभेदे रत्नमाला। दीर्घमध्यः २ह्रस्वोनाकृतौ रत्नमाला।

भद्र शुभकरणे प्रीतौ च भ्वा० आ० अक० सेट् दृदित्। भन्द्रते अभन्द्रिष्ट। [भन्द्रत्-त।

भद्र कल्याणकरणे चु०उ०अक०सेट् दृदित्। भन्द्रयति-ते अबन्

भद्रन्त पु० भदि-झच् नलोपः। १बोद्धभेदे। २पूजिते त्रि०। उणादि० २अव्रजिते उज्ज्वल०।

भदाक न०भदि कल्याणे आकन् नलोपः। कल्याणे उज्ज्वल०

भद्र न० भदि-रक् नि० नलोपः। १मङ्गले उषा०२ हस्तिवे २स्वर्णे च मेदि०। ज्योतिषोक्ते नवादितः सप्तमे करणे स्त्री न०। ४महादेवे ५हर्षे ६वृक्षभेदे ७कदम्बे ८शर्करातिभेदे ९नवदेवे १०रामशरभेदे पु० मेदि०। ११सुमेरुशैले पु० हेमच० १२क्षुद्रोडुवृक्षे च पु० राजनि०। ज्योतिषोक्तास्तु १३तिथीनामष्टमीद्वादशीतिथिषु च स्त्री। १४धार्मे १५श्रेष्ठे च त्रि० मेदि०। १६देवदारुणि पु०। १७कृष्णभगिन्यां स्त्री "रामं मां भद्रया युक्तं" त्रि० त०।

१८मध्यदेशभेदे पु०ब्र०१४अ०कूर्मविभागे दृश्यम्। १९वसु-देवपुत्रभेदे पु० भाग०९२।४।२५ श्लो०। २०तुषितदेवगण-भेदे भाग० ४।१।८। २१वैश्रवणपत्न्यां स्त्री०भा०१८६अ०। २२सोमस्य इड़ितरि जातपत्न्यां स्त्री भा०अ० १५४अ०। २३रौद्राश्वस्य कन्याभेदे हरिवं० १६अ०। २४मटभेदे पु० हरिवं० १९० अ०। २५भारतवर्षस्थे नदीभेदे स्त्री मार्कपु० ५८ अ०। विष्टिभद्रायाः सर्वकार्ये वर्जनप्रतिप्रसवादिकं स० चि० पी०धा० दर्शितं यथा "अयोगे सयोगोऽपि चेत् स्यात् तदानीमयोगं निरस्यैव-मिष्टिं जनोति। परे सन्नगुप्ता कुयोदिनार्धं दिनार्द्धो-त्तरं विष्टिपूर्वं च यत्तम्(१)। शुक्ले पूर्वार्द्धे ऽष्टमीषष्ठ-दशमीभद्रैकादश्यां चतुर्थ्यां परार्द्धे। कृष्णेऽन्यार्द्धे स्यात् तृतीयादशम्योः पूर्वे भागे सप्तमीशम्यु तिथ्योः(२)। यच्चतुर्दशिकाष्टरामरसभूयामादिदशाः शरा विष्टेरास्य असदृग्जेन्दुरसराद्यास्त्रिवाणाग्निषु। यामेष्वन्त्यघटीत्रयं शुभकरं पुच्छं तथा वासरे विष्टिस्तिथ्यपरार्द्धजा शुभकरी रात्रौ तु पूर्वार्द्धजा(३)। कृत्यकल्पतरौ मत्स्ये वर्गेऽजेऽजा-ख्येऽश्विने। स्त्रीधनक्रूरकर्मणि धी भद्रा तत्रैव तत्-कृत्यम्(४)" मू०।

"अथावश्यकशुभकृत्ये कालान्तरप्रतीक्षाऽयोग्यतायां परिहारमाह विष्टिपूर्वं विष्टिर्भद्रा ततपूर्वं तदादि व्य-तीपातादिकं दिनार्द्धोत्तरं मध्याह्नादनन्तरं यत्तं प्राह्ण-मध्याह्नं यावत्कालो निषिद्धः "विष्टिरङ्गारक श्चैव व्यतीपातश्च वैष्टितिः। प्रत्यरं जन्मनक्षत्रं मध्याह्नात् परतः शुभम्" इति तेनैवोक्तत्वात्(१)। अथ भद्रा निषिद्धेति पूर्वसूत्रं तदधुना प्रस्तावात् तन्निषिद्धकालं शालिनीच्छन्द-साह शुक्ले इति। शुक्लपक्षे अष्टम्यां पूर्णिमायाञ्च पूर्वार्द्धे भद्रा भवति एकादश्यां चतुर्थ्यां चोत्तरार्द्धे भद्रा। अथ कृष्णे कृष्णपक्षे तृतीयायां दशम्यां चान्त्यार्द्धे उत्तरार्द्धे भद्रा स्यात् सप्तम्यां शम्यु तिथौ चतुर्दश्यान्तु पूर्वे भागे पूर्वार्द्धे भद्रा स्यात् पूर्वे इति पूर्वादिग्भो नवभ्यो नेति स्त्रिनभावपक्षे रूपम्। अष्टम्यादीनां तिथीनां गत-शेष्यघटिकायोगार्द्धं भद्राप्रमाणमिति यावत् "तिथे-र्गतैष्यैक्यदलं तन्नाम करणं भवेत्" बोधदैवोक्तेः "तिथ्य-र्द्धभागं सर्वेषां करणानां प्रकल्पयेत्" इति सूर्यसिद्धा-न्तोक्तेश्च। उक्तञ्च दीपिकायाम् "तृतीयादशमीशेषे तदूप-मन्योन्तु पूर्वतः। कृष्णे विष्टिः स्मृते तद्वत्तासां परतिथि-स्मृतिः" बृहस्पतिना तु अष्टसङ्ख्यम्। "स्मृते चतुर्थ्यामन्त्या-र्धमष्टम्याद्यार्द्धमेव च। एकादश्यां परार्द्धे तु पूर्वार्द्धे पूर्णयोर्गतयोः। कृष्णे तृतीयान्त्यार्द्धे हि सप्तम्याद्यार्द्ध-मेव च। दशम्यास्तूत्तरार्द्धे तु चतुर्दश्यर्द्धमादितः। वि-ष्ट्याख्योऽयं भद्रादोषः कथितोऽत्र समस्ततः। तदार्गैः कृत-तत्कर्म कर्त्रा सद्य विनश्यति" इति। पूर्वयोर्गतयोः पूर्णिमा-यामू। रत्नकोशे प्रत्येकं भद्रानामानि "हंसी नन्दिन्यपि च त्रिशिराः सुमुखी करालिकाचैव वैक्रतिरौद्रमुखी च चतुर्थ्यां विष्टयः क्रमशः"। चतुर्थ्यादितिथिषूक्तेषु भद्रानामाभिधानं नामसाङ्कर्येण फलतारम्यसूच-नार्थम्। भद्राशब्दरूपं रत्नमालायाम् "वृद्धबोष्ट्रोटतरपो-ड़िताऽतिकृष्णा दंष्ट्रोग्रा पृथुहनुगण्डदीर्घनासा। कार्ष्ण्-क्लीङ्तवक्त्रवक्षं सदृगिरली विश्वान्तः पतति समन्ततोऽत्र विष्टिरिति"(२)। अथ चतुर्थ्यादितिथिषु भद्रावासफलपक्ष-विभागादिकं भार्गवविक्रीड़ितेनाह। पञ्चेति चतुर्थ्यादि तिथीनां क्रमशः पञ्चादिप्रहरेषु शराः पञ्च नागाः आदिमा विष्टेर्भद्रावासाः सर्वं सर्वं यथा चतुर्थ्याः पञ्चम-प्रहरे, आदिभूताः पञ्च षष्ठो भद्रासप्तम एवमष्टम्या द्वि-तीयप्रहरे, एकादश्याः सप्तमप्रहरे, पौर्णमासीचतुर्थ-प्रहरे, तृतीयाया अष्टमप्रहरे, सप्तम्यास्तृतीयप्रहरे, भद्रासप्तमित्यर्थः तद्द भद्रावासफलमसदशुभमित्यर्थः अथ पुनश्चतुर्थ्यादितिथीनां क्रमेण गजादिप्रहरेषु अन्त्यम् अन्ते भवमन्त्यं दिगादिभ्यो यदिति वत् घटीत्रयं पुच्छं पुच्छसंज्ञं तच्छुभकरं सकलकार्येष्वित्यर्थः। यथा चतुर्थ्या अष्टमप्रहरस्यान्त्यं घटीत्रयं भद्रापुच्छम् एव-मष्टम्याः प्रथमप्रहरस्य, एकादश्याः षष्ठप्रहरस्य, पूर्णि-मायास्तृतीयप्रहरस्य, तृतीयायाः सप्तमप्रहरस्य, सप्तम्या द्वितीयप्रहरस्य, दशम्याः पञ्चमप्रहरस्य, चतुर्दश्याश्चतुर्थ-प्रहरस्यान्त्यं घटीत्रयं भद्रापुच्छमित्यर्थः। यदाह गुरुः "भूतदस्रशराम्भोधिवह्नयक्षाङ्गरूपकाः। यामेष्वेषु क्रमादाद्यं भवेत् तिस्रश्च विष्टिर्विति"। व्यवहारसमुच्चये "दशम्यामष्टम्यां प्रथमघटिकापञ्चकपरं हरिद्युः सप्तम्यां दिशं १२घटिकान्ते त्रिघटिकम्। तृतीयाराकायां खयम-२०घटिकाभ्यः परमं शुभं विदेः पुच्छं त्रितिथिचतुर्थ्योस्तु विरमे" इति। हरिद्युरेकादशी राका पूर्णिमा। नन्वु भद्रा देवतेत्यभिधीयते तस्याः पुच्छकथनात्तु पशुत्वमिति-र्दृश्यते देवता च कथं पशुभवितुमर्हति। सत्यं दैत्येन्द्रदेवेषु पराजितेषु रुद्रस्य ज्वालामालाकुलनेत्रा क्रोधितदेहात् देवी भद्राभिधा सुखपुच्छादिमत्त्वेन

उत्पन्ना दैत्यान् जघान यद्रक्तं श्रीपतिना दैत्येन्द्रैः समरेऽमरेषु विजितेष्वीशः क्रुधा दहत्यात् स्वकायं किल निर्मता खरमुखी लाङ्गूलिनी च त्रिपात्। विष्टिः सप्तमुखा सुरेन्द्रगलका लाम्बोदरी प्रेतगा दैत्यघ्नी मुदितैः सुरैस्तु करणप्रान्ते नियुक्ता सदेति"। भद्राफलमाह वसिष्ठः "बधबन्धविवाग्व्यङ्गच्छेदनोच्चाटनादि यत्। तत्कर्मविघोष्टादि कर्म विद्यात्तु विष्टौ। न कुर्यान् मङ्गलं विष्ट्यां जीवितार्थी कदाचन। कुर्वन्नश्यति तत्सद्यः तत् सर्वं नाशतां व्रजेत्"। तत्राङ्गविभागः क्रमश्च कश्यपसंहितायाम् "सप्त मध्य गले सैका वक्त्रेऽष्टादश स्मृताः। नाभौ चतस्रः षट् कट्यां तिस्र पुच्छे तु नाड़िकाः। कार्यं हानिर्मुखे मृत्युर्गले वक्षसि निःस्वता। कट्यासुकलहता नाभौ च्युतिः पुच्छे ध्रुवो जयः"। अयञ्च भद्राङ्गविभागो नाड़ीनां त्रिंशतोन्यूनाधिकत्वे तु त्रैराशिकेन सुखादीनामङ्गानां विभागज्ञानं यथा यदि नाड़ी त्रिंशता दृष्टसङ्कमङ्कपरिमाणं दृष्टपरिमाणेन किमिति त्रैराशिकम् एवं सति लब्धाङ्कपरिमाणं भद्राभोगमितघटीभिः कृतत्वं त्रिंशता भाज्यं लब्धसमोऽङ्गविभागः। तत्र सुखादिकाया रत्नमालायाम् "अजगिरिवृश्चिराशिस्थः सर्वं कीनाशवायुवह्निदग्धपतितकृपेषु प्रोक्तमाद्यं हि विष्टेः। नित्यतद्विभिराशासंख्यया क्रमेण स्फुटमिह परिहार्यं पञ्चदेवेतदेव"। अस्या वक्त्रः कीनाशा यमः सृक्कपुच्छयोः उत्तरार्द्धे पश्चिमदिशि भद्रासुखं तद्राशासंख्यक्रमेण पञ्चमे प्रहरे भवति यथैव भद्रायाः प्रहरचतुष्टयाधिकस्थितभावादन्ते एव घटिकात्रयं पुच्छं ततोऽस्यां हीनप्रहरेऽनेन प्रकारेण याम्येयां दिशि सुखं सुखाच्च प्राक् पुच्छमिति प्रथमप्रहरान्त एव पुच्छघटिका इत्येवं सर्वत्रापि भद्रातिथिव्यवगन्तव्यं प्रयोजनमपि तत्रैव "मनुयमसुनितिथियुगदशगिवसुखसंख्यासु तिथिषु पूर्वेद्युः। यातीति विष्टिरेषा पूर्वे शुभदा पुरस्तु शुभेति" तदेतदात्ययिककार्यासम्भवे सति सुखटिकासंसक्तयात्रानिषेधकमवधेयम्। अन्यान्तरे अन्यदप्युक्तम्। "अस्थिते सर्पिणी त्वेषा स्थिते विष्टिस्तु वृश्चिकी। सर्पिण्यास्तु सुखं त्याज्यं वृश्चिक्याः पुच्छमेव च"। अथ परिहारमाह तत्रैव "विष्टिस्तिथ्यपरार्द्धजा तिथ्युत्तरार्द्धे संभूता वासरे दिवसे यदि स्याद् भद्रा तदा शुभकरी तेनैव प्रकारेण तिथिपूर्वार्द्धजा भद्रा रात्रौ चेत् स्यात् तदा शुभा शुभकरी स्यात्। उक्तञ्च "रात्रिभद्रा यदाह्नि स्याद् दिवा भद्रा यदा निशि। न तत्र भद्रादोषः स्यात् सा भद्रा भद्रदायिनी" इति। रात्रिभद्रा तिथ्युत्तरार्द्धोद्भवा दिवाभद्रा तिथिपूर्वार्द्धोद्भवा यथाह गुरुः। "निशि पूर्वार्द्धजा विष्टिर्दिवा चापरतः शुभा। क्रमागता तु या विष्टिः सैव स्याच्छोभना" इति। ज्योतिषेऽपि "दिवा परार्द्धजा विष्टिः पूर्वार्द्धोत्था यदा निशि। तदा विष्टिः शुभायेति कथनासनभाषितम्"। अत्रसिद्धान्तेऽपि "दिवा परार्द्धजा विष्टिर्विष्टिरेव दिवानिशोः। सा त्याज्या सर्वथा विष्टिः सर्वकर्मशुभप्रदा"। नन्वेवं तु नारदक्रमप्रदर्शनमुक्तम्। "करणानि बवादीनि शुभकर्मोक्तानि षट् क्रमात्। क्रमायाता क्रमायाता विष्टिर्नेष्टा तु मङ्गले"। अत्र क्रमायाता दिवारात्रिक्रमायाता दिवाभद्रा रात्रौ रात्रिभद्रा च द्विवेदर्क्षः। एवं सति द्विविधाया अपि भद्रायादोषवत्त्वाच्चोः पूर्वोक्तपरिहाराभिधानमयुक्तम् उच्यते रट्टमेव क्रमायातेति वचनं ज्ञापकसिद्धार्थं अन्यथा सामान्यतो भद्रादये दुष्टे द्विविधभद्राया दोषवत्त्वसिद्धेरनर्थकमिदं ज्ञातृतत्काच्छुभकार्याणां भद्रादुष्टदिनव्यतिरिक्तकालप्रतीक्षाऽयोग्यत्वे तदेव कार्यं न दुष्टदिने अवश्यकर्तव्यस्य तु शुभकर्मणः कालान्तरप्रतीक्षासहत्वेनैवमादिपरिहारमाश्रित्य दुष्टदिने कृतिरुक्षितेव विष्टिरङ्गारकवैलेत्यपि परिहार एतत्पर एवेत्यलं पल्लवितेन। अथ भद्रानिवासं तत्फलज्ञानहेतुमाह (३)। कुर्क्षेति यदा चन्द्रमसि कुम्भहृदये कुम्भमीनस्थे अर्कहृदये अर्कसिंहराशिस्थिते सति भद्रा अस्यां मनुष्यलोके तिष्ठति। यदाजातस्थे मेषवृषमिथुनस्थितेऽग्नि दृश्चिकस्थिते चन्द्रे स्वर्गे भद्रा तिष्ठति। कन्याधनुस्तुलाकरराशिस्थितेऽधः पाताललोके भद्रा तिष्ठति। अथ भद्रा तत्रैव मर्त्य स्वर्गपातालेषु फलं ददातीत्यपवादद्वारा प्रयोजनमाह भवति। उक्तञ्च "मेषोर्कवृषेषु घटसिंहमीनकर्केषु चापयुगतौलिस्थतासु चन्द्रे। स्वर्गे फलं ददति सप्तविधा हि विष्टिः पातालमर्त्यभुवनेषु यथाक्रमेण" इति। भूपालवल्लभे "कन्यातुलाकरगतेषु नागलोके मेषालिवैर्षिकगतेषु सुरालये स्यात्। पाठीनसिंहघटकर्कटगेषु मर्त्ये चन्द्रे वदन्ति मुनयस्त्रिविधां हि विष्टिम्" (४)पी०धा०

भद्रशब्दात् परिवापणे (सफाने) ऽर्थे गम्ये डाच्। क्रमोऽस्त्रप्रयोगः सद्यादा०स०। भद्राकरोति साङ्ग्ल्यं सफानेन संस्करोतीत्यर्थः सि०कौ०। एवं भद्रशब्देऽपि बोध्यम्।

भद्रक त्रि०भद्र-स्वार्थे संज्ञायां वा कन्। १मनोहरे त्रिका०। २भद्रमुस्तके न० शब्दमाला। ३देवदारुवृक्षे शब्दर०। "श्रीं नरनारनायच गुरुर्दिगकेविरवं हि भद्रकमिदम्"। ड०र०उक्ते द्वाविंशत्यक्षरपादके ४छन्दोभेदे।

भद्रकाष्ठ पु० भद्रः काष्ठोऽस्य। गोशुरक्षुपे राजनि०।

भद्रकर्ण पु० भद्रश्चासौ कर्णश्च यत्र। गोकर्णरूपे तीर्थभेदे।

भद्रकर्णेश्वर पु०ष०त०। गोकर्णाख्ये शिवलिङ्गभेदे भा०व०८।च०।

भद्रकार त्रि० भद्रं करोति कृ-अण् उप०स०। १मङ्गलकारके २देशभेदे पु० भा० स० १२ अ०।

भद्रकाय पु०। १नाम्नजित्यां जाते श्रीकृष्णस्य पुत्रभेदे हरिवं० १६२ अ०। ६व०। २मङ्गलदेहके त्रि०।

भद्रकाली स्त्री १दुर्गायक्तिभेदे "जयन्ती मङ्गला काली भद्रकाली कपालिनी" दुर्गापूजामन्त्रः। तदाविर्भावकथा च कल्किपु० ५०अ० दृश्या। तन्मन्त्रादिकं तन्त्रसारे दृश्यम्। २कुमारानुचरभेदे भा० श० ४७ अ०।

भद्रकाष्ठी स्त्री भद्राय काष्ठते काष्ठ-अच् गौरा० ङीष्। भद्रमुस्तायाम् राजनि०।

भद्रकाष्ठ न० ६व०। देवदारुवृक्षे मुस्तके। [अमरः।

भद्रकुम्भ पु० भद्रकारकः कुम्भः या०त०। पूर्णकुम्भे जलपूर्णघटे

भद्रगन्धिका पु० भद्रो गन्धोऽस्त्रस्या बाहुलकेन ठन्। मुस्तके राजनि०।

भद्रगौर पु० देशभेदे स च पूर्वदिग्वर्त्ती मार्क०५८ अ०।

भद्रङ्कर त्रि०भद्रं करोति कृ-खच् मुम्। मङ्गलकारके।

भद्रङ्करण न०भद्रं क्रियतेऽनेन कृ-ल्युट् मुम्। मङ्गलसाधने।

भद्रचारु पु० रुक्मिण्यां जाते वासुदेवस्य पुत्रभेदे हरिवं०१८५अ०

भद्रचूड पु० भद्रा चूडा यस्य। (चङ्गाखिज) द्रुमभेदे शब्दच०।

भद्रज पु० भद्राय जायते जन-ड। इन्द्रवृक्षे राजनि०।

भद्रतरुणी स्त्री भद्रः तरुणीव। कुजवृक्षे राजनि०।

भद्रतुङ्ग पु० तीर्थभेदे भा०व० ८२अ०॥

भद्रतुरग न० भद्राश्वतुरगा यत्र। जम्बुद्वीपस्य नववर्षमध्ये वर्षभेदे। "माल्यवज्जलधिमध्यवर्त्तिवर्षन्तु भद्रतुरगं जगुर्बुधाः" सि० शि० जम्बुद्वीपशब्दे भद्राश्वशब्दे च विवरणं दृश्यम्।

भद्रदन्तिका स्त्री कर्म० स्वार्थे कन्। दन्तीवृक्षभेदे।

भद्रदारु पुंन०। कर्म०। देवदारुवृक्षभेदे अमरः।

भद्रद्वीप पु० कुशद्वीपान्तर्गते उपद्वीपभेदे मार्कंपु० ५८ अ०।

भद्रनामन् पु०६व०। (काटठोकरा) खगभेदे त्रिका०।

भद्रनामिका स्त्री भद्रं मङ्गलं नामयति प्रापयति नम-णिच्-ण्वुल्। लायन्तीलतायां रत्नमा०।

भद्रनिधि पु० दानार्थकल्पिते ताम्रादिघटितघटे तद्दानविधिश्च हेमा० दा० वामनपु० उक्तो यथा

"पुण्यान्तिथिं प्राप्य तु पौर्णमास्यां तथोपरागे शशिसूर्ययोर्वा। चतुर्युगादिष्वयनद्वये वा प्रबोधने प्रस्वपनेऽथ विष्णोः। कृत्वादरात्पौष्करमेव कृत्स्नं स्थिरस्यभारेण यथात्मशक्त्या। तथाविधानञ्च सुराजतं स्वादिरस्यभारेण तु पूरयेत् तम्। तदर्द्धतोऽर्द्धेन तदर्द्धतो वा स्वशक्तितः स्वर्णपलैः शतेन। तदर्द्धकेन तु वित्तशक्त्या पलत्रयादूर्द्धमपि प्रकल्पात्। तत्ताम्रभाण्डे कनकं निधाय सवज्रनीलोत्पलपद्मरागम्। सशुक्तिवैदूर्यसविद्रुमञ्च तद्राजतं पात्रमधोमुखं स्यात्। एवन्तु तं भद्रनिधिं सुविद्वान् कृत्वासने प्रावरणोपयुक्ते। कृशोत्तरे दर्भचामराढ्ये सपादुकोपानहछत्रयुक्तम्। सतूलभद्रोत्तमयुग्मयुक्तं संपूजयेन्नान्तवरैरथैतैः" "आदौ तु पञ्चास्त्रनखेन विष्णुं संशोध्य संसारहरं समर्च्य। तथेश्वरं पावकमेव कृत्वा धामन्यवेद्यद्रनिधिं ततस्तम्। श्रीखण्डकर्पूरसकुङ्कुमेन पद्माक्षरं नाम शिवः प्रविख्य। नमस्तथोङ्कारयुतं च पात्रे तद्राजतेऽभ्यर्चनमर्चयेत। त्वया समस्तामरसिद्धयक्षविद्याधरेन्द्रोरगकिंनरेन्द्रैः। गन्धर्वविद्याधरदानवेन्द्रैर्युतं हृतं विश्वमिदं नमस्ते। समस्तसंसारकरी त्वमेव विभोः प्रदानन्दमयी च माया। समस्तकल्याणनिधिः समाधिः। हरिप्रिये! भद्रनिधिर्नमस्ते। एवं पूज्य विधानेन ततो विप्रमथार्चयेत्। किरीटाङ्गदनिष्काग्र्यकृष्णसाकुक्षिभूषणैः। अलङ्कृत्य हरिं तद्वत् पीताम्बरधरं ततः। पूजयेदच्युतं ध्यात्वा मन्त्रेणानेन भक्तिमान्। भूदेवोऽसीत्यतो नित्यं नित्यानन्दमयो हरे!। हर मे दुष्कृतं कृष्ण! कृपाकर! नमस्तु ते। भूदेव! भगवद्धर्म! भवभङ्गकरेश्वर!। भवभूतिकरोऽजिष्णो! प्रभविष्णुर्नमोऽस्तु ते। एवं पूज्य हृदि ध्यात्वा तं द्विजं विष्णुरूपिणम्। ततो भद्रनिधिं दद्यान्मन्त्रेणानेन मानवः। स्वगोत्रोच्चारणेनादौ वसुनाम तथात्मनः। यवदर्भतिलैः सार्द्धमुदकं संपरित्यजेत्। पितृसंस्मारणार्थाय नित्यानन्दविवृद्धये। सर्वपापविनाशाय विष्णो-

दानं मया कृतम्। तदनेन सत्येन धातुत्रययुतेन च। सप्तोमाम्बरयुक्तेन सादर्शपादुकेन च। छत्रेण सच्छत्रेण चामरोपानहेन च। सदानन्दविधानेन प्रीयतां विष्णुरीश्वरः। एवमुक्त्वार्घं तन्दद्याद् द्विजाय हरिरूपिणे। गोप्येन विधिना दद्याद्वेमसंख्यां न कीर्त्तयेत्। सकीर्त्तिते कोटिगुणायुतं फलं प्रगोपिते कल्पशतेन संशयः। इतीदमन्यस्य न कीर्त्तयेत् सुधीः निधानमध्ये निहितञ्च यद्धनं। एवं कृते स्यान्मनुजः कृतात्मा तपेच्चरेत् स्यान्नरर्षभः कदाचित्। प्रयाति विष्णोः पदमव्ययं तत् शिवात्मकानन्दमयं सनातनम्"।

भद्रपदा स्त्री ब०व० भद्रस्य इयस्येव पदं यासाम्। पूर्वोत्तरभाद्रपदाश्च रायस्त०। तत्र जातः अण् उत्तरपदवृद्धिः। भद्रपाद तज्जाते त्रि०।

भद्रपर्णी स्त्री भद्रं पर्णमस्याः अजादि० टाप्। १कटभरादृक्षे भद्रपर्णा। २प्रसारिण्याम् अमरः। ३गम्भार्य्याञ्च जटाध०। ङीप्। [पीठभेदे भद्रासनशब्दे उक्तम्।

भद्रपीठ पुंन० भद्रार्थं पीठः। रुद्रदेवादीनामभिषेकार्थे

भद्रबलन पु० भद्रं बलनं बलमस्य। बलरामे शब्दमा०।

भद्रब(व)ला स्त्री भद्राय बलति चलति ब(व)ल-अच्। (गत्यर्थादातु) १लतायां २गन्धिकायां, ३माधवीलतायाञ्च अमरः। बलायां राजनि०। [न्यामेदे भा०आ०६६अ०

भद्रभीमा स्त्री कश्यपपत्न्यां दनुसुतायां क्रोधायां जातौ क-

भद्रमल्लिका स्त्री कर्म०। मल्लिकाभेदे नवमल्लिकायाम् शब्दमाला।

भद्रमुख त्रि०भद्रं सुखं तदुव्यापारोऽस्य कप्। सुखकरि "ततो भद्रमुखात्राङं स्वाख्ये स्वाणुरिवाचलः" मार्कपु० १५अ०।

भद्रमुञ्ज पु० कर्म०। शरभेदे भावप्र०।

भद्रमुस्तक पु० कर्म०। नागरमुस्तके। अमरः।

भद्रमुस्ता स्त्री कर्म०। भद्रमुस्तके "भद्रमुस्ता च रुद्रा च तथा नागरमुस्तकः। मुस्तं कटु स्निग्धं वाहि तिक्तं दीपनपाचनम्। कषायं कफपित्तास्रतृड्ज्वरारुचिजन्तुजित्। अनुपदेयं यज्ज्ञातं मुस्तकं तत् प्रचक्षते। तत्रापि सनिमिः प्रोक्तं वरं नागरमुस्तकम्" भावप्र०।

भद्रयव पु० भद्रो यव इव। इन्द्रयवे अमरः।

भद्ररथ पु० कश्यपवंश्ये ऋष्यङ्गपुत्रस्य पुत्रे हरिवं० ३१अ०।

भद्ररेणु इव०। ऐरावते गजे त्रिका०।

भद्ररोहिणी स्त्री भद्रार्थं रोहति रुह-णिनि ङीप्। कटुरोहिण्यां (कटकी) गुणतः तस्याः भद्रदारुकत्वात् तथात्वम्। "दार्वी त्वक् पिप्पली शुण्ठी भाङ्गाशक्रवर्द्धनम्। संयुक्तं भद्ररोहिण्या पक्वं मेवादिभिश्चितम्"।

भद्रवट पु०७त०। १आश्रमभेदे भा०व०२३०अ०।२तीर्थभेदे च।

भद्रवत् न० भद्र+मतुप् मस्य वः। देवदारुवृक्षे राजनि०।

भद्रवती स्त्री भद्रादि पठ्यादि० मतुप् मस्य वः ङीप्। १गाङ्गायाम्। नाम्नजितीजातायां भरतकन्यायां स्त्री हरिवं० १६१ अ०।

भद्रवर्मन् पु०भद्रं दधाति धृ-मनिन्। नवमल्लिकायाम् शब्दच०

भद्रवल्लिका स्त्री नित्यक०। संज्ञायां कन् सुधः अत इत्वम् कर्म०। (अनन्तमूलख्याते) लतामेदे रत्नमा०।

भद्रवल्ली स्त्री नित्यक०। (अनन्तमूल) गोपवल्लयाम् राजनि०।

भद्रविराज् "ओजे तपरो जरो गुरुर्वेनृ मधौ ज्गौ भद्रविराड् भवेद्नोजें" इ० उक्ते अर्द्धसमे वृत्तभेदे।

भद्रश्रमण् पु०भद्रं श्रमे सुखं यस्य। बुद्धाद्यानन्दयुते। ततो भाङ्गा०अपत्ये इञ् भाद्रश्रमि तदपत्ये पुंस्त्री। [२२७अ०

भद्रशाख पु०भद्राः शाखाः सङ्घायाः यस्य। आर्ष्टिषेणे भा०व०

भद्रश्रेय न०भद्राय श्रीयते श्री-कर्मणि अच्। चन्दनवृक्षे रत्न०

भद्रश्रवस् पु० धर्मस्य पुत्रभेदे भाग० ६।१८।१।

भद्रश्री पु० भद्रा श्रीर्यस्य। चन्दनवृक्षे अमरः।

भद्रश्रेण्य पु० दिवोदासात् पूर्वं वाराणसीपतौ नृपभेदे हरिवं० २८ अ०।

भद्रसरस् न० नित्यक०। सुपार्श्वचलस्थे सरोभेदे धान्यचलशब्दे दृश्यम्। [७अ०।

भद्रसालवन न० वृत०। भद्रात्ववर्षस्थे वनभेदे भा० भी०

भद्रसेन पु० देवक्यां जाते वसुदेवस्य १पुत्रभेदे भाग०९।२४।२५ २कलिन्दपपुत्रभेदे च भाग० ८।२२।

भद्रसोमा स्त्री भद्रः सोम इव इवोऽस्याः। १गङ्गायां शब्दमा० २कुरुवर्षस्थे नदीभेदे मार्कपु० ५८अ०। [दृश्यम्।

भद्रा स्त्री भद्रात्ववर्षस्थे १नदीभेदे २विष्टिभद्रादौ भद्रशब्दे

भद्राकरण न०भद्र+डाच् क-ल्युट् साधदा०स०। सुश्रुते रे अ०

भद्राङ्ग पु० भद्रमङ्गमस्य। बलरामे हेमच०।

भद्राम्बज पु० खड्गे त्रिका०।

भद्रारक पु० अष्टादशद्वीपान्तर्गते द्वीपभेदे शब्दमाला।

भद्रालपत्रिका स्त्री भद्रायालति पर्य्याप्नोति अल-अच् तादृशं पत्रं यस्याः कप् अत इत्वम्। गन्धाल्याम् (गान्धाल) शब्दमा०।

भद्राली स्त्री भद्रायालति पर्य्याप्नोति अच् गौरा० ङीष्। १गन्धाल्याम् (गान्धाल) शब्दमा०। वृत०।२सङ्कटवृक्षे च।

भद्रावती स्त्री भद्र-अस्त्यर्थे मतुप् मस्य वः संज्ञायां पूर्वपद-दीर्घः। कट्फलवृक्षे राजनि०।

दारुण पु० ६त०। चन्दनवृक्षे।

दारुण न० भद्रा कल्या यत्र। १जम्बुद्वीपस्थ नववर्षान्तर्गते वर्ष-भेदे। २तद्वर्षस्थे जनपदे पु० ब० व०। तद्वर्षविवरणञ्च "माल्य-वतः पूर्वपार्श्वे पूर्वगण्डिका एकपञ्चाशद् योजनसहस्राणि मानन्तत्व च भद्राश्वा नाम जनपदाः भद्रसालवनञ्च तत्र व्यवस्थितं, कालाभ्रवर्णाः, पुरुषाः श्वेताः, पद्मवर्णिनः, स्त्रियः कृष्णवर्णाः दशवर्षसहस्राणि च तेषामायुस्तत्र च पञ्च कूलपर्वताः तद्यथा शैलवर्णः माल्याख्यकोऽरुण-वर्णः त्रिशृङ्गो नीलवर्ण इति तद्विनिर्गता नद्यस्तदन्तःस्थितानां देशानां तान्येव नामानि ते च देशाः एताः नदीः पि-बन्ति तद्यथा शीता सुवाहिनी हंसवती कावेरी सुरसा माल्यवती इन्द्रनदी कङ्कारवाहिनी हरितोया सोमा-वर्त्ता घृतच्युता वसावा वसुमती फेनपर्णा उष्णगङ्गा धनुष्मती मणिवप्रा शुक्लभागा विद्युत्प्रिया कृष्णतोया कृष्णोदा नागवती शिवा शैवालिनी मणितटा क्षीरोदा वरुणावती विष्णुपदी महानदी हिरण्यस्तम्बवाहा सुरावती वामोदा पताका चेत्येता महानद्यः एताश्च नद्यासमाः कीर्त्तिताः आजन्मान्तं पापं विनाशयन्ति सुदूरतश्च कोटिशश्च नदीर्वै पिबन्ति ते दशवर्षसह-स्रायुषः रुद्रोमाभक्षा इति" वराहपु० गद्यम्। अधिकं जम्बुद्वीपशब्दे २०४५ पृ० दृश्यम्।

भद्रासन न० भद्राय क्षेमायासनं तैस्त्र आस-आधारे ल्युट्। रूपासने अमरः। तल्लक्षणादि ६त० ४८अ० उक्तं यथा "आदावनड्वुच्चर्म जरया संवृतायुषः। प्रयत्नलक्षण-स्तस्य प्राचीनग्रीवमास्तरेत्। ततो दृषद्मयं योधस्य चर्म रोहितमुच्यते। सिंहस्याथ तृतीयं स्याद्व्याघ्रस्य च ततः परम्। चत्वार्येतानि चर्माणि तस्यां वेद्यासुपा-स्तरेत्। शुभे नक्षत्रे संप्राप्ते शुक्लपक्षे निशाकरे। भद्रासनमेकतमेन कारितं रुक्मरजतताम्राणाम्। क्षौरतरुनिर्मितं वा विन्यस्तं चर्मणोपरि। त्रिविध-स्तस्योच्छ्रायो हस्तः पादाधिकोऽर्द्धयुक्तश्च। माल्यस्रिका तत्तरजित् समस्तराज्यार्थिनां शुभदः। अनर्घ्यं स्थिर-रत्नं तत्रोपविशेत्परेश्वरः शुभनाः"।

भद्रिका स्त्री भद्रा+स्वार्थे क। १पञ्चमीः द्वितीयासप्तमी-द्वादशीषु तिथिषु। २योगिनीदशान्तर्गतायां पञ्चम्यां दशायाम् "मङ्गला पिङ्गला धान्या भ्रामरी भद्रिका तथा" दशाशब्दे दृश्यम्। "भद्रिका भवति रो नरौ" छ० र० उक्ते नवाक्षरपादके २छन्दोभेदे "ननरखयुक्तमिह भद्रिका" छ०र० उक्ते ४एकादशाक्षरपादके छन्दोभेदे च।

भद्रेश्वर पु० १शिवलिङ्गभेदे। २कल्पग्रामस्थ शिवलिङ्गभेदे च वामनपु० ४६ अ०।

भद्रैला स्त्री स्थूलैलायाम् राजनि०।

भद्रोदनी स्त्री भद्रमुदनिमित्तमया उद्+अन-वा० स्वार्थे क गौरा० ङीष्। बलायां राजनि०। [बभाल।

भन अर्चने भ्वा०प०सक०सेट् निघण्टुः। भनति अभा(भ)नीत

भन्द अर्चने दीप्तौ च भ्वा० चु० सक० सेट् निघण्टुः। भन्दते अभन्दिष्ट बभदे बभन्दे। कर्मणि भद्यते।

भन्दिल त्रि०भदि-इलच्। १शुभे २क्रमे २दूते च संक्षिप्तसा०

भन्द्रक पु० वङ्गेश्वरसमीपस्थे देशभेदे स्कन्दपु०।

भपञ्जर न० भानां पञ्जरमिव। नक्षत्रचक्रे त्रि०शि०।

भपति पु० ६त०। १नक्षत्रेशे चन्द्रे हेमच० भसाद्यर्थोऽ-स्यत्र। २राशीश्वरे मङ्गलादौ च।

भमण्डल न० ६त०। राशिचक्रे स्त्रि०शि०।

भम्भ पु० भमित्यव्यक्तशब्देन भाति भा-क। झल्लिकाभेदे दंशे शब्दरा०। २तत्तुल्यगतिके धूमे हेमच०।

भम्भराली स्त्री भमित्यव्यक्तशब्दस्य भरमाहरति भृञ्हरति आ+हृ-क गौ० ङीष्। (डांश) झल्लिकायाम्। स्वार्थे क चात इत्त्वम्। भम्भवालिका तत्रैवार्थे त्रिका०।

भम्भासार पु० मगधदेशनृपभेदे हेमच०।

भय न०विभेत्यस्मात् भी-अपादाने अच्। १भयहेतौ। भावेऽच्। २दैन्यात्मके परतः स्वानिष्टसम्भावनारूपे वा चित्तवृत्तिभेदे ३नाटकप्रसिद्धे भयस्थायिभावके रसभेदे च। भयञ्च "रौद्रशङ्का तु जनितं चित्तवैकल्यजं भयम्" सा० द० लक्षितम्। भयानकशब्दे दृश्यम्। ४निर्गुण्डितुलभेदे पु० भा० शल्य० ६६अ०। [क० १५२ श्लो०।

भयकर त्रि० भयं करोति कृ-अच् ६त०। भयकारके भा०

भयङ्कत् त्रि०भयं करोति कृ-किप्। १भयकारके भयं कृन्तति कृत-श्छेदने किप्। २परमेश्वरे। "भयकृद् भयनाशनः विष्णुस०।

भयङ्कर पु०भयं करोति कृ-खच् मुम् च। १भयजनके २रस-भेदे ३दुष्टकुलविशेषे च पुंस्त्री० स्त्रियां ङीष्। भा०व० ३५अ०श्लो०३विश्वेदेवगणभेदे पु० भा० अनु० ६१ अ०। ५कुमारानुचरमातृभेदे स्त्री ङीष् भा० श० ४७ अ०।

भयडिण्डिम पु० भयजनको डिण्डिमः। रणवाद्ये

भयद्रुत त्रि० भयेन द्रुतः श०त०। भयेन पलायिते अमरः।
भयनाशन त्रि० भयं नाशयति नाशि-ल्यु। १भयनिवारके २विष्णौ पु० "भयकृत् भयनाशनः" विष्णुस०।
भयनाशिनी स्त्री भयं रोगभयं नाशयति नश-णिच्-णिनि। त्रायमाणायां लतायाम् राजनि०। [त्रनः ख्यापके।
भयत्राह्मण पु० भयेन ब्राह्मणः सम्पद्यते। भीत्या विप्रत्वेना-
भयभ्रष्ट त्रि० ६त०। भयेन पलायिते लटाघरः।
भयव्यूह पु० भये सति व्यूहः। पार्श्वादितो भयभेदेन राज्ञा कर्त्तव्ये व्यूहभेदे भयभेदेन तत्प्रकारः काम० नी० उक्तो यथा "यायाद्व्यूहेन महता मकरेण पुरोभवे। श्येने-नोभयपक्षेण स्वया वाधीरचक्रया। पश्चाद् भये तु शकटं पार्श्वयोर्जघनञ्चितम्। सर्वतः सर्वतो भद्रं भयव्यूहं प्रकल्पयेत्"।
भयानक पु० बिभेत्यस्मात् भी-ल्युक। १व्याघ्रे २राक्षसे ३रसभेदे च मेदि०। ४भयङ्करे त्रि०। ५भीतेः अपादाने अमरः। तद्रसलक्षणादि सा०द० उक्तं यथा "भयानको भयस्थायिभावः कालाधिदैवतः। स्त्री-नीचप्रकृतिः कृष्णो मतस्तत्त्वविशारदैः। यस्माद् उत्-पद्यते भीतिस्तदस्यालम्बनं मतम्। चेष्टा घोरतरास्तस्य भवेदुद्दीपनं पुनः। अनुभावोऽत्र वैवर्ण्यं गद्गदस्वर-भाषणम्। प्रलयस्वेदरोमाञ्चकम्पादिकृदिहोच्यते। जुगुप्साऽनेगसंमोहसंत्रासग्लानिदीनताः। शङ्काप-स्मारसंम्लानिमृत्युदाद्या व्यभिचारिणः"।
भयापह त्रि० भयमपहन्ति अप+हन-ड। १भयनाशके २रुपे पु०स्त्रिका०२विष्णौ पु०"जितमन्युर्भयापहः"विष्णुस०
भयावह त्रि० भयमावहति या+वह-अच् ह्रस्व०। भय-कारके हेमच०।
भव्य न० भी-भावे यत् वेदे नि०। भये यजुर्भी० १०।५।६। लोके तु भेयमित्येव। [त्रि० अमरः।
भर पु० भृ-अप्। १अतिशये। कर्त्तरि अच्। २भरणकर्त्तरि
भरग त्रि० भरमतिशयं गच्छति गम-ड। १अतिशयगन्तरि भरगेति वर्णलयलोपे २भर्गशब्दार्थे परब्रह्मणि यथोक्तं ब्राह्म०स० योगियाज्ञवल्क्येन "भेति भासयते यस्मात् रेति रञ्जयति प्रजाः। गेति च गच्छतेऽजस्रं भरगात् भर्ग उच्यते"। तत्र भासि-ड भः रञ्जि ड-रः। गम-ड गः तेषां समाहारः भरगम्। तदर्थलय-योगात् भर्ग इत्युच्यते प्रभो०।
भरट पु०भृ-अटन्। १धूमकारे तेन हरति भक्षा०अण् भर-टिक तेन हर्त्तरि त्रि० स्त्रियां स्वित्वात् ङीष् भरटिकी।
भरण न० भृ-भावकरणादौ ल्युट्। १वेतने २पोषणे ३धारणे च। अस्मिन्यर्थविके द्वितीये ४नक्षत्रे शब्दर० ५पोषक-लतायाञ्च स्त्री ङीप्। नक्षत्रभेदे पु० मेदि०। तस्मायोग-तारादिकम् अश्लेषाशब्दे उक्तम् स च राशिचक्रस्थ२०अं-शोत्तर १३।२० कलाविकलात्मिका। उच्चगणान्नगंता-वधोस्थनगंता च। भरणेन हरति भक्षादि०अण् भर-टिक वेतनेन हारिणि त्रि० स्त्रियां ङीष्।
भरणीभू पु० भरण्यां भवति भू-क्विप्। राक्षसस्त्रे हेमच० भगदेवतशब्दे ३०३पृ०।
भरण्ड पु० भृ-अण्डन्। १खामिनि २रुद्रे च उणादिको०।
भरण्य कण्ड्वा० नामधातुः भुरण्येत्यत्र पाठान्तरम् धारणे पोषणे पर० सक० सेट् भरण्यति भुरण्यति वा।
भरण्यभुज् त्रि० भरण्यं वेतनं भुङ्क्ते भुज-क्विप्। वेत-निके कर्मकरे अमरः। [इत्ये (रासदूती) शब्दच०।
भरण्यास्था स्त्री भरण्या आस्था आस्था यस्याः। पर्षु०ब०
भ(भृ)रण्यु पु० कण्ड्वा० भ(भृ)रण्य उनु। १भरण्ये २अग्नौ च शब्दमाला। ३चन्द्रे ४सूर्य्ये च संक्षिप्तसा०। भरण्यृरिति पाठान्तरम्।
भरत पु० भरं तनोति तन-ड। (जड़भरत) इति ख्याते १मुनिभेदे जड़भरतकथा च ३०१५पृ० उक्ता। नाट्यशास्त्रस्य अलङ्कारशास्त्रस्य च २कर्त्तरि मुनिभेदे ३अश्वरे ४नन्तुवाये ५नटे ६वैकयीसुते रामानुजे च। भरतेन प्रोक्तम् भारतं नाट्यशास्त्रमधीयते अण् तस्य लुक्। ७तच्छास्त्राध्येतृषु ब०व०।८दुष्मन्तेन शकुन्तलायामुत्पादिते पुत्रभेदे पु०तस्यापत्यादि इञ् तस्य बहुषु लुक् ९भरतवंशजे रुपे पु०ब०व०। दौष्मन्तिभरतकथा भाग०९।२०अ०द्रष्टव्या १०ऋषभदेवपुत्रभेदे भाग०५।४अ०। ११वह्निपुत्रभेदे "पावनो लौकिको ह्यग्निः प्रथमो ब्रह्मणः सुतः। ब्रह्मोदवाग्निसंस्तुत्यो भरतो नाम विश्रुतः"मात्स्ये ४८अ०। रामानुजभरतस्य जन्म यथा "भरतो नाम कैकेय्यां जज्ञे सत्यपराक्रमः। साक्षा-द्विष्णोश्चतुर्भागः सर्वैः सद्गुणितो गुणैः"।१२औत्तमसमन्वन्तरपुत्रभेदे मार्कण्डे०१००अ०। १३आयुधजीविसंघभेदे पु० ततः यौधेया० स्वार्थे अण्। भारत तदर्थे ब०व०। १४ऋत्विक्षु ब०व० निघण्टुः।
भरतखण्ड कुमारिकाखण्डे "कुमारिकेति विख्याता यस्या नाम्ना प्रकथ्यते। इदं कुमारिकाखण्डं चतुर्वर्णफल-प्रदम्। यथा क्षत्रावलीयत्र नामाख्यादिलक्षणा।

दृदं भरतखण्डञ्च मया सम्यक् प्रकल्पितम्" स्कन्दपु०।

भरतद्वादशाह पु० भरतक्षते द्वादशाहसाध्ये यज्ञभेदे "सर्वाग्निष्टोमो भरतद्वादशाहः" कात्या० श्रौ० २४।७।१२। "तत्र यज्ञे सर्वाग्निष्टोमा भवन्ति प्रायणीयोदनीयवर्जम्। तेन दशरात्रस्य स्थाने दशाग्न्यग्निष्टोमाः भवन्ति द्वादशानयोः प्रायणीयोदनीययोरतिरात्रावेव" संग्रहव्याख्या कात्या० श्रौ० १०।५।८ द्वयादौ तु अन्यथोक्तं यथा "अथ भरतद्वादशाहः" सू० "अथशब्दोऽहीनकैवल्यबुद्धिविच्छेदार्थः। सत्राहीनसाधारणास्त्रयो द्वादशाहा उक्ताः। तत एकोऽहीन उक्तः। उक्तमस्य साधारण एवमतस्तद्विच्छेदार्थमथशब्दः प्रयुक्तः" नारा०। "दशमेवैकाहं पृथक् संस्थाभिरभ्येयुः" सू० "भरतद्वादशाह स्याहःकृप्तिः। दशमेव प्रकृतैकाहं पृथगभूताभिः संस्थाभिर्युक्तं द्वादशत्वाय कुर्युः। विकृतिषु प्रकृतेः संनिधानत्वादिदमुच्यते। उत्तरत्र संस्थाविधानादेव संस्यासम्बन्धे सिद्धे पृथक्संस्थाभिरितिवचनं वचनादेव स्थाननियमो नातिदेशादिति ज्ञापनार्थम्" नारा०। "अतिरात्रमध्येऽग्निष्टोमसंस्थाः उक्थ्यानग्निष्टोमसंस्थातिरात्रम्" सू० "द्वादशाहसामान्येन प्राप्तानां संस्थानां विधीयमानो भरतद्वादशाहे अयमपवादः" नारा०।

भरतपुत्रक पु० भरतस्य नाट्यशास्त्रकर्तुः पुत्र इव आयति कै-क। नटे हेम०। [स्त्रियां भेदेवपत्न्यां च।

भरतप्रसू स्त्री ६त०। १केकयां शब्दर०। २शकुलतायाम्

भरतवर्ष न० ६त०। भारते वर्षे।

भरताग्रज पु० ६त०। दाशरथौ श्रीरामे।

भरद्वाज पु० ब्रह्मणः भ्रातुरुतथ्यस्य पत्न्यां ममतायां बृहस्पतिना जनिते मुनिभेदे। तदुत्पत्तिकथा विष्णुपु० ४अं० १८अ०। भाग०९।२०अ०। द्राजयद्वदे १७८६पृ०तन्निरुक्तिरुक्ता। भा०अनु०९३अ०अन्यथा निर्वचनञ्च यथा "भरेऽसुतान् भरेऽग्निष्यान् भरे देवान् भरे द्विजान्। भरे भार्यां भरद्वाजं भरद्वाजोऽस्मि शोभने!"। "प्रजा वै वाजस्ता एष बिभर्त्ति यद्बिभर्त्ति तस्माद्भरद्वाज इति शुल्वानुसारेण व्युत्पादनाच्च "भरे इति अग्निष्यान् आग्नेयान् राक्षसान् शत्रूंश्च वयंजन कर्त्तृकया पालयामि तथा असुतान् अपत्यादीनपि दीनानदीनान् पालयामि भार्यां भार्येति पुत्रेष्ट्यादेरपत्यस्य ईदृग्विधोऽन्योऽपि वाजं वेगं शत्रूणां साहसमत्रं वा भरेत्स पृथिवीवत् सर्वं सहोऽग्रदत्त भवतीति तस्मादृषयोऽपि तथाकीर्त्तयः। भरे द्राजसिति च्छेदे तु द्राभ्यां जातं सहरजसित्यर्थः। नन्वेवं "भाता भक्षो पितुः पुत्रो येन जातः स एव सः" इति श्रुतेरुभयोरतुल्या मातेत्यतः सर्वाभ्येकज एवेति नास्ति कश्चिद् दोषः। न हि द्राभ्यां रेतःसेकाभ्यामेको जायत इति सम्भवति सत्यम् आङ्गिरसनीयादीनामपि संस्कारवतां सर्वेषां द्विधा जन्म योनितः संस्कारतश्च तत्र सद्गुरोरन्यत्वाच्चात्रोऽन्येन सहज इति बुद्ध्या संस्कृत इति स एव द्राजः द्विर्जायत इति द्विरुच्यः द्राभ्यां स्त्रीपुरुषाभ्यां जायत इत्यर्थः द्राजादयो निपात्यन्ते तत एव द्राजा अपि सन्नीति "वशी वशं नवसि एकजात! त्वमिति" मन्त्रे मन्योः संकल्पस्य एकजेति विशेषेण द्राजे तु बीजसंस्कार सद्गुरादप्यग्रं संकल्पबोधौद्धत्यसयोर्वा पौर्वापर्यविरोधो भवतीति विश्वासघातकादयो द्राजा इति श्रेयं तदर्थं संग्रहः "कौशिके कौत्सेतपसी राधेये शौर्यभीरुते। खड्गे वाक्चित्तवैमल्ये बीजसंस्कारसद्गुरादिति" नीलक०। ३मनोरूपे सचेतने ऋषिभेदे तन्निरुक्तिर्यथा "भरद्वाज ऋषिरिति। मनो वै भरद्वाज ऋषिरन्नं वाजो यो वै मनो बिभर्त्ति सोऽन्नं वाजं भरति तस्मान्मनो भरद्वाज ऋषिः" शत० ब्रा० ८।१।१।८। अस्यार्थः "भरद्वाज ऋषिः बिभर्तीति भरत् वाजमन्नं यः स भरद्वाजोऽन्नधर्त्ता मनः मननशक्तिः अन्नादनेष्वोतृपत्तेः ऋषिः सचेतनो मनोरूपः" यजु० १२।५९ वेददी०। (भारद्व) ४खगभेदे पुंस्त्री० अमरः। ५दैत्यभेदे भा० भी० ६अ०। भरद्वाज ऋषिश्च मोक्षपर्वोक्तः तच्छब्दे २७८६ पृ० दृश्यम्।

भरम त्रि० भृ-बा० असच्। भरणकर्त्तरि। ततः शुभ्रादि० स्वार्थे ढक्। भारमेव तदर्थे पुंस्त्री०।

भरस् पु० भृ-असुन्। भरणे। ऋ०५।१५।४।

भरित त्रि० भरो जातोऽस्य तारका० इतच्। १जातभरणे हरित+पृषो०ह्रस्वः। २हरितवर्णे शतपथे स्त्रियां ङीप् तस्य नः। भरिणी तद्वर्णयुक्तायां स्त्रियाम्।

भरित्र न० हि०यत्र-इत्र। बाह्वोः निघण्टुः।

भरिमन् पु० भृ-कर्मणि इमनिच्। १कुटुम्बे उज्ज्वल०। भावे इमनिच्। २भरणे उणादिको० कर्त्तरि इमनिच् ३विष्णौ त्रि० कौ०।

भरु पु०भृ-उनु। १स्कन्धिनि उज्ज्वल०। २खर्वे ३शिवे मेदि०।

भरुक पु० दक्षिणदेशभेदे ह०स० १४अ०।

भरुज पुंस्त्री० भेतिशब्देन रुजति रुज-क। भृगाले ततः जातित्वेऽपि स्त्रियां बह्वा० वा ङीष्। भरुजा भरुजी। ततः स्वार्थे अकुल्वा० ठक्। भारुजिक तदर्थे।

भरुटक न० भृ-उट संज्ञायां कन्। भटाभिधे क्षेमच०।

भरे अव्य० भृ-बा० ए। संग्रामे निघण्टुः।

भर्ग पु० भ्रस्ज-घञ् भर्जादेशे कुत्वम्। १शिवे २ज्योतिःपदार्थे ३आदित्यान्तर्गते ऐश्वरे तेजसि, "आदित्यान्तर्गतं यच्चो भर्गाख्यं तन्मुनिभिः। जन्ममृत्युविनाशाय दुःखस्य त्रितयस्य च। ध्यानेन पुरुषैर्यच्च द्रष्टव्यं सूर्यमण्डले" योगिवाज्ञ०। तस्य तेजस ऐश्वरत्वञ्च "यदादित्यगतं तेजो जगद्भासयतेऽखिलम्। यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्" इति गीतायामुक्तम्। भावे घञ्। ४भर्जने च। ५पुष्टकेतुवंश्ये नृपभेदे हरिवं० २६अ०। ६देशभेदे। तत्र भवः तस्य राजा वा अण्। भार्ग। तद्देशवास्तव्ये तत्र भवे च स्त्रियां न लुक् भार्गी।

भर्गस् पु० भ्रस्ज-असुन् नुडभ्रा०। तेजसि ऋ० १।४३।१।

भर्गादि पु० तद्राजार्थं प्रत्ययस्य स्त्रियां लुगनित्ये शब्दभेदे च यथः "भर्ग कङ्क केकय कङ्कोर कास्य कुरुष उरस् कौरव्य"।

भर्गायण पु० प्रवरर्षिभेदे प्रवराध्यायः।

भर्ग्य पु० भ्रस्ज-यत् भर्जादेशे कुत्वम्। शिवे रावण०।

भर्जन न० भ्रस्ज-भावे ल्युट् भर्जादेशः (भाजा) तण्डुलादेः पाकभेदे शब्दमा०।

भर्ज्जस् त्रि० भृ-असुन् नुगागमः। भरणकारके ऋ० ८।६०।२

भर्त्तृ पु० भृ-तृच्। १स्वामिनि २अधिपतौ अमरः। ३राजनि ४पोषके ५धातरि च त्रि० मेदि० यावता० अस्त्रा समाप्तः। ६विष्णौ पु० "सवनो भावनो भर्त्ता" विष्णुस० तस्य सर्वभर्तृत्वेन पालनात् तथात्वम्।

भर्त्तृघ्नी स्त्री भर्त्तारं हन्ति हन-टक् ङीप्। पतिघातिन्यां पाणिरेखायां "पाणिग्रहानान्वितास्तेनाभर्तृघ्नः कामगादिकाः" याज्ञ०। स्त्रीत्वात् मनुष्यकर्तृकत्वेऽपीह टक्।

भर्त्तृदारक पु० भर्त्तरधिकस्य राज्ञः दारकः पुत्रः। नाटकोक्ते १राजकुमारे। २तत्कन्यायां स्त्री। भर्तृदारिका० अमरः।

भर्त्तृस्थान न० तीर्थभेदे भा०व० ८३ अ०।

भर्त्तृहरि पु० भर्त्ता हरिरिव। वाक्यपदीयादि ग्रन्थकर्त्तरि विक्रमादित्यस्य ज्येष्ठे भ्रातरि राजभेदे। [भर्तृवत् त।

भर्त्स अधिक्षेपे चुरा०उभ०सक०सेट्। भर्त्सयति ते अभर्त्सीत्। तिरस्कारायाक्षेपार्थकवाक्योक्तौ। युच्। भर्त्सनाय स्त्री

भर्त्स्यपत्रिका स्त्री भर्त्स्यं भर्त्सनीयं पत्रमस्याः कप कापि अत इत्वम्। महानीलीवृक्षे राजनि०।

भर्भ हिंसायां भ्वा०पर०सक०सेट्। भर्भति अभर्भीत्।

भर्म(न्) न० भृ-मनिन् वा। १स्वर्णे अमरः। २भस्मनि ३नाभौ ४धुस्तूरे च क्षेमच०। नान्तः अदन्तश्च द्विरूपकोशः

भर्मण्या स्त्री भर्मणि साधु यत्। भस्मनि क्षेमच०।

भर्माख्य पु० भरतवंश्ये नृपभेदे भाग० ६।२१।२४।

भर्व हिंसायां भ्वा०पर०सक०सेट्। भर्वति अभर्वीत्। भोजने निघण्टुः। [क्विप् बभूवे।

भल बधे दाने निरूपणे च भ्वा०चु०सक०सेट्। भलते अभलत

भल निरूपणे चु०चु०सक०सेट्। भालयते अबीभलत।

भलता स्त्री भाति-भा-क धर्म०। राजपत्नीतादासु शब्दर०

भलन्दन पु० १दिष्टवंश्ये नृपभेदे भाग०९।२।१६। २कान्यकुब्जदेशीये नृपभेदे ब्रह्मवै० ब्रह्म०खं० १७ अ०।

भलानस् त्रि० भल्लुक्षे ऋ० ७।१८।७। [ङीप्।

भल्ल दाने बधे निरूपणे च भ्वा०प०सक०सेट्। भल्लति अभल्लीत्

भल्ल पु० भल्ल-अच्। १भल्लूके। २अस्त्रभेदे पुंन०। स्वार्थे क भल्लूके पुंस्त्री०वा गौरा०ङीष् पक्षे टाप्। भल्लकाख्यत। ततः सङ्घा०निर्वृत्तार्थे अण्। भाल्लिक तत्सादूरदेशादौ त्रि०। ६अ०१४ अङ्गे ऐशान्यां स्थिते १देशभेदे पु०। ४तद्देशभवे च व०व०। स्वार्थे क। भल्लुक तत्रार्थे ततः स्वार्थे अ। भल्लकीय तदर्थे तत्रापत्यं अ। भल्लकीय तदपत्यादौ त्रि०।

भल्लपाल पु० भल्लं पालयति पालि-अच् उप०स०। भल्लपालके ततः सङ्घा०चतुरर्थ्यां ठञ्। भाल्लपालिक तेन निर्वृत्तादौ। [तत्सङ्घा) चुपभेदे शब्दच०।

भल्लपुच्छी स्त्री भल्लस्य पुच्छमिव पुष्पमस्याः ङीप्। (गोरक्षतण्डुलीवृक्षे राजनि०।

भल्लवि पु० ऋषिभेदे तस्यापत्यमिञ्। भाल्लवि तदपत्ये तस्यापत्यं ढक्ञ्। भाल्लवेय तदपत्ये पुंस्त्री०। इन्द्रद्युम्ने ऋषिभेदे पु० ब्रा०स०। [ब्रा०स०।

भल्लाक्ष पु० भल्लमक्षि यस्य बहुव्री०। मन्दहृदो हंसभेदे

भल्लाट पु० १शशिध्वजराजपुत्रे कथासरि० २२अ०। २नक्षत्रवंश्ये २नृपभेदे हरिवं० २०अ०।

भल्लात पु०न० भल्लं भल्लाक्षमिवातति अर्शिनम् अत-अच्। (भेला)वृक्षभेदे स्वार्थे क। तत्रैव पुंस्त्री०गौ०ङीष्। भल्लातक तत्फलयत्र रूढमा०। "भल्लातकं त्रिषु शोक्षमस्त्रीकरञ्जरो

ऽग्निकः। तथैवाग्नीशखो भल्ली वीरदत्तश्च योऽब्रवीत्। भल्लातकफलं पक्वं खादुपाकरसं लघु। कषायं पाचनं स्निग्धं तीक्ष्णोष्णं छेदि भेदनम्। मेध्यं वह्निकरं हन्ति कफवातव्रणोदरम्। कुष्ठार्शोपहृद्गुल्मप्लीहोदरविषज्वरक्रिमीन्। तन्मज्जा मधुरो हृद्यो दृङ्मेधो वातपित्तहा। हन्त्यामयुष्करं खादु पित्तघ्नं केश्यमग्निकृत्। भल्लातकः कषायोष्णः शुक्रलो मधुरो लघुः। वातश्लेष्मोदरानाहकुष्ठार्शोपहृदान्। हन्ति गुल्मज्वरं चित्रवह्निमान्द्यक्रिमिव्रणान्" भावप्र० गुडभल्लातकशब्दे भल्लातकीगुडपाकविधिर्दृश्यः।

भल्लातकतैल न० भल्लातकफलच्यवनजाते तैलभेदे

"दुरूढत्वात् तु शुष्काणां क्षणकर्म हितं भवेत्। भल्लातकान्वासयेत् तु क्षीरे प्राङ्मूलभावितान्। ततो द्विधा छेदयित्वा क्षीरे कुम्भे निधापयेत्। कुम्भेऽन्यस्मिन्निखाते तु तं कुम्भमथ योजयेत्। सन्धिं सुखेन सन्धाय गोमयैर्दोहयेत् ततः। यः स्नेहस्रवते तस्माद्दृढाहृयेत तं यत्नैर्भिषक्। पाषाणमूषकान्धान् सूक्ष्मचूर्णानि कारयेत्। तैलेनानेन संसृष्टं शुष्कमालेपयेद् व्रणम्। भल्लातकविधानेन कारस्नेहांस्तु कारयेत्। ये च वैचित्फलस्नेहा विधानं तेषु कीर्त्तितम्। दुरूढत्वात्तु क्षाराणां पाण्डुकर्म हितं भवेत्। सप्तरात्रं स्थितं क्षीरे क्षारले रोहिणीफलम्। तैलैव पिष्टं सुरुणं सवर्णकरणं हितम्"। (औषधभेदे

भल्लातकलीह न० चक्रदत्तोक्ते भल्लातकादिपके लौहरूपे

"चित्रकं त्रिफला सर्पं पन्थिकं चविकाऽम्लता। हस्तिपिप्पलीपामार्गदग्धलोहैकसङ्कटेरकाः। एषां चतुष्पलान् भागान् जलद्रोणे विपाचयेत्। भल्लातकचतुष्कं हे छित्त्वा तत्रैव दापयेत्। तेन पादावशेषेण लौहपात्रे पचेद्भिषक्। तत्रार्द्धं तीक्ष्णलौहस्य दत्त्वा कुर्य्याद्यथाविधि। त्रयूषणं त्रिफलायश्चिरैन्धवं विडमौद्भिदम्। यवक्षारविडङ्गानि पलिकांशानि कल्पयेत्। कुडवं दद्यादारस्य तावन्मूल्यात्तथैव च। सूरणस्य पलान्यष्टौ चूर्णं कृत्वा विनिःक्षिपेत्। सिद्धे पीते प्रदातव्यं मधुनः कुडवद्वयम्। प्रातर्भोजनकाले च ततः खादेद् यथाबलम्। अर्शांसि ग्रहणीदोषं पाण्डुरोगमरोचकम्। क्रिमिगुल्मान्मेहान् शूलञ्च व्यपोहति। करोति शुक्रोपचयं बलीपलितनाशनम्। रसायनमिदं श्रेष्ठं सर्वरोगहरं परम्"।

भल्लातकविधान न० तन्त्रोक्ते भल्लातकफलसेवनप्रकारभेदे

"अत ऊर्द्धं भल्लातकविधानमुपदेक्ष्यामः। भल्लातकानि परिपक्वान्यनुपहतान्याहृत्यैकमादाय द्विधा त्रिधा चतुर्धा वा छेदयित्वा कषायकल्पेन विपाच्य कषायस्य शुक्तिमतृप्तां हताभ्यक्तालुजिह्वौष्ठः प्रातः प्रातरुपसेवेत ततोऽपराह्णे क्षीरं सर्पिरोदनं दत्त्वाहार एवमेकैकं वर्द्धयेत् तावद्यावत्पञ्चेति ततः पञ्च पञ्चाभिवर्द्धयदूर्द्धवत् सप्ततिरिति प्राह्य च सप्ततिमपकर्षयेदूर्द्धवः पञ्च पञ्च यावत्पञ्चेति पञ्चभ्यश्चैकैकं यावदेकमिति। एवं भल्लातकशतमुपयुज्य सर्वकुष्ठार्शोभिविमुक्तो बलवानरोगः शतायुर्भवति। द्विरधीयोक्तेन विधानेन भल्लातकनिष्पुतितं स्नेहमादाय प्रातः प्रातः शुक्तिमात्रमुपयुञ्जीत क्षीरं पूर्ववदाहारः फलप्रकर्षश्च। भल्लातकमज्ज्ञो वा स्नेहमादायापक्वदोषः प्रतिसंसृष्टमक्षो निवातमागारं प्रविश्य यथाबलं प्रसृतिं प्रकृष्टं चोपयुञ्जीत। तत्रिद्वं क्षीरं सर्पिरोदनं दत्त्वाहारः"।

भल्ली स्त्री भल्ल ङीष्। भल्लातके यद्रत्ना० तत्फलस्य सर्पिणां व्रणकारित्वा हिंसकत्वात्तत्साम्यात्तथात्वम्। स्वार्थे क भल्लिका तत्रार्थे यद्रत्न०।

भल्लु(ल्लू)क पु० स्त्री भल्ल-उ(ऊ)क। (भालूक) १जन्तुभेदे अमरः स्त्रियां ङीप्। २ग्रहभेदे राजनि०। स च वीरभल्लादिगणे उक्तः। ऋक्षशब्दे दृश्यम्। ३कोशस्थे जलजन्तुभेदे "शङ्खशङ्खनखशुक्तिशम्बूकभल्लूकप्रभृतयः कोशस्थाः" उक्तेः।

भव पु० भवत्यस्मात् भू-अपादाने अप्। १महादेवे तस्य तन्नामनिरुक्तिः यथा भा० ६।१३।१६। "तमब्रवीद्भवोऽस्मीति। तदृक्ष तन्नामाकारोत्पार्जन्यनामरूपमभवत् पर्जन्यो वै भवः पर्जन्याद्वीदं सर्वं भवति सोऽब्रवीच्च्यावयन् वाऽतोऽस्मि वेत्तेव मे नामेति" जलस्य पर्जन्यहेतुत्वात् तस्य जलमूर्त्तित्वम्। अतएवाष्टमूर्त्तिमध्ये जलरूपेण भवनाम्ना तस्यार्चा। भावे अप्। २जन्मनि ३सत्तायां ४प्राप्तौ ५संसारे मेदि०। कर्त्तरि अच् (चालता) ६फले न० राजनि०।

भवक त्रि० भू-ण्वुल्। १सत्पक्षे २आशीर्वादके संक्षिप्तश० ।

भवकेतु पु० केतुभेदे ह०व० ११अ० केतुशब्दे दृश्यम्।

भवघस्मर पु० दृत०। दावानले शब्दमा०।

भवत् त्रि० भा-शतृ। १युष्मदर्थे, सर्वनामता चास्य। भवान् शब्दस्यार्थे पुंस्त्रीभवद्भवतः। भू-शतृ। २वर्त्तमानतदर्थे

३भवनकर्त्तरि च । भवन् स्त्रियामभयत्र ङीप् यञ्ञञस्य लुक् । ङीवन्तः ४विभाषाङ्गाद्ये शब्दरत्ना० ।

भवदा स्त्री खन्दातुचरभेदे भा० प० ४७ अ० ।

भवदादि पञ्चमीसप्तमीतरविभक्त्यन्तादपि "इतराभ्योऽपि दृश्यन्ते" पा०तसिलादिप्रत्ययनिमित्ते शब्दगणे तत्र "दक्षिणपश्चात् भवदादियोग एव" वार्त्ति० । स च गणः "भवान् दीर्घायुः देवानांप्रियः आयुष्मान्" । तेन च भवान् ततो भवान् तत्रभवान् तत्रभवन्तम् इत्यादि एवम् यदीर्घायुः ततो दीर्घायुरित्यादि ।

भवदारु पुं न० भवप्रियं दारु । देवदारुवृक्षे राजनि० ।

भवदीय त्रि० भवतोऽयम् छ । तित्स्वात् पदत्वे तस्य दः । त्वत्सम्बन्धिनि । [३जन्मनि ४सत्तायाञ्च मेदि० ।

भवन न० भू-आधारे ल्युट् । १गृहे अमरः भावे ल्युट् । २भावे

भवनपति पु० ६त० । १गृहस्वामिनि २राज्ञधीशे च भवनशब्दादयोऽत्र ।

भवन्त पु० भू-झच् । काले उज्ज्वल० संक्षिप्तसा० ।

भवन्ति पु०भू-झिच् अस्य स्त्रीत्वमपि । वर्त्तमानकाले अन्यादौ स्त्रीत्वे ङीप् । "अस्तिभवन्तीपरः प्रयोक्तव्यः" भट्टीमाध्यम् ।

भवभूत न० भवरूपे अवितत्तस्वरूपे परमेश्वरे "विश्वरूपं भवभूतमीड्यम्" श्वेता०उ० ।

भवभूति पु० ६त० । १महादेवविभूतौ । महावीरचरितोत्तररामचरितमालतीमाधवादिनाटककर्त्तरि २विदर्भदेशे ।

भवरुत् पु० भवे जन्मनि रोदित्यनेन रुद-करणे क्विप् । प्रेतपटहे त्रिका० ।

भवाचल पु० ६त० । मन्दरस्य पूर्ववर्त्तिनि शैलभेदे कैलासे । "शीतांशुश्चन्द्रमश्चैव कुलीरोऽथ सुधाकरः । सविन्दुर्मन्दरो वेधुस्तामसो निशयस्तथा । देवैश्चैव पुरैवेह मन्दरस्य महाचलाः" मार्कण्डे०५५अ० । [स्त्री शब्दमा०

भवात्मज पु० ६त० । १कार्त्तिकेये २गणेशे च ३मनसादेव्यां

भवादृच(ग्)ञ् त्रि० भवतश्चेव दर्शनमस्य भवत्+दृश-क्विप् टक् कस क्विप् वा सर्वनामत्वात् आत् । भवत्तुल्ये जने । टकि क्विपि च ङीप् भवादृशी ।

भवानी स्त्री भवस्य पत्नी भव+ङीप् आनुक् च । शिवभार्य्यायाम् दुर्गायाम् अमरः । [गुरुत्वात् तथात्वम् ।

भवानीगुरु पु० ६त० । हिमाचले तस्य तदुत्पादकत्वेन तद्भवानीपति पु०६त०।महादेवे तत्पदस्य काव्ये प्रयोगे भवान्याः पत्यन्तरप्रतीतिकारित्वादिरूढ्यर्थद्योतकत्वं काव्यदोषः।

भवान्तकृत् पु० ६त० । १वेधसि तस्य सृष्टिकाले सर्वभूतानां जन्मविनाशकत्वात् तथात्वम् । "यदा स्वपिति शान्तात्मा तदा सर्वं प्रलीयते" मनुः । २संसारनाशके त्रिषु च ।

भवाभीष्ट पु० भवस्य महादेवस्याभीष्टः । १गुग्गुलौ राजनि० ७त० । २भवेऽभीप्सिते त्रि० ।

भवायनी स्त्री भवे महादेवेऽयनं स्थानमस्याः गौरा०ङीष् । १गङ्गायाम् शब्दर०२शिवतत्परे वैष्णवे त्रि० ।

भविक न० भवोभूतिरुत्पाद्यत्वेनास्त्यस्य ठन् । १कृषले कृषकस्य सूतिक्षेत्रत्वात्तथात्वम् । अर्घ० अच २अर्हति त्रि० अमरः । [पत्तिके जटा० ।

भवित त्रि० भवो जातोऽस्य तारं० इतच् । भूते अतीतोत्-

भवितव्य न० भू-भविष्यति कर्त्तरि च नि० तव्यत् । अवश्यम्भव्ये "भवितव्यं भवत्येव यद्विधेर्मनसि स्थितम्" ।

भवितव्यता स्त्री भवितव्यस्य भावः तल् । १अवश्यम्भावे । २भाग्ये च जटाधरः । [त्रिका०

भविन त्रि० भू-णिन्यायाम् वा० इन । काव्यस्य कर्त्तरि

भविल पु०भू-भविष्यति इलच् । १भव्ये भविष्यति उज्ज्वल० २जारे पु० त्रिका० ।

भविष्णु त्रि० भू-इष्णुच् । भवनशीले अमरः ।

भविष्य(त्) पु० भू-"ऋदः सदेति" यत्-ऋट् च पृषो० वा तलोपः । भाविनि १काले २तत्कालवर्त्तिनि पदार्थे त्रि० स्त्रियां ङीप् ह्रस्व च "अव्याजेपो भविष्यन्त्याः" रघुः । तलोपपक्षे क्लीवता । उत्तरपदस्थः त्रि० । "यद्भविष्यो विनश्यति" पञ्चत० ३भविष्यमधिकृत्य कृते पुराणभेदे न० । तच्च महापुराणान्तर्गतं पुराणं तत्प्रतिपाद्यविषयादिकं नारदीयपु० ४पा० १००अ० उक्तं यथा

"अथ ते संप्रवक्ष्यामि पुराणं सर्वसिद्धिदम् । भविष्यं भवतः सर्वलोकाभीष्टप्रदायकम् । तत्राहं सर्वदेवानामादिकर्त्ता वसुव्रतः । ब्रह्मपूर्वं तत्र जज्ञातो मनुः स्वायम्भुवः पुरा । स मां प्रणम्य प्रपच्छ धर्मं सर्वार्थसाधकम् । अहं तस्मै तदा प्रीतः प्रावोचं धर्मसंहिताम् । पुराणानां यदा व्यासो व्यासरूपे महामतिः । तदा तां संहितां सर्वां पृथग्व्यभजन्मुनिः । अष्टादशसहस्राणामाख्यं कथाचितम् । तत्र प्रथमपर्वणि । "तत्रादिमं व्रतं पर्व ब्रह्मं वक्ष्याम्युपक्रमः । व्रतप्रोक्तसंवादे पुराणप्रश्नसंक्रमः । आदित्यचरितः प्रायः सर्वाख्यानसमाश्रितः । ब्रह्मादिसृष्टो-

यैतः शास्त्रसर्वस्वरूपकः। पुस्तलेखकलेखानां वचणञ्च ततः परम्। संस्काराणाञ्च सर्वेषां वचणञ्चात्र कीर्त्तितम्। पञ्चम्यादितिथीनाञ्च कलाः सप्त च कीर्त्तिताः। अष्टम्याद्याः शेषकलाः वैष्णवे पर्व्वणि स्मृताः। शैवे च कामतो भिन्नाः सौरे चान्यत्रयोदयः। प्रति सर्गाङ्गत्वं पञ्चलक्षणाख्यानसमन्वितम्। पुराणस्योपसंहारसहितं पर्व पञ्चमम्। एषु पञ्चसु पूर्वस्मिन् ब्रह्मणो महिमाधिकः"। द्वितीयतृतीयचतुर्थपञ्चमपर्वसु "धर्मे कामे च मोक्षे च विष्णोश्चापि शिवस्य च। द्वितीये च तृतीये च सौरो वर्गचतुष्टये।। प्रतिसर्गाङ्गत्वं त्वान्यं प्रोक्तं सर्वत्रयाचितम्। एतत् भविष्यं निर्दिष्टं पर्व व्यासेन धीमता। चतुर्दशसहस्रन्तु पुराणं परिकीर्त्तितम्। भविष्यं सर्वदेवानां साम्यं यत्र प्रकीर्त्तितम्। गुणानां तारतम्येन समं ब्रह्मेति हि स्मृतिः"। तत्परिमाणन्तु। "तल्लिखित्वा तु यो दद्यात् पौष्यां विद्वान् विमत्सरः। गुडधेनुयुतं हेमवस्त्रमाल्यविभूषणैः। वाचकं पुस्तकञ्चापि पूजयित्वा विधानतः। गन्धाद्यैर्भोज्यभक्ष्यैश्च कृत्वा नीराजनादिकम्। यो वै जितेन्द्रियो भूत्वा सोपवासः समाहितः। अथ वा यो नरो भक्त्या कीर्त्तयेच्छृणुयादपि। स शक्रः पातकैर्घोरैः प्रयाति ब्रह्मणः पदम्। योऽयमुक्तमयीमेतां भविष्यस्य निरूपिताम्। पठेद्वा शृणुयाच्चैतौ सर्वभुक्तिञ्च विन्दतः"। ४(चालता) फलभेदे राजनि०। तान्त ५अले निघण्टुः। भविष्यत्त्वञ्च वर्त्तमानप्रागभावप्रतियोगित्वमिति नैयायिकाः पदार्थस्य अनागतावस्थाभेद इति सांख्यादयः। ६हरिवंशपर्वभेदे न०।

भविष्यदाक्षेप पुं० "सत्यं ब्रवीमि न त्वं मां द्रष्टुं वल्लभ! लप्स्यसे। अन्यचुम्बनसंक्रान्तलाक्षारक्तेन चक्षुषा। सोऽयं भविष्यदाक्षेपः प्रागेवातिमनस्विनी। कदाचिदपराधोऽस्य भावीत्येवमरुन्ध यत्"। काव्यार्थौक्ते अर्थालङ्कारभेदे।

भवीयस् त्रि० अतिशयेन बहुः बहु+ईयसुन् "बहोर्लोपो भू च बहोः" पा०भूरादेयः वेदे न ईलोपः। बहुतरे ऋ०।८४।१ लोके तु ईयसुन ईकारलोपः भूय इत्येव।

भव्य त्रि० भू-कर्त्तरि नि० यत्। १भाविनि "अवश्यभव्ये-ष्वनवद्यफाग्रहेति" नैषधम्। (चालता) २फलभेदे राजनि० "भव्यं स्वादु कषायाम्लं हृद्यमाहुश्च शोधनम्। तदेव भव्यं दाडिम्यं पुरुषादि विशेषतः" राजा०। ३अग्निभेदि-४गुग्गुलेऽश्वे ६योग्ये च न०। ७तद्वति त्रि०। ८कर्मरङ्गे पु० ९गजपिप्पल्यां १०वतक्षां च स्त्री मेदि०। ११रसभेदे शब्दर०

भष कुक्कुरशब्दे भ्वा०पर०सक०सेट्। भषति अभषीत्-अभाषीत्

भष पुंस्त्री०भष-अच्। १कुक्कुरे शब्दरत्ना०स्त्रियां जातित्वात् ङीष्। २स्वर्णचौर्य्यां स्त्री रत्नमा० टाप्।

भषक पु० स्त्री० भष-कन्। कुक्कुरे अमरः। स्त्रियां ङीष्।

भषण न० भष-भावे ल्युट्। कुक्कुरशब्दे हेमच०।

भस दीप्तौ अक०भर्त्सने सक०जु०पर०सेट्। बभस्ति। अभासीत् अभसीत् बभास। वेदिकोऽयम्। [बभास।

भस भक्षणे प०सक०सेट् निघण्टुः। भसति अभा(भ)सीत्

भसद् न० भस-क्विप्। १जघने चञ्चलत्व०।२भास्करे ३मांसे च ४जघने स्त्री मेदि०५कारण्डवखगे ६द्यूते पु०चुरादि-को० ७काले पु०त्रिका०। [पाठः।

भसन्त पु० भस-वा० झच्। काले त्रिका० तत्र भवत्व इत्येव

भसन्धि पु०द्वत०। नक्षत्रभेदानां सन्ध्याख्ये कालभेदे यथोक्तम् "सार्पेन्द्रपौष्णप्रथिष्ण्यानामन्त्याः पादाः भसन्धयः। तद-भेद्याद्यपादो गण्डान्तं नाम कीर्त्यते" सू०सि०। "अश्लेषाज्येष्ठारेवतीनक्षत्राणामन्त्यावयवाश्चरणाः नक्षत्र सन्धयो भवन्ति। तदपभेषु तेषामश्लेषाज्येष्ठारेवतीनक्ष-त्राणामन्तरेषु मघामूलाश्विनीनक्षत्रेत्यर्थः प्रथमचरणो गण्डान्तं नाम प्रसिद्धमुच्यते। यद्यश्लेषाज्येष्ठारेवती-नक्षत्राणामन्तिमं घटिकाद्वयं मघामूलाश्विनीनक्षत्राणा-मादिमं घटिकाद्वयमिति चतस्रोऽन्तरघटिका गण्डान्तम्। एतदतिरिक्तो नक्षत्रसन्धिः पूर्वनक्षत्रान्तघटिकोत्तरनक्षत्रा-दिमघटिकेत्यन्तरालघटिकाद्वयं चन्द्रभक्तभमन्वयेन घ-टिकाः सार्द्धद्वयमिति संक्षिप्तमिश्रं तथापि सूर्य्यसिद्ध-न्तः प्रामाण्यात्र गतिः। अयनैवत्वाच्चतुर्थं पादशब्दः करणेत्यादिवद् विभक्त्यर्थवाचकः। घटिका दण्डाख्या-कारश्च। तथा च ज्ञिवसङ्गमिता अन्त्यघटिकानक्षत्र-सन्धिः" रत्न०। २नक्षत्रयोः सन्धिकाले च तदानयनं त्रि०शि०दर्शितं तच्च तिथिसन्धिशब्दे १२०० पृ० दर्शितम्।

भसित न० भस-क्त। भस्मनि हेम०। [दीप्ते शब्दर०।

भसृचक्र पु० भानि नक्षत्राणि सृचयति सृचि-एवुल्।

भस्त्रा स्त्री भस-ष्ट्रन्। १चर्ममयेविकायाम् अग्निसन्धुक्षणे चर्मनिर्मिते यन्त्रभेदे। (धाँता) अमरः। स्त्रित्वात् ङीष्। अत्रैव शब्दरत्ना० स्वार्थे क टाप् न ह्रस्वम्। भस्त्रा-काष्ठमत्रैव। ततः उत्करा० चतुरर्थ्यां क। भस्त्रीय तद्-दूरदेशादौ त्रि०।

भस्माफला स्त्री भस्मेव फलमस्याः ङीप्। (टेपारि) क्षुपभेदे
भस्मक न० भस्म करोति क-ड। (भस्मकीट) बह्वभोजनकारके १रोगभेदे। "कफादिरुद्धान्नभुजां नराणां क्षीणे कफे मारुतपित्तहर्त्रौ। अतिप्रवृद्धः पवनान्वितोऽग्निर्भुक्तं क्षणाद्भस्म करोति यस्मात्। तस्मादसौ भस्मकसंज्ञकोऽभूदुपेक्षितोऽयं पचते च धातून्"। भस्मकस्य सोपद्रवमरिष्टमाह "वृद्धे ददाहमूर्च्छादीन् कृत्वैवाग्निसमक्षयात्। पक्वान्नमाशु धात्वादीन् स क्षिप्रं नाशयेद्भृशम्" भावप्र०। भस्मेव इवार्थे कन्। २कृतधौते रूप्ये १विड्रूपे च मेदि०।
भस्मकूट पु० भस्मरूपे पर्वतभेदे काशि० ८।१९०।
भस्मगन्धा स्त्री भस्मन इव गन्धोऽस्याः। रेणुकाख्यगन्धद्रव्ये भावप्र०। स्वार्थे क। तत्रैव जटा०
भस्मगन्धिनी स्त्री भस्मन इव गन्धोऽस्यास्या बाहुलकेन इनि ङीप्। रेणुकाख्ये गन्धद्रव्ये अमरः।
भस्मगर्भ पु० भस्म गर्भे यस्य। १तिनिशवृक्षे राजनि० २कपिलधिंग्रपायाञ्च अमरः। ३रेणुकाख्यगन्धद्रव्ये स्त्री जटाधरः टाप्।
भस्मजाबाल पु० उपनिषद्भेदे उपनिषच्छब्दे दृश्यम्।
भस्मतूल न० भस्म तूलयति तूल-उत्वचौ क। १ग्रामकूटे २पांशुचूर्णे ३हिमे च मेदि०।
भस्मन् न०भस्-मनिन्। (छार) दग्धगोमयादिविकारे अमरः अस्य शिवदेहलेपने कारणं कालिकापु० ४१ अ० उक्तं यथा "महादेवोऽथ तद्भस्म मनोभवशरीरजम्। आदाय सर्वगात्रेषु भूतिलेपं तदाकरोत्। लेपयेत्साधिभस्मानि समादाय तदा हरः। सप्तधोऽन्तर्दधे कार्यौ विहाय विधिसम्मतः"। तद्धारणविधिर्यथा "भस्मोपरि चन्दनादिकं न धार्यं तदुक्तं कौर्मे "वैदिकैर्मन्त्रै रहितं चन्दनागुरुकङ्कुमम्। तिर्यक्पुण्ड्रात्मना धार्यं कान्तिसौख्याभिवाञ्छिभिः। पुण्ड्रोद्धृतचन्दनाद्यैरपि भस्म न संत्यजेत्। दग्धे भस्मसंत्यागी शतौघकोऽवशङ्कितः। चन्दनाद्युपरि प्राज्ञो धारयेद्भस्म वैदिकम्। लौकिकं चन्दनाद्यं तु भस्मोपरि न धारयेत्। भस्मचन्दनादीनां त्यागेनार्थो न विद्यते। चन्दनादीन्यतो लौकिकान्येवात्र न संशयः। उपरिष्टाच्चन्दनादेर्दृष्टेऽले सितभस्मनि। चन्दनाद्युत्थमूषाया फलाप्तेः को निवारकः"। त्रिपुण्ड्रधारणं मन्त्ररहितं तूष्णीं तु कार्यम्" तदुक्तं विद्येश्वरसंहितायां "जावालोपनिषदादिभिर्मन्त्रैर्धार्यं भस्मत्रिपुण्ड्रकम्। अन्यथा चेत्प्रमादेन यावज्जन्मशतैरकं व्रजेदिति"। शिवधर्मे "येन भस्मोद्धूलमार्गेण न धृतं त्रिपुण्ड्रकम्। जन्म निःफलं शूकरो यथा"। मन्त्रसारसुधानिधौ" त्रिपुण्ड्रकं सदा कुर्यात् मन्त्रपूतेन भस्मना। मन्त्रेण हीनं यः कुर्यात् परभागी भवेन्नरः"। शिवपूजा तद्धारणं न सिध्यति "विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया। महादेवोऽर्चितो येन न च तस्य फलप्रदः" त्रिकृपु०।
भस्मरोहा स्त्री भस्मनि रोहते रुह-अच्। दन्त्यिकायाम् राजनि०।
भस्मवेधक पु०भस्मन इव वेधो वेधनं यस्य कप्। कर्पूरे शब्दर०
भस्मसा अव्य० ङाजन्तः। चर्षणजन्यशब्दानुकारे यजु०११।८१ वेददी०। [साति। साकल्येन भस्मरूपताकरणे।
भस्मसात् अव्य० भस्म कात्स्न्र्येन सम्पन्नं करोति भस्मन्+
भस्माचल पु० कामरूपस्थे गिरिभेदे कालिकापु० ८१अ०।
भस्मासुर पु० असुरभेदे। दृतिख्याते ढुण्ढासुरे शिववरेण स यस्य शीर्षं करेण स्पृशति स भस्म भवतीति कथा भाग० १०।८८ अ०। [वा० य। कर्पूरे त्रिका०।
भस्माङ्गय पु० भस्म आङ्गयते साङ्ग्येन स्पृश्यते आ+ङ्गि-
भा दीप्तौ अदा०पर०अक०अनिट्। भाति अभासीत् बभौ। प्रति+वृद्धिप्राख्यौ। वि+अति+निशोभासने-आ०दीप्तिश्च तैलसपदार्थावयवभेदः प्रकाशश्च। स च ज्ञाने विप्रकृतत्वा प्रकाशः स्वित्। भावे अङ्। भा
भा स्त्री भा-अङ् टाप्। दीप्तौ अमरः। [१।३४।३भा०।
भाकलीक पु० भाव कलीकः। भावः प्राज्ञे प्रसिद्धे अ०
भाकुट पु० भया दीप्त्या कुटति कुट-क। (भेटकी) भक्ष्यभेदे राजव०। [ब्रा०१८।४ १।१ भा०।
भाकुरि पु०भां कुर्वति कुर्व-कि पृषो०। दीप्तिकारके यत०
भाकूट पु०। १पर्वतभेदे २भक्ष्यभेदे च (भेटकी)मेदि०।
भाकोष पु० भानां दीप्तीनां कोष इव। सूर्ये त्रिका०।
भाक्त त्रि० भक्तेः गौरवाद्दत्तेरागतः अण्। १औपचारिके गौण्या वृत्त्या बोधितेऽर्थे। भक्तस्याश्चखेदम् अण्। २अक्ष्णः सम्बन्धिनि त्रि०। भक्तमक्षमखे नियतं दीयते वा अण्। ३नियतभक्तदानक्षमदाने त्रि०। भक्ताय हितम् अण्। ४भक्तक्षमाद्दनसाधने रुद्रभेदे। [क्षमादाने।
भाक्तिक त्रि० भक्तमक्षे नियतं दीयते ठक्। नियतभक्तदातृ
भाक्त त्रि० भक्ता शीलमस्य अक्षा० अण्। भक्तपर्याप्ते।
भाग पु०भज-भावे घञ्।।भजने कर्मणि घञ्। २अंशे अमरः

दृष्टवस्तुनोऽर्द्धे १एकदेशेऽभाग्ये "त्रिभांशकस्था राशेर्भाग इत्यभिधीयते" इति ज्योतिषोक्ते राशेः ६त्रिभांशके च यद्धरः। भगो देवताऽस्य अण्। ६पूर्वफल्गुनीनक्षत्रे तत्सप्तसङ्ख्यायाम् ७एकादशसंख्यायां ८भागहारे केनचित् अङ्केन कस्यचित् भजनरूपे अङ्कशास्त्रोक्ते व्यापारभेदे।

भागजातिस्त्री। भागस्य विभजनस्य प्रकारभेदे सा च चतुर्विधा भागजातिः प्रभागजातिः भागानुबन्धो भागापवाहश्च तत्र अंशानां समच्छेदकरणं भागजातिरुच्यते। यथा "अन्योऽन्यहराभिहतौ हरांशौराश्योः समच्छेदविधानमेवम्। त्रिषोहराभ्यामपवर्त्तिताभ्यां यद्वा हरांशौ हृधियात्र गुणौ" लीला०। भागस्य भागः प्रभागो यथा "खवाखवह्नाच्च हराहरघ्नाः भागप्रभागेषु खवर्धनं स्यात्"। लीला०। भागस्यानुबन्धो योजनं भागानुबन्धो भागवाहश्च तद्विधोजनम् यथा "छेदघ्नरूपेषु खवा धनर्णमेकस्य भागा अधिकोनकार्यात्। छांशाधिकोनाः खलु यत्र तत्र भागानुबन्धे च खवापवाहे। तच्छेदहरेण हरं निहन्यात् छांशाधिकोनेन न तु तेन भागान्" लीला०

भागधेय न० भाग+स्वार्थे धेय अभिधानात् नपुंसकत्वम्। १भाग्ये। भागेन धीयतेऽसौ धा-कर्मणि यत्। २राजदेये करे पु० अमरः। भागो धीयतेऽस्मै धा-सम्प्रदाने यत्। ३दायादे त्रिषु अजयपालः।

भागलक्षणा स्त्री भागे लक्षणा। अखण्डांशभेदपरित्यागेन इतरांशबोधकलक्षणाभेदे लक्षणलक्षितसार्द्धलक्षणायाम्। लक्षणलक्षणाशब्दे २०८१ पृ० द्रष्टव्यम्।

भागवत त्रि० भगवतः भगवत्या वा इदम् सोऽस्य देवता वा अण्। भगवतः भगवत्या वा इभक्ते, २तयोः सम्बन्धिनि च "भक्ता अणेर्भागवता भवन्ति" वृद्धिः। तयोः सम्बन्धिशुकवर्णने १महापुराणे ४उपपुराणे च न० "वैष्णवं शुतं भागवतं पुराणम्" भाग०। भागवतस्य महापुराणभेदः उपपुराणभेदो वा उपपुराणशब्दे विस्तरेण दर्शितः। नारदीयः महापुराणप्रतिपाद्यविषयोक्तौ वे विष्णवे ब्रह्मणे नान्यत्रेति विष्णुभागवतस्यैव महापुराणत्वनिर्णये उपपुराणशब्दे उन्मतं द्रष्टव्यम्।

विष्णुभागवतप्रतिपाद्यविषयाश्च नार० पु० ४अ० ६६श्लो० यथा "मरीचे! शृणु वक्ष्यामि वेदव्यासेन यत् कृतम्। श्रीमद्भागवतं नाम पुराणं ब्रह्मसम्मितम्। तदष्टादशसाहस्रं कीर्त्तितं पापनाशनम्। सुरपादरजोऽयं खल्वै-दंदंयभिर्वृतः। भगवानेव विप्रेन्द्र! विश्वरूपी समीरितः" तस्य प्रथमस्कन्धे। "तत्र तु प्रथमे स्कन्धे शुतभीष्मां समागमः। व्यासस्य चरितं पुण्यं पाण्डवानां तथैव च। परीक्षितस्तपाख्यानमितीदं सप्तदाहृतम्"। द्वितीयस्कन्धे "परीक्षिच्छुकसंवादे शुतिहवनिरूपणम्। ब्रह्मनारदसंवादेऽवतारचरितामृतम्। पुराणलक्षणञ्चैव शुष्टिकारणसंग्रहः। द्वितीयोऽयं समुदितः स्कन्धो व्यासेन धीमता"। तृतीयस्कन्धे "चरितं विदुरस्यात्र मैत्रेयस्य च शंसनम्। शुष्टिप्रकरणं पश्चाद् ब्रह्मणः परमात्मनः। कापिलं चाङ्गमध्यात्र तृतीयोऽयमुदाहृतः"। चतुर्थस्कन्धे "सत्याचरितमादौ तु ध्रुवस्य चरितं ततः। पृथोः पुण्यप्रसाख्यानं ततः प्राचीनबर्हिषः। स्कन्धेऽत्र तुर्यो गदितो विषर्गे स्कन्ध उत्तमः"। पञ्चमस्कन्धे "प्रियव्रतस्य चरितं तद्वंश्यानाञ्च पुण्यदम्। ब्रह्माण्डान्तर्गतानाञ्च लोकानां वर्णनन्तथा। नरकस्थितिरित्येष संस्थाने पञ्चमो मतः"। षष्ठस्कन्धे "अजामिलस्य चरितं दक्षशुष्टिनिरूपणम्। वृत्राख्यानं ततः पश्चान्नृतां जन्म पुण्यप्रदम्। षष्ठोऽयमुदितः स्कन्धो व्यासेन परिपोषके"। सप्तमस्कन्धे "प्रह्लादचरितं पुण्यं वर्णाश्रमनिरूपणम्। सप्तमो गदितो वत्स! वासनाकर्मकीर्त्तने"। अष्टमस्कन्धे। "गजेन्द्रमोक्षणाख्यानं मन्वन्तरनिरूपणम्। समुद्रमथनञ्चैव बलिबन्धनमेव च। मत्स्यावतारचरितमष्टमोऽयं प्रकीर्त्तितः"। नवमस्कन्धे "सूर्य्यवंशसमाख्यानं सोमवंशनिरूपणम्। वंश्यानुचरिते प्रोक्तो नवमोऽयं महामते!"। दशमस्कन्धे "अस्य बालचरितं कौमारञ्च व्रजस्थितिः। कैशोरं मथुरास्थानं यौवनं द्वारकास्थितिः। भूभारहरणञ्चात्र निरोधे दशमः स्मृतः"। एकादशस्कन्धे "नारदेन तु संवादो वसुदेवस्य कीर्त्तितः। यदोश्च दत्तात्रेयेण श्रीकृष्णोद्धवस्य च। यादवानां विशोऽन्तश्च शुक्लावैकादशः स्मृतः। द्वादशस्कन्धे "भविष्यकथनिर्देशो नृणां राज्ञः परीक्षितः। वेदशाखाप्रणयनं मार्कण्डेयतपः स्मृतम्। सौरी विभूतिरुदिता वैष्णवी च ततः परम्। पुराणसंग्रहाख्यानमाश्रये द्वादशो ह्ययम्। इत्येवं कथितं वत्स! श्रीमद्भागवतं तव"। तत्स्तुतिः "वक्तुः श्रोतुश्चोपदेष्टुरनुमोदितुरेव च। वाङ्मात्रकर्तुर्नंदितं भक्तिमुक्तिविमुक्तिदम्। प्रौष्ठपद्यां पूर्णिमायां ज्ञेयसिंहसमन्वितम्। देवं भागवतावेदं द्विजाव

प्रीतिपूर्वकम्। संपूज्य वस्त्रकेनादौ भगवद्भक्तिमिच्छता। योऽधुनक्रमणीमेतां श्रावयेच्छृणुयात्तथा। स पुराश्वमेधजं प्राप्नोति फलमुत्तमम्"। विस्तरस्तु भाग० १२ उपसंहाराध्याये द्रष्टव्यः।

भगवद्भक्तरूपभागवतलक्षणं यथा भाग०११ स्क०।

"सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः। भूतानि भगवत्यात्मन्येष भागवतोत्तमः। न यस्य स्वपर इति वित्तेष्वात्मनि वा भिदा। सर्वभूतसमः शान्तः स वै भागवतोत्तमः"। हरियोगेश्वरोत्तरे "दृष्ट्वात्मापीन्द्रियैरर्थान् यो न द्वेष्टि न काङ्क्षति। विष्णोर्मायामिदं पश्यन् स वै भागवतोत्तमः"। ब्रह्मवैवर्ते "शिवे च परमेशाने विष्णौ च परमात्मनि। समबुद्ध्या प्रवर्त्तन्ते ते वै भागवतोत्तमाः"। स्कान्दे "येषां भागवतं शास्त्रं सदा तिष्ठति सन्निधौ। पूजयन्ति च ये नित्यं ते वै भागवता नराः। येषां भागवतं शास्त्रं जीवितादधिकं भवेत्। महाभागवताः श्रेष्ठा विष्णुना कथिता नराः"। वैष्णवे "भोजनाच्छादनं सर्वं यथा शक्त्या ददाति यः। विष्णु भक्तस्य सततं स वै भागवतः स्मृतः"। गारुडे "येन सर्वात्मना विष्णुभक्त्या भावो निवेशितः। वैष्णवेषु कृतात्मत्वात् महाभागवतो हि सः"। ब्रह्मवैवर्ते "तुलसीकानन दृष्ट्वा ये नमस्कुर्वते नराः। तत्काष्ठाङ्कितकण्ठास्ते वै भागवतोत्तमाः। तुलसीगन्धमाघ्राय सन्तोषं कुर्वते तु ये। तन्मूलमृदृष्टता यैश्च ते वै भागवतोत्तमाः"। स्कान्दे "सत्कथां कुरुते यस्तु सत्कथाश्च शृणोति च। पूयते सत्कथाभाषाच्च स वै भागवतोत्तमः"। ब्रह्मवैवर्ते "मन्मनसाश्च मद्भक्ता मद्भक्तजनलोलुपाः। मद्गामश्रवणाद्यक्ताश्चते वै भागवतोत्तमाः। वेऽभिनन्दन्ति नामानि हरेः शृण्वन्ति ये गिरः। रोमाञ्चितशरीराश्च ते वै भागवतोत्तमाः। अन्येषामपि हृदयं दृष्ट्वा येऽभिनन्दन्ति मानवाः। हरिनाम परा ये च ते वै भागवतोत्तमाः"। स्कान्दे "येऽर्चयन्ति सदा विष्णुं यज्ञेशं वरदं हरिम्। देहिनः पुण्यकर्माणः सदा भागवता हि ते"। वैष्णे "विष्णुक्षेत्रे शुभान्येव करोति स्वेहसंयुतः। प्रतिमासु हरेर्नित्यं पूजयेत् प्रयतात्मवान्। विष्णुभक्तः स विज्ञेयः कर्मणा मनसा गिरा। नारायणपरा नित्यं भूप! भागवतो हि सः" पद्मोत्तरखण्डे "तापादिपञ्चसंस्कारी नवेज्या कर्मकारकः। ऊर्ध्वपुण्ड्रविधिज्ञः स महाभागवतो हि सः। एकान्तेन सदा विष्णौ यस्याहैवे परायणाः। तस्मादेकान्तिनः प्रोक्तास्तद्भागवतचेतसः" भाग० ११ स्कान्दे "ज्ञात्वा ज्ञात्वाथ ये वै मां यावान् यश्चास्मि यादृशः। भजन्त्यनन्यभावेन ते वै भागवता मताः। न कामकर्मबीजानां यस्य चेतसि सम्भवः। वासुदेवैकनिलयः स वै भागवतोत्तमः"। स्कान्दे "यस्य लक्ष्मगतस्यापि देहेऽस्मिन् रमते मनः। न विच्युता च भक्तिर्वै स वै भागवतो नरः। आपदृगतस्य यस्येह भक्तिरव्यभिचारिणी। नान्यत्र रमते चित्तं स वै भागवतो नरः"। हरियोगेश्वरे "विलुठति हृदयं न यस्य साक्षाद्धरिरवशाभिहितोऽप्यघौघनाशः। प्रणयरसनयाधृताङ्घ्रिपद्मः स भवति भागवतप्रधान उक्तः" हरिभक्तिविलासे १० वि०।

भागवित्ति पु० चूड़ानामके ऋषिभेदे "एतस्य चैव चूडो भागवित्तिः" शत० ब्रा० १४।८।३।१८ ततः कृतसायां वृद्धपत्ये वा ठक्। भागवित्तिक तदीये कृतसिते वृद्धपत्ये पक्षे फक्। भागवित्तेय तत्रार्षे

भागवृत्ति स्त्री उपादिवृत्तिभेदे।

भागहार पु० भागस्य हारो हरणम्। क्षीरस्वामिकृते अङ्कपरिकर्माष्टकमध्ये भागहरणरूपे व्यापारभेदे "भागहारे करणसूत्रं दत्तम्। भाज्याद्धरः शुध्यति यद्गुणः स्यादन्त्यात् फलं तत् खलु भागहारे। समेन हेनाप्यपवर्त्त्य हारभाज्यौ भजेद्धा सति सम्भवे तु"। अत्र पूर्वोदाहरणे शुद्धिताङ्कानां स्वगुणच्छेदानां भागहारार्थं न्यासः भाज्यः। १६२०। भाजकः १२। भजनालब्धो गुणः १३५। अथवा भाज्यहारौ त्रिभिरपवर्त्तितौ ५४० चतुर्भिर्वा ४०५ स्वस्वहारेण च्छृते फलं तदेव १३५।

भागासिद्धि स्त्री हेत्वाभासभेदे "पक्षतावच्छेदकसामानाधिकरण्येन साध्याभावः। यथा पृथिवी गन्धवती घटत्वादित्यादौ पृथिवीत्वसामानाधिकरण्येन पटादौ घटत्वाद्यभावः। बाधे गदा०। यथा वा पृथिव्यादयश्चत्वारः परमाण्वो नित्या गन्धवत्त्वादित्यत्र जलादौ गन्धाभावः।

भागिन् त्रि० भज-घिनुण्। अंशविशिष्टे। स्त्रियां ङीप्।

भागिनेय पुंस्त्री० भगिन्या अपत्यम् ढक्। स्वस्रपत्ये। तत्कन्यायां स्त्री ङीप्।

भागीयस् त्रि० अतिशयेन भागी ईयसुन् इनोलोपः। अतिशयभागयुते हरिवं० १३१अ० अ०।

भागीरथी स्त्री भागीरथेन स्वानीता तेन भागीरथी स्मृता ब्रह्मवै० प्र० खं० उक्ते गङ्गारूपे नदीभेदे।

भागुरि पु० स्मृतिव्याकरणादिकर्त्तरि मुनिभेदे। "वदति भागुरिरल्लोपमवाप्योरुपसर्गयोः" सि० कौ०।

भाग्य न० भज-ण्यत् कुत्वम्। १शुभाशुभसूचके कर्मजन्येऽदृष्टे अमरः। भाग प्रयोजनमस्य यत्। २भागार्हे त्रि०। भागमर्हति यत्। ३भागार्हे त्रि०।

भाङ्गीन न० भङ्गायाः विजयायाः भवनं क्षेत्रं खञ्। (भाङ) भङ्गाभवनयोग्ये क्षेत्रे। खञ्। भाङ्गमप्यत्र। ङीप च। [अवभाजत् त।

भाज पृथक्करणे, भ्वा० पु० सक० सेट्। भाजयति ते भाजक त्रि० भज-ण्वुल्। भागकारके अङ्कभेदे विभाजके

भाजन न०भज्यतेऽनेन भाज-ल्युट्। १पात्रे अमरः। २आधारे ३योग्ये च मेदि०। ४षाड्कपरिमाणभेदे वैद्यकम्।

भाजिन् त्रि० भज-सेवायां णिनि। सेवके कामन्दकीयः।

भाजित त्रि० भाजि-कर्मणि क्त। १पृथक्कृते। २भक्ते च।

भाजी स्त्री० भाज-कर्मणि अच् नि० ङीष्। शटशाकभेदे। अन्यत्र भाजा। सि० कौ०।

भाज्य त्रि० भज्यते विभज्यते भज-कर्मणि यत्। विभजनीये "भाज्यो हरः गुण्यते यद्गुणः खादिति लीलावती।

भाटक पु०न० भट-घोषणे ण्वुल्। परस्वहरणादेरपभोगार्थं तत्स्वामिने दीयमाने धने। (भाडा) हिन्दी०।

"परभूमौ शटं कृत्वा भाटयित्वा वसेत तु यः। स तद् शटहीत्वा निर्गच्छेन्नृपकोशेऽष्टकादिकम्। क्षेमं विना वसित्वा तु परभूमावनिच्छतः। निर्गच्छंस्तृणकाष्ठानि न शटहीयात् कथञ्चन" कात्यायनः। "शटहार्याद्यपधादीनि शटहीत्वा भाटकेन यः। स्वामिनोनार्पयेद्यावत्तावद्भाग्यः स भाटकम्। वापी परस्परता यत्रतिष्ठितेति विवक्षितम्। "शस्यगोखरोष्ट्रादीन् शटहीत्वा भाटकेन यः। स्वामिनोनार्पयेद्यावत्तावद्भाग्यः स भाटकम्"। शङ्खमनुः "यो भाटयित्वा शकटं नीत्वा नान्यत्र गच्छति। भाटं न दद्याद्भाग्योऽसावनूढस्यापि भाटकम्"। शकटं शब्दनौकादेरप्युपलक्षणम्। अनूढस्यावाहितस्यापि शकटादेः" इति विवादचिन्तामणिः।

भाण पु० सा० द० उक्तलक्षणे दशरूपकान्तर्गते दृश्यकाव्यभेदे तल्लक्षणं यथा

"भाणः स्याद्धूर्त्तचरितो नानावस्थान्तरात्मकः। एकाङ्क एक एवात्र निपुणः पण्डितो विटः। रङ्गे प्रकाशयेत् स्वेनानुभूतमितरेण वा। सम्बोधनोक्तिप्रत्युक्ती कुर्याद्दाकाशभाषितैः। स्यच्चेद्वीरश्रृङ्गारौ शौर्यशौभाग्यवर्णनैः। तत्रोद्धतस्तथार्द्धा वृत्तिः प्रायेण भारती। सन्ध्यङ्गानि यथासङ्ख्यं सर्वाण्यत्र दशापि च"। आकाशभाषितरूपं परवचनमपि स्वयमेवानुवदन्नुत्तरप्रत्युत्तरे कुर्यात्। शृङ्गारवीररसौ च शौभाग्यशौर्यवर्णनेन स्यातां। प्रायग्रहणात् कौशिक्यपि वृत्तिर्भवति। उदाहरणं लीलामधुकरः" सा० द०।

भाण्ड न० भाण्ड-अच् भण्ड-ड-स्वार्थे अण् वा। पात्रे १तैजसाद्याधारे २भाजने (भाँड) "अराजदैविकं नष्टं भाण्डं दायस्तु बान्धवैः" नारदः। ३शटभेदे (भाँड़ार) "ब्रह्माण्डभाण्डोदरेत्यादि वीरचरितम्। ४बणिजां मूल्यधने ५अन्नभृतायां मेदि०। ६नटीकृतहृदयमध्ये पात्रे च हेमच०। ७गर्दभाण्डे हस्ते पु० शब्दच०। भण्डस्य भावः अण्। ८भण्डचरित्रे न० (भाड़ामि) अजवः।

भाण्डपुट पु० नापिते जटाधरः।

भाण्डपुष्प पु० सर्पभेदे त्रिका०।

भाण्डल त्रि० भाण्डं वाति वा-क। भाण्डपात्रके स्त्रियां गौरा० ङीष्। [समीपादौ।

भाण्डव त्रि० भण्डोरदूरादि वृद्धास्वा० अण्। भण्डु-

भाण्डागार कर्म०। (भाँड़ार) शटभेदे हेमच०। तत्र नियुक्तः ठन्। भाण्डागारिक तत्र नियुक्ते त्रि०।

भाण्डार न० भाण्डं तदाकारञ्छति छ-अण् उप०स०। शटभेदे (भाँड़ार)।

भाण्डारिन् पु० भाण्डमञ्छति छ-णिनि। अन्नादिद्रव्यशटेषु कृताधिकारे। "क्षुधितस्तृषितः श्रान्तो विद्यार्थी क्षत्रियाधिकारकः। भाण्डारी च प्रवासी च सप्त सुप्तान् प्रबोधयेत्" इति व्यवहारप्रदीपः। [(भाँड़ि)

भाण्डि स्त्री भण्डस्येदम्। नापितस्य क्षुराद्याधारपात्रभेदे

भाण्डिवाह पु०भाण्डिं क्षुराद्याधारं (भाडि) वहति वह-अण् उप०स० नापिते भाण्डि+यत्स्वर्थे अण्। भाण्डिवह तत्रार्थे शब्दमा०।

भाण्डीर पु० भण्ड-ईरच् पृषो०। १वटवृक्षे २वृन्दावनस्थे ३वटवनभेदे च शटा०। "प्रलम्बो नाम भूत्वाथो वटं भाण्डीरमाश्रितः" हरिवं० ५५अ०।

भाति स्त्री भा-क्तिन्। शोभायाम् राजनि०।

भातु पु०भा-तन्। १सूर्ये त्रिका०। २दीप्ते त्रि०संक्षिप्त०।

भाद्र पु० भद्राभिर्युक्ता पौर्णमासी भाद्री सा यस्मिन् मासे अण्। चैत्रादितः षष्ठे चान्द्रे १मासे अमरः। २तस्मा-

सौम्यसौर्यमासां स्त्री ङीप्। भद्रेव स्वार्थे अण्। २पूर्वोत्तरभाद्रपदाख्यनक्षत्रे न०। "भाद्रहये नागरे" ज्योतिषम्। ३भाद्रा पौर्णमास्यायुक्ते पक्षे तथाविधे ४गुरुवर्षे च कार्त्तिकशब्दे दृश्यम्।

भाद्रपदा स्त्री ब०व०। भद्रश्चेदं अण् भाद्रमिव पदमासाम्। ऋक्षत्वविधिके पञ्चविंशद्विंशयोर्नक्षत्रयोः। १तद्युक्ता पौर्णमासी अण् ङीप्। २भाद्रमासस्य पौर्णमास्यां षाडव भाषे अण्। ३चान्द्रे भाद्रे मासि पु०। तादृशे ४पक्षे ५गुरुवर्षभेदे च कार्त्तिकशब्दे दृश्यम्।

भाद्रमातुर पु० भद्रायाः कल्याः मातुः अपत्यम् अण् मातुरङ्। यतौ प्रवरे हेमच०।

भान न०भा-भावे ल्युट्। १प्रकाशे २दीप्तौ ३ज्ञाने प्रकाशे च।

भानु पु० भा-नु। १सूर्ये २अर्कवृक्षे ३किरणे ४राजनि च अमरः ५प्रभौ धरणिः। ६भूतजैनभेदे हेमच०। उत्तममन्वन्तरे ७देवे ब०व० हरिवं०६अ०। ८धर्मपत्नीभेदे स्त्री हरिवं० ३अ०। १०गन्धर्वभेदे पु० भा०आ०६५अ०। ११यदुवंशप्रवरक्षत्रियभेदे भानुसख्याः पितरि पु० हरिवं० १३६अ०। १२विष्णौ पु० "अनन्तांशुभुवो भानुः" विष्णु स० "तमेव भान्तमनुभाति सर्वम्" श्रुतेश्च तथात्वम्।

भानुफला स्त्री भानुरिव दीप्तिमत् फलं प्रसवो यस्याः। कदल्याम् जटाधरः। तस्याः मोचकस्य सूर्यतुल्यवर्णत्वात्तथात्वम्। [१३६ अ०।

भानुमती स्त्री भानोर्वीदर्भस्यभेदस्य कन्यायां हरिवं०

भानुमत् स्त्री भानुः किरणोऽस्यास्ति मतुप्। १सूर्ये मल्लिरा० २अर्कवृक्षे च। भानुमालीत्यपि। ३रूपभेदे पु० भा०भी० ६४अ०। अष्टजातिन्दुपस्य भार्यायां जाते ज्ञातवीर्यस्य ४दुहितृभेदे स्त्री भा० आ० ८५अ०।

भानुसेन पु० वर्षपुत्रभेदे भा० क० ४८ अ०।

भानुमि पु० भानोः नेमिरिव। १सूर्ये २अर्कवृक्षे च त्रिका०।

भान्त पु० भायाः दीप्तेः पञ्चदशाष्टमभ्ये अन्तो यस्य। शुक्लकृष्णपक्षयोः पञ्चदशाष्टमभ्ये क्रान्तेरूपचयापचययुक्ते चन्द्रे "भान्तः पञ्चदशौ यतुः १३।२१ वेददी० धृतः। २नक्षत्रराश्योरन्ते च।

भाम क्रोधे भ्वा०व्याव०अक०सेट्। भामते अभामिष्ट बभामे।

भाम पु०भाम-घञ्। १क्रोधे निघण्टुः। भा-भावे म। २दीप्तौ च। कर्तरि म। ३सूर्ये मेदि०। ४अर्कवृक्षे च। ५अग्निजीपतौ पु०शब्दरत्ना ६क्रोधनायां स्त्रियां स्त्री मेदि०।

भामनी पु० भामं नयति नी-क्विप्। परमेश्वरे "एष उ एव भामनीरेष हि सर्वेषु लोकेषु भाति सर्वेषु लोकेषु भाति य एवं वेद" श्रा०उ०। "एष उ भामनीरेष हि ब्रह्मात् सर्वेषु लोकेष्वादित्यचन्द्राग्न्यादिरूपैर्भाति दीप्यते। "तस्य भासा सर्वमिदं विभातीति" श्रुतेरतो भामानि नयतीति भामनीः भा०। [नावां स्त्रियाम् स्त्री ङीप् अमरः।

भामिन् त्रि०भाम-इनि। क्रोधयुक्ते स्त्रियां ङीप्। कोपनायां स्त्री मेदि०।

भार पु० भृ-घञ्। १गुरुत्वपरिमाणे २तदति द्रव्ये ३विंशतितुलापरिमाणे (चतुःसहस्रपलोन्मानपरिमाणे) च पु०।४वीवधे ५विष्णौ च मेदि०।

भारङ्गी स्त्री भृ-वा० अङ्गच्। पोमपत्न्यां स्त्रियां ततः स्वार्थे० ठञ्। भारङ्गिक तत्र भवे त्रि०।

भारण्ड पु० उत्तरदेशजे खगभेदे "एकोदराः पृथग्ग्रीवा अन्योऽन्यफलभक्षिणः। सहिता विनशन्ति भारण्डा इव पक्षिणः" पञ्चत०।

भारत न० भरतानां भरतवंश्यानधिकृत्य कृतोऽण्ग्रन्थः अण्। भारं वेदादिशास्त्रेभ्योऽधि स्वार्थे तनोति तन-ड वा। १वेदव्यासप्रणीते लक्षश्लोकात्मके ग्रन्थभेदे। भरतेन निर्मितं तत्रेदं वा अण्। "हिमाद्रेर्दक्षिणं वर्षं भरताय ददौ पिता। तस्माद्वै भारतं वर्षम्" इत्युक्ते जम्बुद्वीपान्तर्गते २वर्षभेदे। भरतस्य गोत्रापत्यम् अण्। भरतवंश्ये। भरतेन मुनिना प्रोक्तमण्। ३भरतमुनिप्रोक्ते नाटकशास्त्रादौ न०। तदधीयते पुनरण्। ५नटे ब०व०। ६अग्निभेदे च अन्यरूपभारतग्रन्थस्य निरुक्तिः भा०आ०१अ०दर्शिता यथा "एकतश्चतुरो वेदान् भारतञ्चैतदेकतः। पुरा किल सुरैः सर्वैः समेत्य तुलया धृतम्। चतुर्भ्यः सरहस्येभ्यो वेदेभ्यो ह्यधिकं यदा। तदाप्रभृति लोकेऽस्मिन् महाभारतमुच्यते। महत्त्वे च गुरुत्वे च ध्रियमाणं यतोऽधिकम्। महत्त्वाद्भारतत्वाच्च महाभारतमुच्यते। निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते"।

तच्च वेदव्यासेन कृतं तदादिष्टः तच्छिष्यः वैशम्पायनः जनमेजयं श्रावयामास यथोक्तं भा० आ० १अ०।

"जनमेजयेन पृष्टः सन् ब्राह्मणैश्च सहस्रशः। यशसा शिष्यभावीनं वैशम्पायनमन्तिके। स सदस्यैः सहासीनः श्रावयामास भारतम्। कर्मान्तरेषु यज्ञस्य चोद्यमानः पुनःपुनः। विस्तरं कुरुवंशस्य गान्धार्या धर्मशीलताम्। क्षत्तुः प्रज्ञां,धृतिं कुन्त्याः सम्यग्वै पाण्डवोऽब्रवीत्। वासुदेवस्य माहात्म्यं पाण्डवानाञ्च सत्यताम्। दुर्वृत्तं धार्त्तराष्ट्राणाञ्चकारानु भगवान्ऋषिः"।

तच्च नानाविधं नानासंख्यान्वितं च ऋतं लोके तु शतसाहस्रसंख्यातं यदुक्तं तत्रैवाध्याये

"चतुर्विंशतिसाहस्रीं चक्रे भारतसंहिताम्। उपाख्यानैर्विना तावद्भारतं प्रोच्यते बुधैः। ततोऽध्यर्धशतं भूयः संक्षेपं कृतवान्प्रभुः। अनुक्रमणिकाध्यायं वृत्तान्तानां सपर्वणाम्। इदं द्वैपायनः पूर्वं पुत्रमध्यापयच्छुकम्। ततोऽन्येभ्योऽनुरूपेभ्यः शिष्येभ्यः प्रददौ विभुः। षष्टिं शतसहस्राणि चकारान्यां स संहिताम्। त्रिंशच्छतसहस्रं च देवलोके प्रतिष्ठितम्। पित्र्ये पञ्चदश प्रोक्तं गन्धर्वेषु चतुर्दश। एकं शतसहस्रन्तु मानुषेषु प्रतिष्ठितम्। नारदोऽशृणवद्देवानसितो देवलः पितॄन्। गन्धर्वयक्षरक्षांसि शृणवामास वै शुकः। अस्मिंस्तु मानुषे लोके वैशम्पायन उक्तवान्। शिष्यो व्यासस्य धर्मात्मा सर्ववेदविदांवरः। एकं शतसहस्रन्तु मयोक्तं वै निबोध तत्"। तच्चाष्टादशसाहस्रपर्वयुतं तदवान्तरपर्वशतकं तद्विभागस्तत्र वर्णनीयपदार्थानां संग्रहश्च भा॰ आ॰ २अ॰ दर्शितो यथा

"भारतस्येतिहासस्य श्रूयतां पर्वसंग्रहः"। आदिपर्वणि १पर्वानुक्रमणी पूर्वं द्वितीयः२ पर्वसंग्रहः।३पौष्यं ४पौलोमसास्तीकं५आदिरं(वं)शावतारणम्६। ततः ७जन्मेजयोत्पत्तिमद्भुतं रोमहर्षणम्। ८दाक्षो जतुगृहात्तस्मात् कृष्णाया हैडिम्बं९ पर्व प्रोच्यते। ततो वकवधः१० पर्व पर्व चैत्ररथं११ ततः। ततः स्वयम्वरो१२ देव्याः पाञ्चाल्याः पर्व प्रोच्यते। ज्ञातधर्मेण निर्जित्य ततो वैवाहिकं१३ ऋतम्। विदुरागमनं पर्व राज्यलाभस्तथैव १४ च। अर्जुनस्य वने वासः१५ सुभद्राहरणं१६ ततः। सुभद्राहरणादूर्ध्वं प्रोक्तं हरणहारिका १७। ततः खाण्डवदाहाख्यं१८ तत्रैव मयदर्शनम्।(२)सभापर्व ततः१९प्रोक्तं मन्त्रपर्व २० ततः परम्। जरासन्धवधः२१ पर्व पर्व दिग्विजय२२संज्ञया। पर्व दिग्विजयादूर्ध्वं राजसूयिक२३संज्ञितं। ततश्चार्घाभिहरणं२४ शिशुपालवध२५ऋतः। द्यूतपर्व२६ ततः प्रोक्तमनुद्यूत२७मतः परम्। तत(३)आरण्यकं पर्व किर्मीरवधः२८ एव च। अर्जुनस्याभिगमनं२९ पर्व प्रोक्तमतः परम्। ईश्वरार्जुनयोर्युद्धं पर्व कैरात३०संज्ञितम्। इन्द्रलोकाभिगमनं ३१ पर्व प्रोक्तमतः परम्। नलोपाख्यान३२मपि च धर्मिष्ठं करथोदवम्। तीर्थयात्रा३३ ततः पर्व कुरराजस्य धीमतः। जटासुरवधः३४ पर्व यक्षयुद्ध३५मतः परम्। निवातकवचैर्युद्धं ३६ पर्व चाजगर३७ऋतः। मार्कण्डेयसमास्या३८ च पर्वानन्तरमुच्यते। संवादश्च ततः पर्व द्रौपदीसत्यभामयोः३९। घोषयात्रा४० ततः पर्व मृगस्वप्नोद्भव४१ऋतः। प्रोक्तिर्द्वैधिक४२माख्यानमैन्द्रद्युम्नं (सभाख्यानगतं) तथैव च। द्रौपदीहरणं४३ पर्व जयद्रथविमोक्षणम्४४। पतिव्रताया माहात्म्यं सावित्र्याश्चैवमुत्तमम्४५। रामोपाख्यान४६मतश्चैव पर्व प्रोच्यमतः परम्। कुण्डलाहरणं४७ पर्व ततः परमिहोच्यते। आरण्येव४८ऋतः पर्व (४)वैराटन्तदनन्तरम्। पाण्डवानां प्रवेशश्च४९ समयस्य च पालनम्। कीचकानां वधः५० पर्व पर्व गोग्रहणं५१ततः। अभिमन्योश्च वैराट्या पर्व वैवाहिकं ५२ ऋतम्। (५)उद्योगपर्व विज्ञेयमत ऊर्ध्वं महाद्भुतम्। ततः सञ्जयवाक्यं५३ पर्व प्रोच्यमतः परम्। प्रजागरऋतः५४ पर्व धृतराष्ट्रस्य चिन्तया। पर्व सनत्सुजातं ५५ वै गुह्यमध्यात्मदर्शनम्। यानसन्धि५६ऋतः पर्व भगवद्यान५७मेवच। मातलीयमुपाख्यानं चरितं गालवस्य च। सभाप्रवेशः ऋषभस्य विदुरागमनं तथा। प्रोक्तं विवादपर्वं५८तत्र कर्णस्यापि महात्मनः। निर्याणम्५९ ततः पर्व कुरुपाण्डवसेनयोः। रथातिरथसंख्या६० च पर्वोक्तं तदनन्तरम्। उलूकदूतागमनं ६१ पर्वामर्षविवर्धनम्। अम्बोपाख्यान६२मतश्चैव पर्व प्रोच्यमतः परम्। भीष्माभिषेचनं(६) पर्व ततश्चाद्भुत मुच्यते। जम्बूखण्डविनिर्माणं६३ पर्वोक्तं तदनन्तरम्। भूमिपर्व६४ ततः प्रोक्तं द्वीपविस्तारकीर्तनम्। पर्वोक्तं भगवद्गीता६५ पर्व भीष्मवध६६ऋततः। द्रोणाभिषे(७)चनं पर्व संशप्तकवधः६७ऋतः। अभिमन्युवध६८ पर्व प्रतिज्ञा६९ पर्व चोच्यते। जयद्रथवध७० पर्व घटोत्कचवध७१ऋतः। ततो द्रोणवध७२ पर्व विज्ञेयं लोमहर्षणम्। मोक्षो७३ नारायणास्त्रस्य पर्वानन्तरमुच्यते। कर्णपर्व(८) ततो ज्ञेयं शल्यपर्व(९) ततः परम्। ह्रदप्रवेशनं७४ पर्व पदायुद्धमतः७५ परम्। गारऋतं ७६ ततः पर्व सौप्तिकं(१०)मुच्यते। ऐषीकं७७ पर्व चोद्दिष्टमत ऊर्ध्वं सुदारुणम्। जलप्रदानिकं७८ पर्व स्त्रीविलाप(११)ऋतः परम्। श्राद्धपर्व७९ ततो ज्ञेयं कृष्णाभीर्ध्वदेहिकम्। चार्वाकस्य वधः८० पर्व रक्षसो ब्रह्मरूपिणः। आभिषेचनिकं८१

पर्व धर्मराजस्य धीमतः। प्रतिभागोऽ२ स्टङ्काख्यं पर्वोक्तं तदनन्तरम्। शान्तिपर्व(१२) ततो यत्र राजधर्मानुशासनम्ऽ१। आपद्धर्मश्चऽ४ पर्वोक्तं मोक्षधर्मऽ५स्ततः परम्। शुकप्रश्नाभिगमनं ब्रह्मप्रश्नानुशासनम्। प्रादुर्भावश्च दुर्वासःसंवादश्चैव मायया। ततः पर्व परिक्षेपमानुशासनिकम्(१३) परम्। स्वर्गारोहणिकञ्चैव ततो भीष्मस्य धीमतः। ततोऽश्वमेधिकं(१४) पर्व सर्वपापप्रणाशनम्। अनुगीताऽ६ ततः पर्व श्रेयसध्यात्मवाचकम्। पर्व चाश्रमवासा(१५)ख्यं सुव्रदर्शनमेव च। नारदागमनं८७ पर्व ततः परिमिहोच्यते। मौसलं(१६) पर्व चोद्दिष्टं ततो घोरं सुदारुणम्। महाप्रस्थानिकं(१७) पर्व स्वर्गारोहणिकं(१८) ततः। हरिवंशस्ततः पर्व८८ पुराणं खिलसंज्ञितम्। विष्णुपर्व८९ त्रिशोक्ष्यां विष्णोः कंसवधस्तथा। भविष्यं पर्व९० चाप्युक्तं खिलेष्वेवाङ्गुतं महत्। एतत् पर्व शतं पूर्णं व्यासेनोक्तं महात्मना। (महाभारतसंहितं किञ्चिदधिकशतपर्वोपक्रमेति बोध्यम्)। यत्रावतं स्तनपुत्रेण लौमहर्षणिना ततः। उक्तानि नैमिषारण्ये पर्वाण्यष्टादशैव तु। समासो भारतस्यायमनुक्तः पर्वसंग्रहः। पौष्यं पौलोममास्तीकमादिरं(वं)शावतारणम्। समयो जतुवेश्माख्यं हिडिम्बवकयोर्वधः। तथा चैत्ररथं हैड्याः पाञ्चाल्याश्च स्वयंवरः। वैवाहिकं धर्मनिर्जित्य ततो वैवाहिकं शतम्। विदुरागमनञ्चैव राज्यलम्भस्तथैव च। वनवासोऽर्जुनस्यापि सुभद्राहरणं ततः। हरणाहरणञ्चैव दहनं खाण्डवस्य च। मयस्य दर्शनञ्चैव सभापर्वणि कथ्यते। पौष्ये पर्वणि महात्म्यमुक्तमनुक्रोपवर्णितम्। पौलोमे भृगुवंशस्य विस्तारः परिकीर्तितः। आस्तीके सर्पनागानां गरुडस्य च सम्भवः। क्षीरोदमथनञ्चैव जन्मोच्चैःश्रवसस्तथा। यज्ञतः सर्पसत्रेण राज्ञः पारीक्षितस्य च। कथेयमभिनिर्वृत्ता भारतानां महात्मनाम्। विविधाः सम्भवा राज्ञासङ्काः सम्भवपर्वणि। जन्मेहाञ्चैव मूराणामसद्भैः पार्थिवस्य च। वंशावतारणञ्चात्र देवानां परिकीर्तितम्। दैत्यानां दानवानाञ्च। यक्षाणाञ्च महौजसाम्। नागानामथ सर्पाणां गन्धर्वाणां प्रतत्विषाम्। अन्येषाञ्चैव भूतानां विविधानां समुद्भवः। महर्षेराश्रमपदे कण्वस्य च तपस्विनः। शकुन्तलायां दुष्मन्तादुरतश्चापि जज्ञिवान्। यथ चोक्तेषु नाम्नेदं प्रथितं भारतं कुलम्। वसूनां पुनरुत्पत्तिर्भागीरथ्यां महात्मनाम्। शान्तनोर्वेश्मनि पुनस्तेषाञ्चारोहणं दिवि। तेजोंशानाञ्च सम्भवो भीष्मस्याथ समयः। राज्यादिवर्जनं तस्य ब्रह्मचर्यव्रते स्थितिः। प्रतिज्ञापालनञ्चैव रक्षा चित्राङ्गदस्य च। हते चित्राङ्गदे चैव रक्षा भ्रातुर्यवीयसः। विचित्रवीर्यञ्च तथा राज्ये सम्प्रतिपालनम्। धर्मस्य सूक्ष्म सम्भूतिरणीमाण्डव्यशापजा। कृष्णद्वैपायनाच्चैव प्रसूतिर्वरदानजा। धृतराष्ट्रस्य पाण्डोश्च पाण्डवानाञ्च सम्भवः। वारणावतयात्रायां मन्त्रो दुर्योधनस्य च। कूटस्य धार्तराष्ट्रेण प्रेष्यं पाण्डवान् प्रति। हितोपदेशश्च पथि धर्मराजस्य धीमतः। विदुरेण ततो यत्र हितार्थं म्लेच्छभाषया। विदुरस्य च वाक्येन सुरङ्गोपक्रमक्रिया। निषादाः पञ्चपुत्रायाः सप्तमा जतुवेश्मनि। पुरोचनस्य चात्रैव दहनं सम्प्रकीर्तितम्। पाण्डवानां वने घोरे हिडिम्बायाश्च दर्शनम्। तत्रैव च हिडिम्बस्य वधो भीमान्महाबलात्। घटोत्कचस्य चोत्पत्तिरत्रैव परिकीर्तिता। महर्षेर्दर्शनञ्चैव व्यासस्यामिततेजसः। तदात्वयैकचक्रायां ब्राह्मणस्य निवेशने। वसतां पाण्डुपुत्राणां तत्र चैषां प्रकीर्तितः। वकस्य निधने चैव नागराज्ञश्च विक्रयः। समयश्चैव कृष्णाया धृष्टद्युम्नस्य चैव हि। ब्राह्मणात् सप्तपञ्चाशद् व्यासवाक्यप्रचोदिताः। द्रौपदीं प्रार्थयानस्तु स्वयंवरदिदृक्षया। पाञ्चालानभिसोजग्मुर्यत्र कौतूहलान्विताः। अक्षारुहणं निर्जित्य गङ्गाकूलेऽर्जुनस्तदा। सख्यं कृत्वा ततस्तेन तस्मादेव च लब्धवे। तापत्यमथ वाशिष्ठमौद्दालाख्यानसुत्तमम्। भ्रातृभिः सहितः सर्वैः पाञ्चालानभितो ययौ। पाञ्चालनगरे चापि लब्धं भिक्षा धनञ्जयः। द्रौपदीं लब्धवानत्र मध्ये सर्वमहीक्षिताम्। भीमसेनार्जुनौ यत्र संरब्धान् पृथिवीपतीन्। शल्यकर्णौ च तरसा जितवन्तौ महाहवे। दृष्ट्वा तयोश्च तद्वीर्यमप्रमेयमानुषम्। शङ्कमानौ पाण्डवांस्तान् रामकृष्णौ महामतौ। सम्प्रस्थितौ समागन्तुं शाल्वाम्बष्ठेक्ष्वाकुभिः। पञ्चानामेकपत्नीत्वे विमर्शो द्रुपदस्य च। पञ्चेन्द्राख्यानमत्रैवाद्भुतमुच्यते। द्रौपद्या देवविहितो विवाहस्याप्यमानुषः। चक्षुश्च धृतराष्ट्रेण प्रेष्यं पाण्डवान् प्रति। विदुरस्य च सम्प्राप्तिर्दर्शनं केशवस्य च। खाण्डवप्रस्थवासश्च तथा राज्यार्धशासनम्। नारदस्यागमश्चात्र

चैव द्रौपद्याः स्वयंवरक्रिया। सुन्दोपसुन्दयोश्चरितमाख्यानं परिकीर्त्तितम्। अनन्तरञ्च द्रौपद्या हरणात्तेन युधिष्ठिरम्। अनुप्रविश्य विप्रार्षिं फाल्गुनो मन्त्र चायुधम्। मोचयित्वा मन्त्रं गत्वा विप्रार्षिं कृतनिश्चयः। समयं पालयन् वीरो वनं यत्र जगाम ह। पार्थस्य वनवासे च उलूपी पतिमन्वगात्। पुण्यतीर्थानुसंयानं बभ्रुवाहनजन्म च। तत्रैव मोचयामास पञ्च गोऽप्सरसः शुभाः। शापादुपाकृत्यमापन्ना ब्राह्मणस्य तपस्विनः। प्रभासतीर्थे पार्थेन कृष्णस्य च समागमः। द्वारकायां सुभद्रा च कामयानेन कामिनी। वासुदेवस्यानुमते प्राप्ता चैव किरीटिना। मन्त्रीत्वा हरणं प्राप्ते कृष्णे देवकिनन्दने। अभिमन्योः सुभद्रायां जन्म चोत्तमतेजसः। द्रौपद्यास्तनयानाञ्च सम्भवोऽनुप्रकीर्त्तितः। विहारार्थञ्च गतयोः कृष्णयोर्यमुनामनु। खाण्डवस्य च दाहनम्। मयस्य मोक्षो ज्वलनाद्भुजङ्गस्य च मोक्षणम्। मन्दपालस्य शार्ङ्गाणे तनयत्वसम्भवः। इत्येतदादिपर्वोक्तं प्रवरं वस्तुविस्तरम्। अध्यायानां शते द्वे तु संख्याते परमर्षिणा। सप्तत्रिंशतिरध्याया व्यासेनोक्ततेजसा। मन्त्रौ श्लोकसहस्राणि मन्त्रौ श्लोकशतानि च। श्लोकानामृतरश्मीति मुनिनोक्ता महात्मना (१)।

द्वितीयन्तु सभापर्व बहुवृत्तान्तसंयुतम्। सभाक्रिया पाण्डवानां किङ्कराणाञ्च दर्शनम्। लोकपालसभाख्यानं नारदाद्वेददर्शिनः। राजसूयस्य चारम्भो जरासन्धवधस्तथा। गिरिव्रजे निरुद्धानां राज्ञां कृष्णेन मोचणम्। तथा दिग्विजयोऽत्रैव पाण्डवानां प्रकीर्त्तितः। राज्ञामागमनञ्चैव सार्घ्याणां महात्मनाम्। राजसूयेऽर्घ्यसंवादे शिशुपालवधस्तथा। यज्ञे विभूतिं तां दृष्ट्वा दुःखामर्षान्वितस्य च। दुर्योधनस्यावहासो भीमेन च समागमे। यस्माच्च मन्युसम्भूतो येन द्यूतमकारयत्। यत्र धर्मसुतं द्यूते शकुनिः कितवोऽजयत्। यत्र द्यूतार्थवे मग्नां द्रौपदीं नावमर्षणात्। धृतराष्ट्रो महाप्राज्ञः कृपां परमदुःखिताम्। तारयामास तां तीर्थां ज्ञात्वा दुर्योधनो नृपः। पुनरेव ततो द्यूते समाह्वयत पाण्डवान्। जित्वा च वनवासाय प्रेषयामास तांस्ततः। एतत् सर्वं सभापर्व समाख्यातं महात्मना। अध्यायाः सप्तत्रिंशैवास्यत्र चाष्टौ प्रसंख्यया। श्लोकानां द्वे सहस्रे तु पञ्च श्लोकशतानि च। श्लोकाश्चैकादश प्रोक्ता यत्र पर्वण्यनिन्दिताः (२)। (द्वितीयसभापर्व)

"अतःपरं वनान्तं श्रेयस्कारयत्नं महत्। वनवासं प्रयातेषु पाण्डवेषु महात्मसु। पौरानुगमनञ्चैव धर्मपुत्रस्य धीमतः। अन्नौषधीनाञ्च कृते पाण्डवेन महात्मना। द्विजानां भरणार्थञ्च कृताराधनं रवेः। धौम्योपदेशात्तस्यांशुप्रसादादन्नसम्भवः। क्षितन्तु मुनतः चक्षुः परित्यागोऽम्बिकासुतात्। अन्नस्य पाण्डुपुत्राणां समीपगमनन्तथा। पुनरागमनञ्चैव धृतराष्ट्रस्य शासनात्। अर्थशोकाहतानाञ्चैव धार्त्तराष्ट्रस्य दुर्मतेः। वनस्थान् पाण्डवान् हन्तुं मन्त्रो दुर्योधनस्य च। तं दुष्टभावं विज्ञाय व्यासस्यागमनं पुनः। नियोगप्रतिषेधश्च स्मरख्यानमेव च। मैत्रेयागमनञ्चात्र राज्ञश्चैवानुशासनम्। शापोत्सर्गश्च तेनैव राज्ञो दुर्योधनस्य च। किर्मीरस्य वधञ्चात्र भीमसेनेन संयुगे। कृष्णानामागमञ्चात्र पाण्डवानाञ्च सर्वशः। श्रुत्वा शकुनिना द्यूते निकृत्या निर्जितांश्च तान्। कृष्णायाश्चानयनं हरेश्चैव किरीटिना। परिदेवनञ्च पाञ्चाल्या वासुदेवस्य सन्निधौ। आश्वासनञ्च कृष्णेन दुःखार्त्तायाः प्रकीर्त्तितम्। तथा सौभवधाख्यानमत्रैवोक्तं महर्षिणा। सुभद्रायाः सपुत्रायाः कृष्णेन द्वारकां पुरीम्। गमनं द्रौपदेयानां धृष्टद्युम्नेन चैव हि। प्रवेशः पाण्डवेयानां रम्ये कैतवने ततः। धर्मराजस्य चात्रैव संवादः कृष्णया सह। संवादश्च तथा राज्ञा भीमस्यापि प्रकीर्त्तितः। समीपं पाण्डुपुत्राणां व्यासस्यागमनं तथा। प्रतिस्मृत्याश्च विद्याया दानं राज्ञो महर्षिणा। गमनं काम्यके चापि व्यासे प्रतिगते ततः। अस्त्रहेतोर्विवासश्च पार्थस्यामिततेजसः। महादेवेन युद्धञ्च किरातवपुषा सह। दर्शनं लोकपालानामस्त्रप्राप्तिस्तथैव च। महेन्द्रलोकगमनमस्त्रार्थं च किरीटिनः। यत्र चिन्ता समुत्पन्ना धृतराष्ट्रस्य भूयसी। दर्शनं हृदयस्थञ्च महर्षेर्भावितात्मनः। युधिष्ठिरस्य चार्त्तस्य व्यसने परिवेदनम्। नलोपाख्यानमत्रैव धर्मिष्ठं करुणोदयम्। दमयन्त्याः स्थितिर्यत्र नलस्य चरितं यथा। तथाश्वहृदयप्राप्तिरक्षाद्यूते महर्षितः। लोमशस्यागमञ्चात्र स्वर्गात् पाण्डुसुतान् प्रति। वनवासगतानाञ्च पाण्डवानां महात्मनाम्। स्वर्गं प्रदर्शितं राज्ञा लोमशेनार्जुनस्य वै। सन्देशादर्जुनस्यात्र तीर्थाभिगमनक्रिया। तीर्थानाञ्च फलप्राप्तिः पुलस्त्य-

स्तुपि कीर्त्तितम्। पुलस्त्यतीर्थयात्रा च नारदेन महर्षिणा। तीर्थयात्रा च तत्रैव पाण्डवानां महात्मनाम्। कर्षस्य परिमोक्षोऽत्र कृष्णाभ्यां पुरन्दरात्। तथा यज्ञविभूतिश्च सर्वस्मात् प्रकीर्त्तितः। आगस्त्यमपि चाख्यानं यत्र वातापिभक्षणम्। लोपामुद्राभिगमनमपत्यार्थमृषेस्तथा। ऋष्यशृङ्गस्य चरितं लोमपादप्रचारिणः। जामदग्न्यस्य रामस्य चरितं भूरितेजसः। कार्त्तवीर्य्यवधो यत्र हैहयानाञ्च वक्ष्यते। प्रभासतीर्थे पाण्डूनां दृष्णिभिश्च समागमः। सौकन्यमपि चाख्यानं च्यवनो यत्र भार्गवः। अश्वौ तियत्ने नासत्यौ कृतवान् सोमपीतिनौ। ताभ्याञ्च यत्र स तनिर्यौवनं प्रतिपादितः। मान्धातुश्चाप्युपाख्यानं राज्ञोऽत्रैव प्रकीर्त्तितम्। जन्हूपाख्यानमत्रैव यत्र पुत्रेण सोमकः। पुत्रार्थमयजद्राजा खेभे पुत्रशतञ्च सः। ततः श्येनकपोतीयमुपाख्यानमनुत्तमम्। इन्द्राग्नी यत्र धर्मस्याभिप्रायाच्छकुनिं रूपम्। अष्टावक्रीयमत्रैव विवादो यत्र बन्दिना। अष्टावक्रस्य विप्रर्षेर्जनकस्याध्वरेऽभवत्। नैयायिकानां सख्येन बहुशास्त्रज्ञेन च। पराजितो यत्र बन्दी विवादेन महात्मना। विप्रियत्व सागरं प्राप्तं पितरं कहोडमृषिः। यवक्रीतस्य चाख्यानं रैभ्यस्य च महात्मनः। गन्धमादनयात्रा च वासो नारायणाश्रमे। नियुक्तो भीमसेनश्च द्रौपद्या गन्धमादने। व्रजन् पथि महाबाहुर्दृष्टवान् पवनात्मजम्। कदलीषण्डमध्यस्थं हनूमन्तं महाबलम्। यत्र सौगन्धिकार्थेऽसौ नलिनीं तामधर्षयत्। यत्राह युद्धमभवत् सुमहद्बाहुशैः सह। यक्षैश्चैव महावीर्यैर्मणिमत्प्रमुखैस्तथा। जटासुरस्य च वधो राक्षसस्य दुरोदरात्। वृषपर्वणो राजर्षेस्ततोऽभिगमनं श्रुतम्। आर्ष्टिषेणाश्रमे चैषां गमनं वास एव च। प्रोक्षाद्भिश्च पाञ्चाल्या भीमस्यात्र महात्मनः। कैलासारोहणं प्रोक्तं यत्र यक्षैर्महोत्कटैः। युद्धमासीन्महाघोरं मणिमत्प्रमुखैः सह। समागमश्च पाण्डूनां यत्र वैश्रवणेन च। समागमश्चार्जुनस्य तत्रैव शतभिः सह। अवाप्य दिव्यान्यस्त्राणि पुनर्वै सव्यसाचिना। निवातकवचैर्युद्धं त्रिदशप्रतिमैर्महत्। निवातकवचैर्घोरैर्दानवैः सुरशत्रुभिः। यौधोमैः कालकेयैश्च यत्र युद्धं किरीटिनः। वधश्चैषां समाख्यातो राक्षसेनैव धीमता। अजस्रन्द्रमनारम्भो धर्मराजस्य चाश्रिधौ। पार्थस्य प्रतिषेधश्च नारदेन सुरर्षिणा। अवरोधः पुनश्चैव पाण्डूनां गन्धमादनात्। भीमस्य मदमथनात्र पर्वताभोगवर्त्मना। भुजगेन्द्रेण बलिना तस्मिन् सुगहने वने। अभोज्यदृश्यत्र चैनं प्रश्नाहृत्या युधिष्ठिरः। कामक्रोधमनश्चैव पुनस्तेषां महात्मनाम्। तत्रस्थांश्च पुनर्दृष्ट्वा पाण्डवान् पुरुषर्षभान्। वासुदेवागमनमत्रैव परिकीर्त्तितम्। मार्कण्डेयस्य च तथा देवर्षेर्नारदस्य च। मार्कण्डेयसमास्यासपाख्यानानि सर्वशः। पृथोश्चैत्रस्य यज्ञोक्तमाख्यानं परमर्षिणा। संवादश्च सरस्वत्या तार्क्ष्यैः सुमहात्मनः। अत्रेरुपाख्यानमत्रैव प्रोच्यते तदनन्तरम्। मार्कण्डेयसमास्या च पुराणं परिकीर्त्तितम्। इन्द्रद्युम्नस्योपाख्यानं धौम्यसारं तथैव च। पतिव्रतोपाख्यानं तथैवाङ्गिरसं स्मृतम्। द्रौपद्याः कीर्त्तितश्चात्र संवादः सत्यभामया। पुनर्दैतवनञ्चैव पाण्डवाः समुपागताः। घोषयात्रा च गन्धर्वैर्यत्र बद्धः सुयोधनः। क्षिप्यमानस्तु मन्त्रिभ्यो मोक्षितोऽथो किरीटिना। धर्मराजस्य चात्रैव मृगस्वप्नविगर्हणम्। काम्यके कानने चैव पुनर्मैत्रेयसङ्गमः। द्वैतिद्वैधिकमाख्यानमत्रैव बहुविस्तरम्। दुर्वासोऽप्युपाख्यानमत्रैव परिकीर्त्तितम्। जयद्रथेनापहारो द्रौपद्याश्चात्मजान्तरात्। यत्रैनमन्वयाद्भीमो वायुवेगसमो जवे। चक्रे चैनं पशुगतं यत्र भीमो महाबलः। रामायणमुपाख्यानमत्रैव बहुविस्तरम्। यत्र रामेण विक्रम्य निहतो रावणो युधि। सावित्र्याश्चाप्युपाख्यानमत्रैव परिकीर्त्तितम्। कर्षस्य परिमोक्षोऽत्र कृष्णाभ्यां पुरन्दरात्। यत्राह यक्षिं तुष्टोऽदादेकवीरवधाय च। आरण्येयमुपाख्यानं यत्र धर्मोऽन्वशात् सुतम्। जम्भकैर्व्यवहारो यत्र पाण्डवाः पश्चिमां दिशम्। एतदारण्यकं पर्व तृतीयं परिकीर्त्तितम्। अध्यायशतानि द्वे तु संख्यया परिकीर्त्तिते। एकोनषष्टिरेव तथाध्यायाः प्रकीर्त्तिताः। एकादश सहस्राणि श्लोकानां शतानि च। चतुःषष्टिस्तथा श्लोकाः पर्वण्यस्मिन् प्रकीर्त्तिताः॥ (वनपर्व)

"अतःपरं निबोधेदं वैराटं पर्व विस्तरम्। विराटनगरं गत्वा श्मशाने विपुलां शमीम्। दृष्ट्वा बध्वेदमुक्त्वा च स्वायुधान्युत। यत्र प्रविश्य नगरं कङ्कना न्यवसन्नुते। पाञ्चाल्यां प्रार्थयानस्य कीचकस्य दुरोदरात्। दुष्टात्मनो वधो यत्र कीचकस्य दुरोदरात्। पाण्डवान्वेषणा-

र्द्धं राज्ञो दुर्योधनस्य च। चराः प्रख्यापितास्तात निपुणाः सर्वतो दिशम्। न च प्रवृत्तिस्तेषां वा पाण्डवानां महात्मनाम्। गोपेषु विराटस्य त्रिगर्त्तैः प्रथमं कृतः। यत्रास्य युद्धं सुमहत् तैरासील्लोमहर्षणम्। ध्रियमाणश्च यत्रासौ भीमसेनेन मोचितः। गोधनञ्च विराटस्य मोचितं यत्र पाण्डवैः। धनञ्जयस्य कुरुभिस्तस्य गोपेषु हरणं कृतम्। समस्ता यत्र पाण्डवेन निर्जिताः कुरवो युधि। प्रत्याहृतं गोधनञ्च विक्रमेण किरीटिना। विराटेनोत्तरा दत्ता स्नुषा यत्र किरीटिनः। अभिमन्युं समुद्दिश्य सौभद्रमरिघातिनम्। चतुर्थमेतद्विपुलं वैराट पर्व वर्णितम्। यत्रापि हरिसंख्याता अध्यायाः परमर्षिणा। सप्तषष्टिरयो पूर्णा श्लोकानामपि मे शृणु। श्लोकानां हे सहस्रे तु श्लोकाः पञ्चाशदेव तु। उक्तानि वेदविदुषा पर्वण्यस्मिन् महर्षिणा ४। (विराटपर्व)

"उद्योगपर्वः विज्ञेयं पञ्चमं शृण्वतः परम्। उपप्लव्ये निविष्टेषु पाण्डवेषु जिगीषया। दुर्योधनोऽर्जुनश्चैव वासुदेवमुपस्थितौ। साङ्कार्यसक्तिन् समरे भवान्नौ कर्त्तुमर्हति। इत्युक्ते वचने कृष्णो यत्नोवाच महामतिः। अयुध्यमानमात्मानं मन्त्रिणं पुरुषर्षभौ। कथौचित्यौ वा सैन्यस्य कस्य किंवा ददाम्यहम्। वव्रे दुर्योधनः सैन्यं सन्दात्मा यत्र दुर्मतिः। अयुध्यमानं सचिवं वव्रे कृष्णं धनञ्जयः। मद्रराजस्तु राजानमायान्तं पाण्डवान् प्रति। उपहारैर्वञ्चयित्वा वर्त्मन्येव सुयोधनः। वरदं तं वरं वव्रे सारथ्यं क्रियतां मम। अथास्यापि प्रतिश्रुत्य जगामोद्दिश्य पाण्डवान्। शान्तिपूर्वञ्चाकथयद्दुर्योधनविजयं नृपः। पुरोहितप्रेषणञ्च पाण्डवैः कौरवान् प्रति। वैचित्रवीर्य्यस्य वचः समादाय पुरोधसः। तस्येन्द्रविजयञ्चापि यानञ्चैव पुरोधसः। सञ्जयं प्रेषयामास धर्मार्थौ पाण्डवान् प्रति। यत्र दूतं महाराजो धृतराष्ट्रः प्रतापवान्। श्रुत्वा च पाण्डवान् यत्र वासुदेवपुरोगमान्। प्रजागरः संप्रजज्ञे धृतराष्ट्रस्य चिन्तया। विदुरो यत्र वाक्यानि विचित्राणि हितानि च। श्रावयामास राजानं धृतराष्ट्रं मनीषिणम्। तथा सनत्सुजातेन यत्राध्यात्म महत्तमम्। मनस्तापान्वितो राजा श्रावितः शोकनाशनः। प्रभाते राजसमितौ सञ्जयो यत्र वा विभोः। ऐश्वर्य्यं वासुदेवस्य प्रोच्यमानञ्च यत्र च। यत्र कृष्णो दयापन्नः सन्धिमिच्छन्महामतिः। अवमानाच्च कर्णं नगरं नागसाह्वयम्। प्रत्याख्यानञ्च कृष्णस्य राज्ञा दुर्योधनेन वै। शमार्थं याचमानस्य पञ्चग्रामोदितम्। दम्भोद्भवस्य चाख्यानमत्रैव परिकीर्त्तितम्। वरान्वेषणमत्रैव मातलेश्च महात्मनः। महर्षेश्चापि चरितं कथितं गालवस्य वै। विदुलायाश्च पुत्रस्य प्रोक्षणात्मशासनम्। कर्णदुर्योधनादीनां दृष्टं विज्ञाय मन्त्रितम्। योगेश्वरत्वं कृष्णेन यत्र राज्ञां प्रदर्शितम्। रथमारोप्य कृष्णेन यत्र कर्णोऽनुमन्त्रितः। उपायपूर्वं शौटीर्य्यात् प्रत्याख्यातश्च तेन सः। आगम्य हास्तिनपुरादुपप्लव्यमरिन्दम!। पाण्डवानां यथादृत्तं सर्वमाख्यातवान् हरिः। ते तस्य वचनं श्रुत्वा मन्त्रयित्वा च यद्धितम्। सांग्रामिकं ततः सर्वं सज्जयध्वमुपारमपाः। ततो युद्धाय निर्यातो नराश्वरथदन्तिनः। नगराद्धास्तिनपुरादुपप्लव्यनिवेशनमेव च। यत्र राज्ञा दुर्योधनस्य प्रेषणं पाण्डवान् प्रति। यो भाविनि महायुद्धे दौत्येन कृतवान् प्रभुः। रथातिरथसंख्यानमम्बोपाख्यानमेव च। एतत्सर्वमुदुद्दिष्टं पञ्चमं पर्व भारते। उद्योगपर्व निर्दिष्टं सन्धिविग्रहसंश्रितम्। अध्यायानां शतं प्रोक्तं षड्गीतिर्महर्षिणा। श्लोकानां षट् सहस्राणि तावन्त्येव शतानि च। श्लोकाश्च नवतिः प्रोक्तास्तथैवाष्टौ महात्मना। व्यासेनोदारमतिना पर्वण्यस्मिन्नुपोदनाः! (५)। (उद्योगपर्व)

"अतःपरं विचित्रार्थं भीष्मपर्व प्रचक्षते। जम्बुखण्डविनिर्माणं यत्रोक्तं सञ्जयेन ह। यत्र यौधिष्ठिरं सैन्यं विषादमगमत् परम्। यत्र युद्धमभूद्घोरं दशाहानि सुदारुणम्। कथितं यत्र पार्थस्य वासुदेवो महामतिः। मोहनं नाशयामास ज्ञानमिर्मोक्षदर्शिभिः। समीक्ष्याधोक्षजः क्षिप्रं युधिष्ठिरचिकीर्षया। रथादाप्लुत्य वेगेन स्वयं कृष्ण उदारधीः। प्रतोदपाणिराधावद्भीष्मं हन्तुं व्यपेतभीः। वाक्यप्रतोदाभिहितो यत्र कृष्णेन पाण्डवः। गाण्डीवधन्वा समरे सर्वयत्नमथाग्रहीत्। शिखण्डिनं पुरस्कृत्य यत्र पार्थो महाधनुः। विनिघ्नन्निशितैर्बाणैरवाङ्मुखमपातयत्। शरतल्पगतश्चैव भीष्मो यत्र बभूव ह। षष्ठमेतत् समाख्यातं भारते पर्व विस्तृतम्। अध्यायानां शतं प्रोक्तं तथा सप्तदशापरे। पञ्च श्लोकसहस्राणि संख्यातानि शतानि च। श्लोकाश्च शतरश्मीतिरत्रिन् पर्वणि की-

र्त्तिताः। व्यासेन वेदविदुषा संख्याता भीष्मपर्वणि (६)। द्रोणपर्व ततश्चित्रं बहुदत्तान्तरुच्यते। सेनापत्येऽभिषिक्तोऽथ यत्राचार्यः प्रतापवान्। दुर्योधनस्य प्रीत्यर्थं प्रतिज्ञे महास्त्रवित्। अक्षयं धर्मराजस्य पाण्डुरश्वैश्च धीमतः। यत्र संयत्तवाः पार्श्वमपनिन्युरथालिरात्। भगदत्तो महाराजो यत्र यत्तमभो युधि। सुप्रतीकेन नागेन स हि शान्तः किरीटिना। यत्राभिमन्युं बहवो जघ्नुरेकं महारथाः। अयत्नवत्तया बालं शूरमप्राप्तयौवनम्। कृतेऽभिमन्यौ क्रुद्धेन यत्र पार्थेन संयुगे। अक्षौहिणीः सप्त हत्वा हतो राजा जयद्रथः। यत्र भीमो महाबाहुः सात्यकिश्च महारथः। अन्वेषणार्थं पार्थस्य युधिष्ठिरमुपाद्रवा। प्रविष्टो भारतीं सेनामप्रधृष्यां सुरैरपि। संयत्तकावशेषेण हतं निःशेषमाहवे। अलम्बुषः सुतायुश्च जलसन्धश्च वीर्यवान्। सोमदत्तिर्विराटश्च द्रुपदश्च महारथः। घटोत्कचाटवक्षान्ये निहता द्रोणपर्वणि। अश्वत्थामापि चाक्षैव द्रोणे युधि निपातिते। अस्त्रं प्रादुश्चकारोग्रं नारायणमनन्तजित्। आग्नेयं कीर्त्यते यत्र रुद्रमाहात्म्यसत्तमम्। व्यासस्य चाश्रमगमनं माहात्म्यं कृष्णपार्थयोः। सप्तमं भारते पर्व महदेतदुदाहृतम्। यत्र ते पृथिवीपालाः प्रायशो निधनं गताः। द्रोणपर्वणि ये शूरा निर्दिष्टाः पुरुषर्षभाः। अध्यायशतं प्रोक्तं तथाध्यायाश्च सप्ततिः। अष्टौ श्लोकसहस्राणि तथा नव शतानि च। श्लोका नव तथैवात्र संख्याताश्चत्वदर्शिना। पाराशर्येण मुनिना संचिन्त्य द्रोणपर्वणि (७)।

अतःपरं कर्णपर्व प्रोच्यते परमाद्भुतम्। सारथ्ये विनियोगश्च महाराजस्य धीमतः। आख्यातं यत्र पौराणं त्रिपुरस्य निपातनम्। प्रयाणे पद्मजात्तस्य संवादः कर्णशल्ययोः। हंसकाकीयमाख्यानं तत्रैवाशेषसंज्ञितम्। वधः पाञ्चालपुत्राणां तथा अश्वत्थाम्ना महात्मना। दण्डसेनस्य च ततो दण्डस्य च वधस्तथा। द्वैरथे यत्र कर्णेन धर्मराजो युधिष्ठिरः। संशयं गमितो युद्धे विषक्तां सर्वधन्विनाम्। अन्योन्यं प्रति च क्रोधो युधिष्ठिरकिरीटिनोः। यत्रैवानुनयः प्रोक्तो माधवेनार्जुनस्य हि। प्रतिज्ञापूर्वकश्चापि वधो दुःशासनस्य च। भित्त्वा हृदोदरं रक्तं पीतवान् यत्र संयुगे। द्वैरथे यत्र पार्थेन हतः कर्णो महारथः। अष्टमं पर्व निर्दिष्टमेतद्भारतचिन्तकैः। एकोनषष्टिरुद्दिष्टा अध्यायाः कर्णपर्वणि। चत्वार्येव सहस्राणि नव श्लोकशतानि च। चतुःषष्टिस्तथा श्लोकाः पर्वाध्यायक्रमात् प्रकीर्त्तिताः (८)। (शल्यपर्व) "अतःपरं विचित्रार्थं शल्यपर्व प्रकीर्त्तितम्। कृतप्रतीरे सैन्ये तु नेता सद्वेश्वरोऽभवत्। यत्र कौमारकाख्यानमभिषेचनकर्म च। उक्तानि रथयुद्धानि कीर्त्यन्ते यत्र भागशः। विनाशः कुरुसृञ्जयानां शल्यपर्वणि कीर्त्यते। शल्यस्य निधनत्वात् धर्मराजान्महात्मनः। शकुनेश्च वधोऽत्रैव सहदेवेन संयुगे। सैन्ये च कृतभूयिष्ठे किञ्चिच्छिष्टे सुयोधनः। हृदं प्रविश्य यत्रासौ संस्तभ्यापो व्यवस्थितः। प्रहृत्तिस्तत्र चाख्याता यत्र भीमस्य लुब्धकैः। क्षेपयुद्धैर्वंचोभिश्च धर्मराजस्य धीमतः। हृदात् समुत्थितो यत्र धार्त्तराष्ट्रोऽत्यमर्षणः। भीमेन गदया युद्धं यत्रासौ कृतवान् सह। समवाये च युद्धस्य रामस्यागमनं श्रुतम्। सरस्वत्याश्च तीर्थानां पुण्यता परिकीर्त्तिता। गदायुद्धस्य तुमुलमत्रैव परिकीर्त्तितम्। दुर्योधनस्य राज्ञोऽथ यत्र भीमेन संयुगे। ऊरू भग्नौ प्रसह्याजौ गदया भीमसेनया। नवमं पर्व निर्दिष्टमेतदद्भुतमन्यवत्। एकोनषष्टिरध्यायाः पर्वण्यत्र प्रकीर्त्तिताः। संख्याता बहुदत्तान्ताः श्लोकसंख्यां शृणुध्वम्। त्रीणि श्लोकसहस्राणि हे शते विंशतिस्तथा। मुनिना मतिमतानि कौरवाणां यशोघ्नता (९)। (सौप्तिकपर्व) "अतःपरं प्रवक्ष्यामि सौप्तिकं पर्व दारुणम्। भग्नोरुं यत्र राजानं दुर्योधनममर्षणम्। अपक्रान्तेषु पार्थेषु सर्वसैन्याय्यपूरुषाः। कृतवर्मा कृपो द्रौणिः सायाह्ने वृक्षमारोहितम्। समेत्य ददृशुर्भूमौ पतितं रथभूषणम्। प्रतिजज्ञे दृढक्रोधो द्रौणिर्वैरं महारथः। अहत्वा सर्वपाञ्चालान् सुप्तद्युम्नपुरोगमान्। पाण्डवांश्च महामात्रान् विमोक्ष्यामि दंशनम्। यत्रैवमुक्त्वा राजानमपक्रम्य त्रयो रथाः। क्षयाय्यमनवेक्षायामासेदुर्वृक्षमहनम्। न्यग्रोधस्यात्र महतो यत्राश्वास्तान्व्यवस्थिताः। ततः काकान् बहून् रात्रौ दृष्ट्वोलूकेन क्षिंक्षितान्। द्रौणिः क्रोधसमाविष्टः पितुर्वधमनुस्मरन्। पाञ्चालानां प्रसुप्तानां वधं प्रति मनोदधे। गत्वा च शिबिरद्वारि दुर्दर्शत्वात् राक्षसम्। घोररूपमपश्यत् स दिवमाहत्य तिष्ठितम्। तेन व्याघातमस्त्राणां क्रियमाणमवेक्ष्य च। द्रौणिर्यत्र विरूपाक्षं रुद्रमाराध्य सत्वरः। प्रसुप्तान्निशि विश्वस्तान् सुप्तद्युम्नपुरोगमान्। पाञ्चालान् सपरीवारान् द्रौपदेयांश्च सर्वशः। अतवर्मणा च संरक्षितः समेत्य च

निजघ्निरान्। यत्रासञ्छ्वेत हे पार्थाः पञ्च कृष्णवशानुगाः। सात्यकिश्च महेष्वासः शेषाश्च निधनं गताः। पाञ्चालानां प्रभद्राणां यत्र द्रौपदसुतादृते। धृष्टद्युम्नस्य सूतेन पाण्डवेषु निवेदितः। द्रौपदी पुत्रशोकार्ता पितृभ्रातृवधार्दिता। हतानामनसंख्या यत्र भर्त्रनुयाविभत्। द्रौपदीवचनाद्यत्र भीमो भीमपराक्रमः। प्रियं तस्याचिकीर्षन् वै सदामादाय वीर्यवान्। अन्वधावत् सुसंक्रुद्धो भारतद्रोणं गुरोः सुतम्। भीमसेनभयादश्वत्थामा दैवेनाभिप्रचोदितः। अपाण्डवायेति रुषा द्रौणिरस्त्रमवासृजत्। जैवमित्यब्रवीत् कृष्णः शमयंश्च तदाहवः। यत्रास्त्रमस्त्रेण च तच्छमयामास कालघुनः। द्रौणेश्च द्रोणवृत्तिं वोल्का पापात्मनस्तदा। द्रौणिर्हतायनादीनां शापाद्यान्योन्यकारिताः। मणिं तथा समादाय द्रौपदेयान्प्रहारवात्। पाञ्चालाः प्रदृश्य द्रौपद्यै जितकाशिनः। एतद्दशमं पर्व सौप्तिकं सत्यदाकृतम्। अष्टादशाक्षिसंख्याया पर्वण्युक्ता मनीषिना। श्लोकानां कथितान्यत्र शतान्यष्टौ प्रसंख्यया। श्लोकाश्च सप्ततिः प्रोक्ता मुनिना ब्रह्मवादिना। सौप्तिके श्लोकसम्बद्धे पर्वण्युक्तमतेजसा (१०)। (सौप्तिकपर्व)

"अत ऊर्ध्वमिदं प्राहुः स्त्रीपर्व करुणोदयम्। पुत्रशोकाभिसन्तप्तः प्रज्ञाचक्षुर्नराधिपः। कृष्णोपनीतां यत्नात्तामायसीं प्रतिमां दृढाम्। भीमसेनद्रौहबुद्धिर्दृष्टराष्ट्रो बभञ्ज च। तथा शोकाभितप्तस्य धृतराष्ट्रस्य धीमतः। संसारगहनं बुद्ध्वा क्षेत्रज्ञिर्मोक्षदर्शनैः। विदुरेण च यत्नात्स राज्ञश्चाश्वासनं कृतम्। धृतराष्ट्रस्य चात्मैव सौरवायोधनलक्षा। सान्तःपुरस्य गमनं शोकार्तस्य प्रकीर्तितम्। विलापो वीरपत्नीनां यत्नातिकरुणः कृतः। क्रोधावेशः प्रमोक्षश्च गान्धारीधृतराष्ट्रयोः। यत्र तानु क्षत्रियान् शूरान् संग्रामेष्वनिवर्तिनः। पुत्रान् भ्रातॄन् पितॄंश्चैव ददर्शनिहतान् रणे। पुत्रपौत्रवधार्तायास्तथात्मैव प्रकीर्तिता। गान्धार्याश्चापि कृष्णेन क्रोधोपशमनक्रिया। यत्र राजा महाप्राज्ञः सर्वधर्मभृतांवरः। राज्ञां तानि शरीराणि दाहयामास शास्त्रतः। लोकरूपेण चारब्धे राज्ञामौर्ध्वदेहिके। गूढोत्पन्नस्य चाख्यानं कर्णस्य पृथयात्मनः। श्रुतस्यैतदिह प्रोक्तं व्यासेन परमर्षिणा। एतदेकादशं पर्व लोकपर्वप्रकारकम्। प्रथीतं सज्जनमनोवैक्लव्यानुप्रवर्तकम्। सप्तविंशतिरध्यायाः पर्वण्यस्मिन् प्रकीर्तिताः। श्लोकसप्ततयो चापि पञ्चसप्ततिसंयुता। संख्यया भारताख्यानसङ्ख्यं व्यासेन धीमता (११) (स्त्रीपर्व)

"अतःपरं शान्तिपर्व द्वादशं वृद्धिवर्धनम्। यत्र निर्वेदमापन्नो धर्मराजो युधिष्ठिरः। घातयित्वा पितॄन् भ्रातॄन् पुत्रान् सम्बन्धिबान्धवान्। शान्तिपर्वणि धर्मश्च व्याख्याताः भारतर्षभाः। राजभिर्वेदितव्यास्ते सम्यग्ज्ञानबुभुत्सुभिः। आपद्धर्मश्च तत्रैव कालहेतुप्रदर्शिनः। यान् वृत्ता पुरुषः सम्यक् सर्वज्ञत्वमवाप्नुयात्। मोक्षधर्मश्च कथिता विचित्रा बहुविस्तराः। द्वादशं पर्व निर्दिष्टमेतत् प्राज्ञजनप्रियम्। अत्र पर्वणि विज्ञेयमध्यायानां शतत्रयम्। त्रिंशच्चैव तथाध्याया नव चैव तपोधनाः। चतुर्दशसहस्राणि तथा सप्त शतानि च। सप्त श्लोकास्तथैवात्र पञ्चविंशतिसंख्यया (१२)। (शान्तिपर्व)

"अत ऊर्ध्वं तु विज्ञेयमनुशासनसंज्ञितम्। यत्र प्रकृतिमापन्नः स्तुत्वा धर्मविनिश्चयम्। भीष्मात्कुरुवरोपुत्रात् कुरुराजो युधिष्ठिरः। व्यवहारोऽत्र कार्त्स्न्येन धर्मार्थैः प्रकीर्तितः। विविधानाच्च दानानां फलयोगाः प्रकीर्तिताः। तथा पात्रविशेषाच्च दानानाञ्च परो विधिः। आचारविधियोगश्च सत्यञ्च परा गतिः। माहात्म्यं गवाञ्चैव ब्राह्मणानां तथैव च। रहस्यञ्चैव धर्माणां देशकालोपसंहितम्। एतत् सर्वमुदारात्मन्नुक्तमस्मानुशासनम्। भीष्मस्यापि सभामध्ये कर्मणश्च परिकीर्तिता। एतच्चतोदशं पर्व धर्मनिश्चयकारकम्। अध्यायानां शतं तत्र षट्चत्वारिंशदेव तु। श्लोकानान्तु सङ्ख्याग्र प्रोक्ताश्चाष्टौ प्रसंख्यया (१३)। (अनुशासनपर्व)

"ततोऽश्वमेधिकं नाम पर्व प्रोक्तं चतुर्दशम्। तत्रोक्तं मरुत्तीयं यत्राख्यानमनुत्तमम्। सुवर्णरोमसम्भूतिर्जन्म चोक्तं परीक्षितः। दग्धस्याक्षाग्निना पूर्वं कृष्णात् संजीवनं पुनः। चर्यायां हयमुत्सृष्टं पाण्डवस्यानुगच्छतः। तत्र तत्र च युद्धानि राजपुत्रैरमर्षैः। चित्राङ्गदायाः पुत्रेण पुत्रिकायां धनञ्जयः। संग्रामे बभ्रुवाहेण संप्रयुक्ते बलिभृतः। अश्वमेधे महायज्ञे नकुलाख्यानमेव च। चतुर्गीता तथा प्रोक्ता सम्यगभगवता पुनः। कथितः शाश्वतो धर्मः कृष्णेनार्जुनसन्निधौ। तथा ब्राह्मणगीता च संवादो वृद्धशिष्ययोः। एतदश्वमेधिकं पर्व प्रोक्तमेतन्महाद्भुतम्। अध्यायानां शतञ्चैव त्रयोऽध्यायाश्च कीर्तिताः। त्रीणि श्लोकसहस्राणि तावन्त्येव शतानि च। विंशतिश्च तथा

श्लोकाः संख्याताग्रन्थदर्शिना" (१४ आश्रमेधिकपर्व)।

"ततस्त्वाश्रमवासाख्यं पर्व षष्ठदशं स्मृतम्। यत्र राज्यं समुत्सृज्य गान्धार्या सहितो नृपः। धृतराष्ट्राश्रमपदं विदुरश्च जगाम ह। यं दृष्ट्वा प्रथितं साध्वी पृथाप्यनुययौ तदा। पुत्रराज्यं परित्यज्य गुरुशुश्रूषणे रता। यत्र राजा सुतान् पुत्रान् पौत्रानन्यांश्च पार्थिवान्। श्लोकान्तरगतान् वीरान् ददर्श पुनरागतान्। ऋषेः प्रसादात् कृष्णस्य दृष्ट्वा सर्वमनुत्तमम्। त्यक्त्वा शोकं सदारश्च सिद्धिं परमिकां गतः। यत्र धर्मं समाश्रित्य विदुरः सुगतिं गतः। कृष्णस्य च महात्मनो विद्वान् मानुषयोगिनी। ददर्श नारदं यत्र धर्मराजो युधिष्ठिरः। नारदाच्चैव शुश्राव दृष्णीनां कदनं महत्। एतदाश्रमवासाख्यं पर्वोक्तं सुमहाद्भुतम्। द्विचत्वारिंशदध्यायाः पर्वैतदभिसंख्यया। सहस्रमेकं श्लोकानां पञ्च श्लोकशतानि च। ग्रन्थेन च तथा श्लोकाः संख्याताग्रन्थदर्शिना" (१५ आश्रमवासपर्व)

"अतःपरं निबोधेदं मौषलं पर्व दारुणम्। यत्र ते पुरुषव्याघ्रा यदुवृष्ण्यन्धकर्षभाः। ब्रह्मदण्डविनिर्दिष्टाः समीये लवणाम्भसः। आपाने प्रानकल्पिता दैवेनाभिप्रचोदिताः। एरकारूपिभिर्वज्रैर्निजघ्नुरितरेतरम्। यत्र सर्वक्षयं कृत्वा तावुभौ रामकेशवौ। मानुषं क्षणमत्यक्त्वा लोकं प्राप्तौ सनातनम्। यत्रार्जुनो द्वारवतीमेत्य दृष्णिविनाकृताम्। ददर्श विषादमगमत् परान्धात्तिं नरर्षभः। स संस्कृत्य नरश्रेष्ठं मातुलं गौरिमात्मनः। ददर्श यदुवीराणामाधाने वैशसं महत्। शरीरं वासुदेवस्य रामस्य च महात्मनः। संस्कारं लम्भयामास दृष्णीनाञ्च प्रधानतः। स दृष्ट्वानर्थसादाय द्वारवत्याश्चतो जनम्। ददर्शापदि कष्टायां गान्धार्याश्च पराभवम्। सर्वमार्तैव दिव्यानामस्त्राणामप्रसत्तताम्। नार्थं दृष्णिकलत्राणां प्रभावाचानिलत्वताम्। दृष्ट्वा निर्वेदमापन्नो व्यासवाक्यप्रचोदितः। धर्मराजं समासाद्य सस्मार सगरोदयम्। इत्येतन्मौषलं पर्व षोडशं परिकीर्तितम्। अध्यायाष्टौ समाख्याताः श्लोकानाञ्च शतत्रयम्। श्लोकानां विंशतिश्चैव संख्याताग्रन्थदर्शिना" (१६ मौषलपर्व)।

"महाप्रस्थानिकं तस्मादूर्ध्वं सप्तदशं स्मृतम्। यत्र राज्यं परित्यज्य पाण्डवाः पुरुषर्षभाः। द्रौपद्या सहिता देव्या महाप्रस्थानमास्थिताः। यत्र तेऽग्निं ददृशिरे लोहितं प्राच्य सागरम्। यत्राग्निना चोदितश्च पार्थस्तत्रै महाप्रस्थाने। ददौ सव्यसाचिने गाण्डीवं धनुरुत्तमम्। यत्र भ्रातॄन् निपतितान्द्रौपदीञ्च युधिष्ठिरः। दृष्ट्वा त्यक्त्वा जगामैव सर्वानवशोचन्। एतत् सप्तदशं पर्व महाप्रस्थानिकं स्मृतम्। तत्राध्यायास्त्रयः प्रोक्ताः श्लोकानाञ्च शतत्रयम्। विंशतिश्च तथा श्लोकाः संख्याताग्रन्थदर्शिना"। (१७ महाप्रस्थानिकपर्व)।

"स्वर्गपर्व ततो ज्ञेयं दिव्यं यत्तदमानुषम्। प्राप्य देवरथं स्वर्गमेतवान् यत्र धर्मराट्। आरोढुं सुमहाप्राज्ञ आनृशंस्याच्च्युता विभा। ज्ञानसाक्षित्वमात्मा स्थितिं धर्मे महात्मनः। सुरूपं यत्र तत्त्यक्त्वा धर्मैश्वर्यो समन्वितः। स्वर्गं प्राप्तः स च तत्रा यातनां विपुलां भृशम्। देवदूतेन नरको यत्र व्याजेन दर्शितः। शुश्राव यत्र धर्मात्मा भ्रातॄणां करुणागिरः। निदेशे वर्त्तमानानां देवे तत्रैव वर्त्मनाम्। यत्तदर्शितञ्च धर्मेण देवराज्ञा च प्राक्तनः। आप्लुत्याकाशगङ्गायां देहं त्यक्त्वा स मानुषम्। स्वः धर्मनिर्जितं स्थानं स्वर्गे प्राप्य तु धर्मराट्। सहदैः पूजितः सर्वैः सेन्द्रैः सुरगणैः सह। कर्षञ्च नरकप्राप्तिः प्रभोश्चात्र कीर्त्यते। समागमश्च वीराणां स्वर्गलोके महात्मना। कीर्त्यते यत्र विधिवत् स्वर्गसंवाद एव च। स्थानि स्थानानि च प्राप्ता यत्र ते पुरुषर्षभाः। एतदष्टादशं पर्व श्लोकैर्व्यासेन धीमता। अध्यायाः पञ्च संख्याताः पर्वण्यस्मिन्महात्मना। श्लोकानां द्वे शते चैव समाख्याते तपोधनाः। नव श्लोकास्तथैवान्ये संख्याताः परमर्षिणा। (१८ स्वर्गारोहणिकपर्व)।

अष्टादशैवमेतानि पर्वाण्युक्तान्यशेषतः। खिलेषु हरिवंशश्च भविष्यच्च प्रकीर्त्तितम्। विष्णुपर्व तृतीयस्यां विष्णोः कंसवधस्तथा। भविष्यत् पर्व चाप्युक्तं खिलेष्वेवाद्भुतं महत्। दश श्लोकसहस्राणि विंशत् श्लोकशतानि च खिलेषु हरिवंशे च संख्यातानि महर्षिणा"। "भारतं श्रद्दधानस्य भारतं परिकीर्त्तयेत्। भारतं भवने यस्य तस्य दुःखगतो जयः" भा॰ आ॰ १अ॰। भरतस्यापत्यादि शुभाण्ढक् भारतेय तदपत्यादौ पुंस्त्री॰।

भारतवर्ष पुंन॰ जम्बुद्वीपान्तर्गते वर्षभेदे जम्बुद्वीपशब्दे २०४६ पृ॰ दृश्यम्।

भारती स्त्री भृ-अतच्। स्वार्थे प्रज्ञाद्यण्। १वाक्ये तदधिदेवतायां २सरस्वत्यां ३पक्षिभेदे "भारती संस्कृतप्रायो वाग्व्यापारो नराश्रय" इति वा॰ ६प॰ अलङ्कारोक्ते

४वृत्तिभेदे च ५सङ्ख्याविनासहेतावधिभेदे च स्त्री ।

भारद्वाज पु० भरद्वाजस्य गोत्रापत्यम् अण् । गोत्रप्रवर्त्तके १मुनिभेदे २द्रोणाचार्य्ये मेदि० ३खगस्थसुनौ शब्दर० ४व्याघ्राटविहङ्गे ५बृहस्पतिपुत्रे च हेमच० ६वनकार्पास्यां स्त्री ङीप् । पृषो० । भारद्वाजीत्यपि । विद्या० अञ् ततः अत्रा० फक् । भारद्वायन तद्गोत्रापत्ये पुंस्त्री० । स्त्रियां ङीप् । भारद्वाजी हृत० । भारद्वाजीपुत्र तत्पुत्रे च च यजुर्वेदस्य वंशस्थः ऋषिभेदः शत०ब्रा०१४।९।४।२।

भारभृत् त्रि० भारं बिभर्त्ति भृ-क्विप् । १भारधारके । २विष्णौ पु० "भारभृत् कथितो योगी" विष्णुस० ।

भारमेय त्रि० भारमर्हति भृ० अत्रा० ढक् । भरसहत्वन्विनि स्त्रियां ङीप् ।

भारय पु०भासा रयो वेगो यस्य ।(भारद्व) खगभेदे शब्दच० ।

भारयष्टि स्त्री भारस्य वहनार्थं यष्टिः शाक०त० । भारवहनदण्डे (बाँक) अमरः ।

भारव न० भारं वाति वा-क । धनुर्वृक्षे त्रिका० ।

भारवाह(क) त्रि० भारं वहति अण् ण्वुल् वा । भारवाहिनि खुञ् । भारवाहकोऽप्यत्र । अमरः स्त्रियां ङीष् स्वियत्ययानस्य शब्दादावलादौ ङीषि च ऊठ् । भारौहः भारौही ।

भारवि पु० किरातार्जुनीयकाव्यकारके १कविभेदे । "तावद्भा भारवेर्भाति यावन्नाघस्य नोदयः । उदिते च पुनर्भाते भारवेर्भा रवेरिव" उद्भटः । तत्कृते २काव्ये च "उपमा कालिदासस्य भारवेरर्थगौरवम्" उद्भटः ।

भारवृद्ध पु० भारीभूतो वृद्धः । ज्ञातीनामगण्यवृद्धे शब्दच० ।

भार(ह)हार त्रि० भारं हरति हृ-अच् अण् वा । भारवाहके तत्वाहृत्यमने अच् । उद्यमने तु अण् वृत्तिभेदः ।

भाराक्रान्त त्रि० ३त० । १भारेणाक्रान्ते "भाराक्रान्ता मनसरसना सूरः सुतिरसहवैः" छन्दोम०उक्ते २सप्तदशाक्षरपादके वर्णवृत्तभेदे स्त्री ।

भारि पु० इभस्यारिः पृषो० । सिंहे हेमच० ।

भारिक त्रि० भारं वहति भार+ठक् । भारवाहके अमरः

भारिट पु० भासा रेटति रिट-क । ग्रामघटके खगभेदे राजनि० ।

भारिन् त्रि० भारोऽस्यास्ति वाह्यत्वेन इनि । भारवाहके एतत्पर्य्यायस्य भाराशब्दस्य स्त्रियां ङीष् । भारभारी । "मल्लिकाभारभारिण्यः" काव्यादर्श ।

भारुण्ड पु० उत्तरकुरुवर्षस्थे १खगभेदे तदुपक्रमे "भारुण्डा नाम शकुनास्तीक्ष्णतुण्डा भयानकाः । तान्हिरण्मीद्वृतान् दरीषु प्रक्षिपन्ति च" भा०भी० ७अ० । २सामभेदे तत्र भरुण्डेति पाठभेदः । तत्सामदृष्टरि ऋषिभेदे "भारुण्डसामगीताभिरर्थवद्भिरसोद्गतैः" भा०आ०६७ अ० । तत्र सामार्षित्वे १।२।२ "इमं स्तोममर्हते" इत्यादिमन्त्रे नेयं संज्ञा, मतुप्रत्ययं तुल्यादानादिपठनात् १०२ पृ०दृश्यम् । "काश्यदोहानि सामानि शान्तिकं भारुण्डानि च । पश्चिमे हारपाली तु पठेतां सामगौ तथा" विधानपा० ।

भारूप न० भारूपमस्य । चित्रादौ १ब्रह्मणि २व्यात्मनि पु० ।

भार्ग पु० भृगोरयं देशभेदस्य राजा अण् । १भृगुदेशभवे तस्य तद्राजस्य भार्गा० स्त्रियां न लुक् । भार्गी । २प्रतर्दनस्य पुत्रभेदे पु० हरिवं० २९ अ० ।

भार्गभूमि पु० व्याङ्गिरसे भार्गवपुत्रभेदे हरिवं० २अ० ।

भार्गव पुंस्त्री० भृगोरपत्यम् तद्गोत्रापत्यं वा अण् ।।भृगुवंशप्रवरे बहुत्वे तु अत्रिभृग्वित्यादिना अणो लुक् । भृगवः तद्गोत्रापत्येषु । २शुक्राचार्य्ये ३धन्विनि ४मुनौ च पु० मेदि० । तेन प्रोक्ता तेनाधीता ज्ञाता वा अण् । ५वेदपाठिके विद्याभेदे हृषीकेशां ७चक्षुषां ८दृष्टीनां च स्त्री मेदि० ङीष् । प्राच्ये देशभेदे पु० । "ब्रह्मात्तरा प्रविजया भार्गवाच्चैवमङ्गजाः" मार्कण्डे० । १द्रुपदनगरस्थे कुम्भकारभेदे पु० भा०आ०१८०अ० । २महादेवे पु० भा० द्रो० २०३अ० ।

भार्गवन न० द्वारकास्थे वनभेदे हरिवं० ११७ अ० ।

भार्गवप्रिय पु० ६त० । हीरके तस्य शुक्रपक्षप्रियत्वात् तथात्वम् । [भार्गगोत्रापत्ये ।

भार्गायण पुंस्त्री०भृगोरयं गोत्रापत्यं तैकर्त्तृ० फञ् । तैकर्त्तृ०

भार्गी स्त्री भार्गस्येदमण् । (वाम्नहाटि)द्रुमभेदे राजनि० ।

भार्य्य पु० भृगोरयं गर्गा०यञ् । युद्धजगोत्रे ऋषभेदे भाग० ८।२१।२४।

भार्य्या स्त्री भृ-ण्यत् । १विधिपोढायां स्त्रियाम् २स्त्रीमात्रे ३भरणीयमात्रे त्रि० । भार्य्याशब्दस्य यूपाङ्गवनीवादिवत् अलौकिकसंस्कारसहितस्त्रीबोधकः । तस्याः गुणदोषा यथा "सा भार्य्या या गृहे दक्षा सा भार्य्या या प्रियंवदा । सा भार्य्या या प्रतिप्राणा सा भार्य्या या पतिव्रता । नित्यस्नाता शुचिर्दक्षा च नित्यं प्रियवादिनी । अल्पभुक् स्वल्पभाषी च सततं सङ्कुचैर्युता । सततं धर्मशीलाढ्या सततञ्च पतिप्रिया । सततं प्रियवक्त्री च सतं भर्त्तृज्ञानिनी । पितृदेवक्रियायुक्ता सर्वसौभाग्यवर्द्धिनी ।

यस्येदृशी भगेनाप्यां देवेन्द्रो न च मानुषः" ।
"यस्य भार्य्या विरूपाक्षी कन्यका कलहप्रिया ।
उत्तरोत्तरवादा स्यात् स जरा न जरा जरा । यस्य भार्य्या चितान्यस्य परवेश्माभिकाङ्क्षिणी । कुक्षिया लक्षलक्षा च सा जरा न जरा जरा । यस्य भार्य्या गुणज्ञा च भर्तारमनुगामिनी । लक्षाल्लेन तु सन्तुष्टा सा प्रिया न प्रिया प्रिया । दुष्टा भार्य्या शठो मित्रं भृत्याश्चोत्तरदायकाः । सर्पे च भट्टे वासो मृत्युरेव न संशयः । आपत्सु मित्रं जानीयात् युद्धे शूरं धने शुचिम् । भार्य्यां च विभवे क्षीणे दुर्भिक्षे च प्रियातिथिम्" । गारुडे १०८।१०२ अ० । "ब्रह्मसंहितायाच "यस्य नास्ति सती भार्य्या भट्टेषु प्रियवादिनी । अरण्यं तेन गन्तव्यं यथारण्यं तथा भट्टम् । सुशीला सुन्दरी भार्य्या पतिव्रता यस्य भट्टोदरात् । अरण्यं तेन गन्तव्यं यथारण्यं तथा भट्टम् । भावानुरक्ता वनिता भृता यस्य च भर्त्तृणा । अरण्यं तेन गन्तव्यं यथारण्यं तथा भट्टम् । दैवेनापहृता यस्य पतिसाध्वी पतिव्रता । अरण्यं तेन गन्तव्यं यथारण्यं तथा भट्टम् । यस्य माता भट्टे नास्ति भार्य्या चाप्रियवादिनी । अरण्यं तेन गन्तव्यं यथारण्यं तथा भट्टम् । प्रियाभूल्यं भट्टं यस्य पूर्णं श्रीधन बन्धुभिः । अरण्यं तेन गन्तव्यं यथारण्यं तथा भट्टम् । भार्य्याभून्या वनसमाः सभार्य्याश्च भट्टा भट्टाः । भट्टिणी च भट्टं प्रोक्तं न भट्टं भट्टबन्धते । अशुचिः क्रोधिहीनश्च दैवे पैत्रे च कर्मणि । यदन्नं कुरुते कर्म न तस्य फलभाग्भवेत् । दाहकर्मक्रियाहीनश्च यथा वन्हौ हुताशनः । प्रभाहीनो यथा सूर्य्यः शोभाहीनो यथा शशी । शक्तिहीनो यथा जीवो यथात्मा च तनुं विना । विनाधारं यथाधेयो यत्नेनः प्रकृतिं विना । न च शक्तो यथा यज्ञः फलदां दक्षिणां विना । कर्म्मिणे च फलं दातुं सामग्रीभूतमेव च । विना सूत्रं सूत्रकारो यथाऽशक्तः स्वकर्मणि । यथाऽशक्तः कुलालश्च मृत्तिकाश्च विना द्विजाः ! । तथा गृही न शक्तश्च वक्तुं सर्वकर्मणि ! भार्य्याभूलाश्च पुत्राश्च भार्य्याभूला गृहास्तथा । भार्य्याभूतं सुखं प्रोक्तं गृहस्थानां गृहे सदा । भार्य्याभूतो सदा स्वर्गः भार्य्याभूतश्च मङ्गलम् । भार्य्याभूतश्च संसारो भार्य्याभूतश्च सौरतम् । यथा रत्नश्च रत्नानां मृत्तिकानां तथा मृत्तम् । सारवस्तु यथा तेषां मृत्तिकानां तथा प्रिया । सर्वरत्नप्रधाना च क्षीरक्षे दुग्धवादपि । सा गृहीता गृहस्थेनैवेत्याह कमलोद्भवः । यथा जलं विना पद्मं पद्मं शोभां विना यथा । तथैव च गृहं भद्रे गृहिणीं गृहिणीं विना" । ब्रह्मवै० पु० प्र० अ० ५६ अ० । "लोभयेत् सततं भार्य्यां विधिवत् याचितैरिष्टैः । तासां तुष्ट्या तु कल्याणमकल्याणमतोऽन्यथा । सन्तुष्टो भार्य्यया भर्त्ता भर्त्रा भार्य्या तथैव च । यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम् । यदा विरुद्धयते स्वामी सौभाग्यमदमयया । असतीमङ्गलं कर्त्तुं सा शक्ता देवा अपानरे । दुष्टापि लोकेऽवाच्यत्वमधर्मेणापि विन्दति । न च पितृकुलं स्वामिकुलं तस्याः प्रमोदते । विरुध्यमाने पत्यौ यत् यत्पत्न्या वा प्रवर्त्तते । अतीव दुःखं भवति तदकल्याय कर्त्तव्यः" कालिकापु० २० अ० ।

भार्य्याट पु० भार्य्यां तद्दानमटति अट् अण् उप० स० । अन्यस्मै स्वभार्य्यादानार्थं मन्त्रिरि शिक्षा० ।

भार्य्याटिक पु० भार्य्यया क्रीतो मतिः प्रयोजनमस्य ठक् । १स्त्रीजिते २हरिद्रभेदे च मेदि० ।

भार्य्यारु पु० भार्य्यां हार्य्यं स्यति क्त उक् । १वैद्यभेदे २हरिद्रभेदे । भार्य्यां परभार्य्यांस्यति क्त-उक् । ३अनियोगेन परभार्य्यागामिनि च मेदि० ।

भार्य्यावत्त पु० भार्य्येव प्रियत्वात् दत्तो यस्य । यतङ्के राजनि० । [जड़भार्य्य के

भार्य्यीढ पु० जडा भार्य्यां वेत्ति आदिशति वा ढरनिञतः ।

भाल न० भा-कर्त्तरि घञ् । १ललाटे भ्रुवोरूर्द्धभागे २तन्मात्रे मेदि० ।

भालकृत् पु० गोत्रप्रवर्त्तकभेदे प्रवराध्यायः ।

भालचन्द्र पु० भाले चन्द्रोऽस्य । १शिवे २तन्नेत्रे ३दुर्गायां स्त्री

भालदर्शन न० भाले दृश्यते कर्मणि ल्युट् । १सिन्दूरे शब्दच० भाले दर्शनं नेत्रमस्य । २कपालनेत्रने भट्टारदेवे ।

भालदृश् पु० भाले दृगस्य । त्रिनयने भट्टारदेवे हेमच० ।

भालनेत्र पु० भाले नेत्रमस्य । १शिवे । भालनेत्रादयोऽस्यत्व । २त्रिनयनायां दुर्गायां स्त्री ।

भालाक्ष पु० भालेऽक्षीवाक्षो यस्य भाले अक्षो यस्य वा । १शाकभेदे २करपत्रे ३क्षे (करात) ४रोहितमत्स्ये भट्टारकस्य विशेषलक्षाटविकयुक्ते ५पुरुषभेदे ६शिवे ७कज्जले च मेदि० । [उलूक० ।

भालु पु० भृणाति रोगान् भृ उदन्ते अण् रस्य लः । आदित्ये

भालु(लू)क पुंस्त्री० भल-अवरोधे उक अलू वा । जन्तु-

मख्याते पशुभेदे अमरः पाठान्तरम्। स्त्रियां जातित्वात् ङीष्।

भाल्लवि पु० १सामशाखाभेदे २तदध्येतरि च। "तामेतां भाल्लव्य उपासते" तारुष्य ब्रा० २।२।४ "तामेतां परिवर्त्तिनीं विद्युतिम् भाल्लविशाखाध्यायिन उपासते" भा०।

भाल्लू(ल्लु)क पुंस्त्री० भल्ल+स्वार्थे कन् वा पृषो० ह्रस्वः। जन्तुभेदे भल्ले स्त्रियां ङीष्।

भाव पु० भावयति चिन्तयति पदार्थान् चु०भू-घञ्। नाम्नोक्तौ नानापदार्थचिन्तके १पण्डिते। भावयति ज्ञापयति हृदयगतम् भू-णिच्-घञ्। २हृदुगतावस्थाभेदके मानसविकारे स्त्रेदकम्पादौ व्यभिचारिभावे। ३सत्तादिभावे मेदि० भू-भावे घञ्। साध्यरूपे विद्यरूपे वा ४क्रियारूपे धातोरर्थे। ४रागे ६ज्ञानवत्वे च ६सत्तायां ७चेष्टायाम् ८जन्मनि च अमरः ९विभूतौ। कर्त्तरि च। १०ब्राह्मणि ११बुधे १२जन्तौ करणे घञ्। १३गौरवितरे १४अभिनयभेदे त्रिका०। १५योनौ १७उपदेशे धरणिः। संसारे भवशब्दार्थे च। ज्यो० उक्ते १८जन्मादितः तन्वादि द्वादशभावे तच्छब्दे १८०२ पृ० तदानयनञ्च द्रष्टव्यम्। २०स्त्रीणां यौवनकाले सत्त्वभवाद्यविंशतिलक्षणालङ्कारान्तर्गतेऽङ्गजे प्रथमालङ्कारे। यथा "यौवने सत्त्वजास्तासामष्टाविंशतिसंख्यकाः। अलङ्काराश्च भावहावहेलास्तयोऽङ्गजाः। तत्र भावः "निर्विकारात्मके चित्ते भावः प्रथमविक्रिया"। जन्मतः प्रभृतिनिर्विकारे मनसि उद्बुद्धमात्रो विकारो भावः। यथा "स एव सुरभिः कालः स एव मलयानिलः! सैवेयमवस्था किन्तु मनोऽन्यदिव दृश्यते" सा० द०। भावश्च लक्षणान्तरं यथा "शरीरेन्द्रियवर्गस्य विकाराणां विभावकाः। भावा विभावजनिताश्चित्तवृत्तेश्च हेतवः पुराणे नाट्यशास्त्रे च द्वयोस्तु रतिभावयोः। समानार्थतया चात्र द्वयमेकत्र लक्ष्यते"। २१षड्वर्गाणां द्वादशविधचेष्टाभेदे तदानयनं फलं च ज्यो० त० उक्तं यथा

"शयनोपवेशने नेत्रपाणिः प्रकाशनम्। गमनं गमनेच्छा च सभायां वसतिस्तथा। आगमनं भोजनञ्च स्वचेष्टाश्च कौतुकम्। निद्रा षड्वर्गाणां भावाश्च द्वादशेते प्रकीर्त्तिताः"। भावानयनक्रमो यथा "षड्वर्गो विद्यते खेटस्तेन तं परिपूरयेत्। पुनरंशेन संपूर्णं कर्त्तव्यं तत्र नियोजयेत्। ज्ञातव्यं तथा लग्नमेकीकृत्य यदा बुधैः। रविणा भागहारेण शेषं कार्य्यं नियोजयेत्। कांशेन हतसंख्यया। लब्धं षड्वर्गाणां जन्मनक्षत्रम्। तद्यथा। "विशाखानक्षत्रोदयानि वैष्णवं भगदैवतं पुष्या पौष्णोयमं सर्पौ जन्मभान्यर्कतः क्रमात्। अजोरात्रिः। यदा मेषे षड्वर्गदा १एकपूरितषड्वर्गसंख्याद्युः। यदा वृषे षड्वर्गदा २द्विपूरितो षड्वर्गसंख्याद्युः कार्य्यः। जायाश्रुतस्थतुङ्गस्वदृक्काणस्थितषष्ठषड्वर्गाणां निद्राशयनभावयोः फलम् "निद्रायान्तु यदा पापो जायास्थाने शुभं वदेत्। यदि पापः शुभैर्दृष्टो नाशुभेन कदाचन। यदि वा शत्रुगेहो स्याच्छयने यदि वेक्षितः। तदा नारीसमं तस्य नाशो भवति निश्चितम्। शुभाशुभैर्यदा दृष्टः शुभषड्वर्गसंयुतः। नारी च म्रियते तस्य प्रथमा च विशेषतः। श्रुतस्थाने स्थितः पापो निद्रायां शयनेऽपि वा। तदा शुभं भवेत्तस्य नात्र कार्य्या विचारणा। तुङ्गस्थाने स्वदृक्के वा त्रिकोणे वा यदा भवेत्। षष्ठस्थश्च तदा नाशो जायते नात्र संशयः। शुभषड्वो यदा तत्र क्रूरो वा यदि वेक्षितः। तदा प्रथमापत्यस्य नाशो भवति निश्चितम्। शत्रुस्थाने स्थितः पापो निद्रायां शयनेऽपि वा। तदात्मनोऽपत्यतः स्वाद्वाजतोऽपरतोऽपि वा। शुभषड्वो यदा तत्र शत्रुस्थानेऽपि संस्थितः। तदा च मरणं तस्य शत्रुस्थाने विशेषतः। पापषड्वैर्यदा दृष्टः शुभो वा शत्रुवीक्षितः। तदा तस्य शिरश्छेदो सुनिना परिकीर्त्तितः। एवं क्रमेण बोद्धव्यं षड्भावे सुबुद्धिना। बलावलविचारेण जायते च शुभाशुभम्। ज्योतिर्वित्तत्व च सर्वेषु परिष्कारः कृतो मया। शयनादिकभावेषु ज्ञातव्योपदेशतः। एकादशे वा दशमाश्रये वा धनाश्रये वा यदि वा विलग्ने। पापेन युक्तो न शुभषड्वेनापि सिद्धिं भजतीं वदन्ति"। षड्भेदेन दशाभेदे फलं यथा

"मन्दाग्निः पित्तगुल्मी च जायते शयने नरः१। उपवेशे भवेच्छ्यामवर्णस्तथा नरः२। नेत्ररोगी भवेत् क्रूरो जलदोषो भवेन्नरः३। पुष्टवान् धार्मिकश्चैव धनवांश्च प्रकाशने४। गमने च रवेर्जातः क्षयो धनसंयुतः। दुष्टभार्यो सभी क्रोधी क्षुब्धचित्तः सदा भवेत् ५। अल्पभोक्ता शीघ्रगामी दीर्घायुर्दर्पवल्लभः। शूरः श्रीमान् सुशीलश्च गमनेच्छाभवो नरः६। सभायाञ्च रवेर्जातः खलो दाता सभी भवेत्। दयालुः पण्डितो धीमान् गुणवान् पण्डितप्रियः७। आगमने भवेन्मूर्खः कुरूपो धनवान् भ-

वेद८। भोजने भक्षको मांसलुब्धो महाबलपुर्वकोऽ। ऋत्वभिप्सौ सुन्दरो वाग्मी पण्डितस्तत्परायणः१०। सत्यवादी च महाभोगी कौतुके च दिवाकरे११। दाता भोक्ता प्रियः पुत्रकलत्राणां न संशयः। विकृते देहे करे चैव गुदे रोगी तथैव च। निद्रायाञ्च भवेद्भानोः क्रोधनो रक्तनेत्रकः१२। इति रवेः।

"शयने च विधौ क्रोधी दरिद्रो बहुलस्मटः१। उपवेशे महारोगी धनवांश्च भवेन्नरः२। नेत्रपार्श्वे नेत्ररोगी शुक्रपदो बहुभाषकः। क्रूरः खलोऽतिशूरश्च जायते च विधौ तदा३। प्रकाशने निधानाढ्ये धनवांश्च भवेन्नरः। दक्षो बुद्धिमान् दाता च परदारेषु लम्पटः ४। खरोगी वित्तहा चैव क्रूरकर्मा धनान्वितः। शिरोरोगी दन्तशूली जायते गमने विधौ५। नानाधर्मैर्महाक्रोधी सम्पदुक्तो भवेन्नरः। गमनेच्छुविधौ जातो धनहीनो भवेत् तदा६। दाता च धार्मिकश्चैव राजपात्रो भवेत् सदा। सभायाञ्च विधौ नित्यं जायते दुःखोत्तमः७। नित्यक्रोधी महादुःखी सवेदागमने विधौ८। भोजने च भवेद्दुःखी भक्षणे महाक्षुरः९। यो जातो ऋत्वभिप्सायां सुखवान् धार्मिको भवेत्। बहुपुत्रो धनी दाता जायते नात्र संशयः१०। कौतुके च भवेद्रोगी नानाविद्यासु तत्परः। सत्यवादी च महाक्रोधी जायते च सुनिश्चितम्११। निद्रायां दन्तरोगी स्यात् क्लेशपापसमन्वितः। पुत्रशोकमहादुःखी नित्यं भ्रमति मेदिनीम्१२। इति चन्द्रस्य।

"शयने च कुजे जातो रक्तश्मश्रुवच्छिरङ्कजः। अपक्रोधी महादक्षः कपटो जायते नरः१। उपवेशे यदा भौमे जायते च नराधमः। धनवान् क्रूरकर्मा च निष्ठुरो जातिवर्जितः२। नेत्रपार्श्वे च यो जातोऽक्षिरोगी भवेन्नरः। पुत्रदारधनैर्युक्तो दारिद्र्येणैव दह्यते३। प्रकाशने कुजे जातो धनवान् पण्डितः सुधीः। नारी च म्रियते तस्य प्रथमा च विशेषतः४। गमने च यदा जातः प्रवासी नित्यदुःखितः। शरीरे च भवेद्रोगी कण्ठादिकुष्ठदद्रुकः५। प्रवासी गमनेच्छायां सुदरोगी भवेन्नरः। धनहीनः कुकर्मा च जायते क्षितिलक्षणे६। सभायाञ्च यदा जातो धार्मिको बहुसम्पदा। सुखवांश्च महादाता शिरोरोगी भवेद् ध्रुवम्"७। कुजस्यागमने नित्यं दक्षो भवति मान्यधा। कर्णरोगी पित्तशूली जायते च नराधमः८। भोजने भूमिजस्यापि यो जातो मांसलुब्धकः। दुष्टस्वभावो महाक्रोधी मिथ्योत्साही धनान्वितः९। कुजस्य ऋत्वभिप्सायां यो जातो धनवान् भवेत्। दाता भोक्ता सदा मानी राजपात्रो भवेन्नरः१०। कौतुके क्षितिजस्यापि जातो भवति पण्डितः। नानाधर्मेण संयुक्तो बहुपुत्रो द्विभार्यकः११। निद्रायां भूमिपुत्रस्य यो जातो मूर्ख एवसः। कलहो बान्धवैः सार्द्धं शोकक्लेशसमन्वितः१२" इति मङ्गलस्य।

"बुधस्य शयने जातो धनवान् क्षुधितः सदा। अल्पच्छेदा भवेद्वापि खड्गो भवति मान्यधा१। उपवेशे च यो जातः प्रवासी जायते ध्रुवम्। कवितागुणधीयुक्तो गौरवर्णो महायशः२। नेत्रपार्श्वे च यो जातः शुक्रपादादिकान्वितः। चक्षुरोगी विशेषः स्यात् पुत्रनाशी भवेद्ध्रुवम्३। प्रकाशने भवेज्जातो राजपात्रो धनान्वितः। नानाधर्मेण संयुक्तो जायते वेदपारगः४। गमने यो नरो जातः प्रवासी नित्यदुःखितः। शरीरे क्षतमाप्नोति नित्यमूर्खो भवेन्नरः५। यो जातो गमनेच्छायां सम्पटो दुष्टचित्तकः। स्त्रीवश्यो दुष्टभार्य्यश्च स नरो बहुभाषकः६। सभायाञ्च बुधे जातो मूर्खो भवति पण्डितः। धनवान् धार्मिकश्चैव चिररोगी भवेत्तु सः७। क्रूरः खलो हतो मूर्खः पापशीलो भवेन्नरः। बुधस्यागमने नित्यं जायते च नराधमः८। भोजने च भवेत् सौख्यं धनहीनो भवेन्नरः। परद्वेषी प्रवासी च शोभमानसमन्वितः९। यो जातो ऋत्वभिप्सायां धनवान् पण्डितः कविः। सत्यवादी च महाकुशो मुनिश्च सुखमश्नुतम्१०। कौतुके च यदा जातो भवेत् सर्वजनप्रियः। अर्शोरोगी दृढयुक्तो धनवानल्पसङ्गकः११। निद्रायाञ्च यदा जातः सर्वदाखैकपात्रताम्। नानाक्लेशमवाप्नोति रोगशोकसमन्वयम्१२। इति बुधस्य।

"धनवान् सम्पटः श्यामः स्थूलनखसमन्वितः। जीवस्य शयने जातो मानवो नात्र संशयः१। उपवेशे गुरोर्जातो बहुभाषी च रोगवान्। पशुघाती महाशिल्पी शुक्रपीडारोगसंयुतः२। नेत्रपार्श्वे गुरोर्जातः कासरोगी धनी भवेत्। क्षतादिशरीरे नित्यं जायते नात्र संशयः३। गुरोः प्रकाशे धनवान् सिद्धपुरुषः कलान्वितः। दक्षो सम्पटः पापी च श्यामवर्णो कलान्वितः४। सर्पभीतो गूढकर्मा खाद्यी गमनोन्मुखे। परचित्तेन धनवान् पुमान् भवति

वाक्पतौ५ । गुरोश्च गमनेच्छायां जातो भवति मानवः । मूखी धनी प्रवासी च सेवाकर्मणि तत्परः६ । वक्ता दाता च धनवान् राजसेवान्वितो नरः । मूखरोगी भवेच्चित्रं सभायां वाक्पतौ स्थिते७ । धार्मिकस्तीर्थज्ञानी धनी चागमने गुरोः । परदारेषु संलुब्धो जायते नात्र संशयः । भोजने बहुसौख्याढ्यो मांसलुब्धो महाऽसुरः । कासकः प्रियवाक्यश्च जायते नात्र संशयः८ । स्वल्पक्षिप्तेः शठो वाग्मी धनवान् सात्त्विकस्तथा । महदैश्वर्यसंयुक्तो जीवस्थ च भवेत्सरः।९। कौतुके च गुरोर्जातो धनवान् धार्मिकः सदा । स्वल्पोत्साही महत्सङ्गी भुनक्ति सुखमद्भुतम्।१ निद्रायाञ्चैव यो जातश्चक्षुरोगी भवेच्च सः । कृपणो बहुभाषी च दुःखितो भ्रमते महीम्।१२ । इति गुरोः ।

"शुक्रस्य शयने जातो लम्पटो बहुभाषकः । दन्तरोगी महाक्रोधी नीचो भवति निश्चयः१ । उपवेशे तथा जातो बलवान् दाम्भिकः सदा । नित्यप्रवासी रोगी च जायते नीचसंस्थिते२ । नेत्रपाचौ भृगोर्जातो रोगशोकसमन्वितः । धनहीनो महारोगी मानवः स्वल्पसंचयः३। भृगोः प्रकाशने जातो विद्याधनसमन्वितः । दाता च धार्मिकश्चैव कीर्त्तिमान् जायते नरः४ । शुक्रस्य गमने जातः पादमूले स्त्रजान्वितः । नित्योत्साही महाशिल्पी भवेत्तीर्थगतौ रतः५ । गमनेच्छौ यदा जातो भ्रान्तनाथो भवेद्ध्रुवम् । माता च म्रियते तस्य शैशवे व्याधिसंयुतः६ । सभावाञ्च भृगोर्जातो राजपात्रो महाधनी । कुलश्रीको महादक्षः केवलं मूखरोगवान्७। भृगोरागमने जातो दुःखितो बहुलम्पटः । दन्तरोगी कुलशोकी जायते च नराधमः । शुक्रस्य भोजने जातो बलवान् दाम्भिकः सदा । महाधनी भवेच्चित्रं वाग्मित्वेन विशेषतः८। यो जातो स्वल्पक्षिप्तायां स वाग्मी जायते ध्रुवम् । पाण्डित्यं कविता चैव वर्द्धते च दिने दिने । यदि चैव भवेच्छीघ्रे मूर्खो भवति निश्चयः । बहुस्थाने विशेषेण राजपात्रो महाधनी । कासको बहुकालञ्च परयोषित्प्रियः सदा । महाभूतो महाबन्धुः कौतुकी च भवेत् सदा । बहुप्रकलत्रश्च नानासुखसमन्वितः । नीचे तद्विपरीतः स्यात् दुःखशोकसमन्वितः११ । निद्रायाञ्च भृगोर्जातो भवेद्रोगी न संशयः । नित्यक्लेशी महादुःखी जायते नात्र संशयः । जागरायाञ्च शतस्थाने यदि निद्रा भृगोर्भवेत् । तदा सर्वविनाशः स्याद्विष्णुना परिकीर्त्तितम् १२ । शुक्रस्य ।

"शयने च शनेर्जातो लम्पटो बहुभाषकः । गुह्यस्थाने भवेद्रोगी क्रोधदृष्टिश्च जायते । लग्नात् सप्तमे चैव शयनस्थः शनैश्चरः । तदा नित्यप्रवासी स्याच्चञ्चुरोगी भवेच्च सः१ । उपवेशे यदा जातः श्रीपदीदन्तसंयुतः । धनहीनो भवेत् तस्य पीड़ा भवति नित्यशः२ । नेत्रपाचौ यदा जातो मूर्खो भवति पण्डितः । धनवान् धार्मिकश्चैव द्विभार्य्यो बहुभाषकः३ । प्रकाशने च यो जातो राजपात्रो भवेच्च सः । नानागुणेन गुणवान् धार्मिकः पण्डितः शुचिः" "मतान्तरे "जागरास्थाने च लग्ने च प्रकाशने यदा शनिः । तदा सर्वविनाशः स्याज्ज्ञातिध्वंसो भवेद् ध्रुवम्४ । गमने च यदा जातः पादमूले स्त्रजान्वितः । तीर्थे च गतिमाश्चित्र्यं पुत्रदारैर्विवर्जितः५ । यो जातो गमनेच्छायां श्रीपदीरोगसंयुतः । दन्तघाती महाक्रोधी कृपणः परनिन्दकः६ । सभायाञ्च शनौ जातः पुत्रदारधनैर्युतः । सर्वत्र लभते वित्तं नानारत्नसमन्वितम्७ । आगमने यदा जातो महाक्रोधी स्त्रजान्वितः । सर्पादिभिश्च संदष्टो भ्रान्तनाथो भवेद् ध्रुवम्८ । भोजने चैव यो जातो मन्दाग्निश्च महानपि । खर्जूरोगी तथा मूखी चञ्चुरोगी भवेच्च सः । यो जातो स्वल्पक्षिप्तायां मर्कटो बहुभाषकः । भोजने दुःखितश्चैव प्रवासी परिदेवकः१० । कौतुके च शनेर्जातो राजपात्रो महाशयः । दाता भोक्ता महादक्षो धार्मिकः पण्डितः शुचिः११ । निद्रायाश्च शनेर्जातो धनवान् पण्डितः शुचिः । चञ्चुरोगी पित्तमूखी द्विभार्य्यो बहुपुत्रकः । विशेषतश्च धर्मेऽस्मे कर्मेऽस्मे च कदाचन । यदि दैवाद्भवेद्विघ्नो नाशो भवति निश्चितम् । कर्मनाशो धर्मनाशः क्षुधार्त्तः दुःखितः सदा । नित्यप्रवासी रोगी च कार्य्यनाशः पदे पदे । खञ्जिमगेहे घरे वा केन्द्रे वा लग्नदे पुनः । तदा सर्वं विचार्य्यञ्च वैपरीत्येन चिन्तनम् । जागरायाञ्च शतस्थाने यदि निद्रा भवेत् पुनः । तदा सर्वं शुभं विद्याद्विष्णुना परिकीर्त्तितम्"१२ । शनेः ।

"शयने च यदा राहोर्जन्म वस्त्र भवेत् पुनः । तस्य क्लेशो महादुःखं जायते च न संशयः१ । उपवेशे च यो जातः श्रीपदीरोगसंयुतः । बहुधानिर्नरेन्द्रस्य पीड़ा भवति नित्यशः२ । नेत्रपाचौ यदा जातश्चक्षुरोगी भवेद् ध्रुवम् । सर्पाघातो महाभीतिर्द्विभार्य्यो बहुभाषकः३ । प्रकाशने च यो जातो धनवान् धा-

र्मिकः पुनः। नित्यवासी चोत्साही सात्त्विको धार्मिकः शुचिः४। गमने चैव यो जातो नानारोगैर्धनक्षयः। दलाधाती महाक्रोधी विघुनः परनिन्दकः५। यो जातो गमनेऽवायां वस्तुपुत्रो महाधनः। पण्डितो गुणवान् दाता जायते च नरोत्तमः६। समावाद्य यदा जातः कृपणो धनसंयुतः। नानागुणेन गुणवान् धार्मिकः पण्डितः शुचिः७। आगमने च यो जातो लम्पटो वस्तुभावकः। सुहृद्बन्धुविनाशः स्वाज्ञानाल्लेशच जायतेऽ। भोजने च महादुष्टो मन्दाग्निश्च दुःखान्वितः। कृपणः कटुवाक्यश्च दुःखितो नित्यसेवकः९। यो जातो मस्तिष्कावां चञ्चो भवति मान्यवा। पुत्रनाशो भवेत् तस्य जायानाशो भवेद् ध्रुवम्१०। कौतुके च यदा जातो गुणैः सर्वैः समन्वितः। नानाधनेन धनवान् राजसेवासु तत्परः। यदि दैवाद् भवेत् तुल्यो लम्पटो वा कदाचन। तदा सर्वं वैपरीत्यं जायते च न संशयः११। यो जातो राहुनिद्रायां दुःखितः सर्वतस्त्यजा। नानास्थाने गतो वापि धनपुत्रविवर्जितः। जायायाश्च सुतस्थाने यातो निद्रां विधुन्तुदः। तदा सर्वं वैपरीत्यं मतजायासमन्वितः१२। राहोः एवं केतुनाम्।

२२वैशेषिकोक्तेषु द्रव्यगुणकर्मसामान्यविशेषसमवायात्मकेषु षट्सु पदार्थेषु "द्रव्यादयः पञ्च भावा अनेके समवायिनः" भाषा०"तथा हि पदार्थोद्विविध भावोऽभावश्च। तत्र भावाः षट् सप्तमस्याभावस्तुकीर्तनात्" सि०सु०। अभाव एक इति पदार्थाः सप्त। तत्र द्रव्यादिपञ्चकस्य अनेकत्वविशिष्टं भावत्वं लक्षणं समवायस्य भावत्वेऽपि एकत्वात् न तत्र प्रसङ्गः। तत्र च द्रव्यादिषट्कान्वयमात्रम् भावत्वमिति सि०सु०। सत्तासम्बन्धित्वमिति दिनकरप्रक्रियायः। सम्बन्धित्वं समवाय सम्बन्धेन तादात्म्येन एकार्थसमवायेन वा बोध्यम्। तेन द्रव्यादित्रिके समवायेन, सत्तायां तादात्म्येन विशेषेषु एकार्थसमवायेन, समवाये स्वात्मकसमवायेन स्वरूपसम्बन्धेन विशेषेण सत्तासम्बन्धसम्बन्धानामप्रसङ्गः"। 'भावो यथा तथाऽभाव: कार्यवत्कारणं सतः"कुसुमा०।

भू-चिन्तायाम् करणे घञ्। २१अन्तःकरणे "भावदुष्टो न शुध्यति" आ०त०। २४तन्त्रोक्ते पञ्चाचारादिभेदे "भावस्तु त्रिविधो देवि! दिव्यवीरपशुक्रमात्। दिव्यवीरौ महाभावौ अधमः पशुभावकः। वैष्णवः पशुभावेन भजेत् परमेश्वरम्। भक्तिमन्त्रे वरारोहे! पशुभावो भयानकः। दिव्ये वीरे महेशानि! जायते सिद्धिरुत्तमा"।

वाक्येन साध्यरूपायाः क्रियाया भावलक्षणं यथा "तद् यत्रोभे भावप्रधाने भवतः पूर्वापरीभूतं भावमाख्याते नाश्रये व्रजति पचतीत्य पक्रमभाश्रयपर्यन्तं, भूतं सत्त्वभूतं सत्त्वनामभिर्व्याप्य पक्त्रिरित्यादिभिः सत्त्वानामपदेशो गौरश्वः पुरुषो हस्तीति भवतीति भावश्च,आस्ते शेते व्रजति तिष्ठतीति"। आख्यातिकोक्तभावस्य द्विविधता सकर्मकाकर्मकभेदात् तत्तच्छब्दे दृश्यम्। २५सङ्केतितसङ्कतपदार्थद्योतकशब्दादिचेष्टाभेदे च। "यस्य च क्रियया क्रियान्तरं लक्ष्यते स भावः" इति व्याकरणपरिभाषिते २६पदार्थे च तत्र च सप्तमीव्याकरे स्थितम्। भवतीति भू-कर्त्तरि घञ्। २७उत्पत्तियुते षड्विकारयुते च पदार्थे भावविकारशब्दे दृश्यम्। २८सांख्यमतसिद्धेषु धर्माधर्मादिषु बुद्धिधर्मेषु "संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्" सा०का०,"भावैरधिवासितं धर्माधर्मज्ञानाज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्याणि भावास्तदन्विता बुद्धिः तदन्वितञ्च सूक्ष्मशरीरमिति तदपि भावैरधिवासितं यथा सुरभिचम्पकसम्पर्कादस्त्रं तदामोदवासितं भवति तथा लिङ्गमपि भावैरधिवासितत्वात् संसरति" तत्त्वकौ०। तेषां करणान्वितत्वं कार्यान्वितत्वञ्च दर्शितं यथा "सांसिद्धिकाश्च भावाः प्राकृतिका वैकृतिकाश्च धर्माद्याः। दृष्टाः करणाश्रयिणः कार्याश्रयिणश्च कललाद्याः" सा०का० "वैकृतिकानैमित्तिकाः प्राकृतिकाः, स्वाभाविकाः सांसिद्धिकाः भावाः यथा सनकादावादिविद्वान् भगवान् कपिलो महासर्गेधर्मज्ञानवैराग्यैश्वर्यसम्पन्नः प्रादुर्बभूवेति स्मरन्ति। वैकृतिकाश्च भावाः स्वांसिद्धिकाः ओषधासुज्ञानोत्पन्नाः यथा प्राचेतसप्रभृतीनां महर्षीणाम्। एवमधर्मोज्ञानावैराग्यानैश्वर्याण्यपि। कार्यं शरीरं तदाश्रयिणस्तस्यावस्थाः कललबुद्बुदमांसपेशीकरणाङ्गप्रत्यङ्गव्यूहाः सर्वस्यैव,ततो निर्गतस्य बालस्य बाल्यकौमारयौवनवार्द्धकानीति" त०कौ०। २९तत्तत्पदार्थाधारत्वे धर्मे च "भावे त्वतलौ" पा०। भावशब्देनाधारधर्म उच्यते। स च तदितरावृत्तित्वे यावत्तद्वृत्तिधर्मः यथा गोत्वमित्यादौ भावार्थकत्वप्रत्ययेन सर्वेतरावृत्तित्वे सति सकलगोव्यक्तिवृत्तिधर्मो बोध्यते।

भावक पुं०भाव+स्वार्थे क।१भावशब्दार्थे मनोविकारे हला०। भू-भावि-वा ण्वुल्। २सत्ताश्रये ३उत्पादके च त्रि०।

भावत त्रि० भू-शतृ भवत् तस्येदम् अण्। उत्पाद्यज्ञानसम्बन्धिनि स्त्रियां ङीप्।

भावत्क त्रि० युष्मदर्थकात् भवच्छब्दात् दृदमर्थे पक्षे टक्। भवत्सम्बन्धिनि पक्षे ऊङ्। स्त्रियां पदत्वम्। भवदीय तत्रार्थे त्रि०।

भावन न० भू-णिच्-ल्यु। (चालता)। फलभेदे २विष्णौ पु०। भावे ल्युट्। १अधिवासने ४चिन्तायाम् ५ध्याने ६पर्यालोचनायां वैद्यकोक्ते ७औषधसंस्कारभेदे। भावि-यच्। "व्यापारो भावना सैवोत्पादना सैव च क्रिया" उक्ते ८भवितुर्भवनानुकूलव्यापारभेदे स्त्री भङ्गलब्धे द्रव्यम्। अनुभवजन्ये स्मृतिहेतौ ९संस्कारभेदे स्त्री। "संस्कारभेदो वेगोऽत्र स्थितिस्थापकभावने" "यतोन्द्रियोऽसौ विज्ञेयः कचित् स्यन्देऽपि कारणम्। भावनाख्यस्तु संस्कारो जीवद्वृत्तिरतीन्द्रियः। उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत्। स्मरणे प्रत्यभिज्ञायामयमौ हेतुरुच्यते" भाषाप०। "भावनाख्य इति। तस्य संस्कारस्य, उपेक्षात्मकत्वात् संस्कारानुत्पत्तेरुपेक्षानात्मकनिश्चय इत्युक्तम्। तेनोपेक्षान्यनिश्चयत्वेन संस्कारं प्रति हेतुतेति भावः। ननु स्मरणं प्रत्युपेक्षान्यनिश्चयत्वेन हेतुत्वं तेनोपेक्षादिरूपे न स्मरणम् इत्यत्र संस्कारं प्रति ज्ञानत्वेनैव हेतुतास्थिति चेन्न विनिगमनाविरहेणापि संस्कारं प्रति उपेक्षान्यनिश्चयत्वेन हेतुतायाः सिद्धत्वात्। किञ्च उपेक्षारूपे संस्कारकल्पनाया गुरुत्वात् संस्कारं प्रति चोपेक्षान्यत्वेन हेतुतायाः सिद्धत्वात्। तत्र प्रमाणं दर्शयति। स्मरणे इति। असौ संस्कारः स्मरणं प्रत्यभिज्ञानञ्च जनयति। अतः संस्कारः कल्प्यते। विना व्यापारं पूर्वानुभवस्य स्मरणादिजननासामर्थ्यं स्वव्यापारान्यतराभावे कारणत्वासम्भवात्। न च प्रत्यभिज्ञां प्रति तत्तत्संस्कारस्य हेतुत्वेन प्रत्यभिज्ञायाः संस्कारजन्यत्वेन स्मृतित्वापत्तिरिति वाच्यम्। अप्रयोजकत्वात्। परे तु यत्तद्बुद्धसंस्कारात् प्रत्यभिज्ञानुदयादुद्बुद्धसंस्कारस्य हेतुत्वमेवेष्यते तत्तत्स्मरणस्यैव प्रत्यभिज्ञां प्रति हेतुत्वं कल्पयन्त इत्याहुः" सि०स०।

भ-चिन्तायां युच्।१०चिन्तायां स्त्री। चिन्ता च मानसवृत्तिभेदः सा च त्रिविधा यथोक्तं विष्णुपु०६अं ७अ०। "त्रिविधा भावना विप्र! विश्वमेतत्त्रिबोधत। ब्रह्मात्मा कर्मसंज्ञा च तथा चैवोभयात्मिका। ब्रह्मभावात्मिका ह्येका कर्मभावात्मिका परा। उभयात्मिका तथैवान्या त्रिविधा भावभावना। सनन्दनादयो ब्रह्म भावभावनया युताः। कर्मभावनया चान्ये देवाद्याः स्थावरान्ताः। चिरन्तनमौदिग्य च ब्रह्मकर्मात्मिका द्विधा। बाधाधिकारयुक्तेषु विद्यते भावभावना"। बुद्धशब्दर्शितं बौद्धमतसिद्धभावनाचतुष्टयञ्च दृश्यम्। चु० भू-णिच्यर्थे भावे युच्। २स्नियोसादिना चूर्णद्रव्यस्य मिश्रीकरणे चूर्णद्रव्यस्य स्नियोसादिना संस्कारभेदो भावना तत्प्रमाणमुक्तं भावप्र० यथा

"द्रवेण यावत्कालेन चूर्णं सर्वं प्लुतं भवेत्। भावनायाः प्रमाणन्तु चूर्णे प्रोक्तं भिषग्वरैः"।

भावबोधक पु०भावस्य रत्नादेर्बोधकः अनुमापकः। रत्नाद्यनुमापके १अनुभङ्गादिरूपचेष्टाविशेषे २सत्वरागादौ च अमरः

भावयु त्रि० भावमिच्छति क्यच् उन् वेदे नि०। भावेच्छौ। ऋ०१०।८६।५। [ङीप्।

भाववत् त्रि० भाव+रसा०मतुप् मस्य वः। भावयुते स्त्रियां

भावविकार पु० ६त०। वाक्योक्तेषु उत्पत्तियुतपदार्थस्य जन्मादिषु षट्सु धर्मेषु "षड्भावविकारा भवन्तीति वार्ष्यायणिः, जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते विनश्यतीति, जायत इति पूर्वभावस्यादिमाचष्टे नापरभावमाचष्टे न प्रतिषेधति यस्योत्पद्यत सत्त्वस्यावधारणं, विपरिणमत इत्यप्रच्यवमानस्य तत्त्वादिकारं, वर्धत इति स्वाङ्गाभ्युच्चयं, सांयौगिकानां वार्थानां, वर्धते विज्ञानेनेति वा वर्धते शरीरेणेति वा, अपक्षीयत इत्येतेनैव व्याख्यातः प्रतिलोमं, विनश्यतीत्यपरभावस्यादिमाचष्टे न पूर्वभावमाचष्टे न प्रतिषेधति"।

भावदत्त पु०भावे दत्तः प्रदत्तः भावो दत्तो जातो यस्याद्वा। ग्रन्थिकर्त्तरि ब्रह्मर्षि "यतुष्टुप् च भवेच्छन्दो भावदत्तस्तु दैवतम्" स्मृतिः।

भावाट पु० भावं भावेन वा अटति अट-अण् अच् वा। १भावके २साधौ ३कामुके ४नटे ५निवेशे च मेदि०। भावे घञ् ६त०। ७भावप्राप्तौ।

भावानुगा स्त्री भावं पदार्थमात्रयं वानुगच्छति गम-ड। १छायायाम् २अभिप्रायानुगामिनि त्रि० राजनि०।

भावालीना स्त्री भावे पदार्थे आलीना। छायायां राजनि०

भाविक त्रि० भावेन निर्वृत्तम् ठञ्। १भावसाध्ये पदार्थे २अलङ्कारभेदे ३०१ पृ० दृश्यम्।

भावित त्रि० चु-भू-क्तौ चिन्तायां मिश्रणे वा कर्मणि क्त। १वासिते २प्राप्ते मेदि०। २गुणे ३चिन्तिते ४मिश्रिते वैद्यकोक्तनियोसादिना मिश्रिते ५चूर्णादौ च। वोपदे० उक्ते अव्यक्तानेकवर्णसमीकरणेन ७व्यक्तीकरणे।

भाविन् त्रि० भू–णिनि । १भविष्यत्पदार्थे "भाविनि भूतवदुपचारः" न्यायः । स्त्रियां ङीप् । भावो रत्नादिभावः सात्त्विकभावो वा अस्त्यस्य एकाच्चरकदन्तत्वेऽपि वाऽस्त्यर्थे इनि ङीप् । २स्वभावान्वितायां स्त्रियाम् भरतः १स्त्रीभावे राजनि० । ३गन्धर्वकन्याभेदे स्त्री मार्कं०पु०१२८ तत्र भामिनीति पाठान्तरम् ।

भावुक न० भू–उकञ् । १भङ्गे २तद्वति त्रि० अमरः । २भावनायुते त्रि० हेमच० । "शङ्करोऽपि रविर्वा भुवि भावुकाः" इति भाग०१।१।२ ।

भाव्य न० भू–ण्यत्यप्रत्यये भावे यत् ।।अवश्यम्भवितव्ये । भू–कर्त्तरि यत् भव्य आर्षे ण्यप् । २भव्यशब्दार्थे "भावीत्यवश्यं यत् भाव्यं तत्र ब्रह्मा न बाधकः" काशि०पु०१८अ० ।

भाष वचने भ्वा० आत्म० द्विक० सेट् । भाषते अभाषिष्ट । क्वचित् क्वचिन्न लुङः । उपसर्गपूर्वकस्तु तत्तदुपसर्गद्योतितार्थविशेषवचने । परि+आङ्पूर्वकस्तु परिभाषते ।

भाषण न० भाष–भावे ल्युट् । कथने अमरः । सा०द० उक्ते निर्दुष्टत्वाङ्गभेदे "सन्धिर्विरोधो यमनम्" इत्यङ्गमेदे "भाषणं पूर्ववाक्यस्य" इत्यादिनोद्दिश्य लक्षितं यथा "सामदानादि भाषणम्" ।

भाषा स्त्री भाष–अ । १वाक्ये २संस्कृतादिवाक्ये च "अष्टादशभाषावारविलासिनीभुजङ्गः" इति सा०द० । भाषाभेदाश्च प्राकृतशब्दे ४५४६पृ० दर्शिताः । व्यवहारे ३प्रतिष्ठाङ्गवाक्ये "यदावेदयते राज्ञे तद्भाषेत्यभिधीयते" इति स्मृतिः । पूर्वपक्षशब्दे ४४०६ पृ० दृश्यम् । ४रागिणीभेदे हला० ।

भाषासम न० शब्दालङ्कारभेदे यथोक्तं सा०द० १०परि० ।
"शब्दैरेकविधैरेव भाषासु विविधास्वपि । साम्यं यत्र भवेत् सोऽयं भाषासम इतीष्यते" यथा "मञ्जुलमालिमञ्जीरे कलगम्भीरे विहारसरसीतीरे । विरसाधि केलिकीरे किमाधि ! धीरे च मञ्जुहारसमीरे" एष श्लोकः संस्कृतप्राकृतसौरसेनीमागध्यावन्तीनागरापभ्रंशेष्वेकविध एव" ।

भाषापाद पु०कर्म० । चतुर्थ्यादिव्यवहारे प्रतिष्ठाङ्गके वाक्यरूपे प्रथमेऽङ्गे पूर्वपक्षशब्दे ४४०६ पृ० दृश्यम् ।

भाषिक त्रि०भाषया निर्वृत्तः ठञ् । वेदादिपरिभाषानिर्वृत्ते निरु०२।२ । [कात्या०श्रौ०१।१।१८।१०। भाष्ये दृश्यम् ।

भाषिकस्वर पु० कर्म० । मन्त्रे तरत्समन्दीमगृह्णपात्राङ्के पठितस्वरे

भाषित न०भाष–भावे–क्त । १कथने कर्मणि–क्त । २कथिते त्रि० "भाषितपुंस्कात्" पा० भाषित उक्तः पुमान् येन कप् ।

भाष्य न० "सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः । स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः" इत्युक्तलक्षणे १सूत्रव्याख्यायन्थभेदे "कथिभाषितभाष्यफक्किका" भैष० । २कथनीये त्रि० ।

भाष्यकार पु० भाष्यं करोति कृ–अण् उप०स० । पाणिन्यादिसूत्रभाष्यकारके पतञ्जलिप्रभृतौ भाष्यकारादयः सूत्रभेदे विभिन्ना यथा पाणिनिसूत्रस्य पतञ्जलिः ब्रह्मसूत्रस्य शङ्करानन्दादयः । योगसूत्रस्य वेदव्यासः, सांख्यसूत्रस्य विज्ञानभिक्षुः, गौतमसूत्रस्य वात्स्यायनः, कणादसूत्रस्य प्रशस्तपादः । मीमांसासूत्रस्य शबरस्वामी इत्यादयः । "अहञ्च भाष्यकारश्च कृशाश्वीयधियावहौ । नैव यद्वाम्बुधेः पारं किमम्बे जडबुद्धयः" दुर्गासिंहः नैव न रेव यतवन्नाविलार्थः । क्विप् हृत० । भाष्यकृदत्र ।

भास दीप्तौ भ्वा०चात्म०सक०सेट् । भासते अभासिष्ट । क्वचिद्वा लुङः । अबीभसत् त अबभासत् त । ज्ञानविषयत्वे च "प्रकारीभूय भासते" । [मेदि० १६च्छायां धरणिः ।

भास् स्त्री भास–क्विप्–भावे क्विप् । १प्रभायाम् अमरः २मयूखे

भास पु० भास–भावे घञ् । १दीप्तौ विम्बः आधारे घञ् २गोष्ठे । कर्त्तरि अच् । ३कङ्कुरे ४पक्षे च ५पक्षान्तरे शब्दरत्ने हेमच० "यज्ञार्थमदत्त वसु भासः काङ्क्षोऽथवा भवेत्" स्मृतिः । ६कविभेदे "भासो हासः कविकुलगुरुः कालिदासो विलासः" प्रवरा० ।

भासद न०भसदः कटिरिअच्छेदम् अण् । नितम्बे ऋ०१०।१६२ भाष्यम् । यजु०२५।६ वेददीपे च भासेते सोम–सा०अदि० भासद् दान्तः तत्रार्थे इत्युक्तम् ।

भासन्त पु० भास–झच् । १सूर्य्ये २चन्द्रे उषा० ४नक्षत्रे हेमच० । ५चन्द्राकारे त्रि० ६भासयुक्ते पुंस्त्री० मेदि० ७तारायां स्त्री गौरा० उषा० ।

भासस् न० भास–भावे असिच् । दीप्तौ त्रिकाण्डशेषः ।

भासाकेतु पु० भास–भावे अ । भासा दीप्तिः इव० । दीप्तिकारके वह्नौ ऋ० १०।२०।३ ।

भासापुर न० पुरभेदे ह०स० १६अ० ।

भासु पु० भास–उच् । सूर्य्ये त्रिका० ।

भासुर त्रि०भास–उरच् । १दीप्तियोगे २स्फटिके च त्रिका० ३धौरे पु० धरणिः ४कुशौघधे न०अटा० । [(विचार्यति) राजनि० ।

भासुरपुष्पी स्त्री० भासुराणि पुष्पाण्यस्याः । इक्षिकायाम्

भास्कर पु० भासं करोति भास्+कृ–टच् कस्वा० । १सूर्य्ये

२क्ष्मो मेदि० २वीरे धरणिः। ३अर्कवृक्षे ४सिद्धान्तशिरोमणिप्रन्थप्रणेतृपण्डिते। ५स्वर्णे न० राजनि०। ७भट्टादेवे पु० भा० आतु० टक्०। ८भास्करेण कृते पञ्चलक्षणभेदे न० चक्रदत्तः। भास्करलवणशब्दे दृश्यम्।

भास्करद्युति पु०भास्करे द्युतिरस्य। १विष्णौ पु० "चन्द्रांशुर्भास्करद्युतिः" विष्णुस०। "यदादित्यगतं तेज" इत्युक्तेरस्य तथात्वम्। ६त०। २सूर्यस्य द्युतौ स्त्री।

भास्करप्रिय पु० ६त०। पद्मरागमणौ (चुनि)।

भास्करलवण न० भास्करनिर्मिते लवणभेदे

"पिप्पली पिप्पलीमूलं धन्याकक्षणजीरकम्। वैम्बवल्ल विड्डैव पत्रं तालीशकेसरम्। एषां द्विपलिकान् भागान् पञ्चसौवर्चलस्य च। मरिचाजाजिगुग्गुलीनामेकैकस्य पलं पलम्। त्रयोदशे चार्द्रभागे च सायाह्ने कुडवद्वयम्। दाडिमात् कुडवश्चैव हे पले चाम्लवेतसात्। एतच्चूर्णितं चक्ष्णं गव्याज्यमधुतोपमम्। लवणं भास्करं नाम भास्करेण विनिर्मितम्। जंगलस्थितानां वातश्लेष्मामयापहम्। वातगुल्मं निहन्त्येतद्वातमूलानि यानि च। तक्रमस्तुसुरासीधुशुक्ताम्लिकयोजितम्। जाङ्गलानान्तु मांसेन रसेषु विविधेषु च। मन्दाग्नेरश्नतः शक्तो भवेदाशैव पावकः। अर्शांसि च कफोद्दोषकृतामयभगन्दरान्। कृच्छ्रोगमामदोषांश्च विविधानुदरस्थितान्। प्लीहानमश्मरीञ्चैव शमकाशोदरक्रिमीन्। विशेषतः शर्करादीन् रोगान्नानाविधांस्तथा। पाण्डुरोगांश्च विविधान् शमयत्यशनिर्यथा" चक्रद०।

भास्करावर्त्त पु० शस्त्रतोक्ते शिरोरोगभेदे "सूर्योदयं वा प्रतिमन्दमन्दमधिष्ठितं रक्तमसक्तमेति गाढम्। विवर्द्धते चांशुमता सहैव सूर्यापदक्षौ विनिवर्त्तते च। शीतेन शान्तिं लभते कदाचिदुष्णेन जन्तुः सुखमाप्नुयाच्च। तं भास्करावर्त्तसदाहरन्ति सर्वात्मकं कष्टतमं विकारम्"। [१सन्निभेदे भा० शा० ४७ अ०।

भास्करि पु०भास्करस्यापत्यम्०इञ्। १वैवस्वते मनौ २कर्णे च।

भास्करेष्टा स्त्री ६त०। आदित्यभक्तायां राजनि०।

भास्मन त्रि० भस्मनो विकारः अण् मलत्वात् न टिलोपः। भस्मविकारे।

भास्मायन पु० भस्मनो गोत्रापत्यम् फक्। भस्मन्गोत्रापत्ये ततः स्वार्थे अण् स्त्रियां अत्र भास्मायन्या तत्रार्थे स्त्री

भास्वत् पु० भास्+अस्त्यर्थे मतुप् मस्य वः। १सूर्ये २अर्कवृक्षे ३वीरे मेदि० ४दीप्ते त्रि० हेमच०। स्त्रियां ङीप् वा च ६नद्यां ब०व० ६लक्षणे च स्त्री निघण्टुः। ७ज्योतिषनिबन्धभेदे स्त्री बल सूर्यसङ्घादिनिरूपणमस्ति।

भास्वर त्रि० भास-वरच्। १दीप्तियुक्ते २सूर्ये ३अग्नौ मेदि० ४दिने ५अर्कवृक्षे च पु०। ६कुष्ठौषधे (कुड़) न० राजनि० ७चन्द्रान्तरचरभेदे पु० भा० अ० ४६ अ०।

भिच सौमे लाभायोक्तौ सक० वाचने दिक० क्षेपे अक० भ्वा० आत्म० सेट्। भिञ्चते अभिञ्चिष्ट बिभिञ्चे।

भिक्षा स्त्री भिक्ष-अ। १याच्ञायाम् अमरः। २सेवायां ३स्तुतौ च मेदि०। उपचारात् ४भिक्षिते वस्तुनि। तत्र ब्रह्मचारिभिक्षाप्रकारः ब्रह्मचर्य्यशब्दे ४६६६ पृ० उक्तः। तत्रा दानावश्यकत्वम् प्रमाणं च आ०त० मार्कण्डेयः उक्तं यथा "भोजनं चैलकारं वा अथ भिक्षामथापि वा। अदत्त्वा नैव भोक्तव्यं यथाविभवमात्मनः। यावदानाद्भिक्षा स्यात् अथ यावच्चतुष्टयम्। अथाश्चतुर्थं प्राङ्नैलकारं द्विजोत्तमाः"। यावं पलमात्रमिति नव्य वर्द्धमानः"। भिक्षाया दानपात्राणि उक्तानि विष्णुपु० "दद्याच्च भिक्षान्नितयं परिव्राट् ब्रह्मचारिणाम्। स्वेच्छया तु नरो दद्यात् विभवे सत्यवारितम्। एतेऽतिथयः प्रोक्ताः संप्राप्ता भिक्षुकाश्च ये। चतुरः पूजयेतान् स्वयञ्चाद्यात् प्रसज्यते"। चकारः पूर्वोक्तातिथिभोजनेन सप्तत्वार्थः। सन्यासिभिक्षादाने तु "यतिर्भक्षं जलं दद्यात् भैक्षं दद्यात् पुनर्जलम्। तद्भैक्षं मेरुणा तुल्यं तज्जलं सागरोपमम्"। विष्णुधर्मोत्तरे "चाण्डालो वाथ पापो वा मलुर्वा पितृघातकः। देशकालान्तरगतो भरण्यो मतो मम" विष्णुपु०। "व्याधितस्याकृतान्नस्य कुटुम्बात् प्रच्युतस्य च। अध्वानं वा प्रपन्नस्य भिक्षाचर्य्यं विधीयते"। अस्य भिक्षाप्रदाने भोजननिषेधात् मनुष्ययज्ञस्य नित्यत्वात् अतिथिप्राप्तेरनित्यत्वात् यत्रविद्वत्ये ब्रह्मणमात्राय भिक्षादिदानमावश्यकम्। अतएव बौधायनः "अहरहर्ब्राह्मणेभ्योऽन्नं दद्यात् शाकमूलफलशाकेभ्यः अथैवं मनुष्ययज्ञमाप्नोति"। विष्णुः भिक्षुकाभावे चाथ गोभ्यो दद्यात् अग्नौ वा क्षिपेत्"।

भिक्षाटन न० भिक्षार्थमटनम्। भिक्षार्थे गमने तस्य सायं प्रातश्च निषेधो यथा "सायं प्रातर्गृहान् भिक्षार्थं नावचक्रमेत्" कूर्मपु० १५ अ०।

भिक्षादि पु० "शूद्रकार्षे भिक्षादिभ्योऽण्" पा० उक्ते अण्प्रत्ययनिमित्ते शब्दगणे च गणो यथा "भिक्षा गर्भिणी

सेव करीष कङ्कार चर्मन् सङ्घ युवति पदादि पङ्क्ति वर्षन् दक्षिणा भत विषय श्रोत्र" या०म०।

भिक्षापात्र न० भिक्षाङ्करणार्थं पात्रम् मा०त०। १भिक्षाया आहरणार्थे पात्रे भिक्षुशब्दे दृश्यम्। २भिक्षादानसंप्रदाने ब्रह्मचार्यादौ भिक्षाशब्दे दृश्यम्। [२पैशुन्ये हारा०।

भिक्षाशित्व न० भिक्षाशिनो भावः त्व। १भिक्षाशिनोभावे

भिक्षाशिन् त्रि० भिक्षाभक्षमश्नाति अश-णिनि। भिक्षाशब्दोपपदोविनि। "भिक्षाशी विचरेत् यामम्" स्मृतिः।

भिक्षु त्रि०भिक्ष-उनु। १भिक्षाकारके २चतुर्थाश्रमे पु० २तद्वति च। तदाश्रमे अधिकारिणश्च आश्रमशब्दे दृश्याः। तद्धर्माः नि० सि० दृश्या यथा

"अथ यतिधर्माः प्रातरुत्थाय ब्रह्मणश्चते इति जपित्वा दण्डादीनि गृहीत्वा निधाय मूत्रपुरीषयोर्व्युत्सृज्यचतुर्थं शौचं कृत्वाचम्य पर्वताद्शौचर्जं प्रणवेन दन्तधावनं कृत्वा तेनैव सदा बहिःकटिं प्रक्षाल्य जलतर्पणवर्जं स्नात्वा पुनर्जङ्घे प्रक्षाल्य वस्त्रादीनि गृहीत्वा मार्जनालं कृत्वा केशवादिनमोन्तनामभिस्तर्पयित्वा ओं भूस्तर्पयामीत्यादि व्यस्तसमस्तव्याहृतिभिर्मृर्जनस्तर्पयामीति तर्पयेत्। "ओं भूः स्वाहेति स्वाहाशब्दान्तैः स्वधाशब्दान्तैश्चैरिव पुनस्तर्पयेदिति केचित्। तत आचम्याङ्गुलिना प्रणवेन जलमादाय व्याहृतिभिरङ्गुल्या गायत्र्या त्रिः शिखा गायत्रीं जपेत्। उदिते सूर्ये प्रणवेन व्याहृतिभिर्वाऽर्घ्यं त्रिर्दत्त्वा मित्रस्य चर्षणीत्यादौः पूर्वोक्तसौरीभिरिदं विष्णुरित्यैर्वो ब्रह्मजज्ञानमिति चोपस्थाय सर्वभूतेभ्यो नम इति प्रदक्षिणमावर्त्तते ततो नत्वा "आदित्याय विद्महे सहस्रकराय धीमहि। तन्नः सूर्यः प्रचोदयादिति" त्रिर्जपेत्। एवं त्रिकालं विष्णुपूजां ब्रह्म यज्ञञ्च कुर्यात्। अथ भिक्षा। विधूमे सन्नसुसले व्यङ्गारे भुक्तवज्जने। काले पराङ्मुखविते नित्यं भिक्षां यतिश्चरेत्" इत्युक्ते काले सदयमिति चतसृभिरादित्यमुपस्थाय तेनैक्यं ध्यात्वा आत्मन्येति प्रदक्षिणं कृत्वा दे ते पत्यान इति कृत्वा "सोऽसौ विष्णुरस्य आदित्ये पुरुषोऽन्तर्हृदि स्थितः। सोऽहं नारायणोदेव इति ध्यात्वा प्रणम्य तम्"। त्रिदण्डं दक्षिणे त्वङ्गे ततः सन्धाय बाहुना। पात्रं वामकरे कृत्वा क्षेप्यदृष्टिस्थेन त्रिति" बोधायनोक्तदिशा त्रीन् पञ्च सप्त वा गृहान् गत्वा भवत्पूर्वं भिक्षां याचित्वा "पूर्णमसि पूर्णं मे भूया" दित्यामन्त्र्यचिरत्नं प्रोक्ष्य ओं भूः स्वधा नम इत्यादिव्यस्तसमस्तव्याहृतिभिः स्वर्यादिदेवेभ्यो भूतेभ्यश्च भूमौ क्षिप्त्वा भुक्त्वा प्रणवेन षोडश प्राणायामान् कुर्यादिति संक्षेपः। गौतमव्याख्यायां भर्तृयः। "यतिर्दक्षे जलं दत्त्वा भैक्षं दद्यात् पुनर्जलम्। भैक्षं पर्वतमात्रं स्यात् तज्जलं सागरोपमम्"। अत्र सर्वत्र मूलं माधवार्कमदनरत्नस्मृत्यर्थसारादौ द्रष्टव्यम्। कल्पः "एकरात्रं वसेद्ग्रामे नगरे पञ्चरात्रकम्। वर्षाभ्योऽन्यत्र वर्षासु मासांस्तु चतुरो वसेत्"। जाबालश्रुतौ "शून्यागारे देवगृहश्वपचकुटीवल्मीकवृक्षमूलकुलालशालाग्निहोत्रगृहनदीपुलिनगिरिकुहरनिर्झरस्थण्डिलेष्वनिकेतनः" इति। मातृके "अष्टौ मासान् विहारः स्याद् यतीनां संयतात्मनाम्। एकत्र चतुरोमासान् वार्षिकान्निवसेत् पुनः। अविज्ञप्तप्रविद्वांसां विहारस्तु न विद्यते"। अत्रिः "भिक्षाटनं जपं स्नानं ध्यानं शौचं सुरार्चनम्। कर्त्तव्यानि शरीराणि सर्वथा न परिग्रहवत्। मधुकं शुक्लवस्त्रञ्च स्त्रीकथां लौल्यमेव च। दिवास्वापञ्च यानञ्च यतीनां पतनानि षट्। आसनं पात्रलोभश्च सञ्चयः शिष्यसंग्रहः। दिवास्वापो दयालस्यो यतेर्बन्धकराणि षट्"। दक्षः "नाध्येतव्यं न वक्तव्यं न श्रोतव्यं कथञ्चन। यतिपात्राणि मृद्दारुवलाबूमयानि च"। मदनरत्ने अत्रिः "पित्र्यं कल्पितं पूर्वमन्नं देवादिकारणात्। वर्जयेत् तादृशीं भिक्षां परबाधाकरीं तथा"। वृद्धशातातपः "न तीर्थवासी नित्यं स्यान्नोपवासपरो यतिः। न चाध्ययनशीलः स्यान्न व्याख्यानपरो भवेत्"। एतद्देशभिन्नपरम्। अत्रिः "स्नानं सुरार्चनं ध्यानं प्राणायामो बलिस्तुतिः भिक्षाटनं जपः सन्ध्या त्यागः कर्मफलस्य च"। एते धर्मा मिता० प्रायेणोक्तास्तदाश्रमशब्दे दृश्यम्। ४बुद्धभेदे जटा० ५श्रावणीद्युपे राजनि०। ६कोकिलाक्षे भावप्र० ७उपनिषद्भेदे च।

भिक्षुक पु० भिक्ष-उक। भिक्षोपजीविनि। "ब्रह्मचारी यतिश्चैव विद्यार्थी गुरुपोषकः। अध्वगः क्षीणवृत्तिश्च षडेते भिक्षुकाः स्मृताः" अत्रिणा पारिभाषिकादर्शिताः। ततः समूहे खञ्जिका० ठञ्। भैक्षुक तत्समुदाये न०। कडारा० कर्म०वा परनिपातः। विप्रभिक्षुकः भिक्षुकविप्र इत्यादि। [उप०स०। चौरे हेमच०।

भिक्षुसंघाटी स्त्री भिक्षुं संघटते प्राप्नोति सम्+घट-अच् ङीष्

भिक्षुसूत्र न० भिक्षोः तदाश्रमविहितधर्मस्य ज्ञापकं सूत्रम् मा०त०। व्यासकृते ब्रह्मसूत्रे शारीरकसूत्रे।

भिण्ड पुंस्त्री० भण-ड पृषो० । कराकृतिरस्त्रवर्षणे वर्त्तुलाकारबीजे क्षुपभेदे । स्त्रीत्वे टाप् राजनि० गौरा० ङीष् तत्रार्थे [भिण्डीक्षुपे राजनि० ।

भिण्डीतक पु० भिण्डी सती तकते तक-क्विप् अच् ।

भित्त न० भिद-क्त नि० तस्य न नः । खण्डे अमरः ।

भित्ति स्त्री भिद-क्तिन् । मट्टादेः कुड्ये (देवाल) २प्रभेदे शब्दरत्ना० । ३अवकाशे ४संविभागे विश्वः । स्वार्थे क । तत्रार्थे संज्ञायां कन् । पक्षान्तरे हेमच० ।

भित्तिचोर पु० भित्त्या कुड्यादिभेदनेन चोरयति चुर-अच् । (सिंधेल) सन्धिभेदकचौरे ।

भित्तिपातन पुंस्त्री०भित्तिं कुड्यं पातयति भेदनेन पाति-ल्यु । मट्टामूषिकभेदे राजनि० स्त्रियां जातित्वात् ङीष् ।

भिद् द्विधाकरणे विशेषकरणे च रुधा०उभ० सक० अनिट् । भिनत्ति भिन्ते इदित् अभिदत् अभैत्सीत् अभित्त । विभेद विभिदे । भिन्नः । भेत्ता ।

भिद् अंशकरणे भ्वा०पर०सक०सेट् इदित् । भिन्दति अभिन्दीत्

भिद् स्त्री भिद-क्विप् भावे क्विप् । १भेदे २विशेषकरणे च । कर्त्तरि क्विप् । ३भेत्तरि त्रि० ।

भिदक न०भिद-कुन् । वज्रे १हीरके । २खड्गे चपा०को०

भिदा स्त्री भिद-भावे अङ् । १विदारणे द्वैधीकरणे २विशेषकरणे च ।

भिदादि स्त्री अङ्प्रत्ययनिर्दिष्टे शब्दगणे स च गणः पा० ग० उक्तो यथा "भिदा छिदा विदा क्षिपा गुहा अङ्गा मेघा गोधा धारा हारा कारा (बन्धनस्थाने) क्षिपा तारा (ज्योतिषि) धारा रे(ले)खा चूडा पीडा वपा वसा लज्जा लपा । अत्र छिदा द्वैधीकरण एवान्यत्र क्षिप्तिः । धारा शस्त्रामन्यत्र ऋष्टिः । धारा जलप्रवाहेऽन्यत्र धृतिः । गुहा गिर्योर्बध्योः अन्यत्र गूहिरिति बोध्यम् ।

भिदि पु० भिद-कि । वज्रे हिरूपको० ।

भिदिर न० भिद-किरच् । वज्रे त्रिका० ।

भिदु न० भिद-कु । वज्रे त्रिका० ।

भिदुर न० भिद-कुरच् । १स्वयंभेदनशीले अमरः । २उच्चटङ्के राजनि० । तस्य बौधभेदकाङ्कुरवत्त्वात् तथात्वम् ।

भिदेलिम त्रि० भिद-कर्मकर्त्तरि केलिम । स्वयं भिद्यमाने ।

भिद्य पु० भिद-कर्त्तरि क्यप् नदे त्रि० । नदे हेमच० ।

भिद्र न० भिद-रक् । वज्रे त्रिका० ।

भिन्दिपाल पु० भिदि-विदारणे इनु भिन्दिं भेदनं पालयति पालि-अण् । १इक्षुक्षेपे नालिकास्त्रे, अमरटीकायां भरतः । इक्षुसमाधे अस्त्रभेदे क्षीरस्वामी । हेमा० प० तल्लक्षणमन्यत्रोक्तं यथा "भिन्दिपालस्य लक्षणं प्रोच्यते तच्च यावानो यत्प्रमाणं दण्डस्य च यः परिणाहो यत्संस्थानं दृढादिप्रमाणं यद्दृष्टमोर्ध्वं दृष्टादृष्टाच्च तत्सर्वं यथोक्तं वक्ष्यामि तत्त्व ! निबोध । तत्र भिन्दिपालस्य दण्डः फलाधितः सप्तहस्तो ज्येष्ठो भवति द्वादशाङ्गुलहीनो मध्यमो वितस्तिहीनस्तु कनिष्ठो मानतः षड्दण्डस्य सप्ताङ्गुलपरिणाहः श्रेष्ठो भवति मध्यमो द्व्यङ्गुलहीनस्त्र्यङ्गुलहीनश्च कनिष्ठो भवति मूले परीणाहो यावान् स च गोपुच्छवत् वेदितव्यो दण्डार्थं पुनः कूटजबल्वजं वैणवं भल्लिसिंहकं खदिरं वा दारुमयं वा कारयेत् तन्मया हि दण्डा दृढाः क्षुः कालाकुलोत्पादकारिणः कल्मषा विवर्द्धयन्ति चतस्रिंशदङ्गुला अवनोदकारकानभोद्गमनसहा पूर्वभारपरीक्षमाश्च भवन्ति ते नित्यं दण्डेषु कुशलैः शुभलक्षणा विज्ञेया दण्डस्योपरि पत्रं कर्णिकासंस्थानां प्रयोजयेत् कर्णिका च द्व्यङ्गुलोत्सेधा षड्ङ्गुला च वेष्या स्यात् यथा दण्डपरीणाहं वलित्वां कारयेत् सौवर्णं राजतमयं वा कांस्यं वा ताम्रं वा कौक्षमयं यद्वा जातमस्त्रिजं योजयेत् तदाभावे तु वैणवं दृढं वा विदध्यात् भिन्दिपालफलन्तु विंशत्यङ्गुलप्रमाणं भवति निस्त्रिंशषडश्रम् तीक्ष्णं सुनिशितधारास्तत्रं कुर्यात् अष्टादशाङ्गुलप्रमाणं मध्यं षोडशाङ्गुलप्रमाणं नीचं निर्दिष्टं तत्र यावन्तः फलपत्रपुत्राणां योनयो दृश्यन्ते तावन्तो भिन्दिपालफलकाः, कर्त्तव्या तथा विस्तारे त्र्यङ्गुलमूले षोडशसप्तदशाङ्गुलं दण्डसूत्रेणावगेहयेत् पूर्वभागे मध्यान्तादिपात्रैरित्युत्तमाधममध्यमानां भवेत् दण्डस्य प्रमाणद्विगुणं फलं तस्य गौरवात् भवति तस्मादष्टाङ्गुलं भिन्दिपालफलाग्रम् ऋजु कार्य्यं पक्षभिः पक्षभिः पक्षैर्वर्द्धितया यावच्छतपत्रं श्रेष्ठं पक्षापेक्ष यतिकः उत्तमः कर्त्तव्यः अशीतिपत्रोमध्यमः षष्टिपत्रो नीचः" ।

भिन्न त्रि० भिद-क्त । १विदारिते अमरः २सङ्कीर्णे ३अन्यार्थे ४प्रस्फुटिते च मेदि० । ५रोगभेदे न० । "शक्तिकुन्तेषुखड्गाग्यविशाखैराशयो हृतः । यत्किञ्चित् पक्षवेत्तद्धि भिन्नमित्यभिधीयते" भावप्र० । आशयः कोष्ठः ।

भिन्नक पु० भिन्नं कं यस्य । बौद्धे त्रिका० । तन्मते विज्ञेयक्षणभङ्गुरत्वेन स्थायिसुखराहित्यात्तस्य तथात्वम् ।

भिन्नकूट न० कामन्द० उक्ते वस्तुव्यवहारभेदे । तत्र च वस-

व्यसनं नानाविधसङ्कं यथा "उपरङ्कं परिक्षिप्तं विमानितममानितम्। अमतं व्यथितं त्रान्तं दूरायातं नवागतम्। परिक्षीणाक्षरहितं प्रहतायत्नवं तथा। आयानिर्वेदमूर्छितमत्तप्राप्तमेव च। कलगर्भं विच्छिन्नान्तःस्थं तथैव च। भिन्नगर्भं व्यस्तसमभियुक्तं तथैव च। क्रुद्धमीक्षाविभिन्नञ्च विपिष्टाक्षि विदिशा। दूरयुक्तं व्यविच्छिन्नं भिन्नविच्छिन्नमेव च। विच्छिन्नविविधाकारं शून्यमूलं तथैव च। अक्षाभिसङ्कतञ्चापि भिन्नकूटं तथैव च। इत्यार्थियङ्गमन्यच्च वक्ष्यव्यसनसञ्चयते"। भिन्नगर्भमयत्न।

भिन्नक्रम पु० भिन्नः क्रमो यत्र। वाक्यगते व्याकरणविरुद्धरूपे भग्नप्रक्रमाख्ये काव्यदोषभेदे। [कर्कटग्रामं राजनि०

भिन्नगात्रिका स्त्री भिन्नं विदारितं गात्रमवयवो यस्याः।

भिन्नगुण्डन न० औषा० उक्ते पूरणभेदे "खंगाकृतिच्छेदवधेन भक्ता वक्रं विभिन्ने गुणने फलं स्यात्" उदा०। तत्र दृश्यम्।

भिन्नपरिकर्मन् न० औषा० उक्ते वक्ष्यदेश्ये बहुलवल्लवलवनादिरूपाङ्कसंस्कारादौ परिकर्मनृत्यभेदे दृश्यम्।

भिन्नभिन्नात्मन् पु०भिन्नप्रकारः प्रकारे द्वित्वे तादृश आत्मा यस्य। चपले (चोरा) शब्दच०।

भिन्नयोजनी स्त्री भिन्नं युज्यतेऽनया युज-करणे ल्युट् ङीप्। पाशाक्षभेदके द्यूते राजनि०। [मल्ले सुश्रुतः।

भिन्नवर्चस्(स्क) त्रि० भिन्नं वर्चो यस्य वा कप्। द्रवीभूतभिन्नविट्का स्त्री० भिन्ना विट् मलं यया।१अतीसारे सुश्रुतः। द्रव०। २द्रवीभूतमलके त्रि०। [अमरः।

भिन्नार्घ त्रि० भिन्नोऽर्धो वाच्यो यस्य कप्। अन्यपदार्थे

भिषस् न० भी-वा० असुन्। भये ऋ० १।१२।६। उदा०

भिरिण्टिका स्त्री श्वेतगुञ्जायाम् राजनि०।

भिल भेदने वा चु० उ०पक्षे तु०पर०सक०सेट्। भेलयति-ते अबीभिलत् त अभेलीत्।

भिल्ल पु० भिल-उक्। म्लेच्छजातिभेदे। (भिल) स च ब्राह्मणकन्यायां नीवराज्जातः। "पुलिन्दभेदभिल्लाश्च" इत्युपक्रमे "एते वै नीवराज्जाताः कन्यायां ब्रह्मक्षत्र च" पराशरपद्धतिः। [स्त्रियां राजनि०।

भिल्लगवी स्त्री भिल्लानां गौरिव वच् सवा०ङीष्। गवयजातौ

भिल्लतरु पु० भिल्लप्रियः तदुपजीव्यत्वात् तरुः। लोध्रे राजनि०

भिल्लभूषण न०भिल्लं भूषयति भूषि-ल्यु। गुञ्जाफले राजनि० तत्फलस्य तेषां भूषकत्वात् तस्य तथात्वम्।

भिल्लोट पु० भिल्लप्रियस्टम् पत्रं यस्य। लोध्रवृक्षे सुश्रुतः।

भिल्ली स्त्री भिल-उक् स्त्री० ङीष्। लोध्रे राजनि०।

भिष रोगप्रतीकारे स्वा०पर०सक०सेट्। भेषति अभेषीत्।

भिषक्प्रिया स्त्री ६त०। गुडूच्याम् राजनि०।

भिषग्जित न० ३त०। औषधे त्रि०।

भिषग्भद्रा स्त्री ७त०। भद्रदन्तिजायाम् राजनि०।

भिषग्माठ स्त्री भिषजां माठेव। वासवृक्षे राजनि०।

भिषज् चिकित्सायां अदा० प०सक०सेट्। भिषज्यति अभिषज्यी(ज्यौ)त्।

भिषज् पु०भिषेलक्षात् रोगः "भिषः सुक् चुक्च" उणा०अजि अदा०भिषज्-क्विप् वा। १चिकित्सके। २विष्णौ पु०। तस्य संसाररोगहारित्वात् "भीषा ह्यात् वातः पवते" इत्यादिश्रुत्या सर्वेषां भीतिजनकत्वाद्वा तथात्वम्। ततः अपत्ये गर्गा० यञ् भैषज्य वैद्यशास्त्रे स्त्रियां ङीप् यञोपः भैषजी। भिषजो भावः कर्म वा "भेषजाच्च" पा० निर्देशात् तुपः न इडिः। भेषज चिकित्सायाम् न०। ततः स्वार्थे अण्। भैषज्य न० तत्रार्थे।

भिष्णज् उप० सेवायां अदा० प०सक०सेट्। भिष्णज्यति अभिष्णजीत्।

भिस्फटा स्त्री भिद्यमानं टीकते टीक-ड पृषो०। अर्शे अमरः। पृषो०। भिग्फटा भिङ्फटा भिङ्गिकाख्ये पाठान्तरादपि।

भिक्ष स्त्री भिद्-क्विप् सो-क पृषो० दस्य षः। अर्शे अमरः

भी भये जु०पर० अक०अनिट्। बिभेति अभैषीत् बिभयाम-क्रूर आस चकार बिभाय। भीरुः भीतः। एतद्योगे "भीत्रार्थानां भयहेतुः" पा०भयहेतोरपादानता। आद्यात् भीतः।

भी भये अक० भरचे सक० क्र्यादि०वा वा० परः अनिट् भीनाति बिभार्ति। अबैभीत्।

भी स्त्री भी-क्विप्। भये अमरः।

भीणी स्त्री कुमारानुचरमातृभेदे भा०श० ४७अ०।

भीत न०भी-भावे कर्त्तरि वा क्त।१भये २तद्युते त्रि०।३मन्त्रभेदे पु० "शिवो वा शक्तिरेव वा भीताख्यः स प्रकीर्त्तितः" तन्त्रसारः

भीति स्त्री भी-क्तिन्। १भये अमरः। २कम्पे च त्रिका०।

भीम त्रि० बिभेत्यस्मात् भी-अधिकरणे मक्। १भयहेतौ २भयानकरसे अमरः। ३रुद्रदेवे ४भीमसेने ५धत्तूरे ६तरुभेदे च पु० मेदि०। ७परमेश्वरे पु० तस्य "भीषास्माद्वातः पवते" इत्यादिश्रुतेः सर्वेषां भयहेतुत्वात् तथात्वम्। रुद्रादेवत्वाच्चमूर्त्तिभेदे आकाशरूपे ७मूर्त्तिभेदे

टदेवगन्धर्वभेदे भा० आ० ६५ अ०। आङ्गिरसे वह्नि-भेदे भा० व० २१८ अ०। १०दानवभेदे भा० द्रो० २२७ अ०। ११अभावसुवंश्ये ऋषभेदे हरिवं० २७ अ०। वार्ष्णवंशे १२ऋषभेदे हरिवं० ८६अ०। १३विदर्भाधीशे ऋषभेदे दमयन्तीपितरि तत्कथा भा० व०५१अ०। १४अष्टादशाक्षरमन्त्रभेदे "आदौ मध्ये तथा चान्ते चतुरक्षरयुतो मनुः। ज्ञातव्यो भीम इत्येष यः स्मादष्टादशाक्षरः" तन्त्रसा०।

भीमक पु० पार्थिवारोभजाते नगभेदे हरिवं० १६८अ०।

भीमजानु पु० यमसभास्थे ऋषभेदे भा० स० ८अ०।

भीमतिथि स्त्री भीमोपासिता तिथिः या०त०। भीमैकादश्याम् माघशुक्लैकादश्याम्।

भीमद्वादशी स्त्री भीमोपासिता द्वादशी ।माघशुक्लद्वादश्याम् तत्र भीमसेनव्रते २व्रतभेदे च हेमा० व्र० पद्मपु०।

भीमनाद पु०ह्रस्व०। १सिंहे शब्दच०। कर्म०। २भयानकशब्दे पु०

भीमपराक्रम त्रि० भीमः पराक्रमोऽस्य। १भयानकपराक्रमे २विष्णौ पु० "भीमो भीमपराक्रमः" विष्णुस०।

भीमपुर न० ह्रस्व०। विदर्भराजस्य नगरे कुण्डिनपुरे भीम-नगरादवोऽत्र।

भीमबल त्रि० ह्रस्व०। १भयानकबीर्ये २धृतराष्ट्रपुत्रभेदे पु० भा० आ० १७ अ०। २वृक्षभेदे पु० भा० व० २१८ अ०।

भीमयु स्त्री आत्मनो भीमं इच्छति क्यच् वेदे क्विप् उनङ्। आत्मनो इच्छेच्छौ स्त्रीगव्याम् ऋ० ५।५६।२।

भीमरथ पु० १अक्षरभेदे गरुड़पु० ८६अ०। २धृतराष्ट्रपुत्रभेदे भा० आ० ६७ अ०। ३धन्वन्तरिवंश्ये ऋषभेदे हरिवं० २६ अ०। ४दशार्हवंश्ये ऋषभेदे हरिवं २७ अ०। सत्यभामायां जाते वासुदेवस्य पुत्रभेदे हरिवं १६२अ०।

भीमरथी स्त्री "सप्तसप्ततिमे वर्षे सप्तमे मासि सप्तमी। रात्रि भीमरथी नाम नराणामतिदुस्तरा" इक्ष्वाकायां १रात्रौ। "तामतीत्य नरो योऽब्धौ दिनानि यानि जीवति। क्रतु-भिस्तानि तुल्यानि सुवर्णशतदक्षिणैः। गतिः प्रदक्षिणं विष्णोर्जल्पनं मन्त्रभाषणम्। ध्यानं निद्रा क्षुधा चान्नं भीमरथ्याः फलस्तुतिः" वैद्यके। २नदीभेदे भा०व०८८अ०।

भीमरिका स्त्री सत्यभामागर्भजातायां श्रीकृष्णस्य कन्यायां हरिवं० १६२ अ०।

भीमल त्रि०भियोमलः सम्बन्धो यत्। भयङ्करे यजु०३०।६।

भीमविक्रम पु० १धृतराष्ट्रपुत्रभेदे भा०अ० १७ अ०। ह्रस्व०। २भयानकविक्रमे त्रि०।

भीमविक्रान्त पुंस्त्री ह्रस्व०। १सिंहे त्रिका० स्त्रियां जाति-त्वात् ङीष्। ह्रस्व०। २भयानकविक्रमयुते त्रि०।

भीमवेग त्रि० ह्रस्व०। १भयानकवेगयुते २धृतराष्ट्रपुत्रभेदे पु० भा०अ० ६७ अ०। ३दानवभेदे पु०हरिवं २४ अ०।

भीमवेगवत् पु० धृतराष्ट्रपुत्रभेदे भा० आ० १८६ अ०।

भीमशर पु० धृतराष्ट्रपुत्रभेदे भा० आ० ६७ अ०।

भीमशासन पु०भीमं शासनमस्य। १यमे शब्दार्थवः भयान-कशासनकर्त्तरि २ऋषौ च।

भीमसेन पु० युधिष्ठिरानुजे १मध्यमपाण्डवे २कर्पूरभेदे च शब्दरत्ना०। ३जनमेजयस्य भ्रातृभेदे भा० आ० ३अ०। ४पौरवप्राचीनजनमेजयस्य पुत्रभेदे भा०आ० ६४ अ०।

भीमहास पु० रुद्रभेदे (बुड़िरसुता) शब्दरत्ना०।

भीमा स्त्री १भीमाख्यायाम् दुर्गायाम् २रोचनाख्यगन्धद्रव्ये शब्दरत्ना० ३कथायां शब्दमाला ४नदीभेदे भा०व०२२१अ०

भीमादेवी स्त्री भीमाख्या देवी। दुर्गामूर्त्तिभेदे "पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले। रक्षांसि भक्षयिष्यामि मुनीनां त्राणकारणात्। तदा मां मुनयः सर्वे स्तोष्यन्त्यानम्रमूर्त्तयः। भीमादेवीतिविख्यातं तन्मे नाम भविष्यति" देवीभा०

भीमादि पु० "भीमादयोऽपादाने" पा० अपादाने नियामक-साध्ये शब्दगणे स च गणः पा० ग० उक्तो यथा "भीम भीष्म भयानक वाङ्क चर प्रस्खन्दन प्रपात सङ्घट्ट खुर खुङ् हटि रक्षः शङ्कु मुख मूर्ख खलति"।

भीमैकादशी स्त्री भीमेनोपासा एकादशी शाक्त० त०। माघशुक्लैकादश्याम्। तत्कर्त्तव्यव्रतादिकं भविष्यु०६५अ० उक्तम्।

भीरु त्रि०भी-क्रु। १भयशीले अमरः। २यतावर्यां स्त्री ध-रणिः। ३कण्टकार्यां ४शतपादिकायां शब्दर०। ५छायायां हेमचन्द्रः। ६व्याघ्रे राजनि० १०दृचुभेदे रत्नमा०।

भीरुक पु० भी-क्रुकन्। १व्याघ्रे २व्याधे १दृचुभेदे च। "वातपित्तप्रशमनो मधुरो रसपाकयोः। शीतो दीपनो बल्यः पौष्टिको भीरुकस्तथा" भावप्र०। ३भयशुन्ये त्रि०।

भीरुकच्छ पु० देशभेदे मार्क०पु० ५७ अ०। [अमरः

भीरुपत्री स्त्री भीरुत्वं पत्राणि यस्याः ङीष्। शतमूल्याम्

भीरुस्थान न० ह्रस्व० अन्यायेति भयम्। भीरुणां स्थाने।

भीरुहृदय पु० ह्रस्व०। १व्याघ्रे त्रिका० २भयशीलहृदये त्रि०।

भीरू स्त्री भीरु+स्त्रियामूङ्। भयशीलायां नार्यां भरतः।

भीलु(क)(लूक) त्रि०भी-क्रु। भयशीले। क्रुकन्। तत्र भवूवे पु०

शब्दरत्ना० पृथो० भीरूक तत्रार्थे भङ्गुरे शब्दमा०।

भीषक त्रि० भीषयते भी-णिच्-ण्वुल्। भयकारके हेमच०।

भीषण पु० भीषयते भी-णिच्-ल्युट् ल्यु। १भयानकरसे २कुन्दुरुके ३हिङ्गुले राजनि० ४शङ्खे ५मङ्गलदेवे शब्दरत्ना० ६कपोते च पु० ७गाढे दृढार्थे च त्रि० मेदि०।

भीषा स्त्री भी-णिच्-युक् भावे अङ्। १भयप्रदर्शने "क्षेत्रं वा भीषया हरन्" मनुः। स्वार्थे णिच्। २भये च "भीषास्माद्दातः पवते" श्रुतिः। तृतीयाबहुवचने वेदे आप्।

भीष्म न० भी-णिच्-ष्मक् अपादाने मक्। १भयानकरसे अमरः। २भयानके त्रि० ३रुद्रे ४राक्षसे पु० हेमच० ५गङ्गागर्भजाते शान्तनुपुत्रभेदे पु० गङ्गाजलशब्दे ३०७५ पृ० दृश्यम्।

भीष्मक पु० रुक्मिण्याः पितरि नृपभेदे हरिवं० ८१ अ०।

भीष्मकेश्वर पु० काशीस्थे केशवमूर्त्तिभेदे काशी० ११अ०।

भीष्मजननी स्त्री ६त०। गङ्गायाम् राजनि०। गङ्गाजलशब्दे २४८१ पृ० दृश्यम्।

भीष्मपञ्चक न०भीष्मेण प्राप्तमुपदिष्टं वा पञ्चकम्। कार्त्तिकशुक्लैकादश्यादिषु १पञ्चसु तिथिषु तत्कर्त्तव्ये २व्रतभेदे च। तल्लिङ्गं यथा "भीष्मेणैतत् पुरा प्राप्तं व्रतं पञ्च दिनात्मकम्। सकाशात् वासुदेवस्य तेनोक्तं भीष्मपञ्चकम्" इति भा०अ० नारदपु०। पश्चात् तेन च पाण्डवायोपदिष्टं यथोक्तं तत्रैव "इदं भीष्मेण धर्म्मज्ञ श्रुतवत्सगतेन च। तदेवात्र समाख्यातं दुष्करं भीष्मपञ्चकम्"। तत्कालश्च तथोक्तो यथा "कार्त्तिकस्य शुभे पक्षे स्नात्वा सम्यगयतव्रतः। एकादश्यान्तु मध्वीयात् व्रतं पञ्च दिनात्मकम्"। तत्रैव तद्विधानं दृश्यम्।

भीष्मरत्न हिमाचलोत्तरदेशजातशुक्लवर्णप्रस्तरविशेषे। तल्लक्षणपरीक्षादि यथा "श्रुत उवाच। "हिमवत्युत्तरे देशे वीर्य्यं पतितं सुरद्विषस्य। तस्मात्प्रसूतमाकरजं भीष्मरत्नानाम्। शुक्लाः शङ्खाजनिभाः श्लोनाकसन्निभाः प्रभावन्तः। प्रभवन्ति ततस्तस्मात् वज्रनिभा भीष्मपाषाणाः। स्निग्धादिप्रतिपत्रं शुद्धमपि श्रद्धया विधत्ते यः। भीष्मणि श्रीवादिषु स सम्पदं सर्वदा लभते। गुणयुक्तस्य तस्यैव धारणान्नृपुङ्गव!। विषाणि तानि नश्यन्ति सर्पाश्चैव मङ्क्षीतले। विषमा न बाधन्ते ये तमरत्ननिवासिनः मनीषेऽपि। क्षीणि दुष्करमकुरसिंहव्याघ्रादयो हिंसाः। तस्योत्कलिता क्षतिनो भवन्ति भयं न चापि सर्पपक्षितम्। भीष्मणिं धयुक्तः सम्यक् संप्राप्नोत्युत्तितयः। पित्तप्रकोपे पित्तघां तन्निर्वक्तुर्नैको भवति। शाम्यन्त्युद्भूतान्यपि सर्पोण्डलाखुदष्टविषाणि। सन्निहाग्निवैरितस्करभयानि भीमानि नश्यन्ति। सैवलवलाङ्कामं परुषं पीतप्रभं प्रभाहीनम्। मलिनद्युतिं विवर्णं दूरात् परिवर्जयेत् प्राज्ञः। मूल्यं प्रकल्प्यमेषां विबुधवरैर्दैशकालविज्ञानात्। दूरे भूतानां वक्ष्ये किञ्चित्किञ्चिकटप्रकृतानाम्" गारुडे ७६अ०। भीष्मणश्चादयोऽत्र।

भीष्मसू स्त्री भीष्मं सूते सू-क्विप्। गङ्गायाम् अमरः।

भीष्माष्टमी स्त्री ६त०। भीष्मस्य देहत्यागदिवसे माघस्य शुक्लाष्टम्याम्। अतस्तस्मिन् दिने सर्व्वपुंसस्तस्य तर्पणं कार्य्यम् यथोक्तं ति० त० भविष्योत्तरे "शुक्लाष्टम्यान्तु माघस्य दद्याद् भीष्माय यो जलम्। संवत्सरकृतं पापं तत्क्षणादेव नश्यति"। धवलष्टका स्मृतिः "अष्टम्यान्तु सिते पक्षे भीष्माय सतिलोदकम्। अर्घञ्च विधिवद्दद्युः सर्वे वर्णा द्विजातयः"। सर्वे स्त्रीपादानात् ब्राह्मणक्षत्रयोरप्यधिकारः। द्विजातय इति सम्बोधनम् "ब्राह्मणस्वन्यवर्णानां यः करोत्यौर्द्धदेहिकम्। तदर्थलभसौ याति दृढं लोके परत्र च" इति मरीचिवचनन्तु भीष्मजलेतरपरम्। तथा च स्मृतिः। "ब्राह्मणाद्यास्तु ये वर्णा दद्युर्भीष्माय नो जलम्। संवत्सरकृतं तेषां पुण्यं नश्यति सत्तम!"। अस्यर्घजलदाननिषेधस्तु प्रकरणादपि भ्रात्रादिविषय इति श्रीदत्तः। "आभिरद्भिवरारोह पुत्रपौत्रोचितां क्रियाम्" इत्यर्घमामन्त्र्य पुत्रपौत्रोचितामित्यभिधानात् पिण्डकर्म्मैरौर्द्धदेहिकं तच्च कर्त्तव्यम्। ब्राह्मणः पिण्डतर्पणानन्तरं क्षत्रियादिकस्तु तत् पूर्वं तर्पयेत् इति संवत्सरप्रदीपादयः। अत्र बीजं वर्षकृत्यशब्दे दृश्यम्। रघु०।

भुक्त त्रि० भुज-कर्म्मणि क्त। १भक्षिते २ज्ञातभोगे च भुक्तं भोज्यं रवेरयजेत्" भोज०ता०। भावे-क्त। ३भक्षणे न०

भुक्तभोग त्रि० भुक्तः ज्ञातो भोगो येन। ज्ञातभोगे "अहान्येनां भुक्तभोगामजोऽन्यः" श्वेता० उ०।

भुक्तसमुज्झित त्रि० पूर्वं भुक्तं पश्चात् समुज्झितं त्यक्तम्। भोजनोत्तरं त्यक्ते अन्नादौ।

भुक्ति स्त्री भुज-क्तिन्। १भोजने २रत्यादिपदार्थानां राज्यादिषु गमने ३भोगे च "आगमो निष्फलस्तस्य भुक्तिः स्तोकापि यत्र नो" इति स्मृतिः। भुक्तिप्रामाण्यनिर्णयादिकम् आगमशब्दे ६।१४ पृ० दृश्यम्। अत्र

कश्चिद्विशेषो वीरमित्रोदयग्रन्थे दर्शितो यथा "नारदः "आगमेन विशुद्धेन भोगो याति प्रमाण्यताम्। अविशुद्धागमो भोगः प्रामाण्यञ्चैव गच्छति। आगमस्याविशुद्धत्वं विरोध्याक्रन्दनं भवेत्"। व्यासः "आगमो दीर्घकालश्च विच्छेदापरवोज्झितः। प्रत्यर्थिसन्निधानश्च परिभोगोऽपि षड्विधा"। विच्छेदोऽन्तरायः अपरश्च आक्रोशस्ताभ्यामुज्झितो रहितः। यद्वाच्छेदो व्यवधानस्तद्विगमवान् विच्छेदो निरन्तर इति यावत्। अपरो वर्जनविग्रहोरवः। मदीयं क्षेत्रादि त्वया किमिति भुज्यते इति प्रतिषेधः अपशब्दस्य वर्जनार्थत्वात् तेनोज्झितः। नारदः "सम्भोगं केवलं यस्तु कीर्त्तयेन्नागमं क्वचित्। भोगच्छायापदेशेन विज्ञेयः स तु तस्करः"। विद्यमानेऽपि लिखिते लोक्तस्यापि हि साक्षिषु। विशेषतः स्थावराणां यत्र भुक्तं तत् स्थिरम्। दानविक्रयादेरुपभोगसापेक्षस्यैव स्वत्वोत्पादकत्वात् कियान् भोगस्तदर्थं तत्रापेक्ष्यते इत्याशङ्क्यायासेनोपपत्तिरुक्ता विज्ञानेश्वराचार्यैः। "दानादेः परस्वत्वापादने परकर्त्तृकस्वीकारापेक्षाऽवश्यम्भावनीया। स्वीकारश्च त्रिविधो मानसो वाचिकः कायिकश्च। ममेदमित्यध्यवसायो मानसः। ममेदमित्यादाभिधानं वाचिकः। उपादानाभिमर्शनादिरूपेणानेकप्रकारकः कायिकः। तत्र मानसं विना स्वत्वासम्भवात् स त्वावश्यक एव। दानविशेषपुरस्कारेण शब्दप्रयोगविशेषनियमस्तदादिर्शनादिचेष्टाविशेषनियमाच्च वाचिकक्रायिकावश्यावश्यकावित्यवसीयते। तत्र स्थिरस्वत्वादौ दातृकर्त्तृकस्वत्यागादनन्तरमेव प्रतिग्रहीतृरुपादानादिसम्भवात् त्रिविधोऽपि व्यापारः सम्पद्यते। क्षेत्रादौ तु फलोपभोगं विना कायिकस्वीकारासम्भवादल्पेनाप्युपभोगेनावश्यम्भावितव्यमन्यथा दानविक्रयादेः सम्पूर्णता न भवत्युत्तरकालीनास्वीकाराभावात्। तेन तत्सहिताऽऽगमान्तरादिकल आगमो दुर्बलो भवति। एतच्च द्वयोरागमयोः पूर्वापरभावानवगमे तदपगमे तु स्वल्पभोगविकलोऽपि प्राक्तन एवागमो बलवान्। पूर्वेण दानादिना स्वत्वागमे दानाद्यन्तरासम्भवात्। न चैवमल्पक्षेत्रादेर्भध्यस्वत्वापत्तिः पूर्वस्याभ्यापगमादुत्तरस्याभ्यासतपत्तेरिति वाच्यम्। प्रतिग्रहतन्त्रादेनापेक्षणीयस्वत्वस्य सत्त्वात् पूर्वस्याभ्यसत्त्वेऽपि रात्रौ प्रतिगृहीतक्षेत्रादेः कायिकस्वीकारस्यानिःप्रतिपक्षस्य सम्पादनीयत्वात्

भुक्तिप्रद पु० भुक्तिं भोगं भोजनं वा प्रददाति प्रद-अण् उपपदसमासः। शुद्धे राजनि० लघुपाकत्वात्तथात्वम्। [भोगे

भुक्तिसुहित त्रि० सुहितस्य भुक्तिः मयूर० परनि०। ततः प्र-

भुग्न त्रि० भुज-क्तोटने क्त। रोगादिना कुटिलीकृते।

भुज क्तोटने तु० प० सक० सनिट्। भुजति अभौक्षीत्। क्त क्तोदित् भुग्नः।

भुज भक्षणे भोगे च आ० पालने पर० सक० सधा० अनिट्। भुङ्क्ते ऽभुग्न। अभौक्षीत्। भूमिं भुनक्ति पालयति। "दिवं मरुत्वानिव भोक्ष्यते महीम्" रघुः। भुक्तः। उपसर्गपूर्वेषु तत्तदुपसर्गद्योत्ययुक्तभोगादौ। भोगश्च सुखदुःखाद्यनुभवः सुखं दुःखं वा भुङ्क्ते सुखादिकमनुभवतीत्यर्थः।

भुज त्रि० भुज+क। १भोगकर्त्तरि २कुटिलीभूते च।

भुज पुंस्त्री० भुज्यतेऽनेन भुज-घञर्थे करणे क। १बाहौ २करे मेदि०। लीलावत्यादौ त्रिकोणचतुष्कोणादिक्षेत्रप्रविष्टे क्षेत्रांशभेदे "तथायते तद्भुजकोटिघातः" इति लीलावती। क्षेत्रशब्दे दृश्यम्।

भुजकोटर पु० भुजस्य कोटर इव। कक्षदेशे (काँख) हेमच०

भुजग पुंस्त्री० भुजं-वक्रगतिं कं भुजः कुटिलीभवन् सन् गच्छति गम-ड। १सर्पे अमरः स्त्रियां ङीष्। २कञ्चुकिनि तत्रे ज्यो० त०। तस्य तद्देवताकत्वात् तथात्वम्। कञ्चुकिशब्दे दृश्यम्।

भुजगदारण पु० भुजगं दारयति दारि-ल्यु। गरुडे त्रिका०

भुजगनिसृता स्त्री "भुजगनिसृता नसौ म" इ० र० उक्ते नवाक्षरपादके छन्दोभेदे। [राजनि०

भुजगान्तक पु० ६त०। गरुडे। भुजगनाशनादयोऽप्यत्र।

भुजगभोजिन् पु० भुजगं भुङ्क्ते भुज-णिनि। मयूरे राजनि० स्त्रियां ङीप्। [त्रिका० भुजगमक्षकादयोऽप्यत्र।

भुजगाशन पु० भुजगान् अश्नाति अश-ल्यु। गरुडे

भुजङ्ग पुंस्त्री० भुजः सन् गच्छति गम-खच् मुम् डित्व। १सर्पे स्त्रियां ङीष् २जारे च पु० अमरः। ३कञ्चुकिनि तत्रे पु० ज्यो० त०

भुजङ्गघातिनी स्त्री ६त०। भुजङ्गं तद्दिवं हन्ति-हन णिनि ङीप्। सर्पाञ्जीवतायाम् राजनि०।

भुजङ्गजिह्वा स्त्री ६त०। १सर्पजिह्वायां ३त०। २तदाकारवृतायां मङ्गलमङ्गायाम् राजनि०।

भुजङ्गदमनी स्त्री भुजङ्गो दम्यतेऽनया दम-करणे ल्युट् गौरा० ङीष्। नकुलेष्टायाम् नैघण्टुप्र०

भुजङ्गपर्णिनी भुजङ्गस्तदाकार इव पर्णानि अस्या यस्याः

दनि ङीप्। नागदमन्यां नैघण्टुप्रकाशिकायाम्।

भुजङ्गपुष्प पु० भुजङ्ग इव पुष्पमस्य। चम्पकभेदे हेमच०।

भुजङ्गप्रयात न० "भुजङ्गप्रयातं भवेद्यैर्यतौ चतुर्भिः" छन्दो० उक्ते द्वादशाक्षरपादके छन्दोभेदे।

भुजङ्गभुज् पु० भुजङ्गं भुङ्क्ते भुज-क्विप् ६त०। १गरुडे शब्दर० २मयूरे अमरः।

भुजङ्गभोजिन् पु० भुजङ्गं भुङ्क्ते भुज-णिनि ६त०। राजसर्षपे हेमच०। २गरुडे ३मयूरे च।

भुजङ्गम पुंक्ली० भुजः कुटिलीभवन् गच्छति गम-खच् मुम्। १सर्पे अमरः स्त्रियां जातित्वात् ङीष्। २वीरवृक्षे न० राजनि०। ३अक्षे पानपात्रे पु०। [ताम्बूल्यां राजनि०।

भुजङ्गलता स्त्री भुजङ्ग इव कुटिला लतेवोत्क्षा वा लता।

भुजङ्गविजृम्भित न० "वक्षोबाह्वक्षदोषेतं ममतनयुगवर-सलगेभुजङ्गविजृम्भितम्" छन्दो० उक्ते सप्तदशाक्षरपादके १छन्दोभेदे। ६त०। २सर्पचेष्टिते च।

भुजङ्गहन् पु० भुजङ्गं हन्ति हन-क्विप्। गरुडे त्रिका०।

भुजङ्गाक्षी स्त्री भुजङ्गस्येवाक्षि पुष्पं यस्याः ङीप्। राज्ञायाम् अमरः। [वन्द्रमा०

भुजङ्गाख्य पु० भुजङ्गतुल्या आख्या यस्य। नागकेसरे।

भुजङ्गेश पु० ६त०। १वासुकौ २शेषे तदवतारे शिवकल्पितौ ४पतञ्जलिभेदौ च भुजङ्गमेशादयोऽत्र।

भुजज्या स्त्री ष०वि०उक्षायाम् त्रिकोणक्षेत्रस्थ भुजजीवायाम् "यद्धं संशोध्य मन्दोच्चात् तया शीघ्रादिशोध्य च। शेषं केन्द्रपदं तच्चाभुजज्या कोटिरेव च" सू०सि०। "यद्धं राश्यादिकं मन्दोच्चात् प्रागानीतस्वकीयराश्यादिकमन्दोच्चभोगात् संशोध्यौनीकृत्य शीघ्रात् प्रागानीत राश्यादिशीघ्रोच्चात्। यः शुद्धशेषे। अनीकृत्य शेषं राश्यादिकं तयोच्चसम्बन्धेन केन्द्रं मन्दोच्चाद्यौनो यद्धो मन्दकेन्द्रम्। शीघ्रोच्चाद्यौनो यद्धः शीघ्रकेन्द्रं भवतीत्यर्थः। तच्चात् केन्द्रात् पदं राशिलवात्मकं विषमं समं च पदं ज्ञेयम्। त्रिराश्यन्तर्गतं चेत् प्रथमं विषमं पदम्। ततः षड्राश्यन्तर्गतं चेत् त्रयूनं केन्द्रं द्वितीयं समं पदम्। ततो नवराश्यन्तर्गतं चेत् षड्ऊनं तृतीयं विषमं पदम्। ततो नवोनं चतुर्थं पदं सममित्यर्थः। तच्चात् पदाद्भुजज्या कोटिः कोटिज्या च" रङ्ग०। तदानयनं यथा "गताङ्गभुजज्या विषमे गम्यात् कोटिः पदे भवेत्। युग्मे तु गम्याद्द्युज्या कोटिज्या तु गताद्भवेत्" सू०सि०। "विषमे पदे गताद्भुपक्रम पदादितो यद्गतं राशिविभागाद्यत्कं भागात्मकं भाग्यातं तच्चादित्यर्थः। भुजज्या स्यात्। गम्याद्द्युतोनं त्रिभं यद्यात् पादान्तावधिकमेष्यम्। तच्चात् कोटिः कोटिज्या स्यात्। युग्मे समे तु कारात् पदे एवंप्रकारभुजज्या गतात् कोटिज्या स्यात्। तुकारो विशेषद्योतकः। एवमादेवोक्तरीत्या इयं साधितम्" रङ्ग०।

भुजफल न० "खेनाहते परिधिना भुजकोटिजीवे भांशैः १६० हृते च भुजकोटिफलाख्ये स्तः" सि०शि० उक्ते भुजेनानीते फलभेदे

भुजमध्य न० ६त०। भुजान्तरे क्रोडे हेमा०।

भुजशिखर पु० ६त०। स्कन्धे हेम०।

भुजशिरस् न० ६त०। स्कन्धदेशे अमरः।

भुजाग्र पु० ६त०। करे हेमा०।

भुजादल पु० भुजाया बाहोर्दल इव। करे हस्ते त्रिका०।

भुजान्तर न० ६त०। भुजयोरन्तरं मध्यम्। क्रोडे अमरः इत्तक्षेत्रजबाह्वोर्विक्षेपरूपे गणितागते पदार्धे यथोक्तं सि०शि० "भानोः फलं गणितसकंयुतस्य राशेर्व्यशीतिवधेन खखनागभक्ते १८०० विभक्तम्। लब्धा यथस्य धृतिदं द्युनिशा विभक्तं खर्णं यदेऽर्कवदिदं तु भुजान्तराख्यम्"।

भुजि पु० भुज-धातुनिर्देशे रक्। भुजधातौ भुज-कर्तरि क्विप्। २वह्नौ उणादि० तस्य सर्वभक्षकत्वात् तथात्वम्।

भुजिङ्ग पु० देशभेदे भा० भी० ६अ०।

भुजिष्य पु० भुज-किष्यन्। १दासे २रोगे शब्दरत्ने ४वृक्षे खले च। ५दास्यां ङ्योप्राप्तौ स्त्री मेदि०।

भुज्यु पु० भुज-युच् न अनादेशः। १भोजने उज्ज्वल०। २भोजने लक्षा०। ३अग्नौ संज्ञिप्र० ४वह्ने यजु०१८।४२ वेददी०"यद्यो हि सर्वाणि भूतानि प्राणयतीति" श्रुतेः सर्वलोकपालकत्वात्तस्य तथात्वम्।

भुड भरणे करणे च भ्वा० आ० सक० सेट् उदित्। भुण्डते अभुण्डिष्ट बुभुण्डे कर्मणि भुण्ड्यते।

भुण्डिक पु० गोत्रावयवभेदे तत्रापत्यम् ततः इञ्। औण्डिकि तदपत्ये पुंस्त्री०स्त्रियां फक्। औण्डिक्या तद्गोत्रावयवास्त्रियाम् वि० कौ०।

भुण्यु पु०१पौरवे भरतपुत्रे नृपभेदे भा०आ०१३अ०। २तद्वंश्ये प्राचीनभरतवृत्तभेदे भा० आ० ६४अ०।

भुरज भ्राष्टौ भ्वा०चु० सक०सेट्। भुरजते "भुरज्ञन् यज्ञाः" ऋ० ४।४२।५। अयं धातुः धातुपाठादौ न दृश्यते।

भुरण धारणपोषणयोः जुहो० यक् आ०सक० सेट्। भुरण्यति ऋभुरण्वी(णी)त् अयं गतौ निघण्टुः।

भुरण्यु न० भृ-अतौ कन्यु । १भरणे यजु० १८।५२ १२।४२ वेददीपे कण्ड्वा०भुरण्य-उनृ दलुक्तम् । २क्षिप्रे निघण्टुः शतृहति त्रि० ।

भुरिज् स्त्री "भञ्ज उञ्छे" उणा० भृ-इजि किच्च धातोरुकारादेशः । वस्त्रस्वरायाम् भुज्ज्वल० । २बाहोः हि०व० निघण्टुः । [व० १७ ब० ।

भुरुण्ड पु० १प्रवरर्षिभेदे प्रवराध्यायः भारद्वाजगे भा०

भुर्व अदने भ्वा०सक०सेट् । भूर्वति अभूर्वीत् "भुर्वतिरत्तिकर्मा" इति यास्कोक्तेः अयं तत्रार्थे धातुर्बोध्यः ।

भुर्वणि पु० भुर्व-अनि न दीर्घः । १कर्त्तरि । भट० १।५६।१।

भुव पु० भवन्तीति भू-क । अम्भो यजु० १२।५४ । वेददी० २भुवोलोके च "तत्रेदं भूर्भुवादिकम्" स्मृ०सि० ।

भुवद्वत् पु० भू-शद मत्वर्थत्वासे तुदा० । भुवनं धारयन् वक्ष्यस्य मतुप् मस्य वः तान्तत्वेऽपि "भुवद्भ्रे धारयद्वद्भ्रुः पदसंज्ञा वक्तव्या" वार्ति० उक्तेः पदत्वम् । धारकवति ऋादिके ऋा०ओ० ४।२।५

भुवन न०भवत्यत्र भू-आधारादौ क्युन् । १जगति २जले ३स्वाकाशे ४चतुर्दशसंख्यायाम् । ५जले च मेदि० । भुवनानि च चतुर्दश यथा "चतुर्दशविधं ह्येतद्भूतसर्गं प्रकीर्त्तितम् । भूर्भुवःस्वर्महश्चैव जनश्च तप एव च । सत्यलोकश्च सप्तैते लोकास्तु परिकीर्त्तिताः" "अतलं सुतलश्चैव वितलश्च तथैव च । महातलं रसातलं पातालं सप्तमं स्मृतम् । कृष्णौर्वं शिलाभौमं पातालं नीलसन्निभम् । रक्तपीतश्वेतवर्णभौमानि च भवन्त्यपि । पातालानान्तु सप्तानां लोकानान्तु यदन्तरम् । शुषिरं तानि कथ्यन्ते भुवनानि चतुर्दश" वह्निपु० ।

भुवनकोष पु० भुवनस्य कोष इव । १भूगोले २ज्योतिषग्रन्थभेदे च । पुराणसर्वस्वे विष्णुपु० तद्वर्णने यथा "रविचन्द्रमसोर्यावन्मयूखैरवभास्यते । तावदूर्ध्वपरिक्षेत्रा तावती पृथिवी स्मृता । यावत्प्रमाणा पृथिवी विस्तारपरिमण्डला । नभस्तावत्प्रमाणं वै विस्तारपरिमण्डलम् । भूमेर्योजनलक्षे तु सौरं मैत्रेय ! मण्डलम् । लक्षे दिवाकरात्पि मण्डलं शशिनः स्मृतम् । पूर्णं शतसहस्रे तु योजनानां निशाकरात् । नक्षत्र मण्डलं तस्मात्सहस्रपरिहात् प्रकाशते । द्विलक्षे पोत्तरे ब्रह्मन् ! बुधो नक्षत्रमण्डलात् । तावत्प्रमाणभावे तु बुधाच्छुक्रो स्थितः । अङ्गारकोऽपि शुक्रस्य तत्प्रमाणे व्यवस्थितः । लक्षद्वयेन सौम्यस्य स्थितो देव पुरोहितः । सौरिर्द्विलक्षतेवोर्द्ध्वं द्विलक्षे समवस्थितः । सप्तर्षिमण्डलं तस्मात्तस्मान्मैत्र द्विजोत्तम ! । ऋक्षमध्यस्तु सप्तर्षयो शतादूर्द्ध्वं व्यवस्थितः । मेघीभूतसमस्तस्य ज्योतिश्चक्रस्य वै ध्रुवः । त्रैलोक्यमेतत् कथितस्तुषेण महात्मने !। रज्ज्वाकृतस्य भूरेषा दृष्ट्वा चात्र प्रतिष्ठिता । ध्रुवादूर्द्ध्वं महर्लोको यत्र ते कल्पवासिनः । एका योजनकोटी तु महर्लोको विधीयते । द्वे कोट्यौ तु जनो लोको यत्र ते ब्रह्मणः सुताः । सनन्दनाद्याः कथिता मैत्रेयामलचेतसः । चतसृभिस्तरे चोर्द्ध्वं जनलोकात्तपः स्मृतः । वैराजा यत्र ते देवाः स्थिता दाहविवर्जिताः । षड्गुणेन तपोलोकात् सत्यलोको विराजते । अपुनर्मारकावत्र ब्रह्मलोको हि स स्मृतः । पादगम्यन्तु यत् किञ्चिदस्त्यस्मिन् पृथिवीमयम् । स भूर्लोकः समाख्यातो विस्तारोऽस्य मयोदितः । भूमिसूर्यान्तरं यत्तु सिद्धादिमुनिसेवितम् । भुवर्लोकस्तु सोऽभ्युक्तो द्वितीयोमुनिसत्तम ! । ध्रुवसूर्यान्तरं यत् तु नियुतानि चतुर्दश । सर्लोकः सोऽपि कथितो लोकसंस्थानचिन्तकैः । त्रैलोक्यमेतत् कथितं मैत्रेय ! परिपठ्यते । जनस्तपस्तथा सत्यमिति चाप्तकं त्रयम् । कृतकाकृतकोमध्ये महर्लोकं स्मृतिः । न्यूनो भवति कल्पान्ते योऽत्यन्तं न विनश्यति । एते सप्तमया लोका मैत्रेय ! कथितास्तव । पातालानि च सप्तैव ब्रह्माण्डस्यैव विस्तरः । एतदण्डकटाहेन तिर्यक् ऊर्ध्वमधस्तथा । कपित्थस्य यथा बीजं सर्वतो वै समावृतम् । दशोत्तरेण पयसा मैत्रेयाण्डन्तु तद्वृतम् । सर्वोऽम्बुपरिवारोऽसौ वह्निना वेष्टितो बहिः । वह्निश्च वायुना, वायुर्मैत्रेय ! नभसावृतः । भूतादिना नभः सोऽपि महता परिवारितः । दशोत्तराण्यशेषाणि मैत्रेयैतानि सप्त वै । महान्तन्तु समावृत्य प्रधानं समवस्थितम् । अनन्तस्य न तस्यान्तः संख्यानं वापि विद्यते । भाग० ५।१६।१८ स्क० विस्तरो दृश्यः ।

भुवनेश्वरी स्त्री ६त० । महाविद्यायाम् देवीमूर्त्तिभेदे तन्मन्त्रध्यानादिकं तन्त्रसा० दृश्यम् ।

भुवन्ति पु० भुवं तनोति तन वा० डि किच्च सुम् । रुद्रभेदे यजु० १६।१८ । [२यक्षे ४चन्द्रे च मेदि० ।

भुवन्यु पु० भू-कन्युच् । १स्वामिनि २सूर्ये च उज्ज्वल० ।

भुवपति पु० ६त० । भुवोलोकपतौ यजु०२।२ । भुवमन्त्रादवोऽत्र ।

भुवर् अव्य० भू-असुन् किच्च । आकाशात्मके १द्वितीये लोके भुवनकोशशब्दे विष्णुपु०शब्दं दृश्यम् । २व्याहृतिभेदे च भुवर्लोक पु० कर्म० । द्वितीये लोके ।

भुवस् अव्य० भू-असुन् किच्च । १आकाशात्मके द्वितीये लोके २व्याहृतिभेदे भुवः शब्दे ।

भुवस्यति पु० कर्म० भुवो लोकस्वामिनि अथर्व० १० ५

भुविष्ठ त्रि०भुवि तिष्ठति स्था-क अलुक्स० षत्वम् । भूमिस्थिते भाग० ६।५।१७ ।

भुविस् पु० भू-इसिन् किच्च । सप्तर्षे उज्ज्वल० ।

भुशुण्डी स्त्री पाषाणक्षेपणार्थे चर्ममयवस्त्ररूपे अस्त्रभेदे "भुशुण्डीयुतबाहवः" भा० आ० २२७ अ० नीलकण्ठः

भू प्राप्तौ चु० आ० सक० सेट् । भावयते अभीभवत ।

भू प्राप्तौ भ्वा०उ०सक०सेट् । भवति-ते अभूत् अभविष्ट ।

भू गतौ अक० चिन्तने मिश्रणे च सक० चुरा० उभ० सेट् । भावयति-ते अभीभवत्-त ।

भू सत्तायां भ्वा०पर०अक०सेट्। भवति अभूत् बभूव । "भवते दुरितक्षयं यशोभिः क्रतुभिर्भावयते च नाकलोकम्। भवति त्रिदशैश्च पूजितो यस्तृणवद्भावयति द्विषश्च सर्वान्" कविरः

अधि-आधिक्येन भवने ऐश्वर्ये ।

अनु-अनुभवे ज्ञानभेदे सक० अनुभवशब्दे दृश्यम् ।

अन्तर्+तिरोभावे अक० ।

अभि+तिरस्कारे सक० । अभिभवति अभूत् ।

आविस्+प्रादुस्+प्रथमप्रकाशे ।

उद्-उत्पत्तौ अक० ।

तिरस् अन्तर्धाने स्थितस्य वस्तुनः दारणात्तदवस्थाने अक०

परा+अवज्ञने पराभवः ।

परि+तिरस्कारे परिभवति अतिक्रम्य भवने ।

प्रति+तुल्यरूपभवने अक० प्रतिभूः ।

वि+व्याप्तौ विभुः । [बोपदेवः

वि+अति-परस्परभवने व्याप्ते सक० व्यभिभवतेऽर्कमिन्दुः ।

सम्+ऐक्यत्वे अक० । सम्भाति सम्+भू-णिच् सम्भावनारूपज्ञानविषयत्वे सम्भाव्यते ।

भ स्त्री भू-आधारे कर्त्तरि घञादाने वा यथायथम् क्विप् । १भूमौ अमरः २स्थानमात्रे मेदि० ३यज्ञाग्नौ पु० जटा० ४उत्पद्यमाने त्रि० ५परमेश्वरे पु० "अनिर्विण्णः स्थविष्ठो भूः" विष्णुस० ।

भूक न० भू-कक् । १छिद्रे २काले मेदि० ।

भूकदम्ब पु० भुवि कदम्ब इव । (कोकसिमा) १अकदम्बप्रदेशे रत्नमा० २गोरजतखण्डयोः स्त्री नैघण्टुप्र० । संज्ञायां कन् । भूकदम्बक । यवान्यां राजनि० । [राजनि०

भूकन्द पु० भुवः कन्द इव । (भुइकुड़ि) महाश्रावणिकाद्रव्ये

भूकम्प पु० इत० । लोकानामनिष्टादिसूचके अद्भुतरूपे पृथिव्याः स्वयंचलने । तस्य शुभाशुभसूचकता अद्भुतसागरे उक्ता यथा "मेघे दक्षिणभे गजः प्रचलति व्याघादिभिः कथ्यते चापे मीनकुलीरभे च दृषभे सत्यं चलेत् कच्छपः । यूके कुम्भधरे सहेन्द्रमिथुने कन्याहृगे पन्नगस्तोमैकतमो यदि प्रचलति क्षौणी तदा कम्पते । कच्छपे मरणं क्षेत्र मरणञ्चापि पन्नगे । सर्वत्र सुखदश्चैव पृथिव्यां चलिते गजे । प्रचितनरेश्वर मरणं व्यसनान्यग्नेयमारुतयोः । क्षुद्भयमतिदृष्टिमिरुपप्लवाश्च जनाश्चापि । त्रिचतुर्थपञ्चदिने मासे पक्षे त्रिपक्षके । भवति यदा भूकम्पः प्रधानन्नृपनाशनं कुरुते" । स च भूमिजोत्पातविशेषः यथा "चरस्थिरभवं भौमं भूकम्पमपि भूमिजम् । जलाशयानां वैकृत्यं भौमलक्षणमपि कीर्तयेत् । भौमं चाद्यं फलं क्षेत्रं चिरेण परिपच्यते" ज्यो०त० ।

भूकर्बुदारक पु० भूमेर्बो राजनि० ।

भूकल पुंस्त्री० इर्विनीताख्ये राजनि० ।

भूकश्यप पु० भूमिजातः कश्यपस्तदाख्यः । वसुदेवे त्रिका० कश्यपश्च वसुदेवरूपेणावतारकथा च हरिवं० ५६ अ० । "तदस्य कश्यपस्यांशस्तेजसा कश्यपोपमः । वसुदेव इति ख्यातो गोषु तिष्ठति भूतले" ।

भूकाक पु० भुवि ख्यातः काकः । १क्षुद्रकाके २कौञ्चे ३नीलकपोते च राजनि० ।

भूकुक्षी स्त्री भुवि कुक्षीव । भूमिपार्श्वौ राजनि० ।

भूकुष्माण्डी स्त्री भुवि कुष्माण्डीव । वदर्याम् राजनि०

भूकेश पु० भुवः पृथिव्याः केश इव । १वटे २शैवले च मेदि० ३राक्षस्यां स्त्री शब्दरत्ना० ङीष् ।

भूक्षित् पु० भुवं क्षिणोति क्षिद-क्विप् । भूचरे त्रिका० ।

भूखर्जूरी स्त्री भुवि लग्ना खर्जूरी शाक०त० । क्षुद्रखर्जूर्याम् राजनि० । भूमिखर्जूर्योरुभयत्र ।

भूगर् न०१विष्णे राजनि० २भवभूतिकवौ पु० त्रिका० [विष्णुस०

भूगर्भ पु०भूमेर्भ इव । विष्णौ पु० "हिरण्यगर्भो भूगर्भः"

भूगृह न० भूमध्यस्थं गृहम् । १भूमध्यस्थे गृहे धरणीखननादयोऽत्र । २तन्नीते वस्त्रवस्तिस्थे रेखाभविशेषात्मके पदार्थे "धरणीखननस्थञ्च" श्रीवल्लोहारः ।

भूगोल पु० भूर्गोल इव। गोलाकारे मण्डले "मध्ये समन्तादण्डस्य भूगोलो व्योम्नि तिष्ठति। विश्वाधः परमां शक्तिं ब्रह्मणो धारयात्मिकाम्" सू०सि०।
तत्स्थानभेदस्तन्मानादिकं च सि० शि० उक्तं यथा
"मेरोः पितृकः शशाङ्कसविरविकुजेज्यार्किनक्षत्रकक्षा-
दर्क्षेन्द्वोर्दूतो हतः सनू रुदनिलसलिलव्योमतेजोमयोऽयम्।
नान्याधारः स्वशक्त्यैव वियति नियतं तिष्ठतीहास्य पृष्ठे
निष्ठं विश्वं च शश्वत् सदनुजमनुजादित्यदैत्यं समन्तात्। सर्वतः पर्वतारामग्रामचैत्यचयैचितः। कद-
म्बकुसुमग्रन्थिः केसरप्रसरैरिव। भूतौ धत्तां चेद्धरि-
त्र्यास्ततोऽन्यस्तस्याप्यन्योऽस्त्वेवमानन्त्यता। अन्ये
कल्पना चेत् स्वशक्तिः किमाद्यो किं नो भूमेः साप्तमूर्तेश्च
मूर्त्तिः?। यथोष्णताऽर्कानलयोश्च, शीतता विधौ, द्रुतिः
के, कठिनत्वमक्ष्मनि। मरुच्चलो भूरचला स्वभावतो
यतो विचित्रा वत वस्तुशक्तयः। आकृष्टिशक्तिश्च मही-
तया यत् स्वस्थं गुरु स्वाभिमुखं स्वशक्त्या। आक-
ष्यते तत् पततीव भाति समे समन्तात् क पतत्वियं खे।
अपक्षरस्य समन्तावलोकादाधारशून्या कुरिति प्रतीतिः।
स्वस्थं न दृष्टं च गुरु क्षमातः खेऽधः प्रयातीति
वदन्ति बौद्धाः। द्वौ द्वौ रवीन्दू भगणौ च तद्वदेका-
न्तरौ तावुदयं व्रजेताम्। यदभ्युच्चैर्वमनम्बरादा-
ब्रुवीष्यतस्तान् प्रति युक्तयुक्तम्। भूः खेऽधः खलु
यातीति वृद्धिर्बौद्धीयधा कथम्। यातायातं त इहापि
खे यत् क्षिप्तं गुरु क्षितिम्। किं गच्छत्तं तव वैगुण्यं
वैगुण्यं वा तया कथा। भार्केन्दूनां विलोक्याङ्गा
ध्रुवमतस्तत्परिभ्रमम्। यदि समा सकृरोदरसन्निभा
भगवती धरणी तरणिः क्षितेः। उपरिदूरगतोऽपि
परिभ्रमन् किल नरैरमरैरिव नेक्ष्यते। यदि
निशाजनकः कनकाचलः किल तदन्तरगः सन दृश्यते।
रुदगयं नतु मेरुरयांशुमान् कथमुदेति च दक्षिण
भागके। समो यतः स्यात् परिधेः शतांशः पृथ्वी च
पृथ्वी, नितरां तनीयान्। नरत्व, तत्पृष्ठगतस्य
तस्या समेव तस्य प्रतिभात्यतः सा। पुरान्तरं चेदि-
दमुत्तरं स्यात् तदवन्तिसंस्थैस्तदा किम्। चक्रां-
शकैरित्यनुपातयुक्त्या युक्तं निरुक्तं परिधेः प्रमाणम्।
निरक्षदेशाद् क्षितिगोऽग्रगे भवेदवन्ती गणितेन य-
स्मात्। तदन्तरं षोड्शसंगुणं स्याद् भूमानमस्माद् वद
किं तदुक्तम्। रुद्रोन्नतिघ्नद्युतिघ्नोदयाक्षका-
र्यादिकं परिधिना घटतेऽमुना हि। नान्येन तेन जगु-
रुक्तमहीप्रमाणप्रामाण्यप्रमन्यवयुजा व्यतिरेकवेद्य। लङ्का
कुमध्ये यमकोटिरस्याः प्राक्, पश्चिमे रोमकपत्तनं च।
अधस्ततः सिद्धपुरं सुमेरुः सौम्येऽथ याम्ये बडवानलश्च।
कुवृत्तपादान्तरितानि तानि स्थानानि षड् गोलविदो
वदन्ति। वसन्ति मेरौ सुरसिद्धसङ्घा और्वे च सर्वे नरकाः
सदैत्याः। यो यत्र तिष्ठत्यवनौ तलस्था माक्षानमस्या
उपरिस्थितं च। स मन्यतेऽतः कुरुहर्यधस्थास्तिर्यग्गिवामनन्ति। अधःशिरस्काः कुदलान्तरस्थाश्छाया-
वहुत्वा इव मीरतीरे। अनाकुलास्तिर्यगधःस्थिताश्च
तिष्ठन्ति ते तत्र वयं यथात्र। भूमेरधं खारसिन्धो
रुदक्स्थं जम्बूद्वीपं प्राङ्मुखाचार्यवर्याः। स्वर्धेऽन्य-
स्मिन् द्वीपषट्कस्य याम्ये क्षारक्षीराद्यम्बुधीनां नि-
वेशः। लवणजलधिरादौ दुग्धसिन्धुश्च तस्मादमृतमहृत-
रश्मिः श्रीश्च यस्माद्बभूव। महितचरणपद्मः पद्म-
जन्मादिदेवैर्वसति सकलवासो वासुदेवश्च यत्र। दध्नो
हतश्चेक्षुरसस्य तस्माद्यस्य च स्वादुजलस्य चान्त्यः।
स्वादूदकान्तर्बडवानलोऽसौ पातालशोकाः पृथिवीपु-
टानि। चक्षुत्कषायामिलषांशुलतप्रकाशा एतेषु
साहसगणाः फणिनो वसन्ति। दिव्यानि दिव्यरमणी
रमणीयदेहैः सिद्धाश्च तत्र च सपत्नकनागवासैः।
याम्यं ततः शाल्मलमत्र कौशं क्रौञ्चं च गोमेदकपु-
ष्करे च। द्वयोर्द्वयोरन्तरमेकमेकं सप्तद्वयोर्द्वीपसदाह-
रन्ति। लङ्कादेशाद्रिमगिरिरुदग्धेमकूटोऽथ तस्मात्
तस्माच्चान्यो निषध इति ते सिन्धुपर्यन्तदैर्घ्याः। एवं
सिद्धादुदगपि पुराच्छृङ्गवच्छृङ्गशीर्षा वर्षाण्यत्रैषां जगुरिह
बुधा यत्तरे द्वीपिदेशान्। भारतवर्षमिदं स्मृदग-
स्मात् किंपुरुषवर्षमतो हरिवर्षम्। सिद्धपुराच्च तथा कुरु
तस्मात् विद्धि हिरण्मयरम्यकवर्षे। माल्यवांश्च यम-
कोटिपत्तनाद्रोमकाच्च किल गन्धमादनः। नीलश्वेतनि-
षधावधी च तावन्नाराचमनयोरिलावृतम्। माल्यव-
च्चलधिमध्यवर्त्ति यत् तत् तु भद्रतरगं जगुर्बुधाः।
गन्धर्वजलराशिमध्यगं केतुमालकलिलाकृतिविदः।
निषधनीलसुगन्धसमाल्यकैरचलिलावृतमावृतमावभौ। क-
मरकेलिकुलायसमाकुलं रुचिरकाञ्चनचित्रमहीतलम्।
दृश्य हि मेरुगिरिः किल मध्यगः कनकरत्नमयश्चि-
दशालयः। दृष्टिपथजन्मकृपञ्चकर्क्षिकेति च पुराण-
विदोऽस्तमवर्णयन्। विष्कम्भशैलाः खलु मन्दरोऽस्त्र

सुगन्धयश्चो विपुलः सुपार्श्वः । तेषु क्रमात् सन्ति च केतुवृक्षाः कदम्बजम्बूवटपिप्पलाख्याः । जम्बूफलाम-लसद्रसतः प्रवृत्ता जम्बूनदी रसयुता सदभूत् सुवर्णम् । जाम्बूनदं हि तदतः सुरसिद्धसङ्घाः यत्पत् पिबन्त्य-मृतपानपराङ्मुखास्ताम् । वनं तथा चैत्ररथं विचित्रं तेष्वप्सरोनन्दननन्दनं च । वृक्षाह्वयं यद्वृति-वृतं सुराणां भ्राजिष्णु वैद्याजमिति प्रसिद्धम् । सरांस्यथैतेष्वरुणं च मानसं महाह्रदं शैतजलं यथा-क्रमम् । सरःसु रामारमणश्रमार्तास्ता सुरा रमन्ते ज-लकेलिलालसाः । सदूर्ध्वकाञ्चनमयं शिखरत्रयं च मेरो सुरारिकपुरारिपुराणि तेषु । तेषामधः शतमखव्रज-मानवानां रक्षोऽम्बुपानिलयशीघपुराणि चाष्टौ । विष्णुपदी विष्णुपदात् पतिता मेरौ चतुर्धाऽऽप्तात् । विष्कम्भाचलमस्तकस्थसरःसङ्गता गता वियता । सी-ताख्या भद्राश्वं, मालवनन्दा च भारतं वर्षम् । व-क्षुश्च केतुमालं, भद्राख्या चोत्तरान् कुरून् याता । याऽऽर्षितामिलषिता दृष्टा स्पृष्टावगाहिता पीता । उक्ता स्मृता स्तुता वा पुनाति बहुधा पापिनः पुरुषान्। वां चलितो दलितांखिलबन्धो गच्छति बलगति तत् पितृसङ्घः । प्राप्तटे विलितान्नकटुतो याति नरे निरयात् सुरलोकम् । ऐन्द्रं कशेरुफलं किल ताम्र-पर्णेमन्दुगभस्तिमदतश्च कुमारिकाख्यम् । नाम च सौ-म्यमिह वारुणमन्यखण्डं गान्धर्वसंज्ञमिति भारतवर्ष-मध्ये । वर्षाण्यवस्थितिरिहैव कुमारिकाख्ये येषेषु चान्यज-नता निवसन्ति सर्वे । माङ्गेन्द्रशुक्लिमलयर्क्षकपारिवात्राः सह्यश्च विन्ध्य इह सप्त कुलाचलाख्याः । भूर्लोकाख्यो द-क्षिणे व्यवस्थात् तस्मात् सौम्योऽयं भुवः, खग मेरुः । लभ्यः पुण्यैः खे मेरुः स्वाज्जनोऽतोऽनल्पानन्दैः खे-चरैः सत्यमन्यः । ब्रह्मपुरेऽर्कस्य यदोदयः स्यात् तदा दिनार्धं यमकोटिपुर्याम् । अधस्तदा सिद्धपुरेऽस्त-कालः स्याद्रोमके रात्रिदलं तदैव । यत्रोदितोऽर्कः किल तत्र पूर्वा, तत्रापरा यत्र गतः प्रतिष्ठाम् । तस्मात्-स्वतोऽन्ये च ततोऽखिलाशादृक्स्थितो मेरुरिति प्रसिद्धम् । यद्योज्जयिन्याः कुचतुर्थभागे प्राच्यां दिशि स्याद्यमकोटिरेव । ततश्च प्रस्थान्न भवेदवन्ती लङ्कैव तस्याः ककुभि प्रतीच्याम् । तथैव सर्वत्र यतो हि यत् स्यात् प्राच्यां ततस्तन्न भवेत् प्रतीच्याम् । निरक्षदे-शादितरत्र तस्मात् प्राचीप्रतीच्यौ च विचित्रसंस्थे । निरक्षदेशे क्षितिमण्डलोपगौ ध्रुवौ नरः पश्यति दक्षि-णोत्तरौ । तदाश्रितं खे जलयन्त्रवत् तथा भ्रमद्भचक्रं निजमस्तकोपरि । उदग्दिशं याति यथा यथा नर-स्तथा तथा स्वात्तमहस्तमण्डलम् । उदग्ध्रुवं पश्यति चोत्तरं क्षितेस्तदन्तरे योजनजाः पलांशकाः । योजन-संख्याभागैर्युक्षिता खपरिधिहृता भवन्त्यंशाः । भूभौ कलायां वार्वागेभ्यो योजनानि च व्यस्तम् । सौम्यं ध्रुवं मेरुगताः क्षमध्ये वाम्यं च दैत्या निजमस्तकोर्ध्वे । व्याप्तव्यं भ्रमदच्चक्रं विलोकयन्ति क्षितिजप्रवृत्तम् । प्रोक्तो योजनसंख्यया कुपरिधिः खप्राङ्गुनन्दाब्धयः ४९६७ खद्व्याप्तः कुभुजङ्गखायकभुवः ३५८१ खिद्वांशकेनाधिकः १०१४ पृष्ठे चैतत्फलं तथा युगगुणखत्रिंशच्छराष्टाङ्कितो ७८५२० २४ भूमेः कन्दुकजालवत् कुपरिधिव्याप्ताङ्कितैः प्रस्फु-टम् । दृष्टं कन्दुकपृष्ठजालवदिहागोले फलं जल्पितं सङ्क्षेपाच्च मतांशकोऽपि न भवेद्यस्मात् फलं वास्तवम् । तत् प्रत्यक्षविरुद्धसङ्गतमिदं नैवास्तु वा ह्यस्तु वा हे मोढ़ा ! गणका विचारयत तन्मध्यस्थबुद्ध्या भृशम् । यत् परिध्यर्धविष्कम्भं इत्तं क्षेत्रं किलांशुकम् । तेनार्धन्यूनाद्यतं गोलः किञ्चिदधस्तेऽवशिष्यते । गोलक्षेत्रफलात् त-स्माद्वृत्तक्षेत्रफलं यतः । सार्धद्विगुणितात्तत्रं तावदेवा-परे दले । एवं पञ्चगुणात् क्षेत्रफलात् पृष्ठफलं खलु । नाधिकं लभ्यते तेन परिधिघ्नं कृतं कृतम् । इत्तक्षेत्र-फलं यस्मात् परिधिघ्नं न युक्तिमत् । दृष्टत्वाद् गणि-तस्यास्य दृष्टं भूपृष्ठजं फलम् । गोलस्य परिधिः कक्ष्यो वेदघ्नव्याप्तिसंगतः । खखदुग्नरेखाभिर्यद्वदाम-लके स्थिताः । दृश्यन्ते वृत्तकाक्षहृद् प्राग्वृत्तपरिधेर्मि-तान् । अधोधःक्षतरेखाभिर्गोले वृत्तान् प्रकल्पयेत् । तत्रैकवृत्तक्षेत्रफलं खखेदैः प्रसाध्यते । सर्वत्रैक्यं त्रिभज्यार्धहीनं त्रिज्यार्धभाजितम् । एवं वृत्तफलं तत् स्याद् गोलव्यासघ्नं यतः । परिधिव्यासघातो-द्भो गोलपृष्ठफलं कृतम् । इत्तक्षेत्रे परिधिस्थित-व्यासार्धः फलं तत् चुम्ब्यं वेदैरुपरि परितः कन्दुकस्येव जालम् । गोलस्यैवं तदपि च फलं पृष्ठजं व्यासनि-घ्नं षड्भिर्भक्तं भवति नियतं गोलगर्भे घनाख्यम् । पुराणसर्वस्वे विष्णुपु० अन्यत्रोक्तं यथा

"जम्बुप्लक्षद्वयौ द्वीपौ शाल्मलिश्चापरो द्विज ! । कुशः क्रौञ्चस्तथा शाकः पुष्करश्चैव सप्तमः । एते द्वीपा स-प्तैकस्तु सप्त सप्तभिरावृताः । सर्वेऽप्येतुल्यविष्कम्भाः

दुग्धजलैः समः। जम्बूद्वीपः समस्तानामेतेषां मध्यमे स्थितः। तस्यापि मेरुर्मैत्रेय! मध्ये कनकपर्वतः। चतुरशीतिसाहस्रो योजनैरस्य चोच्छ्रयः। प्रविष्टः षोडशाधस्तात् द्वात्रिंशन्मूर्ध्नि विस्तृतः। मूले षोडशसाहस्रो विस्तारस्तस्य भूमितः। भूपद्मस्यास्य शैलोऽसौ कर्णिकासंस्थितिः स्थितः। हिमवान् हेमकूटश्च निषधस्तस्य दक्षिणे। नीलः श्वेतश्च शृङ्गी च उत्तरे वर्षपर्वताः। सहस्रप्रमाणौ द्वौ मध्यौ दशद्वीनास्तथा परे। सहस्रविस्तयोच्छ्रायास्तावद्विस्तारिणश्च ते। भारतं प्रथमं वर्षं ततः किंपुरुषं स्मृतम्। हरिवर्षं तथैवान्यं मेरोर्दक्षिणतो द्विजः। रम्यकञ्चोत्तरं वर्षं तथैवातु हिरण्मयम्। उत्तराः कुरवश्चैव यथा वै भारतं तथा। नवसाहस्रमेकैकमेतेषां द्विजसत्तम!। इलावृतञ्च तन्मध्ये सौवर्णो मेरुरुच्छ्रितः। मेरोश्चतुर्दिशं तत्र नवसाहस्रविस्तृतम्। इलावृतं महाभाग! चत्वार उपपर्वताः। विष्कम्भा रचिता मेरोर्योजनायुतसंमिताः। पूर्वेण मन्दरो नाम दक्षिणे गन्धमादनः। विपुलः पश्चिमे भागे सुपार्श्वश्चोत्तरे स्मृतः। कदम्बस्तेषु जम्बूश्च पिप्पलो वट एव च। एकादश शतायामाः पादपा गिरिकेतवः। जम्बूद्वीपस्य या जम्बूर्नामहेतुर्महामुने!। महागजप्रमाणानि जम्बूफलानि वै। पतन्ति कुक्षितः पूर्णे शीर्यमाणानि सर्वतः। रसेन तेषां प्रख्याता तत्र जम्बूनदीति वै। सरित् प्रवर्त्तते सा च पीयते तन्निवासिभिः। न स्वेदो न च दौर्गन्ध्यं न जरा नेन्द्रियक्षमः। तत्पानसुखसमनसां जनानां तत्र जायते। तीरस्थत्तत्र संप्राप्य सुखवायुविशोषिता। जाम्बूनदाख्यं भवति सुवर्णं सिद्धभूषणम्। भद्राश्वं पूर्वतो मेरोः केतुमालञ्च पश्चिमे। वर्षे द्वे तु सुनिश्चेत्र! तयोर्मध्यमिलावृतम्। वनं चैत्ररथं पूर्वं दक्षिणे गन्धमादने। वैभ्राजं पश्चिमे तद्वदुत्तरे नन्दनं स्मृतम्। अरुणोदं महाभद्रं सलिलोदं मनोरमम्। सरांस्येतानि चत्वारि देवभोग्यानि सर्वदा। सीतालञ्चैव शृङ्गश्च कुररो माल्यवांस्तथा। वैकङ्कप्रमुखास्मेरोः पूर्वतः केसराचलाः। त्रिकूटः शिशिरश्चैव पतङ्गो रुचकस्तथा। निषधाद्यो दक्षिणतस्तस्य केसरपर्वताः। शिखिवासः सर्वदुर्गः कपिलो गन्धमादनः। जारुधिप्रमुखास्तद्वत् पश्चिमे केसराचलाः। मेरोरनन्तराङ्गेषु जठरादिव्यवस्थिताः। मङ्कुरोत्थश्च अमलो हंसो नागस्तथा परः। कालञ्जराद्याश्च तथा उत्तरे केसराचलाः। चतुर्दशसहस्राणि योजनानां महापुरी। मेरोरुपरि मैत्रेय! ब्रह्मणः प्रथिता पुरी। तस्यां समन्ततश्चाष्टौ दिशासु विदिशासु च। इन्द्रादिलोकपालानां प्रख्याताः प्रवराः पुरः। विष्णुपादविनिष्क्रान्ता पूरयित्वेन्दुमण्डलम्। समन्माद् ब्रह्मणः पूर्वां गङ्गा पतति वै दिवः। सा तत्र पतिता दिक्षु चतुर्धा प्रत्यपद्यत। सीता चालकनन्दा च चक्षुर्भद्रा च वै क्रमात्। पूर्वेण शैलात् सीता तु शैलं वाल्यन्तरीचगा। ततश्च पूर्ववर्षेण भद्राश्वेनैति सार्णवम्। भद्रा तथोत्तरगिरीनुत्तरांश्च तथा कुरून्। क्षारोदोत्तरमम्भोधिं समभ्येति महामुने!। चक्षुश्च पश्चिमगिरीनतीत्य सकलांस्ततः। पश्चिमं केतुमालाख्यं वर्षमभ्येति सार्णवम्। तथा चालकनन्दापि दक्षिणेनेत्य भारतम्। प्रयाति सागरं भूत्वा सप्तभेदा महामुने!। खानीलनिषधायामौ माल्यवद्गन्धमादनौ। तयोर्मध्यगतो मेरुः कर्णिकाकारसंस्थितः। भारताः केतुमालाश्च भद्राश्वाः कुरवस्तथा। पद्मानि लोकपद्मस्य मर्यादाश्चैव बाह्यतः। जठरो देवकूटश्च मर्यादापर्वतावुभौ। तौ दक्षिणोत्तरायामावानीलनिषधायतौ। मेरोः पश्चिमदिग्भागे यथा पूर्वौ तथा स्थितौ। त्रिशृङ्गो जारुधिश्चैव उत्तरे वर्षपर्वतौ। पूर्वपश्चायतावेतावर्णवान्तव्यवस्थितौ। इत्येते सुनिवर्योक्तामर्यादापर्वतास्तव। जठराद्याः स्थिता मेरोर्येषां द्वौ द्वौ चतुर्दिशम्। मेरोश्चतुर्दिशं ये तु प्रोक्ताः केसरपर्वताः। सीतान्ताद्या मुने! तेषामतीव सुमनोरमाः। शैलानामन्तरे द्रोण्यः सिद्धचारणसेविताः। सुरस्थाश्च तथा तेषु कानानि पुराणि च। लक्ष्मीविष्ण्वग्निसूर्यादिदेवानां मुनिसत्तम!। तान्यायतनवर्याणि जुष्टानि वरकिन्नरैः। गन्धर्वाप्सरसश्चैव तथा दैतेयदानवाः। क्रीडन्ति तासु रम्यासु शैलद्रोणीष्वहर्निशम्। भौमाश्चैते स्मृताः स्वर्गा धर्मिणामालयामुने!। नैतेषु पापकर्माणो यान्ति जन्मशतैरपि। भद्राश्वे भगवान् विष्णुर्हयशिरा द्विज!। वराहः केतुमाले तु भारते कूर्मरूपधृक्। मत्स्यरूपश्च गोविन्दः कुरुष्वास्ते सनातनः। विश्वरूपेण सर्वत्र सर्वः सर्वेश्वरो हरिः। सर्वाधारभूतोऽसौ मैत्रेयास्ते द्विजालयः। यानि किंपुरुषाद्यानि वर्षाण्यष्टौ महामुने!। न तेषु शोको नायासो नोद्वेगः क्षुद्भयादिकम्। सुखा

प्रजा निरातङ्काः सर्वदुःखविवर्जिताः । दशहादशवर्षाणां सहस्राणि स्थिरायुषः । न तेषु वर्णवर्येषु भौमान्यम्भांसि तेषु वै । ऋतत्रेतादिका नैव तेषु स्थानेषु कल्पना । सर्वेष्वेतेषु वर्षेषु सप्त सप्त कुलाचलाः । नद्यश्च शतशस्तेभ्यः प्रसूता या द्विजोत्तम !" । "पराशर उवाच । उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम् । वर्षं तद्भारतं नाम भारती यत्र सन्ततिः । नवयोजनसाहस्रो विस्तारोऽस्य महामुने !। कर्मभूमिरियं स्वर्गमपवर्गं च गच्छताम् । महेन्द्रो मलयः सह्यः शक्तिमान्ऋक्षपर्वतः । विन्ध्यश्च पारि(या)यात्रश्च सप्तात्र कुलपर्वताः । ततः संप्राप्यते स्वर्गो दुश्चिमत्वात् प्रयान्ति च । तिर्यक्त्वं नरकत्वञ्च यान्त्यतः पुरुषासने !। इतः स्वर्गश्च मोक्षश्च मध्यश्चान्तश्च गम्यते । न खल्वन्यत्र मर्त्यानां कर्म भूमौ विधीयते । भारतस्यास्य वर्षस्य नवभेदान्निबोधत । इन्द्रद्वीपः कशेरुमांस्ताम्रवर्णो गभस्तिमान् । नागद्वीपस्तथा सौम्यो गन्धर्वस्त्वथ वारुणः । अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः । योजनानां सहस्रन्तु द्वीपोऽयं दक्षिणोत्तरात् । पूर्वे किराता यस्यापि पश्चिमे यवनाः स्थिताः । ब्राह्मणाः क्षत्रिया वैश्या मध्ये शूद्राश्च भागशः । इज्यायुद्धवणिज्याद्यैर्वर्त्तयन्तो व्यवस्थिताः । वेदस्मृतिसुखाचान्याः पारि(या)यात्रोद्भवा मुने !। नर्मदा सुरसाद्याश्च नद्यो विन्ध्यविनिर्गताः । तापीपयोष्णीनिर्विन्ध्या कावेरीप्रमुखा नदी । गोदावरीभीमरथीकृष्णवेण्यादिकास्तथा । सह्यपादोद्भवा नद्यः पुण्याः पापभयापहाः । कृतमालाताम्रपर्णीप्रमुखामलयोद्भवाः । त्रिसामा ऋषिकुल्याद्या महेन्द्रप्रभवाः स्मृताः । ऋषिकुल्याकुमारीद्याः शुक्तिमत्पादसम्भवाः । शतद्रूचन्द्रभागाद्या हिमवत्पादनिःसृताः । यासां नद्युपनद्यश्च सन्त्यन्याश्च सहस्रशः । कुरुपाञ्चालमध्यदेशादयोजनाः । पूर्वदेशादिकाश्चैव कामरूपनिवासिनः । ओड्राः कलिङ्गामगधा दाक्षिणात्याश्च सर्वशः । तथापरान्ताः सौराष्ट्राः शूद्राभीराश्तथार्बुदाः । मारुकामालवाश्चैव पारि(या)यात्रनिवासिनः । सौवीराः सैन्धवाहूणाः शाल्वाः शाकलवासिनः । मद्रारामाम्बष्ठसाल्वाश्च पारसीकादयस्तथा । यासां पिबन्तः सलिलं वसन्ति सरितां सदा । चत्वारि भारते वर्षे युगानि मुनिसत्तम !। कृतं त्रेता द्वापरञ्च कलिश्चान्यन्न कुत्रचित् । तपस्यन्ति सुनयोजुह्वते चात्र यज्विनः । दानानि चात्र दीयन्ते परलोकार्थमादरात् । पुरुषैर्यज्ञपुरुषो जम्बूद्वीपे सदेज्यते । तत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने !। यतो हि कर्मभूरेषा ततोऽन्या भोगभूमयः । अत्र जन्मसहस्राणां सहस्रैरपि सत्तम !। कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयम् । गायन्ति देवाः किल गीतकानि धन्यास्तु ये भारतभूमिभागे । स्वर्गापवर्गास्पदहेतुभूते भवन्ति भूयः पुरुषाः सुरत्वात् । कर्माण्यसंकल्पिततत्फलानि सन्यस्य विष्णौ परमात्मरूपे । अवाप्य तां कर्ममहीमनन्ते तस्मिँस्तवं ये त्वमलाः प्रयान्ति । जानीम नैतत्तुलयं त्रिलोके स्वर्गापदे कर्मभि देहबन्धम् । प्राप्स्याम धन्याः खलु ते मनुष्या ये भारते नेन्द्रियविप्रहीनाः । नवसंख्यन्तु मैत्रेय ! जम्बूद्वीपमिदं मया । कथितं योजनविस्तारं संक्षेपात् कथितं तव । जम्बूद्वीपं समावृत्य लक्षयोजनविस्तृतः । मैत्रेय ! वलयाकारः स्थितः क्षीरोदधिर्बहिः ।"पराशर उवाच । क्षीरोदेन यथाद्वीपो जम्बुसङ्ज्ञोऽभिवेष्टितः । संवेष्ट्य चारसदृशं प्लक्षद्वीपस्तथा स्थितः । जम्बूद्वीपस्य विस्तारः शतसाहस्रसम्मितः । स एव द्विगुणो ब्रह्मन् ! प्लक्षद्वीपोऽप्युदाहृतः । सप्त मेधातिथेः पुत्राः प्लक्षद्वीपेश्वरस्य वै । ज्येष्ठः शान्तभयो नाम शैशिरस्तदनन्तरः । सुखोदयस्तथानन्दः शिवः क्षेमक एव च । ध्रुवश्च सप्तमस्तेषां प्लक्षद्वीपेश्वरा इमे । पूर्वं शान्तभयं वर्षं शिशिरं सुखदं तथा । आनन्दञ्च शिवञ्चैव क्षेमकं ध्रुवमेव च । मध्यादाकारकास्तेषां तथान्ये वर्षपर्वताः । सप्तैव तेषां नामानि शृणुष्व मुनिसत्तम !। गोमेदश्चैव चन्द्रश्च नारदोऽन्दुमिस्तथा । सोमकः सुमनाः शैलो वैभ्राजश्चैव सप्तमः । वर्षाचलेषु रम्येषु सर्वेष्वेतेषु चानघ । वसन्ति देवगन्धर्वसहिताः सततं प्रजाः । तेषु पुण्या जनपदाश्चिराच्च म्रियते जनः । नाधयोव्याधयोवापि सर्वकालसुखं हि तत् । तेषां नद्यश्च सप्तैव वर्षाख्यान्तु समुद्गाः । नामतस्ताः प्रवक्ष्यामि शृताः पापं हरन्ति याः । अनुतप्ता शिखा चैव विपाशा त्रिदिवा क्रमुः । अमृता सुकृता चैव सप्तैतास्तत्र निम्नगाः । एते शैलास्तथा नद्यः प्रधानाः कथिताश्च वः । क्षुद्रनद्यस्तथा शैलास्तत्र सन्ति सहस्रशः । ताः पिबन्ति सदा हृष्टा नदीर्जनपदास्तु ते । अपसर्पिणी न तेषां वै नचैवोत्सर्पिणी प्रजा । नास्तिचास्ति युगावस्था तेषु स्थानेषु सप्तसु । त्रेतायुगसमः कालः सर्वदैव महामुने !। प्लक्षद्वीपादिषु ब्रह्मन् ! सप्तद्वीपान्तिकेषु वै । पञ्चवर्षसहस्राणि जना जीवन्त्यना-

मयाः। धर्मः पञ्चसमेतेषु वर्णाश्रमविभागजाः।
वर्णांस्तु तत्र चत्वारस्तान्निबोध वदामि ते। आर्यकाः
कुरराश्चैव विदिशाभाविनश्च ते। विपश्चत्रियवैश्याश्चे
शूद्राश्च द्विजसत्तम!। जम्बूद्वीपप्रमाणस्तु तन्मध्ये सुमहा-
तरुः। प्लक्षस्तामसंज्ञोऽयं प्लक्षद्वीपो द्विजोत्तम!।
रक्ष्यते भगवांस्तत्र तैर्वैराज्यादिभिः। सोमरूपी
जगत्स्रष्टा सर्वः सर्वेश्वरो हरिः। प्लक्षद्वीपप्रमाणेन
प्लक्षद्वीपसमावृतः। तथैवेक्षुरसोदेन परिवेषात्मकारिणा।
दृश्यतेऽत्र मैत्रेय! प्लक्षद्वीपस्तदावृतम्। संक्षे-
पेण मया भूयः शाल्मलं मे निशामय। शाल्मल-
श्चेश्वरो वीरो वपुष्मांस्तत्सुतान् शृणु। तेषान्तु नाम
संज्ञानि सप्त वर्षाणि तानि वै। श्वेतोऽत्र हरितश्चैव
जीमूतो हरितस्तथा। वैद्युतो मानसश्चैव सुप्रभश्च
महासने!। शाल्मलेन समुद्रोऽसौ द्वीपेनेक्षुरसोदकः।
विस्तारद्विगुणेनाथ सर्वतः संवृतः स्थितः। तत्रापि
पर्वताः सप्त विज्ञेयास्तत्प्रयोनयः। रत्नाभिव्यञ्जकास्ते
तु तथा सप्तैव निम्नगाः। कुमुदश्चोन्नतश्चैव तृतीयश्च
बलाहकः। द्रोणो यत्र महौषध्यः स चतुर्थो महो-
धरः। कङ्कस्तु पञ्चमः षष्ठो महिषः सप्तमस्तथा।
कुमुदान् पर्वतवरः सरिन्नामानि मे शृणु। योनितोया
विपाप्मा च चन्द्रा शुक्ला विमोचनी। निवृत्तिः सप्तमी
तासां कृतास्ताः पापशान्तिदाः। श्वेतश्च लोहितश्चैव
जीमूतं हरितं तथा। वैद्युतं मानसश्चैव सुप्रभं नाम
सप्तमम्। सप्तैतानि तु वर्षाणि चातुर्वर्ण्ययुतानि वै।
शाल्मलेऽपि च ये वर्षा वसन्त्येते महासने!। कपिला-
श्चारुणाः पीताः कृष्णाश्चैव पृथक् पृथक्। ब्राह्मणाः
क्षत्रिया वैश्याः शूद्राश्चैव यजन्ति तम्। भगवन्तं सम-
स्तस्य विष्णुमात्मानमव्ययम्। वायुभूतं मखश्रेष्ठै-
र्यज्विनोऽसङ्कसंस्थितम्। देवानामत्र सान्निध्यमत्रैव
सुमनोरमे। शाल्मलिश्च महाद्रुमो नाम निर्हृतिकारकः।
एष द्वीपः समुद्रेण सुरोदेन समावृतः। विस्तारः शाल्-
मलस्यैव समेन तु समन्ततः। सुरोदकः परिवृतः कुश-
द्वीपेन सर्वतः। शाल्मलस्य तु विस्तारादुद्विगुणेन सम-
न्ततः। ज्योतिष्मतः कुशद्वीपे सप्त पुत्राः शृणुष्व तान्।
उद्भिदो वेणुमांश्चैव सुरथो धृतिमान्। प्रभाकरोऽथ
कपिलस्तान्नाम्ना वर्ष उच्यते। तस्मिन् वसन्ति मनुजाः
सह दैतेयदानवैः। तथैव देवगन्धर्वयक्षकिंपुरुषा-
दिभिः। वर्णास्तत्रापि चत्वारो निजानुष्ठानतत्पराः।
दर्शनः शुचिषः स्नेहा मन्देहाश्च महासने!। ब्रा-
ह्मणाः क्षत्रियाः वैश्याः शूद्राश्चातुक्रमोदिताः। यथोक्त-
कर्मकर्तृत्वात् स्वाधिकारक्षयाय ते। तत्र यस्तु कुशद्वीपे
ब्रह्मरूपं जनार्दनम्। यजन्तः क्षपयन्त्यघमधिकारफल-
प्रदम्। विद्रुमो हेमशैलश्च द्युतिमान् पुष्पवांस्तथा।
कुशेशयो हरिश्चैव सप्तमो मन्दराचलः। वर्षाण्यत्रापि
सप्तैव तत्र द्वीपे महासने!। नद्योऽपि सप्त तास्तासु
शृणु नामान्यनुक्रमात्। धूतपापा शिवा चैव पवित्रा
सम्मतिस्तथा। विद्युदभ्रा मही चैव सर्वपापहरा-
स्त्रिमाः। अन्याः सहस्रशस्तत्र क्षुद्रनद्यश्च तास्तथा।
कुशद्वीपे कुशस्तम्बः संज्ञया तस्य तत् कृतम्। तत्प्रमा-
णेन स द्वीपो घृतोदेन समावृतः। घृतोदश्च समुद्रो वै
क्रौञ्चद्वीपेन संवृतः। क्रौञ्चद्वीपो महाभाग! श्रूयतामा-
परो महान्। कुशद्वीपस्य विस्तारादुद्विगुणो यस्य वि-
स्तरः। क्रौञ्चद्वीपे द्युतिमतः पुत्राः सप्त महात्मनः। तेषा-
मानि च वर्षाणि तेषामुक्तो महीपतिः। कुशलो मन्द्ग-
वोष्णः पीवरोऽन्धकारकः। मुनिश्च दुन्दुभिश्चैव सप्तैते
तत्सुता मुने!। तत्रापि देवगन्धर्वसेविताः सुमनोरमाः।
वर्षाण्यत्रा महाबुद्धे! तेषां नामानि मे शृणु। क्रौञ्च
वामनश्चैव तृतीयश्चान्धकारकः। चतुर्थो धरणश्चैव
स्वाभिधानोऽपरश्च सः। देवाद्रिः पञ्चमश्चैव तथा वृषभपुष्क-
रीकवान्। दुन्दुभिश्च महाशैलो द्विगुणास्ते पर-
स्परम्। द्वीपद्वीपेषु ये शैला यथा द्वीपानि ते तथा।
वर्षेष्वेतेषु रम्येषु वर्षशैलवरेषु च। निवसन्ति निरा-
तङ्काः सुरदेवगणैः प्रजाः। पुष्कराः पुष्कलाधन्याश्चि-
त्याख्याश्च महासने!। ब्राह्मणाः क्षत्रियावैश्याः शूद्राश्चा-
तुक्रमोदिताः। ते तत्र नद्यो मैत्रेय! या विपन्ति शृ-
णुष्व ताः। सप्त प्रधानाः परतस्तास्ताः क्षुद्रनिम्नगाः।
गौरी कुमुद्वती चैव सन्ध्या रात्रिर्मनोजवा। ख्यातिश्च
पुण्डरीका च सप्तैता वर्षनिम्नगाः। तत्रापि वर्षेऽम्बु-
वान् पुष्कराद्यैर्जनार्दनः। योगिरूपस्वरूपस्तु रक्षते
यत्नमास्थितः। क्रौञ्चद्वीपः समुद्रेण दधिमण्डोदकेन
च। आवृतः सर्वतः क्रौञ्चद्वीपतुल्येन मानतः। दधि-
मण्डोदकश्चापि शाकद्वीपेन संवृतः। क्रौञ्चद्वीपस्य
विस्तारादुद्विगुणेन महामते!। शाकद्वीपेश्वरस्यापि
भव्य सुमहात्मनः। सप्तैव तनयास्तेषां ददौ वर्षाणि
सप्त च। जलदश्च कुमारश्च सुकुमारो मणीरकः। कुश-
दोदः सुमौदाकिः सप्तमश्च महाद्रुमः। तत्संज्ञान्यपि-

तान्येव सप्त वर्षाण्यत्रक्रमात् । तत्रापि पर्वताः सप्त वर्ष-विच्छेदकारिणः । पूर्वतोदयगिरिर्जेताधारस्तथा परः । तथा रैवतकः श्यामस्तथैवास्तगिरिर्द्विज ! । आम्बिकेय-स्तथा रम्यः केशरी पर्वतोत्तमः । शाकस्तत्र महाहस्तः सिद्धगन्धर्वसेवितः । तत्पवनातसंसर्गादह्लादो जायते परः । तत्र पुण्या जनपदाश्चातुर्वर्ण्यसमन्विताः । तद्य-थात्र महापुण्याः सर्वपापभयापहाः । सुकुमारी कुमारी च नलिनी रेणुका तथा । इक्षुश्च धेनुका चैव गभस्ती सप्तमी तथा । तन्नास्त्युतमस्तत्र चुहनद्यो म-हाहने ! । महीधराश्चथा चात्र यतयोऽत्र सहस्रशः । ताः पिबन्ति सदायुक्ता जलदादिषु ये स्थिताः । वर्षन्ते जनपदाः स्वर्गादध्वेत्र मेदिनीम् । धर्महानिर्न तेष्वस्ति न संकर्षः परस्परम् । मर्यादाव्युत्क्रमो नापि तेषु देशेषु सप्तसु । मागधाश्च मागधाश्चैव मानसा मन्दगास्तथा । भागा ब्राह्मणभूयिष्ठा मागधा क्षत्रिया-स्तथा । वैश्यास्तु मानसास्तेषां शूद्रास्तेषां तु मन्दगाः । शाकद्वीपे तु तैर्वर्णैः सूर्यरूपधरो हने ! । यतीश्वरैरिज्यते सम्यक्कर्मभिर्नियतात्मभिः । शाकद्वीपस्तु मैत्रेय ! क्षीरो-देन समन्ततः । शाकद्वीपप्रमाणेन वलयेनेव वेष्टितः । क्षीराब्धिः सर्वतो ब्रह्मन् ! पुष्कराख्येन वेष्टितः । द्वीपेन शाकद्वीपात्तु द्विगुणेन समन्ततः । पुष्कराख्यद्वीपस्ते-नैवावृतोऽभवत् सुतः । धातकिश्च तयोस्तत्र हे वर्षे नाम चिह्निते । महावीतं तयैवान्यत् धातकीखण्ड-मण्डितम् । एकचात्र महाभाग ! प्रख्यातो वर्ष-पर्वतः । मानसोत्तरसंज्ञो वै मध्यतो वलयाकृतिः । योजनानां सहस्राणि ज्ञेयं पञ्चाशदुच्छ्रितः । तावा-देव च विस्तीर्णः सर्वतः परिमण्डलः । पुष्करद्वीपवलयं मध्ये संविभजन्निव । स्थितोऽसौ समहान् शैलो व्याप्य तदर्धकवयम् । वलयाकारमेवैतं तयोर्वर्षं तथा गिरिः । दशवर्षसहस्राणि तत्र जीवन्ति मानवाः । निरामया विशोकाश्च रागद्वेषविवर्जिताः । अधर्मोत्तमौ न तेष्वास्तां न वधप्रवधौ द्विज ! नेर्ष्याक्रूयाभय-रोषो दोषो लोभादिको न च । महावीतं महावर्षं धातकीखण्डमण्डनतः । मानसोत्तरशैलश्च देवदैत्यादि सेवितः । यत्रास्तं न तत्राक्षे द्वीपे पुष्करसंज्ञिते । न तत्र शैलनद्यो वा द्वीपे वर्षद्वयान्विते । तत्सुखेनास्तु सततादेवैस्तत्रैवऋषिभिः । वर्णाश्रमाचारहीनं धर्मा-ख्यरवर्जितम् । त्रयीवार्तादण्डनीतिशून्यारहितश्च तत् । वर्षद्वयस्य मैत्रेय ! सोमः स्वर्गोऽवसत्तमः । सर्वत्र सुखदः कालो जरारोगादिवर्जितः । पुष्करे धातकी-खण्डे महावीते च वै सुने ! । त्रयोधः पुष्करद्वीपे ब्रह्मणः स्थानमुत्तमम् । तच्चिन्तयति ब्रह्मा पूज्य-मानः सुरासुरैः । क्षादूदकेनोदधिना पुष्करः परि-वेष्टितः । समेन पुष्करस्यैव विस्तारायामतस्तथा । एवं द्वीपाः सप्तसप्तसु सप्तभिरावृताः । द्वीपश्चैव समुद्रश्च समानौ द्विगुणौ परौ । पर्वाणि सर्वदा सर्व-सप्तसु समानि वै । जलातिरिक्तता तेषां कदाचिच्चैव जायते । क्षारोदसम्मिसंयोगादुद्रेकि सलिलं ह्यधः । तथेन्दुवृद्धौ सलिलमम्भोधौ सनिवृत्तम ! । अनुनाधाति-रिक्ताश्च वर्धन्त्यापो हसन्ति च । उदयास्तमनेऽम्बिन्दोः पक्षयोः शुक्लकृष्णयोः । दशोत्तराणि पञ्चैव अङ्गुलानां शतानि वै । अपां वृद्धिक्षयौ वृद्धौ क्षाद्वोर्णां महा-हने ! । भोजनं पुष्करद्वीपे तत्र स्वयमुपस्थितम् । यत्र संभुञ्जते विप्र ! प्रजाः वर्षाः सदैव हि । क्षादूदकस्य पुरतो दृश्यते लोकसंस्थितिः । द्विगुणा काञ्चनी भूमिः सर्वत्रैवानुविवर्जिता । लोकालोकश्चतः शैलो योजनायुत-विस्तरः । उच्छ्रायेणापि तावन्ति सहस्राण्यत्रचलो हि सः । ततस्तमः समावृत्य तं शैलं सर्वतः स्थितम् । तमश्चाण्डकटाहेन समन्तात् परिवेष्टितम् । पञ्चाशत्-कोटिविस्तीर्णा सैषासौ महाहने ! । सप्तैवाण्डकटाहेन द्वीपाब्धिसहीधरा । सैषा धात्री विधात्री च सर्वभूत-सुखाधिका । आधारभूता सर्वेषां मैत्रेय ! जगतामिति ।

भूगोलस्य स्थिरत्वे युक्तिः खगोलशब्दे उक्ता अधिक-मत्र किञ्चिदुच्यते । ध्रुवस्थैवज्योतिर्विदां मते भूगोलस्यैव दक्षिणोत्तरगतिभ्यां सूर्यस्य उत्तरदक्षिणगतित्वं कल्प्यते स्थिरस्य सूर्यस्य उत्तरदक्षिणायनयोरसम्भवादिति । तदेतन्नातमतीवासम्भवं भूगोलस्य दक्षिणोत्तरगतिस्वीकारे सूर्यस्यैव क्रान्तिकारोक्षिणोश्चकटस्थाधाद्योनामपि उत्तरदक्षिणयोर्गतिः प्रसज्यते न च तथा दृश्यते तेषान्तु यथा विक्षेपनामशरसंज्ञा शोरागमे पठिता ताडयान्तर एव प्रत्यक्षं दर्शनं न मनागपि उत्तरदक्षिणा-यनमिति विवेच्य भूगोलस्य स्थिरत्वमनुसन्धातव्यम् ।

भूच्छाया स्त्री भुवश्छाया । सूर्यकिरणावरणात् जायमाने राहुपर्वाभिधाने १तमसि २वस्तुकारे च शब्दमाला ।

भूजन्तु पुं० भूरिव जन्तुः । नागे हलायुधे राजनि० ।

भूजम्बू स्त्री भुवो जम्बूरिव आकृत्या । १शोधूमे २विकङ्क-

तत्वे च (वदन्ति) मेदि० भूमिस्त्रीत्वा जम्बूः शाक०त० २खण्डजम्बूद्वीपम्। भूमिजम्बूदयोऽत्र स्त्री

भूत न० भू-क्त। १न्याये चर्चिते पृथिवीजलतेजोवायुगगनरूपेषु गन्धादिविशेषगुणवत्सु २द्रव्येषु, ३सत्ये, यथार्थे वास्तविके 'भूतमप्यहपत्यं स्त्रीयते व्यवहारतः' इति स्मृतिः। ४तत्त्वानुसन्धाने च "ज्ञानं विरक्त भूतेन" स्मृतिः। ५पिशाचादौ पु०ऽकुमारे ८योगीन्द्रे ७लक्षणयुक्ते ८प्राप्तिनि च न०। ९अतीते ऽक्ते १२सदृशे ११प्राप्ते १२सत्यार्थे त्रि०। १३जात्यादर्शां स्त्री टाप्। भूतत्वं च आत्मान्यत्वे सति विशेषगुणवत्त्वम् न तु जातिः मूर्त्तत्वेन साङ्कर्य्यात् तथाहि भूतत्वाभाववति मनसि मूर्त्तत्वस्य सत्त्वात् मूर्त्तत्वाभाववति गगने भूतत्वस्य सत्त्वात् उभयोः परस्परभावसामानाधिकरण्यम् पृथिव्यादिषु चतुर्षु च भूतत्वमूर्त्तत्वयोरुभयोः सत्त्वात् परस्परसामानाधिकरण्यमिति साङ्कर्य्यात् जातित्वाभावता।

भूतकला स्त्री ६त०। शा०ति० उक्ते धरादिभूतानामुत्पादके निवृत्त्याद्ये शक्तिभेदे "धरादिपञ्चभूतानां निवृत्त्याद्याः कलाः स्मृताः। निवृत्तिः प्रतिष्ठा शान्ति विद्या शान्तिरनन्तरम्। शान्त्यतीतेति ता ज्ञेया नादेन्दुसहजन्मवाः" शा० त्रि० "शक्तिः प्रथमसम्भूता शान्त्यतीतापदोत्तरा शान्त्यतीतापदाच्छक्तेस्ततः शान्तिपदं क्रमात्। ततो विद्यापदं तस्मात् प्रतिष्ठापदसंयुतः। निवृत्तिपदसंयुक्तं प्रतिष्ठापदतः परम्। एतस्मात् स्वयमेव सृष्टिरीश्वरनोदिता। आनुलोम्यादमीषां प्रातिलोम्येन संहृतिः। यस्मात् पञ्चपदोद्दिष्टान्न सूक्ष्मान्तरमिष्यते। तस्माभिः पञ्चभिर्व्याप्तं यस्मादिदमिदं जगत्" राघवभट्टधृतवायवीयसंहिता।

भूतकेश पु० भूतानां केश इव। (भूतकेश) नामके १तृणभेदे स्त्रीत्वमपि ङीष्। सा च तत्र, २शेफालिकायां च टाप्। ३क्षीरविल्वद्वारे स्त्री ङीष्।

भूतक्रान्ति स्त्री ६त०। पिशाचावेशे राजनि०।

भूतगन्धा स्त्री० भूतः प्रभूतः गन्धो यस्याः। सुरानामगन्धद्रव्ये जटाध०।

भूतगुण पु० ६त०। आकाशादीनां शब्दस्पर्शादिषु विशेषगुणेषु "शब्दस्पर्शरूपरसगन्धा भूतगुणाः स्मृताः" शा०ति० "भूतगुणा भूतविशेषगुणा इत्यर्थः राघवः"। तत्रैव भूतानामेकैकविशेषगुणा उक्ता यथा, "आकाशस्य गुणः शब्दो वायोः स्पर्शः तेजसो रूपं जलस्य रसः भूमेर्गन्धः इति नैयायिकादयः। सांख्यादयस्तु शब्दवाक्पौरुषकर्णवोऽक्षौशानर्शक्तावाम् "शब्देकगुण आकाशः शब्दस्पर्शगुणो मरुत्। शब्दस्पर्शरूपगुणैस्त्रिगुणं तेज इष्यते। शब्दस्पर्शरूपरसैरापो ज्ञेयाश्चतुर्गुणाः। शब्दस्पर्शरूपरसगन्धैः पञ्चगुणा मही"।

भूतघ्न पु०भूतं हन्ति हन-टक्। १भूतयुक्ते राजनि० तद्व्यारक्षे हि बालग्रहभूतादिनिवारणं शास्त्रे प्रसिद्धम्। भूतं प्रकृतं गन्धं हन्ति अधःकरोति। २वरुणे २वट्टे च राजनि०। ३भूतनाशके त्रि० हेमच०। ४तद्वत्यां स्त्री राजनि० ङीष्।

भूतचतुर्दशी स्त्री० भूतप्रिया चतुर्दशी तदुद्देशेन तस्यां दीपदानात्। आश्विनकृष्णचतुर्दश्यां दीपान्विताभावाच्छाण्डिल्यौ यमचतुर्दश्याम्।

भूतजटा स्त्री भूतस्य पिशाचस्य जटेव। १जटामांस्याम् शब्दमा०। २गन्धमांस्यां राजनि०।

भूतद्राविन् पु० भूतान् पिशाचान् द्रावयतीति द्रु-णिच्-णिनि। १रक्तकरवीरवृक्षे २भूतान्द्रावयति च राजनि०

भूतद्रुम पु० भूतरूप द्रुमः। सप्तपर्णवृक्षे। भूतवृक्षादयोऽत्र। भूतप्रियः द्रुमः शाक०त०। २शाखोटवृक्षे।

भूतधात्री स्त्री० भूतानि जन्तून् धारयति धा-इच् ङीप्। पृथिव्याम् त्रिका०।

भूतनाथ पु० ६त०। १शिवे २बटुकभैरवे च। "भैरवो भूतनाथश्च" इति बटुकशब्दोक्तेः। भूतेशभूतपत्यादयोऽत्र।

भूतनाशन न० भूतान् नाशयति नश-णिच्-ल्यु। १रुद्राक्षे राजनि० २सर्षपे पु० ३भल्लातके च रत्नमा०।

भूतपक्ष पु० भूतप्रियः पक्षः अन्धकारत्वात्। कृष्णपक्षे।

भूतपक्षी स्त्री भूतस्य इव पक्षं पत्रं यस्याः ङीष्। कृष्णतुलस्याम् राजनि०। [रत्नमा०।

भूतपुष्प पु० भूत इव पुष्पं कृष्णत्वात् यस्य। स्त्रीनागवृक्षे

भूतपूर्णिमा स्त्री आश्विनपूर्णिमायाम् शब्दर०।

भूतभावन पु० भूतानि पृथिव्यादीनि भावयति जनयति भू-णिच्-ल्यु, भूता सत्ता यथार्था भावना यस्य वा। १विष्णौ, २बटुकभैरवे च "भूतात्मा भूतभावनः" इति। तयोः स्त्रीत्वे।

भूतमण्डल न० ६त०। शा०ति० उक्ते पृथिव्यादीनां षण्णामभेदे तत्तद्रूपं तत्तोक्तं यथा "इत्तं दिक्षत् षड्बिन्दुलाञ्छितं मातरिश्वनः। त्रिकोणं स्वस्तिकोपेतं वह्नेरर्द्धेन्दुसंयुतम्। चन्द्रोज्ज्वलमधो भूमेश्चतुरस्रं सवज्रकम्। तत्तद्भूतसमानानि षण्णामानि विदुर्बुधाः। वर्णैः

स्वैरङ्कितान्याङ्कः स्वस्तानाह्वतान्यपि"। "वर्णैः श्वेतादिभिर्भूतवर्णैरजोभिरङ्कितानीति पदार्थादर्शः। तत्रैतद्ग्राह्या विस्तरेण दर्शिता। मन्त्रमहोदधौ तेषां षट्कं षट्कर्मविशेषे विनियोगश्चोक्तो यथा "अर्द्धचन्द्रनिभं पार्थिवे पद्मदयाङ्कितम्। जलस्य मण्डलं प्रोक्तं प्रणवं वह्निकर्मणि। त्रिकोणं खस्तिकोपेतं वायौ वह्नेषु मण्डलम्। चतुरस्रं वज्रयुक्तं स्यात्ते भूमेषु मण्डलम्। वृत्तं दिक्षु विदेहे विन्दु षट्काङ्कितं च तत्। वायुमण्डलसञ्चाटे मारणे वह्निमण्डलम्"।

भूतमारिन् पु० भूतान् पिशाचान् मारयति अपसारयति मृ-णिच्-णिनि। चिड़ानामगन्धद्रव्ये राजनि०।

भूतयज्ञ पु० भूतानि प्राणिनो वायसादीन् उद्दिश्य यज्ञो बलिः। नित्यं पञ्चसूनाकर्त्तव्यपञ्चयज्ञान्तर्गते बलिहरणदेव कर्मणि "भूतेभ्यो बलिहरणं भूतयज्ञः" हारीतस्मृतिः।

भूतयोनि स्त्री द्वन्द्व०। भूतानामाकाशादीनां कारणे परमेश्वरे कैवल्योप०। [भूमेरधोभागे।

भूतल न० भूरेव तलम्। [पृथिव्याम्] द्वन्द्व०। २पातालेभूतलिका स्त्री भूतलं पातालं मूलत्वेनाऽस्त्यस्याः ठन्। पृक्कायाम् (पिड़िङ्गाक) राजनि० बडुदरमूलत्वात्तस्यास्तथात्वम्।

भूतलिपि स्त्री द्वन्द्व०। भूतदैवत्ये वर्णभेदे "वाय्वग्निभूजलाकाशाः पञ्चाक्षरिपवः क्रमात्। पञ्च ह्रस्वाः पञ्च दीर्घाः विन्दवः सन्धिसञ्ज्ञकाः। पञ्चयः कादयः प्रोक्तलसञ्ज्ञान्ताः प्रकीर्त्तिताः" आ० ति०। कुलाकुलचक्रशब्दे २१३४पृ० दृश्यम्।

भूतलोन्माथ पु० दानवभेदे हरिवं० २४अ०।

भूतवर्ण पु० द्वन्द्व०। ध्येये भूतानां श्वेतादिवर्णे यथोक्तं आ०ति० "स्वच्छं वियन्मरुत् कृष्णो रक्तोऽग्निर्विन्दवः पयः। पीता भूमिः पञ्चभूतान्येकैकाधारतो विदुः"। "स्वच्छं श्वेतं तत्र वैशाखिटरूपिण्यां वर्णकथनतदादानार्थं स्वशास्त्रानुरोधेन राघवः। भूतदैवते ह्रस्वदीर्घसन्धिते वर्णादिवर्णे च। भूतलिपिशब्दे कुलाकुलचक्रशब्दे च दृश्यम्।

भूतवास पु० द्वन्द्व०। (वयड़ा) विभीतकवृक्षे। भूतावासोऽत्र [यतः। अपस्मारारोगे राजनि०

भूतविक्रिया स्त्री भूतानां तदाविशिष्टानामिव विक्रिया

भूतविद्या स्त्री भूतादिनिवारणार्था विद्या। तन्त्रतोक्ते देवाद्युपसर्गोपशमार्थे बलिहरणादौ "भूतविद्या नाम देवासुरगन्धर्वयक्षरक्षःपितृपिशाचनागग्रहाद्युपसृष्टचेतसां शान्तिकर्मबलिहरणादि ग्रहोपशमनार्थम्" या च तत्र तत्रतन्त्रे दर्शिता "ब्रह्मविद्या शक्रविद्या नक्षत्रविद्या भूतविद्या सर्पविद्या"इत्या०त०। [शैवालिकायाम् अमरः।

भूतवेशी स्त्री भूतानामिव वेशोऽस्याः गौरा० ङीष्। श्वेतभूतब्रह्मन् पु० भूतः पिशाच इव ब्रह्मा। देवले ब्रह्महत्यायाम्।

भूतशुद्धि स्त्री० भूतानां देहारम्भकपृथिव्यादीनां शुद्धिर्भावना विशेषात् शोधनम्। तन्त्रादौ प्रसिद्धे देहारम्भकचतुर्विंशतितत्त्वानां भावनाविशेषेण संस्कारेण देवरूपतासम्पादने। भूतशुद्धिप्रकारस्तन्त्रसारे उक्तो यथा गौतमीये "सुषुम्णाध्वर्त्मना षोढ़मिति मन्त्रेण षोजयेत्। मस्तके शिवे स्थाने परमात्मनि देशिकः। धूम्रवर्णं ततो वायुबीजं (यं) षड्बिन्दुलाञ्छितम्। पूरयेद्दिड़या वायुं धीः षोढ़शमात्रया। मात्रया तु चतुःषष्ट्या कुम्भयेत्तु सुषुम्णया। हार्दि शक्त्यात्मया मन्त्री रेचयेत् पिङ्गलाख्यया। पूरयेदनया चैव सञ्चिन्त्य नीलमारुतम्। रक्तवर्णं वह्निबीजं (रं) त्रिकोणं स्वस्तिकान्वितम्। तेन पूरकयोगेन मात्रया षोढ़याख्यया। चतुःषष्ट्या मात्रया च निर्दहेत् कुम्भकेन च। वामपार्श्वस्थितं पापपुरुषं कज्जलप्रभम्। ब्रह्महत्यागिरस्तस्य वर्णस्थेयमुजद्वयम्। सुरापानहृदायुक्तं गुरुतल्पकटिद्वयम्। तत्संसर्गिपदद्वन्द्वमङ्गप्रत्यङ्गपातकम्। उपपातकरोमाढ्यं रक्तश्मश्रुविलोचनम्। खड्गचर्मधरं क्रुद्धमेवं कुक्षौ विचिन्तयेत्। मूलाधारोत्थितेनैव वह्निना निर्दहेत्तमम्। एवं सन्दह्य परितो हार्दि शक्त्यात्मया ततः। भस्मना सञ्चितं मन्त्री रेचयेदिड़या पुनः। वामनाड्यां चन्द्रबीजं (ठं) कुन्देन्दुसुतसन्निभम्। भालेन्दुबीजे संयोज्य ततः षोढ़शमात्रया। सुषुम्णया चतुःषष्टिमात्रया तोयबीजकम् (वं)। ध्यात्वाऽमृतमयीं देवीं पद्मासनसमन्विताम्। तया देहं विचिन्त्यैवं मनसा पिङ्गलाध्वना। हार्दि शक्त्यात्मया मन्त्री संबीजेन दृढं नयेत्। ब्रह्मरन्ध्रे हंसमन्त्रेण पुण्यकेनैव वर्त्मना। जीवं तत्त्वानि चानीय ब्रह्मरन्ध्रे स्थापयेत् ततः। इति कृत्वा भूतशुद्धिं मातृकान्यासमाचरेत्। ततो हंस इति बीजं हृदयमानीय कुलकुण्डलिनीं मूलिन्यादीनि च यथास्थाने स्थापयेत्। विशेषतस्तु शक्तिविषये। हंस इति जीवादिकं परमशिवे संयोज्य षोढ़मिति मन्त्रेण स्थाने नयेत्। तन्त्रान्तरे "षोढ़मेवं

समाधाय जीवं हृदि समानयेत्। मूढे तु विशेषो वाराहीतन्त्रे "हंसाख्यं न स्मरेत् मुग्धो भूतशुद्धौ कदाचन। स्मरणात्स्मरणं याति दीक्षा च विफला भवेत्"। शारदायाम् "जीवं तेजोमयं ध्यात्वा नभो मन्त्रेण योजयेत्"। भूतशुद्धिपदद्वयुत्पत्तिमाह विश्वसारे "शरीराकारभूतानां भूतानां यद्विशोधनम्। अव्यक्तब्रह्मयोगात् भूतशुद्धिरियं मता" वराहीये "मूलाधाराक्षतो बीजं ब्रह्ममार्गेण देशिकः। हंसेन पुष्करस्थाने परमात्मनि योजयेत्"। ब्रह्ममार्गः सुषुम्णा। त्रिपुराम्बारसमुद्भवे "संयोज्य बीजमथ दुर्गमध्वनाडी-मार्गेण पुष्करनिविष्टशिवे सुसूक्ष्मे"। ज्ञानार्णवे "प्राणप्रतिष्ठया पश्चात् जीवं देहे निधापयेत्। सकलत्तं सकलार्थं हंसस्तु विपरीतकः। उच्चरेत् परमेशानि! विद्येयं ब्रह्मचारी मता। प्राणप्रतिष्ठामन्त्रोऽयं सर्व-कर्माणि साधयेत्। तेनैव विधिना देवि! स्थिरीकुर्यात्-त्रिलां तनुम्"। तारादौ विशेषस्तत्रैव दृश्यः।

भूतसञ्चार पु० ६त०। भूतावेशे राजनि०।

भूतसञ्चारिन् पु० भूत इव सञ्चरति सम्+चर-णिनि। दावानले मद्यमा०। [हि भाषते"।

भूतसंप्लव पु० ६त०। प्रलये "आभूतसंप्लवस्थानमस्मत्तत्वं

भूतसर्ग पु० ६त०। भूतसृष्टौ स च चतुर्दशविधः यथोक्तं वह्निपु० "ब्राह्मं प्रजापतीयञ्च सौम्यमैन्द्रमथैव च। गान्धर्वमथ कौबेरराक्षसैशाचमानुषम्। स्थावरं याम्यवं सर्गं सार्गं याकृनिकमथा। चतुर्दशविधं क्षेत्रज्ञूत-सर्गं प्रकीर्त्तितम्" क्षीरस्वामिनापि।

भूतसाधनी स्त्री भूतानि प्राणिनः साधयति अत्र आधारे ल्युट् ङीप्। भूमौ। भूमिं विना जन्तुमात्रासाधारणोत्पत्ते-रभावात् तस्यास्तथात्वम् यजु०२६।१ वेददीपः। [राजनि०

भूतसार पु० भूत इव क्षणत्वात् सारोऽस्य। स्त्रीनाकृतत्वे

भूतहन्त्री स्त्री भूतान् तद्भयं हन्ति हन-तृच् ङीप्। १वन्ध्याकर्कोट्यां, २श्वेतदूर्वायाञ्च तद्वारत्वे हि स्त्रीत्वं प्रजोत्पत्तिरोधकभूतभयनाशः। [राजनि०

भूतहर पु० भूतान् हरति अपहरतीति हृ-अच्। गुग्गुलौ

भूतहारिन् पु० भूतान् हरति स्थानान्तरं नयति हृ-णिनि। देवदारुवृक्षे राजनि०।

भूतांश पु० १ऋषिभेदे ऋ० १०।१०६।११। २शास्त्रप्रवर्त्तके निरु० १२।३०। ६त०। ३भूतानामंशे च। [ख्याते वृक्षे।

भूताङ्कुश पु० भूतानां पिशाचानामङ्कुश इवापसारकत्वात्।

भूताञ्जन पु० भूतानि पृथिव्यादीनि पञ्च द्रव्याणि आत्मा स्वरूपं यस्य। १देहे भूतानि पञ्च द्रव्याणि भूताः प्राणिनश्च आत्मा स्वरूपं यस्य। २परब्रह्मणि "सर्वं खल्विदं ब्रह्म तज्जलानिति" श्रुतिः। ३सर्वभूतात्मके हिरण्यगर्भे ४विष्णौ ५बटुकभैरवे च 'भूतात्मा भूतभावनः' इति तयोः स्तोत्रे।

भूतादि पु० ६त०। "परमेश्वरे भूतादिर्निधिरव्ययः" विष्णुस० सांख्यमतसिद्धे २अहङ्कारतत्त्वे "अहङ्कारात् पञ्चतन्मा-त्राणि"सा०सू०। स्वार्थे क तत्रार्थे।

भूतारि पु० ६त०। शिवे राजनि० तद्भयेन हि भूताप-सरणमिति तस्य तथात्वम्।

भूतार्त्त त्रि० ३त०। पिशाचाविष्टे हेमच०।

भूतार्थ पु० भूतः सत्यभूतोऽर्थो यस्य। यथार्थे

भूतालो स्त्री० भूतानीव अलति पर्य्याप्नोति अल-अच् गौरा० ङीष्। १भूमिपाटल्यौ, २क्षुपभेदाच्च राजनि०।

भूतावास पु० भूतानां प्राणिनामावासः अधिष्ठानत्वात्। १विष्णौ, "भूतावासो वासुदेवः" विष्णुस०। "वसन्ति त्वयि भूतानि भूतावासस्ततो हरिः" हरिवं० ६त०। २विभीतक-वृक्षे राजनि०।

भूताविष्ट त्रि० भूतेनाविष्टः। पिशाचग्रस्ते "भूताविष्टेषु पञ्चाशत् स्तनपत्यासु वै शतम्" स्मृ०त०।

भूतावेश पु० ६त०। पिशाचग्रहावेशे (भूते पाखोदा) लिङ्गा०।

भूति स्त्री भू-क्तिन्। १भवने २अधिमाद्यष्टविधैश्वर्ये ३शिवाङ्ग स्वभस्मनि ४गजवेशे च मेदि०। ५भूतृणे ६सम्पत्तौ ७ज्ञात्यां विश्वः ८वह्निनामौषधे च राजनि०।

भूतिक न० भूत्या सम्पत्त्या कायति कै-क। १भूनिम्बे २कचृणे च अमरः। २यमान्याम् ३चन्दने ४कट्फले हेमच०। पृ० वा दीर्घः। भूतीकोषत्व चिल्लके भावप्र०। [ब्रह्मा०।

भूतिकील पु० भूतेः सम्पत्तेः कील इव। (खानि) भूमिखाते

भूतितीर्था स्त्री कुमारानुचरमातृभेदे भा० श० ४७अ०।

भूतियुवक पु० कूर्मचक्रस्य वामकुक्षिस्थे देवभेदे मार्क०पु०८८अ०

भूतिलय पु० तीर्थभेदे भा०व० १२६अ०।

भूतृण न० भुव इव तृणं गन्धवत्त्वात् (गन्धखड) १तृणभेदे रत्नमा० २रोहिषतृणे पु० राजनि०।

भूतेश ६त०। १प्रथमाधीशे २परमेश्वरे च भूतेशादयोऽप्यत्र।

भूतेष्टा स्त्री ६त०। आश्विनशुक्लाष्टम्याम्।

भूतोड्डामर न० तन्त्रभेदे।

भूतोन्माद पु० भूतजन्य उन्मादः। पिशाचजन्ये उन्मादे।

भूत्तम न० भुवि उत्तमम्। स्वर्गे हेमच०।
भूदरीभवा स्त्री० भूदर्यां भूमिविले भवति भू-अच्। चाषु-कण्यां (उन्दरकानि) भाषायाम्।
भूदार पुं स्त्री० भुवं दृणाति खनति सुखादार्वम् दृ-अच्। शूकरे अमरः स्त्रियां जातित्वात् ङीष्।
भूदेव पु० भुवि देव इव। विप्रे अमरः। भूसुरादयोऽप्यत्र
भूधन पु० भूरेव धनमस्य। क्षपे हेमच०।
भूधर पु० भुवं धरति धृ-अच्। पर्वते अमरः।
भूध्र पु० भुवं धरति धृ-क। महीध्रे पर्वते हेमच०।
भूधात्री स्त्री भुवि धात्री धात्रीव रक्षिका पा० त०। भूम्या-मलक्याम् राजनि०।
भूनाग पु० भुवि नाग इव। उपरसभेदे राजनि०। [राजनि०
भूनिम्ब पु० भुवि निम्बः निम्ब इव पा० त०। (चिरात) क्षुपभेदे
भूनिम्बादि न० चक्रदत्तोक्ते औषधभेदे "भूनिम्बकटुका व्योषसप्तपर्णेन्द्रयवान् समान्। दो चित्रकात् वत्सक-त्वग्भागान् षोडश चूर्णयेत्। गुडूचीताम्बुना पीतं षड्दोषगुल्ममुत्। कासश्वासज्वरप्लीहमेहान्-त्यतिसारन्तत्। गुडूयोगाद् गुडाम्बु स्याद् गुडूचं रसान्वितम्"।
भूनीप पु० भुवि लग्नो नीपः पा० त०। भूमिलग्ने राजनि०
भूप पु० भुवं पाति पा क। भूमिपाले अमरः भूमिपादयोऽप्यत्र।
भूपति पु० ६त०। क्षपे भूमिपत्यादयोऽप्यत्र।
भूपद पु० भुवि पदं मूलं यस्य। १वृक्षमूले यज्ञच०। २मक्षि-कायां स्त्री० ङीष् अमरः।
भूपरिधि पु० ६त०। भूमेः परिधौ तत्स्थानं सू०सि० उक्तं यथा "योजनानि शतान्यष्टौ भूकर्णो द्विगुणानि तु। तद्वर्गतो दशगुणात् पदं भूपरिधिर्भवेत्" "लम्बज्याघ्नस्त्रि-ज्योद्धृतः स्फुटो भूपरिधिः स्वकः"। सि०शि०छेद्यकृतया-न्यथोक्तं यथा "प्रोक्तो योजनसंख्यया कुपरिधिः खघ्नाङ्क नागाब्धय ४८६७ खद्व्याप्तः कुभुजाङ्कशायकभुवः सिद्धां-शकेनाधिकः १५८११/२४। पृथ्वेतत्फलं तथा युग-गुणत्रिंशच्छराष्टाद्रयो ७८५२·१४ भूवेः कन्दुफलात्यत् कुपरिधिव्यासाहतेः प्रस्फुटम्"। [रत्नमा०
भूपलाश पु० भुवि पलाशं यस्य। विशल्यकारके क्षुपभेदे
भूपाटलि भुवि स्थाता पाटलिः। भूतालीवृक्षे राजनि०।
भूपाल पु० भुवं पालयति पाल-अच् उप०स०। भूपतौ मन्दमा०
भूपुत्र पु० ६त०। १मङ्गले २नरकासुरे च। ३जानक्यां स्त्री मन्दर० मो० ङीष्।
भूपुर न० भूरिव पुरम्। वज्रबहिःस्थे रेखात्रयविशेषविरचिते भूम्याकारे स्थाने।
भूपेष्ट पु० भूपस्येष्टः। राजादनीवृक्षे (पियासाल) राजनि० तद्दीजस्य चिरत्वे रति स्थातस्य राजप्रियत्वात्तथात्वम्।
भूबदरी स्त्री भुवि स्थाता बदरी। क्षुद्रकोल्यां राजनि०।
भूबल न० नरपतिजयचर्यायां जयसाधनोपाये बलभेदे "खरोदयैव चक्रैव यतुर्थं बल एवोऽधिकः। तत्र युद्धे बलं श्रेयं भूबलानां जयार्थिनाम्। तेषां नामानि वक्ष्ये-ऽहं ख्यातानि ब्रह्मणाऽग्रे। चतुरशीतिसंख्यानां यद्-बलेन जयी रणे। उड्डी जावज्जरी पूर्वा कामा कोङ्कणकीरिका। मिलीम्ला च मङ्गामारी खेलपाली च वंगजा। रुद्रकालानलं प्रोक्तं कालरेखा निरा-मया। जयलक्ष्मीर्महालक्ष्मीर्जया विजयभैरवी। वामा योगेश्वरी चण्डी व्यामाम्बुकङ्कालरी। मार्दुची सिंहली तन्वी महामाया महेश्वरी। देवकोटी शिवा मल्लिदेंटा माला वराटिका। तिलखा मत्सरी धर्मा खता दृष्टाक्षयाऽक्षया। दुर्मती प्रवरा गौरी कालो नरहरी खता। खेचरी भूचरी गुप्ता डाकिनी विष्टि देवता। त्रैलोक्यविजया काली करालाऽऽडवा परा। रौद्री च त्रिगुणातङ्गे अभेद्या दृढनी जिता। मङ्गला वर्गभूमिश्च कापाली खनिलानला। चन्द्रार्कबिम्बभूमी च षड्भूराधिदेवता। राङ्कवालानली भूमिः खर भूमिर्द्विधा मता। रुद्रत्रिकाधिकाश्चैव राङ्कवाद्विधस्त्रया। चन्द्रः षड्विधः सूर्यश्चतुर्धा योगिनी त्रिधा। कालवेला त्रिभेदा च तिथिनक्षत्रवारगा। एतानि भूबलान्यत्र ज्ञात्वा यः प्रविशेत् रणे। खरयत्तस्य मन्यन्ति मेघा वातहता यथा। समभाद्याधिके भागे खरैश्चक्रैश्च भूबलैः। स्यात्सैन्याधिके यत्नो बलविज्ञान-संयुते। एतद्बलयानि तत्र ज्ञयानि।
भूभर्तृ पु० षष्ठी०। ६त०। भूमिपतौ भूमिभृद्वादयोऽप्यत्र।
भूभुज् पु० भुवं भुङ्क्ते भुनक्ति पालयति वा भुज-क्विप्। भूपाले अटा०। [१पर्वते, २भूपाले च मेदि०।
भूभृत् पु० भुवं बिभर्त्ति धारयति, पालयति वा भृ क्विप्।
भूमण्डल त्रि० ६त०। मण्डलाकारे भूमिभागे।
भूमन् पु० बहोर्भावः बहु+इमनिच् "बहोर्लोपो भू च बहोः" इत्यादे भादेशः। १बहुत्वे अतिशये चार्थे इमनिच् प्राग्वत् २बहुतिशयवद्वस्तुयुते च। "यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखं भूमा त्वेव विजिज्ञासि-

तव्यः। भूमानं भगवो विजिज्ञासे" छा० उ०। "यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखं भूमात्वेव विजिज्ञासितव्य इति भूमानं भगवो विजिज्ञासे" छा० उ०। "यो वै भूमा तत्सुखं निरतिशयम् बह्वतिशयवत्त्वादल्पम्। अतस्तद्विज्ञेयत्वे सुखं नास्ति अल्पानां तृष्णाहेतुत्वात् तृष्णा च दुःखबीजम्। न हि दुःखबीजं ज्वरादि सुखं दृष्टं लोके। तस्माद्युक्तं नाल्पे सुखमस्तीति। अतो भूमैव सुखम् तृष्णादिदुःखबीजत्वासम्भवाद्ब्रह्मेति भाष्यम् तस्मिन् प्रपाठके च यस्मात् यो भूमा तल्लक्षणं दर्शितम्।

भूमय त्रि०भू+मयट्। स्वरूपार्थे २ख्यायां त्रिका० स्त्री ङीप्

भूमि(मी) स्त्री भवन्त्यस्मिन् भूतानि भू–मि किच्च वा ङीप्।

१पृथिव्याम् २स्थानमात्रे मेदि० ३जिज्ञासायां संक्षि० उपा० ४योगशास्त्रोक्ते ४योगिनां चित्तस्यावस्थाभेदे, ५एकसंख्यायाञ्च। षण्णां संख्यादिर्भूश्च समा०बहु०। हिमभूः प्रासादः षाण्णभूमो देयः। योगोक्तभूमयश्च "तस्य भूमिषु विनियोगः" पा० सू० उक्ताः। "तस्य संयमस्य जितभूमेर्योऽनन्तरा भूमिस्तत्र विनियोगः। तज्जयिताधरभूमिरनन्तरभूमिं विजेतुं प्रान्तभूमिषु संयमं लभते तदभावाच्च कुतः तस्य प्रज्ञालोकः, ईश्वरप्रसादाल्लितोत्तरभूमिकस्य च नाधारभूमिषु परचित्तज्ञानादि संयमो युक्तः तस्मात् तदर्थस्यान्यतएवावगतत्वात् भूमेरल्पा इयमनन्तरा भूमिः"भा०। सा च भूमिः सप्तप्रकारा यथोक्तं तत्रैव "तस्य सप्तधा प्रान्तभूमिः प्रज्ञा" पात०सू०। "तस्येति प्रत्युदितख्यातेः प्रत्ययस्यावरः सप्तधेति वरणभेदापगमाच्चित्तस्य प्रत्ययान्तरानुत्पादे सति सप्तप्रकारैव प्रज्ञा विवेकिनो भवति। तद्यथा परिज्ञातं ज्ञेयं नास्य पुनः परिज्ञेयमस्ति क्षीणा ज्ञेयक्लेशा न पुनरेतेषां क्लेशानामस्ति कारणात्मकं निरोधसमाधिना ज्ञानम्। भावितो विवेकख्यातिरूपो ज्ञानोपायः इत्येषा चतुष्टयी कार्यविमुक्तिः प्रज्ञायाः। चित्तविमुक्तिस्तु त्रयी चरिताधिकारा बुद्धिगुणा गिरिशिखरक्षुण्णा इव पाषाणा निरवस्थानाः स्वकारणे प्रलयमात्यन्तिकं यान्ति। न चैषां विप्रलीनानां पुनरुत्पादः प्रयोजनाभावादिति अतस्तासामवस्थायां सुखसम्बन्धातीतस्वरूपमात्रज्योतिरमलः केवलो पुरुष इत्येतां सप्तविधां प्रान्तभूमिप्रज्ञामनुपश्यन् पुरुषः कृतस्थ इत्याख्यायते प्रतिप्रसवेऽपि चित्तस्य कृतः कृतस्थ इत्येव भवति सुखातीतत्वादिति" विवरणम्।

पृथिवीरूपभूमिसुखाद्य भा०शा०उक्ता यथा "भूमेः स्थैर्यं सुखत्वञ्च काठिन्यं प्रसवार्थता। मन्दो गुरुत्वं शक्तिश्च संघातः स्थापना धृतिः"। प्रथमसुखं पतनविरोधी सुखः द्वितीयगुरुत्वम् पिण्डपुष्टिरतो न शोनरूक्षम्। शक्तिः धारणादिसामर्थ्यम् संघातः संश्लिष्टावयवत्वम्। स्थापना मनुष्यादेर्धारणादिव्यापारः। धृतिर्धारणा इत्यर्थः।

भूमिकदम्ब पु० भूमिजातः कदम्बः शा० त०। कदम्बभेदे "त्रिकदम्बा कटुप्राय ग्रन्था दोषहरा स्मृताः। कषाय

निक्षाः पिप्पला वीर्यवद्विवरा धराः" राजनि० ।

भूमिकन्दली स्त्री भूकन्दा कन्दली या० त० । कन्दली-भेदे भावः ६।१०। भाव० ।

भूमिकम्प पु० ६त० । क्षितिचलने तत्कारणादिकं स फलविशेषं ज्ञ० व० १२अ० उक्तं यथा

"क्षितिकम्पमाह रेवे दहदलर्जलनिधिक्षुब्धतम् । भूभारक्षिप्तदिग्गजविश्रमसंक्षुब्धं चान्ये । अनिलोऽनिलेन क्षिप्तः क्षितौ यतन् सञ्चलं करोत्येके । केचित्त्वदृष्टकारितमिदमन्ये प्राहुराचार्याः । गिरिभिः सुरा सपत्नैर्मुधा प्रयतद्भिरुत्पतद्भिश्च । चाकम्पिता पितामहभाङ्कारसंदर्शने व्रीडम् । भगवन्नाम ममैतत् त्वया कृतं यदचलेति तच्च तथा । क्रियतेऽचलैश्चलद्भिः प्रलयं नाम्न खेदश्च । तस्माः सगद्गदगिरं क्षितिं स्फुरिताधरं विनतमीक्षत् । सानुविलोचनमवलोक्य पितामहः प्राह । मन्युं कुरेन्द्र ! धारय्राः क्षिप कुलिशं मैनपक्षभङ्गाय । शक्रः श्रुतमित्युक्त्वा या मेरिति वसुमतीमाह । किन्वनिशदृढनखुरपतिवरुचा यदपत्-कलायबोधार्थम् । प्राग्दक्षिणचतुर्भागेषु दिननिशोः कर्मविघ्नानि । चत्वारोऽस्याद्याद्यादित्यं खगशिरो ऽन्ययुक् चेति । मरुद्गणमेतद्दायव्यमरुक् रूपाणि सप्राहात् । धूमाकुलीकृताशे नभसि नभस्यान् रजः क्षिपन् भीमम् । विरजन् द्रुमांश्च विचरति रविरथटङ्कारवभाखो च । वायव्ये मरुत्ये सस्याम्बुवनौषधीक्षयोऽभिहितः । श्वयथुश्वासोन्मादज्वरकासभया वणिक्पीडा । रूपायुधवृद्धाः स्त्रीकविनाम्बर्षगणक्षितिजनाः । पौष्णे कौशाकुरुमगधदशार्णमत्स्याश्च । पुष्याग्ने रविशाखाभरणीपितृराजभाग्यसंज्ञानि । वह्नौ स्फोटभुजोऽयं करोति रूपाण्यनेतानि । तारोल्कापातादतमादीप्तनिशाम्बरं सदिग्दाहम् । विचरति मरुत्सखायः सप्तार्चिः सप्तदिवसानः । चाग्नेयेऽम्बुदनाशः सविद्युदाश्रयसङ्क्षयो रूपतिवैरम् । दक्षूविषविकाज्वरविसर्पिकाः पाण्डुरोगश्च । दीप्तौजसः प्रचण्डाः पौष्णे चाग्नेय्वाय्वाकाशौकाः । तक्षकविक्षुब्धकुद्विजाः प्रवराश्च नैकविधाः । अभिजिच्छ्रवणधनिष्ठाप्राजापत्यैन्द्रवैश्वमैत्राणि । सुरपतिमरुत्सखमेतद्भवन्ति चाश्च रूपाणि । चलिताचलवर्षोघो गम्भीरविरावविषमसङ्क्षुब्धः । सवज्राशनिकवाहिनिभा विद्युन्ति पयः पयोवाहाः । ऐन्द्रं क्षितिकम्पातिस्खातावनिपालमरणविघ्नं वि । यतिवारमलयरुदनरोगक्षुद्भीतोपाय । वायिवृगन्धरपोरवविरातकीराभिसारवल्लभद्राः । अर्जुनदलवासुधासवपीठाकरभिष्टदृष्टिकरम् । पौष्णाग्नाद्रौद्रेषामूद्वाहिदुर्भिक्षरूपाणि । मरुत्सखमेतद्दारुणमरुद्गणाश्च भवन्ति रूपाणि । नीलोत्पलाञ्जिभिद्राञ्जनसिंधो मधुरराविणो वल्गवाः । तडिद्वलासितदेहा धाराद्रुवर्षिणो जलदाः । वारुणमर्घवसरिदाश्रितसत्त्वमतिदृष्टिं विगतवैरम् । गोनर्दचेदिकुरान् किरातवैदेहकान् हन्ति । षड्भिर्मासैः कस्यो द्वाभ्यां पाकस्तु याति निर्घातः । अन्यानथुत्पातान् जगुरन्ये मरुद्वलैरेतैः । वह्नेः स्फुरिन्द्रपुरं रजश्च निर्घातभूकम्पकल्पप्रदाहाः । वातो ऽतिचण्डो मरुतं रवीन्द्वोर्नक्षत्रतारागणवैक्लवानि । व्यभ्रे दृष्टिर्जलं वातदृष्टिर्धूमोऽम्भोविस्फुलिङ्गार्चिषो वा । वन्यं सत्त्वं यामसंध्ये विशेद्वा रात्रावैन्द्रं कार्मुकं दृश्यते वा । सन्ध्याविकाराः परिवेषसंज्ञा नद्यः प्रतीपा दिवि तूर्यनादाः । अन्यच्च यत् स्यात् प्रलयेः प्रतीपं तत्सञ्चलैरेव फलं निशाद्यम् । इत्यैन्द्रो वायव्यं वायुर्याम्यैन्द्रमेवमन्योऽन्यम् । वारुणकौबेरभुजार्यपि वेलानक्षत्रजाः कर्माः । प्रथितनरेश्वरमरुद्यजनान्याग्नेयवायुमरुद्भवयोः । ध्रुवयमरुद्वह्निभिरुपनाग्ने जलाद्यापि । वारुणयोरिन्द्रयोः सुभिक्षशिवदृष्टिहार्दयो लोके । नागोऽतिभूरिपयसो निवृत्तवैराश्च भूपालाः । पञ्चैतत्तर्भिरनिलक्षितिभिर्मित्रैवराट् च सप्ताहात् । सद्यः फलति च वरुणो येषु न कालोऽनुतेभ्यूहः । चलति पवनः शतदलं शतमनसो दशयोजनान्वितम् । खलिखपतिरशीतिसंवृतं कुलिशधरोऽभ्यधिकं च षष्टिकम् । त्रिचतुर्दशप्रमदिने माघे पक्षे तथा त्रिपक्षे च । यदि भवति भूमिकम्पः प्रधानसंज्ञपनाग्नयो भवति ।"

भूमिचलनादयोऽत्र । "निर्घाते भूमिचलने" भ०त० ।

भूमिका स्त्री भूमिरिव कायति कै-क । १रचनायां "अन्यरूपेवेदन्यस्य प्रवेशस्तत्र भूमिका" इत्युक्ते नाट्ये-अभिनेयपात्रादिवेशान्तरस्वरूपे २अन्ये श्रवणव्यवहारार्हे ग्रन्थे च "नैयायिकादिभिराक्षा प्रथमभूमिकायामवतारितः" इति सांख्यप्रवचनभाष्यम् ।

भूमिकुष्माण्ड पु० भूमिजातः कुष्माण्डः मा०त० (भुँइ-कुमड़ा) ख्याते लतामेदे रत्नमा० ।

भूमिखर्जूरिका स्त्री भुवि जाता खर्जूरिका मा० त० । खर्जूरिकाभेदे "भूमिखर्जूरिका साही दुरारोहा सकु

ऋद्धा । अथ खल्वफला काकर्कटी क्षाद्रमत्स्या । पिण्डखर्जूरिका त्वन्या सा देशे पश्चिमे भवेत् । खर्जूरी गोस्तनाकारा परादृढोपादिङ्गता । जायते पश्चिमे देशे सा क्रोष्टोरिति कीर्त्तिता । खर्जूरीस्तिक्तं शीतं मधुरं रसपाकयोः । स्निग्धं रुचिकरं हृद्यं बलवर्णकरं गुरु । तर्पणं रक्तपित्तघ्नं पुष्टिविष्मूत्रशुक्रदम् । कोष्ठमारुतलङ्घित्वं बाह्यवातकफापहम् । ज्वराभिघात-क्षुत्तृष्णाकासश्वासनिवारणम् । मदमूर्च्छाभ्रमश्रान्तिपित्त-मद्योद्भूतगदान्हरेत् । मज्जतोभ्यां गुणैरल्पा खल्वखर्जूरिका स्मृता । खर्जूरीतस्तोयन्तु मदपित्तकरं भवेत् । वातश्लेष्महरं रुच्यं दीपनं बलशुक्रकृत्" भावप्र० ।

भूमिचम्पक पु० भूमिश्चम्पः चम्पक इव आकृतिर्(भूरचांपा) इति-भेदे मध्य० ।

भूमिज पु० भूमेर्जायते जन-ड । १मङ्गलग्रहे २नरकासुरे मेदि० ३भूमिजद्रव्ये ४मनुष्ये च राजनि० । ५भूमिजात-मात्रे त्रि० । ६क्षितायां स्त्री ।

भूमिजगुग्गुलु पु० कर्म० । आशापुरजाते गुग्गुलौ राजनि०

भूमिजम्बु स्त्री ७त० । क्षुद्रजम्बां रत्नमा० वा जङ्-तत्रार्थे राजनि० । स्वार्थे क । तत्रार्थे स्त्री अमरः ।

भूमिजीविन् पु० भूमिं तत्कर्षणं जीवति जीव-णिनि । वैश्ये मद्धरत्नमा० ।

भूमिञ्जय पु० विराटरूपस्य पुत्रभेदे भा० वि० ३२अ० ।

भूमिधर पु० भूमिं धरति धृ-अच् । १कूर्मरूपेऽवतारे उपचारात् २पर्वतमात्रे । [दयोऽत्र ।

भूमिप पु० भूमिं पाति पा-क । नृपे जटा० । भूमिपाला-

भूमिपत्र पु० भूमिः पत्रं इवास्य । वातादे शारा० ।

भूमिपति पु० ६त० । भूपतौ भूमिनाथादयोऽत्र ।

भूमिपिशाच पु० भूमौ पिशाच इव । तालवृक्षे जटा० ।

भूमिपुत्र पु० ६त० । १मङ्गलग्रहे २नरकासुरे च भूमिपुत्रा-दयोऽत्र । ३आनन्दां स्त्री गौरा० ङीष् ।

भूमिप्रविभाग पु० सुश्रुतोक्ते औषधार्थभूमिविभागे

"अथातो भूमिप्रविभागविज्ञानीयमध्यायं व्याख्यास्यामः । स्थावरकराक्षविषमवल्मीकक्षयानाऽद्यतनदेवतायतनसिक-ताभिरतुपहतामनूपरामभङ्गुरामदूराद्रिकां स्निग्धां प्ररो-हवतीं मृदीं स्थिरां समां श्लक्ष्णां गौरीं लोहितां वा भूमिमौषधार्थं परीक्षेत तस्यां जातमपि क्रमिविषयक्षा-तपपवनदहनतोयसम्बाधमार्गैरतुपहतमेकरसं पुष्टं पृ क्षागहनूकछरीक्ष्यां औषधमादद्यीतौषधभूमिपरीक्षा-विशेषः सामान्यः । विशेषतस्तु । तत्राश्मवती स्थिरा गुर्वी श्यामा क्षुद्रा वा स्थूलदलशल्मायां वृक्षगु-भूयिष्ठा । स्निग्धा शीतलाऽऽस्रतोदका स्निग्धशल्लक-कोमलदलच्छाया शुक्लाम्बुगुणभूयिष्ठा । मालावर्त्ती बहु-श्मवती प्रविरलाल्पाश्वकुदलपरोहाऽग्निगुणभूयिष्ठा । रूक्षा भस्मरासभवर्त्ती तत्रस्थकोटरास्थरसदलच्छायाऽ-ऽनिलगुणभूयिष्ठा । मृदी समाश्वभस्मव्यक्तरसदला सर्वतोऽसारदला महापर्वतदलच्छाया श्यामा चाकाश-गुणभूयिष्ठा । तत्र केचिदाङ्गराचार्याः प्राड्वर्षा-शरद्धेमन्तशिशिरवसन्तग्रीष्मेषु यथासंख्यं मूलपत्रत्वक्क्षीर-सारफलान्यादद्यीतेति तन्तु न सम्यक् कस्मात् सौम्याग्ने-यत्वाच्छरीरतः । सौम्यान्यौषधानि सौम्येष्वृतुष्वादद्यीता-ग्नेयान्याग्नेयेष्वेवमव्यापन्नगुणानि भवन्ति । सौम्यान्यौष-धानि सौम्येष्वृतुषु गृहीतानि सोमगुणभूयिष्ठायां भूमौ जातान्यतिमधुरस्निग्धशीतानि जायन्ते । एतेन शेषं व्याख्यातम् । तत्र पृथिव्यम्बुगुणभूयिष्ठायां भूमौ जातानि विरेचनद्रव्याण्यादद्यीतान्याकाशमारुतगुण-भूयिष्ठायां वमनद्रव्याणि । उभयगुणभूयिष्ठायामुभयतो-भागानि । आकाशगुणभूयिष्ठायां संशमनान्येवं बल-वत्तराणि भवन्ति । सर्वाण्येव चाभिनवान्यव्यापन्नगुणानि मधु-घृतगुडपिप्पलीविडङ्गेभ्यः । सर्वाण्येव बलवीर्याणि वी-र्यवन्ति तेषामसम्पत्तावनतिक्रान्तसंवत्सराण्यादद्यीतेति । भवन्ति चात्र । गोपालास्तापसा व्याधा ये चान्ये वन-चारिणः । मूलाहाराश्च ये तेभ्यो भेषजव्यक्तिरिष्यते । सर्वावयवसाध्येषु पत्राशत्वक्षादिषु । व्यवस्थितो न कालोऽस्ति तत्र सर्वो विधीयते । गन्धवर्णरसोपेता षड्विधा भूमिरिष्यते । तस्माद्भूमिसमावेन बीजिनः षड्वैर्युताः । अव्यक्तः किल तोयस्य रसो निखव-निश्चितः । रस एव स चाव्यक्तो भूमेरेव रसाद्भवेत् । सर्वत्रावयवसम्पन्ना भूमिः साधारणी स्मृता । द्रव्याणि यत्र तत्रैव तद्गुणानि विशेषतः । विगन्धेनाघरामृष्ट-मविपन्नं रसादिभिः । नवं द्रव्यं पुराणं वा ग्राह्यमेव विनिर्दिशेत् । विडङ्गं पिप्पली चौद्रं सर्पिश्चाप्यनवं स्थितम् । श्रेष्मसम्पत्त्वभिनवं श्लक्ष्णीवाद्दोषवर्जितम् । जङ्गमानां वयस्थानां रक्तरोमनखादिकम् । क्षीरमूत्र-पुरीषाणि जीर्णाङ्गारेषु संक्षिपेत् । श्लोतश्छद्मखकुक-शङ्कुविन्यस्तभेषजम् । प्रयत्नाद्यां दिशं गुरौ भेषजा-गारमिष्यते ।"

भूमिमण्ड पु॰ भूमिं मण्डयति मण्ड-अच्। (झापरमाजि) लतायेदे रत्नमा॰। [स्तु। माधवीलतायाम् राजनि॰।

भूमिमण्डपभूषण स्त्री भूमिमेण्डप इव तं भूषयति भूषि-

भूमि(मी)रुह पु॰ भूम्यां भूमौ वा रोहति रुह-क। वृक्षे मल्लीरुहादयोऽप्यत्र। [त्रिका॰।

भूमिलाभ पु॰ भूमिर्लभ्यतेऽत्र लभ-आधारे घञ्। क्षत्रौ

भूमिलेपन न॰ भूमिर्लिप्यतेऽनेन लिप-करणे ल्युट् इत॰। गोमये हेमच॰।

भूमिवर्द्धन पु॰ भूमिं वर्द्धयति खदेहस्यपार्थिवांशोपचयेन वृध-णिच्-ल्यु। यवे मते हेमच॰ क्षितिवर्द्धनादयोऽप्यत्र

भूमिशय पु॰भूमौ शेते शी-अच्।१बालके २भूमौ शयाने त्रि॰

भूमिष्ठ पु॰ भूमौ तिष्ठति स्था-क अलु॰मत्वम्। भूपृष्ठस्थे।

भूमिसत्र न॰भूमिदानरूपं सत्रं मा॰त॰। भूमिदानरूपे यागभेदाख्ये सत्रे "दशभिः सहितां भूमिं यवगोधूमशालिनीम्। गोऽश्वाढ्यनपूर्णां वा बाह्मणेभ्यौदुपार्जिताम्। निधिगर्त्तां दृढभूमिं सर्वरत्नपरिच्छदाम्। अध्वर्यवे प्रयच्छन्ति लोकान् भूमिसत्रं हि तत्स्मृतं" भा॰श॰ त॰६२अ॰

भूमिसम्भवा स्त्री भूमिः सम्भवोऽस्याः। १सीतायां ज़टा॰। २मङ्गलग्रहे ३नरकासुरे पु॰। ४भूमिजातमात्रे त्रि॰।

भूमिसेन पु॰ दशरथमन्त्रिपुत्रभेदे मार्क॰पु॰ ६४अ॰।

भूमिस्तोम पु॰ एकाहसाध्ये यज्ञभेदे आश्व॰ ६५।२।

भूमिस्पृश् पु॰ भूमिं स्पृशति स्पृश-क्विन्। १वैश्ये २मनुष्ये ३चौरभेदे मेदि॰। ४खड्गे ५अन्त्ये च शब्दरत्ना॰।

भूमी स्त्री भू-मि किच्च ङीष्।१क्षणस्थित्तिकायां विषापहरणहेतुतया साच श्रुयते यथा "भूमी कुरुवकश्चैव मम एकाक्षरः स्मृतः। एकयो द्विस्थितो वापि प्रयोक्तव्यो विषापहः"।

भूमीच्छा स्त्री भूमौ तत्पतने इच्छा। भूमिपतनेच्छायाम्।

भूमीन्द्र पु॰ भूमौ इन्द्र इव। नृपे शब्दर॰।

भूमीसह पु॰ भूमौ सहते सह-अच्। (भुरसर) वृक्षभेदे "भूमीसहस्तु शिशिरः रक्तपित्तप्रसादनः" भावप्र॰।

भूम्यनन्तर पु॰भूमेरनन्तरः। स्वविषयघनिष्टदेशस्थे नृपाधां मन्त्री कामन्द॰ ८५६।

भूम्य त्रि॰ भूमिमर्हति यत्। धराहें ऋ॰ ६।४।।१॰।

भूम्यामलकी स्त्री भूमिस्था आमलकी मार्क॰त॰। क्षुद्रामलकीख्याते क्षुपे राजनि॰। "क्षात् भूम्यामलकी तिक्ता कषाया मधुरा हिमा। पित्तास्राकार्षिताक्षुक्षयपाण्डुक्षयप्रणुत्" भावप्र॰।

भूम्यामली स्त्री भूम्या इव आमलति सम्बध्नाति आ+मल अच् गौ॰ ङीष्। भूम्यामलक्याम् राजनि॰।

भूर्याडुक्ष न॰ क्षुपभेदे (भूजातखड़) राजनि॰।[शब्दरत्ना॰

भूयस् अव्य॰ भुवे भावाय वसति यस-भावे क्विप्। पुनरर्थे

भूयस् त्रि॰अतिशयेन बहुः ईयसुन्। "बहोर्लोपो भूच बहोः" ईयोपः भूरादेशश्च। बहुतरे मेदि॰स्त्रियां ङीप्।

भूयश्चस् अव्य॰भूयस्+चीप्सायां अस् सलोपः। बहुश एवार्थे

भूयिष्ठ त्रि॰ अतिशयेन बहुः इष्ठन् भादेशो युक् च।।बहुतरे २प्रचुरे च।

भूयुक्ता स्त्री भुवा युक्ता संज्ञा। भूमिखर्जूर्याम् राजनि॰

भूर् अव्य॰ भू-रुक्। अन्तरीक्षलोकादधःस्थे चरणसञ्चारयोग्यस्थाने लोके भूः आहा इदं भूः यजुषां देवतोद्देशः।

भूरि त्रि॰ भू-क्रिन्। १विष्णौ २त्रिषे ३इन्द्रे च मेदि॰। ४स्वर्णे न॰शब्दरत्ना॰बहु-रि आदेशः ५प्रचुरे त्रि॰अमरः ६सोमदत्तपुत्रभेदे पु॰ भा॰ आ॰ १८६ अ॰। शिवा॰ अप्यत्र अच्। और भूरेरपत्ये पुंस्त्री॰। [द्रव्ये राजनि॰।

भूरिगन्धा स्त्री भूरिः प्रचुरो गन्धो यस्याः। पुरानामगन्ध-

भूरिगम पु॰ भूरि भारयुक्तत्वेऽपि बहु गच्छति गम-अच्। गर्दभे राजनि॰ स्त्रियां जातित्वात् ङीष्।

भूरिज् स्त्री भू-रुजि अच रपरः। पृथिव्यां वि॰कौ॰।

भूरिदक्षिण त्रि॰ भूरिर्दक्षिणा यस्य। १बहुतरदक्षिणादानयुक्ते २विष्णौ पु॰"कपीन्द्रो भूरिदक्षिणः"विष्णुस॰।

भूरिदुग्धा स्त्री भूरीणि दुग्धानि निर्यासा यस्याः। वृक्षिकायां राजनि॰।

भूरिद्युम्न पु॰ भूरि द्युम्नं धनं यस्य। नवममनोः पुत्रभेदे सुद्युम्नपुत्रे हरिवं॰ ७अ॰। मार्क॰पु॰। भूद्युरिमच्च इति पाठः प्रक्षिप्तादिकः तदेवाक्यतया भूरिद्युम्न इत्येव तत्र पाठस्यौचित्याच्।

भूरिधामन् पु॰ नवममनोःपुत्रभेदे हरिवं॰ ७अ॰।

भूरिपत्र पु॰ भूरीणि पत्राण्यस्य। सप्तपर्णवृक्षे राजनि॰।

भूरिपलितदा स्त्री भूरि पलितमिव दायति दै-क। पाण्डुरकदलीवृक्षे राजनि॰।

भूरिपुष्पा स्त्री भूरीणि पुष्पाण्यस्याः। शतपुष्पायाम् राजनि॰

भूरिप्रेमन् पु॰ भूरिः प्रचुरः प्रेमास्य। चक्रवाके राजनि॰।

भूरिफेना स्त्री भूरीणि फेनान्यस्याः। (चामखमा) वृक्षवा॰ वृक्षे अमरः।

भूरिवला स्त्री भूरीणि बलानि यस्याः ६त॰।२अतिबलायाम्

राजनि०।२प्रचुरवले त्रि०३श्रुतरा०कुलभेदे पु०भा०श०२७अ०

भूरिमल्ली स्त्री भूरि बहु यथा स्यात् तथा मलति मल-इच् गौरा० ङीष्। अम्बष्ठायाम् राजनि०।

भूरिमाय पं स्त्री० भूरयः मायाः यस्य। १रुद्रगणे अमरः स्त्रियां योषधत्वात् टाप्। २प्रभूतमायायुते त्रि०

भूरिमूलिका स्त्री भूरीणि मूलानि यस्याः कप् टापि अत इत्वम्। अम्बष्ठायाम् नैघण्टुप्र०।

भूरिश्रस् अव्य० भूरि-श्रस्। बहुत इत्यर्थे।

भूरिश्रवस् पु० ह्रस्व० चन्द्रवंशजे १सोमदत्तसुते नृपभेदे। भा० आ० १८७ अ०। २प्रचुरयशस्के त्रि०।

भूरिश्रेष्ठिक पु० भूरयः श्रेष्ठिनो यत्र। (भुरसट) गौड़देशस्थे पुरभेदे "गौड़े राष्ट्रमनुत्तमं निरुपमा तत्रापि राढ़ा पुरी भूरिश्रेष्ठिकनाम धाम परमं तत्रोत्तमोनः पिता" प्रबोधच०।

भूरिह् त्रि० भूरीन् हन्ति हन-क्विप्। १बहुतरनाशके २बहुरभेदे पु० भा०आ० २२७ अ०।

भूरुण्डी स्त्री भुवं रुणद्धि आच्छादयति रुडि-आडतौ (आधवडत्तौ पठितः) अच् उप०स०। (झारिखँड़ी) इत्यभेदे अमरः। [शब्दमा०

भूरुह पु० भुवि रोहति रुह-क ७त०। महीरुहे इत्यै

भूर्ज पु० भर्ज-अच् ७त०। खनामख्याते वृक्षप्रधाने इत्यै। "भूर्जत्वचः खर्जवतीर्दधानाः" कुमा०। "भूर्जः कटुः कषायोष्णः भूतरक्षाकरः परः। त्रिदोषशमनः पथ्यः दुष्टकोटिघ्ननाशनः" राजनि०। "कर्फरोगपित्तकफमेदोविषहरश्च सः" भावप्र०।

भूर्जकण्टक पुंस्त्री० "ब्राह्मात्तु जायते विप्रात् पाषाण्या भूर्जकण्टकः" मनूक्ते जातिभेदे स्त्रियां ङीष्।

भूर्जपत्र पु० भुवि-भर्ज पत्रं यस्य। खनामख्याते इत्यै। भूर्जत्वगादयोऽप्यत्र रत्नमा०।

भूर्णि स्त्री भृ-नि नि० जत्व रपरः। पृथिव्यां त्रि० को०।

भूर्लोक पु० कर्म०। पादचतुश्चारलोक्यस्थानरूपे लोके।

भूलम्ना स्त्री भुवि लम्ना ७त०। अङ्गपुष्पाम् राजनि०।

भूलता स्त्री भुवि लतेव। महीलतायां (केँचो) धरोरुपभेदे हेम०।

भूलिङ्गशकुनि पु० भूलिङ्गः शकुनिः कर्म०। विहगाधिनि पक्षिभेदे "प्रकृतिं यान्ति भूतानि भूलिङ्गशकुनिर्यथा" भा० स० ४१अ०। तद्विवृतिर्यथा

"अद्य चैषा न ते बुद्धिः प्रकृतिं याति भारत!। मदैव कथितं पूर्वं भूलिङ्गशकुनिर्यथा। भूलिङ्गशकुनिर्नाम पार्श्वे हिमवतः परे। भीष्म! तस्याः सदा वाचः श्रूयन्ते ऽर्थविगर्हिताः। सा शाकुनमितीदं सा सततं वाशते क्षिव। शाकुनं चाप्यनातीव चरन्ती नावबुध्यते। शान्हि मांसार्थिनं भीष्म! खखात् क्षिप्रञ्च खादतः। दन्तान्तरविलग्नं यत्तदादत्ते ऽल्पचेतना। रक्षतः सा हि क्षिप्रञ्च भीष्म! जीवत्यसंशयम्। तद्वत्त्वमप्य धर्मिष्ठ! सदा वाचः प्रभाषसे भा०स०४४अ०। "भूलिङ्गशकुनिर्यथान्यद्दत्त्वान्यत् करोति तद्वत्ते एवं कामयन्ते यवत्तं वदन्तीत्यर्थः भुवं लिङ्गतीति भूलिङ्गो विहगायौ पक्षिविशेषः एवेति पाठे एषा शब्दोद्या बुद्धिस्ते तदीया तद्वत्ते इति योज्यं तदा खमेव शकुन्युपमत्वम् अर्थविगर्हिताः पक्षिविपरीतक्रियया अर्थोविगर्हितो वाचां ताः। वाशते शब्दं करोति। मांसार्थिनं दंष्ट्रान्तरलग्नस्य मांसस्य वर्हिर्निर्गतभागमनुद्धृत्य रक्षति इति। सा हि पक्षिणी मत्स्यमुखे प्रविष्टापि तद्ग्रहेच्छया जीवन्ती यथा लोकानुपदिशति मा शाकुनमिति तथा त्वमुपदेशकारित्वात् मत्स्यमुखे पतितोऽपि मत्स्यना ग्रहेच्छितो जीवन्नन्यानुपदिशसि मत्स्यमुखे न पतितव्यमिति" नील०।

भूवलय न० भूर्वलयमिव। भूमिपरिधौ। [निघण्टुः

भूशयी स्त्री भूशय्या यमी डीष्०त०। कृच्छ्रव्रतां मदनपादभूशय्य पु० भुवि शेते शी-अच् ७त०। १विष्णुभेदे नक्षत्रादौ। २विष्णौ च "भूशयो भूमयो भूतिः" विष्णुस०। स हि रामावतारे रक्षद्रुवधनाय सागरोपान्तभूमौ शयित इति तस्य तथात्वम्। [नैघण्टुप्र०

भूशर्करा स्त्री भुवि ख्याता शर्करा श०त०। कन्दभेदे

भूशेलु पु० भुवि ख्याता शेलुः श०त०। भूकुष्मांडारके राजनि०।

भूष मण्डने वा चु०उभ०सेट् सा० पर० सक० सेट्। भूषयति ते भूषति अबूभूषत्-त अभूषीत्।

भूषण न० भूष्यतेऽनेन भूष-करणे ल्युट्। १अलङ्कारे किरीटादौ। भावे ल्युट्। २भूषणयुक्ते। अलङ्कारभेदाः तत्साधनद्रव्याणि यथा

"किरीटञ्च शिरोरत्नं कुण्डलञ्च ललाटिका। ताटङ्कञ्च हारश्च वैवेयकमथोरसिका। प्रालम्बिका रत्नसूत्रकण्ठी ऽवर्णमालिका। पार्श्वदोलौ नखदोलौ कङ्कणी चादय स्तथा। कटिसूत्रं माधवको मूर्द्धतारा ललन्तिका। अङ्गदौ

बाहुवलयः शिखाभूषणमिङ्किका । प्रणखवस्त्रं ततः पार्श्वं नाभिपूरोऽथ मालिका । सप्तकी शृङ्खलश्चैव दण्डपत्रश्च वर्णकः । जघनश्च नीवी च त्रुटिवस्त्रं प्रवीर्षकम् । पादाङ्गदं हंसकश्च नूपुरं चुटुकघण्टिका । सुखपट्टमिति प्रोक्ता अलङ्काराः सशोभनाः । चत्वारिंशदमी प्रोक्ता लोके वेदे च सोत्सवाः । अलङ्काराः प्रदानेन चतुर्वर्गप्रदायकाः । एतेषां पूजनं कृत्वा प्रदद्यादिष्टसिद्धये । तेषां दैवतसङ्ख्यार्थं पूजयेत्तु विचक्षणः । शिरोगतानि चादद्यात् सौवर्णानि तु सर्वदा । चूडारत्नादिकानीह भूषणानि तु भैरव ! । यैवेयकादिहेमानां सौवर्णं राजतञ्च वा । निवेदयेत् तु देवेभ्यो नान्यतैजससम्भवम् । रीतिवङ्गादिसंजातं पात्रोपकारणादिकम् । दद्यादावसथेजन्तु भूषणं न कदाचन । घण्टाचामरकुम्भादिपात्रोपकरणादिकम् । तद्भूषणान्तरे दद्यात् यस्मात्तु तदुपभूषणम् । सर्वं ताम्रमयं दद्याद् यत् किञ्चिद्भूषणादिकम् । सर्वत्र स्वर्णताम्रमर्घ्यपात्रे ततोऽधिकम् । पूजार्घ्यपात्रं नैवेद्याधारपात्रञ्च पानकम् । कौडुम्बरं सदा विष्णोः प्रीतिदं तोषदं तदा । ताम्रे देवाः प्रमोदन्ते ताम्रे देवाः सदा स्थिताः । सर्वप्रीतिकरं ताम्रं तस्मात्ताम्रं प्रयोजयेत् । स्रोपयोगे नरः कुर्यादेवानामपि भैरव ! । श्रीवोर्द्दैये रौप्यन्तु न कदाचिच्च भूषणम् । प्रावारः पानपात्रञ्च नेष्टकं स्टङ्मेव च । पर्य्यङ्कादि यदन्यच्च सर्वं तदुपभूषणम् । अयोमयन्तते कांस्यन्तते यद्भूषणं भवेत् । स्वर्णरौप्यस्य चाभावे स्वर्णकाये नियोजयेत् । एतेषां भूषणादीनां यद्दातुं शक्यते नरैः । तत्तद्दद्यात् समग्रे तु सर्वमेव प्रदापयेत् । चतुर्वर्गप्रदं नित्यं भूषणं सर्वसौख्यदम् । तुष्टिपुष्टि प्रीतिकरं यथाशक्तीज्ये क्षुजेत् । इदं ते भूषणं प्रोक्तं सर्वदेवस्य तुष्टिदम् कालि०पु०६८अ० । तद्धारणविधिरुच्यते "रेखात्रितयनिर्याता कृष्णादिष्वपि षट्सु । गुरुशुक्रबुधस्त्रीणि यस्मात्तद्धारणक्षमम् । अनिष्टेष्वपि निर्दिष्टं यस्मात्तद्धारणक्षमम् । तद्राज्ञे राजसम्माने ब्राह्मणानाञ्च सम्मते । शिरस्तं मुकुटं हारः कण्ठलग्नाङ्गदानथा । कङ्कणं वामकरके मेखलाद्यावितिक्रमात् । प्रधानभूषणान्येषु यत्नात्तं याति निश्चयः । पद्मरागश्च यत्नश्च विज्ञो मोक्षदस्तथा । मुक्तावैदूर्यनीलश्च तथा मरकतं क्रमात् । चान्द्रिचान्द्रिदशानां सर्वसम्पत्तिदायकाः । गुप्तरत्नैश्चापि घटना सर्वत्राप्युच्यते । प्रधानभूषणेष्वेवमप्रधाने न निर्णयः । प्रधानभूषणं प्रायः शिरसो ह्यभिधीयते । तस्य प्रधानभूतत्वादित्याह भगवान्नन्दनः । सुखदा मणयः सुद्वा दुःखदाः दोषशालिनः ।" इति युक्तिकल्पतरुः ।

भूषा स्त्री भूष-भावे च । मण्डनक्रियायाम् अमरः ।

भूषित त्रि० भूष-क्त । अलङ्कृते ।

भूष्णु त्रि० भू-ग्ष्णु । भवनशीले ।

भूसंस्कार पु०ई०त० । यज्ञादौ भूमिभागस्य परिसमूहनोपलेपनरेखाकरणपांशूद्धरणजलकरणकाभ्युक्षणरूपेषु पञ्चसु संस्कारेषु तत्प्रकारश्च काल्या० श्रौ० २।१।२४सूत्रपद्धतौ दर्शितो यथा "तत्र पूर्वमाहवनीयखरे पञ्च भूसंस्काराः कर्त्तव्याः तद्यथा दर्भैः खरं प्राक्संस्थसदक्संस्थं वा त्रिः परिसमूह्य १गोमयेन लिप्त्वोल्लिख्य २स्रुवेण प्रागायता उदक्संस्था उदगायताः प्राक्संस्था वा तिस्रो रेखाः खरप्रमाणाः कृत्वा ३अनामिकाङ्गुष्ठेन ताभ्यो रेखाभ्यः पांशूनुद्धृत्य ४अद्भिस्तिरश्च्युक्षेत् ५। परिसमूहनं (दर्भाणामपनुत्स्यनम्) काल्या०श्रौ० ४।१२।१० कर्कः ।

भूसुत पु० ई०त० । १मङ्गलग्रहे भट्टमा० २नरकासुरे च ३सीतायां स्त्री ।

भूस्तृण न० भुवस्तृणम् पृषो०सुट् । भूतृणे रूक्षवाले अमरः "गुडबीजञ्च भूतीकं सुगन्धं गोमयप्रियम् । भूस्तृणन्तु भवेच्छ्रेष्ठा भाङ्गा तृणकमित्यपि । भूस्तृणं कटुकं तिक्तं तीक्ष्णोष्णं रोचनं लघु । विदाहि दीपनं रूक्षमनेत्र्यं सुखशोधनम् । अहृद्यं वह्निविट्कफ पित्तरक्तप्रदूषणम्" भावप्र० ।

भूस्पृश् पु० भूमिं स्पृशति स्पृश-क्विन् । मनुष्ये हेमच० ।

भूस्वर्ग पु० भूमिस्थितः स्वर्गः रा० त० । सुमेरुपर्वते जटा० तस्यामरधारत्वेन स्वर्गत्वात् तथात्वम् । [ब्रह्मे ।

भृ भरणे भ्वा०उभ०सक०अनिट् । भरति-ते अभार्षीत् बभार

भृ धारणे पोषणे च जु०उभ०सक०अनिट् । बिभर्त्ति बिभृते अभार्षीत् अभृत । बिभराम्बास-बभार । क्विप् । भरुः भरुजः । क्लि-अप् च । भृत्रिमः ।

भृकुंस(श) पु० भ्रुवा कुंसा(शा) इङ्गितसूचनं यस्य नि० भ्रुवः वा संप्रसारणम् । स्त्रीवेषधारिणि नटे अमरः ।

भृकुटि(टी) स्त्री भ्रुवः कुटिः भङ्गिः वा संप्रसारणं वा ङीप् । भ्रुभङ्गे "रचितभृकुटिवक्त्रं नन्दिता द्वारिरक्षे" हरिवंशः ।

भृगु पु० । भृज्यति क्विप् भृज् ज्वाला तया सङ्गोतुपक्षः ।

१ब्रह्मपुत्रे ऋषिभेदे "भृगिरेव भृगुः पूर्वमङ्गारेभ्योऽङ्गिराऽभवत्। अङ्गारसंज्ञयाङ्गैव कविरित्यपरोऽभवत्। सह ज्वालाभिरुत्पन्नो भृगुत्वात् भृगुः स्मृतः" भा० अनु० ८५ अ०। "भृगोः ख्यात्यां सतुष्पन्ना श्रीः पूर्वहृद्धेः सुतः। तथा धाता विधाता च तस्यां जातौ भृगोः सुतौ। आयतिर्नियतिश्चैव मेरुकन्ये मङ्कामो!। धातुर्विधातुस्ते भार्ये बयोर्जातौ सुतावुभौ। प्राणश्चैव मृकण्डश्च मार्कण्डेयो मृकण्डतः। ततो वेदशिरा जज्ञे प्राणस्य द्युतिमान् सुतः। ततो वंशो भृगिश्रेष्ठ! विस्तरं भार्गवो गतः" विष्णुपु० २अङ्गादेवे २शुक्रपक्षे मेदि०। ३गिरिस्थानौ ५जमदग्नौ हेम०। ४गिरिस्थाने पर्वताद्युच्चस्थाने यतः पातेऽवलम्बनं न भवति तस्मिन् यतटस्थाने अमरः। भृगोर्गोत्रापत्यानि अण् बहुषु तस्य लुक्। ८भृगोरपत्येषु ब०व०। ९वरुणापत्ये ऋषिभेदे "भृगुर्वै वारुणिर्वरुणं पितरमुपससाद" तैत्ति०उ०।

भृगुक्ष पु०कूर्मचक्रस्य दक्षिणपार्श्वस्थे देशभेदे मार्कपु०५८अ०।

भृगुक्षेत्र पु० तीर्थभेदे काशी० ६च०। [२७अ०।

भृगुकेश्वर पु० काशीस्थे भृगुस्थापितकेशवमूर्त्तिभेदे काशी०

भृगुज पु० भृगोर्जायते जन-ड। भार्गवे शुक्राचार्य्ये।

भृगुतनय पु०६त०। शुक्राचार्य्ये भृगुनन्दनभृगुसुतादयोऽप्यत्र

भृगुतुङ्ग न० तीर्थभेदे भा० आ० २१५ अ०। भा०व० ८३अ०।

भृगुपति पु०भृगूणां भार्गववंशस्य पतिः। परशुरामे शब्दमा० तेषां हैहयपतितो हि तेन रक्षा कृता इति तस्य तथात्वम्

भृगुभूमि पु० भार्गवपुत्रभेदे हरिवं० २अ०।

भृगुवल्ली स्त्री भृगुणाऽधीता वल्ली। "भृगुर्वै वारुणिर्वरुणं पितरमुपससाद" इत्यादिकायां तैत्तिरीयोपनिषदः तृतीयवल्ल्याम्।

भृगूणांपति पु० ६त० अलुक्स०। परशुरामे शब्दर०।

भृङ्ग पु० भृ-गन् कित् नुट् च। भ्रमरे २कीटविशेषे (झिङ्गा) अमरः। ३भृङ्गराजे ४जारे मेदि० ५भृङ्गारे ६भृङ्गरोगे च कीटभेदे (भीमरुल) शब्दरत्ना०।

भृङ्गक पु० भृङ्ग इव कायति कै-क। राजवाजनवृक्षे शब्दच०

भृङ्गजा स्त्री भृङ्ग इव जायते जन-ड। १भार्य्याम्। २शुक्रवल्लरे न० राजनि० ३शब्दे ४गुडत्वचि न०रत्नमा०।

भृङ्गपर्णी स्त्री भृङ्ग इव कृष्णत्वात् पर्णं यस्याः ङीप्। कृष्णैलायाम्। स्वार्थे क। भृङ्गपर्णिका तत्रार्थे शब्दच०

भृङ्गप्रिया स्त्री ६त०। माधवीलतायां प्रचुरमधुमत्त्वात् तस्याः तत्प्रियत्वम् राजनि०।

भृङ्गमूलिका स्त्री भृङ्गस्य भृङ्गराजस्येव मूलमस्याः कप् कापि इत रत्वम्। भ्रमरच्छद्राम् राजनि०।

भृङ्गरज पु० भृङ्गान् रञ्जयत अन्यभूतमर्थं रनृज-अच् पृषो० नलोपः। भृङ्गराजे (केशुरिया)। अमरः।

भृङ्गरजस् पु० भृङ्गान् रजयति अन्यभूतमर्थं रनृज-असुन् नलोपः। भृङ्गराजे अमरटीकायां भरतः।

भृङ्गराज पु० भृङ्गान् रजयति रनृज-क्विप्-अच् नि० ह्रस्वः। (केशुरिया)। १क्षुपभेदे। "भृङ्गराजः कटुस्तिक्तो रूक्षोष्णः कफशातनः। केश्यस्त्वच्यः कृमिश्वासकासशोथामवापहः। दन्त्यो रसायनो बल्यः कृष्णनेत्रशिरोर्त्तिजित्" भावप्र० २पक्षिभेदे ह्रस्वः टच्। ३भ्रमरभेदे मेदि० ४वृक्षभेदे च धरणिः।

भृङ्गराजाद्य न० "भृङ्गराजरसप्रस्थे यष्टीमधुपलेन च। तैलस्य कुडवं पक्वं सद्यो दृष्टिं प्रसादयेत्। तत् खादेत् बलीपलितनुं मासैनैतच्च संशयः" चक्रदत्ताक्ते तैलभेदे।

भृङ्गरिट (टि) पु० भृङ्ग इव रटति कच् रट् वा पृषो० अत रत्वम्। शिवपार्श्वचरभेदे। [कीटभेदे त्रिका०।

भृङ्गरोल पु० भृङ्ग इव रौति रु-अच्। (भीमरुल) ख्याते

भृङ्गवल्लभ पु० ६त०। १धाराकदम्बे २मल्लिकदम्बे च। भृङ्गवत् वल्लभते वल्ल-क। ३मल्लिकायाम् स्त्री राजनि०। [त्रिका०

भृङ्गसोदर पु० भृङ्गस्य सोदर इव। (केशुरिया) केशराजे

भृङ्गानन्दा स्त्री आनन्दयति आ+नन्द+णिच्-अच् ह्रस्वः। यूथिकायाम् (जुई) राजनि०।

भृङ्गाभीष्ट पु० अभि+इष्-क ह्रस्वः। आम्रवृक्षे राजनि०।

भृङ्गार पु० बर्त्तते जलं भृ-आरक् नि०। १स्वर्णमयजलपात्रभेदे अमरः २जलपात्रभेदे च (झारी)। भृङ्ग इव ऋच्छति कृ-अच्। ३भृङ्गराजे जटा०। ४जलपात्रे ५सुवर्णे च न० राजनि०। ६भ्रिङ्गीनामकीटे स्त्री अमरः मोरा० ङीप्। स्वार्थे क। भृङ्गारिका तत्रैव। तत्र भृङ्गार पात्रलक्षणादिकं युक्तिकल्पतरावुक्तं यथा

"राज्ञोऽभिषेकपात्रं यद् भृङ्गार इति तन्मतम्। तदष्टधा तस्य मानं प्रकृतिस्थापि चाष्टधा। सौवर्णं राजतं भौमं ताम्रं स्फाटिकमेव च। चान्दनं लौहजं चार्द्धमेतदष्टविधं मतम्। भान्ताऽदिष्टाऽनवमप्राष्टदृष्टाऽनोक्षरोन्मिताः ३३। अष्टावष्टौ समाख्याता आवापपरिधारयोः। द्विचतुर्थांशरन्ध्राणि ४वाक्य४समाष्टदृष्टिताः। यथाक्रमं मसहिटमादित्यादिदशाभुवाम्। पद्मरागकथा वज्रं वैदूर्य्यं मौक्तिकलथा। नीलं मारकतस्त्वेव सङ्गा

च सप्तकीर्तिताः। भृङ्गारसप्तके न्यासा न भौमो मध्यिमर्हति। कानकं मृण्मयं वापि सर्वेषामुपयुज्यते।" "कानकन्तु क्षितीशानां मृण्मयं सार्वभौतिकम्। मधुपद्मेन्दुकुम्भारं प्रत्यक्षं विन्यसेत् क्रमात्। चतुर्विधानां भूपानां चान्द्रः (रौद्रः) सर्वत्र शस्यते। श्वेतं रक्तं तथा पीतं कृष्णं चन्दनमुच्यते। एतेषां वर्णिते सेवकवर्णा क्षान्त्रयीभुजाम्। मद्यो पद्मस्य नीलस्य तथा कृष्णापराजिता। एषां पुष्पाणि वेश्येषु चतुर्णीतिमहीभुजाम्। क्षीरकं पद्मरागस्य वैदूर्यं नीलमेव च। चत्वारो मणयो ध्येयाश्चतुर्णां सेचनाम्बुनि। दत्वं निखिलं यः कुर्यात्सृपतिः सेकमाचरन्। स चिरायुर्भवेद्भोगी दत्तोऽन्यस्त्वन्यथाचरन्"।

भृङ्गारि स्त्री भृङ्गवद्दर्पमर्हति ऋ-इन्। १केरिकाख्ये २भ्रमरश्रेष्ठायां राजनि०।

भृङ्गाह्वा पु० भृङ्गमाह्वयते सदृशं ते या+हू-क। १लोरके २भृङ्गराजे च ३भ्रमरश्रेष्ठायां स्त्री राजनि०।

भृङ्गि पु० भृ-गिक् हुट् च। शिवपार्श्वचरभेदे। "प्राप्ता त्वमधिपत्यं तं नाम्ना भृङ्गिरिति स्मृतः" वामनपु०।

भृङ्गिन् पु० भृङ्गस्यैवं लक्षणत्वदस्यस्त इनि। १वटवृक्षे राजनि० २शिवानुचरभेदे। तस्य शिवतेजो जातत्वेऽपि कृष्णत्वात् तद्भक्तता यथोक्तं कालिकापु० ३५अ० यथा "ब्रह्मावतृच्छमानस्य तेजसः प्रथमोद्भवः। अनुदयतिरक्तं गिरिपृष्ठे पपात ह। तयोः कारयवोः सद्यः सम्भूतौ महाबलौ। एको भृङ्गसमः कृष्णो भिन्नाञ्जननिभोऽपरः। भृङ्गी तस्य तदा ब्रह्मा नाम भृङ्गीति चाकरोत्। महाकृष्णोरुरूपस्य महाकालेति चोत्तरम्"। वामनपु० तु अन्यकासुरस्यैव शिवरक्तेन भृङ्गिरूपत्वं तथाधिपत्यञ्च जातमिति क्रमः।

भृङ्गी स्त्री भृ-गन् ङित् हुट् च गौरा० ङीष्। अतिविषायाम् राजनि०। [तके राजनि०।

भृङ्गीफल पु० भृङ्गीव अतिविषाया इव फलमस्य। आम्रा-

भृङ्गीय पु० हृत०। महादेवे भरतः०। [लिका०।

भृङ्गेरिटि पु० भृङ्गरिटि+पृषो०। भृङ्गिणि शिवपार्श्वचरे

भृङ्गेष्टा स्त्री हृत०। १हतकुमार्यां २भार्म्यां ३वरस्त्रियां ४काकजम्बुवाञ्च राजनि०।

भृज भर्जने (भाजा) पाकभेदे भ्वा०आत्म०सक०सेट्। भर्जते अभर्जिष्ट। दैदित्व निष्ठायां नेट् भृष्टः। [ओजा)क्लम०

भृज्जन पु० भर्जन-करणे ल्युट् वक्त०। अमरीषे (लाजवा-

भृणीय क्रोधे भा०आत्म०सक०सेट् निरुष्टुः। अभीवर्ते। ऋक्षकीरिट।

भृष्टिका स्त्री भिरिष्टिका पृषो०। श्वेतगुञ्जायाम् राजनि०।

भृष्टि स्त्री वीचौ धारा०।

भृत त्रि० भृ-क्त। १पुष्टे वेतनादिना प्रतिपालिते २दासभेदे च। "उत्तमस्त्रायुधीयो यो मध्यमस्तु क्रयीवहः। अधमो भारवाही स्यादित्येवं त्रिविधो भृतः"मिता०। भावे-क्त। ३भरणे न०।

भृतक त्रि० भृतं भरणं वेतनमुपजीवति कन्। वेतनोपजीविनि अमरः "भृतकाध्यापको यस्तु भृतकाध्यापितस्तथा" मनुः। भृतकभेदाः शुक्रनीतिसारे "अन्नभक्षा तथा देव प्रोक्ताः पुरोधादा ब्राह्मणाः सर्व एव ते। अभावे क्षत्रिया वोह्याश्चदभावे तथोदराः। नैव शूद्रास्तु संवोह्या दुष्टवृत्तोऽपि पार्थिवैः। भागधाक्षी क्षत्रियस्तु वाहवाधिपतिश्च सः। वामनो ब्राह्मणो वोह्यः कार्यस्तो वेतनस्तथा। शुल्कधारी तु वैश्यो हि मितप्रतिग्रहश्च पादजः। सेनाधिपः क्षत्रियस्तु ब्राह्मणश्चदभावतः। न वैश्यो न च वै शूद्रः कारयेच्च कदाचन। सेनापतिः शूर एव वोह्यः सर्वासु जातिषु। दक्षश्चतुर्वर्णधर्मज्ञश्चैव धार्मिकः। वक्ता वर्णेषु यो राजा स वर्णैः सुखमेधते। नोपक्रतं मन्यते च न दृष्टमिति सुव्रतैः। कथान्तरे न स्मरति मन्यते प्रकृतमपि। कृच्छ्रासनोऽपि यत्किञ्चित् तं भृतकस्त्यजेत्"

भृति स्त्री भृ-क्तिन्। १भरणे २पोषणे च करणे क्तिन्। ३वेतने अमरः ४मूल्ये च मेदि०। भृतिभेदानां भृतिदानप्रकारादिकं शुक्रनीतिसारे उक्तं यथा "कालमानं त्रिधा प्रोक्तं चान्द्रं सौरं च सावनम्। अतिदाने वदा सौरं चान्द्रं कौलोदवृद्धिषु। कल्पयेत् सावनं नित्यं दिनभक्तेऽवधौ वदा। कार्यमाना कालमाना कार्यकालमितिस्त्रिधा। भृतिदत्ता तु तद्दिष्टं वा देया भाषिता यथा। अर्धं भारस्त्रया तत्र स्यात्सर्वेषामवर्णी भृतिम्। दासादि कार्यमाना वा कीर्तिता तद्विदेष्वलैः। वत्सरे वत्सरे वापि मासि मासि दिने दिने। दत्तावधौ भृतिं तेभ्यो दासानीति च कल्पिते। एतावता कार्यमिदं कालेनापि त्वया कृतम्। भृतिमेतावतीं दास्ये कार्यं कालमितं च वा। न कुर्याद् भृतकोपं तु तथा भृतिंवलम्बनम्। अवज्ञयोपभरणाभृतिमेषां प्रकीर्तिता। परिपोषा भृतिः प्रोक्ता च मा-

ज्ञाच्छादनार्थिका । अवेदेवस्य भरणं यथा वा क्षीणसंस्थिका । यथा यथा तु पुरुषवान् भृतकस्तद्भृतिस्तथा । संयोज्या तु प्रयत्नेन रूपेणाकर्षिताय वै । अवस्थोच्चवर्गस्य भरणं भृतकाद्भवेत् । तथा भृतिस्तु संयोज्या तद्योग्या भृतकाय वै । ये भृत्या हीनभृतिकाः प्रत्यक्षे स्वयं कृताः । परस्य साधकाले तु त्रिद्रे कोपमुपागताः । अन्नाच्छादनमात्रा हि भृतिः शूद्रादिषु स्मृता । तत्पापभागस्यथा स्यात् पोषको भक्षभोजिषु । यद् ब्राह्मणेनापहृतं धनं तत् परलोकदम् । भूपाद दत्तमपि यद्परकार्यैव केवलम् । मन्दो मध्यस्तथा शीघ्रस्त्रिविधो भृत्य उच्यते । यथा मध्या च त्रेता च भृतिस्तेषां क्रमात् स्मृता । भृत्यानां स्वपक्षत्वार्थं दिवाभागं वस्तुतस्त्वजेत् । निशि यामत्रयं नित्यं दिनभृत्येऽर्द्धयामकम् । तेभ्यः कार्यं कारयीत क्षुत्तृष्णादैर्विना नृपः । अन्यायग्रं तु रक्षणेऽपि स्थिता आद्यदिनं यदा । यादृशीनां भृतिं लात्वा दद्यात् तेमासिकीं ततः । यद्यत्परभृत्ये तु न्यूनाधिक्यं यथा तथा । मासमासिकीं तु दीर्घात्तं तदूर्ध्वं न च कल्पयेत् । नैव पक्षार्द्धमार्तस्य क्षतव्याद्यापि वै भृतिः । संवत्सरोषितस्यापि व्याधेः प्रतिनिधिक्रतः । सुस्थदुःस्थितं त्यातं भृत्यं कल्पेत् तदा । सेवां विना नृपः सर्वं दद्याद् भृत्याय वत्सरे । चत्वारिंशत् समा नीताः सेवया येन वै नृपे । ततः सेवां विना तस्मै भृत्यं कल्पयेत् तदा । यावज्जीवं तु तत्पुत्रेऽप्यसमे साधु तद् वृत्तम् । मार्यायां वा सुतायां वन्यायां वा नृपेऽथवे । चतुर्थांशं धारितोक्तं दद्याद् भृत्याय वत्सरे । कार्याष्टमांशं वा दद्याद् कार्यं ज्ञानांशकं क्रतम् । आमिकार्यं विनष्टो यत्तत्पुत्रे तद्भृतिं नयेत् । यावद् वाक्योऽन्यथा पुत्रात्पुत्रान् दद्या भृतिं नयेत् । षष्ठांशं वा चतुर्थांशं भृतेर्भृत्यस्य पालयेत् । दद्याद् तदर्द्धं भृत्याय द्विस्त्रिवर्षेऽधिकां तु वा । वाक्पारुष्याच्यूनभृत्या स्वामी प्रत्यवदत्यतः । भृत्यं प्रियंवदं क्षत्यं मनुष्यं त्वपमानतः । भृतिदानेन सन्तुष्टा मानेन परिवर्द्धिताः । स्वास्थ्यता सदुवाचा ये न त्यजन्त्यधिपं हि ते । चतुर्भागधनस्थानि धनमानौ तु मध्यमाः । उत्तमा मानस्थानि मानो हि महतां धनम् । यथाशुद्धान् स्वभृत्यांश्च प्रजाः स्वैरक्षयेन्नृपः । आज्ञाप्रदानतः कांश्चिद्वरान् फलदानतः । आत्मानं सुखयुक्तं स्वान्यैश्चापि वो-धयेत्वा गिरा । सुभोजनैः सुवसनैस्ताम्बूलैश्च धनैरपि । कांश्चित् सुकृपयामन्त्रैरधिकारप्रदानतः । वाङ्मात्रां प्रदानेन वीक्ष्याभरणदानतः । छत्रातपत्रचमरदीपिकानां प्रदानतः । चक्षुषा प्रत्यिपातेन मानेनाभिगमेन च । सत्कारेण च दानेन दाक्षिण्येन समेन च । प्रेमपूर्वाभीषवाक्येन स्वार्थोक्तनप्रदानतः । सम्यूर्वोक्तनदानेन सुखोपकारकीर्त्तनात् । यत्कार्ये विनियुक्ता ये कार्यार्द्धैरर्द्धवेत्र तान् । षोडशैस्तावलेरीतिमन्यैरक्षतसम्भवैः । सौवर्णै रत्नजैर्वापि यथायोग्यैः स्वलाञ्छनैः । प्रविष्टानाय दूरात् तु वस्त्रेण स्वकरेण वि । बाह्यवाङ्मनश्चेष्टैश्च भृत्यान् कुर्यात् पृथक् पृथक् । अविश्वस्तं च विश्वस्तं न दद्यात् कस्यचिन्नृपः ।

अथ तत्र विशेष उक्तो यथा "कार्यं भृत्यधिं दैवं दत्तं भृत्यस्य वेतयेत् । अति दत्तं हि भृत्येभ्यो वेतनं वारितोचितम् । तत्प्राप्तिपत्रं स्वस्त्रीयाद्याद्धेतनपत्रकम् । सैनिकाः शिक्षिता ये ये तेषु पूर्वां भृतिः स्मृता । व्यूहाग्रायें नियुक्ता ये तेभ्यार्द्धं भृतिमावहेत्" "स्वकार्यसाधका ये तु दृष्ट्वा भोगेन तान् । भोगेना वेतनार्द्धाद्यार्द्धं भृतिमावहेत् । यत्पुत्रान् दुःस्थितः दृष्ट्वा पालयेन् नृपः । वरराङ्गे क्षते दद्यात् भृतिं सिद्धावधिं तथा । दद्यादर्द्धं तस्य पुत्रे शिशे बालमितां क्षिप । क्षतराजस्य पुत्रादौ वदुचिते बालमिताम् । दद्यादा तद्वाल्यतस्तु द्वात्रिंशांशं प्रकल्पयेत्"

भृतिभुज् त्रि॰ भृतिं वेतनं भुङ्क्ते भुज-क्विप् । वेतनोपजीविनि कर्मकरे अमरः ।

भृत्य पुं॰ भृ-क्यप् तुक् च ।।दासे २भरणीये त्रि॰अमरः । भावे क्यप् १भरणे स्त्री टाप् । "कुमारभृत्याकुशलैः" रघुः । निन्द्यानिन्द्यभृत्यपरीक्षा शुक्रनीतिसारे २अ॰ उक्ता यथा "भृत्यं परीक्षयेन्नित्यं विद्वान् विश्वेत् यदा । नैव जातिं च कुलं वेत्तं वल्लभेदपि । वर्णसौकर्यदुष्टाः पूर्वाक्षया जातिकुले न हि । न जात्या न कुलेनैव श्रेष्ठत्वं प्रतिपद्यते । विवाहे भोजने नित्यं कुलजातिविवेचनम् । बलवान् शुचिसम्पन्नस्त्यागिलक्षणवान् धनी । शुद्धश्च शुचीश्च शूरश्च निरालसः । यथा करोत्यात्मकार्यं स्वामिकार्यं ततोऽधिकम् । चतुर्भागेन यत्नेन कायवाङ्मानसेन च । भक्तश्च दक्षो वदुवाक् कार्यदक्षः शुचिर्दृढः । परोपकारचतुरो शुभकारपराङ्मुखः । स्वास्थ्यशक्तिरिष्टं पुत्रं पितरं वापि दर्शकः ।

न्यायमार्गानि पन्थानमनुपः सुबोधकः । नाचेष्टा तद्गिरं कांक्षेत् तन्मनस्काप्रकाशकः । यदीयेच्छतः यत्कार्यं शतकार्यं चिरक्रियः । न तद्भार्याऽपुत्रमित्रच्छिद्रदर्शी कदाचन । तद्दृष्टिदोषेषु भार्यापुत्रादिवन्नृषु । न शासते सर्हते न नाभ्यसूयति निन्दति । नेच्छत्यन्यायिकारं हि निस्पृहो मोदते सदा । तद्वत्तस्मभूपादिधारकस्तत्परोऽनिशम् । श्रुतितत्त्वज्ञयी दानो दयालुः शूर एव हि । तत्कार्यं स रक्षति सुचको भृतको वरः । विपरीतगुणैरेभिर्भृतको निन्द्य उच्यते । ये भृत्या हीनभृतिता ये दण्डेन प्रकर्षिताः । अठाः कातरा लुब्धाः सभयं प्रियवादिनः । मत्ता व्यसनिनश्चार्ता यत्कोचेटाय देविनः । नास्तिका दाम्भिकाश्चैवाबलवाचोऽभ्यसूयकाः । ये चापमानिता वेऽवदाक्यैर्मर्मभिदिताः । रिपोर्मित्रासेवकाश्च पूर्ववैरानुबन्धिनः । चञ्चलाः साहसिका धर्महीना नैते सुसेवकाः । संक्षेपतस्तु कथितं सदसद्भृत्यलक्षणम् ।

तत्परिशिष्टे सर्वभृत्यलक्षणं यथा

"उत्थाय पश्चिमे यामे स्मरञ्जलं विचिन्त्य च । कृत्वोत्सर्गं तु विण्मूत्रं हि कृत्वा स्वादनन्तरम् । प्रातः स्नानं तु निर्वर्त्य यावत् सार्द्धद्वयं क्षणम् । गत्वा स्वकार्यस्थानायां कार्याकार्यं विचिन्त्य च । विघट्टया विघ्नं तु द्वारस्थः सभयम् निरोधयेत् । निवेदयाय विद्वाय तेनाग्रेसरः प्रबोधयेत् । दृढव्रतान् समाभ्यर्च्य राज्ञे दण्डधरः क्रमात् । निवेद्य तदतीः पश्चात् तेषां स्थानानि दर्शयेत् । ततो राजगृहं गत्वाऽग्रेसरो नत्वेह सन्निधिम् । नत्वा सदं यथान्यायं विष्णुरूपनिधानपरम् । प्रविश्य सादरांगस्य चित्तस्य स्वस्थतः । भर्तुरङ्गीकृते दृष्टिं ज्ञात्वाऽन्यत्र विनिःक्षिपेत् । अस्मिं दीप्तप्रियासीदेद्राजानमुपस्थितः । आज्ञोविधस्व क्रुद्धं प्रभुं प्राप्तधनेश्वरम् । वक्तोपचरेच्चित्तं नाकस्मक्षीति चिन्तवन् । समर्थयेच्च तत्पक्षं साधु भाषेत भाषितम् । तच्चित्तोनेन वा ब्रूयादर्थं सुपरिनिश्चितम् । सुराप्रबन्धसोद्योगे विवादे वादिनां मतम् । विजानन्नपि नो ब्रूयात् भर्तुः चित्तोत्तरं वचः । यदाऽनुद्यतवेषः स्यात्पाङ्गतस्तु प्राञ्जलिः । तदाऽऽ ज्ञातमतिः स्तुत्वा वस्त्रान्तरितवक्त्रकः । तदाज्ञां शिरसिवादौ स्वकार्योऽपि निवेदयेत् । नत्वाऽऽसीनासने मञ्चसत्पार्श्वे सम्मुखान्तया । उच्चैःप्रश्वसनं कार्यं शीघ्रं कृत्सनं तथा । कृत्यं गात्रभङ्गं च पर्यालोटनं वर्जयेत् । राज्ञादिष्टं तु यत् स्थानं तत्र तिष्ठेन्मुदान्वितः । प्रबोधोचितमेधावी वर्जयेदभिमानिताम् । आपद्युन्मार्गगमने कार्यकालात्ययेषु च । क्षुष्टोऽपि हितान्वेषी ब्रूयात् कल्याणमाहितम् । प्रियं तथ्यं च पथ्यञ्च वदेत् धर्मार्थकं वचः । समानवार्तया चापि तद्धितं बोधयेत् सदा । कीर्तिमन्यद्यशांसि च वदेत्कीर्तिकरं तथा । दाता त्वं धार्मिकः शूरोनीतिमानसि भूपते ! । अनीतिस्ते तु मनसि वर्त्तते न कदाचन । ये ये भटा अनीत्या तान् तदर्थे कीर्तयेत् सदा । नृपेभ्यो ह्यधिकोऽसीति सर्वेभ्योऽपि विशेषयेत् । परार्द्धं देशकालज्ञो देशे काले च साधयेत् । परार्थनाशनं न ह्यात्मया ब्रूयात् सदैव हि । न कर्मयेत् प्रजाकार्यं-मुपेतश्च भयं सदा । अपि स्वाभुवदाशीत शुष्यन् परिगत. क्षुधा । ज्ञात्वेवानर्थसम्भ्रा हृत्तिं नेक्षेत पण्डितः । यत्कार्यं यो नियुक्तः स भूयात्तत्कार्यतत्परः । नान्यधिकारमन्विच्छेन्नाभ्यसूयेच्च केनचित् । न न्यूनं कथयेत् कञ्च पूरयीत स्वयंकृतः । परोपकरणं भयत्र-ज्ञान्वितकरः सदा । करिष्यामीति ते कार्यं न कुर्यात् कालचम्बनम् । दृक् कुर्यान् समर्थयेत् स्वांगं दीर्घं न रक्षयेत् । गुह्यं कर्म च मन्त्रं च न भर्तुः संप्रकाशयेत् । विद्वेषं च विनाशं च मनसापि न चिन्तयेत् । राजा परमभित्तोऽस्ति न कार्यं विरिचेदिति । क्षीभिस्तदक्षिभिः पार्श्वैरभूतैर्नराकृतैः । एकार्थचर्यां साहित्यं संसर्गञ्च विवर्जयेत् । वेषभाषानुकरणं न कुर्यात् पृथिवीपतेः । सम्मतोऽपि च मेधावी न च सर्वत्र तद्गुणैः । रागापरागो ज्ञानीयाद्भर्तुः कृपकर्मजत् । इङ्गिताकारचेष्टाभ्यस्तदभिप्रायज्ञा तथा । लक्षेत् विरक्तं नृपतिं रक्षे वृत्तिं तु कारयेत् । विरक्तकारणेष्वार्यं विपक्षाभ्युदयं तथा । आयावर्तनकं (कामच्छेदम्) ज्ञात्वा फलनाशं करोति च । अकोपोऽपि सकोपाभः प्रसन्नोऽपि च निष्फलः । वाक्यञ्च समदं वक्ति वृत्तिच्छेदं करोति च । लक्ष्यते चित्तखेदश्च सुयशःकीर्तने सति । दृष्टिं क्षिपत्यन्यत्र क्रियमाणे च कर्मणि । विरक्तलक्षणं क्षेत्रतत्त्वज्ञ लक्षणं ब्रुवे । दृढा प्रसन्नो भवति वाक्यं गृह्णाति चादरात् । कृपणादि यदि पृच्छेत् प्रदापयति चासनम् । विविक्तदर्शनं चास्य रक्ष-

क्षेन न यच्छते । जायेत फुल्लवदनः श्रुत्वा तद्विरमन्नरा । अप्रियाण्यपि चान्यानि तद्युक्तान्यभिनन्दते । उपायनं च गृह्णाति स्तोकं सम्मादयेत्तथा । कथान्तरेषु स्मरति प्रफुल्लवदनस्तथा । इति रक्षस्य वै चक्षुः कर्त्तव्यं तस्य सेवनम् । तद्दत्तवस्त्रभूषादि चिह्नं संधारयेत् सदा । न्यूनाधिके स्वाधिकारे निर्लोभयुक्तो भवेत् सदा । तदर्थां तत्कृतां वार्त्तां श्रुत्वाश्रावापि कीर्त्तयेत् । चारस्तवकदोषेण दुःखन्यथा यदि नृपः । श्रुत्वान्योनमाश्रित्य तथ्यं यत्नेन बोधयेत् । आपद्गतं शुभर्त्तारं कदापि न परित्यजेत् । एकवारमथादिष्टं यत्स्थानं दूरादरेण तत् । तदिष्टं चिन्तयेच्चित्तं पाचकस्त्राङ्गया न किम् । अप्रधानः प्रधानः स्यात्, काले चात्मनसेवनात् । प्रधानोऽप्यप्रधानः स्यात् सेवालस्यादिना यतः । नित्यं संसेवनरतो भृत्यो राज्ञः प्रियो भवेत् । स्व स्वाधिकारकार्य्यं यत् द्राक् कुर्य्यात् सुमानसः । न कुर्य्यात् सहसा कार्य्यं नीचं राजापि नोदिशेत् । तत् कार्य्यकारकाभावे राज्ञः कार्य्यं यदेव हि । काले यद्युचितं कर्त्तुं नीचमप्युत्तमोऽर्हति । वक्तुं प्रीतो भवेद्राजा तदनिष्टं न चिन्तयेत् । न दर्शयेत् स्वाधिकारगौरवं तु कदाचन । परस्परं नाभ्यसूयेन्न भेदं प्राप्नुयात्तथा । राज्ञा चाधिकृताः सन्तः स्वस्वाधिकारसुप्तये । अधिकारिगणो राजा सदृष्टस्तौ यत्र तिष्ठतः । उभौ, तत्र स्थिरा लक्ष्मीर्विपुला संसुखीभवेत् । अन्याधिकारदत्तं तु न ब्रूयाच्छ्रुतमप्युत । राजा न श्रुत्वादन्य सुखतस्तु कदाचन । न बोधयन्ति च हितमहितं चाधिकारिणः । प्रच्छन्नवैरिणस्ते तु दासरूपसपाश्रिताः । हिताहितं न श्रुणोति राजा मन्त्रिसुखाच्च यः । स दक्षू राजरूपेण प्रजानां धनहारकः । सुपुटव्यवहारा ये राजपुत्रैश्च मन्त्रिणः । विरुध्यन्ति च तैः सार्द्धं ते तु प्रच्छन्नतस्कराः । वाक्षा अपि राजपुत्राः नावमान्यास्तु मन्त्रिभिः । सदा सुवाक्यैस्तु संबोध्यास्ते प्रयत्नतः । असदाचरितं तेषां क्वचित् राज्ञे न दर्शयेत् । स्त्रीपुत्रमोहो बलवान् तयोर्निन्दा न श्रेयसे । राज्ञोऽवश्यतरं कार्य्यं प्राणसंशयितं च यत् । आज्ञापयाप्तवाक्यं करिष्ये तत्तु निश्चितम् । इति विज्ञाय तत् कर्त्तुं प्रयतेत स्वयंकृतः । प्राणानपि च संदद्यान्नृकार्य्ये नृपस्य च । अत्यकुटुम्बपुष्टयर्थं नान्यथा तु कदाचन । श्रुत्वा धनहराः सर्वे युक्ता प्राणहरो नृपः । युद्धादौ तु महाकार्य्ये भृत्यप्राणान् हरेन्नृपः । नान्यथा भृतिरूपेण भृत्यो राजधनं हरेत् । अन्यथा हरतस्तौ तु भवतश्च स्वनाशकौ । राजा च युवराजश्च मान्योऽमात्यादिकैः सदा । तस्यूनामात्येन च किं तस्यूनाधिकृतेन किम् । मन्त्रितुल्यश्च भृतको न्यूनः साङ्गिको मतः । न क्रीडेद्राजसमं क्रीडितं तं विशेषयेत् । नावमान्या राजपत्नी कन्या स्त्रापि च मन्त्रिभिः । राजसम्बन्धिनः पूज्याः सुहृदश्च यथार्हतः । नृपाङ्गतस्तुरं गच्छेत् व्यक्ता कार्य्यगतं महत् । मित्रायापि न वक्तव्यं राजकृत्यं सुमन्त्रितम् । भृतिं विना राजद्रव्यमदत्तं नाभिलाषयेत् । राजाज्ञया विना नेक्षेत् कार्य्यं माध्यस्थिकीं भृतिम् । न हि हन्यात् द्रव्यलोभात् न कार्य्यं यस्य कस्यचित् । स्वस्त्रीपुत्रधनप्राणैः काले संरक्षयेन्नृपम् । सत्कोचं नैव गृह्णीयात् नान्यथा बोधयेन्नृपम् । अन्यथादण्डकं भूयं नित्यं प्रबलदण्डकम् । निष्टङ्क बाधयेत् सम्यक् एकान्ते राज्ञ्युपप्लवे । स्थितं राज्ञश्चाहितं यल्लोकानां तत्र कारयेत् । नवीनकरयुक्त्याद्यैर्लोकं बाधेत यत्नतः ।"

"भृत्यः कुर्य्यात् तु राजानं शिष्यवत् सचिवः पतेः । न क्षिपेत् वचनं राज्ञो ह्यनुकूलं प्रियं वदेत् । रहोगतस्य वक्तव्यमप्रियं यद्धितं भवेत् । न नियुक्तो हरेद् वित्तं नोपेक्षेत् तस्य मानकम् । राज्ञश्च न तथाकार्यं वेशभाषाविचेष्टितम् । अन्तःपुरचराध्यक्षो वैरभूतैर्निराकृतैः । संसर्गं न व्रजेद् भृत्यो राज्ञो गुह्यञ्च गोपयेत् । दर्शयेत् कौशलं किञ्चिद्राजानं च विशेषयेत् । राज्ञा यच्छ्रावितं गुह्यं न तल्लोके प्रकाशयेत् । आज्ञाप्यमाने वाक्यञ्च किङ्करोमीति वा वदेत् । वस्त्रं रत्नमलङ्कारं राज्ञा दत्तं च धारयेत् । नानिर्दिष्टो द्वारि विशेन्नायोग्यभुवि राजदृक् । जृम्भां निष्ठीवनङ्कासं क्रोधं पर्य्यङ्किकाश्रयम् । भ्रकुटीं वातसङ्कारं तत्समीपे विवर्जयेत् । स्वगुणाख्यापने युक्ता परात्मानं नियोजयेत् । शाठ्यं क्रौर्य्यं मत्सरित्वं नास्तिक्यं चुद्धता तथा । चापल्यञ्च परित्याज्यं नित्यं राजानुजीविना । स्वेन विद्याधिकेनैव संयोज्यात्मानमात्मना । राजसेवां ततः कुर्याद् भूतये भूतिवर्द्धनः । नमस्कार्य्याः सदा चास्य पुत्रवल्लभमन्त्रिणः । सचिवैर्नाश्च विश्रामो राजचित्तप्रियङ्करैः । त्यजेद् विरक्तं रक्षान्तु वृत्तिमीक्षेत राजवित् । अपृष्टवाक्ष न ब्रुयात् कामं कुर्यात् तथा-

पदि। आवश्यो वाक्यसङ्घाही रहस्ये न च गच्छते। कुमत्रादि परिमन्त्रं समुपयुञ्जति चासनम्। तत्कथा-श्रवणाद्दृष्टो ह्यप्रियाण्यपि मन्यते। अल्पं दत्तं प्रकटीकरोति करेत् तत्तु कथान्तरे। रक्षेच्च राज्ञः कर्त्तव्या सेवामन्यस्य वर्जयेत्" अग्निपु० २२१अ०।

ते च दशधा तेषां प्राधान्याप्राधान्ये च तत्रैव उक्ते यथा "पुरोधाः प्रथमं श्रेष्ठः सर्वेभ्यो राजराड्भवेत्। तदनन्तरात् प्रतिनिधिः प्रधानस्तदनन्तरम्। सचिवस्तु ततः प्रोक्तो मन्त्री तदनु चोच्यते। प्राड्विवाकस्ततः प्रोक्तः पण्डितस्तदनन्तरम्। सुमन्त्रस्तु ततः ख्यातो ह्यमात्यस्तु ततःपरम्। दूतस्ततः क्रमादेते पूर्वश्रेष्ठा यथा गुणाः"। तत्करणसङ्ख्यादि स०चि० उक्तं यथा

"चित्रे मैत्रे वित्तचिन्तार्केज्यवारे सौम्ये लग्नेऽर्के कुजे वा खलाभे। जीवौ मैत्र्यां राशियोपि मैत्र्यां सेवा कार्या स्वामिनः सेवकेन" मु० चि०। "अथ सेवकस्य स्वामिसेवायां मुहूर्त्तं चाह चित्रे मैत्रे इति। चित्रे मैत्रे अश्विनीपुष्यहस्तचित्रानुराधामृगरेवतीपुष्यनक्षत्रेषु, वित्तचिन्तार्केज्यवारे बुधगुरुसूर्य-गुरुवारे तथा सौम्यपदे लग्नसंस्थे सति अर्के वा अथ वा कुजे भौमे वा खलाभे दशमैकादशस्थे सति सेवकेन भृत्येन स्वामिनो राजादेः सेवा कार्या। राजादिदर्शनं प्रागुक्तं वेतनग्रहणकार्याद्यङ्गीकारूपा सेवास्विनृ मुहूर्त्ते कार्या तत्रापि स्वामिसेवकयोर्योनि-मैत्र्यां सत्यां पुनः राशियोः स्वामिसेवकयोर्यौ जन्मराशी तयोर्यावधिपती तयोरपि मैत्र्यां प्रीतौ सत्यां कार्या उक्तञ्च श्रीपतिना "शुभे विलग्ने दशमायगे च रवौ कुजे वा खवशेन योनेः। विद्यायुधाभ्यासरतेन कार्यं समाश्रयः स्वामिनि सेवकेन"। कश्यपोऽपि "दशमैकादशे लग्ने कुजे वा शुभसंयुते। विद्यायुधाभ्यासयुक्तसेवा, क्रमोपि सिद्ध्यति" । राशिमैत्रीसाकल्यं तु "बभ्रूरगं त्रेषमिभेन्द्रसिंहमोत्साहुसंज्ञं त्रजवानरञ्च मोक्षाग्रमशोत्तरमाहिषञ्च वैरं त्वनार्योन्दपत्तयोरेति" वसिष्ठोक्ति मङ्गीकृत्य तल्लक्षणत्वादत्राप्युक्तं परन्तु योनिमैत्री राशिमैत्री च विवाहप्रकरणे अश्विन्यादिपदयोरिति "मिथाथि दासयोरिति वक्ष्यते" पी० धा०। उपनयशब्दे १२५५० पृ० दृश्यम्।

भृत्रिम त्रि० भरणाच्छातः भृ-क्त्रि-मप् च। भरणाच्छाते।

भृ(भृ)मि पु० भृ-इन् धुगो० वा संप्रसारणम्। (घुर्षा) १वायुभेदे २भ्रमणे च। "किन्तु चक्रभ्रमिकारितायुषः" नैषधम्।

भृम्यश्व पु० भृमय इवाश्वाः यस्य। ऋषिभेदे तस्य पुत्रः षण्। भार्म्यश्च तदपत्ये ऋषौ नि० ६।३।

भृश्च अधःपतने दि०पर०अक०सेट्। भृश्यति इरित् अभृश्यत् अभर्शीत् बभर्श। उदित्त्वा वेट्।

भृश्य न० भृश-क। १अतिशये २तर्कति त्रि०। ततो भृशादि० च्व्यर्थे भवतो क्यङ् भृशायते। [शब्दरत्ना०।

भृशम् अव्य०भाल्लभव्ययम् भृश-वा० कस। १सत्वरे २शोभने

भृशादि पु० च्व्यर्थे भवतो क्यङ्प्रत्ययनिमित्ते शब्दगणे स च गणः पा० ग० उक्तो यथा

"भृश शीघ्र चपल मन्द पण्डित धृष्टक सुमनस् दुर्मनस् अभिमनस् उन्मनस् रुक्ष रोहत् रेहत् संचेत् तपत् भ्रमत् भ्रमत् वेहत् शुचिस् शुचिवर्चस् अन्तर वर्चस् ओजस् सुरजस् अरजस् एते भृशादयः। आकृति-गणोऽयं तेन श्यामायते इत्यादि त्रि० कौ०। एवं धूर्षायते "धूर्षायमाणेत्यत्र" धूर्षायमाणशब्दे दर्शितम्

भृष्ट स्त्री द्वयङ्+ष्टुत्वे०। पाषाणे शब्दरत्ना०। तत्र दण्डु इत्येव पाठः भृष्टदित्यपपाठः।

भृष्ट त्रि० भ्रस्ज-क्त। जलोपसेकं विना वालुकाग्निसंयोगाभ्यां पक्वे हेम०। "दृगम्बिः कफहा रूक्षः पित्तलो भृष्ट-तण्डुलः" राजनि०।

भृष्टयव पु० कर्म०। धानाशब्दार्थे अमरः।

भृष्टान्न न० कर्म०। जलोसेकेन भृष्टे तण्डुले (चड़ि)शब्दच०

भृष्टि स्त्री भ्रस्ज-भावे क्तिन्। १भर्जने २भृष्यवाटिकायां मेदि०

भृ भर्जने भर्त्सने भरणे च क्र्यादि०आ०पर०सक०सेट्। भरते अभारीत् बभार बभरतुः।

भेक पुंस्त्री०भी०कन् कस्य भेत्त्वम्। (व्याङ्) १जन्तुभेदे अमरः स्त्रियां जातित्वात् ङीष्। "तेजःसदोबलकरः भ्रमहृद्-दाहमेहहृत्। खापकुष्ठव्रणनाशी भेकस्तु परिकीर्त्तितः" राजनि०। २मेघे मेदि० ३भ्रमणकृपण्यां स्त्री ङीष् अमरः

भेकट पु० भेक इव टलति टल-ड। मत्स्यभेदे हिरूपकोषः।

भेकनि(लि) पु० (भाङ्गन) मत्स्यभेदे राजव०।

भेकपर्णी स्त्री भेक इव पर्णमस्याः ङीष्। भ्रमणकृपण्याम्

भेकभुज् पु० भेकं भुङ्क्ते भुज-क्विप्। सर्पे त्रिका०।

भेकासन न०ष०समासोक्ते पूजाङ्गे आसनभेदे तल्लक्षणं यथा "भेकनामासनं योगं निबध्यचक्षि सं सुखम्। निधाय पादयुगलं स्कन्धे बाहौ पदोपरि। ध्यायेदिष्टपदं श्रीमान्

आसनस्थः शुचाङ्ग तत्। यदि सर्वाङ्गसुन्दोल्य गगने खेचरासनम्। महाभेकासनं प्रोक्तं सर्वसिद्धिप्रदायकम्। महाविद्यामहामन्त्रं प्राप्नोति जपतोऽङ्ग यः"।

भेकुरि स्त्री अप्सरोरूपे नक्षत्रे "शुक्रसूयः सूर्य्यरश्मिचन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम" यजु०।१८।४० "तस्य चन्द्रमसः नक्षत्राणि नाम अप्सरसः कीडयः भेकुरयः भां कान्तिं कुर्वन्तीति भेकुरयः पृषोदरादित्वात्साधुः "चन्द्रमाङ्ग गन्धर्वो नक्षत्रैरप्सरोभिर्मिथुनेन सङ्गोऽकामयत भेकुरयो नामेति भेकुरयोऽङ्ग नामैते भां हि नक्षत्राणि कुर्वन्तीति" शत०ब्रा० ६।४।१।६। [स्त्रियां ङीष्।

भेड पुं स्त्री० भी-ड तस्य नेत्त्वम्। मेषे (मेढ़ा) हेमच०

भेड्र पुं स्त्री० भेड+पृषो०। मेषे त्रिका० स्त्रियां ङीष्।

भेद पु० भिद-घञ्। १पृथक्करणे २अन्यतो विश्लेषे राष्ट्रादुपायभेदे विपक्षत्रासनार्थं ३ततुपचीयमानत्वादिभेदने ४न्यायमतोक्ते अन्योऽन्याभावे च यथा घटात् पटस्य भेदः (तादात्म्येनाभावः) उपायभेदभेदप्रकारो यथा "परस्परन्तु ये द्विष्टाः क्रुद्धभीतावमानिताः। तेषां भेदं प्रयुञ्जीत परमं दर्शयेत् भयम्। आत्मीयान् दर्शयेदोषां येन दोषेण विभ्यति। पराक्षेपैव ते भेदा राज्ञो वै प्रातिभेदकः। सामन्तकोपो बाह्यस्तु मन्त्र्यमात्यात्मजादिकः। अन्तःकोपस्तूपधाभ्यं कुर्वन् भक्तोपजं लभेत्" अग्निपु०२२५ अ०। ५हैधे ६विदारणे भेदि०। ७विरेके वैद्यकम्।

भेदक त्रि० भिद-ण्वुल्। १रेचके २विदारके ३भेदकारके ४विश्लेषके च। "स्त्रीदारादौर्यद्विश्लेषं याद्यैः प्रसुतं पदैः। गुणद्रव्यक्रियाशब्दाख्या खलस्य भेदकाः" अमरः

भेदन त्रि०भेदयति भिद-णिच-ल्यु। १विरेचने २विश्लेषणे च ३छिद्रौ न०४मूकरे ५अस्त्रभेदने च पु० राजनि० भिद-भावे ल्युट्। ६विदारणे ७हैधीकरणे न०।

भेदित त्रि० भिद-णिच्-क्त। १विदारिते भिन्ने च "आदयं हृदयं, शीर्षं वषट् कौवट् च मध्यमे। य एव भेदितो मन्त्रः सर्वशास्त्रविवर्जितः" तन्त्रसारोक्ते २मन्त्रभेदे पु०।

भेदिन् त्रि० भिद-णिनि। १भेदकारके स्त्रियां ङीप्। २अस्त्रभेदने पु० राजनि०।

भेदुर न० भिदुर+पृषो०। वज्रे त्रिकाण्डशेषः।

भेद्य त्रि० भिद-ण्यत्। १यत्नादिना विदार्ये २विश्लेष्ये च। "विश्लेष्यं भेद्यमाभि यत्" अमरः। भेदारोगप्रतिषेधश्च सुश्रुते उक्तो यथा

"अथातो भेदारोगप्रतिषेधं व्याख्यास्यामः। खेदित्वा विस्रवन्तिं छिद्रमस्य निराश्रयम्। पक्वं भित्त्वा तु यत्नेन सैन्धवेनावचूर्णयेत्। क्षौद्रसर्पिर्घृतैर्युक्तमेवाल्पं लायुगेन तु। ततः क्षौद्रं दृतं दत्त्वा सम्यगेवमुपाचरेत्। रोचनाक्षारतुत्थानि पिप्पल्यः क्षौद्रमेव च। प्रतिसारणमेवैकं भिन्ने च गण उच्यते। महत्यपि च युञ्जीत क्षारान्निविधिकोविदः। छिन्नां भिन्नां विनिष्क्रान्तां शिरागञ्जननाभिजाम्। शिरैलानन्तशिरूलैः सक्षौद्रैः प्रतिसारयेत्। रक्षाञ्जनमधुभ्यां वा भिन्नां वा व्रणकर्मवित्। प्रतिसार्याञ्जनैर्युक्तां क्षाद्रव्यैर्दीपशिखोद्भवैः। सम्यक्छिन्ने क्रमिपन्नो भिन्ने स्यात् प्रतिसारणम्। त्रिफलातुत्थकासीसरसैस्त्वेतु रसक्रियाम्। भिन्त्वोपनाह्यं कफजं पिप्पलीमधुसैन्धवैः। लेखनैरञ्जनाद्यैश्च समन्तात् प्रोक्षयेदपि। संशोध्य पवनभक्तैश्च स्नेहयित्वा यथाक्रमम्। आपाकादिविनोक्तेन पक्वं भेद्यादुपाचरेत्। सर्वमेतेषु विहितं विधानं स्नेहपूर्वकम्। सम्यक् प्रयत्नो भूत्वा कुर्वीत व्रणरोपणम्"।

भेर पु० भी-रन्। पटहे संक्षिप्तसा०। उलूखलदण्डेन मौरा० ङीष् भेरीत्येवोक्ता भेरी इन्दुभिरित्युक्तम्।

भेरि(री) स्त्री भी-क्रिन् वञ्चा० नि० वा ङीष्। १डक्कड-क्कायाम्। २पटहे "रवा प्रगल्भाहतभेरिसम्भवः" कुमारः उलूखलदण्डः। "ततः शङ्खाश्च भेर्यश्च" गीता।

भेरीस्वनमहास्वना स्त्री कुमारानुचरमातृभेदे भा०श०४७अ०

भेरुण्ड न० १गर्भधारणे शब्दर० २भयानके त्रि० ३देवताभेदे कालिपु० "महाविद्येश्वरी श्वेता भेरुण्डा कृष्णसुन्दरी" तन्त्रसङ्केतनाम। ४अक्षिणीभेदे स्त्री भेदि०

भेल त्रि० भी-र रस्य लः। १डरे २भीरुके ३निर्बुद्धौ ४सन्निभेदे विश्वः। ५चक्षुषे शब्दर०। स्वार्थे क। भेलक तुल्ये उडुपे (भेला) शब्दर०।

भेष भये भ्वा०उभ०चक०सेट्। भेषति ते अभेषीत् अभेषिष्ट। अदित् चङि न हस्वः। अबिभेषत् त।

भेषज न० भेष-घञ् भेषं रोगभयं जयति जि-ड। १औषधे। स्वार्थे अण्। भैषज्य तत्रार्थे भेषजसेवनकालादि भावप्र० उक्तं यथा

"अथ भेषजमक्षणसमयः "भैषज्यमभ्यवहरेत् प्रभाते प्रायशो बुधः। कषायांस्तु विशेषेण तत्र भेदस्तु दर्शितः। श्रेष्ठः पञ्चविधः कालो भैषज्यस्यहरुच्यते। किञ्चित् सूर्योदये जाते तथा दिवसभोजने। सायमन्ने

भोजने च सङ्कथापि तथा निशि। तत्र प्रथमकालः "प्रायः पित्तकफोद्रेके विरेकवमनार्थयोः। लेखनार्थं च भैषज्यं प्रभातेऽन्नमाहरेत्"। अथ द्वितीयकालः "भैषज्यं विशुद्धे पाने भोजनार्थे प्रशस्यते। अरुचौ चित्तभोद्यैव मिश्रं रुचिरमाहरेत्। समानवाते विशुद्धे मन्देऽग्नावतिदीपनम्। दद्याद्भोजनमध्ये च भैषज्यं कृशयो भिषक्। व्यानकोपे तु भैषज्यं भोजनान्ते समाहरेत्। छिक्काश्वेपथुकम्पेषु पूर्वमन्ने च भोजनात्"। अथ तृतीयकालः "उदाने कुपिते वाते शरभङ्गादि कारिणि। सायंप्रातरन्नरे देयं भैषज्यं सान्ध्यभोजने। प्राणे प्रदुष्टे सानृध्यस्य भुक्तस्यान्ते प्रदीयते। औषधं प्रायशो धीरैः कालोऽयं स्यात् तृतीयकः"। अथ चतुर्थकालः "सङ्कर्षेऽथ तृट्छर्द्दिहिक्काश्वासगरेषु च। सान्नञ्च भेषजं दद्यादिति कालचतुर्थकः"। अथ पञ्चमकालः "ऊर्ध्वजत्रुविकारेषु लेखने दंशने तथा। पाचने शमने देयमनन्नं भेषजं निशि" इति पञ्चमकालः। निरन्नञ्च भेषजस्य गुणमाह "वीर्य्याधिक्यं भवति भेषजमन्नहीनं कृच्छ्रात्तदामयमसंशयमाशु चैव। तद्वान्नदङ्गयुवतीमदनिव पीतम् ग्लानिं परां नयति चाशु बलक्षयञ्च"। सान्नस्य भेषजस्य गुणमाह "शीघ्रं विपाकमुपयाति बलेन किंचादन्नाद्गतञ्च न सङ्कथनाद्विरेति। एतद्धितं स्थविरबालकृशाकृशानाम्यः प्राग्भोजनाद्यदधितं किल तच्च तद्वत् अन्नादतवत् भेषजमिति श्रेयः। "औषधशेषे भुक्तं भोजनशेषे यदौषधं पीतम्। न करोति गदोपशमं प्रकोपयत्यन्यरोगांश्च"। पीतमिश्रमुपलक्षणं लीढादिकञ्च। "अतुलोभोऽनिलः स्वास्थ्यं क्षुत्तृष्णात्मनस्ततः। बलवन्मन्दियोदुगारगुरुजोर्द्धौषधाकृतिः। क्लमो दाहोऽङ्गसदनं भ्रममूर्च्छा शिरोरुजः। अरतिर्बलहानिश्च सावशेषौषधाकृतिः"। अथ भेषजभक्षणविधिमाह चरकः "देवान् गुरूंस्तथा विप्रान् पूजयित्वा प्रणम्य च। आशिषश्च समादाय श्रद्धया भेषजं भजेत्। रसायनमिवर्षीणां देवानाममृतं यथा। सुधैवोत्तमनागानां भैषज्यमिदमस्तु ते। ब्रह्मदक्षाश्विरुद्रेन्द्रभूचन्द्रार्कानिलानलाः। देवाश्च औषधिग्रामा भूमिदेवाश्च पान्तु वः। औषधं हेम रजतस्वर्द्राजनपरिस्थितम्। पिबेदाप्रजनस्थाये प्रसन्नवदनेक्षणः। विश्रान्तस्तूपविश्याथ पीत्वा पात्रमधोमुखम्। निःशिष्याच्चम्य सलिलताम्बूलाद्युपयोजयेत्।"

२जले १क्षुद्रे च निघण्टुः। ४विष्णौ पु० "निर्वापं भेषजं भिषक्" विष्णुस०। तल्लक्षणविहितनक्षत्रादिकं ज्यो० त० उक्तं यथा

"विष्णुधर्मोत्तरे। हरिं गोद्विजचन्द्रार्कसुराग्नीन् प्रतिपूज्य च। दृष्ट्वान् मन्त्रमिमं पुण्यं विद्वान् भेषजमारभेत्। ब्रह्मदक्षाश्विरुद्रेन्द्रभूचन्द्रार्कानिलानलाः। ऋषयश्चौषधिग्रामा भूतसङ्घाश्च पान्तु ते। रसायनमिवर्षीणां देवानाममृतं यथा। सुधैवोत्तमनागानां भैषज्यमिदमस्तु ते। अयं मन्त्रश्च ते दत्त मे इति वदेत्। अश्विन्येषु अयं मन्त्रश्चेऽपि पठेत्। "ब्रह्मोदये गुरुबुधेन्दुसितेषु तेषां वारे रवेश्च सुविधौ सुतिथौ सुयोगे। भैषूपपन्नशिवाश्विवितरेषु जन्मर्क्षविद्धरहितेष्वगदः शुभाय"। "औषधकरणं चित्रायुगे विधियुगे मित्रयुगे वसुषु वारुणविष्णौ। वस्तिविरेचनलेखाः शुभदिनतिथिवह्निमन्त्रेषु"। वस्तिर्यमघटं विरेचनं विरेकः। लेखोऽन्नादिवेधः। "पौष्णाश्विनीहरिवसुद्रुतमित्रभेषु-पुष्याहिसार्पादितीन्दुहरिमूलतक्षभेषु, चित्रान्वितैर्भृगुसुतेन्दुरवीज्यवारे भैषज्यपानमचिरादपहन्ति रोगान्। रक्षनाशायामृत्युनक्षत्रलिखनव्ययगुहो वदुष्टदेषु निरतां बलवद्वत्। आयुषश्च हितकारिणि योगे कीर्तिता नियतमौषधसेवा। द्यूनादिषु, पापयोगेऽशुभशून्येषु। आयुष्मानित्यादिशुभयोगे। भीमपराक्रमे, "भैषज्यपाने गुरुसोमशुक्राः शुभं विलग्नं दिवसोरवेश्च। त्रिद्यावरिक्ते करणे च शस्ते योगे च लग्ने द्विशरीरसंज्ञे"। तत्रैव "रोहिणी चानुराधा च शस्तौषधभक्षणे" इति वचनाद्रोहिण्यामपि। "भैषज्यं बहुशः सुचरे मूलभे ब्रह्मदैवते शुक्रेज्ये विदि च दिवसे चापि तेषां वारेषु। शुद्धे रिष्फद्युनस्तिष्टे सतिथौ भोजनेभे" सु० चि०। "बहुशुचरे अश्विनीपुष्यहस्तचित्रानुराधारेवतीश्रवणधनिष्ठाशततारकस्वातीपुनर्वसुभेषु मूले च भैषज्यम् औषधं प्रारब्धं भक्षितं वा सत् शुभफलदं भवतीत्यर्थः तथाचाह ज्योतिः "पौष्णहये चादितिभहये च हस्तत्रये च श्रवणत्रये च। मैत्रे च मूले च शुभे च शस्तं भैषज्यकर्म प्रवदन्ति सन्तः"। वसिष्ठोऽपि "हस्तत्रये चाश्विनपौष्णभेषु, मित्रेन्दुभेषु च शुभवासरेऽपि"। अथ ब्रह्मदैवते द्विस्वभावराशिषु मिथुनकन्याधनुर्मीनेषु सत्सु शुक्रेज्ये विदि च

शुक्लचतुर्दशीसंज्ञेषु दिवाभावसंज्ञेषु सत्सु च पुनस्तेषां शुक्लौदयव्यापिनां रवेश्च दिवसे वारे सत्तिथौ रिक्तावर्जिते दिने भैषज्यं सत्। उक्तञ्च दीपिकायाम् "द्वादशोदये शुक्लचतुर्दशीषु तेषां वारे रवेश्च सुविधौ सतिथौ सयोगे"। अथ रिष्फद्यून-स्थितिश्चेत्तस्मात् द्वादशसप्ताष्टमस्थेषु शुक्लेषु शुभयोग-रहितेषु सत्सु भैषज्यं सत् तत्र वर्षफलप्राप्तादिना सत्यायुर्दायसंयोगे औषधसेवनं हितमित्यं विशेषो ध्येयः। तदुक्तं श्रीपतिना "द्यूनसप्तनिधनसंस्थगुरौ सद्व्यस्थेषु नितरां बलवत्सु। आयुषश्च हितकारिणि योगे कीर्तिता नियतभौषधसेवा"। कश्यपोऽपि "षट्-सप्ताष्टान्त्यगुरौ च बलिनः शुभखेचराः। आयुर्दाय करे योगे कर्त्तव्या खौषधक्रियेति"। अथ जनेर्भं जन्म नक्षत्रं तौ भैषज्यं सत् तदुक्तं दीपिकायां "जन्मनक्षत्र-गतेन्द्रः प्रथमः सर्वकर्मसु। घोरभैषज्यवादाध्वकर्त्त-नेषु च वर्जयेत्।" पी॰ धा॰।

भेषजाङ्ग न॰ ६त॰। औषधस्य अवयवे वस्तुनि शब्दच॰।

भैक्ष न॰ भिक्षैव तत्समूहो वा अण्। १भिक्षायां २भिक्षासमूहे च। भिक्षायां भवः तत्प्रतिपाद्यग्रन्थव्याख्या वा ऋगयनाण्। २भिक्षाभवे त्रि॰ स्त्रियां ङीप्। ३तत्प्रतिपादक-ग्रन्थव्याख्याने च। "भिक्षायनमनुद्यागात् प्राक् केनाप्य निमन्त्रितम्। अयाचितं तु तद्भैक्षं भोक्तव्यं मनुरब्र वीत्" उद्वाहः। [३।१०८

भैक्षचर्य्या स्त्री चर-भावे क्यप् ६त॰। भिक्षाचरणे मतुः

भैक्षजीविका स्त्री १त॰। भिक्षया जीवने त्रि॰।

भैक्षव न॰ भिक्षूणां समूहः खण्डिकाण्। भिक्षु-समूहे। [चातुर्वर्ण्या॰ यञ्। २भिक्षायाम्।

भैक्ष्य न॰ भिक्षायां समूहः यञ्। १भिक्षासमूहे। भिक्षैव

भैदिक त्रि॰ भेदं नित्यमर्हति छेदा॰ ठञ्। नित्यभेदनार्हे

भैम त्रि॰ भीमस्य रूपमेदम् अण्। १भीमरूपसम्बन्धिनि स्त्रियां ङीप्। सा च २नलपत्न्यां दमयन्त्याम्। भीमेनोपासिता अण् ङीप्। ३माघशुक्लैकादश्याम्। एका॰त॰ विष्णुधर्मोत्तरे "श्रवणोर्क्षं यदधरे माघे मासि प्रजायते। एकादश्यां सिते पक्षे सोपवासो जितेन्द्रियः। द्वादश्यां षट्तिला-चारं कृत्वा पापात् प्रमुच्यते। तिलस्नायी तिलोदन्वी तिलहोमी तिलोदकी। तिलस्य दाता भोक्ता च षट्-तिली नावसीदति"। मत्स्यपुराणे "यदृक्षं स्यां चतु-र्दश्यां द्वादश्यामथ भारत!। अन्येष्वपि दिनर्क्षेषु न मङ्गल्यतयोदितम्। ततः पुष्यान्वितां भीमतिथिं प्राप्यप्रयोजयेत्। उपोष्य विधिनानेन मच्छेद्विष्णोः परं पदम्। भीमतिथिं भैमीत्वेन ख्यातामेकादशीम्" रघु॰

भैमगव पु॰ गोत्रभेदे "कश्चितकुत्सपिङ्गलमङ्गदभैमसगवानामाङ्गिरसाम्बरीषयौवनाश्वेति" आश्व॰ श्रौ॰ १२।१२।२

भैमरथ पु॰ भीमरथमधिकृत्य कृतो ग्रन्थः। भीमरथाधि-कारेण कृते ग्रन्थे

भैमसेन्य पु॰ भीमसेनस्यापत्यम् कुरुत्वात् अञि प्राप्ते वार्त्ति॰ अत्र। भीमसेनापत्ये वा॰ ढञ्। भैमसेनि तत्रार्हे

भैमायन पुंस्त्री॰ भीमस्यापत्यं युवा ढञन्तात् फक्। भीमस्य यून्यपत्ये।

भैरव पु॰ भीरोरिदम् अण्। १भये २तद्युक्ते त्रि॰ अमरः। नाड्यादिपरिच्छे १भयानके रसे। ४भयसाधने त्रि॰ मेदि॰ स्त्रियां ङीप्। ५शङ्करे ६तदवतारतद्गणभेदे भद्रर॰ ७नदभेदे च पु॰ हेमच॰। ८शिवपत्न्यां स्त्री ङीप्। भैरवभेदानामुत्पत्तिर्यथा मत्स्यपु॰ १७ अ॰ यथा "दैत्याधिपः सकृत्पत्न्य क्रोरसि गदां क्षिपत्। संक्षि-प्तस्तु महायोगी सर्वाधारः प्रजापतिः। गदापातच्युता-द्भूरि चतुर्धाऽस्रमवापतत्। पूर्वधारासमुद्भूतो भैरवो-ऽग्निसमप्रभः। विद्याराजेति विख्यातः पद्ममालाविभूषितः। तथा दक्षिणधारोत्थो भैरवः प्रेतसंस्थितः। कालराजेति विख्यातः कृष्णाञ्जनसमप्रभः। नागराजेति विख्यातचक्रमालाविभूषितः। पश्चात्तु रुधिराच्छातो भैरवः शूलभूषितः। सन्ध्याराजेति ख्यात इन्द्रा-युधसमप्रभः। भूयिष्ठाद्रुधिराच्छातो भैरवः फलभूषितः। ख्यातो वह्नितराजेति शोभाञ्जनसमप्रभः। ततो भूतेश्वराजेति भैरवः चतुरात्मवः। उत्पराजो बभूवाथ चतुरात्मैरवोऽपरः। एवं हि सप्तरूपोऽयौ कथ्यते भैरवोत्तमैः। विद्याराजोऽष्टमः प्रोक्तो भैरवाष्टकसञ्ज्ञते।" शारदीयदुर्गापूजायां तत्प्रसङ्गात् भैरवा यथोक्तं ब्रह्मवै॰ प्र॰ख॰६।अ॰। "आदौ महाभैरवश्च संहारभैरवस्तथा। असिताङ्गभैरवश्च रुरुभैरवमेव च। ततः कालभैरवश्च क्रोधभैरवमेव च। ताम्रचूडं चन्द्रचूडमथ चैव च भैरवद्वयम्। एतान् संपूज्य मध्ये च नव शक्तीश्च पूज-येत्।" काशीपूजादौ पूजनीया भैरवाश्च तन्त्रसारोक्ता यथा "असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्तसंज्ञकः। कपाली भीषणश्चैव संहारश्चाष्टमः स्मृतः"। ६शिवगणा-धिपभेदे जातिपु॰ ४४ अ॰ यथा "नन्दी भृङ्गी

महाकालो वेताली भैरवस्तथा। चक्रं भूत्वा महेशस्य वीतभीतास्तपोधनाः। यैर्मानुषशरीरेण प्राप्तिरे तपसोबलात्। मन्त्रानामाधिपत्यन्तु ते जानन्ति परं परम्।" शिवांशकवीरभूपचन्द्रशेखरस्य पार्वत्यंश तारावतीगर्भजाते १०वेतालोदरे च यथोक्तं कालिपु०३५अ०। "प्रविवेश ततो देवी स्वयं तारावतीतनौ। महादेवोऽपि तच्छान्तु कामार्तं वसुपल्लितः। कामावसाने तच्छान्तु सद्योजातं सुतद्वयम्। अभवद्भूपशार्दूल! तथा भ्राता-मुखाननम्। ततश्चयोनौ चक्रे नारदवचनाद्भूपः। ज्येष्ठो भैरवनामाभूत् भीरोः पुत्रो भयङ्करः। वेताल-सदृशः कृष्णो वेतालोऽभूत्तथाऽपरः"। अपि च "योऽसौ भद्रो हरसुतो महाकालोऽपि भूमतः। तावेव गौरी-ग्रामेण सम्भूय नरयोनिजौ। वेतालभैरवौ जातौ पृथिव्यां रूपवेश्मनि। यथा भद्रिमहाकालावुत्पन्नौ प्राक् तथा शृणु। योऽसौ महाभैरवाख्यः सकायः प्रारभो हरः। भैरवः पूजनेवायं सर्वाध्यक्षो हराऽजः।" देवीभेदेषु शिवरूपभैरवभेदाश्च तोड़ल-तन्त्रे १पटले उक्ता यथा "शिव उवाच। शृणु पार्वति! मुग्धे! कालिकायाश्च भैरवम्। महाकालं दक्षिणायां दक्षभागे प्रपूजयेत्। महाकालेन वै सार्द्धं दक्षिणा रमते सदा। तारायां दक्षिणे भागे अक्षोभ्यं परिपूजयेत्। वसुद्रुमवने देवि! कालकूटं वसुस्थितम्। सर्वे देवाः सदाराश्च महाक्षोभमवाप्नुयुः। क्षोभादि-रहितं यस्मात् पीतं क्षालाहलं विषम्। अतएव महेशानि! अक्षोभ्यः परिकीर्त्तितः। तेन सार्द्धं महा-मायां तारिणीं रमते सदा। महात्रिपुरसुन्दर्यां दक्षिणे पूजयेत् शिवम्। पञ्चवक्त्रं त्रिनेत्रञ्च प्रतिवक्त्रं सुरेश्वरि!। तेन सार्द्धं महादेवी सदा कामकुतूहला। अतएव महेशानि! पञ्चमीति प्रकीर्त्तिता। श्रीभद्रभु-वनसुन्दर्यां दक्षिणे त्र्यम्बकं यजेत्। स्वर्गे मर्त्ये च पाताले या चाद्या भुवनेश्वरी। एतया रमते तेन त्र्यम्बकस्तेन कथ्यते। सगङ्गेश समाख्यातः सर्वतन्त्रे प्रपूजितः। भैरव्या दक्षिणे भागे दक्षिणामूर्त्तिसंज्ञ-कम्। पूजयेत् परयत्नेन पञ्चवक्त्रं तमेव हि। छिन्न-मस्तादक्षिणांशे कबन्धं पूजयेत् शिवम्। कबन्ध-पूजनाद्देवि! सर्वसिद्धीश्वरो भवेत्। धूमावती महा-विद्या विधवा रूपधारिणी। बगलाया दक्षभागे एक-वक्त्रं प्रपूजयेत्। महारुद्रेति विख्यातं जगत्संहार-कारकम्। मातङ्गीदक्षिणांशे च मतङ्गं पूजयेत् शिवम्। तमेव दक्षिणामूर्त्तिं जगदानन्दकारकम्। कमलाया दक्षिणांशे विष्णुरूपं सदाशिवम्। पूजयेत् परमेशानि! स सिद्धो नात्र संशयः। पूजयेदन्नपूर्णाया दक्षिणांशे च रूपकम्। महादेवार्द्धदेहं दश-वक्त्रं महेश्वरम्। दुर्गाया दक्षिणे देशे नारदं परि-पूजयेत्। नकारः सृष्टिकर्त्ता च दकारः पालकः सदा। रेफसंहाररूपत्वान्नारदः परिकीर्त्तितः। अन्याश्च सर्व-विद्याश्च ऋषयः परिकीर्त्तिताः। स एव तस्या भर्त्ता च दक्षभागे तु पूज्यते"। ११रागभेदे च च महादेवस्वरूपः। धैवतनिषादषड्जगान्धारमध्यमरूपपञ्चस्वरसिञ्चितैर्गेयः। अस्य स्थानं धैवतस्वरः अरडतौ प्रातर्गेयता। मतान्तरे अस्य रागिण्यः पञ्च। भैरवी वैराटी मधु-माधवी सिन्धवी बङ्गाली चेति" कलानाथमते भैरवो गुर्जरी भाषा विलावली कर्णाटी वलंवा बङ्गसेनी चेति षट्। भरतमते मधुमाधवी सहिता वरारी बङ्गाली भैरवी चेति अन्यविधा पञ्च सङ्गी० दा० दृश्या। १२महाविद्यामूर्त्तिभेदे स्त्री क्लीं या च पञ्चदशविधा तन्त्रसारे उक्ता यथा

१त्रिपुरभैरवी २चण्डभद्रा भैरवी ३क्रोधेशभैरवी ४महा-विद्यंगिनी भैरवी ५सकलसिद्धिदा भैरवी ६चैतन्यभैरवी ७कामेश्वरी भैरवी ८षट्कूटा भैरवी ९नित्या भैरवी १०रुद्र-भैरवी ११भुवनेश्वरी भैरवी १२बटुकेश्वरी भैरवी १३त्रि-पुरवाभैरवी १४अन्नपूर्णेश्वरी भैरवी १५अन्नपूर्णेश्वरी-भैरवी च एतासां मन्त्रध्यानादिकं क्रमेण तत्र दृश्यम्। १३तारिण्योपक्रियोगिनीभेदे च "महाकाल्यश्च रुद्राणी उमा भीमा तथैव च। घोराख्या भ्रामरी चैव महा-रात्रिश्च सप्तमी। अष्टमी भैरवी प्रोक्ता योगिनीक्षाः प्रपूजयेत्" तन्त्रसा०। तत्र शिवस्य पत्न्यां "कालीतन्त्रादौ "भैरव्युवाच "कालीपूजा श्रुता नाथ" कालीशब्दे दृश्यम्। १४भैरवरागस्य पत्नीरूपरागिणीभेदे स्त्री "भैरवी कौशिकी चैव भाषा वेलावली तथा। बङ्गाली चेति रागिण्यो भैरवस्यैव वल्लभाः" संगीतसा०। मतान्तरे १५मालवरागस्य पत्नीभेदे "धानसी मानसी चैव रामकीरी च सिन्धुता। आभावरी भैरवी च मालवस्य प्रिया इमाः"। तस्या गान-कालः पूर्वाह्णः। "विभाषा सहिता चैव आभोदा पठ-मञ्जरी। रामकीरी रामकेली वेला मारी च गुर्जरी। देशकारी च सुभगा पञ्चमी च मङ्गलवती। भैरवी चाष

कौमारी रात्रिखो दश पञ्च च। एताः पूर्वाह्णकाले तु गोपने गावनोत्तमैः" वङ्गीतदा०। १५नागभेदे पु० भा० आ० ५७ अ०।

भैरवीचक्र न० भैरव्याः पूजनार्थं चक्रम्। देवीपूजार्थे कुलाचारवतां चक्राकारसमूहे तद्विधिर्यथा तत्पतितन्त्रे

"नित्यं नैमित्तिकं काम्यं प्रकुर्याद्व दिने दिने। कुलवारे कुलर्क्षे च तिथौ चन्द्रबले तथा। भैरव्याः कल्पितं चक्रं संस्थाप्य पूर्ववत् प्रिये। सुरायां शोधनं कुर्याद् यथावत् परमेश्वरि!। प्रहत्ते भैरवीचक्रे सर्वे वर्णा द्विजोत्तमाः। निहत्ते भैरवीचक्रे सर्वे वर्णाः पृथक् पृथक्"।

भैषज न० भेषजमेव स्वार्थे अण्।१औषधे २लाभकरणे जटा० भिषजो गोत्रापत्यं गर्गा० यञ्। भैषज्य तस्य आत्माः कल्पा० अण् यलोपः। २भिषजो गोत्रापत्यक्षात्रेषु ब०व०

भैषज्य न०भिषजः कर्म भेषज-स्वार्थे वा यञ्। १औषधे भिषजोऽपत्यं गर्गा० यञ्। २भिषजोऽपत्ये पुंस्त्री०।

भैष्मज पु० ब०व० भिष्मजो गोत्रापत्यं गर्गा०यञ् तस्य आत्माः कल्पा० अण् यलोपः। भिष्मगगोत्रापत्यक्षात्रेषु।

भैष्माज्य पुंस्त्री०भिष्मजो गोत्रापत्यं गर्गा०यञ्। तद्गोत्रापत्ये

भैष्मकी स्त्री भीष्मस्य अपत्यम् इञ् ङीप्। भीष्मकन्यायां रुक्मिण्याम् हरिवं० १२० अ०।

भोक्तृ त्रि० भुज-भोजने अथने च तृच्। १भोजनकर्त्तरि २भोगकर्त्तरि च १लाभकर्त्तरि हेमच०। स्त्रियां ङीप्। ४विष्णौ पु० "भ्राजिष्णुर्भोजनं भोक्ता" विष्णुस०।

भोग स्त्री भुज-भावकर्मादौ घञ्। १सुखे २दुःखे ३सुखदुःखाद्यनुभवे ४स्त्र्यादीनां भाटके ५भाटकमात्रे च ६सर्पदेहे ७तत्फणायाञ्च अमरः।८धने ९पालने १०भोजने च मेदि० ११देहे १२सर्पे १३माने च शब्दरत्ना०।१४रम्भादीनां राशिनतिकाले "अतीतानागतो भोगो नाड्यः षष्टिदय स्मृताः" तिथितः। १५भूम्यादीनां फलभुक्तौ भुक्तिशब्दे दृश्यम्। १६विभवभेदे "कर्त्ता च देही भोक्ता च आत्मा भोजयिता यदा। भोगो विभवभेदश्च निष्कृतिर्मुक्तिरेव च" ब्रह्मवै० प्र० ख० २३अ०।

भोगक त्रि० भोग+संज्ञायां कन्। भोगकारीने ततः विदा० अपत्ये यञ्। भौगक तदपत्ये पुंस्त्री०।

भोगगृह न० भोगार्थं गृहम्। बासगृहे हेमच०।

भोगदेह पु० भुज्यते सुखदुःखादिकमत्र भुज-आधारे घञ् कर्म०। सुखपापफलभोगार्थे देहे "प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते" गरु० त०। २भोगसाधने देहे च स च लिङ्गशरीरात्मकः तस्यैव भोगसाधनत्वात् "पञ्चप्राण मनोबुद्धिदशेन्द्रियसमन्वितम्। अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम्" वेदान्तिनः। सांख्यमते पञ्चप्राणयुक्ते पञ्चभूतमात्रा इति भेदः। स्थूलदेहस्य भोगावच्छेदकत्वात् उपचारात् तथात्वमिति बोध्यम्। तद्विवृतिर्यथा "शृणु देहविवरणं कथयामि यथागमम्। पृथिवी वायुराकाशस्तेजोऽवनिति स्फुटम्। देहिनां देहबीजञ्च सृष्टेः सृष्टिविधौ परम्। पृथिव्यादिपञ्चभूतैर्वा देहो निर्म्मितो भवेत्। स क्षत्रियो नश्वरश्च भक्षणाच्च भवेदिह। इडाकुण्डप्रमाणञ्च यो जीवः पुरुषः स्मृतः। बिभर्त्ति सूक्ष्मदेहन्तं तद्रूपं भोगहेतवे। स देहो न भवेद्भक्ष्य ज्वलदग्नौ यमालये। जले न नष्टो देहो वा प्रहारे सुचिरं स्थिते। न शस्त्रे च न खड्गे च न तीक्ष्णकण्टके तथा। तप्तदुर्वे तप्तलोहे तप्तपाषाण एव च। प्रतप्तप्रतिमाङ्गेऽप्यस्थूर्ध्वं पतनेऽपि च। न च दग्धो न भग्नश्च भुङ्क्ते सन्तापमेव स." ब्रह्मवै०प्र०२६अ०।

भोगपाल पु० भोगं भोगसाधनमश्वं पालयति पाल-अण् उप०स०। अश्वरक्षके शब्दमा०।

भोगपिप्पालिका स्त्री भोगे पिप्पालिवेव। सुधायाम् शारा०

भोगप्रस्थ पु० उत्तरस्थदेशभेदे द्व०स० १अ० दृश्यम्।

भोगभूमि स्त्री भोगार्थैव भूमिः न कर्मार्था। भारतवर्षातिरिक्ते वर्षे "तत्रापि भारतं श्रेष्ठं जम्बुद्वीपे महासने!। यतो हि कर्मभूरेषा ततोऽन्या भोगभूमयः" विष्णुपु० २अंशे २अ०।

भोगवती स्त्री भोगः सर्पशरीरं भूम्नाऽस्त्यस्याम् मतुप् मस्य वः ङीप्।१पातालगङ्गायाम् "भोगवती च पातालं स्वर्गे मन्दाकिनी तथा" इति पुराणम्। २कुमारानुचरमातृभेदे भा० श० ४७ अ०। ३नदीभेदे भा० व० १२अ०। ४भोगयुक्ते त्रि० स्त्रियां ङीप्।

भोगवर्द्धन पु० देशभेदे मार्क०पु० ५७ अ० ३८ श्लो०।

भोगसद्मन् न० भोगार्थं सद्म। वासगृहे शब्दरत्ना०।

भोगायतन न० इत०। स्थूलदेहे "भोक्तृरधिष्ठानाद् भोगायतननिर्वचनमन्यथा मूर्तिभावः" वा०सू०।

भोगार्ह न० भोगमर्हति अर्ह-अण् उप०स०। १धान्ये राजनि० भोग्ये २वस्तुमात्रे च त्रि०।

भोगावली स्त्री इत०। १भोगसमूहे। २स्तुतौ उपचारात् ३स्तुतिपाठके जटा० ४नागपुर्यां हेमच०।

भोगावास पु० भोगार्थं आवासः। ६तत्पु०। वासगृहे हारा०।

भोगिक पु० भोगः अन्नभोगः अस्त्यस्य कर्मत्वेन ठन्। अन्नरक्षके यज्ञमा०।

भोगिकान्त पु० ६त०। वायौ त्रिका०। सर्पाणामनिलाहारत्वात् तस्य तत्कान्तत्वम्।

भोगिगन्धिका स्त्री भोगिनः सर्पस्येव गन्धो यस्याः कप् आपि अत इत्वम्। बहुव्रीहौ ङीषि नैषधटुप्र०।

भोगिन् पु० भोगः फणाऽस्त्यस्य इनि। १सर्पे अमरः तद्देवताके। २अन्नेभोगवति च १शेषभोगे ४गजे मेदि० तस्य प्रशस्तभोगवत्त्वात्तथात्वम्। ५नागयुते त्रिः। ६व्याडस्त्रिकरे हेमच० ७भोगयुते त्रि० स्त्रियां ङीप् सा च दर्भङ्गीभिक्षराजभार्य्यायाम् अमरः भट्टिनीत्वेन पाठान्तरम्।

भोगिभुज् पु० भोगिनं सर्पं भुङ्क्ते भुज-क्विप्। मयूरे नैषधटुप्र०।

भोगिवल्लभ न० ६त०। चन्दने राजनि०।

भोगीन्द्र(ग्र) पु० भोगी इन्द्र इव ६त० वा। १अनन्तदेवे यन्त्ररत्ना० २वासुकौ च।

भोग्य न० भुज-ण्यत् कुत्वम्। १धने २धान्ये च। भोगमर्हति यत्। २भोगार्हे त्रि०। भोगार्हस्त्रियां ४वेश्यायाञ्च स्त्री राजनि०। ५व्याधिभेदे पु० यथाह नारदः "विषमाहेष्ठ हानञ्च प्रतिभूराधिरेव च। अधिक्रियत इत्याधिः स विज्ञेयो द्विलक्षणः। ऋतकालोपनेयश्च यावद्देयोद्यतस्तथा। स पुनर्द्विविधः प्रोक्तो भोग्यश्चैव च"।

भोज पु० भुज-अच्। १क्षत्रियजातिभेदे स च देशः (भोजपुर) इति ख्यातः। २धारापुरस्थे नृपभेदे भोजप्रबन्ध भोजचरितादौ तदुदन्तो दृश्यः। "धन्यः श्रीभोजराजस्त्रिभुवनविजयी" उद्भटः। वसुदेवस्य शालिदेवागर्भजाते १३यादवभेदे पु० हरिवं० ६६अ०। ४दुन्दुभ्यपत्नीभेदे भा० आ० ८२ अ०।

भोजक त्रि० भोजयति भुज-णिच्-ण्वुल्। १भोजनसम्मानदे याज्ञ०१।२१५को०भुज-ण्वुल्। २भोजनकर्त्तरि त्रि०

भोजकट पु०भोजः कट इव। भोजाख्ये देशे भा०स०२५अ०। भोजकटे भवः "एङ्प्राचां देशे" पा० ङीप्संज्ञायाम् "ङ्याप्०" पा० ह्रस्व। भोजकटीय तद्देशभवे त्रि०।

भोजदेव पु० भोजो देव इव। भोजराजे तेन च पातञ्जलवृत्तिप्रभृतिपन्थाः कृताः।

भोजन न० भुज-ल्युट्। १कठिनद्रव्यस्य गलविलाधःसंयोजने। करणे ल्युट्। २अन्ने निघण्टुः ३विष्णौ पु०। "भोजयिष्णुर्भोजनं भोक्ता" विष्णुस०। "भोज्यरूपा च प्रकृतिर्यतो भोजनमुच्यते" मायाया भोज्यरूपेण परिणामात् विष्णोस्तदधिष्ठानत्वात् तथात्वमिति भाष्यादौ दृश्यम्। भोजनगुणादि भावप्र० उक्तम् आहारशब्दे ८६७४ पृ० दृश्यम्। तत्र विशेष आह्निकतत्त्वोद्योताभिधीयते "विष्णुपु० "मन्त्राभिमन्त्रितं यच्च न च पर्युषितं भवेत्"। अन्यत्र फलमांसेभ्यः शुष्कशाकादिकात् तथा। तद्दोदरिकेभ्यश्च गुरुपक्वेभ्य एव च। भुञ्जीतोद्धृतसाराणि न कदाचिदतन्द्रितः"। नायेयं पुरुषोऽश्नीयादन्यत्र जगतोऽपते!। मध्वन्नदधिसर्पिर्भ्यः सक्तुभ्यश्च विवेकवान्। अश्नीयात्तन्मना भूत्वा पूर्वन्तु मधुरं रसम्। लवणाम्लौ तथा मध्ये कटुतिक्तादिकांस्तथा। प्रागुक्तं पुरुषोऽश्नन्तु वै मध्ये च कठिनाशनः। पुनरन्ते द्रवाशी तु बलारोग्ये न सीदति। अनिन्द्यं भक्षयेदित्थं वाग्यतोऽन्नमकुत्सयन्। पञ्च ग्रासान् गृहाभीनं प्राणाद्य यजनाय तत्"। मन्त्राभिमन्त्रितमिति मन्त्रानादेये गायत्रीति वचनात् गायत्राभिमन्त्रितम्। गारुडे "ग्राम्यं क्रूरञ्च भूयिष्ठम् अत्यम्लञ्च निवर्जयेत्। न चैकरससेवायां प्रसज्येत कदाचन।" "क्षुन्निमित्तं रतिं प्रोक्तं विप्राणां सर्व्वदर्शिनां नित्यम्। अङ्गानि च तथा तस्मिन्नर्द्धप्रहरयामान्तः" छन्दोगप०। विष्णुः "न क्षुतोऽमयाशीयादाप्रयत्यपि कदाचन"। भगवद्गीतासु "आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्द्धनाः। रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः। कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः। आहारा राजसस्येष्टा दुःखशोकामयप्रदाः। यातयामं गतरसं पूति पर्य्युषितञ्च यत्। उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्"। महाभारते "इन्द्रियाणि च संयम्य बकवत्पण्डितो नरः। देशकालौ च संप्रेक्ष्य सर्व्वान् कामान् समश्नुते"। गङ्गामधिकृत्य मत्स्यपुराणम् "अवगाह्य च पीत्वा च पुनात्यासप्तमं कुलम्"। देवीपुराणम् "ये चैव क्षत्रिया लक्ष्मीर्योदाद्भुक्त्व भुञ्जते। ते सर्वपापनिर्म्मुक्ताः प्रभवन्ति गतामयाः"। मनुः "आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः। श्रियः प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते ह्युदङ्मुखः"। नियमे त्वेवम्। अनियमे तु नोदङ्मुखः। हारीतः "नोदङ्मुखोऽश्नीयात्" इति "निष्कामस्य तु प्राङ्मुखस्यैव भोजनम्। यथाह देवलः "प्राङ्मुखोऽन्नानि भुञ्जीत शुचिः पीठमधि-

स्थितः। विशुद्धवदनः प्रीतो भुञ्जीत न विदिङ्मुखः" जीवनुमात्रकस्य दक्षिणाशुखत्वनिषेधमाह आपस्तम्बः "दक्षिणाशुखो न भुञ्जीत एवंविधभोजनमनायुष्यं मानुष्यदिशति" केचित्तु "कृष्णवस्त्रं गवाजाविं तिलैस्तर्पणमेव च। न जीवत्पितृकः कुर्याद्दक्षिणाशुखभोजनम्" इत्याचारात्र करद्वयाब्जोवत्पितृकस्यापि निषेध इत्याहुः। व्यासः "पञ्चार्द्रौ भोजनं कुर्यात् प्राङ्मुखो मौनमास्थितः। शुष्कौ पादौ तथैवास्यमेषु पञ्चार्द्रता मता।" गोभिलः "भुञ्जानेषु तु विप्रेषु वस्त्रं पात्रं परित्यजेत्। भोजने विघ्नकर्त्तारो ब्रह्महापि तथोच्यते"। आपस्तम्बः "दिवा पुनर्न भुञ्जीतान्यत्र फलमूलेभ्यः"। मनुः "नातिप्रगे नातिसायं न सायं प्रातराशितः"। अतिप्रगेऽतिचिरोदितसूर्ये अतिसायं सूर्यास्तमितिसमय एवं प्रातराशितः दिनभोजनेनातिपूर्वः न सायं न रात्रौ भुञ्जीतेत्यर्थः। आपस्तम्बः "यस्तु भोजनशालायां भोक्तुकाम उपस्पृशेत्। आसनस्थो न चान्यत्र स विप्र पङ्क्तिदूषकः" भोजनशालायां भोक्तुकामः सन् आसनस्थो वान्यत्र स्थितो वा न चोपस्पृशेत्। बौधायनः "उपविष्टे समे स्थाने शुचौ देशे समन्वितः। चतुरस्रं लिखेच्चक्रं वर्त्तुलार्द्धं चन्द्रकम्। कर्त्तव्यमानुपूर्व्येण ब्राह्मणादिषु मण्डलम्। कृत्वा मण्डलकं यो तु भुञ्जतेऽधमयोनयः। तेषान्तु यक्षरक्षांसि हरन्त्यन्नानि तद्बलात्"। आपस्तम्बः "भिन्नकांस्ये तु यो विप्रो यदि भुङ्क्ते तु कामतः। उपवासेन चैकेन पञ्चगव्येन शुद्ध्यति"। तथा शूद्रादिभोजनेनापरिष्कृतपात्रेऽपि। ब्रह्मपुराणम् "ताम्रपात्रे न भुञ्जीत भिन्नकांस्ये कदाचिदे। पलाशपद्मपत्रे वा मृद्वी भुक्त्वेन्दुं चरेत्"। मत्स्यपुराणम् "ताम्रपात्रे तथा पृष्ठे आयसे ताम्र भाजने। करे कपोटके चैव भुक्त्वा चान्द्रायणं चरेत्" पृष्ठे कदलीपत्रादिपृष्ठे। पैठीनसिः "ताम्रराजतसुवर्णाम्रशङ्खशुक्तिस्फटिकानां भिन्नमभिन्नम् इति न दोषः"। अत्र पाषाणपात्रं भोजने विहितम् "तैजसानां मणीनाञ्च पात्राणामश्मजस्य च। अशक्तौ भस्मना शौचं मृद्वारिभिरथापि वा" इति मनुना पाषाणपात्रस्य शुद्धिविधानाच्च। प्रचेताः "ताम्रलाभेऽशने चैव कांस्यपात्रे च भोजनम्। व्रतिश्च ब्रह्मचारी च विधवा च विवर्जयेत्"। अत्रिः "आसने पादमारोप्य यो भुङ्क्ते ब्राह्मणः क्वचित्। सक्तेन चान्नमश्नाति तुल्यं गोमांसभक्षणैः"। सक्तेन कृसरोदनं विना गवादिदधिमात्रैः। आश्वमेधिके "आर्द्रपादस्तु भुञ्जीत प्राङ्मुखश्चासने शुचौ। पादाभ्यां धरणीं स्पृष्ट्वा पादेनैकेन वा पुनः"। बोधायनः "भोजनं हवनं दानमुपहारः परिग्रहः। वह्निर्जातु न कार्य्यादि तदाचमनं स्मृतम्"। हारीतः "भार्जनाञ्च बलिकर्म भोजनादि दैवतीर्थेन कुर्यात्"। पराशरभाष्ये हेमाद्रयः "न विवेश्च च भुञ्जीत द्विजः क्लव्येन पाणिना। नैकहस्तेन च जलं स्पृष्ट्वाचमनवर्जितं विवेत्"। मार्कण्डेयपुराणम् "पादप्रसारणं कृत्वा न च वेष्टितमस्तकः"। मनुः "पूजयेदशनं नित्यं चाद्याच्चैव मकुत्सयन्। दृष्ट्वा हृष्येत् प्रसीदेच्च प्रतिनन्देच्च सर्व्वदा। अन्नं हठा प्रशस्यादौ भुञ्जीतार्द्रश्च तन्मनाः। अदृष्टं नित्यमश्नीयादिति भक्तस्य वन्दयेत्"। विष्णुपुः "नागः कूर्म्मश्च ककरो देवदत्तो धनञ्जयः। वह्निस्था वायवः पञ्च तेषां भूमौ प्रदीयते। अदत्त्वा वायवायुभ्यः प्राणादिभ्यो न होमयेत्"। इति शिष्टपठितवचनाद्वायादिभ्यो बलिदानमिति प्राचीनाचारः। तस्मात्तं देवेभ्योदत्त्वा भोक्तव्यं तथा च भगवद्गीतासु "इष्टान् भोगान् हि वो देवादास्यन्ते यज्ञभाविताः। तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः"। यज्ञैः संवर्द्धिता देवा वो युष्मभ्यं भोगानन्नादीनि इष्ट्यादिद्वारा दास्यन्ति। अतो देवैर्दत्तान् अन्नादीन् तेभ्योऽदत्त्वा यो भुङ्क्ते स चौर एव। श्रुतिः "निवेद्य प्राशनात् पूर्वं देवपादोदकाकृतिः। होतव्या जठरे वह्नौ स्तेन पापितस्तेन तु"। तेन पादोदकेनाचोगानं कृत्वा प्राणाद्याहुतिर्नैवेद्येन कार्य्या" आ॰त॰ रघु॰।

भोजनगर न॰ भोजदेवस्य नगरे धारापुरे भा॰ब॰ ११७अ॰ भोजपुरादयोऽत्र। [१०।३७अ॰ भोजनाद्यादयोऽत्र

भोजपति पु॰ ६त॰। १भोजदेवाधिपे २कंसराजे च भाग॰

भोजिन् त्रि॰ भुज-णिनि। भोजनकर्त्तरि स्त्रियां ङीप्।

भोज्य त्रि॰ भोज-ण्यत् भक्षणार्थत्वात्र क्तवत्। १भक्षणीयद्रव्यमात्रे २भक्षभेदे आहारशब्दे दृश्यम्। आद्यातत्कले पितृणां तृप्त्यर्थं देये ३अन्नादौ च।

भोज्यसम्भव पु॰ सम्भवत्यस्मात् सम्+भू-अप्पादाने यप् ६ब॰। भोज्यजाते देहस्थे रसधातौ शब्दच॰।

भोट पु॰ (भोटान) देशभेदे शब्दरत्ना॰।

भोटाङ्ग पु॰ (भोटान) देशभेदे शब्दर॰।

भोलि पु॰ भा-उलि। वह्नौ त्रिका॰।

भोस् अव्य०भा-डोसि।१सम्बोधने अमरः २प्रश्नविधाने शब्दर०
भौजीय त्रि० भोजे देशभेदे भवः गङ्गा०ञ्। भोजदेशभवे।
भौत पु०भूतानि प्राणिनोऽधिष्ठात्व्य प्रकृत्तः तानि देवता वा अस्य अण्। १देवते ब्राह्मणे शब्दमा०। बलिकर्मरूपे स्मृतस्य-कर्त्तव्ये पञ्चयज्ञान्तर्गते २महायज्ञभेदे। "श्वोभो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्" मनुः। २रात्रौ स्त्री ङीप् ङेमच०। भूतप्रियत्वात्तस्याऽत्वात्वम्।
भौतिक त्रि० भूतानि पृथिव्यादीनि पिशाचान् वा अधिष्ठात्व जातानि ठक्। १भूताधिकारेण जाते "आकृङारिकत्व-श्रुतेर्न भौतिकानि" वा० सू०। २चपद्रवे व्याध्यादौ। ३सङ्कीर्णायां राजनि०। ४महादेवे पु०त्रिका०।
भौत्य पु० भूतेरपत्यं वा० यक्। चतुर्दशमनौ हरिवं ७अ०। "बभूवाङ्गिरसःपुत्रो भूतानाम्नातिकोपनः" इत्युपक्रमे मार्कण्डु० १०० तदुत्पत्त्यादिकथनम्।
भौम पु० भूमेरपत्यं तस्या इदं वा अण्। १नरकासुरे "त्वयि भौमं गते जेतुम्" माघः। २मङ्गलग्रहे च। ३भूमिभवे त्रि० मेदि०। भौमजलशुद्ध्यादिकम् अम्बुशब्दे २२०४ दृश्यम्। ४भूमिव्यापके अमरे धरणिः। ५रक्तपुनर्नवायां राजनि०
भौमन पु० भूम्नोऽपत्यम् अण् मन्नलत्वात् न टिलोपः। विश्वकर्मणि भा० स्त्री० १२अ०।
भौमिक त्रि० भूमौ तिष्ठति अधिकरोति वा ठक्। भूम्यधि-कारिणि २भूमिस्थिते च मनुः ५।१४२। [अमरः।
भौरिक त्रि० भूरि अर्थमधिकरोति ठक्। कनकाध्यक्षे
भौरिकि पुंस्त्री० भूरिकर्णेरपत्यमिञ्। भूरिकर्णेरपत्ये स्त्रियां स्त्रीत्वा० ष्यङ्। भौरिक्या तदपत्ये स्त्रियां स्त्रित्वात् ङीप् च भौरिकीत्यपि तत्रार्थे। ततः अपत्ये तिका० फिञ्। भौरिक्यायाञ्च भौरिकेरपत्ये पुंस्त्री०। भौरिक्या० विषये यौ विधञ्। भौरिकिविध तद्विषये देशे
भौरिक्यादि ग० देशे विषये विधञ्प्रत्ययनिमित्ते शब्दगणे स च गणः पा०ग० उक्तो यथा "भौरिकि भौलिकि चौपयत चैटयत काश्येय वाशिनक वालिकाल्प वैकयत वैकयत"। [भौरिकिशब्दवत् सर्वम्।
भौलिकि पुंस्त्री० भौरिकि+वा रस्य लः। भौरिकिशब्दार्थे
भौलिङ्ग पुंस्त्री०मूलिङ्गस्य खगभेदस्यापत्यम् अण्। मौलिङ्ग-खगापत्ये स्त्रियां गौरा०ङीष्। ततः युवप्रत्ययस्य लुक्
भौवादिक पु० भ्वादौ गणे पठितः ठक् वार्तुपूर्वम् ऐच्। भ्वादिगणपठिते धातौ। एवम् आदादिकतौदादि-कदैवादिकादयोऽपि अदाद्यादिगणपठिते धातौ।

भ्यस भये भ्वा० आ० अक० सेट्। भ्यसते अभ्यसिष्ट।
भ्यसते अव्य०। उत्तरदिशि निघण्टुः।
भ्रंग्य पु० अनृग-भावे यञ्। व्यङ्गने अमरः। अतःपाते च
भ्रंगकला अव्य०अव्यां०। हिंसायाम् गणरत्न० टी०। भ्रंग-कलाजल्प हिंसितेत्यर्थः।
भ्र(भ्रु)(भ्रू)कंस पु० भ्रुवा कंसा इव दृश्यतयाऽपनं यस्य। "ऊभ्रूकंसादीनाम्" वार्त्ति० ष पक्षे वा हुस्वः इति रूपत्रयम् स्त्रीत्वेऽप्यधारिणि मटे अमरः।
भ्र(भ्रु)(भ्रू)कुटि पुंस्त्री० भ्रुवः कुटिः कौटिल्यम्। भ्रुकुं-यवत् रूपत्रयम्। भ्रुवः कौटिल्ये अमरः।
भ्र(भ्रु)क्ष अदने भ्वा० प०सक० सेट् वा रक्ष इः धातुपाठः। भ्र(भ्रु)क्षति ते अभ्र(भ्रु)क्षीत्। अभ्र(भ्रु)क्ष।
भ्रजस् पु० भ्राजते भ्राज-असुन् पृषो० हुस्वः। १अग्नौ ऋग्वेदे यजु०१५।८। "अग्निर्वै भ्रजस्चन्द्रः" शत० ब्रा० ८।५।२।५। २आदित्यरूपे सुरे च "सुरो भ्रजस्चन्द्र इत्यसौ वा आदित्यः सुरो भ्रजस्चन्द्रः" तत्रैव।
भ्रण शब्दे भ्वा०पर०सक०सेट्। भ्रणति अभ्राणीत् अभ्रणीत् अभ्राण। [अभ्रंणीत् भ्रण्यते।
भ्रन्ग्य अधःपतने दिवा०अक०सेट्। भ्रग्यति दरित् अभ्रग्यत्
भ्रन्ग्य अधःपाते अक० सेट्। भ्रंग्यति ऋदित् अभ्रग्यत। ऋदित्। भ्रंग्यित्वा भ्रङ्क्ता। भ्रङ्क्तः। [भ्रुवो भङ्ग।
भ्र(भ्रु)(भ्रू)भङ्ग पु० ६त०। भ्रुकुंसवत् वा सकारहुस्वो
भ्रम चलने भ्वा०पर०अक०सेट्। भ्रमति कौटिल्ये दरित्। अभ्रमत् अभ्रमीत्। बभ्राम कर्त्ता० भ्रेमतुः बभ्रमतुः।
भ्रम चलने दिवा०पर०सक०सेट् श्यमा०। भ्राम्यति अभ्रमीत्।
भ्रम भ्वा०पर०अक०सेट्। भ्रमति अभ्रमीत् कर्त्ता० भ्रेमतुः बभ्रमतुः चङि न हुस्वः। अभ्रमा० भ्रमः भ्रामः।
भ्रम पु० भ्रम-घञ्। १मिथ्याज्ञाने (अन्यथाभूतस्य वस्तुनो-ऽन्यथारूपेण ज्ञाने) २जलनिर्गमस्थाने ३कुन्दे (कुंद) ४भ्रमणे च मेदि०। भ्रमस्य तद्वति तत्प्रकारकज्ञानम्। व्यधिकरणप्रकाराच्छिन्नविषयतासंसर्गज्ञानम्। यत्प्रकारिका या विषयता तत्प्रकारव्यधिकरणविषयताकज्ञानम्। स्वप्रकारव्यधिकरणविषयताकज्ञानम्। स्वव्यधिकरणप्रकारावच्छिन्नविषयताप्रतियोगिज्ञानम्" (चि०) तदभाव-वद्विशेष्यतानिरूपितविषयताप्रतियोगिताकतदभाववति तत्-सम्बन्धेन तद्धर्मविशिष्टतन्निरूपितवैशिष्ट्यविषयताज्ञानम्। विशेष्यितासम्बन्धेन तद्वृत्तित्वावच्छिन्नप्रतियो-गिताकतदभाववदवच्छिन्ना या तद्वृत्तित्वप्रकारिका त-

ज्ञानिज्ञानम् । (मू०मा०) "मिथ्याज्ञानापरपर्य्यायोऽयं निश्चयः" (गौ०ह०) यतस्मिंस्तद्बुद्धयः (भा०प०) । तद्भाववति तत्प्रकारकं ज्ञानम् यथा शुक्तौ इदं रजतम् इति ज्ञानम् । (त०म०) अमो द्विविधः । विषयांशः संशयश्च । तत्रैतयोः दोषा दोषशब्दे २७६२ पृ० दृश्याः

भ्रमण न० भ्रम-ल्युट् । गतिभेदे पर्य्यटने कर्मणशब्दे दृश्यम्

भ्रमणी स्त्री भ्रम-करणे ल्युट् ङीप् । १क्रीडार्थपर्य्यटने तत्साधने २क्रीडिकावाद्ये मेदि० । [तिका०

भ्रमत्कुटी स्त्री भ्रमन्ती कुटीव । इषादिनिर्मिते छत्रे

भ्रमर पुंस्त्री० भ्रम-करन् । १मधुकरे अमरः स्त्रियां जातित्वात् ङीष् । २कांस्ये मेदि० ।३भ्रमरच्छत्रीलताभेदे स्त्री राजनि० टाप् ।

भ्रमरक पु० भ्रमर इव कायति कै-क । ललाटलम्बिते भ्रमरतुल्ये चूर्णकुन्तले अमरः । स्वार्थे क । भृमरक भ्रमरे बालभूषिकायाञ्च मेदि० । (तरमीन) वेधनयन्त्रभेदे दशकुमा० । जलभ्रमणे विदः ।

भ्रमरकोट पु० भ्रमर इव कीटः । (कुमेरपोका) कीटभेदे

भ्रमरच्छत्री स्त्री लतामेदे राजनि० । भृङ्गच्छत्र्यादयोऽप्यत्र "भृङ्गच्छत्री च कटुका तिक्ता दीपनरोचनी" राजनि० ।

भ्रमरपदक न० "भ्रमरपदकमिदमभिहितम्" छादशाक्षरपादके छ० र० टी० उक्ते छन्दोभेदे ।

भ्रमरप्रिय पु० ईत० । धाराकदम्बे रत्नमा० ।

भ्रमरमारी स्त्री भ्रमरं मारयति मारि अण् उप०स०गौरा० ङीष् । भृङ्गारिलतायाम् राजनि० । भृङ्गाद्यादयोऽप्यत्र "भ्रमरारिश्च तिक्ता स्यात् पित्तश्लेष्मकफापहा । त्रिदोषकृष्णकण्डूतिगोफ्रव्रणविनाशिनी" राजनि० ।

भ्रमरविलसिता स्त्री "भोगो नौगो भ्रमरविलसिता" छन्दोमं० उक्ते एकादशाक्षरपादके छन्दोभेदे अस्य स्त्रीत्वमेके वदन्ति ।

भ्रमरातिथि पु० भ्रमरः अतिथिर्यस्य । चम्पके राजनि० ।

भ्रमरानन्द पु० भ्रमरान् आनन्दयति आ+नन्द-णिच्-अण् उप०स० । वकुले २अतिमुक्तके रक्ताम्राने च राजनि०

भ्रमरालक पु० भ्रमर इव अलति पर्य्याप्नोति अल-ण्वुल् । ललाटस्थे चूर्णकुन्तले हेमच० ।

भ्रमरी स्त्री भ्रमर+ङीष् । १षट्पद्यां अस्यर्थे अच् गौरा० ङीष् । तदाकारत्वात् २जतुकायां ३शतदलाम्राच्च राजनि० ।

भ्रमरेष्ट पु० ईत० । १श्योनाकवृक्षे २माष्यां ३भूमिजम्बाच्च स्त्री राजनि० ।

भ्रमरोत्सवा स्त्री भ्रमराणामुत्सवो यत्र । माधवीलतायाम् राजनि० । [निशानाशके यक्षमार्जके हेमच० ।

भ्रमासक्त त्रि० भ्रमे निशानार्थचक्रभ्रमणे आसक्तः । यक्ष-

भ्रंश अधःपतने दि०पर०सक०सेट् । अभ्रंशति अभ्रंशीत् अभ्रंशीत् । चर्दित् ङा वेट् । भ्रंशित्वा भ्रष्ट्वा । भ्रष्टः ।

भ्रंशिमन् पु०भ्रंशस्य भावः अतिशये वा इमनिच् अतोरः । १भ्रंशने २अतिशयभ्रंशे च । अतिशये इष्ठन् भ्रंशिष्ठ रैवतिष्ठन् भ्रंशीयस् अतिशयभ्रंशे त्रि०रैवतिनि स्त्रियां ङीप् ।

भ्रष्ट त्रि० भ्रंश-क्त । च्युते गलिते स्वार्थे क । तत्रार्थे स च उपधा० ।

भ्रस्ज पाके त० उ०सक० अनिट् । भ्रज्जति आर्द्धधातुके वा भर्जादिः स च सेट् अभ्राक्षीत् अभर्जीत् । अभ्रट अभर्जिट । बभर्ज बभ्रज्ज ।

भ्राज दीप्तौ भा०आत्म०अक०सेट् । भ्राजते अभ्राजिष्ट अभ्राक्षीत् भेजे बभ्राजे । चङि वा हुझः । ईत् अधु भ्राजयुः ।

भ्राज न० वर्षसाध्ये नवमयजनसत्रे विषुवद्दिनके प्रधानदिने गेये दिवाकीर्त्ये सामभेदे "दिवाकीर्त्यं सामा भवति" इत्युपक्रमे तस्य दिवाकीर्त्यत्वं समर्थ्य "भ्राजाभ्राजे पवमानसख्ये भवतो सख्युत एवास्य तान्यां तमोऽपघ्नन्ति" ता०ब्रा०४।६।१४ । "यद्यप्यत्र पवमानसख्य इति सामान्यसम्बन्ध एव श्रूयते ये गायत्रे ते गायत्रीपूर्वयोः पवमानयोरिति विशेषावगतेरेव व्याख्यातं सूत्रमन्यत् । अनेन भ्राजाभ्राजयोः साम्नोः स्थानियमोऽर्थाद्भवो भवति" भा० तत्र साम "परिष्कानो गिरिष्ट" इत्यस्मिन् गेयम् तच्च जगत्याने ३प्र०१२ ।

भ्राजक त्रि० भ्राज-ण्वुल् । १दीप्तिशीले २पित्तभेदे न० शब्दरत्ना० पित्तशब्दे ४२२६ पृ० भावप्र० वाक्यं दृश्यम् ।

भ्राजिर पु० भौत्यमन्वन्तरे देवभेदे मार्कपु० १००अ० ।

भ्राजिष्णु त्रि० भ्राज-इष्णुच् । १दीप्तिशीले २विष्णौ पु० । "भ्राजिष्णुर्भोजनं भोक्ता" विष्णुस० ।

भ्रातुष्पुत्र पु० ईत० अलुक्स० कर्म्मा० । भ्रातुः पुत्रे ।

भ्राट पु० भ्राज-क्विप् पृषो० । एकपितृजाते (भाई) इति ख्याते पदार्थे तस्य स्त्री भ्राट्पत्नी एक० । २भ्रातृभगिन्योः द्वि०व० ।

भ्राटक त्रि० भ्रातरिदम् ठञ् । भ्रातृसम्बन्धिनि ।

भ्राटज पुंस्त्री० भ्राटजायते जन-ड ५त० । १भ्रातृपुत्रे २तत्कन्यायां स्त्री ।

भ्राटजाया स्त्री ईत० । भ्रातृपत्न्यां स्त्रौ नियोगेनापि तद्-

मननिषेधो यथा "भ्रातृजायां कमण्डलुम्" कल्पतरुः ३८७३६० इत्यत्र। अनियोगेन तद्गमने दोषो यथा "भ्रातृजायापहारी च भ्रातृगामी भवेच्चरः" ब्रह्मवै० प्र० ५६ अ०। भ्रातृपत्न्यादयोऽत्र।

भ्रातृद्वितीया स्त्री भ्रातृभोजनार्या द्वितीया। कार्त्तिकशुक्लपक्षस्य द्वितीयायाम् यमद्वितीयायां तद्विधिः निर्णयसि० अत्रिः "कार्त्तिके शुक्लपक्षस्य द्वितीयायां युधिष्ठिर!। यमो वसुनया पूर्वं भोजितः स्वगृहेऽर्चितः। ततो यमद्वितीयेयं त्रिषु लोकेषु विश्रुता। अस्यां निजगृहे विद्वन्! न भोक्तव्यं ततो नरैः। स्वेच्छेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनम्। दानानि च प्रदेयानि भगिनीभ्योऽपि विद्वांसतः। वस्त्रालङ्कारवस्त्राद्यैः पूजासत्कारभोजनैः। यस्माद् भगिन्यः संपूज्या अभावे प्रतिपद्गताः" प्रतिपद्गताः भाद्रभगिन्य इति हेमाद्रिः। "पितृव्यभगिनीहस्तात् प्रथमायां युधिष्ठिर!। भ्रातृवक्त्रं सुराहस्ताद्द्वितीयायां तथा नृप!। पितृमातृस्वसृः कन्ये तृतीयायां तथोः क्रमात्। भोक्तव्यं स्वसृजायाश्च भगिन्या हस्ततः परम्। यस्मात् भगिनीहस्ताद्भोक्तव्यं वस्त्रवर्द्धनम्। यस्यां तिथौ यमुनया यमराजदेवः स्वभोजितः प्रतिजगत् स्वसृहस्तेन। तस्यां स्वसुः करतलादिह यो भुनक्ति प्राप्नोति रत्नसुखधान्यमतुल्यमुच्चैः। गौडास्तु "दर्भं च चित्रगुप्तं च यमदूतांश्च पूजयेत्। अर्घ्यञ्चात्र प्रदातव्यं यमाय सहजादयैः मन्त्रः "एहोहि धर्मराज! पाशहस्त! यमानुकानुलोकधरामरेश!। भ्रातृद्वितीयाकृतदेवपूजां गृहाण चार्घ्यं भगवन्नमस्ते! भ्रातस्त्वयानुज्ञातोऽहं भुञ्जे भक्तमिदं शुभम्। प्रीतये यमराजस्य यमुनाया विशेषतः" व्रतोद्यापनजातेति वहेदिति कात्तिः। इत्यत्रदानमिश्रत्वाच्चः। ब्रह्मपुराणेऽपि "या तु भोजयते नारी भ्रातरं युग्मके तिथौ। अर्चयेच्चापि ताम्बूलैर्न सा वैधव्यमाप्नुयात्। भ्रातुरायुःक्षयो राजन् न भवेत् तत्र कर्हिचित्"।

भ्रातृवधू स्त्री ६त०। (भादरवौ) कनिष्ठभ्रातृजायायां रूढा०

भ्रातृभगिनी स्त्री द्वि०त०। वा एकशेषः। भ्रात्रादिसहित भगिन्याम्।

भ्रातृवत् त्रि० भ्रातास्त्यस्य वतच्। भ्रातृयुक्ते।

भ्रातृव्य पु० भ्रातुः पुत्रः भ्रातृ+व्यत्। १भ्रातृपुत्रे २शत्रौ च हेमच०। "अतिवाद्यमानं भ्रातृव्यं क्षपयति य एतया स्तुते" ता०ब्रा०२७।२। [ज्ञेऽभ्रातरि (भाइर) शब्दरत्ना०

भ्रातृशुर पु०भ्राता पतिभ्राता श्वशुर इव पूज्यत्वात्। पतिभ्राते

भ्रात्र न० भ्रातुरिदम् शिवा० अण्। भ्रातृसम्बन्धिनि।

भ्रात्रीय पुंस्त्री० भ्रातरपत्यम् छ। भ्रातृपुत्रे अमरः।

भ्रान्त न० भ्रम-भावे क्त। १भ्रमणे "जनस्थाने भ्रान्तम्" भाट० कर्त्तरि क्त। २मिथ्याज्ञानयुक्ते ३भ्रमणयुक्ते च त्रि०। ४धत्तूरे ५मत्तगजे च पु० राजनि०।

भ्रान्ति स्त्री भ्रम-क्तिन्। १भ्रमणे २अयथार्थज्ञाने च। "वाय्वग्निके तु संप्राप्ते भ्रान्तिः संजायते नृणाम्। धात्वाक्षराणि सूक्ष्माणि पत्राण्युड्डान्यतः पुरा" ज्यो० त०। भ्रान्तिज्ञानञ्च चित्तविक्षेपः योगान्तरायः पात०सू० उक्तः चित्तविक्षेपशब्दे २८४१ पृ० दृश्यम्।

भ्रान्तिमत् त्रि० भ्रान्तिरस्यास्य मतुप् मस्य वः। १भ्रमज्ञानयुते स्त्रियां ङीप्। २अर्थालङ्कारभेदे पु० अलङ्कारशब्दे दृश्यम्। [२भ्रमनाशके त्रि० स्त्रियां ङीप्।

भ्रान्तिहर पु० भ्रान्तिं हरति हृ-ट। १मन्त्रिणि शब्दरत्ना०

भ्राम त्रि० भ्रम-ज्वला० कर्त्तरि घ। भ्रमयुक्ते।

भ्रामक त्रि० भ्रामयति भ्रम-णिच्-ण्वुल्। १भ्रमजनके २भ्रमणे पुंस्त्री० स्त्रियां ङीप्। ३धूर्त्ते त्रि०। ४सूर्य्यांशे भेदे ५अवस्कन्दे (चुम्बकपाषर) मेदि० तस्य लौहाकर्षकत्वात् तथात्वम्।

भ्रामर न० भ्रमरेण संभृतं सम्पादितम् अश्नेदं वा अण्। १मधुनि। २भ्रमरसम्बन्धिनि त्रि० ३अवस्कन्दे पु०मेदि०। "तदाहं भ्रामरं रूपं कृत्वासंख्येयषट्पदम्" इत्युपक्रम्य "भ्रामरीति च मां लोकाः" इति देवीमा० उक्ते ४चण्डीमूर्त्तिभेदे स्त्री। भ्रामरमधुगुणादि किञ्चित् सूक्ष्मैः प्रसिद्धेभ्यः पुष्पेभ्योऽभिसिञ्चितम्। निर्मले स्फटिकाभं यत्तन्मधु भ्रामरं स्मृतम्। भ्रामरं रक्तपित्तघ्नं मूत्रजाठरकृद् गुरु। वाङ्मात्रकमभिष्यन्दि विशेषात् पित्तजं त्रिषम्" भावप्र० उक्तम्। ५अपस्माररोगे शब्दमाला।

भ्रामरिन् त्रि० भ्रामर 'भ्रमरस्येव घूर्णनमस्त्यस्य इनि। अपस्माररोगयुते "भ्रामरी नखभक्षी च" मनुः ३।१६१। टीकायां कुल्लू०।

भ्राश भाषे भ्वा०आ०अक०सेट्। भ्राशते भ्राशिष्टे अभ्राशिष्ट। कण्ठ्य० भ्रेशे अभ्राशे। क्वादित्वे चक्षि न लुक्। हिंस्र वदुः भ्राशथुः।

भ्राष्ट्र पु० भ्रस्ज-करणे ष्ट्रन्। १अम्बरीषे (भाजनाधोढा) अमरः। भ्राष्ट्रे संस्कृतः अण्। २अम्बरीषसंस्कृते भक्ष्यतण्डुलादौ त्रि० स्त्रियां ङीप्।

भ्राष्ट्रकि पु० गोत्रर्षिप्रवरभेदे प्रवरा०।

भ्राष्ट्रिवर्तिन् पु० गोत्रप्रवरभेदे ऋषिभे० ब्र० प्रवराध्यायः।
भ्रास दीप्तौ दिवा०आ०अक०सेट्। भ्रास्यते अभ्रासिष्ट।
भ्रास दीप्तौ भ्वा०आ०अक०सेट्। भ्रासते अभ्रासिष्ट कर्त्रा० भेदे वभ्राशे द्वित्। भ्रासतुः कादित् चङि न ह्रस्वः।
भ्री भये अक० भरणे सक० क्र्या० वा ह्रा० पर० अनिट्। भ्रीणाति भिनाति अभ्रैषीत्।
भ्रुड संवरणे सक० संघाते अक० तु० कु० पर० सेट्। भ्रुडति अभ्रुडीत् बुभ्रोड़।
भ्रूः स्त्री अम-ऊङ्। नेत्रयोरूर्ध्वस्थायां रोमराजौ अमरः। तच्छुभाशुभलक्षणं गरु०६६अ०उक्तं यथा "विशालोन्नता सुस्निनो दरिद्रा विषमभ्रुवः। धनी दीर्घासंबद्धभ्रूर्बालेन्दून्नतसुभ्रुवः। आयो निम्नच खड्गभ्रूर्मध्याच विनतभ्रुवः"। भ्रुवो मूलम् जाङ्घच्। भ्रूजाङ्घ भ्रूमूले न०।
भ्रूक्षेप पु० ६त०। १भ्रूभङ्गे २सङ्केतज्ञापनाय भ्रुवोविक्षेपकरणे "भ्रूक्षेपमात्रानुमितप्रवेशाम्" कुमारः।
भ्रूण आशायां विशङ्कायाञ्च चु०आत्म०सक०सेट्। भ्रूणयते अबुभ्रूणत।
भ्रूण पु० भ्रूण-घञ्। स्त्रीणां १गर्भे २बालके च अमरः।
भ्रूणघ्न त्रि० भ्रूणं गर्भं हन्ति हन-क। भ्रूणहत्याकारके क्विप् भ्रूणहायत्र। "अपि भ्रूणहनं मासात्" मनुः। तत्प्रायश्चित्तं प्रा० वि० उक्तं यथा
"तत्र पुंस्त्वेन ज्ञाते पुरुषवधप्रायश्चित्तं स्त्रीत्वेन ज्ञाते स्त्रीवधप्रायश्चित्तम्। अविज्ञाते तु पुंवधप्रायश्चित्तमाह मनुः °कृत्वा गर्भमविज्ञातमेतदेव व्रतञ्चरेत्। राजन्यवैश्यौ चेज्ज्ञानादात्रेयी(रजस्वलां)मेव च स्त्रियम्" एतदेवेति। ब्रह्मवधप्रायश्चित्तमित्यर्थः। ब्राह्मणीगर्भवधविषयमिदं तस्यैव प्रकृतत्वात्। क्षत्रियादिगर्भवधे तु बहवो गर्भस्तदर्धवधप्रायश्चित्तं कार्यं यथा याज्ञवल्क्यः "यानस्थक्षत्रविड्घाते चरेद्ब्रह्मक्षयो व्रतम्। गर्भहा च यथावर्णं तथात्रेयीनिषूदनः" व्रतपदोपादानात् ज्ञानत इदम् अज्ञानतस्तदर्द्धं तेन ज्ञानतो ब्राह्मणगर्भवधे द्वादशवार्षिकम्। क्षत्रियगर्भवधे त्रैवार्षिकं वैश्यगर्भवधे सार्द्धवार्षिकं शूद्रगर्भवधे नवमासिकं, धेनुसङ्ख्यानमप्यूहनीयम्"।
भ्रूभङ्ग पु० ६त०। क्रोधादिज्ञापनार्थं भ्रुवश्चित्यैक्यकरणे "भ्रूभङ्गदुर्ग्रहे यस्य तस्य" इति कुमारः।
भ्रेज भासे भ्वा०आत्म०अक०सेट्। भ्रेजते अभ्रेजिष्ट। कादित् चङि न ह्रस्वः। अबिभ्रेजत् त।
भ्रेष(भ्रेषृ)च पतने चलने च अक०भ्वा०उभ० सेट्। भ्रेषते(भ्रेषृते)अभ्रेषीत् अभ्रेषिष्ट(भ्रेषृष्ट)। कादित् चङि न ह्रस्वः। अबिभ्रेषत्(भ्रेषृत) त। तत्र पतने आ० भये चलने उभ० अक० इति भेदः।
भ्रैष पु० भ्रेष-अञ्। उचितस्थानात् पतने अमरः। "कारणभ्रैषे कार्यभ्रैषो मा भूदिति" ह०उ० भा०।
भ्रौवेय त्रि० भ्रुव इदम् "भ्रुवो वुक् च" पा० ढक् वुक् च। भ्रूसम्बन्धिनि च।
भुज्ज भक्षणे भ्वा०उभ०सक०सेट्। भुज्जति ते अभुज्जीत् अभुज्जिष्ट। दुर्गमते भक्षधातुरयम्।
भ्राज्ज दीप्तौ वा दिवा० पक्षे भ्वा० आ० अक० सेट्। भ्राज्जते भ्राज्जते अभ्राज्जिष्ट कर्त्रा० भेदे वभ्राजे। द्वित्(वधु) भ्राजदुः। दीपदेवमते भ्राजधातुरयम्।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यसङ्कलिते वाचस्पत्ये भकारादिशब्दार्थसङ्कलनम्।

म

मकारः पवर्गस्य पञ्चमवर्णः। ओष्ठोच्चारणस्थानमोष्ठौ नासिका च जिह्वाग्रेण ओष्ठयोः स्पर्शनोच्चारणम् आभ्यन्तरः प्रयत्नः अतएवास्य स्पर्शवर्णता अनुनासिकता च। बाह्यप्रयत्नाश्च संवारनादघोषाः अल्पप्राणश्च। अस्य ध्येयस्वरूपञ्च तन्त्रं कामधेनुतन्त्रे "मकारं शृणु चार्वङ्गि! सत्यं परमकुण्डली! तरुणादित्यसङ्काशं चतुर्वर्गप्रदायकम्। पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा"।
वर्णाभिधानेऽस्य पर्य्यायो उक्तो यथा "मः कालो क्षोभितः कालो महाकालो महान्तकः। वैकुण्ठो वसुधा चन्द्रो रविः पुरुषराजकः। कालभद्रो जया मेधा विश्वदा दीप्तसंज्ञकः। जठरञ्च श्रमो मानं लक्ष्मीर्मोतोपबन्धनी। विप्रं शिवो महावीरः शशिप्रभा ज्वनेश्वरः। प्रमत्तः प्रियरुद्रः सर्वाङ्गो वज्रिमण्डलम्। मातङ्गमालिनी विन्दुः श्रवणा भरणो विधृत्"। तदधिष्ठातृदेवताध्यानं यथा "कृष्णां दशभुजां भीमां पीतलोहितलोचनाम्।

लक्षणस्वरधरां नित्यां धर्मकामार्थमोक्षदाम्। एवं ध्यात्वा मकारन्तु तन्मन्त्रं दशधा जपेत्"। मातृकान्यासेऽस्य जठरे न्यासता। काव्यादौ प्रथमं प्रयोगे दुःखं फलं "सुखमक्षरधरां क्लेशदुःखं पदगः" इ०र०टी०उक्तेः।

म पु० मा-क। १शिवे २चन्द्रे ३चतुर्थके ब्रह्मणि एकाक्ष० ४यमे ५समये ६विष्णौ ७विष्णौ च मेदि०। छन्दःशास्त्रोक्ते दत्तिगुरुके गणे "मो भूमिस्थिगुरुः श्रियं दिशति वः" इ०र०टी०। तस्य देवता भूमिः काव्यादौ प्रथमप्रयोगे श्रीलाभः फलम्। [द्विट मगके।

मक भूषणे गतौ च भ्वा०आ०सक०सेट् दरिद्। मक्कते अमक्त। मक पुंन० म इव कायति के-क अर्शआदि। शिवादिस्थे।

मकर पुंक्लो० मं विषं किरति कृ-अच्। १जलजन्तुभेदे अमरः स्त्रियां जातित्वात् ङीष्। स च मङ्गावाहनं कामस्य ध्वजश्च। मकराकरत्वात् २मेषादितो दशमे राशौ। तद्राशिस्थ उत्तराषाढाग्रेषपादयुतसहितं भवं धनिष्ठार्द्धञ्चेति नक्षत्रादालक्षः। तद्राशिस्थरूपादिकं नी० ता० उक्तं यथा "शुक्लवरः शुक्लार्द्धरवो यमाशा स्त्री पिङ्गलक्षः शुभभूमिधीतः। खल्पप्रजाशक्तसमीरशीलिरादौ चतुष्पात् विषमोदयो विट्। मकि-मन् पृषो० मकं भूषणं राति ददाति रा-क। ३निधिभेदे निधिशब्दे ४६८ पृ० दृश्यम्। [कारे कर्मभूषणे।

मकरकुण्डल पु०मकराकृति कुण्डलं कर्मभूषणम्। मकरा०

मकरकेतन पु० मकरः मकरचिह्नितं केतनं ध्वजो यस्य। कन्दर्पे हेमच० मकरकेत्वादयोऽप्यत्र।

मकरध्वज पु० मकरो ध्वजोऽस्य। कामदेवे अमरः।

मकरन्द पु० मकरमपि दाति कामजनकत्वात् दो-अवखण्डने क पृषो०सम्। १पुष्पमधौ अमरः। २कुन्दवृक्षे च ३किञ्जल्के न० राजनि०।

मकरन्दवती स्त्री मकरन्द+अर्शआद्यच् मतुप् मस्य वः ङीष्। १पाटलावाम् शब्दच० २मधुविशिष्टे त्रि०।

मकरन्दिका स्त्री "रसैः षड्भिर्द्वाभ्यां यमनसजला सुरसंमकरन्दिका" इ० र० टीकोक्ते जगण्यिसप्तदशाक्षरपादके छन्दोभेदे। [भेदे भा० भी० ह्रट् अ०।

मकरव्यूह पु० मकर इव व्यूहः। मकराकारे सैन्यनिवेशन-

मकरसंक्रान्ति स्त्री ७त०। मकरे राशौ रवेः १संक्रमणे २तदुपलक्षितपुण्यकालोपलक्षिते च दिने।

मकराकर पु० ६त०। समुद्रे हेमच०। [करङ्गभेदे शब्दच०।

मकराकार पु० मकरस्येवाकारः फले यस्य। (काँटाकरमचा)

मकराक्ष पु० राक्षसभेदे रामा० वङ्का०१७अ०।

मकराङ्क पु०मकरोङ्को यस्य। १कामदेवे २मत्स्यभेदे अजयपालः

मकरालय पु० ६त०। समुद्रे मकरावासादयोऽप्यत्र।

मकरासन न० रहस्यमतोक्ते पूजाङ्गे आसनभेदे "मकरासनमाख्यं वाटूनां चाम्बकारणात् पृष्ठे पादद्वयं बद्ध्वा हस्ताभ्यां पृष्ठबन्धनम्"।

मकरीप्रस्थ पु० मकर्यां उपलक्षितः प्रस्थः। यदा कदाचित् मकरीशब्दे प्रस्थे वानौ कर्म्मा० अस्य नाद्युदात्तता।

मकष्टु पु०ऋषिभेदे तस्यापत्यं युवा० ढक्। माकष्टवेय तदपत्ये पुंस्त्री०।

मकार पु० म+स्वरूपे कार। मकारूपे वर्णे। मकारादिर्वर्ण आद्यक्षरेऽस्यास्य कप्। मद्यमत्स्यमांसमैथुनसङ्केते मकारादिवर्णयुक्ते तन्त्रोक्ते पदार्थपञ्चके। [रूपक०।

मकुट न० मकि-भूषणे उट पृषो०। शिरोभूषणे मुकुटे त्रि०

मकुति स्त्री मकि-उति पृषो०। मूढग्रामणे त्रिका०।

मकुर पु० मकि-उरच् पृषो०। १दर्पणे २बकुलवृक्षे ३कुलालदण्डे ४वल्मिकायाञ्च हेमच०।

मकुल पु० मकि-उलच् पृषो०। १बकुले २बकुलवृक्षे शब्दरत्ना०।

मकुष्टक पु०मकि-भूषायां ड-पृषो०मकुं भूषां लाति प्रतिदानि लक-अच् सुमासा०मत्वम्। वनस्थे (सगानि)राजनि०।

मकुठ पु० मीयते मा-ड कुत्सितं तिष्ठति स्था-क अलुक्स० मत्वम् कर्म०। १व्रीहिभेदे "मकुठो वातलो ग्राही कफपित्तकरो लघुः। वात्मिलन्मधुरः पाके लघिलाग्नरनाशनः" भावप्र०। २वृद्धदारुणि त्रि०। स्वार्थे क। ३वनस्थे

मकूलक पु० मकि-ऊलच् पृषो० संज्ञायां कन्। १दन्तीवृक्षे अमरः। २बकुले रत्नमालाया।

मक्क गतौ भ्वा०आ०सक०सेट्। मक्कते अमक्किष्ट ममक्के।

मक्कल पु० शूकरोगभेदे "प्रजातायाश्च नार्याः कुक्षयशरीरावाक्लीच्छैरविशोधितं रक्तं वायुना तद्देशेनातिसंरुद्धं नाभेरधःपार्श्वयोर्वस्तौ वस्तिशिरसि वा ग्रन्थिं करोति। ततश्च नाभिवस्त्युदरमूत्राणि भवन्ति सूचीभिरिव निस्तुद्यते भिद्यते दीर्यते इव च पक्काशयः। समन्तादाध्मानछर्दिः मूत्रसङ्गश्च भवतीति मक्कलक्षणम्" सुश्रुतः।

मक्कूल न० मक्क-ऊलच्। शिलाजतुनि शब्दर०।

मक्कोल पु० मक्क-वा० ओल। खटिकायां त्रिका०।

मच रोधे संघाते च भ्वा०पर०अक०सेट्। मचति अमचीत्।

मचवीर्य्य पु०मच्यं संहतं वीर्य्यं यस्य। ५ब० पियालवृक्षे राजनि०।

मक्षिका स्त्री मक्ष-सिकन्। कीटभेदे वंभराजीकीटे (मौमाक्षि) अमरः। पृषो० दीर्घः तत्रार्थे राजनि०।

मक्षिकामल न० ६त०। सिक्थके (मोम) राजनि०।

मक्षिकासन न० ६त०। (मौचाक) सिक्थकाधारे राजनि० पाठान्तरम्। [ऋ०८।२६।६

मक्षु न० मक्ष-उन्। १शीघ्रे निघण्टुः २शीघ्रगतियुते त्रि०

मक्ष सर्पणे भ्वा०पर०सक०सेट्। मक्षति अमाक्षीत् अमक्षीत् ममाक्ष मेक्षतुः। [मक्षते।

मक्ष सर्पणे भ्वा०पर०सक०सेट् इदित्। मक्षति अमक्षीत्

मक्ष पु० मक्ष-संज्ञायां घ। यज्ञे अमरः।

मक्षत्राट् पु०मक्षं विश्वामित्रर्षिमक्षं त्रायते त्रै-तृच्। श्रीरामे शब्दर०। [त्रि०।

मक्षद्विष् पु०मक्षाय हविषे द्विष-क्विप्। १राक्षसे २यज्ञद्वेषिणि

मक्षाग्नि पु० ६त०। यज्ञे संस्कृताग्नौ जटा०। मक्षानन्तादयोऽप्यत्र।

मक्षान्न न० मक्षे तत्काले भोज्यमन्नं सद्यस्त्वात् या०त०। (माखना)। १त्वलजाते मूलजे फलभेदे "मक्षान्नं पद्मबीजस्य शुष्कैस्तुल्यं विनिर्दिशेत्" भावप्र०। ६त०। २यज्ञान्ने च।

मक्षासुहृत् पु० ६त०। दक्षयज्ञस्य नाशके महादेवे हेमच०

मग सर्पणे भ्वा०पर०सक०सेट् इदित्। मङ्क्षति अमङ्क्षीत्।

मगध पु० मङ्क्षते क्षयीभवत्यनेन अघि-क पृषो० भगं दोषं पापं वा दधाति धा-क। १देशभेदे २तद्देशस्थे जने ब०व०। स च कीकटेतिसंज्ञः कुरुदेशस्थश्च। कीकटेषु गया पुण्या नदी पुण्या पुनःपुना" इत्युक्तेः गयादीनामेव पुण्यत्वम्। अन्येषामपुण्यत्वं प्रत्युत पापजनकत्वम् "अङ्गवङ्गकलिङ्गान्ध्रान् गत्वा संस्कारमर्हति" मिता० देवलोक्तेः। "तीर्थयात्रा व्यतिरेकेणैतान् गत्वा तत्रैव चिरस्थित्वा गङ्गागमनं प्रायश्चित्तम्। तदशक्तौ पुनरुपनयनं अतिचिरवासे तु पुनरुपनयनं कृत्वा चान्द्रायणं कर्त्तव्यम्" प्रा० वि०। अतस्तस्य पापजनकत्वात् तथात्वम्। ततः भवार्थे तत्रा० अ। मगधीय तत्र भवे त्रि०

मगधा स्त्री मगध उत्पत्तिस्थानत्वेनास्त्यस्या अच्। पिप्पल्यां रत्नमा०। [माले च।

मगधेश्वर पु० ६त०। १जरासन्धतुल्ये हेम०। २तद्देशपतिमात्रे

मगधोद्भवा स्त्री मगधदेशे बाहुल्येनोद्भवति अच्। पिप्पल्याम् राजनि०। तद्देशे तस्याः प्रचुरभवत्वात्तथात्वम्।

मगध्य परिवेष्टने कण्ड्वा० प० सक०सेट्। मगध्यति अमगध्यीत्।

मगन्द पु०मगं पापं ददाति दा क पृषो०सम्प्र च। कुष्ठीदिनि० ६।२२।

मगध पु० छन्दःशास्त्रोक्ते सर्वगुरुके वर्णभेदे।

मगल पु० गोत्रप्रवर्त्तकभेदे प्रवरा०।

मग्न त्रि० मस्ज-क्त। (डोबा) जलादौ ज्ञातमज्जने।

मघ कैतवे चौरक्रीड़ादौ अक० सनौ निन्दायां आरम्भे च सक०भ्वा०आ०सेट् इदित्। मङ्घते अमङ्घिष्ट। [मङ्घ्रते

मघ भूमघे भ्वा०पर०सक०सेट् इदित्। मङ्घति अमङ्घीत्।

मघ पु० मघि-अच् पृषो०। १द्वीपभेदे मेदि०। (मम)नामके २रुद्रैकादशभेदे। ३दशभेदे न० शब्दरत्ना०।

मघवन्(त्) पु० मह-कनिन् त्रि०हस्य घः "मघवा बहुलम्" पा०वा तृच्। १इन्द्रे अमरः २तत्सदृशनामके मेघके च। तद्वति मघवान् ऋतृवि मघवा। एवं मघवानौ मघवन्तावित्यादिरूपत्रयम्। भवे अञ्यलुक्सम०। मघोनः इञन्तस्य न मघवतः इत्यादि ङीपि मघोनी मघवतीत्यादि तद्धिते न सम०। माघवनम् इत्यादि भाष्ये तु मघशब्दात् अतृप्रत्ययं साधयित्वा शब्दान्तरमित्युक्त्वा न तृलित्युक्तम्।

मघा स्त्री मह-घ हस्य घत्वम्। अश्विन्यादिके दशमे नक्षत्रे तस्याश्च पञ्चतारात्मकत्वात् बहुत्वमपि "पितरः कृत्तिकाभरण्यश्चाष्टासु मघासु च" श्रुतिः। "मघां मूलञ्च वर्जयेदिति "मघायां विष्कुम्भनाड्येति" श्रुतिस्तु बहुदायत्वेकत्वाभिप्रायेण। अस्या योगतारादिकन्तु भाशब्दे ४८७ पृ० उक्तम्। २औषधभेदे धरणिः।

मघात्रयोदशी स्त्री मघानक्षत्रेण युक्ता त्रयोदशी या०त०। भाद्रकृष्णत्रयोदश्यां तत्रैव मघानक्षत्रसंयोगसम्भवात्। तत्र श्राद्धमावश्यकं यथोक्तं ति० त०

"प्रौष्ठपद्यूर्ध्वं कृष्णत्रयोदश्यां मघायुक्तायामनिच्छन् यत्किञ्चिदुदहेत्येष श्राद्धमावश्यकं मघाद्यविधिवाक्ये नक्षत्रविशिष्टतिथेः श्रुतेः। ततश्च केवलत्रयोदशीकेवलमघाश्राद्धार्थवादा अपि क्षुण्णविशिष्टविधिप्राप्तभंगो नित्यत्वबोधकाः न तु केवलविध्यन्तरकल्पना गौरवात्। तथाच मनुः "प्रौष्ठपद्यामतीतायां मघायुक्तां त्रयोदशीम्। श्राद्धं श्राद्धं हि कर्त्तव्यं मधुना पायसेन च" मनुः "यत्किञ्चित् मधुना मिश्रं प्रदद्यात्तु त्रयोदशीम्। तदप्यक्षयमेव स्यात् वर्षासु च मघासु च"। विष्णुधर्मोत्तरम् "प्रौष्ठपद्यामतीतायां तथा कृष्णा त्रयोदशी। एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः"। याता-

तपः "पितरः सूर्यवन्यत्रमष्टकासु मघासु च। तथा-द्यात् सदोदृयुक्ता विदत्तश्च ब्राह्मणेषु च"। अत्राद्य-मात्रश्रुतेः मनुवचने यत्किञ्चिदिति श्रुतेश्च यद्धोक्त-पावधः फलातिशयार्थः। "गुणविशेषे फलविशेषः स्यात्" इति न्यायात्। व्यक्तं विष्णुधर्मोत्तरे "मघायुक्ता च तत्रापि श्रद्धा राजंस्तयोदयी। तत्राक्षयं भवेच्छ्राद्धं मधुना पायसेन च"। तत्राक्षयकल्पत्वे। अत्र यत् श्राद्धं तन्मधुयोगेन पायसयोगेन वाऽक्षयं भवेत्। एवं मनुवचने यत्किञ्चिन्मधुना मिश्रम् इत्यनेन मधुमात्र-युक्तत्वसिद्धम्। अतोऽत्र सुतरां सूदश्राद्धाधिकारः। अत्र गजच्छायायोगे फलातिशयः। तथाच ब्रह्मवैवर्ते मघौ स्मृतिः "कृष्णपक्षे त्रयोदश्यां मघाखिन्दुः करे रविः। यदा तदा गजच्छाया श्राद्धे पुण्यैरवाप्यते। करे हस्तानक्षत्रे कन्यादशमांशोपरि चपादत्रयोविंशांश यावत्। अविभक्तानामप्यत्र पृथक् श्राद्धमावश्यकम्"। यथा श्राद्धचिन्तामणौ स्मृतिः "विभक्ता अविभक्ता वा कुर्युः श्राद्धमदैविकम्। मघासु च तथान्यत्र नाधि-कारः पृथग्विना"। अदैविकं प्रत्यब्दिकैकोद्दिष्टम् अन्यत्र कृष्णपक्षादौ नाधिकारः न नित्याधिकारः। "स-पिण्डीकरणात्तानि यानि श्राद्धानि षोड़श। पृथक् नैव सुताः कुर्युः पृथग्द्रव्या अपि क्वचित्" इत्यत्रापिना सपिण्डीकरणात्तानामपृथग्द्रव्याणां पुंसां सपिण्डीकरणात्ता-नीति विशेषणात् तदुत्तरं श्राद्धानां पृथक्करणमपि प्रतीयते। मघात्रयोदशीनिमित्तकश्राद्धे पुत्रवत्ता पिण्डा न देयाः। "भौमश्रीं तिथिमासाद्य यावच्चन्द्रार्कसङ्ग-मम्। तत्रापि सप्तमी पूजा कर्त्तव्या पितृदैवते। करे पिण्डप्रदानन्तु त्रयोदश्यां विवर्जयेत्" इति देवीपुराणात् भौमश्रीं पञ्चमीं चन्द्रार्कसङ्गमम् अमावास्यां पितृदैवते श्राद्धे मघायाम्। मातामहः "पिण्डनिर्वापरहितं यत्तु श्राद्धं विधीयते। क्षयाय जायते तस्य दातुश्चैव न संशयः। अक्षय्यदक्षिणा स्वर्गे सौमनस्यं तथाश्नुते" रघु०।

मघाभू पु० मघायां भवति भू-क्विप्। पूर्वफल्गुनी-जाते शुक्लपक्षे त्रिका०। भगदैवतशब्दे ४६११पृ० दृश्यम्

मघी पु० मघानक्षत्रसप्तपत्तिकालत्वेनास्त्यस्य अच् गौरा० ङीष्। मघानक्षत्रस्थरविभुज्यमानयुक्ते काले गौर-भाद्रमासे जायमाने (आउस) धान्यभेदे मेदि०।

मङ्कलक पु० १ऋषिभेदे भा० व० ८२अ०। २यक्षभेदे तत्रैव।

मङ्कि पु० मकि-इन्। धनेच्छुपक्षिभेदे भा०शा० १७७अ०।

मङ्कु पु० मकि-उन्। सङ्कुचद्गतिके शत०ब्रा० ६।५।३।११।

मङ्कुर पु० मकि-उरच्। दर्पणे भरतः।

मङ्कण मङ्क-ल्युट्। जङ्घालाघवे हारा०।

मङ्कु(ङ्कू) अव्य० मकि-उन्। शैघ्र्ये २सुखार्थे च। पृषो० खस्य चत्वमपि।

मङ्क पु० मगि-बाहु०। नौकाग्निरपि हेम०।

मङ्गल पु० मगि-अलच्। १भूमिसुते पञ्चभेदे २प्रशस्ते ३अभीष्टार्थविधौ च। ४तद्युक्ते त्रि० अमरः। स्त्रियां ङीप् "सुमङ्गलीरियं वधूः"सि०कौ०। ५दुर्गायां ६हरि-द्रायां ७दूर्वायां ८पतिव्रतायाञ्च स्त्री शब्दरत्ना० ९क-रञ्जभेदे स्त्री शब्दच०। १०तालपर्णीवृक्षभेदे स्त्री हेम० ११योगिनीदशमभेदे "मङ्गला पिङ्गलेति"दशाशब्दे दृश्यम्। अभिप्रेतसिद्धिर्मङ्गलं तद्धेतुत्वात् गोरोचनादेरपि तथा-त्वम्। मङ्गलद्रव्याणि च मत्स्यसूक्ते ४२अ०उक्तानि यथा "लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः। हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः। एतानि सततं पश्येन्नमस्येदर्चयेत्ततः। प्रदक्षिणन्तु कुर्वीत तथा-चायुर्न क्षीयते। दूर्वां दधिं सर्पिरथोदकुम्भं धेनुं सवत्-सां हरितं सुवर्णम्। मङ्गलमयं स्वस्तिवचनानि वाजा मधु ब्राह्मणकन्यकाश्च। श्वेतानि पुष्पाणि तथा यवीश्च हुताशनं चन्दनमर्कबिम्बम्। अश्वत्थवल्लञ्च समाक्षमेत ततश्च कुर्यादुदिजजातिधर्मम्" दधिमित्यार्षम्। १२विष्णौ न०"पवित्रं मङ्गलं परम्"विष्णुस०। कुजशब्दे २०६६पृ० मङ्गलपञ्चकवादि दृश्यम्। "प्रशस्तचरणं नित्यमप्रशस्त-विवर्जनम्। एतच्च मङ्गलं प्रोक्तमृषिभिर्मन्त्रदर्शिभिः" अत्रि० उक्ते १३प्रशस्ताचरणे निन्द्यवर्जने।

मङ्गलचण्डी स्त्री मङ्गले चण्डी दक्षा। १देवीभेदे स्त्रियां ङीष्। मङ्गलचण्डिकायास्तन्त्रमनिरुक्तिः ब्रह्मवै० प्र० ४१ अ० उक्ता यथा "दक्षायां वर्त्तते चण्डी कल्याणेषु च मङ्ग-लम्। मङ्गलेषु च या दक्षा सा च मङ्गलचण्डिका। पूज्यायां वर्त्तते चण्डी मङ्गलेऽपि महीयसि। मङ्गला-भीष्टदेवी या सा वा मङ्गलचण्डिका। मङ्गलो मधु-वंशश्च समद्वीपधरापतिः। तस्य पूज्याभीष्टदेवी तेन मङ्गलचण्डिका"। [राजनि०]

मङ्गलच्छाय पु० मङ्गला प्रशस्ता छाया यस्य। वटवृक्षे

मङ्गलपाठक पु० मङ्गलार्थं स्तुतीः पठति पठ-ण्वुल्। स्तुतिपाठके हेमच०। "या इयामङ्गलपाठक!"वेणी०।

मङ्गलागुरु न० नित्यस०। अगुरुभेदे राजनि०।

मञ्जुल न॰ मञ्जुवाय हितं यत्। १चन्दने २मञ्जुलागुरुणि ३खर्जे ४सिन्दूरे राजनि॰ ५दन्ति च। ६रुचिरे त्रि॰ हेम॰ ७मञ्जुलकरे त्रि॰ मेदि॰। "सर्वमञ्जुलमञ्जुले" इति देवीमा॰। ८वञ्चुले ९विल्वे १०जोरके ११मञ्जरके च पु॰ मेदि॰ १२नारिकेले १३कपित्थे १४रीठाकरञ्जे च पु॰ राजनि॰। १५आयमाणौषधौ पु॰ धरणिः।

मञ्जुलक पु॰ मञ्जुलपत्रस्य प्रियः तद्दोषनिवारणार्थं दीयमानत्वेन शास्त्रविधानात्। मञ्जुरे अमरः। [भावप्र॰।

मञ्जुलकुसुमा स्त्री मञ्जुलं कुसुमं यस्याः। मतपुष्पायाम्

मञ्जुलनामधेया स्त्री द्व॰। जीवन्त्यामोषधौ जटा॰।

मञ्जुला स्त्री मञ्जुलाय हिता यत्। १मल्लिकागन्धवृक्षागुरुणि अमरः २रोचनायाम् ३वचाकुष्ठ्याम् ४शम्यां ५शुक्लवचायां मेदि॰ ६प्रियङ्गौ ७आम्रपर्ण्यां हेमच॰ ८श्वेतपुष्प्याम् ९जीवन्त्याम् १०अङ्घ्रिनामौषधौ ११हरिद्रायां १२दूर्वायां राजनि॰ १३इङ्गौयाञ्च स्त्री रत्नमा॰।

"मञ्जुलाऽगुरुणिगिरा गन्धाढ्या दीर्घवाङ्घ्रिका" राजनि॰

मञ्जिनी स्त्री मञ्जौ नौकाशिरः अस्त्यस्या इति ङीप्। नौकायां हेमच॰। [पक्षे पुंस्त्वी

मञ्जुष पु॰ नदभेदे तस्यापत्यं कर्षा॰ अञ्। माञ्जुष तद्-

मञ्च दम्भे भाषे च अक॰भ्वा॰आ॰सेट्। मञ्चते अमञ्चिष्ट मेचे।

मञ्च उच्चताकरणे धारणे पूजायां च सक॰ दीप्तौ अक॰भ्वा॰ आत्म॰ सेट् इदित्। मञ्चते अमञ्चिष्ट। मञ्चति।

मञ्चक्रुक न॰ कुरुक्षेत्रान्तर्गते तीर्थभेदे। कुरुक्षेत्रशब्दे दृश्यम्

मञ्चर्चिका स्त्री चर्च-धात्वर्थनिर्देशे ण्वुल् मञ्च इवोरिव चर्चिका ध्यानम्। प्रशस्ते अमरः अच्युतपञ्चोऽयमित्यादौ "मतल्लिकादयो नियतलिङ्गा न तु विशिष्यप्रतिपन्नाः" त्रि॰ कौ॰ "प्रशंसावचनैश्च" पा॰ अस्य विशेषणत्वेऽपि परनिपातः गोमच्चर्चिका गोतमल्लिका इत्यादि।

मञ्छ पुंस्त्री॰ माद्यति मद-क्विप् तथा सन् शेते शी-ड। मत्स्ये शब्दर॰। स्त्रियां जातित्वात् ङीष्।

मञ्जिर पु॰ अस्थिभेदे तस्यापत्यं शिवा॰ अण्। माञ्जिर तत्पत्ये पुंस्त्री॰।

मञ्जकृत् न॰ मज्जानं करोति कृ-क्विप्। १देहस्थे अस्थिरूपे पदार्थे हेमच॰ अन्नादिषु भुक्तेषु रसादिपरिपाकेन क्रमेणशोणितमांसत्वमस्थिशुक्राद्यात्मतत्पत्तेः अस्थ्नः मज्जाकृत्त्वम्।

मञ्जन् पु॰ मस्ज-कनिन्। १अस्थिजाते अस्थिमध्यस्थे स्नेहाकारे पदार्थे २वृक्षादेः सारांशे च अमरः। फलमज्जा-दयः "यस्य यस्य फलस्येव बीजं" भवति यादृशम्। तस्य तस्यैव बीजेषु मज्जानमपि निर्दिशेत्" राजवल्लभः "अस्थि यत्स्थास्नि पक्वं तस्य सारो द्रवो घनः। यः स्नेहवत् पृथग्भूतः स मज्जेत्यभिधीयते"। मज्जस्थानमाह "स्नूचादिषु विशेषेण मज्जा तस्यन्तरे स्थितः" भावप्र॰।

मज्जन न॰ मस्ज-भावे ल्युट्। १स्नाने (डोबा) जटाध॰। कर्तरि ल्यु। २मज्जायां शब्दर॰। अस्थिमध्यमज्जनात्तस्यात्तथात्वम्। ३कुमारानुचरगणभेदे भा॰श॰४६अ॰।

मज्जसमुद्भव न॰ मज्जः सप्तधातवः सम्+उद्+भू-अच् ६त॰। शुक्ले तस्य मज्जजातत्वम् मज्जशब्दे द्रष्टव्यम्।

मज्जा स्त्री मस्ज-अच् टाप्। १अस्थिसारे २वृक्षादेः सारांशे च हेम॰। "मज्जातश्च मूलकशिप्रुबिल्वैः प्रियालमज्जा-सहितैः" सुश्रुतः। [राजनि॰ २शुक्रधातौ न॰

मज्जान न॰ मज्जातो जायते जन-ड। १भूमिजे गुग्गुलौ

मज्जारस मज्जायाः रसः परिपाकः। शुक्रे राजनि॰। तस्य मज्जासम्भवत्वं मज्जशब्दे उक्तम्।

मज्जासार न॰ मज्जायां सारोऽस्य। जातीफले राजनि॰।

मज्जूषा स्त्री मस्ज-ऊषन्। मञ्जूषायां रायमुकुटः।

मज्मन् न॰ मस्ज-मनिन् पृषो॰। बले निघण्टुः।

मञ्च पु॰ मचि-उच्छाये घञ्। १खट्वायाम् अमरः (मांचा) यंत्रनिर्मिते २उच्चासने ३उच्चमण्डपभेदे हारा॰ "मञ्चस्थं रघुनन्दनम्" पुराणम्। स्वार्थे क। तत्रैव "इङ्गोऽन्यः पतिरेष मञ्चकगतः" इति सा॰ २५॰।

मञ्चकाश्रय पु॰ द्व॰। मत्कुणे (आरपोका) राजनि॰।

मञ्चमण्डप पु॰ मञ्च इव मण्डपः। मञ्चरचायां उच्चे प्रासादिकुटीरे (टङ) हारा॰। [शब्दरत्ना॰।

मञ्जर न॰ मनृज-अरच्। १तिलकवृक्षे २सुश्रुतोक्ते २वस्त्रोक्ते

मञ्जरि(री) स्त्री मञ्जु अञ्चति कृ-इन् अक॰ परूपं वा ङीप्। अभिनवोद्गतायां सुकुमारायां पल्लवाङ्कुरूपायां १मञ्जर्याम् अमरः ङीबन्तस्तु तत्र २सुश्रुतोक्तायां शतिवकृतायां शब्दरत्ना॰। ३तुलस्याम् राजनि॰ ततः तारका॰ इतच्। मञ्जरित जातमञ्जरीके त्रि॰। ङीबन्तः "कलशा यवोगिति शरमञ्जैर्मञ्जरी" इ॰ र॰ टी॰ उक्ते चतुर्दशाक्षरपादके छन्दोभेदे। [राज॰।

मञ्जरीनस पु॰ मञ्जर्यां तदवस्थायामपि नसः। वेतसे।

मञ्जा स्त्री मज्जि-अच्। १छाम्यां त्रिका॰ २मञ्जर्यां हेमच॰।

मञ्जि(ञ्जी) स्त्री मनृज-इन् वा ङीप्। मञ्जर्याम् त्रिका॰।

मञ्जिका स्त्री मञ्ज-ण्वुल् टाप् अत इत्वम्। वेश्यायां हारा०।

मञ्जिफला स्त्री मञ्जिः मञ्जरी फले यस्याः। कदल्याम् त्रिका०

मञ्जिष्ठा स्त्री अतिशयेन मञ्जीभवती इष्ठन् मतुपो लोपः। खनामख्यातायां लतायाम् अमरः। "मञ्जिष्ठा मधुरा तिक्ता कषाया वर्णवर्णकृत्। गुरूष्णा विषव्रणश्लेष्मपित्तदोषविषापहा। रक्तातीसारकुष्ठास्रविसर्पव्रणमेहजित्" भावप्र०। मञ्जिष्ठया रक्तम् अण्। माञ्जिष्ठ तत्कार्येण रक्ते त्रि०।

मञ्जिष्ठामेह पु० सुश्रुतोक्ते मेहभेदे तल्लक्षणं तत्रोक्तं यथा मेहतीत्यनुषङ्गे "मञ्जिष्ठोदकप्रकाशं मञ्जिष्ठामेही"।

मञ्जिष्ठाराग पु० मञ्जिष्ठेव रागः। "मञ्जिष्ठारागमाक्षौद्रं यस्यापैत्यतिशोभते" सा०द० उक्ते पूर्वोत्तरागभेदे।

मञ्जीर न० मञ्ज-ध्वनौ ईरन्। नूपुरे अमरः। "मञ्जुमञ्जिमञ्जीरे कलगम्भीरे" इति सा०१०प०। २दधिमन्थनदण्डबन्धस्तम्भे पु० हेमच०।

मञ्जीरक पु० मञ्जीर इव कायति शब्दायते कै-क। नूपुरध्वनितुल्यध्वनियुते ततः स्त्रियां ङीष् अपत्ये अण्। माञ्जीर तदपत्ये पुंस्त्री०। [मञ्जुञ्च तनोति त्रि०।

मञ्जु त्रि० मञ्ज-उनु। मनोहरे अमरः। सिध्मा०लच्।

मञ्जुकेशिन् पु० कर्म० प्राप्तस्ये इनि। १श्रीकृष्णे हेमा० २सुन्दरकेशयुते त्रि० स्त्रियां ङीष्। [त्रि०।

मञ्जुगमना स्त्री ६त०। १हंसां राजनि० २सुन्दरगतियुते

मञ्जुघोष पु०। तन्त्रोक्ते १उपासदेवभेदे तन्त्रसारे द्रव्यम्। २पूर्वजिनभेदे त्रिका०। कर्म०। ३मनोहरशब्दे पु०।

मञ्जुपाठक पुंस्त्री० मञ्जु पठति पठ-ण्वुल्। १शुकपक्षिणि राजनि० स्त्रियां जातित्वात् ङीष्। २मनोहरपाठके त्रि०

मञ्जुप्राण पु० ६त०। चतसृषु ब्रह्मणि जटा० सर्वव्यापित्वेन विधाहप्राणस्य मङ्गलप्राणत्वात् तस्य तथात्वम्।

मञ्जुभद्र पु० जिनभेदे त्रिका०।

मञ्जुभाषिन् त्रि० मञ्जु भाषते भाष-णिनि। १सुन्दरभाषके स्त्रियां ङीष् वा च "सञ्जयाजनौ भवति मञ्जुभाषिणौ" ह०र० उक्ते २त्रयोदशाक्षरपादके छन्दोभेदे।

मञ्जुल त्रि० मनुज-सिध्मा० लच् मञ्जि-उलच् वा। १मनोहरे २निकुञ्जे मेदि० ३जलरङ्गधूमे पुंस्त्री० मेदि० स्त्रियां ङीष्। [३सुन्दरस्त्रीके त्रि०।

मञ्जुश्री पु० ६त०। १मञ्जुघोषे २पूर्वजिनभेदे त्रिका०।

मञ्जुहासिनी स्त्री "जनौ सजौ गो भवति मञ्जुहासिनी" ह०र०टी०उक्ते १त्रयोदशाक्षरपादके २छन्दोभेदे। ३सुन्दरहासयुते त्रि०।

मञ्जूषा स्त्री मनुज अपन् (पेटरा) १पेटिकायाम् अमरः। २मञ्जिष्ठायाञ्च राजनि० ३पाषाणे उणा० को०।

मट धारे भ्वा०प०सक०सेट्। मटति अमटीत् अमाटीत् मेटतुः

मटची स्त्री मट-वा०अचि ङीप्। १पाषाणखण्डौ "मटचीकृतेषु कुरुषु" छन्दोग्यश्रुतिः। २रक्तवर्णक्षुद्रक्षुपभेदे गोविन्दः।

मटस्फटि पु० दर्पारम्भे जटा०। [अमाटीत् मेटतुः।

मठ वासे अक०मर्दने सक० भ्वा० पर० सेट्। मठति अमठीत्-

मठ आध्याने चा०सक०सेट् इदित्। मण्ठते अमण्ठिष्ट।

मठ पुंन० अर्द्धा० मठत्व मठ-अर्शआद्यच्। १ज्ञात्राद्यावासे २देवागारे अमरः। मठप्रतिष्ठातत्त्वे तत्प्रतिष्ठाविधिर्दृश्यः। देवमठशब्दे चात्र दृश्यम्। ३गम्भीरघोषे हारा०।

मठर पु० मठ-अरन्। १मुनिभेदे २यौक्षके त्रि० वज्रज्वल०। राजद्वारनिवासिनः राजमठरः। गर्गा० यञ्। माठर्य तत्कुलेरपत्ये पुंस्त्री०स्त्रियां ङीप् यकोपः। यौक्षार्थे वस्त्रापत्ये विदा० अञ्। माठर तदपत्ये पुंस्त्री०।

मड मोदे चु०उभ०सक०सेट् इदित्। मण्डयति-ते अममण्डत् त। विभूषणे भ्वा० आत्म०। मण्डते।

मड भूषणे चुरा०उभ०पक्षे भ्वा०पर०सक०सेट् इदित्। मण्डयति ते मण्डति अममण्डत्-त अमण्डीत्। [जटा०।

मडक पु० मडि-कन् पृषो० नलोपः। धान्यभेदे (मेडुया)

मडर पु० मडि-वा० अरन् पृषो० नलोपः। शिल्पिभेदे कन्यायन्ते परे अस्यादुदात्तता।

मडार पु० मडि-वा० आरन् पृषो०। भूषके ततः चतुरर्थ्यां प्रगद्या०अञ्। माडार्य तेन निर्वृत्तादौ त्रि०।

मण्ड पु० मण्यन्ति अन्ये अन्दा अत्र मण्ड+उन् पृषो०। पादभेदे अमरः स्वार्थे क मण्डूक तत्रार्थे। मण्डूकस्यादनं शिल्पमस्य वा ठक् पक्षे अण्। माण्डूकिक माण्डूक तदादनशिल्पयुते त्रि०। [अण्डीत् मेण्डतः।

मण अव्यक्तशब्दे भ्वा०प०सक०सेट्। मण्यति अमाण्डीत् अ-

मणि(णी) पुंस्त्री० मण-इन् स्त्रीत्वपक्षे वा ङीप्। सज्ञादौ रत्ने "मणिरत्नं सरं शीतं कषायं स्वादु लेखनम्। चक्षुष्यं धारणात्तच्च पापालक्ष्मीविनाशनम्" राजवल्लभः। "मणिहारावलिरामणीयकमिति" "रूपनीलमणीस्टङ्गतिवेति च" नैषधम्। २सूत्रसंयमपात्रभेदे अलिङ्गारे (जाला) ३लिङ्गाग्रे ४नागभेदे जटा०५मणिबन्धे हेमच० स्वार्थे क संज्ञायां कन् वा। मणिक अलिङ्गारे न०अमरः।

खड्गलक्षणे मेदि० योन्यर्थे शब्दर० [इत्रम्।

मणिकर्ण पु० १कामरूपस्थे २शिवलिङ्गभेदे मणिकूटशब्दे

मणिकर्णिका स्त्री मणिकर्ण० मणिमयकर्णभूषणमस्त्यस्यां ठन्। विष्णुपद्मादर्शनात् विष्णवेन शिवस्य मणिमयकुण्डलपतनस्थाने काशीस्थे १तीर्थभेदे।

तत्माहात्म्यनिरुक्तिः काशी० २६अ० यथा

विष्णुं प्रति शिववाक्यम् "त्वदीयस्यास्य तपसो महोच्चदर्शनात्। यन्मयान्दोलितो मौलिरङ्गभवभूषणः। तदान्दोलनतः कर्णात् पपात मणिकर्णिका। मणिभिः खचिता रम्या ततोऽसु मणिकर्णिका। चक्रपुष्करिणीतीर्थं पुराख्यातमिदं शुभम्। त्वया चक्रेण खननाच्चक्रपुष्करदाधर!। मम कर्णात् पपातेयं यदा च मणिकर्णिका। तदा प्रभृति लोकेऽत्र ख्यातास्तु मणिकर्णिका" मणिकर्णीत्यपि। २मणिमयकर्णभूषणे च।

मणिकर्णीश्वर न० काशीस्थे शिवलिङ्गभेदे काशीख० १००अ०

मणिकर्णेश्वर न० कामरूपस्थे शिवलिङ्गभेदे कालिपु० ८१अ०

मणिकानन न० मणिखचितमाननं यत्र। कण्ठे शब्दर०।

मणिकार पु० मणिमयं भूषणं करोति कृ-अण्। (जड़रि) १मणिमयभूषणकारके २प्रत्यक्षादिवत् खण्डात्मकतत्त्वचिन्तामणिनामकपन्थकारे गङ्गेशोपाध्याये च। कृ-किप् ६त०। मणिकृदादयोऽप्यत्र।

मणिकुट्टिका स्त्री कुमारानुचरमातृभेदे भा०श०४७अ०।

मणिकूट पु०मणिमयः कूटोऽस्य। कामरूपस्थे पर्वतभेदे यथोक्तम् "भद्रकूटस्य चैवान्यो मणिकूटो महागिरिः। मणिकर्णो नाम हरस्तत्र तिष्ठति सिद्धकः" कालिकापु० ८१अ०।

मणिकेतु पु० केतभेदे ह० स० ११अ० केतशब्दे दृश्यम्।

मणिगणनिकर पु० "वसुहययतिरिह मणिगणनिकरः" ह०र० उक्ते पञ्चदशाक्षरपादके छन्दोभेदे द्विगुणद्वयचतुरित्यस्यानुवृत्तिः।

मणिग्रीव पु० कुबेरपुत्रभेदे शब्दर०।

मणिच्छिद्रा स्त्री मणिरिव छिद्रमस्याम्। १मेदानामौषधौ २अम्बमानामौषधौ च मेदि०। [११अ०।

मणिजला स्त्री मणिप्रचुरं जलमस्याम्। नदीभेदे भा० ६०

मणित न० मण-क्त। रतिकाले स्त्रीणामव्यक्तशब्दभेदे हेम०

मणितारक पुंस्त्री० मणिरिव तारकाऽस्य। तारकाख्ये राजनि० स्त्रियां जातित्वात् ङीष्।

मणिद्वीप पु० मणिमयः मणिप्रचुरो वा द्वीपः। क्षीरसमुद्रमध्यस्थे श्रीविद्यापीठरूपे द्वीपभेदे "सुधाब्धेर्मध्ये सुरचितविचित्रोपवनवान् मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे" आनन्दल०।

मणिनाग पु० नागभेदे भा० आ० ३५ अ०। [३५८अ०।

मणिपर्वत पु० मणिप्रचुरः पर्वतः श०त०। पर्वतभेदे हरिवं०

मणिपालि त्रि० मणिं पालयति पालि-इनि। मणिपालके तस्य धर्म्यं महिष्या०अण्। मणिपाल तस्य धर्म्यं त्रि०। तस्यापत्यम् रेवत्या०ठक्। माणिपालिक तदपत्ये पुंस्त्री०

मणिपुच्छी स्त्री मणिरिव पुच्छं यस्याः निञ् ङीष्। मणिवत्पुच्छयुतायां स्त्रियाम्।

मणिपुष्पक पु० यक्षदेवस्य शङ्खे गीता ३।१६।

मणिपुर न० पौरस्त्ये देशभेदे।

मणिपूर न० षट्सु मूलाधारान्तर्गते षट्चक्रमध्ये नाभिस्थे पद्मभेदे "तद्धः नाभिदेशे तु मणिपूरं महाप्रभम्। मेघाभं विद्युदाभञ्च बहुतेजोमयं ततः। मणिवद्विलसत् तत्पद्मं मणिपूरं तदोच्यते। दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम्। शिवेनाधिष्ठितं पद्मं विश्वलोकनकारणम्"

मणिबन्ध पु० मणिर्बध्यतेऽत्र बन्ध-आधारे घञ्। प्रकोष्ठपाणिसन्धिस्थे १करपर्व्वो तस्य शुभाशुभलक्षणं गरु० ६६अ० उक्तं यथा "मणिबन्धैर्निगूढैश्च सुश्लिष्टशुभसन्धिभिः। सुपर्वा हीनैः करश्छेदसमदैर्घ्यैर्नवर्जिताः" २वैद्यवल्लभप्रसिद्धे प्रकोष्ठसन्धौ च। [राजनि०।

मणिबी(वी)ज पु० मणिरिव बी(वी)जमस्य। दाड़िमवृक्षे

मणिभद्र पु० यक्षभेदे भा० स० १०अ०।

मणिभूमि स्त्री ६त०। मणीनामाकरे।

मणिमञ्जरी स्त्री "इनाद्यैः स्यात् यमनयजजगाः कीर्त्तिता मणिमञ्जरी" ह० र० टीकोक्ते जनदेवलक्षणपादके छन्दोभेदे।

मणिमण्डप पु० मणिमयः मणिप्रचुरो वा मण्डपः। १मणिखचिते मण्डपे २देवतापीठस्थानभेदे तन्त्रसारः।

मणिमत् त्रि० मणिरस्यास्ति मतुप्। १मणियुते त्रि० स्त्रियां ङीप्। २यक्षभेदे पु० भा० अ० १अ०। ३त्रासुरस्यजाते द्वापरयुगीये ऋषभेदे पु० भा० अ० ६७अ०। ४नागभेदे भा० स० ८अ०। ५राक्षसभेदे भा०व०१६०अ०। ६दैत्यभेदे हरिवं०२अ०। ७पश्चिमस्थे देशभेदे ह०स०२अ०।

मणिमध्य न० "स्वान्मणिमध्यं चेद्भमसाः" छन्दोम० उक्ते नवाक्षरपादके छन्दोभेदे। [अन्ये अमरः।

मणिमत्य न०मणिरिव मत्यते मत्य-कर्मणि यक्। मैन्धव-

मणिमाला स्त्री ६त०। "त्रौ त्रौ मणिमाला छिन्ना गुरु-

वर्त्तै॰ छन्दो॰ उक्ते द्वादशाक्षरपादके छन्दोभेदे। २हारे शतलक्षतमे भेदि॰। ४मक्षिप्रां यन्दर॰। ५दीप्तौ यन्दमा॰

मणिराग न॰ मणेरिव रागो वर्णोऽस्य। १हिङ्गुले रांजनि॰ हृत॰। २मणिवर्णे पु॰।

मणिल त्रि॰ मणि+सिध्मा॰ अस्त्यर्थे लच्। मणियुते।

मणिव पु॰ मणि-अस्त्यर्थे व। नागभेदे त्रि॰कौ॰।

मणिवाल पु॰ मणिरिव मुद्गत्वात् वालः केशोऽस्य। अश्वि-दैवत्ये पशुभेदे यजु॰ २२।३।

मणिवाहन पु॰ रूपभेदे भा॰ व॰ ६२अ॰।

मणिशैल पु॰ मन्दराचलस्य पूर्वस्थे पर्वतभेदे मार्कपु॰ ५५।

मणिसर पु॰ मणीन् सरति कारयत्वेन गच्छति सृ-अच् हृत॰। मणिखचिते हारभेदे।

मणिस्कन्ध पु॰ नागभेदे भा॰ आ॰ ५७अ॰।

मणीचक न॰ मणेः इं शोभां चकते प्रतिफलति चक-अच् हृत॰। १चन्द्रकान्तमणौ त्रिका॰। २मनश्शरङ्खण्डे पुंस्त्री॰ हारा॰ स्त्रियां ङीष्।

मणीवक न॰ मणीव कायति के-क। पुष्पे हारा॰।

मणीवती स्त्री मणि+अस्त्यर्थे मतुप् नि॰ मस्य वः मरा॰ दीर्घः। मणियुक्तनदीभेदे। [त्र्याम् राजनि॰।

मण्टपी स्त्री मण्टं पाति पा-क गौरा॰ ङीप्। चुड्डोपदे

मण्टि पु॰ गोत्रप्रवरर्षिभेदे प्रवराध्यायः।

मण्ड(ठ) पु॰मठ-अच् पृषो॰वा। (माठ) लताभेदे राजनि॰।

"समितां मर्दवेदाब्धैर्जलेनापि च सप्तभेत्। अस्मात् वटकं कृत्वा पचेत् सर्पिषि नीरसम्। एवमेवङ्कर्पूर-मरिचाद्यैरलङ्कृते। मज्जयित्वा घृतपाके ततस्तच्च मण्डरेत्। अयं प्रकारः संसिद्धो मण्ड इत्यभिधीयते"। अस्य गुणाः "मण्डस्तु दीप्तदा दृप्तो बल्यः सुमधुरो गुरुः। पित्तानिलहरो रुच्यो दीप्ताग्नीनां सुपूजितः" भावप्र॰मठ इति पठितम् लताशब्दे २१८१ पृ॰ दृश्यम्

मण्ड पुंन॰ मन-ड तस्य नेत्त्वम्। १सर्वान्नानामग्रसरे (माड) २सारे ३पिण्डे च। ४श्यामलतायां ५सुरायाञ्च स्त्री। ६दधिमण्डे (मात्) न॰ मेदि॰। ७एरण्डवृक्षे दशार्णभेदे भूप्रायां च पुंन॰ हेमच॰ अर्द्धर्चादि भावप्र॰ तद्विधानं यथा

"तण्डुलानां सुसिद्धानां चतुर्दशगुणे जले। रसः सिक्थैर्विरहितो मण्ड इत्यभिधीयते। शुण्ठीसैन्धव-संयुक्तो दीपनः पाचनश्च सः। अस्य सम्यक्सिद्धत्वात् श्रेष्ठा मण्डस्य सिद्धता। पेया बुधवागूनां विलेपी भक्तयोरपि"। तस्य गुणाः "मण्डो वाती बलः शीतो दीपनो धातुसाम्यकृत्। जरापस्मारपो बल्यः पित्त-श्लेष्मप्रणाशनः"। "वृद्धबोधनो बलविशोधनश्च प्राणप्रदः शोणितवर्द्धनश्च। ज्वरापहारी कफपित्तहरो वायुं जयेदृग्गुणो हि मण्डः। बालमण्डोऽग्निजननो दाह-तृष्णानिवारणः। ज्वरातीसारशमनोऽशेषदोषामपाचनः। वाटग्रमण्डोऽग्निजननः शूलानाहविनाशनः। पाचनो दीपनो रुच्यः पित्तश्लेष्मानिलापहः" राजवल्लभः। वाटग्रमण्डो भक्ष्यममण्डः।

मण्डक पु॰ भाव॰ वुञ् पिष्टकभेदे लताशब्दे २१८१ पृ॰ दृश्यम् सङ्गीतदामो॰ उक्ते गीताङ्गभेदे यथा

"जयश्रियः कलापश्च कमलः सुन्दरस्तथा। मङ्गलो वल्लभ-श्चेति मण्डकाः षट् प्रकीर्त्तिताः। जयश्रियो छंसताले लघुमध्ये यदा गुरुः। जनविंशाक्षरैर्युक्तो रसे वीरे स वर्त्तते। लघुर्गुरुर्लघुर्यत्र छंसताल स उच्यते॥ कलापो रङ्गतालेन युक्तो रौद्ररसे हि सः। द्वाविंशत्यक्षरैर्युक्तो लघुरादौ गुरुद्वयम्। लघुरादौ गुरुद्वन्द्वं रङ्गताल इतीरितः २। लघुद्वन्द्वं गुरुश्चैकोऽनिलोऽत्र वर्णसा-मकः। पञ्चविंशत्यक्षरैः स्यात् कमलः शान्तहास्ययोः ३। गुरुरेको लघुद्वन्द्वं त्रिपुटे भगणात्मके। अष्टाविंशत्यक्ष-रैस्तु मङ्गलः सुन्दरे मतः ४। आदौ गुरुर्लघुर्मध्ये गुरुतोऽन्ते भङ्गतालके। एकत्रिंशत्यक्षरैस्तु वीरे मङ्गल-मण्डकः ५। मङ्गितापुत्रके ताले गलसागलमालके। चतस्रिंशदक्षरोऽयं वल्लभो रौद्रके रसे ६।"

मण्डन पु॰ मण्डयति मडि-ल्यु। १अलङ्कारके २प्रसिद्धमीमां-सकभेदे पु॰ "शिष्यप्रशिष्यैरयमीयमानमवेहि तत् मण्डन-मिश्रधाम"। शङ्करदिग्विजयः तेन सह शङ्कराचार्य्यस्य विचारकथा तत्र दृश्या। भावे ल्युट्। ३भूषायाम् न॰

मण्डप पुंन॰ मडि-घञ् मण्डं भूषां पाति रक्षति पा-क मडि-कपन् वा। १जनविश्रामस्थाने २देवादिगृहे च अमरः। यथा चण्डीमण्डप विष्णुमण्डप इत्यादि। ३मण्डपानकर्त्तरि त्रि॰ शब्दरत्ना॰। ४निष्पाव्यां (शूक-शिम्बीभेदे) स्त्री राजनि॰। [ङिति स्त्री त्रिका॰ ङीप्।

मण्डयन्त त्रि॰ मडि-झच्। १अलङ्कारके सि॰कौ॰। २यो-

मण्डर त्रि॰ मडि-अरन्। १भूषके ततः अङ्कुल्या॰ स्वार्थे ठक्। माण्डरिक तत्रार्थे। २लघुपर्ण्यां स्त्री हारा॰ङीप्।

मण्डल न॰ मडि-कलच्। १चक्राकारेण वेष्टने अमरः यथा ऋग्वेदे "अर्थमण्डलं भूमण्डलम्। उभयतोविंशतियोजनमिते

२देशभेदे २सूर्यचन्द्रयोः परिवेषे ३शब्दगन्धपचक्रे ५कोठरोगे च मेदि० ६गाले अनेकतीर्थको० ७समूहे हेम० "सर्वमण्डलमण्डलम्" इति वोपदेवः। ८चक्रे त्रिका०। "मण्डलाकारपादाख्यं मण्डलं स्यानमीरितम्" इत्युक्ते ९धन्विनां स्थानभेदे शब्दर०। "मण्डलं सर्वतो वृत्तिः" इत्युक्ते १०सैन्यव्यूहभेदे कामन्द०। क्षत्रियरेखावन्नि-वेशेन रचिते ११पदार्थे च यथा यन्त्रमण्डलं सर्वतो-भद्रमण्डलमित्यादि। १२बिम्बे त्रि० अमरः स्त्रियां गौरा० ङीष्। या च १३दुर्वायाम् स्त्री रत्ना० १४कुक्कुरे पु० मेदि० १५सर्पभेदे पु० विश्वः १६व्याघ्रनखाख्यगन्धद्रव्ये शब्दच०। ततः स्वार्थे क। बिम्बे कुष्ठभेदे आदर्शे च। क्षत्रियमण्डलविधानमुक्तं देवीपु० यथा

"चतुर्हस्तं समारभ्य यावद्धस्तशतं भवेत्। मण्डलं तत्र कर्त्तव्यमत ऊर्ध्वं न कारयेत्। विमलं विजयं२ भद्रं३ विमानं४ शुभदं५ शिवम्६। वर्द्धमानञ्च७ देवेशं८ नवाख्यं० कामदायकम्। रुचकं११ स्वस्तिकाख्यञ्च१२ द्वि-दशमिति मण्डलम्। सितादिकरितान्ताश्च रागाः काय्याः सुशोभनाः। शालिषष्टिकगोधूमरजनीकरिपत्रजाः। मक्षिकाण्डमरागाश्च भक्षणा अभिमन्त्रिताः। सितसर्षप धूपाढ्यं रजः कृत्वा तु पातयेत्। कृष्णबीजं न्यसेन्मन्त्री समयेति पदं च वा। समीक्षणं शुभं कृत्वागोमयेनोपलेपितम्। चन्दनागुरुकर्पूरचोदधूपाधि-वासितम्। भूभागं सुमितं चित्रं पूर्वपश्चिमकोत्तरम्। याम्यं स्वस्तिकमत्स्याद्यैः स्वस्तैर्वीथीकुलपत्रजैः। पद्म-पत्राष्टकं मध्ये त्रिगुणं त्रिगुणञ्च वा। द्वाराणि समकू-लाणि कर्णिकाकेसरोज्ज्वलम्। पद्मं तथावशेषाणि स्वस्ति-कान्युत्पलानि च। सव्यावसव्यहस्तस्तु रजःपातं समाचरेत्। मध्यमानामिकाङ्गुष्ठैरपरिष्टाद् यथेप्सया। अधोमुखाङ्गुलिं कृत्वा पातयेत्तु विचक्षणः। समा रेखा तु कर्त्तव्याऽविच्छिन्ना पुटिवर्जिता। अङ्गुष्ठपर्व-वैपुल्या समा कार्य्या विजानता। संसक्तं विषमं न्यूनं विच्छिन्नं क्षतराहतम्। पर्य्यन्तमर्पितं कुत्रजातिखेत्र कदाचन। संसक्ते कलहं विद्याद्रजरेखे तु विग्रहम्। अतिस्थाने भवेद्व्याधिर्निम्नं पीड़ा विनिश्चिते। दुन्दुभे-र्भयमाप्नोति यत्नपश्चात्र संशयः। क्षयायाङ्गार्थहानिः स्यात् विच्छिन्ने मरणं ध्रुवम्। विरोगात्तु भवेत्तस्य दृष्टद्रव्यक्षतस्य वा। अविदित्वा लिखेद्यस्तु मण्डलन्तु यथेप्सया। सर्वदोषानवाप्नोति ये दोषाः पूर्वभा-षितः"। भोजनमण्डलं यथा "यातुधानाः पिशा-चाश्च असुरा राक्षसास्तथा। भुञ्जन्ति केवलमत्र मण्डलस्य विसर्जनात्। आदित्यावसवो रुद्रा ब्रह्मा चैव पितामहः। मण्डलान्युपजीवन्ति तस्मात् कुर्वन्ति मण्डलम्। चतुःकोणं द्विजात्यर्थं त्रिकोणं क्षत्रियस्य तु। द्विकोणाकृति वैश्यस्य शूद्रस्य वर्त्तुलं सदा" वह्निपु०। भोजनशब्दे आह्निकत० वाक्यं दृश्यम्।

व्यूहभेदलक्षणं कामन्दकीये उक्तं यथा "मण्डलो-ऽर्थकृतो भोगो दण्डश्चेति मनीषिभिः। कथिताः प्रकृतिव्यूहा भेदास्तेषां प्रकीर्त्तिताः। यत्नतं व्यूह्य मतिमान् काले स्थाने प्रकल्पयेत्। तिर्य्यग्वृत्तिश्च दण्डः स्याद्भोगः स्याद् वृत्तिरेव च। प्रदरो दण्डकोऽसह्यापो वै तद्विपर्य्ययः। प्रतिष्ठः सुप्रतिष्ठश्च स्यैनौ विजय० सञ्जयौ। विशालविजयः स्थूचो व्यूहाकर्षश्च भूमुखः। वृत्तास्या वलयश्चैव दण्डभेदाः चतुर्जयाः। अतिक्रान्तः प्रतिक्रान्तः कक्षाभ्यां चैव पक्षतः। अति-क्रान्तश्च पक्षाभ्यां ततोऽन्यस्तु विपर्य्ययः। व्यूहापचो धनुःपक्षो द्विव्यूहो दण्ड ऊर्ध्वगः। द्विगुणान्तस्तिर-क्रान्तपक्षोऽन्योऽस्य विपर्य्ययः। द्विचतुर्दण्ड इत्येवं श्रेयो लक्षणतः क्रमात्। गोमूत्रिकाऽश्वितस्थारी शकटो मकरस्तथा। भोगभेदाः समाख्यातास्तथा परि-पतन्तकः। दण्डपक्षो युगोरस्कः शकटस्तद्विपर्य्ययः। मकरो व्यकीर्णश्च शेषः कुञ्जररात्रिभिः। मण्डल-व्यूहभेदौ च सर्वतो भद्रदुर्जयौ। गजानीको द्वितीयस्तु प्रथमः सर्वतोमुखः। अर्द्धचन्द्रश्च उद्धारो वज्रभेदा-स्त्वसंहताः। तथा कृकुटशृङ्गी च काकपादी च गोधिका। त्रिचतुःपञ्चसैन्यानां श्रेया आकारभेदतः। इति व्यूहाः समाख्याता व्यूहभेदप्रयोक्तृभिः। एते समुदय प्रोक्ता दण्डव्यूहाश्च षड्विधा। तथा व्यूहयश्चैव मण्डलस्य प्रयोक्तृभिः। असंहतास्तु सङ्व्यूहा भोग-व्यूहाश्च षड्विधा। व्यूहा एते प्रयोक्तव्याः शत्रुसैन्यस्य उपस्थिते।" [भ्रमणरूपे नृत्ये शब्दमाला।

मण्डलनृत्य न० मण्डलाकारेण नृत्यम्। चक्राकारेण परि-भ्रमणरूपे नृत्ये।

मण्डलपत्रिका स्त्री मण्डलाकारं पत्रमस्याः। रक्तपुन-र्नवायाम् राजनि०।

मण्डलपुच्छक पु० कीटभेदे सुश्रुतः कीटशब्दे दृश्यम्।

मण्डलब्राह्मण न० शत०ब्रा०१०अध्याये पठिते "यदेतन्मण्डलं तपतीत्यादिके ब्राह्मणे मण्डलाध्यायोऽस्ति।

मण्डलाग्र पु० मण्डल एवाग्रमस्य । खड्गभेदे अमरः ।
मण्डलाधिप पु० ६त० । मण्डलेश्वरे नृपभेदे चतुर्योजनपर्य्यन्तो ह्यधिकारो नृपस्य च । यो राजा तच्चतुष्टयस्य एव मण्डलेश्वरः "त्रयाणामप्यधिपः" मण्डलाधीश मण्डलेश्वरादयोऽप्यत्र । [मल्लर० ।
मण्डलाकृत त्रि० मण्डल+च्वि कृञ् क्त । वर्त्तुलाकारे
मण्डलिन् पु० मण्डलं कुण्डलनमस्त्यस्य इनि । १सर्पे २विड़ाले शब्दमाला । ३जाङ्गले (खड़ाश) हेमच० । ४वर्त्तुले त्रिका० ५गोनससर्पे च राजनि० ।
मण्डहारक पु० मण्डं हरति हृ-ण्वुल् । धौरिडके अमरः
मण्डा स्त्री मण्डःकारत्वेनाख्यस्या कप् । सुरायां हारा० मडि-क्वप् टाप् । २यामलक्यां मेदि० ।
मण्डित त्रि० मडि-क्त । १भूषिते २बौद्धभेदे पु० हेमच० ।
मण्डु पु० ऋषिभेदे तस्यापत्यं गर्गा० यञ् । माण्डव्य तद्वत्ये ऋषिभेदे ।
मण्डूक पुंस्त्री० मण्डयति वर्णसमयम् मडि-ऊक । १भेके अमरः स्त्रियां जातित्वात् ङीष् । २शोधके ३तन्निभेदे च पु०मेदि० ४वस्त्रभेदे विश्वः । ५गाङ्गेतलक्षे त्रि०भरत० ।
मण्डूकपर्ण पु० मण्डूक इव पर्णमस्य । १शाकभेदे अमरः २शोधके मेदि० । ३मक्षिकायां स्त्री टाप् ङीष् वा । ४ब्राह्म्यां (वामनहाटि) ५ओषधिभेदे (हुलहुली) रत्नमा० । स्त्री ङीष् मेदि० ६वादिलक्षकायां स्त्री ङीष् राजनि० । स्वार्थे क । मण्डूकपर्णिका तत्रार्थे "मण्डूकपर्णिका वश्यो स्वादुपाका सरा स्मृता" । "मण्डूकपर्णिका वश्यो रूक्षा वातविनाशनी" राजवल्लभः ।
मण्डूकमाट स्त्री मण्डूकस्य माटेव पोषकत्वात् । ब्राह्म्यां (वामनहाटी) राजनि० । [सरोवरभेदे अमरः ।
मण्डूकसरस न० मण्डूकप्रचुरं सरः जातौ कच्समा० ।
मण्डूर न० मडि-ऊरच् । लौहमले अमरः ।
मण्डूरवज्र पु० चक्रदत्तोक्ते वज्रभेदे
"पञ्चलोहं समरिचं देवदारु पलत्रिकम् । विड़ङ्ग-सत्त्वयुक्तानि भागाभ्यिपलसम्मिताः । यावन्त्येतानि चूर्णानि मण्डूरं द्विगुणं ततः । पञ्चा चाष्टगुणे मूत्रे घनीभूते तदुद्धरेत् । ततोऽक्षमात्रान् गुटिकान् पिबेत् तक्रेण तक्रभुक् । पाण्डुरोगं जयत्येष मन्दाग्निमरोचकम् । अर्शांसि सप्तधोदोषसहसाप्यपहा वरा । त्रिभिः श्रीहानदरं मरोमस्य नाशयेत् । मण्डूरवज्र-नामायं रोगानीकविनाशनः ।"
मण्डूरवटक पु० चक्रदत्तोक्ते मण्डूरादिघटिते वटकभेदे "लूरपथं त्रिफलाद्वयं विड़ङ्गचव्यचित्रकौ । दार्वी त्व-मृताद्विको धातुर्यन्त्रिकं देवदारु च । एषां द्विपञ्चि-कान् भागांश्चूर्णं कृत्वा पृथक् पृथक् । मण्डूरं द्विगुणं चूर्णं गुडमज्जसदृक्षमम् । मूत्रे चाष्टगुणे पक्त्वा तस्मिंस्तु गुटिकेत् ततः । उदुम्बरसमान् कृत्वाऽटकां-स्तान् यथाग्नितः । उपयुञ्जीत तक्रेण वातजं क्षीरेण च भोजनम् । मण्डूरवटका हन्ति प्रायदाः पाण्डुरोगिणाम् । कुष्ठान्यलसकं शोथमुदरप्लीहकृमा-नपान् । अर्शांसि कामलां मेहान् श्रीहानं पाण्डु-रक्तं च । पाण्डवस्त्वष्टगुणितं मूत्रं मण्डूरचूर्णतः ।"
मण्डोदक न० मण्डं एवोदकं यत्र । १आतपेऽहे (आखिपोना) २चित्ररागे ३चित्रवर्णे मेदि० । सुश्रुतोक्ते सुराकल्पान-र्गतक्वाथभेदे "वैरेचनिकमूलानां क्वाथे भागान् सुभावि-तान् । सुधौतांस्तत्कषायेण शालीनाञ्चापि तण्डूलान् । अवचुद्यौकतः पिष्ट्वा गुल्मान् सूर्चीर्चितान् । भाजितण्डुलचूर्णञ्च तत्कषायोष्णसाधितम् । तस्य पिष्ट्वा भागांश्चीन् किण्वभागविमिश्रितान् । मण्डोदकार्थं क्वाथस्य दद्यात्तत् सर्वमेकतः । निदध्यात् कलसे तान्तु सुरां जातरसां पिबेत् । एष एव सुराकल्पो वमनेष्वपि कीर्त्तितः ।"
मत त्रि० मन-क्त । १सम्मते २अभिप्रेते ३ज्ञाते ४अर्चिते च । भावे क्त । ५सम्मतौ ६अभिप्राये ७ज्ञाने ८अर्चायाञ्च न० । टसञ्जीजते त्रि० मत्वशब्दे दृश्यम् । ततः स्वार्थे अण् रथ्यादि० क । मतक तत्समीपादौ त्रि० । स्वार्थे क । मत शब्दार्थे ।
मतङ्ग पु० माद्यति जनेन मद-अङ्गच् दस्य तः । १मेघे उणा० दिकोषः । २वस्त्रभेदे भा० व० ८अ० । ३दानवभेदे हरिवं० २४२ अ० । ४राजर्षिभेदे भा० ७१ अ० । ब्राह्मण्यां नापितेन जाते ५चण्डालभेदे च तत्कथा भा० शान्तु० २६ अ० ।
मतङ्गज पुंस्त्री० मतङ्गः मेघ इव जायते जन-ड । १गजे अमरः तस्य मेघाकृतित्वात् तथात्वम् । स्त्रियां ङीष् । शीघ्रं गजानामूर्ध्वं कुष्ठादिरोगो भवति यथोक्तं कामन्द० "क्षते स्रवो शीघ्रगतात् प्रतापाद्भवन्ति कुष्ठानि मतङ्गजानाम् । सस्यक्रियायामपि कुञ्जरस्यामूर्ध्वं शरीरेऽभिजाय्वतीति । यायावयोनेन हि वल्गतश्च प्रस्रुत्य दन्ति हिरदान् प्रतापः । खण्डानि खण्डानि

खण्डकाले विनाम्बुना यानि परामवस्थाम् । अन्यत्व-
मुच्यप्रवितप्रकायाः प्रयानि यदा करिष्योऽपिवनः ।"

मतङ्गवापी स्त्री तीर्थभेदे भा० अनु० २५ अ० ।

मतल्ल पु० पार्श्वस्थे आत्मपक्षजातियुक्ते ऋ०१०।१६२।१भा०

मतल्लिका स्त्री मतं मतिमवति भूयवति खुल् पृषो० । प्रभक्ते अमरः । अव्युत्पन्नोऽयमित्येके नियतलिङ्गोऽयम् क्षि०कौ० ।

मतानुज्ञा स्त्री निग्रहस्थानभेदे गौ०सू० तल्लक्षणसूत्रं यथा
"स्वपक्षदोषाभ्युपगमात् परपक्षदोषप्रसङ्गो मतानुज्ञा"
"यः परेण चोदितं दोषं स्वपक्षेऽभ्युपगमात्तदुत्व वदति भवत्पक्षे समानो दोष इति स स्वपक्षे दोषाभ्युपगमात् परपक्षे दोषं प्रसञ्जयन् परमतमनुजानातीति मतानुज्ञां नाम निग्रहस्थानमापद्यते" भा० ।

मति स्त्री मन-भावे क्तिन् । १ज्ञाने अमरः । २दक्षायां १स्तुतौ च । कर्त्तरि क्तिच् । ४आर्य्ये मेदि० ५याकभेदे जटाधरः । ६मेधाविनि निघण्टुः । ७अतिकरौषधं गद० १८अ० उक्तं यथा
"पाठा हे जीरके कुष्ठमञ्जगन्धाजमोदकम् । यवानि-
कटुकचैव सर्वं चूर्णसमम् । त्रायोरसे भावितञ्च सर्पिर्मधुसमन्वितम् । सप्ताहभक्षितं कुर्यान्मेधां मतिं परामृ ।"

मतिदा स्त्री मतिं ददाति दो-क । १ज्योतिष्मतीलतायाम् (गिलड़ी) राजनि० । दा-क । २बुद्धिदातरि त्रि० ।

मतिनीर पु० ऋषभेदे भा० आ० ६३अ० ।

मतिभ्रम पु०मतेर्भ्रमः अयथार्थविषयत्वेन भ्रमत्वम् । १बुद्धि-
भ्रंशे भ्रान्तौ अमरः । भ्रम-भावे क्तिन् । मतिभ्रान्ति-
रप्यत्र स्त्री । [मतिभ्रंशादयोऽप्यत्र ।

मतिविभ्रम पु० मतेर्विभ्रमोऽत्र । उन्मादरोगे राजनि० ।

मतुख त्रि० १मतवाले ऋ०८।७१।८ । २मेधाविनि निघ० ।

मत्क पु० मद-किए स्वार्थे क । १मत्कुणे (खटमल) मनेदमृ कनू मदादेशः । २मत्सम्बन्धिनि "मैतन्मत्कमिति ब्रूयाः" भट्टिः ।

मत्कुण पु० मद-किए कुत्सितं कुण-अच् कर्म० । १कीटभेदे (खटमल) राजनि० । २निर्दग्धगजे २रक्तवर्णभल्लातके ३नारिकेले मेदि० ४जङ्घालायाम् हेम० । ५चलातलोम-
भगायां स्त्रियां स्त्री भरत० ।

मत्कुणारि पु० ६त० । (बिडि) भङ्गायां शब्दमाला । तत्-
सम्बन्धेन हि तस्य नामः ।

मत्कुणिका स्त्री कुमारानुचरमातृभेदे भा० श० १७अ० ।

मत्त पु० मद-क्त । १दुर्मदे गजे अमरः । २धीरे ३मदयुक्ते
४हृष्टे च त्रि० । ५धुस्तूरे ६कोकिले ७मक्षिके पु० राजनि० मत्तं मदोऽस्त्यस्याम् अच् । ८मदिरायां स्त्री राजनि० । "प्रेया मत्ता मदनमयुता" इ० र० उक्ते
६दशाक्षरपादके छन्दोभेदे स्त्री ।

मत्तकाशि(शि)नी स्त्री मत्तेव शीलेव काशते कसति गच्छति या खिनि पृषो० ह्रस्व० । उत्तमयोषिति अमरः ।

मत्तकीय पु० मत्तः कीय इव । गजे शब्दमा० स्त्रियां जातित्वात् ङीष् ।

मत्तमयूर पु० मत्तो मयूरो यत्र । १भेदे "वेदैरब्धिर्मृतौ यत्र मत्तमयूरम्" इ० र० उक्ते त्रयोदशाक्षरपादके २छन्दोभेदे च ।

मत्तवारण पु०कर्म० । १मत्तहस्तिनि । मत्तं वारयति इ-णिच् ल्यु । २प्रासादवरण्डे न० (बारेण्डा) हेमच० ३पूगवृक्षे शब्दमा० ।

मत्ताक्रीड़ा स्त्री "मत्ताक्रीड़ा भौ त्रौ भौ गश्चेति भवति वसुयतिरदयतियुता" इ० र० उक्ते त्रयोविंशत्यक्षरपादके छन्दोभेदे । [(बारेण्डा) प्रासादवरण्डे हेमच० ।

मत्तालम्ब पु० मत्तैरालम्ब्यते आ+लबि-कर्मणि घञ् ।

मत्तेभविक्रीड़ित न०"सभरा नौ यवगाश्चेत्तदेतन्मत्तेभ-
विक्रीडितम्" इ० र० टी० उक्ते एकविंशत्यक्षरपादके छन्दोभेदे । हृत० । २मत्तगजक्रीड़ायाम् ।

मत्य न० मते समीकरणे साधु यत् । अदर्शनस्य समीकरण-
साधने १फलकभेदे (मट्) "सम्राक्षितेन मत्येन मतीकरोति" ताण्ड्य०ब्रा०२।८।२ । "यथा लोके सम्राक्षितेन सम्राभिरनडुद्भिः सम्राभिर्वोढृभिर्वा अधिष्ठितेन मत्येन मत्यग्राम अदर्शनस्य चेतस्य समीकरणा-
दिसाधनं फलकम् । तेन मतीकरोति समीकरणार्थं कर्मणः प्रयुनक्ति चेतसम्" भा० २दात्रादिवृत्तौ हेमच० [भन्नत ।

मत्र सुप्तभाषणे चु० आ० सक० सेट् इदित् । मन्त्रयते अम-

मत्स पुंस्त्री० मद-स । मत्स्ये शब्दमा० ।

मत्सगन्ध पु० मत्स्येन गन्धो यस्याः (माछेरघण्ट) अञ्जनभेदे शब्दच० ।

मत्सर पु० मद-सरन् । १अन्यगुणभदेहे परसम्पत्त्यसहने २क्रोधे च ३तद्वति ४खलेच त्रि० अमरः । ५कीटभेदे मक्षिकायां स्त्री विश्वः । मत्सरस्य
"निन्दन्ति मां यदा लोका धिगस्तु मम जीवनम् ।
इत्यात्मनि भवेद्दुःखं धिक्कारः स च मत्सरः" क्रिया-

योगसारोक्तः ।"स्वप्रयोजनप्रतिसन्धानं विना पराभिमतनिवारणेच्छा ।" गौ० ह० चक्रच बोध्यः ।

मत्स्य पु० मद–स्यन् । (माछ) ।मीने २जलचरभेदे स्त्रियां ङीष् यत्रोपः मत्सी । तद्भेदगुणादि भावप्र०उक्तं यथा तत्र मत्स्येषु रोहितस्य "रक्तोदरो रक्तशको रक्ताक्षो रक्तपर्वतिः । लघुरुक्षो भवत्येको रोहितः कथितो बुधैः । रोहितः सर्वमत्स्यानां वरो ह्यल्पोऽर्दितार्तिजित् । कषायानुरसः स्वादुर्वातघ्नो नातिपित्तलः । ऊर्ध्वजत्रुगतान् रोगान् हन्याद्रोहितशल्ककम् ।" (सिलन्ध्र) "सिलन्धः श्लेष्मलो बल्यो विपाके मधुरो गुरुः । वातपित्तहरो ह्येष आमवातकरश्च सः ।" (अथ भांगन) "भङ्गुरो मधुरः शीतो ह्यभ्रः श्लेष्मकरो गुरुः । विष्मूत्रजनकश्चापि रक्तपित्तहरः स्मृतः ।" (मोमाचिका) "मोचिका वातकृद्बल्या ह्रस्वी मधुरा गुरुः । पित्तघ्नी कफकृच्या ह्यभ्रा दीप्ताग्नये हिता । (बोदाल)"पाठीनः श्लेष्मलो बल्यो निद्राकृद्विष्टिताशनः । दूषयेद्रुधिरं पित्तकुष्ठरोगं करोति च ।" (अथ बोङ्गी) "ह्रस्वो तु वातशमनी स्निग्धा श्लेष्मकोपनी । रसे तिक्ता कषाया च लघ्वी रुच्या स्मृता बुधैः ।" (अथ शीलचः) "रक्तो मधुरः स्निग्धो रोचनो वह्निवर्द्धनः । पित्तकृत्कफक्षतकृत्किञ्चिद्वातघ्नोऽनिलापहः ।"(अथ सौल)"श्यामो पाढिषी ह्रस्वा मधुरा तु वरा स्मृता ।" अथ (गर्गरा) "गर्गरः पित्तलः किञ्चिद्वातजित् कफकोपनः ।" अथ (कवई)"कवियो मधुरा स्निग्धा कफघ्नी रुचिकारिणी । किञ्चित्पित्तकरी वातनाशिनी वह्निवर्द्धनी ।" अथ-(वर्मी) "वर्मिमत्स्यो हरेद्दाहं पित्तं रुचिकरो लघुः ।" अथ (दण्डारी) "दण्डमत्स्यो रसे तिक्तः पित्तरक्तं कफं हरेत् । वातसाधारणः प्रोक्तः शुक्रलो बलवर्द्धनः ।" (अथ आड़ि) "एरङ्गो मधुरः स्निग्धो विष्मूत्रौ शीतलौ लघुः ।" (अथ पावता) "मङ्गाशफरसंज्ञस्तु तिक्तः पित्तकफापहः । शिशिरो मधुरो रुच्यो वातसाधारणः स्मृतः ।" अथ (गरई) "गरघ्नो मधुरा तिक्ता तुवरा वातपित्तहृत् । कफघ्नी रुचिलघ्वी दीपनी बलवीर्यकृत् ।" अथ (मागुर) "मद्गुरो वातकृद्बल्यो ह्यभ्रः कफकरो लघुः ।" अथ टेङ्गरा "खपादमत्स्यो मेधाकृत् श्लेष्मलश्चक्षुष्यकरश्च सः । वातपित्तकरश्चापि रुचिकृत् परमो मतः ।" अथ शफरी (पोठी) "प्रोक्ता तिक्ता कटुः स्वादुः शुक्रघ्नी कफवातजित् । स्निग्धाङ्गी कण्ठरीगघ्नी रोचनी च लघुः स्मृतः ।" अथ क्षुद्रमत्स्याः "क्षुद्रा मत्स्याः स्वादुरसाः दोषत्रयविनाशनाः । लघवाका रुचिकरा बलदाश्चे हिता मताः ।" अथातिक्षुद्रमत्स्याः "अतिक्षुद्राः पुंस्त्वहरा रुच्याः कासानिलापहाः ।" अथ मत्स्याण्डः "मत्स्यगर्भो भवेद्ग्राह्यः स्निग्धः पुष्टिकरो लघुः । कफमेदप्रदो बल्यो ग्लानिजन्मेहनाशनः ।" अथ (शुकटी) "शुष्कमत्स्याः नवा बल्याः दूजेराः विड्विबन्धिनः ।" अथ दग्धमत्स्याः "दग्धमत्स्यो गुरुः श्लेष्मः पुष्टिकृद्बलवर्द्धनः ।" अथ कूपजादिमत्स्यगुणाः "कौपमत्स्याः गूक्रमूत्रकृच्छ्रश्लेष्मविवर्द्धनाः । सरोजा मधुराः स्निग्धा बल्या वातविनाशनाः । नादेया ह्रस्वा मत्स्या गुरवोऽनिलनाशनाः । रक्तपित्तकरा ह्यभ्राः स्निग्धोष्णाः खलमूत्रलः । चौड्राः पित्तकराः स्निग्धा मधुरा लघवो हिमाः । ताड़ागा गुरवो ह्यभ्राः शीतलाः बलमूत्रदाः । ताड़ागावच्छिन्नजाताः बलायुर्मतिङ्कराः ।" अथतुर्विशेषे मत्स्यविशेषगुणाः "श्वेतले कूपजा मत्स्याः शिशिरे वारसा हिताः । वसन्ते ते तु नादेया ग्रीष्मे चौड्रसङ्कराः । तड़ागजाता वर्षासु ताम्रपर्णी नदीभवाः । नैर्झराः शरदि श्रेष्ठा विशेषोऽयमुदाहृतः ।" तद्भक्षणनिषेधादिकम्

"यो यस्य मांसमश्नाति स तन्मांसाद उच्यते । मत्स्यादः सर्वमांसादस्तस्मान्मत्स्यान् विवर्जयेत्" मनुः ।

"जलस्थलचरा ये च प्राणिनस्तान् हतानपि । न भक्षेन् मानवो ज्ञानी हत्वा तेषां भवेद्धरि । हत्वा हत्वा तु मत्स्यादी सर्वेषां यो विशेषतः । मांसादः प्राणिनां सोऽपि तस्मान् मत्स्यं परित्यजेत् । पाद्मोत्तरखण्डे १०६ अ० । वर्जनीया मत्स्या यथा । "शृणु देवि ! प्रवक्ष्यामि मांसभेदान् निबोध मे । नादेयं तिलकमठं पशुं शृङ्गिणमेव च । गोधीनं चक्रशकुलं वड़ालं राघवं तथा । वामीनं चलकर्कञ्च सचक्रं चेङ्गमेव च । भूविलञ्चानिरुद्धञ्च गाङ्गेयानि विवर्जयेत्" मत्स्यसूक्तमहातन्त्रम् । रविवारे मत्स्यभक्षणे निषेधो यथा "आमिषं रक्तशाकञ्च यो भुङ्क्ते च रवेर्दिने । सप्तजन्म भवेत् कुष्ठी दरिद्रोपजायते" भविष्यपु० । "माघमासिमत्स्यमांसञ्च मसूरं निम्बपत्रकम् । भक्षयेद् यो रवेर्वारे सप्तजन्मान्यपुत्रकः" ति०त० । 'कार्त्तिके मत्स्यभक्षणनिषेधो यथा "न मत्स्यं भक्षयेन्मांसं न सौम्यं

नान्यत्रैव हि। चण्डाको जायते राजन्! कार्त्तिके मांसभक्षणात्" नारदीयपु०। मांसवैशाखयोर्विष्ण व्रह्मवर्ज्यविधानात् मत्स्यभक्षणं नितरां निषिद्धमिति ज्ञेयतत्त्वम्। "नाभक्ष्यं नैवेद्यार्थं भक्ष्येष्वज्ञानमश्नतः क्षीरं वर्जयेत् पञ्चनखमत्स्यवराहमांसानिच" आह्निक०त० विष्णुकृतम्। जन्मतिथौ मत्स्यभक्षणनिषेधो यथा "आमिषं कलहं हिंसां वर्षवृद्धौ विवर्जयेत्"। "भुङ्क्ते यस्तु निरामिषं स हि भवेच्चन्द्रान्तरे पक्षिणः"ति०त०। शैवस्य मत्स्यभक्षणनिषेधो यथा "क मद्यं क शिवे भक्तिः क मांसं क शिवार्चनम्। मत्स्यमांसरतानां वै दूरे तिष्ठति शङ्करः" काशीख०। विन्ध्यपर्वतस्य पश्चिमे मत्स्यभक्षणनिषेधो यथा "विन्ध्यस्य पश्चिमे भागे मत्स्यभुक् पतितो नरः" पुराणम्। कामतो मत्स्यभक्षणप्रायश्चित्तं यथा "मत्स्यांस्तु कामतो जग्ध्वा सोपवासस्त्रयं वसेत्" कात्या-नतस्तदर्द्धम्" प्रा०वि०। मत्स्यभक्षणनिषेधे प्रतिप्रसवो यथा "मत्स्यान् सशल्कान् भुञ्जीत मांसं रौरवमेव च। निवेद्य देवताभ्यश्च ब्राह्मणेभ्यश्च नान्यथा। शफरं सिंहतुण्डञ्च तथा पाठीनरोहितौ। मत्स्यान्खेते समुद्दिश्य भक्षयाय तपोधनैः। प्रोक्षितं भक्षयेदेषां मांसञ्च द्विज-काम्यया। यथाविधि नियुक्तश्च प्राणानामपि चात्यये" कौर्मे उ० १६अ०। "पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः। राज्ञीवात् सिंहतुण्डांश्च सशल्कांश्चैव वर्जयेत्" मनुः। "अनिवेद्य न भोक्तव्यं मत्स्यं मांसञ्च यत्नतः। अन्नं विष्ठा पयो मूत्रं यद्विष्णोरनिवेदितम्" आ० त०। प्रेतश्राद्धे मत्स्यदानविधिर्यथा "सपिण्डीकरणं यावत् प्रेतश्राद्धानि षोडश। एकाहे नैव कर्त्तव्यं त्र्यहेऽपि द्विजातिभिः" आह्नि०त०। २विराटदेशे पु० सोऽभिजनोऽस्य तस्य राजा वा अण्। मात्स्य पित्रादिक्रमेण तद्देशवासिनि तस्य राज्ञे च बहुषु अर्थो लुक्। ३तद्देशवासिषु ब० व०। ४मेषादितोद्वादशराशौ मीनराशौ। ५भगवतः प्रथमावतारे तत्कथा मत्स्यपु०२अ०। भा० व० ३८७ अ० च। मत्स्यं भगवदवतारभेदमधिकृत्य कृतो ग्रन्थः अण्। मात्स्य मत्स्य-पुराणभेदे तत्प्रतिपाद्यविषयाश्च तत्रैव २९०अ० उक्ता यथा "सूत उवाच। एतद्वः कथितं सर्वं यद्वृत्तं विष्णुरूपिणा। मात्स्यं पुराणमखिलं धर्मकामार्थसाधनम्। यत्रादौ मनुसंवादो ब्रह्मणश्चकथनन्तथा। सर्गस्य शरीरकं प्रोक्तं चतुर्युगसहस्रकम्। देवासुराणा सृष्टिसंहारकृतोत्पत्तिरेव च। मदनद्वादशी तद्व्रतोद्यापनपूजनम्। मन्वन्तराणासङ्ख्यो वैन्यराजाभिवर्णनम्। सूर्य्यादृक्षसृतोत्पत्तिर्बुधस्यागमनं तथा। पितृवंशानुकथनं श्राद्धकालस्तथैव च। पितृतीर्थप्रयाग-स्य सोमोत्पत्तिस्तथैव च। कीर्त्तनं सोमवंशस्य ययाति-चरितं तथा। कार्त्तवीर्य्यस्य माहात्म्यं दत्तिवंशानु-कीर्त्तनम्। भृगुशापकथा विष्णोर्दैत्यशापकथैव च। कीर्त्तनं पुरुवंशस्य वंशो रौद्राश्वसस्य तथा। पुराण-कीर्त्तनं तद्वत् क्रियायोगस्तथैव च। व्रतं नक्षत्रसंख्याकं मार्कण्डशयनं तथा। कृष्णाष्टमीव्रतं तद्वदोहिणी चन्द्रसंज्ञितम्। तडागविधिमाहात्म्यं पादपोत्सर्ग एव च। सौभाग्यशयनं तद्वदगस्त्यव्रतमेव च। तथा-नन्तरतीया तु रसकल्याणिनी तथा। आर्द्रा नन्द-करी तद्वद् व्रतं सारस्वतं पुनः। चतुरशीतिलिङ्गस्य सम्भवीकथनं पुनः। भीमाख्या द्वादशी तद्वदनङ्ग-शयनं तथा। अशून्यशयनं तद्वत्तथैवाङ्गारकव्रतम्। सप्तमीसप्तकं तद्वदशोकद्वादशी तथा। मेरुप्रदानं दशधा षड्शानिस्तथैव च। षड्रसकल्पकथनं तथा शिवचतुर्दशी। तथा सर्वफलत्यागः सूर्य्यवारव्रतं तथा। संक्रान्तिस्नपनं तद्वदिभूतिद्वादशीव्रतम्। सप्तिव्रतानां माहात्म्यं तथा स्नानविधिक्रमः। प्रयागस्य तु माहात्म्यं सर्वतीर्थानुकीर्त्तनम्। वैशाखमाहात्म्यं तद्वदोषधीनां तु कीर्त्तनम्। तथान्तरिक्षचारस्य ध्रुव-माहात्म्यमेव च। भवनानि सुरेन्द्राणां त्रिपुरायोधनं तथा। पितृपिण्डप्रमाहात्म्यं मन्वन्तरविनिर्णयः। वज्रा-ङ्गस्य तु संभूतिः तारकोत्पत्तिरेव च। तारकासुरमा-हात्म्यं ब्रह्मदेवानुकीर्त्तनम्। पार्वतीधर्म्मवस्तद्वत् तथा शिवतपोवनम्। अनङ्गदेहदाहस्तु रतिशोकस्तथैव च। गौरीतपोवनं तद्वदिन्द्रनाथप्रसादनम्। पार्वत कर्षि-संवादस्तथैवोद्वाहमङ्गलम्। कुमारसम्भवस्तद्वत् कुमार-विजयस्तथा। तारकस्य वधो घोरो नरसिंहोपवर्ण-नम्। पद्मोद्भवविसर्गस्तु तथैवान्धकघातनम्। वारा-णस्यास्तु माहात्म्यं नर्मदायास्तथैव च। प्रवरानुक्रम-स्तद्वत् पितृणामनुकीर्त्तनम्। तथोभवसुखोदानं दानं कृष्णाजिनस्य च। तथा सावित्र्युपाख्यानं राजधर्मा-स्तथैव च। यात्रानिमित्तकथनं स्वप्नमाङ्गल्यकीर्त्त-नम्। वामनस्य तु माहात्म्यं तथैवादिवराहकम्॥

क्षीरोदमथनं तद्वत् कालकूटाभिधानम्। प्रासाद-लक्षणं तदनुमण्डपानान्तु लक्षणम्। पुरुषंगे त संप्रोक्तं भविष्यद्राजवर्णनम्। तुलादानादि बहुशो महादानानुकीर्त्तनम्। कल्पानुकीर्त्तनं तद्वद् मन्वादि-क्रमणी तथा। एतत्पवित्रमायुष्यमेतत् कीर्त्तिविव-र्धनम्। एतत् पवित्रं कल्याणं महापापहरं शुभम्। यस्मात् पुराणादपि पादमेकं पठेत्तु यः सोऽपि विमुक्तपापः। नाराधयाख्यं पदमेति नूनमनङ्-वहिव्यसुखानि भुङ्क्ते।"

तद्दानविधिः मत्स्यपु० "सुतीनां यत्र कल्पादौ प्रदत्त्यर्थं जनार्दनः। मत्स्यरूपो च मनवे नरसिंहोपवर्णनम्। अधिकत्वान्नीत् सप्तकल्पदत्तमहत्फलम्॥ तन्मानमिति जानीध्वं सङ्ख्यामि चतुर्दश। विष्णवे हेममत्स्येन धेन्वा चैव समन्वितम्। यो दद्यात् पृथिवी तेन दत्ता भवति चाखिला"।

मत्स्यकण्डिका स्त्री मत्स्यानां कण्डिकेवाधारः। (खान्-नुर) मत्स्यरक्षणाधारे पात्रभेदे जटा०।

मत्स्यगन्धा स्त्री मत्स्यस्येव गन्धोऽस्याः। १व्यासमातरि सत्य-वत्याम् भा० आ० ६३अ०। २जलपिप्पल्याञ्च जटा०

मत्स्यवराट पु० खनामख्याते व्यञ्जनभेदे शब्दच०।

मत्स्यजाल न० मत्स्यधारणं जालम् श०त०। मत्स्यधार-णार्थे जालभेदे हेमच०।

मत्स्यजीविन् पु० मत्स्येन तद्धारणविक्रयादिना जीवति जीव-णिनि। निषादे "मत्स्यघातो निषादानाम्" मनुना तस्य तज्जीविकोक्तेस्तस्य तथात्वम्।

मत्स्यण्डी स्त्री (राब) ख्याते गुडविकारभेदे भावप्र० "इक्षो रसो यः संपक्को घनः किञ्चिदुदन्वितः। मदवत् स्यन्दते यस्मान्मत्स्यण्डीति निगद्यते"। अस्या गुणाः "मत्स्यण्डी मेदिनी बल्या बल्यो पित्तानिलापहा। मधुरा दीपनी हृद्या रक्तदोषापहा स्मृता"।

मत्स्यदीप पु० मत्स्यप्रधानो दीपः श०त०। द्वीपभेदे विष्णुपु०

मत्स्यधानी स्त्री मत्स्या धीयतेऽस्यां धा-आधारे ल्युट्, ङीप्। मत्स्यरक्षणाधारे (खानुर) पात्रभेदे अमरः।

मत्स्यनाशन पुंस्त्री० मत्स्यान् नाशयति ल्यु। १कुररपक्षिणि हेमच०। स्त्रियां जातित्वात् ङीष् ल्युट्। मत्स्यनाश-कोऽपि तद्वति त्रिषु २मीनघातके त्रि०।

मत्स्यपित्ता स्त्री मत्स्यस्य पित्तमिव रसोऽस्त्रियाः अच्। कटुरोहिण्याम् (कटकी) अमरः।

मत्स्यबन्धक त्रि० मत्स्यान् बध्नाति बन्ध-ण्वुल्। १मीनधा-रके "नृपायामेव तस्यैव जातो मत्स्यबन्धकः" उशन-साक्ते सङ्कीर्णजातिभेदे २धीवरे पुंस्त्री०। स्त्रियां जातित्वात् ङीष्। णिनि। मत्स्यबन्धिन् तद्वार्थे मत्स्य-धान्यां स्त्री ङीष् टिड्ढा०।

मत्स्यमुद्रा पूजाङ्गे मुद्राभेदे

"दक्षपाणिपृष्ठदेशे वामपाणितलं न्यसेत्। अङ्गुष्ठौ चालयेत् सम्यक् सदैवं मत्स्यरूपिणी। मत्स्यमुद्रा च कूर्माख्या लेलिहा सप्तधेनिका। महायोनिरिति ख्याता सर्वसिद्धिसमृद्धिदा" तन्त्रसारः।

"श्यामादौ सप्तधेनिका। "मत्स्यकूर्मलेलिहाख्या मुद्रा साधरणी मता" तत्रोक्तम्।

मत्स्यरङ्ग पुंस्त्री० मत्स्ये रजति रञ्ज-कर्त्तरि संज्ञायां घञ्। (माछराङ्गा) पक्षिभेदे स्त्रियां टाप्। "त्रिभुवनविदितो स्त्रियां मत्स्यरङ्गे कलङ्कः" शङ्कटः। स्त्रियां ङीष्।

मत्स्यराज पु० ६त०। १रोहितमत्स्ये त्रिका०। २वि-राटपुत्रे "नगरं मत्स्यराजस्य" भा० व० ७२ अ०। तस्य मत्स्यदेशाधिपत्वात् तथात्वम्।

मत्स्यविद्या स्त्री विद्-ज्ञाने क्यप् मत्स्यो मत्स्यरसो विद्या यया तल्लक्षितत्वात्। कटुक्याम् वैद्यकम्।

मत्स्यवेधन न० मत्स्यो विध्यतेऽनेन विध-करणे ल्युट्। १वडिशे अमरः स्त्रीत्वमपि जटा० ङीष्। कर्त्तरि ल्यु। २मद्गुपक्षिणि (पानकौड़ि) स्त्री जटा०।

मत्स्यसन्तानिक पु० व्यञ्जनभेदे "दग्धाङ्गारे सलवणो वेसवारैरुपस्कृतः। मार्द्वीकः कटुतैलेन मत्स्यसन्तानिको भवेत्" शब्दच०।

मत्स्याक्षी स्त्री मत्स्यस्याक्षीवाकारोऽस्याः अच्समा० ङीष्। १गण्डदूर्वायां राजनि० २सोमलतायाम् ३स्त्रिलमोचि-कायाम् ४ब्राह्मीशाके रत्नमाला।

मत्स्याङ्गी स्त्री मत्स्यः तत्पित्तमिवाङ्गं लिङ्गत्वात् यस्याः ङीष्। स्त्रिलमोचिकायाम् त्रिका०।

मत्स्यादनी स्त्री मत्स्य स्वाद्यते आस्वाद्यते अद-कर्मणि ल्युट्। जलपिप्पल्याम् राजनि०।

मत्स्याशन पुंस्त्री० मत्स्यमश्नाति अश-ल्यु। (माछराङ्गा) खगे त्रिका० स्त्रियां ङीष्।

मत्स्यासन न० कटूयामलोक्ते आसनभेदे "अथ मत्स्या-सनं वक्ष्ये दक्षोपरिकराङ्घ्रि। पादयुगलमानेन हस्ताङ्गुष्ठस्य योजनम्"।

मत्स्योदरी स्त्री मत्स्यगन्धयुक्तसुदरमस्या: । १व्यासमातरि मत्स्यगन्धायां २काशीस्थे तीर्थभेदे च काशी० ६६ अ० "दुर्गाणि तैः कृतानीह सप्त स्वर्गसमानि च । सहाराणि सप्तत्वाणि कवाटविकटानि च । कोटिकोटिसटाढ्यानि सर्वर्द्धिसहितान्यपि । ततः शैलमहादुर्गं तैः काशीं परितः कृतम् । परिखा च कृतास्तिन्द्रा मत्स्योदर्यां जलाविला । मत्स्योदरी द्विधा जाता वह्निरत्नेश्वरा पुनः । तस्य तीर्थं महत् ख्यातं त्रिलिंगं गाङ्गवारिणि । यदा संहारमार्गेण गङ्गाम्भः प्रसरेदिह । तदा मत्स्योदरीतीर्थं लभ्यते पुण्यगौरवात् । सूर्याचन्द्रमसोः पर्व तदा कोटिगुणं भवेत् । सर्वपर्वाणि तत्रैव सर्वतीर्थानि तत्र वै । तत्रैव सर्वलिङ्गानि गङ्गा-मत्स्योदरी यतः । मत्स्योदर्यांच ये स्नाता यत्र कुत्रापि मानवाः । कृतपिण्डप्रदानास्ते न मातुरुदरेशयाः । अधिरुह्यमिदं चेलं मत्स्याकारत्वमाप्नुयात् । परितः स्वर्धुनीवारिसंहारे परितोहते । मत्स्योदर्यां कृत-स्नाना ये नरास्ते नरोत्तमाः । कृत्वापि बहुपापानि नेक्षन्ते भास्करेः पुरीम् । किं स्नात्वा बहुतीर्थेषु किं तप्त्वा दुष्करं तपः । यदि मत्स्योदरीस्नाताः कुतो गर्भभयं ततः । यत्र यत्र हि लिङ्गानि स्वदेवर्षि-कृतान्यपि । तत्र मत्स्योदरीं प्राप्य स्नातो मोक्ष-भाजनम् । सन्ति तीर्थान्यनेकानि भूर्भुवःस्वर्गतान्यपि । न समानि परं तानि कोटयंशेनापि निश्चितम् । इत्थं तीर्थं कृतं तेन विभो ! कैलासवासिना । सपार्षदेन समहत् समुदारकर्मणा ।"

मथ विलोड़ने भ्वा०पर०सक०सेट् । मथति एदित् अमथीत् व्यथा० वा थ । मथः माथः । क्वादित् चङि न ह्रस्वः ।

मन्थ वधे सक०क्रैये अक०भ्वा०पर०सेट् इदित् । मन्थति अम-न्थीत् मन्थ्यते ।

मथन न०मथ-ल्युट् ।१वधे २क्रैये ३विलोड़ने च । "क्षीरोद-मथनोद्भूतः" चन्द्रस्तवः । ४गणिकारिकावृक्षे पु०रत्नमा० ।

मथित न० मथ-क्त । १निर्जलतक्रे २पीड़िते ३हते च त्रि० ।

मथु(थू)रा स्त्री मथ-ट(क)रच् । खनामख्यातायां नगर्याम् । "अयोध्या मथुरा माया काशी काञ्ची अवन्तिका । पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः" काशी०ख० । तन्माहात्म्यं विष्णुपु० ६अंशे ८अ० । वराहपु०१२७अ० । ततः चतुरर्थ्यां वरच्० अण् । माथुर तत्पुरुषे दूरभवे त्रि० । मथूराप्यत्र स्त्रियां टाप् ।

मथुरेश पु० ६त० । श्रीकृष्णे शब्दर० । मथुरानाथादयोऽप्यत्र

मद हर्षे दिवा०पर०अक० सेट् शमा० । माद्यति इदित् अम-दत् अमादीत् अमदीत् । इदित् निशायामनिट् पुषादित्वं तेन अमददित्यपि केचित् पाणिनीयाः । घटा० मदयति ओत् मत्तोऽस्ति । प्र+अनवधाने । [दीत् घटा० मदयति ।

मद गर्वे दैन्ये च भ्वा०पर०अक०सेट् । मदति अमादीत् अम-

मद तर्पणे चु०चा०सक०सेट् । मादयते । अमीमदत ।

मद आद्ये स्नेहे मदे आमोदे स्तुतौ दीप्तौ च यङायं अक० सक० च भ्वा० आत्म० इदित् । मन्दते अमन्दिष्ट । तत्र स्तुतौ "मन्दमानः सुमन्त्रभिः" ताण्ड्य०ब्रा० १।७।६ । "मन्दमानः स्तूयमानः मदि-स्तुतौ कर्मणि यकि प्राप्ते व्यत्ययेन शप् भा० ।

मद पु० मद अच् । १हस्तिगण्डादिस्रुतजले दानजले अमरः २गर्वे हर्षे ३रेतसि ४सृगमदे मेदि०५मत्ततायाम् हेमच० ६नदे ७कल्याणकरे वस्तुनि च धरणिः ।

मदकट पु० मदेन कटति कट-अच् पृषो० (पांड़) हेमच० ।

मदकल त्रि० मदेन कलते कल-अच् । १मत्तहस्तिनि मदो-त्कटे अमरः । २अव्यक्तशब्दकारिणि त्रि० शब्दरत्ना० । मदेन कलो यस्य । ३मदाव्यक्तभाषिणि त्रि० मेदि० ।

मदगन्ध पु० मदस्य हस्तिदानस्येव गन्धोऽस्य । १सप्तच्छदवृक्षे २मदिरायां स्त्री टाप् । ३अतसायाञ्च राजनि० ।

मदघ्नी स्त्री मदं मदिरामत्तां हन्ति हन-ट ङीप् । पूतिकायाम् जटा० ।

मदधार पु० मदप्रधाना धारा यस्य । पर्वतभेदे भा०स०२८अ० ।

मदन पु० मादयत्यनेन मद करणे ल्युट् । १कामदेवे अमरः । २सुरायां हेमच० । ३वञ्चने काले ४सिक्थके ५धुस्तूरे च पु० मेदि० । (मयना) ६वृक्षभेदे रत्नमाला । ७भ्रमरे जटा० माघे ८कन्दर्पभेदे हेमच० । ९खदिरवृक्षे शब्दच० १०कुटजवृक्षे ११बकुलवृक्षे (मयनफल) १२वृक्षभेदे च राजनि० । १३व्यक्तिजनभेदे कामशास्त्रम् ।

मदनक पु० मदयति मद-णिच्-ल्युट् स्वार्थे क । दमनक-वृक्षे राजनि० । [२रोमाञ्चे त्रिका० ।

मदनकण्टक पु० मदननिमित्तः कण्टक इव । १सात्त्विके

मदनकाकुरव पुंस्त्री० मदनेन हेतुना काकुरवोऽस्य । पारावते स्त्रियां जातित्वात् ङीष् ।

मदनगृह न० ६त० । १स्त्रीचिह्नभेदे सुरतसङ्गादयोऽप्यत्र । २सन्ध्यावधिके सप्तमस्थाने ज्यो० ।

मदनगोपाल पु० मदन इव गोपालः । श्रीकृष्णे ।

मदनचतुर्दशी स्त्री मदनपूजार्हा चतुर्दशी ष०त०। चैत्रशुक्लचतुर्दश्याम् तत्र दमनवृक्षे मदनपूजाविहितेति तथात्वम्। ति०त० दश्यम्।

मदनत्रयोदशी स्त्री मदनपूजार्हा त्रयोदशी। चैत्रशुक्लत्रयोदश्याम् ति०त०दश्यम्। [मत्स्यपु०७च०

मदनद्वादशी स्त्री मदनपूजार्हा द्वादशी। चैत्रशुक्लद्वादश्याम्

मदनपक्षिन् पु० माद्यति मद-ल्युट् कर्म०। खञ्जनपक्षिणि शब्दच०

मदनपाठक पु० मदनोद्दीपनार्थं पठति पठ-ण्वुल्। कारोहीपनशब्दकारके कोकिले राजनि०।

मदनमोहन पु० मदनमपि मोहयति सौन्दर्येण तृह-णिच् ल्यु। श्रीकृष्णे।

मदनललिता स्त्री "इंदाङ्काङ्कैर्मदनललिता यो भो नम सखाः" ह०र० टीकोक्ते षोडशाक्षरपादके छन्दोभेदे।

मदनलेख पु० मदनज्ञापनार्थं लेखः। स्वकीयानुरागज्ञापनार्थं नायकयोः परस्परं प्रति प्रेम्णे लेखे पत्रभेदे। यथा शकुन्तलायाम्"तुच्छ ण खाणे छिक्खमं" रत्नादि।

मदनबीज न० तन्त्रोक्ते (क्लीम्) इति बीजे

मदनशलाका स्त्री मदनोद्दीपिका शलाका तथाभूत शलाकेव वा।१कारोहीपकौषधे २सारसवृक्षे मेदि०३कोकिले शब्दर०।

मदनसदन न० ६त०। १स्त्रीचिह्नभेदे। ज्योतिषोक्ते लग्नावधिके सप्तमे स्थाने च।

मदनसारिका स्त्री मदनोद्दीपिका सारिका श०त०। (शारिका) पक्षिभेदे जटा०। [धान्यभेदे राजनि०।

मदनाग्रक पु० मदनं मादकमग्रमस्य कप्। कोद्रवे (कोदो)

मदनाङ्कुश पु० मदनस्याङ्कुश इव। १पुरुषचिह्ने लिङ्गे लिका० २मैथुनकाले नखाघाते च।

मदनायुध न० ६त०। स्त्रीचिह्ने शब्दच०। [राजनि०।

मदनायुष पु० मदनस्यायुर्यत्र सप्तम्या०। इक्षिकरञ्जपभेदे

मदनालय पु० ६त०। २स्त्रीचिह्ने ज्योतिषोक्ते लग्नावधिके सप्तमस्थाने मदनभवनादयोऽप्यत्र।

मदनावस्था स्त्री मदनजतावस्था श०त०। कामिनां स्मरजाते उन्मादादौ दशाभेदे दशाशब्दे दृश्यम्।

मदनी स्त्री माद्यत्यनया मद-ल्युट् ङीप्। १सुरायाम् रत्नि० २मुनाभौ रत्नमालाके च राजनि०।

मदनेच्छाफल पु० मदनेच्छां फलति फल-अच् ६त०। बदरवृक्षे राजनि०।

मदनोत्सव पु० मदननिमित्त उत्सवः। १फोल्लाकोत्सवे ७त०। २स्वर्वेश्यायाम् स्त्री शब्दर०।

मदप्रयोग पु० ६त०। गजानां मदोद्गमे क्रिया०। [शब्दच०।

मदभञ्जिनी स्त्री मदं भञ्जति भञ्ज-णिनि। शतमूल्याम्

मदयन्ती स्त्री मद-णिच्-अच् गौरा० ङीष्। वनमल्लिकायाम् (काठमल्लिका) राजनि०। स्वार्थे क वुञ्। मदयन्तिका तत्रैवार्थे शब्दरत्ना०।

मदयित्नु पु० मद-णिच्-इत्नुच्। १कामदेवे २मेघे ३गोखिले च मेदि०। ४मद्ये न० शब्दर०। ५मादके त्रि० त्रिका०।

मदलेखा स्त्री "भ्रमौ नः स्यात् मदलेखा" ह०र०उक्ते सप्तचरणादके छन्दोभेदे ६त०। २गजानां दानवारिणि कपोलौ

मदविच्छिन्न पु० ३त०। १मत्तगजे शब्दच०।२मदेन छिन्ने त्रि०।

मदशाक पु० मदार्थं शाकमस्य। उपोदक्यां शब्दच०।

मदसार पु० मदं सारयति गमयति सृ-णिच्-घञ् उप०स०। तृणवृक्षे राजनि०।

मदस्थल पु० ६त०। १सुरापाने शब्दरत्ना०। मदस्थानादयोऽप्यत्र। ज्योतिषोक्ते लग्नावधिके २सप्तमस्थाने च।

मदहस्तिनी स्त्री मदेन हस्तिनीव। अष्टाकरञ्जवृक्षे राजनि०

मदहेतु पु० ६त०। १मत्तताहेतौ २धातकीवृक्षे वैद्यकम्।

मदाघ पु० अग्निभेदे ततः। उपका० मोक्षप्रत्ययस्य इन्वे च अहन्वे च लुक्।

मदाढ्य पु० मदेन मदकारणेन (ताड़ि) रसेनाढ्यः। १तालवृक्षे राजनि०। २रक्तभिण्टयाम् स्त्री शब्दच०। ३मदयुक्ते त्रि०।

मदातङ्क पु० ६त०। मदजन्यरोगभेदे राजनि०।

मदात्यय पु० ६त०। मदनिमित्ते रोगभेदे तस्य निदानादि यथा"पु० १६० अ० उक्तं दृश्यम्। भावप्र० उक्तन्तु यथा "विषस्य ये गुणा दृष्टाः सन्निपातस्य कोपनाः। तएव मद्ये दृश्यन्ते विधे तु बलवत्तराः। तस्मादविधिपीतेन तथा मात्राधिकेन च। युक्तेन चाहितैरन्नैरकाले सेवितेन च। मद्येन खलु जायन्ते मदात्ययसमा गदाः"। अविधिप्रयुक्तं मद्यं विकारान्तरमप्युत्पादयतीत्याह। "निर्भक्तमेकान्तत एव मद्यं निषेव्यमाणं मनुजेन नित्यम्। उत्पादयेत् कष्टतमान् विकारानुत्पादयेच्चापि शरीरभेदम्"। एकान्ततो नैरन्तर्येण, विकारान् मदात्ययादीन्। शरीरस्य भेदं नाशम्। मदात्ययादीनां हेत्वन्तरमप्याह "क्रुद्धेन भीतेन विपाण्डितेन शोकाभितप्तेन बुभुक्षितेन। व्यायामभाराध्वपरिक्षतेन वेगावरोधाभिहतेन चापि। अत्यन्तकृशावततोदरेण स्त्री-

क्षीर्णभुक्तेन तथाऽजीर्णेन । उष्णाभिताप्तेन च देह्यमानं करोति मद्यं विविधान् विकारान् । तानेव विकारान् विशेषेति । "पानालयं परमदं पानाजीर्णमथापि वा" । पानविकारान् विशेषेति । "पानविभ्रमसंज्ञञ्च तेषां वक्ष्यामि लक्षणम् । तत्र मदात्ययस्य सामान्यलक्षणमाह "शरीरदुःखं बलवत्प्रमोहो हृदयव्यथा । अरतिः प्रततं तृष्णा ज्वरः शीतोष्णलक्षणः । शिरः पार्श्वास्थिसन्धीनां वेदना विद्यते तथा । जाग्रतोऽतिबलात् जृम्भास्फुरणं वेपनं श्रमः । अरोचिष्णुः कासश्च श्वासो हिक्काप्रजागरः । शरीरकम्पः कर्णौ च सक्वरोगाश्चिरव्यधः । ऊर्ध्वाधोभेदतस्त्रेधा दोषाः पित्तकफात्मकः । भ्रमः प्रलापो रूपाणामसत्ताचैव दर्शनम् । तृषाभक्षणतापर्षपांशुभिश्चावपूरितम् । प्रकर्षेणं विकर्षैव भ्रान्तचेताः स मन्यते । व्याकुलानामशस्तानां सत्त्वानां दर्शनानि च । मदात्ययस्य रूपाणि वर्जयेत्तानि लक्षयेत्" । अथ मदात्ययस्य वातिकस्य निदानमाह "स्त्रीशोकभयभाराध्वकर्मभिर्योऽतिकर्शितः । रूक्षाल्पभोजनो यश्च यः पिबत्यतिमात्रया । रूक्षं परिचितं मद्यं निशि शिशिरे च । करोति तस्य तच्छीघ्रं वातप्रायं मदात्ययम्" । तत् मद्यम् । अथ तस्य लक्षणमाह । "हिक्काश्वासविसंज्ञत्वपार्श्वशूलप्रजागरैः । विद्याद्वातप्रकोपस्य वातप्रायं मदात्ययम्" । अथ पैत्तिकस्य निदानमाह "तीक्ष्णोष्णं मद्यमत्यर्थं योऽतिमात्रं निषेवते । अत्युष्णतीक्ष्णभोजी च क्रोधनोऽम्लातपप्रियः । तस्योपजायते तीव्रः पित्तप्रायो मदात्ययः" । अथ तस्य लक्षणमाह "तृष्णादाहज्वरस्वेदमोहातीसारविभ्रमैः । विद्यात्पित्तबलस्यैतं पित्तप्रायं मदात्ययम्" । अथ श्लैष्मिकस्य मदात्ययस्य निदानमाह "मधुरस्निग्धगुर्वाभी यः पिबत्यतिमात्रया । अव्यायामदिवास्वप्नप्रसक्तासनसंस्थितः । मदात्ययं कफप्रायं स नरो लभते ध्रुवम्" । अथ तस्य लक्षणमाह "छर्दिरोचकहृल्लासतन्द्राक्लैब्यगौरवैः । विद्याच्छ्लेष्मपरीतस्य कफप्रायं मदात्ययम्" । अथ सन्निपातिकस्य मदात्ययस्य निदानं लक्षणञ्चाह "त्रिदोषहेतुभिः सर्वैः सर्वैर्लिङ्गैर्मदात्ययः" । अथ परमदलक्षणमाह "क्षेपोच्छ्वासोऽङ्गशून्यता विरसास्यता च विण्मूत्रभक्तिरत्र तन्निरोधकरं । लिङ्गं परस्य तं मदज्ञ वदन्ति तज्ज्ञा कृष्णा रुजा शिरसि सन्धिषु चापि भेदः" । तन्द्रिस्तन्द्रा । पानाजीर्णमाह "आत्मानसयमस्य शौद्धिरत्यं विदाहः पाने त्वजीर्णलक्षणानि लक्ष्यानि" । शुद्धिरत्यं वान्तिः शुद्धारो वा । पीयत इति पानं मद्यम् । पानविभ्रममाह "हृद्गात्रतोदकफसंस्रवकण्ठधूममूर्च्छाभमीज्वरशिरोरुजनप्रदेहाः । हेयः सुराकृविकृतेषु च तेषु तेषु तं पानविभ्रमसमन्वयिनेषु धीराः । कण्ठधूमः निर्गम इव । प्रदेहः कफेन लिप्तास्यता । हेयः सुराकृविकृतेषु सुराविकारेषु अन्नविकारेषु च हेयः । अथाध्यानं मदात्ययादीनां लक्षणमाह । दीनोत्तरोऽमतिशीतमसन्दाहम् नैत्रप्रसादमतिपानकृतं त्यजेच्च । जिह्वोष्ठनखसितं त्वच वापि नीलम् पीते च यस्य नयने रुधिरप्रभे च । हिक्काज्वरो बमथुवेपथुपार्श्वमूलाः कासश्रमावपि च पानकृतं त्यजेत्तम्" ।

मदाम्लात पु० मदस्यातिक्रमे आम्लातः । गजपुष्पे टङ्कावृक्षे हारा० ।

मदाम्बर पु० मदो दानमम्बरमिवास्य । मतगजे त्रिका० ।

मदार पुंस्त्री० मद आरन् । १वराहे उज्ज्वल० स्त्रियां ङीष् । २धूर्त्ते १मत्तगजे विश्वः । ४कासके ५रूपभेदे उज्ज्वलादिकोः । [त्रिका०]

मदार्म्मद पु० मदजन्यमर्म्म ददाति दा-क । कदम्बवृक्षे

मदालस त्रि० मदेनालसः । १मदेनालसे २गन्धर्वराजविश्वावसुकन्यायां स्त्री । [शब्दमाला

मदालापिन् पु० मदेनालपति आ+लप-णिनि । कोकिले

मदाह पु० मदः मृगमद आह्वा यस्य । मृगमदे कर्पूरः त्रिका० ।

मदि स्त्री मद्यति हृष्यत्येतस्मिन्मद-इन् पृषो० । (मद) ख्याते क्षिप्रसाधने क्षुपवल्लभेदे स्वार्थे क । तत्रार्थे क्षिपञ्जे २।६६ पृ०मदिकादानविधिर्द्रष्टव्यः । तद्गुणाः २।१८ पृ० तत्र द्रष्टव्यम् ।

मदिन् त्रि० मदयतीति मद-णिनि । तर्पके यजु० ६।२७।

मदिन्तम त्रि० अतिशयेन मदी तमप् वेदे इमादेशः । अतिशयतर्पके यजु० ६।२७ ।

मदिरा स्त्री मद-करणे किरच् । "माध्वीकं पानसं द्राक्षं खार्जूरं तालमैक्षवम् । मैरेयं मालिकं टाङ्कं मधूकं नारिकेलजम् । सप्तमद्यविकारोक्तं मद्यानि हृदयेच तं इत्युक्ते १मद्यसामान्ये २मत्तखञ्जने शब्दरत्ना० । ३रक्तखदिरे पु० शब्दच० । कासभेदे तद्भेदप्रयोगादयो यथा

"गौड़ी तु त्रिविधैर्येया पैष्टी क्षेमनवर्ग्ययोः। मरद्-गौड्यासवेषु माध्वी याज्या न चान्यया। कादम्बरी शर्करादिमद्यं सुगीतं ब्रह्मकरं महाधम्। माध्वीकं क्षौद्रं द्राक्षजातं मद्यं सुगीतं गुरु तर्पणञ्च। अन्यथा कृते पानं मद्यं सन्नाणशोभदम्। अन्नदोषमदात्यय-कारकं मूर्च्छनञ्च तत्" । "पशुं क्षितमद्यमेवनमद्यं वा पिच्छिलं विगन्धं वा। दोषावरुमविवेकान् मद्यं दुष्टं विवर्जयेत् सर्वम्। मद्यप्रयोगं कुर्वन्ति शूद्रादिषु महार्हिषु। द्विजैरुक्तमिदं न याह्यं यद्यप्युक्तौषधैर्नृतम्" राजनि०। अधिकं मद्यशब्दे द्रष्टव्यम्। ३वसुदेवस्य पत्न्यां हरिवं० २६ अ०। ४दुर्गायां १७८ अ०। "सप्तप्रकारजातावलितो च गुरुः कविभिः कथिता मदिरा" इ० र० टी० उक्ते द्वाविंशत्यक्षरपादके ६छन्दोभेदे स्त्री।

मदिराक्षी पु० १विराटस्य भ्रातरि भा०वि०२१अ०। मदिरा-मत्तस्येव नेत्रे यस्याः ङीष्। २मत्तस्येव नेत्रे स्त्रियां ङीष्। [मद्यपाने मद्यस्थानार्थे गृहे अमरः

मदिराग्रह न० मदिरस्थानार्थं गृहम् भाव० त०।

मदिराश्व पु० १विराटस्यपक्षेनार्यातभेदे भा० आश्व० २अ०। शिरस्यश्वस्य मुखे २प्राचीने ऋषभेदे भा०अनु०१४७अ०

मदिरासख पु० ६त० टच्समा०। आम्रवृक्षे शटा०। तस्य मदिराहृल्लाभादत्वात् तथात्वम्। [मदिरायां क्षेमच०।

मदिष्ठा स्त्री अतिशयेन मदिनी मदयित्री इत्यत्र दिवोदासः।

मदेमहि पु० यागयाचायाम् निघण्टुः।

मदेव पु० मद-वा०एव। मत्ते ऋ०१०।११०।६।

मदोत्कट पु० मदेन दानवारिणा उत्कटः उद्भटः। १मत्त-गजे अमरः २मदिरायां स्त्री राजनि०। ३मदोद्धते त्रि०।

मदोदग्र पु० मदेन हर्षेण दर्पेण वा उद्ग्रः उच्चः। १मत्ते "मदोदग्राः करिघटाः" रघुः। २नार्यां स्त्री शब्दमा०।

मदोद्धत त्रि० मदेन उद्धतः। मत्ते शटा०।

मदोन्मत्त पु० "मन्त्रो वाप्यथ वा विद्या यन्नाधिष्ठदमाक्षरः। फट्कारपल्लवाद्यां मदोन्मत्त इदाहृतः" तन्त्रसारोक्ते १मन्त्रभेदे २मदेनोन्मत्ते त्रि०।

मद्गु पु०मद्-उ न्यङ्वा०। (पानिकोडि) १पक्षिभेदे अमरः। "मद्गुः स्त्रिग्धो वातनाशी भेदकः शुक्रकारकः। रक्त-पित्तविनाशी च शीतलः परिकीर्त्तितः" राजव०। २मद्गुसदृशे नौचरपक्षिणि।

मद्गुर पुंस्त्री०मद्-अरच् न्यङ्वा०। (मागुर)१मत्स्यभेदे। आर्षे क। तस्येव अमरः स्त्रियां ङीष्। तद्गुणाः मत्स्यशब्दे भावप्र०उक्ताः। "निशादो मद्गुरं क्षते" भा० अनु० ४८ अ० २वङ्गीयजातिभेदे (डुबुरि) पुंस्त्री०। "मद्गूनू मीनभेदान् जाति ला-क तस्य रः" मीनघण्टः। अन्न-भक्षणेन मीनहारित्वात् तस्य तथात्वम्। "तस्मादेते अन्ये मन्नाः मद्गुरा नाम विश्रुताः। ये चरन्ति यदाऽऽर्द्र-स्थात् वक्त्रोदरचारिणः" हरिवं० ८५अ०।

मद्गुरप्रिया स्त्री मद्गुरस्य प्रियेव। मत्स्यीमत्स्ये क्षेमच० "मद्गुरस्य प्रिया मद्गुः" अमरः।

मद्गुरसी स्त्री मद्गोः मद्गुरस्येव रस-आस्वादोऽस्याः गौरा० ङीष्। मत्स्यीमत्स्ये शब्दर०।

मद्य न० माद्यत्यनेन करणे यत्। मदिराशब्दे उक्ते माध्वी-कादिद्वादशविधे मादकद्रव्ये अमरः। मद्यभेदा वर्णभेदेन तत्पानविधिनिषेधादिकं प्रा० वि० उक्तं यथा

"ब्रह्मवैवर्ते "पानसं द्राक्षमाधूकं खार्जूरं ताडमैक्षवम्। माध्वीकं टाङ्कमाध्वीकं मैरेयं नारिकेलजम्। समानानि विजानीयान्मद्यान्येकादशैव तु। द्वादशन्तु सुरामद्यं सर्वे-ष्वाधमं कृतम्" । अनेनैकादशानां सुरात्वं निषेधयति मद्यशब्दस्तु मदहेतुद्रव्यद्वयमात्रवचनः तस्मादेव वचनाच्च न मद्यमात्रं सुराशब्दार्थः। तथा च ब्रह्मस्मृतिः "गौड़ीं माध्वीं सुरां पैष्टीं पीत्वा विप्रः समाचरेत्। तप्तकृच्छ्रं पराकञ्च चान्द्रायणमतक्रमात्"। अन्यासां सुरात्वे क्रमेण प्रायश्चित्तं न स्यात्। यथा भविष्ये "सुरा तु पैष्टी सञ्ज्ञोक्ता न तस्यास्त्वितरे समे"। पैष्टीति तण्डुलविकारमात्रोपलक्षणम्। इतरे गौड़ीमाध्व्यौ अतोऽन्नविकार एव सुराशब्दस्य रूढत्वात् त्रिविधा सुरेति गौड़ीमाध्व्योर्गौणसुरात्वख्यापनार्थम्। तेनैतत्-पानेऽपि महापातकत्वमतिदिशति "यश्चैवैता तथा सुरेति" पैष्ट्यां पूर्वप्रसिद्धिं दर्शयति यथा पैष्टी सुरा तथा सर्वा गौड़ी माध्वी च पूर्ववचनोक्ता पैष्टीदृष्टान्तेनात्र दर्शिता न पातव्या द्विजोत्तमैर्नाङ्गवैरित्यर्थः। नैवर्त्तिकपरत्वे उत्तमपदानर्थक्यात्। न च वस्तुवचनानर्थक्यपरिहारार्थम् उत्तमप्रतिपादितानर्थक्यं युक्तं वस्तुवचनस्य जघन्यतोयोप-योगे चरितार्थत्वात्। अतो ब्राह्मणस्य त्रिविधसुरापानं महापातकं क्षत्रियवैश्ययोस्तु "सुरा वै मलमन्नानामिति" वचनेन पैष्ट्रेवेति स्थितम्। गोविन्दराजविश्वरूपधा-रेश्वराणामसम्मतोऽयमर्थः। अतएव "एवं माध्वी च गौड़ी च पैष्टी च त्रिविधा सुरा। द्विजातिभिर्न पातव्या यदाचिदपि धर्मविदिति" यमवचनेऽपि द्विजा-

तिपदं ब्राह्मणपरमेव। अतएव द्विजिह्वसुरापाने अग्नि-दाहादीनां मद्यापातकं दूरे तावदस्तु दोषाभावमेवाह इक्षवाम्रवल्क्यः "कामादपि हि राजन्यो वैश्यश्चापि कथञ्चन। मद्यमेवासुरां पीत्वा न दोषं प्रतिपद्यते"। तदेवं पैष्टीनिषेधस्तैक्षिणानां गौड़ीमाध्वीनिषेधस्तु ब्राह्मणानामेव। नतु ब्राह्मणराजन्याविति विशेषणात् शूद्रविशस्य विवक्षितम्। अतः सर्वं ब्राह्मण्याः सुरापानं महापातकम्। उच्यते निषिध्यमानक्रियायां विशेषत्वेन तत्कर्तुरनुपादेयत्वात्तद्विशेषणं विशस्य विवक्षितं कृविकर्मत्ववत् अतस्तत्क्षत्रियवैश्यस्त्रीयामपि पाननिषेधः। यथा भविष्ये "तस्मात्र पेयं विप्रेण सुराग्रस्यं कथञ्चन। ब्राह्मण्यापि न पेया वै सुरा पापभयावहा"। "या ब्राह्मणी सुरापी स्यात् न तां देवाः पतिलोकं नयन्ति" इति श्रुतेः। "पतुरर्द्धशरीरेण भार्या यस्य सुरां पिबेत्। पतितार्द्धशरीरस्य निष्कृतिर्नोपपद्यते"। न चैवं क्षत्रियवैश्यस्त्रीपानमिति वाच्यं, ब्राह्मणीपदस्य निषिद्ध-सुरापानकर्तृभार्योपलक्षकत्वात् भार्यां यस्य सुरां पिबेदिति सामान्यश्रवणात्। पानस्य दूरीभूतस्याप्यव-धारणं च च कण्ठदेशादधोनयनं न तु मुखप्रवेशः। निशीथनाद्यं यशोधराख्ये पानशब्दप्रयोगात् यथोक्तं "लिङ्गञ्च सुरां कश्चित् पिबतीत्यभिधीयते। यावत्स क्रियते पक्वं मद्यभूयस्य प्रवेशनम्"। तत्र मद्यभूयपरिमाणमविवक्षितं मद्यभाण्डपानेऽपि लोके पानशब्दप्रयोगात् अतएव मुखप्रवेशनमात्रमविवक्षितं किन्तु येन मुखप्रवेशेन कण्ठादधोनयनं भवति अतस्त-देवोपलक्षयति अतएवोष्ठमात्रलेपे न पानव्यपदेशः अतस्तालोत्तमाङ्गसंस्कारप्रायश्चित्तम्। एतेन केवलौष्ठसंयोगे तप्तकृच्छ्रसंस्कारावितिवाक्यस्य व्याख्यानमपकृतं मानाभिज्ञैरिति।"

मद्यभेदगुणादिकं भावप्र० उक्तं यथा

"मद्यन्तु गौड्यैरयमिरा च मदिरा सुरा। कादम्बरी वारुणी च हालापि बलवल्लभा। पेयं यन्मादकं लोकैस्तन्मद्यमभिधीयते। यथारिष्टं सुरा गौड्यराद्यवाद्य-मनेकधा। मद्यं सर्वं भवेदुष्णं पित्तलङ्घातनाशनम्। भेदनं शीघ्रगाकर्षि रूक्षं कफहरं परम्। बल्यन्तु दीपनं हृद्यं पाचनं वातनाशि च। तीक्ष्णं सूक्ष्मन्तु विशदं व्यवायि च विकाशि च"। अथारिष्टस्य लक्षणं गुणाश्च "पक्वौषधास्तु यत्र द्रव्यं यत्तदादरिष्टकम्"। अरिष्टं मद्यमिति लोके। यथा द्राक्षारिष्टम्। दश-मूलारिष्टम्। बब्बूलारिष्टमिति। "अरिष्टं सर्व-पाकेन सर्वतश्च गुणाधिकम्। अरिष्टस्य गुणा प्रेया दीपनं बृंहणं लघु"। अथ सुरालक्षणं गुणाश्च "शालिषष्टिकपिष्टादिसंभृतं मद्यं सुरा स्मृता। सुरा-गुणैः सकलमद्यदुष्टिमेदःकफप्रदा। योगवाही व्यवायि गुरुर्मार्दवकरणी बृंहणी वातघ्नी"। अथ सुराभेदो वारुणी तस्या लक्षणं गुणाश्च "धानजैर्वारुणी पिष्टै-र्वारुणी विधिना स्मृता। संधितैस्तालखर्जूररसैर्वा सापि वारुणी। सुरावद्गुणी ज्ञेयो दीपनश्चाम्लपाचनः"। सुरातो भेदार्थं वक्ष्यति। अथ सीधु-लक्षणं लक्षणं गुणाश्च "इक्षोः पक्वैः रसैः सिद्धः सीधुः पक्वरसश्च सः। आमैस्तैरेव यः सीधुः स च गौतरसः स्मृतः। सीधुः पक्वरसः श्रेष्ठः सरामि-लवणार्द्रकः। वातपित्तकरः सद्यः क्षोभणो रोचनो लघुः। विबन्धमेदःशोफार्शःशोथोदरकफामवान्। तस्मादल्पगुणः शीतरसः सैरेयकः स्मृतः।" अथासवस्य लक्षणं गुणाश्च "यदपक्वौषधाभ्यां सिद्धं मद्यं स आसवः। यथा लोध्रासवादिः। "आसवस्य गुणा प्रेया दीपनं बृंहणं लघु"। अथ नवसुराद्यमद्य-गुणाः। "मद्यं नवमभिष्यन्दि त्रिदोषजनकं गुरु। अकृतं दंष्ट्रिणश्चाहि दुर्गन्धं विशदं गुरु। क्षौद्रेण-देव रोचिष्णु क्षिप्तेष्वानिलपित्तकृत्। कृतं तन्निर्मुखस्तु क्षोतोविशोधनम्"। अथ खाण्डिकानां मद्य विधानं चेष्टाविशेषाः। "खाण्डिके शीतलाक्षादि राजसे खाण्डवादिकम्। तामसे निम्बपत्रञ्च सिद्धास्तु मदिरा चरेत्"। आचरेत् कुर्यात् "विधिना भाजने क्षिप्ते-रसैर्वा बहुभिः सह। प्रकृष्टो यः पिनेष्टद्यं तच्च स्यादासवं यथा। किन्तु मद्यं स्वभावेन यथैवाद्यं तथा स्मृतम्। अयुक्तियुक्तं रोगाय युक्तियुक्तं यथामृतम्"। अथ मद्यानां सम्प्रत्यभावोपायः। "शुक्लैकवासवदलीरक्त-धान्यवेला यवर्षबन् यदि वाप्यभिष्यन्दि। खाभा-विकं सुखजसज्जति पूतिगन्धं गन्धस्तु मद्यगुणादि-भवस्तु नूनम्।" औषधार्थमपि विप्रैर्मद्यं न पेयम् मदिरामद्ये राजनि० वाक्यं दर्शितम्।

सुरादौ ब्राह्मणस्य मद्यनिषेधो यथा

"यदेवाद्यापेयञ्च तथैवाद्यमेव च। द्विजातीना-मनाद्योच्चं नित्यं मद्यमिति स्थितम्। तस्मात् सर्व-

प्रयत्नेन मद्यं नित्यं विवर्जयेत्। पीत्वा पतति कर्म-भ्यस्तस्माद्धो द्विजोत्तमः। भक्षयित्वाऽभक्ष्याणि पीत्वा-ऽपेयान्यपि द्विजः। नाधिकारी भवेत्तावद्यावत्तद्य जठरा-ग्नयः। तस्मात् परिहरेद्विप्रमभक्ष्याणि प्रयत्नतः। अपेयानि च विप्रो वै पीत्वा तदाति रौरवम्। कूर्म पु० १६ अ०। "द्विजस्य पूजादौ मद्यदानविध्यनुकल्प निषेधो यथा। "मदिरां मुक्तो दद्यात् अन्यत् पानन्तु कामतः। अवश्यं विहितं यत्र मद्यं तत्र द्विजः पुनः। नारिकेलजलं कांस्ये ताम्रे च विल्वजेन्मधु। नापद्यपि द्विजो मद्यं कदाचित् विल्वजेदपि। अते, पुष्पासवादुक्तात् अक्षनाहा विशेषतः। राजन्यवैश्यौ तथा मद्यं सचिवः सौम्निकादयः। दद्युर्न रक्षिं भूप समया विभवाय च। मूषाजातुमते मद्यं ददत् पाप-मवाप्नुयात्" कालिका पु० ६६ अ०। अथ ब्राह्मणस्य मद्यपाननिषेधकशुक्रशापो यथा "वैशाम्पायन उवाच। सुरापानादृषां प्राप्य विद्वान् संज्ञानार्थं प्राप्य चैवाति-घोरम्। इह कश्चिदपि तत्राभिरूपं पीतं तया सुरया मोहितेन। समन्युरुत्थाय महानुभावस्तदोशना विप्र-क्षितं चिकीर्षुः। काव्यः स्वयं वाक्यमिदं जगाद सुरापानं प्रति वै जातमन्युः। यो ब्राह्मणोऽद्यप्रभृतीह कश्चित् मोहात् सुरां पास्यति मन्दबुद्धिः। अपेतधर्मो ब्रह्महा चैव स स्यादस्मिंल्लोके गर्हितः स्यात् परे च। यथा चेयं विप्रधर्मोक्षसीमा मर्यादा वै स्थापिता सर्व-लोके। मनो विप्राः शुश्रुवांसो गुरूणां देवालोका-लोपश्चरन्तु सर्वे" भा० आ० ७६ अ०। "नारिकेलस्य खार्जूरं पानस्य तथैव च। ऐक्षवं मधुकं टाङ्ग तालस्यैव च मालिकम्। द्राक्षन्तु दशमं श्रेयं गौड़ं चैकादशं स्मृतम्। पैष्टन्तु द्वादशं प्रोक्तं सर्वेषामधमं स्मृतम्। मध्यमं मधुजं गौड़ं श्रेष्ठोत्तममिष्यते। एतत् द्वादशकं मद्यं न पातव्यं द्विजैः क्वचित्। क्षत्रि-याद्यैः विवेत् सर्वं पैष्टीमेकन्तु वर्जयेत्। सुरां पीत्वा द्विजो मोहात् कामात् तक्रादिमिश्रिताम्। त्रैवार्षिकं व्रतं कृच्छ्रादीवन्निश्चे त्र वार्षिकम्। तक्रादिमिश्रितां किञ्चित् सुरां पीत्वा त्वकामतः। कृच्छ्राद्दपादसहस्रं पुनः संस्कारमर्हति। सुरप्रवेशमात्रे तु प्रायश्चित्तार्द्ध-माचरेत्। अनुपनीतो देवेशि! व्रतं त्रैवार्षिकं चरेत्। ऊर्ध्वकालाचारी स्याद् ब्रह्मचर्यं मवाप्नि वा। आपद्य सर्वं वृद्धं वा बालादर्द्धं विनिर्दिशेत्। स्त्रीणां च विशेषेण अतिकृच्छ्रद्वयं चरेत्। अजातिसाधिते तक्रिन् तदर्द्धं व्रतमाचरेत्। पैष्टीपाने ब्राह्मणस्य मरणान्तिक-मुच्यते। माध्वीगौड़ीसुरापाने द्वादशाब्दं विधी-यते। इतरेषान्तु पानेन गुरुतल्पव्रतेन तु। राजन्य-वैश्ययोरापि गौड़ी माध्वी न शस्यते। मोहात् क्षत्रिय वैश्यश्च पीत्वा कृच्छ्रद्वयं चरेत्। शूद्रोऽपि गौड़ीं पैष्टीञ्च न विवेदीनसंस्कृताम्। कामात् पीत्वा सुरां विप्रो मरणान्तिकमाचरेत्। चरेच्चान्द्रायणं ज्ञानात् क्षत्रियो वैश्य एव च। पैष्टीपाने तु शूद्रस्य प्राजा-पत्यं विनिर्दिशेत्। ज्ञानादभ्यासयोगे तु चान्द्रायण-मेव कृतम्। नारिकेलं तथा ज्ञानाद्विप्रश्चान्द्रायणेन तु। क्षत्रियश्चैव वैश्यश्च प्राजापत्येन शुध्यति। अपक्वं पानसञ्चैव खार्जूरं बदरं तथा। स्यापयित्वा घटे नित्यं दद्यादासप्तपः परम्। त्रैलोक्यविजयाश्चैव मातुलुङ्गं तथैव च। समेऽहनि ततो दद्यात् सन्धा-नात् सप्तमीरितम्। दधि मधु घृतञ्चापि माक्षिकं तिक्तकं तथा। अनुपाने तु देवेशि! द्राक्षमद्यं सुनि-श्चितम्। विड्डं शालयो मूलं समभागेन योजितम्। अधुना सह संस्थाप्य श्रेष्ठपात्रे समाचरेत्। पिप्पलीत्रयचूर्णं दत्त्वा मधुना मद्यमीरितम्। पानसं पक्वखर्जूरमार्द्रं क्षौमसत्तारसम्। एकीकृत्यान्यसन्धानात् खार्जूरं मद्यमी-रितम्। पक्वताम्रं दन्तिपाकं कङ्कभद्रं तथैव च। एतैरेव सुसन्धानात् ताम्रमद्यं प्रकीर्त्तितम्। इक्षुदण्डं मरीचञ्च बदरञ्च तथा दधि। श्रेष्ठे तु सर्वं दत्त्वा इक्षुमद्यं प्रकीर्त्तितम्। नवं मधु तथा बिल्वं पक्वं शर्करया सह। सन्धानाज्जायते मद्यं माध्वीकं सरतो रसम्। प्रता-मरी टङ्कमूलं लक्ष्मणं पद्ममेव च। मधुना सह सन्धा-नात् टङ्कमाध्वीकमीरितम्। माकूरमूलं बदरी शर्करा च तथैव च। एतान्येकत्र सन्धानात् खैरेयं मद्यमीरि-तम्। इन्द्रजिह्वा पक्वताली नारिकेलजलन्तथा। कदली-फलसन्धानन्मद्यं तन्नारिकेलजम्। दधि त्रैलोक्यविजया तथैव च शरीरका। गुडेन सह सन्धानात् गौड़ीमद्यं प्रकीर्त्तितम्। शर्करोमूर्द्धसिद्धाम्लसप्तोदकसमन्वितम्। यद्यो सन्धापयेत् किञ्चित् स्थापयित्वा दिनत्रयम्। शेषेऽहनि तु संप्राप्ते जीवन्तं तत्र निःक्षिपेत्। मूलकेर मरीचञ्च मातुलुङ्गं तथैव च। एतेष्वेव सन्धानात् पैष्टीमद्यं प्रकीर्त्तितम्" मत्स्यसूक्ते १६पटले। "सिंहमन्यो मनोहीरो नवीरो मद्यपायतः। कलौ तु भारते वर्षे लोका

भारतवासिनः। मद्ये मद्ये सुरां पीत्वा वर्षभ्रष्टा भवन्ति हि" तत्पत्तितन्त्रे ६४ पटले। "दीव्यवीरमयो भावः कलौ नास्ति कदाचन। केवलं पशुभावेन मन्त्रसिद्धिर्भवेन्नृणाम्" महानिर्वाणतन्त्रम्। "न दद्याद् ब्राह्मणो मद्यं महादेव्यै कथञ्चन। वामकामो ब्राह्मणो हि मद्यं मांसं न भक्षयेत्" तन्त्रम्। भैरवतन्त्रे "नारिकेलोदकं कांस्ये ताम्रे गव्यं तथा मधु। राजन्यवैश्ययोर्देयं न द्विजस्य कदाचन। एवं प्रदानमात्रेण क्षीणायुर्ब्राह्मणो भवेत्"। कलौ मद्यपानादिनिषेधो यथा याज्ञवल्क्यदीपकलिकायां ब्रह्मपु० "नरास्थमेधौ मद्यञ्च कलौ वर्ज्यौ द्विजातिभिः" निषेधविषयं स्मरयति यथा "मद्यमद्येयमेवमनिर्याह्यम्"। अनिर्याह्यस्वीकार्य्यमिति कल्पतरुः। कालिकापु०। "स्वगात्ररुधिरं दत्त्वा चात्महत्यामवाप्नुयात्। मद्यं दत्त्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते"। स्मृतिः "ताम्रे चेक्षुरसो मद्यं पयसा यवचूर्णकम्। गव्यञ्च ताम्रपात्रस्थं मद्यतुल्यं स्मृतं बुधैः"। अतो मद्यप्रतिनिधिदानमपि न युक्तम्" तिथितत्त्वं रघु०। मद्यतुल्यं यथा "नारिकेलोदकं कांस्ये ताम्रपात्रे स्थितं मधु। गव्यञ्च ताम्रपात्रस्थं मद्यतुल्यं स्मृतं बुधैः" कर्मविपाकः।

मद्यकीट पु० मद्यजातः कीटः। सुराजाते कीटभेदे हेम०।

मद्यद्रुम पु० मद्यहेतुर्द्रुमः ष०त०। माडद्रुमे राजनि०।

मद्यप त्रि० मद्यं पिबति पा–क। १मद्यपायिनि २दानवभेदे पु० हरिवं २४० अ०।

मद्यपङ्क पु० मद्यञ्च पङ्क इव। सुराकल्के (मेकोवा) हेम०।

मद्यपाचन न० मद्यपैरश्यते अश–कर्मणि ल्युट्। मद्यपानरोचके अवदंशे मद्ये (चाटनी) हेम०।

मद्यपीत त्रि० पीतं मद्यं येन बहु० परनि०। सुरापानकर्त्तरि स्त्रियां ङीप्।

मद्यपुष्पा स्त्री मद्यं मदसाधनं पुष्पं यस्याः ष०त०। धातक्यां (धाइफुल) राजनि०। [जाते हेमच०।

मद्यबीज न० द्वन्द्व०। किण्वादौ (बाखर) मद्यकारणे पदार्थे

मद्यवासिनी स्त्री मद्यस्येव वासो गन्धो विद्यते वासस्ये नाच्छा० इनि। धातकीवृक्षे (धाइफुल) राजनि०।

मद्यसन्धान न० मद्यस्य मद्योत्पादनार्थं सन्धानम् अधिकरणे। मद्योत्पादनव्यापारे हेमच०। [राजनि०

मद्यामोद पु० मद्यस्येव आमोदः गन्धोऽस्य। बकुलवृक्षे

मद्र पु० मद–रक्। "विराटपार्श्ववोर्मध्ये पूर्वदक्षिणेन च। मद्रदेशः समाख्यातः" इत्युक्ते १देशे २वर्षे ३मङ्गले च। ह०सं० १४अ०।

मधु न मन–उ नस्य धः। १मद्ये "गजं गजं जघ्नं मूढ! मधु यावत् पिबाम्यहम्" देवीभा०। २चौद्रे "मधु वाता ऋतायते" इति मधुस्तुत्यम्। ३पुष्परसे शब्दर०। "मधु द्विरेफः कुसुमैकपात्रे" कुमारः। ४जले च विश्वः। ५मधुररसे च। "मधुक्षरन्ति सिन्धवः" इति मधुस्तुत्यम्। ६मधुरे त्रि० ७विष्णुकर्णमलजाते दैत्यभेदे पु०। "विष्णुकर्णमलोद्भूतावसुरौ मधुकैटभौ" इति देवीभा० कृष्णोनखाभर्त्तरि दैत्यभेदे पु० एतत्कथा ह०वंशपर्व्वणी १०चैत्रे मासि (बौद्ध) ११डक्षभेदे च मेदि० १२अशोकवृक्षे हेम० १३यष्टिमधौ पु० शब्दर० १४प्राणिनां शुभाशुभकर्मणि न०विष्णुस०भा०। १५जीवन्त्यां स्त्री अमरः। १६चन्दिभेदे १७खगभेदे च पु० विश्वः।

मधुकण्ठ पुंस्त्री० मधुः मधुरः कण्ठोऽस्य। कोकिले त्रिका०। स्त्रियां ङीष्।

मधुकर पुंस्त्री०मधूनि करोति मधिव निम्नं दयति ल अच्। १भ्रमरे अमरः २तद्योषिति स्त्री ङीष्। ३कामिजने धरणिः। ४भृङ्गराजे च पु०रत्नमा०मधुभृदादयोऽपि अमरे।

मधुककटी स्त्री मधु मधुरा ककटी। १जम्बीरभेदे २मिष्टखर्जूरिकायाञ्च राजनि०। स्वार्थे क ह्रस्वः टाप्। मधुककटिका बीजपूरे। [च मेदि०।

मधुका स्त्री मधिव दृवार्थे कन्। १यष्टिमधौ, २मधुपर्णीवृक्षे

मधुकोष पु० मध्वर्थं कृतः कोषः। (मौचाक) मधिकाकृते कोषाकारे पदार्थे शब्दच०। [क तत्रैव।

मधुक्षीर पु० मधु मधुरं क्षीरमस्य। खर्जूरवृक्षे। स्वार्थे

मधुखर्जूरी स्त्री मधुर्मधुरा खर्जूरी। अतिमिष्टखर्जूरीभेदे राजनि०।

मधुच्छदा स्त्री मधुर्मधुरः छदोऽस्याः। मधुरपिप्पलायाम् भावप्र०

मधुज न० मधुनो जायते जन ड। १सिक्थके (मोम) राजनि० मधुदैत्यमेदोजातायां २भूमौ स्त्री शब्दच०।

मधुजम्बीर पु० मधुर्मधुरः जम्बीरः। अतिमिष्टजम्बीरे। (कमलालेबु) राजनि०।

मधुजित् पु० मधुसुरभेदं जितवान्-जि क्विप्। विष्णौ शब्दरत्ना० मधुशत्रु मधुरिपुप्रभृतयोऽप्यत्र।

मधुतृण न० कर्म०। दर्भे त्रिका०। पुंस्त्वं राजनि०।

मधुत्रय न० मधूनां मधुरायाम् त्रयम्। मधुरतिष्ठानां त्रये राजनि०। मधुत्रिकमप्यत्र न०।

मधुदूत पु० मधोर्वसन्तस्य दूत इवाप्रियकरत्वात्। १कोकिले त्रिका० २पाटलायां स्त्री ङीष् भावप्र०।

मधुद्रव पु० मधुरो द्रवोऽस्य। रक्तक्षियौ शब्दर०।

मधुद्रुम पु० मद्यार्थं मद्यार्थं द्रुमः। (महुआ) वृक्षभेदे अमरः। तत्पुष्पेण हि गौड़ीयमधुसम्भवः।

मधुधूलि पु० मधुर्मधुरो धूलिरिव। खण्डे (खांड) गुड़विकारादौ हेमच०। [धेनुशब्दे ३६०६ पृ० दृश्यम्।

मधुधेनु स्त्री० दानार्थं कल्पितायां मधुप्रभृतिद्रव्यान्वितधेनौ।

मधुप पु० मधु पिबति पा-क। १भ्रमरे अमरः २मधुपायिनि त्रि०। "प्रारब्धो मधुपैरकारचषको" इत्युद्भटः।

मधुपर्क न० पृष-घञ् मधुनः पर्को योगो यत्र। मधुयुते कांस्यपात्रस्थे कांस्यपात्रान्तरेणाहृते "दधि सर्पिर्जलं क्षौद्रं तिस्रो वैतेन पञ्चभिः। प्रोच्यते मधुपर्कस्तु" इत्युक्ते दध्यादिद्रव्यपञ्चके।

मधुपर्णी स्त्री मधु इव क्षितकरं पर्णं यस्याः। १गुडूच्याम् अमरः। २गाम्भार्यां २नीलीवृक्षे मेदि० ४वराङ्गकान्तायाम् ५मधुवीजपूरे च राजनि०। [स्याम् शब्दमा०।

मधुपालिका स्त्री मधूनि पालयति पाल-ण्वुल्। गाम्भारीवृक्षे मधुपीलु पु० कर्म०। मधुरपीलौ राजनि०।

मधुपुरी स्त्री मधोर्दैत्यस्य पुरी। मथुरायाम् शब्दरत्ना०।

मधुपुष्प पु० मधुप्रचुरं पुष्पं यस्य। १मधुवृक्षे (महुआ) रत्नमा० २शिरीषवृक्षे, ३अशोकवृक्षे ४वकुलवृक्षे च ५दन्तीवृक्षे ६नागदन्तीवृक्षे च स्त्री टाप् राजनि०।

मधुप्रिय पु० मधु मद्यं प्रियं यस्य। १बलरामे त्रिका० मधु इव प्रियः। २भूमिजम्बौ जटाधरः।

मधुफल पु० मधु मद्यं फलं यस्य। १मधुनारिकेले २मधुखर्जूरिकायां स्त्री राजनि० टाप्।

मधुबल्ला स्त्री मधु बल्लं यत्र। माधवीलतायाम् राजनि०

मधुमक्षिका स्त्री मधुसञ्चारिका मक्षिका या०त० (मौमाछि) वरत्वायाम् अमरः। [राजनि०।

मधुमज्जन् पु० मधुरः मज्जा सारोऽस्य। क्षीरोटवृक्षे

मधुमत् त्रि० मधुर्मधुररसोऽस्त्यस्य मतुप्। १माधुर्ययुक्ते "मधुमत् पार्थिवं रजः" इति मधुरलक्षम्। २काश्मरीवृक्षे ३नदीभेदे राजनि० ४योगशास्त्रप्रसिद्धे सोमिनां चित्तवृत्तिभेदे ५वैदिकप्रसिद्धे "मधु वाता" इत्यादौ ऋक्सूक्ते तत्सोक्ते ६देवोनामिकाभेदे च स्त्री ङीष्।

मधुमर्कटी स्त्री मधुप्राता मर्कटी या०त०। (छिताबरुई) मधुप्राते वृक्षे।

मधुमल्लि(ली) स्त्री मद्य-रत् वा ङीष् मधुप्रधाना मल्लिः (ली) मालत्यां शब्दमाला।

मधुमस्तक न० "मधुतैलघृतैर्मध्ये वेष्टिताः पक्वितास्तु याः। मधुमस्तकवद्दिष्टम्" शब्दच० पक्वे पिष्टकभेदे।

मधुमूल न० मधु मधुरं मूलम्। (मौयाबु) आलुभेदे शब्दच०

मधुयष्टि स्त्री मधुरा यष्टिः कायम्। १रक्तौ २यष्टिमधौ शब्द० स्त्री वा ङीष्। [मधौ अमरः।

मधुयष्टिका स्त्री मधुः मधुरा यष्टिरिव दलार्थे कन्। यष्टि-

मधुर पु० मधु माधुर्यं राति रा-क, अस्त्यर्थे र वा। १गुड़ादिक्षे मिष्टरसे माधुर्यरसवति दलादौ च मेदि० "मधुरया मधुबोधितमाधवी" माघः। ३प्रिये ४लाटौ च त्रि० मेदि० ५रक्षक्षियौ ६राजाके ७रक्तेऽौ दगुडे ८शाकौ, १०क्षीरके च पु० राजनि० ११वङ्गे १२विषे च न० मेदि० १३मतपुष्पायां १४वष्टिमधौ १५मधुकवटिकायां १६मधूल्यां १७मेदायां १८मधुरानगर्यां च स्त्री मेदि० १६काकोल्यां २०शतावर्यां २१इक्षुक्षीरान्तरां २२पालङ्क्यशाके २३मिश्रायाञ्च (मौरी) स्त्री। स्वार्थे क। अत रत्नम्। मिश्रायाम् स्त्री अमरः।

मधुरजम्बीर पु० कर्म०। (कमलालेबु) जम्बीरभेदे राजनि०।

मधुरत्वच पु० मधुरा त्वचा यस्य। धववृक्षे त्रिका०।

मधुरफल पु० मधुरं फलमस्य। राजबदरे राजनि०।

मधुरवल्ली स्त्री कर्म०। मधुवीजपूरे जम्बीरभेदे राजनि०।

मधुरस पु० मधुन इव रसो यस्य। १रक्तौ भावप्र०। २ताले राजनि०। ३सुरायाम् स्त्री अमरः। ४द्राक्षायां ५दुग्धिकायां स्त्री मेदि० ६गाम्भार्यांञ्च भावप्र०। [राजनि०।

मधुरस्रव स्त्री मधुरं स्रवति स्रु-अच्। पियालवृक्षे

मधुराम्लक पु० कर्म०। आम्रातके शब्दच०।

मधु(धू)लम्न पु० मधुर्मधुररसो लम्नो यत्र पृषो० वा दीर्घः। रक्तशोभाञ्जने रत्नमाला।

मधु(धू)लिका स्त्री मधु माधुर्यं लाति ला-क पृषो० वा दीर्घः संज्ञायां कन् अत इत्वम् राजिकायां (राइसर्षा) राजनि०। [अमरः खिनि। मधुलेढीत्यत्र।

मधुलिह् पु० मधु लेढि आस्वादयति लिह क्विप्। भ्रमरे

मधुवन न० मधूनां दैत्यानामधिष्ठितं वनम् या०त०। १मथुराक्षेत्रस्थे वनभेदे किष्किन्धास्थे मधुप्रचुरे २वनभेदे च।

मधुवर्ग पु० ६त०। नानाविधमधुरसे भावप्र० दृश्यम्।

मधुवल्ली स्त्री मधुप्रधाना वल्ली। यष्टिमधौ राजनि०। [अमरः

मधुवार पु० मधुनो मद्यस्य वारः क्रमः। पुनःपुनःमद्यपानक्रमे

मधु(बी)बीज पु॰मधु मधुरं बी(बी)जं यस्य। दाडिमे राजनि॰
मधु(बी)बीजपूर पु॰ कर्म॰। मधुकर्कटिकायाम् राजनि॰।
मधुव्रत पुंस्त्री॰ मधु तत्सङ्ग्रहो व्रतं सततातुशीलनं यस्य। भ्रमरे अमरः स्त्रियां ङीष्।
मधुशर्करा स्त्री मधुजाता शर्करा या॰त॰। (सितायस्त्र) मधुजातशर्करायां राजनि॰।
मधुशाख पु॰ मधुर्मधुरा शाखाऽस्य (मौरु) इक्षे शब्दच॰।
मधुशिग्रु पु॰ मधुः मधुरः शिग्रुः। रक्तशोभाञ्जने अमरः
मधुशेष पु॰ न॰ मधुनः शेषः उच्छिष्टम्। सिक्थके (मोम)। राजनि॰।
मधुश्रेणी स्त्री मधुनः श्रेणीव। मूर्वायाम् अमरः।
मधुश्वासा स्त्री मधुन इव श्वसित्यस्मात् श्वस-अपादाने घञ्। जीवन्तीवृक्षे राजनि॰। [वृक्षे अमरः।
मधुष्ठील पु॰ मधु मधौले गर्भेऽस्य पृषो॰। (मौरु) गुडपुष्प-
मधुसख पु॰ मधोर्वसन्तस्य सखा सदृक्षरः टच्समा॰। कामदेवे मधुसारथ्यादयोऽत्र।
मधुसूदन पु॰ मधुं तन्नामासुरं सूदयति, मधु, जीवानां शुभाशुभकर्म, ज्ञानदानेन सूदयति वा सूद-ल्यु। १श्रीकृष्णे। "भक्तानां कर्मबन्धञ्च सूदनात् मधुसूदनः" तन्नामनिरुक्तेः। मधु माध्वीकं सूदयति भक्षयति। २भ्रमरे जटा॰ पुंस्त्री॰ स्त्रियां ङीष्। मधु इव सूद्यते भक्ष्यते सूद् ङीष्। ३मालतीशाखे स्त्री हेमच॰।
मधुस्रव पु॰ मधूनि मद्यानि स्रवन्त्यस्मात् स्रु-अप्। (मौरु) १इक्षे २मोरटलतायां राजनि॰। ३मधुयष्टिकायां स्त्री जटा॰ ४जीवन्त्यां स्त्री शब्दच॰। ५मूर्वायां स्त्री राजनि॰। [जटाधरः।
मधुस्रवस् पु॰ मधु स्रवति स्रु-असुन्। (मौरु) इक्षे
मधुस्वर पुंस्त्री॰ मधुर्मधुरः स्वरोऽस्य। १कोकिले शब्दर॰ स्त्रियां ङीष्। २मधुरस्वरवति त्रि॰ स्त्रियां टाप्।
मधुहन् पु॰ मधुं तन्नामासुरं कर्मफलं वा ज्ञानद्वारा हन्ति हन् क्विप्। विष्णौ।
मधूक न॰ मद्-अक इच्च धः। १वृक्षभेदे अमरः। (मौरु)२इक्षे पु॰राजनि॰। [अमरः। मधूच्छिष्टमत्यत्र।
मधूच्छिष्ट न॰ मधुन उच्छिष्टमवशिष्टम्। (मोम) सिक्थके
मधूपपन्न पु॰ मधुदैत्योपपन्न आश्रयः। मथुरानगरे जटा॰।
मधूल पु॰ मधु लाति ला-क पृषो॰। जलजलगिरिजम्बुवृक्षवृक्षयोः जटा॰। २मधुकवृक्षेऽस्याम् ३क्षीरे ४क्षीतनके च स्त्री गौरा॰ ङीष् राजनि॰। स्वार्थे क अत इत्वम् टाप्। मधूलिका मूर्वायाम् अमरः।
मध्य पुंन॰ मन-यत् नस्य धः। १देहस्यावयवभेदे। (माझा) "मध्येन सा वेदिविलग्नमध्या" कुमारः। २व्यवहारे-मन्त्रतन्त्रौषधव्रतनिश्चे ३व्यापारभेदे न॰अमरः। ४पूर्वापरसीमयोरन्तराले ५पराद्धसंख्यातोऽर्वाचीनायां ६सङ्ख्यायां न॰ ७तत्संख्याते च। "अन्त्यं मध्यं पराद्धं" ज्योतिषोक्ते षड्भागां ७गतिभेदे स्त्री तद्वति त्यक्ते पु॰। ८न्याय्ये ९अन्तर्वर्त्तिनि च त्रि॰ शब्दर॰॥१०त्र्यक्षरपादके छन्दोभाते ह॰र॰।
मध्यगन्ध पु॰मध्ये फलमध्ये गन्धो यस्य। आम्रवृक्षे शब्दच॰
मध्यतस् अव्य॰ मध्य+तसिल्। प्रथमाप्रभृतीनामन्यवर्त्तिनां मध्यशब्दार्थे।
मध्यदेश पु कर्म॰। 'हिमवद्विन्ध्ययोर्मध्यं यत् प्राग्विनशनादपि। प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्त्तितः, मनूक्ते देशभेदे।
मध्यदिन न॰ मध्यं दिनस्य एकदेशिस॰। १मध्याह्ने। अनुक्ष॰। मध्यन्दिनमप्यत्र। तत्र भवे तत्र पूयवति २वन्द्वकृष्टे राजनि॰।
मध्यपत्रमूलक न॰। "वत्साधुनर्नवैरक्षसर्षपैर्द्विदलेन च। एकत्र योजितैर्नव स्यान्मध्यं पत्रमूलकम्" राजनि॰ उक्ते पदार्थभेदे।
मध्यपदलोपिन् पु॰ मध्यपदस्य लोपोऽस्यास्ति इनि। व्याकरणप्रसिद्धे शाकपार्थिवादिके मध्यपदलोपयुते समासभेदे।
मध्यम त्रि॰ मध्ये भवः म। १मध्यभवे। २सप्तस्वरमध्ये क्रौञ्चस्वरतुल्ये ३पञ्चमे स्वरे पु॰ अमरः।
मध्यमपाण्डव पु॰ कर्म॰। अर्जुने तस्य पूर्वापरयोर्द्वयोर्द्वयोर्मध्यवर्त्तित्वात् तथात्वम्। [मध्यमे दोषे क्षीबवादौ।
मध्यमभृतक पु॰ कर्म॰। 'मध्यमस्तु क्षीबवे' इत्युक्ते
मध्यमलोक पु॰ कर्म॰। पृथिव्याम् तस्याः पातालस्वर्गलोकयोर्मध्यवर्त्तित्वात् तथात्वम्। "मध्यमलोकपालः" इति रघुः मध्यलोकोऽप्यत्र।
मध्यमसंग्रह पु॰ कर्म॰। "प्रेक्षं मद्यमाख्यानां धूपभूषणवाससाम्। प्रलोभनञ्चोपनैर्मध्यमः संग्रहोमतः" व्यवहारोक्ते मध्यमे क्रीसंग्रहरूपे विवादभेदे।
मध्यमसाहस न॰ कर्म॰। "वाक्पारुष्यपानानां दण्डोपकरणस्य च। एतेष्वेव प्रकारेषु मध्यमं साहसं स्मृतम्" इत्युक्ते परकीयवस्त्रादेर्भङ्गाक्षेपादिरूपे साहसभेदे "दण्डानां दे शते सार्द्धे प्रथमः साहसः स्मृतः। मध्यमः

पञ्च विशेषः" मनूक्ते पञ्चपण्डाक्षे २दक्षभेदे पु० ।

मध्यमा स्त्री मध्य+म । १हस्तलक्षायां नाड्याम् २तर्जन्यनामयोरन्तःस्थावयवौ, ३पद्मादीनां वर्णिकायाम् सेदि० परादिषु मध्ये ४हृदयोत्पन्नशब्दभेदे पञ्चश्लोकशब्दे ४२८पृ० दृश्यम् ५नाविकाभेदे च ।

मध्यमेश्वर पु० काशीस्थे शिवलिङ्गभेदे । [गणनाभेदे ।

मध्यमाहरण न० बीजगणितप्रसिद्धे अव्यक्तमानज्ञापके

मध्यरात्र पु० मध्यं रात्रेः एकदेशिस० अच्समा० । रात्रान्तत्वात् पुंस्त्वम् । निशीथे अर्द्धरात्रे हला० ।

मध्यवर्त्तिन् त्रि० मध्ये वर्त्तते वृत-णिनि । वादिप्रतिवादिनोरन्यतरयोर्वा पक्षप्रतिपक्षयोर्वाक्यादिविषयविमर्शपूर्वकं १तत्त्वनिर्णायके न्यायाविरोधेन परार्थसम्पादके, कार्य्यसम्पादके च २मध्यस्थे ।

मध्यस्थ पु० मध्ये तिष्ठति स्था-क । १मध्यवर्त्तिनि २उदासीने च । 'माध्यस्थ्यमिदेऽप्यवलम्बतेऽर्थे' इति कुमारः ।

मध्याङ्ग पु० मध्यमङ्गः एक० स० टच्समा० अङ्गादेशः । अङ्गान्तत्वात् पुंस्त्वम् । त्रिधा विभक्तदिनस्य १द्वितीये भागे "प्रातःकालो मुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु । मध्याह्नस्त्रिमुहूर्त्तः स्यात्" दक्षोक्ते पञ्चधा विभक्तदिनस्य २तृतीये भागे च ।

मध्वालु(क) पु० मधुर्मधुर आलुः । (मौ आलु) मूलभेदे । स्वार्थे क । तत्रैव । [मधुद्रुमजाते मद्ये अमरः ।

मध्वासव पु० मधुना पुष्परसेन कृत आसवः शा०त० । (मौव)

मन पूजायां सक० सर्वे अक० भ्वा० पर० सेट् । मनति अमानीत्-अमनीत् मेनतुः ।

मन गर्वे अक० चु० आ० सेट् । मानयते अमीमनत् ।

मन बोधे तना० आ० सक० सेट् । मनुते अमनिष्ट मेने ।

मन बोधे दि० आ० सक० अनिट् । मन्यते । अमंस्त मेने ।

मन इतौ अद०चु०उ०सक०सेट् । मनयति ते अममनत् त ।

मन पु० मन-अच् । जटामांसाम् शब्दच० । [त्रिका० ।

मनआप त्रि० मन आप्नोति आप-अण् उप०स० । मनोज्ञे

मन(ष)ज पु० नीच० ता० उक्ते वर्षकालीने षड्योगभेदे "वक्रःशनिर्यदि शीघ्रखेटात् पश्चात् पुरश्चलति तूर्य्यसङ्ज्ञा । एकर्क्षभुक्त्वा द्वयोर्वा पञ्चसप्तभैरधिकोनकश्चेत् । तेजो हरेत् कार्य्यपरेत्यभाषी स्थितोऽपि नाशी मन(ष)जः शुभो न" ।

मनःशिला स्त्री मनःशब्दवाच्या शिला । (मनछल) रक्तवर्णे उपधातुभेदे "मनःशिलाविच्छुरिता निषेदुः" कुमारः । पुंस० वा ह्रस्वे पुंस्त्वमपि । "टङ्कैर्मनःशिलशुक्तैरविदार्य्यमाणेति भरतधृतवाक्यम् ।

मनन न० मन-ल्युट् । १अनुमाने २युक्त्या पदार्थनिर्णये च

मनस् न० मन्यतेऽनेन मन-करणे असुन् । 'सर्वेन्द्रियप्रवर्त्तके अन्तरिन्द्रिये न्यायमतम् वेदान्तमते २सङ्कल्पविकल्पात्मकवृत्तिमदन्तःकरणे । तच्च सुखदुःखाद्याधारः "कामः संकल्पोविचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एव" श्रुतेः । न्यायमते तज्ज्ञानादिसाधनमिति भेदः । ३मनःशिलायाञ्च शब्दच० ।

मनसा स्त्री मनं मननं स्यति सो-क । आस्तीकस्य मुनेर्मातरि वासुकिभगिन्याम् जरत्कारुपत्न्यां नाम्न्या जरत्कारौ जटा० ।

मनसादेवी स्त्री मनसा दीव्यति दिवः करणस्य कर्मत्वात् कर्मोपपदत्वेन अण् ङीष् अलुक्स० । मनसागन्धार्वे जटा० ।

मनसिज पु० मनसि जायते जन-ड सप्तम्या वा अलुक् । १कामदेवे अमरः । लुकि । मनोजोऽप्यत्र । एवं चित्तजादयोऽप्यत्र ।

मनसिशय पु० मनसि शेते अच् अलुक्स० । कामदेवे हला० ।

मनस्कार पु० क्रियते मनसः कारोव्यापारभेदः । चित्तस्य सङ्कल्पतत्परत्वे अमरः ।

मनस्ताप पु० मनसस्तापः । १अनुतापे २मनःपीडायाञ्च ।

मनस्विन् त्रि० प्रशस्तं मनोऽस्यास्ति विनि । १प्रशस्तमनस्के । स्त्रियां ङीप् । "मनस्विनीनां प्रतिपत्तिरीदृशी" कुमारः २शरभे पु० राजनि० ।

मनाक् अव्य० मन-आकि । १ईषदर्थे अमरः "कृच्छ्रेणाक्रान्तमना मनागभूत्" नैषधम् । २मन्दे च मेदि० ।

मनाकन्या स्त्री मनाक् कन्या । कन्यायाम् उणादिको० ।

मनाकर न० मनाक् करोति क-अच् । १मल्लिकागन्धयुक्ते अगुरुभेदे शब्दच० । २ईषत्करे त्रि० ।

मनावी(वी) स्त्री मनोः पत्न्या वा ङीष् ङीङ् च । मनोः पत्न्याम् । जटाधरमते ऐङ् । मनायोस्येव तत्रार्थे ।

मनित त्रि० भ्वा० मन-कर्मणि क्त । ज्ञाते ।

मनीक न० मन-ईक । अङ्गने उणादिको० ।

मनीषा स्त्री ईष-अङ् ईषा मनस ईषा शक० । बुद्धौ अमरः ।

मनीषिन् पु० मनीषा अस्त्यस्य इनि । १पण्डिते अमरः २बुद्धियुक्ते त्रि० ।

मनु स्त्री मन उ । १वृक्षावाम् (पिठिङ्गशाक) राजनि० । २मनुपत्न्याञ्च ३प्रजापतिभेदे, धर्मशास्त्रकर्त्तरि स्वाय-

ऋषादौ सप्तिभेदे च पु०। मनवश्च चतुर्दश ते च हरिवं० ७अ० उक्ता ह्यस्याः। [स्त्रियां जातौ ङीष्।

मनुज पु०मनोः स्वायम्भुवात् जायते जन-ड। मनुष्ये अमरः

मनुष्य पु० मनोरपत्यं यत् तुक् च। मानवे जातिभेदे। स्त्रियां जातौ टाप्। [कुबेरे अमरः।

मनुष्यधर्मन् पु० मनुष्यस्येव धर्मो यस्य अनिच् समा०।

मनोगुप्ता स्त्री मनसा मनःशब्देन तच्छब्दवाच्यत्वात् गुप्ता। मनःक्रियायाम् अमरः।

मनोजव त्रि० जु-अच् मनोजवं वेगवत् समनाय यस्मिन्। १पिङ्गलाख्ये अमरः। मनस इव जवो यस्य। २वायौ वेगवति त्रि० ३विष्णौ पु०। ४अग्निजिह्वभेदे स्त्री जटा०। "काली कराली च मनोजवा च" भा० ति०। ५दुर्गायन्त्रभेदे। [कामदहिकरहस्ये राजनि०।

मनोजवृद्धि पु० मनोजस्य कामस्य वृद्धिर्यस्मात् ५ब०।

मनोज्ञ त्रि० मनो जानाति प्रापयति बोधनाय प्रवर्त्तीकरोति ज्ञा-क मनोभूतपूर्वे वा-क। १मनोहरे अमरः। २मनःक्रियायां रत्नमा०। ३वन्याकर्कोट्यां, ४कटभ्यां, ५क्षीरके ६मदिरायाञ्च स्त्री राजनि०। ७राजपुत्र्यां जटा० ८हरिवल्लभे न० रत्नमा०। [तयोऽस्त्र।

मनोभव पु० मनसि भवति भू-अच्। कामदेवे मनोभूयह-

मनोरथ पु० मनस्येव रथोऽत्र, मनसो रथइव वा इच्छासाधनप्रापकत्वात्। इच्छायाम् अमरः।

मनोरम त्रि० मनोरमयति रम-णिच् अच् उप०स०। १मनोहरे अमरः। २गोरोचनायां स्त्री राजनि०। ३रुचिमत्यां स्त्री मार्कं०। [वह्नौ च।

मनोहत त्रि० मनो हृतं यस्य। १प्रतिहते अमरः २प्रति-

मनोहर त्रि० मनो हरति स्वदर्शनाय हृ-अच्। १रुचिरे २कन्दहृक्षे पु० शब्दर०। ३जात्यां ४स्वर्णयूथ्यां च स्त्री। ५स्वर्णे न० राजनि०। णिनि। मनोहारिन् मनोहरे त्रि० स्त्रियां ङीष्। [क्रियायाम् अमरः।

मनोहा स्त्री० मनःशब्देनाहयते हृ-घञर्थे क। मनः-

मन्ज मार्जने सक० ध्वनौ अक० भ्वा० परः सेट्। मञ्जति अमञ्जीत् ममज्जतुः। [मेदि०।

मन्तु पु० मन-उनु तुट् च। १अपराधे २मनुष्ये ३प्रजापतौ च

मन्त्र पु० मत्रि-अच्। १गुप्तभाषणे, रहसि कर्त्तव्यावधारणार्थसञ्चारे २देवादीनां साधनार्थं तत्तद्युक्ते शब्दभेदे, ३वेदविभागभेदे च। वैदिकतान्त्रिकमन्त्रलक्षणादि ऋग्भेदभाष्योक्तं मन्त्रिपु० २८अ० उक्तञ्च द्रष्टव्यम्।

मन्त्रकृत् त्रि० मन्त्रं तत्स्वरूपं वा कृतवान् कृ-भूते क्विप्। १मन्त्रप्रणेतरि २वेदमन्त्राणां स्वरूपकर्त्तरि ३ऋषिभेदे पु० परिशिष्टखण्डे द्रष्टव्यम्।

मन्त्रजिह्व पु०मन्त्र एव जिह्वा आस्वादनसाधनं यस्य। अग्नौ हेमच०। मन्त्रेण दत्तहविरास्वादकत्वात्तस्य तथात्वम्।

मन्त्रणा स्त्री मन्त्रि-युच्। गुप्तभाषणे ल्युट्। तत्रार्थे न०।

मन्त्रदाल पु० दा-डच् ह्रस्व०। गुरौ।

मन्त्रिन् पु० मन्त्रयते यिनि। धीसचिवे येन सह रहसि कर्त्तव्यनिश्चीयते तस्मिन् अमात्ये अमरः।

मन्थ ञेमे सक० विलोडने सक० भ्वा० परः सेट्। मन्थति अमन्थीत्। मन्थते। [मथ्यते।

मन्थ विलोडे क्र्या० परः द्विक० सेट्। मन्थ्नाति अमन्थीत्।

मन्थ पु० मन्थ-करणे घञ्। १मन्थानदण्डे। "सक्तुभिः सर्पिषाभ्यक्तैः शीतवारिपरिप्लुतैः। नात्युष्णो नातिसान्द्रश्च मन्थ इत्यभिधीयते" इत्युक्ते २मेयभेदे, "चूर्णं चतुष्पले शीते चुलुकद्वयं पलं क्षिपेत्। ऋतुपात्रे मन्थमेतं सम्यक् तस्माच्च द्विपलं क्षिपेत्" भावप्र० उक्ते मेयभेदे च। ३नेत्ररोगे धरणिः ४करणे च शब्दच०। भावे घञ्। ५आलोडनादौ। [रत्नमा०।

मन्थज न० मन्थात् दधिमन्थनात् जायते जन-ड। नवनीते

मन्थन पु० मथ्यतेऽनेन करणे ल्युट्। १मन्थानदण्डे शब्दर०। भावे ल्युट्। २विलोडनादौ न०।

मन्थर न० मन्थ-अरच्। १कुसुम्भे। २क्लीबे २क्लेशे, बाधे मन्थानदण्डे च पु०५वृक्षे ६वृद्धौ ७मन्दे च त्रि० मेदि० "मन्दमन्थरशनैश्चरमन्थराः" नैष०। ८जड़े शब्दर०। ९नीचे हेम०। १०कूपके विश्वः ११कैवर्त्तायाः दास्यां स्त्री।

मन्थशैल पु० हृतः। मथ्नातीति मन्थनाय मन्थनदण्डरूपेण कल्पिते मन्दरपर्व्वते। [वलक्षे राजनि०।

मन्थान पु० मन्थ-आनच्। १मन्थनदण्डे अमरः। २आरग्-

मन्द त्रि० मदि-अच्। १मूर्खे २जडे ३अभाग्ये ४रोगिणि ५अल्पे ६क्षुद्रतन्त्रे ७खले च हेम०। ८मदरते ९अनियते १०कुत्सितभेदे च पु० मेदि०। ११यमे त्रिका०। १२गन्धर्वे च पु०अजयः। १३ज्योतिषोक्ते रविसंक्रान्तिभेदे १४अल्पगतिभेदे च स्त्री।

मन्दग त्रि० मन्दं गच्छति गम ड। १मन्दगामिनि २गतिभेदे पु० अग्नि, प्राणिपुरुष, हंस, गज, वरस्त्रियः इत्येते स्वभावान्मन्दगतयः। णिनि। मन्दगामिन् तत्रार्थे त्रि० स्त्रियां ङीष्।

मन्दट पु० मन्द् टीकते टीक-ड। पारिभद्रवृक्षे शब्दरत्ना०।

मन्दता स्त्री मन्दस्य भावः तल्। १आलस्ये २अज्ञाने च "उच्चैरूचति मन्दतामरसतामिति" चन्द्रालोकः।

मन्दर पु० मदि-अरन्। सप्तद्वीपमध्यगे १पर्वतभेदे २मन्दारवृक्षे मेदि० ३स्वर्गे ४हारभेदे हेम० ५दर्पणे च शब्दर०। ६बडिशे ७मन्दे च त्रि० मेदि०।

मन्दाकिनी स्त्री मन्दमकति अक-णिनि। १स्वर्गगङ्गायां "स्वर्गे मन्दाकिनी तथा" पुराणम्। २संक्रान्तिभेदे च।

मन्दाक्रान्ता स्त्री "मन्दाक्रान्ता जलधिषड्गैर्मौ नतौ तो गुरू चेत्" छन्दोमञ्जरीधृते सप्तदशाक्षरपादके छन्दोभेदे।

मन्दाक्ष न० मन्दं मन्दुचितमक्षि यस्मात् बहुव्री०। १कटाक्षायाम् अमरः। ६त० २मन्दुचितनेत्रे स्त्रियां ङीष्।

मन्दाग्नि पु० मन्दः पचने अल्पशक्तिकः अग्निः अनलः, स यस्य। १देहस्थे अपचनशक्तिकेऽनले २तद्धेतौ रोगभेदे च। तच्चिह्नादि यथा "मन्दस्त्वग्नेरपि विषमः समश्चेति चतुर्विधः। कफपित्तानिलाधिक्यात् तत्साम्याच्चाष्टधोऽनलः। विषमो वातजान् रोगान् तीक्ष्णः पित्तसमुद्भवान्। करोत्यग्निसमा मन्दो विकारान् कफसम्भवान्। समा समाग्नेरुचिता मात्रा सम्यग् विपच्यते। अल्पापि नैव मन्दाग्नेर्विषमाग्नेस्तु देहिनः" भावप्र०।

मन्दार पु० मदि-आरक्। १स्वर्गस्थे देवतरुभेदे २पारिभद्रवृक्षे च अमरः ३हस्ते ४धूर्ते ५तीर्थभेदे ६अर्कवृक्षे च मेदि०।

मन्दिर न० मन्द्यतेऽत्र मदि-किरच्। १गृहे २पुरे च अमरः तस्य द्विजिह्वत्वमिश्रके। ३सरट्टे मेदि० ४ज्ञानुपर्याङ्गागे च पु० हेमच०। [नीलकण्ठे च (मादुर) मेदि०।

मन्दुरा स्त्री मदि-उरच्। १अश्वशालायाम् अमरः। २गृह-

मन्दोदरी स्त्री मयदानवकन्यायां रावणभार्य्यायाम्। [अमरः

मन्दोष्ण न० मन्दमीषदुष्णम्। १ईषदुष्णस्पर्शे २तद्वति त्रि०

मन्द्र पु० मदि-रक्। १वाद्यभेदे शब्दर०। २गम्भीरध्वनौ च। अर्श आद्यच् २तद्वति त्रि० अमरः।

मन्मथ पु० मनसं मतु मन-क्विप् मथति अच् ६त०। १कन्दर्पे २कपित्थवृक्षे च अमरः ३कामचिन्तायां मेदि०।

मन्मथालय पु० ६त०। १आम्रवृक्षे राजनि० २स्त्रीचिह्नभेदे च।

मन्या स्त्री मेट्-मन-क्यप्। ग्रीवायाः पश्चाद्भागस्थायां शिरायाम् अमरः।

मन्यु पु० मन-युच् न आगमः। १क्रोधे २दैन्ये ३क्रतौ ४क्रोधे च अमरः ५अहङ्कारे च शब्दर०।

मन्वन्तर न० मनूनामन्तरमवकाशस्तदुपलक्षितकालो वा। १स्वायम्भुवादिमनूनामधिकारे २तदुपलक्षिते काले च सप्तयुगसमितवर्षाधिका एकसप्ततिचतुर्युगसमिता (२।१।३३३-८०००) वर्षावच्छेदकाल इति पुराणम्।

मन्थ गतौ भ्वा०पर०सक०सेट्। मन्थति अमन्थीत्।

मम षष्ठ्य०मा-बा०इदम्। अस्मदष्टतेः षष्ठ्यन्तस्यार्थे तेन ममत्वमिति ममतेति च सिध्यति।

ममता स्त्री मम भावः तल्। १दर्पे २अहङ्कारे हेम०। ३मत्सरे च। एवं ममत्वमप्यत्र। "तथापि ममतावन्ध्ये" इति "ममत्वं मम राज्यस्य" इति च देवीभा०। [विषये त्रि०को०

ममापताल पु० मम आलम् भातोर्बस्य मः अपह्नवागमश्च।

मय गतौ भ्वा०आ०सक०सेट्। मयते अमयिष्ट।

मय पुंक्ली० मय-अच्। १दक्षे २अन्यतरे स्त्रियां टाप् ३दानवभेदे च मेदि०।

मयट्क पु० मि+अच् मयं प्रक्षेपं स्यति प्रतिबध्नाति सक-अच् पृषो० मत्वम्। वनस्थद्रुमे अमरः। पृषो० मयट्क तत्रार्थे पु०।

मयु पु० मि-उ। १किन्नरे अमरः २म्लेच्छे मेदि०।

मयुष्टक पु० मिनोति मि-उ मयुः स्यति-अच् कर्म० पृषो० टत्वम्। वनस्थद्रुमे पृषो०। मयुष्टकोऽप्यत्र।

मयूख पु० माङ्-ऊख मयादेशः। १किरणे २शिखायाम् अमरः ३शोभायां मेदि० ५कीले जटा०।

मयूर पुंक्ली० भी-ऊरन्। खनामख्याते १खगभेदे स्त्रियां ङीष्। २मयूरशिखावृक्षे पु० अमरः। ३वाद्ये क्लीवे कनि ४वर्णमात्रे अमरः। ५तत्वाञ्छने (वँते) न० मेदि०।

मयूरग्रीवक न० मयूरग्रीवेव कन्। वस्त्रे (वँते) राजनि०।

मयूरजङ्घ पु० मयूरस्य जङ्घेव मूलमस्य। श्योनाकवृक्षे राजनि०। [राजनि०।

मयूरतुत्थ न० मयूर इव तद्वर्णं तुत्थम्। वस्त्रे (वँते)

मयूरविदला स्त्री मयूरैर्विदल्यते मयूर इव विशिष्टदलमस्या वा। अम्बष्ठायाम् (आमरुल) वैद्यकम्।

मयूरशिखा स्त्री मयूरस्येव शिखाऽस्याः। खनामख्याते तृणभेदे मयूरचूडादयोऽप्यत्र। "नीलकण्ठशिखा बभ्रो पित्तघ्ने ग्राहितिक्तके" भावप्र०।

मयूरिका स्त्री मयूरस्तदाकारो विद्यतेऽस्याः तद्वदकत्वस्यादत्वात् ठन्। अम्बष्ठायाम् राजनि० (आमरुल)।

मरक पु० मृ-वुन्। १दैविकभौतिकोपद्रवजन्ये प्राणिनाम् आशुमरणे (मड़क) २मारिभये हेमच०।

मरकत न॰ मरकं मारिभयं तरत्वनेन ह्रु-क॰। हरिदर्णे-मणिभेदे (पाचा) अमरः। तल्लक्षणादि परिशिष्टे दृश्यम्

मरकतपत्री स्त्री मरकतमिव हरिद्वर्णं पत्रमस्याः ङीप्। पाठ्यामू राजनि॰।

मरण न॰ म्रियतेऽनेन मृ-करणे ल्युट्। यत्सजनाभाव्ये १विशे राजनि॰। भावे ल्युट्। देहात्मनोर्विच्छेदरूपे, प्राणवायो-रुत्क्रमणरूपे वा २व्यापारभेदे।

मरत पु॰ मृ-अतच्। मरणे उषा॰।

मरन्द पु॰ मरं मरणं ददाति भ्रमराणां जीवनहेतुत्वात् दो-क पृषो॰ तम्। मकरन्दे शब्दर॰।

मराकाली स्त्री मरो मरणकालिकं दुःखमिवाकति याति-नेन मराको हस्तिकः स इवाकति पर्य्याप्नोति दुःख-दानाद्व अल-अच् गौरा॰ ङीष्। हस्तिकाली (सिसाति) रत्नमाला।

मराल पु॰ मृ-आलच्। १राजहंसे जटा॰ "तत्तामरालय-मरालमरालकेशी" नैषधम्। २कज्जले ३कारण्डवे ४अश्वे ५मेघे ६दाढ़िमीवने च मेदिनीकारण्डतः। ७चिकणे त्रि॰ त्रिका॰।

मरि(री)च पु॰ मृ-इच पृ॰ वा दीर्घः। १खनामख्याते हृद्ये अमरः। २कङ्कोलके राजनि॰। [राजनि॰।

मरि(री)चपत्रक पु॰ मरिचस्येव पत्रमस्य कप्। सरलवृक्षे

मरीचि पु॰ मृ ईचि। सप्तर्षिमध्ये ब्रह्मणो मानसे ज्येष्ठे पुत्रे १तन्निभेदे २रश्मौ च हेमच॰। ३किरणे पुंस्त्री॰ अमरः।

मरीचिका स्त्री मरीचौ सूर्य्यकिरणे कमिव यत्र भ्राम्यो। सूर्य्यकिरणे जलभ्रान्तौ, मृगतृष्णायाम् अमरः।

मरु पु॰ मृ उ। १पर्वते २निर्जलदेशे च अमरः ३कुरुवकवृक्षे भावप्र॰ ४देशभेदे च (मारवार) हेमच॰।

मरुज पु॰ मरुदेशे जायते जन ड। १नखीनामगन्धद्रव्ये शब्दच॰। २निर्जलदेशजाते त्रि॰। ३मुगकर्णीक्षाम् स्त्री राजनि॰।

मरुत् पु॰ मृ उति। १वायौ अमरः २मरुद्वंशे भावप्र॰ ३देवे ४यज्ञियपर्णे न॰ मेदि॰। ५पृक्षायां स्त्री शब्दर॰। आर्द्धे प्रज्ञादयच्। मारुतोऽप्यत्र। पृषो॰ तुक्। मरुतोऽपि देवे च वायौ च व्याडिः। [शब्दच॰।

मरुत्कर पु॰ मरुतमपानवायुं करोति कृ-अच्। राजमाषे

मरुत्त पु॰ चन्द्रवंश्ये १नृपभेदे।

मरुत्तक पु॰ मरदिव तक्ति तक-क्विप् अच्। मरुवके भावप्र॰

मरुत्पथ पु॰ ६त॰। आकाशे। मरुदर्कादयोऽप्यत्र।

मरुत्पाल पु॰। मरुतो देवान् पालयति पाल-अच्। इन्द्रे

मरुत्वत् पु॰ मरुत् पालत्वेन हेतुत्वेन वाऽस्त्यस्य मत्वर्थे मश्च वः। १इन्द्रे अमरः। २हनूमति शब्दर॰।

मरुत्सख पु॰ मरुतो वायोः सखा-टच्समा॰। १इन्द्रे धरणिः। २शिवे ३चित्रकवृक्षे च। [शब्दमाला।

मरुदान्दोल न॰ मरुतमान्दोलयत्यनेन करणे घञ्। व्यजने

मरुदिष्ट पु॰ मरुतां देवानामिष्टः। गुग्गुलौ राजनि॰।

मरुद्भवा स्त्री मरुतो वायोर्भवति वर्त्तते भू-अच् ७त॰। ताम्र-मूलीवृक्षे (खिराट) रत्नमा॰। [खदिरे रत्नमा॰

मरुद्रुम पु॰ मरोर्निर्जलदेशस्य द्रुमस्तत्जातत्वात्। विट्-

मरुद्वाह पु॰ मरुत् वाह इव यस्य। १धूमे त्रिका॰ २वह्नौ शब्दमा॰ ३चित्रकवृक्षे च। [अमरः।

मरुन्माला स्त्री मरुतो मालेव। (पिड़िङ्गशाक) वृक्षायाम्

मरुभू पु॰ मरुर्भूमिर्यस्य (मारवार) १देशभेदे त्रिका॰। कर्म॰। २निर्जलभुवि स्त्री। [भावप्र॰।

मरुभूरुह पु॰मरुभुवि निर्जलभूमौ रोहति रुह-क। करवीरे

मरुव पु॰ मरं निर्जलदेशं वाति वारयत्येन वा क। (नाग-दानी) (मरुवा) वृक्षभेदे। आर्द्धे क। तत्र वृक्षभेदे (मरुवा) खल्पपत्रतुलस्याम् अमरः। जम्बीरभेदे भरतः पुष्पप्रधाने (मरुयाफुल) वृक्षभेदे रत्नमा॰ व्याघ्रे, राक्षसे भयानके च जटा॰।

मरुसम्भवा स्त्री मरौ सम्भवति सम्+भू-अच् ७त॰। क्षुद्र-दुरालभायाम् राजनि॰ मरुस्थादयोऽप्यत्र।

मरूद्भवा स्त्री मरौ वृद्धति वृद्ध+भू-अच् ७त॰। १कार्पास्यां २क्षुद्रखदिरे ३वासके च राजनि॰।

मर्क गतौ भौ॰ पर॰ सक॰ सेट्। मर्कति अमर्कीत् ममर्क।

मर्कट पुंस्त्री॰ मर्क-अटन्। १वानरे अमरः। स्त्रियां ङीष् २सर्षपनाम्नि (माकड़सा) ३व्यावरविषभेदे हेमच॰ (छाड़-गिला) ४पक्षिभेदे च पुंस्त्री॰ त्रिका॰ स्त्रियां ङीष्। आर्द्धे क। मर्कटक तत्रैव संज्ञायां कन्। मत्स्यभेदे देशभेदे च शब्दर॰। [भावप्र॰।

मर्कटतिन्दुक पु॰ मर्कटप्रियस्तिन्दुकः शाक॰त॰। कपीतौ

मर्कटपिप्पली स्त्री॰ मर्कटप्रिया पिप्पली शाक॰त॰। कपा-मार्गे राजनि॰।

मर्कटप्रिय पु॰ ६त॰। क्षीरवृक्षे (खिरड़) शब्दमा॰।

मर्कटवासस् पु॰ ६त॰। (माकड़शालाल)क्षुताक्षुवे शब्दर॰

मर्कटशीर्ष न॰मर्कटस्य वानरस्य शीर्षमिव। छिन्नुवे रत्नमा॰

मर्कटास्य वर्कटस्य वानरस्यास्यमिव रक्तत्वात्। १तास्यवर्णे क्षेम०। २तद्वति त्रि०।

मर्कटी स्त्री मर्कटोस्यस्याः स्त्रियत्वेन ङीष्। १क्षपामार्गे २वलमोदायाम् राजनि० ३करञ्जभेदे (माडकरमचा) अमरः। ४मर्कटीजाले पिङ्गलः।

मर्कटीजाल न० छन्दोपन्थोक्ते मात्रावर्णप्रस्तावे लघुगुरु स्थानविशेषज्ञानाय चक्रभेदे ह०र० तन्मटीकायां दृश्यम्।

मर्कर पु० मर्क-अरच्। १महाराजे (केशुरिया) २माषके च २खरङ्गायां ४वन्ध्यायां स्त्रियाञ्च स्त्री विश्व० टाप्।

मर्च पूजने चु० उभ० सक० सेट्। मर्चयति-ते अममर्चत्-त

मर्ज्ज पु० मृज-घञ्। १रजके २पीठमर्दे च हेमच०। ३शुद्धौ स्त्री मेदि०।

मर्त्त पु० मृ-तन्। १मनुष्ये २भूलोके च। तत्र भवः यत्। मर्त्य मनुष्ये। [२चूर्णने च।

मर्दन न० मृद-ल्युट्। १गात्रपादादिसंवाहने अमरः

मर्दल पु० मृद-घञ् मर्दं याति या-क। वाद्यभेदे (माँदल)। अमरः।

मर्दित त्रि० चु० मृद-क्त। १चूर्णिते २पन्थिते च भरतः।

मर्ब गतौ भ्वा० पर० सक० सेट्। मर्बति अममर्बीत् ममर्ब।

मर्म्मज्ञ पु० मर्म जानाति ज्ञा-क। तत्त्वज्ञे। अमर्मविदादयोऽप्यत्र।

मर्मन् न० मृ-मनिन्। १जीवनस्थाने राजनि० २सन्धिस्थाने ३तात्पर्य्ये च "अपि धर्मागममर्मपारगैरिति नैषधम्। "वज्रपातः शिरास्नायुसन्धिमांसास्थिसम्भवः। मर्माणि तेषु तिष्ठन्ति प्राणाः खलु विशेषतः" भावप्र०।

मर्म्मर पु० मृ-घरन् मट् च। १वस्त्रपर्णानां शब्दे (मड़मड़) द्रव्यशुष्कशब्दे अमरः। २पीतदारुणि ३हरिद्रायाञ्च स्त्री मेदि० गौरा० ङीष्।

मर्म्मस्पृश् त्रि० मर्म्म प्राणस्थानं स्पृशति स्पृश-क्विन्। कटुवादे मर्मपीडके अमरः। [दीर्घश्च। मर्मघोडके।

मर्म्मविध् त्रि० मर्म्म सन्धिस्थानं विध्यति विध-क्विप् पूर्व

मर्य्या अव्य० म्रियतेऽवधिर्यत्रेति मृ-यत्। १सीमायाम् स्त्री त्वमपि रावः। कर्त्तरि यत्। २मनुष्ये पु०। "मेधो मर्य्या अपसे" इति वेदमन्त्रः। "मर्य्यामनुष्या" इति भाष्यम्।

मर्य्यादा स्त्री मर्य्यायां सीमायां दीयते दा-घञर्थे क मर्य्यादीयते वा परि+या-दा-कर्त्तरि टाप्। १न्याय्यपथस्थितौ अमरः। २सीमायाम् जटा० ३क्रूले च रेमच०।

मर्व पूर्तौ भ्वा०पर०सक०सेट्। मर्वति अममर्वीत् ममर्व।

मल धृतौ भ्वा०आ०अक०सेट्। मलते अमलिष्ट।

मल पु० मृज्यते शोध्यते मृज-कल-टिलोपः। १पापे २पुरीषे शौकादीनां ३किट्टे अमरः। किट्टं कलङ्को मण्डूरादिर्दृढजातखेदश्लेष्मादिश्च। "वसा शुक्र मज्जमूत्रं विट्कर्णविड्नखाः। श्लेष्मास्रु दूषिका स्वेदो द्वादशैते मलाः स्मृतिः। ४कर्पूरे शब्दर० ५पातपित्तकफेषु च माधवः। ६दुष्टे ६सम्बन्धे च।

मलघ्न पु० मलं विडं हन्ति रेचयति हन-क।१शालमलीकन्दे २नागदमन्यां स्त्री ङीष् राजनि०। ३मलनाशके त्रि०। क्विप्। मलहृत् तत्रार्थे त्रि०।

मलदूषित त्रि० ३त०। मलिने अमरः।

मलद्राविन् पु० मलं द्रावयति रेचयति द्रु-णिच्-णिनि्। जयपाले राजनि०। तत्फलस्य रेचकत्वात् तथात्वम्।

मलपू स्त्री मलं मलस्थानं पुनाति पू-क्विप्। काकोदुम्बरिकायाम् अमरः।

मलभेदिनी स्त्री मलं भेदयति रेचयति भिद्-णिच्-णिनि। कटुकायाम्। (कट्की) राजनि०।

मलमास पु० मलो दुष्टो मासः। "असंक्रान्तिमासोऽयं यत्र रविसंक्रान्तिवर्जितम्। मलमासः स विज्ञेयः" इत्युक्ते रविसंक्रान्तिशून्ये शुक्लप्रतिपदादिदर्शान्तरूपे चान्द्रे मासे। अधिमासशब्दे १२१८० दृश्यम्।

मलय पु० मल-कयन्। दक्षिणस्थे १पर्वतभेदे हेम०। यत्र चन्दनजन्म तत्पर्वतान्तिकस्थे २देशभेदे ३तत्पवने ४तैलाङ्गे च मेदि०। ५नन्दनवने धरणिः। अष्टादशसु द्वीपेषु ६द्वीपभेदे भाग०५।१४।

मलयज पुंन० मलये पर्वते जायते जन-ड। १चन्दने अमरः २मलयपर्वतजाते वायौ पु०। ३तद्देशजाते त्रि०।

मलया स्त्री मलयो देशोऽस्त्यस्याः कारणत्वेन अच्। त्रिहतायां (तेऊोडि) मेदि०।

मलविनाशिनी स्त्री मलं तद्दोषं विनाशयति वि+नश-णिच्-णिनि। शङ्खपुष्प्यां राजनि०।

मलाकर्षिन् पु० मलमाकर्षति आ+कृष-णिनि। कुड्डिजे (मेतर) शब्दमा०। [न्यास्तु संक्षिप्तसा०।

मलाका स्त्री मल-आक। १कामिन्यां २दूत्यां ३कक्षिमलारि पु०मलस्य कलङ्कस्यारिर्हरः। सर्वोषधद्रव्ये राजनि०

मलिन त्रि०मल+अस्त्यर्थे इनन्। १मलयुक्ते अमरः। २दूषिते ३क्लिष्टे च मेदि०। ४घोषे न० शब्दच०। ५दोषे हेम०

हृटङ्के न० राजनि० (दोहागा)। दनि। मलीमसत्व
मलिनमुख पु० मलिनं मुखं यस्य। १वङ्गो तस्यादौ धूमाय मानत्वेन ऋण्यत्वात् २चित्रकवृक्षे च। श्वानरे पुंस्त्री० मेदि० स्त्रियां ङीष् ४क्रूरे ५खले च त्रि० मेदि० हेमे०।
मलिम्लुच पु० मलौ दैहिककर्मानर्हत्वेन दुष्टः सन् म्लोचति गच्छति म्लुच-क। १मलमासे २दासौ ३चमौ ४चौरे च मेदि०। ५चित्रकवृक्षे। [दासीसे च मेदि०।
मलीमस त्रि० मल-ईमसच्। मलिने अमरः। २लौहे ३पुष्प-
मल्ल धृतौ भ्वा०आ०सक०सेट्। मल्लते अमल्लिष्ट ममल्ले।
मल्ल पु० मल्ल-अच्। १बाहुयुद्धकारके नियोद्धरि २पात्रे ३बलीवर्दे ४मत्स्यभेदे ५कपोले च मेदि० ६ब्रात्यक्षत्रियात् सर्ववर्णायां जाते जातिभेदे (माल) ७सङ्कीर्णजातिभेदे खेटात् श्रीधरकन्यायां जाते सङ्कीर्णवर्णे (माला) ब्रह्मदै०पु० ६तन्त्रवायां कुन्दकाराज्जाते सङ्कीर्णजातिभेदे च पुंस्त्री० स्त्रियां जातित्वात् ङीष्। ८देशभेदे स्वार्थे क मल्लक तत्रार्थे। संज्ञायां कन्। दन्ते हेमे०।
मल्लक पु० मल्लयते धिवतेऽत्र मल्ल-बुन्। १दीपाधारे पात्रे २नारिकेलफलजाते पात्रे च (माला) अमरः। ५प्रदीपे मधुरेश्वः ६क्षुद्रनामपुष्पे स्त्री अमरः टाप् अत इत्त्वम्।
मल्लज न० मल्ले देशे जायते जन-ड। मरिचे जटा०।
मल्लभू स्त्री मल्लक्रीड़नस्य बाहुयुद्धस्य योग्या भूः स्थानम्। देशभेदे। मल्लभूम्यादयोऽप्यत्र।
मल्लयुद्ध क्लीं। बाहुयुद्धे तत्प्रकारः भा० वि० १२अ०।
मल्लार पु० मल्ल इव अञ्चति अ-अच्। १रागभेदे २वसन्त-रागस्य रागिणीभेदे स्त्री ङीष् सङ्गीतदामो०।
मल्लि (ल्ली) स्त्री मल्ल-इन् वा ङीष्। १मल्लिकायाम् शब्दमा० संज्ञायां कन्। मल्लिका ऋण्यवर्णदेहे आलोहितचञ्चु-चरणे २हंसभेदे पुंस्त्री० मल्लिकावोऽप्यत्र।
मल्लिकापुष्प पु० मल्लिकाया इव पुष्पमस्य। १कटजवृक्षे राजनि०। २करञ्जवृक्षे च हेमच०। ३तं०। ४मल्लिकायाः कुसुमे।
मल्लिपत्र न० मल्लिरिव पत्रमस्य। खदाके त्रिका०।
मव बन्धे भ्वा०पर०सक०सेट्। मवति अमवीत् अमावीत्।
मव्य बन्धे भ्वा०पर०सक०सेट्। मव्यति अमव्यीत्।
मश भ्रमौ अक० कोपे सक० भ्वा० पर० सेट्। मशति अमशीत् अमाशीत् मेशतुः।
मशक पु० मश-बुन्। १कीटभेदे (मशा) राजनि०। २चर्म-मयजलपात्रभेदे ३रोगभेदे शब्दर०। तद्रोगलक्षणं यथा

"अवेदनं स्थिरं चैव वस्तु गात्रे प्रदृश्यते। मांसवत् क्रमशस्तृप्तं मलिनं मशकं दिशेत्" माधवः पु० १७५अ०।
मशकिन् पु० मशकोऽस्यास्य इनि। वटवृक्षे हेम०।
मशहरी स्त्री मशं मशकं हरति हृ-ट। मशकनिवारणार्थे वस्त्रनिर्मिते पटार्थे चतुष्कक्षाम् जटा०।
मशि(सी) स्त्री मश(स) इन् वा ङीष्। (काली) १पत्र-लेखनद्रव्ये त्रिका०। २नीलगेफालिकाक्षुपे च शब्दर०।
मष वधे भ्वा०पर०सक०सेट्। मषति अमषीत् अमाषीत्।
मस परिणामे अक० परिमाणे सक० दि०पर०सेट्। मस्यति दरित् अमसत् अमसीत् अमासीत्। पुषादित्वं तेन अमसदित्येवेति पाणिनीयाः।
मसन न० मस-ल्यु। सोमराजीवृक्षे शब्दच०।
मसरा स्त्री मस-अरच्। मसूरे जटा०।
मसिका स्त्री मसीव इवार्थे कन्। नीलगेफालिकायाम् शब्दर०। [त्रिका०
मसि(सी)**जल** न० मसिमिश्रितं जलम्। (काली) लेखनद्रव्ये
मसिधान न० मसिर्धीयतेऽत्राधारे धा-ल्युट्। मषाधारे (दोयात) स्त्रीत्वमपि तत्र ङीष्।
मसिपत्र पु० मसिक्षुद्रपत्रलक्षितमसूरमेव पत्रं विक्रेयं यस्य। लेखनोपजीविनि त्रिका०।
मसिप्रसू स्त्री मषाः प्रसूरिव। १मषाधारे। मसिः प्रसूरिव यस्याः। २लेखन्याम् डारा०।
मसीना स्त्री मस-ईनन्। अतस्याम् (तिसि) शब्दच०।
मसु(सू)**र** पुंस्त्री० मस-उरच् ऊरच् वा। १कलायभेदे त्रिका० स्त्रियां गौरा० ङीष्। २वेश्यायां, श्रोत्रिभेदे च स्त्री टाप् मेदि०।
मसूरविदला स्त्री मसूरस्येव विदलं यस्याः। १क्षुद्रविडति (कावतेकोटी) अमरः। २श्यामलतायां रत्नमा०।
मसूरिका स्त्री मसूरेव इवार्थे कन्। १वसन्तरोगे २कृमि-न्याञ्च शब्दमा० "कटुम्ललवणक्षारविरुद्धाध्यशनाशनैः। दुष्टनिष्पावशाकाद्यैः प्रदुष्टपवनोदकैः। क्रुद्धपित्तेषणा-द्यापि देहे दोषाः समुद्गताः। जनयन्ति शरीरेऽस्मिन् दुष्टरक्ते मसूरिकाः। मसूराकृतिसंस्थानाः पिडकाः सुमंसूरिकाः" भावप्र०।
मसूरी स्त्री मस-उरच् गौरा० ङीष्। १वसन्तरोगे मेदि० २विडति, ३रक्तविडति च राजनि०।
मसृण त्रि० मस-कृण, मसृ+ऋण-क पृषो० वा। १स्निग्धे २अकर्कशे च। ३अतस्यां स्त्री मेदि०।

मस्क गतौ भ्वा० पर० सक० सेट्। मस्कति अमस्कीत्।

मस्कर पु० मस्क-अरच्। १वंशे अमरः। २रज्जुवृक्षभेदे च राजनि०। भावे अरच्। ३गतौ ४स्नाने च।

मस्करिन् पु० मस्करो स्नानं गतिर्वास्त्यस्य इनि, मा कर्त्तुं कर्म निषेद्धुं शीलमस्य मा+क्र-इनि "मस्करमस्करिणा-वितिं निपा०। १परिव्राजके विधानेन स्वकर्मपरित्याजके भिक्षौ अमरः। "धारयन् मस्करिव्रतम्" भट्टि० २चन्द्रे च शब्दच०।

मसज स्नाने ह्० पर० सक० अनिट्। मस्जति अमाङ्क्षीत्। क्वोदित् क मग्नः। द्वित्वे यणु मज्जतुः।

मस्त(क) न०मस्जति परिमाल्यनेन मस्ज-करणे त। १शुद्धे त्रि०। २शिरसि च स्वार्थे क। ३उत्तमाङ्गे पुंन०। [हेमच०।

मस्तकस्नेह पु० ६त०। शिरःस्थितमज्जायाम् मस्तिष्के

मस्तदारु न०मस्जति परिमाल्यनेन मस्ज-तुन् कर्म०। देवदारुणि भावप्र०। [वाम् यौवावायाम् शब्दच०।

मस्तमूलक न० मस्तस्य मूलमिव इवार्थे कन्। शिरोधरा-

मस्तिष्क न० मस्-क्विन् मस्तिं पतिष्यतिभेदं स्कन्ति स्कन्द गतौ शुष्टुवो०। मस्तकस्थे स्नेहाकारे पदार्थे (मगज) अमरः। मांसमस्तिष्कपङ्क प्राग्भारे" प्रबोधचन्द्रोदयम्।

मह पूजायां भ्वा०पर०सक०सेट्। महति अमहीत् मेहतुः।

मह इच्छौ भ्वा० आ० सक० सेट् इदित्। मंहते अमंहिष्ट।

मह पूजने चुरा० उभ० सक० सेट्। महयति-ते अमहत्-त।

मह पु० मह-अजर्थे क। १उत्सवे सततानन्दजनकव्यापारे अमरः। २तेजसि मेदि०। ३यज्ञे पु०३महिम्नि च पुंस्त्री० हेमच०।

महत् त्रि० मह-अति। १विपुले २उच्चे च स्त्रियां ङीप् महती ३राज्ञे न० मेदि०। ४साङ्ख्योक्ते महत्तत्त्वे पु० "प्रकृतेर्महांस्ततः" श्रुतिः। "मनो महान् मतिर्ब्रह्मा" इत्युक्ते ५हिरण्यगर्भविकृदेहे आ० भा० सर्वनामस्थाने ह्रस्वादौ महान् महान्तौ एकार्थशब्दे परे समासे तस्याने आ। महाधनम्

महती स्त्री मह-अत+गौरा० ङीष्। १वीणाभेदे अमरः २नारदवीणायाम् भरतः। "अवेक्षमाणं महतीं सुदर्शनः" माघः। ३उच्चायां ४वार्त्ताक्यां ५विपुलायां स्त्रियाञ्च राजनि०। समासे तीक्ष्णाने च। महत्या घासः महाघासः इत्यादि।

महत्तत्त्व न० कर्म०। सांख्योक्तपञ्चत्रिंशत्तत्त्वान्तर्गतत्त्वभेदे प्रकृतिकार्य्ये अहङ्कारादिकारणे निश्चयात्मकवृत्तिविशिष्टे तत्त्वभेदे। [भेदे च।

महर् अव्य० मह-अरच्। १अर्धस्थे चतुर्थे लोके २व्याहृति-

महर्लोक पु० कर्म०। भूरादिषु ऊर्ध्वस्थे सप्तलोकान्तर्गते चतुर्थे लोके

महर्षि पु० कर्म०। परमर्षिशब्दार्थे वेदव्यासादौ त्रिका०। "ऋषिर्हिंसागतौ धातुर्विद्यासत्यतपःश्रुतैः। एष सञ्चि-न्वतो यस्माद् ब्राह्मणस्य ततस्त्वृषिः। विदुतिसम-काख्यन्तु वृद्धा व्यक्तर्षिलक्षयम्। ऋषते परमं यस्मात् परमर्षिस्ततः स्मृतः। गत्यर्थोऽयमृषेर्धातोर्नाम निर्द्धूति-कारणम्। यस्मादेष स्वयम्भूतस्तस्माच्च ऋषिता मता। तेनेश्वराः स्वयम्भूता ब्रह्मणो मानसाः सुताः। विवर्द्ध-मानैस्तैर्वृद्धा महान् परिगतः परम्। यस्मादृषिः पर-त्वेन महांस्तस्मात् महर्षयः" मत्स्यपु०१२०अ० तल्लक्षणम्

महल्लिक पु० "सक्थ्नोऽनुपस्थो यः स्त्रीस्वभावो मह-ल्लिकः शब्दमाला"क्तो ऊनःपुरुषावयवभेदे (खोजा)।

महस् न० मह-असुन्। १तेजसि २उत्सवे च मेदि० ३यज्ञे शब्दर०। [शब्दच०। २स्त्रीलिङ्गे शब्दर०।

महा स्त्री मह-अच्। (गोरचाकलिया) १गोपवल्लाम्

महाकण्टकिनी स्त्री महत् कण्टकमस्त्यस्य भूम्ना इनि ङीप् (फणिमनसा) वृक्षभेदे शब्दच०। [३भूमके च शब्दर०

महाकन्द पु० कर्म०। १खगुने अमरः। २राजपलाण्डौ

महाकपित्थ पु० कर्म०। १बिल्ववृक्षे त्रिका०। २रक्तखगुने ३चाणक्यमूलके राजनि०।

महाकरञ्ज पु० कर्म०। करञ्जभेदे (काँटाकरमचा) राजनि०

महाकर्णिकार पु० कर्म०। आरग्वधे (सोंदाल) राजनि०

महाकाय पु० ब०। १शिवानुचरभेदे नन्दिनि त्रिका० २हस्तिनि पुंस्त्री० स्त्रियां टाप्। ३विपुलदेहयुते त्रि०। कर्म०। ४स्थूलदेहे पु०।

महाकार्त्तिकी स्त्री कार्त्तिकीमधिकृत्य "प्रजापत्यं यदाख्यं तथैतस्यां नराधिप!। सा महाकार्त्तिकी प्रोक्ता" उ-क्तायां रोहिण्यीनक्षत्रयुक्तायां कार्त्तिकपौर्णमास्याम्।

महाकाल पु० कर्म०। १अनवच्छिन्ने काले, २शिवे च "महाकालेन च समम्" कालिकाध्यानम्। (माकाल) ३लताभेदे रत्नमा०। ४भैरवभेदे च "महाकालं यजेद्व्या दक्षिणे भूवर्णकम्" इति कालीतन्त्रम्।

महाकाव्य न०कवेः कर्म काव्यं कर्म०। सर्गबन्धरूपे अष्टा-धिकसर्गके पद्यभेदे तल्लक्षणं साहित्यदर्पणे ६प० दृश्यम्

महाकुक्षौ स्त्री महतो कुक्षीव (पात्रा) कट्फले राजनि०।
महाकुल न० कर्म०। "दशपुरुषविख्यातं श्रोत्रियाणां महाकुलम्" इति मनूक्ते दशपुरुषावधिवेदाध्यायिवंशे।
महाकुलीन त्रि० महाकुले भवः खच्। महाकुलोद्भवे।
महाकोशफला स्त्री कर्म०। देवदालीलतायाम् राजनि०।
महाकोषातकी स्त्री कर्म०। इक्षिघोषायाम् राजनि०।
महागन्ध न० महान् गन्धोऽस्य। १हरिचन्दने २श्वेते च राजनि०।३जलवेतसे हच्चे पु० शब्दच०। ४नागबलायां ५कविकायां च स्त्री राजनि०। ६चाकसंज्ञायां स्त्री हेम०
महागुरु पु० कर्म०। "त्रयः पुरुषस्यातिगुरवो भवन्ति पिता माता चाचार्यश्च" स्मृत्युक्ते पुरुषस्य १पित्रादौ "पतिरेकोगुरुः स्त्रीणां" मित्युक्ते दत्तकन्यायाः २भर्तरि स्वदत्तकन्यायाः पितरि, मातरि च। "महागुरुनिपाते च कार्य्यं किञ्चिदाचरेत्" स्मृतिः।
महागुल्मा स्त्री महान् गुल्मोऽस्याः। शोभाञ्जनाम् राजनि०
महागुहा स्त्री महती गुहेव मूलमस्याः। पृश्निपर्ण्याम् राजनि०। [ङीष्।२दीर्घगोधायुक्ते त्रि०स्त्रियां टाप्।
महाग्रीव पुंस्त्री०महान् ग्रीवाऽस्य। १वृद्धे राजनि० स्त्रियां
महाघोषा स्त्री घुष्यते कर्मणि घञ् कर्म०। १कर्कटशृङ्ग्याम्। (काकड़शिङ्गे) मेदि०। २कुन्दवृक्षे शब्दच०। महान् घोषोऽस्य अत्र वा। ३विपुलशब्दवति त्रि०। ४वृद्धे न० मेदि०।
महाङ्ग पुंस्त्री० महदङ्गमस्य।१वृद्धे स्त्रियां ङीष्। २गोजुरके ३रक्तचित्रके च राजनि०। ४विपुलावयवयुते त्रि०। कर्म०। ५विपुलाङ्गे न०।
महाच्छद पु० महान् छदोऽस्य। देवताड़वृक्षे रत्नमा०।
महाच्छाय पु० महती छाया यस्य। १वटवृक्षे राजनि०। २विपुलच्छायायुक्ते त्रि०। [राजनि०
महाच्छिद्रा स्त्री महत् छिद्रमस्याः। महामेदायाम्
महाजटा स्त्री महती जटा यस्याः। १रुद्रजटावृक्षे राजनि०। २विपुलजटायुते त्रि०। कर्म०। ३वृद्धत्वां, जटायाम् स्त्री।
महाजन पु० कर्म०। वेदवाक्येषु श्रद्धावति जने। "महाजनो येन गतः स पन्थाः" भा० व० यक्षप्रश्नः।
महाज(ब्जु)म्बू स्त्री कर्म०। राजजम्बूम् रत्नमा०। दीर्घफलः भावप्र० "राजजम्बूफलं स्वाद्वि विदाह्यग्नि गुरु रोचनम्"।
महाजाली स्त्री कर्म०। १पीतवर्षगोधायाम् अमरः। २राजकोशातक्यां राजनि०।
महाज्यैष्ठी स्त्री "ऐन्द्रे गुरुः शनौ चैव प्राजापत्ये रविस्तथा। पूर्णिमा रविवारेण महाज्यैष्ठी प्रकीर्त्तिता" स्कन्दवचनायां ज्यैष्ठपौर्णमास्याम्। "महाज्यैष्ठ्यां तु यः पश्येत् पुरुषः पुरुषोत्तमम्" प्रा०त०लक्षणान्तरं दृश्यम्
महाज्योतिष्मती स्त्री कर्म०। (वड़मालकाङ्गनी) लतामेदे राजनि०। [२महति प्रभौ त्रि०।
महाढ्य पु० महता धनेनाढ्यः। १कदर्य्ये राजनि०। कर्म०।
महातरु पु० कर्म०। १क्षुद्रोडुवृक्षे हेमच०। २विपुलवृक्षे च।
महातल न० कर्म०। अधःस्थेषु पातालेषु मध्ये पञ्चमे पातालभेदे शब्दमा०। [देव्यां हेमच०।
महातारा स्त्री कर्म०। तन्त्रोक्ते १तारिणीभेदे २जिनभेदे
महातालो स्त्री कर्म०।विपुलतालीभेदे तालाख्यामे राजनि०
महातिक्त पु० कर्म०। १निम्बवृक्षे राजनि०। २अतिशयतिक्तरसयुते त्रि०। ३वचतिक्तायां स्त्री राजनि०। ४पाठायां शब्दमा०। [२अतितीव्रे त्रि०।
महातीक्ष्णा स्त्री कर्म०। १भल्लातवृक्षे (भेला) राजनि०
महातेजस पु० महत् तेजोऽस्य।१पारदे राजनि०। २अतितेजस्विनि त्रि०। ३कार्त्तिकेये हला०। ४वह्नौ पु०शब्दच०। ५चित्रकवृक्षे च। [महाशये।
महात्मन् न० महान् आत्मा स्वभाव आशयो वा यस्य।
महादान न० कर्म०। विनायकादिस्कन्दजपाङ्के तुलापुरुषादिषोड़शदाने "अथातः संप्रवक्ष्यामि महादानस्य लक्षणम्" इत्युपक्रम्य "आद्यन्तु सर्व्वदानानां तुलापुरुषसंज्ञकम्" इत्यादिना षोड़शदानान्यभिधाय "विनायकादिपञ्चलोकपालवसुरुद्रादित्यमरुद्गणानाम्। ब्रह्माच्युतेशार्कवनस्पतीनां क्रमन्यतोऽष्टोमचतुष्टयं स्यात्। तथानि क्षुद्राणि तथैव चैषामतुक्रमेणापि यथास्वरूपमित्युक्तं मात्स्ये। विस्तरस्तु मत्कृततुलादानादिपद्धतौ द्रष्टव्यः।
महादारु न० कर्म०। देवदारुवृक्षे अटा०।
महादेव पु० कर्म०। "ब्रह्मादीनां सुराणाञ्च मुनीनाञ्च ब्रह्मवादिनाम्। तेषां महत्त्वात् देवोऽयं महादेवः प्रकीर्त्तितः" इत्युक्ते "महती पूजिता विश्वे मूलप्रकृतिरीश्वरी। तस्याः देवः पूजितश्च महादेवस्ततः स्मृतः" इत्युक्ते च शिवे। [महत्त्वम्। २वृद्धदारुवृक्षे च।
महाद्रुम पु० कर्म०।१अश्वत्थवृक्षे शब्दच०। तस्य विष्णुरूपत्वात्
महाधन न० महत् मूल्यरूपं धनमस्य।१बहुमूल्ये अमरः। २द्यूतार्थे ३शिखण्डिवृक्षे च मेदि०। ४मनोज्ञवस्त्रे हेमच०

५ब्रह्मणो पु० शब्दरत्नावली। ६अतिशयधनयुते त्रि०।

महाधातु पु० कर्म०। स्वर्णे शब्दच०। [नद्याङ्ग।

महानदी स्त्री। १ओड्रदेशस्थे नदीभेदे २सप्तद्वगामिन्यां

महानन्द पु० महान् अतिहृष्ट १आनन्दो यत्र। १मोक्षे कृत्या०कर्म०। २अतिशयानन्दे पु० "माघमासस्य या शुक्ला नवमी लोकपूजिता। महानन्देति सा प्रोक्तेत्युक्तायां ३माघशुक्लनवम्यां ४सुरायां राजनि० ५नदीभेदे च स्त्री।

महानन्दि पु० कवौ अलालकरस्य महापद्मनन्दपभेदस्य पितरि।

महानवमी स्त्री कर्म०। आश्विनशुक्लमधिकृत्य "ततोऽस्तु नवमी यस्मात् सा महानवमी स्मृता" इत्युक्तायाम् आश्विनशुक्लनवम्याम्।

महानस न० महदनः संज्ञायाम् अच्। पाकस्थाने अमरः।

महानाटक न० दृश्यकाव्यनाटकभेदे "एवदेव यदा सर्वैः पताकास्थानकैर्युतम्। अङ्कैश्च दशभिर्धीरा महानाटकमूचिरे"। सा ६ त०। २हनुमन्नाटके च।

महानाद पुंस्त्री० महान् नादोऽस्य। १गजे स्त्रियां ङीष्। २गर्जत्क्षवे मेदि० ३सिंहे पुंस्त्री० स्त्रियां ङीष् ४कर्षे च हेमच०। ५वृद्धे पुंस्त्री० राजनि० स्त्रियां ङीष्। ६कण्ठशाद्ये पु० ह्रारा०। कर्म०। ७महति शब्दे च।

महानिद्रा कर्म०। मरणे जटा० तत्र पुनः प्रत्युत्थानाभावात्तथात्वम्।

महानिम्ब पु० कर्म०। (घोडानिम) वृक्षभेदे रत्नमा०।

महानिशा स्त्री "महानिशा तु विज्ञेया मध्यमप्रहरद्वयम्" इत्युक्ते रात्रेर्मध्यमप्रहरद्वये।

महानील पु० कर्म०। १भृङ्गराजे २मणिभेदे "वज्रं वर्षेण भूयस्त्वात् क्षीरे मतगुणे स्थितः। नीलतां तद्गुणात् सर्वं महानीलः स उच्यते" गरुडपु० ७२६अ०। ३नागभेदे मेदि० ४महाजम्बौ च राजनि० ५तन्नभेदे न०। ६नीलापराजितायां स्त्री राजनि० गौरा० ङीष्। [मयूरर०।

महानुभाव पु० महानुभाव आशयो यस्य। महाशये

महापद्ममूलक न० वृक्षतृपद्ममूले। "विल्वोऽग्निमन्थः श्रीनाकः काश्मर्यः पाटला तथा। बैल्वैस्तु त्रिभिरेतैः स्यान्महापद्ममूलकम्" राजनि०।

महापद्मविष "भृङ्गी च कालकूटश्च सुरसो वत्सनाभकः। शङ्खश्चेति योगोऽयं महापद्मविषाभिधः" इत्युक्ते पद्मविषे विषे।

महापक्षा स्त्री महत् पक्षमस्याः। महाजम्बूवृक्षे रत्नमा०।

महापथ पु० कर्म०। १राजमार्गे हेमच०। २हिमालयोत्तरस्थे स्वर्गारोहणपथे च।

महापद्म पु० कर्म०। १अष्टनागमध्ये नागभेदे हेमच० २कुबेरस्य निधिभेदे जटा० "अर्बुदमङ्गं खर्वनिखर्वमहापद्मोति" लीलावत्युक्तायाम् ३दशकोटिसंख्यायां ४तत्संख्यान्विते न० ५नदभेदे महानन्दिसुते च ६शुक्लपक्षे रत्नमा०।

महापातक न० "ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः। महान्ति पातकान्याहुस्तत्संसर्गश्च पञ्चमः" इत्युक्तेषु पञ्चसु पातकेषु महापापमध्यत्व।

महापिण्डीतक पु० कर्म०। क्षुपवर्षे विपुलमदनवृक्षे राजनि०

महापीलु पु० कर्म०। मधुपीलौ राजनि० अतिमधुरत्वात्तस्य हि महत्त्वम्।

महापुराण न० न० "सृष्टिश्चापि विसृष्टिश्च स्थितिस्तेषाञ्च पालनम्। कर्मणां वासना वार्त्ता मन्वन्तरञ्च क्रमेण च। वर्णनं प्रलयानाञ्च मोक्षस्य च निरूपणम्। चतुर्लक्षेण श्लोकैरेव देशनाञ्च पृथक् पृथक्। महापुराणं विज्ञेयमेकादशकलक्षणम्" ब्रह्मवै० ब्र० १२अ० इत्युक्तलक्षणे व्यासप्रणीते पुराणभेदे।

महापुरुष पु० कर्म०। १श्रेष्ठे नरे २नारायणे च। "वन्दे महापुरुष! ते चरणारविन्दमिति भागवतम्।

महापुरुषदत्ता पु० महापुरुषस्य विष्णोः दत्ता इव महत्त्वात् मूर्धान्यस्य। यतमूर्त्याम् रत्नमा०।

महापुष्पा स्त्री महत् यन्नपुष्पत्वेन प्रसक्तं, पत्र पेचया वृक्षत्वं वा पुष्पं यस्याः। अपराजितायाम् शब्दच०।

महाप्रलय पु० कर्म०। ब्रह्मणो दिनावसाने जायमानः सर्वभूतक्षयः प्रलयः तस्यैव स्वमानेन शतवर्षावसाने जायमानस्तु महान् प्रलयः १तस्मिन् २तदुपलक्षिते जन्यद्रव्यानधिकरणीभूते काले च। ३जन्यभावानधिकरणीभूते काले इत्यन्ये। तत्प्रमाणाभाव इति नव्यनैयायिकाः

महाप्रसाद पु० "पादोदकञ्च निर्माल्यं नैवेद्यञ्च विशेषतः। महाप्रसाद इत्युक्ता याद्यं विष्णोः प्रयत्नतः" इत्युक्ते १दैवनैवेद्यादौ २विपुलप्रसन्नतायाञ्च।

महाप्राण पुंस्त्री० महान् बहुकालस्थायित्वात् श्रेष्ठः प्राणो यस्य। १द्रोणकाके राजनि० स्त्रियां ङीष् कर्म०। २ओंकारस्थे वाह्यप्रयत्नभेदे स च वर्ग्यद्वितीयचतुर्थवर्णानां श्रवणस्थानात्तदुच्चारणप्रयत्नः तेषामुच्चारणे हि प्राणवायो र्भूयान् प्रयास इति तेषामपि महाप्राणत्वमुपचारात्।

महाफल पु० महत् पत्रापेक्षया वृक्षत् फलमस्य। १विल्व-

ङले रत्नमा०। २इन्द्रयाकर्ण्यां (राखालशणा) स्त्री जटा०।

महाबल पु० महत् बलं यस्य। १वायौ २दशबले बुद्धे च त्रिका० ३महाबलयुते त्रि०। महत् बलं यस्मात् ५ब०। ४मौसले न० हेमच०। ५पीतवाह्यालके स्त्री रत्नमा०।

महाभारत पु० न० "चत्वारश्चैकतो वेदा भारतञ्चैवमेकतः। पुरा किल सुरैः सर्वैः समस्य तुलया धृतम्। चतुर्भ्यः सरहस्येभ्यो वेदेभ्योऽधिकं यदा। तदा प्रभृति लोकेऽस्मिन् महाभारतमुच्यते। महत्त्वात् भारतत्वाच्च महाभारतमुच्यते" इत्युक्तलक्षणे व्यासप्रणीते लक्षश्लोकात्मके ग्रन्थभेदे भारतशब्दे दृश्यम्।

महाभीता स्त्री कर्म०।१लज्जालुलतायाम् शब्दच०-अर्द्धमात्रेण हि ह्रस्वोच्चेन तस्या अतिभीतत्वम्। २अतिभीते त्रि०।

महाभूत न० कर्म०। सर्वेषां पञ्चात्मकतापाप्त्या क्षुद्रतापन्नेषु क्षुद्रत्वेन पृथिव्यप्तेजोवाय्वाकाशेषु १पञ्चसु भूतेषु। "तं वेधा विदधे नूनं महाभूतसमाधिना" रघुः। २परमेश्वरे पु० "तस्यैतस्य महाभूतस्य निःश्वसितमेतत् यदृग्वेदः" इत्यादि श्रुतिः। [मतुरुप०।

महाभूतघट पु० षोड़शमहादानान्तर्गते षोड़शे महादाने

महामल्ल पु० कर्म०। १नीलझङ्गराजे राजनि०। [हेमच०।

महामनस् त्रि० महदुदारं मनस्तद्व्यापारोऽस्य। महाशये।

महामात्र पु० "मन्त्रे कर्मणि भूम्नायाम् वित्ते माने परिच्छदे मात्रा च महती येषां महामात्रास्तु ते स्मृताः" इत्युक्ते प्रधानामात्ये।

महामाया स्त्री कर्म०। अन्यस्मिन् सर्वधर्मावभासो हि माया सर्वजगन्मूलत्वात्तस्या महत्त्वम्। १जगत्कारणभूतायाम् अविद्यायां २तदधिष्ठात्र्यां दुर्गायाञ्च "महामाया हरेश्चैषा यया संमोह्यते जगत्" देवीमा०।

महामाष पु० कर्म०। राजमाषे (बरबटी) शब्दच० माषापेक्षया तस्य हि महत्त्वात्तथात्वम्।

महामूल पु० महत् वीर्य्यकारित्वात् श्रेष्ठं मूलमस्य। राजपलाण्डौ राजनि०।

महामृग पुंस्त्री०महान् मृगः पशुः। १गजे हेमच०शरभे च राजनि०तयोर्हि पशुषु महत्त्वात् तथात्वम्। स्त्रियां ङीष्

महामेद पु० स्त्री द्व०। वैद्यकप्रसिद्धाष्टवर्गोक्ते ओषधिभेदे रत्नमाला। तत्रार्थे स्त्री राजनि०। "महामेदाभिधः कन्दो वीरुदादौ प्रजायते। शुक्लार्द्रकनिभः कन्दो लताजातः सपाण्डुरः। महामेदाभिधो श्रेयः" भावप्र०।

महामोह पु० महान् मोहः भ्रान्तिहेतुको वस्तुतोऽनिष्टेऽपि रागः। १संसारतदिषयकारणरूपेऽज्ञानभेदे "तमोऽविवेको मोहः स्यादत्यन्तकरणविभ्रमः। महामोहस्तु विज्ञेयो याम्यभोगसुखैषणा" इत्युक्ते २मैथुनादिसुखभोगेच्छारूपे अन्तःकरणवृत्तिभेदे च। वैषयिकसुखस्य वस्तुतोऽनिष्टत्वात् तथात्वम्। "दशविधो महामोहः" भा० का०। शब्दादिषु षट्सु दिव्यादिभेदतया दशविधेषु विषयेषु रञ्जनीयेषु राग आसक्तिः" त० कौ० उक्ते २दशविधविषयरागे च। [२तद्वति त्रि०।

महास्त्र न० कर्म०। १अस्त्रे २तिन्तिड़ीफले च जटा०।

महायज्ञ पु० कर्म०। नित्यं गृहस्थकर्त्तव्ये वेदाध्ययनाग्निहोत्रपितृतर्पणभूतबलिकर्मातिथिपूजनरूपेषु पञ्चसु कर्मसु।

महारजत न० कर्म०। १काचने २शुक्तौ च अमरः। तस्य हि रञ्जकत्वात् महत्त्वम्, कर्म०। ३दर्पणे च।

महारजन न० रजत्वनेन ल्युट् कर्म०। १कृतमाल्ये अमरः २स्वर्णे च मेदि०।

महारथ पु० "एकादश सहस्राणि योधयेद्यस्तु धन्विनाम्। शस्त्रशास्त्रप्रवीणश्च विज्ञेयः स महारथः" इत्युक्ते योधभेदे

महारस पु० द्व०। १खर्जूरे २कपोतेऽपि ३लोभकारे मेदि० ४रजौ पु०काञ्चिके न०जटा०। कर्म० ५पारदे पु० राजनि०। "दरदः पारदं प्रोक्तो वैक्रान्तं कालमभ्रकम्। माक्षिकं विमलञ्चेति सूरेतेऽष्टौ महारसाः" राजनि० उक्तेषु ४दरदादिषु पु०।

महाराज(ज)क पु० महान् चासौ राजते राज् घञर्थे क वा। विंशत्यधिकशतत्रयसंख्याते गणदेवभेदे।

महाराजद्रुम पु० कर्म०। आरग्वधे (सोन्दाल) राजनि०।

महारात्रि स्त्री "ब्रह्मणश्च निपाते च महाकल्पो भवेन्नृप!। प्रकीर्त्तिता महारात्रिः" इत्युक्ते महाकल्पात्मके १महाप्रलये "अहोरात्रात् परं यत्तु सङ्कर्षत्रयमुच्यते। सा महारात्रिरुद्दिष्टा" तन्त्रोक्ते अहोरात्रोपरि सङ्कर्षत्रयात्मके २रात्रिकाले।

महाराष्ट्र पु० कर्म०। (महाराड़्) १देशभेदे। तद्देशः कारणत्वेन अस्त्यस्या अच् गौरा०ङीष्। २तज्जातिप्रियत्वात् ३शाकभेदे च स्त्री राजनि०। [शुभे न०।

महारिष्ट पु० कर्म०। १गिरिजाते निम्बभेदे राजनि०। २अस्त्र-

महारोग पु० कर्म०। "उन्मादो राजयक्ष्मा च अपस्मारस्त्रिदोष एव च। मधुमेहश्वाश्मरी च तथोदरभगन्दरौ। इत्येतेऽष्टौ महारोगा महापातकसम्भवाः" इत्युक्तेषु महापातकजन्येषु उन्मादादिषु रोगेषु। (अपस्मारः अपस्मारशब्दे)

महारौरव पु० कर्म०। "महारौरवसंज्ञस्तु ऊर्ध्वोर्ध्वस्थाश्च-संपुटे। ध्मायते खदिराङ्गारैः पच्यते कालमच्यवम्" इत्युक्ते नरकभेदे वह्निपु०।

महार्घ त्रि० महानर्घो मूल्यं यस्य। बहुमूल्ये त्रिका०।

महार्णव पु० कर्म०। महासमुद्रे।

महार्द्रक न० कर्म०। वनार्द्रके राजव०।

महालय पु० महान् आत्मनिको लयो यत्र। १परमात्मनि २तीर्थस्थाने ३विहारे ४कन्यास्थरविकर्मासकृष्णपक्षे न०। "तस्मात् दद्यात् न चेद्वत्तं पितृणां वै महालये" इति भविष्यपु०। कर्म०। ५बहुदानस्थले।

महालक्ष्मी स्त्री कर्म०। चण्ड्यादितीयचरितदेवतारूपे "देवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम्" इत्युक्तलक्षणे अष्टादशभुजान्विते १दुर्गाशक्तिभेदे तन्त्रोक्ते २लक्ष्मीभेदे च।

महानीलसरस्वती स्त्री तारिणीभेदे तन्त्रसा०।

महालोध्र पु० कर्म०। लोध्रभेदे (पाठिया लोध) रत्नमा०।

महावरा पु० वृणोति विस्तृणाति वृ-अच् कर्म०। दूर्वायाम् शब्दर०। [तारभेदे।

महावराह पु० कर्म०। वृहद्वराहरूपधारिणि भगवद्व-

महावरोह पु० महान् अवरोहोऽस्य। वटवृक्षे राजनि०।

महावल्ली स्त्री कर्म०। माधवीलतायाम् शब्दच०।

महावाक्य न० कर्म०। परस्परसंबद्धार्थके १वाक्यसमुदायरूपे एकवाक्ये "वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते" मीमांसकाः। वेदान्तोक्ते २ब्रह्मविद्याप्रतिपादके तत्त्वमस्यादयुपनिषद्वाक्ये ३दानादौ अभिलापवाक्ये च।

महाविद्या स्त्री कर्म०। "काली तारा महाविद्या षोढ़शी भुवनेश्वरी। भैरवी छिन्नमस्ता च विद्या धूमावती तथा। बगला सिद्धविद्या च मातङ्गी कमलात्मिका। एताः दश-महाविद्याः" इत्युक्तासु कालिकादिषु दशसु देवीषु।

महाविष पु० ह्रस्व०। विषभेदे जटा०।

महाविषुव न०। रवेर्मेषसंक्रमणे। तत्संक्रमणञ्च स्वरूपतः संक्रमणं प्रभापुञ्जस्य संक्रमणं वा। तत्र प्रभापुञ्जसंक्रमणमयनांशानुसारेण अष्टमासाधिकषट्यधिकशतत्रयैरेकैकांशं परित्यज्य ततः पश्चात्पश्चात्तरादौ स्थाने भवति इदानीं च पश्चादयनं पूर्वायने तु पूर्वपूर्वतरादौ स्थाने भविष्यति। तत्तत्तच्चरमनियतस्थानत्वात् स्वरूपसंक्रमस्तु स्थिरः सर्वदैकस्थाने जायमानत्वात्। अयनसंक्रान्तिशब्दे दृश्यम्।

महावीचि पु० नास्ति वीचिः सुखं यत्र स वीचिः कर्म०। १सुखरहिते, "यत्र कल्लोलेन नीयते" इत्युक्ते २नरकभेदे च।

महा(वी)वीर पु० कर्म०। १गरुडे २वृहत्सुमतौ ३सिंहे ४यज्ञाग्नौ ५वज्रे ६श्वेतवृक्षे ७खड्गलक्षणे च मेदि०। ८जैनयतिभेदे च ९कोकिले हेम०। १०धत्तूरे ११एकवीरदत्ते राजनि० १२महाशूरे पु० १३वीरकाकोलीवृक्षे स्त्री रत्नमा०। १४यज्ञसाधने क्षुद्रमये पात्रभेदे तद्विधानविधिः कात्या० श्रौ० २६।१ खण्डादौ दग्धः।

महा(वी)वीर्य्य पु० ह्रस्व०। १वाराहीकन्दे राजनि०। २परमात्मनि च शब्दर०। ३अतिबलयुते त्रि०। ४वनकार्पासे स्त्री राजनि०। ५संज्ञायां स्त्र्यां पत्न्यां च स्त्री त्रिका०।

महावृहती स्त्री कर्म०। वार्ताक्याम् त्रिका०।

महावृक्ष पु० कर्म०। १वृहद्वृक्षे वृक्षा०। २वृहत्तरौ च।

महाव्याधि पु० कर्म०। महारोगे कुष्ठादौ रोगे।

महाव्याहृति स्त्री कर्म०। वैदिके भूर्भुवःस्वरात्मके मन्त्रत्रये

महाव्रण न० कर्म०। (नालिघा) वृहद्व्रणे।

महाव्रत न० कर्म०। १अतिशयव्रते शारदीयदुर्गापूजादौ "महाव्रतं महापुण्यं शङ्कराद्यैरनुष्ठितम्" देवीपु०। २द्वादशवार्षिके प्रायश्चित्तात्मके व्रतभेदे च।

महाशङ्ख पु० कर्म०। तन्त्रे वीराचारप्रसिद्धे नरकपालास्थिजाते "नरकपालास्थिखण्डेन रचिता जपमालिका। महाशङ्खमयी माला तारायाः प्रीतये प्रिया" इत्युक्ते १मालाभेदे २वृहच्छङ्खे च। "पौण्ड्रं दध्मौ महाशङ्खम्" गीता। [त्रि०।

महाशठ पु० कर्म०। १राजधत्तूरे राजनि०। २अतिधूर्ते

महाशणपुष्पी स्त्री शणस्येव पुष्पमस्य ङीप् कर्म०। वृहच्छणपुष्प्याम् राजनि०। स्वार्थे क। तत्रैव।

महाशता स्त्री शतं मूलानि सन्त्यस्य अच् कर्म०। वृहच्छतावर्य्याम् राजनि०।

महाशतावरी स्त्री कर्म०। वृहच्छतावर्य्याम् राजनि०।

महाशय त्रि० महान् उदार आशयो यस्य। महाशुभाशे अमरः। [राजनि०।

महाशाखा स्त्री महती शाखाऽस्याः। नागबलायाम्

महाशालि पु० कर्म०। स्थूलशाल्यौ हेमच०।

महाशीता स्त्री महती शीता शीतलवीर्य्या। १शतमूल्याम् शब्दच०। २अतिशीतले त्रि०।

महाशक्ति स्त्री महती शक्तिरत्वेन प्राशस्त्यात् शक्तिः।

शुक्लाङ्गौ शुक्लौ राजनि० । [स्त्री ङीष् ।

महाशूद्र पु०कर्म० । १आभीरे (आहीर) जातिभेदे २तत्कन्यां

महाश्मशान न० कर्म० । काम्याम् समूलकर्मसहितसर्वजीवानां पुनरुत्पादनाय नाशाधारत्वात् तथात्वम् ।

महाश्यामा स्त्री कर्म० । १श्यामावस्तायां रत्नमा० । २शिंशपाभेदे राजनि० ।

महाश्यावपिका स्त्री कर्म० । (शुलकुड़ी) क्षुपभेदे राजनि०

महाश्वेता स्त्री कर्म० । १सरस्वत्याम् त्रिका० २कृष्णभूमिकुष्माण्डे च अमरः ।

महाष्टमी स्त्री कर्म० । "आश्विने शुक्लपक्षस्य भवेद् या तिथि रष्टमी । महाष्टमीति सा प्रोक्ता" इत्युक्तायामाश्विनशुक्लाष्टम्याम् । [राजनि० ।

महासर्ज पु० कर्म० । १असनवृक्षे २धनसवृक्षे च (काटाल)

महासह पु० कर्म० १मुख्यप्रधाने कुलवृक्षे राजनि०।२माषपर्णाम् स्त्री १अश्वत्थवृक्षे च स्त्री अमरः।३अतिक्षमे त्रि०

महासान्तपन न० कर्म० सप्ताहसाध्ये कृच्छ्रे व्रतभेदे ।

महासार पु० महान् सारोऽस्य । दुरुखदिरे राजनि० ।

महासिंह पु० मित्रक० । १अरभे राजनि० २वृहत्तसिंहे च

महासुगन्धा स्त्री बहु गन्धोऽस्यां हिंसा वाऽस्याः कर्म० । १गन्धनाकुल्याम् राजनि० २अतिसुगन्धयुक्ते त्रि० ।

महासेन पु० महती सेनाऽस्य । १कार्त्तिकेये अमरः । २बृहत्सेनाधिपतौ च ।

महास्कन्धा स्त्री महान् स्कन्धोऽस्याः । जम्बूवृक्षे राजनि० ।

महाहास पु० कर्म० । अट्टहासे उच्चैर्हासे शब्दर० ।

महाहिगन्धा पु० अहेर्गन्धो हिंसा यस्मात् अहिगन्धो नकुलः समत्वेनास्यास्त्य च् कर्म० । गन्धनाकुल्याम् राजनि० । [२अतिगन्धे त्रि०

महाह्वा स्त्री कर्म० । १कपिकच्छ्वाम् (आलकुशी) शब्दमा०

महि(ही) स्त्री मह-इन् वा ङीष् । १पृथिव्याम् । ङीबन्तस्तु मालवदेशस्थे २नदीभेदेऽपि ।

महिका स्त्री मह्यते मह-कुन् । हिमे अमरः ।

महिमन् पु० महतो भावः इमनिच् टिलोपः । १महत्त्वे २ऐश्वरैश्वर्यभेदे हेमच० । [२अर्कवृक्षे च ।

म(मि)हिर पु० मह-(मिह-)वा किरच् ।१सूर्ये त्रिका० ।

महिला स्त्री मह-इलच् ।१योषिति अमरः ।२प्रियङ्गुलतायां २रेणुकागन्धद्रव्ये राजनि० ४मत्तायां स्त्रियाञ्च शब्दर० । एलच् । महेलापि योषिति शब्दर० ।

महिष पुंस्त्री० मह-टिषच् । १खनामख्याते पशुभेदे, स्त्रियां ङीष् । २महिषासुरे च ।३क्षत्राभिजेकायां राज्ञः स्त्रियां ४सैरिन्ध्र्याम् ५ओषधिभेदे च स्त्री मेदि० ङीष् । ६व्यभिचारिण्यां स्त्रियां माहिषिकशब्दे दृश्यम् ।

महिषध्वज पु० महिषो ध्वजः चिह्नं वाहनत्वेनास्य । १यमे २जिनभेदे च हेमच० महिषवाहनादयोऽप्यत्र ।

महिषमर्दिनी स्त्री महिषं महिषासुरं मृद्नाति मृद्-णिनि ङीष् ह्रस्व० । दुर्गाभेदे । [क तन्त्रेव ।

महिषाक्ष पु० महिषस्याक्षीव अक्षमा० । गुग्गुलुभेदे । स्वार्थे

महिषासुर पु० रम्भासुरेण महिष्यामुत्पादिते असुरभेदे ।

महिषासुरसम्भव पु० महिषासुरादात्तनृमेदसः सम्भवति सम्+भू-अच् । भूमिजगुग्गुलौ राजनि० । [ऋषे अमरः ।

महीक्षित् पु० महीं क्षयते दृष्टे क्षि-ऐश्वर्ये क्विप् तुक् च ।

महीज न० मह्या जायते जन-ड । १आर्द्रके राजनि० । २भूकदम्बे ३नरकासुरे च पु० ४सीतायां स्त्री । [धरोऽप्यत्र ।

महीध्र पु० महीं धारयति धृ-क । पर्वते अमरः । क्विप् । महीं-

महीप्राचीर न० मह्याः प्राचीरमिवावरकत्वात् । मण्डूके त्रिका० । [क्विप् । १पर्वते २भूमिपाले च ।

महीभृत् पु० महीं बिभर्त्ति धारयति पालयति वा भृ-

महीयस् त्रि० अतिशयेन महान् महत्+ईयसुन् टिलोपः । अतिमहति "महतो महीयान्" श्रुतिः ।

महीयमान त्रि० महीयते मही+कण्ड्वा० यक्-शानच् । १पूज्ये २श्रेष्ठे च "महीयमाना भवताऽतिमात्रम्" भट्टिः ।

महीरुह पु० महीं रोहति रुह-क । १वृक्षे अमरः २शाखावृक्षे राजनि० ।

महीलता स्त्री मह्या लतेव । (केँचो) किञ्चुलुके अमरः ।

महेच्छ त्रि० महती इच्छा यस्य । महाशये अमरः ।

महेन्द्र पु० महान् इन्द्रः इन्द्रत्वापि नियन्तृत्वात् । १परमेश्वरे २महैश्वर्यवति इन्द्रे ३जम्बुद्वीपस्थपर्वतभेदे च मेदि०

महेन्द्रकदली स्त्री महेन्द्रप्रिया तद्दत्ता वा कदली । कदलीभेदे राजनि० । [दयोऽप्यत्र राजनि० ।

महेन्द्रपुरी स्त्री ह्रस्व० । अमरावत्याम् । महेन्द्रनगर्यां-

महेन्द्रवारुणी स्त्री महेन्द्रश्च वरुणश्च तयोरियं प्रियत्वात् अण् देवताद्वन्द्वे उत्तरपदवृद्धिः कर्म० । (वड़माकाल) लताभेदे राजनि० । [अमरः ।

महेरणा स्त्री महं गजोत्सवमीरयति ल्यु । गजक्रीडायाम्

महेश पु० कर्म० । शिवे । महेश्वरोऽप्यत्र "महेश्वरस्त्र्यम्बक एव नागरः" इति रभसः ।

महेशवन्धु पु० ह्रस्व० । बिल्ववृक्षे शब्दच० ।

महैला स्त्री० कर्म०। स्त्रीजेतायाम् (वड़एजाची) राजनि०।
महोच्च पु० महान् उच्चो यत्र समा०। इङ्गुदवृक्षे अमरः।
"महोच्चं वा महाजं वा श्रोत्रियाय प्रकल्पयेत्" मनुः।
महोटी स्त्री महान्ति फलापेक्षया स्थूलानि उटानि पर्णान्यस्याः ङीष्] इङ्गुद्यां क्षुपभेदे भावप्र०।
महोत्पल पु० कर्म०। १पद्मे, २सारसपक्षिणि च अमरः।
महोत्सव पु० कर्म०। सन्ततसुखसम्पादकव्यापारे।
महोत्साह त्रि० महान् उत्साहो यस्य। अत्यन्तोद्यमयुक्ते महोद्यमोऽत्यत्र।
महोदधि पु० कर्म०। समुद्रे।
महोदय पु० महान् उदयो वृद्धिराधिपत्यं वा यत्र। १कान्यकुब्जदेशे।२तद्देशस्थे पुरभेदे न०। ३मोक्षे पु०मेदि० ४स्वामिनि पु०हेमच०। "अमावास्यायां अवश्यम्" इत्यादि वचनात् स्वल्पशुक्लार्द्धोदययोगात् "किञ्चिदूने महोदयः" इत्युक्ते किञ्चिदूने ५योगभेदे पु०। ६नागबलायां स्त्री राजनि०।
महोदरी स्त्री० महदुदरं यस्याः। १शतमूल्याम् भावप्र०। २महोदरयुक्ते त्रि०। [त्रि०।
महोन्नत पु० कर्म०।१तालवृक्षे भावप्र०। २अत्युन्नतियुक्ते
महोरग पु० कर्म०। महोरगाकारोऽस्य अच्। २तगरमूले न० रत्नमा०।
महोल्का स्त्री कर्म०। इङ्गुदवृक्षायाम्।
महौषध न० कर्म०। १गुडूच्याम् २लशुने ३सारादीकन्दे वत्सनाभे ४विषे, ५भूम्यामलक्यां राजनि० ६पिप्पल्याम् शब्दच० ७अतिविषायाम् अमरः दीर्घवृन्तौषधमात्रे च।
महौषधि स्त्री कर्म०। १दुर्गायां २लशुनाहुतुपे शब्दच०। "सहदेवी तथा व्याघ्री बला चातिबला तथा। अजशृङ्गी तथा सिंही अष्टमी च सुवर्चला। महौषध्यष्टकं प्रोक्तम्" इत्युक्ते ३देवादीनां स्वामीयद्रव्यभेदे। वा ङीष्। ४श्वेतकण्टकार्य्यां ५ज्योत्स्नायां ६कटुकायाम् ७अतिविषायाञ्च राजनि० दक्षिणमोचिकायाम् त्रिका०।
महौषधिगण पु० "पृश्निपर्णी शृङ्गवेरबला भल्लातकी शतावरी। गुडूची सहदेवी च महौषधिगणः स्मृतः" शब्दच० उक्ते पृश्निपर्णादौ ओषधिगणे। [अमित मर्मे।
मा शब्दे अक० माने सक० दुः आ० अनिट्। मिमीते मा माने अदा० प० सक० अनिट्। माति अमासीत्।
मा माने दि० क्रिन् आ० सक० अनिट्। मायते ममाम।
मा अव्य० क्विदन्तत्वात् दैवादिकात् आदादिकाद्वा माधातोः क्विप्। १धारणे। धातोर्क्विबन्तेन शब्दे क्विबन्तव्यवहारात् "न माङ्योगे" पा० क्विदन्तबन्धातुनिष्पन्नयोगे न भूतादिसमः तद्धितयोगे तु स्यादेव "मा निषाद। प्रतिष्ठां त्वमगमः" इति रामायणम्। मा-क-टाप्। २लक्ष्म्याम् मेदि०३मातरि च स्त्री। मा-भस्म०भावे क्विप्। ४माने स्त्री शब्दर०।
मांस न० मन-च दीर्घश्च। "मांस भक्षयिताऽमुत्र यस्य मांसमिहाम्यहम्। एतन्मांसस्य मांसत्वम्" मनूक्ते प्राणिदेहस्थशोणितपरिपाकजे धातुभेदे भावप्रकाशे मांसवर्गे तद्गुणाः उक्ता उदाहृताः। पाकपचनशब्दे परे समासेऽस्यान्यादेशः "मांसपचन्या उपाध्यायाः" महाभाष्यम्।
मांसच्छदा स्त्री मांसं छादयति छद-णिच्-अच् टाप्। मांसरोहिण्यां लतायाम् राजनि०।
मांसज न० मांसाज्जायते जन-ड। देहस्थे मांसजन्ये मेदसि हेमच०। अस्रक्करशब्दे दृश्यम्।
मांसदलन पु० मांसं शोफात्मकं मांसं दलयति दल-णिच्-ल्यु। शोफघातकवृक्षे शब्दच०। [राजनि०।
मांसद्राविन् पु० मांसं द्रावयति द्रु-णिच्-णिनि। अम्लवेतसे
मांसपेशि स्त्री इत०। गर्भस्थावयवभेदे। वा ङीष् तत्रैव भावप्र०। [राजनि०।
मांसफला स्त्री मांसमिव कोमलं फलं यस्याः। वार्ताक्याम्
मांसमासा स्त्री मस-परिणामे घञ् मांसस्य परिणामो यस्याः ६ ब०। माषपर्ण्याम् राजनि०।
मांसरोहिणी स्त्री मांसं रोपयति रुह-णिच् णिनि वा न पुक्। व्रणश्लिष्टद्रव्यभेदे (चामकषा)। राजनि०।
मांसल त्रि० मांस+अस्त्यर्थे लच्। १बहुमांसयुक्ते अमरः। २स्थूले ३पुष्टे च। [राजनि०।
मांसलफला स्त्री मांसलं पुष्टं फलमस्याः। वार्ताक्याम्
मांससार पु० इत०। मेदसि राजनि०। मांसस्य सारोऽयम्
मांसहासा स्त्री मांसेन हस्यते कर्मणि घञ्। देहस्थधर्मणि शब्दर०। [(कसाइ) अमरः।
मांसिक त्रि० मांसं पलमस्य ठक्। मांसविक्रयोपजीविनि।
मांसिनी स्त्री मांसस्तदाकारस्तद्धेतुत्वं वाऽस्त्यस्याः इनि। जटामांस्याम् राजनि०।
मांसी स्त्री मांसमस्त्यस्य अच् गौ० ङीष्। १जटामांस्याम् २कक्कोल्याञ्च मेदि० ३मांसच्छदायां राजनि०।
मांसेष्टा स्त्री मांसमिष्टं यस्याः। वल्लुरायां खगभेदे राजनि०
माकन्द पु० माति मा-क्विप् माः परिमितः कन्दोऽस्य।

ग्यामे । २ग्रामसङ्घां स्त्री राजनि० ३नगरभेदे च स्त्री मेदि० गौरा० ङीष् । ४पीतचन्दने शब्दच० ।

माकरी स्त्री मकरस्य तत्स्थरविकालस्य दृश्यम् अण् । मकरस्थितरविकाले तदारब्धमासस्य शुक्लसप्तम्यां "तस्मे रोगस्य शोकस्य माकरी ह्यन्तु सप्तमी" ति० त० ।

माक्ष सृ० हायां भ्वा०पर०सक०सेट् इदित् । माक्षति अमाक्षीत् ।

माक्षि(क्षी)क न० मक्षिकाभिः सम्भृत्य कृतम् अण् पृषो० वा दीर्घः । १मधुनि अमरः । तन्नुल्यगुणे उपधातुभेदे २स्वर्णमाक्षिके ३रौप्यमाक्षिके च राजनि० । [राजनि०]

माक्षिकज न० माक्षिकाज्जायते जन-ड । सिक्थके (मोम)

माक्षिकफल पु० माक्षिकमिव मधुरं फलमस्य । मधुनारिकेले राजनि० ।

माक्षि(क्षी)कशर्करा स्त्री इत० मधुजाते खण्डभेदे राजनि०

मागध पु० मगधदेशे भवः अण् ।१क्षेत्रजीरके मेदि० २स्तुतिपाठके अमरः क्षत्रियायां वैश्याज्जाते ३वर्णसङ्करभेदे (भाट) च । ४यूथिकायां ५विश्वस्यां स्त्री मेदि० ङीष् । ६कृष्णक्षेत्रायां ७यवकरायां शब्दच० ८भाषाविशेषे च स्त्री हेमच० ९मगधदेशजाते त्रि० ।

मागधखारिका स्त्री लोलावल्लुके खारिकाभेदे ।

माघ पु० मघानक्षत्रयुक्ता पौर्णमासी अण् ङीष् माघी सा यस्मिन् मासे पुनरण् । चैत्रादधिके १एकादशे चान्द्रे मासे । २तत्पौर्णमास्यां स्त्री ङीष् । ३शिशुपालवधकाव्ये ४तत्कर्त्तरि च पु० । "तावद्भा भारवेर्भाति यावन्माघस्य नोदयः" इत्युक्तेः ।

माघ्य न० माघे भवं यत् । कुन्दपुष्पे अमरः ।

माङ्गल्य न० मङ्गलमेव, मङ्गलाय हितं वा यञ् । १मङ्गले २मङ्गलसाधने च । [कृतायाम् राजनि० ।

माङ्गल्यार्हा स्त्री माङ्गल्यमर्हति अर्ह-अच् । त्रायमाणा-

माचिका स्त्री मच-ण्वुल् ।१अम्लवेतायां राजनि० । २मञ्चिकायाञ्च स्त्रिकाo ।

माञ्जिष्ठ न० मञ्जिष्ठया रक्तमण् । १रक्तवर्णे २तद्वति त्रि०

माठर पु०मन-अरन् ठान्तादेशः ततः स्वार्थे अण्, सूर्यस्य परिवार्थं माठति मठ-अरण् वा । सूर्यस्य १पारिपार्श्विकेगणभेदे अमरः । २व्यासे मेदि० ३विप्रे हेमच० । ४यौधिष्ठिरे त्रि० कौ० ।

माण(ण)क न० मा-अकच् पुट् णुट् वा । स्वनामख्याते वृन्दभेदे "इरिद्रा माण(ण)कं कचुः" नवपत्रिकोक्तौ ।

माणव पु० मनोरपत्यं अण् अल्पार्थे णत्वम् । १अल्पवयस्के मनुष्ये शब्दच० । स्वार्थे क । तत्रार्थे २चारभेदे च हेम० ।

माणवीन त्रि० माणवस्येदम् खञ् । बालकसम्बन्धिनि ।

माणव्य न० माणवानां समूहः यत् । बालकसमूहे ।

माणिक्य न०मणिरिव कायति कै-क स्वार्थे यञ् । (माणिक) १रत्नवर्णे रत्नभेदे, २सद्वृत्तौषधिकायां स्त्री हेमच० ।

माणिवन्ध(मन्थ) न० मणिवन्ध(मन्थ) पर्वते भवः अण् । वैन्धवखण्डे अमरः ।

मातङ्ग पु०स्त्री० मतङ्गस्य इनेरयम् अण् । १गजे अमरः । २किरातजातिभेदे स्त्रियां ङीष् ।३जैनभेदे पु०हेमच० । ४दशमहाविद्याभेदे स्त्री ङीष् ।

मातङ्गमकर पु० मातङ्ग इव मकरो जलजन्तुः । महामत्स्यभेदे राजनि० ।

मातरपितृ स्त्री द्वि० व० माता च पिता च इन्द्वे मातरौ मातरादेशः । मात्रापित्रोः । पक्षे मातरानङ् । मातापितृ तयोरर्थयोः द्वि० व० ।

मातरिश्वन् पु० मातरि आकाशे श्वयति वर्द्धते श्वि-कनिन् डिच्च अलुक्स० वायौ अमरः । [इन्द्रसारथौ अमरः ।

मातलि पु० मतं ज्ञातिं ला-क मतङ्गस्यापत्यम् इञ् ।

माता स्त्री मा-अतच् । जनन्याम् । "विश्वेश्वरीं विश्वमातां" इति दुर्गोत्सवः । [२तत्पत्न्यां स्त्री गौरा०ङीष् ।

मातामह पु० मातुः पिता मात्र+डामह । १मातुः पितरि

मातुल पु० मातृभ्राता मातृ-डुलच् । १मातृभ्रातरि अमरः २तत्पत्न्यां वा ङीष् वा आनुक् च । मातुलानी मातुली मातुला च । मद्-विच्-डलच् पृषो० दस्य तः । ३धुस्तूरे ४ओषधिभेदे ५मदनवृक्षे च मेदि० ६वर्णभेदे हेम० ।

मातुलपुत्रक न० मातुलस्य धुस्तूरस्य पुत्र इव कायति कै-क । १धुस्तूरे अमरः । कृत० स्वार्थे क । २मातुलसुते ।

मातुलाहि पु० मातुल इवाहिः । मातुलाने सर्पे अमरः ।

मातुलुङ्ग पु० मातुलं गच्छति गम-खच् डिच्च पृषो० । १बीजपूरे भरतः । २मधुरकक्षुद्रायाम् स्त्री रत्नमा० । स्वार्थे क । ३बीजपूरे अमरः ।

मातृ त्रि० मा-तृच् । १प्रमाणकर्त्तरि २परिमाणकर्त्तरि ३जीवे ४आकाशे च मातरिश्वा । मातारौ मातारः । मा-ट । "ब्राह्मी माहेश्वरी चण्डी वाराही वैष्णवी तथा । कौमारी चैव चामुण्डा चर्चिकेत्यष्ट मातरः" इत्युक्ते १शिवशक्तिभेदे । २जलमद्याम् ७भूमौ ८विभूतौ शब्दर० । ९चक्षुषाम् हेमच० १०रेवत्याम् अमर० ११स्त्री

मध्यां मेदि० १२आसुकण्ठ्याम् १३इन्द्राक्ष्यां (रा-खालशसः) १४जटामांस्यां राजनि० चण्डीप्रसिद्धासु १५देवीभक्तिषु च। "मातः कोपमवाविष्टः" देवीभा०। ज्यातिर्देशिकमातरश्च ब्रह्मवै०पु०गण०ख०१५अ०उक्ता यथा "कन्यदात्री गर्भधात्री भक्ष्यधात्री गुरुप्रिया। अभीष्ट-देवपत्नी च पितुः पत्नी च कन्यका। सगर्भजा या भगिनी पुत्रपत्नी प्रियाप्रसूः। मातृमाता पितृमाता सोदरस्य प्रिया तथा। मातुः पितुश्च भगिनी मातुलानी तथैव च। जनानां वेदविहिता मातरः षोड़श स्मृताः"।

ब्रह्मवै० पु० जन्मख० ५६ अ० अन्यविधा उक्ता यथा "गुरुपत्नी राजपत्नी देवपत्नी तथा वधूः। पितोः स्वसा शिष्यपत्नी भक्तपत्नी च मातुली। पितृपत्नी मातृपत्नी स्वसृ च भगिनीसुता। गर्भधात्रीष्टदेवी च पुंसः षोड़श मातरः"। तत्रैव २६ अ० "गुरोःपत्नी राजपत्नी विप्रपत्नी च या सती। पत्नी च भ्रातृसुतयोर्मित्रपत्नी च तत्प्रसूः। प्रसूः पितोस्तयोर्भ्रातुःपत्नी स्वसृ च कन्यका। जननी तत्सपत्नी च भगिनी सुरभी तथा। स्वाभीष्टसुरपत्नी च धात्री कान्ता प्रदायिका। गर्भधात्री स्वनाम्नी च भयात्रातुश्च कामिनी। एता वेदप्रणीताश्च सर्वेषां मातरः स्मृताः"। अस्य रूपं मातरौ मातरः। दक्षादौ पूज्यासु गौर्य्यादिषु १६देवीभक्तिभेदेषु "गौरी पद्मा शची मेधा सावित्री विजया जया। देवसेना स्वधा स्वाहा मातरो लोकमातरः। शान्तिः पुष्टि-र्धृतिस्तुष्टिरात्मदेवतया सह" शु०त०मट्टपु०।

मातृका स्त्री मातेव कायति कै-क। १उपमातरि २ब्रह्मा-णयादिषु चण्डीप्रसिद्धदेवीमूर्त्तिषु ३सर्वशब्दोत्पादकेषु अकारादिक्षोनपञ्चाशद्वर्णेषु ४मातरि च मेदि०। मातृ+स्वार्थे क। मातृशब्दार्थे।

मातृबन्धु पु० ६त०। "मातुः पितुश्चसुः पुत्रा मातृमातृ-स्वसुः सुताः। मातृमातृस्वसृत्वाच्च विज्ञेया मातृबन्धवः" इत्युक्तेषु मातुः पितृव्यस्त्रीयादिषु। मातृबान्धवोऽत्र।

मातृष्वसृ स्त्री ६त०। मातृभगिन्याम् अनुक्रम० उभयत्र पत्वम्। मातुःस्वसाप्यत्र।

मातृष्वस्रेय पु० मातृष्वसुरपत्यम् ढक्। १मातृभगिनीपुत्रे ततः कन्यायां स्त्री ङीप्। अण्। मातृष्वसेयोऽप्यत्र।

मातृसिंही स्त्री मातुः प्रमातुः सिंहीव। वाराहकन्दे शब्दर०

मात्र न० मा-ष्ट्रन्। १स्वल्पे २अवधारणे च अमरः। ३परिच्छदे ४अल्पे ५परिमाणे स्त्री अमरः। ६कर्णभूषायाम् ७वित्ते ८वर्णावयवभेदे च स्त्री मेदि०। "कालेन यावता पार्थिः पर्य्येति जातुमण्डलम्। सा मात्रा कविभिः प्रोक्ता" इत्युक्ते ९क्षुद्रवर्णोच्चारणकाले च स्त्री। "एक-मात्रो भवेद् ह्रस्वः"। सीवन्त्येनया विद्यायाः मा-करणे ष्ट्रन्। १०इन्द्रियवृत्तौ। "मात्रास्पर्शास्तु कौन्तेय!" गीता।

मात्रापताका स्त्री छन्दोग्रन्थोक्ते मात्राछत्तस्यलघुगुरु-स्थानानुसृते पताकाकारे चक्रे।

मात्रामर्कटी स्त्री छन्दोग्रन्थोक्ते मात्राछत्तस्यलघुगुरुस्थाना-नुसृते मर्कटीजालचक्रभेदे। [भेदचक्रे।

मात्रामेरु पु० छन्दोग्रन्थोक्ते मात्राछत्तस्यलघुगुरुस्थानानुसृते

मात्राछत्त न० मात्रया कृतं छत्तम्। आर्य्यादौ छन्दोभेदे।

मात्सर्य्य न० मत्सरस्य भावः ष्यञ्। परगुणद्वेषे "मात्सर्य्य-मत्यार्य्य विचार्य्य धूर्य्याः" भा०द०। [अमात्सीत्।

माद वधे सक० क्रैये अक० भ्वा० प० सेट् रदित्। मान्दति

माद पु० मद-घञ्। १पथि त्रिका०। २मन्थने शब्दर०।

माधुर त्रि० मधुरायां भवो मधुरायाः आगतो वा अण्। १मधुरानगरीभवे, २तत आगते च।

माद पु० मद-घञ्। १दर्पे २हर्षे च भरतः।

मादक त्रि० मदयति मद-णिच्-ण्वुल्। १मत्तताकारके द्रव्ये। मादयति कर्त्तरि ण्वुल्। २दाल्यूढे पुंस्त्री० शब्दमा० स्त्रियां ङीष्।

मादन न० मादयति मद-णिच्-ल्यु। १स्वर्णे शब्दच०। २कामदेवे ३मदनवृक्षे च पु०। ४विजयायां राजनि० ५माकन्द्याञ्च स्त्री भावप्र०गौरा०ङीष्। ६हर्षकारके त्रि०।

माद(च)(श)य् त्रि० समेव दर्शनमस्य दृश्-कृञ् ट क्विप् वा। सम तुल्यदर्शने मत्सदृशे। [>अतिविषायाञ्च राजनि०।

माद्री स्त्री मद्रे भवा अण्। १पाण्डुराजस्य द्वितीयपत्न्याम्

माधव पु० माया धवः। १नारायणे। मधु+स्वार्थे अण्। २वसन्ते विश्वः "स माधवेनाभिमतेन सख्या" कुमारः। मधुने पुष्परसाय मद्याय वा हितः अण्। ३वैशाखे मासि तस्य बहुपुष्पवत्त्वात् तद्धितत्वम्। ४मधूकवृक्षे तत् पुष्पेण हि मद्यसम्भवः। ५कृष्णसखे च राजनि०। मधु बाहुल्येनास्त्यस्याः अण्। ६वासन्तीलतायाम् स्त्री ङीप्।

माधवीलता स्त्री कर्म०। स्वनामख्यातायां लतायाम् अमरः

माधवेष्टा स्त्री माधवे वैशाखे माधवस्य कृष्णस्य वा इष्टा। वाराहीकन्दे राजनि०। [२माधवप्रिये त्रि०।

माधवोचित न० माधवे उचितः। १कङ्कोलवृक्षे राजनि०

माधवोद्भव पु० माधवे वैशाखे उद्भवति फलत्वेन उद्+भू-अच्। (पियाल) राजादनाम् राजनि०।

माधुर न० मधु-राति अमरेभ्यो ददाति रा-क-स्वार्थे, मधुरस्नेहं वा अण्। १मल्लिकापुष्पे त्रिका०। २मधुरसयुक्ते त्रि०।

माधुरी स्त्री मधुरस्य भावः अञ् माधुर्य्यं तिलत्वात् स्त्रीत्वे ङीष् यलोपः। १माधुर्य्ये मधुरत्वे, "मधुस्रवन्माधुरी धारा" इत्युक्तटः। मधुरा+स्वार्थे अण्। २मदिरायाम्

माधुर्य्य न० मधुरस्य भावः ष्यञ्। १मधुरत्वे "चित्तद्रवीभावमयो ह्लादो माधुर्य्यमुच्यते" सा०द० उक्ते २काव्यगुणभेदे च। तद्व्यञ्जकवर्णाश्च तल्लक्षणा यथा "सर्व्वे वर्गान्त्यवर्णेन युक्ताः टठडढानृ विना। रणौ लघु च तद्व्यक्तौ वर्णाः कारणतां गताः। वृत्तिरल्पवृत्तिर्वा मधुरा रचना मता"। तस्य सम्भोगदुःखादावनुगुणं यथोक्तं तत्रैव "सम्भोगे करुणे विप्रलम्भे शान्तेऽधिकं क्रमात्" इत्यारभ्य हेम०। "रूपं किमप्यनिर्व्वाच्यं तनोर्माधुर्य्यमुच्यते" उज्ज्वलमणौ नायकगुणक्रमे।

माध्यन्दिन न० मध्यन्दनमेव-अण्। मध्यमदिने तत्र पाठः अण्। शुक्लयजुर्व्वेदीयशाखाभेदे।

माध्वीक स्त्री मधुना मधूकेनाप्येव निर्वृत्तम् ठक्। १मधूकपुष्पजाते मद्ये अमरः। मधु एव अण् स्वार्थे ठक्। २द्राक्षाफले "साध्वी माध्वीक! चिन्ता विलुठतिति जयदेवः। [नारिकेले राजनि०।

माध्वीकफल पु० माध्वीकमिव मधुरं फलमस्य। मधु-

माध्वीमधुरा पु० माध्वीकमिव मधुरा मूर्त्तिर्० कर्म्मधो यलोपः। मधुरखर्জ্জूरिकायाम् राजनि०।

मान विचारे भ्वा० सक० सेट् स्वार्थे यन् नेट्। मीमांसते अमीमांसिष्ट अमंसाताम् च तत्र न स्वार्थे सन्।

मान अर्च्चने वा चु० उ० पक्षे भ्वा० पर० सक० सेट्। मानयति ते मानति अमीमनत्-त अमानीत्।

मान न० मा-ल्युट्। १परिमाणे कुडवतुलाप्रस्थादौ द्रव्यपरिच्छेदे भावप्र० मानपरिभाषा कर्म्मशब्दे दृश्या। २प्रमाणे "मानाधीनामेयसिद्धिः" मीमांसकाः। मानाङ्गे कालक्रियायां तालविरामोपलक्षिते ३कालव्यापारे च मेदि०। मन-घञ्। आत्मनि उत्कर्षाभिमानात्मिकायां ४चित्तसमुन्नतौ पु० अमरः। "स्वामीष्टाङ्गे प्रणयोत्थादिविरोधी मान उच्यते" इत्युक्ते ५चतुरस्रदम्पत्योः ६व्यवस्थाभेदे पु०। "कुरु मयि मानमनिदानम्" जयदेवः। ७सम्माने च।

मानयन्थि पु० मानस्य यन्थिर्बन्धनं यस्मात्। अपराधे द्वारा०

मानरन्ध्रा स्त्री मानाय कालप्रमाणज्ञानाय रन्ध्रं यस्याः। त.बहिर्निर्मिते सच्छिद्रे कालज्ञानहेतौ घटीयन्त्रभेदे त्रिका०।

मानव पु० मनोरपत्यम् अण्। १मनुष्ये अमरः। स्त्रियां जातौ ङीष्। सा च २स्वायम्भुवकन्यायाम् भारतम्। ३आसनदेवताभेदे हेमच०। २बाले पु० शब्दर०।

मानस न० मन एव अण्। १मनसि अमरः। कैलासान्तिकस्थे ब्रह्मणा मनसा कृते २सरोवरभेदे च। मनस इदम् अण्। ३चित्तसम्बन्धिनि त्रि०।

मानसव्रत न० मनसा कृतं मानसं कर्म०। "अहिंसासत्यमस्तेयं ब्रह्मचर्य्यमलुब्धता। एतानि मानसानि स्युर्व्रतानि" इत्युक्तेषु अहिंसादिषु। [सात्त्वादयोऽप्यत्र।

मानसौकस् पु० मानसमोको यस्य। हंसे अमरः मान-

मानिनी स्त्री मान-इनि ङीप्। १कलहान्तरिते नेदि० २मानवत्यां स्त्रियां च। ३मानयुते त्रि० ४सिंहे पु० राजनि०।

मानुष पु० मनोरयम् अण् मुक् च। मानवे, ततोजातौ स्त्रियां ङीप् मानुषी। मानुषस्येदम् अण्। २मनुष्यसम्बन्धिनि त्रि० स्त्रियां ङीप् सा च ३चिकित्सासाभेदे शब्दर०।

मानुष्य न० मानुषस्य भावः यत्। मनुष्यत्वे।

मानोन्नक न० मनोन्नस्य भावः मनोज्ञा० वुञ्। मनोज्ञत्वे

मान्द्य न० मन्दस्य भावः ष्यञ्। १रोगे हेम० २मन्दतायाञ्च।

मान्धाट पु० मानमिन्द्रं धयति धे-ड। "मानवं धारयतीत्यस्मात् मान्धातासौ प्रकीर्त्तितः" इति निरुक्ते युवनाश्वराजपुत्रे नृपभेदे। [२मरुन्मानायां स्त्री शब्दमा०।

मान्य पु० मान-अर्हार्थे कर्म्मणि यत्। १पूज्ये जटा०।

मामक त्रि० मम-इदम् अकच्+वुञ् ममादेशः। मत्सम्बन्धिनि खञ्। मामकीनोऽप्यत्र।

माया स्त्री मा-यत् वा०मैत्त्वम्। १अन्यनि वापञ्चे अमरः। २इन्द्रजालादौ ३मिथ्याबुद्धिहेतुज्ञानभेदे, ४जपायां ५दम्भे ६लक्ष्म्यां च मेदि०। ७बुद्धमातरि स्त्री अमरः। ८ईश्वरशक्तिभेदे, अघटनघटनसाधिकायां शक्तौ वेदान्त०। ९पीताम्बरे १०असुरभेदे पु० मेदि०। [(बाजीकर) शब्दर०।

मायाकृत् पु० मायामिन्द्रजालं करोति कृ-क्विप्। मायाकरे

मायादेवीसुत पु० ६त०। बुद्धे अमरः।

मायावत् त्रि० माया+अस्त्यर्थे मतुप् मस्य वः। १मायाविशिष्टे २कंसराजे पु० शब्दर०। ३कामपत्न्यां स्त्री ङीप् जटा०।

मायाविन् त्रि० माया+अस्त्यर्थे विनि । १मायाकरे स्त्रियां ङीप् २विड़ाले पु० राजनि० । [मायीयत्र ।

मायिक त्रि० मायाकार्य्य ठन् । मायाकरे जटा० । ठनि

मायु पु० मा-उ नाडनादेशः । देहस्थे पित्ते धातौ अमरः ।

मायूर न० मयूराणां समूहः तस्येदं वा अण् ।१मयूरसङ्घे । २मयूरसम्बन्धिनि त्रि० स्त्रियां ङीप् । [यामू राजनि०।

मायूरी स्त्री मयूरस्येदं प्रियत्वात् अण् ङीप् । अजमोदा-

मार पु० मृ-घञ् । १मरणे । मारयति मृ-णिच्-अच् । २कामदेवे ३विघ्ने मेदि० । ४धुस्तूरे च शब्दच० ।

मारक पु० मृ-णिच्-ण्वुल् मृ-णिच् घञ् स्वार्थे क वा । १मरके मारिभवे त्रिका० । (वाज) २पक्षिभेदे च । ३नाशके त्रि० । जन्मलग्नावधिकाष्टमस्थानपतौ ४ग्रहभेदे पु० "भाग्यव्ययाधिपत्येन रन्ध्रेशोमारकः स्मृतः" पराशरः । ५द्वितीयसप्तमाधीशे च मारकस्थानशब्दे दृश्यम् ।

मारकस्थान न० मारयतीति मारकः स्थाने । "अष्टमं चायुषः स्थानमष्टमादष्टमञ्च यत् । तयोरपि व्ययस्थानं मारक-स्थानमुच्यते, दत्युक्ते जन्मलग्नात् सप्तमे द्वितीये च स्थाने । [दिवे अमरः ।

मारजित् पु० मारं कामं जितवान् जि-भूते क्विप् । १जिन-

मारण न० मृ-णिच्-भावे ल्युट् । १वधे अमरः । २रणे ल्युट् । वैरिवधसाधने तन्त्रोक्ते अभिचारकर्म्मभेदे च ।

मारि(री) स्त्री मृ-णिच्-इन् । १मारणे । वा ङीप् । "मारीभवे राजभवे" इति वटुकस्वरः । ङीवन्तः २दुर्गाशक्तिभेदे मेदि० ।

मारिष पु० रिष-हिंसायाम् क निषेधार्थकमाशब्देन स० । नाटप्रोक्तौ १आर्य्ये हिंसानिवारकतया तस्य तथात्वम् । २तण्डुलीयशाके च अमरः । ३दक्षमातरि स्त्री मेदि० टाप् ।

मारीच पु० तारकाराधनोत्थे रावणानुचरे १राक्षसविशेषे २कक्कोलके ३याजकब्राह्मणे मेदि० । ४राजगजे पुंस्त्री० जटा० स्त्रियां ङीष् ।

मारुतव्रत न० "प्रविश्य सर्वभूतानि यथा चरति मारुतः । तथाचरैः प्रवेष्टव्यं व्रतमेतद्धि मारुतम्" मनुक्ते राज्ञां धर्म्मभेदे । [मारुतिरथत्र ।

मारुतात्मज पु० हृत० । १हनुमति २भीमे च हृत्र ।

मारुतापह पु० मारुतं वायुदोषमपहन्ति अप+हन-ड । १वरुणद्रुमे राजनि० । २वायुदोषनाशके त्रि० ।

मार्कण्ड पु० मृकण्डोरपत्यम् अण् पृषो० । १मृकण्डुमुनिपुत्रभेदे तेन प्रोक्तम् अण् । व्यासप्रणीते पक्षि मार्कण्डेयसंवादरूपे २महापुराणभेदे न० । तत्प्रतिपाद्य-विषयाश्च नारदपु० पूर्वभागे ६७३अ० उक्ता यथा ।

"यत्राधिकृत्य भगवान् सर्वधर्ममनिरूपणम् । मार्कण्डेयेन मुनिना जैमिनेः प्राक् समीरितम् । पक्षिणां धर्मसंज्ञानं ततो जन्मनिरूपणम् । पूर्वजन्मकथा चैषां विक्रिया च दिवश्च्युतेः । तीर्थयात्रा जलस्नानं द्रौपदेयकथानकम् । हरिश्चन्द्रकथा पुण्या युद्धमाजीवकाभिधम् । पितापुत्र-समाख्यानं दत्तात्रेयकथा ततः । कैटभस्याथ चरितं महाख्यानसमाचितम् । मदालसाकथा प्रोक्ता ह्य-लर्कचरिताचिता । सृष्टिसंकीर्त्तनं पुण्यं नवधा परिकीर्त्तितम् । कल्पान्तवर्णनिर्देशो यत्प्रसृष्टिनिरूपणम् । रुद्रादिसृष्टिरप्युक्ता द्वीपवर्षानुकीर्त्तनम् । मननाच्च कथा नाना कीर्त्तिताः पापहारिकाः । तासु दुर्गाकथाख्यानं पुण्यदा चाष्टमेऽन्तरे । तत्पश्चात् प्रथ-मोत्पत्तिस्त्रयीतेजःसमुद्भवः । मार्कण्डस्य च जन्माख्या तन्माहात्म्यसमाचिता । वैवस्वतान्वयश्चापि यत्स-म्प्रचरितं ततः । खनित्रस्य ततः प्रोक्ता कथा पुण्या महात्मनः । अविक्षिच्चरितं चैव किमिष्कव्रतकीर्त्तनम् । नरिष्यन्तस्य चरितं दम्भकृच्चरितं ततः । तृणबिन्दुचरितं पथ्याश्रमचन्द्रस्य सत्कथा । कृपबंशसमाख्यानं सोमवंशा-नुकीर्त्तनम् । पुरूरवःकथा पुण्या नहुषस्य कथाद्भुता । ययातिचरितं पुण्यं यदुवंशानुकीर्त्तनम् । श्रीकृष्णस्य च-रितं माथुरं चरितं ततः । द्वारकाचरितञ्चाथ कथा सर्वावतारजा । ततः काल्पसमुद्देशः प्रपञ्चस्य च-कीर्त्तनम् । मार्कण्डेयस्य चरितं पुराणश्रवणे फलम्" ।

यः शृणोति नरो भक्त्या पुराणमिदमादरात् । मार्क-ण्डेयाभिधं वत्स ! स लभेत् परमां गतिम् । यस्तु व्या-ख्याते चैतच्छ्रेयं स लभते पदम् । तत्पुस्तकेलिखित्वा यः सौवर्णकरिसंयुतम् । कार्त्तिक्यां द्विजवर्य्याय स लभेद्-ब्रह्मणः पदम् । शृणोति श्रावयेद् वापि यश्चानुक्रमणी-मिमाम् । मार्कण्डेयपुराणस्य स लभेद् वाञ्छितं फलम्" ।

मार्ग्व पु० मारयति क्विप् मारि वेगङ्गेये कूयते कु अच् । क्षुद्रराजे (केंयरिया) अमरः । [क्षुद्रमार्गत त ।

मार्ग संस्कारे सर्पणे च चुरा० उभ० सक० सेट् । मार्गयति-मार्ग्य अन्वेषणे वा चु० उभ० पक्षे भ्वा० प० सक० सेट् । मार्ग-

यति-ते मार्गति । अमार्गीत् त । अमार्गीत् ।

मार्ग पु०सृज-घञ्-मार्ग-अन्वेषणे वा घञ् ।।पथि अमरः । तल्लेदा यथा "त्रिंशद्धनूंषि विस्तीर्णो देशमार्गस्तु तैः स्मृतः । विंशद्धनुर्यामार्गः सीमामार्गो दशैव तु । धनूंषि दश विस्तीर्णः श्रीमान् राजपथः स्मृतः । स्वाजिरथनागा-नामसम्बाधः सुसंवरः । धनूंषि चैव चत्वारिंशत्कार-व्यास्तु निर्मिताः । त्रिकरावोपरथ्यास्तु द्विकरावो-परथ्यका । सङ्कीर्णपथवत्तथ्यादक्षिणादव स्मृतान्तरम् । त्रितिपादस्त्वर्द्धपादः प्राग्वंशः पादकः स्मृतः । अवकरः परिवारः पादमात्रः समन्ततः । प्राइष्टकाके तु प्राइष्टी कर्त्तव्या अन्यथा नहि" देवीपु० ।

मार्गण न० मार्ग-ल्युट् । १अन्वेषणे अमरः। २याचने ३प्रश्ने च मेदि० । कर्त्तरि ल्यु । ४याचके त्रि० ५शरे पु० अमरः ।

मार्गशिर पु० मृगशिरसा युक्ता पौर्णमासी अण् सा यत्र मासे पुनरण् । चान्द्रे १अग्रहायणे मासि २तत्पौर्ण-मास्यां स्त्री ङीष् शब्दर० ।

मार्गशीर्ष पु० साधनं मार्गशिरवत् । १अग्रहायणे मासि । अमरः। २तत्पौर्णमास्यां स्त्री ङीष् ।

मार्गित त्रि० मार्ग-क्त । अन्वेषिते ।

मार्ज्ज मार्जने सक० ध्वनौ अक० चुरा० उभ० सेट् । मार्ज-यति-ते अममार्जत्-त ।

मार्ज्जन न० सृज-ल्युट् । प्रोञ्छनादिना निर्मलीकरणे । युच् । तत्रैवार्थे स्त्री । सा च २सरजस्कनो क्षेमच० । करणे ल्युट । सम्मार्जन्याम् (झाँटा)। स्त्री ङीष् अमरः ।

मार्ज्जार(ल) पुंस्त्री० सृज-आरन् वा रक्त च सः । १विड़ाले अमरः स्त्रियां ङीष् ।२रक्तचित्रके पु० राजनि० । ३रक्त-वृक्षे च क्षेमच० । ततः संज्ञायां कन् । मयूरे ।

मार्ज्जारगन्धा स्त्री मार्ज्जारस्येव गन्धो यस्याः । सुद्रप-र्णीभेदे रत्नमा० । स्वार्थे क यत इत्वम् । तत्रैव ।

मार्ज्जारी स्त्री सृज-आरक् गौरा० ङीष् । १कस्तूर्याम् २रक्तवृक्षजन्नौ ३मार्जारवोषिति च मेदि० ।

मार्ज्जारी(री)य पुंस्त्री० मार्ज्जार+(व) स्वार्थे क, सृज-आरीयक् रक्त वस्त्रम् वा । १विड़ाले २मुद्रे च स्त्रियां ङाप् ३कायशोधने पु० मेदि० ।

मार्जित पु० मार्ज-क्त । २शोधिते । दधि-खण्डमधुसर्पिर्भैरि-चादिक्षते कर्पूरादिवासिते भक्ष्यभेदे स्त्री (रसा) । भरतः

मार्त्तण्ड पु० मृते अण्डे भवः अण् शक० । १सूर्य्ये । तस्य मृताण्डजन्म च "मारितस्तु यतः प्रोक्तमेतदण्डं त्वयो-दितं । तस्मान्मृते ! सुतस्तेऽयं मार्त्तण्डाख्यो भवि-ष्यति" मार्क० पु० । २अर्कवृक्षे अमरः । ३शूकरे पुंस्त्री० मेदि० स्त्रियां ङीष् ।

मार्त्तिक न० मृत्तिकया निर्मितम् अण् । १शरावे (सरा) शब्दर० ।२मृण्मये त्रि० । [गाढ़े अमरः ।

मार्द्दङ्गिक त्रि० मृदङ्गः तदादनं शिल्पमस्य ठक् । मृदङ्ग-

मार्द्दव न० मृदोर्भावः अण् । १मृदुत्वे २परुषःखासहिष्णु-तायाम् ३ह्रीभावे च "अभितप्तमयोऽपि मार्द्दवं भजते कैव कथा शरीरिषां" रघुः । ४मङ्कीर्यजातिभेदे पुंस्त्री० जटा० । स्त्रियां ङीष् । [२नाखोक्तौ श्वेते क्षेमच० ।

मार्ष पु० मृष-क ततः स्वार्थे अण् । १तण्डुलीयशाके भरतः

मार्ष्टि स्त्री मृज-क्तिन् । शोधने ।

माल पु० मल-संज्ञायां कर्त्तरि घञ् । "माला भिल्लाः किरातास्ते ऽपि म्लेच्छजातयः" क्षेमच० उक्ते म्लेच्छ-भेदे २विष्णौ पु०भरतः । ३देशभेदे ४क्षेत्रे मेदि० ५कपटे हरिवंशे क्षेमच० ।

मालक न० मल स्वार्थे कन् । १स्वनामख्याते जटा० । २नारिकेल-पालभेदे पु० (माला) । ३निम्बवृक्षे पु० अमरः ।

मालकोश पु०रागभेदे तस्य गानसमयः शरदतौ रात्रिशेषः ।

मालती स्त्री मां लक्ष्मीं शोभां वा लतति वेष्टते लत-अच् ङीप् । १जातीलतायां २युवत्यां अमरः । ३लाक्ष-माख्यां ४नदीभेदे ५विशल्यायां ज्योत्स्नायां ७निशा-यान्च क्षेमच० ।

मालतीतीरज पु० मालत्या नदीभेदस्य तीरे जायते जन-ड । टङ्गणे (सोहागा) क्षेम० मालतीतीरभवादयोऽप्यत्र

मालतीपत्री स्त्री मालत्यास्तद्भावकजात्यादव पत्रमस्याः । जातीपत्र्याम् (जैयत्री) राजनि० । [जातीफले राजनि० ।

मालतीफल न०मालत्यास्तनामकजात्याः फलम् । (जायफल)

मालभारिक त्रि०मालानां भारोऽस्यास्त्रष्ठन् पूर्वपदवृद्धिः । मालानां भारवति । [वङ्गीतटा० ।

मालव पु० १अवन्तिदेशे (मालवोयार देश) २रागभेदे च

मालविका स्त्री मालवे भवा ठक् । लिङ्गति (तेलोड़ि) राजनि० ।

मालसी स्त्री माल्यं मलनं जटादिना दुष्टत्वं स्यति सो-क गौरा०ङीष् । १केशपुष्पिकारक्षे हक्षे शब्दच० । २रागिणी-भेदे च वङ्गीतटा० ।

माला स्त्री मल-संज्ञायां कर्त्तरि घञ् । १श्रेण्यां क्षेमच० ।

जपसंख्यार्थं रुद्राक्षादिमालासंघातके २माल्यभेदे च ।

मालाकण्ठ पु० मालाकारः कण्ठे कण्ठको यस्य । अपामार्गे राजनि० ।

मालाकन्द पु० मालाकारः कन्दो यस्य । मूलभेदे राजनि० ।

मालाकार पुंस्त्री० मालां करोति कृ-अण् । (मालो) १वर्णसङ्करभेदे स्त्रियां ङीप् । २माल्यकारके त्रि० ।

मालाग्रन्थि पु०मालया ग्रन्थिरत्र । मालाद्वयीयाम् राजनि०

मालाटण न० मालाकारं टणम् । भूस्तृणे अमरः । स्वार्थे क । तत्रैव ।

मालादीपक न० अर्थालङ्कारभेदे अलङ्कारशब्दे दृश्यम् ।

मालादूर्वा स्त्री मालाकारा दूर्वा । (गाठिदूर्वा) दूर्वाभेदे राजनि० । [राजनि०

मालारिष्टा स्त्री मालाभूतमरिष्टं यस्याः ५ ब० । पाच्याम्

मालाली स्त्री मालामलति भूषयति अल-अण् ङीप् । पुत्रिकायां (पिडिङ्गशाक) राजनि० स्वार्थे क । तत्रैव ।

मालिक पुंस्त्री० माला तद्भारोऽस्य अस्तीति मलस्य ठन् । १मालाकारे जातिभेदे अमरः २पक्षिभेदे पुंस्त्री० मेदि० स्त्रियां ङीप् । ३रङ्गके शब्दर० । ४माल्यकारके त्रि० ।

मालिका स्त्री मालैव कन् अत इत्त्वम् । १वनमल्लिकायां २गोवालकृष्णे ३नदीभेदे ४पुष्पमाल्ये ५पुत्रपात्रे मेदि० ६तुरायां स्त्रियां रा० । ७अतसाम् शब्दच० "पाषाणमालिकाम्भोज" इति लक्ष्मीध्यानम् ।

मालिन् पु० माला अस्त्यस्य इनि । १मालाकारे २माल्यवति त्रि० ३मालाकारपत्न्यां ४पञ्चदशाक्षरपादके, "ननमयययुतेयं मालिनी भोगिलोकैः" छ० र० उक्ते ५छन्दोभेदे । ६गोदायाम् ७चम्पानगर्यां ८मन्दाकिन्यां कण्वाश्रममालिकस्थे ९नदीभेदे १०मालतीभेदे च स्त्री मेदि० ङीप् । ११अग्निशिखायां दुरालभायां स्त्री शब्दच० ङीप् ।

मालु स्त्री मल-उण् । १पत्रलतायां (पातलता) २नार्यां च मेदि०

मालुधान पु० मालुरिव पत्रलतेव धीयतेऽसौ धा-कर्मणि ल्युट् । (मालुयाशाक) १सर्पभेदे अमरः । २लताभेदे स्त्री ङीप् मेदि० । [२कपित्थे च राजनि० ।

मालूर पु० मां लक्ष्मीं परेषां लुनाति लू-रक् । १बिल्वे अमरः

मालेय त्रि० मालायां साधुः ढक् । १मालाकारपत्न्यादिपुष्पे २स्थूलैलायां स्त्री रत्नमा० ।

माल्य न० मालायै हितं यत् । १पुष्पे । स्वार्थे अञ् । २पुष्पमालायाम् ३मूर्द्धिस्थायां पुष्पमालायाञ्च अमरः ।

माल्यपुष्प पु० मालायै हितं माल्यं पुष्पमस्य । १शणवृक्षे २शणपुष्पग्राम् स्त्री राजनि० ङीप् । कप् । माल्यपुष्पिका तत्रैवार्थे ।

माल्यवत् त्रि० माल्यमस्त्यस्य मतुप् मस्य वः । १माल्ययुक्ते केतुमालेनाहतवर्षयोः सीमाभूते २पर्वतभेदे ३लङ्केश्वरस्य पुत्रे रावणमन्त्रिणि राक्षसभेदे च । [धके त्रिका० ।

मार्गाष्टिक त्रि० मेति शब्दं निषेधाय करोति ठक् । निषेध

माष पु०मष-संज्ञायां कर्त्तरि घञ् । (माषकलाइ) द्रोणिभेदे "दशार्द्धगुञ्जं प्रवदन्ति माषम्" इत्युक्ते "गुञ्जाभिर्दशभिर्माष इत्युक्ते च २परिमाषभेदे । स्वार्थे क । तत्रार्थे ।

माषकलाय पु० माषाख्यः कलायः । खनामख्याते द्रोणे

माषपर्णी स्त्री माषस्येव पर्णान्यस्याः ङीप् । वनमाषे अमरः

माषभक्तबलि पु० माषमिश्रितं भक्तमेव बलिः पूजोपहार द्रव्यम् । माषमिश्रिते भक्तरूपे पूजोपहारे ।

माषवर्द्धक पु० माषं माषपरिमितं स्वर्णं वर्द्धयति आच्छिनत्ति अपहरति वृध-छेदने ण्वुल् । स्वर्णकारे शब्दमा० ।

माषीण न० माषाणां भवनं क्षेत्रं खञ् । माषद्रोणिभवन योग्ये क्षेत्रे । यत् । माष्यमप्यत्र ।

मास् पु० माति परिच्छिनत्ति खगत्या कालम् मा-असुन् । १चन्द्रे २त्रिंशदहोरात्मककालरूपे मासे च ।

मास पु० मास एव अण् । १चन्द्रे त्रिंशदहोरात्मके २काले च । स च सौरसावनचान्द्रनाक्षत्रभेदात्चतुर्विधः । मासचन्द्रात्स्वार्थे अण् । १चान्द्रे मासे तु तत्रस्थः । मस्यते परिमीयतेऽनेन मस परिमाणे करणे घञ् । परिमाणपञ्चगुञ्जात्मके भरतः । स्वार्थे क । मासक तत्रैवार्थे ।

मासन न०मासं नयति नी-ड । सोमराजीलतायाम् शब्दच० ।

मासप्रमित पु० मासं प्रमातुमारब्धः प्र+मा-क्त । "कालाः परिमाणे" पा० स० । प्रतिपच्चन्द्रे ।

मासर पु०मस-परिणामे अच् मासं परिणामं राति दो-क । भक्तमण्डे अमरः । [मासावसाने संक्रान्त्यादौ ।

मासान्त पु० मासस्य सौरस्य चान्द्रस्य वाऽन्तः अवसानम् ।

मासिक त्रि० मासे भवः कालाट्ठञ् । १मासभवे प्रेतोद्देशेन मृतसजातीयतिथौ, प्रतिमासम् अमावस्यायां च कर्त्तव्ये २श्राद्धे न० "मासि मासि क्रियेऽ तु श्रुतिः । "पितृणां मासिकं श्राद्धमन्वाहार्य्यं विदुर्बुधा" स्मृतिः ।

मास्क अव्य० मस-णिच्-वा० अप् । निवारणे ।

माह माने भ्वा० उभ० सक० सेट् । माहति ते अमाहीत् अमाहिष्ट । ऋदित् चङि न वृद्धिः ।

माहाकुल त्रि॰ महाकुले भवः अण्। महाकुलोद्भवे। स्त्रियां माहाकुलीनोऽप्यत्र त्रि॰।

माहात्म्य न॰ महात्मनो भावः ष्यञ्। महिमनि महत्त्वे।

माहिष न॰ महिष्या इदम् अण्। १महिषीदुग्धादौ महिषसम्बन्धिनि त्रि॰ २तच्चर्मादौ क्ली॰।

माहिषिक पु॰ "महिषीलुच्यते नारी या च स्वाद् व्यभिचारिणी। तां दुष्टां कामयति यः स वै माहिषिकः स्मृतः" कामीपु॰ उक्ते १व्यभिचारिणीपतौ "महिषीलुच्यते नार्य्या भर्त्रोपार्जितं धनम्। उपजीवति यस्तस्याः स वै माहिषिकः स्मृतः" विष्णुपु॰ व्याख्यायां श्रीधरधृतवाक्योक्ते व्यभिचारिस्त्रिया २भर्तोपार्जितद्रव्योजीविनि च। [दादिते सङ्करजातिभेदे अमरः।

माहिष्य पु॰ महिष्यां भवः यञ्। क्षत्रेण वैश्यायामुत्-

माहेन्द्र पु॰ महेन्द्रस्यायम् अण्। ज्योतिषोक्ते महेन्द्रसम्बन्धिनि १दण्डभेदे। २पूर्व्वस्यां दिशि १इन्द्रपत्न्यां २शचि च स्त्री राजनि॰ ङीप्। [स्त्रीगव्यां स्त्री अमरः ङीप्।

माहेय पु॰महा अपत्यम् महो+ढक्। १महत्त्वे २नरकासुरे च

माहेश्वर त्रि॰ महेश्वरादधिगतम् तत्र आगत अण्। १महेश्वरतः प्राप्ते त्रि॰कौ॰। २यवतिक्षारायां स्त्री राजनि॰ ङीप् तस्येदम् अण् "माहेश्वरी दयाकदा" इत्युक्ते ३मातृभेदे ४दुर्गामात्रे स्त्री ङीप्।

मि क्षेपे स्वा॰ उभ॰ सक॰ अनिट्। मिनोति मिनुते अमासीत् अमास्त। क्विप् क्लि मप् च मिलिमम्।

अनु+व्याप्तिहेतुके परामर्शाधीनज्ञाने।

उप+सादृश्यहेतुके ज्ञानभेदे।

प्र+यथार्थज्ञाने।

मिच्छ बाधे तुदा॰ पर॰ सक॰ सेट्। मिच्छति अमिच्छीत्।

मित त्रि॰ मि मा-वा-क्त। १परिमिते, २मन्दिते ३क्षिप्ते च।

मितङ्गम पुंक्ली॰ मितं परिमितं यदु-गच्छति गम-खच् मुम् च। १गजे त्रि॰कौ॰ स्त्रियां ङीप्। २परिमितगामिनि त्रि॰ स्त्रियां टाप्।

मितद्रु पु॰ मितं द्रवति द्रवति वा द्रु क्विप्। सखट्टे हेमच॰।

मितम्पच पु॰ मितं पचति पच-खच् मुम् च। १जघन्ये अमरः। २परिमितपाचके त्रि॰।

मिति स्त्री मा-मि-वा क्तिन्। १ज्ञाने, २माने, ३अवच्छेदे, ४विक्षेपे च। ज्ञानमात्रस्य मितिमात्रमेवविषयकत्वमिति गुरवः।

मि(च्च)त्र न॰मिद्यति स्निह्यति मिद-त्र। १स्नेहान्विते सुहृदि, २राज्ञां विश्वासनिरीक्षितदेशादिरक्षिणि २राजनि तयोर्द्वयोरपि मध्यस्थदेशस्य राज्ञइरक्षणैककार्य्यकरत्वात् मित्रत्वम्। मि-त्र। एकतकारः स्वार्थे पु॰ अमरः ३अर्कवृक्षे।

मित्रयु पु॰ मित्रं याति या-कु। मित्रवत्तुल्ये हेमच॰।

मिथ वधे मेधायाञ्च सक॰ भ्वा॰ उभ॰ सेट्। मेथति-ते अमेथीत् अमेथिष्ट। कादित् चङि न हुस्वः। [अमरः।

मिथस् अव्य॰ मिथ-असुन्। १रहसि, २अन्योन्यक्रियायाञ्च

मिथि पु॰ निमिराजपुत्रे विष्णुपु॰।

मिथिला स्त्री मिथि+अस्त्यर्थे लच्। स्वनामख्यातायां मिथिराजधान्याम्। [दितस्तृतीये राशौ च।

मिथुन न॰ मिथ-उनन् किच्च। १स्त्रीपुंसयोर्युग्मे २मेषादिराशौ ३कामशास्त्रोक्ते स्त्रीपुंसयोर्युग्मे

मिथ्या अव्य॰ मिथ-क्यप्। अयथार्थे असत्ये।

मिथ्यादृष्टि स्त्री मिथ्या सफलस्यापि अफलत्वेन दृष्टिः। नास्तिकतायां सफलस्यापि वैदिककर्म्मणो निष्फलत्वज्ञाने अमरः। [वेदे करणे स्युट्। अपवे भरतः।

मिथ्यानिरसन न॰ मिथ्या निरस्यतेऽनेन निर्+असन-

मिथ्याभियोग पु॰ मिथ्याभूतेनासत्येनाभियोगः राज्ञोऽन्विते वेदनम् अभि-युज-घञ्। यतं मे धारयतीत्यसत्यसङ्का राज्ञोऽन्विते अभियोगे अमरः।

मिथ्याभिशंसन न॰ मिथ्याभूतेनासत्येनाभिशंसनम् अपवादः "त्वया स्वर्णमपहृतम्" इत्यपवादकथने।

मिथ्याभिशाप पु॰ मिथ्याभूतेनासत्येनाभिशापोऽपवादः। मिथ्यापवादे। [अतदिति तदबुद्धेन ज्ञाने।

मिथ्यामति स्त्री मिथ्याभूतस्य मतिः मन-क्तिन्। भ्रान्तौ-

मिथ्योत्तर न॰ कर्म्म॰। व्यवहारे "मिथ्यैतत् नाभिजानामि तदा तत्र न सन्निधिः। अजातत्वाच्च तत्काले इति मिथ्या चतुर्विधम्" इत्युक्तप्रकारे, उत्तरभेदे, ("मिथ्योत्तरे पूर्ववादे") इति स्मृतिः। [अदित् चङि न हुस्वः।

मिद बाधे मेधायाञ्च भ्वा॰ उ॰सक॰सेट्। मेदति-ते अमेदीत्

मिद स्नेहे भ्वा॰ आ॰ लुङि प॰ अक॰ सेट्। मेदते इदित् अमिदत् आदित् भावादौ क्ते मिन्न मेदितम्।

मिद स्नेहे वा चु॰ उभ॰पक्षे भ्वा॰अक॰सेट् इदित्। मिन्दयति अमिन्दत्-त। पक्षे मिन्दति अमिन्दीत्।

मिद स्नेहे दि॰ पर॰ सक॰ सेट्। मेद्यति-ते इदित् अमिदत् अमेदीत्। आदित् क्त मेदितं मिन्नम्।

मिद स्नेहे चु॰ उभ॰ सक॰ सेट्। मेदयति-ते अमीमिदत्-त

मिन्मिल त्रि॰ वातुलाधिक्यजन्यरोगभेदे २तद्युते

त्रि०। "आहत्य वायुः सकलो धमनीः शब्दवाहिनीः। नरान् करोत्यक्रियकान् मूकमिन्मिनमदगदान्" अत्रच नान् दैवदर्शे नञ्। तत्र वायोर्ऊष्मणि मूकत्वमध्यमत्वे सानुनासिकशब्दकारकता अन्तस्थे गद्गदकरत्वमिति भेदः।

मिल क्षेपे तु०उभ० सक० सेट्। मिलति अमेलीत् अमेलिष्ट कुटादित्वमिल्लोपे तेन अमिलीत् क्ष्णुटि मिलनम्।

मिव सेके भ्वा० पर० सक० सेट् इदित्। मिम्वति अमिम्वीत्।

मिश्र ध्वनौ अक० कोपे सक० भ्वा० पर० सेट्। मेश्रति अमेश्रीत्।

मिश्रि(श्री) स्त्री मिश्र-इन् वा ङीष्। १मधुरिकायां (मौरी) २शतपुष्यायां, (सुवफा) भरतः ३जटामांस्यां च शब्दर०। अत्र पृषो०मिधि मिधी मिश्रि-मिश्री इत्यादयः उक्तार्थेषु। तत्र पाठान्तरम्। [यति-ते अमिमिश्र(क)त् अ।

मिश्र (क) योजने भ्वा० चु० उभ० सक० सेट्। मिश्र(क)

मिश्र त्रि० मिश्र अच्। १संयुते उत्तरपदस्थः २श्रेष्ठार्थे। यथा आर्यमिश्राः। ३मजजातिभेदे पु० हेमच०। ४ज्योतिषोक्ते कृत्तिकाविशाखानक्षत्रमण्डले च पु०। संज्ञायां कन्। ५इन्द्रवने जटा० ६औषरलवणे राजनि०।

मिश्रकावण न० मिश्रकनामकं वनं पूर्वदीर्घौ अत्वञ्च। १इन्द्रोद्याने। [कायाम् राजनि०।

मिश्रपुष्पा स्त्री मिश्रं पुष्पं यस्याः अजा० टाप्। मेषि-

मिश्रवर्ण त्रि० मिश्रितो वर्णो यस्य। १क्षत्त्रियादुरुषि राजनि० २मिश्रितवर्णमात्रे त्रि०। [वार्त्ताक्यां राजनि०

मिश्रवर्णफला स्त्री मिश्रवर्णं चित्ररूपान्वितं फलं यस्याः। मिश्रव्यवहार पु० क्रीतादयस्तुल्ये गणभेदे।

मिश्रिता स्त्री "मिश्रिता चैव विज्ञेया मिश्रितर्क्षेषु संक्रमे" इत्युक्ते १कृत्तिकाविशाखानक्षत्रकाले रविसंक्रमणे। २गौरवितं न० जटा० ३मिश्रिते त्रि०।

मिश्रेया स्त्री मिश्र-अच् मिश्रा ईयते ई गतौ यत् एया कर्म० सक०। १मधुरिकायां (मौरी) अमरः। २शतपुष्यायाच (सुवफा) राजनि०। [क्ष्णा सेट्।

मिष सेचने भ्वा० पर० सक० सेट्। मेषति अमेषीत्। इदित्

मिष पराभिभवेच्छायाम् तु० पर० सक० नेट्। मिषति अमेषीत् मिमेष।

मिष न० मिष-क। १क्षणे २स्पर्द्धने पु० मेदि०।

मिषिका स्त्री० मिषी+स्वार्थे क। जटामांस्याम् शब्दरत्ना०।

मिष्ट त्रि० मिष-क्त। १मिक्षे २स्पर्द्धिते च। ३मधुररसे पु० हेमाद्रौ त्रि० भावप्र०।

मिह सेचने भ्वा० पर० सक० अनिट्। मेहति अमिक्षत्।

मिहिका स्त्री मिह-कुन् अत इत्त्वम्। नीहारे शब्दर०।

मिहिर पु० मिह-किरच्। १सूर्य्ये २अर्कवृक्षे ३वृद्धे मेदि० ४मेघे हेमच० ५वायौ, ६चन्द्रे, विक्रमादित्यसभास्थे नवरत्नमध्यस्थे पण्डितभेदे च शब्दर०। तद्भिन्नम्। "धन्वन्तरिक्षपणकामरसिंहशङ्कु वेतालभट्टघटकर्परकालिदासः। ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नवविक्रमस्य" ज्योतिर्विदाभरणवाक्ये वराहः मिहिर इत्येव तस्य समासे वराहमिहिर इत्येकः "वराहमिहिराख्येन पृथुयशसा" तत्पुत्रकृतषट्पञ्चाशिकायाश्चन्द्रः दित्ये वररुचिना सह दशसंख्यापत्तेश्च।

मी वधे दि० आ० सक० अनिट्। मीयते अमेष्ट।

मी वधे क्र्या० उ० सक० सेट्। मीनाति मीनीते अमासीत् अमास्त। ओदित् त्व मीनः।

मी गत्यां अत्वाच्च वा चु० उभ०पक्षे भ्वा०पर० सक० अनिट्। मायवति ते अयति अमीमत्-त अमेषीत्।

मीढ त्रि० मिह-क्त। मूत्रिते।

मीढ्टम पु० मीढृस्+अतिशये तमप् नि०। शिवे।

मीढ्स् पु० मिह-कसु नि०। शिवे।

मीन पुंस्त्री० मी-नक्। १मत्स्ये अमरः स्त्रियां ङीष् मेषादितोद्वादशे २राशौ ३भगवदवतारभेदे च पु०।

मीनकेतन पु० मीनः केतनं यस्य। कन्दर्पे अमरः। मीनध्वजादयोऽप्यत्र। [राजनि० मीनाङ्कोत्पादकोऽप्यत्र।

मीननेत्रा स्त्री मीनस्य नेत्रमिव यन्निरक्षाः। गण्डदूर्वायां

मीनाण्डा स्त्री मीनस्याण्डमण्डाकारा रेणुकाऽस्यस्य अच् गौ० ङीष्। शर्करायाम् राजनि०।

मीम शब्दे सक० गतौ सक० भ्वा० पर० सेट्। मीमति अमीमीत्। अदित् चङि न हृस्वः।

मीमांसक पु० मीमांसां वेत्त्यधीते वा वुन्। १मीमांसाशास्त्रज्ञे २तदध्येतरि च। मान-विचारे स्वार्थे सन् ण्वुल्। ३सिद्धान्तकारके।

मीमांसा स्त्री मान-विचारे स्वार्थे सन् च। १विचारपूर्वकतत्त्वनिर्णये २तत्प्रतिपादकग्रन्थभेदे च स च ग्रन्थः कर्मब्रह्मविषयभेदेन द्विविधस्तत्र कर्मकाण्डविषयसंशयनिवारको ग्रन्थो जैमिनिप्रणीतः स च पूर्वमीमांसात्वेन प्रसिद्धः ब्रह्मविषयसंशयनिवारकश्चरमः स वेदान्तत्वेन प्रसिद्धः।

मील निमेषे भ्वा० पर० अक० सेट्। मीलति अमीलीत्। अदित् चङि वा हृस्वः।

मीलन न० मील ल्युट्। १सङ्कोचने २सङ्कोचने च।
मीलित त्रि० मील-क्त। १व्याकुले २सङ्कुचिते च 'मीलितं यदभिरामताधिक्ये' इति काव्यप्रकाशः।
मीव स्वौ० भ्वा० पर०अक०सेट्। मीवति अमीवीत्।
मु पु० मोचयति जीवान् खर्गे सच डु। १महेशे २ब्रह्मणि एका०। [पद्मखण्डो भरतः।
मुकन्दक पु०सदः सदै कन्दो यस्य कप् पृषो० सदो दस्योपः।
मुकु पु० सच-कु पृषो० यस्य कः। १मोक्षे २उत्सर्गे च
मुकुट पु० मकि-उट पृषो०। १शिरोभूषणे अमरः। २अङ्गुलीमोटने स्त्री शब्दर० ङीप्।
मुकुन्द पु० सकृं ददाति दा-क पृषो०सम्। "सकृन्मव्ययमात्मनं निर्वाणमोक्षवाचकम्। तद्ददाति च यो देवः सकृन्दस्तेन कीर्तितः" "सकृत् भक्तिरसप्रेमवचनं वेदसम्मतम्। यस्तद् ददाति भक्तेभ्यो सकृन्दस्तेन कीर्त्तितः" ब्रह्मवै० जन्मख०११०अ० इति वा निरुक्ते विष्णौ।
मुकुम् अव्य०मकि उसच् पृषो०। १निर्वाणमोक्षे २भक्तिप्रेमरसे च सकुन्दशब्दे द्रष्टव्यम्।
मुकुर पु०मकि-उरच् पृषो०। १दर्पणे, २वकुलवृक्षे ३कुलालदण्डे, मेदि० ४मल्लिकावृक्षे, विश्वः ५कोलीवृक्षे, शब्दर०। ६शेखरके च हेमच०।
मुकुल पु० न० मकि-उलच् पृषो०। १हैयङ्गविकाशितकलिकायाम् अमरः २देहे, ३आत्मनि च धरणिः।
मुकुष्टक पु० सकुर्गलोत्सर्गं स्रवति स्रक-यच् पृ० तत्यम्। धनसङ्गे अमरः पृषो० सकुष्टक तत्रार्थे।
मुकूलक पु० मकि-उलच् सज्ञायां कन्। वृन्तिवृक्षे। रामाश्रमः। [च शब्दर०।
मुक्त त्रि० सच क्त। १त्यक्ते, २प्राप्तमोक्षे मेदि०। ३आनन्दिते
मुक्तरसा स्त्री मुक्तो रसो यस्याः। राज्ञायाम् रत्नमा०।
मुक्तसङ्ग त्रि० मुक्तः सङ्गोविषयाश्रयेण। १त्यक्तसर्वविषयाश्रये २परिव्राजके पु०। [स्त्रो येन। दामनगरे।
मुक्तहस्त त्रि० मुक्तः दानाय प्रसारितः न वद्ध इति यावत्
मुक्ता स्त्री सच-क्त। १राज्ञायाम् रत्नमा० २शुक्तिजे (मति) रत्नभेदे च।
मुक्तापुष्प पु० मुक्तेव शुभ्रं पुष्पमस्य। कुन्दवृक्षे राजनि०।
मुक्ताप्रसू स्त्री मुक्तां प्रसूते प्र+सू-क्विप् दीर्घः। शुक्तौ राजनि०। [मुक्ताहारे हेमच०।
मुक्तावालम्ब पु० मुक्तया मुक्ताविशिष्टतया वालम्बते अच्।
मुक्ताफल न० मुक्ता फलमिव। १मौक्तिके, २वकुलीफले, (मोयाड़) ३कर्पूरे च मेदि०। ४बोपदेवकृते भक्तिप्रधाने ग्रन्थभेदे च "चतुरेष चतुर्वर्गचिन्तामणिविचिन्त्यदा। हेमाद्रिर्बोपदेवेन मुक्ताफलमधीकरत्" तद्ग्रन्थस्य पद्यम्।
मुक्तालता स्त्री मुक्तया कृतेव। मुक्ताहारे हेमच०।
मुक्तावली स्त्री मुक्तया कृतेव आवली हारभेदः। १मुक्ताहारे अमरः। ६त०। २मुक्ताश्रेष्ठौ भाषापरिच्छेदग्रन्थटीकायां ३सिद्धान्तमुक्तावल्यां च। [शुक्तौ अमरः।
मुक्तास्फोट पु० स्फुटते विदीर्य्यते स्फोटः मुक्तायै स्फोटः।
मुक्ति स्त्री सच-क्तिन्। १मोचने २संसारबन्धनराहित्ये मतभेदेन ३आत्यन्तिकदुःखनिवृत्तौ, ४ब्रह्मस्वरूपावाप्तौ च देहेन्द्रियाभ्यामात्मनो ५बन्धशून्यत्वे च।
मुक्तिमण्डप पु० मुक्तिप्रदो मण्डपः शाक०त०। १काशीस्थे २जगन्नाथक्षेत्रस्थे च मण्डपभेदे तीर्थे। [रत्नमा०।
मुक्तिमुक्त पु० मुक्तिर्मोचनं तया मुक्तोरहितः। सिद्धके
मुख न० खन अच् डित् धातोः पूर्वं सुट् च। "मुखाद्धजा यतः खातं तस्मादाहुर्मुखं बुधाः" रत्नमुक्ते देहावयवभेदे। "ओष्ठौ च दन्तमूलानि दन्ता जिह्वा च तालु च। गलो गलादि सकलं सप्राङ्गं मुखमुच्यते" रत्नमुक्ते गलादिसप्राङ्गावयववति २वदने भावप्र०। ३दृष्टस्य निकरस्य वर्त्मनि, अमरः। ४कृष्णखण्डादेः प्रवेशनिर्गमे, ५आरम्भे, ६उपाये, ७नाटकादौ सन्धिभेदे मेदि० दशनाटकादिशब्दभेदे, ८आद्ये, १०प्रधाने, ११शब्दे, १२वेदे, च शब्दर०। १३वकुलवृक्षे पु०(डेवो) शब्दच० [राजनि०
मुखगन्धक पु० मुखस्य गन्धो यस्य सेवनात् कप्। पद्मखण्डौ
मुखचपला स्त्री आख्यानान्तरभेदे मात्राभेदे छ०र०।
मुखज पु० ब्रह्मणो मुखाज्जायते जन-ड। १विप्रे "ब्राह्मणोऽस्य मुखमासीदिति श्रुतिः २वदनजातमात्रे त्रि०।
मुखदूषण पु० मुखं दूषयति सेवनात् दुष्-णिच् ल्यु। पद्मखण्डौ राजनि०।
मुखधौता स्त्री धौतं सखं यया धाव-क्त टाप् परनि०। ब्रह्मयष्टौ (वामनहाटि) शब्दच०।
मुखनिरीक्षक त्रि० मुखमितरासं निरीक्षते निर्+ईक्ष ण्वुल्। १अलसे शब्दर०। स हि अन्योयदि मुखं कुर्यात् तदानाहं करोमीत्याशयेन इतरमुखं निरीक्षमाणः स्वकार्य्यं न प्रवर्त्तते। इति तस्य तथात्वम्।
मुखपूरण न० मुखं पूरयति पूर-ल्यु। गण्डूषभिन्नजलादौ।
मुखप्रिय न०मुखं प्रीणाति प्री-क-उप०स०। १खण्डे भावप्र० २मधुरोपकरणमात्रे त्रि०।

मुखभूषण न० सुखं भूषयति भूष-ल्यु । १ताम्बूले । २सुख-मण्डने च ।

मुखमण्डनक पु० सुखस्य मण्डनमिव दलार्द्धे कन् । १तिलकवृक्षे राजनि० । ह्रस्वः । स्वार्थे क । २सुखभूषणे न० । मण्डयति-ल्यु स्वार्थे क ह्रस्वः । ३सुखभूषके त्रि० ।

मुखमोद पु० सुखं मोदयति मुद-णिच्-अच् उप०स० । शोभाञ्जने राजनि० ।

मुखर त्रि० सुखं सुखव्यापारं करणं राति दत्ते करोतीति यावत् रा-क । १अप्रियवादिनि अमरः । २वाचाले च "मुखरस्तस्य दुष्यते" इति हितोपदेशः । ३काके पुंस्त्री०स्त्रियां ङीष् । ४शङ्खे पु०राजनि० । [माने

मुखरित त्रि०मुखर इवाचरितः । मुखर+क्विप्-क्त । शब्दाय-

मुखरोग पु० मुखाङ्गस्य सुखस्य रोगः । मुखाङ्गसुखस्य रोगभेदे तच्चिदानादि यथा

"ओष्ठौ च दन्तमूलानि दन्ता जिह्वा च तालु च । गलो गलादि सकलं मुखाङ्गं मुखमुच्यते" । अथ मुखरोगाणां संख्यामाह "सुश्रुतोष्ठयोर्दन्तमूले तु दश षट् तथा । दन्तवेष्टौ रसज्ञायां पञ्च स्युर्नव तालुनि । कण्ठे त्वष्टा-दश प्रोक्ताश्चयः सर्वसराः क्षताः । एवं मुखामयाः सर्वे सप्तषष्टिर्मता बुधैः" मुखरोगाणां निदानान्याह "अनूपपिशितक्षीरदधिमाषादिसेवनात् । मुखमध्ये गदान् कुर्युः कृत्वा दोषाः कफोत्तराः" भावप्र० ।

मुखलाङ्गल पुंस्त्री० मुखं लाङ्गलमिव भूमिविदारकं यस्य । शूकरे जटा० स्त्रियां ङीष् ।

मुखवल्लभ पु० ह्रस्व० । १दाडिमवृक्षे शब्दमा० तत्फलस्य मुखप्रियत्वात् तस्य तथात्वम् । २मुखप्रिये त्रि० ।

मुखवाचिका स्त्री मुखं वाचयति अजडीकरोति सेवनात् वच-णिच्-ण्वुल् । अम्बष्ठायाम् राजनि० ।

मुखवास पु० मुखं वासयति सुरभीकरोति वस-अच् उप०स० । १गन्धद्रव्ये राजनि० । २कर्पूरादौ च ।

मुखवासन पु० मुखं वासयति वस-णिच् ल्यु । १मुखसौरभकारके गन्धे । २तद्वति त्रि० अमरः ।

मुखविष्ठा स्त्री मुखं विष्ठेव दुर्गन्धं यस्याः । तैलपायिकायां हेमच० तस्या मुखस्यैवमात्रे हि द्रव्यान्तरे दुर्गन्धो भवति ।

मुखव्यादान न० वि+आ+दा-ल्युट् ह्रस्व० । मुखप्रसारणे ।

मुखशोधन न० मुखं शोधयति शुध-णिच्-ल्यु । १त्रपुणि (दारचिनि) राजनि० २कटुरसे पु०हेमच० । [राजनि० ।

मुखशोधिन् पु० मुखं शोधयति शुध-णिच्-णिनि । जम्बीरे

मुखस्राव पु० स्रवति स्रु-घञ् ५त० । लालाख्ये मुखरुन्दिजले राजनि० ।

मुखाग्नि पु० मुखमेवाग्निस्तुल्यं तापदानेन दाहकत्वात् यस्य । १विप्रे कर्म० बहुव्रीहौ २दाहानन्तरे च मेदिनी ।

मुखास्त्र पु० मुखमेवास्त्रं यस्य । कर्कटे त्रिका० । [च ।

मुख्य त्रि० मुखे साधौ भवः यत् । १प्रथमकल्पे अमरः २श्रेष्ठे

मुग्ध त्रि० मुह-क्त । १मूढे । मोहयति अन्तर्भूतण्यर्थं मुह-कर्त्तरि क्त । २सुन्दरे विश्वः । ३नवोढाभेदे स्त्री सा०द०१प०

मुच दम्भे शाठ्ये भ्वा० आत्म० सक० सेट् । मोचते कमोचिष्ट रुदित्वयम् तत्रार्थे । सस्रुते ।

मुच त्यागे चुरा० उ० सक० सेट् । मोचयति ते अमूमुचत् त

मुच त्यागे तु० सृचादि० उभ० सक० अनिट् । सृजति-ते अक्षत् असृक्षत असृक्त । कर्मकर्त्तरि अकर्मक "दृश्यते सर्वधातुभ्यः" इति दुराषम् ।

मुचकुन्द पु० मुच-कु सुचः कुन्द इव । १वृक्षभेदाख्याते पुष्पवृक्षे भावप्र० माम्रातृक्षपुष्पे २नृपभेदे च ।

मुज धावने अक० मार्ज्जने सक० वा चुरा० पक्षे भ्वा० पर० सेट् । मोजयति ते मोजति अमूमुजत् त अमोजीत् । रुदित्वयत्रार्थे । सञ्जयति ते सञ्जति असस्रञ्जत् त असस्रीत् ।

मुञ्ज पु० मुज-अच् । (मुञ्ज) रज्जुसाधने तृणभेदे राजनि० । "मञ्जवन्तु मधुरं तुवरं शिशिरं तथा । दाहतृष्णा विसर्पास्रमलवस्त्यक्षिरोगजित् । दोषत्रयहरं ह्यं मेखलासूपयुज्यते" भावप्र० । [हेमच० ।

मुञ्जकेशिन् पु० मुञ्जवत् केशः अस्यास्य इनि । विष्णौ

मुञ्जर न० मुज-अरन् । भास्तूके शब्दमा० । [सृष्टप्रते ।

मुट मर्दने भ्वा० पर० सक० सेट् रुदित् । सुण्टति असुण्टीत् ।

मुट छोदे वा चु० उभ० पक्षे भ्वा० पर० सक० सेट् । मोटयति ते मोटति अमूमुटत् त अमोटीत् ।

मुठ छोदने आच्छेदे च तु० कु० पर० सक० सेट् । मुटति असुटीत् मुमोट । [असुण्डिष्ट ।

मुठ पलायने भ्वा० आ० अक० सेट् रुदित् । सुण्ठते

मुड क्रीडादिच्छेदे मर्दने च भ्वा० पर० सक० सेट् रुदित् । सुण्डति असुण्डीत् । [खिण्ड ।

मुड मज्जने भ्वा० आ० अक० सेट् रुदित् । सुण्डते असुण्ड प्रतिघाते तु० पर० सक० सेट् । सुण्डति अमोण्डीत् ।

मुण्ड न० मुड्-कर्मणि घञ् । १मस्तके अमरः । २क्षौरे ३सुश्रुतोक्ते च राजनि० ४दैत्यभेदे, ५राजपुत्रे पु० मेदि० ।

हृनापिते जटा० ७स्यागुडचे च पु० । दग्धिते त्रि० । दमहाश्रावधिकायां १०सुण्डीरिकायाञ्च स्त्री टाप् भेदि० २उपनिषद्भेदे "सुण्डमाण्डूक्यतित्तिरिः" ।

मुण्डक पु० सुण्डयति सुडि-णिच्-ण्वुल् ।१नापिते हेमच० ।

मुण्डचणक पु० सुण्डश्चणकइव । कलाये राजनि० ।

मुण्डन न० सुंड-भावे ल्युट् । केशच्छेदे वपने हेमच० ।

मुण्डफल पु० सुण्डं शिरइव फलमस्य । नारिकेले शब्दर० ।

मुण्डशालि पु० सुण्डः शूकशून्यः शालिः । निःशूके शालि भेदे राजनि० ।

मुण्डायस न० सुण्डमयः अच् समा० । लौहभेदे राजनि० ।

मुण्डितिका स्त्री सुंड-इत स्वार्थे क अत इत्वम् टाप् । (सुण्डीरी) वृक्षभेदे रत्नमा० ।

मुण्डिन् पु० सुण्डयति सुडि-णिच्-णिनि । नापिते अमरः ।

मुण्डीरी स्त्री सुंड-ईरच् गौरा० ङीष् । अनामख्याते वृक्षभेदे जटाधरः ।

मुदशील पु० ६२६ ष० दर्शिते नी० ता० सञ्ज्ञे इत्यशालयोगे

मुद संमार्জ্জने चु० उ० सक० सेट् । मोदयति ते अमूमुदत् त

मुद हर्षे भ्वा० आ० अक० सेट् । मोदते अमोदिष्ट । मुमुदे ।

मुद(दा) स्त्री मुद०सम्प०भावे क्विप् वा टाप् ।१हर्षे अमरः । २हरिद्रानामौषधौ राजनि० ।

मुदिर पु० मुद-किरच् । १मेघे अमरः २भेदे च संश्लिष्टमा० २कासुके त्रि० मेदि० । [२जलकाके च हेमच० ।

मुद्ग पु० मुद-गक् नेट् ।१कलायभेदे(मुग) पु०मेदि० २पक्षिभेदे

मुद्गपर्णी स्त्री मुद्गस्येव पर्णमस्याः ।(मुगानी)वनमुद्गे अमरः ।

मुद्गर न० मुदं गिरति गृ-अच् । १मल्लिकाभेदे २लोष्टभेदने (मुगर) मेदि० । ३पुष्पप्रधानवृक्षभेदे ४कर्मारवृक्षे (काम-राङ्गा) च पु० राजनि० । स्वार्थे क । तत्रैव ।

मुद्गल न० मुदं गिलति गट-अच् रस्य लः । १रोहिषवृक्षे राजनि० । २गोत्रप्रवरर्षौ मुनिभेदे, ३वृषभेदे पु० ।

मुद्गष्ट पु० मुद्गं स्वकति प्रतिबध्नाति स्वक-ड पृषो० इत्वम् । वनमुद्गे अमरः । अच् मुद्गष्टकोऽप्यत्र ।

मुद्रा स्त्री मुद-रक । १प्रलयकारिण्याम् (मोहर) त्रिका० २कङ्कुष्ठिते मुद्राङ्कनवृक्षाकुलीयके शब्दर० ३अर्थरौप्या-दितङ्कायाम् ४अभिधाने । "मुद्रालिपिः शिल्पलिपिर्लिपि-र्लेखनिसम्भवा । गुप्तिकाद्युपयसम्भूता लिपयः पञ्चधा मताः" इत्युक्तलिपिमध्ये ५लिपिभेदे वाराहीतन्त्रम् । "लेखन्या लिखितं विप्रैर्मुद्राभिरङ्कितञ्च यत् । शिल्पा-दिनिर्मितं यच्च पाठ्यं धार्य्यञ्च सर्व्वदा" सुण्डमाङ्गात० । हृतन्त्रप्रसिद्धे वीराचरसेव्ये "मृगुकासण्डुका भद्रा गोधूमचणकादयः । तस्य नाम भवेन्मुद्रा" इत्युक्ते पञ्च-मकारान्तर्गतद्रव्यभेदे ७देवविशेषाराधनायाङ्कुस्यादिसन्नि-वेशविशेषे तन्त्रसारः "योजनात् सर्व्वदेवानां द्रावणात् पापसंक्षतेः । तस्मात् मुद्रेति सा ख्याता सर्व्वकार्यार्थ-साधनी "मुद्रामन्त्रमुमिति तन्त्रम् दक्षोक्तेः च ।

मुद्रालिपि स्त्री मुद्रया लिपिः । पञ्चधाविभक्तलिपिमध्ये लिपिभेदे (आपार अक्षर)

मुद्रिका स्त्री मुद्रैव मुद्रा वा संज्ञा कन् । स्वर्णरौप्यादि निर्म्मिते अङ्गुलिस्थे अङ्गुलसाधनद्रव्ये पदार्थे ।

मुद्रित त्रि०मुद्रा जाताऽस्य इतच् । १अप्रकाशिते २अङ्किते च

मुधा अव्य० मुह-का पृषो० हस्य धः । मिथ्याशब्दार्थे अमरः

मुनि पु० मन-इन् पृषो० उत्वम् । "दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः । वीतरागभयक्रोधः स्थिरधीर्मुनिरुच्यते" गीतोक्तलक्षणे स्थिरचित्ते वीतरागादौ जने । ते च सप्तर्षिविष्णुहारीतादय । २सप्तसंख्यायाञ्च । ३बुद्ध-सेनतरौ ४जिने मेदि० ।५पिप्पलवृक्षे ६परावरवृक्षे हेमच० ७दमनवृक्षे राजनि० । "मननान्मुनिरुच्यते" इत्युक्ते दमननयुते त्रि० । [राजनि० ।

मुनिखर्জ্জूरी स्त्री मुनिप्रिया खर्জ্জूरी । खर्জ্জूरीभेदे

मुनिच्छद पु० मुनिसंख्याताः सप्तसंख्याताः छदा पतिपर्ण यस्य । सप्तच्छदे (सातिम) राजनि० ।

मुनितरु पु० मुनिरगस्त्यनामकस्तरुः । वकवृक्षे रत्नमा० ।

मुनिद्रुम पु० मुनीनां प्रियो मुनिनामको वा द्रुमः । १श्वेत-नाकवृक्षे रत्नमा० २वकवृक्षे च राजनि० ।

मुनिपुत्रक पु० मुनेः पुत्रः संज्ञायां कन् ।१दमनवृक्षे भावप्र० २खञ्जने च त्रिका० । हृत० । ३अग्निसुते । [वकपुष्पे ।

मुनिपुष्प न०मुनिद्रुमस्य पुष्पं मौमो भीमसेनवदुत्तरपदलोपः ।

मुनिभेषज न० मुनीनां भेषजमिव । १हरीतक्यां २अगस्त्ये, मुनौ, ३भोजनाभावे च मेदि० । [भेदे ।

मुनीन्द्र पु० मुनिः इन्द्र इव ।१बुद्धे अमरः । ७त० २अग्नि-

मुन्थ गत्यां भ्वा० पर० सक० सेट् ङा वेट् । मुन्थति अमुन्थीत्

मुन्था स्त्री नी०क०ताल्वग्रसिद्धे इन्द्रियशब्दार्थे । इन्द्रिय-शब्दे ६२६पृ० दृश्यम् ।

मुन्यन्न न० मुनियोग्यमन्नम् । नीवारकन्दादौ ।

मुमुक्ष त्रि० मोक्तुमिच्छुः सन-सन्-च । मोक्षेच्छावति । १संसारबन्धनाभावेच्छावति । २यतौ पु० ।

मुमूचान पु० सच कान पृषो० दीर्घः । १मेघे २सक्तवति त्रि०

"हृषादिह मुमूचानः" इति मन्त्राक्षरपाठप्रमन्त्रः ।

मुमूर्षु त्रि॰ मर्तुमिच्छुः मृ-सन्-उ । आसन्नमरणे ।

मुर वेष्टने तु॰ पर॰ सक॰ सेट् । मुरति अमोरीत् ।

मुर पु॰ मुर-क । १दैत्यभेदे "पार्ष्णिनाथ हिपन् मुरम्" माघः २वेष्टने । ३खनामख्याते गन्धद्रव्ये स्त्री अमरः टाप् ।

मुरज पु॰ मुरात् वेष्टनात् जायते जन-ड । मर्दले वाद्यभेदे अमरः । ४ द्रव बन्धः । मुरजबन्धः । चित्रालङ्कारभेदे ।

मुरजफल पु॰ मुरज इव फलं यस्य । पनसवृक्षे त्रिका॰ । मर्दलफलादयोऽस्यत्व ।

मुरारिपु पु॰ ६ त॰ । विष्णौ । मुरारिमुरमथनादयोऽस्यत्व ।

मुरला स्त्री मुरं लाति ला-क । १नर्मदायाम् । "मुरला-मारुतोद्भूतम्" रघुः । २संगीतास्त्रि वाद्ये गौरा॰ ङीष् ।

मुरलीधर पु॰ मुरलीं धरति भृ अच् । श्रीकृष्णे मुरलीवादनादयोऽस्यत्व ।

मुर्च्छ मोहे भ्वा॰ पर॰ सक॰ सेट् । मूर्च्छति अमूर्च्छीत् । आदित् भावे क्त । मूर्तम् मूर्च्छितम् ।

मुर्मुर पु॰ मुर-क प्रषो॰ द्वित्वम् । १वह्नाग्नौ २कन्दर्पे स्त्र्यांच्चे च मेदि॰ । [यामलिट् मूर्मुः ।

मुर्व बन्धे भ्वा॰ पर॰ सक॰ सेट् । मूर्वति अमूर्वीत् निष्ठा-

मुल रोपणे चु॰ उभ॰ सक॰ सेट् । मोलयति ते अमूमुलत् त ।

मुशटी स्त्री मुश-अटच् गौरा॰ ङीष् प्रषो॰ । चितकबरो मेमच॰ ।

मुश(स)ली स्त्री मुश मुस वा कलच् प्रषो॰ मस्य शः गौरा॰ ङीष् । १तालमूल्याम् २मद्गरोधिकायाम् राजनि॰ संज्ञायां कन् । वङ्गाम् मुक्ता॰ ।

मुष बधे भ्वा॰ पर॰ सक॰ सेट् । मोषति अमोषीत् ।

मुष खेदने दिवा॰ पर॰ सक॰ सेट् । मुष्यति दरिद्र अमुषत् अमोषीत् पुषादिरयमित्यन्ये ।

मुष स्तुटने क्र्या॰ पर॰ द्विक॰ सेट् । मुष्णाति अमोषीत् ।

मुष(ष)(ग)क पु॰ मुष-कन् प्रषो॰ अयोग्ये खनामख्याते धान्यादिकखननसाधने पदार्थे अमरः । [रायमु॰।

मुषा स्त्री॰ मुष क-टाप् । धातुद्रावणे पात्रभेदे (मुची)

मुषित त्रि॰ मुष-क्त । अपहृतद्रव्ये जने अमरः ।

मुष्क पु॰ मुष-कन् । १वृषणचिह्नभेदे अण्डकोशे (बखा-पारच) २मोचखण्डे २संकुचे च मेदि॰ ४तस्करे, ५मांसले च हेमच॰। स्वार्थे क । तत्रैव । [हेमच॰]

मुष्कशून्य पु॰ ३त॰। वृषणरहिते राज्ञामन्तःपुररक्षके (खोजा

मुष्टि स्त्री॰ मुष-क्तिच । १बद्धपाणौ अमरः २पञ्चपरिमाणे पु॰ हेमच॰ ३कुब्जप्रहरणे च । क्तिन् । ४मोषणे स्त्री ।

मुष्टिक पु॰ मुष्टा कायति के-क । १कंसराजमल्लभेदे । मुष्टि मौष्टिकं प्रयोजनमस्य कन् । २मल्लयोद्धरि हेमच॰।

मुष्टिकान्तक पु॰ ६त॰ । बलदेवे शब्दर॰ तस्य मुष्टिकासुर-हननात्तथात्वम् ।

मुष्टियूत न॰ । ३त॰। कपर्दकसहप्राक्षीड़ने (पुरसट्) शब्दमा॰

मुष्टिन्धय पु॰मुष्टिं धयति धे खच् मुम् च । बालके त्रिका॰।

मुष्टिबन्ध पु॰मुष्टेर्बन्धो यत्र । १संपुटे अमरः। ३त॰ २मुष्टि-बन्धने । [आमोसीत् पुषादिरयमित्यन्ये ।

मुस खण्डने दि॰ पर॰ सक॰ सेट् । मुस्यति दरित् अमुसत् मुस(ष)(ग)लिन् मुस(ष)(ग)क+अस्यर्थे इनि । बलदेवे अमरः । [वेध्यौ अमरः ।

मुस(ष)(ग)ल्य त्रि॰ मुस(ष)(ग)केन वेध्यः यत् । मुसल-

मुसलह पु॰ नी॰ ता॰ उक्ते नवांशे "मुसलहे पञ्च खराः प्रदिष्टाः" नी॰ ता॰ ।

मुस्त संहतौ चु॰उभ॰सक॰सेट् । मुस्तयति ते अमुस्तस्त त ।

मुस्त पु॰ मुस्त अच् स्त्रीत्वे टाप् । मुस्तके (मुथा) द्वारा॰ तत्रार्थे स्त्री अमरः स्वार्थे क । अत्रैव अस्त्री॰अमरः । स्थावरविषभेदे पु॰ हेमच॰ । [भेदे अमरः ।

मुस्ताभ न॰ मुस्तेव भाति भा-क । (नागरमुथा) मुस्तक-

मुह मोहे वैचित्त्ये दि॰ उभ॰ अक॰ सेट् मुह्यति अदित् अमुहत् अदित् मोहिता, मोग्धा, मोढा ओत् । मूढोऽस्त्रि ।

मुहिर पु॰ मुह किरच् । १कामे, २मूर्खे च मेदि॰ ।

मुहुस् अव्य॰ मुह-उसिक् । पौनः पुन्ये अमरः ।

मुहूर्त्त स्त्री॰ मुहूर्च्छ क धातोः पूर्वं सट् च ।१द्वादशलग्नभुक्ते काले, पञ्चदशघटिकात्मके दिनस्य पञ्चदशभागे, किञ्चिन्-न्यूनाधिकघटिकाद्वयरूपे २काले च ।

मू बन्धे भ्वा॰ आ॰ सक॰ सेट् । मवते अमविष्ट सुसुवे ।

मृक पु॰ मू-कक् । १मत्स्ये त्रिका॰ २दैत्यभेदे मेदि॰ ३दीने हेम॰वाक्यशिक्षारक्षिते च त्रि॰अमरः । [४जड़े हेमच॰ ।

मूढ त्रि॰ मुह-क्त । १मूर्खे अमरः । २बाले ३तन्द्रिते मेदि॰

मूत त्रि॰ मू+बन्धे क्त । १बद्धे २संयते च अमरः । [मूतत् त

मूत्र स्रावे चुरा॰ उभ॰ अक॰ सेट् । मूत्रयति ते अमू-

मूत्र न॰ मुत्र-अच् । प्रस्रावे उपस्थात् क्षरितजले अमरः ।

मूत्रकृच्छ्र न॰ । रोगभेदे "व्यायामतीक्ष्णौषधरूक्षमद्य-प्रसङ्गरुद्धद्रुतपृष्ठयानात् । स्नानूपमत्स्याध्यशनादजीर्णात् मूत्रौकृच्छ्राणि नृणां तथाऽष्टौ" माधव॰ ।

मूत्रदोष पु० मूत्रस्य दोषो यस्मात् दुष-घञ् ६त०। प्रमेहरोगे राजनि०।

मूत्रनिरोध पु० मूत्रं निरुध्यतेऽत्र नि+रुध-घञ्। मूत्रप्रतिबन्धकरोगे। [२कर्मधा० राजनि०।

मूत्रफला स्त्री० मूत्रमेव फलं यस्याः। त्रपुषाम् (गधा)

मूत्राघात पु० मूत्रमाहन्ति आ+हन-घञ्। मूत्रहननकारिणि रोगभेदे। "प्रायो मूत्रविघातादौषैतैकृच्छ्रशिलादयः। जायन्ते कुपितैर्दोषैर्मूत्राघातास्त्रयोदश" भावप्र०।

मूत्राशय पु० ६त०। नाभेरधोदेशे वस्तिनामकस्थाने भावप्र०।

मूर्ख त्रि० सह खरादेशः। १मूढे २गायत्रीरहिते ३सार्द्धगायत्रीरहिते च। "क्रियाहीनस्तु मूर्खस्स्या"दिति स्मृतिव्याख्यायां निबन्धकारैस्तथार्थकतया व्याख्यानात्।

मूर्च्छना स्त्री मूर्च्छ-युच्। "स्वरः संमूर्च्छितो यत्र रागतां प्रतिपद्यते। मूर्च्छनामिति तां प्राहुः कवयो यामसम्भवाम्" इत्युक्ते गानाङ्गभेदे "स्फुटीभवद्ग्रामविशेष मूर्च्छनाम्" माघः।

मूर्च्छा स्त्री मूर्च्छ-भावे अङ्। १मोहे अमरः। २अनिद्रायामपि बाह्येन्द्रिय व्यापारशून्यावस्थायां "चीयन्ते वातदोषस्य विरुद्धाहारसेविनः। वेगाघातादभिघातात् क्षीणसत्त्वस्य वा पुनः। करणायतनेभ्यो बाह्येभ्यश्च नरेषु च। निविशन्ते यदा दोषास्तदा मूर्च्छन्ति मानवाः" भावप्र०। ३वृद्धौ च।

मूर्च्छाल त्रि० मूर्च्छा+अस्त्यर्थे लच्। मूर्च्छायुक्ते अमरः।

मूर्च्छित त्रि० मूर्च्छा जातास्य तारं० इतच्। १मूर्च्छायुक्ते २वृद्धे ३वर्द्धिते च मेदि०

मूर्त्त त्रि० मूर्च्छ-क्त। १मूर्च्छान्विते अमरः। २मूढे ३कठिने च मेदि०। मूर्त्तिरस्त्यस्य अच्। ४मूर्त्तिमति न्यायोक्तेषु अवच्छिन्नपरिमाणवत्सु। क्षितिजलपावकपवनमनःसु च।

मूर्त्ति स्त्री मूर्च्छ-क्तिन्। १देहे २कठिन्ये, अमरः। ३प्रतिमायाञ्च हेम०।

मूर्त्तिमत् पु० मूर्त्तिरस्त्यस्य मतुप्। १देहे। २आकारयुक्ते ३कठिन्यवति च त्रि० स्त्रियां ङीप्। [आतमाले त्रि०।

मूर्द्धज पु० मूर्द्धनि जायते जन-ड। १केशे शटा०। २मस्तकमूर्द्धन्य त्रि० मूर्द्धनि भवः यत्। १मस्तकजाते। २शिक्षाग्रन्थोक्तेषु अकारटवर्गरषवर्णेषु पु०।

मूर्द्धन् पु० सर्व-कनिन् धट्, च। मस्तके अमरः।

मूर्द्धपुष्प पु० मूर्द्धनि पत्रशिरसि पुष्पं यस्य। शिरीषवृक्षे शब्दमा०

मूर्वा स्त्री सर्व-क्वच्। खनामख्याते धनुर्गुणोपयुक्ते लताभेदे गौरा० ङीष्। मूर्वेयत्र भरतः। [अमूर्वित।

मूल प्रतिष्ठायां भ्वा० उभ० सक० सेट्। मूलति ते अमूलीत्

मूल रोपणे चुरा० उभ० सक० सेट्। मूलयति ते अमूमुलत् त।

मूल न० मूल-क। १शिफायाम् (जड़) (शिकड़) अमरः २आदौ ३निकृष्टे ४नक्षत्रभेदे ५अन्तिके त्रिकः ६वाणिज्याद्युपयोगिनि ७मूलधने, मेदि०। ८निजे अजयः। ९चरणे १०गुरणे शब्दमा० ११पिप्पलीमूले १२पुष्करमूले राजनि०। १३टीकादिना व्याख्येयग्रन्थे च अव्ययबहिके अनर्थके मूलके अव्ये० तिं०त० शब्दर० स्त्रीत्वसङ्ग्रहम्।

मूलक न० मूल+संज्ञायां कन्। १कन्दभेदे (मूला) वर्ज्जनीयं सदा विप्रैर्मूलकं मदिरासमम्" इति ब्रह्मपु०। २विषभेदे पु० हेमच०। [ज्ञने रत्नमा०।

मूलकपर्णी स्त्री मूलकस्येव पर्णान्यस्याः ङीष्। शोभाञ्जने

मूलकर्मन् न० मूलेन मन्त्रौषधादिना कर्मवशीकरणादि। औषधादिना वशीकरणकर्मणि।

मूलकच्छ पु० मूलेन क्वाथितेनमूलेन कच्छः। "मूलकच्छः कृतो मूलैरिति" स्मृत्युक्ते व्रतभेदे। तद् यस्य। २तद्वति त्रि०।

मूलज न० मूलाज्जायते जन-ड। १वार्त्ताके राजनि०। २तत्पलाण्डौ पु० हेमच०। ३मूलनक्षत्रजातमात्रे त्रि०।

मूलत्रिकोण न० "सिंहो वृषश्च मेषश्च कन्या धन्वी घटोघटः। "अर्कादीनां त्रिकोणानि मूलानि राशयः क्रमात्" रव्यादीनां क्रमेण सिंहादिषु राशिषु। तदंशाश्च "रविभौमजीवभार्गवशनैश्चराणां त्रिकोणभागाः स्युः। नखरविदिक्कृतिथिनखरान्ध्रेन्दो दिग्भागकाः क्रमात्" ज्यो०त०।

मूलद्रव्य न० कर्म०। मूलधने यदवलम्ब्य वाणिज्यादिकं क्रियते तत्क्रित् (पूंजि) मूलधनादयोऽत्र।

मूलपर्णी स्त्री मूलमारभ्य पर्णान्यस्याः ङीष्। मरडूकपर्ण्याम् रत्नमा०। [राजनि०।

मूलपुष्कर न० पुष्करस्य मूलं राज० पर०। पुष्करमूले

मूलपोती स्त्री पू-तच् गौ० ङीष् मूलं प्रधाना पोती। पूतिकायाम् राजनि०।

मूलप्रकृति स्त्री मूलीभूता सर्वेषां प्रकृतिः। सांख्यमतोक्ते सर्वेषां कारणीभूते साम्यावस्थापन्ने सत्त्वरजस्तमोरूपे त्रिगुणात्मके १प्रधाने "मूलप्रकृतिरविकृतिः" सांख्यकारिका। २दुर्गायाञ्च ब्रह्मवै०पु०४०अ०। [राजनि०।

मूलफलद पु० मूलेऽपि फलं ददाति दा-क। धनसङ्ग्रहे

मूलरस पु० मूले रसो यस्य । मोरटाख्यताडाम् रक्षगाछा ।
मूलशाकट न० मूलानां क्षेत्रं मूल+शाकट । मूलभवनयोग्ये क्षेत्रे शाकिन । मूलशाकिनोऽप्यत्र पु० । [राजनि०
मूला स्त्री मूलानि बाहुल्येन सन्त्यस्याः अच् । शतमूल्याम्
मूलाधार पु० ६त० । १नाभिलिङ्गयोर्मध्ये तन्त्र हि शरीरस्थ सकलनाड़ीनां मूलस्थानत्वात्तथात्वम् "मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके । मध्ये स्वयम्भुलिङ्गन्तु कोटिसूर्यसमप्रभम्" इत्युक्तलक्षणे त्रिकोणाकारे तन्त्रोक्ते २शुभ्रषाणाडीस्थे चक्रभेदे च । [कोऽप्यत्र ।
मूलिन् पु० मूलमस्त्यस्य इनि । वृक्षे शब्दच० । ठन् । मूलिमूल्य न० मूलाय पटादिक्रयणतन्त्वाद्यादानाय इदम् यत् । तन्त्वाद्यादानाय दीयमाने १धने अमरः । मूल-एयत् । क्रयणयोग्ये त्रि० ।
मूष लुण्ठने भ्वा० पर० सक० सेट् । मूषति अमूषीत् । इमूष
मूष पुंस्त्री० मूष-क । १मूषिके रत्ना० स्त्रियां ङीष् । २तैजसद्रव्यद्रावणपात्रे (मुचि) अमरः ।३गवाक्षे "एकहित्राादि मूषावहने" इति लीला०५देवताड़हये च स्त्री शब्दच०
मूषक पुंस्त्री० मूष-एवुल् स्त्रीत्वे टाप् अत इत्वम् । छन्दुरौ शब्दच० ।
मूषकपर्णी स्त्री मूषककर्णतुल्यं दल पर्णान्यस्याः । (छन्दुरडानी) आखुकर्णाम् मूषिककर्णादयोऽप्यत्र ।
मूषरिफ पु० नीच०ता० ऋक्षे दशराफाख्ये योगभेदे "शीघ्रो यदा मन्दगतेरेकमर्क्षमतिक्रमेति तदेशराफः । कार्यक्षयो मूषरिके खलोक्ये सौम्ये न चिन्ताजनकेन चिन्त्यम्" ।
मूषिक पुंस्त्री० मूष-इन् । १छन्दुरौ अमरः स्त्रीत्वे टाप् । २क्षुद्रिकपर्ण्यां स्त्री शब्दर० ३मूषायां भरतः । [शब्दर०]
मूषिकपर्णी स्त्री मूषिककर्ण इव पर्णान्यस्याः जलजलक्षभेदे
मूषी स्त्री मूष+इन् गौ०ङीष् ।१क्षपाद्रव्यद्रावणपात्रे (मुचो) २मङ्गामूषिके राजनि०।
मृ हतौ तु० पर० धात्वर्थाहे लुङि आशीर्लिङि च आ० अन्यत्र पर० अक० अनिट् भियते । अमृत । ममार मर्त्तासि मृषीष्ट ।
मकण्ड(ण्डु) पु० ऋषिभेदे शब्दच० ।
मृज शुद्धौ भ्वा० प० अक० सेट् । मृजति अमृजीत् ।
मृग अन्वेषणे याचने च चुरा० चु० आ० सक० सेट् मृगयते अममृगत ।
मृग अन्वेषणे दिवा० पर० सक० सेट् । मृग्यति अमृगीत् ।
मृग पु० मृज-क । १पशुमात्रे, २गजभेदे, ३अश्विन्यधिके पञ्चमे न क्षत्रे पु० । ऋ-चु-मृग-भावे कच् । ४अन्वेषणे पु० ५याचने च मेदि० ६यज्ञभेदे ७मार्गशीर्षे मासि अजयः कच् । ८मृगभेदे, भरतः ६मल्लरराशौ च पु० ज्योत० । १०हरिणे अमरः सर्वतः जातौ स्त्रियां ङीष् ११नरभेदे "मृगे तृष्णा च चिलिषौ रतिमञ्जरी ।
मृगगामिनी स्त्री मृग इव गच्छति गम णिनि ङीष् । १विड़ङ्गायाम् राजनि० । २मृगतुल्यगमनवति त्रि० स्त्रियां ङीष् । [व्याधे शब्दच० ।
मृगजीवन पु० मृगैस्तदांसादिविक्रयाभिर्जीवति जीव-ल्यु ।
मृगणा स्त्री मृग युच् टाप् । नक्षत्रव्यक्षान्वेषणे अमरः ।
मृगतृष्णा स्त्री मृगाणां तृष्णेव तृष्णाहेतुत्वात् । सूर्य्यकिरणे जलभ्रान्तौ अमरः । निर्जलदेशस्थं सूर्य्यकिरणं दूरतो वीक्ष्य मृगैर्जलभ्रान्त्या तृष्णार्त्तैः सद्भि बम्भ्रम्यते न च लभ्यते इति यीक्षे मरुदेशे सिकतादौ पतितरविकिरणेषु जलभ्रान्तिरिति च लोकप्रसिद्धम् । स्वार्थे क । तत्रैव ।
मृगदंशक पुंस्त्री० मृगं दंशति दंश ण्वुल् । कुक्कुरे अमरः स्त्रियां जातित्वात् ङीष् । [स्त्रियां ङीष् ।
मृगधूर्त्तक पुंस्त्री० मृगेषु मध्ये धूर्त्तकः । शृगाले अमरः
मृगनाभि पु० मृगस्य नाभिः जन्महेतुर्यस्य । कस्तूर्य्याम् मृगभेदे अमरः ।
मृगनेत्रा स्त्री मृगो मृगशिरो नक्षत्रं नेता प्रापकः सर्वरात्रिप्रकाशकत्वात् यत्र अच्समा० । सौरमार्गस्य किञ्चिदधिकत्रयोविंशदिनावधिभेदेऽप्यर्द्धान्तरात्रिषु ।
मृगनाभिजा स्त्री मृगस्य नाभेर्जायते जन-ड । कस्तूर्य्याम् हेमच० । [हेमच०मृगेशादयोऽप्यत्र २सिंहराशौ च ।
मृगपति पु० ६त० । मृगाणां पशूनां पतिः स्वामी । १सिंहे
मृगप्रिय न० ६त० । पवेततृणे राजनि० ।
मृगबधाजीव पु० मृगबधेनाजीवति आ+जीव-अच् । व्याधे अमरः मृगाजीवोऽप्यत्र ।
मृगबन्धनी स्त्री मृगोबध्यतेऽनया बन्ध-करणे ल्युट् ङीप् । मृगबन्धनार्थे जाले अमरः । करणस्य कर्त्तृत्वविवक्षायां णिनि ङीप् । मृगबन्धिनीत्यत्र अमरे पाठान्तरम् ।
मृगभक्षा स्त्री मृगैर्भक्ष्यते भक्ष-कर्मणि क्विप् । जटामांसाम् राजनि० ।
मृगमद पु० मृगस्य मदो गर्वो यस्मात् । कस्तूर्य्याम् अमरः ।
मृगमदवासा स्त्री मृगमदस्येव वासः सौरभमस्याः । कस्तूरीमल्लिकायां राजनि० ।
मृगया स्त्री मृगं यातनया या-घञर्थे क । (शीकार)

पशुबधफलके व्यापारभेदे चाखेटके अमरकोषः ।

मृगयु पु० मृग-अन्यर्थे यु । १व्याधे २मृगाले ३व्याघ्रे च मेदि० "मृगयुर्मव मृगोऽथ दक्षिणेमौ" भट्टिः ।

मृगरसा पु० मृगो मृगमांसं तस्येव रसोऽस्याः । सप्तदेवीलतायाम् राजनि० ।

मृगराज पु० मृगाणां पशूनां राजा टच्समा० । १सिंहे शब्दर० । मृगेण गजेन राजते राज-क्विप् । २चन्द्रे । ३सिंहराशौ च । उपचारात् ४मृगशिरानक्षत्रे च ।

मृगराटिका स्त्री मृगं रटति जीव्यत्वेन रट-अण् गौ० ङीष् स्वार्थे क । जीवन्त्यामोषधौ राजनि० [राशौ च ।

मृगरिपु पु० ६त० । १सिंहे मृगगतुप्रभृतयोऽप्यत्र । २सिंह-

मृगलाञ्छन पु० मृगो लाञ्छनं यस्य । १चन्द्रे शब्दर० । मृगाङ्कादयोऽप्यत्र उपचारात् २मृगशिरानक्षत्रे च ।

मृगवल्लभ न० ६त० । कुन्दरतृणे राजनि० ।

मृगवाहन पु० मृगो वाहनं यस्य । १वायौ "धावन् हरिण-पृष्ठस्थः" इति वायुध्यानम् । २स्वातिनक्षत्रे च ।

मृगव्य न० मृगान् व्यथतेऽत्र व्यध-ड । मृगयायाम् अमरः ।

मृगशिरस् न० पु० । मृगस्येव शिरोऽस्य । अश्विन्यादिके पञ्चमे नक्षत्रे मृगशिरायत्र स्त्री टाप् शब्दर० । मृगशीर्षन्, न० रायमु० मृगशीर्ष पु० एतावप्यत्र भरतः ।

मृगा स्त्री मृगो मृगमांसतुल्यरसोऽस्यस्य अच् । सप्तदेवीलतायाम् राजनि० ।

मृगाक्षी स्त्री मृगस्येवाक्षि तत्तुल्यं पृथ्वं वा यस्याः उपसमा० ङीष् । १विशालायां २मृगतुल्यनयनवत्यां स्त्रियां च मेदि० [जायते जन-ड । कस्तूर्याम् राजनि० ।

मृगाण्डजा स्त्री मृगस्याण्डाकारात् नाभिस्थितमांसपिण्डात्

मृगादन पुंस्त्री०मृगान् अत्ति अद-ल्यु । व्याघ्रे अमरः । स्त्रियां ङीष् । मृगान्नकोऽप्यत्र ।

मृगादनी स्त्री मृग इवाद्यते अद-कर्मणि ल्युट् । १सप्तदेव्याम् २दंष्ट्राकरञ्जाम् (राखालशशा) ३कस्तूरीभेदे च राजनि० । [२सिंहराशौ च ।

मृगारति पु० ६त० । १कुक्कुरे शब्दमा० मृगशत्रौ २सिंहे च ।

मृगारि पु० ६त० । १कुक्कुरे २सिंहे ३व्याघ्रे ४रक्तशोभाञ्जने च राजनि० तल्लक्षणे हि तस्य नामः । ५सिंहराशौ च ।

मृगाविध् पु० मृगं विध्यति व्यध+क्विप् पूर्ववदोषः । व्याधे जटाधरः ।

मृगित त्रि० मृग-क्त । १अन्वेषिते अमरः २याचिते च ।

मृगेन्द्र पुंस्त्री०मृगः इन्द्र इव । सिंहे अमरः स्त्रियां ङीष् ।

मृगेन्द्रचटक पु० मृगेन्द्र इव चिंचचटकः पक्षी । श्येन० पक्षिणि जटा० ।

मृगेन्द्राणी स्त्री मृगेन्द्रेण सिंहेनाण्यते भक्ष्यते अण-कर्मणि ब्रह्मवै क गौरा०ङीष् । वासके राजनि० ।

मृगेर्वारु स्त्री मृगप्रिया इर्वारुः ककोटी । श्वेतायामिन्द्रवारुण्याम् (सादा राखालशशा) राजनि० ।

मृगेष्ट पु० ६त० । सुहृद्वले राजनि० ।

मृगेक्षणा स्त्री मृगस्य ईक्षणमिवेक्षणं पृथ्वं वा यस्याः । १मृगेक्षणे राजनि० २मृगतुल्यनेत्रायां स्त्रियां च ।

मृज शोधने भ्वादौ च वा चु० उभ० पक्षे वृद्धा० सक० सेट् । मार्जयति-ते मार्ष्टि अमीमृजत्-त अममार्जत्-त अमार्क्षीत् आमार्क्षीत् अमृक्षत् मित् मृक्षा । [ता" भट्टिः

मृजा स्त्री मृज-अङ् । मार्जने अमरः "शिरसा च मृजा-

मृड तोषणे क्रया० प० च पर० सक० सेट् । मृडाति मृडति अमर्डीत् अमर्दं । [आङ्पूर्व च मृडानी ।

मृड पु० मृड-क । १शिवे अमरः २तत्पत्न्याम् स्त्री ङीष्

मृण हिंसे तु० प० सक० सेट् । मृणति अमर्णीत् ।

मृणाल पुंन० मृज-कालन् । १पद्मादेर्नालरूपे स्तम्बे अमरः २वीरणमूले न० मेदि० गौरा० ङीष् । मृणालीत्यपि ३विसतन्तौ स्त्री राजनि० ।

मृणालिन् स्त्री मृणालं विद्यतेऽस्य अच् मृणालं पद्मं तत्समूहे तदुत्पत्तिदेशे वा इनि । १पद्मसमूहे २पद्मोत्पत्तिदेशे ३तदुत्पन्नलतायाञ्च जटा० ।

मृत न० मृ-भावे क्त । १मरणे । २तत्तुल्यदुःखजनके व्याधितके हते च अमरः । कर्त्तरि क्त । ३गतप्राणे त्रि० ।

मृतक न० मृतेन मरणेन कायति कै-क । मरणाशौचे "मृतके मृतकेऽथ वा" इति स्मृतिः ।

मृतकल्प त्रि० ईषदसमाप्तो मृतः मृत+कल्पप् । मृतप्राये ।

मृतकान्तक पुंस्त्री० मृतः शवदेहः कान्तोऽभिमतो यस्य कप् । मृगाले हारा० स्त्रियां ङीष् ।

मृतजीव पु० मृतः नष्टः सन् पुनर्जीवति जीव-अच् । तिलकवृक्षे राजनि० ।

मृतवत्सा स्त्री मृतोवत्सो यस्याः । मृतापत्यायां स्त्रियां २स्त्रीगव्याञ्च "मृतवत्सा च या नारीति" तन्त्रम् ।

मृतसञ्जीवनी स्त्री मृतान् संजीवयति सम्+जीव-णिच्-ल्यु गौरा० ङीष् । १गोरक्षदुग्धायामोषधौ राजनि० तन्त्रोक्ते २विद्याभेदे च । [मरणनिमित्तं क्षतस्नाने अमरः

मृतस्नात त्रि० मृतं मरणं तन्निमित्तं स्नातः स्ना-क्त ।

मृतालक न० मृतमालयति भूषयति अल-णिच्-ण्वुल्। आढक्याम् अमरः। मृत् मृत्तिका तालः प्रतिष्ठा यस्य वा कप्। मृतालकमप्यत्र शब्दर०। सौराष्ट्रमृदि राजनि०

मृत्तिका स्त्री मृद्+तिकन् टाप्। १मृदि (माटि) सा लेखनेऽस्यस्य अच् टाप्। २आढक्याम् राजनि०।

मृत्फली स्त्री मृदि फलमस्याः ङीष्। कृष्णैषधौ। (कुड़) हारा०।

मृत्यु पु० मृ-त्युक्। १यमे हेम० देहादिभ्यः २प्राणवियोगे विजातीयात्ममनःसंयोगनाशे वा ३मरणे च अमरः। "मृत्योः स मृत्युमाप्नोति" श्रुतिः भयात् मायायां जाते ४पुत्रभेदे पु० भयाज्जज्ञेऽथ वै माया मृत्युं भूतापहारिणम्। निर्ऋतिश्च तथा कन्या मृत्योर्भार्याऽभवत्तदा!। अलक्ष्मीर्नाम तस्यां च मृत्योः पुत्रश्चतुर्दश" मार्क०पु०।

मृत्युञ्जय पु० मृत्युं जयति जि-अच्। १महादेवे अमरः "कतिधा मृत्युकन्यानां ब्रह्मणां कोटिशोऽभवे। कालो न क्षीणः शम्भुश्च मृत्युरूपी च निर्गुणः। मृत्युकन्या जिता शश्वत् शिवेन सुदृढा मम। न मृत्युना जितः शम्भुः कल्पे कल्पे श्रुतौ श्रुतम्" ब्रह्मवै०प्र० ५।अ०।

मृत्युनाशक पु० मृत्युं नाशयति नाशि-ण्वुल्। १पारदे राजनि० तस्य हि रसायनक्रियादिना शोधयित्वा सेवने मृत्युनाशकत्वम्। २मृत्युनाशकमात्रे त्रि०।

मृत्युपुष्प पु० मृत्यवे स्वामिमरणाय पुष्पं यस्य। रक्तो रक्तमा० तस्मिन् पुष्पिते हि तत्स्वामिनो नाशः।

मृत्युफला स्त्री मृत्यवे स्वनाशाय फलं यस्याः। कदल्यां मेदि० फलपाके हि तस्या नाशो लोकसिद्धः। [त्रिका०।

मृत्युबीज पु० मृत्युरुद्रेतदांश एव बीजं कारणमस्य। वंशे

मृत्युसूति स्त्री मृत्यवे सूतिः प्रसवोऽस्याः। कर्कटकयोषिति प्रसवेन हि तस्या नाशः "यथा कर्कटकी गर्भमादत्ते मृत्यवे निजम्" इति पुराणम्।

मृत्(सा)स्ना स्त्री मृद्+प्रशस्तार्थे सन् वा। १प्रशस्तमृत्तिकायाम् अमरः। अर्शआद्यच् स्नान्तः। २आढक्याम् अमरः।

मृद क्षोदे क्रया० प० सक० सेट्। मृद्नाति अममर्दीत् ममर्द। मृद् (दा) स्त्री मृद्यते मृद्-कर्मणि क्विप्। मृत्तिकायाम् (माटी) अमरः। कृत्रिमत्वात् वा टाप्। मृद्दारुत्व।

मृदङ्ग पु० मृद्-अङ्गच् किच्च। १वाद्यभेदे अमरः। २कोषातक्यां स्त्री रत्नमा० गौरा० ङीष्।

मृदङ्गफल पु० मृदङ्ग इव फलमस्य। पनसवृक्षे शब्दर०।

मृदङ्गफलिनी स्त्री मृदङ्ग इव फलमस्त्यस्या इनि ङीप्। कोषातक्याम् राजनि०। तत्फलं साम्य दस्त्यस्य अच्। मृदङ्गतुल्यफले पनसवृक्षे पु० शब्दर०।

मृदु त्रि० मृद्-कु। १कोमले अमरः। स्त्रियां वा ङीप् मृद्वी मृदुः। सा च २मृद्वीकन्यायाम्। ३चित्रानुराधाऽगस्त्यरेवतीनक्षत्ररूपे नक्षत्रगणभेदे च त्रि०ङ्गो०त०।

मृदुचर्मिन् पु० मृदु कोमलं चर्म त्वचास्त्रस्य व्रीह्या०इनि। भूर्जवृक्षे राजनि०।

मृदुच्छद पु० छादयतेऽनेन छदः त्रक् ह्रस्वः। १भूर्जवृक्षे २पर्वतजपीलुवृक्षे जटा० ३कुक्कुरवृक्षे ४श्वेतानवृक्षे च राजनि०।

मृदुताल स्त्री कर्म०। श्वेतानवृक्षे (तेंडेत) राजनि०।

मृदुत्वच्(च) पु० मृदुः त्वक् त्वचा वा यस्य। भूर्जवृक्षे अमरः।

मृदुपत्र पु० मृदूनि पत्राण्यस्य। १नले राजनि०। कर्म०। २कोमलपर्णे न० ह्रस्वः। ३तद्वति त्रि०। ४चिल्लीशाके स्त्री राजनि० गौरा० ङीष्। [२मृदुपत्रियुक्ते त्रि०।

मृदुपर्वक पु० मृदूनि पर्वाण्यस्य कप्। १वेते राजनि०।

मृदुपुष्प पु० मृदूनि पुष्पाण्यस्य। १शिरीषवृक्षे रत्नमा०। ह्रस्वः। २मृदुकुसुमयुते त्रि०। कर्म०, ३कोमलपुष्पे न०।

मृदुफल न० मृदूनि फलान्यस्य। १बिल्वे (बरचि) २मधुनारिकेले च राजनि०। ३कोमलफलयुते त्रि०। कर्म०। ४कोमलफले न०। [त्रि० अमरः।

मृदुल न० मृद्-कुलच्। १जले शब्दच० २कोमलमात्रे

मृदुलोमक पु० ह्रस्वः। १मयूरे हेमच०। २कोमललोमयुक्ते त्रि०। कर्म०। ३कोमललोम्नि न०।

मृदूत्पल न० कर्म०। १नीलोत्पले शब्दर०। २नीलपद्मे च।

मृद्वीका स्त्री मृद्+ईकन्। १द्राक्षायाम् अमरः २कपिलद्राक्षायाञ्च राजनि०।

मृध न० मृध्यतेऽत्र मृजर्वै आधारे क। युद्धे अमरः।

मृध आद्रीभावे भ्वा० उभ० सक० सेट् उदित् क्ता वेट्। मर्धति-ते अमर्धीत् अमर्धिष्ट ममर्ध मर्धिषे।

मृश स्पर्शने प्रतिघाते च तु० पर० सक० अनिट्। मृशति अमार्क्षीत् अमार्क्षीत् अमृक्षत् ममर्श।

मृष क्षमायाम् कृद०चु०उभ०सक० सेट्। मृषयति ते अमीमृषत् त। [अमृषिष्ट।

मृष शान्तौ कृद०भ्वा०उभ० सक० सेट्। मृषति ते अमृषीत्

मृष सेचने भ्वा०पर०सक०सेट्। मर्षति अमर्षीत् उदित् क्ता वेट्।

मृष क्षमायां चु०उभ०सक०सेट्। मर्षयति ते अमीमृषत् त अममर्षत् त। [ऊदित्त्वे सति इदित् ङा वेट्।

मृष क्षमायां भ्वा० उभ० सक० सेट्। मर्षति ते अमर्षीत्

मृष क्षमायां चु०पक्षे दिवा०च उभ०सक०सेट्। मृष्यति ते। मर्षयति ते। मर्षितः मर्षित्वा।

मृषा अव्य०कृञ-ङा। मिथ्यार्थशब्दार्थे अमरः।

मृषार्थक न० मृषा अत्यन्तासम्भूतोऽर्थो यस्य। "कूर्मलोमतन्तुवाद्यः शशशृङ्गधनुर्धरः" इत्यादि मिथ्यार्थकवाक्ये।

मृषालक पु० मृषावाक इव मङ्क्यांमस्त्यस्य अच्। आम्रवृक्षे शब्दर०। [तदो वह्निमानित्यादिवाक्यम्।

मृषावाद पु० मृषा+वद-घञ्। मिथ्यावाक्ये जटा० यथा

मृषोद्य न० मृषा+वद-भावे क्यप्। १मिथ्याकथने तद्विद्यतेऽस्य अच्। २मिथ्यावादिनि त्रि०शब्दमा०। [त्रि०अमरः

मृष्ट न०मृज(ष)-क्त। १मरिचे राजनि०। २धृष्टे ३शोधिते च

मृ वधे क्र्या० पर० सक० सेट्। मृणाति अमारीत्।

मे प्रतीदाने भ्वा० आत्म० सक० अनिट्। मयते अमास्त।

मेक(ख)ल पु० मि-कलच् खलच् वा नाभ्यम्। १अद्रिभेदे मे इति कलो यस्य क मध्यः। २आगे पुंस्त्री० राजनि० स्त्रियां ङीष्।

मेक(ख)लकन्यका स्त्री ६त०। नर्मदानद्याम् अमरः।

मेक(ख)लाद्रिजा स्त्री मेक(ख)लाद्रेर्जायते जन-ड। नर्मदानद्याम् हेमच०।

मेचक न० "रक्तजातीनिधार्यं प्रमाणं मेचकं भवेत्। वृत्तं वार्द्धं च पृथुप्रमवदानक्रियाक्षमम्" छन्दोगप०उक्ते यज्ञपात्रभेदे। रक्तप्रमाणं प्रादेशद्वयम्।

मेखला स्त्री मि-खलच्। "मेखला त्वष्टयष्टिका" उक्ते १स्त्रीकट्याभूषणभेदे अमरः। उपनयनकाले ब्रह्मचारिधार्ये मौञ्जयादौ २कटीसूत्रे "मौञ्जी त्रिवृत् समा श्लक्ष्णा कार्या विप्रस्य मेखला। क्षत्रियस्य च मौर्वी वैश्यस्य शणतन्तुजा" मनुः। ३खड्गादेर्मुष्ट्याधारखण्डे ४वर्षाधोभागेन बन्धे ५शैवलितम्बे मेदि० ६नर्मदायां शब्दर० ७दुग्धिकायष्ट्याम् राजनि०। ८होमकुण्डोपरिस्थे स्रुतृणते ९वेष्टनभेदे च।

मेघ पु० मिह-घञ् कुत्वम्। धूमज्योतिःसलिलमरुतसंघातजन्ये १जलधरे २मुस्तके च अमरः। ३राजभेदे शब्दच० ४रागभेदे च सं०गी०। [स्त्रियां ङीष्।

मेघजीवन पुंस्त्री० मेघो जीवनं यस्य। चातकपक्षिणि राजनि०

मेघज्योतिस् न० मेघजन्यं ज्योतिः या०त०। वज्राग्नौ अमरः

मेघनाद पु० मेघस्येव नादोऽस्य। १रावणस्य पुत्रे इन्द्रजिति। ६त०। २मेघशब्दे च मेदि०।

मेघनादानुलासक पुंस्त्री० मेघस्य नादेनानुलसति अनु+लस ण्वुल्। मयूरे राजनि० स्त्रियां ङीष्। घिनि। मेघनादानुलासिन् मयूरे अमरः।

मेघनामन् पु० मेघस्य नामेव नाम यस्य। मेघवाचकशब्दाख्ये तृणभेदे अमरः।

मेघपुष्पक न० मेघस्य पुष्पमिव। जले अमरः।

मेघयोनि स्त्री० ६त०। धूमे शब्दरत्ना०।

मेघवर्णा स्त्री मेघस्येव वर्णोऽस्याः। नीलीवृक्षे शब्दच०।

मेघवर्त्मन् न०६त०। आकाशे त्रिका०। मेघवीथ्यादयोऽप्यत्र।

मेघवह्नि पु० मेघजन्यो वह्निस्तडिदाख्योऽग्निः। वज्राग्नौ हेमच०। एवं मेघानलादयोऽप्यत्र।

मेघवाहन पु० मेघो वाहनमिव यस्य, मेघान् वाहयति चालयति वह-णिच् ल्युट् वा। इन्द्रे अमरः।

मेघसार पु० मेघस्य कर्पूरस्य सारः। चीनकर्पूरे राजनि०।

मेघस्तनितोद्भव पु० मेघस्तनिताद्भवति उद्+भू-अच्। विकण्टककृक्षे राजनि०।

मेघागम पु० मेघानामागमो यत्र। वर्षाकाले वर्षर्तौ शब्दर०

मेघानन्दिन् पु० मेघेन तद्ध्वनिना आनन्दति आ+नन्द-णिनि। मयूरे अत्र मेघानन्दा। बलाकायां राजनि०।

मेघान्त पु० मेघानामन्तो यत्र। शरत्काले राजनि० मेघाल्पत्वादयोऽप्यत्र। [त्रिका०।

मेघास्थि न० मेघानामस्थीव संहतकठिनत्वात्। करकायाम्

मेचक न० मच-ण्वुल् पृषो०। १अन्धकारे २श्यामोऽञ्जने च मेदि० ३नीलाञ्जने राजनि०। ४मयूरचन्द्रके ५श्यामवर्णे मेदि०। ६धूमे ७मेघे ८श्यामाञ्जने शब्दर० ९श्यामवर्णयुते त्रि० अमरः।

मेट (ड) उन्नादे भ्वा० पर० सक० सेट् अदित् चङि न हृस्वः। मेट(ड)ति अमेटी(डी)त्।

मेटुला स्त्री मेट-उलच्। आमलक्याम् शब्दच०।

मेढ्र पुंस्त्री० मिह-इत्र। १मेषे स्त्रियां ङीष् २पुंस्त्रीशिश्नाधारचक्रे च पु० अमरः। [गाडरगिडा) रत्नमा०।

मेढ्रशृङ्गी स्त्री मेढ्रस्येव शृङ्गं यस्याः ङीष्। मेषशृङ्ग्याम्

मेध वधे मेधायाञ्च सक० सङ्गे अक० भ्वा० उभ० सेट्। मेधति ते अमेधीत् अमेधिष्ट। अदित् चङि न हृस्वः।

मेधि(धी) पु० मेध (घ)-इन्। धान्यसङ्ग्रहार्थे मृण्मयभाजनकाष्ठे (मेरकाठ) हेमच०।

मेधिका स्त्री मेध-ण्वुल्। (मेथि) शाकभेदे राजनि०। णिनि मेधिनी। अत्रैव स्त्री ङीष्। कप् गौरा०ङीष्। मेधी अत्रैवार्थे राजनि०।

मेद बधे मेधायाञ्च सक० भ्वा० उभ० सेट्। मेदति ते अमेदीत् अमेदिष्ट। अदित् चङि न हुस्वः।

मेदःसारा स्त्री मेदसः इव सारोऽस्याः। अष्टवर्गप्रसिद्धौषधि भेदे मेदायां राजनि०।

मेदक पु० मेद-ण्वुल्। जङ्गले (मेकोया) अमरः।

मेदज पु० मेदात् महिषासुरमेदसो जायते जन-ड। मुस्तक गुग्गुलौ राजनि०। मेदोजातमात्रे त्रि०।

मेदस् न० मेद-असुन्। मांसजन्ये धातुभेदे (वसा) कप्। मेद अत्रैव पु०। [मांसे हेमच०।

मेदस्कृत् न० मेदः करोति खपरिपाकेन जनयति कृ-क्विप्।

मेदा स्त्री मेदः कारणत्वेनास्त्यस्याः अच्। अष्टवर्गप्रसिद्धौषधिभेदे भावप्र०।

मेदिनी स्त्री मेदः मधुकैटभमेदोऽस्त्यस्याः कारणत्वेन इनि। १पृथ्व्यां "मधुकैटभयोरासीन्मेदसैव परिप्लुता। तेनेयं मेदिनी देवी प्रोच्यते" इति पुराणम्। २मेदायाञ्च।

मेदुर त्रि० मिद-उरच्। १अतिशयस्निग्धे। "मेघैर्मेदुरमम्बरम्" जयदेवः। २काकोल्यां स्त्री राजनि० टाप्।

मेदोज न० मेदसो वसातो जायते जन-ड। देहस्थे मज्जधातौ अस्थिनामके धातौ। [धिभेदे राजनि०

मेदोद्भवा स्त्री मेदादुद्भवति उद्+भू-अच्। अष्टवर्गप्रसिद्धौ-

मेध मेधत्व सर्वम्। मेधति ते अमेधीत् अमेधिष्ट।

मेधस् पु० मेध-असुन्। स्वायम्भुवस्य मनोः पुत्रभेदे।

मेधा स्त्री मेध-अङ्। १धारणावत्यां बुद्धौ यया वुद्ध्या शास्त्रस्य न विस्मरणं तत्र। मन्द्रादिः सुखज्ञात् वक्तु० अस्मिन्समा०। अमेधाः दुर्मेधाः सुमेधाः इत्यादि। आधारे घञ्। २यागे पु०। [वति त्रि० मेदि० स्त्रियां ङीष्।

मेधाविन् पु० मेधा+अस्त्यर्थे विनि। १शुकपक्षिणि। २मेधा-

मेधिर त्रि० मेधा+अस्त्यर्थे इरच्। मेधावति त्रिका०।

मेधिष्ठ त्रि० अतिशयेन मेधावान् दृष्टन् ततोलुक्। अतिशयमेधावति जने। ईयसुन् मेधीयस् तत्रार्थे स्त्रियां ङीष्

मेध्य त्रि० मेध-यत्। १पवित्रे अमरः २शुचौ च मेदि० मेधाय यज्ञाय हितः यत्। २छागे ३अर्हदि ५यवे च पु० मेदि०। ६केतक्यां ७शङ्खपुष्प्यां ८रक्तवचायाम् ९रोचनायां, १०गव्याम्, ११मण्डूक्यां १२ज्योतिष्मतीलतायाम् स्त्री राजनि०।

मेनका स्त्री मि-नक। १स्वर्वेश्याभेदे शब्दर०। मेनैव स्वार्थे क। २हिमालयपत्न्याम्। [ध्यत्र।

मेनकात्मजा स्त्री ६त०। हैमवत्यां दुर्गायाम् मेनासुतादयो-

मेना स्त्री मि-न। हिमालयपत्न्याम् पितृष्वां मानद्यां कन्यायाम्। "मेनां सुनीनामपि माननीयाम्" कुमा०।

मेनाद पुंस्त्री० मे इति नादो यस्य। १विड़ाले २छागे ३मद्गुरे च मेदि० स्त्रियां ङीष्।

मेन्धी स्त्री मा लक्ष्मीः ध्यते यया इन्ध-घञ् गौरा०ङीष्। (मेरदी) वृक्षे तत्पत्रभक्षणे हि लक्ष्मीतुल्यरक्षकत्वता।

मेष गतौ भ्वा० आ० सक० सेट्। मेषते अमेषिष्ट। अदित् चङि न हुस्वः। [नासेर्यङिः।

मेय त्रि० मा-मि-वा यत्। १परिच्छेद्ये २श्लेष्मणि च "मानाधी-

मेरु पु० मि-रु। सर्ववर्षेभ्य उत्तरस्थे १पर्वतभेदे अयमाख्योदन्तः रिस्थे २फलवीजादिके ३करङ्कपमाणायामकुक्षिपर्वभेदे च

मेरुक पु० मेरुरिव गीतवर्णत्वात् स्वार्थे कन्। यष्ट्यधुपे (धुना) शब्दच०।

मेरुसावर्ण पु०। चतुर्दशस्य मनुषु एकादशे मनौ।

मेलक त्रि० मेलयति मिल-णिच-ण्वुल्। १विवाहे-बोटकभेदे मिल-भावे घञ् स्वार्थे क। २सङ्गे अमरः।

मेला स्त्री मिल-णिच-अच् टाप्। १नीलीवृक्षे राजनि०। २सङ्गम ३यज्ञने ४मेलने च मेदि०। [जटा०।

मेलान्धु पु० मेलाया मल्ला अन्धुरिव। मल्लाधारे (दोआब)

मेलापकाख्या स्त्री नी० ता० वृद्धे यड्डडिभेदे यड्डडि० शब्दे २७५१ पृ० दृश्यम्। [चङि न हुस्वः।

मेव सेवने भ्वा० आ० सक० सेट्। मेवते अमेविष्ट। अदित्

मेष पुंस्त्री० मिष-अच्। (मेड़ा) १पशुभेदे अमरः स्त्रियां ङीष्। २चक्रमर्दवृक्षे मेदि०। ज्योतिश्चक्रस्य द्वादशांशे अश्विनीभरणीकृत्तिकानक्षत्राद्यपादात्मके १राशिभेदे।

मेषकम्बल पु० मेषेण तन्तोत्पन्ना निर्मितः कम्बलः। मेषलोमजाते वस्त्राकारे पदार्थे अमरः।

मेषलोचन पु० मेषस्य लोचनमिव पुष्पमस्य। १चक्रमर्दे भावप्र०। २मेषतुल्यनेत्रे त्रि० मेषनेत्रादयोप्यत्र।

मेषवल्ली स्त्री मेषस्य मेढ्राकारफलयुता वल्ली शाक०त०। (गाडरशिङ्ग) लतामेदे भावप्र०।

मेषविषाणी स्त्री मेषस्य विषाणं मेढ्रमिव फलं यस्याः गौरा०ङीष् (गाडरशिङ्ग) लतामेदे रत्नमा०। स्वार्थे क लत इत्वम्। मेषविषाणिका तत्रैवार्थे।

मेषशृङ्ग पु० मेषमेढ्रमिवाकारेऽग्रस्य घच्। १क्षारपिण्ड-

भेदे हेमच०। २अजशृङ्ग्यां (गाडरसिङी) स्त्री गौरा० ङीष् रत्नमा०। [शब्दच०।

मेधा स्त्री मिध-कर्मणि घञ्। सद्बुद्धायाम् (गुजराटी)

मेधाजिकुसुम पु० मेधाजीव कुसुमं यस्य। चक्रमर्दे रत्नमा० मेघपुष्पादयोऽप्यत्र।

मेधाण्ड पु० मेघस्याण्ड एवाण्डोऽस्य। इन्द्रे तस्य हि दत्त-यज्ञेऽण्डनाशे मेषाण्डेन तत्करणमिति पुराणप्रसिद्धम्।

मेधालु पु० मेधामात्मनुरिव प्रियः। वर्बरीवृक्षे शब्दच०।

मेधी स्त्री मिध-कच् गौ० ङीष्। १जटामांस्यां २तिनिशवृक्षे च राजनि०। जातौ ङीष्। ३मेषजातिस्त्रियाम्।

मेसूरण न० सम्यावधिदग्धमस्याने ब्यो० त०।

मेह पु० मिह-घञ्। १प्रस्रावे हेमच० २प्रमेहरोगभेदे च अमरः। प्रमेहशब्दे उदाहृतम्। कच्। ३मेघे शब्दच०।

मेहघ्नी स्त्री मेहं हन्ति हन-टक् ङीप्। हरिद्रायाम् रत्नमा० आर्द्रतन्मूलरसपेषणादि मेहनाश इति वैद्यकप्रसिद्धिः।

मेहन न० मिह्यतेऽनेन मिह-करणे ल्युट्। १मिह्ने अमरः। कर्मणि ल्युट्। २मूत्रे मेदि० भावे ल्युट्। ३मूत्रोत्सर्गे।

मैत्र(त्र) न० मित्रो देवताऽस्य अण् मैत्रं पायुरक्षेदं पुनरण्। १विण्मूत्रोत्सर्गे "मैत्रं कर्म समाचरेत्" इति स्मृतिः। मित्रो देवताऽस्य, मित्रत आगतं तत्रेदं वा अण्। २अनुराधानक्षत्रे न०। तस्य हि मित्रो देवता। ३मित्रतः प्राप्ते "मैत्रमौद्दालिकर्षेर्वं स्मृतिः। ४सुहृत्तत्सम्बन्धिनि च त्रि०। मित्रमेव स्वार्थे प्रज्ञाद्यण्। ५मित्रे ६ब्राह्मणे च पु० मिका०।

मैत्रावरुण पु० मित्रश्च वरुणश्च देवताऽस्य आनङ् मित्रावरुणयोरपत्यम् अण्। अगस्त्ये। इञ्। मैत्रावरुणिरप्यत्र कल्पभेदे हि तस्य तयोः पुत्रत्वं पुराणप्रसिद्धम्।

मैत्री न०मित्रस्य भावः अण् वा अञ् पक्षे ङीप् वयोधः। सौहार्दे मैत्रप्रभृत्यत्र न०। [त्रिका०।

मैत्रेय पु० मित्राया अपत्यमिदम् ढक्। १सुनिभेदे २बुद्धदेवे

मैथिली स्त्री मिथिलायां भवा अण् ङीप्। १सीतायाम्। मिथिलाया राजा अण्। २मिथिलादेशाधिपे पु०।

मैथुन न० मिथुनेन स्त्रीपुंसाभ्यां निर्वृत्तम् अण्। १कन्याधानादौ, कर्मणि "वा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने" इति स्मृतिः। अगन्याधाने हि सपत्नीकस्यैवाधिकार इति तस्य तत्साध्यत्वम्। २स्त्रीपुंसयोरुपसर्गरूपे याम्यधर्मे च अमरः। [जटा०।

मैनाक पु० मेनकायां भवः अण्। हिमालयवर्त्तिते पर्वतभेदे

मैरेय न० मिरायां देशभेदे ओषधिभेदे वा भवं ढक्। मिरादेशजाते १आसवे "मैरेयं धातकीपुष्पगुडधान्याम्लसम्भवम्" माधवोक्ते २मद्यभेदे च न०।

मोच चेपे वा चु० उभ० पक्षे भ्वा० पर० सक० सेट्। मोचयति ते मोचति अमुमोचत् त अमोचीत्।

मोच पु० मोच-घञ्। १अपवर्गे २मोचने "मोचिमोक्षादि मोचः" भा०द०। ३पाटलिवृक्षे मेदि० ४मरुये हेमच०।

मोघ त्रि० मुह-घ अच् वा कुत्वम्। १निरर्थके अमरः २क्षीणे ३पाटलावृक्षे मेदि० ४विडङ्गे च स्त्री हेम० ५प्राचीरे पु० शब्दमा०। [राजनि०।

मोघपुष्पा स्त्री मोघं पुष्पमार्त्तवं यस्याः। वन्ध्यायां स्त्रियाम्

मोच न० मुच-अच्। १कदल्यां २शोभाञ्जने पु० अमरः। ३कदल्यां ४शाल्मलिवृक्षे ५मोचीवृक्षे, च स्त्री मेदि० टाप्।

मोचक पु० मुच-ण्वुल्। १मोचे २कदल्यां ३शोभाञ्जने च ४वैराग्यवति त्रि० हेमच० ५सुस्कवृक्षे राजनि०।

मोचन न० मुच-णिच्-वा भावे ल्युट्। १मुक्तौ २मोचने दम्भे ४त्याजे च। मुच्यते रोगात् अनया मुच-करणे ल्युट्। ५कण्टकार्य्यां स्त्री अमरः ङीप्। [राजनि०।

मोचरस पु० क्लीवे। शाल्मलिनिर्य्यासे अनामख्याते पदार्थे

मोचाट पु० मुच-णिच्-अच् मोचाय रोगमोचनाय अटति अट-अच्। १कम्बुजीरके २रम्भास्थि ३मलयोद्भवे च मेदि०

मोटक न० मुट-ण्वुल्। आढकं विदलानार्थं १सस्यकुशपत्रद्वये २राशिधीभेदे स्त्री टाप् ङीप्।

मोटा स्त्री मुट-अच्। बलायाम् राजनि०।

मोट्टायित न० "आलिङ्गनचुम्बनादौ कृति तद्भावभावतः। प्राकट्यमभिलाषश्च मोट्टायितमुदीर्य्यते" उक्तलक्षणके स्त्रीणामभिलाषभेदे।

मोद पु० मुद-घञ्। हर्षे शब्दर०।

मोदक पु० मोदयति मुद-णिच्-ण्वुल्। १खाद्यभेदे (मोया) अमरः। २बुद्धावां चन्द्रिकायाञ्चाते २वर्णसङ्करजातिभेदे (अयरा) स्मृतिः। [राजनि०।

मोदमोदिनी स्त्री मोद इव मोदयति मुद-णिनि। जम्बाम्

मोदयन्ती स्त्री मुद-णिच्-शतृ ङीप्। वनमल्लिकायाम् (बाठमल्लिका) शब्दर०। [राजनि०।

मोदा स्त्री मोदयति अजान् मुद-णिच्-अच्। अजमोदायाम्

मोदाख्या स्त्री मोदः अजमोदस्तेनाख्या। १अजमोदायाम् २हर्षयुक्ते त्रि० राजनि०।

मोदिनी स्त्री मोदयति हृद-णिच्-णिनि। १खजमोदायाम् २मल्लिकायाम् ३यूथिकायां ४कस्तूर्यां ५मदिरायाञ्च राजनि०।

मोरट न० मुर-अटन्। १इक्षुमूले, २खड्गोटपुष्पे ३मण्डूकपर्ण्योषधिक्षीरे च मेदि०। ४मूर्वालतायां स्त्री अमरः। ५क्षीरमोरटायां पु० राजनि०।

मोषक पु० मुष्णाति मुष-ण्वुल्। तस्करे चौरे अमरः।

मोषण न० मुष-ल्युट्। १लुण्ठने २छेदने, ३वधे च।

मोह पु० मुह-घञ्। १मूर्च्छायाम् भ्रान्तिसाधने २अज्ञाने मेदि० ३वेदान्तोक्ते अविद्याहृत्तिभेदे ४दुःखे शब्दर० ५देहादिष्वात्माभिमाने च।

मोहन पु० मोहयति मुह-णिच्-ल्यु। १धुस्तूरे राजनि० कन्दर्पस्य २शरभेदे च त्रिका०। ३मोहकारके त्रि० स्त्रियां टाप्। सा च ४त्रिपुरमालीपुष्पे रत्नमा०। ५सम्मोहायां शब्दमा०। ६चण्डोदक्यां स्त्री राजनि०। ७वटपत्रायां भावप्र० उभयत्र गौरा० ङीष्।

मोहरात्रि स्त्री ब्रह्मणो निजपरिमाणेन पञ्चाशद्वर्षे गते प्रलयभेदे "आचरात्रिर्महारात्रिर्मोहरात्रिश्च षष्ठी

मोहिनी स्त्री मुह-णिनि। १अप्सरोभेदे वस्याः शापात् ब्रह्मणोऽपूज्यत्वं तत्कथा ब्रह्मवै० ज० ख० ३३अ०। अमृतमन्थनकाले दैत्यानां मोहनाय स्त्रीरूपिणि भगवदवतारभेदे च।

मौक्तिक न० मुक्तैव स्वार्थे ठक्। मुक्तायाम् अमरः।

मौक्तिकप्रसवा स्त्री मौक्तिकं प्रसूते प्र+सू-अच्। मुक्तास्फोटे शुक्तौ राजनि०।

मौक्तिकशुक्ति स्त्री ६त०। मुक्तास्फोटे शुक्तौ राजनि०।

मौञ्जी स्त्री मुञ्जस्येयम् अण्। कटिसूत्रे त्रिराहृत्तमुञ्जतायां मेखलायाम् मनुः। [राजनि०।

मौञ्जीपत्री स्त्री मौञ्जीव पत्रमस्याः। वल्वजायाम्

मौञ्जीबन्ध पु० मौञ्जी मेखलाया बन्धोयत्र। १उपनयनसंस्कारे "मौञ्जीबन्धः शुभः प्राक्चैत्रे मौनगते रवावि"ति ज्यो०। ल्युट् मौञ्जीबन्धन तत्रार्थे न०। "द्वितीयं मौञ्जीबन्धनम्" मनुः। ६त०। २तद्बन्धने च।

मौक्ष्य न० मूढस्य भावः ष्यञ्। १मोहे हेम०२बाल्ये च।

मौद्गल्य पु० मुद्गलस्य मुनेर्गोत्रापत्यं गर्गा० यञ्। मुद्गलगोत्रापत्ये मुनिभेदे। [खेले अमरः।

मौद्गीन न० मुद्गानां भवनं खेलं खञ्। मुद्गभक्षणयोग्ये

मौन न० मुनेर्भावः। वाग्व्यापाररहित्ये "उच्चारे भैषुने चैव प्रस्रावे दन्तधावने। स्नाने भोजनकाले च षट्सु मौनं समाचरेत्" इति स्मृतिः।

मौनिन् त्रि० मौनमस्यास्ति इनि। १वाग्व्यापाररहिते। २मुनौ पु० जटा०। [राजनि०।

मौनेय पु० मुनेः कश्यपपत्नीभेदस्यापत्यम् ढक्। गन्धर्वभेदे

मौरजिक त्रि० मुरजस्यादृश्यादनं शिल्पमस्य ठक्। मुरजवादनशीले अमरः।

मौर्ख्य न० मूर्खस्य भावः ष्यञ्। १ज्ञाने हेमच० २मूर्खतायाञ्च

मौर्वी स्त्री मूर्वा लता तत्तन्तुना निर्वृत्ता अण्। १धनुर्गुणे अमरः। २धनुर्लतायाञ्च रत्नमा०।

मौल त्रि० मूलं वेत्ति मूलादागतो वाऽण्। मूल्याद्देरागमादिमूलत्वे, "यं परम्परया मौलाः सामन्ताः स्वामिनं विदु"रिति स्मृतिः २मूलादागते च।

मौलि पुंस्त्री० मूलस्यादूरभवः इञ्। १चूडायां २किरीटे ३संयतकेशेषु अमरः ४मस्तके हेमच०। ५अशोकवृक्षे पु०। ६भूमौ स्त्री मेदि० वा ङीष्।

मौषल न० मुषलस्येदम् तत्सदृशं वाऽण्। १मुषलसम्बन्धिनि २मुषलतुल्यनिष्टे "गङ्गायां मौषलं स्नानं महापातकनाशनम्" इति पुराणम्। मुषलमधिकृत्य कृतो ग्रन्थः अण्। महाभारतान्तर्गते "मुषलं कुलनाशनम्" इत्यादिप्रतिपादके षोडशे ३पर्वणि।

मौहूर्त्त पु० मुहूर्त्तं तत्प्रतिपादकं शास्त्रं वेत्त्यधीते वाऽण्। ज्योतिःशास्त्रज्ञे। ठक्। मौहूर्त्तिक तत्रैव अमरः।

म्ना अभ्यासे भ्वा०पर०सक० सेट्। मनति अम्नासीत् मम्नौ।

म्रक्ष संयोजने स्नेहने च चु० उभ० सक०सेट्। म्रक्षयति ते अमम्रक्षत् त। [अम्रक्षीत्।

म्रक्ष म्लेच्छने भ्वा० पर०सक० सेट्। म्रक्षति अम्रक्षीत् म्रक्षण न०म्रक्ष-भावे ल्युट्। १संयोजने २राशीकरणे, ३तैले हेमच०।

म्रद मोदे भ्वा० आ० सक० सेट्। म्रदते अम्रदिष्ट। घटा० म्रदयति। णित् अङ् म्रदा। [म्रक्षणे।

म्रदिमन् पु० म्रदोर्भावः म्रदु+इमनिच् डित् आतोरः।

म्रदिष्ठ त्रि० अतिशयेन म्रदुः इष्ठन् डित् आतोरः। अतिम्रदुत्वयति। ईयसुन्। म्रदीयस् तत्रार्थे त्रि० स्त्रियां ङीप्।

म्रुच गतौ भ्वा० पर० सक० सेट्। म्रोचति ते म्रुम्रुचत् अम्रोचीत् अम्रोचत्। उदित् ङा वेट्।

म्रुन्च गतौ सर्वं म्रुचवत्। म्रुञ्चति अम्रुचत् अम्रुञ्चीत्।

स्वेट(ड) उत्क्षेपे भ्वा० पर० सक० सेट्। स्वेट(ड)ति अस्वेटी(डी)त्। अदित् चङि न हुस्वः।

स्वेत्त चु० प्रत्ययवत् सर्वम्। स्वेत्तयति ते। अमस्वेत्तत् त।

स्वेदन त्रि० स्वै कालिन्ये-ल्युट तस्य नः। १मलिने हेमच० २स्वेदनियुक्ते च।

स्वेदनि स्त्री स्वै-क्विन्। कालिन्ये। [२स्वेदने च त्रि०मेदि०

स्विष्ट न० स्वेच्छ-क्त नि०। १अविस्पष्टवाक्ये २तद्वाक्ययुक्ते

स्वेच गतौ भ्वा०पर०सक०सेट्। स्वोचति। इरित् अस्वुचत् अस्वोचीत्। अदित् ङा सेट्।

स्वेनच गतौ स्वुचवत् सर्वम्। स्वेनति अस्वेनत् अस्वेनीत्

स्वेच्छ अपशब्दे वा चु० उभ० पक्षे भ्वा० पर० अक० सेट्। स्वेच्छयति ते स्वेच्छति अमस्वेच्छत् त अस्वेच्छीत्

स्वेच्छ पु० स्वेच्छ-घञ्। १अपशब्दे "स्वेच्छोऽहं वा नाम यदपशब्दः" इति श्रुतिः। कर्तरि अच्। २पामरजातौ, ३नीचजातौ च पुंस्त्री० स्त्रियां ङीष "गोमांसखादको यस्तु विप्रश्चण्डश्च भाषते। सर्वाचारविहीनश्च स्वेच्छ इत्यभिधीयते" बौधायनः। ४पापरते त्रि० मेदि०। ५चिह्नुके न० राजनि०।

स्वेच्छकन्द पु० स्वेच्छप्रियः कन्दः श०त०। लशुने राजनि०

स्वेच्छजाति स्त्री स्वेच्छाभिधा जातिः। गोमांसादिभक्षके किरातादिजातिभेदे अमरः।

स्वेच्छदेश पु० स्वेच्छाधारो देशः। चातुर्वर्ण्याचाररहिते देशे अमरः। "चातुर्वर्ण्यव्यवस्थानं यस्मिन् देशे न विद्यते। स्वेच्छदेशः स विज्ञेय आर्यावर्त्तस्ततःपरम्"।

स्वेच्छभोजन न० स्वेच्छैर्भुज्यते भुज-कर्मणि ल्युट्। १यावके अन्नभेदे शब्दर०। २गोधूमे पु० त्रिका०।

स्वेच्छमण्डल न० ६त०। स्वेच्छदेशे हेमच०।

स्वेच्छमुख न०स्वेच्छानां सुखमिव रक्तत्वात्। ताम्रे अमरः। स्वेच्छास्यमयत्र द्वारा०।

स्वेच्छित न० स्वेच्छ-क्त। अपशब्दे असंस्कृतशब्दे द्वारा०।

स्वेट(ड) उत्क्षेपे भ्वा० पर० सक० सेट्। स्वेट(ड)ति अस्वेटी(डी)त्। अदित् चङि न हुस्वः।

स्वेव शेवने भ्वा० आ० सक० सेट्। स्वेवते अस्वेविष्ट। अदित् चङि न हुस्वः। [अस्वो स्वानः स्वानिः।

स्वै कालिन्ये भ्वा० पर० सक० अनिट्। स्वायति स्वासीत्

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यसङ्कलिते वाचस्पत्ये मकारादिशब्दार्थसङ्कलनम्।

य

यकारः व्यञ्जनवर्णभेदः स्वरवर्णोष्मवर्णयोर्मध्यस्थत्वात् अन्तःस्थवर्णभेदः तस्योच्चारणस्थानं तालु जिह्वामध्येन तालुन ईषत्स्पर्शेनोच्चारणादीषत्स्पर्शं आभ्यन्तरप्रयत्नः "अचोऽस्पृष्टायणस्तीव्रः" शिक्षोक्तः। बाह्यप्रयत्नः संवारनादघोषा अल्पप्राणश्च। वर्णाभिधानेऽस्य वाचकशब्दा उक्ता यथा "यो वायौ वसुधा वायुर्विश्रुतिः पुरुषोत्तमः। युगान्तः अनलः शीघ्रोधूमार्चिः प्राणिसेवकः। यङ्गा भ्रमो जटी लोला वायुवेगी यशस्करी। सङ्कर्षणः कपा वाहो हृदयं कपिला प्रभा। आग्नेयोव्यापकस्यागो मोहोद्याता प्रभा शुभम्। यशः सर्वेश्वरी धूम्रा चामुण्डा सुखेश्वरी। यमात्मा मनसोमाता क्षत्रिणी भृङ्गिनायकः। ङे नमः शोषकोभीनोधनिष्ठानक्षवेदिनी। शिष्टः सोमः षड्ऋतुनामा पापहा प्राणसंज्ञकः"। अस्याधिष्ठातृदेवताध्यानं यथा "श्यामवर्णां महारौद्रीं षड्भुजां रक्तलोचनाम्। रक्तस्रग्वरपरीधानां नानालङ्कारभूषिताम्। महामोक्षप्रदां नित्यामष्टसिद्धिप्रदायिनीम्। एवं ध्यात्वा यकारन्तु तन्मन्त्रं दशधा जपेत्"। अस्य ध्येयस्वरूपं यथा "यकारं शृणु चार्वङ्गि! चतुष्कोणमयं सदा। प्लावधूमसङ्काशं त्रयं परमकुण्डलीम्। पङ्कप्राणमयं वर्णं पङ्कदेवमयं सदा। त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं तथा। प्रणमामि सदा वर्णं सूक्ष्मिमन्त्रोत्तमव्ययम्" कामधेनुतन्त्रम्। नाटकेन्यासे अस्य हृदयन्यासता। काव्यादौ अस्य प्रथमप्रयोगे लक्ष्मीलाभः फलम् "यो लक्ष्मीं रसु दाक्षम्" ङ॰र॰टी॰।

य पु० या-ड। १वायौ २यशसि ३योगे, ४गतौ च ५यातरि त्रि० शब्दरत्ना०। यम-ड। ६संयमे। ७ऋदिगणभेदगुरुके जलदैवते लक्ष्मीफलके यगणे च।

यकार पु० य+स्वरूपे कार। यस्वरूपे वर्णे।

यकृत् न० यं संयमं करोति क-क्विप् तुक् च। १कुक्षौ दक्षिणभागस्थे मांसपिण्डे अमरः। २तद्रोगे रोगभेदे च "अधो दक्षिणतश्चापि हृदयात् यकृतः स्थितिः। तस्य रक्तकफित्तस्य स्थानं शोणितजं मतम्" भावप्र०। तद्रोगनिदानादि तत्रोक्तं यथा "शीघ्रासवस्य क्षेत्रादि समस्तं यकृदामये। किन्तु स्थितिस्तयोर्ज्ञेया वामदक्षिणपार्श्वयोः"। अस्य शमादौ भक्षे च वकृच्छादेशः।

यक्षदात्रिका स्त्री यक्षतदत्वाला स्वरूपं यक्षाः कप्। तैल-पायिकायाम् (तेलापोका) शब्दच०। [ढले शब्दच०।

यक्षदैरिन् पु०यक्षतो रोगभेदस्य वैरी इन्। रोहितक-

यक्ष पूजायां चु० आ० सक० सेट्। यक्षयते अयक्षत।

यक्ष पु० यक्षते यक्ष-कर्मणि घञ्। १देवयोनिभेदे २तदीश्वरे कुबेरे मेदि०१इन्द्रसृष्टे सारस्वतः। भावे घञ् ४पूजने च।

यक्षकर्दम पु०यक्षप्रियः कर्दम इव। "कङ्कुमागुरुकस्तूरी कर्पूरं चन्दनं तथा। सङ्गात्सुगन्धमित्युक्तं नामतो यक्षकर्दम" इत्युक्ते समभागेन मिश्रिते कुङ्कुमादौ धन्वन्तरिः।कुङ्कुमस्थाने कक्कोलस्तक्कम् [यक्षदत्वादयोऽत्र।

यक्षतरु पु० यक्षाणां वासयोग्यतरुः। वटवृक्षे राजनि०

यक्षधूप पु०यक्षे पूजने योग्यो धूपः।(धुना) सर्ज्जरसे अमरः

यक्षराज पु० यक्षाणां राजा टच् समा०। कुबेरे। यक्षेषु राजते राज-क्विप्। यक्षराड्यत्र पु०।

यक्षरात्रि स्त्रि० यक्षप्रिया रात्रिः श्रा०त०। कार्त्तिकपूर्णिमा-रात्रौ त्रिका०। [शब्दमा०।

यक्षामलक न० यक्षाणामामलकमिव। प्रियङ्खवृक्षफले

यक्षावास पु० ६त०। यक्षाणामावासः। वटवृक्षे राजनि०।

यक्षोडुम्बरक न० यक्षाणामुडुम्बरमिव इवार्थे कन्। अश्वत्थफले त्रिका०। [शब्दमा०।

यक्ष्मघ्नी स्त्री० यक्ष्माणं हन्ति हन-टक् ङीप्। द्राक्षायाम्

यक्ष्मन् पु०यक्ष-मनिन्। रोगभेदे अमरः। तद्विवरणादि यथा "वेगरोधात् क्षयाच्चैव साहसाद्विषमाशनात्। त्रिदोषो जायते यक्ष्मा सदो हेतुचतुष्टयात्"। वेगोऽत्र वातमूत्र पुरीषाणां। "वातमूत्रपुरीषाणि निष्टङ्कति यदा नरः" इति चरकवचनात्। क्षयात् क्षीयतेऽनेनेति क्षयः तेनातिव्यायामनेर्ष्यादयो धातुक्षयहेतवः क्षय शब्देनोच्यन्ते। साहसात् बलवता समं मल्लयुद्धादितः। विषमाशनात् "यच्च स्रोतसकाले वा तद्भक्तं विषमाशनम्" तस्मात्। त्रिदोषः सान्निपातिकः। हेतु-चतुष्टयात् अन्येऽपि हेतवः हेतुचतुष्टय एवान्तर्भवन्ति। यक्ष्मणः पर्य्यायाः राजयक्ष्मक्षयशोषाः। यक्ष्मादीनां शब्दानां निरुक्तिमाह "वैद्यो व्याधिमतां यस्मात् व्याधेर्यत्नेन यक्षते। स यक्ष्मा प्रोच्यते लोके शब्द शास्त्रविशारदैः"। यक्षते पूज्यते। "राजसूयसहस्रस्य यस्मादभूदेष क्रियाक्षयः। तस्मात्तं राजयक्ष्मेति केचिदाहुर्मनीषिणः। क्रियाक्षयकरत्वात्तु क्षय इत्युच्यते बुधैः। संशोषणाद्रसादीनां शोष इत्यभिधीयते"। संप्राप्तिमाह "कफप्रधानैर्दोषैस्तु रक्तेषु रसवर्त्मसु। अतिव्यवायिनो वापि क्षीणे रेतस्यनन्तराः। क्षीयन्ते धातवः सर्वे ततः शुष्यति मानवः"। कफ-प्रधानैर्दोषैः रसवर्त्मसु रक्तेषु अनन्तराः सर्वे धातवः क्षीयन्ते ततो मानवः शुष्यति। कारणभूतस्य रसस्य क्षये कार्य्याणां रक्तादीनामनुक्रमेण क्षीयमाणत्वात् भावप्र०।

यज देवपूजने, दाने, सङ्गतौ च भ्वा० उभ० यजादि० अनिट्। यजति ते अयाजीत् अयष्ट इयाज ईजतुः।

यजति पु० यज-अतिच्। यागभेदे। "यजतिषु ये यजामहे नानुयाजेषु" श्रुतिः। तल्लक्षणञ्च कात्या० श्रौ० १।२।६ "तिस्रोमा वषट्कारप्रदाना याज्यापुरोऽनुवाक्यावन्तो यजतयः" सू०। "उच्यन्त इति शेषः। तिस्रोमा होमो येषु ते तिस्रोमाः वषट्कारेण प्रदानं येषु ते वषट्कारप्रदानाः तथा याज्यावन्तः पुरोऽनुवाक्यावन्तश्च ये ते यजतयः उच्यन्ते" कर्कः।

यजत्र न० यज-अत्र। १अग्निहोत्रे उणादि० २तद्वति त्रि०।

यजन न० यज-ल्युट् होत्रादिना पशुचीराज्यादिभिः मन्त्र-पूर्वकं देवतोद्देशेन द्रव्यत्यागे यागे।

यजनञ्च श्रा० वि० देवलोक्तं यथा "पशुचीराज्यपुरो-डाशसोमौषधिचरुप्रभृतिर्हविर्भिः खदिरपलाशाश्वत्थ-न्यग्रोधोडुम्बरप्लक्षमयैः समिद्भिः स्रुक्स्रुवोदुखल-मूषलकुठारखनित्रपदारुदर्भचर्मसावपवित्रभाजनादिभि-र्द्रव्योपकरणैरुद्गाहहोत्रध्वर्युब्रह्मादिभिः ऋत्विग्भिः काम्यनैमित्तिकानां पशुप्रभृतिपूर्वकाणां यथोक्तदक्षिणानां समापनं यजनम्"। ल्यु। उत्तरपदस्थः समभिव्या-हृतदेवादेर्यत्रि०आधारे ल्युट्। ३यागाधिकरणे न०। यथा देवयजनम्। [कर्मफलयुते। २महादेवमूर्त्तिभेदे च।

यजमान पु० यज-शानच्। होत्रादेर्नियोक्तरि प्रधान-

यजि पु० यज-इन्। १यष्टरि उणा०।२यागे ३यजधातौ च।

यजुर्वेद पु० यजुषां ऋक्सामभिन्नानां मन्त्राणां प्रतिपादको वेदः। वेदभेदे स च शुक्लकृष्णभेदेन द्विधा तद्विवरणं चरणव्यूहे भाग० १२।६अध्याये च दृश्यम्।

यजुस् न० यज-उसि। ऋक्सामभिन्ने पदच्छेदरहिते मन्त्रभेदे अमरः। तल्लक्षणम् "छन्दोगीतिवर्जितत्वेन प्रश्लिष्टपठिता मन्त्रा यजूंषि" सा० भा० चक्रम्।

यज्ञ पु० यज-भावे न। यागे अमरः। स त्रिविधः "अफला-काङ्क्षिभिर्नित्यो विधिदृष्टो य इज्यते। यष्टव्यमेवेति मनः समाधाय स सात्त्विकः। अभिसन्धाय तु फलं दम्भार्थ-

अपि चैव यत् । इज्यते भरतश्रेष्ठ ! तं यज्ञं विद्धि राजसम् २। विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् । श्रद्धाविरहितं यज्ञं तामसं परिचक्षते" गीता १७अ०। स च नानाविधः । "द्रव्ययज्ञास्तपोयज्ञा योगयज्ञा स्तथापरे । स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः" गीता ४अ०। पञ्चसूनाकृत्यकर्त्तव्या यज्ञा यथा "अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्" मार्कण्डे ११५अ०। २विष्णौ च

यज्ञपति पु० ६त०। विष्णौ "यज्ञो यज्ञपतिर्यज्वा" विष्णुस०।

यज्ञपशु पु० इज्यते हविर्दीयतेऽत्र यागार्थकयजेर्भावे आधारे वा न यज्ञः यज्ञार्थः पशुः । १अश्वे २छागादौ च ।

यज्ञपात्र न० ६त०। यागसाधने पात्रे तद्भेदस्वरूपादि काम्या०औ०शब्दे ४१०० पृ० दर्शितम् ।

यज्ञपुरुष पु० यज्ञरूपः पुरुषः । वराहरूपे विष्णौ हेमच०। ऋतुपुरुषशब्दे २२८४पृ० दृश्यम्। [राजनि०।

यज्ञभूषण पु० यज्ञम् भूषयति भूष-णिच्-ल्यु । श्वेतदर्भे

यज्ञयोग्य पु० यज्ञे योग्यः । १उडुम्बरवृक्षे राजनि०। तत्सिद्धादिभिर्हि यज्ञः साध्यते।२यागार्हे विप्रादौ च।

यज्ञयष्टी स्त्री० यज्ञार्था यष्टी । क्षीरयष्ट्याम् राजनि० ।

यज्ञवराह पु० यज्ञरूपो वराहः। आदिवराहे भगवदवतारभेदे । ऋतुपुरुषशब्दे २२८४पृ० दृश्यम् । वराहदेहस्य शिवेन विदारणेन यज्ञभेदस्वत्वं सम्पादितं यथोक्तं कालिकापु० १० अ० "विदारिते वराहस्य कावे भर्गेण तत्क्षणात् । ब्रह्मविष्णुशिवा देवाः सर्वैश्च प्रमथैः सह । निर्ममुर्जहतुश्चैव तद् शरीरं नभः प्रति । तद्विभेजुः शरीरन्तु विष्णोश्चक्रेण खण्डशः । तस्माद् सन्धितो यज्ञाजातास्ते वै पृथक् पृथक् । यस्माद् यज्ञाश्च ये यज्ञास्तं ऋण्वन्तु मखर्षयः । भूनासासन्धिना जातो ज्योतिष्टोमो मखाध्वरः । ऋतुत्रयसन्ध्योस्तु वह्निष्टोमो व्यजायत । चक्षुर्भ्रुवोः सन्धिना तु ब्राह्मस्तोमो व्यजायत । आयुः सोमर्भस्तोमस्तस्य पोतोऽत सन्धिना । इडस्तोम ऋतुस्तोमौ जिह्वामूलाद्व्यजायत । अतिरात्रं सवैराजमधोजिह्वान्नरादभूत् । अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् । स्नानं तर्पणपर्य्यन्तं नित्ययज्ञाश्च सर्वगः । कण्ठसन्धेः सप्तपशा, जिह्वातो विधयस्तथा । वाजिमेधो महामेधो नरमेधश्चैव च । प्राणिहिंसाकरा येऽन्ये ते जाताः षोडशन्धितः । राजसूयोऽथ कारीरी वाजपेयश्चथैव च । पृथसवो सप्तपशा 'षडहयज्ञास्तथैव च । प्रतिष्ठोत्सर्गयज्ञाश्च दानश्राद्धादयस्तथा । ऋतुसन्धितः सप्तपशा सावित्रीयज्ञ एव च । सर्वेषां साधका यज्ञाः प्रायश्चित्तकराश्च ये । ते मेदसन्धितो जाता यज्ञास्तस्य महात्मनः । रक्षःसत्रं सर्पसत्रं सर्वश्चैवाभिचारिकम् । गोमेधो दक्षजापश्च खुरेभ्यो ह्यभवत्तिमे । मावेष्टिः परमेष्टिश्च गोप्यतिर्भोगसम्भवः । जानूभसन्धौ संजाता अग्निष्टोम श्चथैवच । नैमित्तिकाश्च ये यज्ञाः संक्रान्त्यादौ प्रकीर्त्तिताः । जानूभसन्धौ ते जातास्तथा द्वादशवार्षिकम् । तीर्थप्रयोगसोमोऽथ यज्ञः सङ्घर्षणस्तथा । आर्कमाधर्वणश्चैव नाभिसन्धेः सप्तऋतवः । सत्रोत्कर्षः श्येनयज्ञः पञ्चमार्गोऽतियोजनः । छिद्रसंज्ञानकैरन्ध्रयज्ञा जातास्च जानुनि । एवमष्टाधिकं जातं शतञ्च द्विजसत्तमाः !! यज्ञानां सततं लोकायेभाष्यन्तेऽधुनापि च । स्फुगस्य पोत्रात् संजाता नासिकायाः स्फुगोऽभवत् । अन्ये स्फुक्स्फुवभेदा ये ते जाताः पोत्रनासयोः । पोत्राभागेन तस्याभून्नाम्नांशो मुनिसत्तमाः !। दक्षपूर्त्तं यजुर्धर्मा जाताः अवचरन्ततः । दंष्ट्राभ्योऽभवन् यूपाः कुशा रोमाणि चाभवन् । उद्गाता च तथाध्वर्युर्होता सविध एव च । अवदिग्धवामाङ्गप्रत्यादेषु सङ्गताः । पुरोडाशाः शकरसो जाता मस्तिष्कसम्भवात् । कर्णैलयुगाज्जाता यज्ञपात्रस्रुचा स्रुवात् । मध्यभागोऽभवद्वेदो मेदात् कुण्डमजायत । रेतोधारास्रुचैवाज्यं स्रुवाकल्पाः सप्तऋतवः । यज्ञायुधः पृथभागात् ऋतुपशात् यज्ञ एव च । तदात्मा यज्ञपुरुषो यज्ञाः कर्म्मात् सप्तऋतवः । एवं यावन्ति यज्ञानां भाण्डानि च हवींषि च । तानि यज्ञवराहस्य शरीरादेव चाभवन् । एवं यज्ञवराहस्य शरीरं यज्ञतामगात् । यज्ञरूपेण सकलमाप्लावितमिदं जगत् ।"

यज्ञवाट पु० ६त० । यज्ञस्थाने हेमच० ।

यज्ञवृक्ष पु० यज्ञार्थः वृक्षः । पटवृक्षे राजनि० । [राजनि०।

यज्ञश्रेष्ठा स्त्री यज्ञेषु तत्साधनेषु श्रेष्ठा । क्षीरयष्ट्याम् राजनि० ।

यज्ञसार पु० यज्ञेषु यज्ञसाधनेषु सारः श्रेष्ठः । यज्ञोडुम्बरवृक्षे राजनि० ।

यज्ञसूत्र न० यज्ञार्थं यज्ञे संस्कृतं वा सूत्रं शाक०त० । यज्ञोपवीते जटा०। तत्स्वरूपादि यथा

"अजैर्न्तु विहितं सूत्रं सधवानिर्मितं शनैः । तन्तुत्रय-

मधोदृतं यज्ञसूत्रं विदुर्बुधाः । त्रिगुणं तदुपन्यस्तं वेदप्रवरसम्मितम् । शिरोधरान्नाभिमध्यात् पृष्ठार्द्धं परिमाणकम् । यजुर्वेदां नाभिमितं सामगानामयं विधिः । वामस्कन्धेन विधृतं यज्ञसूत्रं वसूपदम्" कालिकापु० ४अ०। "उपवीतमाह गोभिलः "यज्ञोपवीतं कुरुते सूत्रं वस्त्रं वा अपि वा कुशरज्ज्वमेव"। यज्ञोपवीतं विशिष्टविन्यासधारणकर्मतया कुरुते । किं तत्सूत्रं विशेषयति छन्दोगपरिशिष्टम् "अर्द्धन्तु त्रिवृतं कार्यं तन्तुत्रयमधोदृतम् । त्रिवृतञ्चोपवीतं स्यात्सूत्रकैको यन्थिरिष्यते" । वामावर्त्तवर्त्तितं तन्तुत्रयं त्रिगुणं कृत्वा दक्षिणावर्त्तवर्त्तितं कार्यम् एवं त्रिवृतं त्रिवृतम् उपवीतं स्यात् एकोपन्थिरिति नानात्वनिषेधार्थम् । तथा च बौधायनः "कौर्मं सूत्रं त्रिस्त्रिवृतं यज्ञोपवीतमाभेः" । कौर्म कूर्मकाण्डोक्तं षट्सूत्रादिसमन्वितम् । कौर्मं कार्पासमुद्भवम् । तथाच मनुः "कार्पासमुपवीतं स्याद् विप्रस्योर्द्धवृतं त्रिवृत् । शणसूत्रमयं राज्ञो वैश्यस्याविकमौविकम्" । त्रिस्त्रिवृतमित्युक्तत्वात् मनुवचनेऽपि त्रिवृन्मात्रं त्रिरावृत्तत्वेन विशेष्यम् । यत्तु पैठीनसिवचनम् "कार्पासमुपवीतं षट्तन्तु त्रिवृतं ब्रह्मणस्य । चौमं राजन्यस्य आविकं वैश्यस्य" । तत्षट्तन्तुत्वब्रह्मणे षट्तन्तु विधायकम् । नवतन्तुत्वं व्यक्तमाह देवलः "यज्ञोपवीतं कुर्वीत सूत्राणि नवतन्तुभिः । एकेन ग्रन्थिना तन्तुर्द्विगुण स्त्रिगुणोऽथवा" । एकेन ग्रन्थिना युक्त इति शेषः । द्विगुणस्त्रिगुणोऽथ वेति तन्तुपदेन द्विसंख्यो त्रिसंख्यो वा कर्त्तव्यः । द्विसंख्यत्वं त्रिसंख्यत्वसम्भवे । गोभिले वा शब्दो विकल्पार्थः । अपिशब्दो वस्त्रकुशरज्ज्वोः सूत्रानुकल्पत्वप्रदर्शनार्थः । एवकारोऽत्रिसंख्यत्वव्यवच्छेदार्थः । द्वितीयो वाशब्दोऽनुक्तौञ्जवाल्वादिसूत्रत्वार्थः । तथा च निगमपरिशिष्टम् "वासंसा यज्ञोपवीतानि कुरुते तदभावे त्रिवृता सूत्रेण कुशसङ्ख्यावच्छिन्नेन वा रज्जुभिर्वा । वाशब्दात्र गोवासः यथाह देवलः "कार्पासं क्षौमगोवासं वररज्जुरथोर्द्धवम् । सदा सम्भवतो धार्यं सुपवीतं द्विजातिभिः" । तदभाव इतिकरणाद्वस्त्राभावे कुशरज्जुभिरिति बोद्धव्यम्" । आ०वि० ।

यज्ञाङ्ग पु० यज्ञस्याङ्गं साधनत्वेनास्यस्य अच् । १यज्ञोडुम्बरे अमरः । २खदिरे राजनि० । ३यज्ञसम्बन्धिकाष्ठाद्यङ्गे च० ते हि यज्ञिय(यज्ञादिना यज्ञं सम्पादयन्ति । ४सोमलतायां स्त्री राजनि० टाप् । ५त्रिवृत्। ६यागाङ्गमात्रे न० ।

यज्ञान्त पु० ६त० । १अवभृथे यज्ञसमाप्तौ स्नानादिक्रियाभेदे २यज्ञभेदे च हेम० ।

यज्ञायज्ञीय न०यज्ञायज्ञा इत्यनेन शब्देन युक्तायामृचि गेयसाम० । १अग्निष्टोमे गेये सामभेदे तां० ब्रा० ४।३।२० ज्योतिष्टोमे गेये २सामभेदे च सा०स०भा०उपोद्घाते ।

यज्ञिक पु० यज्ञः यज्ञाङ्गं साध्यत्वेनास्त्यस्य ठन् । पलाशे जटा० । तत्समिदादिभिर्हि यज्ञोनिष्पाद्यते ।

यज्ञिय त्रि० यज्ञाय हितः च । १यज्ञकर्म्योग्ये अमरः । २द्वापरयुगे पु० त्रिका० ।

यज्ञियदेश पु० कर्म० । यज्ञकर्मयोग्यदेशे "कृष्णसारस्तु चरति मृगो यत्र स्वभावतः । स ज्ञेयो यज्ञियोदेशः" मनूक्ते देशे । [राजनि०, २यागसम्बन्धिनि त्रि० ।

यज्ञीय पु० यज्ञाय हितः तत्रेदं वा छ । १यज्ञोडुम्बरे

यज्ञीयब्रह्मपादप पु० कर्म० । विकङ्कतवृक्षे (वरँचि) राजनि०, "वैकङ्कतीं स्रुचमादत्ते" इति श्रुतौ तदीयस्रुवविधानात् तस्य तथात्वम् ।

यज्ञेश्वर पु०यज्ञस्य प्रवर्त्तयिता ईश्वरः । विष्णौ । [यज्ञके त्रि०

यज्ञेष्ट न० ७त० । १दीर्घरोहितवृक्षे राजनि० । ६त० २२ष्ट०

यज्ञोडुम्बर पु० यज्ञार्थं उडुम्बरः । खनामख्याते वृक्षे शब्दर०

यज्ञोपवीत न० यज्ञेन संस्कृतमुपवीतम् । यज्ञसूत्रे उपनयनसंस्कारेण पवित्रीकृते त्रिवृति ब्रह्मग्रन्थिके दक्षिणकृक्षिगते लम्बमानतया धृते सूत्रभेदे । यज्ञसूत्रशब्दे दृश्यम् । [२विष्णौ च यज्ञपतिशब्दे दृश्यम् ।

यज्वन् पु० यज-भूते क्वनिप् । विधानेन १क्रतुयागे अमरः ।

यत ताडने उपस्कारे च चु० स० सेट् । यातयति । अवीयतत । त । निर्+परीवर्त्ते प्रतीक्षणशोधने च ।

यत यत्ने भ्वा० आत्म० अक० सेट् । यतते अयतिष्ट ऐदित् निशाय मनिट् यत्नः ।

यतम त्रि० एषां मध्ये यः यद्+डतमच् । एषां मध्ये यदुत्कर्षे । [यदल्पत्वे ।

यतर त्रि० । अनयोर्मध्ये यः यद्+डतरच् । अनयोर्मध्ये

यतस् अव्य० यद्+तसिल् । यस्मादित्यर्थे ।

यति पु०यतते मोक्षाय यत-इन् । १परिव्राजके संन्यासिनि अमरः । यम्यते जिह्वा यत यम-क्तिन् । २छन्दोयत्यभिधाते जिह्वाया ३विश्रामस्थाने उच्चारणकालविच्छेदे स्त्री । सा च "क्वचित् छन्दश्शास्त्रे यतिरभिहिता पूर्वसूरिभिः पदान्ते सा शोभां व्रजति पदमध्ये त्यजति च" इत्यादुक्त्या सुप्तिङन्तपदान्ते एव छन्दोमन्थानुसारेण जिह्वाया

विश्रामरूपोच्चारणाभावरूपा। २विधवायां ४रागे ५यन्त्रो च शब्द० ६पाठविच्छेदे मेदि०। ७निकारे ८विधौ हेमच०। ९वाद्याङ्गप्रबन्धभेदे सङ्गीतदा०। यद्+परिमाणे-डति। १०यत्परिमाणे त्रि० ब०व०।

यतिचान्द्रायण न० यतिनेव कर्त्तव्यं चान्द्रायणं व्रतभेदः। "अष्टावष्टौ समश्नीयात् पिण्डान् मध्यदिने गते। नियताक्षा हविष्याशी यतिचान्द्रायणं चरन्" मनूक्ते व्रतभेदे।

यतिन् पु० यम-भावे क्त यतं यमनं यतमनेन इनि। १संन्यासिनि परिव्राजके अमरः। २विधवायां स्त्री ङीप् शब्दरत्ना०। [शब्दर०।

यत्(तू)का स्त्री यत-उक जस वा। जिनपत्निकाष्टके

यत्न पु०यत-भावे नङ्। १आयासे २चेष्टायोगे वैशेषिकोक्ते प्रवृत्तिनिवृत्तिजीवनयोनिरूपत्वैविध्यापन्ने ३गुणभेदे च। स च आत्मगुणः इति नैयायिकादयः चित्तगुण इति सांख्यवेदान्तिकाः।

यत्र अव्य० यद्+त्रल। यस्मिन्नर्थे।

यत्र यत्नोचने वा चु०उभ०पक्षे भ्वा०पर०सक० सेट् इदित्। यन्त्रयति ते यन्त्रांत अयन्त्रत् त अयन्त्रीत्।

यथा अव्य०यद्+प्रकारे थाल्। १येन प्रकारेणेत्यर्थे २सादृश्ये ३योग्यतायाम्४आनुरूप्ये ५पदार्थानतिवृत्तौ च त्रि०कौ०।

यथाकाम अव्य० काममनतिक्रम्य अव्ययी०। १स्वाच्छन्द्ये २यथेष्टतायाञ्च। [स्वेच्छाचारिणि जने स्त्रियां ङीप्।

यथाकामिन् त्रि० यथाकामं स्वाच्छन्द्यमस्त्यस्य इनि।

यथाक्रम अव्य० क्रमस्य आनुरूप्यं तस्यानतिक्रमो वा अव्ययी०। १क्रमानुरूप्ये २क्रमानतिक्रमे च।

यथाजात त्रि० जातं समवयविसमनतिक्रम्य यथाजातं तदस्यास्ति अच्। १मूर्खे अमरः। २नीचे जटा०।

यथातथ अव्य० तथानतिक्रम्य अनतिवृत्तौ अव्ययी०। आद्यार्थे वस्तुनो यद्रूपं भवितुमुचितं तथारूपभावे द्वारा० यथावत्समञ्जसार्थे।

यथार्थ अव्य० अर्थमनतिक्रम्य अव्ययी०। १सत्यतायाम् अर्थस्याभिधारे सत्यस्वरूपे। अर्थ आद्यच्। २सत्ये त्रि०।

यथार्ह अव्य० अर्हं योग्यतामनतिक्रम्य अव्ययी०। १यथायोग्यत्वे ततः अर्थ आद्यच्। २सत्यभूते पदार्थे त्रि०।

यथार्हवर्ण पु० यथार्हं यथायोग्यं वर्णयति वर्ण-अण्। चरे अमरः। [२यथाश्रुतसारे।

यथाश्रुति अव्य० श्रुतेरानुरूप्यम् अव्ययी०। १श्रुतेरानुरूप्ये

यथाशास्त्र अव्य० शास्त्रस्यानुरूप्यम् अनतिक्रमो वा अव्ययी०। १शास्त्रानुसारे २शास्त्रानतिक्रमे च।

यथास्थित अव्य०यथा येन रूपेण स्थातुं योग्यं तथास्थितम् योग्यतायाम् अव्ययी०।१सत्यतायाम् हेमच०अर्थ आद्यच्। २सत्ये त्रि०। [आद्यच्। २यथार्हे त्रि०अमरः।

यथास्व अव्य० स्वस्यानतिक्रमः अव्ययी०।१यथार्थे। अर्थं

यथेप्सित अव्य० ईप्सितस्यानतिक्रमः अव्ययी०। १स्वाच्छन्द्ये अमरः। अर्थ आद्यच्। २यथाभीष्टे त्रि० यथेष्टमस्त्यस्य।

यथोचित अव्य० उचितस्यानतिक्रमः अव्ययी०। १औचित्ये अमरः। अर्थ आद्यच्। २उचिते त्रि०।

यद् त्रि०यज्-यदि डिच्च। (ये)१दत्वेन बुद्धिविशेषविषये। अस्य उक्तार्थे सर्वनामता। अयञ्च यद्यः तच्छब्दार्थनित्यापेक्षो उत्तरवाक्यस्थस्तु न तदपेक्षो इति काव्यप्र०, यत्तच्छब्दयोरन्वये च न समानविभक्तेरन्वयेत्याकरे स्थितम्। २यत्कादित्यर्थे अव्य०। ३गर्हायाम् ४अवधृतौ च मेदि०।

यदा अव्य० यद्+काले दाच्। यस्मिन् काले दत्यर्थे।

यदि अव्य० यद्+यिच्-इन् यिलोपः। १एषान्तरे अमरः। २सम्भावनायाम् ३गर्हायां ४विकल्पे च मेदि०।

यदु पु० ययातिनृपतेः ज्येष्ठपुत्रे वसु वंशे श्रीकृष्णावतारः। तस्य गोत्रापत्यमण् बहुषु तस्य लुक्। २यदुवंश्ये २दर्शार्हदेशे च ब०व० हेमच०। [यदुत्वादयोऽप्यत्र।

यदुनाथ पु० यदूनां नाथो रक्षकत्वात्। श्रीकृष्णे हेमच०।

यदृच्छा स्त्री यद्+यच्छ-अ-टाप्। १स्वातन्त्र्ये, २स्वैरतायाम् अमरः। "यदृच्छालाभसन्तुष्टः" इति गीता।

यदृच्छाशब्द पु० जात्यादिवाचके दित्यादिसंज्ञाशब्दे "असम्भादयतः कश्चिदर्थं आतिक्रियागुणैः। यदृच्छाशब्दवत् पुंसःसञ्ज्ञायै जन्म केवलम्" माघः।

यद्युवा अव्य० यदि च उ च वा च ह०। १पक्षान्तरद्योतने "यद्युवाक्यान्तरसम्भारश्चेद् यद्युनैव" इति "यद्युवाऽभयं चिकीर्षेदिति" च मेदिनिः।

यद्वा अव्य० यच्च वा च ह०। १पक्षान्तरे "यद्वाभ्युदययोग्यता" भट्टेरिः २अथो संक्षिप्तसा०। [३संयमयुक्ते त्रि०हेमच०

यन्तृ पु० यम-तृच्। १सारथौ २क्षिप्तिपक्षे च अमरः।

यन्त्र न० यत्रि-अच्। १संयमने तन्त्रोक्ते देवाद्यधिष्ठाने २चक्रभेदे ३औषधपाकार्थभाण्डभेदे, ज्योतिश्चक्राद्यवेक्षणसाधने ४पदार्थभेदे, ५रक्तधारादेर्दोषवेधकादौ (तुरबिन्) (मसर) पदार्थे। ६कम्बादेः क्षेपणसाधने पदार्थे अग्निवन्त्रम् (कामान धनुक)।

औषधपाकपात्रं च नानाविधं भावप्र० दर्शितं यथा

वालुकायन्त्रम् "भाण्डे वितस्तिगम्भीरे मध्ये निक्षिप्तकूपिके। कूपिकाकण्ठपर्य्यन्तं वालुकाभिश्च पूरिते। भेषजं कूपिकास्थं वह्निना यत्र पच्यते। वालुकायन्त्रमेतद्धि यन्त्रतन्त्रवुधैः स्मृतम्"।

दोलायन्त्रम् "निधाय भौषधं धूतं भूक्ष्णं तच्चिगुणान्तरे। रसगोटिकां काष्ठे दृढं बद्ध्वा गुणेन हि। सन्धानपूर्णं कुम्भान्तः स्रावस्तम्बनसंस्थितम्। अधस्ताज्ज्वालयेदग्निं तत्तुल्यक्रमेण हि। दोलायन्त्रमिदं प्रोक्तं स्वेदनाख्यं तदेव हि"। सन्धानं काञ्जिकादि।

विद्याधरयन्त्रम् "साम्बुस्थालीमुखे बद्धे यन्त्रे स्वेद्यं निधाय च। पिधाय पच्यते यत्र तद्यन्त्रं स्वेदनं परम्। अधःस्थाल्यां रसं क्षिप्त्वा संनिदध्यान्मुखोपरि। स्थालीमूर्द्धमुखौ सम्यक् निरुध्य मृदुवस्त्रया। अधस्थाल्यां जलं क्षिप्त्वा चुल्ल्यामारोप्य यत्नतः। अधस्तात् ज्वालयेदग्निं यावत् प्रहरपञ्चकम्। स्वाङ्गशीतं ततो यन्त्रात् मर्द्दयेद्रसमुत्तमम्। विद्याधराभिधं यन्त्रमेतत्तज्ज्ञैरुदाहृतम्"।

भूधरयन्त्रम् "वालुकासु समस्थाङ्गं गर्त्ते भूम्याः रसान्वितः। दीप्तोपलैः संहण्यादुद्यन्त्रं भूधरनामकम्"।

डमरुयन्त्रम् "यन्त्रं डमरुसंज्ञं स्यात्तत्स्याल्लोर्ष्ट्रिते सुखे" कालज्ञानार्थे सू० सि० शङ्के हृदयार्थभेदे यथोक्तं "कालसंसाधनार्थाय तथा यन्त्राणि साधयेत्। एकाकी योजयेद्योज्यं यन्त्रे विघ्नकारिणि। शङ्कुयष्टिधनुश्चक्रैः स्थाप्यायन्त्रैरनेकधा। गुरूपदेशाद्विज्ञेयं कालज्ञानमतन्द्रितैः" मू०। "शङ्कुयष्टिधनुश्चक्रैः प्रसिद्धैस्थाप्यायन्त्रैस्थाप्याराधकयन्त्रैरनेकधा नानाविधगणितप्रकारैर्गुरूपदेशात् स्वाध्यायकस्य निर्व्याजैकघनादतन्द्रितैरध्वभैः पुरुषैः कालज्ञानं दिनगतादिज्ञानं विघ्नेषु सूक्ष्मत्वेनावगम्यम्। एतत् सर्वं सिद्धान्तशिरोमणौ भास्कराचार्यैः सटीकृतम्

शङ्कुयन्त्रम् "समतलसमस्थपरिधिर्भसिद्धौ दन्तिदन्तजः शङ्कुः। तच्छायातः प्रोक्तं ज्ञानं दिग्देशकालानाम्"।

यष्टियन्त्रम् "क्षिप्त्वाविष्कम्भार्धं हृत्तं कृत्वा दिगङ्कितं तत्र। दत्त्वाक्ष्यां प्राक्पश्चात् द्विज्याशङ्कुं च तन्मध्ये। तत्परिधौ यष्टिं धृत्वा यष्टिमतिद्युतिस्थतः केन्द्रे। क्षिप्त्वाङ्कुना क्षिपेद्या यष्ट्याग्राग्रान्तरं यावत्। यावत्या भौक्यौ यद्दक्षिणोदगले धनुर्भवेत् तत्र। दिनगतशेषा नाड्यः प्राक्पश्चात् क्रमेणैवम्"।

चक्रयन्त्रम् "चक्रं चक्रांशाङ्कं परिधौ त्रयग्रहज्ञवाहिकाधारम्। धात्री धाराधारात् कल्प्या भार्धेऽत्र खार्धं च। तन्मध्ये सूक्ष्माक्षं क्षिप्त्वाकीलिसुखनेमिकं धार्यम्। भूमेरुन्नतभागास्तत्राक्षच्छायया भुक्ताः। तत्खाधोनत्व नता यन्त्रत्रयसङ्कुचं युद्दलम्। युद्दलौन्नतांशभक्तं नाड्यः स्युस्ताः परैः प्रोक्ताः"।

धनुर्यन्त्रम् "दलीकृतं चक्रसमन्ति चापम्" इति।

अथ यन्त्रविस्तरभयादेतेषां निरूपणविस्तरो गणिताद्विचारणोपेक्षित इति मन्तव्यम्। अथ घटीयन्त्रादिभिः समत्कारियन्त्रैर्वा घटीपलीज्ञं कालं सूक्ष्मं साधयेदिति कालसाधनमुपसंहरति रङ्ग०। "तोययन्त्रकपालाद्यैर्मयूरनरवानरैः। सूक्ष्मरेखुनभैश्च सम्यक् कालं प्रसाधयेत्" मू० "तोययन्त्रं च तत् कपालं च कपालाख्यं तदाद्यं प्रथमं येषां तैर्यन्त्रैर्घटीयन्त्रप्रभृतिभिः सामेघघटीयन्त्रैर्मयूरनरवानरैः। मयूराख्यं स्वयंवहयन्त्रं निरीक्ष्यं नरयन्त्रं शङ्कुाख्यं छायायन्त्रं पूर्वोदितं वानरयन्त्रं स्वयंवहं निरीक्ष्यमेतैः सूक्ष्मरेखुनभैः सूक्ष्मदर्शिता रेखवो धूलयो गर्भे मध्ये येषां तैः सूक्ष्मप्रोताः सूक्ष्मदृष्टिका मयूरोदरस्था सुखाद् घटिकान्तरेण यत एव निःसरन्तीति लोकप्रसिद्ध्या तादृशैर्यन्त्रैरित्यर्थः। यद्वा सूक्ष्माकारेण रेखाः सिक्तांशा गर्भे उदरे यस्यैतादृशं यन्त्रं वालुकायन्त्रं प्रसिद्धम्। तेन सहितैर्मयूरादियन्त्रैर्मयूराद्युक्तयन्त्रैर्वालुकायन्त्रेण चेति सिद्धोऽर्थः। चक्रारक्षोययन्त्रकपालाद्यैरित्यनेन सप्तत्वसार्थकः। कालं दिनगतादिरूपं सम्यक् सूक्ष्मं प्रसाधयेत्। प्रकर्षेण सूक्ष्मत्वेनातिसूक्ष्मत्वेनेत्यर्थः। जानीयादित्यर्थः। ननु मयूरादिरूपयन्त्राणि कथं साध्यानीत्यतस्तत्साधनप्रकारा बहवो दुर्गमाश्च सन्तीत्याह रङ्ग०।

"पारदाराम्बुसत्राणि शुल्बतैलजलानि च। बीजानि पांसवस्तेषु प्रयोगास्तेऽपि दुर्लभाः" मू०। "तेषु मयूरादियन्त्रेषु स्वयंवहार्हमेते प्रयोगाः प्रकर्षेण योज्याः। प्रकर्षस्तु यावद्भगतसिद्धेः। तेके इत्यत आह। पारदाराम्बुसत्राणीति। पारदयुक्ता धाराः। तथाच सिद्धान्तशिरोमणौ "लघुकाष्ठजसमचक्रे समसुषिरारा समान्तरा नेम्याम्। विन्यस्ता योज्याः सुषिरार्धं पृथक् तासाम्। रसपूर्णे तच्चक्रं स्वाधाराक्षस्थितं स्वयं भ्रमति"। अम्बु जलस्य प्रयोगः। सत्राणि सूत्रसाधनप्रयोगः।

शुल्वं शिल्पैपुण्यम्। तैलजलादि तैलयुक्तजलस्य प्रयोगः। चकारात् तयोः पृथक् प्रयोगोऽपि। तथाच सिद्धान्तशिरोमणौ "उत्कीर्यनेमिमथ वा परितो यदनेन संहन्यम्। तदुपरि ताम्रपट्टाद्यं क्षत्वा सुषिरे रसं क्षिपेत् तावत्। यावद्वैकपार्श्वं क्षिप्तरसं नश्यतो याति। पिहितच्छिद्रं तदतश्चक्रं भ्रमति खयं जलाकृष्टम्। ताम्रादिमलस्याङ्गुष्ठपर्वनखाम्बुपूर्णस्य। एकं कुरुजलाल्पद्वितीयमपं त्वधोमुखं च बहिः। युगपन्मुक्तं चेत् कं नखेन कुरुतोऽहिः पतति। नेम्यां बद्धा घटिकाषष्टिं जलयन्त्रवत् तथा धार्यम्। नखकप्रच्युतसलिलं पतितं यथा तद्घटीमध्ये भ्रमति। ततस्तत् पतितं पूर्णघटीभिः समाकृष्टम्। चक्रच्युतं खयमुदकं कुरुते याति प्रणालिकया"। इति। बीजानि केवलं तद्बीज प्रयोगः। पौषधो धूलिप्रयोगाश्चैवंजाः प्रयोगाः। अपिशब्दात् प्रयोगेषु सुसमतरा इत्यर्थः। दुर्लभाः अवधारणत्वेन मनुष्यैः कर्तुमशक्या इत्यर्थः। अन्यथा प्रतिगृहं खयंवहानां प्राचुर्यापत्तेः। एवं खयंवहविद्या सप्तद्वारनिर्वासनैः शिरङ्गाख्यैः वस्यगम्यस्तेति। कुहकविद्यात्वादत्र विस्तारानुद्योग इति संक्षेपः" रङ्ग०।

अथ कपालाख्यं जलयन्त्रम्

"ताम्रपात्रमधश्छिद्रं न्यस्तं कुरुडेऽम्भस्यधिं। घटिर्मज्जत्यहोरात्रे स्फुटं यन्त्रं कपालकम्" भू० "यत् ताम्रघटितं पात्रमधश्छिद्रमधोभागे छिद्रं यस्य तत्। अम्भस्यम्भसि निर्मग्नं जले विद्यते यस्मिन् ताडये कुरुडे हृदङ्गाख्ये न्यस्तं धारितं सदहोरात्रे नाक्षत्राहोरात्रे घटिः घटिकारमेव न न्यूनाधिकं मज्जति। अधश्छिद्रमार्गेण जलागमनेन जलपूर्णतया निमग्नं भवति। तत् कपालकं घटघण्टानां कपालपदवाच्यत्वात् घटाधस्तनार्धाकारं यन्त्रं घटीयन्त्रं स्फुटं सूक्ष्मम् तद्घटनं तु "शुल्बस्य दिग्भिर्विहितं पलैर्वत् षड्भुजोच्चं द्विगुणायताख्यम्। तदम्भसा घटिपलैः प्रपूर्णं पात्रं घटार्धप्रतिमं घटी स्यात्। खतुल्यमाषजलनिर्मिता या क्षेत्रः शलाका चतुरङ्गुला स्यात्। विद्धं तया प्राक्तनमत्र पात्रं प्रपूर्यते नाडिकयाम्बुभिस्तत्" भू०। इति व्यक्तम्। भगवता तु मूक्ष्मसूत्रम्। अथ शङ्कुयन्त्रं दिवैव कालज्ञानार्थं नाम्ना देत्याह रङ्ग०। "नरयन्त्रं तथा साधु दिवा च विमले रवौ। छायासंसाधनैः प्रोक्तं कालसाधनसूत्तमम्" भू०।

देवताभेदे पूजाधारयन्त्राणि धारणयन्त्राणि च तन्त्रसारोक्तानि दृश्यानि। तद्धेतुद्रव्याणि तत्रोक्तानि यथा "काश्मीररोचनालाक्षागोमदचन्दनैः। विलिखेद्भेमलेखन्या यन्त्रान्यत्रोतानि देशिकः। सौवर्णे राजते पत्रे भूर्जे वा सम्यगालिखेत्। अथ वा ताम्रपत्रे वा गुटिकीकृत्य धारयेत्। यावज्जीवं सुवर्णे स्यात् रौप्ये विंशतिवार्षिकम्। भूर्जे द्वादशवर्षाणि तदर्धं ताम्रपट्टके"। द्रव्यभेदस्त्वयं तत्र तत्साधार्यतोक्ता यथा "भूमिसृष्टं शवसृष्टं यन्त्रं निर्माल्यसङ्गतम्। विदीर्णं कुत्सितं मन्त्रो यन्त्रं नैव च धारयेत्"।

यन्त्रक न० यन्त्रमिव स्वार्थे कन्। (कुंदु) दारुभाजकयन्त्रभेदे

यन्त्रगृह न० ६त०। तैलिकयन्त्रालये (घानिघर) हेमच०।

यन्त्रगोल पु० यन्त्रमिव ज्योतिश्चक्रान्तर्गतगोलयन्त्रमिव गोलः वर्त्तुलः। कलावभेदे (मटर) शब्दच०।

यन्त्रण न० यत्रि-ल्युट्। नियमने २रक्षणे ३बन्धने च मेदि० युच्। ४पीडायाम् स्त्री टाप्।

यन्त्रपेषणी स्त्री यन्त्रेण पिष्यतेऽनया पिष-करणे ल्युट् ङीप्। (याँता) पेषणयन्त्रे जटा०।

यभ मैथुने भ्वा०पर०सक० अनिट्। यभति अयाभीत्।

यम उपरतौ भ्वा० पर० सक० अनिट् यच्छति अयंसीत् उदित् ङ्गा वेट्। यन्त्रिता यता यत्तः। आ+दीर्घीकरणे आत्म०। उप+विवाहे आत्म०।

यम परिवेषणे चु० उ० सक० सेट् वा घटा०। वमयति यामयति अयीयमत् त अययामत् त।

यम पु० यम-घञ्। "अहिंसा सत्यवचनं ब्रह्मचर्यमकल्कता। अस्तेयमिति पञ्चैते यमाख्यानि व्रतानि च" इत्युक्ते १अहिंसादौ तच्च देहमात्रसाध्यम् आवश्यकमवश्यकार्य्यं नित्यं कार्य्यमिति अमरः इन्द्रियादीनां २संयमने च। यमयति अच्। प्राणिनां शुभाशुभकर्मानुसारेण दण्डविधायके दैवरनियुक्ते दक्षिणस्थे २देवभेदे पु० अमरः। तत्स्वामिकत्वात् ४काले च। आत्मत्वेन यमसम्बन्धित्वात् ५यमौ ६एकगर्भजायमाने यमजे त्रि० मेदि०। ७विंशतिसंख्यायां ८यमदेवताके भरणीनक्षत्रे ज्यो०।

दिक्पालयमभेदाः चतुर्दश भविष्यपु० उक्ता यथा "यमाय धर्मराजाय मृत्यवे चान्तकाय च। वैवस्वताय कालाय सर्वभूतक्षयाय च। औदुम्बराय दध्नाय नीलाय परमेष्ठिने। वृकोदराय चित्राय चित्रगुप्ताय वै नमः"। योगाङ्गयमाश्च पात० सू० भा० उक्ता यथा

"यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि" सू०। "यथाक्रमं एतेषाम् अनुष्ठानं स्वरूपञ्च वक्ष्यामः भा०। तत्र "अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहा-यमाः" सू०। "तत्राहिंसा सर्वथा सर्वदा सर्वभूतानामनभिद्रोहः। उत्तरे च यमनियमाक्रान्तबाह्यतृष्णिधिपरतया तत्प्रतिपदानाय प्रतिपाद्यन्ते तदवदातकरणायैवोपादीयन्ते। तथाचोक्तं "स खल्वयं ब्राह्मणो यथा यथा व्रतानि बह्वीः समादित्सते तथा तथा प्रमादकृतेभ्यो हिंसादिदोषेभ्यो विवर्त्तमानस्तामेवावदातरूपामहिंसां करोति"। सत्यं यथार्थे वाङ्मनसे यथादृष्टं यथानुमितं यथाश्रुतं तथा वाङ्मनसेति स्वबोधसंक्रान्तये वाग्युक्ता सा यदि न वञ्चिता भ्रान्ता वा प्रतिपत्तिबन्ध्या वा भवेत् इत्येषा सर्वभूतोपकारार्थं प्रवृत्ता न भूतोपघाताय यदि चैवमप्यभिधीयमाना भूतोपघातपरैव स्यात् सत्यं भवेत् पापमेव भवेत् तेन पुण्याभासेन पुण्यप्रतिरूपकेण कष्टं तमः प्राप्नुयात् तस्मात् परीक्ष्य सर्वभूतहितं सत्यं ब्रूयात्। स्तेयमशास्त्रपूर्वकं द्रव्याणां परतः स्वीकरणं तत्प्रतिषेधः पुनरस्मृत्युपलब्धेरिति। ब्रह्मचर्य्यं गुप्तेन्द्रियस्योपस्थस्य संयमः। विषयाणामर्जनरक्षणक्षयसङ्गहिंसादोषदर्शनादस्वीकरणमपरिग्रहः इत्येते यमाः" भा०।

गरुड़े तु तस्य दशविधत्वमुक्तं यथा "ब्रह्मचर्य्यं दयाशान्तिर्ध्यानं सत्यमकल्कता। अहिंसाऽस्तेयं माधुर्य्यं दमश्चैते यमाः स्मृताः" १०५ अ०।

यमक न० शब्दालङ्कारभेदे अलङ्कारशब्दे १८६ पृ० दृश्यम्।

यमकोटि पुंस्त्री० भूमेरूर्द्ध चतुर्थपादान्तरिते लङ्कातः पूर्व्वस्यां स्थितायां देवनिर्म्मितायां पुर्य्याम् "लङ्का कुमध्ये यमकोटिरस्याः प्राणिति सिद्धान्तशिरोमणिः"।

यमघण्ट पु० योगविशेषे। "हे मघापूर्वफल्गुन्यौ पुष्याश्लेषार्कचन्द्रयोः। ज्येष्ठानुराधा भरणी चाश्विनी कुजवासरे। हस्ताद्रौ चन्दजे मूला पूर्वाषाढा च रेवती। जीवे श्रुत्तरभाद्रश्च एकार्के स्वातिरोहिणी। शनिवारे शतभिषा अयवा यमघण्टकः" सारसंग्रहः।

यमदग्नि पु० जमदग्नौ ऋषिभेदे।

यमज त्रि० द्वि० व०। यमौ एकदा एकत्र गर्भे सहचरौ जन्मनौ जायेते जन-ड। एकदा एकगर्भजातयोः मेदि०।

यमदशन पु० ब०व०। यमस्य दशना इव चर्व्वणसाधनत्वेन हिंसकत्वात्। "कार्त्तिकस्य दिनान्यष्टौ चाष्टापञ्चाशच्च च। यमस्य दशना एते सप्ताहारी च जीवति" वैद्यकोक्ते सौरदिनभोक्तृयुक्ते। यमदग्नशब्दोऽप्युक्ते अर्थे।

यमदूतिका स्त्री यमस्य दूतीव दृश्यत्वात् कन्। १तिन्तिड़ीवृक्षे अमरः। यमस्य दूत इव कायति कै-क। यमदूतक २काके पुंस्त्री०शब्दरत्ना० स्त्रियां ङीष्।

यमद्रुम पु० यमस्य द्रुमः इव। यमहारस्यद्रुमसाम्ये शाल्मलिवृक्षे तत्तुल्यतीक्ष्णकण्टकाकीर्णवृक्षत्वेन हि नारकिपीडनात्तस्य यमद्रुमत्वम्।

यमद्वितीया स्त्री ६त०। कार्त्तिकशुक्लद्वितीयायाम् "तथा यमद्वितीयायां यात्रायां मरणम्" ति०त०।

यमधार पु० यमसंख्याका धाराऽस्त्र। उभयपार्श्वे धारायुक्ते खड्गे (किरीच)। [यति स्तु। १यमे पु० मेदि०।

यमन न० यम-ल्युट्। १बन्धने २उपरमे च मेदि०। यम-

यमप्रिय पु० ६त०। वटवृक्षे शब्दर०।

यमराज पु० यमानां चतुर्दशानां राजा यमनियामको राजा वा टच्समा०। प्रेतानां राजनि धर्मराजे हेमच०। नृपेषु राजते राज-क्विप्। यमराडप्यत्र अमरः।

यमल न० यमं योगं याति या-क। १युग्मे अमरः इन्द्रावनस्ये २वृक्षभेदे च। "तस्य क्रमशः पदा यमलं" हरिवं०।

यमलपत्त्र पु० यमलानि युग्मानि पत्त्राणि यस्य। १अश्वत्थवृक्षे २कोविदारवृक्षे राजनि०।

यमवाहन पु० यमं वाहयति स्थानात् स्थानान्तरं नयति वह-णिच्-ल्यु। महिषे हेमच०।

यमानी स्त्री यच्छति अग्निमान्द्यमनया यम-करणे ल्युट् ङीष०। आत्त्वम्। १अजमोदायाम् शब्दमा० स्वार्थे क। यमानिका तत्रैव स्त्री।

यमुना स्त्री यम-ल्युनन्। १कालिन्द्यां नद्यां २यमभगिन्याम् सूर्य्यसुतायाम् अमरः। ३दुर्गायाञ्च देवीपु०।

यमुनाम्भस पु० ६त०। यमे अमरः।

ययाति पु० यस्य वायोरिव यातिः सर्व्वत्र रथगतिरस्य। नहुषात्मजे राजभेदे। [मेदि०।

ययु पु० या-कु दित्वञ्च। १अश्वमेधीयेऽश्वे २अश्वमात्रे च

यव पु० यु-अच्। १धान्यभेदे अमरः। "यवान्ने सर्वशस्यानां जायते पत्त्रशातनम्। मोदमानाश्च तिष्ठन्ति यवाः कृषिशशालिनः" इति मीमांसा। अङ्कुरिते यवाकारे २रेखाभेदे स्वार्थे कन् तत्रार्थे तत्रैव "तर्जनीमूलसंपृक्तौ यवौ शुक्लार्द्धदा क्रमात्। मध्यमायां यवश्चैवाङ्गुष्ठेऽपूर्णधनप्रदः। मध्यमायां यदि यवो दृश्यते च सुशोभनः। तदान्यसञ्चितं द्रव्यं प्राप्नोत्यङ्गुष्ठके

वने। यद्यपि चक्रमङ्कुशे यवपूर्वञ्च दृश्यते। तदा पितामहादीनामर्जितं लभते धनम् इति यावत्तुकम्। २भट्टवर्षपाशके परिमाणभेदे शब्दच०। [चेले अमरः।

यवक्ष न० यवानां भवनं क्षेत्रं यत् कृक् च। यवभवने

यवक्षार पु० यवजातः क्षारः। यवजातक्षारे रत्नमा० यवक्षारे वैद्यकपरिभाषा।

यवज पु० यवात् जायते जन-ड। १यवक्षारे रत्नमा० २यवान्नाच्च राजनि०। [राजनि०।

यवतिक्ता स्त्री यवाकारं तिक्तं फलं यस्याः। यष्टिन्याम्

यवन पु० यु-ल्यु। १देशभेदे सोऽभिजनोऽस्य तस्य राजा वा अण् वहुषु तस्य लुक्। २तद्देशस्थेषु जनेषु ३तद्भूपेषु ४वेगे ५अधिवेसयुतास्त्रे मेदि० ६गोधूमे ७अजीर्णतृणे ८तुरङ्गजातौ राजनि० ययातिशप्तस्य तत्पुत्रस्य तुर्वसोर्वंशभ्रे जातिभेदे च पुंस्त्री० स्त्रियां ङीप्। १०वेगवति त्रि०।

यवनदिष्ट पु० यवनैर्दिष्टः दिश-क्त। शुग्रुकौ राजनि०

यवनप्रिय न० द्रुत०। मरिचे हेमच०।

यवनाचार्य्य पु० ताजकादिज्योतिःशास्त्रकारके पण्डितभेदे

यवनानी स्त्री यवनानां लिपिः ङीप् आनुक् च। यवनानां लिप्याम् त्रि० स्त्री०।

यवनारि स्त्री यवनक्षारिः। श्वेतपुष्पे त्रिका०।

यवनाल पु० यवस्येव नाला (नाडा) यस्य। (देधान) धान्यभेदे हेमच०। [यवक्षारे हेमच०।

यवनालज पु० यवस्य नालात् क्षारात् जायते जन-ड।

यवनिका स्त्री युवन्यस्यां यु-ल्युट् ङीप् स्वार्थे क अत इत्वम्। (कानात) जवनिकायाम् अमरः।

यवनी स्त्री यु-ल्युट् ङीप्। १यवानीनामओषधौ मेदि० ङीष्। २यवनभाषायाञ्च। "यवनीसक्तपञ्चानाम्" रघुः।

यवनेष्ट न० द्रुत०। १सीसके हेमच०। २मरिचे ३लशुने ४लशुने ५राजपलाण्डौ ६निम्बे च पु०। खर्जूर्यां स्त्री राजनि० टाप्।

यवफल पु० यव इव फलमस्य। १अंशे अमरः २कुटजे यस्य फलमिन्द्रयवः। ३जटामांस्याञ्च मेदि० ४प्रवालके शब्दर०।

यवमध्य न० यव इव मध्यं यस्य। चान्द्रायणभेदे प्रथमदिवादारभ्य पञ्चदशदिनमेकैकग्रासवृद्ध्या, तदुत्तरं च क्रमात् पञ्चदशदिनं क्रमेणैकैकग्रासहान्या मासमध्ये व्रते तस्य मध्यदिवसनां हि बहुग्रासत्वेन यवमध्यत्वमस्यम्।

यवलास पु० यवेन लसते भंक्षायां कर्त्तरि घञ्। यवक्षारे शब्दच०।

यवशूक पु० यवानां शूकः कारणत्वेनास्त्यस्य अच्। यवक्षारे त्रिका० यवशूकजादयोऽप्यत्र राजनि०।

यवस न० यु-असच्। १घासे २तृणे च अमरः।

यवागू स्त्री यूयते मिश्र्यते यु-आगू। षड्गुणजलपक्वे द्रवभेदे (याउ) अमरः। "मण्डचतुर्थगुणे यवागूः षड्गुणेऽम्भसि" वैद्यकपरिभाषा।

यवागूज पु० यवक्षारात् शूकात् जायते जन-ड। १यवक्षारे अमरः। २यवान्नाच्च राजनि०।

यवानी स्त्री दुष्टो यवः ङीप् आनुक् च। (ओवानि)पदार्थे राजनि०। "यवानी पाचनी रुच्या दीपनी कटुका लघुः। दीपनी च तथा तिक्ता पित्तला शूलशूलहृत्। वातश्लेष्मोदरानाहगुल्मप्लीहकृमिप्रणुत्" भावप्र०।

यवापत्य न० यवक्षारापत्यमिव तज्जातत्वात्। यवक्षारे राजनि०

यवाशज न० यवजातादशात् जायते जन-ड। सौवीरके वाह्लिकभेदे राजनि०।

यवास पु० यु-आस। १दुरालभायाम् अमरः। २खदिरभेदे च शब्दमा० ३खण्डखादिनी तृणे स्त्री राजनि० टाप्। स्वार्थे क। यवासक तत्रैव। [तृणे।

यविष्ठ त्रि० अतिशयेन युवा युवन्-इष्ठन् यवादेशः। अति-

यवीयस् त्रि० अतिशयेन युवा युवन्+ईयसुन् यवादेशः। १अतितरुणे २कनिष्ठे च "अंशभंशं यवीयांसः" स्मृतिः। स्त्रियां ङीप्।

यवोत्थ न० यवादुत्तिष्ठति उद्+स्था-क। सौवीरके राजनि०।

यव्य न० यवानां भवनं क्षेत्रं यत्। यवभवनयोग्ये क्षेत्रे अमरः। युतखन्द्राकीवत्र यत्। २चान्द्रे मासे पु०। "यव्यद्वयं श्रावणादि सर्वा नद्यो रजस्वलाः" मा०त०।

यशःपटह पु० यशःख्यापकः पटहः मा० त०। ढक्कायाम् वाद्यभेदे अमरः। [शोभादयोऽप्यत्र।

यशःशेष त्रि० यश एव शेषोऽस्य। मृते हेमच०। कीर्त्ति-

यशद न० देन वायुना शीयते शद-अच्। (दस्ता) ख्याते धातुभेदे "यशदं रङ्गसदृशं रीतिहेतुश्च तन्मतम्। यशदं तुवरं तिक्तं शीतलं कफपित्तहृत्। चक्षुष्यं परमं मेहान् पाण्डुं श्वासञ्च नाशयेत्" भावप्र०।

यशस् न० यश-असुन् धातोः गुट् च। गौर्यादिभूते ख्यातिपरपर्य्याये पदार्थे अमरः।

यशस्या स्त्री यशसे हिता यशस्+यत्। १लोध्रवृक्षे २शतावरीनामौषधौ च राजनि०। ३यशःसाधने त्रि०। "धन्यं यशस्यमायुष्यम्"।

यशस्वत् त्रि० यशस्+अस्त्यर्थे मतुप् मस्य वः । यशोविशिष्टे
यशस्विन् त्रि० यशस्+अस्त्यर्थे विनि । १यशोयुते स्त्रियां ङीप् । वा च २ज्योतिष्मतीलतायां २यवतिक्तायां राजनि० ४वनकार्पास्यां शब्दर० ।
यशोद पु० यशो ददाति दा-क । १पारदे राजनि० २यशोदातरि त्रि० ।३नन्दगोपपत्न्यां स्त्री । "नन्दगोपगृहे जाता यशोदागर्भसम्भवा" देवीमा० ।
यष्टृ पु० यज-तृच् । यागशीले ।
यष्टि पु० यज-क्तिन् नि० न सम्प्रसारणम् । १ध्वजादिदण्डे २भुजाद्यवलम्बने दण्डे च मेदि० क्लिच् । ३तन्त्रौ शब्दमा० । ४हारलतायां ५भार्य्यां ६मधूकायां (यष्टिमधु) स्त्री वा ङीप् । ७शस्त्रभेदे च मेदि० ।
यष्टिमधु न०यष्टौ मधु यस्य । ख्यातेलतामेदे हला० । कप् तत्रार्थे स्त्री अमरः ।
यष्टीक न०यष्ट्या कायति के-क । यष्टीमधौ लतामेदे भावप्र०
यष्टीपुष्प पु० यष्टीव पुष्पमस्य । पुत्रजीवद्रुमे भावप्र० ।
यष्टीमधु पु० यष्ट्यां मधु यस्य । (यष्टिमधु) ख्यातलतामेदे राजनि० ।
यस यत्ने दिवा० पक्षे भ्वा० वा श्यन् पर०अक०सेट् । यस्यति यसति संयस्यति संयसति अनुयस्यति । इरित् अयसत् अयासीत् अयसीत् । अयं पुषादिरित्यन्ये उदित् क्त्वा वेट् । यसित्वा यस्त्वा यस्तः ।
यस्क पु० यस-क नेत्वम् । मुनिभेदे तस्य गोत्रापत्यं शिवा० अण् । यास्क तदपत्ये पुंस्त्री० निरुक्तकारके मुनिभेदे पु० । बह्वृषु अयो लुक् । यस्काः ।
या गतौ अदा० पर० सक० अनिट् । याति अयासीत् ययौ
याग पु०यज-घञ् । मन्त्रकरम्भके वह्न्याद्यधिकरणे देवोद्देशेन हविस्त्यागरूपे यज्ञे अमरः । तद्भेदाः कात्यायनादि-सौत्रसूत्रादौ दृश्याः ।
याच याचने भ्वा०उभ०द्विक०सेट् । याचति ते अयाचीत् अयाचिष्ट । इदित् चक्रे न लुङः । द्वित् अयु याचयुः । द्वित् याचित्वम् । गोष्वेऽस्य कर्मणि णकारादयः ।
याचक त्रि० याच-ण्वुल् । याच्ञाकारके अमरः ।
याचन न० याच-ल्युट् । याच्ञायाम् । युच् । याचना तत्रार्थे स्त्री ।
याचनक त्रि० याच-ण्वुल् स्वार्थे क । याचके अमरः ।
याचित न० याच-भावे क्त । याचनदत्तो अमरः । २याच्याच । कर्मणि क्त । ३प्रार्थिते त्रि० ।
याचितक न० याचितेनाधिगतम् कन् । याच्ञया धनस्वामिनो गृहीते (चाओया) द्रव्ये अमरः ।
याच्ञा स्त्री याच-नङ् । प्रार्थनायाम् अमरः ।
याजक पु० याजयति यज-णिच्-ण्वुल् । धनादिलाभाय परार्थं यज्ञकर्तरि ऋत्विगादौ ।
याजन न० यज-णिच्-ल्युट् । दक्षिणार्थमन्यस्य यागसम्पादने "यजनं याजनं तथा" मनुः ।
याज्ञवल्क्य पु० १धर्मशास्त्रकर्त्तरि तत्संहिता चाचाराध्यायप्रायश्चित्तात्मकाध्यायत्रयान्विता १२गुरुशुक्लयजुःप्रवर्त्तके मुनिभेदे तत्कथा भाग० १२ स्क० ।
याज्ञसेनी स्त्री यज्ञसेनस्य द्रुपदराजस्यापत्यं स्त्री अत इञ् ङीप् । द्रौपद्यां पाण्डवभार्य्यायाम् हेमच० ।
याज्ञिक पु० यज्ञाय हितः यज्ञः प्रयोजनमस्य वा ठक् । १दर्भभेदे शब्दर० ।२याजके ऋत्विगादौ ३खदिरे ४पलाशे ५यज्ञार्हे राजनि० । ६यजमाने च ।
याज्य न० इज्यतेऽत्र यज-वा ण्यत् । १यागस्थाने २देवप्रतिमायाञ्च "याज्यं क्षेत्रमलङ्कारम्" इति स्मृतिव्याख्यायां दायभागे "याज्यं यागस्थानं देवताप्रतिमा वेल्लुक्षम् । ३याजनीये त्रि० । करणे ण्यत् । ४ऋग्विशेषे स्त्री । तदुच्चारणविशेषः आश्व०श्रौ० १।३५ सू० उक्तः ।
यातना स्त्री यु० यत-युच् । तीव्रवेदनायाम् अमरः ।
यातयाम त्रि० यातो गतो याम यत्किंचित्समयो यस्य । १जीर्णे २परिभुक्ते च अमरः । ३पर्युषिते "यातयामं गतरसम्" इति गीता । ४दुष्टे मेदि० । ४पुनःपुनः प्रयुज्यमाने च "संवत्सरसाध्ये गवामयने प्रत्यहं दृष्टदुष्टरसाभ्योः पुनः पुनः प्रयोगात् तस्य तथात्वम् ता० ब्रा० ४।२।१२ भाष्ये दृश्यम् । [१यत्नौ २गन्तव्ये त्रि० ।
यातव्य पु० यातयतेऽसौ या-तव्य । १पाण्डौ युद्धार्थमभिगन्तव्ये
यातायात न० यातञ्चायातञ्च या-भावे क्त । आ+या-भावे क्त समाहारद्वं० । गमनागमनयोः ।
यातु न० या-तु । १राक्षसे अमरः । २मन्त्रिणि त्रि० त्रिका० ३काके पु० ४अश्वगे त्रि० त्रि० को० ५वायौ संज्ञिप्रवा० यत-णिच्-उण् । ६वातवितरि प्रवर्त्तयितरि च "यातुर्यथेति" ताण्डब्रा०भा० "यातुर्वातयिता प्रवर्त्तयितेति" भा० । [राजनि० ।
यातुघ्न पु०यातं राक्षसं गच्छेन हन्ति हन-टक् । १गुग्गुलौ
यातुधान पुंस्त्री० यातु इति धीयतेऽभिधीयते धा-ल्युट् । राक्षसे अमरः स्त्रियां जातौ ङीप् ।

याट स्त्री या-टच्। १देवरपत्न्याम् (या) अमरः। यातरौ यातरः। तृन्। २गन्तरि त्रि०। यातारौ यातारः।

यात्रा स्त्री या-ष्ट्रन्। १जिगीषया राज्ञां गमने अमरः २गमनमात्रे ३देवोद्देशेनोत्सवभेदे रथयात्रादौ ४यापने च मेदि०। ५उपाये विश्वः यात्रादिनादिकं स०चि० यात्राप्रकरणे दृश्यम्। [स्थिते नक्षत्रादौ च।

यात्रिक त्रि० यात्रायै हितम्। १तद्धरे २उपाये ३गमन-

यात्रातथ्य न० तथा तद्भूपस्यौचित्यम् अव्ययी० तस्य भावः ष्यञ्। यद्वस्तु यथा भवितुं युक्तं तस्य तथाभावे।

याथार्थ्य न०यथार्थस्य भावः। सत्यत्वे वास्तविकत्वे। [अमरः

यादःपति पु० यादसां जलजन्तूनां पतिः। १वरुणे २समुद्रे

यादव पु० यदोर्गोत्रापत्यम् अण्। १यदुवंश्ये स्त्रियां ङीप्। २तत्प्रधाने श्रीकृष्णे पु० शब्दर०। यदूनामिदमृषभ ३गोमहिषादिके धने न०अमर०।४दुर्गायां स्त्री त्रिका०ङीप्

यादस् न० या-असुन् दुक् च। जलजन्तुमात्रे अमरः।

यादसांनाथ पु० ६त० अलुक्समा०। १वरुणे ३का० २समुद्रे च अमरः। यादसांपत्यादयोऽप्यत्र।

याद्दच्(ग्)(ग्) त्रि० यस्येव दर्शनमस्य यद्+दृश्-क्विप् (ट) क्विप् वा। यत्सदृशे यथाविधे। टाप्नात्तु स्त्रियां ङीप्।

याद्दच्छिक त्रि० यदृच्छया आगतः ठक्। यदृच्छया प्राप्ते।

यान न० या-भावे ल्युट्। १गमने उपचितशक्तेः राज्ञः मूल-राज्ञादिरक्षां कृत्वा रिपोरुच्छेदनाय २गमने च अमरः। करणे ल्युट्। ३गमनसाधने रथादौ अमरः।

यापन न० या-णिच्-ल्युट्। १कालादेः क्षेपणे क्षेमच०। २निरसने च मेदि०।

याप्य त्रि० या-णिच्-यत्। १निन्द्ये २अधमे अमरः। ३क्षेपणीये मेदि०। निःशेषप्रतिकार्ये उपशमनीये ४रोगभेदे च भावप्र० तत्र तल्लक्षणादिकन्तु यथा "यापनीयन्तु तं विद्यात् क्रियां धारयते हि यः। क्रियायान्तु निहन्त्यार्त्तं वह्नौ वज्र विनश्यति। प्राप्ता क्रिया धारयति सुखिनं याप्यमातुरम्। प्रपतिष्यन्न दिवागारं स्तम्भो यत्नेन योजितः। साध्या याप्यत्व-मायान्ति याप्यासाध्यतां तथा। म्लेच्छा प्राक्कायसा-ध्यास्तु नराणामक्रियावताम्"।

याप्ययान पु० याप्यं क्षेप्यं कुत्सितं वा पदमुन्यत्वात् इतर-वाहत्वाद्वा यानम्। (मञ्चापाला) शिविकायाम् अमरः।

याम पु० यम-घञ्। १समये मेदि० २प्रहरे च अमरः। "यामो यातस्तथापि नायातः" इति सा० द०।

यामघोष पुंस्त्री०यामे घोषोऽस्य। १कुक्कुटे शब्दच० स्त्रियां ङीष्। २घटिकायन्त्रभेदे स्त्री त्रिका०।

यामल न० यमल+स्वार्थेऽण्। १युगले क्षेमच०। २तन्त्र-शास्त्रभेदे च। "सृष्टिश्च ज्योतिराख्यानं नित्यकृत्य-प्रदीपनम्। क्रमसूत्रं वर्णभेदो जातिभेदस्तथैव च। युगधर्मश्च संख्यातो यामलस्याष्टलक्षणम्"। तच्च षड्विधम् "आदियामलं ब्रह्मयामलं२ विष्णुयामलं३ रुद्रयामलं४ गणेशयामलम्५ आदित्ययामलम्६ च इति वाराहीतन्त्रम्। अस्य वर्म्मादित्वमपि तत्रार्थे।

यामवती स्त्री यामाः बहवः सन्त्यस्यां भूमि मतुप् मस्य वः ङीप्। १रात्रौ राजनि० २हरिद्रायाञ्च

यामात पु०जायां याति तृच् गुणे। जामातृशब्दार्थे शब्दर०

यामि स्त्री यम-इन्। १कुलस्त्रियां २भगिन्यां अन्तःस्थ-यादौ रभसः। "या(जा)मयोयानि मेङानीति" मनुः। ३रात्रौ शब्दर०। ४यमपत्नीभेदे वह्निपु० "अरुन्धती वसु-र्यामिर्लम्बा भानुर्मरुत्वती। सङ्कल्पा च मुहूर्ता च साध्या विश्वा च नामतः। धर्मपत्न्यो दश त्वेतास्तासुपत्यानि मे शृणु"।

यामित्र न० ज्योतिषोक्ते लग्नराशिभ्यां सप्तमे स्थाने।

यामित्रवेधः पु०यामित्रे सप्तमस्थाने वेधः पापग्रहसंयोगः। विवाहादौ वर्ज्ये "पापात् सप्तमगः शशी" इत्यादियुक्ते योगभेदे उपपदशब्दे १२६७ पृ० दृश्यम्।

यामिनी स्त्री यामाः त्रिसंख्याताः सन्त्यस्य अच्छत्वे इनि। १रात्रौ २हरिद्रायाञ्च अमरः। [रजनीशादयोऽप्यत्र।

यामिनीपति पु० ६त०। १चन्द्रे शब्दर० २कर्पूरे च।

यामी स्त्री यमस्येयम् यमो देवताऽस्या वा तस्येदं वा अण् ङीप् १दक्षिणस्यां दिशि २यमसम्बन्धिन्यां यातनायां ३भ-रणीतारायां च। यामि+टा ङीप्।४यामिशब्दार्थे च।

यामुनेष्टक न० यमुनायां भवं वासनं तदिवेष्टकम्। चीवरे लटा० तस्य क्षणत्वात् यामुनजलतुल्यत्वात्तथात्वम्।

याम्य पु० यामी दिक् निवासोऽस्य यत्। १यमस्थे २चन्दन-वृक्षे च मेदि०। यमोदेवताऽस्य तस्येदं वा यत्। ३यम-सम्बन्धिनि त्रि० ४भरणीनक्षत्रे च स्त्री० ५दक्षिण-देशस्थे त्रि०।

याम्यायन न० याम्यायाम् अयनं सूर्य्यस्य गतिः। सूर्य्यस्य दक्षिणायने तदाधारेषु रवेः सङ्क्रमसंक्रान्तितः परेषु षट्सु मासेषु च। [राजनि०।

याम्योद्भूत पु० याम्ये दक्षिणदेशे उद्भूतः। श्रीताजवृक्षे

यावजूक पु० यज-यङ्-जक। पुनःपुनर्यागयोगे अमरः।
यायावर पु० देशाद्देशान्तरं याति या यङ्-वरच्। १दूरगमेऽर्थेयाचे लटा० तस्य नानादेशगमनत्वात्तथात्वम् २जरत्कारुसुनौ च त्रिका०। ३भ्रमणशीले त्रि०।
याव पु० यु-अण् स्वार्थे अण्। १अलक्ते अमरः स्वार्थे क। यावक तत्र। याव इव कन् (कुल्माषकवत्) २व्रीहिधान्यभेदे अमरः।
यावत् त्रि० यत् परिमाणमस्य मतुप्। १यत्परिमाणे स्त्रियां ङीप्। या-वति। २साकल्ये ३अवधौ ४व्याप्तौ ५मानेऽवधारणे च अव्य०अमरः। एतच्छब्दयोगे द्वितीया।
यावत्तावत् अव्य० यावच्च तावच्च इ०। वीप्सयोचितप्रसिद्धे अव्यक्तमानानवधारणाय कल्पे प्रथमे रागौ।
यावतिथ त्रि० यावतां पूरणः यावत्+डट् इथुक् च। यावत् परिमाणपूरणे।
यावन पु० यु-णिच्-ल्यु। किण्वाख्यगन्धद्रव्ये अमरः।
यावनाल पु० यवनाल एव स्वार्थे अण्। धान्यभेदे (जनार) राजनि०।
यावनालशर पु० यवनाल इव शरः। शरभेदे राजनि०।
यावनाली स्त्री यवनालस्य विकारः अण् ङीप्। यवनालभवायां शर्करायाम् राजनि०।
यावशूक पु० यवशूकस्य विकारः अण्। यवशूकरे रत्नमा०।
याष्टीक पु० यष्टिः प्रहरणमस्य ठक्। यष्ट्या योद्धरि अमरः। [भावे घञ्। २प्रयासे।
यास पु० यस-कर्तरि संज्ञायां घञ्। १दुरालभायाम् अमरः
यु मिश्रणे अमिश्रणे च अदा०पर०सक०सेट्। यौति अयावीत्।
यु बन्धे क्र्या०उभ०सक०अनिट्। युनाति युनीते अयौषीत् अयोष्ट।
यु न्ने चु० आत्म० सक० सेट्। यावयते अयीयवत्।
युक्त त्रि० युज-क्त। १मिलिते मेदि०। २अभ्यासवशाद् सदा सर्वविषयकसङ्गमयुते योगिनि पु० भाषा० ३उचिते ४न्यायागतद्रव्ये च न० अमरः ५(एलानी) वृक्षभेदे स्त्री रत्नमा०। [स्त्री) अमरः।
युक्तरसा स्त्री युक्तो रसो यस्याः। राज्ञायां (लाटा आम्रातकी) राजनि०।
युक्ति स्त्री युज क्तिन्। १न्याये मेदि०। २व्यवहारे ३वस्तुमाने ४तत्तुल्यसदृशविकल्पज्ञानादौ स्वरूपसाधकविषयज्ञानसाधकसमाधौ तर्क० व्यवहारे कालि चित्र देशाद्विशिष्टानि नारदीयोक्तानि यथा "उल्काहस्तोऽग्निदो ज्ञेयः सस्यानाशिश्च घातकः। केशास्थिग्रन्थिहीनश्च शुभपत्रपारदारिकः। कुद्दालपाणिर्भृत्यघ्नः शैलभेत्ता शमीपत्रः। तथा कुठारहस्तश्च वनच्छेत्ता प्रकीर्त्तितः। प्रलम्बशिखोविंशेषो दग्धपारश्वप्रकारकः। असाधितसत्त्वश्च क्षेत्ते पारश्वे च परीक्षणम्"। "युक्तिरर्थोऽधारणम्" सा०द० वस्तु इनाटकाङ्गविशेषे च। तत्र न्याये "युक्तोविरोधे न्यायस्तु बलवानर्थनिर्णये। युक्तिहीनविचारे तु धर्महानिः प्रजायते" मीमांसकाः।
युग् वर्जने भ्वा०पर०सक०सेट् इदित्। युङ्क्ते अयुङ्क्त।
युग न० युज्यते अच् पृषो० नलोपः। १द्वन्द्वे द्वित्वसंख्यान्विते सत्यसंहाद्यापरकत्वविरूपे २कालविशेषे ३वृद्धिनामौषधे ४वृक्षस्यचत्वक्परिमाणे ५रथवृक्षादिकूबरभेदे पु० (जोयाल) भेदि०। [काष्ठखण्डभेदे रत्नमा०।
युगकीलक पु० ६त०। रथाद्यक्षदृढधारणार्थे लोहकाष्ठके
युगन्धर पु० युगं रथस्य युगकाष्ठं धरति धृ अच्। रथस्य युगकाष्ठावलम्बने कूबरास्थे १कालभेदे रत्नमा०। २पर्वतभेदे च मेदि०। [अमरः।
युगपद् अव्य० युगमिव पद्यते पद-क्विप्। एककाले एकार्थे
युगपत्र पु०युगमिव संहतं पत्रमस्य। कोविदारवृक्षे हेमच० वा कप्। तत्रैव। स्त्रियां टाप् अत इत्त्वम्।
युगपार्श्वग पु० युगपार्श्वे गच्छति गम-ड। सम्यक्सार्थे साङ्गपार्श्वे वहे वृषे अमरः। [स्थिते अमरः।
युगल न० युगं द्वित्वं याति या-क। युग्मे द्वित्वसंख्या-
युगलाख्य पु० युगलेन वराटकेन व्यञ्जनवर्णद्वयेनाख्यायते ख्या+क। १वर्णवृक्षे राजनि० २युगलनामके त्रि०।
युगान्त पु० युगानां सत्यादीनामन्त्यदुष्कालान्तो वा कालः। १प्रलये २ततत्कालेच हला०।
युग्म न० युज-मक् पृषो० जस्य गः। १द्वित्वसंख्यान्विते (जोड़) युगले। "युग्मान्निक्षतभूतानि षण्मुखस्योरुतेजसः। रुद्रेण द्वादशी युक्ता चतुर्दश्याञ्च पूर्णिमा। प्रतिपदाद्यमावस्या तिथ्योर्युग्मं महाफलम्" स्मृतौ २तिथिविशेषयुते ३रुद्रसंख्यायां ४मिथुनराशौ च ज्यो०
युग्मपत्र पु० युग्मानि पत्राण्यस्य। १रक्तकाञ्चनवृक्षे राजमा० युग्मपर्णादयोऽप्यत्र। संज्ञायां कन्। २शिंशपावृक्षे स्त्री चन्द्र०टाप् अत इत्त्वम्। [२७शिक्षाकौ च राजनि०।
युग्मफला स्त्री युग्मानि फलानि यस्याः। १रुद्रवृक्षे २
युग्य न० युगमर्हति युग+यत्। १शकटे यानेऽश्वादौ युगं वहतीति यत्। २युगवाहकेऽश्वादौ त्रि० अमरः।

युच्छ प्रमादे भ्वा० पर० सक० सेट् । युच्छति अयुच्छीत् ।
युज युतौ रु० उ० सक० अनिट् । युनक्ति युङ्क्ते इरित् अयुनत् अयौक्षीत् अयुक्त युयोज युयुजे । अजन्तोपसर्गात् तदस्य परस्मात् आत्म० ।
अनु+प्रश्ने सक० आ० । अनुयुङ्क्ते अनुयोगः ।
अभि+व्यवहारेऽभ्याक्रन्दने (नालिशकरा) सक० आत्म० अभियुङ्क्ते अभियोगः ।
उद्+आयोजने सक० चतुर्मे अक० उदुङ्क्ते उद्योगः ।
उप+भोजने सक० सम्बन्धभेदे अक० आत्म० उपयुङ्क्ते उपयोगः ।
नि+प्रेरणे सक०आत्म०नियुङ्क्ते । नियोगः । [पर्य्यनुयोगः ।
परि+अनु+दूषणाय प्रश्ने आत्म० सक० । पर्य्यनुयुङ्क्ते प्र+उच्चारणे व्यवहारभेदे च सक० आत्म० प्रयुङ्क्ते प्रयोगः
प्रति+प्रतिरूपे योगे सक० आ० प्रतियुङ्क्ते प्रतियोगः ।
सम्+संयोगे सक० प० संयुनक्ति संयोगः ।
युज निन्दायां चु० आ० सक० सेट् । योजयते अयूयुजत ।
युज समाधौ दि० आत्म० अनिट् । युज्यते । युयुजे ।
युज बन्धने द्युतौ च वा चु० उभ० पक्षे भ्वा० पर०सक०सेट् । योजयति ते योजति । अयूयुजत् त । अयोजीत् ।
युज् त्रि० दि०युज क्विप् । १समाधिमति । युक् युजौ । रु० युज क्विप् ।२संयोगवति त्रि०युङ् युजौ युञ्जः इति भेदः चु० युज-निन्दे भावे क्विप् । ३निन्दायाम् अव्य० ।
युञ्जान पु० युज-शानच् ।१योगविशेषवति भावनासहकारेण सर्वपदार्थज्ञातरि आप्त० । २रथसारथौ ३विप्रे च मेदि० ।
युत दीप्तौ भ्वा०आ०अक०सेट् । योतते । अयोतिष्ट । अदित् चङि न ह्रस्वः । [४ह्रस्वचतुष्टयमाने न०मेदि० ।
युत त्रि० यु-क्त । १संयुक्ते २मिलिते ३अमिलिते च ।
युतक न० यु-क्त युत-क वा ततः स्वार्थे क । १संशये २युगे ३स्त्रीवसनाञ्चले ४चरणाग्रे ५यौतुके धने मेदि० । ६मैत्रीकरणे शब्दर० ७संशये दम्भार्थे च नानार्थमा० । ८स्त्रीवस्त्रभेदे हेम० । १०संयुक्ते त्रि० ।
युतवेध पु० विवाहादौ वध्वां चन्द्रेण सह पापषष्ठयोगे उपयमशब्दे १२६७पृ० वह्निवाक्ये दृश्यम् ।
युद्ध न० युध-भावादौ क्त । १परस्पराभिघातार्थं यन्त्रादिक्षेपव्यापारे योधने २तदाधारे संग्रामे अमरः । ज्योतिषोक्ते षष्ठ्यां गतिभेदजाते योधनरूपे २परस्परमिलनविशेषे च । षष्ठयुद्धशब्दे २७६६ पृ० दृश्यम् ।
युध युद्धे दिवा० आ० सक० अनिट् । युध्यते अयुद्ध युयुधे ।
युध्(धा) स्त्री युध-सम्प० क्विप् वा टाप् । १युद्धे योधने २संग्रामे च अमरः । [१६ अ० ।
युधाजित् पु० क्रोष्टुवंशपुत्रे माद्रीगर्भजाते नृपभेदे हरिवं०
युधान पु० युध-कर्त्रा० कानच् । १क्षत्रिये कर्त्रादिको० ।
युधिष्ठिर पु० युधि युद्धे स्थिरः "सदिस्थिरयुधिभ्यां स्थिरः" पा० षत्वम् । पाण्डवज्येष्ठे । [अयोधीत् ।
युप विमोहे दिवा०पर०अक० सेट् । युप्यति इरित् अयुपत्
युयुधान पु० युध-कानच् हितम् । १इन्द्रे सात्यकिनामनि यादवे क्षत्रियभेदे त्रिका० ।२क्षत्रियमात्रे च संक्षिप्तसा० ।
युवखलति स्त्री युवतिरेव खलतिः पृषो० । (टाक्) रोगवत्याम् युवत्याम् । [शब्दर० ।
युवगण्ड पु० हृत० । यूनो गण्डस्थव्रणभेदे । (वयस्फोड़ा)
युव(ति)ती स्त्री युवन्+ति ङीप् वा । १यौवनवत्यां स्त्रियाम् शब्दर० । युवन्-ङीप् । यूनीत्यत्र । २स्त्रीमात्रे भागुरिः ३इरिद्रायां शब्दच० ।
युवतीष्टा स्त्री युवतीनामिष्टा । स्वर्णयूथिकायाम् राजनि० ।
युवन् त्रि० यु-कनिन् । १अल्पे २निसर्गबलवति मेदि० । "आषोडशाद्भवेद् बालस्तरुणस्तत उच्यते" इत्युक्तवयस्के ३तरुणे च । "जीवति तु वंशे युवा" पा० खतैरुक्ते पौत्रादेरपत्ये ४चतुर्थादौ बालादिस्वरेषु ५स्वरभेदे ।
युवनाश्व पु० सूर्य्यवंश्ये मान्धातृपितरि नृपभेदे ।
युवराज पु० युवैव राजा टच्समा० । राज्ञयोग्यक्रियत्कार्य्यकरे १राजपुत्रे अमरः ।२वृषभेदे त्रिका० । [युष्मद्
युष भजने सौ०पर०सक०सेट् । योषयति अयोषीत् । योषा
युष्मद् त्रि० सौ० युष-मदिक् । संबोध्यचेतने भवच्छब्दार्थे । उक्तार्थेऽस्य सर्वनामता त्रिषु लिङ्गेषु समरूपता च ।
यूका पुंस्त्री० यू-किप् क । मत्कुणे (उकुण) स्त्रीत्वे टाप् ।
यूति स्त्री यु-क्तिन् नि० दीर्घः । मिश्रीकरणे ।
यूथ न० यु-थक् डुमो० दीर्घः । सजातीयसङ्घदाये अमरः ।
यूथनाथ पु० हृत० । वन्यगजादीनां प्रधाने अमरः । यूथपादयोऽप्यत्र ।
यूथिका स्त्री यु-थक् डुमो० दीर्घः स्वार्थे क अत इत्त्वम् टाप् । १चम्पानामे मेदि० २पाठायां राजनि० ३यूथ्याञ्च (युर) अमरः । [अमरः ।
यूथी स्त्री यु-थक् डुमो० दीर्घः ङीप् । (युर) पुष्पप्रधाने वृक्षे
यूप पुंन० यु-पक् डुमो० दीर्घः । १यज्ञीयपशुबन्धनकाष्ठभेदे तच्छब्दे यज्ञपात्रे दृश्यम् । यागसमाप्तिचिह्नार्थे २खड्गे च अमरः ३जयन्तस्थे पु० उणादिको० ।

यूपकटक पु० ६त०। यज्ञसमाप्तिसूचकककाष्ठस्य शिरःस्थे वलयाकारे काष्ठमये पदार्थे चषाले अमरः।

यूपदृ पु० यूपाय दृः प्रकृतिविकृतिभावात् ४त०। खदिरदण्डे यूपदृमादयोऽप्यत्र लिङ्गा०।

यूष बधे भ्वा० पर० सक० सेट्। यूषति अयूषीत् युयूष।

यूष पुंन० यूष-क। १सद्गादिक्वाथे अमरः।

"अष्टादशगुणे नीरे शमीधान्यप्रहोरसः। विरक्ताग्नेः घनः किञ्चित् पेयातो यूष उच्यते। लघुः स एव निर्यूषो रुचिकृच्च विशेषतः"। यूषस्य प्रकारान्तरमाह कल्कद्रव्यमं शुष्टीं पिप्पलीद्वार्द्रकार्द्धिकौ। वारिप्रस्थेन विपचेत्तद्यूषो यूष उच्यते"।

"यूषो बल्यो लघुः पाके रुच्यः कण्ठ्यः कफापहः"। अथ सद्यूषविधिः "सद्यानां द्विपलं तोये प्रतप्तमृढकोन्मिते। पादस्थं मर्दितं पूतं दाड़िमस्य पलेन तत्। युक्तं सैन्धवविश्वाढ्यधान्यकैः पादकांशिकैः। कणाजीरकयोश्चूर्णाभ्यामेकेनावचूर्णितम्। संस्कृतो सद्यूषोऽयं पित्तश्लेष्महरो मतः"। अथ तस्य गुणाः "सद्यानात्तत्क्षणो यूषो दीपनः शीतलो लघुः। ग्रहोर्ध्वजत्रुरुग्दाहकफपित्तज्वरास्रहृत्"। अथ सद्यमलकयूषगुणाः "सद्यामलकयूषस्तु भेदी पित्तानिलापहः। दाहदाहशमनः शीतो मूर्च्छाश्रमतृषापहः" भावप्र०। २ब्रह्मदारुवृक्षे पु० शब्दर०। [चक्षि न लुप्तः।

येष यत्ने भ्वा० आ० सक० सेट्। येषते अयेषिष्ट। कादित्

योक्त्र न० युज्यतेऽनेन यज-ष्ट्रन्। ईषादण्डादौ युगबन्धनार्थे दामनि (जोत) अमरः।

योग पु० युज-भावादौ घञ्। संयोगे १मेलने २उपाये ३सङ्गतिधारणे ४ध्याने ५युक्तौ च अमरः। "योगश्चित्तवृत्तिनिरोधः" इति पातञ्जलोक्ते ६सर्वविप्रकारेभ्योऽन्तःकरणवृत्तेर्निरोधे "संयोगं योगमित्याहुर्जीवात्मपरमात्मनोः" इत्युक्ते ७जीवात्मपरमात्मनोरैक्ये। ८अलभ्यार्थलाभचिन्तायाम् ९देहस्थैर्ये १०शब्दादीनां प्रयोगे ११भेषजे १२विश्वासघातके १३द्रव्ये कार्मणे च मेदि०। १४सङ्घातशब्दस्यावयवार्थसम्बन्धे "योगवर्णं समाख्या" इति मीमांसकाः। "योगः कर्मसु कौशलम्" इत्युक्ते १५यथास्थितवस्तुनोऽन्यथारूपप्रतिपादने यथा संसारबन्धहेतोरपि कर्मणोऽबन्धमोचहेतुत्वम्। १६ज्योतिषोक्तेषु रविचन्द्रयोगाधीनेषु विष्कुम्भादिषु सप्तविंशतौ पदार्थेषु। तिथिवारनक्षत्राद्याम् अन्यतरान्यतमानां १७सम्बन्धविशेषेषु सिद्धियोगः अमृतयोगः अर्कोदययोग इत्यादि। १८दक्षे च "योगाधमनविक्रीतमिति" स्मृतिः। १९नैयायिके २०धने हेमच० २१चारे २२सूत्रे त्रिका०। चित्तवृत्तिनिरोधरूपयोगश्च द्विविधः। राजयोगो लयोगश्च। तत्र राजयोगः पतञ्जलिनोक्तः। लयोगस्तु तन्त्रशास्त्रोक्तः। तस्य प्रकारान्तरेण त्रैविध्यम् भाग० ११।२० अ० उक्तं यथा "श्रीभगवानुवाच "योगास्त्रयो मया प्रोक्ता नृणां श्रेयो विधित्सया। ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित्। निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु। तेष्वनिर्विण्णचित्तानां कर्मयोगस्तु कामिनाम्। यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान्। न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः। तावत् कर्माणि कुर्वीत न निर्विद्येत यावता। मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते। स्वधर्मस्थो यजन् यज्ञैरनाशीःकाम उद्धव!। न याति स्वर्गनरकौ यद्यन्यत्र समाचरेत्। अस्मिँल्लोके वर्त्तमानः स्वधर्मस्थोऽनघः शुचिः। ज्ञानं विशुद्धमाप्नोति मद्भक्तिं वा यदृच्छया"। २२ज्योतिषोक्ते सम्यादिदृष्टविशेषे षड्भेदयोगे यथा राजयोगः नामसंयोग इत्यादि। यात्रायां यात्राचन्द्रात् केन्द्रत्रिकोणस्थिते बुधजीवशुक्राणामेकस्मिन् यथोक्तं स० चि० "एकोच्चेज्यस्थितेषु पञ्चमतपःकेन्द्रेषु योगसंज्ञा ह्यो चेत्तेष्वधियोग एषु सकला योगाधियोगः स्मृतः"। योगे क्षेममधाधियोगगमने "क्षेमं रिपूणां वधः"

योगक्षेम न० योगश्च क्षेमञ्च समाहारः द्व०। अलब्धलाभचिन्तासहिते लब्धपरिरक्षणे "योगक्षेमं वहाम्यहम्"

योगज न० योगात् जायते जन-ड। १अगुरुचन्दने भावप्र०। २योगजातमात्रे त्रि०। ३न्यायादुक्ते प्रत्यक्षसाधने अलौकिकसन्निकर्षभेदे पु०।

योगदान न० योगेन क्षेमेन उपधिना वा दानम्। "योगदानप्रतिग्रहम्" इति स्मृत्युक्ते सोपधिके दाने।

योगनिद्रा स्त्री योगरूपा निद्रा। प्रलये परमेश्वरस्य सर्वजीवसंहारेच्छया योगरूपे १व्यापारे "योगनिद्रामुपेयुषः" देवीभा० २तदधिष्ठात्र्यां दुर्गायाञ्च।

योगपट्ट न० योगाभ्यासार्थं पट्टम्। योगिध्यार्थे पट्टखण्डभेदे योगपट्टकमप्यत्र। "त्रिविधं योगपट्टकमादौ व्याघ्राजिनोद्भवम्। द्वितीयं मृगचर्मोद्भवं तृतीयं तन्तुनिर्मितम्। चतुर्मात्रविस्तारं दैर्घ्येण यज्ञसूत्रवत्" सिद्धान्तशेखरः। चतुर्मात्रं चतुरङ्गुलमात्रम् वीरमि०।

योगपीठ पुं न० योगयोग्यं पीठमासनम्। देवादीमासनभेदे
योगमाया स्त्री योग एव माया। भगवतो जगत्सर्जनार्थां शक्तौ "योगमायामुपाश्रितः" इति भाग० १० स्क० रासारम्भे तदधिष्ठात्र्यां २दुर्गायाञ्च।
योगरङ्ग पु० योगेन रङ्गोऽत्र। (नारङ्ग) जम्बीरभेदे राजनि०
योगरूढ़ पु० योगोऽवयवशक्तिः रूढ़िः समुदायशक्तिः एते स्तोऽस्य कच्। अवयवशक्त्या समुदायशक्त्या च अर्थबोधके पङ्कजशब्दादौ। तत्र हि उभयशक्त्या पङ्कजजन्यकर्त्तृत्वरूपावयवार्थविशिष्टपद्मत्वविशिष्टस्य बोधः। उभयार्थबोधनाच्च पङ्कजाते कुमुदादौ स्वजाते पद्मे च न तत्पदप्रयोगप्रसङ्गः।
योगरूढ़ि स्त्री योगेन सहिता रूढ़िः। शब्दस्य वृत्तिभेदे यथा पङ्कजनिकर्त्तृत्वविशिष्टपद्मस्य बोधः। [च ङेमच०।
योगवाहिन् पु० योगेन वहति वह-णिनि। १पारदे २क्षारभेदे
योगाचार पु० बौद्धभेदे तत्कृतग्रन्थे बुद्धशब्दे ४५८१ पृ० दृश्यम्
योगाधमन न० योगेन छलेनोपधिना वाऽऽधमनम्। सोपधिके छलेनैवके च वस्तुदाने। "योगाधमनविक्रीतम्" इति स्मृतिः।
योगारूढ़ पु० योगमारूढ़ः या+रुह-क्त। "यदा हि नेन्द्रियार्थेषु न कर्म्मस्वनुषज्जते। सर्वसंकल्पसन्न्यासी योगारूढ़स्तदोच्यते" इत्युक्ते योगिभेदे "योगारूढ़स्य तस्यैव शमः कारणमुच्यते" इति गीता।
योगासन न० योगार्थमासनम्। १योगशास्त्रोक्ते स्वस्तिकादौ आसनभेदे ङेमच०। "अथ योगासनं वक्ष्ये यत् कृत्वा योगिवल्लभेत्। जानौः पादतलद्वन्द्वं स्वाङ्के बद्धा करद्वयम्" इति रुद्रया० उक्ते २आसनभेदे च।
योगिन् त्रि० युज-घिनुण्। "आत्मौपम्येन सर्व्वत्र समं पश्यति योऽर्জ্জुनः। सुखं वा यदि वा दुःखं स योगी परमो मतः" गीतादुक्तयोगयुक्ते २संयोगवति च त्रि० स्त्रियां ङीप्। सा च तत्र २दुर्गायां ४तच्छक्तिभेदेषु अक्षोभ्यादिषु चतुःषष्टिप्रकारेषु देवताप्रतिमाशब्दे ३६६५ पृ० दृश्यम्। "प्रतिपच्चथमी पूर्वे रामरुद्रौ च पावके। चरत्नयोदशी याम्ये वेदमासौ च नैर्ऋते। षष्ठी चतुर्दशी पश्चात् वायव्यां मुनिपूर्णिमे। द्वितीया दशमी चैव ऐशान्यां चाष्टमी कुजः" इत्युक्तेषु पूर्वादिदिग्भेदाद् ५तिथिभेदेषु तत्फलं वामे शुभकरी प्रोक्ता पृष्ठे सर्व्वार्थसाधिनी" ज्यो० त०। आवश्यकत्वे यामार्द्धभेदे तस्याः शुभत्वं समयान्तरे उक्तं यथा "वस्यां दिग्द्वयं याति ततो यामार्द्धमुच्यते। अमली तेन मार्गेण भवेत्तत्कालयोगिनी। तेन "प्राचीधनेश्वरछत्राशनकौणपेवायव्यवारुणयमाधिपशङ्करेषु। एषु क्रमाद्विंशति प्रतिपच्चतुर्थ्योः पृष्ठे स्थिता शुभकरी गिरिराजपुत्री"। ६मङ्गलापिङ्गलादिदशाभेदे च दशाशब्दे ३४८४ पृ० दृश्यम्। [२दुर्गायां स्त्री ङीप्।
योगीश्वर पु० ६त०। १यात्तवल्क्यमुनौ २योगिनां श्रेष्ठे च।
योगीश्वर पु० ६त०। १श्रीकृष्णे "योगेश्वर! ततो मे त्वं दर्शयात्मानमव्ययम्" गीता। २दुर्गायां च ३वन्ध्याकर्कोट्यां स्त्री भावप्र० ङीप्।
योगीष्ट न० योगाय योजनार्थमिष्टम्। सीसके अमरः।
योग्य त्रि० योगमर्हति यत् युज-ण्यत् वा। १योगार्हे २उचिते ३निपुणे ४शक्ते च। ५पुष्यनक्षत्रे पु० मेदि०। ६वत्सनाभौषधे न० अमरः।
योग्यता स्त्री योग्यस्य भावः तल्। १सामर्थ्ये २शाब्दबोधसाधने "पदार्थे तत्र तदता योग्यता परिकीर्त्तिता" भाषा० उक्ते ३तत्पदार्थे तत्पदार्थवत्तारूपे ४परस्परान्वये बाधाभावरूपे वार्थे च।
योग्या स्त्री योगमर्हति यत् युज-ण्यत् वा कृत्वम्। १लभ्यायै स्वर्थस्त्रियाञ्च मेदि० २शास्त्राभ्यासे ङेमच०।
योग्यानुपलब्धि स्त्री योग्यस्य प्रत्यक्षादिना उपलब्धुमर्हस्यानुपलब्धिरज्ञानम्। न्यायादुक्ते अभावप्रमाणके साधनभेदे। तथाहि घटादिसत्त्वे तत्र घटाभावो नानुपलभ्यते तस्य प्रतियोगिनो घटादेः सत्त्वेन तत्प्रत्यक्षकारणसामग्र्यसत्त्वेन तत्प्रत्यक्षाभावात् किन्तु घटाद्याभावो मन्यते पिशाचाद्यभावस्तु न प्रत्यक्षता तत्प्रतियोगिपिशाचादेर्दर्शनायोग्यत्वात्। वेदान्तिमते इयं प्रमाणान्तरम् वेदान्तप० ६प०।
योजन न० युज-भावादौ ल्युट्। १संयोगे णिच-ल्युट्। २संयोगकरणे। ३चतुर्षु क्रोशेषु। "स्याद् योजनं क्रोशचतुष्टयेन" "प्रथममगमदङ्गा योजने योजनेशः" इति च लीला०। ४परमात्मनि च मेदि०। ५चक्रुकौ णिच०। युज-णिच-युच्। यस्याश्च यत्तान्वयः तद्वाचकशब्दस्य तदाचकशब्देन ६व्यासत्तिसम्पादने स्त्री।
योजनगन्धा स्त्री योजनं व्याप्य गन्धो यस्याः। १कस्तूर्याम् २सीतायां ३व्यासमातरि सत्यवत्याच मेदि०। स्वार्थे कप् अत इत्त्वम् तत्रैवार्थे। [त्वात्। मल्लिकायाम् रत्नमा०।
योजनपर्णी स्त्री योजनं व्याप्य पर्णान्यस्याः विस्तीर्णपर्ण-

योजनवल्ली स्त्री योजनं व्याप्य वल्लीव । सञ्ज्ञायामू अमरः स्वार्थे क ह्रस्वः टाप् । तत्रैव राजनि० ।

योटक त्रि० युट-ण्वुल् । १मेलके विश्वप्रकाशः २४८८ पृ० दशमूलः ।

योत्र न० यु-ष्ट्रन् । योक्ते (योत) अमरः ।

योद्धृ पु० युध-तृच् । युद्धकर्त्तरि अमरः । [२युद्धे ।

योध पु० युध-अच् । १युद्धकारके अमरः । भावे घञ् ।

योधन न० युध-भावे ल्युट् ।१युद्धे । करणे ल्युट् ।२अस्त्राद्यायुधे । कर्त्तरि ल्यु । ३युद्धकर्त्तरि पु० ।

योधनसंराव पु० योधनस्य युद्धाय संरावः आह्वानम् ६तत्पु० ६तत्० । योधानां युद्धार्थं परस्पराह्वाने अमरः ।

योनल पु० यवस्य नल इव काण्डोऽस्य पृषो० उत्त्वम् । (देधान) शस्यभेदे हेमच० ।

योनि पुंस्त्री० यु-नि । १मनुष्यादीनामुत्पत्तिस्थाने आकरे मेदि० । २कारणे ३जले हेम० । ४स्त्रीणामसाधारणचिह्ने अमरः । ५तद्देवताके पूर्वफल्गुनीनक्षत्रे ज्यो० । स्त्रीत्वे वा ङीप् । ६उत्पत्तिस्थानमात्रे त्रिका० ।

योनिज न० योनिस्थानात् जायते जन-ड । देहभेदे १जरायुजे २अण्डजे च देहे ।

योनिमुद्रा स्त्री योन्याकारा मुद्रा । तन्त्रोक्ते देवताविशेषपूजाङ्गे प्रदर्शनीये अङ्गुलीसन्निवेशविशेषे तल्लक्षणन्तु "मिथः कनिष्ठिके बद्ध्वा तर्जनीभ्यामनामिके । अनामिकोर्ध्वसंश्लिष्टे दीर्घमध्यमयोरधः । अङ्गुष्ठाग्रद्वयं न्यस्य योनिमुद्रेयमीरिता" तन्त्रसा० । २मूलबन्धरूपे योनेर्बन्धभेदे तल्लक्षणञ्च पदार्थादर्शे "पार्ष्णिभागेन संपीड्य योनिमार्गं तथा गुदम् । अपानमूर्ध्वमाकृष्य मूलबन्धो निगद्यते । गुदमेढ्रान्तरं योनिस्तामाकुञ्च्य प्रबन्धयेत् । युवा भवति हृद्रोऽपि सततं मूलबन्धनात्" । (योनिस्थानसङ्कोचात् योनिमुद्रात्वमस्याः) "सेयं मयोक्ता खलु योनिमुद्रा बन्धश्च देवैरपि दुर्लभोऽस्य । अनेन बन्धेन न बाध्यते यत्तस्मात्स्म तत्साधकपुङ्गवस्य" ।

योनिरोग पु० ६त० । षोडशविधे भगरोगभेदे "उदावर्त्ता तथा बन्ध्या२विप्लुता३च परिप्लुता४। वातलाः५ योनिजो रोगो वातदोषेण षड्विधा । षड्विधा पित्तदोषेण तस्यादौ लोहितार्त्तरा६। प्रस्खलिनी७ वामनी८च पुत्रघ्नी९ पित्तलाः१०तथा । अत्यानन्दा११ कर्णिनी१२ च चरणा१३नन्दसूचिका१४। अष्टमूर्त्तीपि५सा ज्ञेया श्लेष्मला५च कफादिमाः। अण्डघ्नीषिणी१। २ च विप्लुता३ सूचीवक्त्रा४ त्रिदोषिणी५। षड्वैता योनयः प्रोक्ताः सर्वदोषप्रकोपतः" । अथ तासां लक्षणान्याह "सकृन्निःसृदावर्त्ता रजः क्लेशेन मुञ्चति। बन्ध्या२ निरार्त्तवा ज्ञेया विप्लुता३ निष्फलेदना । परिप्लुतायां४ भवति व्याध्यधर्मे त्वरा भृशम् । वातलाः५ कर्कशाक्ष्याम्लूनिस्तोदपीड़िता । चतस्रोऽपि चाद्याश्च भवन्त्यनिष्फलेदनाः" । अनिष्फलेदनास्तोदादयः वातलायां त्वति वातवेदना बोद्धव्या वातलेत्यन्वयात् । "यदाक्तं चरते रक्तं यस्याः सा लोहितार्त्तरा । प्रस्खलिनी२ संस्रते च लोहिता दुष्प्रजायिनी" । "लोहिता विमर्दिता संस्रते स्वस्थानाच्चरते दुष्प्रजायिनी दुष्टप्रजननशीला । सतत रुद्विरेदौष्ठ्यं वामनी२ रजसा युतम् । स्रवति हि पातयेद्गर्भं पुत्रघ्नी३ रक्तसंस्रवात्" । पुत्रशब्दोऽत्रापत्योपलक्षकः । "अत्यर्थं पित्तलाः५योनिर्दाहपाकज्वरान्विता । चतस्रोऽपि चाद्यास्तु पित्तलिङ्गोच्छ्रयो भवेत्" । अत्यानन्दा१न सम्यगर्थं व्याध्यधर्मञ्च विन्दति । कर्णिन्यां२कर्णिका योनौ श्लेष्मासृग्भ्यां प्रजायते" । कर्णिका मांसस्य कर्णिकाकारोन्नतिः । "मैथुने चरणा३पूर्वं दुरुद्यादतिरिच्यते । अतिरिच्यते रजोरुद्धतीत्यर्थः । वङ्क्षणयोरतिचरणा४ तयोर्वीर्यं न तिष्ठति" । वङ्क्षणः वारंवारमतिरिच्यते तयोः चरणातिचरणयोः । "श्लेष्मला५पिच्छला योनिः कण्डूयुक्तातिशीतला । चतस्रोऽपि चाद्यास्तु श्लेष्मलिङ्गोच्छ्रयो भवेत् । अनार्त्तवाऽस्रजी प्रस्रुग्दा खरस्पर्शा च मैथुने" । अस्रजी ईषदस्रजो यस्याः सा अत्र स्रुग्दा प्रस्रुग्दा । महामेढ्रमटकीनायां बालायां अण्डिन्यी२ भवेत् । महामेढ्रः दुरुद्यस्तेन पटकीनायाः बालायाः सूक्ष्मयोनिच्छिद्रायाः । अण्डिन्यी२ अण्डवस्तुभ्रममाना योनिर्भवति" । विप्लुतां सूचीवक्त्रामाह "विप्लुता३ च महायोनिः सूचीवक्त्रातिसंस्रुता । त्रिदोषजामाह सर्वलिङ्गसमन्वितां सर्वदोषप्रकोपजम् । चतस्रोऽपि चाद्यास्तु सर्वलिङ्गनिदर्शनम्" । अथासाध्या योनिमाह । "पञ्चासाध्या भवन्तीह योनयः सर्वदोषजाः । पञ्च प्रस्रुतयः' अथ योनिकन्दस्य निदानमाह । "दिवास्वप्नादतिक्रोधात् व्यायामादतिमैथुनात् । चताश्च नखदन्ताद्यैर्वाताद्याः कुपिता यदा" । यदास्रनिदानं कुपिता वातादयः । रूपमाह "पूयशोणितसङ्काशं शुक्तकाञ्जतिसन्निभम् । दारयन्ति यदा योनौ नाड्या कन्दः स योनिजः" । शुक्तकाञ्जतिसन्निभं शुक्तकाकारं शुक्तकमत्र विशेष्यं बोध्यम्" । वातजादिभेदेन रूपमाह । "रूक्षं विवर्णं स्फुटितं वातिकं तं विनिर्दिशेत् । दाहरागम-

ज्वरयुतं विद्यात्पित्तात्मकं त्रितम्। तिलपुष्पप्रतीकाशं कण्डूमन्तं कफात्मकम्। सर्वलिङ्गसमायुक्तं सन्निपातात्मकं वदेत्"।

योषा स्त्री युष-कञ् टाप्। स्त्रियाम् नाट्याम् अमरः।

योषित् स्त्री युष-इति। नाट्याम् अमरः। कृदिकारादिति टाप्। योषिताप्यत्र शब्दर०। [प्रियमाले त्रि०।

योषित्प्रिया स्त्री ६त०। १हरिद्रायां भावप्र०। २नारी-

यौक्तिक त्रि० युक्तित आगतः ठक्। १युक्तिसिद्धे २योग्ये च। युक्तौ अधिकृतः ठक्। ३मन्त्रविचिवे पु० शब्दर०।

यौगिक त्रि० योगात् प्रकृतिप्रत्ययार्थसम्बन्धात् आगतः ठक्। प्रकृतिप्रत्ययलभ्यार्थवाचके शब्दे यथा पाचकादिशब्दः पाककर्त्रादिवाचकः। योगाय प्रभवति ठक्। २योगयोग्ये

यौट संबन्धे भ्वा० पर० सक० सेट्। यौटति अयौटीत्। कदित् चङि न हस्वः।

यौड़ यौटवत् सर्वम्। यौड़ति अयौड़ीत् कदित्।

यौतक न० युते विवाहकालेऽधिगतम् वुञ्। विवाहकाले लब्धे धने हेमा०। इति दायभागानुसारिणः। वीरमि० तु "यु मिश्रणे इति धात्वनुसारात् विवाहकाले एकासनोपविष्टयोर्वधूवरयोर्यद् बन्धुभिर्दीयते तद्युतयोरिदं यौतकमिति व्युत्पत्त्या यौतकमित्युच्यते" इत्युक्तम् अत एव निघण्टौ युतयोर्यौतकमित्युक्तम्। अन्ये तु विवाहे स्त्रीपुंसावेकशरीरतया मिश्रितौ भवत इति "अस्थिभिरस्थीनि मांसैर्मांसानि" इत्यादिन्यायात् तयोक्तेः विवाहेन युतयोरिदम्" इत्याहुः। वस्तुतः विवाहकालोत्तरमेकासनोपविष्टयोरेव दत्तं धनं यौतकं लोकसिद्धं वीरमि०उक्तं साधीयः। "मातुश्च यौतकं यत् स्यात् कुमारी भाग एव सः" मनुः।

यौतव न० युवन् + तल् योद्वः तस्य भावः अण् ।।परिणामे अमरः।

यौतुक न० योतुर्यौनकालस्तत्र लब्धं कञ्। विवाहकाले लब्धे धने यौतकशब्दे दृश्यम्।

यौधाजय न० जङ्गले १प्र० दर्शिते ग्रामभेदे "रौरवयौधाजये वार्क्षते भवतः" श्रुतिः।

यौधेय पु० योध एव आयुधजीविसंघत्वात् स्वार्थे ढक्। १योद्धरि। २क्षत्रियस्त्रीदेवभेदे पु० ङी० स० १३ अ०। युधायाः अपत्यम् "इञ्चः" पा०ढक्। २युधाया अपत्ये। ततः स्वार्थे अञ् शार्ङ्गर० स्त्रियां ङीप्। यौधेयी।

यौन त्रि० योनितः योनिसम्बन्धात् आगतम् अण्। १योनितः प्राप्ते। योनेरयमण्। २वैवाहिकसम्बन्धे पु०।

प्रा० वि० बौधायनः "संवत्सरेण पतति पतितेन सहाचरन्। याजनाध्यापनाद् यौनात् सद्यो हि पतनात्स्मृतः"। सुमन्तुः "यश्चैतैर्यौनसौख्यादीनां सम्बन्धानामन्यतमेन सह सम्पर्कमियात् तस्याप्येतदेव प्रायश्चित्तं विदध्यादिति"।

यौवत न० युवतीनां समूहः अण्। युवतिसमूहादौ अमरः।

यौवन न० यूनो भावः अण्। १तारुण्ये "आ षोडशाद् भवेद् बालस्तरुणस्तत उच्यते। ऊर्ध्वं त्रिंशत्स्मृतो वृद्धः" इत्युक्ते २अवस्थाभेदे। [षोडा]ब्रह्मभेदे शब्दमा०

यौवनकण्टक पुंन० यौवनस्य कण्टक इव चिह्नम्। (वयस्

यौवनदशा स्त्री कर्म०। तारुण्ये अवस्थाभेदे।

यौवनलक्षण न० ६त०। १स्तने २तारुण्ये च भेदि०।

यौष्माक त्रि० युष्माकमिदम् युष्मद्+अण् युष्माकादेशः। युष्मत्सम्बन्धिनि। खञ्। यौष्माकीनोऽप्यत्र त्रि०।

इति यौतारानाथतर्कवाचस्पतिभट्टाचार्य्य सङ्कलिते वाचस्पत्ये यकारादि-शब्दार्थसङ्कलनम्।

र

रकारः व्यञ्जनवर्णभेदः सर्यवर्णोष्मवर्णयोर्मध्यस्थत्वात् अन्तःस्थवर्णः। अस्योच्चारणस्थानं मूर्द्धा। जिह्वाग्रेण मूर्द्धस्थानस्पर्शेनोच्चारणादस्य आभ्यन्तरप्रयत्नः ईषत्स्पृष्टम्। बाह्यप्रयत्नाश्च संवारनादघोषा अल्पप्राणश्च। वर्णाभिधाने अस्य वाचकशब्दा उक्ता यथा "रो रक्तः क्रोधिनी रेफः पावकस्तेजसो मतः। प्रकाशो दर्शनो दीप्तो रततृष्णा परं वसौ। भुजङ्गेशो मतिः स्वर्गौ धातू रक्तप्रकाशकः। व्यापको रेवती दानं दृष्टांसो वह्निमण्डलम्। वयवेगा स्थूलदण्डो वेदकर्णोपलाम्बरा। प्रकृतिः शुक्लो ब्रह्मशब्दश्च गायको घनः। श्रीकण्ठ जम्भा हृदयं तण्डी त्रिपुरसुन्दरी। सविन्दुर्योनिजो ज्वाला श्रीबैजो विश्वतोमुखी"। अस्य ध्येयरूपं यथा "रेफन्तु चक्षुषापाङ्गि! कृष्णजीवयसंयुतम्। रक्तविद्युल्लताकारं पञ्चदेवात्मकं सदा। पञ्चप्राणमयं वर्णं

त्रिबिन्दुसहितं सदा" कामधेनुत०। "अस्याधिष्ठात्रदेवतारूपं यथा "सकलिङ्कां मङ्गारौद्रीं रक्तास्यां रक्तलोचनाम्। रक्तवर्णामष्टभुजां रक्तपुष्पोपशोभिताम्। रक्तमाल्याम्बरधरां रक्तालङ्कारभूषिताम्। मङ्गामोक्षप्रदां नित्यामष्टसिद्धिप्रदायिकाम्। एवं ध्यात्वा मन्त्ररूपां तन्मन्त्रं दशधा जपेत्"। मालतीमाधवेऽस्य दशांशे न्यासता। काव्यादौ प्रयोगे "रक्षु दाहम्" इ० र० टीकोक्तेः दाहः फलम्।

र पु० रा-ड।१वह्नौ २दग्धे मेदि०। ३कामानले च शब्दर०। ४छन्दःशास्त्रप्रसिद्धे लघुमध्ये वर्णान्तरयुक्ते रगणे काव्यादौ तस्य प्रथमप्रयोगे मरणं फलम् अस्य देवताऽग्निः।

रंह् गतौ वेद० चु० उभ० सक० सेट्। रंहयति ते अरंहत् त।

रंहस् न० रंह्-असुन्। वेगे अमरः। [शरीरकृत त

रक् खादे प्राप्तौ च चु० उभ० सक० सेट्। राकयति-ते

रक्त न० रञ्ज-करणे क्त। १कुङ्कुमे २ताम्रे ३प्राचीनामलके मेदि०। ४सिन्दूरे ५हिङ्गुले ६पद्मके राजनि०। ७शरीरस्थे रसपाकजन्ये मांसधेतौ रुधिराख्ये धातुभेदे अमरः। ८कुसुम्भे ९हिङ्गुले १०रोहितवर्षे च पु० ११तद्वति त्रि०अमरः। १२पराग कर्त्तरि क्त। १३अनुरक्ते मेदि० १४क्रीडारते च भरतः। कर्मणि क्त। १५नीलादिभीरञ्जिते त्रि०। करणे क्त। १६मञ्जिष्ठायां १७लाक्षायां १८गुञ्जावाञ्च स्त्री राजनि०टाप्। भावे क्त। २०रागे न०। धातुभेदरक्तस्वरूपादिकं भावप्र० उक्तं यथा "यदा रक्तो बलद्व्याति तत्र रक्तप्रवित्ततः। रागं मांसं च संग्राह्य स भवेद्रक्तसंग्रकः। रक्तं सर्वशरीरस्थं जीवस्याधारसत्तमम्। स्निग्धं गुरु सरं स्वादु विदग्धं पित्तवद्भवेत्"। जीवस्याधारसत्तममिति, यत आह। "जीवो वसति सर्वस्मिन्देहे तत्र विशेषतः। वीर्ये रक्ते मले यस्मिन् वीर्ये वातिं सर्वं सर्वादिति"। वीर्ये रक्ते मले च शरीरारम्भके वाग्भटोक्तपरिमाणमिते सुस्थे जीवो वसति न तु दुष्टे प्रदुष्टे रक्तस्रावोपदेशस्य वैयर्थ्यप्रसङ्गात्। पित्तवद्भवेत् अम्लवद्भवेदित्यर्थः। अथ रक्तस्य स्थानमाह "यकृत् प्लीहा च रक्तस्य सङ्घस्थानमुत्तमौ। स्थितम्। अन्यत्र संस्थितवतां रक्तानां मोक्षकं भवेत्"। अष्टकरभन्धे ५५६ पृ० द्रष्टव्यम्।

रक्तक पु० रक्तं रुधिरमिव कायति कै-क स्वार्थे कन् वा। १कङ्कोलवृक्षे २वन्धूकवृक्षे मेदि०। ३रक्तशोभाञ्जने ४रक्तैरण्डे च राजनि०। ५रुधिरे ६रक्तवस्त्रे च न०। ७अनुरागिणि मेदि० ८विनोदिनि च त्रि०।

रक्तकन्द पु० रक्तवर्णः कन्दोऽस्य। १विद्रुमे प्रवाले हेमच० २रक्तालौ ३रक्तपलाण्डौ च राजनि०।

रक्तकमल न० रक्तं कमलमिव। रक्तवर्णोत्पले राजनि०। ष्ठीप०। रक्तकमलमस्यास्त्र न०। [स्वार्थे क तत्रार्थे।

रक्तकरवीर पु० कर्म०। रक्तवर्णपुष्पकरवीरवृक्षे राजनि०

रक्तकाञ्चन पु० कर्म०। रक्तवर्णपुष्पकाञ्चनवृक्षे शब्दच०।

रक्तकाण्डा स्त्री रक्तः काण्डोऽस्याः। रक्तपुनर्नवायाम् राजनि०। [कैरवरक्तकोकनदे अमर न० जटा०।

रक्तकुमुद न० कर्म०। १रक्तवर्णपुष्पकैरवे जटा०। २रक्तरक्तकुसुम पु० रक्तानि कुसुमान्यस्य। पारिभद्रे (पाडदामादार) राजनि०। [२पुन्नागवृक्षे च रत्नमा०।

रक्तकेसर पु० रक्ताः केसरा यस्य। १पारिभद्रे राजनि०।

रक्तखदिर पु० सारतो रक्तवर्णः खदिरः। रक्तवर्णसारके खदिरवृक्षे राजनि०।

रक्तगन्धक न० रक्तेन गन्धकमिव। धोके (गन्धरस) राजनि०

रक्तघ्न पु० रक्तं हन्ति हन-टक्। २रोहितकवृक्षे जटा०। २दूर्वायां स्त्री शब्दच०।

रक्तचन्दन न० कर्म०। स्वनामख्याते चन्दनभेदे अमरः। "रक्तं (चन्दनम्) शीतं गुरु स्वादु हर्दितृष्णास्रपित्तहृत्। पित्तनेत्रहितं दृष्यं ज्वरत्रयविषापहम्" भावप्र०

रक्तचित्रक न० कर्म०। (लालचिता) लूतभेदे राजनि०।

रक्तचूर्ण न० कर्म०। १सिन्दूरे हारा० २रक्तवर्णचूर्णमात्रे च

रक्तझिण्टी स्त्री कर्म०। (लालझाटि) पुष्पप्रधानवृक्षभेदे अमरः।

रक्ततण्डुल पु० रक्तं तण्डुलमस्य। १शुकपक्षिणि राजनि०। २रक्ततण्डुलके त्रि० कप्। रक्ततण्डुलक मूनागे राजनि०।

रक्ततृणा स्त्री रक्तं तृणं यस्याः। गोभूम्निकायाम् राजनि०

रक्तत्रिवृत् (ता) स्त्री कर्म०।(लालतेओडि) वृक्षभेदे राजनि०

रक्तदन्तिका स्त्री रक्ता दन्ता अस्याः कप् अत इत्त्वम्। दाडिमीवृक्षे दुर्गाशक्तिभेदे "भक्षयन्त्याश्च तानुग्रान् वैप्रचित्तान् महासुरान्। रक्ता दन्ता भविष्यन्तीति°उपक्रमे" ततो मां देवताः सर्वे मर्त्यलोके च मानवाः। स्तुवन्तो व्याहरिष्यन्ति सततं रक्तदन्तिकाम्" देवीमा०। इति तन्नामनिरुक्तिः। [राजनि०।

रक्तदला स्त्री रक्तानि दलान्यस्याः। नाडिकायाम् (नालते)

रक्तदृश् पु० रक्ता दृक् नेत्रमस्य। कपोते। रक्तनेत्रादयोऽप्यत्र

रक्तधातु पु० कर्म०। गैरिके त्रिका०। २ताम्रे च राजनि० देहस्थे रुधिररूपे रसधातुजाते मांसधातुहेतौ ३धातुभेदे च अष्टकारयज्ञे ५१६ पृ० दृश्यम्।

रक्तनाल पु० रक्तो नालोऽस्य। जीवशाके राजनि०।

रक्तप पुंस्त्री० रक्तं पिबति पा-क। १राक्षसे भेदि०। स्त्रियां ङीप्। २रक्तपानकर्त्तरि त्रि०। ३जलौकायां ४डाकिन्यान्तु स्त्री भेदि० टाप्।

रक्तपत्रिका स्त्री रक्तानि पत्राण्यस्याः कप् अत इत्त्वम्। १नाकुल्यां २रक्तपुनर्नवायान्तु राजनि०।

रक्तपल्लव पु० द्व०। १अशोकवृक्षे राजनि०। कर्म०। २रक्तवर्णपल्लवे त्रि०। [राजनि०।

रक्तपाकी स्त्री रक्तः पाकः फलं यस्याः ङीप्। इक्ष्वाम्

रक्तपाद पु० द्व०। १शुकपक्षिणि हेमच०। २खञ्जनौ लतायां २हंसपद्याञ्च स्त्री राजनि० ङीप् पक्षेवच।

रक्तपायिनी स्त्री रक्तं पातुं शीलमस्याः पा+णिनि ङीप्। जलौकायाम् (जोंक) राजनि०।

रक्तपारद न० कर्म०। द्विद्रुते क्षारा०। तत्रार्द्धे पु० जटा०।

रक्तपित्त न० रोगभेदे। तल्लक्षणादिकं भावप्र० उक्तं यथा "धर्मव्यायामशोकाध्वव्यवायैरतिसेवितैः। तीक्ष्णोष्णक्षारलवणैरम्लैः कटुभिरेव च। पित्तं विदग्धं लघुभिर्विदह्यात्तु शोणितम्"। तीक्ष्णं मरिचादि। उष्णमग्न्यादि। क्षारोयवक्षारादिः। विदग्धं लघुभिः क्षारैः गुरुभिस्तीक्ष्णादिभिः। गुरुभिरिति बहुत्वेन तीक्ष्णक्षारलवणकटूष्णधर्म्मादयो गृह्यन्ते विदह्यति दूष्यति। अथ रक्तपित्तस्य सामान्यं लक्षणमाह "ततः प्रवर्त्तते रक्तमूर्द्धाधो द्विधाऽपि वा"। अत्र रक्तमित्युपलक्षणम्। 'तेन संसृष्टं पित्तञ्च। अतएव रक्तञ्च पित्तञ्च रक्तपित्तमिति द्वन्द्व इति सुश्रुतः। रक्तञ्च तत् पित्तं चेति रक्तपित्तं रागप्राग्रं पित्तं रक्तमित्युच्यते रक्तं पित्तं कर्मधारय इति चरकः। उभयथापि न दोषः कारणत्रयात्। कारणत्रयमाह "संयोगात् दूषणात् तन्तु सामान्यात् गन्धवर्णयोः। रक्तञ्च पित्तमाख्यातं रक्तपित्तं मनीषिभिः"। मार्गानाह "ऊर्द्धं नासाक्षिकर्णास्यैर्मेढ्योनिगुदैरधः। कुपितं रोमकूपैश्च सकृत्तत्प्रवर्त्तते"। कुपितं पित्तम्। पूर्वरूपमाह "सदनं शीतकामित्वं कण्ठधूमायनं वमिः। क्षोद्गन्धिश्च निश्वासो भवत्यस्मिन् भविष्यति"। "विशिष्टरूपमाह "सान्द्रं सपाण्डु सश्लेष्मं पिच्छिलं च कफान्वितम्"। वातिकमाह "श्यावारुणं सफेनञ्च तनु रूक्षञ्च वातिकम्"। पैत्तिकमाह "रक्तपित्तं कषायाभं कृष्णं गोमूत्रसन्निभम्। मेचकाङ्गारधूमाभमञ्जनाभञ्च पैत्तिकम्"। मेचकम् चिक्कणं कृष्णवर्णम्। अञ्जनं स्रोतोञ्जनं तदाभम्। संसर्गविशेषेण मार्गभेदमाह "संसृष्टं लिङ्गसंसर्गादुभिलिङ्गं सान्निपातिकम्। ऊर्ध्वगं कफसंसृष्टमधोगं मारुतानुगम्। द्विमार्गं कफवाताभ्यामुभाभ्यां तत् प्रवर्त्तते"। उपद्रवानाह "दौर्ब्बल्यं श्वासकासज्वरमधुमदाः पाण्डुतादाहमूर्च्छा भुक्ते घोरोविदाहस्तृष्टतिरपि सदा हृद्यतल्या च पीड़ा। तृष्णा कोष्ठस्य भेदः शिरसि च तपनं पूयनिष्ठीवनञ्च ह्येषो भक्तेऽविपाको विकृतिरपि भवेदुल्लसिप्तोपसर्गाः"। विकृतिः मांसप्रक्षालनाभतादिः। साध्यादिकमाह "एकदोषानुगं साध्यं द्विदोषात् याप्यमुच्यते। त्रिदोषमसाध्यं स्यान्नवान्नेरतिवेगवत्। अर्द्धं साध्यमधो याप्यमसाध्यं युगपद्गतम्। व्याधिभिः क्षीणदेहस्य दुरुद्धाऽनशनस्तु यत्"। अथ साध्यमाह "एकमार्गं बलवतो नातिवेगं नवोत्थितम्। रक्तपित्तं सुखे काले साध्यं स्यादविपद्गवम्"। सुखे काले हिमशिशिरयोः। असाध्यमाह "मांसप्रक्षालनाभं क्षपितमिव च यत्पक्वमांसोनिभं वा मेदःपूयाक्षकल्यं बदरदव यदि वा पक्वजम्बूफलाभम्। यत् कृष्णं यच्च नीलं भ्रमपि कृष्णं यत्र चोक्ता विकारास्तदर्द्धं रक्तपित्तं सुरपतिधनुषा यच्च तुल्यं विभाति"। उक्ता विकारा दौर्ब्बल्यादयः। सुरपतिधनुषा तुल्यं नानावर्णम्। "येन चोपद्रुतो रक्तं रक्तपित्तेन मानवः। पश्येद्दुःखं वियच्चापि तदसाध्यमसंशयम्"। येन रक्तपित्तेनोपद्रुतः मनुष्यः दुःखं घटपटादिकं रक्तं पश्यति स नश्यति वियच्चापि कृष्णमपीत्यर्थः। अपरिहृतमाह। "लोहितं कृष्णवेद्यासु बस्तिषु लोहितेक्षणः। लोहितोद्गारदर्शी च क्षिप्यते रक्तपैत्तिकः"। लोहितोद्गारदर्शी व्याधिमहिन्नोद्गारमपि लोहितं पश्यतीत्यर्थः"।

रक्तपुष्प न० कर्म०। १रक्ते कुसुमे रक्तं पुष्पमस्य। २करवीरे जटा० ३रोहितकवृक्षे ४रक्तकाञ्चनवृक्षे ५दाड़िमवृक्षे ६रक्तबकवृक्षे रक्तमा० ७बन्धूकवृक्षे ८पुन्नागवृक्षे च राजनि० ९शाल्मलीवृक्षे स्त्री जटा० टाप्। रक्तपुष्पक पलाशवृक्षे रोहितकवृक्षे च जटा०। पर्पटे शाल्मलिवृक्षे च राजनि०

रक्तपुष्पिका स्त्री रक्तानि पुष्पाणि यस्याः कप् अत इत्त्वम्। १खञ्जनलतायाम् शब्दच० २रक्तपुन-

नैवायाम् १भूमिपाटल्यौ च राजनिघण्टुः ।

रक्तपुष्पी स्त्री रक्तानि पुष्पाण्यस्याः ङीप् । १पाटलिवृक्षे (पारुल) २व्रजायाम् ३वार्त्ताकीलतायाम् ४नागदमन्याम् ५करवीरवृक्षे ६पद्मकाष्ठायां च राजनि० ।

रक्तपूरक न० रक्तं रुधिरं पूरयति सेवनात् पूर-ण्वुल् । ह्रस्वश्च राजनि० । [स्थाने च राजनि० ।

रक्तप्रसव पु० रक्तवर्णः प्रसवः पुष्पमस्य । १करवीरे २रक्तपुष्पे

रक्तफल्ल पु० रक्तानि फल्लान्यस्य । १वटवृक्षे जटा० । २विम्बिकायां (तेलाकुचा) स्त्री अमरः टाप् ।

रक्तबालुक न० कर्म० । सिन्दूरे त्रिका० रक्तबालुकाप्यत्र स्त्री

रक्तमञ्जर पु० रक्तवर्णो मञ्जरी अस्यस्य अच् । निचुलवृक्षे त्रिका० । [राजनि० ।

रक्तमूला स्त्री ह्रस्वः, लघ्वालुलतायाम् । कप् । देवसर्षपे पु०

रक्तमेह पु० कर्म० । प्रमेहरोगभेदे "विस्रसृग्यं सलवणं रक्ताभं रक्तमेहतः" भावप्र० ।

रक्तमोक्षण न० ह्रस्वः । रुधिरस्रावणे ।

"वेदनोपशमार्थाय तथाऽपाकशमाय च । व्यचिरोत् प्रसृते शोथे शोणितस्रावमाचरेत्" । चरेत् कुर्य्यात् ।

"एकतस्तु क्रियाः सर्वा रक्तमोक्षणमेकतः । रक्तं हि वेदनामूलं तच्चेन्नास्ति नचापि रुक् । विषमे कठिने स्थाने व्रणे चात्यन्तवेदने । सविशेषे विशेषेण जलौकोभिः पदैरपि" । शोणितस्रावमाचरेदित्यनेनान्वयः" भावप्र०

रक्तयष्टि स्त्री रक्तवर्णा यष्टिरस्याः । मञ्जिष्ठायाम् जटा० । कप् । रक्तयष्टिका तत्रैव ।

रक्तरेणु पु० रक्ता रेणवोऽस्य । १पद्माख्यकलिकायाम् २सिन्दूरे च मेदि० ३पद्मागे राजनि० ।

रक्तलशुन न० कर्म० । (लालरशुन) मूलभेदे राजनि० ।

रक्तलता स्त्री रक्तं रुधिरं हेतुत्वेनास्त्यस्याः अच् तत् लाति सेवनात् ला-क वा । कार्त्तस्वरयाम् राजनि० ।

रक्तवटी स्त्री रक्तवर्णा वटीव । मल्लरिकायाम् त्रिका० ।

रक्तवर्ग पु० रक्तानां वर्गः समुदायः । दाडिमकिंशुकलाक्षावन्यूनफरिद्राह्वयजवाक्षसुमनपुष्पमञ्जिष्ठालक्षकरूपे समूहे राजनि० । [कर्म० । २रोहितरूपे पु० ३तद्वति त्रि० ।

रक्तवर्ण पु० रक्तो वर्णोऽस्य । १इन्द्रगोपकीटभेदे राजनि० ।

रक्तवर्द्धन पु० रक्तं रुधिरं वर्द्धयति भोजनात् धधिच्-ल्यु । वार्त्ताकौ शब्दच० । [वासु राजनि० ।

रक्तवर्षाभू पु० वर्षायां भवति भू-क्विप् कर्म० । रक्तपुनर्नवा-

रक्त(क्ती)वीज पु० रक्तवर्णानि क्ती(क्ती)जान्यस्य । १दाडिमे राजनि० रक्तं रुधिरमेव क्ती(क्त)जस्योत्पत्तिः कारणं यस्य । "रक्तबिन्दुर्यदा भूमौ पतत्यस्य शरीरतः । समुत्पतति मेदिन्यान्तत्प्रमाणस्तदासुरः" देवीमा० उक्ते असुरभेदे [शब्दच०

रक्तहन्ता स्त्री रक्तं हन्ति यस्याः । श्येनिकायाम्

रक्तहृष्टि स्त्री हृतः । देवकृतोपद्रवभेदे रुधिरवर्षणे

"क्वचिन्नामयौ "रक्ते मक्षोद्योगो मांसास्थिवसादिभिर्मरुकः । धान्यक्षिरण्यत्वक्फलकृष्णमाद्ये वर्षिते भयं विद्यात्" ज्यो० त० । [शब्दे १८७६ पृ०३स्तम्भम् ।

रक्तशालि पु० कर्म० । (लालधान) धान्यभेदे भावप्र० । धान्य-

रक्तशिग्रु पु० कर्म० । (लालसजना) वृक्षभेदे राजनि० ।

रक्तशौण्डक पु० रक्तं शौण्डोऽस्य कप् । १खरवृक्षे रत्नमा० । २रक्तमत्तवृक्षे त्रि० ।

रक्तशृङ्गिक न०रक्तं शृङ्गमिवास्यास्य ठन् । विषभेदे राजनि०

रक्तसन्धक न०रक्ता सन्धेव कन् । रक्तवर्णे क्षुद्रे अमरः

रक्तसरोरुह न० कर्म० । रक्तपद्मे अमरः ।

रक्तसर्षप पु० कर्म० । (राङ्गसर्षा) राजिकायाम् राजनि० ।

रक्तसहा स्त्री रक्तं सहते सह-अच् । रक्तस्थाने राजनि०

रक्तसार न० रक्तः सारोऽस्य । १रक्तचन्दने २अस्थ्नश्चेतसे पु० राजनि० ।

रक्तसौगन्धिक न० कर्म० । (लालसुदि) रक्तवर्णकह्लारे जटा०

रक्ताकार पु० रक्तवर्ण आकारो मूर्त्तिर्यस्य । १प्रवाले राजनि० २रक्तमूर्त्तिके त्रि० ।

रक्ताक्ष पु० रक्ते अक्षिणी यस्य बहुव्री० । १पारावते २मक्षिके ३चकोरे राजनि० ४रक्तनेत्रवति क्रूरे अने च त्रि० ५सारसे च मेदि० । स्त्रियां जातौ सर्वत्र ङीष् ।

रक्ताङ्ग न० रक्तमङ्गं यस्य यस्माद्वा । १कुङ्कुमे २मङ्गल्यपक्षे ३कम्पिल्ले (डहरकरमचा) च पु० ४प्रवाले पुंनः मेदि० । ५जीवन्त्यां ६मञ्जिष्ठायाञ्च स्त्री भावप्र० ङीप् ।

रक्ताति(ती)सार पु० रक्तमिश्रितोऽति(ती)सारः । वैद्यकप्रसिद्धे रोगभेदे । "पित्तलन्तु यदाल्पार्थं द्रव्यमश्नाति पैत्तिके । तद्दोषाच्छ्यायते शीघ्रं रक्तातीसार उच्यते" भावप्र० । अति(ती)सारशब्दे १०६ पृ० द्वयम्भम् ।

रक्ताधार पु० ह्रस्वः । देहावरके चर्मणि राजनि० ।

रक्तापह न० रक्तं रुधिरमपहन्ति अप+हन-ड । गन्धरसे बोले राजनि० ।

रक्तापामार्ग पु० कर्म० । (लाल चापाङ) क्षुपभेदे राजनि०

रक्ताम्ब पु० नित्यक० । कोशाम्बे राजनि० ।

रक्तास्थान पु० कर्म०। रक्तमङ्गसङ्गतायाम् राजनि०।

रक्तार्बुद पु० रोगविशेषे। तल्लक्षणं भावप्र० उक्तं यथा "दोषप्रदुष्टा रुधिरं सिराश्च संदूष्य संपीड्य ततस्त्वपाकम्। सञ्जायतेऽत्यर्थमसृग्विमिश्रं मांसाङ्कुरैराहतमाशुवृद्धिम्। अवेदनञ्चारुणवर्णमेतद्रुधिरात्मकन्तु। रक्तार्बुदं दोषचतुष्टयोत्थं दोषोल्बणत्वात् पृथगेव भेदैः। दोषोऽत्र पित्तं, रुधिरं सिराश्च संदूष्य संपीड्य संदूषणीकृत्य मांसाङ्कुरोः सर्वेष्वर्बुदेषु दुष्टत्वं, रक्तजे तु विशेषतो रक्तदुष्टिः एवं मांसार्बुदे विशेषतो मांसदुष्टिर्बोद्धव्या। ततो मांसपिण्डसञ्जातिं तद्गतं करोति। अपाकं शैत्यपाकं यथा स्यादेवमिति क्रियाविशेषणम्। शैत्यपाकश्चैकदेशपाकेन। रक्तार्बुदं दोषचतुष्टयोत्थं दोषोल्बणत्वात् रक्तार्बुदवाः शुक्तेनोक्ताः। तैः पीड्यतत्वात् अर्बुदपीड़ितः"। मातृतपीयकर्मविपाके "रक्तार्बुदविसर्पाद्या उपपापोद्भवा गदाः" इत्युक्तम्।

रक्तार्शस् न० अर्शरोगभेदे। तल्लक्षणं भावप्र० उक्तं यथा "रक्तोल्बणा गुदे कीलाः पित्तोक्तसदृशान्विताः। वटप्ररोहसदृशा गुञ्जाबिम्बसन्निभाः। तेऽत्यर्थं दुष्टरुधिरा गाढविड्भिः प्रपीड़िताः। स्रवन्ति सहसा रक्तं तस्य चातिप्रवृत्तितः। भेकाभः पीयते दुःखैः शोथितत्वरुजैः। क्षीणवर्णबलोत्साहो हतौजाः कलुषेन्द्रियः। विट् स्रावं कठिनं रूक्षमधोवायुर्न वर्त्तते। तत्र चारुणवर्णत्वं क्षीणत्वाद्रक्तमांसयोः। कण्डूरुगुदशूलत्वं दौर्बल्यं यदि वाऽधिकम्। तत्रानुबन्धो वातस्य श्वेतवर्त्मादि च रूक्षणम्। शिथिलं श्वेतपीतञ्च विट् स्निग्धं गुरु शीतलम्। यद्यर्शसां घनत्वाच्च तत्तु स्यात् पाण्डु पिच्छिलम्। गुदं सर्पिष्कं स्रवितं गुरु स्निग्धञ्च कारणम्। श्लेष्मानुबन्धो विष्टब्धात् रक्तार्शसां बुधैः। गुदे कीला अर्शांसि पित्तोक्तसदृशाः। दुःखैरोगैः त्वक्पाकरुग्भ्रमोत्पादनादिभिः। कलुषेन्द्रियः व्याकुलसर्वेन्द्रियः। रक्तजान्यपि वातोल्बणत्वं लक्षणमाह। तत्र रक्तार्शसि अनुबन्धः उल्बणत्वम्। रूक्षणं रूक्षयतीति रूक्षणं रूक्षं द्रव्यम्। पित्तोल्बणस्य लक्षणम् "रक्तोल्बणा गुदे कीलाः पित्तोक्तसदृशान्विताः" इत्यादिनैवोक्तम् रक्तपित्तयोः समानक्रियत्वात्। कफोल्बणस्य लक्षणमाह। सर्पिष्कं पिच्छिलार्द्रं स्रवितमार्द्रचर्मावगुण्ठितमिव"।

रक्तालु पु० कर्म०। (मकरकन्द) आलुभेदे राजनि०।

रक्तिका स्त्री रक्तैव स्वार्थे कन् अत इत्वम्। १गुञ्जायां २रागिकायां राजनि० ३परिमाणभेदे रक्तिकापरिमाणे च।

रक्तेक्षु पु० कर्म०। (काजला) इक्षुभेदे राजनि०।

रक्तैरण्ड पु० कर्म०। (लालभेरण्डा) इक्षभेदे राजनि०।

रक्तोत्पल न० कर्म०। कोकनदे कोद्दितवर्णे पद्मे अमरः। रक्तोत्पलमिव पुष्पमस्त्रस्य अच्। २शालूकमस्त्रिदले (शिलुक) पु० राजनि०। रक्तमुत्पलमिव। ३रक्तिके न० हारा०

रक्तोत्पलाभ पु० रक्तोत्पलस्य कोकनदस्येवाभा यस्य। १रक्तरूपे जटा० २तद्वति त्रि०।

रच पाचने भ्वा०पर०सक०सेट्। रचति अरचीत् ररच। अरीत् रचितो वर्त्तते। [समूहे अमरः।

रचःसभ न० रक्षसां राक्षसानां सभा ङीबत्वम्। राक्षसगृहे

रचक त्रि०रच-ण्वुल्। रचाकर्त्तरि स्त्रियां टाप् अत इत्वम्

रचणि(णी) स्त्री रच-अनि वा ङीप्। लावमाषालतायाम् राजनि०। [अमरः।

रचस् न० रक्षते क्षविरक्षात् रच-अपादानेऽसुन्। राक्षसे

रचा स्त्री रच-भावे क टाप्। १रक्षणे २तदर्थे रक्षसूत्रे च "रक्षे! मा चल मा चलं रचाबन्धमन्त्रः। रचति रच अच् टाप्। ३जतुनि मेदि०। ४भक्षणि च स्त्री शब्दर०। ५रक्षके त्रि०।

रचापत्त्र पु० रचार्थं पत्त्रमस्य। भूर्जपत्त्रवृक्षे राजनि०।

रचित त्रि० रक्षतेऽस्म रच-क्त। १भाक्षते। २वैद्यभेदे पु०।

रचिवर्ग पु० रचिषां वर्गः। रक्षसैन्यादिगणे (षड्रिगण)

रचोघ्न न० रचो हन्ति हन-टक्। १काञ्जिके हेमच०। २हिङ्गुनि राजनि०। तद्गन्धस्य घ्राणसम्बन्धात्तस्य रक्षसामपसरणम्। ३भल्लातकवृक्षे पु० त्रिका०। ४श्वेतसर्षपे पु० रत्नमा०। ऋग्वेदप्रसिद्धे "कृष्णश्यामं" इत्यादिके सूक्त० ४।३।१०। ५रक्षोघ्नभेदे न०। ६वचायां स्त्री। ७राक्षसघातकमात्रे त्रि० ङीप्।

रचोहन् पु० रचो हन्ति हन+क्विप्। १सुरसुरो राजनि० तद्गन्धघ्राणात्तस्य रक्षसामपसरणम्। २श्वेतसर्षपे पु०। ३राक्षसहन्तरि त्रि०। "रचोहणं वसगहनम्" यजु०१.२२

रक्ष पु० रच-नङ्। लाक्षे अमरः। [रक्षते।

रख सर्पणे भ्वा० पर० सक० सेट् इदित्। रखति अरखीत्

रख सर्पणे भ्वा० पर० सक० सेट्। रखति अरखीत् अराखीत्। [घटा० रगयति।

रग शङ्कायाम् भ्वा० प० सक० सेट्। रगति एदित् अरगीत्

रग गतौ भ्वा० पर० सक० सेट् इदित्। रङ्गति अरङ्गीत्।

रग आदे आप्तौ च चु० उभ० सक० सेट्। रागयति शरीरगतं त। [शरङ्कृत् त।

रघ दीप्तौ चु० उभ० सक० सेट् इदित्। रङ्घयति ते

रघ गतौ भ्वा० आ० सक० सेट् इदित्। रङ्घते अरङ्घिष्ट।

रघु पु० रघ-उ सञ्ज्ञायां रलयम्। सूर्य्यवंशे दिलीपसुतौ १ऋषभेदे रघोरपत्यमण् वञ्चु लुक्। रघुवंश्येषु अज-प्रभृतिषु २क्षत्रियेषु ब०व०। तान् अधिकृत्य कृतो ग्रन्थः अण् आख्यायिकायां तस्य लुक्। कालिदासग्रथीते जनविंशतिसर्गात्मके महाकाव्यभेदे पु०।

रघुनन्दन पु० रघून् नन्दयति नन्द-णिच् ल्यु। दशरथस्य ज्येष्ठपुत्रे १श्रीरामे त्रिका० २भरतादौ च।

रघुनाथ पु० रघूणां नाथः रक्षकत्वात् श्रेष्ठत्वाद्वा। श्रीरामे शब्दर०। रघुपत्यादयोऽप्यत्र।

रघुवंश पु० ६त०। रघुकुले। तमधिकृत्य कृतो ग्रन्थः आख्यायिकायां तस्य लुक्। कालिदासग्रथीते जनविंशतिसर्गात्मके महाकाव्यभेदे पु०। [पुत्रे श्रीरामे।

रघुवंशतिलक पु० रघुवंशे तिलक इव। दशरथचन्द्रपुत्र ज्येष्ठ-

रघुवर पु० रघुषु वरः श्रेष्ठः। श्रीरामे।

रघूद्वह पु० रघुषु उद्वहः रक्षादिभारधारकः उद+वह-अच्। दशरथचन्द्रपुत्र ज्येष्ठपुत्रे श्रीरामे शब्दर०।

रङ्कु त्रि० रकि-अच्। १क्षुद्रे २मन्दे च मेदि०। [राजनि०

रङ्कु पु० रकि-उ। १मृगविशेषे अमरः। २अबलपुत्रे मृगे

रङ्ग पुं न०रगि-अच्। १धातुभेदे (राङ) राजनि०। रञ्ज-भावे घञ्। २रागे। आधारे घञ्। ३रङ्गभूमौ ४नाट्यस्थाने च अमरः। करणे घञ्। ५लवङ्गे मेदि०। ६उडुम्बरे (योड़ागा) ७खादिरसारे च राजनि०। रङ्गधातोः यो °धनप्रकारो भाव० उक्तो यथा "र(व)ङ्गनागौ प्रतप्तौ च मलितौ तौ निषेचयेत्। त्रिधा त्रिधा विशुद्धिः स्याद्वि ङ्गखेऽपि च त्रिधा"। तैलतक्रकाञ्जिकगोमूत्रकुलत्थक्वाथेषु प्रत्येकं त्रिधा त्रिधा। अथ रङ्गस्य मारणविधिः। °ऋतुपात्रे द्राविते र(व)ङ्गे चिञ्चात्वत्वचोरसः। चित्वा र(व)ङ्गचतुर्थांशमयोदद्यात् प्रयत्नवेत्"। चिञ्चा(अमिली) रसशूर्णम्। अयोदर्वी (करछुली)। °ततोऽग्नियामपर्य्यन्तं च र(व)ङ्गं भक्ष प्रजायते। अथ भक्षसमं तालं चित्वाम्लेन विमर्दयेत्। ततो गजपुटे पक्त्वा पुनरम्लेन मर्दयेत्। तावता दशमांशेन यावमेकं ततः पुटेत्। एवं दशपुटैः भक्षं र(व)ङ्गं भवति मारितम्। एवं मारितस्य र(व)ङ्ग-स्य गुणाः। "रङ्गं चक्षु षरं रूक्षं कुष्ठमेहक्षयक्रमीन्। निहन्ति पाण्डुं सन्धानं मेदसीवस्तु पित्तलम्। सिंहोगजोष्ट्रान् यथा निहन्ति तथैव र(व)ङ्गोऽखिल श्लेष्मवर्गम्। देहस्य सौख्यं प्रबलेन्द्रियत्वं नरस्य पुष्टिं विदधाति नूनम्"। तस्यापुष्टस्य दोषमाह "रङ्गोविषघ्ने खलु पुष्टिहीनस्तथा क्षयकुष्ठ विकासयुक्तौ। कृशानि-मुक्तं किल वातशोथं पाण्डुं प्रमेहञ्च भगन्दरञ्च। विशेषमं रङ्गविकारवृन्दं जनस्य जघ्नाखि कफज्वरञ्च। मेहाङ्कुरोविद्रधिसक्थरोगान्नागापि कुर्य्यात् कथितान् विकारान्" तद्भेदा यथा। "श्वेतं मृदु लघु स्वच्छं स्निग्धसच्छसङ्गं स्थिरम्। क्षतपक्षकरं कान्तं तदु-त्तमसुदाहृतम्। धुरकं मिश्रकञ्चापि द्विविधं र(व)ङ्ग-मुच्यते। उत्तमं धुरकं तत्र मिश्रकं त्यक्तं मतम्"। राजनि०।

रङ्गज न० रङ्गात् रङ्गधातोर्जायते जन-ड। सिन्दूरे रत्नमा०

रङ्गजीवक पु० रङ्गेण रञ्जनेन जीवति जीव-ण्वुल्। (रङ्गरेज) १शिल्पिभेदे चित्रकरे शब्दर०। २नाट्यजीविनि च

रङ्गद पु० रङ्गं रञ्जनं रागं ददाति दा-क। १टङ्कणे २खदिरसारे च ३स्फटिके स्त्री राजनि०।

रङ्गदायक पु० रङ्गं ददाति दा-ण्वुल्। १टङ्कणे (साजुनी) २धान्यभेदे राजनि०।

रङ्गपत्री स्त्री रङ्गाय पत्रमस्याः ङीष्। नीलीवृक्षे राजनि० तत्पत्ररसादिना हि नीलरागसम्भवः। [वृक्षे राजनि०।

रङ्गपुष्पी स्त्री रङ्गं पुष्पमिति पुष्प अच् गौरा०ङीष्। नीली-

रङ्गभूमि स्त्री रञ्जतेऽत्र रञ्ज-आधारे घञ् ऊङ्। १नाट्यभूमौ शब्दर०। "रङ्गभूमिं समासाद्य" इति सा० ६प०। २सङ्गभूमौ च।

रङ्गमाल स्त्री रङ्गस्य रागस्य मातेवोत्पादिका। १खाङ्गायाम् २कट्फिलायाञ्च मेदि०। या हि नायकयोर्नीलीहरिद्रादिद्वारा रागं वर्द्धयति।

रङ्गलासिनी स्त्री रङ्गं रागं लासयत्युल्लासयति ल्युटस्थेन लस-णिच्-णिनि। श्येनिकायाम् शब्दच०।

रङ्ग(यो)वीज न० रङ्गं यो(यौ)त्यनेनेति साधनं वस। रजते शब्दर०। कृत्रिमरूप्यस्य पारदयोगात् रङ्गजम् रजतशब्दे दृश्यम्।

रङ्गशाला स्त्री ६त०। (नाचघर) नाट्यगृहे शब्दर०।

रङ्गाजीव पु० रङ्गं रञ्जनं नाट्यस्थानं वा आजीवति आ-जीव-अच्। (रङ्गरेज) १शिल्पिभेदे चित्रकरे अमरः। २नटे च हेमच०।

रङ्गारि पु० रङ्गस्यारिरिव आरकत्वात् । करवीरे रत्नमा० । तद्वृक्षसंबन्धादि रङ्गस्य जीर्णता वैद्यकप्रसिद्धा ।

रङ्गावतारक पु० रङ्गे नाट्यस्थानेऽवतरति वेशान्तरपरिग्रहेण अव+तॄ–ण्वुल् । १नटे अमरः । स्त्रियां ङीष् । उक्तार्थे हेमच० । तदङ्गभोजननिषेधो मनुनोक्तो यथा "कर्मारस्य निषादस्य रङ्गावतारकस्य च । सूतस्य चर्मकारस्य सप्तैवैकविधस्तथा । त एतेऽन्ये त्वभोज्यान्नाः क्रमशः परिकीर्त्तिताः । तेषामन्नमसिरोमाणि वदन्यज्ञे मनीषिणः । भुञ्जतोऽज्ञतमस्तान्नममत्वा यशसं त्वहम् । मत्वा भुङ्क्ते चरेत् कृच्छ्रं रेतोविण्मूत्रमेव च" ।

रङ्गिणी स्त्री रङ्गमिव शुभ्राणि मूलानि सन्त्यस्याः इनि । १श्वेतमूल्याम् अमरः । २कैवर्त्तिसुतायां च राजनि० । ३रङ्गयुक्ते त्रि० ।

रङ्गस् न० रञ्ज–असुन् । वेगे अमरे पाठान्तरम् । [त ।

रच रचनायां भ्वा०उभ०सक०सेट् । रचयति ते अररचत् ।

रचना स्त्री रच–युच् । रचने १शुभ्रपत्राद्देविन्याञ्च अमरः । भावे ल्युट् । तत्रैवार्थे न० ।

रज न० रञ्ज–क । १स्त्रीरजसि अमरः । २परागे ३रेणौ ४गुणभेदे च पु० जाम्बे शब्दच० ।

रजक पुंस्त्री० रजति रञ्ज–ण्वुल् नलोपः । वस्त्रादेः रागकारके जातिभेदे (धोबा) अमरः । स च तीवरकन्यायां धीवराज्जातः ब्रह्मवै० । स्त्रियां ङीष् । सा च कुलनायिका "रजकी नापिताङ्गना" तन्त्रम् ।

रजत रञ्ज–अतच् नलोपः । १रूप्ये अमरः । २गजे ३दन्ते ४रुधिरे ५क्षारे ६मैक्षे ७लवणे ८श्वेतवर्णे च हेमच० । ९शुक्लगुणवति त्रि० ।

रूप्यधातोरुत्पत्त्यादि भावप्र० उक्तं यथा "त्रिपुरस्य वधार्थाय निर्म्मितैर्विश्वकर्म्मणा । निरीक्षयामास शिवः क्रोधेन परिपूरितः । अग्निस्फुलिङ्गसमवत्तस्तस्मैकक्षादिनोद्गतात् । ततोऽङ्गः समभवद्वैश्वानर इव ज्वलन् । ततोऽदूरतश्चैलादस्रबिन्दुस्तु वामकात् । तस्माद्रजतसत्पत्रसङ्कर्षेण योजयेत् । अस्मिन्मध्ये भवेत्तस्य वङ्गादिरसयोगतः । रूप्यन्तु रजतं तारचन्द्रकान्ति सितप्रभम् । गुरु स्निग्धं मृदु श्वेतं दाहे क्षेदे घनं क्षमम् । क्षोदक्षं चन्द्रवत् स्वच्छं रूप्यं नवगुणं गुणम् । कठिनं क्षिप्तं रूक्षं रक्तं पीतदलं बधु । दाहच्छेदपनेनेष्टं रूप्यं दुष्टं प्रकीर्त्तितम् । तारं शरीरस्य करोति तापं गुरुं घनं यच्छति शुक्रनाशम् । वीर्य्यं नवं हन्ति तनोति पुष्टिं मङ्गल्यदानं शोधयति क्षणेन" ।

स्थानान्तरे तत्रैव

तस्य शोधनविधिः "पत्रलोहतपत्राणि तारस्यान्तो प्रतापयेत् । निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके । गोमूत्रे च कुलत्थानां कषायेण त्रिधा त्रिधा । एवं रजतपत्राणां विशुद्धिः सम्प्रजायते" । अथास्य दोषमाह "रूप्यं त्वगुरुं प्रकरोति तापं विनाशयेत् वीर्य्यबलञ्चबहु । दैन्यस्य पुष्टिं हरते तनोति रोगांस्ततः शोधनमस्य कुर्य्यात् । अथ रूप्यमारणविधिः "भागैकं तारकं सद्यं यामनम्रेण केनचित् । तेन भागत्रयं तारपत्राणि परिलेपयेत् । शुष्कं मृत्वा पुटे रुद्ध्वा पुटेत् त्रिंशद्गवोपलैः । स्वाङ्गशीतं पुनस्तावं दत्त्वा रुद्ध्वा पुटे पचेत् । एवं सप्तदशपुटैस्तारमस्य प्रजायते" । अथास्य प्रकारः "क्षुद्रौषधीरसे संपिष्टं माक्षिकं तेन लेपयेत् । तालकस्य प्रकारेण तारपत्रस्य दुर्द्धमान् । पुटेच्चतुर्दशपुटैस्तारमस्य प्रजायते" । एवं मारितस्य रूप्यस्य गुणः "रौप्यं शीतं कषायञ्च स्वादु पाकरसं सरम् । वयसः स्थापनं स्निग्धं लेखनं वातपित्तजित् । प्रमेहादिकरोगांश्च नाशयत्यचिराद्ध्रुवम् ।"

रजताचल पु० रजतकल्पितोऽचलः । दानार्थं कल्पिते रजतमये पर्वते मत्स्यपु० ७७अ० तद्विधिर्यत्र । रजतमिव शुभ्रोऽचलः १कैलासपर्वते रजतगिर्यादयोऽप्यत्र पु०

रजन न० रञ्ज–ल्युट् । १रागे त्रि०कौ० । २कुलस्थे २हरिद्रायां ४रात्रौ च स्त्री उज्ज्वलः गौरा० ङीष् ।

रजनि(नी) स्त्री रज्यतेऽत्र रञ्ज-कनि वा ङीष् । १रात्रौ २हरिद्रायां शब्दरत्नावल्यां अमरः ।

रजनीकर पु०रजनीं करोति क–ट रजन्यां करः किरणोऽस्य वा । १चन्द्रे शब्दर० २कर्पूरे च । [पुष्पप्रधाने वृक्षे ।

रजनीगन्धा स्त्री रजन्यां गन्धो यस्याः । सुनामख्याते

रजनीचर पुंस्त्री०रजन्यां चरति चर–ट । १राक्षसे शब्दर० स्त्रियां ङीष् । २चौरे २वणिक्भेदे च ।

रजनीजल न० रजन्या जलमिव । नीहारे हारा० ।

रजनीपुष्प पु० रजन्या हरिद्राया इव पुष्पमस्य । (पूतिकरमचे) करञ्जभेदे राजनि० ।

रजनीमुख न० ष० त० । प्रदोषे सूर्य्यास्तकालात् चतुर्दण्डात्मके सन्ध्याकाले वा काले अमरः । प्रदोषशब्दे ३७३पृ० ।

रजनीहासा स्त्री रजन्यां हासो विकासो यस्याः । मेघाविकायाम् शब्दर० ।

रजस् न०रञ्ज-असुन् नलोपः ।१कुङ्कुमे अमरः। २पुष्परेणौ ३पराग ४धूलौ मेदि० साङ्ख्योक्ते चलनादियुते ५प्रकृति गुणभेदे च "सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलञ्च" रजः" सां० का०। "सत्त्वतमसी खयमक्रियतया स्वकार्य्यप्रवृत्तिं प्रत्यवसीदन्ती रजसोपष्टभ्येते अवसादात् प्रच्याव्य स्वकार्य्ये ते उत्साहं प्रयत्नं कार्य्येते तदिदमुपष्टम्भकं रज इति। अक्षादित्वात् उक्तं चलमिति। तदनेन रजसः प्रवृत्त्यर्थत्वं दर्शितम्" त०कौ०। ६पृथिव्यां स्त्री ङीष् निघण्टुः।

रजस्वल त्रि० रजोऽस्त्यस्य वलच्। १रजोयुक्ते २मक्षिके पुंस्त्री० मेदि० स्त्रियां ङीष्। आर्त्तवत्यां स्त्रियां स्त्री टाप् अमरः।

रजोरस न० रजस इव रसोऽनुभवोऽस्य। अम्लकारे त्रि०।

रजोवल्ल न०रज इव वल्लति। वल्ल-अच्। अम्लकारे त्रिका०

रज्जु स्त्री रज्ज-उ नि०। १बन्धनसाधने दामनि अमरः (दडि) २वेण्यास्च मेदि०।

रञ्जक न० रञ्जयति रञ्ज-णिच्-ल्युल्। १क्विङ्कुले राजनि० २प्रीतिकारके त्रि०। ३काम्पिल्लवृक्षे पु० (कङ्करकरमचा) राजनि०।

रञ्जन न० रज्यतेऽनेन रञ्ज-करणे ल्युट्। १रक्तचन्दने २क्विङ्कुले ३सञ्जातृणे राजनि० ४मञ्जिष्ठायां ५नील्यां ६गण्डरोचनिकायां (कमलागुड़ि) स्त्री मेदि० ङीष्। ७श्वेताक्षिकायां शब्दच०। ८हरिद्रायां दर्पणट्याच स्त्री राजनि० ङीष्। भावे ल्युट्। ९रागे। णिच् कर्त्तरि ल्यु। १०रागजनके त्रि०। संज्ञायां कन्। ११कटफले पु०राजनि०

रट भाषणे भ्वा० पर० सक०सेट्। रटति अराटीत् अरटीत् रेटतुः "भाषे भाषि रटल्याप्यः" भट्ट०त०।

रटन्ती स्त्री रट-वा०भाव ङीप्। "भाषे भाषन्विते पक्षे रटन्त्याख्या चतुर्दशी। तस्यां प्रदोषसमये पूजयेत् सगणाधिपम्" इत्युक्तायां भाषक्षणचतुर्दश्याम्। [रेटतुः।

रठ भाषणे भ्वा० पर० सक० सेट्। रठति अराठीत् अरठीत् रेठतुः।

रण गतौ भ्वा० पर० सक०सेट्। रणति अराणीत् अरणीत् रेणतुः। घटादि०। रणयति। [रेणतुः।

रण रवे भ्वा० पर० अक० सेट्। रणति अराणीत् अरणीत्

रण युद्ध न० अर्त्तिरी० रण-"अधिरणेभ्योः" वार्त्ति० अप्। १युद्धे अमरः। भावे अप्। २शब्दे ३कथे पु० मेदि० ४गतौ च पु० शब्दर०।

रणरणक पु० रणः शब्दस्तत्प्रकारः प्रकारे द्विरुक्तम् ततः संज्ञायां कन्। १उद्वेगे क्लेशच० २व्यतिषङ्गे च।

रणसङ्कुल न० रणमेव सङ्कुलम्। युद्धसङ्कुले अमरः।

रणड पु० रण-ड तस्य नेत्वम्। १धूर्त्ते २विफले अङ्कुरविशिष्टतया ३छिन्नाग्रवंशे त्रि०संछिन्नप्रसारः। ४मूषिकपर्णां स्त्री अमरः। ५विधवायाञ्च स्त्री। स्वार्थे क। अफलवृक्षादौ शब्दच०।

रण्डाश्रमिन् पु० रण्डः विफलः प्रजाहीनत्वात् आश्रमः अस्यास्ति इनि। "चत्वारिंशद्वत्सराणां सप्तानाञ्च परे यदि। स्त्रिया वियुज्यते कश्चित् स तु रण्डाश्रमी मतः" स्मृत्युक्तवयसि स्त्रीवियुक्ते पुरुषे।

रत न० रम-भावे क्त। १रमणे स्त्रीपुंसयोः सङ्गमे मैथुने अमरः। २सुरते च मेदि०। कर्त्तरि क्त। ३अनुरक्ते त्रि०।

रतक्रिया स्त्री रतये रतिरूपो वा क्रिया व्यापारः। स्त्रीपुंससङ्गमसाध्ये मैथुने।

रतगुरु पु० ७त०। पत्यौ त्रिका०। [कामदेवपत्न्यां च मेदि०]

रति स्त्री रम-क्तिन्। १रागे २सुरते ३रमणे ४तदधिष्ठात्र्यां

रतिपति पु० ६त०। कन्दर्पे अमरः। रतिकालादयोऽस्यस्य।

रतिप्रिय पु०६त०। १कामदेवे शब्दर०। ६ब०।२रमणप्रिये त्रि०

रतिबन्ध पु० रतौ बन्धः। रतिसङ्गमुक्ते षोड़शप्रकारे रमणबन्धभेदे "न भवन्ति यदा नार्य्यस्तुष्टा वा रतेन ताः। नानाविधैस्तदा बन्धै रन्तव्या कामिभिः स्त्रियः। पद्मासनो१ नागपाशो२ [लतावेष्टो३ऽर्द्धसंपुटम्४। कुक्कुटं५ सुन्दर६श्चैव तथा केसर७ एव च। क्षिप्तोद्धोट नरसिंहोऽपि विपरीत१०स्तथाऽपरः। ११सुप्तो वै धेनुक१२श्चैवसप्तदशः१३स्तु ततः परम्। सिंहासनो१४ रतिनागो१५ विद्याधर१६स्तु षोड़शः" रतिमञ्जरी। तत्तद्बन्धं तत्र दृश्यम्। [क्षिप्ते च जटा०।

रतिमन्दिर न० ६त०। १रतिगृहे २स्त्रीणामसाधारण्य-

रतिरमण पु० रतिं रमयति रम-णिच्-ल्यु। कामदेवे।

रतिवज्र न० रतेर्वज्रं पदम्। मैथुने त्रिका०।

रतिसत्वरा स्त्री रतिं सत्वरयति सत्वरा+करोत्यर्थे णिच्-अच्। (पिड़िङ्गा) भाषे शब्दच०।

रत्न न० रमतेऽत्र रम-न तालादेशः। १माणिक्यादिप्रसरे अमरः। २सज्जातिषु श्रेष्ठे मेदि० ३माणिक्ये ४स्त्रीरत्ने च राजनि०। तद्भेदादिकं ह०ख०८०अ० उक्तं यथा "रत्नेन शुभेन शुभं भवति नृपाणामनिष्टमशुभेन। यस्मादतः परीक्ष्यं दैवं रत्नाश्रितं तज्ज्ञैः। द्विपहयवनितादीनां शुभाशुभविशेषेष रत्नशब्दोऽस्ति। इह तु-

पुष्परत्नानामधिकारो वज्रपूर्वोधाम। रत्नानि बलाहैलाद् दधीचितोऽन्ये वदन्ति जातानि। केचिद्भुवः स्वभावाद्व वैचित्र्यं प्राहुरत्नानाम्। वज्रेन्द्रनीलमरकतकर्केतनपद्मरागरुधिराख्याः। वैदूर्यपुलकविमलकरराजमणिस्फटिकशशिकान्ताः। सौगन्धिकगोमेदकशङ्खमहानीलपुष्परागाख्याः। ब्रह्ममणिज्योतीरसशयकसञ्ज्ञा प्रवालानि"। [शब्दर०।

रत्नकन्दल पु० रत्नेषु कन्दल इव रक्तत्वात्। प्रवाले

रत्नकूट पु० रत्नमयः कूटः शृङ्गमस्य। पर्वतभेदे शब्दर०।

रत्नगर्भ पु० रत्नयुक्तं गर्भं मध्यं यस्य या० त०। १समुद्रे राजनि० २कुबेरे च त्रिका०। ३पृथिव्यां स्त्री हेमच० ४सतपुत्रायां नार्य्यांच स्त्री।

रत्नद्वीप पुंन०। रत्नमयो द्वीपः। तन्त्रोक्ते सुधासमुद्रमध्यस्थिततया ध्येये रत्नमयेऽन्तरीपे।

रत्नधेनु स्त्री रत्नकल्पिता धेनुः। महादानार्थं कल्पितायां रत्ननिर्मितायां धेन्वाम्। मत्स्यपु० २८७अ० दशमम्।

रत्नपारायण न० रत्नानां पारायणं साकल्येन ज्ञानम्। सर्वरत्नाधारे "रत्नपारायणं नाम्ना कृष्णा" भट्टिः।

रत्नमुख्य न० रत्नेषु मुख्यम्। हीरके अमरः।

रत्नवती स्त्री रत्नानि सन्त्यस्याः मतुप् मस्य वः। १पृथिव्याम् शब्दर०। २रत्नयुक्ते त्रि०।

रत्नसानु पु० रत्नानि सानावस्य। सुमेरुपर्वते अमरः।

रत्नसू स्त्री रत्नानि सूते सू-क्विप्। पृथिव्याम् हेमच०।

रत्नाकर पु० ६त०। १समुद्रे अमरः। रत्नोत्पत्तिस्थाने २मणिबन्धौ च।

रत्नाचल पु० रत्ननिर्मितः अचलः। दानार्थं कल्पिते रत्ननिर्मिते पर्वते धान्यशैलशब्दे ३८८१पृ०दृश्यम्। [भूषणभेदे।

रत्नाभरण न० रत्नघटितमाभरणम् शाक०त०। (जड़ाऊ)

रत्नावली स्त्री ६त०। १रत्नसमूहे तद्घटितहारे २वत्सराजपत्नीभेदे च रत्नावलीमधिकृत्य कृतः ग्रन्थोऽस्याख्यायिकायां तस्य लुक्। श्रीहर्षकृते चतुरङ्कात्मके ४नाटिकाभेदे। [स्त्रीत्वे वा ङीप्।

रत्नि पुंस्त्री० रत-क्नलिच्। बद्धमुष्टिहस्तपरिमाणे अमरः।

रथ पु० रम्यतेऽनेन अल वा रम-कथन्। १स्वनामख्याते यानभेदे अमरः। २देहे च "आत्मानं रथिनं विद्धि शरीरं रथमेव च" इति गीता। अस्य रूपकमित्यन्ये ३पादे ४चेतसष्टङ्के विश्वः ५तिनिसवृक्षे राजनि०। यानरूपरथभेदादिकं हेमच० उक्तं यथा

"युद्धार्थे चक्रवद्याने शताङ्गः स्यन्दनो रथः। संक्रीड़ार्थः पुष्परथो देवार्थस्तु, मरुद्रथः। योग्योरथो वैनयिकोऽध्वरथः परिचारिकः। कर्णीरथः प्रवरुढ्यं दयनं रथगर्भकः। अनस्तु शकटोऽथ स्यादुगन्ती कम्बलि वाह्यकम्। अथ काम्बलवाह्याद्यास्तैः परिवृते रथे। स पाण्डुकम्बली यः स्यात् संवीतः पाण्डुकम्बलैः। स तु दैवो वैयाघ्रस इतो यो दीपिचर्मणा। ज्योतिर्विदाभरणे तत्करणाधिकारे उक्तं यथा "लोकमैत्रसृजिष्णुकर्मेषु स्यन्दनाखिलविधानमवाप्तः। मेनसद्दशु बलाम्बुतपःस्थैः साधुराग्निमति साधुभिरुक्तः। रथचक्रभागमाह "दण्डहस्त्रिकरकर्षयुगाद्यैर्व्यस्तयवतलयं वलयस्य। सप्तभागनिहितभ्रमसंख्यादादिमध्यमनसो नवभागम्। अग्रभे भवति सङ्कुचिरन्ध्रः कूबरोद्भुनि जयोऽथ रथाङ्गे। सन्धिभेदरहितस्तरसन्धौ भीतिरिष्टमनसो नतु गर्भे। अथ रथलक्षणसङ्गते "पुष्ये पुनर्वसुश्रवणेषु धातुराधारवैतीदये। अश्वादिभिर्मे हस्तत्रितये रोहिणीमृगे। सार्के सौम्यदिने सौम्यविलग्ने रथकर्म कृत्"। [अमरः

रथकड्या स्त्री रथानां समूहः रथ-कड्यच्। रथसमूहे

रथक(का)र पु० रथं करोति ज-अच्-अण् वा। १रथनिर्माणकारके (स्त्रधार) २वर्णसङ्करभेदे करणप्रां चाहिण्याञ्जाते पुंस्त्री०। [अमरः।

रथकुटुम्बिन् पु० रथस्य कुटुम्बीव पालकत्वात्। सारथौ

रथगर्भक पु० रथस्य गर्भमिव इवार्थे कन्। १कर्णीरथे २स्वल्पवाह्ययाने (पालकी) हेमच०।

रथगुप्ति स्त्री रथस्य गुप्तिः यत्नवारणार्थं रक्षा उपचारात् तत्स्थानम्। रथस्य यत्नवारणार्थं गुप्तस्थाने अमरः।

रथचरण पु० रथस्य चरण इव गतिहेतुत्वात्। १रथचक्रे तन्नामनामके २चक्रवाकविहगे पुंस्त्री० शब्दर० स्त्रियां ङीष्। रथपादादयोऽत्र। [इत्ये अमरः।

रथद्रु पु० रथनिर्माणाय द्रुः रथनामको वा द्रुः। तिनिशवृक्षे

रथन्तर त्रि० रथेन तरति तृ-खच् सुम् च। १रथनेतरि। "अभित्वा शूर" इत्यस्यामृचि गीते २साममेदे न०। "खरादिविशेषानुपूर्वीभावस्वरूपे अगजरथ्यतिरिक्तं यत् गानम् तद्रथन्तरम्" सामार्चिकभाष्यम्। "सामदेव्यं वहत् साम ज्येष्ठसाम रथन्तरम्" इत्युपक्रमे "पञ्चमे हारपाली तु पठेतां साम गाविति" वि० पा०।

रथयात्रा स्त्री रथेन यात्रा। आषाढ़शुक्लद्वितीयायां जग-

स्थापक रथेन २यात्रायां २तत्र कर्त्तव्ये उत्सवभेदे च ।

रथाङ्ग न० रथ्यते ऽनेन रथि करणे घञ् हृत० । १चक्रे । रथाङ्गशब्दः वाचकत्वेनास्यास्य अच् । २चक्रवाके पुंस्त्री० अमरः स्त्रियां ङीष् ।

रथाङ्गपाणि पु० रथाङ्गं चक्रं सुदर्शनं पाणौ यस्य । चक्रधरे विष्णौ हेला० । [ऽच्चे शब्दर० ।

रथाश्व पु० रथे रथाभियतेऽसौ आ+भट-मूलक० क । वेतस-

रथाश्वपुष्प पु० अश्वमिव पुष्पमस्य रथनामकोऽश्वपुष्पः कर्म० । वेतसवृक्षे भरतः । [२रथेन युद्धकारके च हेमच० ।

रथारोहिन् पु० रथमारोहति आ+रुह णिनि । १रथिनि

रथिक पु० रथो युद्धसाधनत्वेनास्यास्त ठन् । १रथिनि २तिनिशवृक्षे च राजनि० । इर । रथिर । इन । रथिन । इनि । रथिन् एतेऽप्यत्र । [ऽपाविशत्" गीता ।

रथोपस्थ न० रथस्य उपस्थ इव । रथमध्ये । "रथोपस्थ

रथ्य पुंस्त्री० रथं वहति यत् । १रथवाहके घोटके अमरः स्त्रियां ङीष् । रथस्येदं यत् । २रथसम्बन्धिनि चक्रादौ त्रि० हेमच० । ब्राह्मायणः "यद्रथ्यं स्यादायोरिति चर्मण्यं प्रतिवद्धीयात्" "रथ्यं रथसम्बन्धि चर्मणत्वं लोहकिरणप्रादिनिर्मितम्" तात्पर्य्य० भा० १।७।२भा० । रथस्य तद्गमनस्य योग्या श्रेणिः । ३प्रशस्तपथे अभ्यन्तरमार्गे स्त्री अमरः । रथानां समूहः यत् । ४रथसमूहे च स्त्री अमरः । ५आवर्त्तन्यां स्त्री मेदि० । ६मार्गमात्रे ७चत्वरे च स्त्री हेमच० । [रेदतुः ।

रद् उत्खाते भ्वा० प० सक० सेट् । रदति अरादीत् अरदीत् ।

रद पु० रदति उत्खनति रद-अच् । १दन्ते । भावे बा० अप् । २उत्खनने मेदि० ।

रदच्छद पु० द्वि० व० । रदान् छादयति छद-णिच्-च डुप्रत्ययः । ओष्ठयोः चारा० । रदनादिच्छदादयोऽप्यत्र ।

रदन पु० रद-करणे ल्यु । १दन्ते अमरः । भावे ल्युट् । २विदारणे । [त्वत् जदित् वेट् रधिता रद्धा ।

रध हिंसने पाके च दि० पर० सक० । रध्यति अरदीत् अरद्ध ।

रन्ज रागे (वर्णान्तराधाने) सक० आसक्तौ अक० भ्वा० उभ० अनिट् । रजति ते अराङ्क्षीत् अरङ्क्त । घटा० रञ्जयति अनुरमयते तु रजयति ।

रन्ज रागे आसक्तौ दिवा० उभ० सक० अनिट् । रज्यति रज्यते अराङ्क्षीत् अरङ्क्त । घटा० रञ्जयति रजयति ।

रन्तिदेव पु० रम-संज्ञायां तिक् कर्म० । १विष्णौ मेदि० । २चन्द्रवंशजे नृपभेदे ३कुरुक्षेत्रे च पुंस्त्री० शब्दर० स्त्रियां ङीष् ।

रन्तु पु० रम-आधारे तुन् । १वर्त्मनि २नद्याञ्च मेदि० ।

रन्धन न० रध-पाके ल्युट् नुमागमः । "पाके सरहर ! रन्धनसमये" इत्युज्जटः । "रन्धनाय स्यात्तो" वि० कौ० ।

रन्ध्र न० रम-किप् ध-कू० क कर्म० । १छिद्रे २दूषणे मेदि० ज्योतिषोक्ते २लग्नतोऽष्टमस्थाने च । [ऽच्चे राजनि० ।

रन्ध्रकण्ठ पु० रन्ध्रे रन्ध्रे कण्ठः कण्ठोऽस्य । जालवर्त्तुरक-

रन्ध्रवभ्रु पु० रन्ध्रे गर्त्ते वभ्रुरिव । उन्दुरौ त्रिका० ।

रन्ध्रवंश पु० रन्ध्रवद्धो वंशः शाक० त० । (रक्षतावंश) वंशभेदे । "वंशो त्वक्षौ कषायौ च किञ्चित्तिक्तौ च शीतलौ । मूत्रकृच्छ्रमेहार्शःपित्तदाहास्रनाशनौ । विशेषात् रन्ध्रवंशस्तु दीपनोऽजीर्णनाशकः । रुचिकृत् पाचनो हृद्यः शूलघ्नो गुल्मनाशनः" राजनि० । [रराप रेपतुः ।

रप व्यक्तवाक्ये भ्वा० प० सक० सेट् । रपति अरापीत् अरपीत्

रफ गतौ हिंसे च भ्वा० प० सक० सेट् । रफति । अरफीत् अराफीत् । इदिदयमम् । रम्फति अरम्फीत् रम्फ्यते ।

रब गतौ सक० प० शब्दे अक० आ० भ्वा० सेट् इदित् । रम्बति ते अरम्बीत् अरम्बिष्ट ।

रभ औत्सुक्ये भ्वा० आ० अक० अनिट् । रभते अरब्ध रेभे आ+आरम्भे सक० । अनिट्त्वादौ आर्द्धधातुके नुम् । आरम्भः आरम्भणम् । क्विटि तु आरेभे ।

रभ शब्दे भ्वा० आ० अक० सेट् इदित् । रम्भते अरम्भिष्ट ।

रभस पु० रभ-असच् । १वेगे २हर्षे मेदि० ३औत्सुक्ये ४पौर्वापर्य्याविचारे च अमरः । कर्म० आद्यच् । ५वेगादियुक्ते त्रि० ६कोपकारकभेदे पु० । ७अकृति त्रि० निच० ।

रम क्रीडायां भ्वा० आ० अक० अनिट् । रमते विरमति उपरमति अरंस्त उपारंसीत् । ब्रूञ् वेट् । णिचि रमयति । ज्वला० च रमः रामः ।

रम पु० रम-अच् । १काम्ये २अशोकवृक्षे ३कामदेवे च मेदि०

रमठ न० रम-अटन् । क्विब्लुनि स्वार्थे अण् । अत्रैव न० अमरः

रमठध्वनि पु० रमठ इतिशब्देन ध्वन्यते ध्वन-इन् । क्विब्लुनि शब्दच० ।

रमण पु० रमयति-रम-णिच् ल्यु । १कामदेवे २पत्यौ । "रमण ! त्वामनुयामि यद्यपि" कुमा० । ३गर्दभे पुंस्त्री० हेमच० स्त्रियां ङीष् । ४वृक्षे शब्दच० ५मनोहारिणि (त्रि०) राजनि० । जम्बुद्वीपान्तर्गते ६वर्षभेदे च । रम-भावे ल्युट् । ७सुरते न० । करणे ल्युट् । ८पटोलमूले न० मेदि० । ९जघने न० हेमच० । रम्यतेऽनया ल्युट् ङीष् । १०नार्य्याम् ११उत्तमनार्य्याम् स्त्री

मेदि० । १२वाद्याख्यवृक्षे च स्त्री शब्दचन्द्रिकाकोशः ।

रमणीय त्रि० रम्यतेऽत्र रम-आधारे-अनीयर् । सुन्दरे । ततो भावे वुञ् । रामणीयक तद्भावे न० ।

रमति पु० रम-क्तिच् । १नायके २रङ्गे मेदि० । ३कामे शब्दर० ४काले ५कामदेवे त्रि० कौ० ।

रमल न० ज्योतिःशास्त्रभेदे यत्र पाशकक्षेपणेन लग्ननिर्णय-द्वारा प्रश्नादिफलप्रतिपादनम् ।

रमा स्त्री रमयति रम-अच् । १लक्ष्म्याम् मेदि० २कलकि-भार्यायां कल्किपु० । ३शोभायां राजनि० ।

रमापति पु० ६त० । नारायणे रमानाथतत्कान्तादयोऽप्यत्र

रमाप्रिय न० ६त० । १पद्मे शब्दच० । २विष्णौ पु० ।

रम्भ पु० रभि-अच् सम् । १रेणौ २अप्सरोभेदे च मेदि० । स च मङ्किभास्वरजनकः कालिकापु० । ४कदल्याम् ५अप्सरोभेदे स्त्री मेदि० ६वेश्यायां धरणिः । ७गवां ध्वनौ हेमच० । दगौर्याञ्च स्त्री शब्दर० । ८उत्तरस्यां दिशि निघण्टुः ।

रम्भातृतीया स्त्री रम्भा गौरी ६त० । मार्गशीर्षशुक्लतृतीयायाम् उपचारात् तत्र कर्त्तव्ये गौरीपूजाङ्गके २व्रतभेदे च ।

रम्य त्रि० रम्यतेऽत्र यत् । १सुन्दरे मेदि० २वल्कले जटा० । ३चम्पके पु० मेदि० ४वल्कले पु० शब्दच० । ५पटोलमूले न० मेदि० । संज्ञायां कन् । ६प्रधानधातौ शुक्ले न० जटा० । जम्बुद्वीपस्थेषु नवसु वर्षेषु मध्ये "दक्षिणेन सुमेरोस्तु श्वेतस्य चोत्तरेण च वाद्यं रम्यकं नाम" इत्युक्ते ७वर्षभेदे ।

रम्यपुष्प पु० रम्याणि पुष्पाण्यस्य । शालमलीवृक्षे राजनि० ।

रम्या स्त्री रम्यतेऽत्र यत् । १स्वर्वेश्यायाम् राजनि० । २रात्रौ च मेदि० । [अरविध्वम् ।

रय गतौ भ्वा० आ० सक० सेट् । रयते अरयिष्ट । अरयिढम्

रय पु० रय-अच् । १वेगे अमरः । २प्रवाहे च ।

रयि न० रय-इन् । १जले २धने च निघण्टुः । [५।२१

ररार न० ललाट+पृषो० । ललाटे "विष्णोररारमसि" यजु०

रलक पु० रम-क्विप् मलोपे तुक् ला-क कर्म० । १मृगभेदे शब्दर० । २कम्बले अमरः ३नेत्रलोम्नि च भूभूतिः ।

रव गतौ भ्वा० आ० सक० सेट् इदित् । रवते अरविष्ट ।

रव पु० रु-ध्वनौ अप् । शब्दे अमरः ।

रवण पुंस्त्री० रु-युच् । १कोकिले स्त्री० ङीष् । २वंशे न० हेमच० । ३शब्दकारके ४तीक्ष्णे ५चञ्चले ७भयङ्करे च त्रि० शब्दर० ।

रवि पु० अव-इन् रुट् च् । १सूर्य्ये शब्दर० । २अर्कवृक्षे च "अचिरात्तु प्रकाशेन जगत्त्वात् स रविः स्मृतः" मत्स्यपु० तन्नामनिरुक्तिः । ३द्वादशसंख्यायाम् ।

रविज पु० रवेर्जायते जन-ड । १शनौ २सावर्णिमनौ ३वैवस्वते मनौ ४सुग्रीवे वानरे ५यमे च ६वसुतनयायां स्त्री रवितनयादयोऽप्यत्र । [च शब्दच० ।

रविनाथ न० रविर्नाथः प्रकाशकत्वात् यस्य । १पद्मे २बन्धूके

रविनेत्र पु० रविर्नेत्रं यस्य । विष्णौ रविलोचनादयोऽप्यत्र । "चक्षुः सूर्य्यो अजायत" पुरुषसू० चक्षुस्तस्य तथात्वम् ।

रविप्रिय न० ६त० । १रक्तकमले २ताम्रे च ३करवीरे पु० राजनि० ४आदित्यपत्रे ५जलचरे पु० शब्दच० ।

रविरत्न न० रवेः प्रियं रत्नम् श० त० । माणिक्ये राजनि० ।

रविलोह न० रवेः प्रियं लोहं धातुः । ताम्रे राजनि० ।

रश शब्दे सौ० पर० अक० सेट् । रशति अरशीत् अरशीत्

रशना स्त्री अश-युच् रशादेशः । १काञ्च्याम् २जिह्वायाञ्च शब्दर० । ३दामनि च "रशनामर्पयन् रशनासृजस्व" श्रुतिः तत्रार्थे दन्त्यमध्य एवेत्यन्ये ।

रश्मि पु० अश-मि धातोरट् रय-मि वा । १किरणे २अश्वादि दामनि ३पद्मे न० मेदि० ।

रवेः रश्मिभेदादिकार्य्यं मत्स्यपु० १०२ अ० उक्तं यथा "तेजोभिः सर्वलोकेभ्यो ह्यादत्ते रश्मिभिर्जलम् । वसुहादुवायुसंयोगाद् वहन्त्यापो गभस्तयः । ततस्तु पयसां काले परिवर्त्तन् दिवाकरः । नियच्छत्यपो मेघेभ्यः शुक्लाशुक्लैस्तु रश्मिभिः" ।

कूर्मपु० ४अ० विस्तरेणोक्तं यथा "एवमेष महादेवो देवदेवः पितामहः । करोति नियतं कालं कालात्मा ह्यीश्वरो तनुः । तस्य ये रश्मयो विप्राः सर्वलोकप्रदीपकाः । तेषां श्रेष्ठाः पुनः सप्तरश्मयो यदुयोनयः । सुषुम्णोहरिकेशश्च विश्वकर्मा तथैव च । विश्वव्यचाः पुनश्चान्यः सम्पद्वसुरतः परः । अर्वाग्वसुरिति ख्यातः स्वराडन्यः प्रकीर्त्तितः । सुषुम्णः सूर्य्यरश्मिस्तु पुष्णाति शिशिरद्युतिम् । तिर्य्यग्गूर्द्धप्रचारोऽसौ सुषुम्णः परिगीयते । हरिकेशस्तु यः प्रोक्तो रश्मिर्नक्षत्रपोषकः । विश्वकर्मा तथा रश्मिर्बुधं पुष्णाति सर्वदा । विश्वव्यचास्तु यो रश्मिः शुक्रं पुष्णाति नित्यदा । सम्पद्वसुरिति ख्यातं स पुष्णाति च लोहितम् । हरिस्तिं प्रपुष्णाति रश्मिरर्वाग्वसुः प्रभोः । शनैश्चरं प्रपुष्णाति सप्तमश्च स्वराट् तथा । एवं सूर्य्यप्रभावेन सर्वा नक्षत्रतारकाः । वर्द्धन्ते वर्द्धिता

नित्यं नित्यमाप्यायवन्ति च। दिव्यानां पार्थिवानाञ्च नैशानाञ्चैव सर्वशः। आदानाच्चित्यमादित्यस्तेजसा तमसां प्रभुः। आदत्ते स तु नाड़ीनां सहस्रेण समन्ततः। नादेयांश्चैव सामुद्रान् भूमांश्चैव सहस्रकम्। स्थावरान् जङ्गमांश्चैव यच्च किञ्चादिकं पयः। तस्य रश्मिसहस्रन्तु शीतवर्षोष्णनिःस्वनम्। तासां चतुःशतं नाड्यो वर्षन्ते चित्रमूर्त्तयः। जन्तूनाञ्चैव वाताच्च क्षोतनाम्नेकथाख्यया। कक्षता नामतः सर्वा रश्मयो दृष्टिसर्जनाः। त्रिंशोद्गताच तामस्यो रश्मयश्चित्रयतं पुनः। वस्वो मेध्यच पैथ्यच ह्लादिन्यो दृष्टिसर्जनाः। चन्द्रात्मा नामतः सर्वाः शीतामाः सुखभक्तयः। शुक्राच्च कक्षभवैव गावो विरुक्षतस्तथा। शुक्रात्मा नामतः सर्वास्त्रिविधा धर्मसर्जनाः। समं बिभर्त्ति ताभिः स मनुष्यपितृदेवताः। मनुष्यानौषधेनेह स्वधया च पितॄनपि। ऊष्मतेन सुरान् सर्वान् त्रिधा लीनर्पयत्यसौ। वसन्ते ग्रीष्मके चैव शतैः षड्भिरिति त्रिभिः। शरद्यपि च वर्षासु चतुर्भिः स प्रवर्षति। हेमन्ते शिशिरे चैव त्रिभिस्तत्सृजति त्रिभिः। वरुणो मासमासे तु सूर्य्यः पूषा तु फाल्गुने। चैत्रेऽसि भवेदीशो धाताऽवैशाखतापनः। ज्यैष्ठमासे भवेदिन्द्रः आषाढ़े सविताऽरविः। विवस्वान् श्रावणे मासि गोभवद्यां भगः स्मृतः। पर्जन्योऽश्वयुजि त्वष्टा कार्त्तिके मासि भास्करः। मार्गशीर्षे भवेन्मित्रः पौषे विष्णुः सनातनः। षड्रश्मिसहस्राणि यस्यस्यार्कस्य कर्मणि। षड्भिः सहस्रैः पूषा तु देवेभ्यः सम्प्रमिक्षया। धाता दशभिः सहस्रैस्तु नवभिस्तु शतक्रतुः। विवस्वान् दशभिः याति पार्जन्यादशभिर्भगः। सप्तभिः क्षपते मित्रस्त्वष्टा चैवाष्टभिस्तथा। अर्य्यमा दशभिः याति पर्जन्यो नवभिस्तथा। षड्भीरश्मिसहस्रैस्तु विष्णुस्तपति विश्वकृत्। वसन्ते कपिलः सूर्य्यो ग्रीष्मे काञ्चनसंप्रभः। श्वेतो वर्षासु वर्णेन शारदः शरदि प्रभुः। हेमन्ते ताम्रवर्णः स्यात् शिशिरे लोहितो रविः। ओषधीषु बलं धत्ते स्वधामपि पितृष्वथ। सूर्य्योऽमरत्वमनसतत्त्वं त्रिषु नियच्छति। अन्ये चादो मयाः प्रोक्ता सूर्य्यस्याभिहिता द्विजाः!। चन्द्रमाः सोमपतस्य शुक्रश्चैव ग्रहस्मृतिः। भौमो भानुसुतो राहुः केतुमानपि चाष्टमः। सर्वे ध्रुवे निबद्धा ये पञ्चाशे वातरश्मिभिः। भ्राम्यमाणा यथायोगं भ्रमन्त्यनुदिवाकरम्"।

रस स्वने भा० प०अक०सेट्। रसति अरासीत् अरसीत्। ररास रेसतुः।

रस आस्वादे च०चु० उ० सक० सेट्। रसयति ते अरररसत् त

रस पु० रसते रस-अच्। आस्वादो रसनेन्द्रियग्राह्ये १मधुर्य्यादिगुणभेदे २देहस्थे भुक्तान्नादेः प्रथमपरिणामे ३सारे च "ओषधीनां रसः" इति तत्रैव भा० "रसः सारः" भा०। ४धातुभेदे पारदे ५माधुर्य्यादरसवति गुड़ादौ त्रि० ६पुष्पमधुनि ७अलङ्कारोक्ते विभावानुभावव्यभिचारिभावव्यङ्ग्ये रत्यादिस्थायिभावके शृङ्गारादौ। दविधे ९वीर्य्ये १०रागे ११द्रवे अमरः १२जले च १३गन्धरसे पुंन० मेदि० १४अन्ने च निघण्टुः।

पारदशब्दे ४२११ पृष्ठादौ रसयोधनादि दृश्यम्।

देहस्थधातुहेतुरसस्वरूपादि भावप्र० उक्तं यथा "यत्सारो रसधातुर्यस्तोऽभवदयं रसः। सङ्घं सकलं देहं रसतीति रसः स्मृतः।" अथ रसस्य स्वरूपमाह "सम्यक् पक्वस्य भुक्तस्य सारो निर्मलितो रसः। स तु द्रवः स्थितः शीतः स्वादुः स्निग्धश्चलो भवेत्। सारो यथा गुड़मधूकपुष्पबकुलखर्जूरीमृद्वादिभवः सारो मदिरा। अथ रसस्य स्थानमाह "सर्वदेह चरस्यापि रसस्य हृदयं स्थानम्। समानरूपता पूर्वं यदयं हृदये स्थितः।" अथ रसस्य कर्माण्याह "आरक्तधमनीर्गत्वा धातून् सर्वानयं रसः। पुष्णाति तदनु स्नीयैर्व्याप्नोति च तनुं गुणैः।" गुणैः शीतस्निग्धपोषकत्वगुणैः शीतस्निग्धपोषकत्वैः "मन्दश्चिरविदग्धस्तु कटुर्वान्तो भवेद्रसः। स कुर्यादुबङ्गान् रोगान् विषलक्षं करोत्यपि।" अलङ्कारशब्दे दृश्यम्।

अलङ्कारभाक्तोक्तो रसो नवविधः। "शृङ्गारहास्यकरुण रौद्रवीरभयानकाः। बीभत्साऽद्भुत इत्यष्टौ रसा शान्तस्तथा मतः।" सा० द० तल्लक्षणं तत्रैव यथा "विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा। रसतामेति रत्यादिः स्थायी भावः सचेतसाम्"। "विभावादयो वक्ष्यन्ते। सात्त्विकानामनुभावरूपत्वात् न पृथगुक्ताः। व्यक्तो दध्यादिन्यायेन रूपान्तरपरिणतः व्यक्तीकृत एव रसो न तु दीपेन घट इव पूर्वसिद्धो व्यज्यते। तदुक्तं भोजनकारैः "रसाः प्रतीयन्त इति स्वोदनं पचतीतिवद्व्यवहार इति"। अत्र च रत्यादिपदोपादानादेव प्राप्ते स्थायिनो पुनः स्थायिपदोपादानं रत्यादीनामपि रसान्तरेष्वस्थायित्वप्रतिपादनार्थम्। ततश्च हास्यक्रोधादयः

शृङ्गारवीरादौ व्यभिचारिण एव । तदुक्तम् "रसाक्षिप्तः परं भावः स्थायितां प्रतिपद्यते" इति । अस्य स्वरूपकथनगर्भं आक्षेपप्रकारः कथ्यते । "सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः । वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः । लोकोत्तरचमत्कारप्राणः कैश्चित् प्रमातृभिः । स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः । रजस्तमोभ्यामस्पृष्टं मनः सत्त्वमिहोच्यते" इत्युक्तप्रकारो ब्राह्मस्पर्शसुखतापादकः कश्चनान्तरो धर्मः सत्त्वं तस्योद्रेकः रजस्तमसो अभिभूयाविर्भावः । अस्य च हेतुत्वाद्विभावलौकिकत्वाख्यार्थपरित्यागेन । अखण्ड इत्येक एवायं विभावादिरत्यादिप्रकाशसुखचमत्कारात्मकः । अत्र हेतुं वक्ष्यामः । स्वप्रकाशत्वाद्यपि वक्ष्यमाणरीत्या । चिन्मय इति स्वरूपार्थे मयट् । चमत्कारचित्तविस्तारस्वरूपो विस्मयापरपर्यायः । तत्प्राधान्यविवक्षायां ब्रह्मस्पर्शतासहृदयगोचरीकरणविषयीकृतसत्त्वश्रीमत्त्वाद्यपादैरुक्तं । तदाह धर्मदत्तः स्वपद्ये

"रसे सारश्चमत्कारः सर्वत्राप्यनुभूयते । तच्चमत्कारसारत्वे सर्वत्राप्यद्भुतो रसः । तस्मादद्भुतमेवाह कृती नारायणो रसमिति" । "केचिदिति प्राक्तनपुण्यवद्भिः तदुक्तं "पुण्यवन्तः प्रमिण्वन्ति योगिवद्रससन्ततिमिति" यद्यपि "स्वादः काव्यार्थसम्भेदादात्मानन्दसमुद्भवः" इत्युक्तदिशा रसास्वादानतिरिक्तत्वमुक्तं तथापि "रसः स्वाद्यते" इति कालनिकं भेदसरणीमाश्रित्य कर्मकर्तरि वा प्रयोगः । तदुक्तम् "रस्यमानतामात्रसारत्वात् प्रकाशशरीरादनन्य एव हि रसः" इति । एवमन्यत्राप्येवंविधस्थलेष्वुपचारेण प्रयोगा ज्ञेयाः । नन्वेतावता रसास्वाद्यत्वमुक्तं भवतीति व्यञ्जनायाश्च ज्ञानविशेषत्वाद् द्वयोरैक्यमापतेत् ततश्च "स्वज्ञानेनान्यधीहेतुः सिद्धेऽर्थे व्यञ्जको मतः । यथा दीपोऽन्यथाभावे को विशेषोऽस्य कारकात्" इत्युक्तदिशा घटप्रदीपवद् व्यङ्ग्यव्यञ्जकोः पार्थक्यमेवेति कथं रसस्य व्यङ्ग्यतेति चेत् सत्यमुक्तम् अत एवाहुः 'विलक्षण एवायं ज्ञप्तिप्रभेदेभ्यः स्वादनाख्यः कश्चिद्व्यापारः । अत एव हि रसनास्वादनचमत्करणादयो विलक्षणा एव व्यपदेशा इति अभिधादिविलक्षणव्यापारतायाः प्रसाधनयुक्तिभिरस्माभी रसादीनां व्यङ्ग्यत्वमुक्तं भवतीति । ननु तर्हि करुणादीनां रसानां दुःखमयत्वाद्रसत्वं न स्यादित्युच्यते" "करुणादावपि रसे जायते यत् परं सुखम् । सचेतसामनुभवः प्रमाणं तत्र केवलम्" । आदिशब्दाद् बीभत्सभयानकादयः । तथाप्यसहृदयानां सुखसद्भावाय पक्षान्तरमुच्यते । "किञ्च तेषु यदा दुःखं न कोऽपि स्यात्तदुन्मुखः" । न हि कश्चित् सचेता आत्मनो दुःखाय प्रवर्त्तते करुणादिषु च सत्यपि सामिनिवेशप्रवृत्तिदर्शनात् । अनुपपत्त्यन्तरमाह । "तथा रामायणादीनां भवितादुःखहेतुता" । "करुणरसस्य दुःखहेतुत्वात् करुणरसप्रधानरामायणादिप्रबन्धानामपि दुःखहेतुत्वप्रसङ्गः स्यात् । ननु कथं दुःखकारणेभ्यः सुखोत्पत्तिरित्याह "हेतुत्वं शोकहर्षादेर्गतेष्वो लोकसंश्रयात् । शोकहर्षादयो लोके जायन्तां नाम लौकिकाः । अलौकिकविभावत्वं प्राप्तेभ्यः काव्यसंश्रयात् । सुखं संजायते तेभ्यः सर्वेभ्योऽपीति का क्षतिः" । ये खलु रामवनवासादयो लोके दुःखकारणानि इत्युच्यन्ते त एव हि काव्यनाट्यसमर्पिता अलौकिकविभावनव्यापारवत्तया कारणशब्दवाच्यत्वं विहायालौकिकविभावशब्दवाच्यत्वं भजन्ते । तेभ्यश्च सुरते इत्यघातादिभ्य इव सुखमेव जायते । अतश्च लौकिकशोकहर्षादिकारणेभ्यो लौकिकशोकहर्षादयो जायन्ते इति लोक एव प्रतिनियमः । काव्ये पुनः सर्वेभ्योऽपि विभावादिभ्यः सुखमेव जायते इति नियमान्न कश्चिद्दोषः । कथं तर्हि रुक्मिण्यादिचरितस्य काव्यनाट्ययोरपि दर्शनश्रवणाभ्यामसूयादयो जायन्त इत्युच्यते । "असूयादयस्तद्दुद्भूतत्वाद्धेतवो मताः" । तर्हि कथं काव्यतः सर्वेषामीदृशी रसाभिव्यक्तिर्न जायत इत्याह "न जायते तदास्वादो विना रत्यादिवासनाम्" । वासना चेदानीन्तनी प्राक्तनी च रसास्वादहेतुः । तत्र यदि आद्या न स्यात्तर्हि श्रोत्रियजरन्नीमांसकादीनामपि सा स्यात् । यदि द्वितीया न स्यात् तदा गर्भिणामपि जेयाद्विद्रुतोद्बोधो न दृश्यते तत्र स्यात् । उक्तञ्च धर्मदत्तेन "सवासनानां सभ्यानां रसास्वादनं भवेत् । निर्वासनास्तु रङ्गान्तःकाष्ठकुड्याश्मसन्निभाः" इति । ननु कथं रामादिरत्याद्युद्बोधकारणैः सीतादिभिः सामाजिकरत्याद्युद्बोध इत्युच्यते "व्यापारोऽस्ति विभावादेर्नाम्ना साधारणीकृतिः । तत्प्रभावेण यस्यासन् पात्रीभूतास्तदादयः । प्रमाता तदभेदेन स्वात्मानं प्रतिपद्यते" । "ननु कथं मनुष्यमात्रस्य सहृदयत्वनियमादुत्साहोद्बोध इत्युच्यते "उत्साहादिसमुद्बोधः साधारण्याभिमानतः ।

नथापि सत्त्वादिवच्छब्दादौ न दुष्यति"। रत्यादयोऽपि साधारण्येन प्रतीयन्त इत्याह साधारण्येन रत्यादिरपि तद्वत् प्रतीयते"। रत्यादेरपि ज्ञातृगतत्वेन प्रतीतौ सभ्यानां व्रीड़ातङ्कादिभवेत् परगतत्वेन स्वरसतायातः विभावादयोऽपि प्रथमतः साधारण्येन प्रतीयन्ते इत्याह "परस्य न परस्येति ममेति न ममेति च। तदास्वादे विभावादेः परिच्छेदो न विद्यते"। ननु तथापि कथमेवमलौकिकत्वमेतेषां विभावादीनामित्युच्यते "विभावनादिव्यापारसमलौकिकमुपेयुषाम्। अलौकिकत्वमेतेषां मुख्यं न तु दूषणम्"। आदिशब्दादनुभावसञ्चारयोः। तत्र विभावनं रत्यादेर्विशेषेणास्वादाङ्कुरयोग्यतानयनम्। अनुभावनमेवम्भूतस्य रत्यादेः समनन्तरमेव रसादिरूपतया भावनम्। सञ्चारणं तथाभूतस्यैव सम्यक्चारणम्। विभावादीनां यथासङ्ख्यं कारणकार्यसहकारित्वे कथं त्रयाणामपि रसोद्बोधे कारणत्वमित्युच्यते "कारणं कार्यसञ्चारिरूपा अपि हि लोकतः। रसोद्बोधे विभावाद्याः कारणान्येव ते मताः"। ननु तर्हि कथं रसास्वादे तेषामेकः प्रतिभास इत्युच्यते "प्रतीयमानः प्रथमं प्रत्येकं हेतुरुच्यते। ततः संवलितः सर्वो विभावादिः सचेतसाम्। प्रपानकरसन्यायाच्चर्व्यमाणोरसो भवेत्"। यथा खण्डमरिचादीनां संमेलनादपूर्व इव कश्चिदास्वादः प्रधानकरसे संजायते विभावादिसम्मेलनादिहापि तथेत्यर्थः। ननु यदि विभावानुभावव्यभिचारिभिर्मिलितैरेव रसस्यात् कथं एकस्य द्वयोर्वा सद्भावेऽपि स इत्युच्यते "सद्भावेऽपि विभावादेर्द्वयोरेकस्य वा भवेत्। भट्टिलन्यायमालेभे तदा दोषो न विद्यते"। अन्यसमाक्षेपश्च प्रकरणादिवशात्। यथा "दीर्घाक्षं शरदिन्दुकान्ति वदनं बाहू नतावंसयोः सच्छिद्रं निविडोन्नतस्तनतटः पार्श्वे प्रसृते इव। मध्यः पाण्डिमनो नितम्बि जघनं पादावुदग्राङ्गुली इन्दो नर्त्तयितुर्वधेव मनसः सृष्टं तवाद्या वपुः"। "अत्र मालविकामभिलषतोऽग्निमित्रस्य मालविकारूपविभावमात्रवर्णने सञ्चारिणामौत्सुक्यादीनामनुभावानाञ्च नयनविस्फारादीनामौचित्यादेवाक्षेपः। एवमन्यत्रापेक्ष्युह्यम्। "अतएवार्थगतो रसः" इति वदतः प्रत्याह "चारित्रिभ्यालौकिकत्वात् सामान्यतया तथा। अतएवार्थस्य रत्यादेरुद्बोधो न रसो भवेत्"। वीतादिदर्शनादिजो रामादिरत्याद्युद्बोधो हि परिमितो लौकिको, नाट्यकाव्यदर्शनादेः सामान्यतश्च। तस्मात् कथं रसरूपतामियात्। रसस्तु तद्धर्मलितयविलक्षणधर्मकत्वात्। अतएवार्थगतत्वञ्च निरस्यति "शिक्षाभ्यासादिमात्रेण रागादेः रूपतां दर्शयन् नर्त्तको नैव रसस्यास्वादको भवेत्"। किञ्च काव्यार्थाभावने नायमपि सभ्यपदास्पदम्। यदि पुनर्नटोऽपि काव्यार्थभावनया रामादिरूपतामात्मनो दर्शयेत् तदा सोऽपि सभ्यमध्य एव गण्यते"।

द्रव्यगतमधुरादिरसकारणादिकं दृष्टते उक्तं यथा "अथातो रसविशेषविज्ञानीयमध्यायं व्याख्यास्यामः। आकाशपवनदहनतोयभूमिषु यथासङ्ख्यमनेकोत्तरपरिवृद्धाः शब्दस्पर्शरूपरसगन्धाः। तस्मादाद्यो रसः परस्परसंसर्गात् परस्परानुप्रवेशाच्च सर्वेषु सर्वेषां सान्निध्यमल्पत्वकल्पकत्वात्तु षड्विधम्। स खल्वाद्योरसः श्रेष्ठभूतसंसर्गाद्विभक्तः षोढा विभज्यते। तद्यथा मधुरोऽम्लो लवणः कटुकस्तिक्तः कषाय इति। ते च भूयःपरस्परसंसर्गात् त्रिविधा भिद्यन्ते। तत्र भूयस्त्वमुपबाहुल्यान्मधुरः१। भूयस्त्वमग्निगुणबाहुल्यादम्ल२। तोयाग्निगुणबाहुल्याल्लवणः३ वाय्वग्निगुणबाहुल्यात् कटुकः४। वाय्वाकाशगुणबाहुल्यात्तिक्तः५। पृथिव्यग्निगुणबाहुल्यात् कषायः६ इति। तत्र मधुरास्त्रलवणा वातघ्नाः। मधुरतिक्तकषायाः पित्तघ्नाः। कटुतिक्तकषायाः श्लेष्मघ्नाः तत्र वायुराकाशनैर्वाय्वा पित्तमाग्नेयं श्लेष्मा सौम्य इति। त एव रसाः स्वयोनिवर्द्धना अन्ययोनिप्रशमनाश्च"।

रसकर्पूर न० रसेन कर्पूरमिव। (रसकपुर) कर्पूररसे तत्पाकादिगुणा भावप्र० उक्ताः कर्पूररसशब्दे १७४२पृ० दृश्याः। [वैद्यक०।

रसकेसर न०रसेन केसरमिव नामकेसरसन्निवेशात्। कर्पूरे

रसगन्ध पुंन० रसे गन्धोऽस्य। १भोजे गन्धरसे त्रिका०। कप् तत्रार्थे शब्दच० २गन्धके च राजनि०।

रसगर्भ न० रसो गर्भे यस्य। पित्तधातुद्रवले १रसाञ्जने अमरः। २हिङ्गुले च राजनि०। [राजनि०।

रसघ्न ङ० रसं पारदं हन्ति हन-टक्। टङ्कणे (सोहागा)

रसज न० रसात् भुक्तान्नसारात् प्रथमधातोर्जायते जन-ड। १रुधिरे शब्दच० अमरकोशशब्दे ३८३पृ० दृश्यम्। रसात् द्रव्यप्रभृतेः द्रवात् जायते जन-ड। २शुक्रे पु० राजनि०। ३मद्यकोटे च पु० हेमच०। ४रसभवादावोऽप्यत्र।

रसज्ञा स्त्री रसं जानाति अनया ज्ञा-करणे यज्ञ्ञे क।

१जिह्वायाम् रसज्ञानसाधने जिह्वाख्यानेन्द्रिये अमरः ष्ठा-क । रसज्ञातरि त्रि०।

रसज्येष्ठ पु० रसेषु ज्येष्ठः श्रेष्ठः। १मधुररसे हेमच० २मद्यारररसे च। [हेमच०।

रसतेजस् न० रसस्य भुक्तान्नसारस्य तेजः सारः। रुधिरे

रसदालिका स्त्री रसार्थं दल्यते दल-कर्मणि घञ् गौरा० ङीष् स्वार्थे क ह्रस्वः। पुष्पेचौ (पुडि आख) राजनि०।

रसधातु पु० रसाख्यो द्रवरूपो वा धातुः। पारदे राजनि०

रसधेनु स्त्री दानार्थं कल्पितायाम् इक्षुरसनिर्मितायां धेनौ धेनुशब्दे १९०६ पृ० दृश्यम्।

रसन न०रस-ल्युट्। १स्वादे २ध्वनौ च करणे ल्युट्। जिह्वायां च मेदि० "पित्तेन दूने रसने सितापि" नैषधम्।

रसना स्त्री रसतेऽनया रस-करणे ल्युट् अजा० टाप्। १जिह्वायाम् अमरः। २राज्ञायां मेदि०। ३क्षुद्रायां हेमच०। ४रज्जौ च। [जिह्वायाम् हेमच०।

रसनेत्रिका स्त्री रसो नेत्रमिव अस्यस्याः ठन्। मनः-

रसपाकज पु० रसपाकेन जायते जन-ड। १गुडे राजनि० २रुधिरधातौ च अस्रक्करशब्दे दृश्यम्।

रसफल पु० रसो जलं फले यस्याः। नारिकेलवृक्षे शब्दर०।

रसमाणिक्य न० रसेन पारदेन माणिक्यमिव तत् पाकज-त्वात्। रसनामख्याते पदार्थे।

रसराज पु० रसेषु रसो वा राजेव श्रेष्ठत्वात् रसः द्रव इव राजते वा। १पारदे रसनाथादयोऽप्यत्र। २रसाञ्जने च राजनि०। [मद्य वः ङीप्। पाकस्थाने अमरः।

रसवती स्त्री रस आस्वाद्यद्रव्यमस्त्यस्याम् मतुप

रसशोधन न० रसं पारदं द्रवीभूतं द्रव्यं स्वर्णादि वा शोध-यति शुध-णिच्-ल्यु। १दहने (सोहागा) हेमच० हेत०। २पारदशोधने च।

रससान्न न० रसस्य पारदस्य स्थानम्। त्रिकुले शब्दच०।

रससिन्दूर न० रसजातं सिन्दूरम्। पारदजाते सिन्दूरभेदे तत्पाकविधिः भावप्र० उक्तो यथा

"शुद्धसूतस्य मल्लीयादु भिषग्भागचतुष्टयम्। शुद्ध-गन्धस्य भागैकं तावत् कज्जलगन्धकम्। अथ वा पारदा-स्त्रीं शुद्धगन्धकमेव हि। तयोः कज्जलिकां कुर्यादहिन-मेकं विमर्दयेत्। मृत्तिकां वाससा सार्द्धं कुट्टयेदतियत्नतः। तथा वारत्रयं सम्यक् काचकूप्यां प्रलेपयेत्। मृत्तिकां शोषयित्वा तु कूप्यां कज्जलिकां क्षिपेत्। तां कूपीं वालुकायन्त्रे स्थापयित्वा रसं पचेत्। अग्निं निरन्तरं दद्याद् यावद्दिनचतुष्टयम्। मल्लीयमद्भुर्ध्व-संलग्नं सिन्दूरसदृशं रसम्"।

रसा स्त्री पाकजः रसो माधुर्यादिरूपोऽस्त्यस्याः अच्। पृथिव्याम् अमरः। [रसाञ्जने राजनि०।

रसाग्रज न० रसस्य पित्तस्थधातुद्रवस्याग्रात् जायते जन-ड।

रसाञ्जन न० रसजातं पित्तस्थधातुजमञ्जनम्। स्वनामख्याते "रोचनान्तु घ्रायमाणायां तत्क्षिप्तन्तु रसाञ्जनम्। तदभावे तु कर्त्तव्यं दर्वीकाथसमुद्भवम्" रत्नमाले १पदार्थे राजनि० तद्विधिश्च भावप्र० उक्तो यथा

"दार्वीकाथसमं क्षीरं पादं पक्त्वा यथा घनम्। तदा रसाञ्जनाख्यं तन्नेत्रयोः परमं हितम्। रसाञ्जनं कटु क्लेदविषनेत्रविकारहृत्। तिक्तं रसायनं तिक्तं छेदनं मलदोषहृत्"।

रसाढ्य पु० रसेन मधुररसेनाढ्यः। १आम्रातके राजनि०। २रसवति त्रि०। [भागे अमरः।

रसातल न० रसायास्तलम्। पातालभेदे सप्तमे भूमेरधो-

रसाधिक पु० रसाय द्रवाय स्वर्णादिद्रावणाय अधिकः आदीयमानत्वात्। १टङ्कणे रसेनाधिका। २काको-दुम्बरिकायां स्त्री राजनि०। ३रसेनाधिके त्रि०। [रसे

रसान्तर न० अन्यो रसः मयूर० नि०। प्रकृतरसादन्यस्मिन्

रसाभास पु० रस इव आभासते आ+भास-अच्। "अनौ-चित्यप्रवृत्तत्वे आभासौ रसभावयोः" सा० द० उक्ते पश्वादिपरनायकादिगतशृङ्गारादौ रसे।

"अनौचित्यञ्चात्र रसानां भरतादिप्रणीतलक्षणानां साम-ग्रीरहितत्वे सत्येकदेशयोगिनोपलक्षणपरं बोध्यं तच्च बालव्युत्पत्तये एकदेशतो दर्श्यते। "उपनायकसंस्थायां मुनिगुरुपत्नीगतायाञ्च। बह्वनायकविषयायां [रतौ तथाऽनुभयनिष्ठायाम्। प्रतिनायकनिष्ठत्वे तदुपदधव-पालतिर्यगादिगते। अङ्गारेऽनौचित्यं रौद्रे सुखादिगत-कोपे शान्ते च व्रीलनिन्दे सुखोद्भावनत्वे व्याख्ये। ब्रह्मवधादुत्साहेऽधमपात्रगते तथा वीरे। उत्तमपात्र-गतत्वे भयानके घृणेयेऽवस्तुत्व"। [(चुकपाचक्र)।

रसाङ्ग न०रसेनाङ्गम्। १हिङ्गुले राजनि०।२शुक्ले च भावप्र०

रसायन न० रसस्यायनमिव। १तक्रे हेमच० २कटुफले राजनि० ३विषभेदे वैद्यकप्रसिद्धे ४औषधभेदे च ५गरुडे ६विष्णौ च पु० मेदि०। ७त०। ८रसस्थाने च।

औषधभेदलक्षणादि भावप्र० उक्तं यथा

"शक्तराद्याधिविध्वंसि वयसस्तम्भकृत्तथा। चाक्षुष्यं हृद्यं मेध्यं तद्रसायनम्"। रसायनस्य फलमाह "दीर्घमायुः स्मृतीर्मेधामारोग्यं तरुणं वयः। देहेन्द्रियबलं कान्तिं नरो विन्देद्रसायनात्"। तद्विधिमाह "पूर्वे वयसि मध्ये वा मनुष्यस्य रसायनम्। प्रयुञ्जीत भिषक् प्राज्ञः स्निग्धशुद्धतनोः सदा। नाविशुद्धशरीरस्य युञ्जतो रसायनं विधिः। न भाति वाससि क्लिष्टे रङ्गयोग इवाहितः"। "शीतोदकं पयः क्षौद्रं घृतमेकैकशो हितः। त्रिशः समस्तमथ वा प्राक् पीतं स्यादपेक्षयः। मण्डूकपर्ण्याः स्वरसः प्रभाते प्रयोज्य यष्टीमधुकस्य चूर्णम्। रसो गुडूच्यास्तु समूलपुष्पः कल्कः प्रयोज्यः खलु शङ्खपुष्प्याः। आयुःप्रदान्यामलकायनानि बलान्विवर्णस्वरवर्द्धनानि। मेध्यानि चैतानि रसायनानि मेध्या विशेषेण च शङ्खपुष्पी"। मण्डूकपर्णी ब्राह्मी। (वरभी) इति लोके, तदभावे सङ्खपुष्पीरपि प्राह्या तथा अपि रसायनत्वात्। "माक्षिकेण तुगाक्षीर्या पिप्पल्या लवणेन च। त्रिफला त्रिवया वापि युक्ता सिद्धं रसायनम्। त्रिमूलं मर्करा शुण्ठी कषायषड्गुडैः क्रमात्। वर्षादिष्वभया प्राह्या रसायनगुणैषिणा। पुनर्नवस्याढकं सबल्वं पिष्टं पिबेद् यः पयसार्द्धमासम्। मासत्रयं तच्चिरगुप्तं समां वा जीर्णोऽपि भूयः स पुनर्नवः स्यात्। यो मासमेकं स्वरसं पिबन्ति दिने दिने भृङ्गरजः सतुल्यम्। वीराग्निकल्पे पवनीर्ययुक्ता नरास्ततं जीवनमाप्नुवन्ति। शतावरी सुस्थितिका गुडूची सहस्थिकर्षा सह ताल्यमूली। एतानि लात्वा समभागयुक्तान्याक्षेन किं वा मधुनाऽवलिह्यात्। जराकृजाकृत्यु-विमुक्तदेही भवेन्नरो वीर्यबलादियुक्तः। विभाति देवप्रतिमः स नित्यं प्रभामयो भूरिविशुद्धबुद्धिः। घृताप्लुतां प्रातरथो पयसार्द्धमासं घृतेन तैलेन सुखाम्बुना वा। वीर्यञ्च पुष्टिं वपुषो विधत्ते बालस्य शक्रस्य यथाक्षुदृष्टिः। अयःपलं गुग्गुलुरत्र योज्यः पलत्रयं स्योपपलानि पञ्च। पलानि चाष्टौ त्रिफलारजस्य कर्षं त्रिकृत् यावदरत्नमेव। न केवलं दीर्घमिहा युरश्नुते रसायनं योविधिवन्निषेवते। मतिं स देवर्षि निषेवितां सुधां प्रपद्यते ब्रह्म तथैव चाक्षयम्"।

रसायनफला स्त्री रसायनौषधविशेष इव फलं व्याधिघातकत्वाद् यस्याः। हरितक्याम् त्रिका०।

रसायनश्रेष्ठ पु० रसायनेषु औषधभेदेषु श्रेष्ठः। पारदे राजनि०।

रसायनी स्त्री रसायनं रसस्थानमस्त्यस्या अच् गौ० ङीष्। १गुडूच्याम् २काकमाच्यां ३मङ्गाकरञ्जे ४गोरक्षदुग्धायाम् ५मांसरुद्रायाञ्च राजनि०।

रसाल न० रसमाददाति आ+दा-क ह्रस्व०। १सिक्थके २गन्धरसे मेदि०। ३शिखरिण्याम् (श्रेयभेदे) तत्पाकविधिः क्षताभ्रशब्दे २१८३ पृ० भावप्र० उक्तो दृश्यः। ४रसनायां ५दूर्वायां ६विदार्यां ७द्राक्षायाञ्च स्त्री मेदि०। ८आम्रे "रसालः साल्वः समदयूतोऽसना" नैषधम्। ९रक्षौ अमरः। १०पनसे शब्दर०। ११गोधूमे १२पुण्ड्रेक्षौ च पु० राजनि०।

रसालिङ्गा स्त्री रसां भूमिं लेढि स्पृशति लिह-क (चाकलिया) चुपभेदे शब्दच०। [आख) रचुभेदे राजनि०।

रसाली स्त्री रसमाददाति आ+दा-क गौरा०ङीष्। (पुडि-

रसाश्वासा स्त्री रसां भूमिमाश्वासयति दलैः आ+श्वस-णिच् अण्। पत्राशोलतायाम् राजनि०।

रसास्वादिन् पु० रसं पुष्परसमास्वदते आ+स्वद-णिनि। १भ्रमरे शब्दमा०। २मधुरश्रृङ्गारादिरसास्वादके त्रि० स्त्रियां ङीप्।

रसिक पुं स्त्री० रसं वेत्ति अनुभवति ठन्। १सारसपक्षिणि राजनि० २अश्वे ३गजे सारसतः। स्त्रियां जातित्वात् ङीष्। ४रसज्ञे त्रि०। रसोऽस्यास्ति ठन् ५रसवति च त्रि० मेदि०। ६रसालायाम् ७इक्षुरसे च स्त्री मेदि०८काश्म्र्यां ९रसनायां स्त्री विश्वः।

रसित न० चु०रस-भावे क्त। १मेघादिशब्दे २विरुतादिशब्दे च अमरः। कर्त्तरि क्त। ३शब्दयति कर्मणि-क्त ४आस्वादिते च त्रि०। [तत्रैव स्वार्थे क। तत्रार्थे।

रसुन पु० रस-उनन्। लशुने शब्दच०। ओनन् रसोन

रसेन्द्र पु० रस इन्द्र इव। पारदे राजनि०।

रसेश्वर पु० रसः पारद ईश्वर इव तद्वेधरसजातत्वात्। १ईश्वरतुल्ये रसे। तत्त्वज्ञानार्थं देहस्थैर्य्यसम्पादनद्वारा सच्चिदेकत्वसम्पन्ने माहेश्वरभेदाः प्रतिभेदिरे तन्मतञ्च सर्वदर्शनसंग्रहे प्रदर्शितं यथा

"अपरे माहेश्वराः परमेश्वरतादात्म्यवादिनोऽपि पिण्डस्थैर्यं सम्पादयितुं जीवन्मुक्तिं वेत्यतीत्यास्याय पिण्डस्थैर्योपायं पारदादिपदवेदनीयं रसमेव सङ्किरन्ते रसश्च पारदत्वं संसारपरम्परापरिपन्थिहेतुत्वेन तदुक्तम्

इतःपरः ग्रन्थः पारदशब्दे ४११२ पृष्ठे प्रदर्शितः ।

"प्रकारान्तरेणापि जीवन्मुक्तौ नेयं वाचोयुक्तिर्युक्तिमतीति चेन्न षट्स्वपि दर्शनेषु देहपातानन्तरं मुक्तेरुक्ततया तस्य विश्वासानुपपत्त्या निर्विचिकित्सप्रवृत्तेरनुपपत्तेः । तदयुक्तं तत्रैव "अदृष्टार्थेऽपि शास्त्रेषु दर्शिता पिण्डपातने । करामलकवत्प्रायो प्रत्यक्षा नोपलभ्यते । तस्मात्तं रसवेदिभिश्च रसैरेव रसायनैरिति" । गोविन्दभगवत्पादाचार्यैरपि "इति धनशरीरभोगानित्यत्वादनित्यात् सदैव यतनीयम् । मुक्तौ सा च ज्ञानात् तज्ज्ञाभ्यासात् स च स्थिरे देहे"इत्युक्तम् । ननु विनश्वरतया इष्टप्रमाणक देहस्य कथं नित्यत्वमवगीयते इति चेन्नैवं मंस्थाः,षाट्कौशिकस्य शरीरस्यानित्यत्वेऽपि रसाभ्रकपदार्थसिद्धपारगौरीस्थितिजातस्य नित्यत्वोपपत्तेः तथाच रसहृदये "ये चात्यक्तशरीरा पारगौरीस्थितिजालं प्राप्ताः। वन्द्यास्ते रससिद्धा मन्त्रगणः किङ्करो येषामिति" । तस्माज्जीवन्मुक्तिं समीक्षमाणेन योगिना प्रथमं दिव्यतनुर्विधेया । पारगौरीस्थितिसंयोगजनितत्वञ्च रसस्य पारत्वेनाभ्रकस्य गौरीसम्भवत्वेन तत्तदाख्यत्वसङ्गतम् "कज्जलस्य बीजन्तु मम बीजन्तु पारदः । अनयोर्मेलनं देवि ! खलु दारिद्र्यनाशनमिति"। अत्यल्पमिदमुच्यते देवदैत्यसनिमानवादिषु बहवो रससामर्थ्यादिह्यं देहमाश्रित्य जीवन्मुक्तिमाश्रिताः श्रूयन्ते रसेश्वरसिद्धान्ते "देवाः केचिच्छेषाद्या दैत्याः काव्यपुरःसराः । सनयो बालखिल्याद्या नृपाः सोमेश्वरादयः । गोविन्दभगवत्पादाचार्यो गोविन्दनामकः । चर्पटिः कपिलो व्याडिः कापालिः कन्दलायनः । एतेऽन्ये बहवः सिद्धा जीवन्मुक्तावरन्हि ते । तत्तं रसमयीमाद्य तदात्मक कथाचणाः" इति । अयमेवास्यार्थः परमेश्वरेण परमेश्वरीं प्रति प्रपञ्चितः' ।

इतःपरो ग्रन्थः पारदशब्दे ४११३ पृ० दर्शितः ।

तत्प्रपञ्चस्तु गोविन्दभगवत्पादाचार्यसर्वज्ञशङ्करेश्वरभट्टारकप्रभृतिभिः प्राचीनैराचार्यैर्निरूपित इति ग्रन्थभूयस्त्वभयादुद्धास्यते । न च रसशास्त्रं धातुवादार्थमेवेति मन्तव्यं देहवन्धद्वारा मुक्तेरेव परमप्रयोजनत्वात् तदुक्तं रसार्णवे "लोहबन्धस्त्वया देव ! यद्दत्तं परमोचितः । । तं देहबन्धमाचक्ष्व येन स्यात् खेचरी गतिः । यथा लोहे तथा देहे कर्त्तव्यः खलु सत्वतः । समानं कुरुते देवि ! प्रत्ययं देहलोहयोः । पूर्वं लोहे परीक्षेत पश्चाद्देहे प्रयोजयेत्"इति । ननु सच्चिदानन्दात्मकपरतत्त्वस्मरणादेव मुक्तिसिद्धौ किमनेन दिव्यदेहसम्पादनप्रयासेनेति चेत्तदेतदवार्त्तं वार्त्ताशरीराभावे तद्वार्त्ताया अयोगात् । तदुक्तं रसहृदये "गलितानल्पविकल्पः सर्वाध्वविवर्जितश्चिदानन्दः । स्मरितोऽप्यस्मरितस्तनोः करोति किं जन्तुरर्गलेति । यं जरया जर्जरितं कासश्वासादिदुःखविशदञ्च । योग्यं तं न समाधौ प्रतिहतबुद्धीन्द्रियप्रसरम् । वालः क्रीडनपरो विषयरसास्वादलम्पटः परतः । वातविवेको दक्षो मर्त्यः कथमाप्नुयान्मुक्तिमिति" । ननु जीवत्वं नाम संसारित्वं तद्विपरीतत्वं मुक्तत्वं तयाच परस्परविरुद्धयोः कथमेकायतनत्वमुपपन्नं स्यादिति चेत्तदनुपपन्नं विकल्पानुपपत्तेः सच्चिदात्मा सर्वतीर्थकरसम्मता सा किं देवपदे निविशते न वा चरमे यद्यविशेषकल्पा स्यात् प्रथमे न जीवन्मुक्तिर्वर्जनीयजीवतो मुक्तत्वानुपपत्तेः । तदुक्तं रसेश्वरसिद्धान्ते "रसाङ्गमेवमार्गोक्तं जीवन्मोक्षोऽस्त्यधोमनाः । प्रमाणान्तरवादेषु युक्तिभेदावलम्बिषु । ज्ञानज्ञेयमिदं विद्धि सर्वतन्त्रेषु सम्मतम् । नाजीवन् मुक्तिमाप्नोति ज्ञेयं यदतोऽस्त्येव जीवनम्" इति । न चेदमदृष्टचरमिति मन्तव्यं विष्णुत्वाभिमतानुसारिभिः रूपचाक्षुषशरीरस्य नित्यत्वोपपादनात् । तदुक्तम् साकारसिद्धौ "सच्चिदात्मनिजाचिन्त्यपूर्णानन्दैकविग्रहम् । रूपञ्चाक्षुषमहं वन्दे श्रीविष्णुत्वाभिसम्मतम्" इति । ननु तत् सावयवं रूपवदवभासमानं स्वकण्ठीरवादृक् सदिति न सङ्गच्छत इत्यादिनाक्षेपपुरःसरं मनकादिप्रत्यक्षेण "सहस्रशीर्षा पुरुषः" इत्यादिश्रुत्या "तमद्भुतं बालकमम्बुजेक्षणं चतुर्भुजं शङ्खगदाद्युदायुधम्" इत्यादिपुराणलक्षणेन प्रमाणत्रयेण सिद्धं रूपञ्चाक्षुषादृक् कथमसत् स्यादिति । सदादीनि विशेषणानि गर्भश्रीकालभिन्नैः विष्णुत्वाभिचरणपरिपन्थालःकरणैः प्रतिपादितानि । तस्मादस्मदिष्टदेहनित्यत्वमलब्धादृष्टं न भवतीति पुरुषार्थकामुकैः पुरुषैरेष्टव्यम् । अत एवोक्तम् "आयतनं विद्यानां मूलं धर्मार्थकाममोक्षाणाम् । श्रेयः परं किमन्यच्छरीरमजरामरं विद्यायैकमिति" । अजरामरीकरणसमर्थश्च रसेन्द्र एव तदाह "एकोऽसौ रसराजः शरीरमजरामरं कुरुते" इति । किं वर्ण्यते रसस्य माहात्म्यं यस्य दर्शनस्पर्शनादिनापि महत् फलं भवति । तदुक्तं रसार्णवे"दर्शनात् स्पर्शनात्तस्य भक्षणात् क्षरणादपि । पूजना-

द्रवदानाच्च दश्यते षड्विधं फलम्। केदारादीनि लिङ्गानि पृथिव्यां यानि कानिचित्। तानि दृष्ट्वा तु यत्पुण्यं तत् पुण्यं रसदर्शनादित्यादिना"। अन्यत्रापि "काश्यादिसर्वलिङ्गेभ्यो रसलिङ्गार्चनं शिवम्। प्राप्यते येन तल्लिङ्गं भोगारोग्यास्पदाजरम्" इति। रसनिन्द्यायाः प्रत्यवायोऽपि दर्शितः "प्रमादाद्रसनिन्द्यायाः श्रुतावेनं स्मरेत् सुधीः। द्राक् त्यजेल्लिन्द्यं नित्यं निन्द्या पूरितमशुभम्" इति। तस्मादेवंभूतया रीत्या दिव्यं देहं सम्प्राप्य योगाभ्यासवशात् परतत्त्वे दृष्टे पुरुषार्थप्राप्तिर्भवति। तदा "भ्रूयुगमध्यगतं यत् शिखिविद्युत्सूर्यवह्निगङ्गासि। तेजोराशिस्तु पुरुषदशास्तन्नीचति चिन्मयं ज्योतिः। परमानन्दैकरसं परमं ज्योतिःस्वभावमविकल्पम्। विगलितसकलक्लेशं शैवं शान्तं स्वसंवेद्यम्। तस्मिन्नाधाय मनः स्फुरदखिलं चिन्मयं जगत् पश्यन्। चतुरक्षरकर्मबन्धो ब्रह्मत्वमिहैव चाप्नोतीति"। श्रुतिश्च "रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवतीति"। तदित्थं भवे नान्योऽस्त्यरतरणोपायो रस एवेति सिद्धम्। तथाच रसस्य परब्रह्मणा साम्यमिति प्रतिपादकः श्लोकः "यः स्यात् प्रावरणाविमोचनधियां साध्यः प्रलया पुनः सम्भूतो वहते न दीव्यति परं वैश्वानरे जायति। जातो यद्यपरं न वेदयति च स्वात् स्वयं द्योतते यो ब्रह्मैव स दैन्यसंहतिभयात् पाषादसौ पारदः" इति।

रसोत्तम पु० रस उत्तमो यस्य। शुक्रे राजनि०।

रसोद्भव न० रसः पारद उद्भवत्यस्मात् उद्+भू-अच् उद्भवो यस्य। १शिखुके राजनि०। ५त०। २रसजाते त्रि०।

रसोपल न० रसः पारद इव उपलीयते शुभत्वात् उप+ली-ड। औषधिके त्रिका०।

रस्न न० रस न। द्रव्ये उज्ज्वलद०।

रस्य न० रसाद्भुक्तान्नपरिणामादागतः यत्। १रुधिरे शब्दच० रस्यते आस्वाद्यते रस-यत्। २आस्वाद्ये त्रि०। रस्याः, "स्निग्धाः स्थिरा हृद्याः" गीता। ३पाठायां ४राजान्नाद्यञ्च स्त्री राजनि०।

रह गतौ भ्वा० पर० सक० सेट् इदित्। रंहति अरंहीत् "तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः" शारीरकसूत्रम्

रह त्यागे भ्वा० प० सक० सेट्। रहति अरहीत्।

रह त्यागे अद० चु० उभ० सक० सेट्। रहयति ते अररहत्-त

रहस् न० रह-असुन्। १निर्जने अमरः। २गोप्ये ३याज्ञाय्यें ४रमणे च मेदि०। ५निर्जने अव्य० अमरः। रहस्ये अस्मिन् रह-असुन् मस्य रः। ६विश्वासयोग्यदेशे उज्ज्वलद०।

रहस्य त्रि० रहसि भवः यत्। १गोप्ये "रहस्यमन्त्राः स महदिति" नैषधम्। २निर्जनभवे च ३पाठायां ४राज्ञायाञ्च स्त्री राजनि० टाप् ५नदीभेदे स्त्री मेदि०।

रहित त्रि० रह-त्यागे कर्मणि क्त। वर्जिते।

रा दाने यजने च अदा० पर० सक० अनिट्। राति अरासीत्।

रा स्त्री रा-क्यप् भावे क्विप्। १विश्वमे २दाने एकाक्षरकोषः। कर्मणि क्विप्। ३काञ्चने शब्दर०।

राका स्त्री रा-क तस्य नेत्त्वम्। १प्रतिपदुयुक्तायां पूर्णमास्यां सम्पूर्णेन्दुतिथौ २नदीभेदे ३नवजातरजस्कायां नार्यां ४कक्षुरोगे च मेदि०। ५आङ्गिरसः कन्याभेदे कृष्णशब्दे २१६२ पृ० दृश्यम्।

राक्षस पु० रक्ष एव स्वार्थे अण्। "क्वचित् स्वार्थिका अपि प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते"इति भाष्योक्तेः पुंस्त्वम्। खनामख्याते निकषात्मजे १जातिभेदे अमरः जातौ ङीष्। २राक्षसजातिस्त्रियाम् स्त्री। रक्षस इदम् अण्। ३राक्षससम्बन्धिनि त्रि० स्त्रियां ङीष्। "राक्षसी रात्रिरन्यत्र" त्रि०त०। ४दंष्ट्रायां शब्दच० ५चण्डिकायां ६चौरनामगन्धद्रव्ये च स्त्री मेदि० ङीष्।

राक्षसेन्द्र पु० राक्षस इन्द्र इव श्रेष्ठत्वात्। विश्रवसः ज्येष्ठपुत्रे निकषात्मजे रावणे त्रिका०।

राघा स्त्री राध्यतेऽनया रध-कर्मणि-घञ् पृषो० इत्वं वस्य रत्वं। लाघायाम् अमरः।

राध शोभने भूषणे निवारणे च सक० सामर्थ्ये अक० भ्वा० पर० सेट्। राधति अराधीत्। क्वादित्वे अद्धिः न छधः।

राग पु० रञ्ज-भावे घञ् नलोपश्च त्वे। १रञ्जने २शुक्लादिवर्णे ३प्रीतौ ४अनुरागे ५लाभे ६मालवादिनामभिः प्रसिद्धे निषादादिस्वरयोनिके स्वरभेदे मेदि० ७चन्द्रे दक्षयज्ञे च शब्दर०। करणे घञ्। ८लोहितवर्णे १०तद्विशिष्टलाक्षादौ च "तेन रक्तं रागात्" यः अनुरागलक्षणम् उज्ज्वलमणिरुक्तं यथा "क्षणमप्यधिकं चित्ते सुखत्वेनैव रज्यते। यतस्तु प्रथयोत्कर्षात् स राग इति कथ्यते"। स्वरभेदनिरुक्तिर्यथा "यैस्तु चेतांसि रञ्जन्ते जगच्चित्तयवर्त्तिनाम्। ते रागा इति कथ्यन्ते सनिभिर्भरतादिभिः" तेषां भेदाः संगीतद० मतभेदे नाना तत्र प्रसिद्धा षड्भेदा यथा

"आदौ मालवरागेन्द्रस्ततो मल्लारसंज्ञितः । श्रीरागश्च ततः पश्चात् वसन्तस्तदनन्तरम् । हिन्दोलश्चाथ कर्णाट इते रागाः षड़े च तु" सङ्गीतदा० । भरतमते तु "भैरवः कौशिकश्चैव हिन्दोलो दीपकस्तथा । श्रीरागो मेघरागश्च रागाः षड्डिति कीर्त्तिताः" ।

रागचूर्ण पु० रागस्य रतेश्चूर्ण इव । १कामे । रागाय चूर्णस्तेऽस्मै चूर्ण-घञ् । २खदिरे च मेदि० । ३खाद्यायां राजनि० ४रागयुक्तचूर्णे पु० (फाग) शब्दच० ।

रागदालि पु० दल्यतेऽसौ दल-घिच्-इन् पृषो० इद्विः रागेण रक्ततया युक्तो दालिर्वा । मञ्जरे राजनि० ।

रागपुष्प पु० रागयुक्तं रक्तवर्णं पुष्पमस्य । १वन्धूके २रक्तास्थाने च ३लवायां स्त्री राजनि० ङीप् ।

रागप्रसव पु० रागयुक्तो रक्तवर्णः प्रसवोऽस्य । १वन्धूके २रक्तास्थाने च राजनि० ।

रागयुज् पु० रागेण रक्तवर्णेन युज्यते युज-कर्मणि क्विप् । १माणिक्ये राजनि० २रक्तवर्णयुक्ते त्रि० ।

रागसूत्र न० रागयुक्तं सूत्रम् । षट्सूत्रे २तन्त्रास्त्रे च मेदि० । [राजनि० ३त० । रागाद्याधत्र स्त्री ।

रागाङ्गी स्त्री रागयुक्तमङ्गं यस्याः ङीप् । मञ्जिष्ठायाम्

रागिणी स्त्री रागोऽस्त्यस्या इनि । १गौरीवर्णे खरभेदे रागपत्न्यां सङ्गीतदा० । २विदग्धनार्यां जटा० । ३मेनकाकन्यायां रागवति ४अनुरक्ते ५कासके त्रि० विश्वः रनुज-विष्णुन् । ६रतियुक्ते च त्रि० । ७रक्तधान्यभेदे मेदि० । एकैकरागे षट् रागिण्य इति षट्सु रागेषु रागिणीभेदाश्च षट्त्रिंशत् यथा

"षट्त्रिंशद्रागिणीभेदाः क्रमशः कथिता मया । धानसी१ मालसी२ चैव रामकीरी३ च सिन्धुड़ा ४ । आशावरी५ भैरवी६ च मालवश्च (१) प्रिया इमाः । वेलावली७ पुरवी८ च कानड़ा९ माधवी१० तथा । कोडा११ केदारिका१२ चापि मल्लार(२)दयिता इमाः । गान्धारी१३ सुभगा१४ चैव गौरी१५ कौमारिका१६ तथा । वेलोवारी१७ च वैरागी१८ श्रीरागश्च (३) प्रिया इमाः । तुडी१९ च पञ्चमी२० चैव ललिता२१ षठमञ्जरी२२ । गुर्जरी२३ च विभाषा२४ च वसन्तश्च (४) प्रिया इमाः । मायूरी२५ दीपिका२६ चैव देशकारी२७ च पार्हिडी२८ । वराडी२९ गोरहाटी३० च हिन्दोलश्च(५) प्रिया इमाः । नाटिका चाथ भूपाली३१ रामकेली३२ गड़ा३३ तथा । कामोदा३४ चाथ कल्याणी३५ कर्णाटश्च (६) प्रिया इमाः" ।

सङ्गीतदा० । तद्भेदाः तत्पुत्रादयश्च तत्रैव दृश्याः ।

राघ भ्वा० आ० अक० सेट् । राघते अराघिष्ट । कादित् चङि न हुस्वः ।

राघव पु० रघोर्गोत्रापत्यम् अण् । १रघोर्वंश्ये २तत्प्रधाने श्रीरामे च ३मङ्गलतरुभेदे ४वसुदेवे च मेदि० ।

राङ्कव न० रङ्कोरयं विकारो वा तल्लोमजातत्वात् अण् । मृगविशेषलोमजाते वस्त्रभेदे अमरः ।

राज दीप्तौ भ्वा० उभ० अक० सेट् । राजति ते-अराजीत् अराजिष्ट कर्त्तरि रेजतुः रराजतुः । कादित् चङि न हुस्वः ।

राजक न० राज्ञां समूहः कन् । १नृपसमूहे अमरः । राजैव क । २नृपे पु० । राज-खुञ् । ३दीप्तिमति त्रि० । [भेदे जटा० ।

राजकदम्ब पु० कदम्बानां राजा राजद० परनि० । कदम्ब-

राजकल्प पु० ईषत्समाप्तो राजा राजन्+कल्पप् । राज-तुल्ये । [ख्यात् राजनि० ।

राजकर्कटी स्त्री राजते राज-अच् कर्म० । चीनाकर्क-

राजकशेरु पु० कशेरुरिवास्ति राजा राजद० । भद्रमुस्तायाम् राजनि० । [खोदौ ।

राजकीय त्रि० राज्ञ इदम् छ कुक् च । राजसम्बन्धिका-

राजकुमार पु० राज्ञः कुमारः । अप्राप्तवयस्के युवराज-कार्य्यानारूढे राजपुत्रे । [ख्याम् जटा० ।

राजकुष्माण्ड पु० राज्ञः कुष्माण्ड इव प्रियत्वात् । वार्त्ता-

राजकोषातकी स्त्री राजप्रिया कोषातकी । (घियाभिङ्गा) लतामेदे मदनविनोदः ।

राजक्षवक पु० क्षवत्वेन क्षु-अण् राजते राज-अच् कर्म० स्वार्थे क । राजसर्षपे (राइसर्षा) राजनि० ।

राजखर्जूरी स्त्री राजप्रिया खर्जूरी । खर्जूरीभेदे (पिण्ड-खेजुर) राजनि० । [२शाकभेदे राजनि० ।

राजगिरि पु० राज्ञामयं गिरिः । १मगधस्थे पर्वतभेदे

राजघ त्रि० राजानं हन्ति हन-क नि० । १राजहन्तरि, २तीक्ष्णे च जटा० "रराज नीरजनया स राजघः" नैष० ।

राजजम्बू स्त्री राज्ञः जम्बूरिव । १पिण्डखर्जूरे मेदि० राजते अच् कर्म० । २महाजम्बूम् राजनि० ।

राजज(य)क्ष्मन् पु० राज्ञः चन्द्रस्य क्षयकारको ज(य)क्ष्मा । रोगभेदे यक्ष्मशब्दे दृश्यम् "राज(य)क्ष्मेव रोगाणाम्" माघः । [इक्षे २आरम्बधे च राजनि० ।

राजतरु पु० तरूणां राजा राजद० परनि० । १कर्णिकार-

राजताल पु० राजस्ताल इव प्रियः । १सुवाकवृक्षे शब्दर० । स्त्रीत्वमपि तत्र ङीप् । "राजताडीवनध्वनिः" रघुः ।

राजदन्त पु० दन्तानां राजा परनि० । ऊर्द्ध्वदक्षिणे मध्यवर्त्तिदन्तद्वये हेमच० । [तद्धे राजकल्पे ।

राजदेशीय पु० देशदेशो राजा राजन्+देशीयर् । राज-

राजधुस्तूरक पु० धुस्तूराणां राजा राज० पर० स्वार्थे क । वृक्षभेदे राजधुस्तूरकोऽप्यत्र पु० राजनि० ।

राजधर्म्म पु० राज्ञो धर्म्मः । राज्ञामवश्यकर्त्तव्ये प्रजापालनादौ कर्म्मणि । तमधिकृत्य कृतो ग्रन्थः अण् । भारतस्यान्तिमपर्व्वान्तर्गते व्यासप्रणीते ग्रन्थभेदे । राजधर्म्माश्च तत्र मानवे ७ अ० च उक्ता इत्याः ।

राजधानी स्त्री राजा धीयतेऽस्यां धा-आधारे ल्युट् ङीप् । राजावासे महानगर्य्यां शब्दर० । [धान्ये राजनि० ।

राजधान्य न०धान्येषु राजा राज०पर०) (श्यामा) श्यामाक-

राजन् पु० राज-कनिन् रञ्जयति रञ्ज-कनिन् नि० वा । १इन्द्रे, "राजा प्रकृतिरञ्जनात्" रघुः । २चन्द्रे, ३प्रभौ, ४क्षत्रिये, ५यक्षे ६इन्द्रे, च मेदि० । उत्तरपदः पूर्व्वपदस्थ समभिव्याहृतपदार्थश्रेष्ठवाचकः । यथा राजमाषः नृपराज इत्यादि । ७धुस्तुरे च । "पिता न रक्षितास्तस्य प्रजास्ते नाहरक्षिताः । क्षतुरायत्ततस्तस्य नाम राजेत्यभाषत" विष्णुपु० ।

राजनीति स्त्री राज्ञां नीतिः । १राजत्वे सामाद्युपाये, २उपचारात् तत्प्रतिपादके-शास्त्रे च । सा च कामन्दकीयनीतिशास्त्रादौ दृश्या ।

राजन्य पु० राज्ञोऽयम् यत्, जातौ नञोपः । राज-ञ्य वा । १क्षत्रिये अमरः । २राजपुत्रे ३अग्नौ, ४पाण्डिकोशीरिकाख्ये वृक्षे चटा० । [समूहे अमरः ।

राजन्यक न०राजन्यानां क्षत्रियाणां समूहः कन् । क्षत्रिय-

राजन्वत् त्रि० प्रशस्तो राजाऽस्यास्ति प्राशस्त्ये मतुप् मस्य वः न नञोपः । सुन्दरराजयुते देशे अमरः अन्यत्र राजवद् इत्येव । [२मधुरपटोल्यां राजनि० ।

राजपटोल पु० राजप्रियः पटोलः । १पटोले रत्नमा० ।

राजपट्ट पु० राज्ञः पट्ट इव । मणिभेदे त्रिका० ।

राजपथ पु० पथां राजा राजगमनयोग्यो वा पथ्याः षच्-समा० । "धनूंषि दश विस्तारे श्रीमान् राजपथः स्मृतः । चतुर्हस्तिरथनागानामेकबाधः सुसङ्करः" इत्युक्ते राजमार्गे हेमीपु० । [वर्षपत्राख्यो राजनि० ।

राजपत्राख्य पु० पत्राख्यानां राजा श्रेष्ठत्वात् राजद० रक्त-

राजपीलु पु० राजप्रियः पीलुः । महापीलुवृक्षे राजनि० ।

राजपुत्र पु०राज्ञश्चन्द्रस्य, क्षत्रस्य वा पुत्रः । १बुधपुत्रे शब्दर० २क्षत्रकुमारे ३वर्णसङ्करभेदे (रजपुत) "वैश्यादम्बष्ठकन्यायां राजपुत्रस्य सम्भवः" इति पराशरः । ४महाराजचूतवृक्षे राजनि० ।

राजपुत्री स्त्री राज्ञश्चन्द्रस्य पुत्रीव । १कटुतुम्ब्याम् २रेणुकायां ३स्पष्परीतौ, ४जातौ ५क्षुद्रक्षुद्र्यां च । ६मालत्याञ्च राजनि० । हृत० । १क्षत्रकन्यायाम् । संज्ञायां कन् । ७वराटिकावृक्षे जटा० ।

राजपुष्प पु० राजा चन्द्र इव शुभत्वात् पुष्पमस्य । नागकेसरवृक्षे शब्दच० । २करवीरवृक्षे स्त्री राजनि० ङीप् ।

राजफणिञ्जक पु०राज-अच् कर्म० । नागरङ्गवृक्षे शब्दमा०

राजफल न० राजप्रियं फलमस्य । १पटोले त्रिका० । २राजप्रियं फलमस्याः । २लम्बुस्याम् स्त्री राजनि० टाप् ।

राजबदर न० राज्ञो बदरमिव प्रियत्वात् । १रक्तामलके २बदरे च मेदि० बदराणां राजा राजद० प० । ३बदरमकोलौ पु० राजनि० । [भादाल) लताभेदे अमरः ।

राजबला स्त्री राज-अच् राजं बलं यस्याः ५ब० । (गन्ध-

राजभद्रक पु० राज्ञो भद्रं यस्मात् कप् । १कुडे (कुड़) २निम्बे च राजनि० ३पारिभद्रवृक्षे धातुपा० ।

राजभूय न० राज्ञो भावः राजन्+भू-क्यप् । राज्ञोऽवश्यकरणधर्म्मे राजत्वे ।

राजभोग्य न० राज्ञा भोक्तुं योग्यम् भुज-यत् कुत्वम् । १जातीकोषे २प्रियालवृक्षे पु० शब्दच० ३राजतेर्भोग्यवस्तुमात्रे त्रि० ।

राजमार्ग पु० राजयोग्यः मार्गः । १राजपथे राजनि० ।

राजमाष पु० माषेषु कलायेषु राजा श्रेष्ठत्वात् राजद०पर० । १माषभेदे हेमच० । (बरबटी) २स्त्रीत्वेऽपि भेदे राजनि० ।

राजमुद्ग पु०मुद्गेषु राजा राज०प०नि० । (सुगानि) मुद्गभेदे ।

राजरङ्ग न० राजयोग्यं रङ्गम् । रजते शब्दर० ।

राजराज पु० राज्ञामपि राजा प्रभूतधनत्वात् टच् समा० । १कुबेरे, अमरः । २सार्व्वभौमभूपे, ३चन्द्रे च मेदि० ।

राजर्षि पु० राजा ऋषिरिव श्रेष्ठत्वात् संयतत्वाच्च । १राजश्रेष्ठे, २यतात्मनि ऋषे च । [भेदे पुंस्त्री० ।

राजवंश्य त्रि० राजवंशे भवः यत् । १राजवंशोद्भवे २जाति-

राजवर्त्मन् न० राजयोग्यं वर्त्म । १राजशब्दोक्तलक्षणे राजपथे हेमच० । हृत० । राज्ञः २कर्त्तव्यकर्म्मणि च ।

राजवल्लभ पु० हृत० । १प्रियाले २राजबदरे ३राजाहे

राजानि० द्रव्यगुणप्रतिपादके तन्त्रभेदे च। २राज्ञः भिषे त्रि०। [(उक्ता) कृताभेदे रत्नमा०।

राजवल्ली स्त्री राजते राज-क्वच् राजा वल्ली कर्म०। राजवत् त्रि० राजा राजमार्गं विद्यतेऽस्य मतुप् मस्य वः। राजमार्गवति देशे अमरः।

राजवीजिन् त्रि० राजा वीजो कारणं यस्य। राजबंधौ।

राजवृक्ष पु० वृक्षाणां राजा राजद० परनि०। १आरग्वधे (सोन्दाल) अमरः। राजप्रियो वृक्षस्तत्फलवीजजातवड्डुकस्य राजप्रियत्वात्। २प्रियाले मेदि०। ३वड्डास्यावृक्षे (वड्डाखिज) शब्दच०। [शब्दमा०।

राजशृङ्ग न० राज्ञां शृङ्गमिव अर्द्धस्थितत्वात्। राजचिह्ने

राजस त्रि० रजसा निर्मितः अण्। रजोगुणात् जाते १कर्मेन्द्रियादौ "वैनाशिनं कर्मणा लोके ख्यातिमाप्नोति पुष्कलाम्। न च शोचत्यसम्पत्तौ तद्विद्धि यन्तु राजसम्" इत्युक्ते ख्यात्यै क्रियमाणे २कर्मणि च। रजःप्रधानतयास्यास्ति अच्। ३रजःप्रधाने। सर्वेषां वस्तूनां त्रिगुणात्मकत्वेऽपि "भूयस्त्वात्तद्व्यपदेशः" इत्युक्तेः क्वचित् तत्प्रधानत्वेन व्यपदेशः। ४दूर्वायां स्त्री ङीप् शब्दमा०।

राजसभ न० राज्ञां सभा। सभ्यसमाजे अमरः।

राजसर्षप पु० सर्षपाणां राजा श्रेष्ठत्वात् राजद०। (राइसर्षा) १सर्षपभेदे हेमच०। "तेऽष्टौ सिद्धा स तान्त्रिको राजसर्षप उच्यते" कक्षे २परिमाणभेदे च विद्या।

राजसारस पुंस्त्री० राज्ञः सारस इव। मयूरे शब्दमा० स्त्रियां ङीष्।

राजसूय पु० राज्ञा क्रियते कृ-कर्मणि क्यप्। राजमात्रकर्त्तव्ये यज्ञभेदे शब्दच०। "राजा राजसूयेन यजेत" श्रुतिः।

राजस्व न० राज्ञे देयं स्वं करूपम् धनम्। १राजदेये करे हेत०। २राजधने च। [इक्षुधूस्तूरे राजनि०।

राजस्वर्ण पु० स्वर्णानां धुस्तूराणां राजा०राजद० परनि०।

राजहंस पुंस्त्री० हंसानां राजा श्रेष्ठत्वात्राजद०पर०। रक्तवर्णचञ्चुचरणयुक्ते श्वेतपक्षके हंसभेदे अमरः। २कलहंसे च मेदि०। उभयार्थे स्त्रियां ङीष्। राजा हंस इव सारपक्षत्वात्। ३वरपक्षभेदे। [तमरपुष्पे राजनि०।

राजहर्षक न० राज्ञः हर्षान् हर्षयति हृष-णिच्-ण्वुल्। राजातन पु० राजार्थं तनोति फलवीजम् आ+तन-अच्। (चीरकीति) ख्यातवीजवृक्षेतत्फलके पियाले शब्दमा०।

राजादन पु० राज्ञा अद्यते तत्फलवीजजातवड्डुकः अद-कर्मणि ल्युट्। १पियालवृक्षे अमरः। यस्य फलवीजं (चिरञ्जि) तेन हि वड्डुकं कृत्वा राज्ञा भुज्यते। २चीरिकायां (चीरट) ३किंशुके च मेदि०। ४चीरिण्यां स्त्री ङीप् भरतः। [राजनि०।हृत०। २वरपक्षाभिकाक्षे च

राजान्न न० अन्नानां राजा राजद०। १अम्बुदेशजधान्यभेदे

राजान्न पु० आन्नानां राजा श्रेष्ठत्वात् राजद०। १आम्रभेदे "राजाम्रं तुवरं स्वादु विशदं शीतलं गुरु। यदि स्यात् विबन्धाध्मातजन् कफपित्तहृत्" भावप्र०। [राजनि०।

राजान्न पु० अन्नानां राजा श्रेष्ठत्वात् राजद०। १अन्नभेदे

राजार्क पु० अर्काणां राजा श्रेष्ठत्वात् राजद०। श्वेतार्कवृक्षे (बादा आकन्द) राजनि०।

राजार्ह न० राजानमर्हति अर्ह-अच्। १अगुरुचन्दने २राजयोग्ये त्रि० राजनि० ३लम्बां स्त्री मेदि०। [भदन्वि०।

राजालाबू स्त्री राजते राजा अलाबूः कर्म०। मिष्टालाबुवाम्

राजावर्त्त पु० राजानमावर्त्तयति अतिशूलयति आ-वृत-णिच्-अच्। १उपरत्नभेदे राजनि०। २विराटदेशीयवीरवृक्षे हेमच०।

राजाहि पु० सिद्धक०। सिद्धसर्पे शब्दर०।

राजि(जी) स्त्री राज-इन् वा ङीप्। १श्रेण्याम् पङ्क्तौ २रेखायां च मेदि०। स्वार्थे क। रेखायाम्। राजते राज-क्विप्। राजिका राजसर्षपे स्त्री मेदि०।

राजिकाफल पु० राजिकाया इव फलमस्य। श्वेतसर्षपे राजनि०।

राजि(जी)फला स्त्री राजिभूतानि श्रेणिभूतानि फलानि यस्याः। १चीनाकर्कटयाम् राजनि० २पटोले पु०राजनि०

राजिल पुंस्त्री० राज-इलच्। क्षुद्रक्षुपसर्पे (ढोड़ासाप) अमरः स्त्रियां ङीष्।

राजीव न० राजी दलराजी अस्यास्ति व। १पद्मे अमरः। "राजीवराजीवमधोवेति" माघः। २हरिणभेदे ३मत्स्यभेदे च पुंस्त्री० मेदि० "राजीवसिंहदमखांश्च" मनुः। ४गजे त्रिका० ५सारसपक्षिणि च पुंस्त्री० अमरः सर्वत्र जातौ स्त्रियां ङीष्।

राजेन्द्र पु० राजा इन्द्र इव श्रेष्ठत्वात्। "चतुर्योजनपर्य्यन्तमधिकारी नृपो भवेत्। यो राजा तच्चतुष्कः स एव मण्डलेश्वरः। तस्माद्दशगुणो राजा राजेन्द्रः" इत्युक्ताधिकारवति भूपतिभेदे ब्रह्मवै० ब्र०ख० ८६अ०।

राज्ञी स्त्री राज्ञः पत्नी ङीप् स्वयं वा राजते राज-क्विन् ङीप् वा। (रानी) १राजपत्न्याम् २स्वयं राजकर्मकर्त्र्यां च स्त्रियां मेदि० ३कांस्ये हेमच०।

राज्य न० राज्ञो भावः कर्म वा राजन्+यत् नलोपः। १राजकर्मणि २राजभावे च शब्दर०।
"सकलाधिपत्यं राज्यं स्यात् सामाज्यं दशलक्षके। शतलक्षे महेशानि! महासामाज्यमुच्यते" वरदातन्त्रोक्ते ३लक्षत्रयाधिपत्ये च। [प्रजापालनादौ।

राज्यधुरा स्त्री ६त० षष्ठ्यन्तसमा०। राज्यभारे राजकर्त्तव्य

राज्याङ्ग न० ६त०। स्वाम्यमात्यसुहृत्कोषराष्ट्रदुर्गबलप्रकृतिरूपेषु सप्तसु राज्यस्योपायेषु। "परस्वैरोपकारीदं सप्ताङ्गं राज्यमुच्यते। स्वमात्यराष्ट्रे दुर्गेषि कोशो दण्डश्च पञ्चमः। एताः प्रकृतयस्तस्मात् विजिगीषोरुदाहृताः। एता यत्र तथा मित्रं सप्तमं पृथिवीपतिः। सप्तप्रकृतिकं राज्यमित्युवाच भगवानजः। मौरक्षेची तदङ्गं च ब्रुवते शब्दवेदिनः" शब्दर०।

राटि पुं०रट-इण्। (घराट) १विघ्ने अमरः। २युद्धे स्त्री हेमच० वा ङीप्। पृषो० टस्य डत्वम्। राडिरप्युभयोः

राढ़ पु० रह-घञ् पृषो० डत्वम्। देशभेदे (राढ़) स्त्रियां च तत्रैव।

राढ़ा स्त्री रह-घञ् पृषो०डत्वम्। पुरीभेदे "गौडं राष्ट्रमनुत्तमं निरुपमा तत्रापि राढा पुरीति" प्रबोधचन्द्रोदयः।

राढ़ीय त्रि० राढ़ो निवासोऽस्य "ढ्रञ्छ्यः" पा०ढ्रञ्। राढदेशोद्भवे।

रात्रि(त्री) स्त्री रा-त्रिप् वा ङीप्। १रजन्यां रूपां स्वस्वरैशाद्यपेक्षया सूर्यमण्डलस्य अदर्शनयोग्ये काले २हरिद्रायाञ्च अमरः। "मासेन च मनुष्याणां पितृणां तदहर्निशम्। कृष्णपक्षे दिनं प्रोक्तं शुक्ले रात्रिः प्रकीर्त्तिता" मनौ पितृणां ३शुक्लपक्षरूपे काले "उत्तरायणे दिनं प्रोक्तं रात्रिः स्यात् दक्षिणायने" इत्युक्ते देवानां दक्षिणायनरूपे ४काले च।

रात्रिकर पु० रात्रिं करोति कृ-अच् रात्रौ करः किरणोऽस्य वा। १चन्द्रे हेमच० २कर्पूरे च।

रात्रि(त्र)चर पुंस्त्री० रात्रौ चरति चर-ट अच् समा वा। राक्षसे अमरः। १लक्षातिरिक्तयां स्त्री ङीप्। २निशाचारिणि त्रि० टाप्लक्ष स्त्रियां ङीप्।

रात्रिजागर पुंस्त्री० रात्रौ जागर्त्ति अच्। १कुक्कुरे हेमच० स्त्रियां ङीप् २निशाजागरणकर्त्तरि त्रि०। ७त०। ३रात्रौ जागरणे पु०। [कौटभेदे राजनि०।

रात्रिजागरद पु० रात्रौ जागरं ददाति दा-क। मद्यके

रात्रिपुष्प न० रात्रौ पुष्पमस्य पुष्प-अच् ७त०। धत्तूरे राजनि०। [झारा०। २कर्पूरे च।

रात्रिमणि पु० रात्रौ मणिरिव दीप्तिमत्त्वात्। १चन्द्रे

रात्रिवासस् न०रात्रेर्वासः इवाच्छादकम्। १अन्धकारे शब्दमा० रात्रौ परिधेयं वासः शाक०। २रात्रौ परिधेये वस्त्रे च।

रात्रिविगम पु० ६त०। १रजन्यवसाने तदुपलक्षिते २प्रभातकाले च शब्दमाला।

रात्रिविश्लेषगामिन् पु० रात्रौ विश्लेषं विच्छेदं गच्छति गम-णिनि। चक्रवाके राजनि० तत् स्त्रियां स्त्री ङीप्। [अच्। कुक्कुटे शब्दच०स्त्रियां ङीप्।

रात्रिवेद पुंस्त्री०रात्रिं रात्रिभेदं वेदयति रवेश्च विद-णिच्

रात्रिसत्र न० रात्रिषु त्रयोदशादिदिनेषु विहितं सत्रम्। त्रयोदशाहादिषु विहिते यागभेदे तत्र चार्थवादिकं फलं प्रतिषादिकम् न विधिजिज्ञासायाम् स्वर्गफलमिति जै० ४।३। १७।८ सूत्रे समर्थितम्। "यद्यपि रात्रिशब्देन यत्रैव ज्योतिरत्रैव गौरित्यादिवाक्येन विहितानि सौत्रामण्यादीन्युच्यन्ते द्वादशाहादूर्ध्वं भाविनस्त्रयोदशरात्रयस्तदर्थरात्रादयश्च सत्रविशेषाः रात्रिसत्रपदवाच्यास्त्रयोदशसंख्यका रात्रयो यस्मिन् सत्रविशेषे स त्रयोदशरात्र इति व्युत्पत्तेः तथापि बहुवचनान्तरात्रिशब्देन रात्रिसत्रमुच्यते "एता विंशतिं रात्रीः इति श्रवणात्" त० बो०।
"फलमात्रेण निर्देशादस्तुतौ ज्ञानुमानं स्यात्" जै० मू०। निर्देशादर्थवादेन फलस्य निर्देशात् फलमर्थवादोक्तमपि आनेय आह अस्तुतौ अनर्थवादादिषु फलानुक्तिस्तत्तानुमानं स्वर्गफलकल्पनम्" इ० "निर्देशात्तु प्रतिष्ठैव फलत्वेन विवक्ष्यते" तथा च प्रतिष्ठाकाम आयुषा यजेत प्रतिष्ठाकामो ज्योतिषा यजेत इत्यादिस्तुतिपदघटिता एव विधयः कल्पतरौ लाघवात् न तु स्वर्गकामादिपदघटिताः" तत्त्वबो०। रात्रिसत्रन्यायोऽपि आर्थवादिकफलत्वन्यायार्थः।

रात्रिहास पु०रात्रेर्हास इव शुभ्रत्वात्। श्वेतोत्पले शब्दच०

रात्र्यन्ध त्रि० रात्रावन्धः दृष्टिक्षयवुक्तः। १निशादृष्टिघ्नत्वे आकादौ। २रात्रौ रोगकृतदृष्टिघ्नत्वे (रतकाणा) च।

राद्ध त्रि०राध-कर्त्तरि क्तः। १सिद्धे २पक्के च हेम०

राद्धान्त पु० राद्धः सिद्धः अन्तो निर्णयो यस्मात् ब०। संशयविषये वादिदर्शितपक्षनिराकरणपूर्वकयथार्थपक्षप्रतिपादके २वाक्ये अमरः।

राध सिद्धौ अक० निष्पादने पाके च सक० स्वादि० दिवा० च पर० अनिट्। राध्नोति राध्यति अराद्सीत् अराद्धेत्। रराधतुः रराधतुः। शुभाशुभालोचने च। तद्योगे शुभाशुभस्वामिनः सम्प्रदानता। "नमो राध्यति रामाय" बोपदेवः। अप+दोषकरणे "यन्नमस्कमपराध्यति"भ.घः।

राध पु० राधा विशाखा तत्समीपस्था चतुराधा च तद्युक्ता पौर्णमासी अण् ङीप् राधी वा तत्र भवे पुनरण्। १चान्द्रे वैशाखे मासि। ताडमे २पक्षे ३शुक्लपक्षे च कार्त्तिकशब्दे दृश्यम्। ४तत्पूर्णिमायां स्त्री ङीप्।

राधन न० राध-ल्युट्। १साधने २प्राप्तौ मेदि०। ३तोषे च हेम०। राध-णिच्-युच्। पूजने स्त्री टाप्।

राधस् न० राध-असुन्। अन्ने निघण्टुः।

राधा स्त्री राध-अच्। १विशाखानक्षत्रे रिरंसया रमणेच्छालक्षणाविर्भूते गोलोकस्थे परमेश्वरार्द्धाङ्गरूपे २शक्तिभेदे तत्रैव श्रीदामशापात् वृन्दावने जातायां वृषभानुसुतायां ३प्रधानगोपिकायाम् ४कर्णस्य पालयित्र्यां मातरि च। ५वैशाखपौर्णमास्यां स्त्री ङीप्। [दयोऽप्यत्र

राधाकान्त पु० राधायाः कान्तः। श्रीकृष्णे राधावल्लभा-

राधातनय पु० राधायास्तनयः। कर्णे स हि कन्यावस्थायां सूर्य्यात् कुन्तीगर्भजातस्या च तस्याः राधया सूतपत्न्या पालित इति भारतप्रसिद्धम्। [पालितत्वात् ढक्। कर्णे

राधेय पु० राधाया अपत्यम् पुत्रत्वेन परिग्रहत्वेन तत्-

राम पु० रम-कर्त्तरि घञ् च वा। १परशुरामे २दशरथज्येष्ठपुत्रे श्रीरामे ३बलरामे च "आर्ष्टिषेणो राघवो मोपसर्यो रामाः प्रकीर्त्तिता" वह्निपु०। रामशब्दनिरुक्तिः "राशब्दो विश्ववचनो मशापीश्वरवाचकः। "विश्वानामीश्वरो यो हि तेन रामः प्रकीर्त्तितः" ब्रह्मवै० ज०ख० ११०अ०। ४मनोहरे ५क्षिते ६असिते च त्रि०मेदि०। ७बालुकायाम् पङ्कभे (कड़) न० मेदि० ८तमालपत्रे न० राजनि०।

रामकर्पूरक पु० रामं मनोहरं कर्पूरमिव कनति। शौनकिके खनामख्याते वृक्षभेदे शब्दर०।

रामगिरि पु० रामाश्रितः गिरिः। चित्रकूटपर्वते स हि रामेण वनवासगमनकाले प्रथममाश्रितः।

रामचन्द्र पु० रामश्चन्द्र इवाह्लादकत्वात्। दशरथज्येष्ठपुत्रे श्रीरामे शब्दर०। [भदनद्यां (भयनागाख) भावप्र०।

रामच्छर्दनक पु०रामस्याभिरामं छर्दयति छृद-णिच्-ल्युट्।

रामजननी स्त्री ६त०। १वसुदेवपत्न्यां रोहिण्यां २जनक-दम्पतिपत्न्यां रेणुकायां ३दशरथपत्न्यां कौशल्यायाञ्च।

रामठ न०रमठ+स्वार्थे अण्। १हिङ्गुनि अमरः। तत्तुल्यगन्धके २अङ्कोटवृक्षे रत्नमा०। नाडीहिङ्गुनि स्त्री राजनि०ङीष्

रामण न० रमयति रम-णिच् ल्यु पृषो० दृद्धिः। १गिरिनिम्बे २तिन्दुके च (तेँद) राजनि०।

रामणीयक न० रमणीयस्य भावः रमणीयमेव वा योपधत्वात् वुञ्। १रमणीयत्वे "मच्छिक्षारावलिरामणीयकम्" नैष० २रमणीये च।

रामतरुणी स्त्री रामा अभिरामा तरुणीव। (सेवोती) १पुम्भङ्गे राजनि० ६त०। २सीतायां ३रेवत्याञ्च।

रामदूत पु० रामस्य दूतः वार्त्ताहरः। हनूमति स हि रामवार्त्तां जनकात्मजायै आजहार।

रामदूती स्त्री रामा अभिरामा दूतीव गन्धद्वारा प्रचारात्। तुलसीभेदे (रामतुलसी) शब्दच०।

रामनवमी स्त्री रामस्य जन्माधारो नवमी। चैत्रशुक्लनवम्याम्। "चैत्रे मासि नवम्यान्तु जातो रामः स्वयं हरिः" अगस्त्यसंहिता। "प्राप्ते श्रीरामनवमीदिने मर्त्यो विमूढधीः। उपोषणं न कुरुते कुम्भीपाकेषु पच्यते" तिथितत्त्व।

रामपूग पु० रामः अभिरामः पूगः। गुवाकभेदे त्रिका०।

रामबाण पु० रत्नभेदे भावप्र०।

"पारदाभ्रतत्त्वकनकं भागयुग्मपरिचेन मिश्रितम्। तत्र जातिफलमर्द्धभागिकं तिन्तिडीफलरसेन मर्दितम्। वह्निमान्द्यदशवल्लनाशनो रामबाण इति विश्रुतो रसः। संग्रहेण कथितः कफामवातखरदूषणं जयेत्। दीपते च खलु जातुमानतः सद्य एव जठराग्निदीपनः। रोचकः कफकुलान्तकारकः श्वासकासवमिजन्तुनाशनः" भावप्र०।

रामभद्र पु० राम एव भद्रः मङ्गलदायकत्वात्। श्रीरामे "रामेति रामचन्द्रेति रामभद्रेति वा स्मरन्ति" पद्मपु०।

रामलवण न० कर्म०। शाम्भरिलवणे रत्नमा०।

रामवल्लभ न० रामस्य वल्लभं प्रियम्। १भूर्जपत्रे राजनि० तद्धि रामेण वनवासात्प्रभृति प्रियतया धृतम्। २तत्प्रिये त्रि०। [माषशैलत्वात् मनोहरः।

रामशर पु० कर्म०। शरद्वृक्षभेदे राजनि० स हि काण्डद्वारा

रामसख पु० ६त० टच्। सुग्रीवे वानरराजे शब्दच०।

रामा स्त्री रमतेऽनया रम-करणे घञ्। १सीतादिकस्वामिन्यां नार्य्यां २नारीमात्रे भावप्र०३नद्याम् ४हिङ्गुनि मेदि० ५हिङ्गुवे पु० ६श्वेतकण्टकार्य्यां ७अङ्कोलवृक्षायां ८क्षयोगे

६मीरोचनायां १०बाह्यायां ११मैत्रिके च स्त्री शब्दच०।

रामायण न० रामस्यायनं चरितमधिकृत्य कृतो ग्रन्थोऽण्।

रामचरितप्रतिपादके वाल्मीकिकृते महाकाव्यभेदे तच्च सप्तकाण्डात्मकम् ब्रह्मलोके कोटिश्लोकात्मकं मनुष्यलोके च चतुर्विंशतिसाहस्रं षट्शतसर्गयुतम्।

तत्प्रतिपाद्यविषयाश्च भद्द० ४७ अ० उक्ता यथा

"अनोरिक्ष्वाकुवंश्योऽभूद् वंशे राजा रघुः ततः। रघोरजस्ततो जातो राजा दशरथो बली। तस्य ऽत्मासु चत्वारो महाबलपराक्रमाः। कौशल्यायामभूद्रामो भरतः केकयीसुतः। ततो लक्ष्मणशत्रुघ्नौ सुमित्रायां बभूवतुः। रामो भक्तः पितुर्मातुर्विश्वामित्रादवाप्तवान्। अस्त्रग्रामं ततो यज्ञे ताडकां प्रजघान ह। विश्वामित्रस्य यज्ञे तु सुबाहुं न्यवधीद्बली। जनकस्य क्रतुं गत्वा उपयेमेऽथ जानकीम्। धर्म्मिष्ठां लक्ष्मणो वीरो भरतो माण्डवीं सुताम्। शत्रुघ्नो वै कीर्त्तिमतीं कुशध्वजसुते च ते। पित्रादिभिरयोध्यायां गत्वा रामादयः स्थिताः। युधाजितं मातुलच शत्रुघ्नभरतौ गतौ। गतयोर्नृपयोश्चैव राज्यं दातुं समुद्यतम्। रामाय ज्येष्ठपुत्राय कैकेया प्रार्थितं तदा। चतुर्दश समावासो वने रामस्य वाञ्छितः। रामः चिह्नितार्थन्तु लक्ष्मणेन च सीतया। राज्यं च हत्ववत् लङ्का ऋक्षवेरपुरं गतः। रथं त्यक्त्वा प्रयागस्थ चित्रकूटं गिरिं गतः। रामस्य तु वियोगेन राजा स्वर्गं समाश्रितः। संस्थाप्य भरतश्चागात् रामं मातृगणान्वितः। अयोध्यान्तु समागत्य राज्यं कुरु महामते!। स नैच्छत् पादुके दत्त्वा राज्याय भरताय तु। विसर्ज्जितोऽथ भरतो रामराज्यमपालयत्। नन्दिग्रामे स्थितो भक्तो ह्ययोध्यां नाविशद् व्रती। रामोऽपि चित्रकूटाच्च जगामाश्रममादरौ। नत्वा सुतीक्ष्णं चागस्त्यं दण्डकारण्यमागतः। तत्र शूर्पनखा नाम राक्षसी समुपागता। निरस्य कर्णौ नासे च रामेणाथ पराजिता। ततः प्रेरितः खरत्रिशिरोदूषणादिभिः। चतुर्दशसहस्रैश्च रक्षोभिर्बलेन च। रामोऽपि प्रेषयामास बाणैर्यमपुरञ्च तान्। राक्षसा प्रेरितोऽभ्यागात् रावणो हरणाय हि। छद्मरूपं स मारीचं कृत्वाथेऽथ विदग्धधृक्। सीतया प्रेरितो रामो मारीचं प्रजघान ह। त्रियमाणः स च प्राह हा सीते! लक्ष्मणेति च। सीतोक्तो लक्ष्मणोऽभ्यागाद्रामस्तु ददर्श तम्। उवाच राक्षसी माया नूनं सीता हृतेति सा। रावणोऽन्तरमासाद्य कृष्णादाय जानकीम्। जटायुषं विनिर्जित्य ययौ लङ्कां ततो बली। अशोकवनिकायां रक्षितां तामधारयत्। आगत्य रामः शून्याञ्च पर्णशालां ददर्श ह। शोकं कृत्वाथ जानक्या मार्गणं कृतवान् प्रभुः। जटायुषञ्च संस्कृत्य तदुक्तो दक्षिणां दिशम्। गत्वा सख्यं ततश्चक्रे सुग्रीवेण च राघवः। सप्ततालान् विनिर्भिद्य किष्किन्ध्यायां हरीश्वरम्। सुग्रीवं कृतवान् राम ऋष्यमूके स्थितः। सुग्रीवः प्रेषयामास वानरान् पर्वतोपमान्। सीताया मार्गणं कर्त्तुं पूर्वादौ हनुमन्तञ्च। प्रतीचीमुत्तरां प्राचीं दिशं गत्वा समागताः। दक्षिणान्तु दिशं ते च मार्गयन्तोऽथ जानकीम्। वनानि पर्वतान् द्वीपान् नदीनां पुलिनानि च। जानकीं ते अपश्यन्तो मरणे कृतनिश्चयाः। सम्पातिवचनात् ज्ञात्वा हनूमान् कपिकुञ्जरः। शतयोजनविस्तीर्णं प्लुत्वे मकरालयम्। अपश्यज्जानकीं तत्र अशोकवनिकास्थिताम्। भर्त्सितां राक्षसीभिश्च रावणेन च रक्षसा। भव भार्य्येति वदता चिन्तयन्तीञ्च राघवम्। अङ्गुलीयं कपिर्दत्त्वा सीतां कौशल्यमब्रवीत्। रामस्य तस्य दूतोऽहं शोकं मा कुरु मैथिलि!। अभिज्ञानञ्च मे देहि येन रामः स्मरिष्यति। तत् श्रुत्वा ददौ सीता वेणीरत्नं हनूमते। यथा रामो नयेत् शीघ्रं तथा वाच्यं त्वया गते। तत्रोक्त्वा तु हनुमान् वनं दिव्यं बभञ्ज तत्। हत्वाथ राक्षसांश्चान्यान् बन्धनं स्वयमागतः। खड्गैरिन्द्रजितो बाणैर्द्धा रावणमब्रवीत्। रामदूतोऽस्मि हनुमान् देहि रामाय मैथिलीम्। एतत् श्रुत्वा प्रकुपितो दीपयामास पुच्छकम्। कपिर्ज्वलितलाङ्गूलो लङ्कां देहे महाबलः। दग्ध्वा लङ्कां समायातो राघपार्श्वं स वानरः। अक्षतं फलं मधुवने हत्वा सीतेत्यवेदयत्। मणिरत्नञ्च रामाय रामो लङ्कां ययौ पुरीम्। सुग्रीवः सहनुमानङ्गदाद्यैः सलक्ष्मणः। विभीषणोऽपि संप्राप्तः शरणं राघवं हरिं। लङ्कैश्वर्यं लब्धविद्युद्रामस्तं रावणात्मजम्। रामो नलेन सेतुञ्च कृत्वाब्धौ योजनायतम्। सुवेलावस्थितश्चैव पुरीं लङ्कां ददर्श ह। अथ ते वानरा वीरा नीलाङ्गदनलादयः। धूम्रधूम्राक्षधूम्रेन्द्राजाम्बवत्प्रसखादयः। मैन्दद्विविदसुषेणाद्ये पुरीं लङ्कां बभञ्जिरे। राक्षसांश्च महाकायान् काकाक्षनक्षयोपमान्। रामः सलक्ष्मणो हत्वा सकपिः सुरराक्षसान्। विद्युज्जिह्वञ्च धूम्राक्षं देवा-

लक्षनरालकौ । मङ्गोदरमङ्गपार्श्वांवतिकायं मङ्गवलम् । कुम्भं निकुम्भं मत्तञ्च मकराक्षं लक्ष्मनम् । प्रहस्तं वीरबाहुतं कुम्भकर्णं मङ्गवलम् । रावणं ब्रह्मवरन्दित्वा हत्वा दै राघवो बली । निलय बाणवर्षाणि रावणन्तु व्यपातयत् । सीतां गृहां मङ्गीलाय विमाने पुष्पके स्थितः । सवानरः समायातो ह्ययोध्यां प्रवरां पुरीम् । तत्र राज्यं चकाराथ पुत्रवत् पालयन् प्रजाः । दशाश्वमेधानाहृत्य गयाशिरसि पातनम् । पिण्डानां विधिवत् कृत्वा दत्त्वा दानानि राघवः । पुत्रौ कुशलवौ कृत्वा तौ च राज्येऽभ्यषेचयत् । एकादशसहस्राणि रामो राज्यमकारयत् । भरतञ्चो सवर्षं कृत्वा म्लेच्छान् भरतः स्थितः । अगस्त्यादिमुनीनाञ्च सत्सङ्गञ्च रक्षताम् । स्वर्गं गतो जनैः सार्द्धं सयोध्यस्थैः कृतालयैः" । अन्यदपि व्यासप्रणीते पद्मपु० अध्यात्मरामायणं वाल्मीकिकृतमद्भुतरामायणं चास्ति ।

रामालिङ्गनकाम पु० रामाणाम् स्त्रीणामालिङ्गनस्य कामोऽत्र । रक्षाक्षाने राजनि० ।

रामोपाख्यान न० ६त० । १रामस्योपाख्याने । तदधिकृत्य कृतो ग्रन्थः अण् । २भारतवनपर्वान्तर्गते तदुपाख्यानप्रतिपादकेऽवान्तरपर्वणि च । [ग्रन्थभेदे ।

राम्भ पु० रम्भो मेघुत्सर्ग विकारोऽण् । व्रतभेदे धार्म्मे

राल पु० रा-अलच् । सालवृक्षनिर्य्यासे (धुना) भावप्र० । "राजो क्रिमो गुरुश्लिष्मः कषायो व्याधको हरेत् । दोषाक्षक्षेदवीसर्पज्वरव्रणविषादिकाः । पद्मभस्मान्निदग्धांश्च गूलातीसारनाशनः" भावप्र० ।

रालकार्य्य पु० रालः सार्थो यस्य । सालवृक्षे राजनि० ।

राव पु० रु-घञ् । शब्दे हारा० ।

रावण पु० रवस्यापत्यम् शिवा० अण् राव्यति शब्दयति खिच्-ल्यु वा । लङ्काधिपतौ विश्रवसः पुत्रे राक्षसे ।

रावणगङ्गा स्त्री रावणनिर्म्मिता गङ्गा नदी । सिंहलदेशस्थे नदीभेदे गरुड़पु० ७ अ० ।

रावणारि पु० ६त० । श्रीरामे लटा० रावणालकादयोऽप्यत्र ।

रावणि पु० रावणस्यापत्यम् इञ् । मेघनादाख्ये रावणपुत्रे ऐलच० । [चक्रि न लुप्तः ।

राश्च शब्दे भ्वा० आ० अक० सेट् । राशते अराशिष्ट अरीरशत् ।

राशि पु० अश्नुते व्याप्नोति अश्-इन् धातोरुडागमश्च । धान्यादीनां १पुञ्जे अमरः । ज्योतिश्चक्रस्य द्वादशांशे २मेषादौ, "द्वयं राशिप्रविष्टयं" इति लीलावतीप्रसिद्धे ३व्यक्ताव्यक्तगणभेदे यथा त्रैराशिकपञ्चराशिकादिशब्दे ।

राशिचक्र न० राशिघटितं चक्रं तत्तम् । मेषादिद्वादशराशियुक्ते गोलाकारे वायुवशेन पूर्वतः पश्चात् अनिशं भ्रमति भास्करे ज्योतिर्भये "सप्तविंशतिभिर्ज्योतिश्चक्रं क्षिप्तवायुना" इत्युक्ते ज्योतिश्चक्रे खगोलशब्दे दृश्यम् मन्त्रगुप्तकुराशिचक्रे तच्च चक्रशब्दे २८०पृष्ठे दृश्यम् ।

राशिभोग पु० राशीनां खखगत्या षड्भोगः भुज-घञ् कृत्यम् । रव्यादीनां खखगत्यनुसारेण राशिषु गतिभेदे । खगोलशब्दे दृश्यम् ।

राशी(शि)कृत पु० अराशिः राशिः कृतः राशि+अभूततद्भावे च्वि तदर्थे समासो वा । (ढेरी) पुञ्जीकृते एकत्रस्थीकृते ।

राष्ट्र न० राज-ष्ट्रन् । जनपदे 'गौड़ं राष्ट्रमनुत्तमम्' इति प्रबोधचन्द्रोदयः । २७पद्मे अमरः ।

राष्ट्रिका स्त्री राज-ष्ट्रन् स्त्रियां ङीष् स्वार्थे क । कण्टकारिकायाम् अमरः ।

राष्ट्रिय पु० राष्ट्रे भवः घ । भाटौलौ १राजप्राप्ये । ऋ राष्ट्रीय तत्रार्थे । तभावपि २राष्ट्रभवे त्रि० ।

रास शब्दे भ्वा० आ० अक० सेट् । रासते अरासिष्ट ररासत् वक्ति न लुप्तः । रासभः । अयं तालव्यान्त इत्यन्ये ।

रास पु० रस-घञ् रास-घञ् वा । १शब्दे, २ध्वनौ ग्रहलावन्यवत् द्वयोर्द्वयोर्मध्यस्थिता ३क्रीड़ाभेदे, ४कोलाहले च मेदि० ।

रासक न०उपरूपकाव्यभेदे "नाट्ये रासकमेकाङ्कं बहुतालसमन्वितम् । उदात्तनायकं तद्वत् पीठमर्द्दोपनायकम् । हास्योद्भासप्रायं सम्प्रहारो नारी वासकसज्जिका । सन्धिनिर्वहणे सन्धी लास्याङ्गानि दशापि च । केचित् प्रतिमुखं सन्धिमिह नेच्छन्ति केवलम्" सा०द० ।

रासभ पुंस्त्री० रास-अभच् । गर्दभे अमरः स्त्रियां ङीष् ।

रासभवन्दिनी स्त्री रासभस्य वन्दिनीव । मल्लिकायाम् शब्दच० ।

रासमण्डल न० रासार्थं ग्रहलावन्यवत् द्वयोर्द्वयोर्मध्यस्थिता क्रीड़ाभेदार्थं मण्डलं मण्डलाकारेण भ्रमणं यत्र । १गोलोकस्थे रासक्रीड़ाधारस्थाने । तत्तु मण्डलप्रमाणञ्च ब्रह्मवै० जन्मख० ८४ अ० । श्रीकृष्णस्य तदुत्पत्तौ २मण्डलभेदे च ।

रासयात्रा स्त्री ६त० । कार्त्तिकपौर्णमास्यां भगवद्रासभेदे ब्रह्मवै० प्र० २५ अ० । भगवद्रासश्च भा० १०स्क० २८अ० आदौ दृश्यः ।

रामेवास पु० ६त० अनुक् स० । १गोष्ठ्यां, २रासे, ३हल्लीसके ४रसविशे०, ५रसाभासे, ६भ्रष्टौजागरे च मेदि० । ७उल्लासे शब्दच० ८परिहासे जटा० ।

रामेश्वरी स्त्री ६त० । राधिकायाम् ।

रास्ना स्त्री रस-क्यनु । १खनामख्यातायां लतायाम् (काँटा आमरुल) । तत्पर्य्यायगुणा भावप्र० उक्ता यथा "रास्ना वृक्षरसा रक्षा सुवहा रसना रसा । एलापर्णी च सुरसा सुस्निग्धा चेक्षुकी तथा । रास्नाऽऽमवाचनी तिक्ता गुरुष्णा कफवातजित् । शोथश्वासप्लीहाक्षवातशूलोदरापहा । कासज्वरविषाशीतिवातिकामयविध्वंसनी" भावप्र० । ३नाकुल्यां भावप्र० तत्पर्य्यायगुणा उक्ता यथा "नाकुली सुरसा रास्ना सुगन्धा गन्धनाकुली । नकुलेष्टा भुजङ्गाक्षी सर्पाक्षी विषनाशिनी । नाकुली तुवरा तिक्ता कटुकोष्णा विनाशयेत् । श्लीपिवातादधिकान्विषज्वरक्रिमिप्लवान्" ।

राहु पु० रह-उण् । १ग्रहभेदे, २स्वर्भानौ, ज्योतिश्चक्रस्थे सूर्य्यविरुद्धसप्तकौभावेन भ्रायमानपृथिवीच्छायारूपे ३तमसि तदधिष्ठातरि ४पञ्चमभेदे, ५सिंहिकासुते दानवे च । तमःशब्दे दृश्यम् ।

राहुच्छत्र न० राहोर्यच्छत्रमिव । आर्द्रके राजनि० ।

राहुदर्शन न० राहोर्दर्शनं यत्र । चन्द्रसूर्य्योरुपरागरूपे १पर्व्वणि "स्नानं दानं तपः श्राद्धमनन्तं राहुदर्शने" इति ति०त० । तेन उपरोक्ते एव चन्द्रे सूर्य्ये च तस्य दृश्यता नान्यदा तस्य छायारूपत्वात् ।

राहुमूर्द्धभिद् पु० राहोः सिंहिकासुतस्य मूर्द्धानं भिनत्ति भिद-क्विप् । विष्णौ । अमृतपानकाले देवपङ्क्तौ देवरूपेण स्थित्वाऽमृतं पिबन्तं दृष्ट्वा विष्णुचक्रेण शिरश्छेदेति भाग० ८।९ अ० ।

राहुरत्न न० राहोः प्रियं रत्नम् । गोमेदमणौ राजनि० ।

राहुग्रस्त पु० राहोः ग्रस्तः स्वाधिष्ठितभूच्छायाद्वारा ग्रस्तः । चन्द्रसूर्य्योः उपरागरूपे पर्व्वणि कृत्तायुधः ।

राहुच्छिष्ट पु० ६त० । ग्रसने क्षिप्ते० ।

राहुजुष्ट पु० ६त० । ग्रसने क्षिप्ते० ।

रि गतौ तु० पर० सक० अनिट् । रियति अरैषीत् रिरिय ।

रिक्त न० रिच-क्त । १शून्ये २वने मेदि० । ३निरर्थके च त्रि० मेदि० । खार्थे क । तत्रैव त्रि० ।

रिक्तभाण्ड न० रिक्तं भाण्डम् । तैजसादिशून्ये भाण्डे ।

रिक्तहस्त त्रि० रिक्तो धनादिशून्यो हस्तो यस्य । १निर्द्धने, भूरिदानादिना २व्ययितधने च । [तिथिषु शब्दे० त० ।

रिक्ता स्त्री रिच-क्त । उभयपक्षयोश्चतुर्थीनवमीचतुर्दशी-

रिक्थ न० रिच-थक् । १धने अमरः । २मिताक्षरादयुक्ते अप्रतिबन्धे दाये च "स्वामी रिक्थक्रयविभागेत्यादि" गौतमस्मृतिः ।

रिक्थग्राहिन् त्रि० रिक्थं दायं गृह्णाति । ग्रह-णिनि । दायग्राहिणि पुत्रादौ । अच् । रिक्थग्राहोऽप्यत्र ।

रिक्थिन् त्रि० रिक्थं याज्ञवल्क्यनारदाभ्यां इनि । दायग्राहिणि दायादे "उभयोरप्यसौ रिक्थी" इति मनुः ।

रिख खर्पणे भ्वा० पर० सक० सेट् इदित् । रिखति अरिखीत् । अनिदित्त्वान्नलोपे रेखति अरेखीत् ।

रिग गतौ भ्वा०पर०सक०सेट् इदित् । रिगति अरिगीत् ।

रिङ्खण न०रिगि-ल्युट् । स्खलने । रिङ्खि ल्युट् । रिङ्खणमप्यत्र

रिच सम्पर्के वियोगे च वा चु०उभ० पक्षे भ्वा०पर०सक०सेट् । रेचयति ते रेचति । अरीरिचत् त अरेचीत् ।

रिच विरेके (अतिमय पुरीषोत्सर्गे) रुधा०उभ०सक०अनिट् । रिणक्ति रिङ्क्ते इरित् अरिचत् अरैक्षीत् अरिक्त । अति+अतिक्रम्य स्थिते आधिक्येन स्थितौ अक० । अतिरेक वि+अति भेदे तदवस्थे तदवस्थरूपे पदार्थे च अतिरेकः ।

रिज भर्जने भ्वा० आ०सक० सेट् । रेजते अरेजिष्ट ।

रिपु पु० रप-उनु-पृषो० । १शत्रौ अमरः । २चोरनामनि अव्यक्तवर्णे राजनि० । ज्योतिषोक्ते लग्नात्सप्तम्या ३सप्तस्थाने च । देहिस्थेषु षट्सु ४कामक्रोधादिषु । "कामः क्रोधश्च लोभश्च मात्सर्य्यं मदमोहकौ । देहिस्था रिपवस्त्वेते" पुरा० ।

रिपुघातिनी स्त्री रिपुं हन्ति हन-णिनि । (कुँचुर) लतामेदे शब्दच० । २शत्रुघातके त्रि० । [२स्वरभेदे पु० ।

रिपुञ्जय त्रि० रिपुञ्जयति जि-अच् सुम् । १शत्रुजयिनि, रिन्फ वधे तु० प० सक० सेट् । रिम्फति अरिम्फीत् रिम्फते रिप्फ पु०रिन्फ-अच् पृषो० । लग्नात्सप्तम्या द्वादशे स्थाने ज्यो० रिफ क्लथने स्वा० पर० सक० सेट् । रेफति अरेफीत् ।

रिफ किंसायां निन्दायां बोधने च सक० स्वाभावाम् अक० तु० पर० सेट् । रिफति अरेफीत् ।

रिब गत्यां भ्वा०पर०सक०सेट् इदित् । रिम्बति अरिम्बीत् ।

रिभ रवे भ्वा० पर० सक० सेट् । रेभति अरेभीत् ।

रिष गतौ भ्वा०पर०सक०सेट् इदित् । रिक्षति अरिक्षीत् ।

रिश्य हिंसायां तु०पर०सक०अनिट् । रिशति अरिशत् ।

रिश्य(थ) स्त्री रिश(थ)ति रिश(थ)-क्यप् । मृगभेदे त्रिका० स्त्रियां वोपधत्वात् टाप् । मृगश्चासावर्थश्च शब्दर० ।

रिष वधे भ्वा०पर०सक०सेट्। रेषति अरेषीत्। रिरेष।
रिष्ट न० रिष-क्त। १मङ्गले २अशुभे ३पापे च अमरः। भावे क्तः ४नाशे, ५अशुभादिसूचिते त्रि०। उपचारात्। ६खड्गे, ७रक्षणियौ च पु० मेदि०। स्वार्थे क। तेषु।
रिष्टि स्त्री० रिष-रिश-वा क्तिन्। १अशुभे, २यक्ष्मभेदे खड्गे पु०मेदि०। क्तिच्। २रन्ध्रे पु०। सा च ह०ला०दक्षाः
रिह वधे भ्वा० पर० सक० सेट्। रेहति अरेहीत्।
री अरणे दि० आ० अक० अनिट्। रीयते अरेट अरीदित् निष्ठातस्य नः। रीणः। [यात अरैषीत्।
री गतौ वधे च सक० रवे अक० क्र्या० पर० अनिट्। रि०
रीठा स्त्री री-ठक् ठस्य नेत्वम्। रीठाकरञ्जे "रीठाकरञ्ज-त्रिफोष्णः कटुगन्धश्च वातकृत्। कण्डूतिकुष्ठविष-कृत् कफविस्फोटनाशनः" राजनि०।
रीठाकरञ्ज पु० कर्म०। अनामख्याते वृक्षे राजनि०।
रीठा स्त्री रिह-क्त त्रि० दृढभावः। अवष्टायाम् अमरः।
रीण त्रि० री-क्त। अरिते श्रुते अमरः।
रीति स्त्री री क्तिच्। १पित्तले। क्तिन्। २प्रस्थाने, ३अरणे अमरः ४सौरभकिट्टे, मेदि०। ५दग्धक्षयादिरोगे रभा०। ६क्षीभावां, ७गतौ, दक्षभावे, हेमच०। अलङ्कारोक्ते ६गौ-डप्रादिरचनाभेदे च "गौडीपाञ्चालवैदर्भ्यौ रीतयः परि-कीर्त्तिताः" सा० द०। [तत्रार्थे स्त्री मङ्गर०
रीतिक न०रीत्या पित्तेन कायति कै-क। पुष्पाञ्जने राजनि०
रीतिपुष्प न० रीतेः पुष्पमिव। कुसुमाञ्जने अमरः।
रीव गतौ, संवरणे च भ्वा०उभ० सक० सेट्। रीवति ते अरीवीत् अरीविष्ट। अदित् चङि न ह्रस्वः।
रु शब्दे क्र्या०पर०अक०सेट्। रौति-रवीति अरावीत्-अरौ-षीत्। क्ङिति नित्यं ट्। रुरुविरे। [रुरुविषे।
रु वधे गतौ च भ्वा० आ० सक० अनिट्। रवते अरोष्ट।
रुक्प्रतिक्रिया स्त्री रुजः प्रतिक्रिया प्रतिकारः प्रति+ क-भावे श ह्रस्व०। चिकित्सायाम् अमरः।
रुक्म न० रुच्-मन् नि० कुत्वम्। १लाञ्छने, २स्वर्णे, अमरः ३लोहे, मेदि० ४नागकेसरे च राजनि०।
रुक्मकारक पु० रुक्मं तच्चिह्नितभूषणं करोति कृ० ण्वुल्। स्वर्णकारे अमरः।
रुक्मिन् त्रि० रुक्मं विद्यतेऽस्य इनि। १स्वर्णयुक्ते २भीष्मक-राजस्वपुत्रे पु० राजभेदे भाग०१०।५२। ३रुक्मि-राजकन्यायां श्रीकृष्णपत्न्यां स्त्री ङीप्।
रुक्ष त्रि०रुक्ष-क्त १अचिक्कणे २नि:स्नेहे ३कठोरे च अमरः ४रोगान्विते राजनि० ५भग्ने च अमरः
रुच प्रीतौ प्रकाशे च भ्वा० आ० अक० सेट्। रोचते लुडि उ० अरुचत् अरोचिष्ट। एतद्योगे प्रीयमाणस्य सम्प्र-दानता "नारदाय रोचते कलहः" सि०कौ०।
रुचक न० रुच-कन्। १सञ्जिकाक्षारे, माङ्गल्ये २द्रव्ये, ३अश्वभूषणे, ४माल्ये ५सौवर्चले, ६चतुष्कटे त्रि० मेदि० ७आह्लादकरे, शब्दच० ८रोचनायाम्, ९तिलकवृक्षे न० हेमच० १०जलपिप्पल्यां स्त्री० रत्नमा०। ११गोजपुरे, १२दत्ते, १३निष्के पु० १४कपोते च पुंस्त्री०मेदि० स्त्रियां ङीप्। १५स्वर्णपात्रभेदे च।
रुच्(चा) स्त्री रुच भाव० क्विप् वा टाप्। १दीप्तौ, २शो-भायां, ३प्रकाशे, ४मारिकाख्यवर्णे च शब्दर०।
रुचि(ची) स्त्री रुच-कि वा ङीप्। १अनुरागे २आकाङ्क्षे ३स्पृहायाम् ४अभिलाषे ५किरणे अमर। ६शोभायां मेदि० ७वसुभद्रायां हेमच० ८मनोरोचनायां च राजनि०। ९प्रजापतिभेदे पु०मार्क०पु०। १०चाक्षिकल्पभेदे तन्त्रशास्त्रम्।
रुचिर त्रि० रुचिं राति ददाति रा-क। १मनोहरे सुन्दरे १मधुरे च अमरः। २मूलके ३कटुभे ४अवक्षे च न० ५गोरोचनायां स्त्री राजनि०।
रुचिराञ्जन पु० अञ्जतेऽनेन अञ्ज-करणे ल्युट् रुचिरः शोभायुक्तोऽञ्जनः। शोभाञ्जने (सजिना) राजनि०।
रुच्य त्रि०रुचये हितः यत्। १सुन्दरे २रुचिकरे च अमरः। ३सौवर्चले न० राजनि०। ४पत्नी पु०हेमच०। ५कतकवृक्षे ६शालिधान्ये च पु० राजनि०।
रुच्यकन्द पु० रुच्यः रुचिकरः कन्दो मूलमस्य। मूरणे (ओल) राजनि०। [निष्ठातस्य नः। रुग्णः।
रुज भङ्गने तु०प० सक० अनिट्। रुजति अरौक्षीत् रोदित् रुज हिंसायां चु० उभ० सक० सेट्। रोजयति ते अरूरुजत् त रोगकर्त्तरि कर्त्तरि णिच्। रुजयति चौरस्य रोगः रुज(जा) स्त्री रुज-भाव० क्विप् वा टाप् रुज-कृ वा। १रोगे २भङ्गे मेदि० रुज-क। ३मेघ्यां हेमच०। ४कुष्ठे च (कुड) राजनि०। एतद्योगे कर्मण्यण्वा न समासः।
रुजाकर न० रुजां रोगं करोति कृ-अच्। १कर्मरङ्गफले (डामराङ्गा) शब्दच० २रोगकारके त्रि०। ३व्याधौ पु० हेमच०।
रुट चौर्ये भ्वा० पर०सक०सेट् रटित। अरुटत्। अरुटीत्।
रुट रोषे सक० दीप्तौ अक० चु० उभ० सेट्। रोटयति ते अरूरुटत् त।

दिना। येन भूषितवङ्गादि तद्रूपमिति कथ्यते"।

रूपक न॰ रूपयत्यत्र रूप-खुल्। १अभिनयप्रदर्शके दृश्यकाव्यभेदे, "रूपारोपात्तु रूपकम्" तदृश्यं काव्यं नटैरामादिरूपारोपात् रूपकमित्युच्यते" सा॰द॰। तच्च दशविधम् "नाटकमथप्रकरणं भाणव्यायोगसमवकारडिमाः। ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश" सा॰द॰। दशरूपकपदेऽस्य विवृतिः। रूपमस्यास्ति कन्। २मूर्त्ते त्रि॰ मेदि॰ रूप+अर्शआद्यच्। ३शुक्लादिवर्णे, ४आकारे च ५अर्थालङ्कारभेदे, सा॰द॰ अलङ्कारशब्दे ३०२पृ॰ दृश्यम्। ६शुक्लाम्लवरिभाषे "सङ्काची प्रोच्यते शुक्ला तात्त्विको रूपकं भवेत्" युक्तिक॰।

रूपतन्मात्र न॰ सांख्यमतादिप्रसिद्धे तेजःपदार्थारम्भके सूक्ष्मभूतभेदे तन्मात्रशब्दे १२२६ पृ॰ दृश्यः।

रूपधारिन् त्रि॰ रूपं धारयति धारि-णिनि। १रूपवति, २सौन्दर्य्यान्विते, ३वेशान्तरपरिग्रहिणि नटे च।

रूपवत् त्रि॰ रूप+मतुप् मस्य वः। १शुभ्रादिरूपविशिष्टे, २सौन्दर्य्ययुक्ते ३आकारविशिष्टे च।

रूपाजीवा स्त्री रूपं सौन्दर्य्यमाजीवो जीविका यस्याः। वेश्यायाम् अमरः।

रूपिका स्त्री रूपमस्त्यस्य ठन्। श्वेतार्कवृक्षे राजनि॰।

रूप्य न॰ रूपाय आहरन्यते रूपादि यत्। अलङ्कारादिनिर्म्माणाय आहरणमाने १अर्थे २रजते च अमरः। आर्थे यत्। ३रजतमाने रजतशब्दे ३७८६ पृ॰ दृश्यम्। ४सुन्दरे त्रि॰ मेदि॰।

रूप्याध्यक्ष पु॰ रूप्येषु अध्यक्षः। कोषाध्यक्षे अमरः।

रूष धूल्यादिना मिश्रीकरणे भ्वा॰ पु॰ उभ॰ अक॰ सेट्। रूषयति ते अरूरूषत् त। [कारके त्रि॰।

रूषक पु॰ रूष-खुल्। १धावके वृक्षे अटा॰। २मिश्रीकारके त्रि॰।

रूषित त्रि॰ रूष-क्त। १धूल्यादिभिर्मिश्रिते, २अधिकक्षोभिते च अमरः।

रे अव्य॰ रा-के। नीचादेः सम्बोधने हेमच॰।

रेक शङ्कायां भ्वा॰ आ॰ स॰ सेट्। रेकते अरेकिष्ट। अदित् चङि न हस्वः।

रेक पु॰ रिच-घञ्। १विरेचने। रेक-अच्। २शङ्कायां, ३नीचे मेदि॰ ४भेके पुंस्त्री॰ अटा॰। स्त्रियां ङीष्। रेक-भावे अ। ५सन्देहे स्त्री हेमच॰ टाप्।

रेकणस् न॰ रिच-असुन् धिच्च तेन कुत्वं ह्रट्। सर्वे वि॰ को॰

रेखा स्त्री रिच-अप् सच्च रः। १अङ्के, २लेखे, ३आभोगे, बिन्दुपङ्क्तौ दण्डाकारे ४चिह्नभेदे (टाङ्कि) (कवा) विश्वः। ५क्षुद्रमेरुसङ्कटयोर्मध्यस्थक्षुद्रपर्वतभेदे च।

रेखागणित न॰ रेखायाः गणितं प्रमाणफलरूपादि यत्र। जगन्नाथपण्डितकृते गणितग्रन्थभेदे क्षेत्रशब्दे तत्परिभाषादिकं २२८६ पृ॰ दृश्यम्।

रेखापुर न॰ भुवो मध्यस्थलस्थः पुरम्। "राक्षसालयदेवौकः शैलयोर्मध्यसंस्थितम्। रोहितकमवन्ती च तथा संक्षिप्तं वरः" सू॰सि॰ उक्ते पुरे। "राक्षसालयं कृत्वा देवानां दक्षरूपः पर्वतो मेरुरनयोर्मध्ये अक्षसूत्रं तत्र स्थिता देशा रेखाख्याः कल्पादिषूपसूत्रस्थास्तनुपयुक्तास्तत्र मनुष्यागोचरत्वादिति नोक्ताः। स्थानार्थमुदाहरति। रोहीतकमिति। यथा रोहीतकं नगरमवन्युज्जयिनीसंक्षिप्तं वरः कुरुक्षेत्रम्। चकारस्तत्रेत्यस्यपरः। तथान्यानि परस्परं संक्षिप्ततया ज्ञेयानि" रङ्ग॰।

रेखक न॰ रेखयति रिच-णिच्-खुल्। १कङ्कुष्ठे राजनि॰ २वस्त्रधारे, पु॰ त्रिका॰। ३लेखपत्रे, ४तिलकवृक्षे पु॰ राजनि॰। ५पुरीषनिःसारके त्रि॰। क्रोड़ार्थजलनिःसारयन्त्रे न॰(पिचकिरी) राजनि॰। ६कोष्ठस्थ वायोर्निःसारके व्यापारभेदे कुम्भकशब्दे २११४ पृ॰दृश्यम्।

रेखन न॰ रिच्-ल्युट्। १मलभेदनेन तन्निःसारणे। २कोष्ठात् वायोर्नाभिक्रिया निःसारणे च।

रेखनक पु॰ रिच्यतेऽनेन ल्युट् संज्ञायां कन्। १कास्मिकवृक्षे। कनभावे वा ङीष्। रेखनी तत्रार्थे शब्दर॰। २दन्तीवृक्षे ३कालाङ्गन्यां राजनि॰। ४श्वेतसिंहतायाम् स्त्री मेदि॰ टाप्। ५कास्मिकवृक्षे स्त्री शब्दर॰।

रेखी स्त्री रेखयति अच् गौ॰ ङीष्। १कास्मिकवृक्षे २चङ्कोटे च राजनि॰। [दित् चङि न ह्रस्वः।

रेज दीप्तौ भ्वा॰ आत्म॰ अक॰ सेट्। रेजते अरेजिष्ट। अरेजते स्त्री रज+अते। उत्तरस्यां दिशि निवासिभेदः।

रेट वाचने वाचि च दि॰ भ्वा॰ उभ॰ सेट्। रेटति ते अरेटीत् अरेटिष्ट। अदित् चङि न ह्रस्वः।

रेणु पुंस्त्री॰ री-नु। १परागे २धूलौ च अमरः। ३रेणुकायां स्त्री ४पर्णटे पु॰। ५पांशौ च राजनि॰।

रेणुका स्त्री रेणुना कायति कै-क। मरिचाख्यतौ १सुगन्धिद्रव्ये अमरः "रेणुका कटुका पाके तिक्तातुष्णा लघुः कटुः। पित्तला दीपनी मेध्या वातघ्नी कफपातिनी। वस्त्रावातवैकृत्य हृत्कण्ठ्यक्षि विषदाहनुत्" भावप्र॰। २जमदग्निपत्न्यां ३परशुराममातरि च।

रेणुका सुत पु० ६त०। परशुरामे रेणुकात्मजादयोऽत्र।
रेणुरूषित स्त्री रेणुभिः रूषितः। १गर्दभे त्रिका० स्त्रियां ङीष्। २धूसिधूसरे त्रि०।
रेणुसार पु० रेणुरिव सारोऽस्य। १कर्पूरे त्रिका०। कप्। तत्सदृशे वाच्ये। [भावप्र०।
रेतजा स्त्री रेत एव जायते जन-ड टाप्। वालुकायां
रेतस् न० री-असुन् तुट् च। पुंसो रक्तादिपरिपाकजन्ये देहस्थे मज्जाहेतुके धरमधातौ १शुक्रे त्रिवर्योर्ये २पारदे च मेदि०। [मेदि०।
रेत्र न०री-त्र। १रेतसि २पीवूषे ३पटवासे ४खलके च
रेप शब्दे भ्वा० पर० सक० भा० आक० सेट्। रेपते अरेपिष्ट अरिप्त अरिप्त चङि न हस्वः।
रेप त्रि० रेप-अच्। १निन्दिते २क्रूरे ३खलचे च मेदि०।
रेफ पु० र+दफ। १रकाराख्ये वर्णे। रिफ-अच्। २कुत्सिते त्रि० अमरः। [३खलचे च शब्दर०।
रेफस् त्रि० रेप-असुन् पक्ष फः। १क्रूरे २अधमे, ३दुष्टे
रेब(व) गतौ सक० द्युतौ अक० भा० आ० सेट्। रेब(व)ते अरेबि(वि)ष्ट। अरिदित् चङि न हस्वः।
रेभ शब्दे भ्वा०आक०अक०सेट्। रेभते अरेभिष्ट। अरिदित् चङि न हस्वः। [२अवरामवयुरे राजभेदे हरिवं०।
रेवत पु० रेव-अतच्। १जम्बीरे जटा० २आरग्वधे शब्दचि०
रेवती स्त्री रेवतस्यापत्यमच् रेवत्यादीति निर्देशात् न ङीप्। १रेवतराजकन्यायां बलदेवपत्न्याम्। रेव-अतच् ङीप्। अश्विन्यवधितः सप्तविंशतिसंख्याते २नक्षत्रे, ३तत्संज्ञायां, ४मातृकाभेदे मेदि०। ५स्त्रीमात्रे जलवणा० ६नदीभेदे, ७दुर्गायाञ्च देवीपु०। रेवतीपदघटितायां क्वचि च "इतश्चैव रेवतीषु वारवन्तीयम्" श्रुतिः। ८पञ्चममनुपत्न्याम्। [३६२१पृ० ३अम्रम्।
रेवतीभव पु० ७त०। शनैश्चरे हेमच०। शनैश्चरशब्दे
रेवतीरमण पु० रेवतीं रमयति रम-णिच्-ल्यु। बलरामे। ६त०। रेवतीशादयोऽत्र। [छत्रे ३अम्रम्।
रेवत्यादि पु० अपत्यार्थे ठक्प्रत्ययनिमित्ते शब्दगणे। पा०ग०
रेवन्त पु०रेव-अच्। १गुह्यकाधिपतौ २सूर्यसुतभेदे च मेदिनी०।
रेवा स्त्री रेव-अच्। १नर्मदाख्यनद्याम् अमरः। २आम्रपल्लवां ३नीलीवृक्षे च मेदि० ४दुर्गायां देवीपु०।
रेष क्षेणायां (घोटकशब्दे) भ्वा० आक० अक० सेट्। रेषते अरेषिष्ट। अरिदित् चङि न हस्वः।
रै शब्दे भ्वा० पर० अक० अनिट्। रायति अरासीत्।
रै पु० रा-डै। १धने २स्वर्णे अमरः। ३शब्दे शब्दर० अस्य कृदादौ सुपि आत्त्वम् राभ्यामित्यादि। [पालादौ।
रैत्य त्रि० रीतेः पित्तस्य विकारः रीति+ष्यञ्। पित्तजन्यरोगे
रैवत पु० रेवत्या नद्या अदूरो देशः अञ्। द्वारिकासमीपस्थे १पर्वतभेदे २स्वर्णाद्रुद्रुक्षे, ३शिवे मेदि०। ४दैत्यभेदे धरणिः। रेवत्यां भवः अण्। ५चतुर्दशस्य मनोः पञ्चमे मनुभेदे। ६शनैश्चरे च। [रैवतक्षेत्रे न० राजनि०।
रैवतक पु० रैवतएव स्वार्थे क। १रैवतपर्वते हेमच० २पारोक न० रु-असुन् तस्य नेत्त्वम्। १क्षिप्ते अमरः "तन्मे रोकं च शोकघ्नेति" तिग०। २नौकायाम् ३खले त्रि० मेदि० रुच-घञ् नि० कुत्वम्। क्रयक्षेत्रे मूल्यदानेन क्रयाक्षमे ४क्रयभेदे ५दीप्तौ च पु० मेदि०।
रोग पु० रुज-घञ्। १धातुवैषम्यजाते व्याधौ राजनि० २कुत्सौषधे च (कुड़) मेदि०। [च ३रोगनाशके त्रि०।
रोगघ्न न० रोगं हन्ति हन-टक्। १सौषधे, २वैद्यकशास्त्रे
रोगराज पु० ६त० टच् समा०। राजयक्ष्माख्यव्याधौ राजनि०।
रोगलक्षण न०रोगो लक्ष्यते ज्ञायतेऽनेन लक्ष-करणे ल्युट्। रोगानुमापके धातुवैषम्यहेतुके चिह्नभेदे निदाने राजनि० "रोगस्तु दोषवैषम्यं दोषसाम्यमरोगता। रोगा दुःखस्य दातारो व्यत्ययस्त्वनयो हि ते। ते च स्वाभाविकाःकेचित्केचिदागन्तवः स्मृताः। मानसाः केचिदाख्याताः कथिताः केऽपि कायिकाः"। तत्र स्वाभाविकाः शरीरस्वभावादेव जाताः क्षुत्पिपासाजरामृत्युप्रभृतिजरास्वप्रभृतयः अथ वा अस्वभावादुत्पत्तेर्जाता स्वाभाविकाः सहजा इति यावत्। ते च जन्मान्वयादयः। आगन्तवोऽभिघातादिजनिताः। अथ वा जन्मोत्तरभाविनः कामक्रोधलोभमोहभयाभिमानदैन्यपैशुन्यशोकविषादेर्ष्यौत्सुक्यामात्सर्यप्रभृतयः। अथ वा जन्मादयश्चार मूर्छाभ्रमयोहतमःसंन्यासप्रभृतयः। कायिकाः पाण्डुरोगप्रभृतयः "कर्मजाः कथिताः केचिद्दोषजाः सन्ति चापरे। कर्मदोषोद्भवाख्यान्ते व्याधयस्त्रिविधाः स्मृताः"। तत्र कर्मजा व्याधयः यत्प्राक्तनन्दुष्कर्म प्रबलदुर्बलभोगनाश्यम् प्रायश्चित्तनाश्यं वा ततो जाताः मनु दुष्ट वातादिदोषेण जनितास्तथा। "यथाशास्त्रन्तु निर्दोतो यथाव्याधि चिकित्सितः। न मर्म याति यो व्याधिः स ज्ञेयः कर्मजो बुधैः"। दोषजाः। मिथ्याहारविहारप्रकुपितवातपित्तकफजाः। मनु मिथ्याहारविहारित्यनेन पुनरुक्तत्वं शङ्क्यते

एव। ततो दोषजेष्वपि पाक्षजं दुष्कर्मैव कारणम् तत् कर्म दोषजा इत्युच्यते। दोषजेष्वपि वस्तुतः आदि कारणं दुष्कर्म वर्त्तत एव किन्तु तत्र मिथ्याहारविहार दूषिता दोषा हेतवो ऽस्यन्त इति दोषजा इत्युच्यन्ते इति समाधिः। कर्मदोषोद्भवाः "स्वल्पदोषा गरीयांसो-ऽधर्मास्ते कर्मदोषजाः"। अत्र कारणं दुष्कर्म प्रबलं यतो दोषाल्पत्वे ऽपि व्याधेर्गरीयस्त्वतत्कर्मक्षयादेव क्षीणं भवति। दोषाः स्वल्पा अपि निदानत्वेनोक्ता ह्यस्यन्त एवेति दोषाणां कारणता मन्यन्त इति। "कर्मक्षयात् कर्मजता दोषजाः स्वल्पभेषजैः। कर्मदोषोद्भवा यान्ति कर्मदोषक्षये क्षयम्"। दोषजाः स्वल्पभेषजैरिति दोष-जेष्वादिकारणं दुष्कर्म तज्जेषजार्थं द्रव्यक्षयादिजनित दुःखभोगेन कटुतिक्तकषायाद्यहृद्यभक्षणादिजनित-दुःखभोगेन च क्षयं यान्ति। शेषा दुष्टा हेतवो दोषास्ते स्वल्पभेषजैः क्षयं यान्तीत्यर्थः। "साध्या याप्या स्वसाध्याश्च व्याधयस्त्रिविधाः स्मृताः। सुखसाध्यः कष्टसाध्यो द्विविधः साध्य उच्यते"। याप्यलक्षणमाह "यापनीयन्तु तत्रायां सद्यो यत्र विनश्यति। प्राप्-क्रिया धारयति दुःखितं यात्ममात्रया। प्रयतिष्यदिवा-गारं क्षमो यत्नेन योजितः। साध्या याप्यत्वमायान्ति याप्याश्चासाध्यतामपि। घ्नन्ति प्राणानसाध्यास्तु नराणा-मक्रियावताम्"। अक्रियावतां चिकित्सारहितानाम्। अथोपद्रवस्य लक्षणम्। "रोगास्त्वकदोषस्य प्रदोषादुप-जायते। बोऽन्यो विकारः स बुधैरुपद्रव इहोदितः"।

रोगघ्निला स्त्री रोगाय तद्विनाशाय घ्निला। मनःशिलायाम् राजनि०। [क्विप् रोगघ्न। रोगघ्नलरि-वेद्यादौ त्रि०।

रोगघ्न न० रोगं घ्नन्ति घ्न-ड। १औषधे शब्दच०। घ्न-

रोगहर त्रि० रोगं हरति हृ-अच्। व्याधिनाशके द्रव्यादौ तच्च सुश्रुतादौ ह्यस्यम्।

रोगहारिन् पु० रोगं हरति हृ-णिनि। १चिकित्सके वैद्ये अमरः। २रोगनाशके त्रि०।

रोगितरु पु० रोगिप्रियतरुः मध्य०। अशोकवृक्षे राजनि०।

रोगिन् त्रि० रोग+अस्त्यर्थे इनि रुज-णिनुष् वा। व्याधियुक्ते राजनि० स्त्रियां ङीप्।

रोचक त्रि० १रुचिकारके। २क्षुधायां हेमच०। ३कदल्यां शब्दर०। ४राजपलाशवृक्षे ५व्यवदंशे (चाटनि) च राजनि० ६पक्षिविशेषभेदे विश्वः।

रोचन पु० रुच-ल्यु रोचयति वा ल्यु। १कूटशाल्मलिवृक्षे २श्वेतशोभाञ्जने,३पलाशवृक्षे ४दाडिमे च राजनि०।५क-रञ्जे,६अक्षोठे,७वारणवृक्षे च मेदि०।८वत्सनाभायां नाभ्यां हरिवंशोक्तौ स्त्री मेदि० टाप्। ११रुचिकारके त्रि०।

रोचनक पु० रोचनाय रुचिजननाय कायति कै-क। अ-म्बोरे राजनि०। [म्बीरभेदे २विरेचन्यां स्त्री राजनि०

रोचनफल पु० रोचनं रुचिकरं फलमस्य। १बीजपूरके अ-

रोचनी स्त्री रोचयतीति कर्त्तरि ल्युट् गौरा० ङीप्। १मनःशिलायाम् हेमच० २गोरोचनायां ३श्यामलतायाम्, राजनि० ४श्वेतदूर्वायां ५गन्धद्रव्यभेदे च (गुडारोचना) अमरः। [२रुचियुक्ते त्रि०।

रोचमान पु० रुच-शानच्। १अश्वपोतस्वरोमावर्त्ते त्रिका०।

रोचिष्णु त्रि० रुच-इष्णुच्। १दीप्तिशीले २रुचिशीले च।

रोचिस् न० रुच-इसुन्। प्रभायाम् अमरः।

रोची स्त्री रोचयति रुच्-णिच्-अच् गौरा०ङीष्। छिल-मोचिकायाम् शब्दर०।

रोटिका स्त्री रुट-ण्वुल्। गोधूमादिचूर्णनिर्मिते पिष्टकभेदे (रुटी) भावप्र० ज्ञतान्नशब्दे २१८१ पृ०द्रष्टव्यम्।

रोड अनादरे भ्वा०पर०सक०सेट्। रोडति अरोडीत् अदित् चङि न हस्वः।

रोदन न० रुद-ल्युट्। १क्रन्दने २अश्रुणि मेदि०। करणे ल्युट् ङीप्। ३दराडभायाम् अमरः। संज्ञायां कन् अत इत्वम्। रोदनिका ४व्यवसायायाम् अमरः।

रोदस् न० रुद-असुन्। १स्वर्गे २भूमौ च अमरः। गौरा० ङीप् रोदसीत्यपि। ३द्यावाभूम्योः स्त्री द्वि०व०अमरः। ४पृथिव्यां निघण्टुः। [भरतः।

रोध पु० रुध-घञ्। १रोधने २आवरणे च ३नदीतीरे

रोधन त्रि० रुणद्धि रुध-ल्यु। १रोधकर्त्तरि। भावे ल्युट्। २प्रतिबन्धे न०।

रोधस् न० रुध-असुन्। नद्यादिकूले अमरः।

रोधवक्रा स्त्री रोधेन तीरेण वक्रा। नद्यां निघण्टुः। रोधोवक्राऽप्यत्र त्रिका०।

रोध्र न० रुध-रन्। १पापे २अपराधे ३लोध्रवृक्षे पु० मेदि०।

रोध्रपुष्प पु० रोध्रस्य लोध्रस्येव पुष्पमस्य। मधूकवृक्षे (महुल) राजनि०। [धातकीवृक्षे (धाइफुल) राजनि०।

रोध्रपुष्पिणी स्त्री रोध्र इव पुष्पमति पुष्प विकारे णिनि।

रोप पु० रुह-णिच्-घञ् पः कर्मणि अच्। १वापे अमरः भावे अच्। २रोपणे धान्यादेर्जननाय ३क्षुद्रारोपणे च मेदि० ४क्षिप्ते न० हेमच०।

रोपण न० रुह-णिच्-ल्युट् पः ल्युट्। १जनने २अञ्जनभेदे रुध-ल्युट्। ३विमोक्षने ४अन्यथाभूतस्य वस्तुनोऽन्यथा ज्ञाने। अञ्जनभेदप्रकारादि भावप्र० उक्तं यथा "गिरायां रक्तके पिङ्गः सम्यक् संग्राह्य वारिधा। स्टङ्गीयात्तज्जलं सर्वं त्यजेच्चूर्णमधोगतम्। शुष्कञ्च तज्जलं सर्वं पर्पटीसदृशं भवेत्। विचूर्ण्य भावयेत् सम्यक् त्रिवेलं त्रिफलारवैः। कर्पूरस्य रवं तत्र दत्त्वांशेन निक्षिपेत्। अञ्जयेत्तेन नेत्राक्षिरुगदस्फिदः"।

रोपणीवर्त्ति स्त्री नेत्राञ्जनवटीभेदे भावप्र०तत्प्रकार उक्तो यथा "अर्कीतिन्तिडपुष्पाणि मरिचं पिप्पलितण्डुलाः। जातीपुष्पाणि पञ्चाग्न्यकरिष्यानि च षोडश। कृष्णं पिङ्गाम्बुना वर्त्तिः कृता कुसुमिकाभिधा। तिमिरार्जुनशुक्लार्मा नाशिनी मांसदर्शिनी। एतस्या अञ्जने योक्ता माला यत्र हरेणुका"। (कुसुमिका वटी)।

रोपित त्रि० रुह-णिच्-क्त पः क्त। १उद्यादेर्जननाय क्षेत्राद्युरारोपणे अन्यस्थाश्रिते अन्यरूपेण निर्दिष्टे यथा सुखं चन्द्र इत्यादौ सुखस्य चन्द्ररूपेण निर्देशः।

रोमक न० रोमेव निर्विशं कायति कै-क। (रुम) १नगरे स्त्रि०। २पांशुलवणे ३क्षयलवणे च राजनि०।

रोमकन्द पु० रोम्णां युक्तः कन्दो मूलमस्य। पिण्डाख्यौ राजनि०।

रोमकपत्तन न० कर्म०। (रुम) नगरभेदे स्त्रि०।

रोमकूप पु० रोम्णां कूप इव। रोमाधारे विवरे "न रोमकूपेष्वभादित्यः" नैषधम्।

रोमकेसर न० रोमभिः केसरः सिंहस्टेव। चामरे त्रिका०

रोमगुच्छ न० रोमभिर्गुच्छं स्तवकमिव। रोमसमुदायात्मके चामरे स्वार्थे क। अप्येवार्थे हेमच०।

रोमन् न० रु-मनिन्। देहजाते अङ्कुराकारे केशतुल्ये पदार्थे (रोंवा) अमरः।

रोमन्थ पु० रोमं मन्थमति मन्थ-अच् पृषो० मकोपः। भुक्तस्य चावादेः पशुभिरुद्गीर्य चर्वणे। रोमन्थमन्थस्यति क्यङ्। रोमन्थायते।

रोमभूमि स्त्री ६त०। चर्मणि राजनि०।

रोमलता स्त्री रोमाणि लतेव। रोमराजौ हेमच०।

रोमविकार पु० ६त०। रोमोद्गमे रोमाञ्चे हेमा०।

रोमश त्रि० रोमाणि सन्त्यस्य अ। १प्रचुररोमयुक्ते २मेषे पुंस्त्री० हेमच० स्त्रियां ङीष्। ३पिण्डाख्यौ ४भल्लूके पुंस्त्री स्त्रियां ङीष्। ५कुम्भप्राह्व पु०(पाना) राजनि०।

रोमहर्ष पु० रोम्णः हर्ष इव तदुद्भेदकत्वात्। रोमाञ्चे हर्षोत्पुलकादिभिः रोमकूपे जायमाने कण्टकाकारे पदार्थे हारा०। ल्युट्। रोमहर्षणमस्यास्ति अमरः।

रोमहर्षण पु० रोमाणि हर्षयति हृष-णिच्-ल्यु। १विभीतकवृक्षे मेदि० २लोमहर्षणे मुनिभेदे च। [अमरः।

रोमाञ्च पु० रोम्णामञ्चः उद्गमः ऋतृ-अच्। रोमहर्षे

रोमाञ्चित त्रि० रोमाञ्चः जातोऽस्य तारं०इतच्। जातपुलके त्रिका०। [वस्त्यायाञ्च शब्दमा०।

रोमाली स्त्री ६त०। १रोमावलौ तद्भूषणाधने तारुण्यावरोमालु पु० रोमयुक्त आलुः शाक०। १पिण्डाख्यौ राजनि० रोम+आलुच्। २रोमवति त्रि०। [वृक्षे राजनि०।

रोमालुविटपिन् स्त्री रोमालुः रोमयुक्तः विटपी। कृष्णी०

रोमावलि(ली) स्त्री ६त०। १रोमश्रेण्यौ २नाभेरूर्ध्वस्थरोमपङ्क्तौ तदुपलक्षिते ३तारुण्यावस्थायाञ्च हेमच०।

रोमोद्गम पु० रोम्णामुद्गमः उद्-गम घञ्। रोमहर्षे हेमा०। रोमोद्भेदादयोऽप्यत्र।

रोरुदा स्त्री रुद-यङ् भावे च टाप्। अतिशयरोदने।

रोल पु० रु-लच्। पानीयामलके शब्दच०।

रोलम्ब पुंस्त्री रौति रु-विच् रौः सन् लम्बते गच्छति लम्ब-अच् कर्म०,रोड अम्बच् डश्च लो वा। भ्रमरे त्रिका० स्त्रियां ङीष्।

रोष पु० रुष-घञ्। क्रोधे अमरः।

रोषण पु०रुष-युच्। १पारदे, २निकषपस्तरे, मेदि०। ३उषरभूमौ ४क्रोधयुक्ते त्रि० हेमच०।

रोह पु० रुह-अच्। १अङ्कुरे हेमच० २रोहणकर्त्तरि त्रि०।

रोहण पु० रुहतेऽसौ रुह-ल्युट्। १पर्वतभेदे जटा०। भावे ल्युट्। २प्रादुर्भावे न० करणे ल्युट्। ३वृक्षे राजनि०

रोहन्त पु० रुह-झच्। १द्रुमभेदे, २वृक्षमात्रे च। ३लताभेदे, ४लतायाञ्च स्त्री उणादि० औरा० ङीष्।

रोहि पु० रुह-इन्। १पीजे, २वृक्षे च उणादि०। २धार्मिके त्रि० सि० कौ०।

रोहिण न० रुह-इनन्। पञ्चदशधा विभक्तदिनस्य नवमे भागे "कुर्यादारोहिणं बुधः" इति स्मृतिः। रोहिणी देवताऽस्य अण्। रौहिणमस्यास्य। २वटवृक्षे, ३रोहितवृक्षे ४भूतृणे च पु० राजनि०।

रोहिणी स्त्री रुह-इनन् औरा०ङीष्। १स्त्रीमात्रे अमरः अश्विन्यवधिके चतुर्थे २नक्षत्रे स्त्री० ३वसुदेवपत्न्यां-वसुभद्रमातरि, ४विद्युति, ५कटुतुम्ब्यां, ६लोमशवृक्षे

च मेदि०। रोहित+स्त्रियां ङीष् तस्य नत्वे पत्वम्। ७रक्तवर्णवत्यां स्त्रियाम्। सा च दूर्वरितक्याम्, ८काश्मर्याम्, १०भक्षितायाञ्च राजनि०। ११सुरभिकन्यायां वाजिकायु० "अष्टवर्षा भवेत् गौरी नववर्षा च रोहिणी" स्मृत्युक्तायां नववर्षायां १२कन्यायां १३गलरोगभेदे भावप्र० "रोहिणीनामकगलरोगाणां नामानि संख्याञ्चाह "रोहिणी षड्विधा प्रोक्ता कण्ठशालूक एव च। अधिजिह्वश्च वलयोऽलासनामैकविन्द्रकः। ततो द्वन्द्वः सतन्त्री च निलायुः कण्ठविद्रधिः। गलौघः प्रसरश्चैव मांसतालुजवैव च। विद्राधी कण्ठदेशे तु रोगा ह्येते इति स्मृताः"। तत्र षण्णामपि रोहिणीनां सामान्यसंप्राप्तिमाह "गलेऽनिलः पित्तकफौ च मूर्च्छितौ प्रदुष्य मांसञ्च तथैव शोणितम्। गलौघसंरोधकरैस्तथाऽऽरैर्निरुन्ध्य खान् व्याधिरयं हि रोहिणी"। अनिलः मूर्च्छितः षड्वः कफपित्तौ च मूर्च्छितौ पित्तं वा मूर्च्छितं कफो वा मूर्च्छितः न तु त्रयोऽपि मूर्च्छिताः" पृथग्दोषलाभा व्यविच्छमाणत्वात्। तत्रा वातजायालक्षणमाह "जिह्वास्तम्भाद्रुजश्वेदनास्तु मांसाङ्कुराः कण्ठविरोधनाः क्षुः। या रोहिणी वातकृता प्रदिष्टा वातात्कोपद्रव गाढ़युक्ता"। जिह्वास्तम्भात् जिह्वायाः सर्वतः।"वातात्कोपद्रवगाढ़युक्ता स्तम्भादिभिरतिशयेन युक्ता। पित्तजामाह "शिरोरुमा शिरविदाहपाका तीव्रज्वरा पित्तनिमित्तजाता"। श्लेष्मजामाह "स्रोतोनिरोधिन्यपि मन्दपाका गुर्वी स्थिरा सा कफसम्भवा तु। स्रोतोऽत्र कण्ठस्रोतः। सन्निपातजामाह "गम्भीरपाकिन्यनिवार्य्यवीर्य्या त्रिदोषलिङ्गा त्रिभया भवेत् सा"। रक्तजामाह "स्फोटैश्चिता पित्तसमानलिङ्गा साध्या प्रदिष्टा रुधिरात्रिका तु"। रक्तजेतरासंकीर्णकत्वावधिमाह "यद्यस्तिदोषजा स्फुलि त्रयात् कफसमुद्भवा। पञ्चात् पित्तसमूता सप्ताहात् पवनोत्थिता"। [नाडादयोऽप्यत्र।

रोहिणीपति पु० ६त०। १चन्द्रे, २वसुदेवे च रोहिणी-

रोहिणीव्रत न० रोहिणीयुक्ताभ्यां व्रतम्। रोहिणयुक्तायां भाद्रशुक्लाष्टम्यां कर्त्तव्ये उपवासरूपे व्रते। तत्राष्टमीशब्दे २२२०पृ०दृश्यम्। [२४२२ पृ०दृश्यम्।

रोहिणीशकट न० ६त०। ज्योतिषे तारामेदे तत्रोदयशब्दे

रोहित् पु० रुह-इति। १स्वर्णे मेदि० २वर्णभेदे च १मत्स्य भेदे पु०उज्ज्व०। ४लताभेदे ५कन्यायां स्त्री ङीष् मेदि०।

रोहित न० रुह-इतच्। १रुधिरे २कुङ्कुमे ३रक्तो द्रव्यभेदे मेदि०। ४रोहितकवृक्षे पु० ख्यातेऽर्थे ५मत्स्यभेदे पुंस्त्री० स्त्रियां ङीष् मेदि०। "रक्तोदरो रक्तमुखो रक्ताक्षो रक्तपक्षतिः। लग्नपक्षो भवेन्नेत्रो रोहितः कथितो बुधैः। रोहितः सर्वमत्स्यानां वरो ह्योऽर्द्धतार्क्ष्यजित्। कषायानुरसः स्वादुर्वातघ्नो नातिपित्तकृत्। अर्द्धजत्वगतान् रोगान् हन्याद्रोहितसंज्ञकम्" भावप्र०। ६रक्तवर्णे पु० ७तदति त्रि० अमरः। स्त्रियां ङीष् तस्य नत्वे पत्वम्। ८अग्निवाहने सूर्यभेदे निघण्टुः। स्वार्थे क। रोहितक वृक्षार्थे ६ह्रस्वभेदे अमरः।

रोहिताश्व पु० रोहितो सूर्यभेद अश्व इव गतिसाधनम् यस्य। यज्ञो निघण्टुक्षिर्ऋषिः।

रोहितेय पु० रोहित एव स्वार्थे ढक्। रोहितकवृक्षे रक्तको०

रोहिन् पु० रोहति पुनःपुनर्म्रियोऽपि प्रादुर्भवति रुह-णिनि। १रोहितकवृक्षे २वटवृक्षे ३अश्वत्थवृक्षे च। मेदि०। ४रोहणवति त्रि० स्त्रियां ङीष्।

रोहिष पु० रुह-इषन्। खनामख्याते कृष्णे मेदि०।

रौक्ष न० रूक्षस्य भावः अण्। १पारुष्ये २रूक्षगुणतायाञ्च।

रौचनिक त्रि० रोचनया रक्तः ठक्। रोचनया रक्ते।

रौच्य पु०। त्रयोदशे मनुभेदे मनुशब्दे ६ ब०।

रौट(ड) अनादरे भ्वा० पर० सक० सेट्। रोट(ड)ति अरौ(डी)टीत्। अदित् अकि न क्ङिति।

रौद्र न० रुद्रो देवतास्य अण्। १सूर्यतापे, २उग्ररसे च। ३तदति मेदि० ४भीषणे च त्रि० ५रसभेदे अमरः। "रौद्रः क्रोधस्थायिभावो रक्तो रुद्राधिदैवतः। आलम्बनमरिस्तत्रेष्टोद्दीपनं मतम्। सृष्टिप्रहारपतनविक्षतच्छेदादयश्चैव। संग्रामसम्भ्रमादिरुद्दीप्तिः प्रौढ़ा। भ्रूविभङ्गोष्ठनिर्दंशबाहुस्फोटनतर्जनाः। आत्मावदानकथनमायुधोत्क्षेपणानि च। अनुभावास्तत्र स्वेदरक्तरुद्रवर्णनादयः। उग्रतावेगरोमाञ्चसंदेवेपथवो मदः। मोहामर्षादयश्चात्र भावाः स्युर्व्यभिचारिणः" सा० द०।

६दुर्गायां ७रुद्रजटाहृदे च स्त्री ङीष् मेदि०।

रौप्य न० रूप्यमेव स्वार्थे अण्। रजते राजनि०।

रौम न० रुमायां लवणखनिभेदे भवः अण्। ग्राम्यरिलवणे। स्वार्थे क। तत्रैवार्थे अमरः।

रौरव पु० रोरूयतेऽत्र रु-यङ्-क्विप् तेन प्राप्यः तत्रार्थे वा अण्। १नरकभेदे अमरः। २चण्डाले, ३धूर्त्ते, ४घोरे च त्रि० मेदि०। ५रुरुनाम्नि मृगभेदे न०। तस्य चाम चर्म्मणा

प्र० दर्शितम्। "रौरवयोधाजीवे वाच्यते लचे भवतः" ता० आ०। रौरवनरकस्वरूपादिकन्तु मार्कपु० १०अ० "रौरवे क्रूटसाक्षी तु याति यत्रान्ततो नरः। तस्य स्वरूपं गदतो रौरवस्य निशामय। योजनानां सहस्रे द्वे रौरवो हि प्रमाणतः। आतुमात्रप्रमाणश्च ततः क्षुद्रः क्षुदुस्करः। तत्ताङ्गारचयोपेतं ज्वलत्तु धरणीतलम्। जाज्वल्यमाननीव्रेण तापितांङ्गारभूमिगम्। तन्मध्ये पापकर्माणं विसृजन्ति यमानुगाः। स दह्यमानस्तीव्रेण वह्निना तत्र धावति। पदे पदे च पादोऽस्य शीर्य्यते जीर्य्यते पुनः। अहोरात्रेणोद्धरणं पादन्यासं च गच्छति। एवं सहस्रं विंशोर्ध्वं योजनानां विधीयते"।

रौहिण पु० रुह-इनन् स्वार्थे अण्। १चन्दनवृक्षे त्रिका०। २रोहिणशब्दार्थे च।

रौहिणेय पु० रोहिण्यां भवः ढक्। १बुधग्रहे, २बलरामे, च अमरः। ३मरकतमणौ न० राजनि० ४गोवत्से पुंस्त्री मेदि० ५शनैश्चरे पु० भगदैवतशब्दे ४६३१ पृ० दृश्यम्।

रौहिष न० रुह-इषन् स्वार्थेऽण्। १कत्तृणे मेदि० २सप्तभेदे पुंस्त्री० अमरः। ३रोहितमत्स्ये च अजयपा०। ४दूर्वायां, ५रोहितमत्स्याच्च स्त्री ङीष्।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्य सङ्कलिते वाचस्पत्ये रकारादि-शब्दार्थसङ्कलनम्।

ल

लकारो व्यञ्जनवर्णभेदः। तस्योच्चारणस्थानं दन्तमूलम्। स्वरौष्ठ्यवर्णयोर्मध्यस्थत्वादयमन्तःस्थवर्णः। अस्योच्चारणे आभ्यन्तरप्रयत्नः जिह्वाग्रेण दन्तमूलस्य ईषत्स्पर्शेनास्य ईषत्स्पृष्टता। बाह्यप्रयत्नाश्च संवारनादघोषाः अल्पप्राणश्च। मात्रकाल्यामेऽस्य ककृदि न्यस्यता। काव्यादौ प्रथमप्रयोगे व्यसनं फलम्। "व्यसनमस्य स्वर्गेऽरण्टी। तस्य स्वरूपं यथा "लकारं चतुराभाङ्गि! कृष्णवर्णं त्रयंयुतम्। पीतविद्युल्लताकारं सर्वरत्नप्रदायकम्। पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा। त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा। आद्यादिसहितं वर्णं हृदि-भावय पार्वति" कामधेनुतन्त्रम्। तत्पर्य्यायो वर्णाभिधाने उक्तो यथा "लक्ष्मीः पूतना पृथ्वी माधवी शक्रवाचकः। वसातनुजः पिनाकीशो व्यापको मांससंज्ञकः। परावधा कङ्कटपक्षः खड्गो नादोऽमृतं दिवि। लवणं वारुणी-पीतशिखा वाणी क्रियाजिता। ज्वालिनी वेगिनी-नादः प्रद्युम्नः शोषणो हरिः। विघातन्द्रावणी चेतो मेरुगिरि कलोरवः"। तत्तदधिष्ठातृध्येयरूपं यथा "चतुर्भुजां पीतवस्त्रां रक्तपङ्कजलोचनाम्। सर्वदा वरदां भीमां सर्वालङ्कारभूषिताम्। योगीन्द्रसेवितां नित्यं योगिनीं योगरूपिणीम्। चतुर्वर्गप्रदां देवीं नाग-हारोपशोभिताम्। एवं ध्यात्वा लकारन्तु तन्मन्त्रं दशधा जपेत्" वर्णोद्धारतन्त्रम्।

ल पु० ला-क। १इन्द्रे मेदि० तन्त्रोक्ते भूमिदैवताढ्ये २रुद्र-भेदे न० २एकक्षुद्रे वर्णे। लड़ादिदशसु लकारादि तिङ्प्रत्ययेषु "लः कर्मणि च भावे चाकर्मकेभ्यः" पा०।

लक आस्वादे प्राप्तौ च चु० सक० सेट्। लाकयति ते अलीलकत् त।

लकच पु० लक-बा०अचन्। लिकुचवृक्षे (मोदार) शब्दर०।

लकुच पु० लक-उचन्। (मोदार) वृक्षभेदे अमरः।

"लकुचः क्षुद्रपनसो लिकुचो डहरिलपि। आमं ल-कुचफलञ्च गुरु विष्टम्भजनकम्। मधुरञ्च तथाम्लञ्च दोष-त्रितयरक्षकम्। शुक्राग्निनाशनञ्चापि नेत्ररोगहरं हितम्। तदेव पक्वं तच्च मधुरमम्लं वातनिघ्नपित्तकृत्। कफवर्द्धकरं रुच्यं हृद्यं विष्टम्भकञ्च तत्" भावप्र०।

"लकुचं गुरु विष्टम्भि स्वादम्लं रक्तपित्तकृत्। श्लेष्म-कारि समीरघ्नं शुक्राग्निनाशनम्" वैद्यक०।

लकुक पु० लक-कन् नि० संज्ञायां कन्। १खलक्षके (आखता) शब्दर०। २क्रीडोपकरणखण्डे (नेकड़ा) अमरः। [शब्दच०

लकुकर्मन् पु० लकुं करोति क-मनिन्। रक्तवर्णलोध्रे लकुका स्त्री गोधायां निघण्टुः। [लचत् त।

लच दर्शने अङ्गने च चु०उभ०सक०सेट्। लचयति ते अल-

लच न० लच-अच्। १पदे २चिह्ने ३व्याजे ४मरुबे च। ५दशायुतसंख्यायां स्त्री०न० मेदि०।

लचक त्रि० लचयति लचयार्थम् लच-ण्वुल्। लचय-यार्थबोधके शब्दे। तल्लक्षणं य० प्र० उक्तं यथा "वाक्यार्थस्य सम्बन्धवति यत्तन्त यद्भवेत्। तत्र तल्ल-क्षणं नाम तल्लक्षविधुरं यदि"। "वाक्यार्थसम्बन्धवति यत्तान्त सङ्केतितं तदेव तात्पर्य्यार्थे लचकं यदि तात्पर्य्यार्थे

शक्तिमूलं भवेत्। वैलक्षण्यादयश्च शब्दान्तरादिसम्बन्धिनि लक्षणादाविव तुरगादावपि शक्ता एव। गङ्गादयस्तु तीरादावसङ्केतिताः तत्सम्बन्धितीरादिशक्तत्वेन रूढीता एव तीराद्यन्वयं बोधयन्तीति तत्र लक्षका एव शक्तत्वे पूर्वपूर्वप्रयुक्तत्वापत्तेः तस्य तदव्याप्यत्वात् क्वचित्तीरादिसम्बन्धित्वेन रूढीतादपि गङ्गादिपदात्तीरादेरन्वयबोधेन तीराद्यशक्तत्वे सति तत्सम्बन्धितामात्रन्तु न लक्षणा गङ्गागङ्गायां घोष इत्यादावपि गङ्गागङ्गेतिभागस्य निरूढलक्षणायाः सत्त्वेन वैयर्थ्याभावप्रसङ्गाच्च। एतेन तीराद्यशक्तत्वे सति तीरादिपरत्वं तीरादिसम्बन्ध्यनुभावकत्वं वा तल्लक्षकत्वमित्यपि प्रत्युक्तम् अप्रसिद्धेरपि लक्षकत्वापाताच्च नचेष्टापत्तिः शक्तिलक्षणान्यतरवृत्तिमत्त्वे तस्य साधुत्वापत्तेः पदसाधुतायां वृत्तिमत्त्वस्यैव तन्त्रत्वात्। किञ्चानुभावकत्वं तदा घोषादिपदसाकाङ्क्षस्य गङ्गादिपदस्य तीरलक्षकता न स्यात् तेन तीरसम्बन्धिनो तीरस्यानुभानर्न्वानात् खरूपयोग्यत्वन्तु गङ्गायामिति वाक्यस्य दुर्वारं तत्राधाधेयताधर्मिकतीरानुभवं प्रति तीरार्थकनामोत्तर सप्तमीत्वेन तथात्वात् तीराधेयत्वस्य च तीरसम्बन्धित्वानपायात्।" अधिकं लक्षणशब्दे द्रष्टव्यम्।

लक्षण न० लक्ष्यतेऽनेन लक्ष-करणे ल्युट्। इतरभेदानुमापके चिह्ने "अप्यर्थेऽपि पदार्थानां नाना वान्ति पृथक्त्वतः। लक्षणेन तु विज्ञानमन्तं यान्ति विपश्चितः"। यथा पृथिव्या गन्धो लक्षणं स हि पृथिवीं परस्मात् भिन्नतया अनुमापयति। तच्च द्विविधम् "स्वरूपं तटस्थं द्विधा लक्षणं स्यात् स्वरूपे प्रविष्टं स्वरूपाद्विभिन्नम्" इत्युक्तेः स्वरूपलक्षणं तटस्थलक्षणं च यथा आकाशो विभुः सच्चिदानन्दो ब्रह्मेति स्वरूपलक्षणम्। कालवृक्षमुखजन्मादिकर्तृ ब्रह्मेति तटस्थलक्षणम्। स्वरूपे यथा घटलक्षणं वस्तु। इत्यादि व्यवहारोपयोगिनि ४चिह्ने च मेदि०। कर्त्तरि ल्युट्। ५स्वरूपप्रतिपादके "नोदनालक्षणार्थो धर्मः" इति जैमिनिसूत्रम् नोदना विधिवाक्यमेव लक्षणं स्वरूपज्ञापिका यस्य तादृशोऽर्थः धर्मः इति तदर्थः। ६शब्दसाधुतापतिपादके व्याकरणादिग्रन्थे च न० "लक्षणं त्वभिधानानाम्" अमरः। कर्मणि ल्युट्। ७प्रतिपाद्ये यथा "इत्थं द्वादशलक्षणीति" माधवीन्यायात् द्वादशानां लक्षणानां प्रतिपाद्यविषयाणां समाहारः इति तदर्थः। लक्ष युच्। शब्दनिष्ठे वाच्यार्थसंसर्गबोधकतारूपे "सख्यार्थबाधे तद्योगे ययान्योऽर्थः प्रतीयते। रूढेः प्रयोजनाद्वापि लक्षणा शक्तिरर्पिते"त्युक्ते ८वृत्तिभेदे स्त्री। यथा गङ्गायां घोषः प्रतिवसतीत्यादौ गङ्गाशब्दस्य जलप्रवाहरूपे स्वार्थेऽन्वयासम्भवात् तत्सम्बद्धतीरादिबोधकता। एतच्च मते रामानुजे पु० १०सारसपक्षिणि पुंस्त्री०। तत्र स्त्रियां राजनि०ङीष् टाप्। लक्षणाभेदादिकं शब्दशक्तिप्रकाशिकायामुक्तं यथा "लक्षितस्वार्थजक्षितस्वार्थानिरूढाधुनिकादिकाः। लक्षणा विविधास्ताभिर्लक्षकं स्यादनेकधा"। काचिल्लक्षणा शक्यावृत्तिरूपेण बोधकतया लक्षितस्वार्थेत्युच्यते यथा तीरत्वादिना गङ्गादिपदस्य। काचिच्छक्यलक्षणोभयवृत्तिना शक्यवृत्तिनैव वा रूपेणानुभावकत्वादलक्षितस्वार्था यथा दूरत्वादिना नीलघटत्वादिना च घटपदस्य। काचिल्लक्ष्यतावच्छेदकीभूततत्तद्रूपेण पूर्वपूर्वप्रत्ययकत्वात् निरूढा यथा आरण्यादिप्रकारेण तदाश्रयद्रव्यानुभावकत्वदरण्यादिपदस्य। काचित्तु पूर्वपूर्वं तादृक्रूपेणाप्रत्ययकत्वादाधुनिकी यथा घटत्वादिना घटादिपदस्य। स्वादिना शक्यसदृशत्वप्रकारेण बोधकतया गौरण्वुपलक्षते यथा अग्निर्माणवक इत्यादावग्निसदृशत्वादिना अग्न्यादिपदस्य। तदेवं विधलक्षणावत्त्वं लक्षकं नामापि लक्षितस्वार्थादिभेदादनेकविधमित्यर्थः। स्यादेतत् यदि तीरादिलक्षकतया गङ्गादिपदस्य ज्ञानं तीराद्यनुभवे भवेत्तर्हि भवेदयं लक्षकानां विभागः नत्वेतदस्ति तीराद्यन्वयबोधं प्रति तीरादिशक्तत्वेनैव पदज्ञानस्य जायमानेन हेतुतया लक्षकाधानस्यानुभावकत्वात् गुरुधामन्नो गैत्यं स्मृतेर्दित्यादौ शक्त्येन दहनादिनेव गङ्गायां घोष इत्यादौ क्वचित्तेन तीरादिना सार्द्धमदृष्टीतासंसर्गकत्वेन सप्तम्यर्थाधेयत्वादेरन्वयबोधप्रविष्टत्वादिति चेन्न प्रकृत्यर्थावच्छिन्नस्यैव प्रत्ययार्थस्य धर्म्यन्तरेऽन्वयबुद्ध्यनुपपन्नतया तीराद्यविशेषितस्य तत्राधेयत्वादेर्बोधाद्यन्वयबोधायोगात्। न च शक्तस्यैव पदस्य समाकाङ्क्षादात्तरोपस्थाप्यार्थान्वितस्वार्थधर्मिकान्वयबोधं प्रति हेतुत्वादन्वयबुद्धौ लक्ष्यार्थस्याप्रवेशः, कुन्ताः प्रविशन्तीत्यादौ लक्षस्य कुन्तधरादेरन्वयविशेष्यत्वानुपपत्तेः कुन्तैः पन्थाः क्रियन्तामित्यादौ शक्यलक्ष्यार्थयोरन्वयबोधस्याप्यनुभवसिद्धत्वाच्च। तस्माच्छक्तेरिव भक्तेरपि ज्ञानमनुभावकं भवत्येव कार्यतावच्छेदकस्य बहूपाये न व्यभिचारः"। सा च बहुधा विस्तरस्तु साहि०२प०दृश्यः।

लक्षित त्रि॰ लक्ष-कर्मणि क्त। १लक्षणया बोधितेऽर्थे, २ज्ञाते, ३अनुमिते च कर्त्तरि क्त। ४लक्षणाश्रये लक्षक-शब्दे च।

लक्षितलक्षणा स्त्री लक्षणाभेदे यथा द्विरेफपदेन वक्तु-प्रोद्दिश्यमानयोपस्थापिताद्रेफदयघटितसमरपदादभिधयैव भङ्गोपस्थितिः। अत्र न रेफद्वित्वं प्रकृते तु रेफद्वयो-जनाभावात्रेयार्थत्वं स्वमेव लक्षितलक्षणेति वाच्यम्। यत्र लक्षिताच्छब्दाद्बोधिभानं तत्रैव लक्षितलक्षणायाः परिभाषितत्वात्"सा॰ द॰ टी॰।

लक्ष्मन् न॰ लक्ष-मनिन्। १चिह्ने २प्रधाने च अमरः। आर्षे अच् पृषो॰ न ह्रस्वः। ३स्वरूपचिह्ने पुंस्त्री॰ ङीषन्च॰ टरूपपत्न्याः सुमित्रायाः ४लक्ष्मणाजाते च पु॰। ५श्वेतकण्टकार्य्यां ङीषन्च॰ स्त्री टाप् ६स्वरूपचिह्नितायाम् ७ओषधभेदे च स्त्री मेदि॰ टाप्।

लक्ष्मी स्त्री लक्ष-ईट् च। १विष्णोःपत्न्याम् अमरः। २शोभायां, ३कान्तौ, ४सम्पत्तौ, ५कद्रुवौषधे, ६दक्षिणा-मोषधे, ७फल्गिनीवृक्षे च मेदि॰ ८लक्षणयाभिन्नायाम् ९दरि-द्रायां, १०भग्यां, ११लक्षायां १२दूर्व्वे च राजनि॰ १३पीड़ायां १४वारयोषिति च शब्दच॰।

लक्ष्मीपूजाकालादि स्कन्दपु॰ उक्तं यथा

"पौषे चैत्रे तथा भाद्रे पूजयेद्युः स्त्रियः श्रियम्। सिंहे धनुषि मीने च स्थिते सवितरङ्गमे। मध्यह्नं पूजये-ल्लक्ष्मीं शुक्लपक्षे सुरोदिने। नागरात्रे न रात्रौ च नास्तिते न ग्रहक्षुभि। द्वादश्यां चैव नन्दायां रिक्षा-यान्तु निरंशके। त्रयोदश्यां तथाऽमायां कमलां नैव पूजयेत्। न पूजयेत् यमौ भौमे न बुधे नैव भार्गवे। पूजयेत्तु गुरोर्वारे चाप्राप्ते रविसोमयोः। गुरुवारे हि पूजां च यत्नेन यदि लभ्यते। तत्र पूजा तु कमला धनपुत्रविवर्द्धिनी। न कुर्य्यात् प्रथमे भागे नैव कुर्य्यादिसर्जनम्। न चष्टां वादयेत्तत्र नैव भित्तौ प्रदापयेत्। पौषे च दशमी शस्ता चैत्रे पञ्चमी तथा। नभस्ये पूर्णिमा ज्ञेया गुरुवारे विशेषतः। आढकं धान्यसंपूर्णं नानाभरणभूषितम्। कृत्तिकागुरुपुष्ये च शुक्लपक्षे विशेषतः। पौषे तु पिष्टकं दद्यात् परमान्नन्तु चैत्रके। पिष्टकं परमान्नन्तु नभस्ये तु विशेषतः। गुरु-वारसमायुक्ता नभस्ये पूर्णिमा शुभा। कमलां पूजये-त्तत्र पुनर्जन्म न विद्यते। एकेन कमलेनैव कमलां पूजयेद् यदि। स्वर्गे लोके सुखं प्राप्य परत्र लभते पदं त्रजेत्"। लक्ष्मीचरित्रे तु "न लक्ष्मपक्षे रिक्तायां दशमी द्वादशीषु च। श्रवणादिचतुर्ष्वर्क्षे लक्ष्मीपूजां न कारयेत्"। दशमीनिषेधः पौषातिरिक्तपरः प्रागुक्तैक-वाक्यत्वात्। दीपान्विताऽमायां तत्पूजादिकं दीपान्वित-शब्दे २६०७पृ॰ दर्शितम्। कोजागरलक्ष्मीपूजा कोजा-गरशब्दे २२६२ पृ॰ दर्शिता। माघशुक्लपञ्चम्यां श्री-पूजनं "पञ्चम्यां श्रीरपि श्रियम्" इति॰ त॰ विधृतम्। "पञ्चम्यां श्रियं पूजयेत्"कल्पतरुरपि तत्परा। मद॰पृ॰ ११४ च॰ लक्ष्म्याह्वानागारचतोक्ता यथा

"कुचेलिनं दन्तमलोपधारिणं बह्वाशिनं निष्ठुरवाक्य-भाषिणम्। सूर्य्योदये चास्तमये च शायिनं विमुञ्चति श्रीरपि चक्रपाणिनम्। नित्यं क्षेदसमानां धरणि-विलिखनं पादयोरलक्ष्मीर्दन्तानामलशौचं वसनमलि-नता रूक्षता मूर्द्धजानाम्। हे सख्ये चापि निद्रा विवसनशयनं प्रातरुत्थातिरेकः खाद्ये पीठे च वाञ्छा निधनसुपनयेत् केशवस्यापि लक्ष्मीः। तथा भोजनहेतुता तत्रोक्ता यथा "शिरः सुधौतं चरणौ सुमार्जितौ करा-वभ्यासेवनमल्पभोजनम्। अनलसतादिसमन्वयेन चिरप्रनष्टां श्रियमानयन्ति षट्। यत्र कक्षे तु पुष्पस्य पाण्डुरत्वं विशेषतः। शिरसा धार्य्यमाणस्य तत्रलक्ष्मीः प्रतिष्ठन्यते। दीपस्य पश्चिमाभाया छाया यत्रासनस्य च। रजस्तत्र तु यत्नेनमलक्ष्मीस्तत्र तिष्ठति"।

लक्ष्मीकान्त पु॰ ष॰त॰। १विष्णौ, २राजनि च लक्ष्मी-पत्यादयोऽप्यत्र। "विहाय लक्ष्मीपतिलक्ष्मकार्य्यम्" किरा॰। लक्ष्मीपतिस्तु लक्ष्मके पुंगठके च त्रिषु।

लक्ष्मीजनार्द्दन न॰ शालग्रामभेदे। तस्य लक्षणं यथा"एक-द्वारे चतुश्चक्रं नवीननीरदोपमम्। लक्ष्मीजनार्द्दनं श्रेयं रक्षितं वनमालया" ब्रह्मवै॰ प्र॰।

लक्ष्मीनारायण पु॰ शालग्रामभेदे तस्य लक्षणं यथा "एक-द्वारे चतुश्चक्रं वनमालाविभूषितम्। नवीननीरदाकारं लक्ष्मीनारायणाभिधम्" ब्रह्मवै॰ प्र॰।

लक्ष्मीनृसिंह न॰ शालग्रामभेदे तस्य लक्षणं यथा "द्विचक्रं विस्तृतास्यञ्च वनमालासमन्वितम्। लक्ष्मीनृसिंहं वि-श्रेयं सर्व्वसिद्धास्च सुखप्रदम्" ब्रह्मवै॰ प्र॰।

लक्ष्मीपुत्र पु॰ ष॰त॰। १कामदेवे, २बुधे मेदि॰ ३कुबेरे च शब्दच॰। ४गन्धर्व्वभेदे।

लक्ष्मीफल पु॰ लक्ष्म्यै फलमस्य। श्रीफले बिल्वफले राजनि॰

लक्ष्मीवत् पु॰ लक्ष्म्याः शोभाऽस्यास्ति मतुप् मस्य वः। १धनिके

शब्दच० । २चीवुके त्रि० अमरः स्त्रियां ङीप् । ३श्वेतरोहितवृक्षे पु० राजनि० ।

लक्ष्मीसहज पु० लक्ष्म्या सह धीराद्यो जायते जन-ड । १चन्द्रे, शब्दच० २लक्ष्मीःश्रवसि ३कर्पूरे च ।

लक्ष्य न० लक्ष-यत् । १वेधार्थसंहिश्यमाने शरव्ये अमरः । २लक्षणाबोध्येऽर्थे, ३दृश्ये, ४भ्रूवे, ५अनुमेये च त्रि० ।

लक्ष्मासन न० ष० त० । चक्रे आसनभेदे । "अथ लक्ष्मासनं वक्ष्ये विक्रान्ते ऽङ्घ्रितलद्वयम् । गुह्यदेशे कृतयुग्मं तलाभ्यामवलम्बयेत् भुवि" ।

लङ्ग गतौ भ्वा० पर० सक० सेट् । लङ्गति । अलङ्गीत्-अलाङ्क्षीत् । इदितश्चयम् लङ्गति अलङ्गीत् ।

लङ्ग लङ्गीभावे अक० गतौ सक० भ्वा० प० सेट् । लङ्गति अलङ्गीत

लङ्घ लङ्घे भ्वा० पर० सक० सेट् । लङ्घति इदित् अलङ्घीत् लटा० लङ्घति । "लङ्घेव तस्या लङ्घति स पश्चात्" नैष० ।

लङ्घ स्थाने म्रो च सक० भ्रु० उभ० सेट् । लाङ्घयति ते अलीलङ्घत् त ।

लङ्गित त्रि० लङ्ग-क्त । संसक्ते ।

लङ्गुड(ल)(र) पु० लङ्ग-उडच् लस्य डरौ वा । दण्डाकारे काष्ठनिर्मिते प्रहरणे (लाठी) अमरः ।

लङ्घ न० लस्ज-क्त तस्य नः । १मेषादिराशीनामुदये अमरः । २लज्जिते त्रि० । लग-क्त पृषो० । ३संसक्ते त्रि० । ४सुतिपाठके पु० त्रिका० । लग्न एव स्वार्थे कन् । ५प्रतिभुवि । (जामिन) "खादको वित्तहीनः स्यात् लग्नको वित्तवान् यदि" इति स्मृतिः । मेषादिराश्युदय-रूपलग्नपदार्थस्य देशभेदे कालमानं खगोलशब्दे २४५२। ५२५पृ०दर्शितम् । इष्टकाले लग्नसाधनञ्च ३८०२पृ०दृश्यम् ।

लङ्घिका स्त्री लङ्घ एव कन् पृषो० । अष्टवर्गजलूकायां स्त्रियाम् अमरटीका ।

लघ क्षेपणे सौत्रातिक्रमे गतौ च भ्वा०चु०सक०सेट् इदित् । लङ्घते अलङ्घिष्ट । "लङ्घोविनीवल्लभसङ्गलङ्घे" भट्टिः ।

लघ क्षेपे भ्वा० पर० सक०सेट् इदित् । लङ्घति अलङ्घीत् ।

लघ प्रकाशे चु०उभ०स०सेट् इदित् । लङ्घयति ते अललङ्घत् त

लघ आस्वादने चु०उभ०सक०सेट् । लाघयति-ते अलीलघत्-त

लघट्(टि) पु०लघि-गोत्रे "लङ्घेर्नलोपश्च" उणा०अटिः डित्वं उच्चारणार्थः शब्दत० पाराशर्यस्तु न तथा । वाग्वौ ।

लघिमन् पु० लघोर्भावः इमनिच् डित्वं । १लघुत्वे वायवे, वेगोर्द्धगतिधर्म्मत्वः । २ऐश्वर्यभेदे च ।

लघिष्ठ त्रि० अतिशयेन लघुः इष्ठन् डित् । अतिशय-लघुत्वयुक्ते । रैवतनु । लघोरतिशय स्त्रियां ङीप् ।

लघु न० लघि-कु त्रि०लघोः ।१शीघ्रे अमरः । २क्षणानुदयिमेदि० । ३वीरधमूले राजनि० । ४पृक्कानामौषधौ स्त्री मेदि० । ५निःसारे, ६स्वाचरणयुक्तायिते, ७तुच्छे, ८मनोहरे च त्रि० मेदि० । व्याकरणोक्ते हस्वसंज्ञके ९अकारादौ वर्णे, ज्योतिषोक्तेषु "पुष्यान्तिहस्ता लघुः" इत्युक्तेषु १०पुष्यादिनक्षत्रेषु च पु० । ११लघुतावत्यां स्त्रियां स्त्री वा ङीप् । तदस्यतो ष्यञ् लघ्यति ।

लघुकाय पुंस्त्री० लघुः कायो यस्य । १छागे त्रिका० स्त्रियां वोपधत्वात् टाप् । कर्म० । २क्षुद्रशरीरे पुंन० ।

लघुकाश्मर्य्य पु० नित्यकर्म० । क्षुद्रफले वृक्षे राजनि० ।

लघुचिर्भिटा स्त्री वि०कर्म० । क्षुद्रचीर्भटी वर्त्तुलीभेदे राजनि० ।

लघुदन्ती स्त्री कर्म० । क्षुद्रदन्तीवृक्षे ।

"दन्तीद्वयं खरं प्राहुः रसे च कटुदीपनम् । गुदाङ्कुरास्रमूलाखशूलकृमिविदाहहृत् । तीक्ष्णोष्णं कृमि पित्तास्रं कफगोदरविबन्धीनुत्" "क्षुद्रदन्तीफलन्तु स्वाद्वम्लं रसपाकयोः । शीतलं क्षुद्रविष्मूत्रं सक्षयोग कफापहम्" भावप्र० ।

लघुद्राक्षा स्त्री कर्म० । द्राक्षाभेदाल्पायाम् राजनि० ।

लघुनामन् पु० लघुवर्णयुक्तं नाम यस्य बहुव्रीहौ यस्य । अगुरुचन्दने शब्दच० ।

लघुपत्रक पु० लघूनि क्षुद्राणि पत्राण्यस्य कप् । (छड़ारो-धना) वृक्षभेदे शब्दच० । स्त्रियां ङीप् । लघुपत्री स्त्री २अश्वत्थवृक्षे राजनि० ।

लघुपुष्प पु०लघु पुष्पं यस्य । भूमिबदरे राजनि० । [ङीप् ।

लघुबदर पु० कर्म० । क्षुद्रबदरी । २भूबदर्य्यां स्त्री राजनि०

लघुब्राह्मी स्त्री कर्म० । क्षुद्रब्राह्म्याम् राजनि० ।

लघुमन्य पु० । अस्मिमन्यः मन्यः पूर्वपदलोपः कर्म० । क्षुद्रात्मिमन्ये राजनि० ।

लघुलय न० लघु शीघ्रं लीयते स्त्री-क्यच् । वीरधमूले अमरः

लघुसदाफला स्त्री सदा फलं यस्याः कर्म० । क्षुद्रोडुम्बरि-कायाम् (छोट डुमुर) राजनि० ।

लघूडुमदुग्धा स्त्री कर्म० । क्षुद्रोडुम्बरे (छोट डुमुर) राजनि०

लघूदुम्बरिका स्त्री कर्म० । क्षुद्रोडुम्बरभेदे राजनि० ।

लङ्का स्त्री लक्ष-अच् डस्य ङ । अनामख्यातायां १पुर्य्याम् । सा च भूमेरुत्तरे याम्ये भूवृत्तपादविवरे सवडवमध्ये स्थिता" सि० शि० । २सारिवोभौ ३वेश्यायां ४आचार्य्यभेदे वाच्य त्रिका० ।

लङ्घाधिप पु० ६त० । १रावणे लङ्घानाथादयोऽप्यत्र । २कुबेरे च । [पृक्कायां (पिड़िङ) शाकभेदे शब्दच० ।

लङ्घा(यि)पिका स्त्री लङ्घामश्नते आप्नोति वा ण्वुल् । लङ्घास्थायिन् पु०लङ्घायां तिष्ठति स्था णिनि । (लङ्घाविज) वृक्षभेदे शब्दच० । २लङ्घावासिनि त्रि० ।

लङ्घोपिका स्त्री लङ्घायामश्यते वप-ण्वुल् पृषो० । पृक्कायाम् । (पिड़िङशाक) शब्दर० ।

लङ्घन न० लङ्घि-ल्युट् । १क्षमीजने, २अतिक्रम्य गमने, ३क्रमणे, ४लङ्घने च मेदि० । ५वर्जने च भावप्र० लङ्घनस्य लक्षणसङ्ख्यादिकञ्च यथा "ज्वरी लङ्घनं कुर्य्यादित्याह चरको वागभटश्च "आमाशयस्थो दुष्टाग्निं वायुर्मार्गात् विभाषयन् । विदधाति ज्वरं दोषसाम्यात्तल्लङ्घनमाचरेत्" । तथा "ज्वरादौ लङ्घनं प्रोक्तं ज्वरमध्ये तु पाचनम् । ज्वरान्ते भेषजं दद्याज्ज्वरसङ्क्षे विरेचनम् । त्रिविधं त्रिविधि दोषे तत्समीक्ष्य प्रयोजयेत् । दोषोऽपि लङ्घनं पथ्यं मध्ये लङ्घनपाचनम् । प्रभूते भोधनं तच्च मूलादुन्मूलयेन्मलान् । चक्रदत्तश्च "तत्र्यं तु ज्वरं पूर्वं लङ्घनेन जयं नयेत् । आमदोषमविज्ञाय लङ्घयेत्तं यथाविधि । वातः पचति सप्ताहात् पित्तन्तु दशभिर्दिनैः । श्लेष्मा द्वादशभिर्वैः पच्यते वदतांवर ! । लङ्घनं लङ्घनीयन्तु कुर्य्याद्दोषानुरूपतः । त्रिरात्रमेकरात्रं वाऽथोरात्रमथ वा ज्वरे । निर्वातसेवनात् खेदाल्लङ्घनाद्ग्न्यवारिणः । यावदामज्वरे क्षीणे पश्चादौषधमाचरेत्" । आत्रेयोक्तम् "ज्वरादौ लङ्घनं प्रोक्तं ज्वरमध्ये तु पाचनम् । ज्वरान्ते भेषजं दद्याज्ज्वरसङ्क्षे विरेचनम् । दोषग्रहश्च पाचार्थमग्नेः सन्धुक्षणाय च । लङ्घितस्याप्यदोषस्य यवागूपानमाचरेत् । षष्टिषष्टिकसङ्घानां मूलं वा शस्यमाचरेत् । पञ्चकोलेन संसिद्धं यवागूं मध्यलङ्घने । अत्यर्थं लङ्घितं ज्ञात्वा तस्य सन्तर्पणं हितम् । क्षाद्यादाडिमलाजूरपियालैः सपरूषकैः । तर्पणाख्यं कर्त्तव्यमत्यर्थं ज्वरशान्तये" । अत्र लङ्घनशब्देनानशनमुच्यते । यत आह सुश्रुतः "आनशनमिति तैर्दोषैर्यावन्न बाधते मात्रा । तावत्त्वनशनं कुर्य्यात्ततः संसर्जनमाचरेत् । आनशनमिति तैर्दोषैः सम्बन्धः । संसर्जनम् औषधान्नादिप्रसङ्गम्" । यत आह चरकः "षड्विधा लङ्घनाः प्रोक्तास्तेषु सप्तविधा मता । पाचनान्युपवासश्च व्यायामश्चेति लङ्घनम् । षड्विधा संशुद्धिर्वमनञ्च विरेचनम्" । निरूहवस्तिशिरोविरेचनानि नस्यानुवासनं तस्य द्वंद्वपत्वात् । अत्र लङ्घनं कर्मणामित्यर्थः । सुश्रुतः "शरीरलाघवकरं यद्द्रव्यं कर्म वा पुनः । तं लङ्घनमिति प्रोक्तं द्वंद्वं तु पूर्वमित्यम्" । लङ्घनात्कर्मणादस्यत् शरीरस्योपलक्षणमित्यर्थः" ।

लङ्घ विश्लेषकरणे भ्वा० पर० सक० सेट् । लङ्घति अलङ्घीत् ।

लज्ज व्रीड़ायाम् भ्वा० आ० अक० सेट् । लज्जते अलज्जिष्ट ।

लज्ज तिरस्कारे भ्वा०पर०सक०सेट् इदित् । लज्जति अलज्जीत् ।

लज्ज अवलम्बने चुरा० उ० सक० सेट् । लाजयति-ते अलीलजत् त ।

लज्ज भाषणे हिंसायां दाने च सक०सामर्थ्ये वासे च अक० चुरा० उभ० सेट् इदित् । लज्जयति-ते अलज्जत् त ।

लज्ज भाषणे अद०चु०उभ०सक०सेट् । लज्जयति-ते अलज्जत्-त

लज्जकारिका स्त्री लज्जं लज्जां करोति ञ-ण्वुल् अत इत्त्वम् । लज्जाजनकवाद्यभेदे हेमच० ।

लज्जा स्त्री लज्ज-भावे च । अकस्मात्प्रवृत्तो परदर्शने दुष्टक्रियया वतो निवृत्तिसाधने चित्तवृत्तिभेदे अमरः ।

लज्जालु स्त्री लज्ज-आलुच् । १लताभेदे शब्दच० । २लज्जावति त्रि० ।

"लज्जालुः स्यात् ग्रमीपर्णी समङ्गाञ्जलिकारिका । रक्तपादी नमस्कारी नाम्ना खदिरवेल्लपि । लज्जालुः शीतला तिक्ता कषाया कफपित्तजित् । रक्तपित्तमतीसारं योनिरोगं विनाशयेत्" भावप्र० । [विग्रिष्टे ।

लज्जाशील त्रि० लज्जां शीलयति शील-अच् । लज्जालज्जिरी स्त्री लज्जा+अस्त्यर्थे इरच् गौरा०ङीष् । लज्जालुलताभेदे राजनि० । [त ।

लज्ज भाषणे अद०चु०उभ०अक०सेट् । लज्जयति ते अलज्जत्

लज्ज पु० लज्ज-अच् । १पद्मे २लज्जो च हेमच० ३वृक्षे लटा० संज्ञायां कन् अत इत्त्वम् । लज्जिका वेश्यायाम् हेमच० ।

लट वाक्यभावे अक० उञ्छौ हि० भ्वा० पर० सेट् । लटति । अलाटीत् अलटीत् । [विश्वः ।

लट पु० लट-घञ् । १प्रमादवचने २दोषे च

लटक पु० लट-कुन् । दुर्जने उणादिकोषः ।

लटपर्ण न०लटं दुष्टं पर्णमस्य । त्वचे (दारचिनि) राजनि०

लटा स्त्री लट-अ । (नाटाकरमचा) १करञ्जभेदे, २वाद्यभेदे, ३श्यामषटके, मेदि० ४लुब्धके हेमच० । ५अप्सरसि च भरतः । ६त्वचे खने पुंस्त्री० जातिभेदे पुंस्त्री०७रागभेदे पु० उषा० ।

लड विलासे भ्वा॰ पर॰ अक॰ सेट्। लडति अलाी(ड)डीत्
लड उत्क्षेपणे सक॰ जिह्वाचालने अक॰ भ्वा॰ पर॰ सेट्। लडति अलाडीत्-अलडीत् घटा॰। लडयति।
लड अलम्भनपाचने चु॰उभ॰सक॰सेट्। लाडयति-ते अलीलडत् त।
लड आप्तौ चु॰उभ॰सक॰सेट्। लाडयति-ते अलीलडत् त।
लड भाषणे दिक॰ वा चु॰ उभ॰पक्षे भ्वा॰ पर॰ सेट् इदित्। लण्डयति-ते लण्डति। अललण्डत्-त अलण्डीत्।
लड उत्क्षेपणे वा चुरा॰ उभ॰पक्षे भ्वा॰पर॰सक॰सेट् इदित्। लण्डयति-ते लण्डति। अललण्डत्-त अलण्डीत्।
लड क्षेपणे अद॰चु॰उभ॰सक॰ सेट्। लडयतिते अललडत् त
लडुक पु॰ लड-डु तस्य नेत्त्वम् स्वार्थे क। तेलादिपक्वे गोधूमादिचूर्णनिर्मिते (लाडु) मिष्टान्नभेदे "प्रथुलडुक लक्षनीति" नैषधम् स्त्रीत्वमथच।
लण्ड पु॰ चडि रत्। (लण्डन) इति ख्याते देशभेदे।
लत आघाते भौ॰पर॰सक॰सेट्। लतति अलातीत् अलतीत्।
लता स्त्री लत-अच्। आखारक्षिते १गुडूच्यादौ अमरः। २आस्फोतायां ३प्रियङ्गौ ४पृक्कायाम् ५अक्षनपर्ण्यां च अमरः। ६ज्योतिष्मत्यां ७लताकस्तूरिकायां ८माधवीलतायां ९दूर्वायाञ्च मेदि॰। १०वैद्यकोक्तायां ११सारिवौषधौ च राजनि॰।
लताकरञ्ज पु॰ लतारूपः करञ्जः। करञ्जभेदे राजनि॰।
लताकस्तूरिका स्त्री लतायां कस्तूरीव सुगन्धत्वात् स्वार्थे कन्। कस्तूरीगन्धयुक्तपत्रयुतायां लतायाम् राजवल्ल॰। "लताकस्तूरिका तिक्ता वृद्धा पीताक्षरोगकृत्"।
लताजिह्व पुंस्त्री॰लतेव जिह्वा यस्य। सर्पे शब्दमा॰ स्त्रियां ङीष्।
लतातरु पु॰ लतेव दीर्घस्तरुः। १ताडवृक्षे २माकरञ्जवृक्षे च शब्दच॰। ३आखुपर्ण्यां राजवल्ल॰। लताद्रुमादयोऽप्यत्र।
लतापनस पु॰ लतायां पनसमिव स्थूलं फलमस्य। (तरसल) लतामेदे त्रिका॰। [शब्दच॰।
लतापृक्का स्त्री लतेव त्रिशीर्षा पृक्का। (घिङ्गड़) शाकभेदे
लताफल न॰ लतायां फलमस्य। पटोले।
लतामरुत् स्त्री लतायां मरुत् वायुर्यस्याः। पृक्कायां शब्दच॰ लतालेहने हि वायुवृद्धिरिति वैद्यकप्रसिद्धम्।
लतायष्टि स्त्री लतापि यष्टिरिव। मञ्जिष्ठायाम् शब्दमा॰।
लतायावक न॰ लतया यावकमिव। प्रवाले त्रिका॰।
लताक पु॰ लतयाऽकं इव। खद्योतमक्षिकयोः अमरः।

लतावेष्ट पु॰ "बाहुभ्यां पादयुग्माभ्यां वेष्टयित्वा स्त्रियं रमेत्। सुखिक्लृप्ताङ्गं योगो लतावेष्टश्च्यते" रसम॰ उक्ते आलिङ्गनभेदे। [वेष्टितकं तथा" शब्दमा॰।
लतावेष्टितक न॰ आलिङ्गनभेदे। "उद्धृतकूर्पीढ़ितं लतालप कथने भ्वा॰पर॰ दिक॰ सेट्। लपति। अलापीत्-अलपीत्। क्वादित्वात् न क्ङित्।
लपन न॰ लप्यते उच्चार्यतेऽनेन लप-करणे ल्युट्। १हरे अमरः। भावे ल्युट्। २कथने च। [न॰ अमरः।
लपित त्रि॰ लप-कर्मणि क्त। १कथिते। भावे क्त। २कथने
लप्सिका स्त्री खाद्यभेदे लताशब्दे २१८१ पृ॰ दृश्यम्।
लब आलम्बने सक॰ शब्दे अक॰ भ्वा॰ आत्म॰ सेट् इदित्। लम्बते अलम्बिष्ट।
लब्ध त्रि॰ लभ-कर्मणि क्त। १प्राप्ते अमरः। २नाविकभेदे स्त्री जटा॰। भावे क्त। प्राप्तौ १लाभे न॰। "अलब्धाधिकं लब्धम्" मौत॰ स्मृतिः।
लब्धवर्ण पु॰ लब्धो वर्णो वर्णनं प्रशंसा ज्ञानवत्त्वेन येन। पण्डिते अमरः।
लभ शब्दे सक॰भ्वा॰आत्म॰सेट् इदित्। लम्भते अलम्भिष्ट।
लभ प्राप्तौ सक॰ भ्वा॰ आत्म॰ अनिट्। लभते। अलब्ध। ञित् लब्धिः। नित् लभा। अचिश्नुधातुभ्रुवां यङ्लुबन्तस्य धातोरेत्वम्। आलल्भः अपालल्भः। अनुपसर्गात् किम् हृ न लाभः। क्वचित्तु सर्वथा दुर्लभः।
आ+लम्भे वधे च उप+ज्ञानभेदे उप+आ+तिरस्कारे।
लभस न॰ लभ-असच् नि॰सुम्। वाजिबन्धने उज्ज्वल॰।
लभ्य त्रि॰लभ-कर्मणि यत्। १प्राप्तव्ये मेदि॰ २न्याय्ये अमरः
लमक पु॰ रस-डुनृ रस्य लः। १भिक्षे जारे त्रि॰को॰।
लम्पट पु॰ रस-अटनृ पुक् च रस्य लः। परस्त्रीषु १लोलुपे मेदि॰। २व्यसक्ते च।
लम्ब पु॰ लबि-अच्। १नर्तके २व्याले ३अक्षे च अमरः। ४उत्कोचे हेमच॰ अङ्कशास्त्रोक्ते त्रिभुजादिक्षेत्रे भुजकर्णयोर्मध्यस्थे लम्बमाने ५सूत्रे च "बाधाभुजश्रुत्योरन्तरमूलं प्रसार्यते लम्बः। लम्बगुणं भूम्यर्द्धं फलं त्रिभुजे फलं भवति" लीला॰। ७दीर्घे दलम्बमाने च त्रि॰।
लम्बकर्ण पु॰ लम्बः कर्णो यस्य। १छागे मेदि॰ २अक्षोटवृक्षे पु॰ ३कलिङ्गे ४राजवृक्षे च पुंस्त्री॰शब्दच॰ ५श्लेष्मणि राजनि॰। ६लम्बश्रोत्रयुते त्रि॰। कर्म॰। ७लम्बमाने श्रोत्रे पु॰। सर्वत्र स्त्रियां जातित्वात् ङीष्।
लम्बकेश त्रि॰ लम्बः दीर्घः केशो यस्य। दीर्घकेशयुक्ते कृष्णसर्पे

विष्टरे। "ऊर्ध्वकेशो भवेत् ब्रह्मा लम्बकेशस्तु विष्टरः। दक्षिणावर्त्तको ब्रह्मा वामावर्त्तस्तु विष्टरः" सं० त०। "केशोऽस्यास्त्यम्" रघु०। २दीर्घकेशयुक्ते त्रि०। कर्म०। ३दीर्घे केशे च पु०।

लम्बदला स्त्री लम्बोदीर्घः दल इव बीजकोष्ठको यस्याः। १सिंहलदीपभवपिप्पल्याम् राजनि०। २दीर्घदलयुक्ते त्रि० कर्म०। ३दीर्घे दले पु०।

लम्बन न० लबि-ल्यु। नाभिदेशपर्य्यन्तं १लम्बमाने मालादौ अमरः। भावे ल्युट्। २आलम्बने न०।

लम्बबीजा स्त्री लम्बं दीर्घं बीजं यस्याः। सिंहलदेशजातपिप्पल्याम् राजनि०।

लम्बा स्त्री लम्बते लबि-अच्। १तिक्तलम्बां (तितलाउ) २लक्ष्म्यां ३गौर्य्यां च मेदि० ४दक्षकन्याभेदे ५हिमालयकन्याभेदे च हरिवं०।

लम्बोदर पु० लम्बं दीर्घमुदरं यस्य। १गणेशे अमरः। २तारानाम्न्यां देव्यां स्त्री तन्त्रम् ङीप्। ३दीर्घोदराथे त्रि०।

लम्बो(म्बी)ष्ट पु० स्त्री० लम्बौ ओष्ठौ यस्य। वृद्धे त्रिका० स्त्रियां ङीप्। [ललविडम् ललायध्वम्।

लय गतौ भ्वा० आत्म० सक० सेट्। लयते ललयिष्ट।

लय पु० ली-अच्। १संश्लेषे २विनाशे ३नृत्यगीतवाद्यानामेकतानतारूपे साम्ये च मेदि०। लीयतेऽत्र। सर्वभूतशरीरे ४प्रलयकाले शङ्कर० ५ईश्वरे च। षड्लयभेदाश्च "द्रुतो स्यादुद्धतिका भल्लिका छिन्नखण्डिका। वामभुग्लस्तास्त्रिका खण्डधारा कड्कलकः। अम्बाडिकाकलतिका खण्डकः खरिकस्तथा। कथितश्चतुरश्रोऽर्द्धचतुरश्रोऽथ मर्कटः। लम्बुः षड्यन्त्रालवालश्चमन्दघटौल्यपि। कादम्बचरी चट्टा मिश्रोऽर्द्धवलिता ततः। अतिचित्रः समश्चैव वलितोऽर्द्धवलस्तथा। आविद्धस्तु टङ्कुकस्तत्रचित्रविचित्रकौ। आन्त्री विलम्बधारा च सङ्कीर्णश्च विलोडकः। रमणीयस्तथैव करकस्तुकसंज्ञकः। चत्वारिंशदिमे प्रोक्ता लया लयविशारदैः। लयेन यस्तो भगवान् लये लीनो जनार्दनः" सङ्गीतदा०।

लर्व गतौ भ्वा० पर० सक० सेट्। लर्वति अलर्वीत्।

लल इच्छायां चु०उभ०सक०सेट्। लालयति-ते अलीललत् त

लल इच्छायां चदं० चु०उभ०सक०सेट्। ललयति ते अललत् त

ललञ्जिह्व पु० ललनो आस्वादनाय चलनो जिह्वा यस्य बहु० टच्। १कुक्कुरे, २वृद्धे, ३सिंहसत्त्वे त्रि०मेदि० स्त्रियां जातित्वात् ङीष्। ४चलद्रसनायुक्ते त्रि०। स्त्रियां टाप्।

ललन न० लड-ल्युट्, डस्य लः। १चालने। २केलौ हेमच० ३बाले ४बालवटे ५प्रियालवृक्षे च पु० राजनि०। चु० लल-ल्यु। ६जिह्वायां ७नार्य्यां च स्त्री मेदि०।

ललनाप्रिय पु० कर्म०। १कदम्बे। २लवेरे न० राजनि०। ३जिह्वाप्रिये, ५रमणीवल्लभे च त्रि०।

ललन्तिका स्त्री लड-झच् स्वार्थे क अत इत्वम् डस्य लः। नाभिदेशपर्य्यन्तं लम्बमाने १मालादौ अमरः। २गोधायां शब्दच०।

ललाट न० लड-अच् डस्य लः ललमटति अट-अण्। ललकाधःस्थेऽङ्गभेदे (कपाल) अमरः।

ललाटन्तप पु० ललाटं तापयति तप-णिच् खच्-मुम्। १सूर्य्ये त्रि०को०। २ललाटतापके त्रि० "त्रिपर्वलाटन्तपनिष्ठुराक्षरा" नैषधम्।

ललाटपट्ट पु० ललाटं पट्टमिव विस्तीर्णत्वात्। प्रशस्तललाटे ललाटफलकादयोऽप्यत्र।

ललाटिका स्त्री ललाटे भवेऽच्यते ठन्। १ललाटभूषणे (टीका) अमरः २ललाटस्थे चिह्ने च।

ललाम न०लल-अच् तममति अम-अण्। १प्रधाने, २ध्वजे ३पुच्छे ४बालधौ ५चिह्ने ६भूषायां ७रम्ये ८तिलके ९घोटके १०प्रभावे च मेदि०। लान्तत्वाच्चस्य नुट्।

ललामक न० ललामं तिलकमिव स्वार्थे कन्। ललाटपर्य्यन्तं चक्षुःस्थस्थे माल्यभेदे अमरः।

ललित न० लल-क्त। १मङ्गलाचरणयुक्ते चेष्टाभेदे "सुकुमारतयाङ्गानां विन्यासो ललितं भवेत्" साहि०। २सुन्दरे, ३ईप्सिते च त्रि० अमरः ४स्वरभेदे पु० सङ्गी० लड क्त डस्य लः। ५चालने न० ६कस्तूर्य्यां ७नार्य्यां च स्त्री राजनि०। ८नदीभेदे सा च नदी कालिकापु० ८१ अ० उक्ता। ९दुर्गायाम् "या दुर्गा सैव ललिता" पद्मपु० पाता०। १०राधासखीभेदे च।

ललितासप्तमी स्त्री ललितायां प्रियासप्तम्यां। ललितापूजाङ्गे १भाद्रशुक्लसप्तम्याम्, तद्दिनकर्त्तव्ये २व्रतभेदे च।

लव पु० लू-अप्। १लेशे २विनाशे ३छेदने श्रीरामपुत्रे मेदि० ५कालपरिमाणभेदे काष्ठादये हेमच० ६गोलाङ्गूललोम्नि, ७बाले केशे च दलातीफले न० शब्दच०। ८लवङ्गे १०स्तामञ्जके ११ऐषदर्थे राजनि०। १२लावखगे पुंस्त्री० राजनि०।

लवङ्ग न० लू-अङ्गच्। सुनामख्याते द्रव्ये अमरः। "लवङ्गं कटुकं तिक्तं लघु नेत्रहितं हिमम्। दीपनं पाचनं रुच्यं कफपित्तास्रनाशनम्। तृष्णां छर्दिं तथा घ्राणमूलरोगान् विनाशयेत्। कासं श्वासं च हिक्कां च क्षयं क्षिपति तद्भुवम्" भावप्र०। स्वार्थे क तत्रैव शब्दर०।

लवङ्गकलिका स्त्री लवङ्गं कलिकेव। लवङ्गे राजनि०।

लवण पु० लू-ल्युट् पृषो० यत्वम्। १रसभेदे "लवणः शोधनो रुच्यः पाचनः कफपित्तदः। पुंस्त्ववातकरः काश्यवैशिल्यस्रुद्गताकरः। चक्षुर्नाशाग्निजलदः कपोलगलदाहजित्। सोऽतियुक्तोऽक्षिपाकास्रपित्तकोटत्वतादिजित्। वलीपलितखालित्यं कुष्ठवीसर्पतृट्प्रदः" भावप्र०। तत्प्रधाने २सैन्धवक्षौर्यजविड़ादिरूपे पदार्थे च न०। तदुत्पत्तिस्थाने ३सिन्धुदेशे ४षड्रसे ५मधुरैलयुते च-तुरभेदे च पु०। ६लवणरसयुक्ते भेदि० उलावणवति च त्रि० ८नदीभेदे ९दीप्तौ च स्त्री मेदि०।

लवणकिंशुका स्त्री लवणरसान्वितं किंशुकं पलाशं यस्याः। मङ्गाज्योतिष्मत्याम् राजनि०। [राजनि०

लवणक्षार पु० लवणमयः क्षारः। लवणसंयुक्ते क्षारे

लवणखनि स्त्री ६त०। शाम्भरिलवणोत्पत्तिस्थाने हेमच०।

लवणधेनु स्त्री दानार्थं कल्पितायां लवणनिर्मितायां धेनौ वराहपु०। [धान्यशैलशब्दे १८८१पृ० दृश्यम्।

लवणाचल पु० दानार्थं कल्पिते अचलाकारे लवणस्तूपे।

लवणाब्धि पु० लवणमयोऽब्धिः। लवणमचुरसमुद्रे। लवण-समुद्रादयोऽप्यत्र। [(करकचलवण) राजनि०।

लवणाब्धिज न० लवणाब्धेर्जायते जन-ड। साम्भरलवणे

लवणोत्तम न० लवणेषु उत्तमम्। सैन्धवलवणे रत्नमा०।

लवणोद पु० लवणमयसमुद्रं वक्ष्यदेशः। लवणसमुद्रे अमरः।

लवन न० लू-भावे कर्मणि वा ल्युट्। १छेदने अमरः (लोना खाता) २दत्ते स्त्री यत्वच-ङीप्। [दत्ते राजनि०।

लवली स्त्री० लवं छेदं लाति-ला क गौ० ङीष्। (नीयाड़)

लवित्र न० लूयतेऽनेन लू-इत्र। १दात्रे अमरः।

लश(ष)(स) शिल्पयोगे चु०उभ०सक०सेट्। लाश(ष)(स)यति ते अलीलशत(ष)(स)त् त।

लश(ष)न न० लश-ल्यु अनन् वा धातोरादेश्च। (रसुन)। रसोने भावप्र०।

तस्योत्पत्तिगुणादि भावप्र० उक्तं यथा "लशुनन्तु रसोनः स्यादुपलम्भो महौषधम्। अरिष्टो रुक्षकन्दः स्यात् पवनेष्टो रसोनकः। यदास्तं दैवतैर्योऽहार सुरसङ्गनः। तदा ततोऽपतद्विन्दुः स रसोनोऽपतद् भुवि। पद्मिनि रदैर्युक्तो रक्तः स्नेहेन वर्जितः। तस्य द्रव्येण दृष्टो द्रव्याणां गुणवेदिभिः। कटुकोऽपि लशेषु तिक्तः पत्रेषु संस्थितः। नाले कषाय उद्दिष्टो नालाग्रे लवणः स्थितः। बीजे तु मधुरः प्रोक्तो रसः कन्दगुणवेदिभिः। रसोनो दंष्ट्रको द्रव्यः क्षिप्रोष्णः पाचनः सरः। रक्ते पाके च कटुकस्तीक्ष्णो मधुरको मतः। भग्नसन्धानकृत् कण्ठ्यो गुरुपित्तास्रदर्दिदः। बलवर्णकरो मेधाहितो नेत्र्यो रसायनः। कृच्छ्रोग-गुल्मोर्ध्वश्वासकृमिप्लीह विबन्धगुल्मशूचिकासप्लीहान्। दुर्नामकुष्ठानलसादजन्तुसमीरपद्मार्बुदकफांश्च हन्ति। मद्यं मांसं तथास्रञ्च हितं लशुनसेविनाम्"। दीर्घमध्य-भ्रन्दर०।

लष अ० कान्तौ दिवा० भ्वा०च उभ०सक०सेट्। लषति-ते लषति ते अलषीत् अलाक्षीत् अलषिष्ट अलाक्ष लेषे।

लस क्रीडे क्रीडायां दीप्तौ च अक०भ्वा०पर०सेट्। लसति-अलसीत् अलसीत्।

लसा स्त्री लसति लस-अच्। हरिद्रायाम् शब्दर०।

लसिका स्त्री लस-अच् टाप् अत इत्त्वम्। लालायां शब्दच०.

लसज प्रीडायां भ्वा०आ०सक०सेट्। लज्जते अलज्जिष्ट। ईदित् निशायामनिट् खोदित् निशातस्य नः। लग्नः।

लस्त त्रि० लस-क्त नि० दडभावः। १श्लिष्टे, क्रीडिते, २शिल्पयुक्ते च। संज्ञायां कन्। धनुर्मध्यभागे पु०अमरः

लहरि(री) स्त्री लेन-इन्द्रेणेव स्तियते आर्द्रगमनाय स्तृ-कर्मणि इन् वा ङीष्। मङ्गातरङ्गे हेमच०।

ला आदाने अदा० पर० सक० अनिट्। लाति अलासीत्।

लाक्षणिक त्रि०लक्षणया बोधयति ठक्। १लक्षणया अर्थबोधके शब्दे। अस्त्यर्थे ठन् स्वार्थे अण्।२लक्षणयुक्ते च।

लाक्षण्य त्रि० लक्षणं वेत्ति अण्। १शुभाशुभलक्षणज्ञे। स्वार्थे वा० अण्। २लक्षणयुक्ते।

लाक्षा स्त्री लक्ष्यतेऽनया लक्ष-अच् पृषो०ह्रस्वः। (ला)ख्याते पदार्थे अमरः। २रञ्जनद्रव्ये।

लाक्षातरु पु० लाक्षायोनिश्चरः। (ला) द्रव्यसाधने वृक्षे शब्दच०। लाक्षावृक्षादयोऽप्यत्र।

लाक्षादितैल न०लाक्षादिभिः पक्वं तैलम् मा०त०। वैद्यकप्रसिद्धे तैलभेदे तच्च द्विविधं स्वल्पं बृहच्चेतिभेदात् तत्र स्वल्पं यथा "लाक्षा हरिद्रा मञ्जिष्ठाकल्कैस्तैलं विपाचितम्।

तद्गुणेनारनालेन दाहशीतज्वरापहम्"। इदम् यथा "लाक्षारसाढके प्रस्थं तैलस्य विपचेत् भिषक्। मस्ताढकसमायुक्तं पिष्ट्वा चात्र समावपेत्। अतसुप्यां हरिद्रायाः मूर्वां कृष्णं हरेणुकाम्। कटुकां मधुकां रास्नासरलगन्धाञ्च दारु च। सुखकं चन्दनं चैव पृथगत्र-समानकैः। द्रव्यैरेतैश्च संसिद्धमभ्यङ्गात् मारुतापहम्। विषमाक्षात् ज्वरान् सर्वानाशु तं प्रशमं नयेत्। कासं श्वासं प्रतिश्यायं कण्डूं दौर्गन्ध्यगौरवम्। त्रिकपृष्ठ-शूलं शूनं गात्राणां स्फुटनं तथा। पापालक्ष्मीप्रशमनं सर्वमङ्गलिवारणम्। अश्विभ्यां निर्मितं सम्यक् तैलं लाक्षादिकं महत्" सुश्रुतबोधः। [राजनि०

लाक्षाप्रसाद पु० लाक्षायां प्रसादो यस्य। पट्टिकाकोद्रे

लाक्षाप्रसाधन न० प्रसाध्यते भूष्यतेऽनेन ल्युट् लाक्षा तद्रस एव प्रसाधनमस्य। २रक्तकोद्रे अमरः।

लाक्षारस पु० लाक्षायाः निःस्रुतो रसः इवः। अलक्तकरसे।

लाक्ष शोषे भूषणे दाने वारणे च सक० सामर्थ्ये अक०भ्वा० पर०सेट्। लाक्षति अलाक्षीत् अदित् चङि न हुझः।

लाघ सामर्थ्ये भ्वा० आ० अक०सेट्। लाघते अलाघिष्ट। अदित् चङि न हुझः।

लाघव न० लघोर्भावः अण्। १लघुत्वे आरोग्ये च राजनि०

लाङ्गल न० लगि-कलच् पृषो० डुवुः। स्वनामख्याते १भूमिकर्षके पदार्थे अमरः। २लिङ्गे त्रिका० ३युग्मभेदे ४तालवृक्षे ५सप्तपदारण्ये च मेदि०। [(देश) अमरः।

लाङ्गलदण्ड पु० ६त०। लाङ्गलमध्यस्थे काष्ठमये दण्डे

लाङ्गलपद्धति स्त्री लाङ्गलखाता पद्धतिः रेखा। सीतायाम् लाङ्गलखातक्षेत्रस्थभूमिरेखायाम् अमरः।

लाङ्गलिकी स्त्री लाङ्गलमिवाकारोऽस्यस्या ठन् ङीष्। (विषलाङ्गला) १वृक्षभेदे अमरः। तत्र भवः अण्। २विषभेदे पु० हेमच०।

लाङ्गलिन् पु० लाङ्गलं प्रहरणसाधनत्वेनास्यास्ति इनि। १बल-रामे शब्दर०। लाङ्गलदण्ड इव दीर्घः आकारोऽस्त्यस्य इनि। २नारिकेलवृक्षे अमरः।

लाङ्गली स्त्री लाङ्गलाकारः पुष्पमस्त्यस्याः अच् गौरा०ङीष् (काँचड़ा) शाकभेदे अमरः।

लाङ्गूल न० लगि-कलच् पृषो०। प्रसूनां पश्वादिलिनि रोम युक्ते सारसुन्दरी २शैवे मेदि० शब्दमूले सि०कौ०।

लाङ्गूलिका स्त्री लाङ्गूलाकारोऽस्त्यस्याः ठन्। पुष्पिपत्राम् राजनि० [तदाकारपुष्पयुते २क्षुपभौषधे च राजनि०।

लाङ्गूलिन् पु० लाङ्गूलमस्त्यस्य इनि। १वानरे शब्दच०

लाङ्क्ष अङ्कने भ्वा०पर०सक०सेट् इदित्। लाङ्क्षति अलाङ्क्षीत्। [दयत्ययम्। लाङ्कति अलाङ्कीत्।

लाज भर्त्सने भ्वा०पर०सक०सेट्। लाजति अलाजीत्। इदित्

लाज न० लाज-अच्। १धान्ये २खाद्यैतण्डुले पु० मेदि०। ३भटधान्ये (खइ) पु०ब०व०अमरः। स्त्रीलिङ्गमात्रे मेदि०।

लाञ्छन न० लाञ्छ्यते लाञ्छि-कर्मणि ल्युट्। १चिह्ने २नामनि च मेदि० भावे ल्युट्। ३अङ्कने।

लाट पु० लट-संज्ञायां घञ्। १देशभेदे २तत्रत्ये अमरः ३लोध्रतरौ शब्दर०। ४विदग्धपुरुषे च मा०द०।

लाटानुप्रास पु० अलङ्कारोक्ते शब्दालङ्कारभेदे अनुप्रासशब्दे १७८१पृ० अलङ्कारशब्दे च १८६ पृ० दृश्यम्।

लाड क्षेपे अदा०चु०उभ०सक०सेट्। लाडयति ते।

लाभ पु० लभ्यते लभ-कर्मणि घञ्। १मूलधनादितोऽधिके लभ्यमाने धने अमरः। भावे घञ्। २प्राप्तौ।

लामज्जक न० लायते ला-किप् लाः आदीयमानः मज्जा सारो यस्य कप्। वीरणमूले अमरः।

लालन न० लड-ल्युट्। स्नेहपूर्वकपालने।

लालसा स्त्री लष-सृ छायां यङ् लुक् भावे अ। १अतिमात्रेच्छायाम् अमरः। २गर्भिणीदोहदे हेमच०। ३याच्ञायां कौतुकयुक्ते च मेदि०। कर्त्तरि अच्। ५लोले त्रि० हेमच०।

लालाख्यी पु०ब०व०-ख्यिच् अच्-टाप्। सुखजजलजन्तवे अमरः

लालाटिक त्रि० ललाटं प्रभोर्भाग्यं पश्यति ठञ्। १प्रभु-भाग्योपजीविनि काण्डलग्नं अमरः। ललाटात् ललाटस्थधान्यात् आगतः तत्रेदं वा ठण्। २भाग्या-धीने त्रि० "प्राग्रिस्तु लालाटिकौ" इत्युज्ज्वलः। ३ललाट-सम्बन्धिनि त्रि०।

लालाविष पु० लालायां विषमस्य। १लूतादौ कीटे हेमच० कीटशब्दे २५६८ पृ०दृश्यम्। [हेमच०।

लालास्राव लालां स्रावयति सु णिच्-अच्। लूताकीटे

लालित्य न० ललितस्य भावः ष्यञ्। १सौन्दर्य्ये २मनो-हरत्वे "नैषधे पदलालित्यम्" इत्युज्ज्वलः।

लाव पुंस्त्री० लू-कर्त्तरि संज्ञायां घञ्। १पक्षिभेदे अमरः। स्त्रियां ङीष्। स्वार्थे क। तत्रैव भावे घञ्। २छेदने।

लावण न० लवणे संस्कृतम् अण्। लवणसंस्कृते औषधादौ

लावणिक न० लवणे संस्कृतम् ठण्। १लवणे संस्कृतौषधादौ हेमच०। लवणं पण्यमस्य ठण्। २लवणविक्रयोपजी-विनि वणिग्भेदे च।

लावण्य न० लवणस्य भावः ष्यञ्। सामुद्रे "सङ्घातेषु ह्यवयवान्तरत्वमिवान्तरा। प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते" रूपवत्यां स्त्रियां देहसौन्दर्य्यभेदे च।

लासिका स्त्री लस-ण्वुल्। नर्त्तक्याम् अमरः। पृषो० नासकीत्यप्यत्र तट्टीका।

लास्य न० लस-ण्यत्। १नृत्ये अमरः। २वाद्यनृत्यगीतिके भेदे०। "स्त्रीनृत्यं लास्यमुच्यते" इत्युक्ते १स्त्रीनृत्ये च। स्वार्थे क। तत्रैव।

लिकुच पु० लकुच-पृषो० दस्यम्। (माँदार) वृक्षे अमरः।

लिङ्ग(क्ष) स्त्री लिख-गतौ क्सं धातुकत्वानि पृषो० वा कुत्व। १यूकाण्डे शब्दर०। "आत्मान्तरगते भावे यच्चाणु दृश्यते रजः। तैस्तुल्यभिभेर्लिङ्गा" २इत्युक्ते परिमाणभेदे च।

लिख लेखने तुदा०पर०सक०सेट्। लिखति अलेखीत्। कुटादित्वान्न ङित्त्वम् तेन लिखनमिति सिद्धम्।

लिख गतौ भ्वा०पर०सक०सेट् इदित्। लिङ्खति अलिङ्खीत्

लिखन न० कृ० लिख-भावादौ ल्युट्। १लेखने २लिपौ च

लिखित न० लिख-भावे क्त। १लेखने। आधारे क्त। २लिपौ अमरः। विवादे अर्थसाधके १पत्रे च "प्रमाणं लिखितं भुक्तिः" स्मृतिः। लेख्यशब्दे दृश्यम्। ३स्मृतिकारके मङ्गुसंज्ञातरि मुनिभेदे पु०।

लिग गतौ भ्वा०पर०सक०सेट् इदित्। लिङ्गति अलिङ्गीत्।

लिग चिह्नीकरणे चुरा०उभ०सक०सेट् इदित्। लिङ्गयति ते अलिलिङ्गत् त।

लिङ्ग पु० लिगि-कच्। १चिह्ने २पुंसोऽसाधारणचिह्ने उपस्थेन्द्रिये अमरः। ३अनुमानसाधने हेतौ ४सांख्योक्ते प्रधाने तस्यालिङ्गविवेकहेतुत्वात् तथात्वम्। ५शिवमूर्त्तिभेदे भेदे०। ६व्याप्ये व्यङ्ग्ये शब्दनिष्ठे पदसाधुतापयोजके धर्मभेदे विका०। ७अर्थप्रकाशनसामर्थ्ये च। "क्षमता च लिङ्गमिति" मीमांसकाः।

शब्दधर्मलिङ्गं चाकाभिः शब्दार्थरत्ने निरूपितं यथा "लिङ्गत्वञ्च प्राकृतगुणगतावस्थाविशको धर्म एव तद्विशेषश्च पुंनपुंसकत्वादिः। तथा हि सर्वेषां स्त्रियगुणप्रकृतिकार्य्यत्वात् तथा शब्दानामपि तथात्वेन गुणगतविशेषाक्षवद्देषु लिङ्गविशेष इति कल्प्यते स च विशेषः शास्त्रे दृश्यमध्यधायि। "लिङ्गतमत्त्वादीनां तुल्यरूपेष्वावश्यकात् नपुंसकत्वं सत्त्वाधिक्ये पुंस्त्वम् अल्पत्वे (रज आधिक्ये) स्त्रीत्वमिति"। एवञ्च लिङ्गस्य शब्दधर्मत्वेऽपि शब्देन सहार्थाभेदारोपात् क्वचित् बाधके सत्यपि साक्षात् तत्पारतन्त्र्येण वा सर्वत्र तस्य विशेषणत्वम् शाब्दबोधे शब्दभानस्थलेत्वाच्च शब्दस्य नामार्थतावत् तद्गतलिङ्गस्यापि नामार्थतौचित्यात् "न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते" इति हर्य्युक्तेः "शब्दोऽपि यदि भेदेन विवक्षा स्यात्तदा तथा। नो चेत् स्त्रीत्वादिभिः सिद्धोऽप्यसावर्थैरवभास्यते" इत्युक्तेश्च शब्दानां नामार्थतावगतेः। तथा प्रातिपदिकार्थभेदविवक्षायां तु स्त्रीत्वादिभिरेव सिद्धः शाब्दः सन् ऋषं प्रकारतया भासते इति तदर्थः। युक्तञ्चैतत् पुंलिङ्गः शब्द इति व्यवहारात् "स्वमोर्नपुंसकादिति"या०सूत्रे शब्दस्यैव नपुंसकत्वव्यपदेशात् दारादिशब्दादौ पुंस्त्वान्वयबाधाच्च लिङ्गस्य शब्दधर्मत्वमन्यथैतेषु लिङ्गाद्यनन्वयापत्त्या व्यवहारस्वनिर्देशासङ्गत्यापत्तेश्च। तथा अर्थभेदाच्छब्दभेदवत् लिङ्गभेदादपि शब्दभेद इति कल्प्यते प्रागुक्तधर्मविशेषरूपभेदकत्वाच्च। उक्तञ्च भाष्ये "एकार्थं शब्दान्यत्वाद्दृष्टं लिङ्गान्यत्वमिति"। एवञ्च तटादिशब्दानामनेकलिङ्गत्वव्यवहारः समानातपूर्वीत्वेनैव वस्तुतस्तेषां भिन्नानामेव भिन्नलिङ्गत्वमिति दिक्।

अर्थप्रकाशनसामर्थ्यरूपलिङ्गन्तु द्वितीयादिश्रवणे तत्तन्मन्त्रप्रकाश्यार्थे विनियोगबाधकं यथा "बर्हिर्देवसदनं दामीति" अत्र दामीति पदस्य दा लवने इत्यस्माद्धातोः लिङ्गस्य छेदनप्रकाशनसामर्थ्यात् बर्हिरित्यस्य चाक्षुतदर्भप्रकाशनसामर्थ्यात् दर्भच्छेदने सङ्घातमन्त्रस्य विनियोगोऽवगम्यते" तत्त्वबोधः। प्रत्यक्षद्वितीयाश्रवणे तु लैङ्गिकविनियोगस्थले "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्" जै० सू०। यथा "ऐन्द्रा गार्हपत्यसप्रतिष्ठेति" श्रुतिः ऐन्द्री च ऋक् "कदाचन स्तरीरसि नेन्द्र! दाशुषे" अस्य मन्त्रस्य इन्द्रप्रकाशनसामर्थ्यम् तदेतत् निरूपितं तत्त्वबोधग्रन्थे "तथा हि गार्हपत्यमिति द्वितीयारूपप्रत्ययश्रुत्या गार्हपत्याग्निगतं क्रियाजन्यप्रीतिफलाश्रयत्वरूपं कर्मत्वं साक्षादवोधितं तथा च तस्य देवतात्वं श्रुतिप्राप्तं क्रियाजन्यप्रीतिभागित्वनोहे अग्नेरेव देवतात्वादिति गार्हपत्याग्नेरुपस्थानस्य शेषितावगम्यते ऐन्द्रीति ततीयया ऋचः करणत्वबोधनादुपस्थानशेषत्वमवगम्यते मन्त्रलिङ्गेनेन्द्रस्यापि शेषत्वमित्युभयोरुपस्थानं देवतात्वस्यावगम्यते। तथा च विरोधः न ह्यन्यप्रकाश्यकत्वेऽन्योपस्थानं

विच्छिन्नमिति तत्परीहाराय मन्त्रस्थेन्द्रपदे विधिवाक्यस्थगार्हपत्यपदे वा एकत्र लक्षणावश्यकी। तत्र गार्हपत्यपदस्य इन्द्रे न लक्षणा गार्हपत्यदेवतात्वस्य लिङ्गानिरपेक्षश्रुतिप्राप्यत्वात् इन्द्रदेवतात्वन्तु लिङ्गेन विलम्बबोध्यम्। तथा हि इन्द्रप्रकाशनसामर्थ्यान्यथानुपपत्त्या इन्द्रसपतिष्ठते इति कल्प्यते इति इन्द्रस्य देवतात्वं विलम्बगम्यमिति शीघ्रबोधकत्वेन श्रुतिरेव बलवतीति लिङ्गं दुर्बलम्। अतएव न लक्षणयः न वा इन्द्रश्चेति नियमः लिङ्गस्य दुर्बलत्वेन इन्द्रोपस्थानस्याप्राप्यत्वात्। एवञ्च श्रुतितोऽग्नेरुपस्थाने सिद्धे कथमित्याकाङ्क्षायामैन्द्रेति। ततश्च मन्त्रस्थेन्द्रप्रकाशकत्वात् तेनाग्नेरुपस्थानानुपपत्तेः न चान्योपस्थापकमन्त्रेऽन्यस्योपस्थानं युक्तमित्यनुपपत्त्या मन्त्रस्थेन्द्रपदस्य इदं परमैश्वर्यं इति धात्वनुसारादैश्वर्यगुणयोगादग्नौ लक्षणा" "यावदेव हि मन्त्रार्थो मन्त्रेण प्रतिपाद्यते। मन्त्रार्थं मन्त्रतो बुद्ध्वा पश्चाल्लिङ्गनिरूप्यते। मन्त्राकाङ्क्षावशेऽन्येन्द्रपदस्य श्रुतिकल्पना। श्रुत्या प्रत्यक्षया पूर्वं गार्हपत्यार्थता गते। लिङ्गस्य हि प्रमाणत्वं मन्त्राकाङ्क्षानिबन्धनम्। तच्च श्रुतिर्विरुध्यती श्रुतिविरोधेन गच्छति। विरोधे च श्रुतिर्लिङ्गं बलीयस्त्वेन बाधते"। लिङ्गं स्वयं गच्छति पृथो०। १०सांख्योक्ते महत्तत्त्वे देहशब्दे ३७५४ पृ० दृश्यम्। ११सप्तदशावयवे लिङ्गदेहे।

"सप्तदशैकं लिङ्गम्" सां० सू०। "सूक्ष्मशरीरमधाराधेयभावेन द्विविधं भवति तत्र सप्तदश मिलित्वा लिङ्गशरीरं तच्च सर्गादौ समष्टिरूपमेकमेव भवतीत्यर्थः। एकादशेन्द्रियाणि पञ्च तन्मात्राणि बुद्धिरिति सप्तदश। अहङ्कारस्य बुद्धावेवान्तर्भावः। चतुर्थं स्वतन्त्रमाद्यप्रमाणादेतान्येव सप्तदशलिङ्गं मन्तव्यम्। न तु सप्तदश एकं चेत्यष्टादशतया व्याख्येयम् उत्तरसूत्रेण व्यक्तिभेदस्योपपाद्यतया लिङ्गैक्ये एकशब्दस्य तात्पर्यावधारणाच्च। "कर्मात्मा पुरुषो योऽसौ बन्धभोगैः स युज्यते। स सप्तदशकेनापि राशिना युज्यते च सः" इति मोक्षधर्मादौ लिङ्गशरीरस्य सप्तदशत्वमिद्धेव सप्तदशावयवा अत्र सम्मीति सप्तदशको राशिरित्यर्थः। राशिशब्देन स्थूलदेहस्यावयवित्वं निराकृतम् अवयविरूपेण द्रव्यान्तरकल्पनायां गौरवात्। स्थूलदेहस्य चावयवित्वमेकतादिग्रन्थानुरोधेन कल्प्यत इति। अत्र च लिङ्गदेहे बुद्धिरेव प्रधानेत्याशयेन लिङ्गदेहस्य भोगः प्रायशः। प्राणवानःकरणश्चैव इतिभेदः। अतो लिङ्गदेहे प्राणपञ्चकस्यान्तर्भाव इत्यस्य सप्तदशावयवकस्य शरीरत्वं स्वयं वक्ष्यति "लिङ्गशरीरनिमित्तक इति सनन्दनाचार्यः" इति स्मरेच्च। अतो भोगायतनत्वमेव सर्वं शरीरलक्षणम्। तदाश्रयतया त्वन्यत्र शरीरत्वमिति पश्चाद्व्यक्तीभविष्यति। चेष्टेन्द्रियार्थाश्रयः शरीरमिति तु न्यायेऽपि तस्यैव लक्षणं कृतमिति" भा०। "तदधिष्ठानाश्रये देहे तद्वादात् तद्वादः" सां० सू०। "तस्य लिङ्गस्य तदधिष्ठानमाश्रयो वक्ष्यमाणभूतपञ्चकं तस्याश्रये षाट्कौशिकदेहे तद्वादो देहवादस्तद्वादात् तस्याधिष्ठानशब्दोक्तस्य देहस्य वादादित्यर्थः लिङ्गसम्बन्धादधिष्ठानस्य देहत्वमधिष्ठानाश्रयत्वाच्च स्थूलस्य देहत्वमिति पर्यवसितोऽर्थः"। अधिष्ठानशरीरं च सूक्ष्मं पञ्चभूतात्मकं वक्ष्यते तथा च शरीरत्रयं सिद्धम्" "वासना भूतसूक्ष्मं च कर्मविद्ये तथैव च। दशेन्द्रियं मनोबुद्धिरेतल्लिङ्गं विदुर्बुधाः" इति वायवीयादिवाक्येभ्यः। अत्र लिङ्गशरीरप्रतिपादनेनैव पूर्यष्टकमपि व्याख्येयमित्याशयेन बुद्धिधर्माणामपि वासनाकर्मविद्यानां पृथगुपन्यासः। भूतसूक्ष्मं चात्र तन्मात्रा, दशेन्द्रियाणि च ज्ञानकर्मेन्द्रियभेदेन पुरइयमित्याशयः। यत्तु मायावादिनो लिङ्गशरीरे तन्मात्रस्थाने प्राणादिपञ्चकं प्रक्षिपन्ति पूर्यष्टकं चान्यथा कल्पयन्ति तदप्रामाणिकमिति" भा०। वेदान्तिनये "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम्। अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम्" इत्युक्तं सप्तदशावयवं लिङ्गशरीरमिति भेदः।

लिङ्गक पु० लिङ्गेन जायते कै-क। कपित्थवृक्षे शब्दच०।

लिङ्गपुराण पु० व्यासप्रणीते महापुराणभेदे लिङ्गपुराणप्रतिपाद्यविषया यथा "ब्रह्मोवाच "शृणु पुत्र! प्रवक्ष्यामि पुराणं लिङ्गसंज्ञितम्। पठतां श्रृण्वतामेव भुक्तिमुक्तिप्रदायकम्। यच्च लिङ्गाभिधे तिङन्तु वह्निचिह्ने हरोऽभ्यधात्। तद्धर्मादिसिद्ध्यर्थमस्मिन्कल्पकथाश्रयम्। तदेव व्यासदेवेन भागद्वयसमाश्रितम्। पुराणं लिङ्गसुदितं ब्रह्मज्ञानविचिन्तितम्। तदेकादशसाहस्रं हरमाहात्म्यसूचकम्। परं सर्वपुराणानां सारभूतं जगत्त्रये। पुराणोपक्रमे प्रश्नः सृष्टिसंक्षेपतः पुरा"। तत्र पूर्वभागे "योगाख्यानं ततः प्रोक्तं कल्पाख्यानं ततः परम्। लिङ्गोद्भवस्तदर्चा च कीर्त्तिता हि ततःपरम्। सनत्कुमारशैलादिसंवादश्च पावनः। ततो दधीचिचरितं युगधर्मनिरूपणम्। ततो भुवनकोशाख्या

स्वर्णसोमाम्बवत्तः। ततश्च विस्तरात् सर्गेस्त्रिपुराख्यानकं तथा। लिङ्गप्रतिष्ठा च ततः पशुपाशविमोक्षणम्। शिवव्रतानि च तथा सदाचारनिरूपणम्। प्रायश्चित्तान्यरिष्टानि काशीश्रीशैववर्णनम्। अन्धकाख्यानकं पश्चादारुचरितं पुनः। ऋषिचरितं पश्चाच्छलस्यवधस्ततः। मैत्रं बहुसुतानाथ दक्षयज्ञविनाशनम्। कामस्य दहनं पश्चात् गिरिजायाः करग्रहः। ततो विनायकाख्यानं सत्याख्यानं शिवस्य च। उपमन्युकथा चापि पूर्वभाग इतीरितः। उत्तरभागे विष्णुमाहात्म्यकथनमम्बरीषकथा ततः। सनत्कुमारनन्दीशसंवादश्च पुनर्मुने!। शिवमाहात्म्यसंयुक्तज्ञानयोगादिकं ततः। सूर्यपूजाविधिश्चैव शिवपूजा च सत्क्रिया। दानानि बहुधोक्तानि श्राद्धमकरवन्ततः। प्रतिष्ठा तत्र गदिता ततोऽघोरस्य कीर्तनम्। ब्रह्मेश्वरी महाविद्या गायत्रीमन्त्रिमा ततः। मृत्युञ्जयश्च माहात्म्यं पुराणस्यास्य च। एतत्सोपरिभागस्थे वैष्णवे कथितो मया। व्यासेन हि शिवश्रेष्ठ बह्माहात्म्यसूचिनः। लिखित्वैतत् पुराणन्तु तिलधेनुसमन्वितम्। फाल्गुन्यां पूर्णिमायां यो दद्याद्ब्रह्मणे द्विजातये। यः पठेच्छृणुयादपि लैङ्गं पापापहं नरः। स भुक्त्वाभोगान् लोकेऽस्मिन्ते शिवपुरं व्रजेत्। लिङ्गात्मकमथोमेतां पठेद् यः शृणुयात् तथा। तावुभौ शिवभक्तौ तु लोकद्वितयभोगिनौ। जायेतां गिरिजाभर्तुः प्रसादान्नात्र संशयः" मार०पु०१०२अ०।

लिङ्गवर्द्धिनी स्त्री लिङ्गं पुरुषचिह्नभेदं वर्द्धयति वृध-णिच्-णिनि। अपामार्गे शब्दच०।

लिङ्गवृत्ति पु० लिङ्गं संन्यासादिवेषधारणमेव वृत्तिः जी० विका यस्य। जीविकार्थसंन्यासचिह्नादिधारिणि कपटपरिव्राजके अमरः।

लिङ्गिन् त्रि० लिङ्गमस्यास्त्यस्य इनि। १चिह्नयति, २जीविकार्थसंन्यासादिचिह्नयति, ३प्रशस्तलिङ्गयुक्ते गजे च पु० अटा०। ४लिङ्गज्ञानप्रमेये साध्ये ५पक्षे च। "तल्लिङ्गलिङ्गिज्ञानपूर्वम्" सा० का० व्याख्याने लिङ्गिपक्षधर्मतावर्त्तनीयं तेन लिङ्गमस्यास्तीति पक्षधर्मताज्ञानमपि दर्शितम् त० कौ०। [गुरिया] छतामेदे राजनि०।

लिङ्गिनी स्त्री लिङ्गमिवाकारोऽस्त्यस्याः इनि ङीप्। (पंचलिङ्गी)

लिङ्गोपहित पु० लिङ्गेन हेतुना उपहितः विशिष्टः। साध्यमानाकूतहेतुयुक्ते पक्षे। आचार्यैर्यते लिङ्गोपहित एव पक्षे वैङ्गिकस्य साध्यस्य भानम्। तथा हि वह्निव्याप्यो हि धूमो वह्निलिङ्गं सहति पक्षे वह्नेर्भानम् वह्निव्याप्यधूमवान् पर्वत इति परामर्शोत्तरं जायमानानुमाने ज्ञानलक्षणया साध्यपक्षभानस्यावश्यकत्वात्। तथा च वह्निव्याप्यधूमवान् पर्वतो वह्निमान् इत्येव तत्तानुमानप्रकारः। [अलिपत् अलिपत अलिप्त।

लिप लेपने, तुदा० उभ० सृषा० सक० अनिट्। लिम्पति ते

लिपि(पी) स्त्री लिप-इक् वा ङीप्। १लिखिताक्षरके पत्रे, अमरः २लेखने च। [लेखके अमरटी०।

लिपिक(का)र पु० लिपिं करोति कृ-अच् अण् वा।

लिप्त त्रि० लिप-क्त। १भुक्ते, २कृतचन्दनादिलेपे अमरः ३मिश्रिते सि०कौ० ४विस्तीर्णे च मेदि०। ज्योतिषोक्ते राशेः अष्टमभागात्मके षष्ठ्यंशरूपे ५भागे स्त्री "लिप्तार्द्धहीनं यदि पूर्वमेतत्" इति सी० तात्त्वकम्। स्वार्थे क अत इत्वम्। लिप्तिका दक्षकन्यकायाम्।

लिप्तक पु० कुत्सितं लिप्तम् कन्। विषाक्तबाणे अमरः।

लिप्सा स्त्री लभ सन्-भावे अ। १लाभेच्छायाम् २दम्भायां अमरः। "लिप्सायास्ते तृतीयवर्षेऽस्मिन् द्रव्यार्जननियमस्य क्रतवर्त्तव्यमापादितं गुरुणा" मिता०। [२खरे च शब्दर०।

लिम्पाक पु० लिप-आकन् पृषो०। १जम्बीरभेदे (पातिलेबु)

लिवि(वी) लिप-इक् पृषो० पस्य वः वा ङीप्। लिपिशब्दार्थे अमरः। लिविकरादयोऽपि लिपिकरादयः।

लिश क्षेपे अल्पीभावे च दि० सक० आत्म० अनिट्। लिश्यते अलिशत।

लिश गतौ तु० पर० सक० अनिट्। लिशति अलिशत्।

लिह आस्वादने अदा० उभ० सक० अनिट्। लेढि लीढे। अलिक्षत् त। [ओदित् निष्ठातस्य नः। लीनः।

ली श्लेषे दिवा० आ० अक० अनिट्। लीयते अलेट।

ली श्लेषे क्र्या०पु० पर० सक० अनिट्। लिनाति अलैषीत्।

ली द्रावणे वा चुरा० उभ० सक० सेट् पक्षे भ्वा० पर० अनिट्। लीनयति ते लाय(प)यति ते घृतम् लयति। अन्ये इदावणे लीङ् विलापनीत्येव। प्रलम्भने अभिभवे पूजायाञ्च सक०आत्म०। तत्र लिलमाप्ते पुक्। अटाभिलीपयते पूजामभिभवतीत्यर्थः। श्लोनो वर्त्तिकाच्छादयते अभिभवतीत्यर्थः। वालस्तृणायते वञ्चयतीत्यर्थः। अलीलनत् त अलील(प)यत् त। अलैषीत्। अलासीत्।

लीढ त्रि० लिह-आस्वादे क्त। १आस्वादिते, २भक्षिते च।

लीला स्त्री ली-किप् लियं लाति ला-क। १क्रीडायां, २विलासे ३शृङ्गारादिजातचेष्टायाम् मेदि०। "अप्राप्तवस्तुभवसमा-

गमनायिकायाः, सख्याःपुरोऽत्र निजचित्तविनोदबुद्ध्या, आलापवेशगतिहास्यविलोकनाद्यैः प्राप्तेश्वरातङ्कतिमाकलयन्ति लोकाम् उज्ज्वलमण्युक्ते ४प्रियानुकरणे च।

लीलावती स्त्री लीला+अस्त्यर्थे मतुप् मस्य वः। १विलासवत्यां स्त्रियां, भास्कराचार्य्यस्य २पुत्र्यां, तत्कृते २खण्डखण्डाख्ये मल्लनाचार्य्येण ४भाषायां तद्नामके न्यायशास्त्रप्रसिद्धे "नाथः खजतीत्यादिके" न्यायमतसिद्धपदार्थप्रतिपादके ५ग्रन्थभेदे, पुराणप्रसिद्धे ६वेश्याभेदे च ति० त० मतुप्पु०। [२देवपत्न्यां च त्रिका०।

लीलोद्यान न० लीलार्थमुद्यानम्। १क्रीड़नार्थे आरामे,

लुक्कायित त्रि० लुच्यते लुनच-अपनयने क्विप् लुक् कायो यस्य तादृग् इवाचरति लुक्काय+क्विप्-क्त। अन्तर्हितदेहे

लुञ्ज कथने अदृधातोरर्थे च चुरा० उभ०सक० सेट् इदित्। लुञ्जयति ते अलुलुञ्जत् त।

लुञ्चित त्रि० लुनच-क्विप्-क्त। अपसारिते दूरीकृते।

लुट दीप्तौ अक० प्रतिघाते सक० भ्वा० आत्म० सेट्। लोटते लुदित् लुडि उभ० अलुटत् अलोटिष्ट।

लुट क्षरणे भ्वा०पर०सक०सेट् इदित्। लुण्टति अलुण्टीत्।

लुट दीप्तौ चु०उभ०सक०सेट्। लोटयति ते अलूलुटत् त।

लुट विलोड़ने, क्षरणे च दिवा० सक० पर०सेट्। लुट्यति अलुटत्। ऋदित् चङि वा ह्रस्वः।

लुट विलोड़ने सम्बन्धे च दिवा० सक०पर०सेट्। लुट्यति अलोटीत्। अत्रार्थे भ्वादिरपि। लोटति।

लुट गतौ चौर्य्ये च सक० खण्डीभावे आलस्ये च अक० भ्वा० पर० सेट् इदित्। लुण्टति अलुण्टीत्।

लुठ प्रतिघाते भ्वा० आ० लुडि उभ० सक० सेट्। लोठते। अलुठत् अलोठिष्ट। ऋदित् चङि न ह्रस्वः।

लुठ उपघाते भ्वा० पर० सक० सेट्। लोठति अलोठीत्।

लुठ लोठे तु० कु० प० अक० सेट्। लुठति अलुठीत्।

लुठ चौर्य्ये चु० उभ०सक०सेट्। लोठयति ते अलूलुठत् त।

लुठन न० कु० लुठ-ल्युट्। अश्वादेर्भूम्यादौ श्रमापनयनार्थं पुनः पुनरङ्गचालने (लोटा) त्रिका०।

लुठित त्रि० लुठ-क्त। भूमौ लुतमूरिदेहपरावर्त्तने।

लुड मज्जने भ्वा०पर०सक०सेट्। लोडति अलोडीत्।

लुड मंडतौ सक० क्षेपे अक० तु० कु० पर० सेट्। लुडति अलुडीत्। लुडनम्।

लुण्ट व्यवसाय चौर्य्ये च वा चु० उभ० पक्षे भ्वा० पर० सक० सेट्। लुण्ठयति ते लुण्ठति अलुलुण्टत् त अलुण्ठीत्। कर्मणि लुण्ठते।

लुण्टक पु० लुण्ट-ण्वुल्। (नटिया) शाकभेदे शब्दच०।

लुण्टाक त्रि० लुटि-आकन्। चौरे स्त्रियां ङीष्।

लुण्ठक त्रि० लुठि-ण्वुल्। चौरे।

लुण्ड चौर्य्ये चु० उ० सक०सेट्। लुण्डयति ते अलुलुण्डत् त

लुथ वधे सक० क्षेपे अक० भ्वा० पर० सेट् इदित्। लुन्थति अलुन्थीत्।

लुनच अपनयने भ्वा०पर०सक०सेट्। लुनचति अलुनचीत्।

लुप छेदने विनाशने च तु०चु०उभ०सक० अनिट्। लुम्पति ते अलुपत् अलुप्त। ऋदित् चङि वा ह्रस्वः। अलूलुपत् त अलुलोपत् त। [अलोपीत् नित्यमङ् दृश्यते।

लुप आक्षेपाभावे दिवा० पर० अक० सेट्। लुप्यति अलुपत्

लुप्त न० लुप-क्त। १अपहृतधने। २क्षिप्ते ३नष्टे त्रि०।

लुब्ध अर्दने वा चु० उभ० पक्षे भ्वा० पर० सक०सेट् इदित्। लुम्बयति ते लुम्बति। अलुलुम्बत् त अलुम्बीत्।

लुब्ध पु० लुभ-क्त। १व्याधे। २लम्पटे मन्दरः ३लोलुपे च मेदि०। स्वार्थे क। तत्रैव। लुब्ध इव कायति कै-क। लुब्धक व्याधाकारतारभेदे खगोलशब्दे २४२२पृ०दृश्यम्।

लुभ विमोहने तु० पर० अक० सेट्। लुभति अलोभीत्।

लुभ आकाङ्क्षायां दि० पर० सक० सेट्। लुभ्यति। ऋदित् अलुभत्-अलोभीत्।

लुल विमर्दने भौ० पर० सक० सेट्। लोलति। अलोलीत्।

लुलाप पुंस्त्री० लुल वञ्चने क तमाप्नोति अण्। मत्स्ये अमरः स्त्रियां ङीष्। [लुलितपतत्स्निग्धमांसम् भट्टिः।

लुलित त्रि० लुल क्त। १आन्दोलिते, २चालिते च "अथ

लुष चौर्य्ये भ्वा० पर० सक० सेट्। लोषति अलोषीत्।

लुष हिंसायां भौ० पर० सक० सेट्। लोषति अलोषीत्।

लुह आकाङ्क्षायां भ्वा० पर० सक० अनिट्। लोहति अलुहत्। [लाषीत्।

लू छेदने क्रया०पा० उभ० सक० सेट्। लुनाति लुनीते अलूता स्त्री लू-तक्। कीटभेदे (मकड़सा) अमरः। स्वार्थे क अत इत्त्वम्। तत्रैव। २पिटीलिकायां ३रोगभेदे (मर्म्मग्रन्थे) मेदि०।

लून त्रि० लू-क्त निष्कासश्च नः। छिन्ने अमरः।

लूम न० लू-मक्। कार्पासे अमरः। [लुषत्।

लूष वधे क्षेपे च चु० उभ० सक० सेट्। लूषयति ते अलू-

लेख पु० लिख्यते पूज्यं लिखादिपटेऽसौ लिख-कर्मणि घञ्। देव अमरः। भावे घञ्। २लेखने। कर्मणि घञ्।

२लेख्ये त्रि० मेदि० । आधारे घञ् । ४लेखनाधारे पत्रे "निर्द्धारितेऽर्थे लेखेन" इति माघः ।

लेखक पु० लिख-ण्वुल् । लिपिकरे अमरः । लेखकलक्षणादि मत्स्यपु० १८६ अ० उक्तं यथा

"सर्वदेशाक्षराभिज्ञः सर्वशास्त्रविशारदः । लेखकः कथितो राज्ञः सर्वाधिकरणेषु वै । श्रीमतोमितान् सुस्थमूर्खान् समसंस्थितगतान् समान् । अक्षरान् वै लिखेद् यस्तु लेखकः स वरः स्मृतः । उपायवाक्यकुशलः सर्वशास्त्रविशारदः । वक्तुर्भवक्ता चाल्पेन लेखकः स्याद् नृपोत्तम ! । वाक्याभिप्रायतत्त्वज्ञो देशकालविभागवित् । अनाकुलार्थो नृपे भक्तो लेखकः स्याद् नृगृह्यहे" । "सकृदुक्तग्रहीतार्थो लघुहस्तो जिताक्षरः । सर्वशास्त्रसमालोकी प्रकृतो नाम लेखकः" यमवाक्यः राजलेखकलक्षणं तु पत्रकौमुद्यामुक्तं यथा "ब्राह्मणो मन्त्रणाभिज्ञो राजनीतिविशारदः । नानालिपिज्ञो मेधावी नानाभाषासमन्वितः । मन्त्रणाचतुरो धीमान् नीतिशास्त्रार्थकोविदः । सन्धिविग्रहभेदज्ञो राजकार्य्ये विचक्षणः । सदा राज्ञो हितान्वेषी राजसन्निधिसंस्थितः । कार्य्याकार्य्यविचारज्ञः सत्यवादी जितेन्द्रियः । ऋजुप्रवादी शुद्धात्मा धर्मज्ञो राजधर्मवित् । एवमादिगुणैर्युक्तः स एव नृपलेखकः । नृपानुवर्त्ती सततं नृपविश्वासरक्षकः । नृपतेर्हितकान्वेषी स एव राजलेखकः" । "लेखकानपि कायस्थान् लेख्यलक्ष्ये विचक्षणान्" पराशरेणोक्तं कायस्थस्य लेखकत्वं विवादान्तर्गतविषयलेखने एव न पुस्तकादौ अब्राह्मणलिखितपुस्तकस्य पाठनिषेधात् ।

लेखन न० लिख-ल्युट् । १पत्रादौ वर्णादिविन्यासे, २छेदने च । आधारे ल्युट् । ३भूर्जपत्रे मेदि० । लिख्यतेऽनया ल्युट् । ४काशे राजनि० ५लेखनसाधने (कलम) स्त्री ङीप् । "मसाधारं लेखनीञ्च" इति तिथितत्त्वं । ६रोगोत्सारणार्थशस्त्रभेदे स्त्री ७अञ्जनाङ्गे व्यापारभेदे ८वर्णभेदे च न० । ९लेखनसाधनवर्त्तिभेदे स्त्री भावप्र० तस्य लक्षणक्रियां तत्साधनलेखनीप्रमाणञ्चोक्तं यथा

"लेखनं चारतिक्षाक्षरसैरङ्गनसुच्यते । नेत्रवर्त्मशिराजाहत्रोत्रहृद्दाटकस्थितम् । सुखलाक्षाञ्जिभिर्दोषसप्तकेऽग्र्य खावयेच्च तत्" । तद्वर्त्तिमानं तत्रैव "परस्वमात्रारत्निषु लेखनी स्यात् प्रमाणतः । चूर्णं तु लेखनं वैद्यैर्दृग्लाकं प्रदीयते" । तस्य शलाकास्वरूपादि तत्रैव "सुखे सूक्ष्ममाकारा कषायपरिमण्डला । अष्टाङ्गुला शलाका स्यादङ्गुला धातुजाऽथ वा" कषायपरिमण्डला अत्र कषायवद् वर्त्तुला । "ताम्रलोहशलाका शलाका लेखने मता" । चन्द्रोदयाख्या लेखनी वर्त्तिश्च तत्रोक्ता यथा "शङ्खनाभिविभीतस्य मञ्जा ग्राह्या मनःशिला । पिप्पली मरिचं कृष्णं यवा चेति समांशकम् । छागक्षीरेण संपिष्य वर्त्तिं कुर्यात् यवोन्मिताम् । एरण्डमात्रां संपिष्य जलैः कुर्याद्यथाञ्जनम् । तिमिरं नाशयद्दिव्यं काचं पटलमर्बुदम् । रात्र्यन्धं वार्षिकं पुष्पं वर्त्तिश्चन्द्रोदया हरेत्" । रसक्रिया लेखनी तत्रैवोक्ता यथा "तुत्थमाक्षिकमिन्द्रयवासिताशङ्खमनःशिला । मरिचं सिन्धुफेनञ्च मरिचं चेति चूर्णयेत् । संयोज्य मधुना कुर्यादञ्जनार्थं रसक्रियाम् । पक्ष्मरोगार्शतिमिरकाचशुक्लहरीं पराम्" । चूर्णलेखनञ्च तत्रोक्तं यथा "दन्त्यगुडत्वक्शिलाकाचशङ्खचन्दनसैन्धवैः । अञ्जनं हरते नित्यं सर्वानक्षिगदान् बलात् दत्तः कनकुटः" । अक्षरलेखनीप्रमाणादि योगिनीतन्त्रोक्तं यथा "वंशसञ्जां लिखेद् यस्तु तस्य दृष्टिर्भवेद् ध्रुवम् । ताम्रसूच्या तु विभवो भवेच्च तदृचयो भवेत् । मङ्गल्यश्रीर्भवेल्लिप्यं सुवर्णस्य शलाकया । दृढसूत्रस्य सूच्या वै नातिदृष्टिः प्रजायते । तथा अग्निमयैर्देवि ! पुत्रपौत्रधनागमः । रौप्येण विपुला लक्ष्मीः कांस्येन मरणं भवेत् । अष्टाङ्गुलप्रमाणेन दशाङ्गुलेन चाथ वा । चतुरङ्गुलसूच्या वा यो लिखेत् पुस्तकं शुभे ! । तत्तदक्षरसंख्याते सत्यायुर्याति वै दिने ।"

लेखनिक पु० लेखनं शिल्पमस्य ठन् । लिपिकरे मेदि० ।

लेखर्षभ पु० लेख ऋषभ इव श्रेष्ठत्वात् । इन्द्रे अमरः ।

लेखहार पु० लेखं हरति हृ-अण् । १पत्रवाहके । ष्वुल् । लेखहारकोऽप्यत्र ।

लेखा स्त्री लिख-अ टाप् । १रेखायां, २पङ्क्तौ च । आधारे संज्ञायां घञ् टाप् । ३लिपौ मेदि० ।

लेख्य त्रि० लिख-ण्यत् । १लेखनीये । २व्यवहारे स्वत्वाख्ये भेदके पत्रभेदे न० । तल्लक्षणादि वीरमि० उक्तं यथा "अथ लेख्यं निरूप्यते । तत्र हेतुस्मृतिः "साक्षिणामेव निर्देशः संख्यानामनियमः । लिखितमाधुना वक्ष्मि विधानमसमूलतः । साक्ष्यभावेऽपि समये भ्रान्तिः सञ्जायते नृणाम् । धातुाक्षराणि कूटानि पत्राकृद्यान्यतः पुरा । राजलेख्यं स्थानलग्नं स्वहस्तलिखितन्तथा । लेख्यन्तु त्रिविधम्प्रोक्तं भिन्न-

द्विधा पुनः। भागदानक्रयाधानसंविद्हास ऋणादिभिः। सप्तधा लौकिकं लेख्यन्त्रिविधं राजशासनम्। मरीचिरपि "स्थावरे विक्रयाधाने विभागे दान एव च। लिखितेनाप्रयात् सिद्धिमविसंवादमेव च" विभागो दायभागः आधानमाधीकरणम् संविद्समवः आदिशब्देन विद्युद्वादिपरिग्रहणम्। भागपत्रादीनां लक्षणमाह व्यासस्मृतिः "भ्रातरः संविभक्ता वे स्वस्था वा परस्परम्। विभागपत्रं कुर्वन्ति भागलेख्यन्तदुच्यते। भूमिन्दत्त्वा तु यत्पत्रं कुर्याद्वन्द्वार्कसाक्षिकम्। अनाच्छेद्यमनाहार्य्यन्दानलेख्यन्तदिदुः। गृहक्षेत्रादिकं क्रीत्वा तल्लक्षमूल्याक्षरान्वितम्। पत्रं कारयते यत्तु क्रयलेख्यन्तदुच्यते। जङ्गमं स्थावरम्वस्वं दत्त्वा लेख्यङ्करोति यः। गोप्यभोग्यक्रियायुक्तमाधिलेख्यन्तदुच्यते। ग्रामे देशे च यत्कुर्यात् सत्यलेख्यमरक्षरम्। राजाविरोधिधर्म्मार्थं संविद्पत्रं वदन्ति तत्। वस्त्वाहीनः कालारे लिखितं कुरुते तु यः। कर्म्माणि ते करिष्यामि दासपत्रन्तदुच्यते। धनं दत्त्वा गृहीत्वा तु स्वयं कुर्याच्च कारयेत्। उद्धारपत्रन्तत्प्रोक्तमृणलेख्यं मनीषिभिरिति"। विद्युद्विपत्रलक्षणं कात्यायनेन "अभिशापे समुत्तीर्णे प्रायश्चित्ते कृते बुधैः। विद्युद्विपत्रमेवन्तेभ्यः साक्षिसमन्वितम्"। सन्धिपत्रमाह स एव "उत्तमेषु समक्षेषु अभिशापे समागते। उत्तानुशादलेख्यं यत् तज्ज्ञेयं सन्धिपत्रकम्"। अन्वाधिपत्रमाह प्रजापतिः "धनी धनेन नैनैव परमाधिं नयेद्यदि। कृत्वा तदाधिलिखितं पूर्वं वाऽस्य समर्पयेत्"। पूर्वमाधिपत्रम्। सीमापत्रमाह कात्यायनः "सीमाविवादे निर्णीते सीमापत्रं विधीयते" इति। ऋणशोधने कृते ऋणपत्रनाशादौ सति प्राप्तिपत्रसमर्थनायाह देवलिखितः "दत्त्वर्णमाटवेल्लेख्यं गृह्णीयान्यत्तु कारयेत्"। अत्र लौकिकं सप्तविधं लेख्यं सजातान्यजातभेदेन द्विविधमुक्तम् "लेख्यन्तु द्विविधं प्रोक्तं सजात्यञ्जातमन्यथा"। सजाते साक्ष्यनियमोऽन्यजाते तन्नियम इत्याशयेनाह स एव "असाक्षिमत्साक्षिमच्च लिखितेयस्तितेत्रयोरिति"। असाक्षिमदपीत्यर्थः। याज्ञवल्क्यः "विनापि साक्षिभिर्लेख्यं स्वहस्तलिखितञ्च यत्। तत्प्रमाणं कृतं सर्वं बलोपधिकृताऽते"। इत्यपिशब्दः प्रागुक्तबलोपधिकृतत्वपर्य्युदासः सर्वलेख्यविषयो न सजातमात्रविषयः। तथा च मनुः "बलाद्गुप्तं बलाद्दत्तं बलाद्यच्चापि लेखितम्। सर्वान् बलकृतानर्थानकृतान्मनुरब्रवीत्"। नारदोऽपि "सत्ताभियुक्तस्त्रीबालबलात्कारकृतञ्च यत्। तदप्रमाणं लिखितं भयोपधिकृतन्तथेति"। अन्यत्रते विशेषान्तरमाह योगीश्वरः "यः कश्चिदर्थी निष्णातः स्वस्था तु परस्परम्। लेखन्तु साक्षिमत्कार्य्यं तत्स्थनिरूपूर्वकम्। समासाद्यतद्वर्णनामजातिस्वगोत्रकैः। सम्यक्चारित्रकाख्यैश्च पितृनामादिचिह्नितम्"। धनिकनामपूर्वकमित्यनेनोत्तमर्णनामोपरि लेख्यमधमर्णनाम तदधः इत्यर्थः। एतदधमर्णपत्रादिविषयमन्यत्राऽसम्भवात्। समासाद्य यथा सम्भवमन्यत्रापि सम्यक्चारित्रकाख्यश्चादिशब्दाभ्यामुक्तगुणनाम वक्ष्यः कठ इत्यादि। वशिष्ठोऽपि "कालं निवेश्य राजानं स्थानं निवसनन्तथा। दायकं याचकञ्चैव पितृनाम्ना च संयुतम्। जातिर्गोत्रञ्च शाखाञ्च द्रव्यमार्धं समङ्गकम्। इदं पाठकहस्तञ्च विदितार्थौ च साक्षिणौ"। स्थानं जनपदः। निवसनं पुरग्रामादिकं पाठकोऽधमर्णः। तन्निवेशनप्रकारमाह योगीश्वरः "समाप्तेऽर्थे ऋणी नाम स्वहस्तेन निवेशयेत्। मतं मेऽस्तकपुत्रस्य यदतोऽपरि लेखितमिति"। साक्षिणाविवादेन इवोरभावज्ञानात् अवश्यलिख्यो नालेखुलेखस्तु न भवत्येवेति। अत्र साक्षिलेखकाभ्यां स्वहस्तचिह्नं कार्य्यमित्याह स एव "साक्षिणश्च स्वहस्तेन पितृनामकपूर्वकम्। अत्राऽसमक्षः साक्षी विलेख्युरिति ते समाः। उभयाभ्यर्थितेनैतत्क्रया क्रयकसूनुना। लिखितं क्रयकेनेति लेखकोऽन्ते ततो लिखेत्"। समा इत्यनेन गुणसाम्यं सङ्ख्यासाम्यञ्च वैषम्यनिवृत्तये विवक्षितम्। असमा इत्यकारप्रश्लेषस्तु वैषम्यस्य सामान्यत एव साक्षिषु प्राप्तेर्नोपादेयः। ऋणिसाक्षिणोः सर्वथा विप्रतिपत्तौ नारद आह "ऋणिनिह्नु ऋणी यः स्यात् क्षमतं स तु लेखयेत्। साक्षी वा साक्षिणान्येन सर्वसाक्षिसमोपतः" इति।

त्रिविधं राजशासनमित्युक्तम् त्रैविध्यं विवृणक्ति हारीतः "दत्त्वा भूम्यादिकं राजा ताम्रपट्टे पटेऽथ वा। शासनं कारयेद्धर्म्मं स्थानर्षभादिसंयुतम्। मातापित्रोरात्मनश्च पुण्यायासक्रमूनवे। दत्तमग्न्यागुत्पाद्य दानं सङ्कल्पचारिणे। चन्द्रार्कसमकालीनं पुत्रपौत्रान्वयागतम्। अनाच्छेद्यमनाहार्य्यं सर्वभागविवर्जितम्। दातुः पालयितुः स्वर्ग्यं हर्तुर्नरकमेव च। यद्धि

वर्षसङ्ख्यादि दानाच्छेदफलं लिखेत्। ज्ञातं भवेति लिखितं सन्धिविग्रहलेखकैः। सप्तङ्गं वर्णमात्रादिवर्णाध्यक्षाधिकरान्वितम्। एवंविधं राजज्ञप्तं शासनं सप्तदाङ्गुलम्। देवादिकं यस्य राजा लिखितेन प्रयच्छति। सेवाकौर्य्यादिना तुष्टः प्रसादलिखितश्च सः। पूर्वोत्तरक्रियाबाहुनिर्णयान्ते यदा नृपः। प्रदद्याच्छासनं लेख्यं जयपत्रं तदुच्यते"। यत्रङ्गचारिणे यस्मै आज्ञा आयिने। सर्वभागविवर्जितम् सकलराजकरादि देयैर्वरहितम्। योगीश्वरः शासनपत्रमाह "भूमिं दत्त्वा निबन्धं वा कृत्वा लेख्यन्तु कारयेत्। आगामि भद्रनृपतिपरिपालनाय प्रार्थिवः। पटे वा ताम्रपट्टे वा स्वमुद्रोपरिचिह्नितम्। अस्मिल्लेख्यालङ्कारोऽयं शासनालङ्कार इति ग्रहीष्यतिः। प्रतिषट्प्रतीमाषं दानच्छेदोपवर्णनम्। षट्कृष्णलाश्चतुस्तच्चं शासनं कारयेत् स्थिरमिति"। इत्यत्र पर्णकसुवर्णादावित्यनि पर्णकसुवर्णादीन्यङ्के देयानीति राज्ञो नियतदानाज्ञानिबन्धं कारयेत् सन्धिविग्रहाद्यधिकारिहारेत्यर्थात्। तथा च व्यासः "राज्ञा तु स्वयमुद्दिष्टः सन्धिविग्रहलेखकः। ताम्रपट्टे पटे वापि प्रतिलेद्राजशासनमिति"। प्रतिषट्शत इति प्रतिषट्को भूम्यादिस्वल्पतरीमाषं प्रतिषट्परीमाषं उपवर्णस्य दीर्घो ह्रस्वश्च। दीयत इति दानम् भूम्यादि तस्य च्छेदः क्षेत्रादेर्व्यवहेदः तदुपवर्णनं तच्चिह्नैर्यम्। आज्ञबंस्यादीनभिलिख्येत्यर्थः। इदञ्च साधुशब्देरेव लेखनीयं न लौकिकयवनादिभिरिति। तथा च संग्रहकारः "राजा स्वहस्तचिह्नेन राजादेशेन संयुतम्। युक्तं राजाभिधानेन मुद्रितं राजमुद्रया। सुश्लिष्टपदशब्दोक्तिसम्पूर्णवर्णवदाक्षरम्। शासनं राजदत्तं स्यात् सन्धिविग्रहलेखकैः"। अस्मिन्नपादोत्तरं लिखितमिति शेषः। तच्चिह्नं लौकिके देशभाषादिप्रतिषेधो नेत्याह नारदः "देशाचाराविरुद्धं यद्यत्तत्राधिविधिलक्षणम्। तत्प्रमाणं कृतं लेख्यमविरुद्धप्रकाशकमिति"। शासने राज्ञा स्वहस्तेनैव स्वनाम्नः लेख्यमित्याह व्यासः "सन्धिविग्रहं प्रमाणञ्च स्वहस्तेन लिखेत्तथम्। सतम्भोऽस्तकवृत्तस्य अक्षरस्य नृपतेः"। सन्धिविग्रहं प्रमाणञ्चेत्यस्य पूर्ववाक्ये प्रतिलेखेदित्यनुवादः तयोरालक्षणस्वहस्तलिखनानियमात्। इदञ्च राज्ञा प्रतिषट्कीले यमपर्णीयमित्याह विष्णुः "पटे वा ताम्रपट्टे वा लिखितं स्वमुद्राङ्कमागामि नृपतिपरिपालनार्थं दद्यादिति"। कृतप्रदत्तापहारदोषप्रतिपादनमपि भाविनृपपालनायनार्थं तत्रावश्यकं मित्याह व्यासः "अदिवर्षसङ्ख्यादि दानच्छेदफलन्तथा। आगरमिन्दपशासनबोधनायाभिलेखयेत्" इति। अदिवर्षसङ्ख्यादीत्यादि पुराणवचनप्रसिद्धानाञ्छेदयोः दानापहारयोः स्वर्गादिनरकादिफलं लेखयेद्राजेत्यर्थः।"

लेख्यपत्र पु० लिख्यतेऽत्र यत् लेखं पत्रं यस्य। १ताम्रपट्टे भरतः। कर्म०। २लेख्ये पत्रे न० [लेपते अलेपिष्ट।

लेप गमने भ्वा० आत्म० सक० सेट् अदित् चङि न ह्रस्वः।

लेप पु० लिप लेप-वा घञ्। १भोजने, २लेपने च मेदि०। कर्मणि घञ्। ३सधावाम् (अलिचुन) विश्वः। ४पिण्डदत्तपिण्डभेदे "लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः" स्मृतिः। [प्रलेपपट्टे पु० अमरः।

लेपक त्रि० लिम्पति लिप-ण्वुल्। १लेपनकरे २ज तिभेदे

लेपन न०लिप-ल्युट्। (लेपा) इति ख्याते १आधारे। कर्मणि ल्युट्। २तरक्षनासगन्धद्रव्ये राजनि०।

लेप्य पु० त्रिहरायो ज्यो० न०।

लेलिहा स्त्री सर्वदेवजोपन्यासाङ्के सप्तभेदे तल्लक्षणं यथा "तर्जनीमध्यमाऽनामाः यस्यं कृत्वोदधोमुखीः। अनासावां लिखेत् तद्वाङ्गुल्यौ कृत्वा कनिष्ठिकाम्। लेलिहा नाम सप्तैयं जोपन्यासे प्रकीर्त्तिता" तन्त्रसा०।

लेलिहान पु० लिह यङ्लुक् शानच्। १शिवे भट्टार० २सर्पे पुंस्त्री० हेमच०। ३पुनःपुनर्लेहनकरे त्रि० तारादेवतापूजाङ्गे ऋक्कल्पादिप्रसिद्धेऽग्निभेदरूपे ४सप्तजिह्वाभेदे स्त्री। तल्लक्षणं यथा "वक्त्रं विस्तारितं कृत्वाऽधो जिह्वां च चालयेत्। पार्श्वस्थं सप्तियुगलं लेलिहानेति कीर्त्तिता" तन्त्रसा०। [२अग्नौ च।

लेश पु० लिश अल्पीभावे घञ्। १अल्पे २लवे अमरः।

लेष्टु पु० लिष्-ष्टुन्। लोष्टे अमरः। [लोष्टुभेदोऽप्यत्र।

लेष्टुघ्न पु०लेष्टुं हन्ति हन-क। लेष्टुभेदके शुद्धरे मद्यच०ख्यु

लेह पु० लिह-घञ्। १आस्वादे २आस्वादे लिह्यते रसादानव्यापारभेदे (चाटा) च हेमच०। भावे ल्युट्। लेहनमप्यत्र न०।

लेहिन पु० लिह-इनन्। टङ्कणे (बोराक्स) हेमच०।

लेह्य त्रि० लिह-ण्यत्। लिह्यते १आस्वाद्ये। २भक्षणे न० मद्यज्ञ०।

लैङ्ग न०लिङ्गमधिकृत्य कृतो ग्रन्थः अण्। अष्टादशसु महापुराणेषु एकादशे १महापुराणे। लिङ्गं तदाकारः

अस्यस्याः फलेषु अच् ङीप्। २लिङ्गिनीवृक्षे स्त्री राजनि०। तस्येदमण् ।२लिङ्गसम्बन्धे त्रि०। स्त्रियां ङीप्।

लैङ्गिक त्रि० लिङ्गेनानुमापकचिह्नादिना आपादितस्तत आगतो वा ठक्। लिङ्गादिभिः १कथिते २अनुमिते साध्ये लिङ्गोपस्थितलैङ्गिकमानमित्याचार्याः। अयमनाप्तवाक्यार्थलिङ्गेन कथिते १मन्त्रादीनां तत्तत्कर्मादि विनियोगे च।

लोक दीप्तौ चु०उभ०सक०सेट्। लोकयति ते अलूलुकत् त।

लोक दर्शने भ्वा०आ०सक०सेट्। लोकते अलोकिष्ट लुलोके। ऋदित् चङि न हृस्वः। अलुलोकत् त।

लोक पु० लोक्यतेऽसौ लोक-घञ्। १भुवने भुवनशब्दे दृश्यम्। २जने च अमरः। भावे घञ्। १दर्शने।

लोककान्ता स्त्री ६त०। १कदम्बौषधे राजनि० २लोकस्वामिनि ३लोकप्रिये च त्रि०। [अमरः।

लोकजित् पु० लोकं लोकाचारं जितवान् जि-क्विप्। बुद्धे

लोकपाल पु० लोकान् पालयति पा-णिच् अच्। १लोकपालके रूपे, २रुद्रादिदिक्पाले, ३विनायकादिषु पञ्चसु। ४लोकरक्षकमात्रे त्रि०। लोकनाथादयोऽप्यत्र।

लोकबान्धव पु० लोकानां बान्धवः सर्वकर्मप्रवर्त्तकत्वात्। सूर्ये जटा०। [लोकबहिर्भूते।

लोकबाह्य त्रि० बहिरवति बहिस्+यञ् टिलोपश्च ६त०।

लोकमातृ स्त्री लोकानां मातेव रक्षित्री। १ब्रह्मण्याम् अमरः ६त०। लोकानां मातरि त्रि०।

लोकलोचन पु०लोकैर्लोक्यतेऽनेन लुच ल्युट्। १सूर्ये मेदि० लोकस्य लोचनमिव। २चक्षुषि न०। लोकनेत्रादयोऽप्यत्र न०

लोकायत न० लोकेषु आयतम् विस्तीर्णम् अनायासेनाध्यत्वात्। चार्वाकमतसिद्धधर्म्म मेदि०।

लोकायतिक पु०लोकायतं तन्मतम् अधीष्ट ठक्। चार्वाके।

लोकालोक पु० लोक्यतेऽसौ लोकः न लोक्यतेऽसौ कर्म०। अनालोक्यते सूर्यकिरणसम्पर्कहीनोपपद्यते। तस्य च पार्श्वयोरातपानातपसम्बन्धात्तथात्वम्।

लोकेश पु० ६त०। १ब्रह्मणि अमरः। २रुद्रपत्नौ ३यारदे च राजनि०बुद्धभेदे त्रिका०। [न हृस्वः। अलुलोचत् त।

लोच दीप्तौ चु०उभ०सक० सेट्। लोचयति ते ऋदित् चङि

लोच दर्शने भ्वा० आत्म० सक० सेट्। लोचते अलोचिष्ट। ऋदित् चङि न हृस्वः।

लोचक न० लोच-ण्वुल्। १मांसपिण्डे, २अञ्जितारके २क-ज्जले ३स्त्रीणां ललाटाभरणे, ४नीलवस्त्रे, ५कर्षपूरे, ६कदल्यां, ७मूर्वायां ८निर्गुण्डी भूतृणवर्गयोः मेदि०। ९वर्षकरुढे शब्दर०।

लोचन न०लोक्यतेऽनेन लोच-करणे ल्युट्। १नेत्रे अमरः। भावे ल्युट्। २दर्शनक्रियायाम्। युच्। ३दर्शने ४व्या-लोचने च स्त्री टाप् अमरः। ५मङ्गाप्राप्तिकीटे स्त्री राजनि० ङीप्।

लोचनहिता स्त्री हृत०। तत्माञ्जने हर्ते) राजनि०।

लोचमस्तक पु० लोच्यते लोचं मस्तकं यस्य। मयूर-शिखायाम् अमरः।

लोट(ड) उन्मादे भ्वा० पर० सक० सेट्। लोट(ड)ति। अलोटी(डी)त्। ऋदित् चङि न हृस्वः।

लोणा स्त्री लवणमस्त्यस्याः मतुपसमये वर्णेव्यत्ययेन वच्। १क्षुद्रशिखायाम् राजनि०। लोणाख्याप्यत्र स्त्री राजनि०

लोणार न० लवणमस्त्यति कारणत्वेन अस्-अच् उप०स०। पूर्णे० लवणजे क्षारभेदे राजनि०।

लोत न० लू-तन्। १चोरितधने, लोप्त्रे (रुमाल) ललाटधरः २चिह्ने त्रि० कौ०। ३नेत्राञ्जनि त्रिका० ४लवणे च

लोत्र न० लू-ष्ट्रन्। १चक्षुर्जले, २चोरितधने च संक्षिप्तसा०।

लोध पु० रुध-घञ् रस्य लः। खनामख्याते वृक्षे रत्नमा०।

लोध्र पु० रुध-रक् रस्य लः। (लोध) ख्याते वृक्षे अमरः। "लोध्रो याक्षी लघुः शीतस्तुरुष्यः कफपित्तनुत्। कषायो रक्तपित्तास्रव्रणातीसारशोथहृत्" भावप्र०।

लोप पु० लुप-भावे घञ्। १विनाशे २छेदने, ३व्याकरणोक्ते अदर्शनरूपे नाशे च। लोपयति स्त्रीत्वं रूपगर्वम् अच्। २अगस्त्यसहधर्मिण्यां स्त्री जटा०।

लोपाक पुंस्त्री० लोपमदर्शनमाप्नोति कृतम् आप-ण्वुल्। हरिद्राशे शब्दमा० स्त्रियाम् जाला० टाप् अत इत्वम्।

लोपामुद्रा स्त्री लुप्तं राति रा-क कर्म०। अगस्त्यसहधर्मिण्यां अमरः।

लोप्त्र न०लुप-इत्र्। लोपधने स्त्रीत्वमपीच्छन्ति तत्पक्षे ङीप्।

लोभ पु० लुभ-आकाङ्क्षायां भावे घञ्। परद्रव्येषु अतिगृद्धिताभिलाषे ४रवित्तादिकं दृष्ट्वा नेतुं यो हृदि जायते। अभिलाषो द्विजश्रेष्ठ! स लोभः परिकीर्त्तितः" पद्मपु०।

लोभिन् त्रि०लुभ-णिनि। परद्रव्येषु अतितृष्णावति जटा०।

लोभ्य पु० लुभ-कर्मणि यत्। १छत्रे हेमच०। २लोभनीय-पदार्थे त्रि०। [अमरः। तत्प्रधाने २शाकभेदे न० जटा०।

लोम न० लू-मन्। देहजाते केशाकारे १रोमाख्ये द्रव्ये

लोमकर्ण पुंस्त्री लोमवद्भवः कर्णो यस्य शाक०। ४वर्णे

हेमच० तत्कर्मस्थ लोमशत्वात्तथात्वम् स्त्रियां ङीष् ।
लोमकूप पु० लोम्नां कूप इव । रोमाधारे २त्वग्गतगर्त्ते
लोमघ्न न० लोमानि हन्ति हन-टक् । (टाक) रोमभेदे ।
लोमन् पु० लू-मनिन् । देहस्थे केशतुल्ये (रों० वा) पदार्थे
अमरः । [रूपभेदे रामा०
लोमपाद पु० लोमयुक्तौ पादावस्य या०त० । ऋक्षशृङ्गस्थे
लोमश पु० लोमानि बाहुल्येन सन्त्यस्य श । १मुनिभेदे
२मेषे ३लोमयुक्ते त्रि० मेदि० ४काकजङ्घायां ५जटा-
मांस्यां, ६वचायाम् ७शुक्तिशम्बूकाम् ८सप्तदशमेदायां
८काशीसे १०याकिनीभेदे च स्त्री मेदि० ११शणपुष्पीकाम्
१२अतिबलायां च स्त्री विश्वः । १३गन्धमांस्यां स्त्री
राजनि० । [राजनि०
लोमशकाण्डा स्त्री लोमश इव काण्डोऽस्याः । कर्कश्याम्
लोमशपर्णिका स्त्री लोमशानीव पर्णानि यस्याः कप्
अत इत्त्वम् । मधुपर्ण्याम् शब्दच० । [राजनि०
लोमशपुष्पक पु० लोमशमिव पुष्पमस्य कप् । गिरीषवृक्षे
लोमशातन न० लोमानि शातयति शद-णिच् ल्यु-
दयः ल्यु । लोमपातने औषधभेदे गरु० पु० १८५ अ०
तदौषधसङ्ग्रहं यथा "हरितालशङ्खचूर्णं कदलीदलस-
ञ्जना । एतद्द्रव्येण लोहस्य लोमशातनमुत्तमम् । त
त्रयं हरितालञ्च तच्छुल्वाच्च फलानि च । लाक्षर स-
मायुक्तं लोमशातनमुत्तमम् । क्षुधा च हरितालञ्च
मक्षयेच्च मनःशिला । वैन्तवेन सहैकत्र लोमशातनमेव
देत् । तत्क्षणोद्धर्त्तनादेव लोमशातनमुत्तमम्" ।
लोमहर्षण न० लोम्नां हर्षणं हर्षजनकव्यापार इव ल्युट्
इति यावत् । १रोमाञ्चे । लोमानि हर्षयति उत्तमश्लोक-
कथया हृष-णिच्-ल्यु । व्यासशिष्ये सूतवंश्ये खनाम-
ख्याते २पौराणिके पु० "प्रख्यातो व्यासशिष्योऽभूत् सूतो
वै लोमहर्षणः । पुराणसंहितां तस्मै ददौ व्यासो महामुनिः" विष्णुपु० ।
लोमहृत् पु० लोमानि हरति हृ-क्विप् तुक् च । १हरि-
ताले हेमच० । लोमशातनशब्दे तस्य तथात्वं दृश्यम् ।
लोल त्रि० लोड-कच् डस्य लः । १चञ्चले २चञ्चले च अमरः
च शब्दाद्भावां ३चञ्चलाच्च स्त्री मेदि० ।
लोलाक्ष पु० कार्पासे धर्कमूर्त्तिभेदे कार्पास० ३६ अ० ।
लोलिका स्त्री लोडयति सेवने दलात् लोड-ण्वुल् डस्य
लः । १चाङ्गेर्याम् (चुकोपालङ्क) जटा० ।
लोलित त्रि० लुल-विमर्दे णिच् क्त । चालिते ।

लोलुप(भ) त्रि० लुभ-यङ् क्वन् पृषो० भस्य पः । अति-
लोभयुक्ते अमरः । [लोलोद्विष ।
लोष्ट संहतौ राशीकरणे भ्वा० आ० सक० सेट् । लोष्टते
लोष्ट पुंन० लोष्ट-अच् । १मृत्पिण्डे (ढेला) अमरः । २लोष्ट-
मात्रे राजनि० ।
लोष्टघ्न पु० लोष्टं हन्ति मर्दयति हन-क । लोष्टभेदने मुद्ग-
रादौ भरतः । [भेदनसाधके मुद्गरादौ भरतः ।
लोष्टभेदन पु० लोष्टं भिनत्ति विमर्दयति भिद-ल्यु । लोष्ट-
लोष्ट्र पु० लोष्ट-रन् । लोष्टे हेमच० ।
लोह पुंन० लू विच् लोच्यं जहाति हा-क । १धातुभेदे
अमरः । २धातुमात्रे मेदि० ३रुधिरे राजनि० ४ऋगुग-
न्धने न० अमरः । धातुभेदत्वरूपादि भावप्र० उक्तं
यथा "अथ लोहलोत्पत्तिनामरूपगुणाः "पुरा लोभि-
दैत्यानां निहतानां सुरैर्युधि । रत्नखानि शरीरेभ्यो
लोहानि विविधानि च । लोहोऽस्त्री शस्त्रकं तीक्ष्णं
पिण्डं कालायसायसी । गुरुताडनतोल्लेदकफ-
दाहस्य कारिता । अस्त्रदोषः सृदुर्मन्दो दोषाः सप्तायु-
षस्य तु । लोहं तिक्तरसं शीतं मधुरं तुवरं गुरु ।
रूक्षं वयस्यं चक्षुष्यं लेखनं वातलं जयेत् । कफं पित्तं
मरं शूलं शोथार्शःप्लीहपाण्डुताः । मेदोमेहकृमीन्
कुष्ठं तत्पिण्डं तद्वदेव हि । पाण्डुत्वकुष्ठामयकृच्छ्रदं भ-
ेद्वृद्धोगशूलो कुरुतेऽग्निरीञ्च । नानाकृजाञ्जापि तथा
प्रकोपं करोति वृद्धासमयुद्धलोहम् । लोहारि मद-
कारि चायसं भेदगुल्मिमदर्शस्कृतं ध्रुवम् । पाटवं न
तनुते शरीरजे दार्ढ्यं वृद्धि रुजाञ्च यच्छति ।
कृष्णाख्यं तिक्ततैलञ्च मायाख्यं राजिकां तथा । मद्य-
मम्लरसञ्चापि त्यजेल्लोहस्य सेवकः" । तस्य सारलोहस्य
लक्षणं गुणाश्च "समाभं स्निग्धराकारायस्कान्तस्पर्शेन
लेपयेत् । लोहे सुवर्णं रूप्याणि तत्सारमभिधीयते ।
लोहसारो लघुः स्निग्धोदुग्धवर्णोमतिसारकम् । अर्श-
सर्वोदरं वातं शूलञ्च परिणामजम् । अतिदुष्टं पीनसं
पित्तं श्वासं कासं व्यपोहति" । अथ कान्तलोहस्य
लक्षणं गुणाश्च । "यत् पात्रेण प्रहरति जले तैल-
बिन्दुः प्रतप्ते क्षिप्तं सर्वं त्यजति च निजं तिक्ततां
निम्बवल्कः । तप्तं दुग्धं भवति शिखराकारकं
नैति भूमिं कृष्णाङ्गः स्यात् सजलचषकः कान्तलोहं
तदुत्तमम् । गुरुमोदरार्शःशूलाममासवातं प्रमन्दरम् ।
कामलाशोथकुष्ठानि चयं कान्तमयो हरेत् । लोहान-

मस्तुपित्तञ्च वलञ्चापि शिरोरुजम्। सर्वान् रोगान् विजयते काललोहं न संशयः। वलं वीर्य्यं वपुःपुष्टिं कुरुतेऽग्निं विवर्द्धयेत्"। अथ किट्टस्य "ध्मायमानस्य लोहस्य मलं मण्डूरसञ्ज्ञकम्। लोहसिंहानिका किट्टं सिंहानञ्च निगद्यते। यल्लोहं यद्गुणं प्रोक्तं तत्किट्टमपि तद्गुणम्"। अथ लोहस्य दोषशान्तये शोधनमभिधीयते "पत्तलीकृतपत्राणि लोहस्याग्नौ प्रतापयेत्। निषिञ्चेत् तप्ततप्तानि तैले तक्रे च काञ्जिके। गोमूत्रे च कुलत्थानां कषाये च त्रिधात्रिधा। एवं लोहस्य पत्राणां विशुद्धिः संप्रजायते"। अथ लोहस्य मारणविधिः "शुद्धलोहमयं चूर्णं पातालगरुडोरसैः। मर्दयित्वा पुटेद्रुद्धौ दद्यादेवं पुटद्वयम्। पुटत्रयं कुमार्याश्च कुठारच्छिक्किकारसैः। पुटषट्कं ततो दद्यादेवं तीक्ष्णा स्तुतिर्भवेत्"। अन्यच्च। "त्रिपेटुदादयमांशेन दरदं तीक्ष्णचूर्णतः। मर्दयेत् कन्यकाद्रावैर्यामयुग्मं ततः पुटेत्। एवं सप्तपुटैर्हन्तुं लोहचूर्णमवाप्नुयात्। सत्याऽनुभूतो योगोन्द्रैः क्रमोऽन्यो लोहमारणे। कथ्यते रामराजेन लौहकल्पविधाऽधुना। शतकाद्रिगुणं गन्धं दत्त्वा कृत्वाच कज्जलीम्। द्वयोः समं लोहचूर्णं मर्दयेत् कन्यकाद्रवैः। यामयुग्मं ततः पिण्डं कृत्वा ताम्रञ्च पात्रके। धर्मे धृत्वा कुक्कुरस्य पत्रैराच्छादयेद्बुधः। यामद्वयाद्भवेद्भस्म धान्यराशौ क्षिपेत्ततः। दत्त्वोपरि शरावञ्च लिप्तान्ते सप्तधरेत्। पिष्ट्वा च गालयेद्वस्त्रादेवं वारितरं भवेत्। दाडिमस्य दलं पिष्ट्वा तच्चतुर्थजलान्विता। तद्भेषजरसचूर्णं सप्तधावारितं द्रावयेदपि। खातपे शोधयेत्तच्च पुटेदेवं पुनः पुनः। एकविंशतिवारैस्तन्म्रियते नात्र संशयः। एवं सर्वाणि लोहानि स्वर्णादीन्यपि मारयेत्"। एवं मारितलोहस्य गुणाः "लोहं तिक्तं सरं शीतं कषायं मधुरं गुरु। रूक्षं वयस्यं चक्षुष्यं लेखनं वातलं जयेत्। कफं पित्तं गरं शूलं शोफार्शःप्लीहपाण्डुताः। मेदोमेहकृमीन् कुष्ठं तत्किट्टं तद्वदेव हि। शुद्धामेकां समारभ्य यावत् स्युर्नव रत्तिकाः। तावल्लोहं समश्नीयाद्यवाद्योषानलं परः। कृष्णाखदं तिलतैलञ्च भोज्यं राजिकान्वया। मद्यमस्तुरसञ्चैव वर्जयेल्लोहसेवकः" भावप्र०। "यदा तु आयसे पात्रे पक्वमन्नाति वै द्विजः। स पापिष्ठोऽपि भुङ्क्ते ऽत्र रौरवे परिपच्यते" मत्स्यपु०। "अयःपात्रे पयःपानं मद्यं सिद्धान्नमेव च। भक्षादिकं मधु गुडं नारिकेलोदकं तथा। फलं मूलञ्च यत् किञ्चिदभक्ष्यं मनुरब्रवीत्" ब्रह्मवै०।

लोहकण्टक पु० लोहमिव कठिनः कण्टको यस्य। १मदनवृक्षे शब्दच०। २लोहमयकण्टके च।

लोहकार पु०लोहं तन्मयं शस्त्रादि करोति कृ-अण्। कर्मकारे। ष्युञ्। लोहकारकोऽप्यत्र। "गोपालात् तन्तुवाय्यां वै कर्मकारोऽभवत् सुतः" पराशरोक्ते जातिभेदे पुंस्त्री०।

लोहकिट्ट न० ६त०। लौहमले। (लोहार गु)। राजनि०

लोहचूर्ण न० ६त०। (लोहाचुर) ख्याते १पदार्थे २लोहमले राजनि०।

लोहज न० लोहात् लोहाभ्यां वा जायते जन-ड। १लोहमले राजनि० २धातुद्वयजे कांस्ये च हेमच०।

लोहद्राविन् पु० लोहानि धातुद्वयाणि द्रावयति द्रु-णिच् णिनि। १टङ्कणे (सोहागा) राजनि०। २धातुद्रावके त्रि०। [अमरः स्त्रियां ङीप्।

लोहपृष्ठ पुंस्त्री० लोहमिव कठिनं पृष्ठमस्य। कच्छपभिदि

लोहमारक पु० लोहं मारयति मारयति मृ-णिच्-ण्वुल्। भार्गिक्षाखे त्रिका०। [२लोहमारके त्रि०।

लोहल पु० लोहमिव लाति ला-क। १कव्यक्लवचने अमरः

लोहवर न० लोहेषु सर्वधातुषु मध्ये वरम्। स्वर्णे मेदि०।

लोहश्लेषण न० लोहानि स्वर्णादीनि श्लेषयति योजयति श्लिष-णिच्-ल्यु। टङ्कणे (सोहागा) हेमच०।

लोहसङ्कर न०लोहानां धातुद्वयाणां सङ्करो यत्र। मिश्रितधातौ १रीत्यादौ २वर्त्तलोहे च राजनि०।

लोहाभिसा(हा)र पु० लोहं तन्मयमस्त्रम् अभिसि(हो)यतेऽत्र अभि+सृ-(हृ)-घा आधारे अच्। राज्ञां युद्धयात्रादौ शस्त्रनीराजनाविधौ अमरः।

लोहार्गल पु० १तीर्थभेदे वराहपु०। २लोहकीले च।

लोहित न० रुह-इतच् रस्य लः। १कुङ्कुमे २रक्तचन्दने ३रक्तगोमीर्षकभेदे मेदि०।४प्रवाले ५रुधिरचन्दने शब्दच०। ६शणकुङ्कुमे ७रुधिरे च राजनि० ८युद्धे हेमच०। ९मदभेदे १०मर्दने ११रक्तवर्णे च पु०मेदि०। १२रक्ततायुते त्रि०। १३नगभेदे १४रोहितमत्स्ये १५वर्णे १६देवभेदे भरतः। १७मसूरे शब्दच० १८रक्ताक्षौ १९रक्तयाक्षौ राजनि०।२०वनभेदे २१सरोवरभेदे ब्रह्मपुत्रशब्दे उमसम्। सर्वत्र जातौ स्त्रियां ङीष्। वर्णे तु स्त्रीत्वे ङीष् तस्य नः। लोहिनी लोहितवर्णयुतस्त्रियाम्। रुह-इतनु रस्य लः। रोहणकर्त्तरि स्त्रियां टाप्।

लोहितक न० लोहितमिव कायति कै-क। १पित्तले राजनि०। लोहित+स्वार्थे कन्। २पद्मरागमणौ पु० हेमच०। ३मङ्गलपद्मे पु० शब्दमाला।

लोहितचन्दन न०कर्म०। १कुङ्कुमे अमरः २रक्तचन्दने च।

लोहितपुष्पक पु० लोहितानि रक्तानि पुष्पाण्यस्य कप्। दाडिमवृक्षे भावप्र०। २रक्तवर्णपुष्पयुते त्रि०।

लोहितमृत्तिका स्त्री कर्म०। १गैरिके (गेरिमाटी) रत्नमा० २रक्तमृदि च।

लोहिता स्त्री रुह-रतच् रक्त इत्वम्। १वराहक्रान्तायां शब्दच० २रक्तपुनर्नवायां राजनि०। ३रक्तवर्णायां स्त्रियाम्।

लोहिताक्ष पु०लोहिते अक्षिणी अस्य अच् समा०। १विष्णौ शब्दच० २लोहिते च पुंस्त्री० शब्दच०। ३रक्तनेत्रयुते त्रि० स्त्रियां ङीष्। [मिश्रवृक्षे च राजनि०।

लोहिताङ्ग पु०लोहितमङ्गमस्य। १मङ्गलपद्मे अमरः २ब्रह्मणि

लोहितानन पुंस्त्री० लोहितमाननमस्य। १वकुले राजनि० स्त्रियां ङीष्। २रक्तमुखे त्रि० स्त्रियां टाप्। [त्रिका०।

लोहितायस् न० लोहितं वर्णमेति इण्-असुन्। ताम्रे

लोहितायस न० लोहितमयः अच् सः। १ताम्रे २रक्तवर्णायोजातिभेदे च।

लोहोत्तम न० लोहेषु धातुषूत्तमम्। स्वर्णे हेमच०।

लौकायतिक न० लोकायतं चार्वाकशास्त्रं वेत्त्यधीते वा ठक्। चार्वाकमताभिज्ञे।

लौकिक त्रि० लोके विदितः प्रसिद्धो हितो वा ठण्। १लोकविदिते २लोकप्रसिद्धे। ३लोकहिते च।

लौकिकाग्नि पु० कर्म०। विधानेन संस्कारशून्ये वह्नौ।

लौड उन्मादे भ्वा० पर० सक० सेट्। लौडति अलौडीत्। क्वादित् चक्रि न दृश्यः। [२धातुमात्रे च।

लौह पु०लोहमेव स्वार्थे अण्। (लोवा) १धातुभेदे भरतः।

लौहज न० लोहात् लौहाभ्यां जायते वा जन-ड।१मण्डूरे रत्नमा०। धातुद्वयजे कांस्यपित्तलादौ च।

लौहभाण्ड पु० लोहस्य विकारः अण् कर्म०। (हामान-दिस्ता) २लौहमये पात्रभेदे शब्दच०। ३लोहमयपात्र-मात्रे न०।

लौहमल न० लोहस्येदमण् कर्म०। लोहकिट्टे राजनि०।

लौहित्य न०लोहितस्य भावः ष्यञ् स्वार्थे ष्यञ् वा। १रक्त-वर्णे २रक्तले "लोहितात् सरसो जातो लौहित्यस्तु ततो स्मृतः" उक्ते रक्तप्रजनदभेदे। "तौर्यलौहित्यरक्तः।

ल्ली क्षेपे क्र्या० पर० सक० अनिट्। ल्लिनाति अल्लीत्। [लीत्।

ल्ली श्लेषे क्र्या० पर० सक० अनिट्। ल्लिनाति अल्ली-

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यसङ्कलिते वाचस्पत्ये लकारादिशब्दार्थसङ्कलनम्।

व

वकारः अव्ययवर्णभेदः। स च स्वार्थेऽव्ययवर्णयोरन्तःस्थितत्वात् अन्तःस्थवर्णभेदः अस्योच्चारणस्थानं दन्तोष्ठौ "दन्तौष्ठ्यो वः स्मृतो बुधैः" शिक्षोक्तेः। अस्योच्चारणे जिह्वाग्रेण दन्तौष्ठबहिर्भागस्पर्शात् ईषत्स्पृष्टता आभ्यन्तर-प्रयत्नः। बाह्यप्रयत्नास्तु विवारनादघोषा अल्पप्राणत्व। अस्य दन्तोष्ठ्यत्वात् दन्तत्वं क्वचित्र ओष्ठ्यत्वमाश्रित्य कार्य्यभेदस्तेन संवृतोकारादौ ओष्ठ्यत्वमाश्रित्य उः अपरः। दन्तत्वमाश्रित्य च अनुस्वारस्थाने अनुनासिको वो वा पदे अनुस्वारस्थितिः। अस्य मादकान्यासे वाम-स्तने न्यसता। काव्यादौ प्रयोगे "व्यसनमस्य वयौं" इ० र० टी० उक्तेः व्यसनं फलम्। वर्णाभिधाने अस्य वा-चकशब्दा उक्ता यथा "वो वाणो वारुणो वक्रा वरुणो मेदसंज्ञकः। खड्गीशो व्यापिनी वक्रं कवचो वारिवाचकः। उत्कारी शाखिनी शान्ता वातः स्त्रिय क्षीरः शुचिः। इन्द्रधारा च वामांसः करभूरुं च नर्त्तकः। जगद्धात्री सारिणी च देवोऽखिलोऽनिरुद्धकः। गिरिराजो निद्रताता व्यङ्गा निन्दी करः" अस्य ध्येयस्वरूपं यथा "वकारं चतुराषाढि! कुण्डली मोक्षमव्ययम्। पद्मरागमयं वर्णं त्रिशक्तिसहितं सदा। त्रिबिन्दुसहितं वर्णमात्मादित्त्वसंयुतम्। पद्मदेवमयं वर्णं पीतविद्युल्लतोपमम्। चतुर्वेगमयं वर्णं सर्वसिद्धि-प्रदायकम्" कामधेनुतन्त्रे "अक्षाधिष्ठातृध्येयरूपं यथा "कुन्द-पुष्पप्रभां देवीं द्विभुजां पद्मजेक्षणाम्। शुक्लाम्बरधरां रत्नहारोज्ज्वलां पराम्। वामकामीश्वरां शिवां

विद्विदां विद्वत्सेवितम्। एवं ध्यात्वा वकारं तु तन्मन्त्रं दशधा जपेत् वर्णोद्धारतन्त्रम्।

व पु० वा-ड। १वायौ २वरुणे ३वास्त्रे ४मन्त्रभेदे मेदि० ५राक्षौ हेमन्द्राघे ७वडवायां ८वसतौ ९वसुदेवे च शब्द च०। १०आम्रे ११वसने १२शालूके १३वन्दने च एकाक्षरकोष०। १४वाडवे अव्य० मेदि० "शास्त्रं व यशः पशुः" रघुः। १५वरुणे न० मेदि०। १६वरुणबीजे मालतीमाधवम्।

वंश पु० वमति उद्गिरति वम-ड तस्य नेत्त्वम्। १पुत्रपौत्राद्यपत्यवर्गे २तृणजातिभेदे (बाँस) अमरः।

"वंशः शरो दिव्यः स्वादुः कषायो वस्तिशोधनः। श्लेष्मनः कफपित्तघ्नः कुष्ठास्रव्रणशोषजित्। तत्करीरः कटुः पाकरसे रूक्षो गुरुः सरः। कषायः कफजित् स्वादुर्विदाही वातपित्तकृत्। तद्यवास्तु सरा रूक्षाः कषायाः कटुपाकिनः। वातपित्तकरा उष्णा बद्धमूत्राः कफापहाः" भावप्र०। १९जाध्यये ३वर्णे च मेदि० १२रूपो हेमचन्द्रे च राजनि०। ७वाद्यभेदे पुंस्त्री० धरणिः स्त्रीत्वे गौरा० ङीष् "वंशीरवेण वनिते" इति छन्दोमञ्जरीः। तद्विवृतिर्यथा

"तालेन राजते गीतं तालो वादित्रसम्भवः। तच्चतुर्विधमुच्यते। ततं सुषिरमानद्धं घनमित्यं चतुर्विधम्। ततं तन्त्रीगतं वाद्यं वंशाद्यं सुषिरं तथा। चर्मावनद्धमानद्धं घनं तालादिकं मतम्"। तत्र सुषिरं यथा "वंशोऽथ पारी मधुरी तित्तिरी शङ्खवाडला। तोड़ही सरली तुङ्गा शङ्खिका खरनामधृः। शृङ्गं कापालिकं वंशखर्वशंखत्तया परः। एते सुषिरभेदास्तु कथिताः पूर्वसूरिभिः। वर्तुलः सरलश्चैव पर्वदोषविवर्जितः। वैणवः खादिरो वापि रक्तचन्दनजोऽथ वा। श्रीखण्डजोऽथ सौवर्णो दन्तिदन्तमयोऽपि वा। राजतस्ताम्रजो वापि लौहजः स्फाटिकोऽथ वा। कनिष्ठाङ्गुलितुल्येन गर्भरन्ध्रेण शोभितः। शिल्पविद्याप्रवीणेन वंशः कार्यो मनोहरः। वंशेनैव मतःप्रीतिः मतङ्गमुनिनोदितम्। ततोऽन्येऽपि तदाकारा वंशा एव प्रकीर्त्तिताः। तत्र लक्ष्म शिरोदेशादधोदिग्मितमङ्गुलम्। फुत्कारतारन्ध्रं कुर्यात् मितमङ्गुलिपर्वणा। पञ्चाङ्गुलानि संलक्ष्य तारतन्ध्राणि कारयेत्। कृष्णोत्तराग्रतन्ध्राणि सप्तसंख्यानि कोशलात्। बदरीबीजतुल्यानि संलक्ष्याङ्गुलमङ्गुलम्। प्राग्वयोः संस्थं कार्यं स्वरादीनांदक्षेतरे। सिक्थकेन कला देया तेन सुस्वरता भवेत्। पञ्चाङ्गुलोऽयं वंशः स्यादेवैकाङ्गुलिवर्द्धितः। षडङ्गुलानि नाम्ना स्यात् यावदष्टादशाङ्गुलम्। फुत्कारतारन्ध्रयुक्तं यावदङ्गुलसप्तरम्। तत्रैव नाम वंशस्य वंशिकैः परिकीर्त्यते। एकाङ्गुलोद्वयङ्गुलश्च त्र्यङ्गुलश्चतुरङ्गुलः। अतितारतरत्वेन वंशिकैः सप्तपेक्षितः। त्रयोदशाङ्गुलो वंशोऽपरः पञ्चदशाङ्गुलः। निन्दितो वंशतत्त्वज्ञैस्त्रया सप्तदशाङ्गुलः। महानन्दस्त्रयानन्दो विजयोऽथ जयस्त्रया। चत्वार उत्तमा वंशा मतङ्गमुनिसम्मताः। दशाङ्गुलो महानन्दोनन्द एकादशाङ्गुलः। द्वादशाङ्गुलमानस्तु विजयः परिकीर्त्तितः। चतुर्दशाङ्गुलमितो जय इत्यभिधीयते। ब्रह्मा रुद्रो रविर्विष्णुः क्रमादत्र व्यवस्थिताः। नैर्विद्यं प्रौढ़तापापि सुस्वरत्वञ्च शीघ्रता। माधुर्यमिति पञ्चामी फुत्कारेषु गुणाः स्मृताः। प्रीतूकारबलः सम्यो विस्तरः स्फुटितो वपुः। क्षमधुरत्व विश्लेषाः षड्दोषाः फुल्लते क्रमात्। इत्या प्रयोगबाहुल्यमस्तता गीतवादने। एभिर्दोषैर्युतोऽतीव निन्दितो वंशिको मतः। स्थानत्रादिरवाभिज्ञोगमज्ञाश्च स्फुटाक्षरः। शीघ्रज्ञः कलाभिज्ञो वंशिको रक्ष उच्यते। प्रसन्निरङ्गसन्धिश्च वृत्तिश्चेत्यङ्कुरे गुणाः। सुस्थानत्व सुस्वरत्वबलोद्धारक्रियाः। समस्तगमकज्ञानं रागरागाङ्गवेदिता। क्रियाभाषाविभाषासु दक्षता गीतवादने। स्वस्थाने चापि दुःस्थाने नादनिर्माणकौशलम्। गातुर्यां स्थानदाढ्यं तद्दोषाच्छादनं तथा। वांशिकस्य गुणा एते मया संक्षिप्य दर्शिताः" सङ्गीतदा०।

वंशक पु० वंश इव कायति कै-क। (सोमशाडा) १क्षुपभेदे रत्नमा० २मतङ्गभेदे (राजत) शब्दमा०। ३चतुरश्चन्द्रने न० हारा०। [वंशरोचनायाम् राजनि०।

वंशकर्पूररोचना स्त्री कर्पूरमिव रोचते रुच-ल्यु ह्रस्व०।

वंशचीरी स्त्री वंशस्य चीरमिवास्त्यस्या अच् गौरा० ङीष्। वंशरोचनायाम् राजनि०।

वंशज पु० वंशात् जायते जन-ड। १वंशसजाते यथाकारे वेणुयवे राजनि० २मतङ्गमुनिजाते त्रि०। ३वंशरोचनायां स्त्री टाप् शब्दर०। [राजनि०।

वंशतण्डुल पु० ह्रस्व०। वेणुजाते तण्डुलाकारे वेणुयवे

वंशधर त्रि० वंशं धरति। कुलाविच्छेदकारके सन्ताने। धृ-खिच् ल्यु। वंशवर्द्धनोऽप्यत्र।

वंशनेत्र न० वंशस्येव नेत्रमस्य। रक्तमूले राजनि०।

वंशपत्र पु० वंशस्य पत्रमिव पत्रमस्य । १नखनामके तृणे राजनि० । ६त० । २वंशदले न० । कप् तलोप च । ३नाड़ी-हिङ्गौ स्त्री राजनि० गौरा० ङीष् ।

वंशपत्रपतित न० सप्तदशाक्षरपादके छन्दोभेदे । "दिङ्-छनि वंशपत्रपतितं भरनभनगैः" छन्दो० ।

वंशपीत पु० वंशवत्पत्रमिव पीतः । कचगुगुचौ राजनि० ।

वंशपुष्पा स्त्री वंशस्य पुष्पमिव पुष्पमस्याः । सप्तदेवीलतायाम् राजनि० ।

वंशपूरक न० वंशस्येव पूरकं यस्य । इक्षुमूले राजनि० ।

वंशरो(लो)चना स्त्री वंशेषु रोचते रुच-ल्यु वा रस्य लः । वंशपर्वस्थिते श्वेतवर्णे कर्पूराकारे द्रव्ये । (वंशलोचन) । "वंशजा वंशपो दृष्या वंश्या वंशी च शीतला । दग्धाकाशवरंशाख्यपिप्पलीकामलाः । स्मरेत् कृष्णं प्रणं पाण्डुं कषायवातलाच्छ्लिष्टं भावप्र० ।

वंशशर्करा स्त्री वंशस्य शर्करेव । (वंशलोचन) पदार्थे राजनि० । [हेमच० ।

वंशशलाका स्त्री० वंशस्य शलाकेव कठिनत्वात् । वीरणमूले

वंशस्तनित न० । द्वादशाक्षरपादके वंशस्थविलाक्षरयोर्योगे छन्दोभेदे भट्टः । [वंशस्थविलं जतौ जरौ" छन्दो०

वंशस्थविल न० । द्वादशाक्षरपादके छन्दोभेदे । "वदन्ति वंशाग्र न० वंशस्य अग्रं मूलम् । वंशाङ्कुरे (कोँड़) राजनि०

वंशाङ्कुर पु० ६त० । (कोँड़) इति ख्याते पदार्थे राजनि०

वंशिक न० वंशोऽस्त्यस्य ठन् वंश इव वा कन् । १कुरुचन्दने अमरः २वंश्यां स्त्री शब्दच० टाप् ।

वंशीधर पु० वंशीं वंशजवाद्यभेदं धरति धृ-अच् । श्रीकृष्णे

वंश्य त्रि० वंशे मतृकुले जातः यत् । मतृकुलजाते ।

वक्क कौटिल्ये अक० गतौ वक-भ्वा०आ०सेट् इदित् । वक्कते अवक्किट ।

वक पुंस्त्री० वक्कि-अच् पृषो० नलोपः । १वनामख्याते विहगे अमरः स्त्रियां ङीष् । २वनामख्याते पुष्पवृक्षे "अगस्तिकुसुमं शीतं चातुर्थकनिवारकम् । नक्षत्रान्यनाशनं तिक्तं कषायं कटुपाकि च । पीनसक्लेदपित्तघ्नं वातघ्नं रुचिमेधनम्" भावप्र० । ३औषधादिपाचनयन्त्रभेदे "जलकल्कपयोलवणदोलाभूधरवालुकाः । वकाद्या यन्त्रभेदाः स्युर्जारणाद्याय मूषिकाः" शब्दच० । अस्य लक्षणं यथा "दीर्घेक्षुखण्डकाच्छिद्या शिलयेत् खलभाण्डकम् । तिर्यक् कृत्वा पचेत् चुल्ल्यां वकयन्त्रमिति स्मृतम् ।" वैद्यकम् । ४कर्षरे ५राक्षसभेदे मेदि० यो भीमेन हतः भा०व० १३ अ० । श्रीकृष्णेन हते दैत्यभेदे च भाग० १०।११ अ० ।

वकजित् पु० वकं जितवान् जि-क्विप् ६त० । १श्रीकृष्णे २भीमसेने च वकान्नकादयोऽत्र ।

वकधूप पु० वक इव शुभ्रो धूपः । हरिवासे धूपे अमरः ।

वकपञ्चक न० । कार्त्तिकशुक्लपक्षैकादश्यादितिथिपञ्चके । तत्र मत्स्यादवकैरपि मत्स्यत्यागेन व्रताचरणात् तथात्वम्

वकपुष्प पु० वक इव कुटिलं पुष्पमस्य । वनामख्याते पुष्पवृक्षे शब्दच० ।

वकवृत्ति पु० वकस्येव स्वार्थपरा वृत्तिरिवेष्टा यस्य । "अधोदृष्टिर्नैकृतिकः स्वार्थसाधनतत्परः । शठो मिथ्याविनीतश्च वकव्रतिरुदाहृतः" दण्डुकस्तस्मे परःस्वे वने ।

वकव्रतधर पु० वक इव व्रतं धारयति धृ-अच् । "अधोदृष्टिर्नैकृतिकः स्वार्थसाधनतत्परः । शठो मिथ्याविनीतश्च वकव्रतधरो द्विजः" दण्डुके स्वार्थसाधनतत्परे वञ्चके विप्रादौ । [व्रतधरे ।

वकव्रतिन्(क) पु० वकव्रत+अस्त्यर्थे इनि ठन् वा । वक-

वकुल पु० वकि-कुलच् नलोपः । १वनामख्याते पुष्पवृक्षे अमरः । २कटुकायां स्त्री राजनि० टाप् । काकोल्यां ङीष् पृषो० । वकुलोऽपि वकुले पु० ।

"वकुलो मधुगन्धश्च सिंहकेसरकेशरः । वकुलस्तुवरोऽतुण्डः कटुः पाके रसे गुरुः । कफपित्तविषश्वित्र कृमिदन्तगदापहः" भावप्र० । अस्य लोध्रादित्वमिच्छन्त्यन्ये ।

वक्क गतौ भ्वा०चुरा०अक०सेट् । वक्कते अवक्किट ।

वक्कव्य त्रि० वच-तव्य । १कुत्सिते २हीने २दुष्टे च मेदि० "दिवा वक्कव्यता पाठे" स्मृतिः । ४कथनीये च । भावे क्त्व । ५कथने दुष्टत्वे च न० ।

वक्तृ त्रि० उचितं वक्तृ वक्ति वच-तृच् । १उचितवक्तरि अमरः स्त्रियां ङीप् । २पण्डिते पु० मेदि० ।

वक्त्र न० वक्त्राग्नेन वच-करणे ष्ट्रन् । १मुखे अमरः । २तगरमूले शब्दर० । ३वसनभेदे मेदि० । वक्त्रं "नाद्याक्षयो खातामक्षेर्योऽनुष्टुभि ख्यातम्" छ० र० वक्त्रे ४छन्दोभेदे च ।

वक्त्रभेदिन् पु० वक्त्रं भिनत्ति भिद-णिनि । १तिक्तरसे हेमच० । २मुखविदारके त्रि० स्त्रियां ङीप् ।

वक्त्रवास पु० वक्त्रं वासयति वस-णिच् अच् उप० स० । १नागरङ्गे हेमच० । ६त० २मुखगन्धे पु० ।

वक्त्रशोधिन् पु० वक्त्रं शोधयति शुध-णिच्-णिनि । १जम्बीरे २मुखशोधके ३ताम्बूलादौ त्रि० स्त्रियां ङीप् ।

वक्रासव पु० वक्रश्चासव इव । अपरररसे टिका० ।
वक्र न० वक्रि–रन् पृषो० नलोपः । १नदीवङ्के अमरः २धनेश्वरे पु०मेदि० ३मङ्गलपद्मे पु०हेम० ४कुटे हलि० पुराहरे पु० धरणिः ६पर्वते कुटिलगतौ च स्त्री । वतहति त्रि० । पङ्क्तायां वक्रनतिकारकं खगगतिशब्दे उक्तम् । सामान्यतः ज्यो० त० उक्तं यथा "वक्राः खुः पञ्च षड्भैर्क्षं अतिवक्रा नगाष्टभैः । नवमे दशमे चैव जायते सप्तजा गतिः । द्वादशैकादशे सूर्यं भवन्ति शीघ्रतां पुनः । रविस्थित्यं शकलिप्तावधेः संख्यात कल्पते । न तु राश्यन्तरप्राप्तात् पञ्चमादिनिरूपणम् । राशुक्तेन सदा वक्रौ" ।
वक्रकण्ट पु० वक्रः कुटिलः कण्टः कण्टकोऽस्य । बदरवृक्षे राजनि० । ततः संज्ञायां कन् । खदिरवृक्षे राजनि० ।
वक्रखड्ग पु० कर्म० । करवाले राजनि० ।
वक्रग्रीव पुंस्त्री० वक्रा ग्रीवा यस्य । १पक्षिणि त्रिका० स्त्रियां ङीष् । २कुटिलग्रीवायुते त्रि० स्त्रियां टाप् ।
वक्रपुच्छ पुंस्त्री० वक्रं पुच्छं यस्य । १कङ्कुरे त्रिका० स्त्रियां ङीष् । वक्रवालूकादयोऽप्यत्र ।
वक्रपुष्प न० वक्राणि पुष्पाण्यस्य । १वकवृक्षे अमर० २पलाशवृक्षे च राजनि० । [वृक्षे राजनि० ।
वक्रप्रख्या स्त्री वक्रं प्रख्यमिव पत्रादि यस्याः । कुटुम्बिनी-
वक्राङ्ग पुंस्त्री० वक्राण्यङ्गान्यस्य । १वंशे स्त्रियां ङीष् । २कुटिलावयवयुते त्रि० स्त्रियां वा ङीष् । कर्म० ३कुटिले देहे न० ।
वक्रिमन् पु०वक्रस्य भावः इमनिच् । कौटिल्ये "वक्रितवक्रिम प्रेक्षितम्" मालतीमाधवम् । पृषो० । चदन्तोऽयम् ।
वक्रोक्ति स्त्री कर्म० । १कुटिलोक्तौ "अन्यस्यान्यार्थकं वाक्यमन्यथा योजयेद्यदि । अन्यः श्लेषेण काक्वा वा सा वक्रोक्तिस्त्रिधा" सा० द० उक्ते २अर्थालङ्कारभेदे १काकुवचने च ।
वक्ष रोषे भ्वा० पर० सक० सेट् । वक्षति अवक्षीत् ।
वक्षस् न० वह–असुन् षुट् च । १वक्षसि २उरसि च अमरः ।
वक्षः(क्ष)स्थल न० वक्षःस्थलमिव वा विसर्गलोपः । प्रथमवक्षसि । [सा० द० ।
वक्षोज पु०वक्षसि जायते जन–ड । १स्तने "वक्षोजयोर्भेदता"
वक्षोरुह पु० वक्षसि रोहति रुह–क । स्तने त्रिका० ।
वख गतौ भ्वा० पर० सक० सेट् इदित् । वङ्खति अवङ्खीत् अनिदित्त्वम् वखति अवखीत् अवाखीत् ।
वग वङ्गे भ्वा०पर०अक०सेट् इदित् । वङ्गति अवङ्गीत् ।
वगाह पु० अव+गाह–घञ् अवातो लोपः । अवगाहने ।
वघ गतौ निन्दायाम् आरम्भे च सक०अनि अक० भ्वा०आत्म० सेट् इदित् । वङ्घते अवङ्घिष्ट ।
वङ्ग पु० वङ्ग–घञ् । १नदीवङ्गे भरतः । २पक्षयवने (प्राचीन) स्त्री त्रिका० टाप् ।
वङ्गि स्त्री वङ्ग–रि । १पार्वत्याम् हेमच० । २वाद्यभेदे पुंन० उणादिको० । २मद्गुदाख्ये पुंन० शि०कौ० ।
वङ्ग न० वङ्ग–अच् । धातुभेदे (राङ्) रङ्गशब्दे दृश्यम् । "रङ्गाङ्गारं समारभ्य ब्रह्मपुत्रान्तगं प्रिये ! । वङ्गदेश इति प्रोक्तः" वङ्गे देशभेदे पुं०ब०व० १चन्द्रवंश्ये नृपभेदे पुं० गरु०१अ० । ४वार्त्ताकौ ५कार्पासे च पु० मेदि० ।
वङ्गज न०वङ्गात् धातोः जायते जन–ड । १सिन्दूरे रत्नमा० २वङ्गदेशजाते त्रि० ।
वङ्गन पु० वङ्ग–ल्यु । वार्त्ताकौ शब्दर० ।
वङ्गशुल्वज न० वङ्गशुल्वाभ्यां रङ्गताम्राभ्यां जायते जन–ड । रङ्गताम्रमिश्रितजाते कांस्ये धातौ हेमच० ।
वङ्गसेन पु० वङ्गमिव शुभ्रा सेना पुष्पमस्य । वकवृक्षे त्रिका०
वङ्गारि पु० ६त० । कपित्थे हेमच० तस्य वङ्गधातुजारिरयत्वात्तथात्वम् ।
वङ्गण पु० वच–ल्युट् पृषो०नुम् । जलकुक्कुटे (कुक्की) अमरः
वच सन्देशे सक०कथने दिव० चुरा०उभ० सेट् । वाचयति ते
वच कथने अदा० द्विक० पर० अनिट् । वक्ति । "न हि वचिरनियोगः प्रयुज्यते" अभियुक्तोक्तेरप्यत्र अनि" अवोचत् त । उवाच ऊचतुः ऊचुः ।
अनु+उक्तस्य पुनःकथने अनुवादे ।
निर्+अवद्यार्थकथने निरुक्तिः निर्वचनम् ।
प्र+प्रकर्षेण कथने व्याख्यानार्थसङ्गस्य कथने प्रवचनम् ।
वचन न० वच–ल्युट् । १कथने २वाक्ये अमरः ३गुणद्रव्यशब्दच० कर्त्तरि ल्यु । व्याकरणोक्ते संख्यार्थके सुप्तिङन्तरूपे शब्दे च । "सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु । वचनेषु च" । [खिनि । वचने स्थिते वशीभूते अमरः ।
वचनग्राहिन् त्रि०वचनं गृह्णाति तदनुसारेणाचरति ग्रह–णिनि ।
वचनीय त्रि० वच–अनीयर् । १कथनीये २निन्दनीये दोषापवादे न० "वचनीयमिदं व्यवस्थितम्" कुमारः ।
वचनेस्थित त्रि० वचने वाक्ये तदुपदिष्टाचारे तिष्ठति स्था–क अलुक्स० । वाक्यप्रतिपालके वशीभूते अमरः । [मेदि०
वचर पुंस्त्री०वच–अरन् । १कङ्कुटे स्त्रियां ङीष् । २चटे त्रि०

वचस् न० वच-असुन्। वाक्ये वाक्पदार्थे अमरकोषः।
वचसांपति पु० ६त० अनुक्स०। ब्रह्मणो दीपिका।
वचस्कर त्रि० वचः करोति क्र-खच् कस्कादि०। वाक्यपटि-
पाखके वाग्मे।
वचा स्त्री वच-क्विप्। (वच) इति ख्याते द्रव्ये।
"वचोपगन्धा कटुका तिक्तोष्णा वान्तिविक्रिया।
विबन्धाध्मानशूलघ्नी ग्रहणीमूलविशोधनी। अपस्मार-
कुष्ठोन्मादभूतज्वरनिलान् हरेत्"। (सुश्रुतोक्ती
वचा)। "पारसीकवचा शुक्ला प्रोक्ता हैमवतीति सा।
हैमवत्युदिता तद्वत् गुणे हीनेति विशेषतः।" अथ (मङ्गा-
भरी) वचा। वच्या स्त्रीके (कुलीवच इति) नामान्तरम्।
"सुगन्धाद्यगन्धा च विशेषात् कफकासनुत्। सुस्वरत्व-
करी रुच्या कृत्कण्ठसुखशोधिनी"। अपरा सुगन्धा
स्यूलपत्रिकेत्या लोके मङ्गाभरा इति नाम। "स्थूल-
पत्रिः सुगन्धाख्या ततो हीनगुणा स्मृता"। (चोप-
चीनीति) लोके प्रसिद्धा। तस्या गुणाः "द्वीपा-
न्तरवचा कट्वी तिक्तोष्णा वस्तिशोधिनी। विबन्धाध्मान
शूलघ्नी ग्रहणीमूलविशोधनी। वातव्याधीनपस्मार-
सस्मादतनुवेदनाम्। व्यपोहति विशेषेण फिरङ्गामव
नाशिनी" भावप्र०।
वज गतौ भ्वा० परः सक०सेट्। वजति। अवाजीत्-अव-
जीत् अवजतः। [ति अवीवजत् त।
वज शरसंस्कारे गतौ च चुरा० उभ० सक० सेट्। वाजयति
वज्र पुंन० वज-रन्। १हीरके २इन्द्रास्त्रभेदे च। तच्च
दधीचिसन्धस्थितो ज्ञातम् भाग०६।११०अ०उक्तम् २वालके
३धान्याम् न०मेदि० ४काङ्क्षिके जटा० ५वज्रयुध्ये शब्दर०।
६लोहभेदे ७अस्त्रभेदे न०भावप्र०ज्योतिषोक्ते विष्कुम्भादिषु
सप्तविंशतौ योगेषु, मध्ये पञ्चदशे योगभेदे च न०।
८कोकिलाक्षवृक्षे १०श्वेतकुशे पु०राजनि०। ११श्रीकृष्णस्य
प्रपौत्रे यदुवंश्ये नृपभेदे च पु० भाग०। १२सेन्धवखण्डवृक्षे
भावप्र०। हीरकवज्रलक्षणादि ह० म० ८०अ० उक्तं यथा
"रत्नानि वज्राद्दैत्यादृदधीचितोऽन्ये वदन्ति जातानि।
केचिद्भुवः स्वभावाद् वैचित्र्यं प्राह्यरूपवानाम्।
इत्युपक्रमे।"
"वेणातटे विपुलं शिरीषकुसुमोपमं च कौशलकम्।
सौराष्ट्रकमातामं क्षण्णं सौपारकं वज्रम्। कैलासं
हिमवति मतङ्गजं वज्रपुष्पसङ्काशम्। आम्रोतं च
कचिद्धे श्यामं पौण्ड्रेषु कम्बूतम्। ऐन्द्रं इन्द्रस्य
शुक्लं वाग्मं सर्वोत्कृष्टमधिकं च। कदलीकाण्डनिकाशं
वैण्यवमिति सर्वसंस्थानम्। वारुणमवलाशुक्लापमं भवेत्
क्षत्रियकारपुष्पनिभम्। ब्रह्मकाटकसंस्थानं व्याघ्रास्थिनिभं
च क्षौद्रभुजम्। वायव्यं च यवोधमगोकुसुमप्रभं
मसृष्टिम्। स्रोतः स्वनिः प्रकीर्णकमिलाकारसंस्था-
स्त्रिविधः। रक्तं पीतं च शुभं राजन्यानां सितं
द्विजातीनाम्। वैरोचं वैश्यानां शूद्राणां शस्त्रतेऽपि-
निभम्। सितसर्षपाष्टकं तण्डुलो भवेत्षण्डुलैस्तु
विंशत्या। हे वज्रे मूल्यं द्विहतमूनिते चैतत्। पाद-
त्रयं मार्धोनं त्रिभागपञ्चांशषोडशांशाश्च। भागश्च पञ्च-
विंशः शतिकः साष्टशिक्यश्चेति। सर्वद्रव्याभेद्यं वज्र-
मस्ति तरति रश्मिवत् स्निग्धम्। तडिदनलशक्रचापोपमं
च वज्रं स्थितायोक्तम्। काकपदमक्षिकाकेशधातुवृक्षानि
शर्करावित्रम्। दिगुणाश्चि दिग्धकलुषलक्षविभीषणानि
न शुभानि। यानि च बुद्बुदस्थितास्थिचिपिटवासो-
फलप्रदीर्णानि च। सर्वेषां चैतेषां मूल्याङ्गागोऽष्टमो
हानिः। वज्रं न किञ्चिदपि धारयितव्यमेकं सुवाह्नि-
नीभिरबलाभिरुक्तम् तज्ज्ञाः। ब्रह्मकाटकस्थिपुटधान्यक-
वस्त्रस्थितं यच्छ्रोणीनिभं च शुभदं तनयार्थिनीनाम्।
खजनविभवजीवितक्षयं जनयति वज्रमनिष्टलक्षणम्।
अशनिविषभयारिनाशनं शुभसुखभोगकरं च भूभृताम्।"
क्षीरकोत्पत्त्यादि गारुडे ६८अ० उक्तं यथा
"तस्मा(वज्रस्था)स्थिशेषो निपपात तेषु भुवः प्रदेशेषु कथ-
ञ्चिदेव। वज्रादि वज्रायुधनिर्जिगीषोर्भवन्ति नाना-
कृतिमन्ति तेषु। कैलासतङ्गसौराष्ट्राः पौण्ड्रकाश्चिङ्ग-
कोशलाः। वेणातटाः सह्यवीरा वज्रक्षाद्याविधाकराः।
श्यामा हिमप्रैवजाश्च शशिभा वेणातटीयाः स्मृताः
सौवीरे तविताजमेघसदृशास्तामाश्च सौराष्ट्रजाः।
काश्चिक्याः कनकावदातरुचिराः पीतप्रभाः कोशले
श्यामाः पुण्ड्रभवा मतङ्गविषये नाम्नापीतप्रभाः।
वज्रं सप्तवर्णतश्च गुणवत् पार्श्वेषु सम्यक् समं रेखा-
विन्दुकलङ्कदोषकलुषादिभिर्वर्जितम्। लोकेऽस्मिन्
परमाणुमात्रमपि यत् वज्रं क्वचिद्दृश्यते तस्मिन्
देव! समाश्रयो ह्यवितथस्तीक्ष्णाग्रधारं यदि।
वज्रेषु वर्णसुक्ता देवानामपि परिग्रहः प्रोक्तः।
वर्णेभ्यश्च विभागः कार्यो वर्णाश्रयादेव।। हरित
पीतपिङ्गश्यामाताम्राः स्वभावतो रुचिराः। हरि-
वरवपुरङ्गतवर्णिहपतिसदृशा स्वभावर्णाः। विप्रक्ष

शङ्खकुसुदस्फटिकावदातः स्यात् क्षत्रियस्य शशबभ्रु विलोचनाभः। वैश्यस्य कालच्छदकोदनसन्निकाशः शूद्रस्य धौतकरवालसमानदीप्तिः। हो वज्रवर्णौ पृथिवीपतीनां सन्धिः प्रतिष्ठौ न तु सार्वजन्यौ। यः स्याच्चवा विद्रुमभङ्गगौरो यो वा हरिद्वारसन्निकाशः। दैवत्वात् सर्ववर्णानां गुणवत् सार्वधिकम्। कामतो धारयेद्राजा नान्योऽन्यत् कथञ्चन। अधरोत्तरदत्त्वा हि याद्रक् स्याद्वर्णसङ्करः। ततः कल्पतरो वज्रो वर्णानां सङ्करो मतः। न च मार्गविभागमात्रत्वा विदुषा वज्रपरिग्रहो विधेयः। गुणवद्गुणसम्पदां विभूतिर्विपरीतो व्यसनोदयस्य हेतुः। एकमपि यस्य सङ्गं विदलितमवलोक्यते विशीर्णं वा। गुणवदपि तद्व्यर्थं वज्रं श्रेयोऽर्थिभिर्भवने। स्फुटिताम्बिशीर्णसङ्करैरं मलवर्णैः दूषतैरुपेतमध्यम्। न हि वज्रभृतोऽपि वज्रमाशु श्रियमन्याश्रवलाभवां न कुर्यात्। यस्यैकदेशः क्षतलाञ्छनाङ्को यदा भवेल्लोहितवर्णचित्रम्। न तच्च कुर्याद्विभवाय भाग्य सच्छन्दरत्नोरपि जीवितानम्। कोटयः पार्श्वानि धारायं सङ्गो हादशेति च। उत्तुङ्गसमतीक्ष्णाग्रा वज्राकारजा गुणाः। षट्कोटिगुणसमं स्फुटतीक्ष्णधारं वर्णान्वितं बहु सुपार्श्वमेत दोषम्। इन्द्रायुधांशुविच्छुरितच्छुरितालरीक्षमेवंविधं भुवि भवेत् दुर्लभं न वज्रम्। तीक्ष्णाग्रं विमलमपैति सर्वदोषं धत्ते यः प्रयततनुः सदैव वज्रम्। हृद्वित्तं प्रतिदिनमेति वावदायुः श्रीस्वस्तत्सुतधनधान्यगो, पशूनाम्। व्याधिव्यालविषव्यथाग्नितस्करास्त्रभयानि च। दूरात्तस्य निवर्त्तन्ते कर्मण्यायवंशानि च। यदि वज्रमपेत सर्वदोषं विभ्रत्यात्तसङ्कविधिं गुरुत्वे। मणिशास्त्रविदो वदन्ति तस्य द्विगुणं रूपकलत्रमग्र्यमूल्यम्। त्रिभागहीनार्द्धतदर्द्धभेदं त्रयोदशं त्रिंशदतोऽर्द्धभागात्। अष्टोत्तरभागोऽथ शतांशभागः सङ्कल्पभागोत्तमसमानवेगः। यत्तच्छुभैर्हादशभिः क्षतस्य वज्रस्य मूल्यं प्रथमं प्रदिष्टम्। द्वाभ्यां क्रमाद्वानिसुपागतस्य त्वेकावसानस्य विनिश्चयोऽयम्। न चापि तच्छुभैरेव वज्राणां धारणक्रमः। षड्भिः सर्वगुणैर्युक्तं वज्रं तरति वारिणि। रत्नवर्गसमस्तोऽपि तस्य धारणमिष्यते। अनेनापि हि दोषेण लक्षालक्षेण दूषितम्। क्रमूल्यात् दशमं भागं वज्रं क्रमन्ति मानवः। प्रकटानेकदोषस्य चलस्य बहुतोऽपि वा। क्रमूल्याच्छतभागोऽपि वज्रस्य न विधीयते। सूक्ष्मदोषसङ्कारे वज्रं यद्यपि दृश्यते। रत्नानां प्रतिबन्धार्थं मूल्यं तस्य भवेद्ध्रुवम्। प्रथमं गुणसम्पदाम्युपेतं प्रतिबद्धं सदुपैति तच्च दोषम्। यत्नमाहरत्नेन तस्य राज्ञो गुणहीनोऽपि मणिर्न भूषणाय। नार्थो वज्रमधार्य्यं गुणवदपि सुतप्रसूतिमिच्छन्त्या। कन्यया दीर्घचिपिटहस्वादुगुणैर्विसङ्गाच्च। कवया पुष्परागेण तथा गोमेदकेन च। वैदूर्यस्फटिकाभ्यान्तु काचैरापि गुणगविधैः। प्रतिरूपाणि कुर्वन्ति वज्रस्य कृतलाञ्छनाः। परीक्षा तेषु कर्त्तव्या विदुषिः सुपरीक्षकैः। क्षारोल्लेखशलाभिस्तैर्वा कार्यं परीक्षणम्। पृथिव्यां यानि रत्नानि वै चान्ये लोहधातवः। सर्वाणि विलिखेद्वज्रं तच्च तैर्न विलिख्यते। गुरुता सर्वरत्नानां गौरवाधारकारणम्। वज्रे तान्यैरीत्येन खुरयः परिक्षयते। जातिभिरजाति विलिखन्ति वज्रकृष्णविन्दाः। वज्रेवैवं विलिखति नान्येन लिख्यते वज्रम्। वज्राणि सङ्गामवयो याच काचन जातयः। न तेषां प्रतिबन्धानां भा भवत्युद्गमिनी। तिर्यक्कृतत्वात् केषाञ्चित् कथञ्चिद्यदि दृश्यते। तिर्यग्भालिख्यमानानां वा पार्श्वेऽपि दृश्यते। यद्यपि विशीर्णकोटिः सविन्दुरेखान्वितो विवर्णो वा। तदपि धनधान्यपुत्रान् करोति सैन्द्रायुधो वज्रः। सौदामिनीविस्फुरिताभिरामं राजा यथोक्तं कुलिशं दधानः। पराक्रमाक्रान्तपरप्रतापः समस्तसामन्तभुवं भुनक्ति। शब्दिद्युम्नो तच्चिवारणहेतुर्यथा "प्रचण्डपवनाघाते मेघेषु क्षतितेषु यः। त्रिःपठेच्चामिनीयोऽग्नि प्राङ्मुखो वाप्युदङ्मुखः। तस्य मा भूद्भयं घोरं विद्युतोयोऽवसीदति या॰त॰ भृतयज्ञपुराणम्। "सनेः कल्याणमित्रस्य जैमिनेरापिकीर्त्तनात्। विद्युदग्निभयं नास्ति पठिते च गृहोदरे"। "लिखिते च गृहोदरे" इति वा पाठः। जैमिनिश्च सुमन्तुश्च वैशम्पायन एव च। पुलस्त्यः पुलहश्चैव पञ्चैते वज्रधारकाः" पुराणम्।

तत्पर्य्यायादि भावप्र॰ उक्तं यथा

"हीरकः पुंसि वज्रोऽस्त्री चन्द्रो मणिवरश्च सः। स तु श्वेतः क्षतो विप्रो लोहितः क्षत्रियः स्मृतः। पीतो वैश्योऽसितः शूद्रश्चतुर्वर्णोऽकथ सः। रसायने मतो विप्रः सर्वसिद्धिप्रदायकः। क्षत्रियो व्याधिविध्वंसी शस्त्रास्त्रहरः स्मृतः। वैश्यो धनप्रदः प्रोक्त

क्षया रेचस्य दार्ढ्यतः। मूले नाशयति व्याधीन् वयः स्तम्भं करोति च। पुंस्त्वमुद्वाजीकृत्य क्षयपीयानि क्षयेत्। सुस्नाः फलसंपूर्णास्तेलोवृक्षा दृढत्वराः। पुरुषास्ते समाख्याता रेखाबिन्दुविवर्जिताः। रेखाबिन्दु समायुक्ताः षड्भास्ते स्त्रियः स्मृताः।" षड्भाः षट्कोणाः। "स्निग्धोच्चाः सुदीर्घास्ते विज्ञेयाश्च नपुंसकाः। तेषु स्युः पुरुषाः श्रेष्ठा रत्नवस्त्रनकारिणः। स्त्रियः कुर्वन्ति कायस्य कान्तिं स्त्रीणां सुखप्रदाः। नपुंसकास्त्वधीर्याः स्युरकामाः कलवर्जिताः। स्त्रियः स्त्रीभ्यः प्रदातव्याः स्त्रीवं स्त्रीवे प्रयोजयेत्। सर्वेभ्यः सर्वदा देयाः पुरुषाः वीर्यवर्द्धनाः। अयुग्मं कुरुते वज्रं कुरुं पार्श्वव्यथान्वया। पाण्डुतामङ्कुरत्वञ्च तस्मात् संशोध्य धारयेत्।" तच्छोधनविधिर्यथा

"कुलत्थक्वाथपक्वाये दोलायन्त्रे विपाचयेत्। व्याघ्रीकन्दगतं वज्रं त्रिदिनं तदिशुद्धति"। व्याघ्री कण्टकारिका। अन्यः शोधनविधिः। "पटोलाग्निं शुभे वज्रं व्याघ्रीकन्दोदरे क्षिपेत्। माहिषीविजया क्षिप्ता कारीषाग्नौ विपाचयेत्॥ त्रियामायां चतुर्थीमं यामिन्यन्ते त्वमूनके। शोषयेत्याचयेदेवं शुद्धरात्रेण शुद्धयति।" अथ वज्रस्य मारणविधिः "छिन्नुसैन्धवसंयुक्ते क्षिपेत्काचे कुलत्थजे। तप्तं तप्तं पुनर्वज्रमम्लेनैव त्रिसप्तधा"। अन्योऽस्य मारणप्रकारः "मेषशृङ्गभुजङ्गास्यकूर्मपृष्ठास्थितेतसम्। यावदन्तं वज्रमिहा वज्रीक्षीरेण मेलकम्। कृत्वा तत्क्षण्ये वज्रं म्रियते घृतमेवहि।" अरिष्टस्य वज्रस्य गुणाः "आयुःपुष्टिं बलं वीर्यं वर्णं सौख्यं करोति च। सेवितं सर्वरोगघ्नं कृतं वज्रं न संशयः।" अन्यभेदा तद्गुणाश्च भावप्र० उक्ता यथा

"पुरा बधाय दनुजं वज्रिणा वज्रतां गतम्। विष्णुविष्कम्भसम्भूतं गगने परिवर्तितः। ते गिरेर्घर्षनध्वानाच्छिखरेषु मही गताम्। तेभ्य एव समुत्पन्नं तत्तद्गिरिषु काञ्चनम्। तद्वज्रं वज्रजातत्वादम्लमधुरबोद्भवात्। गगनात् स्खलितं यस्माद्गगनञ्च ततो मतम्। त्रिप्रकारं त्रिगुणवट् गुरुभेदात्तत् खाष्टधा विधम्। क्रमेणैषां सितं रक्तं पीतं कृष्णञ्च वर्णतः। प्रथमस्ते सितस्तारं रक्तं तत्तु रसायने। पीतं क्षेमनि॰ कृष्णन्तु मरणेषु नृपतेरपि च। पिनाकं दर्दुरं नाम वज्रमेति चतुर्विधम्। सुस्निग्धो विनिःक्षिप्तं पिनाकन्दलवस्तुरङ्। आघातादूरुधं तच्च मङ्गल्यप्रदायकम्॥ दर्दुरं स्वस्निनिःक्षिप्तं कुरुते दर्दुरध्वनिम्। गोलकान् वज्रमाहत्या च स्नानूत्पत्तिप्रदायकः। नागन्तु कामवहत्वो फुत्कारं परिमुञ्चति। तद्वज्रितमवज्ञन्तु विदधाति भगन्दरम्। वज्रन्तु वज्रवत्तिष्ठेच्चाम्लो विज्ञातं व्रजेत्। सर्वाश्रेषु वरं वज्रं व्याधिघाङ्कालतूतम्। अम्लोत्तरमेकोल्यं बलसत्त्वं सुखाधिकम्। दक्षिणावर्तिभं श्लक्ष्णसत्त्वमल्पगुरुप्रदम्। अम्लं कषायं मधुरं सुशीतमायुष्करं धातुविवर्द्धनम्। कफात् त्रिदोषं प्रथमेऽकुक्षीक्षोदरपन्थिविबन्धमीष्व। रोगान् हन्ति दृढयति वपुर्वीर्यं वृद्धिं विधत्ते तारुण्यं रमयति यतं योषितां नित्यमेव। दीर्घायुष्मान् जनयति सुतान् विक्रमैः सिंहतुल्यान् श्वयोभीतं हरति यतं सेव्यमानं नृताग्रम्।"

वज्रकण्टक पु॰ वज्रमिव कठिनं कण्टकमस्य। १क्षुद्रोहिण्यां लटा॰। २कोकिलाक्षे राजनि॰। [राजनि॰

वज्रचर्मन् वज्रमिव कठिनं चर्म यस्य। गण्डके खड्गिनि

वज्रतुण्ड पु॰ वज्राकारं तुण्डमस्य। १गण्डीरे २गरुडे त्रिका॰ ३मत्स्ये ४पक्षिणि च राजनि॰।

वज्रदन्त पु॰ वज्रमिव कठिनो दन्तोऽस्य। १शूकरे २मूषके च शब्दमा॰ वज्रदशनादयोऽप्यत्र।

वज्रदुः पु॰ वज्राकारो दुः। क्षुद्रोहिण्यां अमरः। वज्रदुमादयोऽप्यत्र। [वज्रदुमादयोऽप्यत्र।

वज्रधर पु॰ वज्रं धरति धृ-अच्। १इन्द्रे हेमा॰ २मेघेऽपि च

वज्रनिर्घोष पु॰ हृत॰। वज्रस्यनितशब्दादौ तथा॰ वज्रनिर्घोषोऽप्यत्र। [वज्रदुमादयोऽप्यत्र।

वज्रपाणि पु॰ वज्रं पाणौ यस्य। १इन्द्रे २मेघेऽपि च त्रिका॰

वज्रपुट न॰ वज्रमिव कठिनं पुटमस्य। औषधपाचनपात्रभेदे

वज्रपुष्प न॰ वज्रमिव पुष्पम्। तिलपुष्पे अमरः।

वज्रपुष्पा स्त्री वज्रमिव पुष्पं यस्याः। मालतीलतायाम् राजनि॰

वज्रमय त्रि॰ वज्राकृतम् मयट्। अतिकठिने स्त्रियां ङीप्।

वज्रमूली स्त्री वज्रमिव कठिनं मूलमस्याः ङीप्। माषपर्णीम् राजनि॰। [वज्रारुहतायाम् हारा॰।

वज्रवल्ली स्त्री वज्रमिव कठिना वल्ली। (काड़जोड़ा) अस्थिसंहारलतायाम्

वज्रबीजक पु॰ वज्रमिव कठिनं बीजमस्य कप्। सप्तकरञ्जे राजनि॰। [राजनि॰।

वज्रवृक्ष पु॰ वज्रमिव कठिनो वृक्षः। सेहुण्डवृक्षे (सेंहोड़ा)

वज्रा स्त्री वज्र-रक्। १गुडूच्याम् २क्षुद्रशाल्मलौ मेदि॰ ३दुर्गायां देवीभा॰ ४क्षुद्रोहिण्यां स्त्रीवन्नोऽपि मेदि॰।

वज्राक्षति पु० वज्रवद्वाक्षतिरस्य । जिङ्गामूलीयवृक्षे वर्षभेदे ।

वज्राङ्गी स्त्री वज्रमिवाङ्गं यस्याः । गवेधुकाधान्यभेदे (गड़-गड़े) शब्दच० २लताभेदे (झाड़झोड़ा) भावप्र० ।

वज्राग्निगृहुला स्त्री वज्रमिवाग्निं हरन्ती वल्लं यस्याः । कोकिलायां राजनि० । [रत्नं भेदि० ।

वज्रिन् पु० वज्रमस्त्यस्य इनि । १इन्द्रे अमरः २मेघवृक्षे च ।

वञ्चक पुंस्त्री०वञ्च–ण्वुल् । १प्रतारके अमरः स्त्रियां ङीप् २शटवञ्चौ च । ३खले ४प्रतारके च त्रि० मेदि० ।

वञ्चन न० वञ्च–ल्युट् । प्रतारके अन्यथास्थितस्य वस्तुनोऽन्यथारूपेण कथनादिनाऽन्यमोहोत्पादने । युच् । वञ्चनाप्यत्र स्त्री ।

वञ्चुक त्रि० वञ्च–उकञ् । वञ्चनाशीले शब्दर० ।

वञ्जुल पु० वञ्च–उलच् पृषो० चस्य जः । १तिनिशवृक्षे २अशोकवृक्षे अमरः । ३वेतसवृक्षे मेदि० ४खञ्जनपक्षिणि शब्दच० । ५पक्षिभेदे च फक्का० । ६वञ्जुलवृक्षायां स्त्रियां स्त्री हेमच० । ७तत्रे त्रि० वञ्जुलप्रियः ।

वञ्जुलद्रुम पु० वञ्जुलाख्यः द्रुमः । अशोकवृक्षे राजनि० ।

वञ्जुलप्रिय पु०वञ्जुलं तत्रं प्रीणाति प्री–क । वेतसे रत्नमा०

वट वेष्टने भागे च भ्वा०चुरा०उभ०सक०सेट् । वटयति ते । अववटत् त । [अवटतः ।

वट वेष्टने भ्वा० पर० सक०सेट् । वटति । अवटीत् अवाटीत्

वट विभाजने वा चुरा०उभ०पक्षे भ्वा०पर०सक०सेट् इदित् । वण्टयति ते वण्टति । अववण्टत् त अवण्टीत् ।

वट कथने भ्वा० पर० द्विक० सेट् वटा० । वटयति अवाटीत् अवटीत् । अवटतः ।

वट क्षेपे भ्वौ०पर०सक०सेट् इदित् । वण्टति अवण्टीत् ।

वट पु० वट–अच् । १स्वनामख्याते वृक्षे अमरः २शय-निर्मिततनौ च त्रि० । (बैंटे) मेदि० ।

वटवृक्ष वटरूपवत्यत्यच्छे ५।७ पृ० वक्ष्यम् ।

"वटः शीतो गुरुर्ग्राही कफपित्तव्रणापहः । वर्णौ विसर्पदाहघ्नः कषायो योनिदोषजित्" भावप्र० । २वाद्ये हेमच० । ३वपदे ५गोले ६मल्लभेदे (बड़ा) मेदि० ।

वटक पु० वट–कन् । पिष्टकभेदे (बड़ा) भावप्र० क्षुताक्षयशब्दे २।८२पृ० उदाहृतम् ।

वटपत्र पु० वटस्येव पत्रमस्य । १सितालङ्कारे राजनि० । २पाषाणभेदौषधतायां स्त्री ङीप् भावप्र० । "वटपत्री कषायोष्णा योनिरक्तगदापहा" ३तिलुरमाक्षीकृक्षे रत्नमा० टाप् । [त्रि० शब्दर० ।

वटर पुंस्त्री० १कङ्कुटे स्त्रियां ङीष् । २शठे ३चञ्चले ४चोरे

वटी स्त्री वट–अच् गौरा०ङीष् । १रञ्जौ अमरः गोलाकारे (बड़ी) पदार्थे भावप्र० आर्धे क हस्वः । वटिकायाम् "वटिका वर्त्त कथ्यन्ते तत्राम गुटिका वटी । मोदको वटिका पिण्डी गुड़ो वर्त्ति स्त्रयोच्यते । लेह्यवत् साध्यते वस्त्रो गुड़ो वा शर्करादि वा । गुग्गुलुर्वा त्रिफेत्तस्य चूर्णं तन्निर्मिता वटी ।" तत्र वर्त्तिसिद्धे गुड़ादौ । "कुर्यादक्षमिते न कचिद्गुग्गुलुना वटीं" । द्रवेण मधुना वापि गुटिकां कारयेद्बुधः । त्रिगा चतुर्गुणा देया वटीषु द्विगुणो गुड़ः । चूर्णे चूर्णसमः कार्य्यो गुग्गुलु-र्मधु तत्समम् ।" तत्समम् चूर्णसमम् "द्रवं तु द्विगुणं देयं मोदकेषु भिषग्वरैः" । द्रवं द्रवरूपद्रव्यम् । "कर्षप्रमाणं तन्मात्रा वर्त्त इहा प्रयुज्यते" । वर्त्तमिति वर्त्तादेरण्प्र-त्ययान्तम् । नदीवटाख्ये २वृक्षभेदे राजनि० ।

वटु पु० वट–उ । १माणवके २ब्रह्मचारिणि च हेमच० ।

वटुक पु० वट–उक । १बालके शब्दर० २भैरवभेदे च तन्त्रम्

वठ अवस्त्रायकरणे भ्वा० आत्म० सक० सेट् इदित् । वण्ठते अवण्ठिष्ट । [अवठतः ।

वठ स्थाम्न्यं भ्वा०पर०अक०सेट् । वठति । अवाठीत् अवठीत्

वठर पु० वठ–अरन् । १मूर्खे उणादि० २अम्बष्ठे हेमच० ३शठे ४मन्दे च त्रिका० ।

वड विभजने चुरा० उभ० सक० सेट् इदित् । वण्डयति ते अववण्डत् त । [अवण्डिष्ट ।

वड वेष्टने विभाषे च भ्वा० आ० सक० सेट् इदित् । वण्डते

वड आरोहणे सौ० पर० सक० सेट् । वडति अवाडीत् अवडीत् । अवडतः ।

वडभि(भी) स्त्री वडते आरुह्यतेऽत्र वड–अभि वा ङीष् । १शटकूटाख्याम् (सदनि) अमरः २प्रासादाग्रस्थगृहे च (चिलेघर) रत्नमा० ।

वडा स्त्री वड–अच् । स्वनामख्याते पिष्टकभेदे शब्दच० ।

वडिश न० वड–इन् वर्डिं स्यति शो–क । मत्स्यधारणार्थे वक्रलौहकण्टकयुक्ते पदार्थे अमरः । "वडिशेन झषो-रिवाक्षान्" इन्द्रावनचम्पूः ।

वड्र त्रि० वल–रक् लस्य डः । डरति (वड़) अमरः ।

वण शब्दे भ्वा० पर० सक० सेट् । वणति अवाणीत् अव-णीत् । ऋदित् चङि वा हस्वः ।

वण्ट विभाजने अद० चुरा० उभ० सक० सेट् । वण्टयति

ते अवबष्टत् त । [२अक्षतोदाहे च । (डेकरो) अल्पवा०
वष्ट पु० वष्ट-अच् । १भागे २दात्राहे: धारयस्थाने(बाढ)
वष्टक पु० वष्ट-वञ् स्वार्थे क । १भागे अमरः
ख्युन् । २विभाजके त्रि० । [१अक्षतोदाहे च मेदि०।
वष्ठ त्रि० वष-ठ तस्य नेत्वम् । १खर्वे (बेंटे) ।२क्लान्तायुधे
वष्ठर पु० वठि-अरन् । १स्थगिकारज्जौ २कक्कुरबाङ्गुले
३करीरकोषे ४तालस्य पल्लवे ५पयोधरे च मेदि० । अय
औणादिरपि तत्रार्थे ।
वष्ड त्रि० वडि-अच् ।१अक्षतोदाहे २छत्राद्यङ्गविकले (बेँडे)
३अनाहतभेदे हेमच० ४पांशुलायां स्त्रियां स्त्री मेदि० ।
वष्डाल पु० वडि-आलच् । १शूरयुद्धे २नौकायां धनिले
च मेदि० । [आर्षे अव्य० राजवत् शूद्रवत् इत्यादि ।
वत् अव्य० वा-डति । वादश्चे अमरः वतिप्रत्ययान्तोऽव्य-
वत अव्य० वन-क्त । १खेदे २अनुकम्पायाम् ३हर्षे ४वि-
स्मये ५आमन्त्रणे च अमरः ।
वतंस पु० अव+तनस-घञ् अवाङ्नोपः । १कर्णभूषणभेदे
२शेखरे ३शिरोभूषणे मेदि० ४भूषणमात्रे च ।
वतण्ड पु० अव+तडि-अच् अवाङ्नोपः । सन्निभेदे उणादि० ।
वतोका स्त्री अवगतं तोकं यस्याः प्रा०ब०अवाङ्नोपः । अपत्य-
हीनायां स्त्रियाम् अमरः ।
वत्स न० वस-स । १वत्सःस्यते अमरः । २जवादिशिशौ हि-
ङ० । ३तृणरे पु० अमरः । ४चन्द्रवंशे राजभेदे च पु० ।
वत्सक न० वत्स इव दरादर्शे कन् । १पुष्यकामीसे राजनि०
२कुटजे अमरः । ३इन्द्रयवे च राजनि० ।
वत्सकबीज न०वत्सकस्य कुटजस्य बीजम् । इन्द्रयवे राजनि०
वत्सतर पुंस्त्री० क्षुद्रः वत्सः अल्पत्वे तरप् । १क्षुद्रवत्से
अप्राप्तदमनकाले गवादौ अमरः स्त्रियां ङीप् । वत्सतरी
वत्सनाभ पु० वत्सान् पशुशिशून् नभ्यति छिनत्ति नभ-
अच् वत्सस्य नाभिराकारोऽस्यस्य अच् वा । स्थावरे
विषभेदे अमरः । तस्य गुणादि भावप्र० उक्तं यथा
"सिन्धुवारसदृक्पत्रो वत्सनाभ्याकृतिस्तथा । वत्
पार्श्वेन तरोर्द्विर्वत्सनाभः स भाषितः । तस्य सामान्य
गुणा यथा । "विषं प्राणहरं प्रोक्तं व्यापि च विकाशि
च । आग्नेयं वातकफहृद्योगवाहि महावहम् ।
व्यापि सकलकायव्यापनपूर्वकपाकगमनशीलम् । वि-
काशि दोषमलशोषणपूर्वकं सन्धिबन्धशिथिलीकरणशी-
लम् । आग्नेयम् अधिकाग्न्यं दोषवाहि संसर्ग-
सुखप्राहकम् महावहं तमोगुणाधिक्येन बुद्धिविध्व-
सकम् । "तदेव युक्तियुक्तं तु प्राणदायि रसायनम् ।
योगवाहि त्रिदोषघ्नं दंशघं वीर्यवर्द्धनम् । ये दुर्गुणा
विषेऽगदे ते क्षुद्रौषा विशोधनात् । तस्मादिदं प्रयो-
गेषु शोधयित्वा प्रयोजयेत् भावप्र० ।
वत्सपत्तन न० वत्सस्य वत्सराजस्य पत्तनम् । उत्तरदेश-
स्थायां कौशाम्ब्यां नगर्याम् हेमच० ।
वत्सपाल पु० वत्सान् पालयति पाल-अच् । १श्रीकृष्णे
२बलदेवे च । [इभ्यप्रम ।
वत्सर पु० वस-सरन् । द्वादशमासात्मके काले अजादौ
वत्सराज पु०चन्द्रवंश्ये नृपभेदे । "वत्सराजचरितम्" रत्ना०
वत्सरान्तक पु० वत्सरस्यान्तं करोति अन्त+णिच्-ख्युन् ।
फाल्गुनमासे राजनि० वत्सरस्य चैत्रादिकत्वात् फाल्गु-
नस्य तदन्तकालत्वात्तथात्वम् ।
वत्सल त्रि० वत्सं लाति ला-क । १स्नेहयुक्ते २वात्सल्ये
रसे पु० शतदति त्रि० ३विष्णौ पु० विष्णुस० ।
वत्साक्षी स्त्री वत्सस्याक्षीवाक्षि अस्य पक्षमा० । गो-
डुम्बायाम् (गोमक) जटा० ।
वत्सादनी स्त्री वत्सैरद्यते प्रियत्वेन अद-ल्युट् ङीप् ।
१गुडूच्याम् अमरः । वत्सः अदनमस्य । २वृक्षे पुंस्त्वा०
राजनि० स्त्रियां ङीप् । [अवन्दिट ।
वद् हतौ अभिवादने सक० भ्वा० आ० सेट् इदित् । वन्दते
वद् वाक्ये सन्देशे च भ्वा० उभ० सक० सेट् । वदति ते
अवादीत् अवदिष्ट । ज्ञानवत्त्वादावात्मनेपदीत्यन्ये ।
वद् वाचि भ्वा० पर० सक० सेट् यङा० । वदति अवादीत्
उवाद ऊदतुः ऊदिथ ऊदतः ऊदितः ।
भाषने उपसान्त्वने आत्म० आङ्गे वादते भाषमाणो
वदतीत्यर्थः भाष्यानुपवदते सान्त्वयतीत्यर्थः । ज्ञानाद्युपाधौ
च आत्म० । तत्र ज्ञाने आङ्गे वदते । यत्रे क्षेत्रे वदते ।
विभतौ क्षेत्रे विवदन्ते । उपक्रन्दने उपवदते आर्द्रयते
इत्यर्थः सि०कौ० । अन्तरायां सम्भूयोच्चारणे आत्म०
प्रवदन्ते विप्राः । अति+मर्य्यादातिक्रमेऽर्थोक्तौ प०
अतिवदति । अनु+उक्तस्य पश्चादानरेण कथने अनुवादः
अकर्मकात् अन्तरायामनुवादे तु आत्म० अनुवदते कठ-
प्रवक्तस्य सि०कौ० अव्यक्तवाचि तु प० अनुवदति वीप्सा
सकर्मकात्तु पर० उक्तमनुवदति । विरुद्धोक्तौ अन्तरायां
वाचि वा आत्म० विप्रवदन्ते नित्यं वैद्याः । [विशेषविधिः
अप+निन्दायाम् । अपवादः । विशेषविधाने च अपवादः
परि+निन्दायां मिथ्यादुष्टत्वे च पर० । परिवदति परिवादः ।

प्रति+विरुद्धतयोक्तौ परः प्रतिवदति प्रतिवादः प्रतिवादी प्रत्युत्तरोक्तौ च।
वि+विरुद्धोक्तौ पक्षप्रतिपक्षपरिग्रहेणोक्तौ आत्मः विवदन्ते पण्डिताः वादिप्रतिवादिनश्च।

वद वाचि सन्देशे च सक॰ चुरा॰ उभ॰ सेट्। वादयति ते अवीवदत्। अभि+प्रधामे।

वद त्रि॰ वदति वद-अच्। वक्तरि अमरः।

वदन न॰ उद्यतेऽनेन वद-करणे ल्युट्। १मुखे अमरः। २वचनेन्द्रिये भावे ल्युट्। ३वचने न॰। [अमरः।

वदा(द)न्य पु॰ वद-अन्य पृषो॰ वा दीर्घः। भूरिदानशीले

वदाम न॰ वद-आमन्। (बादाम) बाताद फलभेदे भावप्र॰।
"बातादो बातवैरी स्यात्तेलोपमफलत्वचा। बातादः उष्णः स्निग्धो बातघ्नः शुक्रवर्द्धनः। बातादमज्जा मधुरो हृद्यः पित्तनिवापहः। स्निग्धोष्णः कफकृत् श्लेष्मो रक्तपित्तविकारिणाम्" भावप्र॰।

वदाल पुंस्त्री॰ वद-आल। पाठोनमतृणे (बोयाल) त्रिका॰ स्त्रियां ङीष्। स्वार्थे क तत्रार्थे। [अमरः।

वदावद पु॰ अत्यन्तं वदति वद-अच् नि॰। बहुवक्तरि

वधू स्त्री उह्यते पितृगेहात् पतिगृहं वह-ऊ धुकच्।
१भार्यायाम् २नवोढायां ३पुत्रजायायाम् अमरः। ४शठायाञ्च मेदि॰। अस्य ओल्यादित्वमित्यन्ये

वधूजन पु॰ कर्म॰। नारीजने त्रिका॰।

वधूटी स्त्री अल्पा वधूः टी। अल्पवयस्कायाम् नार्याम् "गोपवधूटी इकुलेति" भाषापरि॰। [नीत् अवनीत् अवनतः।

वन सेवने सक॰ शब्दे अक॰ भ्वा॰ पर॰सेट्। वनति अवावन व्यापारे भ्वा॰ पर॰ सक॰ सेट्। वनति अवानीत् अवनीत्। ज्वला॰वनः वानः। घटा॰वनयति। [निघ॰।

वन याचने हिंस॰ तना॰ या॰ सेट् क्वा वेट्। वनुते अववन उपकारे उपतापे च सक॰ शब्दे अक॰ वा चु॰ उभ॰ पक्षे भ्वा॰ पर॰ सेट्। वानयति ते वनति। अवीवनत् त। अवनीत् अवानीत्।

वन न॰ स्त्री वन-अच्। १उदकसदायाञ्चके अरण्ये अमरः स्त्रीत्वे ङीष्। "सुवनी सम्भवदृतुपिकापि का" नैष॰। २जले ३निवासे ४आलये च मेदि॰। ५प्रस्तरचे हेमच॰।

वनकदली स्त्री ७त॰। काण्डकदल्याम् राजनि॰।

वनकन्द पु॰ वनजातः कन्दः। अरण्यजाते शूरणे राजनि॰

वनकार्पासी स्त्री वनोद्भवा कार्पासी। (वनकापास) तूलभेदे रत्नमा॰।

वनकोलि पु॰ वनोद्भवः कोलिः। (वनकुल) वृक्षे।

वनचन्दन न॰ वनजातं चन्दनम् शा॰क॰। १अगुरुचन्दने २देवदारुणि च विश्वः।

वनचन्द्रिका स्त्री वने चन्द्रिकेव। मल्लिकायाम् राजनि॰।

वनचम्पक पु॰ ७त॰। (वनचाँपा) चम्पकभेदे राजनि॰।

वनच्छाग पु॰ वने जातश्छागः। (वनछागल) १छागभेदे राजनि॰। वने छाग इव। २शूकरे पुंस्त्री॰ शब्दमा॰ स्त्रियां ङीष्।

वनज न॰ वने जलेऽरण्ये वा जायते जन-ड। १पद्मे २मुस्तकभेदे ३वनसूरणे पु॰ राजनि॰ ४गजे विश्वः। ५अश्वगन्धायां ६गन्धपत्रायां ७वनकार्पास्यां ८वनोदुम्बर्याम् ९मिश्रेयायां १०ऐन्द्र्यां स्त्री राजनि॰। ११षड्पद्यां च स्त्री मेदि॰। १२वनजातमात्रे त्रि॰।

वनतिक्त पु॰ वनेषु वनजातेषु मध्ये तिक्तः। १हरीतक्याम् शब्दमा॰। २पाठायां (आकनादि) च स्त्री रत्नमा॰। स्वार्थे क तत्रैव अमरः।

वनदीप पु॰ वनस्य दीप इव। वनचम्पके राजनि॰।

वनपल्लव पु॰वनमिव निबिड़ः पल्लवोऽस्य। शोभाञ्जने जटा॰।

वनपुष्पा स्त्री वनमिव बहुलं पुष्पं यस्याः। शतपुष्पायाम् राजनि॰। [पूरकः। वनबीजपूरके राजनि॰।

वनपूरक पु॰ पूरकः बीजपूरकः पूर्वपदलोपः वनोद्भवः

वनप्रिय पुंस्त्री॰ वनं वनस्थं प्रीणाति प्री-क। १कोकिले स्त्री मेदि॰ स्त्रियां योपधत्वात् टाप् २अरण्यप्रियमात्रे त्रि॰। ३तक्षे न॰ राजनि॰।

वनभुज पु॰ वनं भुङ्क्ते भुज-क्विप्। १अग्नौ २तद्धामौषधे शब्दच॰। [अमरः।

वनमक्षिका स्त्री वनोद्भवा मक्षिका। दंशे कीटभेदे (डाँस)

वनमक्षी स्त्री वनोद्भवा मक्षी। अरण्यमक्षिकायाम् शब्दर॰।

वनमाला स्त्री "आजानुलम्बिनी माला सर्वर्तुकुसुमोज्ज्वला। मध्ये स्थूलकदम्बाढ्या वनमालेति कीर्त्तिता" इत्युक्तायां मालायाम्।

वनमालिन् पु॰ वनमालाऽस्यास्ति इनि। १श्रीकृष्णे अमरः २वाराहीलतायाम् स्त्री मेदि॰ ङीष् ३द्वारकापुर्य्यां स्त्री त्रिका॰। [२सुद्गपर्ण्यां स्त्री राजनि॰गौरा॰ ङीष्।

वनमुद्ग पु॰ वनोद्भवः मुद्गः। १मुद्गभेदे (सुगनि) अमरः।

वनमूर्ब्बिजा स्त्री वनस्थ मूर्ब्बिजं मूर्ब्बेव शुक्लमिवास्यास्याः अच्। (काकड़ाशिङ्गी) कर्कटशृङ्ग्याम् राजनि॰।

वनमोचा स्त्री वनोद्भवा मोचा। काण्डकदल्याम् राजनि॰।

वनलक्ष्मी स्त्री वनस्य लक्ष्मीरिव तदधिष्ठानत्वात्। कदम्बाम राजनि०। [राजनि०।

वनवर्वर पु० वनोद्भवः वर्वरः। तृणाजीवे। (वनवाबुर) इति

वनवासिन् पु० वनं वासयति सुरभीकरोति वासि-णिनि। १सल्लकीवृक्षे २वारा(रा)ह्यीकन्दे ३शालूकन्दे ४नीलझिण्टिकन्दे ५कुसुमनामौषधे च राजनि०। वने वसति वस-णिनि। ६वनवासकर्त्तरि त्रि० स्त्रियां ङीप्।

वनवीज पु० बीजो बीजपूरकः उत्तरपदलोपः ७त०। वनबीजपूरे राजनि०। [राजनि०।

वनवृन्ताकी स्त्री वनस्य वृन्ताकी वार्त्ताकी। वृक्षवाम्

वनव्रीहि पु० वनस्य व्रीहिः। नीवारे (चड़िधान) हेमच०।

वनशूकरी स्त्री वनस्य शूकरीव रोमशत्वात्। १कपिकच्छूम् राजनि०। ७त०। २वनवराहे पु०२वनशूकरयोरिति स्त्री।

वनशृङ्गाट पु० वनस्य शृङ्गाट इव कण्टकाढ्यत्वात्। गोक्षुरे अमरः। स्वार्थे क। तत्रैवार्थे। [शब्दच०।

वनशोभन न० वनं जलं शोभयति शुभ-णिच्-ल्यु। पद्मे

वनसङ्कट पु० सम्+कट-घञ् ह्रस्व०। मरुरे शब्दच०।

वनसरोजिनी स्त्री वनस्य सरोजिनी पद्मिनीव शोभाकरत्वात्। वनकार्पासाम् शब्दर०।

वनस्पति पु० वनस्य पतिः नि० सुट्। पुष्पं विना जातफलवत्यां १वृक्षत्वादौ वृक्षे अमरः। २वृक्षमात्रे मेदि०।

वनहास पु० वनस्य हास इव प्रकाशकत्वात्। काशवृक्षे राजनि०।

वनाखु पु० वने आखुरिव। मूषके त्रिका०।

वनाखुक पु० अव+नख-उकञ् अवाङ्लोपः। छुद्रे त्रिका०।

वनाट् पु० वनमटति अट-उन्। १वर्षाकायां नीलमक्षिकायाञ्च शब्दच०। २क्षपानदेशे उणादि०।

वनामल्ल पु० वनस्यामल्ल आमलक इव। करमर्दे शब्दमा०।

वनाम्ल पु० वनस्य आम्ल इव। लोमशाके राजनि०।

वनायु पु० वन-आयुच्। प्रशस्तघोटकोद्भवदेशभेदे (आरब) राजनि०। [(आरबि) शब्दर०।

वनायुज पु० वनायुदेशे जायते जन-ड। प्रशस्तघोटके

वनारिष्टा स्त्री वनस्य न रिष्टं यस्याः। वनकरिहायाम् राजनि०। [गुडूचीलतायाम् हारा०।

वनालिका स्त्री वनमलति भूषयति अल-ण्वुल्। कस्तूरिकायाम् राजनि०।

वनि पु० वन-इन्। १चम्मो त्रि०को० २रागौ उणादि०। ३याचने पु० ४याचके त्रि०। [रक्तायां स्त्रियाञ्च मेदि०।

वनिता स्त्री वन-याचने कर्मणि क्त-इट्। १योषिति २अनुवनिन् पु०वनम् आश्रयतयाऽस्यास्ति इनि। वानप्रस्थाश्रमयुक्ते

वनिष्णु त्रि० वन-ष्णुच्। याचके।

वनीपक वनीयक+पृषो० यस्य पः। याचके उणादि०। "अपश्यत्स वनीपकोपसेवितपर्वतः क्षेमात्" रघुश्च

वनीयक स्त्री वन-इन् आत्मनो वनिं याचनमिच्छति क्यच् ण्वुल्। याचके अमरः पृषो० यलोपः। वनीकोऽप्यत्र सारसुन्दरी।

वनेचुद्रा स्त्री ७त० अलुक्स०। करञ्जे रत्नमा०।

वनेचर त्रि० वने चरति चर-ट अलुक्स०। वनगतचारिणि व्याधादौ स्त्रियां ङीप्।

वनेसर्ज पु० सृजति-सृज-घञ् ७त० अलुक्स०। असनवृक्षे रत्नमा०। [कार्पासाम् रत्नमा० २वनजाते त्रि०।

वनोद्भवा स्त्री वन एव उद्भवति उद्+भू-घञ् ७त०। १वनवनीकस् पु० वनमेव ओकः स्थानं यस्य। १वानरे अमरः। २वनवासिनि त्रि०।

वन्च प्रतारणे भ्वा०पर०सक०सेट् छा० वेट्। वञ्चति अवञ्चीत्

वन्दन न० वदि-ल्युट्। १स्तवने २प्रणामे च। युच्। वन्दनाद्यत्र स्त्री। १यदने न० शब्दच०।

वन्दनीय त्रि० वदि-अनीयर्। १नमनीये २स्तवनीये च ३पीतशुक्लराजे पु०राजनि०।४गोरोचनायां स्त्री त्रिका०।

वन्दा स्त्री वदि-कर्मणि घञ्। (परगाछा) लताभेदे अमरः २भिक्षुक्यां ३लताभेदे च मेदि०।

वन्दाका स्त्री वदि-आकन्। वन्दायाम् वृद्धच०। गौरा० ङीप् तलार्थे स्त्री शब्दर०। तलार्थे पु० भावप्र० "वन्दाकः स्यादिमश्चित्रः कषायो मधुरो रसे। वातघ्नः कफपित्तास्रशोथव्रणविषापहः"।

वन्दारु त्रि० वदि-आरु। वन्दनशीले शब्दर०।

वन्दि(न्दी) स्त्री वदि-इन् वा ङीप्। १कारावन्दमतृत्यादौ (कएदी) शब्दर०२वन्दने ३स्तुतौ च।४शोपानके उणा०।

वन्दिग्राह पु० वन्दिभिः-गृह्णाति ग्रह-क। वन्दावद्भिर्न धार्यते (डाकाइत) भिता०। "वन्दिग्राहांस्तथा वाणिक्कुसीदाञ्च कारिषेः" मनुः।

वन्दिपाठ पु० ६त०। स्तुतिपत्रे त्रिका०।

वन्दिन् पु० वन्दते स्तौति वदि-णिनि। राजादेः १स्तुतिपाठके अमरः। [भावप्र० २वन्दायां शब्दच०।

वन्द्य त्रि० वदि यत्। १वन्दनीये। २गोरोचनायाम् स्त्री

वन्द्र न० वन्द-रन्। कल्याणे त्रि०को०।२पूजके त्रि०उणादि०

वन्य न० वने भवः यत्। १तृणे (दारचिनि) राजनि०।

२वनस्थूरके २खाराङ्कीकन्दे ४देवनले पु०राजनि०। ५वनजातमात्रे त्रि०। ६सङ्घपर्णां ७गोपालकर्कट्यां टगुञ्चायां ८सिध्रेयायां १०भद्रमुस्तायां ११नद्यपत्यायां स्त्री राजनि०। वनानामरण्यानां जलानां वा समूहः यत्। १२जलसमूहे १३वनसमूहे च स्त्री मेदि०।

वप बीजवपने तन्तुवयने सेचने च सक० भ्वा० उभ० सनिट् यजा०। वपति ते अवाप्सीत् अवप्त अवाप अवप्तुः। क्विप् अग्निमः। पित्रादिपिण्डदाने "पिण्डनिर्वपनं चरेत्" स्मृतिः।

वपन न० वप-ल्युट्। १केशसेचने २बीजाधाने ३तन्त्राधाने च मेदि०। "प्रयागे भास्करक्षेत्रे पितृभाद्रविवोगतः। आधाने सोमपाने च वपनं पञ्चसु स्मृतम्" प्रा० त०।

वपनी स्त्री उप्यतेऽनया अत्र वा वप-ल्युट् ङीप्। १नापितास्त्रे २तन्तुवायानां (तान्तवर) क्षेमच० ३तन्तुवयनयन्त्रभेदे (माकु) च।

वपा स्त्री वप-क्विप्। १मेदसि (चरबि) "वपाया हविषः" इति श्रुतिः। २छिद्रे च अमरः।

वपुन पु० वप-उनच्। देवतायां शब्दर०।

वपुषा स्त्री वप-वा उषन्। हरिद्रायाम् भावप्र०।

वपुष्टमा स्त्री अतिशयेन वपुः प्रशस्यावृत्तिः तमप् इत्वम्। १पद्मचारिण्याम् लतायाम् जटा०। २काशीपतिकन्यायां अन्नपूर्णाजयपत्न्यां च।

वपुस् न० उप्यन्ते देहान्तरभोगसाधनबीजीभूतानि कर्माण्यत्र वप-उसि। १शरीरे अमरः। २प्रशस्याकारे च मेदि०।

वप्त पु० वप-तृच्। १जनके २क्षौरिके च मेदि० ३बीजादिवापके त्रि०।

वप्र पुंन० उप्यतेऽत्र रन्। १दुर्गनगरादौ परिखाया उद्धृतमृत्तिकाभूपे अमरः। २क्षेत्रे ३रेखौ ४तटे मेदि०। ५सीसके न० हेमच०। ६जनके ७प्राचीरे पु० विश्वः। ८प्रजापतौ च पु० संक्षिप्तसा०। ९मङ्क्षिकायां स्त्री राजनि०। [२वप्रक्रीडे च संक्षिप्तसा०।

वप्रि पु० वप-रि १क्षेत्रे केदारे त्रि० को०। २दुर्गतौ

वभ्र गतौ भ्वा० पर० सक० सेट्। वभ्रति अवभ्रीत्।

वम उद्गारे भ्वा०पर० सक० सेट्। वमति अवमीत्। क्विप् वमनुः। ज्वला० वमः वामः। वमयति वामयति उपदेशस्य नित्यं हेतुः। फक्वा० वेमतुः ववमतुः। क्वचित् वमित्वा वान्त्वा वान्तः।

वमथु पु० वम-अथुच्। वमने उद्गिरणे अमरकोषः।

वमन न० वम ल्युट्। १मर्दने २छर्दने मेदि० ३वाङ्मतौ विश्वः ४निःसारणे च "स्वर्गाभिध्यन्त्वमनम्" कुमारः। ५अश्वे पु०। ६जलौकायां स्त्री राजनि० गौरा० ङीष्।

वमि स्त्री वम-इन्। १छर्दौ छर्दिशब्दे २६८० पृ० दृश्यम्। २अग्नौ पु० मेदि० ३धूम्रे त्रि० शब्दर०।

वमित पु० वम-क्विच् क्त। छर्दितोद्गारे। [वि(ड्)ध्वम्।

वय गतौ भ्वा० आ० सक० सेट्। वयते अवयिष्ट। अव-

वयस् न० अज-असुन् वीभावः। १विङ्गे २बाल्याद्यवस्थायाम् अमरः "वयोऽतिपातोऽतक्रान्तेति" नैज०। ३यौवने च विश्वः।

वय(यः)स्थ पुंस्त्री० वयसि यौवने तिष्ठति स्था-क खपरे यलि वा विसर्गलोपः। १तरुणे २विभीतक्यां स्त्री अमरः। "वयस्था नागरासङ्गात्" वैद्यकम्। ४श्यामलक्यां ४हरीतक्यां ५सोमवल्ल्यां स्त्री अमरः। ६गुडूच्यां ७वृद्धदारुलतायां टक्काकोल्याम् हलायां स्त्री मेदि०। ९शालमल्यां स्त्री हेमच०। ११क्षीरकाकोल्याम् भावप्र० १२अल्पसपर्णां मत्स्याक्षां १३युवतौ च स्त्री राजनि०।

वयस्य पु० वयसा तुल्यः यत्। १समानवयस्के अमरः। २सख्यां स्त्री अमरः।

वयुन न० वय-उनन्। १ज्ञाने भाग० १०।८० श्रीधरः। २देवागारे त्रिका०। देवागारे पु० उणादि०।

वयोधस् पु० वयो यौवनं धत्ते धा-असुन्। तरुणे उणा०।

वयोरङ्ग न० वयसा रङ्गमिव। शीसके राजनि०।

वर ईप्सौ चुरु० उभ०सक०सेट्। वरयति ते अवीवरत् त।

वर न०त्रियते इ-कर्मणि अप् वरि-अच् वा। १कुङ्कुमे २अनाभीष्टे अमरः "वरं प्राणान् परित्यज्य" इति तन्त्रम्। भावे अप् अच् वा। ३इच्छायाम् ४याचने ५आवरणे ६वेष्टने च। इ-कर्मणि अप्। ७अभीष्टे दक्षे च त्रि० अमरः। ८जारे १०जामातरि शब्दर० ११गुग्गुलौ शब्दच० १२पत्यौ च पु० हेमच०। "तपोभिरिप्यते वस्तु देवेभ्यः स वरोमतः" इत्युक्ते १३श्रेष्ठे।

वरक पु० इ-कन्। १वनसङ्के हेमच० २पर्पटे ३खण्डधान्यभेदे (चीना) च राजनि०। ४पोताख्यादनवस्त्रे न० शब्दर०।

वरचन्दन न० कर्म०। १काश्मीरे २देवदारुणि च मेदि०।

वरट न० इ-अटन्। १कुन्दपुष्पे शब्दर०। २कीटभेदे (बोलता) ३हंसे पुंस्त्री०मेदि०। स्त्रियाम् अजादि० टाप् अमरः।

ङीष् मेदि० ४कुलुत्थबीजे भावप्र० । सा च ५गन्धोल्यां मेदि० ।

वरण न० ड–ल्युट् । कन्यादिदानाय जामात्रादेरभ्यर्थनात्मके १व्यापारभेदे २वेष्टने मेदि० । ऋत्विगादेः क्रियायै नियोगाय ३पूजनादौ ५वृते पुंस्त्री० हारा० । ६प्राकारे ७वरणवृक्षे च । (साँको) ख्याते ८पदार्थे च ९काशीस्थे नदीभेदे स्त्री शब्दर० । वरणशब्दे दृश्यम् ।

वरण्ड पु० ड–अण्डच् (वस्त्रफोड़ा) १मुखरोगभेदे मात्तङ्ग युद्धार्थे २मध्यवेदौ च मेदि० ।

वरण्डक पुंन० ड–अण्डच् संज्ञायां क । १वरण्डशब्दार्थे २वस्त्रे मेदि० । ३भित्तौ हेमच० । ४विशाले ५क्षुद्रपक्षे ६भीते च त्रि० शब्दर० ।

वरण्डालु पु० वरण्ड इवालुः । एरण्डवृक्षे त्रिका० ।

वरतिक्त पु० वरः श्रेष्ठस्तिक्तो रसो यस्य । कटजवृक्षे राजनि० । २पाठायाम् (आकनादि) स्त्री राजनि० स्वार्थे क तत्रैव ।

वरत्रा स्त्री ड–अत्रच् । चर्मिकवल्लरज्जौ अमरः ।

वरत्वच पु० वरा त्वचा यस्य । १निम्बवृक्षे रत्नमा० । २श्रेष्ठत्वगयुते त्रि० ।

वरद त्रि० वरं ददाति दा–क । १अभीष्टदातरि अमरः । २प्रसन्ने च मेदि० शतच्छिङ्कटके कृत्यादिविनाशरूपे रुद्रभेदे न० "अभयं वरदद्वैवं श्यामाध्यानम् । ४कन्यायाम् स्त्री मेदि० । ५अश्वगन्धायाम् स्त्री भावप्र० ६त्यादिलक्षणायां स्त्री राजनि० ७दुर्गायाञ्च स्त्री ।

वरदाचतुर्थी स्त्री माघशुक्लचतुर्थ्याम् । तामधिकृत्य "चतुर्थी वरदा नाम तस्यां गौरी तु पूजिता" तिथितः भविष्यपु० ।

वरदातु पु० दा–तुन् (तृच्) । मूषीकवृक्षे राजनि० ।

वरपर्ण पु० वराणि पर्णान्यस्य । क्षीरकाकोलीवृक्षे रत्नमा० ।

वरप्रदा स्त्री वरं प्रददाति दा–क । लोपामुद्रायां हेमच० । २वरप्रदातरि त्रि० ।

वरफल पु० वरं फलमस्य । १नारिकेलवृक्षे शब्दच० । कर्म० । २श्रेष्ठे फले न० । [द्रव्ये शब्दच० ।

वरमुखी स्त्री वरं मुखं यस्याः ङीष् । रेणुकानामगन्ध-

वरम् अव्य० ड–अरु । दैवदोषे मेदि० ।

वरम्बरा स्त्री वरं वृणोति वृ–खच् मुम् । (चाकुड़िया) १चक्रपर्ण्याम् शब्दच० । २पतिम्बरायां कन्यावाच्च ।

वररुचि त्रि० वरा रुचिर्यस्य । १श्रेष्ठप्रीतियुते । २पाणिनि-सूत्रवार्त्तिककारे कात्यायनसूनौ त्रिका० । ३विक्रमादित्य-सभास्थे पण्डितभेदे च । नवरत्नशब्दे १९९२पृ० दृश्यम् ।

वरल पु० ड–अलच् । १वरटे त्रिका० २कीटभेदे शब्दमा० स्त्रियां गौरा० ङीष् वरटायां स्त्री जटा० अजा० टाप् ।

वरलब्ध पु० वरः उत्कर्षः इष्येषु लब्धो येन परनि० । १चम्पके त्रिका० २प्राप्तवरे त्रि० ।

वरवर्णिनी स्त्री वरः श्रेष्ठो वर्णः प्रशंसाऽस्त्यस्याः इनि । उत्तमस्त्रियाम् अमरः । २खाद्यायां ३हरिद्रायां ४रोचनायां ५फलिन्यां ६साध्व्यां स्त्रियां मेदि० । ७गौर्यां ८लक्ष्म्यां ९पार्वत्यां च शब्दर० ।

वरवाल्लोक न० कर्म० । कङ्कुमे अमरः ।

वरा स्त्री ड–अच् । हरितक्यामलकीवयस्यारूपे फलत्रिके मेदि० । २रेणुकानामगन्धद्रव्ये शब्दच० । ३गुडूच्याम् ४मेदायां ५ब्राह्म्याम् ६विदार्याम् ७पाठायाम् ८हरिद्रायाञ्च राजनि० ।

वराक पु० ड–वाकन् । १शिवे मेदि० । २युद्धे न० हेमच० । ३वरे त्रि० शब्दर० । ४शोचनीये च त्रि० मेदि० स्त्रियां ङीष् ।

वराङ्ग न० कर्म० । १मस्तके । व्रियते आव्रियते गुप्यते ड–अण् । २गुह्ये अमरः । ३योनौ ४गुडत्वचि च त्रिका० । ५वे० । ६गजे पुंस्त्री० त्रिका० स्त्रियां ङीष् ७विष्णौ विष्णुस० । ८कामदेवे च पु० । प्रशस्ताङ्गयुक्ते त्रि० । ९हरिद्रायाम् स्त्री राजनि० । गौरा० ङीष् । संज्ञायां कन् । गुडत्वचि (दारुचिनि) न० अमरः ।

वराङ्गिन् पु० वराङ्गमस्त्यस्य इनि । १अश्वत्थवृक्षे रत्नमा० । २श्रेष्ठाङ्गयुते त्रि० स्त्रियां ङीप् ।

वराट पु० वरमलमटति अट–अण् । १कपर्दे राजनि० । २रज्जौ च पु० रत्नको० । स्वार्थे क । तत्रार्थे "वराटकानां दशकद्वयं यत्" लीला० अट–एषुल् । वराटक पद्मबीजाधारे कोशे पु० अमरः । [शब्दमा० ।

वराटकरजस् पु० वराटकस्येव रजोऽस्त्र । नागकेशरे वृक्षे

वराण पु० ड–आनन् । १इन्द्रे त्रिका० २वरणवृक्षे शब्दर०

वरादन न० वरैर्न्द्रैरश्यते अद–ल्युट् । राजादने (पियाशाल) शब्दच० ।

वरास्त्र पु० वरः श्रेष्ठमस्त्र इव । करमर्दे रत्नमा० ।

वरारोह पु० वरं वरारोहो मध्यं यस्य । १हस्तिनि शब्दर० २प्रशस्तनितम्बवत्यां स्त्रियां स्त्री अमरः ।

वरालिका स्त्री वरानामालिर्यस्यां कप् । दुर्गायां त्रिका० ।

वराग्नि पु० वरमावरणमश्नुते अश–इनि । स्नुववृक्षे अमरः ।

वरासन न० वराय वरणीयायास्यते क्षिप्यते अस-ल्युट्। १जवापुष्पे शब्दमा०। कर्म०। २उत्तमे आसने न०। वरं पतिमश्नुते अश-क्विप्। ३शिङ्गे जारे पु०। वरान् श्रेष्ठानपि अश्नुते दूरीकरोति ल्यु। ४द्वारपाले च पु० विश्वः। [२खड्गधरे च धरणिः।

वरासि पु० वरायावरणायास्यते अस-इन्। १स्थूलवस्त्रे

वराह पुस्त्री० वराय अभीष्टाय सस्यादिलाभाय आहन्ति खनति भूमिम् आ+हन-ड। १शूकरे अमरः स्त्रियां ङीष्। २यज्ञवराहाख्ये भगवतोऽवतारभेदे पु० ३पर्वतभेदे ४सप्तसे ५मानभेदे मेदि०। ६शिशुमारे ७वाराहीकन्दे पु० राजनि० ८अष्टादशद्वीपमध्ये द्वीपभेदे च।

"गन्धर्वो वरुणः सौम्यो वराहः कङ्क एव च। कुलुटश्च कसेरुश्च नागो भङ्गारकस्तथा। चन्द्रेन्द्र मनवः शङ्ख यवाङ्कुश गभस्तिमान्। ताम्राङ्कुश कुमारी च तत्र द्वीपा दशाष्टभिः" शब्दमा०।

वराहकन्द पु० वराहप्रियः कन्दः श०त०। खनामख्याते द्रव्यभेदे राजनि०। [शब्दर०।

वराहकान्ता स्त्री वराहाणां कान्ताऽभीष्टा। वराहकन्दे

वराहक्रान्ता स्त्री वराहेण क्रान्तेव। १लज्जालुलतायाम् शब्दच० २वाराह्यां (चामराल्) शुभूतिः।

वराहिका स्त्री वराहो भक्षकत्वेनास्त्यस्याः ठन्। कपिकच्छ्वाम् राजनि०।

वाराही स्त्री वराहो भक्षकत्वेनास्त्यस्या अच् गौरा० ङीष्। १भद्रमुस्तायाम् २वराहकन्दे च राजनि०।

वरिवस् न० वृ+वसुन् रुट् च। १पूजने २धने च निघण्टुः।

वरिवसि(स्य)त त्रि० वरिवः पूजनं करोति क्यच्-क्त वा यलोपः। पूजिते अमरः। [२शुश्रूषायाम् अमरः।

वरिवस्या स्त्री वरिवस्+क्यार्थे क्यच्-भावे अ। १पूजने

वरिष्ठ त्रि० अतिशयेन उरुः वृ+इष्ठन् वरादेशः। १उत्तमे २तिलशिरिविल्वे पुंस्त्री० स्त्रियां ङीष् ३नागरङ्गवृक्षे पु०राजनि०। ४ताम्रे न० अमरः। ५मरिचे न० मेदि० ६वसुषे अजयः। ७आदित्यभक्तायां स्त्री राजनि०।

वरी स्त्री वरी शतावरी पृषोदरादयः। १शतावर्याम् अमरः २सूर्यपत्न्याञ्च त्रिका०।

वरीयस् त्रि० अतिशयेन उरुः ईयसुन् वरादेशः। १उत्तमे विल्वस्थादिषु मध्ये २अष्टादशे योगभेदे पु० ज्यो०त०। [द्रव्ये अमरः।

वरी(री)वर्द्ध पु० वृध-वर्द्-कुक् रुच् पृषो० रस्य वा वः।

वरुट पुस्त्री० म्लेच्छजातिविशेषे स्त्रियां ङीष्। "पुलिन्दा बाह्लिका निष्काः शबरा वरुटा भटाः। माद्राः भिल्लाः किराताश्च सर्वेऽपि म्लेच्छजातयः" हेमच०।

वरुड पु० वृ-उडन्। अन्त्यजजातिभेदे स्त्रियां ङीष्। "रजकस्वर्णकारश्च नटोवरुड एव च" मनुः।

वरुण पु० वृ-उनन्। पश्चिमाशाप्रतौ १जलेशे खनामख्याते देवभेदे अमरः। २जले मेदि० ३सूर्ये च विश्वः। ४द्वीपभेदे वराहशब्दे द्रष्टव्यम्। ५काशीस्थे नदीभेदे स्त्री। काशीस्थनदीभेदस्योत्पत्त्यादिकं वामनपु० ३४ अङ्के यथा "प्रयागे वसते नित्यं योगगायी तु विश्रुतः। चरणाङ्गिणान्तस्थ विनिर्यातो सरिद्वरा। विश्रुता वरु(र)णेत्येवं सर्वपापहरा शुभा। सप्तात् पादात् द्वितीया च वरिरित्येव विश्रुता। ते उभे च सरित्श्रेष्ठे लोकपूज्ये बभूवतुः। तयोर्मध्ये तु यो देशस्तृचेलं योगगामिनः। त्रैलोक्यप्रभवं तीर्थं सर्वपापप्रमोचनम्। न तादृशोऽस्ति गगने न भूम्यां न रसातले। तत्रास्ति नगरी पुण्या ख्याता वाराणसी शुभा"।

७खनामख्यातद्रव्यभेदे पु०अमरः "वरुणः पित्तलो भेदी श्लेष्मकृच्छ्वासमारुतान्। निहन्ति गुल्मवातार्श क्रिमीन्दोषोऽग्निदीपनः। कषायो मधुरस्तिक्तः कटुको रूक्षको लघुः" भावप्र०।

वरुणात्मजा स्त्री वरुणस्य जलस्यात्मजेव जन्यत्वात्। जलभवे मद्ये अमरः। [पत्न्याम् जटा०।

वरुणानी स्त्री वरुणस्य पत्नी ङीष् आनुक् च। वरुण-

वरुत्र न० वृ-उत्र। उत्तरीयवस्त्रे त्रि० को०

वरूथ न० वृ-अथन्। तनुत्राणे हेमच० २चर्मणि मेदि०। ३वसुस्थिरस्थाने परप्रहाररक्षार्थमाहते स्थाने पु०अमरः।

वरूथिनी स्त्री वरूथोऽस्त्यस्याः इनि। सेनायाम् अमरः।

वरेण्य न० वृ-एन्य। १कङ्कुभे राजनि० २प्रधाने ३प्रार्थनीये च त्रि० अमरः। [वरेन्द्र विप्रभेदे।

वरेन्द्री स्त्री गौड़देशे त्रिका०। साभिजनोऽस्त्र अण्।

वरोट न० वराणां टानि दलान्यस्य। मरुवकपुष्पे अमरः।

वरोल पुंस्त्री०वृ-ओलच्। वरटे कीटभेदे त्रिका०। स्त्रियां ङीष्

वर्कर पु० वृक-अरन्। १तरुणपशौ अमरः २मेषशावके भरतः ३छागमात्रे पुंस्त्री०स्त्रियां ङीष् ४परिव्राजके मेदि०

वर्ग पु० वृज-घञ्। १सजातीयसमूहे अमरः। यथा मनुष्यवर्गः पशुवर्गः। समानधर्मभिः प्राग्यप्राप्तिभिः कृते २संघे च यथा कवर्गः चवर्गः। अत्र कत्वत्वादिना

विजातीयत्वेऽपि स्थानसाम्यमस्ति । २अन्यपरिच्छेदे यथा स्वर्गवर्गः पातालवर्गः । ३अङ्कशास्त्रोक्ते समानाङ्कसमूहे परस्परगुणने यथा द्विकस्य चत्वारि, त्रिकस्य नव, चतुष्कस्य षोड़श इत्यादि । "स्याद्योऽन्यवर्गे" "वर्गे मूलं पदं कृतिम्" इति च कोशः। हृज-घञ् ।५त्यागे । अन्यपरिच्छेदाश्च बहुविधाः यथा "वर्गोवर्गपरिच्छेदोद्धाताध्यायाङ्कसंग्रहाः। उच्छ्रायः परिवर्त्तश्च पटनः काण्डसञ्चियाम्। स्थानं प्रकरणं पर्यायोऽधिकञ्च पन्थसञ्चयः" त्रिका०।

वर्गप्रकृति बीजगणितोक्ते गणनाप्रकारभेदे तत्र दृश्यम् ।

वर्गमूल न० वर्गस्य समद्विघातात्मकराशेः मूलम् । अङ्कशास्त्रप्रसिद्धं समाङ्कवर्गेण कृताङ्कसङ्ख्यायाः यन्मूलं ज्ञातसाधनं तत्र । यथा षोड़शानां चत्वारि नवानां त्रयः चतुर्णां द्वौ इत्यादि ।

वर्गोत्तम पु० वर्गेषु षट्सु खेटादिषु उत्तमः नवांशः । "चराणां प्रथमे चांशे स्थिराणां पञ्चमे तथा । ह्रास्वकानाञ्च नवमे वर्गोत्तम इति स्मृतः" इति ज्योतिषोक्ते त्रिंशांशकालकरायेनवांशभेदे ।

वर्च दीप्तौ भ्वा० आत्म० अक० सेट् । वर्चते अवर्चिष्ट ।

वर्चस् न० वर्च-असुन् । १रूपे २शुक्रे ३तेजसि ४विद्यायाञ्च मेदि० ५चन्द्रपुत्रे पु० "रोहिण्यामभवद्बुधो वर्चसो येन चन्द्रमा" भट्टिपु० । स्वार्थे क । विद्यायाम् अमरः ।

वर्चस्विन् त्रि० वर्चस्+अस्त्यर्थे विनि । तेजस्विनि स्त्रियां ङीप् ।

वर्जन न० हृज ल्युट् । १त्यागे २हिंसायां च ३सारथे मेदि०

वर्ज्य स्तुतौ विस्तारे शुक्रादिवर्णकरणे उद्योगे दीपने च अदु० चु० उभ० सक० सेट् । वर्णयति ते अवर्णयत् त ।

वर्ण वर्णने चु० उभ० सक०सेट् । वर्णयति ते अववर्णत् त ।

वर्ण न० वर्ण-अच् ।१कुङ्कुमे न०२स्तवे ३स्तुतौ ४शुक्रादिरूपे ५अकारादावक्षरे ६भेदे ७गीतक्रमे ८चित्रके ९ताम्रभेदे १०अङ्कुरागे पु० हेमच० । ११गजचित्रकम्बले पु० अमरः १२यशसि १३गुणे १४स्तुतौ पु०मेदि० । भेदे रूपे अक्षरे पु० न० मेदि० । १५ब्राह्मणादिजातौ पु० अमरः । "चतुर्वर्ण्यं मया सृष्टम्" गीता ।

तत्र विप्रादिवर्णानां सृष्टिः तद्धर्माश्च मनुना उक्ता यथा "लोकानान्तु विवृद्ध्यर्थं मुखबाहूरुपादतः । ब्राह्मणं क्षत्रियं वैश्यं शूद्रञ्च निरवर्त्तयत्" । "मुखबाहूरुपज्जानां पृथक् कर्माण्यकल्पयत् । अध्यापनमध्ययनं यजनं याजनन्तथा" "ब्राह्मणोऽस्य मुखमासीद्बाहूराजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत" यजु० ३१।११ तेषां ब्राह्मणस्य श्रैष्ठ्ये कारणं मनुनोक्तं यथा "ऊर्ध्वनाभेर्मेध्यतरः पुरुषः परिकीर्त्तितः । तस्मान्मेध्यतमं त्वस्य मुखमुक्तं स्वयम्भुवा । उत्तमाङ्गोद्भवात् ज्यैष्ठ्याद् ब्रह्मणश्चैव धारणात् । सर्वस्यैवास्य सर्गस्य धर्मतो ब्राह्मणः प्रभुः" वर्णधर्माश्च जातिधर्मशब्दे २१०५पृ० दृश्याः ।

तत्र अक्षररूपवर्णोत्पत्तिक्रमः तद्भेदाश्च शब्दार्थरत्नेऽस्माभिरुक्ता यथा

"अथ वर्णोत्पत्तिप्रकारस्तावदभिधीयते । चेतनेन ज्ञातार्थविवक्षया तद्बोधकशब्दनिष्पादनाय प्रेरितमन्तःकरणं मूलाधारस्थितमनलं चालयति तच्चालितस्तानलः तत्स्थलस्थानिलचालनाय प्रभवति तच्चालितेन वायुनेन तत्रैव सूक्ष्मरूपेणोत्पादितः शब्दः परा वागित्यभिधीयते । ततोनाभिदेशपर्य्यन्तं चलितेन तेन तद्देशसंयोगादुत्पादितः शब्दः पश्यन्तीति व्यवह्रियते एतद्द्वयस्य सूक्ष्मसूक्ष्मतरतया हृदयोमिमात्रगम्यता नाभ्युद्दीयस्तुतिगोचरता । ततस्तेनैव हृदयदेशं परिसरता हृदयसंयोगेन निष्पादितः शब्दो मध्येत्युच्यते सा च स्वकर्णप्रिधानेन ध्वन्यात्मकतया सूक्ष्मरूपेण कदाचिदाकर्णयितृ स्वमधिगम्या । ततो मुखपर्य्यन्तमागच्छता तेन कण्ठदेशं प्राप्य वायुना मूर्द्धानं तत्प्रतिघातेन परावृत्य च मुखविवरे कण्ठादिषु तत्तदुत्स्थानेषु स्वाभिघातेनोत्पादितः शब्दो वैखरीत्युच्यते । तदुक्तं शिक्षायाम् "आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया । मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् । सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः । वर्णाञ्जनयते तेषां विभागः पञ्चधा मतः । स्पर्शतः कालतः स्थानात् प्रयत्नानुप्रदानतः" इति । संस्कारक्षयेण स्मृतानर्थान् बुद्ध्या बुद्धिस्थान् समेत्य विषयीकृत्यार्थः । तथा । "प्राणापानान्तरे देवी वाग्वै नित्यं हि तिष्ठति । स्थानेषु विकृते वायौ कृतवर्णपरिग्रहा । वैखरी वाक् प्रयोक्तृणां प्राणवृत्तिनिबन्धिनी । केवलं बुद्ध्युपादानाक्रमरूपानुपातिनी । प्राणवृत्तिमनुक्रम्य मध्यमा वाक् प्रवर्त्तते । सविभागा तु पश्यन्ती सर्वतः संहृतक्रमा । सूक्ष्मज्योतिरेवातः परा वागनपायिनी" भारतेऽप्युक्तम् । अत्र प्राणापानान्तरे इत्यधिकरणनिर्द्दे-

शौदाकाश्स्थायिता नित्यमित्यभिधानात् यावत्प्रलय-
मर्थान्स्थायिता प्राणापानादेरपि तत्रैव नित्यत्वाभ्यु-
पगमात्। न तु चक्षिकता मध्ये उत्पत्तिविनाशकल्पने
गौरवात् शब्दार्थयोर्नित्यसम्बन्धस्वीकारादनित्येन शब्देन
नित्यार्थसम्बन्धस्वीकारेऽयुक्तत्वापत्तेश्च। नित्यत्वेऽपि तेषां
व्यञ्जकसङ्गावाभावाभ्यां प्रत्ययाप्रत्ययाविति न्यत्र विस्तरः।
स्थानेषु कण्ठताल्वाद्यवस्थानेषु वायौ मूलाधारस्थे
विवक्षाप्रेरितमनोनियुक्तात्मिर्यत्नोभाहन्यते
इत्यर्थः। क्रमवर्णपरिपाट्या वर्णभावापन्ना, तच्च स्थाने-
ष्विति व्यवच्छिन्नेनान्वितम्। प्राणवृत्तिनिबन्धिनीत्यनेन
प्राणवृत्तेर्वायोरुत्तरदेशपर्यन्तगमनमभिप्रेतं, केवलमित्य-
नेन कण्ठताल्वादिस्थानानपेक्षोभिहिता। बुद्ध्यनु-
दानेत्यनेन हृदयस्थानगमनमुक्तं बुद्धेर्हृदयस्थत्वात्।
सर्वतः संहृतक्रमेत्यनेन हृदेवस्थानगमनानपेक्षोभिहि-
ता। अविभागेत्यनेन मध्यमावा विभागरूपविशे-
षस्य कर्षविधानेनावगमात् पश्यन्त्यास्तु तदव्युदासः।
अनपायिनी स्वस्थानादचलिता प्राणापानान्तरे मूला-
धारस्थितेति यावत्। अतो यथाप्रदर्शितं परादीनां
विभागं प्रतिपादयतीदं मन्त्रशास्त्रीयमवलं विस्तरेण।"
"अभिधातस्थानानि चाष्टविधानि सामान्यतो वेदित-
व्यानि "अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।
जिह्वामूलञ्च दन्ताश्च नासिकोष्ठौ च तालु चेति" शिक्षा
दृष्टेः। वर्णाश्च मतभेदेन त्रिषष्टिश्चतुःषष्टिर्वा शिक्षा-
द्यभिहिता वेदितव्याः। यथा "चतुःषष्टिस्त्रिष-
ष्टिर्वा वर्णाः सप्तशतो मताः। स्वरा विंशतिरेकञ्च
स्पर्शानां पञ्चविंशतिः। यादयश्च मता ह्यष्टौ चत्वा-
रश्च यमाः स्मृताः। अनुस्वारो विसर्गश्च क ँ पौ चापि
पराश्रितौ। ह्रस्वदीर्घप्लुतेति त्रिधेयो ह्रस्वः श्रुत एव
चेति"। तस्यार्थः अ इ उ ऋ ऌ एते स्वा ह्रस्वदीर्घप्लुता:
कालभेदात् द्वादश भेदाः ऋकारस्यैको भेदोऽस्य दीर्घाभावात्
प्लुतस्तूक्तः प्रतिपादितः। एवं चतुर्थी ह्रस्वाभावात्
दीर्घप्लुतभेदेनाष्टौ भेदाः ऋ ऌ एते विंशतिः स्वराः। स्पर्शाः
कादयो मावसानाः पञ्चविंशतिः। यादयो ह्यन्ता
अष्टौ। यमाः वर्गेष्वाद्यानां चतुर्थी पञ्चमे परे मध्ये
पूर्वसदृशाः प्रातिशाख्ये प्रसिद्धाश्चत्वारो वर्णाः। यथा
वाङ्मनौ चक्षुश्रोत्रं। अङ्गिनः। पतिर्घ्नीत्यादौ। अनुस्वारादयश्चत्वारः स्मृताः। क ँ पौ
चापि पराश्रितावित्युक्तिस्तु कयोः परयोरेकविधः
पक्षयोः परयोरन्यविधः कण्ठ्योष्ठ्यत्वभेदादिति ज्ञाप-
नाय। ह्रस्वदीर्घप्लुतेत्यृकारः। "अचोऽस्पृष्टा
यणस्त्वीषदस्पृष्टाः शलस्तथा" इत्यनेन प्रतिपादितस्य
यणादाभिधेयवरत्वो धर्मस्य ईषत्स्पृष्टत्वस्य ऌकारे क्व-
नात् ऌकारस्य स्वरत्वयत्नोभयधर्मसमावेशात् द्विवि-
धता इति त्रिषष्टिभेदाः। ऌकारस्य प्लुतत्वे चतुः-
षष्टिभेदाः। एवं वर्णानां सामान्यतो भेदे बोधिते
एतेषामुत्पत्तिस्थानानि बाह्याभ्यन्तरप्रयत्नभेदाश्च प्रद-
र्श्यन्ते। तत्र स्थानानि "ह्रस्वं पञ्चभिर्मूलमस्त्र-
स्याभिश्च संयुतम्। दीर्घन्तं विजानीयात् कण्ठ्य-
माद्यैरेव संयुतम्। कण्ठ्यावह्राविचेयशास्त्रज्ञा ओष्ठ-
जावपू। मूर्द्धन्या ऋटुरेषा दन्त्या ऌतुलसाः
स्मृताः। जिह्वामूले तु कः प्रोक्तः दन्त्यौष्ठ्यौ वः स्मृतौ
बुधैः। ए ऐ तु कण्ठतालव्यावोकौ कण्ठ्योष्ठजौ
स्मृतौ। अर्द्धमात्रा तु कण्ठ्या आदेकारैकारयोर्भवेत्।
ओकारौकारयोस्तद्वदिति"। "अनुस्वारयमानाञ्च नासिका
स्थानमुच्यते। अयोगवाहा विज्ञेया आश्रयस्थान-
मागिन इति शिक्षालक्षणानि वेदितव्यानि। यद्यपि
सर्वेषां वर्णानामुच्चारणे कण्ठव्यापार आवश्यकत्वेऽपि
चकारादिोच्चारणे तालवादिव्यापारोऽप्यपेक्षित इति तत्रा-
त्मामात्रजन्यत्वेन वर्णानां वैलक्षण्यम्। "जिह्वामूले तु
कः प्रोक्तः" इति पाणिनिशिक्षाभिधानात् कवर्गस्य
कण्ठ्यत्वव्यवहारेषु कण्ठशब्दस्य कण्ठमूलपरतया
मात्र एव तवर्गस्य दन्तमूलीयत्वेन दन्त्यत्ववत् अन्यथा
भग्नदन्तस्य तदनुच्चारापत्तेः। जिह्वामूलीयस्य आश्र-
यस्थानमागिन्त्वेन तदाश्रयस्य कोरपि जिह्वामूलस्थान-
त्वौचित्यात्। दन्तौष्ठ्यौ इत्यादावुभयोरेव प्रत्येकं
वकारस्थानत्वं न तु सकलितयोः तथा सति दन्तौष्ठ्य
इत्येव परिगृह्येत। अतस्तस्य दन्तौष्ठ्योभयकार्यनि-
मित्तता एवमप्यपि द्रष्टव्यम्। यमानां प्रातिशाख्य-
प्रसिद्धानां कादिचतुष्टयानां पूर्वोदितानां यमसंज्ञा-
बोधितानाञ्च नासिकापि स्थानमधिकृत्योपदिश्यते। तत्र
च यमेत्युपलक्षणम्। "अनोऽनुनासिका नद्यौ" इत्युक्त्या
ङकाररञकारभिन्नानामनुनासिका स्थानत्वाभिधानात्
नासामनुगतः स्थानत्वेनेत्यनुनासिकशब्दव्युत्पत्त्या ना-
सिकास्थानत्वप्राप्तेश्च। तत्र नद्यौविति पुनः ङकार-
रकारयोः पर्युदासः। "मुखनासिकावचनोऽनुनासिकः"
इति पा० सूत्रे मुखपदस्य कण्ठादितत्तत्स्थानपरतया

स्थानानुप्रदस्थानत्वम्। ओष्ठयोगद्वा विसर्गौ जिह्वा-मूलीयोपाध्मानीययोरपि विसर्गविशेषरूपत्वेनाभ्यस्थान-भागित्वम्। आभ्यस्थानभागित्वञ्च यस्माच्चित्वे तेषु तत्स्थानभागित्वमतः विसर्गस्य कण्ठ्यो-परयोर्जिह्वामूलीयार्थमाभ्यरोरास्यत्वेन तत्स्थानभागि-त्वात् जिह्वामूलीयरूपान्वितनामता सङ्गच्छेता। एवमो-परयोरोष्ठ्यार्थमाभ्यरोरास्यत्वेनोपध्मानीयता। उच्च एव आध्मायेते अनेन स्थानेनेति व्युत्पत्तेः उपाध्मान शब्द ओष्ठ्यवचनः। ततस्थानयोग्यत्वादन्वितनामता लाभवेता। अतएव "औसद्यां जिह्वामूलीयस्य जिह्वा-मूलसुपाध्मानीयस्योष्ठाविति"क्षम्। यद्यपि सर्वेषां वर्णा-नामाकाशस्थानत्वं करणत्वञ्च कण्ठादीनां तदुत्पत्तौ युक्तं तथापि तेषां स्थानत्वव्यवहारो वर्णाभिव्यञ्जक-तात्वादौ वर्णजनकवायुसंयोगाधारे वर्णोद्धारत्वादौषेण भाक्त एव। ततस्तस्थानेषु जिह्वाद्यादिसम्बन्धेन वर्णोत्प-त्त्या जिह्वाद्यादिस्थिते तत्सम्बन्धजनकप्रयत्नविशेषे चाभ्यन्तरप्रयत्नाख्ये स्पृष्टतादावेव करणत्वव्यवहारः सङ्गच्छित। वर्णाभिव्यञ्जनानन्तरभाविनस्तु बाह्यान्तरव्य-वहारोपयुक्ताः कण्ठविवरविकाशादेराशुवर्णदर्शनाव-च्छिन्नकार्यत्वञ्च जनका बाह्या यत्रा गुणशब्देनोच्यन्ते ह्रस्वादिकं शेखरादौ स्पष्टम्। आभ्यन्तरप्रयत्नास्तु वर्णोत्पत्तेः प्रागभाविनो बाह्यास्तु तदुत्पत्तेः पश्चाद्भाविन इति विवेकः। तथाहि नाभिदेशात् प्रयत्नप्रेरितः प्राणवायुरूर्द्धभागमञ्चन् उरःप्रभृतीनि स्थानान्याहन्ति ध्वन्यादयति च ततो वर्णोत् तदभिव्यञ्जकध्वनींश्च तत्र वर्णोत्पत्तेः प्राक् जिह्वाद्योपाग्रमध्यमूलानि तत्तद्वर्णो-त्पत्तिस्थानं तालुादिकं यदा सम्यक् स्पृशन्ति तदा स्पृष्टता प्रयत्नो यदा ईषत् स्पृशन्ति तदा ईषत्स्पृष्टता समीपावस्थाने संवृतता दूरावस्थाने विवृतता इत्येव-माभ्यन्तरप्रयत्नभेदात् वर्णानां भेदाः। अतएव एव-वर्णत्रयाणां तालव्यत्वाविशेषेऽपि यवर्णोच्चारणे कर्त्तव्ये तालुस्थानेन सह जिह्वाग्रादीनां सम्यक् स्पर्शः, यका-रोच्चारणे तु ईषत् स्पर्शः शकारेकारोच्चारणे दूरसमी-पावस्थानमिति। एतेषां चाभ्यन्तरत्वं ओष्ठप्रभृति-कण्ठौजनककण्ठस्थानपर्यन्तरूपाद्यान्तर्गततत्तत्स्थानेषु जिह्वाग्रादीनां स्पर्शादिचतुष्टयरूपाभ्यन्तरकार्यकारि-त्वात् वर्णोत्पत्त्यव्यवहितपूर्वभावित्वाच्च बोध्यम्। विवारसंवारौ तु गलबिलस्य विकाशाविकाशाभ्यां बाह्यौ प्रयत्नौ विवृतसंवृताभ्यां भिन्नावेव तयोः समीप-दूरावस्थानात्मकत्वादिति विवेचनीयम्। ते च चाभ्य-न्तराः प्रयत्नाः केषां वर्णानाङ्गे इत्येतत्तावदधीयते। कादिमावसानानां स्पृष्टता अतएव तेषां सकलस्पर्श-जनेन स्पर्शपदवाच्यता। यणः ईषत् स्पृष्टता। तेषाञ्च स्पृष्टविवृतयोर्मध्यस्थितत्वेन लौकिकव्यवहारेऽपि अवा-दीनां वर्णोत्पाद्य मध्यस्थितत्वेन वान्तःस्थवर्णत्वम् वान्तः-स्थाभिश्च संयुतमित्युक्तेरन्तःस्थाशब्दः आदृतः। अवसङ्घानां अचाञ्च विवृतता। अवसङ्घानाञ्च उष्मशब्दाभिधेयवायु-प्रधानत्वात् ऊष्मशब्दवाच्यता। अचाञ्च स्वयं राजमान-त्वात् उदात्तादिस्वरवत्त्वाच्च स्वराभिधेयता। "अचः स्वयं विराजन्ते"रित्युक्तेः "उदात्तश्चानुदात्तश्च स्वरितश्च स्वरा-स्त्रयः। ह्रस्वो दीर्घः प्लुतश्चेति कालतो नियमा अचि-त्युक्तेश्च। तत्र ह्रस्वस्य संवृतता।"संवृतं त्वेकमात्रं स्यात् विवृतन्तु द्विमात्रकम्"रित्युक्तेः ह्रस्वस्यैकमात्रतया प्रयोगे संवृतता प्रक्रियायान्तु विवृततैव। तत्र सूत्रं "अचो-स्पृष्टा यणस्तोष्मन् नेमस्पृष्टाः शलस्तथा। शेषाः स्पृष्टा हलः प्रोक्ता" इति शिक्षावाक्यमेव बोध्यम्। अत्राचः स्वरीभावरूपविवृततावन्तः यणः यवरणस्तोष्मन् स्पृष्टा इत्यर्थः नेमस्तदर्द्धवाची। शलः शषसहा नेम-स्पृष्टा अर्द्धस्पृष्टा अर्थादर्द्धविवृताः। "स्वराणामग्र-भाग्येव विवृतं करणं स्मृतम्"इत्येकवाक्यत्वात्। एते च स्थानप्रयत्नाः सवर्णसंज्ञायामुपयुक्ताः बाह्यप्रयत्नास्तु स्थानान्तरव्यपरीत्यायामेवोपयोगिन इति "तुल्यास्यप्रयत्नं सवर्णमिति" पा०सूत्रभाष्यादौ स्पष्टम्। तेन तकारस्थाने विवारश्वासघोषाल्पप्राणरूपबाह्यप्रयत्नसाम्येन चकारटका-रादेशः "स्थानेऽन्तरतमः"इति पा०सूत्रभाष्ययोः स्पष्टम्। वङ्गसमानधर्मत्वमेवान्तरतम्ये हेतुरिति बोध्यम्।" "बाह्याःप्रयत्नाश्चाष्टविधाः काकलकाधःस्थसलबिलसङ्कोच-विकाशश्वासोत्पत्तिध्वनिविशेषघोषाल्पघोषप्राणाल्पमहत्व रूपकार्यकराः यथाक्रमं विवारसंवारश्वासनादघोषाल्प-घोषाल्पप्राणमहाप्राणनामानो मन्तव्याः। प्रयत्नप्रेरितो वायुर्वर्णानभिव्यञ्जन् यत्रविशेषेण गलबिलविकाशादीनपि जनयति यतो गलबिलविकाशादिकरत्वादाद्यवर्ण-दर्शनकार्यकरत्वात् चैते बाह्या इति। ते च "खफां यमां खयः +कँपौ विसर्गः शर एव च। एते श्वासा नुप्रदाना अघोषाश्च विवृतास्ते। कण्ठमन्ये तु घोषाः स्युः संवारा नादभागिनः। अयुजा वर्गप्रथमतृतीय-

त्यासवः स्मृताः" इति सिद्धान्तकौमुद्युक्तदिशावसेयाः। स्वां स्वाने जाता ये वर्णाः पूर्वोक्ताः प्रातिशाख्ये प्रसिद्धाः। यथा, अरः अयस्कृत्। एते त्रासानुप्रदाना अघोषाः कण्ठं विवृण्वते च। अन्ये एतद्भिन्नाः सर्वे वर्णा घोषसंवारनादवाह्यप्रयत्नवन्तः। वर्गीयप्रथमतृतीय-पञ्चमवर्णाः प्रथमतृतीयवर्णजातयश्च पूर्वोक्ताः यश्च एते अल्पप्राणाख्यक्षिप्ताः सर्वे महाप्राणा इति विवेकः।" "तथा उदात्तानुदात्तस्वरितह्रस्वदीर्घप्लुतकालभेदाच्च स्वराणां विशेषाधाने हेतवो वेदितव्याः। तथा हि "विभागः पञ्चधा मतः" इत्युपक्रम्य "स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः" इति स्वरकालस्थानप्रयत्नानुप्रदानाभिधेयत्वाच्च प्रयत्नान् वर्णविभाजकान् पक्ष्ये सामान्यतो निर्दिश्य शिक्षाकृता उदात्तत्वानुदात्तत्वादिना अच्चैव स्वरकालयोर्विभाजकताऽभिहिता। तत्र तास्वादिषु स्थानेष्वूर्ध्वभागे निष्पन्नोऽनुदात्तः नीचैरुच्चार्यमाणोऽनुदात्तः प्रथमवर्णोऽनुदात्ततयोच्चार्यं उत्तरार्द्धमनुदात्ततयोच्चार्यमाणः स्वरितः इति "उच्चैरुदात्तः नीचैरनुदात्तः समाहारः स्वरितः तस्य चादितः उदात्तमर्द्धह्रस्वमिति" पाणिनिसूत्रजातेभ्यः। तदेवं परस्परविभाजकस्थानवाह्याभ्यन्तरप्रयत्नस्वरकालकृतविशेषात् वर्णानां परस्परविशेषरूपता। सर्वे हि वर्णाः पुरस्कृत्यैव विशिष्टविशेषं विशेषतामाप्नुवन्तीति।"

विवाहेऽपयोगिनि नक्षत्रविशेषकृते ।ऋक्षकूटे उद्वाहतत्त्वशब्दे ऋक्षकूटोक्तौ १२४८ पृ० दृश्यम्।

वर्णक न०वर्णयति वर्ण-ण्वुल्। १हरितालरञ्जमा०।२अनुलेपनयोग्ये अमरः ३पिष्टे ४हट्टे वा चन्द्रनादौ हृद्ये च। ५हिङ्गुवादौ पुंस्त्री० भरतः ६मण्डने शब्दर०। एकस्यैव स्तवादेः पद्यान्तरव्याख्यानरूपे १प्रबन्धभेदे न० "विष्कम्भके तृतीयवर्णके"मिता०। ८चारणे पु०मेदि०।

वर्णकूपिका स्त्री वर्णानामक्षराणां लेखनाय क्षुद्रः कूपः कूपी स्वार्थे कन्। मसाधारे त्रिका०।

वर्णचारक पु० वर्णं शुक्लादिरूपं चारयति प्रेर-णिच्-ण्वुल्। चित्रकरे शब्दमा०।

वर्णज्येष्ठ पु० वर्णेषु ज्येष्ठः प्रथमसृष्टत्वात्। १ब्रह्मणे विप्रे। ब्रह्मणेव्या २श्रेष्ठवर्णकूटयुते त्रि०। "वर्णज्येष्ठा च या नारी" स्मृतिः।

वर्णतूलि(ली) स्त्री वर्णानां लेखनसाधनं तूलिः। लेखन्याम् शब्दर०स्वार्थे क। अत्रैव [जटा०।२वर्णभेदे त्रि०

वर्णद न० वर्णं ददाति दा-क। १काञ्चीवर्के मन्त्रद्रव्ये।

वर्णदात्री स्त्री वर्णं रूपं ददाति दा-तृच् ङीप्। १हरिद्रायाम् राजनि० २वर्णदातरि त्रि०।

वर्णदूत पु० वर्णा एव दूतो यत्र। लिपौ त्रिका०।

वर्णधर्म्म पुंन० ६त०। विप्रादीनामसाधारणे धर्मे यथा विप्रस्य याजनाध्यापनप्रतिग्रहादिः। क्षत्रियस्य प्रजापालनादिः पु० जातिधर्मशब्दे दृश्यम्।

वर्णमातृ स्त्री ६त०। वर्णानां मातेव। लेखन्यां शब्दर०।

वर्णमातृका स्त्री स्वरूपत्वात् शब्दच०।

वर्णमाला स्त्री ६त०। १जातिमालायां २अक्षरपङ्क्तौ ३अनर्थकेऽपि पञ्चाशद्वर्णात्मकमालाभेदे। अक्षमाला शब्दे ४२पृ० दृश्यम्।

वर्णरेखा स्त्री वर्णान् लिखत्यनया लिख-करणे घञ् रेखः। कठिन्यां (खड़ि) त्रिका०।

वर्णवती स्त्री वर्ण+मतुप् मस्य वः। १हरिद्रायां जटा०। २वर्णविशिष्टे त्रि०स्त्रियां ङीप्।

वर्णविलोड़क पु० १श्लोकचौरे २सन्धिचौरे मेदि०

वर्णसङ्कर पु० सम्+कृ-अप् वर्णतः सङ्करः। विप्रादिभ्यो वर्णेभ्योऽनुलोमजाते प्रतिलोमजाते मूर्द्धावसिक्तादौ मागधादौ च जातिभेदे "जायते वर्णसङ्करः" गीता। जातिशब्दे २०८१ तद्भेदादिकं दृश्यम्।

वर्णसिन्धु पु० वर्ण-अक्षिच्। अक्षे उणादि०।

वर्णा स्त्री प्रशस्तवर्णोऽस्त्यस्याः अत्वर्णादौ अच्। खादक-द्रव्याम् शब्दच०। [लेखन्याम् शब्दच०।

वर्णाङ्का स्त्री वर्णा अक्षराणि अङ्कान्तेऽनया अङ्क-अच्।

वर्णात्मन् पु० वर्णः आत्मा स्वरूपं यस्य। अन्त्यजजातिभेदे अकारादिक्षरे शब्दभेदे जटा०।

वर्णार्ह पु० वर्णं स्तुतिमर्हति अर्ह-अच्। सूदे राजनि०।

वर्णिका स्त्री वर्णा अक्षराणि लेखत्वेन सन्त्यस्याः ठन्। १लेखन्याम् २कठिन्यां हारा० ३मसाधारे त्रिका०।

वर्णित त्रि० वर्ण-क्त। १स्तुते अमरः २ज्ञातवर्णने ३रूपान्तरमापादिते च।

वर्णिन् पु० वर्णोऽस्त्यस्य इनि। १चित्रकरे २लेखके ३ब्रह्मचारिणि मेदि०। "अथाह वर्णी विदितो महेश्वरः" कुमारः। ४विप्रादिजातौ च "वर्णिनां हि वधो यत्र" स्मृतिः। [हरिद्रायाम् अमरः।

वर्णिनी स्त्री वर्णः अक्षरसङ्घः प्राशस्त्ये इनि ङीप्।

वर्षु पु० वर्ष-उनु । १नदभेदे २वादिभे० ३वादित्ये संक्षिप्त० ।

वर्त्तक पु० वृत-ण्वुल् । (भारद) १पक्षिभेदे वर्त्तकाण्डज । २क्षुरे च अमरः । ३वर्त्तकीक्षे न० हेमच० ।

वर्त्तन न० वृत-ल्युट् । १वृत्तौ २स्थितौ अमरः । क्विप्-भावे ल्युट् । २स्थापने क्विप् करणे ल्युट् । ३जीवनोपाये स्त्री ङीप् । ४तक्रपीठे न०मेदि० । ल्यु । ५वृत्तिमति वर्त्तिष्णौ च त्रि० अमरः । ७वासने त्रि० मेदि० । ८आधारचक्रवर्त्तके न० शब्दर० ।

वर्त्तनी स्त्री वर्त्यते पादाद्यत्र वृत-क्विप् आधारे ल्युट् । १पथि २प्रेमणे शब्दर० । पृषो० ह्रस्वः पूर्वदेशे लिङ्गा० ।

वर्त्तमान पु० वृत-शानच् । कालभेदे शब्दप्रयोगाधारे वारब्धापरिसमाप्ते १काले २तत्कालवृत्तौ त्रि० ।

वर्त्तमानकालश्च चतुर्विधः । यथा "प्रवृत्तोपरतश्चैव वृत्तावितत२ एव च । नित्यः प्रवृत्तः३ सामीप्ये४ वर्त्तमानचतुर्विधः । क्रमेणोदाहरणानि । मांसं न खादति कादौ प्रवृत्तं मांसभोजनं निवर्त्तयतीत्यर्थः । पश्य कुमाराः क्रीड़न्ति २तदानीमनक्रीड़नाभावेऽपि पूर्वक्रीड़ानां बहौ वर्त्तमानत्वात् । पर्वतास्तिष्ठन्ति ३नित्यं प्रवृत्तत्वात् । किञ्च पर्वतानां स्थितत्वेन वर्त्तमानत्वेऽपि भूतभविष्यत्कालाभ्यां सम्बन्धविवक्षया पर्वतास्तस्थुः स्थास्यन्ति इत्यपि स्यात् । सामीप्ये४ द्विविधः । भूत सामीप्ये भविष्यत्सामीप्यञ्च यथा कदा आगतोऽसि इतिप्रश्ने अध्वखेदादेर्वर्त्तमानत्वात् एषोऽहमागच्छामि इति आगतोऽपि वदति । भविष्यत्सामीप्ये यथा । कदा गमिष्यसि इति प्रश्ने एषोऽहं गच्छामि इति गमने क्रियमाणोद्यमोऽपि वदति" दुर्गादासः ।

वर्त्तरुक पु० १नदीभेदे २काकलीभेदे ३जलावर्त्ते मेदि० । ४दारपाले त्रिका० । [आवर्त्तनयोग्ये लौहभेदे ।

वर्त्तलोह न० वर्त्यते वृत-क्विप्-कर्मणि अच् कर्म० ।

वर्त्ति (र्त्ती) स्त्री वृत-इन् वा ङीप् । १लेखे २नयनाञ्जने ३गात्रानुलेपने ४दीपदशायां ५भिषजां विरेचौषधभेदे (वाति) "कतकस्य फलं शुद्धः सैन्धवं त्रपुषं वचा । क्षेपो रसाञ्जनं लौद्रं विडङ्गानि मनःशिला । एषां वर्त्तिकृतैर्नित्यं तिमिरं पटलं तथा" गरुड़पु० १६८अ० । ६दीपे च मेदि० ।

वर्त्तिक पुंस्त्री वृत-ठिकन् । (बटेर) १विहगभेदे राजनि० स्त्रियां ङीष् । वर्त्मनि वर्त्तते वृत-कन् वर्त्तः तत्र साधुः स्थितो वा ठन् । (भारद) २खले अमरः ।

२खलक्षेत्रे स्त्री० राजनि० ४दीपदशायां स्त्री वा च षड्विधा यथा "षड्सूत्रभवा दर्भगर्भसूत्रभवाश्च वा । शाक्षजा बादरी वापि कक्षकोद्भवाथ वा । वर्त्तिका-दीपकल्पेषु सदा षड्विधा स्मृता" कालिकापु० ६८अ० ।

वर्त्तिन् त्रि० वृत-णिनि । वर्त्तनशीले ।

वर्त्तिष्णु त्रि० वृत-स्नुच् । वर्त्तनशीले ।

वर्त्तिष्यमाण पु० वृत-शानच् स्नुट् सदृवेति स्नुट् । भविष्यत्काले । २तद्वृत्तौ त्रि० ।

वर्त्तुल त्रि० वृत-उलच् । १गोलाकारे पदार्थे अमरः । २मट्टने न० राजनि० । ३कषायभेदे पु० शब्दमा० । ४तर्कपीठ्यां स्त्री हारा० ५गजचिकित्सायां स्त्री राजनि० ङीप् ।

वर्त्मन् न० वृत-मनिन् । १पथि अमरः २आचारे "वा मनोवर्त्मनः" रघुः ३नेत्ररोगे च मेदि० । अक्षिशब्दे ४५१पृ० दृश्यम् । वर्त्मलक्षणं तद्गतरोगभेदाश्च सुश्रुते उक्ता यथा

"द्वाङ्कुलं वर्त्मतः सार्द्धं भिषग्व्यधनबुद्बुदम् । वृत्तं मोक्षनाकारं सर्वभूतसुखोद्भवम् । यत् भ्रुवोऽस्तितो रक्तं वातात्तत्कृष्णं सितं जलात् । श्लेष्मणादश्रुमार्गश्च जायते नेत्रबुद्बुदे । दृष्ट्वास्य तथा वक्ष्ये यथावद्व्याधिशारदः । नेत्रायामत्रिभागन्तु कृष्णमण्डलमुच्यते । कृष्णात् सप्तममिच्छन्ति दृष्टिं दृष्टिविशारदाः । मण्डलानि च सर्वाणि पटलानि च लोचने । यथाक्रमं विजानीयात् षण्मण्ट् च क्लेद च । पञ्चवर्त्मगतेतत्कृष्ण० दृष्टीनां मण्डलानि तु । चतुर्पूर्वन्तु ते मध्यात्सप्तारोऽन्त्या यथोत्तरम् । पञ्चवर्त्मगतः सन्धिर्वर्त्मशुक्लगतोऽपरः । शुक्लकृष्णगतस्त्वन्यः कृष्णदृष्टिगतोऽपरः । ततः कनीनकगतः षष्ठश्चापाङ्गगः स्मृतः । ते वर्त्मपटले विद्यात्सप्तार्म्मन्यानि चाक्षिणि । जायन्ते तिमिरं येषु व्याधिः परमदारुणः ।"

"पृथग्दोषाः समस्ताश्च यदा वर्त्मव्यपाश्रयाः । शिरा व्याप्यावतिष्ठन्ते वर्त्मस्वधिकमूर्च्छिताः । विवर्त्मांसं रक्तञ्च तदा वर्त्मव्यपाश्रयान् । विकाराञ्जनयन्त्याशु नामतस्तान्निबोधत । बहलिन्यश्च कृष्णीका पोथकी वर्त्मशर्करा । तथार्शोवर्त्मसंज्ञौ शुक्तिर्यत्रैवाञ्जनाभिका । बहलं वर्त्म यच्चापि व्याधिर्वर्त्मावबन्धकः । क्लिष्टकर्दमवर्त्माख्यो ग्रथितवर्त्म तथैव च । प्रक्लिन्नमपरिक्लिन्नं वर्त्मवातकृतन्तु यत् । अर्बुदं निमिषार्धापि शोफितार्मञ्च यद्भवेत् । क्लेदो विसर्पिका च

पक्ष्मकोपश्चैव च। एकविंशतिरित्येते विकारा वर्त्म-संज्ञयाः। नामभिस्ते समुद्दिष्टा लक्षणैस्तान् प्रचक्ष्महे। पिडकाभ्यन्तरसुखी बाह्याधोवर्त्मसंज्ञया। विस्फोटसंज्ञिनौ नाम तदूर्ध्वपिडकान्विता। कृम्मीकवीज-प्रतिमाः पिडकाः पक्ष्मवर्त्मनोः। आध्मायने तु भिन्ना याः कृम्मीकपिडकास्तु ताः। कण्डूस्रावान्विता गुर्व्यो रक्तसर्षपसन्निभाः। पिडकाश्च स्रवावस्थाः पोथकाश्च इति संज्ञिताः। पिडकाभिः सुसूक्ष्माभिर्घनाभिरभिसंहता। पिडका या खरा स्थूला सा ज्ञेया वर्त्मशर्करा॥ रूक्षाः खराश्च वर्त्मस्थाकर्दमैर्वर्त्मकर्दमैः कीर्त्यते। दीर्घो-ऽङ्कुरः खरः स्थूलो दारुणो वर्त्मसंभवः। व्याधिरेष समाख्यातः शुष्काक्षि इति संज्ञितः। दारुणोदयतो ज्ञेया पिडका वर्त्मसंभवा। स्तब्धो मन्दरुजा स्निग्धा ज्ञेया साऽञ्जननामिका७। वर्त्मोपचीयते यस्य पिडकाभिः समन्ततः। सवर्णाभिः समाभिश्च विद्याद्बहलवर्त्म८ तत्। कण्डूमताल्पतोदेन वर्त्मशोफेन यो नरः। न सम्यक्छादयेदक्षि भवेदुन्मन्थः९ स वर्त्मनः। स्तब्धस्यवेदनं तार्क्ष्यं तद्वर्त्म सममेव च। चक्षुषश्च भवेद्रुक्षं क्लिष्टवर्त्म१० तदा-दिशेत्। क्लिष्टं पुनः पित्तयुक्तं विदहेच्छोणितं यदा। तदा क्लिन्नत्वमापन्नमुच्यते वर्त्मकर्दमम्॥११। यद्वर्त्म बाह्य-तोऽन्तश्च श्यावं शूनं संवेदनम्। दारुकण्डूपरिक्लेदि श्याव-वर्त्मेति१२ तन्मतम्। अरुजं बाह्यतः शूनमन्तःक्लिन्नं सवर्त्मयत्। कण्डूनिस्तोदभूयिष्ठं क्लिन्नवर्त्म१३ तदुच्यते। यस्य धौतानि धौतानि सन्त्यन्यानि पुनः पुनः। वर्त्मो-न्मथपरिक्लान्ति विद्यादक्लिन्नवर्त्म१४ तत्। विस्तब्धसन्धि निखिलं वर्त्म यस्य निमील्यते। एतद्वातकृतं१५ विद्यात् सरुजं यदि वाऽरुजम्। वर्त्मान्तरस्थं विषमं ग्रन्थिभूतमवेदनम्। विद्यादर्बुदं१६ पुंसां सरक्तमवसन्निभम्। निमेषणोः शिरा वायुः प्रविष्टो वर्त्मसंश्रयाः। चालयेदतिवर्त्मानि निमेष१७ स गदो मतः। क्लिन्नाक्लिन्ना विवर्द्धन्ते वर्त्मस्था ह्यर्बुदाङ्कुराः। दारुकण्डूरुजो-पेताश्चिरं शोणितसंस्रवाः१८। अपाकः कठिनः स्थूलो ग्रन्थिवर्त्मभवोऽरुजः। सकण्डूः पिच्छिलः कोठप्रभावो बलवाँल्लसः। शूनं बहलं बहुभिः सूक्ष्मैः स्थूलैः समन्वितम्। विषमत्वञ्च दृश्य विषवर्त्मेति२० तन्मतम्। पक्ष्माश्रयगता दोषाश्छेदपाकौ खराणि च। निर्वे र्तयन्ति पक्ष्माणि तैर्लुप्तैष्वाणि दूयते। उत्पाटितैः पुनः श्यावैः पक्ष्मभिश्चोपजायते। वातातपानलेभ्यो पक्ष्मकोपः२१ स उच्यते।" तत्रचिकित्सा तत्र दृश्या।

वर्त्मनि क्ली हृत-अनि सुट् च। पथि चक्षा०।

वर्ध छेदने पूरणे च चु० उभ० सक०सेट्। वर्धयति ते अववर्धत त। (भावे अच्। २पूरणे २छेदे च।

वर्ध पु० हृध-अच्। १ग्राम्यपशौ (वामनघाटि) लटा० वर्द्ध-

वर्धक पु० हृध-ण्वुल्। १ग्राम्यपशौ (वामनघाटी) अमरः हृध-वा वर्ध-ण्वुल्। २पूरके २छेदके ३वर्द्धकारके च त्रि०।

वर्धकि पु० वर्ध-छेदने अच् कप-डि कर्म०। त्वष्टरि (छुतार) अमरः। (जातिभेदे शब्दर०।

वर्धकिन् पु० वर्धकः वर्द्धोऽस्त्यस्य इनि। त्वष्टरि (छुतार)

वर्धन न० हृध-वर्ध-भावे ल्युट्। १छेदने २पूरणे च मेदि०। हृध णिच्-ल्युट्। ३वर्द्धकारके त्रि०। "करोमि क्षितिवर्द्ध-नम्" भट्टिः। हृध-ल्युट्। ४वर्द्धियुक्ते त्रि०।

वर्धनी स्त्री वर्धतेऽनया हृध-णिच्-ल्युट् ङीप्। १संमार्ज-न्याम् २खड्गे मेदि०। ३खनाकपालभेदे च (वदना) लटा०।

वर्धमान पु० हृध-शानच्। १परिखढक्षे अमरः। २वर्द्ध-शीले त्रि०। ३शरावे स्त्रियामपि भेदे ४श्रिष्णौ ५पशुभेदे च मेदि०। ६जिनभेदे हेमच०। ७अनिलां सप्तभेदे हेमा०। ८देशभेदे बृ० स० १४अ० कूर्मविभागशब्दे दृश्यम्। ९नगरभेदे च। १०वर्द्धियुक्ते त्रि०।

वर्धापन न० वर्धं छेदं करोति वर्ध+णिच-आप् च ततो भावे ल्युट्। नाडीच्छेदनकर्मणि संस्कारभेदे त्रि०त० रघु०।

वर्धित न० वर्ध-क्त। १छेदिते २पूरिते ३प्रस्रुते च।

वर्धिष्णु त्रि० हृध-ष्णुच्। वर्द्धिशीले। (भरतः क्षीर्।

वर्ध्र न० हृध-ष्ट्रन्। १चर्मणि उणादिको०। २चर्मरज्जौ स्त्री

वर्पस् न० हृ-असुन् पुंस्। रूपे निघण्टुः।

वर्फ गतौ वधे च भ्वा० पर० सक० सेट्। वर्फति अवर्फीत्।

वर्ष्मकण्टक पु० वर्ष्म इव कण्टकोऽस्य। पर्पटे राजनि०।

वर्ष्मकषा स्त्री वर्ष्म-कषति अच्। (चामकषा) सन्नद्धायाम् शब्दर०।

वर्ष्मन् न० हृ-मनिन्। १कवचे सन्नाहे अमरः। २क्षत्रि-योपाधौ पु०। "वर्ष्मान्तं क्षत्रियस्य हि शातातपः।

वर्ष्मधर पु० वर्ष्म धरति धृ-अच्। सन्नाहधारणयोग्ये अवस्थाभेदे तरुणे। "वर्ष्मधरः कुमारः" रघुः।

वर्ष्मिन् पु० हृ-वा० मिनु। (चामि) मत्स्यभेदे राजनि०।

वर्ष्मित त्रि० वर्ष्म करोति णिच्-क्त। १क्षतसन्नाहे २वद्युक्ते च

वर्ष्य त्रि० हृ-यत्। १प्रधाने श्रेष्ठे च अमरः। २कामदेवे

२पतिम्बरायां कन्यायां अमरः । ४कन्यामात्रे च स्त्री ।

वर्षणा स्त्री वर्षति वर्षति शब्दायते वर्ष-ल्युच् । (भद्रमुस्ते) मुस्तिकाभेदे अमरः । अयमौषधादिरित्यर्थे ।

वर्षर न० इ-वरच् वुट्च् । १चिक्कणे २पीतचन्दने ३शब्दरसे च राजनि० । ४धामरे ५मूर्खे च त्रि० । "वर्षरमिच्छन्ति वर्षरा" रत्नमुटः । ६वेगभेदे (वाचरी) ७देशभेदे ब्रह्माण्डजे (कालवाचर) ब्रह्मे च पु०राजनि० । ८मक्षिकाभेदे पुंस्त्री०अमरः०(वावर) १०ब्रह्मे स्त्री टाप् ङीप् वा "वर्षरी करभी तुल्ये खरदुग्धास्त्रगस्त्रिका। पर्षांसक्तत्र कृष्णे तु कठिञ्जरकठेरकौ । कालसारः कराल्य मलूकः कृष्णमस्त्रिका । तत्र गुल्केऽर्ज्जकः प्रोक्तो वर्षरी-पत्रस्ततोऽपरः । वर्षरीत्रितयं रूक्षं शीतं कटु विदाहि च । तीक्ष्णं रुचिकरं हृद्यं दीपनं लघुपाकि च । पित्तलं कफवाताक्षदृक्कमिविषापहम्" भावप्र० संज्ञायां कन् । वर्षरिका चन्दनभेदे पुष्पभेदे स्त्री मेदि० ।

वर्षरीक पु० इ-ईकन् फर्फरीकाः नि० । १ब्राह्मणयष्टिवृक्षे २कुटिलकेशे च त्रिका० । ३यज्ञसम्बिकायां (वाबुरतुलसी) शब्दच० ४ब्रह्माकाशे हेमच० ।

वर्वा स्त्री इ-व तस्य नेत्वम् । (वाबुई) ब्रह्मभेदे शब्दच० ।

वर्वुर पु० इ-वरच् वुट्च् । (वावडा) ब्रह्मभेदे राजनि० । ओषधादिरित्यन्ये ।

वर्ष पु० वृष-भावे घञ् कर्त्तरि अच् वा । १वृष्टौ २जम्बुद्वीपांशभेदे पुंन० अमरः ।

"हिमवद्हेमशृङ्गिनिषधमेरुकूटोऽथ तस्मात् तस्माच्चान्यो निषध इति ते विष्णुपर्यन्तदैर्घ्याः । एवं विष्णादुदगपि पुराक्रूरवच्छ्रुङ्गीनीला वर्षाण्यथो जगुरिह बुधा अन्तरे द्रोण्यिदेशान् । भारतवर्षमिदं हि दृगस्मात् किम्पुरुषवर्षमतो हरिवर्षम् । विष्णुपुराच्च तथा कुरु तस्मादविद्धि हिरण्मयरम्यकवर्षे । माल्यवांश्च यमकोटिपत्तनाद्रोमकाच्च किल गन्धमादनः । नीलवैडूर्यनिषधावधी च तावन्नराद्यमन द्रोरिलावृतम् । माल्यवच्छृङ्गधिमध्यवर्ति यत् तत् तु भद्रतुरगं जगुर्बुधाः । गन्धवैडूर्यराशिमध्यगं केतुमालकमिलावृताविदुः । निषधनीलसुगन्धमाल्यकैरलमिलावृतमाद्रतमावभौ । अमरकेसिकुलायसङ्काकुं इषिरकाञ्जनचित्रसङ्गीतकम्" सि० शि० "अत्र भूगोलखार्धसप्तरं जम्बुद्वीपम् । तत्र चाराव्येव वन्धिनिरब्धेशः । तत्र ब्रह्मा रोमकं विष्णुपुरं यमकोटिरिति पुरचतुष्टयं भूपृष्ठिपचतुर्थांशान्तरे किल कथितम् । तेभ्यः पुरेभ्यो यद्यां दिशि मेरुः सोत्तरा । अतो ब्रह्मणा उत्तरतो हिमवान् नाम गिरिः पूर्वापरविस्तृतपर्यन्तदैर्घ्योऽस्ति । तस्योत्तरे हेमकूटः । सोऽपि तथाविधपर्यन्तदैर्घ्यः । तथा तदुत्तरे निषधः । तेषामन्तरे द्वीण्यिदेशा वर्षसंज्ञाः । तत्रादौ भारतवर्षम् । तदुत्तरं किम्पुरुषवर्षम् । ततो हरिवर्षमिति । एवं विष्णुपुरादुत्तरतः मेरुकृवान् नाम गिरिः । ततः श्वेतगिरिः । ततो नीलगिरिरिति । तेऽपि विस्तृतपर्यन्तदैर्घ्याः । तेषामन्तरे च वर्षाणि । तत्रादौ कुरुवर्षम् । तदुत्तरे हिरण्मयम् । ततो रम्यकमिति । अथ यमकोटेरुत्तरतो माल्यवान् नाम गिरिः । स तु निषधनीलपर्यन्तदैर्घ्यः । तस्य जलधेश्च मध्ये भद्राश्वं वर्षम् । एवं रोमकादुत्तरतो गन्धमादनः । तस्य जलधेश्च मध्ये केतुमालवर्षम् । एवं निषधनीलमाल्यवद्गन्धमादनैरावृतमिलावृतं नाम नवमं वर्षम् । इदं खलु भूमिः । अतश्च देवक्रीडाद्यर्थानि" । १२दादशमासात्मके काले ४जम्बुद्वीपे च पु०मेदि० । कर्त्तरि अच् । ६मेघे पु० हेमच० ७प्रमवादिषु अष्टवत्सुरेषु पु० ।

वर्षंकरी स्त्री वर्षं तत्सम्बन्धं करोति रवेश्च क-ट । भिण्डिकायां हेमच० । [२वर्षाचले ।

वर्षकेतु पु०वर्षस्य वृष्टेः केतुरिव । १रक्तपुनर्नवायाम् राजनि० ।

वर्षकोष पु० वर्षस्य कोष इव । १दैवज्ञे शब्दर० । २मासे हेमच० । [३वर्षके संज्ञिप्रभा० ।

वर्षणि स्त्री वृष-अनि । १वृष्टौ २वर्त्तने उणा० । ३क्रतौ

वर्षपर्वत पु० वर्षाणां चिह्नभूतः सीमाभूतो वा पर्वतः । "हिमवान् हेमकूटश्च निषधो मेरुरेव च । चैत्रः कर्णी च शृङ्गी च सप्तैते वर्षपर्वताः" रत्नमुक्ते पर्वतेषु शब्दार० । द्वीपभेदेऽप्यत्र वर्षपर्वता कुलपर्वतशब्दे २।१२२ पृ० दर्शिताः । त्रि०शि० उक्ता जम्बूद्वीपपर्वता वर्षशब्दे दर्शिताः । तत्र नाममात्रे भेदः कल्पभेदात् ।

वर्षपाकिन् पु० वर्षेण पाकोऽस्यास्ति इनि । आम्रातकवृक्षे हेमच० तस्य हि सकृत्फलोद्गमात् प्रावेण वत्सरानन्तरफलपाकः । [राजनि०।

वर्षपुष्पा स्त्री वर्षकाले पुष्पमस्याः । सप्तदेवीलतायाम्

वर्षप्रिय पुंस्त्री० वर्षः प्रियोऽस्य । चातकपक्षिणि त्रिका० स्त्रियां योषधत्वात् टाप् ।

वर्षवर पु० वर्षं रेतोवर्षं वृणोति आवृणोति वृ-अच् । "ये त्वल्पसत्त्वा प्रथममात्रोत्थाः स्त्रीस्वभाविनः । जाता न वृद्धा काण्डेषु ते वै वर्षवराः स्मृताः" रत्नमुक्तवचने

राष्ट्रामन्त्रःपुररक्षके वर्गे (खोजा) अमरः। "नष्टं वर्गवरैरिति" रत्नावली।

वर्षवृद्धि पु० वर्षस्य वृद्धिरधिकता यस्मिन्। १जन्मतिथौ २तद्दिनकर्त्तव्ये मुण्डादौ च। "युगाद्या वर्षवृद्धिश्च ब्रह्मणो पार्वतीप्रिया। रवेरुदयभोक्ष्ये न तत्र तिथियुग्मता" त्रि०त०। "तत्रत्यं च मलमासे न कर्त्तव्यं चान्द्रमासीयत्वेन सावकाशत्वात् न च सौरमासीयं तथात्वे तत्तिथेः कदाचिदप्राप्तौ तद्दर्शे तत्प्रत्यवायोपपत्तेः न चेष्टापत्तिः "प्रतिसंवत्सरं चैव कर्त्तव्यश्च महोत्सवः" ब्रह्मपु० प्रतिसंवत्सरं तद्विधानात् ति० त० रघु०। अधिकं जन्मतिथिशब्दे दृश्यम्।

वर्षा स्त्री ब०व०। वर्षन्ति मेघा अत्र। श्रावणभाद्रात्मके मासद्वये ऋतौ "नभश्च नभस्यश्च वार्षिकावृतू" यजु० श्रुतिः "वर्षासु च मघासु च" मनुः।

वर्षाङ्गी स्त्री वर्षासु अङ्गमस्याः। पुनर्नवायाम् शब्दर०।

वर्षापगम पु० वर्षाणामपगमो यत्र। १शरत्काले हेत०। २वर्षासमाप्तौ।

वर्षाभव पु०वर्षासु भवति भू-अच्। रक्तपुनर्नवायाम् राजनि०

वर्षाभू पु० वर्षासु भवति भू-क्विप्। १भेके अमरः २इन्द्रगोपे राजनि० ३महौषधतायाम् मेदि० ४पुनर्नवायां ५भेक्यान्तु स्त्री मेदि० अमरे भेक्याम् गौरा० ङीष् वर्षाभ्वीत्येव ६वर्षाभवमात्रे त्रि०। [ङीष्।

वर्षामद पुंस्त्री० वर्षासु माद्यति मद-अच्। मयूरे स्त्रियां

वर्षिष्ठ त्रि० अतिशयेन वृद्धः इष्ठन् वर्षादेशः। अतिशयवृद्धे

वर्षीयस् त्रि० अतिशयेन वृद्धः वृद्ध+इयसुन् वर्षादेशः। अतिवृद्धे अमरः स्त्रियां ङीष्।

वर्षुक त्रि० वृष-उकञ्। वर्षणशीले। [अमरः।

वर्षोपल पु० वर्षस्य वृष्टेरुपलः प्रस्तर इव। करकेषु (शिल)

वर्ष्मन् न० वृष-मनिन्। १देहे २पार्श्वे च अमरः। ३अतिवृद्धे त्रि०। [अवर्हेत त।

वर्ह बधे भ्वा० पर० सक० सेट्। वर्हति-ते

वर्ह उत्कर्षे भ्वा० आ० सक० सेट्। वर्हते अवर्हिष्ट।

वर्ह न० वर्ह-अच्। मयूरपिच्छे अमरः अस्य पुंस्त्वमपि "कं वरेदेव वर्हः" विक्रमो०प्रयोगात्। २अन्धिपर्णे वृक्षे भरतः। ३पत्रे शब्दर०।

वर्हिं(र्हिः)कुसुम न० वर्हिःवर्हिरिव कुसुममस्य वृक्षो० वा सलोपः। अन्धिपर्णे शब्दमा०।

वर्हिःपुष्प न० वर्हिः वर्हिरिव पुष्पमस्य। अन्धिपर्णे भरतः

वर्हिःशुष्मन् पु० वर्हिं कुशः शुष्म बलमस्य। १वह्नौ अमरः कुशेन हि वह्निरुद्दीप्यते।

वर्हिं(र्हिः)ष्ठ न० वर्हिरिव तिष्ठति स्था-क वा विसर्गलोपः सत्वम्। होवरे अमरः। [दर्भि। वर्हीत्यत्र।

वर्हिण पुंस्त्री० वर्हमस्यास्ति इन। १मयूरे अमरः स्त्रियां ङीष्

वर्हिर्ज्योतिस् पु० वर्हिषा कुशेन ज्योतिरस्य। वह्नौ हेम०

वर्हिर्मुख पु० वर्हिर्वर्हिर्मुखं यस्य। देवे अमरः। तद्द्वारैव हि देवा हविरश्नन्ति।

वर्हिषद् पु० ब०व० वर्हिषि विप्रयागिस्थेऽग्नौ सीदन्ति वर्हिस् सद-क्विप् षत्वं०। पितृगणभेदे "अग्निष्वात्ता वर्हिषद आज्यपा सोमपास्तथा" मनुः। [वह्नौ।

वर्हिष्केश पु० वर्ह-दीप्तौ इसुन् वर्हिः दीप्तिमान् केशो यस्य

वर्हिस् स्त्री वृह-इसुन् नि० नलोपश्च। १वह्नौ मेदि० "वर्हिषि रजतं न दैवम्" श्रुतिः। २यज्ञियपर्णे ३चित्रके च (चिते) अमरः। ४कुशे पु०न० "वर्हिर्दे वसदनम्" श्रुतिः वर्ह-दीप्तौ असुन्। ५दीप्तियुक्ते त्रि०। [वा षटा०।

वल संवरणे भ्वा०आत्म०सक०सेट्। वलते अवलिष्ट। वव्रलतुः

वल न०वल्यतेऽनेन वल-क। सैन्ये रायमु० वलशब्दार्थे च।

वलज पु० वल-क्विप् अज-अच् कर्म०। १धवले वर्णे २तद्वति त्रि० अमरः।

वलन न० वल-भावे ल्युट्। १संवरणे वि०शि० उक्ते इङ्गुदादिसंस्कारार्हे २कदम्बवाह्योत्तरयोरन्तर तत्संज्ञकादिके तत्रोक्तं प्रदर्श्यते

"तुल्याद्योर्हि संपाते विषुवत्क्रान्तिहेतवोः। ज्ञातौ बाह्योत्तरे भिन्ने परक्रान्त्यन्तरे च ते। आयनं वलनं तत्र जिनांशज्ञासमं ततः। एकैवायनसंधौ तु तयोः स्याद्दक्षिणोत्तरा। एकैव तद्दशात् प्राची तत्र नो वलनं ततः। तदन्तरेऽनुपातेन खेटकोटिक्रमज्ञया। जिनज्याघ्नी द्युजीवाप्तायनदिग्वलनं भवेत्। एवमेव हि संपाते विषुवल्लग्नहेतयोः। उन्मण्डलं भवेत् तत्र विषुवद्दक्षिणोत्तरा। क्षितिजं समहेतस्थं पलज्या च तदन्तरम्। क्षितिजेऽज्यया तुल्यमयनं वलनं ततः। तयोरेवैव बाह्योदङ्मध्ये वलनं ततः। नतक्रमज्यया साध्यमन्तरे लम्बनं ततः। नतं खाद्धृतं भक्तं द्युदलेनाग्रभागकैः। क्रमज्याचज्यया घुघ्ना द्युज्याभक्ताज्यकं भवेत्। प्राक् पश्चिमे याम्ये तद्गोलैक्यान्तरात् स्फुटम्। एवमेव च संपातो यः क्रान्तिसमहेतुः। परमं तत्र तत्कालवलनैक्यान्तरं स्फुटम्।

कथयतः पृष्ठतस्त्वात् क्रान्तिवृत्ते त्रिभेऽन्तरे। तयो र्याम्योत्तरैकत्वात् तत्र नो वलनं स्फुटम्। न स्पष्टवलनाभावश्चात्र स्याद्दृक्कर्मसंक्षया। क्रमज्यया ततः कार्यं दाक्षार्धं कथ्यते पुनः। सर्वतः क्रान्तिसंज्ञायां ध्रुवे योगो भवेद्यतः। विषुवन्मण्डलप्राच्या ध्रुवे याम्या तयोत्तरा। सर्वतः क्षेपसंज्ञायां ध्रुवाच्चिह्नवशान्तरे। योगः कदम्बसंस्पृश्यं क्षेपो वलनबोधकृत्। तत्रापमण्डलप्राच्या याम्या सौम्या च दिक् सदा। कदम्बमण्डलं च स्पृशेयात् परितो ध्रुवात्। गोले तु जिनदृङ्मार्गयोश्चक्रे क्रान्तिभिन्नी। सर्वतः समवृत्तात्त्वाद् याम्योदक्कुजसंगमे। तत्तिर्यग्गतसूत्रस्थां योगः स समसंज्ञकः। समध्रुवकदम्बानामुपरि द्युचरान्नयेत्। क्षितावपि हृत्सूत्रेषु वलनानि तदन्तरे। अयनं वलनं मध्ये स्यात् समध्रुवसूत्रयोः। कदम्बध्रुवसूत्रान्तरायनं च त्रिभे यतः। कदम्बसमसूत्रान्तः स्फुटं सर्वदिशां च तत्। अथ वा परितः खेटात् खाङ्गभागान्तरे त्यजेत्। त्रिज्याहृत्तं ततस्तत्र विषुवत्समवृत्तयोः। मध्येऽयनवलनं विद्याद्विषुवत्क्रान्तिवृत्तयोः। अन्तरं चायनं क्रान्तिसमवृत्तान्तरे स्फुटम्। तत्रापमण्डलं प्राची तथा याम्योत्तरः धरः। वलनानयने क्षेपः चिह्नो यैस्ते कुवृत्तयः। नक्षत्रादिव कदम्बच स्यातां याम्योत्तरे समम्। आयनं वलनं तस्मान्नायनादौ प्रजायते। ततो भ्रमति गोले च मकरादिर्यथा यथा। तथा तथा भ्रमत्येष कदम्बो निजमण्डले। कुम्भादावथ मीनादौ याम्योदग्वलवस्थिते। जायते वलनं तद्वत् सौम्यसूत्रकदम्बयोः। अन्तरं भिन्नीरूपं कदम्बसममण्डले। अयनाहतकालांशक्रमक्रान्तिज्यका हि सा। चक्रमज्या यतो बाणः भिन्नी तु क्रमज्यका। सन्निभार्कात् क्रमक्रान्तिज्यातो वलनमायनम्। यैरुक्तसूत्रक्रमक्रान्त्या भान्त्या तैर्नाशितं हि तत्। युक्तानयैव विक्षेपमण्डलं च क्रमज्यया। परोक्तेरन्यथा ब्रूयाद्दृक्षः परान् न प्रदूषयेत्। तस्यैव दूषणं तद्धि न दोषोऽतोऽन्यदूषणे। चक्रक्रमज्यानिराकोऽयमन्यथा वाच कथ्यते। जिनांशैर्जिनदृत्तस्थं कदम्बात् परितो न्यसेत्। क्रान्तिसाम्योत्तरं वृत्तं कदम्बद्वयकीलयोः। प्रोतं कृत्वा खलं न्यस्तं दृक्तले स्याद् ध्रुवोपरि। दृक्तलान्नाड्यस्तेऽर्कैस्तैरेव चलति ध्रुवात्। जिनदृत्ते तदंशानां तत्र ज्या क्रान्तिभिन्नी। आयनं वलनं तद्वत् क्षितावपि जायते यतः। यतो ध्रुवान्तरे यस्माद्दृश्या चार्धांशकाः सदा। त्रिज्याहृत्ते यतो देयं तत्रातः परिधास्यते। एवमक्षांशकैर्वृत्तं समाख्यात् परितो न्यसेत्। समकीलकयोः प्रातं तथा याम्योत्तरं चलम्। तत्तत्खेटोपरि न्यस्तं वैरंशैः खार्धतो नतम्। समदृक्तेऽहृत्ते च तैरेव क्षितितं ध्रुवात्। समवृत्तनतांशज्याक्षज्यापरिधितश्चलम्। दृक्क्षितौ वलनं प्राग्वत् त्रिज्याप्ते परिधास्यते। चरपक्त्यानया सम्यक् समवृत्तनतांशजम्। वलनं स्यात् तथा यच्चे क्षाहोरात्रनतादपि। अक्षोन्मण्डलयोर्योगः समदिक्क्रेऽन्यथान्तरम्। तत्त्रिज्यावर्गविश्लेषपदमक्षाग्रभिन्नी। नतार्धदोर्ज्यया हृत्या वलनं चरजं स्फुटम्। नतं खाङ्गाहतं भक्तं द्युदलेनाप्तभागकैः। क्रमज्याहृज्ज्यया हृत्या स्थूलं वा दृज्ज्यया हृता। दृक्क्षितावुदगक्षे न्यसेद्दा रविमण्डलम्। बिम्बमध्ये वलनं तद् यदन्तरं हृत्तयोस्तयोः। बिम्बान्तबिम्बमध्योत्क्रान्तिभोर्यो ऽन्तरम्। चक्रदोर्भोग्यखण्डघ्नं बिम्बार्धं तत्तदाहृतम्। जिनज्याघ्नं त्रिभज्याघ्नमेवं स्यादन्तरं हि तत्। बिम्बार्धोद्धृतं त्रिभज्याघ्नमेवं त्रिज्या नतं भवेत्। सुधाकरबिम्बार्धत्रिज्यानाशे हते सति। भोग्यखण्डं जिनांशज्यागुणं तत्त्वाग्निभाजितम्। सन्निभार्कात् क्रमक्रान्तेः तत्तुल्यं जायतेऽथ वा। क्रमक्रान्तेरिदं बीज्यं भ्रान्तिं त्यजत बालिशाः!। नाभितं ध्रुवबद्बिम्बं तिर्यक् क्रान्तिस्तु सा समा। अत्र दृज्ज्यानुपातो यस्तत्तिर्यक्करणाय सः" सू०। "अथ वलनेषु दृक्कर्माणि चोत्क्रमज्यानिराकरणाय मूलसूत्रेऽपि वक्ष्यते तथापि किञ्चिदिहोच्यते। विषुवद्वृत्तं समवृत्तं प्रकल्प्य दक्षिणोत्तरवृत्तस्थे अक्षे आयनवलनस्योपपत्तिप्रतीत्यर्थं पृथग् दर्शयेत्। अक्षमण्डलप्राच्यपरायां एकः कदम्बो याम्या अन्यः सौम्या दिक्। एवं विषुवद्वृत्तप्राच्यपरायां ध्रुवौ। यदा मकरादिर्याम्योत्तरवृत्ते तदैव कदम्बोऽपि। अतो विषुवत्क्रान्तिवृत्तयोरैक्यं याम्योदक्। तया दक्षिणोत्तरवृत्तस्थ कुम्भादेव मध्ये खाहोरात्रवृत्ते पलभाङ्गचन्द्रा १८३५ अयनो वर्त्तन्ते। ते पलभाङ्गताः कालांशाः स्युः २२।१५। अथ कुम्भादिर्याम्योत्तरवृत्तं नीयते तावत् कदम्बो निजमण्डले चक्रांशाङ्किते तावद्भिरेव कालांशै २२। १५ दक्षिणोत्तरवृत्तसंपातात् प्रत्यगवलम्बते। कदम्बयाम्योत्तरसूत्रयोरन्तरं वलनम्। सा च तेषांशानां कदम्बवृत्ते ज्या। अतः क्रमज्या।

ऊनक्रमज्या तु बाणहृता भवति। कदम्बहृत्ते वा ज्या या क्रान्तिज्या। अतस्तेषामंशानां क्रमक्रान्तिज्या वक्तव्या। अथ वैकराशेः क्रमक्रान्तिज्या त्रिज्यागुणा दृज्याहृता तथापि सैव भवति। अथ वान्यप्रकारेणोत्क्रमज्यानिराकरणं दृज्यानुपातश्च प्रतिपाद्यते। क्रान्तिहृतेऽर्कस्थानेऽर्कबिम्बं सुद्धिकाकारं विन्यस्य बिम्बपरिधौ यत्र खाष्टोरात्रहृत्तं लग्नं यत्र च क्रान्तिहृत्तं तयोरन्तरं यद्दक्षिणोत्तरं तत् तत्र बिम्बे प्राच्यपरयोर्वलनम्। तच्चार्कक्रान्तेर्बिम्बार्धकलायुतखाष्टांश क्रान्तेश्चान्तरम्। अतस्तज्ज्ञानार्थम्। रविदोर्ज्ययोर्या क्रियमाणायां यद्भोग्यखण्डं तेन ज्ञानार्थकला गुणाः खरहिदस्रै २२५ भक्ताः। फलं दोर्ज्ययोरन्तरं स्यात्। तत्र तावत् स्फुटभोग्यखण्डज्ञानायानुपातः। यदि त्रिज्यातुल्यायां कोटौ प्रथमं ज्यार्धं खरहिदघ्ना भोग्यखण्डं तदाभिमतायामज्यां किमिति फलं स्फुटं भोग्यखण्डम्। तेन गुणितं बिम्बार्धं खरहिदस्रैर्भाज्यम्। एवं स्थिते खरहिदस्रमितयोर्युग्मखरयोर्नाशे कृते बिम्बार्धस्य कोटिज्या गुणस्त्रिज्या हरः। फलं दोर्ज्ययोरन्तरम्। ततः क्रान्त्यर्थमनुपातः। यदि त्रिज्यया जिनज्या लभ्यते तदानेन दोर्ज्यान्तरेण किमिति। फलं क्रान्त्यन्तरम्। तद्बिम्बव्यासार्धहृत्ते वलनम्। अथान्योऽनुपातः। यदि बिम्बव्यासार्धहृत्ते एतावद्वलनं तदा त्रिज्याव्यासार्धहृत्ते किमिति। अत्र त्रिज्यातुल्ययोर्युग्मखरयोस्तथा बिम्बार्धमितयोश्च तुल्यत्वाद्राशे कृते कोटिज्याया जिनाभज्या गुणस्त्रिज्या हरः। फलं कोटिक्रमक्रान्तिज्या। तत् त्रिज्याहृत्ते वलनम्। एवं विषुवद्वृत्तस्थित एव यदि। यतो भूमध्यात् खस्वस्तिकस्थबिम्बमध्यं प्रति यत् सूत्रं नीयते तत् त्रिज्यासूत्रं दण्डवत्। तदुपरिस्थं बिम्बं ऋजुवत् समत्वात् सममेव। यत् तत्परितस्त्रिज्याहृत्तं यत्र च वलनज्या दृश्या तदपि भूसममेव स्थितम्। अतस्तत्र यथागतमेव वलनम्। यदा किल मेषान्ते यदा तदा तत्क्रान्त्या खस्वस्तिकाद्दक्षिणे नतं बिम्बं स्यात्। त्रिज्यासूत्रं तदा कर्णरूपम्। बिम्बमध्याच्च लम्बसूत्रं ध्रुवपृष्ठस्थं दृज्या। सा तत्र कोटिः। क्रान्तिज्या भुजः। यथा त्रिज्यया कर्णस्थिता दृष्टे दण्डे ऋजवपि तत्सदृशेन्यां दिशि कर्णरूपं भवति। तत्र वलनज्यापि कर्णरूपिण्या भवितव्यम्। यत् पूर्वमानीतं क्रान्त्यन्तरं लम्बसूत्रप्रतिस्पर्धि तत् कोटिरूपं जातम्। तस्य कर्णकरणायानुपातः। यदि दृज्याकोट्या त्रिज्या कर्णस्तदानया किमिति। पूर्वं कोटिज्याया जिनज्या गुणस्त्रिज्या हरः। इदानीं त्रिज्या गुणो दृज्या हरः। अत्रापि त्रिज्यातुल्ययोर्युग्मखरयोर्नाशे कृते कोटिज्या जिनज्यागुणा दृज्यया भक्ता वलनं स्पष्टिसुपपन्नम्। युक्त्यानयैव विक्षेपमण्डले च क्रमज्ञेति। यथायनवलनार्थं ध्रुवात् परितो जिनभागैः कदम्बमण्डले निबद्धं तथा याम्योत्तरक्षितिजयोर्यः संपातः स समसंज्ञकः। तस्मादप्यक्षांशैः परितोऽक्षवलनज्ञानार्थं वृत्तं बध्नीयात्। तत् किलाक्षवलयसंज्ञम्। तदपि भांशैरङ्कितम्। तत्राक्षवलनोपपत्तिर्दर्श्यते। तद्यथा मध्याह्नेऽर्कात् समच्छेदं प्रति नीयमानं क्रान्तिकारं सूत्रं ध्रुवच्छिन्नं याति। अतस्तत्र विषुवन्मण्डलयोरेव याम्योत्तरा वलनाभाव इत्यर्थः। अथ यदि दिनार्धोन्नतं सूर्यं कृत्वा समच्छेदात् सूर्यं प्रति नीयमानं सूत्रं यत्र सममण्डले लगति तत्खस्वस्तिकयोर्मध्ये यावन्नोऽंशास्तावन्त एवाक्षवृत्ते समसूत्रध्रुवयोर्मध्ये भवन्ति। यतस्तत्समवृत्तानुकारं वृत्तम्। तेषां भागानामक्षवलये यावती क्रमज्या तावदेव समसूत्रध्रुवयोरन्तरम्। अथ क्षितिजस्थेऽर्के क्षितिजमेव समसूत्रम्। तत्राक्षवृत्ते च नवतिर्नतांशाः। तेषां ज्याक्षवलयेऽक्षज्यातुल्या स्यात्। अतः सममण्डलगतैर्नतांशैर्वलनं साधयितुं युज्यते। ते तु मध्याह्नेन ज्ञायन्ते। न तु सूर्येण। अतस्तज्ज्ञानार्थं स्फुटोऽनुपातः सूत्रार्थं कृतः। यदि दिनार्धतुल्येन खाष्टोरात्रनतेन नवतिः समसूत्रनतांशा लभ्यन्ते तदेष्टेन किमिति। लब्धनतांशानां या क्रमज्या सा क्षवलयाद्वृत्ते परिणाम्यते। यदि त्रिज्यावृत्ते एतावती ज्या तदाक्षजावृत्ते कियतीति। लब्धं किल वलनज्या स्यात्। परं सा दृज्याग्रे, न त्रिज्याग्रे। यतः समसूत्रध्रुवयोरन्तरं तत्। यद्ध्रुवयोर्मध्ये दृज्याग्राणांशा एव लभ्यन्ते। यदि दृज्यावृत्ते एतावती तदा त्रिज्यावृत्ते कियतीति। एवं सति पूर्वलब्धराशिस्त्रिज्या हरः। इदानीं गुणः। तत्त्वात् तयोर्नाशे कृते नतांशज्ञेया अक्षज्या गुणो दृज्या हरः। फलं स्फुटा वलनज्या स्यात्। अथ सूत्रान्याच्यते। यद्यक्षकोर्ज्यस्य ग्रहः ग्रहतुल्यया च साध्या। अयाग्रहतुल्ययोः समदिशोरेकान्यत्वान्तरं स किल याम्यः पूर्वं प्रतिपादित एव।

यद्दक्षमण्डलयोरन्तरं क्रान्त्यन्तरं दक्षिणोत्तरं वाऽक्षवलं स्यात्। यदा विषुवद्दृक्क्षादुत्तरतो दक्षिणतो वा क्रान्तिज्यान्तरे द्युज्याऽधिका तदा समसन्धादपि वाऽक्षवलाद्दक्षिणतो वा वाऽक्षवलयोरन्तरे चरदलं कलम्बम्। तदपि भागैरङ्कम्। वाऽक्षवर्गौनत्रिज्यावर्गस्य पदं लम्बज्या द्युज्यावद्व्याख्यम्। अथ द्युज्याधिकोपक्रान्तयोर्यो प्राक्परयोरन्तरसंपातौ तयोर्जीवावद्वृत्तं स्पष्टं निबध्यते दृक्क्षार्धमुपक्रान्तं नतांशानां ज्या। वैवाक्षोरात्रदलनतांशानां भुजज्या। अथ तदानयनम्। नतांशानां वा भुजज्योवा वा द्युज्याधिकं परित्यज्यते। यदि त्रिज्याधिकं एतावती तदा द्युज्याधिकं कियतीति। स्वमुपक्रान्तनतांशज्या भवति। ततो यदुपक्रान्तव्याख्यार्धं एतावती तदाचज्याव्याख्यार्धं कियतीति। ततो द्युज्याग्रे एतावती वलनज्या तदा त्रिज्याग्रे कियतीति। अत्र प्रथमेऽनुपाते त्रिज्या हरो द्युज्या गुणः। लतीवेऽनुपाते त्रिज्या गुणो द्युज्या हरोऽतस्तुल्यत्वात् तयोर्नाशे कृते नतांशानां भुजज्याचापीवा गुणितोपक्रान्तव्याख्यार्धेन भक्ता वा लब्धा वलनज्या स्यात्। अत उक्तमग्रान्तरतयोर्योग इत्यादि। अत्र दृष्टान्तः। यत्र किल दृग्भमण्डलक्रान्तिवृत्तयोरुदयः २०। १८ तत्र दृग्भमण्डलयोरर्कौ दिनार्धे सममण्डले भवति। तदा क्रान्तिवृत्तं दृङ्मण्डलवदाभाति स्यात्। सप्तर्षयोऽर्कौ राशिपञ्चकं सिंहान्तः। स च तदा क्षितिजे वर्त्तते। तत्र प्राक्परयोरन्तरं क्षितिजे प्रत्यक्षं वलनं दृश्यते। ज्या च सिंहान्तज्या। तत् कथं सप्तर्षयोर्नतक्रमक्रान्तिर्वलनम्। अतोऽयुक्तम्। अक्षदानयनं विना नेदमयाक्षं वलनसत्कथं दृश्यते। अयान्यो लक्षान्तदृष्टान्तः। यत्र देशे षट्षष्टिभागाः ६६ अक्षः। तत्र मेषादौ क्षितिजस्थे सर्वेऽपि राशयः समकालमेव क्षितिजस्था भवन्ति। तदा क्रान्तिवृत्तमेव क्षितिजं भवतीत्यर्थः। तत्र मेषादौ दृग्भादौ मिथुनादौ वा स्थिते रवौ परमं त्रिज्यातुल्यमेव स्फुटं वलनं स्यात्। अतः क्रान्तिवृत्तमाकुञ्चितरा जाता। तथा विक्षेपाभावे सति तदा रवेर्दक्षिणस्यां दिशि स्थितिः। चन्द्रस्योत्तरस्यामित्यर्थः। एतदुक्तं भवति। तत्र देशे तस्मिन् काले तस्य त्रिज्यातुल्यस्य वलनस्याक्षवशादुपपन्नाक्षदोयमेव वलनानयनं युक्तियुक्तम्। तत्र देशेऽक्षज्या २१०। मेषादिते रवौ द्युज्या ३३१८। चरज्याग्रम् ०। क्षितिजस्थोर्कं नतघटिकाः १५। आयनवलनचापांशाः २४। आक्षवलनचापांशाः ६६। स्फुटवलनस्य चापांशाः ८०। वृषादिगे रवौ द्युज्या २२६६। चरज्याग्रम् १६७०। नतघटिकाः १८। २८। आयनवलनचापांशाः २१। ४। अक्षजस्य ६८। ५६। स्फुटवलनस्य चापांशाः ८०। मिथुनादिगे द्युज्या ११८। चरासः ३३६५। नतघटिकाः २४। ३७। आयनवलनांशाः २१। ३२। अक्षजस्य ७७। २८। स्फुटस्य ८०। एवं सर्वत्र।"

वलभि (भी) स्त्री वल्यते आच्छाद्यते वल-अभि वा ङीप्। वडभीशब्दार्थे गोपालक्षाम् अमरटी०।

वलय पुंन० वल-अयन्। १कङ्कणादिकटकादौ अमरः। उत्तरपदस्थः तदाकारवेष्टने यथा भूवलयम्। २वेष्टनभूमौ ४गोले च। ५गजरोगभेदे माधवः "वलास एवायतस्ततश्च गोलं करोत्यन्नमतिं निगद्य। तं सर्वदेवाप्रतिकार्यमेव्यं विवर्जनीयं वलयं वदन्ति"। ६वेत्रलतायां ७कङ्कुभे जटा०। [अमरः।

वलयित त्रि० वलयमिव आचरितम् वलय+कि-क्त। वेष्टिते

वला स्त्री वल-अच्। (बेड़ेला) ओषधिभेदे रायमुकुटः। २बलाशब्दार्थे च। [बला० टाप्।

वलाक पुंस्त्री० वल-आकन्। वकपक्षिणि अमरः स्त्रियां

वलाहक पु०वारि वहति पृषो०। १मेघे २सप्तके च अमरः। ३पर्वते दैत्यभेदे ५नागभेदे मेदि० श्रीकृष्णस्य हयभेदे "स्कन्दस्तु सदानन्दः सारविवास्य दारुकः। सुरक्षाः शैव्यसुग्रीवमेघपुष्पबलाहकाः" विष्णु०।

वलि पु० वल-इन्। उपकारद्रव्ये ओड्यादित्वमित्यन्ये।

वलिर त्रि० वल-घञर्थे क वलसंवरणस्यास्य इरन्। केकरे अमरः।

वलिश न० वलिना उपकारद्रव्येण श्यति शतृत्वान् यो-क। वडिशशब्दार्थे। [वडिश जटा०।

वलीक न० वल्यते संव्रियतेऽनेन ईकन्। वनोकशब्दार्थे

वलूक न० वल-बा ऊक। १अक्षरे २पक्षिभेदे मि०को०।

वल्क भाषणे चु०उभ०हि०सेट्। वल्कयति ते अवल्कत त।

वल्क न० वल-संवरणे क कस्य नेत्वम्। १वल्कादीनां त्वचि वल्कले २मतृक्षानां त्वचि वल्के (छाल) मेदि०। ३अक्षे च विश्वः। ४पङ्क्तिवाद्ये पु० राजनि०।

वल्कतरु पु० वल्कप्रधानः तरुः मा०त०। सुवाकवृक्षे राजनि०।

वल्कद्रुम पु० वल्कप्रधानो द्रुमः। भूर्जपत्रवृक्षे राजनि०।

वल्कल न० वल्क-अलच् कस्य नेत्वम्। १त्वचे (दारचिनि) द्रुमे राजनि० २वल्कि (छाल) पुंन० अमरः। ३शिखावलकायां स्त्री राजनि०।

वल्कलोष्ठ पु० वल्कलमयो ओष्ठः। पट्टिकाकोष्ठे राजनि०।

वल्ग गतौ भ्वा० पर० सक०सेट्। वल्गति अवल्गीत्। [हेमच०

वल्गा स्त्री वल्ग-अच्। (लगाम) अश्वसञ्चालने रज्जुभेदे

वल्गित न० वल्ग-भावे क्त। १अश्वस्य गतिभेदे द्रुतगतौ अमरः। २गमने ३वञ्चनायां च।

वल्गु पु० वल्ग-संवरणे उ-गुक् च। १ज्ञाने २मनोहरे त्रि० मेदि०। संज्ञायां कन्। वल्गुक चन्दने वने पक्षे च न०। चारुणि सुन्दरे च त्रि० अजयः। अस्यौणादिकत्वमित्यन्ये।

वल्गुपत्र पु० वल्गूनि पत्राणि यस्य। वनसङ्गे शब्दर०।

वल्गुला स्त्री वल्ग-उला। १वागुच्यां सोमराज्यां २खगभेदे राजनि०संज्ञायां कन्। वल्गुलिका तैलपायिकायां हेमच०

वल्भ भक्षणे भ्वा० आत्म० सक० सेट्। वल्भते अवल्भिष्ट।

वल्मिकि पु० वल्-इकि सुट् च। कीटविशेषजाते मृत्तिकास्तूपे (उधेर डिपि) शब्दर०। वल्-इक सुट् च। वल्मिक तत्रार्थे भरतः।

वल्मीक पुंन०वल्-ईक सुट् च। क्षुद्रकीटजातमृत्स्नूपे अमरः तन्मृदा शौचनिषेधो विष्णुपु० उक्तो यथा "वल्मीकस्फिकोत्खातां मृदमन्तर्जलां तथा। शौचार्थिनां नेहाच्च नादद्यात् क्षेपसम्भवाम्"। देवप्रतिमायाः शिल्पिदोषशान्तये तन्मृदा प्रतिमालेपनं विहितं यथा "वल्मीकमृत्तिकाभिश्च गोमयेन समन्वना। लालयेत् शिल्पिसंस्पर्शदोषाशान्तिप्रशान्तये" देवप्र० व०। तेन देवमूर्तीनां स्नापनमपि देवप्र० त० विहितं यथा "स्नापयेत् प्रथमं देवं तोयैः पञ्चविधैरपि। पञ्चामृतैः पञ्चगव्यैः पञ्चसूत्रविलेपनैः। मृत्तिका करिदन्तस्य पर्वताश्वखुरस्य च। कुशवल्मीकसम्भूता मृत्पञ्चक-मुदीरितम्" देवप्र० त०। तत्राविर्भूते प्राचेतसे वनाम-ख्याते रामायणकर्त्तरि २मुनिभेदे ३रोगभेदे च विश्वः। ४दोषनिदानादि भावप्र० उक्तं यथा "श्रीवांसकक्षाकरपादशेषे सन्धौ गले वा त्रिभिरेव दोषैः। सन्निः स वल्मीकवदक्रियायां जातः क्रमे-णैव सतप्रदुष्टिः। सुस्थैरनैस्त्वतितोदवह्निः विसर्पवत् सर्पति शोफताप्तैः। वल्मीकमाहुर्भिषजो विकारम् निष्प्रत्यनीकं चिरजं विशेषात्"। वल्मीकवदिव्यनेन अ-चुरधिकरत्वसङ्गत्यवगाढमूलत्वञ्च लक्ष्यते निष्प्रत्यनीक-मुपचारायोग्यम्"। ततः भवार्थे रञ्। वाल्मीकि वल्मीकभवे प्राचेतसे मुनौ शब्दरत्न०।

वल्मीकयोनि न०वल्मीकस्य योनिरिव। शोतोऽञ्जने राजनि०

वल्मीकूट न० वल्मीकं कूटमिव यस्य०। वल्मीके हेमच०

वल्ल(ल्लू)ल छेदने पवित्रताकरणे च अदः चुरा० उभ०सक० सेट्। वल्लु(ल्लू)लयति ते अवल्लु(ल्लू)लत् त।

वल्ल संवरणे भ्वा० आत्म० सक० सेट्। वल्लते अवल्लिष्ट।

वल्ल पु० वल्ल-घञ्। १गुञ्जाफलपरिमाणे "वल्लस्तुगुञ्जे" शोभा० २गुञ्जाफले वैद्यकम्।३सार्द्धगुञ्जामाने "गोधूमहितयोन्मिता तु कथिता गुञ्जा तया सार्द्धया वल्लः" राजनि०।

वल्लकी स्त्री वल्ल-कन् गौरा० ङीष्। १वीणायाम् अमरः। २वल्लुकीवृक्षे च राजनि०।

वल्लभ पु० वल्ल-अभच्। १दयिते २सख्यले अमरः। ३उत्त-मार्णे च मेदि०। ४दयितायां स्त्री हेमच०।

वल्लभपाल पु० वल्लभं पालयति पाल-अण्। अश्वपाले

वल्लर न० वल्ल अरन्। १क्षणागुरुणि मेदि० २गहने २कुञ्जे च राजनि०। ४मञ्जर्यां शब्दर०।

वल्लरि(री) स्त्री वल्ल-अरि वा ङीष्। १मञ्जर्याम् अमरः। २मेषिकायां ३चिल्लमूले च राजनि०।

वल्लव पुंस्त्री० वल्ल-अच् तं वाति वा-क। १गोपे अमरः स्त्रियां ङीष्। २पाचके अमरः ३भीमसेने मेदि०।

वल्लि(ल्ली) स्त्री वल्ल-इन् वा ङीष्। १लतायाम् अमरः। २वृश्चिक्याञ्च शब्दच० दीर्घोन्तस्तु ३अजमोदायां मेदि० ४कैवर्त्तिकायाम् ५चव्ये च राजनि०।

वल्लीज न० वल्ल्यां जायते जन-ड। मरिचे राजनि०।

वल्लीदूर्वा स्त्री वल्लीरूपा दूर्वा। माङ्गल्यदूर्वायाम् राजनि०।

वल्लीबदरी स्त्री वल्लीरूपा बदरी। भूमिबदर्याम् राजनि०।

वल्लीमुख पु० वल्लीप्रधानः मुखः। वनसङ्गे (लगानि) राजनि०

वल्लीहस्त पु० वल्लीव दीर्घौ हस्तौ यस्य०। वानरवृक्षे राजनि०।

वल्लुर न० वल्ल-उरन्। १कुञ्जे २मञ्जर्यां ३खेले ४निर्जन-स्थाने ५गहने हेमच०। ६गहने च मेदि० वल्ल-उरन्। वल्लुर तत्रार्थे न० शब्दर०।

वल्लूर त्रि० वल्ल-ऊरन्। आतपादिना १शुष्कमांसे अमरः २शूकरमांसे मेदि० ३वनखेले ४वाहने ५ऊषरभूमौ च हेमच०।

वल्ला स्त्री वल्ल-यत्। धात्रीवृक्षे राजनि०।

वल्वज पु० वल्गते ऊर्ध्वं वेष्टयति वल्ल-क्विप् ताडश्च० वनु वजति गच्छति वज-अच् । १तृणभेदे अमरः । (वाउर) २दृढभेदे स्त्री राजनि० ।

वल्ह दीप्तौ चु० उभ०अक०सेट् । वल्हयति अवल्हयत् त वल्ह उत्क्षेपे भ्वा० आ० सक० सेट् । वल्हते अवल्हिष्ट ।

वव पु० वा ड प्रकारे हिलम् । ज्योतिषोक्ते तिथ्यङ्गानां प्रथमे करणे । अस्य बौधायनादित्वमित्यन्ये ।

वश्र छेदने भ्वा०पर०सक०सेट् । वश्रति वश्रः वश्रन्ति । अवश्रट् अवश्रीत् अवश्राश्च अवश्रतः ।

वश्र पुंन० वश्र-भावे घञ्, कर्त्तरि अच् वा । १दायत्वे २प्रभुत्वे च आयत्ते त्रि० शब्दर० ।

वश्रंवद त्रि० वश्रं वशकरं मधुरं, वशोऽस्मिन्निति वा वदति वद-खच् मुम् च । १प्रियवाक्यवादिनि २मधुरवादिनि (तवाहं वश्रः) इति २वादिनि च । [करणे ।

वश्रक्रिया स्त्री वश्रस्य क्रिया करणं क्र-भावे श । वशीवश्रग त्रि० वश्रं गच्छति गम-ड । वशीभूते ।

वश्रवर्त्तिन् त्रि० वश्रे वर्त्तते वृत-णिनि । वशीभूते ।

वश्रा स्त्री वश-अच् । १वन्ध्यायां २दोग्ध्यां ३सुतायां ४कुरिण्यां स्त्रीगव्याच्च मेदि० । अनेन जातेः समासे वरनि० गोवश्रा । [चन्द्रने स्त्री ।

वश्रिक त्रि० वशोऽस्यास्य ठन् । १स्यूने अमरः २अनुरूवश्रित्व न०वश्रिनो भावः त्व । १स्वातन्त्र्ये २ईश्वरस्य ऐश्वर्यभेदे च । तल् । वश्रितायत्व स्त्री । [स्वतन्त्रे च ।

वश्रिन् त्रि० वशोऽस्यास्य इनि । १जितेन्द्रिये २स्वाधीने

वश्रिर न० वश-इरन् । १घासतृणवन्धे अमरः । २गजपिप्पल्याम् ३वेश्यां च पु० राजनि० ।

वश्रिष्ठ अतिशयेन वशी इष्ठन् इनेर्लुक् । अतिशयजितेन्द्रियतायुक्ते मुनिभेदे ।

वश्रीकरण न० अवश्रः वशः क्रियतेऽनेन वश-च्वि-कृ-ल्युट् । तन्त्रादुक्ते वशतासम्पादके मन्त्रिमन्त्रादौ ।

वश्रीर पु० वश-ईरन् । गजपिप्पल्याम् जटा० ।

वश्र्य न० वश-यत् । १लवङ्गे शब्दर० । २आयत्ते त्रि० अमरः

वष वधे भ्वा० पर० सक० सेट् । वषति अवषीत् अवाक्षीत् । ववक्षतुः ।

वषट् अव्य० वह-डषटि । देवोद्देशकहविष्प्रक्षेपे अमरः ।

वषट्कार पु० वषट्+कृ-घञ् । १देवोद्देशकत्यागरूपे यज्ञे २वषडिति करणे वजतिशब्दे काल्या०वाक्यं दृश्यम् ।

वषट्कृत त्रि० वषट् इति कृतम् कृ-क्त । हुते अमरः ।

वष्क गतौ भ्वा० आक्र० सक० सेट् । वष्कते अवष्किष्ट ।

वष्कय पु० वष्क-अयन् । एकहायने वत्से अमरः ।

वष्कयणी स्त्री वष्कयमेकहायनवत्सं नयति स्थानान्तरं नी-ड गौरा० ङीष् वत्सम् । चिरप्रसूतायां गवि अमरः । जात्या समासेऽस्य वरनि० गोवष्कयणी ।

वष्कयिणी स्त्री वष्कय एकहायनो वत्सोऽस्त्यस्या इनि । चिरप्रसूतायां गवि अमरः वष्कयणीति वा पाठः । "वष्कयिण्यास्त्रिदोषघ्नं तर्पणं वत्सतृण्यपयः" भावप्र० ।

वस छेदे छेदने बधे च सक० चु० उभ० सेट् । वासयति ते अवीवसत् त । अधि+गन्धादिनासंस्कारे सक० ।

वस स्नेहे दिवा०पर०सक०सेट् । वस्यति इरित् अवसत् अवासीत् उदित् ङा वेट् ।

वस निवासे भ्वा०पर०सक०अनिट् यजा० । वसति अवात्सीत् उवास ऊषतुः उषितः उषित्वा । अधि+अनु+उप—आ+वा वसतेराधारस्य कर्मता अधिवसति वैकुण्ठं हरिः स्त्रि०को० अनुवसति उपवसति आवसति । उप+ अभोजने तत्राधारस्य कर्मता "एकादश्यामुपवसेत्" इत्यादि ।

वस आच्छादने अदा० आ० सक० सेट् । वस्ते अवसिष्ट ।

वस वासने सुरभीकरणे अद०चु०उभ०सक०सेट् । वासयति ते अववसत् त ।

वसति(ती) स्त्री वस-अति वा ङीप् । १वासे २स्थानिन्यास् "वसतीरुषित्वा" रघुः । ३निकेतने मेदि० ४स्थाने च ५शिविरे त्रि० को० ।

वसतिवरी स्त्री व०व० सोमपइनार्थं अपसु । "अग्नीषोमीयस्य पशोरालंभनात्ते वसतीवरीयइपं स्कन्दमानानालभन्तामिते" काल्या० श्रौ० ८।६।७। "सोमार्थं आपो वसतीवरीशब्देनोच्यन्ते" कर्क० । अथ सोमाभिषवोपयुक्तानां वसतीवरीसंज्ञानामपां यइपमभिधीयते" वेददी० यजु० ६।२२ ।

वसन न० वस-आच्छादने कर्मणि ल्युट् । १वस्त्रे अमरः । भावे ल्युट् । २आदने मेदि० वस-वासे आधारे ल्युट् । ३निवासे ४क्षीकटीभूषणे च शब्दर० ।

वसन्त पु० वस-झ । मधुमाधवात्मके ऋतुभेदे "मधुश्च माधवश्च वासन्तिकावृतूः" यजु श्रुतिः । २अतिसारे शब्दर० । ३नाट्ये विदूषकोपाधौ । ४रागभेदे च ।

"आन्दोलिता च देशाख्या लोला प्रथममञ्जरी । मन्दारी चेति रागिण्यो वसन्तस्य सदानुगाः" इत्युक्ता अस्य षड् रागिण्यः षट् इत्यन्ये रागिणीशब्दे दृश्याः ।

अस्य गानकालः। "श्रीपञ्चमी समारभ्य यावत् स्याच्छयनं हरेः। तावद्वसन्तरागस्य गानसक्तं मनीषीभिः" सङ्गीतदा०। ४तालविशेषे। "जयमङ्गलगन्धर्वमकरन्दत्रिभङ्गभाः। रतितालो वसन्तश्च जगझम्पोऽथ गारुडिः" वसन्ततालेकर्त्तव्यो नगणो मगणस्तथा" सङ्गीतदा०।

वसन्तक पु० वसन्ते कायति कै-क। स्योनाकवृक्षे शब्दमा०

वसन्तकुसुम पु० वसन्ते कुसुमं यस्य। सेतुवृक्षे शब्दमा०।

वसन्तकुसुमाकर पु० प्रमेहरोगनाशके औषधभेदे।

"प्रवालरसमौक्तिकाभ्रकमिदं चतुर्भागभाक् पृथक् पृथगथ कृते रजतक्षेमतो द्वयं शके। अयोमुलगरङ्कं त्रिकटकं विमर्द्याखिलं गुमेऽक्षनि विभावयेत् भिषगिदं धिया सप्रथः। दूर्वार्द्रधनियेक्षुजैः कमलमालतीपुष्पजैः पयःकदलिकन्दजैर्मलयजैश्चनाम्बुद्रवैः। वसन्तकुसुमाकरोरुपतिदिं वह्नोऽयितः समस्तगदकृद्भवेत् किल निजातुपानैरयम्" द्वयोर्गतरङ्कणी। [राजनि०।

वसन्तजा स्त्री वसन्ते जायते जन-ड। माधवीलतायाम्

वसन्ततिलक न० क्षेयं वसन्ततिलकं तभजा जगौ गः" छन्दो० उक्ते चतुर्दशाक्षरपादके छन्दोभेदे

वसन्तदूत पु० वसन्तस्य दूत इव। १कोकिले २आम्रवृक्षे ३पद्मरागे च विश्वः। ४माधवीलतायाम् ५पाटलीवृक्षे स्त्री मेदि० गौ० ङीष्। दुर्गाधिकारिकायां ७विद्यायाञ्च स्त्री ङीष् राजनि०।

वसन्तद्रु पु० वसन्तस्य द्रुः। आम्रवृक्षे शब्दर० तत्काले तस्य जायमानसङ्गत्वात् तथात्वम् वसन्तद्रुजादयोऽप्यत्र।

वसन्तसख पु० वसन्तस्य सखा ऋतुसमा०। कामदेवे हेमा०

वसा स्त्री वस-अच्। १मांसजाते देहस्थे धातुभेदे मेदसि अमरः। अङ्गुरीयशब्दे ५५८पृ०दृश्यम्। २मांसरोहिण्यां लतायाञ्च राजनि०। [त्रिका०।

वसाढ्य पुंस्त्री० वसाभिः आढ्यः। प्रचुरमेदस्के त्रिशुमारे

वसि पु० वस-इन्। वसने उणा०। [धरणिः।

वसिर न० वस-इरन्। १सासदूलवृक्षे २गजपिप्पल्यां च

वसिष्ठ पु० वरिष्ठ+पृषो०। ब्रह्मणः मानसपुत्रेषु सप्तर्षिषु ऋषिभेदे भा० अनु० अन्यादपि तन्निरुक्तिर्यथा "वरिष्ठोऽपि वसिष्ठोऽपि वसे वासमटेऽपि। वरिष्ठत्वाच्च वासाच्च वसिष्ठ इति विद्धि माम्"।

वसु न० वस-उ। १धने २रत्ने अमरः ३दर्भतृणभेदे ४स्थाने मेदि०। ५स्वर्गे त्रिका०। ६जले च त्रि०को०। ७अकवृक्षे पुंस्त्यर्थे ८वसौ १०गङ्गो ११गणदेवताभेदे च पु०अमरः। "धरो ध्रुवश्च सोमश्च अहश्चैवानिलोऽनलः। प्रत्यूषश्च प्रभासश्च वसवोऽष्टाविति स्मृताः" भा० आ० ६६अ०। १२अष्टसङ्ख्यायाञ्च १३मधुरे १४शुक्ले च त्रि० हेमच०। १५दीप्तौ १६दर्भतृणौषधौ च स्त्री शब्दच०। १७वसुदेवताके धनिष्ठानक्षत्रे पु० स्त्री०त०। १८चेदिराजाख्ये देवभेदे

वसुक पु० वसुना सूर्य्येणाम्ना कायति कै-क। १अर्कवृक्षे अमरः। २अकवृक्षे च मेदि०।

वसुकीट पु० वसुनि धने कीट इव। याचके त्रिका०।

वसुच्छिद्रा स्त्री वसुसङ्ख्यातानि पुष्पे छिद्राण्यस्याः। मञ्जिष्ठायाम् रत्नमा०। [देवे त्रिकाण्डशेषे अमरः।

वसुदेव पु० वसुना दीव्यति दिव-अच्। श्रीकृष्णजनके यादवभेदे

वसुदेवसू पु० वसुदेवात् भवति भू-किप्। श्रीकृष्णे वसुदेवसुतादयोऽप्यत्र। [दधाति धा-क वा। पृथिव्याम् अमरः

वसुधा स्त्री वसूनि धीयन्तेऽस्यां धा-अधिकरणे आधारे क, वसूनि

वसुधारा स्त्री वसोश्चेदिराजस्य प्रियार्थं धारा इतादिक्षरन्तिः। माङ्गल्येषु चेदिराजवसुहेतुना दीयमानायां घृतादिधारायाम्।

"कृत्वाऽग्नौ वसोर्धारां सप्त वारान् घृतेन तु। कारयेत् सप्त वारान् वा नातिनीचां न चोच्छ्रिताम्। आयुष्यमिति यान्त्यर्थं अद्धा तत्र समाहितः। ब्रह्मभ्यः शिष्टभ्यस्तदनु आद्यदानमथक्रमेत्" छन्दोगप०।

२जिनयक्षभेदे हेमच०। ३कुबेरपुर्य्यां शब्दमा०।

वसुन्धरा स्त्री वसूनि धारयति धृ-खच् मुम् ह्रस्वश्च। पृथिव्याम् अमरः।

वसुप्राण पु० वसवो प्राः प्राण इव यस्य। अग्नौ शब्दर०।

वसुमती स्त्री वसूनि सन्त्यस्यां मतुप्। पृथिव्याम् अमरः।

वसुरोचिस् पु०वसुने धनाय रोचते रुच-इसुन्। यज्ञे त्रि०को०

वसुल पु० वसु दीप्तिं लाति ला-क। देवे त्रिका०।

वसुहट्ट पु० वसूनां दीप्तीनां हट्ट इव। अर्कवृक्षे जटा०।

वस्त बध गतौ च सक० याचने दि० पु० उभ० सेट्। वस्तयति ते अववस्तत् त। [अमरः स्त्रियां ङीष्।

वस्त पुंस्त्री वस्यते वध्यते यद्वा वस्त्र-कर्मणि घञ्। छागे

वस्तक न० वस्त इव कायति कै-क। त्रिलिङ्गशेषे हेमच०।

वस्तकर्ण पु० वस्तस्य कर्णः पत्राकारोऽस्यास्य अच्। शालवृक्षे राजनि०।

वस्तगन्धा स्त्री वस्तस्येव गन्धोऽस्याः। अजगन्धायाम् राजनि०। [राजनि०।

वस्तमोदा स्त्री वस्तस्येव मोदो यस्याः। अजमोदायाम्

वस्ति पु० वस्ते आहत्योति मूलम् वस-तिच्। नाभेरधोभागे मूलाधारे स्थाने २वासे च २यच्चनदशावं पुंस्त्री व० व० अमरः (पिचकारी) क्षीरौषदानार्थे द्रव्यभेदे पु० तद्विधिः भावप्र०

"वस्तिर्द्विधानुवासाख्यो निरूहश्च ततः परम्। यः स्नेहो दीयते सः स्यादनुवासननामकः। कषाय क्षीरतैलैर्यो निरूहः स निगद्यते। वस्तिभिर्दीयते यस्मात्तस्मादस्तिरिति स्मृतः।" वस्तिभिः स्नेहादीनां मूलार्थैः "तस्मादनुवासनाख्यो हि वस्तिर्नेत्र उच्यते। अनुवासनभेदश्च मात्रावस्तिरुदीरितः। पञ्च द्रवस्य मात्रा तत्स्यादर्द्धापि वा भवेत्। अनुवास्यस्तु रूक्षः स्यात्तीक्ष्णाग्निः वेगधारिणी। नातिस्थूलकृशौ स्यातां स्नेहे वीर्यवतोद्धरौ। नास्याध्मा नानुवास्याश्च जीर्णान्नाद्दृढदर्दिताः। शोथमूर्च्छाऽरुचिभयश्वासकासकृताद्दृढाः। नेत्रं कार्यं सुवर्णादिधातुभिर्वंशनेषुभिः। तत्रैर्नैर्ऋितायाग्नेयैर्मणिभिर्वा विधीयते।" नेत्रं नाड़ी तथा चोक्तं विश्वप्रकाशे "नेत्रं मद्यपुष्पे वस्त्रे तन्मूले विलोचने। नेत्रवस्त्रे च नाड्यान्तु नेत्रो नेत्ररि भेद्यवदिति"। "एकवर्षात्तु षड्वर्षाद् यावन्मानं षडङ्गुलम्। ततो द्वादशकं यावन्मानं स्यादष्टसञ्ज्ञितम्। ततः परं द्वादशभिरङ्गुलैर्नेत्रदीर्घता। सुखच्छिद्रं कलायाभं छिद्रं कोलास्थिसन्निभम्। यवास्थ्नश्च भवेच्छ्रेष्ठं मध्यं गोधूमसन्निभम्। गोधूमास्थिसन्निभं मूले तस्मात् क्रमात् क्रमात् क्षयम्"। सुखच्छिद्रादिप्रमाणं नेत्रं क्रमेण षड्वर्षा यद्वा दशवर्षा यद्वा तद्वृद्धौ वर्षाच्च ज्ञेयाः। "आत्मराङ्गुष्ठमानेन मूले स्थूलं विधीयते। कनिष्ठिकापरीणाहमग्रे च गुटिकाङ्गुलम्।" परिणाहोऽत्र स्थौल्यम् "तन्मूले कर्णिके द्वे च कार्ये मात्राङ्गतुर्यकात्।" कर्णिका गवादिकर्णवत् "योजयेत्तत्र वस्तिञ्च वस्त्रदलविधानतः। सृगालशूकरगवां मक्षिकाया अपि वा भवेत्।" वस्तिरिति शेषः। "मूलकोषस्य वस्तिस्तु तदाभे तु चर्मणः। कषायरक्तः स दृढैर्वस्तिः स्निग्धो दृढोच्छ्रितः। द्रव्यवस्तेस्तु नेत्रं स्यात् तच्चमष्टाङ्गुलोन्नितम्। सुवर्णच्छिद्रं स्वप्रमाणनाडिका परिणाहि च। अरोगोपचयं वर्षं बलमारोग्यमायुषः। कुरुते परिहर्त्तव्ये वस्तिः सम्यगुपाचितः। दिवा भीते वमने च स्नेहवस्तिः प्रदीयते। ग्रीष्मवर्षाशरत्काले स्नाने स्यादनुवासनम्। न चातिस्निग्धमशनं भोजयित्वानुवासयेत्। अदं मूत्रांश्च जनयेद्विधा स्नेहः स्रयोऽस्रितः।" विधा भोजने वस्तौ च। "स्नेहं भुक्तवतोऽल्पन्तु स्नेहं वर्त्मसु स्रावयेत्। सुस्निग्धमतो जन्तुं भोजयित्वानुवासयेत्"। सुस्निग्धं यथोचितस्नेहं भोज्यं भोजयित्वेत्यर्थः। "क्षीणस्यानुभौ वस्ती नातिकार्श्यकरौ स्मृतौ। अतिस्थौल्यौ तथानाढ्यमातीव्रारकारकौ" उभौ वस्ती अनुवासननिरूहाख्यौ। "उत्तमा मात्रयैः षड्भिर्मध्यमा मात्रयैस्त्रिभिः। यवाद्यैर्न हीना स्यादनुमात्रानुवासने। यतोऽनुवास्यवाक्यात्र देयं स्नेहे च न्यूनकम्। तस्मात्तोत्तमसंख्यात्या षट्पलं यमाधकैः। विरेचनास्थापनात्ते गते मात्रवशाय च। मुक्तवान्नायानुवास्याय वस्तिर्देयोऽनुवासनः। अथानुवास्यं भुक्तवतस्तस्यात्तु स्नेहदितं यत्नैः। भोजयित्वा यथामात्रं कृतवृद्धमथं ततः। शुद्धदानिवस्तिमूलं योजयेत्स्नेहवस्तिना" यस्मात्सुस्नेहितम् यस्मात्सुना स्नापितम्। "शुष्कस्य वामपाणेन वामजानुप्रसारिणः। कुंचितापरजङ्घस्य नेत्रं स्निग्धे गुदे न्यसेत्। दृढं वस्तिसुखं सर्वैर्वामहस्तेन धारयेत्। पीड़येद्दक्षिणेनैव प्रथमेन धीरधीः। मुञ्चाकाशञ्चयादींश्च वस्तिकाले न धारयेत्। तिर्यक्प्रक्षिप्तः कायः शोफो वस्तौ च पीड़ने। ततः प्रक्षिप्ते स्नेहे वस्तौ वामयतो भवेत्। खजानुनः करावर्त्तं कुर्यात्कोटिकया पुनः। एवं मात्रा भवेदेवा सुखैवेह निश्चयः। निमिशोन्मेषणं पुंसामङ्गुल्या कोटिकाय वा। गुर्वक्षरोच्चारणं वा मात्रामेवं वदन्ति बुधैः। प्रसारितैः सर्वगात्रैर्यथावीर्यं प्रसर्पति" यथावीर्यं स्नेहादि। "ताड़येत्तत्तयोरेनन्नीस्नीत्वारान् यत्नैः यत्नैः। स्निग्धोष्णैव तथा शीघ्रं यथास्नैर्योक्तमेवतः। स्निग्धोष्णैनं जपाभिश्च पूर्ववत्ताड़येद्बुधः। यथास्नं पदतस्तस्य तीन् वारान् तृप्तिमेवतः। स्नाते विधाने तु तत कुर्यात्तिष्ठेत् यथासुखम्। सानिलः सपुरीषश्च स्नेहः प्रत्येति यस्य तु। उपद्रवं विना शीघ्रं स सम्यगनुवासितः। जीर्णान्नमथ सायाह्ने स्नेहे प्रत्यागते पुनः। सस्नेहं भोजयेत्कामं दीप्ताग्निस्तु नरो यदि। अनुवासिताय दातव्यमितरेऽह्नि सुखोदकम्। धान्याम्लशुष्ठीकथायं वा स्नेहव्यापत्तिनाशनम्। सुखोदकमुष्णोदकं आपत्तिव्याधिः। "अनेन विधिना षड्वा सप्त चाष्टौ नवापि वा। विधेया वस्तयस्तेषामन्ते नेत्र निरूहणम्। दत्तस्तु प्रथमो वस्तिः स्नेहयेद्विवलक्षयौ। सम्यग्दत्तो द्वितीयस्तु मू

श्लेष्मनिर्हं जयेत्। वस्तं वर्षेच स जयेन्नरोवस्तु प्रयोजितः। चतुर्थषष्ठमो दन्तौ क्लेदयेतां रसाहजौ। अष्टमो मांसं क्लेदयति वह्निमो मेद एव च। दशमो नवमस्थापि मज्जानञ्च यथाक्रमम्"। यथाक्रममिति वचनादष्टमोऽस्थि क्लेदयेत्। "एवं युक्तगतान् दोषान् द्विगुणः साधु साधयेत्।" अष्टादशदिवसावधिरवस्तिफलम् "अष्टादशाष्टादशकाहिनाडु यो ना विशेषते। स कुञ्जरवलोऽश्वस्य जवतुल्योऽमरप्रभः। दृढाय वस्तवाताय क्लेदयन्तिं दिने दिने। दद्याद्दोषक्षयान्वेषा-मन्यावाधभवाय त्रिदृढात्। क्लेदोऽल्पमात्रो दृढार्थां दीर्घकालमनत्ययः।" अनत्ययः अबाधः। "तथा स्निग्धः स्निग्धानामल्पमात्रः प्रशस्यते। अथ वा वस्त तत्कालं क्लेदो निर्याति केवलः। तस्माच्चलतरो देहो न हि स्निग्धेऽवतिष्ठते।" अवतिष्ठते दृढः क्लेद इति शेषः "अशुद्धस्य मलोन्निग्रः क्लेदो नैति यदा पुनः। तदाकृष्टदनाघ्राने मूर्धं स्रावश्च जायते। पक्वाशये गुदस्तस्य दद्यान्निरूहणम्। तीक्ष्णं तीक्ष्णौषधैर्युक्तं क्रूरकर्त्तिमथापि वा। यथानुलोमनो वायुर्मलः क्लेदश्च जायते। तथा विरेचनं दद्यात्तीक्ष्णं मध्यञ्च शस्यते। वस्त नोपद्रवं कुर्यात् क्लेदवर्त्तिरनिःसृता। अर्वोऽल्पो व्याहतो रौक्षाद्वेष्टयेः स विजानता। अनाघातस्त्रिरात्रे क्लेदं संशोधनैर्हरेत्। क्लेदवस्त्यनवाप्तौ नान्यः क्लेदो विधीयते। गुदच्युतस्रुतपूतीकमार्गोद्वेष्टनरौक्षिणम्। अतएरीं सकुचरं काकनासां प्रकोपिणाम्। अवमाघातशोकोत्तकुरुत्वान् प्रकृतोन्निताम्। चतुर्थोऽल्पमलः पक्वा द्रोणयोर्वेष तेन च। क्लेदेनैवाहृतं सर्वैर्दोषैर्वै प्रकोपितैः। अनुवासनमेतद्धि सर्वव्याधिविकारहृत्।" पूतीकः करञ्जः रौक्षिणं रूक्षत्वकारकत्वविशेषः। काकनासा (काकाठोठी) प्रकृतम् प्रकृतस्थम्। "घोडा यत्र व्यापदस्तु जायते वस्तिकर्मणः। दूषितान् वस्तदोषेण तांश्चिकित्साम्यान् शृणुतान्। वस्तदोषेण वस्तुचितनेत्रादिसामग्र्या। "आनाहारविहाराच्च परिहाराच्च वस्तयः क्लेदयन्त्यमाः काश्चो नात्र कार्य्या विचारणा।"

वस्तिकर्माख्य पु० वस्तिकर्मणा तत्प्रोक्तनत्याप्रारोक्तात्। अरिष्टसंज्ञे मन्त्रभ०।

वस्तिमल न० वृत०। मूत्रे हेमच०।

वस्तु न० वस-तुन्। १वृक्षे २पदार्थे लिङ्गा० ३वस्तुपदार्थे च।

वस्तुक न० वस्तु+स्वार्थे कन्। १वास्तुके शाकभेदे २शेतपिङ्गोशाके च स्त्री राजनि०।

वस्त्य न० वस्तौ साधु यत्। वस्तौ भवः।

वस्त्र न० वस-ष्ट्रन्। परिधानाद्युपयुक्ते कार्पासादौ वसने। वस्त्रधारणगुणाः यथा "स्नातस्यानन्तरं सम्यग्वस्त्रेण तनुमार्जनम्। कान्तिप्रदं शरीरस्य कण्डूयादोषनाशनम्। कौषेयं चित्रवस्त्रञ्च रक्तवस्त्रं तथैव च। वातश्लेष्महरं तत्तु शीतकाले विधारयेत्।" कौषेयं पट्टाम्बरं तस्तरवस्त्रञ्च। "मेध्यं शुचीतं पित्तघ्नं कार्पासं वस्त्रमुच्यते। तद्वारयेदृतुकाले तद्यपि लघु प्रशस्यते।" कार्पासं (कोकटी) इति लोके। कषायरागरक्तं वा। "शुक्लन्तु शुभदं वस्त्रं शीतातपनिवारणम्। नवोत्थं नच वा शीतं तन्तु वर्षासु धारयेत्। वस्त्रं कान्तमायुष्यं श्रीमदानन्दवर्द्धनम्। स्वच्छं वशीकरं दृश्यं नवं निर्मलमम्बरम्।" कान्तं कामोद्दीपकम्। "कदापि न जनैः सङ्गिधार्य्यं मलिनमम्बरम्। तत्तु वस्त्रं क्रमिकरं ग्लान्यलक्ष्मीकरं परम्।" अलक्ष्मीरशोभा दारिद्र्यं वा।" भावप्र०

अस्य परिधानविधिर्यथा स्मृतिः "विकक्षोऽन्तरीयञ्च नग्नत्वावस्त्र एव च। शौतं आर्द्रं तथा कर्म न नग्नश्चिन्नदेहपि। विकक्षः परीधानाद्वक्षितकक्षः। तथा च "परीधानात्ववहिः कक्षा निवद्धा आन्तरी भवेत्" स्मृतिः "वामे पृष्ठे तथा नाभौ कक्षमवसदाहृतम्। एभिः कक्षैः परीधत्ते यो विप्रः स शुचिः स्मृतः"। बौधायनः "नाभौ धृतञ्च यद्वस्त्रमाच्छादयति जानुनी। अन्तरीयं प्रशस्तं तदिच्छन्तस्त्रयोस्त्रयो।" प्रचेताः "दशा नाभौ प्रयोजयेत्" स्मृतिः "न स्यात् कर्मणि कञ्चुकीति"। उत्तरीयधारणं चोपवीतवत् "यथा यज्ञोपवीतञ्च धार्य्यते च द्विजोत्तमैः। तथा सन्धार्य्यते यद्वदुत्तराच्छादनं शुभम्" स्मृतेः। अत्र यथा द्विजोत्तमैः सन्ध्यावन्दनादिना उपवीतं धार्य्यते तथा उत्तराच्छादनमपि द्विजोत्तमैरिति प्रदर्शनमात्रम् प्रागुक्तशुक्लवसनेन सर्वेषां द्विजातीनामेवेतेः" भारद्वाजः "एकवेष्टाधो भवति तस्य उत्तरार्द्धेन प्रच्छादयतीति" आ० त०रघु०। "वस्त्रपरीधानमन्त्रादि "ब्रह्मातुराधवस्तुतिश्चविश्वाखड्गचित्रोत्तराग्निपवनादितिरेवतीषु। जन्मर्क्षजीव बुधशुक्रदिनोत्सवादौ धार्य्यं नवं वसनमीश्वर देवताश्च।" ज्यो० त०। "स्वर्णे चाक्षधनं,

ग्रहः ग्रथिदिने, क्षौमः सदा भूमिजे, वस्त्राणां बहुता बुधे, गुरुगुरौ विद्यागमः सम्पदः। नानाभोगयुतप्रमोद ग्रयनं विद्याङ्गना भार्गवे, सौरौ क्षुः खलु रोगशोकसहिता वस्त्रे धृते नूतने" कर्मलोचनम्। वस्त्र धारणयोग निथिवृद्धिदिनानि यथा। "मन्दभङ्गलवक्षीरु द्वादश्यां श्राद्धवासरे। वस्त्राणां धारणंयोगात्दरिद्रत्वाक्षयं कुलम्।" ह्या०त०।

परकीयवस्त्रधारणनिषेधो यथा "आसनं वसनं शय्या जायापत्यं कमण्डलुः। आत्मनः शुचिरेतानि न परेषां कदाचन"। ईषद्धौतादिवस्त्रस्य पश्चिमाद्यादिप्रसारितवस्त्रस्य च अधौतत्वं यथा "ईषद्धौतं स्त्रिया धौतं यद्धौतं रजकस्य तु। अधौतं तद्विजानीद्याद्विधवपश्चिमे।" कर्मलोचनम्। शङ्खतपाः "प्रागपसव्यं वा धौतं वस्त्रं प्रसारयेत्। पश्चिमाग्रं दक्षिणाग्रं पुनः प्रक्षालनात् शुचि" अत्राग्रं दशा इत्यर्थः। प्रचेताः "स्वयं धौतेन कर्त्तव्या क्रिया धर्म्या विपश्चिता। न च रजकधौतेन नाधौतेन भवेत् क्वचित्। पुत्रमित्रकलत्रेण स्वजातिबान्धवेन च। दासवर्गेण यद्धौतं तत् पवित्रमिति स्थितिः"। स्नानोत्तरं उष्णीषवस्त्रस्य धार्य्यत्वं यथा उष्णीषधारणं शिरोरुजापनयनाय। तेन स्नानानन्तरं धार्य्यम्। तथा च महाभारतम् "आप्लुतस्याधिवासेन जलेन च सुगन्धिना। राजहंसनिभं प्राप्य उष्णीषं शिरसार्पितम्। जलक्षयनिमित्तं वै वेष्टवासस मूर्द्धनि"। शिरसार्पितम् अनादरेण। निषिद्धवस्त्राणि यथा भारते "न क्षौमेण न दग्धेन पारक्येण विशेषतः। मूषिकोत्कीर्णजीर्णेन कर्म कुर्याद्विचक्षणः।" नारसिंहे "न रक्तवस्त्रं वासो न नीलञ्च प्रयच्छते। अन्यत्रञ्च दशाहीनं वर्जयेदम्बरं बुधः। वस्त्रयुग्मं उत्कटरक्तविशेषम्। आचाररत्ने अथना "दशाहीनेन वस्त्रेण कुर्यात् कर्माण्यभावतः"। विष्णुधर्मोत्तरे "वस्त्रं नान्यधृतं धार्य्यं न रक्तं मलिनं तथा। जीर्णं वाऽपद्यञ्चैव नैतं धार्य्यं प्रयत्नतः। उपानहं नान्यधृतां ब्रह्मक्षत्रञ्च धारयेत्। न जीर्णमलवद्वासा भवेच्च विभवे सति।" योगियाज्ञवल्क्यः "स्नात्वैव वाससी धौते अक्लिन्ने परिधाय च। प्रक्षाल्योरू मुखञ्चैव हस्तौ प्रक्षाल्य वेततः। अभावे धौतवस्त्राणां शाकपौमादिकानि च। कृतयो योगपट्टं वा दिर्घोष्णं वेन वा भवेत्। अधौतेन च वस्त्रेण नित्यनैमित्तिकीं क्रियाम्। कुर्वन् फलं न चाप्नोति दत्तं भवति निष्फलम्"। कृतयो नेपालकम्बलः। तत्रापवादः "राङ्कवे पट्टसूत्रे च सूचीछिद्रं न दुष्यति" विधानपा० "नीलोरक्तं न दुष्यतीति क्वित्पाठः। तर्पणात् पूर्वं स्नानवस्त्र निष्पीडने निषेधो यथा "निष्पीड़यति यः पूर्वं स्नानवस्त्रन्तु तर्पणात्। निराशास्तस्य गच्छन्ति देवाः पितृगणैः सह"। जाबालिः "स्नानं कृत्वार्द्रवासास्तु विष्मूत्रं कुरुते यदि। प्राणायामत्रयं कृत्वा पुनः स्नानेन शुध्यति। नार्द्रमेकञ्च वसनं परिदध्यात् कदाचन"। हारीतः "आर्द्रञ्च सप्तवाताहतमपि शुद्धमिति"। संक्रान्त्यादौ वस्त्रनिष्पीड़ननिषेधो यथा यद्विष्णुधर्म्मोत्तरनिगमौ "संक्रान्त्यां षड्दश्यान्तु द्वादश्यां श्राद्धवासरे। वस्त्रं न पीड़येत्तत्र नच चारेण योजयेत्" ति०त०

वस्त्रकुट्टिम न० वस्त्रनिर्मितं कुट्टिमं यत्र। १वस्त्रगृहे (ताम्बू) २वस्त्रे त्रिका०। [निर्मिते गृहे त्रिका०।

वस्त्रगृह न० वस्त्रनिर्मितं गृहम् शाक०। (ताम्बू) वस्त्र-

वस्त्रग्रन्थि पु० ६त० नीव्यां त्रिका०।

वस्त्रपुत्रिका स्त्री वस्त्रनिर्मिता पुत्रिका। वस्त्रनिर्मितपुत्तलिकायाम् शब्दमा०। [२साकरखण्डदले च राजनि०]

वस्त्रभूषण स्त्री वस्त्रस्य भूषणं यस्याः ६ब०। १माक्षिकायाम्

वस्त्रयोनि स्त्री ६त०। त्वक्फलत्रसिरोमादौ अमरः।

वस्त्ररञ्जन पु० वस्त्रं रञ्जयति रञ्ज-णिच्-ल्यु। कुसुम्भे राजनि०।

वस्त्र न० वस-मन्। १वेतने २मूल्ये ३वस्त्रे ४द्रव्ये च विश्वः ५धने ६स्तुतौ च अमरटीकायां रमानाथः। मूल्ये पु० अमरः।

वस्त्रसा स्त्री वस्त्रंखति सो-क। स्त्रायौ अमरः।

वस्त्रौकसारा स्त्री वस्त्रनामौकस्य सारो यत्र। १इन्द्रगवाम् २इन्द्रनद्यां ३कुबेरपुर्य्यां ४कुबेरनद्यास्तु हेम०।

वह दीप्तौ चु० उभ० सक० सेट् इदित्। वंहयति ते अवंहिष्ट।

वह प्रापणे भ्वा० उभ० द्विक० यजा० अनिट्। वहति ते अवाक्षीत् ववोढ़ ववाह ऊहे ऊढः। अस्य प्रधानकर्मण्येव लकारादयः।

वह पु० ऊह्यतेऽनेन वह-अच्। १हलस्फालनदण्डे अमरः। वह-कर्त्तरि अच्। २घोटके ३वाहौ ४पथि त्रिका० ५नद्यां स्त्री हेमच०।

वहत पु० वह-अतच्। १हले २पात्रे च उणादिकोश०

वहति पु० वह-अति। १वायौ उणा०। २गवि ३सचिवे च मेदि०। [३गमने च।

वहन न० वह-भावे ल्युट्। १पुरभेदे त्रिका० २प्रापणे।

वहन्त पु० वह-झ। वायौ त्रि०कौ० २वाहे उणा०।

वहल पु० वह-अलच्। १पोते हारा० २दृढ़े त्रि० हेम०।

वहलगन्ध न० वहलो दृढो गन्धो यस्य। श्रम्बरचन्दने राजनि०।

वहलचक्षुस् पु०वहलानि चक्षुषीव पुष्पाण्यस्य। मेषशृङ्ग्यां (गाड़रसिङ्गी) रत्नमा०। [राजनि०।

वहलत्वच पु० वहला दृढा त्वचा यस्य। श्वेतलोध्रे

वहला स्त्री वहलानि पुष्पादीनि सन्त्यस्य अर्श आद्यच्। १शतपुष्पायां राजनि०। २स्थूलैलायां भावप्र०।

वहित्र न० वह-इत्र। १पोते जलयाने त्रिका०। स्वार्थे क। अत्रैवार्थे।

वहिरङ्ग न० वहिः प्रकृतेर्बाह्यमङ्गं यस्य। व्याकरणोक्ते प्रत्ययादिनिमित्तके प्रकृत्यवयवादिकार्य्ये। "असिद्धं वहिरङ्गमन्तरङ्गे" व्या० परिभाषा।

वहिरिन्द्रिय न० वहिर्देशाद्बाह्यस्य पदार्थस्य ग्राहकमिन्द्रियम्। शब्दादिबाह्यविषयग्राहकेषु श्रोत्रादिषु।

वहिर्द्वार न० वहिःस्थं द्वारम्। तोरणे अमरः।

वहिर्मुख त्रि० वहिः बाह्यविषये सुखं प्रवर्त्तता यस्य। बाह्यविषयासक्तमनस्के विषयासक्ते १जने २विमुखे च।

वहिस् अव्य० वह-इसुन्। बाह्ये अमरः।

वहेड़क पु०वह-अच् वहः एडक इव डहत् कायतो यस्य। विभीतकवृक्षे (बहेड़ा) राजनि०।

वह्नि पु० वह-नि। १अग्नौ २चित्रकवृक्षे अमरः ३भल्लातके ४निम्बूके राजनि०। तन्त्रोक्ते ५रकारे च। "वर्णोर्द्ध्वं वह्निसंस्थम्" इति श्यामाक्रोत्रम्। वह्निभेदादिकं यथा

"जन्मको दीपकश्चैव विश्वमध्यमशोभनाः। क्रव्यादश्चाग्निरुद्दिष्टः पञ्चधा दक्षिणाग्निवत्। एतेऽग्नयस्त्रयो मुख्या गार्हपत्यो दक्षिणाग्निस्तथैवाहवनीयकः। एतेऽग्नयस्त्रयो मुख्या श्रेषाश्चोपदृक्षयः" वह्नि०पु०। तत्र निषिद्धकर्म्माणि यथा "नाग्नीध्रोऽग्निं परिचरेत् न देवान् कीर्त्तयेद्बहून्। न चाग्निं लङ्घयेद्वीमान् नोपदध्याद्धः क्वचित्। न चैनं पादतः कुर्य्यात् सुखेन न धमेद्बुधः। अग्नौ न निक्षिपेदस्थि नाङ्गिः प्रशमयेत्तथा। न वह्निं मुखनिश्वासैर्व्यजनेनाशुचिर्बुधः। सुखमग्निं नैव कृत्वा सुशेषाणस्तु चिरं वसेत्। नाप्यक्षिपेन्नोपधमेत् न सृजेच्च च पाणिना। सुखेनाग्निं समासीनं सुखादग्निरजायत" कूर्म्मपु०१५अ०। अग्निवैलक्ष्यं तस्य शान्तिश्च यथा "अनग्निर्दीयते यत्र राष्ट्रे यस्य निरिन्धनः। न दीयते चेन्धनवान् स राष्ट्रः पीड्यते नृपैः। अल्पवेदेषु मासं वा तथाङ्गेष्वपि किञ्चन। प्रासाद तोरणद्वारं नृपवेश्म सुरालयम्। एतानि यत्र दह्यन्ते तत्र राजभयं भवेत्। विद्युता वा प्रदह्यन्ते तत्रापि नृपतेर्भयम्। धूमध्वानग्निजो यत्र तत्र विद्यान्नृपक्षयम्। विनाग्निं विस्फुलिङ्गाश्च दह्यन्ते यत्र कुत्रचित्। त्रिरात्रोपोषितत्वात्र पुरोधाः सुसमाहितः। सर्पिर्भिः क्षीरदध्याद्यैः सर्वैरेतेन च। दद्यात् सुवर्णञ्च तथा द्विजेभ्यो गामथैव वस्त्राणि तथा भवस्य। एवं कृते शान्तिमुपैति नाशं यदग्निवैलक्ष्यभवं द्विजेन्द्र!" वह्निपु०१०५अ०। हुतदेवताके ज्योतिषम्।

वह्निकरी स्त्री वह्निं देहस्यवह्निं करोति वह्नौ०अति क्त-ङीष्। १धातकीवृक्षे (धारफुल) शब्द०। २वह्निदीपके त्रि०। [दाहागुरुणि राजनि०।

वह्निकाष्ठ न० वह्नेर्दाह्यदाहायाष्ठकाष्ठं काष्ठम् या० त०।

वह्निगन्ध पु० वह्नौ दाहकाले गन्धो यस्य। सर्जधूपे शब्दच०

वह्निगर्भ पु० वह्निर्गर्भे यस्य। १वंशे २शमीवृक्षे स्त्री शब्दर०

वह्निज्वाला स्त्री वह्नेर्ज्वालेव दीप्तिराकारकत्वात्। १धातकीवृक्षे राजनि० हेम०। २वह्निशिखायाम्।

वह्निदीपक पु० वह्निं देहस्यवह्निं सेवनाद्दीपयति दीप-णिच्-ण्वुल् वह्निरिव दीप्यति दीप-ण्वुल् वा। १कुसुम्भे शब्दर०। २अग्न्युद्दीपके त्रि०। ३अजमोदायाम् स्त्री राजनि०। [ङीष्। जटामांसाम् रत्नमा०।

वह्निनी स्त्री वह्निं तत्कालं नयति नी-ड गौरा०।

वह्निपुष्पी स्त्री वह्निरिव तापकं पुष्पं यस्याः ङीष्। धातकीवृक्षे राजनि०।

वह्निभोज्य न० हुत०। घृते शब्दच०।

वक्षिमत्य पु० वक्षसे वक्षिजननाय मथ्नातीति मन्थ-कर्मणि यञ्। १गर्भाधिकारोक्ते ऋटा०। ईत०। २वक्षेर्मन्थने राजनि०। (तत्रैव न०।

वक्षिमिव पु० वक्षिर्मित्रं यस्य। १यायौ शब्दच०। ईत०।

वक्षिरेतस् पु० वक्षो निषिक्तं रेतो येन। १शिवे वक्षो हि निषिक्तात् शिवपीर्यात् शक्रादिसंक्रमेण क्षार्चिकेयोत्पत्तिः पुराणप्रसिद्धम्। ईत०।२कार्त्तिके च। [राजनि०।

वक्षिलोहक न० वक्षेः प्रियं लोहं धातुः स्वार्थे क। कांस्ये

वक्षिवधू स्त्री ईत०।१स्वस्मिन्भार्य्यायां स्वाहायाम् २स्वाहाक्रमके मन्त्रे च। वक्षिस्वादयोऽप्यत्र।

वक्षिवर्ण न०वक्षेरिव वर्णोऽस्य। रक्तोत्पले शब्दच०। [त्रिका०

वक्षिवल्लभ पु० वक्षेर्वल्लभ इवोपकारात्। सर्जरसे (धुना)

वक्षिवीज न० वक्षेर्ईश्वरवक्षेर्बीजमिव उपकारात्। १लोरके ईत०। वक्षिदेवताके तन्त्रोक्ते २रकारे च। ३निम्बुके राजनि० ४ हेमच०।

वक्षिशिख न० वक्षेरिव रक्तत्वात् शिखाऽस्य। १कुसुम्भे अमरः। २कलिन्यां २कलिकारीवृक्षे ४धातक्यां च स्त्री राजनि० ईत०। ५अग्निशिखायां स्त्री। [राजनि०।

वक्षिसख पु० ईत०। १वायौ। ईश्वरवक्षेरुपकारे २लोरके वक्ष न० वक्ष-यत्। १शकटे २वाहनमात्रे च हेमच०। ३तन्निष्पत्त्यां स्त्री टाप्।

वक्ष स्रवणे भ्वक० गतौ सेवने च भ्वक० चुरा० उभ० सेट्। वाक्षयति ते अवीवक्षत् त। [वाति अवासीत्।

वक्ष गमने क्षिंसने (क्षुचने) च अदा० पर० सक० अनिट्। वक्ष्य० वा-क्षा। १विकल्पे २साहश्ये ३अवधारणे ४समुच्चये अमरः। एवर्त्तेषु यथरत्ने उदाहृतं यथा (विकल्पे) यथैवा ब्रीहिभिर्वा यजेत। (उपमाने) मिश्रौ वाधौ मण्डकं गोर्वा रसः" इत्रे (अवधारणे) "सा वा शब्दोत्पादोया वा मूर्त्तिर्लक्षणमयी मम" न ह्यतीयेत्यर्थः। (समुच्चये) वायुर्वा दहनो वा। ५वितर्के ईषादपुरुषे च मेदि० [लटा०

वांशिक पु० वंशो नटादनं शिल्पमस्य ठक्। वंशीवादनशीले

वांशी स्त्री वंशे भवः अण् ङीप्। वंशरोचनायाम् राजनि०

वाक पु० वच-घञ्। १वचने "नमोवाकं प्रयाक्षद" उत्तररामचरितम्। पृषो० साधुत्वम्। पत्यभेदे "वाकोवाक्येतिहासेत्यादि" छान्दोग्यम्। "वाकोवाक्यम् अश्लिष्टवचनम्" भा०। वकस्येदम् तेषां समूहो वा अण्। १वकसम्बन्धिनि त्रि०। २वकसंघे पु० अमरः।

वाकुची स्त्री वाति क्विप् वाः कुच-अङ्गोचे क गौरा०ङीष् कर्म०। (वाकुच) १ओषधिभेदे २सोमराज्यां राजनि०।

वाक्कीर पु० वाचा कौतुकवाचा कीर इव श्लिष्टत्वात्। शुकपक्षिणि शब्दर०।

वाक्कुल न० क्षौत० कुलोक्ते कुलभेदे "अविशेषाभिहितेऽर्थे वक्तुमिप्रायादर्थान्तरकल्पनम् वाक्कुलम्" गौ० सू०। अथवा एकार्थशब्दबोधतात्पर्य्यकशब्दस्य शक्त्याऽर्थान्तरबोधतात्पर्य्यकत्वकल्पना वाक्कुलम् इत्तिः। यथा लेषादागतोऽयं नवकम्बलवत्त्वात् इत्युक्ते कुतोऽस्य नवसंख्यकाः कम्बला इत्युक्तिः।

वाक्पति पु० ईत०। १बृहस्पतौ अमरः २सुधनचतुरे च वाचः पतिरिव। ३निर्दोषोद्भतवचनयुक्ते राजसुकुटः।

वाक्पथ पु० वाचः पन्थाः विषयः षष्ठ्यभा०। वाक्यविषये

वाक्पारुष्य न० वाचा कृतं पारुष्यम्। १वाक्यकृते पारुष्ये तद्विषके २विवादभेदे च। तद्विवृतिः वीरमि०उक्ता यथा "तस्य च स्वरूपमाह नारदः "देशजातिकुलादीनामाक्रोशं न्यङ्गसंयुतम्। यद्वचः प्रतिकूलार्थं वाक्पारुष्यं तदुच्यते" इति। आक्रोशः आक्षेपः मर्म्मनमिति यावत् कलहप्रियाः गौड़ा इति देशाक्रोशः। अल्पलोकोपजीव्या ब्राह्मणा इति जात्याक्रोशः। "क्रूरचरिता वैश्यामित्रा इति कुलाक्षेपः। न्यङ्गं निकृष्टाङ्गमवद्यञ्च तद्युक्तं यद्वैगुण्यजननार्थं वाक्यं तदाक्पारुष्यमित्यर्थः। तस्य त्रैविध्यमाह स एव "निष्ठुराक्षीक्षतीव्रत्वादपि तत् त्रिविधं स्मृतम्। गौरवात्क्रमात्तस्य दण्डोऽपि स्यात् क्रमादुरुरिति" निष्ठुरादीनां स्वरूपमाह स एव "वाक्षेपश्चिरुद्रं क्षेपमश्लीलं न्यङ्गसंयुतम्। पतनीयैरुपाक्रोशैस्तीव्रमाक्रोशनोधिषः" इति। धिङ्मूर्ख! जाल्म! इत्यादि वाक्षेपमाक्रुष्टं निष्ठुरम्। न्यङ्गसंयुतं अवद्यभक्षिण्यादिगमनसंयुतम् अश्लीलम्। पतनीयैः सुरापानादिभिरुपाक्रोशैस्तीव्रं वाक्पारुष्यमित्यर्थः। कात्यायनोऽपि "यत्त्वसत्प्रतिषेद्धृभिः परमाक्षिपति क्वचित्। अभूतैर्वाऽपि भूतैर्वा निष्ठुरा वाक् स्मृता तु सा। न्यग्भावकरणं वाचा क्रोधात्तु कुरुते यदा। इत्तदेयकुलानान्तु अश्लीला सा बुधैः स्मृता। महापातकयोक्त्री च रागद्वेषकरी च या। जातिभ्रंशकरी वाच तीव्रा सा प्रथिता तु वागिति।" कल्पतरौ न्यङ्गावमूरुषमिति पठित्वा निकृष्टाङ्गप्रकाशनेन तिरस्करणमिति व्याख्यातम्। न्यग्भावकरणमिति तु माधवादिसंमतः पाठः। मध्यमध्यमोत्तममेदेन त्रैविध्यमाह हरिस्मृतिः "हेय

श्यामकुबादीनां क्षेपः पायेन योजनम्। द्रव्यं विना तु प्रथमं वाक्पारुष्यं तदुच्यते। भगिनीमातृसम्बन्धोपपातकदूषणम्। पारुष्यं मध्यमं प्रोक्तं वाचिकं शास्त्रवेदिभिः। अभक्ष्याभक्षणं महापातकदूषणम्। पारुष्यमुत्तमं प्रोक्तं तीव्रं मर्माभिघट्टनमिति।" द्रव्यं विनेत्यत्र द्रव्यशब्दोऽभिधेयपरः। तेनोच्यमानार्थव्यतिरेकेणैवंविधमभिधानं वाक्पारुष्यमित्यर्थः इति कल्पतरौ। द्रव्यं विना द्रव्यवैशिष्ट्यं विनेति मदनरत्ने। अभिघट्टनं ताडनम्। निष्कारणे दण्डमाह याज्ञवल्क्यः "अत्यावत्यान्यथाशौचैन्यूनाङ्गेन्द्रियरोगिणाम्। क्षेपं करोति चेद्दण्डः पणानर्द्धत्रयोदशेति। अन्यथाशौचनिन्दास्तुतिः। न्यूनाङ्गाः करादिरहिताः। न्यूनेन्द्रियाः नेत्रादिरहिताः। रोगिणः कुब्जादयः अर्द्धत्रयोदशान् अर्द्धाधिकद्वादशपणानित्यर्थः। एतत् स्ववर्णविषयम्। अतएव हारीतः "समजातिगुणानान्तु वाक्पारुष्ये परस्परम्। विनयो विदुषः शास्त्रे पणा अर्द्धत्रयोदशाः" इति। "विष्णुरपि "समवर्णाक्रोशे द्वादश पणान्दण्ड्य इति"। परस्परमिति शेषः। मनुनारदावपि "समवर्णे द्विजातीनां द्वादशैव व्यतिक्रमे। वादेष्ववचनीयेषु तदेव द्विगुणं भवेदिति"। शङ्खलिखितावपि "समवर्णव्यतिक्रमे द्वादशपणा यथारूपविशिष्टक्षेपेषु विशिष्टस्य चतुर्विंशतिरविशिष्टस्यातिक्रमे च विशिष्टस्य ततोऽर्द्धमिति। अत्र द्वादशार्द्धद्वादशयोरुत्कृष्टानुत्कृष्टत्वेन व्यवस्था। काात्यायनोऽपि "यो गुणान् कीर्त्तयेत् क्रोधाद्विगुणे वा गुणव्रताम्। अन्ध अंश्चानियोजी च वाग्दुष्टं तत्तरं विदुरिति" "नारदोऽपि "दुष्टस्यैव तु यो दोषान् कीर्त्तयेत् क्रोधकारणात्। अन्यायदेशवादी च वाग्दुष्टं तत्तरं विदुरिति" "अत्र क्रोधकारणादित्यनेन दुष्टपरित्यागार्थं दोषकीर्त्तने न दोष इति सूचितम्। अतएवोक्तं काात्यायनेन "यत्र ख्यात्परिहारार्थं पतितस्तेन कीर्त्तितः। वचनात्तत्र न स्यात्तु दोषो यत्र विभाववेदिति" "वचनात् दोषकीर्त्तनात्। यत्राभियोगादौ पातित्यादिकं साधयेत्तत्रापि वचनाद्दोषो न स्यादिति यत्र विभाववेदित्यस्यार्थं उक्तः स्मृतिचन्द्रिकायाम्। यत्रापि दण्डपारुष्यत्वादेन युगपत्प्रहृत्तयोर्दण्डतुल्यत्वं क्रमयुगपत्प्रहृत्तयोः पूर्वप्रहृत्तस्य दण्डाधिक्यमिति द्रष्टव्यम्। जातिगुणकृते विशेषे दण्डवैषम्यमाह हारीतः "समानयोः समो दण्डोन्यूनस्य द्विगुणोदमः। "उत्तमस्याधिकः प्रोक्तो वाक्पारुष्ये परस्परमिति"। हीनक्षोत्तमक्षेपे द्विगुणः उत्तमस्य हीनाक्षेपेऽर्द्धपरिमितोदण्ड इत्यर्थः। याज्ञवल्क्योऽपि "अर्द्धोदमेषु द्विगुणः परक्षीणोत्तमेषु च। दण्डप्रणयनं कार्यं वर्णजात्युत्तराधरैरिति" "अर्द्धः सार्द्धद्वादशपणात्मक इत्यर्थः पूर्ववाक्ये "पञ्चविंशतिको दम" इति पञ्चविंशतेः प्रकृतत्वात्। वर्णा ब्राह्मणादयः। जातयो मूर्द्धावसिक्तादयः। ते च ते उत्तराधराश्च वर्णजात्युत्तराधरास्तैरन्योन्याक्षेपे क्रियमाणे दण्डस्य प्रणयनम् अवनीयं ज्ञातव्यम्। उत्तराधरभावमाश्रित्य दण्डः कल्पनीय इत्यर्थः। तमेव कल्पनीयं दण्डं प्रदर्शयति मनुः "शतं ब्राह्मणमाक्रुश्य क्षत्रियो दण्डमर्हति। वैश्योऽप्यर्द्धशतं द्वे वा शूद्रस्तु वधमर्हति। विप्रः पञ्चाशतं दण्ड्यः क्षत्रियस्याभिशंसने। वैश्ये स्यादर्द्धपञ्चाशच्छूद्रे द्वादशको दम इति।" हारीतस्मृतिरपि क्षिपन् विप्रादिकं दद्यात् पञ्चाशत्पणिकं दममिति"। शङ्खलिखितावपि "आक्रोशे ब्राह्मणस्य क्षत्रियः पञ्चशतं दण्ड्यः, शतार्द्धं वैश्यस्य पञ्चविंशतिं शूद्रस्येति"। हारीतस्मृतिरपि। "विप्रः शतार्द्धं दण्ड्यस्तु क्षत्रियस्याभिशंसने। विंशत्यर्द्धं पञ्चाशच्छूद्रस्यार्द्धत्रयोदश। शङ्खहारीतावुदितौ विनयोऽनयराधिनः। गुणहीनस्य शारुष्ये ब्राह्मणो नापराध्नुयात्। वैश्यस्तु क्षत्रियाक्रोशे दण्डनीयः शतन्भवेत्। तदर्द्धं क्षत्रियो वैश्यं क्षिपन् विनयमर्हति। शूद्राक्रोशे क्षत्रियस्य पञ्चविंशतिको दमः। वैश्यस्य चैतद्द्विगुणः शास्त्रविच्छिरदाहृतः। वैश्यमाचारयन् शूद्रोदाद्यः स्यात् प्रथमं दमम्। क्षत्रियं मध्यमश्चैव विप्रस्तूत्तमसाहसमिति।" जिह्वाच्छेदनरूपोऽत्रोत्तमसाहसो द्रष्टव्यः। तथा च स एव "धर्मोपदेशकर्त्ता च वेदोदाहरणान्वितः। आक्रोशकस्तु विप्राणां जिह्वाच्छेदेन दण्ड्यते" इति। शूद्र इत्यनुषङ्गः। आपस्तम्बोऽपि "जिह्वाछेदं शूद्रस्यार्थे धार्मिकमाक्रोशतः" इति। गौतमोऽपि "शूद्रो द्विजातीनभिसन्धायाभिहत्य च वाग्दण्डपारुष्याभ्यामङ्गोच्छो येनाङ्गेनाभिहन्यते तेन वियोजनीय इत्यर्थः। तृणादाक्रोशे त्वाहतः शङ्खलिखितौ "तथाऽधिक्षतान् विप्रान् गुरूंश्च निर्वासनमङ्गच्छेदं ताडनं वा गोमयाद्युपेयनं

खरारोहणं दर्पहरणं वा दण्डो वेति । दण्डः कार्षापणशतरूपः । अतएव विष्णुः "गुरूनाचारयन् कार्षापणशतमिति" । पुत्रादिभिर्मात्रादीनामाक्रोशे दण्डमाह बहुः "मातरं पितरं जायां भ्रातरं श्वशुरं गुरुम् । आचारयन् शतन्दाप्यः पन्थानञ्चाददद्गुरोरिति" । भ्रातरं ज्येष्ठभ्रातरम् । एतच्च साक्षराधेषु मात्रादिषु निरपराधायां जायायामिति मिताक्षरायामभाणि । अन्यादिविषये दण्डमाह हरहस्तिः "क्षिपन् अन्धादिकं दद्यात् पञ्चाशत्पणिकं दममिति ।" वाङ्मादिच्छेदन निष्ठुरभाषाभिभाषणे दण्डमाह याज्ञवल्क्यः "बाहुपीवानेत्रसक्थिविनाशे वाचिके दमः । अल्पस्तद्विदुषः पादनासाकर्णकरादिष्विति ।" बाह्वादिविनाशे वाचिके करिष्यामीति वाचा प्रतिपादितं अल्पः शतपरिमितो दण्डः । पादादिभङ्गं करिष्यामीत्याक्षेपे पञ्चाशत्परिमितो दण्ड इत्यर्थः । एवंवादिनोऽप्यङ्गस्य दमप्रथा दण्डनीया इत्याह स एव "अयङ्गस्तु वदन्नेवं दण्डनीयः पणान्दशेति ।" यः पुनः अङ्गोऽयङ्गस्य बाह्वादिभङ्गाक्षेपं करोति न केवलं स दण्ड्यः किन्तु अयङ्गक्षेमार्थं प्रतिभुवमपि दापनीय इत्याह स एव "तथा अङ्गः प्रतिभुवन्दाप्यः क्षेमाय तस्य त्विति" । अङ्गीकृतभाषणे दण्डमाह स एव "अभिगन्तासि भगिनीं मातरं वा तवेति च । अपनन्दापयेद्राजा पञ्चविंशतिकं दममिति ।" तीव्राक्रोशे दण्डमाह स एव "पतनीय कृते क्षेपे दण्डस्तत्समसाहसम् । उपपातकयुक्ते तु दाप्यः प्रथमसाहसमिति ।" पतनीयैः पातित्यहेतुभिर्ब्रह्महत्यादिभिः । उपपातकानि गोवधादीनि । बहुरपि "ब्राह्मणक्षत्रियाभ्यान्तु दण्डः कार्यौ विजानता । ब्राह्मणे साहसः पूर्वः क्षत्रिये त्वेव मध्यमः । विट्शूद्रयोस्त्वेवमेव स्वजातिं प्रति तत्त्वतः । छेदवर्जं प्रथयनं दण्डस्येति विनिश्चयः । पापोपपातवक्तारो महापातकशंसकाः । आद्यमध्योत्तमान्दण्डान्दद्युस्ते यथाक्रममिति ।" विष्णुरपि "परस्परपतनीये क्षेपे कृते तत्तमसाहसं उपपातकयुक्तन्तु मध्यमम् अविद्यद्वज्ञानक्षेपे जातिपूगानाञ्च ग्रामदेशयोः प्रथममिति" । देशाद्याक्रोशे दण्डमाह हरहस्तिः "देशादिकं क्षिपन्दाप्यः पणानर्हत्वमोदय । ग्रामेण वोजयन् दर्पाद्दाप्यः प्रथमसाहसम् । एष दण्डः समाख्यातः पुरुषापेक्षया मया । समन्त्वाधिक्यतो ज्ञेयो मनीषिभिरिति ।" बाह्यवल्क्योऽपि "मध्यमो जातिपूगानां प्रथमो ग्रामदेशयोरिति ।" राज्ञ आक्रोशे दण्डमाह नारदः "अवक्रुश्य च राजानं वर्त्मनि स्थे व्यवस्थितम् । जिह्वाच्छेदाद्ऋते शुद्धिः सर्वस्वहरणेन वेति ।" याज्ञवल्क्योऽपि "राज्ञोऽनिष्टप्रवक्तारन्तथैवाक्रोशकन्तथा । तस्यच्छेत्तारमिच्छन्ति जिह्वायास्तथेदिति ।" वस्तुदोषाभिधानेऽपि वाक्पारुष्यदण्डोऽस्त्येव तथा च नारदः "पतितं पतितेत्युक्त्वा तथा चौरेति वा पुनः । वचनात्तुल्यदोषः स्यान्मिथ्याद्यैर्दोषतां व्रजेदिति ।" मनुनारदावपि "काणं वाप्यथ वा खञ्जमन्यं वापि तथाविधम् । तथ्येनापि ब्रुवन्दाप्यो दण्डङ्कार्षापणावरमिति ।" विष्णुरपि "काणखञ्जादीनान्तथ्यवाक्येपि कार्षापणद्वयमिति ।" एतच्च दुर्वृत्तविषयमिति माधवीये विद्यारण्यश्रीपादैरभ्यधायि । मिथ्यावदनशीलानां दण्डमाह कात्यायनः "अन्धताख्यानशीलानाञ्जिह्वाच्छेदो विशोधनमिति ।" हारीतोऽपि "मिथ्याभाषिणां भेषजमाशु राजा जिह्वाच्छिन्द्याद्दण्डयेद्वेति" भेषजो भङ्गः । कस्यचिदाक्रोशकृतोऽर्द्धदण्डमाह शौनकः "मोहात्प्रमादाद्बालत्वात् प्रीत्या वोक्तं भवेति यः । नाहमेवं पुनर्वक्ष्ये दण्डार्द्धन्तस्य कल्पयेदिति ।"

वाक्य न० वच-ण्यत् चस्य कः । "वाक्यं स्याद् योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः" इत्युक्ते १पदसंघे सा०द० । २स्वार्थबोधसमाप्ते पदसमुदाये वैयाकरणाः । [अवाक्षीत् ।

वाक्ष भ्वादौ भा० पर० सक० सेट् इदित् । वाक्षति

वागीश पु० वाचामीशः । १हरहस्तौ "वागीशाद्याः सुमनस" इति न्यायमाला । २बरस्वत्यां स्त्री "वागीशा हृदये यस्य" इति भाग०टीकोपक्रमे श्रीधरः । ३सुवर्चे च

वागीश्वर पु० ६त० । १हरहस्तौ २गुरौ च ३तत्पत्न्यां स्त्री ङीप् "वागीश्वरीसुतस्नातां फुल्लेन्दीवरलोचनाम् । वागीश्वरेण संयुक्तामिति तन्त्रम् । ४बरस्वत्यां स्त्री ङीप् ५मङ्गुलोषे पु० त्रिका० । [सोमराजग्राम् अमरः ।

वागुजी स्त्री वाचा गुज्यते ध्वन्यते गुज-क गौरा० ङीष् ।

वागुरा स्त्री वा-हिंसने उरच् मनु च । मृगबन्धार्थं मृगबन्धनपाशादौ अमरः । [बल । आधे ।

वागुरावृत्ति पु० वागुरा मृगबन्धनपाशादिरेव वृत्तिर्जीविका यस्य ।

वागुरिक पु० वागुरा प्रहरणं यस्य वागुरयाचरति वा ठक् । व्याधे अमरः ।

वाग्गुद पुंक्लो० पक्षिभेदे त्रिका० गुडहरणे तज्जातिग्राहि-

मैत्रनोक्ता "गोधा मां वाग्गुदो गुडम्" इत्येति शेषः
वाग्गुलि पु० रात्रौ ताम्बूलदातरि रक्षभाषा ।
वाग्डम्बर पु० ६त० । १वाक्यस्तोमे २वक्तृत्ववाक्ये च ।
वाग्दण्ड पु० वाचो वागिन्द्रियस्य दण्डः संयमनम् । १मित-२भाषणे २वाक्यसंयमे च ।
वाग्दत्ता स्त्री वाचा दत्ता । विधिना वाक्यमात्रेण दातुं कृतसङ्कल्पायां कन्यायाम् "वाचा दत्ता मनोदत्तेति षड्वा० त०
वाग्दरिद्र त्रि० ६त० । मितभाषिणि शब्दभा० ।
वाग्दान न० ३त० । कन्याया वाङ्मात्रेण दाने "ततो वाग्दानपर्य्यन्तं यावदेकाहमेव च" स्मृ० त० ।
वाग्दुष्ट त्रि० वाचा दुर्वचनेन दुष्टः । शुद्धेऽपि वस्तुन्य-शुद्धरूपतया कथनेन दूषिते । "वाग्दुष्टं भावदुष्टं च वर्जयेदिति" स्मृतिः ।
वाग्देवता स्त्री वाचां देवता । सरस्वत्यां "वाग्देवता चरितचित्रितचित्तसद्मा" जयदेवः । वाग्देव्यादयोऽत्र ।
वाग्मिन् त्रि० वाच्+अस्यर्थे ग्मिनि चस्य कः तस्य लोपः । १प्रशस्तवाक्यवक्तरि अमरः । २बृहस्पतौ पु० मेदि० । ३विष्णौ पु० विष्णुस० । [२निर्बोधे २कल्पे अमरः ।
वाग्य त्रि० वाचं यच्छति यम-ड । १वाग्दरिद्रे शब्दभा०
वाग्यत त्रि० वाक् वागिन्द्रियव्यापारोयता येन । मौन-धारिणि पुंसि अमरः "वाग्यतस्त्रिदिवं चरेत्" स्मृतिः ।
वाग्यम त्रि० वाचं तद्व्यापारं यच्छति यम-क्विप् । मुनौ अमरः ।
वाङ्मती स्त्री "हिमाद्रेस्तुङ्गशिखरात् प्रोद्भूता वाङ्मती नदी" इत्युक्ते नदीभेदे । सा च सिन्धुवादिशब्दाभि-धेयतया वक्ष्यते ।
वाङ्मय त्रि० वाङ्मयरूपम् मयट् चस्य कः तस्य ङः । १वाक्य-स्वरूपे शास्त्रे । २वाक्यजनिते पापभेदे च । "पारुष्यमनृतञ्चैव पैशुन्यञ्चापि सर्वशः । असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतु-र्विधम्" मनुः । तथा "परुषवचनमपवादः पैशुन्यमनृतं तथालापो निष्ठुरवचनम् वाङ्मयानि षट् । परेषां देश-जातिकुलविद्याशिल्परूपवृत्ताचारपरिच्छदशरीरकर्मजी-विनां प्रत्यक्षदोषवचनं परुषम् । "यद्वाक्यात् क्रोधस-न्तापत्रासभञ्जनं वचः । परुषं तन्न विज्ञेयं यद्वाक्यञ्च तथाविधम् । चतुष्प्रकारमित्युक्तं चाण्डालं म्लेच्छ-योनि च । प्रशंसानिन्दनं हेयात् परुषान्न विशिष्यते" । तेषामेव परुषवचनानामपरोक्षसदाक्षरत्वम् अपवादः । गुरुन्दपतिबन्धुभ्रात्रभिमतसङ्घे अर्थोपघातार्थं दोषो-द्घाख्यानं पैशुन्यम् । अनृतं त्रिविधं असत्यसम्बादश्चेति "देशराष्ट्रप्रसङ्गाच्च परार्थपरिजल्पनात् । नर्महास-प्रसङ्गाच्च भाषणं व्यर्थभाषणम् । गुह्याङ्गामेध्यसंज्ञानां भाषणं निष्ठुरं विदुः । यदन्यद् वा वचो नीचस्तोषो-न्मिदनाश्रयम् । इत्येवं षड्विकल्पस्य दुष्टवाक्यस्य भाष-णात् । इह चामुत्र च क्रूरमनर्थं प्रतिपद्यते" । प्रशं-सयानिन्दनं प्रशंसानिन्दनम् । अत्र चतुर्विधषड्विधयो-रविरोधः । असत्यत्वासत्यत्वभेदानादरेण पारुष्यप्राप-वादयोरैक्यात् निष्ठुरस्य परुषान्तर्भावाच्च । असम्बद्ध-प्रलापव्यर्थभाषणयोः पर्य्यायत्वाद्वार्थान्तरम्" इति० त० ।
वाङ्मुख न० ६त० उपन्यासे प्रथमवाक्योपक्रमे अमरः ।
वाचंयम त्रि० वाचं यच्छति वाचा+यम-खच् मुम् ह्रस्वश्च । १मितभाषिणि । २मौनावलम्बिनि मुनौ पु० अमरः ।
वाच पुंस्त्री० वच-घिञ्-अच् । (बाघा) इति ख्याते मत्स्य-भेदे राजवल्लभः स्त्रियां ङीष् ।
वाचक त्रि० वक्ति अभिधाशक्त्या बोधयति वच-ण्वुल् । "साक्षात् सङ्केतितं योऽर्थमभिधत्ते स वाचकः" रत्युक्ते १शब्दभेदे २कथके त्रि० । वाचयति वच-घिच्-ण्वुल् । ३पुराणादिपाठके पु० "वाचकः पूजितो येनेति" पुरा० "ब्राह्मणं वाचकं विद्यान्नान्यवर्णजमादरात् । अन्यान्य-वर्णजाद्राजन् ! वाचकाक्षरकं व्रजेत्" । तथा "देवाद्धी-मयतः कृत्वा ब्राह्मणानां विशेषतः । अन्विच्छ पितरं कुर्याद्वाचकः कुरुनन्दन ! । पुनर्वेतीत तत्पुत्रं न सङ्का धारयेत् कचित् । हिरण्यं रजतं गाव तथा कांस्योपदोह-नाः । दत्त्वा तु वाचकायेह सुतस्याप्नोति तत् फलम्" । कांस्योपदोहनाः कांस्यक्रोड्राः "वाचकः पूजितो येन प्रसन्नास्तस्य देवताः" । तथा "ज्ञात्वा पर्वसमाप्तिञ्च पूजये-द्वाचकं बुधः । आत्मानमपि विक्रीय य इच्छेत् सुकृतं कृतम्" । तथा "विस्तृतमद्भुतं शान्तं सदाक्षरपदं तथा । कलस्वरसमायुक्तं रसभावसमन्वितम् । बुध्यमानः सदात्यर्थं पन्थार्थं लभते नरो नृप ! । ब्राह्मणादिषु सर्वेषु पन्थार्थं चार्पयेन्नृप ! । य एवं वाचयेद् ब्रह्मन् स शिवो व्यास उच्यते" । तथा "सप्तस्वरसमायुक्तं काले काले विशाम्पते ! । प्रदर्शयन् रसान् सर्वान् वाचयेद् वाचको नृप" इति० त० ।
वाचकलक्षणादि हेमा० दा० नन्दिपु० चक्रं यथा
"वाचको ब्राह्मणः प्राज्ञः श्रुतशास्त्रो मनामनाः । अभ्यक्षाक्षरविन्यासो दत्तशास्त्रविशारदः । शब्दार्थवित्

प्रगल्भश्च विनीतो मेधया पुनः। गीतिज्ञो वाक्यसुश्राव्य स्वरेष्वाखिलभाषकः" इत्युपक्रमे एवंविधानतो वाच्यं वाचकेन विपश्चिता। तपःप्रभावात्कं सर्वं स्वर्गादिफलसाधकम्। अनेर्विबोध्य वै वाच्यमध्यात्मादि च यद् भवेत्। क्रुद्धोक्तियुद्धसंक्षोभं धारावर्त्तेन (वेगेन) वाचयेत्। सरागं ललितैर्वाक्यैर्वाचयेते इडाक्रमे। नानाद्यत्तानुरूपेण लालित्येन च वाचयेत्। सर्गाध्याये समाप्ते च क्रमाधर्य्यन्त एव वा। प्रशस्तशब्दसंयोगे कुर्य्यादिति विरामयम्। समाप्तौ वाचको भीष्म! ब्रूयादेवं विचक्षणः। अवधार्य्य जगच्चित्तमन्ते वाच्युदकं क्रजेत्। शुभं शुभं ब्रूयादस्तु व्याख्यातमित्यदः। लोकः प्रवर्त्ततां धर्मे राजा चारु सदा जतो। धर्मवान् धनसम्पन्नो गुरुभक्त निरामयः। इति प्रोच्य यथाऽऽत्मानं गन्तव्यं च विभावतः।

वाचन न॰ वच-णिच्-स्वार्थे वा णिच्-ल्युट्। १पठने २कथने च युच्। पठने स्त्री। [पाघाटौ।

वाचनिक त्रि॰ वचनेन निर्वृत्तम् ठक्। वाक्यनिष्पादिते

वाचस्पति पु॰ इत॰अलुक्स॰। १इन्द्रस्तवे २पुण्यनक्षत्रे च

वाच्(चा) स्त्री उच्यतेऽसौ अनया वा वच-क्विप् निं॰ वा टाप्। १वाक्ये अमरः २वागिन्द्रिये च।

वाचाट त्रि॰ वाक्+कुत्सायां वाङ्क्रेऽस्यर्थे आटच् मत्वात् न कः। कुत्सितवक्तृसाधिषि अमरः। आलच्। वाचालोऽत्र।

वाचिक त्रि॰ वाचा कृतम् वाच्+ठक् मत्वात् न कः। वाक्यनिष्पादिते पाघादौ वाङ्मयशब्दे दृश्यम्। २वाक्यारम्भभेदे। "आलापश्च विलापश्च संलापश्च प्रलापकः। अनुलापोऽपलापश्च सन्देशश्चातिदेशिकः। अपदेशोपदेशौ च निर्देशो व्यपदेशकः। कीर्त्तिता वक्तृनारम्भा हादशामी मनीषिभिः" उज्ज्वलमणिः। [नैर्मल्ये च।

वाचोयुक्ति स्त्री इत॰ अलुक्स॰। १वाचादर्शितयुक्तौ २वाक्यालाप्य न॰ वच-भावे यत् न कः। १दूषणे २प्रतिपादने धरणिः। ३कथने च। कर्मणि यत्। ४दूषे ५प्रतिपाद्ये अभिधया बोध्यार्थे च सा॰ द॰।

"नचाख्यातवदुक्तत्वात्क्रियां प्रत्योत्तमां विभक्तिं प्रयोजयति। वाच्यवाचकभावोऽयमुपादादिशब्दवत्। विभीतकेऽप्यक्षशब्दो यद्यप्यक्षैः प्रयुज्यते। तथापि वाचकस्तस्य श्रूयते शकटाक्षवत्" म॰त॰भट्टवा॰। [भावे-ष्य। वाक्छा।

वाछ कामे स्वा॰पर॰सक॰सेट इदित्। वाञ्छति अवाञ्छीत्।

वाज न॰ वज-घञ्। १अन्ने २इष्टे ३जले ४यज्ञे च मेदि॰। ५शरपक्षे अमरः ६वेगे पु॰ ८निश्चये ९पक्षे पु॰ मेदि॰ १०सूनौ पु॰विश्वः। [काल्पा॰श्रौ॰तत्प्रकारादि दृश्यम्।

वाजपेय पुंन॰ वाजस्य अन्नं इष्टं वा पेयमत्र। यागभेदे

वाजपेयिन् पु॰ वाजपेय+अस्त्यर्थे इनि। १वाजपेययागकर्त्तरि उपचारात् २तदंशे च।

वाजसन पु॰ वाजमन्नं सनोति ददाति सन-अच्। १विष्णौ विष्णुस॰। २शिवे भा॰ आनु॰ १७अ॰।

वाजसनि पु॰ राज्ञः अन्नस्य सनिर्दानं येन। सूर्य्ये "आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः" इत्युक्तेरस्य वृष्टिद्वारा अन्नदातृत्वात् तथात्वम्।

वाजसनेय पु॰ वाजसनेः सूर्य्यस्य छात्रः ढक्। याज्ञवल्क्ये "आदित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते" इत्यादारभ्य स्मृतिः। तदर्थः। आदित्यादधीतान्यादित्यानि शुक्लानि शुद्धानि। इयमत्र आख्यायिका। व्यासशिष्यो वैशम्पायनो याज्ञवल्क्यादिभ्यः स्वशिष्येभ्यो यजुर्वेदमध्यापयत्। तत्र दैवात् केनापि हेतुना क्रुद्धो वैशम्पायनो याज्ञवल्क्यं प्रत्युवाच मदधीतं त्यजेति। स योगसामर्थ्यान् मूर्त्तां विद्यां विधायोद्वमत्। वान्तानि यजूंषि गृह्णीतेति शुष्का अन्ये वैशम्पायनशिष्यास्तित्तिरयो भूत्वा यजूंष्यभक्षन्। तानि यजूंषि बुद्धिसाहित्यात् कृष्णानि जातानि। ततो दुःखितो याज्ञवल्क्यः सूर्य्यमाराध्यान्यानि शुक्लानि यजूंषि प्राप्तवान्। तानि च जाबालगौधेयकाण्वमाध्यन्दिनादिभ्यः पञ्चदशशिष्येभ्यः पाठितवान्" वेददी॰। "एवं स्तुतः स भगवान् वाजिरूपधरो रविः। यजूंष्ययातयामानि मुनयेऽदात् प्रसादतः। यजुर्भिरकरोच्छाखा दशपञ्चशतैर्विभुः। जगृहुर्वाजसन्यस्ताः। काण्वमाध्यन्दिनादयः" भाग॰ १२।६।६७ श्लो॰

वाजसनेयिन् पु॰ ब॰व॰। वाजसनेयेन प्रोक्तमधीयते इनि। यजुर्वेदशाखाभेदाध्यायिषु विप्रादिषु। २तदुक्तरीत्या कर्म्मकर्त्तृषु त्रिषु च "त्रयो वाजसनेयिनः" म॰मा॰त॰।

वाजिदन्त पु॰वाजिनां दन्त इव पुष्पमस्य। १वासके रत्नमा॰ कप्। वाजिदन्तक तत्रैव।

वाजिन् पु॰ वाजः वेगः पक्षो वा अस्त्यस्य इनि। १घोटके २बाणे ३वासके च शब्दर॰। ४वेगवति त्रि॰ स्त्रियां ङीप्। सा च ५अश्वगन्धावाञ्च ६घोटक्यां स्त्री

राजनि०। ७देवभेदे पु०। वाजिनशब्दे दृश्यम्।

वाजिन पु० वाजिभ्यो देवम् अण्। अग्निहोत्रादिःहुतशेषे "तप्ते पयसि दध्यानयति वा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्" इति श्रुतिः।

वाजिपृष्ठ पु० वाजिन इव पृष्ठमस्य। अश्वारूढत्वे शब्दच०।

वाजिभक्ष पु० भक्ष्यते भक्ष-कर्मणि घञ् हृत०। चणके राजनि०। [मुद्गे राजनि०।

वाजिभोजन पु० वाजिभिर्भुज्यते भुज-कर्मणि ल्युट्।

वाजीकरण न० अश्वाजो वाजीव क्रियतेऽनेन वाजिन्+च्वि कृ-ल्युट्। "यद्द्रव्यं पुरुषं कुर्यात् वाजिवत् सुरतक्षमम्। तद्वाजीकरणं ख्यातम्" इत्युक्ते वीर्यवृद्धिकरणे ओषधभेदे। सुश्रुते दृश्यम्।

वाञ्छा स्त्री वाञ्छि-च। इच्छायाम् इष्टसाधनताधीजन्येऽभीष्टविषये चित्तवृत्तिभेदे अमरः।

वाट पु० वट-घञ्। १पथि २वृतिस्थाने च मेदि०गौरा०ङीष् ३वास्तुभूमौ ४कुटयां स्त्री मेदि०। ५वाटधानके शब्दर०।

वाटिका स्त्री वट-ण्वुल्। १वास्तुभूमौ (वेड़ियाका) २क्षुपे ३क्षिङ्कुपत्र्याञ्च शब्दच०। [क्षुपभेदे रत्नमा०।

वाटया स्त्री वाट्यै हिता तत्र साधुर्वा यत्। (वेड़ियाका)

वाटयाल पु० वाटीमश्नुते भूषयति अल-अण्। (वेड़ियाका) क्षुपभेदे शब्दर० गौरा० ङीष् तत्रैव स्त्री। स्वार्थे वुञ्। वाट्यालक तत्रैवार्थे पु० शब्दर०। [अवाडिट।

वाड् वाड्यावे भ्वा० या० अक०सेट् चर्कि न छुक्षः। वाडते

वाढ न० वह-क्त लि०। १अतिशये २तत्युक्ते लि० अमरः। पृषो० साधुः। वाढम् ३अतिशयार्थे ४स्वीकारे च अव्य० अमरः।

वाण पु० वण-घञ्। १शरे अमरः २गवां स्तने ३दैत्यभेदे ४केवले मेदि० ५वणौ लिङ्गा० ६काण्डावयवे विश्वः ७अङ्कुशे राजनि० कादम्बरीग्रन्थकारके ८कविभेदे च "पुलवाचस्तु वाणः" इति प्रबन्धराघवम्। ९नीलझिण्टयां पु स्त्री० अमरः। अस्योऽग्रादिलक्षितत्वम्।

वाणपुर न० हृत०। शोणितपुरे (कोड़री) पुरास्थे पुरभेदे

वाणवार पु० वाणं परसङ्ख्यं वारयति चु० वृ-अण्। बोधादेशोद्धारे सङ्ख्यादि कवचे शब्दच०।

वाणहन् पु० वाणं तन्नामासुरं हतवान् हन-ताडने भूते क्विप्। श्रीकृष्णे वाणजिदादयोऽप्यत्र।

वाणि स्त्री वण-इण् वा ङीप्। १वयने अमरः २वयनदण्डे वेमनि हेमच०। ३वाक्ये हृतहेवतावाच्यु अमरः ङीप्।

वाणिनी स्त्री वण-णिनि ङीप्। १नर्त्तक्यां २छेके ३मत्तस्त्रियाम् हेमच०। वाण+अस्त्यर्थे इनि। ४शरयुते लि०।

वात गतौ सेवायां सुखीकरणे च सक० सट० चु०उभ०सेट्। वातयति ते अववातत् त।

वात पु०वा-क्त। सर्वमात्रविशेषसुखके भूतभेदे १पवने अमरः। अनिलशब्दे १६४१० दृश्यम्। २देहस्थे धातुभेदे च। ३मलरि लि०। ४रोगे ५दृष्टनायके च "प्रभातवाता इतीति" भट्टिः। ६वातजन्ये रोगभेदे भावप्र० यथा "कषायकटुतिक्तकप्रमितरूक्षशीतक्षुतः पुरःपवनजागरप्रतरणाभिघातश्रमैः। क्षिमाहनशनात् तथा निधुवनाच्च धातुक्षयात् मलादिरयधारणात् सहजशोकचिन्ताभयैः। अतिप्रचलमोक्षणात् गदक्लान्तिमर्माभिघातादतीव वमनात् च्यवामतिविरेचनादामतः। प्रयोदशमये दिनक्षपदयोस्तृतीयांशयोर्जरामतिगतेऽग्निते शिशिरसंज्ञकालेऽपि च। देहे स्रोतांसि रिक्तानि पूरयित्वाऽनिलो बली। करोति विविधान् रोगान् सर्वाङ्गैकाङ्गसंश्रयान्"। प्रमितक्षाल वैपरीत्ये प्राप्तधर्मलेन अपरिमितमित्यर्थः। प्रकर्षेण मितमल्पत्वं वा प्रच्यवम् अतिपुराणं शाल्यादि। अतिचिदन्नानि सवान्यपि वातलानि यत आह सुश्रुतसंहितायाम् "नीवारश्चिप्पुटः सतीनचणकः श्यामाकसङ्घाढकोनिष्पावाश्च मकुष्ठकश्च वरट्टमकुल्लकः कोद्रवः"। एते वातकरा इति शेषः। नीवारः प्रसाधिका (चीना) इति लोके। चिप्पुटः (चसारी)। सतीनः कलायः। निष्पावो राजमाषः। (बरबटी) इति लोके। मकुष्ठकः (माढा) इति लोके। वरट्टा वरट्टिका (बरै) इति लोके। मकुल्लकः (मसूरी) इति लोके। पुरःपवनः प्राग्वातः, श्यामतः श्यामेन मार्गावरणात्। यत उक्तम् यावोर्द्धं तुषवात् कोष्ठो मार्गस्यावरणेन चेति"। त्रयोदशमये वर्षान्ते। जरामतिगतेऽग्निते भुक्तेऽजीर्णताकृते। देहे स्रोतांसीत्यादिना संप्राप्तिरुक्ता। कषायादिभिर्हेतुभिर्वर्षान्ते समये हेतुमते बली अनिलः प्रकोपो वायुः करोति विविधान् रोगान्। ते रोगाः कथ्यन्ते "शिरोग्रहोऽलसकत्वं जृम्भाल्पार्थं कृतग्रहः। जिह्वास्तम्भो गद्गदत्वं सन्धिनत्वञ्च मूकता। वाचालता प्रलापश्च रसानामनभिज्ञता। बाधिर्य्यं "कर्णनादश्च सर्वोत्तत्वं तथार्दितम्। मन्यास्तम्भोऽथ मन्यायो बाहुशोषोऽपबाहुकः। पर्विता चैव शिराणां जङ्घयोश्च तथोरुतः

ङाध्मानञ्च प्रत्याध्मानं वातार्शोक्षा प्रत्यर्शोक्षा।"तूणी च प्रतितूणी च वङ्क्षवैषम्यमेव च। खाटोपः पार्श्वशूलञ्च त्रिकशूलं तथैव च। गुदस्य मूलं मूलनिपड़ो मलग्राहता। पुरीषस्याप्रवृत्तिश्च स्तम्भश्री च ततः परम्। कलापखञ्जता चापि खञ्जता पङ्गुता तथा। क्रोष्टुशीर्षक खल्ली च वातकण्टक एव च। पादहर्षो पाददाह आक्षेपो दण्डकाभिधः। वातपित्तकृताक्षेपस्तथा दण्डा पतानकः। अभिघातकृताक्षेप आयामो द्विविधः स्मृतः। आन्तरश्च तथा बाह्यो धनुर्वातश्च कुब्जकः। अपतन्त्रोपतानश्च प्रघाताक्षिकाङ्कुकः। कम्पस्तम्भो व्यथातोदो भेदश्च स्फुरणं तथा। रौक्ष्यं कार्श्यञ्च कार्श्यञ्च शैत्यं लोम्नाञ्च हर्षणम्। अङ्गमर्दोऽङ्गविभ्रंशः शिरासङ्कोच एव च। अङ्गभेदाश्च भीरुत्वं मोहश्चञ्चलचित्तता। निद्रानाशः स्वेदनाशो बलहानिस्तथैव च। शुक्रक्षयो रजोनाशो गर्भनाशः परिश्रमः। एत एवाशीतिसंख्यारोगा योगेन कुपितः। वातव्याधीतिनामानो मुनिभिः परिकीर्त्तिताः"। एत एव शिरोग्रहादय एव। योगेन वातेन वातादृव्याधिर्वातव्याधिरिति निरुक्त्या तदा वातज्वरादिष्वपि प्रसङ्गः आदत आङ् कुटितः प्रसिद्धितः शिरोग्रहादयोऽशीतिरेव वातव्याधिसंज्ञाः प्रसिद्धा न तु वातज्वरादयः"। तच्चरकादिकं तत्र दृश्यम्।

वातक पु॰ वात इव चलतः दृवार्थे कन्। १अक्षनपर्णाम् स्वार्थे क। २जारे च।

वातकर्मन् न॰ वातानां कर्म। अपानेन मरुत्त्यागे पदने।

वातकिन् त्रि॰ वातोऽस्यास्ति इनि कुक् च। वातरोगयुक्ते अमरः स्त्रियां ङीप्।

वातकेतु पु॰ वातस्य केतुरिव। धूलौ रजसि त्रिका॰।

वातगुल्म पु॰ वातेन गुल्म इव। १वातजे त्रिका॰। २वातनिमित्ते गुल्मरोगभेदे गुल्मशब्दे २६१६ पृ॰ दृश्यम्।

वातघ्नी स्त्री वातं रोगभेदं हन्ति-हन-टक् ङीप्। १माषपर्णाम् (माषपानि) २अश्वगन्धायां ३शिखण्डीवृक्षे च राजनि॰।

वातचक्र न॰ ष॰स॰ २७अ॰उक्ते पूर्वादिवातानां कालभेदेन शुभाशुभसूचके वर्षनभेदे

"पूर्वः पूर्वमसद्वीचिशिखरप्रस्खालनाधूर्णितसन्ध्रार्कांशुघटाभिघातकलितो वायुर्यदाकाशगतः। नैकान्तस्थितशीतमेघपटलां धारासंवर्षितां वासन्तोत्कटसस्यमण्डिततलां विद्यात्तदा मेदिनीम्। यदाग्नेयो वायुर्मलयशिखरास्खालनपटुः प्रवल्गत्किञ्जल्कयोगे भगवति पतङ्गे प्रवसति। तदा निर्व्यूढोष्मा ज्वलनशिखरालिङ्गिततनुः खगाश्चोष्णोच्छ्वासैर्वमति वसुधा भस्मनिकरम्। तापोपलक्षतावितानतरुभिः शाखाशतान्तर्गतैर्यत्र योगेऽस्मिन् प्लुषति घननिष्पन्दो वायुर्यदा दक्षिणः। सर्वोद्योगसमुद्यताश्च गजवक्त्राख्यभैषद्विताः क्षोणाश्चा इव मन्द्वारिकणिकान्मुञ्चन्ति मेघास्तदा। कृच्छ्रैलालवलीलवङ्गनिचयान् व्याधूर्णयन् सागरे भानोरस्तमये प्रवल्गविरतो वायुर्यदा नैर्ऋतः। क्षुत्तृष्णास्तमातुधास्त्रियश्चलप्रसारभारच्छदा भक्षा प्रेतवधूरिवोपचपला भूमिस्तदा लक्ष्यते। यदा रेणूत्पातैः प्रथिकटसटाटोपचपलः प्रवातः पश्चार्धे दिनकरकरापातसमये। तदा सक्षोभेता प्रवरवरवाडवमरा धरा स्थाने स्थानेऽप्यविरतवसामांसरुधिरा। आषाढ़ीपूर्वकाले यदि किरणतेरस्तकालोपपन्नो वायव्यो बद्धवेगः प्लवति घनरिपुः पन्नगादानुकारी। आनीयाङ्गारिधाराप्रहृदितसुदितां सक्तमस्तूककरणां सक्षोद्भासैकचिह्नां सुखवडवतया भास्वदेनामिवोर्वीम्। मेरुश्रृङ्गाम्बरीचिमण्डलतले क्षीणावसाने रवौ वात्यामोदिकदम्बगन्धसुरभिर्वायुर्यदा चोत्तरः। विद्युद्भ्रान्तिसमस्तकान्तिकलनामत्ताश्चदा तोयदा उन्मत्ता इव नश्चन्द्रकिरणां गां पूरयन्त्यम्बुभिः। ऐशानो यदि शीतलाऽमरगणैः संसेव्यमानो भवेत् पुन्नागागुरुपारिजातसुरभिर्वायुः प्रवल्गध्वनिः। आपूर्णोदकदोषना वसुमती सम्पन्नसस्याकुला धर्मिष्ठाः प्रथतारयो नृपरवो रक्षन्ति वर्षास्तदा"।

वाततूल न॰ वातेन चड्डीयमानं तूलम्। (वुडिरुतूला) आकाशे चड्डीयमाने मूले डारा॰। [२धूनौ।

वातध्वज पु॰ वातो ध्वज इव यस्य। १मेघे शब्दमा॰। २तः।

वातपोथ पु॰ वातं रोगभेदं पुथ्यति क्षिपति पुथ-कथ्। पक्षाघाते अमरः। [मृगे (वाघोटा) अमरः।

वातप्रमी पुंस्त्री॰ वातं प्रमिणोति प्र+मा-ई किच्च। १क्षीपूगे

वातमज पुंस्त्री॰ वातमतुलञ्च कजति कज-क्विप् अभावः। मृगभेदे जटा॰ स्त्रियां ङीष्। [जटा॰ स्त्रियां ङीष्।

वातमृग पुंस्त्री॰ वातानुगो मृगः आक॰। क्षीपूगे मृगभेदे

वातरक्त न॰ वातजं दुष्टं रक्तमस्य रुधिरं यत्र। रोगभेदे

"लवणाम्लकटूष्णरूक्षक्षीणाजीर्णभोजनैः। क्षिप्तशुष्काम्बुजानूपमांसपिण्याकमूलकैः। कुलत्थमाषनि-

आवयाकादिपटलैर्युक्तैः। दध्यारनालसौवीरशुक्ततक्र-सुरासवैः। विरुद्धाध्यशनक्रौर्यदिवास्वप्नातिजागरैः। प्रायशः सुकुमाराणां मिथ्याहारविहारिणाम्। स्थूलानां सुखिनां चापि प्रकुप्येद्वातशोणितम्। रूक्षशीतैर्गजन्तस्याग्नेश्च विदाहनं संविदाहाशनञ्च। क्षारो यवक्षारादिः। अजीर्णभोजनैः अजीर्णाय भोजनैः अतिमात्रभोजनैरित्यर्थः। क्लिन्नादीनि मांसस्य विशेषणानि। क्लिन्नं शिथिलम्। शुष्कमातपे शोषितम्। अम्बुजं मत्स्यादिमांसम्। आनूपं गौड़ादिपूर्वदेशजं मांसम्। पिशितकं तिलपिष्टैः। मूलकं प्रसिद्धमेव। तिन्दावः (बोड़ा) शाकम्। शाकं पत्रशाकम्। आदिशब्देन इक्ष्वाकादीनि फलशाकानि गृह्यन्ते। पक्वं शिथिलत्वादिदोषरहितमपि मांसं वातशोणितं प्रकोपयेत्। शिथिलादि तु मांसं विशेषतो वातशोणितं प्रकोपयेत्। आरनालं सन्धानभेदः। शुक्तं सन्धानभेदः। सौवीरं सन्धानभेदः। तक्रं चतुर्थांशजलयुक्तं वस्त्रपूतं दधि। सुरा सन्धानभेदः। आसवः सन्धानभेदः। विरुद्धं क्षीरमत्स्यादि। अध्यशनम्। "अजीर्णे भुज्यते यत्तु तदध्यशनमुच्यते"। अतिजागरो-निशि। प्रायशः बाहुल्येन। सुकुमाराणाम् अल्पतरकायव्यापाराणाम्। अथ वा। मिथ्याहारविहारिण्याम् अयथाहारविहाराभ्यां स्थूलानां सुखिनाञ्च रक्तदुष्ट्या रूक्षशीतैर्गजन्तः यतो वायुर्विदह्यते रुधिरञ्चाधो गच्छति। रूक्षादय उपलक्षणानि। यद्वाग्नेयतिक्षतः। अग्नेः विदाहजम्। विदाहि निम्बकुलत्थसर्षपशाकादि। संविदाहाशनञ्च। संविदाह्येऽशनं यच्च भुक्ते विदह्ये तदुपरि भुञ्जानस्येत्यर्थः। अध्यशनशब्दाभ्येतदपि विदह्याजीर्णभोजनञ्च विशेषतो हेतुत्वार्थम्। पश्चात् वातशोणितं प्रकुप्येदित्यनेनान्वयः। एतेषां कारणानां मध्ये केनचिद्वायुः केनचिदुभयमपि प्रकुप्येत्। संप्राप्तिमाह "ततस्तं रक्तं विदग्धत्वाच्च तच्च दुष्टं सन्तं पाटयोत्पीयते च। तत् संदूषितं वायुना दूषितेन तत् प्राबल्याद्वच्यते वातरक्तम्"। पूर्वोक्तैर्हेतुभिः ततस्तं सञ्चयं रक्तं विदहति अत्र दहधातुरविवक्षितकर्मकः। तेन विदहति विदग्धं भवतीत्यर्थः। तच्च दुष्टरक्तम्। सन्तम् अधोगतम् पादयोर्पीयते सञ्चितं भवति। तद्दूषितं दूषितेन स्वहेतुना संदूषितं मिश्रितं वातरक्तम् उच्यते। ननु चैतच्च संप्राप्तिरूपा सुश्रुतेन "शीघ्रं रक्तं दुष्टिमापद्यते तच्च वायोर्मार्गं संरुध्यबाह्यासु वातः। क्रुद्धोऽत्यर्थं मार्गरोधात् स वायुरत्युल्बणं दूषयेद्रक्तमाशु"। अत्र प्रथमं रक्तस्य दुष्टिरतो रक्तवातमिति व्यपदेष्टुमुचितं भवत्यत आह तत्प्राबल्यादिति। तस्य वातस्य दोषत्वेन प्राधान्याद्वातरक्तमिति व्यपदिश्यते। पूर्वरूपमाह "स्वेदोऽत्यर्थं न वा काश्यं" स्वेदाभावत्वं चतेऽतिरुक्। सन्धिशैथिल्यमालस्यं सदनं पिड़कोद्भवः। जानुजङ्घोरुकट्यंसहस्तपादाङ्गसन्धिषु। निस्तोदस्फुरणं भेदो गुरुत्वं सुप्तिरेव च। कण्डूः सन्धिषु रुग्दाहो भूत्वा नश्यति चासकृत्। वैवर्ण्यं मण्डलोत्पत्तिर्वातासृक्पूर्वलक्षणम्"। अथाधिक्यतावस्थस्य रक्तस्य लक्षणमाह "वातेऽधिकेऽधिकं तत्र शूलस्फुरणतोदनम्। शोफस्य रौक्ष्यं श्यावत्वं म्लानताङ्गेष्वनवः। धमन्यकुण्डिसन्धीनां सङ्कोचोऽङ्गग्रहोऽतिरुक्। शीतद्वेषानुपशयौ सम्भवेषदुसुप्रयः"। तत्र पादयोः शूलादिबहुत्वम् यत आह सुश्रुतः "अर्शोहिम्नौ शोफभेदप्रमोक्षौ स्राणोमेतौ वातरक्तेन पादाविति"। अत्र सुप्तिः स्वर्शोक्ता। अधिकरक्तं वातरक्तमाह "रक्ते शोथोऽतिरुक् तोदस्रावश्चिमिचिमायते। स्निग्धरक्तैः समं नैति कण्डूक्लेदसमन्वितः"। अधिकपित्तं तदाह "पित्ते विदाहः संमोहः स्वेदो मूर्छामदभ्रमाः। अर्शांसदृशं रुग्दाहः शोफपाकौ त्वशोषिता"। विदाहश्च पादयोरेव बोद्धव्यः यत आह सुश्रुतः "पित्तासृग्भ्यामुपदाहो भवेतामत्यर्थिनौ रक्तशोथौ सदू च"। पादाविति शेषः। अधिककफं तदाह "कफाधिक्ये तु गुरुता सुप्तिः स्निग्धत्वशीतता"। गुरुतादयः पादयोरेव यत आह सुश्रुतः कण्डूमलौ स्वेदशीतौ सशोथौ पीवरत्वचौ क्लेद्यदुष्टौ च रक्तौ"। अप्रतिक्रियमाणवातरक्तस्य उपद्रवानाह "अस्रपित्तोपद्रवाः सर्मांसकोथग्निरोपद्राः। मूर्छा च मन्दरुग् दाहज्वरशोफोपकोपकाः। पिड़कामण्डलम् पीतसर्षपाकृतोदश्चभङ्गमाः। अङ्गुलीवक्रताम्लोटदाह सर्षपकार्बुदाः" मांसकोथो मांसगलनम्। असाध्यलक्षणमाह "एतैरुपद्रवैर्युक्तं" शोफेनैकेन वापि यत्। असृक्शोफोपद्रवं याप्यं साध्यं स्यादुपद्रवम्। एकदोषानुगं साध्यं नवं याप्यं द्विदोषजम्। त्रिदोषजमसाध्यं स्यादसृक् च कुपितद्रवाः"।

वातरक्तघ्न पु० वातरक्तं रोगभेदं हन्ति हन-टक्। कङ्कुरटचे (कङ्करबोडा) शब्दच०। [शब्दच०।

वातरक्तारि पु० ६त०। (गुडूच) ख्यातायां लतायाम्

वातरङ्ग पु० वातरोग एवतं रङ्गयतनमस्य। धत्तूरे अमरः।

वातरायण पु०वा-क्विप् ततस्तरए् वातरमयनं यस्य यत्वम्। १उन्मत्ते २प्रवोजनशून्ये पुरुषे १काष्ठे ४करपात्रे ५क्षुद्रे ६परमंक्रमे मेदि०। ७अरण्यहुमे च शब्दर०।

वातरूष पु० वातेन रूषयते रूष-घञ्। १वातरुजे २उल्लोचे २रन्ध्रधामे च मेदि०।

वातर्द्धि पु० वातस्य ऋद्धिर्यतः। १काष्ठलोष्टनिर्मितयन्त्रे त्रिका० ६त०। २वायुवृद्धौ स्त्री।

वातल पु० वातं रोगभेदं लाति ला-क। १चणके शब्दच०। २वायुकारके द्रव्ये त्रि०।

वातव्याधि पु० वातेन देहस्थधातुभेदेन जनितो व्याधिः शाक०। वातरोगे वातशब्दे दृश्यम्।

वातशीर्ष न० वातस्य शीर्षमिव। वक्षो राजनि०।

वाताट: पु० वात इवाटति अट-अच्। १सूर्य्ये त्रिका० २वातस्पृगे शब्दर०।

वाताख्य पु० कुष्ठरोगविशेषे तस्य लक्षणं यथा "दूषयो दूषयेद्वायुः श्लेष्मणा यस्य संहतः। तस्य सुप्तत्वलक्षणो रोगो वाताख्यसंज्ञकः" माधवकरः।

वाताद पु० वाताय वातनिवृत्तयेऽद्यतेऽसौ अद-घञ्। (वादाम) फलप्रधानवृक्षे भावप्र०।

वातापि पु०अगस्त्यमुनाग्निते दैत्यभातरि असुरभेदे। "वातापिर्भक्षितो येनवातापिच महाबलः। समुद्रः शोषितो येन स मेऽगस्त्यः प्रसीदतु" इति भोजनान्ते पाठमन्त्रः।

वातापिसूदन पु० वातापिं सूदयति क्विपि सूद-ल्यु। अगस्त्ये मुनौ त्रिका०भा०व०१८८०अ० तत्कथा दृश्या।

वातामोदा स्त्री वातेनामोदो यस्याः। कलूयाम् शब्दमा०

वातायन न० वातस्यायनं गतिर्येन। १गवाक्षे अमरः। वातस्येव शीघ्रमयनं गतिरस्य। २अश्वे पुंस्त्री० त्रिका० स्त्रियां ङीष्।

वातायु पु० वातमयते अय-उण्। तुरिषे अमरः

वातारि पु० वातस्य रोगभेदस्यारिः। १एरण्डवृक्षे २अतमूल्यां ३मेषशृङ्गिकायां ४अश्वगन्धायां ५भार्ग्यां ६वृद्धदारुकायां ७विडङ्गे ८सूरणे ९अम्लवेतसे १०अतिबलायां ११पुनर्नवायोश्च राजनि०।

वाताख्य पु० वात इव शीघ्रगोऽस्यः। जालानेवे उत्तमे वृक्षे त्रिका०।

वाति पु० वा-क्तिच्। १वायौ २सूर्य्ये ३चन्द्रे च रभसः।

वातिक पु० वाताद्यागतः ठक्। देहस्थधातुजन्ये रोगभेदे राजनि०।

वातिग पु० वातिं वायुं गच्छति गम-ड। १वात्तोकौ २धातुवादिनि त्रि०मेदि०। गम-क्विप्। वातिगमोऽस्यत्र शब्दर०

वातिङ्गण पु० वातिं देहस्थवातं सेवनात् गणयति गण-क्विप् सम् च। वात्तोकौ त्रिका०।

वातीव न० वाताय वातनिवृत्तये हितः छ। काञ्जिके शब्दच०

वातुल पु० वातानां समूहः उलच्। वातसमूहे भरतः।

वातुलि पुंस्त्री० वा-उलि वट् च। (शदुड़) ख्याते क्षुपे धारा०।

वातुल त्रि० वात+अस्यर्थे उलच्। १वातरोगयुक्ते उन्मत्ते अमरः। समूहार्थे उलच्। २वातसमूहे न० भरतः।

वातोना स्त्री वातमूनयति ऊन-अच्। १गोजिह्वाक्षुपे राजनि० वातेनोनः। २वायुहीने त्रि०।

वात्या स्त्री वातानां समूहः यत् १वातसमूहे अमरः "विः तस्य वात्यानयचक्रचंक्रमानू" नैष०।

वात्सक न० वत्सानां समूहः वुञ्। वत्ससंघे अमरः।

वात्सल्य न० वत्सलस्य भावः ष्यञ्। पुत्रादिस्नेहानुगुणे रसभेदे उज्ज्वलमणिः "यशोदा वत्सले स्मृता"।

वात्स्य पु० वत्सस्यापत्यं यञ्। गोत्रप्रवर्त्तके मुनिभेदे।

वात्स्यायन पु० वत्सस्य गोत्रापत्यं युवा वत्स+यञ् ततो युनि फक्। १युनि वत्सगोत्रापत्ये। २न्यायसूत्रभाष्यकारके मल्लिनाथे मुनौ पुं स्त्री०।

वाद पुं स्त्री वद-घञ्। १तत्त्वमुद्भावया कथने "प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः" इति २गौतमोक्ते विचारात्मके वाक्यभेदे। "वादः प्रवदतामहम्" गीता।

वादन न० वद-णिच्-कर्मणि ल्युट्। १वदनुकूलादिवाद्ये भावे ल्युट्। वदनुकूलादिताडनरूपे २व्यापारे।

वादर न० वदरायाः कार्पासाः विकारः अण्। कार्पासवस्त्रनिर्मिते वस्त्रादौ। वदरशब्दस्य ओषधादित्वमिलन्ये।

वादरङ्ग पु० वादरं वदरासम्बन्धिपत्रादिसाहस्यं गच्छति गम खच् डित्। अम्लवेतसे त्रिका०।

वादरत त्रि० वादे विवादे रतः रम-क्त। अहर्दिनविवादशीले।

वादरा स्त्री वातं वायुं राति ददाति रा–क पृषो॰ तस्य दः [कार्पासाम् शब्दर॰।

वा(वा)दरायण पु॰ व(वा)दरीप्रधानं स्थानं वा बादरं तदयनं स्थानं यस्य। नित्यं व(व)दरिकाश्रमवासिनि ।वेदव्यासे। स्वार्थे दञ्। वा(वा)दरायणिरप्यत्र शब्दच॰। अपत्ये दञ्। वा(वा)दरि व्यासपुत्रे शुकदेवे। [मधुवनौ शब्दच।

वादल न॰ वातं लाति गृह्णाति ला–क पृषो॰ तस्य दः।

वादाम न॰ वातमर्मति छिनत्ति मम–अच् पृषो॰ तस्य मः। बनामख्याते फलभेदे भावप्र॰।

वादि त्रि॰ वद–इन्। विदुषि उणादिकोष। [शब्दर॰।

वादिर न॰ वद–णिच्–किरच्। व(व)दरीसदृशफलके वृक्षे

वादित्र न॰ वद–णिच्–इत्र। मृदङ्गादिवाद्ये अमरः।

वादिन् त्रि॰ वदति वद–णिनि। ।वक्तरि २अर्थिनि ३वादकव्याकर्त्तरि विचारस्थले ४प्रथमपक्षप्रतिपादके च।

वाद्य न॰ वद–णिच्–यत्। वादनीये मृदङ्गादौ अमरः। संगीतशास्त्रे ततादिभेद उक्तश्च यथा

ततं यथा "अलाबनी ब्रह्मवीणा किन्नरी त्रय किन्नरी। विपञ्ची वल्लकी ज्येष्ठा चित्रा ज्येष्ठवती त्रया। घोषिका कुब्जिका कूर्म्मी शारङ्गी परिवादिनी। त्रिशवी शतचन्द्री च नकुलोष्ठी च डंबकी। औडुम्बरी पिनाकी च निबद्धः शुष्कलक्षया। मदावारणहस्तश्च रुद्रोऽथ भरतश्च कः। कपिलाक्षी मधुस्यन्दी घोषेत्यादि ततं भवेत्"। अलाबनी यथा "अनिष्किकापरिध्यर्द्धं मध्यच्छिद्रेण संयुतः। दण्डतन्त्रिसितो दण्डः खादिरो वैणवोऽथ वा। अधःकरभमानूर्द्धं लम्बावल्लाभिशोभितः। नवाङ्गुलादधश्छिद्रोपरिचन्द्रार्द्धसन्निभम्। निवेशयेत्तुम्बिकां भद्रालाबुखण्डं निवेशयेत्। द्वादशाङ्गुलविस्तारं दृढपक्वं मनोहरम्। तुम्बिकावेधमध्येन दण्डच्छिद्रे तु निर्मिताम्। अलाबुमध्यगां डोरीं कृत्वा खल्लान्तु काष्ठिकाम्। तेषां संवेष्टय तन्मध्ये काष्ठिकां भ्रामयेत्ततः। यथा काष्ठिचलालाबुर्बन्धव्य करभोपरि। पञ्चाङ्गुलिषु संत्यज्यालाबुं खल्लाच्च बन्धयेत्। वेधान्तर्निर्मिता षड्भसौ खलतायै वा। समा सुच्छा दृढा तत्र तन्त्रौ देया विचक्षणैः। एतल्लक्षणसंयोगिन्यलाबनी प्रकीर्त्तिता। विन्दुना न वसुपेतं तुम्बं निःक्षिप्य वक्षसि। मध्यभागाश्रिकाश्चाश्च वाद्या दक्षिणपाणिना। तारे मन्द्रे च घोषे च स्निग्धाने विन्दुरिष्यते। तुम्बीमूलं वसुदण्डस्य बाणाङ्गुलेन धारयेत्। ततस्ताभिस्तु सर्वाभिः करव्यक्तिर्विधीयते। त्रिस्वरो दक्षिणः पार्श्वमध्यस्त्र चतुःस्वरः। अलाबन्यां स्थिता श्रेष्ठाः सप्त षड्जादयः स्वराः। रागव्यक्तिर्यथा रागे भवेत् षड्जादिभेदतः। संज्ञाभेदाश्च तथापि विधीयते। रुद्रभावनी प्रोक्ता मनःश्रवणरञ्जनी। प्रत्यक्षा शारदा देवी वीणारूपेण संस्थिता। शुषिरं वंशयन्त्रे उक्तम्। आनद्धं यथा

"आनद्धे मर्दलः श्रेष्ठानृ दङ्गुक्तं भरतादिभिः। सरजपटहडक्काविल्वकोर्दुंबाद्यं पणवनगरुज्झाझाबलाङ्गाविवल्यः। करटकमठभेरी स्यात् कुडुक्का डुडुक्का मनसुरलिभल्लीदुक्कशीदौण्डिशाना। डमरुरटमुरजिमड्डा कुण्डलीसङ्कुनामा रणसभिघटवाद्यं दुन्दुभी च रजय। क्वचिदपि ठुडुकी स्यात् दर्दुरं पाथुपाङ्गं प्रकटितमनुबन्धं वाद्यमित्थं जगत्याम्। त्रिपुरभवनकर्त्तुस्ताण्डवे तत् प्रयोगे ततमथ सुषिरस्थानमित्थं घनश्च। मर्दलः खादिरः श्रेष्ठो हीनः स्यादन्यदारुजः। रक्तचन्दनजो वाद्यो गभीरध्वनिरुच्यते। सार्द्धहस्तप्रमाणन्तु दैर्घ्यमस्य विधीयते। त्रयोदशाङ्गुलं वामभय वा द्वादशाङ्गुलम्। दक्षिणस्य भवेद्वीननैकेनाद्यांगुलेन वा। करप्रमाणवदनो मध्ये चैव पृथुर्भवेत्। वामाननीयो भवेत् शस्तसप्तभं करषं मतम्। चर्म्मिकानिर्मितश्चैव मर्दलः परिकीर्त्तितः। पातयेत् सरसिं वाद्यो वादनार्थञ्च मर्दले। विभूतिर्गैरिकं भक्तं वेन्दुवेन च संयुतम्। यद्वा पिष्टोदकं देयं जीवनीसत्त्वमिश्रितम्। सर्वमेकत्र मिश्रयेत्तेन सरश्चिरच्यते। वामास्ये पूरितां कृत्वा लेपं दद्याच्च दक्षिणे। एवं मर्दलकः प्रोक्तः सर्ववाद्योत्तमो मतः। अस्य संयोगमासाद्य सर्वं वाद्यञ्च शोभते। एतदङ्गे बीजकाष्ठे दलमङ्गीकृतं विदुः"। मर्दलः त्रयोदशाङ्गुलवामसख्यो द्वादशाङ्गुलदक्षिणसख्यः। सरजस्तद्वादशाङ्गुलवामसख्य षड्दशाङ्गुलदक्षिणसख्यः मर्दलसरजयोरयं भेदः। घनं यथा। "अतुरङ्गं विरङ्गञ्च द्विविधं घनवाद्यकम्। नीतातुगमसहरङ्गं विरङ्गं तालसंश्रयम्। करतालः कांस्यतालो जयघण्टोऽथ एक्किका। कण्विका पञ्च वाद्यञ्च पटुतोर्यं च सर्वरम्। झञ्झातालश्च मञ्जीरकर्त्तर्युडुर इत्यपि। द्वादशैते मुनीन्द्रेण कथिता घनसंज्ञकाः। त्रयोदशाङ्गुलव्यासौ शुद्धकांस्यविनिर्मितौ। मध्यसख्यौ घनाकारौ तन्मध्ये रज्जुगुम्फितौ।

वह्निनीपलसदृशौ कराभ्यां रज्जुवन्तितौ। करताडावुभौ वाद्यौ घाटैर्भनटकैरिति। यद्वा त्रयोदशवर्षाणां वत्सयोन्मितम्। यवमध्यकृशगम्भीरं मध्ये च यवसन्नकम्। निष्टप्तं वर्तुलं निम्नं यवसंमितं ततः। पृथुतो मध्यदेशे च त्रिवल्लिकुसमाकृति। चर्मणष्टौनिर्दग्धगुडकांस्यविनिर्मितम्। संरब्धाकुचि सुस्निग्धसदृशं मधुरध्वनिम्। घनानुसारि संरब्धं दृढं शुष्कं मनोहरम्। काश्मीरादिसमुद्भूतं ताडनाङ्गमनीषिणः। सुनादं दक्षिणं ताडं ततो हीनस्य वामकम्। कुर्यात तद्वदयं कार्यं तर्ज्जन्यङ्गुष्ठयोर्गतम्। वामहस्तस्थतालस्य मध्यं सन्निनादितम्। तिर्यग्द्विपतालस्य परिध्यंशेन ताडयेत्। तालादौ वादयेच्चैव श्रुतदीर्घप्लुतैः"। अन्येषां बहुत्वं विस्तरभयान्नोक्तम्। "इक्षिणस्याः सव्यभागायाः कार्त्तिन्दोमित्रविन्दयोः। जाम्बवत्या नाग्नजित्या सत्यायाश्च द्वयोरपि। कृष्णस्याष्टमहिषीणां पुरोद्वाहमहोत्सवे। ततं सुस्थिरमानद्धं घनञ्च युगपत्क्वनाः। वादयन्त्यप्सरःसंघातमिति पौराणिकी श्रुतिः। ततं वाद्यन्तु देवानां गन्धर्वाणान्तु शौषिरम्। आनद्धं राक्षसानान्तु किन्नराणां घनं विदुः" सङ्गीतदा०

वाद्यभाण्ड न० कर्म०। वादनोपयोगे।

वा(वा)ध विघाते भ्वा०आत्म०सक०सेट्। वा(वा)धते अवा(वा)धिष्ट। चङि न हस्वः।

व(वा)ध पु० वा(वा)ध-घञ्। १प्रतिरोधे २प्रतिबन्धे न्यायोक्ते स्वाभावबन्धेन ज्ञाने ३हेत्वाभासभेदे। भावे घञ्। वा(वा)धाप्यम् २पीड़ायाञ्च स्त्री अमरः ङीष्। वा(वा)धनमप्यत्रार्थे न० शब्दच०।

वाधूष्य न० वध्वां साधु यत् कुक् च। विवाहे त्रिका०।

वार्धीणस पु० वार्धीं नस+पृषो०। वार्धीनसे खड्गिनि च।

वान न० वन-घञ्। १शुष्कफले अमरः। २शुष्के त्रि०मेदि०। वनस्येदं तत् समूहो वा अण्। २वनसम्बन्धिनि त्रि०। ३तत्संघे न०। वे-भावकर्मादौ ल्युट्। ५जीवनकर्मणि ६कटे। वा-भावादौ ल्युट्। ७गतौ मेदि०। दक्षस्रुतवातोर्मौ दक्षरङ्गायां १०वीरुधे हेमच० ११गोजीरजे १२तनवजीरे राजनि०। १३वस्त्रिकाखण्डे स्त्री जटा०।

वानप्रस्थ पु० वाने वनसमूहे प्रतिष्ठति स्था-क। ऋषुकल्पे २एकाश्रमभेदे। वनप्रस्थ एव स्वार्थे अण्। "षष्ठस्त्वन्ते वयोपचितमात्मनः। प्रक्षेषु दारान् निक्षिप्य वनं गच्छेत् सहैव वा" रघुः। "द्वितीयमाश्रमभेदे भेदिः। स च द्विविधः पचमानः अपचमानश्च। तत्र पचमानः कन्दमूलादिः। अपचमानस्तु दन्तोलूखलिकः। तस्य धर्मा यथा "भूम्या भूमिफलाशित्वं स्वाध्यायस्तप एव च। संविभागो यथान्यायं धर्मोऽयं वनवासिनः। तपस्यति योऽरण्ये यजेद्देवान् जुहोति च। स्वाध्याये चैव निरतो वनस्थस्तापसो मतः। तपसा कर्षितोत्यर्थं वसु ध्यानपरो भवेत्। यद्यप्यधीत्य स विप्रोवो वानप्रस्थाश्रमे स्थितः" गारुडे ४६अ० याज्ञवल्क्य उवाच "वानप्रस्थाश्रमं वक्ष्ये तत् शृण्वन्तु महर्षयः। पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत् सहैव वा। वानप्रस्थो ब्रह्मचारी साग्निः सोपासनः क्षमी। अक्षारलवणे नाग्नौ पिबदेवातिथौ स्थितः। श्मश्रुजटाकोनखदात्मवान्। दान्तः स्थिरवयस्कायो नित्यस्य प्रतिग्रहात्। स्वाध्यायवान् ध्याननीलः सर्वभूतहिते रतः। श्रद्धो मानस्य यज्ञां वा कुर्याद्दानपरिग्रहम्। त्यक्त्वा त्यजेदाश्रयुजे नवेष्टं व्रतादिना। पचे भागे तु वाग्रोवाद्दन्तोलूखलिको भवेत्। चान्द्रायणी यतेद्भूयो कर्म कुर्यात् फलादिना। पौषे पञ्चाग्निमध्यस्थो वर्षासु स्थण्डिलेशयः। आर्द्रवासास्तु हेमन्ते योगाभ्यासाहिनं नवेत्। १०२ अ०। "अटित्वमग्निहोत्रित्वं भूशय्याऽजिनधारणम्। वने वासः पयोमूलनीवारफलवृत्तिता। प्रतिश्रिद्धाद्विजत्वञ्च त्रिस्नानं व्रतधारिता। देवतातिथिपूजा च धर्मोऽयं वनवासिनः। २१५ अ०। "एवं षष्ठाश्रमे स्थित्वा द्वितीयभागमायुषः। वानप्रस्थाश्रमं गच्छेद्वदारः साग्निरेव च। निःक्षिप्य भार्यां पुत्रेषु गच्छेद्वनमथापि। ब्रह्मचर्यञ्च चापत्यं जर्जरीजतविग्रहः। शुक्लपक्षस्य पूर्वाह्णे प्रयत्नो चोत्तरायणे। गत्वाधरण्यं नियमांस्तपः कुर्यात् समाहितः। फलमूलानि वन्यानि नित्यमाहारमाहरेत्। यदाहारो भवेत्तेन पूजयेत् पितृदेवताः। पूजयेदतिथिं नित्यं श्रुत्वा चाभ्यर्चयेत् सुरान्। यामादानीय वाग्रोवाद्दन्तोलूखलिकः। जटाश्च विभृयान्नित्यं नखरोमाणि नो त्यजेत्। स्वाध्यायं सर्वदा कुर्यात् नित्यश्चैवाग्निमान्वतः। अग्निहोत्रन्तु जुहुयात् पञ्च यज्ञान् समाहरेत्। शुल्यैर्विविधैर्मेध्यैः श्राकमूलफलेन वा। चीरवासा भवेन्नित्यं स्नायात् त्रिषवणं शुचिः। सर्व-

भूतानुकम्पी स्यात् प्रतिग्रहविवर्जितः। दर्शेन पौर्ण-मासेन यजेत नियतं द्विजः॥ पक्षेष्ट्या आग्रयणे चैव चातुर्मास्यानि चाहरेत्। उत्तरायणञ्च क्रमशो दक्षस्या-यनमेव च। वासन्तशारदैर्मेध्यैर्मुन्यन्नैः स्वयमा-हरेत्। पुरोडाशं चरुं चैव विधिवन्निर्वपेत् पृथक्। देवतभ्यश्च तद्धुत्वा बल्यं मेध्यतरं हविः। शेषं स-मुपभुञ्जीत लवणञ्च स्वयंकृतम्। वर्जयेन्मधुमांसादि भौमानि कवकानि च। भूस्तृणं शिग्रुकञ्चैव श्लेष्मा-तकफलानि च। न फालकृष्टमश्नीयात् स्वयंकृष्टमपि क्वचित्। न ग्रामजातान्यार्तो वा पुष्पाणि च फलानि च। आग्रयणे चैव विधिना वह्निं परिचरेत् सदा। न दुष्येत् सर्वभूतानि निर्द्वन्द्वो निर्ममो भवेत्। [illegible] नक्तं किञ्चिदश्नीयात् रात्रौ ध्यानपरो भवेत्। [illegible]न्द्रियो जितक्रोधस्तत्त्वज्ञानविचिन्तकः। ब्रह्म-[illegible]भवेन्नित्यं न लोभमपि संश्रयेत्। वस्तु पत्न्या वनं गत्वा नैष्ठुनं कामतस्त्यजेत्। तद्व्रतं तस्य लुप्येत प्रायश्चित्ती भवेत् द्विजः। तत्र यो जायते गर्भो न संसृष्टो द्विजातिभिः। न हि वेदाधिकारोऽस्य तत्त्व-मध्येवमेव हि। अधः शयीत सततं सावित्रीजप-तत्परः। सरण्यः सर्वभूतानां संविभागपरो भवेत्। परीवादं मृषावादं निद्रालस्ये च वर्जयेत्। एकाग्नि-रनिकेतः स्यात् प्रोक्षितां भूमिमाश्रयेत्। मुनैः सह चरेदेषु तैः सङ्घे च समेयेत्। शिलायां प्रस्तरायां वा स्वयं शीर्णेषु संहितः। सद्यःप्रक्षालको वा स्यात् मास-सञ्चयिकोऽपि वा। षण्मासनिचयो वा स्यात् समानिचय एव वा। नक्तञ्चाह्नं समश्नीयात् दिवा वा-प्युत्तम श्रुतः। चतुर्थकालिको वा स्यात् स्याद् वा अष्टमकालिकः। चान्द्रायणविधानैर्वा शुक्ले कृष्णे च वर्तयेत्। पक्षे पक्षे समश्नीयात् यवागूकथितां तथा। पुष्पमूलफलैर्वापि केवलैर्वर्तयेत् सदा। आमादिकैः स्वयंशीर्णैर्वैखानसमते स्थितः। मुनौ वा परि-वर्तेत तिष्ठेद् वा प्रपदैर्दिनम्। स्थानासनाभ्यां विहरेत् न क्वचिद्वैसंश्रयञ्जयेत्। पौष्णे पशुतपाश्च स्याद् वयोरूपभावकालिकः। आर्द्रवासास्तु हेमन्ते क्रमशो वर्तयंस्तपः। 'उपस्पृश्य त्रिषवणं पितॄन् देवांश्च तर्प-येत्। एकपादेन तिष्ठेत शरीरीर्वा विवेत् सदा। प-ञ्चाग्निषूषरो वा स्याद्भूषरः सोमपोऽथ वा। पद्मः पिबेत् शुक्लपक्षे कृष्णपक्षे तु गोपयम्। शीर्णपर्णाशनो वा स्यात् कच्छ्रैर्वा वर्तयेत् सदा। योगाभ्यासरतो वा स्याद्नुदाध्यायी भवेत् सदा। ऋग्यजुःसामरूपेतो वेदान्ता-भ्यासतत्परः। यमान् सेवेत सततं नियमांश्चाप्य तन्द्रितः। कृष्णाजिनी सोपवीतः शुक्लयज्ञोपवीतवान्। अथ वाग्नीन् समारोप्य स्वात्मनि ध्यानतत्परः। वन-स्थिरनिकेतः स्यान्मुनिर्मौनपरो भवेत्। तापसेष्वेव विप्रेषु वाजिकं भैक्षमाहरेत्। सप्तमेषु चान्येषु द्विजेषु वनवासिषु। ग्रामादाहृत्य वाग्नीयादहो रात्रान् वनेवसन्। प्रतिगृह्य पुटेनैव पाणिना शकलेन वा। विविधाश्चोपनिषद आत्मसंसिद्धये जपेत्। विद्याविशेषान् सावित्रीं रुद्राध्यायं तथैव च। महाप्रस्था-निकश्चासौ कुर्यादनशनक्रिया। अग्निप्रवेशमन्यद् वा ब्रह्मर्षिपथविधौ स्थितः। ये तु सम्यगिमं ब्रह्म-माश्रयन्त्यनुभुञ्जानाशनम्। ते विरजन्ति पदमैश्वरं परं वान्ति चैव जगतोऽस्य संस्थितिम्" कूर्मपु० २६अ०

वानर पुंस्त्री० वानं वनसम्बन्धिफलादिकं राति रा-क। वनाभ्याते पशुभेदे अमरः स्त्रियां ङीप्।

वानरप्रिय पु० ६त०। चोरिटवृक्षे रत्नमा०।

वानराघात पु० वानराणामाघातो यत्र। शोभाञ्जने शब्दच०

वानरी स्त्री वानरस्य प्रियम् भक्षत्वात् अण् ङीप्। १भूक-ष्माण्डे शब्दर०। वानर+स्त्रियां ङीप्। २वानर-योषिति। [२वानराधीशे वानरनाथादयोऽप्यत्र।

वानरेन्द्र पु० वानर इन्द्र इव। १सुग्रीवे शब्दर० हेम०।

वानल पु० वानं वनभावं निषिद्धतां लाति ला-क। (वाबद) लक्षभेदे शब्दच०।

वानस्पत्य पु० वनस्पतेरयम् प्रतिरूपः पुष्पाच्छातफलत्वात्। पुष्पजातफलत्वे आम्रादौ हृक्षे अमरः।

वानायु पु० वनायु+पृषो०। देशभेदे (आरब) शब्दर०।

वानायुज पुंस्त्री० वानायुदेशे जायते जन-ड। घोटकभेदे च (आरबी) अमरः स्त्रियां ङीप्। [अमरः।

वानीर पु० वन-ईरन् आर्धधा०। १वेतसे २वञ्जुलवृक्षे

वानीरक पु० वानीर इव इवार्थे कन्। वञ्जुलवृक्षे राजनि०

वानेय न० वने जले भवः ढक्। कैवर्तीमुस्तके अमरः।

वान्त त्रि०वम-क्त। वमनकृते "वानामीत्युच्यते बुधैः" स्मृतिः।

वान्तिकृत् पु० वान्तिं वमनरोगं करोति कृ-क्विप्। (सयना) ख्याते हृक्षे शब्दच०। [राजनि०

वान्तिदा स्त्री वान्तिं छर्दिं ददाति दा-क। कटभीवृक्षे

वाप पु० वप-घञ्। १क्षेत्रादेर्बीजादेश्च २वपने ३वपनकर्त्रे च।

वापदण्ड पु० उप्यतेऽनेन वप-करणे घञ् कर्म० । वेमनि तन्तुवपनदण्डे अमरः । [२धान्यभेदे न० राजनि० ।

वापित त्रि० वप-णिच् क्त । १बीजाक्ते २क्षिप्ते मेदि० ।

वापि(पी) स्त्री वप-इञ् वा ङीप् । "ह्रीषात् दमुषा वापी" इत्युज्ज्वलदत्तः १जलाशयभेदे जलाशयशब्दे दृश्यम् २जलाशयमात्रे च "वापीं स्वातुजिता मताम्" इति काव्यप्र० । "यो वापीमथ वा कूपं देशे वारिविवर्जिते । खानयेत् स दिवं याति विन्दो विन्दो यतं समाः" कल्पतरौ वायुपु० तज्जलगुणाः "वाप्यं गुरु कटुक्षारं पित्तलं कफवातजित्" राजवल्लभ । "वापीकूपतड़ागं वा प्रासादं वा निकेतनम् । न कुर्यादृद्धिकामस्तु जनशान्तिनैर्ऋते । याम्ये वा मनसस्तापो नैर्ऋते क्रूरकर्मकृत् । वायव्यां बन्धवित्तञ्च पीयमाने जले प्रिये ! । स्थानञ्च पापजे भागे वापीकूपतड़ागकम् । ऐशान्यादि सदा कुर्यात् सर्वानुग्रहतत्परान् । नैर्ऋते पीयमानन्तु चात्मना दुःखितो भवेत् । कन्यापि तज्जलं पीत्वा पतिं हन्तुमति कामतः" देवीपु० ।

वापीह पुंस्त्री० वापीं तत्स्थजलं जहाति हा-क । घातके विल्वे त्रिका० स्त्रियां ङीष् ।

वाप्य न० वाप्यां भवः यत् । १कुशौषधे अमरः । २वापीभवे वप-यत् । ३वपनीये च त्रि० ।

वाम न० वा-मन् । १धने मेदि० २वाङ्मुखे जटा० । ३मनोहरे ४प्रतिकूले ५सव्यभागस्थे त्रि० मेदि० । ६ऊर्ध्वगे त्रि० स्त्री० ७सव्यदेहे न० । ८कामदेवे ९मद्यादिपानरूपाचारे च पु० कुलाचारशब्दे २१२४पृ० दृश्यम् ।।१स्त्रीभाषे स्त्री अमरः १२दुर्गायां स्त्री । "वामं विरुद्धरूपन्तु विपरीतन्तु गीयते । वामेन सुखदा देवी वामा तेन मता बुधैः" देवीपु० ३५अ० । "वामान्तु वामदाक्षिण्यभावाभ्यामपि पूजयेत् । श्यामानभैरवीं देवीमुग्रतारां तथैव च । छिन्नाभैरवीं चण्डीं तारां त्रिपुरभैरवीम् । एतासु वामभावेन यजेत् त्रिपुरभैरवीम् । सर्वत्र सिद्धिदेवादौ यस्माद्भवति दक्षिणः । देवी च दक्षिणा यस्मात्तस्मात् दाक्षिण्यमुच्यते । या पुनः पूज्यमाना तु देवादीनां तु पूर्वतः । यत्प्रभागं स्थितं यत्ते सा वामा तु प्रकीर्त्तिता" कालिकापु० ७७अ० ।

वामदेव पु० कर्म० । महादेवमूर्त्तिभेदे अमरः ।

वामन त्रि० वम-णिच्-ल्युट्-ल्यु वा । १दक्षिणदिग्गजे अमरः । २अङ्गोदङ्गे ३वलिबन्धनार्थं प्रादुर्भूते हरेरवतारभेदे मेदि० तत्कथा उत्तरखं० २६१ अ० द्रष्टव्या । ४शिखिशिखातुल्य काशिक हस्तिकारके ५पक्षिशुकभेदे च । ६लघुके त्रि० अमरः स्त्रियां ङीप् । "वामनीं मूर्त्तिमादधे" ।

वामनूर पु० वामं नुदति नू-रक् । वल्मीके अमरः ।

वामलोचना स्त्री वामे सुन्दरे लोचने यस्याः । स्त्रीभेदे अमरः ।

वामवेध पु० वामः प्रतिकूलो वेधः । ज्योतिषोक्ते गोचरस्थग्रहाणां स्वजराश्यवधिकस्वान्तरिक्षेस्थस्वपञ्चभेदकृते योगभेदे "वामवेधविधिना त्यजेत्तनां शुभाशुभौ" इति ज्योतिषम् गोचरशब्दे २६८२ पृ० दृश्यम् ।

वामाचार पु० वामः वेदादिविरुद्धः आचारः । तन्त्रोक्ते मद्यमांसादिसेवनरूपे आचारभेदे । कुलाचार शब्दे दृश्यम्

वामापीड़न पु० वामं यथा तथा आ+पीड-ल्युट् । पीड़ाकरे यत्ने [illegible] तेऽनेन

वामावर्त्त त्रि० वामेनावर्त्तते वा-वृत-घञ् । १वामभागेऽवस्थिते पदार्थे । भावे घञ् । २वाममार्गेणावृत्तौ पु० ।

वामिल त्रि० वाम+अस्त्यर्थे लच् वा इलच् । १दाक्षिण्यके २वामे च मेदि० ।

वामी स्त्री वाम-गौरा० ङीष् । १अश्वयाम् "अयोद्वामीमनवाप्तितार्थः" रघुः । २मृगाख्यां श्रारभ्यां ३करभ्याञ्च मेदि० । [श्रुतायां नार्याम् ।

वामोरू स्त्री वामौ सुन्दरौ ऊरू यस्याः ऊङ् । प्रशस्तावाय पु० वे-घञ् । वयने (बोना) । [वापदण्डे हिरुपक्षोपः ।

वायदण्ड पु० वायतेऽनेन वे-करणे घञ् कर्म० । वेमनि

वायवी स्त्री वायोरियं अण् स्त्रियां ङीप् यलोपः । १वायुसम्बन्धिन्यां स्त्रियां २तन्त्रोक्तो ३उत्तरपश्चिमयोर्दिशि च जटा० ।

वायव्य त्रि० वायुर्देवताऽस्य वायु+यत् । १वायुदेवताके पदार्थे "वायव्यं श्वेतमालभेत" श्रुतिः । २वायुसम्बन्धिनि च

वायस त्रि० वय एव स्वार्थे अण् । १काके वायं वपनं स्मृतिं · सो-क । २अगुरुवृक्षे ३श्रीवासे च मेदि० ।

वायसविद्यिक त्रि० वायसविद्यां वेत्ति ठक् । काकज्ञेदा० भेदेन शुभाशुभाभिज्ञे ।

वायसाद्नी स्त्री वायसैः काकैरद्यते अद-ल्युट् ङीप् । १काकदन्त्यां २मक्षाख्योतिष्मत्यां च राजनि० ।

वायसारति पु० ६त० । मेचके अमरः ।

वायसी स्त्री वायसस्येयमण् प्रियत्वात् । १काकोडुम्बरिका-

याम् २काकमाच्यां च मेदि० ३मङ्गाज्योतिष्मत्यां ४काकनासायां ५काकतण्ड्यां च राजनि०।

वायसेष्टु पु० वायसानामिष्टुरिव प्रियः। काशतृणे राजनि०

वायसोली स्त्री वायसमोड्डते ओड-उत्वे पृषो० डस्य लः अक० गौरा० ङीष्। काकमाच्याम् अमरः। स्वार्थे क तत्रैव।

वायु पु० वा-उण्। १स्पर्शगुणके पञ्चभूतमध्ये भूतभेदे उत्तरपश्चिमविदिग्धिपतौ २देवभेदे ३देहस्थधातुभेदे च धनिशब्दे १६४ पृ० दृश्यम्।

वायुगुल्म पु० वायुना गुल्म इव। अम्लपित्तभेदे त्रिका०

वायुदारु पु० वायुना दीर्यतेऽसौ दृ-उण्। मेघे त्रिका०।

वायुपुत्र पु० ६त०। १हनुमति २भीमे च वायुसुतादयोऽप्यत्र

वायुफल न०वायुना फलति प्रतिफलति फल-अच्। १रम्भाफले २शरकायां च मेदि०।

वायुभक्ष पुंस्त्री० वायुं भक्षति भक्ष-अण्। १सर्पे राजनि०। स्त्रियां ङीष्। ख्या। वायुभक्षोऽस्त्यत्र। वायुभक्ष्य तत्रार्थे पुंस्त्री० स्त्रियां टाप्। [शब्दर०।

वायुवर्त्मन् न०। वायोर्वर्त्म सञ्चारमार्गो यत्र। आकाशे

वायुवाह पु० वायुना वहति वह-अण्। धूमे हेमच०।

वायुवाहिनी स्त्री वायुं देहस्थवायुं वाहयति सञ्चारयति वह-णिच-णिनि। वायुसञ्चारिण्यां देहस्थसिरायाम्-कायशब्दे १८१६ पृ० दृश्यम्। [भरतः।

वायुसख पु० वायोः सखा सदृक्षरः ष०समा०। वह्नौ

वायुसखि पु० वायुः सखा यस्य। वह्नौ अमरः।

वायुस्पद न० ६त०। वायुसञ्चारस्थाने आकाशे धनञ्जयः।

वार् न० वृ० इ-क्विप्। जले अमरः।

वार पु० इ-घञ्। १मङ्गे २अवसरे अमरः। खरोष्ट्रकाले (पाला) "वारोऽङ्गुराजलक्षः" सा० २प०। ४द्वारे ५शिवे ६कञ्चुके ७क्षणे मेदि०। वार्+रूढे अण्। ८जलसमूहे न० सूर्योदयादधिकृते ८दिने पु० यथा रविवारः रविस्वामिकं दिनम्। तदानयनञ्च स्त्री० त्रि०

"मन्दादधः क्रमेण स्युस्तुर्या दिवसाधिपाः। वर्षाधिपतयस्तद्वत् तृतीयाश्च प्रकीर्त्तिताः। ऊर्ध्वक्रमेण शशिनो मासानामधिपाः स्मृताः। होरेशाः सूर्यतनयादयोऽधःक्रमतस्तथा।" सू० "अनेः सकाशादधःक्रमेण चतुर्थसङ्ख्याका यदा दिनाधिपतयो वारेश्वरा भवन्ति। यथा शनिरविचन्द्रभौमबुधगुरुशुक्रा इति। वर्षस्य यदधिकगतवर्षादिनाङ्कस्य स्वामिनस्तदङ्कान्दादधः क्रमेण तृतीयसङ्ख्याका यदा दिनाधिपतयो वारेश्वरा भवन्ति। यथा शनिभौमशुक्रचन्द्रसूर्यबुधा इति। चन्द्रात् सकाशादूर्ध्वाङ्कक्रमेण यदा मासानां त्रिंशद्दिनात्मकानां स्वामिनः कथिताः। तत्क्रमश्च चन्द्रबुधशुक्ररविभौमगुरुशनय इति। अनेः सकाशादधोधः क्रमतः अधःक्रमेण होरेशाः "होरेति लग्नं भगणश्च सूर्यम्" इत्युक्तलग्नाद्भभोगात्मकहोराणां दिने द्वादश रात्रौ द्वादशेत्यहोरात्रे चतुर्विंशतिहोराधिनाथाः। होरा सार्धदिनाडिका। इति घटिकात्मकेऽहोरात्रे चतुर्विंशतिहोराधिनाथे स्वामिनस्तथा मासेश्वरवदव्यवस्थिताः कथिताः। यथा तत्क्रमः शनिगुरुभौमरविशुक्रबुधचन्द्रा इति। अत्र अनेः सर्वोर्ध्वस्थत्वाच्छनेश्च सर्वाधःस्थत्वात् ताभ्यामध ऊर्ध्वक्रमः क्रमेणोक्तः अन्यथाऽहोरात्रविशिष्टाब्दप्रवेशे विलग्नसमाविरुद्धापत्तेः। न तु अनेरारभ्याधिपत्येन खेटादौ दिनवर्षहोराणां स्वामित्वं न वा चन्द्रादावारभ्याधिपत्येन खेटादौ मासेशत्वं पूर्वखण्डोक्तानीततदीयैर्विरोधापत्तेः। अत्रोपपत्तिः। होरारूपषष्ट्यानां क्रान्तिक्रमेणाधःक्रमेण मेषादीनां षष्ठ्यवादूर्ध्वक्रमात्तेऽधः क्रमेण होरेशत्वं युक्तम्। अहोरात्रे चतुर्विंशतिहोराः। सप्तानां खेटानां होरेशा गताः चतुर्थो होरेशो द्वितीयदिनारम्भे स एव प्रथमहोरेशत्वाद् द्वितीयदिने होरेशः एवमुत्तरत्रापि। एवमेतद्वारक्रमेण सावनवर्षे त्रयो वारा अधिका इति पूर्ववर्षगतदिनवर्षेभ्योऽधःक्रमेण तृतीय उत्तरोत्तरम्। एवं सावनमासे द्वौ वारौ वारक्रमेण मासेश्वराधिकाविति कक्ष्योर्ध्वक्रमे वारक्रमेणैकान्तरितत्वात् कक्ष्योर्ध्वक्रमेण मासेश्वर उत्तरोत्तरमित्युपपन्नं मन्दादित्यादि श्लोकद्वयम्" रङ्गनाथः।

वारप्रवृत्तिश्च देशभेदात् भिन्नकालीना यतोऽत्र सि०शि० "अर्कोदयादूर्ध्वमथ ताभिः प्राच्यां प्रतीच्यां दिशि तत्प्रवृत्तिः। ऊर्ध्वं तथाऽधश्च कलाभिरार्भवाद्युदग्दक्षिणगोलमार्गे" भू०। "प्राच्यां ताभिर्घटीभिर्दिनवरप्रवृत्तिरर्कोदयादूर्ध्वम् भवति प्रतीच्यां तु तस्मादधः। यतो लङ्कोदये वारादि यतएव च वाराद्युत्तरगोलस्थे चरोर्ध्वघटिकाभिरूर्ध्वम् यतस्तदा उन्मण्डलं क्षितिशादूर्ध्वम्। दक्षिणे त्वधः यतस्तत्रोदयादधः वारप्रवृत्तिः" ग्रसिता०। "जगति तमोभूतेऽस्मिन् सृष्ट्यादौ भास्करादिभिः

स्फुटैः। यस्मादिनप्रवृत्तिर्दिनवारोऽर्कोदयात् तस्मात्। श्रीपतिरपि "स्फुटैर्युक्ते ध्यानग्रहेऽपि विश्वे यद्देषु स्फुटेऽभिनपूर्वदेषु। दिनप्रवृत्तिस्तदधीश्वरश्च वारश्च तस्मादुदयप्रवृत्तिः। चन्द्रोदयाभ्यासयुजात् प्रथममपरतः पूर्वदेशे च पश्चात् सध्योत्थाभिर्घटीभिः सवितुरुदयतो वासरे वा प्रवृत्तिः। स्वेषा सूर्योदयात् प्राक् चरगणक-भवैषामुभियोस्त्यगोले पश्चात् तैः सौम्यगोले युतिविमुति-वशाद्वाभयोः स्फुटत्वम्"। अन्योऽप्याह "केचिद्वारं सवितुरुदयात् प्रारभन्ते दिनार्धात् भानोरर्धास्तमय समयादूचिरे केचिदेवम्। वारस्यादिं यवनपतिर्दण्ड-सप्तर्क्षं निशाया चाटाचार्यः कथयति पुनर्द्वादशे चार्कवर्क्षे। एवं मतभेदे व्यवस्था मतमा० उक्ता यथा "हो तिथ्यन्तावेकवारे यत्र स स्यात् दिनत्रयः" कूर्मपु० "एकस्मिन् सावने स्पृष्टे तिथीनां त्रितयं यदा। तदा दिनत्रयः प्रोक्तस्तत्र साङ्गत्विकं फलम्" वसिष्ठः। कोमेऽराधवसिष्ठवचनैक्यात्मतया सावनदिनवत् वारप्र-वृत्तिः सूर्योदयावधिरेव सूर्यसि० "स्फुटकालानां परिच्छेदो दिनमासाब्दपादिका। मध्यमग्रहभुक्तिश्च सावनेन प्रकी-र्तिता"। अत्र दिनाधिपस्य रव्यादेर्भाग्यं दिनं वार-रूपं सावनमधनवाक्यम् यत्तु "रेखापूर्वापरयोः स्पष्टा-दिना ज्योतिषे वारप्रवृत्तिरुक्ता तत् ज्योतिषशास्त्रो क्तार्कोदयानार्थम्"। वाराणां ग्रहविशेषविधा-नार्थं संज्ञाभेदा यथा "चरः सौम्यो गुरुः शिखी रक्तः शुक्रो रविर्ध्रुवः। अनिष्ट दारुणो क्षेयो भौम उग्रः शनी समः। चरक्षिप्रैः प्रयातव्यं प्रवेश्यं रक्तभ्रुवैः। दारुणोग्रैश्च योद्धव्यं चलक्षिप्रैर्युडकार्द्धनिः"। इति सामान्यतोऽभिधाय "स्पर्शाभिषेकोद्वाहेषु कार्यं च सूर्यवारे प्रशस्यते। सोमे तु क्षेत्र्यागमं च कृषिं चैव स्फटादिकम्। क्षैनापत्यं क्रौर्ययुद्धं शस्त्राभ्यासः कुजे तथा। सिद्धिकार्यं च सन्यासं यात्रां चैव बुधे तथा। पठनं देवपूजा च वस्त्राद्याभरणं गुरौ। कन्यादानं गजारोहः शुक्रे स्यात् समयः स्त्रिया। स्नानं स्फटप्रवेशश्च शनौ शुभः" शब्दरत्नाव०

वारक वि० वारयति ढ-क्विप्-स्वुल्। १प्रवृत्तिनिवारके। २वस्त्रभेदे ३अवसतिविशेषे च पु० मेदि०। ४कट-स्थाने ५छुरीवेरे न० हेमच०।

वारकिन् पु० वारकः अस्त्यस्य इनि। १चित्रार्थे २एषो-धनि (वाहः) ३वस्त्रे ४यतौ च मेदि०।

वारकीर पु० वारे कीर इव। १श्याकवके त्रिका० वार-याकवे २शाकवे ३शूकायां ४वेषिवेधिन्यां ५नीराजितवृषे च मेदि०।

वारङ्ग पु० च० ढ-अङ्गच्। चडगादिस्फुटौ (स्फुट) त्रि०को०।

वारट न०चु० ढ-अटच्। १क्षेत्रे त्रिका० २क्षेत्रसमूहे शब्दर० २ङीषां स्त्री हेमच० टाप्।

वारण न०चु०-ढ-ल्युट्। प्रवृत्तिप्रतिरोधे १निषेधे मेदि० २ढक्षादिवारणे च जटा०। ३गजे पुंस्त्री० अमरः स्त्रियां ङीष्। ४वाक्यवारे कवचे पुंन० शब्दच०।

वारणपुष्पा स्त्री वारणं पुष्णाति पुष-क पृषो० पस्य वः। कदल्याम् अमरः।

वारणवल्लभा स्त्री ६त०। कदल्याम् त्रिका०।

वारमुख्या स्त्री वारे वेश्याहन्दे मुख्या। बहुजनसम्भ-क्तायां वेश्यायाम् अमरः।

वारंवारम् अव्य० ढ-वसुच् द्वित्वम्। पौनःपुन्ये।

वारयिट पु० चु० ढ-टच्। १पक्षी हेमा०। २वारय-कर्त्तरि त्रि०।

वारयोषा स्त्री वारस्य जनसमूहस्य योषा साधारणत्वात्। वेश्यायाम्। ६त०। वारबध्वादेयाऽयत्र ङीषच०।

वारलोक पु० वारजं रक्तं लोकं यत्र। (शालुङ् तलसी) वृक्षे शब्दर०। [कवचे अमरः।

वारवाण पुंन० वार्यते ढ-घञ् वारो वार्यो वाणो यत्र।

वारवाणि स्त्री वारं समूहं वष्टते वप-इण् वा ङीष्। वेश्यायाम् त्रिका०। [२कदल्यां शब्दर०।

वारवृषा स्त्री वारं जनसंघं वर्षत्यत्र वृष-क। १धान्ये

वारवेला स्त्री ६त०। सूर्यादिदिनविशेषे वर्ज्यकालभेदे "अतश्चतुर्नवयमरवरुद्रभरार्कयुङ् भास्करादि-यामार्द्धे। अनवर्ति हि वारवेला न शुभा शुभकार्येषर-यार्थ्यो०त०। [त्रि अकुक् समा०। बहुव्रे शब्दर०।

वारांनिधि स्त्री वारां जलराशीनां निधिराधारः नि+धा-

वाराणसी स्त्री वरणा च असी च सीमात्वेनास्त्यस्या अच् पृषो०दीर्घौ ङीष्। पृषो०वराणसी अत्र। वरणाशब्दे ३८४३पृ० ३यत्रम्। [राजनि०।२वराणसीसम्बन्धिनि त्रि०।

वाराह पु० वराहस्येदं प्रियत्वात् अण्। १मङ्गलिपक्षीतरुक्षे

वाराहकर्णी स्त्री वराहस्यार्थं वाराह इव कर्णोऽस्याः पत्रमस्याः ङीष्। अश्वगन्धायाम् राजनि०।

वाराहपत्री स्त्री वाराहस्तत्कर्णं इव पत्रमस्याः ङीष्। अश्वगन्धायाम् राजनि०।

वाराहाङ्गी स्त्री वाराहमिवाङ्गमस्याः ङीष्। दन्तीवृक्षे भावप्र०।

वाराही स्त्री वराहस्येयम् अण् ङीप्। अष्टमातृकामध्ये १वराहशक्तौ "उग्रवराहमहत्तं रूपं या बिभ्रती हरेः। शङ्खः साध्यावयो तत्र वाराहीं बिभ्रती तनुम्" देवीमा० "वाराही नारसिंही च" शब्दमालायाः। २योगिनीभेदे हेमचन्द्रकोशस्य०। ३वराहक्रान्तायाम् अमरः ४वराहयोषिति च ५उग्रमाखण्डे राजनि०।

वाराहीकन्द पु०(वाराह) ख्याते कन्दभेदे "वाराहीकन्द एवान्यैर्वर्ण्यते कारुको मतः। अनूपे स भवेद्ग्रे वराहइव लोमवान्" भावप्र०।

वारि न० व-रिन्। १जले अमरः २ह्रीवेरे च हेमच०। वार्यतेऽनया व-रिच्-इन् वा ङीप्। ३गजबन्धन्याम् अमरः। "वार्यर्गलाभङ्ग इव प्रवृत्तः" रघुः। ४वारि ५सरस्यायाम् च स्त्री ङीबन्तः ६कलस्यां धरणिः ७वन्दी च मेदि०।

वारिकण्टक पुंन० वारिणः कण्टक इव। मत्स्ये जटा०

वारिकर्णी स्त्री वारिणि कर्ण इव पत्रमस्याः ङीप्। १कुम्भ्राम् (पाना) शब्दर० स्वार्थे क। तत्रैव।

वारिकर्पूर पुंस्त्री० वारिणि कर्पूर इव। इक्षिणमत्स्ये त्रिका० स्त्रियां ङीष्।

वारिकुञ्ज पु० वारिणि कुञ्ज इव वक्राकृतित्वात्। मत्स्यजटके शब्दर०। स्वार्थे क। तत्रैव त्रिका०।

वारिक्रमि पु०इत०। जलौकायां त्रिका०। [कायाम् त्रिका०।

वारिचत्वर पु० वार्येव चत्वरस्पमस्याधारत्वात्। कुम्भि-

वारिचर पुंस्त्री० वारिणु चरति चर-अच्। १मत्स्ये २जलचरजन्तुमात्रे त्रि० स्त्रियां ङीष्। [यैवाले त्रिका०

वारिचामर न० वारिणश्चामरमिव शोभाहेतुरुङ्गाकृतित्वात्। वारिज न० वारिणि जायते जन-ड। १पद्मे २जलजन्तौ ३शङ्खे वर्णे ४जलजभेदे च राजनि०। ५मुस्तके हेमच० ६शम्बूके पु० शब्दच०। ७जलजातमात्रे त्रि०।

वारितस्कर पु०वारिणः तस्कर इवापहारकत्वात्। १मुस्ते २मेघे शब्दमा०। ३शङ्खे च।

वारित्रा स्त्री वारिणस्त्रायते त्रै-क। जले त्रिका०।

वारिद न० वारि ददाति दा-क। १मेघे २शङ्खे च अमरः ३जलदातरि त्रि० ४वाद्यायां स्त्री शब्दच०।

वारिधि पु० वारीणि धीयन्तेऽस्मिन् धा-आधारे कि। १समुद्रे शब्दर० वारिनिध्यादयोऽप्यत्र जलाधारे २घटादौ च

वारिपर्णी स्त्री वारिणि पर्णान्यस्याः ङीप्। कुम्भिकायाम् (पाना) अमरः।

वारिपालिका स्त्री वारीणि पालयति पाल-ण्वुल्। कुम्भिकायाम् (पाना) शब्दमा०।

वारिपृश्नी स्त्री वारिणि पृश्निः पर्णमस्याः ङीप्। कुम्भिकायाम् (पाना) शब्दमा०। [त्रिका०।

वारिबटरा स्त्री वारिणीवभवा बदरेव। प्राचीनामलके

वारिबालक न० वारिणो बालक इव। ह्रीवेरे त्रिका०।

वारिभव न० वारिणि नैमित्तिकत्वात् वारिणि वा भवति प्रभवति वा भू-अच्। १स्रोतोऽञ्जने राजनि०। २जलभवमात्रे त्रि०

वारिमसि पु० वारि जलं मसरिव नीलतापादकं यस्य। १मेघे त्रिका० २शङ्खे च। [(पाना) त्रिका०।

वारिमूली स्त्री वारिणि मूलमस्याः ङीष्। कुम्भ्राम्

वारिरथ पु०वारिणि रथ इव गमनसाधनत्वात्। मेघे त्रिका०

वारिराशि पु० वारीणां राशियोगात्। १समुद्रे त्रिका०। हृत०। २जलसमूहे च। [२जलजातमात्रे त्रि०।

वारिरुह न० वारिणि रोहति रुह-क। १पद्मे राजनि०

वारिवदन न० वारियुक्तं वदनं यस्मात्। प्राचीनामलके तत्सेवने हि मुखं वारिनिस्रावः।

वारिवर न० वारि वृणोति वृ-अच्। वरणटके जटा०।

वारिवल्लभा स्त्री वारि वल्लभमस्याः जलकत्वात्। विद्यां रा-जनि०। [च अमरः। ष्णि। वारिवाड्यत्र भवे वार्डूषः।

वारिवाह पु० वारीणि वहति वह-अण्। १मेघे २शङ्खे

वारिश पु०वारिणि शेते शी-ड। विष्णौ त्रिका०।

वारीश पु० इत०। १समुद्रे २वरुणे च। वारिनाथादयोऽप्यत्र।

वारु पु० वारयति रिपून् वारि-उण्। विजयकुञ्जरे शब्दर०।

वारुण न० वरुणस्येदम् अण्। १जले २वरुणसम्बन्धिनि त्रि० स देवताऽस्य अण्। ३वरुणदेवताके त्रि०। ४शततारके न०।

वारुणि पु० वरुणस्यापत्यम् इञ्। अगस्त्यमुनौ त्रिका०।

वारुणी स्त्री वरुणो देवताऽस्य वरुणस्येदं वा अण् ङीप्। १पश्चिमदिशि २मदिरायाम् हेमच०। ३शतभिषानारायां। ४गण्डदूर्वायाम् ५दूर्वायां भेदि०। ६इन्द्रवारुण्यां राजनि० ७वरुणस्त्रियां ८शतभिषानक्षत्रयुक्तचन्द्रलग्नयोगदशायां च स्कन्दपुराणे। "वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी। गङ्गायां यदि लभ्येत सूर्यग्रहशतैः समा" वारुणं शतभिषा। "शनिवारसमायुक्ता सा महावारुणी स्मृता। गङ्गायां यदि लभ्येत कोटि

सूर्यपर्वैः समा। शुभयोगसमायुक्ता शनौ शतभिषा यदि। महामहेति विख्याता त्रिकोटिकुलसङ्गरेत्" "अत्र संज्ञाविधेः मार्कण्डेयाय निमित्तत्वेन मासपक्षतिथ्युल्लेखानन्तरं महाशब्दोमहामहाशब्दाभ्यामुल्लेखनीये चाद्ये पार्वणादिसंज्ञाल्लेखवत् पौर्णमास्यमावास्ययोः पक्षाल्लेखवच्च तिथेः अत्र च रजस्वलत्वात् सावनदिनमेव ग्राह्यम् "स्नतकानां परिक्षेदो दिनमाद्यात्रयं। मध्यमत्रयमुक्तिश्च सावनेन प्रकीर्त्तितः" स्मृत्यर्थसारः। कौमपाद्मयोः "द्वौ तिथ्यन्तावेकवारे यत्र स्यात् स दिनत्रयः"। वशिष्ठः "एकस्मिन् सावने त्वृक्षि तिथीनां त्रितयं यदा। तदा दिनत्रयः प्रोक्तस्तत्र साङ्गिकं फलम्" इत्येतयोश्चनयोरेकवाक्यतयापि तथावगम्यते। रेखापूर्वापरयोरित्यादिकन्तु ज्योतिःशास्त्रोक्तं काश्यपोरादित्यानार्थमिति। अत्र "संक्रान्तिषु व्यतीपाते ग्रहणे चन्द्रसूर्ययोः। पुण्ये स्नात्वा च गङ्गायां कुलकोटीः समुद्धरेत्"। इति ब्रह्मवैवर्त्तपुराणात् ग्रहणमात्रे त्रिकोटिकुलोद्धरणविधानात् ततोऽधिकेषु वारुण्यादिपूत्तरोत्तरगुरुषु महामहावारुण्यादिषु यत् त्रिकोटिकुलोद्धरणसङ्गं तदुद्धरणगततारतम्येनाविरुद्धम् "यं यं क्रतुमधीते च तस्य तस्याप्नुयात् फलम्" याज्ञवल्क्योक्ताध्ययनात् यद्वा तत्तद्दानकरणेऽधिकफलम् अतएव शिष्टानामादरोऽपि तत्रेति। नचात्र "स्नानं कुर्वन्ति यानार्थं चन्द्रे शतभिषां गते। सप्तजन्म भवेयुस्ता दुर्भगा विधवाध्रुवम्"। "त्रयोदश्यां तृतीयायां दशम्यान्तु विशेषतः। शूद्रविट्क्षत्रियाः स्नानं नाचरेयुः कथञ्चन" इति प्रचेतोजाबालिवचनाभ्यां स्त्रीणां शूद्रादीनान्तु स्नाननिषेध इति वाच्यम् "भोगाय क्रियते यत्तु स्नानं वाहर्क्षकं नरैः। तत्त्रिपिण्डं दशम्यादौ नित्यनैमित्तिके न तु" इति हेमाद्रिधृतवचनेन रागप्राप्तस्नान एव निषेधात् नक्षत्रेऽपि तथाकल्पनात्। अत्र त्रयोदश्यां पूर्णायां पूर्वाह्णेतरकाले नक्षत्रादिसत्त्वे परदिने पूर्वाह्णे तिथिनक्षत्रलाभेऽपि पूर्वदिन एव स्नानम्। तथा च कालमाधवीये नारदीयम् "आदित्योदयवेलाया आरभ्य घटिकाद्वयम्। तिथिस्तु सा हि शुद्धा स्यात् सार्वत्रिष्वेव स्नानं विधिः" अत्र पूर्वतिथेः शुद्धत्वाभिधानात् तत्परतिथेरशुद्धत्वाभिधानं प्रतीयते। रात्रावपि वारुण्यादिषु गङ्गायां स्नानम्। "दिवा रात्रौ च सन्ध्यायां गङ्गायाञ्च प्रसङ्गतः। स्नात्वाऽऽमेयञ्च पुण्यं स्टहेयुर्दुष्टतत्त्वजैः"। स्टहरत्नाकरे देवलः "महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम्। तत्रां स्नानं न कर्त्तव्यं काम्यनैमित्तिकादृते"। अत्र महानिशायामपि काम्यनैमित्तिकं स्नानं प्रतीयते"। त्रि०त०रघु०

वारेन्द्री स्त्री देशभेदे (वारेन्द्रभूमि) (राजशाही) बङ्गदेश प्रदेशभेदे।

वार्च त्रि० वारि चरति चर-ड। जलचरे हंसादौ।

वार्णिक पु०वर्णसङ्केखनं शिल्पमस्य ठञ्। लेखके शब्दच०

वार्त्त न० वर्त्ति+अण्। १आरोग्ये २व्यवहारे ३निरामये ४वर्त्तिशीले च त्रि०अमरः। ५वृत्तौ या "पञ्चादिप्राचनाद्देयी क्षधिकमौल्यकारणात्। वर्त्तनाद्वारणाद्वापि वार्त्ता सैव प्रगीयते" देवीपु०। ६वृत्तौ क्षधिश्चर्मणि ७जनपदौ अमरः। ८वृत्तान्ते हेमाद्रिकृष्णे मेदि०। १० कालकर्णके भूतनाशने च स्त्री "अस्मिन् महामोहमये कटाहे सूर्याग्निना रात्रिदिनेन्धनेन। मासर्तुदर्वीपरिघट्टनेन भूतानि कालः पचतीति वार्त्ता" इति भा०व० यक्षप्रश्नः।

वार्त्ताक पु० वार्त्तमारोग्यमाकवति गमयति अक-अच्-अण्। वार्त्ताकी त्रिका०। भावप्र० स्त्रीत्वमस्योक्तं ङीप्

वार्त्ताकु स्त्री वार्त्तमारोग्यमाकवति गमयति अक-णिच्-उण्। इलाके (वेगुन) शब्दच०। "वस्निप्रदाः मारुतस्राविणोश्च शुक्रप्रदाः शोणितवर्द्धनाश्च। कृष्णाः कासारुचिनाशिनी च ५।६।७। वार्त्ताकुरेषा गुणसम्प्रयुक्ता। सा वाता कफवातघ्नी पक्का सञ्चारपित्तजा। सदाफला त्रिदोषघ्नी रक्तपित्तप्रसादनी। कृष्णवर्णा वार्त्ताकुः किञ्चित् पित्तकरी मता। कफमेदोऽनिलहरा सरा लघुतरा परा" राजव०। "इलाकं स्वादु तीक्ष्णोष्णं कटुपाकमपित्तलम्। ज्वरवातकफश्वास दीपनं गुरुलं लघु। तद्वार्त्ताकं कफपित्तघ्नं ह्रद्यं पित्तकरं गुरु। इलाकं पित्तलं किञ्चिदुद्गारोपरिपाचितम्। कफमेदोऽनिलाध्मानमल्पं लघु दीपनम्। तदेव हि गुरु स्निग्धं सतैलं लवणान्वितम्। खरं श्वेतं इलाकं कफकृत्तादृशं भवेत्। तदर्शःसु विशेषेण हितं क्षीणस्य पूर्वतः" भावप्र०। तत्रार्थे पु० त्रिका०।

वार्त्तायन पु० वार्त्तया अयनं येन। प्रवृत्तिते चरे हेमच०

वार्त्तावह पु० वार्त्तामावहति वा+वह-अण्। १क्षधिवाणिज्याजीविनि वणिग्भेदे अमरः २वृत्तान्तवाहके त्रि०

वार्त्तिक न० वृत्तिरूपेण कृतो ग्रन्थः ठक्। "उक्तानुक्त-

दुरुक्तार्थव्यक्तकारि तु वार्त्तिकम्" इत्युक्ते सूत्रानुक्ता-र्थवार्त्तिकारके ।यत्वभेदे हेमच० । वार्त्तायां तद्वरणे नियुक्तः ठक् । २चरे त्रि० । इत्तिः जीव्यादिः प्रयो-जनमस्य ठञ् । ३वैश्ये ४वर्त्तिकाखगे पुंस्त्री० स्त्रियां ङीष् । राजनि० ५वार्त्ताकौ शब्दर० । ६खगभेदे (बटेर) स्त्री हारा० ।

वार्दर न० वारे जलाय दीर्य्यते दृ-अप् । १दक्षिणावर्त्त-शङ्खे २काकचिञ्चायाम् ३लक्ष्मणाबीज ४भारट्यां मेदि० ५लभिजे ६आम्रबीजे च । वारेव दरम् । ७जले च विश्वः ।

वार्दल न० वार्दलस्येदम् दल-आधारे क । १दुर्दिने २मस्ता-धारे पु० मेदि० ।

वार्द्धक न० वृद्धानां समूहः तस्य भावः कर्म वा वुञ् । १वृद्ध-समूहे वृद्धत्व २भावे १कर्मणि च मेदि० ।

वार्द्धिक न० वृद्धस्य भावः कर्म वा ष्यञ् कुक् च । वृद्धत्वे अमरः । [त्रिका० ।

वार्द्धि पु० वारि जलानि धीयन्तेऽत्र धा-कि उप० । समुद्रे

वार्द्धिभव न० वार्द्धौ समुद्रे भवति भू-खच् । १समुद्रजवणे राजनि० । २समुद्रभवमात्रे त्रि० ।

वार्द्धुषि पु०वृद्धया जीवति इण् वृद्धि+धुषिभावः । वृद्धाजीवे अमरः । स्वार्थे क तत्रैव । "समार्धं धान्यमादाय मङ्गलं यः प्रयच्छति । स वै वार्द्धुषिको नाम इच्छाफलविवर्द्धि-कृत्तः स्मृतिः । वृद्धिश्च वृद्धिशब्दे वक्ष्यते तत्रोक्तनियमा-तिक्रमेण अनापदि स्वयमन्यद्वारा वा स्वाधमर्ण्येन यो व्यवहरति तस्यैव प्रायश्चित्तम् आपदि तु स्वयं करणे नियमातिक्रमे च न दोषः" प्रा० वि० ।

वार्द्धुषिन् त्रि० वृद्धि+अस्त्यर्थे इनि प्रत्ययेः नि० वार्द्धुषि भावः । वृद्धाजीविनि भा० स्त्री० ४८२६ श्लो० ।

वार्द्ध्य न० वार्द्धेर्भावः ष्यञ् । धान्यादेर्वर्द्धनोपाये (बाढ़ि देया) त्रिका० ।

वार्द्धीनस पुंस्त्री० वारि जलानि धयति धा-किप् वार्द्धीः नासा नासिका यस्य नसादेशः । १गण्डूके त्रिका० स्त्रियां ङीष् । "त्रिपुरं त्रिन्द्रियशीर्षं श्वेतं वृद्धमजा-पतिम् । वार्द्धीनसः प्राच्यतेऽसौ इन्द्रे कल्पे च सप्तमतः" इत्युक्ते २कल्पभेदे "वार्द्धीनसस्य मांसेन दत्तिर्दादशवार्षिकी" स्मृतेः ।३पक्षिभेदे च "रक्तपादो रक्तशिरा रक्तचञ्चुर्विहङ्गमः । कृष्णो वर्णेन च तथा पक्षी वार्द्धीनसो मतः" भार्क०पु०अयं श्राद्धकल्पम् । वलिदानाङ्गं कलिकापु० ६६अ० उक्तो यथा "नीलपीतो रक्तशीर्षः कृष्णपादः सितच्छदः । वार्द्धीनसः स्मृतः पक्षीशो मम विष्णोरतिप्रियः" । पृषो० वार्ध्रीणसोऽप्यत्र ।

वार्भट पुंस्त्री०वारि भट इव कुम्भीरे त्रिका० स्त्रियां ङीष् ।

वार्मण न० वर्मणां समूहः अण् न टिलोपः । कवचसमूहे अमरः । [समूहे शब्दर० ।

वार्मिण न० वर्मिणां समूहः अण् न टिलोपः । कवच-

वार्मुच पु० वारि जलानि मुञ्चति मुच-किप् । १मेघे शब्दर० २मुस्तके च ।

वार्शिला स्त्री वाजीता शिला शाक० । करकायां शब्दच० ।

वार्षक न० पृथिवीभागभेदे । "दशधा विभजन् क्षेत्रमकरोत् पृथिवीमिमाम् । इक्ष्वाकुरुं ययादादो मध्यदेशमवाप्तवान् । कोष्टवे वार्षकं क्षेत्रं रघवेऽन्तर्बहिर्भुवं हृं खन्निषु० ।

वार्षिक त्रि० वर्षं वर्षार्थं वा भवः ठञ् । १वत्सरभवे २वर्षा-कालभवे च । ३लाभमात्रेऽवतारां न० मेदि० तत्रार्थे स्त्री राजनि० स्त्रीत्वे ङीष् । ४वर्षं वर्षं कर्त्तव्यायां पूजायां स्त्री ङीष् । "शरत्काले महापूजा क्रियते या च वा-र्षिकी" देवीमा० । [अमरः ।

वार्हत न० वृहत्याः फलम् अण् तस्य न लुप् । वृहतीफले

वार्हद्रथ(थि) पु० वृहद्रथस्यापत्यमण् इञ् वा । वृहद्रथ-राजपुत्रे जरासन्धे रूपे त्रिका० अथनः शब्दर० ।

वार्हस्पत्य न० वृहस्पतिना प्रोक्तमधीते पठत्यनया यक् । १चार्वाके रत्नमा० । तेन प्रोक्तं तत्रैदं वा यक् । २नीतिशास्त्रे ३वोडामले च । ४वृहस्पतिसम्बन्धिनि त्रि० । ५वर्षभेदे गुरुवर्षशब्दे २६।८५ उ०दृश्यम् स दैवताऽस्य यक् । ६तद्दैवतारके त्रि० ७नक्षत्रभेदे न० ग्रैषिकोऽण् । वार्हस्पत्य तत्सम्बन्धिनि त्रि० स्त्रियां ङीष् ।

वालव पु० वल्ल-घञ् वालवलनं वाति गच्छति वा-क । तिथ्यङ्गभेदके द्वितीये करणे ज्यो०त० । [लकुच अप्यत्र न०

वाल्क न० वल्केन निर्वृत्तमण् । वल्कजातवस्त्रे । वा-

वाल्मिकि पु० वल्मीके भवः इञ् पृषो० । रामायण-प्रणेतरि मुनिभेदे हिङ्गुपत्रो० ।

वाल्मीक(कि) पु० वल्मीके भवः अण् इञ् वा । भार्गवे प्राचेतसे मुनिभेदे जटा० । [अमरः ।

वावदूक त्रि० वद-यङ्लुक्-ऊकञ् । बहुवदनशीले वक्तरि

वावय पु० वय-यङ्लुक्-अच् । (वायुर) तुलसीभेदे शब्दच० ।

वावृत संभक्तौ द्वि० आत्म० सक० सेट् ङा वेट् । वावृत्यते अवावर्त्तिष्ट । "ततो वावृत्यमाना सा" भट्टिः ।

वावृत्त त्रि० वावृत-क्त । कृतवरणे ।

वाश्र तिरश्चां शब्दे अक० आह्वाने सक० दि० आत्म० सेट् अदित् चङि न हस्वः। वाश्यते अवाशिष्ट। "उद्वाश्यमानः पितरम्" भट्टिः।

वाशा स्त्री वां कामयतिं श्यति शो-क। वाशके शब्दरू० स्वार्थे क हस्वे अत इत्त्वम्। वाशिका तत्रार्थे शब्दच०।

वाशित न० वाश-भावे क्त। १तिरश्चां शब्दे अमरः २आह्वाने च।

वाशिता स्त्री वाश-क्त। १करिण्याम् २स्त्रीमात्रे च अमरः

वा(शि)शिष्ठ न० वशि(शि)ष्ठेदम् अण् तेन प्रोक्तं वा अण्। वशिष्ठप्रणीते १उपपुराणभेदे २योगशास्त्रभेदे च। ३वशि(शि)ष्ठसम्बन्धिनि त्रि०। ४गोमत्यां नद्यां स्त्री ङीप च० ङीप्। [भेदि०।

वाश्र न० वाश-रक्। १मटरे २चतुष्पदे च। २दिवसे पु०

वाष्प(स्र) पु० वा-प ष्(ष्)क् च। १अश्रुणि २लोहे मेदि० ३चक्षुर्जले च अमरः। कुत्सायां कन्। ४मारिषशाके (नटिया) पुंस्त्री०शब्दर० वा गौ०ङीष्। वाष्पी+(स्त्री)-स्वार्थे क। वाष्पि(स्रि)काप्यत्र अमरः।

"मारिषो वाष्पको मार्षः श्वेतो रक्तश्च स क्षतः। मारिषो मधुरः शीतो विदग्धो पित्तरक्तहृद् गुरुः। वातश्लेष्मकरो रक्तपित्तहृद् विषमाग्निजित्। रक्तमार्षो गुरुर्नीतिसक्षारो मधुरः करः। श्लेष्मलः कफुकः पाके स्वल्पदोष उदीरितः" भावप्र०। [अववाषत् त।

वास हरभीकरणे अद० चु० उभ० सक० सेट्।

वास पु० वस-निवासे आच्छादने वा आधारकर्मादौ घञ्। १गृहे २वस्त्रे ३अवस्थाने हेमच०। वास-कच्। ४वासके शब्दरू०। तत्रार्थे स्त्रीत्वमपि तत्र टाप्। ५सुगन्धे च। स्थानभेदेऽवस्थाननिषेधो यथा

"तस्मात् सङ्कीर्णदुष्टेषु वासो मम न रोचते। पुंसो ये नाभिनन्दन्ति दुष्टे नाभिजनेन च। न तेषु च वसेत् प्राज्ञः श्रेयोऽर्थी पापबुद्धिषु। ये त्वेवमभिजानन्ति दुष्टे नाभिजनेन च। तेषु साधुषु वस्तव्यं सवासः श्रेयसे सतः" मात्स्ये २८अ०। "धार्मिकैरावृते धामे न व्याधिर्बाधते क्वचित्। न शूद्रराज्ये निवसेत् न पाषण्डजनैर्वृते। द्विभवद्विभव्ययोर्मध्यं पूर्वपश्चिमयोः शुभम्। सङ्घा वसतयोर्नैवं नान्यत्र निवसेत् द्विजः। कर्कशोग्रादोकूलं वर्जयित्वा द्विजोत्तमः। नान्यत्र निवसेत् ग्रामं नान्यत्रयाम्यचक्रिणौ। न संवसेच्च पतितैर्न चण्डालैर्न पुक्कसैः। न मूर्खैर्नावलिप्तैश्च नान्त्यैर्नान्त्यावसायिभिः" कूर्मपु० १५अ०। "धनिनः श्रोत्रियो राजा नदी वैद्यश्च षण्णमः। पञ्च यत्र न विद्यन्ते तत्र वासं न कारयेत्" चाणक्यः

वासक पु० वास-ण्वुल्। औषधिख्याते वृक्षे "येन तेन प्रकारेण वासकः कासनाशकः" इति वैद्यकम्

"वासकः कासहृत् स्वर्यः कफपित्तास्रनाशनः। तिक्तः सुवर्को हृद्यो लघुः शीतस्तृड्विषहृत्। श्वासकास ज्वरच्छर्दिमोहकुष्ठक्षयापहः" भावप्र०। २गानाङ्गविशेषे यथा "मनोहरोऽथ कन्दर्पश्चारुनन्दन एव च। चत्वारो वासकाः प्रोक्ताः शङ्करेण स्वयं पुरा"। वेषान्तरिमिते नामान्तरम्। "विनोदो वरदश्चैव नन्दः कुसुद एव च। चत्वारो वासकाः प्रोक्ता गीतवाद्यविशारदैः" सङ्गीतदा०।

वासकसज्जा स्त्री "कुरुते मण्डनं या तु वस्त्रिते वासवेश्मनि। सा तु वासकसज्जा स्यात्" रसमञ्जरीधृते नायिकाभेदे वासकसज्जाप्यत्र सा० द०।

वासकर्णी स्त्री वासं देववासं कर्णयत्यत्र कर्ण-आधारे अच् गौरा० ङीष्। यज्ञशालायाम् शब्दर०।

वासगृह न० वासयोग्यं गृहम् शाक०। मध्यगृहे अमरः।

वासत पुंस्त्री० वास-अतच्। गर्दभे शब्दर०। स्त्रियां ङीष्।

वासतेयी स्त्री वसतये हिता ढक्। १रात्रौ त्रि०। २वसतियोग्ये त्रि० "वनेषु वासतेयेषु" भट्टिः। स्त्रियां ङीप्।

वासन न० वास-ल्युट्। १सुरभीकरणे २धूपने ३वारिधान्याम् ४वस्त्रे मेदि० ५वासस्थाने शब्दर० ६घ्राणे च धरणिः वस-णिच्-ल्युट्। ७निक्षेपाधारे निक्षेपार्थं सङ्गृहीते पात्रे च। "वासनस्यमनाख्याय वसुदं यश्चिकीर्षते" नारदः। "वासनं निक्षेपाधारभूतं सम्पुटादिकं वसुदपत्यादिवुद्ध्या" व्य०त० रघु०। वस-णिच् भावे ल्युट्। ८क्षेपणे च।

वासना स्त्री वास-युच्। १प्रत्याशायां २घ्राणे मेदि० ३स्मृतिहेतौ संस्कारे जटा०। ४सुरभीकरणे च। मिथ्याज्ञानजन्ये ५संस्कारभेदे दोषशब्दार्थे। ६आशयविज्ञानानामेकसन्तानवर्त्तिनां तत्तत्प्रवृत्तिविज्ञानजनकत्वरूपे बौद्धाः। ७गणितशास्त्रप्रसिद्धे यद्यच्छाहीकरणादुपयोगिनि संस्कारभेदे च।

वासन्त पुंस्त्री० वसन्तस्येदम् वसन्ते भवः वा अण्। वसन्तप्रिये १वृक्षे मेदि० २कोकिले च राजनि०। स्त्रियां ङीष्। वसन्तभवे ३मलयवायौ ४वृक्षे त्रिका०। ५अण्णन्तत्वे हेमच०। ६मदनवृक्षे च शब्दर०। ७तत्कालभवे त्रि०।

स्त्रियां ङीप् सा च दत्यूह्यां हेमाधरीक्षतायां धरणिः। १०पाटलायां विश्वः ११नवमल्लिकायां भावप्र०। "वासन्ती शीतला लक्ष्मी तिक्ता दोषत्रयापहा" भावप्र०। १०वसन्तकाले कर्त्तव्यदुर्गापूजायाम्। भविष्यपु० "मीनराशिस्थिते सूर्य्ये शुक्लपक्षे नराधिप!। सप्तमीं दशमीं यावत् पूजयेद्दम्बिकां सदा" भविष्योत्तरे "चैत्रे मासि सिते पक्षे सप्तम्यादिदिनत्रये। पूजयेदिधिवद् दुर्गां दशम्यान्तु विसर्जयेत्" कालकौमुद्यां जाबालिः "चैत्रे मासि सिते पक्षे सप्तम्यादिदिनत्रये। पूजयेद्विधिवद्दुर्गां दशम्यान्तु विसर्जयेत्। नानाविधैश्च बलिभिर्मेषादैर्दोषवर्जितैः। विचित्राभरणैः पार्थ! पङ्कजादिभिरेव च। एवं यः कुरुते पूजां वर्षे वर्षे विधानतः। ईप्सितान् लभते कामान् पुत्रपौत्रादिकान्नृप!" इति। अत्र निरूपपदमासशब्दसङ्केतात् भविष्यपुराणवचने मीनराशिस्थित इति मीनस्थरव्यारब्धचान्द्रमासीयतिथिपरम्। सौररव्यारब्धे कदाचित् सप्तम्यादितिथिक्षयवाराभावात् तद्धर्म्मे तत्क्षतदोषः स्यात् न चेष्टापत्तिः भविष्यपुराणे सदापदोषादानात् जाबालिवचने] वर्षे वर्षे इत्युपादानाच्च नित्यत्वम्। एतद्विहितं कालविवेके। एवं जाबालिशेषवचनपरार्द्धे पुत्रादिरूपफलश्रवणात् काम्यत्वञ्च। ततश्च काम्यतया पूजने कृते प्रसङ्गाद्भित्यसिद्धिः। "सिताष्टम्यान्तु चैत्रस्य पुष्यैस्तत्काल सम्भवैः। अशोकैरपि यः कुर्य्यात् मन्त्रेणानेन पूजनम्। न तस्य जायते शोको रोगो वाप्यथ दुर्गतिः" इति कालिकापुराणवचनात् केवलाष्टमीकल्पश्चक्रः। चैत्रमासमधिकृत्य "नवम्यां पूजयेद्देवीं महिषासुरमर्दिनीम्। कुङ्कुमागुरुकस्तूरीधूपान्धध्वजतत्परैः। दमनैस्तैरपत्रैश्च विजयाख्यपदं लभेत्" इत्यनेन केवलनवमीकल्पश्चक्रः। व्यवस्था तु शारदीयपूजाप्रकरणोक्ता यात्रा। विशेषस्तत्र बोधनक्रिया नास्ति बाधितायां बोधनासम्भवात् इति प्रागुक्तम्। कोमादिकन्तु पूर्ववज्ज्ञेयमिति दिक् दुर्गोत्सवविवेकः। तत्कालपूजत्वात् दुर्गापि वासन्त्युच्यते।

वासयोग पुं० वासेन गन्धेन योगो यत्र (आविर) चूर्णभेदे अमरः। [पु०भेदि०।

वासर पुंन०। वस-अरच्। १दिवसे अमरः। २नागभेदे

वासव पुं० वसूनामेव स्वार्थेऽण् वसूनि सन्त्यस्य अण् वा। १इन्द्रे वसोरपत्यम् स्त्री अण् ङीप्। २व्यासमातरि सत्यवतीगन्धायाम् स्त्रीत्वेऽपि०। ३धनिष्ठानक्षत्रे न० ज्यो०

वासवदत्ता स्त्री वासवदत्तामधिकृत्य कृतो ग्रन्थः अण् आख्यायिकायां तस्य लुक्। १वासवदत्ताचरिताख्यायिकाग्रन्थभेदे २तं। २इन्द्रदत्ते त्रि०। [भेदे राजनि०।

वासस् न०वस-आच्छादने असि णिच्। १वस्त्रे अमरः २पत्र-

वासाखण्ड न० चक्रदत्तोक्ते औषधभेदे

"त्वचामादाय वासायाः पचेदष्टगुणे जले। तेन पादावशेषेण पाचयेदाढकं भिषक्। चूर्णानामभयानाञ्च खण्डाच्छुद्धं तथा गुडम्। हे पले पिप्पलीचूर्णात् सिद्धगीते च माक्षिकात्। कुड़वं घृतभाजन्तु सर्वजातं सचूर्णितम्। खित्वा विलोड़ितं खादेदूरुक्षयी क्षतक्षयी। कासश्वासपरीतश्च यक्ष्मणा च प्रपीड़ितः"

वासाखण्डकुष्माण्डक न० चक्रदत्तोक्ते औषधभेदे

"पञ्चाशच्च पलं खित्वं कुष्माण्डात् प्रस्थमानतः। यावद्यावत् पलं खण्डं वासाक्वाथाढके पचेत्। सक्षौद्रां शर्करां शुभ्रां मरीचं त्रिसुगन्धकं च कार्षिकैः। ऐलेयविश्वधन्याकमरिचैश्च पलांशिकैः। पिप्पलीकुड़वञ्चैव मधुमार्द्दीं प्रदापयेत्। कासं श्वासं क्षयं हिक्कां रक्तपित्तं हलीमकम्। हृद्रोगमग्निवैषम्यञ्च पीनसञ्च व्यपोहति"

वासागार न० वासयोग्यमगारम् मध्य०। वासयोग्ये गृहे गृहमध्ये त्रिका०।

वासाघृत न० चक्रदोक्ते घृतभेदे

"वासां वराञ्चां सपलाशमूलां कृत्वा कषायं कुसुमानि चास्याः। प्रदाय कल्कं विपचेद् घृतं तत् क्षौद्रान्वितं रक्तमुखं"।

वासाद्यघृत न० चक्रदत्तोक्ते घृतभेदे

"वासां गुडूचीं त्रिफलां त्रायमाणां वरासकम्। पञ्चानां तेन कषायेण पयसा द्विगुणेन च। पिप्पलीमूलहरीका चन्दनोत्पलनागरैः। कल्कीकृतैश्च विपचेत् घृतं जीर्णज्वरापहम्"। [वाद्यादि०।

वासि(सी) स्त्री वस-इञ् वा ङीप्। १कुठारभेदे (बरश)

वासित त्रि० वास-क्त। १सुरभीकृते अमरः। वास-क्त पृषो०। २स्तुते न०भेदि०. ३ज्ञानमात्रे हेमच०। ४खगशब्दे विश्वः ५करिण्यां ङीप्। ६क्षौमवस्त्रे स्त्री अमरे पाठान्तरम् वा गौरा० ङीष्। ७ख्याते दत्तवेदिते च त्रि०धरणिः।

वासिनी स्त्री वासोऽस्त्यस्याः इनि। शुक्लभिण्टायाम् शब्दच०। [नक्षत्रे च उणादिको०।

वासु पुं० वस-उण्। १विष्णौ त्रिका०। २विश्वरूपे ३पुनर्वसु-

वासुकि पु० वसुना शिरस्यरत्नेन आयति कै–क स एव रत्न । १सर्परा०जे "भगिनी वासुकेस्तथा" भगवान्कोत्तम् ।

वासुदेव पु० वसुदेवस्यापत्यम् अण् । १विष्णौ अमरः ।

अन्यापि तत्रामनिरुक्तिः विष्णुपु० दर्शिता यथा "सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः । ततः स वासुदेवेति विद्वद्भिः परिपठ्यते" । विष्णुस० भाष्ये तु द्विधा पठितयोः वासुदेवशब्दयोर्द्विधा व्युत्पत्तिर्दर्शिता तत्र प्रथम वसुदेवापत्यरूपार्थिका द्वितीया यथा "वसति वासं गच्छति वा वासुः द्योतते, क्रीडति जिगीषते व्यवहरति द्योतते स्तूयते सुरसङ्घैर्वा गच्छतीति वा देवः । वासुश्चासौ देवश्च वासुदेवः । "ह्लादयामि जगद्विश्वं भूत्वा (मायया) सूर्य्य इवांशुभिः । सर्वभूताधिवासश्च वासुदेवस्ततः स्मृतः" "वसनात् सर्वभूतानां वासुत्वाद् देवयोनितः । वासुदेवस्ततो ज्ञेयो योगिभिस्तत्त्वचिन्तकैः" भा० व० । स च चतुर्व्यूहस्य नारायणाख्यस्य परमात्मनः अंशभेदः इति वैष्णवामन्यन्ते

"एकांशेन जगत् कृत्स्नं व्याप्य नारायणः स्थितः । चतुर्व्यूहस्थितो व्यापी सगुणो निर्गुणोऽपि वा । एकांशभगवतोमूर्त्तिर्यौनरूपा शिवाऽमला । वासुदेवाभिधाना सा गुणातीता सुनिष्कला । द्वितीया कालसंज्ञान्या तामसी रौद्रसंज्ञिता (सङ्कर्षणाख्या) । निहन्ति सकलांश्चान्ते वैष्णवो परमा तनुः । सत्त्वाद्विका तृतीयाऽन्या प्रद्युम्नेति च संज्ञिता । जगत् व्याप्यते सर्वं सा विष्णुप्रकृतिर्ध्रुवा । चतुर्थी वासुदेवस्य मूर्त्तिर्ब्राह्मी समर्चिता । राजसी चानिरुद्धाख्या प्राद्युम्नी सृष्टिकारिका । यः सृष्ट्वाखिलं सृष्ट्वा प्रद्युम्नेन सृजत् प्रभुः । नारायणाख्यो ब्रह्मासौ प्रजासर्गेश्वरो हि सः । या सा नारायणतनुः प्रद्युम्नाख्या मनोश्वरा ! । तया संमोह्यतेऽखिलं सदेवासुरमानुषम् । सैव सर्वजगत् सूते प्रकृतिः परिकीर्त्तिता । वासुदेवो जगन्नाथो केवलो निर्गुणो हरिः । प्रधानं पुरुषः कालस्तद्व्यक्तमनुत्तमम् । वासुदेवात्मकं नित्यमेतत् विज्ञानसञ्ज्ञितं" कूर्मपु० ४८ अ० ।

वासुदेवप्रियङ्करी स्त्री ६त० । १शतावर्य्याम्, राजनि०

वासुरा स्त्री वस-उरच् । १स्त्रीभाषे २करिण्यां ३रात्रौ ४भूम्नि च हेमच० ।

वास्तु स्त्री वस-तु । गार्होक्षौ वास्तायाम् स्त्रियाम् अमरः ।

वास्तव न० वस्तोर्भव अण् । वस्तुभूते पदार्थे । [पदार्थे ।

वास्तविक त्रि० वस्तुतो निर्वृत्तम् ठक् । ऋतःसिद्धे वस्तुभूते

वास्तव्य त्रि० वसति वस-तव्य निं० । वासकर्त्तरि, २वास० योग्ये स्थाने, ३वसतौ च न० ।

वास्तु पु०न० वस-तुण् । वास्तुयोग्यभूमौ अमरः । ब्रह्मशब्दे २६२२पृ० दृश्यम् । स्वार्थे क । स्वनामख्याते शाके राजनि० । तत्रार्थे न० भावप्र० ।

वास्तूक न० वास्तु स्वार्थे क पृषो० दीर्घः । (बेतुवा) १शाके भावप्र० २चिल्लीशाके स्त्री गौरा० ङीष् राजनि० ।

"वास्तूकं वास्तुकं च स्यात् क्षारपत्रञ्च शाकराट् । तदेव तु हरित् यत्तं रक्तं स्याद् गौड़वास्तुकम् । प्रायशो यवमध्ये स्यात् यावत् शाकमतः स्मृतम् । वास्तूकद्वितयं स्वादु क्षारं पाके कटूदितम् । दीपनं पाचनं रुच्यं लघु शुक्रबलप्रदम् । सरं श्लेष्मपित्तास्रकृमिदोषत्रयापहम्" भावप्र० । [त्रिषु २वास्तुयोग्ये च ।

वास्तेय त्रि० वस्तोरिदम् वस्तये हितं वा ढक् । १वस्तिसम्बन्धे

वास्तोष्पति पु०ङीप्त० अलुक् समा० । १रुद्रे, अमरः २वास्तुभूमिपतौ च । [रुद्रे अमरः ।

वास्त पु० वस्त्रं खण्डतो रचः अण् । १स्त्रोत्रे सम्यग्खण्डते

वास्नेय पु० वास्नाय हितं ढक् । नागकेसरे रत्ना० ।

वाह्य भ्वा० आ० अक० सेट् वृदित् चङि न हुस्वः । वाढ्ढते अवाढ्ढिष्ट ।

वाह पुंक्ली० वह्यतेऽनेन अथो वा गवादिना वा वह-घञ् । १अश्वे "वाहो भारवहेऽश्वे" रत्नमाले २परिमाणभेदे च अमरः । ३भुजे ४बाहौ पु० ५वहने च पुंक्लो० शब्दर० स्त्रियां जातित्वे ङीष् । अमरः वाहरिपादयोऽत्र ।

वाहदिषत् पु० वाहाय देहि दिव-शतृ ६त० । मन्त्रिणे

वाहन न० वाह्यति वह-णिच्-ल्यु । रथादौ याने ।

देवभेदे वाहनभेदो यथा "विष्णुब्रह्मशिवैर्देवैर्ध्रियते या जगन्मयी । सितप्रेतो महादेवो ब्रह्मा लोहितपङ्कजः । हरिर्हरिस्तु विज्ञेयो वाहनानि महौजसः । समूर्त्तौ वाहनत्वन्तु तेषां यस्मान्न युज्यते । तस्मान्मूर्त्त्यन्तरं कृत्वा वाहनत्वं गतास्त्रयः । यस्मिन् यस्मिन् महामाया प्रीयाति सततं शिवा । तेन तेनैव रूपेण वाहनान्यभवन् त्रयः" कालिकापु० ५७अ० । देवदानवानां वाहनानि यथा । पुलस्त्य उवाच "ब्रह्मन्न वक्ष्यामि सर्वेषामपि नारद ! । वाहनानि समासेन एकैकस्यानुपूर्वशः । रुद्रस्तत्तनोत्पन्नं महाकायं महागजम् । श्वेतवर्णं महाशीर्षं देवराजस्य वाहनम् । रौद्रोजःसम्भवं भीमं कृष्णवर्णं मनोजवम् । यौवनकं नाम माहिषं

धर्मराजश्च नारद ! । रुद्रयानसमायुक्तं श्यामं जलधिसन्निभम् । त्रिगुणारं दिव्यगतिं वाहनं वरुणस्य च । रौद्रं शकटचक्राभं वैलाकारनरोत्तमम् । अम्बिकाप्रादसम्भूतं वाहनं धनदस्य तु । एकादशानां रुद्राणां वाहनानि महाहवे । गन्धर्वाश्च महावीर्या भुजगेन्द्राः सुदारुणाः । श्वेतानि सौरभेयाणि हयाश्चाश्वजवानि च । रथं चन्द्रसवर्णाश्वं सहस्रहंसवाहनम् । हयोद्रवाहाश्च आदित्या सुनिश्चितम् । । कुञ्जरश्चाथ वसवो यक्षाश्च नरवाहनाः । किन्नराश्वजगारुढा हयारुढो तथाश्विनौ । मारङ्गाधिष्ठिता ब्रह्मन् ! मरुतो घोरदर्शनाः । शुकारुढाश्च कवयो गन्धर्वाश्च पदातिनः । आरुह्य वाहनान्येवं स्वानि स्वान्यमरोत्तमाः । सन्नद्ध निर्ययुर्हृष्टा युद्धाय सुमहौजसः" वामनपु० ९४ अ० । त्रिशिखो देवभेदे वाहननामभेदा यक्षाश्च दशग्राः ।

वाहस पु० वाहं गतिं स्यति सो-क । १अजगरे अमरः । २सुनिषण्णके (सुसनि) शाके २परिमाणे च मेदि० ।

वाहिक पु०वह-णिच्-ण्वुल । १उष्ट्रायां २गोवाहे (बलदे) ३शकटादौ धरणिः । ४भारवाहके त्रि० "गोवाँहिकः" सा० द० । [पृषो० । गजकक्ष्यायामोभाग अमरः ।

वाहित्य न० वहतीति त्रिणि वाही-तस्मिन् तिष्ठति ष्यञ्-क

वाहिनी स्त्री वाहोऽस्त्यर्थाः इनि ङीप् । १सेनायां, २दक्षस्यादिसंख्याभेदान्विते सैन्यभेदे अनीकिनीशब्दे १६८पृ०दृश्यम् । वहति वह-णिनि । २नद्यां अमरः । "वाहिन्यः पार्श्वमेता न जहति भवतः" काव्यप्रकाशः ।

वाहिनीपति पु० ६त० । १सेनापतौ अमरः । २यमद्रे च शब्दच० ।

वाहीक पु० वह-ईकण् । १जर्त्तिके जातिभेदे (जाट) । २देशभेदे च हेमच० ।

"वाहीकदेशं यद्राँश्च कृतघ्नान् वाक्यमब्रवीत् । पञ्चानां सिन्धुषष्ठानां नदीनां येऽन्तराश्रिताः । तान् धर्मबाह्यानशुचीन् वाहीकान् परिवर्जयेत् । शाकलं नाम नगरमापगा नाम निम्नगा । जर्त्तिका नाम वाहीकास्तेषां द्वेष्यं सुनिन्दितम्" भा० कर्ण० २०१ अ० ।

वाह्य न० वाहं वाहनमर्हति यत्, वह-ण्यत्वा । १अश्वादौ यानेहेमच० । बहिर्भवः यञ् टिलोपः । २बहिर्भवे त्रि० । ३एतत्सदृशे खोऽप्रादित्वमिच्छन्ति ।

वाह्येन्द्रिय न० वाह्यपदार्थानां शब्दादीनां ग्रहणयोग्यमिन्द्रियम् शाक० । शब्दादिग्राहके श्रोत्रादौ इन्द्रिये ।

वाह्लि(ह्ली)क पु० । वह-लिच् स्वार्थे क । १देशभेदे भरतः । तद्देशजाते-कुङ्कुमे, २क्रिङ्कुनि न० मेदि० ।

वि अव्य० वा-कि । १नियोगे, २विशेषे, ३निश्चये, ४व्यवहरणे, ५निग्रहे, ६हेतौ, ७व्याप्तौ, ८ईषदर्थे, ९परिभवे, १०अवलम्बने, ११ज्ञाने मेदि० १२विशेषेण गतौ, १३व्याख्याने, १४पालने च शब्दच० । १५विहगे पु० अमरः । गणरत्ने अस्यार्थभेदानुक्त्वा क्रमेणोदाहृतं यथा "विनानावियोगातिशयभृशार्थगोहेयवाङ्मध्यधनैशून्याक्षरार्थभूषेषदर्थाभिमुख्यानवस्थाऽऽनुपूर्व्यस्वैर्यदर्शनेषु" । विचित्रं १वियुक्तः२ विकोर्णः३ विततो नदी४ विमनस्कः५ । विभुः६ विवदति७ विगायति८ विक्षतः९ विभूषितः१० विलोपितः११ विसृष्टः१२ विश्रान्तः १३ विहृष्टः१४ विश्रान्तः विलोकयति१५" । [गतिसङ्ख्यापूर्व्यते तस्मिन् ।

विंश त्रि०विंशतेः पूरणः विंशति+ड तिलोपः । येन विं-

विंशक न०विंशतेरवयवः कन् तिलोपः । विंशतिसंख्यायाम् । विंशतिरधिका दीयतेऽस्मिन् यते खार्थो लाभो ढञ्वाँढञ् । प्रतिशतं विंशत्यधिकलाभादौ "शतस्य विंशकं शतम्" इति याज्ञ० ।

विंशति स्त्री द्वे दशती नि० । द्विदशकसंख्यायां, तत्सङ्ख्याते च त्रिलोक्यव० । सङ्ख्याविशेषार्थे तु द्वि०ब०व० । द्वे विंशती त्रिंशो विंशतयः इति ।

विंशतिक त्रि० विंशतिमर्हति कन् । विंशतिसंख्यायोग्ये ।

विंशततम त्रि० विंशतेः पूरणः तमप् । विंशशब्दार्थे स्त्रियां ङीप् । [संख्यायाम् ।

विंशिन् पु० विंशति+संख्यायां डिनि तिलोपः । विंशति-

विक न० विरुद्धं विगतं वा कं जलं सुखं वा यत्र । यद्यःप्रस्तावा गोःक्षीरे पेयूषे शब्दच० । २विगतसुखे ३विगतजले च त्रि० । [टफलं पक्वं मधुरं सर्वदोषहृत्" भावप्र० ।

विकङ्कट पु०वि+ककि-कटन् । गोक्षुरे शब्दमाला० । "विकङ्कु-

विकङ्कत पु० वि+ककि अतच् । (वँदघो) १दक्षे अमरः २अतिबलायां स्त्री राजनि० ।

विकच पु० विगतः कचो यस्य । १क्षपणे बुद्धसंन्यासिनि । विगतः कचो यत्र । २ध्वजे केतौ मेदि० । वि+कच-अच् । ३विकसिते अमरः । ४वर्णे ५केशशून्ये त्रि०मेदि० । ६मङ्गल्यावयविकायाम् स्त्री राजनि० ।

विकट पु० वि+कट-अच् । १विस्फोटके शब्दरत्ना० २शाकवृक्षभेदे च राजनि० । वि+कटच् । ३विशाले त्रि०मेदि० । ४विकृते त्रि० त्रिका० ५सुन्दरे त्रि० विश्वः ६दन्तुरे त्रि०

धरधिकोषः ७मायादेव्यां स्त्री विकाख्यशेषः ।

विकण्टक पु०विगतः कण्टकोऽस्य । १यवासे अटा० । २शत्रुहीने त्रि० । [कर्त्तरि युच् तत्कर्त्तरि त्रि०]

विकत्थन न० वि+कत्थ-ल्युट् । आत्मश्लाघायाम् हेमच० ।

विकर्त्तन पु० वि+कृत-ल्यु । १सूर्य्ये २अर्कवृक्षे च अमरः ।

विकर पु०वि+कृ-अच् । १रोगे शब्दच० । २सारस्वतदेशे हेमच०

विकर्म्मस्थ पु० त्रि० विकर्मणि निन्दिताचारे तिष्ठति स्था-क । कुत्सिताचाररते विष्णुपु० ।

विकर्ष पु० वि+कृष-कर्मणि घञ् । शरे बाणे त्रिका० ।

विकल त्रि० विरुद्धा कला यस्य । १विच्छिन्ने, २स्वभावहीने त्रिका० ३कलाहीने च । ४अल्पमात्रां स्त्रियां स्त्री रत्नमा० वा ङीष् । विगता कला यस्या प्रा०ब०व० ५कलाषष्टिभागे स्त्री "विकलानां कला षष्ट्या"ज्यो०त० [विकाङ्क्षे अमरः ।

विकलाङ्ग त्रि० स्वभावहीनमङ्गमस्य । स्वभावतो न्यूना-

विकल्प पु० विभिन्नः कल्पः । १आत्मिज्ञाने २कल्पने भेदि० ३विविधकल्पने ४संशयारोपणे, ५पक्षतः प्राप्तौ च ।

विकल्पश्च द्विविधः व्यवस्थितः ऐच्छिकश्च । योऽभ्याकाङ्क्षाविरहे युक्तः तथा च भविष्ये "श्रुतिशास्त्रे विकल्पस्तु याकाङ्क्षापूरणे यति" । इच्छाविकल्पेऽष्टदोषाः यथा "प्रमाणत्वाप्रमाणत्वपरित्यागप्रकल्पना । प्रत्युच्चीवनहानिभ्यां प्रत्येकमष्टदोषता" । ब्रीहिभिर्यजेत यवैर्यजेत इति श्रूयते । तत्र ब्रीहिप्रयोगे प्रतीतयवप्रामाण्यपरित्यागः । अप्रतीतयवप्रामाण्यपरिकल्पनम् । इदन्तु पूर्वस्मात् पृथक् वाक्यम् अन्यथा यवेऽपि यागसिद्धिः स्यात् । अतएव विकल्पे न उभयम् शास्त्रार्थ इत्युक्तम् । प्रयोगान्तरे यवे उपादीयमाने परित्यक्तयवप्रामाण्यस्योज्जीवनं स्वीकृतयवप्रामाण्यहानिरिति चत्वारो दोषाः । एवं ब्रीहावपि चत्वारः इत्यष्टौ दोषा इच्छाविकल्पे । तथा चोक्तम् । "एवमेवाष्टदोषाश्च यद्वद् ब्रीहियवाक्रयोः । विकल्प व्याश्रितस्तत्र गतिरन्या न विद्यते" इति । विविधं कल्प्यते इति विकल्पः । तस्मादष्टदोषभिया उपोषम्र हे तिथौ इत्यत्र न इच्छाविकल्पः किन्तु व्यवस्थितविकल्पः" एता० त० रघु० । प्रायश्चित्तोक्तेः क्वचिच्छक्तिभेदे यथा "शब्दज्ञानानुपाती-वस्तुशून्यो विकल्पः" स्मृ० । "स न प्रमाणोपारोही न विपर्य्ययोपारोही वस्तुशून्यत्वेऽपि शब्दज्ञानमाहात्म्य निबन्धनो व्यवहारो दृश्यते । तद् यथा चैत्रस्य पुरुषस्य खरूपमिति यदा चित्तिरेव पुरुषः तदा किमत्र केन व्यपदिश्यते भवति च व्यपदेशे वृत्तिः यथा चैत्रस्य गौरिति । तथा प्रतिषिद्धवस्तुधर्मा निष्क्रियः पुरुषः । तिष्ठति वाधः स्थास्यति स्थित इति गतिनिवृत्तौ धात्वर्थमात्रं गम्यते । तथातत्पक्षिधर्मा पुरुष इति उत्पत्तिधर्मस्याभावमात्रमवगम्यते न पुरुषान्वयी धर्मः तस्मादिकल्पितः स धर्मस्तेन चास्ति व्यवहार इति । भा० "नन्तु शब्दज्ञानानुपाती चेदागमप्रमाणान्तर्गतो विकल्पः प्रसज्येत निर्वस्तुकत्वे वा विपर्ययः स्यादित्यत" आह । स नेति । न प्रमाणविपर्य्ययान्तर्गतः कस्मात् यतो वस्तुशून्यत्वेपीति प्रमाणान्तर्गतं निषेधयति । शब्दज्ञानमाहात्म्यनिबन्धन इति विपर्य्ययान्तर्गतम्" । तदुक्तं भवति क्वचिदभेदे भेदमारोपयति क्वचित् पुनर्भिन्नानामभेदं ततो भेदाभेदस्य च वस्तुतोऽभावात् तदाभासो विकल्पो न प्रमाणं नापि विपर्य्ययो व्यवहाराविसंवादादिति । शास्त्रप्रसिद्धसदाचरणमाह तद् यथेति । किं विशेष्यं केन व्यपदिश्यते विशेष्यते, नाभेदे विशेष्यविशेषणभावो न हि गवा गौर्विशेष्यते । किन्तु भिन्नेन चैत्रेण तद्दण्डादि । भवति च व्यपदेशे वृत्तिः । व्यपदेश्यव्यापदेशकयोर्भावो व्यपदेशे विशेष्यविशेषभाव इति यावत् तस्मिन् वृत्तिर्वाक्यस्य, यथा चैत्रस्य गौरिति । शास्त्रीयमेवोदाहरणान्तरं सङ्गृह्णाति तथेति प्रतिषिद्धवस्तुनः पृथिव्यादेः धर्मं परित्यन्दो यस्य स तथोक्तः कोऽसौ निष्क्रियः पुरुषः । न खलु शास्त्रीये राद्धान्तेऽभावो नाम कश्चिदस्ति वस्तु धर्मो येन पुरुषो विशेष्येतेत्यर्थः । क्वचित् पाठं प्रतिषिद्धवस्तुधर्मा इति तस्यार्थः प्रतिषेधव्याप्त्या प्रतिषिद्धाभावो न वस्तुधर्माणां तद्व्याप्तता भावाभावयोरसम्भवाच्च तथा प्रतीतिरिति । लौकिकसदाचरणमाह तिष्ठति वाध इति । पचति भिनत्तीत्यत्र पूर्वापरीभूतया पाकादिक्रिययैव स्थानक्रियया वाध्याद्धिक्रया वाधस्य व्यपदेश इति गतिनिवृत्तौ धात्वर्थमात्रं गम्यते । गतिनिवृत्तिरेव तावत् कल्पिता तस्या अभावरूपत्वम् । तत्रापि पूर्वापरीभाव इत्यत्रो कल्पनायामस्मरेत्यर्थः । अभावः कल्पितो भाव इव चानुगत इव च सर्वपुरुषेषु गम्यते न पुरुषाद् व्यतिरिक्तो धर्मः कश्चिदित्युदाहरणान्तरमाह । तथातत्पक्षिधर्मेति । प्रमाणविपर्य्ययाभासन्या न विकल्प इत्तिरितिवादिनो वयः प्रतिभेदिरे तत्पतिबोधनायोदाहरणमपठ्य" विव० ।

ज्ञाने प्रकारतारूपविषयतामेदे यथा सविकल्पकं सप्रकारताकं ज्ञानम्। निर्विकल्पकं निष्प्रकारताकं ज्ञानमित्यादि दर्शनग्रन्थे तस्य क्वचित् सत्त्वं क्वचिदसत्त्वम्। यथा "साध्यसन्दाभावयोर्धर्मविकल्पात्" गौ० सू० इत्तौ दृश्यम्।

विकल्पसम पु० गौ० उक्ते जात्युत्तरभेदे। स च कस्य चित् धर्मस्य क्वचिद्व्यभिचारदर्शनेन धर्मत्वाविशेषात् प्रकृतहेतोः प्रकृतसाध्यं प्रति व्यभिचारापादनरूपः यथा शब्दोऽनित्यः कृतकत्वादित्यत्र कृतकत्वस्य गुरुत्वव्यभिचारदर्शनात् गुरुत्वस्यानित्यत्वव्यभिचारदर्शनात् अनित्यत्वस्य मूर्त्तत्वव्यभिचारदर्शनात् धर्मत्वाविशेषात् कृतकत्वमप्यनित्यत्वं व्यभिचरेदिति दृष्टिः। वा०भाष्ये तु "साधनधर्मयुक्ते दृष्टान्ते धर्मान्तरविकल्पात् साध्यधर्मविकल्पं प्रसञ्जतो विकल्पसमः। यथा क्रियाहेतुगुणयुक्तं किञ्चिद् गुरु यथा लोष्टः किञ्चिद् लघु यथा वायुः। एवं क्रियाहेतुगुणयुक्तं किञ्चित् क्रियावत् स्यात् यथा लोष्टः। किञ्चिदक्रियं यथात्मा। विशेषो वा वाच्यः" इत्युक्तम्।

विकश(स्व)र त्रि० वि+कश(स)-अरच्॥प्रकाशयुक्ते अमरः २रक्तपुनर्नवायाञ्च राजनि०।

विकधा(सा) स्त्री विशेषेण कथ्यतेऽसौ कथ(सा)-घञर्थे क। १सङ्किरायाम् अमरः। २मांसरोहिण्यां राजनि०।

विक(ग्नि)सित त्रि० वि+कश(स)-क्त। प्रकाशयुक्ते।

विकार पु० वि+कृ-घञ्। प्रकृतेरन्यरूपे परिणामे।

"विकारश्च यदात्मकं द्रव्यं यदा सुवर्णं वा तदात्मनोऽन्यत्वे पूर्वो व्यूहो निवर्त्तते व्यूहान्तरं वोपजायते। तं विकारमाचक्षते" वा० भा० २।२।३६ सूत्रे उक्तः। स्वरूपत्यागेन रूपान्तरापत्तिरूपः। स्वरूपस्य विनाशे अविनाशे वा द्रव्यान्तरारम्भकत्वरूपः यथा दुग्धादेर्दध्यारम्भकत्वम् बीजादेर्ङ्कुरारम्भकत्वरूपो वा" गौ०सू०इत्तावुक्तो वा। स्वरूपनाशोऽपि विकारो भावविकारशब्दे दृश्यः। काष्ठादेरवयवनाशेन तक्षोत्पादनात् तक्षापि काष्ठविकार एव कर्मनृशब्दे विकार्यनिरूपणे दृश्यम्।

विकार्य्य त्रि० वि+कृ-ण्यत्। १विकारजन्ये द्रव्ये व्याकरणोक्ते कर्मभेदे कर्मनृशब्दे १७११ पृ० दृश्यम्।

विकाल पु० विरुद्धः दैवपित्र्यादिकर्मानर्हः कालः। १रात्रौ नामकवेलायाम् २दिवसान्त्यभागे त्रिका०।

विकालिका स्त्री विज्ञातः कालोऽनया कप् अत-इत्वम्। कालज्ञापके घटीयन्त्रभेदे (ताँबी) ताम्र्यां त्रिका०।

विकाय न० विरुद्धः कायः। १रङ्गे २विशिष्टे काये प्रकाशे च अमरः। [अमरः।

विकायिन् त्रि० वि+काय-णिनि। प्रकाशशीले विकत्थने

विकिर पुंस्त्री० वि+कृ-क। १विक्षेपे अमरः स्त्रियां ङीष्। २दत्ते त्रिका०। विकीर्य्यते यज्ञार्थं क। ३विघ्नोपशान्तये यत्तृप्तिप्रश्नेतसर्षपादौ "बालचन्दनसिद्धार्थभक्तदूर्वाक्षताक्षताः। विकिरा इति सन्दिष्टा सर्वविघ्नौघनाशनाः" तत्त्वसा०। ४अग्निदग्धादीनां पित्तनिर्वपने "असंस्कृतप्रमीतानां योगिनां कुलयोषिताम्। चक्षिष्टं भागधेयं स्यात् दर्भेषु विकिरश्च यः" आ० त०।

"पिण्डनिर्वापरहितं यत्तु श्राद्धं विधीयते। क्षुधावाचनकोपोऽत्र विकिरस्तु न लुप्यते" आ०त०।

विकिरण न० वि+कृ-ल्युट् नि० इत् रपरत्वम्। १क्षेपणे २क्षिपने, २त्यागे च। ४सर्वतक्षे पु०अमरः। ६व०,५क्रियाशून्ये त्रि०।

विकीर्ण त्रि० वि+कृ-क्त। विक्षिप्ते।

विकुर्वाण त्रि० वि+कृ-शानच्। कुर्वद्देहेना जातरोमहर्षादौ अमरः। २विकृतिप्राप्ते च। [११ ऋ०।

विकुक्षि पु० सूर्य्यवंश्ये इक्ष्वाकुराजपुत्रे ऋषभेदे हरिवं०।

विकुस पु० वि+कुस-रक्। चन्द्रे उणादिकोशः।

विकूणिका स्त्री वि+कू-रक्+टाप् स्वार्थे क, अत इत्वम्। नासायां हेमच०।

विकृत त्रि० वि+कृ-क्त। १बीभत्से २सविनीकृते, ३रोगयुक्ते ४विकारयुते।

"छोभानेर्ष्यादिभिर्यत्र नोच्यते स्वं विवक्षितम्। व्यज्यते चेष्टयैवेदं विकृतं तद्विदुर्बुधाः" उज्ज्वलमण्युक्ते ५भावभेदे न० प्रभवादिषु ६षष्टितमे संवत्सरे पु० प्रभवादिशब्दे ४४७४पृ० तदानयनं दृश्यम्। "सर्वाः प्रजाः प्रपीड्यन्ते व्याधिः शोकश्च जायते। शिरोवक्षोऽक्षिरोगाश्च पापाद्धि विकृते जनाः" ज्यो०त०। सुकृतशब्दे २६२२ पृ० दृश्यम्। [स्त्रियां नित्यं ङीप्। २रोगे, ३हिंस्रे हेमच०

विकृति स्त्री वि+कृ-क्तिन् वा। १विकारशब्दार्थे अमरः।

विकेशी स्त्री विगतः केशो यस्याः ङीष्॥केशशून्यायां स्त्रियां २पटवर्षौ च धरणिः। ३महीरूपस्य शिवस्य पत्न्याम् "सूर्य्यो जलं मही वह्निर्वायुराकाशमेव च। दीक्षितो ब्राह्मणः सोमः इत्येताश्चाष्टमूर्तयः क्रमात्। सुवर्चला तदैवोमा विकेशी चापरा शिवा। स्वाहा दिशश्च दीक्षा रोहिणी च यथाक्रमम्। सूर्य्यादीनामिमाः पत्न्यो ह्यष्टानां नामभिः सह" मार्क० ४०।

विकोक पु० ककारस्वरयुक्तभेदे कवर्गिन० २१ अध्याये दृश्यम्।

विक्क पु० विक्कयति वि+क्कच-ड। करिशावके त्रिका०।

विक्रम पु० विशेषेण क्रामति वि+क्रम-घञ्। १त्रि० विक्रमे, २विष्णौ, "मेधावी विक्रमः क्रमः" विष्णुस०। ३विक्रमादित्यनृपे "रत्नानि वै वररुचिर्नव विक्रमस्य" ज्योतिर्विदाभरणम्। भावे घञ्। ४क्रमणे मेदि०। करणे घञ्। ५चरणे, त्रिविक्रमः। ६शौर्यातिशये, ७सामर्थ्ये च राजनि०। षष्टिवर्षमध्ये "जयं मधु गन्धव मङ्गलं विक्रमे प्रिये!" इत्युक्तनाम्नि दक्षवर्षभेदे मेदि०। प्रभवादिशब्दे ४३७४ पृ० दृश्यम्।

विक्रमादित्य पु० विक्रमेणादित्य इव। स्वनामख्याते नृपभेदे विक्रमार्कोऽत्र "सो दुष्टः सुत एव वा क्षितितले श्रीविक्रमार्कोपमः" मिता०।

विक्रमिन् पु० वि+क्रम-णिनि। १सिंहे, राजनि० २विष्णौ विष्णुपु०। ३विक्रमयुक्ते त्रि० स्त्रियां ङीप्।

विक्रय पु० वि+क्री-घञ्। मूल्यपरिवर्त्तेन परस्वत्वापादके व्यापारे अमरः।

विक्रये विक्षिप्तादिक्षिप्तलक्षणान्यपि यथा "यमादिष्टक्रमस्निग्धताम्रपूर्वा नेत्राः क्रये विक्रयणे प्रशस्ताः। पौष्णास्त्रिवायुतविन्दुवाताः क्रये क्षिप्ता विक्रयणे निषिद्धाः"। ज्योतिःसारः। क्रयविक्रयनिर्णयो यथा "मूल्यं दास्यामीति नियमं कृत्वा परिक्षादपि क्रयसिद्धिः। तथाच विवादचिन्तामणौ कात्यायनः "पण्यं परीक्ष्य यो मूल्यमदत्त्वैव दिशं व्रजेत्। अनुशयस्तोपरिष्टात् तद्धनं दाप्यमाप्नुयात्"। अतएव बृहस्पतिः "परीक्षेतादिकं क्रीत्वा तुल्यमूल्याचरान्वितम्। पश्चं कारयते यस्तु क्रयशेषं तदुच्यते"। क्रयविक्रये समयविशेषात्यन्तरे पश्चात्तापादसिद्धिः। यथाह मनुः "क्रीत्वा विक्रीय वा किञ्चित् यस्येहानुशयो भवेत्। सोऽन्तर्दशाहे तद्द्रव्यं दद्याच्चैवाददीत वा"। एतद्याज्ञवल्क्योक्तेरपरम्। यथा याज्ञवल्क्यः "दशैकपञ्चसप्ताहमासत्रयूहार्द्धमासिकम्। बीजायोवाक्षरत्नस्त्रीदोहपुंसां परीक्षणं। अत्र बृहस्पतिः "अतोऽन्यत्र पशुदोषस्तु यदि संजायते क्वचित्। विक्रेतुः प्रतिदेयन्तत् क्रेता मूल्यमवाप्नुयात्"। अतस्तद्द्रव्यपरीक्षणकालात्। कात्यायनः "क्वचित्तन्तु यत् क्रीतं दुष्टं पश्वादिभावितम्। क्रेता तत् साक्षिणे देयं पश्चात् कालेऽन्यथा न तत्। काले प्राप्तुमपरीक्षाकालाभ्यन्तरे। परीक्षिते तु दृष्टस्मृतिः "परीक्षेत स्वयं पश्चात् अन्येनापि प्रदर्शयेत्। परीक्षितं बहुमत्वा गृहीत्वा न पुनस्त्यजेत्"। अत्र विशेषमाह नारदः "क्रीत्वा मूल्येन यो द्रव्यं दुष्कीतं मन्यते क्रयी। विक्रेतुः प्रतिदेयं तत् तस्मिन्नेवाङ्गमाहरेत्। दिनद्वयेऽस्थि दर्शत क्रेता मूल्यात्त्रिभागमाहरेत्। दिगुणन्तु तृतीयेऽस्थि परतः क्रेतुरेव तत्"। आहरेत् दद्यात् विक्रेतेति शेषः। दिगुणं त्रिभागमिति शेषश्च। "याज्ञवल्क्यः "राजदैवोपघातेन पण्ये दोषमुपागते। क्रान्निर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः"। नारदः "उपहन्येत वा पण्यं दह्येतापहियेत वा। विक्रेतुरेव तोऽनर्घो विक्रीयार्धप्रयच्छतः। दीयमानं न गृह्णाति क्रीतं पश्चात्तु यः क्रयी। न एवास्य भवेद्दोषो विक्रेतुर्दोऽप्रयच्छतः" प्राय० त०। "न्यासं कृत्वा परत्राधिं कृत्वा वाधिं करोति च। विक्रयं वा क्रियातत्र पश्चिमा बलवत्तरा"। न्यासं कृत्वा आधिं करोति आधिं कृत्वा वा विक्रयं करोति। विक्रयपदं सत्त्वध्वंसकत्वात् दानं लक्षयति तत्र धरा क्रिया सिद्धेत्यर्थः। एवञ्च विक्रेतृटाक्षोभैरत्यादिना आध्यनुद्धारे विक्रयदाने अनुकूलत्वजननात् तत्र तत्क्रेतृप्रतिग्रहीतृभ्यामाध्युद्धारः कार्य्यः इति। न च "स्थावरस्य समस्तस्य गोक्षमाधारणस्य च। नैवः कुर्यात् क्रयं दानं परस्परमतं विना। विभक्ता अविभक्ता वा सपिण्डाः स्थावरे समाः। एको ह्यतीयः सर्वत्र दानाधमविक्रये" इति व्यासवचनाभ्यामेकस्य दानवत्स्वविक्रयानधिकारः इति वाच्यं यत्रेदविनियोगार्हत्वरूपस्य स्वत्वस्य द्रव्यान्तर इवात्रायविशेषात् वचनस्य स्वामित्वेन दुर्वृत्तपुरुषाचरविक्रयादिना कुटुम्बविरोधादधर्मजनकत्वनिषेधकं न तु विक्रयाद्यनिष्पत्त्यर्थमिति दायभागः। एवञ्च "स्थावरे विक्रयो नास्ति कुर्यादाधिमनुत्तमा" इति स्थावरस्य केवलविक्रयप्रतिषेधात् एवं "भूमिं यः प्रतिगृह्णाति" इत्यादिवचने दानप्रशंसादर्शनाच्च विक्रयेऽपि कर्त्तव्ये सद्भिरग्रसुदकं दत्त्वा दानरूपेण स्थावरविक्रय इति विज्ञानेश्वरः। वस्तुतस्तु स्थावरविक्रयनिषेधः अविभक्तस्थावरविषयः। तत्रापि यदि विक्रयं विना अवस्थितिर्न भवति तदा विक्रयः कर्त्तव्यः। पूर्वपुरुषार्जितनरोद्धारे विशेषयति मिताक्षरायाम् "स्थावरं द्विपदश्चैव यद्यपि स्वयमर्जितम्। अवश्यञ्च सुतान् सर्वान् न दानं न च विक्रयः" इः

ज्ञादि। अस्यापवादमाह "एकोऽपि स्थावरे कुर्याद्दानाधमनविक्रयम्। आपत्काले कुटुम्बार्थे धर्मार्थं च विशेषतः" दायतत्त्वे रघु०। द्रव्यविशेषविक्रयनिषेधो यथा स्मृतिः "विक्रीणन् मद्यमांसानि लवणञ्च न भक्षयेत्। कुर्वन्नगम्यागमनं मूढः पतति तत्क्षणात्। कपिलाक्षीरपानेन ब्राह्मणीगमनेन च। वेदाक्षरविचारेण मूढश्चाण्डालतां व्रजेत्" आत्रिस्मृतिः। "विक्रयं सर्ववस्तूनां कुर्वन् शूद्रो न दोषभाक्। मधु चर्म सुरां लाक्षां त्यक्त्वा मांसञ्च पञ्चमम्" मनुः। "यज्ञाः पतति लोहेन लाक्षया लवणेन च। त्रपुणा शूद्रो भवति ब्राह्मणः क्षीरविक्रयात्। अगम्यागमनेऽभक्ष्यभक्षणे पतनेऽपि च। यद्यत्कृत्यन्तु विक्रेयमिच्छता धान्येन तत्समाः" याज्ञि० त०। "गवां विक्रयकारी च गवां गोष्ठे कृमिर्भवेत्" इति ब्रह्मवचनम्। "गोवधोऽयाज्यसंयाज्यपारदार्यात्मविक्रयाः। तडागारामदारागामपत्यस्य च विक्रयः। श्रुताध्ययनादानमपण्यानान्तु विक्रयः" मनुः।

विक्रयानुशय पु० विक्रयस्यानुशयः पश्चात्तापः। विक्रीतपदार्थस्य पराङ्मुखिकरणे १अनुतापे तद्विषिके २विवादभेदे

विक्रयिक पु० विक्रयः अस्त्यस्य ठन्। विक्रेतरि अमरः।

विक्रयिन् त्रि० वि+क्री-ताच्छील्ये णिनि। विक्रयशीले ङीप्। [भावे क्त। २विक्रमे।

विक्रान्त पु०वि+क्रम-क्त। १सिंहे राजनि० २शूरे च अमरः।

विक्रिया स्त्री वि+कृ-भावे श। १विकारे कल्पान्तरितस्य वस्तुनोऽन्यथा परिणामे।

विक्रीयासम्प्रदान न० विक्रीय न सम्प्रदानं क्रेत्रे यत्र। अष्टादशविवादान्तर्गते विवादविशेषे तत्स्वरूपादिकं वीरमि० उक्तं यथा

"अथ विक्रीयासम्प्रदानाख्यव्यवहारपदम्। तत्स्वरूपमाह नारदः "विक्रीय पण्यं मूल्येन क्रेतर्यश्च प्रदीयते। विक्रीयासम्प्रदानं तद्विवादपदमुच्यते इति" तत्र विक्रेयद्रव्यस्य द्वैविध्यमभिप्रेत्य क्रमेणाह स एव "लोकेऽस्मिन् द्विविधं प्रोक्तं जङ्गमं स्थावरं तथा। षड्विधस्तस्य च बुधैर्दानादानविधिः स्मृतः। गणितन्तुलितं मेयं क्रियया रूपतः क्षितेरिति"। दानं विक्रयः आदानं क्रयः। गणयित्वा यस्य क्रयः तद्गणितम्। गणितं संख्येयं क्रमुकफलादिकम् एवं तुलितादिकं तुलितन्तुलाधृतं हेमचन्दनादिकम्। मेयं व्रीह्यादिकम् क्रियया शाटनदोहनादिरूपया युक्तमिति शेषः। रूपतः रूपेण युक्तं वस्तु पशुवस्त्रादि। क्षितेर्दीप्त्या युक्तं पद्मरागादिकम्। यदा विक्रेता मूल्यं गृहीत्वा याचमानाय क्रेत्रे विक्रीतं वस्तु न ददाति तदा यत्कर्त्तव्यं तदाह स एव "विक्रीय पण्यं मूल्येन क्रेतुर्यो न प्रयच्छति। स्थावरस्य त्वयं दाप्यो जङ्गमस्य क्रियाफलमिति" यो गृहीतमूल्योविक्रेता अज्ञातानुशयाय क्रेत्रे प्रार्थयमानाय नार्पयति तत्र पण्यं यदि स्थावरात्मकं तदा त्वयेष सहितमसौ दाप्यः। यदा तु जङ्गमात्मकं तदा क्रियाफलेन सहितम् इत्यर्थः। विक्रयानन्तरं ज्ञात उपभोगोऽत्र क्रयः क्रियाफलं दोहनादिक्रियाफलं क्षीरादिकम्। रदश्च क्रयकालापेक्षया अर्पणकाले मूल्याधिक्ये वेदितव्यम्। मूल्यस्वाम्ये स्वयमभिधानात्। तथा च स एव "अर्पयेदपहीनेन क्रेतुर्दद्यात्तदन्यथा" इति। अर्थात् हेदपहीनेनेति वक्तव्ये पाठः। अर्थात् विक्रीतस्य क्रेत्रे समर्पणात् पूर्वं अपचीयेत हीनमूल्यं भवेत्तोदयस्यापभावहेदिति"। अर्थात् विक्रयकाले यावन्मूल्यं गृहीतं तावता मूल्येनार्पणसमये मूल्यह्रासवशाद्यावदुपचयसहितं लभ्यते तावद्दाप्यादित्यर्थः। यदा तु मूल्यसाम्यं तदा पण्योपचयरूपस्यासम्भवात् "निक्षेपं हृद्विनेयस्य क्रयं विक्रयमेव च। याच्यमानमदत्तञ्चेद्दाप्यं पण्यं यतस्मिति" वचनोक्त हृद्विसहितमस्यं दाप्यः। अतएव याज्ञवल्क्यः "गृहीत मूल्यं यः पण्यं क्रेतुर्नैव प्रयच्छति। सोदयं तस्य दाप्योऽर्घो दिग्गवार्भं वा दिशागते" इति। गृहीतमूल्यमस्यं विक्रेता यदि प्रार्थयमानाय गृहेऽन्यस्मिन् क्रेत्रे न समर्पयति तत्र पण्यं यदि क्रयकाले बहुमूल्यं सत्स्वान्तरे स्वल्पमूल्येनैव लभ्यते तदा सोदयं हृद्या सहितं विक्रेता क्रेत्रे दापनीयः। यदा मूल्यह्रासतः पण्यस्योदयो नास्ति किन्तु क्रयकाले यावता मूल्येन लभ्यं यावत्पण्यमिति प्रतिपन्नं तावदेव तदा तत्पण्यमादाय तस्मिन् देशे विक्रीतस्य यो लाभस्तेनोदयेन सहितं दापनीयः वचनत्रयस्यार्थः। चतुर्थस्य तु यो देशान्तरात् क्रयार्थमागत्य क्रीणाति तस्मै देशान्तरे तत्पण्यं विक्रये यो लाभस्तेन सहितं तत्पण्यं दापनीय इत्यर्थः। देशान्तरलाभसहितपण्यदानञ्च केवलमाद्यांशस्य एव किन्तु मूल्यस्य हृद्धौ सत्यामुदयाद्दाप्य इति नारदः "स्थाविनामेव नियमोदिग्लाभं दिग्विचारिणामिति"।

स्थायिनां विक्रेतृदेशस्थायिनाम् एष नियमः स्थावरस्य त्वं दाप्य इत्यादिवचनात्तु नियम इत्यर्थः। विष्णुर्विक्रेतुर्दण्डमप्याह "अदत्तमूल्यं यः पण्यं क्रतुनैव दद्यात्तस्य दोषं दाप्यो राज्ञा च पणवतं दण्ड्यः" इति। एतच्चानुशयरहिततत्प्रविक्रेतृविषयमिति मदनरत्ने। यत्तु विक्रीयानुशयवशाद्दापयति यच्च क्रीत्वाऽनुशयवशान्न गृह्णाति तौ प्रत्याह कात्यायनः "क्रीत्वा प्राप्नान्न गृह्णीयाद्यो न दद्याद्दूषितम्। स मूल्याद्दशभागन्तु दत्त्वा स्वन्द्रव्यमाप्नुयात्"। अप्राप्ते त्वस्मिन् क्रियाकाले ऋते नैव प्रदापयेत्। एष धर्मो दशाहात्तु परतोऽनुशयो नास्तीति"। दूषितं जलादिनेति शेषः। दोह्यवाह्यादिपण्यस्य दोहनवाहनादिरूपः कालोऽत्यक्रियाकालस्तस्मिन्नप्राप्ते सति अपहृष्येऽदाने वा ऋते सति न दशभागं प्रदापयेत् किन्तु तमदत्त्वैव क्रीतं द्रव्यं प्राप्नुयादिति। एष धर्मो दशाहात्प्राग्वेदितव्यः तत ऊर्द्धमनुशयो न कर्त्तव्यः। विक्रीयासम्प्रयच्छतो यद्विक्रीतं पण्यं विक्रेतुः पार्श्वे स्थितं तस्य यदिनाशः स्यात्तदा विक्रेतुरेव हानिरित्याह याज्ञवल्क्यः "राजदैवोपघातेन पण्ये दोषस्तु गामिते। हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः" इति। अत्र याचितस्येति विशेषणोपादानात् याचनाभावे न विक्रेतुर्हानिरित्यर्थोऽभ्युपेयते। नारदोऽपि "अपहृष्येत वा पण्यं दह्येतापच्छिद्येत वा। विक्रेतुरेव सोऽनर्थो विक्रीयासम्प्रयच्छतः" इति। यथा याचितस्याप्रयच्छतो विक्रेतुर्हानिस्तथा दीयमानं पण्यमगृह्णतः क्रेतुरपीत्याह स एव "दीयमानन्तु गृह्णाति क्रीतमप्यपरञ्च यः क्रयी। स एवास्य भवेद्दोषो विक्रेतुर्योऽप्रयच्छतः" इति। अप्रयच्छतः विक्रेतुर्यो दोषः स एवास्य भवेदित्यन्वयः। क्रेतुर्दोषाभिधानस्य फलं पण्यस्य मूल्यं क्रेतरि विक्रेता न प्रत्यर्पयेदिति। दीयमानन्तु गृह्णातीति वदता दीयमानपक्षे न मूल्यहानिरिति दर्शितम्। क्रयानन्तरं क्रेता न याचितं विक्रेता च न समर्पितं जातचौरादिदूषणन्तयोः समा हानिः। क्रेतृविक्रेत्रोरुभयोरपि याचनानर्पणयोर्विद्यमानेन सापराधत्वादित्युक्तं देवभट्टैः स्मृतिचन्द्रिकायाम्। याज्ञवल्क्योऽपि "हानिर्वेत् क्रेतृदोषेण क्रेतुरेव हि सा भवेदिति" क्रेतृदोषः दोषमानपक्षस्थम्। यत्तु पुनर्जातानुशयः क्रेता विक्रेता दीयमानन्तु गृह्णाति तत्राह नारदः "दीयमानन्तु गृह्णाति क्रीत्वा पण्यं च यः क्रयी। विक्रीणानस्तदन्यत्र विक्रेता नापराध्नुयादिति"। क्रयी जातानुशय इति शेषः। याज्ञवल्क्योऽपि "विक्रीतमपि विक्रेयं पूर्वक्रेतर्यगृह्णतीति"। यत्तदुष्टं पण्यं दर्शयित्वा सदोषं विक्रीणीते यच्चान्यदृष्टं विक्रीतं तत्क्रेतानुशयाभाव एवान्यत्र विक्रीणीते तयोः समानोदण्ड इत्याह नारदः "निर्दोषं दर्शयित्वा तु सदोषं यः प्रयच्छति। स मूल्याद्दिगुणं दाप्यो विनयं तावदेव तु। तथान्यदृष्टं विक्रीय योऽन्यत्कं तत्प्रयच्छति। द्रव्यान्दिगुणं दाप्यो विनयं तावदेव त्विति"। याज्ञवल्क्योऽपि "अन्यदृष्टं च विक्रीतं दुष्टं वाऽदुष्टवादि। विक्रीणीते दशत्तस्य मूल्यात्तु द्विगुणो भवेदिति" बुद्धिपूर्वविषयमेतत्। "ज्ञात्वा सदोषं यः पण्यं विक्रीणीते विचक्षणः। तदैव द्विगुणं दाप्यस्तत्क्षणं विनयं तथेति" हारीतस्मृतिरुक्तत्वात्। अबुद्धिपूर्वके विक्रये तु क्रयपरावर्त्तनमेव। अन्यत्रापि विषयविशेषे परावर्त्तनमाह हारीतः "मत्तोन्मत्तेन विक्रीतं हीनमूल्यं भयेन वा। अस्वतन्त्रेण मूढेन बालेनस्त्रीजनस्य पुनर्भवेदिति"। एतत्सर्वं दत्तमूल्ये पण्ये द्रष्टव्यम्। अत एव नारदः। "दत्तमूल्यस्य पण्यस्य विधिरेष प्रकीर्त्तितः" इति। यत्र पुनर्मूल्यं न दत्तं तत्रापि स एवाह "अदत्तेऽन्यत्र समयान्न विक्रेतुरविक्रयः" इति। अदत्तमूल्ये तु पण्ये बालबालेषु क्रये कृते न परावर्त्तनीयमित्येवमादिसमयाभावे सति प्रदत्तो निष्टत्तो न कथञ्चिद्दोष इत्यर्थः। यत्र पुनर्बालक्रयपरिहारार्थं विक्रेतुर्दत्ते क्रेता किञ्चिद्द्रव्यं दत्तं तत्र क्रेतृदोषवशेन क्रयासिद्धौ त्वाह व्यासः "सत्यङ्कारं च यो दत्त्वा यथाकालं न दृश्यते। पण्यं भवेन्निरुद्दिष्टन्दोषमानमवाप्नुतः" इति। निरुद्दिष्टं भवेत् उपरुद्धं भवेदित्यर्थः। अत्र पण्यद्रव्यस्योपरोधः सत्यङ्कारद्रव्योपरोधेऽभिमतः। अन्यथा बालक्रयकर्तृतुल्यत्वेन विक्रेतुः सत्यङ्कारद्रव्यग्राहकत्वलक्षणमन्यत्र विक्रयवाद्यपराधनिमित्तं सत्यङ्कारद्रव्यस्य द्विगुणत्वेन प्रतिदानं न स्यात्। अत्रापि विक्रीतमविक्रेयमित्यनुसन्धेयम्। अस्मिन्नेव विषये विक्रेतृदोषवशेन क्रयासिद्धौ त्वाह याज्ञवल्क्यः "सत्यङ्कारकृतं द्रव्यं द्विगुणं प्रतिदापयेदिति" सत्यङ्कारः सत्यापनं कृतस्य क्रयस्य सत्यताकरणमिति यावत्। "क्लीबे सत्यापनं सत्यङ्कारः सत्याकृतिः स्त्रियाम्" इत्यमर

कोषाभिधानात् । वस्त्रद्वाराय क्षतं समर्पितं वस्त्रद्वार-क्षतं पूर्वं वस्त्रं कर्तुं यद्विक्षेतृक्षतं क्षतमित्यर्थः"।

विक्षेय त्रि॰ वि+क्षी-यत् । विक्षयणीये पदार्थे । [२व्याकुलत्वे

विक्लव त्रि॰ वि+क्लु-अच् । १व्याकुलभूते अमरः । भावे अप्

विक्लित्ति स्त्री वि+क्लिद-क्तिन् । अन्ततेजःसंयोगाभ्यामव-यवसंश्लिष्टे पूर्वरूपकसंयोगनाशानन्तरक्रियाविशेषसंयोगा-पत्तौ ।

विक्लिन्न त्रि॰ वि+क्लिद-क्त । १आर्द्रे २शीर्णे ३क्लीबे च मेदि॰ । ४विक्लेदयुक्ते । [यन्त्रे च वैद्यकम् ।

विक्लाव पु॰ वि+लु-घञ् । १अन्धे अमरः । २कासादिरोगभेदे

विक्षिप्त त्रि॰ वि+क्षिप-क्त । १विशेषेण क्षिप्ते २योगशास्त्रोक्ते चित्तस्य भूमिभेदे न॰ । तयोक्तं पातञ्जलभाष्यविव-रणयोः "क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तभूमयः । तत्र विक्षिप्ते चेतसि विशेषोपसर्जनी भूतः समाधिर्न योगपक्षे वर्त्तते" भा॰ । "क्षिप्तं सदैव रजसा तेषु तेषु विषयेषु क्षिप्यमाणम् अत्यन्तमस्थिरं, भूदन्तु तमःसत्त्वैकाग्र्याद्वृत्तिमत् । विक्षिप्तं क्षिप्ता-दिभ्यः विक्षिप्तं विशेषोऽस्य स्वेभवद्भ्यस्य कादाचित्कः स्वेभा वा चाक्षाःस्वेभवद्भता सांसिद्धिकी वा यक्ष-माद्यव्याधिस्थानाद्यन्तरायजनिता वा" विव॰ ।

विक्षीर पु॰विशिष्टं विगतं वा क्षीरमस्य । १अर्कवृक्षे राजनि॰ २विगतक्षीरे त्रि॰ ।

विक्षेप पु॰वि+क्षिप-घञ् । १त्यागे २प्रेरणे ३दूरीकरणे च । "चित्तस्य विक्षेपा नवविधाः पात॰ स्वभाष्यवार्त्तिकादौ च चित्तविक्षेपशब्दे २८३१पृ॰ अन्तरायशब्दे च दृश्याः । वेदान्तसिद्धचित्तविक्षेपाः २०० पृ॰ उक्ताः ।

विभ्रमस्थले यत् यद्रूपस्थानं तस्य क्रान्तिरूपत्वात् यत् तिर्यङ्-मनरं स विक्षेपः" सि॰शि॰ उक्ते ४अरे च ।

"भूषाभाभर्त्सरचना हया विभ्रमविक्षेपम् । रङ्गाख्या-वभीयुश्च विक्षेपो दयितालिके" सा॰ द॰ उक्ते स्त्रीणां १०सत्त्वजालङ्कारभेदे ।

हृदयाविच्छेदरूपे निग्रहस्थानभेदे "कार्य्यव्यासङ्गात् कथाविच्छेदो विक्षेपः" गौ॰सू॰ "यत्र कर्त्तव्यं व्याक्षिप्य कथां व्यवच्छिनत्ति । इदं मे करणीयं विद्यते तच्चिरवसितं कथयिष्यामि इति विक्षेपो नाम निग्रहस्थानम् । एकनिग्रहावसानायां कथायां स्वयमेव कथान्तरं प्रति-पद्यते इति" वा॰भा॰। "अवसन्नयत्नाद्यान्तरकलेनारोपितं कार्य्यव्यासङ्गशब्दाभ्यां कथाविच्छेदस्तथा" इत्तिः ।

विक्षेपशक्ति स्त्री विक्षेपस्य शक्तिका शक्तिः । वेदान्तोक्ते अविद्याशक्तिभेदे ।

"विक्षेपशक्तिस्तु यया रजस्तमान् आवृतरज्वादौ स्व-शक्त्या सर्पादिवस्तूद्भावयति एवमज्ञानमपि स्वावृताक्षि स्वशक्त्या आकाशादिप्रपञ्चमुद्भावयति तादृशं सामर्थ्यम् । तदुक्तम् "विक्षेपशक्तिर्लिङ्गादि ब्रह्माण्डान्तं जगत्सृजे-दिति" । वेदान्तसा॰ ।

विखु त्रि॰ विगता नासिका यस्य खादेशः । गतनासिके । अमरः । खादेशः । विखोऽप्यत्र त्रिका॰ ।

विखुर पुं स्त्री॰ १राक्षसे त्रिका॰ स्त्रियां ङीष् । २चौरे संक्षिप्त॰

विख्यात विशेषेण ख्यातः प्रसिद्धः वि+ख्या-क्त । प्रसिद्धे

विगणन न॰ विशेषेण गणनम् गण-ल्युट् । अवज्ञोधनार्थे सङ्ख्यागणने ।

विगत त्रि॰वि+गम-क्त । १प्रमादरहिते अमरः । २विशेषगते रुद्र॰ ३अपगते च हेमच॰ । ४मृते । ५खगगतौ न॰ । "विगतं विगतम्" भक्तिः । [स्त्रायां स्त्रियाम् शब्दरत्ना॰ ।

विगतार्त्तवा स्त्री विगतमार्त्तवं रजो यस्याः । गतरज-स्कायां स्त्रियाम् ।

विगन्धक पु॰ विरुद्धः गन्धोऽस्य कप् । १रक्तदीरक्तचे राजनि॰। २दुष्टगन्धायां स्त्री॰ टाप् । गन्धकाभावे त्रि॰ ।

विगम पु॰ वि+गम-घञ् । १नाशे, २अपाये च ।

विगर्हण न॰ वि+गर्ह-ल्युट् । निन्दने ।

विगर्हित त्रि॰ वि+गर्ह-क्त । १निन्दिते २निषिद्धे च । भावे-क्त । ३निन्दायाम् न॰ ।

विगाढ़ त्रि॰ वि+गाह-क्त । १स्नाते, २अवगाहने च ।

विगान न॰ वि+गै-ल्युट् । निन्दायाम् हेमच॰ ।

विगीत त्रि॰ वि+गै-क्त । निन्दिते ।

विगीति स्त्री वि+गै-क्तिन् । निन्दायाम् ।

विगुण त्रि॰ विरुद्धो गुणोऽस्य । गुणरहिते ।

विगूढ़ त्रि॰ वि+गुह-क्त । १गर्हिते, २गुप्ते च मेदि॰ ।

विग्रहीत त्रि॰ वि+ग्रह-क्त । १गृहीते, व्याकरणोक्ते वि-ग्रहवाक्ये २पदे च ।

विघ्न त्रि॰ विगता नासिकाऽस्य खादेशः। विगतनासिके अमरः

विग्रह पु॰ वि+ग्रह-अच् । १देहे, २विग्रहे, ३युद्धे पुं न॰ अमरः। ४समासादिदृत्तिसमानार्थकवाक्यभेदे, ५विशेष-ज्ञाने च "अविग्रहा गतादिस्था यथा आमादिकर्मणः" हरिः ।

विघटिका स्त्री विगता घटिका यथा मा॰त॰। घटिकार्द्धभागे पलद्वये कांचे राजनि॰। वि+घट-ण्वुल्।२विघोजते त्रि॰

विघटित त्रि॰ वि+घट-क्त। १विश्लेषिते २विश्लेषेण रचिते च
विघट्टित त्रि॰ वि+घट्ट-क्त। १चालिते २वियोजिते च।
विघस पु॰वि+अद-घञ्। भोजनशेषे मेदि॰ २आहारे च शब्दच॰। ३सिक्थके न॰ राजनि॰। ४दैवपैत्रकृत्यशेषे
विघसाशिन् त्रि॰ विघसं देवतादिदत्तावशेषमश्नाति अश-णिनि। दैवपैत्रकार्य्यानन्तरं तदवशिष्टभोजिनि।
विघात पु॰ वि+हन-क्त। १व्याघाते २आघाते च।
विघातिन् त्रि॰ वि+हन-णिनि। १निवारके। २नाशके, ३नाशप्रतियोगिनि च "नित्यस्यायं वस्तुनिमित्तो विघाती" इति व्याकरणम्। ख्युन्। विघातकोऽप्यत्र।
विघ्न पु॰ वि+हन-क। १व्याघाते अन्तराये अमरः। २कट-फलायां शब्दच॰। [गणेशे शब्दर॰।
विघ्ननायक पु॰ विघ्नानामुत्पत्त्युत्पन्नयोः नायकः। विघ्नेशे
विघ्नकारिन् त्रि॰ विघ्नं करोति कृ-णिनि। १घोरदर्शने २विघातके च मेदि॰। स्त्रियां ङीप्। [ण्यत्।
विघ्ननाशक पु॰ह्रस्व॰। गणेशे शब्दच॰ ल्यु। विघ्ननाशनादयो-
विघ्नराज पु॰ विघ्ने राजते राज-क्विप्। गणेशे अमरः। ह्रस्व॰। विघ्नेशादयोऽप्यत्र।
विघ्नहारिन् पु॰विघ्नं हरति हृ-णिनि। गणेशे त्रिका॰।
विघ्नित त्रि॰ विघ्नो जातोऽस्य इतच्। जातविघ्ने।
विघ्नेशानकान्ता स्त्री ह्रस्व॰। श्वेतदूर्वायाम् राजनि॰।
विच पृथक्करणे रु॰ चु॰ वा उ॰ अक॰ अनिट्। विनक्ति विवेक्ति विक्ते विविक्ते। इरित् अविचत् अवैक्षीत्।
विचकिल पु॰ विच+क किल-क कर्म्म॰। १मदनवृक्षे। २मल्लीभेदे मेदि॰। [२नागदन्त्यां स्त्री राजनि॰ टाप्।
विचक्षण पु॰ वि+चक्ष-ल्यु न ख्यादेशः। १पण्डिते अमरः
विचक्षुस् त्रि॰ वि+चक्ष-असि न ख्यादेशः। १विगतचक्षुषि त्रिका॰। विगतं चक्षुर्यस्य। २नेत्रशून्ये त्रि॰। [चयने च।
विचयन न॰वि+चि-ल्युट्। १अन्वेषणे शब्दच॰। २पुष्पादि-
विचर्चिका स्त्री वि+चर्च-ण्वुल्। पामनि रोगभेदे अमरः। सा च क्षुद्रकुष्ठविशेषः। "एकं कुष्ठं क्षतं पूर्वं गलचर्म ततः क्षतम्। ततश्चर्मदलं प्रोक्तं ततश्चापि विचर्चिका। विपादिकाभिधा सैव पामा कच्छूस्ततः परा। ततो दद्रुश्च विस्फोटः किटिभञ्च ततः परम्। ततश्चालसकं प्रोक्तं ततश्च ततः परम्। क्षुद्रकुष्ठानि चैतानि कथितानि भिषग्वरैः। सकण्डूः पिडका श्यावा बहुस्रावा विच चिका" पिडका क्षुद्रपिडका। "दाह्यते त्वक् खरा रूक्षा जालोद्गमैर्वा विचर्चिका। प्रादे विपादिका श्लेष्मा स्थान-भेदाद्विचर्चिका"। "केचिद्विचर्चिकातो विपादिकां भिन्नामाहुः" भावप्र॰। कुष्ठशब्दे २१६४पृ॰ दृश्यम्।
विचार पु॰ वि+चर-घञ्। १तत्त्वनिर्णये सन्दिग्धे वस्तुनि प्रमाणेन तत्त्वपरीक्षायां २तदनुगुणे वाक्यसोमे च। "विपरीतोल्लाघवकपरविजिगीषया न्यायप्रयोग इति" केचित् प्राहुः। यथा पदार्थानुमानस्थले पर्वतो वह्नि-मान् धूमवत्त्वादित्यादि। अत्र च पर्वते वह्नौ साधनीये प्रतिवादिना च पर्वतो न वह्निमानित्यादि विपरीतवाक्ये प्रयुक्ते मध्यस्थस्य संशयो जन्यते। तन्निवृत्त्यर्थं वादिना पर्वतो वह्निमानित्यादिप्रतिज्ञादिघटितवाक्यप्रयोगरूपः विचारः क्रियते इति। ३विगतश्चारो यस्मात् प्रा॰ब॰, चार-शून्ये च "विचारदुश्चारदमव्यवर्त्तत"।
विचारण न॰ वि+चर-णिच्-ल्युट्। १विचारे शब्दर॰। युच्। तत्रैव स्त्री अमरः। २मीमांसाशास्त्रे हेमच॰
विचारित त्रि॰ विचारो जातोऽस्य इतच्। कृतविचारे।
विचाल त्रि॰ वि+चल-ऋतॄरि ण। १अन्यत्तरे २अन्त-राले-हेमच॰। वि+चल-णिच् भावे अच्। ३अन्यथा स्थितस्य वस्तुनो विशेषरूपतापादने "अधिकरणविचाले च" पा॰ "द्रव्यस्य संस्थानान्तरापादने संस्थावा धा स्यात्। एकं राशिं पञ्चधा कुरु" सि॰कौ॰। [ङीप्।
विचि(ची) पुंस्त्री विच-इञ्। तरङ्गे भरतः। स्त्रीत्वपक्षे वा
विचिकित्सा स्त्री वि+कित-सन्नर्थे अन्+अ। सन्देहे अमरः।
विचित्र न॰ विशेषेण चित्रम्। १कूजितवर्णे। २तद्वति त्रि॰ शब्दच॰ ३आश्चर्य्ये त्रि॰। ४सगेवारौ स्त्री राजनि॰। ५अर्थालङ्कारभेदे न॰ अलङ्कारशब्दे ४०२ पृ॰ दृश्यम्। संज्ञायां कन्। भुजपत्रवृक्षे पु॰ राजनि॰।
विचित्रवीर्य्य पु॰ शान्तनुतत्पुत्रजे नृपभेदे भा॰ आ॰१०६ अ॰
विचित्राङ्ग पुंस्त्री॰ विचित्रमङ्गं यस्य। (चित्रे) १व्याघ्रभेदे शब्दच॰ २मयूरे पुंस्त्री॰ शब्दर॰ उभयत्र स्त्रियां ङीष्। ३आश्चर्य्यदेहे त्रि॰।
विचेतस् त्रि॰ विरुद्धं दुष्टं विभ्रिष्टं वा चेतो यस्य। १दुष्ट-चित्ते २विभ्रिष्टचित्ते च। ३दुर्मनस्के हेमच॰।
विचेष्टित त्रि॰ विगता चेष्टितमस्य। १चेष्टाशून्ये, वि+चेष्ट-भावे क्त। २विशेषेण चेष्टायाम् न॰।
विच्छ दीप्तौ चु॰उभ॰सक॰सेट्। विच्छयति ते अविविच्छत् त
विच्छ गतौ तु॰ पर॰ सार्व॰ धात्व, धात्वन्ते उ॰सक॰ सेट्। विच्छावति विच्छावते विच्छति। अविच्छावीत् अविच्छा-विष्ट अविच्छीत्।

विच्छन्दक पु० विशिष्टः छन्दो यत्र कप्। ईश्वरदण्डे अमरः "उपर्युपरि यद्वेष्टं तद्विच्छन्दकसंज्ञितम्"।

विच्छाय न० द्वयोर्न पञ्चिषां छाया नपुंसकत्वम्। पञ्चिषां समूहच्छायायाम् अमरः। विगता छाया यस्य। २छाया-रहिते त्रि० मेदि०। ३विशिष्टकान्तियुते मणौ भरतः।

विच्छित्ति स्त्री वि+छिद-क्तिन्। १अक्षरत्यागे २हारभेदे ३विच्छेदे मेदि०। ४छेदे ५विनाशे ६स्त्रीणां चेष्टाभेदे च। "श्लोकार्द्धाक्षररचना विच्छित्तिः कान्तिपोषकृत्" सा०द०

विच्छिन्न त्रि० वि+छिद-क्त। १विभक्ते २समाप्तप्राये च मेदि० ३कुटिले हेमच०। भावे-क्त। ४छेदने न०।

विच्छेद पु० वि+छिद-भावे घञ्। १वियोगे २सन्ततिरा-हित्ये ३विभागे च।

विज पृथक्करणे जु० उभ० सक० अनिट्। वेवेक्ति वेविक्ते इरित् अविजत् अवैक्षीत् अविक्त।

विज भये कम्पे च रु० पर०-अक०-सेट्। विनक्ति अविक्षीत्। ईदित् ओदित्च विग्नः। [ईदित् ओदित्च क्त-विग्नः।

विज भये कम्पे च तु०आ०-अ०-अनिट्। विजते अविजिष्ट।

विजन त्रि० विगतो जनो यस्मात् प्रा०ब०। निर्जने अमरः।

विजनन न० वि+जन-ल्युट्। १गर्भमोचने प्रसवे हेमच० २उद्भवे शब्दच०।

विजपिल न० विज-क पिल-क कर्म०। पङ्के हलायुधः।

विजन्मन् त्रि० विरुद्धं जन्म यस्य। जारजे।

विजय पु० वि+जि-कर्त्तरि अच्। १अर्जुने मेदि०। "अभिप्रयामि संग्रामे यदहं युद्धदुर्मदान्। नाजित्वा विनिवर्त्तामि तेन मां विजयं विदुः" भा० वि० ४४अ०। २विमाने हेमच० ३यमे च। ४विष्णोरनुचरभेदे। जय-शब्दे २०५० पृ० दृश्यम्। तच्छब्दशब्दे दर्शिते ५रूपभेदे ६कल्किपुत्रभेदे कल्किपु० १२अ०। भावे अच्। जये ८परिभवपूर्वकपराजये च।

विजयकुञ्जर पु०विजयाय कुञ्जरः। राजवाहनगजे त्रिका०।

विजया स्त्री १आश्विनशुक्लपञ्चोदशम्याम् २उमायां सखीभेदे वामनपु० ४अ० "कथयतु विजया" इति सट्टारात्रम्। ३दुर्गायां हेमच० "विजित्य पद्मनाभान दैत्यराजं महाबलम्। विजया तेन सा देवी लोके चैवापराजिता" देवीपु०४५अ०। ४जयन्त्यां ५शेफालिकायां ६मञ्जिष्ठायां ७यमीभेदे, ८अम्लिमन्थे राजनि०। ९भङ्गायाम् (सिद्धि) हेमच० तत्पर्य्यायगुणादि भावप्र० उक्तं यथा

"भङ्गा गञ्जा माद्यनी मादिनी विजया जया। भङ्गा कफहरी तिक्ता पाचिनी पाचनी लघुः। तीक्ष्णोष्णा पित्तला मोहमदवाग्वह्निवर्द्धिनी" भावप्र०।

अष्टादशीमध्ये "यदा तु शुक्लद्वादश्यां नक्षत्रं श्रवणं भवेत्। तदा सा तु महापुण्या द्वादशी विजया स्मृता" इत्युक्ते १०द्वादशीभेदे "शुक्लपक्षस्य सप्तम्यां सूर्य्यवारो यदा भवेत्। सप्तमी विजया नाम" इत्युक्ते सप्तमीभेदे च। ११यमभार्य्यायां १२हरितक्यां जटा०। १३श्यामायां रत्नमा०। १४अस्त्रविद्याभेदे "विद्यामधेनं विजयां जयाञ्च भट्टिः।

विजल्प पु० "व्यक्तयाऽस्पष्टया गूढमानसहान्तरालया। अव-हित्थि कटाक्षोक्तिर्विजल्पो विदुषां मतः" उज्ज्वलम-ण्युक्ते वाक्यभेदे।

विजात त्रि० विरुद्धं जातः। १जारजाते विशेषेण जाता। २जातासत्तायां स्त्रियां स्त्री हेमच०। धर्म्मांशवस्त्रिणि।

विजातीय त्रि० विभिन्नां जातिं धर्म्मञ्चेति छ। विभिन्न-

विजिगीषा स्त्री विजेतुमिच्छा वि+जि-सन् भावे अ। १क्रोधरूपेच्छया निन्दनीयकर्म्मादौ प्रवृत्तौ २सन्निन्दा-ऽमर्षणे रभा० ३विजयेच्छायाञ्च। ङी। विजिगीषु जयेच्छावति त्रि० शब्दच०।

विजिगीषाविवर्जित त्रि ६त०। औदरिके अमरः।

विजिन(ल) न० विज-इनच् इलच् किच्च। सरसव्यञ्जने "पाकरूपरसाढ्ये व्यञ्जने तु भवेत् त्रयम्। तैलवाक-सुसंस्कारे प्रशस्तसुसंस्कृतम्। विजिनं स्नानसौकुञ्च विजिलं विज्जिलञ्च तत्" शब्दर०।

विजुल पु० विज-उलच् किच्च। शालमलीवृक्षे राजनि०।

विजृम्भण न० वि जृभि-ल्युट्। १विकाशे २सुखविकाशहेतु-भूते वायुव्यापारभेदे (हारतोला)। ङ्यां विजृम्भा स्त्री।

विजृम्भित त्रि० वि+जृभि-क्त। १विकशिते मेदि० २जृम्भा-युक्ते भावे क्त। ३प्रकाशे ४चेष्टायां ५जृम्भायां च मेदि०।

विज्झन न० विद्-वेधने जनयति जन-क्यच्। बाणे त्रिका०।

विज्झल न० व्यध-ताड़े क्विप् विदा जडयति जडि-क्यच् डस्य झः। १बाणे त्रिका०। २विजिले हेमच०।

विज्झुल न० विज-उलच् जुट्। त्वचे (दारचिनि) राजनि०

विज्झुलिका स्त्री विज्झुल+संज्ञायां कन् कापि अत इत्त्वम्। जतुकायां राजनि०। [क्षिप्ते पु० राजनि०।

विज्ञ त्रि०विशेषेण जानाति वि+ज्ञा-क। १प्रवीणे अमरः। २प-

विज्ञात त्रि० वि+ज्ञा-क्त। १ख्याते अमरः। २ज्ञाते च।

विज्ञान न० वि+ज्ञा-ल्युट्। १ज्ञाने २धर्म्मभेदे मेदि० ३शि-

स्थादिस्थाने अमरः । ४वेदान्तोक्ते अविद्याशक्तिभेदे च । ५बौद्धमतसिद्धे आत्मरूपे स्थाने च । "चतुर्दशानां विद्यानां धारकं हि यतोऽतः । विज्ञानमितरत् विद्यात् येन धर्मो विवर्द्धते" कूर्मपु० १४अ० उक्ते ६चतुर्दशविद्यास्थाने च ।

विज्ञानमयकोष पु० विज्ञानात्मकः कोष इवावरकत्वात् । ज्ञानेन्द्रियसहिते बुद्धिपदार्थे ।

विज्ञानस्कन्ध पु० बौद्धमतसिद्धेषु रूपविज्ञानवेदनासंज्ञासंस्काररूपेषु स्कन्धेषु आलयविज्ञानप्रवृत्तिविज्ञानप्रवाहे ।

विज्ञानिक त्रि० विज्ञानमस्त्यस्य ठन् । विज्ञानयुक्ते भरतः ।

विज्ञोली स्त्री विज्ञ-ङीष्-पृषो० । षड्ग्रन्थौ लिङ्गा० ।

विट आक्रोशे सक० सने अक० भ्वा० पर० सेट् । वेटति अवेटीत् ।

विट पु० विट क । १विष्ठे सारे अमरः । २शृङ्गाररसनायकानुचरे "सखीसहीनसम्पद् विटस्तु धूर्तः फलैक देशघ्नः । वेशोपचारकुशलो वाग्मी मधुरोऽथ बहुमतो मोक्षाम्" साण्ड० । ३भूर्जे, "विट ! विटपमस्तं ददस्व तस्मै" माघः ४पर्वतभेदे ५खदिरभेदे ६खदिरभेदे ७भूमिजे च मेदि० । ८नागरङ्गवृक्षे शब्दमाला ।

विटङ्क न० वि+टकि-अच् । कपोतपालिकायां प्रासादाद्यग्रे काष्ठनिर्मिते कपोतावासस्थाने । (पायराखोप) अमरः ।

विटप पुंन० । विटं विस्तारं वा पाति पिबति वा पा-क । १शाखायां, २पल्लवविस्तारे अमरः । ३स्तम्बे ४पल्लवे च शब्दर० ५विटपालके हृतत्पायिनि च मेदि० "पिबति च पाति च शाखां रक्तस्त्वाद् विट ! विटपमस्तं ददस्व तस्मै" माघः । ७स्वादिखदिरे पु० राजनि० । ८छत्राकशङ्खपालस्थाने हेमच० ९विटार्थिभेदे मेदि० । [वृक्षे राजनि० ।

विटपिन् पु० विटप+अस्त्यर्थे इनि । १वृक्षे अमरः । २वटवृक्षे

विटप्रिय पु० ६त० । खदिरवृक्षे राजनि० ।

विटमाक्षिक पु० विटप्रियः माक्षिकः । धातुभेदे हेमच० ।

विटि(टी) स्त्री विट-इ वा ङीष् । पीतचन्दने शब्दमाला ।

विट्खदिर पु० विड्वत् दुर्गन्धः खदिरः । (सुपेवाबला) वृक्षे अमरः । [अमरः स्त्रियां ङीष् ।

विट्चर पुंस्त्री विधि-विड्वां चरति चर-अच् । शाम्बशूकरे

विट्पति पु० विशते विश-क्विप् विशः कन्यायाः पतिः । जामातरि जटाधरः । [पक्षिभेदे जटा० ।

विट्सारिका स्त्री विड्वत् दुर्गन्धः सारिका । (सुपेसालिक)

विड आक्रोशे भ्वा० पर० सक० सेट् । वेडति अवेडीत् ।

विड न० विड-क । लवणभेदे अमरः ।

"विडं सञ्चारमूध्वोधःकफवातानुलोमनम्" अर्शःकफमधोवातं सञ्चारयतीत्यर्थः । "दीपनं वातु तीक्ष्णोष्णं रूक्षं रुच्यं व्यवायि च । विबन्धानाहविष्मूत्रगुल्मशूलहृत्" भावप्र० ।

विडङ्ग पुन०विड-अङ्गच् । १क्षुद्रनामख्याते औषधभेदे अमरः । "विडङ्गं कटु तीक्ष्णोष्णं रूक्षं वह्निकरं लघु । कृमिप्लीहोदरश्लेष्मविषानाहविबन्धहृत्" भावप्र० । २अग्निशे त्रि० मेदि० ।

विडम्बन न०वि-डबि+ल्युट् । १निरक्षरणे २अनुकरणे च । युच् । विडम्बनाद्यत्र स्त्री । 'दयस्व तेऽन्या शुरतो विडम्बनेति' कुमारः ।

विडाल पुंस्त्री विड-कालन् । १क्षुद्रनामख्याते जन्तुभेदे अमरः स्त्रियां ङीष् । २नेत्ररोगे मेदि० ३नयनौषधभेदे च भावप्र० ४विदार्यां स्त्री राजनि० ङीष् । संज्ञायां कन् । हरितालेऽपि न० । स्वार्थे क । विडाले पशौ पु० स्त्री० । संज्ञायां कन् । नेत्रौषधभेदे तद्विधिः भावप्र० उक्तो यथा "विडालको यष्टिलेपो नेत्रे पक्ष्मविवर्जिते । तस्य मात्रा परिज्ञेया सुखालेपविधानवत्" । सुखालेपस्तु "कनिष्ठस्य चतुर्थांशो सुखालेपः कनिष्ठकः । मध्यमस्तु त्रिभागः स्यादुत्तमोऽर्द्धांकुलो भवेत्" । स्थितिकालोऽपि तस्योक्तो यावत् कल्को न शुष्यति । तेनापि सुखशीतः स्यात्तया दूषयति त्वचम्" । स च "यष्टीमेरिकविल्वमूलदार्वीताम्रैः समांशकैः । जलपिष्टैर्विडालेपः सर्वनेत्रा मयापहः" । ताम्रं रसाञ्जनम् । "रसाञ्जनेन वा लेपः पक्ष्माविल्लदलैरपि । वचाहरिद्राविल्वैर्वा तथा नागरकैरिकैः" ।

विड़ालपदक न० कर्मधारये भावप्र० कर्मशब्दे १७७३ पृ० दृश्यम् । [शब्दे २४१४ पृ० दृश्यम् ।

विडीन न०वि+डी-क्त । पक्षिणां गतिभेदे जटा० यमगतिः

विडुल पु० विड-कुलच् । नेतवृक्षे हेमच० ।

वि(डी)डौजस् पु० विड-क्विप् विट् व्यापकमोजो यस्य पृषो० वा औत् । इन्द्रे अमरः ।

विड्गन्ध न० विड इव गन्धोऽस्य । विड्लवणे रत्नमाला ।

विड्लवण न० विड्वत् दुर्गन्धं लवणम् । खनामख्याते लवणभेदे रत्नमाला ।

विड्वराह पुंस्त्री० विट्प्रियो वराहः शाक० । १ग्राम्यशूकरे जटा०स्त्रियां ङीष् । "लवणं विड्वराहस्तु" इति स्मृतिः ।

वितंस पु० वि+तनस्-कच्। पक्षिणां बन्धनसाधने रज्जु-प्रभृतौ भरतः।

वितण्डा स्त्री वि+तडि-भावे क। खण्डाद्यवस्थापनेन परपक्षमात्रनिराकरणे कथाभेदे अमरः। २कपोलशाके ज०। ३करञ्जे मेदि० ४दध्नां क्षारा०।

वितण्डाकथालक्षणं यथा "स जल्पो वितण्डा प्रतिपक्षस्थापनाहीनो वितण्डा" सू० "स जल्पो वितण्डा भवति किंविशेषः। प्रतिपक्षस्थापनया हीनः। यौ तौ समानाधिकरणौ विरुद्धौ धर्मौ यत्प्रतिपक्षाविलुप्तौ तयोरेकतरं वैतण्डिको न स्थापयतीति परपक्षप्रतिषेधेनैव प्रवर्त्तत इति। वस्तु तर्हि प्रतिपक्षहीनो वितण्डा यदि खलु तत्परप्रतिषेधलक्षणं वाक्यं न वैतण्डिकस्य पक्षः न ह्यसौ साध्यं कञ्चिदर्थं प्रतिपत्तये स्थापयतीति तस्मात् यथान्यायमेवास्तु" वा०भा०।

इत्थं तु सूत्रमन्यथा व्याख्यातं यथा

"क्रमप्राप्तां वितण्डां लक्षयति स इति। यद्यपि तच्छब्देन जल्पो न परामृष्टुं शक्यते जल्पस्य स्थापनाद्वयवतः प्रतिपक्षस्थापनाहीनत्वस्य विरुद्धत्वात् तथापि स्थापनाद्वयवत्त्वं विहाय जल्पैकदेशः परामृश्यते प्रतिपक्षो द्वितीयपक्षः तथाच प्रतिपक्षस्थापनाहीना विजिगीषुकथा वितण्डेति। न च खलु स्थापनीयाभावात् कथमियं कथा प्रवर्त्तताभिति वाच्यम् परपक्षखण्डनेन जयस्यैवेहोद्देश्यत्वात्। परे तु परपक्षखण्डनेनैव स्वपक्षलाभादेव सिद्धिसाधनाभावेऽपि न प्रवर्त्तन्तुप्रवर्त्तिरिति वदन्ति"।

वितथ त्रि० वि+तन-कथन्। मिथ्याभूते पदार्थे अमरः। स्वार्थे यत्। वितथ्य तत्रैव। [उत्पादिको०

वितर्दु स्त्री वि+तर्द-उ दानदेशः। पक्षावदेशस्येनदीभेदे

वितरण न० वि+तॄ-ल्युट्। दाने अमरः।

वितर्क पु० वि+तर्क-भावे घञ्। १सन्देहे २ऊहे च मेदि०। ३स्थानसञ्चये शब्दर०। ४यमांगद्वारभेदे अलङ्कारशब्दे ४०२ पृ० दृश्यम्।

वितर्दि स्त्री वि+तर्द-इन् वा ङीप्। वेदिकायाम् अमरः। पृषो० वितर्द्विरप्यत्र स्त्री भरतः वा ङीप्।

वितल न० विशेषेण तलम्। पातालभेदे शब्दर०। पाताल-शब्दे ४२६६ पृ० दृश्यम्। २तलभूम्ये त्रि०।

वितस्ति पुंस्त्री० वि+तस-क्तिच्। द्वादशाङ्गुलपरिमाणे विस्तृत सकनिष्ठाग्रयोरङ्गुष्ठाग्रपरिमाणे अमरः।

वितान न० वि+तन-कर्मभावादौ घञ्। १छत्तिभेदे मेदि० २चन्द्रातपे ३विस्तारे अमर। ४चन्द्रातपे पुंन० ५वृक्षे ६मन्दे च त्रि०अमरः। ८पुन्ने त्रि० धरणिः। स्वार्थे क। चन्द्रातपे। संज्ञायां कन्। माहडसे राजनि०। ६याज्ञिकीयाग्नीनां विस्तारे। वितानेन निर्वृत्तः ठक्। वैतानिक वितानसाध्ये अग्न्याधेयप्रभृतौ त्रि० "अग्न्याधेय-प्रभृतीन्याह वैतानिकानि" आश्व० श्रौ० २सू०। "वितानेषु भवानि वैतानिकानि वितानसाध्यानीत्यर्थः। वितानशब्दोऽत्र सूत्रे मानवश्रौतोऽग्नीनां विस्तारवचनः" नारा०। वितायन्तेऽग्नयोऽस्मिन् वि+तन० आधारे घञ्। १०अग्निहोत्रादिकर्मणि। "अथैतस्य कर्मणो वितानस्य योगावर्त्तिं व्याख्यास्यामः" आ० श्रौ० १सू०। "वितानाः अग्नयो यस्मिन्निति श्रौतकर्मजातमस्मिन्नित्यादि वितानशब्देनोच्यते" नारा०। तत्र साधु ठक्। वैतानिक अग्निहोत्रादि कर्मसाधने अग्नौ पु०। "वैतानिकेऽग्नौ कर्त्तरि" मनुः।

वितानमूलक न० वितानाय मूलमस्य कप्। उशीरे राजनि०।

वितुद न० वि+तुद क। १सुनिष्पावके अमरः संज्ञायां कन्। २धान्यके शब्दे च न० अमरः। ३भूम्यामलक्यां स्त्री राजनि०। संज्ञायां कन्। ४तामलक्यां पु० अमरः।

वित्त त्यागे चुरा० उभ० सक० सेट्। वित्तयति ते अवित्तत् त वित्ताययतीत्यपि।

वित्त न० विद्यते लभ्यते वित्त-घञ्। १धने अमरः। विद-क्त वा दस्य तः। २ख्याते, ३विचारिते ४ज्ञाते ५लब्धे च त्रि०।

वित्ति स्त्री विद-क्तिन्। १ज्ञाने २लाभे ३विचारे च मेदि०।

वित्तेश पु० ६त०। कुबेरे।

वित्सन पु० विद-लाभे क्विप् तां सनोति सन-दाने क। ब्रह्मणि शब्दच०। [अथर्वशिष्ट।

विद्य याचने भ्वा० आ० द्विक० सेट् चङि न ह्रस्वः। वेदते

विदुर पु० विद-उरच् किच्च। १चौरे २राक्षसे च उणा०।

विद्या स्त्री विद-यत्। गोजिह्वायाम् शब्दच०।

विद् ज्ञानादिचतुष्टये लाभाख्याने, वादे च सक० सार्व० सक० चुरा० उभ० सेट्। वेदयति ते अवीविदत् त।

विद् लाभे तु० उभ० सक० अनिट् सुखादि। विन्दति ते। खादित्वे अविदत् अवित्त। विवेद विविदे। विद्वं वित्तम्।

विद् मीमांसे कथा० आ० सक० अनिट्। विन्ते अवित्त।

विद् भावे, दिवा० आ० सक० अनिट्। विद्यते अवित्त।

विद ज्ञाने अदा० पर० सक० सेट् । वेत्ति-वेद । अवेदीत् ।

विद पु० विद-क्विप् । १पण्डिते अमरः २बुधग्रहे च ज्यो० ।

विद पु० विद्-क । १पण्डिते अमरः २बुधग्रहे च ज्यो० ।

विदंश पु० विदश्यतेऽनेन वि+दंश करणे घञ् । अवदंशे (चाटनि) राजनि० ।

विदग्ध त्रि०वि+दह-क्त । १नागरे त्रिका० २निपुणे राजनि० ३पण्डिते च शब्दच० । ४नायिकाभेदे स्त्री रसमञ्जरी । परकीयशब्दे ४२११ पृ० ऽस्यम् । ५विशेषेण दग्धे त्रि० ।

विदग्ध पु० विद-कथच् । १योगिनि, २ऋतिनि च मेदि० ।

विदर न०वि+दृ-अच् । (क्षणिमनसा) हृदे शब्दर० । भावे अप् २विदलीकरणे पु० शब्दर० । प्रा०व० । ३विगतभये त्रि० ।

विदर्भ पुंस्त्री० विगताः दर्भाः कुशावतः । देशभेदे कुण्डिननगरे (वऱ्हाडनागपुर) ।

विदल त्रि० विशेषेण दल्यते दल-घञर्थे क । १द्विधाभूते २दाड़िमकलके ३संघादिपाठे ४क्षयादेरवयवे च न० । ५कलायादौ न० अमरभरतौ ६रक्तशालूके ७पिण्डके न० शब्दच० । ८तिन्तिडि (तेंतोड़ि) स्त्री राजनि० । प्रा०ब० । ९दलशून्ये त्रि० ।

विदा स्त्री विद-अङ् । १ज्ञाने २बुद्धौ च मेदि० ।

विदादि पु०अपत्यादौ "विदादिभ्योऽञ्" पा०अञ्प्रत्ययनिमित्ते शब्दगणे स च गणः पा० गणसूत्रे दृश्यः ।

विदार पु० वि+दृ-णिच् भावादौ घञ् । १विदारणे २जलोच्छ्वासे च मेदि० ३युद्धे हेमच० । ४विदारकरणे ।

विदारक पु०वि+दृ-णिच्-ण्वुल् । १जलमध्यस्थतरुणिलतादौ अमरः । २विदारणकर्त्तरि त्रि० ३शुष्कनदादेर्जलधारणयोग्ये गर्त्ते न० सर्वधरः । ४जलबन्धके शब्दर० ।

विदारण न०वि+दृ णिच्-भावादौ ल्युट् । १भेदने २विड़म्बे च मेदि० । ३मारणे शब्दर० । ४युद्धे पुंस्त्री० मेदि० । ५कर्णिकारवृक्षे पु० शब्दच० ।

विदारिणी स्त्री वि+दृ-णिच् ङीप् । काश्मर्य्यां राजनि०

विदारी स्त्री वि+दारि+कर्मणि अच् गौ० ङीष् । १शालपर्ण्यां । (शालपान) मेदि० २भूमिकुष्माण्डे च अमरः "विदारी वातपित्तघ्नी बल्या हृद्या रसायनी" राजव० । ३कक्षरोगभेदे भावप्र० "सदाहतोदं सरुजं सुताम्रमन्तर्गलेऽपि पुतिविशीर्णमांसम् । पित्तेन विद्यात् वदने विदारीं पार्श्वे विशेषात् स च येन येते" स च पुरुषो येन पार्श्वेन विशेषात् बाहुल्येन येते तस्मिन् पार्श्वे सा विदारी भवतीत्यर्थः" ।

विदारीगन्धा स्त्री विदार्याः भूमिकुष्माण्डस्येव गन्धो यस्याः । शालपर्ण्यां (शालपान) अमरः ।

विदारु पु० वि+दृ-उन् । १क्रकचपादे २क्रकचाये हेमच० ।

विदाहिन् न० वि+दह-णिनि । दाहजनकद्रव्ये ।

विदित त्रि० विद्-क्त । १ज्ञाते अमरः २प्राप्तिते च मेदि० ३कवौ पु० जटा० । भावे-क्त । ४विख्यातौ ४उपगमे शब्दच० ५ज्ञाने च । तदर्थाच्चि च् । ६ज्ञातरि त्रि० । "विदितः समाययाविति" किरा० ।

विदिश् स्त्री विगता दिशौ । दिशोर्मध्ये यस्मिन्निर्दिश्यमाने व्याप्तीयानकोणचतुष्टये अमरः ।

विदु पु० विद-कु । उलिङ्गकृमिमध्यभागे अमरः ।

विदुर त्रि० विद-कुरच् । १नागरे २धीरे ३कौरवार्थे मन्त्रिणि दासीगर्भजाते धर्म्मावतारभेदे च मेदि० भा०आ० १०६अ० ४ज्ञातरि च अमरः ।

विदुल पु० विद-कुलच् । १वेतसे २जलवेतसे मेदि० ३गन्धरसे च रत्नमा० । ४क्षत्रियभेदे भा० ७० १३२ अ० ।

विदूर न० विगतं दूरम् । १अतिदूरे २तत्रस्थे पदार्थे त्रि० "विदूरे केयूरे कुरु" इति सा०द० १परि० । ३वैदूर्य्यमणिसमानवर्णस्थाने पु० "विदूरभूमिनैवमेघशब्दात्" कुमारः ।

विदूरज न० विदूरे देशभेदे जायते जन-ड । वैदूर्य्यमणौ ।

विदूरथ पु०१द्वादशमनोः पुत्रभेदे २पौरवे क्षत्रभेदे विष्णुपु०१२अ०

विदूराद्रि पु० विदूरे देशेऽद्रिः पर्वतः । पर्वतभेदे । यत्र वैदूर्य्यमणिरुत्पद्यते ।

विदूषक पु० विदूषयति वि+दूष-णिच्-ण्वुल् । १हास्यकारकस्वभावभेदे २परनिन्दके त्रि० मेदि० ।

"हास्यकरः स्वभावा विटचेटविदूषकाद्याः स्युः । भक्षा नर्मसु निपुणाः कुपितवधूमानभञ्जनाः शूद्राः । कुलनवसलाद्यभिधाः कर्मसपूर्वंयभाषाद्यैः । हास्यकरः, कलहरतिर्विदूषकः स्यात् स्वकर्मज्ञः" सा० द० ३प० ।

विदेश पु० विभिन्नो देशः । देशान्तरे "को विदेशः सविद्यानाम्" चाणक्यः ।

विदेह पु० विगतो देहः देहसम्बन्धो यस्य । १जनकाख्ये नृपे "क्रतुसमाप्तौ ततो यज्ञे वसिष्ठागमहेतवः । तं दृष्ट्वा कुपितः प्राह शप्स्यास्मीति पार्थिव ! । यस्मात् तस्मात् त्रयेयं त्वां विदेहस्त्वं भविष्यसि वक्ष्यति । तदीये २जनपदे च स च देवः मिथिलादेव इति ख्यातः । कूर्म्मविभागे ३८अ० १४उक्तः । कूर्म्मविभागशब्दे दृश्यम् । २तद्राज्ये नृपे ब्र०व०च ३कौरवसङ्किते ४देहसम्बन्धशून्ये

च त्रि० ४मि० विलायां स्त्री ङीषच०। ५देहभृन्मे देवे पात० सूत्रभा० अग्न्यादौ देवस्य विदेहत्वं समर्थितं यथा "भवप्रत्ययो विदेहप्रकृतिलयानाम्" सू०।

"स खल्वयं द्विविध उपायप्रत्ययो भवप्रत्ययश्च तत्रोपाय प्रत्ययो योगिनां भवति" भवप्रत्ययो विदेहप्रकृतिलयानाम्" विदेहानां देवानां भवप्रत्ययः ते हि स्वसंस्कारमात्रोपयो(भो)गेन चित्तेन कैवल्यपदमनुभवन्तः स्वसंस्कारविपाकं तथाजातीयकमतिवाहयन्ति" भाष्यम्। "भवन्ति जायन्तेऽस्यां जन्तव इति भवोऽविद्या स खल्वयं भवः प्रत्ययः कारणं यस्य निरोधसमाधेः स भवप्रत्ययः। तत्र तयोर्मध्ये उपायप्रत्ययो योगिनां मोक्षसाधनानां भवति विशेषविधानेन शेषस्य सतश्चसम्बन्धं निषेधति। केषां तर्हि भवप्रत्ययः। इत्यत्र श्लोकोत्तरम्। विदेहाश्च प्रकृतिलयाश्च तेषामित्यर्थः। तद् व्याचष्टे विदेहानां देवानां भवप्रत्ययः भूतेन्द्रियाणामन्यतममात्मत्वेन प्रतिपन्नानामुपासनया तदासनावासितान्तःकरणाः पिण्डपातानन्तरमिन्द्रियेषु भूतेषु वा लीनाः संस्कारमात्रावशेषतया षाट्कौशिकशरीररहिताः विदेहाः ते हि संस्कारमात्रोपयोगेन चित्तेन कैवल्यपदमिवानुभवन्तः प्राप्नुवन्तः विदेहाः। खट्वत्तिकत्वञ्च कैवल्येन सारूप्यम्। खाधिकारसंस्कारशेषता च वैरूप्यम्। संस्कारमात्रोपभोगेषेति क्वचित् पाठः तत्रार्थः संस्कारमात्रमेवोपभोगो यस्य न तु चित्तवृत्तिरित्यर्थः। प्राप्तावधयः संस्कारविपाकं तथाजातीयकमतिवाहयन्ति खतिक्रामन्ति पुनरपि संस्कारे विशन्ति तथा च वायुप्रोक्तं "दश मन्वन्तराण्येष तिष्ठन्त्येन्द्रियचिन्तकाः। भौतिकास्तु शतं पूर्णम्" विवरणम्। तेषां देवानां मध्ये यस्य विवेकसाक्षात्कारस्य कैवल्यप्राप्तिः "योगी देवानां प्रत्यबुध्यत स विमुच्यते" इति श्रुतेः। भीमांसाविदे देहभृन्मे ५अचेतने मन्वादौ देवे च। अविपक्वशब्दे ४५१ पृ० दृश्यम्।

विदेहकैवल्य न० कर्म०। "न तस्य प्राणा उत्क्रामन्ति इहैव समवलीयन्ते" श्रुत्युक्ते जीवन्मुक्तस्य देहपतनानन्तरं निर्वाणभोगे।

विदेहकैवल्यनिष्पत्तिप्रकारादि शा० सू० भाष्योक्तं यथा "भोगेन त्वितरे क्षपयित्वा सम्पद्यते" सू०। अनारब्धकार्य्ययोः पुण्यपापयोर्विद्यासामर्थ्यात् क्षय उक्तः इतरे तारब्धकार्य्ये पुण्यपापे उपभोगेन क्षपयित्वा ब्रह्म सम्पद्यते "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये" इति। "ब्रह्मैव सन् ब्रह्माप्येति" इति चैवमादिश्रुतिभ्यः। ननु सत्यपि सम्यग्दर्शने यथा प्राग्देहपाताद् भेददर्शनं द्विचन्द्रदर्शनन्यायेनानुवर्त्तमानमेव पश्चादप्यनुवर्त्तेत न, निमित्ताभावात् उपभोगशेषक्षपणं हि तत्रानुवृत्तिनिमित्तं न च तादृशमस्ति किञ्चित् कारणम्। नन्वपरः कर्माशयोऽभिनवमुपभोगमारभते न, तस्य दग्धबीजत्वात्। मिथ्याज्ञानावष्टम्भं हि कर्माशयं देहपाते उपभोगान्तरमारभते तच्च मिथ्याज्ञानं सम्यग्दर्शनेन दग्धमिति साध्वेतत् आरब्धकार्य्यत्वे विदुषः कैवल्यम्" भा०। तत्रैव ४पादे च सू०भाष्योक्तं यथा "सम्पद्याविर्भावः स्वेनशब्दात्" सू० "एवमेवैष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते" श्रुतिविषयवाक्यं तत्र पूर्वपक्षं दर्शयित्वा विद्वान्तितं भाष्यकृता यथा "केवलेनैवात्मनाविर्भवति न धर्मान्तरेणेति कुतः? स्वेन रूपेणाभिनिष्पद्यते इति स्वशब्दात्" भा०। "मुक्तः प्रतिज्ञानात्" सू०। "योऽत्राभिनिष्पद्यते इत्युक्तः स पूर्वमन्यविनिर्मुक्तः शुद्धेनैवात्मनावतिष्ठते" कुतः? प्रतिज्ञानात्। "एतं त्वेव ते भूयोऽनुव्याख्यास्यामः" इति प्रतिज्ञातस् "अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः" इति चोपन्यस्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः" इति (श्रुतेः) भा०। "अविभागेन दृष्टत्वात्" सू०। "अविभक्त एव परेणात्मना युक्तोऽभिनिष्पद्यते कुतः? दृष्टत्वात्" "यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति" एवं मुनेर्विजानतः आत्मा भवति गौतम!" इत्येवमादीनि सूत्र० स्वरूपनिरूपणपराणि वाक्यान्यविभागमेव दर्शयन्ति नदीसमुद्रादिनिदर्शनानि च" भा०। विवेकचू० उक्तञ्च यथा "पाषाणदग्धधान्यकटाम्बरादा दग्धा भवन्ति हि यदेव यथा तथैव। देहेन्द्रियासुमनआदिसमस्त दृश्यम् ज्ञानाग्निदग्धमुपयाति परात्मभावम्। विच्छिद्य यथा ध्यानं क्षीयते भानुतेजसि। तथैव सकलं दृश्यं प्रज्ञात्मनि विलीयते। घटे नष्टे यथा व्योम व्योमैव भवति स्फुटम्। तथैवोपाधिविलये ब्रह्मैव ब्रह्मवत् सदम्। क्षीरं क्षीरे यथा क्षिप्तं तैलं तैले जलं जले। संयुक्तमेकतां याति तथात्मन्यात्मविन्मुनिः। एवं विदेहकैवल्यं सन्मात्रत्वमखण्डितम्। ब्रह्मभावं प्रपद्यैव यतिर्नावर्त्तते पुनः। यदात्मकत्वविज्ञानदग्धाऽविद्यादिबन्धनः। अतएव ब्रह्मभूतत्वात् ब्रह्मणः कुत उद्भवः")

"विद्वश्च विद्वच्छते" न तस्य प्रायश्चित्तकामस्य दृष्टैव समन्वयोक्ते" इत्यादौ स्मृतयश्च प्रमाणम्।

विद्ध त्रि॰ व्यध-क्त। १छिद्रिते अमरः। २विद्धे २व्यथिते ३व्याधिते मेदि॰ ४ताडिते च।

विद्धकर्ण पु॰ विद्धः कर्ण इव यत्रास्य। पाठायाम् (आकनादि) हिरूपकोषः। स्त्रीत्वमपि तत्रैव अमरः। ङीप्। स्वार्थे क। तत्रार्थे स्त्री शब्दर॰। [दार्थे त्रि॰।

विद्यमान पु॰ विद्-शानच। १वर्त्तमानकाले, २तद्वति त्रि॰।

विद्या स्त्री विद-क्यप्। १ज्ञाने। २तत्त्वसाक्षात्कारे "विद्यया ह्यमृतमश्नुते" इति श्रुतिः। ३दुर्गायां शब्दच॰ ४गणिकायां शब्दच॰। तन्त्रोक्ते ५देवीमन्त्रे च। "यतस्तच्छ्रवणप्राप्तौ तस्य विद्या न सिध्यतीति" श्यामारहस्यम्।

६विद्याभेदौ शास्त्रे "अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः। धर्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्दश। आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः। अर्थशास्त्रं चतुर्थन्तु विद्या ह्यष्टादशैव ताः" प्रा॰ त॰ विष्णुपु॰। विद्याभेदे देवताभेदाः हेमा॰ ब्र॰ विष्णुधर्मोत्तरे उक्ता यथा "ऋग्वेदस्तु स्मृतो ब्रह्मा यजुर्वेदस्तु वासवः। सामवेदं तथा विष्णुः शम्भुश्चाथर्ववेदभाक्। त्रिधाप्रजापतिर्ज्ञेया कल्पो ब्रह्मा प्रकीर्त्तितः। सरस्वती व्याकरणं निरुक्तं वरुणः प्रभुः। छन्दो विष्णुस्तथैवाग्निर्ज्योतिषं भगवान् रविः। मीमांसा भगवान् सोमो न्यायमार्गः शमीश्वरः। धर्मश्च धर्मशास्त्राणि पुराणञ्च तथा मनुः। इतिहासं प्रजाध्यक्षो धनुर्वेदः शतक्रतुः। आयुर्वेदस्तथा साक्षाद्देवो धन्वन्तरिः प्रभुः। कलावेदो महादेवो रत्नशास्त्रं महेश्वरः। वास्तुवेदः शङ्करश्च पाशुपतं तथा। पातञ्जलमनन्तश्च सांख्यञ्च कपिलो मुनिः। अर्थशास्त्राणि सर्वाणि धनाध्यक्ष प्रकीर्त्तितः। कामशास्त्राणि सर्वाणि कामदेवो जगद्गुरुः। अन्यानि यानि शास्त्राणि यत्कर्माणि प्रचक्षते। स एव देवता तस्य शास्त्रं कर्म च दैवतम्"। श्रुतौ च विद्याभेदः द्विविधः परापरभेदात् उक्तः। तयोः ब्रह्मावगमः वा परा "तयाऽक्षरमधिगम्यते वा परेतिश्रुतेः"। ऋग्वेदादिलक्षणा अपरा वा च अध्ययनाध्यापनरूपा।

विद्याचन(ण) त्रि॰ विद्यया ख्यातः। विद्या+चन(ण) विद्यया विख्याते। [ख्याते।

विद्याचक्षु पु॰ विद्यया विख्यातः विद्या+चक्षु। विद्यया

विद्यादल न॰ विद्याये ग्रन्थाय दलमेदौ। मूलछदे शब्दच॰

विद्यादान न॰ ६त॰। १अध्यापने २शुक्लादिदाने च।

"विद्यादानञ्च अध्यापनेन आत्मना विशिष्यार्थेन च भवतीति ब्रह्मो॰त॰रत्नु॰। तत्राध्यापने विधिः श्रुतौ यथा "योऽधीत्यार्षेयो विद्यां न प्रयच्छेत् स काको वाग्यसिनू स्यात् श्येनो वारमपाहरेत्यात् अनध्यापने दोषश्रवणात् तस्यावश्यकत्वं गम्यते। "अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत" इत्यादिस्मृतौ च अध्यापनाविधिलाभः। व्याख्यानादिविधिलाभस्तु "ब्रह्मानतिमिरोपेतान् सन्देहपटलान्वितान्। निरस्यवान् यः कुरुते शास्त्राञ्जनशलाकया। दृष्ट कीर्त्तिं राजपूजां लभते चेहमुत्तमं च सः" ब्रह्मो॰त॰। तद्देतुपुस्तकादिदानञ्चापि वह्नयाद्यग्निप्रमाणात् तत्र ज्ञानरूपविद्यादानप्रकारः हेमा॰दा॰वह्निपु॰उक्तो यथा "वाजपेयसहस्रस्य सम्यगिष्टस्य यत् फलम्। तत्फलं समवाप्नोति विद्यादानान्न संशयः। तस्माद्देयानि नित्यं धर्मशास्त्रस्य वा श्रुतेः। पठनं कारयेत् राजन्! यदीच्छेत् धर्ममात्मनः। गोभूहिरण्यवासांसि शयनान्यासनानि च। प्रत्यहं तेन दत्तानि भवन्ति नृपसत्तम!। धर्माधर्मौ न जानाति लोकोऽयं विद्यया विना। तस्मात् सदैव धर्मात्मन्! विद्यादानरतो भवेत्। वेदशास्त्रस्य यो वेत्ता नैव स्यात्पोत्तम!। ततोऽज्ञानतमोऽन्धस्य कावस्था जगतो भवेत्। ब्रह्मादयः सुराः सर्वे ऋषयो दग्धकिल्बिषाः। मनुष्याः पितरश्चैव विद्यादाने प्रतिष्ठिताः। चतुर्युगानां राजेन्द्र! एकसप्ततिसंख्यया। वेदशास्त्रप्रदः स्वर्गे पूज्यते सुरसत्तमैः। इत्युपक्रमे "दानं विशेषफलदं जगतीह नान्यद् विद्यां विहाय वदनाब्जलताधिवासाम्। गोभूहिरण्यगजवाजिरथादि सर्वं तां यच्छतां किमिति भूप! भवेन्न दत्तम्"। तत्रैव नन्दिपु॰ "अध्यापयेच्छुभान् शिष्यानभिजातान् सुमेधसः। एवं विद्याप्रदानं हि सर्वदानोत्तमोत्तमम्। सर्वदा सर्ववर्णानामयं च ध्रुव उत्तमः। अनेन विधिना दत्त्वा विद्यां पुण्यधरो नरः"।

स्वयंविद्यादानासामर्थ्ये आ॰ त॰ भविष्यपु॰ उक्तं यथा "अध्यापकस्य यो वृत्तिं दत्त्वाऽध्यापयति द्विजान्। किं न दत्तं भवेत्तेन धर्मकामार्थसिद्धता"। तद्देतुभूतवृत्तादिदानमपि विद्यादानं हेमा॰ दा॰ उक्तं यथा नन्दिपु॰ "विद्या च सर्व्वा दानानां शुश्रूषोश्च विधिं बुधः। श्रुत्वा विद्याञ्च विधिवत् गुरवे भावितात्मने। सतृणाम्बुभ्यश्च तां दद्यात् विशेषात् गुणशालिनु। उप-

योग्यञ्च यद्यद्यस्य तत्तस्य प्रतिपादयेत्"। ततः पुस्तकलेखन-प्रकारस्तद्दानविधिश्च विस्तरेणोक्तस्तत्र द्रष्टव्यः। विद्योपयोगित्रव्यादिदानेऽपि विद्यादानं भवति यथोक्तं देवीभा० देवीपु० "आत्मविभवानुसारेण विद्यादानं करोति यः। यथाध्यं फलमाप्नोति शास्त्रतत्त्वं न संशयः। स्त्री तथानेन विधिना विद्यादानफलं लभेत्। भर्त्रा चैवानुज्ञाता विधवा च तद्दिशेत्"। विधानमाह "विद्यारम्भे सदा दद्याद् ब्रह्मभ्यश्च भोजनम्। लेखिकां सुदृढं दीप्तं ब्रह्मसूत्रं विनामलः। लेखनीघटितं तीक्ष्णं मसीपात्रन्तु लेखनीम्। दत्त्वा तु लभते वत्स! विद्यादानमनुत्तमम्। पुस्तकस्थरथं दत्त्वा सुप्रमाणं सुशोभनम्। विद्यादानमवाप्नोति सत्यवक्त्रश्च बुद्धिमान्। यन्त्रकं त्वासनञ्चैव दण्डासनमथापि वा। विद्यावाचनशीलाय दत्तं भवति राजवत्। अञ्जनं नेत्रपादानां दत्तं विद्यापरायणे। भूमिर्दत्ता च तेनैव स्वर्गराज्यफलप्रदम्। यश्च भूम्यां स्थितो नित्यं विद्यादानं प्रयच्छेत्। तस्यापि भवति स्वर्गस्तत्प्रभावान्न संशयः"। "येऽपि पत्रं मसीपात्रं लेखनीं सम्पुटादिकम्। ददुः शास्त्राभियुक्ताय तेऽपि विद्याप्रदाविनाम्। यान्ति लोकान् शुभान् सर्वान् पुण्यभाजो नराधिप!"। नन्दिपु० "विद्यादानमवाप्नोति प्रदानात् पुस्तकस्य च। शिल्पानि शिक्षयेद् यस्तु पौण्डरीकफलं लभेत्। शिल्पभाण्डप्रदानेऽपि तद्विद्यादानजं फलम्। व्यक्तितेषु प्रदत्तस्य तथा ज्ञात्वा निवारणम्। विद्यादानफलं प्रोक्तं नात्र कार्य्या विचारणा। पापहस्तस्य च तथा दत्त्वा चैव परां गतिम्। विद्यादानफलं प्राप्य स्वर्गलोके महीयते। देन जीवति भाण्डेन तस्मै तद्भाण्डदायकः। सर्वकामसमृद्धस्य यत्तस्य फलमश्नुते" विष्णुधर्मो०। तत्रैव स्कन्दपु० विद्यादानोपक्रमे "पुस्तकस्थरथं दत्त्वा सदृशं तत्प्रमाणतः। तदासनं वितानं वा शिवलोके महीयते। यः शोभनसमुद्भूतं निम्नखातं सुलक्षणम्। दद्यात् सम्पुटकं कृत्वा चर्मणा वापि निर्मितम्। शिवज्ञानाभियुक्ताय तदध्ययनहेतुना। सुदृढं फलकं वापि विद्यादानफलं लभेत्। यः शोभनं समसूत्रं सर्वरत्नोपशोभितम्। सविधानं समक्षूत्रं विद्याकोशसमाश्रयम्। कारवेल्लापि रौप्येण ताम्रेण चतुरस्रकम्। कांस्यारकूटं लोहं वा दारुवंशादिनिर्मितम्। सुकषायातिरिक्तेन चर्मणाभिनवेन च। अलंकृत्य च मठवेत् विद्यादाने नवं गृहम्। सुदृढं कटकोपेतं दृढस्तम्भनिवेशनम्। कृत्वोत्तालकसंयुक्तं विद्यावर्त्तिकरण्डकम्। एवं वित्तानुसारेण कारयित्वा गृहं नृपः। विद्यासिंहासनं तत्र संपूज्य विधिवद्बुधः। तस्मिन् पुस्तकशब्देन विद्याकोशगृहं न्यसेत्। एवं यः शिवविद्यायाः कुर्य्यादायतनं शुभम्। स सकलैः सर्वैर्विद्यादानफलं लभेत्। विद्यामण्डलकं कृत्वा विद्याव्याख्यानमण्डपे। तत्राभ्यर्च्य शिवां विद्यां तद्व्याख्यां शृणुयात्ततः। सोऽपि याति शिवस्थानं कार्यकालसमन्वितम्। अनेन विधिना दानं यः शृणोति प्रयत्नतः। स साम्राज्यश्रियं सौख्यं देहान्ते मुक्तिमाप्नुयात्"। तत्रैव देवीपु० "तस्मात् सर्वप्रयत्नेन विद्या देया सदा नरैः। इहैव कीर्त्तिमाप्नोति मृतो याति परां गतिम्। यस्तु देवाग्रे सदृशे नित्यं विद्यादानं प्रवर्त्तयेत्। स भवेत् सर्वलोकानां पूज्यः पूज्यपदं व्रजेत्"। वराहपु० "लेखयित्वा तथाक्षरं देयं शुभवते सदा। तपस्विने, धर्मरते प्रतिपालनतत्परे। वस्त्रयुग्मेन संवीतं पुस्तकं प्रतिपादयेत्। वाचकं पूजयेच्चापि वस्त्राभरणभूषणैः। अनेनैव विधानेन विद्यादानफलं लभेत्"।

विद्याधन न० विद्याया इदं धनम्। विद्याया इदे "धनमस्ते तु यद्यद्यं विद्याया धनपूर्वकम्। विद्याधनन्तु तद्विद्यात्" इति, "शिल्पादाविज्यतः प्राग्वं सन्दिग्धमन्त्रनिर्णयात्। अज्ञानसंशयोच्छेदाद्यं प्राध्ययनात्तु यत्। विद्याधनन्तु तत् प्राहुः" इति "शिल्पिन्यपि हि धर्म्यमस्" इत्युपक्रम्य "धनं निरस्य वादेन विद्यया दानपूर्वकम्"। विद्याधनं तु तद्विद्यादिव्युक्ते च धने।

विद्याधनविभागे विशेषः "विद्याधनं तु यद् यस्य तत्तस्यैव धनं भवेत्। कुटुम्बं बिभ्रयाद् भ्रातुर्वा विद्याधिगच्छतः। भागो यवीयसां तत्र यदि विद्यानुपालिनः" दायभा०। दायतत्त्वे तु "भागं विद्याधनात्तस्मात् स लभेतेतरा-श्रुतौ धनम्" इति पाठः। दायभा० नारदवाक्ये "देयं वैद्येन तद्धनम्" पाठः। "परभक्तोपयोगेन विद्या प्राप्ताऽन्यतस्तु वा। तया लब्धं धनं यत्तु विद्यालब्धं तदुच्यते" दाय-त० कात्यायनः। "खण्डतः पितृभाद्भक्तव्यतिरिक्तात्" स्मृ०। "नाविद्यानां तु वैद्येन देयं विद्याधनात् क्वचित्। समविद्याधिकानां तु देयं वैद्येन तद्धनम्" "कुले विनीतविद्यानां भ्रातॄणां

विष्टतोऽपि वा। यौर्वग्राह्यं तु यदित्थं तद्विभाव्यं दृष्टसूतिः" दायत०।

विद्याधर पु० विद्यां मन्त्रादिकं धरति धृ-अच्। १देवयोनिभेदे अमरः। २विद्याधारके त्रि०।

विद्यारम्भ पु० ६त०। पञ्चमवर्षे शिशोः कर्त्तव्ये विद्यावारम्भे तत्प्रकारादि० ज्यो० त० उक्तं यथा

"संप्राप्ते पञ्चमे वर्षे अग्रहृष्टे जनार्दने। मघौ प्रतिपदञ्चैव वर्ज्जयित्वा तथाष्टमीम्। रिक्तां षष्ठदर्शीं चैव सौरिभौमदिनं तथा। एवं सुनिश्चिते काले विद्यारम्भं तु कारयेत्। पूजयित्वा हरिं लक्ष्मीं देवीञ्चापि सरस्वतीम्। सविद्यास्तत्प्रकारांश्च प्राप्य विद्यां विशेषतः" विष्णुध०। "सप्तसप्तशिवमूलाधोसप्तसप्तदशौन्नत्यगयिषु च हरिबोधे शुक्रजीवार्कवारे। उदितवति च जीवे केन्द्रकोणेषु सौम्यैरपठनदिनवर्जं पाठयेत् पञ्चमेऽब्दे" दोषिका। "विद्यारम्भे गुरुः श्रेष्ठो मध्यमो भृगुभास्करौ। बुधश्चन्द्रोभौमोऽन्यविद्या बुधसोमयोः" मदनपा०। "विद्यारम्भः सुरगुरुसितेज्यसौम्यार्धदायो कर्त्तव्यायुश्चिरमपि करोत्यंशुमान् मध्यगोऽत्र। नीहारांशौ भवति जडता पङ्गुता भूमिपुत्रे ज्ञायास्तनयेऽपि च सनयः कीर्त्तयन्त्येवमाद्याः" रत्नेर्गुरोर्भृगोर्लग्ने तत्पञ्चेऽर्केऽथोन्दुसुतेऽथितः। गुर्वर्केन्दुभृगुष्वेषु च विद्यारम्भः प्रशस्यते"। "प्राङ्मुखो गुरुरासीनो वरयाभिमुखं शिशुम्। अध्यापयेच्च प्रथमं द्विजातीर्भिः समन्वितम्। दृष्टसूतिः। तद्विधिः ऋग्यजुस्साम्नां ज्ञेयः। अविद्या बुधसोमयोरिति धनुर्विद्याविषयम् यथोक्तं दीपिकायाम् "अदितिसुतयमार्कज्ञातिचित्राग्निदैवप्रभुहरिवसुभाशोन्दुभाग्यान्त्यमेषु। विधिनिशिवुधाहे विष्णुबोधे विधौ च सुखमवतिविद्योगे चापविद्याप्रदानम्" तत्प्रकारश्च विद्यारम्भे च जन्मर्क्षाद्विरावश्यकोक्तात् यो० धा० ऋषिः "शुभाः पापाश्च रन्ध्रस्थाः सर्वे नेष्टाः सदा पञ्च। भाद्यष्टादशकस्थेभ्याः पापाः सर्वे शुभावहाः। शुभाः केन्द्रत्रिकोणस्थाः धनस्थाश्चशुभाः। सर्वे स्वाभे प्रशस्ताः स्युरष्टरन्ध्रे त्रिशोः"। अष्टरन्ध्रं विद्योपलक्षणम्" उभयत्रापि उत्तरायणस्थैव याज्ञता। "उदगयने भास्वति पञ्चमेऽब्दे" वसिष्ठोक्तेः।

विद्युत् स्त्री विद्योतते वि+द्युत-क्विप्। १तडिति अमरः २सन्ध्यावाह्ने विशतायुषि यज्ञ प्रा०व०२निबन्धे त्रि०भेदे। विद्युतश्च चतुर्विधाः "अरिष्टनेमिपत्नीनामपत्यानीह षोडश। बहुपुत्रश्च विदुष्यतस्ता विद्युतः स्मृताः"। तासां "वातायु कपिला विद्युदातपायु हरिद्विताः। पीताश्च वर्षाय चित्रेया दुर्भिक्षायासिताः भवेत्" ज्यो०। आन्तरिक्षोपद्रवविद्युत्कारणञ्च श्रीपतिरुक्तं यथा "निर्घातोल्काशनसुरधनुर्विद्युतश्च कुवायोः संदृश्यन्ते खनमरपरीवेषपूर्वास्तवान्ते" "सुखजलधिमध्ये वाडवोऽग्निः स्थितोऽस्मात् खलिलभरनिमग्नात् विद्युतस्तस्कुलिङ्गाः"। तदग्निपातरूपवज्राग्निपातसम्भवकारणं यथाह्यादैद्युतं तेजः पार्थिवांशयुक्तमिश्रितम्। वाय्वाद्यं भवदाघाते प्रतिकूलानुकूलयोः। वाय्वोस्तत् पतति प्रायो ह्यभावप्राप्यवर्षके। यतः प्रावृषि नैवैते पांसवः प्रसरन्ति हि। तत् तेषां पार्थिवं चाप्यं तेजसं तत्तडित्मृतम्। यतो निर्झरदाहेन भूविस्फैरनुभूयते"।

विद्युत्प्रिय न० ६त०। विद्युदाकर्षके कांस्ये धातौ हेमच०।

विद्युन्माला स्त्री अष्टाक्षरपादके छन्दोभेदे। "भो भो गा गो विद्युन्माला" छन्दोम०। [प्रविद्धे २राक्षसभेदे च।

विद्युन्मालिन् पु० राक्षसभेदे भाग०१।७ अ०। १रामायणविद्र न० अध-रक् दान्तादेशः। छिद्रे शब्दच०।

विद्रधि पु० वेत्त्यनेन विद् क्रुदृधं रुधादि रुध-किन् पृषो०। रोगभेदे। तच्चिकित्सादि भावप्र० उक्तं यथा

"तत्र विद्रधेः सम्प्राप्तिपूर्वकं सामान्यं लक्षणमाह। "त्रयश्चत्वारिंशद्दोषाः प्रदुष्यास्त्रिसमाश्रिताः। दोषाः शोथं मनैर्घोरमनयन्त्यूष्मिता भृशम्। अन्तर्मुखं दृढारम्भं दुष्टं वायव्य वायतम्। स विद्रधिरिति ख्यातो विज्ञेयः षड्विधश्च सः" त्रिसमाश्रिता दोषा इति वक्ष्यमाणशोथाद् विद्रधेर्भेदार्थम्। यतो त्रयशोथे दोषाः प्रायस्त्रिसमाश्रयनियमो नास्ति इति त्रयशोथात् दारुणम्। आयतन्दीर्घम्। षड्विधत्वं विद्रधेरिति। "यथा दोषैः समस्तैश्च कृतेनाप्यसृजा तथा। यस्मात् तेषां तुल्यमेव लक्षणं समलक्षते" अथ विशिष्टानि लक्षणानि। तत्र वातिकस्य लक्षणमाह "कृष्णोऽरुणो वा विषमो भृशमत्यर्थवेदनः। चिरोत्थानप्रपाकश्च विद्रधिर्वातसम्भवः" विषमो भृशम् लक्षणमस्यः अयं महान्। चिरोत्थानप्रपाकः चिरादित्यन्वादुत्थानप्रपाकगतिः प्रपाकश्च वक्ष्यते। अथ पैत्तिकमाह "पक्वोदुम्बरसङ्काशः स्रावो वा ज्वरदाहवान्। क्षिप्रोत्थानप्रपाकश्च विद्रधिः पित्तसम्भवः"। अथ श्लैष्मिकमाह। "घनावगाढः पाण्डुः शीतः स्निग्धोऽल्पवेदनः। चिरोत्थान-

प्रवाहश्च विद्रधिः कफवातजः। तनुपीतासितास्तस्यामाशयाः क्रमशोऽर्बुदाः। अथ सान्निपातिकमाह। "नानावर्णरुजास्रावो घाटाढ्यो विषमो महान्। विषमं पच्यते यश्च विद्रधिः सान्निपातिकः"। नाना अनेकविधाः वर्णाः कृष्णरक्तपाण्डुरूपाः। रुजा तोददाहकण्डादिरूपाः स्रावाः तनुपीतसिताः यस्य सः। घाटाढ्यः घाटाकोटिः साऽस्यास्तीति घाटाढ्यः अत इच्प्रत्ययः दर्शनं। विषमः निम्नोन्नतः। विषमं पच्यते चिरादिरागशीघ्रोत्सानोद्दानुबन्धभेदेन विषमं यथा स्यात्तथा पच्यते। अथाभिघातजस्यागन्तोः विद्रधेः सन्निपूर्वकं लक्षणमाह। "तैस्तैर्भावैरभिहते क्षते वाऽप्यवकारिणा। ततोऽस्रा वायुविहतः सरक्तं पित्तमीरयेत्। ज्वरस्तृषा च दाहश्च जायते तस्य देहिनः। आगन्तुर्विद्रधिर्ज्ञेयः पित्तविद्रधिलक्षणः"। तैस्तैर्भावैः काष्ठोदूखलाद्यादिभिः अभिहते यदा रक्तस्रावो भवति। तथाभिहते क्षते क्षते वा अथ वा खड्गशूकादिभिः क्षते यथारक्तस्रावो भवति तथा क्षते क्षते ततोऽस्रा। अत्र क्षतशब्देन क्षतमात्रं उच्यते तेनाभिहतक्षतयोरुभयोरप्यस्रा वायुना विहतः अभिघातात् क्षते रक्तत्वात् कुपितेन वायुना प्रहतः। ईरयेत् कोपयेत्। अथ रक्तजमाह "कृष्णस्फोटाहतः श्यावस्तीव्रदाहरुजान्वरः। पित्तविद्रधिविज्ञेयस्तु रक्तविद्रधिरुच्यते" अधिष्ठानविशेषेण लिङ्गविशेषं बोधयितुमाभ्यन्तरान् विद्रधीनाह "आभ्यन्तरानतस्तु विद्रधीन् परिचक्षते। गुर्वभाज्यविरुद्धास्यगुरुकाकान्नभोजनाः। अतिव्यायामवेगाघातास्थ्यादिभिः। पृथक् समस्तैर्वा दोषाः कुपिता गुल्मरूपिणम्। वस्तौ वक्षसि वक्षोमध्ये कुर्वन्ति विद्रधिम्। गुदे वस्तिमुखे नाभ्यां कुक्षौ वङ्क्षणयोस्तथा। तयोः स्रोतांसि यस्यति गुदं वा स्रोतसि त्यजेत्। एषां लिङ्गानि जानीयाद्वातादिविद्रधिलक्षणैः" समस्तैर्वा मिलितैर्वा। सन्निपातं समसन्नाद्बलवत्तमम्। स्थानविशेषेण रूपविशेषमाह "गुदे वातनिरोधस्तु वस्तौ मूत्रस्य सूक्ततां। नाभ्यां हिक्कां तृष्णायां च कुक्षौ भास्तकोपनम्। कटिहृदयहृत्सीदो वङ्क्षणोत्थे तु विद्रधौ। कक्षयोः पार्श्वसङ्कोचः स्रोतसां तु रुजावरोधनम्। सर्वाङ्गप्रपदहृत्सीदो हृदि कासश्च जायते। श्वासो यस्यति हिक्का च स्रोतसि मेपीयते पयः" स्थानमाह "नाभेरधस्ताज्जानुभ्यां मेढ्रे वङ्क्षणयोरधः। गुदे यस्तु भवेत्तस्य स्थानं वस्त्यादिजाताः यानि स्थानानि अर्बुदाधिकारे, इतरे वस्त्यादिजाः यथाः गुदाद्। नाभिजस्तूभाभ्यां वार्णाभ्याम्। तथा च हारीतः अर्बुदं प्रभिद्येव सुखाच्छरीरात् प्रवर्तेतास्रमुल्बणं हि पूयः। यतः प्रभिद्येत्यादुभयमाह् दाह्यां प्रवृत्तिश्चेह नाभिजेषु" अथ साध्यत्वादिकमाह "यदः क्षतेषु लोक्तेषु क्षतेषुर्ध्वं न जायते। कृच्छ्राभिसञ्चितजेषु तेषु भिन्नेषु याप्यतः। जायेतेऽपि क्वचित् पुरुषे नेतरेषु कदाचन"। कृच्छ्राभिसञ्चितजेषु श्रोणिकोष्ठादिजाः तेषु तथाभिन्नेषु न जायेत् कृच्छादीनां बलत्वात्। अतएव भोजः "असाध्यो मर्मजो ध्येयः पक्वाऽपक्वश्च विद्रधिः। वस्तिप्रतोदितोऽप्येवं पक्व एव हि वक्षिजः। त्वग्जो नाभेरधोजश्च साध्यो यश्च समोन्नतः। अपक्वश्चैव पक्वश्च साध्यो नाभेरुपरि स्थितः। आध्मानं वह्निसन्धुक्षं कृच्छ्रिङ्गाहसान्वितम्। कृच्छ्राद्यसमायुक्तं विद्रधिर्नाभ्यवेक्षणम्" अथ साध्यविद्रधीनां साध्यासाध्यत्वमाह "साध्या विद्रधयः पञ्च विवर्ज्याः सान्निपातिकः। आमपक्वविदग्धत्वं तेषां ज्ञेयञ्च शोफवत् शोफवत् वक्ष्यमाणलक्षणशोफवत्"।

विद्रधिनाशन पु० विद्रधिं नाशयति नश-णिच्-ल्यु। शोभाञ्जने त्रिका०। [ज्वरघ्ने च यक्ष्मा०।

विद्र(द्रा)व पु० विद्रु-अप् वत्र् वा। १पलाशने अमरः

विद्रुत त्रि० वि+द्रु-क्त। १प्राप्तद्रवे २पलायिते च अमरः।

विद्रुम पु० विगतो द्रुमः। १प्रवालरत्नहेतुवृक्षे मेदि०।

विद्रुमलता स्त्री विद्रुमश्च लतेव। नखीनामगन्धद्रव्ये मेदि० स्वार्थे क प्रत्ये टाप्। विद्रुमलतिका तत्रैव। [द्रुने विद्रुधि

विद्वत्कल्प त्रि० ईषदसम्पन्नो विद्वान् विद्वस्+कल्पप्। ईषद्विद्वत्तम पु० अतिशयेन विद्वान् विद्वस्+तमप्। अतिपण्डिते तरप्। विद्वत्तरोऽप्यत्र। [विद्वत्कल्पे

विद्वद्भोग्य त्रि० ईषदसम्पन्नो विद्वान् विद्वस्+ईयसर्। **विद्वस्** त्रि० विद्-क्वसु। १प्राप्ते स्त्रियां ङीप् सुम्। "विदुषी सूर्ध्नि सा विभर्ति यानं नैष०। २पण्डिते पु० ३ज्ञानयुक्ते। [क्व। विद्वद्भोग्यत्व।

विद्विष् पु० विशेषेण द्वेष्टि वि+द्विष-क्विप्। शत्रौ अमरः।

विद्वेष पु० वि+द्विष-घञ्। वैरिभावे शत्रुतायाम् अमरः।

विद्वेषण न० वि+द्विष-णिच्-ल्युट्। तन्त्रोक्ते अभिचारकर्मभेदे येन शत्रूणां परस्परविद्वेषो भवति तत्किन् आचारे। वि+द्विष-ल्युट्। २विद्वेषे। [विधति। अवैधीत्

विध विधाने जुहोत्यादौ क्षेदने च तु० पर० सक० सेट्।

विध पुंस्त्री विध-क वत्र् वा। १विधाने २गजभक्ष्यान्ने ३प्रकारे

३वेधे ६ह्रस्वौ रभसः ६वेतने मेदि० ७कर्मणि च स्त्री ऐमच०। तत्रार्थे वेधने च स्त्री त्रिका०।

विधवा स्त्री विगतो धवो यस्याः। मृतपतिकायां स्त्रियाम् अमरः।

विधवाधर्माश्च शु०त० उक्ता यथा विष्णुः० "मृते भर्तरि ब्रह्मचर्यं तदन्वारोहणं वा"। ब्रह्मचर्यं मैथुनवर्जनं ताम्बूलादिवर्जनञ्च यथाह प्रचेताः "ताम्बूलाभ्यञ्जनं चैव कांस्यपात्रे च भोजनम्। यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत्"। कस्यञ्जनमायुर्वेदोक्तम् रघु०। काशीख० विस्तरेण ३य० उक्ता यथा

"ऊढ्वाति न भर्त्तारं यदि दैवात् कदाचन। तथापि शीलं संरक्ष्यं शीलभङ्गात् पतत्यधः। तद्दौर्मुख्यादपि स्वर्गात् पतिः पतति नान्यथा। तस्याः पिता च माता च भ्रातृवर्गस्तथैव च। पत्यौ मृते च या योषिद्वैधव्यं पालयेत् क्वचित्। सा पुनः प्राप्य भर्त्तारं स्वर्गभोगान् समश्नुते। विधवाकबरीबन्धो भर्त्तृबन्धाय जायते। शिरसो वपनं तस्मात् कार्य्यं विधवया सदा। एकाहारः सदा कार्य्यो न द्वितीयः कदाचन। त्रिरात्रं पञ्चरात्रं वा पक्षव्रतमथापि वा। मासोपवासं कुर्य्याद् वा चान्द्रायणमथापि वा। कृच्छ्रं पराकं वा कुर्य्यात् तप्तकृच्छ्रमथापि वा। यवान्नैर्वा फलाहारैः शाकाहारैः पयोव्रतैः। प्राप्तयात्रां प्रकुर्वीत यावत् प्राणैः स्वयं व्रजेत्। पर्य्यङ्कशायिनी नारी विधवा पातयेत् पतिम्। तस्माद्भूशयनं कार्य्यं पतिमोक्षमभीप्सया। नैवाङ्गोद्वर्त्तनं कार्य्यं स्त्रिया विधवया क्वचित्। गन्धद्रव्यस्य सम्भोगोनैव कार्य्यस्तया पुनः। प्रत्यहं तर्पणं कार्य्यं भर्तुः कुशतिलोदकैः। तत्पितृस्तत्पितृभ्यापि नाममोल्लादिपूर्वकम्। विष्णोस्तु पूजनं कार्य्यं पतिबुद्ध्या न चान्यथा। पतिमेव सदा ध्यायेद्विष्णुरूपधरं परम्। यद् यदिष्टतमं लोके यच्च पत्युः समीहितम्। तत्तद्गुणवते देयं पतिप्रीणनकाम्यया। वैशाखे कार्त्तिके माघे विशेषनियमांश्चरेत्। स्नानं दानं तीर्थयात्रां विष्णोर्नामग्रहं तथा। वैशाखे जलकुम्भांश्च कार्त्तिके घृतदीपकाः। माघे तिलैश्चतुर्होमः स्वर्गलोके महीयते। अपूपा कार्य्या च वैशाखे देवे देया गन्धलिप्तका। चणकद्रव्यजं चापि सूक्ष्मवासांसि चन्दनम्। कर्पूरन्तु ताम्बूलं पुष्पदानं तथैव च। जलपात्राण्यनेकानि तथा पुष्पस्रजानि च। दानानि च विचित्राणि द्वाचारस्याफलानि च। देयानि द्विजरूपेभ्यः पतिर्मे प्रीयतामिति। ऊर्जे यवागूमश्नीयादेकाहमथ वा पुनः। इक्षवं शूरणञ्चैव शूकशिम्बीञ्च वर्जयेत्। कार्त्तिके वर्जयेत्तैलं कार्त्तिके वर्जयेन्मधु। कार्त्तिके वर्जयेत् कांस्यं कार्त्तिके चापि सन्त्यजेत्। कार्त्तिके भोजनियमे घृष्टां चारं प्रदापयेत्। पलभोजी कांस्यपात्रं हतं पूर्वं प्रयच्छति। भूमिशय्याव्रते देया शय्या कृष्णा सकुलिका। फलत्यागे फलं देयं रसत्यागे च तद्रसः। धान्यत्यागे च तद्धान्यमथ वा शालयः स्मृताः। धेनुं दद्यात् प्रयत्नेन सालङ्कारां सकाञ्चनाम्। एकतः सर्वदानानि दीपदानं तथैकतः। कार्त्तिके दीपदानस्य कलां नार्हन्ति षोडशीम्। किञ्चिदभ्युदिते सूर्य्ये माघस्नानं समाचरेत्। यथाशक्त्या च नियमान्माघे स्नानं समाचरेत्। पक्वान्नैर्भोजयेद्विप्रान् यतीनपि तपस्विनः। लड्डुकैः फाणितैश्चापि वटकैश्च खरिकादिभिः। घृतपक्वैः समरिचैः शुचिकर्पूरवासितैः। गर्भे शर्करया पूर्णैर्नवानन्दैः सुगन्धिभिः। शुष्कैक्षुनालानां भारांश्च दद्याच्छोषणत्तये। कक्षुकं तूलगर्भञ्च तूलिकां सुपवीतिकाम्। मञ्जिष्ठारूपवासांसि तथा तूलवतीं पटीम्। ऊर्णामयानि वासांसि यतिभ्योऽपि प्रदापयेत्। जातीफललवङ्गैश्च ताम्बूलानि बहून्यपि। कम्बलानि च चित्राणि निर्वातानि गृहाणि च। मृदुलाः पादरक्षाश्च सुगन्ध्युद्वर्त्तनानि च। हतकम्बलपूजाभिर्भक्त्या ज्ञानपुरःसरम्। दत्त्वा शास्त्रं विदुं पूजयेद् दृढभक्तितः। कृष्णाशुकप्रभृतिभिर्भोगारे प्रभुभिर्नरैः। तूलवर्त्तिप्रदीपैश्च नैवेद्यैर्विविधैस्तथा। भर्त्तृरूपो भगवान् प्रीयतामिति घोषयेत्। एवंविधैश्च विधया विविधैर्नियमैर्व्रतैः। वैशाखादि कार्त्तिकान्ति माघान्तेवमेवातिवाहयेत्। नाधिरोहेदनड्वाहं प्राणैः कण्ठगतैरपि। कक्षुकं न परीदध्यादाशो न विलतं यजेत्। कृष्णात्र शुक्लान् किञ्चिन्न कुर्य्याद् भर्त्तृतत्परा। एवं चर्य्यापरा नित्यं विधवापि शुभा मता। इति धर्मसमायुक्ता विधवापि पतिव्रता। पतिलोकानवाप्नोति न भवेत् क्वापि दुःखिता।

ब्रह्मवै० ज० ख० ८२अ० कश्चिद्विशेष उक्तो यथा

"ब्राह्मणी पतिहीना या भवेच्चिरकामगी सदा। एकभक्ता दिवास्नाने सा कुर्य्याच्चरतां सदा। न धत्ते दिव्यवस्त्रञ्च गन्धद्रव्यं श्रुतैवसम्। सजञ्च चन्दनं चैव शङ्खं सिन्दूरभूषणम्। लक्ष्मी सविनयक्षा स्याद् नित्यं नारा-

वर्षं करेत्"। "पुत्रस्तल्पस्थ पुरुषं यदा पश्यति धर्मतः। मिष्टान्नं न च भुञ्जीत सा न कुर्याद्विभवे व्रजम्। एकादश्यां न भोक्तव्यं कृष्णजन्माष्टमीदिने। श्रीरामस्य नवम्यान्तु शिवरात्रौ चतुर्दशी। अघोरायान्तु प्रेतायां चन्द्रसूर्योपरागयोः। अदृष्ट्वा परिवाज्यं भुञ्जते परमेव च। ताम्बूलं विधवाश्लीषां यतीनां ब्रह्मचारिणाम्। सन्ध्यासिनां च गोमांसवराहस्य श्रुतौ श्रुतम्। रक्तवासं श्वसुरस्य जम्बीरं पर्णमेव च। अलाबूवर्तुलाकारा वर्जनीया यतेरपि। पर्य्युषायिनी नारी विधवा पातयेत् पतिम्। यानारोहणं कृत्वा विधवा नरकं व्रजेत्। न कुर्यात् केशसंस्कारं गात्रसंस्कारमेव च। केशावली जटारूपा न क्षौरं तीर्थकं विना। तैलाभ्यङ्गं न कुर्वीत न हि पश्यति दर्पणम्। सुखञ्च परदुःखं च यावत् स्वल्पं महोत्सवम्। नर्त्तकं गायकञ्चैव सुवेशं पुरुषं शुभम्"।

विधातृ पु॰ वि+धा-तृच्। १प्रजापतौ ब्रह्मणि अमरः। २कामदेवे मेदि॰। ३मटिरायां राजनि॰। ४भृगुसुनिपुत्रभेदे भाग॰ ५विधानकर्त्तरि त्रि॰ स्त्रियां ङीप् सा च ६पिप्पल्यां शब्दर॰। ७अधर्मे पु॰ "हो धाता च विधाता च धौराघो जगतां पतौ। हो शास्तारौ त्रिलोकेऽस्मिन् धर्माधर्मौ प्रकीर्त्तितौ" अग्निपु॰। [२मरीच्यादौ च।

विधातृभू पु॰ विधातुर्भवति भू-क्विप्। १नारदमुनौ त्रिका॰

विधात्रायुस् पु॰विधातुरायुः प्रमाणं यस्मात्। सूर्य्ये शब्दच॰ सूर्य्यक्रियां विना वत्सरादिज्ञानासम्भवात् सूर्य्यस्य तथात्वम्। इत॰। तस्य वयःकाले २मङ्गलके च। तदायुःकालश्च आयुस्शब्दे ७८२ पृ॰ दृश्यः।

विधान न॰ वि+धा ल्युट्। १करणे २कर्म्मणि। ३विधौ, जटा॰ ४गजभक्ष्यान्ने च हारा॰ संज्ञायां कन्। अर्थायां म॰ शब्दर॰। [त्रे त्रि॰।

विधानज्ञ पु॰ विधानं जानाति ज्ञा-क। १पण्डिते। २विधि॰

विधायक त्रि॰ वि+धा-ण्वुल्। विधानकर्त्तरि।

विधि पु॰ वि+धा-कि। १भजनकर्त्तरि ब्रह्मणि, २भाग्ये ३कर्म्मे अमरः "चिकीर्षाज्ञातसाध्यसाधनोपायो विधिः" शब्दच॰ ४शास्त्रे प्रवर्त्तनारूपे ५नियोगे तल्लक्षणे ६वाक्ये ७क्षेमचं॰। ८विष्णौ ९लाघवे १०कर्म्मणि त्रिका॰। ११गजभक्ष्यान्ने जटा॰। १२वैद्ये राजनि॰। १३अप्राप्तप्रापकरूपे वाक्यभेदे, व्याकरणोक्ते १४सूत्रभेदे। तत्र व्याकरणविधिर्निरूप्यते। "संज्ञा च परिभाषा च विधिर्नियम एव च। अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्" इति षड्विधभेदाः तत्र "तुल्यास्य प्रयत्नं सवर्णम्" पा॰ सवर्णसंज्ञा परिभाषा तच्छब्दे ४२४६पृ॰ उक्ता। अप्राप्तप्रापको विधिः यथा "अकः सवर्णे दीर्घः" पा॰ इत्यादि। अत्र सवर्णे परे पूर्वस्य दीर्घस्याप्राप्तेस्तत्प्रापकत्वात् तथात्वम्। स च द्विविधः वर्णोत्पादकोऽभावरूपश्च। तत्र वर्णोत्पादक उक्तः अभावोऽपि द्विविधः लोपरूपो निषेधरूपश्च तत्र "लोपोऽभ्यासस्यो" इति पा॰ नाशरूपः। "नाभ्यस्ताच्छतरित्यादौ" निषेधरूपः। सामान्यप्राप्तस्य विशेषावधारको नियमः यथा "रात्सस्यैव" पा॰ इत्यादि। अन्यधर्मस्यान्यत्रारोपविधिरतिदेशविधिः यथा पुंवद्भावादिः। पूर्वसिद्धस्वपटादेरन्यत्रोपस्थितिनिरधिकारविधिः। स च त्रिविधः "शिष्टावलोकितः कैश्चिन्मतस्तूक्तस्तथैव वा। गङ्गाप्रवाहवच्चापि स्यादधिकारस्त्रिधा मतः"। अधिकारशब्दे १२७पृ॰दृश्यम्। विधिश्च विनियोगरूपतया शब्दम॰ प्र॰ निरूपितो यथा

"नेह लक्षणात्मकं विधानम्। आख्यातमात्रस्य तद्बोधनसामर्थ्यात् किन्तु प्रवर्त्तकधिकीर्षायां यत्प्रकारकज्ञानस्य हेतुत्वं स तथा, तादृशस्तु क्षतिसाध्यत्वनिष्टसाधनत्वम् बलवदनिष्टानननुबन्धित्वञ्च प्रत्येकमेव, यागयाजकादिधर्मिकक्षतित्वेनैव यागादिधर्मिकधिकीर्षोत्पत्त्या तत्र प्रवृत्तेः। एवञ्च यजेतेत्यादौ यागः क्षतिसाध्यः इष्टसाधनं बलवदनिष्टानननुबन्धी चेत्याकारको बोधः" अधिकं तत्र दृश्यम्। मीमांसकमते विधिस्वरूपभेदादिकं खौगाक्षिभास्करेण दर्शितं यथा

"तत्राप्तातार्थज्ञापको वेदभागो विधिः। स च तादर्थ्यप्रयोजनवदर्थविधानेनार्थवान् तादर्थ्यं चार्थं प्रमाणान्तरेणाप्राप्तं विधत्ते। यथाग्निहोत्रं जुहुयात् स्वर्गकाम इति विधिर्नान्तरेणाप्राप्तस्वर्गप्रयोजनवद्धोमं विधत्ते। अग्निहोत्रहोमेन स्वर्गं भावयेदिति वाक्यार्थबोधः"। "यत्र कर्म्म प्रमानान्तरेण प्राप्तं, तत्र तदुद्देशेन गुणभावं विधत्ते। यथा दध्ना जुहोतीत्यत्र होमस्याग्निहोत्रं जुहुयादित्यनेन प्राप्तत्वाद्धोमोद्देशेन दध्नि भावविधानं दध्ना होमं भावयेदिति। यत्र तूभयमप्राप्तं तत्र विशिष्टं विधत्ते: यथा सोमेन यजेतेत्यत्र सोमयागयोरप्राप्तत्वात् सोमविशिष्टविधानम्। सोमपदे सत्यर्थलक्षणया सोमवता यागेनेष्टं भावयेदिति वाक्यार्थबोधः। न चोभयविधाने वाक्यभेदः प्रत्ये-

कसमवस्थाविधानात्। न च ज्योतिष्टोमेन स्वर्गकामो यजेतेति विधिप्राप्तोऽग्नेयेन सोमरूपसुखविधानमेवास्तु सोमेन यागं भावयेदिति, किं मत्वर्थलक्षणयेति वाच्यम्। तस्याधिकारविधित्वेनोत्पत्तिविधित्वासम्भवात्। ननूद्भिदा यजेत पशुकाम इत्यत्रेव ज्योतिष्टोमेनेत्यत्रापूत्पत्त्यधिकारविधित्वमस्त्विति चेन्न, इष्टाग्नौ उत्पत्तिवाक्यान्तराभावेनान्यथानुपपत्त्या तथात्वाश्रयणात्। किञ्च ज्योतिष्टोमेनेत्यत्रोभयविधित्वे तेनैव यागसम्बन्धोऽपि बोधनीय इति गुरुतरो वाक्यभेदस्तस्मात् सोमपदे मत्वर्थलक्षणया विशिष्टविधानम्। स च विधिश्चतुर्विधः उत्पत्तिविधिर्विनियोगविधिः, अधिकारविधिः, प्रयोगविधिश्चेति। तत्र कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः। यथाग्निहोत्रं जुहोतीति। अत्र च विधौ कर्मणः करणत्वेनान्वयः अग्निहोत्रहोमेनेष्टं भावयेदिति। ननु यागस्य हि रूपे द्रव्यं देवता च। तथाच रूपान्वये अग्निहोत्रं जुहोतीति कथमुत्पत्तिविधिः अग्निहोत्रपदस्य तु तत्प्रख्यन्यायेन नामधेयत्वादिति चेन्न, रूपान्वयेऽप्यङ्गोत्पत्तिविधित्वात्। अन्यथा रूपश्रवणाद्धा जुहोतीति अयमेवोत्पत्तिविधिः स्यात्। तथा चाग्निहोत्रं जुहोतीति वाक्यमनर्थकं स्यात्। अङ्गप्रधानसम्बन्धबोधको विधिर्विनियोगविधिः। यथा दध्ना जुहोतीति। स हि हुतीदध्या प्रतिपद्याङ्गभावं दध्ना होमसम्बन्धं विधत्ते दध्ना होमं भावयेदिति। गुणविधौ च धात्वर्थस्य साध्यत्वेनैवान्वयः। क्वचिदाश्रयत्वेनापि यथा दध्नेन्द्रियकामस्य जुह्वयादित्यत्र दधिकरणत्वेनेन्द्रियं भावयेत् तत्र किंनिमित्तमित्याकाङ्क्षायां सन्निधिप्राप्तहोम आश्रयत्वेनान्वेति। एतच्च विधेः षड्कारिभूतानि षट् प्रमाणानि श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्याश्चापि। एतत्षड्ङ्गतेनानेन विधिनाङ्गत्वं परोक्षेणमङ्गसंज्ञतिसाध्यत्वरूपं परार्थापरपर्यायं ज्ञाप्यते ततः तत्षड्विधारोपि श्रुत्यादीनि निरूपितानि तत्र श्रुत्यादीनि "तदेवं निरूपितानि सङ्क्षेपतः श्रुत्यादीनि षट् प्रमाणानि। एतत् षड्ङ्गतेन विनियोगविधिना दर्शादिभिरुक्तस्य "दर्शपूर्णमासाभ्यां यजेत" इत्येवं रूपेण यानि विनियोज्यानि तान्यङ्गानि द्विविधानि सिद्धरूपाणि, क्रियारूपाणि चेति। तत्र सिद्धानि आतिद्रव्यसंस्कारादीनि तानि च इष्टार्थान्येव। क्रियारूपाणि च द्विविधानि। गुणकर्माणि च प्रधानकर्माणि च। एतान्येव सन्निपत्योपकारकाणि आरादुपकारकाणीति चोच्यते। कर्माङ्गद्रव्यादुद्देशेन विधीयमानं कर्म सन्निपत्योपकारकम्। यथाऽवघातप्रोक्षणादि। तच्च इष्टार्थमदृष्टार्थं दृष्टादृष्टार्थं चेति। इष्टार्थमवघातादि। अदृष्टार्थं प्रोक्षणादि। दृष्टादृष्टार्थं पशुपुरोडाशादि। यद्वि द्रव्यत्यागांशेनैवादृष्टं देवतोद्देशेन च देवतास्मृत्यर्थं दृष्टं करोति। द्रव्यादनुद्दिश्य केवलं विधीयमानं कर्म त्वारादुपकारकम्। यथा प्रयाजादि। आरादुपकारकञ्च परमापूर्वोत्पत्तावेवोपयुज्यते। सन्निपत्योपकारकन्तु द्रव्यदेवतासंस्कारद्वारा यागस्वरूपेऽप्युपयुज्यते। दृष्टमेव चाश्रयिकर्मेत्युच्यते। तदेवं निरूपितः सङ्क्षेपतो विनियोगविधिः। प्रयोगप्राप्तुभावबोधको विधिः प्रयोगविधिः। स चाङ्गवाक्यैकतापन्नः प्रधानविधिरेव। स हि खलु प्रधानमनुष्ठापयन्विश्वजिन्न प्रमाणाभावादिति न्यायेन प्रयोगप्राप्तुभावं विधत्ते। न च तदविश्वजिन्नेऽपि प्रमाणाभाव इति वाच्यं विश्वजि स्वर्गप्रधानविध्येकवाक्यतावगततत्प्राप्तिस्वानुपपत्तिः विश्वजिन क्रियमाणयोः पदार्थयोः दृष्टमेव सङ्गतमिति साकाङ्क्षत्वव्यवहाराभावात्। स चाविश्वजि नियते क्रम आश्रियमाणे भवति। अन्यथा हि किमेतदनन्तरमेतत् कर्त्तव्यमेतदनन्तरं वेति प्रयोगविप्लवापत्तेः। अतः प्रयोगविधिरेव स्वविधेयप्रयोगप्राप्तुभावसिद्ध्यर्थं नियतं क्रममपि पदार्थविशेषत्वतया विधत्ते। अतएवाङ्गानां क्रमबोधको विधिः प्रयोगविधिरित्यपि लक्षणम्"।

"तदेवं संक्षेपतो निरूपितः षड्विध क्रमनिरूपणेन प्रयोगविधिः। कर्मजन्यफलस्वाम्यबोधकोविधिरधिकारविधिः। कर्मजन्यफलस्वाम्यं च कर्मजन्यफलभोक्तृत्वम्। स च यजेत स्वर्गकाम इत्यादिरूपः, स्वर्गमुद्दिश्य यागं विदधतानेन स्वर्गकामस्य यागजन्यफलभोक्तृत्वं प्रतिपाद्यते "यस्याग्निहोत्रमस्मिन्नहन्यहोऽस्मिन् जायतेऽष्टाकपालं पुरोडाशं निर्वपेत" इत्यादिना दाक्षायणे निमित्ते कर्म विदधता निमित्तवत कर्मजन्यापूर्वरूपफलस्वाम्यं प्रतिपाद्यते। एवम् "अक्षरशः सन्ध्यामुपासीत" इत्यादिना श्रुतिविहितकालशरीरिन सन्ध्योपासनाजन्यप्रत्यवायपरिहाररूपफलस्वाम्यं बोध्यते। तच्च फलस्वाम्यं तत्रैव योऽधिकारविधिः। अधिकारश्च स एव यद्विधिवाक्ये पुरुषविशेषत्वेन श्रूयते। यथा काम्ये कर्मणि फलकामना। नैमित्तिके कर्मणि निमित्तनियतः।

नित्ये सन्ध्योपासनादौ शुचिविहितकालजीवित्वम् अतएव "राजा राजसूयेन स्वाराज्यकामोयजेत" इत्यनेन विधिवाक्येन स्वाराज्यसहित्य राजसूयं विदधता न स्वाराज्यकाममात्रस्य फलभोक्तृत्वं प्रतिपाद्यते किन्तु राज्ञः अतः स्वाराज्यकामस्यैव राजसूयस्यापि अधिकारिविशेषणत्वेन अवगात्। किञ्चित् च पुरुषविशेषणत्वेनाश्रुतमप्यधिकारिविशेषणं यथाध्ययनविधिविहिता विद्या ऋत्विधीनामर्थज्ञानापेक्षत्वेनाध्ययनविधिविहितार्थज्ञानवन्तं प्रत्येव प्रवर्त्तते:। एवमग्निसाध्यकर्मसु आधानविहाग्निमन्ता अग्निसाध्यकर्मणामन्यापेक्षत्वेन तद्विधीनामाधानविहाग्निमन्तं प्रत्येव प्रवर्त्तते। एवं सामर्थ्यमपि आख्यातानामर्थं ब्रुवतां यक्तिः सत्कारिष्यतीति न्यायात् स मर्थं प्रत्येव विधिप्रवृत्तेः। तदेवं निरूपितो विधिः"। विधिरवायने च विधिभेदोऽन्यत्र दर्शितो यथा "विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति। तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते" तत्तच्छब्दे विशेषो द्रष्टव्यः। १२ अर्थालङ्कारभेदे च। अलङ्कारशब्दे ४०२५ पृ० दृश्यम्।

विधिज्ञ त्रि० विधिं क्रमं जानाति ज्ञा-क। विधानक्रमज्ञे।

विधित्सा स्त्री विधातुमिच्छा वि+धा-सन् भावे च। विधानेच्छायाम्।

विधिदेशक पु० विधिं विधानं दिशति दिश+ण्वुल्। विधिदर्शनि १सदृशे अमरः २गुरौ च।

विधिवत् अव्य० विधिमनतिक्रम्य विधि+वति। विध्यनुसारे

विधु पु० व्यध-कु। १चन्द्रे २सूर्य्ये ३विष्णौ मेदि०। ४नक्षत्रे शब्दर०। ५शत्रौ ६राक्षसे विश्वः। ७वायौ ८व्यधि च मेदिनी०।

विधुत त्रि० वि+धु-क्त १कम्पिते। २त्यक्ते च अमरः।

विधुनन न० वि+धु-णिच्-ल्युट्। चालने जटा०।

विधुन्तुद पु० विधुं तुदति तुद-खश् मुम् च। राहौ अमरः

विधुपिङ्गल पु० विधोः पिङ्गल इव। १खड्गे शब्दर०।

विधुर त्रि० विगता धूर्यस्य बहुव्री०। १विश्लिष्टे अमरः। २विकले च मेदि०। विगता धूः। ३वैकल्ये ४विश्लेषे च न० त्रिका०। ५रथाङ्गायां स्त्री मेदि०।

विधुवन न० वि+धु-ल्युट्। कम्पने अमरः।

विधूत त्रि० वि+धू-क्त। १कम्पिते २त्यक्ते च हेमच०। "विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम्" स्मृतिः।

विधेय त्रि० वि+धा-यत्। १विधातुं योग्ये २वशवर्त्तिनि आवश्यके अमरः। ३विधिना बोध्ये च। ४यद्यप्रकारतया शाब्दबोधे विशेषणविषयतायुते पदार्थे यथा पर्वतो वह्निमानित्यादौ वह्निर्विधेयः। पचतीत्यादौ पाक्षतिः आख्यातार्थश्च विधेयतयैव बोधस्वीकारात्। विधेयता च विशेषणविषयता अनुवाद्यनिष्ठा "अनुवादमनूद्य च न विधेयमुदीरयेत्" इति भाट्टनियमः। प्रत्यक्षादिप्रमितविशेष्यतावच्छेदकतानिष्ठा विशेष्यतानिरूपिता च वेद्यत्वे।

विधेयाविमर्श पु० विधेयस्याविमर्शो यत्र। अविमृष्टविधेयांशरूपे काव्यदोषभेदे दोषशब्दे ३७३२ पृ० तस्य स्वरूपादिकं दृश्यम्। [३०२ पृ० दृश्यम्।

विध्याभास पु० अर्थालङ्कारभेदे सा० द० अलङ्कारशब्दे

विध्वंस पु० वि+ध्वंस घञ्। नाशे।

विनत त्रि० वि+नम-क्त। १प्रणते २भुग्ने ३गणिते च मेदि०। गरुडमातरि ४कश्यपपत्नीभेदे ५पिटकाभेदे च स्त्री मेदि०। [नताल्लजादयोऽप्युभयत्र।

विनतासूनु पु० ६त०। १अरुणे २गरुडे च जटा०। वि-

विनद पु० विशेषेण नदति नद-अच्। (ज्ञातियान) हर्षे शब्दच०। [राजनि०।

विनस्मक न० विशेषेण नस्यमिव दृश्यते कन्। तगरवृक्षे

विनय पु० वि+नी-भावे अच्। १शिक्षायां २प्रणामे ३अनुनये च मेदि०। वि+नी-कर्त्तरि अच्। ४विनययुक्ते, जने, विनयश्चास्त्रज्ञानजन्यसंस्कारभेदः इन्द्रियसंयमो वा। ५निश्चले, ६क्षिप्रे, ७जितेन्द्रिये च। ८अधिगुणने पु० अमरः। ९दण्डे अव्य० त०। १०शास्त्रादौ स्त्री मेदि०।

विनयग्राहिन् त्रि० विनयं शिक्षां गृह्णाति ग्रह-णिनि। वचनस्थिते आयत्ते अमरः। स्त्रियां ङीप्।

विनयस्थ त्रि० विनये तिष्ठति स्था-क। वचनग्राहिणि आयत्ते हेमच०।

विनयन न० वि+नय-ल्युट्। १विनाशे। विनयन्ति अदर्शनं गच्छति सरस्वत्यत्र वि-नय+आधारे ल्युट्। २कुरुक्षेत्रस्थे तीर्थभेदे त्रिका०। "त्रिषवदुविन्ध्ययोर्मध्यं यत् प्राग् विनशनादपि" मनुः। स च सरस्वत्यन्तर्धानदेश एव प्रभासतीर्थसन्निहितनिषादपुरसमीपस्थः यथोक्तं भा० व० १३०अ०।

"एषा सरस्वती रम्या दिव्या लोकवती नदी। एतद्विनशनं नाम सरस्वत्या विशाम्पते!। द्वारं निषादराष्ट्रस्य येषां दोषात् सरस्वती। प्रविष्टा पृथिवीं वीर! सा निषादा हि

र्वा विदुः"। "शुक्लपक्षप्रथमायां दीक्षा सरस्वतीविनयने" काला०श्रौ० २३।५।१०। "सरस्वतीविनयने सरस्वती यस्मिन्प्रयुक्ते प्रभावे सारस्वतसत्त्वार्थं दीक्षा भवति" कर्कः "यत्र सरस्वत्यन्तर्भवति तद्विनयनमुच्यते इत्यग्निस्वामिनः। "सरस्वती नाम नदी प्लक्षप्रस्रोता प्रवहति तस्याः प्राग् परभागो सर्वलोकप्रत्यक्षो मध्यमस्तु भागो भूम्यन्तर्निसृत्य प्रवहति नाम्नो केनचिद् दृश्यते तद्विनयनमुच्यत" इति काला० १०।१५।। माधवाचार्यः।

विनष्ट त्रि० वि+नश-क्त। १विनाशप्रतियोगिनि २पतिते च "विनष्टे वाप्यसरसे पितर्युपरतस्पृहे" नारदः। "विनष्टे पतिते" दायभा०।

विना अव्य०वि+ना। १वर्जने २अन्तरेणेत्यर्थे च। इतरयोगे २द्वितीया तृतीया पञ्चमी च। [२रक्षिते च त्रिका०।

विनाकृत त्रि० विनेति कृतम् विना+कृ-क्त। १त्यक्ते

विनाडिका स्त्री विभक्ता नाडिका यया। "दश गुर्वक्षरः प्रायः षड्भिः प्राणैर्विनाडिका। तत्षष्ट्या तु भवेन्नाडी स्त्री० स्त्रि० उक्ते दण्डषष्टिभागात्मके घटरूपे काले।

विनायक पु० वि+नी-ण्वुल्। १गणेशे २बुद्धे अमरः ३विघ्ने ४गुरौ च। क्लीं० ५गरुडे मेदि०। ६गरुडपत्न्यां स्त्री शब्दमा० टाप् कापि अत इत्वम्।

विनायकश्च कर्मविघ्नसिद्ध्यर्थमीश्वरेण नियुक्तः देवभेदः यथोक्तं याज्ञवल्क्येन "विनायकः कर्मविघ्नसिद्ध्यर्थं विनियोजितः। गणानामाधिपत्ये च रुद्रेण ब्रह्मणा तथा "कर्मणां पुरुषार्थसाधनानां विघ्नसिद्ध्यर्थं फलसाधनत्वविघातसिद्ध्यर्थं नियोजितो नियुक्तः" मिता०। तेनोपसृष्टस्य लक्षणान्याह स एव "तेनोपसृष्टो यस्तस्य लक्षणानि निबोधत। अग्रेऽनमाक्षतेऽत्यर्थं जलं सृजति च मुञ्चति। कषायपाण्डुरश्चैव क्रव्यादांश्चाधिरोहति। अल्पजैर्गदभैरुष्ट्रैः सङ्कैलाबर्तिकाति। प्रजल्पति तथात्मानं मन्यतेऽनुगतं परैः" तस्य प्रत्यवायलक्षणान्याह स एव "विमना विफलारम्भः संशीतत्वनिमित्ततः। तेनोपसृष्टो लभते न राज्यं राजनन्दनः। कुमारी न च भर्तारमपत्यं गर्भमङ्गना। आचार्यत्वं श्रोत्रियत्वं न शिष्योऽध्ययनं तथा। वणिग्लाभं न चाप्नोति कृषिस्थापि फलोदयः" तन्निवारणविधिश्च तत्रोक्तो यथा। "विनायका विघ्नकारा महोत्साः" रघुनन्दनः।

विनारुहा स्त्री विना मूलं विना रोहति रुह-क। त्रिपर्णिकायां राजनि०।

विनाश पु० वि+नश-घञ्। १ध्वंसे २अदर्शने च।

विनाशोन्मुख त्रि० विनाशाय उन्मुख उद्यतः। १मरणप्राप्ते २पक्के च अमरः। [विधाने शब्दच०।

वि(वी)नाह पु० वि+नह-घञ् वा उपसर्गदीर्घः। कूपस्थ-

विनिद्र त्रि०विगता निद्रा यस्य। १प्रकाशिते शब्दमा०। २निद्राहीने च। तस्य भावः। त्व। विनिद्रत्व प्रबोधे न०हेमच०।

विनिपात पु० वि+नि+पत-घञ्। १निपाते २दैवादिकृते व्यसने मेदि० ३अपमाने च हेमच०।

विनिमय पु० वि+नि+मि-अच्। परिवर्त्ते १तुल्यद्रव्यदानेन द्रव्यान्तरग्रहणे शब्दच०। २सन्धौ च शब्दमा०।

विनियोग पु० वि+नि-युज-घञ्। क्रियासु प्रवर्त्तने "अनेनेदन्तु कर्त्तव्यं विनियोगः प्रकीर्त्तितः इत्युक्ते २अनुष्ठानक्रमविधाने च "आर्षं छन्दश्च दैवत्यं विनियोगस्तथैव चेति" योगियाज्ञ०। [देवगणभेदे पु० बाह्या०।

विनिर्भय त्रि० विनिर्गतं भयं यस्मात्। १भयशून्ये साध्य-

विनीत त्रि०वि+नी-क्त। १विनययुक्ते २कृतदण्डे ३शिष्टे अमरः ४अपनीते ५निष्टते च। ६जितेन्द्रिये ७शान्ते च मेदि०। ८शिक्षितार्थे अमरः। ९मदनवृक्षे च पु० १०शिक्षितदण्डादौ राजनि० ११वणिजि पु० मेदि०।

विनीय पु० वि+नी-क्यप्। १वस्त्रे २पापे च। क्यप् शिक्षणेत्यादार्थे अव्य०।

विनेट त्रि० वि+नी-टच्। १शिक्षके २नटे पु० मेदि०।

विनेय त्रि० वि+नी-यत्। १शिक्षणीये २प्राप्ये च।

विनोक्ति स्त्री अर्थालङ्कारभेदे अलङ्कारशब्दे ४०२पृ०दृश्यम्।

विनोद पु० वि+नुद-घञ्। १कौतुकहर्षे हर्षा०। २क्रीडायां २अवज्ञाने च। ४नटभेदे "दीर्घं त्रयोदशपदाः प्रसारतोद्वौ प्रथितौ। विनोद एव द्वाराणि त्रिंशत्कोष्ठद्वयं भवेत्" युक्तिक०।

विन्ध्य पु० विध-यत् पृषो० सम् च। १पर्वतभेदे अमरः। २व्याधे च। ३नवनीडजे स्त्री मेदि०। ४छन्दोभावां हेमच०। ५चावन्त्ये म्लेच्छभेदे पु० अतुविन्ध्यशब्दे १८५ पृ० दृश्यम्।

विन्ध्यवासिनी स्त्री विन्ध्येऽचले वसति वस-णिनि ङीप्। यशोदागर्भजातायां दुर्गायाम्। "कंसस्त्राकोऽपि तां (यशोदागर्भजकन्याम्) दृष्ट्वा विन्ध्ये वेगात्खगाम ह। तत्र गत्वा तयोवाच तिरश्चक्रे महाबले। पूज्यमाना सुरैर्नित्या ख्याता त्वं विन्ध्यवासिनी" वामनपु० ५अ०। "ततस्तौ नागमिथुनौ विन्ध्याचलनिवासिनौ" देवीभा०।

२व्याडिश्नौ पु० ७मत्त०। विन्ध्यप्रस्थोऽत्यत्र जटा०।

विन्ध्याचल पु० कर्म०। विन्ध्यपर्वते।

विन्ध्याटवी स्त्री विन्ध्यस्या अटवी। विन्ध्यपर्वतस्थे वनभेदे।

विन्ध्यावली स्त्री याचाहरमात्रि त्रिका०।

विन्न त्रि० विद्-कर्मणि क्त। १विचारिते २प्राप्ते अमरः। ३ज्ञाते ४क्षिप्ते च विश्वः। [मद्दत्त०।

विन्यास पु० वि+नि+अस-घञ्। १स्थापने २रचने तन्त्रोक्ते मन्त्रादुद्धारपूर्वकं हृदयादिषु अङ्गुल्यादीन्यर्पण-भेदे च।

विप क्षेपे चु० उभ० सक० सेट्। वेपयति-ते अवीविपत् त।

विपक्षिम त्रि० विपाकेन निर्वृत्तः वि+पच-क्त्रि मपच्। विपाकाधीनजाते "विपक्त्रिमज्ञानगतिर्मनस्वी" भट्टि।

विपक्ष त्रि०विरुद्धः पक्षो यस्य। १शत्रौ अमरः। २प्रतिकूल-पक्षावलम्बिनि च। विरुद्धः पक्षः प्रा० स०। २प्रतिकूले पक्षे विवादे अर्थिप्रत्युक्तिलक्षिते पक्षस्य विरुद्धे ४पक्षे च।

विपक्षी स्त्री वि+पच-अच् गौरा० ङीष्। १वीणायाम् अमरः। २केशे मेदि०। स्वार्थे क। विपक्षिका तत्रैव।

विपण पु० वि+पण-घञर्थे क। विक्रये अमरः।

विपणि(णी) पुंस्त्री० वि+पण-इन् स्त्रीत्वपक्षे वा ङीष्। १पण्यविक्रयशालायाम् (हाटचाला) २हट्टे च अमरः। क्रये मेदि०।

विपणिन् पु० वि+पण-णा०इनि। विक्रेतरि वंशजे जटा०

विपत्ति स्त्री वि+पद-क्तिन्। आपदि अमरः। २नाशे ३यातनायाञ्च मेदि०। "यस्मिन् राज्ञो गते भावो विपत्तिं यान्ति मानवाः" म० त०।

विपद पु० विरुद्धः पन्थाः अच्समा०। निन्दितमार्गे अमरः

विपद्(दा) स्त्री वि+पद-क्विप् वा टाप्। १विपत्तौ ज्यो० उक्ते जन्मतारातः क्रतीयदादशैकविंशतिसंख्याक नक्षत्रे च "विपत्तारे वधं दद्यात्" ज्यो०त०।

विपन्न त्रि० वि+पद-क्त। १विपद्युक्ते मेदि० २नष्टे च भट्टच०। ३मर्णे पुंस्त्री० मेदि० स्त्रियां ङीष्।

विपरीत त्रि०वि+परि+इण-क्त। १प्रतिकूले जटा०। २व्यत्यस्त-क्रमे च ३कामशास्त्रोक्तायां स्त्री ४नारीणां पुरुषाधिष्ठितरमणे नं "स-म्भोगकाले च यमं विपरीतरताद्वरम्" कर्पूरस्तवः। "पाद-मेकमूरौ कृत्वा द्वितीयं कटिसंस्थितम्। नारीषु रमते कामी विपरीतासु मन्मथ" रतिम० उक्ते ५रतिबन्धभेदे। संज्ञायां कन्। "पादमेकमूरौ कृत्वा द्वितीयं स्कन्धसंस्थि-तम्। कामिनीं कामयेद् कामी मन्मथः स्यात् विपरीतकः" स्मरदीपिकोक्ते रतिबन्धभेदे।

विपर्णक पु० विगतानि पर्णान्यस्य कप्। १पुष्पप्रधाने पलाशवृक्षे शब्दच०। २अल्पपत्रवति त्रि०।

विपर्यय पु० वि+परि+इण-अच्। व्यतिक्रमे। २अतस्मिं-स्तद्बुद्धौ च। पात० भाष्ये ३चित्तवृत्तिभेदे "विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्" पात० सू०।

"संशयस्यापि विपर्ययत्वमतद्रूपप्रतिष्ठानत्वात् तस्य तद्विकल्पाभावाभावगोचरतया एकांशे अतद्रूपप्रतिष्ठत्वान पायात्। स कस्मात् न प्रमाणम्?। यतः प्रमाणेन बा-ध्यते भूतार्थविषयत्वात् प्रमाणस्य, तत्र प्रमाणेन बाध-नमप्रमाणस्य दृष्टम्। तद्यथा द्विचन्द्रदर्शनं सद्विषयदर्शनेन चन्द्रदर्शनेन बाध्यते" भा०। "स च पञ्चविधः अविद्या-स्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः" पात० सू०। इति पञ्च विपर्ययाः। इत्यादि भा०। [इत्ये च

विपर्यस्त त्रि०वि+परि+अस-क्ते क। १व्यतिक्रान्ते २परा-

विपर्यास पु० वि+परि+अस-घञ्। १वैपरीत्ये २व्यति-क्रमे ३अतत्त्वेऽपे च। ४विपर्ययेऽर्थालं० च।

विपल न०विभक्तं फलं येन प्रा०ब०। फलषष्टिभागे कालभेदे। "खस्तटस्थपलं छिन्नं तत्संख्यं क्रमतः पलम्। विपलं च रवेर्भोग्यमेवं कल्पनमत्रभे"ज्यो०त०। [षष्ठिते अमरः।

विपश्चित् पु० विगतं चेतति वि+प्र+चित-क्विप् पृषो०।

विपाक पु० वि+पच-भावे घञ्। १पाके २स्वेदे च। कर्मणि घञ्। २कर्मफलपरिणामे जात्यायुर्भोगरूपे पदार्थे। "सति मूले तद्विपाको जात्यायुर्भोगाः" पात०सू० "क्लेशमूल क्लेशेषु (अविद्यादिषु) कर्माशयो विपाकारम्भी भवति नो-च्छिन्नक्लेशमूलोऽपि। यथैव खल्वमूलाः शालितण्डुलाः अदग्धबीजभावाः प्ररोहसमर्था भवन्ति नापनीततुषा-दग्धबीजभावा वा तथा क्लेशावनद्धः कर्माशयो विपाक-प्ररोही भवति नापनीतक्लेशो न प्रसंख्यानदग्धबीजभावो वेति। स च विपाकस्त्रिविधो जातिरायुर्भोगश्चेति"भा०।

विपाश्(शा) स्त्री विगतः पाशो यस्मिन्यस्याः। जलाशयख्याते नदीभेदे अमरः। विपाशयति विस्रब्धपाशं बध्नाति करोति विपाश+क्विप्-क्विप्। तत्रार्थे अमरः। तद्या-ख्यात्मकथा भा०आ०१७७अ०। "अथ पाशैस्तदात्मानं गाढं बद्ध्वा महामुनिः (वसिष्ठः) तस्या जले महानद्या निममज्ज दृढव्रतः। अथ छित्त्वा नदी पाशांस्तस्मात्तीरमवाहरत्।

स्वबलं तद्वधिं ज्ञात्वा विषादं समवाप्तवत् । उवाचतार ततः पार्थैर्विसृष्टः स महाबलिः । विषादेति च नामाख्यानवाचके महाबलिः" "शतकोटिविशालायुतः सिन्धु-नद्याः सुतीर्तं खलु खाडु सर्वांसवप्रम् । जलं निर्मलं दीपनं पाचनञ्च प्रदत्ते बलं बुद्धिमेधायुषञ्च राजनि० ।

विपिन न० वप-इनन् पृषो० । वने अमरः ।

विपुल त्रि० वि+पुल-विस्तारे क । १विस्तीर्णे अमरः । २अगाधे ३मेरुपरिमण्डले मधुरभेदे पु० मेदि० ४मेरौ ५हिमाचले च धरणिः । ६आर्य्यावृत्तछन्दोभेदे स्त्री । "संयुक्तौ गणसप्तमादिमं यदि लघोर्हर्योभवति पादः । यत्राक्षरं पिङ्गलनागो विपुलाभिति समाख्याति" ह० र० । विपुलाचलश्च मेरोर्दिक्स्थपर्वतभेदो यथोक्तम् विष्णुपु० "मेरोश्चतुर्दिशं तस्य नवयोजनविस्तृतम् । दलाद्रितं ब्रह्मभाग ! चत्वार उपपर्वताः । विष्कम्भा रचिता मेरो-र्योजनायुतसंख्यिताः । पूर्वेण मन्दरो नाम दक्षिणे गन्धमादनः । विपुलः पश्चिमे भागे सुपार्श्वश्च तथोत्तरे" तस्य शिखरत्वादिकं तत्रोक्तं यथा "सदश्वकेतुमाल्यूर्ध्वं जम्बूश्च विपुलोऽष्टमः । एते एव च । एकादशशतायामाः पादपा गिरिकेतवः । वनं चैत्ररथं पूर्वं दक्षिणा गन्धमादनम् २ । वैभ्राजं३ पश्चिमे तद्वदुत्तरे नन्दनं४ स्मृतम् । अरुणोदं५ महाभद्रं६ मानसं७ च सरोवरम् । सरांस्येव च चत्वारि देवभोग्यानि सर्वदा" । धान्यशैलश्च दर्भिते दानार्थं कल्पिते गिरिभेदे अतद्दानाख्यपर्वते हेमा० दा० ।

विपुलास्रव स्त्री विपुलं रक्तमास्रवति स्रा+स्रु-अच् । व्रतकुमारीवृक्षे राजनि० ।

विपूय पु० वि+पू-करणे नि० क्यप् । सङ्घे शब्दरत्ना० ।

विप्र पु० वप-रन् पृषो० यत इत्वम् वि+प्रा पूर्त्तौ-क वा । १ब्राह्मणे अमरः "जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते । विद्ययायाति विप्रत्वं त्रिभिः श्रोत्रियउच्यते" प्रा-वि०वाक्यम् २यज्ञिये राजनि० ३विशेषेण पूरके त्रि० ।

विप्रकार पु० वि+प्र+कृ-घञ् । १अपकारे अमरः । २तिरस्कारे हेमच० । [वञ्च । तुलसदृशे राजनि० ।

विप्रकाष्ठ न० विशेषेण प्राप्तिं प्रा-क विप्रं पूरकं काष्ठं

विप्रकर्ष पु० वि+प्र+कृष-घञ् । दूरत्वे हेमा० ।

विप्रकृत त्रि० वि+प्र+कृ-क्त । १उपकृते, २तिरस्कृते च "तस्मिन् विप्रकृताः काले कुमारः । [तत्रैवार्थे अमरः ।

विप्रकृष्ट त्रि० वि+प्र+कृष-क्त । दूरस्थे हेमा० । व्यवहिते च ।

विप्रकीर्त्ति पु० वि+प्र+कृत-क्विप् । दानवभेदे ।

विप्रतिपत्ति स्त्री वि+प्रति+पद-क्तिन् । १विरोधे "परस्परं मनुष्याणां स्वार्थे विप्रतिपत्तिषु" स्मृतिः । २संशयजनके वाक्ये "आकृतमेकार्थकं विप्रतिपत्तिः" गो० सू० व्याघातो विरोधोऽन्यतरभाव इति । व्याघातो विरोधे च दर्शनं नास्त्याक्षेपपरः" वा० भ० । ३विरुद्धकोटिद्वयोपस्थापके शब्दे च वादिना पर्वतो वह्निमान् प्रतिवादिना च पर्वतो वह्न्यभाववान् इति प्रतिपन्ने मध्यस्थस्य पर्वतो वह्निमान् नवेति संशय उदेति अतस्तस्य संशयव्याधायकत्वात्तथात्वम् । स च विरुद्धार्थप्रतिपादकवाक्यादवाक्षकः पर्वतो वह्निमानवेति संशयव्याधाकः । "विपरीतायां निन्दितायां च ४प्रतिपत्तौ ५विलक्षतायनूढे च "शब्देऽविप्रतिपत्तिः" कात्या० स्त्री० अप्रतिपत्तिरनूढः" प्रतिनिधिशब्दे ४४४२पृ० दृश्यम् । [विरोधे च ।

विप्रतिपन्न त्रि० वि+प्रति+पद-क्त । १संदेहयुक्ते २भ्रान्ते ।

विप्रति(ती)सार पु०वि+प्रति+सृ-घञ् वा दीर्घः । १अनुतापे, अनुशये, २रोषे च मेदि० ।

विप्रयुक्त त्रि०विप्र+युज-क्त । १वियुक्ते, २विरहिणि च ।

विप्रयोग पु० वि+प्र+युज-घञ् । १विप्रलम्भे अमरः । २विरोधे ३विसंवादे ४वियोगे च । ५रागिणोर्विच्छेदे ।

विप्रलब्ध त्रि० वि+प्र+लभ-क्त । वञ्चिते, हेमच० "प्रियः कृत्वाऽपि सङ्केतं यस्या नायाति सन्निधिम् । विप्रलब्धेति सा ज्ञेया" सा० द० उक्तलक्षणे नायिकाभेदे स्त्री ।

विप्रलम्भ पु०वि+प्र+लभ-घञ् सुम् च । १विसंवादे, २वञ्चने, ३विरहे च अमरः । "ऊनोरयुक्तयोर्भावो युक्तयोर्वाथ वा मिथः । अभीष्टालिङ्गनादीनामनवाप्तौ प्रकृष्यते । स विप्रलम्भो विज्ञेयः" उक्तलक्षणयुक्ते ४शृङ्गाररसभेदे ।

विप्रलाप पु० वि+प्र+लप-घञ् । १विरोधोक्तौ परस्परविरुद्धार्थकथने अमरः । २अनर्थकवाक्ये हेमच० ।

विप्रलोभिन् पु० विप्रलोभयति वि+प्र+लुभ+णिच्-णिनि । किंकिरातवृक्षे, अशोकवृक्षे । राजनि० ।

विप्रस्त्रिका स्त्री विशेषेण प्रस्त्रायते ५त० कप् यत इत्वम् । दैवज्ञायां स्त्रियाम् अमरः । [धीमतायाम् ।

विप्रसात् अव्य०विप्रस्याधीनं करोति विप्र+सात् । विप्रस्व

विप्रस्व न० क्त० । विप्रस्वामिके धने ।

विप्रिय पु० विरुद्धं प्रियं वि+प्री-क वा । १अपराधे हेमच० । २अप्रिये च "कृतवानस्मि विप्रियं न मे" कुमारः आदि० ब० । विगतप्रिये त्रि० ।

विप्रुष् स्त्री० ब० व०वि+प्रुष-क्विप्। १बिन्दुषु २वेदपाठकाले तच्चनिर्गतजलबिन्दुषु अमरः।
"अक्षिका विप्रुषच्छाया गौरत्वः सूर्यरश्मयः। रजो भूर्भुवस्तस्मिन् सर्वमेध्यानि निर्दिशेत्" शु०त०। आचमनकाले तच्चनिःसृतानां तासां नोच्छिष्टदोषजनकता यथाह "नोच्छिष्टं दूषयन्ते तच्छा विप्रोऽङ्गं नवन्ति याः। टन्नवत् दन्तलग्नेषु जिह्वाग्रेणैऽशुचिर्भवेत्" कूर्म०उ० २अ०।

विप्रोषित त्रि० वि+प्र+वस-क्त। मतप्रवासे।

विप्लव पु० वि+प्लु-अप्। १परचक्रपतिराजादितो भये २राष्ट्रोपद्रवे च अमरः। [स्रावे च।

विप्लाव पु०वि+प्लु-घञ्। अवस्रे १गतिभेदे २अवनात् जलविप्लुत त्रि०वि+प्लु-क्त। १व्यवनयुक्ते क्षेत्रच० २अपद्रुते च "अविप्लुतब्रह्मचर्य्यः" स्मृतिः। [तत्कर्त्री स्त्री० राजनि०।

विफल त्रि०विगतं फलमस्य। १निरर्थके २फलरहिते च १क्षेविबध पु० विगतो बधो हननं गतिर्यस्मात्। षष्ठ्यन्तधात्वन्तरशब्दादौ "निरुद्धविबधाहारेति"ति माघः प्रयो०। दोषः बीबध तत्रार्थे विश्वः। [कारके रोगभेदे अमरः।

विबन्ध पु० विबध्नाति अनेन वि+बन्ध-घञ्। अवबन्ध।

विबुध पु० वि+बुध-क। १पण्डिते मेदि० २देवे अमरः "विबुधवन्द्यः" भट्टिः। ३चन्द्रे च हेमच०।

विभक्त त्रि० वि+भज-क्त। १पृथक्कृते २विभिन्ने कृतविभागे च ३भावे क्त। २विभागे ३भेदे न०। "पञ्चमी विभक्ते"ति पा०। यस्य विभागः कृतः पूर्वाढ्ये धने "अविभक्तं स्थावरं यत् सर्वेषामेव तत् भवेत्। विभक्तं स्थावरं पित्रा स्वोपार्जितमेव वा" याज्ञ० मान्योदर्थैः कथञ्चन वचनम्। तदुक्तादि अच्। येन धनस्य विभागःकृतस्तस्मिन् दूजने तत्। विभक्तधर्मादिकं दायभागादौ दर्शितं यथा
"भ्रातॄणां चौरतो पित्रोः सङ्गवासो विधीयते। तदभावे विभक्तानां धर्मस्तेषां विधीयते" "विभक्तानां समस्तधनेन वैदिकस्मार्त्तधर्मत्वेन तदुक्तिः" दाय०त० रघु०। "दानग्रहणपक्षत्यागदक्षेत्रपरिपक्षाः। विभक्तानां पृथग् ज्ञेयाः पाकधर्मागमव्ययाः। याज्ञिकं प्रातिभाव्यञ्च दानं ग्रहणमेव च। विभक्ता भ्रातरः कुर्युर्नाविभक्ताः परस्परम्। तेषामेताः क्रिया लोके प्रवर्त्तन्ते पृथक्पृथक्। विभक्तानवमन्यैव युर्ज्येष्ठमध्यमान्रेव तान्" नारदः "भ्रातृणामप्य दत्त्वाऽन्यः पित्रः पुत्रस्य चैव हि। प्रातिभाव्यञ्च साक्षित्वमविभक्ते न तद् भवेत्" याज्ञ०। "वस्तूनामविभक्तानां भोगं नैव प्रदापयेत्" वाच०। "भ्रातृणामविभक्तानामेको धर्मं प्रवर्त्तते। विभागे सति धर्मोऽपि भवेत् तेषां पृथक् पृथक्" वाच०। "अविभक्ता विभक्ता वा कुर्युः श्राद्धन्तु दैविकम्। मयाऽपि च तवान्यत्र नाधिकारः पृथग् विना" श्रा० त० धृतवचनम्। "बहवः सुतदा पुत्राः पितुरेकत्वयोगिनः। सर्वेषां तु मतं कृत्वा ज्येष्ठेनैव तु यत् कृतम्। ब्रह्मेच्छाविभक्तेन सर्वैरेव कृतं भवेत्" शु० त०। "अविभक्ता विभक्ता वा सपिण्डाः स्थावरे समाः। एको ह्यनीशः सर्वत्र दानाधमनविक्रये" नारदः। "एतत् दृष्टं तत्पुरुषविक्रयविषयमिति" दाय०त० रघु०।

विभक्ति स्त्री वि+भज-क्तिन्। १विभागे "संख्यातव्याप्य सामान्ये शक्तिमान् प्रत्ययस्तु यः। सा विभक्तिर्द्विधा प्रोक्ता सुप् तिङ् चेति प्रभेदतः" ग०ग०प०शक्तिवादे २प्रत्ययभेदे च। "सदसं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु" "विशेष्यस्यैव यल्लिङ्गं विभक्तिवचने च। ये तानि सर्वाणि योज्यानि विशेषणपदैरपि" श्रा० का०।

विभव पु० वि+भू-अच्। १धने २मोक्षे सर्वमूर्त्तसंयोगरूपे ३ऐश्वर्य्ये मेदि०। अतिसंवत्सरमध्ये "क्षेमं क्षेमं सदारोग्यं सर्वे व्याधिविवर्जिताः। प्रयान्ति मानवास्तत्र यत्रयत्रा वसन्वराः। पुत्राः पुत्राः जनाः सर्वे विभवेऽहे वरानने!" इत्युक्तफलदे ४वर्षभेदे पु०।

विभा स्त्री वि+भा-क्विप्। १किरणे हेमच० २शोभायां ३प्रकाशे च राजनि०।

विभाकर पु० विभां प्रकाशं करोति कृ-अच्। १सूर्य्ये २अर्कवृक्षे च। ३चित्रकवृक्षे अमरः ४अग्नौ मेदि०।

विभाग पु० वि+भज-भावे घञ्। १भागे पूर्वस्वामिस्वत्वनाशोत्तरं तत्सम्बन्धाधीनस्वातन्त्र्यत्व २व्यक्षेत्रे व्यापारभेदे दायभागादि। सामान्यधर्मयुतानां बहूनां परस्परविरुद्धतद्व्याप्यधर्म प्रकारेण प्रतिपादने शीकरणः। वैशेषिकोक्ते ४गुणभेदे तल्लक्षणविभागादि कथा० क्ष०। ३० दर्शितं यथा
"एतेन विभागो व्याख्यातः" कणा० सू०। "विभागे संयोगोत्पत्तिप्रकारमतिदिशन्नाह संयोगवद्विभागोऽप्यन्यतरकर्मज १उभयकर्मजो २विभागश्च ३शब्दनकर्मजाश्चाणुशब्देनविभागः १संयुक्तयोर्मूलयोर्मूलयोर्वा कर्मभ्यां तद्भवविभागः २शाखायं कर्मोत्पन्नव्यवच्छिन्नशाखोत्पत्तिवत् अवयवीयान्तरानारभात् तदुक्तं "संयोगविभागयोरन्यत्वेऽकारणं कर्म इति विभागे जननीये आत्मवः संयोगविभागयोरन्यत्वेऽकारणं कर्म इति विभागे जननीये आत्मवः

योगे च जनकीये पूर्वसंयोगनाशस्यापेक्षणीय इति चेन्न क्षीतक्षणनन्तरोत्पत्तिकभावभूतानपेक्षत्वस्य कर्मणो निरपेक्षत्वात्। विभागजस्तु विभागो द्विविधः कारणमात्रविभागजकारणाकारणविभागभेदात् कारणाकारणविभागजकार्यकार्यविभागभेदाच्च तत्र कारणमात्रविभागात् कारणाकारणविभागो यथा कपालद्वयविभागात् कपालाकाशविभागः। कारणाकारणविभागाच्च कार्यकार्यविभागो यथाऽङ्गुलीतरुविभागाद्धस्ततरुविभागतः शरीरतरुविभाग इति। ननु विभाग एव न प्रमाणं संयोगाभाव एव विभागव्यवहारादिति चेन्न संयोगाभावोऽत्यन्ताभावश्चेत् शुषकर्मणोरपि विभागव्यवहारप्रसङ्गात् द्रव्ययोर्वर्त्तमानः संयोगात्यन्ताभावो विभक्तप्रत्ययहेतुरिति चेदवयवावयविनोरपि प्रसङ्गात् स्वकार्यकारणभूतयोर्द्रव्ययोरिति चेत् विद्यद्विभवतोरपि स्यात् भवत्येव तत्रेति चेन्न क्वान्तस्य शुषकर्मणोरपि भावात् कस्यान्यमधिकृत्य व्यवहारस्य चिन्त्यमानत्वात् संयोगविनाशो विभाग इति चेत् एकतरसंयोगिनाशेन नष्टे संयोगे तद्व्यवहारप्रसङ्गात् संयोगिनोर्विद्यमानयोरिति चेत् एकसंयोगनाशानन्तरं पुनः संयुक्तयोः कुवलामलकयोः संयोगदशायामपि विभक्तप्रत्ययप्रसङ्गात् यावत्संयोगनाशस्तावेति चिरैकसंयोगनाशे तदभावप्रसङ्गात् तत्र यावदर्थाभावात्। तस्मादस्ति विभागोऽर्थान्तरम् स च शुषः विरोधिशुणान्तरनाश्यः विरोधिनं समानाधिकरणं शुणमन्तरेण सत्त्वाच्चे शुणनाशानुपपत्तेः कर्मैव संयोगनाशकं स्यादिति चेन्न विरोधिनो शुणस्य शुणनाशकत्वात्। किञ्च यत्राङ्गुलीहस्तभुजशरीराणां स्वस्वकर्मणा तरुसंयोगसत्त्वाङ्गुलीमात्रे सत्त्वप्रत्येन कर्मणाऽङ्गुलीतरुसंयोगनाशसम्भवेऽपि हस्ततरुभुजतरुशरीरतरुसंयोगानामनाशप्रसङ्गात् हस्तादीनामक्रियत्वात् अङ्गुलीकर्मणश्च अधिकरणत्वात् व्यधिकरणस्यापि कर्मणः संयोगनाशकत्वे क्वचिदप्युत्पन्नेन कर्मणा युगपदेव सर्वसंयोगनाशापत्तेः। स्वन्यत्र तत्र का गतिरिति चेत् अङ्गुलीतरुविभागेन जनितो हस्ततरुविभागो हस्ततरुसंयोगनाशक इष्टव्य एवमभ्युपगमात्। व्यधिकरणेनाङ्गुलीकर्मणैव हस्ततरुसंयोगनाशोऽस्तु न चातिप्रसङ्गः आश्रयाश्रितपरम्परासंयोगस्यैव व्यधिकरणकर्मनाश्यत्वाभ्युपगमादिति सर्वत्रेन यदुक्तं तदपि न युक्तं विरोधिनः शुणाधिकरणस्यैव शुणस्य नाशकत्वानुभवात् बाधकमन्तरेण तदपरित्यागानुपपत्तेः। यद्यविभागो न विभागकार्यो तत्र विभागस्य शब्दासमवायिकारणत्वेन श्रुत्यभावे न हि शंखे पाटप्रभाने दले च परस्परसंयोगवति देशान्तरे चोपरिलभ्यमाने यः शब्दोत्पद्यते तत्र देशकालविभागादन्य दृश्यमवयविकारणं पश्यामः। न च दण्डेन तदवयवेषु क्षुब्धेषु शुषोत्पादे विभागातिरिक्तमसमवायिकारणं पश्यामः। कारणाकारणविभागात्तु कार्यकार्यविभागमनुमन्यामहे कथमन्यथा स्वस्वकर्मजनिताङ्गुलीतरुसंयोगमूलतरुसंयोगशरीरतरुसंयोगानामङ्गुलीमात्रोत्पन्नकर्मणाऽङ्गुलीतरुविभागे सति अङ्गुलीतरुसंयोगनाशे सत्यपि हस्ततरुसंयोगादीनां नाशः तत्र हि विभागजविभागपरम्परयैव तत्तत्संयोगनाशिकेत्युक्तत्वात् कारणद्रव्यविभागपूर्वके तु कारणाकारणविभागे न संशयः यतोऽवयवे यदुत्पन्नं कर्म तेन देशान्तरविभागदाकाशादिविभागस्यापि जननसम्भवात् यावद्भिः कर्मभिर्यत् संयुक्तमासीत् तावद्भिस्तत्कर्मभ्यो विभागस्य दर्शनात् नह्यङ्गुल्यसंयुक्तेन कर्मणाऽङ्गुल्यन्तरविभागदाकाशादिदेशेभ्योऽपि विभागो न जायते। कमलदले चोत्पन्नेन कर्मणा देशान्तरविभागदाकाशादिदेशेभ्यो वा न विभागो वारभ्यते द्रव्यारम्भकसंयोगाविरोधिनः शतमपि विभागानेकं कर्मारभताम्। यत्तु कर्म द्रव्यारम्भकसंयोगविरोधिनं विभागमारभते न तत् द्रव्यारम्भकसंयोगाविरोधिनमपि यच्च द्रव्यारम्भकसंयोगाविरोधिनं तद् द्रव्यारम्भकसंयोगविरोधिनमिति ब्रूमः। कुत एतदिति चेत् कार्यवैचित्र्येण कारणवैचित्र्यानुमानात्। ननु कर्मण्यपि वैचित्र्यमवश्यं तथाचैकं कर्म द्रव्यारम्भकसंयोगविरोधिनं विभागं जनयतु यथा विवक्षितं कमलकुवलादावपरत्र द्रव्यारम्भकसंयोगविरोधिनमविरोधिनञ्चोभयमिति मैवं कार्यविरोधो हि कारणवैचित्र्यकल्पनामूलं स च विरोधः एकस्य द्रव्यारम्भकसंयोगप्रतिबन्धित्वेन परस्य तु तदप्रतिबन्धित्वेनेति तत्रैव वैचित्र्यानुपपत्तिकल्पनौचित्यात् तच्चेदं संपद्यते वर्त्तमानं कर्म द्रव्यविभागमात्रं जनयति स च विभागोऽन्ये आकाशादिदेशादिभागं द्रव्यारम्भकसंयोगाप्रतिबन्धिनं विभागमारभते तच्च निरपेक्षस्य विभागजनने कर्मत्वापत्तिरिति द्रव्यमात्रविशिष्टं कालमपेक्षते। ननु तदानीमपि कर्मैव तज्जनयतु अतीतकालत्वात् विभागजनने कर्मणः क्षीतक्षणानन्तर एव काले सत्त्वं विभागेन जनिते विभागान्तरे कर्म

प्रदेशान्तरसंयोगमपि न जनयेत्, न संयोगजनं प्रति कर्मणोऽनपेक्षत्वात् स्वयं कर्म न नश्येदेव ततोऽन्तरसंयोगमात्रनाशकत्वात् । सोऽयं विभाग उत्तरसंयोगनाशकः स्वप्रत्यवायी कचिदारम्भनाशकः तद्यथा तन्तोरवयवेऽशौ कर्म तदनन्तरमंशुद्वयविभागकदेव स्वस्मिन् कर्म ततोऽंशुद्वयविभागेन स्वारम्भकसंयोगनाशकत्वात्तन्तुकर्मणा च विभागसतो द्व्यारम्भकसंयोगनाशात्तन्तुकर्मणो नाशकत्वाभावाच्च स्वस्मिन्कर्मजत्वविभागनाशः । स्वेवं स्वस्मिन्नोत्पन्नस्य कर्मणो न नाशः कादिनाशकाभावात्, उत्तरसंयोगेन हि स्वाश्रयेऽवयविभागे च नष्टे नोत्तरसंयोग इति चेन्न तन्तौ यत् कर्मोत्पन्नं तेन यथा विनाश्यद्रव्यस्यान्तोविभागो जनितस्तथा तदंशोरपि विभागो जननीयः सोऽप्यारम्भकसंयोगविरोध्येव तेनांशुतन्तुविभागेन स्वाकाशविभागरूपेण चोत्तरसंयोगरूपेण ततः कर्मनाशः । यदा यत्र तन्तौ यदा कर्म तदंशावपि तदैव कर्म तच्च कर्मविनाश्यद्रव्यस्यान्तुनदव्यकाकाशादिदेशाद्युगपदेव विभागानारभते सर्वेषां विभागानारम्भकसंयोगविरोधित्वात् तथा च कारणंशुकारणशून्याकाशादि तद्विभागात् कार्यशून्ये तन्तोरकार्येणाकाशादिना यो विभाग उत्पद्यते तदनन्तरोत्पत्तिकेन संयोगेन तन्तुरूपमवेतस्य कर्मणो विनाश इति । कचिद्द्वाभ्यां तद् यथा तन्तुवीरणयोः संयोगे सति स्वावयवेऽशौ कर्म वीरणे च कर्मैतेकः कालः अंशुकर्मणाऽन्तरविभागजेन च संयोगेन स्वारम्भकस्य विनाशः वीरणकर्मणा च तन्तुवीरणविभागजतन्तुवीरणसंयोगनाशेन स्वारम्भकसंयोगनाशानन्तरं तन्तुनाशजतन्तुवीरणसंयोगनाशानन्तरं वीरणस्य प्रदेशान्तरसंयोगकाभ्यामाश्रयनाशसंयोगाभ्यां विभागनाशः" उप० वृत्तिः । कर्मणि घञ् । ५त्यागे रुद्रे च ।

विभज्य त्रि० विभक्तुमर्हति वि+भज-ऋहेंऽर्थे ण्यत् । विभागयोग्ये विभजनीये धनादौ ।

"कुले विभीतविद्यानां ज्ञातृणां पितृतोऽपि वा । शौर्यप्राप्तं तु यद्वित्तं विभाज्यं तद्दृढ़स्मृतिः" ।

विभाण्डक पु० ऋष्यशृङ्गपितरि मुनिभेदे रामा० ।

विभाण्डी स्त्री० विभाण्डक+गौरा० ङीष् । आवर्त्तकीलतायां राजनि० ।

विभात न० वि+भा-क्त । प्रभाते शब्दरत्ना० ।

विभाव पु० वि+भू-घञ् । १परिणये रुद्रटालङ्कारोक्ते रसकोद्दीपके २आलम्बनादौ "रत्यादुद्बोधकाश्चोक्ता विभावाः काव्यनाट्ययोः । आलम्बनोद्दीपनाख्यौ तस्य भेदाविमौ स्मृताः" । ये हि लोके रामादिगतरतिहासादीनामुद्बोधकारणानि सीतादयस्त एव काव्ये नाट्ये च निवेशिताः सन्तः विभाव्यन्ते आस्वादाङ्कुरप्रादुर्भावयोग्याः क्रियन्ते रामालिङ्गनादिभावा एभिरिति विभावा उच्यन्ते" सा० द० ३५० ।

"विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा" सा०३५० ।

विभावना स्त्री अर्थालङ्कारभेदे अलङ्कारशब्दे ३०४३ पृ० दृश्यम् ।

विभावरी स्त्री वि+भा-वनिप् ङीप् वनो र च । १रात्रौ अमरः । २हरिद्रायां २कृष्णत्रिवृति ४वल्कयोषिति ५चिरादवस्थितवस्तुनां मेदि० ।६सुन्दरस्त्रियाम् शब्दर० ७मेदाख्ये च रत्नमा० ।

विभावसु विभायुक्ता वसवोऽस्य । १सूर्ये २वह्नौ ३वह्नौ चित्रकवृक्षे अमरः । ५चन्द्रे ६ज्ञानभेदे च हेमच० ।

विभाषा स्त्री विरुद्धा भाषा वि+भाष-अ वा । व्याकरणोक्ते पाक्षिकप्राप्तिफलके "नवेति विभाषा" इत्युक्तलक्षणे विकल्पविधाने । [भक्ते च ।

विभिन्न त्रि० वि+भिद-क्त । १प्रकाशिते २विदलिते ३विभीतक पु० विशेषेण भीत एव दृश्यते कन् । (बयड़ा) वृक्षे अमरः । "विभीतकं स्वादुपाकं कषायं कफपित्तहृत् । उष्णवीर्यं हिमस्पर्शं भेदनं बालनाशनम् । कृष्णं नेत्रहितं केश्यं कृमिवैस्वर्यनाशनम् । विभीतमज्जा तृड्दर्दि कफवातहरो लघुः । कषायो मदजनाय धात्री मज्जापि तद्गुणः" भावप्र० । काभावे विभीतोऽप्यत्र ।

विभीषण पु० विशेषेण भीष्यते शत्रून् भी-णिच्-ल्युट् च ल्यु । १रावणभ्रातरि राक्षसे रामा० । २नलतृणे राजनि० ३भयकारके त्रि० । [ल्युट् । भयप्रदर्शने

विभीषिका स्त्री वि+भी-णिच्-ण्वुल् च धात्वर्थनिर्देशे

विभु पु० वि+भू-डु । सर्वमूर्त्तसंयुक्ते १आत्मादौ २महादेवे ३ब्रह्मणि च मेदि० ४भल्ले त्रिका० । ५विष्णौ शब्दमा० ६व्यापके ७नित्ये दत्तर्हरे हेमच० ।८हरे त्रि० अजयः । १०परमकृष्णयुते वि० हला० ।

विभूति स्त्री वि+भू-क्तिन् । १ऐश्वर्ये "अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा । ईशित्वं च वशित्वञ्च तथा कामावसायिता" इत्युक्ते २ऐश्वर्ये च । ऐश्वर्यशब्दे १५४६ पृ० दृश्यम् ।

विभूषा स्त्री वि+भूष-अ । १शोभायां हेमच० २भूषणे च ।

विभ्रम पु० वि+भ्रम-घञ्। १स्त्रीणां शृङ्गाराङ्गे चेष्टाभेदे "विभ्रमस्त्वरयाऽऽकाले भूषास्थानविपर्ययः" इत्युक्ते २त्वरया भूषास्थानवैपरीत्ये च "यस्मात्सारो विभ्रमस्खलनानाम्" कुमारः। विशेषेण ३भ्रान्तौ मेदि० ४शोभायां ५सन्देहे हेमच०। ७भ्रमणे शब्दरत्ना०। "चित्तदत्त्यनवस्थानं शृङ्गारात् विभ्रमो भवेत्" उक्ते ८शृङ्गाराच्चित्तदत्त्यनवस्थाने। "क्रोधं स्थितञ्च कुसुमाभरणादि याच्ञा तद्दर्जनञ्च सहसैव विमर्दनञ्च। आक्षिप्य दानवचनं जघनं सखीभिर्निष्कारणोत्थितगतं वद विभ्रमं तत्" इत्युक्ते स्त्रीणां ९चेष्टाभेदे च। भावे घञ्। १वार्द्धक्यावस्थायां स्त्री शब्दरत्ना०।

विभ्राज् त्रि० वि+भ्राज-क्विप्। भूषणादिना दीप्ते अमरः

विमत त्रि० वि+मन-क्त। विरुद्धमतियुक्ते १विषमे २सन्दिग्धे च। [व्याकुलचित्ते अमरः।

विमनस्(स्क) त्रि० विक्षिप्तं मनो यस्य वा कप्। चिन्तादिना

विमर्द पु० विमृद्यतेऽसौ वि+मृद-घञ्। (कालकासुन्दिया) १वृक्षे रत्नमा०। संज्ञायां कन्। चक्रमर्दके राजनि०। भावे घञ्। २मर्दने शुक्रकृ० आदिमर्दने च।

विमर्शन न० वि+मृश-ल्युट्। १परामर्शे न्यायोक्ते साध्यव्याप्यहेतुमत्त्वेन पक्षनिश्चये २वितर्के च हेम०। घञ् विमर्श तत्रैवार्थे पु०।

विमर्ष पु० वि+मृष-घञ्। १विचारे जटा० २नाटकाङ्गसन्धिभेदे च। स च "अन्तरैकार्थसम्बन्धः सन्धिरेकान्वये सति। सुखं प्रतिमुखं गर्भो विमर्श उपसंहृतिः। इति पञ्चास्य भेदाः स्युः क्रमात्तत्त्वमुच्यते" इति विभज्य "यत्र मुख्यफलोपाय उद्भिन्नो गर्भतोऽधिकः। भावादीः सान्तरावत्र स विमर्श इति स्मृतः" इति सा० द० लक्षितः। तदङ्गानि च तत्रोक्तानि यथा "अपवादोऽथ सम्फेटो व्यवसायोद्रवोद्भुतिः। शक्तिः-प्रसङ्गखेदश्च प्रतिषेधो विरोधनम्। प्ररोचना प्रहर्षश्च आदानं छादनं तथा"।

विमल त्रि० विगतो मलो यस्मात्। १स्वच्छे निर्मले अमरः। विगतो मलो यस्याः ५ब०। (चामकचा) २सप्तलायाम् अमरः। जगन्नाथक्षेत्रस्थे ३देवीभेदे स्त्री तन्त्रसा०। ४दुर्गामूर्त्तिभेदे देवीपु०। ५उपरसभेदे न० राजनि०। ६जिनदेवे पु० ७चारुणि त्रि० शब्दर०। "चेतसा सत्त्वयुक्तेन दानं यद्दु विमलं स्मृतम्" गरुडपु० उक्ते ८सात्त्विके दानभेदे न०।

विमात स्त्री विरुद्धा माता। मातृसपत्न्याम्। "मातुः पितुः कनीयांसं न नमेदयसाधिकः। नमस्कुर्यात् गुरोः पत्नीं भ्रातृजायां विमातरम्" म० त० स्मृतिः। तत्रैव कूर्मपुराणे "स्त्रियो नमस्या हृद्याश्च वयसा पतयो न ताः"। "यतः पतयो वयसा ताः स्त्रियो हृद्याः अतः कनिष्ठा अपि अपि नमस्याः" म०त०रघु०। [अमरः।

विमातृज पु० विमातुर्जायते जन-ड। सापत्ने भ्रातरि

विमान पुंन० वि+मन-घञ् वि+मा-ल्युट् वा। १देवयाने रथे अमरः। २सार्वभौमभद्रहस्तिभेदे च ३यानमात्रे ४अभ्रे पु० मेदि० ५परिमाणे च न०।

विमार्ग पु० विरुद्धो मार्गः। १कुपथे २निन्दिताचारे च।

विमुख त्रि० विरुद्धमनसः कूलं मुखमस्य। १वक्रितमुखे २निहते च

विमुद् त्रि० विगता मुद्रा हर्षलोभादयो यस्य। १विकसिते हेमच०। २मुद्रारहिते च।

विम्ब पुंन०। वी+बन्-मुम्हुस्वौ। १दर्पणादौ भासमानप्रतिबिम्बाधारे २कमण्डलौ च संक्षिप्तसा०। ३सूर्यादिमण्डले अमरः। ४लज्जासे पुंस्त्री०मेदि०स्त्रियां ङीष्। विम्बायाः फलम् अण् तस्य लुप्। ५विम्बिकाफले न०।

विम्बजा स्त्री विम्बं फलं जायतेऽस्याः जन-ड ३वि०म्बिकातुल्यतायां (तेलाकुचा) शब्दच०।

विम्बट पु० विम्बमटति अट-अच् शक०। सूर्य्ये शब्दच०।

विम्बा(म्बी) स्त्री विम्बमस्त्यस्याः अच् वा गौरा० ङीष्। (तेलाकुचा) १लतामेदे शब्दर० "विम्बीफलं स्वादु शीतं गुरु पित्तास्रवातजित्। स्वप्ननं लेखनं रूक्ष्यं विस्म्बाघ्नानकारकम्" भावप्र०। स्वार्थे क कापि अत इत्त्वम् तत्रार्थे। सूर्य्यादिमण्डले पु०न० नात इत्त्वम्।

वियत् न० वि+यम-क्विप् मलोपे तुक्। आकाशे अमरः।

वियद्गङ्गा स्त्री वियत्स्था गङ्गा शाक०। खगगङ्गायां मन्दाकिन्याम् अमरः।

वियद्भूति स्त्री वियतो भूतिरिव। अन्धकारे त्रिका०।

वियन्मणि पु० वियतो मणिरिव प्रकाशकत्वात् भूषकत्वाद्वा। द्युमणौ सूर्य्ये शब्दर०।

वियम पु० वि+यम-घञ्। १संयमे अमरः। २दुःखे क्षीरस्वामी। पक्षे दृद्धिः। वियाम तत्रार्थे।

वियात त्रि० वि+या-क्त यातेः अच् वा। १भ्रष्टे २निर्लज्जे च अमरः। तस्य भावः ष्यञ्। वैयात्य निर्लज्जत्वे न० "वैयात्यं सुरतेष्वपि" माघः।

वियोग पु० वि+युज-घञ्। १विच्छेदे हेमच० ३त०

२पक्षियोगे च मेदिनीप्रसिद्धे ३राक्षोर्व्यवकथने च।

वियोगिन् पु० वि+युज–घिनुण्। १चक्रवाके पक्षिणि शब्दच०। २विच्छेदवति। ३पक्षियोगवति च त्रि०। स्त्रियां ङीप् "वियोगिनीमैक्षत दाडिमीमसौ" नैष०।

विरक्त त्रि० वि+रञ्ज–क्त। १विच्छिन्ने २अननुरक्ते ३दुर्भगायां स्त्रियां स्त्री त्रिका०।

विरङ्ग पु० वि+रञ्ज–घञ्। कङ्कुष्ठे राजनि०।

विरचित त्रि० वि+रच–क्त। १कृते २निर्मिते च। [अमरः।

विरजस्तमस् त्रि० विगते रजस्तमसी यतः। सत्त्वगुणप्रधाने

विरजस्(स्का) स्त्री विगतं रजो यस्याः वा कप्। १गतार्त्तवायां स्त्रियाम् जटा०। २रजोगुणहीने त्रि०।

विरजा स्त्री विशेषेण रज्यतेऽस्र रञ्ज–घञर्थे क। १दूर्वायां शब्दार०गोलोकस्थे २राधासखीभेदे तच्छापाच्छ्रीदामाने ३नदीभेदे च ब्रह्मवै० ज० ख० ३५अ०। ४कपित्थानीवृक्षे रत्नमा०। ५ययातिमातरि कूर्मपु० २०अ०। सा च नदी उत्कलदेशस्था जगन्नाथसन्निहिता "उत्कले नाभिदेशश्च विरजाक्षेत्र उच्यते। विमलाख्य महादेवी जगन्नाथस्तु भैरवः" पीठनिर्णयः। तत्र सप्तरात्रोपवासो न कार्य्यः "सप्तरात्रं चोपवासश्च सर्वतीर्थेषु यः विधिः। वर्जयित्वा गयां गङ्गां विशालां विरजां तथा" प्रा०त०।

विरञ्च(ञ्चि) पु० वि+रच–अच् इन् वा सम् च। जगत्स्रष्टरि ब्रह्मणि हेम०। [शब्दर०।

विरण न० विगिरो रणो मूलमस्य। उशीरे (वेणारमूल)

विरत त्रि० वि+रम–क्त। निवृत्ते। [पारामावे च अमरः।

विरति स्त्री वि+रम–क्तिन्। १निवृत्तौ २विषयवियोगे च व्या०

विरल त्रि० वि+रा–कलच्। १अवकाशे २विच्छिन्ने अमरः। ३अनिविड़े च। ४दन्ति न०राजनि०।

विरलजानुक त्रि० ह्रस्व०। वक्रजानुके हेमच०।

विरलद्रवा स्त्री ह्रस्व०। ब्रह्मण्यां यवान्यां जटा०।

विरह पु० वि+हन्–घञ्। १विच्छेदे २अभावे अहङ्काररसस्य विप्रलम्भाख्ये ३अवस्थाभेदे च हेमच०।

विरहित त्रि० वि+रह–क्त। १त्यक्ते २हीने च।

विरहिन् त्रि० वि+रह णिनि। १विरहयुते स्त्रियां ङीप्। सा च २अहनौ शब्दमा०।

विरहोत्कण्ठिता स्त्री "आगन्तुं कृतचित्तोऽपि दैवाद्यायाति यत्प्रियः। तदनागमदुःखार्त्ता विरहोत्कण्ठिता तु सा" सा०द०३५० लक्षिते नायिकाभेदे।

विराग पु० वि+रञ्ज–घञ्। १रागाभावे। विगतो रागो यस्य। २रागशून्ये त्रि०। "विषयेष्वतितरां रागो मानसो मल उच्यते। तस्यैव तु विरागो हि नैर्मल्यं सुखदायकम्" प्रा० त०। वैराग्यशब्दे दृश्यम्।

विराज् पु० विशेषेण राजते क्विप्। १क्षत्रिये ब्रह्माण्डात्मकस्थूलदेहाभिमानिनि २स्वादिपुरुषे ३छन्दोभेदे च। वेदे द्वाभ्यामक्षराभ्यां गायत्र्यादीनां समष्टावधिकत्वे विराट् छन्दो भवति छन्दःशब्दे २८७८ पृ० काात्यायनवाक्यं दृश्यम्। "समष्टिस्थूलस्थूलशरीराभिमानी चेतनः विराट्संज्ञो वेदान्तादौ प्रसिद्धः। तस्योत्पत्तिः तद्भ्रष्टत्व भागवतादौ दृश्यम्। ऋच्। विराजोऽपि समष्टिस्थूलाभिमानिनि चेतने। ४स्वायम्भुवमनौ च। "ततः कालेन महता तस्य पुत्रोऽभवन्मनुः। स्वायम्भुव इति ख्यातः स विराडिति नः श्रुतम्" मत्स्यपु०३अ०। "मानवे तु स्वायम्भुवस्य विराट्पुत्रत्वमभिहितम्। यथा "द्विधा कृत्वात्मनो देहमर्द्धेन पुरुषोऽभवत्। अर्द्धेन नारी तस्यां स विराजमसृजत् प्रभुः। तपस्तप्त्वाऽसृजद् यन्तु स स्वयं पुरुषो विराट्। तं मां वित्तास्य सर्वस्य स्रष्टारं द्विजसत्तमाः!"। [च। भा० विराट्पर्वणि दृश्यम्।

विराट पु०विशेषो राटो यत्र। १देशभेदे, तद्देशाधिपे २नृपे

विराध पु० राक्षसभेदे। स च तुम्बुरुनामा गन्धर्वः कुबेरशापात् राक्षसत्वमाप्तः रामेण मोचितः तत्कथा वह्निपु० "तुम्बुरुर्नाम गन्धर्वः प्रविष्टो राक्षसीं तनुम्। अभिशापाद्दहं घोरं प्राप्तो वैश्रवणेन वै"।

विराधन न० वि+राध–ल्युट्। पीड़ायाम्। शब्दर०।

विराम पु० वि+रम–घञ्। १अवसाने, २विरतौ, ३निवृत्तौ च जटा०। ४मध्ये त्रिका०। ५व्याकरणोक्ते परवर्णाभावे च।

विराल पु स्त्री० वि+डल–घञ् डस्य रः। बिड़ाले पशुभेदे अमरः स्त्रियां ङीप्। [२विगतरवे त्रिका०।

विराव पु० वि+रु–घञ्। १शब्दे अमरः। प्रादि० ह्रस्व०।

विरिञ्च पु० वि+रिच–अच् सम् च। १विष्णौ २जगत्स्रष्टरि वेधसि, ३शिवे च शब्दर०। इन् विरिञ्चि तत्रैवार्थे अमरः।

विरुद्ध त्रि० वि+रुध–क्त। विरोधयुक्ते २हेत्वाभासभेदे "अनैकान्तो विरुद्धश्चेत्यादिना विभज्य "यः साध्यवति नैवास्ति स विरुद्ध उदाहृतः" भाषा०लक्षितः। "एवकारेण साध्यवत्त्वावच्छेदेन हेत्वभाव इति सूचितम् तथा च साध्यव्यापकाभावप्रतियोगित्वं तदर्थः शि०मुक्ता०" गौतम १।४७ सू० अन्यथा लक्षितो यथा "सिद्धान्तमभ्युपेत्य

तद्विरोधी विरुद्धः" "तं (सिद्धान्तं) विरुणद्धीति तद्विरोधी कथ्यमानं सिद्धान्तं व्याहन्तीति। यथा योऽयं विकारो व्यक्तेरपैति नित्यत्वप्रतिषेधात् अपेतोऽव्यक्तिं विनाशप्रतिषेधात् न नित्यो विकार उपपद्यते इत्येव हेतुव्यक्तेरपेतोऽपि विकारोऽस्तीत्यनेन सिद्धान्तेन विरुध्यते। कथं? व्यक्तेरात्मलाभः खपायः प्रच्युतिः यद्यात्मलाभात् प्रच्युतो विकारोऽस्ति नित्यत्वप्रतिषेधो नोपपद्यते यत् व्यक्तेरपेतस्यापि विकारस्यास्तित्वं तत् खलु नित्यत्वमिति। नित्यत्वप्रतिषेधो नाम विकारस्यात्मलाभप्रच्युतेरुपपत्तिः। यद् यदात्मलाभात् प्रच्यवते तदनित्यं दृष्टं यदस्ति न तदात्मलाभात् प्रच्यवते। अस्तित्वं चात्मलाभात् प्रच्युतिरिति तद्विरुद्धा वेतौ न सह सम्भवतः। स चायं हेतुर्यं सिद्धान्तमाश्रित्य प्रवर्त्तते तमेव व्याहन्तीति" वा० भा०।

इत्थं त्वित्थमन्यथा व्याख्यातं यथा "क्रमप्राप्तं विरुद्धं लक्षयति सिद्धान्तमिति अत्र च सिद्धान्तः साध्यं प्रतिज्ञायां हि सिद्धस्य पक्षधर्माने साध्यमभिधीयते तथा च साध्यमस्योपेत्य तद्विपर्ययं प्रयुक्तस्तद्विरोधी साध्याभावव्याप्त इति फलितार्थः। यथा वह्निमान् ह्रदत्वादिति। अत्र साध्याभावात्तमितिशब्दोत्तेन साध्यात्तमिति प्रतिबन्धो दूषकतावीजम्। न च सत्प्रतिपक्षाविशेषः तत्र हेत्वन्तरं साध्याभावसाधकम्। इह तु हेतुरेव साध्याभावसाधकः साध्यसाधकत्वेन त्वयोपन्यस्त इत्यत्तिविशेषोद्भावकत्वेन विशेषात्"। इदञ्च नावद्यौर्वैधर्म्यविरुद्धोदाहरणम् अभिचारादेः सत्त्वात्। किन्तु उपाधेरसत्त्वेऽप्युपाधेरसत्त्वादित्यनुमेरस्य दूषकतावीजसत्त्वोदाहरणत्वं बोध्यम्।

विरुद्धमतिकृत् पु० "विपरीतार्थधीर्यस्मात् विरुद्धमतिकृत्तमम्" उक्ते काव्यदोषभेदे २७६२पृ०दृश्यम्। [रिते च भेदि०।

विरूढ त्रि०विशेषेण रोहति वि+रुह-क्त। १जाते २अङ्कुरिते च।

विरूप त्रि० विगतं रूपमस्य। १दुष्टरूपयुक्ते २निन्दिते च। ३पिप्पलीमूले न० राजनि०। ४व्यतिविषायां, ५दुरालभायाञ्च स्त्री० राजनि०।

विरूपाक्ष पु० विरूपे विकटे अक्षिणी यस्य बहु०समा०। १महादेवे अमरः। २विकटनेत्रे त्रि०।

विरूपिन् त्रि० विगतं रूपमस्यास्ति इनि। १कुरूपे त्रिका०। २जाङ्गलजन्तौ पु० राजनि०। [ङ्गर०। २व्यतिरेके च।

विरेक पु० वि+रिच-घञ्। १महादेरधोनिःसरणे, म-

विरेचन न० वि+रिच-णिच्-ल्युट्। १मलादेर्निःसारणे, तद्विधिः भावप्र० उक्तो यथा

"स्निग्धस्विन्नाय दातव्यं सम्यग्विरेचनम्। बलानलं तथःक्लेशो यस्मिन्नौ सादवेत्कफः। मन्दाग्निं गौरवं कुर्याज्जनयेद् वा प्रवाहिकाम्। अथ वा पाचनैरामं बलासं परिपाचयेत्। क्षतौ पक्वे यदि देहशुद्धौ विरेचयेत्। अन्यदात्वधिके कार्यं शोधनं शोधयेद् बुधः"। आत्वधिके प्राग्वत्कृते। "पित्ते विरेचनं युञ्ज्यादामोद्भूते गदे तथा। उदरे च तथाध्माने कोष्ठशुद्धौ विशेषतः। दोषाः कदाचित् कुप्यन्ति जिता लङ्घनपाचनैः। शोधनैः शोधिता ये तु न तेषां पुनरुद्भवः। बालो वृद्धो भयं स्निग्धः क्षतक्षीणो भयान्वितः। श्रान्तस्तृषार्त्तः क्ष्वुत्क्षाम गर्भिणी च नवज्वरी। नवप्रसूता नारी च मन्दाग्निश्च मदात्ययी। अत्यादितश्च रूक्षश्च न विरेच्या विजानता। जीर्णज्वरी गरव्याप्तो वातरोगी भगन्दरी। अर्शःपाण्डूदरग्रन्थि हृद्रोगार्च्यपीड़िताः। योनिरोगप्रमेहार्त्ता गुल्मप्लीहव्रणार्दिताः। विद्रधिच्छर्दिविस्फोटविसूचीकृतसंयुताः। कर्णनासाशिरोवक्त्रगुदमेढ्रामयान्विताः। प्लीहशोथाक्षिरोगार्त्ताः क्रिमिचारानिलार्दिताः। मूत्रिनो मूत्रघातार्त्ता विरेकार्हा नरा मताः। बहुपित्तो मृदुः प्रोक्तो बहुश्लेष्मा च मध्यमः। बहुवातः क्रूरकोष्ठो दुर्विरेच्यः स कथ्यते। मृद्वी मात्रा मृदौ कोष्ठे मध्यकोष्ठे च मध्यमा। क्रूरे तीक्ष्णा मता दृष्ट्वा मृदुमध्यमतीक्ष्णकैः। मृदुर्द्राक्षापथस्युतैरपि विरेच्यते। मध्यमस्त्रिवृतात्रिफलाराजवृक्षैर्विरेच्यते। क्रूरः स्युक्पयसा हेमक्षीरीदन्तीफलादिभिः"। पथ्युतैलम् एरण्डतैलम्। राजवृक्षः (वनवहेरा) हेमक्षीरी (धोक) दन्तीफलम् दन्तीफलम् जयपालेति प्रसिद्धम् "मात्रोक्तमा विरेकस्य स्निग्धदेहैः कफान्वितैः। वेगैर्दशभिर्मध्या क्षीणोक्ता दशवेगिका। द्विपलं श्रेष्ठमाख्यातं मध्यं च पलं भवेत्। पलार्द्धन्तु कनीयस्तु विरेचनम्। कल्कमोदकचूर्णानां कर्षमध्वाज्यलेहतः। कर्षद्वयं पलं वापि वयोरोगाद्यपेक्षया। पित्तोत्तरे त्रिवृच्चूर्णं द्राक्षाक्वाथादिभिः पिबेत्। त्रिफलाक्वाथगोमूत्रैः पिबेद्व्योषं कफार्दितः। त्रिवृत्सैन्धवशुण्ठीनां चूर्णमक्षैः पिबेन्नरः। वातार्दितो विरेकाय आजरसानां रसेन वा। एरण्डतैलं त्रिफला-

काचेन द्विगुणेन वा। युक्तं पीतं पयोभिर्वा न चिरेण विरेच्यते"। शोधनमेव विरेचनं इत्यर्थः "त्रिवृता कोटजं बीजं पिप्पलीत्रिफलेभजम्। समङ्गीकारसं क्षौद्रं वर्षाकाले विरेचनम्। त्रिवृद्दुराभमासुलग्नर्क-रोदीच्यचन्दनम्। द्राक्षाम्बुना सवल्काङ्गीतलङ्ग घनालये"। सदोच्याम्बाला घनालये शरदि। "पिप्पलीं नागरं त्रिवृं श्यामां त्रिवृतया सह। त्रिवृत् क्षौद्रेण शिशिरे वसन्ते च विरेचनम्"। श्यामा (क्षुद्रासाख्य) (त्रिवृता शर्करा तुल्या शीतकाले विरेचनम्। अभयामरिचं गुडीविड्भ्रामलकानि च। पिप्पली पिप्पलीमूलं त्वक्पत्रं सुरसेभ च। एतानि समभागानि दन्ती तु त्रिगुणा भवेत्। त्रिवृताष्टगुणा ज्ञेया षड्गुणा चात्र शर्करा। मधुना मोदकान् कृत्वा वर्षमात्रान् प्रमाणतः। एकैकं भक्षयेत्प्रातः शीतक्षीरानुपेच्छलम्। तावद्विरेच्यते जन्तुर्यावदुष्णं न सेवते। पानाहारविहारेषु भवेच्चैवं सदा। विषमज्वरमन्दाग्निपाण्डुकास भगन्दरान्। गुल्मप्लीहोदरजठरकृमिदरजं जयेत्। खेष्टाभक्षश्च रोगे च दिनमेकं सुधीस्त्यजेत्। सततं शीलनादेव पक्तिरानि प्रणाशयेत्। अभया मोदका ह्येते रसायनपराः स्मृताः"। इति अभयादिमोदकः "पीत्वा विरेचनं शीतजलैः संसिच्य चक्षुषी। सुगन्धि किञ्चिदाघ्राय ताम्बूलं शीलयेद् बुधः। निर्वातस्थो न वेगांश्च धारयेच्च यतीत च। शीताम्बु न स्पृशेत् क्वापि कोष्णनीरं पिबेन्मुहुः। वलासौषधयिक्तानि वायुर्वान्ने यथा व्रजेत्। रेकान्तथा मलं पित्तं भेषजस्य कफो व्रजेत्। दुर्विरिक्तस्य नाभेस्तु स्तब्धता कुक्षिशूलरुक्। पुरीषवातसङ्गश्च कण्डूमण्डलगौरवम्। विदाहोऽङ्गविराध्मानं भ्रमस्फूर्तिश्च जायते। तं पुनः पाचनैः स्नेहैः पक्वा स्निग्धान्त रेचयेत्। तेनाशोपदुवा यान्ति टीप्राग्नेर्लघुता भवेत्। विरेकस्यातियोगेन मूर्च्छा श्रमो गुदस्य च। मूलं कफातियोगः स्यान्मांसधारय वह्निभम्। मेदोनिभक्षताभासं रक्तस्यापि विरेचयेत्। तस्य शीताम्बुभिः सिक्ता शरीरं तण्डुलाम्बुभिः। अथवा शैत्यतो शीतैः कारयेद्भक्षणं लघु। कङ्कारस्यः कलको दद्या क्षौद्रेण वा। पिष्टा नाभिप्रलेपेन कन्यतीक्षारसुल्वणम्। क्षौद्रं तु सर्वरोगेभ्यः पक्वैर्वा निस्तुषैः कृतैः"। क्षीरं दन्तानम् "बलाक्षीरं रसक्षापि वैष्किरं क्षारिषं तथा। आविभिः सप्तकैः क्षुल्लैर्मक्षुरैर्वापि मोक्षयेत्। वर्त्तिकाद्यावविष्किरकपिञ्जलकतित्तिराः। चकोरक्रकराद्याश्च विष्किराः सप्तदाहृताः"। कपिञ्जल इति ख्यातो लोके कविशतित्तिरः। क्रकरः। (कराट) इति लोके। हरिणस्यावर्यः मृगः। "क्षीतैः संपाचिभिर्द्रव्यैः कुर्यात् संयवागूकं भिषक्। लाघवे मनसस्तुष्टावह्नयोमकृतेऽनिले। सविरिक्तं नरं ज्ञात्वा पाचनं पाययेत्ततः। इन्द्रियाणां बलं बुद्धेः प्रसादो वह्निदीप्तता। धातु स्थैर्यं वयस्थैर्यमरोगत्वं विरेचनसेवनात्। प्रतापसेवां शीताम्बु स्नेहाभ्यङ्गमजीर्णताम्। व्यायामं मैथुनञ्चैव न सेवेत विरेचितः। शालिषष्टिकगोधूमयवागूभोजयेत् क्रमात्। जाङ्गलविष्किराणां वा रसैः शाल्योदनं क्षिपम्। राजीवः पृथुतण्डैव जङ्गलाः खरादयः"। विरेचयति वि+रिच-णिच्-ल्यु।२पीलुवृक्षे पु० राजनि०। ३भेदकमात्रे त्रि०। ण्वुल् विरेचक तत्रार्थे त्रि०।

विरेफ पु० वि+रिफ-घञ्। मदमात्रे धनञ्जयः। प्रादि०ब० २रकारवर्णशून्ये त्रि०। [२स्वर्णकिरणे पु० हेमच०।

विरोक पु० न० वि+रुच-घञ् चस्य कः। १क्षिप्ते त्रिका०।

विरोचन पु० वि+रुच-ल्युच्। १सूर्ये २अर्कवृक्षे अमरः। ३बलिपितरि प्रह्लादतनयेऽसुरभेदे ४चन्द्रे ५वह्नौ च मेदि०। विरोचयति वि+रुच-णिच्-ल्यु। ६रोहितकवृक्षे ७अग्नौ नाकवृक्षे ८हरितकवृक्षे च पु० राजनि०। ९रुचिकारके त्रि०।

विरोध पु० वि+रुध-घञ्। १वैरे २विरुद्धतायाम् न्यायोक्ते बाध्येनाबाधमानाधिकरणरूपे ३हेत्वदोषे यथा वह्निमान् जलादित्यत्र जलरूपहेतोर्वह्निना सामानाधिकरण्यं नास्ति यतस्तत्र द्रव्यत्वम्। ४अर्थालङ्कारभेदे अलङ्कारशब्दे ४०३ पृ० दृश्यम्। ५विपरीतार्थकत्वे च। "विरोधे त्वनपेक्षं स्यादसति ज्ञापकमानम्" सौरि० प्रभादिषु "विषमस्थं जगत् सर्वं विरोधे मयसंश्रयम्। विकारः सर्वतोऽपायः" रत्नकोशकोषे द्वयर्थभेदे।

विरोधन न० वि+रुध-ल्युट्। वैरे अमरः।

विरोधिन् पु० वि+रुध-णिनि। १रिपौ अमरः। अष्टसंवत्सरमध्ये "जायते मानुषे कष्टं विरोधिनि न संशयः" रत्नकोशचक्रे २संवत्सरभेदे च। ३विरोधकारके त्रि०।

विरोधाभास पु० विरोधः इवाभासते या+भास-कर्त्तरि घञ्। अर्थालङ्कारभेदे अलङ्कारशब्दे ४०३ पृ० दृश्यम्।

विरोधोक्ति स्त्री परवचनविरोधिवचने अमरः।

विल क्रृतौ तु० पर० सक० सेट्। विलति अवेलीत्।

विलच पु० वि+लच-कच्। विच्छेदयुक्ते अमरः।

विलक्षण त्रि० विगतं लक्षणमस्य प्रा०ब०। १विभिन्ने जटा० २विशेषयुक्ते च। ३निष्प्रयोजनस्थितौ च न० भाग्नरिः ४दानार्थं कल्पितकाञ्चनपुरुषमूर्त्तियुतशय्याभेदे स्त्री। "शय्यौचानात् द्वितीयेऽह्नि शय्यां दद्यात् विलक्षणाम्। काञ्चनं पुरुषं तद्वत् फलपुष्पसमन्वितम्। संपूज्य द्विजदाम्पत्यं नानारत्नभूषणैः" पु०त० मत्स्यपु०।

विलग्न त्रि० विशेषेण लग्नं लस्ज-क्त तस्य नः लश्च गः। १संलग्ने मेदि०। "मध्येन सा वेदि विलग्नमध्या" कुमा० २मध्यभागे हेमच०। ३कटौ अमरः। ४उदितमेषादि राशौ च न०"गोचरे वा विलग्ने यादिति ज्योतिषम्।

विलङ्घ पु० वि+लघि-घञ्। विलङ्घने अशौद्धत्ये प्रतीक्षणीय काले २प्रभवादिषु "तस्करैः पार्थिवैश्चैव सर्वभूतमिदं जगत्। अर्थो भवति सामान्यो विलङ्घे तु भयं महत्" स्त्री० त० उल्लङ्घने वर्षभेदे।

विलङ्घित त्रि० वि+लघि-क्त। १अशौचे, २मन्दे च विलङ्घने कण्ठकरचरणादयः प्रत्येकं प्रदर्शनाय स्वरविशेषज्ञानाय वा यत्र आधारे क्त। मध्यकालेन परिच्छेदे २लङ्घने ३गीते च।५विलम्बयुते त्रि०। तत्र भेदपाठे कालभेदे विलम्बवृत्तिः साङ्केतोक्ता यथा "द्रुतमध्यमने वृत्तिं प्रयोगार्थं तु मध्यमाम्। शिष्ट्याचाराप्तपरोधार्थं विलम्बितां समाचरेत्"।

विलम्ब पु० वि+लम-घञ् नुम्। अतिदाने अमरः।

विलय पु० वि+ली-अच्। १प्रलये भद्रर० २नाशे च।

विलला स्त्री० वि+लल-अच्। क्षेत्रवलायाम् रत्नमा०।

विलाप पु० वि+लप-घञ्। परिदेवनोक्तौ अमरः।

विलास पु० वि+लस-घञ्। "तत्कालिको विशेषस्तु विलासोऽङ्गक्रियादिषु" इत्युक्ते १स्त्रीणां हर्षकारचेष्टाविशेषे २दीप्तौ च। "गतिस्थानासनादीनां सुखनेत्रादिकर्मणाम्। विशेषस्तु विलासः स्यादिष्टसन्दर्शनादिना" उक्ते स्त्रीणां ३सात्त्विकभावभेदे सा०द०। "यदूपं तदभेदेन सङ्गमेन विराजते। आकृत्यादिभिरन्याद्रक् स तदेकात्मरूपकः। स विलासः स्मृत इति धत्ते भेदद्वयं पुनः। सरूपमन्याकारं यत्तस्य भाति विलासतः। प्रावेद्यात्मकं यद्वा स विलासो निगद्यते" ४भागवतोक्ते पदार्थे

विलासिका स्त्री उपरूपकरूपे नाटिकाभेदे "हर्षकारवतीवेष्टा दक्षाचाङ्गसंयुता। विदूषकविटाभ्याञ्च पीठमर्देन भूषिता। स्त्रीना गर्भविमर्शाभ्यां सन्धिभ्यां स्त्रीनायका। अल्पवृत्ता सुनेपथ्या विख्याता सा विलासिका" सा० द० ६प०।

विलासिनी स्त्री० विलासोऽस्त्यस्या भूम्ना इनि ङीप्। १नार्यां राजनि०। २वेश्यायां धरणिः। ३भोगवति त्रि०।४सर्पे ५छन्दसि ६वृक्षौ च पु० मेदि० ७चन्द्रे टक्करे, ८मल्लाटदेवे पु० शब्दर०। [२विशिष्टे १नष्टे च।

विलीन त्रि० वि-ली-क्त। १प्राप्तद्रवीभावे द्रवादौ, अमरः।

विलेपन न० विलिप्यतेऽनेन करणे ल्युट्। गात्रानुलेपनद्रव्ये १पिष्ट २घृष्टे वा चन्दनकङ्कुमादौ। कर्मणि ल्युट् ङीप्। ३वर्णाख्यां ४सुवेशायां स्त्रियाञ्च स्त्री० मेदि०।

विलेप्य पु० वि+लिप-यत्। १अवाम्बाम् शब्दर०। २विलेपनीये त्रि०।

विलोचन न० वि+लुच-करणे ल्युट्। १नेत्रे जटा०। भावे ल्युट्। २दर्शने। [डिते त्रि०।

विलोडित न० वि+लोड-क्त। १तक्रे राजनि०। २चालो-

विलोम त्रि० विगतं लोम यत्र अच्समा०। १विपरीते हेमच० २व्यत्यस्तकुक्कुरे न० ३सर्पे ४कुक्कुरे पुंस्त्री० स्त्रियां ङीष् ५वरुणे च पु० मेदि०। ६व्यस्तविधिर्विलोमे" लीला०। ७व्युत्क्रमान्विते यथा अकारादिहकारान्तवर्णानां व्युत्क्रमेण हकारादह्यकारान्ततया जपः। सप्तशतीप्रयोगभेदे मार्कण्डेय स्वाचेत्यादिरस्य सावर्णिभविता मनुरित्यन्तस्य मालामन्त्रस्य व्युत्क्रमेण पाठः।

विलोमकर्मन् कर्म०। विपरीतकर्मणि "छेदं गुणं गुणं छेदं वर्गं मूलं पदं क्षतिम्। स्वयं स्वं कुर्यात् दुःखे राशिपरिक्षये" लीला० उक्ते अङ्कराशेर्मानस्थानार्थे क्रियाभेदे।

विलोमजिह्व पुंस्त्री० विलोमा विपरीता जिह्वा यस्य। गजे शिवा०ङीष्। तस्य तथात्वकथा भा०आनु०८५अ० यथा "इत्युक्ता तांस्ततो देवाः पुनरेव महीमिमाम्। परीयुर्ज्वलनत्रासं न जग्मिन्नु कृताञ्जलयः। अथ तान् द्विरदः कश्चित् सुरेन्द्रद्विरदोपमः। अभ्यधावज्ज्वलनः सर्वान् द्विरदान् क्रोधमूर्च्छितः। प्रतीपा भवतां जिह्वा भविष्यतीति भगवद्दत्त!"।

विलोमवर्ण पु० विलोमजः स्वार्थेऽणुक्तया व्युत्क्रमजो वर्णः। प्रतिलोमजाते उत्तमस्त्रियामधमवर्णेन जनिते

बहुर्थे वर्षे । [गौरा० ङीष् । वामलक्ष्याम् मेदि० ।

विलोमी स्त्री विरुद्धं लोम केशो यस्याः ५त० अच्समा०

विलोल त्रि० वि+लुल–अच् । १चञ्चले २विशेषसक्ते च ।

विवर न० वि+वृ–अच् । १छिद्रे अमरः २दोषे च मेदि० ।

विवरण न० वि+वृ–ल्युट् । १व्याख्याने कृदा० व्याख्यानग्रन्थव्याख्याने २ग्रन्थभेदे च । भा० भा० टीकायष्टीकोपरि विवरणम् । पातञ्जलभाष्योपरि वाचस्पत्यं विवरणम् । कैयटोपरि नागेशकृतं विवरणमित्यादि ।

विवरनालिका स्त्री विवरयुक्तं नालमस्त्यस्याः ठन् । वेधौ (वैरा) लिका० । [२मलिने च ।

विवर्ण त्रि० विरुद्धो वर्णोऽस्य । १अधमे २नीचे च अमरः

विवर्त्त पु० वि+वृत–घञ् । १भ्रमे २असदादरे ३अपवर्त्तने वेदान्तोक्ते कारणात् विषमसत्ताकतया उत्पद्यमाने ४कार्य्ये च । यथा रज्ज्वात् रजतम् ब्रह्मणो जगत् । वेदान्तिभिः विवर्त्तवाद एवाश्रितः । न परिणामवादः ।

विवश त्रि० विगतो वश यत्नो यस्य । १अयत्नवति २व्याकुले ३अरिष्टबुद्धियुते मेदि० ।

विवस्वत् पु० वि+वस+क्विप् अस्यर्थे मतुप् मस्य वः । १सूर्य्ये २अर्कवृक्षे अमरः । ३अरुणे शब्दर० । ४देवे च मेदि० ।

विवाक पु० वि+वच–संज्ञायां कर्त्तरि घञ् । विवेचके प्राम्विवाकशब्दे पृ० दृश्यम् ।

विवाद पु० विरुद्धो वादः । "अर्थादिदावकलहे द्वयोर्वस्त्वन्तरस्य वा । विवादो व्यवहारश्च" इत्यमरोक्तलक्षणे व्यवहारे व्यवहारशब्दे दृश्यम् । २कलहे च ।

विवाह पु० वि+वह–घञ् । दारपरिग्रहे तज्जनके व्यापारे च । उद्वाहशब्दे उपयमशब्दे च दृश्यम् । "भार्य्यात्वसम्पादकस्यानं विवाहः" इति उद्वा० रघु० । भार्य्यात्वस्योपलक्षणतया निवेशः । तेन नान्योन्याश्रयः "चरमसंस्कारो विजातीयसंस्कारो वा विवाहः" इत्यन्ये ।

विवाहित पु० विवाहो जातोऽस्य तारा० इतच् । जातविवाहे । [वाह्ये च ।

विवाह्य त्रि० वि+वह–यत् । १विवाहयोग्ये २विशेषेण

विविक्त त्रि० वि+विच–क्त । १निर्जने २पवित्रे अमरः ३असंयुक्ते च । ४कर्त्तरि–क्त । ४विवेकिनि त्रि० मेदि० ५दुर्भगायां स्त्रियां स्त्री त्रिका० ।

विविध त्रि० विभिन्ना विधा यस्य । नानाप्रकारे ।

विवीत पु० विशिष्टं वीतं गवादिप्रचारस्थानं यत्र । प्रचुरतृणजलादियुक्ते देशे । "पथि ग्रामविवीतान्ते चैत्ये दोषो न विद्यते" याज्ञवल्क्यस्मृतिव्याख्याने मिताक्षरायाम् ।

विवृत त्रि० वि+वृ–क्त । १विस्तृते मेदि० २व्याख्याते च । ३सुदृश्यभेदे स्त्री मेदि० ।

विवृताक्ष पुंस्त्री० विवृते अक्षिणी यस्य अच्समा० । कुक्कुटे हेमच० । स्त्रियां जातित्वात् ङीष्त्वाच्च ङीष् ।

विवृति स्त्री वि+वृ–क्तिन् । १विस्तारे मेदि० २व्याख्याने च । "वाक्यस्य शेषादिष्टेर्वृत्तिं" यक्रियाकलमानम् ।

विवृत्त त्रि० वि+वृत क्त । १तिर्य्यक्चलिते २प्रकटिते ३चक्षुरोगभेदस्त्री भावप्र० । "विवृत्तास्यां महादाढां पक्वोदुम्बरसन्निभाम् । विवृत्तामिति तां विद्यात् पित्तोत्थं परिमण्डलम् परितः शोथवतामिति शेषः" ।

विवेक पु० वि+विच–घञ् । १यथार्थ्येन वस्तुस्वरूपावधारणे २प्रकृतिपुरुषयोर्भेदज्ञाने च जटा० । ३अन्योन्यधर्म्माव्यावर्त्तनेन वस्तुस्वरूपावधारणे । विवेकचूततत्प्रकारो दृश्यः । ४विचारे ५जलद्राक्षायाम् मेदि० । संज्ञायां कर्त्तरि घञ् । ६विचारके च प्राढविवेकः ।

विवेकिन् त्रि० वि+विच–घिनुण् । विवेकशीले भैरवसंज्ञे देवसैन्यपतिभेदे पु० जालिपु० ट्यच० ।

विवोढृ पु० वि+वह–तृच् । १जामातरि २पत्नौ च हेमच०

विव्योक पु० वि+या–क तस्य ओकः स्थानम् । "गर्वाभिमानादिष्टेऽपि विव्योकोऽनादरक्रिया" इत्युक्तलक्षणे स्त्रीणां हङ्कारचेष्टाभेदे ।

विश प्रवेशे तु० पर० सक० अनिट् । विशति अविक्षत् ।

अधि+उपवेशने ।

अभि+नि+मनसः स्थितिहेतुसंयोगभेदे आत्म०एतदर्थं आधारस्य कर्मता धर्म्ममभिनिविशते अन्यत्रार्थे न कर्मता । "या या संज्ञा यस्मिन् यस्मिन्नभिनिविशते" भाष्यम् । "क्वचिदुपसर्गविशेषेऽप्युपसर्गोऽभिनिविशते" व्या० परिभाषा ।

उप+आसनादौ स्थितिभेदे ।

नि+स्थितिभेदे आत्म० "निविशते यदि मूकशिखा पदे" नैष० ।

निर्+उपभोगे "क्रीडारसं निर्विशतीव बाल्ये" कुमा० "निर्वेशो भूतिभोगयोः" अमरः "निर्विष्टविषयस्नेहः" रघु० ।

प्र+अभ्यन्तरगमने ।

विश पु० विश–क्विप् । १मनुजे २वैश्ये च अमरः ।

विश न० विश–क । १लवणे रायमु० । २प्रवेशकर्त्तरि त्रि० ।

विश(ष)(स)कण्ठा स्त्री विशं(षं)(सं) लवणमिव कण्ठोऽस्याः । वनकाकायां राजनि० समध्यः समध्योऽत्र ।

विशङ्कट त्रि० वि+शङ्कटच् । विशाले अमरः ।

विशद पु० वि+शद-अच्। १शुभ्रवर्णे २तद्वति त्रि० अमरः। ३विमले क्षेम०। ४व्यक्ते च त्रि० मेदि०। [मीमांसा।

विशय पु० वि+शी-अच्। संशये "विशयो विशयश्चेति"

विशर पु० वि+शृ-अच्। १वधे अमरः। प्रादि०व०। २विगतवाधे त्रि०।

विशल्यकृत् पु० विशल्यं तत्प्रकारवेदनानिवृत्तिं करोति कृ-क्विप्। (डापरमाखी) १वृक्षे रत्नमा०। २विशल्यकारके त्रि०।

विशल्यकरणी स्त्री विशल्यं क्रियतेऽनया कृ-ल्युट् ङीप्। ओषधिभेदे "पूर्वं त्व कथिता याची वीर! जाम्बवता तव। दक्षिणे शिखरे जातां मृतोऽधिविशल्यनय। विशल्यकरणीं नाम्ना सावर्ण्यकरणीं तथा। संजीवकरणीं वीर! सन्धानीञ्च महौषधिम्" रामा० लङ्का० १२स०।

विशल्या स्त्री विगतं शल्यं तत्प्रकारवेदना यस्याः ५त०। १अस्त्रिशिखवृक्षे २दन्तीवृक्षे २गुडूच्याम् अमरः ४त्रिपुटायाम् ५बलमोटायाञ्च राजनि०।

विशसन न० वि+शस-ल्युट्। १मारणे अमरः। करणे ल्युट्। २खड्गे पु० त्रिका० "अथविशसनः खड्गः" खगडपूजामन्त्रः।

विशस्त त्रि० वि+शस-क्तविनये न दृट् अन्यत्र दृट्। धृष्टे वि० कौ०। दृटि विशसित। मारिते त्रि०।

विशस्तृ पु० वि+शस-तृच् न दृट्। चण्डाले मेदिनी०।

विशाकर पु० विशाकः विगतशाकः यत्र राजते राज-वा० ट। भद्रमुस्ते (नागरमोथा) शब्दच०। तस्य शाकशून्यत्वात् तथात्वम्।

विशाख पु० विगता शाखा अस्य। १कार्त्तिकेये २अग्निना विसर्जनराजपादावस्थाने अमरः। ३पुनर्नवायां राजनि० ४याचके च मेदि०। ५स्कन्दांशजाते देवभेदे तत्प्रसूतिः भा०व०२२६अ० उक्ता यथा "वज्रप्रहारात् स्कन्दस्य संजातः पुरुषोऽपरः। युवा काञ्चनसन्नाहः शक्तिधृग् दिव्यकुण्डलः। यदग्रवेदनाच्छातो विशाखस्तेन कीर्त्तितः"। ६स्कन्दात्मजभ्रातरि "अग्नेः पुत्रः कुमारस्तु श्रीमान् शरवनालयः। तस्य शाखो विशाखश्च नैगमेय यश पृथुलः" भा० आ० ६६अ०। ७अग्नौ भा०शा० १७अ०।

विशाखज पु० विशिष्टा शाखा यस्य तथा सन् जायते जन-क। नारङ्गे शब्दच० [शब्दमालोक्ते धन्विनामवस्थानभेदे।

विशाखल न० "विशाखान्तरविन्यस्ते पादद्वन्द्वे विशाखलम्"

विशाखा स्त्री विशिष्टा शाखा प्रकारो यस्याः। १खड्गनक्षत्रात्मकेऽग्निदेवधिष्ठिते षोडशे नक्षत्रे अमरः। "विशाखयोर्मध्यगतः समूर्ध्व इव चन्द्रमा" रामा० प्रयोगात् तस्य द्विवचनान्ततैलङ्ग्ये। "बहुपुत्रो विशिखाहु" भा० आ० ६ उक्तेर्बहुत्वं बहुतारात्मकत्वेनेति बोध्यम्। अस्मिन्नर्थे ४६७ पृ०दृश्यम्। २कठिल्लके मेदि०।

विशाय पु० वि+शी-घञर्थे अच्। प्रहरिणां घञर्थेच शयने अमरः।

विशारण न० वि+शृ-स्वार्थे णिच्-ल्युट्। मारणे क्षेमच०।

विशारद पु० विशालं ददाति दा-क तस्य रः। १बृहद्वृक्षे २क्षुद्रवृक्षभावां स्त्री राजनि०। ३पण्डिते पु० ४प्रगल्भे त्रि० अमरः ५चतुरे च त्रि० अजय।

विशाल त्रि० वि+शालच्। १विस्तीर्णे २बृहति च अमरः। २खगभेदे ३खगभेदे पुंस्त्री० मेदि० स्त्रियां ङीष्। ४नृपभेदे पु० ५वृक्षभेदे शब्दर०। ६इन्द्रवारुण्याम् स्त्री अमरः। ७माहेन्द्रवारुण्याम् दत्तपोटक्यां च स्त्री राजनि०। ८वल्लविनीनगर्यां स्त्री मेदि०। ९नदीभेदे च स्त्री "विशालां विरजां तथा" सप्तर्षीणामुपवर्त्तनदासः विरजाशब्दे दृश्यः। [२वृक्षे शब्दर०

विशालता स्त्री विशालस्य भावः तल्। १पार्श्वविस्तारे अमरः

विशालतैलगर्भ पु० विशालं विस्तीर्णं तैलं गर्भे फलमध्ये यस्य। बहुबीजवृक्षे राजनि०। [अमरः।

विशालत्वच् पु० विशाला त्वक् यस्य। वप्रवृक्षदृक्ष।

विशालपत्र पु० विशालं पत्रमस्य। १कासाली, २शीतालवृक्षे च राजनि०।

विशालाक्ष पु० विशाले अक्षिणी यस्य षच्समा०। १महादेवे, २गरुडे, ३विष्णौ च ४वृक्षभेदे, त्रि० मेदि०। ५पार्वत्यां ६नागदन्त्यां च स्त्री राजनि० ङीष्। ७रक्षियां स्त्री विश्वः। ८योगिनीभेदे स्त्री। [राजनि०।

विशाली स्त्री० वि+शालच् गौरा० ङीष्। बलमोटायाम्।

विशिख पु० विगता विगता वा शिखा यस्य प्रादि० ब०। १शरवृक्षे राजनि० २बाणे अमरः। ३तोमरे च मेदि०। ४शिखारहिते त्रि०। ५बलिनप्रां ६नाविकायाञ्च ७रक्षायाञ्च स्त्री० मेदि०।

विशिख न० विश-इखच्। मन्दिरे उणादिको० [वृक्षे च।

विशिष्ट त्रि० वि+शिष-क्त। १युक्ते २विलक्षणे ३विशेषयु-

विशिष्टबुद्धि स्त्री ६त०। विशेषवतो विशेषस्य ज्ञाने यथा घट इत्यादिकं ज्ञानम् अस्य घटस्य विशेषवतया भास-

भानस्य घटे विशिष्टे भानम् एतत्कारणस्य विशेषणज्ञानं दण्डरोधेनैव अयं घट इत्यादिप्रत्यक्षविलम्बं तत्कारणस्य घटत्वज्ञानस्य पूर्वं सम्भवत्यं घटघटत्वे इति निर्विकल्पकज्ञानमपि भवतीत्यङ्गीकृतं नैयायिकैः ।

विशिष्टवैशिष्ट्यज्ञान क्ली० । विशेष्यविशिष्टे वैशिष्ट्यस्य संसर्गस्य ज्ञाने यथा रूपवान् घट इत्यादि ज्ञानं तत्र घटत्वविशिष्टे रूपादेः संसर्गस्य भानम् । तच्च द्विविधम् विशेषणोपलक्षितप्रतियोगिकवैशिष्ट्यावगाहि विशेषणविशिष्टप्रतियोगिकवैशिष्ट्यावगाहि च । आद्ये विशेषणज्ञानासंसर्गयोः कारणता द्वितीये तु विशेषणतावच्छेदकप्रकारकविशेषणज्ञानस्य कारणता । यत्राकारणं च तयोर्बोधवैलक्षण्यम् । तत्र क्वचित् विशेष्ये यद्विशेषणं तत्रापि विशेषणान्तरमिति रीत्या ज्ञानं जायते यथा दण्डवान् पुरुष इति ज्ञानम् अत्र ज्ञाने पुरुषांशे दण्डो दण्डांशे दण्डत्वं विशेषणतया भासते । तत्र विशेषणोपस्थितिः प्रयोजिका । क्वचिदेकत्र द्वयमिति रीत्या बोधः । यथा दण्डवान् पुरुष इति ज्ञानम् अत्र च ज्ञाने एकस्मिंश्चैव पुरुषे पुरुषत्वं दण्डत्वं चेत्युभयं विशेषणतया भासते नतु विशेषणविशेष्यतावच्छेदकभावेन । क्वचित् विशिष्टवैशिष्ट्यावगाहि ज्ञानं भवति यथा दण्डवान् पुरुष इति ज्ञानमत्र च ज्ञाने विशेषणतावच्छेदकप्रकारकं विशेषणज्ञानं कारणम् । तत्र दण्डरूपविशेषणावच्छिन्नप्रतियोगिकवैशिष्ट्यरूपः संसर्गः पुरुषांशे संसर्गतया भासते । अतएव विशेषणविशिष्टसंसर्गावगाहि तदिति उपलक्षितज्ञानात् विशेषः । क्वचिच्च विशिष्टज्ञानं यथा अयं दण्डीति ज्ञानम् अत्र च ज्ञाने इदमर्थे विशेष्ये दण्डात्मकविशेषणप्रतियोगिकः संसर्गः संसर्गतया भासते उपलक्षणे तु न तत्प्रतियोगिकतया संसर्गस्य भानमिति भेदः । विशिष्टवैशिष्ट्यज्ञाने तत्त्वं भेदः व्युत्पत्तिवैचित्र्येण तद्धेतुतावच्छेदकविधेयतावच्छेदकयोः पारतन्त्र्येण परस्परं प्रयोज्यप्रयोजकभावेनान्वयः । यथा धनवान् सुखीत्यत्र धनप्रयोज्यत्वस्य सुखे, सुरापः पतनीत्यत्र सुरापानस्य पतने प्रयोज्यत्वस्यान्वयः ।

विशिष्टाद्वैत न० रामानुजाद्युक्ते प्रकृतिविशिष्टस्य ब्रह्मणोऽद्वयत्वे । रामानुजशब्दे दृश्यम् ।

विशिष्टाभाव पु० इत० । विशेषणविशिष्टस्याभावे स च क्वचित् विशेषणाभावप्रयुक्तः क्वचिच्च विशिष्टाभावप्रयुक्तः क्वचिदुभयाभावप्रयुक्तः ।

विशीर्ण त्रि० वि+शॄ-क्त । १शुष्के, २जरावस्थापन्ने ।

विशीर्णपर्ण पु० विशीर्णं पर्णमस्य । निम्बवृक्षे राजनि० ।

विशुद्ध त्रि० वि+शुध-क्त । १दोषरहिते, २विशदे च । तन्त्रोक्ते कण्ठस्थे २चक्रभेदे चक्रशब्दे २८०८पृ०दृश्यम् ।

विशुद्धाद्वैत न० इत० । वल्लभाचार्यमतप्रसिद्धे दोषरहितस्य ब्रह्मणोऽद्वयत्वे ।

विशुद्धि स्त्री० वि+शुध-क्तिन् । १शोधने २दोषराहित्ये च ।

विशृङ्खल त्रि० विगता शृङ्खला यत्रेति बहु० । परिपाटीशून्ये

विशेष पु० वि+शिष-घञ् । १प्रभेदे, २प्रकारे, अटा० । ३अन्यत्वे हेमच० । ४तिलके, त्रिका० । "अन्योन्यनित्यद्रव्यवृत्तिर्विशेषः परिकीर्त्तितः" इति भाषा०उक्ते ५पदार्थभेदे "अन्ये अवस्थाने तिष्ठतीति अन्यः यदपेक्षया विशेषो नास्तीत्यर्थः । घटपटादीनां द्व्यणुकपर्य्यन्तानां तत्तदवयवभेदात् परस्परं भेदः । परमाणूनां भेदको विशेष एव स तु स्वत एव व्यावृत्तः तेन तत्र विशेषान्तरापेक्षा नास्तीति" सि०मुक्ता० । अयञ्च नित्यद्रव्ये समवायेन तिष्ठति तेषु आत्मसु च समवायः प्रकीर्त्तितः भाषायां चकारेण नित्यद्रव्येषु विशेषसम्बन्धस्य समवायतायाः सङ्ग्रहात् । "द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्" कणा० सू० उद्दिश्य लक्षितं यथा "अन्यत्रान्त्येभ्यो विशेषेभ्यः" सू० । "अन्या विशेषा नित्यद्रव्यवृत्तयो येऽभिहितास्तान् वर्जयित्वा सामान्यविशेषाभिधानमित्यर्थः । अन्ये अवस्माने भवन्तीत्यन्याः यतो न व्यावर्त्तकान्तरमस्ती त्याचार्याः उत्पादविनाशयोरन्ये अवस्थाने भवन्तीत्यन्यानि नित्यद्रव्याणि तेषु भवन्तीत्यन्या विशेषाः इति हस्तिनखः ते हि विशेषा एव व्यावृत्तबुद्धिहेतवः न तु सामान्यरूपा अपि" उप० ह० । नित्यैकमात्रवृत्तय इति फलितार्थः । "अन्योन्याभावविरोधिसामान्यरहितः समवेतो विशेषः" सर्व०को०माधवः । द्रव्याश्रयधर्म । यथा नीलघटः रक्तादौ घटत्वव्याप्यधर्मः नीलत्वादिविशिष्टघटत्वादिः । ७कर्णालङ्कारभेदे च अलङ्कारशब्दे ३०५ पृ० दृश्यम् ।

विशेषक पुंन० विशेषयति वि+शिष-णिच्-ण्वुल् । १ललाटस्थे तिलके अमरः । २विशेषकर्त्तरि त्रि० मेदि० "त्रिभिर्न्यूनं विशेषकम्" इत्युक्ते एकवाक्यतापन्ने ३श्लोकसमूहे न० । ४तिलहृक्षे राजनि० ।

विशेषगुण पु० कर्म० । "बुद्ध्यादिपटकं रूपादिषट्कञ्च

स्वेऽभावने। स्वाभाविकद्रवत्वञ्च जलटे शब्द एव च" भाषा० उक्तेषु गुणभेदेषु।

विशेषण न० विशिष्यतेऽनेन वि+शिष-ल्युट्। भेदकधर्मे गुणक्रियादौ यथा नीलम् उत्पलं चलो गौरित्यादौ गुणक्रियादिभेदकधर्मः।

विशेषणञ्च त्रिविधं व्यावर्त्तकं विधेयं हेतुगर्भञ्च। तत्राद्यं नीलो घट इत्यादौ नीलः, द्वितीयं पर्वतो वह्निमान् अत्र वह्निर्विधेयविशेषणम्। "लक्षारो ह्ययमेव मे वदरयः" इत्यादौ लक्षारोविधेयः। तृतीयं यथा सुरापः पततीत्यादौ सुरापानं हेतुगर्भविशेषणम्। तस्य भावः तत्त्व। विशेषणतायाप्रकारतारूपविषयताभेदे स्वरूपसम्बन्धविशेषे च स्त्री। स च तत्पदजन्यबोधविषयत्वेन शक्तिविषयत्वरूपः। अभावप्रत्यक्षे सन्निकर्षभेदे च। यथा घटाभाववद् भूतलमित्यादि चाक्षुषप्रत्यक्षे भूतलांशे घटाभावस्य विशेषणता सन्निकर्षः। "विशेषणतया तद्वदभावानां यद्वो भवेत्" भाषा०। सा च नानाविधा यथोक्तं

"यद्यपि विशेषणता नानाविधा तथापि भूतलादौ घटाभावः संयुक्तविशेषणतया लक्ष्यते, संख्यादौ रूपत्वाद्यभावः संयुक्तसमवेतविशेषणतया, संख्यात्वादौ रूपाद्यभावः संयुक्तसमवेतविशेषणतया, शब्दाभावः केवलश्रोत्रावच्छिन्नविशेषणतया। रूपत्वादौ रूपत्वाद्यभावः श्रोत्रावच्छिन्नसमवेतविशेषणतया। एवं रूपत्वावच्छिन्नाभावे रूपत्वाभावादिकं विशेषणविशेषणतया। एवं घटाभावादौ घटाद्यभावः संयुक्तविशेषणविशेषणतया। एवमन्यदप्यूहं तथापि विशेषणतात्वरूपेणैव सा गृह्यते। अन्यथा बोढा सन्निकर्ष इति प्राचां प्रवादो व्याहन्यतेति" सि० मुक्ता०। "प्रत्यक्षे समवायस्य विशेषणतया भवेत्" भाषा० मुक्तेः समवायप्रत्यक्षसन्निकर्षभेदे च।

विशेषणासिद्ध पु० विशेषणेनासिद्धः। हेत्वाभासभेदे यो हेतुः विशेषणविशिष्टः सन् पक्षे न तिष्ठति तादृशे हेतौ यथाशब्दो नित्यः द्रव्यत्वे सत्यस्मार्थत्वात् इत्यादौ द्रव्यत्वरूपविशेषणस्य शब्दे बाधात् तथात्वम्।

विशेषविधि पु० विशेषे विधिः। सामान्यविशेषयोर्मध्ये विशेषगोचरे विधाने यथा ब्राह्मणेभ्यो दधि दीयतां कौण्डिन्याय तक्रमित्यत्र कौण्डिन्यस्य ब्राह्मणविशेषत्वेन तदिषये दधिदानापवादेन तक्रदानविधिः। "सत्यः स्याद् विषयो यस्य स विशेषविधिर्मतः" व्या०का०। [क्रते च।

विशेषित त्रि० वि+शिष-णिच्-क्त। १भेदिते २विशेषणयुक्ते

विशेषोक्ति स्त्री अर्थालङ्कारभेदे अलङ्कारशब्दे ४०५ पृ० दृश्यम्।

विशेष्य त्रि० विशिष्यते भेद्यते गुणादिभिरसौ वि+शिष-कर्मणि ण्यत्। गुणादिभिर्भेद्ये १व्यवच्छेद्ये पदार्थे २धर्मिणि च। तस्य भावः तत्त्व। विशेष्यतया विषयताविशेषे स च तज्ज्ञानीयतत्तत्किञ्चित्प्रकारतानिरूपितः संसर्गविषयतासम्बन्धः विषयताविशेषः इति प्राञ्चः। तत्र समानाधिकरणा प्रकारता विशेष्यता च एकैवेति जगदीशः। तयोर्भिन्नत्वम् अवच्छेद्यावच्छेदकभावश्चेति गदाधरः। यथा घटाभाववद् भूतलमित्यादौ घटनिष्ठप्रकारतानिरूपिता या अभावनिष्ठा विशेष्यता सैव तदवच्छेद्या वा या अभावनिष्ठा प्रकारता तन्निरूपिता भूतलनिष्ठविशेष्यतेति प्राञ्चः। स्वरूपसम्बन्धविशेषत्वन्त्वन्ये।

विशेष्यासिद्ध पु० स्वरूपासिद्धे हेत्वाभासभेदे। यो हेतुः स्वघटकविशेष्यस्वरूपः पक्षे न तिष्ठति तादृशे हेतौ यथाशब्दो नित्योऽस्मार्थत्वे सति द्रव्यत्वादित्यादौ यत्र अस्मार्थत्वविशिष्टं द्रव्यत्वं हेतुः तत्र विशिष्टं द्रव्यत्वं शब्देऽसिद्धमिति स्वरूपासिद्धो हेतुः।

विशोक पु० विगतः शोकः यस्मात् यस्य वा। १अशोकवृक्षे राजनि०। २शोकरहिते त्रि०। योगशास्त्रोक्ते १चित्तवृत्तिभेदे स्त्री। "विशोका वा ज्योतिष्मती" पात०सू०। "विशोका विविधविषयवतीति" विवरणम्।

विशोधनी स्त्री विशुध्यतेऽनया शुध-ल्युट् ङीप्। १दर्वीवृक्षे राजनि०। भावे ल्युट्। २शोधने न०। वि+शुध-ल्यु। २शोधनकारके त्रि०। "प्रायश्चित्तं विशोधनम्" स्मृतिः।

विशोधिन् त्रि० वि+शुध-णिच्-णिनि। १शोधनकारके २नागदन्त्यां राजनि० स्त्री ङीप्।

विश्र पु० विश-दीर्घो भावे रक्। दीर्घो वि०कौ०। [अमरः

विश्र(श्रा)ण न० वि+श्रण-णिच्-ल्युट् वा ह्रस्वः। दाने

विश्रब्ध त्रि० वि+श्रम्भ-क्त। विश्वस्ते "विश्रब्धं परिचुम्बन्त्यजातपुलका" सा०द०। २ज्ञाने ३अनुद्यते त्रि० हेमच० ४गाढे त्रि० मेदि०। [इत्तव्यापारस्थावस्थाने च भरतः।

विश्र(श्रा)म पु० वि+श्रम-घञ् वा ह्रस्वः। १विरामे प्र०

विश्रम्भ पु० वि+श्रम्भ-घञ्। १विश्वासे अमरः। २प्रणये ३केलिकलहे मेदि० ४वधे च विश्वः।

विश्राव पु० वि+श्रु-घञ्। १प्रसिद्धौ अमरः २ख्यातौ च।

विश्रुत पु०वि+श्रु-क्त। १विख्याते अमरः। २विशेषेण श्रुते च

विश्लिष्ट त्रि॰ वि+श्लिष-क्त। १वियुक्ते २शिथिले च।

विश्लेष पु॰ वि+श्लिष-घञ्। १वियोगे २शैथिल्ये च मेदि॰।

विश्व न॰ विश-व। १जगति संसारे। २तदभिमानिनि जीवे पु॰। व्याप्तस्य जगदेहे प्रवेशात्तस्य तथात्वम् वेदान्तसारे उक्तम्। ३श्राद्धदेवविशेषे पु॰ ब॰ व॰। ४सकले त्रि॰ ३तदर्थेऽस्य सर्वनामता। श्राद्धदेवाश्च दशविधाः गण-देवताभेदाः यथोक्तम् "वसवो क्रतुदक्षो कालकामौ धुरिः कुरुः। पुरूरवा माद्रवाश्च विश्वे देवाः प्रकीर्त्तिताः" दैवशब्दे ३७५७ पृ॰ दृश्यम्। ५नागरे विश्व-हृदब्रह्मकन्याभेदे विश्वदेवमातरि स्त्री मत्स्यपु॰ ५अ॰। ७व्याप्तिविधायां स्त्री अमरः। ८यतावर्थौ स्त्री राजनि॰ ९विंशत्यक्षरपरिमाणे स्त्री। "युग्माः षण्णवतिः स्तोमा दशभ्य तत्परं भवेत्। विंशा विंशत्परं प्रोक्त" ज्योति-ष्मती। अस्य परिमाणभेद कंसवधिक्प्रसिद्धः। १०विष्णौ न॰ विष्णुस॰। ११देहे न॰ चक्रशब्दे २८०८पृ॰ दृश्यम्।

विश्वकटु पु॰ विश्वं कटुवति कट-कु। १शृगवाकृतिचक्रकुरे अमरः। २शब्दे पु॰ १रत्ने त्रि॰ मेदि॰।

विश्वकर्म्मन् पु॰ विश्वेषु कर्म व्यापारो यस्य। १सूर्य्ये २देवशिल्पिनि अमरः। ३सृष्टिभेदे मेदि॰ ४परमेश्वरे च।

विश्वकृत् पु॰ विश्वं करोति कृ-क्विप्। १विश्वकर्मणि २परमेश्वरे च

विश्वकेतु पु॰ विश्वे केतवोऽस्य। अग्निरुद्रे अमरः।

विश्व(श्व)क्सेन विष्णु(ष्णु)भी सेना यस्य। १विष्णौ अमरः २प्रियङ्गुवृक्षे स्त्री ३विष्णोर्निर्माल्यधारके तदीयगणभेदे "निर्माल्यधारी विष्णोस्तु विश्व(श्व)क्सेनश्चतुर्भुजः" कालिकापु॰ ८२अ॰। ४त्रयोदशमनौ मत्स्यपु॰ १९०॰। यमध्य एवेश्वर्येषु पा॰ सम्मतः भरतस्तु यमध्यतामाह तन्मूलं चिन्त्यम्। [च राजनि॰।

विश्वगन्ध न॰ विश्वतो गन्धोऽस्य। १गोवे गन्धरसे २पलाण्डौ

विश्वगन्धा स्त्री विश्वे सकला गन्धा यस्याम्। पृथिव्याम् शब्दच॰। [राजनि॰।

विश्वग्रन्थि स्त्री विश्वतो ग्रन्थिर्यस्याः। कंसघण्टीलतायाम्

विश्व(श्व)त् अव्य॰ विष् विश्वं वा अश्नुते क्विप् पृषो॰ विश्वस्य विशुः ततः सप्तम्यादौ असि तस्य लुक्। १सर्वत रत्यर्थे। अमेरभावे। २सर्वत्रगामिनि त्रि॰ स्त्रियां विश्वूचो भवे विश्व(श्व)ञ्च रत्यादि। वृद्धागमे विश्वद्रूच् उक्तार्थे। भवे विश्वद्रीच रत्यादि। यमध्यतां भरत आह तन्मूलं चिन्त्यम्।

विश्वचक्र न॰ दानभेदे मत्स्यपु॰ तद्विधिर्यथा "अथातः संप्रवक्ष्यामि महादानमनुत्तमम्। विश्वचक्र-मितिख्यातं सर्वपातकनाशनम्। तपनीयस्य शुद्धस्य चक्रन्तु कारयेत्। श्रेष्ठं पलसहस्रंच तदर्द्धेन तु मध्य-मम्। तस्यार्द्धेन कनिष्ठं स्यादिश्वचक्रमुदाहृतम्। अन्य-दिंगतपलादूर्द्धमशक्तोऽपि निवेदयेत्। षोडशारं तत-चक्रं भूमिनेम्यष्टकाङ्कितम्। नाभिपद्मे स्थिरं विष्णुं भोगारूढं चतुर्भुजम्। शङ्खचक्रगदापद्मं तु देयष्टक-समाहितम्। द्वितीयावरणे तद्वत् पूर्वतो ब्रह्मसंयुतम्। ऋत्विग्भिर्गुरुशिष्यैश्च ब्रह्मा कार्य्यश्च एव च। मत्स्यः कूर्म्मो वराहश्च नरसिंहोऽथ वामनः। रामो रामश्च रामश्च बुद्धः कल्की च ते दश। द्वितीयावरणे गौरी माद्रभि-र्बन्धुभिर्युता। चतुर्थे द्वादशादित्या वेदाश्चत्वार एव च। पञ्चमे पञ्च भूतानि रुद्राश्चैकादशैव तु। लोकपाला-ष्टकं षष्ठे दिङ्मातङ्गास्तथैव च। सप्तमेऽस्त्राणि सर्वाणि मङ्गल्यानि च कारयेत्। अन्तरान्तरतो देवान् विन्य-सेदष्टमे पुनः। तदाप्लुत्यवतं शेषं समनात् परिकल्प-येत्। ऋत्विङ्मण्डपसंभारभूषणाच्छादनादिकम्। विश्व-चक्रं ततः कुर्य्यात् कृष्णाजिनतिलोपरि। तदाढ-दश धान्यानि रसाश्च लवणादयः। पूर्णकुम्भाष्टकञ्चैव वस्त्राणि विविधानि च। माल्येषु फलरत्नानि वितानं चापि कल्पयेत्। ततो मङ्गलशब्देन स्नातः शुक्लाम्बरो धृत्वा। होमाधिवासनान्ते तु स्तुतिकुसुमाञ्जलिः। दक्षसव्यारदेन्मन्त्रं त्रिः कृत्वा तु प्रदक्षिणम्। नमो विश्व-मयायेति विश्वचक्रात्मने नमः। परमानन्दरूपी त्वं पाहि नः पावकेर्मात्। तेजोमयमिदं यस्मात् सदा पश्यन्ति योगिनः। क्षुद्रं तच्चिन्तयित्वातु विश्वचक्रं समाश्रयेत्। वासुदेवस्थितञ्चक्रं चक्रमध्ये च माध-वम्। अन्योन्याधारकरूपेण प्रणमामि स्थितावुभौ। विश्वचक्रमिदं यस्मात् सर्वपापहरं परम्। आयुध-ष्वाधिवासस्तु भवादृङ्मार्गितः"।

विश्वजित् पु॰ विश्वं जयति जि-क्विप्। १विष्णौ २सर्वस्व दक्षिणे यज्ञभेदे "विश्वजिता यजेत" श्रुतिः। ३तदधि-कारेण श्रुतफलत्वे स्वर्गफलकल्पकन्यायभेदे मीमां॰।

विश्वदेवा स्त्री विश्वतो दीव्यति दिव-अच्। १क्षुद्रमक्षेषु-कायाम् (गोरलचाकुलिया) जटा॰। २नागवलायां ३रक्त-पुष्पदूर्वायां च रत्नमाला। कर्म॰। ४विश्वाख्यदेवगणे पु॰

विश्वधारिणी स्त्री विश्वं धारयति धृ-णिनि। पृथिव्याम्

विश्वपर्णी स्त्री विश्वतः पर्णान्यस्याः। भूम्यामलक्यां राजनि॰

विश्वभुज् पु॰ विश्वं पृणाति भक्षति पृण-क्विनि। १सर्वभक्षके वह्नौ

२चन्द्रे हेमच०। ३देवे ४विश्वकर्मणि ६भूमौ संक्षिप्त० ६स्वर्णे शब्दर०।

विश्वभेषज न० विश्वेषां भेषजम्। ६तत्त्वज्ञाने अमरः।

विश्वमटा स्त्री विश्वस्य मटोयस्याः। अग्निजिह्वाभेदे शब्दमा०

विश्वम्भर पु० विश्वं बिभर्त्ति भृ-अच् मुम् च। १इन्द्रे अमरः २विष्णौ च। ३पृथिव्यां स्त्री।

विश्वरूपक न० विश्वं रूपमस्य कप्। लक्षाग्रुरुचि राजनि०

विश्वरेतस् पु० विश्वं रेतोरेतोऽस्य वस्तु। चतुर्मुखे ब्रह्मणि हेमच०। [चशब्दे त्रिका०।

विश्वरोचन पु० विश्वान् रोचयति रुच-णिच्-ल्यु। वाड़ी-

विश्ववेदस् पु० विश्वं वेत्ति विद-असुन्। १इन्द्रादौ देवे २सर्वज्ञे च। [(फर्णमनस) २हंसे पु० शब्दच०।

विश्वसार न० विश्वेषां सारम्। १तन्त्रभेदे। संज्ञायां कन्।

विश्वस्रज् पु० विश्वं सृजति सृज-क्विन्। चतुर्मुखे ब्रह्मणि अमरः। कृदादौ कुः विश्वस्रक् विश्वस्रग्भ्यामित्यादि

विश्वस्त त्रि० वि+स्रस-क्त। १ज्ञातविश्वासे। २विधवायां स्त्रियां स्त्री अमरः। या ङीष्। विश्रम्भित त्रि०ज्ञातविश्वासे

विश्वस्था स्त्री विश्वतः तिष्ठति स्था-क। प्रतापस्यां राजनि०

विश्वाची स्त्री विश्वमञ्चति अञ्च-क्विप्। १कपूरशरोभेदे वाक्षिप्०। २वाङ्मरोगभेदे भावप्र० तल्लक्षणादि० तत्रोक्तं यथा "अथ विश्वाचीलक्षणमाह "तलं प्रलम्बकीनां वा कण्डरा बाहुपृष्ठतः। बाहोः कर्मक्षयकरी विश्वाची सा निगद्यते"। कण्डरा महास्नायुः तलं कक्षोपरिभागः तलशब्दोऽत्र उपरिवाचकः यथा भूमितलमिति। तेनायमर्थः बाहुपृष्ठतः बाहोः पृष्ठं बाहुपृष्ठमारभ्य तलं प्रतिकक्षतलं यावत्कीलक आकुञ्चनां कण्डराख्याः सन्त्यत्र बाहोः प्रसारणाकुञ्चनादिकर्मक्षयकरी भवति सा दृढ़ वातव्याधिषु विश्वाचीत्युच्यते बाहोरिति द्विवचनं बहुवचनपरम्। एकस्मिन्नपि बाहौ विश्वाची भवति" भावप्र०।

विश्वात्मन् पु० विश्वमात्मा यस्य। विष्णौ विष्णुस०।

विश्वधामन् पु० विश्वं दधाति धारयति धा-असुन् विश्व पूर्वदीर्घः। देवे त्रि०को०।

विश्वानर पु० अग्निजनके विप्रभेदे वैश्वानरशब्दे दृश्यम्।

विश्वामित्र पु० विश्वं मित्रमस्य पूर्वपददीर्घः। माधिसुते ऋषे ब्रह्मर्षिभेदे हरिवं०२८अ०।

विश्वामित्रप्रिय पु० ६त०। १नारिकेले शब्दर० २श्रीरामे च

विश्वा(श्व)राज् पु० विश्वेषु राजते राज-क्विप्। १विश्वेषां राजनि। २परमेश्वरे च अस्य कृदादावेव समासत्व विश्वराजाविल्यादि। [भेदे २रात्रौ स्त्री मेदि०।

विश्वावसु पु० विश्वेषां वसु यस्मात् पृषो० दीर्घः। १गन्धर्व-

विश्वास पु० वि+स्रस-घञ्। १दृढमित्यमेवेत्याकारे १चित्तवृत्तिभेदे प्रत्यये अमरः। २शङ्कायाञ्च "नक्षिनाञ्च नदीनाञ्च शृङ्गिणां शस्त्रपाणिनाम्। विश्वासो नैव कर्त्तव्यः" चाणक्यः

विश्वेदेव पु० ब०व० कर्म० असुक्स०। "क्रतुर्दक्षो वसुः सत्यः कामः कालस्तथा धुरिः। रोचनोमाद्रवाश्चैव तथा चान्यः पुरूरवाः। विश्वे देवा भवन्त्येते दश श्राद्धेषु पूजिताः" इत्युक्ते श्राद्धदेवभेदे। २वह्नौ पु० संक्षिप्त०।

विश्वेश पु० ६त०। शिवे, विश्वेश्वराद्योऽण्।

विश्वौषध न० विश्वेषु रोगेषु औषधम्। गुडूच्याम्। राजनि०

विष व्याप्तौ जु० उभ० सक० अनिट्। वेवेष्टि वेविष्टे हरित् अविषत् अविक्षत त। विष्णुः।

विष विप्रयोगे क्र्या० पर० अक० अनिट्। विष्णाति अविक्षत् विष सेचने भ्वा०पर०सक०अनिट्। वेषति अविक्षत्। [षतिः।

विष् स्त्री विष-क्विप्। १विष्ठायाम् अमरः २कन्यायां च विट्-

विष न० विष-क। १जले अमरः २पद्मकेशरे, रावसकुटः। ३गन्धरसे बोले ४वत्सनाभे-विषे च ५गरलमात्रे पुंन० राजनि०। ६सुरायाञ्च पु० अमरः। गरलरूपविषस्य नाम लक्षणादिकं भावप्र०उक्तं यथा "विषं तु गरलः खेऽस्त्र भेदानुदाहरे। वत्सनाभः सङ्कारिद्रः सक्तुकश्च प्रदीपनः। सौराष्ट्रिकः शृङ्गिकश्च कालकूटस्तथैव च। डाकाहलो ब्रह्मपुत्रो विषभेदा अमी नव"। तत्र वत्सनाभस्य स्वरूपनिरूपणम्। "सिन्दुवारसदृक्पत्रो वत्सनाभ्याकृतिस्तथा। वत्सपार्श्वेन तरोर्हि वत्सनाभः स भाषितः"। अथ सङ्कारिद्रस्य स्वरूपनिरूपणम् "सङ्कारिद्रदलमूलो यो सङ्कारिद्रः स उदाहृतः"। अथ सक्तुकस्य स्वरूपम् "यदग्निभिः सक्तुकेनेव पूर्णमध्यः स सक्तुकः"। अथ प्रदीपनस्य स्वरूपम् "वर्त्तनो लोहितो यः स्याद्दीप्तिमान् दहनप्रभः। सङ्कादाहकरः पूर्वैः कथितः स प्रदीपनः"। अथ सौराष्ट्रिकस्य स्वरूपम् "सुराद्रविप्रभे यः स्यात् स सौराष्ट्रिक उच्यते"। अथ शृङ्गिकस्य स्वरूपम् "यस्मिन् गोशृङ्गके वर्त्ते दुग्धमस्रवति लोहितम्। स शृङ्गिक इति प्रोक्तो द्रव्यतत्त्वविशारदैः"। अथ कालकूटस्य स्वरूपम् "देवासुररणे देवैर्वासुकेस्य शृङ्गमालिनः। दैत्यस्य रुधिराक्तात्तस्करात्तस्य सम्भवः। निर्यासः कालकूटोऽस्य मुनिभिः परिकी-

क्षितः। कोऽहिफेने मूलवेरे कोद्रवे मद्ये भवेत्' अथ फालाहृतस्य लक्षणम् "गोलनाभसमो गुरुः फालपत्रैरदष्टया। तेजसा यस्य दह्यन्ते वनीपस्या द्रुमादयः। अयौ फालाहृतोऽवेयः किञ्चिन्न्यायां स्थिरालये। दक्षिणाक्षितटे देये कोद्रवेऽपि च जायते'। अथ ब्रह्मपुत्रस्य लक्षणम् "वर्षतः कपिलो यः स्यात्तथा भवति धारतः। ब्रह्मपुत्रः स विज्ञेयो जायते मलवाचले। ब्राह्मणः पाण्डुरक्षेषु क्षत्रियो रोहितप्रभः। वैश्यः पीतोऽसितः शूद्रो विष लक्षणतर्विधः। रसायने विषं सिद्धं क्षत्रियं देहशुद्धये। वैश्यं कृष्णविनाशाय शूद्रं दद्यात् वधाय हि'। (एते च स्थावरविषाः) तेषां शोधनविधिः तत्रैव स्थानान्तरे "गोमूत्रे त्रिदिनं स्थाप्यं विषं तेन विशुद्धयति। रक्तवर्णपतेत्काक्षं तथा धार्य्यञ्च वासयि। ये गुणा मरणे प्रोक्तास्ते गुणीना विशोधनात्। तस्माद्विषं प्रयोगे तु शोधयित्वा प्रयोजयेत्'। अथ विषस्य गुणाः "विषं प्राणकरं प्रोक्तं व्यवायि च विकाशि च। आग्नेयं वातकफहृत् योगवाहि महाबलम्"। व्यवायि सकलकायशुष्यव्यापनपूर्वकपाकगमनशीलम्। विकाशि ओजःशोषणपूर्वकसन्धिबन्धविश्लेषकरणशीलम्। आग्नेयम् अधिकाग्न्यंशम्। योगवाहि संसर्गिगुणग्राहकम्। महाबलं तमोगुणप्राधान्येन दुर्विधंसकम्। "तदेव युक्तियुक्तन्तु प्राणदायि रसायनम्। योगवाहि परं वातश्लेष्मजित् वह्निप्रातहृत्'। अथोपविषाणां निरूपणम् "अर्कक्षीरं स्नुहीक्षीरं लाङ्गली करवीरकः। गुञ्जाहिफेनोधत्तूरः सप्तोपविषजातयः"। एतेषां शोधनं चिन्त्यं गुणाश्चात्र तत्र दृष्टव्याः"।

तत्र विषस्य द्वैविध्यमाह "स्थावरं जङ्गमञ्चैव द्विविधं विषमुच्यते। दर्वीकरोद्भवादीनां तु द्वितीयं कोऽणाश्रयम्'। स्थावरविषस्य दशाश्रयत्वाह "मूलं पत्रं फलं पुष्पं त्वक् क्षीरं सारमेव च। निर्यासो धातवः कन्दः स्थावराश्रया दश'। तद्यथा मूलविषं करवीरादि। पत्रविषं विषपत्रिकादि, फलविषं कर्कोटकादि, पुष्पविषं नेत्रादि, त्वक्सारनिर्यासविषाणि करञ्जादीनि क्षीरविषं स्नुह्यादि धातुविषं हरितालादि कन्दविषं वत्सनाभशृङ्गकादि। जङ्गमविषस्य कोऽणाश्रयत्वाह "दर्वि-निःश्वासदंष्ट्रा च नखमूत्रमलानि च। शुक्रं लालाकफश्चर्म्मः सदंशं लालमर्दितम्। गुदाक्षिपित्तशुक्राणि दश षट् जङ्गमाश्रयाः'। तद्यथा दर्विनिःश्वासविषाः दिव्याः सर्पाः, दंष्ट्राविषाः औमसर्पाः दंष्ट्रानखविषा व्याघ्रादयः, मूत्रपुरीषविषाः लूताकीटोधिकादयः शुक्रविषा मूषिकादयः, लालाविषाः सञ्जिटिकादयः, लालाचर्म्ममूत्रपुरीषार्त्तवशुक्रसङ्गसदंष्ट्रास्यार्त्तवमर्दितगुदपुरीषविषाक्षिपत्तशोणितोदयः, अक्षिविषाः सर्पादयः, पित्तविषाः मक्षिकमत्स्यादयः, शुक्रविषाः भ्रमरादयः। स्थावरविषाणां सामान्यानां कार्य्याण्याह। तत्र मूलविषस्य कार्य्यमाह "दहेत्तनं मूलविषैर्मोहः प्रलपनं तथा'। पत्रविषस्य कार्य्यमाह "जृम्भणं वेपनं श्वासो नखा पत्रविषैर्भवेत्'। फलविषस्य कार्य्यमाह "गुल्मशोथः फलविषैर्दाहोद्वेष्य भोजने'। पुष्पविषस्य कार्य्यमाह "भवेत् पुष्पविषैश्छर्दि-राध्मानं मूर्च्छनं तथा"। त्वक्सारनिर्य्यासकार्य्याण्याह "त्वक्सारनिर्य्यासविषैरुपमुक्तैर्भवन्ति हि। आक्षेपोर्ग-न्थ्यपाश्वशिरोरुकफवंश्रयाः'। क्षीरविषकार्य्यमाह "फेनागमः क्षीरविषैर्विभेदो गुरुजिह्वता'। धातुविष-कार्य्यमाह "हृत्पीड़नं धातुविषैर्मूर्च्छा दाहश्च तालुनि। प्रायेण कालघातीनि विषाण्येतानि निर्दिशेत्'। एतानि मूलविषाणि सद्य कालघातीनि कालान्तरे मारयन्ति। कन्दविषस्य कार्य्यमाह। "कन्दजान्युग्रवीर्य्याणि यान्युक्तानि लक्षोदय। सर्वाण्येतानि कुशलैर्यानि दश-भिर्गुणैः। स्थावरं जङ्गमं वापि कृत्रिमं चापि यद्विषम्। सद्यो निहन्ति तत् सर्वं गुणैश्च दशभिर्युतम्"। तान् दशगुणानाह "रूक्षतीक्ष्णं तथा शीघ्रं सूक्ष्ममाशु व्यवायि च। विकाशि विशदञ्चैव बहुपाकि च ते दश' तैर्गुणैर्विषस्य कार्य्यमाह "तद्रौक्ष्यात् कोपयेद्वायु-कौष्ण्यात्पित्तं सशोणितम्। तैक्ष्ण्यात्क्लान्तिं मोहयति मर्म्मबन्धान् छिनत्ति हि। शरीरावयवान् सौक्ष्म्यात् प्रविशेदिकरोति च। आशुत्वादाशु तत् प्रोक्तं व्यवायात् प्रकृतिं हरेत्। विकाशित्वात् क्षपयति दोषान् धातून्-ओजसि। अतिरिच्यते वैशद्यात् दुश्चिकित्स्यं च बाहु-ल्यात्। दुर्जरं चाविपाकित्वात् तस्मात् क्लेशयते चिरम्"। विषविप्लवलक्षणस्य लक्षणमाह "सद्यः पार्श्वं याति यस्य भुक्तं तत् सवेदनं पच्यते चाप्यभीक्ष्णम्। क्लेशीभूतं क्लिन्नगन्धं पूतिजलाभासं शीर्य्यते यस्य वापि। तस्या-तायौ दाहमूर्च्छे च यस्य दिग्धं विद्धं तं मनुष्यं व्यवस्येत्। विक्लान्तेतान्येव कुर्य्यादभिलैंङ्गः क्लेदो वा व्रणे यस्य वापि'। पच्यते चाप्यभीक्ष्णं पुनः पुनः

पाकमेति तापः वह्निःस्थितः, दाहोऽभ्यन्तरे। वः कुर्यादित्यत्र क्तं कर्तृपदं योजनीयम्। प्रायेण राजादीनामन्नादौ गरदो विषं ददाति। तेषां ज्ञानार्थं लक्षणमाह "इङ्गितज्ञो मनुष्याणां वाक्चेष्टासुखवैक्लवैः। जानीयादिष्टदातारमेभिर्लिङ्गैश्च बुद्धिमान्। न ददात्युत्तरं पृष्टो विक्लवोऽन्यमेति च। अपार्थं बहु सङ्कीर्णं भाषते चापि मूढवत्। अङ्गुलीः स्फोटयेद्वीक्ष्य विलिखेच्च महीमपि। वेपथुश्चास्य भवति तत्सर्वं वैकमोच्यते। विवर्णवक्त्रः श्यामश्च नखैः किञ्चिच्छिनत्ति च। आलभेता बलाद्दीनः करेण च शिरोरुहान्। निर्विद्यासुरपदारैः वीक्षते च पुनः पुनः। वर्त्तते विपरीतं च विषदाता विचेतनः"। इङ्गितमभिप्रायसूचकम् आकारं सुखवैक्लवं सुखवैवर्ण्यादि एभिर्लिङ्गैर्वक्ष्यमाणैः न ददात्युत्तरं पृष्टः क्षोभायत्कर्मजनितव्यामोहात् सङ्कीर्णम् अस्फुटं भयजनितवर्णव्यपनोदायाङ्गुलीः स्फोटयेत् प्रकुर्यात्। अङ्गेतापि श्यामः दग्धसमानवर्णः, आलभेत स्पृशेत् विपरीतं यथा स्वादेव वर्त्तते। अङ्गमक्षिणाद्यां सामान्यानां कार्यमाह "निद्रां तन्द्रां क्लमन्दाहं सम्यक् लोमहर्षभम्। क्षोभं वैवर्णतां च कुरुते लङ्घनं विषम्"। लङ्घनेषु तीक्ष्णतरेषु सर्पाणाह "वातपित्तकफात्मानो भोगिमण्डलराजिलाः। यथाक्रमं समाख्याता द्वन्द्वजा दन्दशूकिनः। फणिनो भोगिनो ग्रैवा संख्याताश्चेत्र विंशतिः। मण्डलैर्विविधैश्चित्राः पृथवो मन्दगामिनः। षट् ते मण्डलिनो ग्रैवा व्यञ्जनाकृतिधाः स्मृताः। स्निग्धा विविधवर्णाभिश्चित्रं गूर्ध्वं च राजिभिः। विचित्रा इव ते भान्ति राजिलास्ते हि तैरपि षट्"। एते यथाक्रमं वातपित्तकफात्मानः द्वन्द्वजाः द्वे द्वन्द्वे भेदौ येषां ते द्वन्द्वजाः, यथा भोगिनो मण्डलिन्यां जाताः इत्यादि। भोगिप्रभृतिकृतदंशदेशलक्षणमाह "दंशो भोगिकृतः कृष्णः सर्ववातविकारकृत्। पीतो मण्डलिनः श्वेतो रुजः पित्तविकारवान्। राजिलोत्थो भवेद्दंशः स्निग्धश्वेतश्च पिच्छिलः। पाण्डुः स्निग्धोऽतिसान्द्रास्रकृत्सर्वत्रैष्मविकारवान्"। देशविशेषे कालविशेषे च दष्टस्याध्यायमाह "अम्बुदेवायतनश्मशानवल्मीकसन्ध्यासु चतुष्पथेषु। याम्ये च पित्र्ये परिवर्जनीया काले नरा सर्वसु ये च दष्टाः"। याम्ये भरणां पित्र्ये मघायाम् "दर्वीकराणां विषनाशु इन्ति सर्पाणि क्षीणे द्विगुणीभवन्ति"। उष्णे उष्णसंयोगे। दर्वीकरलक्षणमाह "रक्ताङ्गुलाङ्गलक्षलिकाङ्गुलधारिणः। श्वेता दर्वीकराः सर्पाः फणिनः शीघ्रगामिनः"। अपरेषु येषु विषमाशु मारकं भवति तानाह "अजीर्णपित्तातपपीडितेषु बालेषु वृद्धेषु बुभुक्षितेषु। क्षीणे क्षते मेढ्रिनि कृच्छ्रजुष्टे रूक्षे बले गर्भवतीषु चापि। यस्मिन्नते यस्य न रक्षसस्ति राज्ञो व्रतानिव न सन्त्यवन्ति। भीताभिरङ्गिव न रोमहर्षो विप्राभिभूतं परिवर्जयेत्तम्। जिह्मं सखं यस्य च वेगघातो नासावसादश्च सकण्ठभङ्गः। अक्ष्णोश्च रक्तः श्रवणश्च दंशे कृच्छ्रो स्थिरत्वश्च विवर्जनीयम्"। वेगघातः आकर्षणात्, नासावसादः नासावाः नतत्वं कण्ठभङ्गः ग्रीवाधारणाशक्तिः कृच्छ्रो स्थिरत्वं हनुहृदयसन्धेः। अपरञ्च "वान्तिर्घना यस्य निरेति वक्त्राद्रक्तं सवेदुर्मधवश्च यस्य। दंष्ट्रानिपातावतुरश्च यस्येद् यस्यापि वैद्यैः परिवर्जनीयः"। वान्तिः रुधिरस्य, यस्य च नासास्रस्रविकृमिदाहिभ्यो रक्तं स्रवेत् उल्बणमत्यर्थसृग्दुष्टं वा क्षीणस्वरं वाप्यथ वा विवर्णम्। शारिष्टमत्यर्थमवेगिनञ्च जह्यान्नरं तत्र न कर्म कुर्यात्"। अत्यर्थसृग्दुष्टं वा उल्बणातिसारादिभिरतिशयेनोपद्रुतं क्षीणस्वरं वक्त्रमुखं विवर्णं कृष्णवर्णं शारिष्टं नासाभङ्गादियुक्तम्। अवेगिनं वेगो विषवेगः। (जहरि) इति लोके तद्दूषितम्। स्थावरं जङ्गमं च विषमेव लोष्टत्वादिभिः कारणैः दूषीविषसंज्ञां लभते तदाह "लीर्णं विषमौषधिदूषितं वा दावाग्निवातातपशोषितं वा। स्वभावतो वा गुणविप्रहीणं विषं हि दूषीविषतामुपैति"। लीर्णम् अतिपुराणं विषमौषधिदूषितं विषमौषधीभिर्लीर्णं लीनीकृतं स्वभावतो वा गुणविप्रहीनं स्वभावादेव दशानां गुणानां मध्ये एकद्वित्र्यादिगुणहीनम्। दूषीविषस्य कार्यमाह "वीर्यालस्यभावाच्च निपातयेत् तत् कफान्वितं वर्षगणानुबन्धि। तेनार्दितो भिन्नपुरीषवर्णो विमन्यिवैरस्ययुतः पिपासी। मूर्च्छां भ्रमं गद्गदवाक्त्वमिष्टं विचेष्टमानोऽरतिमाप्नुयाद् वा"। न निपातयेत् न मारयति कफान्वितं कफेन सन्दीक्षतोष्णादिगुणं वर्षगणानुबन्धि कफेनाग्नेर्मान्द्यादीर्घपाकाश्चिरस्थायि तथा दूषीविषजदष्टुरोगवतां भिन्नपुरीषवर्णश्च भिन्नपुरीषोद्गतमलः भिन्नवर्णो विवर्णः। विचेष्टमानः विरुद्धां चेष्टां कुर्वन् मूर्च्छादीन् व्याधीन् लभते। स्थानविशेषोत्थिते दूषीविषे लिङ्गविशेषमाह। "आमाशयस्थे कफपात-

रोगी पक्वाशयस्थेऽनिलपित्तरोगी। भवेत् वसद्ध्वजशिरोऽङ्गरुट्को विलूनपक्षश्च यथा विहङ्गः"। वसद्ध्वजशिरोऽङ्गरुट्कः वसद्धजाः शिरोरुहाः केशाः अङ्गरुहः लोमानि यस्य सः एतदपि लिङ्गं पक्वाशयस्थे दूषीविषे बोद्धव्यम् "स्थितं रसादिस्थ तद्यथोक्तान् करोति धातुप्रभवान् विकारान्"। तत् दूषीविषं यथोक्तान् वसते व्याधिसङ्घैर्योक्तान्। दूषीविषस्य प्रकोपसमयमाह "कोपं तु शीतानिलदुर्दिनेषु वाताशु पूर्वं भजते तस्य रूपम्"। कुपितस्य दूषीविषस्य पूर्वरूपमाह "निद्रा गुरुत्वं विजृम्भणञ्च विश्लेषहर्षौ वपुषश्च वाङ्मदैः"। विश्लेषः गात्रशैथिल्यं हर्षः रोमाञ्चः। रूपमाह "ततः करोत्युत्तमदाविपाकावरोचकं मण्डलकोठजन्म। मांसक्षयं पाणिपदास्यशोथं मूर्च्छां तथा कृच्छ्रमथातिसारम्। दूषीविषं श्वासरसौ ज्वरं च कुर्यात् प्रदुष्टं जठरस्य चापि" उत्तमदः उत्तमे मुक्ते पूगफलेनेव मदः। अविपाकः अजीर्णम्। दूषीविषभेदेन विकारानाह "तस्मादमन्यज्ञनवेत्तथान्यदाहारमन्यत् च पचेच्च शुक्रम्। गाढद्यमन्यज्ज्ञनयेच्च कुर्यात् तांस्तान्विकारांश्च बहुप्रकारान्"। अन्यत् दूषीविषं तांस्तान् विकारान् विसर्पविस्फोटादीन्। दूषीविषस्य निरुक्तिमाह "दूषितं देशकालाद्यं दिवास्वप्नैरभोजनैः। यस्मात् संदूषयेद्धातूंस्तस्माद्दूषीविषं स्मृतम्"। देशः अनूपादिः कालः दुर्दिनादिः अन्नं कुलत्थतिलमत्स्यादि धातुदूषकत्वाद्दूषीविषम्। दूषीविषस्य साध्यत्वादिकमाह "साध्यमात्मवतः यद्यो याप्यं संवत्सरोत्थितम्। दूषीविषमसाध्यं स्यात् दोषस्याहितसेविनः"। कृत्रिमं विषं द्विविधम् एकं सविषं दूषीविषसंज्ञम् अपरमविषं तदेव गरसंज्ञं तथा च काश्यपसंहितायाम् "संयोगजञ्च द्विविधं द्वितीयं विषमुच्यते। दूषीविषं तु सविषमविषङ्गर उच्यते"। संयोगजं कृत्रिमं विषं द्वितीयं स्वाभाविकं तच्च द्विविधम्। तत्र दूषीविषमभिधाय गरं दर्शयितुमाह "सौभाग्यार्थं स्त्रियः स्नेहरजोनानाकृजान् भजान्। यत्र प्रयुञ्जते गरान् प्रयच्छन्त्यग्निश्रितान्"। गरकार्यमाह "तैः स्यात् पाण्डुक्षयोऽत्यग्निर्ज्वरश्चोपजायते। मर्मग्रधमनाघ्राणं हृदयोः शोषसम्भवः। जठरग्रहणीरोगा यक्ष्मागुल्मभयो ज्वरः"। तैः गरैः स्नेहरजःप्रभृतिभिः ज्वरश्चोपजायत इति पचाद्यात्। मर्मग्रधनं मर्मग्रथा च धातुक्षयः। लूतानां जन्तुविशेषाणामुत्पत्तिं निरुक्तिं लक्षणमाह "लक्षाकृमिभ्यः पक्वान्नं भक्षयं प्राप्य सूनेः पक्वे दविन्द्रयः। तेभ्यो जातास्तथा लूता इति ख्याताासु षोडश"। अत्र सुश्रुतः "विश्वमित्रो नदपरः कदाचिदधिवासयम्। वशिष्ठं कोपयामास गत्वाऽश्रमपदं किल। कुपितस्य मुनेस्तस्य ललाटात् स्वेदबिन्दवः। अपतन्दर्शनादेव क्षयस्तोत्रर्चयः। लूने दग्धे मरुद्भिस्तु धेन्वर्थे समुपेतेऽपि च। ततो जातास्विषे घोरा नानारूपा महाविषाः। तासामष्टौ कष्टसाध्या वल्मीकाश्चत्र एव हि"। तत्र त्रिमण्डलप्रभृतयोऽष्टौ कष्टसाध्याः सौवर्षिकप्रभृतयोऽष्टावसाध्याः। तासां सामान्यानां दंशलक्षणमाह "तासिदंष्टे दंशकोथः प्रदुष्टिः क्षतजस्य च। ज्वरो दाहोऽतिसारश्च मदाः क्षुच्च विदोषजाः। पिडका विविधाकारा मण्डलानि महान्ति च। शोथा महान्तो रुजदो रक्ताः स्यावाश्चलासवा। सामान्यं सर्वलूतानामेतद्दंशस्य लक्षणम्"। दंशकोथः दंशमध्ये पूतिभावः। "दंशमध्ये तु यत्क्षतं स्यात् वा लाक्षाकृतम्। दग्धाकृति क्षतस्याकं खेदशोषज्वरान्वितम्। दूषीविषाभिलूतासिक्षतमिति निर्दिशेत्"। सौवर्षिकादयोऽष्टावसाध्या प्राणहरास्तासां लक्षणमाह "शोथः श्वेता सिता रक्ता पीता च पिडका ज्वरः। प्राणान्तिको भवेद्दाहः श्वासश्छर्दिश्शिरोग्रहः"। आखुदूषीविषलक्षणमाह "आदंशाच्छोथितं याखुमण्डलानि रोऽरुचिः। लोमहर्षश्च दाहश्चाखुदूषीविषार्दिते" प्राणहरमूषकविषकार्यमाह "मूर्च्छाङ्गशोथवैवर्ण्यं क्लेदश्छर्द्यास्रुषिज्वराः। शिरोगुरुत्वं लालास्रक् छर्दिश्चासाध्यमूषकात्। अङ्गशोथोऽत्र मूषकाकारो वाढ्य इति। तन्त्रान्तरे अलर्कदष्टस्य लक्षणमाह "शोथस्य कार्ष्ण्यमथ वा नानावर्णत्वमेव च। शोफोऽथ वर्चसो भेदो दष्टस्य अलर्कलूतैः"। इक्षिकविषस्य लक्षणमाह "दष्टस्याग्निरिवादौ तु भिनत्तीवाङ्गमाशु च। इक्षिकस्य विषं याति पश्चात् दंशेऽतिदह्यते"। असाध्यस्य इक्षिकदष्टस्य लक्षणमाह "दष्टोऽसाध्यैस्तु हृद्रुग्भ रक्तोपहतो नरः। मांसैः पतद्भिरत्यर्थं वेदनार्तो जडाक्षिभ्रुत्"। असाध्यैर्दष्टिकैस्तेषामेवानुक्तैः हृदादिषु उपद्रुतः हृदादिक्रियारहितो भवति अत्यर्थं क्लेदनार्तः दृष्टव्यः। कपर्दकदष्टस्य लक्षणमाह "विसर्पः श्वयथुः शूलं ज्वरस्तर्दिरथापि वा। लक्षणं कपर्दकैर्दष्टे दंशवैषम्यमीर्ष्यते"। कपर्दकः कीटविशेषः। उच्चिटिङ्गदष्टस्य लक्षणमाह "व्रणस्तोदोच्चिटिङ्गेन दष्टश्चिङ्गो-

भयार्त्तिमान् । दष्टः शीतोदकेनैव विषान्यङ्गानि मन्यते"। क्षणलोमा सधिकतरक्षणरोमा चञ्चिटिङ्ग (चौटा) कीटविशेषः । तद्विषमक्षूकटस्य लक्षणमाह "एकदंष्ट्रार्दितः सूनः सरजः पीतकः खट् । खनिद्रस्तं दंशमानु दष्टोमक्षूकैः सविषैर्भवेत्" । एकदंष्ट्रार्दितः स्वभावादेकयैव दष्ट्वा दष्टो भवति। तत्सविषस्य कार्य्यमाह "तत्कास्तु सविषा कुर्युर्दाहं शोथं रुजं तथा"। लूताविषकार्य्यमाह "खण्डं शोथं ज्वरं मूर्च्छां सविषास्तु लूताकृतः"। कुर्युरिति शेषः। मण्डलोधिका विषकार्य्यमाह "विदाहं सरुषं शोथं प्रस्वेदं मण्डलोधिकाः"। कुर्युरिति शेषः। शतपदीविषकार्य्यमाह "दंशे स्वेदं रुजं दाहं कुर्याच्छतपदीविषं" शतपदी (गिजारे) रति लोके। मशकविषकार्य्यमाह "कण्डूमान्मशकैरीषच्छोथः स्यान्दन्दवेदनः"। असाध्यमशकलक्षणमाह "असाध्यकीटसदृशमसाध्यं मशकक्षतम्"। असाध्यकीटसदृशं असाध्यैः कीटैर्लूतादिभिः कृतं यत् क्षतं तत् सदृशवेदनम्। मक्षिकादंशलक्षणमाह "सद्यः संजायिनो शोथादाहमूर्च्छाज्वरान्विता। पिडका मक्षिका दंशे तासान्तु स्यगिका तनुः"। तासामित्यादि तासां तनुतोक्तानां मक्षीणां मक्षिकाणां मध्ये स्यगिकानाम्नी शोथं प्राप्य स्थूलीभवतीत्यर्थः। व्याघ्रादिविषाणां कार्य्यमाह "चतुष्पाद्भिर्द्विपाद्भिर्वा नखैर्दन्तैश्च यत् क्षतम्। शूयते पच्यते तत्तु स्रवति ज्वरयत्यपि"। चतुष्पाद्भिः व्याघ्रादिभिः द्विपाद्भिः वनमनुष्यादिभिः शूयते शूनो भवति। विषोल्बणक्षतस्य लक्षणमाह "प्रस्रुतदोषं प्रकृतिस्थधातुमण्डाभिकाभं समन्तूर्ध्वविटकम्। प्रसन्नवर्णेन्द्रिय चित्तचेष्टं वैद्योऽवगच्छेदविषं मनुष्यम्"। प्रसन्नदोषं प्रकृतिस्थदोषं शेषं सुगमम्"। [वल्याकर्कोऽस्याम् राजनि०

विषकण्टकिनी स्त्री विषयुक्तं कण्टकमस्त्यस्या इनि।

विषकण्ठ पु० विषं कण्ठे यस्य। शिवे। [मल्लच०।

विषघ्ना स्त्री विषं हन्ति हन-ड निः कुत्वञ्च। गुडूच्याम्

विषघातिन् पु० विषं हन्ति हन-णिनि। शिरीषवृक्षे मल्लमाला। २विषनाशके त्रि०।

विषघ्न पु०विषं हन्ति हन-टक्। १शिरीषवृक्षे शब्दच०। २यवासे ३विषौषधे राजनि०। ४चम्पकवृक्षे च जटा०। ५हिङ्गुलोचिकायां(पेचेपा)स्त्री ङीप्। हरिद्रायाम् ७वनवर्द्धरायाम् ८भूम्यामलक्याम् ९रक्तपुनर्नवायाम् १०हरिद्रायाम् ११हविष्कान्नाम् १२मण्डूकपर्ण्यां च १३मञ्जकलतायां स्त्री राजनि०ङीप्। १४विषनाशके त्रि०।

विषजिह्व पु० विषयुक्ता जिह्वेव पत्रमस्याः। देवताड़वृक्षे रत्नमा०। [मल्लर०। स्त्रियां ङीप्।

विषज्वर पुंस्त्री० विषमिव प्राणहरो ज्वरो यस्य। १महिषे

विषण्ड न० विशेषेण षण्डम्। मूर्खे मल्लर०।

विषतिन्दु पु० विषयुक्तस्तिन्दुः। १कपीतौ भावप्र०। २कारस्करवृक्षे राजनि०। [वर्षे पु०। ३तदति त्रि० अमरटीका।

विषद न० वि+षद-क। १पुष्पकासीसे राजनि०। २शुक्ल

विषदंष्ट्रा स्त्री विषयुक्ता दंष्ट्रा। १सर्पदंष्ट्रायाम्। विषस्य दंष्ट्रेव नाशकत्वात्। २सर्पकङ्कालीलतायां रत्नमा०।

विषदन्तक पुंस्त्री० विषं दन्ते यस्य कप्। १सर्पे मल्लच० स्त्रियां ङीप्। [चकोरवृक्षे हेमच० स्त्रियां ङीप्।

विषदर्शनमृत्यु पुंस्त्री० विषस्य दर्शनेन मृत्युरस्य कप्।

विषद्रुम पु० विषयुक्तो द्रुमः। कारस्करवृक्षे राजनि०।

विषधर पुंस्त्री० विषं धरति धृ-अच्। १सर्पे अमरः स्त्रियां ङीष्। "विषधरविषमं वनं भवितां" उद्भटः।

विषधर्मन् पु० विषस्येव धर्मोऽस्य अनिच्समा०। (आकन्दी) लतायाम् मल्लच०। [वृक्षे धारा०। २विषनाशके त्रि०।

विषनाशन पु० विषं नाशयति नश-णिच्-ल्यु। १शिरीष-

विषनाशिनी स्त्री विषं नाशयति नाशि-णिनि ङीप्। सर्पकङ्कालीलतायां मल्लच०।

विषनुद् पु० विषं नुदति नुद-क्विप्। श्योनाकवृक्षे मल्लच०।

विषपुष्प न० विषमिव नीलं पुष्पमस्य। १नीलपद्मे मल्लमा० २धुस्तूरवृक्षे (मनफल) रत्नमा० कप्। मदनवृक्षे भावप्र०।

विषम त्रि० विगतो विरुद्धो वा समः। १असमे २अयुग्मे (विजोड़) ३अवस्तावति ४दारुणे ५सङ्कटे च "भिन्नचित्रचतुष्पादं विषमं परिकीर्त्तितम्" इत्युक्ते ६पदभेदे न०। "ओजोऽथ युग्मं विषमः समश्च ओजःतःउक्ते ७मेषसिंहधनुराद्यसमराशौ पु०। ८ताललभेदे पु०"चतुर्विधः परिच्छेदस्तालः कालक्रियात्मकः। पूर्णः१ खण्डः२ समश्चैव विषम४श्चैव कथ्यते। सचतुष्कं गणौ पूर्णे१ खण्डे२ विन्दुद्वयं गुरुः। यत्रत्रस्तु समे प्रोक्तस्तत्तद्गणो विषमे भवेत्" सङ्गीत०। विषमादागतः विषमच, रूप्यण्, विषमरूप्य ञ, विषमीय विषमादायते त्रि० स्त्रि०ङी०। [ऋदे(ऋतिम) अमरः।

विषमच्छद पु०विषमाणि अयुग्मानि सप्त छदाः यस्य। सप्त-

विषमज्वर पु०विषमश्चासौ ज्वरः। ज्वरभेदे। यथोक्तं भावप्र० "तत्र विषमज्वरस्य निदानकथनपूर्व्वकं संप्राप्तिमाह

"दोषोऽस्थोऽस्थिरस्थ्नो ज्वरो रुद्रस्य वा पुनः। भाद्रमन्यतमं प्राप्य करोति विषमज्वरम्"। अयमर्थः ज्वरोऽरुद्र ज्वरोऽस्थ्नश्च। अस्थिरस्थ्नीत्याह। दोषः कफः, ज्वरश्चात्र कफोऽपि। विषमस्थेत्याह। अस्थिमज्जास्नायुशिराद्याश्रितः कफः दूषितः पुनर्विषमज्वरं करोति ज्वरोऽरुद्रस्य वेति वाशब्देनेति बोध्यते। प्रथमतो विषमज्वरो भवति यत उक्तम्। "आमाशयाश्रितो यस्तु" रसादिकम् रसादिकमात्रं दूषयित्वा कंचिद्विषमज्वरं करोति रसस्थेत्याह "सततं रसरक्तस्थः सततं रक्तधातुगः। दोषः क्रुद्धो ज्वरं दुःसं सोऽन्येद्युः पित्तमाश्रितः। मेदोगतस्तृतीयेऽह्नि अस्थिमज्जागतः पुनः। कुर्यात्सप्तर्षिकं घोरमन्तकं रोगसङ्करम्"। अन्तकमिव मारकत्वात्। अथ विषमज्वरस्य सामान्यं लक्षणमाह "यः स्वादनियतात् कालात् शीतोष्णाभ्यां सहैव च। वेगतश्चापि विषमोज्वरः स विषमः स्मृतः"। यः स्वादनियतात् कालादित्यस्यायमर्थः। यथा वातिकोज्वरः सप्त दिनानि, पैत्तिको दश दिनानि, श्लैष्मिको द्वादशदिनानि, दोषाणां प्रबलत्वेवातिकश्चतुर्दशदिनानि, पैत्तिको विंशतिदिनानि, श्लैष्मिकश्चतुर्विंशतिदिनानि स्यात्। तथा विषमज्वरो नियतं कालं स्थाप्य न स्यादित्यर्थः। शीतोष्णाभ्यां सहैव स्यात्। "वेगतश्चापि विषमः कदाचिदतिवेगवान्"। कदाचिन्मन्दवेगः। विषमज्वरस्य भेदानाह "सततः सततोऽन्येद्युस्तृतीयक चतुर्थकौ"। तत्र सततस्य लक्षणमाह "सप्ताहं वा दशाहं वा द्वादशाहमथापि वा। सततो योऽविसर्गी स्यात् सततः स निगद्यते"। विसर्गो वातिकादिभेदात्। सततो नैरन्तर्येण अविसर्गी अपरित्यागी। नन्वेतल्लक्षणं विषमत्वमिति विषमलक्षणम् तदत्र न घटत इति कथमयं विषमेषु पठ्यते"। घटत एवेति न दोषः। यत उक्तं चरकेण "विसर्गं द्वादशे कृत्वा दिवसे अक्लक्षणम्। दुर्लभोपशमः कालं दीर्घमेवानुवर्तते" इति। यच्च चरकादेरुक्तम् "ज्वराः षष्ठ तु ते प्रोक्ताः पूर्वं सततकादयः। चत्वारः सततं हित्वा शेषाश्चैव विषमज्वराः" इति तच्चिन्त्यम् लाघवाभिप्रायेण। सततलक्षणमाह "अहोरात्रे सततको द्वौ कालावनुवर्तते"। द्वौ कालौ कफस्यैककालं रात्रावेककालम्। यतो दोषाश्चाहोरात्रे प्रत्येकं द्वौ द्वौ प्रकोपकालौ। यत उक्तं वाग्भटेन "वयोऽहोरात्रिभुक्तानामन्तमध्यादिकाः क्रमादिति"। अन्येद्युष्कलक्षणमाह। "अन्येद्युष्कस्त्वहोरात्रादेककालं प्रवर्तते"। एककालं दोषमेत्यैवा एककालमपि न द्वितीयं, प्रथमकाले क्षुद्रो दोषस्तिष्ठतीति। तृतीयकचतुर्थकयोर्लक्षणमाह। "तृतीयकस्तृतीयेऽह्नि चतुर्थेऽह्नि चतुर्थकः"। तृतीयेऽह्नि रसाश्रमेनदिनं स्थित्वा यत उक्तम् "दिनमेकमतिक्रम्य यो भवेत् स तृतीयकः। दिनद्वयमतिक्रम्य यः स्यात् स हि चतुर्थकः" इति। अत्राह डल्हणभुतः "कफस्थानविभागेन यथास्वं सततादीन् करोति हि। सततान्येद्युष्कत्वाख्य चतुर्थकप्रवेपकान्। अहोरात्रादहोरात्रात् स्थानात् स्थानं प्रपद्यते। दोष आमाशयं प्राप्य करोति विषमज्वरम्"। अयमर्थः आमाशयोरःकण्ठशिरःसन्धयः पञ्च कफस्थानानि एषु तिष्ठन् दोषो यथास्वं सततादीन् करोति। तत्र आमाशये स्थितो दोषः सततं करोति द्वौ कालौ, अहोरात्रे कालद्वये दोषप्रकोपात्। हृदये स्थितो दोष आमाशयमागत्य अन्येद्युष्कं करोति एककालं नैकस्मादेकस्मिन्नहोरात्रे दोष आमाशयमागत्य अन्येद्युष्कं करोति। तत्र द्वौ दोषप्रकोपकालौ एकस्मिन् काले हृदये तिष्ठत्यपरस्मिन्नामाशय इति। कण्ठे स्थितो दोषोऽहोरात्रात् हृदयमायाति। तृतीये दिने आमाशयमागत्य स्वप्रकोपकाले तृतीयकं ज्वरं करोति एककालं न तु द्वौ कालौ स्वभावात्। एवमेव शिरःस्थितो दोषः अहोरात्रात् कण्ठमायाति ततः पुनरहोरात्रात् हृदयमायाति चतुर्थे दिने आमाशयमागत्य स्वप्रकोपकाले चतुर्थकं ज्वरं करोति एककालमेव द्वौ कालौ स्वभावादेव। नन्वेवं दोषस्यागमनक्रमेण निजस्थानगमनक्रमात् कथं तृतीयचतुर्थदिवसयोर्ज्वरागमनम्। उच्यते। दोषो हि प्रकोपसमये वेगवत्तया लाघवात् स्वस्थानन्तु वेगहीन एव याति। यत आह "दोषः प्रकोपकाले हि वेगवत्त्वेन लाघवात्। वेगवानेव सर्वत्र स्वस्थानमधिगच्छति"। सन्धिषु स्थितः प्रवेपकं करोति। कण्ठशिरआमाशयेऽपि सन्धिषु स्थितः प्रवेपकं सर्वदा करोति "विहृत्तः पुनरायाति विषमो नियते दिने। स्वभावः कारणं तत्र मन्यन्ते मुनिपुङ्गवाः"। स्वभावस्य कारणत्वे कफस्थानविभागनिरपेक्षात्सप्तर्षिकादिविषमज्वराः अपि ज्वराः रूपकाले प्रभवन्ति "ऋषियो यथा भूमिं बीजं स्वे

प्ररोहति। अधिशेते तथा धातून् दोषः काले प्रकुप्यति। सुश्रुतोऽप्याह "स चापि विषमं देहं न कदाचित् प्रमुञ्चति। ग्लानिगौरवकार्श्येभ्यः स यस्माच्च प्रमुच्यते। डेने तु समतिक्रान्ते मतोऽयमिति लक्ष्यते। धातवस्तेषु हीनत्वात् सौक्ष्म्याच्चैवोपलभ्यते"। द्विदोषोल्बणस्य तृतीयकस्य लक्षणमाह "कफपित्तात् त्रिकग्राही पृथग्धातुकफात्मकः। वातपित्ताच्छिरोग्राही त्रिविधः स्यात् तृतीयकः"। त्रिकग्राही वेदनया त्रिकं गृह्णातीत्यर्थः। ननु कफपित्तात् त्रिकग्राही वेदनया त्रिकव्यापी त्रिकं तु वातस्थानं तत्कथं तद्गृह्णीतः पित्तकफौ अन्यस्थानगत्वेन दुर्बलत्वात् दुर्बलौ च कथं वेगं कुरुतः, दोषाणां स्थाननियमः ननु कुपितानां तथा च सुश्रुतः "कुपितानां हि दोषाणां शरीरे परिधावतां। यत्र सङ्गः स वैगुण्यात् व्याधित्वेनोपजायते"। एवमन्यस्थानगत्वेन चतुर्थको वाच्यः। वातकफात्मकः पृथग् व्यथया पृथग् व्याप्य भवतीत्यर्थः। "त्रिकग्राहिपे कर्मण्यधिकरणे च" पा०सू० ३।३।९३ घञ्। कफोल्बणस्य वातोल्बणस्य चतुर्थकस्य लक्षणमाह "चतुर्थकः दर्शयति स्वभावं द्विविधं ज्वरः। जङ्घाभ्यां श्लैष्मिकः पूर्वं शिरोऽभिलषभवः। मध्यकायन्तु गृह्णाति पूर्वं यस्तु स पित्तजः। विषमज्वर एवान्यश्चतुर्थकविपर्ययः"। श्लैष्मिकः श्लेष्मोल्बणः। तथा अनिलसम्भवो वातोल्बणः अन्यतादीनां द्विदोषजत्वम्। यत उक्तं चरके "प्रायशः सन्निपातेन एते सर्वेविषमज्वराः" इति। प्रायशोपदेशादेकदोषजा द्विदोषजा अपि भवन्तीति जेज्जटः। पूर्वं प्रथमं जङ्घाभ्याम् व्यथया जङ्घे व्याप्य पश्चात् सकलं शरीरं व्याप्नोति। एवमुल्बणवातजातः शिरसः पूर्वं व्यथया शिरोव्याप्य सकलं शरीरं व्याप्नोतीत्यर्थः। "विषमज्वर एवान्यश्चातुर्थकविपर्ययः। अस्थिमज्जगतो दोषश्चातुर्थकविपर्ययः। जायते भिषजा ज्ञेयो विषमज्वर एव सः"। अन्यः अन्यतादिपञ्चकादपरः चातुर्थकविपर्ययाख्यो ज्वरः सोऽपि विषमज्वर एव वैद्येन ज्ञातव्यः। स किं धातुस्थ इत्यपेक्षायामाह अस्थीत्यादि। तस्य चातुर्थकविपर्ययस्य लक्षणमाह "स मध्ये ज्वरयत्यह्नो यामान्ते च विमुञ्चति"। चतुर्थकविपर्ययः इत्युपलक्षणम् अन्यतादिविपर्ययोऽपि बोद्धव्यः। यथा अहोरात्रे द्वौ कालौ मुञ्चति शेषं सर्वमहोरात्रं तिष्ठतीति सततविपर्ययः। अहोरात्रे एककालं मुञ्चति शेषं सर्वमहोरात्रं तिष्ठति अन्येद्युष्कविपर्ययः मध्ये एकं दिनं ज्वरयति त्रयादह्नो च मुञ्चतीति तृतीयकविपर्ययः। एते विषमज्वरोपलक्षकाः अन्ये रात्रिज्वरादयोऽपि विषमज्वरा बोद्धव्याः यथा "समो वातकफो यस्य चोष्मपित्तस्य देहिनः। रात्रौ प्रायो ज्वरस्तस्य दिवा क्षीणकफस्य तु"। प्रायः बाहुल्येन। अन्यतादीनां शीतपूर्वत्वे दाहपूर्वत्वे च हेतुमाह "त्वक्स्थौ क्लेष्मपित्तौ शीतमादौ जनयतो ज्वरम्। तयोः प्रशान्तयोः पित्तमन्दाग्निं करोति च"। शीतं शीतसहितम्। प्रशान्तयोः प्रशान्तवेगयोः अन्तः अभ्यन्तरे। "करोत्यादौ तथा पित्तं त्वक्स्थं दाहमतीव च। तस्मिन् प्रशान्ते त्वितरौ कुरुतः शीतमन्ततः"। अन्ततः हस्तपादादितः। शीतादिदाहादिज्वरयोः द्विदोषजत्वमाह "द्वावेतौ दाहशीतादिज्वरौ संसर्गजौ मतौ। दाहपूर्वस्तयोः कष्टः सुखसाध्यतमोऽपरः"। संसर्गजौ सान्निपातिकौ। कष्टः कष्टसाध्यः। विषमज्वरविशेषमाह "विदग्धेऽन्नरसे देहे श्लेष्मपित्ते व्यवस्थिते। तेनार्द्धं शीतकं देहमूर्द्धतृष्णं प्रजायते"। अन्नरसे विदग्धे आहारजे रसे दुष्टे, देहे श्लेष्मपित्ते व्यवस्थिते दुष्टे स्थिते। तेन हेतुना शीतकं कफेन तृष्णं पित्तेन, अर्द्धं चार्द्धनारीश्वराकारेण नरसिंहाकारेण वा। "काये दुष्टं यदा पित्तं श्लेष्मा चाग्ने व्यवस्थितः। तेनोष्णत्वं शरीरस्य शीतत्वं हस्तपादयोः"। अन्ये हस्तपादादौ "काये श्लेष्मा यदा दुष्टः पित्तं चाग्ने व्यवस्थितम्। शीतत्वं तेन गात्रे स्यादुष्णत्वं हस्तपादयोः"। विषमज्वरविशेषस्य प्रलेपकस्य लक्षणमाह "प्रलिप्तमिव गात्राणि तमसेव च मोहनम्। मन्दज्वरविशेषो च स शीतः स्यात् प्रलेपकः"। मोहनेन उपलक्षितः। मन्दज्वरविशेषो मन्दवेगस्य विशेषः सदा सम्बन्धोऽस्यास्तीति मन्दज्वरविशेषी। अयं विषमज्वरः। तथा च सुश्रुतः "प्रलेपकास्त्वो विषमः प्रायशः क्लेशयोषिताम्। ज्वराश्च विषमाः सर्वे प्रायः क्लेशाय योषिताम्"।

विषमनयन पु० विषमाणि अयुग्मानि त्रीणि नयनान्यस्य। त्रिनेत्रे शिवे। विषमनेत्रादयोऽत्र।

विषमर्दनी स्त्री विषं मृद्नातेऽनया मृद-ल्युट् ङीप्। गन्धनाकुल्याम्। स्वार्थे क। विषमर्दनिकातत्रैव राजनि०।

विषमस्थ त्रि० विषमे उन्नतानते सङ्कटे वा तिष्ठति स्था-क। १अयुग्मस्थाने २सङ्कटस्थे ३उन्नतानतदेशस्थे च।

विषमशिष्ट न० विषमं मिष्टं भोजनम् । अनुचितभोजने ।
विषमायुध पु० विषमाणि अयुग्मानि पञ्च आयुधानि बाणा यस्य । पञ्चशरे कामे हेमा०विषमेषुरादयोऽस्य । [राजनि०
विषमुष्टि पु०विषं मुष्णाति मुष-क्विप् । क्षुपभेदे (विषदोडि)
विषमृत्यु पु०विषात् विषदर्शनात् मृत्युरस्य । चकोरपक्षिणि शटा०
विषय पु० विशिष्यन्ति ज्ञाताकृतया विषयिणं निरूपयन्ति संबध्नन्ति वा वि+षि-अच् । इन्द्रियगोचरे शब्दादौ २देशे च अमरः । ३भोगसाधने "विषयो द्व्यणुकादिषु ब्रह्मखण्डान्त उदाहृतः" । "सिन्धुहिमादिर्विषयो मतः" । "प्राक्षादिषु महावायुपर्यन्तो विषयो मतः" भाषा० । "अत्र विषयः भोगसाधनं सर्वमेव हि कार्यमदृष्टाधीनं यद्व कार्यं यददृष्टाधीनं तत् तदुपभोगं साक्षात्परम्परया जनयत्येव न हि बीजप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्ति तेन द्व्यणुकादिब्रह्मखण्डान्तं सर्वमेव विषयो भवतीत्यर्थः" सि० सङ्गा० । "विशिष्यन्ति विषयिणं बध्नन्ति स्वेन रूपेण निरूपयीयं कुर्वन्तीति विषयाः पृथिव्यादयः सुखादयश्च यच्छब्दादीनामविषयाश्च तन्मात्रजन्याः योगिनामूर्ध्वस्रोतसां च विषयाः" सांख्य०त० कौ० । ४निन्द्यमैथिते अमरः । ५अव्यक्ते ६शुक्ले च अजयपालः । ७कान्तादौ ८उपभोग्ये शब्दरत्ना० ८निषाधके "विषयो हि निःशेषार्थः सिनोतिबन्धनार्थकः । विशेषेण सिनोतीति विषयो यतो नियामकः" भट्टका० । १०आरोपाख्ये "आरोप्यान्या च यत्रोक्ता विषयो विषयी तथा । विषयस्तादृते ज्ञेयो विषयी सा स्यात् साध्यवसानिका" काव्यप्र० । ११विचारार्हवाक्ये अधिकरणवाक्यभेदे "विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् । निर्णयश्चेति विद्वान्तः शास्त्रेऽधिकरणं स्मृतम्" मीमांसा० । [त्रिनि० ।
विषयाज्ञान न० विषयाणां न ज्ञानं यत्र । तन्द्रायाम् राविषयिन् न० विषयोऽस्यास्य इनि । १ज्ञाने "विषयी यत्र तत्रैव" भाषा० २इन्द्रिये च । ३विषयासक्ते त्रि०मेदि० । ४रात्रि ५कामदेवे पु० मेदि० । विषयिणो भावः तल् । विशिष्टा ज्ञाननिष्ठे विषयनिरूपिते यदार्थभेदे स्वरूपसम्बन्धभेदे च स्त्री । सा च त्रिविधा विशेष्यनिरूपिता विशेषिता, विशेषणनिरूपिता प्रकारिता, संसर्गनिरूपिता संसर्गिता इति मदाधरादयः । मदाधरमते विषयितैव प्रतिबन्धकतावच्छेदिका । जगदीशमते विषयतैवेति भेदः ।
विषरूपा स्त्री विषं मूषकविषं रूपयति अतिक्रामति रूप-क । अतिविषायाम् (आतरच) राजनि० । [राजनि०
विषलता स्त्री विष-व्याप्तौ अच् कर्म० । इन्द्रवारुण्याम् ।
विषविद्या स्त्री विषाय तन्निहरणाय विद्या । विषघ्नमन्त्रज्ञाने
विषविधि पु० दिव्यभेदे दिव्यशब्दे २५८८ पृ० दृश्यम् ।
विषवैद्य पु० विषे विषापहारे वैद्यविकित्सकः । विषमन्त्रविद्यायुते अमरः । [राजनि० ।
विषशालूक पु० विषस्य शूकस्य शालूकः । पद्मकन्दे
विषशृङ्गिन् पु० विषं शृङ्गमिवास्त्रस्य इनि । शृङ्गरोगे हारा० । [हेमच० स्त्रियां ङीष् ।
विषसूचक पुंस्त्री० विषं सूचकं हिंसकमस्य । चकोरपक्षिणि
विषसृक्कन् पु० विषं सृक्क इव यस्य । शृङ्गरोगे त्रिका० ।
विषहन्त्री स्त्री विषं हन्ति हन-तृच् ङीष् । १अपराजितायाम् राजनि० । २विषहारके त्रि० ।
विषहरी स्त्री विषं हरति हृ-अच् गौरा० ङीष् । १मनसादेव्याम् शब्दच० । २विद्याभेदे तन्त्रसा० [त्रिनि० ।
विषहा स्त्री विषं हन्ति हन-ड । देवदालीलतायाम् राविषा स्त्री विषं मञ्जिष्ठविषं नाशयत्यनयेत्यस्याः अच् । (आतरच) १अतिविषायाम् अमरः २दुग्धी च शब्दार्थ-
विषाण न० विष-घञ् कानच् । १पशुशृङ्गे २हस्तिदन्ते ३कुष्ठौषधे मेदि० ४वराहदन्ते हेमच० ५चोरकाख्यायाम् ६अजशृङ्ग्यां स्त्री मेदि०गौरा० ङीष् । सा च ७वृश्चिकाली स्त्री राजनि० । ८तिलिङ्गां स्त्री शब्दच० ।
विषाणिका स्त्री विषाणमस्त्यस्याः ठन् । १मेषशृङ्ग्याम् (गाड़रसिङा) रत्नमा० । २कर्कटशृङ्ग्याम् ३श्यामलतायां ४क्षीरलतायां राजनि० ।
विषाणिन् पु० विषाणमस्त्यस्य इनि । १शृङ्गिणि २हस्तिनि च अमरः । ३शृङ्गाटके ४अपधौषधे च पु० राजनि० ।
विषाद पु०वि+षद-घञ् । १अवसादे हेमच० २अजडतायाञ्च ।
विषादनी स्त्री विषाय तन्निहरणाय अद्यतेऽसौ अद-ल्युट् । पलाशीलतायाम् राजनि० । [२विषहरे त्रि० ।
विषान्तक पु० विषस्यान्तक इव । १शिवे हेमच० ३त० ।
विषापहा स्त्री विषमपहन्ति अप+हन-ड । १शुक्लदूर्वायां राजनि० । २इन्द्रवारुण्यां ३निर्विषायां राजनि० । ४नागदन्त्यां भावप्र० । ५अर्कमूलायाञ्च (हरमूल) ६पर्पटकशाकिकायां रत्नमा० । [ङीष् ।
विषार पुंस्त्री० विषमृच्छति ऋ-अण् । सर्पे शब्दच० स्त्रियां
विषारति पु० ३त० । १कृष्णशूकरे राजनि० । २विषनाशके च ।

विषारि पु॰ईत॰। ईतस्वरूपे २मङ्गाधक्षुशाके च राजनि॰
विषास्य पु॰ विषमास्ये यस्य। ईषें शब्दच॰ विषानलादयो॰ ह्यस्य। विषाक्तविषाक्तमस्याः। २भल्लातके स्त्री शब्दच॰
विषु अव्य॰विष-कु। १साम्ये भरतः। २नानारूपे रामाश्रमः
विषुव न॰ विषु दिनरात्रोः साम्यं वाति वा-क। १समरात्रिदिनकाले अमरः। अयनांशक्रमणे २रवेः तुलामेषराशिसंक्रान्तिभेदे च

"मृगकर्कटसंक्रान्ती हे तुदगदक्षिणायने। विषुवती तुलामेषे गोलमध्ये तयापरा" ज्यो॰त॰। "मत्स्यकूर्माभौ विषुवद्दृतियं समसूत्रगम्। अयनद्वितयं चैव क्रमतः प्रथितास्तु ताः" सू॰ सि॰। "मत्स्यकूर्माभौ भगोलस्य ध्रुवद्वयाभ्यां तुल्यान्तरेण मध्यभागे विषुवद्दृतियं समसूत्रगं परस्परं व्यासखण्डान्तरितं ध्रुवमध्ये विषुवद्दृत्तस्थानात् तद्दृत्ते क्रान्तिवृत्तभागौ यौ लग्नौ तौ क्रमेण पूर्वापरौ विषुवत्सञ्ज्ञौ मेषतुल्याख्यौ चेत्यर्थः" रङ्ग॰ कालभेदे विषुवसंक्रमणयोरभेदः अयनसंक्रान्तिशब्दे दर्शितः सूर्यसिद्धान्त॰संक्षिप्य कालभेदे विषुवारम्भप्रकारश्च यथा "मेषसंक्रमतः पूर्वं पश्चात्तरादिनान्तरे। प्राप्तिकोऽयेन साम्येन विषुवारम्भणं भवेत्। त्रयोदशदिने शौरे चैत्रे नक्षतिथौ १६२०शके। विषुवारम्भणं तत्र कर्म मानं दिवानिशोः। ततः प्रतिदिनं वेद्या वर्षादत्रिपलाधिका। वर्द्धते मेषविश्रांतपर्य्यन्तं स्थूलमागतः। तथाच्छैशान्तपर्य्यन्तं पादोनत्रिपलाधिका। तादृशाब्दपर्य्यन्तं पञ्चैकप्रमिता मता। ततः कर्कटविश्रांतपर्य्यन्तं प्रत्यब्दक्रमात्। वर्षादपक्षमानेन वेद्या तु ह्रसति निश्चितम्। तादृग्भाद्रान्तपर्य्यन्तं पादोनत्रिपलाधिका। दिवामानं दशघटैरूना रात्रेः प्रमाणकम्। वैशाखादौ दिवामानं रात्रिमानं तुलादिषु। अष्टषष्टिवत्सरानेवं ततः स्यात् द्वादशांशके। पुनस्तद्वत् सरांस्तद्वत् तत एकादशादिके"। [विषुवशब्दार्थे।
विषुवत् न॰विषु साम्यं दिवानिशोरस्त्यस्मिन् मतुप् मस्य वः।
विषौषधी स्त्री ईत॰। नागदन्त्याम् रत्नमा॰।
विष्क हिंसायां चु॰ आ॰सक॰ सेट्। विष्कयते अविविष्कत दर्शने सभ॰ सेट्। विष्कयति ते अविविष्कत त।
विष्कम्भ पु॰ वि+स्कभ्-घञ्। सूर्यचन्द्रयोगजातयोगमध्ये प्रथमे १योगे ज्यो॰त॰ २विस्तारे ३प्रतिबन्धे ४रूपकनाटकाङ्गभेदे "सर्वोपक्षेपकाः पञ्च विष्कम्भप्रवेशकौ। चूलिकाङ्कावतारौऽथ स्यादङ्कस्यमुखानि च। उत्तरोत्तरसंभाषानां कथांशानां निदर्शकः। संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः। मध्येन मध्यमाभ्यां वा पात्राभ्यां समयोजितः। शुद्धः स्यात् स तु सङ्कीर्णो नीचमध्यमकल्पितः" सा॰द॰। ५योगिनां बन्धभेदे मेदि॰ ६वृक्षे अमरः ७अवष्टम्भके अमरः ८कीलकादौ च भरतः। ९पर्वतभेदे विष्णुशब्दे दृश्यम्।
विष्कल पुंस्त्री॰ विषं विषां कलयति कलि-अच् पृषो॰। माध्यमूकरे राजनि॰ स्त्रियां ङीष्।
विष्किर पुंस्त्री॰ विकिरति वि+कृ-क षुट्च्। १विकिरे अमरः स्त्रियां ङीष्। २विष्टरभेदे भावप्र॰ "वर्त्तकालावविष्किरकपिञ्जलकलिङ्गिराः। कुक्कुटकुक्कुटाद्याश्च विष्किराः परिकीर्त्तिताः। विकीर्य भक्षयन्त्येते यस्मात्तस्माद्धि विष्किराः। कपिञ्जल इति प्राज्ञैः कथितो गौरतित्तिरः"। कुक्किरः (कएर) इति लोके। "विष्किरा मधुराः शीताः कषायाः कटुपाकिनः। बल्या हृद्याश्चक्षुष्याः पथ्यास्ते लघवः स्मृताः"।
विष्टप न॰ विश-कपन् षुट् च। भुवने अमरः।
विष्टब्ध त्रि॰ वि+स्तभ-क्त। प्रतिरुद्धे अवरुद्धे
विष्टम्भ पु॰ वि+स्तभ-घञ्। १प्रतिबन्धे २आनाहे रोगभेदे च आनाहशब्दे ७२६ पृ॰ दृश्यम्। [जनके च।
विष्टम्भिन् त्रि॰वि+स्तभ-णिनि। १प्रतिबन्धके २रोगविशेषे
विष्टर पु॰ वि+स्तृ-अप् षत्वम्। "ऊर्द्धकेशो भवेद्ब्रह्मा सव्यकेशस्तु विष्टरः" इति "वामावर्त्तस्तु विष्टर" इति च स्मृत्युक्ते दर्भभेदे १आसनभेदे २आसनमात्रे ३हरौ ४कुशस्तम्बे च अमरः। [विष्णौ अमरः।
विष्टरश्रवस् पु॰ विष्टरः कुशस्तम्बरिव श्रवसी कर्णौ यस्य।
विष्टरवहा स्त्री विष्टा भूमौ प्रविष्टा सती रोहति रुह-क। अर्थकेतक्यां राजनि॰। [शब्दे २८१८ पृ॰ दृश्यम्।
विष्टार पु॰ वि+स्तृ-घञ् षत्वम्। पङ्क्तिच्छन्दोभेदे छन्दः-
विष्टि स्त्री विश-क्तिन् क्तिच् वा। वेतनं विना भारादिवहनजन्ये १क्लेशे अमरः। २वेतने ३कर्मणि ४वर्षके ५तिर्य्यग्लोककरणमध्ये सप्तमे करणे विश्वः। भद्रशब्दे ४६२७पृ॰ दृश्यम्। ६प्रेषणे हेमच॰। ७कर्मकरे अर्थे ८वेतनं विना कर्मकरे च त्रि॰ मेदि॰।
विष्ठल न॰विप्रकृष्टं स्थलम् प्रा॰स॰षत्वम्। दूरस्थस्थले त्रि॰ औ॰
विष्ठा स्त्री विविधं तिष्ठति स्था-क षत्वम्। १उदरे शब्दरत्ना २पुरीषे अमरः।
विष्णु स्त्री विश-व्यापने नुक्। १व्यापके परमेश्वरे अमरः

"यस्मात् विश्वमिदं सर्वं तस्य शक्त्या महात्मनः । तस्मादेवोच्यते विष्णुर्विशधातोः प्रवेशनात्" इत्युक्तेः विश-प्रवेशे तु पृषो० दत्वमपि बोध्यम् । २यज्ञे २शुद्धे ३यज्ञदेवतायां धरणिः । ५धर्मशास्त्रकारभेदे च "मन्वत्रिविष्ण्वादीते"ति याज्ञ० दृतद्दैवते श्रवणनक्षत्रे स्त्री०त० ।

विष्णुकन्द पु० विष्णुप्रियः कन्दः श०त० । मूलभेदे राजनि०

विष्णुक्रान्ता स्त्री ३त० विष्णुरुहपूर्णः क्रान्तो वा यया । अपराजितायाम् अमरः तस्याः विष्णुतुल्यवर्णत्वात् विष्णुपरित्यक्तत्वाच्च तथात्वम् ।

विष्णुगुप्त पु० १चाणक्ये मुनौ श्रवणेव मातृस्थानत्वेन पक्षित्वेन प्रसिद्धः त्रिका० । ३त० । विष्णुना गुप्ते तन्त्रादौ २देवादौ २कन्दभेदे राजनि० ।

विष्णुतैल न० वैद्यकप्रसिद्धे तैलभेदे तच्च द्विविधं खल्वदृक्षभेदात् तत्तैलपाकप्रकारः भैषज्यरत्ना० उक्तो यथा तत्र खल्वविष्णुतैलम् "शालपर्णीं पृश्निपर्णीं बलागोरक्षतशुक्लाः । एरण्डस्य च मूलानि दृक्षयोः पूतिकस्य च । प्रतावरी सहचरी पचेदेतैः पलोन्मितैः । तैलप्रस्थं पयोदत्त्वा गव्यं वाऽजं चतुर्गुणम् । अस्य तैलस्य पलमेकं शुण्ठीं पीत्वा मतः परम् । वातार्त्तो नरनागाश्च पीत्वा दृढतनुत्वचः । क्षतपार्श्वमूले वातार्त्ते गलगण्डेऽर्दिते ग्रवे । अर्करोहिणिपाण्डुत्वकामलार्शोविभेदके । श्रोत्रेन्द्रियेऽन्यदृष्टौ च जराजर्जरिते हितम् । स्त्रीणामप्रतरीणाञ्च गर्भस्थितिकरं परम् । एतदुत्तरं तैलं विष्णुना परिकीर्त्तितम् । तच्छुक्लः गोरक्षतशुक्लः । दृक्षयोर्दृतीकण्टकार्योः । पूतिकं नाटाकरञ्जः । सहचरी झिण्टी । अत्र क्वाथान्तराभावात् क्षीरञ्च चतुर्गुणं जलं कविद्दाति । "खरक्षीरमाक्षीकैः पाको यत्नेरितः क्वचित् । अजं चतुर्गुणं तत्र क्षीरार्थानार्द्रभावयेत्" इति परिभाषावलात् । क्वचिदिति पाठात् क्वाथान्तररहिते केवलक्षीरादिसहिततैलादिपाके ज्ञातव्यं न तु सर्वत्र । "रक्तचन्दनकङ्कोलागुरुसुराकुष्ठोशीरमांसी घटी श्रीवासस्थदर्पान्वितपर्णयमस्थत्वचो धीध्यजोशीरकम् । कस्तूरीनखपूतिपैत्तजलसुङ्मेषीलवङ्गादिकम् । गन्धद्रव्यमिदं प्रदेयमखिलं श्रीविष्णुतैलादिषु" । अथ दृक्षद्विष्णुतैलम् "अजधरमञ्जगन्धा जीवकर्षभकौ घटी । काकोली क्षीरकाकोली जीवन्ती मधुयष्टिका । मधूरिका देवदारु पद्मकाख्यञ्च सैन्धवम् । मांसी चैला त्वचं कुष्ठं रक्तचन्दनमेवजम् । सञ्चिप्ता कृतनामिश्च श्वेतचन्दनकङ्कुमम् । पर्णी कुन्दुरु खोटिश्च पन्थिकश्च नखी तथा । एतेषां प्राक्तिकेभागैस्तैलमापि तथाविधम् । प्रतावरी रसतमं दुग्धस्थापि समं भवेत् । विष्णुतैलवरं श्रेष्ठं सर्ववातविकारहृत् । जङ्घावाते शिरोवाते शुक्रविनष्ट एव च । शिरोमध्यगता ये च मन्यास्तन्भे गलग्रहे । यस्य शुष्यति चैकाङ्गं गतिर्यस्य च विच्युता । ये वात प्रभवारोगा ये च पित्तसमुद्भवाः । सर्वांस्तान्नाशयत्याशु सूर्यस्तम इवोदितः" ।

विष्णुदैवत(त्य) त्रि० विष्णुर्दैवतं(त्यं) यस्य । विष्णुदेवताके द्रव्यादौ "स्पृशन्तु सर्वदैवत्यं यदत्रं द्विजोत्तमाः ! । तज्ज्ञेयं विष्णुदैवत्यं सर्वं वा विष्णुदैवतम्" शु० त० विष्णु० । २श्रवणनक्षत्रे च ।

विष्णुधर्म्म पु० विष्णूपासनायोग्यो धर्म्मः शाक० । विष्णूपासनोचिते १नियमभेदे उपचारात् तत्प्रतिपादके २ग्रन्थे च

विष्णुधर्मोत्तर न० विष्णुधर्म्म उत्तरः प्रधानः वर्णत्वेन यस्य । संहिताभेदे ।

विष्णुपद न० विष्णोः पदमिव व्यापकत्वात् । १आकाशे अमरः । दृत० । २क्षीरार्णवे मेदि० ३मुक्तौ च हेमच० ४विष्णोश्चरणे कर्म० । ५विष्णुरूपस्थाने च "तद्विष्णोः परमं पदम्" ऋ० विष्णुसूक्तम् ।

विष्णुपदी स्त्री० विष्णुपदं कारणत्वेनास्त्यस्याः अच् गौरा० ङीष् । १गङ्गायाम् "निर्गता विष्णुपादाब्जात् तेन विष्णुपदी स्मृता" ब्रह्मवै० प्र०८अ० २वर्षासिक्तक्षत्रिककुम्भराशौ रवेः संक्रान्तौ च । "दृषद्वत्यिककुम्भेषु सिंहे विष्णुपदी स्मृता" "गुरुवायां विष्णुपद्याच्च प्राक्पश्चादपि षोडश" ज्यो०त० । "अयने कोटिगुणितं स्नानं विष्णुपदीषु च" तिथ्या० त० "तदन्तरेषु संक्रान्तिहितयं हितयं पुनः । नैरन्तर्यात् तु संक्रान्तेर्नेयं विष्णुपदीद्वयम्" स्मृ०सि० । "तदन्तरेषु विषुवायनान्तरालेषु । अयनान्तरालानां चतुःस्थाने बहुवचनम् । संक्रान्तिहितयं हितयं पुनराख्यादिभागे अहोरात्रमक्रमणं वारद्वयं भवति तदन्तराले राश्यादिभागौ द्वौ भवत इत्यर्थः । तथा हि मेषाख्यविषुवत्कर्कीयायनयोरन्तराले वृषमिथुनयोरादौ । कर्कतुलयोरन्तराले सिंहकन्ययोरादौ । तुलामकरयोरन्तराले वृश्चिकधनुषोरादौ । मकरमेषयोरन्तराले कुम्भमीनयोरादौ इति । एवं विषुवदनन्तरं संक्रमणद्वयमयनान्तरमयनं तदनन्तरं संक्रान्तिद्वयं तदनन्तरं विषुवमनन्तरं संक्रान्तिद्वयमनन्तरमयनमित्यादि । यौगपद्येन

ज्ञेयमित्यर्थः। संक्रान्तिद्वयमध्ये प्रथमसंक्रान्तौ विशेषमाह। नैरन्तर्यादिति। निरन्तरतया सम्भूतायाः संक्रान्तेः सकाशादिष्णुपदोद्भवं तदन्तराल इत्यर्थः" रघु०

विष्णुपुराण न० व्यासप्रणीते महापुराणभेदे तत्प्रतिपाद्यविषयाद्युद्धारादीरे ८४ अ० उक्ता यथा

"शृणु वत्स! प्रवक्ष्यामि पुराणं वैष्णवं महत्। त्रयोविंशतिसाहस्रं सर्वपातकनाशनम्। यत्रादिभागे निर्दिष्टाः षड्भागाः ब्रह्मजेन तु। मैत्रेयाद्यादिमे तत्र पुराणस्यावतारिका"। तत्र प्रथमभागस्य प्रथमांशे "आदिकारणसर्गश्च देवादीनाञ्च सम्भवः। समुद्रमथनाख्यानं दक्षादीनां कथोदयः। ध्रुवस्य चरितं चैव पृथोश्चरितमेव च। प्राचेतसं तथाख्यानं प्रह्लादस्य कथानकम्। पृथुराज्याधिकाराख्यः प्रथमोंऽश इतीरितः। पातालनरकाख्यानं सप्तस्वर्गनिरूपणम्। सूर्यादिचारकथनं पृथग्ज्योतिषसंगतम्। चरितं भरतस्याथ मुक्तिमार्गनिदर्शनम्। निदाघ ऋतुसंवादो द्वितीयोंऽश उदाहृतः"। प्रथमभागस्य तृतीयांशे "मन्वन्तरसमाख्यानं वेदव्यासावतारकम्। नरकोद्धारकं कर्म गदितञ्च ततः परम्। सगरस्यौर्वसंवादे सर्वधर्मनिरूपणम्। आद्यक्षत्रं तथोद्दिष्टं वर्णाश्रमनिबन्धने। सदाचारस्य कथितो मायामोहकथा ततः। तृतीयोंऽशोऽयमुदितः सर्वपापप्रणाशनः"। प्रथमभागस्य चतुर्थांशे "सूर्यवंशकथा पुण्या सोमवंशानुकीर्त्तनम्। चतुर्थेंऽशे मुनिश्रेष्ठ! नानाराजकथोचितम्"। प्रथमभागस्य पञ्चमांशे "कृष्णावतारसम्भ्रो गोकुलीया कथा ततः। पूतनादिवधो बाल्ये कौमारेऽघादिहिंसनम्। कैशोरे कंसहननं मातुर्चरितं तथा। ततस्तु यौवने प्रोक्ता लीला द्वारवतीभवा। सर्वदैत्यवधो यत्र विवाहाश्च पृथग्विधाः। यत्र स्थित्वा जगन्नाथः कृष्णो योगेश्वरेश्वरः। भूभारहरणं चक्रे परस्परनिमित्तकम्। अष्टावक्रीयकाख्यानं पञ्चमोंऽश इतीरितः"। प्रथमभागस्य षष्ठांशे "खण्डितं चरितं मोक्षं चातुर्विध्यं जयस्य च। ब्रह्मज्ञानसहेयः खाण्डिक्यस्य निरूपितः। जैमिध्वजेन योगेशः षष्ठोंऽशः परिकीर्त्तितः"। तस्य द्वितीयभागे "अतःपरन्तु सूतेन शौनकादिभिरादरात्। पृष्टेन कीर्त्तिताः सर्वविष्णुचर्मोत्तराश्रयाः। नानाधर्मकथाः पुण्या व्रतानि नियमा दमाः। धर्मशास्त्रं चार्थशास्त्रं वेदानां ज्योतिषं तथा। वंशाख्यानं प्रसङ्गाद्यैः सोमादि सनवस्तथा। नानाविद्याश्रयाः प्रोक्ता सर्वलोकोपकारकाः। एतद्विष्णुपुराणं वै सर्वशास्त्रार्थसंग्रहः" तत्फलश्रुतिः "पाराशर्यकलाप्तेन व्यासेन कथितं त्विह। यो नरः पठते भक्त्या यः शृणोति च सादरम्। तावुभौ विष्णुलोकं हि व्रजेतां भुक्तभोगकौ। तल्लिखित्वा च यो दद्यादाषाढ्यां व्रतधेनुना। कथितं विष्णुभक्ताय पुराणार्थविदे द्विज!। स याति वैष्णवं धाम विमानेनार्कवर्चसा। यच्च विष्णुपुराणस्य समनुक्रमणी द्विज!। कथयेच्छृणुयाद्वापि स पुराणफलं लभेत्"।

विष्णुमाया स्त्री ६त०। विष्णोः परमेश्वरस्य माया। १घटनघटनपटीयस्याम् २तदधिष्ठात्र्यां दुर्गायाञ्च।

विष्णुयशस् पु० कल्किपितरि कल्किपु०।

विष्णुरथ पु० विष्णोः रथ इव गतिहेतुत्वात्। १गरुडे अमरः। ६त०। २विष्णोः रथे च।

विष्णुरात पु० विष्णुना रातः विष्णुर्वा रायाऽऽशीर्वचनमस्मै रा-क्त त वा। परीक्षिदाख्ये नृपे स हि गर्भस्थ एव अश्वत्थामास्त्रेण दग्धो मृतः सन् प्रश्वासानन्तरञ्च विष्णुना पुनर्जीवितः तत्कथा भा० आश्व० ७१अध्याये। तन्नामनिरुक्तिः भाग०१।१२ अ० यथा

"दैवेनाप्रतिघातेन शुक्ले (वंशे) संस्थासुपेयुषि। रातोऽनुग्रहार्थाय विष्णुना प्रभविष्णुना। तस्मान्नाम्ना विष्णुरातो लोके ख्यातिं गमिष्यति"।

विष्णुवल्लभा स्त्री ६त०। १तुलसाम् राजनि० २लक्ष्म्यां शिखाटक्षे च शब्दच०। २तुलस्याम्।

विष्णुवाहन पु० विष्णुं वाहयति स्थानान्तरं नयति वह-णिच्-ल्यु। गरुडे हेमच०।

विष्णुवाह्य पु० विष्णुर्वाह्योऽस्य। गरुडे शब्दच०।

विष्फार पु० वि+स्फुर-णिच्-अच् धत्व आत् वत्वम्। धनुर्ज्याकर्षणशब्दे टङ्कारे अमरः।

विष्व त्रि० विशेषेण वध्यः वि+वध। विशेष वध्ये अमरः।

विष्वक्सेनप्रिया स्त्री ६त०। १तुलस्याम् (चामर-आहु) २वाराह्याम् अमरः।

विष्वक्सेन न० वि+सन-क्विप् वत्वषत्वे। भोजने जटा०।

विष्वाण पु० वि+स्वन-घञ् वत्वषत्वे। भोजने हेमच०।

विस न० वि+सो-क। मृणाले अमरः। आदित्यविशब्दे

विस उच्चगै दि०पर०सक०सेट्। विसति अवैसीत्।

विसंवाद पु॰ वि+सम्+वद–घञ्। १विप्रलम्भे अमरः। २वञ्चने अन्यथा स्थितस्य वस्तुनोऽन्यथा कथनादौ च।

विसकुसुम न॰विसयुक्तं कुसुमम्। पद्मे राजनि॰।

विसट्ट पु॰ विशिष्टः सट्टो यस्मात्। १सिंहे शब्दच॰ २दन्तदीर्णे च राजनि॰। [वमूढे च त्रिका॰।

विसनाभि स्त्री विसं नाभिरिव यस्याः। १पद्मिन्याम् २पद्म॰

विसर पु॰वि+सृ–अप्। १समूहे अमरः। २विस्तारे च मेदि॰

विसर्ग पु॰ वि+सृज–घञ्। १दाने २त्यागे ३मलत्यागे ४विसर्जनीयाख्ये ५वर्णभेदे ६सूर्य्यस्यायनभेदे ७मोक्षे ८लङ्घने ९प्रलये १०विशेषसृष्टौ शब्दरत्ना॰ "विसर्गविसर्गादिप्रवचनसंशयसंशितमिति" श्रीधरः।

विसर्जन न॰ वि+सृज–ल्युट्। १दाने अमरः २त्यागे च। वि+सृज–णिच् ल्युट्। ३प्रेरणे मेदि॰

वि(वी)सर्प पु॰ वि+सृप–घञ् वा दीर्घः। रोगभेदे तद्भेदादि भावप्र॰उक्तं यथा तत्र विसर्पविज्ञाननिदानं संख्यां निरुक्तिञ्चाह "लवणाम्लकटूष्णादिसेवनाद्दोषकोपतः। विसर्पः सप्तधा ज्ञेयः सर्वतः परिसर्पणात्" आदिशब्दाद्दरकोक्तदधितिलशाकमत्स्यक्षीरप्रभृतीनां ग्रहणम्। सप्तधात्वं विदधोति "वातिकः पैत्तिकश्चैव कफजः सान्निपातिकः। चत्वारः एते दोषर्षा वह्निना हन्द्वजास्त्रयः। वाग्भेयो वातपित्ताभ्यां ग्रन्थिस्थः कफवातजः। यस्तु कर्दमको घोरः स पित्तकफसम्भवः"। विसर्पदोषदूष्यादि संक्षेपाह "रक्तं तत्रौकात्वङ्मांसं दूष्यं दोषास्त्रयो मताः। विसर्पाणां सप्तत्वे हेतवः सप्त धातवः"। त्रयो मताः वातपित्तकफाः दोषा दूषका इत्यर्थः। अन्यथा दोषभेदा इत्यत्र पुनरुक्तिदोषो लक्षिप्यते। वातिकस्य लक्षणमाह "तत्र वातात्मरीसर्पो वातज्वरसमन्वयः। शोफरुग्रक्तनिस्तोदभेदायामार्तिहर्षवान्"। परीसर्पो विसर्पः। वातज्वरसमन्वयः शिरोहृद्गात्रोदरशूलादियुक्तः। भेदः विदारणेनेव व्यथा। आयामः आकर्षणेन व्यथा। पैत्तिकमाह "पित्ताद् द्रुतगतिः पित्तज्वरविजृम्भोऽतिलोहितः"। द्रुतगतिः शीघ्रप्रसरणशीलः। अथ श्लैष्मिकमाह "कफात्कण्डूयुतः स्निग्धः कफज्वरसमान्वितः"। सान्निपातिकमाह "सन्निपातसमत्वेन सर्वरूपसमन्वितः"। वातपैत्तिकमाह "वातपित्तात्ज्वरच्छर्दिमूर्च्छातीसारहृद्भ्रमैः। अस्थिभेदोऽग्निसदनतमसारोचकैर्युतः। करोति सर्वमङ्गेषु दीप्ताङ्गारावकीर्णवत्। यं यं देशं विसर्पश्च विसर्पति भवेत् स सः। शीताङ्गारावकीर्णो शीघ्रो रक्तो वा रूपमीरयते। अस्मिन्नग्न्य एव स्फोटः शीघ्रत्वाद् द्रुतस्तु सः। असांसुसारी बीसर्पः स्रावातातिबलस्ततः। व्यधेताङ्गं हरेत् संज्ञां निद्रां श्वासमीरयेत्। क्षिप्राच्च गतोऽस्यामीदर्शी लभते नरः। क्वचिच्छमोऽरतिर्यत्तो भूमिशय्यासनादिषु। चेष्टमानस्ततः क्षिप्तो मनो देहसमुद्भवाम्। दुःप्रबोधोऽभ्युते निद्रां सोऽग्निवीसर्प उच्यते"। स्फोटः स्फुरणीयत इत्यन्वयः। "असांसुसारी यदारुहदवासुसारी हरेत विसर्पं इत्यन्वयः क्षिप्रां क्षिप्राम् हरेत् संज्ञां पर्य्युपरि प्रेरयेत्। मनोदेहसमुद्भवां निद्रां मरणरूपाम्। अश्नुते प्राप्नोति। वातपैत्तिकं सन्निपातिकं विसर्पमाह "कफेन रुद्धः पवनो भित्त्वा तं बहुधा कफम्। रक्तञ्च दूषयित्वा च दीर्घायुर्दुष्टसञ्ज्ञकरोगनाम्। यन्त्रीवां कुरुते मासां रक्तानां तीव्ररुग्ज्वराम्। श्वासकासातिसारांश्च शोषहिक्काप्रमिश्रभैः। शोफैर्वर्णैर्मूर्च्छाङ्गभङ्गाग्निसदनैर्युतः। इत्यं सन्निपातेन सर्वो बीसर्पो वातपैत्तिकप्रकोपजः"। कफेन रुद्धेनावृतेन पवनोऽपि रुद्धेनावृतः। तेनायं वातपैत्तिकः। तं कफं बहुधा भित्त्वा रक्तं वा दूषयित्वेत्यन्वयः। त्वगादिकमिति रक्तस्य विशेषणम्। अथ पित्तश्लैष्मिकं कर्दमाख्यं विसर्पमाह "कफपित्तज्वरस्तम्भनिद्रातन्द्रशिरोरुजाः। अङ्गावसादविक्षेपप्रलापारोचकक्लमाः। मूर्च्छाग्निसदनिर्भेदो दाहस्तृष्णा पिपासेन्द्रियगौरवम्। आमोपवेशनं लेपः स्रोतसाञ्च विसर्पति। प्रायेणामाशयं सङ्गे कदेशं न चातिरुक्। पीडकैरवकीर्णोऽतिपीतलोहितपाण्डुरैः। स्निग्धोऽसितो मेचकाभो मलिनः शोफगान् गुरुः। गम्भीरपाकः प्राग्रोगा स्फुटः क्लिन्नोऽवदीर्यते। पक्वत्वक्पीतमांसश्च स्फुटस्नायुसिरागणः। अवगन्धी च बीसर्पः कर्दमाख्यस्तमन्ति तम्"। स च सर्पति एकदेशमित्यन्वयः। पीडकैः पीडाकारिभिः। अवकीर्णः व्याप्तः। अवितः क्लिन्नः। मेचकः कृष्णः। प्राग्रोगा प्रथमरोगा। स्फुटः क्लिन्नोऽवदीर्यते। स्फुटः सङ्घर्षो भवति विदीर्यते। पक्वत्वक् कर्दमवर्णत्वक् यत्र सः। पीतमांसः गलितमांसः। अत एव स्फुटस्नायुसिरागणः। सान्निपातिकमाह "सन्निपातसमत्वेन सर्वरूपसमन्वितः"। अथ क्षतजं विसर्पमाह "बाह्यहेतोः क्षतात् क्रुद्धः स्वरक्तं पित्तमीरयन्। विसर्पं भारतः कुर्यात् कुलत्थसदृशैचितम्। स्फोटैः शोषज्वरच्छर्दितृष्णादाहार्त्तिभिश्चितम्।

वातहेतोः श्लेष्मप्रकारव्याधदलनखाद्यामन्तुहेतोः । ग्रा-बश्चोचितं कण्ठवर्चरलम् । उपद्रवानाह "ज्वरातिसारो वमथुस्तम्भावदरथकलमाः । अरोचकविषादौ च विसर्पे स्यादुपद्रवाः" । साध्यत्वादिकमाह "सिद्ध्यन्ति वातकफ-पित्तजता विसर्पाः सर्वात्मजः क्षतजतश्च न सिद्धिमेति । पित्तात्मकोऽञ्जनवपुश्च भवेदसाध्यः कक्षाक्ष मर्मसु भवन्ति हि सर्व एव" ।

विसर्पण न० वि+सृप-ल्युट् । प्रसारे अमरः ।

विसल न०विस-कलच् । पद्मे त्रिका० [अमरः स्त्रियां ङीप् ।

विसार पु क्लो० विसरति सर्पति वि+सृ-घञ् । मत्स्ये अ-

विसारिन् त्रि० वि+सृ-णिनि । १प्रसरणशीले २मत्स्ये पु० ३माषपर्ण्यां स्त्री राजनि० ङीष् ।

विसिनी स्त्री विसानां समूहः तदुत्तो देशो वा इनि । १पद्मसमूहे २पद्मवतायाञ्च ३कृषाले राजनि० ।

विसूचिका स्त्री विगिता सूचीव रुजार्थे कन् । रोगभेदे तस्य निरुक्तिर्यथा "सूचीभिरिव गात्राणि तुदन् सन्ति-ष्ठतेऽनिशम् । यस्माज्जन्तुर्न सा वैद्यैर्विसूचीति निगद्यते । तस्य निदानमाह "न तां परिमिताहारा लभन्ते वि-दितागमाः । मृद्वन्नाममिताहारा लभन्ते ऽजीर्णभोजनाः । विदितागमा ज्ञातायुर्वेदाः । तस्यालक्षणमाह "मूर्च्छा-तिसारो वमथुः पिपासा शूलं भ्रमोद्वेष्टनजृम्भदाहाः । हैक्कास्यकम्पो हृदये रुजश्च भवन्ति तस्यां शिरसश्च भेदः" । उद्वेष्टनं हस्तपादयोः, शिरोभेदः शिरः-शूलम् । तस्या उपद्रवानाह "निद्रानाशोऽरतिः कम्पो मूत्राघातो विसंज्ञता । अमी उपद्रवा घोरा विसूच्याः पञ्च दारुणाः । अमी उपद्रवा घोराः अमी निद्रानाशा-दय उपद्रवाः सर्वेषामेव रोगाणां घोराः भयङ्कराः । विसूच्याः पञ्च दारुणाः विसूच्यासु पञ्चापि यदि युगपद् दारुणाः प्राणभयङ्कराः । तस्या अरिष्टमाह "यः श्यावदन्तोष्ठनखोऽल्पसंज्ञस्तृष्णार्दितोऽन्यन्नरयातनेवः । घोरस्वरः सर्वविसूचिलक्षणैर्मासात्ततः सोऽपुनरागमाय" । सर्वविसूचिलक्षणैः सर्वे विसूचाः शिथिलीभूताः अन्वयो यस्य सः" भावप्र० ।

विसृत त्रि०वि+सृ-क्त । विस्तीर्णे अमरः । [स्त्रियां ङीप् ।

विसृत्वर त्रि० वि+सृ-क्वरप् । प्रसरणशीले अमरः ।

विसृमर त्रि० वि+सृ-क्मरप् । विसरणशीले अमरः ।

विसृष्ट त्रि० वि+सृज-क्त । १प्रेरिते "रथे विसृष्टः" इति रघुः । २विक्षिप्ते अटा० श्लक्ष्णे च ।

विस्र पु०न० विस-रक्तगौ क्त नि० न दट् । १कर्पूरे २रक्त-शोणितरक्तिकापरिमाणे च अमरः ।

विस्तर पु० वि+स्तृ-अप् । १शब्दसमूहे अमरः । २वाक्यसङ्क्षे ३विस्तारे ४प्रपञ्चे ५बहुत्वे च । आधारे अप् । हृषीके शब्दरत्ना० ।

विस्तार पु० वि+स्तृ-संज्ञायां कर्त्तरि घञ् । १विटपे भावे घञ् । २विस्तीर्णतायाम् समासवाक्यस्ये ३पदसमूहे च अमरः । ४लम्बे मेदि० ।

विस्तीर्ण त्रि०वि+स्तृ-क्त । १विपुले २विस्तारयुक्ते ३विशाले च जटा० । [शब्दच० ।

विस्तीर्णपर्ण न० विस्तीर्णानि पर्णान्यस्य । मानके कन्दभेदे

विस्तृत त्रि० वि+स्तृ-क्त । विस्तारयुक्ते ।

विस्फुलिङ्ग पु० विस्फुरति वि+स्फुर-डु ताडश्चं डित्व-मस्य । १वह्निकणे २विषभेदे च हेमच० ।

विस्फोट पु० विस्फोटयति वि+स्फुट-णिच्-घञ् । (विष-फोड़ा) व्रणभेदे स्वार्थे क । स्फोटकभेदे "विस्फोटकभया-पहा" गीतगोविन्दम् । तद्रोगनिदानादि भावप्र० उक्तं यथा "तत्र विस्फोटस्य विप्रकृष्टं निदानपूर्विका संप्राप्तिमाह "कट्वम्लतीक्ष्णोष्णविदाहिरूक्षक्षारैरजीर्णाध्यशनातपैश्च । तथर्तुदोषैश्च विपर्ययेण कुप्यन्ति दोषाः पवनादयस्तु । त्वचमाश्रित्य ते रक्तं मांसास्थीनि प्रदुष्य च । घोरान् कुर्वन्ति विस्फोटान् सर्वान् ज्वरपुरःसरान् । ऋतुदोषश्च ऋतुहेतुकथितोष्णादीनामतियोगेन । विपर्ययेण ऋतु-चिताहारविहारवैपरीत्येन । त्वचमाश्रित्य त्वचि विस्फो-टान् कुर्वन्तीत्यर्थः । ज्वरपुरःसरान् ज्वरपूर्वान् । पूर्व-रूपमाह "अग्निदग्धा इव स्फोटाः सज्वरा रक्तपित्तजाः । क्वचित् सर्वत्र वा देहे विस्फोटा इति ते स्मृताः" । रक्तपित्तजाः एतेन सर्वेषु विस्फोटेषु रक्तपित्तयोः प्र-धानकारणत्वम् यथा मूत्रेषु वातस्य, तथा वातानुगति-रपि बोद्धव्या । तथा च भोजः "यदा रक्तञ्च पित्तञ्च वातेनानुगतं त्वचि । अग्निदग्धनिभान् स्फोटान् कुरुतः सर्वदेहगान्" । अथ वातिकमाह "शिरोरुक्कण्ठभेदयुक् ज्वरस्तृट्पर्ववेदनम् । कृष्णत्वर्चस्ता चेति वातविस्फोट-लक्षणम्" । शूलं तोदरूपम् । अथ पैत्तिकमाह "ज्वर-दाहरुजापाकस्रावरक्ष्णा समन्वितम् । पीतलोहितवर्णञ्च पित्तविस्फोटलक्षणम्" । श्लैष्मिकमाह "छर्दिरोचकजा-ड्यानि कण्डूकाठिन्यपाण्डुताः । श्लेष्मस्रुक् चिरात् पाकः स विस्फोटः श्लेष्मात्मकः" । आशुः शङ्खनखा-

नाम । कफपैत्तिकमाह "वक्त्रदौर्गन्ध्यं ज्वरश्छर्दिरेतैश्च कफपैत्तिकः" । अथ वातपित्तजमाह "वातपित्तजतोयस्तु तत्र स्यात्तीव्रवेदना" । वातश्लैष्मिकमाह "वक्त्रवैमित्यगुरुभिर्जानीयात् कफवातिकम्" । सान्निपातिकमाह "मध्ये निम्नोन्नतास्तत्र कठिनः सल्पणाकवान् । दाहरागतृष्णामोहच्छर्दिमर्म्मरुजाज्वराः । प्रलापो वेपथुर्मूर्च्छा सोऽसाध्यश्च त्रिदोषजः" । मोहो विपरीतं ज्ञानम् मूर्च्छा सर्वथा ज्ञानशून्यता । रक्तजमाह "वेदितव्यास्तु रक्तेन पैत्तिकेन च हेतुना । गुञ्जाफलसमा रक्ता रक्तस्रावा विदाहिनः । न ते सिद्धिं समायान्ति सिद्धैर्योगिशतैरपि" । पैत्तिकेन हेतुना पित्तस्य हेतुना कट्वादिना रक्तपित्तस्य बलत्वात् सिद्धैर्योगिशतैरपि ते सिद्धिं न समायान्ति । विस्फोटकभेदानाह "एते चाष्टविधा वाता ज्ञातरोऽपि भवेदयम् । तत्रिचलन्त्यर्थं वा तीव्रा ज्वर युक्ताभिजायते । यस्मिन् वह्निर्गते स्वास्थ्यं न वातस्य बहिर्गतिः । तत्र वातिकविस्फोटक्रिया कार्या विजानता" मसूरिकोपद्रवानाह "तृट्श्वासमांसक्षयो वदाहविड्भेदज्वराः । विसर्पमर्म्मसंरोधास्तेषामुक्ता उपद्रवाः" । मांसक्षयः मांसस्य शठिलम् । मर्म्मसंरोधो मर्म्मव्यथा । तेषां विस्फोटानां केचिदुपद्रवाणां लक्षणान्तरं पठन्ति "हिक्काश्वासोऽरुचिस्तृष्णा शाकुमहीं हृदिव्यथा । विसर्पज्वरहृल्लासाः विस्फोटानामुपद्रवाः" । साध्यत्वादिकमाह "एकदोषोल्बितः साध्यः कृच्छ्रसाध्यो द्विदोषजः । सर्वरूपान्वितो घोरो ह्यसाध्यो मृत्युपद्रवः" । २कुष्ठभेदे "स्फोटाः स्यादारुणाभासा विस्फोटास्तु तदुत्थवः" भावप्र० ।

विस्मय पु० वि+स्मि-अच् । १आश्चर्य्ये अमरः । २अद्भुतरसाश्रितभावभेदे रसभेदे सा०द० । "विविधेषु पदार्थेषु लोकसीमातिवर्त्तिषु । विस्मारदेतसो वस्तु स विस्मय उदाहृतः" सा०द० । ३दर्पे मेदि० ४सन्देहे शब्दर० [अमरः ।

विस्मयान्वित त्रि० तृ० त० । १विस्मययुक्ते २आश्चर्य्ययुक्ते च

विस्मापन पु० वि+स्मि-णिच्-ल्युट्-आत्वं वा पुक् च लुप् । १कन्दर्पे २आश्चर्य्यकरे च । ३मन्त्रभेदे न० मेदि० । आदभावे विस्मायनमप्यत्र ।

विस्मित पु० वि+स्मि-क्त । विस्मययुक्ते ।

विस्मृत त्रि० वि+स्मृ-क्त । अत्यन्तविस्मये अमरः ।

विस्मृति स्त्री वि+स्मृ-क्तिन् । अत्यन्तभ्रमे ।

विस्र न० विस्र-रक् । आमगन्धे १चिताधूमादौ २आमगन्धे अमरः । ३कामगन्धे च

विस्रंस पु० वि+स्रंस-भावे-घञ् । १पतने २स्खलने च ।

विस्रगन्धा स्त्री विस्रो गन्धोऽस्याः । कुलुथायाम् राजनि० ।

विस्रगन्धि पु० विस्रस्येव गन्धोऽस्य रत्नमा० । हरितालेऽपि च० । [च अमरः ।

विस्रम्भ पु० वि+स्रंभ-घञ् । १विश्वासे २प्रत्यये ३परिचये

विस्रम्भिन् त्रि० वि+स्रंभ-णिनि । १विश्वासयुक्ते २प्रत्ययिनि च ।

विस्रसा स्त्री वि+स्रंस-क । जरायाम् अमरः । [जनि०।

विस्रा स्त्री विस्रमामगन्धोऽस्यस्याः अच् । कुलुथायाम् राजनि० ।

विहग पुंस्त्री० विहायसा गच्छति गम-ड नि० । १पक्षिणि अमरः स्त्रियां ङीष् । २बाणे १लग्ने ४चन्द्रे ५मेषे च पु० शब्दरत्ना० । ६लग्नादिपदे पु० धरणिः ।

विहङ्गम पुंस्त्री०विहायसा गच्छति गम-खच् नि० । पक्षिणि अमरः स्त्रियां ङीष् । २भारद्वाजे स्त्री (बाँक) शब्दच० ।

विहङ्गराज पु० ६त०-अच् समा० । गरुडे हेमा० "विहङ्गराजाङ्कुरहैरिवाभतैः" माघः । [२क्षिप्तायाञ्च मेदि० ।

विहनन न०विहन्यते वि+हन-ल्युट् । १तूणपिङ्गुले २विघ्ने

विहर पु०वि+हृ-अप् । विहारे ल्युट् । विहरण तत्रैव न० ।

विहसित न० वि+हस-क्त । मध्यमहास्ये अमरः ।

विहस्त त्रि० विगतो हस्तो हस्तावलम्बनं यस्य । १व्याकुले अमरः । २पक्षिणि मेदि० ३पङ्गौ च पु० शब्दच० । ४हस्तशून्ये त्रि० ।

विहा अव्य० वि+हा-आ । स्वर्गे वि०कौ० ।

विहापित न० वि+हा-णिच् क्त । दाने अमरः ।

विहायस् पु०न० वि+हय-असुन् नि० ह्रस्वः । १आकाशे २पक्षिणि पु० अमरः । स्वार्थे अच् । विहायसमप्याकाशे न० खगे पु० आदन्तमव्ययम् आकाशे हेमच० ।

विहार पु० वि+हृ-घञ् । क्रीडार्थं पादाभ्यां १गमने अमरः २भ्रमणे ३स्कन्धे ४लीलायां ५बौद्धदेवालये मेदि० ६वैजन्ते च शब्दमा० ७विन्ध्यरेवाकक्षसे पुंस्त्री०शब्दच० ।

विहित त्रि० वि+धा-क्त । १कृते विधिना २योजिते च ।

विहीन त्रि० वि+हा-क्त । १त्यक्ते २वर्जिते च ।

विहृत न० वि+हृ-भावे क्त । १विहारे २स्त्रीणां वैशाखभेदे हेमचन्द्रे "लीलाविलासो विच्छित्तिर्विब्बोकः किलकिञ्चितम् । मोट्टायितं कुट्टमितं बलितं विहृतं तथा । विभ्रमश्चेत्यमी हावाः स्त्रीणां स्वाभाविका दश" विहृतमित्यत्र पाठः" सा०द० स्त्रीणां सात्त्विकस्वाभाविकालङ्कारमध्ये विलासमित्येव पठित्वा "वक्तव्यकालेऽन्य-

वको वीड्वा विकृतं मतमिति" लक्षितम् विकृतशब्दे ३८८१पृ० दर्शितेन उच्चवक्रमधिकृत्येन लक्षितविकृतस्य तुल्यार्थत्वात् अतस्तत्र विकृतमित्येव पाठो युक्तः।

विहेठन न०वि+हेठ-भावे ल्युट्। १हिंसायां २मर्दने ३विडम्बने मेदि० ४विबाधायां त्रिका०। [२विलोने च हेमच०।

विह्वल त्रि० वि+हुल-अच्। १भवादिका व्याकुले अमरः। यो काल्यो जनने च अक० गतौ व्याप्तौ क्षेपे भोजने च सक० चटा० पर० अनिट्। वेति अवेप्रोर्।

वीक पु० अज-कक् आदेशः। १वायौ २खगे च उज्ज्वल०। ३अनलि संज्ञिप्रसा०। [२प्रकाशे च अमरः।

वी(वि)काश पु० वि+काश-घञ् वा दीर्घः। १रङ्गवि

वीक्षण न० वि+ईक्ष-करणे ल्युट्। १नेत्रे। भावे ल्युट्। २दर्शने।

वीक्षा स्त्री वि+ईक्ष-अच्। १मूक्ष्मबुद्ध्याम्। भावे अ। २मतिभेदे ३दृष्टे ४अवधानभेदे ५सन्यो च शब्दच०।

वीचि(ची) पुंस्त्री० वे-डीचि स्त्रोते वा ङीप्। १तरङ्गे अमरः २अवकाशे २५खे मेदि०। ३अल्पे हेमच०। ४किरणे च जटाध०।

वीचितरङ्ग पु० वीचेरेव तरङ्गो यत्र। वीचितो यथा उत्तरोत्तरं तरङ्गजननमेवं खलन्यजन्यादिरूपेण प्रवाहरिविषये न्यायभेदे न्यायशब्दे ३।६८पृ०दृश्यम्। [हेमच०।

वीचिमालिन् पु० वीचीनां मालाऽस्त्यस्य इनि। वरुणे

वीज अजने अद० चुरा० उभय० सक० सेट्। वीजयति ते अविवीजत्-त। "वीज्यते स हि सत्प्रः" इति कुमारः।

वीज न०वी-किप् अज-ड कर्म०। १क्षारके २शुक्रे अमरः। ३क्षत्तुरे ४तत्त्वावधाने मेदि०। ५मज्जनि राजनि०। ६व्यञ्जनसंज्ञितभेदे "पूर्वं प्राक् व्यञ्जनव्यञ्जनं प्रायः प्रत्ययो विना व्यञ्जनयुक्तात्। ज्ञातं यत्र तन्द्धीभिर्निर्तान्तं यत्प्रातिपदिकात् तत्र वीजक्रियात्व। ७अन्नभेदे तन्द्रधा०। "वीजन्ते मातरेतत् त्रिपुरहरवधू! स्निः क्षतं ते जघन्यं कर्पूरखण्डः। ७धान्यादेः फलादौ च।

वीजक पु० वीजेन कायति के-क। १मातुलुङ्गे वटा० २श्वेतसारे (विजयासार) भावप्र०।

वीजकृत् न० वीजं शुक्रवृद्धिं करोति कृ-क्विप्। वाजी० करणे राजनि०। [वराटके अमरः।

वीजकोश पु० वीजानां कोश इवाधारः। १फलीजाधारे

वीजगर्भ पु० वीजानि गर्भे यस्य। पटोले राजनि०।

वीजगुप्ति स्त्री वीजानां सुप्तिर्यस्मात्। शिग्रुवृक्षे राजनि०।

वीजन न० वीज-भावे ल्युट्। १व्यजने। करणे ल्युट्। २चामरादौ २वस्तुनि पु०।चक्रवाके ४जीवञ्जीवविहगे च पुंस्त्री० मारवतः। स्त्रियां ङीप्।

वीजपादप पु०वीजप्रधानः पादपः। १भल्लातवृक्षे राजनि० वीजजातः पादपः श्रा०त०। २वीजजाते वीजप्ररोहिवृक्षे च। [मेदि०।

वीजपुष्प न० वीजात् पुष्पं यस्य। १सरले २मदनवृक्षे च

वीजपूर पु० पूर्यते पूर-कर्त्तरि अच् २त०। (टाबा भेदे) जम्बीर भेदे वाजपूरोऽप्यत्र।

"वीजपूरफलं स्वादु रसेऽम्लं दोषनाशनम्। रक्तपित्तकरं कण्ठजिह्वाहृदयशोधनम्। श्वासकासहरं हृद्यं तृष्णाघ्नं लघु तत्"। तद्भेदमधुकर्कटी गुणा यथा "वीजपूरोऽपरः प्रोक्तोमधुरा मधुकर्कटी। मधुकर्कटिका स्वादी रोचनी शीतला गुरुः। रक्तपित्तक्षयश्वासकासहिक्काज्वरापहा" भावप्र०।

वीजपैत्रिका स्त्री वीजस्य शुक्रस्य पैत्रिकेव। अण्डकोषे राजनि०। [राजनि०।

वीजफलक पु० वीजानि फले यस्य कप्। वीजपूरे जम्बीरे

वीजमातृक स्त्री वीजानां मातेव रक्षार्थं कन्। पञ्चवीजे क्षारा०।

वीजरत्न न० वीजं रत्नमिवास्य। माषकलाये हेमच०।

वीजरुह पु० वीजेन रोहति रुह-क। वीजमात्रजाते धान्यादौ "कुरुष्टाद्या अपत्रीजा मूलजास्तूपलादयः। पर्वयोनय इक्ष्वाद्या स्कन्धजाः शल्लकीमुखाः। आम्रादयो वीजरुहाः संमूर्च्छजास्तृणादयः। सुपनस्यतिकायस्य वर्द्धते मूलजातवः" हेमच०।

वीजरेचन न० वीजं रेचयति रिच-णिच्-ल्यु। वीजेषु मध्ये रेचके जयपालवीजे राजनि०।

वीजवपन न० वीजानि उप्यन्तेऽत्र वप-आधारे ल्युट्। १क्षेत्रे। भावे ल्युट्। २वीजस्य उत्पादनार्थं क्षेत्रे क्षेपणे च। तद्विधादि दीपिकायामुक्तं यथा "पूर्वोक्तियाव्यक्तचिह्नप्रतिपन्नेषु रिक्तादर्शविगतेषुचन्द्रतिथिं विहाय। द्वादशीत्रयोदशदये त्रिकुलार्किवारे मघेन्दुयोगकरणेषु फलप्रदाः। फलप्रदाश्चवृद्धीजवपनस्य विधिः श्रुतः। चित्राद्वाद्य शुभे केन्द्रे स्थिरलग्नतुलोदये। क्षेत्रमादि विशुद्धं बीजशोधयतः शुचिः। इन्द्रं त्रिजे निधायाथ स्वयं तद्दिक्स्थं वपेत्। कृत्वा चाभ्युदयप्रोक्तमङ्गलो हृष्टमानसः। प्राङ्मुखो वरुणं मन्त्रं इमं मन्त्र

क्षटीरयेत् । त्वं वै वह्नरे ! सीते वह्नुपुष्पफलप्रदे । नमस्ते मे शुभं नित्यं क्रियां मेधां शुभे कुरु !। रोहन्तु सर्वशस्यानि काले देवः प्रवर्षतु । कर्षकास्तु भवत्वद्या धान्येन च धनेन च"। "इत्या बीजन्तु तत्रैव भोक्तव्यं बान्धवैः सह"। पराशरः "वैशाखे वपनं श्रेष्ठं मध्यमं रोहिणीरवौ । अतः परञ्चित्रधर्म न जातु शास्त्रे शुभम्"। क्रियाशब्देऽधिकं दृश्यम्। ज्योतिषे "पूर्वाभाद्रपदामूलं रोहिण्युत्तरफल्गुनी। विशाखा मृगशिरा वाप धान्यादिरोपणे वरा। षड्रोहा रजनीं नीत्वा पुत्रविद्भिर्युज्यते । क्षयंजाते पुनस्ते हे पापवत् नैव दुष्यति । धारामेघहतध्वंसे वा नीडात् सर्वनाशवत् । वराभं रिष्टयोति यशोधनधनक्षयम् । निशा नीडो यशायत्र चिड़ा श्वेतापराजिता । कोविदारश्च वर्षन्ति वर्षं निघ्नन्ति मङ्गलम्"। निशा हरिद्रा कोविदारको रक्तकाञ्चनः । "क्षेमाम्बरा हरबीजं शालो मन्त्रेण रोपयेत् । वह्निरिति स्वीतेति पुत्रदेति धरेति च । नमस्ते शुभगे ! नित्यं द्रुमोऽयं वर्द्धतामिति" ज्यो०त० "एतेषु स्तुतिवाक्यादितिविशाखोडुनि भौमे विना बीजोप्तिर्मतिता शुभा स्वशुभतोऽष्टाम्बीन्दुरामेन्द्वः । रामेन्द्वग्न्युडान्यसप्तभकराष्टपूर्वा फलेदर्कोज्झिता-द्वाद्राभाद्दनवाष्टभानि शुनिभिः प्रोक्तान्यरत् सन्ति च" इत्यंशं । "एतेष्विति । स्तुतिःस्वस्थः पारुष्यं शततारका चादितिः पुनर्वसुः विशाखा मघिका एतेष्वृक्षेषु नक्षत्रैर्विनेतेषु पूर्वोक्तनक्षत्रेषु मूलभघाश्लेषाहस्तचित्रधनिष्ठाश्वातीषु पञ्चदशनक्षत्रेषु बीजोप्तिर्मतिता शुभम् । उक्तञ्च रत्नमालायाम् "हस्ताच्चित्रोत्तरारोहिणीषु चित्रात्तराधाश्वनरेवतीषु । श्वातौ धनिष्ठासु शतासु मूले बीजाप्तिरत्यन्तफलप्रदा" । वसिष्ठेनाप्येतावन्त्येव नक्षत्राण्युक्तानि "धातृहये कौणपपैत्रपुष्ये फल्गुवये त्र्युत्तरमैत्रमेषु । पौष्णे धनिष्ठाक्षयवारिणीभे बीजोप्तिरत्यन्तफलप्रदा स्यादिति" । कौणपो मूल नारदेनाप्युक्तः "स्वातौ मूलेऽश्विपर्वेषु पितृवायुवसुद्रुषु । स-मूलमेव बीजोप्तिरत्यन्तफलप्रदा" । कश्यपेनापि "वसु-वायुभनक्षत्रमश्विभमृक्षद्रुषु । सीतां स्वात्वा बीजो-प्तिरत्यन्तफलप्रदा" । अत्र मघा भोज्या । अथ भौमो मङ्गलवारो निषिद्धः अर्थात् सूर्यचन्द्रबुधगुरुशुक्रशनीनां वारेषु बीजोप्तिः शुभा । अत्र विनायके द्वितीया सूर्येन्दुस्तुतिवाक्येषु कुजे बीजोप्तिर्यत्तदारत्तच्च वक्तव्यात् नेष्टा क्षतिरित्यतो मकारोऽत्रानुपयुक्तो तेन बीजोप्तिर्नेष्टेत्यर्थः । अत्र कालविवेचनिबन्धो राजमार्तण्डे "रवौ रौद्राद्यपादस्थे भूमेः संजायते रजः । तस्माद्विलयं तत्र बीजवापं परित्यजेत्" इति । अथ बीजोप्तौ फल्गुचक्रमुच्यते । शुभमतो न विद्मो गावः क्रिया यस्मादावधुः यस्य स्वरूपाभावः तस्य कृतकारी क्रियाः ताडयोऽगूराङ्गलस्थं नक्षत्रं तस्मादित्यर्थः । राशुधिष्ठितनक्षत्रादारभ्य यानि यावदक्षरीचीनानि तत्-स्थोपि शुभानि तत एकमशुभं ततस्थोपि शुभानि ततो-ऽप्येकमशुभं ततस्थोपि शुभानि ततोऽप्येकमशुभं तत-स्थोपि शुभानि ततस्तत्स्थांशुभानि । एवं बीजोप्तौ नव-विंशतिनक्षत्राणां शुभाशुभत्वमुक्तं भवति नारदेन "भक्षेषु त्रितयं मूर्ध्नि धान्यनाशाय राष्ट्रभात् । गले त्रयं वस्त्र-नाश उरो द्वादश चोदरे । निष्फलत्वं चाकुक्षे च चतुष्टयमीरितम् । नाभौ वह्निःपक्षे स्याद्बीजोप्ता-विति चिन्तयेदिति । राष्ट्रर्क्षात् कक्षेऽस्ति नक्षत्रचक्रं त्रयं मूर्ध्नि मस्तके स्थाप्यं धान्यनाशकरं भवति । तत्-त्रयं गले स्थाप्यं वस्त्रनाशाय स्वामिनाशसंपादकं स्यात् । ततो द्वादश भानि वह्निर्नक्षत्ररहितानि उदरे स्थाप्यानि तानि धान्यवृद्धये स्युः ततो नक्षत्रचतुष्टयं पुच्छे निष्फल-त्वकरं स्यात् ततोऽवशिष्टं वह्निर्नक्षत्रपञ्चकं धान्यनाश-करं स्यात् । रत्नमालायामपि "मूर्ध्नि त्रीणि गले त्रयं च जठरे धिष्ण्यानि च द्वादश स्युः पुच्छे च चतुष्टयं बहिरतो भानां स्थितं पञ्चकम् । स्वेष्टं कल्यसमक्ष-दृक्षिरधिकानिसप्तकुलयं क्रमात् स्वादीतिप्रभवं भयं च कथितं धान्यबीजोप्तिकाले स्फुटम्" इति । अत्र के-चित् कथितं कथनात् सर्वनक्षत्रादिति व्याचक्ष्युस्तत्र युक्तिः "सर्वमादुरमः स्याद्यः" इति खरोदयवाक्यैकवा-क्यभावात् । तत्र नारदवाक्ये धान्यद्रुमादित्युक्तत्वात् "राष्ट्रधिष्ण्यात् समारभ्य धिष्ण्येष्वेतेषु निष्फलमिति" व्याख्येयम् । "सर्वमादुरमः स्याद्यः" इति तु खरोदय-वचनं देशभेदव्यवस्थितम् । बीजवापने लग्नशुद्धिमाह वसिष्ठः "भवरिपुसहजे पापैस्त्रिकोणकेन्द्रस्थितैश्च शुभैः । कथितेषु च धिष्ण्येष्वपि शुभलग्ने बीजवापनं कार्य-मिति" वी०धा० ।

बीजतुष पु० बीजमात्राच्छादितो तुषः । अल्पतुषे राजनि० ।

बीजतृण पु० बीजानां वपनयोग्यधान्यादीनां वपनाय वृणोति-वृञ् + क । वपनयोग्यधान्यादिवर्षपत्रे ।

"कृत्तार्द्रचित्रादितिस्वातिरेवत्यां श्रवणहस्ते । स्थिरे लग्ने शुभे शुक्ले बीजं धार्य्यं प्रयत्नतः । माघे वा फाल्गुने वापि सर्वबीजानि संहरेत् । शोषयेत्तापयेद्दृढे रात्रौ चोपनिधापयेत् । ततश्च पुटिकां बद्ध्वा शोषयेच्च पुनःपुनः । स्थापयेच्च प्रयत्नेन यथा भूमिषु न स्पृशेत् । टीपाग्निना च संस्पृष्टं दग्धा चोपहतञ्च यत् । वर्जनीयं तथा बीजं यत् स्यात् कीटसमन्वितम्" ज्यो० त० ।

बीजम् पु० बीजं स्तौति स्तु-क्विप् । पृथिव्याम् हेमच० ।

बीजस्थापन क्ली० । धान्यादिस्थापने तन्नक्षत्रादिकं ज्यो० त०उक्तम् "धान्याग्निरुद्राहिविधाक्षपूर्वमाहेन्द्रमित्रेतरभैः शुभांशे । धान्यादिसंस्थापनमेष शस्तं सूर्गस्थिरद्वयरुग्दहोदयेषु । सौम्यादितिमघाब्धिधातुपुत्रेषु च कारयेत् । मीने लग्ने शुभे चन्द्रे निधने क्रूरवर्जिते । क्षेत्रव्यं कोष्ठके धान्यं गर्गो वदति सर्वदा" ।

बीजाक्त त्रि० बीजेन सह क्तम् डाच्+क-क्त । बीजेन सह क्ते वैते ।

बीजाक्ष न० बीजेनाक्षमिव । वृक्षाक्षे राजनि० ।

बीजिन् पु० बीजमस्यास्ति इनि । १पत्यादके पितरि हेमच० २बीजविशिष्टे त्रि० स्त्रियां ङीप् । [त्रिका० ।

बीजोदक न० बीजमिव कठिनत्वादुदकं यत्र । करकायां

बीज्य त्रि०विशेषेण रज्यः वि+यज-क्यप् वा । कुत्सिते अमरः

बीटि(टी) स्त्री वि+इट-इन् वा ङीप् । (पानेर बीड़ा) खण्डितताम्बूले । स्वार्थे क । बीटिका तत्रैव । "कङ्कुङ्किकापन्नो च "तद्बीटिकासंस्मृतिं" साण्ड० ।

बीणा स्त्री वेञ-नक् बीभावः पृषो० वत्वम् । खनामख्याते १वाद्यभेदे अमरः । वाद्यशब्दे दृश्यम् । २विद्युति मेदि०

बीणादण्ड पु० ६त० । बीणावाद्यस्थितालाबूपरिस्थे काष्ठदण्डे अमरः । [वादके अमरः ।

बीणावाद त्रि० बीणां वादयति वद-णिच्-अण् । बीणा-

बीत न० वि-इण्-क्त । १युद्धाख्यमर्दे हस्त्यश्वादिसैन्ये अमरः २अङ्कुशकर्मणि मेदि० । ३न्यायवादयुक्ते अनुमानभेदे च । अवीतशब्दे ४६५ पृ० दृश्यम् । ४ज्ञाते ५गते च त्रि० हेमच० ।

बीतंस पु० वि+तनस्-घञ् दीर्घः । १मृगपक्षिणां बन्धनोपकरणे दामप्रभृतौ अमरः । २तेषां विश्वासहेतुप्रावरणे मेदि० ।

बीतन पु०विशिष्टं तनोति तन-अच पृषो०दीर्घः । हस्तपार्श्वद्वये "हस्तस्तु बन्धरा मध्यं हस्तपार्श्वौ तु बीतनौ" हेमच० ।

बीतशोक पु० पु० बीतः विगतः शोको यस्मात् यस्य वा । १अशोकवृक्षे शब्दच० । २शोकहीने त्रि० ।

बीति स्त्री वी-क्तिन् । १गतौ २दीप्तौ ३भोजने ४प्रजनने ५धारणे च मेदि० ।

बीतिहोत्र पु० बीतये पुरोडाशादिभक्षणाय हूयते देवा अत्र हु-आधारे त्र । १वह्नौ अमरः २सूर्य्ये मेदि० ।

बीथि(थी) स्त्री विथ-इन् वा ङीप् । १पङ्क्तौ २श्रेण्यां ३रथ्यायां ४वर्त्मनि ५दृश्यकाव्यभेदे च मेदि० ।

तल्लक्षणादि साद० ६पु० एकं यथा

"बीथ्यामेको भवेद्धूर्तः कश्चिदेकोऽत्र कथ्यते । आकाशभाषितैरन्यैश्चिन्तां प्रत्युक्तिमाश्रितः । सूचयेद् भूरिशृङ्गारं किञ्चिदन्यान् रसानपि । सुखनिर्वहणे सन्धौ सर्वप्रकृतयोऽखिलाः" । कश्चिदित्युक्तौ मध्यमोऽधमो वा । शृङ्गारबहुलत्वाच्चास्याः कैशिकीवृत्तिबहुलत्वम् । "अस्यामङ्कयोरष्टावङ्कानि निर्दिशन्ति मनीषिणः । उद्घात्यकावलगिते प्रपञ्चत्रिगते छलम् । वाक्केलिश्चिबले गण्डमवस्कन्दितनामिके । असत्प्रलापव्याहारमृदवानि च तानि तु" । तत्रोद्घात्यकावलगिते प्रस्तावनाप्रस्तावे सोदाहरणं लक्षिते "त्रिधो वाक्यसमुद्भूतः प्रपञ्चो छाद्मजल्पतः" । यथा विक्रमोर्वश्याम् । यद्भीरुविदूषकचेट्योरन्योन्यवचनम् "त्रिगतं खादनेकार्थयोजनं युतिमाश्रितः" । यथा तत्रैव राजा "सर्वचिन्तितहरां नाथ ! दृष्टा सर्वाङ्गसुन्दरीं । रामा रम्ये वनान्तेऽस्मिन् मया विरहिता त्वया" । नेपथ्ये तत्रैव प्रतिशब्दः । राजा कथं दृष्टेत्याह । अत्र प्रश्नवाक्यमेवोत्तरत्वेन योजितम् "नटादिप्रेरितविषयमेवेदमिति कश्चित् "प्रियाभैरप्रियैर्वाक्यैर्विलोभ्य छलनाच्छलम्" यथा वेणायां "भीमार्जुनौ" "कर्त्ता द्यूतच्छलानां जतुमयशरणोद्दीपनः सोऽभिमानी राजा दुःशासनादेर्दुरनुनयशतस्याक्षुरराजस्य शिष्यम् । कृष्णायैवोत्तरीयव्यपनयनपटुः प्राप्तवान् यश्च दासः काले दुर्योधनोऽसौ कथयतु न कथा दृष्टमस्मागतौ वः" "अन्ये त्वाकस्मिकं किञ्चित् कार्यमुद्दिश्य कस्यचित् । यदीर्यते यद्वचनं वस्तुना छाद्मरोषजम्" । "वाक्केलिर्हास्यसम्बन्धो द्वित्रिप्रत्युक्तितो भवेत्" । द्विरोत्यपलक्षणं यथा "प्रिये ! मानविधेयं प्रकृष्टे किं तेन मद्यं विना मद्याप्यति तत्र प्रियं प्रियमहो सुराङ्गनाभिः सह । वेश्याभ्यर्थनदूतिः कृतस्तव धनं द्यूतेन चौर्य्येण वा चौर्य्यद्यूतपरिग्रहोऽपि भवतो नष्टस्य

ज्ञान्वा गतिः"। "केचित् प्रक्षालनाक्यस्य वाक्यस्य केवं निर्दिशन्ति"। अन्ये च "अनेकस्य प्रश्नस्यैकमुत्तरम्"। "अन्योन्यवाक्याधिक्योक्तिः अर्थाधिक्यं मतम्"। यथा मम प्रभावत्यां वज्रनाभः "अस्य वक्षः क्षतेनैव निर्गत्य गदयानया। लोकयोर्द्वयविष्यामि भुवनद्वयमद्य वः"। प्रद्युम्नः। अरेरे खलराक्षस! अलमनेन वृथाप्रलापेन मम खलु "अद्य प्रचण्डभुजदण्डसमर्पितोरुकोदण्डनिर्गमितबाणसमूहघातैः। आस्तां समस्तदितिजव्रततोक्षितेयं क्षोणिः क्षणेन विधिताशनलोभनीया"। "मयूखं प्रस्तुतसम्बन्धिभिन्नार्थं सत्वरं वचः"। यथा वेण्यां "राजा" अध्यासितं तव चिराच्चलनस्यलस्य पर्याप्तमेव करभोरु! ममोरुयुग्मम्"। अनन्तरं प्रविश्य कञ्चुकी। "देव भग्नं भग्नमित्यादि"। अत्र रथवेतनभङ्गार्थं वचनमूरुभङ्गार्थं सम्बन्धे सम्बद्धम्। "आक्षान् अरथोक्तान्यथाप्रसन्दितं भवेत्"। यथा ऊत्तररामे सीता। आर्य काङ्क्षं खलु अयोध्यायाः गन्तव्यं तत्रहि सो राजा विसएव वर्णयिदव्वो। लवः। अथ किमावाभ्यां राजोपजीविभ्यां भवितव्यं। सीता। आर्य सो तुह्माणं पिदा। लवः। किमावयोः धूपतिः पिता। सीता। साधङ्कं मा अवधा संकधं च खलु तुह्माणं सयासाए ज्जेव दुवेए त्ति। "प्रहेलिकैव वाक्येन युक्ता भवति नाटिका"। संवरणकाव्यान्तरं प्रहेलिका। यथा रत्नावल्यां "सुसङ्गता "साङ्ग जङ्घ कदे तुमं। यं चित्तफलवस्सं"। अत्र त्वं रत्नः क्षते आगतेत्यर्थः संहतः। "असत्प्रलापो यदाक्यमकस्मद्वं तथोत्तरम्। अत्यद्भुतोऽपि मूर्खस्य पुरो यत्र स्थितं वचः"। तत्रादौ यथा मम प्रभावत्याम् प्रद्युम्नः सङ्कारवल्लीमवलोक्य सानन्दम्" अहो सा कथमिहैव। "अनिलचलमञ्जुलेखौ परिमलवहुला रसावहा तन्वी। किसलयपेयजलाधिः लोकितकलधाधिनी प्रियतमा मे"। एवमसम्बद्धोक्तेरपि। तृतीयं यथा वेण्यां दुर्योधनं प्रति गान्धारीवाक्यम्। "व्याहारो यत्परस्यार्थं व्याक्षोभकरं वचः"। यथा मालविकाग्निमित्रे। व्याक्षप्रयोगावसाने मालविका निर्गन्तुमिच्छति। "विदूषकः। भो दाव उपदेसगहणा गमिस्सदि रण्णो पक्कमे मग्गदोः। विदूषकं प्रति आर्य! उच्चतां यत्पदा क्रमभेदो लक्षितः। विदूषकः। एदं वच्छपूआ भोदि सा इमाए लङ्घिदा। मालविका "अवते" (तत्र इति पाठान्तरम्) इत्यादिना नायकस्य विदूषकादर्शनप्रयुक्तेन व्याक्षोभकारिणा वचसा व्याहारः। "दोषा गुणा गुणा दोषा यत्र स्युर्दर्शनं हि तत्"। क्रमेण यथा "प्रियजीवितता क्रौर्यं निःस्नेहत्वं कृतघ्नता। भूयस्त्वदर्शनादेव ममैते गुणतां गताः। तस्मात्तदूपसौन्दर्यं भूयितं यौवनश्रिया। तच्चैकतायनं जातं दुःखायैव ममाधुना"। इति व्याहारादि नाटकादिषु सर्वत्रापि वीथ्यामर्थप्रविधेयानि। विस्तृततया नाटकादिषु विनिविष्टान्यपीहोदाहृतानि नानारसानाक्षान्त्या नाङ्गरूपतया स्थितत्वादीषदेवम्" सा॰द॰ ६प॰।

वीथ्यङ्ग पुं॰वीथ्या रूपकस्य ।१दृश्यकाव्यभेदे ।हेत॰। २तदङ्गे वीथिशब्दे दृश्यम्। [संक्षिप्तसा॰।

वीध्र त्रि॰ वि-इन्ध-रक्। १निर्मले २नभसि शब्दो ४कम्बो

वीनाह पु॰ वि-नह-घञ् दीर्घः। कूपादिस्तम्भबन्धनसाधने (पाट) ख्याते पदार्थे अमरः।

वीप्सा स्त्री वि+आप-सन्-अच-टाप्-च अभ्यासलोपश्च। व्याप्तौ

वीभ औणादिकेऽर्थे विकत्थने च भा॰ अक॰सेट्। ऋदित्वादङि न वृद्धिः। वीभते अवीभिष्ट।

वीर न॰वीर-अच्। १अङ्गिनि २नटे मेदि॰ ३मरिचे ४पद्ममूले ५काश्मिरके ६दक्षवीरे ७शाल्वके राजनि॰। ८शौर्ये विशिष्टे शूरे त्रि॰ अमरः। ९जिने १०नटे पु॰ हेमच॰। ११विष्णौ पु॰ विष्णुस॰। तन्त्रोक्ते १२कुलाचारयुते त्रि॰ कुलाचारशब्दे पु॰ दृश्यम्। १३तरङ्गवीचौ १४वराहकन्दे १५वृक्षतरकरञ्जे १६करवीरे १७अर्जुने पु॰ राजनि॰ १८यज्ञाग्नौ भरतः वीरहा।१९उत्तरे २०शुभटे च मेदि॰। २१श्रेष्ठे त्रि॰ हेमच॰। २२पत्नौ २३शुक्ले च "वीरा निम्नति शुक्ला" अमरः। २४रसभेदे "उत्तमप्रकृतिर्वीरः स्थाय्युत्साहविभावकः। अद्भुतदैवतो हेमवर्णोऽयं वस्तुदाहृतः। आलम्बनविभावास्तु विजेतव्यादयो मताः। विजेतव्यादिचेष्टाद्या उद्दीपनरूपिणः। अङ्गभावास्तु तत्र स्युः सञ्चार्याद्या रसोदयाः। सञ्चारिणस्तु धृतिमतिगर्वस्मृतितर्करोमाञ्चाः। स च दानधर्मयुद्धदयया च समन्वितस्तद्भेदौ स्यातां। स च वीरः। दानवीरो धर्मवीरो दयावीरो युद्धवीरश्चेति चतुर्विधः" सा॰द॰३प॰।

वीरक पु॰ वि+ईर-ण्वुल्। करवीरे राजनि॰।

वीरण न॰ वि+ईर-ल्यु। उशीरे (वेणारमूल) अमर॰।

वीरतर न॰ वि+ईर-अच् तत॰, वीर+वा तरप्। १वीरत्वे अमरः। २शूरतरे च।

वीरतरु पु॰ वि+ईर-अच् कर्म॰। १अर्जुनवृक्षे अमरः। २कोविदारे ३भल्लातके (भेला) ४बिल्वभेदे च राजनि॰ वीरद्रुवादसोऽत्यत्र।

वीरपत्नी स्त्री वीरः पतिर्यस्याः वा ङीप् च। वीरभार्यायाम् अमरः। पक्षे वीरपति तत्रार्थे।

वीरपत्नी स्त्री वीरयति वीर-अच् तथाभूतं पत्रं यस्याः। विल्ववायाम् भद्रे राजनि॰।

वीरपान(थ) न॰ वीराणां पानं वा यत्र। युद्धात युद्धखेदापनुत्तये वा सुरापानादौ अमरः।

वीरभद्र पु॰ वीरो भद्रोऽस्य। १यज्ञमेधीवेदांशे २वीरेषु भद्रे ३वीरभेदे मेदि॰। ४शिवगणभेदे तदुत्पत्तिकथा कालीख॰ ८६अ॰। "अहमेवीरोऽपि रे भद्र! अस्य सर्वस्यधेश्वरः। वीरभद्राह्वया हि त्वं प्रथितं परमं प्रभो। कुरु मे वचनं वत्स दक्षयज्ञक्षयं लघु"। आर्षे च। वीरभद्रेऽपि वीरभद्रे अटा॰।

वीरभार्य्या स्त्री ६त॰। वीरपत्न्याम् अमरः।

वीरमाट स्त्री ६त॰। वीरस्य जनन्याम् अमरः।

वीररजस् न॰ वीर इव रजः रजत्वात्। किन्दूरे राजनि॰।

वीररेणु पु॰ वीरयति वीरो रेणुर्धूलिमर्दनं यस्य। भीमसेने त्रिका॰।

वीरवत् त्रि॰ वीरोऽस्त्यस्य मतुप् मस्य वः। १वीरयुते स्त्रियां ङीप्। "वीरवती न भूमिः" भट्टिः। स्त्री च २मांसरोहिण्यां भावप्र॰।

वीरवत्सा स्त्री वीरो वत्सो यस्याः। वीरजातरि अटा॰।

वीरबाहु पु॰ विष्णौ विष्णुस॰।

वीरविज्ञापक पु॰ "वीरविज्ञापको लृक्षन् अनेः मूढ्यमाक्षुतेः" हेमच॰ उक्ते मूढ्यक्षीतपनेन क्षोभकर्तरि।

वीरवृक्ष पु॰ निम्बवृक्षे॰। १भल्लातवृक्षे अमरः। २अर्जुनवृक्षे हेमच॰ ३बिल्वभेदे। राजनि॰ (देशान्त) ४धान्यभेदे रत्नमाला।

वीरसू स्त्री वीरं सूते सू+क्विप्। वीरमातरि अमरः।

वीरसेन पु॰ वीरः सेना यस्य। १सप्तराजजनके यदुभेदे भा॰ व॰ ५१अ॰। २धार्मिकवृक्षे न॰ राजनि॰।

वीरहन् पु॰ वीरयति औद्धत्यं करोति वीर+क्विप् अच्। वीरो यज्ञान्तिकं हतवान् हन-क्विप्। तद्घातके विष्णौ अमरः। २विष्णौ विष्णुस॰।

वीरा स्त्री वि+ईर-अच्, वीर-अच् वा वीर+स्त्रियां टाप् वा। १सुरानामवस्त्रद्रव्ये २क्षीरकोकोलाम् ३आमलक्याम्। ४एलवालुकायां ५पतिपुत्रवत्यां स्त्रियां ६रास्नायां ७विदार्य्याम् ८दुग्धिकायाम् ९क्षीरविदार्य्यां १०जयायां मेदि॰। ११काकोल्यां १२मद्यभाजनायाम्॥ १३शतकुमार्य्याम् १४आम्रातायाम् १५अतिविषायां १६मदिरायाञ्च राजनि॰। १७शिंशपावृक्षे (शिशु) रत्नमा॰।

वीराख्य पु॰ वीरयति औद्धत्यं करोति वीर+क्विप्-अच् कर्म॰। कङ्कुष्ठवृक्षे राजनि॰। [भयङ्करे युद्धक्षेत्रे अमरः।

वीरासंज्ञन न॰ वीरैरासंज्ञतेऽत्र आ+सन्ज-आधारे ल्युट्।

वीरासन न॰ वीरस्येवासनम्। "एकपादमधैकस्मिन् विन्यसेदूरुसंस्थितम्। इतरस्मिन् तथा पश्चात् वीरासनमिति स्मृतम्" इत्युक्ते आसनभेदे तन्त्रम्। २भिक्षादानयज्ञनेन स्थितौ "रात्रौ वीरासनं वसेत्" मनुष्या॰ कुल्लू॰।

वीरुध्(धा) स्त्री वि+रुध-क्विप् दीर्घः वा टाप्। विस्तारायां लतायाम् अमरः।

वीरेश्वर त्रि॰ ६त॰। १वीरपतौ कालीखे २शिवविग्रहभेदे पु॰ तदाविर्भवकथा कालीख॰ ८२ अ॰ दृश्या।

वीरोक्ष पु॰ वीरो वज्रान्तिकमक्षति यथाकथञ्चन तुदनेन क्षञ्ज-अच्। प्रातःस्नायं क्षौमाकल्पेरि हेमच॰।

वीरोपजीविक पु॰ वीरः यज्ञान्तिकतत्साध्यमन्त्रिक्षोत्रादि उपजीविका यस्य। दम्भार्थमन्त्रिक्षोत्रादुत्तारिणि हेमच॰

वीर्य्य न॰ वीर-यत्, वीरस्य भावो वत् वा। १देहस्थे धरमधातौ शुक्रे २पराक्रमे ३बले ४प्रभावे अमरः। ५तेजसि मेदि॰ ६दीप्तौ ७द्रव्यनिष्ठे रसविपाकादि शक्तिरूपे प्रभावभेदे सुश्रुतः "वीर्य्यं प्रभावनामेति कर्माक्षात्तद्येनौषधकर्मनिष्पत्तेः। दृष्टौषधकर्माण्यूर्ध्वाधोभागोभयभागसंशोधनसंशमनसंघातभेदनदीपनप्रपीडनक्लेदनदारणभादनप्राप्यान्नविघातप्रशमनानि वीर्य्यप्राधान्याद्भवन्ति। तच्च वीर्य्यं द्विविधमुष्णं शीतं चाग्नीषोमीयत्वाज्जगतः। केचिदष्टविधमाहुरुष्णं शीतं स्निग्धं रूक्षं विशदं पिच्छिलं मृदु तीक्ष्णं चेति तानि वीर्य्याणि स्वबलगुणोत्कर्षादुपसंभिभूयात्मकर्म कुर्वन्ति यथा तावत्कश्चित् पदार्थो रूक्षो वायवं तिक्तानुरसं वातं प्रकोपयति वीर्य्यतात् तथा कुलत्थः कषायकटुकत्वात्॰ पलाण्डुः क्षेष्मभावाच्च मधुरस्नेहगुरुसो वातं वर्द्धयति शीतवीर्य्यत्वात्। वटुका पित्तश्लेष्मणौ क्षपयति मृदुशीतवीर्य्यत्वारसगुण-

अवर्णं वर्णं वैलक्षण्यम्। तिक्ता कायमाची चित्तं वर्द्धयति गुरुवीर्य्यत्वात्। वटकं मूलक इत्यादि वर्द्धयति स्निग्धवीर्य्यत्वात्। रूक्षं कार्पासं इत्यादि क्षपयति रूक्षवीर्य्यत्वात्। तदेतत्त्रिदर्शनमात्रलक्षणम्। भवन्ति चात्र ये रसावातशमना भवन्ति यदि तेषु वै। रौक्षलाघवशैत्यानि न ते वृष्याः कफीरवम्। ये रसाः पित्तशमना भवन्ति यदि तेषु वै। तैक्ष्ण्योष्णप्लवतायैव न ते तत्कर्मकारिणः। ये रसाः श्लेष्मशमना भवन्ति यदि तेषु वै। स्नेहगौरवशैत्यानि ह्यवार्यं वर्द्धयन्ति ते। "तत्राहीर्य्यं प्रधानमिति"। द्रव्यगतवीर्य्यं रसाद्यनुगुणयक्रियिशेषरूपम् तच्च चिन्त्याचिन्त्यक्रियाहेतुत्वेन द्विविधम्। तत्र चिन्त्यक्रियाहेतुः प्रभावापरपर्य्यायो द्रव्याणां रसादितत्कर्मकार्य्यवैशेषिकः यथोक्तं "भूतप्रभावान्नियमो द्रव्ये यादृक् रसे स्थितः। चिन्त्याचिन्त्यक्रियाहेतुर्वीर्य्यं धन्वन्तरेर्मतम्" चक्रदः। भावप्र० वीर्य्यप्रभावयोर्भेद उक्तो यथा "द्रव्ये रसो गुणो वीर्य्यं विपाकः शक्तिरेव च। पदार्थाः षड् निगद्यन्ते यैः स्वं कुर्वन्ति कर्म च" इति सामान्यतः द्रव्यगतान् षड् पदार्थानुक्त्वा रसगुणानुक्त्वा च "उष्णशीतगुणोत्कर्षात् वृषवीर्य्यं द्विधा स्मृतम्। यत् कर्मजनितोभोगं दृष्ट्वते भुवनत्रयम्" इत्यनुक्त्वा च "विपाकश्च दर्शयित्वा प्रभावो वक्ष्यते यथा "रसादिभ्यो यत्कर्म विद्यते तत्प्रभावजम्। इत्यौ रसादीनामपि चिन्त्यत्वं विरेचनी। मधुरत्वं च मृद्वीका इत्यं वीर्यस्य दीपनम्। प्रभावस्तु यथा शाखी शुकपक्षं रसादिभिः। समापि कुरुते दोषत्रितयस्य विनाशनम्। कश्चित्तु केवलं द्रव्यं कर्म कुर्यात् प्रभावतः। स्मरं स्मरि शिरोवृद्धा यष्टेर्मधुलटा यथा"। तथा नानौषधियोगे ऽकं प्रति क्षमाद्यवान्तरवीर्य्यो न तु तत्र रसादिक्षेत्रविचारः कर्त्तव्यः अत आह डल्हणः "अयं सामान्यविज्ञानं प्रविद्वांसः क्षमावतः। आमलेयोपयोज्यानि वैद्यजानि विचक्षणैः। प्रत्यक्षलक्षणक्षुण्णाः प्रविद्वांस क्षमावतः। नौषधीक्षेत्रभेषज्ञा परीक्ष्येण वटादयः। विरुद्धगुणसंयोगे भूयसाञ्च हि जायते। रसं विपाकञ्चौ वीर्य्यं प्रभावञ्चान्यथोऽपि" इत्यनेन रसगुणवीर्य्यविपाकवीर्य्यप्रभावकर्म्मज्ञानानि। अतश्चयोर्भेदो बुद्धः।

वीर्य्यवत् त्रि० वीर्य्यमस्यास्त्यस्य मतुप् मस्य वः। प्रशस्तवीर्य्ययुक्ते वृक्षादौ च वीर्य्यान्योषधीव कुमारः।

वीहार पु० विहियतेऽत्र वि+हृ-आधारे घञ् दीर्घः। हृद्य-मन्दिरे अमरः।

वृग योगे भ्वा०पर०अक०सेट् रदित्। वृङ्क्ते अवृङ्क्षीत्।

वृट वर्त्ते चुरा०उभ०सक०सेट् रदित्। वृण्टयति अवृण्टत् त।

वृ आवरणे चु० उभ०सक० सेट्। वारयति ते अवीवरत् त।

वृ सेवायां क्र्या०आ०सक०सेट्। वृणीते "वृणते हि विवक्षाकारिषम्" शिरा०। अवरीष्ट अवरिष्ट अवृत।

वृ वरणे भ्वा०उभ०सक०सेट्। वरति ते अवारीत् अवरि(री)ट

वृ वरणे आदि० क्र्या० च उभ०सक० सेट्। वृणोति वृणुते वृणाति वृणीते अवारीत् अवरिष्ट अवरीष्ट अवृत।

वृंहित न० बृहि-क्त। करिगर्जने अमरः।

वृक आदाने भ्वा०चुरा०सक० सेट्। वर्कते अवर्किष्ट।

वृक पु० वृक-क। १वृकरूपाकारे करिरुधातके आधुनिके। (घोष) २वाके उणादि०। ३वकवृक्षे मेदि०। ४मृगभेदे शब्दार०। ५वृकभिदे पुंस्त्री० (वृकेणेवद्रव्यमस्ये घूपे उणादि० वृके रक्षणा० उदरस्थे पर्य्याप्तभेदे वृकोदरः। ६वृकलतायां स्त्री वा गौरा० ङीष्। सर्व्वत्र जातौ स्त्रियां ङीष्।

वृकदंश पुंस्त्री० वृकं दशति दंश-अच्। १वृकुरे शब्दर० स्त्रियां ङीष्।

वृकधूप पु० वृक्यते वृक-घञर्थे क कर्म०। नानाद्रव्यनिश्चिते दशाङ्गादौ धूपे अमरः। २सरलवृक्षे च(टारपिन्)अमरः

वृकधूर्त्त पुंस्त्री० वृक इव धूर्त्तः। १मृगाले शब्दार० स्त्रियां ङीष्। [शिवति (तस्करे) रत्नमा०।

वृकाक्षी पु० वृकस्येवाक्षि पुष्यमस्य मत्व० वमा० ङीष्।

वृकारति पु० वृत०। वृकुरे राजनि० वृकरिपादयोऽप्यत्र।

वृकोदर पु० वृकनामाग्निरुदरे यस्य। "यस्य नोच्छो वृको नाम जठरे वृध्यवर्द्धनः। मया दत्तः स धर्म्मोऽत्र तेन चासौ वृकोदरः" मत्स्यपु० वृक० बच्। भीमे "त्वमूचे वचनं वृकोदरः" शिरा०।

वृक्ण त्रि० व्रश्च-क्त। छिन्ने अमरः।

वृक्ष वरणे भ्वा०चुरा०सक०सेट्। वृक्षते अवृक्षिष्ट।

वृक्ष पु०व्रश्च-क्स। व्रश्चनेऽपि आवश्यके वृक्षे। वृक्षादौ वन्। वृक्ष वृक्षवृक्षे। [स्त्रियां ङीष्।

वृक्षचर पुंस्त्री० वृक्षे चरति चर-ट। वानरे धनञ्जयः

वृक्षच्छाय न० वृत०। बहूनां वृक्षाणां छायाऽत्र।

वृक्षधूप पु० वृक्षोऽपि धूपस्तत्साधनम्। सरलवृक्षे राजनि०।

वृक्षनाथ पु० वृत०। वटवृक्षे शब्दर०। [शब्दच०।

वृक्षपाक पु० वृक्षस्य पाकः शिथिरिव जटिलत्वात्। वटवृक्षे

वृक्षभवन न० ७त०। वृक्षस्य कोटरे यद्भरद्वाजकी।
वृक्षभक्षा स्त्री वृक्षो भक्षो वेष्टकत्वात् भोजनीय इव यस्याः। वन्दायाम् (परगाछ) भाषा०।
वृक्षभेदिन् पु० वृक्षं भिनत्ति भिद्-णिनि। वृक्षभेदके १वज्रभेदे अमरः। २टङ्के हेमच०। [शब्दच०।
वृक्षरुह् पु० वृक्षस्य रुहि भूमौ भवति भू-क्विप्। जलवेतसे
वृक्षरुहा स्त्री वृक्षे रोहति रुह-क। १वन्दायाम् अमरः २अमृतलतायाञ्च राजनि०।
वृक्षवाटिका स्त्री वृक्षैर्वाटीव संवृतत्वात् दलार्थे कन्। कमालगन्धिकोपदेव्यं स्टङ्गवेरपत्ये उपवने अमरः।
वृक्षादन पु० वृक्षमत्ति भिनत्ति अद-ल्यु। १कुठारास्त्रे (नेड़ाचि) अमरः। वृक्षान्तरमत्ति भिनत्ति। २अन्यवृक्षे ३मधुवृक्षे ४कुठारे च मेदि०। ५पियाले धरणिः। ६वृक्षविदारके त्रि० ७वन्दायां स्त्री गौरा० ङीष्।
वृक्षाम्ल न० वृक्षजातमम्लम्। (तेंतुल) १वृक्षजाताऽम्लरसधाने वृक्षे अमरः। २चुक्राम्ले च।
"वृक्षाम्लमामलक्योष्णं वातघ्नं कफपित्तलम्। पक्वन्तु गुरु संप्राहि कटुकं दुर्जरं मधु। कच्चोष्णं रोचनं रूक्षं दीपनं कफवातजित्। तप्तार्श्वोग्रहणीगुल्मशूलकृद्रोगजन्तुजित्" भावप्र०।
वृक्षार्हा स्त्री० वृक्षेभ्य अर्हा पूजा। मल्लामेदायां राजनि०।
वृक्षाश्रयिन् पु० वृक्षमाश्रयति आ+श्रि-इनि। १खगे २चुटोलूके राजनि०।
वृक्षोत्पल पु० वृक्षे उत्पलमिव। कर्पिकारवृक्षे रत्नमा०।
वृच दीप्तौ चु० उभ० सक० सेट्। वर्चयति ते अवीवृचत् त
वृत वर्त्तने भ्वा० आत्म० वृङि वृटि वृङ च उभ० अक० सेट्। वर्त्तते। अवृतत् अवर्त्तिष्ट वृटि वृङि च पर० सेट् वर्त्तिष्यति वर्त्स्यति। यनि च तया विवर्त्त्यते, विवृत्सति। वदित् ङा वेट्।
वृत संभक्तौ, वरणे च दि० आत्म० सक० सेट्। वृणते अवर्त्तिष्ट। वदित् ङा वेट्। [धातुपाठः।
वृत् त्रि० वृत+भूते-क्विप्। वृत्ते अतीते "वृत वृतादि" पा०
वृत त्रि० वृ-क्त। १प्रार्थिते २वर्त्तुले ३समीढो मार्गणादिना क्षतनियोगे ४क्षोभिते च अमरः। [राजनि०।
वृतपत्रा स्त्री वृतमु आवृतं पत्रं यस्याः। पुत्रदात्र्यां लतायां
वृति स्त्री वृ-क्तिन्। वेष्टने (वेड़ा)"वृतिञ् तत्र कुर्वीत" याज्ञ०
वृतिङ्कर पु० वृतिङ्करोति कृ-खच्। विकङ्कते (गरुरि) शब्दच०
वृत्त न० वृत-भावे क्त। "गुरुपूजा दया शौचं सत्यमिन्द्रियनिग्रहः। प्रवर्त्तनं हितानाञ्च तत्सर्वं वृत्तमुच्यते" रघुः १चरित्रभेदे २पद्यभेदे "पद्यं चतुष्पदो तच्च वृत्तं जातिरिति द्विधा। वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत्। सममर्द्धसमं वृत्तं विषमञ्चेति तत्त्रिधा" छन्दा० ३वृत्तौ च। वृत-कर्त्तरि क्त। ४अतीते ५वृद्धे ६वर्त्तुले ७क्षतावरुद्धे च त्रि० अमरः। ८अधीते वृत्ते मेदि० ९जाते च त्रि० १०भूमौ पु० राजनि०। ११रेणुकायां १२प्रियङ्गौ १३रोहिण्यां १४भिक्षिकारिष्टलतायां स्त्री राजनि०। तत्र वर्त्तुलाकारवस्तु यथा "वृत्तानि बाकुनारङ्ग खर्जूरधन्वाम्रबीजकाः। रम्भाकुष्माण्डकादयः। कर्पासमुञ्जाशालूकचापघटानलम्। सूत्रिकापरिखायोगपङ्कारालूकादयः" कविकल्प० १६गोकारे क्षेत्रभेदे न० क्षीरा० क्षेत्रशब्दे २४००पृ० दृश्यम्।
वृत्तगन्धि न० वृत्तस्य पद्यभेदस्य इव गन्धो यस्य बहु० समा०। "भवन्त्युत्कालिकाप्रायं समाक्षरं द्रुताक्षरम्। वृत्तैकदेशसम्बन्धात् वृत्तगन्धि पुनःक्षुतम्" छन्दुक्ते गद्यभेदे
वृत्ततण्डुल पु० वृत्तो वर्त्तुलस्तण्डुलोऽस्य। शालिधान्ये राजनि०
वृत्तनिष्पाविका स्त्री वृत्ता वर्त्तुला निष्पाविका। नवनिष्पाव्यां राजनि०।
वृत्तपर्णी स्त्री वृत्तानि पर्णान्यस्याः ङीष्। १भद्रायामष्टाङ्गायाम् २पाठाञ्च (आकनादि) राजनि०।
वृत्तपुष्प पु० वृत्तानि वर्त्तुलानि पुष्पाण्यस्य। १शिरीषवृक्षे २कदम्बे ३पाचीरे ४कुब्जके ५वञ्जरे च राजनि०।

दृत्तफल न० दृत्तं फलमस्य । १मेरीवृक्षे २दाडिमे ३खदरे च । ४वार्त्ताकीक्षुपे ५श्यामलक्षुपे स्त्री टाप् राजनि०।

दृत्तमल्लिका स्त्री दृत्ता चासौ मल्लिकेव । १श्वेतार्कवृक्षे २मोदिन्यां लतायां च राजनि०। [स्त्री राजनि०।

दृत्तबीज पु० दृत्तानि बीजान्यस्य । १भिण्डावृक्षे २वाट्यक्षुपे

दृत्तस्थ त्रि० दृत्ते गुरुपूजादौ चरित्रे तिष्ठति स्था-क । वृत्तशब्दोक्तगुरुपूजादिचरित्रवति ।

दृत्तान्त पु० दृत्तो ज्ञातोऽन्तोनिर्णयो यस्मात् । १संवादे २वार्त्तिकसंदेशे च अमरः । २प्रक्रियायां ३वार्तायां ४प्रस्तावे च मेदि० । ५अवसरे हेमचन्द्रे ७१वृत्तान्ते च विश्वः ।

दृत्ति स्त्री० दृत-क्तिन् । १वर्त्तने २स्थितौ ३विवरणे च मेदि० । करणे क्तिन् ४जीविकायाम् अमरः । ५कौशिकीभारत्यारभट्यात्मके नाटकरचनाभेदे "श्लक्ष्णे कौशिकी वीरे सात्वत्यारभटी पुनः । रसे रौद्रे च भीभत्से दृत्तिः सर्वत्र भारती । वृत्तयो द्वौ तु सर्वत्र नाट्यस्य मातरौ" सा० द० । ६वेदान्तोक्ते अन्तःकरणादेः परिणामभेदे च । अन्तःकरणदृत्तिस्वरूपप्रयोजनादिकं वेदान्तदर्शितं यथा तड़ागोदकं छिद्रान्निर्गत्य यथा कुल्यालया केदारान् प्रविश्य तद्देव चतुष्कोणाद्याकारं भवति तथा तैजसमन्तःकरणं चक्षुरादि द्वारा घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते स एव परिणामो दृत्तिरित्युच्यते । अन्तश्चित्यादिस्थले तु अन्तःकरणस्य न बहिर्घटादिदेशगमनं बहिर्घटादिदेशचक्षुरादिसन्निकर्षात् १प० । इन्द्रियजन्यदृत्तित्व आवरणभङ्गार्थो वृत्त्यर्थो दृति मतद्वैधं यदुक्तं तत्रैव ७प० । "या चान्तःकरणवृत्तिरावरणाभिभवार्थैवोक्तं मतम् तथा हि अविद्योपहितचैतन्यस्य जीवत्वपक्षे घटाद्यधिष्ठानचैतन्यस्य जीवरूपतया जीवस्य सर्वदा घटभानप्रसङ्गो घटाद्यवच्छिन्नचैतन्यावरकमज्ञानं मूलाविद्यापरतन्त्रमवच्छापद वाच्यमभ्युपगन्तव्यम् । एवं सति न सर्वदा घटादेर्भानप्रसङ्गः । अज्ञानचैतन्यस्यैव भानप्रयोजकत्वात् तस्य चावरणस्य सदातनत्वे कदाचिदपि घटभानं न स्यादिति तद्भङ्गे तज्जन्यं तच्चैतन्यमात्रं तज्ज्ञानस्य तदनिवर्त्तकत्वात् नापि वृत्त्युपहितचैतन्यं, परोक्षस्थलेऽपि तद्वृत्त्यापत्तेरिति परोक्षव्यावृत्तवृत्तिविशेषस्य तदुपहितचैतन्यस्य वा आवरणभङ्गकत्वमित्यावरणाभिभवार्थो वृत्तिरित्युच्यते । तत्त्वन्यार्थो वृत्तिरित्यपरं मतम् । तत्राविद्योपाधिकोजीवोऽपरिच्छिन्नः स च घटादिप्रदेशे विद्यमानोऽपि घटाद्यपरोक्षवृत्तिविरहदशायां न घटादिसत्त्वभासयति घटादिना सर्वं तस्य सम्बन्धाभावात् तत्तदाकारवृत्तिदशायां तु भासयति तदा सम्बन्धसत्त्वात्" । अतएवोक्तं "वृत्तिवृत्तिविदाभासौ द्वावेतौ व्याप्नुतो घटम् । तत्राज्ञानं विधा नश्येत् आभासात्तु घटः स्फुरेत्" दृष्टञ्च प्रथमताभिप्रायम् अन्तःकरणवृत्तीनां भेदादिकं पातञ्जलादिदर्शितमन्तःकरणशब्दे १६५ पृ० दृश्यम् । "ब्रह्मज्ञानप्रतिबन्धनाशाय वृत्तिव्याप्तिरपेक्षिता" वेदा० । विप्रञ्च लौकिक रूपवृत्तिकरणे दोषो यथा "स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत्तु यः । स जलन्न इति ज्ञेयः कल्पं तत्र वसेत्तु भूमिप ! । यावन्नोरेणवः सिक्ता विप्राणां नेत्रविन्दुभिः । तावद्वर्षसहस्राणि वृत्तापाके स तिष्ठति । तप्ताङ्गारञ्च तद्भक्ष्यं पानञ्च तप्तमूत्रकम् । तप्ताङ्गारे च शयनं दाहते यमकिङ्करैः । तदन्ते च भवेत्पापी विष्ठायां जायते कृमिः । सप्तिर्यग्वर्षसाहस्रि देवमानेन भारते । ततो भूमिविहीनश्च प्रजाहीनश्च मानवः । दरिद्रः क्षयी रोगी मूर्खो निन्द्यतमः शुचिः" ब्रह्मवै० प्र० ४८अ० ।

दृत्तिकर्षित त्रि० दृत्त्या कर्षितः । १विपन्नत्वे २अत्यन्तमात्र दृत्तिके च । [२खरटे पु० स्त्री राजनि० स्त्रियां ङीष् ।

वृत्तिस्थ त्रि० दृत्तौ तिष्ठति स्था-क । १वृत्तकर्मोपजीविनि

दृत्र पु० दृत-रक् । १अन्धकारे २रिपौ त्वष्टृपुत्रे ३दानवभेदे ४मेघे ५पर्वतभेदे मेदि० ६इन्द्रे विश्वः । ७अहे त्रि०कौ०

दृत्रहिन् पु० दृत० । इन्द्रे हेमच० । दृत्रमरिपादयोऽस्यत्र ।

दृत्रहन् पु० दृत्तं हतवान् हन-क्विप् । इन्द्रे अमरः ।

दृथा अव्य० वृथ-आत् किच्च । निरर्थके अमरः ।

दृथादान न० कर्म० । १निष्फलदाने स्मृतिप्रदर्शिते देवपित्रार्थमिश्रेषु कार्य्येषु २दानभेदे च ।

"देवपितृविहीनं यदीश्वरेभ्यः ददोषतः । दत्त्वातुकीर्त्तनाच्चैव वेदाभिव्रतत्यागिने । अन्यायोपार्जितं दानं व्यर्थं ब्रह्महरे तथा । गुरवेऽनृतवक्त्राय कृतघ्नाय शठाय च । दत्तघ्नाय च यद्दत्तं वृथा ब्रह्मविद्विषे । याजकाय च सर्वस्व दक्षिणायतये तथा । परिचारकाय कृत्याय सर्वत्र पिशुनाय च । दत्तेतानि तु राजेन्द्र ! दृथादानानि षोडश" वह्निपु० । "न्यायभागेन यद्दत्तं तत्सप्तविधमपि पुनर्नोपहर्त्तव्यं यत् इतरन्यायेन दत्तं तदृदत्तं षोडशप्रकारमपि ग्रहीतव्यमेव दत्तमोदनुं भवति । नारदेन च 'दत्तं सप्तविधं प्रोक्तमदत्तं षोडशात्मकम्' इति प्रतिपाद्य दत्तादत्तयोः स्वरूपं विहितं यथा

"पण्डमल्यं भवेत्सुद्धा स्त्रीहार्द्र प्रसूपकारतः। स्त्री-गुह्यकानुपकारार्थं दत्तं दानविदो विदुः। अदत्तन्तु भवक्रोधशोकवेगरुजान्वितैः। तथोत्कोचपरिहासव्यायाम क्लमयोगतः। बालमूढाक्षतन्यासार्त्तमत्तोन्मत्तापवर्जितम्। कर्त्ता ममेदं कर्मेति प्रतिज्ञाभेक्षया च यत्। अपात्रे पात्रमित्युक्तं कार्य्यं वा धर्मसंहिते। यद्दत्तं ह्रादविज्ञानाददत्तमिति तत् स्मृतम्" मिता० अदत्तशब्दे दृश्यम्।

हृद्यामांस न० हृद्यभूतं मांसम् मा०क०। देवाद्यनुद्देशेन कृतपशूनां मांसे।

हृद्द न० हृध-क्त। १मैथुनाभिलाषव्यङ्ग्ये अमरः। २हृद्दारके हृद्दे पु० राजनि०। ३हृद्दियुक्ते त्रि० ४गतयौवने हृद्दा-वस्थायुक्ते। बाल्यादिवयःकालभेदश्च भावप्र० उक्तो यथा "बाल्यादेरवधिमाह सुश्रुतः "वयस्तु त्रिविधं बाल्यं मध्यमं वार्द्धकं तथा। जनयोड्शवर्षन्तु नरो बाल्ये निगद्यते। त्रिविधः षोडशि दुग्धाशी दुग्धान्नाशी तथान्नभुक्। दुग्धाशी वर्षपर्य्यन्तं दुग्धान्नाशी शरद्द्वयम्। तदुत्तरं स्वादन्नाशी एवं बाल्यस्थिरा मतः। मध्ये षोड्शवर्षाणां नरो मध्यमः कथितो बुधैः। चतुर्थं मध्यमं प्राहुर्यो द्वात्रिंशतो मतः। चत्वारिंशत् समा यावत्तिष्ठेदीर्य्यादिपूरितः। ततः क्रमेण क्षीणः स्याद् यावद् भवति सम्मतिः"। वीर्य्यादीत्यादिशब्देन रसादिसप्तधात्विन्द्रियबलोत्साहा उच्यन्ते। क्षीणः सप्तधात्विन्द्रियबलोत्साहैर्हीनः "ततस्तु सप्ततेर्द्धं" क्षीणधातुरसादिकः। क्षीणमांसेन्द्रियबलः क्षीणरेता दिने दिने। बलीपलितखालित्ययुक्तः कर्मसु वाजमः। कासश्वासादिभिः क्लिष्टो हृद्दो भवति मानवः। बाल्ये विवर्द्धते श्लेष्मा पित्तं स्यान्मध्यमेऽधिकम्। वार्द्धक्ये वर्द्धते वायुर्विचार्य्यैतदुपक्रमेत्। उपक्रमेत् चिकित्सेत्। तन्त्रान्तरे तु "बलहृद्विष्ठविभेदा त्वग्दृष्टिः शुक्रविक्रमौ। बुद्धिः कर्मेन्द्रियं चेतो जीवितं दशतो नुदेत्"।

५पक्षिभेदे पु० मेदि०।

हृद्दाक्ष पु० कर्म०। द्रोणकाके हेमच०।

हृद्दगङ्गा स्त्री कर्म०। नदीभेदे "अस्ति नाटकजैत्रे तु सरोमानससन्निभम्। यत्र सार्द्धं मैथुनेच्छा जलक्रीड़ां सदा हरः। कुरुते नरशार्दूल! स्वर्णपङ्कजशोभिते। तस्य पश्चान्मध्यदेशेऽस्य सरित्त्रयम्। पश्चिमेतीर्थं प्रयाग्रेव दक्षिणं सागरं प्रति। तस्य पश्चिमभागे तु नदी दिग्करिकाह्वया। दिग्गजाः क्षेत्रसंजाताः तेन दिक्करिका स्मृता। मध्यभागात् स्रुता या तु शङ्करेणावतारिता। हृद्दगङ्गाह्वया सा तु गङ्गेव फलदायिनी। या निःसृता पूर्वभागात् तस्माद्धिरण्यरात् नदी। स्वर्णरेखेति विख्याता सा गङ्गासदृशी फले" काशिकाखं० ८२अ०।

हृद्दारक पु० हृद्दं दारयति दृ-णिच्-ण्वुल्। वीरतालवृक्षे अण्। वृद्दार तस्यार्थे राजवल्लभः। "रसावनो हृद्दारः शोथघातामवातजित्"।

वृद्दारु न० हृद्दं दारयति दृ-णिच्-उण्। हृद्दारकवृक्षे राजनि० "हृद्दारुहृदयं शोथं पित्तिकं कफवातनुत्। वल्यं कासमेदोघ्नं द्वितीयं खल्वशोकदम्" राजनि० [अमरः।

हृद्दनाभि त्रि० हृद्दा नाभिरस्य। (गोंड) हृद्दनाभियुक्ते

हृद्दप्रपितामह पु० हृद्दः प्रपितामहात् राज०। प्रपितामहस्य पितरि। [महस्य पितरि।

हृद्दप्रमातामह पु० हृद्दः प्रमातामहात् राज०। प्रमातामहस्य पितरि।

हृद्दबला स्त्री हृद्दं बलं यस्याः ५ब०। महाबलायां राजनि०। तस्या बलहृद्दिकरत्वात्तथात्वम्।

हृद्दविभीतक पु० हृद्दः विभीतक इव। आम्रातके शब्दर०।

हृद्दश्रवस् पु० हृद्देभ्यः श्रवोऽन्नं यस्य ब० यस्य वा श्रवो यशो यस्येति वा। इन्द्रे अमरः। [टीका०।

वृद्दसूत्रक न० कर्म० संज्ञायां कन्। इन्द्रवृक्षे (वुड़िरसना)

हृद्दा स्त्री हृध-क्त। १गतयौवनायां स्त्रियाम्। २वृद्धशब्दच०। ३महाश्रावणिकायां राजनि०।

स्त्रीणां वयःकालविभागो यथा

"षोड्शाद्वे भवेद्बाल्ये तरुणी त्रिंशता मता। पञ्चपञ्चाशतः प्रौढ़ा हृद्दा भवति तत्परम्" इति काशिदासः। "बालेति गीयते नारी यावद्वर्षाणि षोड्श। ततस्तु तरुणी श्रेया द्वात्रिंशद्वत्सरावधि। तदूर्द्धमधिरूढा स्यात् पञ्चाशद्वत्सरावधि। वृद्धा ततपरन्तु श्रेया सुरतोत्सववर्जिता" भावप्र०। तस्याः सम्भोगे दोषो यथा "बाला तु प्राणदा भोक्ता युवती प्राणहारिणी। प्रौढ़ा करोति वृद्धत्वं वृद्धा मरणमादिशेत्। निदाघशरदोर्बाला प्रौढ़ा वर्षावसन्तयोः। हेमन्ते शिशिरे श्रेष्ठा न वृद्धा क्वापि शस्यते। नार्याश्च तु षोड्शाद्वर्षात् सप्तम्याः परतो न च। आयुष्कामो नरः स्त्रीभिः संभोगं कर्तुमर्हति। पञ्चपञ्चाशतो नारी सप्तसप्ततिकः पुमान्। द्वावेतौ न प्रशस्येते प्रशस्येते विपर्य्ययात्" राजवल्लभः। "शुक्लं सार्द्धं स्त्रियो हृद्दा बाह्वार्द्धमदधं दधि। भ्रमाते

मैथुनं सिद्धा सद्यः प्राणहराणि षट् चाष्टकमतीसारः वृद्धि स्वा वध–क्तिन् । ।सङ्घातो २अभ्युदये मेदि० ३सम्पत्तौ ४समूहे च । वध–कर्त्तरि क्तिच् । ५ओषधिविशेषे ऋद्धिशब्दे १४४७ पृ० तच्छब्दादि द्रष्टव्यम् ।

(कोरन्द) ६रोगविशेषे तच्चिदानादि भावप्र० उक्तं यथा "तत्र वृद्धेर्निदानं संख्याश्चाह 'दोषाश्चमेदोमूत्रान्त्रेः संवृद्धिः सप्तधा मतः । मूत्रान्त्रजावयन्निजाडेवमेदस्तु केवलः । वृद्धिं करोति कोषस्थः फलकोषाभिवाहिनीम् । कफा वातगतिर्वायुर्धमनीः सञ्चरगामिनीः" । तत्र वातिकमाह "वातपूर्णवतिप्रख्यो रूक्षो वातादृतेरुक्" । ऋतेरुक् चेत्यदर्थे नञ् । तेन रूक्षादपि विप्रकृष्टात् कारणात् रुक् पीड़ा यत्र सः । अथ पैत्तिकमाह "पक्वोदुम्बरसङ्काशः पित्ताद्दाहोष्मपाकवान्" । दाहः अभ्यन्तरः ऊष्मा बहिस्सन्तापः । अथ श्लैष्मिकमाह "कफाक्लेदो गुरुःस्निग्धः कण्डूमान् कठिनोऽल्परुक्" । अथ रक्तजमाह "श्यावस्फोटावृतः पित्तवृद्धिलिङ्गैश्च रक्तजः" । श्यावस्फोटावृत इति वैत्तिकोक्तैः । मेदोजमाह "कफवन्मेदसो वृद्धिर्दुश्चिकित्सतमोपमः" । नीलवर्णुकः । मूत्रजमाह "क्षवथारथ्यशीलस्य मूत्रजः स तु मन्थरः । क्षोभिभिः पूर्णवस्तिवत् क्षोभं याति सरुङ् मुहुः । मूत्रसञ्चयनाधः कुर्यात् सञ्चयनं फलकोषयोः" । सञ्चयनं फलकोषयोरधः मूत्रसञ्चं मूत्रेण यथा कुर्यादित्यर्थः । अथान्त्रवृद्धिमाह "वातकोपिभिराहारैः शीततोयावगाहनैः । धारणैरध्वभाराध्वविषमाङ्गप्रवर्त्तनैः । क्षोभणैः क्षोभितोऽन्यैश्च क्षुद्रान्त्रावयवं यदा । पवनो विगुणीकृत्य स्वनिवेशादधो नयेत् । कुर्याद् बङ्क्षणस्थिस्थे पन्थानं श्वयथुं तदा" । धारणम् उपस्थितस्य वेगस्य । ईरणम् अनुपस्थितस्य वेगस्य प्रेरणम् । विषमाङ्गप्रवर्त्तनं वक्रत्वेनाङ्गसोटनम् । अन्यानि क्षोभणानि वल्गनहियङ्गवठारधनुराकर्षणादीनि तैः क्षोभितः सन्दुष्य सञ्चालितः पवनः यदा क्षुद्रान्त्रावयवं विगुणीकृत्य स्वनिवेशादधो नयेत् । तदा बङ्क्षणस्थिस्थः अन्त्रवृद्धिरोगः । तस्यावस्थामाह । "उपेक्षमाणस्य मरुद्वृद्धिमाध्मानरुक् क्षणतोव कुर्यात् । प्रपीड़ितोऽन्तः-स्वनवान् प्रयाति प्रध्मापयन्नेति पुनश्च सूक्ष्मम्" । तत्राध्मानसदृशं रूक्षं वृद्धयोर्लक्ष्ययोः क्षणो गाढं तदुक्तां कुर्यादित्यर्थः । भोजोऽप्याह "अन्त्रं विगुणमादाय वातो नयति बङ्क्षणम् । बङ्क्षणात् तद्गुलायुक्तं फलकोषं प्रपद्यते" इति । स सुश्रुतेन रोगः अन्तः सदरे प्रध्मापयन् श्वयथुनामानं निरुजं कुर्वन् एति आयाति । अथासाध्यमाह स चोदरं श्वादिव्याकाङ्क्षयामाह "यस्यान्त्रावयवाश्लेषो सञ्चयोर्वातसङ्क्षयात् । अन्त्रवृद्धिरसाध्योऽयं वातवृद्धिमाक्षिपेत्" । वातवृद्धिमाक्षिपेदिति योऽन्त्रवृद्धिरोगः सोऽसाध्यो वातवृद्धिमाक्षिपेत्" । अन्त्रवृद्धिशब्दे २०८ पृ० सुश्रुतोक्तं द्रव्यम् नीतिशब्दादि त्रिवर्गान्तगते ७वर्गचटकपदार्थे "त्रयः स्यानन्तु वृद्धिश्च त्रिवर्गो नीतिरेदिनाम्" अमरः । "वृद्धिर्विष्कम्भ पथोदुर्गं सेतुःकङ्करवन्धनम् । कच्चकरवदानं सैन्यानाञ्च विनायनम्" । एतेषामर्थानामन्यतमस्य त्रयं स्यान वृद्धिशब्दार्थः । एकस्मान्तरे (७८) वृद्धिस्वरूपभेदादिकं वोरभि० उक्तं यथा नारदः "वृद्धिश्चतुर्विधा प्रोक्ता पञ्चधान्यैः प्रकीर्त्तिता । षड्विधान्यैः समाख्याता तत्त्वतस्तां निबोधत" इति । षड्विधा मे इति क्वचित् पाठः तत्र मे मते । तान् प्रकारान् स एवाह "कायिका कालिका चैव चक्रवृद्धिश्चतोऽपरा । कारिता सप्तिधाख्या वृद्धिर्भोगगमाह्वया चैव इति" । एतेषां स्वरूपमाह "कायिका कर्मसंयुक्ता मासयाच्या तु कालिका । वृद्धेर्वृद्धिश्चक्रवृद्धिः कारिता ऋणिना कृता । प्रत्यहं दृश्यते या तु तिथावृद्धिस्तु सा स्मृता । दृष्टाभोगः फलं क्षेत्राद् भोगलाभः प्रकीर्त्तितः" इति । कायिका कर्मसंयुक्ता यत्र बन्धकीकृतस्य गवाश्वादेर्दोहनवाहनादिकं कर्म वृद्धित्वेन परिकल्पितं तत्र सा कायिकेत्यर्थः । तथा च व्यासः "दोहवाहकर्मयुता कायिका समुदाहृतेति" । मदनरत्ने तु भोग्याधितया स्थापितस्य यो दोहनवाहनादिकर्मरूपैर्भोगस्तत्कालिका या वृद्धिः सा कायिकेत्युक्तम् । मासयाच्या तु कालिका प्रतिमासं देया या वृद्धिः सा कालिकेत्यर्थः । "प्रतिमासं ऋणी या वृद्धिः सा कालिका मतेति" नारदवचनात् । वृद्धेर्वृद्धिश्चक्रवृद्धिः । वृद्धेरपि प्रतिमासं मूलभावेन पुनर्वृद्धिरित्यर्थः । "वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धिरुदाहृतेति" नारदवचनात् । कारिता ऋणिना कृता । ऋणिनाऽधमर्णेन स्वेच्छया कृता वृद्धिः कारितेत्यर्थः । "वृद्धिः सा कारिता नाम यत्किञ्चेन स्वयं कृतेति" नारदवचनात् । अधमर्णकारितैव वृद्धिर्देया नोत्तमर्णकारिता तथा च वृद्धस्मृतिः "ऋणिकेन तु या वृद्धिरधिका समुल्लिखिता । आपत्काचकृता नित्यं दातव्या सा तु का-

रिता। अन्यथा कारिता वृद्धिर्न दातव्या कथञ्चनेति"। उत्तमर्णप्रलोभनार्थम् आपत्काले मासोद्ग्रादधिका स्वयं कल्पिता कारिता वा या वृद्धिर्दीयते सा पुनरनेवंविधा धनिकेन कारिता दातव्येत्यर्थः। "प्रत्यहं वर्द्धते या तु शिखावृद्धिस्तु सा स्मृता"। प्रतिदिनवर्द्धमानशिखासादृश्याच्छिखावृद्धिरिति व्यपदिश्यत इत्यर्थः। किं पुनः शिखासादृश्यं वृद्धेरित्याकाङ्क्षायां वृद्धयन्तरेणाह "शिखेव वर्द्धते नित्यं शिरच्छेदाविवर्त्तते। मूले दत्ते तथैवेयं शिखावृद्धिस्तु सा स्मृतेति"। प्रत्यहं वर्द्धत इति च धर्मस्थप्रतिस्तुतदिनसंख्यया वृद्धिपञ्चकालोपलक्षणम्। तथा च कात्यायनः "प्रतिकालन्दादत्वेव शिखावृद्धिस्तु सा स्मृतेति"। "वर्द्धान्तोयः फलं चत्वारो भोगलाभः प्रकीर्त्तितः"। बन्धकीकृताद् वर्द्धान्तिवासादिजनितः चतुर्थः। चेलात् यज्ञादिफलस्य भोगलाभाख्यो वृद्धिप्रकार इत्यर्थः। वर्द्धचेलपदयं स्वावरात्मकभोग्यार्थोपलक्षणार्थम्। अतएव कात्यायनः "वार्धभोगस्तु भोगो यो वस्तुने परिकल्पितः। [प्रयोगे यत्र चैवं स्यादाधिभोगः स उच्यते" इति। यस्मिन् ऋणादानप्रयोगे स्थावराधित्वेन परिकल्पिता या वृद्धिस्तस्य सा वृद्धिराधिभोग इत्युच्यते इत्यर्थः। अपरार्कौ "वर्द्धात् क्षौमः पटः चेलादिति पाठः"। क्षौमो भाटक इति कल्पतरौ। पटः यज्ञादिफलम्। वृद्धेः परिमाणं दर्शयति मनुः "वसिष्ठविहितां वृद्धिं सृजेद्विंशविवर्द्धिनीम्। अशीतिभागं गृह्णीयात् मासाद्वार्धुषिकः शते" इति। विंशतिशते प्रयुक्ते मासस्य यावद्विंशतिपरिमितां वृद्धिं वार्धुषिको वृद्ध्यर्थं गृह्णीयादित्यर्थः। एतत्सवन्धकविषयम्। अतएव याज्ञवल्क्यः "अशीतिभागो वृद्धिः स्यान्मासिमासि सवन्धके। वर्णक्रमाच्छतं द्वित्रिचतुःपञ्चकमन्यथेति"। सवन्धके प्रयुक्तस्य द्रव्यस्याशीतितमो भागो वृद्धिः पञ्चयते प्रयुक्ते सप्ताहः पक्षः प्रतिमासं वर्द्धत इत्यर्थः। अन्यथा बन्धकरहिते वर्णक्रमात् ब्राह्मणादिवर्णक्रमेण द्वित्रिचतुःपञ्चकं शतमन्वर्थं भवति। द्वौ वा त्रयो वा चत्वारो वा इति द्वित्रिचतुःपञ्चा यस्मिन् शते वृद्धिर्दीयते इति द्वित्रिचतुःपञ्चकं शतम्। "तदस्मिन् वृद्ध्यावसाभगुल्कोपदा दीयते" या० कन्। तथा चायमर्थः। बन्धकरहिते पञ्चशतं प्रति प्रतिमासं ब्राह्मणात् पञ्चदश क्षत्रियात् पञ्चविंशं वैश्यात् पञ्चत्रिंशत् शूद्रात् पञ्चपञ्चकं पादशम्। यत्तु तत्रैवोक्तम्। "द्विकं शतं वा गृह्णीयात् सतामन्वर्थमनुस्मरन्निति" तदुपयस्थितविकल्पविषयम्। अतएव व्यासः "सवन्धे भाग आशीतः साष्टभागः सबन्धके। निराधाने द्विकशतं आरभ्याभ्युदाहृतः" इति। सवन्धे आधिरक्षिते। आशीतः अशीततमः। साष्टः अष्टितमः। सबन्धकः प्रतिभूः। निराधाने बन्धकरक्षिते। आधानपदयं प्रतिभुवोरप्युपलक्षणम्। कल्पतरौ साष्टभाग इति पठित्वा सबन्धके अशीततमो भागः सकोपाष्टसहितो मासवृद्धिरित्युक्तम् "द्विकत्रिकचतुष्कञ्च पञ्चकञ्च शतं क्रमम्। मासस्य वृद्धिं गृह्णीयाद् वर्णानामनुपूर्वशः" इति। द्विकं द्वौ वृद्धिर्दीयते यस्मिन्नृधने तत् तथा। एवं त्रिकादयोऽपि समासाः प्राग्वन्नायिकम्। विष्णुरपि "अथोत्तमर्णोऽधमर्णेऽदृश्यादृश्यमर्थं गृह्णीयात्। द्विकत्रिकचतुष्कं पञ्चकं शतं वर्णानुक्रमेण प्रतिमासमिति"। अधमर्णविशेषेऽप्याह याज्ञवल्क्यः "कान्तारगासु दशकं वासट्टा विंशकं शतमिति"। अथं गृहीत्वा कान्तारं सञ्चरन्तः कान्तारगा दुर्गस्थलगन्तारो वस्त्रादिक्रयकारिणः पथश्रमस्य दशकं प्रतिमासं दद्युरित्युत्तरवाक्यस्थशब्दात्। वसट्टा वसट्टगन्तारः प्रतिमासं विंशकं शतं दद्युरित्यर्थः। कारितायान्तु न नियम इत्याह स एव "दद्युर्वा कल्पितां वृद्धिं सर्वे सर्वासु जातिष्विति"। सर्वे ब्रह्मणादयोऽधमर्णाः सबन्धकेऽबन्धके वा सर्वासु जातिषूत्तमर्णभूतासु स्वयमङ्गीकृतां वृद्धिं दद्युरित्यर्थः। द्रव्यविशेषे वृद्धिविशेषमाह स एव "वस्त्रतिन्तु पशुस्त्रीणां रसस्नेहगुणा परा। वस्त्रधान्यहिरण्यानां चतुष्पद्द्विगुणा परेति"। पशुस्त्रीणां महिषीस्त्रीप्रभृतीनां वृद्ध्यर्थं प्रयुक्तानामन्तरीया वस्त्रतिरेव वृद्धिः। रसस्नेहतादेरष्टगुणा। वस्त्रधान्यचतुर्गुणा धान्यानामन्नगुणा। हिरण्यानां द्विगुणा परेति प्रत्येकं सम्बध्यते। परा परमा। अतःपरमधिका वृद्धिर्नाङ्गीकार्यः। न च गवादीनाम् ऋणत्वेन दानञ्च सम्भवतीति वाच्यम्। तत्तोपकाद्युपलक्षणत्वात्तद्वृद्धिनो दानसम्भवात्। पञ्चन्तु क्षीरवाहनसेवार्थिनः। वृद्धयन्तरेण "हिरण्ये द्विगुणा वृद्धिस्त्रिगुणा वस्त्रकृप्यके। धान्ये चतुर्गुणा प्रोक्ता मद्यमांसरसेषु च। एका पञ्चगुणा प्रोक्ता वीजेक्षौ षड्गुणा स्मृता। सवत्सासु तु धेनूषु द्विगुणा सस्यसम्भवे" मनुनि चैवोक्ता प्रयुक्ते हिरण्यादिके

दृति । कृष्णं त्रयुषीशकादिकम् । यदः चेलफलम् । तच्च गोवल्लीवर्दन्यायाद्वान्यव्यतिरिक्तं पुष्पमूलफलादिकम् । बाह्लीऽस्यादिः । त्रयो मेथीयावचमरीकेशादिः । अत्र चिरकालशब्देन प्रतिश्रुतायाः अशीतिभागायाः वृद्धेर्यस्मिन् समये द्वैगुण्यादिपापकत्वं समाप्नोति । ततोऽधिकः कालो ग्राह्यते । यत् तु "धान्ये मद्ये त्रये वाह्ये द्रव्यादि-मनुनोक्तं तत्प्रत्यर्पणसमये सकृद्ग्राह्यमर्थविषयम् । षाड्गुण्यप्रतिषेधपरमिति मदनरत्ने । यत् तु वसिष्ठवचनम् "द्विगुणं स्थिरधान्यं त्रिगुणं धान्यं धान्येनैव रसा व्याख्याताः । पुष्पमूलफलानि च तुलाधृतसद्गुणमिति" तत्त्रिगुणमेव धान्यादिकं दातव्यमिति यत्र देये स्थिति तद्विषयम् । दरिद्रार्थविषय वा एवमन्यत्रापि न्यूनाधिकपरमद्विगतिपादकानि वचनानि देयविशेषविषयतया दरिद्रादिविषयतया वा व्यवस्थापनीयानि । व्यासोऽपि "वदन्त्यष्टगुणात् काले मद्यक्षौद्ररसास्त्रयमिति" क्षौद्रक्षौद्रादिः । रसः क्षीरादिः । कात्यायनोऽपि "तैलानाञ्चैव सर्वेषां मद्यानां मधुसर्पिषाम् । वृद्धिरष्टगुणा ज्ञेया गुडस्य लवणस्य चेति" । विष्णुरपि "स्थिरधान्यस्य द्विगुणा वृद्धिस्त्रिगुणा वस्त्रस्य धान्यस्य चतुर्गुणा रसस्याष्टगुणा सन्ततिः स्त्रीपशूनामिति" । व्यासोऽपि "शाकपाषाणवीजेषु षड्गुणा परिकीर्त्तितेति" । वसिष्ठोऽपि "वज्रशुक्तिप्रवालानां हेम्नश्च रजतस्य च । द्विगुणा स्थिरते वृद्धिः कालाकालानुसारिणीति" । शुक्तिशब्देनात्र शुक्ताफलं गृह्यते वज्रसाहचर्यात् । अतएव कात्यायनः "मणिसुक्तिप्रवालानां सुवर्णरजतस्य च । स्थितो द्विगुणा वृद्धिः फलकेटाविकस्य चेति" । केटडीटाङ्गम् षड्रुत्वादि । आविक कम्बलादिकम् । वसिष्ठोऽपि "ताम्रायःकांस्यरीतीनां त्रिगुणः सीसकस्य च । त्रिगुणा तिष्ठतो वृद्धिः कालाच्चिरतरस्य तु इति । रीतिरारकूटम् । देशभेदेन परां वृद्धिं दर्शयति नारदः "ब्राह्मणानां सार्वभौमोऽयं विधिर्वृद्धिकरः कृतः । देशाचारास्थितिस्त्वन्या यत्रार्थमवतिष्ठते । द्विगुणं त्रिगुणञ्चैव तथान्यस्मिंश्चतुर्गुणम् । तथाऽष्टगुणमन्यस्मिन् तत् तु देशेऽवतिष्ठते" इति । यत्र वृद्धिविशेषो न श्रूयते तत्र द्विगुणैव याज्ञवल्क्याह विष्णुः "अनुक्तानां द्विगुणेति" अयञ्च द्वैगुण्यादिरूपो वृद्धयुपरमः सकृत्प्रयोगे सकृदाधरणे वेदितव्यः तथा च मनुः "कुसीदवृद्धिर्द्वैगुण्यं ज्ञात्वेति सकृदाहृतेति" । उपपदार्थं प्रयुक्तं द्रव्यं कुसीदं तस्य वृद्धिः कुसीदवृद्धिर्द्वैगुण्यं ज्ञेति नातिक्रामति । यदि सकृदाहृता सकृत् प्रयुक्ता पुरुषान्तरसंक्रमणादिना प्रयोगान्तरकरणेन तस्मिन्नेव वा पुरुषेरेकसेकाभ्यां प्रयोगान्तरकरणे द्वैगुण्यमतिक्रम्य पूर्ववद्वर्तत एवेत्यर्थः । द्वैगुण्यग्रहणं त्रैगुण्यादीनामप्युपलक्षणम् । सकृदाहृतेति पाठे यदि प्रतिमासं प्रतिवत्सरं वा न गृह्यते किन्तु सकृद् गृह्यते तदा द्वैगुण्यमतिक्रामतीत्यर्थः । गौतमोऽपि "चिरस्थाने द्वैगुण्यं प्रयोगस्येति" । प्रयोगस्येत्येकवचननिर्देशात् प्रयोगान्तरकरणे द्वैगुण्यातिक्रमः चिरस्थान इति निर्देशात् शनैः शनैर्वृद्धिपक्षे द्वैगुण्यातिक्रमो भवतीति सूचितम् । सकृच्च वृद्ध्युपरमस्य क्वचिद् द्रव्यविशेषेऽपवादमाह बृहस्पतिः "हस्यकाष्ठेष्टकास्तत्रकिण्वचर्मास्थिवर्मणाम् । क्षेतिपुष्पफलानाञ्च वृद्धिस्तु न निवर्त्तते" । किण्वं सुरादूव्योपादानकारणभूतो मद्यविशेषः चर्म शरादिनिवारकफलकः वर्म कवचम् । क्षेतिरायुधम् । पुष्पफलयोर्वृद्धेरनिवृत्तिः प्रतिदानवेलायामस्यासमर्थाधमर्णविषया देयविशेषविषया वा वेदितव्या । अन्यथा त्रिगुणवृद्धिप्रतिपादकव्यासवचनविरोधः स्यात् । विष्णुरपि "किण्वकार्पासस्नायुवर्मचर्मास्थिवेष्टकाङ्गारधान्यवेति" । कार्पासे तु षड्गुणवृद्धिविधायकव्यासवचनविरोधः पूर्ववत्परिहरणीयः । वसिष्ठोऽपि "दलचर्मास्थिवल्कानां वस्त्रमद्यानान्तथैव च । अस्यया वृद्धिरेतेषां पुष्पमूलफलस्य च" इति । अस्यया मूलप्रतिपादनाभावे शतगुणापि वर्द्धत एवेत्यर्थः । शिखावृद्ध्यादीनामनुपरममाह बृहस्पतिः "शिखावृद्धिश्च वायिकाश्च भोगलाभं तथैव च । धनी तावत् समाप्नोद्यावत् मूलन्न शोधितम् । न शोधितञ्च प्रतिदानकर्त्रभिनेत्यर्थः क्वचिदनङ्गीकृतापि वृद्धिर्भवतीत्याह विष्णुः "यो यत्कीत्वा ऋणं पूर्वं वा दास्यामीति सामकम् । न दद्याद्ग्राहकः पश्चात्तदङ्गाद् वृद्धिमाप्नुयात्" इति । स्व इति प्रतिश्रुतस्य प्रतिदानकालावधेरुपलक्षणम् । सममेव सामकम् अवृद्धिकमिति यावत् । योऽसुकस्मिन् दिने समर्पयिष्यामीति प्रतिश्राव्य ऋणं गृहीत्वा पश्चाद्भोगादिकम् कुर्यात् सोऽवधिदिनमारभ्य वृद्धिं दद्यादित्यर्थः । कालावध्यनङ्गीकारेण गृहीतस्य धनस्य षण्मासादूर्ध्वं वृद्धिर्भवतीत्याह नारदः "न वृद्धिः प्रीतिदानानां स्वादनाकारिता क्वचित् । अना-

कारितमप्यूहुं वत्सरादूर्ध्वमेवर्द्धते" इति । अनाकारिता अनङ्गीकृता । प्रीतिदत्तानां प्रतियाचनप्रतिदानदिनानिर्देशमन्यत्रानाभिति शेषः । अनाकारितेत्यादेरयमर्थः । वृद्धिमङ्गीकृत्य स्वीकृतमपि धनमासादूर्ध्वं प्रीतिदत्तं वृद्धिं प्राप्नोतीति । प्रतियाचितस्य प्रीतिदत्तस्याऽदाने वृद्धिविशेषमाह कात्यायनः "प्रीतिदत्तञ्च वर्द्धते यावच्च प्रतियाचितम् । याच्यमानमदत्तञ्चेद्वर्द्धते पञ्चकं शतम्" इति । पञ्चकं पञ्चाधिकम् प्रतियाचनदिनमारभ्य पञ्चशतस्य पञ्चपञ्चकं प्रतिमासं वर्द्धते इत्यर्थः । याचितकं स्वीकृत्य अप्रतिदत्त्वैव देशान्तरगमने विशेषमाह कात्यायनः "यो याचितकमादाय तमदत्त्वा दिशं व्रजेत् । ऊर्द्धं संवत्सरात्तस्य तद्धनं वृद्धिमाप्नुयात्" इति । एतच्चाप्रतियाचितविषयम् । प्रतियाचिते याचितकमदत्त्वा यदि देशान्तरङ्गच्छति तदा विशेषमाह स एव "ऋणोद्धारमदत्त्वा यो याचितञ्च दिशं व्रजेत् । ऊर्द्धं मासत्रयात्तस्य तद्धनं वृद्धिमाप्नुयात्" इति । ऋणोद्धारं याचितकं स्वीकृत्वा याचितोऽप्यदत्त्वेत्यन्वयः । देशान्तरगमनाभावे तु याचितकात्समारभ्य याचितकस्य वृद्धिविशेषमाह स एव "स्वदेशेऽपि स्थितो वस्तु न दद्यात् याचितः क्वचित् । तं ततो कारितां वृद्धिमनिच्छन्तञ्च दापयेत्" इति । ततः प्रतियाचनकालादारभ्येत्यर्थः । एतत्कस्मिंश्चिदवधिमपरिकल्प्य याच्ञाप्राप्ते ज्ञेयम् । अवधि स्वीकृत्य तदतिक्रमे त्वतिक्रमदिनमारभ्य तद्धनस्य वृद्धिर्ज्ञेया । "तदर्द्धाद्वृद्धिमाप्नुयादिति" व्यासस्मरणात् । स्वीकृतपञ्चो मूल्यमदत्त्वा देशान्तरगमने वृद्धिविशेषमाह स एव "पञ्चं स्वीकृत्य यो मूल्यमदत्त्वैव दिशं व्रजेत् । ऋतुत्रयस्योपरिष्टात्तद्धनं वृद्धिमाप्नुयात्" इति । एतच्चाप्रतियाचितविषयम् । प्रतियाचने त्वेतस्य निश्चितवृद्धिशेषस्य तदिनमारभ्य प्रतिमासं शते पञ्चकं वर्द्धत इत्यर्थाच्च स एव "निःशिष्टं वृद्धिशेषञ्च क्रयविक्रय एव च । याच्यमानमदत्तञ्चेद्वर्द्धते पञ्चकं शतम्" इति । नन्वृतावार्द्धौ परिमाणविशेषानुक्तेः किं परिमाणं ग्राह्यमिति चेत् । अशीतिभागो वृद्धिः स्मृतिचन्द्रिकादौ वसिष्ठादि याज्ञवल्क्यादुक्तपरिमाणं ग्राह्यमिति ब्रूमः । अतएव विष्णुः "वृद्धिं दद्युर्वत्सरातिक्रमे यथाभिहितामिति" । वत्सरातिक्रम इति यत्र यदतिक्रमे वृद्धिरुक्ता तत्रोपलक्षणम् । यथाभिहितां धर्मशास्त्र इति शेषः । धर्मशास्त्रे यथोक्तां तथाविधामित्यर्थः । नतु यथाभिहितामित्यस्यार्द्धमित्यर्धिनोरन्यतरेण सह्यस्येन वाभिहितां दद्यादित्यर्थः कस्मात्तु भवति अतिप्रसङ्गापत्तेः । "ऋतानुसारादधिका व्यतिरिक्ता न सिद्ध्यति । कुसीदपथमाश्रित्य पञ्चकं शतमर्हतीति मनूक्तेश्च । अस्यार्थः । शास्त्रविधिनियमितशास्त्रकृतवृद्ध्यनुसारी यो वृद्धिपक्षे लौकिकानां समाचारः तस्मादधिका वृद्धिरृतुमर्यादैरकृतवृद्धौ न सिद्ध्यति यतः सा व्यतिरिक्ता धर्मशास्त्रबाह्या । अतएव कुसीदपथमाश्रित्य धर्मपथमिति । पञ्चकं शतमर्हतीति प्रतियाचितविषयमिति स्मृतिचन्द्रिकायाम् । पूर्वोक्ताच्छास्त्रानुसाराद्यधिकाऽधमर्णेनाकृता वृद्धिर्न सिध्यति । यतः कुसीदपथमाश्रित्य । यदा तु व्यवहारादस्मादृत्तमर्णोऽधिकमधमर्णेनाकारितं लाभमिच्छति तदा ब्रूते पञ्चकं शतं प्रकीर्तेति न ततोऽधिकमधमर्णाकारितमित्यर्थमाह रत्नाकरः । अकृतवृद्धेरपवादमाह नारदः "पथ्यमूल्यं श्रुतिन्यासो दण्डो यश्च प्रकल्पितः । वृथादानाधिकपथा वर्द्धन्ते नाविवक्षिताः" इति । पथ्यस्य वस्त्रादेर्मूल्यम् । श्रुतिर्वेतनम् । न्यासो निक्षेपः । वृथादानं वेश्यादिभ्यः प्रतिश्रुतम् । आधिकपथो द्रष्टव्यः । अविवक्षिताः । अत्र पथ्यमूल्यस्य वृद्धेरभावोक्तिः प्रवासप्रतियाचनयोरभावे वेदितव्या अन्यथा पूर्वोक्तकात्यायनवचनेन विरोधः स्यात् । व्यासस्य च वृद्ध्यभाववचनं प्रतियाचनाभावे "न वृद्धिः स्त्रीधने स्वामे निःशिष्टे च यथास्थिते । सन्दिग्धे प्रातिभाव्ये च यदि न स्यात् स्वयं कृतम्" इति संवर्त्तवाक्ये यथास्थितमिति विशेषणोपादानाद् व्यक्त्यन्यथाकरणाभावे च ज्ञातव्यम् । तथा च निश्चितं वृद्धिशेषस्येत्यादि पूर्वोक्तकात्यायनवचनविरोधो न । कात्यायनोऽपि "वर्षमध्यासयद्भूते पञ्चमूले च सर्वदा । स्त्रीशुल्केषु न वृद्धिः स्यात् प्रातिभाव्यागतेषु च" इति । सर्वदेत्यनेन प्रतियाचनादेः परस्मादपि वृद्धिरकृता नास्तीत्युक्तम् । यद्यपि सर्वदेति सर्वशेषत्वात् पथ्यमूल्येऽपि प्रतियाचनादेः परस्मादकृतवृद्धुपरमः प्रतिभाति । तथापि पूर्वोक्तकात्यायनवचनविरोधात् न तच्छेषता सर्वदेत्यस्य । एवञ्च पूर्वोक्त एव परिहारः । एवं वर्षशेषोऽपि वृद्ध्यभावोक्तिः प्रतियाचनाभावे तथा च न तच्छेषतापि । एवञ्च न पूर्वोक्तकात्यायनवृद्धिप्रतिपादकवसिष्ठादिवचनविरोधः । अन्यत्रापि वृद्ध्यभावं स्मृत्यन्तरमाह याज्ञ "प्रातिभाव्यमुपनिधिमदत्त्वा

तद्द दित्सतः। न वर्धते प्रयत्नस्य दमः शुल्कं प्रतिश्रुतम् इति। भुक्तवस्त्वभिलषनेन स्थापितस्य सुप्राधेर्वृद्धा-ब्रह्मारादेरुपभोगे वृद्धिर्न भवतीत्युक्तम्। अतएव गौतमः "भुक्ताधिर्न वर्द्धते वस्त्रालङ्कारादिरिति" अष्टौतत्तु दित्सतः प्रतिदातुमिच्छोरधमर्णादुत्तमर्णो वृद्धिलोभादिवशान्न यदा गृह्णाति तदा तस्य क्षतापि वृद्धिस्तद्दिनादारभ्य न देयेत्यर्थः। तथा च याज्ञवल्क्यः "दीयमानं न गृह्णाति प्रयुक्तं यत् सकृन्नरम्। मध्यस्थस्थापितं तत्स्याद् वर्द्धते न ततःपरम्" इति। मध्यस्थस्थापितमिति विशेषणेनाधमर्णो यदि स्वनिकटे स्थापयति तदा भवत्येव वृद्धिरिति"। ६तत्सेवेयमस्यद्रव्ये पु०। १०धने च राजनि०।

वृद्धिका स्त्री वृद्धि+स्वार्थे क। वृद्धिनामकौषधे शब्दच०।

वृद्धिजीविका स्त्री वृद्धिस्वरूपा जीविका। ऋणदानादिषु प्रयुक्तधनेभ्यो लब्धपजीविकायाम्।

वृद्धिश्राद्ध वृद्ध्यै अभ्युदयाय श्राद्धम्। पुत्रादीनां संस्कारारूढे पार्वणविधिके नान्दीश्राद्धे नान्दीश्राद्धशब्दे दृश्यम्

वृद्धौच पु० कर्म० च्छ समा०। जरद्गवे अमरः।

वृद्ध्याजीव त्रि० वृद्धिम् ऋणमर्णतः प्रयुक्तद्रव्याधिकलाभमाजीवति या+जीव-अण्। वार्द्धुषिके अमरः।

वृध दीप्तौ च० उभ० अक० सेट्। वर्द्धयति ते अवीवृधत् त अववर्द्धत् त।

वृध वृद्धौ भ्वा० आत्म० लुडि खुटि लृङि च उभ० अक० सेट् वृता०। वर्द्धते अवृधत् अवर्द्धिष्ट वृतवत् वर्तस्यति वर्द्धिष्यते। वर्द्धित्वा वेट्।

वृधसान पुंस्त्री० वृध-आन अनुक् च। मनुष्ये त्रि०कौ० स्त्रियां ङीष्। [वर्षादि०।

वृधसानु पु० वृध-आनु अनुक् च। १पुरुषे २पक्षे ३क्रतौ च

वृन्त न० वृ-क्त त्रि०सम् च। (वाँटा)फलपत्रादिबन्धने अमरः

वृन्ताक पुंस्त्री० वृन्तमकति अक-अण्। वार्त्ताकौ शब्दच०। स्त्री राजनि० स्त्रीत्वे गौरा० ङीष्।

वृन्तिता स्त्री वृन्तं जातमस्याः तारं० इतच्। कटुकायां शब्दच०

वृन्द न० वृण्वते वृण्वते वा-वृध-वृत वा दन् नि०। १समूहे अमरः। २दशार्बुदसंख्यायां ज्योति० ३केदारकन्यायां ४तुलस्यां स्त्री शब्दच०। ५राधिकायां स्त्री वृन्दावनम्।

वृन्दार त्रि० वृन्दमर्हति वृन्द-अण्। मनोज्ञे शब्दच०।

वृन्दारक पु० वृन्देन कायति कै-क। १देवे अमरः। स्वार्थे क। २सुरे ३मनोज्ञे च त्रि० ४यूथपतौ पु०व्याडिः।

वृन्दावन स्त्री वृन्दावाः तपस्यार्थं तत्क्रीड़ार्थं वा वनम् या० त०। मथुरासन्निकृष्टे वैष्णवे १तीर्थभेदे गोलोकस्थे धामभेदे च "कमलांशा तस्य (केदारस्य) कन्या नाम्ना वृन्दा तपस्विनीत्युपक्रमे "वृन्दा यत्र तपस्तेपे तत्तु वृन्दावनं स्मृतम्। वृन्दया वृता क्रीड़ा तेन वा सुनिपुङ्गव!। राधाशोड़शनाम्नां च वृन्दा नाम श्रुतौ श्रुतम्। तस्याः क्रीडा वनं रम्यं तेन वृन्दावनं स्मृतम्" ब्रह्मवै० जन्म० १७अ०। "नित्यं वृन्दावनं धाम ब्रह्माण्डोपरि संस्थितम्। पूर्णब्रह्मसुखैश्वर्यं नित्यमानन्दमव्ययम्। वैकुण्ठादि तदंशांशं स्वयं वृन्दावनं भुवि। गोलोकैश्वर्यञ्च यत्किञ्चित् गोकुले तत् प्रकीर्त्तितम्। वैकुण्ठादिवैभवं यत् द्वारकायां प्रकाशवेत्। यद्ब्रह्म परमैश्वर्यं नित्यं वृन्दावनाश्रयम्। तस्मात् त्रैलोक्यमध्ये तु पृथ्वी धन्येति विश्रुता। यत् स्यान्माथुरकं धाम विष्णोरत्यन्त वल्लभम्। तस्यानन्तधिकं नाम धेयं माथुरमण्डलम्। निगूढं परमं स्थानं पूर्णब्रह्मनरसंस्थितम्। षड्दलपद्मसाकारं माथुरमण्डलम्। विष्णुचक्रं परिभ्रमद्धाम वैष्णवमद्भुतम्। कर्णिकापत्रविस्तारं षड्दलक्रममीरितम्। प्रधानं द्वादशारस्थं माहात्म्यं कथितं क्रमात्। भद्रश्रीरलीढभाण्डीरभद्रपुष्पाख्यखदीरकाः७। बल्वलश्चेति षट्कोणे काम्ये १०मधु११वृन्दावने१२तथा। द्वादशैतावने संख्याः कालिन्द्याः सप्त पश्चिमे। पूर्वे पद्मवनं प्रोक्तं तत्रास्ति गुह्यसत्तमम्। भद्रावनं गोकुलाख्यं रम्यं मधुवनं तथा। पूर्वे तु पद्म भद्राद्यास्तालाद्याः सप्त पश्चिमे। अस्यशोपवनं प्रोक्तं कृष्णक्रीड़ारसस्थलम्। कदम्बखण्डिकं नन्दवनं नन्दीश्वरं तथा। नन्दनानन्दखण्डञ्च पाताशाशोकखेतकम्। सुगन्धिमादनं कैलासकृतं भोजनस्थलम्। सर्वप्रसाधनं वल्गुस्वरं श्रेयश्रायनम्। ग्रामपूर्व दधिग्रामं चक्रमानुपुरं तथा। कुण्डितं विपदञ्चैव बालक्रीड़च घूसरम्। केसङ्गुमं खरोवीरसुतसुकञ्जापि नन्दनम्। इत्येव वने संख्याख्यिं-शद्धोपवने कृता। पूर्वोक्तं द्वादशारस्थं प्रधानं वनसत्तमम्। तत्रोत्तरे चतुर्थञ्च वनञ्च सप्तदाहृतम्। नाना विधरसक्रीडानानाचीत्रमयस्थलम्। दलविस्तृत विस्तारस्तस्यक्रममीरितम्। षड्दलपद्मकमलं गोकुलाख्यं महत् पदम्। तत्रोपरि सुवर्णपीठे मणिमण्डप मण्डितम्। तत्र तत्र क्रमाद्दिक्षु विदिक्षु दलमीरितम्। तद्दलं दक्षिणे प्रोक्तं परं गुह्योत्तमोत्तमम्। तस्मिन्

दले महापीठं निगमागमदुर्गमम्। योगीन्द्रैरपि दुष्प्रापं सर्वात्मा यत्र गोकुले। द्वितीयं दलमाम्नेयं तद्वृक्ष द्विधा तथा। निकुञ्जकुटीवीरकुटीरौ तद्दले स्थितौ। पूर्वदलं तृतीयं यत् प्रधानं स्थानमुच्यते। गङ्गादिसर्वतीर्थानां सर्वाकृतगुणं भवेत्। चतुर्थदलमैशान्यां सिद्धपीठेऽस्थितप्रदम्। कामयन्त्रतना गोपी तत्र कृष्णप्राप्तिं लभेत्। वस्त्रालङ्कारकरणं तद्दले सप्तदाहृतम्। उत्तरे पञ्चमं प्रोक्तं दलं सर्वदलोत्तमम्। द्वादशादित्यमत्रैव दलञ्च कर्णिकासमम्। वायव्यन्तु दलं षष्ठं तत्र कालीह्रदः स्मृतः। दलोत्तमोत्तमत्वैव प्रधानस्थानमुच्यते। सर्वोत्तमदलं श्रेष्ठं पश्चिमे सप्तमं दलम्। वस्त्रपत्रीमयानाञ्च तदीप्सितवरप्रदम्। बकासुरस्य निर्वाणं चक्रे त्रिदशदर्शितम्। ब्रह्ममोहनमत्रैव दलं ब्रह्महृदावहम्। नैर्ऋत्यान्तु दलं प्रोक्तमष्टमं व्योमघातनम्। शङ्खचूड़वधस्तत्र नानाकेलिरसस्थलम्। नवमन्दलं प्रोक्तं वृन्दारण्यान्तरस्थितम्। श्रीमद्वृन्दावनं धन्यं वसुनायाः प्रदक्षिणम्। शिवस्त्रिलुम्पधाता हरो गोपीश्वराभिधः। तद्दाक्षे षोड़शदलं त्रिया पूर्वं तदीरितम्। सर्वांश दिशु यत् प्रोक्तं प्रादक्षिण्याद् यथाक्रमम्। महत् पदं महद्धाम प्रधानं षोड़शं दलम्। प्रथमैकदलं श्रेष्ठं माहात्म्यं कर्णिकासमम्। तस्मिन् मधुवनं प्राक्तं तत्र प्रादुरभूत् स्वयम्। चतुर्भुजो महाविष्णुः सर्वकारणकारणम्। तत्राधिष्ठिततद्दैवं सनिश्रेष्ठ! सनातनम्। दलं द्वितीयमाख्यातं किञ्जल्कोत्तारसस्थलम्। खदिरारण्यमत्रैव दलञ्च सप्तदाहृतम्। सर्वश्रेष्ठदलं प्रोक्तं माहात्म्यं कर्णिकासमम्। तत्र गोवर्द्धने रम्ये नित्यानन्दरसाश्रये। कर्णिकायां महालीला तल्लीलारससागरे। यत्र कृष्णो नित्यवृन्दाकाननस्थ पतिर्भवेत्। कृष्णो गोविन्दतां प्राप्तः किमन्यैर्बहुभाषितैः। दलं तृतीयमाख्यातं सर्वश्रेष्ठोत्तमोत्तमम्। चतुर्थदलमाख्यातं महाद्भुतरसस्थलम्। फरिर्वैश्च पतिः साक्षाच्चित्रं गोवर्द्धनं स्वयम्। कदम्बखण्डो तत्रैव पूर्णानन्दरसाश्रयः। स्निग्धं हृद्यं प्रियं रम्यं दलञ्च सप्तदाहृतम्। नन्दीश्वरदलं रम्यं तत्र नन्दालयः स्मृतः। कर्णिकादलमाहात्म्यं पञ्चमं दलमुच्यते। अधिष्ठाता तत्र गोपालः धेनुपालस्ततः परम्। दलं षष्ठं यदाख्यातं तत्र नन्दवनं स्मृतम्। सप्तमं बकुलारण्यं दलं रम्यं प्रकीर्त्तितम्। दलाष्टमं तालवनं तत्र धेनुवधः स्मृतः। नवमं कुसुदारण्यं दलं रम्यं प्रकीर्त्तितम्। काम्यारण्यं दलं हृद्यं दशमं सर्वकारणम्। ब्रह्मभाण्डं तत्र विष्णुवृन्दं प्रदर्शितम्। कृष्णक्रीड़ारसस्थानं प्रधानं दलमुच्यते। दलमेकादशं प्रोक्तं भद्रासुपड़कारणम्। निर्वाणं सेतुबन्धस्य नानारसमयस्थलम्। भाण्डीरं द्वादशदलं वनं रम्यं मनोहरम्। कृष्णक्रीड़ारसस्तत्र श्रीदामादिभिरावृतः। त्रयोदशदलं श्रेष्ठं तत्र भद्रवनं स्मृतम्। चतुर्दशदलं प्रोक्तं सर्वसिद्धिप्रदं स्थलम्। श्रीवनं तत्र रुचिरं सर्वैश्वर्यस्य कारणम्। कृष्णलीलामयदलं श्रीकीर्त्तिकान्तिवर्द्धनम्। पञ्चदशं दलं श्रेष्ठं तत्र लोहवनं स्मृतम्। कथित षोड़शदलं माहात्म्यं कर्णिकासमम्। महावनं तत्र गीतं तत्रास्ति गुह्यमुत्तमम्। बालक्रीड़ारसस्तत्र वत्सपालैः समावृतः। पूतनादिवधस्तत्र यमलार्জ্জুनभञ्जनम्। अधिष्ठाता तत्र बालगोपालः पद्मनाभादिकः। नाम्ना दामोदरः प्रोक्तः प्रेमानन्दरसार्णवः। दलं प्रसिद्धमाख्यातं सर्वश्रेष्ठदलोत्तमम्। कृष्णक्रीड़ा च किञ्जल्के विस्तारदलमुच्यते। सिद्धिप्रधानं किञ्जल्कं दलञ्च सप्तदाहृतम् पद्मपु० पा० ख०।

वृन्दिष्ठ त्रि० अतिशयेन वृन्दारको बहुः दृश्नृ वृन्दादेशः। अतिशयबहुत्वे "वृन्दिष्ठमाशीर्त् वसुधाधिपानाम्" इति भट्टिः। स्त्रियां ङीष्। वृन्दीयानप्यत्र त्रि० स्त्रियां ङीष्।

वृञ् वृतौ दिवा० पर० सक० सेट्। वृण्यति अवृणत् अवर्णीत् प्रभृतिरयमिलेके तेन अवृणदित्येव।

वृञ् पु० वृञ्-क। १वासकवृक्षे भरतः। २वन्दारे पुंस्त्री० शब्दच० स्त्रियां ङीष्। ३ओषधिभेदे स्त्री रत्नादि०।

वृश्चिक पु० व्रश्च-किकन्। (बिछा) १कीटभेदे राजनि० कीटशब्दे दृश्यम्। २शुककीटे (शुवापोका) अमरः। मेषादितः ८मे राशौ ज्यो० ९ओषधिभेदे मेदि०। ५मदनवृक्षे ६कर्कटे ७गोमयकीटे च भरतः। ८नाक्षत्रिके संज्ञिप्रसारः।

वृश्चिकराशिश्च २१६०० कलात्मकस्य राशिचक्रस्य १२६० कलोपरि १८०० कलात्मकः विशाखाग्नेयपादानुराधाज्येष्ठानक्षत्रात्मकः स च गौर्धौदयः श्वेतवर्णः जलराशिः उत्तरदिक्पतिः कफप्रकृतिः जलमयः बहुपुत्रः बहुस्त्रीयुक्तः चित्रवर्णः विप्रवर्णः सौम्यः बहुनाकृपः समराशिः स्थिरः पुष्करांशुः वरीयुवजातिः पार्थ्यः दृश्यज्ञातके दृश्यम्।

वृश्चिकप्रिया स्त्री वृश्चिकस्य शुक्रकीटस्य प्रिया। पूतिकायाम् शब्दच०।

वृश्चिकवर्णी स्त्री वृश्चिकस्य वर्ण इव पर्णं यस्याः। आखुकर्ण्याम् राजनि०। [भेदे राजनि०।

वृश्चिका स्त्री वृश्चिकः तदिदमस्त्यस्या अच्। (बिछाती) चुपवृश्चिकाली स्त्री वृश्चिक इवालति पर्य्याप्नोति अर्शसे वेदनायै अच् गौरा० ङीष्। (बिछाती) चुपभेदे रत्नमा०।

वृश्चिपत्री स्त्री वृश्चिक इव पर्णं विषाक्तमस्य पृषो० कलोपः ङीप्। वृश्चिकाख्यायाम् रत्नमा०।

वृषीर पु० वृष-कीरच्। श्वेतपुनर्नवायाम् रत्नमा०।

वृष सेचने सक० भ्वा० पर० प्रजननसामर्थ्ये ऐश्वर्ये चक० सेट्। वर्षति अवर्षीत्। उदित् क्त्वा वेट्।

वृष प्रजननसामर्थ्ये ऐश्वर्ये चुरा० आत्म० सक० सेट्। वर्षयते अवीवृषत-अववर्षत।

वृष पु० वृष-क। १वृषभे पुङ्गवे अमरः २मेषादितो द्वितीये राशौ ज्यो०त०। ३पुरुषभेदे ४एकादशमनुकालीने ५इन्द्रे ६धर्मे गरुडपु० ८अ०। ७अष्टक्रिमाख्ये ८मूषिके ९शुक्रयुक्ते १०वास्तुस्थानभेदे ११वासकवृक्षे मेदि०। १२शतौ जटा०। १३कामे १४बलयुक्ते त्रि०विष्णुः १५अष्टमनामौषधौ राजनि०। १६मयूरपिच्छे १७श्रीकृष्णे च त्रिका०। वृषराशिश्च २१६०० कलात्मकस्य राशिचक्रस्य १८००कलोपरि १८०० कलात्मकः। कृत्तिकाप्रथमत्रिपादरोहिणीसृगशिरार्द्धात्मकः स च सौम्यः कफेन समः स्थिरः पुंश्चरश्चतुष्पाद् निशाबलः स्त्रीसंज्ञः दक्षिणदिगीशः रात्रिसंज्ञः पृथोदयः शीतस्वभावः वातप्रकृतिः सुन्दरमुखश्यामो श्वेतवर्णः वैश्यजातिः मन्दशब्दकरः मध्यमस्त्रीसङ्गः मध्यमप्रजश्च इत्यादि। मूलं दशग्रम। पुरुषविशेषलक्षणञ्च "बहुगुणबलुबन्धुः शोभनाभो नताङ्गः सकलरुचिरदेहः सत्यवादी वृषो नां रतिम० चक्रम। १८अरिष्टाक्षरे च हि वृषाकारेण छन्दोवर्णे शोभनेन प्रथमः कर्णेन कृतः। ततश्च हरिव० ७८अ०। वृषस्य शुभाशुभलक्षणं शोभनाशनटे २७।८ पुत्रादौ दर्शितम्। वृषादि०आद्युदात्तः।

वृषकर्णी स्त्री वृष इव वृषदर्शनः कर्णोऽस्या ङीप्। (वृषदर्शन गुनच) ख्यातायां लतायाम् रत्नमा०।

वृषगन्धा स्त्री वृषस्य गन्धो लेपो यत्र। वस्तान्यां राजनि०।

वृषण पु०वृष-क्यु। १अण्डकोशे अमरः। २शोभान्विते त्रि०। "स्यूतचित्तो दरिद्रः स्यात् दुःखं वृषणशोभवेत्। विष्णे स्त्रीजघनो वै नटः स्यात् वृषणे समे। प्रजनवृषणोत्थायुर्निर्द्रव्यो मक्षिभिर्भवेत्" गरुडपु० ६१अ०।

वृषणश्व पु० कर्म० शक०। सामर्थ्ययुक्ते इन्द्राग्नौ त्रिका०।

वृषणवत् त्रि० वृषन्+मतुप् मस्य वः न नलोपः वत्वम्। वर्षयुते स्त्रियां ङीप्। [प्रकरणे रथाटौ जटा०।

वृषणवसु त्रि० वृषा वसु यस्य न नलोपः वत्वम्। इन्द्रस्त्रो-

वृषदंशक पुंस्त्री० वृषान् मूषिकान् दशति दंश-ण्वुल्। बिडाले अमरः स्त्रियां ङीष्।

वृषध्वज पु०वृषो वृषभो मूषको ध्वजो यस्य। १शिवे अमरः वृषदेवतत्वादस्यत्व। २हरभेदे ३पलक्कर्मयुते च विश्वः। [गौरा० ङीष्। नागरमुस्तायाम्।

वृषध्वाङ्क्षी स्त्री वृषो बलवान् ध्वाङ्क्षः काको यस्याः ५त०।

वृषन् पु० वृष-कनिन्। १इन्द्रे २कर्णे ३दृढे ४वेदनाख्याने मेदि०। ५वृषे हेमच०।

वृषनाशन पु० वृषान् मूषिकान् नाशयति नश-णिच् ल्यु। १बिडाले शब्दमा०। २अरिष्टरूपवृषनाशके श्रीकृष्णे हरिव० ७८अ०।

वृषपर्णी स्त्री वृषस्य मूषिकस्य कर्णइव पर्णमस्याः। (छन्दरकाखी) १आखुकर्ण्याम् रत्नमा०। २छदर्णनीवृक्षे राजनि०।

वृषपर्वन् पु० वृषे पर्व ग्रन्थो यस्य। १शिवे २दैत्यभेदे च। वृषं बलकरं पर्व यस्य। ३भृङ्गारवृक्षे ४ऊषरे च विश्वः।

वृषभ पु० वृष-अभच् किच्च। १वृषे २श्रेष्ठे ३वैद्यभैषजितभेदे मेदि०। ४जिनभेदे हेमच०। ५कर्णच्छिद्रे ६वृषभनामौषधौ च उणादि०। [दयोऽयत्र।

वृषभगति पु० वृषभेण गतिरस्य। शिवे शारा० वृषभयानवृषभध्वज पु० वृषभो ध्वजोऽस्य। शिवे वृषभदेवतत्वादस्यत्व

वृषभाक्षी स्त्री वृषभस्य अक्षीव पुष्पमस्याः ङीष् समा०ङीष्। इन्द्राक्ष्याम् राजनि०।

वृषभानु(न) पु०राधिकायाः पितरि। ब्रह्मवै०ब्र० १७अ०।

वृषभानु(न)सुता स्त्री वृषभानु+ङीप्। राधिकायाम्। [त्रिका०।

वृषभासा स्त्री वृषा इन्द्रेण भासते भास-अच्। अमरावत्याम्

वृषल पु० वृष-कलच्। १शूद्रे २दुष्टजने ३खोटके ४चन्द्रगुप्तनृपे च मेदि०। ५कुमारभिक्षे जटा०।

वृषली स्त्री "पितर्येवं च नारी रजः पश्यत्यसंस्कृता। भ्रूणघ्नी पितृहत्यायाः सा कन्या वृषली स्मृता" इत्युक्तायां पितृहत्यायां दुष्टजन्मायामनूढायां १कन्यायाम्। वृषल+भार्य्यायां जातौ वा ङीप्। २वृषलजातिस्त्रियां

इतङ्गावाच्च । "ब्रह्महा वृषलीपतिः" इति "वृषलो-फेनपीतस्य" इति च मनुः ।

वृषलोचन पु० वृषलस्येव लोचनं यस्य । १मूषिके । ह्रस्व० । २वृषनेत्रे न० । ह्रस्व० । ३वृषवल्लनेत्रे त्रि० ।

वृषवाहन पु० वृषो वाहनमस्य । शिवे वृषभवाहनादयोऽस्य ।

वृषशत्रु पु० ह्रस्व० । चीत्रपक्षे त्रिका० वृषान्तकादयोऽस्य ।

वृषस्थली स्त्री वृषेण जम्भनमिच्छति वृष+जभ्भावे क्यच् ह्रस्व च शत्-ङीप् । कासक्षाम् अमरः "वृष्यं वा वृष-स्थली" भट्टिः । [ष्ठ्राम् अमरः । २वृषिकच्छ्रां हेमच० ।

वृषा स्त्री वृषः मूषिकस्तदाकारः पर्णेऽस्याः अच् । १मूषिकप-

वृषाकपायी स्त्री वृषाकपेः पत्नी ङीष् हेङ् च । १लक्ष्म्रां २गौर्याम् अमरः । ३खाड्यां ४भव्यां ५लोकमात्रां ६य-तावत्यां च मेदि० ।

वृषाकपि पु० वृषं धर्मं न कम्पयति न+कपि-इन् नञोपः । १महादेवे २विष्णौ ३अग्नौ मेदि० ४इन्द्रे वीरस्वामी ।

वृषाकर पु० वृषस्य वामर्थ्यस्याकरः । माघे राजवि० ।

वृषाङ्क पु० वृषः अङ्कोऽस्य । १शिवे २महातेजे ३धर्मे च ४खाधौ वृषाङ्कवति च मेदि० ।

वृषाहार पुंस्त्री०वृषो मूषिक आहारो यस्य । विड़ाले शारा०

वृ(वृ)षि(षी) स्त्री वर्ष्यादित्वे ऋवर्णोऽन्तां वीदन्ति वद-वट् ऋवः वृ आदेशः ङीष् वृषो० अनः स्यादित्वे वृष-कि वा ङीष् । ऋतिनां कुमुदवाहनभेदे अमरः ।

वृषोत्सर्ग पु० वृष+सृज-घञ् तृत० । व्रतादावृद्देशेन तत्-प्रत्यादिभिः क्रियमाणे विधानेन वृषस्य त्यागे तद्विधिर्यथा शु०त० "कार्त्तिकेऽसिते" इ० "एकादशाहे प्रेतस्य यस्य चोत्सृज्यते वृषः । प्रेतलोकं परित्यज्य स्वर्गलोकं स गच्छति । आद्याब्दे त्रिपक्षे वा षष्ठे माघि च वत्सरे । वृषोत्सर्गश्च कर्त्तव्यो यावद्व स्यात् वृषिकृता । वृषिकृतेश्वरत्वादृद्धं काम्योऽयः प्राह्मचोदितः" । यत्र प्रेतस्येति सामान्यश्रुतेः पित्रभिप्रायेऽपि वृषोत्सर्गः प्रतीयते । त्रिपक्षोऽत्र चान्द्रः आद्ये तथादर्शनात् आद्यप्रदीपे जातू० "वृद्धौ त्रिपक्षात् यत् श्राद्धं मृताऽन्येव तद्भवेत्" । अत्र पूर्वमृततिथिमादाय त्रिपक्षगणना स्त्रीणां मृततिथौ विधानात् त्रिपक्षश्राद्धमपि मृताहे कार्य्यम् । अत्र वत्सर इत्युपादानात् विष्णुधर्म्मोत्तरीये मृताह इति यत् पूर्वसंवत्सरमृततिथिपरम् । तदुक्तं वृषोत्सर्गमधिकृत्य विष्णुः "विष्णुर्दैवते चैव मृताहे श्राद्धमेव च । मृताहो यस्य यस्मिन् वा तस्मिन्नहनि कारयेत्" । यच्च श्राद्धस्य पित्रादेर्यस्मिन्नहनि मृताहः तस्मिन्नो कर्त्तव्यमित्यर्थः । (तस्मिंश्च प्रथमादिकला ह्रासवृद्ध्यन्यतरक्रियया सजातीयतिथिभेदेन त्रिपक्षश्राद्धे पक्षान्तरत्वेऽपि न क्षतिः) । छन्दोगपरि० "वृषोत्सर्गविधिं व्याख्यास्यामः "कार्त्तिक्यां पौर्णमास्यां रेवत्यामश्वयुज्यां दशाहे गते संवत्सरेऽतीते वा" । अत्र मृततिथिमादाय वत्सरगणना दशाहवदविरोधः । एकाद्याह इति आद्याद्य इति च अमौचान्निहतौदयिकपरम् । अमौचान्ते द्वितीयेऽह्नीत्यनुपक्रमे "वृषोत्सर्गश्च कर्त्तव्यो देवा च ऋषिका शुभा" मत्स्यपु०एकवाक्यत्वात् । प्रेतवृषोत्सर्गे वृद्धिश्राद्धं न कार्य्यम् "नार्वाक् संवत्सरात् वृद्धिर्वृषोत्सर्गे विधीयते । वृषिकृतेश्वरत्वादूर्द्धं वृद्धिश्राद्धं विधीयते" स्मृत्योर्वचनात् । वृषस्वरूपमाह कर्म्मप्र०काशा० "सवत्सो लोहवत्सायाः पयस्विन्याः सुतो वृषी । एकवर्षो द्विवर्षो वा यो वा स्यादधिकायुतः । यूथादुत्तरतो यस्तु समो वा नीच एव वा । सप्तावरान् सप्त परानुद्धरेदुद्धरः" । अधिकायुतः अधिकातिथिषु ज्ञातः "वृष एव स मोक्षव्यो न वध्यार्थी स्मृते वचन" मत्स्यपु० । बल्लवरो-विशेषमाह काशा० "अयुतो लोहिता पत्नी यावज्जीवं वृषोत्सर्गे । पृष्ठतश्च भवेत् शुक्ला वृषस्य च लोहिते । चतस्रो वत्सिका भद्रा ह्रे वा वत्सयुतोऽपि वा । यतुर्थं सर्वाङ्गसंपूर्णं कन्या सा वत्सिका भवेत्" देवीपु०व० । अत्र वत्सवत इत्युक्त्या एकयापि वत्सतया वृषोत्सर्गः सिध्यति । "वृद्धित्वोत्सृज्यते पूर्वं गात्रालङ्कृत्य सर्वतः । तप्तेन वासतप्तं वास्ये मुद्रं समाचिह्नेत् । धातुना हेमतारेण आवसेनावधारयेत्" देवीपु० । प्रेतोद्देश्यकवृषोत्सर्गस्तु मलमासादावपि कर्त्तव्यः "अमौचान्तेऽपि कर्त्तव्यं वृषो-त्सर्गादिकं बुधैः । अधिमासादिदोषस्तु न श्राद्धस्य कदाचन" शु०त० धृतवाक्यात् । कालसाधनीये कालादर्शे च मलमासे कर्त्तव्यतानिषेधपक्षस्य प्रबलत्वं यथा "श्राद्धस्य नैमित्तिकस्य कास्यवृषोत्सर्गस्य च निष्क्रियः" । अत्र काम्येति विशेषणात् नित्यस्य न निषेधः "अमौचान्नात् द्वितीयेऽह्नि यस्य नोत्सृज्यते वृषः । न तस्य निष्कृतिर्दृष्टा दृष्टैः श्राद्धशतैरपि" इत्युक्तेश्च नित्यत्वम् यत्स्नपेक्षमन्दे दृश्यम् ।

वृष्टि स्त्री वृष-क्तिन् । १वर्षणे अमरः । वर्षति क्तिन् । मेघादिभिः २क्षिप्यमाणे च । तत्कारकं यथा "ब्रुवन्तु परमार्थं च किमिन्द्रादृष्टदृष्टिरेव च । कृष्णाहि-

जायते तोयं तोयात् शस्यानि प्राणिनः। तेभ्योऽन्नानि फलान्येव तेभ्यो जीवन्ति जीविनः। सूर्यपक्षस्तु गोरत्न काले तस्मात् सस्यसम्भवः। सूर्यो मेघादयः सर्वे विधात्रा ते नियोजिताः। यत्रावर्षे यो जलधरो गजश्च सागरोभवत्। शस्याधिपो नृपो मन्त्री विधात्रा ते निरूपिताः। जलाढ्कानां सस्यानां तत्स्थानाच्च निरूपितम्। यदृष्टेऽवृष्टेऽस्येव तत् सर्वं कल्पे कल्पे युगे युगे। कृषी सस्यादादाय करेण जलमीप्सितम्। दत्त्वा दानाय तद्यादातेन प्रेरितो घनः। स्थाने स्थाने पृथिव्याञ्च काले काले यथोचितम्। दैवैरेवाद्यविभूतं पूर्वं तत्प्रतिबन्धकम्। भूतं भव्यं भविष्यच्च मन्त्रं चुद्रच्च मध्यमम्। धात्रा निरूपितं कर्म केन तात! निवार्यते" ब्रह्मवै० जन्म० १अ०। "अम्भो प्राप्ताकृतिः सस्यमादित्यस्तपतिक्षते। आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजा" गीता। "सस्यस्थदृष्टिसूचकानि यथा "मयूराः सलिलूनां शब्देन हृषिता शुद्धः। केकारवान्ति प्रतिध्वने सततं वृष्टिसूचकाः। मेघात्सुकानां मधुरस्वातकानां मनोहरः। श्रूयतामतिमत्तानां वृष्टिसन्दिग्धसूचकः। मगने शक्रचापेन कृतं वाक्यतमाखरम्। धाराधारशरैस्तापं क्षेतुं प्रति यशोद्गतः" कालिकापु० १५अ०।

वृष्टिघ्नी स्त्री वृष्टिं हन्ति वारयत्वेन अश्नाति वृष्ट-क्त ङीप्। सुक्ष्मैलायाम् शब्दच०।

वृष्टिजीवन त्रि० वृष्टिः वृष्टिजलमेव जीवनं पानयोपायो यस्य। १वृष्टिजलमात्रजीविनि चातके। २देवमातृके देशे हेमच०। [हारा०। २वृष्टिमये त्रि०।

वृष्टिभू पु० वृष्टौ तदुपलक्षिते काले भवति भू-क्विप्। १मेघे

वृष्टिवैकृत न० ६त०। उपद्रवसूचके वृष्टिविकारे यथोक्तं वृ० स० ३६अ०

"दुर्भिक्षमनावृष्ट्यामतिवृष्ट्यां चुद्भयं सपरचक्रम्। रोगो ज्वरश्वभवायां सपवनोऽनभ्रजातायाम्। मीतोष्णविषमं नो सम्यग्वृष्टञ्च सम्यग्वृष्टेषु। अल्पमासाद्भयं रोगभयं दैवजनितं च। अन्यतौ सप्ताहं प्रवहवर्षं प्रधानसपमरणम्। रक्ते मक्षोद्योगो मांसास्थिवसादिभिर्भरकः। धान्यक्षिरण्यतक्फलकुसुमाद्यैर्पितैर्भयं विद्यात्। अक्षारपांशुवर्षं विनाशमायाति तत्नगरम्। सपत्ता विना जलधरैर्विजला वा प्राणिनो यदा वृष्टाः। क्षिप्रं वाप्यतिवृष्टौ सस्यानामीतिसङ्गननम्। क्षीरवृक्षौदाम्बो दग्धो रुधिरोष्णयोर्वर्षे। देशविनाशो श्लेष्मोऽस्रवर्षे चापि सपयुक्तम्। यद्यमसेऽर्के छाया न दृश्यते दृश्यते प्रतीपा वा। देशस्य तदा सुभद्रत्वमाषातं विनिर्देश्यम्। व्यक्ते नभसीन्द्रधनुर्दिवा यदा दृश्यतेऽथ वा रात्रौ। प्राच्यामपरस्यां वा तदा भवेत् चुद्भयं सुभद्रत्। सूर्येन्दुपर्जन्यसमीरणानां योगः स्मृतो वृष्टिविकारकाले। धान्याद्यगोवाजनदक्षियाच देवास्ततः प्राणिसुपैति पापम्"।

वृष्णि पु० वृष-नि किच्च। १यादववंशेऽ सपभेदे शब्दच०। २श्रीकृष्णे ३मेषे अमरः। ४चक्रे ५पाचक्रे च त्रि० शब्दर०।

वृष्णिगर्भ पु०वृष्णिः यादवकुलं गर्भो यस्य। श्रीकृष्णे हारा०

वृष्य पु० वृषाय हितो यत् वृष-क्यप् वा। १माषे हेमच०। २शुक्रवृद्धिकारके त्रि० भावप्र०। ३वाजीकरणे न० ४आमलक्यां ५शतावर्यां ६क्षुद्रमनामौषधौ च स्त्री राजनि०। ७वृद्धिनामौषधौ रत्नमा०। [राजनि०]

वृष्यकन्दा स्त्री वृष्यः शुक्रवर्द्धकः कन्दो यस्याः। विदार्याम्

वृष्यगन्धिका स्त्री वृष्यः शुक्रवर्द्धको गन्धो यस्याः कप् अत इत्वम्। क्षतिबलादाम् राजनि०। कवर्भावे इत्वमन्या वृद्धदारके स्त्री शब्दच०। [वृष्यवल्लिका तत्रैव स्त्री।

वृष्यवल्ली स्त्री कर्म०। १विदार्याम् राजनि०। २वृद्धे च हारा०।

वृह दीप्तौ वा चु० उभ०सक० पक्षे भ्वा० पर० इदित्। हंहयति ते अवहंहत् त। हंहति अवहंहीत्।

वृह वृद्धौ शब्दे च सक० भ्वा० पर० सक० सेट्। वर्हति ऽरित् अवहर्हत् अवर्हीत्। [ऽदित्। हंहति अवहंहीत्

वृह ध्वनौ वृद्धिध्वनौ वृद्धौ च भ्वा०पर० पर०सक० सेट्।

वृह वृद्धौ भ्वा०पर०सक० सेट्। वर्हति अवर्हीत्।

वृह उद्यमे तु०पर०सक०सेट्। वृहति। अवर्हीत्-अवृहत्।

वृह वृद्धौ भ्वा०आत्म० सक० सेट् ऽदित्। हंहते अवहंहिष्ट।

वृहच्चक्षु पु० वृहती चक्षुरिव मञ्जरी यस्य। मक्षाचक्षुषाके राजनि०। [१फलपूरे शब्दच०। २उदारचित्तयुते त्रि०।

वृहच्चित्त पु० वृहत् उदारं चित्तं यस्मात् ५ब०यस्य वा ६ब०।

वृहच्छल्क पु० वृहत् शल्कोऽस्य। चिङ्गटमत्स्ये अटा०।

वृहत् त्रि०वृह-अति। महति अमरः स्त्रियां गौरा०ङीष्।

वृहती स्त्री वृहत्+गौरा० ङीष्। १महत्यां स्त्रियां २क्षुद्रवार्ताक्याम् राजनि०। ३वारिधान्यां ४वाचि ५कण्टकारिकायाम् मेदि०। ६नवाक्षरपादके छन्दोभेदे छ०र०। संज्ञायां कन् ह्रस्वः। उत्तरीयवस्त्रे स्त्री अमरः।

बृहतीपति पु० बृहतीनां वाचां पतिः । बृहस्पतौ हेमच० ।
बृहत्कन्द पु० बृहत् कन्दो यस्य । १गृञ्जने रत्नमा० । २विष्णुकन्दे च राजनि० ।
बृहत्काय पु० कर्म० । (खागड़ा) वृक्षभेदे हारा० ।
बृहत्कालशाक पु० कर्म० । (बड़ कालकाहन्दे) शाकभेदे त्रिका० ।
बृहत्कुक्षि पु० बृहत् कुक्षिर्यस्य । वन्दिके (भुंडे) अमरः ।
बृहत्ताल पु० कर्म० । हिन्तालवृक्षे राजनि० ।
बृहत्तिक्ता स्त्री कर्म० । पाठायाम् (आकनादि) राजनि० ।
बृहत्तृण पु० बृहत्तृणं यत्र । वेणौ शब्दच० ।
बृहत्त्वच् पु० बृहती त्वक् यस्य । (अतियान) वृक्षे रत्नमा०
बृहत्पत्र पु० बृहत् पत्रमस्य । १हस्तिकन्दे (हातिकान्दा) राजनि० । २त्रिपर्णिकायां स्त्री राजनि० ।
बृहत्पाटलि पु० च० पट-अलि कर्म० । धुस्तूरवृक्षे त्रिका० ।
बृहत्पाद त्रि० बृहत् पादो मूलमस्य । वटवृक्षे शब्दच० ।
बृहत्पालिन् पु० बृहतः पालयति पाल-णिनि । वनजीरके राजनि० ।
बृहत्पीलु पु० कर्म० । महापीलौ राजनि० ।
बृहत्फला स्त्री बृहत् फलं यस्याः । १कटुतुम्ब्याम् २महाज्योतिष्मत्यां ३कृष्णाख्यायां ४महाजम्बां च राजनि० ।
बृहत्साम न० कर्म० । "त्वामिद्धि हवामहे" इत्यस्यामृचि गीयमाने साम्नि "बृहत्साम तथा साम्नाम्" गीता ।
बृहदङ्ग पुंस्त्री० बृहदङ्गमस्य । गजे शब्दच० स्त्रियां ङीष् ।
बृहदम्ल पु० कर्म० । (आमराङ्गा) वृक्षे शब्दच० ।
बृहदेला स्त्री कर्म० । स्थूलैलायाम् राजनि० ।
बृहद्गुह पु० कास्यदेशे त्रिका० । स च हिमालयस्य पश्चाद्दक्षिणस्यां मालवदेशसन्निकृष्टः ।
बृहद्गोल न० कर्म० । (तरमुज) लताफले शब्दच० ।
बृहद्दल न० बृहत् दलमस्य । १पद्मिकालोध्रे २हिन्तालवृक्षे च राजनि० ।
बृहद्बल न० कर्म० । महाबलाङ्गे त्रिका० । [च अमरः ।
बृहद्भानु पु० बृहद्भानुः किरणो यस्य । १अग्नौ २चित्रकवृक्षे
बृहद्रथ पु० बृहत् रथोऽस्य । १इन्द्रे २यज्ञपात्रभेदे ३शाकभेदे च । [जनि० ।
बृहद्राविन् पु० बृहत् रौति-रु-णिनि । धुस्तूरवृक्षे राजनि० ।
बृहद्रुक्ष पु० बृहत् वृक्षमस्य । पद्मिकालोध्रे राजवल्लभः ।
बृहद्वात पु० बृहत् वातो धातुभेदो यस्मात् ६त० । (देधान) वृक्षे रत्नमाला ।
बृहद्वारुणी स्त्री कर्म० । महेन्द्रवारुण्याम् राजनि० ।
बृहद्वीज पु० बृहत् बीजमस्य । आम्रवृक्षे शब्दच० ।
बृहद्वल पु० बृहत् बलो यस्य । महापोटगले मेदि० ।
बृहद्बला(डा) पुंस्त्री० बृहत् बलो यस्य वा बल्व डः । बलायां वेमच० विराटपर्णि तत्कथा दृश्या ।
बृहस्पति पु० बृहतां वाचः पतिः पुषो० नि० । १जीवे देवाचार्ये अमरः २यज्ञभेदे सु० सि० खगोलशब्दे तत्कक्षादिमानं तद्भगणादि च यज्ञशब्दे दृश्यम् । बृहस्पतिना च बौद्धधर्मः प्रवर्त्तितो यथाऽग्नं मत्स्यपु० २४च० "ततो बृहस्पतिः शक्रमकरोद्वृत्रतर्पितम् । यज्ञैरग्निविधानेन पौष्टिकेन च कर्मणा । मत्वाच मोहयामास रजिपुत्रान् बृहस्पतिः । जिनधर्मं समास्थाय वेदबाह्यं स वेदवित् । वेदत्रयी परिस्पष्टमकार धिषणाधिपः । वेदबाह्यान् परित्याय हेत्वाभासमन्वितान् । जघान शक्रो वज्रेण सर्वधर्मबहिष्कृतान्" । बृहस्पतिसवः यज्ञभेदः ।
वृ वरणे क्र्या० पर० उभ० सक० सेट् । वृणाति वृणीते अवारीत् अवरिष्ट-अवरीष्ट अवर्त्त । वव्रतुः ।
वे स्तुतौ भ्वा० अभ० अज्ञा० सक० अनिट् । वयति ते अवासीत् अवास्त वयादेशः अवाव अवतुः अवातुः ।
वेग पु० विज-घञ् । १प्रवाहे हेमच० २जवे अमरः ३महाकालफले मेदि० ४रेतसि हेमच० ५सूत्रविष्टादिनिःसारक्रियायां हृन्नाभौ संस्कारभेदे च
"स्पर्शादयोऽष्टौ वेगाख्याः संस्कारो मनसो गुणाः" ।
"क्षितिर्जलं तथा तेजः पवनो मन एव च । परापरत्वमूर्तत्वक्रियावेगाश्रया अमी" भाषा० तस्य क्षित्यादिगुणतोक्ता । "स्वभावतः प्रवृत्तानां मनआदीनां जितेन्द्रियः । न वेगं धारयेद्धीरः कामादीनाञ्च धारयेत्" राजनि० ।
वेगसर पुंस्त्री० वेगेन सरति सृ-ट । वेगगामिनि १अश्वतरे हेमच० । स्त्रियां ङीष् । २वेगगामिमात्रे त्रि० स्त्रियां ङीष् । [२वेगवति त्रि० अमरः स्त्रियां ङीष् ।
वेगिन् पु० वेग+अस्त्यर्थे इनि । १श्येनविहगे राजनि० ।
वेचा स्त्री विच-भावकर्त्तरि अच । वेतने हेमा० ।
वेजानी स्त्री विज-ल्युच् तमानयति आ-नी-ड गौरा० ङीष् सोमराजाम् शब्दच० ।
वेड न० विड-घञ् । १मान्द्रनिष्ठिवद्रव्यभेदे हेमच० २नीकायां स्त्री हेमच० ।
वेडमिका स्त्री रोटिकाभेदे भावप्र० क्षुताम्रशब्दे दृश्यम् ।
वेण निशामने वाद्यादाने मतौ ज्ञाने चिन्तायाञ्च भ्वा० उभ०

अक० सेट्। वेषति ते। अवेषीत् अवेषिष्ट। अदित्व पक्षे न क्सः।

वेष पु० वेष-अच्। १वर्णसङ्करजातिभेदे "वैदेहकेन त्व मम्बष्ठात्तायां वेष उच्यते" मनुः। २पृथुराजपितरि ऋषभेदे "सतप्रजेष तु ज्ञानेन वेषोऽपि ३नटीभेदे स्त्री। त्रिदिवं ययौ" विष्णुपु०। तत्प्रान्तत्वमस्येत्यर्थे।

वेषि(णी) स्त्री वेष-इन् वा ङीप्। १केशरचनाभेदे अमरः २जघनसमूहे जटा०। ३तन्त्रप्रसिद्धे ऐभच०। ४देवताङ्कृत्ते अमरः। ५नटीभेदे तदुपजीविकथा पद्मोत्तर० १६६अ०। ६गङ्गायमुनासरस्वतीसङ्गमस्थाने च। प्रयागशब्दे दृश्यम्।

वेषीर पु० वेष-ईरन्। अरिष्टवृक्षे (निम) शब्दच०।

वेषु पु० वेष-उच्। १वंशे अमरः। २तद्विकारे वंशीवाद्ये च शब्दच०। "मा पूरय वेणुम्" इत्युक्तेः। ३नटभेदे मेदि०।

वेणुक न० वेणुरिव वेणोर्विकारो वा कन्। तोत्रे ऐभच०। (पाचनवाड़ि)।

वेणुकर्कर पु० वेणुरिव कर्करः। करवीरवृक्षे त्रिका०।

वेणुज पु० वेणुतो जायते जन-ड। १वेणुजाते यवाकारे तण्डुले राजनि०। २वंशजाते दण्डादौ त्रि०।

वेणुध्म पु० वेणुं वंशीं धमति धा-क। वेणुवादके अमरः।

वेणुन न० वेष-उनन्। अरिष्टे रत्नमा०।

वेणुपत्री स्त्री वेणोरिव पत्रमस्याः। वंशपत्रीवृक्षे रत्नमा०।

वेणुयव पु० वेणुजातो यव इव। १वंशजाते २तण्डुलाकारे पदार्थे राजनि०। [स्वार्थे क। वेणुवादक तत्रैव त्रि०।

वेणुवाद त्रि० वेणुं वादयति वद-णिच्-अण्। वेणुवादके

वेणुबीज न० ६त०। वेणुजाते यवाकारे पदार्थे राजनि०।

वेतन न० व्यज-ल्युट् वेभावः। १क्रीतकर्मणोमूल्ये अमरः। भृतिशब्दे दृश्यम्। २जीवनोपाये हेमच०।

वेतनानपाकर्मन् न० ६त०। व्यवहारभेदे तत्स्वरूपादिकं वीरमि० उक्तं यथा नारदः "भृतानां वेतनस्योक्तो दानादानविधिक्रमः। वेतनस्यानपाकर्म तन्निबोधपदं शृणु"। वेतनं कर्ममूल्यं तस्यानपाकर्म भृत्याय समर्पणं समर्पितस्य वा परावर्त्तनम्। तत्र समर्पणे विशेषमाह स एव "भृत्याय वेतनं दद्यात् कर्मस्वामी यथाक्रमम्। आदौ मध्येऽवसाने तु कर्मणो यदिनिश्चितम्"। तुभ्यमेतावदहं दास्यामीति यद्वेतनं परिभाषितो निश्चितं तच्चिधा विभज्य कर्मण आदिमध्यान्तेषु त्रिषु कालेष्वन्यतमकाले वा दद्यादित्यर्थः। एतद्वैतावद्वेतनं दास्यामीति भाषायाः सप्तमे। अवसाने त्वाह स एव "भृतावनिश्चितायां तु दशभागमवाप्नुयुः। त्वामं गोवीर्य्यशस्यानां वणिग्गोपकृषीवलाः" इति। दशभागं दशमभागङ्गोवीर्य्यं पालयानगवादिभवस्यवीर्य्यादि। यदि कर्मस्वामी भृत्याय दशमभागञ्च प्रयच्छति तदाऽसौ राज्ञा दाप्य इत्याह याज्ञवल्क्यः "दाप्यस्तु दशमभागं वाणिज्यपशुशस्यतः। अनिश्चित्य भृतिं यस्तु कारयेत् स महीक्षिता" इति। यस्तु स्वामी वेतनपरिच्छेदमकृत्वैव भृत्यं कर्म कारयति न तस्माद् वाणिज्यपशुशस्यलक्षणात् कर्मणः सकाशाद् यत्किञ्चं तस्य दशमं भागं भृत्याय सहीक्षिता राज्ञा दापनीय इत्यर्थः। यत्तु "त्रिभागं पञ्चभागं वा गृह्णीयात् शीरगोवृक" इति वृद्धशातातपवचनं तद्वृद्धायासाध्यालक्षणविषयम्। व्यवस्थितविकल्पस्यायम्। कथमत्र व्यवस्थेत्याकाङ्क्षायामाह स एव "भक्ताच्छादनतः शीरी भागं गृह्णीत पञ्चमम्। जातश्रमात्त्रिभागं तु प्रगृह्णीयाद्वयोऽधिकः" इति। अशनाच्छादनाभ्यां भृतः क्रीतवत्तो वाङ्मनोविकलेनेवजातश्रमात् पञ्चमभागं गृह्णीयात्। ताभ्यामभृतस्तु तृतीयं भागमित्यर्थः। अथ वा यत्रैतावद्दास्यामीति नास्ति परिभाषा तत्र वृद्धमनूक्तं दृश्यम् "सप्तदशानकृषतां देशकालार्थदर्शिनः। नियच्छेदुर्भृतिं यान्तु सा स्यात् प्रागकृता तदा" इति। एतावद्दास्यामीति परिभाषितेऽपि क्वचित्तो न्यूनमपि स्वामिनापरिकल्पितं देयं क्वचित्ततोऽधिकमपि देयमित्याह याज्ञवल्क्यः "देयं कालश्रमं योऽनीयाद्वाभं कुर्याच्च योऽन्यथा। तत्र स्यात् स्वामिनश्चन्दोऽधिकं देयं कृतेऽधिके" इति। यो भृत्यः स्वाम्यनुज्ञां विना स्वातन्त्र्येण वाणिज्यादिकर्मणः फलसाधकत्वपादकं देयं कालं चातिक्रामति लाभं वा बहुतरं व्यत्ययेन कर्म करोति तत्रैव पूर्वपरिभाषितश्चतिमध्ये स्वामी कालानुसारेण किञ्चिद् दद्यात्। यस्तु स्वातन्त्र्येण बहुलाभं करोति तत्रैव परिभाषितमूल्यादधिकं किञ्चिद्देयं स्वामिना पारितोषिकमित्यर्थः। अनेकत्वसाध्यकर्मणि वेतनार्पणप्रकारमाह स एव "यो यावत् कुरुते कर्म तावत् तस्य तु वेतनम्। उभयोरप्यसाध्यं चेत् साध्ये कुर्याद् यथास्थितम्" इति। उभयोरप्यौत्पत्तिना बहुना परिश्रमेण वणिग्वृद्धादौ कृते भवतानेतावद्दास्यामीति परिभाषिते द्विपञ्चभिरारब्धं कर्म यदि व्याध्यादि-

याज्ञ अयाचितं तदा तेषु यो यावत् कर्म करोति तस्मै तत्कर्मानुसारेण मध्यस्थपरिकल्पितं वेतनं देयम्। न तु खाम्येन दानञ्च परिषन्मात्रप्रभावाददानम्। यदि तैः क्रमाचितं तदा यद्या परिभाषितं देयञ्च तु प्रत्येकं शतञ्च दातव्यं नापि कर्मानुसारेण परिकल्प्य दातव्यमित्यर्थः। यस्तु वेतनं गृहीत्वा समर्थोऽपि न कर्म करोति तं प्रत्याह दक्षस्मृतिः "गृहीतवेतनः कर्म न करोति यदा भृतः। समर्थश्चेद्दमस्तस्यो द्विगुणं तच्च वेतनम्" इति। दमं यथाप्रकृतानुसारेण राज्ञा दाप्यः। गृहीतञ्च वेतनं द्वैगुण्येन स्वामिने दद्यादित्यर्थः। नारदोऽपि "भृतिं गृहीत्वाऽकुर्वाणो द्विगुणां भृतिमावहेत्" इति। याज्ञवल्क्योऽपि "गृहीतवेतनः कर्म त्यजन् द्विगुणमावहेत्" इति। अस्मिन्नेव विषये यावता वेतनेन यत्परिमाणकं गृहीतं तावदेव स्वामिने देयञ्च तु राज्ञे दण्ड्यमित्यर्थः। यद्यगृहीतां भृतिं दत्त्वा बलात्कारयितव्य इत्याह नारदः "कर्माकुर्वन् प्रतिश्रुत्य कार्यो दत्त्वा भृतिं बलाद्" इति। प्रतिश्रुत्येति प्रारम्भस्याप्युपलक्षणार्थम् अतएव कात्यायनः "कर्मारम्भं तु यः कृत्वा विक्रियैव तु कारयेत्। बलात्कारयितव्योऽसावकुर्वन् दण्डमर्हति" इति। किञ्चिद् द्रव्यं दत्त्वा दत्वापेक्षायामाकृष्टञ्च मनुराकृष्टस्तौ "प्रतिश्रुत्य न कुर्याद् यः स कार्यः स्याद् बलादपि। स चेन्न कुर्यात् तत्कर्म प्रदद्याद् द्विगुणं दमम्" इति। द्विगुणं कार्षापणद्वियतमित्यर्थः। यत्तु मनुवचनम् "भृतोऽनार्त्तो न कुर्याद् यो दर्पात् कर्म यथोदितम्। स दण्ड्यः क्षत्रियान्योऽसौ न देयं तस्य वेतनम्" इति। तदत्यदण्डयाज्ञवल्क्यादिविरुद्धमिति मृतिचन्द्रिकायाम्। अकुर्वन्नकर्मकरणविषयमिति मदनरत्ने। किञ्चिदकुर्वन्नकर्मकरत्वे स्वाह च एव "यथोक्तकार्त्तः सुस्थो वा यत्तत्कर्म न कारयेत्। न तस्य वेतनं देयमल्पोनस्यापि कर्मणः" इति। सुस्थो वा कर्म कारयेदिति वदता सुस्थोऽपि स्वयं कर्त्तव्यनियमो नास्तीति दर्शयति। आर्त्तो यदि आर्त्युपशमानन्तरं याज्ञोक्तं कर्म करोति तदार्त्ते दीर्घकालतया कालक्षेपेऽपि भृतदोषाभावाद्वेतनभङ्गो निर्विवादं लभत इत्याह च एव "आर्त्तस्तु कुर्यात् सुस्थः सन् यद् यथाभाषितादितः। सदीर्घस्यापि कालस्य तस्यैव वेतनम्" आदितः आदौ यथाभाषितं यथाप्रतिश्रुतं तथा कुर्यादित्यर्थः। सदीर्घस्यापि कालस्य भृतस्यैवेति शेषः। यस्तु कालविशेषावधिकं कर्म प्रतिश्राव तत्कालापूर्त्तावेव कर्म त्यजति तं प्रत्याह नारदः "कालेऽपूर्णे त्यजन् कर्म भृतनाशमवाप्नुयाद्"। अत्र दण्डमप्याह विष्णुः भृतकश्चापूर्णे काले त्यजन् सकलमेव मूल्यमुद्धात् राज्ञे च पञ्चशतं दद्यादिति"। मूल्यं वेतनम्। स्वामिदोषात्त्यागे तु यावति काले कर्म कृतं तत्कालानुसारेण कल्पितं वेतनं लभत इत्याह नारदः "स्वामिदोषात्परित्यजन् यावत् कृतमवाप्नुयाद्" इति। स्वामिदोषो विनापराधं निष्कारणताडनादिः। अत्र दण्डमप्याह विष्णुः "स्वामी चेद्भृतकमपूर्णे काले त्यजात् तस्य सर्वमेव मूल्यं दद्यात् पञ्चशतञ्च राजन्यत भृताद्दोषादिति"। स्वामिद्रव्यस्य भृतदोषेण नाशे यत् कर्त्तव्यं तदाह स एव। "तद्दोषेण यदिनश्येत्तत् स्वामिने देयमन्यच्च दैवोपघातादिति"। दैवोपघातोराजकृतश्चाप्युपलक्षणम्। स्वामिने देयं मूल्यद्वारेति शेषः। अत्र दोषविशेषाद्विशेषमाह बृहन्मनुः "प्रमादात्स्वामितं दाप्यः सर्वं हि द्रोहनाशितम्" इति। प्रमादात्स्वामितनबधाननाशितं समस्तमेव दद्यात्। द्रोहनाशितं तीव्रप्रयत्नादिना द्रोहेण नाशितं हिरण्यो द्विगुणं दाप्य इत्यर्थः। भृतदोषाभावे यदन्यत एव नष्टं तत्र देवसित्याह स एव "न तु दाप्यो भृतस्तैरैश्वमूढं जलेन वेति"। अत्र नीतम्। यस्तु वाहको वाह्यं द्रव्यं प्रस्थादीनत्यादिना भृतदोषेण नाशयति तं प्रत्याह नारदः "भाण्डं व्यसनमाप्तञ्चेद्यदि वाहकदोषतः। दाप्यो वस्तुन नष्टेन देवराजकृताद्ऋते" इति। भाण्डं प्रकृतीयं द्रव्यं सकृदादि वहनं नाम। अत्र भाण्डवाहकयोर्यत्नवत्त्वदर्शनवत्त्वयोरुपलक्षणमिति मदनरत्ने। अत्रापि "प्रमादात्स्वामितं दाप्यः सर्वं हि द्रोहनाशितमिति" वदनुक्तोऽपि द्रोहोऽवगन्तव्यः। यस्तु वाहकः भृतदोषेण प्रस्थानविघ्नं करोति स द्विगुणां भृतिं दाप्य इत्याह कात्यायनः "विघ्नं यो वाहको दाप्यः प्रस्थाने द्विगुणां भृतिम्" इति। विघ्नं करोतीति शेषः। वाहकग्रहणं प्रदर्शनार्थं न तु विवक्षितत्वे नायुधीयादेर्दुर्विज्ञानपरिहारायेति मन्तव्यम्। अतएव नारद "द्विगुणां तु भृतिं दाप्य, प्रस्थाने विघ्नमाचरन्" इति सामान्येनोक्तवान्। याज्ञवल्क्योऽपि "प्रस्थानविघ्नकृच्चैव प्रदाप्यो द्विगुणां भृतिम्" इति। एतच्च भृत्यान्तरसमादानकालासम्भवविषयम्। अकृतकर्मकरणस्यापि यदा यदा-

यानेराक्रमेण प्रत्यर्पणविन्नापादकत्वं तदा लाह स एव "प्रकाशे सप्तमप्यागच्छतु पणि वन्त्रजनू । भतिमर्हपणे सर्वां प्रदापयेन्नाजकोऽपि च" इति। प्रकाशे कर्मणि स्वीकृतं कर्म त्यजन् स्वयो भृतेः सप्तमभागं दाप्यः। गमने प्रारब्धे पणि त्यजन् भृतेः षष्ठं भागम्। अर्हपणे त्यजन् सर्वां भृतिमित्यर्थः। नाजकोऽपि चेत्रक्षायमर्थः गमनारम्भानन्तरं स्वामी यदि त्याजयति तदा पूर्वोक्तक्रमेण भृताय सप्तमभागादिकं दापनीय इति। एतच्चाव्याधितादिविषयम् व्याधितस्यापराधाभावात्। यत्र स्वामिना त्याजने चतुर्थभागदापनमुक्तं तदविक्रीतभाण्डस्वामिविषयम्। विक्रीतभाण्डस्वामिना यत् कर्त्तव्यं तदाह बृहस्पतिः "यदि विक्रीय तद्भाण्डं क्वचिद् भूयं व्रजेद् यदि। अथ तद्भावि देयं स्याद् भृतेर्द्वौ क्रमेत यः" इति। यदि भाण्डस्य चौरादिभिः प्रतिरोधे राजादिभिरपहृते स्वामिना कर्त्तव्यमाह कात्यायनः "यदा च पथि यद्भाण्डमाच्छेत्तृभिर्हृतं वा। तावतो धनमेवेति। तेन भारवाहकस्वीकृतेन यानादिना। भाण्डनेतारं प्रत्याह नारदः "वहयन् भाटविला च भाण्डवत् यानवाहनम्। दाप्यो भृतिचतुर्भागं सर्वामर्द्धपथे व्रजन्" इति। यानं शकटादि वाहनम् वाजादि। अवश्यं यो यानादिना भाण्डवहनं कर्त्तुं परकीयं यानादिकं भाटविला प्रारब्धादायोपाधिकं परिक्रयं कृत्वा तच्च वहति स यानस्वामिने परिकल्पितस्य भाटकस्य चतुर्थांशं दाप्यः। वस्तु तत्रोत्साहभागं त्यजति स सर्वां भृतिं दाप्य इति। वस्तु शकटादिकं भाटयित्वा तत्रिरोपकारभूयस्त्वादाव देशान्तरं गच्छति भाटकं च न प्रयच्छति तं प्रत्याह बृहस्पतिः "यो भाटयित्वा शकटं नीत्वा वाऽन्यत्र गच्छति। भाटं न दत्वाद् दाप्यः स्वादुद्धरापि भाटकम्" इति। अनुद्धरापि बलतोपकारस्यापीत्यर्थः। वस्तु क्रते कृत्वे समनन्तरं वाहनादेः समर्पणं न करोति तच्च समर्पणपर्यन्तभाटकदानमाह कात्यायनः "शकटाश्वोष्ट्रदोहादीन् भृतीत्वा भाटकेन यः। नार्पयेत् क्रतकृत्यः संस्तावद्दाप्यः स भाटकम्। गृहयानौषधादीनि भृतीत्वा भाटकेन यः। स्वामिने नार्पयेत् तावत्तावद्दाप्यः स भाटकम्" इति। चारिशब्देन तदाधारभूतं यानं गृह्यते। नार्पयेत् क्रतकृत्यः सन्निहितवस्तुकः। परभूमौ कृतक्रियांशाय भाटकदातारं प्रत्याह नारदः "परभूमौ भृतं कृत्वा क्षेमं दत्वा वसेत् तु यः। स तद्भृतीत्वा निर्गच्छेत् दण्डाष्टकादिकम्" इति। क्षेमशब्दाटकं क्षेमप्रदानेऽप्याह स एव "क्षेमादिना वसित्वा तु परभूमावनिर्गतम्। निर्गच्छन्तु भृतकाष्ठानि न भृतीत्वात् कथञ्चन। यान्येव दण्डकाष्ठानि स्थिरीकृत्वा विनिवेशितानि। विनिर्गच्छन्तु तत् सर्वं भूमिस्वामिने वेदयेत्" इति। स्वामिने निवेदयेदित्यर्थः। अनिश्चितपरिमिते यदा दण्डकाष्ठादिपञ्चहस्तषड्हस्तपरिमाणादिहीनविषयमेतदिति दर्शितम्। परिमाणविषये तु यथा परिमाणितं कर्त्तव्यम्। भाटके भृतीतानां भाजनपात्रादीनां भङ्गे नाशे च विशेषमाह स एव "क्षेमवाहीनि भाण्डानि पूर्णकाल्यानुपानयेत्। गृहीतराजरेङ्गन्नष्टभान्यत्व संभवात्" इति। क्षेमवाहीनि भाटकगृहीतानि पूर्वपरिभाषितभाटकानि तत्स्वामिनं प्रापयेदिति पूर्वार्द्धार्थः। भग्नमेकदेशेन विकृतं, नष्टम् कात्स्न्र्येन विकृतम्। संभवः परस्परसङ्गतिः तद्विप्रकारेण यद्भग्ननष्टत्व तद्भाटकगृहीतर्भवति। संभवेन तु यद्भग्ननष्टत्व तद्भाटकदात्रा पूर्ववत् कृत्वा मूल्यद्वारेण वा देयमित्यर्थः। व्याधितस्य भृतस्य स्वामिना यदि त्याने दण्डमाह कात्यायनः "त्यजेत् पथि यद्भाण्डं यः स्वान्तं रोगार्त्तमेव वा। प्राप्नुयात् साष्टकं पूर्वं यामे त्र्यहमपालयन्" इति। स्वाम्यनुज्ञातेन भृत्येनापराधे कृते नोऽपराधः स्वामिन एवेत्याह बृहस्पतिः "प्रभुणा विनियुक्तः सन् भृतको विदधाति यत्। तदशुभं कर्म स्वामी तत्रापराप्नुयात्" इति। स्वामी क्रतकर्मणे क्रतकाय यदि न वेतनं ददाति तदाऽसौ राज्ञा दापनीयः इत्याह स एव "क्रते कर्मणि यः स्वामी न ददाति वेतनं भृते। राज्ञा दापयितव्यः स्याद् वेतनद्विगुणकृपतः" इति। वेश्यातदुपभोक्तृविषये नारद आह "शुल्कं भृतीत्वा पण्यस्त्री नेच्छन्ती द्विगुणं वहेत्। अनिच्छन् शुल्कदातापि शुल्कद्वानिमवाप्नुयात्" इति। एतदव्याधितादिविषयम्। व्याधितादिविषये त्वाह बृहस्पतिः "व्याधिता स्वगृहव्यग्रा राजकार्यपरायणा। यामन्विता च नामर्च्छेदन्याच्या वडवा स्मृता" इति। यामन्विता याचिता। वडवा दासी तदुपलक्षणञ्च पण्यस्त्रीप्रदर्शनार्थम्। उपभोक्तारं प्रत्याह नारदः "यामच्छन्नयो शुल्कमनूनं दातुं स्त्रियम्। क्रमेण च वहेद् घातदमनत्वादिभिः। अयोनौ च समाहा-

वेट् वज्रमिर्योपि वासवेत्। शुल्कं योऽदत्तुषं दाप्यो विनयं लावदेव तु" इति। वेश्यावाक्यपराधे दण्डादिकं मनूक्तपुराणे दर्शितम् "मद्दीत्वा वेतनं वेश्या योऽभादत्तस्य गच्छति। तां दमं दापयेद्राजादितरस्यापि भाटकम्" इति। इतरस्य दत्तशुल्कस्य। तत्रैव विशेषान्तरमुक्तम् "अन्यस्मादिह वेश्यां यो नयेदन्यस्य कारणात्। तस्य दण्डो भवेद्राज्ञः सुवर्णस्य च भाटकम्। नीत्वा भोगस्य यो दद्याद् दाप्यो द्विगुणवेतनम्। राज्ञश्च द्विगुणं दण्डं तथा धर्मो न क्षीयते। यद्धनं व्रजतामेकां सर्वं तद् द्विगुणं धनम्। तच्चै दद्युः पृथक् राज्ञे दण्डञ्च द्विगुणमरम्" इति। अत्र निर्वेतनाकारः "वेश्याःप्रधाना यास्तत्र कामुकाकाङ्क्षोधिताः। तत्सम्बन्धेषु कार्य्येषु निर्णयं संश्रये विदुः" इति।

वेतस पु० व्यज-असुन् तक् च धीभावः। (बेत) वृक्षभेदे अमरः। स्त्रीत्वमपि शब्दच० तत्र गौरा० ङीष्।

वेतसास्त्र पु० वेतस एव अस्त्रः। अस्त्रवेतसे लटा०।

वेतस्वत् त्रि० वेतसाः सन्त्यत्र भूम्ना वेतस+इनुण्। बहुवेतसयुक्ते देशे अमरः।

वेताल पु० व्यज-विच् धीभावः तस-अञ् कर्म०। १मद्यविशेषे २भूताधिष्ठितशवभेदे अमरः ३शिवानुचरे भैरवभेदे कालिकापु०। ४द्वारपाले च शब्दर०।

वेतालभट्ट पु० विक्रमादित्यसभास्थे नवरत्नान्तर्गते कविभेदे

वेत्तृ त्रि०विद-तृच्। १ज्ञातरि २बोद्धरि ३लब्धरि च राजनि०

वेत्र पु० व्यज-त्रन् धीभावः। (बेत) वेतसवृक्षे राजनि०।

वेत्रकीय त्रि०वेत्र+छ-इकच्। १वेत्रसमूहे २तद्युक्तदेशादौ च स्त्रि० कौ०। [यष्टिधारणशीले त्रि०।

वेत्रधर पु० वेत्रं धरति धृ-अच्। १द्वारपाले हेमा० २वेत्र-

वेत्र(त्रा)वती स्त्री वेत्रा बाहुल्येन सन्त्यस्याः मतुप् मस्य वः वा दीर्घः। १मालवदेशस्थे नदीभेदे "शरावती वेत्रवती चन्द्रभागा सरस्वती"। २दक्षासुरमातरि वराहपु०।

वेत्रासन न०वेत्रनिर्मितमासनम्। वेतनिर्मिते आसने (मोढ़ा)

वेत्रासुर पु० सिन्धुद्वीपात्मजेऽसुरभेदे वराहपु०।

वेद याचने भ्वा० आत्म० द्वि० सेट् ऋदित् चङि न ह्रस्वः। वेदते अवेदिष्ट।

वेद पु० विद-घञ् यज्ञ वा। १विष्णौ विष्णुसं०। २ज्ञाने ३यज्ञसाधने तत्साधने धर्मप्रतिपादके मन्त्रब्राह्मणात्मके शब्दभेदे ४ब्राह्मणे ५गन्धर्वभे० ६कुशसङ्ख्यिकृते पदार्थभेदे "वेदं कृत्वा वेदिं कुर्य्यात्" श्रुतिः वेदयति विद-घञ् णिच्-घञ् विद-अच् वा। ७ब्राह्मणे ८चत्वारि च त्रि० "वेदोऽसि येन त्वं देव! वेद देवेभ्यो वेदोऽभवस्तेन मह्यं वेदो भूयाः" यजु० २।२। "यज्ञो वेदं प्रसुवति वेदोऽसीति "हे कुशसङ्ख्यिनिर्मितपदार्थ! त्वं वेदोऽसि ज्ञानाद्यात्मकोऽसि यद्वा वेत्तीति वेदः ज्ञातासि। देवेभ्यो देवानां वेदोऽभवः ज्ञापकोऽभूः" कर्म०। तच्च यच्च पौरुषेयं वाक्यं वेद इति मीमांसकाः। पौरुषेयत्वे पूर्वपक्षं दूषयित्वा-ऽपौरुषेयत्वं माधवेनोपन्यस्य समर्थितं यथा "समयबलेन सम्यक्परोक्षानुभवसाधनं वेद इति" वेदलक्षणञ्च मन्वादिस्मृत्यादावतिव्याप्तिमाशङ्क्य "अपौरुषेयत्वे सतीति विशेषणाददोष इति चेत् वेदस्यापि परमेश्वरनिर्मितत्वेन पौरुषेयत्वात् शरीरधारिजीवनिर्मितत्वाभावादपौरुषेयत्वमिति चेत् "सहस्रशीर्षा पुरुषः" इत्यादिश्रुतिभिरीश्वरस्यापि शरीरित्वात्। कर्मफलरूपशरीरधारिजीवनिर्मितत्वाभावमात्रेणापौरुषेयत्वं विवक्षितमिति चेत् न जीवविशेषैरग्निवाय्वादित्यैर्वेदानामुत्पादितत्वात्। "ऋग्वेद एवाग्नेरजायत, यजुर्वेदो वायोः, सामवेद आदित्यादिति श्रुतेः" (ईश्वरस्याग्न्यादिप्रेरकत्वेन निर्माणत्वं द्रष्टव्यम्)। ततः मन्त्रब्राह्मणात्मकत्वं वेदलक्षणमुक्त्वा "मन्त्रब्राह्मणयोर्वेदनामधेयम्" इत्यापस्तम्बवचनं प्रमाणयतोपन्यस्य ततश्च मन्त्रलक्षणमुक्त्वा तदितरत् ब्राह्मणमित्युक्तम्। तत्रैवोत्तरत्र मन्त्रेष्वपि वेदस्य पौरुषेयत्वेन विप्रतिपन्नवाक्यवदप्रामाण्यं स्यात् पौरुषेयत्वं च १पादे पूर्वपक्षत्वेन जैमिनिरुक्तवत् यथा "वेदांशैके सन्निकर्षं पुरुषाख्येति" सू० "एके वादिनो वेदान् प्रति सन्निकर्षं मन्यन्ते। यथा रघुवंशादयः काचिदाख्यायिका इदानीन्तनाश्चया वेदोऽपि न तु वेदा अनादयः अतएव वेदकर्तृत्वेन पुरुषा आख्यायन्ते वैयासिकं भारतं बाल्मीकेयं रामायणमित्यत्र यथा भारतादिकर्तृत्वेन व्यासादय आख्यायन्ते तथा काठकं कौथुमं तैत्तिरीयकमित्येवं तत्तद्वेदाध्यायकर्तृत्वेन कठादीनामाख्यातत्वात् वेदाः पौरुषेयाः। नन्वेवं नित्यानामेव सतां वेदानामुपाध्यायसम्प्रदायप्रवर्त्तकत्वेन कठकादिसमाख्या स्यादित्याशङ्क्य युक्त्यन्तरं सूचयति "अनित्यदर्शनाच्चेति" सू० अनित्यानामनन्तभरथवतो वेदादयो वेदाश्च श्रूयन्ते "वसन्तो ग्रावग्रभिरकामयत कुशलविन्दु

ओङ्कारक्रियासमवेतेति" तथा स्मृतिं वररुचिप्रभृतिभिः पूर्वमाचार्यैरभिलाषितत्वाच्च वेदाः। विमतं वेदवाक्यं पौरुषेयं वाक्यत्वात् काश्चिदाख्यादिवाक्यवत् इत्यनुमानमूलकत्वकारः" इति पूर्वपक्षे सिद्धान्तयति। "शब्दं तु शब्दपूर्वत्वम्" सू० "तुशब्दो वेदानामनित्यत्वं वारयति। शब्दस्य वेदरूपस्य कठादिपुरुषेभ्यः पूर्वत्वमनादित्वम् प्राचीनैव सूत्रैरुक्तम्। "औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः" इत्यत्र औत्पत्तिकशब्देन सर्वेषां शब्दानां वेदानां तदर्थानां तदुभयसम्बन्धानां च नित्यत्वं प्रतिज्ञाय उत्तराभ्यां शब्दाधिकरणवाक्याधिकरणाभ्यामुपपादितम्। का तर्हि कठकाद्याख्याया गतिरित्याशङ्क्य संप्रदायप्रवर्त्तनात् तेषामुपपद्यते" इत्युत्तरसूत्रयति "आख्याः प्रवचनादिति" सू० "अस्मिन्नध्याये विद्यावागतिः (इयं प्रवचनरूपा संप्रदायप्रवर्त्तनेत्यर्थः") वररुच्यादिनित्यदर्शनं यदुक्तं तस्य किमित्युत्तरमित्याशङ्क्याह "परं तु श्रुतिसामान्यमात्रम्" सू० यत्परं वररुचिप्रभृतिकं तत् तच्छब्दसामान्यमेव। न तु मनुष्यो वररुचिनामकोऽत्र विवक्षितः वररुच्यभियुक्तप्रवरुच्यभावस्य वाग्वोरत्र वक्तुमशक्यत्वात्। पूर्वपक्षोक्तस्य वाक्यत्वहेतोः पराकृतेः। तस्माच्छास्त्रि वेदस्य पौरुषेयत्वम्। अत्र संग्राहकश्लोकौ "पौरुषेयं न वा वेदवाक्यं स्यात् पौरुषेयता। काठकादिसमाख्यानात् वाक्यत्वाच्चान्यवाक्यवत्। समाख्यानं प्रवचनात् वाक्यत्वं तु पराकृतम्। तत्कर्त्रनुपलम्भेन स्यात्ततोऽपौरुषेयता"। ननु भगवता बादरायणेन वेदस्य ब्रह्मकार्यत्वं सूत्रितं "शास्त्रयोनित्वादिति"। ऋग्वेदादिशास्त्रकारत्वात् ब्रह्म सर्वज्ञमिति सूत्रार्थः (तदेतस्य महाभूतस्य निःश्वसितं यदृग्वेदोयजुर्वेद इत्यादिं श्रुतिः "अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा" स्मृतिश्च तत्र मूलम्) वादं नैयायिका पौरुषेयत्वं भवति मनुष्यनिर्मितत्वाभावात्। ईदृशमपौरुषेयत्वमभिप्रेत्य व्यवहारदशायामाकाशादिवन्नित्यत्वं बादरायणेनैव देवताधिकरणे सूत्रितम् "अतएव च नित्यत्वमिति"। वेदा०प० पौरुषेयत्वापौरुषेयत्वे अन्यथा निरुक्ते "यथा मनु चक्षिकत्साभावेऽपि विषदादिपदादिमत्त्वेन परमेश्वरकर्तृकतया पौरुषेयत्वादपौरुषेयत्वं वेदानामिति मत्र सिद्धान्तोभङ्गेतेति चेन्न तावतापुरुषेयोद्धार्य्यनाथत्वं पौरुषेयत्वं गुरुमतेऽपि पौरुषेयत्वापत्तेः (पाठभ्रमान वेदानामिति भेदः) नापि पुरुषाधीनोत्पत्तिमत्त्वं पौरुषेयत्वं नैयायिकाभिमतपौरुषेयत्वानुमानेऽकादादीनां सिद्धसाधनापत्तेः किन्तु सजातीयोच्चारणानपेक्षोच्चारणविषयत्वं तथा च सर्गाद्यकाले परमेश्वरः पूर्वसर्गसिद्धवेदसमानपूर्वीकं वेदं विरचितवान् न तु तद्विजातीयं वेदमिति न सजातीयोच्चारणानपेक्षोच्चारणविषयत्वं पौरुषेयत्वं वेदस्य, भारतादीनान्तु सजातीयोच्चारणमनपेक्ष्यैवोच्चारणमिति तेषां पौरुषेयत्वम्"। शब्दचिन्तामणिकृता तु वेदलक्षणमन्यथा निरुक्त्य पौरुषेयत्वमीदृशमेव समर्थितं यथा "अथ वेदः पौरुषेयो वाक्यत्वात् भारतादिवत् इति चेत् कोवेद अनुगतधर्मभावेन तस्य शाखासु नानार्थत्वात् तथा हि न सूक्ष्मवेदप्रयोगविषयो वेदः सूक्ष्मार्थकथनात् नापि शाखासमूहः तस्य वेदनिरूप्यत्वात् समूहस्यानुगतिप्रतिपाद्यत्वेन वाक्यत्वासिद्धेः। नापि स्वर्गकामो यजेतेत्यादिवाक्यं स्मृतिभारतादेरपि तथात्वात्" इत्यादिवेदलक्षणे पूर्वपक्षसङ्गा पौरुषेयत्वमाधो तस्माच्च "पौरुषेयत्वं न तदर्थधीजन्यत्वं तदुच्चारणधीप्रभवत्वं वा अध्यापकाध्येतृधीजन्यत्वेन सिद्धसाधनात् स्वतन्त्रपुरुषप्रणीतजातीयत्वं यदि साध्यं तदाद्यभारते स्मृतौ च वाक्यत्वमनैकान्तिकम्" इत्यादिना। अथोत्तरसूत्रं यथा "शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्यविषयार्थकत्वे सति शब्दजन्यवाक्यार्थज्ञानाजन्यप्रमाणशब्दत्वं वेदत्वम्। ईश्वरप्रमाया अजन्यत्वात् वेदार्थस्यातुमानविषयत्वेऽप्यनुमानादेर्दोषजीवकतया स्मृतीनां भारतादिभागस्य च वेदसमानार्थकत्वेऽपि शब्दजन्यधीजन्यत्वात् वेदादर्थं प्रतीत्यैव तत्प्रवृत्तेश्च" (अग्निर्हिमस्य भेषजमित्यादिवेदवाक्यसंग्रहाय सत्यन्तं लक्षणमविद्यं सत्यन्तं तु अदृष्टार्थकतावाक्यव्यावृत्त्यापनार्थमिति बोध्यम्)। मधुरानाथेनैतद्विहतं तत्र दृश्यम्। साध्यं च पौरुषेयत्वं सजातीयोच्चारणानपेक्षोच्चरितजातीयत्वमिति निर्दोषमधिकं तत्र दृश्यम्।

वेदाश्च चत्वारः तेषां शाखाविभागरचनाप्रकारे चरणव्यूहे उक्तः तत्र ऋग्वेदशाखाविभागः ऋग्वेदशब्दे १४११५८० दर्शितः। "यजुर्वेदस्य षड्योतिर्भेदा भवन्ति। तत्र चरकार्वा द्वादश भेदा भवन्ति। चरकाः१ आध्वरकाः२ कठाः३ प्राच्यकठाः४ कपिष्ठलकठाः५ ओपमन्यवाः६ आदृश्यकठाः७ पारायणीयाः८ पाराशरीयाः९ वार्त्तान्तवेयाः१० श्वेताश्वतराः११ (श्वेताश्वेतरा इति वा पाठः)। मैत्रायणीयाः१२चेति। तत्र मैत्रायणीयानां षड् भेदा भवन्ति। मानवाः१ दुन्दुभाः२ चैकेयाः३ मारद्वाजाः४ वा-

रिद्रुवेयाः ४ शामाः ६ शाट्यायनीयाश्चेति। तेषामध्ययनम् चत्वारो वेदाः षडङ्गान्यधीत्य शाखापारगो भवति। तान्येव त्रिगुणान्यधीत्य पदपारगो भवति। तान्येव त्रिगुणान्यधीत्य क्रमपारगो भवति। षडङ्गान्यधीत्य षडङ्गविद्भवति। शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमित्यङ्गानि। तत्र प्राच्योदीच्यां नैर्ऋत्यां निर्ऋत्यः। तत्र वाजसनेयानां पञ्चदश भेदा भवन्ति। जाबालाः १ कौण्वेयाः २ काण्वाः ३ माध्यन्दिनाः ४ शातपथीयाः ५ तापायनीयाः ६ कापालाः ७ पौण्ड्रवत्साः ८ आवटिकाः ९ पारावटिकाः १० (परमावटिकापि पाठः)। पाराशरीयाः ११ वैनेयाः १२ औतेयाः १३ गालवाः १४ वैजवापाः १५ काण्वायनीयाश्च १६। प्रतिपदमनुपदं छन्दो भाषा धर्मो मीमांसा न्यायस्तर्क इत्यङ्गानि। उपज्योतिषम्। वाङ्मलक्षणम्। प्रतिज्ञानवाक्यम्। परिसंख्याचरणम्। आङ्कलक्षः। प्रवक्ताध्यायश्च। यज्ञम्। ऋतुः। संख्यानः। आगमः। यज्ञगार्हः कोलकम्। (पारम्यानुकोलकमपि पाठः)। पशवः। कल्पानि। कूर्मलक्षणमित्यष्टादशपरिशिष्टानि। हे ब्रह्मन् मते व्यूने मन्त्रे वाजसनेयके। इत्युक्तं परिसंख्यातमेतत् सकलं शुक्रियम्। अन्यच्च परिसंख्याता ब्राह्मणस्य चतुर्दशम्। आदावारभ्य वेदान्तं ब्रह्मव्याप्तिपूर्वकम्। वेदमधीय एतेषां कोलान्ते तु समारभेत्"। तत्र तैत्तिरीयकाणां द्विभेदा भवन्ति। औक्षाः १ (खण्डिकोऽपि पाठः)। खाण्डिकेयाश्चेति २। तत्र खाण्डिकेयानां पञ्च भेदा भवन्ति। आपस्तम्बीयाः बौधायनीयाः सत्याषाढीयाः हिरण्यकेशीयाः औदेयाश्चेति ५ (औधेयी च पाठः)। तत्र कठानामुपमानविशेषाः। चतुश्चत्वारिंशदुपन्यासाः। मन्त्रब्राह्मणयोर्वेदस्तिसृणां वक्त्र पठ्यते। यजुर्वेदः स विज्ञेयः त्रेधाः शाखान्तराः कृताः"।

साधवेदस्य किल ब्रह्मभेद आसीत्। अनध्यायेऽधीयानास्ते व्रतव्रतर्जेषामिङ्गिताः प्रजाः। तेषां प्रवक्ताश्वासुरायणीया वासुरायणीया वार्त्तान्तेवासाः ब्राह्मणा ऋग्वेदभेदाः प्राचीनयोग्या ज्ञानयोग्या राणायनीयाश्चेति। तत्र राणायनीयानां नव भेदा भवन्ति। राणायनीयाः शाण्डानीयाः पाराशर्यायणीयाः कालवदाः। (कालवदाना इति वा पाठः)। कौथुमाः। (इति वै भाषे गाथि)। खलवाः। महाखलवाः खाण्डवाः। कौथुमाः जैमिनीयाश्चेति। तेषामध्ययनम् चत्वारो सामवेदाश्च सामानि च चतुर्दश चत्वारि दर्शेति दशग्रन्थ वाचयित्वाः सकृपर्यग्रेऽङ्ग। एतत् सामसर्वं व्रतम्। ऋग्वेदस्य नव भेदा भवन्ति। वैष्मवाः १। दात्राः २। प्रदात्राः ३। खाताः ४। खौताः ५। ब्रह्मदावनाः ६। मौनकौ ७। देवदर्शनौ ८। चरणविद्याश्चेति। (दात्रा प्रदात्रा खौता ब्रह्मदो-यो वेदयो इति भाषे नामान्तरम्) तेषामध्ययनं पञ्च कल्पानि भवन्ति। नक्षत्रकल्पो विधानकल्पो विधिविधानकल्पः संहिता शान्तिकल्पश्चेति। सर्वेषामेव वेदानामुपवेदा भवन्ति। ऋग्वेदस्यायुर्वेदः। यजुर्वेदस्य धनुर्वेद उपवेदः। सामवेदस्य गान्धर्ववेद उपवेदः। अथर्ववेदस्य यज्ञशास्त्राणि भवन्ति। "यजुर्वेदतरोः शाखाः सप्तविंशत्प्रकाशिताः। वैशम्पायननामासौ व्यासशिष्यश्चकार वै। शिष्येभ्यः प्रददौ तास्त्र ब्रह्मरातोऽथ्वनुक्रमात्। याज्ञवल्क्यस्तु तस्यासीद् ब्रह्मरातसुतो द्विजः। शिष्यः परमधर्मज्ञो गुरुभक्तिपरः सदा। ऋषिर्योऽद्य महामेरोः समाधौ नो प्रतिष्ठति। तस्य वै याज्ञवल्क्यस्तु ब्रह्मरत्ना भविष्यति। पूर्वमेव सुनिर्णीतः समयोऽयं कृतो द्विज!। वैशम्पायन एकस्तु तं व्यतिक्रान्तवांस्ततः। यस्मोयं बालकं सोऽथ पदा स्पृष्टमवातवत्। यस्मिन्यानाच्च भोः शिष्याः ब्रह्महत्याव्रतं व्रतम्। चरध्वं मत्कृते सर्वे न विचार्यमिदं तथा। अथाह याज्ञवल्क्यस्तं किमेभिर्भगवन्! द्विजैः। क्षीतिरक्षतेजोभिरिष्टेरुद्गमिदं व्रतम्। ततः क्रुद्धो गुरुः प्राह याज्ञवल्क्यं महामतिम्। सत्यतां यत् त्वयाधीतं मत्तो विप्रावमन्य च। निर्जलो वदखैतान् यत्तं ब्राह्मणभङ्गकृत्। तेन शिष्येण नार्थोऽस्ति ममाज्ञाभङ्गकारिणा। याज्ञवल्क्यस्ततः प्राह भक्त्यैतत्ते मयोदितम्। ममाध्यं त्वयाधीतं वमया तदिदं द्विज!"। श्रीपराशर उवाच "रक्तुक्ता रुधिराक्तानि वस्त्राणि यजूंषि सः। छर्दयित्वा ददौ तस्मै ययौ च स्वेच्छया मुनिः। यजूंष्यथ विसृष्टानि याज्ञवल्क्येन वै द्विज। तित्तिरीरास्तु भूत्वा तैत्तिरीयास्तु ते ततः। ब्रह्महत्याव्रतं घोरं गुरुणा चोदितैस्तु यैः। चरकाध्वर्यवस्ते तु चरणात्समुदाहृताः। याज्ञवल्क्योऽपि मैत्रेय! प्राचामपरार्धगः। लब्ध्वा प्रयतः सूर्यं यजूंष्यधिजगेऽसतः"। श्रीयाज्ञवल्क्य उवाच "नमः सवित्रे

हाराय सूक्ष्मेरमिततेजसे। ऋग्यजुःसामभूताय त्रयीधामने नमः"। श्रीपराशर उवाच "इत्येवमादिभिस्तेन स्तूयमानः स्वयं रविः। वाजिरूपधरः प्राह त्रिवताम्भिवाञ्छितम्। वाजसनेयतः प्राह प्रसिद्धत्वं दिवाकरम्। यजूंषि तानि मे देहि यानि सन्ति न मे गुरौ" श्रीपराशर उवाच "एवस्तुतो ददौ तस्मै यजूंषि भगवान् रविः। अधीतयानसंख्यानि यानि वेत्ति न तद्गुरुः। यजूंषि वैरधीतानि तानि विप्रेर्हि सोत्तम!। वाजिनस्ते समाख्याताः सूर्योंऽशः सोऽभवद्यतः। शाखाभेदास्तु तेषां वै दश पञ्च च वाजिनाम्। काण्वाद्याः सुमन्तोमाम! याज्ञवल्क्यप्रवर्त्तिताः" विष्णु० ३अंशे ५अ०। ऋग्वेदस्य संहिता यथा "ऋग्वेदतरोः शाखा व्यासशिष्यैः सुसंविधिः। क्रमेण येन भेदेन वेद! विभेद ह्येषु तन्मम। सुमन्तुस्तस्य पुत्रोऽभूत् सत्वानस्तस्य वै सुतः। अधीतवान्संहितैकां संहितां तौ महात्मनौ। शाकल्यं संहिताभेदं सुकर्मा तत्सुतस्ततः। चकार तस्य तच्छिष्यो जगृहाते महात्मतौ। स्थिरसेनामः कौसल्यः पौष्यञ्जिश्च द्विजोत्तमः। उदीच्याः सामगाः शिष्यास्तस्य पञ्चशतः स्मृताः। स्थिरसेनाह्वयस्यापि संहिता वै द्विजोत्तम!। गृहीतास्तेऽपि चोच्चक्रे, पञ्चभिस्तैः प्राच्यसामगाः। लोकाक्षिः कुथुमिश्चैव कुशीदिर्लोकक्षिस्तथा। पौष्यञ्जिशिष्यास्ते वै संहिता मतिमत्तराः। स्थिरसेनाभिधश्चैव चतुर्थस्तत्संहिताः। प्रोवाच ऋतिनाम्नोऽन्यो शिष्येभ्यः सुमहामतिः। तैरापि सामवेदोऽयं शाखाभिर्बहुलीकृतः"। अथर्ववेदस्य संहिता यथा। "अथर्वणामभोवक्त्रे संहितानां चतुष्टयम्। अथर्ववेदं स मुनिः सुमन्तुरमितद्युतिः। शिष्यमध्यापयामास कबन्धं सोऽपि तं द्विधा। कृत्वा तु वेददर्शाय तथा पथ्याय दत्तवान्। वेददर्शस्य शिष्यास्तु मोदो ब्रह्मबलिस्तथा। पौल्कायनिः पिप्पलादस्तथान्यो मुनिसत्तमः। पथ्यस्यापि त्रयः शिष्याः कुमुदादिश्च तत्तथा। शौनकः कुमुदादिश्च तृतीयः शौनको द्विज। शौनकस्तूद्विधा कृत्वा ददावेकान्तु बभ्रवे। द्वितीयां संहितां प्रादात् सैन्धवायनसंज्ञिने। सैन्धवो मुञ्जकेशश्च भिन्दन् वेदं द्विधा पुनः। नक्षत्रकल्पो वेदानां संहितानां तथैव च। चतुर्थः साङ्गिरसः शान्तिकल्पश्च पञ्चमः। वेदाचार्यत्वमासीते संहितानां विकल्पकाः"। विष्णु० ३अंशे ६अ०।

हेमाद्रि दा०ख० द्वितीय० ७अ० वेदविभागोत्पत्तयोक्तो यथा "त्रिं वेदरूपं मानस्व त्रयाणुसंख्याभेदतः। अङ्गानि चैव वेदानां तत्त्वं ब्रूहि सनातन!"। ब्रह्मोवाच "ओंकारप्रभवा वेदा गायत्री वेदमातृका। ब्रह्मणास्मै समाख्याता ब्रह्मोपाङ्गास्तथैव च। छन्दोलक्षणसंयुक्ता मातृकागर्भजाः स्मृताः। एकएव भवेद्वेदस्तदङ्गैः पुनरुक्तः। शाखार्थभेदसंयुक्तानां सङ्ख्याविनिश्चयात्। संविभक्ता मया पत्र! ऋग्यजुःसामाथर्वकाः। तत्र भेदास्तु ऋग्वेदे दश चैव प्रकीर्त्तिताः। आश्वलायनशाङ्खायनौ चैव आश्वलायनौ। बाष्कलाश्च तथा शाकलाश्च तथा। शाकलाश्च त्रिविधा भूयः! शाकला-याक्ष-मार्कवाः। तेषामध्ययनं प्रोक्तं मण्डलानि च सप्ततिः। वर्गाणां वरसङ्ख्या तु चतुर्विंशत्तानि च। ऋचां दश सहस्राणि ऋचां पञ्च शतानि च। ऋग्वेदोयमितिः पादश्च एतत् पारायणञ्च्यते। ऋग्वेदे तु भवेत्संख्या यजुर्वेदञ्च शृणुताम्। चरकाध्वर्युभेदेन मया भिन्नाः शिवाज्ञया। दशधा चरकाश्चात्र कठाश्च कठकालपाः, कठाः प्राच्यकठाश्चैव कपिष्ठलकठास्तथा। मारायणीयाः श्वेताश्च श्वेताश्वतरकैवायाः। पुनः षड्भिर्भेदेन मैत्रायण्यः प्रकीर्त्तिताः। मानवा दुन्दुभा वाराहाः हारेया हारिद्रवीयाः, श्यामाः श्यामायनीयाश्च तेषामध्ययनमुच्यते। अष्टादश सहस्राणि पाठा वेदविदोऽविदन्। द्विगुणं पदपारीयाक्षिमुखं क्रमपारगाः। षडङ्गानि यटाधीते स षडङ्गविदुच्यते। शिक्षा कल्पो व्याकरणं निरुक्तं छन्दोज्योतिषम्। षडङ्गानि भवन्त्येतानृ ऋषाङ्गानि ऋषुत्र भोः। प्रतिपदमनुपदं छन्दो मीमांसा-न्यायतर्कश्च ऋषाङ्गाः परिकीर्त्तिताः। पुराणिश्च संख्याता अष्टादश ऋषुत्र तान्"। ऋग्वेदस्य ऋगनुक्रमं प्रतिशाखानुक्रमसङ्ख्या-चरणव्यूह-आश्व-कल्पसूत्राणि परिषट्सूत्रयजुर्वेदभाष्यं प्रवराध्यायोक्तमाश्वं ऋतसंख्या निरुक्ता यज्ञपार्श्वहोतृकम्। ऋतं प्रवरोत्थानकुर्यंसूत्रसंयुतम्। संधिताः परिशिष्टास्तु ऋग्विंशतिसंख्यया। कठानां पुनर्याज्ञवल्क्यत्वारिंशच्चतुर्युतान्। प्राच्योदीच्या निरुक्ताश्च वाजसनेयास्तु पञ्च च। दशभेदविभिन्नाश्च ऋत्वा सुनिसुकृत्य!। आवाजाबोधेयाःकाण्वामाध्यन्दिनाश्च शामेयाः। सुपार्श्वितः कण्वाख्याः प्रौष्यञ्जयाश्च रसाश्विकाः। षट्सारविकाः पाराशरा

कण्वबौधायनीयाः । अयोध्या अवोपेयाश्च तेषामध्ययनानि च । हिमवद्वृद्धे शतद्रूने वेदे वाजसनेयके । अङ्गगधीयं प्रवक्ष्यातस्ततोऽन्यानि वक्ष्यामि च" । शतद्रुप्रभाषं यजुषां हि केवलम् "सखिलं काण्वीयं परिसंख्यातं ब्राह्मणम् । चतुर्विंशन्तु माध्यन्दिनैतिरीया द्विधा पुनः । ऋचेयाः खाण्डिकेयाश्च खाण्डिकाः षड्धा पुनः । काण्वेया बौधायनीया हिरण्यकेशास्तथैव च । भारद्वाजाश्चत्वार्श्च तेषां भेदाः प्रकीर्त्तिताः । अध्ययनं कौथुमिकस्तथैव प्रवचनीयं तथापरम् । सामवेदस्तु विख्यातः सप्तसप्तेदशः पुरा । अनध्यायेष्वधीयानास्तदा इन्द्रेण धीमता । वज्रेण निहताः शेषांस्तावच्छृणु यत्तम ! । राणायनीयाः कौथुमाश्चत्र भेदान् पुनः शृणु । राणायनीयाः प्रथमं सुपाद्याश्चपतांवर । काण्वेया महाकाण्वेया वाङ्कवैद्युता । कौथुमानामपि तथा चतुराचानरादयाः । प्रज्ञावैनश्चत्वाच्च परिवोढ्याः परिकायणाः । अध्ययनमपि तेषान्तु यथावत् कथितं शृणु । अष्टौ सामसहस्राणि सामानि च चतुर्दश । अष्टौ शतानि नवतीः दश सवानखिलात्मकाः । ऋक्पर्णाश्च प्रक्ष्याश्च एतं सामगणं विदुः । अथो अथर्ववेदस्य नव भेदा भवन्ति हि । पिप्पलादा दर्भदाश्च भूतावनाः कातयस्तथा । ब्रह्मवेदा ब्रह्मवेदाश्च शौनकी कुनखी तथा । वेदकर्षि-कौरविद्या तेषामध्ययनं शृणु" । पञ्चकल्पा भवन्ति "नक्षत्रकल्पोवैतानः संहिताविधिः आङ्गिरसम् । शान्तिकल्पस्य अथर्वाणो भवन्ति हि । ऋग्वेदसंहितेयं गौतमं वासुदेवं विदुर्बुधाः । काण्यश्च यजुर्वेदं रुद्रदेवन्तु तं विदुः । सामवेदोऽपि गौतमश्च भारद्वाजः पुरन्दरम् । अथर्ववेदं विज्ञानीयात् वैतानन्तु अथर्वणः" ।

वेदगर्भ पुं० वेदोगर्भे यस्य । सर्ववेदस्य प्रथमं कर्त्तरि १हिरण्यगर्भे २विप्रे च हेमच० । ३विष्णौ विष्णुस० ।

वेदन न०विद-ल्युट् । १ज्ञाने २सुखदुःखाद्यनुभवे ३विवाहे च "वसनस्य दशा प्राहा मूढयोत्तरवेदने" इति मनुः । युच् । वेदनापि तत्रार्थेषु स्त्री । सा च वैद्यमते रक्तस्य मज्जानान्तंतरक्तभेदे बौद्धशब्दे दृश्यम् ।

वेदनिन्दक पुं० ६त० । १नास्तिके जटा० २बौद्धे च ।

वेदपारग पुं० वेदानां पारमन्तं गन्तुं शीलं गच्छति गम-ड । सकलवेदाध्यायिनि । [वेदरूपत्वात्तथात्वम् ।

वेदमाट स्त्री ६त० गायत्र्यां मन्त्रभेदे तस्याः सकलपाठेन

वेदवत् पुं० वेदोऽस्यास्तीत्यर्थे मतुप् मस्य वः । १वेदाभ्यासकर्त्तरि २कुरुध्वजराजकन्यायां सीतादिरूपेऽग्निभूतायां स्त्री । "कृते युगे वेदवती कुरुध्वजसुता शुभा । त्रेतायां रामपत्नी सा सीतेति जनकात्मजा । तस्या द्रौपदी देवी द्वापरे द्रुपदात्मजा । त्रिष्वायुषोषि सा योक्ता विद्यमाना युगत्रये" ब्रह्मवै०प्र०१२अ० ।

वेदव्यास पुं० ६त० । ब्राह्मणे तस्य तत्पाठतदुक्ताचाराभ्यासात् तथात्वम् वेदावासादयोऽत्र । [दृश्ये त्रि० ।

वेदविद् पुं० वेदं वेत्ति विद-क्विप् । १विष्णौ विष्णुस० २वेदज्ञे ।

वेदव्यास पुं० वेदान् व्यस्यति विभिन्नशाखत्वेन पृथक् करोति वि+अस-घञ् । पराशरपुत्रे सत्यवतीगर्भजे १मुनिभेदे तथा भूतेषु अन्येषु २मुनिषु च ।

युगभेदे तद्भेदाश्च विष्णुपु० ३अं ३अ० उक्ता यथा पराशर उवाच "यस्मिन् मन्वन्तरे व्यासा ये ये तांस्तान् निबोध मे । यथा च भेदः शाखानां व्यासैः क्रियते मुने !! अष्टाविंशतिकृत्वो वै वेदा व्यस्ता महर्षिभिः । वैवस्वतेऽन्तरे तस्मिन् द्वापरेषु पुनःपुनः । वेदव्यासा व्यतीता ये अष्टाविंशतिसत्तमाः । चतुर्द्धा यैः कृतो वेदो द्वापरेषु पुनःपुनः । द्वापरे प्रथमे व्यस्ताः स्वयं वेदाः स्वयम्भुवा ।। द्वितीये द्वापरे चैव वेदव्यासः प्रजापतिः२ । तृतीये चोशनाः३व्यासश्चतुर्थे तु बृहस्पतिः४ । सविताः पञ्चमे व्यासो मृत्युः६ षष्ठे मृतः प्रभुः । सप्तमे च तथैवेन्द्रो७ वसिष्ठश्चाष्टमे मृतः । सारस्वतश्च नवमे त्रिधामा१० दशमे मृतः । एकादशे च त्रिवृषो११ भरद्वाज१२स्ततः परम् । त्रयोदशे चान्तरीक्षो१३ धर्म्मी१४ चापि चतुर्दशे । त्र्यारुणः१५ पञ्चदशे षोडशे तु धनञ्जयः१६ । कृतञ्जयः१७ सप्तदशे ऋक्षवृक्षो१८ऽष्टादशे मृतः । ततो व्यासो भरद्वाजो१९ भरद्वाजात्तु गौतमः२० । गौतमादुत्तरं व्यासो हर्य्यात्मा२१ योऽभिधीयते । ऋक्ष हर्य्यात्मनो वेधः मृतो वाजश्रवास्तु२२ यः । सोमो मुख्यायनस्तस्मात् तृणबिन्दु२३रिति स्मृतः । ऋक्षोऽभूद्भार्गवस्तस्मात् वाल्मीकि२४र्योऽभिधीयते । तस्मादभूत् पिता शक्तिः२५ व्यासस्तस्मात्२६(पराशरः) मुने ! । जातूकर्णो२७ऽभवत्तस्तः (पराशरादनन्तरम्) कृष्णद्वैपायन२८ स्ततः । (ततो जातूकर्णात्परम् अष्टाविंशतिमे युगे) "अष्टाविंशतिरित्येते वेदव्यासाः पुरातनाः । एकोवेदश्चतुर्द्धा तु तैः कृतो द्वापरादिषु । भविष्ये द्वापरे चैव द्वैपायनोऽसौ भविष्यति । व्यतीते मम पुत्रोऽस्मिन् कृष्णद्वैपायने मुने" ।

वेदस् पुं० विद-असुन् । वेत्तरि । जातवेदाः विश्ववेदाः ।

वेदाङ्ग न० वेदस्याङ्गमिव। "शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः। ज्योतिषामयनञ्चैव वेदाङ्गानि षडेव तु" इत्युक्तेषु शिक्षादिषु षट्सु शास्त्रेषु। तेषामङ्गविशेषरूपत्वं शिक्षायामुक्तं यथा

"छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते। ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते। शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्। तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते"।

वेदादि पु० वेदस्यादिरिव तत्पाठे प्रथमोच्चार्यमाणत्वात्। प्रणवे

वेदाधिप पु० ६त०। "ऋग्वेदाधिपतिर्वीरो यजुर्वेदाधिपो महान्। सामवेदाधिपो भौमः अथर्ववेदपः" इत्युक्तेषु जीवादिषु २विष्णौ च विष्णुस०।

वेदान्त पु० ६त०। वेदशिरोभागे ब्रह्मप्रतिपादके उपनिषद्भागे १ग्रन्थभेदे तदुपकारके २शारीरकसूत्रभाष्यादौ च उत्तरमीमांसाशब्दे १०९७पृ० दृश्यम्। शारीरकसूत्रस्य बहुभिराचार्यैः स्वस्वमतानुसारेण व्याख्यातं तत्र रामानुजपूर्णप्रज्ञशब्दयोस्तत्कृतं प्रदर्शितं शाङ्करमतानुसारि मतस्य विद्यान्तविन्दुप्रदर्शितस्य सङ्क्षेपोऽत्र प्रदर्श्यते

"वेदान्तिमते सामान्यतः द्विविध एव पदार्थः दृग्दृश्यरूप तत्रैव सर्वपदार्थानामन्तर्भावात्। तत्र दृक्पदार्थ आत्मा। स च सर्वैकरूपोऽप्यौपाधिकभेदात् त्रिविधः ईश्वरः जीवः साक्षी चेति। तत्र कारणीभूताज्ञानोपाधिरीश्वरः। अन्तःकरणतत्संस्कारावच्छिन्नाज्ञानोपहितो जीवः। जीवेश्वरानुगतसर्वानुसंधानं चैतन्यं साक्षी। तत्रेश्वरोऽपि त्रिविधः स्वोपाधिभूताविद्यावृत्तिसत्त्वादिगुणत्रयभेदेन विष्णुब्रह्मरुद्रभेदात्। तत्र कारणीभूतसत्त्वगुणावच्छिन्नो विष्णुः पालयिता। तथा रज उपहितो ब्रह्मा सृष्टा। स्थिरत्वगर्भस्तु महाभूतकारणत्वाभावान्न ब्रह्मा। तथापि स्थूलभूतसृष्टत्वेन क्वचिद् ब्रह्मेत्युपचर्यते। तथा तम उपहितो रुद्रः संहर्त्ता। इयत्त्वैकत्वेऽपि तत्र चतुर्भुजचतुर्मुखाद्याः पुमाकाराः श्रीभारतीभवान्याद्याश्च स्त्र्याकारा मत्स्यकूर्मादयोऽवतारा जीवदेवाविर्भवन्ति। तथा जीवोऽपि त्रिविधः स्वोपाधिजाग्रदाद्यवस्थात्रयभेदेन विश्वतैजसप्राज्ञभेदात्। तत्राविद्यान्तःकरणस्थूलशरीरावच्छिन्नो जाग्रदभिमानी विश्वः। स एव स्थूलशरीराभिमानरहित उपाधिद्वयोपहितः स्वप्नाभिमानी तैजसः। अयमेव शरीरद्वयान्तःकरणो, प्राक्तनैरुपहितोऽन्तःकरणसंस्कारावच्छिन्नोऽविद्यामात्रोपहितः सुषुप्त्यभिमानी प्राज्ञः। साक्षी तु सर्वान्तस्थाता सर्वानुगतस्तुरीयाख्य एकविध एव।

अविद्यातत्कर्मात्मकप्रपञ्चो दृश्यपदार्थः तस्यापारमार्थिकत्वेऽपि व्यवहारिकत्वाभ्युपगमात् स्वप्नादिवदतात्त्विकत्वम्। दृश्योऽपि त्रिविधः अव्याकृतमूलाभूतभेदात्। तत्र चिदाभासवच्छिन्नाऽविद्या मूलाभूतप्रपञ्चस्य बीजशक्तिरनादिरव्याकृतमित्युच्यते। दृश्यत्वाव्याकृताख्याऽविद्येश्वरोपाधिः। सा च स्वयं जड़ाप्यजड़ेन चिदाभासेनोज्जीविता पूर्वपूर्वसंस्कारजीवकर्मभ्यां प्रयुक्ता सती शब्दस्पर्शरूपरसगन्धाश्रयाख्याकाशवायुतेजोजलपृथिव्यात्मकानि पञ्च सूक्ष्मभूतानि जनयति। तत्र पूर्वपूर्वभूतभावापन्नाया एवाविद्याया उत्तरोत्तरभूतं प्रतिकारणत्वात् पूर्वपूर्वभूतगुणानामुत्तरोत्तरभूतेष्वनुप्रवेशाद् भूतानामेकैकवृद्धीभूतगुणशक्तित्वं तथा चाकाशस्य शब्दो गुणः, वायोः शब्दस्पर्शौ, तेजसः शब्दस्पर्शरूपाणि, जलस्य तानि रसश्च, पृथिव्यास्तानि गन्धश्चेति। आकाशस्यैव दिग्व्यवहारजनकत्वेन दिशो न पृथक् पदार्थता। आकाशस्य चिज्जड़सम्बन्धरूपतया तदाधाराविद्याप्रकृतया च न पार्थक्यम्। तानि च सूक्ष्माणि पञ्च भूतानि अमूर्त्तान्याकाशभेदाच्च सत्त्वरजस्तमोगुणात्मकानि सत्त्वरजोऽंशप्राधान्येन ज्ञानक्रियाशक्त्यात्मकमेकं सूक्ष्मद्रव्यं चिद्रूपमिव मिलित्वा जनयन्ति। तच्च समस्तं द्रव्यं ज्ञानशक्तिप्राधान्येऽन्तःकरणं तदपि द्विविधं मनोबुद्धिभेदात् षड्विधं मनोबुद्ध्यहङ्कारचित्तभेदादित्यन्ये। तदेव क्रियाशक्तिप्राधान्ये प्राणः। स च पञ्चधा प्राणादिभेदात्। एवमेकैकभूतेभ्यो ज्ञानक्रियाशक्तिभेदात् प्रत्येकं ज्ञानकर्मेन्द्रियद्वयं जायते। यथाकाशात् श्रोत्रवाचौ, वायोस्त्वक्पादौ, तेजसश्चक्षुःपायू, जलाद् रसनापायू, पृथिव्या घ्राणोपस्थौ चोत्पद्येते। तत्र शब्दस्पर्शरूपरसगन्धाश्चाकाशि श्रोत्रत्वक्चक्षुःरसनाघ्राणाख्यानि पञ्च ज्ञानेन्द्रियाणि वचनादानगतिविसर्गानन्दजनकानि वाक्पाणिपादपायूपस्थाख्यानि पञ्च कर्मेन्द्रियाणि। एतच्च सर्वं मिलित्वा सप्तदशकं लिङ्गशरीरम्। तच्च ज्ञानशक्तिप्राधान्येन समष्टौ हिरण्यगर्भ इति क्रियाशक्तिप्राधान्येन समष्टौ सूत्रमिति चोच्यते। अयं मूर्त्तपदार्थः कार्यत्वात्। समष्टिव्यष्टिजीवोपाधिसूक्ष्मभूतानि तु भोगायतनं शरीरं भोग्यविषयञ्चान्तरेण भोगं जनयितुमसमर्थानीति जीवकर्मप्रयुक्तानि तानि स्वीयांशं पञ्चीकृतानि म०

वन्ति। तथा हि सर्वाणि भूतानि ब्रह्मादीं शे खेतरभूतानां चतुर्थांशेऽवस्थितानि त्रिपादोऽमृतमित्यादिश्रुतेः सर्वाण्येव प्रधानानि। ब्रह्मांशाधिक्याद्ब्रह्माण्यादिव्यवहारः। तानि च यद्यीकृतानि महाभूतानि भूतौघाणि विशिष्यैकं कार्यं भिन्द्रियाण्यासंधिष्ठानं जनयन्ति। तदेव स्थूलशरीरमित्युच्यते। तत्र सत्त्वप्रधानं दैवं शरीरं रजःप्रधानं मानवं तमःप्रधानं तिर्यगादिस्थावरान्तानाम्। सर्वेषां देहानां पाञ्चभौतिकत्वेऽपि चित्रे रूपाणामिव भूतानां क्वचिद्भूयोतिरेको न विवक्ष्यते। विष्वा अपि चतुर्दशभुवनाख्या घटादयश्च सत्त्वरजस्तमोऽंशतारतम्येन तेभ्य एव भूतेभ्यो जायन्ते। एतच्च सर्वं ब्रह्माण्डं विराडिति चोच्यते। सर्वं च सृष्टिप्रलयादिकं स्वप्नसृष्टि प्रलयवदज्ञानकल्पमपि अनादिवासनाद्ार्ढ्यात् अवधारणमिति मायिकत्वेऽपि न तुच्छत्वप्रसङ्गः। अन्यदाकरे द्रष्टव्यम्। [शाङ्करे जटा०।

वेदान्तिन् त्रि० वेदान्तो ग्रन्थत्वेनाऽस्त्यस्य इनि। वेदान्तग्रन्थाध्येतरि।

वेदाभ्यास पु० ६त०। "वेदस्योच्चारणं पूर्वं विचारोऽभ्यसनं जपः। तद्ज्ञानञ्चैव शिष्येभ्यो वेदाभ्यासो हि षड्विधः" दक्षोक्तेषु वेदपाठविचारानुशीलनतन्मन्त्रजपपाठनेषु।

वेदि न०विद+इन्। १धर्म्यायाम् (आङ्गनादि) २परिष्कृतायां भूमौ स्त्री अमरः वा ङीष्। "अर्धेन सा वेदिविलग्नमध्या" कुमारः। २परिष्कृते पु० ४अङ्गुलिसंख्यायां स्त्री मेदि०। ३स्रुक्संस्तरपरिष्कारकरणक्रियाकालरूपे च "प्राग्द्वारवेदिविनिवेशितपूर्णकुम्भः" रघुः। ४भूमिस्थे देशभेदे यथा अन्तर्वेदि उत्तरवेदिः दक्षिणवेदिरित्यादि। वेदिश्च डमरुकाकारपिण्डकावती पशुबन्धार्थं होमीयद्रव्यावहनार्थं वा कृतसंस्कारा परिष्कृता चतुरस्रादिरूपा भूमिः। तदादानाद्यङ्गमन्त्रपरस्त्रेदिलक्षणं ज्ञेया। दा० उक्तं यथा "बध्नोत्तमवेदिं मन्त्रपरस्त्रिभागतः। चतुर्थांशोच्छ्रितिस्तस्यास्त्रिभक्तप्रमुखतोऽपि वा। सर्वैकादशधारा वा दृष्टकाभिः प्रकल्पयेत्"। वेदिकर्मांङ्गवेदिलक्षणादिकं कात्या०श्रौ०२।६।१स्त्रादौ उक्तं यथा "अपरेणाहवनीयं वेदिं मिनोति" कात्या०श्रौ०। "अप्रक्रुष्टमातम्" सू०"अप्रक्रुष्टं स्तृणन्ति"कर्क०। "आमपात्रात् पश्चात्" सू० "अपरस्यां दिशि तिर्यक्प्रमाणेन चतुररत्निमात्रां कर्क०। "अरत्निं प्राचीम्" सू०"अरत्निं प्राचीम् मुष्टिपरावतां दीर्घाम्। इरत्नात् (पूर्वपार्श्वं) तिर्यक्प्रमाणं यद्यपि नोक्तम्। तथाप्यरत्नि तत्प्रमाणमेव दर्शनात्" कर्क०। "अपरिमितां वा" सू०"अस्मिन् सूत्रे यत्ते द्वावपरिमितशब्दौ श्रुतिवाक्यानुसरणादपरिमाणवाचिनौ अपरिमिता वा अपरिमितेऽका वेति च। अन्ये तु अपरिमितं प्रमाणाद्भूय इत्युक्तत्वात् पूर्वोक्तपरिमाणादतिशयेनाधिकपरिमाणवाचकः" कर्क०। "प्राक् प्रवर्गासदस्यां" सू० "प्रवर्ते उक्तिनाधोऽनेन वेति प्रवर्ग्यं नीयम् प्रवर्त्तते वा वनसदकमक्तिति तदेव निम्नम्" कर्क०। "मध्यसंस्तीर्णाम्" सू०"तत्प्रसाधनप्रकारश्च परिशिष्टे उक्तः "आनीय रज्जुं पूर्वार्द्धात् पश्चार्द्धं यावदेव तु। द्विगुणीकृत्य तां रज्जुमन्ते तस्यास्तु मङ्कुकौ। आश्रयणेन मानेन तया रज्ज्वाऽथमायया। वा मृदुस्थदरीदेश भागेनालिखेत्संप्रदायिति" क्वचित् "वेदिश्रोण्यंसयोर्मध्ये तया रज्ज्वाऽथमायेति पाठः" कर्क० "अस्मिन्नभितोऽसौ" सू० "अंसौ आग्नेयेशानकोणौ आहवनीयसदसतो अतः अंसयोर्मध्ये आहवनीयो भवतीत्यर्थः अतोऽसावपि वेदेरेवावयवौ श्रोणिवत् खननसंस्कारादयश्च वेदिसम्बद्धाः संस्कारास्तयोरपि प्रवर्त्तन्ते। अष्टरत्निं रज्जुं मित्वा द्वितीयारत्न्यन्ते लक्षणं चोत्पादनार्थम् ततोऽरत्नेचतुर्थे भागे लक्षणमार्गसंधार्थम् तृतीयारत्न्यन्ते प्राच्यानुत्पादनार्थम् ततश्चतुर्थभागोने(अरत्नौ) अक्षानुत्पादनार्थम् ततः सार्द्धेऽरत्नौ पाश्च इति अयं च पाशोऽविपर्य्यासेन साधनोपायः विपर्यासपक्षे तु अष्टरत्निं रज्जुमभयतः पाशौ कृत्वा प्रथमं सार्द्धारत्न्यन्ते अक्षानुत्पादनार्थम् ततोऽर्धारत्नौ श्रोण्यनुत्पादनार्थम् ततोऽरत्नेचतुर्थे भागे लक्षणसंधार्थम् अरात्नत्रये च प्राच्यानुत्पादनार्थमिति। अपरिमितपक्षाश्रयणे च प्राचीप्रमाणं पुरस्तात्तिर्यक्प्रमाणं च तत्तत्र पश्चात्तिर्यक्प्रमाणं प्राचीप्रमाणं तृतीयभागेनाधिकमिति युक्त्या कल्पनीयम्। तत्र च प्राचीप्रमाणां रज्जुं द्विगुणीकृत्य रज्ज्वर्द्धात् पुरस्तात्तिर्यक्प्रमाणा यत्रं मूलरज्जोश्चात्रिंशत्तमभागस्थादौ लक्षणार्थं लक्षयितिं। अथ खननप्रमाणे पश्चान्नरमाह "आमूलक्षेदनादोषधीनाम्" सू० "प्राक् प्रवर्गासदस्येत्यतः प्रकृतानुषङ्गेणेह तिस्रोवेत्यनेन वाशब्दोऽनुवर्त्तते छिद्यन्ते वा। अक्षिणे एव एव विशेषमाह" कर्क० "ओषधीनां मूलान्युच्छिद्यन्ते न यात्" सू० "दर्भं प्रैषमन्त्रपूर्वमुत्पाटयति प्रति न यात्। मूलानि च भूमिमध्ये दूरमपि यावत् प्रवर्त्तन्ति तावत्पर्यन्तम्" कर्क०। "आहार्यपुरीषं दक्षिणाग्नेयं" सू० "मासतुमार्जनादेः शकाशादिति पुरीषमपनेय

कार्यान्वत् पुरीषभानीव वेदिमध्ये प्रक्षेपणीयम् एतद् पुरुषार्थम् प्रयत्नेन कांस्यादिवत् अतस्व विक्रतो न भवति। निष्कामेष्वपि वेदिः पुरीषवत्येव कार्या वेदिपुरीषं मन्त्रेव लिखति न ततो निष्क्रामयते वचनाभावात्। ज्ञाता वेदिः नाङ्गिः सम्स्कारकार्या किन्तु पांशुनेव कार्या कर्त्रः। "वेदिं परिसमूह्य वितृतीयेऽग्नीदुत्तरत उत्करं करोति" सू० "अन्वाहार्यादिधवनानन्तरं प्रथमं वेदिमानमध्वर्युः करोति यवोक्तम् "ततोऽग्नीद्धैर्वेदिमध्यपतितं तृणपुरीषादिकमपवार्य वेदेरुत्तरतः परिसमूह्य तृणपुरीषादुत्करं राशिं करोति उल्लेखनं इत्युत्करः। वितृतीयं च वेदेः प्रक्रमतत्वादग्नीदीयमेव गार्हपत्याहवनीयान्तरालं वितृतीयं च शुल्बसूत्रोक्तम् गार्हपत्याहवनीययोरन्तरं मेढा सप्तधा वासन्तुषं त्रेधा विभज्यापरवितृतीयभागेन दक्षिणायम्य तस्मिन्नग्नि विपर्यस्योत्तरत उत्कर इत्येकः प्रकारः। अपि वान्तर त्रिभागेनया रज्ज्वा पूर्वार्द्धं समचतुरस्रं कृत्वा श्रोणीसूत्रमिति विपर्यासोत्तरांस उत्कर इति विपर्यासवैवम् पूर्वतृतीयभागेनोत्तरत आवपतीति प्रथमे प्रकारे गार्हपत्याहवनीययोरन्तरत्रिभागेनया रज्ज्वापरार्द्धं समचतुरस्रं कृत्वा तस्य चतुरस्रस्योत्तरांसे उत्कर इति द्वितीय प्रकारः। चात्वालोत्करावन्तरेण सप्तदशः सन्निहितो हि चात्वालोत्करः पूर्वविनृतीये भवतीति" कर्क०। तत्करश्च प्रकारस्तत्रत्यपद्धतौ दृश्यः।

वेदिका स्त्री वेदिरिव स्वार्थे कन्। मनुष्यकर्षणं कृष्टद्वारादौ चतुरस्रादिस्थितिकाभूमाकारेण निर्मिते भूमण्डले वितर्दौ अमरः। [हेमच०।

वेदिजा स्त्री वेद्या होमवेदितो जायते जन-ड। द्रौपद्याम्

वेदिष्ट त्रि० विद्-तृच् इट् च। प्राप्तरि हेमच०।

वेदिन् पु० विद्-णिनि। १पण्डिते भट्टर०। २स्थिरचित्तमर्मज्ञे च। ३ज्ञातरि त्रि० स्त्रियां ङीप्।

वेध पु० विध-घञ्। (वेँध) १वेधने २व्यधाने (चाड़ा) "परिधिनवभागः शूकधान्येषु वेधः" इति लीला०। विवाहादौ वर्ज्ये नक्षत्रविशेषस्थितसप्तभेदजातवंशेषु च उपयमशब्दे ज्यो०त० ३ व्यधम् "वेधं सर्वत्र वर्जयेत्"।

वेधक पु० विध-ण्वुल्। १कर्कूरे त्रिका०। २व्यधकरणे ३धन्वाके न० राजनि० ४वेधकर्त्तरि त्रि०।

वेधनी स्त्री विध्यतेऽनया विध-ल्युट् ङीप्। (भोंकरी) शरशिरस्त्रादिवेधकारके व्यधभेदे। स्वार्थे क। तत्रार्थे २मेषिकायां रजनि०।

वेधमुख पु० ७त०। १कर्कूरे राजनि०। संज्ञायां क। २कर्कटशृङ्गाटके अमरः।

वेधस् पु० वि+धा-असुन् गुणः। १विरञ्चिब्रह्मणि जगत्स्रष्टरि २विष्णौ अमरः। ३सूर्ये ४श्वेतार्कवृक्षे शब्दच०। ५पण्डिते त्रिषु ६सूर्यवंशजे राजभेदे पञ्चपु०।

वेधित त्रि० वेधो जातोऽस्य तारं० इतच्। १विद्धे २क्षिप्ते अमरः। [२मेषिकायां राजनि०।

वेधिनी स्त्री विध-णिनि। १अलोकायाम् (जौंक) शब्दर०।

वेधा स्त्री वन-न उपधायाः दीर्घः। नदीभेदे "विनदीं पिञ्जलां वेधां(धाम्) तङ्गवेणां(णां) महानदीम्" भा०भी०१८अ०।

वेप कम्पने भ्वा०आत्म०सक०सेट्। वेपते अवेपिष्ट। अदित्वेऽपि न छुक्। डित्। वेपथुः।

वेपथु पु० वेप-अथुच्। कम्पे अमरः।

वेपन पु० वेप-ल्युट्। कम्पने शब्दच०।

वेपस् न० वेप-असुन्। अनवद्ये उणादिकोषः।

वेम पु० वे-मन् न आत्वम्। वायटखड़े शब्दच०। अनिन् च आत्। वेमन् अत्रैवार्थे पु०न० अमरः।

वेर न० अज-रन् वीभावः। १दीने २स्वार्त्तानौ ३शत्रौ च अमरः। संज्ञायां कन्। ४कर्कूरे धरणिः।

वेल भाषने भ्वा०पर०सक०सेट्। वेलति अवेलीत्। अदित्वेऽपि न छुक्। [चेत् न।

वेल कालोपदेशे अ० पु० उ०सक० सेट्। वेलयति ते अविवेलत

वेल न० वेल-अच्। १समये हेमच०। २काले समये ३मर्यादायां ४वसन्तद्रुमे च स्त्री "वेलाभूते विभावरी परिक्षीणा" भट्टिः। ५क्षीरालाबौ वाचस्पतिः "चतुर्विंशतिवेलाभिरक्षीरालं प्रचक्षते" अग्निपु०। ६वसन्तद्रुमवृक्षविकारे ७अक्षिप्तमरणे दरामे ८ईश्वरभोजने च मेदि० अक्षोक्षादित्वमिष्यन्ते अतार्थे।

वेलाकूल न० सप्तमितत्पुरुषे त्रिका०। [अवेलीत्।

वेल्ल भाषने भ्वा०पर०सक०सेट् अदित् अछि न छुक्। वेल्लति

वेल्ल पु०न०वेल्ल-अच्। १विड़ङ्गे अमरः। वज्रे। २चलने पु०

वेल्लज पु० वेल्ल-अच्-तत्त्वाभूतः अन् जायते जन-ड। मरिचे अमरः।

वेल्लन न० वेल्ल-ल्युट्। १अश्वादेर्भ्रमौ सुखदने २काललिङ्गे पदार्थे (वेलुन) भावप्र० ३मालादुर्वायां स्त्री राजनि०।

वेल्लन्तर पु० वेल्लं तरति तृ-अच्। वीरतरौ "वेल्लन्तरोज्ञ इति वीरतरः प्रसिद्धः वेलाविलासविधिरोचितवीर-

पुष्पः । आख्यातिसुल्लकुटजः शमिच्छत्रपत्रः स्वादुक-
ण्ठकी च जवदेशज एष वृक्षः । वेल्लन्तरो रसि पाठे
तिक्तरसः श्यावफलपत्रः । मूलाधातः प्रकाशत्वाद्धी वोनि
मूत्रानिलार्त्तिकृत् भावप्र० । (जटा० ।

वेल्लहल पु० वेल्लं चलयति चल-अच्-मुमो० । केलिनागरे

वेल्लि स्त्री वेल्ल-इन् । लतायां शब्दर० ।

वेल्लित न० वेल्ल-भावे क्त । १गमने मेदि० । कर्त्तरि क्त ।
२कम्पिते १कुटिले च त्रि० अमरः ।

वेल्लि(ल्ली) स्त्री वेल्ल-इन् वा ङीप् । लतायाम् शब्दच० ।
संज्ञायां कन् वेल्लिका । (वेजहठ) वृक्षे शब्दच० ।

वेवी कान्तौ गतौ व्याप्तौ क्षेपे भोजने च सक० प्रजनने अक०
अदा०आत्म० सेट् जयादि० वैदिक एवायम् । वेवीते
अवेविट । अस्य क्वचिदपि गुणहीनो न स्तः ।

वेश पु० विश-घञ् । अलङ्कारादिना कृतरूपान्तरे १नेपथ्ये च
कर्म्मणि च अमरः । २वेश्यान्तरे १गृहभाण्डे मेदि० ४प्रवेशे

वेशधारिन् पु० वेशं धारयति धृ-णिनि । छद्मना रूपान्त-
रधारिणि १अन्यतरलिङ्गस्थितौ शब्दच० । २वेशकारके
नटादौ च । शाहि० ।

वेशन्त पु० विश-झच् । १क्षुद्रसरोवरे अमरः । २अम्बो ख-

वेशर पु० वेशं राति रा-क । अश्वतरे त्रिका० ।

वेश्मन् न० विश-मनिन् । गृहे अमरः ।

वेश्मभू स्त्री ६त० । गृहकरणयोग्ये स्थाने अमरः ।

वेश्य न०विश-यत् वेश्याय हितं वा यत् । १वेश्यागृहे मेदि०
२पाठायाम् (आकनादि) ३वारयोषिति च स्त्री अमरः ।
"पतिव्रता चैकपत्नी द्वितीये कुलटा स्मृता । तृतीये
दुश्चली प्रोक्ता चतुर्थे पुंश्चली स्मृता । वेश्या च पञ्चमे
प्रोक्ता छट्टी च सप्तमेऽहनि । तत ऊर्द्धं भवेद्वेश्या सा-
धारणस्त्री सर्वजातिषु । यो द्विजः कुलटां गच्छे द्वयोर्द्वी
पुंश्चलीमपि । छट्टीं वेश्यां भजेद्वेश्यागृहदोषं प्र-
याति सः । शतावरं कुलटागामी षष्टागामी चतुर्वर्षम् ।
षड्वर्षं पुंश्चलीगामी वेश्यागामी शुभाष्टकम् ।
छट्टीगामी दशवर्षं वसेत्तत्र न संशयः । सप्तवेश्या
मासुकस्य ततः शतवर्षं वसेत् । तदेव सर्वगामी चेत्तत्र-
स्थाश्च पितामहः । तत्रैव यातनां भुङ्क्ते यमदूतैस्तु ता-
डितः स तिर्य्यग्गतिः कुलटागामी षष्टागामी च वायसः ।
काकिलः पुंश्चलीगामी वेश्यागामी बकस्तथा । छट्टी
गामी शूकरश्च सप्तजन्मसु भारते । सप्तवेश्यागामि-
श्च जायते मालुमद्विजः" ब्रह्मवै०प्र०ख०२८अ०।

वेष पु० विष-घञ् षत्वं वा । भूषणादिना १रूपान्तरकरणे
२वेशग्राजनायके च भरतः ।

वेषण पु० विष-करणे ल्युट् । १कासमर्दे (कासडाकुन्दे)
शब्दर० । २धन्याकवृक्षे स्त्री रत्नमा० । [अवि(व)वेष्टत त]

वेष्ट वेष्टने भ्वा०आत्म०सक०सेट् । वेष्टते अवेष्टिष्ट । चङि त

वेष्ट पु० वेष्ट-घञ् अच् वा । १वेष्टने २श्रीवेष्टे राजनि०
३कञ्चनिर्य्यासे च (काटा) वैद्यकम् ।

वेष्टक न०वेष्ट-ण्वुल् । (गामड़ी)१श्रीवेष्टे शब्दर०।२कुशाख्ये
राजनि०। ३प्राचीरे पु०हेमच० । ४वेष्टनकारके त्रि० ।

वेष्टन न० वेष्ट-करणे ल्युट् । १कर्णशष्कुल्याम् २श्रीवेष्टे
३सङ्कटे च ४गुग्गुलौ शब्दच० । भावे ल्युट् । ५वृतौ
मेदि० ।

वेष्टवंश पु० वेष्ट-अच् कर्म० । (वेड़वाँश) वंशभेदे शब्दच०।

वेष्टसार पु० वेष्टस्य सारः । श्रीवेष्टे राजनि० ।

वेष्टित त्रि०वेष्ट-क्त । प्राचीरादिना १आवृते अमरः । २वद्धे
४व्याप्ते ३करणान्तरे न० मेदि० । [अवेष्टीत् ।

वेस गतौ भ्वा०पर०सक०सेट् अदित् चङि न ह्रस्वः । वेसति

वेसन न० वेष-ल्युट् । "दालयश्चणकानान्तु निस्तुषा यन्त्र-
पेषिताः । तच्चूर्णं वेसनं प्रोक्तम्" रत्नमा० १चण-
कादिद्विदलचूर्णे २गमने च ।

वेसर पु० वेष-अरन् । अश्वतरे हेमच० ।

वेसवार पु० वेषं वारयति इ-अच् । (बाटना) पिष्टधान्या-
वसर्षणादौ अमरः । "निरस्थि घिग्रितं पिष्टं त्रिवृद्गुड-
घृतान्वितम् । कृष्णमरिचसंयुक्तं वेसवारं इति स्मृतम्"
इत्युक्ते २भक्ष्यभेदे अस्य गुणाः "वेसवारो गुरुः स्निग्धो
बलोपचयवर्द्धनः" राजवल्लभः । अस्य समध्यत्वं समध्यत्वं
वा रायमुकुटे दृष्टम् । [अवेष्टिष्ट ।

वेह्य यत्ने भ्वा० आत्म० अक० सेट् चङि न ह्रस्वः । वेहते

वेहत् स्त्री वि+हन क्विप् तलोपः । गर्भोपघातिन्यां स्त्री-
याम् अमरः । आत्मा समासे परनि० । गोवेहत् त्रि०को०

वेहार पु०वि+हृ-घञ् पृषो० । अनामख्याते देशभेदे [ह्रस्वः

वेह्ल गतौ भ्वा०पर०सक० सेट् । वेह्लति अवेह्लीत् चङि न
ह्रस्वः । वैं शोषे भ्वा०पर०अक० सेट् अनिट् । वायति अवासीत् ।
ओदित् निष्ठातस्य नः । वानः निर्वाणः ।

वै अव्य० वा-डै । १पादपूरणे २अनुनये ३सम्बोधने अमरः ।

वैकक्ष न० विशेषेण कक्षति व्याप्नोति अच् । तिर्य्यक्कक्षाव-
स्थानि १हारभेदे हेमच० । वुन् । वैकक्षक परिच उप-
वीताकारेण धृते मालाभेदे अमरः ।

वैकङ्कत पु॰विकङ्कत+स्वार्थेऽण्। (वैँचि) १वृक्षभेदे। तस्येदमण्। २विकङ्कतसम्बन्धिनि त्रि॰। [२पक्षभवे च।

वैकल्पिक त्रि॰विकल्पेन प्राप्तः तत्र भवो वा ठक्। १पक्षप्राप्ते

वैकल्य न॰ विकलस्य भावः ष्यञ्। विकलत्वे।

वैकुण्ठ पु॰ विकुण्ठायां भवः अण् विविधा कुण्ठा माया यस्य स्वार्थेऽण् वा। १विष्णौ २इन्द्रे मेदि॰। ३सितार्जके राजनि॰ "चाक्षुषस्यान्तरे देवो वैकुण्ठः पुरुषोत्तमः। विकुण्ठायामसौ जज्ञे देवतैः सह" विष्णुपु॰"विविधा कुण्ठा गतेः प्रतिबन्धिसंज्ञाः कर्त्तृ इति वैकुण्ठः। जगदारम्भे विभिन्नानि भूतानि परस्परं संश्लेषयन् तेषां गतिं प्रत्यवरुन्धादिति वा वैकुण्ठः। "माया संश्लेषितामूर्मिरङ्गिव्योम्ना च वायुना। वायुश्च तेजसा सार्द्धं वैकुण्ठत्वं ततो मम" भा॰शान्तिप॰। विष्णुस॰ भा॰। "कुण्ठं जडत्वं विशेषं विशिष्टत्वं करोति या। विकुण्ठां प्रकृतिं वेदाश्चत्वारश्च वदन्ति ताम्। गुणाश्रयेण भगवान् तस्यां जातः स्वहृदये। परिपूर्णतमं तेन वैकुण्ठञ्च विदुर्बुधाः"। ४विष्णुधाममेदे "उपरिष्टात् क्षितेरस्तु कोटिरष्टादश प्रभो!। यत्रास्ते श्रीपतिः साक्षात् सर्वेषामभयप्रदः" पद्मपु॰स्व॰ ६अ॰।

वैकृत न॰ विकृतस्य भावः अण्। १विकारे २बीभत्सरसे तदा जन्यनर्मांसशोणितादौ विकृतिः प्रयोजनमस्य अण्। ३विकृतियुते जाते त्रि॰ "वैकृतास्तु तथा देवाः"।

वैक्रान्त न॰ स्वार्थे अण्। मणिभेदे विक्रान्तशब्दे दृश्यम्।

वैखरी स्त्री विशेषेण खं राति रा-क स्वार्थे अण्। अर्थबोधके कण्ठादिस्थानार्ज्यमाणे वर्णात्मके शब्दविशेषे। वर्णशब्दे ४८५॰ पृ॰ दृश्यम्।

वैखानस पु॰ वि+खन-ड अन-अच्छन् कर्म॰ स्वार्थे अण्। वानप्रस्थे तापसभेदे "वैखानसेभ्यः श्रुतराभवात्तैः" भट्टिः

वैगुण्य न॰ विगतो विरुद्धो वा गुणोऽस्य तस्य भावः ष्यञ्। यत्र यदुचितं तस्य १रूपान्तरतापादने २अन्यायत्वे ३असम्भवत्वे च। [अयत्वे च।

वैचित्र्य न॰ विचित्रस्य भावः ष्यञ्। १नानारूपत्वे २विस्मये ३कौशले ४कामशास्त्रोक्ते ५रतिभेदे च।

वैजयन्त पु॰ विजयते वि+जि-भ स्वार्थे अण्। १इन्द्रप्रासादे अमरः। २इन्द्रे मेदि॰। ३गृहे शब्दच॰। ४इन्द्रध्वजे मेदि॰। ५अग्निमन्थवृक्षे राजनि॰ ६पताकायाम् स्त्री अमरः। ७वैजन्तीवृक्षे च स्त्री मेदि॰।

वैजिक न॰ बीजेन निर्वृत्तं ठक्। १शिग्रुतैले मेदि॰। बीजाय हितम् स्वार्थे ठक् वा। २कारवे। ३बीजनि शब्दमा॰ तत्रेदं बीजादागतं वा ठञ्। ४सद्योजाताङ्कुरे मेदि॰ ५बीजसम्बन्धिनि त्रि॰।

वैज्ञानिक पु॰ विज्ञानाय साधु ठक्। १निपुणे अमरः। विज्ञानमधिकृत्य कृतो ग्रन्थः ठक्। २बौद्धागमे ३तदध्येतरि ४तत्सम्बन्धिनि च त्रि॰।

वैडालव्रत न॰विड़ालरूपेदम् अण् तदिव व्रतम् "यस्य धर्मध्वजो नित्यं प्रकटश्चल इवोच्छ्रितः। प्रच्छन्नानि च पापानि वैडालं नाम तद्व्रतम्" इत्युक्ते प्रकाशेन धर्माचरणेन गुप्तपापाचारे।

वैडालव्रतिक पु॰ वैडालव्रतमस्यास्य ठन्। छद्मेन धर्मचारिणि कृत्रिमतापसे त्रिका॰। इनि। वैड़ालव्रतिन् तत्रार्थे "छद्मना चरितं तस्य व्रतं रक्षसि गच्छति। अविद्वान् लिङ्गवेषेण यो लिङ्गिषूपजीवति। स लिङ्गिनां हरेत् पापं तिर्य्यग्योनौ च जायते"। वैड़ालव्रतिनः पापाः सर्वधर्मविनाशकाः। सद्यः पतन्ति पापेषु कर्मचस्य तत् फलम्" कूर्मपु॰ ५अ॰।

वैणव न॰वेणूनां फलम् अण्,तस्य न लुप् तस्येदं वा अण्। १वेणुफले वेणुयवे अमरः। २वेणुसम्बन्धिनि त्रि॰स्त्रियां ङीप्।

वैणविक त्रि॰ वेणोर्विकारः अण् वैणवं वेणुवाद्यं शिल्पमस्य ठक्। वंशीवादके अमरः। [अमरः।

वैणिक त्रि॰ वीणा तदादनं शिल्पमस्य ठक्। वीणावादके

वैणुक न॰ वेणोर्विकारः ठक्। १गजचालनार्थे लौहसूचे वंशदण्डे अमरः। वेणुस्तदादनं शिल्पमस्य ठक्। २वेणुवादके त्रि॰ शब्दच॰। [रूपभेदे जटा॰।

वेण्य न्य) पु॰ वेण(न)स्यापत्यम् यञ्। १वेणुसुते पृथुनामके

वैतंसिक त्रि॰ वितंसेन शकुनपञ्जरादिबन्धनोपायेन चरति ठक्। मांसविक्रयोपजीवके व्याधे अमरः। [शल्यादौ अमरः।

वैतनिक त्रि॰ वेतनेन जीवति ठक्। वेतनोपजीवके कर्मकरे

वैतरणि(णी) स्त्री वितरत्येन दानेन तरत्यनया अण् ङीप् वा पृषो॰ तुडागः। यमद्वारस्थे नदीभेदे "नदी वैतरणी नाम दुर्गम्या रुधिरावहा। उष्णतोया महावेगा अस्थिकेशतरङ्गिणी" भा॰वि॰ अमदग्निः। तस्या वस्तूत्पत्त्यादि वाह्निपु॰ १८अ॰ उक्तं यथा

"शनैश्चरोऽपि भूतेशमासाद्यान्तर्हितस्तदा। बाष्पवृष्टिं दुराधर्षामवजघ्राह मायया। यदा च नाशकत् बाष्पान् सम्भारयितुमर्जुनः। तदा महागिरौ क्षिप्ता बाष्पास्ते

जलधारजे । लोकालोकस्य निकटेजलधाराकृतो गिरिः । पुष्करद्वीपपृष्ठस्थस्तोयसागरपश्चिमे । स तु सर्वप्रमाणेन मेरुपर्वतसन्निभः । तस्मिन् विन्यस्तवान् वाय्वान् न धर्त्तुं क्षम रेचितः । विदीर्णस्तेन वाय्वोर्मध्यमध्योऽभवद्भुतम् । ते वाय्वाः पर्वतं भित्त्वा विविशुस्तोयसागरम् । सागरोऽपि गृहीत्वा तान् ययाच खरानति । ततस्तु सागरं मध्ये भित्त्वा वाय्वाः समागताः । तोयधेः प्राग्भवां वेलां खण्डमात्रादविभेद तान् । विभिद्य वेलां ते वाय्वाः पुष्करद्वीपमध्यगाः । नदी वैतरणी भूत्वा पूर्वसागरमाऽभवत् । जलधारस्य वेगेन संसर्गात् सागरस्य च । लवणाम्बुमयतां किञ्चिद् वाय्वाम्बे नाभिदन् क्षितिम् । तदाम्बुव्याकुला पृथ्वी विद्रीर्णा खात्र चेष्कनिः । अवलग्नाश्च तान् वाय्वान् सोऽपि क्षुब्धोऽभवद्बलात् । अनेश्वरेण तं वोढुमसमर्थेन क्षोतकैः । क्षिप्तैर्विदारितः सोऽब्धौ जलधारो महागिरिः । विभिद्य पर्वतं मध्येवाँम्बे सागरं ययुः । वैवस्वतपुरद्वारे योजनद्वयविस्तृता । अद्यापि तिष्ठत्यापगा क्षरत्तोयसमन्विता । भित्त्वा वेलां ततः पृथ्वीं विभिद्याशु तरङ्गिणीम् । चक्रुर्वैतरणीं नाम्ना पूर्वसागरगामिनीम् । नानायानविमानेन न क्षौण्या छन्दनेन च । तर्त्तुं शक्या सा तु नदी तप्ततोया विभीषणा । दुःखेन तां तु पृथिवी बिभर्त्ति मकृताधुना । सदा वोढुं गतेर्वोम्नैर्विक्षिपन्ति नभश्चरान् । तस्या उपरि नो यान्ति देवा अपि भयाकुलात् । यमद्वारं समाश्रित्य योजनद्वयविस्तृता । निम्नं वहति संपूर्णा भीषयन्ती जगत्त्रयम्" २पितृकन्याभेदे "यमस्यानन्त यज्ञानः पितरो ब्रह्मणः सुताः । अग्निष्वात्ता बर्हिषदो द्विधा तेषां व्यवस्थितिः । तेभ्यः स्वधा, स्वधा यस्ते मेनां वैतरणीं तथा" कूर्मपु० ३२अ० । वितरत्यनया तृ-करणे ल्युट् ङीप् । यमस्य ल्युकारे दातव्यासां ३गवि च "यमस्यल्युना देया गौः सवत्सा च पूर्ववत् । तदभावे च गौरेका नरकोद्धारणाय वै । तदा यदि न शक्नोति दातुं वैतरणीञ्च गाम् । शक्नोऽन्योऽरुक् तदा दत्त्वा श्रेयो दद्यात्कृतस्य च" । पूर्ववत् क्षेमशङ्कादिना अत्र कृतस्य चेति शकारश्रवणात् एकादशाङ्गेऽपि वैतरणीदानाचारः" शु०त०रघु० । "यमद्वारे महाघोरे तप्ता वैतरणी नदी । तान्तु तर्त्तुं ददाम्येनां तस्यां वैतरणीञ्च गाम्" शु०त० ।

वैतस पु० वेतस एव स्वार्थे अण् । वञ्जुलवेतसे अटा० ।

वैतानिक पु० वितानस्यायम् ठक् । १श्रौतविधिनाऽग्निस्थापने २वितानसम्बन्धिनि च "दाक्षादुर्ह्मणौ स्यातां यस्य वैतानिको विधिः" स्मृतिः । वितानशब्दे ४८६६४पृष्ठम् ।

वैतालिक त्रि० विविधस्तालः मङ्गलगीतादिशब्दलक्षणः अत्र हरति ठक् । मङ्गलस्तुत्यादिभिः रात्रौ प्रबोधकारके मागधादौ अमरः ।

वैतालीय पु० मात्राछन्दोभेदे । "यद् विषमेऽक्षौ समे कला ज्ञाश्च समे युजौ निरन्तराः । न समाऽत्र पराश्रिता कला वैतालीयेऽन्ते रलौ गुरुः" छ०र० ।

वैदग्ध न० स्त्री विदग्धस्य चतुरस्य भावः अण् ङीप् वा स्त्रीत्वं पक्षे ङीप् । १चातुर्य्ये २भङ्गी च । अच् । वैदग्धशब्दार्थ न० ।

वैदर्भ पु० विदर्भाणां जनपदानां राजा अण् । १विदर्भदेशाधिपे २वाक्यरचनाभेदे न० "माधुर्य्यव्यञ्जकैर्वर्णै रचना ललितात्मिका । अवृत्तिरल्पवृत्तिर्वा वैदर्भीं रीतिरूच्यते" साहित्यके ३काव्यरचनाभेदे स्त्री सा०द० ङीप् । विदर्भे भवा अण् । ४नलराजपत्न्यां दमयन्त्याम् स्त्री ङीप् । ५अगस्त्यपत्न्यां ६श्रीकृष्णमहिषीभेदे च स्त्री हरिव० ।

वैदल न० विदलस्य विकारः अण् । १भिक्षुकस्य भिक्षापात्रभेदे अमरः । २पिष्टकभेदे पु० शब्दच० ।

वैदिक पु० वेदं वेत्त्यधीते वा ठञ् । १वेदज्ञे ब्राह्मणे वेदेषु विहितः ठक् । २वेदोक्ते कर्म्मणि त्रि० । स्त्रियां ङीप् "वैदिकी तान्त्रिकी सन्ध्या यथाशक्तिसमन्वितः" तन्त्रम् ।

वैदुष्य न० विदुषो भावः विदुष+ष्यञ् सुक्च० । पाण्डित्ये ।

वैदूर्य्य न० विदूरे गिरौ भवः ष्यञ् । क्षणप्रोतवर्णे विड़ालनेत्रतुल्यवर्णे मणिभेदे वैडूर्य्यरत्ने (वसनिया) राजनि० "सुस्निग्धविद्रुमवज्रेन्द्रवैदूर्य्यस्फटिकादिकम् । मणिरत्नं वरं प्रीतं कषायं स्वादु शेखनम् । चाक्षुष्यं धारणात्तच्च पाण्डुच्छर्दिविनाशनम्" राजवल्लभः । तच्चाभावलक्षणं यथा "एकं वेणुपलाशकोमलरुचा मार्जारनेत्रद्युतिप्रा मार्जारेक्षणपिङ्गलच्छविजुषा श्रेयं त्रिधा प्राप्तवत् । यद्भासं गुरुतां दधाति नितरां स्निग्धन्तु दोषोज्झितं वैदूर्य्यं विपदं वदन्ति सुधियः सच्छस्तु तच्छोभनम् । तस्य कृत्रिमलक्षणं यथा "विच्छायं स्फटिकाभमेव बहु रूक्षञ्च खण्डतम् । सत्रासं परुषं क्षणं वैदूर्य्यं दूरतो नयेत् । तत्परीक्षा यथा । "दृष्टं यदातपे क्षिप्तं सच्छायां निष्कषाश्मनि । स्फुटं प्रदर्शयेदेतद्वैदूर्य्यं जात्यरत्नजम्" । राजनि० "वैदूर्य्यपुष्परागाद्यां कर्केतनीश्मके वदे । परीक्षां ब्रह्मणा प्रोक्तां व्यासेन कथितां द्विज ! । कल्यालक्षाक्षुमितास्तुराशिनिस्तोदकल्याहितिजश्च नादात् ।

वैदूर्यं सत्पञ्चमनेत्रवर्णं शोभाभिरामं दूतिवर्णबीजम्। अविदूरे विदूरश्च गिरेरुत्तङ्करोधसः। कामभूतिकसीमान-मनु तस्याकरोऽभवत्। तस्य नादयसत्त्वादाकरः सुम-ङ्गलगुणः। अभूदुत्तरितो लोके लोकत्रयविभूषणः। तस्यैव दानवपतेर्निनदात्तरूपप्राहट् प्रयोदरवदर्शितवारू-रूपाः। वैदूर्यरत्नमणयो विविधावभासात्तस्मात् स्फुलि-ङ्गनिवहा इव संबभूवुः। पद्मरागसुपादाय मणिवर्णौ हि येचितौ। सर्वांस्तान् वर्णः शोभाभिर्वैदूर्यमनुगच्छति। तेषां प्रधानं शिखिकण्ठनीलं यदा भवेद्दीप्तदलप्र-काशम्। चामाद्यपत्रप्रतिमश्चियो ये न ते प्रशस्ता मणिशास्त्रविद्भिः। गुणवान् वैदूर्यमणिर्नीलवति स्वामिनं वरमाप्नुयै.। दोषैर्युक्तोदोषैकत्वाद् यत्नात्परी-क्षेत। गिरिकाचशिशुपाली काचस्फटिकाश्च भूमि-निर्भिन्नाः। वैदूर्यसदृशैरेते विजातयः सन्ति। शिक्षाभावात् काचं लघुभावाच्छैशुपालकं विद्यात्। गिरिकाचमदीप्तित्वात् स्फटिकं वर्णोज्ज्वलत्वेन। यदि-न्द्रनीलश्च महागुणश्च सुवर्णसंख्याकलितश्च मूल्यम्। तदेव वैदूर्यमणेः प्रदिष्टं पलद्वयोन्मापितं गौरवश्च। ज्ञात्वश्च सर्वेऽपि मणिषु यादृक् विजातयः सन्ति समान-वर्णाः। तथापि नानाकरत्वात्तमेवभेदप्रकारः परतः प्र-दिष्टः। सुखोपलभ्यश्च यदा विचार्यो ह्ययं प्रभेदो विदुषा नवेन। स्वेऽप्रभेदो लघुता महत्त्वं विजातिलिङ्गं खलु सार्वजन्यम्। कृत्यकालगुणैः प्रयुज्यमानाः प्रतिपद्यन्ते प्रति-मतक्रियां प्रयोगैः। गुणदोषसमुद्भवं हि मणयोऽर्थान्तरमूल्यमेव भिन्नाः। क्रमशः समतीतवर्त्मानाः प्रतिपद्यन्ते मणिवन्धनेन वक्षात्। यदि नाम भवन्ति दोषहीना मणयः महागुणमाप्नुवन्ति मूल्यम्। आकरात् समतीतानासुदधेर्वीरमणीनां। मूल्यमेतत् खनीनान्तु न सर्वत्र महीतले। सुवर्णो मनुना यस्तु प्रोक्तः षोडशमाषकः। तस्य चप्रतिमोभागः संज्ञारूपं करिष्यति। माषचतु-र्भागो माषकः पञ्चकृष्णलः। पलस्य दशमोभागो धरणः परिकीर्त्तितः। इति मानविधिः प्रोक्तो र-त्नानां मूल्यनिर्णये। गारुडे ७२ अ०। "क्षितस्य भूमेरुद्भाश्चमीषत्कृष्णान्वितं भवेत्। वैदूर्यनाम तद्रत्नं रत्नविद्भिरुदाहृतम्। ब्रह्मक्षत्रियविट्शूद्रजातिभेदा-च्चतुर्विधाः। क्षितनीलो भवेद्विप्रः क्षितरक्तस्तु वा-क्षत्रः। पीतनीलस्तु वैश्यः स्यात् नील एव हि शू-द्रकः"। अस्य गुणाः "माल्यांशुकमणिग्रन्थं रत्नोत्प-त्तिं हि वा। कलिङ्गं निर्मलं व्यङ्गं वैदूर्यं देवभूष-णम्। सुतारं घनमत्यच्छं कलिङ्गं व्यङ्गमेव च। वैदूर्यानां गुणाख्याता एते पञ्च महागुणाः"। "अद्रिरश्मिव दीप्तिं योऽसौ सुतार इतीर्यते। प्र-माणतोऽल्पं गुरु यद् घनमित्यभिधीयते। कलङ्कादि-विहीनं तदव्यङ्गमिति कीर्त्तितम्। ब्रह्मणस्तस्करोत्कार-रङ्गतो यत्र दृश्यते। कलिङ्गं नाम तद्रत्नं सर्वसम्पत्ति-कारकम्। विच्छिटाङ्कन्तु वैदूर्यं व्यङ्गमित्यभिधीयते। कर्करं कर्कशं नाम कलङ्को देह एवपि। एते पञ्च महादोषा वैदूर्यानामुदीरिताः। शर्करायुक्तमिव यत् प्रतिभाति च कर्करम्। सर्वेऽपि यत्नजन्येच कर्कशं बन्धुनाशनम्। भिन्नध्वनिकरश्चासः स कुर्यात् क्षयम-क्षयम्। विरङ्गवर्णो यस्याङ्गे कलङ्कः क्षयकारकः। मल-दिग्ध इवाभाति देहो देहविनाशनः। जयति यदि सुवर्णभारहीनो यदा वा बहुविधमणिहारी भूपति र्वा यति र्वा। दधदपि खलदोषं जातु वैदूर्यरत्नं प्रतिह-तफलरूपः पातमेषत्प्रयत्नम्"। युक्तिकल्पतरुः।

वैदेह पु० विशेषेण देह एव स्वार्थे प्रज्ञाद्यच् विदेहे भवः अण् वा। १वणिग्जने भरतः। शूद्रात् वैश्यजाते २जातिभेदे पुंस्त्री०मेदि० स्त्रियां ङीष्। ठक्। वैदेहिकोऽपि तत्रैव। विदेहानां राजा अण्। ३विदेहराजे जनके नृपे।

वैदेही स्त्री विदेहेषु मिथिलादेशेषु भवा अण्। १सीतायाम् जनकात्मजायाम् २हरिद्रायाम् ३पिप्पल्याम् ४वणिक् स्त्रियाच मेदि०।

वैद्य पु०विद्याऽस्यास्य अण्। १यज्ञिके "नाविद्यानान्तु वैद्येन देयं विद्याधनात् क्वचित्" दायभा०। २भिषजि अमरः। तदुपकारके शब्दरत्ने च शब्दच०। वैद्योत्पत्तिश्च "वैद्योऽश्विनीकुमारेण जातश्च विप्रयोनिति। वैद्यवी-र्येण भूद्वायां बभूवुर्वैद्यवो जनाः। ते च यामसुष-ज्ञाश्च मन्त्रौषधिपरायणाः। तेभ्यश्च जाताः शूद्रायां ते आत्रेयाश्चिको मुनिं"। शौनक उवाच "कथं ब्रा-ह्मणपत्न्यान्तु सूर्यपुत्रोऽश्विनोसुतः। अहो केन विधा-केन बीर्याधानं चकार सः"। सौतिरुवाच "गच्छन्तीं तोययात्रायां ब्राह्मणीं रविनन्दनः। ददर्श कामुकीं कान्तः पुष्पोद्याने मनोहरे। तया निवारितो यत्नात् बलेन बलवान् सुरः। अतीव सुन्दरीं दृष्ट्वा बीर्याधानं चकार सः। हुतं तस्याश्च गर्भे वा पुष्पोद्याने मन ोरमे

सदो बभूव पुत्रश्च तप्तकाञ्चनसन्निभः। सुतो स्वामिनो गेहं जगाम क्रोडिता तदा। स्वामिनं कथयामास यथाद्दैवादिसङ्कटम्। विप्रोरोषेण तत्याज तस्य पुत्रं स्वकामिनीम्। सरिद् बभूव योगेन सा च गोदावरी स्मृता। पुत्रं चिकित्साशास्त्रञ्च पाठयामास यत्नतः। नानाशिल्पञ्च यत्नञ्च स्वयं स रविनन्दनः। विप्रश्च ज्योतिर्गणनात् वेदनाञ्च निरन्तरम्। वेदधर्मपरित्यक्तो बभूव गणको भुवि"। ब्रह्मवै०पु० १० अ०। नरकभोगान्ते वैद्यजन्म यथा "यः करोत्यपहारञ्च देव ब्राह्मणयोर्धनम्। पातयित्वा स्वसुखान् दश पूर्वान् दशापरान्। स्वयं याति च धूमाख्यं धूमध्वान्तसमन्वितम्। धूमक्लिष्टो धूमभोगी वर्षेस्तत्र चतुर्युगम्। ततो मूषिकजातिञ्च शतजन्मानि भारते। ततो नानाविधाः पक्षिजातयः कृमिजातयः। ततो नानाविधाः वृक्षजातयश्च ततो नरः। भार्य्याहीनो वंशहीनः श्वरो व्याधिसंयुतः। ततो भवेत् सूर्य्यकारः स सुवर्णवणिक् ततः। ततो यवनसेवी च ब्राह्मणो गणकस्ततः। विप्रो दैवज्ञोपजीवी वैद्यजीवी चिकित्सकः"। "लाक्षाक्षौद्रादिव्यापारी रसादिविक्रयी च यः। स याति नागवेष्टञ्च सर्पवेष्टित एव च। वर्षेत् सहस्रमानावद्दं तत्रैव नागदंशितः। ततो भवेत् स गणको वैद्यश्च कर्मजन्मसु। गोपश्च कर्मकारश्च रङ्गकारस्ततः शुचिः"। ब्रह्मवै०पु० २८अ०। राजवैद्यश्च कथं यथा "परं पारङ्गतो यः स्यादष्टाङ्गे तु चिकित्सिते। अनाढ्यः स वैद्यः स्याद्भोक्ता च कुलोद्वतः। प्राणाचार्य्यः स विप्रेयो वचनं तस्य भूभुजः। राजन्! राज्ञा सदा कार्य्यं यत्नाकार्य्यं पृथग्जनैः"। मात्स्ये १८६ अ०। "चिकित्सां कुरुते यस्तु स चिकित्सक उच्यते। स च यादृक् समीचीनस्तादृशोऽपि निगद्यते। तत्त्वाधिगतशास्त्रार्थो दृष्टकर्मा स्वयं कृती। लघुहस्तः शुचिः शूरः सज्जोपस्करभेषजः। प्रत्युत्पन्नमतिर्धीमान् व्यवसायी प्रियंवदः। सत्यधर्मपरोयश्च वैद्य ईदृक् प्रशस्यते"। दृष्टकर्मा दृष्टा परेण कृता चिकित्सा येन सः। स्वयं कृती स्वयं चिकित्साकुशलः। लघुहस्तः सिद्धिमद्धस्तः। निन्दितवैद्यो यथा "कुचेलः कर्कशः काव्यः श्यामीषः स्वयमागतः। एते वैद्या न पूज्यन्ते धन्वन्तरिसमा अपि"। कर्कशः अप्रियवादी। काव्यः सामिमानः। श्यामीषः अपहाराचतुरः। अथ वैद्यश्च कर्म आह "व्याधेस्तत्त्वपरिज्ञानं वेदनायाश्च निग्रहः। एतद्भैषज्यं वैद्यस्य न वैद्यः प्रभुरायुषः"भावप्र० "सत्यस्तेताद्वापरेषु युगेषु ब्राह्मणाः क्षिति। ब्रह्मक्षत्रियविट्शूद्रकन्यका उपयेमिरे। तत्र वैश्यसुतायां वै जज्ञिरे तनया अमी। सर्वे ते तनयाः ख्याता वेदवेदाङ्गपारगाः। तेषां सप्तोऽमृताचार्य्यास्त्यावम्बाकुले हि यत्। अम्बष्ठ इत्यसावुक्तो जाति प्रवर्त्तनाद्। परे सर्वेऽपि चाम्बष्ठा वैद्यब्राह्मणसम्मताः। जननीतो जनुर्लब्धा यज्ञाता वेदसंस्कृतैः। अम्बष्ठाख्येन ते सर्वे द्विजा वैद्याः प्रकीर्त्तिता। अथ रुक् प्रतिकारित्वाद्भिषजस्ते प्रकीर्त्तिताः। सत्ये वैद्याः पितृस्तुल्याश्चेतायाञ्च तथा स्मृताः। द्वापरे भ्रातृवत् प्रोक्ताः कलौ वैद्यप्रेषमा सुताः" कुलच०। आयुर्वेदशब्दे दृश्यम्।

वैद्यक न०वैद्यं चिकित्सकमधिकृत्य कृतो ग्रन्थः कन्। आयुर्वेदे "ब्रह्मयजुःसामाथर्वाख्यान् दृष्ट्वा वेदान् प्रजापतिः। विचिन्त्य तेषामर्थञ्चैवायुर्वेदं चकार सः। कृत्वा तु पञ्चमं वेदं भास्कराय ददौ विभुः। स्वतन्त्रां संहितां तस्माद् भास्करश्च चकार सः। भास्करश्च स्वशिष्येभ्य आयुर्वेदं स्वसंहिताम्। ददौ पाठयामास ते चक्रुः संहितास्ततः। तेषां नामानि विदुषां तन्त्राणि तत्कृतानि च। व्याधिप्रशमबीजानि साधि! मनो निशामय। धन्वन्तरिर्दिवोदासः काशीराजश्चसत्तमः। नकुलः सहदेवार्यौ च्यवनो जनको बुधः। जाबालो जाजलिः पैलः करथोऽगस्त्य एव च। एते वेदाङ्गवेदज्ञाः षोडश व्याधिनाशकाः। चिकित्सातत्त्वविज्ञानं नाम तन्त्रं मनोरमम्। धन्वन्तरिश्च भगवांश्चकार प्रथमे सति!। चिकित्साद्यं नाम दिवोदासश्चकार सः। चिकित्साकौमुदीं दिव्यां काशीराजश्चकार सः। चिकित्सासारतन्त्रञ्च भग्नं चाग्निवेशतौ। तन्त्रं वैद्यक सर्वस्वं नकुलश्च चकार सः। चकार सहदेवश्च व्याधिसिन्धुविमर्दनम्। ज्ञानार्णवं महातन्त्रं यमराजश्चकार सः। च्यवनो जीवदानञ्च चकार भगवान्ऋषिः। चकार जनको योगी वैद्यसन्देहभञ्जनम्। सर्वसारं चन्द्रकृतो जाबालस्तन्त्रसारकम्। वैद्यकुसारं तन्त्रञ्च चकार जाजलिर्मुनिः। पैलो निदानं करथस्तन्त्रं सर्वधरं परम्। द्वैधनिर्णयतन्त्रञ्च चकार कुम्भसम्भवः। चिकित्साशास्त्रबीजानि तन्त्राण्येतानि षोडश। व्याधिप्रशमबीजानि वक्ष्यामि कथयामि च। श्रुत्वा

ज्ञानमन्यानैरायुर्वेदयो निधिम्। ततस्तन्त्रान्युद्धरन् नवनीतानि कोविदाः। एतानि क्रमशो दृष्ट्वा दिव्यां भास्करसंहिताम्। आयुर्वेदसर्ववीजं सर्वं जानासि सुन्दरि!" ब्रह्मवै० पु० १६ अ०।

वैद्यनाथ पु० देशविशेषे "करवीरे महालक्ष्मीरूपा देवी विनायके। अरोगा वैद्यनाथे तु महाकाले महेश्वरी" मात्स्ये। "वैद्यनाथं समारभ्य भुवनेशान्तगं शिवे!। तावदङ्गाभिधो देशो यात्रायां न हि दुष्यति" यक्षिसङ्गमतन्त्रे ७प०। २भैरवविशेषे "हार्दपीठे वैद्यनाथे वैद्यनाथस्तु भैरवः। देवता जयदुर्गाख्या नेपाले जानुनी मम" तन्त्रचूडा०। ३शिवलिङ्गभेदे "हरिद्रानगरे यत्र वैद्यनाथो महेश्वरः। तत्राचयो बिल्वपत्रैः स्वर्णपत्रैः सदाहृतैः" हरिवंशपु० ११ अ०। "झारखण्डे वैद्यनाथो वक्रेश्वरस्तथैव च। वीरभूमौ सिद्धनाथो राढे च तारकेश्वरः" इति महालिङ्गेश्वरतन्त्रे।

वैद्यबन्धु पु० इत०। आरग्वधवृक्षे शब्दर०।

वैद्यमाल स्त्री वैद्यस्य मालेव। १वासके अमरः तस्य वैद्यौषधिकाप्रयोजकरोगशान्तिकरत्वेन तदुपोषकत्वात् तन्मालत्वत्वम्।

वैद्यसिंही स्त्री वैद्यस्य सिंहीव। वासकवृक्षे शब्दच०।

वैद्या स्त्री वैद्यः पाण्डित्येनाऽस्त्यस्याः अच्। काकोल्याम् शब्दच०।

वैध त्रि० विधिना आगतः अण्। विधिप्रतिपाद्ये।

वैधहिंसा स्त्री कर्म०। वेदविहितहिंसायाम् "या वेदविहिता हिंसा नियताऽस्मिंश्चराचरे। अहिंसामेव तां विद्याद् वेदाद् धर्मो हि निर्बभौ" मनुः। अत्र नियतेत्युपादानात् नित्ये पशुयज्ञादौ हिंसाया अहिंसात्वं न तु काम्येऽपीति सम्प्रदायविदः। पिष्टपशुमीमांसायाञ्च तथैवोक्तं "कुर्यात् पशुं सङ्गे कुर्यात् पिष्टपशुं तथा" मनुना सङ्गे कामनायां पिष्टपशूनामेव विधानात्। विशेषतः कल्पौ "मांसदानं तथा श्राद्धे" "अष्टादश्यां गवालम्भम्" इति च कलियज्ञेषूक्तैः काम्यवस्तिदानादि निषेधः। हिंसाया अनर्थसाधनत्वेऽपि वैधहिंसाया अर्थसाधनत्वम् वैद्योक्तसंस्कारभेदेन विषस्येवेति बोध्यम्। तिथितत्त्वमतभेदेन च वैधहिंसा उभयरूपत्वं निरूपितं यथा "मा हिंस्यात् सर्वभूतानि" इत्यत्र सर्वशब्दस्य व्याप्यकार्थपरतया एतदधिकृतकृत्य "वायव्यं श्वेतमालभेत" इत्यादिविधेर्विषयाप्राप्तेरगत्या वैधातिरिक्तविषयत्वं सर्वा सर्वाणि छन्दसि वेत्यनेन तत्पदं सिद्धम्। यदपि नानादर्शनटीकाकृद्भिर्वाचस्पतिमिश्रैस्तत्त्वकौमुद्यामभिहितं "न च सा हिंस्यात् सर्वा भूतानि" इति सामान्यशास्त्रं विशेषशास्त्रेण "अग्नीषोमीयं पशुमालभेत" इत्यनेन बाध्यते इति वाच्यं विरोधाभावात् विरोधे हि बलीयसा दुर्बलं बाध्यते। न चास्ति विरोधः भिन्नविषयत्वात्। तथा हि सा हिंस्यादिति निषेधेन हिंसाया अनर्थहेतुभावो बाध्यते न पुनरकरणत्वमपि। अग्नीषोमीयं पशुमालभेतेत्यनेन तु पशुहिंसायाः करणत्वमुच्यते न त्वनर्थहेतुभावस्तथा सति वाक्यभेदप्रसङ्गात्। न चानर्थहेतुत्वकरणोपकारकत्वयोः क्वचिदपि विरोधः। हिंसा हि पुरुषस्य दोषमावहतीति क्रतोरेवोपकरिष्यतीत्यत्रैव, तदपि सांख्यनये। मीमांसकमते तु विरोध एव तथा हि गुरुनये न खलु सर्वभूतहिंसाभावविषयकं कार्यम् इति निषेधविध्यर्थस्य बाधं विना अग्नीषोमीयपशुत्वावच्छिन्नविषयकं कार्यमिति भावविध्यर्थ उपपद्यते। भट्टनये तु अङ्गे यथा तथास्तु। न च सुख्यपशुयागे पुरुषार्थपशुहिंसनस्यार्थसाधनत्वमनर्थसाधनत्वञ्चोपपद्यते विरोधात्। वस्तुतस्तु अङ्गेऽपि विरोधोऽस्त्येव कुतो? विधेरेव स्वभावो यत् स्वविषयस्य साक्षात् परम्परया वा पुरुषार्थसाधनत्वमवगमयति अन्यथाऽङ्गानां प्रधानोपकारकत्वमपि नाङ्गीक्रियेत। अर्थसाधनत्वं बलवदनिष्टाननुबन्धीष्टसाधनत्वम् अनर्थसाधनत्वं बलवदनिष्टसाधनत्वं न चानयोरेकत्र समावेश इति। अतएवोक्तं "तस्माद्यज्ञे वधोऽवधः" इति। नन्वेवं "श्येनेनाभिचरन् यजेत" इत्यत्र श्येनस्य शत्रुवधरूपेष्टसाधनत्वमवगतम् "अभिचारो मूलकर्म च" इति मनुना उपपातकगणमध्ये पाठादनिष्टसाधनत्वमवगतम्। तदेतत् कथमुपपद्यतामिति चेन्नैवं "आततायिनमायान्तं हन्यादेवाविचारयन्" इत्यत्र वाक्यतया आततायित्वले इष्टसाधनत्वम् अनाततायित्वले तूपपातकत्वेन बलवदनिष्टसाधनत्वसिद्धविरोध इति गुरुचरणाः"।

वैधात्र पु० विधातुरपत्यम् अण्। सनत्कुमारादौ ऋषिभेदे अमरः। २ब्राह्म्यां (वामनघाटि) स्त्री राजनि०।

वैधृति पु० विगता धृतिर्यस्मात् पृषो० ह्रस्वः। विष्कम्भादिषु सप्तसु २अन्तिमे योगे। सूर्यचन्द्रयोः क्रान्तिसाम्येनानीते अशुभसूचके २७भेदे तत्र वैधृतशब्दोऽपि यथोक्तं

स०स्त्रि० "एकायनगतौ स्थातां कृष्णचन्द्रमसौ यदा। तदोते मण्डले क्रान्त्योस्तुल्यत्वे वैषुतामियः"। पातशब्दे ४२८६ पृ० विस्तरो द्रष्टः। उपयमशब्दे १२६५ पृ० दृश्यम्। [मुखं अमरः।

वैधेय त्रि० विधीयतेऽसौ वि+धा-यत् ततः स्वार्थे अण्। वैधर्म्य न०विरुद्धो धर्मो यस्य तस्य भावः ष्यञ्। १विरुद्धधर्मत्वे २अन्यलक्षणे च। [असद्वेदनम्" इति कुमारः।

वैधव्य न० विधवाया भावः ष्यञ्। पतिविरहे "नववैधव्य-

वैनतेय पु० विनतायाः अपत्यं ढक्। १गरुडे अमरः २अरुणे च मत्स्यपु०। [हेमच०।

वैनयिक त्रि० विनये रतः ठक्। शास्त्रज्ञानादिना विनयरते

वैनायिक पु० विनायं खण्डनमधिकृत्य कृतो ग्रन्थः ठक्। १बौद्धागमे त्रिका० उपचारात् २तदभिज्ञे त्रि०।

वैनाशिक पु० विनाशमधिकृत्य कृतो ग्रन्थः ठक्। सर्वेषां क्षणिकत्वप्रतिपादके १बौद्धागमे २तदभिज्ञे त्रि०। विनाशाय हितम् ठक्। ज्योतिषोक्ते मङ्गाङ्गोचक्रस्थे जन्मनक्षत्रावधिकयोर्दिने २नक्षत्रे ४खधिके ५परतन्त्रे च त्रि० हेमचन्द्रनामे पु० मेदि०।

वैनीतक पु०न०। विशेषेण नीतं नयनं तेन कायति कै-क स्वार्थे अण्। परम्परया वाहने शिविकादौ अमरः।

वैपरीत्य न० विपरीतस्य भावः ष्यञ्। १विपर्यये हेमच०। २लक्षणो क्षतावां स्त्री राजनि०।

वैभव न० विभोर्भावः अण्। १विभुत्वे २विभूतौ।

वैभ्राज न० विभ्राज इदम् अण्। देवोद्यानभेदे त्रिका०। तच्च मेरोः पश्चिमविष्कम्भगिरिपुष्पपर्वतस्थं पिपुलशब्दे ४८१२ पृ० दृश्यम्। [२तथाभूतभगिन्यां स्त्री ङीष्।

वैमात्र पु० विमातुरपत्यम् अण्। १सापत्ने भ्रातरि अमर

वैमात्रेय पु० विमातुरपत्यं ढक्। १सापत्ने भ्रातरि अमरः २तथाभूतभगिन्यां स्त्री ङीष्।

वैमुख्य न० विमुखस्य भावः ष्यञ्। विमुखत्वे।

वैमेय पु० वि+मि-यत् स्वार्थे अण्। विनिमये हेमच०।

वैयधिकरण्य न० व्यधिकरणस्य भावः ष्यञ्। अवस्थानाधिकरण्यत्वे। [भिन्ने।

वैयाकरण त्रि० व्याकरणं वेत्त्यधीते वा अण्। व्याकरणा-

वैयाघ्र पु० व्याघ्रचर्मणा परिवृतो रथः अण्। व्याघ्रचर्मपरिवृते रथे अमरः।

वैयाघ्रपद्य पु० व्याघ्रपदस्यापत्यं यञ्। गोत्रकारके मुनिभेदे "वैयाघ्रपद्यगात्रावेति" गोत्रप्रवरभास्करः।

वैयात्य न० वियातस्य भावः ष्यञ्। निर्लज्जत्वे "वैयात्यं सुरतेष्वपि" भाषः। [गुरुदेवे।

वैयासकि पु० व्यासस्यापत्यम् इञ् कुक्च। व्यासस्यापत्ये

वैयासिकी स्त्री व्यासेन प्रोक्ता ठञ् ङीष्। व्यासप्रणीतायां संहितायाम्।

वैर न० वीरस्य भावः अण्। विरोधे विद्वेषे अमरः। "वैरं पञ्चसन्तानं मुनिभिः परिकीर्त्तितम्। स्त्रीकृतं वास्तुजं वाग्जं सखापत्यापराधजम्"। तत्र स्त्रीकृतं ब्राह्मणेदिपयोः। वास्तुजं कृषिपाल्ययोः। वाग्जं द्रोणद्रुपदयोः। सापत्यं नैसर्गिकमक्षिनकुलयोः। अपराधजं पूजनीयक्षुद्रत्नयोः।

वैरकर त्रि० वैरं करोति क-ट। विरोधकारके।

वैरक्त्य न० विरक्तस्य भावः ष्यञ्। विरागे।

वैरङ्गिक त्रि० विरङ्गं विरागं निष्पन्नमर्हति ठञ्। विरागार्हे हेमच०। वैराङ्गिक तत्रार्हे त्रि०कौ०।

वैरनिर्यातन न०वैरस्य वैरकृतापकारस्य निर्यातनम् निर्+यत-ल्युट्। वैरकृतापकारप्रतीकारे अमरः।

वैरप्रतीकार पु० ६त०। वैरकृतापकारस्य तत्स्वरूपापकारकरणेन तस्य शोधने वैरप्रतिक्रियायाम् स्त्री।

वैरशुद्धि स्त्री ६त०। वैरप्रतीकारे अमरः।

वैराग्य न० विरागस्य भावः ष्यञ्। विषयवासनाराहित्ये ऐहिकामुष्मिकविषयरागराहित्ये च।

वैराग्यस्य मोक्षहेतुत्वादि विवेकचूडामणौ दर्शितं यथा "मोक्षस्य हेतुः प्रथमो निगद्यते वैराग्यमत्यन्तमनित्यवस्तुषु। ततः प्रशान्तिर्दमस्तितिक्षा न्यासः प्रसक्ताखिलकर्मणां भृशम्। ततः श्रुतिस्तन्मनन सतत्त्वध्यानं चिरं नित्यनिरन्तरं मुनेः। ततो विकल्यं परमेत्य विद्वानिहैव निर्वाणसुखं समश्नुते। यदाब्धिमेवं तवेदानीमात्मानात्मविवेचनम्। तदुच्यते मया सम्यक् श्रुत्वाऽन्यवधारय। मज्जास्थिमेदःपलरक्तचर्मत्वगाह्वयैर्धातुभिरेभिरन्वितम्। पादोरुबाहूदरपृष्ठमस्तकैरङ्गैरुपाङ्गैरयुक्तमेतत्। अहं ममेति प्रथितं शरीरं मोहास्पदं स्थूलमितीर्यते बुधैः। नभोनभस्वद्दहनाम्बुभूमयः सूक्ष्माणि भूतानि भवन्ति तानि। परस्परांशैर्मिलितानि भूत्वा स्थूलानि च स्थूलशरीरहेतवः। मात्रास्तदीया विषया भवन्ति शब्दादयः पञ्च सुखाय भोक्तुः। य एषु मूढा विषयेषु पञ्चसु प्रयोरूपाशेन सुदुर्मनेन। आयान्ति निर्यान्त्यध जन्तवः सकर्मदुतेन जवेन

नीताः । अन्यादिभिः पञ्चभिरेव पञ्च पञ्चत्वमापुः स्व-सुखेन बद्धाः । कुरङ्गमातङ्गपतङ्गमीनभृङ्गा, नरः पञ्च-भिरावृतः किम् ? । दोषेण तीव्रा विषयः क्षणसर्ग-विषादपि । विषं निहन्ति भोक्तारं दृष्टं चक्षुषाप्य-यम् । विषयाशा महापाशात् यो विमुक्तः सदुच्यते । स एव कल्पते मुक्तुं नान्यः षट्शास्त्रवेद्यपि । आपात-वैराग्यवतो मुमुक्षून् भवाब्धिपारं प्रतियातुमुद्यतान् । आशापट्टो मल्लयतेऽन्तराले निग्रह्य कण्ठे विनिवर्त्य वेगात् । विषयाख्यपट्टो येन सुविरक्तप्रसिना हृतः । स गच्छति भवाम्भोधेः पारं मत्सरवर्जितः । विषम-विषयमार्गैर्गच्छतो नश्वरुद्धेः प्रतिपदमभियातो मृत्यु रथेष सिद्धिः । स्थितजलनगुरुकुक्षा गच्छतः खल्व युक्त्या प्रभवति फलसिद्धिः सत्यमित्येव विद्धि । भो-अस्य काङ्क्षा यदि वै तवास्ति त्यजातिदूरादिषवान् विषं यथा । पीयूषवत्तोषदवाच्चमार्जवप्रशान्तिदान्तीर्भज नित्यमादरात्" ।

वैराट त्रि॰ विराटस्येदम् अण् । १विराटसम्बन्धिनि । वीर इ वाटति अट-अच् स्वार्थे अण् । २इन्द्रगोपकीटे हेमच॰।

वैरातङ्ग पु॰ वीरस्य अर्जुनस्यातङ्काय अङ्काय साधु-यत् । अर्जुनपक्षे राजनि॰ । [तत्प्रकारके २वैरातुगते च ।

वैरानुबन्धिन् त्रि॰ वैरं विद्वेषमनुबध्नाति णिनि । १विद्वेषा

वैरिन् त्रि॰ वैरमस्यास्ति इनि । शत्रौ अमरः ।

वैरूप्य न॰ विरूपस्य भावः ष्यञ् । १विरूपत्वे २अनतुरू-पत्वे ३अन्ययाभावे ४वस्तुनोविकारभेदे च ।

वैरोच(न)नि पु॰ विरोचनस्यापत्यम् शिवादित्वात् इञ् वा । १अग्निपुत्रे २सूर्य्यपुत्रे ३बलिराजपुत्रे दानवभेदे च ४नृपभेदे ५विप्रभेदे शब्दर॰ ।

वैलक्षण्य न॰विलक्षणस्य भावः ष्यञ् । विलक्षणत्वे वैशिष्ट्ये

वैलक्ष्य न॰ विलक्षस्य भावः ष्यञ् । १लज्जायाम् अमरः २स्वभाववैलक्षण्ये च "वैलक्ष्यहेतोर्गतिमेतदीयाम्" नैष॰।

वै(व)वधिक त्रि॰ वी(व)वधेन धान्यादिसंग्रहेण व्यवहरति ठक् । वार्त्तोपजीवे नैगमे (दोकानि) अमरः ।

वैवर्ण्य न॰ विवर्णस्य भावः ष्यञ् । विवर्णत्वे मालिन्ये ।

वैवस्वत पु॰विवस्वतोऽपत्यम् तस्येदं वा अण् । १यमे अमरः २अग्नौ ३रुद्रभेदे च भटा॰। ४तत्सम्बन्धिनि त्रि॰ "वैव-स्वतकरक्रिया" इत्युद्भटः । ५दक्षिणदिशि स्त्री ङीप् । ६सप्तमे मनुभेदे "मनुर्विवस्वतः पुत्रः श्राद्धदेव इति स्मृतः । सप्तमो वर्त्तमानोऽयमदपत्यानि मे शृणु ।। इक्ष्वाकुनं भगवैव नृष्टः शर्यातिरेव च । नरिष्यन्तोऽथ नाभागः सप्तमो दिष्ट उच्यते । इषधश्च पृषध्रश्च दशमो वसुमान् स्मृतः । मनोर्वैवस्वतस्यैते दश पुत्राः परन्तप ।। आदित्या वसवो रुद्रा विश्वे देवा मरुद्गणाः । अश्विनौ धनमो राजन् ! इन्द्रस्तेषां पुरन्दरः । कश्यपोऽत्रिर्वसिष्ठश्च विश्वामित्रश्च गौतमः । जमदग्निर्भरद्वाज इति सप्तर्षयः स्मृताः । अत्रापि भगवज्जन्म कश्यपाददितेरभूत् । आ-दित्यानामवरजो विष्णुर्वामनरूपधृक् । संक्षेपतो मयो-क्तानि सप्त मन्वन्तराणि ते" भाग॰ ८।१३अ॰।

वैवाहिक त्रि॰ विवाहाय हितं साधु वा ठक् । १विवा-हयोग्ये "वैवाहिकीं तिथिं पृष्टाः" इति कुमारः । २विवाहेन सम्बद्धे कन्यापुत्रयोः श्वशुरे ३विवाहसम्ब न्धिनि च त्रि॰ "पञ्चमे सप्तमे वापि येषां वैवाहिकी क्रिया" स्मृतिः ।

वैशम्पायन पु॰ व्यासशिष्ये भारतवक्तरि मुनिभेदे । स च व्यासादृष्टः जनमेजयाय भारतं श्रावितवान् यथोक्तं भा॰आ॰१अ॰"जनमेजयेन पृष्टः सन् ब्राह्मणैश्च सहस्रशः । यशसे शिष्यमासीनं वैशम्पायनमन्तिके । स सदस्यैः स-हासीनः श्रावयामास भारतम् । कर्मान्तरेषु यज्ञस्य चो-द्यमानः पुनःपुनः" । स च यजुर्वेदे तस्य शिष्यः यथाह "अथ शिष्यान् प्रजग्राह चतुरो वेदपारगान् । जैमि-निञ्च सुमन्तुञ्च वैशम्पायनमेव च । पैलं तेषां चतुर्थञ्च पञ्चमं मां महामुनिः । ऋग्वेदशाखकं पैलं जग्राह स महामुने !। यजुर्वेदप्रवक्तारं वैशम्पायनमेव च" कौमेपु॰ ४८ अ॰ । [वक्ते च ।

वैश्रस न॰विश्वस्य भावः स्वार्थे वा अण् । १क्लिन्ने २क्लि-न्ने

वैशाख पु॰ विशाखानक्षत्रयुक्ता पौर्णमासी वैशाखी सा यत्र मासे पुनः अण् । अनाख्याते चैत्रतो द्वितीये १चान्द्रमासे २शुक्लवर्णभेदे च आर्क्षिकशब्दे १६४६ पृ॰ दृश्यम् । चान्द्रवैशाखनक्षत्रं तु मेषस्थरव्यारब्धशुक्ल-प्रतिपदादिदर्शान्तत्रिंशत्तिथिमितम् । मेषस्थरविके ३सौर-तन्मासे "तुलामकरमेषेषु प्रातःस्नानं विधीयते। कविप्रं ब्रह्मचर्य्यञ्च महापातकनाशनम्" । तन्मा-सस्य ४पौर्णमासी स्त्री ङीप् । विशाखा प्रयोज-नमस्य अण् । ५मन्त्रानटरूपे पु॰ ६अनुराधानामवख्या-नभेदे न॰अमरः । [रथाभिधक्ते नायकभेदे रत्नम॰ ।

वैशिक पु॰वेशे वेशग्रामे भवः तत्र साधुः ठक् । वेशग्रामां प्रकृतः ठक् ।

वैशिष्ट्य न॰ विशिष्टस्य भावः ष्यञ् । विशेषविशेषव-

समवस्थिनि विशिष्टबुद्धिनियामके समवाये २भेदे च।

वैशेषिक न० विशेषं पदार्थभेदमधिकृत्य कृतो ग्रन्थः ठञ्। कणादप्रणीते १शास्त्रभेदे। तदधीते अण्। २कणादशास्त्राभिज्ञे त्रि०। तत्रेदम् अण्। ३कणादशास्त्रसम्बन्धिनि त्रि०। [शेषाद्यत्तदादः" भा०सू०।

वैशेष्य न० विशेषस्य भावः ष्यञ्। १वैशिष्ट्ये २भेदे च "वैशेष्यात्तु तद्वादस्तद्वादः" भा०सू०।

वैश्य पुंस्त्री विशति उपभुङ्क्ते विश-क्विप् स्वार्थे ष्यञ्। वर्णभेदे ब्रह्मण जन्मजाते जातिभेदे अमरः स्त्रियां टाप्। "विशस्त्वाशु पशुभ्यश्च कृष्यादानरुचिः शुचिः। वेदाध्ययनसम्पन्नः स वैश्य इति संज्ञितः" पद्मपु०सृ०२६अ०।

वैश्यवृत्ति स्त्री ६त०। कृषिवाणिज्यादौ "वैश्यस्तु कृतसंस्कारः कृत्वा दारपरिग्रहम्। वार्त्तायां नित्ययुक्तः स्यात् पशूनाञ्चैव रक्षणे। प्रजापतिर्हि वैश्याय सृष्ट्वा परिददे पशून्। ब्राह्मणाय च राज्ञे च सर्वाः परिददे प्रजाः। न च वैश्यस्य कामः स्वान्न रक्षेयं पशूनिति। वैश्ये चेच्छति नान्येन रक्षितव्याः कथञ्चन। मणिमुक्तप्रवालानां लोहानां तान्तवस्य च। गन्धानाञ्च रसानाञ्च विद्यादर्घबलाबलम्। बीजानामप्रिविद्यं स्यात् क्षेत्रदोषगुणस्य च। मानयोगञ्च जानीयात् तुलायोगांश्च सर्वशः। सारासारञ्च भाण्डानां देशानाञ्च गुणागुणान्। लाभालाभञ्च पण्यानां पशूनां परिवर्द्धनम्। भृत्यानाञ्च भृतिं विद्याद् भाषाश्च विविधाः नृणाम्। क्रयविक्रयमेव च। धर्मेण च द्रव्यवृद्धावातिष्ठेद् यत्नमुत्तमम्। दद्याच्च सर्वभूतानामन्नमेव प्रयत्नतः" मनुः। "वैश्यस्य च एव ज्ञानि यो धर्मो वेदसम्मतः। दानमध्ययनं यौचं यज्ञश्च धनसञ्चयः। पालयेच्च पशून् वैश्यः पितृवद्धर्ममाचरन्। विक्रमं तद्भवेदन्यत् कर्म यत् स समाचरेत्। रक्षया स हि तेषां वै महत् सुखमवाप्नुयात्। प्रजापतिर्हि वैश्याय सृष्ट्वा परिददे प्रजाः। ब्रह्मणेभ्यश्च राज्ञे च सर्वाः परिददे प्रजाः। तस्य हस्तिं प्रवक्ष्यामि यच्च तस्योपजीवनम्। यस्यामेका पिबेद्धेनुं प्रताच्च मिथुनं भवेत्। लक्षाच्च सप्तमं भागं तथा गृह्णीकलक्षुरे। यज्ञानां सर्वबीजानि एषा संवत्सरी भृतिः" याज्ञव०२६अ०।

वैश्रवण पुं० विश्रवसोऽपत्यम् अण् विश्रवआदेशः। कुबेरे अमरः। [वैश्रवणावासादयोऽत्र।

वैश्रवणालय पुं० ६त०। १पद्मवने हेमच० २कुबेरगृहेच।

वैश्वदेव पुं० विश्वेभ्यो देवेभ्यो देयो बलिः अण्। वैश्वदेवीहोमेन दीयमाने बलौ।

वैश्वानर पुं० विश्वेषां नराणामयम् कृञ्छिरुत्वात् अण् पूर्वदीर्घः। १वह्नौ २चित्रकवृक्षे। ३चेतने च विश्वानरस्यापत्यमण्। अग्निलोकाधिपे ४वह्नौ काशीख०। ५तत्कथा दृश्या। सर्वदेहाभिमानिनि ६सर्वात्मयोनिनि परमेश्वरे तदुपासनप्रकारः छान्दो० ६प्र०दर्शितो यथा "एष वैश्वानरो विरात्मा वैश्वानरः" इत्युपक्रमे "तान् होवाचैते वै खलु यूयं पृथगिवेममात्मानं वैश्वानरं विद्वांसोऽन्नमत्थ यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति" "तान् यथोक्तवैश्वानरदर्शनवतो ह उवाच। एते यूयं वै खल्वित्यर्थकौ यूयं पृथगिवापृथक् सन्तमिममेकं वैश्वानरं विद्वांसोऽन्नमत्थ परिच्छिन्नात्मबुद्ध्या एतद्धि तदर्शन इव लक्षणम्। यस्त्वेतमेवं यथोक्तावयवैर्द्युमूर्धादिभिर्विशिष्टमेवं प्रादेशमात्रं प्रादेशैर्द्युमूर्धादिभिः पृथिवीपादान्तैरध्यात्मं मीयते ज्ञायत इति प्रादेशमात्रम्। सुखादिषु वा करणेष्वकर्तृत्वेन मीयत इति प्रादेशमात्रः। द्युलोकादिपृथिव्यन्तप्रदेशपरिमाणो वा प्रादेशमात्रः। प्रकर्षेण शास्त्रेणादिश्यन्त इति प्रादेशा द्युलोकादय एव तत्परिमाणः प्रादेशमात्रः। शाखान्तरे तु "मूर्धादिचुबुकप्रतिष्ठः" इति प्रादेशमात्रं कल्पयन्ति। इह तु न तथाभिप्रेतः। "तस्य ह वा एतस्यात्मनः" इत्यादुपसंहारात्। प्रत्यगात्मतयाऽभिविमीयतेऽहमिति ज्ञायत इत्यभिविमानस्थमेतमात्मानं वैश्वानरं विश्वान्नराद्ययति पुरुषपापानुरूपां गतिम्। सर्वात्मैष ईश्वरो वैश्वानरो" विश्वो नर एव वा सर्वात्मत्वात्। विश्वैर्वा नरैः प्रत्यगात्मतया प्रविभज्य मीयत इति वैश्वानरः। तमेवमुपास्ते यः सोऽन्नमत्तादौ सर्वेषु लोकेषु द्युलोकादिषु सर्वेषु भूतेषु चराचरेषु सर्वेष्वात्मसु शरीरेन्द्रियमनोबुद्धिषु तेषु ज्ञानक्रियात्मकेषूपदेशः प्राणिनामन्नमत्ति। वैश्वानरवित् सर्वात्मा सन्नन्नमत्ति। न यथोक्तः पिण्डमात्राभिमानः सन्नित्यर्थः"।

वैषम्य न० विषमस्य भावः ष्यञ्। विषमत्वे वैलक्षण्ये।

वैषयिक त्रि०विषयेण निर्वृत्तः ठक्। विषयनिर्वृत्ते सुखादौ

वैष्टुत न०विष्टुत्या निर्वृत्तम् अण्। १स्तोमभक्तभेदे हेमच०। २विष्टुतिसाध्ये यागादौ त्रि०। [३विष्णौ च संज्ञिप्रमा०।

वैष्ट्र न० विष-ष्ट्रन् स्वार्थे अण्। १पिष्टमे सुखादि० २खले हेमाद्रौ

वैष्णव त्रि० विष्णुर्देवताऽस्य तमधीते वा अण्। १विष्णूपासके २विष्णुसम्बन्धिनि च स्त्रियां ङीप्। ३वैष्णव्यां भङ्गौ "वैष्णवो समरे चैनम्" देवीभा०। "गायत्री वैष्णवी ह्रीश्च" श्रुतिः। ४विष्णुधामनि न०। विष्णुमधिकृत्य कृतो ग्रन्थः अण्। ५महापुराणभेदे न०विष्णुपुराणशब्दे ४९२६ पृ० दृश्यम्।

वैसारिण पुंस्त्री० विसरति वि+सृ-णिनि स्वार्थे अण्। मत्स्ये अमरः स्त्रियां जातित्वात् ङीष्।

वैहार्य्य त्रि० विहारं परिहासमर्हति यञ्। परिहासार्हे ख्यातकादौ "यथा बालेषु नारीषु वैहार्य्येषु तथैव च। खड्गेषु निपातेषु तथापद्व्यसनेषु च। अन्तं नोक्तपूर्वं मे" भा०उ० १२१अ०।

वैहासिक पु० विहासेऽभिरतस्तं करोति वा ठक्। नाटकादौ प्रसिद्धे अट्टहासकारकचरे १विदूषके हेमच० (भाँड़) इति २ख्याते लोके च।

वोड्र पुंस्त्री० वा-वा० ड्रच्। १तोमरवर्णे (बोडाशाक) विक्रयादि०। २अन्त्यभेदे मेदि०। स्त्रियां जातित्वात् ङीष्। सा च १पलघ्नवर्णांशे (दुडि) मेदि०। [मन्त्रः।

वोढु पु० वह-तृन्। सनिभेदे "वोढुः पञ्चशिकस्तथा" तर्कभ.

वोढृ त्रि० वह-तृच्। १वाहके २स्थानान्तरप्रापके "भागो रवी निर्भरशीकराणां वोढा" कुमारः। ३पाणिग्राहके पु० "पिण्डदा वोढरेव ते" स्मृतिः। ४भारवाहके ५मूढ़े च त्रि० शब्दच०। ६वृषभे पु० राजनि०। ७सूते पु० मेदि०। [अवस्रावोऽोप। आर्द्रं त्रिका०।

वोढ त्रि० अवधिरूपसटकं यत्र प्रा०ब० षटकखोदादेशः

वोदाल पुंस्त्री०वोढ आर्द्रः सलति अल-अच्। वृक्षभेदे (बोकोयाच) शब्दर० स्त्रियां ङीष्।

वोरक पु०अवनतं लेखनकाले उरो यस्य प्रा०ब०कप् अवस्रावो लोपः पृषो० सलोपः। लेखके त्रिका०। [द्वये त्रिका०।

वोरट पु० वोरति रटनि भङ्गा अत्र रट-घञर्थे क। कुन्द-

वोरव पु० वा-उर वोरं वाति वा-क। (वोरो) धान्यभेदे "वोरवस्तु बुधैः प्रोक्तस्त्रिदोषघ्नः प्रकोपणः। मधुरश्चाम्लपाकश्च प्रोक्तः पित्तकरो गुरुः" राजवल्लभ०।

वोल पु० वा-उलच्। गन्धरसे गन्धद्रव्यभेदे। "वोलस्तु कटुतिक्तोष्णः कषायो रक्तदोषहृत्। कफपित्तामयान् हन्ति प्रदरादिरुजापहः" राजवल्लभः। स्वार्थे क। तत्रार्थे पु० अमरः।

वोल्लाह पुंस्त्री० श्वेतवेशरवाङ्गुवयुते अत्रे हेमच०।

वोशि स्त्री अभवशरशब्दे १२६१पृ० दर्शिते अन्त्यकाले कृष्णांहितोयस्थे विचन्द्रयष्टे। तटपेक्षया द्वादशस्थे तु वेशौ।

वौषट् अव्य० वह-डौषट्। देवोद्देशेन हविष्क्षेपणे अमरः।

व्यंशक पु० विगतोऽंशोऽवयवोऽस्य। पर्वते त्रिका०।

व्यंसक पु० विगतोऽंसः स्कन्धो यस्य कप्। १भूते हेमच० २स्कन्धशून्ये। "मयूरव्यंसकादयश्च" पाणिनिसूत्रम्।

व्यंसित त्रि० वि+अंस-क्त। १वञ्चिते २प्रतारिते त्रिका०।

व्यक्त त्रि०वि+अञ्ज-क्त। १स्फुटे २प्रकाशिते मेदि० ३प्राप्ते अमरः। ४स्फुटे "व्यक्ताव्यक्तविज्ञानात्" सा० का०। ५विष्णौ पु० विष्णुस०। [साक्षिणि त्रिका०।

व्यक्तदृष्टार्थ पु० व्यक्तं स्फुटं दृष्टोऽर्थो येन। साक्षाद्दृष्टरि

व्यक्तरूप पु०व्यक्तानि स्थूलानि भूतान्येव रूपं यस्य। विष्णौ विष्णुस०। तस्य विराट्रूपेण सर्वभूतात्मकत्वात्तथात्वम्।

व्यक्ति स्त्री वि+अञ्ज-क्तिन्। १प्रकाशे क्विप्। २जने हेम०। पृथगात्मतारूपे एकैकविशेषे च अमरः। अभिव्यक्तिशब्दे दृश्यम्। [विशिष्टमयं यस्य। २विष्णौ पु० विष्णुस०।

व्यग्र त्रि०विगतमयं यस्य। १व्याकुले २व्यासक्ते च अमरः।

व्यङ्ग न०विगतं विकलं वाङ्गं प्रादिकर्म०। १विकलाङ्गे विगताङ्गं यस्य। २अङ्गहीने त्रि० ३भेके पुंस्त्री० मेदि० स्त्रियां ङीष्। ४सन्निपातरोगभेदे तन्निदानादि माधवनिदाने उक्तं यथा "क्रोधायासप्रकुपितो वायुः पित्तेन संयुतः। सङ्गमागम्य सहसा मस्तकं विकलत्यतः। नीरुजं तत्तकं ज्ञात्वा सद्यो व्यङ्गं तमादिशेत्"।

व्यङ्ग्य त्रि० वि+अञ्ज-ण्यत्। १व्यञ्जनया उक्त्या बोध्येऽर्थे "वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः। व्यङ्ग्यो व्यञ्जनया तास्तु सुधियः शब्दशक्तयः" सा०द०। २प्रकाश्ये च। [विधीत् विध्याच विविच्यतुः व्यचः।

व्यच व्याजे अक०सम्बन्धे सक०तु०कु०पर०सेट्। विचति अव्यजन न० वि+अञ्ज-ल्युट् नञादेशः। तालवृन्ते अमरः। "मूलादाकृष्टयाधर्मजमतुत् व्यजनानिलः। तालव्यजनजो वायुस्त्रिदोषशमनो लघुः। वंशव्यजनजो वायु रुष्णो वातपित्तकृत्। बेतसव्यजनोत्थस्तु त्रिदोषकृत्। बालव्यजनजो वायुर्मक्षिकादिनिवारकः। तेजस्करोऽयो विघ्नेयो विद्वद्भिर्भिषजां वरैः" राजव०।

व्यञ्जक पु० वि+अञ्ज-ण्वुल्-ण्वुच्। १कृतमभावादिप्रकाशके अभिनये अमरः। २व्यञ्जनवार्थबोधके शब्दे च सा०द० व्यञ्जनशब्दे दृश्यम्। ३प्रकाशकमात्रे त्रि०।

व्यञ्जन न० विशेषेणाञ्जते वि+अञ्ज-ल्युट्। १रूपणादौ

द्योदनभोजनोपकरणे राजनि० । "व्यञ्जनं शाकमत्स्याद्यं हृद्यं हव्यञ्च पुष्टिदम् । दूरेण येन येनेह व्यञ्जनं मृदुमांसयोः । तत्र तत्र तथार्थे तद्बहुदोषैर्विभावयेत्" राजव० । वि+अनज्-घञ्-ल्युट् । २चिह्ने २रूपकुष्ठि ४अवयवे ५दिने मेदः । ६उपस्थे ७अर्द्धमात्राकालेनोच्चार्य्ये हलक्षरे च धरणिः "व्यञ्जनं चार्द्धमात्रकम्" शिक्षा० । ८अलङ्कारप्रसिद्धे शब्दस्य वृत्तिभेदे च युच् । ६उक्तार्थे स्त्री "विरताभिधादाप्त यथार्थो बोध्यतेऽपरः । सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च । अभिधालक्षणामूलशब्दस्य व्यञ्जना द्विधा" सा० द० । तत्र अभिधामूला तच्छब्दे २६० पृ० दृश्या ।

"लक्षणामूलामाह "लक्ष्योपाश्रयते यस्य क्रते तत्तु प्रयोजनम् । यया प्रतीयते सा स्याद् व्यञ्जना लक्षणाश्रया" । (गङ्गायां घोषः) इत्यादौ जलमयादार्थबोधनादभिधायां विरतायां तटादार्थबोधनाच्च लक्षणायां विरतायां यया शीतत्वपावनत्वादितिरयवादिर्बोध्यते सा लक्षणामूला व्यञ्जना । एवं शाब्दी व्यञ्जनामुक्त्वाऽऽर्थीं व्यञ्जनामाह "वक्तृबोद्धव्यवाक्यानामन्यसन्निधिवाच्ययोः । प्रस्तावदेशकालानां काकोश्चेष्टादिकस्य च । वैशिष्ट्यादन्यमर्थं वा बोधयेत् सार्थसम्भवा" । व्यञ्जनेति सम्बध्यते । तत्र वक्तृवाक्ययोस्तावद्वैशिष्ट्ये यथा मम "कान्तो मधुः कुसुमित एव च पुष्पधन्वा धीरा वहन्ति रतिखेदहराः समीराः । केलीवनीयमपि वञ्जुलकुञ्जमञ्जुर्दूरे पतिः कथय किं करणीयमद्य" । अत्रैतं देवं प्रति श्रोतुं प्रच्छन्नकामुकत्वया प्रयुक्तम्" इति सखीं प्रति कयाचित् द्योत्यते । बोद्धव्यवैशिष्ट्ये यथा "निःश्रेयच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः । मिथ्यावादिनि ! दूति ! वाच्यवचनप्रातपीड़ागमे वार्यो स्वामितो गतासि न पुनस्तस्याधमस्यान्तिकम्" । अत्र तदन्तिकमेव गतासीति विपरीतलक्षणया लक्ष्यम् । तस्य च रन्तुमिति व्यङ्ग्यं प्रतिपाद्यटूतावैशिष्ट्यादवबोध्यते । अन्यसन्निधिवैशिष्ट्ये यथा "लक्ष्य चिह्न चिह्नन्दा भिसिनीपत्तम्मि रेहइ बलाआ । चिन्नलमरनलमाकअपरिट्ठिआ संकसुत्ति अ" । अत्र बलाकाया निस्पन्दत्वेन विश्वस्तत्वं तेनास्य देशस्य विजनत्वमतः सङ्केतस्थानमेतदिति कयापि सङ्केतितप्रच्छन्नकामुकं प्रत्युच्यते । अत्रैव स्थानविजनत्वरूपव्यङ्ग्यार्थवैशिष्ट्यं प्रबोधनम् । "भिन्नरुचध्वनिभेदैः काकुरित्यभिधीयते" । दलुक्रपकारायाः काकोर्भेदा आकारादिभ्यो ज्ञातव्याः । एतद्वैशिष्ट्ये यथा "गुरुपरवशतया चल दूरतरं देशमुद्यतो मन्तुम् । अलिकुलकोकिलललिते नैष्यति सखि ! सुरभिसमयेऽसौ" । अत्र नैष्यति अपि तु एष्यत्येवेति काकुर्व्यज्यते । चेष्टावैशिष्ट्ये यथा "सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया । हसन्येवार्पिताकूतं लीलापद्मं निमीलितम्" । अत्र सन्ध्या सङ्केतकाल इति पद्मनिमीलनादिचेष्टया कयाचित् द्योत्यते । एवं वक्त्रादीनां व्यक्तसमस्तानां वैशिष्ट्ये बोध्यम् । "त्रैविध्यादियमर्थानां प्रत्येकं त्रिविधा मता" । अर्थानां वाच्यलक्ष्यव्यङ्ग्यत्वेन त्रिरूपतया सर्वा अपनलरोक्ता व्यञ्जनास्त्रिविधाः । तत्र वाच्यार्थस्य व्यञ्जना यथा "कान्तो मधुः" इत्यादि । लक्ष्यार्थस्य यथा "निःश्रेयच्युतचन्दनम्" इत्यादि । व्यङ्ग्यार्थस्य यथा "उच्च चिह्नेत्यादि" । प्रकृतिप्रत्ययव्यञ्जनत्वन्तु प्रपञ्चयिष्यते "शब्दोबोध्यो व्यनक्त्यर्थं शब्दोऽर्थोन्तरात्मवः । एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता" । अतः शब्दो व्यञ्जकत्वेऽर्थान्तरमपेक्षते अर्थोऽपि शब्द, तदेकस्य व्यञ्जकत्वे अन्यस्य सहकारिताऽवश्यमङ्गीकार्या । "अभिधादिलक्षणोपाधिवैशिष्ट्यात्त्रिविधो मतः । शब्दोऽपि वाचकस्तद्वच्चको व्यञ्जकस्तथा" । अभिधोपाधिको वाचकः । लक्षणोपाधिको लक्षकः । व्यञ्जनोपाधिको व्यञ्जकः" सा० द० २५० ।

व्यञ्जित त्रि० वि+अनज्-णिच्-क्त । १प्रकाशिते "अव्यञ्जितस्वर्णलक्षणः" कुमारः । २व्यञ्जनाद्वारा बोधितेऽर्थे च ।

व्यडम्बक पु० डवि-एवुल् विशेषेण न डम्बकः । परच्छद्मे अमरः । [भेदि० ।

व्यतिकर पु० वि+अति-कृ-अप् । १व्यतिसम्बन्धे २अवने च

व्यतिक्रम पु० वि+अति+क्रम-घञ् न ह्रस्वः । १विपर्य्यये "विवाहे च व्यतिक्रमः" उ०त० । २विशेषतोऽतिक्रमे च ।

व्यतिरिक्त त्रि० वि+अति+रिच-क्त । भिन्ने "न लक्षणवृत्तिव्यतिरिक्तसाधनम्" इति कुमारः ।

व्यतिरेक पु० वि+अति+रिच-घञ् । १विशेषेण अतिक्रमे २अभावे ३विनेत्यर्थे ४अर्थालङ्कारभेदे च अलङ्कारशब्दे ३०४ पृ० दृश्यम् । न्यायोक्ते हेतुदृष्टान्ते तदसत्त्वरूपे कारणताप्राहके पदार्थभेदे अन्वयाभावव्याप्यीभूताभावप्रतियोगित्वरूपे व्याप्तिभेदे च ।

व्यतिरेकिन् न० वि+अति+रिच-घिनुण् । न्यायोक्ते सा०

भावव्यापकीभूताभावप्रतियोगित्वरूपव्याप्तिर्हेतुके १अनुमानभेदे "तच्चानुमानं त्रिविधं केवलान्वयिकेवलव्यतिरेकान्वयव्यतिरेकिभेदात्" चिन्तामणिः। यथा पृथिवी इतरभिन्ना गन्धवत्त्वात् इत्यादि। व्यतिरेकिदृष्टान्तश्च यत्तैवं तत्तैवमित्यादि। २अतिक्रामके च स्त्रियां ङीप्।

व्यतिषक्त त्रि० वि+अति+सृज-क्त। १मिलिते २व्याप्ते च

व्यतिषङ्ग पु० वि+अति+सृज-घञ्। परस्परमेलने।

व्यति(ती)हार पु० वि+अति+हृ-घञ् वा दीर्घः। परीवर्त्ते हेमच०। २परस्परैकजातीयक्रियाकरणे।

व्यतीत त्रि० वि+अति+इण्-क्त। अतीते "व्यतीतकालस्त्वङ्गमभ्युपेतः" इति रघुः।

व्यतीपात पु० वि+अति+पत-घञ् दीर्घः। १महोत्पातभेदे २अवमाने मेदि० विष्कम्भादिषु मध्ये ३योगभेदे ज्यो० त० "अवष्वाश्विधनिष्ठार्द्रानागदैवतमस्तके। यदामा रविवारेण व्यतीपातः स उच्यते" इत्युक्ते ४तिथ्यादियोगभेदे च पातशब्दे ४२८७पृ० दर्शिते सूर्य्यवि० उक्ते क्रान्तिसाम्यात्मके योगवियोगरूपे पूर्वभेदे

"व्यतीपातत्रयं वारं गण्डत्रितयं तथा। एतद् भसम्भवितयं सर्वकर्मसु वर्जयेत्" स्मृ०वि० "व्यतीपातानां त्रयं योगवियोगात्मकौ क्रान्तिसाम्यरूपौ द्वौ व्यतीपातौ विषुवत्सन्निधौ क्रान्तिसाम्यान्तरेण व्यतीपातत्वयोरेव भेदः न पृथक्। पञ्चाङ्गान्तर्गतयोगान्तर्गत व्यतीपातत्रयेति त्रयम्" रघु०। भविष्यपु० "चतुर्दश्यां यदा योगो व्यतीपातेन चाष्टम्या। तदा पुण्यतमः कालो देवानामपि दुर्लभः। तदा यः स्नाति गङ्गायां भक्त्या तत् फलमाप्नुयात्। यत्र तत्र विष्णो हि सन्निधानन्तु सः" प्रा० त० उक्ते ६तिथ्यादियोगभेदे। "निरयं दिवसं विष्टिं व्यतीपातञ्च वैष्टिम्। जेन्द्रं वापि शुभैर्हीनं वाषाढ्मपि वर्जयेत्। परिघस्य त्यजेदर्द्धं शुभकर्म ततःपरम्। गण्डव्याघातयोः षट् च नव वैधृतिवज्रयोः। वैष्टिं व्यतीपातौ च समस्तं परिवर्जयेत्"। अस्य प्रतिप्रसवमाह भीमपराक्रमे "न विष्कम्भो न वा गण्डो न व्यतीपातवैधृती। चन्द्रतारावले प्राप्ते दोषास्तत्यसंशयाः। नवमन्यत्रको विष्टिः शनैश्चरदिनं तथा। व्यतीपातो न दुष्यन्ति यत्रार्कौ दक्षिणे स्थितः। यदि विष्टिव्यतीपातौ दिनं वाप्यशुभं भवेत्। हन्यतेऽमृतयोगेन भास्करेण तमो यथा" ज्यो० त०। [अमरः।

व्यत्यय पु० वि+अति+इण्-अच्। १अतिक्रमे २विपर्य्यये च

व्यत्यास पु० वि+अति+अस-घञ्। विपर्य्यये अमरः।

व्यथ भये चलने दुःखानुभवे च भ्वा०आत्म०अक०सेट्। व्यथते अव्यथिष्ट मित् घटा०। व्यथयति मित् अङ् व्यथा।

व्यथा स्त्री व्यथ-भावे अङ्। १पीडायाम् २दुःखे च अमरः।

व्यध ताडने दि०पर०सक०अनिट्। विध्यति अव्याक्षीत्। विव्याध विविधतुः। [२भेदने च।

व्यध पु० व्यध-अच्। १वेधे अमरः भावे अप्। २छिद्रीकरणे

व्यध्व पु० विरुद्धः अध्वा अच्समा०। कुपथे अमरः।

व्यप क्षये चुरा०उभ०सक०सेट्। व्यापयति-ते अविव्यपत्-त।

व्यपदेश पु०वि+अप+दिश-घञ्। १कथने २संज्ञायां त्रिका०। ३कापट्ये हेमच०। ४मुख्यव्यवहारे च।

व्यपदेशिन् त्रि० निमित्तसङ्गावाद् विशिष्टोऽपदेशो मुख्यो व्यवहारोऽस्यास्ति इनि। मुख्यव्यवहारविषये पटार्थे "व्यपदेशिवदेकस्मिन्" व्या० प०। व्यपदेशेन तुल्यं वर्त्तते इति वति। कार्य्यं प्रति एकस्मिन्नसङ्गावेऽपि तत् कार्य्यं कर्त्तव्यमिति तदर्थः। [२छलाटने।

व्यपरोपण न० वि+अप+रुह-णिच्-ल्युट् हस्वः। १छेदने

व्यपरोपित त्रि० वि+अप+रुह-णिच्-क्त हस्वः। १छिन्ने २छलाटिते च। [२अस्वीकारे ३निह्नवे च।

व्यपाकृति स्त्री वि+अप+आ+कृ-क्तिन्। १निराकरणे

व्यपाश्रय पु० वि+अप+आ+श्रि-अच्। आश्रये।

व्यपेक्षा स्त्री वि+अप+ईक्ष-अ। अपेक्षायां व्याकरणोक्ते अन्वयव्यापेक्षत्वे च।

व्यभिचार पु० वि+अभि+चर-घञ्। १निन्दिताचारे २स्त्रियाः परपुरुषसंगे ३दुःसङ्गे परस्त्रीसङ्गमे न्यायादिप्रसिद्धे ४हेत्वदोषभेदे च।

हेत्वदोषभेदश्च अनैकान्तरूपः। "साधारणासाधारणानुपसंहारिणामन्यतमत्वं च अनैकान्तिकत्वम्" सि० सु० "आद्यः साधारणस्तु स्यादन्योऽसाधारणो मतः। तथैवानुपसंहारी त्रिधा नैकान्तिको भवेत्" भाषा०। "साधारणः साध्यवदन्यवृत्तिर्हेतुः। तेन च व्याप्यत्वप्रतिबन्धः क्रियते। असाधारणः साध्यसमानाधिकरणो हेतुः। तेन साध्यसामानाधिकरण्यप्रतिबध्यते। सत्प्रतिपक्षे तु प्रतिहेतुः साध्याभावसाधकः। अत्र तु हेतुरेवेति विशेषः। साध्याभावसाधक एव साध्यसाधकत्वेन उपन्यस्त इत्यशक्तिविशेषोपस्थापकत्वाच्च विशेषः। सत्प्रतिपक्षः साध्याभावव्याप्यवान् पक्षः। अस्यैतावान्प्रामाण्यकसाध्याप्यत्वेनोप-

स्थितिकालीनसाध्याभावव्याप्यत्वेनोपस्थितिविषयकत्वा दुक्तम्। अत्र च परम्परासाध्यव्याप्यत्वज्ञानात् परम्परानुमितिप्रतिबन्धः फलम्" सि०सु०। अधिकता व साध्यवन्मात्रवृत्त्यत्वे सति साध्याभावकालवृत्त्यन्यत्वम्" इत्यनैकान्तिकत्वमिति लक्षितम्।

व्यभिचारिन् पु० वि+अभि+चर-णिनि। १अवहारोक्ते रसप्रादुर्भावङ्गे निर्वेदादौ सञ्चारिभावे तद्ग्रन्थभेदादिकं का०८ परि० उक्तं यथा "विनिर्वेदादयस्त्रिंशत् सञ्चारी व्यभिचारिणः। स्थायिन्युन्मज्जनिर्मग्नाः सञ्चरन्ति रसे तु ते। निर्वेदावेगदैन्यश्रममदजड़ता औग्र्यमौत्सुक्यनिद्रा-व्रीडोन्मादस्मृतीनामरुणसबलतामर्षनिद्रावहित्थाः। औत्सुक्यौग्र्यहर्षाद्भुत-धृतिमतिसंज्ञिता व्याधिसन्त्रासलज्जा-श्रङ्कासूयाविषादाः सुप्तिबोधामर्षगर्वाः स्मृतिचपलता ग्लानिचिन्तावितर्काः" इति विभक्ति लक्षिता यथा "तत्त्वज्ञानादयो-ऽनिर्वेदः। स्वमानना। दैन्यचिन्तास्रविश्वासवैवर्ण्याश्रुकृशतादिकृत्। आवेगः। सम्भ्रमस्त्वत्वरजे पीड़िताकृता। त्वत्पातजे स्खलताङ्गे भूताद्याकुलतास्मिजे। राजविद्रवलादेस्तु शस्त्रनागादिवीक्षणम्। गजादेःस्तम्भकम्पादिः पांशुद्याकुलतानिजात्। दृष्टादर्थात् शुचोऽनिष्टाज्ञेयाद्वान्ये यथायथम्। दौर्बल्याद्यैरनौत्सुक्यं दैन्यं। श्रमिनतादिकृत्। खेदोरत्यध्वगत्यादेः श्वासनिद्रादिकृच्छ्रमः। सम्भोगानन्दसम्भेदो मदोऽन्यद्योषयोगजः। अरुणा चाक्षिणः रोते मध्या कृपति गायति। अधर्मप्रकृतित्वापि परस्वं वक्ति रौद्रिति। अप्रतिपत्तिर्जड़ताद् ज्ञादिष्टानिष्टदर्शनश्रुतिभिः। अविभिन्नमयननिरीक्षणष्ठीवीभावादवज्ञा। शौर्यापराधादिभवं भवेद्भयं तत्त्वसम्पतात्। तत्र खेदः शिरःकम्पतर्जनाताड़नादयः। मोहोऽविचित्तता मीतिदुःखावेगात्तुचिन्तनैः। घूर्णनाभ्रान्तपतनभ्रमणादर्शनादिकृत्। निद्रापगमहेतुभ्यो विबोधश्चेतनागमः। जृम्भाङ्गभङ्गनयनमीलनाङ्गावलोकनकृत्। स्वप्नोऽनिद्रासमेतस्य विषयानुभवस्तु यः। कोपावेगमदभ्रान्तिसुखदुःखादिकारकः। मनःक्षेपस्त्वपस्मारो॥ यद्दाद्यावेशनादिकृत्। मूर्खात्तकर्मप्रज्ञेदर्फेनलालादिकारकः। गर्वो॥२ मदः प्रभावश्रीविद्यासत्कुलतादिजः। अवज्ञासविलासाकृदर्शनाविनयादिकृत्। धराद्यैरर्थ॥२ लोपत्यागोऽङ्गपतनादिकृत्। आलस्यं॥३ श्रमगर्भोद्भवो जृम्भाङ्गमुतादिकृत्। निन्द्याक्षेपापमानादेरमर्षो॥५ऽभिनिविष्टता। नेत्ररागशिरःकम्पभ्रूभङ्गोत्तर्जनादिकृत्। चेतः-सम्मोहनं निद्रा॥६ श्रमक्लममदादिजम्। जृम्भाङ्गभङ्ग-नयनोच्छ्वासगात्रभङ्गादिकारकम्। भयगौरवलज्जादेर्मुखाद्याकारगुप्तिरवहित्था॥७। व्यापारान्तरसक्तान्यभावविलोकनादिकरी। दृष्टानवाप्तेरौत्सुक्यं॥८ कालक्षेपासहिष्णुता। चित्ततापत्वराखेददीर्घनिश्वसितादिकृत्। चित्तसम्मोह उन्मादः॥९ कामशोकभयादिभिः। अस्थानहासरुदितगीतप्रलपनादिकृत्। परकौशलदोषाद्यैः शङ्का॥१०ऽनर्थस्य तर्कणम्। वैवर्ण्यं कम्पवैस्वर्यं पार्श्वालोकाङ्गगोपनकृत्। सदभ्यासनचिन्ताद्यैर्भूयस्त्वमनादिकृत्। स्मृतिः॥११ पूर्वानुभूतार्थविषयज्ञानमुच्यते। नीतिमार्गानुसृत्यादेरर्थनिर्द्धारणं मतिः॥१२ क्षेरता धृतिरुन्मोषो बहुमानश्च तद्भवाः। व्याधि॥१३र्ज्वरादिर्वातादेर्भूयो मोक्षोत्कम्पनादिकृत्। निर्घातविद्युदुल्कादेस्त्रासः॥१४ कम्पादिकारकः। धार्ष्ट्याभावो व्रीड़ा॥१५ वदनानमनादिकृद् दुराचारात्। हर्षः॥१६स्त्रिष्टालाभ्रेर्मनःप्रसादाऽङ्गगद्गदादिकरः। असूया॥१७न्यगुणख्यातीनामौद्धत्यादसहिष्णुता। दोषोद्घोषभ्रूविभेदावज्ञाक्रोधेङ्गितादिकृत्। उपायाभावजन्या तु विषादः॥१८ सत्त्वसङ्क्षयः। निःश्वासोच्छ्वासकृच्छ्रायासेष्टादिकृत्। ज्ञानाभीष्टागमादौस्तु सम्भ्रमेऽस्थिरा धृतिः॥१९। व्रीड़ित्यवचनोद्वासहासप्रतिभादिकृत्। मातस्वर्द्वेषरागादेरवज्ञा॥२० त्वनवस्थितिः। तत्र भर्त्सनपारुष्यभ्रूस्खलन्दाचरत्यादयः। रत्यायासमनस्तापक्षुत्पिपासादिसम्भवा। ग्लानि॥२१र्निष्प्रायताकर्मकार्श्यान्ततापादिकृत्। ध्यानं चिन्ता॥२२ स्थितानाप्तेः शून्यतालम्बतापकृत्। तर्को॥२३विचारः सन्देहाद् भ्रूशिरोऽङ्गुलिनर्त्तकः। रत्यादयोऽध्यानयते रसे कुर्व्यभिचारिणः। श्रृङ्गारवीरबीभत्सा वीरे क्रोधस्तथा मतः। शान्ते जुगुप्सा कथिता व्यभिचारितया पुनः। इत्याद्यन्तर्गतस्तेषां स्वयमूह्यस्तत्त्वबुद्धिभिः"। न्यायोक्ते २व्यभिचारदूषणहेतुपदार्थे च। २परपुरुषगामिन्यां स्त्रियां स्त्री ङीष्। "कृताधिकारां मलिनां पिण्डमात्रोपजीविनीम्। परिभूतामधःशय्यां वासयेद्व्यभिचारिणीम्"। "सोमः शौचं ददौ तासां गन्धर्वश्च गिरम्। पावकः सर्वभक्षत्वं मेध्या वै योषितो ह्यतः" इति तु स्त्रीसामान्यविषयम्। "व्यभिचाराद्ऋतौ शुद्धिर्गर्भे त्यागो विधीयते। गर्भभर्तृवधे तासां तथा महति पातके" गरुड़े ८५अ०। तस्याः परित्यागादि हेत्वमाह हारीतः

"गर्भिणीमपोवर्षगां शिष्यसुतनाभिनीं पापव्यसनासक्तां धनधान्यक्षयकरीं वर्जयेत्"। यमः "स्वच्छन्दगा हि या नारी तस्यास्त्यागो विधीयते। न चैव स्त्रीवधः कार्यो न चैवाङ्गविमोजनम्"। हारीतः "हीनवर्णोपभुक्ता या त्याज्या वध्यापि वा भवेत्"। विज्ञेश्वरोऽपि मिताक्षरायां स्मृतिः "ब्राह्मणक्षत्रियविशां भार्याः शूद्रेण संस्कृताः। अप्रजास्तावियुक्तास्ति प्रायश्चित्तेन नेतराः"। एतत् बलात्कारविषयम् उद्वा० त०।

व्यय गतौ त्यागे कट्० चु० उभ० सक० सेट्। व्ययति ते अव्ययत् त। [व्यथित अव्यथिष्टम् (ध्वस)।

व्यय गतौ भ्वा० प० सक० सेट्। व्ययति ते अव्ययीत् अव्यय नोदे चु० उभ० सक० सेट्। व्याययति ते अविव्ययत् त।

व्यय पु० वि+इण्-अच्। १विगमे २धनादेस्त्यागे अमरः। ज्योतिषोक्ते जन्मात् १२तमस्थाने च ज्यो० त०।

व्यर्थ त्रि० विगतोऽर्थः प्रयोजनं यस्य। १निष्प्रयोजने २विफले जटा० ३अर्थशून्ये च।

व्यलीक न० वि+अल-ईकक्। १दुःखार्थे २वैरक्ष्ये केटि० ३अपराधे हेमच० ४अप्रिये ५दुःखदे च अमरः। ६तद्वति त्रि०। ७अप्रतीतायां स्त्रियां ८गतिविषयेऽपि भरतः।

व्यवकलन न० वि+अव-कल-ल्युट्। १वियोजने हेमच० २विगमने ३हीनतासम्पादने च "व्यवकलनमार्गेऽसि कुशला" गीता०।

व्यवकलित त्रि० वि+अव+कल-क्त। वियोजिते। [त्रिका०।

व्यवच्छिन्न त्रि० वि+अव+छिद-क्त। १छिन्ने २विशेषिते च

व्यवच्छेद पु० वि+अव+छिद-घञ्। १पृथक्करणे २विशेषकरणे ३मोचने च ४वाक्यसङ्गे हेमच०।

व्यवधा स्त्री वि+अव+धा-क। व्यवधाने अमरः।

व्यवधान न० वि+अव+धा-ल्युट्। १तिरोधाने २द्रव्यान्तरेण द्रव्यान्तरस्याच्छादने च हेमच०। [२काच्छादके च

व्यवधायक त्रि० वि+अव+धा-ण्वुल्। १व्यवधानकर्त्तरि

व्यवधि पु० वि+अव+धा-कि। व्यवधाने शब्दच०।

व्यवसाय पु० वि+अव+सो-घञ्। १उद्यमे "अरक्षव्यवसायत्वं किमङ्गकुमारः। २वणिजीविकायाम् ३अनुष्ठाने ४अवधारणे च "व्यवसायात्मिका बुद्धिः" गीता। ५विष्णौ विष्णुस०।

व्यवस्था स्त्री वि+अव+स्था-क। १शास्त्रविहितस्य विषयान्तरपरिहारेण विषयविशेषे स्थापने २शास्त्रमर्य्यादायाञ्च

व्यवस्थान न० वि+अव+स्था-ल्युट्। १व्यवस्थायाम्। कर्त्तरि ल्युट्। २विष्णौ पु० विष्णुस०।

व्यवस्थित त्रि० वि+अव+स्था-क्त। विषयान्तरपरिहारेण विषयविशेषे अवस्थिते १शास्त्रविहिते पदार्थे २अवस्थितमात्रे च।

व्यवस्थितविभाषा स्त्री कर्म०। व्याकरणोक्ते विषयान्तरपरिहारेण विषयविशेषेऽवस्थितरूपे विकल्पे।

व्यवहर्त्तृ त्रि० वि+अव+हृ-तृच्। व्यवहारकर्त्तरि।

व्यवहार पु० वि+अव+हृ-घञ्। १अर्थविशेषबोधनाय शब्दविशेषप्रयोगे २क्रयादानादिव्यवहारेषु ३सङ्घाशनभोजनादौ च

विवादरूपव्यवहारलक्षणं वीर० मि० शङ्खः यथा

"अथ कोऽयं व्यवहारः प्रमाणतर्कोपलक्षः पक्षप्रतिपक्षपरिग्रहः इति चेन्न वादादेरपि तत्त्वापत्तेः। लिखितादिः प्रमाणविशेषः परिग्रहस्तत इति चेत् तत्रापि तत्प्रहत्वविरोधात्। अनुमानागमबहिर्भावाच्च तेषामव्यावर्त्तकत्वात्। अतएवान्यविरोधेन स्वसम्बन्धितया कथनमित्यपि परास्तम्। प्रमाणान्तर्भावेण स्वरूपनिरूपणानौचित्याच्च कथनादेर्व्यवहारपदवाच्यत्वे "व्यवहारान्नृपः पश्येदित्याद्यनन्वयाच्च। उच्यते। क्रयादानादिलौकिकार्थविषया कथैव व्यवहारः। कथाव्यपदेशाभावस्तु शास्त्रीयपदार्थविषयत्वात् अधिकरणादिव्यपदेशो यथा वैदिकार्थविषयकथायामाख्यातव्यवहारव्यपदेशः। अतएव यथायथं हेत्वाभासनिग्रहस्थानादियोजनमपि युक्तम्। तत्र तत्र तत्र प्रदर्शयिष्यते। चतुष्पात्त्वमपि तस्य तदविरोध्येवोपादयिष्यते। यत् तु गोपालेन तत्त्वनिर्णयेषु कथात्रादात्वमेवाङ्गीकृत्य मिश्रमतत्वेनोपन्यस्य जयभङ्गफलकत्वात् स्थापनावसानत्वाच्च अत्रुटितावयवमिति तन्निरस्तम्। तस्यैकविधत्वमयुक्तम्। यद्धातत्त्वाभियोगभेदेन उभयरूपत्वस्यैव युक्तत्वात्। वैतण्डिकस्य व्यवहारायोग्यत्वादस्य वितण्डात्वव्यपदेशस्यापि। अन्यविरोधेन स्वसम्बन्धितया कथनमिति विज्ञानयोगिवचोऽप्येवं सति नायुक्तम्। न च पक्षे दित्यनन्वयः निर्णयार्थकथनतया सर्वनिबन्धृभिस्तदाख्यानात्। "स्वाचारव्यपेतेन मार्गेणाधर्षितः परैः। आवेदयति चेद्राज्ञे व्यवहारपदं हि तत्" याज्ञवल्क्यवचनं यद्यपि व्यवहारपदान्यृणादानादीनि सामान्येन वक्ष्यति तथापि वक्ष्यवहारसामान्यलक्षणमपि समानसम्बन्धिसंवेदात्तया ततः प्रतीयते। तस्मादयमर्थः स्वाचारादिधर्मप्रमाणातिक्रान्तरीत्यान्यैरभिभूतः सन्नर्थो-

राजादिभ्यो व्यवहारदर्शिभ्यो यदावेदयति तर्हि तदाऽऽवेद्यमानत्वमादुव्यवहारस्य पदं विषयः। इति प्रतिज्ञादानादिलक्षत्वेन मन्वादुक्तसपक्षिप्तमिति। एवञ्चार्थसिद्धत्वमाधर्मकस्य प्रत्यक्षित्वन्नयोर्विवादश्च व्यवहार इति प्रतीयते। इदमेव च मिताक्षरायामन्यविरोधेनेत्यादिना निष्कृष्टमस्तम्। अन्यविरोधेनेत्यस्तके प्रश्नोत्तरादिरूपेण स्वसम्बन्धिकथनमपि व्यवहारः स्यात्। स्वसम्बन्धितयेत्यस्तके एकसम्बन्धितया साक्षिणा कथनमन्यविरोधि भवत्येवेत्यसाध्यत्वापत्तिरतः स्वसम्बन्धितयेति। इदं चोत्तरचतुष्टयेऽप्यनुगतम्। न च सम्मतिपत्तावप्राप्तिः तत्रापि साध्यतया वादिना निर्दिष्टस्य सिद्धतया निर्देशे तद्विरोधपर्यवसानात् स्वयमोत्तरत्वभङ्गप्रसङ्गात्। यद्यपि द्वावपि भाषावादिनौ तत्रापि परस्परविरोधावश्यम्भावाद्वाप्तिः। इदं चार्थे व्यक्तीभविष्यति। यच्च कात्यायनेनोक्तम् "प्रयत्नसाध्ये विच्छिन्ने धर्माख्ये न्यायविस्तरे। साध्यमूलस्तु यो वादो व्यवहारः स उच्यते" इति एतच्च व्यवहारोक्तव्यवहारस्वरूपोक्तिपरतया, साधवीयपारिजातादिभिर्व्याख्यातम् "विच्छिताचरणनिबिद्धवर्जनादिप्रयत्नसाध्ये धर्माख्ये वस्तुनि विच्छिन्ने विप्लुते सतीति व्यवहारहेतुरूपः धर्मोधर्मविप्लवस्यैव व्यवहारहेतुत्वात्। तथा च नारदः "मतः प्रजापतिर्यस्मिन् काले राज्यमभुञ्जत। धर्मैकतानाः पुरुषास्तदासन् सत्यवादिनः। तदा न व्यवहारोऽभूच्च द्वेषो नापि मत्सरः। नष्टे धर्मे मनुष्येषु व्यवहारः प्रवर्त्तते" इति। बृहस्पतिरपि "धर्मप्रधानाः पुरुषाः पूर्वमासञ्च त्रिंशकाः। लोभद्वेषाभिभूतानां व्यवहारः प्रवर्त्तते" इति। न्यायेत्यादिना व्यवहारस्वरूपमुक्तम्। तत्र साधवीयव्याख्यानम्। न्यायः शिष्टसम्मतिपत्रं लौकिकमाचरणं तस्य विस्तरः इदं युक्तमिदमयुक्तमिति उपपत्तिपुरःसरो निर्णयः। तस्मिन् विषयभूते तत्प्रवर्त्तकोऽर्थिप्रत्यर्थिनोः साध्यमूलः साध्यस्वादानादिपदं तन्मूलस्तद्विषयको यो विवादः स व्यवहार इति। मदनरत्ने तु न्यायः प्रमाणस्य विस्तरः प्रवर्त्तियंत्र तस्मिन् विषय इति। साध्यमूलेत्यादि तुल्यम्। मदनरत्नाकरस्मृतिचन्द्रिकाकल्पतरुकारैः सर्वभेदं वचनं व्यवहारस्वरूपपरतयापि व्याख्यातम्। प्रयत्नसाध्ये कष्टसाध्ये पराभिभवेन स्वेच्छया भोक्तुमशक्ये सति हेत्वादौ सति न्यायः प्रमाणं विस्तार्यते प्रवर्त्तते यस्मिन् तस्मिन् धर्माधिकरणे सदसि साध्यमूलेत्यादि पूर्ववत्। तेनापि प्रागुक्तमेव विवक्षितमतस्तत्प्रत्यवस्थानमतीव यतितव्यम्। वयन्तु सर्वं सम्मन्वनसामान्याधिकरण्येन व्याचक्ष्महे। विच्छिन्नानुष्ठानादिगोचरप्रयत्नसाध्ये धर्माख्ये न्यायविस्तरे नीयतेऽर्थोऽनेनेति न्यायः प्रमाणं स्मृतिसूत्रादि विस्तार्यते प्रवर्त्तेतऽस्मिन् स्मृत्यादिप्रमेय इत्यर्थः। विच्छिन्ने प्रमाणापरिज्ञानतात्पर्य्यानवधारणादिना दुष्टत्वे सति। यद्वा। धर्मे व्याख्यायतेऽनेनेति धर्माख्यो धर्मप्रतिपादक इति यावत्। न्यायविस्तरे प्रमाणसमूहे स्मृतिसूत्रादौ प्रमाणादिना विच्छिन्ने लुप्तप्राये सति साध्यमूलेत्यादि गतार्थमिति। स्मारोक्तः "स्वधर्मश्च यथा प्राप्तिः परधर्मश्च वर्जनम्। न्यायेन क्रियते यत्र तु व्यवहारः स उच्यते" इति। न्यायेन प्रमाणेन। एतच्चापि पूर्वोक्त एव तात्पर्य्यम्। तन्निरुक्तिभेदाश्च तत्र दर्शिता यथा "निरुक्तिमपि व्यवहारपदस्यास्यैवं सुपपद्यते। यच्च कात्यायनेनोक्तं "विना नार्थेन सन्देहो हरणं हार उच्यते। नानासन्देहहरणाद् व्यवहार इति स्मृतः" इति। अथ व्यवहारभेदानाह नारदः "द्वौत्तरोत्तरवेति स विप्रोक्तो द्विसप्तधः। द्वोत्तरोऽभ्यधिको यत्र विशेषपूर्वकः पथः" इति। यदि पराजयेऽपि तदा पराजयदण्डाभ्यधिकमेतावद्दास्यामीति यत्र लेखनपूर्वकं प्रतिपद्यते स द्वोत्तर इत्यर्थः। तद्विपरीतस्तूत्तर इत्यर्थादुक्तं भवति। स एव त्रयोदशप्रकारनिबन्धनानवान्तरभेदानुद्दिश्य विस्तृतवान् यथा "चतुष्पाच्च चतुःस्थानश्चतुःसाधन एव च। चतुश्चित्तचतुर्व्यूहो चतुष्कारी च कीर्त्तितः। त्रिद्वारस्त्रिविधोयुक्तस्त्रिद्वारोद्विगतिस्तथा। षडङ्गोऽष्टादशपदः सप्तधा चैव च। धर्मश्च व्यवहारश्च चरित्रं राजशासनम्। चतुष्पाद् व्यवहारोऽयमुत्तरः पूर्वबाधकः। तत्र सत्ये स्थितो धर्मो व्यवहारस्तु साक्षिषु। चरित्रं तु कीर्त्तिरूपे राजाज्ञायान्तु शासनम्। साम्नादुपायसाध्यत्वात्तुतःसाधन उच्यते। चतुर्व्यासपि वर्णानां रक्षणाच्च चतुश्चित्तः। कर्त्तृनयो साक्षिणश्च सभ्यान् राजानमेव च। व्याप्नोति तान्यो यस्माच्चतुर्व्यूहो ततः स्मृतः। धर्मस्यार्थस्य यशसोलोकयोश्चैव च। चतुर्णामुद्भवादेव चतुःकारी प्रकीर्त्तितः। कामाद् क्रोधाद् लोभाद्

त्रिभ्यो यस्मात् प्रवर्त्तते । त्रियोनिः क्रीर्य्यते तेन त्रय-मेतदिवादिकात् । दृभियोगस्तु विप्रेयः शङ्खातत्त्वाभि-योगतः । शङ्खाऽयतान्तु संसर्गात्तत्त्वं क्रोडाभिदर्शनात् । पञ्चत्वाभिसम्बन्धात् हिंसतिः सप्तदाहृतः । पूर्ववाद-स्तयोः पञ्चः प्रतिपञ्चस्तदुत्तरः । भूतप्रत्ययानुसारित्वात् हिंसतिः सप्तदाहृतः । भूतत्त्वार्थसंयुक्तं प्रमादाभिहितं क्रमम् । राजा१ सप्तस्वः सभ्यः२ शास्त्रं३ गणकलेख-कौ४ ५ । हिरण्यहस्तिन्७रटकटसटाहुः सप्तदाहृतः । अपादानं १ध्रुवनिधिः२ सम्प्रयोज्यानः३ सेव च । दत्तस्य पुनरादानः४ अनुशूश्रूषाभ्युपेत्य च । वेतनस्यानपाकर्म६ तथैवास्वामिविक्रयः७ । विक्रीयासम्प्रदानं८ च क्रीत्वानु-शयः९ एव च । समयस्यानपाकर्म१० विवादः चेतज११ स्तथा । स्त्रीपुंसयोश्च सम्बन्धो१२ दायभागो१३ऽथ साक्ष्यः१४ । वाक्पारुष्यं१५ तथैवोक्तं दण्डपारुष्य१६मेव च । द्यूत१७समाह्वयौ१८ द्वावेव त्रिदशपदः स्मृतः । क्रियाभेदान्मनुष्याणां शतशाखो निगद्यते" इति ।

व्यवहारपद न० ६त० । व्यवहारविषये ।

व्यवहारमातृका स्त्री व्यवहारस्य विवादनिर्णयस्य मातेव बोधकत्वात् परिच्छेदकत्वाद्वा इवार्थे कन् । व्यवहार-निर्णयार्थं प्राड्विवाकादिकार्य्ये क्रियासमूहे "व्यवहाराङ्गः पञ्चेत्" इत्युक्तो व्यवहारः सोऽय-मित्थं चतुष्पाच्चतुरंगकल्पनया विवादेषु अर्थादानादि-रूपदर्शितो वर्णितः "तत्र प्रत्यर्थिनोऽग्रतो लेख्यम्" इति भाषापादः प्रथमः । "श्रुतार्थस्योत्तरं लेख्यम्" इत्युत्तर-पादो द्वितीयः । "ततोऽर्थी लेखयेत्पक्षं" इति क्रि-यापादस्तृतीयः । "ततसिद्धौ सिद्धिमाप्नोति" इति सा-ध्यसिद्धिपादश्चतुर्थः । यदुक्तम् "परस्परं मनुष्याणां स्वार्थविप्रतिपत्तिषु । वाक्यान्यायाश्रयस्थानं व्यवहार चटाहृतः । भाषोत्तरक्रियासाध्यसिद्धिभिः क्रमवृत्तिभिः । आद्यिप्रचतुरंशस्तु चतुष्पादभिधीयत" इति । सम्प्रति प्रत्युत्तरे तु साधनानिर्देशाद्भाषार्थस्यासाध्यत्वाच्च न साध्य सिद्धिलक्षणः पादोऽस्तीति द्विपाच्चमेव । उत्तराभिधाना-नन्तरं सभ्यानामग्रे प्रत्यर्थिनोः कस्य क्रिया स्यादिति परा-मर्शलक्षणस्य प्रत्याकलितस्य योगीश्वरेण व्यवहारपादत्वे-नाभिधानात् व्यवहारस्य सम्बन्धाभावाच्च न व्यवहारपाद-त्वमिति स्थितम् इति व्यवहारमातृका । एवं सर्वव्य-वहारोपयोगिनीं व्यवहारमातृकामभिधायाधुना क्वचित् व्यवहारविषये कस्मिंश्चिद्विशेषं दर्शयितुमाह मिता० ।

व्यवहारिक त्रि०व्यवहारः प्रयोजनतयाऽस्त्यस्य ठन् । व्य-वहारयोग्ये लोकप्रसिद्धे घटपटादौ स्त्रियां ङीप् । २रङ्गदृश्ये २लोकव्यवहारार्थां ३सभाऽर्च्यां स्त्री मेदि० ।

व्यवहारिकसत्ता स्त्री कर्म० । १व्यवहारोपयिके सत्त्वे वे-दान्तकल्पिते ब्रह्मभिन्नपदार्थमात्रस्य वस्तुतोऽसत्त्वेऽपि व्यवहारयोग्ये सत्त्वे येन घटादि व्याख्यायते । तत्का-र्यंकरयोपयोगित्वेन कल्पिते घटादेरर्थक्रियाकारित्व-रूपे २सत्त्वे च ।

व्यवहार्य्य त्रि० वि+अव+हृ-ण्यत् । दृढमित्यमेवेत्येवंरूपेण व्यवहारविषये येन सह भोजनादिकमेकपङ्क्तौ क्रि-यते २तस्मिंश्च जने ।

व्यवहित त्रि० वि+अव+धा-क्त । व्यवधानवति पदार्थे ।

व्यवाय पु०वि+अव+इण-घञ् । १स्त्रीसम्भोगे अमरः । २अन्तर्धाने च शेषश्चि न० मेदि० । ४शुद्धौ पु० जटा० ।

व्यवायिन् त्रि० वि+अव+इण्-णिनि । स्त्रीसम्भोगकारके स्त्रियां ङीप् ।

व्यसन न० वि+अस-ल्युट् । १विपत्तौ २अन्धे कामजाते कोपजाते च स्त्रीभोगमद्यपानादौ ३दोषे ४देवादिकृते उपद्रवे च ५पापे हेमाद्रिः । "व्यसनान्याह भगवः कामजेषु प्रसक्तो हि व्यसनेषु मही-पतिः । विमुच्यतेऽर्थधर्माभ्यां क्रोधजेष्वात्मनैव तु । मृगयाक्षो२ दिवास्वप्न३ परीवादऽस्त्रियो५ मदः६ । तौर्यत्रिकं७ वृथाट्या८ च कामजो दशको गणः । पैशुन्यं१ साहसं२ द्रोह३ ईर्षाऽसूयाऽर्थदूषणम्४ । वाग्दण्डजञ्च पारुष्यं७ क्रोधजोऽपि गणोऽष्टकः" । तौर्यत्रिकं नृत्यगीतवाद्यानि त्रीणीति दश । पैशु-न्यमविज्ञातपरदोषाविष्करणम् । साहसं साधोर्बन्धना-दिना निग्रहः । द्रोहो जिघांसा । ईर्षा अन्यगुणाक्ष-मिष्णुता । असूया परगुणेषु दोषाविष्करणम् । अर्थ-दूषणम् अधर्मेणापहरणं देवानामदानञ्च मनुः८ ।

व्यसनार्त्त त्रि० व्यसनेनार्त्तः । २देवाद्युपद्रवयुक्ते ।

व्यसनिन् त्रि० व्यसनमस्यास्ति इनि । १व्यसनयुक्ते कामजा-दिमद्यपानादिरूपदोषयुक्ते २देवाद्युपद्रुते च हेमच० ।

व्यसु त्रि० विगताः असवो यस्य । १मृते "ग्रामे जातो भवेद्-व्यसुः" ज्योतिषम् ।

व्यस्त त्रि० वि+अस-क्त । १प्राकृते २व्याप्ते मेदि० ३विभक्ते च "व्यस्तादिदिक्ष्वस्ते" कुमारः । ४विपरीते "एतद्-व्यस्तं महावीरम्" ति०त० । "व्यस्तविधिर्विलोमे" लोला० ।

५बहुदितपदार्थमध्ये एकैकस्मिन्। "एते व्यस्ता समस्ता वा" विश्वामित्रः। ६समस्तभिन्ने च भावे क्ल। ७व्यतिक्रमे त्रि०

व्याकरण पु० व्याक्रियन्ते व्युत्पाद्यन्ते अर्थवत्तया प्रतिपाद्यन्ते शब्दा येन वि+आ+कृ-करणे ल्युट्। वेदाङ्गे शब्दसाधुत्वबोधके १शास्त्रभेदे वेदाङ्गोक्ते नामरूपाभ्यां २जगतोविकाशने च

"अथ व्याकरणं वक्ष्ये काल्यायन! समासतः। सिद्ध-शब्दविवेकाय बालव्युत्पत्तिहेतवे। सुपतिङन्तं पदं ख्यातं सुपः सप्त विभक्तयः। स्त्रीजसः प्रथमा प्रोक्ता सा प्रातिपदिकार्थके। सम्बोधने च सिङ्गादावुक्ते कर्मणि-कर्तरि। अर्थवत् प्रातिपदिकं धातुप्रत्ययवर्जितम्। कर्मोट्प्रो द्वितीया स्यात् तत्कर्म क्रियते च यत्। द्वितीया कर्मणि प्रोक्ता उक्तानुक्ताविभेदतः। टाभ्यां-भिस्तृतीया स्यात् करणे कर्तरीरिता। येन क्रियते तत्करणं तत्कर्त्ता यः करोति सः। ङेभ्यांभ्यस्चतुर्थी स्यात् सम्प्रदाने च कारके। यस्मै दित्सा धारयते रोचते सम्प्रदानकम्। पञ्चमी स्यात् ङसिभ्यांभ्योऽपादाने च कारके। यतोऽपैति समादत्ते यदपादानं ध्रुवं यतः। ङसोसामश्च षष्ठी स्यात् स्वामिसम्बन्ध उच्यते। ङ्योस्-सुपश्च सप्तमी स्यात् सा चाधिकरणे भवेत्। आधारश्चा-धिकरणं रक्षार्थानां प्रयोगतः। ईप्सितं चानीप्सितं वस्तूपादानकं स्मृतम्। पञ्चमी पर्य्युपाङ् योग इतर-त्रान्यदिङ्मुखे। एनब्योगे द्वितीया स्यात् कर्मप्रवच-नीयकैः। लक्षणवीप्सेत्थंभूतेऽभिभागे च परिप्रती। अनुस्तोषु सहार्थे च हीनेऽनूपौ च कीर्त्तितौ। द्वितीया च चतुर्थी स्याद्धेत्वायां गतिकर्मणि। अप्राणे हि विभक्ती द्वे सम्बन्धकर्मणादरे। नमःस्वस्तिस्वधास्वाहालंवषट्-योग ईरिता। चतुर्थी चैव तादर्थ्ये तुमर्थाद्भाववा-चिनः। तृतीया सहयोगे स्यात् कृद्विहितेऽङ्गे विशेषणे। काले भावे सप्तमी स्यादेतैर्योगे च षष्ठ्यपि। स्वामीश्वरा-धिपतिभिः साक्षिदायादसूतकैः। निर्द्धारणे द्वे विभक्ती षष्ठी हेतुप्रयोगजे। क्रियार्थकर्मणि तथा करोतेः प्रति-यत्नजे। क्रियार्थानां प्रयोगे च क्रति कर्मणि कर्तरि। न कर्तृकर्मणोः षष्ठी निषादौ प्रतिपादिता। द्विविधं प्रातिपदिकं प्रातिपदिकमञ्जसम्। भ्वादिस्यश्चिङो वः स्याद्धकारा दश वै स्मृताः। तिप्तसन्तवः प्रथमो मध्यः सिप्थस्थास उत्तमः। मिवस्मसः परस्मैतु पदानाह्यात्म-नेपदम्। शमामताम्ना प्रथमो मध्यस्त्वाथांध्वा तथा। उत्तम इवहिमहिङो डितः कर्त्तरि धातुतः। लोट्मि प्रयुज्यमानेऽपि प्रथमः पुरुषो भवेत्। मध्यमो युष्मदि प्रोक्त उत्तमः पुरुषोऽस्मदि। भुवादयो धातवः प्रोक्ताः स्वादयस्तासु धातवः। लडीरितो वर्त्तमाने क्षेनातीते च धातुतः। भूतानद्यतने लिट् च लिङाशिषि च धा-तुतः। विध्यादावेवातुमतौ लिङ्विधिर्मन्त्रणे भवेत्। निमन्त्रणाधीष्ट संप्रश्न प्रार्थनेषु तथाऽऽशिषि। लिङ्लोते परोक्षे स्याल्लङ् लुङ् लृट् लृङ् भविष्यति। स्यादद्य-तने लृट् च भविष्यति च धातुतः। धातोर्लृङ्क्रिया-तिपत्तौ लिङर्थे लोट् प्रकीर्त्तितः। क्तस्त्विष्वपि वर्तन्ते भावे कर्मणि कर्त्तरि। यत् यानच् तव्यखद्यु यदनीयर् क्य तृचादयः" गारुडे २०६अ०।

व्याकुल त्रि० वि+आ+कुल-क। रोगादिना इतिकर्त्तव्य-तानिश्चयविक्षीणे अमरः। [प्रकटीकृते।

व्याकृत त्रि० वि+आ+कृ-क्त। १प्रकाशिते २नामरूपाभ्यां

व्याकृति स्त्री वि+आ+कृ-क्तिन्। १भङ्गौ हला०२प्रकाशने। करणे क्तिन्। ३व्याकरणे च। य व्याक्रिया तत्रार्थे "व्याक्रियाव्यङ्गनीया वा जातिः कापीह साधुता" हरिका०

व्याकोश(ष) त्रि० वि+आ+कुश(ष)-अच् आगतः कोशा-(षा)दू प्रा०स० वा। १प्रफुल्ले अमरः "व्याकोशे(षे)न्दी-वराक्षी" इति तन्त्रम्। [हरूपे १ग्रन्थभेदे २कथने च।

व्याख्या स्त्री वि+आ+ख्या-अच्। विवरणात्मके शब्दसमू-

व्याख्यात त्रि० वि+आ+ख्या-क्त। १कथिते २विवृते च।

व्याघात त्रि० वि+आ+हन-घञ्। १व्यवधाने २प्रहारे भेदि० ३अर्थालङ्कारभेदे अलङ्कारशब्दे ४०५पृ०उक्तम्। ४प्रतिबन्धे "व्याघातावधिराशङ्का" कुसुमाञ्जलिः। विष्क-म्भादिसप्तविंशतियोगमध्ये ५त्रयोदशे योगे च।

व्याघ्र पुंस्त्री० वि+आ+घ्रा-क। १जन्तुभेदे अमरः स्त्रियां ङीष्। २रक्तारक्षे २करञ्जे च पु०भेदि०। [व्रच०।

व्याघ्रदल पु० व्याघ्रस्तत्पाद इव दलमस्य। एरण्डवृक्षे म-

व्याघ्रनख न० व्याघ्रस्य नखोऽग्रस्य आकारे अच्। १नखीनामगन्धद्रव्ये अमरः। व्याघ्रस्य नख इव दला० न्यस्य। २क्षुद्रोष्टके शब्दच०। ३कन्दभेदे। ४नखच्छदे च भेदि० हृत०। ५व्याघ्रस्य नखे।

व्याघ्रनाडक पुंस्त्री० व्याघ्रं नयति स्थानान्तरं प्रापयति पश्चात् क्रोशनेन नी-खुल्। शृगाले (फेउ) राजनि० तस्य पश्चात्क्रोशनेन व्याघ्रस्य स्थानान्तरप्रापकत्वेन तथात्वं स्त्रियां ङीष्।

व्याघ्रपाद(द्) पु०व्याघ्रस्य पादइव मूलमस्य वा बन्यत्वोप०। १विकङ्कतवृक्षे अमरः। २मुनिभेदे च ३विकङ्कटवृक्षे राजनि०। [अमरः। ६त०। २अ० बहुव्रीहौ च।

व्याघ्रपुच्छ पु० व्याघ्रस्य पुच्छइव दलमस्य। १एरण्डवृक्षे

व्याघ्राट पुंस्त्री० व्याघ्रं दृष्ट्वाटति अट-अच्। भरद्वाजपक्षिणि अमरः स्त्रियां ङीष्। [वाम् अमरः।

व्याघ्रादनी स्त्री व्याघ्रेणादयते अद-ल्युट् ङीप्। त्रिवृता-

व्याघ्रास्य पुंस्त्री० व्याघ्रस्येवास्यं यस्य। विड़ाले शब्दच०। स्त्रियां टाप्।

व्याघ्री स्त्री व्याघ्रस्तद्वदाकारः कण्टकोऽस्त्यस्याः अच् गौरा० ङीष्। १कण्टकारिकायाम् अमरः। जातौ ङीष्। २व्याघ्रयोषिति।

व्याज पु० वि+अज+घञ् वीभावाभावः। १कपटे वञ्चनाफले २असत्यव्यवहारे कारणान्तरेण १प्रवृत्तस्य कारणान्तरत्वेनोद्भावनरूपे अपदेशे च अमरः।

व्याजनिन्दा स्त्री ३त०। १कपटनिन्दायाम् २अर्थालङ्कारभेदे च अलङ्कारशब्दे ४०४ पृ० दृश्यम्।

व्याजस्तुति स्त्री० ३त०। १कपटस्तुतौ २अर्थालङ्कारभेदे च अलङ्कारशब्दे दृश्यम्। [अलङ्कारशब्दे ४०४पृ०दृश्यम्।

व्याजोक्ति स्त्री ३त०। १छलेनोक्तौ २अर्थालङ्कारभेदे च

व्याड पु० वि+आ+अड-अच्। १मांसभक्षके व्याघ्रादौ पशौ २सर्पे अमरः। ३दन्ते शब्दच०। ४वञ्चके त्रि० रायमु०।

व्याडायुध न० व्याडस्य व्याघ्रस्यायुधं नख इवास्यस्य अच्। व्याघ्रनखाख्ये गन्धद्रव्ये अमरः। [च ३मुनिभेदे त्रिका०

व्याडि पु० व्याकरणस्य संग्रहाख्यग्रन्थकारके १कोषकारके

व्यात्युची स्त्री वि+अति+वच-भावे अतिरारे क्यच् आर्वे क्यच् ङीप्। परस्परसेचनरूपे जलक्रीड़ाभेदे।

व्यादिश पु० वि+आ+दिश-क। १विष्णौ विष्णुस० २विशेषेण आदेशके त्रि०।

व्याध पुंस्त्री० व्यध-घ। मृगहिंसके चतुरिवात् सर्वत्रैपत्त्यां जाते १सङ्कीर्णजातिभेदे पुंस्त्री० स्त्रियां ङीष्। "नापितात् गोपकन्यायां सर्वज्ञो तस्य योषिति। चक्राद् बभूव व्याधस्य वनवान् मृगहिंसकः" ब्रह्मवै०ब्र० १०अ०। २दुष्टे त्रि० मेदि०। भावे घञ्। ३वेधने ४पीड़ने च।

व्याधभीत पुंस्त्री० व्याधाद्भीतः भी-क्त। मृगे शब्दच०। स्त्रियां ङीष्। [वल्ले हेमच०।

व्याधाम पु० व्याधेन पीड़नेन श्रमयति श्रम-णिच्-अच्।

व्याधि पु० वि+आ+धा-कि। १रोगे व्याधिश्च योगान्तराय- भेदः चित्तविक्षेपशब्दे २८३१ पृ० दृश्यम्। २कुष्ठरोगे अमरः। ३कामज्वरे नायकयोरवस्थाभेदे सा०द०।

व्याधिघात पु० व्याधिं हन्ति-हन-अण्। आरग्वधे (सोन्दाल) अमरः। [अमरः।

व्याधित त्रि० व्याधिर्जातोऽस्य तारं० इतच्। व्याधियुक्ते

व्याधिहन्तृ पु० व्याधिं हन्ति हन-तृच्। १वाराहीकन्दे राजनि० २रोगनाशके त्रि० स्त्रियां ङीप्।

व्याधुधूत त्रि० वि+आ+धु-(धू)-क्त। कम्पिते शब्दर०।

व्यान पु० वि+अन-घञ्। देहस्थे सर्वशरीरव्यापके प्राणादिमध्ये वायुभेदे "विष्वगनञ्चवान् वायुर्व्यानः इत्यभिधीयते" वेदान्तमते "व्यानो व्यानयत्यङ्गं सर्वव्याधिप्रकोपनः। सङ्कोचनप्रसारो हानोपादानकारणम्। स चाक्षिकर्णयोर्मध्ये कक्षौ वै गुल्फयोरपि। प्राणे गलेस्थिगुदेषु तिष्ठत्यत्र निरन्तरम्। स्खलत्यत्यधरं वक्त्रं गात्रनेत्रे प्रकोपनः" पदार्थादर्शः।

व्यापक त्रि० विशेषेणाप्नोति वि+आप-ण्वुल्। १अधिकदेशवृत्तौ "व्यापकत्वात् परापि स्यात्" भाषा०। न्यायोक्ते स्वाधिकरणवृत्त्यभावाप्रतियोगिनि च २पदार्थे ३तन्त्रोक्ते सर्वोङ्गसम्बन्धिनि न्यासभेदे पु० "अङ्गुलिव्यापकन्यासो" तन्त्रसा०। ४आच्छादके त्रि० अमरः। [च अमरः।

व्यापन्न त्रि०वि+आ+पद-क्त। १मृते क्षेमच० २विपद्युक्ते

व्यापाद पु० वि+आ+पद-घञ्। १द्वेषचिन्तने क्षेमच०।

व्यापादन न०वि+आ+पद-णिच्-ल्युट्। १मारणे क्षेमच० २परानिष्टचिन्तने अमरः।

व्यापार पु० वि+आ+पृ-घञ्। "व्यापारो भावना सैवोत्पादना सेव च क्रिया" हर्षोक्तायां १भावयितृत्वोत्पादनक्रियायाम्। बधजो २व्यवसाये च।

करणजन्ये करणजन्यक्रियाजनके ३पदार्थे यथा दात्रूपकरणजन्यः तज्जन्यश्छेदजनकः क्लेदसंयोगादिः एवमिन्द्रियस्य व्यापारः विषयसंयोगः। "विषयेन्द्रियसंयोगो व्यापारः सोऽपि षड्विधः" भाषा०। एवं यागादेः व्यापारः षड्विधः। व्यापारवत् कारणं करणमिति। "क्रियायाः परिनिष्पत्तिर्व्यापारादनन्तरम्। विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम्" हरिकारिका।

व्यापारिन् त्रि० व्यापारोऽस्यास्ति इनि। १व्यापारवति करणादौ "न हि व्यापारेण व्यापारिणोऽन्यथा सिद्धिः"। २व्यवसायवति वणिग्जने पु०। [३विष्णौ पु० विष्णुस०।

व्यापिन् त्रि० वि+आप-णिनि। १व्यापके स्त्रियां ङीप्।

व्याप्त त्रि॰ वि+आ+प्त-क्त। १व्यापारयुक्ते २कर्मणिचिरे शेषच॰।

व्याप्त त्रि॰ वि+आप+-क्त। १पूर्णे शेषच॰। २समाक्रान्ते ३ख्याते च मेदि॰। ४स्थापिते ५व्याप्नुवते च "यमेन यदि नो व्याप्तः" उदयनाचार्यः।

व्याप्ति स्त्री वि+आप-क्तिन्। १ऐश्वर्यभेदे न्यायमते तद्भाववति अविद्यमानत्वरूपे २पदार्थे यथा वह्नेरभाववति जलादौ धूमो नास्तीति धूमादौ वह्नेर्व्याप्तिः। "व्याप्तिः साध्यवदन्यत्रित्तसम्बन्ध उदाहृतः।" अथ वा हेतुवच्छिन्नविरुद्धाप्रतियोगिना। साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते" भाषा०। प्रमेयत्वावच्छिन्नसाध्यविशेषे हितीयवलक्षणसङ्गम्। प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति हितीयलक्षणार्थः। व्याप्तिश्च हिविधा अन्वयव्याप्तिर्व्यतिरेकव्याप्तिश्च तत्रान्वयव्याप्तिः पूर्वोक्ता। "साध्याभावव्यापकत्वं हेत्वभावस्य यत् भवेत्" भाषा० उक्ता अपरा या च साध्याभावव्यापकीभूताभावप्रतियोगितारूपा। तत्रान्वयव्याप्तिज्ञाने व्यभिचारज्ञानाभावः सहकारज्ञानञ्च कारणम्। व्यतिरेकव्याप्तिज्ञाने च साध्याभावे हेत्वभावस्य सहचारज्ञानं व्यभिचारज्ञानाभावश्च कारणम्। "व्यभिचारशङ्कोऽपि सहचारग्रहस्तथा। हेतुर्व्याप्तिग्रहे, तर्कः कश्चिच्छङ्कानिवर्त्तकः। द्वैविध्यन्तु भवेत् व्याप्तेरन्वयव्यतिरेकतः" भाषा०। धूमो यदि वह्निव्यभिचारी स्यात् तदा वह्निजन्यो न स्यादित्यादितर्केण व्यभिचारशङ्का निवर्त्तते इत्याकरे दृश्यम्। उपाधिस्तु व्यभिचारोद्भावकतया व्याप्तिज्ञानविघटकतया चानुमितिविरोधी उपाधिशब्दे १२४८ पृ० दृश्यम्।

व्याप्य त्रि॰ वि+आप-ण्यत्। १व्याप्ते २अल्पदेशवृत्तौ "व्याप्यत्वादपराऽपि च" भाषा०। ३अनुमितिसाधने लिङ्गे न॰ ४साधनमात्रे ५कुलौषधौ च अमरः।

व्यायम पु॰ वि+यम-घञ्। तिर्यक्पार्श्वतो विस्तृतयोर्बाह्वोरन्तरालपरिमाणे शेषच॰।

व्यायत त्रि॰ वि+आ+यम-क्त। १दीर्घे २व्याप्ते ३दृढे ४अतिशये च मेदि॰। भावे-क्त। ५दैर्घ्ये ६व्यायामे च न॰ मेदि॰।

व्यायाम पु॰वि+आ+यम-घञ्। १श्रमे २श्रमसाधने व्यापारे ३पौरुषे ४दुर्गसंस्कारे ५विश्रमे मेदि॰ ६मल्लानां श्रमकारके व्यापारे (कुस्ति) ७व्यायामपरिमाणे च शेषच॰।

व्यायोग पु॰वि+आ+युज-घञ्। दृश्यकाव्यभेदे सा॰द॰ तल्लक्षणञ्च यथा "ख्यातेतिवृत्तेव्यायोगः स्वल्पस्त्रीजनसंयुतः। हीनोगर्भविमर्शाभ्यां नरैर्बहुभिराश्रितः। एकाङ्क एव भवेदस्मिन्निमित्तसमरोदयः। कौशिकीवृत्ति रहितः प्रख्यातस्तत्र नायकः। राजर्षिरथवा दिव्यो महेशेरोद्धतश्च सः। हास्यशृङ्गारशान्तेभ्य इतरेऽङ्गिन्यो रसाः" यथा सौगन्धिकाहरणधनञ्जयविजयादि।

व्याल पुंस्त्री॰ वि+अड-घञ् डस्य लः। १सर्पे २हिंसकपशौ अमरः। स्त्रियां ङीष्। ३दुष्टगजे च मेदि॰ ४चित्रके व्याघ्रे पुंस्त्री॰ राजनि॰ स्त्रियां ङीष्। ५ऋषे पु॰ ६मनुरेशः। ७शठे त्रि॰ अमरः ८धूर्त्ते त्रि॰। [राजनि॰।

व्यालगन्धा स्त्री व्यालस्येव गन्धो यस्याः। नाकुल्याम्

व्यालग्राह पु॰ व्यालान् सर्पान् गृह्णाति ग्रह-अण्। (साइड़े) सर्पधारिणि भरतः। णिनि। व्यालैव शब्दर॰। "व्यालग्राही यथा व्यालं बलादुद्धरते बिलात्" ण्वुल्तृचौ काशीखः। [मनसायाम् राजनि॰।

व्यालजिह्वा स्त्री व्यालस्य सर्पस्य जिह्वेव पत्रमस्याः। मङ्गुरे

व्यालदंष्ट्र पु॰ व्यालस्य व्याघ्रस्य दंष्ट्रेव कण्टकमस्य। गोखुरे राजनि॰। [लतलोऽप्यत्र।

व्यालनख पु॰ व्यालस्य व्याघ्रस्य नखइव। गन्धद्रव्यभेदे व्या-

व्यालपत्रा स्त्री व्यालस्य पादइव पत्रमस्याः। एरण्डे कर्कटीभेदे राजनि॰।

व्यालम्ब पु॰ विशेषेण आलम्बते वि+आ+लबि-घञ्। १रक्तैरण्डे वैद्यकम्। विशेषेण २लम्बमाने त्रि॰।

व्यालायुध न॰व्यालस्य व्याघ्रस्यायुधं नखइव। १नखीनामगन्धद्रव्ये मेदिनीशेषः। २व्यालनखाख्ये गन्धद्रव्ये पु॰राजनि॰

व्यावक्रोशी स्त्री वि+अव+क्रुश-घञ् स्वार्थे अण् ङीष्। परस्पराक्रोशे। [भिक्षुकटके शब्दर॰।

व्यावर्त्त पु॰ विशेषेण आवर्त्तते वि+आ+वृत-घञ्। ना-

व्यावहारी स्त्री वि+अव+हृ-घञ् स्वार्थे अण् ङीष्। परस्परहरणे। [स्मरहरणे।

व्यावहासी स्त्री वि+अव+हस-घञ् स्वार्थेऽण् ङीष्। पर॰

व्याहृत्त त्रि॰ वि+आ+हृत-क्त। १हते शेषच॰ २निहृत्ते च "व्याहृतगतिरुद्याने" कुमारः।

व्याहृत्ति स्त्री वि+आ+हृत-क्तिन्। निवारणे।

व्यास पु॰ अस्यति वेदान् वि+अस-घञ्। १पराशरसुते सत्यवतीगर्भजे वसिष्ठपौत्रे शक्तिपुत्रे वेदविभागकर्त्तरि महाभारतादिकर्त्तरि महर्षिभेदे स च नारायणस्य पञ्चदशावतारभेदः यथोक्तं

ब्रह्मवै०पु० ४अ० "व्यासः पुराणसूत्रञ्च प्रश्नञ्च बालभिक्षं यदा। मौनीभूतः स चकार त्यजेव जगदम्बिकाम्। तदा चकार विद्वान्तं त्वहरेण तनीदरः। संप्राप निर्मलं ज्ञानं भक्तान्धध्वंसदीपकम्। पुराणसूत्रं श्रुत्वा स व्यासः पद्मकलोद्भवः। त्यां सिषेवे प्रदध्यौ च शतवर्षञ्च पुष्करे। तदा त्वत्तोवरं प्राप्य स कवीन्द्रो बभूव ह। तदा वेदविभागञ्च पुराणञ्च चकार ह"। स च कन्याकाले सत्यवत्यां पराशराज्जातः कालीनशब्दे १८६३पृ०दृश्यम् वेदव्यासशब्दोक्तेषु मुनिभेदेषु च २समासादिसमानार्थके विग्रहवाक्ये ३विस्तारे अमरः द्वैपायनस्य मध्यरेखायाम् "व्यासे भवन्दाम्बिहते" कौवा० क्षेत्रशब्दे २४०१ पृ० दृश्यम्। "यस्मं वाचयेद्विप्रा स ब्रह्मन्! व्यास उच्यते" देवीपु ५पुराणपाठके विप्रे च हेमाद्रिभेदे शब्दर०। [ब्रह्मे च।

व्यासक्त त्रि० वि+आ+सृज-क्त। १आसक्ते तत्परे २संलग्ने च।

व्यासङ्ग पु० वि+आ+सृज-घञ्। १कार्य्यान्तरत्यागेनैकपरत्वे २आसक्तौ च। [२निषिद्धे च।

व्यासिद्ध त्रि० वि+आ+सिध-क्त। १राजाज्ञयावरुद्धे मेदि०

व्याहत त्रि० वि+आ+हन-क्त। व्याघातयुक्ते।

व्याहार पु० वि+आ+हृ-घञ्। १वाक्ये २उक्तौ अमर।

व्याहृति स्त्री वि+आ+हृ-क्तिन्। १उक्तौ २भूर्भुवःस्वरादिषु सप्तसु भूर्भुवःस्वरादिलोकस प्राप्तिहेतुषु मन्त्रभेदेषु च सप्त लोकाः पुनरेताः सप्त व्याहृतय एवेति योगियाज्ञवल्क्येन प्रतिपादितम् यदाह "भूराद्याश्चैव सत्यान्ता सप्त व्याहृतयस्तथा। लोकास्ता एव सप्तैते उपर्युपरिसंस्थिताः"। तथा "सप्त व्याहृतयः प्रोक्ताः पुरा यत्तु स्वयम्भुवा। ता एव सप्त छन्दांसि लोकाः सप्त प्रकीर्त्तिताः" यया च वासनया सप्त व्याहृतयः सप्त लोकाः सा च वासना योगियाज्ञवल्क्येनैव निरुक्तया विविच्य प्रतिपादिता यदाह "भवन्ति चाखिलं भूतानि स्थावराणि चराणि च। तस्माद्भूरिति विप्रेन्द्रा प्रथमा व्याहृतिः स्मृता। भवन्ति भूयो भूतानि उपभोगाय भुवस्तस्मात् प्रकीर्त्तिता। योगीन्द्रदृष्टितेजांसि जायन्ते तानि वै सदा। आयुः सुखतोषाच्च स्वर्लोकः स उदाहृतः। अपरोत्तरलोकेभ्यो महांस्तु परिकल्पितः। हृदयं सर्वलोकानां महस्तेन निगद्यते। कल्पदाहप्रलीनास्तु प्राणिनस्तु पुनः पुनः। जायन्ते ह पुनः स्वर्गं जनस्तेन निगद्यते। तपसा दाहाशक्याश्च सिद्धा ये चान्ये ब्रह्मणः सुताः। अधिकारनिवृत्तास्ते तिष्ठन्त्यस्मिंस्ततस्तपः। सत्यन्तु सप्तमो लोको ब्रह्मणस्तदनन्तरम्। सर्वेषाञ्चैव लोकानां मूर्द्ध्नि संस्थिते सदा। ज्ञानकर्मसु निष्ठानां तथा सत्यस्य भाषणात्। प्राप्यते चोपभोगार्थं प्राप्य न च्यवते पुनः। ततश्चैतं सप्तमो लोकस्तस्माद्दुर्गं न विद्यते"। [च हेमच०।

व्युत्क्रम पु०वि+उद्+क्रम-घञ्। १क्रमस्यैपरीत्ये २अतिक्रमे

व्युत्थान न० वि+उद्+स्था-ल्युट्। १विरोधकरणे २खातन्त्र्यकरणे मेदि० ३प्रतिरोधने ४योगशास्त्रोक्ते समाध्यवस्थाप्रच्यवे हेमच० ५व्रतभेदे शब्दच०। ६विशेषेण उत्थाने च। वि+उद्+स्था-क्तिन्। व्युत्थितिरत्र स्त्री।

व्युत्पत्ति स्त्री वि+उद्+पद्-क्तिन्। १विशेषेण उत्पत्तौ शास्त्रजन्ये शब्दार्थज्ञानादिसम्पादे संस्कारभेदे २शब्दानामर्थावबोधकशक्तौ च।

व्युत्पन्न त्रि० वि+उद्+पद्-क्त। १व्युत्पत्तियुक्ते शब्दे तत्संस्कारयुक्ते २पुरुषे च। ३विशेषेणोत्पन्ने च।

व्युदस्त त्रि० वि+उद्+अस-क्त। निराकृते।

व्युदास पु० वि+उद्+अस+घञ्। निराकरणे।

व्युष्ट त्रि० वि+उष-क्त वा० रुडभावः। १दग्धे २पर्युषिते ३प्रभाते च ४फले ५दिवसे च न० हेमच०।

व्युष्टि स्त्री वि+उष-क्तिन्। १सस्यादौ २स्तुतौ ३फले च मेदि० व्युष्टिविरात्रं यागभेदः युक्तरोद्धादि।

व्यूढ त्रि०वि+वह-क्त। १निवेशनविशेषेण स्थापिते व्यूहयुक्ते सैन्यादौ "व्यूढां द्रुपदपुत्रेण" गीता। २विन्यस्ते ३संहृते अमरः "व्यूढोरस्को वृषस्कन्धः" रघुः। ४पृथुले त्रि० मेदि० ५परिहृते ६विवाहिते च त्रि० "व्यूढा काचन कन्यका" प्रबोधचन्द्रोदयः। [कवचे अमरः।

व्यूढकङ्कट त्रि० व्यूढःपरिहितः कङ्कटः वर्म येन। सन्नद्ध-

व्यूत त्रि०वि+वे-क्त। तन्तुभिर्ग्रथिते। [पदार्थे अमरः।

व्यूति स्त्री वि+वे-क्तिन्। १स्त्र्यादिवयनकर्म्मणि २तद्धेतने(वानि)

व्यूह पु० वि+ऊह-घञ्। १समूहे २निर्माणे च ३सम्यक्तर्के ४वृद्धे ५सैन्ये ६युद्धार्थं सैन्यस्यविन्यासविशेषे अमरः। "समग्रस्य तु सैन्यस्य विन्यासः स्थानभेदतः। स व्यूह इति विख्यातो युद्धेषु पृथिवीभुजाम्। व्यूहभेदाश्च चत्वारो दण्डोभोगस्तु मण्डलम्। असंहतश्च निर्दीतो नीतिसारादिसम्मताः। अन्येऽपि प्रकृतिव्यूहाः क्रौञ्चचक्रादयः क्वचित्। तिर्यग्वृत्तिश्च दण्डः स्याद् भोगोऽनाद्वत्तिरेव च। मण्डलं सर्वतो वृत्तिः पृथग्वृत्तिरसं-

कृतः" शब्दर० । शुक्रनीतिसारे तद्भेदादिकमुक्तं यथा "नद्यादिवनदुर्गेषु यत्र यत्र भयं भवेत् । सेनापतिस्तत्र तत्र गच्छेद् व्यूहप्रभेदकैः । यायाद् व्यूहेन महता सकरेण पुरोभवे । श्येनेनोभवपक्षेण क्रव्या वा धीरवक्त्रया । पक्षाङ्गे तु शकटं पार्श्वयोर्वज्रसंज्ञकम् । सर्वतः सर्वतोभद्रं चक्रं व्यालमथापि वा । यथादेशं कल्पयेद्वा शत्रुसैन्याविभेदकम् । व्यूहरचनसङ्केतान् वाद्यभाषासमीरितान् । स्वसैनिकैर्विना कोऽपि न जानीयात् तथाविधान् । नियोजयेच्च मतिमान् व्यूहान् नानाविधान् सदा । स्थानाच्च गमनाच्च पदातीनां पृथक् पृथक् । चक्रैः संग्रामयेद्वा व्यूहसङ्केतान् सैनिकान् सदः । वामदक्षिणसंस्थो वा मध्यस्थो वाऽप्यसंस्थितः । स्तुत्वा तान् सैनिकैः कार्यमनुशिष्टं यथा तथा । रक्षोक्षनं प्रसरणं परिस्रमणमेव च । आकुलनं तथा यानं प्रयाणमपयानकम् । पर्य्यायेण च साम्मुख्यं वस्तुतानच्च लुण्ठनम् । संस्थानं चाष्टदलवज्रकव्होवतल्पकम् । स्रचीतल्पं शकटवद्वर्द्धचन्द्रसमन्तु वा । पृथगभवनसल्लापैः पर्य्यायैः षड्भिरेवनम् । शस्त्रास्त्रयोधोरचयच्च सन्धानं लक्ष्यभेदनम् । मोचयच्च तथाऽस्त्राणां शस्त्राणां परिघातनम् । दृष्ट्वा सन्धानं पुनः पातो यष्टौ मोचः पुनः पुनः । स्वगूहनं प्रतीघातः शस्त्रास्त्रपदविक्रमैः । हास्यां त्रिभिश्चतुर्भिर्वा षड्भिस्तो गमनं ततः । तथा प्राग्भवनं चापसरणं तूपसर्जनम् । अपसृत्यास्त्रविद्धार्थं संपसृत्य विमोचणम् । प्रागभूत्वा मोचयेदस्त्रं व्यूहस्थः सैनिकः सदा । आसीनः स्थादविसृष्टास्त्रः प्राग्वा चापसरेत् पुनः । प्रागासीनं तूपसृतो दृष्ट्वा स्वास्त्रं विमोचयेत् । एकैकशो द्विशो वापि सङ्घशो बोधितो यथा । क्रौञ्चानां खे गतिर्यादृक् षड्भिस्तः सम्प्रजायते । तादृक् सञ्चारयेत् क्रौञ्चव्यूहं देशवलं यथा । शकटापीडं मध्यपुच्छं स्यूतपक्षन्तु षड्भिस्तः । दृढत्वं मध्यगत्पुच्छं श्येनं तच्चे तनु । चतुष्पानुमकरो दीर्घस्यूतवक्त्रहिरोत्कः । स्रची स्यूतसखो दीर्घसमदण्डान्तरम्रुवुक् । चक्रव्यूहश्चैकमार्गो द्विदधा कृष्णनीलतः । चतुर्दिक्षुदपरिधिः सर्वतोभद्रसंज्ञकः । एकमार्गश्चाष्टवलयो गोलकः सर्वतोमुखः । शकटः शकटाकारो व्याको व्याघ्राकृतिः सदा । सैन्यमध्यं दृढदापि दृढा मार्गं रथं स्थलम् । व्यूहैर्व्यूहेन व्यूढाभ्यां सङ्करेणापि कल्पयेत् ।

व्यूहपार्ष्णि पु० ६त० । युद्धार्थमवस्थानविशेषेण स्थितसैन्यानां पश्चाद्भागे अमरः ।

व्यृद्धि स्त्री विरुद्धा ऋद्धिः । विरुद्धसम्पत्तौ तत्रार्थे अव्ययोः । दुर्धनत्वं यवनानां विरुद्धसम्पत्तौ सि० कौ० ।

व्ये धूनौ इतौ च भ्वा० उभ० सक० अनिट् यजा० । अयति ते अव्यासीत् अव्याष्ट विव्याय विव्यतुः । क्रमतः ।

व्यो अव्य० व्ये-डो । १खौ २खे व्योकारः २पीजे च ।

व्योकार पु० व्यो+क-अण् । खौहकारके अमरः ।

व्योमकेश पु० व्योमेव केशो यस्य । शिवे महादेवे अमरः ।

व्योमकेशिन् पु० व्योमाकारः केशोऽस्यास्ति इनि । महादेवे

व्योमचारिन् पु० व्योम्नि चरति चर-णिनि । १विष्णौ २देवे ३पक्षिनक्षत्रादौ च ४आकाशगामिनि त्रि० व्योमचारिपुरं शोभनगरम् ।

व्योमधूम पु० व्योम्नः धूमरव नीलत्वात् । मेघे त्रिका० ।

व्योमन् न०व्ये-मनिन् पृषो० । १आकाशे अमरः । २अभ्रके (आव) राजनि० । ३जले च ४सूर्य्यांशौश्वे मेदि० ।

व्योममण्डल न० व्योम मण्डलमिव । मण्डलाकारे १आकाशे । व्योम्नो मण्डलमिव । २पताकायाम् शब्दच० ।

व्योममुद्गर पु० व्योम्नोऽद्गर इव आघातहेतुत्वात् । गगनात् अकस्माद्गुत्पते वायोर्निर्घाते हारा० । [अमरः ।

व्योमयान न० ७त० । आकाशगमनयोग्ये वाहने विमाने

व्योष न० वि+उष-अच् । शुण्ठीमरीचपिप्पलीरूपे त्रिकटुनि अमरः ।

व्रज गतौ भ्वा०पर०सक०सेट् । व्रजति अव्राजीत् । [जत् ।

व्रज संस्कारे गतौ च चु०उ०सक०सेट् । व्राजयति ते अविव्रत्

व्रज पु० व्रज-घञर्थे क । १समूहे अमरः । २गोष्ठे ३पथि मेदि० मथुरासमीपस्थे देशभेदे च

मात्स्ये "व्रजमण्डलभूगोलं शेषनागफणाम्बरम् । कृष्णादाख्यं महाश्रेष्ठं सर्वेषां मध्यसंस्थितम् । तस्योपरिस्थितं लोकं सर्वस्थानं महाफलम् । लक्षयोजनविस्तारार्धसप्तस्थानविराजितम् । चतुरष्टकदशक्रोशेन परिपूर्णविराजितम् । यस्य प्रदक्षिणां कुर्वन् धनधान्यसुखं लभेत् । दानाज्जीवासतो लोको विष्णुलोकमवाप्नुयात् । आवसन् म्रियते चेत्तु पुनर्जन्म न विद्यते । पुण्यं लक्षगुणं लब्ध्वा क्षेत्रेऽस्मिन् व्रजमण्डले । लक्ष्येण निर्मितास्तीर्थाः सार्द्धत्रयसहस्रकाः" । तत्रादौ वनोपवनप्रतिवनाधिवनान्यष्टचत्वारिंशत् तानि चतुरष्टक्रोशपरिमाणस्थितानि चतुर्भागयोऽन्तरस्थितानि क्रमश आह।

याह्ये "वनानि द्वादशान्याद्यं सप्तमोत्तरदक्षिणे। मद्रावनं१ मद्राश्रेष्ठं वरं काम्यवनं२ शुभम्। कोकिलाख्यं तृतीयञ्च३ तुर्यं तालवनं४ तथा। पञ्चमं कुशदाख्यञ्च५ षष्ठं भाण्डीरसंज्ञकम्६। नाम्ना लवणवनं७ श्रेष्ठं सप्तमं परिकीर्त्तितम्। अष्टमं खदिरं८ प्रोक्तं नवमं लोहजं वनम्९। नाम्ना भद्रवनं१० श्रेष्ठं दशमं बहुपुष्पदम्। एकादशं समाख्यातं बहुलावनसंज्ञकम्११। नाम्ना बिल्ववनं१२ श्रेष्ठं द्वादशं कामनाप्रदम्। इति द्वादशसंज्ञानि वनानि शुभदानि च"। द्वादशोपवनान्याह वाराहे "आदौ भद्रवनं१ नाम द्वितीयं तप्तरोचनम्२। तृतीयं विल्वलं३ नाम कदम्बाख्यं४ चतुर्थकम्। नाम्ना खर्जूरवनं५ श्रेष्ठं पञ्चमं परिकीर्त्तितम्। सुरभीवननामाऽपि षष्ठमाह्लादवर्द्धनम्। श्रेष्ठं प्रेमवनं७ नाम सप्तमं शुभदं नृणाम्। मयूरवननामाऽपि चाष्टमं परिकीर्त्तितम्। मानेङ्गितवनं९ श्रेष्ठं नवमं मानवर्द्धनम्। श्रेयस्कामिवनं१० श्रेष्ठं दशमं पापनाशनम्। एकादशं समाख्यातं नारदाख्यं११ शुभोदितम्। द्वादशं परमानन्दवनं१२ सर्वानंदायकम्। इति द्वादशसंज्ञानि वनान्युपवनानि च"। द्वादशप्रतिवनानि भविष्ये "आदौ रङ्गवनं१ श्रेष्ठं पुरसंज्ञाविराजितम्। वात्सवनं२ द्वितीयञ्च२ करहाटं३ तृतीयकम्। चतुर्थं काम्यनाम्नापि४ वनं कामप्रदं नृणाम्। वनमञ्जननामापि५ पञ्चमं स्त्रीशुभप्रदम्। नाम्ना खर्जूरवनं६ श्रेष्ठं षष्ठं खप्नवरप्रदम्। कण्डाखिण्डकं७ नाम वनं सप्तमकीरितम्। नन्दप्रेक्षणकाख्यं वनं नन्दनदप्रदम्। वनमिन्द्रवनं९ नाम नवमं कण्टकूजितम्। शिखावनं१० शुभं प्रोक्तं दशमं नन्दभाषितम्। चन्द्रावलीवनं११ श्रेष्ठमेकादशसदाकृतम्। नाम्ना लोहवनं१२ श्रेष्ठं द्वादशं शुभदं नृणाम्। इति प्रतिवनान्याह्नौर्णे वामे च दक्षिणे। इति द्वादशसंज्ञानि देवावासफलप्रदाः"। द्वादशाधिवनान्याह विष्णुपु० "मधुरा१ प्रथमं नाम राधाकुण्डं२ द्वितीयकम्। नन्दग्रामश्चतुर्थञ्च गोवर्द्धनं३ चतुर्थकम्। पञ्चमं बर्हितापार्श्वं४ ह्यमभाण्डीरं६ च षष्ठं। सप्तमं भोजकूपं स्यान्७ अष्टमं बलदेवकम्८। गोवर्द्धनवनं९ श्रेष्ठं नवमं कामनाप्रदम्। वनं जावट१० नाम दशमं परिकीर्त्तितम्। सख्यं इन्द्रावनं११ श्रेष्ठमेकादशं प्रकीर्त्तितम्। बहुलावटकं१२ स्थानं वनं द्वादशं कीर्त्तितम्। इति द्वादशसंज्ञानि वनान्यधिवनानि च। वनानामधिपाः प्रोक्ता व्रजमण्डलमध्यगाः। एषां नैव विलोकेन वनयात्रा च निष्फला। एषाञ्च दर्शनेनैव वनयात्रा शुभप्रदा। आदौ लोकां वदा पश्चेद्वनयात्रां ततश्चरेत्। सर्वान् कामानवाप्नोति विष्णुलोकमवाप्नुयात्। सर्वत्र विजयी भूयाद्वनयात्राप्रभावतः"।

व्रजनाथ पु० ६त०। श्रीकृष्णे व्रजपालादयोऽप्यत्र। [श्रीकृष्णे

व्रजमोहन पु० व्रजान् व्रजस्थान् मोहयति मुह-णिच्-ल्यु।

व्रजवर पु० व्रजानां तत्स्थानां वरः प्रार्थनीयः। श्रीकृष्णे।

व्रजवल्लभ पु० ६त०। श्रीकृष्णे।

व्रजाङ्गना स्त्री ६त०। व्रजस्थ स्त्रियां गोपास्।

व्रज्या स्त्री व्रज-क्यप्। १पर्य्यटने २गमने ३जिगीषोर्युद्धार्थं प्रयाणे च अमरः।

व्रण शब्दे भ्वा०पर०अक०सेट्। व्रणति अव्राणीत् अव्रणीत्।

व्रण अङ्कुरतौ चुरा०उ०अक०सेट्। व्रणयति ते अव्रणयत् त

व्रण पु०न० चु० व्रण-अच्। क्षते अमरः। तत्स्वरूपनिदानादि भावप्र० उक्तं यथा "व्रणो द्विधा परिज्ञेयो दोषागन्तुभेदतः। दोषजो दुष्टदोषैः स्यादन्यः शस्त्रादिसम्भवः"। तत्र वातिकस्य लक्षणमाह "खरः कठिनसंस्पर्शो वर्त्मावो मेघसन्निभः। तदुत्तः स्फुटितस्रावो व्रणो मारुतसम्भवः"। खरः कर्कशः। पैत्तिकमाह "श्यामोष्णज्वरकृद्दाहतृष्णावदारवैः। व्रणं पित्तकृतं विद्यात् सावैर्मन्दैश्च पूतिकैः"। क्लेदे आर्द्रता। तृष्णं व्यथारूपम्। अवदारणं व्रणे विदारणवत् पीडा। श्लैष्मिकमाह "बहुपिच्छो गुरुः स्निग्धश्चिरेणोत्पद्यते व्रणः। पाण्डुवर्णोऽल्पसंक्लेदश्चिरपाकी कफव्रणः"। बहुपिच्छः बहुपिच्छिलः। अल्पसंक्लेदः स्वल्पदाहः। रौधिरं लक्षणं सान्निपातिकमाह "रक्तो रक्तप्रसीरस्राद् द्विलिङ्गः स्यात् तदन्वयः"। तदन्वयः द्विलिङ्गदोषविशेषसम्बन्धः। शुक्लव्रणविशेषमाह "स्निग्धावभासोऽतिमृदुः श्लक्ष्णः स्निग्धोऽल्पवेदनः। सुव्यक्तो निराचारः शुक्लव्रण इति स्मृतः। स्निग्धावभासः तत्सदृशोऽन्य स्वरूपार्थः तेन स्निग्धावद्वत्तः। सुव्यक्तः उच्चनतारहितः। दुष्टव्रणनिरूपणमाह "पूतिपूयादिदुष्टास्रकृच्छ्राप्यूष्मकृतो चिरस्थितिः। दुष्टव्रणोऽतिगन्धादिः शुक्लविपर्य्ययः"। ऊष्मकृतो कोटरकारी। अतिगन्धादिः आदिशब्देन श्यावत्वेदनाविवर्णतादयः संगृह्यन्ते। संरोहिव्रणस्य लिङ्गमाह "कपोतवर्णप्रतिमा वस्त्रं तानोदवर्जिताः। स्थिराश्च पिडका-

वन्तो रोहन्तीति तमादिशेत्"। कपोतवर्णप्रतिमः पाण्डुधूसरः। स्थिराः विदीर्णतारहिताः। पिडकावन्तः संरोहणार्थं ये मांसाङ्कुरास्तदयुक्ताः। संरूढलिङ्गमाह "रूढवल्मीकसदृशमश्मशस्त्रसमं व्रणम्। त्वक्सवर्णं समतलं सम्यग्रूढं विनिर्दिशेत्"। रूढवल्मीकं संरूढलक्षणमार्गम्। समतलं अनिम्नम्। सुखसाध्यत्वादिकमाह "त्वङ्मांसजः सुखे देशे तरुणश्चानुपद्रवः। धीमतोऽभिनवः काले सुखे साध्यः सुखव्रणः"। सुखे देशे मर्मरहिते। अनुपद्रवः ज्वरतृष्णा श्वासकासारोचकादिरहितः। धीमतः पण्डितस्य। सुखे काले हेमन्ते शिशिरे च। "गुणैरल्पतरैरेभिर्हीनः क्लेशो व्रणः स्मृतः। सर्वैर्विहीनो विज्ञेयस्त्वसाध्यो निरुपक्रमः"। एभिस्त्वङ्मांसजत्वादिभिः। निरुपक्रमः अनुपक्रान्तः चिरमपेक्षित इति यावत्। "वसामेदोऽस्थिमज्ञानं मस्तुलिङ्गस्य यः क्षयेत्। आगन्तुजो व्रणः सिध्येन्न सिध्येद्दोषसम्भवः"। मस्तुलिङ्गं मस्तुकाभ्यन्तरक्षेदः "कृमिणां विषदुष्टानां शोणितां मधुमेहिनाम्। व्रणाः लक्ष्येण सिध्यन्ति तेषां चापि व्रणे व्रणः"। अरिष्टमाह "दग्धस्य चान्तरर्थं बहिःशीतास्च ये व्रणाः। दग्धे बहिरिवार्थं भवन्त्यन्तश्च शीतलाः। प्राणमांसक्षयश्वासकासारोचकपीडिताः। प्रस्रुतपूयरुधिरा व्रणा ये चापि मर्मसु। क्रियाभिः सम्यगाचर्या न सिध्यन्ति च ये व्रणाः। चिकित्सेद्वैद्य तानू वैद्यः संरक्षन्नात्मनो यशः। मद्यागुर्वन्नसुमनः पद्मचन्दनचम्पकैः। सगन्धा दिव्यगन्धाश्च समूर्णा व्रणाः स्मृताः"। मर्मसु पायुनाभिहृदयादिषु। सुमनाजातिः। दिव्यगन्धाः पारिजातादिगन्धाः। अथागन्तुव्रणस्य निदानमाह "नानाधारास्त्रशस्त्रैर्नानास्थान निपातितैः। भवन्ति नानाकृतयो व्रणास्तांस्तान्निबोध मे"। नाना धारा सुतीक्ष्णानि येषां तैः शस्त्रैः अर्द्धचन्द्र खड्गमण्डलाग्रकुन्तशूलशरादिभिः। नानाकृतयः बहाकृतयः। ता आकृतीराह "छिन्नं भिन्नं तथा विद्धं दष्टं पिष्टमथापि वा। इत्यागन्तुसमा सर्वा तेषां वक्ष्यामि लक्षणम्"। तत्र छिन्नस्य लक्षणमाह "तिर्यक्छिन्नं ऋजुर्वापि यो व्रणस्त्वायतो भवेत्। मांसस्य पातनं तत्र छिन्नमित्यभिधीयते"। यो व्रणः तिर्यक्छिन्नः खड्गादिकृततिर्यक्छेदयुतः। ऋजुर्वापि अथवा खड्गादिकृतरहितो व्रणः आयतः दीर्घः। आयत इति तिर्यक्छिन्नस्य ऋजोश्च विशेषणम्। मांसस्य पातनं मांसस्यैकदेशस्य छेदेन पृथक्करणं वा छिन्नमित्यभिधीयते। भिन्नमाह "यन्निष्पन्नेषुखड्गाग्रविषाग्नैराशयो कृतः। यत् किञ्चित् प्रस्रवेत्तत्र भिन्नमित्यभिधीयते"। आशयः कोष्ठः। कोष्ठभेदस्य लक्षणमाह "स्थानान्यन्नमिपक्वानां मूत्रस्य रुधिरस्य च। क्षुद्रक्षुद्रकः फुफ्फुसश्च कोष्ठ इत्यभिधीयते। तस्मिन् भिन्ने रक्तपूर्णे ज्वरोदाहश्च जायते। मूत्रमार्गगुदास्येभ्यो रक्तं वायुश्च गच्छति। मूर्छा श्वासस्तृषाध्मानमभक्तच्छन्द एव च। विण्मूत्रवातसङ्गश्च खेदग्लानिरुरःक्षतम्। कोष्ठमस्थिमांसस्य गात्रदौर्गन्ध्यमेव च। क्षुद्रे मूत्रं पार्श्वयोश्च विशेषणमभिधीयते"। तस्मिन् कोष्ठे। भिन्ने शस्त्रादिभिः। रक्तपूर्णे कोष्ठे तस्मादङ्गाद्विस्रावे क्षुतेन रक्तेन पूर्णे वा ज्वरादयो जायन्ते। आमाशये पक्वाशये च रक्तपूर्णे लक्षणभेदमाह "आमाशयस्थे रुधिरे रुधिरं छर्दयत्यपि। आध्मानमतिमात्रञ्च मूत्रञ्च भृशदारुणम्। पक्वाशयगते रक्ते रुजा गौरवमेव च। अधःकाये विशेषेण शीतता च भवेदिह"। रुजाशूलम्। गौरवं पक्वाशये। अधःकाये नाभेरधोदेशे विशेषेण गौरवमित्यर्थः। शीतता च भवेदिह रक्त नाभेरधोदेशे शीतता च स्यात् सा च व्याधिस्वभावात्। विद्धमाह "सूक्ष्मास्त्रशस्त्राभिहतं पदं गत्वाशयं विना। उत्सृष्टितं निर्गतं वा तद्विद्धमिति निर्दिशेत्"। आशयं विना कोष्ठं विना। उत्सृष्टितं अनिर्गतशल्यम्। निर्गतं वा निर्गतशल्यं वा। सशल्यस्य व्रणस्य लक्षणमाह। "श्यावं सशोथं पिडकायुतञ्च सञ्छर्दिमोहितवाङ्मनञ्च। बुद्बुदतं बुद्बुदतल्यमांसं व्रणं सशल्यं सरुजं वदन्ति"। सञ्छर्दिमोहितवाङ्मनं यदा यदा शल्यं चलितं तदा तदा रुधिरं वहति। बुद्बुदतं बुद्बुदतुल्यम्। कोष्ठस्थितस्य शल्यस्य लक्षणमाह "स्वयोऽतीव्र शिरादीनि भित्त्वाङ्गं परिहृत्य वा। कोष्ठे प्रतिष्ठितं शल्यं कुर्याद्रुक्षानुपद्रवान्"। स्वयः स्वप्नापि अतिक्रम्य उक्तानुपद्रवान् व्रणोपनाहो व्रणस्रवेनात्र पुरीषदर्शनञ्च। अथाध्यस्य कोष्ठस्थस्य पुरीषस्य लक्षणमाह "कोष्ठान्तर्लोहितं पाण्डु शीतपादकरानलम्। शीतोच्छ्वासं रक्तनेत्रमानद्धञ्च विवर्जयेत्"। आनद्धं आनाहवन्तम्। क्षतमाह "नातिच्छिन्नं नातिभिन्नसन्धिलेखास्थितम्। विषमं व्रणमङ्गे यत्तत् क्षतं परिकी-

त्तितम्"। नातिच्छिन्नं नातिदीर्घतातम्। नातिभिन्नं नातिगम्भीरतातम्। उभयोश्छिन्नभिन्नयोः विषमं व्रणमङ्गे यत् यद्व्रणमङ्गवैषम्यकरम्। पिच्छितमाह "प्रहारपीड़नाभ्यान्तु यद्रक्तं पृथुतां गतम्। सास्रि तत् पिच्छितं विद्याद्रक्तमज्जपरिप्लुतम्"। प्रहारो मुद्गरादिना। पीड़नं कपाटादिना। पृथुतां पिच्छितां। दुष्टमाह "वर्षणादपि घातादु वा यद्रक्तं विगतत्वचम्। जाम्बवाभान्वितं तत् तु दुष्टमित्यभिधीयते। वर्षणात् कर्कशेष्टकापाषाणादिभिः। मांस सिरास्नायुसन्ध्यस्थिमर्मसु क्षतेषु सामान्यलक्षणमाह "भ्रमः प्रलापः पतनं प्रमोहो विचेष्टनं ग्लानिरधोमुखता च। खरताम्रता मूर्च्छनमूर्ध्ववातस्तीव्रा रुजो वातकृताश्च तास्ताः। मांसोद्भवं रुधिरञ्च गच्छेत् सर्वेन्द्रियार्थोपरमस्तथैव। दशार्द्धसंख्येषु च विद्धतेषु सामान्यतो मर्मसु विद्धलक्षणम्"। पतनं भूमौ। विचेष्टनं विरुद्धं चेष्टनं हस्तपादादिप्रक्षेपणादिकम्। मूर्च्छनं इन्द्रियमोहः। प्रमोहो मनोमात्रमोहः। तीव्रा रुजो वातकृताश्च तास्ताः दण्डापतानकादयः। रुधिरञ्च गच्छेत् मेढ्रनखमुखादिभ्यः स्रवेत्। सर्वेन्द्रियार्थोपरमः इन्द्रियाणां कार्य्यनाशः। अथ मर्मसिरास्नायुसन्ध्यस्थां विद्धानां पृथगलक्षणमाह "सुरेन्द्रगोपप्रतिमं प्रभूतं रक्तं स्रवेत्तत्क्षयजश्च वायुः। करोति रोगान् विविधान् यथोक्तान् सिरासु विद्धास्रव वा क्षतासृङ्"। सुरेन्द्रगोपो वार्षिकोत्पत्तिकीटविशेषः। (वीरबहुटी) इति लोके प्रसिद्धः। प्रभूतं बहु। रोगान् शिरोभितापास्रतास्रवकादीन्। विद्धासु शरादिना। क्षतान् खड्गादिना। "कौब्जं शरीरावयवावसादः क्रियाक्षमत्वक्लिन्नसुप्तता रुजा च। चिराद् व्रणो रोहति यस्य चापि तं स्नायुविद्धं पुरुषं वदन्ति। कौब्जं विद्धस्नायुजं लक्षणं। तत्तत्र भवति"। "गोधातिदष्टिन्नसुप्तसारुजश्च मनोभयः सर्वत एव गोधः। क्षतेषु सन्धिप्रचलावकेषु स्नातु सन्धिकर्मोपरमश्च लिङ्गम्"। सर्वत एव गोधः सर्वसन्धीन् व्याप्य गोधः। उपरमः नाशः। "घोरारुजो यस्य निशादिनेषु सन्धिक्षयस्तास्तु न चैति यामिम्। क्षिप्रम्विपद्येद्विदितार्त्तरूपलक्षणमस्त्रिविद्धं पुरुषं प्रवक्ष्ये"। सर्वोत्तरस्यास्तु शयनासनादिकासु। विदितार्त्तरूपः ज्ञातलक्षणः। अथ मर्मसिरादिविद्धलिङ्गानि पृथगभिधाय मर्मसिरादीनां विद्धानां पृथक्लिङ्गान्यतिदेशेनाह "यथास्वमेतानि विभावयेच्च लिङ्गानि मर्मस्वपि ताडितेषु"। यथास्वं सिरादीनां विद्धानाम् एतानि लिङ्गानि पृथगुक्तानि लिङ्गानि चकारात् भ्रमप्रलापादीनि च। मर्मस्विव सिरादिष्व ताडितेषु विद्धेषु विभावयेत् जानीयात्। सर्वत्र धानासन्दूषणाह "विसर्पः पक्षघातश्च सिरास्नाय्वभिघातजः। मोहोन्मादौ व्रणे पीड़ा ज्वरस्तृष्णाऽतिसृष्टयः। कासश्छर्दिरतीसारो हिक्का श्वासः सवेपथुः। षोडशोपद्रवाः प्रोक्ता वृणानां व्रणचिन्तकैः"। व्रणाग्निदग्धस्य निदानमाह "तत्राग्निर्द्विविधो ज्ञेयः कोष्ठक्षुप्रभेदतः। कोष्ठस्थस्तु तैलादि रुद्धं कोष्ठादिकथ्यते"। अग्निदग्धं चतुर्विधमाह "अग्निदग्धं चतुर्द्धा स्यात् मृदु दुर्दग्धमेव च। सम्यग्दग्धं तथातीव्रदग्धञ्च परिकीर्त्तितम्"। तेषां लक्षणमाह "यद्विवर्णमतिस्निग्धं तत्मृदुमभिधीयते। तीव्रदाहो व्रणावस्थो यत्र स्फोटा भवन्ति हि। चिरेण ते प्रशाम्यन्ति तद्दुर्दग्धमुदाहृतम्। ताम्रवर्णमगम्भीरं दाहपीड़ासमन्वितम्। सुसंस्थितञ्च कथितं सम्यग्दग्धं भिषग्वरैः। खड्गांसं यत्र दग्धं स्यादिङ्गितेषु वपुष्यथा। सिरास्नाय्वस्थिसन्धीनां तं वदन्त्यतिदग्धकम्। जन्तुर्न वेदनादाहो ज्वरस्तृष्णामूर्च्छया सह। स्यादु व्रणस्तु चिराद् रोहेत् रूढो याति विवर्णताम्"। दुष्टव्रणनाड़ी व्रणशब्दोक्तौ द्वौ। व्रणगन्धनिरुक्तिः सुश्रुते उक्ता यथा "द्रवति यस्माद्दोषोऽपि व्रणवस्तु न मुञ्चति। आदेहधारणात्तस्मात् व्रण इत्युच्यते बुधैः"। सुश्रुतोक्ता विशेषाः द्विव्रणशब्दे वृणाशब्दे च द्रष्टव्याः।

व्रणकृत् पु० व्रणं करोति कृ-क्विप्। १भल्लातके रत्नमा०। २व्रणकारके त्रि०। [३व्रणघातके त्रि०।

व्रणदिध् पु० व्रणं देहि दिध-क्विप्। १आङ्गुष्ठपर्व्वटिकायाम्

व्रणशोथ पु० ६त०। व्रणस्य स्फीतताकारके रोगभेदे तल्लक्षणादि भावप्र० उक्तं यथा

"पृथक् समस्तदोषोत्था रक्तजागन्तुजौ तथा। व्रणशोथाः षड़ेते स्युः संयुक्ताः शोथलक्षणैः" शोथलक्षणैः पूर्वोक्तैः। विभिन्नं रूपमाह "विषमं पच्यते यावात् शिरोत्पत्त्यावा चिरस्थिरम्। कफजः स्निग्धपक्वोष्णो रक्तजागन्तुमस्रुतौ"। अपक्वस्य व्रणशोथस्य लक्षणमाह "मन्दोष्मताऽल्पशोथत्वं काठिन्यं त्वक्प्रसन्नता। मन्दवेदनया चापि शोथलक्षणमुच्यते"। तस्य पच्यमानस्य लक्षणमाह "ह-

क्षते दष्टनेनेव चारेणेव प्रपच्यते। पिपीलिकाभक्षणेनेव दश्यते छिद्यते तथा। भिद्यते चैव शस्त्रेण दष्टेनेव च ताद्यते। पीड्यते पाणिनेवान्तःक्षोभिरिव हृद्यते। ऊर्ध्वोर्ध्वो विवर्धः स्यादकृत्स्नं वापपीड्यते। आसने शयने स्थाने शान्तिं दधिकविद्भवत्। न गच्छेदातङ्कः शोथो भवेदाघातवत्क्षितवत्। ज्वरस्तृष्णाऽरुचिश्चैतत् पच्यमानस्य लक्षणम्। छिद्यते छिद्रा क्रियत इव। भिद्यते विदार्य्यत इव। ऊर्ध्वोदाहः। शोथः पार्श्वस्थानिनेव सन्तापः ताभ्यां युक्तः स्यात्। ततः त्वक्सङ्कोचरहितः वस्तिर्मूत्राशयवर्त्मपुटो वा। पक्वस्य लक्षणमाह "वेदनोपशमः शोथो लोहितोऽल्पो न शोन्नतः। प्रादुर्भावो बलीनाञ्च तोदः कण्डूर्ज्वरोऽल्पः। उपद्रवाणां प्रथमो निम्नता स्फुटनन्त्वचाम्। वस्तावित्यम्बुसञ्चारः स्राव्यो-ऽङ्गुलिपीड़िते। पूयस्य पीड़नेऽङ्गमङ्गे च पीड़िते। बुभुक्षा वृषशोषश्च भवेत् पक्वस्य लक्षणम्"। वेदनोपशमः दाहादिदुःखोपशमः। अल्पलोहित इत्यन्ववः। न शोन्नत इत्यनेनैव। उपद्रवाणां ज्वरादीनाम्। निम्नता स्वरूपतोऽङ्गुलिपीड़नाद्या अवनतत्वम्। स्फुटनम् किञ्चिद्दारणम्। वस्तावित्यादि शोथेऽङ्गुलीपीड़िते सति अङ्गुलिपीड़ितदेशादन्यदेशे अम्बुसञ्चारः किञ्चित्। वस्तौ चर्मपुटके। एवम् अन्यैकदेशे पीड़िते एक मन्तमपरमन्तमापूर्यं पीड़यति। एकदोषारब्धेऽपि शोथे पाककाले सर्वदोषसम्बन्धमाह "ऋतेऽग्निघातोष्म विना न पित्तं पाकः कफाद्वापि विना न पूयः। तस्माद्धि सर्वे परिपाककाले पच्यन्ति शोथास्त्रिभिरेव दोषैः"। पच्यन्ति पाकं प्राप्नुवन्ति। एवशब्दोऽत्रार्थः अव्ययानामनेकार्थत्वात्। अन्ये मतान्तरमाह "कायान्तरे नाभ्युदितन्तु पित्तं कृत्वा वपे वातकफौ प्रवृद्धौ। पचत्यतः शोणितमेव पाको मतः परेषां विदुषां हितोयः"। वपे कृत्वा क्षीणीकृत्य शोणितं कर्म पूर्वत्र कफात् पूयोऽत्र शोणितात् पूय इति भेदः। मन्दोरपाके शोथे पाकज्ञानार्थलक्षणान्तरमाह सुश्रुतः "कफजेषु च शोथेषु मन्दोरं पाकमेत्यसृक्। पक्वलिङ्गं ततः स्पष्टं यतः स्राव्योऽयशोतता। त्वक्सावर्ण्यं स्रवोऽल्पत्वं घनस्पर्शत्वमग्रवत्"। कफजेषु च शोथेषु मन्दोरमसृक् पाकमेति तत्र कथं पाकज्ञानमित्याह तत्र ततः कारणात् पक्वलिङ्गं स्पष्टम्। अतः पच्यमानावस्थानन्तरागदाहव्यथानान्तरे शोथ शीतादयो भवन्ति। घनस्पर्शत्वं स्पर्शे व्यापकत्वम्। अनिर्हृतस्य पूयस्य दोषमाह "कफं समाधाय यथैव वह्निर्वातेरितः सन्दहति प्रसह्य। तथैव पूयोऽविनिःसृतस्तु मांसं सिराः स्नायुमपीह खादेत्"। कथं तृणवनम्। शोथस्थानकलक्षणस्थानाज्ञाने भिषजां गुणदोषाह "आमं विदह्यमानञ्च सम्यक्पक्वन्तु यो भिषक्। जानीयात् स भवेद् वैद्यः शेषास्तस्करदक्षतयः"। विदह्यमानं विपच्यमानम्। तस्करदक्षतयः तेषां तस्कराणामिव द्रव्यलाभमात्रप्रयोजनं भवति। न तु धर्मयशोमैत्रीलाभः "यस्त्वनभ्यासमज्ञानाद्व्रणस्य पक्वमपेक्षते। अपक्वमिव विच्छेदो तावन्निष्पत्तिकारिणो"।

व्रणास्राव पु० ६त०। सुश्रुतोक्ते व्रणस्य पूयादिस्रवे। तद्विज्ञानं च तत्रोक्तं यथा

"अथातो व्रणास्रावविज्ञानीयमध्यायं व्याख्यास्यामः। "त्वङ्मांसशिरास्नायुस्नायुसन्धिकोष्ठमर्म्मसीव्रणो व्रणस्थानानि। अत्र सर्वव्रणसन्निवेशः। तत्रादौक्षतास्रुक्सन्निवेशो त्वग्भेदी व्रणः क्षुद्रप्रकारः शेषाः क्रियमाणदीर्घमाणा इत्युपचाराः। तत्रायतवृत्तरजो वृत्तस्निग्धपुटक इति व्रणाकृतिसमासः। शेषास्तु विकृताकृतयो दुष्टपक्वा भवन्ति। सर्व एव व्रणाः क्षिप्रं संरोहन्त्यात्मवतां सुभिषग्भिरुपक्रान्ताः। अनात्मवन्तश्चोपक्रान्ताः ग्रहत्वाद्धोषाणाम्। तत्रातिसंवृतोऽतिविवृतोऽतिकठिनोऽतिश्लक्ष्णोऽवक्षतस्रोऽवस्रोऽतिशीतोऽल्पाः क्षारक्षपीतशुक्लादीनां वर्णानामन्यतमवर्णो भैरवः पूतिपूयमांसशिरास्नायुप्रभृतिपूर्णः पूतिपूयास्रुस्रावी तृष्णाभ्रमोच्छ्वासदर्शनगन्धोऽल्पर्थं वेदनावान् दाहपाकरागकण्डूशोथपिडकोपदंशोऽल्पर्थं दुष्टशोणिताक्षावी दीर्घकालानुबन्धी चेति दुष्टव्रणलिङ्गानि। तस्य दोषोक्तमार्गेण दृष्ट्वा विभज्य यथास्वं प्रतीकारे प्रवर्तेत। अत ऊर्द्धं सर्वास्रावान् वक्ष्यामः। तत्र दष्टाद् क्षिप्ताद् वा त्वक्स्फोटेषु भिन्नेषु विदारितेषु वा सलिलप्रकाशो भवत्यास्रावः किञ्चिद्दिग्धः पीतावभासश्च। मांसगतः सर्पिःप्रकाशः स्निग्धः श्वेतः पिच्छिलश्च। सिरागतः सदा स्निग्धास्तु सिरासु रक्तातिप्रवृत्तिः पक्वाशु च तोयनाडीभिरिव तोयागमनं पूयस्रावावभास तनुर्विच्छिन्नः पिच्छिलोऽवस्रावी स्रावोऽवस्रावप्रतिमश्च। स्नायुगतः स्निग्धो घनः सिंहाण्डकप्रतिमः सरक्तश्च। अस्थिगतोऽस्रुग्भिद्यते स्फुटिते भिन्ने दीर्णावदारिते वा दोषैरु-

क्षितत्वादस्निःसारं शुक्लिधौतमिवाभाति। आशावशात् मज्जभिश्चः सरुधरः स्निग्धश्च। सन्निगतश्च पीड्यमानो न प्रवर्त्तते आकुञ्चनप्रसारणोन्नमनविनमनप्रधावनोत्क्वाथनप्रवाहणैश्च युक्तो भवति। आशावशात् पिच्छिलोऽवस्रंसी सफेनपूयरुधिरोन्नाथितश्च। कोष्ठगतोऽन्तर्मुखपुरीषपूयोदकानि स्रवति। मर्म्मगतस्त्वगादिष्ववस्थितत्वात्राच्यते। तत्र त्वगादिगतानामाशावाशां यथाक्रमं मासस्थायावत्स्थायदधिमस्तुसारोदकमांसधावनपुटाकोदकसन्निभत्वानि मारुताद्भवन्ति। पित्ताद्भामेदोमूत्रभस्मयवकुलकाथोदकमाध्वीकतैलसन्निभत्वानि। पित्तवद्रक्तादतिविस्रत्वञ्च। कफात्पुनर्नीतकाशोसमज्जपिष्टतिलनारिकेलोदकवराहवसासन्निभत्वानि। सन्निपातात्तिलनारिकेलोदकैर्वाकरसकाञ्जिकवसादारुकोदकप्रियङ्गुफलयवक्कुलयूषसवर्णत्वानीति। "श्लोकौ चात्र भवतः। पक्वाशयादसाध्यस्तु पुटाकोदकसन्निभः। सारोदकनिभः स्रावो वर्च्चो रक्ताशयात्स्रवन्। आमाशयात्कलायाम्भोनिभश्च त्रिकसन्निजः। स्रावानेतान् परीक्षादौ ततः कर्म्माचरेद्भिषक्"। अत ऊर्द्धं सर्वव्रणवेदना वक्ष्यामः। तोदनभेदनताडनस्फोटनायमनस्तम्भनविश्लेषणसुप्तभावनविदंशनावभञ्जनस्फोटनविदारणोत्पाटनकम्पनविविधसूचिविश्लेषविक्रियापूरणस्तम्भनसुप्तिप्रावकुञ्चनाङ्गुलिकाः सम्भवन्ति। अनिमित्तविविधवेदनाप्रादुर्भावो वा शुद्धस्तंभ्यतेऽगच्छन्ति वेदनाविशेषास्तं वातिकमिति विद्यात्। ज्वरोष्मपरिदाहधूमायनानि यत्र गात्रमङ्गारावकीर्णमिव पच्यते यत्र चोष्माभिद्रुतैः क्षते क्षारावसिच्यते च वेदनाविशेषास्तं पैत्तिकमिति विद्यात्। पित्तवद्रक्तसम्भवं जानीयात्। कण्डूगुरुत्वं शुक्लप्रसेकोऽल्पवेदनत्वं श्लेष्मणः श्लैत्यञ्च यत्र तं श्लैष्मिकमिति विद्यात्। यत्र सर्वासां वेदनानां सम्भवश्चिह्नं सान्निपातिकमिति। अत ऊर्द्धं व्रणवर्णान् वक्ष्यामः। मांसप्रदोषास्त्रिवर्णः पक्वोऽरुणः कृष्ण इति मारुतजव्रणः। नीलः पीतो स्फुरितः शीघ्रावः कृष्णो रक्तः क्वचित् इति रक्तपित्तसम्भवौ। श्वेतः स्निग्धः पाण्डुरिति श्लैष्मिकस्य। सर्ववर्णोपेतः सान्निपातिकस्य इति। भवति चात्र "न केवलं व्रणेष्वेतौ वेदनावर्णसंग्रहः। सर्वरोगविकारेषु व्रणवच्चोपदेक्ष्यते"।

व्रणह पु० व्रणं हन्ति हन-ड। १एरण्डवृक्षे २गुडूच्याम् स्त्री यङ्च०।

व्रणाग्र पु०व्रणमग्रमिति मध्य-कर्म्म०। १वीरे गन्धरसे २व्रणकण्डूयने च राजनि०।

व्रत न० व्रज-क जश्च तः। १भक्षणभेदे उपवासादि० २पुण्यसाधने ३उपवासादिनियमभेदे च

व्रतञ्च सम्यक्सङ्कल्पजनितानुग्रहेयक्रियाविशेषरूपं तच्च प्रवृत्तिनिवृत्त्युभयरूपं तत्र द्रव्यविशेषभोजनपूजादिकं प्रवृत्तिरूपम् उपवासादिस्तु निवृत्तिरूपं तच्च नित्यं नैमित्तिकं काम्यञ्च। नित्यमेकादश्यादिव्रतम् नैमित्तिकं चान्द्रायणादिव्रतं काम्यं तत्तत्तिथ्युपवासादिरूपं "सम्यक् संसाधनं कर्म कर्त्तव्यमधिकारिणा। निष्कामेण महावीर! काम्यं कामान्वितेन च" भविष्यपु०। सम्यक् प्रथमकल्पादिना संसाधनं यथाविहितं साधनं यस्य। अधिकारिणा अर्थिना समर्थेन विदुषा चेत्यर्थः। तत्र व्रतारम्भकालः क्षेमाद्रि० दर्शितो यथा

अथ व्रतारम्भकालः। तत्र सत्यव्रतः "उदयस्था तिथिर्यां हि न भवेद्दिनमध्यभाक्। सा षष्ठ्या न व्रतानां स्यादारम्भे च समापने" इति। एतद्व्रतिरिक्तावासष्ठ्यां प्रारम्भमाह हेमाद्रिधृतः "षष्ठ्यष्टम्यामपि मार्त्तण्डो यद्यषष्ठ्या भवेत्तिथिः। व्रतप्रारम्भणत्यागमनङ्गेरुक्तयुगिति"। तिथियंद्यनङ्गेरुक्तयुक् चतुर्दशमितनुरुक्तयुक्ता तस्यां व्रतमारम्भणीयमित्यर्थः, इदमुपलक्षणम्। गुरुशुक्रयोर्वार्द्धक्येऽपि व्रतमारम्भणीयमित्यर्थः। तथा च हेमाद्रिधृतस्कन्दे "कन्याधानं प्रतिष्ठाञ्च यज्ञदानव्रतानि च। वेदव्रतव्रतोत्सर्गचूडाकरणमेखलाः। मार्कण्डेयमखेकञ्च मलमासे विवर्जयेत्। बाले वा यदि वा वृद्धे शुक्रे वाक्रान्ते गुरौ। मलमास एवैतानि वर्जयेद् देवदर्शनम्" इति। मार्कण्डेयोऽपि "नामान्नप्राशनञ्चौलं विवाहं गौञ्जिबन्धनम्। निष्क्रमं जातकर्मापि काम्यं हव्यविसर्जनम्। अस्तंगे च गुरौ शुक्रे बाले वृद्धे महिष्युचे। कन्याधानमुखारम्भं व्रतानां नैव कारयेद्" इति। छन्दः "नीचस्थे वक्रसंस्थे व्यतिचरत्यगते बालवृद्धात्मजे वा संन्यासो देवयात्रा व्रतचरणविधिः कर्त्तव्येष्वस्तु दीक्षा। नौञ्जीबन्धोऽथ चूडा परिणयनविधिर्वास्तुदेवप्रतिष्ठा वर्ज्यैः सङ्गैः प्रदत्तात् त्रिदशपतिगुरौ सिंहराशिस्थिते च" इति। नीचत्वमन्तु ज्योतिःशास्त्रे "कर्क्यादिभूमजगोमकराः क्रमात् स्युः। स्त्रीकर्किमीनवणिजोऽतनयस्य नीचम्" इति। उच्चस्थानात् सप्तमं नीचमित्यर्थः। तथा च

नीचस्थे गुरौ मकरगते दत्तार्थं । शौनकः "पुत्रौत्पात-विवाहयानगमनं चौलाद्यर्थव्ययं विद्यादेवविलोकनोपनयनं दीक्षापरीक्षा व्रतम् । स्नानं तीर्थगमं रत्नं पुरमठादानप्रतिष्ठापनम् । सिंहस्थे विबुधार्चिते न शुभदं कर्तुं क्षमा सूर्यगे" । अत्रलक्षणन्तु ब्रह्मसिद्धान्ते "रविचारशक्तिरन्ध्रेषां यद्दाभागस्य उच्यते । ततोऽर्वाक् बार्हकं विद्याद्दुर्दं बाल्यं प्रकीर्त्तितम्" इति । एतयोरवधिः ज्योतिःशास्त्रेऽनेकविधोदर्शितः "बालः शुक्रो दिवसदशकं पञ्चकञ्चैव दद्यः पश्चादङ्गिरसतयसुदितः पञ्चमौढ्यः क्रमेण । जीवो दद्यः शिखुरपि सदा पञ्चपञ्चैः शिखी तौ दद्यौ प्रोक्तौ दिवसदशकद्वापरैः सप्तरात्रम्" इति । एतेषां पक्षाणां व्यवस्था देशान्तरविद्यया आपद्विद्यया वा । तथा च गार्ग्यः "शुक्रो गुरुः प्राक्परात् चैव बाल्ये विप्रेन्द्र दशावन्तिषु सप्तरात्रम् । वङ्गेषु दृष्येषु च षट् च पञ्च मेघे च देशे त्रिदिनं वदन्ति" इति । वराहमिहिरोऽपि "बहवो दर्शिताः कालाः ये बाल्ये बार्हकेऽपि च । पाञ्चालाधिकाः शेषा देशभेदादुदाहृताः" इति ।

व्रतानां मानसादिभेदस्तत्र दर्शितो यथा

वराहपुराणे "अहिंसा सत्यमस्तेयं ब्रह्मचर्यमकल्मषम् । एतानि मानसान्याहुर्व्रतानि व्रतधारिणाम् । एकभक्तं तथानक्तमुपवासादिकञ्च यत् । तत्सर्वं कायिकं पुंसां व्रतं भवति नान्यथा" । उपवासोऽत्राहोरात्राभोजनम्, आदिशब्दाद्यावज्जीवादि । तथा "किञ्चिद् व्रतं वा क्रियते पूज्यते यत् त्रिलोचन !। विप्रेभ्योदीयते सर्वमेतत्प्रस्तरोः फलम्" ।

व्रतभेदफलादिकं तत्रोक्तं यथा गरुडपुराणे "तपोमूलमिदं भूतानां तप एव परायणम् । तपसा विजिता लोकास्तपसा निर्जितैः सताम् । तपसा धूतपाप्मानो निर्वाणं परमङ्गताः । तपसा परमायुश्च श्रीलं वापि तथाप्नुयात् । तपसा विन्दते लोकानक्षयानपि पूरुषः । तपसा परमङ्गच्छन्ति निर्वाणमपि शाश्वतम् । तपसा चेप्सितां सिद्धिं विपुलामपि विन्दति । सम्पन्ने च श्रुतादीनां तपसा सम्पदोऽतयः । अत्यन्तञ्च धनाढ्यकुलजन्मनरा भुवि । व्रतोपवासनियमैः शरीरोत्तापनस्यः । अहिंसासत्य दिवा निष्टुरविवर्जनया निशि । एतदोरात्रं प्रोक्तं महापातकनाशनम् । एकभक्तेन नक्तेन तथैवायाचितेन च । उपवासेन चैकेन प्राजापत्यः प्रकीर्त्तितः" । कूर्मपुराणे "व्रतोपवासनियमैर्होमब्राह्मणतर्पणैः । आराधय महादेवं यज्ञदानसमाधिभिः । ब्रह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव द्विजोत्तम !। अर्चयन्ति महादेवं यज्ञदानसमाधिभिः । व्रतोपवासनियमैर्होमैः स्वाध्यायतर्पणैः । तेषां वै रुद्रसायुज्यं सामीप्यञ्चातिदुर्लभम् । सलोकता च सारूप्यं लभते तत्प्रसादतः" । गरुडपुराणे "धुन्धुमारस्तु राजर्षिर्मम पुत्रशतं पुरा । दानेन नियमेनैव तपसा च व्रतेन च । सगरो नाम राजर्षिर्दिक्षु सर्वासु विश्रुतः । पुत्राणाञ्च शतं प्राप्तं तेन राज्ञा महात्मना । तथा दशरथो राजा व्रतेषु निरतः सदा । यज्ञदानतपोयोगैः सन्तुष्टः पुरुषोत्तमः । स्वयं पुत्रत्वमापेदे तस्य राज्ञो महात्मनः । जनको नाम राजर्षिस्तपोव्रतनिधिः स्वयम् । ऐश्वर्यमतुलं प्राप्य योगिनां गतिमाप्तवान् । एवमेव महाराज ! राजानो ब्राह्मणास्तथा । ऐश्वर्यलक्षणं प्राप्तुगतिं वै व्रतवैभवात् । अतः कुरुष्व सततं तपःसञ्चयमात्मवान् । व्रतोपवासनिरतस्तीर्थानि त्वपहस्तम !" । तथा "विनियम्येन्द्रियग्रामं कुर्वीत नियमात्मवान् । उपवासजप, ध्यानतीर्थस्नानादिकैरपि । व्रतैर्नानेन दानेन तपसा तीर्थसेवया । अनेकजन्मसंसिद्धिमेनःक्षपयति द्विजः" । व्रतादीनां चातुर्वर्ण्याधारत्वाभिधानात् द्विजपदञ्च मत्र वर्णमात्रोपलक्षणार्थम् । न चैवं सति शूद्रस्य यज्ञेऽनधिकारादुद्यत्पदविरोध इति वाच्यम् । यज्ञेरनेकार्थत्वेन देवतापूजाद्यर्थसम्भवात् । "कायिकं मानसञ्चैव वाचिकञ्च त्रिधा मतम् । यत्तोदानं तपश्चैव वदतस्तच्छृणुष्व मे । अहिंसा व्रतचर्या च तपः कायिकमुच्यते । वाचिकं सत्यवचनं भूतद्रोहविवर्जितम् । मानसं मनसः शान्तिः सर्ववैराग्यलक्षणम्" । आदित्यपुराणे "व्रतोपवासान् खलु यो विधत्ते दारिद्र्यशोकं स भिनत्ति चाशु । व्रतोपवासेषु रतस्य पुंसश्चैवापदः शान्तिमुपान्ति तज्ज्ञाः" व्रतसामान्यधर्मास्तदधिकारिश्च तत्र दर्शिता यथा

स्कन्दपुराणे "निजवर्णाश्रमाचारनिरतः शुद्धमानसः । व्रतेष्वधिकृतो राजन्नन्यथा विकलः श्रमः । सत्यवादी च सर्वभूतहिते रतः । व्रतेष्वधिकृतो राजन्नन्यथा विकलः श्रमः । अहिंसाव्यायभीरुश्च मदद्यविवर्जितः । व्रतेष्वधिकृतो राजन्नन्यथा विकलः श्रमः । श्रमः सर्वेषु भूतेषु शिवभक्तो जितेन्द्रियः । व्रतेष्वधिकृतो राजन्नन्यथा विकलः श्रमः । पूर्वं निशिथ्य शाखार्द्धं

यथावत् कर्मकारकः। अवेदनिन्दको धीमानधिकारी व्रतादिषु। महाभारते "श्राद्धकर्म तपश्चैव सत्यमक्रोध एव च। स्वेषु दारेषु सन्तोषः शौचं नित्यानसूयता। आत्मज्ञानं तितिक्षा च धर्मः साधारणो नृप!" देवलोऽपि "व्रतोपवासनियमैः शरीरोत्तापनेन वा। वर्णाः सर्वेऽपि सध्रुवं पातकेभ्यो न संशयः" इति। तदेवं वचनसन्दर्भेणोक्तनियमवतां चतुर्णामपि वर्णानां स्त्रीपुंसाधारण्येन व्रतेष्वधिकार इति प्रतिपाद्यते। तथा च भारते(गीता) "मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः। स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्" इति। तत्रायं परोविशेषो यत् स्त्रीणां भर्तुराज्ञां विना न स्वातन्त्र्येण व्रतादिष्वधिकार इति। तथा च मार्कण्डेयपुराणे "नास्ति स्त्रीणां पृथग् यज्ञो न व्रतं नाप्युपोषणम्। भर्तुः शुश्रूषयैवैता लोकानिष्टान् व्रजन्ति हि। यद्देवेभ्यो यत्र पित्रादिकेभ्यः कृत्यांङ्गत्वेनाभ्यर्चनं सत्क्रियाङ्ग। तस्मादर्हा वै सा खलु नान्यचित्ता नारी मुङ्क्ते भर्तुः शुश्रूषयैव। धर्मार्थकामसंसिद्धौ भवेद्भर्तुः सहायिनी"। आदित्यपुराणे "नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम्। पतिं शुश्रूषते यत्तु तेन स्वर्गे महीयते। पत्युरभ्यधिकं नारी योपवासव्रतञ्चरेत्। अनायुष्यं हि तज्जन्तोः प्रत्युक्तास्त्रादुच्यते। देवताराधनं कुर्यात् कामं वा ब्राह्मणोत्तमः। नारी पतिव्रता नाम प्राप्यानुज्ञान्तु भर्तृतः। नारी खल्वननुज्ञाता पित्रा भर्त्रा सुतेन वा। विफलं तद्भवेत्तस्या यत्करोत्यौर्द्धदेहिकम्"। पित्रेति कन्यात्वे। भर्त्रेति सौभाग्यदशायाम्। सुतेनेति वैधव्यदशायाम्। और्द्धदेहिकं व्रतादि। "अथ वा सर्वसंत्यक्त्वा पतिपूजनतत्परा। केशवाराधनं कुर्यात् साध्वी स्त्री पुरुषप्रभ!। तेनैव स्वर्गमाप्नोति यत् किञ्चिन्मनसेच्छति। अफलं सर्वमेव स्यात् भर्तृहीनां विना व्रतम्। केशवाराधनं यच्च तथापि सफलं स्त्रियः"। हरिवंशे "सतीत्वधर्मचरणं यज्ञा नित्यमखण्डितम्। पुण्यकानां विधिस्तज्ज्ञाः पुराणे परिकीर्तितः। दानोपवासव्रतानि हुतान्यप्यरुन्धति!। निःफलान्यसतीनां हि पुण्यकानि तथा शुभे"। पुण्यकानि व्रतानि। "या नाचरन्ति भर्तारं योनिदुष्टाश्च याः स्त्रियः। योनिदोषात् पुण्यफलं नाश्नन्ति निरयङ्गताः। साध्व्यो जगद्धारयन्ति सुशीलाः पतिदेवताः। अनन्यधर्मनिष्ठाश्च सतां पन्थानमाश्रिताः। अपापदुष्टाः शौचयुक्ताः स्तुतिमत्यः शुचिव्रताः। सततं साधुवादिन्यो धारयन्ति जगत् खलु। व्याधितः पतितो वापि निर्धनो वा कथञ्चन। न वक्तव्यः स्त्रिया भर्ता धर्म एष सनातनः। अकार्यकारिणं वापि निर्गुणं स्त्री पतिं तथा। तारयत्येव साध्वी सा तथात्मानं शुभानने!। योनिदुष्टस्त्रियो नास्ति प्रायश्चित्तं कृतैर्यतः। वाग्दुष्टे विहितं साध्वि! प्रायश्चित्तं पुरातनैः। भर्तुरुच्छन्देन कर्त्तव्यं व्रतकं सर्वदा स्त्रिया। उपवासोऽपि वा सत्ये! कालज्ञत्वात् तु शुभां गतिम्। कल्पान्तरसहस्रेषु न स्त्री सा लभते गतिम्। तिर्यग्योनिसहस्रेषु पच्यते योनिविप्लवात्। यदि स्यान्मानुष्यं स्त्री लभेदसती सती। चण्डालयोनौ दुर्मेधा जायते कुक्कुरानना। भर्ता देवः सदा स्त्रीणां स्त्रीभिर्दृष्टः सनातने! यस्या हि तुष्यते भर्ता सा सती धर्मचारिणी। कौटुम्बकृतानान्तु स्त्रीणां लोको न शोभनः। भर्तृष्वेव मनो यासां सद्भावेन व्यवस्थितम्। कर्मणा मनसा वाचा पतिं नातिचरन्ति याः। तासां पुण्यफलं सौम्ये! पुण्यकैः समुदाहृतम्। पुण्यकानां विधिं कृत्स्नं स्वर्लोकं प्रति शोभने!। निबोध सुसमाहिता। सर्वो हि दृष्टोऽयं तपसा मया। स्नात्वा स्त्री प्रातरुत्थाय पतिं विज्ञापयेत् सती। उपवासार्थमथ वा व्रतकार्यं धृतव्रते!। स्नात्वा करांघ्री चरणौ सततं सक्तमस्य च। दृष्ट्वोदुम्बरं पात्रं सकुशं साक्षतं तथा। गोशृङ्गं दधिसर्पिश्च प्रतिगृह्णीत तज्जलम्। ततो भर्तुः सती दद्यात् स्नानस्य प्रयतस्य च। आत्मनोऽथ निषेक्तव्यं ततः शिरसि तज्जलम्। त्रैलोक्ये सर्वतीर्थेषु स्नानमेतदुदाहृतम्। उपवासेषु कर्त्तव्यमेतद्धि व्रतकेषु च। स्नानमेतद्धि सामान्यं स्त्रीणां पुंसाञ्च भामिनि!। अरुन्धति! मया दृष्टं तपसा क्रतोधकम्। अन्यून्यं विद्धि शयनमासनञ्च तथाविधम्। स्वयं प्रक्षालनं चापि पादयोरनुगच्छितम्। अनुगच्छितं व्रतोपयोगितया कथितम्। "अनुप्रयातो रोषञ्च कलहस्य क्षतिः सति!। उपवासात् व्रताद्वापि यद्योषं यति स्त्रियम्। शुक्लमेव सदा वासः प्रशस्तं चन्द्रसन्निभे!। अलङ्कारोऽपरञ्चैव उपवासव्रते तथा। पाद्यार्घस्तु यैः कार्यैः सर्वदा व्रतके सति!। उपवासेऽपि च विधिरेष एव प्रकीर्तितः। अञ्जनं रोचनञ्चापि गन्धान् सुमनसस्तथा। व्रतके चोपवासे च नित्यमेव विवर्जयेत्। "रोचनं कुङ्कुमादिना, उपोज्झनोक्तरत्नम्। "दन्तकाष्ठं

शिरःस्नानमुद्वर्त्तनमथापि वा। विवर्जितं सदा सर्वं शौचार्थन्तु विधीयते। तिलामलकफलैर्नित्यं त्रीफलैव समाचरेत्। प्रक्षालनच्च शिरसः सदा क्षुण्णिश्चितैर्जलैः। शिरसोऽभ्यञ्जनं सौम्ये! नैवमेतत् प्रशस्यते। न पादयोर्न नाभ्यस्य स्नेहेनेति स्थितिः स्मृता। शोधानमर्दयानच्च कथञ्चिदपि नाचरेत्। खट्वायानच्च सततं व्रते चाप्युपवासके। नदीजलं प्रवर्जं शस्तं वै शोभनन्दिनि!। शुभे तडागे वाप्यादौ विशोर्णे जलमाहृते। गत्वा स्नानं प्रशस्यन्तु सदैव खलु सर्वथा। अलाभे त्ववरुद्धा स्त्री घटस्नानं समाचरेत्। नवैश्च कुम्भैः स्नातव्यं विधिरेष सनातनः। स्नानस्य कार्यं शिरसा तपःफलमवाप्नुयात्"। भविष्यत्पुराणे "क्षमा सत्यं दया दानं शौचमिन्द्रियनिग्रहः। देवपूजाग्निहवनं सन्तोषः स्तेयवर्जनम्। सर्वव्रतेष्वयं धर्मः सामान्यो दशकः स्मृतः"। अत्र क्षमादीनां स्वतन्त्रतया चतुर्वर्गसाधनत्वेन विहितानां व्रताङ्गतयाऽभिधानं खादिरं वीर्य्यकामस्येत्यादिवत् संयोगपृथक्त्वन्यायादुपपन्नम्। मत्स्यपुराणे "तस्मात् व्रतोपवासेन स्नानमभ्यङ्गपूर्वकम्। वर्जनीयं प्रयत्नेन रूपन्नं तत्परं नृप!"। यत्तूक्तं गरुडपुराणे "गन्धालङ्कारवस्त्राणि पुष्पमाल्यानुलेपनम्। उपवासे न दुष्यन्ति दन्तधावनमञ्जनम्" इति यच्च व्यासोक्तम् "दन्तधावनपुष्पाणि व्रतेऽपि स्युर्न दुष्यति"। तदेतत्सभर्त्तृकोपवासविषयम्। भविष्यत्पुराणे "अञ्जनञ्च सताम्बूलं सिन्दूरं रक्तवाससी। विष्वक्सेनोपवासेऽपि सर्वेषु व्रतेषु च। विधवा यतिभार्य्या च कुमारी वा यदृच्छया" पद्मपुराणे "गर्भिणी सूतिकादिश्च कुमारी वाथ रोगिणी। यदा शुद्धा तदान्येन कारयेत् प्रयता स्वयम्"। गर्भिण्यादिरुपवासे कर्त्तव्ये नक्तं कुर्य्यात्। सूतकादिभिरशुद्धा अन्येन व्रतं कारयेत्। प्रयता शुद्धा, स्वयं कुर्य्यात्, पुंसोऽप्येष विधिः लिङ्गस्याविवक्षितत्वात् तदेवं स्त्रीणां कन्यादशायां पित्रादेराज्ञया, विवाहानां भर्त्तुराज्ञया, विधवानां पुत्राद्याज्ञयैव व्रताधिकारोनान्यथेति सिद्धम्। अग्निपुराणे "बीजिनश्चिक्कसङ्घाश्च कषायाः सलिलं पयः। श्यामाकाश्चैव नीवारा गोधूमाद्या व्रते हिताः। कूष्माण्डालाबुवार्त्ताकीपालङ्क्यौदकशाकजेत्। चरुमैक्ष्यं शक्तुकणाः शाकन्दधि घृतं मधु"। श्यामाकाः शालिनीवारा शाकं मूलफलादिकम्। "अविप्लुतब्रह्मचर्य्यादग्निकार्य्यादिकं हितम्। मधु मांसं विहायान्यद् व्रते च हितमीरितम्"। ब्रह्मदयादीनामुपवासगुणतयातदङ्गत्वम् एकान्ते दर्शितं यथा व्रते गुणानाह गौतमः "दया सर्वभूतेषु क्षान्तिरनसूया शौचमनायासो मङ्गलमकार्पण्यमस्पृहा चेति"। दयादिलक्षणान्याह हरिस्मृतिः "परे वा बन्धुवर्गे वा मित्रे द्वेष्टरि वा सदा। आत्मवद्वर्त्तितव्यं हि दयैषा परिकीर्त्तिता"। परे उदासीने। आपत्सु रक्षितव्यमित्यर्थः। कल्पतरौ पाठः। आत्मवदितिव्यङ्गमाह दक्षः "यथैवात्मा परस्तद्वद्द्रष्टव्यः सुखमिच्छता। सुखदुःखानि तुल्यानि यथात्मनि तथा परे"। हरिस्मृतिः "बाह्ये चाध्यात्मिके चैव दुःखे चोत्पादिते क्वचित्। न कुप्यति न वा हन्ति सा क्षमा परिकीर्त्तिता। न सुखान् सुखिनो हन्ति सौति मन्दसुखानपि। नान्यदोषेषु रमते साऽनसूया प्रकीर्त्तिता। अमङ्गलपरिहारस्तु संसर्गाद्यनिन्दितैः। स्वधर्मे च व्यवस्थानं शौचमेतत् प्रकीर्त्तितम्। शरीरं पीड्यते येन सुखभोगेनापि कर्मणा। अल्पन्तत्र कुर्वीत अनायासः स उच्यते। प्रशस्ताचरणं नित्यमप्रशस्तविवर्जनम्। एतद्धि मङ्गलं प्रोक्तमृषिभिस्तत्त्वदर्शिभिः। लोकादपि च दानवज्ञमदीनेनैव चात्मना। कृत्स्नकृत्ति यत् किञ्चिदकार्पण्यं हि तत् स्मृतम्। यथोत्पन्नेन सन्तोषः कर्त्तव्यः सर्वदा बुधैः। परस्य चिन्तयित्वार्थं साऽस्पृहा परिकीर्त्तिता"। देवीपुराणम्। "तत्स्नानं तज्जपः स्नानं तत्कथाश्रवणादिकम्। उपवासक्षतो क्षिप्ते शुद्धा प्रोक्ता मनीषिभिः"।

व्रतकालविवेकेऽत्र विशेष उक्तो यथा "दीर्घकालानुपालनीयतत्तद्तिकर्त्तव्यताकलापोपलक्षितनियतसङ्ख्यविषयो व्रतमिति व्रतलक्षणम्। व्रतानां सङ्ख्यासम्भवमाह मनुः "सङ्ख्यामूलः कामो वै यज्ञाः सङ्ख्यासम्भवाः। व्रता(नृंस्त्वमार्षम्)नियमधर्माश्च सर्वे सङ्ख्याजाः स्मृताः"। व्रतारम्भप्रतिष्ठाकालमाह ज्योतिषम् "गुरोर्भार्गोरस्तबाल्ये वार्द्धक्ये सिंहगे गुरौ। गुर्वादित्ये दशाहे तु वक्रिजीवास्तसिंहगे। दिने, प्रायाग्रहनाशातिचारिगुरुवत्सरे। प्रायाग्निगन्तृजीवस्य चातिचारे त्रिपक्षके। कल्याद्भुत सप्ताहे नीचस्थेज्ये मलिम्लुचे। भानुतस्कृतके भार्गवे क्षये राहुयुते गुरौ। पौषादिकचतुर्मासे चरघाद्यितवर्षके। एकेनाङ्गा चैकदिने द्वितीयेन दिनत्रये। तृतीयेन तु सप्ताहे भाङ्गुल्यानि जिजीविषुः। विद्यारम्भ कर्णवेधौ चूडोपनयनोद्वाहान्। तीर्थयानमनाद्यन्तं तथा

नादिसुरेत्यत्र । परीक्षारामयत्तांश्च पुरश्चरणदीपके । व्रतारम्भप्रतिष्ठे च सङ्कारम्भप्रवेशने । प्रतिष्ठारम्भणे देवकूपादेर्वेश्मनि च । हानिंशद्दिवसाद्धे जीवस्य भार्गवस्य च । हानप्रतिष्ठंकल्पे पादादे द्वादश क्रमात् । कन्यात् प्राक् परतो वा पक्षं गुरोर्वर्द्धकवर्तते । पक्षं हृद्धो मकादौ तु मृगुवाक्यो दशाधिकः । पादादे तु दशाहानि हृद्धो बालो दिनत्रयम्" । सिंहस्थ गुरौ विशेषस्तु ज्योतिःकौतुकाम् "गङ्गकन्या उत्तरे तीरे गिरिराजस्य दक्षिणे । सिंहस्थं मकरस्थञ्च गुरुं यत्नेन वर्जयेत्" इति । अथ व्रतानुष्ठानं तत्र देवलः "अभुक्त्वा प्रातराहारं स्नात्वाचम्य समाहितः । सूर्य्यादिदेवताभ्यश्च निवेद्य व्रतमाचरेत्" । अत्र प्रातर्व्रतमाचारेदित्यन्वयः ततश्चाहारमभुक्त्वा इति पूर्वदिने एकभक्तं कृत्वा इत्यर्थः दिवारात्रिभोजनद्वयस्यैकतरनिवृत्त्यैकतरस्यावश्यमानत्वात् । सङ्कल्पितव्रताकरणे प्रायश्चित्तमाह देवलः "यो सङ्कल्प्य व्रतं मोहात् नाचरेत् काममोहितः : जीवन् भवति चाण्डालो मृतः श्वा चैव जायते" । अत्र प्रायश्चित्तवाक्ये शाम्बपुराणम् "लोभान्मोहात् प्रमादाद्वा व्रतभङ्गो भवेद्यदि । उपवासत्रयं कुर्यात् कुर्याद्वा केशखण्डनम् । प्रायश्चित्तमिदं कृत्वा पुनरेव व्रती भवेत्" । वाशब्दः समुच्चये तेन केशखण्डनञ्च कुर्यादित्यर्थः । प्रमादात् सङ्कल्पकरणे प्रतिप्रसवमाह देवलः "सर्वमेतन्मयं प्रोक्तं प्रमादो गुरुशासनम् । अव्रतघ्नानि कर्माणि सङ्कल्पेतानि शास्त्रतः" । आरम्भानन्तरमशौचं न प्रतिबन्धकम् "व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे । आरब्धे सूतकं न स्यादनारब्धे तु सूतकम्" विष्णुक्तेः । व्रतारम्भे सङ्कल्प एव तत्रैवोक्तः । आरब्धव्रतस्य समापनं विनाऽरण्ये तत्फलप्राप्तिरपीत्याहाङ्गिराः "योवदर्धं चरेद्धर्ममसमाप्य मृतो यदि । स तत्पुण्यफलं प्रेत्य प्राप्नोति मनुरब्रवीत्" । प्रेत्य परलोके । अशक्तौ जलादिपाने दोषाभावमाह बौधायनः "अक्षौ तान्यव्रतघ्नानि आपो मूलं फलं पयः । हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम्" । गर्भिण्यादौ विशेषमाह शाम्बपुराणम् "गर्भिणी सूतिका नक्तं कुमारी च रजस्वला । यदा शुद्धा तदान्येन कारयेत् क्रियते तदा" । अशुद्धा पूजादिकं कारयेत् कायिकमुपवासादिकं यदा शुद्धाशुद्धा वा स्वयं कुर्यात् । उपवासाशक्तौ नक्तं कुर्वीत । "उपवासेष्वशक्तानां नक्तं भोजनमिष्यते" इति वचनात् । व्रतदिने वर्ज्यान्याह हारीतः "पतितपाषण्डनास्तिकसम्भाषणतामिधानादिकं सपवासदिने वर्जयेत्" । तथा कूर्मपुराणम् "बहिर्ग्रामान्त्यजं सूतिं पतितञ्च रजस्वलाम् । न स्पृशेन्नाभिभाषेत नेक्षेत क्रियावासरे" । व्रतानुष्ठानकालश्च तत्तत्तिथिविहितपूजाप्रधानकालपूर्वाह्णे प्राप्तितिथ्योर्द्वा यथा नरसिंहपुराणम् "दैवज्ञास्तु पूर्वाह्णे मनुष्याणान्तु मध्यमे । अपराह्णे पितॄणान्तु कार्य्याण्येतानि यत्नतः" इति तथा स्मृतिरपि पूर्वाह्णो वै देवानां मध्यन्दिनं मनुष्याणामिति" । उभयदिने पूर्वाह्णलाभे विशेषवचनं विना युग्मादिवचनादुभयव्याप्ती । संक्रान्तिनिमित्तं तत्तत्संक्रान्तिपुण्यकाल एव कार्य्यम् । "त्रुटेः सप्तमभागो यः स कालो रविसंक्रमः" इत्युक्तेः संक्रान्तिकालस्यातिसूक्ष्मत्वेन कर्मानर्हतया संक्रान्तिपदस्य तत्समीपवत्तत्परत्वात् । अत्र तु "हविष्यस्य तु संक्रान्त्यां पुत्रकामा व्रतं चरेत्" इति भविष्यपुराणीयेन कार्त्तिकेयव्रतस्य संक्रान्तिविहितत्वेऽपि "सायंकाले समारोप्य प्रातःकाले विसर्जयेत्" इति भविष्यपुराणीयेन पूजाया रात्रिमात्रकर्त्तव्यताभिधानात् तदकरणेऽपवासस्य चाशक्तेरसाध्यत्वेन पुण्यकाले तदसम्भवात् तदुयुक्ताशौरात्र एव कर्त्तव्यम् । तत्र संपूर्णार्द्धरात्रात् परं हविष्यसंक्रान्तौ परदिने पूर्वयामद्वयस्य पुण्यकालत्वेन तदुयुक्ताशौरात्र एव कार्त्तिकेयव्रतं कर्त्तव्यम् दिवा तदकरणादेः व्रतत्वेन प्रातरारम्भार्हत्वात् तदकरणेऽपवासस्य प्रातरारम्भार्हत्वाच्च । उक्तान्यतरेषु युग्मवचनेन शुक्लपक्षस्यापराह्णादिभेदेन वा तिथिविवेकोक्ता व्यवस्थानुसरणीया ।

व्रतप्रतिष्ठाकालश्च पूर्वोक्तेन "गुरोर्भार्गवस्य वाक्ये वार्द्धक्ये सिंहगे गुरौ" इत्यादिवचनोक्तगुरुशुक्रास्तमयादिभिन्नः शुद्धसमय एव कालः । तत्र "सर्वैरुक्तेषु कर्त्तव्या प्रतिष्ठा विधिना बुधैः । फलार्थिभिरतः प्रोक्तं यस्मात्तिथिफलप्रदम्" इति कृत्यौषधुराशौचवचनेऽकरणे निष्फलत्वश्रुतेः प्रतिष्ठा नित्या सा च न व्रताङ्गं किन्तु कर्मान्तरम् । "समाप्ते तु व्रते तस्य प्रतिष्ठा तदनन्तरम्" ब्रह्मपुराणात् । इत्यत्र तन्निमेऽशौचादौ यथा न व्रताङ्गानुष्ठानं तथा समयाशुद्धावपि नानुष्ठानम् । यत्तु "समाप्ते तु व्रते तस्य प्रतिष्ठा तदनन्तरम् । न कालनियमस्तत्र विघ्ने परादिके" इति तदसम्भवे दिवसे समयाशुद्धावपि प्रतिष्ठाविधायकं वचनं तत् कामधेनुवत्सतरकारादिभिरालिखितत्वादनादरम् । यदेव व्रतं

मासवर्षादिकालविशेषनियन्त्रितं काम्यं तस्यैव प्रतिष्ठा यत् पुनर्नित्यं कालविशेषानियन्त्रितञ्च न तस्य प्रतिष्ठा पूर्वोक्तहयशीर्षादौ काम्यकलार्थिभिरित्यनेन काम्यस्यैव प्रतिष्ठाविधानात् कालविशेषानियन्त्रिते तदसम्भवात्"।

व्रतभेदाश्च नानापुराणोक्तास्तत्र हेमा० व्र० खण्डोक्ता ओंकारादिरोंदाक्षरपूर्वकयद्धानुसारेणात्र कर्त्तव्यकालसहिताः प्रदर्श्यन्ते तेषामितिकर्त्तव्यता तु तत्र द्रष्टव्या

अक्षयतृतीयाव्रतं भविष्योत्तरोक्तम्। "वैशाखस्य सितामेकां तृतीयामक्षयां शृणु। तस्यां स्नानं जपो होमः स्वाध्यायः पितृतर्पणम्। दानञ्च क्रियते किञ्चित् तत् सर्वं चाक्षयम्। आदिः कृतयुगस्येयं युगादिस्तेन कथ्यते। सर्वपापप्रशमनी सर्वसौख्यप्रदायिनी"।

अक्षयफलावाप्तिकरकाख्यतृतीयाव्रतं विष्णुधर्मोत्तरोक्तम्। "वैशाखशुक्लपक्षे तु तृतीयायामुपोषितः। अक्षयं फलमाप्नोति सर्वस्य सुकृतस्य तु। सा तथा कृत्तिकोपेता विशेषेण च पूजिता। तत्र दत्तञ्च जप्तञ्च सर्वमक्षयमुच्यते। अक्षया सा तिथिस्तस्मात्सा सुकृतमक्षयम्। अक्षतैः पूजितोविष्णुस्तेन सा चाक्षया स्मृता। अक्षतैस्तु नरः स्नातो विप्रादत्त्वा तथाऽक्षतान्। सक्तून् सुसंस्कृतांश्चैव कृत्वा चैव तथाक्षतान्। विप्रेषु दत्त्वा तानेव तथा सक्तून् सुसंस्कृतान्। एकान्तन्तु महाभाग! फलमक्षयमश्नुते। एकामप्युक्तां कृत्वा च तृतीयां शृणुनन्दन!। एतावत्तु तृतीयानां सर्वान्तु फलं लभेत्"।

अक्षयैकादशीव्रतं वामनपु० उक्तम्। "माघि चाश्वयुजे ब्रह्मन्! यदा पद्मजसन्निधिः। नाभ्यां निष्पतति जगतामोशितुश्चक्रधारिणः। तस्मिन् रम्ये शुभे काले या शुक्लैकादशी भवेत्। तस्यां सम्यग्यजेद्विष्णुं येन यज्ञः प्रपूर्यते"। येन विष्णुप्रपूजनेन यज्ञसम्पूर्णं धर्मादिभिः परिपूर्णमवतीत्यर्थः"।

अग्निचतुर्थीव्रतं विष्णुधर्मोत्तरोक्तम्। "दृढमन्यत् प्रवक्ष्यामि चतुर्थीव्रतं तव। चतुरात्मा हरिः प्रोक्तश्चत्वारश्च हुताशनाः, आहितास्तिस्रिदिवो यस्य विद्यतेऽग्निचतुष्टयम्। सोपवासश्चतुर्थ्यान्तु शुक्लपक्षस्य फाल्गुने। अभ्यर्च्य चतुरात्मानं वासुदेवमतन्द्रितम्। तस्मै दद्याद् द्विजेन्द्राय तिलप्रस्थानि षोडश। सुवर्णञ्च सुवर्णञ्च यस्य एतत्रयमपि"। सुवर्णं कर्षोन्मानम् "एवं संवत्सरं कृत्वा व्रतमेतदतन्द्रितः। सर्वकामसमृद्धस्य यत्रयुक्तः करिष्यते"।

अघोराख्यचतुर्दशीव्रतं भविष्योत्तरे "भाद्रे मासि सिते पक्षे अघोराख्याचतुर्दशी। तासुपोष्य नरोयाति शिवलोकमव्रतः" तिथितः।

अङ्गारकचतुर्थीव्रतं मत्स्यपु० उक्तम्। "चतुर्थ्यङ्गारकदिने यदा भवति भारत!। सदा स्नानं तदा कुर्यात् पद्मरागविभूषितः। अग्निकूष्माण्डो दिवो मन्त्रं जपंस्तिष्ठेदृढव्रतः। गुडलवणौजपन् होमान्ते भोगविवर्जितः"।

अचलासप्तमीव्रतं भविष्योत्तरोक्तम्। "माघस्य सितसप्तम्यां सर्वकामफलप्रदम्। रूपसौभाग्यजननं स्नानं कुरु वरानने!। कृत्वा षष्ठ्यामेकभक्तं सप्तम्यां निशि भोजनम्। रात्र्यग्ने चाश्वत्थाग्रं दत्त्वा शिरसि दीपकम्। माघस्य सितसप्तम्यामचलत्वाभिलषितञ्च यत्। एकभक्तेन सन्तिष्ठेत् षष्ठ्यां सम्पूज्य भास्करम्। सप्तम्यां तु व्रजेत् प्रातः सुगम्भीरजलाशयम्"।

अदारिद्र्यषष्ठीव्रतं स्कन्दपु० उक्तम्। "षष्ठी नाम तिथिर्ख्याता सामान्या दैवतैरपि। एकभक्तेन नक्तेन तथैवायाचितेन च। उपवासेन दानेन तैलक्षारविवर्जितः। अयं हि भगवान् देवो भास्करस्य परद्युतिः। येन श्रीर्देवि दत्तेयं तदृग्युक्तं कथयाम्यहम्। योपनीयं व्रतं दिव्यमिह लोके फलप्रदम्। यस्मिन् कृते व्रते चैव दरिद्रो न भवेत् कुले। षष्ठीतिथिं समुद्दिश्य ब्राह्मणस्य च भोजनम्। माल्योदनञ्च पयसि कृत्वा च शर्करायुतम्। बाह्मण्यघृतसंयुक्तं वर्षमेकं प्रदापयेत्। कुले तस्यैव ये जाता ये भविष्यन्ति मानवाः। दृष्ट्वा तस्यैव ये यन्ति तान् दारिद्र्यं न गच्छति"।

अनघाष्टमीव्रतं भविष्योत्तरोक्तम्। "कृष्णाष्टम्यां मार्गशीर्षे दाम्पत्यं दर्भनिर्मितम्। अनघं वासुदेवञ्च वह्निपत्नीः समन्वितम्। स्थापयित्वा शुभे देशे गोमयेनानुलेपिते। स्नात्वा समर्चयेत् पुष्पैः सुगन्धैश्चानुलेपनैः। अग्नेर्देवोक्तमन्त्रैश्च दण्डकं मनसा स्मरन्। अनघं वासुदेवन्तु एतो तस्याग्निसम्भवा। प्रद्युम्नादिपुत्रवर्गं हरिवंशे यथोदितम्। वर्षमेकं ततः कृत्वा इदं तदनघं स्मृतम्"।

अनङ्गत्रयोदशीव्रतं भविष्योत्तरोक्तम्। "अनङ्गो भगवान् शम्भुस्त्रैलोक्यमूर्त्तिरगोचरः। स एव देवोदेवानां तेनानङ्गत्रयोदशी। प्रसिद्धा समनुप्राप्ता त्रिलोकी सर्वफलप्रदा। मार्गशीर्षेऽमले पक्षे त्रयोदश्यां समाहितः। स्नानं नद्यां तडागे वा गृहे वा कूपतोऽपि वा। कृत्वाभ्यर्च्य महादेवं विधानाच्छिवभूषणम्। शिवं स्मरन्नुं भूतसङ्घे

यत्प्रतिष्ठितम् । तदनङ्कमिति प्रोक्तं पूजयेद्वङ्कितोवृतौ" । एतत् व्रतं तदधि वर्षसाध्यम् ।

अनङ्गत्रयोदशीव्रतं कालोत्तरोक्तम् । "चैत्रशुक्लत्रयोदश्यामनङ्गं तु पटे लिखेत् । नीलदूर्वांकुरश्यामं हस्तमात्रं प्रमाणतः । रतिप्रीत्युभयोपेतं पौष्पसायकचापधृक् । पटेषु सुस्थितः कार्यः सर्वैषाप्सरसां गणैः" ।

अनन्तचतुर्दशीव्रतं भविष्योक्तम् "अनन्तव्रतमध्यक्तिश्रावणमनुत्तमम् । सर्वपापहरं नृणां स्त्रीणां चैव युधिष्ठिर ! । शुक्लपक्षे चतुर्दश्यां माघि भाद्रपदे भवेत् । तस्मात्तुष्टानमात्रेण सर्वपापाद्व्यपोहति" ।

अनन्ततृतीयाव्रतं पद्मपु० शक्रम् । "शृणुष्वावहिता देवि ! तृतीयानन्तपुण्यदम् । नराणामथ नारीणामाराधनमनुत्तमम् । नभस्ये वाथ वैशाखे मार्गशीर्षेऽथ वा पुनः । शुक्लपक्षे तृतीयायां स्नातः सन् गौरसर्षपैः । गोरोचनाऽथ गोमूत्रं सुस्नागोशकृतं दधि । चन्दनेन च कंसिथ्रा ललाटे तिलकं न्यसेत् । सौभाग्यारोग्यकृत्यस्मात् सदा च चर्चितात्रियम् । प्रतिपच्छतृतीयायां दुग्धान् वाथ सुवासिनी । धारयेद्वल्कवस्त्राणि कुसुमानि सितानि च" ।

अनन्तद्वादशीव्रतं विष्णुरहस्योक्तम् । "द्वादश्यां शुक्लपक्षे च माघि भाद्रपदे नरः । नैवेद्यगन्धपुष्पाद्यैरर्चयेल्लक्ष्मणाग्रजम् । न चाऽऽलभेद्धिंसकर्मस्थान् पाषण्डान् पतितान्नरान् । स्नात्वा अपश्यन्नन्तेति व्रतमष्टोत्तरं बुधः । व्रजंस्तिष्ठन् स्वपन् भुञ्जन् वृध्यन् पश्यंश्चिते शुचे । वेदवार्त्तः स्मरेच्चित्यमनन्तं मनसा गिरा । व्रतमेतद्विधानेन कुर्यात् संवत्सरं नरः" ।

अनन्तपञ्चमीव्रतं स्कन्दप्रभासोक्तम् । "यो नरः पूजयेद् नागं पञ्चम्यां फाल्गुने सिते । पञ्चोपचारविधिना सिताहारो जितेन्द्रियः । न तं दशन्ति फणिनो दश वर्षाणि पञ्च च । विषं न क्रमते तस्य कुले मातृकुलेऽपि च । तस्मात् तं पूजयेद् यत्नात् पञ्चम्यां तु विशेषतः" ।

अनन्तफलसप्तमीव्रतं भविष्योक्तम् । "शुक्लपक्षे तु सप्तम्यां माघि भाद्रपदेऽच्युत ! । प्रणम्य शिरसा देवं पूजयेत् सप्तवाडवम् । पुष्पधूपादिभिर्वीरः कृतपानाशु तर्पणैः" । कृतपानां, ब्राह्मणादीनाम् । "पायसादिभिराशाप्य कृतस्वस्तिवाचनम् । विप्राय दक्षिणां दत्त्वा नक्तं भुञ्जीत वाग्यतः । तिष्ठन् ब्रुवन् प्रस्थितश्च कृतप्रस्थ उदङ्मुखः । आदित्यनामस्मरणं कुर्याद्वुद्धारणं तथा । अनेनैव विधानेन मासान् द्वादश वै क्रमात् । उपोष्य पारणे पूर्वं समभ्यर्च्य जगद्गुरुम् । पुत्रेण सपत्नीकेन प्रथमेत पुटिमाप्नुयात् । एवं यः पुरुषः कुर्यादादित्याराधनं शुचिः । नारी वा स्वर्गमभ्येत्य सानन्यं फलमश्नुते" ।

अनोदनसप्तमीव्रतं भविष्योक्तम् । "शुक्लपक्षे तु वैशाखे सप्तम्यां समुपोषितः । पूजयेद् भास्करं भक्त्या पुष्पधूपादिलेपनैः । येन तत् पूजयेद्देवं स विधिः कथ्यते तव । तदा वैशाखो येन विधिनाऽपूजयद्रविम् । दनखादां भवेद् यद्वि तदोदनमिति स्मृतम् । भक्ष्यं चूर्णं तथा लेह्यमोदनस्त्रिः प्रकीर्त्तितम् । तोयं चाऽनोदनं प्रोक्तं तस्मात् तत्परिवर्जयेत् । तत् परिवर्जयेदिति तच्छब्देन ओदनः परामृश्यते तस्मादोदनमेव वर्जयेद्व तु पेयमपि तस्मानोदनत्वात्" । "एवं वानोदना नाम सप्तमी भरतर्षभ ! । यासूपोष्य नरो भक्त्या धनधान्यमवाप्नुयात्" ।

अपराजितासप्तमीव्रतं भविष्यपु० "माघि भाद्रपदे शुक्ला सप्तमी या नराधिप ! । अपराजितेति विख्याता महापातकनाशिनी । चतुर्थ्यामेकभक्तन्तु पञ्चम्यां नक्तमाचरेत् । उपवासस्तथा षष्ठ्यां सप्तम्यां पारणं भवेत् । पारणान्यत्र चत्वारि कथितानि मनीषिभिः । पुष्पाणि करवीराणि तथा रक्तञ्च चन्दनम् । धूपक्रिया गुग्गुलुना नैवेद्यं गुडपूपकाः । नभस्यादिषु मासेषु विधिरेष प्रकीर्त्तितः" । इदं व्रतं वर्षसाध्यम् ।

अमावास्याव्रतं कूर्मपु० शक्रम् । "अमावास्यामनुप्राप्य न क्षुद्धाय कुटुम्बिने । यत् किञ्चित् वेदविदुषे दद्याद्दक्षिणाग्रहरम् । प्रीयतामीश्वरः सोमो महादेवः सनातनः । सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति" ।

अभीष्टसप्तमीव्रतं विष्णुधर्मोत्तरोक्तम् । सप्तम्यामुदयुक्तमे "पूजयित्वा सहस्रांशु द्वीपाद्वव तटा नरः । पातालांश्च महाभाग ! भुक्त्वाग्र्यभोगसंचितान्" ।

अमुक्तभरणसप्तमीव्रतं भविष्योक्तम् । "भद्रे ! भाद्रपदे माघि सप्तम्यां सन्निधायवे । स्नात्वा शिवं मण्डलके लेखयित्वा तथाम्बिकाम् । भक्त्या सम्पूज्य समयं कुर्याद्वृद्धा करे शुभम् । यावज्जीवं मयाक्ता त्व शिवस्य विनिवेदितः" ।

अरुन्धतीव्रतं स्कन्दपु० शक्रम् । "अरुन्धतीव्रतं वक्ष्ये सदा सौभाग्यदायकम् । येन योगेन वै सम्यक् नारी सौभाग्यभाजनम् । जायते रूपसम्पन्ना पुत्रपौत्रसमन्विता । एवमुक्तं वसिष्ठाद्य तृतीयायां सुरर्षभ ! । स्नानं कृत्वा

तु विधिवच्चिरात्रोपोषिता सती। सिद्धान्नानि च चत्वारि समाहृत्य व्रतव्रता। पूजयेत् पुष्पताम्बूलैश्चन्दनैश्च तथाक्षतैः"।

कर्कव्रतं भविष्योक्तम्। "सप्तम्यां च तथा षष्ठ्यां पक्षयोरुभयोरपि। योऽश्नन्नेकं नक्तभोजी नियतात्मा जितेन्द्रियः। यत्पुण्यं परमं प्रोक्तं सततं सत्रयाजिनाम्। सत्रयाजिषु यत् पुण्यं यत् पुण्यं सततगामिनाम्। तत्फलं सकलं प्राप्य मम लोकमुपैति सः"।

कर्कसप्तमीव्रतं ब्रह्मपु० उक्तम्। "कर्कसंपुटसंयुक्तसदकप्रार्थनं पिबेत्। क्रमाद् दत्त्वा चतुर्थ्यमेवैकं क्षिपते पुनः। द्वाभ्यां संवत्सराभ्यां तु समाप्य नियमोभवेत्। सर्वकामप्रदा ह्येषा प्रीयेतार्कसप्तमी"।

कर्कस्फुटसप्तमीव्रतं भविष्यपु० "फाल्गुनामलपक्षस्य षष्ठ्यां सम्यगुपोषितः। पूजयेद्भास्करं भक्त्या पुष्पगन्धाक्षतैर्घनैः। कर्कपुष्पैर्नमस्कारादो! गुग्गुलेन सुगन्धिना। सितेन भूषयन् देवं चन्दनेन दिवाकरम्। गुडोदनञ्च नैवेद्यं पलानां त्रितयं रवेः। एवं पूज्य दिवा भानुं रात्रौ तत्कायतः क्षमेत्"।

कर्कोटमीव्रतं भविष्योत्तरोक्तम्। "यदाऽष्म्यां शुक्लपक्षे र विवारोऽभिजायते। उपोष्या सा प्रयत्नेन तेनैव विधिना नृप!। अर्चयेद्देवदेवेशं सह देव्या महेश्वरम्। विशेष एव एवात्र शिवस्य नयनेक्षितम्। भानुं सम्पूजयेद् भक्त्या गन्धपुष्पाक्षतैः शुभैः। शिवञ्च सितपुष्पैस्तु रक्तपुष्पैस्तथाम्बिकाम्। रत्नैरङ्गसिमैर्दिव्यैर्भक्तिमानर्चयेद्विभुम्। कुङ्कुमेनाक्षतैर्देवीं चन्द्रेण महेश्वरम्"।

कर्कावाप्तिव्रतं ब्रह्माण्डपु० उक्तम्। "प्राप्ते तु श्रावणे मासि शुक्लपक्षे मनोहरे। संस्थाप्य पार्वतीं देवीं पूजयेद्भक्तिसंयुतः। मासं यावच्चमतः संस्मरन् पार्वतीं हृदि। श्वेताभ्रैः श्वेतकुसुमैः श्वेतचन्दनकेन च। गन्धैर्धूपैश्च नैवेद्यैर्यथाकालोद्भवैः फलैः। अर्घ्यं दद्यात् फलेनैव कुसुमाक्षतचन्दनैः। नमोऽर्कश्रावणि! देवि! सर्वपापक्षयङ्करि!। गृहाणार्घ्यं हि देवेशि! भक्तिरेष सदा मम"।

कर्कोदयव्रतं स्कन्दपु० उक्तम्। "माघमासां व्यतीपात आदित्ये विष्णुदैवते। कर्कोदयं तमित्याहुः सहस्रार्कग्रहैः समम्। पुराकृतं वसिष्ठेन जामदग्न्येन सुव्रत!। सनकाद्यैस्तथान्यैश्च मुनिभिर्वाञ्छितैरपि। अन्यैः शतसहस्रैश्च दृष्टं भवति कुम्भज!। दानानां दक्षतीर्थानां फलं येन कृतं भवेत्। माघमासे कृष्णपक्षे षष्ठ्यां रवेर्दिने। वैष्णवेन च ऋक्षेण व्यतीपाते सुदुर्लभे"। वैष्णवर्क्षं श्रवणम् "पूर्वाह्णे सकले स्नात्वा शुचिर्भूत्वा समाहितः। सर्वपापविशुध्यर्थं नियमस्थो भास्करः। विष्णोर्व्रतं इदं देवाः करिष्ये भुक्तिमुक्तिदम्। भवन्तु साक्षिणो मेऽद्य त्वयोदेवास्त्वयोऽग्नयः"।

कलत्रसप्तमीव्रतं भविष्योक्तम्। "सर्वविधा प्रिययुक्ता शुचिरन्नभोजना सती। सोपवासा तृतीयायां लवणं परिवर्जयेत्"। सोपवासेति व्रतारम्भे द्वितीयायां कृतोपवासा तृतीयायां लवणं परिवर्जयेत् "सा संप्रीता वै भक्त्या व्रतमाभरणान्वितम्। गौरी ददाति सन्तुष्टा रूपसौभाग्यमेव च। लावण्यलवणं हृद्यं स्त्रीणां पुंसां मनोऽनुगम्। पतिं मनोरमं नारी भर्ता भार्यां मनोरमाम्। गौरीव्रतेन लभते राजन्! लवणवर्जनात्"

कल्पविनायकचतुर्थीव्रतं वराहपु० "अथ विघ्नहरं राजन्! कथयामि तवानघ!। येन सम्यक् कृतेनेह न विघ्नमुपजायते। चतुर्थ्यां फाल्गुने मासि यक्षीतव्यं व्रतान्वितम्। नक्ताहारेण राजेन्द्र! तिलान्नं पारणं व्रतम्"। पारणं नक्तभोजनम् "तदैव शुक्लौ क्षोतव्यं ब्राह्मणाय च तद्भवेत्। चतुर्भिस्तण्डुलैश्चैव कलशं पञ्चमे तथा। सौवर्णं राजतं वापि कृत्वा विप्राय दापयेत्"।

कल्पवियोगतृतीयाव्रतं कालिकापु० उक्तम्। "अथैकाग्रमतं स्त्रीणामवियोगव्रतन्त्विदम्। मार्गशीर्षे सिते पक्षे स्नाता शुक्लाम्बरान्विता। ब्रह्मा चन्द्रं द्वितीयायां नक्तं भुञ्जीत पायसम्। आचम्य च शुचिर्भूत्वा दत्त्वाक्षतकुशरत्नमेव। सदान्विता समक्षस्य विप्राय परमेश्वरम्"।

कवियोगसप्तमीव्रतं भविष्यपु० "शुक्ले भाद्रपदे मासि द्वादश्यां समुपोषितः। स्नात्वा जलाशये रम्ये शुक्लाम्बरधरः शुचिः। जलान्ते कलशं कृत्वा गोमयेनानिशोभनम्। गोधूमचूर्णकृताश्चे सवत्सां कमलार्चनम्। लेखयित्वा पटे गौरीं सावित्रीं ब्रह्मणा सह। राज्ञा (चन्द्रेण) सह रविं राजंस्त्रैलोक्योद्द्योतकारकम्। गन्धपुष्पैस्तथा धूपैर्नैवेद्यैर्भक्तितोऽर्चयेत्। कवियोगव्रतं पार्थ! कन्येयानेन तत्कृतः। कवियोगाद् दृढमना शिरस्याधाय केशवम्"।

कल्याणसप्तमीव्रतं भविष्यपु० "शुक्लपक्षे तु सप्तम्यां माघे भाद्रपदेऽथवा! प्रणम्य शिरसा देवं पूजयेत् सप्तपुष्पकम्। इक्षुपूपादिभिर्वीर! कृतपानाच तर्पणैः।

पायसादिभिराचामेत्कुर्वन्निवेदयेत्तथा। विप्राय दक्षिणां दत्त्वा नक्तं भुञ्जीत वाग्यतः। तिष्ठन् ब्रुवन् प्रक्षिपंश्च सुतप्रस्खलनादिषु। आदित्यनामस्मरणं कुर्याद्द्वादशाक्षरं तथा। अनेनैव विधानेन मासान् द्वादश वै क्रमात्। उपोष्य पारणे पूर्वं समभ्यर्च्य जगद्गुरुम्। पुण्येन अवधेनेह प्रथमेतं पुष्टिमाप्नुयात्। एवं यः पुरुषः कुर्यादादित्याराधनं शुचिः। नारी वा स्वर्गमभ्येत्य मानव्यं फलमश्नुते"। शुक्लपक्षे समभ्यर्च्य पुष्पधूपादिभिः शुचिः। आश्वयुजे मासि सम्प्राप्ते देवायं सम्प्रवाच्यम्। प्राप्येह विपुलं देवं धर्मानन्तरमक्षयम्। अमुत्र लोकमायाति दिव्यं खगपतेः शुभम्"। इत्यादि

कृच्छ्रैकभक्तद्वितीयाव्रतं भविष्यपु० "चातुर्मास्ये भवेद्राजन्! वर्षायां व्रतमुत्तमम्। श्रावणस्य द्वितीयायां कृष्णपक्षे नराधिप!। श्रावणादिकार्त्तिकान्तं कुर्यात्तत् व्रतमुत्तमम्। पुष्पं धूपञ्च नैवेद्यं दीपमान्नं विशेषतः"। "ततो भाद्रपदे मासे यवदानं ददाति च। ततश्चाश्विद्वितीयायां शय्यादानं विशेषतः। न तस्य सूनुं शयनमुत्सो न भवेच्चरः। ततश्च कार्त्तिके मासि द्वितीयायां नराधिप!। शर्करालवणक्षाद्यानि दधिक्षीरघृतानि च। उपस्करं भगवते दद्यात् सर्वं प्रयत्नतः" इत्यादि।

अशोकत्रिरात्रव्रतं भविष्योत्तरोक्तम्। "तच्छृणु त्वमशोकाख्यं त्रिरात्रव्रतमुत्तमम्। माघे मार्गशिरे चैव ज्येष्ठे भाद्रपदे तथा। शुक्लपक्षे पञ्चदशग्रामेकभक्तन्तु कारयेत्। ततः प्रातःस्नात्वाय स्नानं कुर्यात् ततो व्रती"।

अशोकपूर्णिमाव्रतं विष्णुधर्मोत्तरोक्तम्। "अशोकपूर्णिमामेतां शृणुष्व गदतो मम। उपोष्यैतां नरः शोकं नाप्नोति स्त्री तथापि वा। फाल्गुनामलपक्षस्य पौर्णमास्यां नृपोत्तम!। स्नात्वालेन नरः स्नात्वा दत्त्वा शिरसि वै ह्रदम्। स्नपनाधनं ततः कृत्वा कृत्वा च स्वस्तिवाचनं सदा। पुष्पैर्गन्धैः समभ्यर्च्य भूधरं नाम नामतः। धरणीञ्च तथा देवीमशोकेति च कीर्त्तयेत्। यथा विशोका धरणिः कृतकृत्या जनार्दनात्। तथा मां सर्वशोकेभ्यो मोचयाशेषधारिणि!"।

अशोकप्रतिपद्व्रतं भविष्योत्तरोक्तम् "चैत्रशुक्लपक्षस्य प्रथमेऽह्नि दिनोदये। अशोकं पूजयेत् तत्र प्रह्वैश्च शुभपल्लवम्। प्रह्वैः सप्तधान्यैश्च सुखैर्मोदकैः शुभैः। फलैः कालोद्भवैर्दिव्यैर्नारिकेलैः सदाडिमैः। धूपदीपादिना तत्र पूजयेत्तरुत्तमम्। अशोकं पाण्डवश्रेष्ठ! शोकं नाप्नोति कुत्रचित्। पिबन्त्यातृप्तिमद्भ्यश्च सुत आमातृकां तथा"।

अशोकाष्टमीव्रतं विष्णुपुराणोक्तम् "अशोककलिकाश्चाष्टौ ये पिबन्ति पुनर्वसौ। चैत्रे मासि तथाष्टम्यां न ते शोकमवाप्नुयुः"। अत्र पुनर्वसुयोगः प्राशस्त्यार्थः। कूर्मपुराणेऽपि "अशोकाष्टकलिका मन्त्रेणोक्तेन भक्षयेत्। शोकं नैवाप्नुयान्नार्त्यो रूपवानपि जायते"। "शुक्लाष्टम्यां तु संप्राप्ते मासि भाद्रपदे तथा। दूर्वामतानं श्वेतसूत्रराशाभिगामिनम्। पूजयेद्दृष्टदृमानीय गन्धमाल्यानुलेपनैः। फलमूलैस्तथा चैव दीपं धूपैर्विसर्जयेत्। चन्द्रिपक्वं तथा सर्वं निवेद्य च कथञ्चन। भोक्तव्यञ्च तथा ब्रह्मन्! वह्निपक्वविवर्जितम्। दूर्वाङ्कुरस्थां सम्पूज्य विधिना यौवने प्रियम्। यौवनं स्थिरमाप्नोति यत्र यत्राभिजायते। अष्टमीषु च सर्वासु पूजनीयाश्चोकिका। गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा। तत्क्षिप्तहनि या भुङ्क्ते नक्तमिन्दुविवर्जिते। भवत्यथो विशोका सा यत्र यत्राभिजायते। अष्टमीषु च सर्वासु नचेच्छृणोति वै सने। प्रोष्यपद्यामतीतायां या स्यात् कृष्णाष्टमी द्विज!। तस्मात्सर्वं कर्त्तव्यं देवीं पूज्य यथाविधि"। इदं व्रतान्तरम्।

अहिंसाव्रतं पद्मपु० "वर्जयित्वा पुमान्मांसमश्नन्नो गोप्रदो भवेत्। तद्वर्षमेकं दत्त्वा गोऽश्वमेधफलं लभेत्। अहिंसाव्रतमित्युक्तं कल्पान्ते भूपतिर्भवेत्"।

आग्नेयव्रतं भविष्योत्तरोक्तम्। "सङ्क्रान्त्यां भक्तेन पूजयेद्वह्निवासिनीम्। पुष्पैर्धूपैस्तथा दीपैर्नैवेद्यैर्विविधैरपि। पूजयित्वा ततो विद्वान् पञ्चरं सकलंयुतम्। हेमं विप्राय दद्याद्यः स वाग्मी जायते नरः। सङ्क्रान्तेन भक्तेन अग्निलोकप्रदायकम्"।

आग्नासंक्रान्तिव्रतं स्कन्दपु० "सङ्क्रान्तिदिवसे पुण्ये प्रारभेद्व्रियमं व्रते.। पद्ममष्टदलं कृत्वा कुङ्कुमेन तु भास्करम्। पूजयेन्नक्तभक्षार्थं विधिवद् गुरुसन्निधौ। आग्ना तेजस्करी वत्ते प्रभादीप्तियशस्करी। आग्नां सर्वगां देव! मम देहि नमोऽस्तु ते। पूज्यैवं कुङ्कुमेनाथ दद्याद्द्विप्राय भोजनम्। उद्यापने तु चत्वारिंशत् सौवर्णं सरथं तथा। एकचक्रञ्च सप्ताश्वमरुणेन समन्वितम्। यः कुर्याद्विधिनानेन आग्नासंक्रान्तिव्रतमाम्। अयाग्नाऽस्खलिता लोके स्त्री तत्तस्य जायते"।

आदित्यव्रतं भविष्यपुराणोक्तम् "योऽब्दमेकं नक्तमीत नक्तं

हि महिने नरः। ब्रह्मचारी जितक्रोधो मद्भार्चनपरः खग!। संवत्सरान्तमासाद्य मद्भक्तांश्च द्विजोत्तमान्। भोजयित्वा व्रती ब्रूयात् प्रीयतां मे दिवाकरः। यच्च भक्तिसमायुक्तो मम लोकं स गच्छति। स च भानुव्रतं लोकं ध्रुवं सम्प्राप्नुयाच्चरः। ये त्वादित्यदिने प्राप्ते श्राद्धं कुर्वन्ति मानवाः। सप्तजन्मानि ते प्राप्ताः सम्भवन्ति विरोगताम्। वैराग्यमिह वै प्राप्य मम लोकं व्रजन्ति ते। उपवासन्तु कुर्वन्ति ये त्वादित्यव्रते सदा। जपन्ति त महाश्वेतामीप्सितं लभते फलम्। विशेषादादित्यदिने जपमानो गणाधिपान्। षड्क्षरं महाश्वेतं जपन् वैरोचनं पदम्"।

आदित्यशयनव्रतं आदित्यपु० "आदित्यशयनं नाम यथावच्छृणुरार्चनम्। येषु नक्षत्रयोगोऽत्र पुराणज्ञाः प्रचक्षते। यदा हस्तेन सप्तम्यामादित्यस्य दिनं भवेत्। सूर्यस्य वाथ संक्रान्तौ सा तिथिः सर्वकामिकी। उमामहेश्वरस्यार्चां पूजयेत् सूर्यनामभिः। सूर्यार्चां शिवविष्णुञ्च उभयं पूजयेत्ततः। उमापते रवेर्वापि न भेदः क्वचिदिष्यते। यस्मात् तस्मात्वमप्येव! सदा शम्भुं समर्चयेत्" इत्यादि।

आदित्यनन्दाव्रतं भविष्यपु० "द्वादश्यां हस्तभे वारो आदित्यस्य महात्मनः। नन्दो भद्रसुता सौम्यः कामदः पुत्रदस्तथा। जयो जयन्तो विजय आदित्यानामुपास्थितः। हृदयो रोगहा चैव महारोगविनाशनम्। मालतीकुसुमानीह श्वेतचन्दनसत्तमम्। धूपं गुग्गुलुखण्डेन नैवेद्यं पूपमेव तु। दत्त्वा पूपांस्तु विप्राय ततो भुञ्जीत वाग्यतः"।

आनन्दव्रतं मत्स्यपु० "चैत्रादिचतुरो मासान् जले कुर्यादर्चयेत्। व्रतान्ते सर्पिकन्दाज्यवस्त्रसमन्वितम्। तिलपात्रं हिरण्यञ्च ब्रह्मलोके महीयते। कल्पान्ते भूपतिर्भूत्वा आनन्दव्रतमुच्यते"।

आनन्दपञ्चमीव्रतं भविष्यपु० "पञ्चमी, दयिता राजन्! नागानां नन्दवर्द्धनी। पञ्चम्याः किल नागानां भवतीत्युत्सवो महान्। वासुकिस्तक्षकश्चैव कालियो मणिभद्रकः। धृतराष्ट्रश्चैरावतः कर्कोटकधनञ्जयौ। एते प्रयच्छन्त्यभयं प्राणिनां प्राणदाः सदा। पञ्चम्यां श्रावणस्यान्ते नागान् क्षीरेण ये नराः। तेषां कुले प्रयच्छन्ति सभयं प्राणदक्षिणाम्"।

आनन्दानवमीव्रतं भविष्यपु० "आनन्दा नन्दिनी नन्दा महानन्दा महीयते!। तथाद्या नवमी पुण्या पञ्चमी महती स्मृता। फाल्गुनामलपक्षस्य नवमी या महोत्तमे!। आनन्दा सा महापुण्या सर्वपापहरा शुभा। कृत्वैकभक्तं पक्षस्यां षष्ठ्यामक्तं तथा नृप!। अयाचितन्तु सप्तम्यामुपवासः परेऽहनि। य एवं पूजयेद्भक्त्या नवम्यां विधिवन्नृप!। सोपवासोऽर्चयेद् देवीं धूपं दद्यात् तथागुरुम्। मासैश्चतुर्भिरादीयं द्वितीयं पारणं शृणु"। आदीयम् आद्यम् "भोजयेद् विप्रकन्याश्च नवम्यां त्रीन् क्षत्रियः। मासि मासि महाबाहो! यथा शक्त्या यथाविधि। आषाढे श्रावणे मासि मासि भाद्रपदे तथा। तथाश्वयुजे मासि पुण्या भगवती विभो!। कृत्वैकभक्तं पक्षस्यां षष्ठ्यां नक्तं तथा नृप!। अयाचितं तु सप्तम्यामुपवासः परेऽहनि। सोपवासो नवम्यां तु पूजयेद्विधिवच्छिवाम्। सोऽश्वमेधफलं प्राप्य विष्णुलोके महीयते"।

आयुधव्रतं विष्णुधर्मोत्तरोक्तम्। "दृढमन्यत् प्रवक्ष्यामि चतुर्मूर्त्तिव्रतन्नव। शङ्खचक्रगदापद्मचतुरात्मा प्रकीर्त्तितः। वासुदेवः स्मृतः शङ्खः चक्रं सङ्कर्षणस्तथा। प्रद्युम्नश्च गदा पद्ममनिरुद्धो जगद्गुरुः। श्रावणादिषु मासेषु वह्निःस्नातस्तु नक्तभुक्। तेषान्तु पूजनं कुर्यात् प्रतिमासमनुक्रमात्। गन्धमाल्यानमस्कारदीपधूपान्नसम्पदा। ततस्तु कार्त्तिकस्यान्ते समाप्ते तु तथा व्रते। ब्राह्मणान् भोजयेद्भक्त्या दद्याच्छक्त्या च दक्षिणाम्। कांस्यपात्रञ्च सदृतं सवृषं तथैव च। कृत्वा व्रतं मासचतुष्टयन्तु प्राप्नोति लोकं त्रिदशेश्वरस्य। मानुष्यमासाद्य तथैव पश्चात् चक्रेश्वरो भवतीह वीरः"।

आरोग्यव्रतं विष्णुधर्मोत्तरोक्तम्। "प्रोष्ठपद्यामतीतायां प्रतिपत्प्रभृति क्रमात्। यावच्च दिवाऽऽद्यायामनिरुद्धं प्रपूजयेत्। पूर्वोक्तेन विधानेन यावदाश्वयुजी भवेत्"। पूर्वोक्तेन रूपावाप्तिव्रतोक्तेन "सारसैरर्चयेद् देवं जातोपुष्यदिने दिने"। सारसैः कमलैः "एतेन जुहुयाद् वह्निं हुतं दद्याद् द्विजातये। भोजनं गोरसयुतं तथा विप्रांश्च भोजयेत्। त्रिरात्रोपोषितः सम्यगाश्वयुज्यान्ततो नरः"। अपरं वराहपु० "अथापरं महाराज व्रतमारोग्यसंज्ञितम्। कथयामि परं पुण्यं सर्वपापप्रणाशनम्। तथैव माघमासस्य सप्तम्यां सुसमाहितः। पूजयेद्भास्करं देवं विष्णुरूपं सनातनम्। आदित्य! भास्कर! रवे! भानो! सूर्य! दिवाकर!। प्रभाकरेति संपूज्यो देवः सर्वेश्वरो विभुः। षष्ठ्यां चैव हुताशनः सप्तम्यामुपवासकृत्। अष्टम्यान्तु भुञ्जीत एष एव विधिः क्रमः। अनेन मन्त्रवरं

पूर्णं विधिना योऽर्चयेद्धरिम्। तस्यारोग्यं धनं धान्यमिह जन्मनि जायते। परत्र च सुखं स्थानं गत्वा न निवर्त्तते"।

आरोग्यदशमीव्रतं गरुडपु० "व्रतमेतन्महाबाहो! कार्य्यमारोग्यमिच्छता। सर्वकार्य्येष्वेतद्धि विपश्चिता जीवितं चिरम्। उपवासश्च कर्त्तव्यो नवम्यामिह भक्तितः। दशम्यां तु कृतस्नानो मङ्गलायतनं हरिम्। देवमिन्दिरया सार्द्धं ध्यात्वा च जगतां पतिम्। शङ्खचक्रगदापद्मगार्ङ्गश्रीवत्सलक्षणम्"। इन्दिरया लक्ष्म्या "कलैर्धूपैश्च पुष्पैश्च पायसेन समर्चयेत्"।

आयुर्व्रतं गरुडपु० "अतस्तच्चान्निजननमायुःप्रदमनाकुलम्। सर्वमोक्षप्रदं भद्रं तादृगव्रतमिहोच्यते। चतुर्दश्यां शुचिः स्नात्वा दन्तधावनपूर्वकम्। पौर्णमास्यान्तथा कृत्वा देवपूजां समाचरेत्। मण्डलं चतुरस्रन्तु कारयेत् कृतमाल्यतैः। तस्मिन् श्रीशं श्रियं देवीमर्चयेत् सुसमाहितः"।

आयुःसंक्रान्तिव्रतं स्कन्दपु० "अथान्यां सम्प्रवक्ष्यामि आयुःसंक्रान्तिसत्तमाम्। संक्रान्तिदिवसे पूज्य पूर्वेद्युश्च दिवाकरम्। कांस्यं क्षीरव्रतं दद्यात् सक्षिरण्यं सदक्षिणः। मन्त्र एव पृथग्दाने पूजा सैव प्रकीर्त्तिता। सघृतं सुरभोज्यं तत् पीयूषसमरूपकम्। आयुरारोग्यमैश्वर्य्यं मम देहि द्विजार्पितम्। अनेन विधिना सम्यक् सर्वं दद्यादतन्द्रितः"।

आदित्यव्रतं स्कन्दपु० "माघमास्यसिते प्राप्य यदादित्यदिनं भवेत्। तदा व्रतमिदं प्राह्य नरैस्त्रीभिर्विशेषतः। यावत् संवत्सरं तावद्विधिनानेन पुत्रक!। सोमयेन चितौ कृत्वा मण्डलं वर्त्तुलं पुनः। रक्तपुष्पैरक्षतादौरर्घ्यं तत्र प्रदापयेत्। यथाशा विमलाः सर्वाः सूर्य्य! भास्करभानुभिः। तथाशां सफलां मह्यं कुरु नित्यं मयार्चितः। एवं यः कुरुते सम्यक् व्रतमेतदनुत्तमम्। आदित्येति विख्यातं तस्य पुण्यफलं महत्। इत्यादि

आश्वयुजव्रतं विष्णुधर्मोत्तरोक्तम्। "एतमन्वत प्रवक्ष्यामि चतुर्मूर्त्तिव्रतं तदा। चैत्रस्यामलपक्षे तु सोपवासो जितेन्द्रियः। चतुर्ष्वंशे वासुदेवञ्च कृत्वा संपूजनं शुभम्। काञ्चनं दक्षिणां दद्यात् द्विजाय ब्रह्मचारिणे। तथा सङ्कर्षणं देवं पूजयित्वा जगद्गुरुम्"।

आषाढव्रतानि महाभारते "आषाढमेकभक्तेन स्थित्वा मासमतन्द्रितः। बहुधान्यो बहुधनो बहुपुत्रश्च जायते। आषाढमेकभक्तेन पूजयेद्विष्णुतत्परः"।

इन्दूपोषमाषाव्रतं भविष्योत्तरोक्तम्। "त्रिंशत्संपूज्य दम्पत्या-न्युपवासी विभूषणैः। सोमलोकमवाप्नोति सोमसिद्धः व्रतादिह"।

ईशानव्रतं कालिकापु० "अथोपोष्य चतुर्दश्यां गुरोर्दिने। पूजयेद्विधिनानेन सिद्धं सर्वं निबोध मे। ब्रह्मणः पश्चिमे भागे वामे विष्णुश्च दक्षिणे। रौद्रमीशं प्राग्दिशि स्थितम्"। खण्डोलकमर्धम्

ईश्वरव्रतं भविष्यपु० "ईश्वरञ्च चतुर्दश्यां सर्वैश्वर्यसमन्वितः। बहुपुत्रो बहुधनस्तथा आयाति संशयः। सूक्ष्मन्यासमंत्राभिरङ्गमन्त्राश्च कीर्तिताः। पूर्ववत्पञ्चपत्रस्थः कर्त्तव्यश्च तिथीश्वरः। गन्धपुष्पोपहारैश्च यथाशक्ति विधीयते। पूजाऽनया शान्त्या कृतापि तु फलप्रदा। आज्याराशमिद्धिय दधिक्षीरान्नमाचिकैः। पूर्णाहुतिसहस्रं तु होमः कृतः शान्तेन चेतसा"। एतद्व्रतं ईशानेश्वर प्रतिपद्व्रतवद्व्राह्यम्"।

उदकसप्तमीव्रतं भविष्यपु० "उदकपात्रं दत्वा क्रियते या तु सप्तमी। सा ज्ञेया सुखदा घोर! सदोदकसप्तमी"।

उभयदादशीव्रतं भविष्योत्तरोक्तम्। "अथ व्रतानां सर्वेषामुभयद्वादशीव्रतम्। तत्तेऽहं संप्रवक्ष्यामि समाहितमनाः शृणु!। ततोऽपराह्णे मन्त्रज्ञं कृतसन्ध्यादिकः शुचिः। प्राप्यात्तां वेदविदुषः पुराणज्ञात् जितेन्द्रियात्। संपूज्य देवदेवेशन्दन्तधावनपूर्वकम्। कृत्वाऽऽ नियमं पार्थ गुरुदेवाग्निसन्निधौ। एकादश्यां निराहारः स्थित्वाऽऽ मध्यपरेऽहनि। भीक्ष्यामि पुण्डरीकाक्ष! शरणं मे भवाच्युत!। इत्युक्त्वा च गुरुं नत्वा पूजयित्वा जनार्दनम्। मूर्ध्नो क्षपेज्जितक्रोधः शब्दादिविषयो ऽऽदरः। अनेन विधिना यावत् तिष्ठेत् कृष्णासुपोषयेत्। द्वादशीं पुरुषव्याघ्र! ध्यायन् सङ्कर्षणं विभुम्। प्राश्यसूर्यं ततः कृत्वा ब्राह्मणाय निवेदयेत्"। इदञ्च व्रतं मासयोर्द्वादशीत्रिकालत्वाद्द्वादशमाससाध्यं तच्च उभयपक्षयोः कार्य्यम्।

उभयनक्तव्रतं भविष्यपु० "योऽष्टम्येकं प्रकुर्वीत नवम्यां नक्तमादरात्। इह भोगानवाप्यान्ते परत्र च दिवं व्रजेत्। पौषे मासे च सप्तम्यां यः कुर्यान्नक्तभोजनम्। जितेन्द्रियः सत्यवादी क्षमक्रोधविवर्जितः। पञ्चयामे-वर्षी वह्नादुपवासेन पापवेत्"। इदं व्रतं वर्षसाध्यम्।

उभयसप्तमीव्रतं भविष्यपु० "पौषे मासे च सप्तम्यां यः कुर्यान्नक्तभोजनम्। जितेन्द्रियः सत्यवादी क्षान्तो सोमूत्रगोरसैः। पञ्चयोः सप्तमीं वह्नादुपवासेन यो नयेत्।

सिसन्यासमन्वेद्वादं शाण्डिल्येवच्च शृणुत !"। तदवधिधर्म-साध्यम्। व्रतान्तरं विष्णुधर्मोत्तरोक्तम् "अनेनैव विधानेन प्रतिमासन्तु यो नरः। सप्तमीहितवं कुर्याद्यावत् संवत्सरं रवेः। सोऽश्वमेधमवाप्नोति सूर्यलोकं च गच्छति। कुलसप्तधरते राजन् ! सर्वान् कामानुपाश्नुते"। उमामाहेश्वरतृतीयाव्रतं भविष्योत्तरोक्तम्। "लोके ख्यातं पार्वत्या उमामाहेश्वरव्रतम्। समाख्यातं पुरा मार्ग ! नाद्यापि प्रथितं भुवि। मार्गशीर्षे सिते पक्षे तृतीयायां समाहिता। कृतोपवासा राजेन्द्र ! सर्वभोगविवर्जिता। संवेद्य श्वेतवस्त्रेण शिवं रक्तेन चाम्बिकाम्। पञ्चाङ्गं दक्षेद्वारो भक्तिभावेन भाविता। भोजयेच्छिवभक्तांश्च ब्रह्मणान् वेदपारगान्। भक्तेभ्यो दक्षिणां दद्याद्भक्त्या शास्त्रविनाकृताम्"। कृतोपवासा सङ्कल्पितोपवासा "हैमीमुमां रजतपिण्डमयं महेशम् रौप्ये शुक्लपक्षभवे वसुपस्थितौ तौ। संपूज्य रक्तसित-रक्तदुगोपगूढौ नारी भवत्यविधवा सुतसौख्ययुक्ता। पौर्णमासाममावासां चतुर्दश्याष्टमीषु च। नक्तमश्नन्तु कुर्वीत हविष्यैर्ब्रह्मचारिणी। उमामहेशप्रतिमां हेम्ना कृत्वा सुशोभनाम्। राजतीं वापि कर्षार्द्धं स्थापयित्वा घृतादिभिः। गन्धपुष्पैरलङ्कृत्य वस्त्रयुग्मैश्च शोभनैः। भक्ष्यभोज्यैरशेषैश्च वितानध्वजचामरैः। भोजयेच्छिवभक्तांश्च दीनानाथान् प्रतर्पयेत्"। व्रतान्तरं शिवधर्मोत्तरोक्तम्। "ऋतुस्नाता चतुर्दश्यां नियतब्रह्मचारिणी। वर्षमेकं न भुञ्जीत महीभोगविभोगया। वर्षान्ते प्रतिमां कृत्वा पूर्ववद्विधिमाचरेत्। स्नानार्घ्यैर्वस्त्रयुग्मं प्राप्य पूर्वोक्तांस्तु गुणान् लभेत्"। कृताप्युमामहेश्वर प्रतिमा कर्त्तव्या। पूर्ववदिति पूर्वव्रतोक्तवदित्यर्थः। देवीपु०व्रतान्तरं "यदीच्छसि शुभस्तोरमिह जन्मन्यथापरे। कन्या कुमारीस्तृपते ! विष्णुना कथितं व्रतम्। सर्वपापहरं पुण्यं सर्वकामफलप्रदम्। उमामहेश्वरं नाम कर्त्तव्यं विधिना यथा। प्रोष्ठपदे तथा मासे शुक्ले भाग्ये १२ऽथ वा शुने !। मैत्रे १७शाके १८ऽथ वा कार्यमष्टम्याञ्च शाङ्करे ६। व्रतान्तरं भविष्योक्तम्। "उमामाहेश्वरं नाम यो च स्त्री कुरुते व्रतम्" इत्युपक्रमे "उमामाहेश्वरौ कार्यौ प्रतिमा काञ्चनोद्भवा। त्रिरात्रं तदहश्च कर्मस्नापि त्रिनक्त च। भूम्यादीनं न कर्त्तव्यं सर्वथा फलकाम्यया। स्थापयेत् श्वेतवस्त्राढ्ये राजते हृदये शुभे। व्याघ्राजिने सुविशीर्षे संस्थाप्याभ्यर्च्य यत्नतः। सोपवासा च कुर्यान्तु चतुर्दश्यां समाहिता। चैवं साङ्गुरुकं होमं सौख्यं होमञ्च यत्नतः। प्राप्ते प्रभातसमये स्नात्वा संपूज्य पूर्ववत्। आहूय वेदविदांश्च ब्राह्मणं पूजयेन्मतिः !। अर्चयेत् प्रतिमां शम्भोः कर्मदोषापशान्तये। वाक्येन ब्राह्मणं तोष्य ततः पारणमाचरेत्"।

उल्कानवमीव्रतं भविष्योत्तरोक्तम्। "उल्काख्या नवमी राजन् ! कथयामि निबोध ताम्। या कार्त्तिकेन कथिता तारकस्यार्त्तिनाशिनी। आश्वयुक्शुक्लपक्षे या नवमी लोकविश्रुता। नद्यां स्नात्वा समभ्यर्च्य पितृदेवान् यथाविधि। पश्चात् संपूजयेद्देवीं चामुण्डां भैरवप्रियाम्। पुष्पैर्धूपैः सनैवेद्यैः सांसमत्स्यसुरासवैः। पूजयित्वा सदा कुर्यान्नन्त्रेणानेन मानवः"। कौरपु०"वरेण येन देवेन्द्र ! प्रसीदत्यायु पार्वती। तद्गृहाण नवमीकल्पं ग्रहण ! सर्वफलप्रदम्। तस्यां नवम्यां सर्वाणी महिषादीन् महासुरान्। जघान समरे शत्रून् तेन सा नवमी प्रिया। आश्वयुक्शुक्लस्य नवम्यां प्रयतात्मवान्। स्नात्वाभ्यर्च्य पितॄन् देवान् मनुष्यांश्च यथाक्रमम्। जपेत् पश्चान्महादेवीं महिषासुरघातिनीम्। पुष्पैर्धूपैः सनैवेद्यैः पयोदधिफलादिभिः। भक्त्या संपूजयित्वैवं देवीं सम्यगथेत्ततः"।

ऋतुव्रतं विष्णुधर्मोत्तरोक्तम्। "अथातः संप्रवक्ष्यामि सर्वमूर्त्तेरर्चनं परम्। वसन्ते पूजयेद्विष्णुं हौ मासौ सुनिशुक्लपक्षे ! फलैः पुष्पैः कषायैस्तु ग्रीष्मे पञ्चैव पूजयेत्। मधुरेण महाराज ! प्रावृट्काले ऋतुं यजेत्। अनेन पूजयेद्विष्णुं शरदं लवणेन च। कटुकेन च हेमन्तं तिक्तेन शिशिरं तथा। नक्ताशनक्षमा तिष्ठेत् पक्षकं वर्षमेवं हि सर्वम्। ब्राह्मणान् भोजयेच्चापि प्रभूतवसनादिभिः। संवत्सरमिदं कृत्वा व्रतं परमपावनम्। अश्वमेधमवाप्नोति राजसूयञ्च विन्दति। चैत्रे समारभ्य सिते तु पक्षे संपूजयेद्यस्तु हृषीकमेवम्। कृतोपवासः स नरो यथोक्तं लभेत् फलं शाश्वतमेव शीघ्रम्"।

ऋषिपञ्चमीव्रतं ब्रह्माण्डपु० "शृणु राजन् ! प्रवक्ष्यामि व्रतानामुत्तमं व्रतम्। ऋषिपञ्चमीति विख्यातं सर्वपापहरं परम्। नभसे शुक्लपक्षे तु यदा भवति पञ्चमी। तद्यादिषु तदा स्नानं कृत्वा नियममेव च। विधाय नित्यकर्मादि गत्वा द्वारवतीमधीम्। स्नापयेद्विधिवद्भक्त्या पञ्चामृतवरैः शुभैः"। द्वारवतीं, अग्निहोत्रशालां धूमनिर्गमद्वारैर्बहुभिर्युक्तत्वात्"। ऋषयोऽत्र सप्तर्षयः।

एकभक्तव्रतं विष्णुधर्मोक्तम् । "चैत्रं विष्णुपरो मासमेकभक्तेन यः क्षिपेत् । सुवर्णमक्षिसुक्ताढ्यं गार्हस्थ्यं समवाप्नुयात् । अहिंसुः सर्वभूतेषु वासुदेवपरायणः । नमोऽस्तु वासुदेवायेत्यष्टशतं जपेत् । अतिरात्रस्य यज्ञस्य ततः फलमवाप्नुयात् । यस्तु संवत्सरं पूर्णमेकभक्तो भवेन्नरः । अहिंसः सर्वभूतेषु वासुदेवपरायणः । नमोऽस्तु वासुदेवायेत्यष्टशतं जपेत् । पौण्डरीकस्य यज्ञस्य ततः फलमाप्नुयात् । दश वर्षसहस्राणि स्वर्गलोके महीयते । ततश्चयादिह चागत्य मानुष्यं प्रतिपद्यते" ।

ऐश्वर्यतृतीयाव्रतं विष्णुधर्मोक्तम् । "तृतीयायां तथाभ्यर्च्य ब्रह्मविष्णुमहेश्वरान् । पृथक् पृथक् नाममन्त्रैर्नैवेद्यादि निवेदयेत् । त्रीन् लोकांश्च तदा नाम सम्यक् संपूजयेन्नरः । ऐश्वर्यं महदाप्नोति गतिमग्र्यां च विन्दति" ।

कदलीव्रतं भविष्योत्तरोक्तम् । "शुक्ले पक्षे चतुर्दश्यां माघे भाद्रपदे नृप ! । देयमर्घ्यं वरस्त्रीभिः फलैर्नानाविधैस्तथा । विल्वैः सप्तधान्यैश्च दीपालङ्कृतचन्दनैः । दधिदूर्वाक्षतैर्वस्त्रैर्नैवेद्यैस्तपाचितैः । जातीफलैः पूगफलैर्लवङ्गकदलीफलैः । तत्सिद्धदिने दातव्यं स्त्रीभीरभ्याभिरभ्यलम् । मन्त्रोऽनेन चैवार्घ्यं तच्छृणुष्व नराधिप ! । चित्तस्था कदली नित्यं कदली कामदायिनी । अरीरारोग्यमायुष्यं देहि देवि ! नमोऽस्तु ते" ।

कन्दुचतुर्थीव्रतं देवीपु० "माघमासे तु सम्प्राप्ते चतुर्थी कन्दुसंयुता । सोपोष्या तु वरश्रेष्ठ ! ततो राज्यं भविष्यति । सर्वोपचारसम्पन्नं सर्वोपस्करमाहरेत् । कन्दुपक्वं फलं शाकं लवणं गुडघृतौ वरा । अष्टौ कुसुम्भरीलोरं धान्यानि विविधानि च । दातव्यानि रघुश्रेष्ठ ! कन्यकानान्तु भक्तितः" ।

कपिलाषष्ठीव्रतं स्कन्दपु० "प्रौष्ठपदोऽसिते पक्षे षष्ठी भौमेन संयुता । व्यतीपातेन रोहिण्या सा षष्ठी कपिला स्मृता" । प्रौष्ठपदो, भाद्रपदश्च न चात्र दर्शान्तोपाङ्गः, रोहिणीयोगश्च तत्रैव सम्भवात् ।

"द्वितीया (अन्या) तु षष्ठ्यादुष्या दुर्लभा वृतिनः क्वचित् । षष्ठी संवत्सरस्यान्ते सा पुनस्तेन संयुता । चैत्रवैशाखयोर्मध्ये सिते पक्षे शुभोदया । वैशाखेऽपि च राजेन्द्र ! द्वारवत्यां परा स्मृता । यदि दृश्ये सहस्रांशुस्तदा कार्यं व्रतं बुधैः । यच्चां चैव श्रुतं दत्तं यत्किञ्चित् प्रतिपादितम् । तस्य सर्वस्य पुण्यस्य संख्यां वक्तुं न शक्यते । यस्मिन् काले भवेदेतैर्युतैः षष्ठी युता तदा । पञ्चम्यामेकभक्तन्तु कृत्वोत्तम विचक्षणः । षष्ठ्यां प्रातः समुत्थाय कृत्वादौ दन्तधावनम्" इत्यादि ।

करणव्रतं ब्रह्माण्डपु० "शृणु राजन् ! प्रवक्ष्यामि करणव्रतमुत्तमम् । बवाख्यं बालवञ्चैव कौलवन्तैतिलक्षुरम् । वणिजं विष्टिरित्याहुः करणानि पुराविदः । माघमासे तु सम्प्राप्ते शुक्लपक्षे यदा भवेत् । बवाभिधानकरणमुपवासस्तदा भवेत् । एवं सप्त विधेयानि बवाख्यान्यथ सप्तमे । बवे तु करणे प्राप्ते पूर्वं पूर्वं समाचरेत् । ब्राह्मणान् भोजयेच्चात्र सप्तसंख्यान् सदक्षिणम् । अथैवं बालवादीनि विज्ञातानि यथाक्रमम् । क्षपित्वा सप्त सप्तैव पूर्वोक्तविधिना नृप ! । समाप्येदृव्रतं भूरिगोभूहेमादिदानतः । एवंकृते व्रते राजन् ! राजसूयाश्वमेधयोः । समस्तं फलमाप्नोति सुखं कीर्तिं महाश्रियम्" ।

कमलसप्तमीव्रतं पद्मपु० "अतःपरं प्रवक्ष्यामि व्रतं कमलसप्तमीम् । यस्य संकीर्तनादेव तुष्यतीह दिवाकरः । वसन्तामलसप्तम्यां स्नातः सन् गौरसर्षपैः । तिलपात्रे तु सौवर्णं निधाय कमले रविम् । वस्त्रोपवीताभरणगन्धपुष्पैरथार्चयेत्" ।

कल्किद्वादशीव्रतं धरणिव्रतोक्तम् "तद्वद्भाद्रपदे मासि शुक्लपक्षे तु द्वादशीम् । षडङ्गन्यास विधिना देवमर्चयेत् परमेश्वरम् । नमोऽस्तु कल्किने पादौ हृषीकेशाय वै कटिम् । स्वेच्छाप्रधानमनायोरु जगन्मूर्त्तिस्वरोदरम् । श्रीवत्साय नमस्तुभ्यं खड्गपाणीति वै भुजौ । सुनाम्ना शङ्खचक्रे तु विश्वमूर्त्तेस्तथा शिरः । एवमभ्यर्च्य मेधावी प्रागवत्तस्यापतो घटम् । विन्यस्य कल्किनं देवं सौवर्णं तत्र धारयेत्" ।

कल्पद्रुव्रतं पद्मपु० "अतः परं प्रवक्ष्यामि व्रतं कल्पतरोः प्रियम् । यत्कृत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः । कल्पद्रुं यथाशक्त्या तण्डुलं स्वर्णसंस्थितम् । स्वर्णं द्रोणद्वयम् "दत्त्वा ब्रह्मपदं याति कल्पद्रुव्रतं स्मृतम्" ।

कल्याणसप्तमीव्रतं पद्मपु० "सौरधर्मं प्रवक्ष्यामि पार्थ ! कल्याणसप्तमीम् । तस्या विधानं वक्ष्यामि यथावदनुपूर्वशः । यदा तु शुक्लसप्तम्यामादित्यस्य दिनं भवेत् । सा तु कल्याणिनी नाम विजया च निगद्यते । प्रातर्स्नात्वेन पयसा स्नानमस्यां समाचरेत् । शुक्लाम्बरधरः पद्मसंस्थितैः परिकल्पयेत् । प्राङ्मुखोऽष्टदलं मध्ये तदुत्तरतः

सकर्णिकम् । सर्वेऽपि देवेशीयं विन्यसेत् पूर्वतः क्रमात्" इत्यादि ।

कार्त्तवीर्यव्रतं गरुडपु० "कार्त्तवीर्याख्या पुरी नाम व्रतं सर्वोपद्रवापहम् । शुक्लद्वादश्यां तथा च एकादश्यां पूर्णिमा । संक्रान्तिर्वा महाभागे कृष्णा चाष्टमी तिथिः । पर्वस्वेतेषु दातव्या कार्त्तवीर्याख्या पुरी शुभा" ।

कामव्रतं भविष्यपु० "पुष्यादित्यस्योदयां स्नात्वा नक्तं मधौ मधौ । अशोकवारुणं दद्यादिक्षुयुक्तं दशाङ्गुलम् । विप्राय वस्त्रसंयुक्तं प्रद्युम्नः प्रीयतामिति । कृत्वं विष्णुपुरे स्थित्वा विशोकः स्यात् पुमान् नृप !। एतत् कामव्रत नाम सदा शोकविनाशनम्" ।

कामदाशम्यादिव्रतं भविष्योत्तरोक्तम् । "फाल्गुनामलपक्षस्य दशम्यां च घनाचन !। उपोषितो नरो नारी समभ्यर्च्य तमोपहम् । हृषीकनाम जपन् भक्त्या भावयुक्तो जितेन्द्रियः । तिलद्रुपविशंवैव स्नानमेवानुकीर्त्तयेत् । ततोऽन्यदिवसे प्राप्ते चतस्रां नियतो रविम् । स्नात्वा सम्यक् समभ्यर्च्य दद्याद्विप्राय दक्षिणाम्" ।

कामदेवव्रतं विष्णुधर्मोक्तम् । "शुक्लपक्षे महाराज ! त्रयोदश्यामुपोषितः । पूजयेत् कामदेवन्तु वैशाखात् प्रभृति प्रभो !। गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा । दद्याद् प्रेताग्ने विप्राय गन्धवस्त्रयुगं तथा" । "कृत्वा व्रतं वत्सरमेतदित्थमासाद्य नाकं सुचिरं मनुष्यः । मानुष्यमासाद्य भवत्यरोगः सुखान्वितोरूपबलन्वितश्च" ।

कामधेनुव्रतं वह्निपु० "कार्त्तिकः खलु मासो वै सर्वदेवमयो महान् । कृष्णपक्षे विशेषेण तत्र पञ्च दिनानि तु । पुण्यानि तेषु यद्दत्तमक्षयं सर्वकामिकम् इत्युपक्रमे अभावस्यादिषु तत्र विशेषस्तु "नन्दा सुनन्दा सुरभी सुशीला सुमनास्तथा । निर्गता मथ्यमानाब्धौ क्रमः स्नानं शुभप्रदम" । कामधेनोराविर्भावभावितस्वदेहात् क्रमः प्रशस्तमित्यर्थः "तत्र स्नात्वा समभ्यर्च्य धेनुं पूजां प्रयत्नतः । गोदानफलमाप्नोति नरो विगतकल्मषः । एकादश्यामुपोष्याथ नरो दिनचतुष्टयम् । घृतेन स्नापयेद्विष्णुं गव्येन पयसापि वा । नक्तायो गोरसैर्दिव्यैः पूजयेन्मधुसूदनम् । गन्धपुष्पैः सुवेषैश्च स्नानालङ्कारकुङ्कुमैः । तस्मात्तत्रैव च कामधेनुं दद्याः समन्त्रिकाम् तु शेषवत्तु । विप्राय वै सर्वगुणाय यत्र कृत्वा व्रतं कृतकृतो भवेत्सु" ।

कामव्रतं पद्मपु० "कामं पुण्यत्रयोदश्यां शुक्लपो जायते प्रभुम् । दृष्ट्वा रूपवतीं भार्यां लभेत् कामांश्च पुष्कलान् । मूलमन्त्राः सर्वसाधिरङ्गमन्त्राश्च कीर्त्तिताः" ।

कामव्रतोद्यापनं वराहपु० "कामव्रतं महाराज ! शृणु मे गदतोऽधुना । येन कामाः सहध्यन्ते मनसा चिन्तिता अपि । अतः फलाशनो वस्तु वर्षमेकं व्रतं चरेत् । माघमासे सिते पक्षे पञ्चम्यां नक्तभोजनः । अतश्चान्तु प्राप्तवेद्वीभानु ! फलमेकन्तु पार्थिव !। ततो भुञ्जीत वत्सेन वाग्यतः शुद्धमोदनम् । ब्राह्मणैः सह राजेन्द्र ! अथ वा केवलं फलम् । तमेकं दिवसं स्थित्वा षष्ठ्यां पारणं नृप !। अग्निकार्यं च कुर्वीत शुक्लपक्षेषु सर्वदा । पूजयित्वा विधानेन वर्षमेकं व्रतं चरेत्" ।

कामावाप्तिव्रतं विष्णुधर्मोत्तरोक्तम् । "कृष्णपक्षे चतुर्दश्यां महाकालमथार्चयेत् । तस्मात्कामवाप्नोति दत्तेष्टं नात्र संशयः" ।

कार्त्तिकमासव्रतं नारदोक्तम् । "माहात्म्यमभिधास्यामि मासस्यास्य वरानने !। येन ते जायते भक्तिर्मत्कृता येनार्च्यते हरिः । कार्त्तिके कृष्णपक्षे वो यः प्राजापत्यरतोऽपि वा । द्वादश्यां पक्ष वा मासं वा वरवर्णिनि !। उपवित्वा नरो याति तद्विष्णोः परमं पदम् । एकभक्तेऽथ वा नक्ते तथा शुभ्रु ! यथाविधे । ऋते नरैर्नाप्राप्नुयाद्वै दीपमालया । तस्मिन् हरिर्दिवं पुण्यं तथा वै भीष्मपञ्चकम् । प्रबोधनीं नरः कृत्वा जागरेण समन्विताम् । न मातृजठरे याति अपि पापान्वितो नरः" ।

कार्त्तिकेयव्रतोद्यापनं भविष्योत्तरम् "मार्गशीर्षे सिते पक्षे षष्ठी भरतसत्तम !। पुण्या पापहरा नित्या शिवगीता गुहप्रिया । निहत्य तारकं षष्ठ्यां गुहस्तारकराजवत् । रराज तेन दयिता कार्त्तिकेयस्य सा तिथिः । स्नानदानादिकं कर्म तस्यामक्षयमुच्यते । वेदास्त्रां पठन्ति साङ्गेयं दक्षिणाभिः समाश्रितम् । ब्रह्महत्यादिपापैस्तु मुच्यते नात्र संशयः । तस्मादस्यां सोपवासः कुमारं पर्वसम्भवम् । राजतञ्च महाराज ह्यथवा दारुजम् । कारयित्वार्चयेत्तत्र कामान्मर्वान्वितः । अपराह्णे ततः स्नात्वा सम्यगाचम्य बुद्धिमान् । पद्मासनस्थं साङ्गेयं ध्यायेच्छिष्टेन शक्तितः" ।

कालरात्रिव्रतं कालिकापु० "साधु साधोऽसि धर्मज्ञ ! कालरात्रिव्रतं मम । शृणु ! वक्ष्यामि तत्सर्वं कर्त्तव्यं विधिवद्यथा । भाद्रे मासि सिते पक्षे शुक्लपक्षे जितेन्द्रियः । सत्यवाक् स्थिरचित्तात्मा नियतस्थो

भवेत्सुधीः । कालोव्रतमिदं ख्यातं कर्त्तव्यं सत्कुलोद्भवैः"। कालरात्रि काली ।

कालाष्टमीव्रतं वामनपु० "नभसे मासि च तथा या स्यात् कृष्णाष्टमी शुभा । युक्ता मृगशिरसैव सा तु कालाष्टमी स्मृता । तस्यां सर्वैकलिङ्गेषु तिथौ स्थपति शङ्करः । वसन्नसन्निधाने तु तत्र पूजाजपया स्मृता" । इदं व्रतं भाद्रादिवर्षसाध्यम् ।

कीर्त्तिव्रतं पद्मपु० "चतस्रः भास्करं गङ्गां प्रणम्यैकत्र वाम्यतः । एकभक्तं नरः कुर्यादेतस्यां वै विमत्सरः । व्रतान्ते विप्रमिथुनं पूजयेद्धेनुसयान्वितम् । दत्त्वा हिरण्मयं दद्यात् सोऽश्वमेधफलं लभेत् । दिवि देवविमानस्थो मोदतेऽप्सरसाङ्गणैः । एतत्कीर्त्तिव्रतं नाम भूमिकीर्त्तिप्रदायकम्" ।

कुक्कुटीव्रतं भविष्योक्तं २०६२ पृ० ति०त० दृश्यम् ।

कुजैरवतीयोगव्रतं भविष्यपु० "तृतीयायान्तु वित्तेशं वित्ताढ्यो जायते ध्रुवम्" । पूजयित्वेति शेषः "क्रयादिव्यवहारे च लाभो दिव्यगुणो भवेत्" ।

कुमारषष्ठीव्रतं कालोत्तरोक्तम् । "चैत्रशुक्लात् समारभ्य व्रतार्थमधुनोच्यते । उपोष्य विधिना षष्ठीं विशेषात् षण्मुखं यजेत्" ।

कुम्भीव्रतं स्कन्दपु० "एकादश्यां कार्त्तिकस्य शुक्लपक्षे तु कारयेत् । कुम्भादिनरदेभ्यस्तु वदेत् क्षमयेत्ततः । प्रयत्नात् कार्त्तिके मासि विधारभे तु जागरम् । शुक्लैकादशीं रात्रौ विशेषादर्चयन्ति च । चतुरस्रं चतुर्द्वारं गोमयेनोपलिप्य च । चतुर्भिः शालिगोधूमवर्णकैरुपशोभितम् । स्थाप्य नारायणं पूज्य स्वशिक्ये प्रतिमासु च । कृत्वा दीपां बलिं दत्त्वा विधानमवधारयेत् । दीपमालान्वितं गन्धपुष्पाद्यैः पूजयेत्ततः । कुम्भौ दैवमयौ ध्यात्वा सञ्चरते सर्वसिद्धिभैः" ।

कूर्मद्वादशीव्रतं धरणीव्रतोक्तम् "पौषमासस्य या पुण्या द्वादशी शुक्लपक्षतः । तस्यां प्रातिर्व सङ्कल्पं कृत्वात् स्नानादिकाः क्रियाः । विधेयाराधयेद्देवं तावदेकादशीं जनार्दनम् । पुष्पैर्गन्धैर्द्विजश्रेष्ठ ! देवदेवं जनार्दनम् । कूर्माय पादौ पूजयन्तु पूज्य नारायणायेति कटिं हरेत्तु । सङ्कर्षणायेत्युदरं हरेत्तु हरो विशोकाय समाय कण्ठम् । सुवक्त्रे चैव भुजौ शिरश्च नमो विशालाय दयाकृशङ्खौ । जनार्दनायैव सुपूजयन्तं नीलाम्बुजैर्विविधे पूजयेच्च । सम्पूज्य देवं कलशं तदग्रे संस्थाप्य वाल्यात्तदामकण्ठम् । तं रत्नगर्भन्तु पुरैव कृत्वा सन्निहितो हेममयञ्च देवम् । समुद्रं कूर्मरूपेण कृत्वा संस्थापयेत्ताम्रपात्रे ततश्च । पूर्णे घटे पूर्यैव सन्निवेश्याथो ब्राह्मणायैव सर्वं तु दद्यात्" । ततश्च पूर्णे ताम्रपात्रे समुद्रं कूर्मरूपं निधाय घटोपरि निवेश्य प्रभाते दद्यादित्यर्थः" ।

कृच्छ्रव्रतानि विष्णुरहस्ये "सुपुण्ये कार्त्तिके मासि देवर्षिगणसेविते । क्रियमाणे व्रते नृणां स्वल्पेऽपि स्नानदानजम् । ततश्च सवत्सरः पुण्यात्तस्मादर्थेषु पूजितः । वर्षावाः कार्त्तिकः पुण्यः कार्त्तिकाद्व्रतमुत्तमम् । नैवेद्यं पुष्पधूपञ्च चन्दनं सुविलेपनम् । दत्त्वैकस्मिन् कार्त्तिके विष्णोः फलं सांवत्सरं लभेत् । अतः कार्त्तिकमासाद्य सदैव सुखकाङ्क्षिभिः । हरिस्तुहिश्च कर्त्तव्यं सुखदात्रा सुकरं व्रतम् । कार्त्तिकस्यासिते पक्षे वायुभक्षव्रतदर्शीम् । वसुधोष्य नरो भक्त्या पूजयेद् गरुडध्वजम् । उपवासस्तु कर्त्तव्यो वारिमध्ये स्थितेन च । जलकृच्छ्रमिदं कृत्वा विष्णुलोकं व्रजेन्नरः । दशम्यां पञ्चगव्याशी एकादश्यामुपोषितः । अर्चयेद्देवमच्युतं देवं नियतश्च व्रतञ्चरेत् । कार्त्तिकस्यासिते कृत्वा नरो देवव्रतञ्चरेत् । दामोदरं समभ्यर्च्य देवो वैमानिको भवेत् । घृतः क्षीरं दधि दर्भं सप्तम्यादिचतुर्दिनम् । कार्त्तिकस्यासिते पीत्वा एकादश्यामुपोषितः । कृच्छ्रं पैतामहं नाम कुर्वन् संपूजयेद्धरिम् । प्राप्नोति परमं विष्णोः स्थानं त्रैलोक्यपूजितम् । त्रिरात्रं पयसः पानमुपवासः परश्च यः । मध्यादौ कार्त्तिके शुक्ले कृच्छ्रो माहेन्द्र उच्यते" इत्यादि ।

कृच्छ्रचतुर्थीव्रतं स्कन्दपु० "मार्गशीर्षे शुभे मासि सिते पक्षे तु षष्ठ्यहम् । चतुर्थ्यां नियमं कृत्वा विघ्नेशं पूज्य भक्तितः । पुष्पैर्गन्धैश्च नैवेद्यैः लड्डुकैश्च समन्ततः । पञ्चविंशतिपिण्डैश्च तथा षोडशकैः प्रभुम् । पूजयित्वा विधानेन प्रार्थयेत्तत्र मानवः" ।

कृत्तिकाव्रतं भविष्योत्तरोक्तम् । "कार्त्तिक्यां पौर्णमास्यान्तु स्नात्वोपोष्य कृत्तिकाव्रतम् । षट् मासांस्तु व्रतं यावदिदं चित्तन्य चेतसि । पारणे पारणे चापि पुराणञ्च द्विजोत्तमे । श्रद्धायुतं प्रयच्छत यथा विभवसारतः । कृत्तिकासु स्वयं सोमः कृत्तिकासु हुताशनिः । यदा स्यात् सोमवारेण सा महाकार्त्तिकी स्मृता । ईदृशी बहुभिर्वर्षैर्बहुपुण्यैर्न लभ्यते । लब्धापि न हृता नेया व-

दीक्षेच्चैव आत्मनः। अन्यापि कार्त्तिकी पार्थ! सदुपोष्या विधानतः। तस्या विधानं राजेन्द्र! शृणुष्वैकाग्रमानसः। कार्त्तिके शुक्लपक्षस्य पौर्णमास्यां दिनोदये। नक्तेन नियमं कुर्याद्दन्तधावनपूर्वकम्। उपवासेन वा शक्त्या ततः स्नात्वा जलाशये" इत्यादि। कृष्णचतुर्दशीव्रतं भविष्यपु० "बालवृद्धातुराणाञ्च भोगिनां स्त्रीषु वालिशे। विधानमेषु वक्ष्यामि सुखदे ते यथा सुत!। भूतायां फाल्गुने कुर्यात् कृष्णपक्षेऽतिभक्तितः। दरिद्राधमनार्याणामक्षमाणां विशेषतः। सर्वकामप्रदं कृष्णचतुर्दश्यां शिवव्रतम्। रात्रौ विशेषपूजा तु महाक्षपणसंयुता। महादीपद्वयं देयं शतमष्टोत्तरं पुनः। सहतं गुग्गुलं धूपं शिवं प्रणुपतिं यजेत्। खण्डखाद्यान्यनेकानि भक्ष्याणि विविधानि च। यथा समर्पयेत् भक्त्या विक्तशाठ्यं विनाशुत!। रात्रौ जागरणं कार्य्यं शिवस्याग्रे शिवं जपेत्"। शिवधर्मोक्तम् "नारी वोपवसेदेतां कृष्णामेकाम्बुचतुर्दशीम्। वर्णान्ते प्रतिमां कृत्वा शान्तिपिष्टमयीं शुभाम्। गीतानुलेपनैर्माल्यैः पीतवस्त्रैस्तु पूजयेत्। पूर्वोक्तमखिलं कृत्वा शिवाय विनिवेदयेत्"। कृष्णद्वादशीव्रतं वराहपु० "एकभक्तेन नक्तेन तथैवायाचितेन च। उपवासेन दानेन न निर्द्वादशिको भवेत्। मार्गशीर्षे मासस्य सुतं सर्वं त्वया बुध!। श्रीयान्मासस्तिमाकेवं कुर्यात्संवत्सरं व्रती। नामानि देवदेवस्य केशवस्य पृथक् पृथक्। कृष्णोऽनन्तोऽच्युतश्चक्री वैकुण्ठोऽथ जनार्दनः। उपेन्द्रो यज्ञपुरुषो वासुदेवस्तथा हरिः। योगेशः पुण्डरीकाक्षोमासनामान्यनुक्रमात्"। विष्णुधर्मोत्तरोक्तम् "माघ्यान्तु समतीतायां द्वादशी या भवेन्नृप!। ततः प्रभृति कर्त्तव्यं व्रतमेतदुपोषिता। द्वादशीषु च कृष्णासु नाम कृष्णस्य कीर्त्तयेत्। तैलेनैव तथाभ्यङ्गौ कर्त्तव्यौ तत्र चोपरौ। तिलैर्निवेदनं कार्य्यं होमः कार्य्यस्तथा तिलैः। पौषप्रान्तु समतीतायां कृष्णा या द्वादशी भवेत्। तस्यां व्रतावसाने तु तिलान् दद्याद्द्विजातिषु। सुवर्णञ्च महीपाल! रक्तवस्त्रं तथैव च। संवत्सरमिदं कृत्वा व्रतं मनुजपुङ्गव!। तिर्य्यग्योनिं न चाप्नोति स्वर्गलोकञ्च गच्छति। यावज्जीवं व्रतमिदं यः करोति समाहितः। न स दुःखमवाप्नोति नारकं मनुजोत्तम!। यत्र वैतरणी दुर्गा क्षुरधारा सुपर्वता। प्राणानां यातना यत्र तत्रासौ न गमिष्यति"। कृष्णव्रतं पद्मपु० "एकादश्यां तु नक्ताशी सङ्कल्पं विनिवेदयेत्। विष्णवेति शेषः "कृत्वा मन्त्रं च सौवर्णं स विष्णोः पदमाप्नुयात्। एतत् कृष्णव्रतं नाम कल्याणं सुखलाभकृत्"। कृष्णषष्ठीव्रतं भविष्योत्तरोक्तम्। "कृष्णषष्ठ्यां प्रयत्नेन कृत्वा नक्तं विधानतः। मासो मार्गशिरस्यादावंशुमानिति पूजयेत्। विधिवत् प्राश्य गोमूत्रमनाहारो निशि क्षपेत्। अतिरात्रस्य यज्ञस्य फलं प्राप्नोति मानवः"। इत्यादि तदवधिवर्षसाध्यमिदम्। कृष्णाष्टमीव्रतं देवीपु० "कृष्णाष्टम्यां विधानं वै निखिलं क्रियते यथा। क्रमेण मे तथा ब्रूहि तत् कर्त्तव्यं सुरेश्वर"। ईश्वर उवाच "हेमन्ते त्वथ सम्प्राप्ते मासि मार्गशिरे तथा। नक्तं कृत्वा शुचिर्भूत्वा गोमूत्रं प्राश्येन्निशि"। नक्तं कृत्वा नक्तमन्त्रकल्पम् "आकरेद्वायन" यत्र यथाक्रम्य तथाश्नीयात्। तेन नक्तं सङ्कल्पितं प्राशितं प्राशितेन च" इति। तेन नक्तं सङ्कल्पितं प्राशितेनचेति क्वचित्प्राशितेन क्वचिदप्राशितेनेत्यर्थः। "कृष्णाष्टम्यां विधानं वै शङ्कर पूज्य भक्तितः। अतिरात्रस्य यज्ञस्य फलमष्टगुणं भवेत्। अरेश्च शाङ्कर नाम सायं रात्रौ दिवा यथा" इत्यादि। तदवधि वर्षसाध्यम् "कृष्णाष्टम्यां चैत्रमासे स्नातो नियतमानसः। कृष्णमभ्यर्च्य पूजाञ्च देवक्यां कुरुतेऽनघः। निराहारो जपन्नाम कृष्णस्य जगतः पतेः। उपविश्य जपन् स्नातः घृतप्रस्थसितादिषु। पूजायाञ्चापि कृष्णस्य सप्तवारान् प्रकीर्त्तयेत्। पाषण्डिनो विकर्मस्थान् नास्तिकैश्चैव नास्तिकान्। प्रभाते वाम्बुना स्नातो दद्याद्विप्राय दक्षिणाम्। भुञ्जीत व्रतपूजाञ्च कृष्णस्यैव जगत्पतेः" इत्यादि। इदं तदवधि वर्षसाध्यम्। भविष्योत्तरोक्तम्। "कृष्णाष्टमीव्रतं पार्थ! शृणु पापहरं परम्। धर्मस्य जनन लोके सर्वप्रीतिकरं परम्। मार्गशीर्षेऽथ वै मासि दन्तधावनपूर्वकम्। उपवासस्य नियमं कुर्वन्नक्तस्य च व्रती"। समधोसमर्घभेदेन व्यवस्थितो विकल्पः। इत्यादि तदवधि वर्षसाध्यमिदम्। व्रतान्तरं कृष्णाष्टमीशब्दे द्रष्टव्यम्। कृष्णैकादशीव्रतं विष्णुधर्मोत्तरोक्तम्। "एकादशी तथा कृष्णा फाल्गुने मासि भार्गव!। छन्दोदेवस्य कर्त्तव्या पूजा धर्मभृतांवर। पूजनाच्छन्ददेवस्य येनार्यं सुखवर्जितम्। न प्राप्नोति तथा प्रीतिं सुखवन्तं न संशयम्"। कोकिलाव्रतं भविष्योत्तरोक्तम्। "आषाढ़पौर्णमास्यान्तु सन्ध्याकाले तु पश्यते। सङ्कल्पयेन्नरश्चैनं श्रावणीप्रभृति

शुक्लम्। स्नानं करिष्ये नियता ब्रह्मचर्यं स्थिता सती। भोक्ष्यामि नक्तं भूत्वाहरिष्ये प्राशिनान्द्यास्। इति यद्वस्य दुःखो नारी वा ब्राह्मणान्तिके। प्राप्यातत्स्नानतः प्राह्ने सर्वेषामधिसंयुतः" इत्यादि।

कोटीश्वरीतृतीयाव्रतं स्कन्दपु० "शृणु भद्रे! परं गुह्यं सर्वकामफलप्रदम्। दुर्भगाधाश्च नारीणां सौभाग्यकरणं परम्। कोटीश्वरीति विख्यातं ततः कोटीश्वरीव्रतम्। तृतीया शुक्लपक्षे तु माघि भाद्रपदे भवेत्। तस्यां व्रतं तु संपाद्यं यावज्जीवतदत्वम्। उपवासेन कर्त्तव्यं वर्षे वर्षे तु सुन्दरि!। चतस्रश्चानां तस्रश्चानां तिस्रश्चानां वा सुलोचने!। कलसमेकं विरचयेत् घृतेन पयसि शोभने। क्षीरसंमिश्रितैः कार्या देव्यामूर्त्तिः सुलोचना। कृत्वा तु पुष्पप्राकारं पुष्पमालाभिमण्डितम्। संस्थाप्य पार्वतीं देवीं पूजयेद्भक्तिसंयुतः" इत्यादि।

कोकिलाव्रतं विष्णुरहस्योक्तम्। "माघि चाश्वयुजे शुक्ल एकादश्यामुपोषितः। अक्षीणायां तु व्रतं श्रेष्ठं कोकिलाख्यं महाफलम्। अस्त्रिसंध्यः शुचिर्भूत्वा धौतवासा जितेन्द्रियः। द्वादश्यामर्चयेद् देवं श्रुत्वा वासुदेवं जगद्गुरुम्"।

क्षेमव्रतं विष्णुधर्मोत्तरोक्तम्। "यस्याश्चां राजसान्नाद्य चतुर्दश्यान्तु पूजनम्। कृत्वा क्षेममवाप्नोति क्रियासाफल्यमेव च"।

गणपतिचतुर्थीव्रतं भविष्यपु० "चतुर्थ्यान्तु महाराज! निराहारो व्रतान्वितः। दत्त्वा तिलान्नं भुङ्क्ते यः स्वयं भुङ्क्ते तिलोदकम्"। दिवा निराहारो रात्रौ भुङ्क्ते इति विरोधपरिहारः। वर्षत्रये समाप्तिर्व्रतस्य तु यदा भवेत्। विनायकस्तदा तुष्टो ददाति फलमीप्सितम्"।

गन्धव्रतं शिवधर्मोक्तम् "पौर्णमास्यामुपवसेदष्टम्यामेकं सुव्रतः। वर्षान्ते सर्वगन्धाढ्यां प्रतिमां विनिवेदयेत्। सुविचित्रैर्मनोज्ञानैर्दिव्यगन्धविभूषितैः। युगकोटिशतं सार्द्धं शिवलोके महीयते"।

गवन्तिव्रतं शिवरहस्योक्तम् "पवित्रतोयसंयुक्तैः कुम्भैः पौष्णे शिवोपरि गवन्तेद् यः पयोधारां तु ब्राह्मणदत्तये"।

गायत्रीव्रतं गरुडपु० "सर्वोत्तमं परं ब्रह्मवरं श्रेष्ठ! भद्रदम्। चतुर्दश्यां महाभाग! सर्वरोगार्त्तिशान्तये। ज्वरशूलग्रहोन्मादकुष्ठातिसारसंयुतः। मन्त्रं निबोधदं वक्ष्ये सर्वकामविवर्जितः। आदित्यमुपतिष्ठेत गायत्रीञ्च जपन्मुदः। उदयात् पूर्वमारभ्य यावदस्तं गतो रविः। निराहारो जितक्रोधो तावत्तिष्ठेत् समाहितः। रवावस्तङ्गते देवमर्चयेत् पुरुषोत्तमम्। उपोष्य विधिवत्। स्नात्वा तथा पर्वणि सुव्रतः"। पर्वणि, पौर्णमास्याम्। एतच्च शुक्लचतुर्दशीव्रतं, पुराणे शुक्लपक्षे व्रतप्रकरणे पठितत्वात्।

गुडतृतीयाव्रतं भविष्यपु० "शुक्लपक्षेषु दातव्या माघि भाद्रपदे तु वा। तृतीया पायसेनापि वासवेयं प्रीतये"।

गुणावाप्तिव्रतं विष्णुपु० "अतःपरं प्रवक्ष्यामि व्रतमूर्त्तिव्रतं तव। दिवा तु देवदेवस्य मूर्त्तिर्भवति यादव। घोरा सौम्या शिवा चान्या घोरा भवति पावका। शिवा चाग्निपतिर्यस्मात्सौम्यो सोमात्मकं जगत्। दिवा घोरा विनिर्दिष्टा दिवा सौम्या ततः पुनः। घोरा वह्निश्च सूर्यश्च सौम्या सोमजलाधिपौ। तेषां च पूजनं कार्यं प्रतिपत्प्रभृति क्रमात्। शुक्लपक्षात् तथारभ्य फाल्गुनञ्च द्विजोत्तम!। आदित्यं पूजयेद्राजन्! प्रथमेऽह्नि परः शुचिः। द्वितीयेऽह्नि तथा वह्निं तृतीयेऽह्नि जलाधिपम्। चतुर्थेऽह्नि यथाशक्त्या यथावन्नामयोक्तमः"।

गुरुव्रतं भविष्योक्तम् "अनुराधासमायार्यं देवानां पूज्य भक्तितः। पूर्वोक्तक्रमयोगेन सप्त नक्षान्यथाचरेत्। हैमं क्षेममये पात्रे स्थापयेच्च गुरुप्रतिम्। पीताम्बरयुगच्छन्नं पीतयज्ञोपवीतकम्। पाद्माक्षमालासहितं सदण्डं सकमण्डलुम्। संपूज्य पुष्पनिकरैर्धूपैर्दीपाक्षतादिभिः। सप्तधान्योपस्करञ्च द्विजाय प्रतिपादयेत्"।

गुर्वष्टमीव्रतं भविष्यपु० "माघि भाद्रपदे राजन्! शुक्लपक्षे यदाष्टमी। गुरुवारेण संयुक्ता सा तिथिर्मेषसंक्रमी। सम्भूता सर्वपापघ्नी प्रेतयोनिविनाशनी। अष्टम्यां स्नानमस्यां सम्यक् दन्तधावनपूर्वकम्। एकभक्तेन राजेन्द्र! तस्यां देवी प्रपूजयेत्। स्नानं नद्यां तडागे वा गृहे वा नियतात्मना। सौवर्णं कारयेत्प्रीत्यै राजतं वा नरोत्तम! तदाभावे यथाशक्त्या श्रीवत्सेनापि कारयेत्"।

गुह्यकद्वादशीव्रतं भविष्योत्तरे "द्वादश्यां शुक्लपक्षस्य यक्षराजसमन्वितैः। हैमं विप्राय वै दद्याद्गुडधेनुसमन्वितः। एतद्वै गुह्यकं प्रोक्तं व्रतं पापहरं शुभम्"।

गृहपञ्चमीव्रतं भविष्योत्तरे "सर्वौषध्युदकस्नातः पञ्चम्यां पूजयेद्धरिम्। सर्वौषधिरसदानञ्च यः करोति गृहाग्रणे। गृहाटोदुम्बरं पूर्णं शिवां स्थापयेच्च पञ्चमीम्"।

मट्टाटः पेषयेत्तत्तदुक्तं धान्यकखण्डकम्। "उदङ्मुखश्च पूर्वन्तु एतेषामनुगन्धं यत्। एतानि मट्टिकां गेहे प्रस्थाप्य पुरुषोत्तम!। उपस्करोति नारी न शोदति कदाचन। एतद्दुष्टहरं व्रतं नाम सर्वसौख्यप्रदायकम्"।

गोपद्मिरात्रव्रतं भविष्योक्तम् "पार्थ! भाद्रपदे मासि शुक्लपक्षे दिनोदये। तृतीयायां चतुर्थ्यां च त्रयेण परिवत्सरम्। उपवासेन मट्टोवात् व्रतं मान्वा तु गोपदम्। स्नात्वा नरोऽथ नारी वा पुष्पधूपविलेपनैः। दत्त्वा च एतमिश्चैव पिष्टकैर्वेतनमात्रया। अभ्यङ्गवेद्यां मट्टके सपुष्पे चैव भारत!। दद्याद्गवाह्निकं भक्त्या वासः पूर्वापराह्णयोः। घनस्निग्धं भुञ्जीयात् तैलक्षारविवर्जितम्"।

गोपालनवमीव्रतं गरुडपु० "तथा सप्तदशम्यां नवम्यां स्नानमाचरेत्। शुचौ तदुचिते तोरे सिक्ताभिरलङ्कृते। वसुदेवसुतं विष्णुं गोपीगणनिषेवितम्। वनमालाचितोरस्कं वन्यपुष्पैरलङ्कृतम्। बर्हिबर्हकृताबीडं पीतकौशेयवाससम्। समानवेषैरत्यर्थैः क्रीडद्भिरितरेतरम्। हतं गोपकुमारैश्च नीलाकुञ्चितमूर्धजम्। ध्यात्वा देवं परं विष्णुं सर्वलोकेश्वरेश्वरम्। वन्यपुष्पैश्च गन्धाद्यैः शुचिभिश्च यथाविधि"।

गोमयादिसप्तमीव्रतं भविष्यपु० "यः शिवेऽहोमयाहारः हादश सप्तमीः क्रमात्। राजेन्द्र! यावकाहारः शीर्णपर्णाशनोऽपि वा। क्षीराशी वैकभक्तो वा भिक्षाहारोऽथ वा पुनः। जलाहारोऽथ वा भूत्वा पूजयित्वा दिवाकरम्। पुष्पोपहारैर्विविधैः पद्मसौगन्धिकोत्पलैः। नानाप्रकारैर्गन्धैस्तु धूपैर्गुग्गुलचन्दनैः। मङ्गलोपायसाद्यैश्च विधिवच्च विभूषणैः। अर्चयित्वा नरश्रेष्ठ! हिरण्यादादिभिर्नरः। यथोक्तफलमाप्नोति क्रतुभिर्भूरिदक्षिणैः। तदत्र प्राप्यते वीर! सप्तम्यां केवलं रवेः"।

गौरीचतुर्थीव्रतं पद्मपु० "तमाचतुर्थ्यां माघे तु शुक्लायां योगिनीगणैः। प्रागभक्षयित्वा स्नुषा च भूयः स्वाकृतं स्वकैर्गुणैः। तस्मात् सा तत्र संपूज्या नरैः स्त्रीभिर्विशेषतः। कुन्दपुष्पैः प्रयत्नेन सम्यगभक्त्या समाहितैः। कुङ्कुमागरुकाभ्यां रक्तसूत्रैः सकङ्कणैः। सर्वैः पुष्पैश्चापूपैर्दीपैर्विलिभिरेव च। गुडार्द्रकाभ्यां पनसफलबीजाभ्यां पायसैः। पूज्या स्त्रियश्च विधवाः कन्या विप्राश्च शोभनाः। सौभाग्यवृद्धये पश्चात् भोक्तव्यं बन्धुभिः सहेति"।

गौरीव्रतं कालोत्तरोक्तम् "गौरीव्रतमथो वक्ष्ये स्त्रीणां सौभाग्यवर्द्धनम्। चैत्रशुक्लतृतीयायां गौरीव्रतं समाचरेत्। उपोष्य तु प्रयत्नेन विधानमिदमाचरेत्"।

गोवत्सद्वादशीव्रतं भविष्योत्तरे "संप्राप्ते कार्त्तिके मासि शुक्लपक्षे नृपोत्तम!। द्वादश्यां जलमङ्गल्यः स्नात्वा गृहे जलाशये। नरो वा यदि वा नारी नक्तं भक्षयेत् चेतसि। ततो मध्याह्नसमये कृत्वा देवार्चनादिकम्। प्रतीक्षेतागमं भक्त्या गवां गोध्वानतत्परः। सवत्सां तरुणवत्सां च गोधिनीं गां पयस्विनीम्। चन्दनादिभिरालिप्य पुष्पमालाभिरर्चयेत्"।

गोविन्दद्वादशीव्रतं विष्णुरहस्ये "द्वादश्यां भोजयेद्विप्रान् तेभ्यो दद्याच्च दक्षिणाम्। प्रतिमासं तिथौ तस्यां क्षीरेण दद्याद्गवाह्निकम्। गवां क्षीरेण संयुक्तं दत्त्वा वाऽथ घृतेन वा। घृतपात्रे च समशीतोष्णरसवर्णं व्रती। संवत्सरमुपोष्यैव गोविन्दद्वादशीं नरः। पुनर्गोभ्यो यथा भक्त्या भूयो दद्याद्गवाह्निकम्। गोविन्दद्वादशी वा तु उपोष्य विधिवन्नरः। प्राप्नोति विधिवद्दत्त्वा गोसहस्रस्य यत् फलम्"।

चण्डिकाव्रतं भविष्योत्तरोक्तम् "अष्टम्यां तु चतुर्दश्यां पक्षयोरुभयोरपि। योऽश्नीयेन्न भुञ्जीत चण्डिकाराधने रतः। स याति परमं स्थानं यत्र सा चण्डिका स्थिता"।

चतुर्दशीजागरव्रतं कालिकापु० "कार्त्तिके शुक्लभूतायां क्षरं स्नाप्य एतादिभिः"। शुक्लभूतायां शुक्ल चतुर्दश्याम् "समालभ्य न्यसेद्भूयः सौवर्णं वा प्रमाणकम्। सुरभिभिस्ततः पुष्पैरभ्यर्च्य गुग्गुलं दहेत्। नैवेद्यञ्च प्रदर्त्तव्यं बलिं बाह्ये विनिःक्षिपेत्। वितानं दीपमादर्शं वस्त्रयुग्मं ध्वजास्तथा। धूपोत्क्षेपञ्च षष्टाञ्च दत्त्वा देवाय शम्भवे। प्रदक्षिणं ततः कुर्याद्दण्डवद्भूरिवस्त्र हि। ततस्तत्रोपविष्टश्च जागरं परिकल्पयेत्"।

चतुर्दशीव्रतं भविष्योत्तरे "चतुर्दश्यां निराहारः समभ्यर्च्य त्रिलोचनम्। पुष्पधूपादिनैवेद्यै रात्रौ जागरणेन च। पद्मगर्भं निधिं प्राप्य स्वर्गेऽनौ विमलाक्षरः"।

चतुर्दशीमौनव्रतं भविष्योत्तरे "शृणु! नक्तोपवासस्य विधानं पाण्डुनन्दन!। येन विज्ञानमात्रेण नरो मोक्षमवाप्नुयात्। येषु केषु च मासेषु शुक्लपक्षे चतुर्दशीम्। ब्राह्मणं भोजयित्वा तु प्रारभेत् शृणितो व्रतम्। मासि मासि भवन्ति हे अष्टमी च चतुर्दशी। शिवार्चनरतो भूत्वा शिवध्यानैकमानसः। वसुधां भाजनं कृत्वा भुञ्जीयान्नक्तभोजनम्। उपवासात्परं नैक्यं नैक्या-

तूपरमयाचितम्। अयाचितात् परं नक्तं तच्चाश्नीयेन भाजयेत्। देवैव भक्तं पूर्वाह्णे मध्याह्ने मुनिभिस्तथा। अपराह्णे च पितृभिः सन्ध्यायां गुह्यकादिभिः। सर्ववेलामतिक्रम्य नक्तभोजी सदा भवेत्। हविष्यभोजनं स्नानं सत्यमाहारलाघवम्। अग्निकार्यमधःशय्या नक्तभोजी सदा भवेत्"।

चतुर्मासी(चातुर्मास्य) व्रतं भविष्योत्तरे "शृणु पार्थ! प्रवक्ष्यामि गोविन्दशयनव्रतम्। कटिदानं सकृत्स्नानं चतुर्मासीव्रतक्रमम्। मिथुनस्थे सहस्रांशौ स्थापयेन्मधुसूदनम्। तुलां प्राप्ते महाराज! पुनरुत्थापयेच्च तम्। अधिशयिते च देवे एष एव विधिक्रमः। नान्यथा स्थापयेत् कृष्णं नान्यथोत्थापयेत्तथा। आषाढस्य सिते पक्षे एकादश्यामुपोषितः। स्थापयेत् प्रतिमां विष्णोः शङ्खचक्रगदाधराम्। काञ्चनीं राजतीं ताम्रवतीं पित्तलजां तथा। पीताम्बरधरां सौम्यां पर्यङ्के चारुचित्रिते शुभे। शुक्लवस्त्रपटच्छन्ने सोपधाने सुपूजिते। प्रभावेऽस्यतो विष्णोः लताञ्जलिपुटस्तथा। चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि। इमं करिष्ये नियमं निर्विघ्नं कुरु मेऽच्युत!। स्त्री वा नरो वा सङ्कल्पो धर्मार्थं सुदृढव्रतः। स्नात्वोदङ्मुखमानेतान् दन्तधावनपूर्वकान्। तेषां फलानि वक्ष्यामि तत्कर्तॄणां पृथक् पृथक्। मधुस्वरो भवेद्राजा! पुरुषो गुडवर्जनात्। तैलस्य वर्जनादेव सुन्दराङ्गः प्रजायते। कटुतैलपरित्यागाच्छत्रुनाशश्च वायात्। मधूकतैलत्यागेन सौभाग्यमतुलं लभेत्। योगाभ्यासी भवेद्यस्तु स ब्रह्मपदमाप्नुयात्। कटुकाम्लतिक्तमधुक्षारकषायलवणवर्जनम्। यो वर्जयेत स वैरूप्यं दौर्भाग्यं नाप्नुयात् क्वचित्। ताम्बूलं वर्जयेत् भोगी रक्तकण्ठश्च जायते। घृतत्यागाच्च लावण्यं सर्वस्निग्धतनुर्भवेत्। फलत्यागाच्च मतिमान् वह्निपुत्रश्च जायते। शाकपत्रान्नाङ्गोगी सर्वकामदमो भवेत्। पादाभ्यङ्गपरित्यागाच्छिरोऽभ्यङ्गं विवर्जयेत्। दीप्तिमान् दीपदानेन सोऽपि चोर्द्धपतिर्भवेत्। दधिदुग्धैकनियमी गोरेभक्षो गोपतिर्भवेत्। इन्द्रातिथित्वमाप्नोति स्नानोपाकस्य वर्जनात्। लभते सकृतिं दीर्घां तैलपक्वस्य वर्जनात्। भूमौ प्रस्तरशायी च विप्रो मुनिवरो भवेत्। सदा मुनिः सदा योगी मधुमांसस्य वर्जनात्। निर्व्याधिर्नीरुजश्चक्षुः सुरामद्यं विवर्जयेत्। एवमादिपरित्यागात् धर्मः स्यात् अमलानघ!। एकान्तरोपवासेन ब्रह्मलोके महीयते। धारणाद्व्रतरोत्राद्व मङ्गलानफलं लभेत्। मौनव्रती भवेद्यस्तु तस्याज्ञा लङ्घिता भवेत्। अयं चातुर्मास्यव्रतारम्भो गुरुत्वयादावपि कार्यः। यदाह ब्रह्मवर्गः "न यैशयञ्च मोक्षञ्च शुक्रगुर्वोर्न वाक्यते"। "चक्रतीर्थं चिनीवेशादौ चातुर्मास्यविधौ नरः। पादाभिवन्दनादिष्णोर्लभेद्दानजं फलम्। भूमौ भद्रङ्के सदा यस्तु स पृथिव्याः पतिर्भवेत्। नमोनारायणायेति जपन्नूयज्ञफलं लभेत्। विष्णुपादाब्जसंस्पर्शदिनपापात् प्रमुच्यते। पादोदकाभिषेकाद्व वै सङ्काल्लानं दिने दिने। पर्वसु च नरो भुङ्क्ते कुरुक्षेत्रफलं लभेत्। नित्यं शास्त्रमाख्यानाल्लोकान् यस्तु प्रबोधयेत्। व्यासस्तुवति तस्याशु विष्णुलोकं स गच्छति। लत्वा प्रेक्षकं विष्णोर्लभेदप्सरसां सभम्। तीर्थाम्बुस्नापनाद्विष्णोर्निर्मलं देहमाप्नुयात्। पञ्चगव्याशनात् पार्थ! चान्द्रायणफलं लभेत्। अयाचितेन प्राप्नोति पुत्रान् धर्म्यान्नवेश्मतः। षष्ठात्रकालभोक्ता यः कल्पस्थायी भवेद्दिवि"। षष्ठात्रकालभोक्ता उपवासद्वयान्तरितैकभक्तः "शिवोच्छिष्टेन भुञ्जानः प्रयागस्नानमाप्नुयात्। विष्णुदेवकुले कुर्यादुपलेपनमार्जने। कल्पस्थायी भवेद्राजा स नरो नात्र संशयः। प्रदक्षिणयतं यस्तु करोति स्तुतिपाठकः। हययुक्तविमानेन स तु विष्णुपुरं व्रजेत्। गीतवाद्यकरो विष्णोर्गान्धर्वं लोकमाप्नुयात्। यामद्वयं जलत्यागाच्च रोगैरभिभूयते। गुडवृतो नरो दद्याद्धृतं ताम्रभाजनम्। सविरण्यं सदक्षिणं! सवस्त्रञ्चाप्यं विधिः"।

चतुर्मूर्त्तिचतुर्व्रतं विष्णुधर्मोत्तरोक्तम् "इदमन्यत् प्रवक्ष्यामि चतुर्मूर्त्तिव्रतं तव। वासुदेवांशकात् जाताः सर्वे देवमया नृप!। अधिकेन तु लेशेन साध्या जाताश्चतुरः। तत्रापि चाधिकांशेन चतुरात्मा हरिःस्मृतः। नरो नारायणश्चैव हरिः कृष्णश्च वीर्यवान्। चतुरात्मा हरिर्ज्ञातो सदृशमस्य यादव!। आदित्येषु तु यावुक्तौ मित्रारुणसंज्ञकौ। तावेव नाम्नौ जातौहि हरिकृष्णौ च यादव। आदित्येषु यावुक्तौ शक्रविष्णू सुरोत्तमौ। तावेव सिद्धसाध्येषु नरनारायणौ पुनः। चैत्रशुक्लचतुर्थ्यान्तु सोपवासस्तु पूजयेत्। देवेशं चतुरात्मानं चित्तशक्त्या नराधिप!। व्रतमेतच्चरः कृत्वा पुनर्जन्मवतुष्करम्। न दुर्गतिमवाप्नोति मोक्षोपायञ्च विन्दति"।

चतुर्युगव्रतं विष्णुधर्मोक्तम् "इदमन्यत् प्रवक्ष्यामि चतुर्युगव्रतं तव। लतादिकं चतुर्युगं पूजयेत् सुसमाहितः। प्रथमे

चैत्रशुक्ल दिने पूज्यं व्रतं युगम्। श्वेतेन वस्त्रयुग्मेन गन्धमाल्यादिना तथा। चैत्रशुक्लसमारभ्य यथेऽहनि पूजयेत्। व्रतं शुक्लेन सर्वेण गन्धमाल्यादिना द्विज!। द्वितीयेऽहनि रक्तेन तथा त्रेतान्तु पूजयेत्। तृतीयेऽहनि पीतेन द्वापरं पूजयेद् बुधः। चतुर्थेऽहनि कृष्णेन तिष्यं संपूजयेद् युगम्। सिद्धार्थकैः कुङ्कुमेन तद्वैव च हरिद्रया। तत्तद्वामसकैः स्नानमन्त्रैर्दिवसक्रमात्। क्षीरेण प्राथयात्रान्तु कृत्वात् प्रत्यहमेव च। कृत्वा व्रतं वत्सरमेतदेकं चतुर्युगं मोदति नाकपृष्ठे। संपूज्य देवं युगमूर्त्तिसंज्ञं चतुर्युगं याति महीं समग्राम्"।

चन्द्रव्रतं वराहपु० "चन्द्रव्रतं पञ्चदश्यां शुक्लायां नक्तभोजनम्। दश पञ्च च वर्षाणि व्रतमेतत् समाचरेत्। अश्वमेधसहस्राणि राजसूयशतानि च। इष्टानि तेन राजेन्द्र! एतद्व्रतं समाचरेत्"। पद्मपु० "चान्द्रायणञ्च यः कृत्वा हैमचन्द्रं निवेदयेत्। चन्द्रव्रतमिदं प्रोक्तं चन्द्रलोकप्रदायकम्"।

चन्द्ररोहिणीशयनव्रतं पद्मपु० "रोहिणीचन्द्रशयनं सोमव्रतमिहोत्तमम्। तस्मिन्नारायणस्यांशमर्चयेदिन्दुनामभिः। यदा सोमदिने युक्ता भवेत्पञ्चदशी क्वचित्। अथ वा नक्षत्रं पौर्णमासी प्रजायते। तदा स्नानं नरः कुर्यात् पञ्चगव्येन सर्वदैः"।

चन्द्रार्कव्रतं विष्णुधर्मोत्तरोक्तम् "शृणुष्वावहितो राजन्! यत्फलं पूजयन्ति चन्द्रार्कराशिगौ। आदित्यमण्डलेऽर्चित्वा सोमं पूजयारभेत्। आदित्यं सर्वरत्नेन चन्द्रं शुक्लेन यादव!। माल्यादिना महाभाग! होमयेत् तिलतण्डुलान्। घृतक्षीरयुतान् राजन्! तथार्चेद्यावधिं। व्रतान्ते ब्राह्मणेन्द्राय! शयनं प्रतिपादयेत्। रजतं वा महाभाग! यथाशक्त्यनुरूपतः। कृत्वा व्रतं वत्सरमेतदिष्टं दद्याच्च दीपान् विधिवत् प्रभूतान्। चान्द्रं यदं प्राप्य विवर्द्धते सदा धनान्वितः स्यात् त्रिदिवे दृढैव"।

चन्द्रायणव्रतं स्कन्दपु० "यदि वर्त्तेत जीवेऽपि दैवेन नृपसत्तम!। अथो भाद्रपदे शुक्ला दैवतेन समन्विता। विशाखा भौमयोगेन सा चन्द्रेतीह विश्रुता। देवासुरमनुष्याणां दुर्लभा षष्टिहायनी। कृते त्रेतायां पद्मा-यनी द्वापरे पुनः। चत्वारिंशत् कलौ त्रिंशद्वायनी दुर्लभा ततः"।

चान्द्रायणव्रतं ब्रह्मपु० "अथ शुक्लचतुर्दश्यां पौर्णमासे समाहितः। चान्द्रायणव्रतं मासं चाहरेत् सर्वपापजित्। पूर्वेन्दुपौर्णमासान्तु पूजयेत् पत्रकं जलैः"।

चित्रभानुसप्तमीव्रतं भविष्यपु० "सप्तम्यां पूज्य खद्योतं चित्रभानुं दिवाकरम्। रक्तैश्च गन्धकुसुमैर्मन्दारोग्यमाप्नुयात्"।

चैत्रकृष्णतृतीयाव्रतं भविष्योत्तरे "चैत्रे मासि तृतीयायां दन्तधावनपूर्वकम्। उपवासश्च नियतान् मङ्गलीयाङ्गसिभावतः। अञ्जनं च सताम्बूलं सिन्दूरं रक्तवासकौ। विष्टरात् सोपवासापि सर्वैश्वर्यकरं परम्। विधवा सतिमाप्नोति कुमारी च वरेप्सया। कृष्णादायांचनविधिं श्रूयतामत्र च क्रमः। विधिभेदपदे क्षेप सर्वसौख्यप्रदायकः। सप्रधानविधानेन गौरीं पूजयेदुमाम्"

चैत्रशुक्लप्रतिपदादिकं तिथिव्रतम् भविष्यपु० "दक्षे विशुक्लाशोकशोभिते प्रतिपत्तिथिः। शुक्ला तस्यां प्रकुर्वीत स्नानं नियममास्थितः। नारी नरो वा राजेन्द्र! संतप्यं पितृदेवताः। नद्याक्षीरे तडागे वा गृहे वा तदलाभतः। पिष्टातकेन विलिखेदक्षरं पुरुषाकृतिम्। ततः प्रभक्षयेद्दिनं तिलकालङ्कृतं सुखम्। धार्यं हेवत्सरं यावच्छशिनेव नभस्तलम्। एवं नरो वा नारी वा व्रतमेतत् समाचरेत्। सदैव पुरुषव्याघ्र! भोगान् भुवि भुनक्त्यसौ"।

जयन्तीसप्तमीव्रतं भविष्यपु० "माघस्य शुक्लपक्षे तु सप्तमी या त्रिलोचना। जयन्ती नाम सा प्रोक्ता सुख्या पापहरा तथा। उपोष्या तेन विधिना श्रृणु तं पार्वतीप्रिय! पारणानि तु चत्वारि कथितानि च पण्डितैः। पञ्चम्यामेकभक्तन्तु षष्ठ्यां नक्तं प्रकीर्त्तितम्। उपवासस्तु सप्तम्यामष्टम्यां पारणं भवेत्" इत्यादि इदं वर्षसाध्यम्।

जयपौर्णमासीव्रतं भविष्यपु० "पौर्णमासी महाराज! सोमस्य दयिता तिथिः पूर्णमासी भवेद् यस्यां पूर्णमासी ततः स्मृता। तस्यां तु सोमसि स्नात्वा समर्च्य पितृदेवताः। आलिख्य मण्डले सोमं नक्षत्रैः सहितं विभुम्। पूजयेत् कुसुमैर्गन्धैर्दीपैर्नैवेद्यैर्तपार्चितैः। शुक्लवस्त्रैर्दक्षिणाभिः पूजयित्वा समापयेत्। आकाङ्क्षारेच्च सन्यञ्चेनक्तं भुञ्जीत वाग्यतः" इत्यादि।

जयापञ्चमीव्रतं भविष्यपु० "माघस्यामपि वक्ष्यामि पञ्चम्यामत्र भारत!। जयेति या च विख्याता व्रतिनां जयदा-

दिनौ। यस्माच्चैवा जयाशब्दं कुर्वन्ति व्रतिनो बुधाः। परिपूर्णं व्रतं यस्यां सा चैवा जयपञ्चमी। जया च विजया चैव जयन्ती पापनाशिनी जया, कार्त्तिकशुक्लपञ्चमी"।

जयावाप्तिव्रतं विष्णुधर्मोत्तरोक्तम् "कार्त्तिकशुक्लाऽतीतायां प्रतिपत्प्रभृतिक्रमात्। पूर्ववत् पूजयेद्देवं लोकनाथं त्रिविक्रमम्"। पूर्ववदिति रूपावाप्तिव्रतवत् "विरात्रन्तु तु कार्त्तिक्यां यद्यात् भक्षयसत्तमम्। सर्वशस्यधरङ्कृत्वा भक्त्या रत्नैरलङ्कृतम्। कृत्वा व्रतं मासमिदं यथोक्तं प्राप्नोति लोकं सुचिरं मधोर। तत्रोषित्वा कालं सुचिरं मनुष्यः प्राप्नोति सर्वत्र जयं त्रिलोक्याम्"।

जयासप्तमीव्रतं भविष्यपु० "जया च विजया चैव जयन्ती चापराजिता। महाजया च नन्दा च भद्रा वामा प्रकीर्त्तिता। शुक्लपक्षे सप्तम्यां नक्षत्रं पञ्चतारकम्। यदा भवेत् तदा ज्ञेया जयानामेति सप्तमी"। पञ्चतारकमिति रोहिण्यन्वेमामघाश्रवणात्। तस्यां दत्तं हुतं जप्तं तर्पणं देवपूजनम्। सर्वं शतगुणं प्रोक्तं पूजाऽपि दिवाकर। एवं नक्षत्रमाश्रित्य शुक्ला वा सप्तमी परा"। एवः सूर्यः "वर्षमेकन्तु कर्त्तव्यं विधिनानेन भास्करम्। सौवर्णं कारयेच्चक्रं द्विभुजं पद्मधारिणम्। पारणान्तिवसे तस्यां क्रियते गोपतेः पुरः"।

जातिस्मिरासप्तमीव्रतं भविष्योत्तरे "ज्येष्ठे मासि च कर्त्तव्यं त्रयोदश्यान्तु पार्थिव!। नियमश्च यथोक्तव्य आचार्यो तत्रया ततः। कृत्वैकभक्तं द्वादश्यामुपवासत्रयञ्चरेत्। मण्डलं कारयेत् तत्र सप्तपार्श्वं मनोहरम्। तत्र जातिः प्रकर्त्तव्या सप्तोद्विभवसंयुतः। रौप्यसुवर्णाथि काष्ठानि वंशपात्रे निधापयेत्। तत्र देवाश्चवः पूज्या ब्रह्मविष्णुमहेश्वराः। सप्तधान्याः शुभैः पुष्पैः फलैश्च विविधैस्तथा"।

जामदग्न्यद्वादशीव्रतं परशोर्व्रतोक्तम् "वैशाखशुक्लपक्षेवन्तु संकल्पविधिना नरः। तदह स्नानं सदा कृत्वा ततो देवालयं व्रजेत्। तत्राराध्य हरिं भक्त्या एभिर्मन्त्रैर्विचक्षणः। जामदग्न्याय पादौ तु सदरं सर्वधारिणे" इत्यादि।

स्नानावाप्तिव्रतं विष्णुधर्मोक्तम् "भगवन्! कर्मणा केन बुद्धियुक्तो भवेन्नरः। एतदेव मनुष्याणां मनुष्यत्वसदाकृतम्"। मार्कण्डेय उवाच। "चैत्रप्राप्तु यमतीतायां यावन्मासं दिने दिने। पूर्ववत् पूजयेद्देवं ऋषिरूपपराजितम्"। पूर्ववदिति चैत्रमासोक्तरूपावाप्तिव्रतवद्देवभक्तवह्निःस्नानभूयस्यादिकं कर्त्तव्यमित्यर्थः। "कोमन्तु मन्त्रं कृत्वा तु तथा सिद्धार्थसंयुतम्। स्नानन्तु भोजयेद्धाम तथा मिथुरं रूप!"। मिथुरं मधुसंयुक्तं शर्करा: "वैशाख्यां जनकन्दद्यात् विरात्रोषोषितो नरः। स्नानावाप्तिमदन्त्वेतद्व्रतं बुद्धिविवर्द्धनम्। कृत्वा व्रतं मासमिदं यथोक्तमाप्नोति नाकं सुचिरं मनुष्यः। मानुष्यमाप्य तु बुद्धियुक्तो ज्ञानेन युक्तश्च तथा भवेत्"।

ज्येष्ठाव्रतं भविष्योत्तरे "मासे भाद्रपदे शुक्लपक्षे ज्येष्ठा यदा भवेत्। रात्रौ जागरणं कृत्वा गीतवादित्रनिःस्वनैः। एवंविधविधानेन एभिर्मन्त्रैः सुपूजयेत्। एष्टोऽसि त्वं महाभागे! सुरासुरनमस्कृते!। ज्येष्ठे त्वं सर्वदेवानां मङ्गलार्थे सदा भव"।

ज्येष्ठव्रतानि महाभारते "ज्येष्ठामूलन्तु वै मासमेकभक्तेन यः क्षिपेत्। ऐश्वर्यमतुलं श्रेष्ठं पुमान् स्त्री वाधिगच्छति"। विष्णुधर्मे "ज्येष्ठार्पितमना ज्येष्ठमेकभक्तेन यः क्षिपेत्। सर्वभूतेषु वासुदेवपरायणः"।

तपश्चरणसप्तमीव्रतं भविष्योत्तरे "ऋषयश्चावदन्तो भूत्वा युधिष्ठिर! तपोव्रतम्। मार्गशीर्षादिमासेषु कर्त्तव्यं भूतिमिच्छता। तस्मिन् स्थितो व्रते विप्रो बहूचो वेदपारगः। ब्रह्मवित् ब्रह्मसप्तम्यां दद्याद्यं मधौतले। ऋग्वेदवर्णसंयुतं घटित्वा सूर्यसंयुतम्" इत्यादि।

तपोव्रतं पद्मपु० "माघे सितादुर्वाशाः स्नात्वा सप्तम्यां गोप्रदो भवेत्। स्वर्गलोकमवाप्नोति तपोव्रतमिदीर्यते"।

ताम्बूलसंक्रान्तिव्रतं स्कन्दपु० "अथान्यां सम्प्रवक्ष्यामि ताम्बूलाख्यामनुत्तमाम्। विधानं पूर्ववत् कृत्वाऽन्तसंक्रान्तिवत्तु तत्। ताम्बूलभक्षणाद्यश्च प्रकर्त्तव्या द्विजोत्तमात्। यावत् संवत्सरं पूर्णं रात्रौ रात्रौ ततः परम्। ताम्बूलं भक्षयेद् विप्रान् कारयेच्चैव नान्तरम्। वस्त्रदानं तु कनकं कृत्वा चैव तु काञ्चनम्। प्रतिमोद्यच कुर्वीत तथा पूगीफलान्वितम्" इत्यादि।

तारकद्वादशीव्रतं भविष्योत्तरे "कथं तत् कृष्ण! कर्त्तव्यं तारकद्वादशीव्रतम्। प्राप्तोऽपि बहुतिं प्राप्तो वत्सभावात् खगध्वज!"। कृष्ण उवाच "मार्गशीर्षे सिते पक्षे स्नात्वा द्वादशीव्रतम्। कृत्तिकासु जले स्नानमपराह्णे समाचरेत्। प्रथम्य भास्करं भक्त्या कृत्वा देवार्चनं तथा"।

तिथिनक्षत्रवारव्रतानि कालोत्तरे "नक्षत्रतिथियोगेन तिथीनां वारयोगतः। पुनरेव प्रवक्ष्यामि व्रतानि तु यथोचितम्। रोहिण्याद्वादशीयोगो यदा भवति सोमजे। विशेषपूजा कर्त्तव्या पुत्रकामेन यत्नतः। पुत्रं

शुक्लचतुर्दश्यां गुरुयोगो यदा भवेत्। अत्र वा सोमसंयोगो विशेषात् पूज्य शङ्करम्। पायसं घृतसंयुक्तं शिवाय विनिवेदयेत्। धूपदीपोपहारादैः पूर्ववत् पूजयेच्छिवम्। प्राशनन्तु घृतं कार्य्यं सर्वकामप्रदं व्रतम्। आदित्यरेवतीयोगचतुर्दश्यां यदा भवेत्। अष्टम्यां वा भचायोगो शिवं संपूज्य पूर्ववत्। तिलास्तु प्राशने प्रोक्ता आदित्यव्रतमीरितम्। आरोग्यं जायते तस्य पुत्रवन्धुगणैः सह। रोहिणीचन्द्रयोगश्च चतुर्दश्यां यदा भवेत्। अष्टम्यां सोमसंयोगात् तदा चन्द्रव्रतं चरेत्। प्राग्मुखेन विधानेन शिवं संपूज्य यत्नतः। दधि क्षीरन्तु नैवेद्यं प्राशनं क्षीरमेव च। कीर्त्तिमारोग्यमैश्वर्य्यं प्राप्नुयान्नात्र संशयः। अश्विनीभौमसंयोगचतुर्दश्यां यदा भवेत्। अष्टम्यां भरणीयोगस्तदा भौमव्रतं चरेत्। संपूज्य परया भक्त्या शिवं षड्डोपचारतः। रक्तोत्पलप्राशनन्तु साम्राज्यं प्राप्नुयाच्छुभम्। रोहिणीबुधसंयोगचतुर्दश्यां यदा भवेत्। अष्टम्यां वा समासेन बुधव्रतं समाचरेत्। शिवं पूज्या विधानेन महास्नानपुरःसरम्। महावर्त्तिसमीपे तु प्राशनं पायसंयुतम्। पुत्रार्थदाराश्च यशो वर्द्धते तस्य नान्यथा। रेवतीगुरुसंयोगचतुर्दश्यां यदा भवेत्। अष्टम्यां तिथ्यसंयोगाद् गुरुव्रतं तदा चरेत्। प्राशनं कपिलाक्षन्तु त्रिरात्रोपोषितस्य च। वाग्मीशत्वमवाप्नोति व्रतस्यास्य प्रभावतः। अथवा भार्गवयुतं चतुर्दश्यां यदा भवेत्। शुक्रव्रतं तदा विद्धि पुत्रवर्द्धनमीदृशम्। संपूज्य परमेशानं यथाविभवविस्तरैः। प्राशनं मधु चैवात्र कर्त्तव्यं संयतात्मना। महाफलमवाप्नोति व्रतस्यास्य प्रभावतः। भरणीयोगनियोगस्तु चतुर्दश्यां यदा भवेत्। आर्द्रायोगस्तथाष्टम्यां तदा यमिव्रतं चरेत्। शिवं संपूज्य विधिवत् प्राशनं मधुनैव च। यमिरेकाटमश्नो हि फलं यच्छति शोभनम्। विरुद्धं नश्यते वत्स! तदर्थं व्रतमाचरेत्। क्षेमकृत्यप्रयोगस्तु कम्बलन्तु क्रमेण च। यद्वस्तु तीक्ष्णकौक्षेयं क्रमाद् यत्नेन दापयेत्। यथा सम्भवतो वत्स! आचार्य्याय प्रयत्नतः"।

तिथियुगलव्रतं यमस्मृतौ "द्वेष्टाष्टम्यौ तु मासस्य चतुर्दश्यौ तु ते तथा। अमावस्याप्यथैवमाद्यौ सप्तम्यौ द्वादशीद्वयम्। संवत्सरमभुञ्जानः सततञ्च जितेन्द्रियः। सङ्ख्यार्थं फलं यच्च यतफलं सत्यवादिनाम्। क्रतुशतस्यापि फलं यच्च तदश्नोऽभोजनात्"

तिन्दुकाष्टमीव्रतं भविष्यपु० "ज्यैष्ठे मासि द्विजश्रेष्ठ! शुक्लाष्टम्यां निशोच्यते। यः पूजयति देवेशमीशलोकं व्रजन्नरः। ज्यैष्ठे मासि तथाषाढे श्रावणे च तथा परे। पूजयेच्चतुरोमासान् नीलोत्पलकदम्बकैः। त्रिपुरान्तकरं शम्भुं तत्र्यम्बकाम्बकच्छदनम्। गन्धानाञ्च कदम्बेन पूजयेत् गुग्गुलेन च। टेम्बुरुफलं विप्र! प्राशयेत् कायशोधनम्" टेम्बुरुकन्तिन्दुकफलम्"।

तिलदाहोव्रतं स्कन्दपु० "विधिना केन कर्त्तव्यं तिलदाहोव्रतोत्तमम्। कस्मिन्मासे तिथौ चैव विधिना केन तद्भवेत्" श्रीभगवानुवाच "पौषमासे च या कृष्णा तिथिरेकादशी शुभा। तास्वपोष्य तदा स्नानं कृत्वा नारायणं जपेत्" इत्यादि।

तिलद्वादशीव्रतं विष्णुधर्मोत्तरम् "माघमासे तु सम्प्राप्ते माघार्द्धं भवेद् यदि। मूलं वा कृष्णपक्षस्य द्वादश्यां नियतव्रतः। मध्याह्नोयात् पुण्यफलदं विधानं तस्य मे शृणु!। देवदेवं समभ्यर्च्य स्नातः प्रयतः शुचिः। कृष्णनाम्ना तु सम्पूज्य एकादश्यां महामतिः। उपोषितो द्वितीयेऽह्नि पुनः सम्पूज्य केशवम्। संपूज्य नाम्ना तेनैव कृष्णाख्येन पुनः पुनः। दद्यात्तिलांस्तु विप्राय कृष्णो मे प्रीयतामिति। स्नानप्राशनयोः सोऽस्तास्तथा कृष्णतिला स्मृते!। विष्णुधौपनमन्त्रेण समाप्ते वर्षपारणे। कृष्णकम्बलसंयुक्तैः सार्द्धं पक्वान्नेन च संयुताः। ऋत्विगुपानदुगैः सार्द्धं संधीता रत्नगर्भिणः। ब्राह्मणानां प्रदेयास्ते यथावन्नामसंख्यया" इत्यादि। विष्णुधर्मे व्रतान्तरम् "माघ्यान्तु समतीतायां श्रवणेन तु संयुता। द्वादशी या भवेत् कृष्णा प्रोक्ता सा तिलद्वादशी। तिलैः स्नानं तिलैर्होमं नैवेद्यं तिलमोदकैः। दीपैश्च तिलतैलेन तथा देयं तिलोदकम्। तिलाश्च देया विप्रेषु तस्मिन्नहनि पार्थिव!। उपवासदिने राजन्! स्नातव्यञ्च तथा तिलाः। उपोषितेनापरेऽह्नि स्नातव्यञ्च विशेषतः। दत्त्वा च प्रदातव्यं ब्राह्मणेषु तथा नघ!। तिलप्रस्थं तदा श्रुत्वा सोपवासो जितेन्द्रियः। न दुर्गतिमवाप्नोति नात्र कार्य्या विचारणा" इत्यादि।

तीव्रव्रत सौरपु० "यथात्मचरणौ भित्त्वा शिवचेले वसेन्नरः। ईशानं शिवसायुज्यं लभते नात्र संशयः"।

तुरगसप्तमीव्रतं विष्णुधर्मोत्तरे "चैत्रमासस्य सप्तम्यां शुक्लपक्षे नराधिप!। गोमयेनोपलिप्ते तु स्थण्डिले कृष्णवर्त्मनि। तत्राष्टपत्रं कमलं कर्त्तव्यं वर्णकैः शुभैः।

कृतोपवासस्तन्मध्ये भास्करं पूजयेन्नरः। व्रते समाप्ते दातव्यास्तुरगा ब्राह्मणाय तु। प्राप्यात्रमेधस्य फलं सर्वान्लोकान्व्रजत्यथ पुरन्दरस्य। उपैष्यं राजन्! सचिरञ्च कालं सायुज्यमायाति दिवाकरस्य"।

तृतीयाप्रीतीयाव्रतं विष्णुधर्मोत्तरे "तृतीया सर्वदा कृष्णा या च सर्वफलप्रदा"। सर्वोऽत्र पौर्णमास्यनुलोमादो पाद्यः यतः सर्वफलप्रतीयायाः सर्वयुक्तत्वं न दुर्घटम्। "तस्यां संपूज्य गोविन्दं तृप्तिमत्र्यामवाप्नुयात्"।

तेजःसंक्रान्तिव्रतं स्कन्दपु० "सर्वान्यां सम्प्रवक्ष्यामि तेजःसंक्रान्तिमुत्तमाम्। संक्रान्तिवासरं प्राप्य स्नानं कृत्वा विचक्षणः। शालितण्डुलसंयुक्तं कारयं कारयेच्छुभम्। तन्मध्ये दीपकं स्थाप्य प्रज्वलन्तं स्वतेजसा। तन्मुखे मोदकं स्थाप्य ब्राह्मणाय निवेदयेत्। अर्घ्यञ्च पूर्ववत् कार्यमेकभक्तन्तु पूर्ववत्। संवत्सरे तु संपूर्णे कृष्णां दद्याद्गवं बुधः" इत्यादि।

त्रयोदशद्व्यवधप्रतीयाव्रतं भविष्योत्तरे "भानोर्दिने सिते पक्षे व्यतीते चोत्तरायणे। सर्वोद्दिश्यसिद्धिलक्षयवान् सह मासमुद्गौधूममांसमधुमैथुनकांस्यपात्रैः। अभ्यङ्गनाञ्जनशिलातलचूर्णितानि वर्जयन्ती परिहरेदहनीदिवा। देवान् पितॄन् सनियमान् सजलाञ्जलीभिः सन्तर्प्य पूज्य गगनाङ्गनहस्तदीपम्। स्नात्वानले तिलयवान् बहुयोषिताक्षान् भूमौ क्षिपेत् क्षुदि निधाय दिनेशबिम्बम्। यानि त्रयोदशदिनैरिह वर्जितानि द्रव्याणि तानि परिहृत्य दिने च भक्ष्यान्। संप्राप्य सुदुर्लभकामिह वर्षमेकं प्राप्नोति भारत! पुमान् मनसेप्सितानि"।

त्रिगतिसप्तमीव्रतं भविष्यपु० "सप्तम्यां शुक्लपक्षे तु फाल्गुन्यां वा यजेन्नरः। जपेद्वचोक्तं नाम भक्त्या पुनः पुनः। देवार्चनं वाष्टशतं कृत्वैवं तु जपेच्छुचिः। स्नातः प्रत्यूषकाले तु स्नाने स्वर्चिते शुचौ। पापघ्नान्! पतितांश्चैव तथैवान्यावधारिणः। नाक्षिपेत् तथा भानुमर्चयेच्छ्रद्धयान्वितः। रुद्रोद्धारवेद्वानोमं तथा ध्यानतत्परः। हंस हंस जपाशो! त्वं जगतोनां गतिर्भव। संसाराणवमग्नानां त्राता भव दिवाकर। एवं प्रथमोपवासं कृत्वा निवृतमानसः। पूर्वेद्युः एव वान्येद्युः सकृत् प्राश्नाज्जुनीयकम्" यावुनीयक, गोमूत्रकाभयम्।

त्रिविक्रमतृतीयाव्रतं विष्णुधर्मोत्तरे "शुक्लपक्षे तृतीयायां सोपवासो जितेन्द्रियः। मण्डलत्रितयं कुर्याद् वर्णकेन पृथक् पृथक्। मण्डलं दक्षिणे भागे श्वेतं कुर्यात् ततो नरः। रक्तं मध्ये रवेः कुर्यात् तादृक्श्वेतं ध्रुवस्य तु। विष्णोः पदत्रयं तेषु पूज्यं स्यात् मण्डलेन तु। भूमौ तु प्रथमं पादं द्वितीयं स्वर्गमण्डले। तृतीये तु ध्रुवे देवे पूजयेत् प्रयतः शुचिः"।

वृतान्तरं विष्णुधर्मोत्तरे "हितीयेषु प्रवक्ष्यामि शृणु! त्रैविक्रमं व्रतम्। भूमिस्तु प्रथमः पादः द्वितीयस्तत्र परः। तृतीयो दिवि विज्ञेया देवदेवस्य चक्रिणः। भुवः पतिः स्मृता वह्निरन्तरिक्षस्य चानलः। दिवांपतिस्तथा सूर्यस्तस्य विष्णोः पदत्रयम्। ज्येष्ठे-शुक्लतृतीयायां सोपवासो जितेन्द्रियः। कल्ये कूपजले स्नाता वह्निं संपूजयेन्नरः। एतत् संवत्सरं कृत्वा नरस्त्रैविक्रमं व्रतम्। सर्वकामसमृद्धस्य यत्रस्थ फलमश्नुते"।

वृतान्तरं विष्णुधर्मोत्तरे "वक्ष्यामि ते महाभाग! तव त्रैविक्रमव्रतम्। हतीये सूर्यभाद्रे च! तन्मे निगदतः शृणु!। ज्येष्ठे शुक्लहतीयायां नरः मन्त्रयुपोषितः। भुवः सम्मूजनं कुर्याद्गन्धाद्यातुलेपनैः। दीपैः रत्नैश्च विविधैर्दद्याद् विप्रेषु दक्षिणाम्। बीजपूर्णानि पात्राणि सद्धिरण्यानि भक्तितः। पूजैवमन्तरिक्षस्य माद्यायाढे विधीयते। दक्षिणा तत्र दातव्या तथा वासोयुगं द्विजे। दिवः पूजा च कर्तव्या श्रावणे प्राग्वदेव तु। ऊर्जशोषानहं युग्म दक्षिणां तत्र दापयेत्। एवं मासत्रयेणेह पारणं प्रथमं भवेत्। मासत्रयेण चान्येन ततो मासत्रये पुनः। ततो मासत्रये चान्यैवमन्यत्रचान्यथा। विदेशमित्थं धर्मेण पारणां चतुष्टयम्" इत्यादि।

त्रिविक्रमविरात्रव्रतं विष्णुरहस्ये "वत्सरात्रव्रतं कुर्यात् समुद्दिश्य जनार्दनम्। कृत्वानां शतमादाय स याति भवनं हरेः। नवम्यादितिथे पक्षे नरोमार्गशिरस्य च। प्रारभेत विरात्राख्यं व्रतं तु विधिवत् व्रती। श्रद्धानो जितक्रोधो नित्यस्नायी क्षमान्वितः। अभ्यर्चयेत् सदा विष्णुं कर्मणा मनसा गिरा। अष्टोत्तरसहस्रन्तु व्रतं वासुदिनं जपेत्। अष्टम्यामेकभक्ताशी दिनत्रयमुपावसेत्। एकादश्यां शुचि स्नातो वासुदेवार्चने रतः। द्वादश्यां पूजयेद्देवं गन्धमाल्यविलेपनैः। नैवेद्यधूपदीपाद्यैर्गोतिन्दस्यैव केशवम्। अनेन विधिना कृत्वा त्रिरात्राख्यं व्रतं नरः। निवापयेत् ततो भक्त्या विप्रेष्वि-

धिना व्रतम्। संप्राप्ते कार्त्तिके मासि व्रतमेतदनुत्तमम्। प्रतिमासं त्रिरात्रव्रतिनि पञ्चाशता मासैः यत् तच्चाधिमासहतयोमाच्चतुर्भिर्वैरिति कार्त्तिके समाप्नुयात्।

त्रिविक्रमव्रतं विष्णुधर्मोत्तरे "करोति केशवप्रीत्यै कार्त्तिकं मासमाप्नुयात्। पूर्वं वयसि यत्तेन ज्ञानताऽज्ञानताऽपि वा। पापमाचरितं तस्मात् मुच्यते नात्र संशयः। अनेनैव विधानेन मार्गशीर्षेऽपि साधयेत्। समभ्यर्च्यैकभक्तं वै वर्त्तिभ्यो यः प्रयच्छति दत्तुपक्रमे। त्रैमासिकं व्रतमिदं यः करोति नरेश्वर!। स विष्णुप्रीणनात् पापैर्मुच्यते परिमुच्यते। द्वितीये वत्सरे राजन्! मुच्यते चोपपातकैः। तद्वत् तृतीयेऽपि कृतं महापातकनाशनम्। व्रतमेतत्त्रयैः स्त्रीभिस्त्रिभिर्मासैरनुष्ठितम्। त्रिभिः संवत्सरैश्चैव प्रददाति फलं नृणाम्। त्रिभिर्मासैस्त्रयस्त्रिंशद्विधात् पातकात्नृप!। त्रीणि नामानि देवस्य घोषयन्ति त्रिवार्द्धिकैः। यतस्ततो व्रतमिदं त्रिविक्रमसदाह्वयम्। सर्वपापप्रशमनं केशवाराधनं परम्"।

सौरत्रिविक्रमव्रतं भविष्योत्तरे "समभ्यर्च्य जगन्नाथं देवमेकमथापि वा। एकभक्तादि यो भक्तं हितीयं ब्राह्मणार्पणम्। करोति भास्करप्रीत्यै कार्त्तिकं मासमाप्नुयात्। पूर्वं वयसि यत्तेन ज्ञानताऽज्ञानताऽपि वा। पापमाचरितं तस्मात् मुच्यते नात्र संशयः। व्रतमेतत्त्रयैस्त्रीभिस्त्रिभिर्मासैरनुष्ठितम्। त्रिभिः संवत्सरैश्चैव प्रददाति फलं नृणाम्। त्रिभिर्मासैस्त्रयस्त्रिंशद्विधात् पातकात्नृप!। त्रीणि नामानि देवस्य घोषयन्ति त्रिवार्द्धिकात्। यतस्ततो व्रतमिदं त्रिविक्रमसदाह्वयम्। सर्वभूतप्रशमनं भास्कराराधनं परम्"।

त्र्यम्बकव्रतं पद्मपु० "चतुर्दश्यान्तु नक्ताशी समान्ते गोयुगप्रदः। स यैवं पदमाप्नोति यजन्त्र्यम्बकं व्रतम्"।

दशादित्यव्रतं ब्रह्मखण्डपुरा० "वक्ष्ये सौरव्रतं पुण्यं दुर्दशानाशकरं परं। दशकरं हि भक्तानां मनोरथकरं परं। भानुवारे सिते पक्षे दशम्यां चैव नारद!। प्रातः कालेऽथ मध्याह्ने स्नानं कुर्याद्विधाविधिं" इत्यादि।

दशावतारव्रतं विष्णुपु० "एकादश्यां निराहारो द्वादश्यां पुरुषोत्तमम्। अर्चयेद् ब्राह्मणस्थे च गच्छेत्परमं पदम्। एषा तिथिर्वैष्णवी स्याद्द्वादशीशुक्लपक्षगा। तस्यामाराधयेद्देवं प्रयत्नेन जनार्दनम्"।

दाम्भिकाष्टमीव्रतं भविष्यपु० "कार्त्तिके मासि विप्रेन्द्र! प्रवक्ष्यामि नरोत्तमे!। अष्टम्यां कृष्णपक्षस्य पूजयेद्दिधिवद्विज! उमासहितं शर्वं विधिवद्भुक्तमुक्तम!। य एतत् कुरुते भक्त्या उमामहेश्वरं व्रतम्। सर्वमेवं विप्रेन्द्र! स याति परमां गतिम्"। समेमेकं संवत्सरम् "चतुर्भिः पारणैरेवं समैकमेक कीर्त्तितं बुधैः। प्रयच्छन्ति त्रिभिर्मासैः पारणं कार्त्तिकादिभिः। कार्त्तिके मार्गशीर्षे तु पौषे माघि तथा परे। उन्नतस्य पुण्यैस्तु फलैश्चैरनेकशः"।

दिवाकरव्रतं भविष्यपु० "आदित्यवारं रुक्षेन युक्तं सप्तमीं नाश्नीत पार्थव!। ततः प्रत्यादित्यदिनं सप्त वारान् प्रपूजयेत्। एकभक्तेन नक्ताशी ब्राह्मणान् पूजयेत् दिवा। दक्षिणां तु यथा शक्त्या दद्यात् विप्राय भक्तितः"

दीप्तिव्रतं पद्मपु० "सप्तम्यादीपपदो यस्तु समां तैलञ्च वर्जयेत्। समान्ते दीपकान् दद्याद्धेमं शूलञ्च काञ्चनम्। वस्त्रयुग्मञ्च विप्राय स तेजस्वी भवेदिह। रुद्रलोकमवाप्नोति दीप्तिव्रतमिदं कृतम्"।

दुर्गानवमीभोज्यनाशनत्रयोदशीव्रतं भविष्योत्तरे "ज्यैष्ठे मासि सिते पक्षे त्रयोदश्यां युधिष्ठिर!। स्नात्वा पुष्पनदीतीरे पूजयेद्दुर्गदेवताम्" इत्यादि।

दुर्गानवमीव्रतं भविष्यपु० "नवम्यां तु सिते पक्षे नियतः संयतेन्द्रियः। माघि चाश्वयुजे वीर! कार्त्तिके कार्त्तिकोत्तरे। एभ्यो च पूजयेद् दुर्गां जातिपुष्पैर्विधानतः। धूपार्थं गुग्गुलं दद्याद्वैद्यं गुडपूपकान्। दुर्गेति नाम जप्यं प्रयतोऽष्टशतं नृप!। माघे च फाल्गुने माघि चैत्रे चैत्रोत्तरे नृप!। शुक्लपक्षे तु कर्त्तव्या सुपवासपरायणैः" इत्यादि वर्षसाध्यम्।

दुर्गाव्रतं देवीपु० "देवीव्रतं प्रवक्ष्यामि सर्वकामप्रसाधनम्। श्रावणे शुक्लपक्षे तु अष्टम्यां वायुभोजनः। स्नात्वा सार्द्रपटीभूत्वा जितक्रोधः क्रियान्वितः। देवीं सम्पूज्य तोयेन पुनःक्षीरेण वारिणा। ततो गुग्गुलधूपञ्च सदा कल्पन्तु दापयेत्" इत्यादि तदवधिवर्षसाध्यम्।

दुर्वाष्टमीचतुर्थीव्रतं सौरपु० "चौर्थमेतद् व्रतं सर्वैः पुराकल्पे षडानन!। चतुर्थी वा भवेद्दुर्वा नक्षोमाक्षस्य पुण्यदा। तस्यां व्रतमिदं कुर्यात् कार्त्तिक्यां वा षडानन!। गजाननं चतुर्बाहुमेकदन्तं विघाटिनम्। तथा हैमीमथो दूर्वां तदाधारे व्यवस्थिताम्"। तदाधारे, विघ्नेशासने "संस्थाप्य विघ्नहर्त्तारं कलशे ताम्रभाजने। वेष्टितं रक्तवस्त्रेण सर्वतो भद्रमण्डले। पूजयेच्छुक्लकुसुमैः पत्रिकाभिश्च पद्मभिः। विल्वपत्रमयैर्मार्गैः शमी दूर्वा हरिप्रिया। सोपोष्य तु हरक्षेत्र!

ततो राज्यं भविष्यति। सर्वोपहारसम्पन्नं सर्वोपस्करमाहरेत्। कन्दपक्वं फलं शाकं लवणं गुडशर्करा। घृतं कुसुम्भरी क्षीरं धान्यानि विविधानि च। दातव्यानि द्विजेभ्यश्च! वस्त्रकाञ्चनमेव च"।

दूर्वाविरात्रव्रतं पद्मपु० "ब्रह्मन्! दूर्वाविरात्रस्य विधिं कार्त्स्न्येन शृणुत!। माघशुक्लप्रपद्येव एकभक्तं तथोदगयम्। त्रिरात्रं वत्सरं यावत् पूर्वा तिथिमवेत्। उमामहेश्वरं देवं सावित्रीं धर्ममेव च। दूर्वाभूषे तु संस्थाप्य कलशं कारयेत्ततः" इत्यादि।

दूर्वाष्टमीव्रतं भविष्यपु० "ब्रह्मन्! भाद्रपदे मासि शुक्लाष्टम्यामुपोषितः। दूर्वाश्चेच्छुद्धभक्त्या यो नरः श्रद्धयान्वितः। स याति परमं स्थानं यत्र देवस्त्रिलोचनः। गन्धेश पूजयेत्तस्तु दूर्वया यो हि तं सुने!। क्षीरोपवासं सप्तम्यामष्टम्यां पूजयेच्छिवम्। दूर्वाभमेतं विप्रेन्द्र! दध्यक्षतफलैः शुभैः"। व्रतान्तरं दूर्वाष्टमीशब्दे द्रष्टव्यम्।

देवमूर्तिव्रतं विष्णुधर्मोत्तरोक्तम् "देवानञ्च तथा वक्ष्ये विष्णोश्च समीरणम्। जानीहि यदुशार्दूल! देवमूर्तिव्रतत्रयम्। तेषान्तु रूपनिर्माणं कृत्वा तानर्चयेद् बुधः। गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा। वैत्रैकादशे मासि! प्रतिपत्प्रभृतिक्रमात्। कौपनादेय तोयाग्रकासारैः स्नानमाचरेत्। दद्यात् तिलैर्यवैर्वीहीन् एतेन च तथा भवेत्। कर्पूरं कुङ्कुमञ्चैव तथैवागुरुचन्दनम्। ब्राह्मणेषु प्रदातव्यं तथा राजन्! दिनक्रमात्। दिनत्रयं तथाऽश्नीयात् सायं प्रातरयाचितम्। दिनमेकन्तु नाश्नीयात् व्रतचारी नरोत्तमः। एतत् संवत्सरं कृत्वा व्रतं पुरुषसत्तम। सर्वकामसमृद्धस्य दशस्य फलमश्नुते"।

देवव्रतं पद्मपु० "नक्तमाहरित्वा तु गवा सार्द्धं कुटुम्बिने। हैमशृङ्गं त्रिशूलञ्च दद्याद्विप्राय वाससी। प्रणम्य भक्त्या शक्रञ्च प्रियतां शिवेशयो। एतद्व्रतं नाम महापातकनाशनम्। वत्सरं संवत्सरं पूर्वमेकभक्तो भवेन्नरः। अहिंसा सर्वभूतेषु वासुदेवपरायणः। नमोऽस्तु वासुदेवेत्यष्टशतमेतं जपेत्। पौण्डरिकस्य यज्ञस्य ततः फलमवाप्नुयात। दश वर्षसहस्राणि स्वर्गलोके महीयते। ततश्चादिह चागत्य साम्राज्यं प्रतिपद्यते"। कालोत्तरे व्रतान्तरं "कृष्णप्रतिपदादौ नक्तव्रतं दशम्यां यदा भवेत्। उपोष्य पूजयेत्तस्यां देवदेवं महेश्वरम्। महास्नानप्रकारेण महावस्त्रैः पुरःसरम्। अगुरुरागचन्दनेन शुक्लपुष्पैः प्रपूजयेत्। धूपस्तु सकलो देयः मधुना चन्द्रसंयुतः। सितवस्त्राणि वस्त्रञ्च आचार्याय प्रदापयेत्। जातीफलैः प्राशनञ्च रात्रौ जागरणं हितम्। एतद्देवव्रतं नाम सर्वायुःश्रीकीर्तिवर्द्धनम्"।

देवीव्रतं पद्मपु० "पयोव्रतं पञ्चदश्यां व्रतान्ते गोयुगप्रदः। लक्ष्मीलोकमवाप्नोति देवीव्रतमिदं कृतम्" देवीपु० व्रतान्तरं "क्षीराशी कार्त्तिके वस्तु देव्या मन्दिरतो नरः। शाकप्राशनकृन्नित्यं प्रातःस्नायी शिवारतः। पूजयेत्तिलहोमस्तु मधुक्षीरघृतादिभिः। कार्य्यस्तु देवीमन्त्रेण शृणु पुण्यफलं हरे" इत्यादि।

द्वादशसप्तमीव्रतं भविष्योत्तरे "माघमासात् समारभ्य शुक्लपक्षे सुधिषिरे!। सप्तम्यां व्रतसङ्कल्पो वर्षमेकं व्रती भवेत्" मासभेदे नियमभेदास्तत्रोक्ता द्रष्टव्याः।

द्वादशाध्यतृतीयाव्रतं विष्णुधर्मोत्तरे "मनोऽनुमन्ता प्राणश्च नरयानश्च वीर्य्यवान्। विक्तिहेवो नयश्चैव हंसो नारायणस्तथा। प्रभवो विष्णुरिन्द्रश्च साध्या द्वादश ते स्मृतिरे। तृतीयायां महाभाग! पूजयेत्तानुपोषितः"। प्रत्येकतृतीयायां द्वादशवर्षं सोपवास इति शेषः।

द्वादशादित्यव्रतं विष्णुधर्मोत्तरे "धाता मित्रोऽर्यमा पूषा शक्रोऽंशोभगस्त्वष्टा। त्वष्टा विवस्वान् सविता विष्णुर्द्वादशकस्तथा। पूजयेद् द्वादशादित्यान् शुक्लपक्षे समोषितः। मार्गशीर्षादिमारभ्य द्वादश्यां नियतव्रतः"।

द्वादशीव्रतं कूर्मपु० "एकादश्यां निराहारो द्वादश्यां पुरुषोत्तमम्। अर्चयेद् ब्राह्मणमुखे च गच्छेत्परमं पदम्। एषा तिथिर्वैष्णवी स्याद् द्वादशी शुक्लपक्षगा। तस्मात्माराधयेद्देवं प्रयत्नेन जनार्दनम्"।

द्वीपव्रतं विष्णुधर्मोत्तरे "यथातः संप्रवक्ष्यामि द्वीपव्रतमनुत्तमम्। चैत्रशुक्लात्तथारभ्य प्रत्यहं दिनसप्तकम्। जम्बूशाककुशक्रौञ्चशाल्मलिद्वीपसंज्ञितम्। गोमेदं पुष्करञ्चैव प्रत्यहं पूजयेत् क्रमात्। नित्यमेव सदा स्नानं बहिरेव समाचरेत्। अधःशायी भवेच्चित्यं तदेव दिनसप्तकम्" इत्यादि।

धनसंक्रान्तिव्रतं स्कन्दपु० "धनसंक्रान्तिमाहात्म्यं शृणु स्कन्द! विधानतः। यत्कृत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः। संक्रान्तिवासरं प्राप्य शुचिर्भूत्वा समाहितः। कलशं निर्व्रणं दृष्ट्वा वारिपूर्णं निधापयेत्। सुवर्णयुक्तं कृत्वा प्रतिमाञ्च दापयेत्। विधिनानेन वर्षान्ते प्रीयतां मे दिवाकरः"।

धनाप्तिव्रतं धर्मोत्तरोक्तम् "भगवन्! कर्मणा केन धनवान्

पुरुषो भवेत्। पुत्रवान् देवलोकेषु पूज्यो भवति मानवः"। इति प्रश्ने "श्रावण्यां समतीतायां प्रतिपत्प्रभृति क्रमात्। पूर्ववत् पूजयेद्विष्णुं देवं सङ्कर्षणं विभुम्" इत्यादि।

धन्यव्रतं वराहपु० "अथातः सम्प्रवक्ष्यामि धन्यव्रतमनुत्तमम्। येन सद्यो भवेद्धन्योऽधन्योऽपि हि यो भवेत्। मार्गशीर्षेऽमले पक्षे प्रतिपद् या तिथिर्भवेत्। तस्यां नक्तं प्रकुर्वीत रात्रौ विष्णुञ्च पूजयेत्" इत्यादि।

धराव्रतं पद्मपु० "यो विंशतिपलादुर्वीं सहीं कृत्वा तु काञ्चनीम्। दिनं पयोव्रतं दद्याद्दृष्टलोके महीयते। धराव्रतमिदं प्रोक्तं सप्तकल्पशतानुगम्"। दिनं देवानामुत्तरायणम्। पयोव्रतमित्यनन्तरं कृत्वेत्यनुषङ्गः। रुद्रो देवता धरादानं पारणम् इत्यादि।

धर्मव्रतं विष्णुधर्मोत्तरे "शुक्लपक्षे दशम्यां तु सोपवासस्तु मानवः। धर्मं सम्पूजयेद् देवं सर्वलोकसुखावहम्"।

धान्यव्रतं स्कन्दपु० "अथातः संप्रवक्ष्यामि धान्यव्रतमनुत्तमम्। यत् कृत्वा हि नरो राजन्! सर्वकामानवाप्नुयात्। अयने विषुवे चैव स्नानं कृत्वा विचक्षणः। व्रतस्य नियमं कृत्वात्मवान् देवं दिवाकरम्। रविम्प्रार्च्य ततो दद्याद्धान्यप्रस्थं द्विजातये। प्रतिमासं पुनस्तद्वत् पूज्यो देवः सहस्रपात्। एवं सदा प्रदातव्यं धान्यप्रस्थं द्विजन्मने। एवं संवत्सरे पूर्णे कुर्याद्धोमोपनक्रियाम्"।

धान्यसप्तमीव्रतं भविष्यपु० "संपूज्य सितसप्तम्यां भानुं धान्यानि सप्त च। ददाति नक्तभुक् गेहे सर्वधनेन समन्वितम्"। गेहे गृहस्थोपकरणम् "स तारयति सप्तान्यात् कुलानात्मानमेव च। सुत! धान्यव्रतं नाम व्रतं धान्यसुखप्रदम्"।

धामत्रिरात्रव्रतं पद्मपु० "त्रिरात्रोपोषितो दद्यात् फाल्गुन्यां भवनं शुभम्। आदित्यलोकमाप्नोति धामव्रतमिदं स्मृतम्"।

धारावतं भविष्योत्तरोक्तम् "चैत्रारम्भात् पिबेल्लोयङ्गलधारां प्रपातदेत्। वर्षान्ते घृतसंपूर्णान्द्याद्धेनूनिकां नवाम्। घृतधारावतं नाम सर्वाहे सङ्करं परम्। कान्तिसौभाग्य जनन सर्वसौख्यं नयनम्"।

ध्वजनवमीव्रतं भविष्योत्तरे "पौषस्य शुक्लपक्षे तु नवमी भद्रदा स्मृता। तस्यां स्नात्वा शुभैः पुष्पैरर्चनीया सुरैः सदा। कुमारी भगवान् देवो सिंहस्कन्दगामिनी। ध्वजान् नानाविधान् कृत्वा पुरतस्तस्य पूजयेत्। माल्यैर्धूपैर्दीपैर्गन्धैर्नृत्यैर्विलेपनैः। बलिभिः पशुभिर्मेध्यैः सुरामांसफलान्वितैः। दधिचन्दनपूपैश्च फलैश्चानन्विताचितैः। देवीं स्वर्णमयीं कृत्वा सिंहारूढां चतुर्भुजाम्। खड्गशक्तिधरां शूलधरां नेत्रत्रयान्विताम्"। (पूजयेत्)

ध्वजव्रतं विष्णुधर्मोत्तरोक्तम् "चैत्रे तु प्रथमं मासि गरुडं पूजयेद्धरः। घोतेन गन्धनैवेद्यमाल्यवस्त्रादिना द्विज!। वैशाखे च तथा मासि तालं संपूजयेत्सदा। नीलेन गन्धनैवेद्यमाल्यवस्त्रादिना द्विज!। ज्यैष्ठे च प्रथमं मासि मकरं पूजयेत् सदा। श्वेतेन गन्धनैवेद्यमाल्यवस्त्रादिभिर्द्विज!। अश्वं संपूजयेद्देवं माघमासे यथाविधि। रक्तेन गन्धनैवेद्यमाल्यवस्त्रादिना द्विज!। बहिः स्नानं तथा कुर्याद्विप्रसंपूजनं तथा। नित्यञ्च कुर्याद्धोमञ्च! तथा ब्राह्मणभोजनम्। पारणार्थं तथा कुर्याच्चक्रं तैलविवर्जितम्। अधःशायी तथा चैव ब्रह्मचारी सदा भवेत्। व्रतमेतन्नरः कुर्यात् सम्यङ्नाम चतुष्टयम्। ब्राह्मणान् पूजयेच्छक्त्या आषाढे परमेऽहनि। वस्त्राण्युक्तानि धर्मज्ञ! दद्याद्विप्रेषु दक्षिणाम्। कृत्वैकं पारणं राजन्! स्वर्गलोके महीयते। द्वितीयं पारणं कृत्वा यज्ञलोके महीयते। तृतीयं पारणं कृत्वा ब्रह्मलोके महीयते। कृत्वा तूर्यं पारणन्तु रुद्रलोके महीयते। विष्णुलोकमवाप्नोति कृत्वा द्वादशपारणम्। ध्वजव्रतं द्वादश वत्सराणि कृत्वा नरो मार्गवबंधसुख!। सायुज्यमाप्नोति जनार्दनस्य देवस्य विष्णोः परमेश्वरस्य"।

नक्षत्रतृतीयाव्रतं स्कन्दपु० "विनायकचतुर्थ्याख्यं व्रतं वक्ष्यामि तेऽनघ!। धन्यं यशस्यमायुष्यं समीहितफलप्रदम्। विघ्नापशमनायाशु सर्वसिद्धिप्रदायकम्। प्रियं गणपतेर्नित्यमृषिभिश्चाप्युपासितम्। मार्गशुक्लचतुर्थ्यान्तु व्रतमिदं सदृत। नक्ताहारेण विप्रेन्द्र! तिलान्नं पारणं स्मृतम्। तदेव वह्नौ होतव्यं ब्राह्मणाय ददेत् सदा। सदा सदे वा नैवेद्य विघ्नराजाय संयमी। पूजयेत् गणपतिं रात्रौ गन्धैः पुष्पैर्यथाक्रमम्"

नक्षत्रपुरुषव्रतं मत्स्यपु० "नक्षत्रपुरुषं नाम परं नारायणार्चनम्। पादौ हि कृत्तिकाविद्धिष्ण्यनामानि कोर्त्तयेत्। प्रतिमां वासुदेवस्य मूर्द्धाद्यभिपूजयेत्। चैत्रमासं समासाद्य कृत्वा ब्राह्मणवाचनम्। मूले नमो विश्वधराय पादावनन्तदेवाय च रोहिण्यां। जङ्घे च पूज्ये वरदाय चैव ह्येजानुनी चाश्विकुमारकौ। पूर्वोत्तराषाढयुगे च पादौ नमः शिवायेत्यभिपूजनीयौ" इत्यादि।

नक्षत्रार्थव्रतं देवीपु० "अतःपरं प्रवक्ष्यामि रूपसौभाग्यकारकम्। नक्षत्रविधिगं वत्स! यथा दृष्ट्वर्तिं यदुरो। मृगादारभ्य मूलेन यादौ जातिस्रजा पुरा। पूजयेत्सोपवासस्तु नक्षत्रान्ते तु पारणम्। यवान्नं हविषा सिद्धं ब्राह्मणे जङ्गे प्रपूजयेत्" इत्यादि।

नदीव्रतं विष्णुधर्मोत्तरे "चैत्रशुक्लादवारभ्य प्रत्यहं दिनसप्तकम्। तुदिनीं तुदिनीचैव पावनीं चैव पूजयेत्। सोतां चेक्षुं तथा सिन्धुं तथा भागीरथीं क्रमात्। वह्निःस्नानं तथा कुर्यात्तिलं नक्षत्रतो भवेत्। जले च जुह्वतां क्षीरं शान्तात्मा च दिने दिने। क्षीरपूर्णांश्च दातव्या वारिधान्नो द्विजातिषु। क्षीरायनस्य तिष्ठेत तत्तथा दिनसप्तकम्। एवं संवत्सरं कृत्वा पूर्णं संवत्सरे नरः। द्विजातिषु ततो दद्याद्धेनवस्य पलं शुभम्। फाल्गुनस्यासिते पक्षे सप्तम्यां दिवसे क्रमात्। तं लोकमवाप्नोति नरो यत्र पावकदर्भाः" इत्यादि।

नन्दव्रतं विष्णुधर्मोत्तरे "शुक्लपक्षे महाराजं त्रयोदश्यामुपोषितः। फाल्गुनात्तु समारभ्य नित्यं संपूजयेद्धरः"। महाराजन्तु धनदम्। "गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा। सुवर्णं ब्राह्मणेन्द्राय व्रतान्ते प्रतिपादयेत्। कृत्वा व्रतं वत्सरमेतदिष्टं पक्षेषु राजन्! सुचिरं सुखेषु। मानुष्यमासाद्य धनान्वितः स्यात् सौभाग्ययुक्तश्च तथा विरोगः"।

नन्दादित्यव्रतं भविष्योत्तरे "यस्यादित्यपक्षेषस्य वारो देवस्य सुव्रतः। पूजयेत् स प्रियो नित्यं ख्यातो भानुतिभूषणः (शिवः)। वस्तु संपूजयेच्चित्यं पतङ्गं पन्नगाधिपम्। गन्धपुष्पादिधूपैस्तु सोत्तरैर्वा विधिपूर्वतया। सोपवासो मघश्रेष्ठ! आदित्यपक्षे शुचिः। जपमानो महामन्त्रं यथाशोक्तपदाधिपम्। ब्राह्मणान् भोजयित्वा तु ततो भुञ्जीत वाग्यतः। आदित्यपक्षयुक्ते ऽस्मिन् वारे त्रिपुरसूदनः। तत्र कर्म कृतं पुण्यं तत्सर्वं शुभदं भवेत्"।

नन्दाव्रतं देवीपु० "मासे नभसि संप्राप्ते नक्षत्रारो जितेन्द्रियः। प्रातःस्नायी सदाध्यायी अग्निकार्यपरायणः। देवीं संपूजयेदत्र! बिल्वपत्रागचम्पकैः। धूपन्तु गुग्गुलं दद्यान्नैवेद्यं एतदर्पितम्। क्षीरान्नं दधिभक्तञ्च अथवा शाकवाटकम्। जपञ्च कुर्यान्मन्त्रस्य सहस्रमथवा शतम्। दैव्यास्तत्र समर्थैतत् यावत् पूर्णं व्रतम्चरेत्"।

नन्दसप्तमीव्रतं भविष्योत्तरे "या तु मार्गशिरे मासि शुक्लपक्षे तु सप्तमी। नन्दा सा कथिता वीर! सर्वानन्दकरी शुभा। पञ्चम्यामेकभक्तं तु षष्ठ्यां नक्तं प्रकीर्त्तितम्। सप्तम्यामुपवासस्तु कीर्त्तयन्ति मनीषिणः। मालतीकुसुमानीह सुगन्धं चन्दनं तथा। कर्पूरागुरुसंमिश्रं धूपञ्चात्र विनिर्दिशेत्। दध्योदनं सघृतञ्च नैवेद्यं भास्करप्रियम्। तदेव दद्याद्विप्रेभ्यो भक्षीयाच्च स्वयं यथा"।

नयनपञ्चमीव्रतं भविष्यपु० "या मार्गशीर्षे सितपञ्चमेऽह्नि हस्तसंयोगे जगतः प्रसूतिम्। संपूज्य भानुं विधिनोपवासो सगन्धपुष्पाक्षतधूपहारैः। घृतौदनाग्र्यं प्रतिवत्सपूजादानादियुक्तं व्रतमत्र्दमेकम्" इत्यादि।

नरकपूर्णिमाव्रतं विष्णुधर्मोत्तरोक्तम् "प्रतिमासन्तु नामानि पञ्चदश्यां जगत्पतेः। क्रतोपवासः स्नातः पूजयित्वा जगद्गुरुम्। उद्धारयन्नरोयाति सुखेनैव गच्छति। यद्वा मासमतं नाम प्रीयतामिति कीर्त्तयेत्। केशवं मार्गशीर्षे तु पौषे नारायणं तथा। माधवं माघमासे तु गोविन्दमपि फाल्गुने। चैत्रे विष्णुञ्च वैशाखे कीर्त्तयेन्मधुसूदनम्। ज्येष्ठे त्रिविक्रमं देवं तथाषाढे च वामनम्। श्रीधरं श्रावणे मासि हृषीकेशं ततः परम्। नाम भाद्रपदे तद्वत् ज्ञायते पुण्यकाङ्क्षिभिः। तदद्दश्वयुजे मासि पद्मनाभेति कीर्त्तयेत्। दामोदरं कार्त्तिके च सर्वान्नरति दुर्गतिम्। एवं मासक्रमेणैव यदि दातुं न शक्यते। तदा संवत्सरान्ते दद्यादेव समागतम्"।

नरसिंहचतुर्दशीव्रतं नरसिंहपु० "वैशाखशुक्लपक्षे तु चतुर्दश्यां समाचरेत्। मध्याह्नसमयं पुण्यं व्रतं पापप्रणाशनम्। वर्षे वर्षे तु कर्त्तव्यं मम सन्तुष्टिकारकम्। महापुण्यमिदं श्रेष्ठमानुषैर्देवभोरुभिः। तेनैव क्रियमाणेन सहस्रादशोफलम्। जायते सत्सखा वह्निः मानुषाणां महात्मनाम्। ज्ञातोनज्ञवयोगेन प्रतिहारेण संयुते। सिद्धियोगस्य संयोगे वाणिज्ये करणे तथा। पुण्यसौभाग्ययोगेन लभ्यते दैवयोगतः। सर्वैरेतैस्तु संयुक्तं कृत्वाकोटिविनाशनम्। एतदन्यतरे योगे तद्दिनं पापनाशनम्। केवले तत् प्रकर्त्तव्यं महिने व्रतमुत्तमम्। अन्यथा नरकं याति यावच्चन्द्रदिवाकरौ। यथा यथा प्रवृत्तिः स्यात्प्रातःकाले कलौ युगे। तथा तथा प्रवर्त्तन्ति तद्व्रतस्य प्रभावतः। सद्व्रतस्य प्रभावेन मतिर्न स्याद् दुरात्मनाम्। विचार्यं तत्र प्रकर्त्तव्यं माधवे मासि सद्व्रतम्"।

नरसिंहचतुर्दशीव्रतं नरसिंहपु० "शुक्लपक्षे चतुर्दश्यामयाचितः। तर्पयित्वा देवपितॄन् क्षपेत् नियतेन्द्रियः। नरसिंहं समभ्यर्च्य यः करोत्युपवासकम्। सर्वपापविनिर्मुक्तो विष्णुलोके महीयते"।

नरसिंहव्रतं गरुडपु० "अथाष्टमीव्रतं ब्रह्मन्! प्रोच्यमानमिदं शृणु!। भवविध्वंसनं नृणां सर्वोत्कर्षकरं परम्। राजा वा राजपुत्रो वा यदि चेद्दृढमानसम्। तटाकस्थान्तु संस्नातो ववाससं प्रकारयेत्। कृत्वोदुदकं पद्मं तण्डुलैर्वा प्रसूनकैः। कर्णिकायामथेशानं नरसिंहाकृतिं स्मरेत्" इत्यादि।

नवम्याद्युपवासव्रतं मत्स्यपु० "नवमी चाष्टमी चैव पौर्णमासी चतुर्दशी। यो भुङ्क्ते देवि, तेषु सुपर्वसु नरः सदा। गार्हस्थ्यं स लभते निःसपत्नमनिन्दितम्"।

नवरात्रिव्रतं देवीपु० "सौभाग्यार्थं स्त्रिया कार्य्यमार्यैश्च धनकाङ्क्षिभिः। महाव्रतं महापुण्यं ब्रह्मरुद्रैरुदाहृतम्। कर्त्तव्यं देवराजेन्द्र! देवीभक्तिसमन्वितैः। कन्यासंस्थे रवौ शक्र! शुक्लादारभ्य नन्दिकाम्"। नन्दिकाम् प्रतिपदम् "यवाशीलश्चैकाशी नक्ताशीलश्च वा पुनः। प्रातःस्नायी जितक्रुद्धस्त्रिकालं शिवपूजकः। जपहोमसमासक्तः कन्यका भोजयेत् सदा। कार्य्या नवमिताः दारुजानि शुभानि च। एकं वा द्विविभागेन कारयेत् सुरसत्तम!। तस्मिन् देवीं प्रकर्त्तव्यां हैमीं वा राजतीं च वा। युद्धकालक्षणोपेतखड्गशूलेन पूजयेत्। सर्वोपहारसम्पन्नैस्तत्तत्फलादिभिः। कारयेद्वृषदोलादिपूजाश्च विविधैर्विधीम्" इत्यादि।

नागदष्टोद्धरणपञ्चमीव्रतं भविष्योत्तरे "उपोष्य पञ्चमीं सम्यक् नागानां बलवर्द्धनम्। सर्वमेकमेकं यावच्च विधानं शृणु भारत!। समेकं संवत्सरम् "मासि भाद्रपदे राजन्! शुक्लपक्षे तु पञ्चमी। सापि पुण्यतमा प्रोक्ता ब्राह्मणो गतिकाम्यया। चतुर्थ्यामेकभक्तञ्च तस्यां नक्तं प्रकीर्त्तितम्"। तस्यां पञ्चम्यामुपोष्येति दिवा भोजनवर्जनात् "कृत्वोडुन्द्रमसं नागमथ वा कनकोद्भवम्। अथ दारुमयं भव्यं मृण्मयं वाप्यशक्तितः। चान्द्रमसं सौवर्णं कनकोद्भवम्। पञ्चम्यामर्चयेद् भक्त्या नागं पञ्चफणन्तथा। करवीरैस्तथा पद्मैः जातीपुष्पैः सुगन्धिभिः। गन्धैर्धूपैः सनैवेद्यैः लाजैः क्षीरादिभिर्नरैः। ब्राह्मणान् भोजयेत्पश्चात् घृतपायसमोदकैः। अनन्तं वासुकिं शङ्खं पद्मं कम्बलमेव च। तथा कर्कोटकं नागं नागमश्वतरं तथा। धृतराष्ट्रं शङ्खपालं कालियं तक्षकं तथा। पिङ्गलञ्च महानागं मासि मासि क्रमाद् यजेत्"।

नागपञ्चमीव्रतं भविष्यपु० "नागानिहा तु पञ्चम्यां न विषैरभिभूयते। स्त्रियं च लभते पुत्रं परमां श्रियमाप्नुयात्। मूलमन्त्राः सदंष्ट्राभिरङ्गमन्त्राय कीर्त्तिताः। पूर्ववत् पद्मपत्रस्थः कर्त्तव्यश्च शिवेश्वरः"। शिवेश्वरोऽत्र नागः "गन्धपुष्पाक्षतैरस्य सकाशक्ति विधीयते। पूजाऽशाखेन शास्त्रेण जातापि तु फलप्रदा। आज्यधारासमिश्रेण दधिक्षीरान्नसक्तिकैः। पूर्वोक्तफलदो होमो यतः शान्तेन चेतसा। एतद्व्रतं वैश्वानरप्रतिपदतवद् व्याख्येयम्"।

नागव्रतं कूर्मपु० कार्त्तिकशुक्लपञ्चमपक्षस्य "तिथौ युगाङ्गवायान्तु समुपोष्य यथाविधि। शङ्खपालादिनागानां भेषजस्य च सर्वज्ञः। पूजां कार्य्या पुण्यगन्धक्षीराद्यायनपूर्वकमिति"। युगाङ्गवायाङ्गदर्श्यां प्रातर्मध्याह्नव्यापिन्यान्तु कर्त्तव्यम्" तथा च स्कन्दपुराणे "प्रातर्मध्यन्दिने तत्र तत्रोपोष्य फणीश्वरान्। क्षीरेणाथाथ पञ्चम्यां पारयेत् प्रयतो नरः। विधाय तस्य नश्यन्ति न तं हिंसन्ति पन्नगाः"।

नानाफलपूर्णिमाव्रतं विष्णुधर्मोत्तरे "प्राप्य पञ्चदशीं राम! तथा शुक्लाञ्च कार्त्तिकीम्। चतुरश्रमष्टभित्तिं वै उभयोश्च समालिखेत्। तस्य द्वारि मध्ये चापि नानावर्णैस्तु वर्त्तिकम्। मध्योपकरणं शक्त्या तत्रैवाभितो लिखेत्। पीतं वृत्तसमाक्रान्तं सकर्णीसूत्रनासिकम्। ततस्तो पूजयेद्धीरो स्नात्वा भक्त्यैरा शुचिः"।

नामतृतीयाव्रतं भविष्योत्तरे "उपवासस्य नियमं मत्तो शृणुयात् भक्तिभावितः। देवीं संवत्सरं यावत् तृतीयायामुपोषितः। प्रतिमासं चरिष्यामि पारणञ्चापरेऽहनि। तदविघ्नेन मे याहु समाप्तिं व्रतमुत्तमम्। शरणं त्वां प्रपन्नास्मि दौर्भाग्याद्दुरत्यय मम्। एवं कृत्वात्र विधिवत् कौन्तेय! कृतनिश्चया। भक्त्या नारी ध्यानपरा स्नानं कृत्वा जितेन्द्रिया। नद्यां तडागे वाप्यां वा गृहे वा नियतेन्द्रिया। पूजयेत् पार्वतीं नाम्ना रात्रौ प्राप्य कुशोदकम्। प्रभाते भोजयेत् विप्रान् शिवभक्तान् विशेषतः। पौषे मासे तृतीयायां गिरिजां नाम पूजयेत्। सोमूलं प्राशयेद्रात्रौ प्रभाते भोजयेद् द्विजान्" इत्यादि। भविष्यपु० मतान्तरम् "गौरी

काली२ उमा३ भद्रा४ दुर्गा५ कान्ति६ सरस्वती७। मङ्गला८ वैष्णवी९ लक्ष्मी१० शिवा११ नारायणी१२ क्रमात्। मार्गतृतीयामारभ्य पूजयेत् स्वर्गभाक् भवेत्"। मार्गशीर्षतृतीयामारभ्य प्रतिमासमेकैकेन नाम्ना पूजयेदित्यर्थः "अर्द्धनारीश्वरं रुद्रमथ वा उमाशङ्करम्। पूजयेद्विधिवद्वारी वियोगमवाप्नुयात्"।

नामद्वादशीव्रतं विष्णुरहस्ये "मार्गशीर्षे शुभे मासि शुक्लपक्षे व्रतव्रतः। प्रथमञ्चैव सङ्गीयात् द्वादशीं विधिवद्वरः। कारवेच्च हरेर्यत्नमाचार्यादौविधानतः। अर्चयित्वा हरिं तत्र लब्धानुज्ञां द्विजन्मनः" इत्यादि।

नामनवमीव्रतं भविष्यपु० "नवम्यां शुक्लपक्षे तु कृते नक्तं विशेषतः। मासि चाश्वयुजे वीर! दुर्गादेवीति पूजयेत्। बिल्वपत्रैस्तथाङ्गिच द्रोणपुष्पैस्तु सर्वशः। गुग्गुलेनाथ दुग्धेन भक्ष्यभोज्यैरनेकशः। परमान्नेन रत्नेन महिषाजैर्विधातितैः। सम्पूजनं तथा कृत्वा देव्या वै भक्तिमाचरन्। भोजयित्वा नवम्यां तु ब्राह्मणान् तु कन्यकाः। ब्राह्मणानां सन्निधत्र यथा भवति भक्तितः। पश्चाद्गत्वं ततः प्राश्य नक्तं भुञ्जीत वाग्यतः। य एवं पूजयेदत्र दुर्गां भक्त्या समन्वितः। सोऽश्वमेधसहस्रस्य फलं प्राप्य दिवं व्रजेत्। कार्यमाश्विनवत् सर्वं कार्त्तिकेऽपि हि सत्तम!। कृत्वोपवासमष्टम्यां मासि मार्गशिरे नृप!। नवम्यां पूजयेद्देवीं भक्त्या भगवतीं बुधः" इत्यादि। वर्षसाध्यमिदम्।

नामसप्तमीव्रतं भविष्योत्तरे "चैत्रात् प्रभृति कर्त्तव्या सर्वदा नामसप्तमी। धातेति मधुमासे तु पूजनीयो दिवाकरः। अर्यमेति च वैशाखे ज्यैष्ठे मित्रः प्रकीर्त्तितः। आषाढे वरुणो चैव इन्द्रो नभसि कथ्यते। विवस्वांश्च नभस्ये तु पर्जन्योऽश्वयुजि स्मृतः। पूषा कार्त्तिकमासे च मार्गशीर्षे तु कथ्यते। भगः, पौषे विवस्वांश्च त्वष्टा माघे तु कथ्यते। विष्णुस्तु, फाल्गुने मासि पूज्यो वन्द्यश्च भास्करः। सप्तम्यां चैव सप्तम्यां भोजयेद्भोजकान् बुधः"।

निम्बभास्करसप्तमीव्रतं प्रथमं भविष्यपु० "स्वयं भक्त्या तु या नारी ध्रुवं सा पुरुषो भवेत्। स्त्री चैवाप्नुयात् सम्यं नाथं यत् कृत्वा सुखते ध्रुवम्। निम्बभास्करव्रतं भानोः सदा प्रीतिविवर्द्धनम्। वियोगकरं वीर! धर्मकामार्थसाधकम्। सप्तम्यामथ षष्ठ्यां वा संक्रान्तौ भानवे दिने। हविषा हविषा होमं क्षीरवासाः समाचरेत्। निम्बभास्करं चैवाग्नौ कृत्वा सर्वमयीं शुभाम्। रात्रौ वाथ वार्चां वा स्थापयेत् स्वतादिभिः"। निम्बभास्कर्यमन्त्रो तयो सङ्क्षिप्तोऽर्कः। हितीयम् "या मोक्ष्यं पश्यसेदेवं कृष्णमेकान्तु सप्तमीम्। सा गच्छेत् परमं स्थानं भानोरमिततेजसः। वर्षान्ते प्रतिमां कृत्वा गाङ्गिपिष्टमयीं शुभाम्। पीतानुलेपनैर्माल्यैः पीतवस्त्रैः प्रपूजयेत्। पूर्वोक्तं निखिलं कृत्वा भास्कराय निवेदयेत्। सर्वभूमौ महीपालो धातुचामीकरप्रभः। वर्षकोटिसहस्राणि सूर्यलोके महीयते"। इतीयम् "सप्तम्यां वा निराहारो भवेदष्टम्यन्विता। नक्तं पिष्टमयं कृत्वा वर्षान्ते विनिवेदयेत्। विधाय राजन पद्मं सुवर्णकृतकर्णिकम्। भक्त्या विन्यस्य तत्पृष्ठे सर्वं पूर्ववदाचरेत्। कामतोऽपि कृतं पापं भूणहत्यादि यद्भवेत्। तत् सर्वं गजदानेन लीयते नात्र संशयः"। चतुर्थम् "कृष्णपक्षे तु माघस्य सप्तम्यां या व्रतव्रता। वर्षैकसुपवासेन सर्वभोगविवर्जिता। वर्षान्ते सर्वगन्धोत्थं निम्बभास्कं निवेदयेत्"।

निम्बैकादशीव्रतं भविष्योक्तम् "वृश्चिके निम्बनक्षत्रे शुक्ला चैकादशी भवेत्। ज्यैष्ठे माघि प्रयत्नेन सोपोष्या लवर्जितैः। स्नाने चाचमने चैव वर्जयित्वोदकं बुधः। उपभुञ्जीत दैवाद्व्रतभङ्गोऽन्यथा भवेत्। उदयाद्व्रतं यावद्भर्जयित्वा जलं बुधः। अप्रयत्नादवाप्नोति द्वादशीं द्वादशीवरः। ततः प्रभाते विमले द्वादश्यां स्नानमाचरेत्। जलं सुवर्णं दत्त्वा तु द्विजातिभ्यो यथाविधि। भुञ्जीत कृतकृत्यस्तु ब्राह्मणैः सहितो बुधो। एवं कृते तु यत् पुण्यं भीमसेन! शृणुष्व तत्। संवत्सरस्य या मध्ये एकादश्यो भवन्त्युत। तासां फलमवाप्नोति यत्र मे नास्ति संशयः"।

नीराजनद्वादशीव्रतं भविष्योत्तरे "कार्त्तिके शुक्लपक्षस्य द्वादश्यां रजनीमुखे। समुत्थिते विनिद्रे तु देवे दामोदरे तथा। दोषान्ते नरनारीभिरभ्ये स्त्री वा सुरालिके। जनयित्वा नरं विष्णुं कृत्वा मन्त्रैर्हिलोत्तमैः। सार्द्धमानतपुष्पाभिर्दीपिकाभिर्द्वितागनम्। कृत्वा मङ्गलनाः सर्वे हरिं नीराजयेच्छनैः। पुष्पैरभ्यर्चितं देवं समालभ्य च चन्दनैः। वदरैः कदलैश्चैव नृपसैरिक्षुभिस्तथा। मन्त्रैः पुष्पैरलङ्कारैर्वस्त्रैश्च पूजितैः। तस्यैवानुगतां लक्ष्मीं ब्राह्मणं चक्षिकां तथा। आदित्यं गुरुं गौरीं यज्ञं गणपतिं महान्। मातरः

पितरो गावः सर्वा नीराजयेत् क्रमात्। सर्वां नीराजनं कुर्यात् महिष्यादेव मण्डलम्। श्यामलेच्छासवेच्छद्वैर्घण्टावादनच्छादनैः"।

ऋषिसंहादशीव्रतं धरणीव्रतोक्तम् "तद्वत् फाल्गुने मासि कृष्णपक्षे तु द्वादशी। यथोक्त विधिना हरिमाराधयेद् बुधः। नरसिंहाय पादौ तु गोविन्दायोदरं तथा। कटिं विश्वभुजे तद्वदनिरुद्धाय चोदरम्। कण्ठन्तु क्षितिकण्ठाय पुरुषोत्तमाय वै शिरः। अक्षरध्वंसनायेति चक्रमोष्ठालने तथा। शङ्खमिलेव सम्पूज्य गन्धपुष्पफलैस्तथा। रत्नगर्भं घटे स्थाप्य तं संपूज्य विधानतः। द्वादश्यां वेदविदुषे ब्राह्मणाय निवेदयेत्। एवं कृते फलं प्राप्तं यत् पुरा पार्थिवेन च" इत्यादि।

पञ्चसन्धिव्रतं पद्मपु० "प्रतिपद्येकभक्ताशी वामनं कपिलाप्रदः। वैश्वानरपुरं याति व्रतं वैश्वानरन्त्विदम्। मृण्मयीं भाजनं कृत्वा यो भुङ्क्ते पञ्चसन्धिषु। अहोरात्रेण चैवेनातिरात्रफलमश्नुते"।

पञ्चघटपूर्णिमाव्रतं भविष्योत्तरे "पञ्च पञ्चदशीः स्थित्वा एकभक्तेन मानवः। संपूज्य पूर्णिमां देवीं लिखितां चन्द्रमादिनां"। पूर्णिमाप्रतिमा तु परिभाषायां दृश्या। "ततः पञ्च घटान् पूर्णान् पयोदधिघृतेन च। मधुना सितखण्डेन ब्राह्मणायोपपादयेत्। मनोरथान् पूरयेच्च यथा त्वं पूर्णिमा ह्यसि। पञ्चकृत्वःप्रदानेन भूतानां तृप्तिरस्तु मे। इत्युक्त्वैवं नमस्कृत्य सर्वान् कामानवाप्नुयात्। एतत् पञ्चघटं नाम व्रतं तृप्तिप्रदायकम्"।

पञ्चपिण्डिकागौरीव्रतं स्कन्दपु० नागरख० "नभस्ये च सिते पक्षे तृतीयादिवसे स्थिते। प्रातरुत्थाय पश्चाच्च भक्षयेद् दन्तधावनम्। ततश्च नियमं कुर्यादुपवासपरायणम्। गौरीनाम सदा ध्येयं श्रद्धापूतेन चेतसा। ततो निशागमे प्राप्ते कृत्वा गौरीचतुष्टयम्। कृष्णपक्षं यावच्च भक्षयेत् तद्दिनैकमनाः शृणु!। एका गौरी प्रकर्त्तव्या पञ्चपिण्डा यथोचिता। प्रहरे प्रहरे प्राप्ते तासु पूजां चरेत्"। इत्यादि

पञ्चभक्षापयनाशनद्वादशीव्रतं भविष्यपु० "यत् कृत्वा मुच्यते जन्तुर्महतः पञ्चपातकात्। पञ्चपातकिनः प्रेतान् पितॄंस्तारयते तथा। निशाकृदाप्यायनञ्च पूर्णिमादेवता इमाः। अमृताद्यो गदाधारी देवेन्द्रो देवकीसुतः। चतुर्भुजो गदापाणिः सुरशत्रुः सुलोचनः। सर्वसत्त्वगणाधिः सुरवामसुरान्तकः। श्रीश्च द्वादश इमा देवताः परिकीर्त्तिताः। स्वाहाकारान्वितैरेतैस्तुर्य्यन्तैव नामभिः। आदावादौ देवतानां पूजां च कृत्वा व्रती। आदावादेव कुर्यात् द्वादशीं परिकीर्त्तिताम्। पूर्णिमायान्तु देवेभ्यः पायसञ्च निवेदयेत्। अमावास्यां देवतानां तिलसङ्गुडोदकम्। पञ्च रत्नानि देयानि पञ्चपातकशान्तये। पञ्चमूर्त्तिं सुवर्णमयीं पञ्चाक्षतसमन्विताम्। भोजयेद् ब्राह्मणान् राजन्! पञ्चद्वादशसंख्यया।

पञ्चमहाभूतपञ्चमीव्रतं विष्णुधर्मोक्तम् "अतःपरं प्रवक्ष्यामि पञ्चमूर्त्तेस्तवार्चनम्। पृथिव्यापस्तथातेजो वायुराकाशमेव च। एता वै देवदेवस्य कथिताः पञ्च मूर्त्तयः। चैत्रे तु पञ्चमीं शुक्लां समासाद्य विचक्षणः। सोपवासो हरिं देवं पञ्चात्मानं समर्चयेत्। पञ्चमण्डलकाः कार्याः पञ्चभिर्वर्णकैः पृथक्। पार्थिवं मण्डलं कार्यं नीलवर्णं महीपते!। वारुणञ्च तथा श्वेतं रक्तमाग्नेयमिष्यते। पीतं भवति वायव्यं कृष्णमाकाशदैवतम्। समानवर्णगन्धैश्च पुष्पैस्तानर्चयेत् पृथक्। मन्त्रा च ध्रुवदोषान्तैर्वेदवाक्यमरिन्दम!। यदैर्भोगैस्तिलैश्चैव हायनेन च"। तेन

पञ्चमूर्त्तिव्रतं विष्णुधर्मोत्तरे "अथापरं प्रवक्ष्यामि पञ्चमूर्त्तिव्रतं तव। शङ्खचक्रगदापद्मं पृथिवीञ्च महाभुज!। गन्धैर्मण्डलिकां कृत्वा पञ्च पञ्चसु पूजयेत्। चैत्रशुक्लादिमां प्राप्य पञ्चमीप्रस्थितिं नरः। सोपवासो बहिःस्नातः शुक्लाम्बरः शुचिः। गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा। सर्वेषां पूजनं कृत्वा जुहुयाज्जातवेदसि। सर्वैर्नामभिरेवैतान् नामभिस्तु तथा पृथक्। ब्राह्मणान् भोजयेच्चात्र तदा च सुरभोजनम्। संवत्सरमिदं कृत्वा व्रतान्ते वस्त्रपञ्चकम्। पञ्च वेदविदां दद्यात् पञ्चवर्षं नराधिप!। व्रतेनानेन योगेन राजसूयफलं लभेत्"।

पञ्चाग्निसाधनरम्भातृतीयाव्रतं भविष्योत्तरे "भद्रे कुरुष्व यत्नेन रम्भाव्रतमनुत्तमम्। मनोऽभिलषितं कामं देव प्राप्नोति मद्वरम्। ज्यैष्ठशुक्लतृतीयायां स्नाता नियतमत्परा। कुरु! पार्श्वेषु पञ्चाग्नीन् ज्वालामालाकुलाकुलान्। गार्हपत्यं दक्षिणाग्निं सभ्यकाहवनीयकम्। पञ्चमं भास्करं तेजः स्मरेत् पञ्च वह्नयः। स्मरेयं मध्यमा भूत्वा तिष्ठ पूर्वसखी मतो। चतुर्हस्तं ध्यायमानं पद्मोपरिसंस्थितम्। मृगाजिनकृतकक्षां जटाबन्धकृतशिरोरुहाम्। सर्वाभरणसम्पन्नां देवीमभिमुखं कुरु!"।

पत्रव्रतं भविष्योत्तरे "ताम्बूलस्य पादो वा गौरीपत्रं ददाति च"। गौरीपत्रं ताम्बूलपत्रम् "पुगचूर्णसमायुक्तं स्त्रियो वा पुरुषस्य वा। वर्षान्ते तु सौवर्णं फलपत्रन्तु राजतम्। सुक्ताफलमयं चूर्णं सम्पूर्णं वा प्रयच्छति। न सा प्राप्नोति दौर्भाग्यं न दौर्गत्यं सुखस्य वा। एतत्पत्रव्रतं नाम गौरीलोकप्रदायकम्"।

पदार्थव्रतं विष्णुधर्मोत्तरे "शुक्लपक्षे दशम्यां तु सोपवासस्तथा नरः। मार्गशीर्षे तथारभ्य यावत् संवत्सरं भवेत्। गन्धमाल्यनमस्कारधूपदीपान्नसम्पदा। दिक्पालपूजनं कुर्यात् दिशां संपूजनं तथा। गां वत्सरान्ते दद्याच्च तथैव च पयस्विनीम्। ब्राह्मणाय महाभाग! तथा च मनुजोत्तम!। एतद्व्रतं नरः कृत्वा यत्र कुत्र न गच्छति। तत्रैतं काममाप्नोति पुत्रैश्चिरफलमश्नुते। वाणिज्यसक्तश्च नरः सुसिद्धिं यायात् तथान्यां विलोमीप्रवच। विद्यार्थिनो वा रिपुनाशनं वा स्थितं पदार्थव्रतमेतदिष्टम्"।

पद्मनाभद्वादशीव्रतं "तद्दादश्युक्ते मासि द्वादशीं शुक्लपक्षिकाम्। सङ्कल्प्याभ्यर्चयेद्देवं पद्मनाभं सनातनम्। पद्मनाभाय पादौ तु कटिं वै पद्मयोनये। उदरं सर्वदेवाय पुष्कराक्षाय वै करः। अव्ययाय तथा बाहू पार्श्वदेशांश्च पूजयेत्। प्रभवाय शिरः पूज्य प्राग्वदग्रे घटं न्यसेत्। तस्मिन् हेमनयं देवं पद्मनाभं तु विन्यसेत्"। पद्मनाभस्तु दक्षिणाधोरुक्षादारभ्य सव्येन च शङ्खपद्मगदाचक्रधारी कार्यः"।

पद्मोव्रतं पद्मपु० "वर्षमेकं भवेदयस्तु पञ्चदश्यां पयोव्रतः"। पञ्चदश्यामित्यमावास्यायां पुराणान्तरसंवादात् "समान्ते चाब्दकृद् दद्यात् यत्र पञ्च पयस्विनीः। वासांसि च त्रिशुक्लानि जलकुम्भयुतानि च। स याति वैष्णवं लोकं पितृणां तारवेच्छतम्। जन्मान्तरे भवेद्राजा! पद्मोव्रतमिदं कृतम्"।

पर्वनक्तव्रतं भविष्यपु० "योऽब्दमेकं प्रकुर्वीत नक्तं पर्वणि पर्वणि"। पर्व पञ्चदशी "ब्रह्मचारी जितक्रोधः शिवार्चनरतः सदा। वत्सरान्ते च विप्रेन्द्र! शिवभक्तान् समर्चितान्। भोजयित्वा ततो ब्रूयात् प्रीयतां भगवान् प्रभुः। एवंविधसमायुक्तः शिवलोकन्तु गच्छति"

पर्वभोजनव्रतं पद्मपु० "पृथिवीभाजने भुङ्क्ते नित्यं पर्वसु यो नरः। अतिरात्रफलं देवि! अहोरात्रेण विन्दति"। पृथिवीभाजने भूमावन्नं निधायेत्यर्थः। शिवोऽत्र देवता"।

पाताव्रतं विष्णुधर्मोत्तरे "चैत्रमासे दशम्यां तु शुक्लपक्षे दिने दिने। पातालपूजनं कुर्यात् प्रतिपत्तप्रभृतिक्रमात्। रौद्रं भौमं स्त्रिभौमं पातालं नीलसंज्ञितम्। रक्तभौमं पीतभौमं श्वेतकृष्णाष्टकानपि। सुवर्णैर्गन्धमाल्यैश्च नैवेद्यैश्च च भूरिभिः। इतरोपचारैश्च वस्त्रिभिर्वर्षेण च। एवं नक्तामनः कृत्वा व्रतं संवत्सरं सदा। व्रतावसाने दद्यात्तु दीपकान् द्विजसत्तम"।

पात्रव्रतं नरसिंहपु० "उपवासेन दर्शे तु शुक्लां माघसमेऽथ पूर्णिमाम्। कृत्वाविधिविधिं सम्यक् सदा तस्य व्रजेत्पदम्। तद्दद्यात्पात्रदानं तद् व्रतं धीभाग्यदायकम्। पतदं वेत्रदण्डेव विधिना चरितं त्विदम्। घृतपात्रं प्रकारं समयुक्तं गुणान्वितम्। पूजयेद्गन्धिकाभोज्य पादुकाद्यैः सुभावितः। रूक्षमाज्ययुतञ्चाथ पात्रं नीलाञ्च नामपि। अभावे च तथा हेम्नः कर्षार्द्धेन तु राजतम्। वस्त्रयुग्मं नवं शुभ्रं पुष्पाक्षतविलेपितम्। आच्छिद्य तत्र तत् पात्रं शुचौ देशे निवेशयेत्। ततो जागरणं कुर्यात् गीतवाद्यादिमङ्गलैः। प्रभाते तु नयेत्पात्रं क्षीरेरावतनं महत्। स्नाप्य क्षीरादिभिर्देवं विष्णुं सम्पूज्य वै क्रमम्। निवेदयेत् तु तत्पात्रं प्रीयतामिन्दुदीरयेत्"।

पापनाशनीसप्तमीव्रतं भविष्यपु० "शुक्लपक्षस्य सप्तम्यां यदा ऋक्षगुरो भवेत्। तदा पुण्यतमा प्रोक्ता सप्तमी पापनाशिनी"। करो, कृतः अयं हि योगो बहुले आवणे मासि सम्भवति। "तत्रां सम्पूज्य देवेशं चित्रमानुभगद्रुमम्। सप्तजन्मकृतात्पापान्मुच्यते नात्र संशयः। यथोपवासं कुरुते तत्रां नियतमानसः। सर्वपापविनिर्मुक्तः सूर्यलोके महीयते। दानं यद्दीयते किञ्चित् वस्तुद्दिश्य दिवाकरम्। होमो वा क्रियते तत्र तत् सर्वञ्चाक्षयं भवेत्। करवी सप्तमी कृत्वा तेनोक्ता पापनाशिनी। यस्यां समभ्यर्च्य रविं याति सौमनसं पुरम्"।

पापमोचनव्रतं सौरपु० "विल्वद्रुमं समाश्रित्य दादशाङ्गसमोक्षणम्। यः कुर्यात् भूयशक्त्या पापान्मुक्तो भवति नारद!"।

पापाक्षाणसंक्रान्तिव्रतं स्कन्दपु० "यस्यास्यपापसंक्रान्तिं शृणु स्कन्द! विधानतः। संक्रान्त्यां नियतो भूत्वा तिलैः श्वेतैः समन्वितैः। करकं वर्द्धमानञ्च प्रतिमासं निवे

देवेत्" । वर्द्धमानः प्रकाश । "मन्त्रेणानेन तु स्नाप्याद्भक्तिभावसमन्वितः । तिलो मास्मात् पापेभ्यस्तव देव प्रसादतः । त्वञ्च मां रक्ष देवेश ! वाङ्मनःकायकर्मभात् । उद्यापने च देवस्य सौवर्णमाकरेच्च तु । द्विभुजा प्रतिमा कार्या रजतेनाथ कारयेत्" ।

पालीचतुर्दशीव्रतं भविष्योत्तरे "माघि भाद्रपदे पक्षे शुक्लेभूतचतुर्दश्यौ नृप ! । तदा भक्त्या प्रदातव्यं वस्त्राद्यार्घ्यं सुत्तमम् । ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैः स्त्रीभिस्तथैव च । फलपुष्पैस्तथा धूपैर्दीपाक्षतकुङ्कुमचन्दनैः । विल्वैः सप्रसवान्यैव दधिपिष्टाम्बुचन्दनैः । जम्बीरपनसैश्चैव लिखितस्तुलसिंचितैः । खर्जूरैर्नारिकेलैश्च बीजपूरैस्तथैव च" । खादयं (खाना) फलविशेषः "द्राक्षादाडिमपूगैश्च पुष्पैश्चापि प्रपूजयेत् । संस्कृगुडसंमिश्रानिक्षवां विप्राय पालीसुपेत्य वस्त्रभिस्तुभिः कृतालीम् । ये पूजयन्ति वरुणं वहितं वसुदे तेषां गृहे भवति भूतिरनर्घगाधा" ।

पाशुपतव्रतं वह्निपु० "शिवं ये पूजयिष्यन्ति दानं दास्यन्ति सुव्रताः । सर्वपापविनिर्मुक्ता दिवमेष्यन्ति ते द्विजाः । यथा पशुपतिर्नित्यं कृत्वा सर्वमिदं जगत् । न लिप्यते पुनः सोऽपि यो नित्यं व्रतमाचरेत् । रुद्र जन्म कृतं पापं पूर्वजन्म कृतद्युवत् । व्रतं पाशुपतं नाम कृत्वा मुच्यति द्विजोत्तम ! द्वादश्यामेकभक्ताशी त्रयोदश्यामयाचितम् । चतुर्दश्यां तथा नक्तं उपवासं परेऽहनि" । कालसंहितोक्तम् "रुद्रस्य यत् प्रवक्ष्यामि सर्वपापनिकृन्तनम् । व्रतं पाशुपतं श्रेष्ठं मया च गिरिसि (वेदे) श्रुतम् । कार्त्तिकैत्रपौषमासी देयः शिवपरिग्रहः ! क्षेत्रारामादिरन्यो वा प्रशस्तः शुभलक्षणः । तत्र पूर्वत्रयोदश्यां स्नातस्तु कृताञ्जलिः । चतुर्दश्यं समाचम्य संपूज्य प्रविपत्य च । पूजां कृत्वाग्निकार्यं कृत्वा शुक्लाम्बरधरः स्वयम् । शुक्लयज्ञोपवीती च शुक्लमाल्यानुलेपनम् । दर्भासने समासीनो दर्भमुष्टिं प्रगृह्य च । प्राणायामत्रयं कृत्वा प्राङ्मुखोदाङ्मुखः । ध्यात्वा देवञ्च देवीञ्च भूतविज्ञानवर्त्मना । व्रतमेतत् करोमीति भवेत्सङ्कल्प्य दीक्षितः । यावत् शरीरपातञ्च द्वादशाब्दमथापि वा । तदर्द्धं वा तदर्द्धं वा मासदशकन्तु वा । तदर्द्धं वा तदर्द्धं वा मासमेकमथापि वा । दिनद्वादशकं वाथ व्रतसङ्कल्पनं विधिः" । व्रतान्तरं भविष्यपोक्तं विष्णुपु० "कृत्वा कलीवसं विष्णुं स्नाप्य चन्दनवारिणा । चैत्रमासादि विप्रेन्द्रा शिवविष्णुव्रतं शुभम् । कृत्वा हैमं शुभं पद्मं कर्णिकाकेसरान्वितम् । नवरत्नैस्तु खचितमष्टपत्रं यथाविधि । कर्णिकायान्त्वेदिञ्च स्फाटिकं पीठसंयुतम् । तत्र भक्त्या यथान्यायमर्चयेद्विष्वक्सेनकैः" ।

शिवव्रतं विष्णुधर्मोत्तरे "अतः परं प्रवक्ष्यामि सप्तमूर्त्तिव्रतं तव । चैत्रमासादथारभ्य प्रतिपत्पक्ष इति क्रमात् । सुभास्करो विधिर्ज्ञेयोऽग्निर्व्याप्तास्तथैव च । कव्यादाप्यहताश्चैव वाय्वाख्याश्च सुकालिनः । पूजयेत् प्रत्यहं राजन् ! गन्धमाल्यानुलेपनैः । नैवेद्यं जठरं कुर्यात् तिलानग्नौ च होमयेत् । जठरं भोजयेद्विप्रान् तिलान् दद्याच्च दक्षिणाम् । नक्षत्रायनसंज्ञे द्वे विद्याश्चो नराधिप ! संवत्सरमिदं कृत्वा व्रतं पुरुषसत्तम ! । व्रतावसाने दद्यात्तु रजतस्य फलं द्विजे । व्रतेनानेन घोरेण सप्तलोकगतिर्भवेत् । त्रिदशैः पूज्यमानस्तु कामचारी विहङ्गमः" । [कार्य्यम् ।

विपीतकीद्वादशीव्रतं ति० त० शुक्लं वैशाखशुक्लद्वादश्यां पुष्करीकप्राप्तिव्रतं विष्णुधर्मोत्तरे "द्वादश्यां देवदेवेशं पूजयित्वा जलाधिपम् । पुष्करीकमवाप्नोति वस्त्रं यादसाम्पतिम्" ।

पुत्रकामव्रतं पद्मपु० "नभस्यमासस्य तु पौर्णमास्याम् । भार्याद्वितीयः सङ्कल्प्य एव पुत्रेष्टिमादौ खण्डेऽपि कृत्वा । गच्छेत्ततः सर्वसमृद्धियुक्तो होमैः सजाप्यैर्विधिना च रुद्रम् । शैवेन्द्रकस्कागलवह्निसूक्तम् सङ्गायमक्त्या पथ वाचयित्वा । संपूज्य विप्रानथ देवपूर्वान् कृतोपवासो जितरोषदोषः । ततः सङ्गायानपि भोजयित्वा भार्यान्तु पश्चात् स्वयमथ भुञ्जे । प्रदाप्तु भार्यामथ गोपयित्वा प्रदक्षिणीकृत्य गुरुं सुपुत्राम् । सङ्गांस्तु गच्छेत्परिपूर्णकामो हृष्टः प्रहृष्टः कृतभोजनश्च । कृत्वाथ दिव्यास्त्वथ नन्दिनीञ्च भार्यां ततः स्नापयतोः प्रयुक्ताम् । क्षीरोदनं त्रिदिनं भोजयेच्च वन्ध्यापि भार्यामपि पुत्रकामाम् । ततो गृहे सर्वसमृद्धिकामः कन्यां भार्यां प्रयतो विधाय । उमां शिवं नन्दिनं चार्चयित्वा ततो भवेत् पुत्रवती च वन्ध्या" । व्रतान्तरं हस्तिकसंक्रान्त्यां कार्त्तिकपूजाख्यम् ।

पुत्रप्राप्तिषष्ठीव्रतं विष्णुधर्मोत्तरे "वैशाखमासादारभ्य षष्ठ्यां च सोपोषितः । भवनं पूजयेत् षष्ठ्यां संवत्सरमतन्द्रितः । पुत्रार्थी प्राप्नुयात् पुत्रान् धनकामो धनी भवेत् । स्वर्गार्थी प्राप्नुयात् स्वर्गमपि हृष्टो मनोजवः । शोके च

च मदीयेन ये लोकप्रन्ति नराः प्रभो !। लोकद्वयेऽपि ते कामान् प्राप्नुवन्ति मनःप्रियान्। कुमारश्च तथा स्कन्दो विशाखश्च गुहस्तथा। चतुरात्मा विनिर्दिष्टो भगवान् क्रौञ्चसूदनः। तमभ्यर्च्य नरः सद्यः पुत्रान् प्राप्नोत्यभीप्सितान्"।

पुत्रप्राप्तिव्रतं देवीपु० "ब्रह्मणा यो विधिः शक्रे कथितो विजयाव्रतः। अवेहि पूर्णिमा तात ! श्रावण्यां शुभाव्रता"। शक्र उवाच "विजया या समाख्याता सर्वकामप्रसिद्धये। तामहं श्रोतुमिच्छामि तत्त्वतः सुरसत्तम !"। ब्रह्मोवाच "पुत्रार्थं राज्यविद्यार्थं यशःसौभाग्यतोऽपि वा। विजयार्थं प्रकामो वा जयां कुर्वीत पूर्णिमाम्। हैमं वा राजतं वापि खड्गं वा चर्म पादुके। प्रतिमां वापि कुर्वीत सर्वलक्षणसंयुताम्"। शाङ्ख्यां दर्भे शेषः "तामादाय शुभे क्षेत्रे शुक्लवस्त्रविभूषिताम्। यवशालेर्दुरोपेतां धान्यपात्रविभूषिताम्। दीपैः सुशोभनां वस्त्रैः कल्पयेत्तत्र विन्यसेत्"।

पुत्रसप्तमीव्रतं वराहपु० "माघि भाद्रपदे प्राप्ते शुक्लपक्षे सुरेश्वरः !। सप्तम्यामुपवासेन पुत्रप्राप्तिप्रदं व्रतम्। कर्त्ता चैव सुकल्पत्र सप्तम्यां पूजयेद्धरिम्"।

पुत्रीयव्रतं विष्णुधर्मोत्तरे "प्रौष्ठपद्यामतीतायां कृष्णपक्षाष्टमी तु या। सोपवासोनरोऽष्टम्यां योषिद्वा तनयार्थिनी। स्नाता सरसि धर्मज्ञा तोयेऽवाप्यथ वारसे। पूजनं वासुदेवस्य यथा कुर्यात्तथा शृणु !"।

पुत्रीयसप्तमीव्रतं विष्णुधर्मोत्तरे "मार्गशीर्षे शुभे मासि शुक्लपक्षे द्विजोत्तम !। पुत्रीयां सप्तमीं राम ! शृणुयात् प्रयतः शुचिः। अथ वा पुत्रकामश्च विधिना येन तत् शृणु"। पुत्रीयां पुत्रदाम्। "हविष्याशी शिरःस्नानं कृत्वा भास्करपूजनम्। कृष्णायां द्वितीयेऽह्नि मोदकैर्घृतपाचितैः। स्नात्वा संयम्य च तथा शुभे देशे तु मण्डलम्। तत्राष्टपत्रकमलं विन्यसेत् वर्णकैः शुभैः। तस्यैव कर्णिकामध्ये भास्करं चन्दनेन तु। रक्तेन पूजयेद्देवं गन्धमाल्यानुलेपनैः"।

पुत्रोत्पत्तिव्रतं आदित्यपु० "कुरु संवत्सरं स्नानं अवधे अवधे सुते ! सोऽपि पुत्रानवाप्तोऽभूत् चकार श्रद्धयान्वितः। पारार्थ्यः सुतं लेभे व्रतस्यास्य प्रभावतः। एवमन्योऽपि राजेन्द्रस्तावत् सिद्धिमवाप्नुयात्। पुत्रान् पौत्रांश्च लभते सुखञ्चात्यन्तमश्नुते"।

पुरंदरषष्ठीव्रतं स्कन्दपु० नागरखण्डे "माघमासे वरे षष्ठे सकरस्थे दिवाकरे। सप्तम्यां सूर्यवारेण व्रतमेतत् समाचरेत्। पायसैः पतितैः सार्द्धं तण्डिलैश्च वर्त्तयेत्। उपोष्यैवं तथा षष्ठ्यां प्रभाते दन्तधावनम्। मन्त्रेणानेन पानाच्च कर्त्तव्यो नियमो नृप !। पुरंदरषष्ठिव्रतं पापात् सप्तम्यां दिवसाधिप !। उपवासं करिष्यामि अद्य त्वं शरणं मम। ततोऽपराह्णसमये स्नात्वा धौताम्बरः शुचिः। प्रतिमां पूजयेद्भक्त्या दिनाधिपसमुद्भवाम्। रक्तैः पुष्पैर्भक्तावीरपादौ सम्पूजयेत्ततः"।

पुष्पद्वितीयाव्रतं भविष्यपु० "कार्त्तिके शुक्लपक्षे तु द्वितीयायां नराधिप ! पुष्पाहारो वर्षमेकं वसेत् सुनियतात्मवान्"। कार्त्तिकशुक्लपक्षद्वितीयायां व्रतमारभ्यान्यापि शुक्लपक्षद्वितीयास्वेव वर्षपर्यन्तं पुष्पाहारव्रतं कुर्यादित्यर्थः। "कालप्राप्तानि यानि स्युर्विष्वक्सेनकुसुमानि तु। भक्षीत तानि दत्त्वा तु ब्राह्मणेभ्यो नराधिप !"। विष्वक्सेनकुसुमानि पूजार्थानि भक्षणे चाविरुद्धानि कल्पितो चात्र नाममन्त्रोऽपि पूजनीयौ तयोः फलदातृत्वेन श्रवणात्। "हृषीकेश च पुष्पाणि गवा अष्ट ददामि यः। व्रतान्ते तस्य सन्तुष्टौ देवौ त्रिभुवनेश्वरौ। दत्तः कामांस्तथा दिव्यान्विमानमपि तेजसम्। सुचिरं देवनारीभिर्लोकं रमयतोऽश्विनौ"।

पूर्णिमाव्रतं विष्णुधर्मोत्तरे "या प्रेरयति कर्माणि लोकेषु द्विजसत्तम !। तस्याः संपूजनं कार्यं शुक्लपक्षदर्शे सदा। माल्यानुलेपनैः शुक्लैर्धूपेन च सुगन्धिना। रक्तवस्त्रप्रदानेन दीपदानेन चाथ वा। वेदवेद्यै तथा भक्ष्यैरन्नपैश्च तथैव च। पूजयित्वा च तां देवीं भोक्तव्यं निशि सार्द्धया। यदि पक्षदर्शे सर्वं न शक्नोति कथञ्चन। देव्याः संपूजनं कार्यं अवश्यमपि कार्त्तिके। उमान्तु पूजयेद् या तु सा तु नारी पतिव्रता। सदा धर्मरता नारी लोके भवति शार्ङ्गिण !"। वह्निपु० व्रतान्तरम् "श्रावणां पौर्णमास्यान्तु सोपवासो जितेन्द्रियः। प्राणायामशतं कृत्वा शुद्धते सर्वकिल्बिषैः"।

पृथिवीपञ्चमीव्रतं विष्णुधर्मोत्तरे "पञ्चम्यां पृथिवीं शुक्लां देवीं संपूजयेन्नरः। तामवाप्नोति यत्नेन नात्र कार्या विचारणा"।

पौरन्दरपञ्चमीव्रतं भविष्योत्तरे "तिलपिष्टमयं कृत्वा गजं हैमविभूषितम्। कक्षाङ्कुशयुतं तद्वदारोहकसमन्वितम्। तदिति खण्डव्रतोक्तमत्र गजखण्डं गृह्यते। "नवत्रमाल्यसहितं चामरापीडधारिणम्। दशनाम-

वंशनेत्रं रक्तवस्त्रयुगावृतम्। ताम्रपात्रां कृष्णतिले वा
ऋतदनापभोदकम्। प्रदद्याद् द्विजटम्बोः पुज्य मा-
ल्याविभूषणैः। कर्णाभरणकं दद्यात् वस्त्रञ्च मलवर्जि-
तम्। कान्तारतारकं चैतत् कथितं हि युधिष्ठिर!।
कान्तारगिरिदुर्गेषु तारयत्यपि दुःखितान्। दृष्ट
लोके परे चैतद्व्रतं कार्यां विचारणा। ये कुर्वन्ति
दिने पुण्ये व्रतं पौरन्दराह्वयम्। तेषां पौरन्दरे लोके
वासः स्यात् सुचिरं नृप!" दिने पुण्ये, पञ्चम्यां
प्रकरणवशात्।

प्रकृतिपुरुषहितीयाव्रतं विष्णुधर्मोत्तरे "पुरुषः प्रकृतिश्चोभौ
जगत् सर्वं प्रकीर्त्तितम्। अन्योन्यात्मकं सर्वं तथा
तच्च प्रकीर्त्तितम्। वासुदेवश्च लक्ष्मीश्च ताभ्यां परिकी-
र्त्तितौ। चैत्रशुक्लहितीयायां सोपवासो जितेन्द्रियः।
पौरुषेण च सूक्तेन वह्निं संपूजयेत्सुरैः"। सोपवास
इति प्रतिपदि व्रतोपवासो हितीयायां वह्निं पूज-
येदित्यर्थः। उपरिष्टाच्च क्षीरव्रतभोजनञ्च विधि-
तत्वात् "गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा। लक्ष्मीञ्च
वरदं देवं पूजयेदुदकं हरिम्। श्रीसूक्तेन च धर्मज्ञ!
तथा चैवान्नभोजनम्"। हरिशब्दो वह्निं लक्षयित्वा
प्रतिपाद्य पुरुषमग्निं वासुदेवञ्चोपरि पूजयेत्" इत्यादि।

प्रजापतिव्रतं "अथ वटोर्ध्वतम् इत्युपक्रमे "नेक्षेतोद्य-
न्तमादित्यमित्यादिकशेषम्"।

प्रतिपद्क्षीरपाव्रतं भविष्यपु० "कार्त्तिक्यामथ सप्तम्यां
वैशाख्यां वा युगादिषु। नियमोपवासं प्रथमं यष्टव्येत
विधानवित्"। कार्त्तिके वैशाखे वा मासि प्रतिपत्तिथौ
व्रतारम्भः। युगादितिथिव्रतञ्च माधवैशाखभाद्र-
पद कार्त्तिकेष्वन्यतमे द्वारम्भः "या तिथिर्नियमं कर्तुं
शक्या समनुगच्छति। तस्यां तिथौ विधानं यत्तन्नि-
बोध जनाधिप!। नियमोपवासं प्रथमं याचयेद् विधि
वत्सरः। यदा वै प्रतिपद्यादौ स्टङ्क्षोदयमियं नृप!।
चतुर्दश्यां व्रताहारः सङ्कल्प्य परिकल्पयेत्। अमावास्यां
न भुञ्जीत निशायां स्नानमाचरेत्। पवित्राणि जपेच्चित्यं
गायत्रीं शिरसा सह। अर्चयित्वा विधानेन गन्ध-
माल्यैर्विभोत्तमान्। शक्त्या क्षीरं प्रदद्यात् तु ब्रह्मा
मे प्रीयतां विभुः। ततो भुञ्जीत गोक्षीरमनेन विधिना
नृप!। एष एव विधिः प्रोक्तः सर्वासु तिथिषु नृप!"।

प्रतिमाव्रतं कालोत्तरे "अधुना तु प्रवक्ष्यामि प्रतिमाव्रत-
मुत्तमम्। महाव्रतं महादेवप्रीतिमाव्रतं तथा।
विल्वपत्रं कुङ्कुमेन पूपं वै गुग्गुलेन तु। अष्टोत्तरे-
णैव नैवेद्यं पयसा युतम्। तावन्माषा चतुर्विंशत् ति-
लेला च चतुर्भुजा। सूत्राक्षियुग्मवस्त्रौघा नानाम-
रणभूषिता। शालिपिष्टमयो कार्या दीपपुष्टे च
शोभना। चामरैर्वीज्यमानन्तु शिवं तत्र प्रबल्भयेत्। दर्प
णञ्चैव ताम्बूलं व्यजनं पादुकासनम्। वैजयन्तीध्वजं
यानमाचार्यायैव प्रयत्नतः। मासि मासि प्रकर्त्तव्यं चतु-
र्दश्यां दिने दिने। कार्त्तिकन्तु समारभ्य यावदाब्दा-
वधि। एतद् व्रतोत्तमं नाम प्रतिमाव्रतमीरितम्"।

प्रदोषव्रतं भविष्यपु० "त्रयोदश्यान्तथा रात्रौ सोपहारं
त्रिलोचनम्। दहेयं प्रथमे यामे सद्यते सर्वपातकैः"।

प्रभाव्रतं पद्मपु० "यद्योपवासी यो दद्याद्विप्राय कपिला-
द्वयम्। ब्रह्मलोकमवाप्नोति देवासुरसुपूजितः। तदन्ते
राजराजः स्यात् प्रभाव्रतमिदं स्मृतम्"।

प्राजापत्यव्रतं पद्मपु० "अश्वक्रान्ते गोयुगं दद्याद् भोजनं
यत्नितः पदम्। विप्राय शाकुरं यावि प्राजापत्यमिदं
स्मृतम्" शाकुरं पदं वातीत्यन्वयः। अश्वक्रान्ते इयम्।

प्राप्तिव्रतं पद्मपु० "वत्सरं यो नमस्कारी सभक्ष्यफलकन्मदः।
शिवलोके वसेत्सम्यक् प्राप्तिव्रतमिदं स्मृतम्"।

फलव्रतं पद्मपु० "मङ्गलानि यथाशक्ति चतुर्भोक्ष्यं द्विजा-
तये। दैवानि कार्त्तिके दद्याद् गोयुगेन समं नरः।
वित्तशाठ्यविनाशाय सम्यक् चाभ्यर्हणेन च। एतत् फलव्रतं
नाम सर्वकामफलप्रदम्"।

फलसप्तमीव्रतं पद्मपु० प्रभासख० "फलसप्तमीव्रतं या नारी
कुरुते तत्र भाविता। वर्षमेकं सिते पक्षे देवीं पूज्य
विधानतः। फलानि ब्राह्मणे दद्यादभीष्टानि च यानि
तु। फलानि वर्जयेत् तत्र मांसाद्यानि सुरसुन्दरि!।
निम्बालाबूकीं तद्वान् मांसंचैव कुलत्थिकान्। मद्य-
रान् राजमाषांश्च गोधूमांश्चिपुटांस्तथा। चणकान्
वर्तुलान् वापि सकृटान् भक्षितोऽपि यः। नरो वा
यदि वा नारी यावद्वोरीव्रतं चरेत्। तस्याः पुण्यफलं
वक्ष्ये कथ्यमानं मुखात् मे। धनं धान्यं गृहे तस्य
न कदाचित् क्षयं व्रजेत्। दुःखिता दुर्भगा दीना सदा
जन्मनि नो भवेत्। कथानकञ्च श्रोतव्यं देव्या माहात्म्य-
संयुतम्। व्रतयातनसाद्याय सर्वकामसमृद्धये"।

फलषष्ठीव्रतं भविष्योत्तरे "अन्यामपि प्रवक्ष्यामि फलषष्ठीं
शुभां तथा। यामुपोष्य नरः पापैर्विमुक्तः फलभाग्
भवेत्। मार्गशीर्षे सिते पक्षे षष्ठ्यां नियमस्थितः।

ह्वा दन्तधावनं तु कृत्वेहाग्नौ विमत्सरः । ततः प्रभाते विमले कारयित्वा तु काञ्चनम् । कमलस्य फलन्त्वेकं सघृतं सगुडं शुभम् । ततस्तु सङ्क्रमे स्नातो मध्याह्ने जलनिस्तटः । आगत्य भवनं देवं पूजयित्वा जगद्गुरुम् । ह्वा तु कमलं पात्रे सफलं शर्करान्वितम् । षोडशस्वरे क्षणमये वा यथाशक्त्या सपोत्तम !। पूजयेत् पुष्पधूपाद्यैर्नैवेद्यैर्विविधैः फलैः इत्यादि ।

फलसंक्रान्तिव्रतं स्कन्दपु० "अथान्यामपि ते वक्ष्ये फलसंक्रान्तिसत्तमाम् । संक्रान्तिवासरं प्राप्य स्नानं कृत्वा तु पूर्ववत् । संपूज्य पूर्ववद्भानुं पुष्पधूपादिना तथा । शर्करावस्थितं पात्रं फलाष्टकसमन्वितम् । संक्रान्तिवासरं प्राप्य ब्राह्मणाय निवेदयेत् । तटस्थं तु रविं कृत्वा सुवर्णेन च नारद !। कमलोपरि संस्थाप्य गन्धपुष्पैः प्रपूजयेत् । फलाष्टकं ततो दद्याद् भक्ष्यभोज्यसमन्वितम् ।

फलसप्तमीव्रतं भविष्यपु० "अथ भाद्रपदे मासि सिते पक्षे महीपते !। कृत्वोपवासं सप्तम्यां विधिवत् पूजयेद्रविम् । माघेश्वरेण विधिना पूजयेदेव भास्करम् । अष्टम्यां तु पुनः प्रातः पूजयित्वा दिवाकरम् । दद्यात् फलानि विप्रेभ्यो भानुर्मे प्रीयतामिति । अर्कं नारिकेलञ्च मातुलुङ्गफलानि च । ब्राह्मणान् भोजयित्वा तु फलाहारः स्वयं भवेत् । पूर्वमेकन्तु सम्प्राप्य सुवर्णं फलमादरात् । मन्त्रेण भरतश्रेष्ठ ! ततः श्रेयोऽधि भाजयेत्" । पद्मपु० "अन्यामपि प्रवक्ष्यामि नाम्ना तु फलसप्तमीम् । यामुपोष्य नरः पापैर्विमुक्तः स्वर्गभाग्भवेत् । मार्गशीर्षे शुभे मासि पञ्चम्यां नियतव्रतः । यत्रोपोष्य फलं कारयित्वा तु काञ्चनम् । शर्करासंयुतं दद्यात् ब्राह्मणाय कुटुम्बिने । कृष्णन्तु काञ्चनं कृत्वा फलञ्चैकञ्च धर्मवित् । दद्यादिक्षवेवेलायां भानुर्मे प्रीयतामिति । भक्त्या तु विप्रान् संपूज्य सप्तम्यां क्षीरभोजनम् । कृत्वा कुर्यात् फलत्यागं यावत्कालं क्षणप्रभौ । यामुपोष्य विधिं कृत्स्नेनैव क्रमेण तु । तद्वदेकफलं दद्यात् सुवर्णकमलान्वितम् । शर्करापात्रसंयुक्तं वस्त्रमाल्याविभूषितम् । संवत्सरमनेनैव विधिनोभयसप्तमीम् । उपोष्य दद्यात् क्रमशः सुवर्णमलसुदीरवेत्" इत्यादि ।

फलसप्तमीव्रतं भविष्योत्तरे "अथ वक्ष्ये फलसप्तमीम् । यां कृत्वा मानवः सम्यक् सर्वपापैः प्रमुच्यते । माघे मासि सिते पक्षे सप्तम्यां नियतव्रतः ।

पञ्चमो गुरुकैः सप्तो सोष्मान्तकैः शुभैः। अशोकवर्त्तिभिः शुभ्रैः सप्तमो जातिवाङ्घ्रयेत्। अष्टमी कर्णिकापूर्णैः सर्वतोभद्रकैर्युधिष्ठिर!। एवं क्रमेण कर्त्तव्याः षड्रसव्यञ्जनवस्त्रैः। सङ्घेभ्य स्थितैर्भोज्यं भोक्तव्यं प्रीतिपूर्वकम्। उपाख्यानान्तमासाद्य भोजनं सङ्घसा त्यजेत्। तावदेव हि भोक्तव्यं यावत् सा कथ्यते कथा। ततोभूत्वा वुधस्याग्रे वाचकस्य च समाहितः। विप्राय वेदविदुषे वाचकाय प्रदापयेत्। साज्यं सक्षिरखण्डं च जातरूपमयं शुभम्। अर्चितं चन्दनैः गन्धैः पुष्पैर्धूपैः सुगन्धिभिः। पीतवस्त्रैः समाच्छन्नं वृषं सोमात्मकं तथा। मात्रवेण सुवर्णेन तदर्द्धेन वा कृतम्" इत्यादि

ब्रह्मव्रतं भविष्यपु० "ब्रह्माणञ्च द्वितीयायां संपूज्य ब्रह्मचारिणम्। भोजयित्वा च विधिना सर्वासां पारगो भवेत्। सूक्तमन्त्राः स्वशाखाभिरुक्तमन्त्राश्च कीर्त्तिताः। पूर्ववत्पद्मपत्रस्थः कर्त्तव्यश्च तिलेश्वरः"। तिलेश्वरो ब्रह्मा।

ब्रह्मकूर्चव्रतं ब्रह्मपु० "सपोषितव्रतदर्द्धां पञ्चदश्यामनन्तरम्। पञ्चगव्यं समश्नीयाद्विप्राणां त्वननन्तरम्। ब्रह्मकूर्चमिदं कुर्यादुष्णप्रशमनाय वै। पक्षान्ते व्रत वा कार्य्यं मासमध्येऽथ वा पुनः। ब्रह्मकूर्चं नरः कुर्यात् पौर्णमास्यां यु यः सदा। तस्य पापं क्षयं याति दुर्भुक्तादि न संशयः। मासेन हिक्करः कृत्वा ब्रह्मकूर्चं समाहितः। सर्वपापविनिर्मुक्तो वसेदाकृतिमाप्नुयात्। ब्रह्मभूतमभावास्यां पौर्णमास्यां तथैव च। योगभूतं परिचरन् केशवं सङ्घमाप्नुयात्"।

ब्रह्मगवप्राप्तिव्रतं विष्णुधर्मोत्तरे "इदमन्यत् प्रवक्ष्यामि चतुर्मूर्त्तिव्रतं तव। यत्कृत्वा नाशवरुग्धनाढ्यश्च वदुत्तम!। चतुरात्मा विनिर्दिष्टो वासुदेवो जगत्पतिः। तेषान्तु रूपनिर्माणं कृत्वा तानर्चयेद् बुधः। गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा। आदौ हरिं चैत्रशुक्ल वजेत त्रिदशेश्वरम्। द्वितीयेऽह्नि यमं देवं तृतीये श्रीनिधिम्। चतुर्थेऽह्नि धनाध्यञ्च प्रत्यहं स्नानमाचरेत्। नदीप्रदेशमासाद्य देवदिक्प्रवहक्रमात्। यवैस्तिलैस्तथाज्येन होमः स्यात् तिलतण्डुलैः। रक्तं पीतं तथा कृष्णं श्वेतं वस्त्रं दिनक्रमात्। शुभमेतद् व्रतं कृत्वा पूर्णसंवत्सरं नरः। नाकलोकमवाप्नोति यावदाभूतसंप्लवम्"।

ब्रह्मव्रतं पद्मपु० "ब्रह्माणं काञ्चनं कृत्वा तिलराशिसमन्वितम्। ब्रह्मचर्यं तिलप्रदो भूत्वा वह्निं सत्यं च हिलान्। संपूज्य विप्रदम्पत्यं माल्यवस्त्रविभूषितम्। अङ्कितांस्त्वपवादुर्वं विप्रात्मा प्रीयतामिति। पुष्पेऽह्नि दद्यात्स परं ब्रह्म यात्यपुनर्भवम्। एतद् ब्रह्मव्रतं नाम निर्वाणफलदं नृणाम्"।

ब्रह्मसावित्रीव्रत भविष्योत्तरे "शृणुतां पाण्डवश्रेष्ठ! सावित्रीव्रतमादरात्। कथयामि यथा पौर्णं तथा सत्या युधिष्ठिर!। इत्युपक्रमे "त्रयोदश्यां भाद्रपदे दन्तधावपूर्वकम्। विरागं नियमं कृत्वादुपवासस्य भक्तितः। अशक्तश्च त्रयोदश्यां नक्तं कुर्यात्तितेन्द्रिया। चतुर्दश्यां पौर्णमास्यामुपोषणम्। नित्यं स्नात्वा महानद्यां तडागे निर्झरेऽपि वा। विशेषतः पूर्णमासां स्नानं सर्वफलप्रदैः। गृहीत्वा वालुकां पात्रे प्रस्थमात्रां युधिष्ठिर!। अथ वा धान्यमादाय यवशालितिलाढकम्। ततो वंशमये पात्रे वस्त्रयुग्मेन वेष्टिते। सावित्रीप्रतिमां कृत्वा ब्रह्मणश्चैव शोभनम्। सौवर्णीं रूप्यमयीं वापि स्वशक्त्या रौप्यनिर्मिताम्। रक्तवस्त्रयुगं दद्यात् सावित्र्या, ब्रह्मणः सितम्। सावित्रीं ब्रह्मणासार्द्धमेवं भक्त्या प्रपूजयेत्" इत्यादि।

ब्राह्मणावाप्तिव्रतं प्रभासखं० "ज्यैष्ठ्ये पौर्णमास्यान्तु दम्पती यस्तु भोजयेत्। परिधाय यथा शक्त्या दौर्भाग्यैर्मुच्यते नरः। गन्धपुष्पोपहारैश्च पौर्णमास्यान्तु योऽर्चयेत्। ब्राह्मण्यं लभते तस्य सप्तजन्मनि सुन्दरि!।

ब्रह्मप्राप्तिव्रतं भविष्यपु० "वह्नेः शुक्लपक्षस्य द्वादशी वा भवेच्छुभा। तस्यामुपोष्य विधिवत् सर्पीरं चरिमर्चयेत्। पर्यङ्कास्तरणं कृत्वा नानास्तरणसंयुतम्। तत्र लक्ष्म्या युतं देवं रौप्यं कृत्वा निवेदयेत्। तस्योपरि ततः पुष्पैर्मण्डपं कारयेद् बुधः। स्त्रीवादित्रगीतैश्च जागरं तत्र कारयेत्। एवं कृत्वा प्रभाते तु दापयेत् ब्राह्मणाय तम्। वेदवेदाङ्गयुक्ताय संपूर्णाङ्गाय धीमते। ब्राह्मणांश्च तथा भोज्य व्रतमेतत् समाप्यते। व्रतस्यान्ते ततो विष्णुर्भक्तो वै भवति ध्रुवम्"।

भद्रकालीव्रतं विष्णुधर्मोत्तरे "नवम्यां सोपवासस्तु भद्रकालीं प्रपूजयेत्। शुक्लपक्षे महाराज। कार्त्तिकात् प्रभृति क्रमात्। गन्धमाल्यनमस्कारधूपदीपान्नसम्पदा। संवत्सरान्ते संपूज्य व्रतान्ते ब्राह्मणाय तु। वस्त्रयुग्मं नरो दत्त्वा वसेत् कामफलाप्नुयात्। विधिना पूजयेत् कन्यां भद्रकालीं नराधिप!। नवम्यामाश्विने मासि शुक्लपक्षे

नरोत्तम !" । इत्युक्त्वा चाह "पूर्वोत्तरे तु दिग्भागे विखेत् वास्तुमनोहरे । भद्रकालीं समभ्यर्च्य चित्रवस्त्रैरलङ्कृतम् । भद्रकालीं घटे कृत्वा तत्र सम्पूजयेद्द्विज !"।

भद्रचतुष्टयव्रतं भविष्यपु० "शृणु राजन्वर्णितो भद्राणां विस्तरं परम् । कथयिष्ये न कथितं यत्नया कस्यचित् पुरा । शुक्ला मार्गशिरस्यादौ चतस्रस्तिथयो वराः । द्वितीया च तृतीया च चतुर्थी पञ्चमी तथा । एकभक्ताः प्रकुर्वीत प्रतिपदि जितेन्द्रियः । प्रभाते तु द्वितीयायां कृत्वा तत् करणीयकम् । प्रहरे वै समधिके गते स्नानं समाचरेत् । मन्त्रोयं तु संपठ्य मन्त्रैरेभिर्विचक्षणः" । "स्नात्वा चैव ततो नाम द्वितीयादौ चतुर्दिने । नमः कृष्णाच्युतानन्तहृषीकेशेति च क्रमात् । चतुर्दिने द्वितीयादिदेवमभ्यर्चयेद्व्रती । प्रथमेऽह्नि कृता पूजा पादयोरुक्तपाणिनः । नाभिपूजा द्वितीयेऽह्नि कर्त्तव्या विधिवत्करैः । हृदङ्घ्रितृतीयेऽह्नि पूजां वक्त्रे विन्यसेत् । चतुर्थेऽह्नि जगद्धातुः पूजां शिरसि विन्यसेत्" इत्यादि ।

भद्रातृतीयाव्रतं पद्मपु० "कार्त्तिकादि तृतीयायां प्राश्य गोमूत्रयावकम् । नक्तव्रतेन्दुदर्शेऽब्दं तदन्ते गोप्रदो भवेत् । गौरीलोके वसेत् कल्पं ततो राजा भवेदिह । एतद् भद्राव्रतं नाम सर्वकल्याणकारकम्" ।

भद्रासप्तमीव्रतं भविष्यपु० "शुक्लपक्षे तु सप्तम्यां नक्षत्रं सवितुर्भवेत् । यदा प्राप्यमवेत्तेन तदा तां भद्रतां व्रजेत् । सवितृनक्षत्रं रुक्ष्वा । "चतुर्थ्यामेकभक्तन्तु पञ्चम्यां नक्तमादिशेत् । षष्ठ्यामयाचितं प्रोक्तं उपवासस्ततः परम्" । "अनेन विधिना यस्तु कुर्याद्वै भद्रसप्तमीम् । भद्रा तदाति सप्तम्यां भद्रं तस्य व्रतं भवेत् । तस्य भद्राः सर्व एव गच्छन्ति ज्ञातयः सदा । तदभक्तः फलं तस्यां विधिना केन दीयते । व्योमभद्रमिति प्रोक्तं देवचित्तं मनोरमम् । आश्विनेऽस्यं प्रोक्तं चतुःकोणं मनोरमम् । गन्धेन सर्षपा युक्तं खड्गमर्करयान्वितम् । चतुर्जातकचूर्णेन द्राक्षाभिश्च विशेषतः" ।

भवानीतृतीयाव्रतं पद्मपु० "आसेपनञ्च यः कुर्यात् तृतीयायां शिवालये । समाप्ते धेनुदो याति भवानीव्रतमिदं शृणु" ।

भवानीव्रतं विष्णुपु० "पौषमाद्यामवाप्यां वर्षमेकमतन्द्रिता । उपवासरता नारी नरो वा द्विजसत्तमाः ! । वर्षान्ते सर्वगन्धाद्यां प्रतिमाञ्च निवेदयेत् । सा भवान्यास्तु सायुज्यं सारूप्यं वाथ व्रतता । लभते नात्र सन्देहः सत्यं सत्यं सनीश्वराः !" ।

भाद्रपदव्रतं महाभारते "प्रौष्ठपादन्तु यो मासमेकाहारो भवेन्नरः । धनाढ्यस्कीतमतुलमैश्वर्यं प्रतिपद्यते । राजसूयस्य यज्ञस्य फलं दशगुणं लभेत्" ।

भानुव्रतं पद्मपु० "सप्तम्यां नक्तभुक् दद्यात्ताम्रमाल्ये गां सकाञ्चनाम् । सूर्यलोकमवाप्नोति भानुव्रतमिदं स्मृतम्" ।

भास्करव्रतं कालिकापु० "कृतोपवासः षष्ठ्यान्तु सप्तम्यां यस्तु मानवः । करोति विधितः चाद्धं भास्करः प्रीयतामिति । सर्वरोगविनिर्मुक्तः सूर्यलोकमवाप्नुयात्" ।

भीमद्वादशीव्रतं पद्मपु० "यदाष्टम्यां चतुर्दश्यां द्वादशीष्वथ भारत ! । अन्येष्वपि दिनेष्वेषु न भक्तस्तूपोषितम् । ततः पुण्यामिमां भैमीं सर्वपापप्रणाशनीम् । उपोष्य विधिनानेन नरः विष्णोः परं पदम् । माघमासस्य दशमी यदा शुक्ला भवेत्तदा । कृतनाभ्यञ्जनं कृत्वा तिलैः स्नानं समाचरेत् । तत्रैव विष्णुमभ्यर्च्य नमो नारायणेति वै इत्यादि । "शृणु राजन् ! प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् । यानुपोष्य न दुःखानां भाजनं भजते जनः । माघमासे सिते पक्षे द्वादशी पावनी स्मृता । तस्यां जलार्द्रवसन उपोष्य सुखभाग् भवेत्" । "भीमाख्या द्वादशी चेति कृतकृत्या नरा यतः । इमा मुक्तस्तुनिना कथिता कृष्णनन्दन !। यश्चैनां कथितां यत्नात् कुर्याद्वा भक्तिभावतः । सर्वपापविनिर्मुक्तो विष्णुलोके महीयते । दरिद्रेणापि वा पार्थ ! विधिनाऽयं विधीयते । विष्णुभक्तेन कर्त्तव्या संसारभयभीरुणा । भीमेन या किल पुरा कथितत्वाद्व्रतौ भवत्स्थिरमुशीतलवारिधारा । तां द्वादशीं त्रिदशवेद्यसुखां चरेद्यः सम्यक् समाचरति याति स विष्णुलोकम्" ।

भीमव्रतं पद्मपु० "माघोपवासो यो दद्याद्विप्राय धीमते । सर्वेश्वरपदं याति भीमव्रतमिदं स्मृतम्" ।

भीष्मपञ्चकव्रतं नारदपु० "प्रवक्ष्यामि महापुण्यं व्रतं व्रतवतां वर !। भीष्मेणैतदुपदिष्टं पुरा प्राप्तं व्रतं यदा । तदाप्रभृत्यहं देवैस्तेनोक्तं भीष्मपञ्चकम् । व्रतस्यास्य प्रभावस्तु कः शक्तः कीर्तयेत्ततः । व्रतमेतत्कृतयुगे मन्वादीनां मनोरथम् । ततो नरैः प्रयत्नेन कर्त्तव्यं भीष्मपञ्चकम् । कार्त्तिकस्यामले पक्षे स्नात्वा समाहितव्रतः । एकादश्यान्तु कर्त्तव्यो व्रतं पञ्चदिनात्मकम् । प्रातः स्नात्वा विधानेन कर्त्तव्यं च तथा व्रतं । नद्यां निर्झरतीर्थे वा तडागस्यथ गोकुले । यत्रौषधिसिद्धैः कृष्णक

पितृन् सम्पर्पयेत् क्रमात्। स्नात्वा भौमं ततः कृत्वा धौतवासा दृढव्रतः"। इत्यादि "अर्चयित्वा हृषीकेशमेकादश्यां समाहितः। निःप्राश्य गोमयं सम्यक् एकादश्यामुपवसेत्। गोमूत्रं मन्त्रवद्भूयो द्वादश्यां पूजयेद् व्रती। क्षीरञ्चैव त्रयोदश्यां चतुर्दश्यां तथा दधि। संप्राश्य कायशुद्ध्यर्थं कुशतोयञ्चतुर्दिनम्"। प्राशनं होममन्त्रेण च। "पञ्चमे तु दिने स्नात्वा विधिवत् पूजयेत् क्षितिम्। भोजयेद् ब्राह्मणान् भक्त्या तेभ्यो दद्यात् दक्षिणाम्। तथोपदेष्टारमपि पूजयेद् वस्त्रभूषणैः। ततो नक्तं समश्नीयात् पञ्चगव्यपुरःसरम्। एवं सम्यक् समाप्तं स्यात् यथोक्तं व्रतमुत्तमम्। सर्वपापहरं पुण्यं प्रख्यातं भौमसञ्ज्ञकम्। जन्मप्रभृति यन्नीचं त्यक्त्वा पुण्यमवाप्नुयात्। तत्फलं समवाप्नोति संत्यक्त्वा भौमपञ्चके। मद्यपो वः पिबेन्नद्यां जन्मतोमरणान्तिकम्। तन्नीलपक्षके त्यक्त्वा सम्प्राप्नोत्यधिकं फलम्"।

भूभाजनव्रतं पद्मपु॰ "संवत्सरन्तु यो भुङ्क्ते नित्यमेव व्रतन्द्रितः। निवेद्य पितृदेवेभ्य पृथिव्यामेकराड्भवेत्" यो भुङ्क्ते पृथिव्यामित्यन्वयः।

भूमिव्रतं कालोत्तरे "शुक्लपक्षे चतुर्दश्यां यदा तिष्यार्कसङ्गमः। पूजयेत् पूर्वविधिना उपवासेन भूमिनम्"। पूर्वविधिना त्रिकुव्रतोक्तेनेत्यर्थः। "कुङ्कुमेनाक्षतैः सम्यक् गन्धपुष्पैः प्रपूजयेत्। पायसं घृतसंयुक्तं कृत्वा प्रस्थप्रमाणतः। भूमिदानं प्रकर्त्तव्यं शिवभक्ताय यत्नतः। अनेन व्रतयोगेन पृथ्वीपालत्वमाप्नुयात्। एतद्भूमिव्रतं नाम पृथ्वीपालस्तु कारयेत्"।

भोगसंक्रान्तिव्रतं स्कन्दपु॰ "वक्ष्येऽहं भोगसंक्रान्तिं सर्वभोगविवर्द्धनीम्। संक्रान्तिवासरं प्राप्य योषितस्तु समाचरेत्। कुङ्कुमं कज्जलञ्चैव सिन्दूरं कुसुमानि च। सुगन्धीनि च सर्वाणि ताम्बूलं मणिसंयुतम्"। मणिसंयुतं कर्पूरसंयुतम् "तण्डुलान् फलसंयुक्तान् प्रदद्याच्च विचक्षणः। अन्यान्यपि हि वस्तूनि भोगसाधनकानि च। दद्यात् प्रहृष्टमनसा विप्रेभ्यः प्रयतत्नतः। भोजयित्वा यथा शक्त्या वस्त्रयुग्मं प्रदापयेत्। एवं संवत्सरस्यान्ते रविं सम्पूज्य पूर्ववत्। सर्वालङ्कारसंयुक्तां धेनुं च दक्षिणां दद्यात् सपयोवहिजातये। एवं यः कुरुते भक्त्या भोगसंक्रान्तिमादरात्। स्यात् सुखी सर्वभक्ष्येषु भोगी जन्मनि जन्मनि"।

भोगावाप्तिव्रतं विष्णुधर्मोत्तरे "व्यतीपातन्तु यत्तीतावां प्रतिपत्प्रभृतिक्रमात्। पूर्ववत् पूजयेद्देवं विश्वरूपधरं हरिम्"। यद्यपि पूर्ववदिति रूपवाप्तिव्रतवदित्यर्थः "कृत्वा व्रतान्ते च तथा विप्रान् दत्त्वा सुवृत्तं शयनं द्विजाय। स्वर्लोकमाधाद्य चिरं नरेन्द्र! मानुष्यमाधाद्य च भोगवान् स्यात्"।

भौमवारव्रतं स्कन्दपु॰ "भौमोऽवन्तेश्वरः पुत्रः पृथिव्यां अनितो महान्। रूपेणैव सदा रम्यो वरदानाद्दिगीश्वरम्। यस्यैव दिवसे प्राप्ते ताम्रपात्रं सुशोभनम्। परिपूर्णं गुडेनैव वर्षमेकं प्रदापयेत्"।

भौमव्रतं भविष्योत्तरे "स्नात्वाभ्यङ्गारकं स्पृष्ट्वा उपवेश्यक्षभोजनः। पद्मे स्थण्डिल संन्यस्ते स्थापितं ताम्रभाजने। हैमं रक्ताम्बरच्छन्नं कुङ्कुमेनानुलेपनम्। नैवेद्यं गुडसंकारं पूजयेत् पुष्पाक्षतादिभिः। मन्त्रोच्चारेण तं दद्यात् ब्राह्मणाय कुटुम्बिने"। पद्मपु॰ "यदाषाढाधिपे भौमे पूजयेद्भौमवासरे। मङ्गलो भूमिपुत्रश्च ऋणहर्त्ता धनप्रदः। स्थिरासनो महाकायः सर्वकामार्थसाधकः। लोहितो लोहिताक्षश्च सामगानां कृपाकरः। धरात्मजः कुजो भौमो भूतिदो भूमिनन्दनः। अङ्गारको यमश्चैव सर्वरोगापहारकः। एतानि कुजनामानि प्रातरुत्थाय यः पठेत्। ऋणं न जायते तस्य धनं प्राप्नोत्यसंशयम्। त्रिकोणञ्च सदा कार्यं मध्ये छिद्रं प्रकल्पयेत्। कुङ्कुमेन सदा लेख्यं रक्तचन्दनकेन च। कोणे कोणे प्रकल्प्यानि त्रीणि नामानि भूमिप!। अरं वक्रं भूमिसुतं रक्तगन्धैश्च पूजयेत्"।

मङ्गलव्रतं देवीपु॰ "आश्विने चाथ माघे वा चैत्रे वा आरभेऽपि च। कृष्णादारभ्य कर्त्तव्यं व्रतं शुक्लावधिं चरेत्"। शुक्लावधिं शुक्लपक्षावधिम्। एतच्चोक्तमासेष्वेव यद्यमासप्रकारेण कृष्णाष्टम्यामारभ्य शुक्लाष्टमीं यावत् कर्त्तव्यम् "अष्टमीमाश्रितां कृष्णामेकभक्तेन कारयेत्। मङ्गलाङ्कयुतां देवीमथ वा रुद्रघातिनीम्। पूजयेद्विधिभेदेन गन्धमाल्यनिवेदनैः। नवभेदेन नवकृत्वो गन्धवर्णेन। "कन्यका मालवेदु यतुष! देवीभक्ताय दापयेत्। अथ वा नवरात्रेण सम्पर्यन्तिक एव वा। एकभक्तेन नक्तेनायाचितोपोषितैः क्रमात्"। नवरात्रमेकभक्तेन सप्त नक्तेन पञ्चायाचितेन तिस्र उपवासेनेति क्रमः। अष्टमीमारभ्य कृत्वा नवादिग्रहणं पूर्व-

लाभमर्हति पत्नाः "जपेतात्रिने शक्र ! यावच्छक्ता तु षष्टमी। पूजयेन्मङ्गलां तत्र मण्डले विधिवद्व्रते। सर्वसम्भारसम्पन्ने सर्वसिद्धिविधायके। सर्वकामानवाप्नुयात्" इत्यादि।

मङ्गल्यसप्तमीव्रतं गरुडपु० "मङ्गल्यं परमिच्छन्ती मङ्गलायतनं हरिम्। अर्चयेद्दिनता देवं सप्तम्यां सप्तपोषिता। माङ्गल्यं परमिच्छन्ती व्रतेनानेन चाप्नुयात्। पुमानपि यशः कीर्त्तिं बलमायुश्च विन्दति"।

मत्स्यद्वादशीव्रतं धरणीव्रते "मार्गशीर्षे शुक्लपक्षे तु दशम्यां नियताशवान्। स्नात्वा देवार्चनं कृत्वा अग्निकार्यं यथाविधि। शुचिवासाः प्रसन्नात्मा हव्यं चान्नं सुसंस्कृतम्। भुक्त्वा पञ्चपदं गत्वा पुनः शौचं तु पादयोः। कृत्वाऽऽचान्तमानन्तु चोरदन्तसमन्वितम्। भक्षयेद्दन्तकाष्ठं तु तत आचम्य यत्नतः। स्मृत्वा स्वानि तथाङ्गानि चिरं ध्यात्वा जनार्दनम्"। स्वानीन्द्रियाणि "शङ्खचक्रगदापाणिं पीतवस्त्रं किरीटिनम्। प्रसन्नवदनं देवं सर्वलक्षणलक्षितम्। ध्यात्वा जलं स्पृशेत्वा तु भानुरूपं जनार्दनम्। इद्धाग्निं द्रापयेत् पश्चात् करतोयेन मानवः। एवमङ्गानि संस्पृश्य तस्मिन् काले महामुने!। एकादश्यां निराहारो भूत्वाऽभ्यर्चयेऽच्युतम्। भोक्ष्यामि पुण्डरीकाक्ष! शरण्यं मे भवाच्युत!। तस्यां रात्र्यां शुभं पीठं स्थापयेदब्जसंयुतम्। तस्मिंश्च रौप्यं सौवर्णं ताम्रं वा दारवं तथा। अलाभतश्चोदपूर्णं कृत्वा पात्रं ततो न्यसेत्"। अलाभतः सौवर्णादीनामभावे दारवमपि कुर्यादित्यर्थः "सौवर्णं मत्स्यरूपेण कृत्वा देवं जनार्दनम्। वेदवेदाङ्गसंयुक्तं स्तुतिस्तुतिविभूषणम्"। तोयपूर्णं पात्रं कृत्वा तत्र मत्स्यरूपं जनार्दनं न्यसेदित्यन्वयः "तत्रानेकविधैर्भक्ष्यैः फलैः पुष्पैश्च शोभितम्। गन्धैरन्नैश्च धूपैश्च अर्चयित्वा यथाविधि। रसातलगता वेदा यथा देव त्वयाऽऽहृताः। मत्स्यरूपेण तद्वन्मां भवाद्दुद्धर केशव!। एवमभ्यर्च्य तस्याग्रे जागरं तत्र कारयेत्। यथाविभवसारेण प्रभाते विमले तथा। चतुर्भ्यां ब्राह्मणानां च चतुरो द्रापयेत् घटान्"।

अनन्तद्वादशीव्रतं मत्स्यपु० "चैत्रे मासि सिते पक्षे द्वादश्यां नियतव्रतः। स्थापयेद्वर्धं कुम्भं सितसूत्रपुरितम्। नानाफलयुतं तद्विद्यद्रत्नसमन्वितम्। सितवस्त्रयुगच्छन्नं सितचन्दनचर्चितम्। नानाभक्ष्यरसोपेतं सर्पिरन्नं तथोपरि। ताम्रपात्रं गुडोपेतं तदुपरि निवेशयेत्। तदभावे कृशं कुर्यात् कामदेवयवोन्नरः। कामनाम्ना हरेरर्चां स्थापयेद्दुकारिणा। शुक्लपुष्पाक्षतैस्तिलैरर्चयेदिति शेषम्। अनेन विधिना सर्वं मासि मासि समाचरेत्। उपवासो त्रयोदश्यामर्चयेद् विष्णुमव्ययम्। फलमेकञ्च सम्भाद्य द्वादश्यां भूतले क्षिपेत्। ततस्त्रयोदश्यां मासि धेनुसमन्विताम्। शय्यां दद्याद् द्विजेन्द्राय सर्वोपस्करसंयुताम्। काञ्चनं कामदेवं च शुक्लां गाञ्च पयस्विनीम्। वासोभिर्द्विजदाम्पत्यं पूजयेच्च प्रयत्नतः। विभूषणैः। सर्वगन्धादिकं दद्यात् प्रीयतामित्युदीरयेत्"।

मधुकतृतीयाव्रतं भविष्योत्तरे "फाल्गुनस्य सिते पक्षे तृतीयायामुपोषिता। स्नाता स्थिता ब्रह्मचर्यं ततोऽन्यस्मिन् दिने पुनः। व्रजेन्मधुवनं, गौरीं पूजयेत् मधुमालया। मन्त्रेणानेन ध्यात्वा तां पार्वतीप्रतिमां शुभाम्। स्नपनाभिनवैः कुम्भैः जटासङ्कटशोभिताम्। गोधारूढगतां देवीं रुद्रध्यानपरायणाम्। पूजयेत् गन्धकुसुमैर्दीपाक्षतचन्दनैः। पर्यङ्कशुक्लसुखरात्रिकृशोपगीतं दत्त्वा फलाक्षतयुतं मधुपादपस्य। गौरीव कामसदृशा भवतोऽस्तु नारी" इत्यादि।

मनोरथद्वादशीव्रतं पद्मपु० "फाल्गुनामलपक्षस्य एकादश्यामुपोषितः। नरो वा यदि वा नारी समभ्यर्च्य जगत्पतिम्। हरेर्नाम जपन् भक्त्या सप्तवारान् जनेश्वर!। चक्रिञ्च मण्डपे चैव हरिमेवाशु कीर्त्तयेत्। ततः प्रभाते विमले द्वादश्यां नियतो हरिम्। स्नात्वा सम्यक् समभ्यर्च्य दत्त्वा विप्राय दक्षिणाम्। हरिर्द्विजश्च वेत्यग्नौ हुतशेषं समाचरेत्। फाल्गुनश्चैत्रवैशाखौ ज्ञेयौ मासौ च पार्थिव!। चतुर्भिः पारणं मासैरभिनिष्पादितं भवेत्। रक्ताश्चैव चतुरो मासान् कुर्वीत चार्चनम्। जातीपुष्पाणि धूपञ्च गन्धः सर्जरसेन तु। प्राश्य दर्भोदकं चान्नं मौनव्रतं च निवेदयेत्। स्वयमेव ततोयाच्छेत्तं पूर्ववदाचरेत्। कार्त्तिकादिषु मासेषु गोमूत्रं क्वथितोदनम्। युगन्धं खेऽथवा धूपं पूजां भृङ्गारकेण च"। भृङ्गारको माकन्दः "क्षीरं चान्नं नैवेद्यं भुञ्जीयाच्च वै स्वयम्। प्रतिमासञ्च विप्राय दत्त्वा दक्षिणा तथा। प्रीयतं देवदेवस्य पारणे पारणे गते" वर्षाध्यधिकम्।

मनोरथपूर्णिमाव्रतं विष्णुधर्मोत्तरे "कार्त्तिक्यान्तु तथारभ्य संपूर्णं शशलक्षणम्। पूजयेदुदये राजन्! इदं मन्त्र-

शनो भवेत्। लवणं मण्डलं कृत्वा चन्दनेनानुलेपितम्। द्विदिगन्धसंयुक्तं ततः सोमन्तु पूजयेत्"। लवणं नैवेद्यलवणयुक्तम् "कृत्तिकारोहिणीयुक्तं कार्त्तिके मासि पूजयेत्। सौम्यार्द्रासंयुतं राजन्! मासि सौम्ये तथैव च। आदित्यपुष्यसंयुतं मासि पौषे च यादव!। मघासंयुतं माघे फाल्गुने श्रृणु पार्थिव!। आर्द्रामृगेण इत्थं सावित्रैः संयुतं पूजयेद्विभुम्। चित्राक्रान्तियुतञ्चैत्रे वैशाखे श्रृणु पार्थिव!। विशाखया च मैत्रेण युतं संपूजयेत्तथा। ज्येष्ठामूलयुतं ज्यैष्ठे आषाढे धनिलोत्तरे। श्रावणे श्रवणोपेतं वारुणेन अविघ्नया। तथा भाद्रपदे पौष्णा कलाश्विन्नर्क्षसंयुतम्। अश्विनी भरणीयुक्तं तथाश्वयुजे विभुम्" इत्यादि।

मनोरथसंक्रान्तिव्रतं स्कन्दपु० "अतः परं प्रवक्ष्यामि संक्रान्तिञ्च मनोरथाम्। गुडेन पूर्णकुम्भञ्च सवस्त्रञ्च सशक्तितः। सङ्क्रान्तिवासरे दद्याद्ब्राह्मणाय कुटुम्बिने। एवं संवत्सरे पूर्णे सयज्ञोद्यापनं शुभम्। गुडेन पर्वतं कार्य्यं वस्त्ररत्नैश्च भूषितम्। शयने चोत्तरे दद्याद्दित्तशाठ्यं न कारयेत्। यं यं प्रार्थयते कामं तं तं प्राप्नोति पुष्कलम्। सर्वपापविनिर्मुक्तः सूर्य्यलोके महीयते"।

मन्दारषष्ठीव्रतं भविष्योत्तरे "श्रृणु पार्थ! प्रवक्ष्यामि सर्वपापप्रणाशिनीम्। सर्वकामप्रदां पुण्यां षष्ठीं मन्दारसंज्ञिताम्। माघस्यामलपक्षे तु षष्ठ्यां लघुभुक् नरः। दन्तकाष्ठं ततः कृत्वा षष्ठीमुपवसेच्छुचिः। सर्वभोगविहीनस्तु षष्ठीमुपवसेन्नरः। प्राप्नोतीप्सां द्विजश्रेष्ठात् मन्दारं पार्थवेद्मनि" इत्यादि।

मन्दारसप्तमीव्रतं पद्मपु० "अथातः सम्प्रवक्ष्यामि सर्वपापप्रणाशिनीम्। सर्वकामप्रदां पुण्यां माघ्रा मन्दारसप्तमीम्। माघस्यामलपक्षे तु षष्ठ्यां लघुभुक् नरः। दन्तकाष्ठं ततः कृत्वा षष्ठीमुपवसेच्छुचिः। विप्रान् सम्यग् भोजयित्वा तु मन्दारं प्राशयेन्निशि। ततः प्रभाते उत्थाय कुर्य्यात् स्नानं पुनर्द्विजान्। भोजयेच्छक्तितः कृत्वा मन्दारकुसुमाष्टकम्"। मन्दारोराजार्कः "सौवर्णं पुरतस्कृत्य पद्मपत्रं सुशोभनम्। पद्मं कृष्णतिलैः कृत्वा ताम्रपात्रे ऽष्टपत्रकम्। हैमं मन्दारकुसुमं स्थाप्य मध्ये च पूजयेत्" इत्यादि वर्षसाध्यम्।

मरीचसप्तमीव्रतं भविष्यपु० "तथा संपूज्य देवेशं भानुं कामप्रदं नृप!। भोजयित्वा यथान्यञ्च ब्राह्मणांश्च विशेषतः। सप्तम्यां प्राशयेच्चापि मरीचं मनुजाधिप!। कृत्वा मरीचशतमग्र्यं शुद्धं परम्। मरीचं प्राशयेद्राजन् मन्त्रेणानेन वा सुधीः" इत्यादि।

मरुत्सप्तमीव्रतं विष्णुधर्मोत्तरे "चैत्रस्य शुक्लपक्षे तु सम्यक् स्नात्वासुपोषितः। सप्तम्यामर्चनं कृत्वाऽदितेर्नाम तत्र च। तत्र श्रेणीगतं सप्तमण्डलं नृप! कारयेत्। श्रेणी तथा कार्यसमा सप्तमण्डलकान्विता"। इत्यादि वर्षसाध्यम्।

मङ्गलादीव्रतं भविष्योत्तरे "मङ्गलैर्विशेषतः कार्य्यैरन्यैरपि भक्तितः। पूजयन्ति क्रमेणैव मासि मासि तनूर्भम्। मार्गशीर्षादिभिः पार्थ! पूजयेन्नामभिः। पारणे पारणे दद्यान्मङ्गिकानि द्विजातये। गन्धैः पुष्पैः क्षतादीपैर्गीतवाद्यैर्मनोहरैः। मङ्गलैश्च विविधैर्जागरं कारयेन्निशि। एतदानैः क्षीरदानैर्दीपदानैः पृथक् पृथक्। सर्वत्र देवदेवेशः कृष्णो मे प्रीयतामिति। एवमेव विधिः प्रोक्तो मन्त्रदानसमन्वितः। द्वादशीयं मयाद्यापि क्रियते बलसङ्क्षये। मङ्गलानां जयदा यस्मान्मङ्गलदर्शिनी। तस्मान्मङ्गैः प्रकर्त्तव्या मङ्गलैर्जयवाञ्छिभिः। कन्येनापि कौन्तेय! सर्वान्कामजयदायिनी। इमां चीर्त्वा पापमङ्गैर्मुच्यते नात्र संशयः। मङ्गोरादपतले लिखितैर्मङ्गलैरनाकुलकुलं लिखेत्। सम्पूजितः सपदि यत्र तिथौ ततस्त्वा द्वादशी भुवि गता बलमङ्गलेच्छा"।

महाजयासप्तमीव्रतं भविष्यपु० "शुक्लपक्षे तु सप्तम्यां यदा संक्रमते रविः। महाजया तदा ज्ञेया सप्तमी भास्करप्रिया। स्नानं दानं जपो होमः पितृदेवाभिपूजनम्। सर्वं कोटिगुणं प्रोक्तं तपनेन महौजसा। यस्त्वेतां मानवो भक्त्या इतेन स्नापयेद्रविम्। सोऽश्वमेधफलं प्राप्य ततः सूर्यपदं व्रजेत्"।

महातपोव्रतं महाभारते "मासि मासि तिरात्रञ्हि कृत्वा तु नियतेन्द्रियः। गवाधिपत्यं प्राप्नोति निःसपत्नमनामयम्। यस्तु संवत्सरं पूर्णमेकाहारो मनोहरः। अतिरात्रञ्च यज्ञञ्च सर्वं फलमवाप्नुते। दशवर्षसहस्राणि स्वर्गलोके महीयते। ततश्चयादिह चागत्य साम्राज्यं प्रतिपद्यते। यस्तु संवत्सरं पूर्णञ्चतुर्थं भक्तमश्नुते। अग्निष्टोमानिरो नित्यं सत्यवागविजितेन्द्रियः। वाजपेयस्य यज्ञस्य स फलं समवाप्नुते। त्रिंशद्वर्षसहस्राणि स्वर्गां दिवि मोदते। ऊर्द्धमेन तु भक्तेन त्रीन्वै संवत्

सर्वं नरः। सर्वां मेधस्य यज्ञस्य फलं प्राप्नोति मानवः। हंससारसयुक्तेन विमानेन स गच्छति। ब्रह्मलोकं स षड्विंशानि वर्षाणि दिवि मोदते। पक्षे पक्षे गते राजन्! योऽश्नीयाद्दर्भमेव तु। यज्ञमाधानजन्यस्य भगवानब्रवीत्। षष्टिवर्षसहस्राणि दिवमावसते स च। अश्नीयाद्दिनीये पक्षे यस्तु सर्वदिनेष्विति। वीणानां वल्लकीनाञ्च वेणूनाञ्च विशाम्यते!। सुघोषैर्मधुरैः शब्दैः स सुप्तः प्रतिबुध्यते। संवत्सरमिहैकन्तु मासि मासि पिबेत् पयः। फलं विष्णुसलोकत्वं प्राप्नोति स नरोत्तमः। किङ्किणीजालयुक्तेन विमानेन स गच्छति। अप्सरोभिः सुरकन्या रमयन्ति च तत्परम्। सप्तविंशं सहस्राणि वर्षाणां दिवि मोदते। मासादूर्ध्वं नरव्याघ्र! नोपवासो विधीयते"।

महाफलव्रतादशमीव्रतं विष्णुरहस्ये "पौषे कृष्णे विशाखासंयुक्ता चैकादशी भवेत्। तस्यां संपूजयेद्विष्णुमुपोष्य विधिवन्नरः। सुगन्धपुष्पनैवेद्यैर्धूपैर्दीपैर्मनोरमैः। मासानुमासमभ्यर्चेद्विधिना जगतोपतिम्। प्राशनाद्यायुषार्थं कार्यं मासक्रमेण तु। गोमूत्रसदृशं सर्पिराद्यस्य कामतः परम्। ततोदूर्ध्वं दधिक्षीरसितांश्चैव यवांस्तथा। जलमर्ककरैस्तप्तं दर्भांश्च क्षीरमेव च। द्वादशीं भोजयेद्विप्रान् दधिक्षीरगुडौदनैः। मासक्रमेण विप्रेभ्यो दद्यात्सम्यक्फलाप्तये। हृतं तिलक्षीरियवसुवर्णसंयुतं घटम्। मोदकैश्च युतं कृत्स्नमातपत्रन्तु पायसम्। फाणितं चन्दनं माला. सुगन्धाद्येति दक्षिणाः। व्रतमेतन्महापुण्यं दशाश्वमेधफलप्रदम्। कर्त्तव्यं धर्मनिरतैर्विष्णुपूजनतत्परैः। व्रतमेतत्वरः कृत्वा विप्राणां प्रवरे कुले। सुजन्मा जायते धीमान् वेदवेदाङ्गपारगः"।

महाफलव्रतं भविष्यपु० "शृणु कौरव! कर्माणि तिथिगुह्यानितानि तु। श्रुत्वैव पापहानिः स्यात् कृत्वानन्तं फलं लभेत्। क्षीराशनः प्रतिपदि। घृताहारो द्वितीयायाम्। लवणवर्जितं तृतीयायाम्। तिलान्नाशी चतुर्थ्याम्। क्षीराशनः पञ्चम्याम्। फलाशनः षष्ठ्याम्। शाकाशनः सप्तम्याम्। बिल्वाहारोऽष्टम्याम्। पिण्याशनो नवम्याम्। अनग्निपक्वाहारो दशम्याम्। एकादश्यामुपवासः। घृताशनो द्वादश्याम्। यावदाहारस्त्रयोदश्याम्। यावन्नाहारश्चतुर्दश्याम्। गोमूत्राहारः कुशोदकप्राशनः पौर्णमास्याम् एवं प्राशनविधिः। उक्तानि प्राशनान्येवं विधिपूर्वमुदाहृतम्। क्षीरं प्रतिपदादान्तु सर्वासु च विधीयते"।

महत्तमव्रतं स्कन्दपु० "वैदिकेन विधानेन व्रतं पुण्यं महत्तमम्। कथितव्यो तु कर्त्तव्यं विधानं तद्वदस्व मे"। स्कन्द उवाच "मासि मासि भाद्रपदे शुक्ले च प्रतिपत्तिथौ। नैवेद्यन्तु पचेन्नौनी षोडशस्त्रिगुणानि च। फलानि पिष्टपक्वानि दद्याद्विप्राय षोडश। देवाय षोडशैतानि दातव्यानि प्रयत्नतः। भुञ्जते षोडश तथा व्रतस्य नियमात्मयात्। सौवर्णं कारयेद्देवं यथा शक्त्या श्रिरक्ष्मयम्" इत्यादि।

महाराजव्रतं स्कन्दपु० "यदागच्छ! चतुर्दश्यामाद्रां भाद्रपदाथ वा। सितायामसितायां वा न विशेषो यथा गवि। तदा लक्षैकभूतं वा लयोदश्यां यथाविधि। सर्ववत्तं महाराजं तदा संकल्पयेन्नरः। चतुर्दश्यां ततः कुर्यात्तिलगोभूगोमयैः। स्नदाच गन्धगन्धेन स्नानं गुडाम्बुना ततः। शिवसंकल्पमन्त्रस्य ततो दशगतं पठेत्। शिवसंकल्पमन्त्रो यजाग्रतो दूरमित्यादिर्यजुःशाखाप्रसिद्धः "पञ्चाक्षरस्तु शूद्रस्य जन्मकोटिकृतैर्व्रतः। मुच्यते पातकैः सर्वैस्तत्कृत्वा नात्र संशयः"।

महालक्ष्मीव्रतं स्कन्दपु० "महाराज! निबोधेदं महालक्ष्मीव्रतं शुभम्। भद्र! भाद्रपदे मासि शुक्लाष्टम्यां नरोत्तम!। स्नात्वाभ्यर्च्य महालक्ष्मीमेकभक्तं प्रकल्प्य च। कङ्कुमाक्तव्रतं सूत्रं षोडशग्रन्थिसंयुतम्। तन्तुभिस्तत्प्रमाणैश्च बध्नीयात्तु करे शुभम्। दूर्वाक्षतप्रवालानां षोडशैव तु षोडश। पुनरेवाश्विने मासि कृष्णाष्टम्यां दिने शुभे। व्रतसूत्रं कारयेद्ब्राह्मणैर्वेदपारगैरादितम्"।

महाव्रतं कालिकापु० "महाव्रतमथो वक्ष्ये येनारोग्यं लभेन्नरः। सुरासुरमुनीनाञ्च दुर्लभं विधिना शृणु। पर्वण्याश्वयुजस्यान्ते पायसञ्च हविष्यकम्। नक्तं भुञ्जीत शुद्धात्मा चन्दनञ्चैवान्वितम्"। आश्वयुजस्यान्ते कार्त्तिके। पर्वणि अमावस्यायां कार्त्तिकस्यान्त इत्यर्थः। ऐलव इत्युरसः। लिङ्गपु० "अष्टम्याञ्च चतुर्दश्यां पक्षयोरुभयोरपि। वर्षमेकं ततो भुक्त्वा नक्तं यः पूजयेच्छिवम्। सर्वयज्ञफलं प्राप्य स याति परमाङ्गतिम्"। विष्णुधर्मोत्तरे "योगभूतं हरिं देवं चातुर्मास्यमुपोषितम्। अर्चयेत् पौर्णमास्यान्तु सोऽश्वमेधफलं लभेत्"। योगभूतं सकलम् "अष्टभूतसमावास्यां पूजयेत्तामुपोषितः। राजसूयमवाप्नोति कुलसङ्घरति क्रमम्"।

ब्रह्मभूतं नियच्छन्तं "ब्रह्मभूतमयाच्छां पौष्करीच्छां तथैव च। दोग्धारं परिचरन् वेदवं मदमाप्नुयात्। चतुर्थं प्रीतिमाप्नोति मासयोश्चांत्रयोः सदा। पूजितः सोपवासेन भक्त्या देवेश्वरो हरिः। महाव्रतमिदं ख्यातं सर्वकल्मषनाशनम्। संवत्सरमिदं कृत्वा नाकपृष्ठे महीयते" इत्यादि।

महासप्तमीव्रतं भविष्यपु० "माघस्य शुक्लपक्षे तु पञ्चम्यादु कुरुद्वह!। एकभक्तं समाख्यातं षष्ठ्यां नक्तमुदाहृतम्। सप्तम्यामुपवासस्तु केचिदिच्छन्ति सुव्रत!। षष्ठ्यां केचिद्वदन्त्योह सप्तम्यां राधनं विदुः। अतोऽयवाः षष्ठ्यान्तु पूजयेदु भास्करं बुधः। रक्तचन्दनमिश्रैस्तु करवीरैः समाकुलैः। गुग्गुलेन महाबाहो! सुगन्धेन च सुव्रत!। पूजयेद्देवदेवेशं महेशं शङ्करं रविम्"। शङ्करं सुखकरमित्यर्थः "एवं हि चतुरोमासान् माघादीन् पूजयेद्विभुम्। आत्मनश्चापि सुखार्थं ब्राह्मणं भोजयेत्तथा च। स्नानन्तु भोजनेनैव कर्त्तव्यमात्मसुखये। ब्राह्मणान् दिव्यभोगांश्च भोजयेच्छापि शक्तितः"। दिवि देवकृते भवाः दिव्या इतरे भौमाः। "ऋतादिष्वपि मासेषु श्वेतचन्दनमुच्यते। श्वेतानि चापि पुष्पाणि शुभगन्धान्वितानि वै। क्षीरान्नं तथा घृतं नैवेद्यं परमं स्मृतम्। तेनैव ब्राह्मणान् साधून् भोजयेच्च महामते!। प्राशयेत् पञ्चगव्यन्तु स्नानं तेनैव सुव्रत!। कार्त्तिकादिषु मासेषु क्रमशस्तिलसर्षपैः स्नानम्। पूजनं कुरुशार्दूल! धूपयेदागरादिभिः। नैवेद्यं गुडपूपाश्च तथैवेक्षुरसः स्मृतः। तेनैव ब्राह्मणान् साधो भोजयेच्च समक्षितः। कुमोदकं प्राशयेच्च स्नानन्तु कुरु सिद्धये। अतीतवारश्चस्नाने माघे माघि महामते!। भोजनं तत्र दानन्तु द्विगुणं परमुदाहृतम्। देवदेवस्य पूजा च कर्त्तव्या शक्तितो बुधैः। रथस्य चापि दानन्तु रथयात्रा च सुव्रत!। रथस्य प्राप्तिहेतोर्वै कर्त्तव्या विभवे सति। दानं सर्वरथस्यैव यथोक्तं विभवे सति। इत्येषा कथिता पुत्र! रथाङ्गसप्तमी शुभा। सप्तमीति महाख्याता महापुण्या महोदया। यास्यतोऽत्र धनं पुत्रान् कीर्त्तिं विद्यां समश्नुते"।

महेश्वरव्रतं विष्णुधर्मोत्तरे "शुक्लपक्षादवारभ्य फाल्गुनस्य नराधिप!। पूजयेत् तु चतुर्दश्यां सोपवासो महेश्वरम्। गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा। व्रतान्ते गां तथा दत्त्वा यज्ञिकोनफलं लभेत्। एतदेव व्रतं कृत्वा शुक्लपक्षे तु वत्सरम्। पौष्करीकमवाप्नोति कुलसङ्घरति स्वकम्। चतुर्दशीह्यवैतत् कृत्वा संवत्सरं नरः। मासि मासि यथाभक्त्या सर्वान् कामानवाप्नुते। यावाद्य कामांश्च महेश्वरस्य तथापि कान्तं सुचिरञ्च राजन्!। सायुज्यमाप्नोति महेश्वरस्य सर्वेश्वरस्यापतिसञ्च तस्य"।

महेश्वराष्टमीव्रतं विष्णुधर्मोत्तरे "शुक्लपक्षात्तथारभ्य सौम्याष्टम्यां नराधिप!। पूजयेत् सोपवासस्तु देवदेवं त्रिलोचनम्"। सौम्याष्टम्यां मार्गशीर्षाष्टम्याम् "सिते वाप्यथ चाङ्गीयां कमले यदि वा स्थले। दत्तक्षीराभिषेकेण स्नातेन विविधेन वा। गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा। नीतेन शुक्लवासेन वह्निसन्तर्पणेन च। ब्राह्मणानाञ्च पूजाभिर्यजयन्नुत्तमोत्तम!। व्रतावसाने दत्त्वा तु तथा धेनुं पयस्विनीम्। पौष्करीकमवाप्नोति कर्मणोक्तञ्च यत्फलं"।

महोत्सवव्रतं स्कन्दपु० "आविधिष्टभवैर्दीपैः पञ्चभिर्नवभिस्तथा। कुर्यादारात्रिकं शम्भोः सर्पपात्रैः सुसंस्कृतैः। विचित्रवस्त्रपूजा च कर्त्तव्या महती शिवे। पुष्पमण्डलिकां चित्रां सवितानोज्ज्वलां शुभाम्। महोत्सवेन विधिवद्देयं तूर्यरवेण च। विविधैर्भक्ष्यभोज्यैश्च नैवेद्यैश्चोपकल्पयेत्। सम्यक् सम्पादनीया स्यात् रथयात्रा पिनाकिनः। प्रेक्षणीयैस्तथा नृत्यैर्वादित्रैश्च शोभनैः। पूजयेच्छिवभक्तांश्च विप्रानन्यांश्च भक्तितः। प्रीयतां शिव इत्युक्त्वा नक्तं भुञ्जीत च स्वयम्। वर्षेवर्षे प्रकर्त्तव्यं एतच्चैवोत्सवं महत्। शिवभक्तेष्वथान्येषु कीर्त्तिश्चेयोविवर्द्धते"।

माघमासव्रतं भविष्योत्तरे "एतस्मात् कारणात् शक्र! माघस्नानं विशिष्यते। कर्त्तव्यानि तु दातव्यान्यिहाः शर्करान्विताः। त्रिभागस्तु तिलानां हि चतुर्थः शर्करान्वितः। सुनक्षत्रो वरारोहे सर्वं माघं नयेद् व्रती। सूर्योमे प्रीयतां देवो विष्णुमूर्त्तिर्निरञ्जनः। माघावसाने सुभगे! भद्रं सम्प्रदापयेत्। दम्पत्योर्वाससी शुक्ले सप्रधानसमन्विते। त्रिंशत्तु मोदका देयाः घृतालिप्ताः सुशोभनाः। मरिचैर्निर्मिताः शुभ्राः नारङ्गाश्चि च दापयेत्"।

माघनवमीव्रतं भविष्योत्तरे "मातरश्चैव संपूज्याः यथा शक्त्या मयव्रतः। तदपे शिवभक्तांस्तु भोजयेत् विभवतः। एवं कृत्वा विधानेन सर्वान् कामानवाप्नुयात्"।

दत्त्वा पञ्चमे मातृनामान्यभिधाय चक्रम् "नवम्यां पूजयेद् वस्तु मासि चाश्वयुजे सदा। अक्षयस्थितमभावस्तु भवते नात्र संशयः"।

मातृव्रतं वराहपु० "मातृणामष्टमी दत्ता ब्रह्मणा तिथिरुत्तमा। एताः क्षमापयेद्भक्त्या निराहारो नरः सदा। तस्य ताः परितुष्टास्तु क्षेमारोग्यं ददन्ति वै"।

मार्गशीर्षव्रतं महाभारते "मार्गशीर्षन्तु यो मासमेकभक्तेन संक्षिपेत्। भोजयेत्तु द्विजान् भक्त्या मुच्यते व्याधिकिल्बिषैः। सर्वकल्याणसम्पूर्णः सर्वदुःखविवर्जितः। उपोष्य व्याधिरोहितो वीर्यवानभिजायते। ऋद्धिभागी बहुधनो बहुधान्यश्च जायते"।

मार्तण्डसप्तमीव्रतं भविष्यपु० "मार्तण्डसप्तमीं कृष्ण! शृणान्यां वच्मि तेऽनघ!। पौषमासे सिते पक्षे सप्तम्यां रसपोषितः। सम्यक् संपूज्य मार्तण्डं मार्तण्ड इति वै जपन्। पूजयेत् कृतयं भक्त्या चक्रया परयान्वितः"। कृतयः कृत्यः "पुष्पधूपोपहारादैरुपवासैः समाहितः। मार्तण्डेति जपन्नाम पुनस्तद्गतमानसः। विप्राय दक्षिणां दद्यात् यथाशक्त्या सुवर्णज। द्वितीयेऽह्नि पुनस्नात! तत्रैवाभ्यर्चनं रवेः। तेनैव नाम्ना संबोध्य दत्त्वा विप्राय दक्षिणाम्। ततो भुञ्जीत गोदोहसमुद्भूतसमन्वितम्। एवमेवाखिलान् मासान् उपोष्य प्रयतः शुचिः। दद्याद्वार्षिकं विद्वान् प्रतिमासञ्च शक्तितः। पारिते च पुनर्वर्षे यथापूर्वं गवाह्निकम्। दत्त्वा परत्र भूयः स्यात् सर्वं फलमश्नुते। सर्वसङ्कटः पञ्चगावः सप्त तु वृषभवरः। प्रतिमासं द्विजातिभ्यो दत्त्वा यत् फलमश्नुते। तदाप्नोत्यखिलं सम्यगनन्तमेतदुपोषितः। तत्र लोकमवाप्नोति मार्तण्डो यत्र तिष्ठति"।

मासव्रतं देवीपु० "मासं रसोत्तमं दद्याद् व्रतं पौषे महाफलम्"। रसोत्तमं सप्तम्यम् "तिलान्माघे क्षमिश्रेष्ठ! सप्त धान्यानि फाल्गुने। विधिवच्चापि वस्त्राणि चैत्रे दद्याद् द्विजातये। वैशाखे द्विज! गोधूमान् ज्यैष्ठे लोष्टव्रतं घटम्। आषाढे चन्दनं देवं शर्करं मधुफलम्। नवनीतं नभोमासि क्षत्रं प्रौष्ठपदे व्रतम्। गुडधेनुरवाश्वयुजे कार्त्तिके यः प्रयच्छति। सर्वकामानवाप्नोति क्रमेण च सदाद्भुतम्"।

मासोपवासव्रतं विष्णुधर्मोत्तरे "आश्विनस्यामले पक्षे एकादश्यामुपोषितः। व्रतमेतत् तु कृष्णीयाद् यावत् त्रिंशद्दिनानि तु। वासुदेवं समुद्दिश्य कार्त्तिकं सकलं नरः। मासस्योपवसेद्वस्तु स तत्फलमाप्नुयात्। अच्युतस्याग्रतो भक्त्या लिखितं कुसुमैः शुभैः। मालतीन्दीवरैः पद्मैः कमलैः सप्तपर्णिभिः। कुङ्कुमोशीरकर्पूरैर्विलिख्य वरचन्दनैः। नैवेद्यधूपदीपाद्यैरर्चयेत जनार्दनम्" इत्यादि।

मुक्तिद्वादशमीव्रतं मत्स्यपु० "अश्वमेधादियज्ञानां सप्तकोटिगुणैरपि। तत् फलं लभते पुंसा मुक्तिद्वादशव्रतेन यत्। योगमार्गमनभ्यस्य यतेराचारवानपि। अस्य युक्तो व्रतस्यापि व्रतेनानेन मुच्यते। शुक्लपक्षे प्रथमे दन्तधावनमाचरेत्। नमोऽस्त्वेवेत्युदीर्याथ सर्वकालेन भक्तिमान्। अथ वा पुष्य मूलेन जलेनाङ्गारवर्जनं तथा। कृत्वा पवित्रं देवानां मन्त्रेणाङ्गसमित्स्थितम्। रक्तचन्दनपद्मन्तु विष्णोर्होमयथाविधा। प्राकृते षोडशदलं समर्चेदब्जकर्णिकम्" इत्यादि।

सुखव्रतं पद्मपु० "सुखरात्रं परित्यज्य सप्तम्यां गोप्रदो भवेत्। यत्तत्पितृगणाप्नोति सुखव्रतमिदोच्यते"।

सुनिव्रतं विष्णुधर्मोत्तरे "सप्तम्यां सुनिशार्दूल! दत्तानभ्यर्चयेन्मुनीन्। आध्यायफलमाप्नोति तद्वाक्यफलमश्नुते"।

सूर्यसोमव्रतं पद्मपु० "आश्वे मासि कृष्णे च सप्तमेऽहनि। त्रिपर्वणा त्रिशल्येन त्रिसुखेन यरेण च। सुखानि त्रीणि त्रिच्छेद यज्ञश्च सूर्यरूपिणः। तैः शिरोभिस्तपत्पद्मं वरः प्राप्तोऽथ सप्तराट्"। त्रिशल्येन त्रिसुखेन शल्यरूपत्रिसुखेनेत्यर्थः। सूर्यरूपित्रिसुखसूर्यरूपिण इत्यर्थः "श्लोभिः पूज्यानि तानीति न मनुष्यैः कदाचन। सूर्यसोमं ततः कृत्वा त्रिकोणाकारन्तु सूक्ष्मयम्। क्षीरेण तर्पणीयं वै पूजनीयं यथाविधि। अर्घैः पुष्पैश्च धूपैश्च नैवेद्यैर्विविधैरपि। शाकैः सौवर्चलाभिश्च कृतैः पिष्टमयैः शुभैः"। सौवर्चलाभिः कृतसौवर्चलाभिः। "कांस्यभाजनवादौश्च पश्चात् कार्यं तु भोजनम्"।

सेवपाचीरतीयाव्रतं भविष्यपु० "अश्वयुक्शुक्लपक्षे च तृतीयायां युधिष्ठिर!। सेवपाको प्रदातव्या भक्त्या स्त्रीभिर्न्निशात्यया। अर्घैः विरूढैर्गोधूमैः सप्तधान्यसमन्वितैः। तिलतण्डुलमिश्रैश्च दातव्या धर्मसिद्धये"। युधिष्ठिर उवाच "कोदृशी सा भवेद्धात्री सेवपाको जनार्दन!। कस्यां कीदृशं तस्याः को मन्त्र इति मे वद"। श्रीकृष्ण उवाच "ताम्रभाजनवादौश्च पक्वैरन्ना वरो

वनश्वरी। वाटीषु वा न मार्गेषु प्रेषिता पर्वतेषु वा। यत्र वा दृश्यते राजन्! शुचौ देशे समन्विता। मेघपाली समभ्यर्च्या फलैः पुष्पैस्तथाक्षतैः। खर्जूरैर्नालिकेरैश्च नारङ्गैर्दाडिमैस्तथा। बीजपूरैः कपित्थैश्च सप्तधान्यैर्विरूढकैः"।

मौनव्रतं स्कन्दपु० "नभस्ये व्यतिक्रान्ते नभस्ये च प्रवर्त्तिते"। नभाः, श्रावणः, नभस्यो भाद्रपदः तौ चात्र पूर्णिमान्तौ ग्राह्यौ। "एवं कालक्रमेणैव श्रावणी पूर्णिमा गता। तद्दिनं प्राप्य विप्रेभ्योऽत्रेत्याभिधानात्। "व्रतमेतत्तु कर्त्तव्यं षोडशैव दिनानि तु। एतच्छ्रुत्वा ततो देवी प्रहृष्टा वाक्यमब्रवीत्"। पार्वत्युवाच "किं विधानं पुरा प्रोक्तं व्रतं मौनव्रताह्वयम्। तन्ममाग्रे समाचक्ष्व प्रसादं कुरु मे प्रभो!"। ईश्वर उवाच "तद्दिनञ्च समाप्य सभार्य्यः सह बान्धवैः। गत्वा प्रभातसमये स्नानार्थं जलसन्निधौ। तडागे वा नदीदेशे गत्वा प्रस्रवणेऽथ वा। स्नानं कार्य्यं तदा सर्वैः शिवध्यानपरायणैः। दूर्वाकाण्डं सुसंस्पृष्टं षोडशग्रन्थिसंयुतम्। तत्सूत्रञ्च करे न्यस्य स्थित्वा यामे नदीजले। एवंविधानं कर्त्तव्यं यावत् स्यात् प्रतिपद्दिनम्। तद्दिने चैव संप्राप्ते समाप्तार्थं व्रतस्य तु। मौनेनैवानयेत्तोयं मौनात् गोधूमपेषणम्। मौनेनैव च कर्त्तव्यं नैवेद्यं भोजनादिकम्। सर्वोपस्करमादाय गत्वा च जलसन्निधौ। स्नानं कार्य्यं तदा तत्र नित्यकर्म ततः परम्। देवर्षिमनुजानाञ्च पितॄणाञ्चैव तर्पणम्। पश्चाद्देवाधिदेवेशं मन्त्रैः सम्पूजयेत् ततः"।

क्षमाचतुर्थीव्रतं कूर्मपु० "भरणस्थान्तु चतुर्थ्यान्तु शनैश्चरदिने यमम्। पूजयेत् सप्तजन्मोत्थैर्मुच्यते पातकैर्नरः"।

यमद्वितीयाव्रतं भविष्योत्तरे "कार्त्तिके शुक्लपक्षस्य द्वितीयायां युधिष्ठिर!। यमो यमुनया पूर्वं भोजितः स्वगृहे सदा। द्वितीयायां मनोल्लासे नारकीयाश्च तर्पिताः। पापेभ्योऽपि विमुक्ताश्च मुक्ताः सर्वनिबन्धनात्। भगिनीहस्तसन्तुष्टाः स्थिताः सर्वे यथेच्छया। तेषां मनोल्लासो जातो यमराड्मुक्तबन्धनः। अतो यमद्वितीया सा प्रोक्ता लोके युधिष्ठिर! यस्यां निजगृहे पार्थ! न भोक्तव्यमतोबुधैः। स्वेष्टेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनम्"।

यमव्रतं भविष्यपु० "दशम्यां यमराडिष्टः सर्वव्याधिहरो नृणाम्। मूलमन्त्राः सर्वकामिरङ्गमन्त्राश्च कीर्त्तिताः। पूर्ववत् पञ्चपत्रस्थः कर्त्तव्यश्च तिथीश्वरः"। इदं व्रतं वैशाखनक्षत्रतिथ्यादृतवद्दृश्याख्येयम्। कूर्मपु० "उपोषितश्चतुर्दश्यां लक्षपत्रे समर्चितः। यमाय धर्मराजाय मृत्यवे चान्तकाय च। वैवस्वताय कालाय सर्वभूतक्षयाय च। प्रत्येकं तिलसंयुक्तान् दद्यात् सप्तोदकाञ्जलीन्। स्नात्वा नद्यान्तु पूर्वाह्णे कृष्यते सर्वपातकैः"। महाभारते "बलिष्युः पञ्चमीं सर्वां यमान् यो भोजयेद् द्विजान्। अष्टमीमथ कौन्तेय! शुक्लपक्षे चतुर्दशीम्। उपोष्य व्याधिरहितो रूपवानिति जायते"। विष्णुधर्मोत्तरे "यत्र क्वचन नद्यान्तु यत्र क्वचा चतुर्दशी। अमावास्युदिते काले दैवं सम्पूजयेद् यमम्। घृतपूर्णं चित्रगुप्तं कालपाशञ्च यादव!। मृत्युं स्वर्गञ्च धर्मञ्च गन्धमाल्यादिसम्पदा। यमोदधार इत्युक्त्वा तिलांश्च जुहुयात् ततः। नमो यमायेति तथा स्त्रीशूद्रश्च विधीयते। ब्रह्मरं भोजयेद्विप्रान् यथाशक्ति नरोत्तमः। दद्याद् व्रतान्ते विप्राय तथैव च पयस्विनीम्। कृत्वा व्रतं वत्सरमेतदिष्टं न याति राजन्! नरकं मनुष्यः। पापक्षयं प्राप्य स याति नाकं मानुष्यमासाद्य स धर्मवान् स्यात्"।

यमादर्शनत्रयोदशीव्रतं भविष्योत्तरे "पूर्वाह्णे मार्गशीर्षादौ वर्षमेकं निरन्तरम्। त्रयोदश्यां सौम्यदिने सूर्याङ्गारकवर्जिते। मम नाम्ना द्विजानष्टौ पञ्च चैव समाभुञ्जेत्। पुराणवेदतत्त्वज्ञान् स्वाचारांस्तन्वदर्शनान्। सूर्यैकशरणात् साधून् सर्वभूतहिते रतान्। शुचौ देशे शुभे पट्टे प्राङ्मुखानुपवेशयेत्। तन्वांसोयुतान् भक्त्या यत्नेनाभ्यङ्गयेत तान्। त्रयोदश्यां त्रयोदश्यां ये करिष्यन्ति भूतले। एकभक्तेन नक्तेन उपवासेन वा पुनः। यमादर्शनसंज्ञा वै व्रतं सर्वव्रतोत्तमम्। ते सर्वपापनिर्मुक्ता विमानेनार्कवर्चसा। यास्यन्तीन्द्रपुरीं रम्यामप्सरोगणसंवृताम्"।

युगादिव्रतम् आदिपु० "वैशाखस्य तृतीयायां श्रीमन्मेतं जगद्गुरुम्। नारायणं पूजयेथाः पुष्पधूपविलेपनैः। वस्त्रालङ्कारसम्भारैर्नैवेद्यैर्विविधैस्तथा। ततस्तस्याग्रतो धेनुर्वत्सवत्सादकेन तु। कार्या कृष्णकलेऽद्य! चतुर्भोगेन वत्सकम्। अविच्छेदोपरि स्थाप्य कल्पयित्वा विधानतः। ब्राह्मोक्तक्रमयोगेन ब्राह्मणायोपपादयेत्। श्रीधरः श्रीपतिः श्रीमान् श्रीशः संप्रीयतामिति। अनेन विधिना दत्त्वा धेनुं विप्राय भारत!। गोषड्भप्रदानस्य फलं प्राप्नोत्यसंशयम्। तथैव कार्त्तिके मासि नवम्यां

नक्तभुग् नरः। स्नात्वा नद्यां तड़ागे वा देवखातेऽथ वा पुनः। समासदार्द्रं वरद नीलकण्ठमथार्चयेत्। पुष्पधूपादिनैवेद्यैर्दीपगन्धादिभिस्तथा। धेनुं तिलमयीं दद्यात् पुराणोक्तविधानतः। अष्टमूर्त्तिर्नीलकण्ठः प्रीयतामिति कीर्त्तयेत्। तदनु प्राप्यते पुण्यं पार्थ! न केन वर्ण्यते। दत्त्वा तिलमयीं धेनुं शिवलोकमवाप्नुयात्। त्रयोदश्यां नभस्ये वा पितॄन् तत्र समर्चयेत्। पितॄन् पायसदानेन सुमनोभिर्हरेण च। भोजयेद् ब्राह्मणान् भक्त्या वेदवेदाङ्गपारगान्। पितॄनुद्दिश्य दातव्या सर्वदा कांस्यदोहना। प्रत्यब्दा गौर्महाभाग! तरुणी सुपयस्विनी। पिता पितामहश्चैव तथैव प्रपितामहः। मातामहाश्चतयस्तथैवात्र त्रयो मम। प्रीयन्तामक्षयप्रदानेन इति दत्त्वा विसर्जयेत्। अनेनानेन राजेन्द्र! यत् पुण्यं प्राप्यते पुनः। तदन्येन न शक्यन्तु वक्तुं वर्षशतैरपि। पुत्रांश्च पौत्रांश्च धनं सर्वं समृद्धीप्सितम्। इहैवाप्नोति पुरुषः परत्र च पराङ्गतिम्। पञ्चदश्यान्तु माघस्य पूजयित्वा पितामहम्। गायत्र्या सहितं देवं वेदवेदाङ्गभूषितम्। नवनीतमयीं धेनुं फलैर्नानाविधैर्युताम्। सक्षीरवत्सां सत्कृत्य ब्रह्मणाय निवेदयेत्। प्रीयेतां प्रीयतां मेऽद्य ब्रह्मयोनिः पितामहः। यत्स्वर्गे यच्च पाताले यत्कर्त्ये किञ्चिदुर्लभम्। तदवाप्नोत्यसन्दिग्धं पद्मयोनेः प्रसादतः। यानि चान्यानि दानानि दीयन्ते सुखहेतवे। युगादिषु महाराज! क्षयव्याधि भवन्ति हि। वित्तहीनः सत्कृत्या यो ददाति स्वल्पकं वसु। तदप्यक्षयतां याति नात्र कार्य्या विचारणा"।

युगावतारव्रतं भविष्यपु० "माघि प्रौष्ठपदे यत्तु कृष्णपक्षे त्रयोदशी। अयनोर्ध्वं युगं तत्तु त्रेतायान्तु समाहित!"। त्रेतायां विष्णुभक्तायां एतत्तां तिथौ युगमयनोर्ध्वमिति सम्बन्धः। अयनोर्द्ध द्वापरमिति कथ्यते "गोमूत्रं गोमयं दूर्वां समानीय च मृत्तिकाम्। स्नात्वाऽऽर्द्रे तड़ागे वा तिथौ तस्यां समाहितः। कृतेनानेन भवेच्छ्राद्धं शतायान्तु न संशयः। युगादौ यस्त्रिलोकेशं स्नापयेदुमरुद्ध्वजम्। घृतक्षीरजलैः पुण्यैः स गच्छेदैप्सितीं पुरीम्। स्नापितोऽथ विधिप्रोक्त पूजितोऽथ नमस्कृतः। युगादौ युगकर्त्ता तु नृणां सुकृतदो हरिः। कृते वै सर्वयज्ञेन युगादौ जगतीपतिः। पूजनीयो जनैर्भक्त्या सर्वदुःखहरो हरिः"।

योगव्रतं भविष्योत्तरोक्तम् "विष्कुम्भादिषु योगेषु भवेदेकादशो नरः। यो ददाति क्रमात् पार्थ! इतनैवफलेप्सवे। यवगोधूमवरणं निष्पावाञ्चालितण्डुलान्। लवणं दधि दुग्धञ्च वस्त्रं कनकमेव च। कम्बलं गोवृषं कांस्यमुपानद्युगलं तथा। कर्पूरं कुङ्कुमञ्चैव चन्दनं कुसुमानि च। लौहं ताम्रञ्च कांस्यञ्च रौप्यञ्चेति युधिष्ठिर!। स्नातः सत्कृत्य विधिवत् सर्वपापैः प्रमुच्यते। न वियोगमवाप्नोति योगव्रतमिदं श्रुतम्"।

योगेश्वरद्वादशीव्रतं धरण्यां व्रते "शृणुष्व भक्तितो राजन्! कार्त्तिकैकादशीं तथा। उपोष्य विधिना येन सर्वान्कामान् प्राप्नुयात् फलम्। प्राग्विधानेन संकल्प्य तद्वत् स्नानं समाचरेत्। विशोभनार्चयेद्देवं नारायणमकल्मषम्"।

रथावस्थनपौर्णमासीव्रतं भविष्योत्तरे "चतुर्दशेऽम्बरे पार्थ! प्राप्ते प्रौष्ठपदे सिते। संप्राप्ते श्रावणे मासि पौर्णमास्यां दिनोदये। स्नानं कुर्वीत मतिमान् श्रुतिस्मृतिविधानतः। ततो देवान् पितॄंश्चैव तर्पयेत् परमात्मना। ऋषीन्मरीचिं चैवोक्षदधीचाङ्गिरसं तथा। कुर्वीत ब्राह्मणः श्राद्धं वेदानुद्दिश्य कृत्स्नतः!। मूढानां मन्वरक्षितं स्नानं दानञ्च शस्यते। ततोऽपराह्णसमये रथारोहणिकां शुभाम्। कारयेद्यतैः शस्तैः सिद्धार्थैर्ब्रह्मभूषिताम्। वस्त्रैर्विचित्रैः कार्पासैः क्षौमैर्वा मणभूषितैः। दूर्वाक्षतसहितैस्तिला दुरितोपशमनाय। ऋषिभ्यो मरुद्भ्यो देवेभ्यो दत्तवद्भ्यो नमेत् क्रमम्। पीठं दत्त्वोपरि विष्णोः राजामात्यैर्युतस्य तत्। वेद्याञ्जनेन सहितो मङ्गलशब्दैः सुसंस्कृतैरिद्धैः। रथवस्त्रः कार्य्यः शान्तिध्वनिना नरेन्द्रस्य। देवद्विजातिगुरुभक्तो रथाभिरर्चयेत् प्रथमम्। तदनु पुरोधा नृपतेः रथं प्रतीत मन्त्रेण" इत्यादि।

रथनवमीव्रतं भविष्यपु० "शुक्लपक्षेऽश्वयुजे मासि कृष्णपक्षे नराधिप!। नवम्यामुपवासन्तु दुर्गादेवीं प्रपूजयेत्। पुष्पधूपोपहारैस्तु ब्राह्मणानां च तर्पणैः। पूजयित्वा रथं कृत्वा नानावस्त्रोपशोभितम्। शोभितं ध्वजमालाभिः कृतचामरदर्पणैः। नानापुष्पसजालाभिश्च सिंहैर्युक्तं मनोरमम्। कृत्वा सुवर्णमयीं दुर्गां महिषासनशोभिताम्। विन्यस्य रथमध्ये तु पूजयेत् कृतलक्षणम्। तं रथं राजमार्गेण शङ्खभेर्यादिनिस्वनैः। नगर्यां भ्रामयित्वा तु नयेत् दुर्गालयं नृप!। तत्र जागरणं कुर्यात् प्रदीपाद्युपशोभितम्। नानाप्रक्षेपकैर्वीर!

कल्पयानैव बालकैः। जागरं कारयेत्तत्र पूजयानघ चण्डिकाम्। प्रभाते स्नपनं कृत्वा तद्भक्तानाञ्च भोजनम्। रथं शोभासमायुक्तं भ्रमयेत्तै निवेदयेत्"।

रथसप्तमीव्रतं भविष्योत्तरे "शुक्लपक्षे तु माघस्य षष्ठ्यामासन्नवेत् सदा। स्नानं शुक्लतिलैः कार्यं नद्यभावे तु कुत्रचित्। विमले सलिले राजन्! विधिवद्वर्षधर्मतः। देवादीन् पूजयित्वा तु नत्वा सूर्यालयं ततः। सूर्यं सम्यक् नमस्कृत्य पुष्पधूपाक्षतैः शुभैः। आगत्य भवनं पश्चात् पञ्च यज्ञांश्च निर्वपेत्। संभोज्यातिथिभृत्यांश्च बालवृद्धाश्रितान् स्वयम्। विद्यमाने दिनेऽन्येद्युरागतस्तैलवर्जितम्। रात्रौ विप्रं समाहूय विधिज्ञं वेदपारगम्। संपूज्य नियमं कुर्यात् सूर्यमाधाय चेतसि। सप्तम्यान्तु निराहारो भूत्वा भोगविवर्जितः। मध्येऽहन्यां जगन्नेत्र निर्विघ्नं तत्र मे कुरु!। रत्नुज्ञार्थं नयेत्! तोयं तोयेषु निक्षिपेत्। ततो विवर्जं तं विप्रं स्नपेद्भूमौ जितेन्द्रियः। ततः प्रातः समुत्थाय कृतावश्यः शुचिर्नरः। कारयित्वा रथं दिव्यं किङ्किणीजालमालिनम्। सर्वोपस्करसंयुक्तं रत्नैः सर्वाङ्गशोभितम्। काञ्चनं राजतञ्चाथ ह्यसारथिसंयुतम्। ततो मध्याह्नसमये कृतस्नानादिको व्रती। सतीर्थं गन्धीक्षमाधस्तु पायसन्नालपर्वजितम्। क्षीरसूक्तं जपन् प्राज्ञः समागच्छेत् समाहरम्"।

रथाङ्गसप्तमीव्रतं भविष्यपु० "माघे मासि महादेव! सिते पक्षे जितेन्द्रियः। षष्ठ्यामुपोषितो भूत्वा गन्धपुष्पोपहारकैः। पूजयित्वा दिनकरं रात्रौ तत्रापतः स्वपेत्। विबुद्धस्तत्र सप्तम्यां भक्त्या भानुं समर्चयेत्। ब्राह्मणान् भोजयेद्भक्त्या वित्तशाठ्यं विवर्जयेत्। घृतधेनुं तिलैश्चैव तथैवेक्षुगुडघृतैकैः। प्रदद्यं वस्त्रयुग्मं च सुवर्णं कारयेद् बुधः। देवदेवस्य वै यात्रां पूर्वोक्तविधिना तथा।" पूर्वोक्तः विधिना नानातिथिप्रकरयुक्तरथयात्राविधिनेत्यर्थः। "अष्टपादं व्रतं कृत्वादूयाद्वै रविं तथा। पश्येद्भक्त्या जगन्नाथं न याति परमां गतिम्। तृतीयायामेकभक्तं चतुर्थ्यां नक्तमुच्यते। अयाचितन्तु पञ्चम्यां षष्ठ्यान्तैव उपोषितः। सप्तम्यां पारणं कुर्यात् पद्मे देवं रथे स्थितम्। पूजयित्वा च विधिना भक्त्यातैव त्रिलोचनम्। कौशेयन्तु रथं कृत्वा ताम्रपात्रो परिस्थितम्। रथमध्ये स्थितं होमं पूजितं मधुमिश्रितम्"।

रम्भात्रिरात्रव्रतं स्कन्दपु० "शुक्लपक्षे तथोदग्यां माघि ज्येष्ठे च व्रतं! त्रिरात्रं व्रतसंदिग्ध भक्त्या तं कदलीं शुभाम्। स्नात्वा चैव शुचिर्भूत्वा व्रती शिखिदृढच्छदकैः। स्तम्भेषु वेष्टयेद्भक्त्या गन्धपुष्पादि दापयेत्। रात्रौ कुर्वीत जागरं च यवदमेकं समाहितः। तथैव कदलीग्रन्थं नित्यमेव प्रसेचयेत्। ज्येष्ठे मासि ततः प्राप्य द्वादश्यान्तैव व्रतं! नद्यां वाथ तडागे वा शिवं संपूज्य चाक्षतैः। स्नात्वा च पूजयेत्तन्दिद्रुमादेहार्द्धधारिणम्। एकभक्तं ततः कृत्वा नियमं कारयेत् व्रते। भोक्ष्येऽहं त्रिदिनं जन्तु सम्यगिद्धा सुरेश्वरीम्। तत्प्रसादात् व्रतं मेऽस्तु निर्विघ्नेन महेश्वरि!। रम्भायाः स्थण्डिलं कृत्वा विचित्रञ्च सुशोभनम्। रम्भाया निकटे स्थित्वा गीतवाद्यसमन्वितम्। मण्डपं कारयेत्तत्र पुष्पमालाविभूषितम्। वितानेन च संयुक्तं सर्वशोभासमन्वितम्। मध्ये कुर्वीत कदलीं फल आदिसंयुताम्। राजतीं शोभनाकारां जातरूपफलाचिताम्। वस्त्रयुग्मवतो दद्यात् सर्वालङ्कारभूषिताम्"।

रविव्रतं भविष्यपु० "माघमासि सदा शुक्लसप्तम्यां योऽर्चयेद्रविम्। भक्त्या माघमासिकं पुण्यं मासेनैव न संशयः"।

रसकल्याणिनीतृतीयाव्रतं ब्रह्मपु० "अन्यामपि प्रवक्ष्यामि तृतीयां पापनाशनीम्। रसकल्याणिनीमेतां पुराकल्पविदो विदुः। माघमासे तु सम्प्राप्य तृतीयां शुक्लपक्षतः। प्रातर्गव्येन पयसा तिलैः स्नानं समाचरेत्। स्नापयेन्मधुना देवीं तथैवेक्षुरसेन च। वस्त्रोदकेन च पुनः पूजनं कुङ्कुमेन वै। दक्षिणाङ्गानि सम्पूज्य ततो वामानि पूजयेत्"। "अनेन विधिना देवीं मासि मासि समर्चयेत्। वर्षान्ते वर्जयेन्माघे फाल्गुने च गुडं पुनः। तथैव चैत्रे वर्ज्यन्तु मधु माधवे। पानकं ज्येष्ठमासे तु तथाऽऽषाढे च क्षीरकम्। श्रावणे वर्जयेत् क्षीरं दधि भाद्रपदे तथा। घृतमाश्वयुजे तद्वदूर्जे वर्ज्यानि वर्जिका"। वर्जे, कार्त्तिके। वर्जिका, रसाद्या लोके शिखरिणीतिप्रसिद्धा। "धान्यकं मार्गशीर्षे तु पौषे वर्ज्यानि शर्करा। व्रतान्ते करकं पूर्णमेतेषां मासि मासि च। दद्याद्विकालवेलायां भक्ष्यपात्रेण संयुतम्"।

रात्रयहादशीव्रतं धरणीव्रते "ज्येष्ठमासेऽथवैमेव संकल्प्य विधिना नरैः। अर्चयेत् परमं देवं पुष्पैर्नानाविधैः शुभैः। नमोऽस्त्वनन्तायेत्युक्त्वा पादौ पूर्वं समर्चयेत्। एव-

सम्यर्च्य विधिवत् हृतकल्मषं प्रकल्पयेत्। ब्राह्मद्वययुग्मञ्चको सौख्यौ रामव्रतौ" इत्यादि।

राजराजेश्वरव्रतं कात्तिकोत्तरे "बुधस्यात्यन्तिकोयोगो यदा-स्यां प्रजायते। उपोषितस्तु विधिना महाभागपुरः सरम्। सम्मूजयेद्विरूपाक्षमङ्गरागं चतुःसमम्। महा-वर्त्तिदयं दीपदीपं वाष्टोत्तरं शतम्। चतुष्कुडुमधू-पन्तु घृतपुष्पैस्तु पूजयेत्। खण्डखाद्यान्यनेकानि नैवे-द्यानि प्रकल्पयेत्। आचार्य्यांय शिवज्ञाय कौपयवस्त्र-टादिकम्। रजताकुण्डले चैव कञ्चुकं सद्विजाहयम्। वाहनन्तु गजञ्चैव तदभावाद्वृषोत्तमम्। सम्पूज्य परया भक्त्या वस्त्रञ्च शर्करायुतम्। राजराजेश्वरपदं प्राप्नुया-द्धोमसङ्ख्यया। राजराजेश्वरं तेन व्रतमेतत् प्रकाशितम्"।

राज्ञतृतीयाव्रतं विष्णुधर्मोत्तरे "ज्यैष्ठे शुक्लतृतीयायां नि-राहारो नरः शुचिः। त्रिमूर्त्तिपूजनं कृत्वा तृतीयायां यथाविधि"। त्रिमूर्त्तिपूजनं तिसृणां मूर्तीनां वायुसूर्य्यचन्द्रमसां पूजनम्। "कूष्मण्डतण्डामादीमिश्चैः प्रातः शुचिजलैः। प्रत्यूषे पूजयेद्वायुमन्तरिक्षे शुभ-स्थले। गन्धमाल्यधूपदीपपक्वान्नसम्पदा। होमं कुर्य्यादवैर्मुख्यैर्व्रती दद्याद् द्विजातये। मध्याह्ने पूज-येद्रुद्रं तथा सूर्य्यमतन्द्रितः। तिलांश्च जुहुयाद्वह्नौ दद्याद्विप्रेषु काञ्चनम्। सूर्य्यास्तमनवेलायां जले चन्द्रञ्च पूजयेत्। जले चन्द्रमसमभिध्याय पूजयेदिति। वह्ना-वभिध्याय मध्याह्ने सूर्य्यं प्रपूजयेदिति यावत् "हुतेन होमं कुर्वीत रक्तं दक्षिणा हुतम्। नक्तं भुञ्जीत धर्मज्ञः तैलहीनं ततो नरः। पूर्णे संवत्सरे त्वेवं व्रतमेतदतन्द्रितः। सर्वलोकमवाप्नोति सङ्घ परि-वत्सरम्। मानुष्यमासाद्य ततो राजा भवति भूतले। व्रतं त्वेतन्महाभाग! पूर्णं संवत्सरत्रयम्। यद्यूर्ध्व-मङ्गसाप्नि स्वर्गलोके महीयते"।

राज्यद्वादशीव्रतं धर्म्मधर्मे "हृषीकेशस्थितो राजन्! द्वा-दशीं राज्यदां शिवाम्। यामुपोष्य नरोलोके राज्य-माप्नोत्यकण्टकम्। मार्गशीर्षस्य मासस्य शुक्लपक्षे नरा-धिप!। दशम्यां प्रयतः शुद्धः स्नानमध्यक्षपूर्वकम्। हविष्यभुक् प्राणान्तात्मा दन्तधावनपूर्वकम्। उपवासञ्च सङ्कल्प्य द्वादश्यामुपवासञ्च कारयेत्। देवाकुक्षे कृशकोक्षी-मेकवस्त्रोत्तरच्छदाम्। अध्यासीत महीं तत्र तां रात्रौं संयतो नयेत्। द्वितीयेऽह्नि ततः कृत्वादद्धि स्नानमत-न्द्रितः। पूजनं चैव सर्वेश सर्वसङ्घेन कारयेत्" इत्यादि।

राज्याग्निदशमीव्रतं विष्णुधर्मोत्तरे "ऋतुर्दत्तो मुनिः पूर्वं कालः कालोपबृंहया। कुरवान् मनुजो विप्रो रोगसा-रथ्ये ते दयं। विश्वेदेवाः समाख्याता दशाग्नेयो विभुः। तस्य सम्मूजनं कार्य्यं सितपक्षे नराधिप!। आरभ्य कार्त्तिकान्मासाद्दशम्यां नृपपुङ्गव!। मध्यलेखय पुरुषेषु यदि वाञ्छसि यादव!। गन्ध,माल्य, नमस्कार, दीप, धूपान्न, सम्पदा"! यद्यां प्रतिमा सा च यथाश-क्त्यं सुवर्णादिधातुमयी विधेया "व्रतान्ते कनकं द-द्याद् यथाशक्ति द्विजातये। इत्थं व्रतं केवलमेतदिष्टं प्राप्नोति तेषां सुचिरन्तु लोकान्। तस्मोप्र लोके पुरु-षोत्तमस्य राजा भवेद् ब्राह्मणपुङ्गवो वा"।

रामनवमीव्रतं अग्निपुराणसंहितोक्तम् "चैत्रे नवम्यां प्राक्पक्षे दिवा पुष्ये पुनर्वसौ। उदये गुरुगौरांशोः कोशलायां पुरोत्तमे। मेषे पूषणि शुक्लाह्ने कर्कटस्थेषु पञ्चसु। आविरासीत् कदा कौशल्यायां परः पुमान्। तस्मिन् दिने तु कर्त्तव्यमुपवासव्रतं सदा। तत्र जागरणं कु-र्य्यादूर्ध्वपुनाथवरो भुवि। प्रातर्दशम्यां स्नात्वा तु सन्ध्याद्याः क्रियाः। संपूज्य विधिवद्भक्त्या भक्त्या दित्या-दुपचारतः। ब्राह्मणान् भोजयेद् भक्त्या दधिक्षीरमधु लोभयेत्। गोभूतिलहिरण्याद्यैर्व्रतान्ते तुरयेत्तथा। इत्थमनुष्ठानं प्रयत्नेन लोकयेत्तरया सदा। एवं यः कुरुते भक्त्या श्रीरामनवमीव्रतम्। अनेकजन्मसिद्धानि पाप-जानि बहून्यपि। भक्षीकृत्य व्रजत्येव तद्विष्णोः परमं पदम्"।

रामव्रतं भविष्यपु० "कार्त्तिक्यां नक्तभुक् दद्यान्नेमं हेमविभूषितम्। मार्गशीर्षे तथा पद्मेन्दिरायुतं तद्देव हि" इत्यादि। एवं क्रमेण यो दद्याद्वर्षे वस्त्र-विभूषितान्। पौर्णमासीं पौर्णमासीं कौन्तेय! वस्त्र-दक्षिणम्। एतद्रामव्रतं नाम सर्वोपद्रवनाशनम्। सर्वोपापूरकं सहस्रमोक्षदायकम्"।

रुक्मिणीव्रतमीव्रतं स्कन्दपु० "माघे मासि मार्गशिरे शुक्लपक्षेऽ-ष्टम्यां षडानन!। रुक्मिणीव्रतसंज्ञा सा सर्वकाम-फलप्रदा। तस्यां प्रातः शुचिर्भूत्वा नारी नियमकारिणी। वर्षं च प्रथमे कुर्य्यादेकाहारं व्रतं सदा। सर्वोपकरणं सर्वं तस्मिन्निधाय सादरम्। वीक्षीत्य रूपप्रकाराद्यैर्तादीव रसांशया। वस्त्रैः काञ्चनया

दलैश्चित्रैश्च लिखितान्यथा। कार्याः पुत्तलिकास्तत्र तासां नामानि मे शृणु ॥ लक्ष्मणश्च रुक्मिणी चैव सत्यदेवश्च रेवती। प्रद्युम्नश्चैव तद्भार्या अनिरुद्धस्तथा तथा। देवकोवसुदेवादीन् सर्वांस्तत्र प्रकल्पयेत्। ततोऽनुपूजयेत् सर्वानष्टधूपाक्षतादिभिः। चन्द्रोदये तु भुञ्जीत दद्यादर्घ्यं निशादिने। "कर्घ्यं दत्त्वा तु भुञ्जीत मित्रस्वजनबन्धुभिः। ततः प्रभातसमये कुमार्यै तद्गृहं शुभम्। दद्यात् प्रीतेन मनसा सर्ववस्तुसमन्वितम्। ततो द्वितीये वत्सरे तु कृत्वाद् द्विसप्तमन्दिरम्। पूर्ववत् पूरितं कृत्वा कुमार्यै विनिवेदयेत्। ततस्तृतीये वत्सरे तु कृत्वा त्रिसप्तमन्दिरम्। सम्पूर्णं पूर्ववत् कृत्वा कुमार्यै विनिवेदयेत्। ततश्चतुर्थे वत्सरे तु कृत्वा सप्तचतुष्टयम्। पञ्चमेऽब्दे पञ्चद्वारं षष्ठे वस्त्रसमन्वितम्। कृत्वा दद्यात् प्रयत्नेन कुमार्यै तच्च मन्दिरम्। ततस्तु सप्तमे वर्षे कुर्याद् द्वादशनं शुभम्। सप्तद्वारं सप्तहस्तं कृत्वा सुशोभयन्वितं महत्। शय्यां तूलीं च यानं च छत्रोपानहमेव च। आदर्शं चामरञ्चैव सप्तधान्यानि तथा। कांस्यभाजनपात्राणि ताम्रस्य तु महान्ति च। नानाविधानि वस्त्राणि तथैवाभरणानि च। सप्तोपकरणं सर्वं सप्तहे निक्षिप्य सर्वतः। लक्ष्मणञ्च रुक्मिणीञ्चैव प्रद्युम्नञ्च मनोहरम्। कृत्वा स्वर्णमयान् भक्त्या पीतवस्त्रावगुण्ठितान्। पूजयित्वोपवासेन रात्रिजागरणेन च। ततः प्रभातसमये तद्गृहे सप्तपागतम्। सपत्नीकं द्विजं पुण्य वस्त्राभरणपूर्णैः। तस्मादेतद्गृहं दद्याद्गुणाढ्यायाथ सुशोभितम्"।

रुद्रव्रतं पद्मपु० "यस्त्वेकभक्तेन समां क्षिपेद्धेनुं सुशान्विताम्। धेनुं तिलमयीं दद्यात् स पदं याति शाङ्करम्। एतद्रुद्रव्रतं नाम पापशोकविनाशनम्"। व्यतीते पञ्चतपाः सायं हेमधेनुप्रदो दिवम्। वात्सरीयचतुर्दश्यो रुद्रव्रतमिदं स्मृतम्"। चतुर्दशीचतुर्दश्यामिति च चत्वारि दिनानि पञ्चाग्निसाधनं तच्चतुर्थे दिने सायं सुवर्णधेनुं दद्यात्"।

रूपनवमीव्रतं भविष्यपु० "पौषे मासि महाबाहो! चतुर्दश्यां गजं शुभम्। कृत्वा रुक्ममयं भक्त्या न्यस्य पात्रे हिरण्मये। इन्द्राणीं विधिवद्दद्यान्नानामणिविभूषितम्। एवं पूजयते भक्त्या इन्द्राणीं विधिवत्ततः। स ऐरावतमारूढः सोमलोके महीयते"।

रूपसप्तमीव्रतं विष्णुधर्मोत्तरोक्तम् "फाल्गुन्यां समतीतायां कृष्णपक्षाष्टमी तु या। समूलां तां तु संप्राप्य व्रतं स्नातो भवेन्नरः। उपोषितव्यं तत्रैव नक्षत्रं नक्षत्रस्य च दैवतम्। वरुणञ्च तथा चन्द्रं पूजयेद् विधिना नरः। पूजयेद्देवदेवञ्च भगवन्तं जनार्दनम्। उपोष्याङ्गानि देवस्य प्रयत्नेन च पूजयेत्। ततोऽग्निहवनं कृत्वा पूजयित्वा तथा गुरुम्। उपवासस्तु कर्त्तव्यो द्वितीयेऽहनि पार्थिव। उपोष्य रात्रौ विगते स्नात्वा संपूज्य केशवम्। कृत्वाग्निहवनं भक्त्या पूजयित्वा द्विजोत्तमान्। हविष्यान्नन्तु भोक्तव्यं शृणु चाङ्गक्रमं मम। पादयोः कटितं मूलं नाभ्यन्तु जङ्घयोः। अश्विनौ जानुयुगलं ऊरुयुग्मे च पार्थिव!। सक्थिनी द्वे तथा बाहू सक्थिनी ऋतू। पूर्वोत्तरे च फाल्गुन्यौ कुक्षिका च कटिर्भवेत्। पार्श्वयोः कुक्षिसुतयोर्नक्षत्रत्रितयं समम्। उभे प्रोष्ठपदे राजन्! रेवती च तथा भवेत्। चरोऽनुराधासु पृष्ठं धनिष्ठासु प्रकीर्त्तितम्। भुजौ श्रवौ विशाखासु हस्तौ प्रोक्तौ तथा करौ। कृत्तिकाश्च तथा ग्रीवा राजसिंह! पुनर्वसौ। अश्लेषायां नखाः प्रोक्ता ज्येष्ठायां रूप! कन्धरः। श्रवणे श्रवणौ श्रेयौ मुखं पुष्ये प्रकीर्त्तितम्। दन्ताः स्वातौ शतभिषा हनुः प्रोक्ता तथा रूपः! मघायां नासिके प्रोक्ते मृगशीर्षे च लोचने। चित्रा ललाटे विज्ञेया भरण्याञ्च तथा शिरः। शिरोरुहास्तथाद्रांसु व्रतस्नाते नराधिप!। चैत्रशुक्लावसाने तु सत्रं परिसमाप्यते"।

रूपसंक्रान्तिव्रतं स्कन्दपु० "अथान्यदपि ते वक्ष्मि रूपसंक्रान्तिसत्तमम्। संक्रान्तिवासरे स्नानं तैलं कृत्वा विचक्षणः। हैमपात्रे घृतं कृत्वा हिरण्येन समन्वितम्। स्वरूपं वीक्ष्य तत्पात्रं ब्राह्मणाय निवेदयेत्। एकभक्तं ततः कृत्वा भक्त्या चैव समन्वितम्। व्रतान्ते काञ्चनं दद्याद्धृतधेनुसमन्वितम्। अश्वमेधसहस्राणां फलमाप्नोति मानवः"।

रूपावाप्तिव्रतं विष्णुधर्मोत्तरे "फाल्गुन्यां समतीतायां प्रतिपद्यभ्यतिक्रमात्। यावच्चैत्री महाराज! तावत्स्नातो दिने दिने। वह्निः संपूजयेद्देवं केशवं भोगशायिनम्। एकभक्ताशनो नित्यमधःशायी तथा भवेत्। त्रिरात्रोपोषितः पूजाञ्चैत्र्यां कृत्वोत्तरैव च। स्वशक्त्या रजतं दद्याद्वस्त्रयुग्मं तथैव च। रूपार्थिनो मासमिदं मयोक्तं व्रतोत्तमं नित्यमदोषसत्तमम्। कृत्वा तु नाकं मनुजस्त्वयाप्य मानुष्यमासाद्य च रूपवान् स्यात्"।

रोहिणीद्वादशीव्रतं भविष्योत्तरे "प्रकृते श्रावणे मासि

कृष्णपक्षे समाहितः। एकादश्यां शुचिर्भूत्वा स्नात्वा सर्वौषधीजलैः। मासचूर्णेन राजेन्द्र! कुर्यादिन्दुरिकामयम्। अष्टारं तत्र पद्मं हेमपत्रैः सुनिर्मलैः। आलोप्यागमुद्दिश्य ततो गत्वा जलाशयम्। इत्यादोविरचितं सर्वोपेतजलेष्टतम्। तस्मिन् पुष्किने रम्ये जलाल्ले गोमयादिना। कृत्वा मण्डलकं दत्तं पिष्टकादिभिरर्चितम्। चर्चितं गन्धकुसुमैर्धूपदीपाक्षतैः शुभैः। तत्र चन्द्रं लिखेत् पात्रे रोहिण्या सहितं भुवि। अर्चयेत् शुभार्हेण मन्त्रेणानेन भक्तितः। एवमभ्यर्च्य तद् दत्त्वा तल्लग्नं स्वयमाविशेत्"। "अष्टाग्नं जलमात्रं वा आतुगुप्तान्नमेव वा। भोजयेत् सोमराजन्तु रोहिणीसहितं विभुम्। अन्नमेव भुञ्जीत स्वयमिन्दुरिकामयम्। ये रोहिणी शशिभृता विच्युता स्थिता च यत्र तारके मृष्ट नरेन्द्र! निवेदयामि। तत्पिष्टमाधर्चितेन्दुरिकामयं यद्भुक्तं तत्रे गुडहतेन कृत्त तदेव"।

रोहिणीव्रतं स्कन्दपु० "रोहिणी जन्मनक्षत्रं यावाद् देवस्य चक्रिणः। ताम्रदण्डमयीं कृत्वा पञ्चरत्नेन संयुताम्। स्थापयेद्धेमयुग्मेन पुष्पधूपैः प्रपूजयेत्। कालोद्भवफलोद्दिष्टैर्नैवेद्यैस्तत्पाचितैः। द्वितीयेऽह्नि समाप्येतद्ब्राह्मणायोपपादयेत्। श्रोत्रियाय सुरूपाय भिक्षुकाय कुटुम्बिने। कृत्वा नक्तेन भुञ्जीत रोहिण्यां दर्शने कृते। एवंविधं व्रतं दिव्यं दिवि देवास्च चक्रिरे। वर्षे वर्षे समायाते देवाद्याप्यपि कुर्वते। यं यं कामभिध्यायन् तं तमाप्नोत्यसंशयम्।

कृष्णाष्टम्यव्रतं मत्स्यपु० "अष्टमि वत्स! व्रतमेकं तिथिनक्षत्रयोगतः। नभस्ये मासि राजेन्द्र! यदाऽष्टमी लभ्यते तदा। व्रतमेतदिधातव्यमष्टम्यामीश्वरं भुवि। आरोग्यैश्वर्यसौभाग्यसुखसम्पत्प्रदायकम्। कारयित्वा यथाशक्ति सौवर्णं मिथुनं तयोः। गौरीगिरिशयोर्भक्त्या नक्तं सद्वस्त्र पूजयेत्। नभस्ये वत्सलाष्टम्यामेवं यः कुरुते व्रतम्। कृष्णाष्टमीतिविख्यातमिदं तस्य फलं शृणु। सर्वपापविशुद्धात्मा सर्वैश्वर्यसमन्वितः। भुक्त्वा भोगान्नरेन्द्रेण ततः कालविपर्यये। राजा भवति धर्मात्मा बाहुवीर्यसमन्वितः। माघार्द्रचतुर्दशी भवति या कृष्णा नभस्ये तदा सौवर्णं मिथुनं शिवागिरिशयो रूपं तयोः कारयेत्। पूर्वं पिष्टमयैर्दद्याति गुरवे सार्द्धं रसैर्भोजनं भुक्त्वा भोगयुतोत्तरं वदनयो मन्मोर्जलेक्षाव्रतम्।

लक्ष्मीनारायणव्रतं विष्णुधर्मोत्तरे "पञ्चदश्यां शुक्लपक्षे फाल्गुनस्य नरोत्तम!। पापक्षुपतितार्थैव तथैवान्यावसायिनः। नास्तिकान् भिन्नवर्णांश्च पाषिनश्चापि नाचयेत्। नारायणे मनोमनाः पुरुषो नियतेन्द्रियः। तिष्ठन् ब्रुवन् प्रस्खलंश्च शुते वापि जनार्दनम्। कीर्त्तयेत्तत्क्रियाकाले सर्वं कृत्वा पुनः पुनः। लक्ष्म्या समन्वितं देवमर्चयेत जनार्दनम्। सन्ध्याम्बुदरसे चन्द्रसदृशं हरिमीश्वरम्। रात्रिस्तु लक्ष्मीं सहितं सलक्ष्मणमेव चिन्तयेत्। श्रीर्निशा चन्द्ररूपा त्वं वासुदेव! जगत्पते!। मनोऽभिलषितं देव! पूरयस्व नमोनमः। मन्त्रेणानेन दत्त्वार्घ्यं देवदेवस्य भक्तितः। नक्तं भुञ्जीत मौनेन तैलक्षारविवर्जितम्। तथैव चैत्रवैशाखे ज्यैष्ठे च सुनिश्चितम्!। अर्चयेच्च यथामोक्तं मासि मासि च तद्विने। निष्पादितं भवेदेकं पारणं द्वादश्य! भक्तितः। द्वितीयं तत्र वक्ष्यामि पारणन्तु निबोध मे। आषाढे श्रावणे मासि भाद्रपदे तथा। तथैवाश्वयुजेऽभ्यर्च्य श्रीधरञ्च श्रिया सह। सम्यक् चन्द्रमसन्दृष्ट्वा भुञ्जीतार्घ्यं यथाविधि। द्वितीयमेतदाख्यातं तृतीयं पारणं शृणु। कार्त्तिकादिषु मासेषु तथैवाभ्यर्च्य केशवम्। भूत्वा समन्वितं दद्याज्जलाढ्यायार्घ्यं तिथि। भुञ्जीत च यथाख्यातं तृतीयमपि पारणम्। प्रतिपूज्य ततो दद्यात् ब्राह्मणेऽभ्यर्च्य दक्षिणाम्। प्रतिमासं च वक्ष्यामि माधवं कायशुद्धये। प्रथमं चतुरो मासान् पञ्चगव्यसुदाहृतम्। कृशीदकं तथैवान्यदुक्तं मासचतुष्टयम्। गोतवाद्यादिकं राज्ञो तथा लक्ष्म्यश्च शुभाः। कारयेद्देवदेवस्य पारणे पारणे सति। जनार्दनं सलक्ष्मीकमर्चयेत् प्रथमं तथा। सश्रीकं श्रीधरं तद्वत्तृतीयं भूतिकेशवम्। एवं सम्पूज्य विधिवत् सपत्नीकं जनार्दनम्। नाप्नोतीष्टवियोगार्त्तिं प्रमाद्यार्घ्यमि वा पुनः"।

लक्ष्मीपञ्चमीव्रतं यमपु० "लक्ष्मीसमर्च्य पञ्चम्यामुपवासी भवेन्नृपः। समाप्ते हेमकमलं दद्याद्धेनुसमन्वितम्। स वैष्णवं पदं याति लक्ष्मीलोकानि जन्मनि। एतल्लक्ष्मीव्रतं नाम दुःखशोकविनाशनम्"।

ललिताद्वितीयाव्रतं भविष्योत्तरे "अथमासे सिते पक्षे द्वितीयायां व्रतव्रता। प्रातो प्रक्षाल्य वक्त्रौ च शुद्धश्चैव समाहितः। उपवासन्तु नियमं दन्तधावनपूर्वकम्। मध्याह्ने तु नदीं गत्वा तिलैरामलकैः शुभैः। स्नात्वोत्तीर्य जलात् शुक्ले वाससी परिधाय च। सुगन्धैश्च

पुष्पैश्च गन्धैः कुङ्कुमादिभिः। चर्चयीत तथा तथा देवीं त्वां भक्त्या भक्तिवत्सले!" इत्यादि।

खलिताव्रतं स्कन्दपु० "शृणु स्कन्दवदाम्बिके! खलिताराधनविधिम्। आश्विनस्य सिते पक्षे दशम्यां नक्तभोजनम्। प्रतिमां हेममयीं दिव्यां सर्वालङ्कारभूषिताम्। वापी कार्या शुभे देशे तन्मध्ये वेदिका शुभा। हस्तमात्रा वितस्त्यूर्ध्वं दशधान्यसमन्विता। वेदीकोणेषु संस्थाप्या कलशाः पञ्च देवताः। विष्णुं ब्रह्मेन तन्मध्ये देवीं स्थाप्या प्रयत्नतः। अग्रतो मण्डलं कुर्यात् ताम्रपात्रसमन्वितम्। तत्र सर्वमयीं देवीं स्थाप्य च खलितां शुभाम्। चन्द्रस्तु रोहिणीयुक्तं राजतं कारयेत् पुरः। दधिपात्रे क्षीरपात्रं स्थाप्यं वाससी विघ्ननाशनम्। मूलमन्त्रेण गायत्र्या सर्वं तत्र प्रपूजयेत्" इत्यादि।

खलिताषष्ठीव्रतं भविष्योत्तरे "शृणु! भाद्रपदे मासि शुक्ले पक्षे तु संयतः। नारी स्नात्वा प्रभाते च शुक्लमाल्याम्बरप्रिया। सुवेषाभरणोपेता भूत्वा संस्थे वालुकाः। नवे वेणुमये पात्रे स्थले नक्षत्रदैवतके। उपवासा प्रयत्नेन तत्र देवीं प्रपूजयेत्। कृत्वा पक्वगुणं रम्यं पुष्पधूपादिविचित्रितम्। तत्र संस्थाप्य तां देवीं पुष्पैः सम्पूजयेद्धरिम्"। तां देवीमिति ब्रह्मान्तरगतां वालुकामयीम् एव संस्थापने पद्मपिष्टकान्वितं वालुकामयीं पूजयेदिति "ध्यात्वा तु खलितां देवीं तपोवननिवासिनीम्। शङ्खं करवीरं च नेपालीं मालतीं तथा"। नेपालीं पुष्पविशेषं, संस्थापित्वा पूजयेदितिशेषः। नीलोत्पलं क्षेत्रकोलं संस्थे तगरं वरम्। एकैकाष्टशतं पाद्ममष्टाविंशतिरेव वा। यजतः खलितां स्थे तामिर्देवीं समर्चयेत्"।

खलितासप्तमीव्रतं विष्णुधर्मोत्तरोक्तम् "कार्त्तिक्यां समतीतायां प्रतिपत्प्रभृतिक्रमात्। घटे वा यदि वा दार्वां प्रद्युम्नं पूजयेद्विभुम्। वह्निस्थानं ततः कृत्वोन्नक्तमश्नीत वाग्यतः। एकभक्तं महाराज! कृत्वा प्रयतः शुचिः। मार्गशीर्षे ततः प्राप्ते त्रिरात्रोपोषितः शुचिः। सम्पूज्य देवं प्रद्युम्नं कृत्वाग्नौ हुतमेव च। भोजयेद्ब्राह्मणांस्तत्र भोजनं सर्वदोत्कटम्। भूषितस्तु ततः पश्चात् सर्वत्र द्विजातये। अष्टारत्नतरङ्गं च वस्त्रयुग्मं तथा गुरोः। दद्यात्तु कनकं राजन्! कांस्यपात्रं तथैव च। मासेन लभते यत्नं व्रतोत्तमं नात्रसंशयः। न जेयं वादये! सर्वकामान् नरस्य दद्यात्सदृष्टप्रभावताम्"।

खोक्षव्रतं विष्णुधर्मोत्तरोक्तम् "अतःपरं प्रवक्ष्यामि तव खोक्षव्रतं शुभम्। आस्तु व्याहृतसत्तम यत्र लोकाः प्रकीर्तिताः। आचरेत् प्रत्यहं स्नानं वह्निर्मित्रमतन्द्रितः। चैत्रशुक्लात्प्रारभ्य क्रमेण दिनसप्तकम्। गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्। एकरात्रोपवासश्च क्रमेणैवं समाचरेत्। महाव्याहृतिभिर्होमस्तिलैः कार्यो दिने दिने। संवत्सरान्ते दद्याच्च तथा विप्रेषु दक्षिणाम्। सुवर्णं शुभहस्तः कांस्यधेनूस्तथैव च। संवत्सरमिदं कृत्वा व्रतं पुरुषसत्तम!। सर्वलोकवरः श्रीमान् स्वेच्छया याति राघवः"।

षटतिलैकादशीव्रतं स्कन्दपु० धर्मराजवरप्रदानानन्तरं सावित्र्युवाच "ब्रवीतु मे व्रतं देव! भक्त्या नारी करिष्यति। भर्तुः सौभाग्यदा साध्वी समस्तकुलभाजना"। धर्मराज उवाच "नारी वा विधवा वापि सधवा पतिवर्जिता। समर्चेका सधवा वा कार्यं व्रतमिदं शृणु। एकादश्यां तु संप्राप्ते पौष्यमासां पतिव्रता। स्नात्वा चैव शुचिर्भूत्वा घटं सिच्य वस्त्रकैः। सुवेष वेदवेदज्ञैः पञ्चपुण्याहघोषतैः शुभैः। नमो देवसवायेति मन्त्रेणानेन प्रदक्षिणम्। रात्रौ कुर्वीत नक्तञ्च यद्भक्ष्यं समाहितः। तथैव घटलक्षञ्च पक्षे पक्षे च पूजयेत्। संप्राप्ते च पुनर्वर्षे लक्षमेकं घटार्पणं देत्। दत्त्वा ब्राह्मणं कृत्वा नियमं कारयेत्ततः। त्रिरात्रं चक्षुषा च पक्षं दिवसे शुभम्। चन्द्रायार्घ्यं प्रदत्त्वा च पूजयित्वा च तां सतीम्। मिष्टान्नानि प्रयत्नेन पूजयित्वा द्विजोत्तमान्। भोक्ष्ये ऽहन्तु जगन्नाथ! निर्विघ्नं कुरुषे सने। नियममन्त्रः "कृत्वा संयमने पात्रे वालुकाप्रस्थमेव च। सप्तधान्यधृतं पात्रं प्रस्थेनैव द्विजोत्तम!। तस्योपरि स्थाप्य सावित्रीं ब्रह्मणा सह। वैभवीं कृत्वा तयोः प्रीत्यै त्रिरात्रमुपवासयेत्। स्नापयेच्च ततो विद्वांस्तैश्चैव दिनत्रयम्। कौशेयैश्चैव सावित्रीं वस्त्रैश्च सह कारयेत्। रौप्यपर्यङ्कमारोप्य रत्नाधरि निवेशयेत्। पलाष्टकं सुवर्णस्य कारयेत्तत्र रौप्यमयं शुभम्। तथा च काष्ठभारे च घटे चैव सुविस्तरम्। प्रदद्यात् विधुवे कृत्वा पूजयेद्वृतमन्वहम्। कर्तुं संभक्षणं कृत्वा गोमयेन तपोधन!। ब्रह्मास्त्रेण शुभं मन्त्रपुष्पोदकेन च। चन्दनागुरुकर्पूरैर्नीलोत्पलसमन्वितैः। संपूज्य तत्र सावित्रीं मन्त्रेणानेन पूजयेद्बुधः। पौराणिकेन पद्मेन वा चन्द्रेण च। त्वमेवैक्य ततो देवीं कमले कमलालये!

अनेन विधिना स्नात्वा पूजयेद्वृषभध्वजम्" इत्यादि।

वरचतुर्थीव्रतं स्कन्दपु० "चतुर्थ्यां मार्गशीर्षे तु शुक्लपक्षे महोत्सव! प्रारभ्य प्रतिमासन्तु चतुर्थ्यां गणनायकम्। संपूज्य विधिना कुर्यादेकमक्तं समाहितः। आचारलक्षं त्वेवं पूर्णसंवत्सरे ततः। द्वितीये वत्सरे चाथ नक्तं प्रतिचतुर्थि च। कुर्यादुक्तेषमभ्यर्च्य तृतीयेऽप्याचितं तथा। एवमेव प्रकुर्वीत चतुर्थं खादुभोज्यम्। ततश्चतुर्थं संवाप्य तदुद्यापनमाचरेत्। इदं वरचतुर्थाख्यं व्रतं सर्वार्थसाधकम्"।

वरव्रतं पद्मपु० "सप्तम्यामथितो दद्यात् एतत्कर्म द्विजालये। वरव्रतमिदं प्रोक्तं ब्रह्मलोकप्रदायकम्"।

वराटिकासप्तमीव्रतं भविष्यपु० "या काचित् सप्तमी प्रोक्ता ततो वक्ष्यामि शोभनम्। वराटिकालयकीतं वस्तु किञ्चित् प्रामयेद्वरः। अनेन देहि मूल्येन यद्भक्ष्यं तच्च भक्षयेत्। अभक्ष्यं वापि भक्ष्यं वा नात्र कार्या विचारणा। अनेन विधिना कार्या वराटाख्यसप्तमी"।

वराहद्वादशीव्रतं धरणीव्रते "एवं माघे सिते पक्षे द्वादशी धरणीव्रतः। वराहस्य प्रपूजान्यां पुण्यां परमधार्मिकः। प्रागुक्तेन विधानेन वह्नित्र स्नानमेव च। कृत्वा देवं समभ्यर्च्य एकादश्यां विशुद्धधीः। पुष्पैर्नानाविधैश्चैव गन्धयित्वाच्युतं नरः। पञ्चामृतेन तं स्नाप्य कुशजलपूर्णैस्तु विन्यसेत्। एवं विधानतो दत्त्वा हरिं वाराहरूपिणम्। ब्राह्मणाय च तद्दद्यात् फलं तस्य निशामय। दृष्ट्वा जन्मनि सौभाग्यं श्रीः स्थानिस्थिरैव च। ज्ञानवान् वित्तवान् भोगी बहुलः पुत्रवान् भवेत्"।

वरव्रतं पद्मपु० "निशि कृत्वा जले वासं प्रभाते मोदको भवेत्। वाहनं लोकमाप्नोति वरव्रतसमुद्भवे"।

वसुव्रतं विष्णुधर्मोत्तरे "शुक्लपक्षे चतुर्दश्यां चैत्रादारभ्य यादव!। प्रत्यूषे प्रातरुत्थाय स्नात्वैवानिलाशनः। अर्चयेत् पुण्डरीकाक्षं प्रभावैर्नोदनैस्तथा। अष्टम्यां पूजयेद्वस्तु सोपवासो नराधिप!। चैत्रमासादमारभ्य शुक्लपक्षात् यादव!। अष्टम्यामुपवासेन क्रमेण सकलान्विते!। गन्धमाल्यानुलेपैश्च धूपैर्दीपैश्च सर्वदा। बलिभिः स्नानैश्च राजेन्द्र! तथाभरणवस्त्रकैः। वत्सरान्ते तु यो दद्याद्धेनुं विप्राय शक्तितः"। पद्मपु० "यवोपवासतश्चैव दद्यात् प्रभूतकनकान्विताम्। दिनं प्रयोजनो तिष्ठेद्यो वापि परमं पदम्। एतद्वसुव्रतं नाम धनराज्यप्रदुर्लभम्"।

वसुविरात्रव्रतं भविष्योत्तरोक्तम् "चैत्रे तु कृष्णदेवं त्रिभिः प्रयतमानसः। त्रिरात्रं तत्र तत्रस्थो नत्वा स्नात्वा द्विजालये। पञ्चगव्यं पयः प्रदद्यात् स सुवर्णकाः। न जायते पुनस्सो लोकलोके कदाचन। एतद्वसुव्रतं प्रोक्तं सर्वव्याधिविनाशनम्"।

वह्निव्रतं विष्णुपु० "शुक्लपक्षे चतुर्दश्यां चैत्रादारभ्य यादव!। वह्निसंपूजनं कृत्वा गन्धमाल्यानुलेपनैः। तिलक्षौमयुगं कृत्वा ब्रह्मणे वेदपारगे!। संवत्सरान्ते दद्याच्च सुवर्णं शक्तितश्च। कृत्वा व्रतं वत्सरमेतदिष्टं प्राप्नोति वित्तं सततं नरश्च। धर्मे मतिरुत्तमस्य कामान् यदेतान् सुखमप्नुयाच्च"।

वामनद्वादशीव्रतं धरणीव्रते "एवमेव सुते! माघि चैत्रे संकल्प्य द्वादशीम्। उपोष्य धारयेद्भक्त्या देवदेवं जनार्दनम्। वामनायेति पादौ तु विष्णवे जठरं वरः। वासुदेवाय जठरं उरः सङ्कर्षणाय च। प्रद्युम्नाय भुजं विद्वन्नन्ते पूज्य शिरो वै ओमरूपिणे। बाहू विश्वजिते पूज्य ह्यनाभ्यां शङ्खचक्रके। अनेन विधिनाभ्यर्च्य देवदेवं जनार्दनम्। प्राश्नीयेन्नोदकं कृत्वा सप्तरात्रं व्रतरो भवेत्"। पुनः पद्मपुराणम्। "द्वादश्यामथ संप्राप्य वामनं कारयेत् बुधः। यथाशक्ति व्रतं सम्यक् वित्तशक्त्योपपादितम्। कुम्भिकां स्थापयेत् पात्रे छत्रिकापादुके तथा। अक्षमालाञ्च संस्थाप्य यष्टिकां च विशेषतः। एतैरुपस्करैर्युक्तं प्रभाते ब्राह्मणाय च। दापयेत् प्रीयतां विष्णुः शुक्लरूपीति कीर्तयेत्। भावनाम्ना तु तत्संयुक्तं प्रादुर्भावाभिधानकम्। प्रीयतामिति सर्वत्र विधिरेष प्रकीर्तितः। भावनाम्ना वामनीप्रादिभावेनयादिनाम्ना प्रादुर्भावाभिधानकं मत्स्यरूपी कूर्मरूपीत्येवमादि"।

वायुव्रतं विष्णुधर्मोत्तरे "शुक्लपक्षे चतुर्दश्यां चैत्रादारभ्य यादव!। वायुं सम्पूजयेद्वर्षं सोपवासो जितेन्द्रियः। गन्धमाल्यानुलेपैश्च धूपैर्दीपैश्च सर्वदा। संवत्सरान्ते दातव्यं वस्त्रयुग्मं द्विजातये। कृत्वा व्रतं वत्सरमेतदिष्टमासाद्य लोकं सुचिरं मनुष्यः। इहाजनि भुक्त्वा सुचिरं महीयो मानुष्यमासाद्य भवेत्पुरोगः"।

वारिव्रतं पद्मपु० "चैत्रादिव्रतरो मासान् अर्के कुर्यादयाचितम्। वह्नेरादे तथा मासे पौषे वा राजसत्तम!। व्रतान्ते शक्तिकं दद्यादवस्त्रमसमन्वितम्। तिलपात्र

क्षिरणञ्च ब्रह्मलोके महीयते। तदन्ते राजराजः स्याद् वारिव्रतमिदोच्यते"।

वासुदेवद्वादशीव्रतं यथोक्तं "आषाढे ऽप्येवमेवन्तु सङ्कल्प्य विधिना ततः। अर्चयेत्पुरुषं देवं गन्धपुष्पैर्विधानतः। वासुदेवाय पादौ तु कटिं सङ्कर्षणाय च। प्रद्युम्नायेति जठरमनिरुद्धाय वै उरः। चक्रपाणये च भुजौ कण्ठं भूपतये तथा। खड्गिने मुखञ्चैव तु पुरुषायेति वै शिरः। एवमभ्यर्च्य मेधावी ब्राह्मणस्यायतो घटम्। विन्यसेद्वस्त्रयुग्मं तु तस्योपरि ततो न्यसेत्। काञ्चनं वासुदेवं तु चतुर्बाहुं सनातनम्। तमभ्यर्च्य विधानेन गन्धपुष्पादिभिः क्रमात्। ब्राह्मणस्तु ब्राह्मणे दद्याद्देवादिनि सुव्रते रत्नादि।

विजयाद्वादशीव्रतम् आदित्यः "पुष्यर्क्षेण समायुक्ता शुक्ला वै द्वादशी भवेत्। सा प्राक्ता वासुदेवेन सर्वपापप्रणाशिनी। येऽर्चयन्ति नरास्तस्यां भक्त्या देवं जनार्दनम्। वसुधोप्र विमुच्यन्ते पापैस्ते यतजन्मजैः। कर्मणा मनसा वाचा यत्पापं समुपार्जितम्। तत् जानवति गोविन्दस्तिथौ तस्यां समर्चितः। स्नानं जपोऽथ वा होमः सर्वदृष्टिय जनार्दनम्। नरैर्वत क्रियते तस्यां तदनन्तफलं भवेत्। यस्माच्छाम्यते जन्तोः पापं जन्मशतोद्भवम्। पुष्यर्क्षेद्वादशी तस्मात् प्रोक्ता पापप्रणाशिनी। एवमेव पुरा प्राह भानुः सारथिनं प्रति। भानुरुवाच "द्वादशी या परा ब्रह्मन्! पुष्यर्क्षेण च संयुता। उपोष्या तु प्रयत्नेन द्वादशी पापनाशनी। पुष्यर्क्षेण द्वादशीयुक्ता शुक्ला वै कार्तुनक्षत्र च। विजया द्वादशी प्रोक्ता स्वयं या विष्णुना पुरा। तस्यां दत्तं तपप्तप्तं कोटिकोटिगुणोत्तरम्। एकादश्यां निराहारो द्वादश्यां विष्णुमर्चयेत्। रौप्यसौवर्णपात्रे वा दारुपात्रमथेऽपि वा। आच्छाद्य पात्रं वासोभिरक्षतैः सुपरीक्षितैः। मार्गेण मेढ्रजेनैव सिद्धिः स्याच्छत्रमेवया। तिलाढ्येन विलाढ्येन प्रस्थेन कुटजेन वा। यवानां चैव गोधूमैः फलं तस्य तिलैर्भवेत्"। ब्रह्मवैवर्ते "माघि भाद्रपदे शुक्ले पक्षे वदि हरेर्दिनम्। बुधश्रवणयोगश्च प्राप्यते तत्र पूजितः। प्रयच्छति सुतान् कामान् वामनो भक्तवि खिलान्। विजया नाम सा प्रोक्ता तिथिः प्रीतिकरी हरेः। श्रवणः पर्वतीयोगः सङ्गमे तत्र लभ्यते। शुक्ला भाद्रपदे स्वर्गे ब्रह्मा कल्पसंक्षयम्। ब्रह्मादयसुतयोः शुक्ले नर्मदासरिदङ्गमे। सरस्वत्यरण्योश्चैव सङ्गमे पापनाशने। ब्रह्मवल्मीकाभ्यासे सप्तधारेऽथ वा हिल !! सर्वेषु सङ्गमेष्वेव स्वयमायाति वामनः। तत्र सम्पूजितोऽथो लभते प्रेतमोक्षदः। दध्योदनसमायुक्तां वारिधानीं प्रदापयेत्। पूजय त्वं जगन्नाथं वामनः प्रीयतामिति। अनेनैवविधा क्षीणा सङ्गमे विजया तिथिः। सर्वपापक्षयो नूनं जायते च उपोषणात्। कृत्वोक्तां नियमं प्रातर्गत्वा नद्यादिसङ्गमे। सौवर्णं वामनं कृत्वा सौवर्णमथवेऽपि वा। यथा शक्त्या तु विन्यस्य कुम्भोपरि जगत्पतिम्। पूर्णपात्रे स्थापयित्वा मन्त्रैरेतैः प्रपूजयेत्। एवं कृते तु विजयायुतेऽस्मिन् विजया दिने। न दुर्लभतरं किञ्चिदिह लोके परत्र च। दुर्लभा विजया नृणां दुर्लभस्तत्र सङ्गमः"। अग्निपु० "विधानं शृणु राजेन्द्र! यथोक्तं मुनीषिभिः। उपोष्यं नियमं कृत्वादैकादश्यामुपोषितः। दन्तकाष्ठं प्रकुर्वीत वाग्यतो नियतेन्द्रियः। अथ द्वादशीयोगे समुपोष्य जनार्दनम्। अर्चयित्वा विधानेन कृष्णं भोक्ष्ये परेऽहनि। नदीनां सङ्गमे स्नायादर्चयेत् यत्र वा भवेत्। कौशं रक्तसंयुक्तं द्वादशाङ्गुलसंस्कृतम्। पीतवस्त्रैः सुभैर्युक्तं सङ्कल्पं नवम्। क्षिरवृक्षेण पात्रेण स्थण्डिलं प्रकल्पयेत्। दध्यक्षतकुशैश्चैव कर्पूरस्थं सचन्दनम्। नमस्ते ब्रह्मनाभाय नमस्ते जलशायिने। तुभ्यमर्घ्यं प्रयच्छामि बालरामनरूपिणे। मायावी वामनः श्रीशः सौम्यात्मा तु जगत्पतिः। एवं सम्पूजयित्वा तु द्वादशाक्षरदेवतैः। अङ्कारसहितं मन्त्रं संवत्सरं प्रपूजयेत्। वामनः प्रतिगृह्णातु वामनोऽहं ददामि तम्। वामनं सर्वतोभद्रं विजयार्थं निवेदयेत्। अनेनैव तथा दद्याच्छत्रं चैव तु पादुके। कपिलास्थानि वस्त्राणि धेनुं चानडुहं शुभ !। यत्किञ्चिद् दीयते तत्र तदानन्त्याय कल्पते। अथ द्वादशीयोगे सम्पूज्य गरुडध्वजम्। दत्त्वा दानं द्विजातिभ्यो विसर्जने पारणं ततः। विसर्जयिते तु मार्तण्डे अथवास्ते निशाकरे। अथ द्वादशी पेया न स्याद् भाद्रपदादृते। दशम्येकादशी यत्र सानुपोष्या भवेत्तिथिः। अथवेन तु संयुक्ता सा शुभा सर्वकामदा"। अथवेन युक्तायां दशमी साप्युपोष्यैव। "पारणं तिथिहीनो तु द्वादशीसङ्गमवात्। तद्दो कृष्णोदयोदस्यां तत्र दोषो न विद्यते"। द्वादशीतत्त्वे नक्षत्रे द्वादश्यां पारणम् उक्तं त्रयोदश्यामित्यर्थः"।

विजयासप्तमीव्रतं भविष्योत्तरे "शुक्लपक्षे तु सप्तम्यां यदा दिवसदिनं भवेत्। सप्तमी विजया नाम तत्र दत्तं महाफलम्। स्नानं दानं जपो होम उपवासस्तथैव च। सर्वं विजयसप्तम्यां महापातकनाशनम्। प्रदक्षिणं यः कुरुते फलैः पुष्पैर्दिवाकरम्। स सर्वगुणसम्पन्नं पुत्रं प्राप्नोत्यसंशयम्। प्रथमा नारिकेरैस्तु द्वितीया बीजपूरकैः। तृतीया रक्तनारङ्गैश्चतुर्थी कदलीफलैः। पञ्चमी क्षत्तुकुष्माण्डैः षष्ठी पक्वैश्च तेन्दुकैः। दाडिमैः सप्तमी ज्ञेया घृतेनाष्टोत्तरेण तु। मौक्तिकैः पद्मरागैस्तु तिलैः कर्कटकैस्तथा। गोमेदैर्विद्रुमैर्दैवैः घृतेनाष्टाधिकेन तु। दाडिमैर्बदरैर्बिल्वैः करमर्दैः सचिर्भटैः। चाम्रातकैश्च जम्बीरैर्जम्बूकर्कटिकैः फलैः। पुष्पैर्धूपैः फलैः पत्रैर्मोटकैश्चतुरन्वितैः। एभिर्विजयसप्तम्यां भानोः कुर्यात् प्रदक्षिणम्। सर्वैः फलैश्च कालोत्थैरखण्डैर्पन्निवर्जितैः। रवेः प्रदक्षिणं देयं फलेन फलमादिशेत्। नारी वा कुरुते वा तु सापि तत्फलभागिनी। नित्यं गृहीतसजयप्रतिपादयित्री या सप्तमी मुनिवरैः प्रवरा तिथीनाम्। सा भानुपादकमलार्चनचित्तकानां पुंसां सदैव विजया विजयं ददाति"। भविष्योत्तरे "माघे मासि सिते पक्षे सप्तम्यां कुरुनन्दन!। निराहारो रविं भक्त्या पूजयेद्विधिना नृप!। पूर्वोक्तेन क्रमेणात्र देवस्य पुरतः स्थितः। गुडौदनपरा राजन्! जितक्रोधो जितेन्द्रियः"। इत्यादि "एवं संवत्सरं यावत् कुर्याद् विजयसप्तमीम्। स जयेदखिलाञ्छत्रून् सूर्यलोकं स गच्छति"। भविष्यपु० "शुक्लपक्षस्य सप्तम्यां सूर्यवारो भवेद् यदि। सप्तमी विजया नाम तत्र दत्तं महाफलम्। स्नानं दानं जपो होम उपवासस्तथैव च। सर्वं विजयसप्तम्यां महापातकनाशनम्। षष्ठ्यामेकभक्तं स्यात् सप्तम्यां नक्तमुच्यते। उपवासस्तु सप्तम्यामष्टम्यां पारणं भवेत्। उपवासपरः सप्त्यां सवत्सस्य पूजयेद्रविम्। उपवासपरः विजयसप्तम्यामुपवासं करिष्यन्। "गन्धपुष्पोपहारैश्च भक्त्या श्रद्धासमन्वितः। प्रकल्प्य पूजां भूमौ च देवस्य पुरतः क्षमेत्। जपन्मानस्तु गायत्रीं घोरमन्त्रमथापि वा। त्र्यक्षरं वा मनुं चैतं षडक्षरमथापि वा। विबुद्धस्तत्र सप्तम्यां कृत्वा स्नानं गवाधिपम्। पञ्चैवं पूजयित्वा तु होमं कृत्वा विधानतः। ब्राह्मणान् भोजयेत् पश्चाद्भक्त्या च गवनायकम्। घृताक्तोदनसपूपांश्च खण्डवेष्टांश्च शक्तितः। दत्त्वा तु दक्षिणां शक्त्या ततो विप्रान् विसर्जयेत्। इत्येषा कथिता देव! तुभ्यं विजयसप्तमी। यामासाद्य नरो गच्छेत् परं वैरोचनं पदम्।

विजयासप्तमीव्रतं भविष्यपु० "नैमित्तिकान् ततो वक्ष्ये यत्रादौ स समाहितः। सप्तम्यां यत्र वै सूर्यसंक्रान्तिषु विशेषतः"। नैमित्तिकान् ततो वक्ष्ये इत्यनेन शेषेण यत्रसंक्रान्तिषु साधारणेन यत्रप्रतिज्ञा कृता तत्र सप्तमीयत्र तावदाह शुक्लपक्षेत्यादिना "शुक्लपक्षस्य सप्तम्यां हविर्भुक्तेऽदा दिवा। सम्यगाचम्य सन्ध्यायां वरुणं प्रतिपत्स्य च"। वरुणोऽत्र सूर्यः "दन्द्रियाणि च संयम्य स तं ध्यात्वा स्वपेद् बुधः। दर्भयज्ञागतो रात्रौ प्रातः स्नातः समुत्थितः। सर्वस्मादौ तथैवान्ते पूर्ववद्वरुणं यजेत्। जुह्वयाद्वह्निचत्वारि सूर्यायेति परिकल्प्य वै। सूर्यायेत्यस्य वक्ष्ये तर्पणं च समासतः। अस्ते योद्धारसंज्ञिके सावित्र्याभ्युक्ष्य वानले"। अस्ते च अस्तमन्त्रेण सावित्र्या सूर्यगायत्र्या एतच्च सर्वं निशुम्भसप्तम्यामेवाभिहितं वेदितव्यम्। "प्रतिष्ठाप्योर्वं दर्भांश्च देशे भूमौ यथेप्सितम्। प्रागग्रैरुदगग्रैश्च पात्राण्याहृत्य चक्रवत्। पवित्रं दक्षिणं कृत्वा पात्रं प्रादेशसम्मितम्। तेन पात्राणि संप्रोक्ष्य संशोध्य च विशोध्य च। चतुर्भागस्थिते पात्रे साग्निना चोदकेन च। पर्यग्निकरणं कृत्वा ततश्चोत्पवनं त्रिधा। परिस्तीर्य च दर्भैः स्वशोचितैश्च तैः। जुह्वयात् प्रोक्षिते वह्नौ तत्रार्कं पूर्ववत् यजेत्। भूमौ स्थितेन पात्रेण विस्तरेण तु पाणिना। वामेन यदुशार्दूल। नान्तरिक्षे तु क्वचित्। अन्तरिक्षे त्रिकादौ "दक्षिणेन स्रुचौ गृह्य जुह्वयात्सावकं बुधः। हृदयेन क्रियाः सर्वाः कर्तव्याः पूर्वचोदिताः"। हृदयेन हृदयमन्त्रेण "अनेन हुत्वा सूर्याय दद्यात् पूर्णाहुतिं ततः। वरुणावाहनाद्याश्च सप्तम्यां वरुणं यजेत्। यथा शक्त्या तु विप्रेभ्यः प्रदद्यात् खण्डवेष्टकान्। दद्याच्च दक्षिणां शक्त्या प्राप्यते यागजं फलम्। एवन्तु फाल्गुने सूर्यं चैत्रे चैवांशुमालिनम्। वैशाखे मासि धातारं ज्यैष्ठे यजेद्रविम्। आषाढे आर्यमे मासि भगं भाद्रपदे तथा। आश्विने चापि पर्जन्यं त्वष्टारं कार्त्तिके यजेत्। मार्गशीर्षे तु मित्रस्तु पौषे विष्णुं यजेद् यदि। संवत्सरेण यत् प्रोक्तं फलमिहा दिने दिने। तत् सर्वं प्राप्नुयात् क्षिप्रं भक्त्या श्रद्धा-

समन्वितः। एवं संवत्सरे पूर्णे कृत्वा वै काञ्चनं रथम्। सप्तभिर्वाजिभिर्युक्तं नानारत्नोपशोभितम्। आदित्यप्रतिमां मध्ये सुवर्णेन कृतां शुभाम्। रत्नैरलङ्कृतां कृत्वा हेमपद्मोपरिस्थिताम्। तस्मिन् रथवरे कृत्वा सारथिं चापतः स्थितम्। हतं द्वादशभिर्विप्रैः क्रमान्नासाधिपात्मभिः। सर्वकल्मषनाशार्थं पूजयित्वा रथापतः। नासाधिपाः प्रतिमासोक्ताः कृष्णाः। अतस्तद्भक्तिभावितैर्द्वादशभिर्विप्रैर्हुतमाचार्यं पूजयेदित्यर्थः।

विद्याप्रतिपद्व्रतं मत्स्यपु० "अथ वां प्रतिपत्कल्पं शृणु सर्वमनस्करं व्रतम्। यत् कृत्वापः श्रियं विन्देद्दुर्लभं मानुषैरिह। मासितस्तुलसंछिन्ने मण्डले चतुरस्रके। श्रीयं शिवमवाप्नोति पूजयेत् सुरसत्तमम्। अष्टपत्रदलैः पद्मैरुत्तैस्तं प्रपूजयेत्"। अष्टपत्रदलैः विलिखितैः "सहस्रैर्वा यथायोगं पयसा घृतेन च। ततस्तु विधिनाभ्यर्च्य पार्श्वे देवीं सरस्वतीम्। अथातः पूजयेदिन्दुं गुरुं पश्चादनन्तधीः। परिवारनियोगेन तांश्च सत्कारयेदथ"। प्रार्थनामन्त्रः "मम विद्यां प्रदिशतु देवो वाणीश्वरो हरिः। विद्याधिदैवतं देवी विद्यां दिशतु मे स्थिराम्। सरस्वती प्रदिशतु बाल्यादभिमतियाचिताम्" इत्यादि। "यस्त्वेवं कुरुते विष्णौ विद्वान् विद्याव्रतमन्वहम्। समस्तविद्यानिपुणो वैद्यं पदमश्नुते"।

विद्यावाप्तिव्रतं विष्णुधर्मोत्तरे "शीघ्रान्तु समतीतायां प्रतिपत्पञ्चतिक्रमात्। प्राग्वत् पूजयेद्देवं तुरङ्गशिरसं हरिम्"। प्राग्वदिति रूपावाप्तिव्रतोक्तविधिवत् तुरङ्गशिरसं हयशीर्षम्। "तिलांश्च जुहुयाद् वह्नौ तिलैर्देवं समर्चयेत्। त्रिरात्रोपोषितो मासं तिलान् कनकमेव च। दद्याद् ब्राह्मणसङ्घाय सम्यक्प्रवतमानसः। सङ्घात् यज्ञोपवीतांश्च प्रभूतमपि चन्दनम्। कृत्वा व्रतं मासमिदं यथोक्तं विद्यान्वितः स्यात् पुरुषः सदैव। सर्वोत्तमामाद्य सुखानि भुक्त्वा कामानभीष्टान् पुरुषोऽश्नुते च"।

विधानद्वादशसप्तमीव्रतम् आदित्यपु० "निरुक्तसप्तमीनान्तु शृणु नारद! निर्णयम्। यः प्राप्नुयादधिगच्छेत् स्वरूपात् सर्वकिल्बिषैः। यातनां सर्वपापानां यातनां नमतां विदुः। तस्मोपवासविधिना धातारं य उपासते। चैत्रमासे तु सप्तम्यामतिरात्रफलं लभेत्। वैशाखमासे सप्तम्यां पर्जन्यं वस्तु पूजयेत्। ज्यैष्ठमासस्य यत्पुण्यं प्राप्नोति तत्र वै। विभा विभावयोर्देहा आयुर्ह्रो आग्नेदीप्तिषु। विभानाम निरुक्तञ्च स्वयमेव विभावसोः। सप्तम्यां ज्यैष्ठमासन्तु वरुणं यः समर्चयेत्। आप्नोत्यनुदशानान्तु फलं विन्दति मानवः। अस्तार्चं यदा देवा जयशब्देन निर्ययुः। पूजयन्ति जयां देवा-स्ततस्त्वाषाढ तत् स्मृतम्। आषाढमासे सूर्यन्तु सप्तम्यां पूजयेन्नरः। अश्वमेधमवाप्नोति कुलञ्चैव समुद्धरेत्। सप्तम्यां निर्जिता देवैरसुरा दानवास्तथा। समाराध्य सुरैः सेन्द्रैः संग्रामे तारकामये। त्रैलोक्ये विजयप्राप्ते तस्मादिजयसप्तमी। यः पूजयति मां भक्त्या तस्मिन्दृष्टे मानवः। स्नात्वा सम्यगुपस्पृश्य शुक्लवासाः कृताञ्जलिः। सदा यज्ञोपवीती च ब्रह्मचारी जितेन्द्रियः। अक्रोधनो जपपरः स्थिरचित्तः समाहितः। ध्यायमानस्तथा शाम्ब! तत्परः सजितेन्द्रियः" इत्यादि।

विभूतिद्वादशीव्रतं मत्स्यपु० "शृणु राजन्! प्रवक्ष्यामि विशोकं तमनुत्तमम्। विभूतिद्वादशी नाम सर्वाभरणभूषिता। कार्त्तिके चाथ वैशाखे मार्गशीर्षेऽथ फाल्गुने। आषाढे वा दशम्यान्तु शुक्लायां नक्तभुङ्नरः। कृत्वा शयनतो सम्यक् स्टङ्गीयाद्वियमं बुधः। एकादश्यां निराहार समभ्यर्च्य जनार्दनम्। द्वादश्यां द्विजसंयुक्तः करिष्ये भोजनं ततः। तदविघ्नेन मे यातु याफल्यं मधुसूदन!। ततः प्रभाते चोत्थाय कृत्वा स्नानजपं शुचिः। पूजयेत् पुष्करीकाक्षं शुक्लमाल्यानुलेपनैः"।

वि(बि)ल्वत्रिरात्रव्रतं स्कन्दपु० "ज्येष्ठे मासि च संप्राप्ते पूर्णमास्यां द्विजोत्तम!। ज्येष्ठाऋक्षदिने कुर्यात् सिद्धार्थैः स्नानमुत्तमम्। श्रीवृक्षं विल्वमेव पश्चाद्वन्यैश्च पूजयेत्। वत्सरन्त्वेकभक्तन्तु हविष्यान्नेन कारयेत्। शूकरखरादीनां दर्शने भोजनं त्यजेत्। अनेन विधिना सम्यक् मासि मासि समाचरेत्। ततः संवत्सरे पूर्णे गत्वा वि(बि)ल्वसमीपतः। स्टङ्गीत्वा वालुकां पात्रे प्रस्थमात्रं मनोरमे!। अथ वा धान्यमादाय यथाशक्तितादिकम्। ततो वंशमये पात्रे वस्त्रयुग्मेन वेष्टयेत्। उमामहेश्वरं हैमं भक्त्या कुर्यात् सुभूषितम्" इत्यादि।

विशोकद्वादशीव्रतं पद्मपु० "पुष्ये चाश्वयुजे मासि विशोकद्वादशीव्रतम्। यद्दोषां शोकदीर्घस्य भाजनं न नरो भवेत्। दशम्यां नक्तभुक् रात्रौ कृत्वा वै दन्तधावनम्। षडङ्गसूक्तं प्राङ्सूक्तं वा वाक्यमेतदुदीरयेत्। एकादश्यां निराहारः समभ्यर्च्य च केशवम्। श्रियं च जगतां भूतिं भोक्ष्याम्योत्पवरेऽहनि। एवं नियम-

माख्याय सुधा रात्रौ जितेन्द्रियः। प्रभाते विमले गत्वा मध्याह्ने तु जलाशयम्। स्नानं सर्वौषधैः कृत्वा पञ्चगव्यजलेन च। शुक्लमाल्याम्बरधरः सशब्दं स्पृष्टं ततः। पूजयेज्जगतां नाथं लक्ष्मीदयितमच्युतम्" इत्यादि।

विशोकषष्ठीव्रतं भविष्योत्तरे "विशोकषष्ठीमधुना वक्ष्यामि मनुजोत्तम!। यामुपोष्य नरः शोकं न कदाचिदिहाप्नुयात्। माघे कृष्णतिलैः स्नानं षष्ठ्यां शुक्लपक्षतः। कृताहारः शुचिर्वा दन्तधावनपूर्वकम्" । शुचिर्वा, तिथितत्त्वेऽप्युक्तेः "उपवासव्रतं कृत्वा ब्रह्मचारी भवेन्निशि। ततः प्रातः समुत्थाय कृतस्नानजपः शुचिः। कृत्वा तु काञ्चनं पद्मकर्णिकमिति पूजयेत्। करवीरैश्च रक्तैश्च रक्तवस्त्रयुगेन च। यथा विशोकं भुवनमदितेः सर्वदा यतः। तथा विशोकता मे स्याच्चक्षुषः प्रतिजन्मनि। एवं संपूज्य षष्ठ्यान्तु द्विजान् भक्त्या प्रपूजयेत्। घृतधेनुं गोभूमं समुत्थाय ततः शुचिः। संपूज्य विप्रान् दानेन गुडपात्रेण संयुतम्। वस्त्रोपरिस्थाद्य गुरवे सर्वमेतन्निवेदयेत्" इत्यादि।

विशोकसंक्रान्तिव्रतं स्कन्दपु० "अतःपरं प्रवक्ष्यामि विशोकसंक्रान्तिमुत्तमाम्। यजने विष्णवे पुण्ये व्यतीपातो भवेद्यदि। एकभक्तं नरः कुर्यात्तिलैः स्नानन्तु कारयेत्। काञ्चनं भास्करं कृत्वा यथाविभवशक्तितः। स्थापयेत्पङ्कजे पद्मे रक्तैः संपूजयेत्। वेष्टयेद्रक्तवस्त्राभ्यां ताम्रपात्रे निधापयेत्" इत्यादि।

विशोकसप्तमीव्रतं भविष्यपु० "विशोकसप्तमीं तद्वत् वक्ष्यामि मुनिपुङ्गव!। यामुपोष्य नरः शोकं न कदाचिदिहाप्नुते। माघे कृष्णतिलैः, स्नातः पञ्चम्यां शुक्लपक्षतः। कृताहारः शुचिर्वा दन्तधावनपूर्वकम्। उपवासव्रतं कृत्वा ब्रह्मचारी भवेन्निशि। ततः प्रभाते चोत्थाय कृतस्नानजपः शुचिः। कृत्वा तु काञ्चनं पद्मकर्णिकमिति पूजयेत्। करवीरैश्च पुष्पैश्च रक्तवस्त्रयुगेन च। यथा विशोकं भुवनं त्वयैवादित्य! सर्वदा। तथा विशोको मे भानु चक्षुषः प्रतिजन्मनि। एवं संपूज्य पद्मां तु भक्त्या संपूजयेद्द्विजान्। कृत्वा संग्राह्य गोभूमसुत्थाय कृतनित्यकः। संपूज्य विप्रं यत्नेन गुडपात्रसमन्वितम्। वस्त्रस्थं वस्त्रसंयुक्तं ब्राह्मणाय निवेदयेत्। घृतधेनुयुतं भक्त्या भौमसंयुतः। ततः पुराणश्रवणं कर्तव्यं भूतिमिच्छता। अनेन विधिना सर्वेऽप्युभयोरपि पक्षयोः। कुर्यात् यावत् पुनर्माघशुक्लपक्षे सप्तमीम्। व्रतान्ते कलशं दद्यात् सुवर्णकमलान्वितम्"।

विश्वव्रतं भविष्यपु० "एकादश्यां यथोद्दिष्टा विश्वेदेवाः प्रपूजिताः। प्रजां पशून् धनं धान्यं प्रयच्छन्ति महीं तथा। मूलमन्त्रः स्वसंज्ञाभिरङ्गमन्त्राः प्रकीर्तिताः। पूर्ववत् पद्मपत्रस्थः कर्तव्यश्च तिथेश्वरः। गन्धपुष्पोपचारैश्च यथाशक्ति विधीयते। पूजाऽग्राह्येण शाकेन कृतापि न फलप्रदा। शाल्यन्नाराजमाषैश्च दधिक्षीरान्नसर्पिषैः। पूर्वोक्तफलदो होमः कृतः शास्त्रेण चेत्तथा"। एतद्व्रतं वैश्वानरप्रतिपद्व्रतवद्ज्ञातव्यम्"।

विश्वरूपव्रतं भविष्योत्तरे "रेवतीयनियोगस्तु यिताष्टम्यां यदा भवेत्। भूतायां वा महाभाग! तदा जातमिदं शृणु! महास्नानं प्रकर्तव्यं नित्यकृत्यादनन्तरम्। चन्दनैर्वाक्षतैरक्तैः पूजान्तु कलयेत्। सितपद्मानि देयानि भूषणानि बहूनपि। चन्द्रमेवं दृष्ट्वेदं नैवेद्यं पायसं घृतम्। श्वेतानडुत्सहस्रं सौम्यं शिवाय विनिवेदयेत्। अष्टमं कुञ्जरञ्च आचार्याय प्रदापयेत्। ऋग्यजुःसामाथर्वाणः प्रत्यक्षकुञ्जरं तथा। राज्यार्थी लभते राज्यं यावदाकल्पसंप्लवम्। पुत्रार्थी लभते पुत्रान् वायुतुल्यपराक्रमान्। भोगार्थी लभते भोगान् विद्यातत्त्वेन शाश्वतान्। यान् यान् कामयते कामान् तांस्तान् कामानवाप्नुयात्। विश्वरूपमनन्तेन व्रतमेतदुदाहृतम्। कुशोदकप्राशनन्तु रात्रौ जागरणं ततः"।

विष्टिव्रतं भविष्योत्तरे विष्टिरूपसङ्का "एवमेषा समुत्पन्ना विष्टिरिष्टविनाशिनी। तस्मात्परिहरेत्तां वै! वर्जनीया फलार्थिना। येनोपवासविधिना व्रतेन च युधिष्ठिर!। पूजिता तोषमायाति तदेव कथयामि ते। यस्मिन् दिने भवेद्विष्टा तस्मिन्नश्नति भारत!। उपवासञ्च नियमं कुर्यात्तारी नरोऽथ वा। यदि रात्रौ भवेद्विष्टिरेकभक्तं दिनद्वयम्। कार्यं चैनोपवासः स्यादिति पौराणिको विधिः। प्रहरस्योपरि यदा स्याद्विष्टिः प्रहरत्रयम्। उपवासस्तथा कार्यः एकभक्तमतोऽन्यथा। सर्वौषधिजलस्नानं सुगन्धामलकैरथ। तस्मात्तस्मिंश्च सप्तम्यां स्नानं सर्वत्र शस्यते। देवान् पितॄन् समभ्यर्च्य ततो दर्भमयीं शुभाम्। विष्टिं कृत्वा पुष्पधूपैर्नैवेद्यादिभिरर्चयेत्। होमन्तु नाममिर्विष्टेः शतमष्टोत्तरं नृप!। भुञ्जीत दत्त्वा विप्राय तिलान् पायसमेव च। सतैलं क्षारं भुक्त्वा पश्चाद्भुञ्जीत कामतः। आयाहि सूर्य्य सुते! देव! विष्टिरिष्टार्थनाशिनि!। पूजितासि यथाशक्त्या

भद्रे ! भद्रव्रता भव । घृतेऽथ विधिनानेन दद्या सम्यग् यथा क्रमात् । दद्याद्यमं ततः कुर्यात् पूर्ववत् पूजयाग्निकीम् । स्थापयित्वावसे पीठे क्षपरात्रं निवेद्य च । परिधाय क्षयवस्त्रयुगं मन्त्रेण तं पुनः । ब्राह्मणाय पुनर्दद्याद् घोषतैले तिलांस्तथा । क्षणां सवत्सां गामेकान्तथैव क्षणकम्बलाम् । दक्षिणाश्च यथाशक्त्या दत्त्वा भद्रां विसर्जयेत् । य एवं कुरुते पार्थ ! सम्यग्भद्राव्रतं नरः । विघ्नं न जायते तस्य कार्येष्वेषु कथञ्चन" ।

विष्णुदेवकीव्रतं विष्णुधर्मोत्तरे "प्रथमे कार्त्तिकेऽह्नि समाप्ते देवकि ! क्षयम् । पञ्चगव्यक्षतस्नानः पञ्चगव्यक्षताशनः । वाग्यतैः समभ्यर्च्च्य वासुदेवमजं विभुम् । दत्त्वा च चन्दनं धूपं परमान्नं निवेदयेत् । हृतं निवेदयेद्विप्रे मृष्टौदनाञ्च ततो हृतम् । यदाप्रभृत्यहं मांसं विरतः प्राणिनां वधात् । क्षमत्ववचनात्तस्येत्यान्धुमांसादिभक्षणात् । क्षपयन् विबुधान् गच्छेत् क्षरिष्यामीत्यच्युतम् । परापवादं पैशून्यं परपीड़ाकरन्तथा । मच्चास्त्रदेवतायत्तनिन्दा मन्यच्च वा भुवि । न वक्ष्यामि जगत्सृष्टिन् पश्यन् सर्वगतं हरिम् । क्षयक्षो वाऽधिगच्छोऽपि यस्मिन् बोद्धुं यथास्मिनि ! । कुर्वीत नियमं तस्य त्यागोऽधर्मोपशान्तये । क्षत्वैवं पुरतो विष्णोर्निर्वृतिं यापयः शुभे । नैवेद्यं क्षयमश्नीयान्नौनी नित्यसदङ्सुखः । मार्गशीर्षे तथा माघि जातीपुष्पैर्जनार्दनम् । समभ्यर्च्च्य पुनर्धूपं चन्दनञ्च निवेदयेत् । परमान्नञ्च देवाय विप्राय च पुनर्हृतम् । दत्त्वा तथैव मृष्टौदनाश्नियमो योऽत्र रोचते । तथैव नक्तं भुञ्जीत नैवेद्यं कुरुनन्दिनि ! । सर्वत्रैव चतुर्मासं पञ्चगव्यादिकं समम् । पुष्पधूपोपहारेषु विशेषो दक्षिणासु च । स्नानप्राशनयोः साम्यं तथैव नक्तभोजनम् । क्षर्चयेत् प्रतिमासन्तु वैः पुष्पैस्तानि मे शृणु ! । ये च क्षपाः प्रदातव्या नैवेद्यास्तु यत्तया । वाणैश्च जातिकुसुमैः तथैव च सकुन्दजैः । कुन्दातिमुक्तकैः रक्तैः रक्तैर्वोरैश्च रक्तकैः । श्वेतैः शुभ्रैर्मल्लिकाद्यैस्तथा मल्लिकया ततः । दक्षिणाश्चाभवेत्तस्याः पञ्चरत्नोत्सवेन च । क्रमेणाभ्यर्चितो विष्णुर्ददाति मनसि स्थितम् । कार्त्तिके मार्गशीर्षे च धूपं पौषे च चन्दनम् । माघफाल्गुनचैत्रेषु ददादिष्टोत्तथाऽगुरुम् । वैशाखादिषु मासेषु त्रिषु देवकि ! भक्तितः । कर्पूरं देवदेवाय गुग्गुलं श्रावणादिषु । कार्त्तिकादिषु मासेषु परमान्नं शुभे ! त्रिषु । कासारं माघपूर्वेषु यवाग्वञ्च ततस्त्रिषु । हृतं तिलान् जलघटं हि रत्नत्रयं वा व्रती । प्रतिमासं तथा दद्याद् ब्रह्मणाय शुभव्रते ! । यथोक्तनियमाच्चैव यद्दत्तं प्रतिमासिकम् । कुर्वन् जगत्पतिर्विष्णुः प्रीयतामिति मानवः । योषिद्यच्चेत्प्रपन्ना व्रतमेतद् यथाविधि । करोति मासान् सकलान् लभते मनोरथान् । व्रतेनाराधितो विष्णुरनेन जगतां पतिः । ददात्यभिमतान् कामान् क्षिप्रकालेन भामिनि ! । धन्यं यशस्यमायुष्यं सौभाग्यारोग्यदं तथा । व्रतमेतत् प्रियतरं व्रतेभ्योऽन्यच्चतुर्मुखः" ।

विष्णुपदव्रतं विष्णुधर्मोत्तरे "श्रावणे दुःखशयदं व्रतं विष्णुपदव्रयम् । सर्वारम्भविनिष्पत्तिकारकं पापनाशनम् । संसारोच्छेदकैर्धीरैर्यत्नेन स्थिरबुद्धिभिः । तदहं तव राजेन्द्र ! व्रतानामुत्तमं व्रतम् । कथयामि समाधत्व यथा पूर्वं समाहितः । आषाढे मासि राजेन्द्र ! पूर्वाषाढासु पार्थिव ! । समभ्यर्च्च्य जगन्नाथमच्युतं नियतः शुचिः । पुष्पैर्धूपैस्तथा दीपैर्गन्धैः सागुरुचन्दनैः । यथाविभवतश्चान्यैरन्नैर्वासोभिरेव च । घोरन्ते स्थितं तद्वद्व्यैर्विष्णुपदव्रयम् । समभ्यर्च्च्य यथाशक्त्या नैवेद्यन्तदनन्तरम् । दद्यादिप्राय श्रीपतिः प्रीयतामिति । नक्तं भुञ्जीत राजेन्द्र ! हविष्यान्नं सुशोभनम् । तथैवोत्तरषाढासु श्रावणे मासि मानवः । तथैवाभ्यर्च्च्य गोविन्दं तथा विष्णुपदव्रयम् । विप्रायान्नं हृतं दत्त्वा प्रीणयित्वा भुवःपतिम् । भुञ्जीत गोरसप्रायं मानवो मौनमास्थितः । स्त्री वा राजेन्द्र ! पूर्वासु तथा भाद्रपदासु वै । फाल्गुने फाल्गुनीपूर्वां भवेदिति यदा नृप ! । त्रिविक्रमं तदा देवं पूर्वोक्तविधिनार्चयेत् । पदत्रयन्तु देवस्य समभ्यर्च्च्य तु पार्थिव ! । स्थिरत्वं दक्षिणां दद्यात् स्वर्गतिः प्रीयतामिति । नक्तं भुञ्जीत राजेन्द्र ! खाद्यपाकविवर्जितम् । एष एवोत्तरायोगे चैत्रे मासि विधिः स्मृतः । अपुत्रो लभते पुत्रमधनो धनमिनं पतिम् । समागमं प्रवासाच्च तथा प्राप्नोति बान्धवैः । भद्रमैश्वर्यमारोग्यं सौभाग्यं चानुरूपताम् । प्राप्नुयादक्षिणानेतान् पूजयित्वा पदत्रयम् । यान् यान् कामान्वरः स्त्री वा हृदयेनाभिवाञ्छति । तांस्तानाप्नोति निष्कामो विष्णुलोकं प्रपद्यते । पूर्वं कृत्वापि पापानि नरः स्त्री वा नराधिप ! । पदत्रयव्रतं कृत्वा मुच्यते सर्वकिल्बिषैः" ।

विष्णुप्राप्तिद्वादशीव्रतं भविष्यत्पु० "द्वादश्यामुपवासन्तु ये वै कुर्वन्ति ते नराः । मामेव प्रतिपद्यन्ते मम भक्तिपरा-

यथाः। कृत्वा चैवोपवासन्तु गृहीत्वा च जलाञ्जलिम्। नमो नारायणायेति चादित्यं चावलोकयेत्। यावन्तो बिन्दवः केचित् पतन्त्यञ्जलितो जलात्। तावद्वर्षसहस्राणि स्वर्गलोके महीयते। तथैव तद्वां द्वादशीं कृत्वा कर्म समाचरेत्। माधवैरेव पुष्पैस्तु सप्तभिर्गन्धैरेव धूपनैः। य एवं कारयेद्भूमे! तस्यापि हरिर्वां गतिम्" इत्यादि।

विष्णुव्रतं भविष्यपु० "द्वादशीं विष्णुरिहेच्छ सर्वदा विजयी भवेत्। पूज्यश्च सर्वलोकानां यथा गोपतिगोकरः"। गोपतिः सूर्यो गोकरो नेत्ररश्मिर्यस्य स गोपतिगोकरो विष्णुः "मूलकन्याः सूर्यतनयाभिरुक्तकन्याश्च कीर्तिताः। पूर्ववत् पद्मपत्रस्थः कर्तव्यश्च तिथीश्वरः। गन्धपुष्पोपहारैश्च यथाशक्ति विधीयते। पूजाऽयाचितेन याचितेन कृतापि तु फलप्रदा। आज्यधारसमिश्रैश्च दधिक्षीरसमाधिकैः पूर्वोक्तफलदो होमः कृतः शान्तेन चेतसा"। एतत्तु व्रतं वैश्वानरप्रतिपद्व्रतवद्व्याख्येयम्। पद्मपु० "द्वादश द्वादशीर्वत्सु समाप्योपोषणैर्नरः। गोवत्सं काञ्चनं विप्रानर्चयेद्भक्तितः। परं पदमवाप्नोति विष्णुव्रतमिदं कृतम्"। विष्णुधर्मोत्तरे "विष्णुव्रतमिति ख्यातं दर्शितं विष्णुना स्वयम्। पौषशुक्लद्वितीयादि कृत्वा मासचतुष्टयम्। मध्याह्नधारणायां तु गृह्णीयात् परमं व्रतम्। पूर्वं विद्यार्थकैः स्नानं ततः ऋत्विग्भिः कृतम्। वचयाय ततोदेऽह्नि सर्वौषध्या ततःपरम्। नाम्ना लक्ष्म्याश्च ताभ्यां तथा तं तेन पूजयेत्। तथैव च चतुर्थेऽह्नि हृषीकेशं च केशवम्। देवमभ्यर्च्य पुष्पैश्च पत्रैर्धूपानुलेपनैः। चतुष्कलश वाक्षेन्द्रोर्दध्याद्यं समाहितः। पुष्पैः पत्रैः फलैश्चैव सर्वधान्यैश्च भक्तितः। दिनक्रमेण चैतानि चन्द्रनामानि कीर्तयेत्। यशो चन्द्रः यशाङ्कश्च निशापतिरिति क्रमात्। नक्तं भुञ्जीत सततं यावत्तिष्ठति चन्द्रमाः। अशक्तश्चेत् न भुञ्जीत व्रतभङ्गभयाद्भुवि!। एवं सर्वेषु मासेषु ज्येष्ठान्तेषु यथाविधि!। कर्तव्यं वै व्रतश्रेष्ठं द्वितीयादिचतुष्टयम्। विप्राय दक्षिणां दद्यात् पञ्चधान्यं च यत्नतः!। एवं समाप्येत्मासैः षड्भिः प्रथमपारणम्। पारणान्ते च देवस्य पूजनं भक्तितः शुभैः। यथाशक्त्या तु कर्तव्यं वित्तशाठ्यं विवर्जयेत्। आषाढादिद्वितीयासु षण्मासैव तपोधन!। पारणं वै समाख्यातं व्रतस्यास्य शुभप्रदम्।

इक्षुव्रतं पद्मपु० "कार्त्तिक्यां यो इक्षोर्दानं कृत्वा नक्तं समाचरेत्। वैष्णवं पदमवाप्नोति इक्षुव्रतमिदं कृतम्"।

वेदव्रतं विष्णुधर्मोत्तरे "इदमन्यत् प्रवक्ष्यामि चतुर्मूर्त्तिव्रतन्नव। विद्याकामेन यत्कार्यं नरेण सुविपश्चिता। बहिःस्नानं नरः कृत्वा व्रतक्षमेदपूजनः। ऋग्वेदं श्रद्धयान्वितं मासदयमतन्द्रितः। चैत्रादारभ्य धर्मज्ञ! नित्यं नक्ताशनो भवेत्। ततो ह्यपवर! प्राप्ते ज्येष्ठस्य चरमेऽहनि। वाससोयुगं हिरण्यञ्च तथा धेनुं पतङ्गिनीम्। घृतपूर्णं कांस्यपात्रं सक्षिरण्यन्तु दक्षिणाम्। आषाढादिषु मासेषु यजुर्वेदव्रतं चरेत्। आश्विनादिषु मासेषु सामवेदव्रतं चरेत्। तथाथर्वव्रतं नाम पौषादिषु विधीयते। सर्वेषु सर्वं कर्तव्यमृग्वेदव्रतकौर्त्तितम्। वेदाग्नेर्वासुदेवस्य पूजां कृत्वा नरो द्वादशवत्सरान्ते। विष्णोर्लोकं याति लोकैर्विशिष्टं यत्किन् प्राप्ते सर्वदुःखं जहाति"। वेदपदार्थं वेदव्रतं विधानपा० दृश्यम्।

वेद्याव्रतं पद्मपु० "यथाप्यन्यत् व्रतं सम्यक् उपदेक्ष्यामि तत्त्वतः। अविचारेण सर्वाभिरनुष्ठेयञ्च तत् पुनः। संसारोत्तारणायास्मिन्नेतद्वेदविदो विदुः। यदा सूर्यदिने कृष्ण पुष्योऽथाथ पुनर्वसुः। भवेत् सर्वौषधीस्नानं सम्यक्कारी समाचरेत्। तदा पद्मशरस्थापि सन्निधानमिहेष्यते। अर्चयेत् पुष्करीकाक्षमनङ्गस्यापि कीर्त्तनम्। तस्मादिहाय दातव्यं कृच्छ्रतः श्रीयतामिति। यथेच्छाकारभुग्भक्तं तमेव द्विजसत्तमम्। रत्यर्थं कामदेवोऽयमिति चित्तेन धारयेत्। यद्यदिच्छति विप्रेन्द्रस्तत्तत् कुर्यात् विशाम्पते। सर्वभावेन चात्मानमर्पयेत् क्षितिभाविनी। एवमादित्यवारेण सदा तद्व्रतमाचरेत्। तस्यैवमनुवर्तानादि यावन्मासाब्दयोदय। ततस्त्रयोदशे मासि संप्राप्ते तस्य कामिनी। विप्रस्योपस्करैर्युक्तां शय्यां दद्यादिवेच्छया। शोपधानकविन्यासं क्षीरावरणसंयुताम्। दीपकोपानहच्छत्रपादुकासनसंयुताम्। सप्तधान्यसमायुक्तं हेमरत्नाकुलीयकैः। सूक्ष्मवस्त्रैः सकटकैर्धूपमाल्यानुलेपनैः। कामदेवं सपत्नीकं गुडकुम्भोपरिस्थितम्"। कामदेवव्रतन्तु मदनत्रयोदशीव्रतोक्तं विज्ञेयम्। "ताम्रपात्रासनगतं हेमरत्नपटावृतम्। सुकांस्यभाजनोपेतमिक्षुदण्डसमन्वितम्। दद्यादृग्यजुरुक्तविधिना तवैकां मां शयित्नीम्"।

वैतरणीव्रतं भविष्योत्तरे "एकादशीं तिथिं कृत्वा मार्गशीर्षगता नृप!। तामासाद्य नरः सम्यक् सङ्गो-

यान्वितम् शुचिः। एकादशी तिथिः कृष्णा शुक्ला वैतरणी शुभा। वा व्रतेन मया कार्या वर्षं नक्तपरा यथः। मध्याह्ने तु नरः स्नात्वा नित्यं निर्वर्तितक्रियः। रात्रौ सुरभिमानीय कृष्णमर्चेत् यथाविधि। पूर्वोक्तिसङ्ख्यपि धातव्या कृष्णा गोर्निप्रभूतले। अघपादादितः पूजा पश्चात्पादवधावधि। गोदक्षिणं यमाद्या कुर्यात् वै चित्तपेषम्। ततः पूजा प्रकर्तव्या शास्त्रदृष्टविधानतः। गायत्र्या चतुरा युक्तचन्दनेनानुलेपयेत्। गन्धतोयेन चरणौ हस्तौ प्रक्षाल्य भक्तितः। ततोऽनुपूजयेद्धूपैः पुष्पैर्गन्धादिवासितैः। मन्त्रैः पुराणसम्भोक्तैर्यथास्थानं यथाविधि। "मार्गशीर्षादिके मासे यावन्मासचतुष्टयम्। चन्दनासक्तचक्षुस्तु यावत्कार्यमेव च। यावत्यादिषु मासेषु चतुर्व्याद्यं पायसम्। तदन्नं त्रयोभागाः गोगुरुब्राह्मणेभ्य च। नैवेद्यं हि मया दत्तं सुरभी प्रीयतामिति। द्वितीयं गुरवे दद्यात् तृतीयं स्वयमेव च। मासान्मासं प्रकुर्वीत आब्दादब्दं व्रतम्। उद्यापनान्ततः कुर्यात् पूर्वं संवत्सरे तदा। शक्त्या वस्त्रिका भाद्रोदस्यो परिधानकम्। कृत्वा कृष्णवर्णां तु धेनुः कार्या पवस्विनी। कांस्यपात्रीं सुरभीं कृत्वा स्थापयेत् तुलिकोपरि। सुरभीं पूजयेन्मन्त्रैः पूर्वोक्तैर्भक्तिसंयुतैः। ततस्तु गुरवे दद्यात् सर्वं तत्र समापयेत्। नारी वा पुरुषो वापि व्रतस्यास्य प्रभावतः। राज्यं बहुविधं भुक्त्वा स्वर्गलोके महीयते। भारो वोढव्य दातव्यः कार्योऽसौ द्रोणसम्मितः। वैतरण्याः समाप्त्यर्थं ब्राह्मणाय कुटुम्बिने"।

वैनायकचतुर्थीव्रतं भविष्योत्तरे "चतुर्थ्यां नक्तभुग्दद्याद्दान्ते हेमवारणम्"। वारणः, करी। "व्रतं वैनायकं नाम सर्वविघ्नोपशान्तिदम्"।

वैशाखव्रतानि पद्मपु० "वैशाखे पुष्पसञ्चयं वर्जयित्वा तु गोप्रदः। विष्णुलोकमवाप्नोति ततो राजा भवेदिह"। भविष्यपुराणे "निरन्नैरेकभक्तेन वैशाखं यो जितेन्द्रियः। नरो वा यदि वा नारी ज्ञातीनां श्रेष्ठतां व्रजेत्"। विष्णुधर्मोत्तरे "यः क्षिपेदेकभक्तेन वैशाखे पूजयेद्धरिम्। नरो वा यदि वा नारी ज्ञातीनां श्रेष्ठतां व्रजेत्। अक्षिप्तः सर्वभूतेषु वासुदेवपरायणः। नमोऽस्तु वासुदेवाय वैशाखव्रतं जपेत्। अतिरात्रस्य यज्ञस्य ततः फलमवाप्नुयात्"।

वैशाखस्नानव्रतं भविष्योत्तरे। "वैशाखिनी कृत्वा च प्रतिपद्यामिति व्रतम्। कृत्वा सर्वधान्यानि प्राप्नुयादक्षतं धनम्"। दद्या पूजयित्वा। प्रतिपद्यां प्रतिपदि। इति व्रतं कामानुसारेण स्थिरस्थिरतया विदितम्। कृत्वा व्रतेन। सर्वधान्यानि तुलेत्यन्वयः। "मूलमन्त्रैः सर्वसाभिरङ्गमन्त्रैश्च कीर्तिताः। पूर्ववत् पद्मपत्रस्थः कर्तव्यश्च तिथीश्वरः"। मूलमन्त्राः प्रधानमन्त्राः अङ्गमन्त्राः परिवारदेवतामन्त्राः अग्नये हृदयाय नम इत्यादयः। सर्वसाभिः ओं अग्नये नम इत्यादिपूजावाम्। ओं अग्नये स्वाहा इत्यादि होमे। पूर्ववत् सूर्यव्रतवत्। पद्ममध्यस्थः कर्णिकायां सभूम्यां पत्रेषु परिवारभूम्यां स्थितः। तिथीश्वरोऽत्र वह्निः। स च रक्तस्रुवधारी त्रिनेत्रोऽनो रक्ताङ्गवस्त्रवर्णश्च दक्षिणे भुजे तदपरे स्वाहा। वसुमतायां वसुपात्रहस्तायां स्वाहायां स्वस्मे च स्वस्तरोऽपरो वरः। चत्वारः शुक्ला रक्तश्च वोढारः। वायुः सारथिरित्येवं विष्णुधर्मोत्तराभिहितो वेदितव्यः। "गन्धपुष्पोपहारैश्च यथाशक्ति विधीयते। पूजाऽयाचेन याचेन कृतापि तु फलप्रदा। अयाचेन फलप्रदेन याचेनेति स्तुतिः। "आज्यधारासमिद्भिश्च दधिक्षीरान्नसर्पिर्भिः। पूर्वोक्तफलदो होमो विज्ञेयः शान्तिकेषु"। आज्यधारादिभिः षड्भिः पृथक्कृतो होमः पूर्वोक्तफलदो भवेत्। शान्तिकं मधु। यदो पूजा ततो हवाक्षधान्यहोमस्ततो आज्यधारादिहोमः"।

वैश्वानरव्रतं पद्मपु० "यवैश्चन्द्रोदये यद्यदिच्छेत्तस्तत्फलं व्रती। घृतधेनुप्रदोऽन्ते च स परं ब्रह्म गच्छति। वैश्वानरव्रतं नाम सर्वपापप्रणाशनम्"।

वैष्णवव्रतं पद्मपु० "आषाढादिचतुर्मासान् प्रातः स्नायी भवेन्नरः। विप्राय भोजनं दत्त्वा कार्तिक्यां गोप्रदो भवेत्। एतत्कर्म तथा दद्यात् सर्वकामानवाप्नुयात्। वैष्णवव्रतमित्युक्तं विष्णुलोकप्रदायकम्"।

व्यतीपातव्रतं वराहपु० "शुभे व्यतीपातदिने विमाङ्गेत् स पद्मगर्भेण भक्तानदीपलम्। उपावसेद्यः प्रयतात्मजापको जयेत्तु शुद्धो व्यतिपात! ते नमः। ज्ञादिते ताम्रपात्रेण शर्करापूरिते घटे। कांस्यपात्रे प्रतिष्ठाप्य हैममष्टभुजाक्षरम्। अष्टभुजं अष्टादशभुजम् उत्पत्तिवाक्ये व्यतीपातमूर्तेरष्टादशभुजत्वात् उत्पत्तिवाक्यानुसारत्वाच्च विनियोगवाक्यस्य यथा भगवद्दीक्षासु "चत्वारोऽमवसतेति" चतुरक्षरमन्त्रेण। "गन्धपुष्पाक्षतैर्धूपदीपवस्त्रविभूषणैः।

भक्ष्यैर्भोज्यैः फलैश्चित्रैर्वासोभिः सगंधिरेऽर्चयेत्। ममस्तेऽस्तु व्यतीपात ! सूर्य सोमसुत ! प्रभो !। यद्दानादि कृतं किंचित् तदनन्तमिहास्तु मे। इत्युक्त्वा पञ्चरत्नाद्यं सदुग्धाक्षतमञ्जलिम्। प्रक्षिप्य ततश्चादेव सर्वपापक्षयो भवेत्। यदि द्वितीयेऽपि दिने व्यतीपातो भवेन्नहि !। तदा पूर्वोपवासस्तु दद्यात्तत् सकलं गुरोः। पारणं व्यतिपातान्ते कुर्यात् संप्राप्य सोमपम्। अथैकस्मिन्नेव दिने व्यतीपातो भवेद् यदि। तत्रैवाह्नि तदा दत्त्वा उपवासं समाचरेत्। कुर्यादेवं यावि यावि व्यतीपातस्त्रयोदश। व्यतीपाते तु संप्राप्ते कुर्याद्दद्याद्यनं बुधः। व्यतीपाताय स्वाहेति घोरदक्षसमन्वितम्। चाक्ष्यघोरतिलाज्यं च होतव्यं वै यतं यतम्"। नारदीयपु० "व्यतीपातव्रतस्यास्य विधानं शृणु तत्त्वतः। माघे वा फाल्गुने वापि अन्यस्मिन्वापि वा भवेत्। व्यतीपातो दिने यस्मिन् प्रारभेद्व्रतमुत्तमम्। तिलैः पूर्णं घटं चास्य गुरवेऽर्पयेत्। एवं द्वितीये दातव्यं तृतीये तु समापयेत्। सप्तधान्यं पायसं च दातव्यं चोत्तरोत्तरम्। एवं संवत्सरस्यान्ते देवस्यान्ते कारयेत्। शङ्खचक्रगदापाणिं पद्मनेत्रं हिरण्मयम्। वस्त्रयुग्मेन संवेष्ट्य पूजयेद्गरुडध्वजम्। गोक्षीरेण च संपूर्णं कांस्यभाजनसंस्थितम्। स्थापयेद्देवदेवस्य स्थानन्तत्रैव कल्पयेत्। यथा च सन्निधौ तस्य स्याद्या देवमनुस्मरन्। अनन्तशायिनं देवमनन्तफलदं शुभम्। लक्ष्म्या सहान्वितं विष्णुं भक्त्या संपूजयेद्बुधम्। वैदिकैर्नैव मन्त्रैश्च जातीपुष्पैः समर्चयेत्। पायसेनैव नैवेद्यं शर्करासंयुतेन च। दत्त्वा निवेद्य देवस्य प्रार्थनं प्रार्थयेद्व्रती"।

व्योमव्रतं भविष्यपु० अगस्त्यार्घ्यदानानन्तरम् "सितचन्दनतोयेन व्योम स्थाप्य विलिप्य च। कर्णिकाकल्पितैः पद्मैः संपूज्य प्रक्षिपेत्पुनः"। कर्णिकाकल्पितैः कर्णिकामण्डितैः "बहुले विमले सौम्ये निष्कृहे पुष्पिते सति"। पुष्पिते विकसिते। "मध्ये नेश्वरलोकस्य व्योम स्थाप्यं सुशोभनम्। चतुष्पर्वोपशोभन्तं सर्वगन्धसमन्वितम्। अग्रे संस्थापयित्वा च भास्करस्य सुरोत्तम !। पूजयेत् करवीरैस्तु तथा रक्तैश्च चन्दनैः। धूपयेच्च गुग्गुलं दद्यात् प्रथमं शिरसा रविम्। कृष्णं पूर्वार्द्धे तु दद्याद्व्योम्नः समाहितः। दक्षिणे चासितं दत्त्वा पश्चिमे चन्दनं सितम्। चतःसमुत्तरे तु दद्याद्व्योमविचक्षणः। दद्यान्मध्ये शुभं पुष्पं रक्तचन्दनमादरात्। पूजयेदिविधैः पुष्पैस्तथा साङ्गुरुचन्दनैः। धूपं कृष्णागुरुं दद्यात् सप्तधा वापि गुग्गुलुम्। वासांसि च सुवस्त्राणि विशेषाणि निवेदयेत्। पायसं घृतसंयुक्तं घृतदीपांश्च दापयेत्। सर्वं निवेद्य मन्त्रेण ततो गच्छेत् प्रदक्षिणम्। प्रथम्य शिरसा भानुस्तथ्यायेन जपापयेत्। सर्वोपहारसंयुक्तं बलिं देवाय चाहरेत्। सुखोल्काबेति मन्त्रेण सुधांवामितेजसे। अनेन विधिवद्देवमर्चयित्वा पुरा रविम्। अर्कं ब्रह्मवसापक्वः प्रसादाद्भास्करस्य तं।

व्योमषष्ठीव्रतं भविष्यपु० "भाजनं तत्र संपूर्णं मधुना च समन्वितम्। दद्यात् कृष्णतिलानां तु प्रस्थमेकन्तु भागवम्। वितस्तिं तण्डुलानां च पृथक् प्रस्थं च कारयेत्"। भाजनं प्रस्थचतुष्टयपूरकोयं पात्रं त्रिपुष्करं प्रस्थत्रयम् पृथगिति घृतमधुतिलतण्डुलपात्राणि पृथक् कुर्यात्। "मन्त्रयुग्मेन तथा धूपैर्नानावाद्यैर्विशेषतः। ततः संपूजयेत् सूर्यं नानावाद्यसमन्वितम्। सूर्यं गगनस्थम्। "पूजयेच्च ततो व्योम बलिं दिनु प्रपूजयेत्। व्याघटेऽष्टदले चैव सर्वभूतानि योजयेत्। व्योमदेव स्टदे तत्र यत्र व्योम प्रतिष्ठितम्"। व्योमनिर्माणं विष्णुधर्मोत्तरात् "चतुरस्रं भवेन्मूले तत्र हस्तं महाभुजम्। ततोऽन्यत् चतुरस्रञ्च प्रथमे संस्थितं शुभम्। भद्रपीठमथो श्रोक्तो व्योमभागस्तुरीयकः। तस्मै वैश्वानरोऽयास्य मध्यभागः प्रकीर्तितः। भद्रपीठपदन्यस्य तत्र पद्मं निवेशयेत्। शुभाष्टपत्रं तन्मध्ये कर्णिकायां दिवाकरः। पत्राष्टके न्यसेत्तस्य दिक्पालान् क्रमतो दिशम्"। "य एवं कुरुते षष्ठ्यां सन्ध्याकाले बलिं रवेः। स सूर्यलोकमासाद्य मोदते शाश्वतीः समाः"।

व्रतराजस्तृतीयाव्रतं देवीपु० "ततोयायान्तु शुक्लायां त्रिखेहस्तयुगे शुभे। रोचनाक्षितकर्पूरैः त्रिगोमां पूजयेत्ततः। हेमरत्नसजेवस्त्र ! मन्त्रयुग्मसुदीरयेत्। यमस्तकामफलदं यत्तत् पूर्वमुदाहृतम्। ततो जपार्चनं होमं कर्त्तव्यं द्विजसत्तम !। अवियोगाय नारीणां व्रतराजं सदा स्थितम्। सहेमपुष्परत्नाढ्यं सदक्षं दापयेत्तु तत्। ब्रह्मपुत्रं महाभाग्यं सर्वकामप्रदायकम्। श्रुतस्यास्तवियोगस्तु न भवेत्तेन भो द्विज !। न व्याधिर्नोपसर्गश्च यावत्तन्तुरतो भवेत्। तावत्कालसमाकीर्णे राजते मोदते चिरम्।

शक्रव्रतं विष्णुधर्मोत्तरे "आश्वयुज्यां सपूर्वन्तु पौर्णमास्यां नरो भुवि। सोपवासः सुरेन्द्रस्तु देवं संपूजयेत्तथा। शचीमैरावतं वज्रं मातलिञ्च नराधिपः। गन्धमाल्यनमस्कारदीपधूपाद्यसम्मदा। संवत्सरान्ते कनकञ्च दत्त्वा प्राप्नोति लोकं स पुरन्दरस्य। मानुष्यमासाद्य नरेन्द्रपूज्यो राजा भवेद्वा द्विजपुङ्गवो वा"। पद्मपु० "आकाशायी समां दद्याद्धेनुमन्ते पयस्विनीम्। शक्रलोकमवाप्नोति शक्रव्रतमिदं स्मृतम्"।

शङ्करनारायणव्रत देवीपु० "कथितं शङ्करोमाख्यं व्रतं सर्वसि सुव्रते। श्रोतुमिच्छाम्यहन्नात विष्णुशङ्करसंभितम्"। महत्वाच "यथा सर्वेश्वरत्वात तथा कार्यमिदं व्रतम्। किन्तु पीतानि वासांसि केशवाय प्रकल्पयेत्। गन्धपुष्पं तथा धूपं सुगन्धञ्च जनार्दने। कार्यं पूजनसम्भारे कङ्कुमादिरसं दधि। एवन्तौ पूजयित्वा तु प्रतिमास्वखिलेऽपि वा। वाच्य ब्राह्मणौ वत्स! वेदवेदाङ्गपारगौ। यतौ वा व्रतसम्पन्नौ जटाकाषायधारिणौ। तौ भोजयेद्विधानेन सूपघृतसमन्वितम्। क्षमाप्य विधिना वत्स! सर्वकामप्रसाधकौ। भूमात्रं दक्षिणां विष्णोर्दैवज्ञं शङ्कराय च। दत्त्वानुव्रजतो लोकौ क्रमाद्देवयते ततः"।

शङ्करार्कव्रतं कालिकापु० "अथ चानेन मार्गेण शुभां तामेव चाष्टमीम्। सम्प्राप्यादित्ययोगेन प्राग्विधानेन वा नरः। किन्तु दक्षिणनेत्रस्थं भास्करञ्चार्चयेद्बुधः। पद्मरागेण हैमेन योजयेदं क्षेपनं शुभम्। नेत्रे न्यस्य ललाटाधः कुङ्कुमं रक्तचन्दनम्। दत्तन्तु योज्य मध्ये तु क्षुरं पूर्ववदर्पयेत्"। अर्द्धचन्द्राकारं तन्मध्ये दत्तन्तु कृत्वा क्षेमनिबद्धं पद्मरागं दत्तमध्ये निधाय सूर्यरूपनेत्रं कुर्यादित्यर्थः। "अभावे पद्मरागादेर्हेम सर्वत्र योजयेत्। रक्तवीजं वरं पूतं यतस्तच्चैव सर्वदा। शुक्लमाल्याम्बरं वस्त्रं नैवेद्यं च घृतप्लुतम्। क्षेत्रः पूर्वविधानेन कर्त्तव्यो विधिविस्तरः। किन्तूपोष्य प्रकुर्वीत सप्तम्यां विजितेन्द्रियः। शङ्करार्कयुतं पूज्य घृतं भक्ष्यञ्च पारयेत्"।

शनिव्रतं भविष्योत्तरे "यतो यस्य दिवसे स्नानमभ्यङ्गपूर्वकम्। कार्यं देवस्य विप्राय तैलमभ्यङ्गहेतवे। यस्तु संवत्सरं यावत् प्राप्ते शनिदिने नरः। तैलं ददाति विप्राय सूर्यस्यानन्दजनस्य तु। ततः संवत्सरान्ते प्राप्ते तस्य दिने पुनः। लौहघटार्पितं सौरिं तैलकुम्भे विनिक्षिपेत्। लौहे वा रजतमये वाथ ताम्रस्थसुवर्णान्वितम्" इत्यादि।

शर्करासप्तमीव्रतं पद्मपु० "शर्करासप्तमीं वक्ष्ये सर्वकल्मषनाशिनीम्। आयुरारोग्यमैश्वर्यं यस्यानन्त्यं प्रजायते। माघस्य सिते पक्षे सप्तम्यां श्रद्धयान्वितः। प्रातःस्नातस्तिलैः शुक्लैः शुक्लमाल्यानुलेपनैः। स्थण्डिले पद्ममालिख्य कुङ्कुमेन सकर्णिकम्। तस्मिन्विधिवत् सविते धूपं पुष्पं निवेदयेत्। स्थापयेद्घृतं कुम्भं शर्करापात्रसंयुतम्। शुक्लवस्त्रेण संवेष्ट्य शुक्लमाल्यानुलेपनैः। सर्करघृतं यथाशक्त्या कलशेष्वानेन पूजयेत्" इत्यादि।

शाकसप्तमीव्रतं भविष्यपु० "सप्तम्यां सोपवासस्तु रात्रौ भुञ्जे तु यो नरः। कृतोपवासः सप्तम्यां तु पञ्चम्यामेकभक्तभुक्। दत्त्वा तु संस्कृतं शाकं भक्ष्यभोज्यैः सुसंस्कृतम्। देवाय ब्राह्मणेभ्यश्च रात्रौ भुञ्जीत वाग्यतः। यावज्जीवं नरः कश्चिद्व्रतमेतच्चरिष्यति। तस्य श्रीर्विजयश्चैव त्रिवर्गश्च विवर्द्धते। मृतः स्वर्गमवाप्नोति विमानवरमास्थितः"। "शाकं संस्कृतं कृत्वा भक्ष्यभोज्यसमन्वितम्। दत्त्वा विप्रे यथाशक्त्या पश्चाद्भुञ्जीत निशि व्रती। कार्त्तिके शुक्लपक्षस्य याज्ञोऽयं कुरुनन्दन!। चतुर्भिरपि मासैस्तु पारणं प्रथमं स्मृतम्। अगस्ति कुसुमैश्चात्र पूजा कार्या विभावसोः"। कार्त्तिकशुक्लसप्तम्यामारभ्य प्रतिमासं कुर्वता पुनर्मासचतुष्टयम् यावत् शुक्लसप्तमी तस्यां तस्यान्तु पारणं कार्यम्। एकस्मिन् वर्षे चतुष्टयं पारणं भवति एवमेव वर्षान्तरेषु तादृशं व्रतं यावज्जीवं कर्त्तव्यम्"।

शान्तिचतुर्थीव्रतं भविष्यत्पु० "माघमासि तथा शुक्ला या चतुर्थी महीपते!। सा सर्वशान्तिदा नित्यं शान्तिं कुर्यात् सदैव हि। स्नानं दानं वह्निः कर्म सर्वमस्यां कृतं विभो!। भवेत्सहस्रगुणितं प्रसादाद्विघ्ननः सदा। कृत्वोपवासं तस्यां तु पूजयेद्विघ्ननायकम्। तस्यां होमादिकं कर्म भवेत्साङ्गिकं नृप!। सवर्णं गुडपूर्णञ्च एतावत् तस्य भारत!। दत्त्वा भक्त्या तु विप्रेभ्यः फलं साङ्गिकं लभेत्"।

शान्तितृतीयाव्रतं गरुडपु० "तृतीयायां सुभागे! कर्त्तव्यञ्च व्रतं शृणु। येनानन्तभगारब्धमेनः क्षपयति द्विज!। यक्षपीड़ादिकैरन्यैरुपसर्गैः प्रपीड़ितः। यस्यां शान्तिं प्रकुर्वीत यतवाक्कायमानसः। स्थण्डिलं रचयित्वा तु नरोवीजप्रसूनकैः। चक्राब्जं सप्तदलं कुर्यादक्षिणसूत्रित-

तण्डुलैः। तत्र चागच्छेद्वै देवं नरसिंहाकृतिं विभुम्। प्रसन्नमधुराटारवीक्षणक्षपितार्त्तिकम्। अशेषभयविध्वंसचतुरं पुरुषं हरिम्। अभयं भवतप्राणां ददतं ददतं वरम्" इत्यादि। "होमान्ते द्विगुणं प्राज्ञस्तर्पणं मन्त्रनिश्चयः। तस्य तद् द्विगुणं प्राज्ञैर्जप एव विधिक्रमः। नियोगारम्भसमये नियमान् प्रतिपालयेत्। स्वयं चाहरहः कुर्यान् नक्तकालं समापयेत्"। नियमान् मौनादीन्। स्वयञ्चाहरहः पूर्वं नक्तकालं समापयेत्। स्वयं होमतर्पणजपान् अहरहः प्रतिदिनं संख्या च सङ्कल्पितहोमसंख्यापेक्षया। "हविष्याशी जितक्रोधो यतवाक्कायमानसः। नित्यं त्रिःषवणं स्नायात् सदाचाररतो मुनिः। न चान्नतकवोऽनग्निर्ब्रह्मचारी जितश्रमः"। यस्त्वेतत् कुरुते मर्त्यः श्रद्धाभक्ति समन्वितः। स सर्वार्त्तिविनिर्मुक्तो शान्तिमाप्नोति नैष्ठिकीम्"।

शान्तिपञ्चमीव्रतं भविष्यपु० "तद्वद्भाद्रपदे मासि पञ्चम्यां श्रद्धयान्वितः। यत्नाच्चित्रं नरो नागान् क्षणवर्णादिवर्णकैः। पूजयेद्गन्धधूपैस्तु सर्पिर्गुग्गुलपायसैः। तस्य तुष्टिं समायान्ति पन्नगास्तक्षकादयः। आसप्तसकुलात्तस्य न भयं नागतो भवेत्। तस्मात् सर्वप्रयत्नेन नागान् संपूजयेद्बुधः। तथैवाश्वयुजे मासि पञ्चम्यां कुरुनन्दन!। कृत्वा कृशमयान्नागानिन्द्राण्या सह पूजयेत्। यस्तस्यां विधिवन्नागान् शुचिर्भक्त्या समन्वितः। पूजयेत् कुरुशार्दूल! तस्य शेषादयो नृप!। नागाः प्रीता भवन्तीह शान्तिमाप्नोति वा विभो!। प्रशान्तिलोकमासाद्य मोदते शाश्वतीः समा"।

शान्तिव्रतं वराहपु० "शान्तिव्रतं प्रवक्ष्यामि शृणुष्वैकमना नृप!। येन पौर्णेन शान्तिः स्यात् सर्वदा स्वर्गमेधिनः। पञ्चम्यां शुक्लपक्षस्य कार्त्तिके मासि पार्थिव!। आरभ्य वर्षमेकन्तु भुञ्जीयादक्षवर्जितम्। नक्तन्तु पूजयेद्देवं हरिं शेषोपरिस्थितम्। एवं यः कुरुते भक्त्या व्रतमेतन्नराधिप!। तस्य शान्तिर्भवेच्चित्तं नागेभ्यश्चाभयं तथा। शेषाहिभोगशयनस्वरूपांप्रकृतिं संपूज्य पुरुषं पतगेन्द्रकेतुम्। येनक्षमत्यमधुरं सितपञ्चमीषु तेषां न नागजनितं भयमस्ति किञ्चित्"।

शाम्भरावणीव्रतं भविष्योत्तरे "तस्मात् पार्थ! प्रयत्नेन प्रतिमासं समाहितः। मासि मासच्युतं पूजां भवेत्सान्नमनास्तया। ये शाम्भरायणिकचारितव्रतेन वर्षाणि सप्त विधिना सुधियो नयन्ति। ते स्वर्गलोकमभिलभ्य लताधिवासाः कल्पायुतं सुतपतेरपि न च्यवन्ति"।

शिवाचतुर्दशीव्रतं भविष्योत्तरे "लवणैर्धान्यकैर्युक्तं क्षीरकं मरिचानि च। छित्त्वा शूलहीं हरिद्राञ्च सर्वं परिकरं तथा। चतुर्ष्वामेकभक्ताशी सकृद् दत्त्वा कुटुम्बिने। स्वर्गेषु सप्तसु तथा शिवायुक्तानि भारत!। एतच्छिवाव्रतं नाम सर्वलोकप्रदायकम्"।

शिवचतुर्दशीव्रतं मत्स्यपु० "शृणुष्वावहितो ब्रह्मन् वक्ष्ये माहेश्वरं व्रतम्। त्रिषु लोकेषु विख्यातं नाम्ना शिवचतुर्दशी। मार्गशीर्षे त्रयोदश्यां सितायामेकभोजनः। प्रार्थयेद्देवदेवेशं त्वामहं शरणङ्गतः। चतुर्दश्यां निराहारः समभ्यर्च्य च शङ्करम्। सुवर्णवृषभं कृत्वा भोजयेच्चापरेऽहनि। एवं नियमकृत् कृत्वा प्रातरुत्थाय मानवः। कृतस्नानजपः पश्चादुमया सह शङ्करम्। पूजयेत् कमलैः शुक्लैः गन्धधूपानुलेपनैः"। "पञ्चदश्यां ततः पूज्य विप्रान् भुञ्जीत वाग्यतः। तद्वत्कृष्णचतुर्दश्यामेतत् सर्वं समाचरेत्। चतुर्दशीषु सर्वासु कुर्यात् पूर्ववदर्चनम्। ये तु मासविशेषासु तान्निबोध क्रमादिह। मार्गशीर्षादिमासेषु क्रमादेतदुदीरयेत्"। आश्विनान्तेऽपि शैवम् इत्यादि।

शिवनक्तव्रतं भविष्यपु० "कृष्णाष्टम्यां तु नक्तेन कृत्वा कृष्णचतुर्दशीम्। इह भोगानवाप्नोति परत्र शिवसद्मनि"।

शिवरथव्रतं विष्णुधर्मोत्तरे "कृत्वैकभक्तं हेमन्ते माघमासे तु यन्त्रितः। माघान्ते च रथं कुर्याच्चित्रवस्त्रोपशोभितम्। श्वेतैर्वृषभैः संयुक्तं दृढैः समलङ्कृतम्। शोभितं ध्वजमालाभिश्चित्रचामरदर्पणैः। तण्डुलाढकपिष्टेन चित्रं कृत्वा सवेदिकम्। विन्यस्य रथमध्ये तु पूजयेत् कृतलक्षणम्। तद्वाह्यौ राजमार्गे च शङ्खभेर्यादिभिः स्वनैः। भ्रामयित्वा ततः प्रह्वाच्छिवायतनमानयेत्। तत्र जागरपूजाभिः प्रदीपाद्युपशोभितैः। प्रेक्षणीयप्रदानैश्च क्षपयेत मनैर्निशाम्। प्रभाते स्नापनं कृत्वा नक्तस्नानाच्च भोजनम्। दीनान्धकृपणानाञ्च यथाशक्त्या च दक्षिणाम्। रथं शोभासमायुक्तं शिवाय विनिवेदयेत्। भुक्त्वा च बान्धवैः सार्द्धं प्रणम्यैनं स्वर्गं व्रजेत्"।

शिवरात्रिव्रतं स्कन्दपु० नागरखण्डे "माघस्य कृष्णपक्षेय तिथिश्चैव चतुर्दशी। तस्यां रात्रिः समाख्याता शिव-

रात्रिरिति द्विजाः ! । तस्यां सर्वेषु लिङ्गेषु सदा संक्रमते हरः । विशेषादमरैः सर्वैः ख्याता सैवं कलेश्वरे । माघनाम्नश्च कृष्णायां चतुर्दश्यां सुरेश्वर ! । अर्कं वाऽथापि भूमिष्ठो रात्रौ नैव दिवा क्वचित् । लिङ्गेषु च समस्तेषु सर्वेषु स्थावरेषु च । प्रपूजयेत् सम्यगेव सर्वपापविशुद्धये । तस्यां रात्रौ हि मे पूजां यः करोति मानवः । मन्त्रैरेतैः सुरश्रेष्ठ ! विधानमपि मे भवेत् । स्कन्दउ० "माघमासे तु या कृष्णा फाल्गुनादौ चतुर्दशी । सा तु पुण्या तिथिर्ज्ञेया सर्वपापविनाशिनी । शान्तात्मा क्रोधहीनस्तु तपस्वी ह्यनसूयकः । तस्मै देयमिदं देवि ! गुरुपादानुगे सदा । अन्यथा यो ददातीदं स दाता नरकं व्रजेत् । वर्षे वर्षे महादेवि ! नरोनारी पतिव्रता । वीक्षयामि जगत् सर्वं कोमां भक्त्या प्रपूजयेत् । शिवमन्त्रैर्जपं कृत्वा होममर्चनदीपनम् । जागरं शिवरात्र्यान्तु शिवं पश्येत् समाहितः । मम भक्तो नरो देवि ! शिवरात्र्युपोषकः । गणत्वमक्षयं दिव्यमक्षयम् शिवशासनम् । सर्वं कृत्वा तु भजते भोगानन्तसमान्वितः । एवं द्वादश वर्षाणि शिवरात्र्युपोषकः । योमां जागरते रात्रिं मनुजः स्वर्गमाप्नुयात् । अकृत्वा मां न जानाति व्रतमेतदुदाहृतम् । शिवञ्च पूजयित्वा यो जागर्त्ति च चतुर्दशीम् । मातुः पयोधरक्षीरं न पिबेत् स कदाचन । यदीच्छेत्स्वाश्रयान् भोगान् दिवि देवसमः पुमान् । जागरोक्तविधिं कृत्वा प्राप्नोति सकलं फलम्" ।

शिवलिङ्गव्रतं शिवधर्मोत्तरे "श्वेतचन्दनतोयेन स्नाप्य लिङ्गं विलेप्य च । श्वेतैर्विकसितैः पद्मैः संपूज्य प्रणिपत्य च । पद्मजे विमले सौम्ये निष्कृते पुष्पिते वने । सौम्ये रम्ये मध्ये क्षेत्रस्य स्थाप्य लिङ्गं कनीयसम् । चतुरस्रं विधिवत् सर्वलक्षणसंयुतम् । स्थाप्य दक्षिणमूर्धौ तु बिल्वपत्रैः समर्चयेत् । एवं योऽर्चयते लिङ्गं पद्मे गन्धमयं शुभम् । सर्वपापविनिर्मुक्तः शिवमेवाभिगच्छति । एतद्व्रतोत्तमं गुह्यं शिवलिङ्गं मयोदितम् । भक्तस्य ते मयाख्यातं न देयं यस्य कस्यचित्" ।

शिवव्रतं कालोत्तरे "व्रतवरं प्रवक्ष्यामि व्रतानान्तु यथाक्रमम् । व्रतस्यान्तु चतुर्दश्यां पक्षयोरुभयोरपि । उपोष्य संयतो भूत्वा त्रिविधेनान्तरात्मना । ततोऽपराह्णे शुचिना विशेषात् पूजयेच्छिवम् । पूर्वोक्तेन विधानेन जपहोमादिमाचरेत् । पूजयेत् परया भक्त्या गुरुवाक्यसाधनादिभिः । ततस्तु पञ्चगव्येन स्नापयेच्छुचिसंयम् । अमन्त्रोपसंस्कृत्य हविष्यान्नेन वर्त्तनम् । अनेन विधिना यावद् वाव्वर्षं व्रतं चरेत् । पिता पितामहश्चैव तथैव प्रपितामहः । वसन्ति शिवलोकेषु शिवव्रतप्रभावतः । एतच्छिवव्रतं नाम व्रतानामुत्तमोत्तमम् । तत्रैवान्यत्र "पौषमासे तु सम्प्राप्ते पक्षयोरुभयोः कृत ! । चतुर्दश्यामष्टम्यां पौर्णमास्यामथापि वा । नित्यं नित्यं विधिवत् ततः काम्यं समाचरेत् । विशेषपूजा तत्रैव कर्त्तव्या शुद्धचेतसा । नैवेद्य यावकस्यं खण्डं क्षीराज्यसंयुतम् । रुद्रसंख्यांस्तु वै विप्रान् भोजयेच्चैव दक्षिणे । वित्तशाठ्यं प्रकुर्वीत यावपिष्टेन निर्मितान् । वृषभैकखुरान्नाङ्गुलतमूधान्त कारयेत् । शिवाय तु प्रदातव्या कपिला गुरवे ततः । स्वाच्छन्दसमायुक्ता व्रतपुण्यमतः प्रभु ! । वर्षसाध्यम् "अनेन विधिना माघे खड्गं पिष्टमयं शिवे । समर्प्य च विधानेन चक्रवर्त्तिपदं लभेत् । फाल्गुने तु तथा चक्रं निवेद्य तत्पदं लभेत् । चैत्रे शिवं पिष्टमयं निवेद्य च शिवाप्तयः । स सप्तति ब्रह्मकल्पां शिवलोकमवाप्नुयात् । वैशाखे मासि दण्डाग्रं शिवस्याग्रे निवेदयेत् । कृष्णार्द्धं पिष्टकं कार्यं पूजान्ते तु निवेदयेत् । मुच्यते सर्वपापेभ्यो रुद्रलोके महीयते । ज्यैष्ठे पिष्टमयं खड्गं शिवाय विनिवेदयेत् । मुच्यते तु कृतघ्नत्वाद् रुद्रलोके तु गच्छति । आषाढे पिष्टजं पात्रं शिवाय विनिवेदयेत् । मुच्यते दुष्कृतैः सर्वैरिह जन्मनि सञ्चितैः । ध्वजं पिष्टमयं यस्तु शिवस्याग्रे निवेदयेत् । श्रावणे तु विधानेन सोऽक्षयं मोक्षमाप्नुयात् । मासे भाद्रपदे यस्तु गदां पिष्टमयीं ददेत् । निधीशत्वं स लभ्याथ शिवलोके महीयते । मासि चाश्वयुजे शूलं दत्त्वार्द्धं पिष्टसम्भवम् । शिवाय गुरवे देयं भूयश्चत्वां व्यपोहति । कार्त्तिके तु गदाचक्रं शिवस्याग्रे निवेदयेत् । सप्तजन्मकृतं पापं दह्यन्निरिवेन्धनम् । मासे वै मार्गशीर्षे तु कमलं पिष्टसम्भवम् । शिवाय विधिना देयं सर्वैश्वर्यमवाप्नुयात् । सर्वमाख्यैव नक्तन्तु व्रतानां कीर्त्तितं मया । नित्यपूजान्तु निर्वर्त्त्य काम्यपूजान्तु कारयेत्" । तत्रैवान्यत्र "खड्गं वै मार्गशीर्षे तु यस्तु पिष्टमयं ददेत् । शिवं सम्पूज्य विधिवत् सूर्यलोके महीयते । दिव्यं वर्षसहस्रन्तु तत्रैव स्थाप्यते नरः । पौषे पिष्टमयी दत्ती शिवस्याग्रे निवेद्यते । निःसप्तकुलसंयुक्तः शिवलोके महीयते ।

दिव्यं वर्षसहस्रन्तु तदन्ते स्थानमीप्सितः। चक्रवर्त्ती महावीरः सर्वैश्वर्यसमन्वितः। माघे चाक्षरसं वस्तु शिवाय विनिवेदयेत्। उद्धरेत्सोऽपि नरकात् स्वपितॄन् रौरवादितः। शिवलोके तु वसति दिव्यवर्षायुतत्रयम्। तदन्ते तु महीं कृत्स्नां न च खण्डां भुनक्ति सः। फाल्गुने दृषयूथन्तु पिठोत्थं रुद्रसंख्यया। निवेद्य तु शिवस्थाने त्रैलोक्याधिपतिर्भवेत्। दिव्यं वर्षसहस्रन्तु तदन्ते स्थानमीप्सितः। चक्रवर्त्ती महावीरः सर्वैश्वर्यसमन्वितः। चैत्रे रुद्रमिन्दुमयं दाशदासीसमन्वितम्। रुद्रोपकरणैर्युक्तं विचित्राङ्गवरचर्चितम्। पूजान्ते प्रणम्य भक्त्या शिवाय विनिवेदयेत्। दिव्यवर्षशतान्यष्टौ रुद्रलोके महीयते। जातिस्मरस्तदन्ते तु चक्रवर्त्तित्वमाप्नुयात्। माघि वैशाखसंक्रान्ते तु सप्तब्रीहिशरावकान्। शिवाय पुरतो दद्यात् पूजान्ते प्रीतचेतसा। स याति शिवसायुज्यं बन्धुभिः सहितो नरः। पलानां द्वे शते वस्तु गुग्गुलन्तु दशैव तु। ज्येष्ठे माघि शिवस्थाने पूजान्ते भक्तिसंयुतः। त्रिःसप्तकुलसंयुक्तः शिवलोके महीयते। तदन्ते पृथिवीं भुङ्क्ते न च खण्डां ससागराम्। बलिमण्डलकं कार्यं आषाढे शुक्लपाक्षिकः। नानाभक्ष्यैर्विरचितं नानाभक्ष्यसमन्वितम्। नानाचित्रसमाकीर्णं कर्त्तव्यं बलिमण्डलम्। संपूज्य परमेशानं ततस्तस्य निवेदयेत्। पितॄन् पितामहांश्चैव भ्रातॄन् पितृव्यमातुलान्। पुत्रपौत्रसमायुक्तः शिवलोके महीयते। दिव्यवर्षसहस्राणि तदन्ते पृथिवीपतिः। श्रावणे माघि देवस्य विमानं पुष्पसञ्ज्ञकम्। पूजास्थाने दातव्यं विचित्ररचनाङ्कितम्। वर्षायुतप्रमाणन्तु रुद्रलोके महीयते। योगीशो जायते श्रीमान् येन मोक्षं व्रजेत्तु सः। माघि भाद्रपदे यस्तु रुद्रव्रतां चरेत् तदा। गुग्गुलं प्रथमं धूपं सुरदारु ततो दहेत्। बिल्वबीजं हृतं तद्वत् तथा नागहृताभिधम्। पञ्चमं शृगुरं दद्यात् धूपं सर्वौषधेन विभोः। मासमेकन्तु देवेशं नैरन्तर्येण भक्तितः। याति सायुज्यतां शम्भोः सप्तजः सप्तबान्धवः। यस्त्वर्कपत्रपुटकं पूरयेत् क्षीरसर्पिषा। मासमश्नुयुजं शम्भोर्नैरन्तर्येण भक्तितः। तस्य पुण्यफलं वक्तुं न शक्नोम्यहं षडानन!। तत्कुले पतिता ये तु दिग्भाविग्भाविता पुनः। ते प्रयान्ति महाभागा रुद्रलोके यथासुखम्। वर्षायुतायुतं सार्द्धं तदन्ते तु नरेश्वराः। आवन्ते शिवभक्ताश्च ज्ञानिनो वीतकल्मषाः। शिवदीक्षां समासाद्य ते यान्ति परमाकृतिम्। यस्त्वाढ्यबिल्वपत्रं पुटकन्तु शिवाप्यतः। पूजान्ते दापयेद् वस्तु माघि प्राप्ते च कार्त्तिके। देहान्ते रुद्रलोके तु मोदते सह बान्धवैः। व्रतान्ते चैव संपूज्य शिवभक्तान् यथाविधि। हैमवस्त्रान्नपानैश्च वित्तशाठ्यं विना सुत!"। पद्मपु० "आषाढादिचतुर्मासां वर्जयेन्नक्तभोजनम्। हविष्यान्नं समश्नीयात् सक्तुसर्पिर्घटान्वितम्। कार्त्तिक्यान्तु पुनर्हैमं ब्राह्मणाय निवेदयेत्। रुद्रलोकमवाप्नोति शिवव्रतमनुत्तमम्"।

शिवाचतुर्थीव्रतं भविष्यपु० "शिवा शान्ता सुखी राजन्! चतुर्थी त्रिविधा स्मृता। माघि भाद्रपदे शुक्ला शिवा लोकैरपूजिता। तस्यां स्नानं तथा दानन्तथैवोद्यापनन्तथा। क्रियमाणं शतगुणं प्रसादाद्वह्निनो नृप!। गुडलवणहतानां दानं सुखकरं स्मृतम्। गुडपूपास्तथा वीर! पुण्यं ब्राह्मणभोजनम्। चतुर्थ्यां नरशार्दूल! पूजयेन्न सदा स्त्रियः। गुडलवणपूजाभिः सप्तजन्मसु दुःखमातरः। ताः सर्वा सुभगा, रूपैर्विघ्नशान्तानुमोदनात्। कन्यकाश्च विशेषेण विधिनानेन पूजयेत्"।

शिवोपवीतव्रतं शिवधर्मोत्तरे "पौर्णमास्यां तथामास्यां शिवं संपूज्य यत्नतः। उपवीतं शिवे दद्याच्छिवभक्तांश्च भोजयेत्। पुनरेव च कार्त्तिक्यां पूजयित्वा शम्भुं क्षमापयेत्। यतीनां दक्षिणां दत्त्वा सुव्रतस्यादिपूर्विकाम्। यः कुर्य्यात् सकृदप्येवं चातुर्मास्यां पवित्रकम्। कल्पकोटिसहस्राणि रुद्रलोके महीयते"।

श्रीवत्सतृतीयाव्रतं पद्मपु० "श्रवणस्थेऽर्कसप्तमि तृतीयायान्तु यो नरः। गां दत्त्वा शिवमभ्येति पुनरावृत्तिदुर्लभम्। इदमानन्दजनकं पुंसां श्रीवत्सव्रतमिदं स्मृतम्"।

श्रीद्वादशीव्रतं विष्णुधर्मोत्तरे "भगवन्! कथं वा केन श्रीमान् पुरुषो भवेत्। कृतजातिस्मृतेरस्य श्रीमत्त्वं विधीयते"। मार्कण्डेय उवाच "आषाढाद्यतुरोमासे तु मासमेकं दिने दिने। पूर्ववत् पूजयेद्देवं वराहमपराजितम्। घृतेन स्नापयेद्देवं घृतेन जुहुयाद्धरिम्। घृतं द्विजेभ्यो दद्याच्च घृतमेव निवेदयेत्। त्रिरात्रोपोषितः शौभ्रां घृतपात्रेण च द्विजम्। पूजयेच्च सुवर्णेन यथाशक्ति नराधिप!। कृत्वा व्रतं मासमिदं यथोक्तमाद्य नाकं सुचिरं मनुष्यः। मानुष्यमासाद्य च श्रीमान् स्यात् प्राप्नोति पुत्रं चिरजीवितञ्च"।

शुक्लव्रतं भविष्योत्तरोक्तम् "शुक्लं ज्येष्ठासु संग्राह्य पूजये-

नक्तभोजनः । पूर्वोक्तक्रमयोगेन द्विजमर्चयेत्तु तं । सम्प्रमे त्वथ संप्राप्ते सौवर्णं कारयेच्छुभम् (शुक्रम्) । रौप्ये वा कांस्यपात्रे वा स्थापयित्वा भगोः सुतम् । संपूज्य परया भक्त्या श्वेतस्रक्चानुलेपनैः । अथो तस्य प्रदातव्यं पात्रं घृतसंयुतम्" ।

शुद्धिव्रतं वशिष्ठः "एवं वा द्वादश मासानुपोष्यैकादशीं बुधः । स यः करोति शुद्धात्मा कृतकृत्यः सुखी भवेत् । शुक्लामेकादशीं पूज्य नाम्ना द्वादशभिस्तथा । द्वादश धेनवो देया हरिः कामान् प्रयच्छति । दिवि देवाः स देवेन्द्राः कृत्वा कर्मांगनेकशः । पश्चादाराधयन्तीह हरिं शुद्धिव्रतेन हि" ।

शुभद्वादशीव्रतं वराहपुः "शृणु राजन् ! महाभाग ! शुभव्रतमनुत्तमम् । येन सम्प्राप्यते विष्णुः शुभेनैव न संशयः । माघि मार्गशिरे पुण्ये प्रथमाद्वात् समाचरेत् । एकभक्तं क्षिते पक्षे यावत् स्याद्द्वादशी तिथिः । ततो दशम्यां मध्याह्ने स्नात्वा केशवमर्चयेत् । भुक्त्वा सङ्कल्पतः प्राग्वद् द्वादश्यां शुद्धमानसः । केशवेति हरिं पूज्य दद्यात्तत्प्रीतये तिलान् । सक्षिरघटं तथा कृष्णद्वादश्यां प्रयतो नृप !! तामर्घेवस्तुथित्वा च यवान् दद्याद् द्विजातये । कृष्णायेति हरिर्वाच्यो दाने होमे तथार्चने । चातुर्मास्यामथैवन्तु स्थापित्वा राजसत्तम ।। चैत्रादिषु पुनस्तद्वदुपोष्य प्रयतः शुचिः । सक्षीरघटान्यपि विप्राणां सक्षिरघटानि दापयेत् । श्रावणादिषु मासेषु तद्वद्गोविन्दमर्चयेत् । त्रिषु मासेषु यावत्तु कार्त्तिकः स्यादिहागतः । तमप्येवं स्थापयित्वा दशम्यां प्रयतः शुचिः । अर्चयित्वा हरिं भक्त्या मासनाम्ना विचक्षणः" ।

शुभसप्तमीव्रतं पद्मपुः "अन्यामपि प्रवक्ष्यामि शोभनां शुभसप्तमीम् । यस्याप्य नरोरोगात् शोकदुःखात् प्रमुच्यते । शुक्ले चाश्वयुजे मासि कृतस्नानजपः शुचिः । वाचयित्वा द्विजश्रेष्ठानारभेच्छुभसप्तमीम् । कपिलां पूजयेद्भक्त्या मन्त्रमाल्यानुलेपनैः । नमामि सूर्यं सप्ताश्वमनोपभुवनालयम् । त्वामहं सर्वकल्याणशरीरं सर्वसिद्धये । अथाहत्य तिलप्रस्थं ताम्रपात्रे कृतं नवम् । वाससं सुघटं तद्वत्सप्तमाल्यगुडान्वितम् । फलैर्नानाविधैर्मन्त्रैः सर्वोपस्करसंयुतैः । दद्याद्विकालवेलायामर्घमा प्रीयतामिति । पक्वान्नं तु संप्राप्य क्षपेद्भूमौ विचक्षणः । ततः प्रभाते स्नातो भक्त्या सन्तर्पयेद् द्विजान् । अनेन विधिना दद्यात् माघि माघि सदा नरः । वाससी सुघटं चैकं तद्वच्छन्दोऽनुपूजनम् । सक्षीरान्नं च श्रयनमिक्षुदण्डगुणान्वितम् । सोपधानकविश्रामभाजनासनसंयुतम् । ताम्रपात्रे तिलप्रस्थं सौवर्णहृषभैर्युतम् । दद्याद्देवदिदे वर्षं विधात्रा प्रीयतामिति" ।

शूलदानव्रतं शिवधर्मोत्तरे "श्रावण्यां निराहारः सदैकं नियन्त्रितम् । शूलं पिष्टमयं कृत्वा वर्षान्ते विनिवेदयेत् । शिवाय राजतं पद्मं सौवर्णकर्णिकम् । भक्त्या च विन्यसेत् मूर्ध्नि शेषं पूर्ववदाचरेत् । कामतोऽपि कृतं पापं भ्रूणहत्यादिकञ्च यत् । तत् सर्वं शूलदानेन नश्यत्येव न संशयः । महापद्मविमानेन नरो नारीसमन्वितः । युगकोटिशतं सार्धं शिवलोके महीयते" ।

शैवव्रतं विष्णुधर्मोत्तरे "अथातः संप्रवक्ष्यामि तव शैवव्रतं शुभम् । महेन्द्रो मनवः सप्ताः शुक्लिमान्हत्ववानपि । विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः । चैत्रशुक्लसमारभ्य प्रत्यहं दिनसप्तकम् । तेषां संपूजनं कृत्वा बहिःस्नानं समाचरेत् । मन्त्रमाल्यनमस्कारधूपदीपान्नसम्पदा । यथैवमं तथा कुर्याद् दद्याद्विप्रे यवानपि । नित्यं यवान्नमश्नीयात् कुर्यात् संवत्सरं व्रतम् । तस्यावसाने दद्यात्तु शयनञ्च विंशतिम् । सावत्सकाय द्विजेन्द्राय सुवर्णं काञ्चनस्य तं" ।

शैवनक्तचतुर्दशव्रतं विष्णुधर्मोत्तरे "उपवासेष्वशक्तानां नक्तं भोजनमिष्यते । यस्मिन् व्रते तदप्यत्र श्रूयतामय महत् । शिवनक्तचतुर्दश शिवभक्तिरतां नृणाम् । तस्मिन्नक्तचतुर्दशयोगे च पुराणज्ञाः प्रचक्षते । फाल्गुनस्यामले पक्षे यदा कृष्णः प्रजायते । तदा प्राह्यं व्रतं चैतन्नक्तैर्नाम्ना च शूलिनम् । शिवायेति च कृष्णेन यादौ संपूजयेद्विभोः" ।

शैवसप्तव्रतं विष्णुधर्मोत्तरे "प्रतिमासं प्रवक्ष्यामि शैवव्रतमनुत्तमम् । धर्मकामार्थमोक्षार्थं नरनार्यादिदेहिनाम् । पौषे मासे तु सम्प्राप्ते यः कुर्यान्नक्तभोजनम् । सत्यवादी जितक्रोधः शान्तिमोघुमगोरसैः । पक्षयोरष्टमीं सम्यगुपवासेन वर्त्तयेत् । त्रिसन्ध्यमर्चयेद्देवीशमग्निकार्यञ्च भक्तितः" । वर्षान्ते च "त्रिरात्रस्यास्मिन्हवनं भूयश्च नक्तभोजनम् । पक्षयोरुपवासेन चतुर्दश्यष्टमीं क्षिपेत् । इत्येवमादिनियमैराचरेत शिवव्रतम् । शिवभक्तो तु या नारी ध्रुवं सा पुरुषो भवेत् । स्त्रीत्वमत्युत्तमं सा चेत् काङ्क्षते मृणुयाद् व्रतम्" ।

शैवोपवासव्रतं भविष्यपु० "चतुर्दश्यां तथाष्टम्यां पक्षयोः शुक्लकृष्णयोः। योऽश्नन्नेकं न भुञ्जीत शिवार्चनरतो नरः। यत् पुण्यमश्वमेधस्य प्रोक्तं सततं सत्रयाजिनाम्। तत् पुण्यं सकलं तस्य शिवलोकञ्च गच्छति"।

शौर्य्यव्रतं वराहपु०"अतःपरं प्रवक्ष्यामि शौर्य्यव्रतमनुत्तमम्। येन वीरोऽपि महत् शौर्य्यं भवति तत्क्षणात्। मासि चाश्वयुजे शुद्धा नवमी सप्तपोषिता। सप्तम्यां कृतसङ्कल्पः स्नित्वाष्टम्यां निरोदनः। नवम्यां प्राशयेत् पिष्टं प्रथमं भक्तितो नृप!। ब्राह्मणान् भोजयेच्छक्त्या देवीञ्चैव तु पूजयेत्। दुर्गां देवीं महाभागां महाभावां महाप्रभाम्। एवं संवत्सरं यावदुपोष्य विधिवन्नृप!। व्रतान्ते भोजयेद्बालान् यथाशक्त्या कुमारकान्। क्षेमवस्त्रादिभिः स्नातान् पूजयित्वा तु भक्तितः। पश्चात् क्षमाप्येत्तान्तु देवी मे प्रीयतामिति। एवं कृत्वा नरराज्योरुभेदाढ्यं न संशयः। अविद्यो लभते विद्यां भीरुः शौर्य्यञ्च विन्दति"।

अद्भाव्रतं पद्मा० "कृत्वोपलेपनं शम्भोरयतः केशवस्य च। स सर्वापत्तिनिर्मुक्तः शिवलोके महीयते। राजा भवति सम्भूतः सार्वभौमो महेश्वरः। एतत् अद्भाव्रतं नाम सर्वकल्याणकारकम्"।

श्रवणद्वादशीव्रतं भविष्योत्तरे "एकादशी यदा शुक्ला श्रवणेन समन्विता। विजया सा तिथिः प्रोक्ता भक्तानां विजयप्रदा। एकादश्यां सोपवासो रात्रौ संपूजयेद्धरिम्। रौप्यसौवर्णपात्रे वा दारुपात्रमथेऽपि वा। आच्छाद्य पात्रं वासोभिरक्षतैः पत्रसंयुतैः। मार्गशीर्षे तथा चैत्रे भक्त्या वा शक्त्यपेक्षया। तिलाढ्येन वित्ताढ्यः प्रस्थेन कुडवेन वा। अलाभे यवगोधूमैः फलैः शुद्धतिलैर्भवेत्। पुष्पैर्गन्धैः फलैर्धूपैः कालोत्थैरर्चयेद्धरिम्। नानाविधैश्च नैवेद्यैर्भक्ष्यभोज्यैर्गुडोदनैः। खण्डसक्तुसहस्रेण घृतस्य च सहस्रकम्। मन्त्रेण तु शतगुणं भक्त्या कृष्णोत्तरम्। भक्तिमन्त्रगुणोपेतं कोटिकोटिगुणोत्तरम्। अभिमन्त्रपदैश्चात्र पूजयेद्गरुडध्वजम्। उपहारैर्नरश्रेष्ठ! शुचिर्भूत्वा समाहितः"। "एषा व्युष्टिः समाख्याता एकादश्यां मया तव। पूर्वमेव समाख्याता द्वादशी श्रवणान्विता। उपोष्यैकादशीं पश्चाद् द्वादशीमप्युपोषयेत्। नचात्र विधिलोपः स्याद्भवोर्देवता हरिः"। एकादश्यां द्वादश्यां चान्यतरस्यां वा श्रवणयुक्तायां श्रवणयुक्तोपवासेनैव व्रतदयसिद्धिः एकस्मिन् व्रते पूर्वमन्यां तिथिमुपोष्य पश्चादपरयित्वा नान्तरोपोष्या इति यो विधिलोपः स एकदेवताकत्वेन न भवतीत्यर्थः। "बुध श्रवणसंयुक्ता द्वादशी सङ्गमोदकम्। स्नानं दध्योदनं सम्यगुपवासः परो विधिः। सगरेण सकृत्कृत्वा धन्वन्तरेण धीमता। एतद्व्रतमथो राजेन्द्र! कामाञ्च द्वादशीव्रतम्। सा द्वादशी बुधयुता श्रवणेन सकं सखौ जयेति कथिता ऋषिभिर्नभस्ये। तस्मादनेन सप्तपोष्य नरोऽमरत्वमाप्नोति पार्थ! ऋषिभादिगुणोपपन्नम्"। विष्णुधर्मोत्तरे "उपवासक्षमर्थानां किं स्यादेकमुपोषितम्। महाफलं महादेव! तन्ममाचक्ष्व पृच्छतः"। ईश्वर उवाच "या राम! श्रवणोपेता द्वादशी सङ्गता तु सा। तस्यामुपोषितः स्नातः पूजयित्वा जनार्दनम्। प्राप्नोत्यतुलात् धर्मन्न! द्वादशद्वादशीफलम्। दध्योदनयुतं तस्यां जलपूर्णं घटं द्विजे। वस्त्रसंवेष्टितं दत्त्वा छत्रोपानहमेव च। न दुर्गतिमवाप्नोति जातिस्मरत्वमाप्नुयात्। अक्षयं स्थानमाप्नोति नात्र कार्या विचारणा। श्रवणद्वादशीयोगे बुधवारो भवेद् यदि। अत्यन्तं सङ्गता नाम द्वादशी सा प्रकीर्त्तिता। स्नानं जप्यं तथा दानं होमः श्राद्धं सुरार्चनम्। सर्वमक्षयमाप्नोति तस्यां भरतसत्तम!। तस्मिन् दिने तथा स्नातो यत्र कुत्र सङ्गमे। स्वर्गङ्गास्नानजं राम! फलं प्राप्नोत्यसंशयम्। श्रवणे सङ्गमाः सर्वे परपुष्टिप्रदाः सदा। विशेषात् द्वादशीयुक्ते बुधयुक्ते विशेषतः। तस्यैव द्वादशी प्रोक्ता बुधश्रवणसंयुता। तृतीया च तथा प्रोक्ता सर्वकामफलप्रदा। तथा तृतीया धर्मज्ञ! तथा पञ्चदशी शुभा"।

श्रीपञ्चमीव्रतं गरुड़पु०"यदिन्द्रेण पुरा चीर्णं श्रीविमुक्तेन पार्थिव!। श्रीसम्वर्द्धिकरं तद्धि शृणु श्रीपञ्चमीव्रतम्। मार्गशीर्षे सिते पक्षे पञ्चम्यां पञ्चगोत्तमे। उपवासस्तु नियमं कुर्यात् पञ्चम्यां खरेऽहनि। सर्वरोग्यं यथा शक्त्या ताम्रं कृत्वाऽञ्जलिमथ। चित्रपङ्कगतां देवीं लक्ष्मीं क्षीरोदजे! कारयेत्। पद्मासनां पद्महस्तां पद्मां पद्मदलेक्षणाम्। दिग्गजेन्द्रैः स्नाप्यमानां काञ्चनैः कलशैर्नृप!"। लक्ष्मीरुपनिमांश्चान्तु विष्णुधर्मोत्तरोक्तं वेदितव्यम्। तद्यथा "वसुस्थिता श्रीः कर्त्तव्या शङ्खाम्बुजकरा शुभा। सुखस्थिता महाभाग! पद्मे पद्मकरा शुभा। द्विभुजा चारुसर्वाङ्गी सर्वाभरणभूषणा। द्वौ च मूलकरौ मूर्ध्नि कार्यौ विद्याधरौ शुभाविति। ततो

यामलये याते निम्नगाया महाव वा। स्नानं कृत्वाद-संध्यान्तः शक्तिमदुपचारतः। देवान् पितॄंश्च सन्तर्प्य ततो देवालयं व्रजेत्। तस्यां पूजयेद्देवीं पुष्पैस्तत्काल-सम्भवैः। फलानि च यथालाभं विल्वं धान्यसप्तकम्। ततः सुवासिनी पूजां कुङ्कुमैः कुसुमेन च। भोजयेन्मधुराद्येन प्रणिपत्य विसर्जयेत्। ततस्तु तण्डुलप्रस्थं घृतपात्रेण संयुतम्। ब्राह्मणाय प्रदातव्यं वा श्रीर्मे प्रीयतामिति। निर्वर्त्यैतदशेषेण ततो भुञ्जीत वाग्यतः। मासानुमासं कर्त्तव्यं विधिनानेन भारत!। श्रीर्लक्ष्मीः कमला सम्पत् पद्मा नारायणी तथा। पद्मधृतिः स्थितिः पुष्टिस्तुष्टिः सिद्धिः क्षमा क्रमात्। मासानुमासं राजेन्द्र! प्रीयतामिति कीर्त्तयेत्। वस्त्रमण्डपिकां कृत्वा पुष्पगन्धादिवासिताम्। मध्यावां स्थापयेल्लक्ष्मीं सर्वोपस्करसंयुताम्। सौभाग्याष्टकसंयुक्तां नेत्रपट्टाद्यलङ्कृताम्। सप्रधान्यसमोपेतां रसधातुसमन्विताम्। पादुकोपानद्-युग्मभाजनासनसंस्कृताम्। देवीं संपूज्य विधिवद् ब्राह्मणाय कुटुम्बिने। व्याघाय देवविदुषे यज्ञे वा रोचते स्वयम्। सोपस्करां सवत्साञ्च धेनुं दत्त्वा क्षमापयेत्। यः पद्ममीव्रतमिदं दम्पती सुरारेर्भक्त्या समाचरति पूज्य सुगोसहजाम्। राज्यश्रियं स भुवि भव्यजनोपभोग्यं भुक्त्वा प्रयाति भवनं मधुसूदनस्य। माहात्म्यमपि वक्ष्यामि पद्मव्रतस्य भारत!। जयेति या च विख्याता व्रतिनां जयदायिनी। यस्माज्जया जयाशब्दं करोति व्रतिनो बुधाः!। परिपूर्णं व्रतं यस्यां सा त्रेधा जयपञ्चमी। जया च विजया चैव जयन्ती पापनाशिनी"। जया, कार्त्तिकशुक्लपञ्चमी "श्रवणेन यदा युक्ता शुक्लपक्षे तु पञ्चमी। उत्तराफाल्गुनी यस्यामिन्दुवारसमागमः। धारयेत नरस्तस्यां व्रतं पूर्वोपोषितः। चतुर्थ्यामेकभक्ताशी ब्रह्मचारी जितेन्द्रियः। धृतिमान् व्रतसंकल्पो भवेच्चियमवाप्नुयात्। ततःकल्यं समुत्थाय स्नात्वा नियतमानसः। धृतसङ्कल्पया पत्न्या कुर्याद् बिल्वस्य चार्चनम्। बिल्वमूले ततः कुर्याद् वेदिं पुण्याच्छतैर्युताम्। स्थापयेत् कलशानष्टौ तस्यामष्टसु दिक्षु वा। तन्मध्ये बिल्वमूले तु स्थापयेच्च मृदाघटम्। सौवर्णं राजतं ताम्रं मार्त्तिकं वा शुभान्वितम्" इत्यादि।

श्रीपञ्चमिव्रतं विष्णुधर्मोत्तरोक्तं "श्रीविहीनस्य लोकेऽस्मिन् जीवितस्यापि किं फलम्। तस्माद्व्रतं समाचक्ष्व येन स्याच्छ्रीयुतो नरः"। मार्कण्डेय उवाच "शृणुष्वावहितो राजन् व्रतं पञ्चम्यसंज्ञितम्। यत्कृत्वा मानवः सम्यक् सर्वान् कामानवाप्नुयात्। मार्गशीर्षसितायान्तु पञ्चम्यां नियतेन्द्रियः। उपोष्य पञ्चमीं तस्यां स्नात्वा पञ्चनदादिषु। पञ्चगव्यं पिबेत्तस्यां पञ्चपल्लवसंयुतम्। पञ्चरत्नसमायुक्तं पञ्चपद्मसमन्वितम्। पञ्चवर्णैः समालिख्य मण्डलं पञ्चकोणकम्। पञ्चधान्यैः समायुक्तं पञ्चगन्धसमन्वितम्। पञ्चामृतसमायुक्तं

मूर्त्तिव्रतं तव। संवत्सरः कृतो वह्नित्तथार्कः परिवत्सरः। इष्टापूर्वस्तथा सोमो ज्ञानपूर्वः प्रजापतिः। चतुर्पूर्वस्तथा प्रोक्तो देवदेवो महेश्वरः। तेषां मण्डलविन्यासः प्राग्वदेव विधीयते"। प्राग्वदिति नीलवेतरक्तपीत कृष्णैः मण्डलविन्यासाः कर्त्तव्याः "प्राग्वत् प्रपूजनं कार्य्यं होमः कार्य्यो यथाविधि। तिलैर्व्रीहियवैश्चैव घृतेन सितसर्षपैः। तद्विद्वद्भिश्च वा मन्त्रैर्होमभिः प्रत्यहं क्रमात्। नक्ताशनस्तथा तिष्ठेत् प्राग्वद्विधिसमन्वितः। चैत्रशुक्लं समारभ्य पञ्चमीप्रभृतिक्रमात्। संवत्सरान्ते वर्षेतु व्रतमेतत् समाचरेत्। पूजावसाने दातव्याः सुवर्णाः पञ्च यादव!। चतुर्वेदविदे देयं शाखामेदेन यादव!। एकैकं पञ्चकं देयं यथाकालमिदं भवेत्। वरेष्टं लोकमाप्नोति कामचारी विहङ्गमः"।

सङ्कटव्रतं वराहपु० "शृणुष्वैकमना भद्रे! सङ्कटव्रमिदं व्रतम्। कथयामि महापुण्यं ब्रह्मणा कथितं मम। माघस्य कार्त्तिकस्यापि शुक्लप्रतिपदि व्रतम्। सङ्कीर्याद्येकभक्तन्तु कृत्वा दन्तादिशोधनम्। सायं सङ्कल्पमाधाय द्वितीयायामुपावसेत्। तृतीयायामपि तथा चतुर्थ्यां पारणं भवेत्। शिवं संपूजयेद्भक्त्या उपवासदयेऽपि च। यत्र विघ्नोपचारेण रात्रौ दद्यात्ततो भुवि। स्वपेत् प्रातः समुत्थाय स्नात्वा देवं समर्चयेत्"।

सन्तानव्रतं भविष्योत्तरोक्तम् "कार्त्तिक्यामुपवासी यः कन्यां दद्यात् स्वशक्तितः। स्वकीयां परकीयां वा नष्टोसङ्कल्पके शुभे। एतत् सन्तानदं नाम व्रतं सुमतिदायकम्"।

सन्तानाष्टमीव्रतं विष्णुधर्मोत्तरे "कृष्णाष्टम्यां चैत्रमासे स्नातो नियतमानसः। कृष्णमभ्यर्च्य पूजाञ्च देवक्याः कुरुते च यः। निराहारो नरः पश्यात् कृष्णञ्च जगतः पतेः। उपोषितो जपन्मन्त्रं रात्रौ प्रयतमानसः। पूजायाञ्चापि कृष्णस्य सप्त वारान् प्रकीर्त्तयेत्। यानस्थिन्नोदिकर्मस्थान् वेदान्तान् वक्तृनास्तिकान्। प्रभाते च ततः स्नातो दत्त्वा विप्राय दक्षिणाम्। भुञ्जीत व्रत पूजस्तु कृष्णश्चैव जगत्पतेः। वैशाखञ्चैत्रयोश्चैव पारणं हि त्रिमासिकम्। उपोषितो देवदेवेशं हृतेन स्नापयेद्धरिम्। आषाढे श्रावणे चैव मासि भाद्रपदे तथा। उपोषितो द्वितीयं वै पारणं पूर्ववद्भवेत्। आश्विने कार्त्तिके सौम्ये हृतीयं पारणं तथा। पौषे माघे फाल्गुने च चतुर्थं द्विजसत्तम!। पारणे पारणे पूर्वं हृतेन स्नापयेद्धरिम्। ब्राह्मणेभ्यो हृतं दद्यात्तथैव प्रतिपारणम्। कृत्वा व्रतं नाकमनुप्रयाति मानुष्यमासाद्य च निष्कृतः स्यात्। सन्तानवृद्धिञ्च तथाप्नुतेऽसौ यावत्कल्पं सागरमेखलानाम्।

सप्तर्षिव्रतं विष्णुधर्मोत्तरे "चैत्रशुक्लादथारभ्य प्रत्यहं दिनसप्तकम्। मरीचिमत्रिकूरसं पुलस्त्यं पुलहं क्रतुम्। वशिष्ठञ्च महाभागं पूजयेत् दिवसक्रमात्। कालोद्भवैः फलैः पुष्पैः गोरसैश्च फलान्वितैः। आचरेत् प्रत्यहं स्नानं वह्निर्नक्षाशनो भवेत्। महाव्याहृतिभिर्होमं तिलैर्नित्यं समाचरेत्। तर्पयेद्ब्राह्मणांश्चाथ फलमूलैश्च गोरसैः। वारिधान्यञ्च दातव्याः क्षीरपूर्णा द्विजातिषु। एवं संवत्सरं कृत्वा व्रतान्ते चाऽऽहिताग्नये। दद्यात् कृष्णाजिनं राजन्! यथापूर्वं भवेदितम्। व्रतमेतत्तरः कृत्वा सोपोपायञ्च विन्दति"।

सप्तसारस्वतव्रतं विष्णुधर्मोत्तरोक्तम् "चैत्रशुक्लादथारभ्य प्रत्यहं दिनसप्तकम्। शुभ्रभां काञ्चनाक्षीञ्च विशालां भानवोद्भवाम्। भवनादां सुवेषाञ्च तथैव विमलोदकाम्। नित्यं संपूजयेद्भक्त्या वह्निःस्नानं समाचरेत्। नक्तञ्च प्रत्यहं कृत्वा दत्त्वा होमं समाचरेत्। ब्राह्मणान् भोजयेच्चान्न दत्त्वा युक्तं सुभोजनम्। हृतोदनं तथाश्नीयाद्भक्तदेव तथा निशि। एवं संवत्सरं कृत्वा व्रतं सारस्वतं नरः। तत्रोपोष्य सुचिरं कालं मानुष्ये जायते यदा" इत्यादि।

सप्तसुन्दरकव्रतं भविष्योत्तरोक्तम् "एकभक्ता च सप्ताहं पौरिणीरत्र भोजयेत्। संपूज्य पार्वतीं भक्त्या गन्धपुष्पविलेपनैः। ताम्बूलसिन्दूरवरैर्नीरिक्षेक्षुफलेन च। प्रीयतां कृष्णदा देवी प्रतिपत्स विसर्जयेत्। एकैकां पूजयेद्देवीं सप्ताहं यावदेव तु। पुनश्च सप्तमे प्राप्ते ताः सप्तैव निमन्त्रयेत्। भक्त्या सम्भोजयित्वाद्यं यथाभक्त्या विभूषयेत्। भूषयित्वा माल्यवस्त्रैः कर्णपेटाकुलीयकैः। कृष्णदा माधवी गौरी भवानी पार्वती उमा। अम्बिका चेति संपूज्या दर्पणं दापयेत् पृथक्। ब्राह्मणं पूजयेच्चैकं वाच्यं सम्पद्यतामु मे। सप्तसुन्दरकं नाम व्रतं पापहरं शुभम्। कृत्वा प्राप्नोति सौन्दर्य्यं सौभाग्यमतुलं तथा"।

सप्तव्रतं विष्णुधर्मोत्तरे "अथातः संप्रवक्ष्यामि सप्तव्रतमेव ते। चैत्रशुक्लादथारभ्य प्रत्यहं दिनसप्तकम्। लवणं क्षीरं घृतं दधिमद्यं सुरोदकम्। तत्रैवेक्षुरसोदञ्च

शादुदङ्मुख एव पूजयेत्। आचरेत् प्रयतः स्नानं शुचिर्भूत्वा तथा बहिः। घृतेन होमं कुर्वीत सप्तम्यान्तु प्रदापयेत् द्विजाग्र्यो भवेन्नरः कुर्यात् संवत्सरं व्रतम्। संवत्सरान्ते दद्याच्च तथा धेनुं पयस्विनीम्। व्रतेनानेन पौष्येण सप्तसागरमेखलाम्। भुनक्ति वसुधां राजा! सप्तजन्मान्तराणि तु"।

कर्मपूर्णव्रतं भविष्योत्तरे "संपूर्णं नाम तच्चापि व्रतं सम्यक् फलप्रदम्। यद्दीर्घं नरनारीभिर्व्याख्यातं संपूर्णकाङ्क्षिभिः। किञ्चिदूनं प्रमादेन यद्व्रतं व्रतिनां भवेत्। तत् संपूर्णं भवेत् सर्वं व्रतेनानेन पार्थिव!। उपद्रवैर्बहुविधैर्मोहाद्वा दोषतोऽपि वा। यद्व्रतं किञ्चिदेव स्यात् व्रतं विघ्नविनायकैः। तत् संपूर्णं भवेत् सर्वं सत्यं सत्यं न संशयः। काञ्चनं रौप्यकं रूपं त्रिलिखेन तु घटापयेत्। भग्नव्रतस्य योदेवस्तत् स्वरूपं सुनिर्मितम्। रूपं स्त्रीपुंसयोर्वापि प्रारब्धं तद्व्रतं किल। न च निष्पादितं किञ्चिद्दैवात् सर्वं तथा स्थितम्। द्विभुजं पङ्कजारूढं सौम्यं प्रहसिताननम्"। द्विभुजादीनि स्त्रीपुंसयोरुपलक्षणविशेषणम् तच्च रूपमन्यातेषु व्रतेषु, जन्मान्तरकृतानां विस्मृतानाञ्च स्मृतत्वे तेषामपीदं प्रायश्चित्तमिति। "निष्पादितं त्रिलिखेन च तस्मिन्नेव दिने पुनः। तस्मान्मासे पुनः प्राप्ते ब्राह्मणो विधिना सुधे। स्नापयेत् पयसा दध्ना घृतक्षीररसाम्बुभिः। गन्धचन्दनपुष्पैस्तु पूजयेत् कुसुमादिना। तोषपूर्णस्य कृष्णस्य सुखे विन्यस्य चन्दनैः। धूपदीपाक्षतैर्वस्त्रैर्नानाबल्युपहारकैः। अर्घ्यं दद्याच्च तस्मान्ते मन्त्रेणानेन पार्थिव!। उपवासेन हीनस्य प्रायश्चित्तं कृताञ्जलेः। शरण्यञ्च प्रपन्नस्य कुरुष्वाद्य दयां पुनः। परत्र भयभीतस्य भग्नवर्ज्यव्रतस्य च। कुरु प्रसादं संपूर्णमस्तु मे त्वत्प्रसादतः"।

कल्पोक्तव्रतं भविष्यपु० "हे पङ्कज्यौ हि मासस्य द्वे च प्रतिपदौ नरः। नोपवासः क्षमन्याद्यः प्रयोत प्रियया सह। खण्डनिशलाचित्तस्तु रतिप्रीतिविवर्जितः"। खण्डनिशलाचित्तः सूर्य्यध्यानपरः "अमव क्षुतिभीनच तस्य पुण्यं फलं शृणु। दिव्यं वर्षसहस्रं तु दिव्यं वर्षशतं तथा। ततस्तु भावयत्येनं महादेवं न संशयः"।

कर्मपञ्चमीव्रतं भविष्यपु० "पयोव्रतन्तु पङ्कज्यां दत्त्वा नागं द्विजातये। सौवर्णं सर्पजनितं भयं तस्य न जायते। एतत् सर्पव्रतं प्रोक्तं सर्पभैरवकं परम्"।

कर्मविशाखपञ्चमीव्रतं स्कन्द० प्रभासखं० "आश्वयुजे मासि पङ्कज्यां शुक्लपक्षे वरानने!। आरभ्योभयतो रेखाः गोमयेन विशोभनाः। कृत्वा च कौसुमाक्षागाद्विशाखौ च प्रपूजयेत्। इतोदकाभ्यां पयसा स्नापयित्वा वरानने!। गोधूमैः पयसा पूज्य लाजाद्यैर्विविधैस्तथा। पूजयेत् विधिवद्देवि! दधिदूर्वाङ्कुरैः क्रमात्। गन्धपुष्पोपहारैश्च ब्राह्मणान्तु तर्पयेत्। अथ वा आश्वयुजे मासि पङ्कज्यां श्रद्धयान्वितः। यथालेख्य नरो नागान् क्षणवर्णैर्विवर्णकैः। गुरूक्तान् तथा वीथ्यां स्वस्थचेतो विलिखेत् बुधः। पूजयेद्गन्धपुष्पैश्च पयसा पायसेन च। तस्य तुष्टिं समायान्ति पन्नगास्सह्यकादयः। नाशमायान्ति कुलं तस्य न भयं नागतो भवेत्। प्रजायते तस्य मन्त्रो विषस्य प्रतिषेधकः। तस्य प्रजपमात्रे तु न विषं क्रमते क्वचित्"।

सर्वकामव्रतं विष्णुधर्मोत्तरोक्तम् "अङ्गारकं तथा सूर्यं निर्ऋतिं वा खगेश्वरम्। श्रवणं वेश्वरं वापि कृत्वा कनककर्णिकाम्। तत्र वैकादशान् वस्तु देवान् त्रिभुवनेश्वरान्। एकादश्यां सोपवासः सोमं सम्पूजयेत्तथा। गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा। मार्गशीर्षादयारभ्य यावत् संवत्सरं भवेत्। संवत्सरान्ते दद्याच्च ब्राह्मणाय पयस्विनीम्। कृत्वा व्रतं वत्सरमेतदिष्टं रुद्रत्वमाप्नोति नरस्तु राजन्!। रुद्रेण सार्द्धं सुचिरं वसित्वा कामानवाप्नोति मनोऽभिरामान्। तथा सर्वगतान् रुद्रान् सदा सर्वत्र पूजयेत्। सर्वकामानवाप्नोति सर्वानपराजितान्"। विष्णुधर्मोत्तरे "माघमासे चतुर्दश्यां कृष्णपक्षे विशेषतः। तथा पितृगणान् राजन्! क्षीणचन्द्रे च पूजयेत्। सर्वकामसमृद्धस्य यज्ञस्य फलमश्नुते। श्राद्धं कृत्वा तथा राजन्! सर्वकामानवाप्नुयात्"।

सर्वकामाप्तिव्रतं विष्णुधर्मोत्तरे "ऋक्षिकाऋक्षदेवं वार्क्षिकीं प्रकृतिक्रमात्। यावत् स्यात् वार्क्षिकी भूयो नरसिंहसुपोषितः। यतुलेपनपुष्पाद्यैः सर्वरत्नैः सदैव तु। पूजयेत् विधिवद्देवं सर्वकामानवाप्नुयात्"।

सर्वव्रतं भोरुव० "मन्दवारयुता पञ्चमी शुक्लपक्षे त्रयोदशी। तस्यामुपोष्य विधिवत् सम्पूज्य गिरिजापतिम्। ब्रह्महत्यादिभिः पापैर्मुक्तो भवति मानवः"।

सर्वाग्निसप्तमीव्रतं भविष्यपु० "कृष्णपक्षे तु माघस्य सप्तम्यां

सप्तमीं शृणु। वासुदेवोऽत्र समाप्नोति सर्वान् कामान् वरावर!। पाद्यखादिभिराचार्यमर्चयेत् भक्तितत्परः। पूजयेत् प्रथतो देवमेकाग्रमतिरच्युतम्। माघादि पारणं कार्यं षड्भिः शुक्लैलकं कृतम्"। शुक्लैलकम् आषाढ़ान्तकम्। "मार्त्तण्डः प्रथमं नाम द्वितीयोऽर्कः प्रकीर्त्तितः। तृतीयं चित्रभानुस्तु विभावसुरतःपरम्। अनेति पञ्चमो ज्ञेयः षष्ठो हंसः प्रकीर्त्तितः। पूर्वेषु षट्सु मासेषु स्नानप्राशनयोरिह। श्रावणादिषु मासेषु पञ्चगव्यसदाहृतम्। स्नाने च प्राशने चैव प्रशस्तं पापनाशनम्। प्रतिमासन्तु देवस्य कृत्वा पूजां यथाविधि। विप्राय दक्षिणां दद्यात् श्रद्धानः स्वशक्तितः। पारणान्ते च देवस्य प्रीणनं भक्तिपूर्वकम्। कुर्वीत शक्त्या विधिवद्विधिं भक्त्या दिवस्पतिम्"।

सर्वावाप्तिव्रतं विष्णुधर्मोत्तरोक्तम् "इदमन्यत् प्रवक्ष्यामि चतुर्मूर्त्तिव्रतं तव। वर्षं स्नानं तथैश्वर्यं यस्मिन् यद्दुनन्दन!। विख्यातं देवदेवस्य तस्य मूर्त्तिचतुष्टयम्। यदेव रूपं कूर्मस्य वराहोक्तं तथैव तु। रूपं प्रावनस्य ते प्रोक्तं नारसिंहं तथा नृप!। रूपं तथैश्वर्यं कथितन्तु मया तव। पूर्वं बलसखं तस्य वासुदेवसखं भवेत्। दक्षिणं यदनं स्नानं देवं सङ्कर्षणं विदुः। ऐश्वर्यं पश्चिमं वक्त्रं रौद्रं पापहरं तथा। वाराहञ्च तथा वक्त्रमनिरुद्धं प्रकीर्त्तितम्। विरात्रोपोषितश्चैत्रे पूर्वं संपूजयेन्नरम् शुक्लपक्षप्रतिपदि वैशाखे मासि दक्षिणम्। ज्यैष्ठे च पश्चिमं वक्त्रमाषाढ़े च तथोत्तरम्। श्रद्धोपयोगि दातव्यं चैत्रे मासे द्विजातये। रक्षोपयोगि दातव्यं वैशाखे यादवोत्तम!। योगोपयोगि दातव्यं ज्यैष्ठे मासि द्विजातये। यज्ञोपयोगि दातव्यं माषाढ़े तथैव च। व्रतमेतच्चरः कृत्वा पूर्णमासचतुष्टयम्। पारणं प्रथमं कृत्वा स्वर्गलोके महीयते। श्रावणादिषु मासेषु द्वितीयं पारणं भवेत्। दशवर्षसहस्राणि स्वर्गं भुक्त्वा यथोदितम्। सौभाग्यादिषु भोगेषु तृतीयं पारणं भवेत्। तृतीयं पारणं कृत्वा भोजयेद्ब्राह्मणाञ्छुचिः। भोजनं गोरसप्रायं सहीकाशर्करायुतम्। प्राप्ते द्वितीये व्रतपारणे तु प्राप्नोति देवस्य सलोकतां सः। स्वर्गेन्द्रलोके च यथोक्तकालं भुक्त्वा सुखं सर्वसमृद्धिकामः"।

सर्वयज्ञफलव्रतं भविष्यपु० "संपूज्य विधिवद्देवं पुष्पधूपादिभिर्बुधः। यथाशक्ति ततः पश्चाद्वेदां भक्तितो न्यसेत्। ब्रह्माणां प्रवरा जातिर्यूपानां विल्वः परः। गन्धानां कुङ्कुमं श्रेष्ठं लेपानां रक्तचन्दनम्। दीपदाने घृतं श्रेष्ठं नैवेद्यं मोदकं परम्। एतैस्तुष्यति देवेशः सान्निध्यं चापि गच्छति। एवं संपूज्य विधिवत् कृत्वा चापि प्रदक्षिणम्। प्रणम्य शिरसा देव! देवदेवं दिवाकरम्। सुखासीनस्ततः पश्चाद्वेदैरभिसुखस्थितः। एवं विज्ञापयेत्कृत्वा हस्ते पानीयसंयुतः"। विज्ञापनं पश्चेदित्यनयः "कामं यद्येतं हृदये कृत्वा तं वाञ्छितं नरः। पिबेत् सन्तोषवान् विप्रमस्तृशन् दशनैः सकृत्"। राजाविति शेषः "द्वितीयायान्तु सप्तम्यां हौ स्पृशीत्वा तु सुव्रत!। तृतीयायां तु सप्तम्यां पातव्यास्तत्र एव हि। चतुर्थ्यां वापि चत्वारः पञ्चम्यां पञ्च एव च। षट् पिबेदापि षष्ठ्यां तु इतीयं वैदिकी श्रुतिः। सप्तम्यां वारिसंयुक्तां सप्त चैव पिबेन्नरः"। वारिशब्दः द्रव्यवाची पञ्चगव्यस्य वक्ष्यमाणत्वात् "षट्कप्रभृतिं यावत् पञ्चगव्येन सप्तमी। एवं तोयेन सहितं हौ वापि घृतसंयुतौ। तृतीयं मधुना सार्द्धं दध्नापि च चतुष्टयम्। शुक्लास्तु पयसा पञ्च षट् च गोमयसंयुताः। पञ्चगव्येन वै सप्त पिबेत् सिद्धार्थकान् द्विज!। अनेन विधिना यस्तु कुर्यात् सर्वयज्ञफलप्रभीम्। बहुपुत्रो बहुधनः सिद्धार्थकापि सर्वदा। इह लोके नरो भूत्वा प्रेत्य याति दिवालयम्"।

सागरव्रतं विष्णुधर्मोत्तरोक्तम् "इदमन्यत् प्रवक्ष्यामि चतुर्मूर्त्तिव्रतं तव। नित्यव्रतेषु मासेषु श्रावणादिषु यादव!। चतुःसागरचिह्नानि पूर्वकर्माणि पूजयेत्। चतुरात्मा हरिर्ज्ञेयः सागरात्मा विचक्षणैः। स्नानं समाचरेन्नित्यं नदीतोयेन यादव!। होमश्च प्रत्यहं कुर्यात् सततं तैलवर्जितम्। कार्त्तिकस्यावसानाच्च पूजयित्वा द्विजोत्तमान्। तैलं दत्त्वा तु विप्राय नाकपृष्ठे महीयते। सर्वकामसमृद्धस्य यत्तस्य लभते फलम्"।

साध्यव्रतं विष्णुधर्मोत्तरोक्तम् "मनोमनस्वा प्राणो नरो जातश्च वीर्यवान्। वीतिर्हयोऽनघश्चैव हंसो नारायणस्तथा। विभुश्चापि प्रभुश्चैव साध्या द्वादश कीर्त्तिताः। पूजयेच्छुक्लपक्षे तान् द्वादश्यां मार्गशीर्षतः। कृत्वा वर्षं व्रतमेतदिह प्राप्नोति तेषां तु स सलोकमेव। तत्रोग्र कालं सुचिरं मनुष्यो राजा भवेद द्विजपुङ्गवो वा"।

सामव्रतं पद्मपु० "घृतेन स्नापनं कृत्वा केशवस्य शिवस्य च। ब्रह्मणो भास्करस्यापि गौर्या लम्बोदरस्य च। कृत्वैव शुभं कुर्यात् पञ्चगोमयसङ्कुले। समाने क्षेमकमलं तिलधेनुसमन्वितम्"। सभा वर्षम्। "शुद्धमदा-

कुर्वं दद्याद्विप्रलोके महीयते। साम सामवतश्चैतत् सामव्रतमिहोच्यते"।

सारस्वतपञ्चमीव्रतं पद्मपु० "सम्यक् पृष्टं त्वया राजन्! शृणु सारस्वतं व्रतम्। यस्य सङ्कीर्त्तनादेव तुष्यतीह सरस्वती। यो यद्भक्तः पुमान् कुर्यादेतद्व्रतमनुत्तमम्। तडागरादौ संपूज्य विमानेतत् समारभेत्। अयवादित्यवारेण पञ्चतारावलेन च। पायसन्नीजयित्वा तु कुर्याद् ब्राह्मणवाचनम्। शुक्लवस्त्रादि दद्याच्च विरस्त्रादि शक्तितः। गायत्रीं पूजयेद्भक्त्या शुक्लमाल्यानुलेपनैः। एभिर्मन्त्रपदैः पश्चात् सर्वं कुर्यात् कृताञ्जलिः। एवं संपूज्य गायत्रीं वीणाक्षमधिधारिणीम्। शुक्लपक्षेऽथवैभक्त्या सकमण्डलुपुस्तकाम्। मौनव्रतेन भुञ्जीत सायं प्रातश्च धर्मवित्। पञ्चम्यां प्रतिपक्षे च पूजयित्वा सुवासिनीः। तस्यां तु तण्डुलप्रस्थं घृतपात्रेण संयुतम्। क्षीरं दद्यात् स्थिरत्वाय गायत्री प्रीयतामिति। सन्ध्यायोश्च तथा मौनमेतत् कुर्वन् समारभेत्। नान्यत्र भोजनं कुर्याद् यावन्नाक्षत्रोदयः। समाप्ते तु व्रते दद्यात् भाजनं शुभतण्डुलैः। पूर्णं सवत्सवृषभन्तु गां सवत्सां सुशोभनाम्। विप्राय वेदविदुषे। वाचकायाथ पार्थिव! अनेन विधिना यस्तु कुर्यात् सारस्वतं व्रतम्। विद्यावान् धनयुक्तश्च रूपवांश्च जायते। सरस्वत्याः प्रसादेन व्याप्नुयात् स कविर्भवेत्। नारी वा कुरुते या तु सापि तत्फलभागिनी"।

सारस्वतव्रतं पद्मपु० "सन्ध्ययोर्नरः कृत्वा स्नानं प्रतकुम्भकम्। वस्त्रयुग्मं तिलान् धेनुं ब्राह्मणाय निवेदयेत्। लोकं सारस्वतं याति पुनरत्रैव जायते। एतत् सारस्वतं नाम रूपविद्याप्रदायकम्"।

सार्वभौमव्रतं वराहपु० "सार्वभौमव्रतं चान्यत् कथयामि समासतः। येन सम्यक्कृतेनाशु सार्वभौमो भवेन्नरः। कार्त्तिकस्य तु मासस्य दशमी शुक्लपक्षगा। तस्यां नक्षत्रभोगार्क्षदिशु शुद्धवह्निं हरेत्"। शुद्धवह्निः पवित्रद्रव्यैः पूजोपहारः। "विचित्रैर्दुकूलैर्भक्ष्यैः पूजयेद्विधिवत्। सर्वो भवद्भिः सिध्यन्तु मम जन्मनि जन्मनि। एवमुक्त्वा बलिं तस्मै दत्त्वा शुद्धेन चेतसा। ततोऽहिपत्रे भुञ्जीत दध्यन्नञ्च सुसंस्कृतम्। सर्वं पराङ्मुखश्चैव एवं संवत्सरं नयः। यः करोति नरोनित्यं तस्य दिग्विजयो भवेत्"।

सितसप्तमीव्रतं विष्णुधर्मोत्तरे "मार्गशीर्षे च मासस्य शुक्लपक्षे नराधिप!। सोपवासस्तु सप्तम्यां कलशैः पूजयेद्विभुम्। अर्घायां वा स्थले वापि शुक्लैः पुष्पैर्यथाविधि। चन्दनेन तु शुक्लेन घटकैः पूरकेण च"।

सिद्धार्थकादिसप्तमीव्रतं भविष्यपु० "वैनतेय! शृणुष्व त्वं विधानं सप्तमीव्रतम्। एतद्धि परमं गुह्यं रवेराराधनं परम्। सिद्धार्थकैस्तु प्रथमा द्वितीया चाकसम्भवैः। तृतीया मरिचैः कार्या चतुर्थी तिलसप्तमी। षड्भुता पञ्चमी कार्या षष्ठी च फलसप्तमी। सप्तम्यामोदना वीर! सप्तमी परिकीर्त्तिता"। षड्भुता इति सिद्धार्थकादिभिः प्रकारैर्भुता"। एतेषां सप्तसप्तम्यः कर्त्तव्या भूतिमिच्छता। तथा चानुक्रमेणाशाङ्करं कथयाम्यहम्। माघे वा मार्गशीर्षे वा कार्या शुक्ला तु सप्तमी। न च स्नात्विसमर्थः पञ्चमासव्रतो भवेत्"। आर्त्तिवशादन्यस्मिन् मासे पक्षे च कार्यैवार्थः" इत्यादि।

सिद्धिविनायकचतुर्थीव्रतं स्कन्दपु० "गजवक्त्रान्तु शुक्लायां चतुर्थ्यां पूजयेन्नृप!। यदा वोत्पद्यते भक्तिर्मासे पुण्ये गणाधिपः। प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृप!। सयक्षं गणनाथञ्च स्वशक्त्यां तथाकृतिम्। कृत्वा पूजां प्रयत्नेन स्नाप्य पञ्चामृतैः पृथक्" इत्यादि।

सुखसप्तम्याद्यव्रतं विष्णुधर्मोत्तरे "यस्य परिमलाद्य नारीह सुखमेधते। दुःखोपेऽपि हि कामार्थी नारी प्राप्नोति भर्त्तरि। अनाहारा जगन्नाथं सर्वलोकेश्वरं हरिम्। कथमाप्नोति चेन्नारी सर्वलोकसुखान्वितम्। सुखसप्तयुतत्वाद्व्रतसप्तमुदाहृतम्। कर्त्तव्यं तत्तथा तस्य शृणुतां वरवर्णिनि!। यद्भोगां सर्वनारीणां श्रेयः प्राप्नोत्यसंशयम्। ऐहिकञ्च सुखं प्राप्य सुता स्वर्गसुखान्यपि। अनुप्राप्य च पितृतो मातृतश्च कुमारिका। पूजयेत्तु जगन्नाथं भक्त्या पापहरं हरिम्। विष्वक्सेनश्चचैव पतिकामा कुमारिका। माधवेति वै नाम जपेच्चित्तमतन्द्रिता। प्रियङ्गुपुष्पैर्मधुकैः कुङ्कुमैस्तथा। समभ्यर्च्याच्युतं दद्यात् कुङ्कुमेनानुलेपनम्। सर्वौषधिभिः सुस्नाता तमाराध्य जगत्पतिम्। नमोऽस्तु माधवेति होमयेन्मधुसर्पिषा। सदैवमुत्तरायोगे समभ्यर्च्य जनार्दनम्। भोजनं पतिमाप्नोति प्रेत्य स्वर्गञ्च गच्छति। पतिवाक्ये च यत्किञ्चित् तया प्राप्यमनुत्तमम्। तस्मादिच्छत्यते पात्रात् सुखिनी चैव जायते। अनेनैवेह तत्त्वज्ञ! व्रतं प्राप्य यदिच्छति। तदेव प्रा-

भुवाच्छे ! नारायणपरायणा। षण्मासमेकभक्तं कार्यं यथाशक्त्या च वै हरेः। पारणान्ते महाभागे ! भोजयेद् ब्रह्मणोत्तमान्"।

शुक्लत्रिरात्रव्रतं विष्णुधर्मोत्तरे "अग्रहस्यृक्षदिवसं प्राप्य त्रिरात्रोषितो नरः। मार्गशीर्षात्तथारभ्य पूजयेत् तु त्रिविक्रमम्। त्रिवर्षैः कुसुमैर्दैवं त्रिभिः प्रयतमानसः"। त्रिवर्षैः श्वेतपीतरक्तैः "त्रयोऽनुलेपना देयास्त्रिवारं धूपमेव च"। त्रिवारं गुग्गुलुकृष्णागुरोद्भवाः "बलिं त्रिमधुरं दद्यात् क्षीरं दीपान्नरोत्तम !। यवैस्तिलैस्तथा होमः कर्त्तव्यः सर्षपान्वितैः। दद्यात्त्रिलोहकं तथा द्विजेभ्यः ताम्रं सुवर्णं रजतं तथा राजन् !। न केवलं शुक्लदं व्रतन्तु सर्वेष्टकामाप्तिकरं प्रदिष्टम्"।

शुक्लद्वादशीव्रतं विष्णुधर्मोत्तरे "तथैव द्वादशी शस्ता ह्यत्र शुक्लकर्मणाम्। वासुदेवोऽभ्यधिकं द्विजश्रेष्ठ ! न याति नरकं नरः। फाल्गुनामलपक्षस्य एकादश्यामुपोषितः। द्वादश्यां च द्विजश्रेष्ठ ! पूजयेन्मधुसूदनम्। एकादश्यां प्रसक्तिप्तं विष्णोर्नामानुकीर्त्तनम्। पूजायां वासुदेवस्य कुर्वीत सुसमाहितः"।

शुक्लव्रतं भविष्यपु० "कृष्णाष्टमीं तु नक्तेन यस्तु कृष्णां च सप्तमीम्"। उपवसेदिति शेषः "दृष्ट्वैव सुखमाप्नोति परत्र च शुभां गतिम्"। विष्णुधर्मोत्तरे "देवानां मानवानां वा तत्पराये तथा परे। तेषां संपूजनं कृत्वा चतुर्दश्यां सुखी भवेत्"। भविष्यपु० चतुर्थीं तु चतुर्थीं तु वदाङ्गारकसंयुता। उपोष्य तत्र तत्रैव प्रदेयो विधिवत् कुजः। उपोष्य नक्तेन विभो ! चतस्रः कुजसंयुताः। चतुर्थ्यान्तु चतुर्थ्यान्तु विधानं शृणु यादवम्"। एकचतुर्थीशब्दः तिथिविशेषवचनः, अपरस्तु संख्यापरः इति "दशवर्षान्ते सुखं दशार्द्धं भवापि वा। वीवर्षपात्रे रौप्ये वा भक्त्या ताम्रमयेऽपि वा। विंशत्पलानि पात्राणि विंशत्यर्द्धपलानि च। विंशत्कर्षाणि वा वीर ! ततोऽर्द्धेन न कारयेत्। भक्त्या वित्तस्य भक्त्या च पात्रे ताम्रमयेऽपि वा। प्रतिष्ठाप्य कुजपात्रे रक्तवस्त्रेण वेष्टयेत्। पुष्पमण्डपिकां कृत्वा दिव्यैर्धूपैस्तु धूपिताम्। तत्तत्स्थमर्चयेद्देवं पूर्वमन्त्रैः क्रमेण तु"।

शुक्लाष्टमीव्रतं विष्णुधर्मोत्तरे "अष्टमीं पूजनं कृत्वा भक्त्या सुखमवाप्नुयात्"।

शुक्लसप्तमीव्रतं आदित्यपु० "अमावास्यान्तु देवाय कार्त्तिके मासि वैष्णवम्। अभयं प्राप्य तत्रास्तु सर्वातङ्कोपशान्तये। लक्ष्मीर्दैत्यभयान्मुक्ता सुखं सुप्ता भुजोदरे। चतुर्भुजस्य कृष्णस्य ब्रह्मा तत्रस्थ बोधके। अतोऽर्घं विधिवत् कार्या मनुष्यैः सुखमिच्छता। दिवा तत्र न भोक्तव्यमृते बालातुरान् जनान्। प्रदोषसमये लक्ष्मीं पूजयित्वा ततः क्रमात्। दीपवृक्षाश्च दातव्याः शक्त्या देवगृहेषु च। चतुष्पथे श्मशानेषु नदीपर्वतवेश्मसु। उत्तमश्लोकगोष्ठेषु चत्वरेषु गृहासु च। वस्त्रैः पुष्पैः शोभितव्याः क्रयविक्रयभूमयः। दीपमालापरिक्षिप्ते प्रदेशे तदनन्तरम्। ब्राह्मणान् भोजयित्वादौ विभवस्य च भुञ्जीत। खलङ्कृतेन भोक्तव्यं सर्वस्नेहोपशोभिना। स्निग्धैर्मुग्धैर्विदग्धैश्च बान्धवैर्मित्रतैः सह। अहरस्तु पुरा दूतं सकलं सुमनोहरम्। कार्त्तिके शुक्लपक्षे तु प्रथमेऽह्नि व्रतं ! जितश्च अहरस्तत्र जयं लेभे च पार्वती। अतोऽर्घं अहरो दुःखी उमा नित्यं सुखोचिता। तस्माद् दूतं प्रकर्त्तव्यं प्राभाते तत्र मानवैः। तस्मिन् भवेज्जयोयस्य तस्य संवत्सरं शुभम्। पराजये विपद्भन्तु जयमायस्ततो भवेत्। आतव्यं गीतवाद्यादि स्वलङ्कृतैः। विशेषश्च भोक्तव्यं प्रथमेऽह्नि सुखं सह। तस्यां निशायां कर्त्तव्यं यथास्थानं सुशोभनम्। गन्धपुष्पैस्तथा वस्त्रैरलंकारैरलङ्कृतम्। दीपमालापरिक्षिप्तं तथा धूपेन धूपितम्। दयिताभिश्च सहितेनैवा सा च भवेत्रिशा। सर्वैस्तैश्च संपूज्य द्विजसम्बन्धिबान्धवान्" इत्यादि।

सुगतिव्रतं पद्मपु० "भक्त्या यो त्वष्टमीषु स्याद् वत्सरान्ते तु गोव्रतः। पौरन्दरपदं याति सुगतिव्रतमुच्यते"।

सुगतिद्वादशीव्रतं विष्णुधर्मोत्तरे "एकादश्यां शुक्लपक्षे फाल्गुने मासि यो नरः। जपन् कृष्णेति देवस्य नाम भक्त्या पुनः पुनः। देवार्चनं वाद्यगीतं कृत्वैतत्तु जपेच्छुचिः। स्नाने प्रस्थानकाले च भक्षणे स्वपिते क्षये। यामघ्नान् ! पतितांश्चैव तथैवान्त्यावसायिनः। नालपेत्तु तथा देवमर्चयेच्छ्रद्धयान्वितः। ददद्योदाहरेत् मन्त्रं मनसाधाय तत्परः। चैत्रवैशाखयोश्चैवं तद्वदर्चयेत्तु च पूजयेत्। सर्वलोके गतिं चेशं दाक्ष्य ! प्राप्नोति वै नरः। उत्क्रान्तिकाले कृष्णस्य स्मरणञ्च तथाप्नुयात्। आषाढे श्रावणे चैव मासि भाद्रपदे तथा। तथैवाश्वयुजे देवमनेन विधिना नरः। उपोष्य संपूज्य तथा

केशवेति च कीर्त्तयेत्। गोमूत्रप्राशनात् पूतः स्वर्गलोके महीयते। आराधितश्च जगतामीश्वरश्च महात्मनः। तत्कालिकाले स्मरणं केशवस्य तथाप्नुयात्। घोरस्य प्राशनं श्रेष्ठं विधिनेदं यथोदितम्। कार्त्तिकादि यथान्यायं कुर्य्यान्नासचतुष्टयम्। तेनैव विधिना ब्रह्मन्! तत्र विष्णुं प्रकीर्त्तयेत्। स याति विष्णुसालोक्यं विष्णुं स्मरति तत्त्वतः। प्रतिमासं द्विजातिभ्यो दद्याद्दानं यथेच्छया। सुगतिर्दादशीमेतां श्रद्धानश्च यो नरः। उपोष्येति तथा नारी प्राप्नोति त्रिविधां गतिम्"।

शुक्लद्वादशीव्रतं विष्णुधर्मोत्तरे "पौषे मासि सिते पक्षे द्वादश्यां शक्रदैवते। नक्षत्रयोगगे विष्णुं प्रथमं तु समर्चयेत्। ततः प्रभृति विप्रेन्द्र! मासि मासि जनार्दनम्। उपोषितः पूजयेत यावत् संवत्सरं गतम्। मासे च मासे विधिनोदितेन तस्यां तिथौ दानमिति ब्रवीमि। प्राग्वं यथावद्विधिवत् क्रमेण तदुच्यमानं निखिलं निबोध। घृतं तथा त्रीव्रियवं स्थिरस्थं यवान्नमम्लवणकारपानम्। क्षीरं पयोऽन्नं गुडफाणिताढ्यं सुचन्दनं वस्त्र मतक्रमेण। एकैकमासोक्तमथैकदानं गोमूत्रमश्नो व्रतमाप्नुयाच्च। दूर्वादधिव्रीव्रियवं तिलांश्च सूर्य्यांशुतप्तं जलमम्बु दार्भम्"।

शुक्लद्वादशीव्रतं विष्णुधर्मोत्तरे "मेषसंक्रमणे भानोः सोपवासो नरोत्तम!। पूजयेद्वामनं देवं रामं शक्रा यथाविधि। वृषसंक्रमणे प्राप्ते तथा कृष्णञ्च पूजयेत्। तथा मिथुनसंक्रान्तौ पूजयेद्योगशायिनम्। तथा कुलीरसंक्रान्तौ वराहमपराजितम्। नरसिंहं तथा देवं सिंहसंक्रमणे विभुम्। कन्यासंक्रमणे देवं तथाश्वशिरसं यजेत्। तुलासंक्रमणे कूर्मं पूजयेत् भक्तिभावतः। वृश्चिकसंक्रमणे कल्किं देवं संपूजयेत् नरः। धनुःसंक्रमणे बुद्धं देवमभ्यर्चयेत् बुधः। तथा मकरसंक्रान्तौ रामं दशरथात्मजम्। कुम्भसंक्रमणे राजन्! रामं यादवनन्दनम्। मीनसंक्रमणे मत्स्यं वासुदेवन्तु पूजयेत्। घटे वा यदि वा स्थण्डिलायां गन्धमाल्याक्षतैर्मुदा। प्रादुर्भावेण नाम्ना च च होमं कुर्वीत पार्थिव!। व्रतान्ते जलधेनुन्तु क्षीरोपानत्समन्विताम्। वस्त्रयुग्मयुतां दद्यात् प्रतिमासं सकाञ्चनाम्। रात्रौ तु दीपमालाभिर्देवदेवं प्रपूजयेत्। कृत्वा व्रतं वत्सरमेतदिष्टं स्वर्गेषु तिर्य्यक्षु न चापि जन्म। प्राप्नोत्यवाप्नोति चिरञ्च नाकं कामानवाप्नोति मनोऽभिरामम्"।

सुदर्शनमष्टमीव्रतं गरुडपु० "अथ षष्ठ्यान्तु राजन्य उपोष्य यथाविधि। पक्षाद्यमष्टकं कृत्वा कर्णिकायां सुदर्शनम्। दलेषु लोकपालानामायुधानि समर्चयेत्। चक्राब्जं चक्रनाभिघटितावलम्। "खान्यायुधानि पुरतः प्रतिष्ठाप्य प्रपूजकः। रक्तचन्दनसिद्धार्थरक्तपद्माङ्कुरैरपि। रक्तवस्त्रैः सुगन्धाद्यैर्धूपाद्यभिरर्चयेत्" इत्यादि।

सुनामद्वादशीव्रतं वह्निपु० "शृणुष्वैकमना भूप! सुनामद्वादशी शुभा। सर्वपापहरा स्वर्ग्या मुक्तिसिद्धिप्रदायिका। मनसा च विकीर्षन्ति द्वादशीं ये नरोत्तमाः। तेऽपि घोरं न पश्यन्ति पुनः संसारसागरम्। आद्यं सर्वव्रतानां तु वैष्णवानां त्वयोत्तम!। नरैर्विशिष्य कर्त्तव्यं विष्णोस्तुष्टिकरं परम्। मार्गशीर्षे शुभे मासि शुक्लपक्षे यतव्रतः। प्रथमञ्चैव षष्ठीयाद्द द्वादशीं विधिवन्नरः। मनोवाक्कायचेष्टाभिः सुविशुद्धो जितेन्द्रियः। दशम्यां नियतः स्नात्वा प्रविशेत्त जनार्दनम्। कृतप्राङ्मुखाहारः शुचिर्भूत्वा भवेद्व्रती। उपलिप्ते शुचौ देशे भद्रपीठेऽम्बुधावनम्। उपोष्यैकादशीं सम्यक् पूजयित्वा जनार्दनम्। सुनामद्वादशीं देव! अहं भोक्ष्ये परेऽहनि। एवं सङ्कल्प्य नियमं प्रणम्य गरुडध्वजम्। दशम्यामेकभक्ताशी संयतः संयतेन्द्रियाम्। एकादश्यां ततः प्रातरेकचित्तः समाहितः। पूर्वं संपूजयेत् सूर्य्यं ततो देवं प्रपूजयेत्" वर्षसाध्यमिदम्।

शुक्लद्वादशीव्रतम् उमामहेश्वरसंवादे "पौषमासं तु संप्राप्य पुष्यर्क्षं तु सुबोधयेत्। तस्यां रात्रौ संयतात्मा ध्यात्वा विष्णुं सनातनम्। श्वेता गौरेकवर्णा च तस्या याह्यश्च गोमयम्। पञ्चरित्रात् प्रपतितं शुचिर्गौरवाप्स्यतः। तस्याः कृत्वाऽऽढकीनाञ्च शतमष्टोत्तरं तिलैः। प्रतीच्यैकादश्यां कृताशुपवासपरायणैः। भाव्यं नियमसंयुक्तैर्विशेषात् संयतात्मभिः। स्नात्वा नद्यां तडागे वा विष्णुमेवाथ चिन्तयेत्। गोवर्षकं हरिं कृत्वा रौप्यं वाक्षः सुशक्तितः। तिलपात्रोपरिस्थे च न्यसेत् कृष्णे सुवर्णके" इत्यादि। "एवं यः कुरुते देवि! शुक्लद्वादशीव्रतम्। नरो वा यदि वा नारी तस्य पुण्यं शृणुष्व मे। दौर्भाग्यं नश्यते तस्य यावि जन्मान्तरार्जितम्। यावि भुज्यस्य सम्बन्धो जायते कारणान्तरात्। तस्यापि न भवेद् दुःखं वैरूप्यं तस्य जन्मनि"।

सूर्य्यव्रतं विष्णुधर्मोत्तरे "शिरसोपनं कृत्वा योऽर्चयेत

दिवाकरम् । तपनस्तोषमायाति वह्निहोमञ्च विन्दति । ऋषैः सप्तदशैर्भक्त्या तथा सवणपाचितैः । बह्निरण्यैः समभ्यर्च्च बह्निहोमफलं लभेत् । सूर्य्याङ्गि यस्तु नक्तार्थी संपूजयति भास्करम् । दृष्टान् कामानवाप्नोति सूर्य्यलोकञ्च गच्छति" । कालान्तरे "आश्विन्यादित्यवारे तु यदि शुक्ला चतुर्दशी । स्नानं विशेषतः कार्य्यं शिवस्य परमात्मनः । अक्षतरागं रोचनया रक्तपुष्पैः प्रपूजयेत् । कपिलाघृतं तथा क्षीरं नैवेद्यं परिकल्पयेत्" । पद्मपु० "माघमासे रवौ स्नानं कृत्वा दम्पत्यमर्चयेत् । भोजयित्वा यथाशक्त्या बान्धवस्त्रिविभूषणैः । सौभाग्यमतुलं प्राप्तो शरीरारोग्यमुत्तमम् । सूर्य्यलोकमवं नूनं सूर्य्यव्रतमिदं कृतम्" । भविष्यपु० "कृष्णैकभक्तं हेमन्ते माघमासमतन्द्रितः । मासान्ते च रथं कृत्वा त्रिवस्त्रोपशोभितम् । श्वेतैर्वृषभिर्युक्तं तुरगैः समलङ्कृतम् । श्वेत ध्वजपताकाभिः कृत्वा मरदर्पणम् । तण्डुलाढकपिष्टेन कृत्वा भानुं नराधिप ! । विन्यस्य तं रथस्थे संस्थाप्य सह भूपते ! तं रात्रौ राजमार्गेण शङ्खभेर्यादिभिः स्वनैः । भ्रामयित्वा शनैः पश्चात् सूर्य्यायतनमानयेत् । तत्र चागुरुपिष्टेन प्रदीपाद्युपशोभितम् । प्रेक्षणीयप्रदानैश्च स्थापयित्वा शनैः शनैः । प्रभाते स्नपनङ्कृत्वा पयसा वा घृतेन वा । दीनान्धकृपणानाञ्च यथाशक्त्या च दक्षिणाम् । रथं संवाहनोपेतं भास्कराय निवेदयेत् । भुक्त्वा च ब्राह्मणैः सार्द्धं प्रणम्यार्कं स्वकं व्रजेत्" । कौरवर्मोत्तरे "शृणु राजन् ! प्रवक्ष्यामि यद्व्रतं व्रतमुत्तमम् । सर्वकामप्रदं पुंसां कुष्ठादिव्याधिनाशनम् । भानोरुत्पत्तिकरं राजन् ! मुक्तिसिद्धिप्रदायकम् । तस्य देवस्य वक्ष्यामि व्रतं राजन् ! सविस्तरम् । पूजार्घ्यं प्राशनं दानं नैवेद्यं शृणु तत्त्वतः । सर्वतीर्थेषु यत् पुण्यं सर्वयज्ञेषु यत्फलम् । सर्व्वदानेन तपसा यत् पुण्यं समवाप्यते । प्रातःस्नानेन यत् पुण्यं यत् पुण्यं रविवासरे । मार्गशीर्षादिमासेषु द्वादशस्वपि भूपते ! । सूर्य्यव्रतं करिष्यामि यावदर्कं दिवाकर ! । व्रतं संपूर्णतां यातु त्वत्प्रसादात् प्रभाकर !" इत्यादि ।

सूर्य्यनक्तव्रतं मत्स्यपु० "तस्मादादित्यवारेण सदा नक्ताशनो भवेत् । यदा हस्तेन संयुक्तमादित्यस्य च वासरम् । सप्तम्यते यदा भक्तिर्भानोरुपरि शाश्वती । तदादित्यदिने कुर्य्यादेकभक्तं विमत्सरः । तदारभ्य सदा कार्य्यं [illegible]दिवासरे । नक्तमादित्यवारेण भोजयित्वा द्विजोत्तमान् । ततोऽस्तसमये भानो रक्तचन्दनपङ्कजम् । विलिख्य द्वादशदलं पूज्य सूर्य्येति पूर्वतः" । "इत्यनेन विधानेन वर्षमेकन्तु यो नरः । नक्तमादित्यवारेण कुर्य्यात् स नीरुजो भवेत् । धनधान्यसमायुक्तः पुत्रपौत्रसमन्वितः । भुक्त्वा स्थित्वा चिरं कालं सूर्य्यलोकमवाप्नुयात्" ।

सूर्य्यषष्ठीव्रतं भविष्योत्तरे "भाद्रे भाद्रपदे शुक्ले एकभक्ताशनो भवेत् । दन्तधावनपूर्वन्तु षष्ठ्यां सोपवसेन्नरः । गोरसप्रकल्पेन स्नायात् कायविशुद्धये । रोचनाकुष्ठगोमूत्रसप्तधाचन्दनोसकृत् । दधिकाक्षतकैश्चैव ललाटे तिलकं न्यसेत् । शिखारूपदलैश्चैव सौभाग्यारोग्यकृद्व्रतः । कुलं कुङ्कुमताम्बूलं सिन्दूरं रक्तवाससी । वितरेत् सोपवासा हि नारी सङ्कल्पवर्द्धनम् । विधवा तु विरक्तानि कुमारी शुक्लवाससी । ततः स्नपने भानुं पूजयेत् शीतलोदकैः । अपराह्णे ततः स्नात्वा शुभैनौ नियतव्रतः । प्रतिमां स्नपयेद्भानोः पञ्चगव्येन वारिणा । रक्तचन्दनपङ्केन कुङ्कुमेन समालभेत् । जयन्त्यकुलमैरण्डैः करवीरैः प्रपूजयेत्" ।

सूर्य्यसप्तमीव्रतं विष्णुधर्मोत्तरे "चैत्रे शुक्लस्य पक्षे तु सम्यक् षष्ठ्यामुपोषितः । सप्तम्यामर्चनं कुर्य्याद्देवदेवस्य भूपते ! । बहिःस्नानं नरः कृत्वा गोमयेनोपलेपितः । लेपयेत्स्थण्डिलं सम्यक् ततो गोरक्तदा नृप !। तत्राष्टदलकमलं वर्णकैस्तु समं लिखेत्" इत्यादि ।

सोमद्वितीयाव्रतं पद्मपु० "दद्यात्सितद्वितीयायां सिन्धोर्लवणभोजनम् । समाप्ते गोप्रदो याति विप्राय शिवमन्दिरम्" विप्राय सिन्धोर्लवणभोजनं दद्यादित्यन्वयः । सोमस्तत्र देवता सोमव्रतमिदं व्रतमिति सोमस्य देवतात्वं गम्यते । "कल्पान्ते राजराजस्य सोमव्रतमिदं व्रतम्" ।

सोमव्रतं कालोत्तरे "चन्द्रार्क्षयां रोहिण्यां स्नातदा चन्द्रव्रतञ्चरेत् । शिवं सम्पूज्य विधिवत् स्नानैः पञ्चामृतादिभिः । विलेपनन्तु चन्द्रेण चन्द्रेण तु वा क्षितम् । शुक्लपुष्पैस्तथा पुष्पैः पूजयेत् परमेश्वरम् । नैवेद्यं क्षीरकुष्माण्डं सितशर्करया युतम् । प्राशनं चन्द्रनेनैव रात्रौ जागरणं क्षितम् । आयुःकामैः सदा कार्य्यं कीर्त्तिश्रीसाधनं क्षितम् । इति चन्द्रव्रतं नामोदारदानेन जायते" । कालिकापु० "वारे सोमस्य वारुण्यां पक्षोभौ सोमसंयुतौ । विधिना चन्द्रचूडाढ्यं प्राच्यास्नानेन सज्जलम्" । पक्षोभौ शुक्लोभयत्र पक्षे नियमोऽमीषोमवारयोः संयो-

गमात्रं विवक्षितं, प्राच्यां चाव्यवच्छेदमन्त्रम् । "दक्षिणार्द्धं हरन्त्यावेदामोर्द्धन्तु हरिं विभुम्" । इत्यादि "अत्रस्थां पितरावर्च्च विधिनानेन सुव्रत !" । पितरौ तावेव देवीदेवौ "वक्ष्यन्ते तदनं तु कर्त्तव्यं यच्चिरोधत । प्रागुक्तविधिना पूज्य सितं पीतं युगद्वयम् । दद्यादितानके चैव पताकाचष्टिके तथा । भूपसङ्गारथे चापि दोष्टचौ सुशोभिनौ" । भविष्यपु० "ताम्रपात्रं पयःपूर्णं कृत्वा तत्स्थञ्च शङ्करम् । प्रच्छादोपरिवस्त्रेण गन्धपुष्पार्चितं महत् । शिवभक्ते द्विजे दद्याद्भोजयित्वा विधानतः । प्राच्यां मघट्टिते सोमे प्रतीच्याञ्च रवौ गते । पौर्णमास्यां तु वैशाख्यां स्टङ्पात्रं शिवाय तु । प्रीयतां मे महादेवः सोममूर्त्तिर्जगत्पतिः । तस्मै विप्राय तत्पात्रमर्चयेद्भक्तितः शनैः । एवं सोमव्रतं नाम कृत्वा सोमालिकं व्रजेत्" ।

सोमवारव्रतं भविष्योत्तरे "तद्दिनात्तु संप्राप्य सोमवारं विचक्षणः । नक्तोक्तविधिना सर्वं कुर्य्यात् पूजादिकं विधोः । सप्तमे तु ततः प्राप्ते दत्त्वा ब्राह्मणभोजनम् । ताम्रपात्रे तु संस्थाप्य सोमं रजतसम्भवम् । सोमरूपन्तु चतुर्दशीस्थमहाराजव्रतोक्तं वेदितव्यम् "पात्रे कृत्वा सोमराजं श्वेतपद्मैः प्रपूजितम् । पादुकोपानहच्छत्रभाजनासनसंयुतम् । होमं हुतनिधैः कुर्य्यात् सोमनाम्ना तु मन्त्रवित् । समिधोऽष्टोत्तरशतमष्टाविंशतिरेव वा । होतव्या मधुसर्पिर्भ्यां दत्त्वा चैव हुतेन तु" इत्यादि ।

सोमाष्टमीव्रतं स्कन्दपु० "वारे सोमस्य चाष्टम्यां पञ्चदोऽमयोरपि । विधिवच्छङ्करं सोमं सम्पूजयेच्छिवे" । सोमं उमासहितम् रूपन्तु तथाष्टम्यामेव व्याख्यातम् । "तिलसर्षपकल्केन स्नातोऽमलजलाप्लवे । स्टङ्वायतने वापि शिवैकाङ्क्षितमानसः । ब्रह्मकूर्चेन देवेशं प्राशयित्वा ततो व्रती" । ब्रह्मकूर्चं पञ्चगव्यम् "वामादिवामन्त्रैश्च देवं देवीं तथार्चयेत् । चन्दनेनेन्दुयुक्तेन दक्षिणार्द्धं विलेपयेत्" इत्यादि ।

सौख्यव्रतं भविष्यपु० "एकादश्यां माघमासे चतुर्दश्यष्टमीषु च । एकभक्तेन यो दद्यात् घेनुकान्यर्जुनानि च । उपानहौ कम्बलञ्च पात्रं चित्रं तथोदकम् । करपात्रादिकं वत्स ! यथाशक्त्यार्चिने नृप ! । आर्त्तत्राणपरो नित्यमश्वमेधफलं लभेत् । एतत्सौख्यव्रतं नाम आर्त्तत्राणकरं परम्" ।

सौभाग्यव्रतं पद्मपु० "वर्जयेद् यस्तु पुष्पाणि क्षेमलज्जिभिरे व्रती । पक्षत्रयञ्च फाल्गुन्यां कृत्वा शक्त्या च काञ्चनम् । दद्याद्वै माघवेलायां प्रीयेतां शिवकेशवौ । शिरःसौमन्त्यजननं सदानन्दप्रदं नृणाम् । कृत्वा परं पदं याति सौभाग्यव्रतमुत्तमम्" ।

सौभाग्यतृतीयाव्रतं वराहपु० "अतःपरं महाराज ! सौभाग्यकरणं व्रतम् । श्रृणु येनानु सौभाग्यं स्त्रीषु सम्यगभिजायते । फाल्गुनस्य तु मासस्य तृतीया शुक्लपक्षतः । उपोषितेन नक्तेन शुचिना सत्यभाषिणा । सम्पूजयेच्च हरिं पूज्य रुद्रं वा उमया सह" इत्यादि । गरुडपु० "फाल्गुनादितृतीयायां व्रतं यस्तु वर्जयेत् । सप्तजन्मशतं दद्यात् स्टङ् सोपस्करान्वितम्" । समान्ने वत्सरान्ते "संपूज्य विप्रमिथुनं भवानी प्रीयतामिति । गौरीलोकप्रदं नित्यं सौभाग्यव्रतमुच्यते" ।

सौभाग्यव्रतं भविष्यपु० "पौर्णमास्यां तु यः सोमं पूजयेद् भक्तिमान्नरः । सौभाग्यञ्च भवेत्तस्य रतिं मे निश्चितां मतिः । मूलमन्त्राः ऋषयोऽग्निरङ्गमन्त्राश्च कीर्त्तिताः" इत्यादि ।

सौभाग्यशयनव्रतं मत्स्यपु० "तथैवान्यत् प्रवक्ष्यामि सर्वकामफलप्रदम् । सौभाग्यशयनं नाम यत् पुराविष्णोर्विदुः" । इत्युपक्रमे "वस्त्रमाल्यसमायुक्तां तृतीयायां जनप्रियाम् । शुक्लपक्षस्य पूर्वाह्णे तिलैःस्नानं समाचरेत् । तस्मिन्नहनि सा देवी किल विश्वात्मना सती । पार्थिवैश्चन्द्रकैः मन्त्रैरूढा वरवर्णिनी । तया सह देवेशं तृतीयायां समर्चयेत्" इत्यादि । "एवं संवत्सरं यावत् तृतीयायां सदा मनो ! । प्राशने दानमन्त्रे च विशेषोऽयं निबोध मे । गोमूत्रोदकमाद्यं स्याद् वैशाखे गोमयं पुनः । ज्यैष्ठे मन्दारकुसुमं बिल्वपत्रं शुचौ घृतम् । श्रावणे दधि सम्प्राश्य नभस्ये च कुशोदकम् । क्षीरमाश्वयुजे मासि कार्त्तिके पृषदाज्यकम् । पृषदाज्यं दधिमिश्रं घृतम् "मार्गशीर्षे तु गोमूत्रं पौषे सम्प्राशयेद् घृतम् । माघे कृष्णतिलांस्तद्वत् पञ्चगव्यञ्च फाल्गुने । ललिता विजया भद्रा भवानी कुमुदा शिवा । वासुदेवी तथा गौरी मङ्गला कमला सती । उमा च दानकाले तु प्रीयतामिति कीर्त्तयेत् । मङ्गलाश्लोकसमकटस्योत्पलमालतीम् । कुलत्थं करवीरञ्च बाणमल्लानकुङ्कुमम् । सिन्दुवारञ्च सर्वेषु मासेषु क्रमतः स्मृतम्" इत्यादि ।

सौभाग्यसंक्रान्तिव्रतं स्कन्दपु० "कथान्यां प्रवक्ष्यामि सौ-

भाग्यसंक्रान्तिसुत्तमाम्। शृणु नारद! यत्नेन धनैश्वर्यप्रदायिनीम्। यत्ने विष्णवे युक्ते व्रतोपायेन भानुना। संक्रान्तिदिवसे कुर्यादेकभक्तं विमत्सरः। पूर्ववद्भानुमभ्यर्च्य तथा चैव सुरार्चिते। सौभाग्याष्टकसंयुक्तं वस्त्रयुग्मं सयोषिते। विप्राय वेदविदुषे भक्त्या तत् प्रतिपादयेत्। एवं संवत्सरे पूर्णे कृत्वा ब्राह्मणभोजनम्। पर्वतं सवर्णं कृत्वा यथाविभवसारतः। काञ्चनं कमलं कृत्वा भास्करञ्चैव कारयेत्। गन्धपुष्पादिना पूज्य विप्राय प्रतिपादयेत्"।

सौभाग्यावाप्तिव्रतं विष्णुधर्मोत्तरे "भाद्यान्तु समतीतायां प्रतिपत्प्रभृतिक्रमात्। षष्टे वा यदि वाऽहीवां कृष्णं संपूजयेत् सदा। पूर्वोक्तं सकलं कुर्याद् विधिं चात्र नराधिप!"। पूर्वोक्तमिति चैत्रमासमम्बन्धिरूपावाप्तिव्रतोक्तमित्यर्थः। "नित्यं समाचरेत् स्नानं तथा गन्धप्रियङ्गुणा। चरुं प्रियङ्गुणा कुर्याद्धोमं कुर्यात् प्रियङ्गुणा"। प्रियङ्गुः कङ्गुसदृशगन्धद्रव्यम् "फालगुन्यान्तु ततो दद्यात् विरात्रोपोषितो नरः। वस्त्रे च दैवे नृप! कङ्कुमाक्ते सौदृश्य पात्रञ्च तथैव कांस्यम्। सौभाग्यदं श्रोतदत्तमन्नं व्रतं मैतत्कथितं नृवीर।"।

सौरनक्षत्रव्रतं वसिष्ठपु० "हस्तयुक्ते वार्क्षदिने सौरनक्षत्रव्रतं चरेत्। स्नात्वाभ्यर्च्य तु विप्रान् वै विरोगो जायते नरः"।

सौरसप्तमीव्रतं पद्मपु० "यत्रोषवासी सप्तम्यां समाप्ते हेमपङ्कजम्। गावैव शक्तितोदद्याद्धोमान्ते घटसंयुताः। एतत् सौरव्रतं नाम सूर्यलोकप्रदायकम्"।

स्त्रीपुत्रकामावाप्तिव्रतं भविष्यपु० "एकभक्तेन या नारी चार्चिकन्तु चपेत्नृप!। चमार्चिसादिदिवसैः सञ्जाता ब्रह्मचारिणी। गुडान्नमिश्रं शाल्यन्नं भास्कराय निवेदयेत्। पुष्पाणि करवीराणि गुग्गुलं साज्यमादरात्। सप्तम्याञ्चाथ षष्ठ्यां वा उपवासरतिर्भवेत्। पञ्चयोरुभयोरेव भक्त्या परयान्वितः। रन्ध्रनीलपतीकाग्रैर्विमानैः सार्वकामिकैः। नारी युगशतं सार्धं सूर्यलोके महीयते वर्षसाध्यमिदम्।

क्षेत्रव्रतं पद्मपु० "आषाढादिचतुर्मासानन्यक्षं वज्रवेश्वरः। पारिते च पुनर्दद्यात्तिलतैलयुतं घटम्। भोजनं पायसाज्यञ्च स याति भवनं विभोः। लोकप्रीतिकरं श्रोतत् क्षेत्रव्रतनिरुच्यते"।

क्षुधाब्रह्मव्रतं शाम्बिकोत्तरे "क्षुत्पराङ्मुखताज्ञातो द्वादश्यां पूजितो हरिः। मनोजवः। वस्त्रैश्चैवाः पूजनीयश्चैत्रशुक्ल पञ्चमी। तत्रैव पूज्या गन्धर्वास्तुरङ्गाश्चान्तु बान्धवाः। पत्रवाघधराः केचित् केचित् पत्रैव संवृताः। भीमश्चित्ररथश्चैव विख्यातः सर्वविदयम्। तथा सालिशिराः श्रीमान् प्रद्युम्नश्च महायशाः। नारदश्च कलिन्दश्च गन्धर्वश्च हाहा हूहूः। सुवाहस्तुम्बुरुश्चैव तथा चित्ररथः प्रभुः। चित्राङ्गदश्च विख्यातश्चित्रसेनश्च वीर्यवान्। सिद्धपूर्णश्च वदरी पर्णायश्च महायशाः। ब्रह्मचारी रतिगुणः सुपर्णोऽतिबलस्तथा। विश्वावसुः सुरेन्द्रश्च गन्धर्वोऽतिपराक्रमः। एत्येते पूजनीयाः स्युर्गीतैरद्यावधैः शुभैः। मोदकैः पोलिकाभिश्च परमान्नेन चाचतैः। दध्ना गुडेन पयसा शालिपिष्टेन भूरिशः। धूपैर्माल्यैस्तथा दीपैर्विज्ञानां स्वस्तिवाचनैः। एवं हि पूजिताः सम्यक् तुरगाणां हि बान्धवाः। बलमायुः प्रयच्छन्ति संग्रामेष्वपराजयम्। आरोग्यं परमा पुष्टिस्तथैव च विधीयते"।

हरव्रतीयाव्रतं स्कन्दपु० "माघे शुक्लतृतीयायामुपवासन्तु कारयेत्। रात्रौ सम्भारभाङ्मूल गौरीयागञ्च मण्डपे। अथ पत्रं लिखेत् पद्मं मण्डपे सन्निधुक्रुव!। उमामहेश्वरं तत्र पूजयेत् उमयान्वितः। पूर्वपत्रे न्यसेद् गौरीमाग्नेय्यां ललितां न्यसेत्। दक्षिणे तु उमां नाम नैर्ऋत्यां च सुधां तथा। पश्चिमे वामदेवीन्तु वायव्यां भूतगौरिकाम्। उत्तरे तु सुभगान्तु ऐशान्यां गिरिजां तथा। उमामहेश्वरं मध्ये गन्धपुष्पैः प्रपूजयेत्। षडङ्गारञ्चैव संस्थाप्य तण्डुलैः परिपूरयेत्। एवं कृत्वा विधानेन सुने! वर्षचतुष्टयम्। आराधनन्तु देव्याश्च सौभाग्यजननं परम्। उद्यापनं ततः कुर्यात् तस्मिन्नेव ततो दिने। उमामहेश्वरं हैमं खण्डन्ते मण्डले स्थितम्। वस्त्रैर्गन्धैश्च धूपैश्च दीपमालादिभिस्तथा। भक्ष्यभोज्यविधैः सम्यक् पूजयित्वा भक्त्या ततो सुने!। तदङ्गं सभार्यञ्च पूजयेत् द्विजसत्तमम्। गां चैव गुरवे दद्यात् वस्त्रालङ्कारसंयुताम्। मिथुनानीह चत्वारि भोजयेत् उमयान्वितः। उमामहेश्वरं हैमं दत्त्वा भक्त्या उमापयेत्"।

हरव्रतं भविष्यपु० "कृष्णायां पूजितो देवो गोयुताभरणो हरः। ज्ञानं ददाति विपुलां कान्तिं जातिं बलं तथा"। गोयुताभरणः चक्षुःश्रवोभूषः शिव इत्यर्थः। "स्नात्वा स्नानदयैव पापहाः च प्रपूजितः। मूलमन्त्रः स्वशक्तिभि-

रङ्गमन्त्राश्च कीर्त्तिताः। पूर्ववत् पद्मपत्रस्थः कर्त्तव्यस्तिथीश्वर। गन्धपुष्पोपहारेण यथाशक्ति विधीयते"।

हरिव्रतं वराहपु० "त्रैलोक्यगामिनी देवी लक्ष्मीस्तेऽस्तु सदा प्रिया। द्वादशी च तिथिस्तेऽस्तु कामरूपी च जायते"। हरिं प्रतीदं वचनम् "इतश्चतो भवेद्यस्तु द्वादशीं तत्परायणः। स स्वर्गवासी भवति पुमान् स्त्री वा विशेषतः"।

हरिकालीव्रतं भविष्योत्तरे "शुक्ले भाद्रपदस्यैवं तृतीयायां समाचरेत्। रत्नधान्यैः सवैदूर्यैः कृत्वा विग्रहमादृते। खर्जूरैर्नारिकेलैश्च फलैश्च मधुरैस्तथा। मातुलाङ्गकृष्मैर्धान्यकैर्जम्बुकैस्तथा। गन्धैः पुष्पैः फलैर्धूपैर्नैवेद्यैर्मोदकादिभिः। प्रोक्षयित्वा समासाद्य पञ्चरात्रेण भाविता। वराहाद्यादिभिर्गीतैः शुभैर्दिव्यैः कथानकैः। पूजनीया महाराज! मन्त्रेणानेन भक्तितः। हरेर्नित्यं वसत्यत्र! हरिकालि! हरिप्रिये!। सर्वदा शङ्खमूर्त्तिस्थे! प्रसीदार्त्तिहरे! नमः। इत्थं संपूज्य तां देवीं दद्याद्विप्राय दक्षिणाम्। कृत्वा जागरणं रात्रौ प्रभाते विष्णुमुद्वहेत्। रात्रौ सुवासिनीभिश्च सा नेया तु जलाशये। ततो जलाशये रत्ने मन्त्रेणैव विसर्जयेत्। अर्चिता च मया भक्त्या गच्छ देवि! सुरालयम्। मम दोषान्यनाशाय पुनरागमनाय च। एवं यः पाण्डवश्रेष्ठ! हरिकालीव्रतं चरेत्। प्रतिवर्षं विधानेन नारी वा भक्तितत्परा। भोक्त्वा यत् फलमाप्नोति तदन्येन न लभ्यते"।

परिशिष्टम्।

श्यामकैकादशीव्रतं स्कन्दपु० प्रभासख० "फाल्गुनस्य सिते पक्षे एकादश्यामुपोषितः। स्नात्वा नद्यां तडागे वा वाप्यां कूपे ह्रदेऽपि वा। गत्वा गिरौ वने वापि यत्र वा प्राप्यते शिवा। क्षीरोदे मज्जमाने तु यदा दक्षः समुत्थितः। आगतान्देवदैत्यानां तेन सामलकी स्मृता। तस्मिन् वृक्षे स्थिता लक्ष्मीः सदा पितृसुरेऽपि!। शिवालक्ष्मीस्थितो वृक्षः सेव्यते सुरसत्तमैः। देवैर्ब्रह्मादिभिः सर्वैर्वृक्षोऽसौ वेष्टितः श्रितः। तत्र गत्वा हरिः पूज्यो वृक्षमूलेऽथ वा शिवा। पूज्या पुष्पैः शुभैरात्रौ कार्यं जागरणं नरैः। अष्टाधिकशतैः कार्या फलैस्तस्याः प्रदक्षिणा। प्रदक्षिणीकृत्य ततो भोक्तव्यं तु फलं नरैः। करकं जलपूर्णं तु कर्त्तव्यं पात्रसंयुतम्। दक्षिणान्तु कर्त्तव्यं कथाश्रवणतत्परैः। कृष्णे देहिनः पापैः कलिजैः कायसम्भवैः। देहान्ते ये नराः पूर्वं पूज्यन्ते हरिमन्दिरम्"।

एतानि व्रतानि प्रायेण हेमाद्रिव्रतखण्डोक्तानि प्रसङ्गागतान्यपि कानिचिदुक्तानि। अन्यान्यपि व्रतान्यादृक्षाणि द्रष्टव्यानि नैमित्तिकानि प्रासादव्रतादीनि व्रतानि तु तत्तच्छब्दे उक्तानि द्रष्टव्यानि। [२विस्तारे च अमर।

व्रतति स्त्री व्रत-अति पृषो० वा ङीप्। १लतायाम्।

व्रतभिक्षा स्त्री व्रतार्थं भिक्षा। उपनयनकालविहितभिक्षायां तद्विधिः संस्कारतत्त्वे दर्शितो यथा "अथ भैक्षमाचरति"। अथ शब्दस्नूषीमादित्योपस्थानमग्निप्रदक्षिणञ्च शंसति। "प्रतिष्ठोपस्थितं दण्डमुपस्थाय च भास्करम्। प्रदक्षिणं परीत्याग्निं चरेद्भैक्षं यथाविधि" इति मनुवचनात्। "भिक्षासूत्रं भैक्षं तच्चरति आहरति इत्यर्थः। "मातरमेवाग्रे वा अन्ये वृत्तदो यावत्यो वा सन्निहिताः स्युः"। याचते इत्यध्याहार्यम्। वृत्तदः स्निग्धवृत्तयः स्वसादयः तथाच मनुः "मातरं वा स्वसारं वा मातुर्वा भगिनीं निजाम्। भिक्षेत भिक्षां प्रथमं याचेनं नावमानयेत्"। सन्निहितास्तेऽग्रस्थाः न तु प्रतिष्ठं गत्वा। (भवति! भिक्षां देहीति) ब्राह्मणभिक्षा प्रयोगः। तथा च मनुः "भवत्पूर्वं चरेद्भैक्षमुपनीतो द्विजोत्तमः। भवन्मध्यन्तु राजन्यो वैश्यस्तु भवदुत्तरम्"। "आदिमध्यावसानेषु भवच्छब्दोपलक्षिता। ब्राह्मणक्षत्रियविशां भैक्षचर्या यथाक्रमम्" इति याज्ञवल्क्यवचनाच्च। आचार्याय भैक्षं प्रथिमत्व वेदयति (समर्पयति) भोरिति", "आचार्यायैव निवेद्य प्रतिष्ठङ्गीयादिति" मन्त्रान्तरवचनात्। भैक्षं भोरिति निवेदनमन्त्रः। भैक्षस्य संस्कारार्थत्वात् आचार्यायैव निवेद्य स्वयं तदेव भुञ्जीत। तथा च मनुः "समाहृत्याथ तद्भैक्षं यावदन्नमायया। निवेद्य गुरवेऽश्नीयात् आचार्यः प्राङ्मुखः शुचिः"। आचार्यश्च माणवकाय भैक्षं प्रदाय कर्म्मशेषं समापयेत्"।

व्रतसंग्रह पु० ६त०। व्रतसङ्ग्रहार्थे ग्रन्थभेदे हेमाद्रौ च०।

व्रतादेश पु० व्रतमादिश्यतेऽत्र आ+दिश आधारे घञ्। उपनयने तत्र हि आचार्येण माणवकस्य व्रतमादिश्यते।

व्रतिन् पु० व्रतमस्त्यस्य इनि। १व्रतधारके २यजमाने च। अमरः।

व्रश्च छेदे तु०पर०सक०अनिट् वेट्। व्रश्चति अव्रश्चीत् अव्राक्षीत्।

व्रश्चन पु० व्रश्च्यतेऽनेन व्रश्च-ल्युट्। (छेनि) १खण्डादिच्छेदनार्हे वृक्षभेदे अमरः। भावे ल्युट्। २छेदने न० अमरः।

व्रात पु० व्रा-क्तच् पृषो०। समूहे अमरः।

व्रातीन त्रि० व्रातेन चरति ख। संघजीविनि। "व्रातीनव्या वदीयास्तः" भट्टिः।

व्रात्य पु० व्रातात् समूहात् च्यवति यत्। अव्यवस्थिते, संस्कारहीने, जातिमात्रोपजीविनि, "अत ऊर्द्धं त्रयोऽप्येते यथाकालमसंस्कृताः। सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः" मनुः। तत्र प्रायश्चित्तं मिता०उक्तं यथा तत्र व्रात्यतायां मनुनेदमुक्तम् "येषां द्विजानां सावित्री नानूच्येत यथाविधि। तांश्चारयित्वा त्रीन् कृच्छ्रान् यथाविध्युपनाययेदिति"। यच्च यमेनोक्तम् "सावित्रीपतिता यस्य दश वर्षाणि पञ्च च। सशिखं वपनं कृत्वा व्रतं कुर्यात् समाहितः। एकविंशतिरात्रेण पिबेत् प्रस्थतियावकम्। हविषा भोजयेच्चैव ब्राह्मणान् शक्त पञ्च वा। ततो यावकशुद्धस्य तस्योपनयनं स्मृतम्" इति। तदुभयमपि यात्रवल्क्यीयमासपयोव्रतविषयम्। यत्तु व०शिष्ठेनोक्तम् "पतितसावित्रीक षड्रात्रकव्रतञ्चरेत्। द्वौ मासौ यावकेन वर्त्तयेन्मासं पयसा पञ्चमाभिषयाष्टरात्रं हविषेन षड्रात्रमयाचितेन त्रिरात्रमभ्यक्षोरात्रमुपवसेदश्वमेधावभृथस्नानेन वा यजेतेति"। तत्रेयं व्यवस्था यस्योपनयने आपद्भावेन तत्कालातिक्रमस्तस्य यात्रवल्क्योक्तव्रतानामन्यतमत् शक्त्यपेक्षया भवति अनापद्यतिक्रमे तु मानवं त्रैमासिकम्। तत्रैव षोडश वर्षादूर्द्धमपि कियत्कालातिक्रमे तूद्रात्रकव्रतम् व्रात्यस्तोमो वेति। येषान्तु पित्रादयोऽप्युपनीतास्तेषामापस्तम्बोक्तम् "यस्य पिता पितामहादनुपनीतो व्रातान्तस्य संवत्सरं त्रैविद्यकं ब्रह्मचर्य्यम्। यस्य प्रपितामहादेर्नातुस्मर्यते उपनयनञ्च द्वादश वर्षाणि त्रैविद्यकं ब्रह्मचर्य्यमिति"।

व्रात्यस्तोम पु० व्रात्ययोग्यः स्तोमः। यज्ञभेदे "स च यज्ञक्रतुर्विधः" कात्या० श्रौ० २२।४।१ सूत्रादौ दर्शितो यथा

"व्रात्यस्तोमाश्चत्वारः" सू०"व्रात्यस्तोमसंज्ञकाश्चत्वारः क्रतवो भवन्ति व्रात्याः प्रसिद्धा एव त्रिपुरुषं पतितसावित्रीकाः। प्रायश्चित्तार्थत्वाच्च लौकिकेऽग्नौ भवन्ति न ह्येतैराधानं प्रयुज्यते अतदङ्गत्वात् तदुक्तमाचार्येण स्वपतौ व्रात्यं प्रकल्प्य लौकिक इति। "द्वितीय उक्थ्यः" सू० "व्रात्यगणस्य ये सम्भादयेयुस्ते प्रथमेन व्रजेरन्" सू० सम्भादनं च गायननर्तकादीनाम् तेषां प्रथमेऽधिकारः। ये व्रात्या स्तुत्यगीतवाद्यशस्त्रधारणादौ स्वयं प्रवीणाः सन्त उपदेष्टारो भूत्वा सां विद्यां व्रात्यसमूहस्य सम्भादयेयुः शिक्षेयुः पाठयेयुः ते प्रथमेन व्रजेरन्। "द्वितीयेन निन्दिता ऋशंसाः" सू०। ऋशंसत्वेन ये निन्दितास्तेषां द्वितीयेऽधिकारः" सं०। ये ऋशंसा निन्दितान्तदभिमन्तुष्यैरभिशंसनेन पापाध्यारोपणेन निन्दिताः गर्हिताः ज्ञातिभिर्बहिष्कृताः ते द्वितीयेन व्रजेरन्" कर्कः "तृतीयेन कनिष्ठाः" सू० कनिष्ठाः लघवः। "व्येषायतर्चेन" सू० अधिक्रियन्ते। व्येषशब्दार्थमाह "व्येषेतप्रजननास्त्रविरास्तदाख्यास्तेषां ये ऋशंसतमः क्षादुद्रव्यवत्तमो वानूचानतमो वा तस्य गार्हपत्ये दोहेरन्" सू०। "स ऋद्धपतिः कर्त्तव्यः" सं०। अपगतप्रजनेन्द्रियसामर्थ्यां यौवनापगमे। निर्वीर्यप्रजनाः स्त्रविरा इद्वास्तदाख्याः। ऋशंसतमः अत्यन्तं क्रूरकर्मा" भा०। [अव्रैषीत्।

व्री इतौ क्र्या० पा० पर० सक० अनिट्। प्रि(व्री)णाति

व्री गतौ दिवा० आ०सक० अनिट्। व्रीयते अव्रेष्ट। ओदित् व्रीण्यः। [अव्रीड्ढ।

व्रीड़ छेपे दिवा० पर० सक० लज्जायां चक० सेट्। व्रीड्यते

व्रीड़ पु०व्रीड़-घञ्। लज्जायाम्। ख। तत्रैव स्त्री अमरः।

व्रीस वधे वा चु० उभ० पक्षे भ्वा० पर० सक० सेट्। व्रीसयति ते व्रीसति।

व्रीहि पु० व्री-क्हि किच्च। १धान्यभेदे २शाल्यादौ च अमरः। तद्भेदादिकं भावप्र० उक्तं यथा

"वार्षिकाः कथिताः शुक्लाः व्रीह्यश्चिरपाकिनः। कृष्णव्रीहिः पाटलश्च कुक्कुटाण्डक इत्यपि। शालामुखो जतुमुख इत्याद्याः व्रीह्यः स्मृताः। कृष्णव्रीहिः स विज्ञेयो यः कृष्णतुषतण्डुलः। पाटलः पाटलाशुष्क वर्षको व्रीहिरुच्यते। कुक्कुटाण्डाकृतिर्व्रीहिः कुक्कुटाण्डक उच्यते। शालामुखः कृष्णशूकः कृष्णतण्डुल उच्यते। शालावर्षं सखं यस्य श्वेतो जतुमुखस्तु यः। व्रीह्यः कथिताः पाके मधुरा वीर्य्यतो हिताः। अल्पाभिष्यन्दिनो बद्धवर्च्चस्काः पञ्चिकाः समाः। कृष्णव्रीहिर्बलोषां तस्मादल्पगुणाः परे"। ततः अस्यर्थे व्रीह्या० ठनि ठौ। व्रीहिन् व्रीहिक तद्विशिष्टे त्रि० विद्या० पुराड् मणिन्नि अवयवार्थे अण्। व्रैह तद्ववये।

व्रीहिकाञ्चन ष० व्रीहिषु काञ्चनं तद्रूपमस्यस्य अच्। मनूरे त्रिका०। [पानि) चुपभेदे राजनि०।
व्रीहिपर्णी स्त्री व्रीहीणामिव पर्णान्यस्याः ङीष्। (शाल-
व्रीहिभेद पु० ६त०। १धान्यभेदे (चिना) अमरः। २धा-
न्यविशेषे च। [पुरोडाशे। अस्यास्ति त्रिका० अच्।
व्रीहिमय पु० व्रीहेर्विकारः पुरोडाशः मयट्। व्रीहिविकारे
व्रीहिराजिका पु० व्रीहिषु राजिकाकारे अस्यस्याः अच्। कङ्गुधान्ये (काङ्नी) मेदि०।
व्रीहियेष्ठ पु० व्रीहिषु श्रेष्ठः। शालिधान्ये राजनि०।
व्रीह्यगार न० ६त०। धान्यस्थापनस्थाने कुशूले त्रिका०।
व्रीह्यादि पु० विकाराद्यर्थे इनिठनुप्रत्ययनिमित्ते पा०ग०सू० उक्ते शब्दगणे च च "व्रीहि माया याया शिखा माला मेखला वेला लटका पताका चर्मन् कर्मन् वर्मन् दंष्ट्रा वंशा वड़वा कुमारी नौ वीणा वलाका यवखद मोकुमारी (मौसौरुच)" "नौकुमार्यौरिकाणौ गन्धे द्विधा पाठः" वि०कौ०। "अत इनिठनौ व्रीह्यादिभ्यश्च" पा०व्रीही व्रीहिकः। "न च वक्तव्यो व्रीह्यादिभ्य इनिठनाविष्यते किं तर्हि शिखामालावंशादिभ्य इनिः यवखदादिभ्यः ठन्। अस्मिन्य उभयम्" वि०कौ०।
व्रुड़ संवरणे सक० संघाते मज्जने च अक० चु० कुटा०। पर० सेट्। व्रुड़ति अव्रुड़ीत्।
व्रूस वधे वा चु० उभ० पक्षे भ्वा० पर० सक० सेट्। व्रूसयति ते व्रूसति। [चेत्यादौ।
व्रैहेय त्रि० व्रीहीणां भवनं चेत्यम् ढक्। व्रीहिभवनयोग्ये
व्री गतौ इतौ च क्र्यादि० प्रा० प० सक० अनिट्। (व्रि)व्री-णाति अव्रैषीत्।

परिशिष्टम्।

व्रत्य पु० वात्यवेदप्रसिद्धे यज्ञभेदे वि० कौ०।
व्रिजया स्त्री अच्यादिषु पाठ्यु मालभेदे
व्रिजयाभिनन्दन पु० कलियुगीयशककर्तृ नृपभेदे शकशब्दे दृश्यम्।

इति श्रीतारावतर्कवाचस्पतिभट्टाचार्य्य संकलिते वाचस्पत्याभिधाने वकारादिशब्दार्थसङ्कलनम्।

श

शकारः अक्षरवर्णभेदः। अस्योच्चारणस्थानं तालु। तस्योच्चारणे आभ्यन्तरप्रयत्नः विवृतम्। बाह्यप्रयत्नो विवारः श्वासाघोषः महाप्राणश्च। अस्य ध्येयरूपम् "शकारं परमेशानि! शृणु वर्णं सुचिस्मिते!। रक्तवर्णं प्रभाकारं स्वयं परमकुण्डली। चतुर्वर्गप्रदं देवि! शकारं ब्रह्मविग्रहम्। पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं प्रिये। रजःसत्त्वतमोयुक्तं त्रिबिन्दुसहितं सदा। त्रिशक्तिसहितं वर्णमाद्यन्तत्त्वसंयुतम्" कामधेनुतन्त्रम्। अस्य वाचकयन्त्रा योगिनीतन्त्रोक्ता यथा "शः शब्दश्च कामरूपी कामरूपो महामतिः। शौक्ष्णनामा कुमारोऽस्ति शोकहो हव्यवेतनः। शब्दब्रह्मः शवनं शान्ता शुभगा विश्वविक्रिणी। कल्पद्रुमो महालक्ष्मीमेन्द्रः कुलकौलिनी। बाडवेंधो विषदहः क्रूदनक्लोऽङ्कुशः खनः। वामोदः पुष्करीकाक्षः कान्तिः कल्याणवाचकः"। मातृकान्यासेऽस्य कूटादिदेवकरे न्यासता। काव्यादौ प्रथमप्रयोगे सुखं फलम्। "शः सुखं वस्तुवेदम्" ह० च० टी०। [शब्दर०।
श्र न० श्री-ड। १मङ्गले त्रिका०। २महादेवे, ३यक्षे च पु०
श्रंयु त्रि० श्रमस्यस्य श्रम्+युस्। श्रमान्विते त्रिका०।
श्रंव त्रि० श्रमस्यस्य श्रम्+व। १श्रमयुक्ते त्रिका०। २सूचकाश्वोढे २वस्त्रे च पु० भरतः।
श्रंवर न० श्रंवतीति श्रम्+ड-अच्। जले अमरः।
श्रंसा स्त्री श्रनस-च। १वाक्ये। २वाञ्छायां मेदि०। ३प्रशंसावाक्ये शब्दर०। [२कथिते ३स्तुते च।
श्रंसित त्रि० श्रनस-क्त। १निश्चिते हेमा०। २स्तुते।
श्रंस्य त्रि० श्रनस-यत्। १स्तुत्ये २स्तुत्ये ३वाच्ये च।
श्रक त्रासे अक० संशये सक० भ्वा० चा० सेट् इदित्। श्रङ्कते अशङ्किष्ट।
श्रक शमायां सक० दि० उभ० सेट्। शक्यति ते अशकीत्-अशकीत् अशक्षीत् "शक्योऽस्य मन्युर्भवता विनेतुम्" रघुः।
श्रक सामर्थ्ये चा० प० अक० इरित् सेट्। शक्नोति अशकत्-अशाक्षीत्। पुषादिरित्त्वे तेन अशकदित्येव।
श्रक पु० शक-अच्। १जातिभेदे स च ब्राह्मक्षत्रियः १६०७पृ० दृश्यम्। २देशभेदे खराब्दावधिवत्सरारम्भप्रवर्त्तके शब्दभेदे ३तटीये वत्सरे च। कलियुगे शककर्त्तृषु भट्सु युधिष्ठिरः विक्रमादित्यः शालिवाहनश्चेति त्रयोजनाः

विजयाभिनन्दनादयस्त्रयो भविष्यन्ति । तथा हि कल्कौ षट् अककर्त्तारः तच्छब्दादि ज्योतिर्वि० १०अ० उक्तं यथा "कल्कौ भविष्यत्यथ भारतावनौ महीभुजो वाङ्कसुतोऽप्यनेकशः । अकास्तथैवामभिधेयनादिकं स्थितं सदोदीरितकालसाधितम् । धराधिभूर्भिल्लशकादिजातिजस्तदासनस्थोऽभिजनैर्नमस्कृतः । सुतः स राजाधिजनैः प्रतिष्ठितो नन्दभेदाद्यभिधेयनोचितः । निहन्ति यो भूतलमण्डले शकान् सपञ्चकोच्चाजदलप्रमान् कलौ । स राजपुत्रः शककारको भवेत् नृपाधिराज्ये हृतधाककर्त्तृ हा" । (तस्य शककारकस्य विक्रमादित्यस्य हननात् धाविधाहननस्य शककर्त्तृत्वम्) "युधिष्ठिरो विक्रमधाविधाहनौ नराधिनाथौ विजयाभिनन्दनः । इमेऽन्तु नागार्जुनभेदिनौ विभुर्वदिः क्रमात् षट् शककारकाः कलौ" । तत्प्रवृत्तिकालांस्तत्राह "युधिष्ठिरात् भेदयुगाम्बरानलाः (२०४४) कलम्बविश्वे (१३५) ऽम्बरखाष्टभूभवः १८००० । ततोऽयुतं १०००० लक्षचतुष्टयं क्रमात् धराद्रगष्टाविति (८२१) शाकवत्सराः । युधिष्ठिरोऽभूद्भुविहस्तिनापुरे तथोज्जयिन्यां पुरि विक्रमाङ्कयः । धाविधाभूमोहति धाविधाहनःसुचित्रकूटे विजयाभिनन्दनः । नागार्जुनो रोहितके क्षितौ बलिर्भविष्यतीन्द्रो भद्रुकल्पपत्तने । कल्पप्रवृत्तिस्तदनन्तरं भवेत्तदा भविष्यन्त्यवनीभृतोऽर्कतः" । अत्र युधिष्ठिरात् प्राक् कल्पौ शककर्त्तॄणामभावात् कलियुगारम्भकालादेव तत्र शककाल उक्तः वराहसंहितायां १२ अ० तु तद्धाब्दावधित एव शककाल इत्यभिप्रायेण "यावन् मघासु सप्तर्षयः प्रयान्ति पूर्वां युधिष्ठिरे नृपतौ । षड्द्विकपञ्चद्वियुतः (२५२६) शककालस्तस्य राज्ञश्च" तेन कलेः (५१८) वर्षेषु गतेषु युधिष्ठिरस्य राज्यप्रवृत्तिः । षट् कर्त्तृगतसंख्यास्थिरत्वं च ।

बुधि०	२०४४ ।	इति न कलिमानसंख्याविरोधः
विक्र०	१३५	अतएव ज्योतिर्विदाभरणेऽब्दे सप्त-
धाबि०	१८०००	तत्रैव "वर्षैः सिन्धुरदर्शनाम्बरगुणै-
विजया०	१००००	र्यातेऽब्दो विक्रमतेः" इति कलि-
नागा०	४०००००	युगस्यैव २०६८ वर्षेषु गतेषु सप्त-
बलि०	८२१	ऋषयउदयम् ।

२१२०००

अकट पु० न० अक–अटन् । १यानभेदे (गाड़ि) अमरः । २असुराधिष्ठिते नन्दनवने अकटविशेषे अकटमण्डनः कृष्णः । ३डिण्डकरूपपरिमाणे ऐलच० । अल्पार्थे क्वोप् । चतुरकटे स्वार्थे क । अकटिका तत्रैव स्त्री ।

अकटहन् पु० अकटमसुराधिष्ठितशकटभेदं हतवान् हन–भूते क्विप् । श्रीकृष्णे तत्कथा हरिवं० ६२अ० ।

अकटाह्वा स्त्री अकटाकारत्वात् तदाह्वा यस्याः । रोहिण्यां नक्षत्रे तस्याः अकटाकारचतुष्कारात्मकत्वेन तथात्वम् ।

अकन्धु पु० ईत० अकन्धवः । परनिपातः अकानां कूपे ।

अकल पु० न० अक–कलच् । १खण्डे २एकभागे । ३तत्रैव ४वलक्षे मेदि० ५अखण्डे (आँख) च न० ।

अकलिन् पु० अकलं अखण्डमस्यास्ति इनि । मत्स्ये अमरः ।

अकावृद् पु० अककर्त्तृत्वपर्य्यन्ती वृद्धः । १अकप्रवर्त्तकत्वपराब्दावधिवत्सरे २तत्संख्यायाञ्च ।

अकार पु० "अदमूर्खताभिमानी दुष्कृतवैश्वर्यसंयुक्तः । सोऽयमनुद्धाम्नाता राज्ञः शूद्राः अकार इति" भा० द० उक्तलक्षणे १राज्ञोऽनुद्धाम्नायान्तरि । अ+सदृशे–कार । अकरूपे २वर्णे च ।

अकारि पु० अकानां स्वेच्छजातिभेदानामरिः । विक्रमादित्ये

अकुन न० अक–उनन् । १शुभाशुभसूचकनिमित्ते–वाङ्मनस्कायकादिदर्शनादौ । इःअकुनशब्दे २६१पृ० दृश्यम् २पक्षिमात्रे ३पक्षिभेदे अश्वे च पुंस्त्री० मेदि० ।

अकुनज्ञ त्रि० अकुनं जानाति ज्ञा–क । १निमित्तज्ञानिनि २अश्वेऽपि स्त्री त्रिका० ।

अकुनि पु० अक–उनि । १पक्षिमात्रे अमरः । २खलपक्षिणि हेमच० । ३सुबलराजपुत्रे दुर्य्योधनमातुले च । ४ग्रामपक्षिणि स्त्री क्वोप् राजनि० । ५वर्णादिषु करणभेदे पु० ६दुःसहस्कन्धपुत्रे पु० मार्कण्डेयपु० । विक्रान्तिस्कन्धपुत्रभेदे पु० वङ्गेपु० ।

अकुनिप्रपा स्त्री० ईत० पक्षिणां पानीयशालायाम् टाप् ।

अकुन्त पु० अक–उन्त । १पक्षिमात्रे । २भाषापक्षिणि २कोटभेदे च मेदि० ।

अकुन्तला स्त्री० अकुन्तैः जायते ता–डजर्थे–क । मेनकागर्भजातायां विश्वामित्रसुतायाम् सा च जातमात्रा मातापितृहीना अकुन्तपक्षिता पश्चात् कण्वमुनिना प्रतिपालिता दुष्मन्तस्त्रियेण गान्धर्वविधिना व्यूढेति "निर्जने तु वने कण्वात् अकुन्तैः परिपालिता । अकुन्तलेति नामाऽस्याः कृतं चापि ततो मया" भा० आ० ७२अ० । अकुन्तलाभिज्ञान शाकुन्तलो ग्रन्थः । अस्य आख्यायिकायां तस्य या कथा । आदिदाहप्रभृतौ अकुन्तलाधिकारेण कृते २नाटकभेदे च कथाऽर्हे कि त्र अकुन्तल तत्रार्थे न० ।

शकुन्तलाङ्कज पु० ६त० । शकुन्तलासुते भरतऋषे हेमचन्द्र० ।

शकुन्ति पु० शक-उनि । १पक्षिमात्रे अमरः । २भावप-त्तिथि उणादिकोषः ।

शकुल पुंस्त्री० शक-उलच् । मत्स्यभेदे (शउल) अमरः । स्त्रियां ङीष् । [वाम् राजनि० ।

शकुलाक्षी पु० शकुलस्याक्षीव अक्षि समा० ङीष् । गण्डदूर्वा०

शकुलादनी स्त्री० शकुलैरद्यते अद-ल्युट् । कट्की) शाक-भेदे अमरः । २जटामांस्यां, ३जलपिप्पल्यां, कट्फले च विश्वः । [(शउर) मत्स्ये । अमरः ।

शकुलार्भक पु० शकुलस्यार्भक इव चुद्रत्वात्तदाकारत्वाद्वा ।

शकृत् न० शक-ऋतन् । विष्ठायाम् अमरः ।

शकृत्कारि पु० शकृत् किरति कृ-इन् । १गवादीनां २वत्से २वत्सायां स्त्री ङीष् ।

शकृद्द्वार न० ६त० । मलद्वारे गुदानस्थाने हेमच० ।

श(क्क)र पु० शक-किप् क्र-अच् कर्म० शक-करप् वा । १द्वेषे मेदि० । चतुर्दशाक्षरपादके २छन्दोभेदे । ३नदीभेदे ४मेखलायाञ्च स्त्री ङीष् । ५अङ्कोले त्रि०कौ० । मुख्यो० शर्करीत्यपि चतुर्दशाक्षरपादके छन्दसि ।

शक्त त्रि० शक-क्त । समर्थे हेमच० ।

शक्ति स्त्री शक-क्तिन् । १सामर्थ्ये २स्त्रीदेवतायां देवी-मूर्त्तौ । न्यायादुक्ते कारणनिष्ठे कार्योत्पादनयोग्ये ३धर्मभेदे । ४शब्दनिष्ठे अर्थबोधकतारूपे बोध्यत्वप्रकार-ज्ञेच्छाविषयत्वरूपे वृत्तिभेदे सर्वशास्त्रे ६अस्त्रभेदे च अमरः । मीमांसकमते शक्तिः पदार्थान्तरम् यथोक्तम् शबरस्वामि० चि० "स्यादेतत् ईश्वरवत् कार्य्यमेव शक्तिरप्यनुमीयते तथा हि यादृशादेव करानलसंयोगाद्दाहो जायते तादृशादेव मणि प्रतिबन्धके न जायते अतो यदभावात् कार्य्याभावस्तदु-द्भावाद्भाव्यं तेन विना तदभावात् यत्तद्भावानु-पपत्तेर्व्यतिरेकसिद्धेः शक्तिसिद्धिः" । न्यायते तन्निरा-सस्तत्रैव ईश्वरवादप्रस्तावे दर्शितो यथा "दण्डादिभिरभिघातजन्यानामानन्त्येन प्रतिव्यक्ति भावेऽनुगतशक्तिस्वीकारे गौरवं तावदनन्तव्यक्तिजन्या-वान्तरव्यक्तिषु जातिलाघवकल्पने लाघवमिति तदेव कल्प्यते । न च जातौ योग्यानुपलब्धिबाधः गोमयप्रभव-दधिकयोर्वा पाटलत्वकपिलत्वव्यङ्ग्यत्वेजात्यस्य प्रत्यक्ष-सिद्धत्वात् दण्डजन्यनानाव्यक्तिषु दण्डजन्यत्वज्ञानानन्तरं अधिजन्यत्वादित्यनुगतबुद्धिरपि जातिविषया । दण्ड-जन्यत्वेनोपाधिनाऽपीति चेन्न बाधकं विनानुगतबुद्धे-स्तद्व्यङ्ग्यजातिविषयत्वनियमात् । न च गोमयदधिक-प्रभवदधिकजातिपरम्परायामनुगतजात्यापत्तिः गोमय-जन्यदधिकप्रभवत्वजातेः सत्त्वात् अङ्गिमात्रे च दाहस्यैव कारणत्वम् तत्संयोगः सेवनादिषु कारणानि न तु दण्डादिकं विनापि, तदुत्पत्तिप्रसङ्गः विशेषसामग्रीमा-दायैव साध्यसामग्र्याजनकत्वात्" ।

एवमाधेयशक्तिरपि मीमांसकमतेन पूर्वपक्षीकृत्य तत्र निरस्ता यथा तत्र प्रोक्षणप्रतिष्ठाशब्दयोर्दर्शितं मृ अधिकं किञ्चिदत्र प्रदर्श्यते यथा

"कामिनीचरणाभिघातदोहदादिभिरशोकपुष्पोत्कर्षदर्श-नादपि नाधेयशक्तिः समवधिविशेषावच्छिन्नचरणदोहा-दिसंयोगध्वंसस्यैव कारणत्वात् चरणाभिघाताद्यदृष्टजन्या-ज्जनितदृष्टादेव वा तदुपपत्तिः कालान्तरे पुष्पाद्युत्क-र्षात् । दुःखावयवोपचयावयवाभावेन दृष्टभेदावश्यकत्वात् । नापि तान्त्रिकांस्पादावस्त्रभक्षसंयोगादिजन्यशुद्धिरूपा आधेयशक्तिः तत्संयोगध्वंसस्य संयोगसमानकालीना-वयवसंसर्गादिप्रतियोगिकयावदनादिसंसर्गाभावसङ्कितस्य शुद्धिपदार्थत्वात् । भक्षादिसंयोगजनितः कांस्यादुपभोक्तृ-निष्ठः संस्कार एव शुद्धिरित्यन्ये । अभिमन्त्रितपयः पञ्चवादावपि समवधिविशेषावच्छिन्नाभिमन्त्रणध्वंस एव व्यधादुपनायकः तत्तन्मन्त्रदेवताऋद्धिरेव वा । कल-मबीजादीनामापरमाण्वन्तभङ्गे तत्र चावान्तर-जातिभावे नियतकलमजातीयादिसिद्धिरपि । परमाणु-पाकजविशेषादेव कार्यद्रव्यरूपादि सजातीयस्य पूर्वरूपा-दिविजातीयस्य परमाणौ पाकजरूपादेरभ्युपगमसिद्धत्वात् यथा हि कलमबीजं यवादिजात्या व्यवस्थ्यते तथा तत्परमाण्वोऽपि पाकजैरेव । एवं मायकर्मजनितात् परमाणुपाकपरम्पराविशेषादेव वैलक्षण्यसंभवोपपत्तिः । एतेन क्षारसावसैकादयो व्याख्याताः । निमित्तविशेष-जनितपाकजात्ततफलविशेषः यथा हारीतमांसं हरिद्रा-नलसाधितसुपयोगात् सद्योव्याधादयति नान्यथा साधि-तमित्यादि । यत्र च नोद्भूतेजोवायुषु न पाकजोविशेष-स्तत्रोद्भवानुद्भवद्रव्यकठिनत्वादयोविशेषास्तदुपनायकाद-दृष्टविशेषादेव । तच्चादौ चाधिवासपूर्वकतत्कारोद्भवसामग्री तत्तच्छ मन्त्रास्तत्प्रतिष्ठाप्रसहिता प्राचीनाधर्मांशफले तत्तच्छक्तौ जनयति । यद्वा अयं निष्पापः पापवान् वेति तत्तद्भावाभिप्रायसंज्ञानविशेषसहिता सा तथा, त-दाहुः, "तांस्तु देवाः प्रयच्छन्ति स्वर्गे वालरदुरुषः" इति

अथ वा प्रतिबन्धकाभावौ अपेक्ष्य तया धर्माधर्मौ जन्येते ताभ्यां च जयपराजयौ सत्यामप्यल्पभिन्नाभिभवत्तुलारोहणक्षेपादिनिष्फलत्वेनार्थतो विधिनिषेधात्। अभिभवात् सत्यप्रतिबन्धोविजयकामस्तुलामारोहेदित्यत्र सत्यप्रतिबन्धो न तुलामारोहेदिति श्रुतेरन्वयात्। यद्वा तया देवतासन्निधिः क्रियते तत्र कर्मोत्कर्षविकर्षमभिव्यञ्जयन्ति। तत्र च शक्तिपदार्थस्वरूपादिकमुक्तं यथा "कस्त्वं शक्तिपदार्थः कारणत्वं तच्च स्वव्याप्येतरसकलसंपन्नो कार्याभावव्यापकाभावाप्रतियोगित्वम्। अथ वा यत्र कार्याभावव्याप्यता इतराभावावच्छिन्ना तत्कारणबीजे अङ्कुराभावव्याप्यता न बीजत्वेनावच्छिद्यते इतरसमवधाने सति बीजादङ्कुरसत्त्वात्, किन्त्वितराभावेनावच्छिद्यते इतराभावावच्छिन्ना तत्कारणबीजे अङ्कुराभावव्याप्यता न बीजत्वेनावच्छिद्यते इतराभावे बीजाङ्कुराभावनियमात्। शिलाशकलेष्वङ्कुराभावव्याप्यता शिलात्वेनावच्छिद्यते। यद्वा कन्यासमवधानावच्छिन्नकार्योत्पत्तिव्याप्यत्वं कारणत्वं, रासभादेः कार्याभावव्याप्यता कन्यासमवधानस्य वैयर्थ्यमानवच्छेदकत्वात्। अनन्यथासिद्धनियतपूर्ववर्त्तिजातीयत्वं वा तत्त्वम्। अन्यथासिद्धश्च त्रिधा येन सहैव यस्य यं प्रति पूर्ववर्त्तित्वमवगम्यते, यथा घटं प्रति दण्डरूपस्य,(१) अन्यं प्रति पूर्ववर्त्तित्वे ज्ञाते एव यं प्रति यस्य पूर्ववर्त्तित्वमवगम्यते यथा शब्दं प्रति पूर्ववर्त्तित्वे ज्ञाते एव ज्ञानं प्रत्याकाशस्य(२)। अन्यत्र क्वचिन्नियतपूर्ववर्त्तिन एव कार्यसम्बन्धे तत्सदृशभूतत्वम्(३) यथा गन्धवति गन्धानुत्पादादुगन्धं प्रति तत्प्रागभावस्य नियतपूर्ववर्त्तित्वकल्पनात् पाकजस्थले गन्धं प्रति रूपादिप्रागभावादीनामप्यन्यथासिद्धत्वम् एतत्त्रितयव्यतिरेके नियतपूर्ववर्त्तित्वं कारणत्वम्। यागापूर्वयोस्तु यागपूर्ववर्त्तित्वे ऽवगते न स्वर्गस्यमाने यत्र जन्यस्य पूर्ववर्त्तित्वे ऽवगते जनकस्य पूर्वभावोऽवगम्यते तत्र जन्येन जनकस्यान्यथासिद्धिः। यत्र च जनकस्य तथात्वे ऽवगते जन्यस्य पूर्वभावावगतिस्तत्र तद्द्वारा तस्य जनकत्वमेव। दण्डसंयोगसमवयोस्तु युगपदेव पूर्वभावितत्वग्रहः। स्वस्मानन्तरोत्पत्तिकसकलसमवधाने सत्यपि यस्याभावात् कार्यं न जायते सति च जायते तज्जातीयं प्रति तदन्यथासिद्धम्। अनन्यथासिद्धनियतपूर्ववर्त्तित्वं कारणत्वमित्यन्ये तत्र ईश्वरतदृष्टादीनामसंग्रहात् तदृष्टव्यतिरेकस्य तत्समवधानव्यतिरेकस्य वाऽभावात्। कार्यस्यान्यथानुपपद्यमानताव्यवस्थापकत्वं वाऽनन्यथासिद्धम्। नन्वेवमतिरिक्तशक्तौ बाधकबाधकप्रमाणाभावात्तत्त्वं संशयः न च बाधकाभावस्य बाधकत्वं बाधकाभावस्य साधकत्वादिति चेन्न साधकाभावेन वस्त्वावश्यक सिध्यतीन्द्रियधर्माभावसाधने लाघवं बाधकाभावेनातीन्द्रियधर्मसाधने गौरवमिति साधकाभावात्तदभाव एव सिध्यतीति"।

"इच्छा क्रिया तथा ज्ञानं गौरी ब्राह्मी तु वैष्णवी। त्रिधा शक्तिः स्थिता यत्र तत्परं ज्योतिरोमिति"गोरक्ष०। सत्त्वरजस्तमोगुणत्रयाधीने ईश्वरस्य क्रमेण ज्ञानेच्छाक्रियारूपे ऽशक्तित्रये। "एषा त्रिशक्तिरुद्दिष्टा नरसिद्धान्तगामिनी। एषा श्वेता परा सृष्टिः सात्त्विकी ब्रह्मसंस्थिता। एषैव रक्ता रजसि वैष्णवी परिकीर्त्तिता। एषैव कृष्णा तमसि रौद्री देवी प्रकीर्त्तिता। परमात्मा यथा देव एकएव त्रिधास्थितः। प्रयोजनवशाच्छक्तिरेकैव त्रिविधाऽभवत्" वराहपु०। प्रकृतिशक्तिश्च ईश्वरस्य सृष्टिकर्तृत्वप्रवर्त्तिका "शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुम्" आनन्द०। तन्त्रोक्ते पीठाधिष्ठातृदेवताभेदे देवभेदे पीठशक्तयो भिन्नाश्चन्द्रसारादौ उक्ताः। राज्ञां प्रभावोत्साहमन्त्रजाते ईशमर्थे च अमरः। दुर्गायां मेदि० दक्षकन्यायां शब्दमा०।

इच्छिभेदशक्तिश्च अर्थबोधानुकूलः पदपदार्थसम्बन्धः स च इदं पदमुमर्थं बोधयतु, इत्यात् शब्दादवगम्यो बोद्धव्य इत्येवंरूपः इच्छात्मकः सङ्केतः, घटादिपदार्थविशेषकं घटादिपदजन्यबोधविषयतानिरूपकेच्छाविषयो वा। मीमांसकास्तु अभिधा नाम पदार्थान्तरं सङ्केतयन्ति शक्तिरित्याहुः। पदपदार्थयोः सम्बन्धान्तरं शक्तिरिति शाब्दिकाः। सा च शक्तिस्त्रिविधा रूढियौगः योगरूढिश्चेति तत्राद्या घटादिपदेषु, द्वितीया पाचकादिपदेषु, तृतीया पङ्कजादिपदेषु। प्राभाकरमते शक्तिर्द्विविधा अनुभविका स्मारिका च तत्राद्या कार्यान्वितेषु, द्वितीया तु ज्ञाते। तत्र गवादिपदानां जात्याकृतिविशिष्टव्यक्तौ शक्तिरिति नैयायिकाः। व्यक्तावेव शक्तिरिति नव्याः। जात्याकृतिव्यक्तिषु तिसृषु शक्तिरिति वैयाकरणाः। ज्ञातायामेव शक्तिर्व्यक्तौ भानं त्वाक्षेपादिति भाट्टादवः। ज्ञातौ व्यक्तौ चोभयत्र शक्तिः किन्तु जात्यंशे ज्ञाता व्यक्त्यंशे स्मारूपसती प्रत्यायिकेति। कार्यान्वितव्यक्तौ शक्तिरिति प्राभाकराः। धातोस्तु फलावच्छिन्नव्यापारे शक्तिरिति

नैयायिकाः। फल एव शक्तिरिति मण्डनादयः। व्यापारे शक्तिरिति रत्नकोषकृत्। आख्यातस्य कृतौ शक्तिरिति नैयायिकाः। कर्त्तरि शक्तिरिति भाट्टिकाः। व्यापारमात्रे शक्तिरिति मीमांसकाः। चतुर्विधविषयत्वात् तस्याश्चातुर्विध्यं शब्दशक्तिप्र० अवच्छेदकतया दर्शितं यथा

"जातिद्रव्यगुणक्रियाभेदैः षड्डेतवस्तया। जातिशब्दादिभेदेन चातुर्विध्यं परे जगुः"। गोत्वशबलादीनां गोत्वादिजात्या, पचत्यादीनां लादेर्द्रव्यत्वेन, धन्यपिशुनादीनां गुणत्वेनादिगुणेन चलनपचनादीनाञ्च शब्दानां कर्मत्वावच्छिन्नशक्तिमत्त्वाच्चातुर्विध्यमेव रूढानामिति तदुक्तं दक्षिणात्यैः "शब्दैरेव प्रतीयन्ते जातिद्रव्यगुणक्रियाः। चातुर्विध्यादमीषान्तु शब्द एवास्तवतुर्विधः" इति।

तदेतच्चिरन्तनं तत्रैव "तदेतच्छङ्कमूकमूर्खादीनामव्यगुन्मादीनाञ्च शब्दानामपरिपक्वतया परिस्फुरमस्माभिः"।

शक्तिग्रह पु० ६त०। शक्तेः सम्बन्धबोधकताऽवच्छेदकत्वेन ज्ञाने।

शक्तिग्राहक पु० शक्तिं गृह्णाति ग्रह-ण्वुल्। १कार्त्तिकेये शक्तिं गृह्णाति बोधयति ग्रह-णिच्-ण्वुल्। "शक्तिग्रहं व्याकरणोपमानात् कोशाप्तवाक्यात् व्यवहारतश्च। वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः" इत्युक्ते शक्तिबोधके २हेतौ। शक्तिग्रहप्रकारश्च शब्दशक्तिप्रकाशिकायां दर्शितो यथा

"षड्डेतवस्तु षड्भिः पूर्वं वृद्धस्य व्यवहारतः। पदादेर्वाक्यशेषाच्च प्रसिद्धेर्वाक्यतोऽपि च। प्रथमं षड्भिरेतेषु षड्डेतवस्तु व्युत्पत्तेः शब्दाधीनव्यवहारादेव बालानां तथा हि गामानयेति केनचिद्वृद्धेन नियुक्तः कश्चन व्युत्पन्नसङ्केतोऽर्थं प्रतीत्य गवानयनं करोति तद्दर्शनमानो बालः इदं गवानयनं खलोचरप्रवृत्तिजन्यं चेष्टात्वान्मदीयचेष्टावदित्यनुमाय सो गवानयनप्रवृत्तिः स्वविषयधर्मिककार्यतानिरूपकजन्या प्रवृत्तित्वात् स्वविषयप्रवृत्तिवदिति प्रवृत्तेर्गवानयनधर्मिककार्यतानिरूपकत्वं प्रसाध्य गवानयनगोचरतज्ज्ञानसमवायिकारणत्वं कार्यत्वाद्घटवदित्यवगच्छन्नः सङ्गच्छितत्वाद्वाक्यात् श्रुतं वृद्धवाक्यमेव तदसाधारणकारणत्वेनावधारयति तदनन्तरञ्च गवादिपदानां प्रत्येकवाक्यांशेनैव गवादिवृद्धौ जनकत्वमवगच्छानतिप्रसङ्गे गवादिपदे तस्य तदतद्वृत्तित्वं कल्पयति। पश्चात् कश्चिदुपलभ्यमानाच्छक्तिग्रहो यथा गवादिपदशक्तिधीसाचिव्येन गोसादृश्यातिदेशवाक्यात् गवयपदवाच्यत्वबोधोत्तरं गवयत्वजात्यवच्छिन्ने गोसादृश्यग्रहात् गवयो गवयपदवाच्य इत्याकारः। क्वचिच्च व्याकरणात् यथा कर्मणि द्वितीया कर्त्तरि परस्मैपदमित्यानुशासनात् कर्मत्वादौ द्वितीयादेः। क्वचित् कोशादपि यथा "शुक्ले शुक्लादयः पुंसि शुक्लिक्लीबे तदादयः"। "सुधीः शिशरो जडः। चूर्णे चोदः सक्तवित्यप्यमरः" इत्यादि कोशेभ्यः शैत्यादौ शुक्लादिशब्दस्य। क्वचिदिरवादपि यथा पचति पाकं करोतीति तुल्यार्थकवाक्यात् तत्वादौ तिङादेः। क्वचित् प्रसिद्धार्थशब्दसामानाधिकरण्यादपि यथा नीरूपस्पर्शवान् वायुर्निःस्पर्शमूर्त्तिमत्त्वान इत्यादौ रूपशून्यस्पर्शवदादिषु वाच्यादिपदस्य। वायुत्वादिजातेरतीन्द्रियत्वेन स्वरूपतस्तदवच्छिन्नस्यानुपस्थित्या तत्र शक्तिग्रहायोगात् यथा वा "सतत्वात्वावच्छेदकां कन्यां ददानः कृतकृत्यः स्यात्" इत्यादावनुकरीत्या कन्यादानादिषु कृतकृत्यादिपदस्य। षड्कारस्तरौ मधुरं रौति पिक इत्यादिकन्तु न युक्तपसङ्गकमेव शक्तिग्रहकोदाहरणं लिङ्गे धर्मिकल्पभेदेन नानार्थान्वयव्युत्पन्नत्वात् प्रत्यक्षसिद्धलौकिकतत्तज्जात्यवच्छिन्न एव बाधेन पिकशब्दस्य शक्त्यवच्छेदात्। क्वचिद्वाक्यशेषादपि यथा यवपदस्य बहुप्रभृतौ स्वेच्छानां दीर्घशूके च शिष्टानां व्यवहारादेकमात्रयत्नैः परिच्छेत्तुमशक्यत्वात् नानार्थत्वस्य चान्याय्यत्वात् यवमयश्चरुर्भवतीतिश्रुतौ यवपदस्यार्थसन्देहे "यवन्ने सर्वधान्यानां जायते प्रवरोत्तमम्। मोदमानास्तु सिञ्चन्ति यवाः क्षिप्रमशालिनः" इति विध्यर्थवाक्यात् प्रवर्षणादाढ्यशेषाद्दीर्घशूक एव यवपदस्य शक्तिग्रहः। यथा वा खारात्यकाशोऽग्निष्टोमेन यजेतेत्यादिविधिशेषीभूतेभ्यः "यज्ञ इःखेन सम्मितं न च यत्तत्पनन्तरम्। अग्निष्टोमेनयीतं च ततसुखं स्वःपदाप्तदम्" इत्यादिवाक्येभ्यः स्वरादिपदस्य"।

शक्तिधर पु० शक्तिं धरति धृ-अच्। १कार्त्तिकेये २सामर्थ्यधरे त्रि० "शक्तिधरः कुमारः" इति रघुः। शक्ति-किण् ६त०। शक्तिघटादयोऽत्र।

शक्तिपर्ण पु० शक्तिरिव पर्णं यस्य। सप्तपर्णे अटा०।

शक्तिपाणि पु० शक्तिः पाणौ यस्य। कार्त्तिकेये स्कन्द० शक्तिहस्तादयोऽत्र। [शक्त्या योद्धरि।

शक्तिहेतिक पु० शक्तिर्हेतिः प्रहरणास्त्रं यस्य कप्।

श(स)त्रु पु० व०व० श(स)द-तन्। (अत्र) अन्नयादिदूषणं

अमरः। ज्ञानशब्दे २।८५ पृ० तद्भेदादि दृश्यम्।

शक्तुफला(ली) स्त्री शक्तव इव सूक्ष्माणि फलान्यस्याः वा ङीप्। शमीवृक्षे शब्दच०। [भेदे

शक्ति(क्तिपृ) पु० वशिष्ठसुनेः पुत्रे पराशरस्य पितरि मुनि-

शक्तु त्रि० शक-तु। प्रियभाषिणि अमरः।

शक्य त्रि० शक-यत्। १शक्तियुक्ते २शक्त्या बोधेऽर्हे। ३समर्थनीये। ४साधयितुं योग्ये च।

शक्यतावच्छेदक त्रि० ६त०। शक्यपदार्थसंसर्गाधारत्वधर्मेण धर्मेण यत्र यस्य शब्दबोधविषयता तत्रिनु धर्मे। यथा घटशब्दः घटत्ववन्तं पदार्थं बोधयति अतस्तदसाधारणधर्मो घटत्वं घटशब्दस्य शक्यतावच्छेदकम्।

शक्र पु० शक-रक्। १इन्द्रे अमरः। २कुटजवृक्षे ३रजतवृक्षे मेदि०। ४ज्येष्ठानक्षत्रे ५ऐरावते च। इन्द्रस्य चतुर्दशविधत्वम् मन्वन्तरभेदेन इन्द्रशब्दे दर्शितमतः तत्संख्यासाम्यात् १४चतुर्दशसंख्यायाम्।

शक्रगोप पु० शक्रं शक्रधनुर्गोपायति रक्षतीव रक्षणात् गुप-अच्। इन्द्रगोपे कीटे जटा०।

शक्रज पु० शक्रात् जायते जन-ड। १खदिरे त्रिका०। २इन्द्रजन्ये त्रि०। शक्रजातादयोऽप्यत्र।

शक्रजित् पु० शक्रं जितवान् जि-क्विप् तुक् च। १रावणपुत्रे मेघनादे राक्षसे। २इन्द्रजेतरि त्रि०।

शक्रधनुस् न० ६त०। मेघलाञ्छने धनुराकारे सूर्यकिरणसम्बन्धे पदार्थभेदे (रामधनुक) अमरः।

शक्रध्वज पु० ६त०। भाद्रशुक्लद्वादश्यां पूजिते इन्द्रदैवते ध्वजाकारे पदार्थे। इन्द्रध्वजशब्दे ८४६ पृ० दृश्यम्।

शक्रनन्दन पु० ६त०। अर्जुने जटा०। २इन्द्रनन्दके त्रि०।

शक्रपर्य्याय पु० शक्रस्य पर्य्यायो नाम नामवत् मध्यपदलोपः। १कुटजवृक्षे रत्नमाला ६त०। इन्द्रस्य २वाचकशब्दे च।

शक्रपादप पु० ६त०। १देवदारुवृक्षे अमरः। २कुटजवृक्षे राजनि०। [अमरः। खार्थे क। तत्रैव रत्नमा०।

शक्रपुष्पी स्त्री शक्रस्येव पुष्पमस्याः ङीप्। अग्निशिखावृक्षे

शक्रभवन न० ६त०। स्वर्गे त्रिका०। शक्रावासादयोऽप्यत्र।

शक्रभूभवा स्त्री शक्रस्योपभुवि भवति भू-अच्। इन्द्रवारुण्याम् शब्दच०। [२इन्द्रजन्यायाम् अदितिश्याम्।

शक्रमाद स्त्री शक्रस्य मादेव। १भार्य्यायाम् राजनि०। ६त०।

शक्रमूर्द्धन् पु० शक्रस्येव शिखावान् मूर्द्धा यस्य। १वल्मीके त्रिका०। ६त०। २इन्द्रमस्तके। शक्रशीर्षादयोऽप्यत्र।

शक्रयष्टी स्त्री शक्रप्रिया यष्टी। इन्द्रवारुण्याम् राजनि०।

शक्रवाहन पु० शक्रं वाहयति वह-णिच्-लु। मेघे शब्दच० इन्द्रवाहनादयोऽप्यत्र।

शक्रवीज न० शक्रस्य कुटजस्य वीजम्। इन्द्रयवे राजनि०।

शक्रशाखिन् पु० शक्रनामकः शाखी। कुटजवृक्षे भावप्र०।

शक्रसारथि पु० ६त०। इन्द्रमातलौ मातलौ।

शक्रसुत पु० शक्रस्य सुतः। १वालिनामके वानरराजे रुक्मायु०। २इन्द्रपुत्रे अर्जुने च।

शक्रसुधा स्त्री शक्रस्य सुधेव। पालङ्क्याम् शब्दच०।

शक्रसृष्टा स्त्री ६त०। हरीतक्याम् त्रिका०।

शक्राख्य पु० शक्रस्येवाख्या यस्य। १पेचके त्रिका०।

शक्राणी स्त्री शक्रस्य पत्नी ङीप् आनुक् च। पुलोमजायाम् इन्द्रपत्न्याम् शब्दमा०।

शक्राशन न० शक्रे आश्यते अश-कर्मणि ल्युट्। भङ्गायाम् "शक्राशनन्तु तीक्ष्णोष्णं मोहजित् कुष्ठनाशनम्। बल-मेधाग्निदं स्रोतोदोषहारि रसायनम्" राजव०।

शक्राशन पु० शक्रं तन्नामधृते आप्नोति अश-ल्यु। कुटजवृक्षे शब्दच०। [संज्ञिप्रकारः।

शक्रि पु० शक-क्रिन्। १मेघे २वज्रे ३गजे ४पत्रे च

शक्रोत्थान न० शक्रस्य तद्ध्वजस्य उत्थानम्। भाद्रशुक्लद्वादश्यां कर्त्तव्ये १शक्रध्वजस्योत्थाने, तद्पद्धतिश्चते २तत्रत्ये च। इन्द्रध्वजशब्दे ८४६ पृ० दृश्यम्।

शक्त पु० शक-क्त। गजे त्रि० को०।

शङ्कु पु० शक-कुच् वा+सुम्। शकटादिवाहकवृषभे धारा०।

शङ्कर पु० शं करोति कृ-अच्। १महादेवे २कल्याणकरे त्रि० ३शिवत्वात् स्त्री ङीष्। ४शमी च शङ्किष्ठायां शब्दच०। ५गव्यां राजनि०। [शुभत्वात्। २कर्पूरे राजनि०।

शङ्करावास पु० ६त०। १कैलासाचले। शङ्करस्यावास इव

शङ्का स्त्री शकि-अ। १त्रासे २वितर्के मेदि० ३संशये च।

शङ्कित त्रि० शङ्का जाताऽस्य तारा० इतच्। १भीते त्रिका० २सन्दिग्धे ३वितर्किते च।

शङ्कु पु० शकि-उण्। १खाणौ। २मत्स्यभेदे। ३शल्याख्ये अमरः। ४कीलके। ५दशकोटिसंख्यायाम् ६तत्सङ्ख्याते। ७महादेवे। ८कलभे मेदि०। ९पक्षिशिरोजाते १०मेढ्रे हेमच०। ११नखीनामकद्रव्ये जटा०। १२छायापरिमाणार्थं काष्ठादिनिर्मिते, "अङ्गुला द्वादशस्पर्शा काष्ठी द्वादशमूलिका। शङ्कुसंज्ञा भवेच्चैव तच्छायां परिकल्पयेत्" इत्युक्ते १३कीलकभेदे च स्त्री०त०। १४जलमेजयपुत्रभेदे भा० आ० ९५ अ०। १५नवरत्नान्त-

र्भेदकविभेदे । दिक्साधनार्थं क्ष० त्रि० शङ्कुश्च दर्शितो यथा

"शिलातलेऽम्बुसंशुद्धे वज्रलेपेऽपि वा समे । तत्र शङ्कुं द्वादशाङ्गुलैरिष्टैः समं मण्डलमालिखेत् । तन्मध्ये स्थापयेच्छङ्कुं कल्पनाद्वादशाङ्गुलम् । तच्छायाग्रं स्पृशेद् यत्र वृत्ते पूर्वापरार्द्धयोः । तत्र बिन्दू विधायोभौ वृत्ते पूर्वापराभिधौ । तन्मध्ये तिमिना रेखा कर्त्तव्या दक्षिणोत्तरा । याम्योत्तरदिशोर्मध्या तिमिना पूर्वपश्चिमा । दिङ्मध्यमत्स्यैः संसाध्या विदिशस्तद्वदेव हि" । तत्र दिक्साधनोपक्रमे प्रथममम्बुसंशुद्धे जलवत् समीकृते शिलाप्रदेशे क्वापि वाथ वा तदभावेऽन्यत्र वज्रलेपे चत्वरादौ घृष्टनादिना समस्थाने कृते शङ्कुकर्णैः शङ्कुच्छायाकर्णविभागसमानष्टकीतैरभीष्टसंख्याकाङ्गुलैर्व्यासार्द्धरूपैर्वृत्तभवक्रमात् लिखेत् । सर्वतः केन्द्राद्वृत्तपरिधिरेखा तुल्या स्यात् तथेत्यर्थः । ततश्चमध्ये तस्य वृत्तस्य केन्द्ररूपमध्ये कल्पनया द्वादशसंख्याकाङ्गुलानि तुल्यानि यस्मिंस्तं द्वादशविभागाङ्कितमित्यर्थः । शङ्कुं समतलसमस्थकपरिधिकाष्टदण्डं स्थापयेत् । ततः पूर्वापरार्द्धयोर्दिनस्य प्रथमद्वितीयभागयोश्छायाग्रं स्थापितशङ्कोश्छायावान्प्रदेशो मण्डलपरिधौ यस्मिन् विभागे स्पृशेत् । दिनस्य प्रथमविभागेऽनुच्चं छायाच्छाद्वृत्ते यत्र प्रविशति दिनस्यापरार्द्धे छायानुच्चषड्डङ्गैर्वृत्तं यत्र निर्गच्छतीत्यर्थः । तत्र निर्गमनप्रवेशस्थानयोरुभौ द्वौ बिन्दू पूर्वापरसञ्ज्ञौ क्रमेण वृत्ते परिधिरेखायां कृत्वा तन्मध्ये पूर्वापरबिन्दुनरमध्ये तिमिना मत्स्येन रेखा कार्या सा दक्षिणोत्तररेखा भवति । मत्स्यस्तु बिन्दुनरालम्बसमितेन व्यासार्द्धेन बिन्दुद्वयकेन्द्रकल्पनेन वृत्तद्वयं निष्पाद्य वृत्तद्वयसंयोगाभ्यां वृत्तद्वयपरिधिविभागाभ्यामन्तर्गतं मत्स्याकारं स्थानं भवति । तत्रैकः संयोगो मुखं बाह्यवृत्तभागसम्मार्जनेनापरसंयोगस्तु पुच्छमितरवृत्तभागद्वयसम्मार्जनेन मुखपुच्छावधृत्वा रेखा दक्षिणोत्तररेखा । तत्र बिन्दोः सव्यं रेखाग्रं दक्षिणा दिक् । पश्चिमबिन्दोः सव्यं रेखाग्रमुत्तरा दिक् । अनन्तरं पूर्ववृत्तं मत्स्यश्च सम्मार्जनीयः । शङ्कुरपि तत्स्थानान्निष्काश्य इति केवला दक्षिणोत्तररेखा स्थितेति तात्पर्यम् । दक्षिणोत्तरदिशोर्मध्यस्थाने तिमिना दक्षिणोत्तररेखामितेन व्यासार्द्धेन दक्षिणोत्तरस्थानाभ्यां पूर्ववत् प्राग्वृत्तं वृत्तं विधाय पूर्ववद्विद्धेन मत्स्येतेत्यर्थः । पूर्वपश्चिमा रेखा कार्या । तत्र पूर्वबिन्दोरासन्नं रेखाग्रं पूर्वा पश्चिमबिन्दोरासन्नं रेखाग्रं पश्चिमेति मत्स्यसम्मार्जने केवला पूर्वापररेखापि सिद्धा । अथ रेखासंयोगस्थानात् दिक्साधनोपक्रमोक्तं पूर्ववृत्तमङ्कयेत् । तद्वृत्तपरिधौ यत्र रेखा लग्ना तत्र दिगिति तद्वृत्तमध्यस्थ दिक्चतुष्टयं वृत्ते सिद्धम् । तद्वत् यथा दक्षिणोत्तराभ्यां पूर्वापरा साधिता तत्प्रकारेणेत्यर्थः । एवकारोऽन्यप्रकारनिरासार्थकः । हि निश्चयेन । विदिशः कोणदिशो दिशां पूर्वादिसिद्धदिशां ये मध्यमत्स्या यस्यवस्थितदिग्वृत्तान्तरोत्पन्ना जलवत्तैः संसाध्याः सम्यक्प्रकारेण साध्याः । रेखावृत्तसंयोगस्थानेन ज्ञेयाः" रङ्गना० ।

छायाशब्दे २८८६ पृ० दृश्यम् ।

शङ्कुकर्ण पु० शङ्कुरिव कर्णोऽस्य । १गदेभे त्रिका० । दानवभेदे हरिवं० ३अ० । ३छन्दोनुचरभेदे भा० ४७ अ० ।

शङ्कुतरु पु० शङ्कुयोग्यस्तरुः । सालवृक्षे शब्दर० । शङ्कुवृक्षादयोऽप्यत्र ।

शङ्कुला स्त्री शकि-उलच् । १घत्तूरपत्रिकायाम् संक्षिप्तसा० पुगच्छेदकाख्यभेदे (जाति) शङ्कुलाखण्डः इति सि०कौ० ।

शङ्कोच(चि) पु० शकि-उच-(उचि) वा । मत्स्यभेदे जटा० ।

शङ्ख पु०न० शम-ख । १खनामख्याते खसदृजाते पदार्थे अमरः । २ललाटास्थ्नि, ३निधिभेदे, ४नखीनामगन्धद्रव्ये मेदि०, ५कर्णसमीपस्थे-अस्थ्नि, ६नागभेदे, ७कक्षिदलमध्ये त्रिका० । ८दशनिखर्वसंख्यायां, तत्संख्याते च । तस्य शङ्खचूडासुरास्थितस्तद्वृत्तिः ब्रह्मवै० ब्रक० १८अ० उक्ता यथा ।

"अथ शम्भुहरेः शूलं जघान दानवं प्रति । तीव्रमध्याङ्गभागं षडङ्गमानरूपसंयुतम् । शूलञ्च भस्मसात् कृत्वा पपात दानवोपरि । चकार भस्मसात्तञ्च सरयाबलीलया । स शिवस्तेन शूलेन दानवस्थास्थिजालकम् । प्रेषणा च प्रेरयामास जलधौ च सागरे । अस्थिभिः शङ्खचूडस्य शङ्खजातिर्बभूव ह । नानाप्रकाररूपा च शस्यत्पूता सुराचने । प्रशस्तं शङ्खतोयञ्च देवानां प्रीतिदं परम् । तीर्थतोयसरूपञ्च पवित्रं शम्भुना विना । शङ्खशब्दो भवेद्यत्र तत्र लक्ष्मीश्च सुस्थिरा । स स्नातः सर्वतीर्थेषु यः स्नातः शङ्खवारिणा । शङ्खे हरेरधिष्ठानं यतः शङ्खस्ततो हरिः । तत्रैव सततं लक्ष्मीर्दूरीभूतमशङ्खकम् । स्त्रीणाञ्च शङ्खवलिभिः

शुद्धाच्च विशेषतः। भीता रुदा याति लक्ष्मीः सत्यं मन्यत् स्वभावतः" १०क्षुद्रभेदे तन्त्रसा०। ११प्रस्तरभेदे। युक्तिकल्पतरौ तल्लक्षणादि यथा "क्षीरोदकूलेऽपि सुराष्ट्रदेशे तदन्यतोऽपि प्रभवन्ति शङ्खाः। वरत्वकार्यास्तमिश्रुभासः सुलक्षणाक्रा गुरवो महान्तः। ते वामदक्षिणावर्त्तभेदेन द्विविधा मताः। दक्षिणावर्त्तशङ्खस्तु कुर्यादायुर्यशोधनम्। तेनैव शिरसा यस्तु श्रद्धानः प्रतीच्छति। वारि क्षिप्त्वा स पापानि मुच्यमाप्नोति मानवः। दृक्तत्वं स्निग्धताक्त्वं शङ्खस्येति गुणत्रयम्। आवर्त्तभङ्गदोषो हि हेमयोगादिनश्यति। ब्रह्मादिजातिभेदेन स पुनश्चतुर्विधः"।

"ये स्निग्धमसृणाकारा मृदवो लघवस्तथा। ब्राह्मण्याः प्रस्तराश्चेयाः सर्वकर्मसु शोभनाः। ये दृढाङ्गाः सुगुरवस्त्रयांशांशविभागिनः। क्षत्रियाश्चेयाः कर्कशाङ्गास्तथैव च। मृदवो गुरवो ये तु ये श्वेतेनैव रचिताः। ते वैश्याः स्त्रविभक्तांशा युजन्ते सर्वकर्मसु। ये कर्करावृताङ्गाश्च कर्करा ये प्रतिष्ठिताः। वेदत्यजगुरवः स्निग्धास्ते शूद्राः प्रस्तराधमाः। इति प्रोक्तमशेषेण सम्यक् पाषाणलक्षणम्। विचार्य्य मतिमान् कार्य्यं नियोक्तव्यं विचक्षणैः"।

शङ्क न० शङ्ख विकारः वुन्। १शङ्खजाते वलयाकारे पदार्थे मेदिनि० २शिरोरोगे पु० तस्य लक्षणादि यथा "पित्तरक्तानिलाद्दुष्टाः शङ्खदेशे विमूर्च्छिताः। तीव्रमुग्दारुरोगं हि शोथं कुर्वन्ति दारुणम्। सशिरोविषवद्देशमशिरध्याशु मरणं तथा। शिराव्याप्तीवितं ह्यन्ति शङ्खको नाम नामतः। अत्रहाल्लोपितभैषज्यं प्रत्याख्येयस्य कारयेत्। पित्तरक्तानिलाद्यत्र कफोऽपि योज्यः "क्षतानुतापः कफपित्तरक्तैरिति" सुश्रुतवचनात्। विमूर्च्छिताः प्रदुष्टाः शिरात्रात् शिरामध्ये मारयति" भावप्र०।

शङ्ककार पु० शङ्कं तद्विकारं वलयाकारं पदार्थं करोति ण-अच्। वर्णसङ्करजातिभेदे (शाँखारी)। स तु शूद्रागर्भे विश्वकर्मतो जातः ब्रह्मवै०। [कारा स्त्रिका०।

शङ्कचरी स्त्री शङ्के ललाटास्थि चरति चर-ट। ललाटिकास्थ्नि शङ्खचर०।

शङ्कचर्चा स्त्री शङ्खस्य चर्चा भूषा यतः। ललाटिकायां [स्त्रियां क्रमिहरं परम्" राजव०।

शङ्कचूर्ण न० ६त०। शङ्खजाते चूर्णे। "शङ्खचूर्णं कटु चार-

शङ्कद्रावक पु० औषधविशेषे। तत्पाकादि यथा "अर्क-स्नुही तथा चिञ्चा तिलारण्डवचित्रकम्। क्षारमार्कं भक्षसमं वस्त्रपूतं जलं हरेत्। लवणेन समौ याह्यौ द्वौ क्षारौ टङ्कणं तथा। सप्तकृत्वेनगोदन्तकाशीशं सोरकं तथा। द्विगुणं पञ्चलवणं मातुलुङ्गरसेन च। काचकूप्यान्तु संग्राह्यं वासयेदम्लयोगतः। शङ्खचूर्णपलं दत्त्वा वारयो यत्नसङ्हरेत्। सर्वधातून् हरेच्छीघ्रं वराटीशङ्खकादिकान्। उदरादिकरोगाणां सद्यो हि नाशकः परः" भैषज्यर० "योगिनीभैरवाभ्याच्च बलिमादौ प्रदापयेत्। पश्चाद् यत्नश्च कर्त्तव्यमेवाह परमेश्वरी। रसः शङ्खद्रवो नाम ब्रह्मदेवेन भाषितः। गुह्याद् गुह्यतमं गुह्यमिदानीं कथ्यते मया। शङ्खचूर्णं यवक्षारं सर्जिकाक्षारटङ्कणम्। समञ्च पञ्चलवणं स्फटिकारी त्रयादरः। काचकूप्यां ततः क्षिप्त्वा वारयो यत्नसङ्हरेत्। यामार्द्धं द्रावयत्येव शङ्खगुल्मिवराटकान्। अर्शांसि नाशयेत् षट् च मूलशूलाश्मरीं तथा। उदराष्टविधं हन्ति गुल्मप्लीहोदराणि च। अजीर्णं नाशयेच्छीघ्रं यकृत्पीहञ्च विंशतिकाम्। भुक्तेऽर्धे च भोक्तव्यो मात्रमात्रोरसोत्तमः। क्षयमात्राद्वयेत् भक्षं पुनर्भोजनमिच्छति। प्रत्यहं भोजनान्ते च सेव्योऽयं रसोत्तमः। न रजायां क्वापि सत्यं सत्यं वदाम्यहम्। न देयं यस्य कस्यापि सदा गोप्यस्य कारयेत्। रसः शङ्खद्रवो नाम वैद्यानामुपकारकः"।

शङ्खद्राविन् पु० शङ्खं द्रावयति द्रु-णिच्-णिनि। खञ्जवेतसे राजनि०।

शङ्खधरा स्त्री ष-अच् ६त०। स्त्रियोषिकायाम् रत्नमा०।

शङ्खध्म पु० शङ्खं धमति धमा-क। शङ्खवादके। क्विप्। शङ्खध्मा इत्यपि।

शङ्खनख पु० शङ्खस्य नख इव। १क्षुद्रमत्स्ये (झोङ्गा) अमरः। २नखीनामगन्धद्रव्ये शब्दर० स्त्रीत्वमपि तत्र ङीष्।

शङ्खपुष्पी स्त्री शङ्ख इव पुष्पमस्याः ङीष्। (शङ्खाली) वृक्षे राजनि०। "शङ्खपुष्पी तु तीक्ष्णोष्णा मेध्या कृमिविषापहा"। राजवल्लभः "शङ्खपुष्पी सरा मेध्या कृष्णा मानसरोगनुत्। रसायनी कषायोष्णा स्मृतिकान्तिबलाग्निदा। दोषापस्मारमूलास्रकृकृकृमिविषप्रणुत्" भावप्र०। [हेमच०।

शङ्खभृत् पु० शङ्खं बिभर्त्ति भृ-क्विप्, तुक् च। विष्णौ

अङ्गमुख पुं क्ली० अङ्गस्य इव मुखमस्य । कुम्भीरे हेमच० । स्त्रियां ङीप् । [चक्रा) क्षुपभेदे शब्दच० ।

अङ्गिका स्त्री अङ्गसदृशाकारं पुष्पमस्त्यस्याः ठन् । (चोरक-

अङ्गिन् पु०अङ्ग+अस्त्यर्थे इनि । १विष्णौ, २सदृशे च मेदि० ।

अङ्गिनी स्त्री अङ्गसदृशाकारं पुष्पमस्त्यस्याः इनि । १चोर-पुष्पवृक्षे, अमरः । २श्वेतपत्राग्रे २विश्वः । ४श्वेतवृक्षायां ५श्वेतचुक्रायां, ६युवतिक्षायां, राजनि० । ७स्त्री-भेदे, ८वपदेवताभेदे:, (शाकविक्री) ९अङ्गसदृश्यां स्त्रियाञ्च । स्त्रीभेदलक्षणं रतिमञ्जर्यामुक्तं यथा

"दीर्घा सुदीर्घनयना वरसुन्दरी या कामोपभोगरसिका सुपयोधरयुक्ता । रेखात्रयेण च विभूषितकण्ठदेशा सम्भोगलोलरसिका किल अङ्गिनी सा" । "अश्वे पद्मिनी वृद्धा चित्रिणी रमते खगे । हस्ते अङ्गिनी वृद्धा हस्तिनी रमते हये" । "पद्मिनी पद्मगन्धा च मीनगन्धा च चित्रिणी । अङ्गिनी चारुगन्धा स्यात् मृगगन्धा च हस्तिनी" । [राजनि० ।

अङ्गिनीफल पु० अङ्गिन्या इव फलमस्य । शिरीषवृक्षे

अङ्गिनीवास पु० ६त० । शाखोटवृक्षे शब्दच० ।

अच गतौ भ्वा० आत्म०सक० सेट् इदित् । अचते, अञ्चिष्ट ।

अच वाचि भ्वा० आत्म० सक० सेट् । अचते अञ्चिष्ट ।

अचि(ची) स्त्री अच-इन् वा ङीप् । १इन्द्रपत्न्याम् अमरः । २करशाखान्तरे मेदि० ।

अचीपति पु० ६त० । इन्द्रे अमरः । अचीभक्तादयोऽप्यत्र ।

अट(ठ) शाखायां चु० आ० सक० सेट् । अटि(ठ)यते अघी-अट(ठ)त । [अटति । अघाटीत् अघटीत् ।

अट गादे अक० रोगजनने गतौ भेदे च सक० पर० भ्वा०

अट पु० अटति दलं अट-अच् । १अन्ने त्रि०कौ० । २सिंहकेसरे ३जटावाञ्च स्त्री अमरः टाप् ।

अटि(टी) स्त्री अट-इन् वा ङीप् । (वन आदा) खनाम-ख्याते ओषधिभेदे

"अटी पलाशी अङ्गपत्रा छत्रता गन्धमूषिका । गन्धारिका गन्धवधूर्वधूः पृथुपलाशिका । भवेदगन्धपलाशी तु कषाया याक्षिणी लघुः । तिक्ता तीक्ष्णा च कटु-रुष्णास्यमलनाशिनी । शोषकासव्रणश्वासशूलाध्मान प्रणाशनी" भावप्र० ।

अटक न० अट-क्विप् टक-अच् कर्मधा० । घृतलवणमिश्रित-माषचूर्णे । "माषचूर्णं घृतं तोयं मिश्रितं अटकं वदेत्" भावप्र० ।

अठ बधे सक० कैतवे क्लेशे च अक० भ्वा० पर० सेट् । अठति अठाठीत् अठठीत् ।

अठ आलस्ये चु०पर०अक०सेट् । आठयति ते अघीठठत् त ।

अठ दुष्टवचने चु०पर०सक०सेट् । अठयति ते अघठठत् त

अठ न० अठ-अच् । १तगरे २कङ्कुमे ३खौड़े च राजनि० । ४धूसूरे ५मध्यस्थपुरुषे च पु० । "प्रियं वक्ति पुरो-ऽन्यस्य विप्रियं कुरुते भृशम् । व्यक्तापराधचेष्टश्च अठो-ऽयं कथितो बुधैः" विष्णुपु० अङ्के धूसूरे त्रि० मेदि० ७नायकभेदे पु० तल्लक्षणं यथा

"अठोऽन्यसेवक वल्लभावो यः । दर्शितबहिरतुरागो विप्रि-यमन्तः गूढमाचरति" सा० द० ।

अठता स्त्री अठस्य भावः तल् । शाठ्ये वञ्चनायाञ्च । [राजनि०

अठम्बा स्त्री अठ-अच् अजि-अच् कर्म० अक० । अम्बष्ठायाम्

अड संघाते रोगे च अक० भ्वा० पर० सेट् इदित् । अण्डति अण्डिष्ट । [अशाखे मेघतः ।

अण दाने भ्वा० पर०सक० सेट् । अणति अणीत् अणीत्

अण पु० अण-अच् । खनामख्याते क्षुपभेदे हेमच० ।

अणघण्टिका स्त्री अणः अणुरेव तत्तुल्यरवकलकलत्वात् स्वार्थे कन् । अणुकारवल्लफलायाम् अणुपुष्प्यां राजनि० ।

अणपर्णी स्त्री अणस्येव पर्णान्यस्याः ङीप् । अजमोदायाम् राजनि० । [अणे स्वार्थे क । तत्रैव ।

अणपुष्पी स्त्री अणस्येव पुष्पमस्याः ङीप् । (भ०भजने) वन-

अणसूत्र न० अणाज्जातं सूत्रम् । अणजाते सूत्रे अमरः ।

अणालुक पु०अण इवालुकः । आरेवतवृक्षे (शोणालु) शब्दर०

अणिका स्त्री अणस्तत्पुष्पमस्त्यस्याः ठन् । अणपुष्प्यां राजनि०

अण्ड न० अडि-अच् । १पक्षादिसमूहे शब्दर० । २नपुंसके ३वृषे च द्विरूपकोष० । [तस्यापत्यं यञ्जौ० फञ् आण्डिक्य ।

आण्डिल पु० अडि-इलच् । आण्डिल्यस्य पितरि मुनिभेदे

अण्डज न० अण्ड-ड तस्य नेत्वम् । १अन्तःपुररक्षके क्लीबे २क्लीवमात्रे अमरः । ३वृषे मेदि० ४अन्त्यपुरुषे जटा० ५अण्डस्थे घनकुञ्जरः ।

अत न० एक०व० शो-डतच् । १खनामख्यातसंख्यायाम् २बहुसंख्यायां ३ततसंख्याते च । स्वार्थे क । तत्रैव न० अतवाचकशब्दाश्च धार्त्तराष्ट्रः१ अतसिक्षा तारा२ पुरु-षायुष्यम्३ रावणाकुलिः४ पद्मदलं५ इन्द्रयवः६ अस्थिशो-धनम्७ अविकल्पवता । [अवयवे कन् । २अतसंख्यायां न० ।

अतक त्रि० अतं परिमाणमस्य कन् । १अतसंख्यायुक्ते ।

अतकुम्भ पु० अतं कुम्भाकारम् । अण्डजनिपर्वतभेदे भरतः ।

शतकोटि पु० शतं कोटयोऽस्यामि यस्य । १वज्रे अमरः । शतगुणिता कोटिः भाक० । २शतगुणितकोटिसंख्यायां स्त्री ।

शतक्रतु पु० शतं क्रतवोऽस्य । इन्द्रे अमरः ।

शतग्रन्थि स्त्री शतं ग्रन्थयोऽस्य । दूर्वायाम् राजनि० ।

शतघ्नी स्त्री शतं हन्ति हन-टक् । १अस्त्रभेदे "अयःकण्टकसंछन्ना शतघ्नी महती शिला" विजयरक्षितः । २हंचकाख्यां १करञ्जे च मेदि० ।

शततम त्रि० शतस्य पूरणः तमप् । शतसंख्यापूरणे ।

शततारा स्त्री शतसंख्यिता तारा: भाक० । शतभिषानक्षत्रे ।

शतदन्तिका स्त्री शतं दन्ता इव सन्त्यस्य ठन् । नागदन्त्याम् राजनि० ।

शतद्रु पु० शतधा द्रवति-द्रु-क्विप् नि० । नदीभेदे तन्नामनिरुक्तिर्यथा "शोके बुद्धिं तदा चक्रे नचैकत्र व्यतिष्ठत । सोऽगच्छत् पर्वतांश्चैव सरितश्च सरांसि च । हृदा स(वसिष्ठः) पुनरेवाधिनदीं हैमवतीं तदा । चखड्याश्चवतीं भीमां तस्याः स्रोतस्यपातयत् । सा तमस्मिन्यमं विप्रमनुचिन्त्य सरिद्वरा । शतधा विद्रुता यस्माच्छतद्रुरिति विश्रुता । ततः स्वमतं दृष्ट्वा तस्याप्यात्मानमात्मना । मर्तुं न शक्ष्यामीत्युक्त्वा पुनरेवाश्रमं ययौ" भा० आ० १७७ अ० ।

शतधा स्त्री शतं धान् धत्ते धा-क । १दूर्वायाम् । शत+प्रकारे धाच् । २शतप्रकारे अव्य० ।

शतधामन् पु० शतं धामानि यस्य । विष्णौ जटा० ।

शतधार पु० शतं धारा यस्यामि यस्य । १वज्रे त्रिका० । २शतधारायुक्ते त्रि० "वसोः पवित्रमसि शतधारम्" यजुर्वेदः १२।४९ । [३स्वर्गे च विश्वः ।

शतधृति पु० शतं धृतयोऽस्य । १इन्द्रे २ब्रह्मणि मेदि० ।

शतपत्र न०शतं बहूनि पत्राणि सुषम्यदलान्यस्य । १पद्मे अमरः । २मयूरे ३खारशल्लके ४दार्वाघटशल्लके मेदि० ५राजकीरे हेमच० ।

शतपत्री स्त्री शतं पत्राणि दलान्यस्याः ङीष् । (सेवोति) पुष्पवृक्षभेदे । स्वार्थे क । तत्रैव । [चालकपक्षभेदे ।

शतपथ पु० शतं पन्थानो यत्र अच्समा० । यजुर्वेदीयब्राह्म-

शतपथिक त्रि० शतपथं वेत्त्यधीते वा ठन् । शतपथब्राह्मणाध्यायिनि ।

शतपद न० शतं पदानि यत्र । ज्योतिष्योक्ते नक्षत्रपादानुसारेण नामकरणोपयोगिप्रथमवर्णसूचके १चक्रभेदे चक्रशब्दे २८।७ दृ० दृश्यम् । शतं पादाः यस्याः पादुभावः समा० ङीष् पद्भावः । शतपदी २कीटभेदे (कानखजूरा) स्त्री अमरः । ३शतमूल्यां राजनि० । [रत्नमा० ।

शतपद्म न०शतदलयुक्तं पद्मम् । १शतदलकमले २श्वेतपद्मे च

शतपर्वन् पु० शतं पर्वाणि ग्रन्थयो यस्य । १वंशे अमरः २ईक्षुभेदे च "शतपर्वा भवेत् किञ्चित् कोषकारसुधान्वितः । विशेषात् किञ्चिदुष्णश्च सक्षारः पवनापहः" भावप्र० । ३कटुकायां राजनि० । ४वचायां ५दूर्वायां च स्त्री ङीभाभ्यां मेदि० । ७कोलासरपूर्णिमायां शब्दरत्ना० । कप् । तासु मेदि० टबपि शब्दर० ।

शतपाद् स्त्री शतं पादा यस्याः पाद्भावः । कीटभेदे (कानखजूरा) जटा० । [जटा० । २जलौकायां च शब्दर० ।

शतपादिका स्त्री शतं पादा मूलान्यस्याः कप् । १काकोल्यां

शतपुष्पा स्त्री शतं पुष्पाणि यस्याः । (सुलफा) १शाकभेदे (मौरी) २क्षुपभेदे च । कप् । तत्रैव ।

"शतपुष्पा कटुः स्निग्धा तिक्तोष्णा कफवातजित् । रुच्याक्तिक्तिता नेत्र्या बृंहिणी क्रमिशुक्रकृत् । संग्राहिभीतला तिक्ता दाहतृट् वातजा जयेत्" भावप्र० । किरातार्जुनीयमहाकाव्यकारके भारविकवौ पु० त्रिका० । [राजनि० ।

शतप्रसूना स्त्री शतं प्रसूनानि यस्याः । (सुलफा) शाके

शतप्रास पु०शतं प्रासा इव फलानि यस्य । करवीरवृक्षे अमरः

शतभिषज् स्त्री शतं भिषज इव तारा: यत्र । शततारातत्रके चन्द्रस्यादिषु चतुर्विंशे नक्षत्रे । शतभिषाप्यत्र स्त्री

शतभीरु स्त्री शतं बहवो वियोगिनो भीरवो यस्याः ५त० । मल्लिकायाम् अमरः तद्दर्शने हि बहुवियोगिनां कामोद्दीपनात् ततो भीरुत्वम् । [२भेचके च ।

शतमख पु० शतं मखा यज्ञा यस्य । १इन्द्रे हलायुधः ।

शतमन्यु पु० शतं मन्यवो यज्ञा यस्य शते देवेषु मन्युः क्रोधो वा यस्य । १इन्द्रे अमरः । २भेचके च ।

शतमान पु०न० शतेन मीयते मि-ल्युट् । १रूप्यपले २आढ़के ३तत्परिमिते च अमरः । [चिकित्सके ।

शतमारिन् पु० शतं मारयति मृ-णिच्-णिनि । विशिष्ट-

शतमुखी पु० शतं मुखानि यस्याः ङीष् । १संभालुवायां २शतमुखयुक्ते त्रि० ।

शतमूला स्त्री शतं मूलान्यस्याः टाप् । १दूर्वायां २शतनामख्यातायां लतायाञ्च ङीषन्तः अमरः । [भेदे अमरः ।

शतयष्टिका पु० शतं यष्टयो गुच्छा यस्य । शतगुच्छके हार-

शतरुद्रीय न०शतं रुद्रानधिकृत्य कृतो ग्रन्थः छ । १यजुर्वेदोक्ते "नमस्ते रुद्र ! मन्यव इत्यादिके रुद्राध्याये ।

शतरूपा स्त्री शतं रूपाण्यस्याः । १ब्रह्मणः पत्न्यां २तत्कन्यायां सावित्र्यां च "ततः संजपतस्तस्य भित्त्वा देहमकल्मषम् । स्त्रीरूपमर्द्धमकरोद्दक्षं पुरुषरूपवत् । शतरूपा च सा ख्याता सावित्री च निगद्यते । सरस्वत्यश्च गायत्री ब्रह्माणी च परन्तप । दृष्ट्वा तां व्यथितस्तावत् कामबाणार्दितो विभुः । उपयेमे स विश्वात्मा शतरूपामनिन्दिताम् । ततः कालेन महता ततः पुत्रोऽभवन्मनुः । स्वायम्भुव इति ख्यातः स विराड्रिति नः श्रुतम्" भागवते ३अ० ।

शतवीर्य्या स्त्री शतं वीर्य्याण्यस्याः ५ब० । १श्वेतदूर्वायाम् २शतावर्य्यां ३कपिलद्राक्षायां च राजनि० ।

शतवेधिन् पु० शतं विधति विध-णिनि । ऊखवेतसे अमरः

शतसहस्र न० शतगुणितं सहस्रं मध्य० । लक्षसंख्यायाम् ।

शतसाहस्र त्रि० शतं सहस्राणि परिमाणमस्य अण् उत्तरपदवृद्धिः । लक्षसंख्याते ।

शतह्रदा स्त्री शतं ह्रादाः शब्दायस्याः पृषो० ह्रस्वः । १विद्युति अमरः । २वज्रे मेदि० ३दक्षकन्याभेदे वा ङीप्

शताची स्त्री शतमक्षीण्येव मुखान्यस्याः अच् समा० ङीप् । १रात्रौ २शतमुखायाम् । शब्दच० ३दुर्गायाञ्च "भूयश्च शतवार्षिक्यामनावृष्ट्यामनम्भसि । मुनिभिः संस्तुता भूमौ सम्भविष्याम्ययोनिजा । ततः शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीन् । कीर्त्तयिष्यन्ति मनुजाः शताक्षीमिति मां ततः" देवीभागवाख्ये । [ह्रस्वे च राजनि० ।

शताङ्ग पु० शतमङ्गान्यवयवावस्य । १रथे अमरः २तिनिशे ।

शतानन्द पु० शतमानन्दयति णिच् । गोतमपुत्रे अहल्यागर्भजे १मुनिभेदे । स च जनकराजपुरोहितः । २देवकीनन्दने मेदि० ३ब्रह्मर्षि भेदच० ४विष्णुरथे त्रिका० । ५शतजनानन्दके त्रि० ।

शतानीक पु० शतमनीकानि यस्य । १व्यासशिष्ये मुनिभेदे २चन्द्रवंश्ये नृपभेदे मेदि० । ३मुदाकरराजपुत्रे भाग० ९।२२ अ० ।

शतार न० शतमराण्यस्य । वज्रे त्रिका० ।

शतारुस् न० शतं अरूंषि यत्र । क्षतभेदे "रक्तं स्रावं सदाहार्त्तिं शतारुः स्यात् वक्षत्रणम्" भावप्र० ।

शतायुस् त्रि० शतमायुर्वर्षकालोऽस्य । शतवर्षमितवयस्के "शतायुर्वै पुरुषः" श्रुतिः ।

शतावरी स्त्री शतमाष्टणोति या+वृ-अच् गौरा० ङीष् । १शतमूल्याम् अमरः । "शतावरी सुरः शीता तिक्ता रसायनी । मेध्यास्निग्धोष्टदा स्निग्धा नेत्रा गुल्मार्तिसारजित् । शुक्रस्तन्यकरी बल्या वातपित्तास्रशोषजित् भावप्र० । २रुद्रभार्य्यायां शब्दच० । ३शक्यां त्रिका० । [वर्त्तते यिनि । तत्रैव । शतावर्त्तिन् ।

शतावर्त्त पु० शतमावर्त्ता यस्य । विष्णौ हेमच० । शतधा

शताह्वा स्त्री शतं शतमूली शतपुष्पा वेति आह्वा यस्याः अभ्यपदलोपः । १शतमूल्यां राजनि० २शतपुष्पायाञ्च जटा०

शतिक त्रि० शतेन क्रीतः, तस्य विकारः तस्येदं वा ठन् । १शतेन क्रीते पदार्थे । २तद्विकारे शतसम्बन्धिनि च । शतमस्मै ददाति आयः लाभः शुल्कम् उपदा वा दीयते ठन् । ४दक्षाद्यादिरूपेण शतदानसम्प्रदाने । पचे बहुलं तत्रार्थे । [व्येय क्रीतादौ शतिकशब्दार्थे ।

शत्य त्रि० शतेन क्रीतः शतिकशब्दवत् यत् । शतसंख्यातद्०

शत्रु पु० शद-त्रुन् । १रिपौ राज्ञां २विषयानन्तरस्थे नृपे अमरः ३ज्योतिषोक्ते लग्नावधिकषष्ठस्थाने ४कामादिषु च । ५ज्ञातके त्रि० । [तृच्प्रत्ययान्तजे २रिपुवाचके त्रि० ।

शत्रुघ्न पु० शत्रून् हन्ति हन-क । दशरथात्मजे सुमित्रागर्भजे

शद शातने शैथिल्यतायां भ्वा०पर०सक०अनिट् वृदित् । शीयते अशदत् । शत्स्यति ।

शद गतौ भ्वा०पर०सार्वधातुके आत्म० सक०अनिट् । शीयते

शद पु० शद-अच् । फलमूलादौ सिद्धान्नकौ० ।

शद्रि पु० शद-क्रि । १मेघे २शिखरिणि मेदिनी० ३गजे शब्दा०

शद्रु त्रि० शद-क्रु १पतनकर्त्तरि २गन्तरि च ।

शनकावलि(ली) स्त्री शनैः कायति कै-क पृषो० तेषामावलिर्यत्र वा ङीप् । गलपिप्पल्यां शब्दच० ।

शनपर्णी स्त्री शणस्येव पर्णान्यस्याः पृषो० णस्य नः । कटुक्यां शब्दच० ।

शनि पु० शो-अनि किच्च । १सूर्य्यपुत्रे छायागर्भजाते षष्ठभेदे "शनिर्विरूक्षोऽनिलवन्मतिमान् शूद्राकृतिः धातुःसमोस्थिरश्च । क्रूरः प्रतीचीतुपरोऽतिदृष्टोऽकरः शितीट् दीर्घतनोऽलसोऽहम्" । नील० ताज० । "मन्दोऽलसः कपिलकृष्णदीर्घगात्रः स्थूलद्विजः पवनरोगकफोपनिलात्मा" हरिवंशा० । २तत्स्वामिकदिने च "शनौ वन्ध्यां विजानीयात्" ज्यो० त० । [वारे ।

शनिवार पु० शनिस्वामिकोवारः । सूर्य्यादिवारमध्ये सप्तमे

शनैश्चर पु० शनैश्चरति चर-अच् । शनिग्रहे तस्य षष्ठ्यर्थां मध्ये सर्वोपरिकक्षास्थितत्वात् बहुकालेनैकराशिभोगात् मन्दगतित्वम् । [अमरः ।

शनैस् अव्य०मन्द-डैसि पृषो० तुक् च । मन्दे २अशैघ्र्ये च

अम्स हिंसायां स्तुतौ कथने च भ्वा० पर० सक० सेट् ङ्गा सेट् । अंसति अंसीत् । [अंसति ते अंसाप्नोत् ।
अप आक्रोशे वा भ्वा०पक्षे दिवा०उभ०सक०अनिट् । अपति ते
अपथ पु० अप-अथन् । सत्यताकरणाय दिव्यभेदकरणे यथा एतत् यदि मिथ्या स्यात् तदा मे एतदनिष्टं स्यादित्यादि
अपन पु० अप-ल्युट् । १अपथे अमरः । २गाढौ त्रिका० ।
अप्त त्रि० अप-क्त । १अभिशापयुक्ते २उक्तपाक्ये हत्यभेदे पु० शब्दच० । [च मेदि० ।
अफ न०अम-अच् पृषो०दस्य फः । १गवादीनां खुरे २वृक्षमूले
अफर पुंस्त्री० अफं राति रा-क । (पुटी) मत्स्यभेदे अमरः स्त्रियां ङीष् ।
अफराधिप पु० ई०त० इक्षिसमत्स्ये त्रिका० । [शब्दत् त ।
अब्द शब्दकरणे अ०चु०उभ० सक० सेट् । शब्दयति ते अब-
अब्द पु० शब्द-घञ् । १ध्वन्यात्मके २वर्णात्मके च श्रोत्रेन्द्रियग्राह्ये आकाशस्थे गुणभेदे ।
अब्दग्रह पु० शब्दं गृह्णाति गृह-अच् । १श्रोत्रेन्द्रिये शब्दवं अप् ई०त० । २शब्दज्ञाने ।
अब्दतन्मात्र न० कर्म० । सांख्यमतसिद्धे आकाशकारणे सूक्ष्मभूतभेदे तन्मात्रशब्दे ३२२८ पृ० दृश्यम् ।
अब्दन त्रि० शब्द-ल्यु । शब्दकारके अमरः ।
अब्दब्रह्मन् न०शब्दात्मकं ब्रह्म । १वेदात्मके २स्फोटात्मके च नित्ये शब्दरूपे ब्रह्मणि । [१वाणभेदे २अर्जुने त्रिका० ।
अब्दभेदिन् पु०शब्दानुसारेण भिनत्ति शब्दम् भिद्-णिनि ।
अब्दवेधिन् पु० शब्दानुसारेण विध्यति शब्दं विध-णिनि । १वाणभेदे २अर्जुने च धनञ्जयः ।
अब्दशक्ति स्त्री ई०त० । शब्दानामर्थावबोधकतारूपे अभिधालक्षणादौ वृत्तिरूपे शाक्तयें ।
अब्दाधिष्ठान न० ई०त० । कर्णे हेमच० ।
अब्दानुशासन न० अनुशिष्यतेऽनेन अनु+शास-ल्युट् ई०त० । शब्दसाधुतानुशासके व्याकरणे । "अथ शब्दानुशासनम्" महाभाष्यम् ।
अब्दालङ्कार पु० शब्दमालक्षतोऽलङ्कारः । अलङ्कारशास्त्रप्रसिद्धेऽनुप्रासादौ अलङ्कारे । अलङ्कारशब्दे तद्भेदादिकं दृश्यम् ।
अब्दित त्रि० शब्द-क्त । आहूते ।
अभ्र भ्रान्तौ सक० भ्रान्तीकरणे सक० दि० शमा० पर० सेट् । भ्राम्यति इरित् अभ्रमत्-अभ्रमीत् । उदित् ङ्गा सेट् । भ्रान्तः । भ्रमयति भ्रामयति ।
अभ्र भाषोचने चु० उभ० सक० सेट् । भ्रामयति ते भ्रमयति ते अभीभ्रमत् त ।
अभ्र पु० भ्रम-घञ् । १भ्रान्तौ अन्तरिन्द्रियदमने अमरः । २मोहे त्रिका० ३पाशौ रामाश्रमः । ४वञ्चनाचारे राजनि० ।
अभ्रथ पु० भ्रम-अथच् । १भ्रान्तौ अमरः । २मन्त्रिणि मेदि० ।
अभ्रन पु० भ्रमयति भ्रम-णिच्-ल्यु । लोकानां पुण्यापुण्यफलदातृत्वेन दण्डकारके १यमे अमरः । भ्रम-णिच्-भावे ल्युट् । २भ्रान्तीकरणे न० । ३वञ्चनार्थमृगघाते अमरः ४चर्वणे धरणिः ५हिंसायां हेमच० ६स्कन्धभेदे शब्दच० ।
अभ्रनस्थ स्त्री ई०त० । यन्त्रनाभ्यां अमरः ।
अभ्रल न०भ्रम-कलच् । १विष्ठायां अमरः । २पापे संक्षिप्त०
अभ्रि(मी) स्त्री भ्रम-इन् वा ङीप् । (भाँड) १वल्लभेदे "भ्रमी तिक्ता कटुः शीता कषाया रेचनी लघुः । कफकासश्रमश्वासकृमिशोफहरा स्मृता" भावप्र० । २शिम्बायाञ्च (शुँटि) हेमच० । ३वायुञ्जो मेदि० ।
अभ्रिन् त्रि० भ्राम्यति भ्रम-णिनि । भ्रान्ते ।
अभ्रीक पु०भ्रम-वा० ईक । स्तनिभेदे । [२विप्रे च शब्दच० ।
अभ्रीगर्भ पु० अभ्रीगर्भ आधारत्वेनास्यास्य अच् । १यज्ञौ
अभ्रीधान्य न० अभ्री शिम्बैव धान्यम् । शिम्बात्मके माषमुद्गादौ धान्ये अमरः ।
"अभ्रीजाः शिम्बिजाः शिम्बा वराः स्युश्च वैदलाः । वैदलाश्चपुरा रूक्षाः कषायाः कटुपाकिनः । वातलाः कफपित्तघ्ना बह्वभ्रमला हिमाः । मुक्ते मुद्गमसूराभ्यामन्ये त्वाध्मानकारकाः" । मुद्गमसूरयोराध्मानकारित्वमल्पवैदलापेक्षया न तु सर्वथा एतयोरपि किञ्चिदाध्मानकारित्वदर्शनात् भावप्र० "मूकधान्यं अभीधान्यं समातीतं प्रशस्यते । परतो वातलत्वं प्रायेणाभिनवं गुरु । यवगोधूममाषाश्च तिलाश्चाभिनवा हिताः । पुराणाविरसाश्चैते न तथाभ्यवरा मताः" राजवल्लभः ।
अभ्रीपत्नी स्त्री अभ्रया इव पत्रमस्याः ङीप् । शुल्फाखुलतायां लटा० ।
अभ्रीर पु० अल्पा अभ्री अल्पार्थे र "क्वचित् स्वार्थिका अपि प्रत्ययाः प्रकृतितो विशेषवचनान्यतिवर्त्तन्ते" इति भाष्योक्तेः पुंस्त्वम् । क्षुद्रायां अभ्रयाम् अमरः ।
अभ्रा स्त्री भं राति रा-क । विद्युति अमरः ।
अभ्राक पु०भं शिवं राके ददते वा अस्य । १आरग्वधे अमरः । २विपाके ३वावके च हेमच० ।
अभ्व गतौ भ्वा० पर० सक० सेट् । अभ्वति अभम्वीत् ।

शम्ब पु० शम्ब-अच्। १वज्रे २मूषलायस्त्रितयौके मेदि०। २लौहकाचार्य्ये हेमच०। ३चतुर्लोमकवर्षे भरतः। ४दरिद्रे च संक्षिप्तसा० ६भाग्यवति त्रि० रामाश्रमः।

शम्बर न० शम्ब-अरन्। १जले २धने ३व्रते रत्नमा०। ४चित्रे च ५वौद्धव्रतभेदे हेमच०। ६क्षत्रभेदे ७दैत्यभेदे पु० मेदि० ८मत्स्यभेदे ९पर्वतभेदे १०जिनभेदे पु० विश्वः। ११युद्धे पु० १२श्रेष्ठे त्रि० धरणिः १३चित्रकवृक्षे १४लोध्रे १५वर्णवृक्षे च पु० राजनि०। [राजनि०।

शम्बरकन्द पु० शम्बरः श्रेष्ठः कन्दो यस्य। वाराहीकन्दे

शम्बरचन्दन न० ६त०। शम्बरपर्वतजाते चन्दनभेदे राजनि०

शम्बरसूदन पु० शम्बरमसुरं सूदयति क्षिणोति सूद-ल्यु। कामदेवे हेमा० तद्वधकथा हरिवं० १६२।१६४ अ० द्रष्टव्या।

शम्बरारि पु०६त०। कामदेवे अमरः। शम्बररिपुादयोऽप्यत्र।

शम्बरी स्त्री शम्बरं जलं वाञ्छत्यनयेति शम्बर अच् गौरा०ङीष्। १आखुपर्ण्यां मेदि०। २मायायां शब्दर०।

शम्बल पु०न०शम्ब-कलच्। १क्षुद्रे २पाथेये ३मत्सरे च मेदि०

शम्बाकृत त्रि० शम्बं क्षुद्रमप्यतुलोममाद्रियते शम्ब+कर्म-धार्थे डाच्+कृ-क्त। अतुलोमेन हिराडम्बे क्षुद्रे क्षेत्रे अमरः।

शम्बु(म्बू) पुंस्त्री० शम्ब-उन् ऊ वा। १जलशुक्तौ (शामुक) हेमच० स्वार्थे क। तत्रार्थे। संज्ञायां कन्। शम्बुकस्थानभागे च। रामायणप्रसिद्धे शूद्रतापसे, शङ्खे हेमच० दैत्यभेदे च पु०।

शम्भ त्रि० शमस्यस्य शम्+भ। कल्याणयुक्ते।

शम्भल पु० शम्भं कल्याणदायकं लाति-ला क। १याममेदे यत्र कल्की भविष्यति तत्रिन्। २कङ्कुन्यां स्त्री अमरः गौरा० ङीष्।

शम्भु पु० शम्+भू-डु। १महादेवे अमरः। २ब्रह्मणि ३शिवे मेदि० ४विष्णौ हेमा० ५खिले शब्दर०। ६श्वेतार्के शब्दर०। [भ्रुतादयोऽप्यत्र।

शम्भुतनय पु० ६त०। १गणेशे २कार्त्तिकेये च शब्दमा० शम्भुप्रिया स्त्री ६त०। १दाक्षायण्यां हेमच० २दुर्गायाञ्च।

शम्भुवल्लभ न०६त०। १श्वेतपद्मे राजनि० २महादेवप्रिये च

शम्या स्त्री शम-यत् टाप्। १युगकीलके अमरः। २दक्षकन्यातनयाभेदे संगीतदा०। [४निद्रायां ५पर्णे च विश्वः।

शय पु० शी-अच्। १शेषे अमरः। २सर्पे ३शय्यायां मेदि०

शयन न० शी-ल्युट्। १निद्रायां २शय्यायाम् अमरः ३मैथुने च मेदि०।

देवभेदे शयनकालभेदादि वामनपु० १६अ० उक्तं यथा "मिथुनाभिगते सूर्ये शुक्लपक्षे तपोधन!। एकादश्यां जगत्स्वामिशयनं परिकल्पयेत्। शेषाहिशोभनपर्य्यङ्कं कृत्वा संपूज्य केशवम्। कृतोपवीतवस्त्रैव सम्यक् संपूज्य च द्विजान्। अनुज्ञां ब्राह्मणेभ्यश्च दादश्यां प्रयतः शुचिः। कृत्वा पीताम्बरधरं स्वपेत्ति निद्रां समाश्रयेत्। त्रयोदश्यां ततः कामः स्वपते शयने शुभे। कदम्बानां सुगन्धानां कुसुमैः परिकल्पिते। चतुर्दश्यां ततो यज्ञाः स्वपन्ति सुखशीतले। सुवर्णपङ्कजाते सुखास्तीर्णोपधानके। पौर्णमास्यासुमनायः स्वपते चक्रसंस्तरे। वैशाखे च अटाभारं वसुद्रव्यान्यचर्मणा। ततो दिवाकरे राशिं संप्रयाति च कर्कटम्। ततोऽमरार्च्चां रजनी भवते दक्षिणायनम्। ब्रह्मा प्रतिपदि तस्यां नीलोत्पलदलेऽनघ!। तल्पे स्वपिति देवानां दर्शयन् मार्गमुत्तमम्। विष्णुकर्म्मा द्वितीयायां तृतीयायां गिरेः सुता। विनायकश्चतुर्थ्यान्तु पञ्चम्यामपि धर्मराट्। षष्ठ्यां स्कन्दश्च स्वपिति सप्तम्यां भगवान् रविः। कात्यायनी तथाष्टम्यां नवम्यां कमलालया। दशम्यां भुजगेन्द्राश्च स्वपन्ति वायुभोजनाः। एकादश्यान्तु ऊषायां साध्या ब्रह्मन् स्वपन्ति हि। एष क्रमस्तु मनितो निशायां शयने शुने!। स्वपतस्तु तेषु देवेषु प्रावृट्कालः समाययौ"।

अथ लोकानां शयनप्रकारादि प्रदर्श्यते

"उषास्तु पश्चिमां सन्ध्यां कृत्वाग्नीनानुपास्य च। शस्त्रैः परिवृतो भुक्त्वा नानिष्टप्रोक्ष्य संविशेत्। शुचिं देशं विविक्तन्तु गोमयेन तु लेपयेत्। प्राक्शिरास्तु प्रसुप्तव्ये चैव संवसेत सदा बुधः। प्राक्शिराश्च प्रमेहित्वं तथा वै दक्षिणाशिराः। प्रमेहदुक्शिरा नैव तथा प्रत्यक्शिरा न च। न चान्तर्द्धानकीने तु न तिर्यक् च कदाचन। शून्यावासे श्मशाने तु एकवस्त्रे चतुष्पथे। महादेवगृहे चापि गाढवेश्मनि न स्वपेत्। न च नागायतने स्कन्दायतने तथा। दर्भेषु च विना दीक्षां न स्वपेत्तु कथञ्चन। धान्यगेहे च विप्राणां गुरुणाञ्च तथोपरि। नाशुचौ पर्वकीर्त्ते तु नाशुचिर्नाशुचिस्तथा। दिने सन्ध्यौ न नग्नश्च नोत्तरापरमस्तकः।

नाकाशे पर्वते शून्ये न च चैत्यद्रुमे तथा। न तु द्वारे-ऽग्नसाकीर्णे नार्द्रपादस्त्वधावितः। पालाशे शयने नैव बल्मदारुस्थते न च। न दग्धे विद्युता चैव वह्निप्लुष्टे जले तथा। न क्षपेत् सन्ध्ययोर्निद्रां न शिवस्थाने कटे। एवं क्षपन् नरो नित्यं सुखमेह परत्र भाक्। अन्यथे च क्षपेद्दुःखी मृतो नरकमश्नुते" वह्निपु०। इति स्मृत्यै शय्या न धातनीया स्वर्योदयात् पूर्वमुत्तोलनीवेलाच्च स्मृतिः "भास्करोदयशय्यानि नित्याग्निसलिलानि च। सूर्य्यावलोकितीपानि चक्षुषा वेक्षणानि भाजनम्। आसनं वसनं शय्या जायापत्यं कमण्डलुः। आत्मनः शुचि-रेतानि न परेषां कदाचन"। न कदाचन स्वयमुपतिं विना अन्यथाऽऽतिथ्यानुपपत्तेः रघु०। व्यासः "शुचौ देशे विविक्ते तु गोमयेनोपलिप्यते। प्रागुदक्प्रवणे चैव संविशेत्तु सदा बुधः। माङ्गल्यं पूर्वकर्माणि शिरस्याने निधापयेत्। वैदिकैर्गारुडैर्मन्त्रैरक्षां कृत्वा क्षपेत्ततः"। गर्गः "अष्टहे प्राक्शिराः शेते आयुष्ये दक्षिणाशिराः। प्रत्यक्शिराः प्रवासे तु न कदाचिदुदक्शिराः" मार्कण्डेयपु० "प्राक्शिरःशयने विद्यात् धनमायुश्च दक्षिणे। प-श्चिमे प्रबलां चिन्तां हानिं मृत्युं तथोत्तरे" तथा "नम-स्कृत्याव्ययं विष्णुं समाधिस्थः क्षपेन्निशि" मार्कण्डेयपु० "शून्यागारे श्मशाने च एकवृक्षे चतुष्पथे। भग्नदेव-गृहे चापि पर्वतशिखरेषु। धान्यगोविप्रदेवानां गुरूणाञ्च तथोपरि। न चापि भग्नशयने नाशुचौ नाशुचिः क्वचित्। नार्द्रपादा न नग्नश्च नोत्तरापरमस्तकः। नाकाशे सर्वशून्ये च न च चैत्यद्रुमे तथा"। न क्षपेदित्यर्थः आ० त०। "भुक्त्वा च विधिवन्-मन्त्रैर्हुतो भुक्ताऽवशिष्टकम्। सबन्धुर्बान्धवजनः क्षपेत् शुक्लपटो निशि। नोत्तराभिमुखः स्वप्यात् पश्चिमाभि-मुखो न च। न चाकाशे न नग्नो वा नाशुचिर्नाक्षते क्वचित्। न शीर्षाण्यान्तु खट्वायां शून्यागारे न चैव हि। नापि वंशे च पालाशे शयने वा कदाचन" लोमपु०। "ऋतपादादिशौचश्च भुक्त्वा चार्यं ततो गृही। गच्छेत् शय्यां स्वयन्नाञ्च शयना दारु-निर्मिताम्। शाल्मलस्य कदम्बस्य नीपमन्दारकस्य च। किंशुकस्य वटस्यापि तथा कृष्णतिलस्य च। आरो-हणात् भवेत् पापं तस्मात्तेषु न च क्षपेत्। प्ररोह शय्यां सूते वा वर्षपे परमेश्वरि!। न शुक्ले नापविले च न दग्धे न च भूतले। तूलिकायां तथा वस्त्रे शय्या-भावे क्षपेद्भूमौ। क्षपेच्च पट्टवस्त्रे च कम्बलेषु च" मत्स्यपु० ४४अ०। "श्वासानष्टौ समुत्तानस्तान् दिःक्षपार्द्धे च दक्षिणे। ततस्तदूर्द्धगुणान्१२ वामे पश्चात् क्षपात् यथासुखम्। वामदिशायामनलो नाभे रूर्द्धोऽस्ति जन्तूनाम्। तस्मात्तु वामपार्श्वे शयीत भुक्त्वा प्रपाकार्थम्" भावप्र०। [तत्रैव।

शयनीय न० शी-आधारे अनीयर्। शय्यायाम् स्वार्थे क।

शयनैकादशी स्त्री ६त०। आषाढशुक्लैकादश्याम्।

शयालु त्रि० शी-आलुच्। निद्राशीले अमरः। २अजगरे, ३कुक्कुरे च पु० हारा०। [द्वयां न०।

शयित त्रि० शी-कर्त्तरि क्त। १निद्रिते। भावे-क्त। नि-

शयु पु० शी-उ। १अजगरे सर्पे अमरः। वनन्। शयुनो-ऽत्यत्र उणादिको०।

शय्या स्त्री शी-आधारे क्यप्। १खट्वायाम् अमरः। भावे क्यप्। २शयने ३गुल्मरोगे मेदि०। "त्रिदोषशमनी खट्वा तूली वातकफापहा। भूशय्या दुःखदा ह्रस्वा काष्ठपट्टी तु वातला"। "भूशय्या वातलातीव रूक्षा पित्तास्रनाशिनी। सुशय्याशयनं कृत्स्नं पुष्टिनिद्राधृतिप्रदम्। श्रमानिलहरं हृद्यं विपरीतं ततोऽन्यथा" भावप्र०। शयनविधानं यथा "ऋतपादावशौचश्च भुक्त्वा चार्यं ततो गृही। गच्छेत् शय्यामस्कृटितामेव दारुमयीं क्वचित्। नास्थि-शार्द्रां न वै भग्नां नासमां मलिनां न च। न च जन्तुमयीं शय्यामधिगच्छेन्नरोत्तमः"। विष्णुपु० ३अंशे ११अ०।

शर न० शृ-अच्। १जले २बाणे ३दधिदुग्धाद्यासारे पु० मेदि० ४दशसंख्याधने तृणभेदे पु०। "भद्रमुञ्जः शरो वाणस्तेजनश्चेषुमेदनः। मुञ्जो मुञ्जातको बाणः स्थूल-दर्भः सुमेधसः। तुञ्जदयन्तु मधुरं तुवरं शिशिरं तथा। दाहतृष्णाविषश्लेष्मभूतरक्तक्षयान्जित्। दोषत्रय-हरं हृद्यं मेधलाशूलयुज्यते" भावप्र०। भावे घञ्। ५हिंसायाम्।

शरकाण्ड पु० ६त०। १शरस्तम्बे २तद्विभित्तकबाणे च।

शरज न० शरात् दधिदुग्धसारात् जायते जन-ड। १घृत-वीने हेमच० शरवणे जाते २कार्त्तिकेये पु०। अग्नि-कुमारशब्दे ५४३पृ० दृश्यम्।

शरजन्मन् पु० शरवणे जन्म यस्य। कार्त्तिकेये अमरः।

शरट पु० शृ-अटन्। १क्रकलासे अमरः २कुलत्थशाके च भरतः

शरण न० शृ-ल्युट्। १गृहे २रक्षके अमरः। ३रक्षणे ४बधे

मेदि० । २घातवे शब्दच० । ३प्रसारख्यां स्त्री शब्दर०टाप् ।
शरणागत त्रि० शरणमागतः आ+गम-क्त । शरणापन्ने ।
शरणापन्न त्रि० शरणमापन्नः आ+पद क्त । शरणमागते ।
शरणार्थिन् त्रि० शरणमर्थयते अर्थ-णिनि । शरणकामे ।
श(स)रणि(णी) स्त्री शृ(सृ)-अनि वा ङीप् । १पथि, ङीबन्तस्तु २प्रसारख्यां शब्दर० । ३जयन्त्याञ्च स्त्री शब्दर० । ४पृथ्व्याम् अजयः ।
शरण्ड पु० शृ-अण्डच् । १खगे कासके शब्दरत्ना० । २धूर्त्ते ३शरटे ४मूषकभेदे मेदि० । ५चतुष्पदि संक्षिप्तसा० ।
शरण्य त्रि० शरणाय साधुः यत् । १शरणागतत्राणकरणयोग्ये २दुर्गायां स्त्री ।
"विश्वाग्निभयघोरेषु शरण्यं शरणाद् यतः । शरण्या तेन सा देवी पुराणे परिपठ्यते" देवीपु० ।
शरण्यु पु० शृ-अन्यु । १मेघे २वाते च विश्वः । [शब्दर०
शरत्कामिन् पु० शरदि कामयते कम-णिनि । कुक्कुरे
शरत्पद्म न० शरदि शुभ्रं पद्मम् । श्वेतपद्मे राजनि० ।
शरत्पर्वन् न० ७त० । कोजागरपूर्णिमानिमित्तोत्सवे जटा० ।
शरद् स्त्री शृ-अदि । १वत्सरे, २आश्विनकार्त्तिकमासात्मके ऋतौ च अमरः । तद्धारिगुणा भावप्र० उक्ता यथा
"वर्षासु नाभसं वारि सेवेतोद्भिदमेव वा । सर्वं शरदि हेमन्ते तड़ागं सारवन्तु वा" । शारदं चानभिष्यन्दि लघु तत् परिकीर्त्तितम् । हैमन्तिकलघुस्निग्धं बल्यं ह्यं हितं गुरु" राजव० । तत्रोत्तरवायुसेवनं हितं यथा
"वसन्ते दक्षिणो वातो भवेत् वर्षासु पश्चिमः । उत्तरः शरदे काले पूर्वो हेमन्तशैशिरे" राजनि० । ऋतुशब्दे दृश्यम् । "शरदृतुश्च वैद्यकमते भाद्राश्विनमासात्मकः । तत्र वर्षनीयानि चन्द्रपटुता जलगुप्तता कुमुदाः हंसः दृश्यः" कविकल्प० ।
शरधि पु० शरा धीयन्तेऽत्र धा-आधारे कि । तूणे हेमच० ।
शरपुङ्खा स्त्री शरस्येव पुङ्खो यस्याः । नीलीवृक्षलतौ काण्डपुङ्खाकृते "शरपुङ्खा वक्रतुण्डोऽगुलमत्रणविषापहा । तिक्ता कषाया कासास्रज्वरश्वासहरी लघुः" भावप्र० ।
शरभ पु० शृ-अभच् । "अष्टापादुन्नयन जर्द्धं पादचतुष्टयः" रत्नमालायां १मृगभेदे अमरः । २करभे, ३वानरभेदे अमरः । ४गृद्धे च जटा० । ५शिशुपालपुत्रभेदे भा० आश्व० ८१ अ० । ६दानवभेदे भा० आ० ६५ अ० । "अष्टापादुन्नयनः शरभो वनेश्वरः । तं सिंहं हन्तुमागच्छन्नुन्नेत्रश्च निरेक्षणम् । तं शरभः शरभं शरभमपतः । दृष्ट्वा बलिनमत्युग्रं द्रुतं सम्प्राद्रवद्भयात् । स एवं शरभस्थाने संन्यस्तो मुनिना तदा । मुनेः पार्श्वगतो नित्यं शरभः सुखमाप्तवान् । ततः शरभसन्त्रस्ताः सर्वे मृगगणास्तदा । दिशः सम्प्राद्रवन् राजन् ! भयाच्चकितबान्धवाः । शरभोऽथतिसंक्रुद्धो नित्यं प्राणिवधे रतः । फलमूलाशनं कर्त्तुं नैच्छत् स पिशिताशनः । ततो रुधिरतर्षेण बलिना शरभोऽन्वितः । दृष्ट्वैव तं मुनिं हन्तुमुद्यतश्चः क्षयोनिजः । ततस्तेन तपःशक्त्या विदितो ज्ञानचक्षुषा । विज्ञाय स महाप्राज्ञो मुनिःक्रोधं तमत्यजत् । स त्वं हीपित्वमापन्नो हीपी व्याघ्रत्वमागतः । व्याघ्राच्चागो मदपटुनागः सिंहत्वमागतः । सिंहत्वं बलमापन्नो भूयः शरभतां गतः । मया क्रोधपरीतेन विक्रुष्टो नष्टचान्वयः । यस्मादेवमपार्थं मां पाप ! हिंसितुमिच्छसि । तस्मात् स्वयोनिमापन्नः स्वैव त्वं हि भविष्यसि । ततो मुनिजनद्वेषा दुष्टात्मा प्राकृतोऽबुधः । ऋषिणा शरभः शप्तस्तद्रूपं पुनराप्तवान्" भा० आ० ११७अ० ।
शरभू पु० शरे शरत्वे भवति भू-क्विप् । कार्त्तिकेये हेमच० ।
शरमय त्रि० शरस्य विकारः मयट् । शरजाते पदार्थे ।
श(स)रयु(यू) स्त्री शृ-(सृ)-अयु वा ऊङ् । अयोध्यानगरीनिकटवाहिन्यां नद्याम् । तस्यां भवः अण् नि० । सा (शा)रव तत्र भवे त्रि० अमरः ।
श(स)रल त्रि० शृ(सृ)-अलच् । १मृगमे, २अकुटिलचित्ते (सरल) ३वृक्षभेदे च । [त्रिकाण्डे ।
शरवणोद्भव पु० शरवणम् उद्भवः उत्पत्तिस्थानमस्य । कार्त्तिकेये
शरव्य न० शरवे बाणनिक्षेपाय हितं शर+यत् । लक्ष्ये, शरेण वेधनायोद्देश्ये अमरः ।
शराटि(डि)(लि) स्त्री शरमतुलक्ष्यं अटति अट-इन् पृषो० टस्य डो लो वा । (शराल) पक्षिभेदे अमरः ।
शराभ्यास पु० ६त० । बाणमोचनशिक्षास्थाने अमरः ।
शरारु त्रि० शृ-आरु । हिंसके अमरः । [अण् । धनुषि जटा०
शरारोप पु० शराः आरोप्यन्तेऽत्र आ+रुह-णिच् ।
शराव पु० शरं दध्यादिसारमवति अव-अण । १मृण्मये पात्रभेदे, (शरा) अमरः । २कुडवद्वयपरिमाणे च वैद्यकम् ।
शरावती स्त्री शराः सन्त्यस्याम् मतुप् यस्य वः पूर्वदीर्घश्च । नदीभेदे अमरः ।
शरास्रय पु० ६त० । तूणे हेमच० ।

शरासन पु० शराः अस्त्रमेनेन अस्य-ल्युट्। १धनुषि अमरः। शराणामासनम्। २तूणे च।

शरिमन् पु० शृ-उषा० इमनिच्। प्रलये त्रि०कौ०।

शरी स्त्री शीर्य्यते शृ-ई। एरकाख्ये भावप्र०।

शरीर न० शृ-ईरन्। प्रतिक्षणं क्षीयमाणे १देहे।

तस्य अङ्गप्रत्यङ्गभेदा भावप्र० उक्ता यथा

"गर्भाशयगतं शुक्रशोणितं जीवसंयुतः। प्रकृतिः स-विकारा च तत् सर्वं गर्भसंज्ञकम्। कालेन वर्द्धितो गर्भो यदाङ्गोपाङ्गसंयुतः। अनेकदा च सूतिभिः शरीरीति निगद्यते। अङ्गोपाङ्गसंयुक्तः अङ्गाङ्गोपाङ्गः। "तस्य त्वक्चाष्टौ पाङ्क्तानि ज्ञाता सप्तदशाङ्गतः। अतस्त्वादभि धीयन्ते भिन्नाः! श्रृणु यत्नतः। आद्यमङ्गं शिरः प्रोक्तं तदुपाङ्गानि कुन्तलाः। ललाटं भ्रूयुगलता। नेत्रद्वयं तयोरन्तर्वर्त्मते द्वे कनीनिके। दृष्टिद्वयं अक्ष्णोर्द्वौ श्वेतभागौ च वर्त्मनी। पक्ष्माक्षिपाक्षौ अक्ष्णो च कर्णौ तच्छ्रुतिद्वयम्। घ्राणद्वयं बभौ च नासिका च प्रकीर्त्तिता। ओष्ठाधरौ च सञ्जिह्वौ दन्तं तालु हनुद्वयम्। दन्ताश्च दन्तमेताश्च रसना चिबुकञ्चुकः। द्वितीयमङ्गं ग्रीवा तु यत्र मूर्द्धा विधार्यते। तृतीयं बाहुयुगलं तदुपाङ्गान्यथ ब्रुवे। तत्रोपरिगतौ स्कन्धौ प्रगण्डौ भवतस्त्वधः। कफोणि-युग्मं तदधः प्रकोष्ठयुगलन्तथा। मणिबन्धौ तले हस्तौ तयोराङ्गुलयो दश। नखाश्च दश ते ज्ञाया दश ऊर्द्धाः प्रकीर्त्तिताः। चतुर्थमङ्गं वक्षस्तु तदुपाङ्गान्यथ ब्रुवे। स्तनौ पुंस्तया नार्य्यां विशेष उभयोरयम्। यौवना-गमने नार्य्याः यौवरौ भवतः स्तनौ। गर्भवत्याः प्रसूता-यास्तावेव चीरपूरितौ। हृदयं पुष्करोद्वेध सदृशं स्या-दधोमुखम्। आपतत्तद्विषयति अपतत्तु निषीदति। आशयस्तु जीवस्य चेतनाज्ञानसंज्ञकम्। अतस्त्वि-त्यनेनाग्रे प्राणिनः प्रकृपन्ति हि। चेतनाज्ञान-मित्यभिप्रायाभिप्रायः "वेद्यस्योपनयाद्यं च मनं, द्रव्यगुणैर्विना" इत्युक्तवता चरकेण सकलं शरीरं चेतनाज्ञानसंज्ञम् तदपेक्षया हृदयं विशेषतश्चेतना-ज्ञानमिति "अक्षयोर्बभ्रवः कृष्णौ अक्षिणी सप्तदाकृते। कृष्णे तमे समाख्याते द्वयोः ज्ञातं च वर्त्मनी। उदरं पञ्चमाङ्गं मतं पार्श्वद्वयं मतम्। सप्तदशं तु तथा समस्तं सप्तमं स्मृतम्। उपाङ्गानि च अक्ष्णस्तानि ज्ञानोहि यत्नतः। शोणिताज्जायते ह्येतत् यावतो हृदयादधः। रक्तवाहिशिराश्चां च मूलं ज्ञातो मह-र्षिभिः। हृदयादामतोऽधश्च कुपुप्फुसो रक्तफेनजः। अधो दक्षिणतश्चापि हृदयात् यकृतः स्थितिः। तनु-रक्तजपिच्छश्च स्थानं शोणितजं मतम्। अधस्तु दक्षिणे-भागे हृदयात् क्लोम तिष्ठति। अन्नवाहिशिराम्लं श्लेष्माच्छादनजन्मतम्"। क्लोम तिष्ठतम् एतत्तु वातरक्त-जम्। अत्र डल्हणभट्टः "रक्तादनिलसंसृष्टात्क्लोम-वातरक्तजम्" इति "मेदःशोणितयोः सारादुभयोर्यु-गलं भवेत्। तौ तु पुष्टिकरौ प्रोक्तौ जठरस्थस्य मेदसः। तस्याः पार्श्वास्थयो ज्ञाया पुंसामन्यानि सूरिभिः। अर्द्धव्याप्तेन फेनानि योषितोऽन्यानि निर्दिशेत्। वृक्कद्वय कटी वापि त्रिकं वस्तिश्च वङ्क्षणौ। वङ्क्ष-णाख्यां प्ररोहः स्यात् स्थानं तद् वीर्य्यमूत्रयोः। य एव गर्भस्याधानं कुर्य्याद्भावोऽयं स्त्रियाः। अङ्गनाख्यातति-र्योनिरूपावर्त्ता सा च कीर्त्तिता। तस्यास्तृतीये स्तावर्त्ते गर्भशय्या प्रतिष्ठिता। द्वयो भवतः शोणितवाहिन्यां च मेदसाम्। वीर्य्यवाहिशिराधारौ तौ मतौ पौरु-षाण्डौ। हृदस्थं यानं सर्वेषां शोणितरक्तजम्। तत्र कुर्वन्ति वसिक्तः यस्त्रावर्जनिभास्तु ताः। प्रवाहिण्यो भवेत् पूर्वा शोणितकुसंज्ञिता मता। अन्त्रजन्मी तु तदधः सा शोणितकुसंज्ञिता। तस्याधः सञ्चरण्यौ स्याद्रोहिणी-कुसंज्ञा मता। अर्द्धाङ्गुलप्रमाणं तु बुधैर्युदरं मतम्। अन्त्रोद्गमस्थानमौदर्यं पायुर्दैर्घ्ये विनिर्मितः। पुंसः प्रोक्तौ स्तनौ तौ तु तौ नितम्बौ च योषितः। तयोरन्तरे स्थानं सन्धिनी तलमटसम्। तदुपाङ्गानि च भ्रूणो जानुनी पिण्डिकाद्वयम्। अङ्घ्री द्वे पुष्टिते पार्ष्णीतले च प्रपदे तथा। शाद्वलाङ्कुरवत्तत्र दश तासां नखा दश"।

शरीरक पु० शरीरं वायति आत्मत्वेनाभिमन्यते कै-क। जीवे। स्वार्थे कन्। शारीरकोऽप्यत्र।

शरीरज पु० शरीरात् जायते जन-ड। १रोगे २कामदेवे ३पुत्रे च धरणिः। ४देहजातमात्रे त्रि०।

शरीरावरण न० शरीरमावृणोति आ+वृ-ल्युट्। देह-व्यापिनि १चर्मणि राजनि०। २देहावरणे त्रि०। ल्युट्। ३देहाच्छादने न०। [त्रटा०।

शरीरिन् पु०शरीरमात्माभिमानास्पदत्वेनास्त्यस्य इनि। जीवे

शरु पु० शृ-उनु। १क्रोधे २वज्रे मेदि०। ३बाणे हेमच०। ४आयुधे च संक्षिप्तसा०।

अरिष्ट पु० अर्च्यते कामिनं अर्च-क्त अरः कामः तस्य रट रम-क्त। आचे जटा०।

अर्करक पु० अर्करायाः रसः अच् ष्टच्भावः अर्करः रस इव आयति मधुरत्वात् के-क। मधुरजम्बीरे राजनि०।

अर्करजा स्त्री अर्करात् जायते जन-ड। सितायष्टे राजनि०

अर्करा स्त्री अर्च-करन् टाप च नेत्वम्। १खण्डविकारे (चिनि) अमरः। २खण्डखण्डे २कर्परखण्डे च (खापरा) मेदि०। अर्कराः सन्त्य मतुप् तस्य लुक्। ३खण्डकरायुते देशे अमरः। ४रोगभेदे वृक्षरीशब्दे ४८६ पृ० दृश्यम्। ६शर्करे च मेदि०। अर्कराभेद गुणा राजनि० उक्ता यथा "स्निग्धा पक्वार्कशर्करा हितकरी चीये क्षवेऽरोचके चक्षुष्या बलवर्द्धनी सुमधुरा रूक्षा च वंशेक्षुजा। दृष्टा तृप्तिबलप्रदा श्रमहरा श्यामेक्षुजा शीतला स्निग्धा कान्तिकरीरसाम्लसहिता रक्तेक्षुजा पित्तजित्" "यावनाली स्निग्धोत्पन्ना स्निग्धाली स्निग्धशर्करा। क्षुद्रशर्करिका क्षुद्रा गुड़जा जलबिन्दुजा। स्निग्धा शर्करा गौड्या दीप्ता तिक्ताऽतिपिच्छला। वातघ्नी वारिजा रूक्षा दाहपित्तास्रदायिनी। "शीतलान्याकर्करजा साध्वी च मधुशर्करा। माक्षिका शर्करा प्रोक्ता सितायष्टेश्च खण्डकः। सितायष्टोऽतिमधुरश्चक्षुष्यश्छर्दिनाशनः। कृच्छ्रपक्वकफश्वासहिक्कापित्तास्रदोषनुत्। यवासशर्करा त्वन्या सुधामोदकमोदकः। तवराजः खण्डसारः खण्डजा खण्डमोदकः"। "वृत्तखण्डीकाः खण्डसिता गुणश्रेष्ठा यथोत्तरम्। विमलाः शीतलाः स्निग्धाः गुर्व्यः स्वादुतराः वराः। दृष्टास्तृष्णाक्षत क्षीणरक्तपित्तानिलापहाः। वृत्तखण्डी पाकिणी वल्या कषाया वातजित् गुरुः। खण्डं गुरु वरं रूक्षं वातघ्नं बलपुष्टिदम्। सितोत्पला वरा गुर्वी वातघ्नी न कफप्रदा"। पथ्यापथ्यविवेकः "शर्करा ज्वरपित्तास्रक्षतमूर्च्छार्दितृषापहा। तृष्णाघ्नखण्डराजस्तु ज्वरदाहास्रपित्तजित्। बालिका फाणितगुड़खण्डमत्स्यण्डिकासिताः। निर्मला उत्तरो ज्ञेयाः शीतगौड्यां यथोत्तरम्। यथा यथैषां वैमल्यं भवेच्छैत्यं तथा तथा" राजवल्लभः। "खण्डस्तु सिकताकारं शुभ्रं शर्करा सिता। सिता सुमधुरा रूक्षा वातपित्तास्रदाहजित्। मूर्च्छाच्छर्दिज्वरान् हन्ति सुशीता गुरुकारिणी। भवेन्मधुसिता शीता रक्तपित्तहरी गुरुः। अर्द्धतीक्ष्णतृड्दाहरक्तक्षतज्वरा हिमा। यथा यथैषां नैर्मल्यं मधुरत्वं तथा तथा। क्षौद्रवत्तव गैल्यादि रसत्वञ्च तथा तथा" भावप्र० गुडवर्गे।

अर्कराचल पु० दानार्थं कल्पिते अर्कराजते पर्वते। तद्विधिः हेमा० दा० पद्मपुराणे उक्तो यथा "अथातः संप्रवक्ष्यामि शर्कराचलकल्पनम्। यस्य प्रदानाद्विष्णुर्नरस्तुष्यति सर्वदा। अष्टभिः शर्कराभारैः कृतमः स्यान्महाचलः। चतुर्भिर्मध्यमः प्रोक्तो भाराभ्यामधरः स्मृतः। भारेण वार्द्धभारेण कुर्यात् वा खलु वित्तवान्। विघ्नमप्यर्वतान् कुर्यात् तरीयांशेन मानवः। धान्यपर्वतवत्सर्वभावाद्यामरसंयुतम्। मेरोरुपरि तस्य स्याच्च हेमतरुत्रयम्। मन्दारः पारिजातश्च तृतीयः कल्पपादपः। एतद्दृक्षत्रयं मूर्ध्नि सर्वेष्वपि निवेशयेत्। हरिचन्दनसन्नानौ पूर्वपश्चिमभागयोः। निवेशयो सर्वशैलेषु विशेषाच्छर्कराचले। मन्दारे कामदेवञ्च प्रत्यग्वक्त्रः सदा भवेत्। यत्नमादनवृक्षे च धनदः स्यादृक्षसुखः। प्राङ्मुखो वेटमूर्त्तिश्च हरः स्याद्विपुलाचले। हेमौ सुपार्श्वे सुरभी दक्षिणाभिमुखौ भवेत्। धान्यपर्वतवत् सर्वभावाद्यनवसादिकम्"।

अर्कराधेनु स्त्री दानार्थं कल्पिते अर्कराजते धेन्वाकारे रूपभेदे हेमा० दा० स्कन्दपुराणोक्तविधिर्यथा "तद्वच्च शर्कराधेनुं राजन्! कुर्यात् यथार्थतः। चतुर्विप्रे महीपृष्ठे कृष्णाजिनकृतोत्तरे। धेनुः शर्करया राजन्! सदा भारचतुष्टयम्। तस्मा कथ्यते सद्भिः चतुर्थांशेन वत्सकः। तदर्द्धं मध्यमा प्रोक्ता चतुर्थांशेन कन्यसा। तद्वदत्सं प्रकुर्वीत चतुर्थांशेन मानवः। अथ वा धेनुतः कुर्यादंशेन तु वत्सकम्। क्रयक्रया कारयेद्धेनुं यथात्मानं न पीड़येत्। सर्वौषधानि संस्थाप्य चतुर्दिक्षु समन्ततः। शौवर्णसुचमृक्षाणि मौक्तिकैर्नयनानि च। गुडेन च सुखं कार्यं जिह्वा पिष्टमयी तथा। कम्बलं पट्टसूत्रेण घण्टाभरणभूषिता। दधुपादा रौप्यखुरा नवनीतमयस्तना। प्रशस्तपत्रश्रवणा सितचामरभूषिता। पल्लवरक्तसंयुक्ता दर्भरोमसमन्विता। कांस्योपदोहना सम्यक् गन्धपुष्पैः समन्विता। हैमकं विधानसंयुक्तां वस्त्रैराच्छादितां तथा। गन्धपुष्पैरलंकृत्य ब्राह्मणाय निवेदयेत्"।

अर्करार्बुद पु० रोगभेदे तल्लक्षणं भावप्र० उक्तं यथा "प्राग्य मांसं सिरा स्नायुं मेदः क्लेद्य तथानिलः। पन्थिं करोत्यसौ भिन्नो मधुसर्पिर्वसानिभम्। क्रमात्स्रावसमत्वं तस्य दृष्ट्वा मतोऽनिलः। मांसं विशोष्य

थितां शर्करां जनयत्यतः। दुर्गन्धक्लिन्नमत्यर्थं नानावर्णं ततः सिराः। व्याप्नुवन्ति सकला रक्तं तं विद्याच्छर्करार्बुदम्"। शर्करा वालुकाश्मखा" भावप्र०।

शर्करावत् त्रि० शर्कराः सन्त्यस्मिन् मतुप् मस्य वः। बहुशर्करायुक्तदेशे।

शर्करासप्तमी स्त्री वैशाखशुक्लपञ्चसप्तम्याम्। तद्विधानं मत्स्यपु० ७२ अ० उक्तं यथा "शर्करासप्तमीं वक्ष्ये तद्व्रतं कलुषघ्नाग्निनीम्। आयुरारोग्यमैश्वर्यं यथावत्तं प्रजायते। माधवस्य सिते पक्षे सप्तम्यां शुक्लपञ्चतः। प्रातःस्नात्वा तिलैः शुक्लैः शुक्लमाल्यानुलेपनैः। स्थण्डिले पद्मनाभस्य कुङ्कुमेन सकर्णिकम्। तस्मै नमः सविल्वं तं गन्धपुष्पं निवेदयेत्" इत्यादि।

शर्करीदक न० शर्कराभिश्रितसदकम्। (चिनिर पानी) शर्कराभिश्रिते जले तत्करणप्रकारगुणादिकं भावप्र० उक्तं यथा "जलेन शीतलेनैव घोलिता शुद्धशर्करा। एलालवङ्गकर्पूरमरिचैश्च समन्विता। शर्करोदकमाख्यातं शुक्लं शिशिरं वरम्। बल्यं हृद्यं लघु स्वादु वातपित्तास्रनाशनम्। मूर्च्छोच्छर्दितृषादाहज्वरशान्तिकरं परम्" भावप्र०

शर्करिक त्रि० शर्कराः सन्त्यस्य ठक्। बहुशर्करायुक्तदेशे दण्डच्। शर्करिल-तत्रैव उभयत्रामरः।

शर्द् प० भ्वा०-चुरा० उभ० सक० सेट्। अपानवायूत्सर्गे। ल्युट्। तत्रैव न०।

शर्दिच्छद् पु० शर्दं अपानवायूत्सर्गं अहाति छा-क सप्तम्यां च। माषे। तद्भोजने हि अपानवायुर्निःसरतीति तस्य तथात्वम्।

शर्ध् हिंसायां गतौ च भ्वा०पर०सक०सेट्। शर्धति अशर्धीत्।

शर्मद त्रि० शर्म ददाति दा-क। १सुखदायके २विष्णौ पु० विष्णुस० ।

शर्मन् शृ-मनिन्। १सुखे २तदति त्रि० ३ब्राह्मणोपाधौ पु०। "शर्मा देवश्च विप्रस्य वर्मा त्राता च भूभुजः। भूतिर्दत्तश्च वैश्यस्य दासः शूद्रस्य कारयेत्" यमः। "शर्मान्तं ब्राह्मणस्य स्याद् वर्मान्तं क्षत्रियस्य तु। धनान्तञ्चैव वैश्यस्य दासान्तं चान्त्यजन्मनः" शातातपः।

शर्मरा स्त्री शर्म-राति रा-क। १दारुहरिद्रायां २वल्लभेदे पु० वरार्थः ३सुखदायके त्रि०।

शर्या स्त्री शृ-यत्। रात्रौ वाचस्पतिः।

शर्याति पु० वैवस्वतमनोः पुत्रभेदे।

शर्व् हिंसे भ्वा० पर० सक० सेट्। शर्वति अशर्वीत्।

शर्व पु० शर्व-अच्। १महादेवे हेमच०। २विष्णौ विष्णुस०।

शर्वर पु० शर्व-अरन्। १रात्रौ त्रि० ३तमसि न० उणादि०। ३सन्ध्यावाच्य संधिप्रसा० ४स्त्रियां मेदि०।

शर्वरी स्त्री शृ-वनिप् ङीप् वनो र च। १रात्रौ अमरः। शर्वरीशवन्द्रः। २हरिद्रायां त्रिका०। [हेमच०।

शर्वला स्त्री शर्व-अच् शर्वं खाति-का-क। तोमरास्त्रे

शर्वाणी स्त्री शर्वस्य पत्नी ङीप् आनुक् च। भवान्यां हेमच०

शल चालने भ्वा० आत्म० सक० सेट्। शलते अशलिष्ट। अशलिद्(ध्व)म् शेषे [ज्वलादि० शलः शालः।

शल गतौ भ्वा० पर० सक० सेट्। शलति अशालीत्।

शल शाधायां चु० आत्म०सक०सेट्। शालयते अशीशलत।

शल शेषे भ्वा० पर० सक० सेट्। शलति अशालीत्।

शल न० शल-अच्। १शल्लकीकोम्नि (सलारकाँटा) अमरः २मङ्गिन्यां ३क्षेत्रभेदे ४मत्स्यभेदे च पु० मेदि० ५कुलास्त्रे त्रिका० ६वृक्षे पुंस्त्री० हेमच० स्त्रियां ङीप्।

शलक पु० शल-वुन्। (माकड़सा) कीटभेदे त्रिका०।

शलङ्क पु० शल-अङ्कच्। १लोकपाले २वृक्षभेदे उणादि०।

शलभ पु० शल-अभच्। कीटभेदे पतङ्गे अमरः।

शलल न० स्त्री शल-अलच्। शल्लकीकोम्नि (सलारकाँटा) अमरः। स्त्रीत्वे गौरा० ङीष्।

शलाका स्त्री शल-आकन्। १शल्ये २मदनवृक्षे (मयना) ३शारिकायां ४मङ्गल्यां ५यवे मेदि० ६व्याधेरुपद्रविकायां हेमच०। उणादिषु च शब्दच०। सुश्रुतोक्ते शस्त्रकादुद्धारकार्ये यन्त्रभेदे शस्त्रशब्दे दृश्यम्।

शलाकापरि अव्य०अव्ययी०। शलाकाद्यावनक्रीडायां परावृत्ते

शलाकापुरुष पु० हेमचन्द्रोक्ते बौद्धानां त्रिषष्टिदेवपुरुषभेदे

शलाटु त्रि० शल-आटु। १अपक्वफले अमरः। २मूलभेदे उणादि० ३शल्ये च पु० राजनि०।

शलालु पु० शल-आलुच्। सुगन्धिद्रव्यभेदे त्रि०कौ०।

शलालुक त्रि० शलालुना क्रीतं वुन्। शलालुद्रव्येण क्रीते पदार्थे स्त्रियां ङीप्।

शल्क न०शल-घञ् कुत्वञ्च नेत्वम्। १वल्के २वृक्षत्वक्फले अमरः। ३मत्स्यत्वचि च (आँस) कोषान्तरम्। [त्वचि च त्रि०कौ०

शल्कल न०शल-कलन् कुत्वञ्च नेत्वम्। १मत्स्यवल्कले २वृक्षत्वचि च (आँस) कोषान्तरम्। [त्वचि च त्रि०कौ०

शल्कलिन् पु० शल्कलमस्त्यस्य इनि। मत्स्ये शब्दर०।

शल्किन् पु० शल्कमस्त्यस्य इनि। मत्स्ये हेमच०।

शल्यदा स्त्री शल-अच् तादृग्धं प्रदं मूलं यस्याः। क्षेदावालोमशौ राजनि०।

शल्भ प्रार्थनायां भ्वा०आ०सक० सेट् । शल्भते अशल्भिष्ट ।

शा(शा)ल्मलि पु० शल्-मलच् शालँ रुन् दञ् वा । शाल्मलिवृक्षे (सिमुल) तद्रूपकोषः स्त्रीत्वमपि तत्र वा ङीप् तत्रार्थे ।

शल्य न० शल्-यत् । १बाणे २तोमरे ३क्षेपके मेदि० ४वंशकविकायां विश्वः । ५दुःखहेतौ ६दुर्वाक्ये शब्दर० ७पापे त्रिका० "शल्यं नाम विविधतृणकाष्ठपाषाणलोष्ट्रबालनखपूयास्रावानर्गलभग्नोद्धारणार्थं यन्त्रशस्त्राग्न्यभिप्रधिधानं व्रणविनिश्चयार्थञ्च" सुश्रुतोक्ते चिकित्साङ्गे यन्त्रभेदे ८वस्त्रि, ङीप्०त० वास्तुभूमिस्थ शल्योद्धारं प्रश्नाक्षरेण यथा भवति तथोक्तं ज्यो०ब० "खनित्रितां मन्दिरभूमिमादौ निखाय तोयावधि यत्नतस्ताम् । कुर्यादिशल्यामथ वा क्षमानं खात्वाथ वा प्रश्नवशादधिघ्नः । दूर्वाप्रवालाक्षतपुष्पवारिः शुचिः शुचिं दैवविदं समेत्य । पृच्छेद्विनीतो मधुरक्षरेण शल्यस्य तत्त्वं भवने तदीयः । ततः प्रश्नादिनो वर्णः सन्ध्यार्थौ यत्नतोऽथ वा । क्रमात् पुष्पाक्षतादेवफलानां ग्रहर्क्षादिकः । प्रथमो धरणी धारिणी करो तदनन्तरम् । न भूतौ नभ इत्येष मन्त्रो वह्निप्रियात्मकः" वह्निप्रिया स्वाहा "मन्त्रेणानेन कठिनीमभिमन्त्र्य विभाजयेत् । सवधा खदनजेयं तवा यक्षादिवेक्षयेत् । वक्रचत एष्टाः सपदा नव चेत् प्रश्नाक्षराणि लभते । नामादिकोऽष्टमवर्णो वर्णोक्ते शल्यमाख्याति । प्रश्ने वकारः पुरतो नराणि त्रसेति शल्यं सरकप्रदायि । ओषीशब्दखोरगकेतुशब्दप्रदं ककारः खरशल्यमग्नौ । वाम्यं चकारः प्लवगास्त्रिनेत्रं प्रभोर्विनाशं प्रकरोति शल्यम् । रक्षोदिशि स्यात्रि स्टकस्थितानां मरुद्भयं वक्ति सुनिश्चितं तत् । एः पार्थिदिग्यस्त्रि शिशोर्व्रणेति शल्यं प्रवासाद् स्टकमेव शल्यम् । ओवायुकोणे नरकूपसंस्थे दारिद्र्यमित्यवगदिधत्ते । धनपदिशि शकारः प्राह विप्रास्त्रि वित्तक्षयकृदेव पक्षारो वक्ति शस्त्रास्त्रि भग्नौ । तदिह कुजविशाखं शोधनानाख्य हानिं वितरति स्टकनाशस्त्रापि सुप्रश्न देवैः । यो मध्यभागे भवितं कपालं कालावसं चाह कुलक्षयाय । यत्नादपाक्षान्यधुना प्रमाणं सर्वत्र तथ्यं कथयामि शल्ये । इन्द्रश्चोजश्चेशाने शल्यं सार्द्धकरे कटौ । वज्रान्तककुबेरेषु पुरुषे मध्यवातयोः" । देवीपु० "पुरुषाधःस्थितं शल्यं न स्पृशे दोषदं भवेत् । प्रासादे दोषदं शल्यं भवेद् यागक्षयान्तकम् । स्टहारभेदतिकष्टभूतिः स्यात्स्पृशे यदि जायते । शल्यं स्वपनदेशस्थं प्रासादे भवनेऽपि वा" । १०मदनवृक्षे ११खादिरे च पु० अमरः १२मकुलमात्रवृक्षे मद्राधिपे ऋषभेदे पु०१३सीम्नि १४शलाकायां पु० हेमच० १५बिल्ववृक्षे पु० १६मत्स्यभेदे राजनि० । १७शल्कभेदे पु० त्रिका० ।

शल्यक पु० शल्य इव कायति कै-क । १मदनवृक्षे (मवना) शब्दच० । २शल्लकीवृक्षे च पुंस्त्री० स्त्रियां ङीप् राजनि० ।

शल्यलोमन् न० शल्यमिव लोम । शल्लकीलोम्नि राजनि० ।

शल्यारि पु० ६त० । शल्यस्यापहन्तरि युधिष्ठिरे तद्वधकथा भा० शल्य० दृश्या ।

शल्ल गतौ भ्वा० पर० सक० सेट् । शल्लति अशल्लीत् ।

शल्ल न० शल्ल-अच् । १तक्षि २भेदे पु० शब्दच० । स्वार्थे क । शल्लि न० । २मोचवृक्षे पु० जटा० । (सलाद) ३पक्षिभेदे स्त्री गौरा० ङीप् । सा च ५गजभक्ष्यवृक्षे अमरः ।

शल्लकीद्रव पु० शल्लकीवाद्रव इव स्वादुत्वात् । सिल्लरे जटा० ।

शल्व पु० शल-व । शाल्वदेशे चया० । [अभवीत् ।

शव विकारे गतौ च भ्वा०पर०सक० सेट् । शवति-अशावीत्

शव पु०न० शव-अच् । मृतदेहे गतप्राणे १देहे अमरः । २जले न० मेदि० ।

शवकाम्य न० शवः काम्यो यस्य । कङ्कुरे शब्दर० ।

शवयान न० शवयानं यानमस्य अक० । मृतदेहवाहनार्थे तल्पे हारा० ।

शवर न० शव-अरन् । १म्लेच्छजातिभेदे अमरः । २पानीये २शिवे च पु० मेदि० ३तत्पत्न्यां स्त्री ङीप् । ४शाक्तभेदे ५वृक्षे पु० जयादिको० मीमांसाभाष्यकारके ६विदूषके । [शब्दर० ।

शवरथ पु० शवयानार्थं रथः शाक० । शवयानार्थे याने

शवरलोध्र पु० शवरप्रियः लोध्रः । म्लेच्छलोध्रे रत्नमा० ।

शवरालय पु० ६त० । शवरावासस्थाने अमरः ।

शवल पु० शव-कलच् । १कर्बुरवर्णे २तद्वति त्रि० अमरः । ३तद्वर्णवत्यां गवि स्त्री अमरः ।

शवसान पु० शव-शानच् सुक् च । पथिके त्रि०को० ।

शश प्लुतगतौ भ्वा०पर०सक०सेट् । शशति, अशशात्-अशशीत्

शश पुंस्त्री० शश-अच् । पशुभेदे (खरगोश) अमरः । स्वार्थे क । तत्रैव ।

"शशः शीतो लघुर्भोजी रूक्षः स्वादुः सदा स्थितः । वह्निस्तु कफपित्तघ्नो वातघ्नश्चारुधः स्मृतः । ज्वरा-

तिसारशोषाजीर्णासामवङ्करत्व ः भावप्र०। आर्द्रे तन्मांस दाने फलभेदः श्रा० त० उक्तो यथा "ऐणरौरव वाराहशार्भमांसैर्यथाक्रमम्। मासतृप्तिर्भवत्येषां दत्तेनेह पितामहाः" तन्मासं विष्णवे देयं यथोक्तं "भागं भांसं तथा छागं शार्भं समनुयच्छते। एतानि मे प्रियाण्याशु ः प्रयच्छानि वसुन्धरे!"। वराहपु० २चन्द्रा-कृष्णपेक्षणे धरणिः। ३बोधे ४लोध्रे ५नरभेदे मेदि०। तल्लक्षणं यथा "मृदुवचनसुशीलः कोमलाङ्गः सुवेषः सकलगुणनिधानं सत्यवादी शशोऽयम्" रतिम०।

शशक पुंस्त्री० शश--स्वार्थे क। (खरगोश) पञ्चनखेषु भक्ष्ये पशुभेदे "शशकः शल्की गोधा खड्गी कूर्मश्च पञ्चमः। भक्ष्यान् पञ्चनखेष्वाहुरनडुहांश्चैकतोदतः" मनुः।

शशधर पु० शशं मृगभेदं धरति धृ-अच्। १चन्द्रे २कर्पूरे च अमरः। भ-क्विप् शशभृदादयोऽप्यत्र।

शशलाञ्छन पु० शशः मृगभेदो लाञ्छनं यस्य। १चन्द्रे २कर्पूरे च शशाङ्कादयोऽप्यत्र।

शशबिन्दु पु० १राजभेदे २विष्णौ च मेदि०।

शशशिम्बिका स्त्री शश इव शिम्बी तया कायति कै-क। जीवन्त्यां राजनि०। [यस्तनयोर्मध्यस्थे देशभेदे त्रिका०।

शशस्थली स्त्री शशवासयोग्या स्थली। अन्तर्वेद्यां गङ्गा-

शशाङ्गुलि स्त्री शशि--अङ्गि इ॰वा ङीप्। कर्कटीभेदे रा॰ जनि०। "शशाङ्गुली तिक्तकटुश्च कोमला कफास्रपित्तानिलहारिणी मधुरा कफापहा। पाके तु साऽम्ला मधुरा विदाहजत् कफे तु शुष्का रुचिकृच्च दीपनी" राजनि०। [खु। तत्रैव।

शशाद पु० शशमत्ति अद-अण्। श्येनविहगे राजनि०।

शशिकला स्त्री इत०। १चन्द्रस्य षोडशभागे "गुरुनिधनमनु-लघुरुड शशिकला" छन्दोम० उक्तलक्षणे २पञ्चदशाक्ष-रपादके छन्दोभेदे। [मणौ पु० राजनि०।

शशिकान्त न० शशी कान्तो यस्य। १जलदे २चन्द्रकान्त-

शशिन् पु० शशोऽस्त्यस्य इनि। १चन्द्रे २कर्पूरे च शब्दमा०।

शशिप्रभ न०शशिना प्रभा श्लेष वा प्रभा यस्य। १जलदे।२स्त्री-स्त्रियां राजनि०। इत० ङीष्स्त्रियां जटा०। [दयोऽप्यत्र।

शशिभूषण पु० शशी भूषणं यस्य। १महादेवे शशिमण्डना-

शशिलेखा स्त्री शशिनो रेखा रक्ष ङः। १चन्द्रकलायां शशिनो लेखेव कलतात्सदृश्यात्। २गुडूच्यां मेदि०। "भो भो यो चेत् भवेतां सप्ताष्टकैचन्द्रलेखा" छन्दोम० उक्तलक्षणे २पञ्चदशाक्षरपादके छन्दोभेदे। [राजनि०।

शशिशेखर पु० शशी शेखरं यस्य। महादेवे कृला० शशि-मौलिदयोऽप्यत्र।

शशोर्ण न० इत०। शशस्य लोम्नि अमरः। [अमरः।

शश्वत् अव्य० शश-वति। १नैरन्तर्ये २पुनःपुनरित्यर्थे च

शष वधे भ्वा० पर० सक० सेट्। शषति अशाषीत् अशषीत्।

शष्कुल पु० शष-कुलच् कस्य नेत्त्वम्। (डहरकरभचा) १खण्डे २अपूपभेदे स्त्री शब्दच० गौरा० ङीष्। ३कर्ण-रन्ध्रे "अवलम्बितकर्णशष्कुली" नैष०। ४मत्स्य-भेदे च भावप्र० दन्त्यमध्योऽयमन्यार्थे। [मेदि०।

शष्प न० शष--पक्। १बालतृणे घासे अमरः २प्रतिभाजने पु०

शस वधे भ्वा० पर० सक० सेट् उदित् ङ्ना वेट्। शसति। अशासीत् अशसीत्।

शस आशिषि भ्वा० आत्म० सक० उदित् सेट्। प्रायेणाङ्-पूर्वः। आशंसते आशंसिष्ट।

शस क्षये अदा० पर०सक०सेट् उदित्। शंस्ति अशंसत्।

शसन न० शस--ल्युट्। यज्ञार्थे पशुहनने।

शस्त न० शस--क्त। १कल्याणे २तदति अमरः। ३स्तुते ४प्रशस्ते च त्रि०मेदि०। ५देहे न०त्रिका० संज्ञायां कन्। ६कङ्कुचिताग्रे शब्दच०।

शस्त्र न० शस--ष्ट्रन्। १लौहे २खड्गादौ अस्त्रे च हेमच० स्वार्थे क। तत्रैव। तत्र शस्त्रमस्त्रमसक्तं यन्त्रमिति भेदः शंस--ष्ट्रन्। ३प्रशंसति मन्त्रभेदे चिकित्साङ्गशस्त्राद्यां स-ज्ञायादि सुश्रुतोक्तं यथा "अथातःशस्त्रविचारणीयमध्यायं व्याख्यास्यामः विंशतिः शस्त्राणि। तद्यथा मण्डलाग्रकरपत्रबृद्धिपत्रनखशस्त्र-मुद्रिकोत्पलपत्रकार्द्धधारसूचीकुशपत्राटीमुखसरारीमुखा-न्तर्मुखत्रिकूर्चकुठारिकाग्रोद्विमुखाराबेतसपत्रकवृद्धि-दन्तशङ्कुमुखानि इति। तत्र मण्डलाग्रकरपत्रे छेदने लेखने च। बृद्धिपत्रनखशस्त्रमुद्रिकोत्पलपत्र-कार्द्धधाराणि छेदने भेदने च। सूचीकुशपत्राटीमुख-सरारीमुखान्तर्मुखत्रिकूर्चकानि विस्रावणे। कुठारीका-ग्रोद्विमुखाराबेतसपत्रकाणि व्यधने सूची च। वृद्धिपत्रं दन्तशङ्कुश्चाहरणे। एषणीयेषणे आतुरोपयोगे च। सूच्यः सेवने इत्यष्टविधे कर्मणि उपयोगः शस्त्राणां व्याख्यातः। तेषामथ यथायोगमुक्तसमाधोपायः कर्मसु वक्ष्यते। तत्र बृद्धिपत्रं दन्तपत्रसाधारणे भागे दृष्टोपाङ्गदन्तान्वेषं सर्वाणि। बृद्धिपत्रं मण्डलाग्रञ्च किञ्चिदुत्तानपाणिना लेखने बहुशोऽयचार्यं दन्तार्बु

विशावयवानि विशेषेण बालवृद्धस्त्रीकुमारभीरुनारीणां रात्रौ राजपुत्राणाञ्च लिखेत्। तत्र अक्षादिस्थलमङ्गुष्ठप्रदेशिनीभ्यां त्रीन्त्रिरङ्गुलम्। कृठारीवां वामहस्तन्यस्तांशितरङ्गुलमध्यमाङ्गुष्ठविदंशयामिङ्गुलात्। धारोद्धरपत्रैषणखो भूते। शेषाणि तु यथायोगं स्वल्पोदात्। तेषां नामभिरेवाङ्गतयः प्रायेण व्याख्याताः। तत्र नखशस्त्रेषणखावटाङ्गुले स्वयो वक्ष्यन्ते। वर्द्धनो दन्तशङ्कुवानतामे तीक्ष्णकण्टकप्रथमवयवपत्रसुखे। एषणी गण्डूपदाकारसुखी। प्रदेशिन्यपपर्वप्रदेशप्रमाणा सुद्विधा। दशाङ्गुला शरारीसुखी सा कर्त्तरीति कथ्यते। शेषाणि तु षड़ङ्गुलानि। तानि छुपड़ाणि सुखोड़ानि सुधाराणि सुरूपाणि सुसमाङ्गितसुखाग्राङ्गकराङ्गानि चेति शस्त्रसम्पत्। तत्र वक्रं कुण्ठं खण्डं खरधारमतिस्थूलमतिस्थूलमतिदीर्घमतिह्रस्वमित्यष्टौ शस्त्रदोषाः। अतो विपरीतगुणमाददीतास्त्रं करपत्रात्तु खरधारमच्छिन्दनार्थम्। तत्र धारा भेदनानां माक्षुरी। छेदनानामर्द्धमाक्षुरी। व्यधनानां विशावयवानाञ्च कैशिकी। छेदनानामर्द्धकैशिकीति। तेषां धावना त्रिविधा क्षारोदकतैलेषु तत्र क्षारधावितं शरशल्याच्छिन्दनेषु। उदकधावितं मांसच्छेदनभेदनपाटनेषु तैलधावितं शिराव्यधनस्नायुच्छेदनेषु। तेषां निशाणार्थं कृष्णशिला मार्दवार्थां। धारासंस्थापनार्थं गोमयीफलकमिति। भवति चात्र "यदा सुनिशितं शस्त्रं रोमच्छेदि सुसंस्थितम्। सुगृहीतं प्रमाणेन तदा कर्म्मसु योजयेत्"। अनुशस्त्राणि तु क्षुरास्त्रस्फटिकाचक्रकुविन्दजलौकाग्निक्षारनखगोजीमेषालिकाशाकपत्रकरीरवालाङ्कुशयः इति। "शिशूनां शस्त्रभीरूणां शस्त्राभावे च योजयेत्। क्षुरकारादि चतुर्वर्गं छेद्ये भेद्ये च बुद्धिमान्। आहार्य्यच्छेद्यभेद्येषु नखं शस्त्रेषु योजयेत्। विधिः प्रवक्ष्यते पश्चात् क्षारवह्निजलौकसाम्। ये क्षुद्रोगगता रोगानेतत्पर्वगताश्च ये। गोजीमेषालिकाशाकपत्रैर्विशावयेत्तु तान्। एष्वेवेषणशस्त्राभे तु बालाङ्कुशक्षुरा स्थिताः। शस्त्राण्येतानि मतिमान् शुद्धमेद्यावयानि तु। कारवेत्कर्मणैः प्राप्तं कर्मारं कर्मकोविदम्। प्रयोगशस्त्र वैद्यस्य सिद्धिर्भवति निश्चयः। तस्मात्परिचयः कार्यः शस्त्राणामादितः सदा। [राजनि०।

अस्त्रकोषतरु पु० अस्त्रकोषस्य स्थितस्तरुः। सप्तपर्णवृक्षे

अस्त्रजीविन् पु० अस्त्रेण जीवति जीव-णिनि। अस्त्रव्यापारेण युद्धादिना वृत्तिमति त्रैमच०।

अस्त्रपाणि पु० अस्त्रं पाणौ यस्य। १अस्त्रधारके २ख्यातताविभेदे च "अस्त्रपाणिर्धनापहः" इति स्मृतिः।

अस्त्रमार्ज्ज पु० अस्त्रं मार्ष्टि मृज-ण्वुल् (शिक्षकवर) अस्त्रमार्ज्जनकरे त्रिलिङ्गभेदे अमरः।

अस्त्रहत त्रि० २त०। १अस्त्रघातेन हते "पक्षिपतङ्गदंशैर्वा दंष्ट्रिदङ्किनखैर्हताः। पतनानशनप्रायैर्वैद्यास्त्रिविधबन्धनैः। हता अस्त्रप्रवेशेन ते वै अस्त्रहताः स्मृताः" देवीपु० परिभाषिते २खगादिदष्टे च। तस्यौषधादि शुद्धितत्त्वं यथा "अस्त्रघाते व्रणेऽदुष्टे यदि कश्चित् प्रमीयते। अशौचं प्राकृतं तत्र सर्ववर्णेषु निश्चयः" व्यासः "क्षतेन क्षियते यस्तु तस्याशौचं भवेद्द्विधा। आसप्ताहात् त्रिरात्रं स्यात् दशरात्रमतःपरम्"। अत्र अस्त्रघातपरं क्षतेतरशस्त्रघातपरं पारिभाषिकशस्त्रघातपरञ्च। न च शास्त्रीयव्यवहारेऽन्तरङ्गत्वेन पारिभाषिकस्यैव ग्रहणं युक्तमितिवाच्यम् आद्ये पारिभाषिकापरिभाषिकशस्त्रघातयोरुभयोरपि तथा युक्तत्वात् पारिभाषिकत्वादेव न प्रकरणनियमः" शु० त० रघु०।

अस्त्रहतचतुर्दशी स्त्री अस्त्रहतोद्देश्यकत्वाद्व्रतं चतुर्दशी। शौचाश्विनशुक्लचतुर्दश्यां तत्र कर्त्तव्यं आह्निके दर्शितं यथा

"अथ अस्त्रहतचतुर्दशी। विष्णुः युद्धहतानां श्राद्धकर्मणि चतुर्दशी प्रशस्ता"।

अस्त्रयुद्धहतानामेवेति न नियमार्थम् अग्निपुराणे "प्रायोऽनशनशस्त्राग्निविषोद्बन्धनिनां तथा। चतुर्दश्यां तु कर्त्तव्यं तत्प्रशस्तेति निश्चयः" प्रायोनशनशस्त्राग्निविषोद्बन्धनिनाम्। वायुपुराणे "युवानस्तु हते यस्य क्षतात्तेषान्तु दापयेत्। अस्त्रेण च हता ये वै तेषां दद्याच्चतुर्दशीम्"। युवान एव पुत्रादयो हता इत्यर्थः। मरीचिः "विषशस्त्राग्निदष्टस्तिर्यग्ग्राह्यक्षघातिनाम्। चतुर्दश्यां क्रिया कार्या अन्येषान्तु विगर्हिता"। ब्राह्मक्षत्रक्षतघातोऽस्त्रोति ब्राह्मक्षघातीतेषां, ये च ब्राह्मक्षत्रैर्हताः" इति अस्त्रपुराणवचनात् न तु क्षतमात्रस्यघातस्य प्रतितत्वात्। अन्येषाम् अशस्त्रादिहतानाम् एतच्च अस्त्रहतत्वाद्वं विष्णादिभिः सामान्यप्रकरणलिखनात् अस्त्रलक्षणपक्षसाधारणम् पित्रादीनामेव पार्वणविधिप्रकरणात् पार्वणविधिना कार्यं "सपि-

श्लोकरणादूर्द्धं यत्र यत्र प्रदीयते। तत्र तत्र त्रयं कुर्याद्दर्जयित्वा सुताङ्गनि" इति शङ्खवचनाच्च। ननु "यन्येद्युरन्तु विगर्हितां" इति अन्यथात् कर्त्तव्ये नैपुरुषिकपार्वणविधिः न यस्य पुरुषान्तरस्य एव श्रस्त्रहतास्तस्य नैपुरुषिकविधिरूपपद्यत एव यस्य द्वौ श्रस्त्रहतौ एको वा तेनापि द्वैपुरुषिकैकपुरुषिकमेव पार्वणं कर्त्तव्यं यथा मनुः "पिता यस्य तु दग्धः स्याज्जीवेद्वापि पितामहः। पितुः स नाम संकीर्त्य कीर्त्तयेत् प्रपितामहम्" तथा हारीतः "पितामहोऽपि जीवेद्वै पितर्य्येव समाप्येत्"। नन्वेकोद्दिष्टमात्रं श्रूयते यथाह मार्य्यः "सपिण्डीकरणादूर्द्धं मृते कृष्णचतुर्दशीम्। प्रतिसंवत्सरादन्यदेकोद्दिष्टं न कारयेत्" यमः "सपिण्डीकरणादूर्द्धं यत् पितृभ्यः प्रदीयते। एकोद्दिष्टविधानेन प्रदेयं श्रस्त्रघातिने" भविष्यपुराणे "समत्वमागतस्यापि पितुः श्रस्त्रहतस्य च। चतुर्दश्यां तु कर्त्तव्यमेकोद्दिष्टं न पार्वणम्। चतुर्दश्यां तु यत् श्राद्धं सपिण्डीकरणे कृते। एकोद्दिष्टविधानेन प्रदेयं श्रस्त्रघातिने" उच्यते। एषां वचनानामसूत्रत्वात् समूलत्वेऽपि पार्वणाश्रुतिविरुद्धकाण्वैतानि विष्णादिवचनेषु पार्वणावगतेः। भ्रात्रादीनान्तु श्रस्त्रहतानाम् एकोद्दिष्टविधिना कार्य्यम्। "अपुत्रा ये मृताः केचित् स्त्रियो वा पुरुषाश्च ये। तेषामपि च दातव्यं स्वादेकोद्दिष्टं न पार्वणम्" इत्यापस्तम्बवचने पार्वणनिषेधात्। तच्च न सकलकृष्णपक्षसाधारणं विष्णादिवचने श्राद्धशब्दस्य पार्वणपरत्वोक्तेः। किन्त्वाश्विनमासीयकृष्णपक्षविषयम्। ब्रह्मपुराणे "प्रायानयनेत्यादिना सकलकृष्णपक्षसाधारणं श्राद्धमभिधायाश्विने "तर्पणीयाचतुर्दश्यां लुप्तपिण्डोदकक्रियाः" इति पुनरभिधानं तच्छस्त्रहतभ्रात्रादिविषयम् अतएव तत्रैव "अमावास्यां पितरः पूज्या नान्दीमुखा अपीति" श्रस्त्रप्रपितामहादीनामपि श्राद्धं दर्शितम्। श्रत्रैव चतुर्दश्यामस्त्रहतश्राद्धनिन्दा आश्विनमासीयकृष्णपक्षश्राद्धादिकल्पव्यतिरिक्तसामान्यकृष्णपक्षविहितश्राद्धकाम्यश्राद्धविषया प्रकरणभेदेन श्राद्धकर्मभेदात् सामान्यविशेषन्यायाच्च इतरथा चतुर्दश्यां संक्रान्तिश्राद्धेऽस्त्रहतनिन्दास्यात् अतएव "कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीमिति" मनुवचनेऽपि चतुर्दशीवर्जनं पक्षश्राद्धादिव्यतिरिक्तविषयम्। ननु श्रस्त्रादिहतानां श्राद्धनिषेधः श्रूयते यथा ऋग्वेदः "श्रस्त्रविप्रहतानाञ्च ह्यङ्गदंष्ट्रि नखीरोगिणाञ्चैव श्राद्धमेषां न कारयेत्"। सत्यं बुद्धिपूर्वकहतानामेव। प्रमादहतानाञ्च श्राद्धादिकमाह अङ्गिराः "यत्र कथित् प्रमादेन क्षिप्यते श्वभ्युदकादिभिः। अशौचं तत्र कर्त्तव्यं कर्त्तव्या चोदकक्रिया"। अबुद्धिपूर्वकमपि श्रस्त्रप्रादिभिः क्रीड़ां कुर्वतां हतानां न कर्त्तव्यम्। ब्रह्मपुराणे "श्रङ्गिदंष्ट्रिनखिव्यालविषवह्निक्षिया जलैः। श्रादरात् परिहर्त्तव्यः कुर्वन् क्रीड़ां हतस्तु यः"। परिहर्त्तव्यः श्राद्धादौ। शास्त्रानुमत्या बुद्धिपूर्वकहतानामपि कर्त्तव्यम्। मार्य्यः "श्रशौचञ्च तिलैर्मन्त्रैस्तत्राख्यातमिवक्रियः। श्रात्मानं घातयेद्यस्तु श्वभ्यन्यनखगादिभिः। तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसञ्चयः। तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमिष्यते"। एवं क्रीड़ाव्यतिरेकेणाबुद्धिपूर्वहताः शास्त्रानुमत्या च बुद्धिपूर्वकहता अपि श्राद्धार्हाः। कथम् लुप्तपिण्डोदकत्वम् इति चेदुच्यते ब्रूमः बुद्धिपूर्वकहते पिण्डोदकक्रियालोपात्।

श्रस्त्राभ्यास पु० ६त०। श्रस्त्रप्रयोगशिक्षायां क्रियाभ्यासे। [अनि०।

श्रस्त्रायस श्रस्त्रयोग्यमयः अच्समा०। लोहभेदे (इस्पात) रा०।

श्रस्त्रिन् त्रि० श्रस्त्रमस्त्यस्य इनि। श्रस्त्रविशिष्टे।

श्रस्त्री स्त्री अस्त्रं श्रस्त्रं ङीष्। कुरिकायाम् मेदि०।

श्रस्त्र न० अस-ष्ट्रन्। बालतृणे शाके अमरे पाठान्तरम्।

श्रस्थ न० अस-थन्। दक्षादीनां मते "श्रस्थं क्षेत्रगतं प्राहुः सतुषं धान्यसञ्चये" इत्युक्ते क्षेत्रस्थे धान्यादौ च अस्थ इत्यादित्वमपि नवश्रस्थसम्भोगनक्षत्राणि ज्यो० त० उक्तानि यथा "अनुराधा मृगशिरो रेवती चोत्तरा त्रयम्। हस्ता चित्रा यथा पुष्या अश्वयुक् च पुनर्वसुः। रोहिणी नवश्रस्थादिनवद्रव्याग्रनादिषु। प्रथमं नवपीठादिसम्भोगे षड्विधुवदेत्"।

श्रस्थध्वंसिन् पु० श्रस्थं ध्वंसयति ध्वंस-णिच्-णिनि। १तक्षके (वृंद) श्रस्थ्नः २श्रस्थनाशके त्रि०।

श्रस्थमञ्जरी स्त्री ६त०। अभिनवधान्यादिशीर्षे अमरः।

श्रस्थशुक न० धान्यादेः शीर्षे अमरः। [अमरः।

श्रस्थसञ्चर पु० श्रस्थं संवृणोति सम्+वृ-अच्। सञ्चयतृणे

श्रस्थारु पु० श्रस्थस्यति अस-थन्। तुङ्गयवीयतृणे अस्थ्नः।

श्राक पु०न० अक-अञ्। १पत्रपुष्पादौ अमरः २वृक्षभेदे पु० (सेगुण) वृक्षे च २शकौ ३शिरोवृक्षे पु० शब्दरत्ना०। ५सरराज्यावधि मालवप्रवर्त्तके राजभेदे हेमाद्रौ। मालवे च पु० मेदि०। श्रूयते सामर्थ्यं यो-क तच्च नेत्यम्।

"मूलपत्रे करीराग्रे फलकाण्डाधिरूढकम्। त्वक्पुष्पं सवकचैव शाकं दशविधं स्मृतम्" इत्यृक्षेषु उद्भटादीनां पत्रादिषु न०। तत्र १मूलं मूलकादेः। २पत्रं वास्तूकादेः। ३करीरं बंशादेः। ४क्षयं बेलादेः। ५फलं कूष्माण्डादेः। ६काण्डं उत्पलादेः। ७अधिरूढं तालास्त्रिमल्लादेः। ८त्वक् मातुलाङ्गादेः। ९पुष्पं कोविदारादेः। १०सवकं ऋद्धिकादेः। भावप्र० कन्दवोक्तं यथा "पत्रं पुष्पं फलं नालं कन्दं संक्षेदजं तथा। शाकं षड्विधस्तद्वित् गुरु विद्याद्यथोत्तरम्"। "प्रायः शाकानि सर्वाणि विष्मीनि गुरूणि च। कृच्छाणि बहुवर्चांसि कृष्टविण्मारुतानि च। शाकं भिनत्ति वपुरस्रि निहन्ति नेत्रम् वर्णं विनाशयति रक्तमथापि शुक्रम्। प्रज्ञाक्षयं च कुरुते पलितञ्च नूनम् कृन्ति स्मृतिं गतिमिति प्रवदन्ति तज्ज्ञाः"। ८द्वीपभेदे मत्स्यपु० १२१ अ० तत्प्रमाणाद्युक्तं यथा

"शाकद्वीपञ्च वक्ष्यामि यथावदिह निश्चयम्। कथ्यमानं निबोधध्वं शाकं द्वीपं द्विजोत्तमाः!। जम्बूद्वीपस्य विस्ताराद्द्विगुणश्चास्य विस्तरः। विस्ताराद् द्विगुणश्चापि परीणाहः समन्ततः। तेनावृतः ससुद्रोऽयं द्वितीयो लवणोदकः। तत्र पुण्या जनपदा चिराञ्च जीवते जनः। कृत एव च दुर्भिक्षं क्षमातेजोयुतेष्विह। तत्रापि पर्वताः शुभ्राः सप्तैव मणिभूषिताः। शाकद्वीपादिषु त्वेषु सप्त सप्त नगास्त्विह। कृच्छ्रायताः प्रतिदिशं निविष्टाः पर्वतोत्तमाः। रत्नाकरादिनामानः सानुमन्तो महाचिताः। समोदिताः प्रतिदिशं द्वीपविस्तारमानतः। उभयत्रावगाढौ च लवणक्षीरसागरौ। शाकद्वीपे तु वक्ष्यामि सप्त दिव्यान् महाचलान्। देवर्षिगन्धर्वयुतः प्रथमो मेरुरुच्यते। प्रागायतः स सौवर्ण उदयो नाम पर्वतः। तत्र मेघास्तु हृष्यन्ति प्रभवन्त्यपयान्ति च। तस्मादपरेण सुमहान् जलधारो महागिरिः। स वै चन्द्र इति ख्यातः सर्वौषधिसमन्वितः। तस्माच्चित्तमुपादत्ते वासवः परमद्भुतम्। नारदो नाम चैवोक्तो दुर्गशैलो महाचितः। तस्माच्छतो दक्षिणतो पूर्वं नारदपर्वतो। तस्मादपरेण सुमहान् ग्रामो नाम महागिरिः। यत्र ग्रामत्वमापन्नाः प्रजाः पूर्वमिमाः किल। स एव दुन्दुभिर्नाम ग्रामपर्वतसन्निभः। अब्रह्मण्यैः पुरा तस्मिन् दुन्दुभिर्ताडितः सुरैः। रत्नमालान्तरमयः शब्दमत्वान्तरालजत्। तस्मादपरेण रजतो महानस्तोगिरिः स्मृतः। स वै सोमक इत्युक्तो देवैर्वासस्तं पुरा। ऋक्षतस्तस्य मातरर्थे गरुत्मता। तस्मादपरे चाम्बिकेयः सुमनास्त्वेव स स्मृतः। शिरस्यासो वराहेण तस्मिन् शैले निसूदितः। आम्बिकेयात् परो रम्यः सर्वौषधिनिषेवितः। विभ्राजस्तु समाख्यातः स्फाटिकस्तु महान् गिरिः। यस्मादिभ्राजते वह्निर्विभ्राजस्तेन स स्मृतः। सैवेह केशवेत्युक्तो यतो वायुः प्रवाति च। तेषां वर्षाणि वक्ष्यामि पर्वतानां द्विजोत्तमाः। क्षुप्यं नामतस्तानि यथावदनुपूर्वशः। द्विनामान्येव वर्षाणि यथैव गिरयस्तथा। उदयस्योदयं वर्षं जलधारेति विश्रुतम्। तस्मात् शतभयं नाम वर्षं तत् प्रथमं स्मृतम्। द्वितीयं जलधारस्य सुकुमारमिति स्मृतम्। तदेव मैत्रिरं नाम वर्षं तत् परिकीर्त्तितम्। नारदस्य च कौमारमदेव च सुखोदयम्। ग्रामपर्वतवर्षं तदनीचकमिति स्मृतम्। आनन्दकमिति प्रोक्तं तदेव मुनिभिः शुभम्। सोमकस्य शुभं वर्षं विश्वयं कुसुमोत्करम्। तदेवासितमित्युक्तं वर्षं सोमकसंज्ञितम्। आम्बिकेयस्य सैनाकं सोमकस्यैव तत् स्मृतम्। तदेव ध्रुवमित्युक्तं वर्षं विभ्राजसंज्ञितम्। द्वीपस्य परिणाहस्य सुखदीर्घत्वमेव च। जम्बूद्वीपेन संख्यातं तस्य मध्ये वनस्पतिम्। शाको नाम महाद्रुमः प्रजास्तस्य महानुगाः। एतेषु देवगन्धर्वैः सिद्धाश्च सह चारणैः। विहरन्ति रमन्ते च दृश्यमानाश्च तैः सह। तत्र पुण्या जनपदाश्चातुर्वर्ण्यसमन्विताः। तेषु नद्यश्च सप्तैव प्रतिवर्षं ससुद्गाः। द्विनाम्ना चैव ताः सर्वा गङ्गा सप्तविधा स्मृता। प्रथमा सुकुमारीति गङ्गा शिवजला शुभा। सुनितम्बा च नाम्नैषा नदी सम्परिकीर्त्तिता। सुकुमारीं तपःसिद्धा द्वितीया नामतः सती। नन्दा च पावनी चैव तृतीया परिकीर्त्तिता। शिविका च चतुर्थी स्यात् द्विविधा च पुनः स्मृता। दक्षुव पद्मो ध्रुवा तथैव च पुनः कृष्णः। वेणुका चाक्षता चैव षष्ठी सम्परिकीर्त्तिता। सुक्षता च गभस्ती च सप्तमी परिकीर्त्तिता। एताः सप्त महाभागाः! प्रतिवर्षं शिवोदकाः। भावयन्ति जनं सर्वं शाकद्वीपनिवासिनम्। अभिगच्छन्ति तावान्या नदनद्यः सरांसि च। बहुदकपरिस्रावा यतो वर्षति वासवः। तासान्तु नामधेयानि परिमाणं तथैव च। न शक्यं परिसंख्यातुं पुण्यास्ताः सरिदुत्तमाः। ताः पिबन्ति सदा हृष्टा नदीर्जनपदास्तु ते।

एते शालभद्राः प्रोक्ताः प्रमोदाद्वे च वै शिवाः। आनन्दाश्च सुखाद्यैव क्षेमकाश्च नरैः सह। वर्णाश्रमाचारयुता देशास्ते सप्त विश्रुताः। आरोग्या बलिनश्चैव सर्वे मरणवर्जिताः। अवसर्पिणी न तेष्वस्ति तथैवोत्सर्पिणी पुनः। न तत्रास्ति युगावस्था चतुर्युगसता क्वचित्। त्रेतायुगसमः कालस्तदा तत्र प्रवर्त्तते। शाकद्वीपादिषु श्रेयं पञ्चस्वेतेषु सर्वशः। देशस्य तु विचारेण कालः स्वाभाविकः स्मृतः। न तेषु सङ्करः क्वचित् वर्णाश्रमगतः क्वचित्। धर्मश्च चाण्डालीचारादेकालस्थितो जनाः। न तेषु माया लोभो वा दैवात्स्वल्पा भयं कृतः। विपर्ययो न तेष्वस्ति तद्वै स्वाभाविकं स्मृतम्। कालो नैव च तेष्वस्ति न दण्डो न च दाण्डिकः। स्वधर्मेण च धर्मज्ञास्ते रक्षन्ति परस्परम्"।

शाकचुक्रिका स्त्री शाकेषु मध्ये चुक्रिका। चिल्लायां राजनि०।

शाकट न० शकटाय हितम् अण्। १शकटसम्बन्धियुगादौ २शकटयोद्धरि च मेदि०। ३क्षेत्रोत्पातके वृक्षे राजनि०। ४धवृक्षे च पु० रत्नमा०।

शाकटायन पु० व्याकरणकारके मुनिभेदे "इन्द्रचन्द्रः काशकृत्स्नापिशली शाकटायनः। पाणिन्यमरजैनेन्द्राः जयन्त्यादिशाब्दिकाः" कविकल्पद्रुमः।

शाकटिक पु० शकटेन चरति ठञ्। शकटेन गन्तरि।

शाकटीन पु० शकटः परिमाणमस्य खञ्। विंशतितुलापरिमाणे क्षेमच०। [शाकछत्रादयोऽप्यत्र।

शाकतरु पु० शाकाख्यः तरुः। (सेगुण) वृक्षे शब्दच०।

शाकपत्त्र पु० शाकस्येव पत्त्रमस्य। शिग्रुवृक्षे राजनि०।

शाकवाटेय पु० वाटे हितम् ठक् शाकप्रधानो वाटेयः। ब्रह्मयष्टिकायाम् शब्दच०। [च। तत्रैव शिका०।

शाकविल्व पु०शाकोऽपि बिल्व इव। वार्ताकौ अटा०ख्यातौ

शाकम्भरी स्त्री शाकैर्बिभर्त्ति भृ-खच् ह्रस्वः च। "भरिष्यामि सुराः शाकैराजन्मैः प्राणधारकैः। शाकम्भरीति विख्यातिं तदा यास्याम्यहं भुवि" देवीमा० निरुक्तायाम् १दुर्गायाम् २रोमकालगतशाकम्भरनगर्यां न० तत्र भवं छ। शाकम्भरीय लवणभेदे न० "शाकम्भरीयं कथितं गड़ाख्यं रोमकं तथा। गड़ाख्यं लघु वातघ्नमल्पं भेदि त्रिदोषजम्। तीक्ष्णं व्यवायि रुच्यञ्च दीपनं कटुपाकि च" भावप्र०।

शाकयोग्य पु० शाके शाकत्वेन योग्यः। धन्याके राजनि०।

शाकराज पु० शाकेषु राजते अच्, शाकानां वा राजा टच् समा०। वास्तूकशाके राजनि०।

शाकल पु० ब०व० शकलेन ऋषिणा प्रोक्तमधीयते अण्। १शकलर्षिप्रोक्तऋग्वेदादिपुस्तकाध्येतृषु। तेषां संघोऽङ्गो घोषो वा पुनरण् वुञ् वा। शाकल शाकलक वा। १तत्समूहे २तद्वृद्धे ३तद्घोषे च पु०। "अङ्गः परम्परासम्बन्धः" सि०कौ०।

शाकलिक त्रि० शकलखेटं ठक् कालात्० वार्त्ति०। शकलसम्बन्धिनि पक्षे अण् शाकल तत्रार्थे। [शाके त्रिका०।

शाकवीर पु० शाकेषु वीरः वीर्याधायकत्वात्। १वास्तूक-

शाकशाकट न० शाकस्य क्षेत्रं शाकटच्। शाकक्षेत्रे। शाकटिनच् शाकशाकटिन अत्रार्थे क्षेमच०।

शाकश्रेष्ठ पु० शाकेषु श्रेष्ठः। १वास्तूकशाके शब्दर०। २जीवन्त्यां ३वार्त्ताकौ स्त्री क्षेमच०। [वृक्षे राजनि०।

शाकाङ्ग न० शाकस्य तद्गुणकाङ्गरूपयोगि। १मरिचे २डोडी-

शाकाम्ल न० शाकमेवाम्लम्। इक्षाम्ले राजनि०।

शाकाम्लभेदन न० शाकरूपम् अम्लं भिनत्ति भिद्-ल्यु। १चुक्रे (चुकोपाख्ये) राजनि०। [वृक्षे राजनि०।

शाकालाबु स्त्री शाकप्रधानालाबुः। अलाबुभेदे राजालाबु

शाकाष्टका स्त्री शाकेन कर्त्तव्या अष्टका। गौणकालेऽष्टकाभ्यामष्टकाशब्दे ५१६ पृ० दृश्यम्।

शाकिनी स्त्री शाकमस्त्यस्याः अतएवत्वेन इनि। १शाकभक्षणीयायां भूमौ मठवाटिकायाम् २देवीसङ्गचरीभेदे च। "डाकिनी योगिनी चैव खेचरी शाकिनी तथा। दिक्षु पूज्या इमा देव्यः सुसिद्धिफलदायिकाः" कालि०कल्प०। कण्ठदेशस्थे विशुद्धाख्ये चक्रे स्थितायां ३देवीभेदे च "विशुद्धाख्ये महाचक्रे षोड़शस्वरसंयुते। षड़ाधिवं शाकिनीञ्च विन्यसेत् पूर्ववत्ततः" तन्त्रसा०।

शाकुण पु० शक-वा० उणन्। परतापके शब्दमा०।

शाकुन पु० शकुनं शुभाशुभसूचकं निमित्तमधिकृत्य कृतो ग्रन्थः अण्। शकुनज्ञानसाधने ग्रन्थे (शाकचरित)। "शुभाशुभज्ञानविनिर्णयार्थं हेतुर्दृष्टां यः शकुनः स उक्तः। गतिस्वराक्षोकनभावचेष्टां संकीर्त्तयामोहि-पदादिकानाम्। लोकोऽधुना शाकुनसंज्ञकेन ज्ञानेन विज्ञातसमस्तकर्म्मा। नापावशूरे पतति प्रसर्पेन् शास्त्रं हि दिव्या इगतीन्द्रियेषु" वसन्तराजः।

शाकुनिक पु० शकुनेन पक्षिवधादिना जीवति ठञ्। पक्षिघातके अमरः।

शाकुन्तलेय पु० शकुन्तलायां अपत्यं ढक्। दुष्मन्तात्मजे शकुन्तलागर्भजे भरते रूपे जटा०।

शाक्त त्रि० शक्तिर्देवताऽस्य अण्। तन्त्रोक्ते शक्तिदेवतोपासके तस्य प्रयोगा षट्कर्माद्यात० २पटले उक्ता "स्वर्गे मर्त्ये च पाताले नास्ति शाक्तात् परः प्रियः। सौराणां गाणपत्यानां वैष्णवानां तथैव च। शैवानां चैव शाक्तस्य क्रमशः क्रमशः प्रिये!" "शाक्ता एव द्विजाः सर्वे न शैवा न च वैष्णवाः। उपासते यतो देवीं सायंसौ परमाश्वराम्" निर्वाणत० २पटले। "शक्त्याराधनं ज्ञात्वा नान्यत्राराधनं चरेत्। अन्यत्र चरणाद्देवि! योगिनी शापमाप्नुयात्" तन्त्रान्तर०। "तर्जन्या रजतं धार्यं स्वर्णं धार्यं मनामया। एष एव क्रमः शाक्तो न दर्भो वनस्पतिः" श्यामार०। [अमरः।

शाक्तीक पु० शक्तिः प्रहरणमस्य ठक्। शक्त्या योद्धरि

शाक्य पु० शक्त-यञ् तस्य साधुः यत्। बुद्धे।

शाक्यशब्दनिरुक्तिरन्यथोक्ता यथा

"शाक्यशब्दप्रतिच्छन्नं यस्मं यस्मात् प्रचक्षिरे। तस्मादिक्ष्वाकुवंश्यास्ते भुवि शाक्या इति स्मृताः" भरतधृतवचनम्। दृषद्वत्याख्यिका पितृव्यप्राः केचिदिक्ष्वाकुवंश्या ओतमवंशजकपिलमुनेराश्रमे योगाभ्यासाय शाक्यवृक्षे जनयामासुः शाक्या इति ख्यातिमापन्नाः।

शाक्यमुनि पु० शाक्यो मुनिः। बुद्धभेदे अमरः।

शाक्यसिंह पु० शाक्यवंश्ये सिंह इव। बुद्धभेदे अमरः।

शाक्र त्रि० शक्रस्येदं यो देवताऽस्य वा अण्। १इन्द्रसम्बन्धिनि २इन्द्रदेवताके हविरादौ। स्त्रियां ङीप्। शक्रस्येव पराक्रमः अस्याः अण्। २शक्रतुल्यपराक्रमायां दुर्गायाञ्च "इन्द्राणी इन्द्रजननी शाक्री शक्रपराक्रमा" देवीपु०।

शाकर पु० शक-वरप् स्वार्थे अण्। वृक्षे हेमच०।

शाख व्याप्तौ भ्वा० पर० सक० सेट् कुदित् चङि न ह्रस्वः। शाखति अशाखीत्।

शाख पु० शाख-अच्। क्षत्रियात्मजे ब्राह्मणजे १कुमारानुचरभेदे "क्षत्रियात्मजः कुमारस्तु शरस्तम्बे व्यजायत। तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठजाः" मत्स्यपु०५अ०। २अन्यपरिच्छेदे सर्वशाखानीये अन्यांशभेदे शब्दच०। वृक्षस्कन्धभेदे (डाल) स्त्री अमरः। ४पक्षान्तरे ३राष्ट्रौ ५वेदैकदेशे च स्त्री मेदि०। ६कश्यपे त्रिषु०। ७वेदांशभेदे च।

शाखाकण्ट पु० शाखाव्याप्तो कण्टः कण्टको यस्य। वृक्षौ

शाखानगर न० शाखेव नगरम्। मूलनगरसमीपस्थे छद्मनगरभेदे शाखादाढ़े राजनि०। [पुरे अमरः। शाखापित्त पु० शाखासु पित्तं यतः। पार्श्वपादादिदेहशाखादाढ़े राजनि०। [स्त्रियां ङीष्।

शाखामृग पुंस्त्री० शाखासु मृगः पशुः। वानरे अमरः।

शाखावृद्धा स्त्री शाखाप्रधाना। वृक्षभेदे राजनि०।

शाखारण्ड पु० शाखायां वेदशाखायां रण्डः तद्विहितकर्मानाचरणात्। ब्रह्मशाखानेनाचरणाद्ब्रह्मोक्तकर्मकर्तरि हेमच०। [राजनि०।

शाखाल पु० शाखाः बाहुल्येन सन्त्यस्य अच्। वानीरवृक्षे

शाखाशिफा स्त्री शाखाऽऽढ्या शिफा मूलम् मध्य०। वटादीनां शाखाजाते १मूले अमरः। २शिफाप्रारभ्य शाखायुतायां गुडूच्यादिलतायाम् भरतः।

शाखिन् पु० शाखाऽस्त्यस्य इनि। १वृक्षे अमरः। २वेदैकदेशयति, ३वृक्षभेदे, ४ऋक्षभेदे च मेदि०।

शाखोट पु० शाख-आप्नो खाटन् (शाखोड़ा) वृक्षे तिकाण स्वार्थे क। तत्रैव।

शाङ्किक पुंस्त्री० शङ्कुलहिकारवलवनिर्माणं शिल्पमस्य ठञ्। जातिभेदे (शाँखारी) अमरः स्त्रियां ङीष्। [रत्नमा०।

शाङ्कुष्ठा स्त्री शं प्रति शो-कु शः अकुष्ठ एव यस्याः। गुडूचीवां गुडूच्यां मेदि०। [लतायां अमरः।

शाट पु० शट-घञ्। वस्त्रे अमरः। स्त्रीत्वमपि गौरा०ङीष्।

शाटक पु०न० शट-ण्वुल्। वस्त्रे अमरः स्त्रीत्वमपि टाप्।

शाट्यायन पु० १मुनिभेदे, तेन प्रोक्तम् अण्। २प्रकृतक्रोडकर्मणि वैगुण्यसम्पादनार्थं विहिते क्रोडभेदे न०भरतः।

शाठ्य न०शठस्य भावः ष्यञ्। शठतायाम्। [चक्रिन् तुल्यः।

शाड स्नानायां शा०षा०सक० सेट्। शाडते अशाडिष्ट कुदित्

शाण न० शणेन निर्वृत्तम् अण्। शणसूत्रनिर्मिते १रज्ज्वादौ शण-दाने(तैलने) घञ्। (कष्टिपाषर) २कषणसाधने २वस्त्रादीनां निकषणे तीक्ष्णकरणवस्त्रभेदे मेदि० ४करपत्रे (करात) विश्वः। ५मानचतुष्कमाने भावप्र०।

शाणाजीव पु० शाणमाजीवति शण+जीव-अण्। शाणतीक्ष्णकारके शिल्पिनि हेमच०।

शाणि पु० शण-रक्। १वृक्षभेदे शब्दच०। शणेन निर्वृत्ता रज्जु वा ङीप्। २शणनिर्मिते वस्त्रविशेषे २शणिद्रव्ये च हेमच०। ४वृक्षकटाद्यादिरचनायां शब्दर०। ५वस्त्रमण्डपे (ताँबु) मेदि०।

शाणित त्रि० शण-दाने (तैलने) क्त-क्त। तीक्ष्णीकृते।

शाणीर न० शण-वा० ईरच्। शोभनदन्तधावनतरौ विश्वः।

शाण्डिल्य त्रि० अण्डिलस्यापत्यम् यञ्। गोत्रप्रवर्त्तके भक्तिशास्त्रकारके ऋषिभेदे मेदि०। भक्तिशब्दे तत्मतं दिग्मात्रं दर्शितम्। तत्प्रियत्वात् २बिल्वे अमरः ३अक्षिभेदे च मेदि०।

शात न०गो-क। १खड्गे २तनूकरणे त्रि०अमरः। ३क्षिप्ते ४क्षये त्रि० विश्वः। ५दुर्बले ६निर्मिते च त्रि० मेदि०। ७धूसरे पु०अमरः। [अमरः २धूसरे ३करवीरे च पु० मेदि०।

शातकुम्भ न० शतकुम्भे गिरौ भवः अण्। १हिरण्ये

शातकौम्भ न० शतकुम्भे भवम् अण् द्विपदवृद्धिः। १हिरण्ये २धूसरे च हिरण्यकोषः।

शातन न० शो-णिच्-ल्युट्। १तनूकरणे २विनाशने च "वस्त्रे वर्णशातानां जायते पञ्चशातनम्" इति अधिकरणमाला। [चन्द्रप्रकाशे यङ्लुप०।

शातपत्रक पु० शतपत्रमिव कायति कै-क स्वार्थे अण्।

शातभीरु पु० शाता दुर्बलाः पान्था भीरवो यस्याः १व०। १मल्लिकाभेदे रत्नमाला। [वि०भी०।

शातमान त्रि० शतमानेन क्रीतम् अण्। शतमानेन क्रीते

शातला स्त्री शातं कायं लाति ला-क। (शामलता) दृष्टे भरतः।

शातातप पु० ऋतिकारके मुनिभेदे। तेन प्रोक्तं कल्प। शातातपोय तत्प्रोक्ते धर्मविषाकथन्थे।

शात्रव पु० शत्रुरेव स्वार्थेऽण्। १रिपौ अमरः। तस्य भावः तेषां संघो वा अण्। २वैरे ३रिपुसमूहे च न०।

शाद पु० शद-घञ्। १हर्षे २हरिततृणे च अमरः।

शाद्वलहरित पु०शाद्वलेन हरितवर्णयुक्तः। शाद्वले देशे अमरः

शाद्वल पु०शादाः शब्दात्र दूयच्। बहुलहरिततृणयुक्ते देशे अमरः। [अशोशांसोत् अशीशांसिष्ट।

शान तेजने भ्वा० उभ०सक०सेट् स्वार्थे यङ्। शीशांसति ते

शान इ० शान-अच् शो निशाने रत्नुक्षेरनित्यः यङ्। अक्षादीनां तीक्ष्णताकारके शब्दभेदे भरतः।

शानी स्त्री शान-ङीष्। रन्द्रयाकषां यङ्लुप०।

शान्त त्रि० शम-क्त। १शमयुक्ते २अभियुक्ते च शम-णिच्-क्त नि०। ३शान्तिं गमिते त्रि०। ४निर्वेदस्थायिभावके रसभेदे पु० मेदि०। ५लोभपाटलाक्रान्तायाम्, अम्लाम्लरूपक्षायां ६अम्लीभेदे च स्त्री राजनि०। शान्तरसनिरूपणं सा०द० ३य० यथा "शान्तः शमस्थायिभाव उत्तमप्रकृतिर्मतः। कुन्देन्दुसुन्दरच्छायः श्रीनारायणदेवतः। अनित्यत्वादिनाऽशेषवस्तुनिःसारता तु वा। परमात्मस्वरूपं वा तस्यालम्बनविभवते।। पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः। महापुरुषसङ्गाद्यास्तस्योद्दीपनरूपिणः। रोमाञ्चाद्या अनुभावास्तथा स्तम्भनिर्वारिणः। निर्वेदहर्षस्मरणमतिभूतदयादयः। निरङ्कारस्वरूपत्वाद्व्यभिचारिदोषेण नो। दयावीरादौ हि औन्नत्याङ्कनादौ अन्तरा मलवत्त्वाद्व्यभिचारादेरन्ने च विद्याधरचक्रवर्त्तित्वाद्याप्ते दैन्यनिरङ्कारोपमयो न दृश्यते। शान्तस्तु सर्वप्रकारेणाङ्कार-प्रशमैकरूपत्वात्र तत्रान्तर्भावमर्हति। अतस्य नागानन्दे शान्तरसप्रधानत्वमपास्तम्। नन्तु "न यत्र दुःखं न सुखं न चिन्ता न द्वेषरागौ न च काचिदिच्छा। रसः स शान्तः कथितो मुनीन्द्रैः सर्वेषु भावेषु शमप्रधानः" इत्येवंरूपस्य शान्तस्य मोक्षावस्थायामेवात्मरूपावस्थितत्वात्तस्यां प्राकृतभावात् तत्र सङ्घार्यादीनामभावात् कथं रसत्वमित्युच्यते। "युक्तविमुक्तदशायामवस्थितो यः शमः स एव यतः। रसतामेति तदस्मिन् सञ्चार्यादेः स्थितिश्च न विरुद्धा" यद्यस्मिन् सुखाभावोऽयुक्तस्तस्य वैषयिकसुखपरत्वान्न विरोधः। उक्तं हि "यच्च कामसुखं लोके यच्च दिव्यं महासुखम्। तृष्णाक्षय-सुखस्यैते नार्हतः षोडशीं कलाम्। सर्वाकारमलङ्कार-रहितत्वं व्रजन्ति ये। अत्रान्तर्भावमर्हन्ति दयावीरा-दयस्तदा"। आदिशब्दात् धर्मवीरदानवीरदेवताविषय-रतिप्रभृतयः"। [नव" इति तत्पर्यन्तः।

शान्तनव पु० शान्तनोरपत्यम् अण्। भीष्मे "भीष्मः शान्त-

शान्तनु पु० द्वापरयुगभवे चन्द्रवंशजे प्रतीपराजपुत्रे नृपभेदे

शान्तम् अव्य० शान्ति+वा० दण्ड। निवारणे मेदि०।

शान्ति स्त्री शम-क्तिन्। १कामक्रोधादिजये २विघ्नेभ्यो मनसो निवारणे अमरः। ३उपद्रवनिवारणे ४निवारणे च "यत्किञ्चिदस्तु संप्राप्य अल्पं वा यदि वा बहु। या तृप्तिर्जायते चित्ते सा शान्तिः कथ्यते बुधैः" पद्मपु० क्रियायो० उक्ते ५शान्तोभभेदे हेमाद्रौ व्रतखण्डे "सर्वज्ञा सर्ववेत्तृत्वात् शान्तित्वाच्छान्तिरुच्यते" देवीपु०। ७पूजाहोमजपदानादिद्वारा ग्रहोपद्रवनिवारणे ८शान्तिकर्मणि ९शान्तिकर्मादिकर्त्तरि च "यथा मन्त्रप्रकाराणां कवचं निवारकम्। तथा दैवोपघातानां शान्तिर्भवति वारकम्" मत्स्यसूक्तवाक्यम्। सा च मन्त्रभेदेऽपि कार्य्या नैमित्तिकत्वात् "नैमित्तिकानि कार्य्याणि निगदन्ति यथा यथा। तथा तथैव कार्य्याणि

न कार्यमु विधीयते" इति भवन्तः वाक्यात्। कङ्कु-तादिशान्तिश्च हेमाद्रिशान्तिकाण्डे शान्तिकल्पादौ दृश्या।

शान्तिक त्रि॰ शान्तये हितं ठक्। शान्तिसाधने होमादौ तत्करणसङ्ख्यौदिकं सु॰चि॰ उक्तं यी॰ ४॰ यथा "त्रिप्रभृत्यान्यचरमैतन्मयानु मन्त्रा शान्तिकञ्च षड्भङ्गपौष्टिकाभ्याम्। खेऽर्के विधौ सुखगते तनुगे गुरौ, सौम्यादिदृष्टसमये, शुभदं निमित्ते"। "अथ शान्तिक-पौष्टिकादिकल्पेषु सङ्ख्यां वक्ष्यतिवक्ष्येनाह। त्रिप्रेति त्रिप्रादीनि मन्त्रान्तानि प्रसिद्धानि तेषु पौष्टिकं षड्भङ्गं विनायकशान्त्यादि शान्तिकं दुष्टफलदमूलनक्षत्रादुत्पन्नशान्त्यादि एतानि कर्माणि काम्यानि उक्तञ्च दीपिकायाम्। "मित्रादित्यमघोत्तरात्रयमिश्वक्षातोविरञ्च्युत्तरभाधीश्वरपूज्यपौष्णरविषु स्फीते तथारित्रिषि। रिक्तां पर्वं विहाय सौम्यदिवसे मन्त्रे ऋषां भूतये सर्वैः शान्तिकपौष्टिकं निगदितं गर्गादिभिर्निश्चयात्" अथ लग्नशुद्धिः तत्रार्के स्वर्क्षे खे दशमे सति विधौ चन्द्रे सुखगते चतुर्थस्थे गुरौ तनुगे लग्नस्थे सति शान्त्यादिकं कर्म कार्यं उक्तञ्च रत्नमालायाम्। "पूर्णे चन्द्रे वेशसः शेऽर्केऽम्बरा॰स्थे लग्ने जीवे, वाक्पतेर्वाम्बरे च। श्रीमत्या-युष्प्राप्ति कार्याणि कार्याणीति" नीलकण्ठादि मौर्ये शुक्रशुक्रयोरस्तादिवे बाल्यवार्द्धकसिंहस्थ गुर्वादिरूपे दुष्ट-समयेऽपि न शुभदम्। तथा निमित्ते केत्वादुत्पातदर्शने सति शुभदं उक्तञ्च दीपिकायाम्। शान्तिकर्माणि कुर्वीत-रोगे नैमित्तिके तथा। शुक्रभार्गवमौर्येऽपि दोषस्तत्र न विद्यते"। उक्तञ्चैतत् "यतोऽस्तोदं शान्तिकं नैमित्तिक-कम् "अनिमित्तजता शान्तिर्निमित्तायोपजायते इति स्मरणात्। तत्र निमित्ते रोगरूपे केत्वादुत्पातालरदर्शन-रूपे च भवति नैमित्तिकं तत्र बहुदिनव्यापके शुक्र-शुक्रास्तादिदोषेऽप्यवश्यं विधेयं यतो जन्मान्तरीयदुर-दृष्टसूचकमिदं निमित्तमुत्पन्नं तस्य शान्त्या निरासादशु-भादृष्टस्यापि निरासः। बहुदिनग्राह्ये निर्दुष्टे काले क्रियमाणं शान्तिकं किञ्चिद्दूरदृष्टस्यापकं यद्यपि भवति तथापि तावच्चिरेणैर्दुरदृष्टस्य प्राबल्याद् दुःखप्राप्तिः यथाल्पोऽग्निरल्पेनैव जलेन शान्तो भवति तथा बलवन्नगरदाहको बहुभिर्वेश्मभिर्युगपद् मुद्गीतजल-पूर्णघटैरेकदेशनिर्वापितोऽपि बलवोऽग्निर्ननिर्वाप्यते स-र्वथैः सर्वथा सौम्यादिदोषं विनैव यथा कथञ्चित्कथित-प्रकारेण दिनशुद्धिमङ्गीकृत्य शान्तिकाद्यवश्यं विधेयम्"।

शाप पु॰ शप्-घञ्। (खनिष्ठं भूयादित्यादिरूपम्) १आक्रोश-रूपे २अपराधे च मेदि॰।

शापास्त्र पु॰ शाप एवास्त्रं यस्य। मुनौ त्रिका॰।

शाब्दबोध पु॰शब्देन निर्वृत्तः अण् कर्म॰। अन्वयबोधे शब्द-ज्ञानजन्ये पदार्थोपस्थितिद्वारके ज्ञानभेदे न्यायमतम्। शा-ब्दत्वं त्वनुभवत्वव्याप्यं जातिभेदः तद्बोधप्रकारादि भाषा॰ उक्तं यथा "पदज्ञानन्तु करणं द्वारं तत्र पदा-र्थधीः। शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी। सङ्गत्या शक्तसम्बन्धस्तात्पर्यानुपपत्तितः। आकाङ्क्षयो-न्यताकाङ्क्षातात्पर्यज्ञानमिष्यते"। भाषा॰ सि॰मु॰ विवृत-मेतत् यथा

"शाब्दबोधप्रकारं दर्शयति। पदज्ञानन्विति। न तु ज्ञायमानं पदं करणम् पदाभावेऽपि नौरिच्छोकादौ शाब्दबोधात्। पदार्थधीरिति। पदजन्यपदार्थस्मरणं व्यापारः। अन्यथा पदज्ञानवतः प्रत्यक्षादिना पदार्थो-पस्थितावपि शाब्दबोधापत्तेः। तत्रापि इच्छा पद-जन्यत्वं बोध्यम्। अन्यथा घटादिपदात् समवायसम्ब-न्धेन तत्पाकाश्रयस्मरणं स्यात् तत्पाकाश्रयेऽपि शाब्द-बोधापत्तेः। इच्छाः शक्तिसङ्गत्यन्तरः सम्बन्धः। अत्रैव शक्तिज्ञानस्योपयोगः। पूर्वं शक्तिग्रहाभावे पद-ज्ञानेऽपि तत्सम्बन्धेन स्मरणानुपपत्तेः। पदज्ञानस्य सम्बन्धिज्ञानविधयार्थस्मारकत्वम्। शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः। सा चाप्तोक्तादवगन्तव्या ईश्वरेच्छारूपा। आधुनिके नास्ति शक्तिरित्येव। "एतादृशेऽहनि पिता नाम कुर्यात्" इतीश्वरेच्छाबा-धात्। आधुनिके तु सङ्केते न शक्तिरिति सम्प्रदायः। मन्यास्तु ईश्वरेच्छा न शक्तिः किन्त्विच्छैव। तेन आधु-निकसङ्केतेऽपि शक्तिरस्तीति वदन्ति"।

शाब्दिक पु॰ शब्दं शब्दसाधुताज्ञापकं शास्त्रं वेत्त्यधीते वा ठक्। व्याकरणशास्त्रविदि।

शामित्र न॰ शम-णिच् इत्र। १पशुबन्धने। शमितुः कर्म-अण्। यज्ञार्थपशुहननकर्तृभावे २तद्धनने च।

शामीन न॰शम-ईनञ्। १मक्षणि २वृक्षे स्त्री ङीष् त्रि॰कौ॰

शाम्बरी स्त्री शम्बरेण निर्वृत्ता अण् ङीप्। मायायाम् इन्द्रजालादौ अमरः। [जटा॰।

शाम्बविक त्रि॰ शम्बूः एवमस्य ठक्। शाङ्खिके (शाँखारी)

शाम्बु(म्बू)क पु॰ श(म्बू)म्बूक+स्वार्थे अण्। शम्बूके (शाबुक) भरतः।

शाम्भव पु० शम्भोरयम् अण्। १गुग्गुलौ २कर्पूरे ३शिवभक्तिकायां राजनि०। ४विष्णुभेदे शब्दच० ५शम्भुपुत्रे पु० ६देवदारुणि च न० राजनि० ७शिवसम्बन्धिनि दनुपासके च त्रि०। ८दुर्गायां स्त्री "शाम्भरी कुपिता तस्यै तिं तन्मम्।

शा(सा)यक पु० शो(सो) वा-ण्वुल्। १वाणे खड्गे च जटा०

शार दौर्बल्ये भ्वा० पु० सक० सेट्। शारयति-ते अशशारत् त।

शार न० शार-अच्, ह्रस्व वा। १कर्पूरवर्षे २तद्वति त्रि० अमरः ३वायौ पु० अमरः ४अम्बोपकरणे मेदि०।

शारङ्ग पुंस्त्री० शारं कर्बुरमङ्गं यस्य शक०। १चातकपक्षिणि २हरिणे ३गजे ४भृङ्गे ५मयूरे च। रायमुकुटः जातित्वात् स्त्रियां ङीष्। ६हिंसके ७वाद्ययन्त्रभेदे स्त्री ङीष् शब्दार्णवः।

शारद न० शरदि भवम्-अण्। १श्वेतपद्मे राजनि० २काशे ३वकुले ४हरिद्रौ च पु० राजनि० ५शरद्भवमात्रे त्रि० स्त्रियां ङीष्। शारदं श्वेतपद्ममस्त्यस्याः अच्। ६शरत्सम्बन्धिन्यां स्त्री त्रिका०। ७नूतने दृश्यप्रतिमे त्रि० मेदि०। ८शाकीने त्रि० विश्वः। १०दुर्गायां स्त्री टाप् "शरत्काले पुरा यस्मात् नवम्यां बोधिता सुरैः। शारदा सा समाख्याता पीठे लोके च नामतः" तिथितः। ११शरभेदे शब्दर०। १२तोयपिप्पल्यां १३सप्तच्छदे स्त्री मेदि० ङीष् एवं १४कोजागरपूर्णिमायां स्त्री शब्दरत्ना० शरत्कालोने पूजादौ त्रि० स्त्रियां ङीष्। "शारदी चण्डिकापूजा त्रिविधा परिकीर्त्तिता। सात्त्विकी राजसी चैव तामसी चेति तां शृणु भविष्यपु०। [भवे १आद्ये २शरत्कालजे रोगे पु०

शारदिक न० शरदि भवं आद्यं रोगो वा ठञ्। शरत्काले

शारदीय त्रि० शरदि भवः छ। १शरत्काले कर्त्तव्ये उत्सवादौ तथाभूतायां दुर्गापूजायां स्त्री "अदूरे जगदम्बायाः शारदीयो महोत्सवः"। "शारदीया महापूजा चतुःकर्णमयी शुभा" तिथितः।

शारि(री) स्त्री शृ-इञ् वा ङीष्। १पाशकादिगुटिकायां २अम्बोपकरणे च मेदि०। ३पक्षिभेदे च "शारीं शरन्नीं सखि! शारवेति" नैषधम्। ४युद्धार्थगजपर्य्याणे ५व्यवहारभेदे मेदि०। ६कपटे धरणिः। स्वार्थे क। पक्षिभेदे गौणादाद्यत्वे च ङीषन्त०।

शारिफल पु० न० शारेः फलमिवाधारः। शारिफलके पाशक्रीड़ासाधने २द्रव्ये (जड) अमरः स्वार्थे क। तत्रैव।

शारिवा स्त्री शारिरिव वर्णतः वन-ड। श्यामालतायाम् अमरः। "एकं वै शारिवामूलं सर्वव्रणविशोधनम्" वैद्यः।

शारिशृङ्खला स्त्री शारेः शृङ्खलेव। पाशकभेदे तद्भेदाश्च "चतुरो तिन्तिड़ो द्यूतं पञ्चमी शारिशृङ्खला। नव पीठो चाष्टकाष्टो नयः काण्डयपुत्रकः। एते पाशकभेदाः कुलेयकोलाहलोऽपि च" शब्दर०।

शारीर त्रि० शरीरस्येदम् अण्। १देहसम्बन्धे सुखदुःखादौ तद्बोधमात्रे पुनः अण्। २रुजे पु० मेदि०। शरीरमात्मनेनाभिमन्यते अण्। ३जीवे। स्वार्थे क। तत्रार्थे। शारीरं जीवं दुःखं वा अधिकृत्य कृतो ग्रन्थः कन्। आयुर्वेदान्तर्गते चिकित्साङ्गे सुश्रुतग्रन्थाद्योक्तदेहे च शारीरञ्च दुःखं रोगादिकं यथोक्तं विष्णुपु० ६५अ०। "आध्यात्मिकोऽपि द्विविधः शारीरो मानसस्तथा। शारीरो बहुभिर्भेदैर्भिद्यते ऽनुगताञ्च यः। शिरोरोग प्रतिश्यावज्वरशूलभगन्दरैः। गुल्मार्शःक्षयकुष्ठाद्य ह्यर्दोभिरनेकधा। तथाक्षिरोगातिसारकृच्छ्राश्मामयसंज्ञकैः। भिद्यते देहजस्तापो मानसं शृणुवर्क्षि" सुश्रुतान्तर्गतशारीरकस्थानञ्च तत्र दृश्यम्।

शारीरिक त्रि० शरीरे भवः ठक्। देहजाते दुःखादौ।

शारुक त्रि० शृ-उकञ्। छिन्नके।

शार्कर त्रि० शर्करा अस्त्यस्य अण्। १शर्करायुक्ते देशे शर्करावा विकारः अण्। २फाणिते ३इक्षुभक्षेपे च पु० मेदि०। शर्करीछन्दोऽस्य अण्। शर्करीछन्दोयुक्ते ४मन्त्रादौ।

शार्ङ्ग त्रि० शृङ्गस्य विकारः अण्। १शृङ्गजाते पदार्थे। २विष्णुधनुषि ३धनुर्मात्रे च पु० मेदि० ४शार्ङ्गके न० राजनि०। [स्निग्धे त्रि०।

शार्ङ्गिन् पु० शार्ङ्गः अस्त्यस्य इनि। १विष्णौ अमरः। २धनुर्धरे

शार्दूल पुंस्त्री० शृ-अलच् दुक्च। १व्याघ्रभेदे अमरः। २गुग्गुलभेदे ३शरभे ४राक्षसभेदे च मेदि० उत्तरपदस्थः। ५श्रेष्ठार्थे अमरः। ६पक्षिभेदे धरणिः ७चित्रके राजनि०। स्त्रियां सर्वत्र जातित्वे ङीष्।

शार्दूललालित न० अष्टादशाक्षरपादके छन्दोभेदे तल्लक्षणं यथा "सः सो जः सतसा दिनेशयतिभिः शार्दूललालितम्" छन्दोम०।

शार्दूलविक्रीड़ित न० एकविंशत्यक्षरपादके छन्दोभेदे तल्लक्षणं यथा "सूर्य्याश्वैर्मसजस्ततः सगुरवः शार्दूलविक्रीड़ितम्" छन्दोम०।

शार्वर न० शर्वर्यां रात्रौ भवोऽण्। १खद्योतमणि।

२शाखके च त्रि० मेदि०। ३शाखिसम्बन्धिनि त्रि०।
"शार्वरस्य तमसो निभिद्यें किरा० भवार्थे त्व काशाद्-
ठञ् शार्वरिक इत्येव शाखिभवे। [अशाखिष्ट।

शाल क्षये भ्वा०पर०सक० सेट् चङि न ह्रस्वः। शालते

शाल पु० शल-घञ्। १सत्त्वभेदे २प्राकारे ख्यातेऽमरः
३वृक्षभेदे अमरः। ४वृक्षमात्रे राजनि० दन्त्यादिस्तु
वृक्षमात्रे "रसालः साल: समदग्धतासना" इति नैषधम्।
५नदभेदे भट्टि०। इत्यश्विवाङ्गनन्तमे विश्वः।

शालग्राम पु० शालानां वृक्षाणां ग्रामः समूहो यत्र।
१पर्वतभेदे तत्र जातः अण्। तत्र जाते २विष्णोर्मूर्त्तिभेदे
गण्डकशब्दे २५११ पृ० दर्शिते गण्डक्या एकदेशस्य
भेदेऽपि जाते ३विष्णुादिदेवचक्रयुक्तशिलाभेदे च तदुत्पत्ति-
र्लक्षणभेदेन तन्नामभेदाश्च यथा "कीटयोनिं व्रजेद्यो" इति
गण्डक्याः सुरान् प्रतिशापे "तेन कर्मविपाकेन सदा
कृष्णा नदी भवेति" देवानां गण्डकीं प्रति शापे च जाते
विष्णुना तत्समाधानायोक्तं यथा
"शृणु ब्रह्मन्! महादेव! शृणु देव! गजानन!।
मद्गण्डो ब्राह्मणो ब्राह्मणाङ्गो शापतोऽत्र वै।
भविष्यतस्तयोर्भोक्तं भविष्यामि कलेवरम्। शीर्षं
भविष्यति यदा तन्मेदोमज्जसंभवाः पाषाणालर्गताः
कीटा वज्राख्याः प्रभविष्यन्ति" इति "ऋषेव गण्डकी
पुण्या गङ्गातुल्या महानदी। गण्डक्यां गिरिराजस्य
दक्षिणे दशयोजनम्। विस्तीर्णं तन्महाक्षेत्रं पुण्य-
क्षेत्रं महीतले। चक्रतीर्थमिति ख्यातं त्रिषु लोकेषु
विश्रुतम्। यावत्पश्यति देवा देवो द्वारावतीं गतः।
तमयोः सङ्गमो यत्र मुक्तिस्तत्र न संशयः। सर्वदेवप्रीति
करा मुक्तिमुक्तिप्रदायिनः। भवन्त्येषां तु पाषाणा-
मेतदन्तर्गता हराः। प्रार्थितं तं विना सर्वं चक्रकीटा
भवन्त्विति। अनेनैव तु गण्डक्याः पुण्यत्वं भवतामपि।
भविष्यति तदन्तश्च चिह्नं तद्देवतोद्भवम्। विप्राय वेदचि-
विभ्रति प्रीयतां सा च देवता" इति विष्णुना ब्रह्मणा
तच्चक्रमस्य प्रत्ये विष्णुशिलेत्या
"स्त्रीवर्णा शिला पूज्या ब्राह्मणादेः सुखाप्तये। स्निग्धा
शिला मनस्सिद्धिं कृष्णाऽसिद्धिं करोति च। मेचका
कोत्तिका पीताङ्गारवत् सा यशोहरा। पार्श्वकृष्णार्ध-
वर्णा चक्रिणा पापघोकरी। पीता पुत्रक्षयं दद्या-
दारक्तवर्णा सुतान् हरेत्। नीला संदिग्धते लक्ष्मी धूम्राभा
हरते मतिम्। रोगप्रदा रक्तवर्णा सिन्दूराभा महा
कलिम्। दारिद्र्यकारिणी पद्मा समा सर्वार्थसाधिका।
स्थूला निहन्ति चैवायुः सूक्ष्मा सत्सन्ततिं हरेत्।
पूजामन्त्रं वाञ्छितया निष्फला वाञ्छनं विना। क-
पिला चित्तवैकल्यं नेत्ररोगञ्च कर्बुरा। भग्ना भङ्गकरो-
क्षेत्रा वज्रचक्रापमानदा। लक्षणान्तरहीना च देवचक्रा
वियोगदा। दीर्घमुखी बलक्षयी दीर्घचक्रा सुतान्
हरेत्। संलग्नचक्रा त्वसुखं बहुचक्रा महाभयम्। भग्न-
चक्रा तु दारिद्र्यं सर्वनाशं लघोदरी। कृशोदरं
व्याकुलधी विषमा विविधापदः। विस्तीर्णनाभिश्च
विकारान् कुरुते बहून्। वंशच्छेदो गदस्थानां नाद-
सिद्धां प्रजायते। रेखाक्रान्ता दुःखदात्री च यदा सूक्ष्मा
तदा सुखम्। यदा स्निग्धा तदा चक्रीत्यादिभेदानतः
शृणु। चक्रोद्धरिः। स विष्णोर्यत्र यत्र सचक्रकम्।
केवला वनमाला च गदस्थानामभीष्टदा। वासुदेवः२
स विष्णोर्यद्द्वारे चक्रयुग्मकम्। किरीटं सगदं चापि
स श्वेतः पाञ्चजन्यभृत्। सङ्कर्षणः२ स विष्णोः प्राक्-
पश्चाच्चक्रयुग्मकम्। संलग्नपूर्वभागस्थं महारत्नं सुशो-
भनम्। प्रद्युम्नः४ सूक्ष्मचक्रं स्याच्चिह्नं दीर्घं सुवि-
स्तरम्। सुस्थिरान्तर्बहिश्चिह्नः पीत इष्टप्रदायकः।
अनिरुद्धस्तु५ नीलाभो वर्तुलश्चातिशोभनः। रेखाद्वयं
तु तद्द्वारि पृष्ठे ब्रह्मेन लाञ्छितम्। केशवः६ स तु
विष्णोरस्त्रेकं वा हरमेव वा। मान्धा यत्राऽस्त्र चक्रं
स्यात् चतुष्कोणः स भाग्यकृत्। नारायणः७ श्यामवर्णो
नाभौ चक्रं तथोन्नतम्। दीर्घरेखासमायुक्तं दक्षिणे
सुषिरं पृथु। हरिरूपाङ्कितं वा स्यात् तथा लक्ष्मीं
सुखं भवेत्। हरिवंशे दृश्यते द्वारं मुक्तिसम्प्रदा तु
सा। परमेष्ठी८ स विष्णोर्यः पद्मचक्रान्वितस्तु यः। वि-
स्तीर्णनाभिरुच्चाभः पृष्ठे च सुषिरं महत्। विष्णुस्तु९०
लक्ष्मीवर्णः स्यात् स्थूलचक्रे सुशोभने। द्वारोदरि तथा
रेखा दृश्यते मध्यदेशतः। नारसिंहस्तु११ कपिलः
पृथुचक्रो ह्रस्वमुखः। त्रयो वा यत्र वा यत्र चिह्नयो
स्टङ्किणां न सत्। कपिलनारसिंहस्तु१२ गुरुलाघ-
विभो भवेत्। स्थूलचक्रद्वयं मध्ये द्वारे रेखा सुशोभना।
महासिंहो१३ विष्णोः पूर्वोक्तैर्लक्षणैर्युतः। रेखाश्च
केसराकारा सुखं दीर्घं भयानकम्। लक्ष्मीनृसिंहो१४
विष्णोश्चतुष्कः सबिन्दुकः। पूर्वोक्तलक्षणैर्युक्तो वन-
माला विभूषितः। वराहो१५ऽमो१६ मलिनिम्ने चक्रे
च विषमे तथा। इन्द्रनीलनिभः स्थूलस्त्रिकोणा-

च्छिन्नो भवेत् । पृथ्वीवराहनाम्नो१६ वा वा वराहाकृतिः शिला । वामस्था चैव रेखैका गतराज्यप्रदाविका । मत्स्याख्या१७ वा शिला पृष्ठे बिन्दुत्रय विभूषिता । कांस्यहारा स्वर्णनिभा दीर्घा वा मुक्तिरुक्मिदा । कूर्माख्या१८ तु शिला पृष्ठे वर्तुला वोन्नता भवेत् । हरितं वर्णमायाता कौस्तुभेन च चिह्निता । शिलाकूर्म१९ स विज्ञेयः कूर्माकारस्तु वो भवेत् । चक्राङ्किता तथा छत्रा पूजिता सा पदप्रदा । हयग्रीवो२० ऽङ्कुशाकारो रेखा चक्रसमीपगा । बिन्दुसमायुक्तं पृष्ठं नीरदनीलभम् । श्रेयः सौम्यहयग्रीवो२१ हयग्रीवसमा शिला । दीर्घया रेखया युक्ता रेखा वा ताडयो भवेत् । हयग्रीवः२२ स विज्ञेयो छत्रं यस्य हयाकृति । पद्मजेति भवेद्यापि साक्षमालं शिरस्तया । वैकुण्ठ२३स्त्रिवर्णोभचक्रमेकं तथा ध्वजम् । हारोपरि तथा रेखा पृष्ठाकारा सुशोभना । श्रीधरस्तु२४ तथा देवश्चिह्नितो वनमालया । कदम्बकुसुमाकारो रेखा पद्मविभूषितः । वामनः२५ स तु विज्ञेयो योऽतिच्छत्रश्च वर्तुलः । अतसीकुसुमप्रख्यो बिन्दुनोपरिशोभितः । दधिवामननामा२६ तु जङ्घोर्ध्वचक्रसंयुतः । मङ्गलाकृतिरत्यच्छः सुभिक्षक्षेमदायकः । सुदर्शन२७स्तथा देवः श्यामवर्णो मङ्गलाकृतिः । वामपार्श्वे तथा चक्रं रेखैकैव तु दक्षिणे । सङ्कर्षणाभिधा२८ख्यो नानारेखामयो भवेत् । चक्राकारा वनस्पङ्क्तिः स नष्टदुष्टदायकः । स्थूलदामोदरो२९ यस्य मध्ये चक्रं प्रतिष्ठितम् । दूर्वाभो हारसंकीर्णः पीतरेखो धनप्रदः । राधादामोदरो३० श्वेत जङ्घोर्ध्वचक्रवद्विलम् । नातिदीर्घच्छत्रं मध्ये लम्बरेखा च भोगदः । दामोदरः३१ स विज्ञेयो वनमालाङ्कितः । छत्रं भवेच्चापवर्त्त पूजितः सुखदः सदा । अनन्तो३२ बहुवर्णः स्याच्छागभोगेन चिह्नितः । अनेकचक्रसंभिन्नः सर्वकामफलप्रदः । पुरुषोत्तमनाम्ना३३ सौ यस्य दिशु विदिशु च । जङ्घोर्ध्वाङ्कानि चत्वारि पुरुषार्थफलप्रदः । योगेश्वर३४ स विज्ञेयो सिद्धं यस्य शिरोगतम् । अच्छिद्रमादियानानं नाभयो योगसिद्धिदः । पद्मनाभ३५स्तथा रक्तः पद्मजन्मसंयुतः । तत्स्था पूजितो नित्यं हरिद्भ्योश्वरोभवेत् । रश्मिजालो हिरण्याक्ष३६श्चन्द्राभः स्फटकोपमः । अथ वा ज्ञायते नानास्वर्णरेखाभिरन्वितः । गरुड३७ स तु विज्ञेयो मध्ये पक्षद्वयान्विते । शंखो वा दृश्यते रेखा स सर्पविषनाशकः । जनार्दन३८ स विज्ञेयः केवलानि स्फुटानि च । वक्षोदरे तु चक्राणि चत्वारि पितृतृप्तिकृत् । लक्ष्मीनारायणो३९ श्वेतो वनमालाङ्कितोदरः । छत्रदारवतचक्रो भुक्तिमुक्तिप्रदायकः । हरीशेश४० स विज्ञेयो योऽर्धचन्द्राकृतिर्भवेत् । तमध्यर्धं भवेत् स्वर्णं विभवांश समोद्दिशेत् । लक्ष्मीनरहरि४१श्चैवः कृष्णवर्णः सबिन्दुकः । वामपार्श्वे समे चक्रे सदृष्ट्वाभीष्टदायकः । त्रिविक्रमस्तु४२ विज्ञेयः श्यामवर्णो महाद्युतिः । वामपार्श्वे चक्रयुग्ममेकरेखा तु दक्षिणे । कृष्णो४३ श्रेयः शिला कृष्णा सचक्रा वा विचक्रिका । प्रदक्षिणावर्त्तकृतवनमालाविभूषिता । चतुर्व्यूह४४ स विज्ञेयो ह्यं चक्रे मध्यरेखतः । चतस्रः पार्श्वगा रेखा वेदमार्गप्रदः मेरुतः । शिवादिशिलाभेदास्तत्रैवोक्ता यथा शिवोक्तिः "बालपाषा मतस्तूपाः प्रद्युम्नेत्यान्तु लक्षणम् । यतस्तेषनाङ्गवेदिष्टमिह लोके परत्र च । शिवनाभः१ स विज्ञेयः सलिङ्गाकारतां गतः । स्वयम्भुलिङ्गाकृतिमान् सर्वसंपद्विधायकः । व्यापकः२ स तु विज्ञेयो बिन्दूत्तरविभूषितः । सूचाकारा तथा रेखा गतपुत्रप्रदायकः । धूर्जटिः३ स तु विज्ञेयो यत्र रेखा जटासमा । तिस्रो यत्र प्रदृश्यन्ते सोऽर्चितो ज्ञानदायकः । अमृतेश४ प्राग्वदा श्वेतो बिन्दुः कृष्णस्तु मस्तके । त्रिलक्षमाश्रयेत्तस्त्रो पूजितः स्त्रोऽक्षरः । ईश्वरः५ स तु विज्ञेयो रक्तो बिन्दुस्तु मस्तके । एकचक्रो द्विचक्रो वाभ्यन्तरेऽथ सोम्यदृक् । स्थाणुश्रवः६ स विज्ञेयस्त्रयस्त्रयविनाशकः । अधश्चक्रं तदूर्ध्वं च श्वेता रेखा त्रिभूखगा । चन्द्रशेखर७नामाऽसावर्धचन्द्राकृतिस्तु के । मध्ये चक्रद्वयं तस्य सेवनाद्रोगनाशनम् । वटु८ स एव विज्ञेयः कपिलो सूर्म्न लक्षितः । चक्रमध्ये भवेद्रेखा सारवेद्विएवन्तिम् । "बालपाषानयो यस्ते शक्तिकोटसमुद्भवान् । वेषां पूजनतो देवी भवानी सुप्रसीदति । सौविद्या१ सा तले चक्रमूर्ध्वं छत्रं प्रदृश्यते । वामे षट्कोणितो मूर्ध्वो स्निग्धा श्यामाखिलेष्टदा । महाकाली२ तु सा श्वेता योनिचिह्नसमन्विता । दिक्त्रिकोणा सदा शिला त्रिकोणेनाङ्किता च वा । यदा बुधाकृतिर्वा तां देवीं तत्र निर्दिशेत् । देवीशिला सचक्रा वा दक्षमार्गेण तां यजेत् । साचिता वाममार्गेण षोडशयन्त्रसंयुता । वा चक्ररहिता देवीशिलां तां वामतोऽर्चयेत्" ।

"कौरी शिखा दुर्लभैव प्रायः कलियुगे पुनः। स्फटिकाभा भवेत् सा तु धर्मं नित्यं विवर्द्धति। गवेशः स तु विज्ञेयः सत्यशुक्लाङ्गितो भवेत्। शुक्लाकारा शिखा यापि गजाननसमापि वा। यस्या मध्ये महच्चक्रं शुक्लचक्रन्तु यद्दिशि। सा शिखा तस्य दिक्पक्ष वेधा ऽहिंसि राज्यदा। अर्द्धचन्द्राकृतिर्यत्र दृश्यते प्रकटम्। सा तु चन्द्रशिखा ब्रह्मयुक्ता सौमशिखा मता। वाधाकारेण चिह्नेन शेषा बुधशिखा पुरा:!। दीर्घेण चतुरस्रेण वृत्ता गुरुशिखा मता। पक्षोत्था तु शुक्रस्य चापाकारा प्रमेमता। सर्पाकारा तु राहोः स्यात् केतोस्तु ध्वजरूपिणी" मेरुत०।

तुलसीं प्रति भगवदुक्तिः "अहञ्च शैलरूपी च गण्डकीतीरसन्निधौ। अधिष्ठानं करिष्यामि भारते तव शापतः। वज्रकीटाश्च शतवो वज्रदंष्ट्राश्च तत्र वै। तच्छिलाकुहरे चक्रं करिष्यन्ति सदीयकम्। एकद्वारे चतुश्चक्रं वनमालाविभूषितम्। नवीननीरदाकारं लक्ष्मीनारायणाभिधम्। एकद्वारे चतुश्चक्रं नवीननीरदोपमम्। लक्ष्मीजनार्द्दनं श्रेष्ठं रहितं वनमालया। द्वारद्वये चतुरस्रं गोप्यदेन समन्वितम्। रघुनाथाभिधं श्रेष्ठं वेष्टितं वनमालया। अतिक्षुद्रं द्विचक्रन्तु नवीननीरदोपमम्। दधिवामनं विज्ञेयं सर्व्वसिद्धिप्रदं सुखप्रदम्। अतिक्षुद्रं द्विचक्रञ्च वनमालाविभूषितम्। श्रीधरं देवि! विज्ञेयं श्रीप्रदं सर्व्वसिद्धिदं सदा। स्थूलन्तु वर्त्तुलाकारं रहितं वनमालया। द्विचक्रं स्फुटमत्यन्तं श्रेष्ठं दामोदराभिधम्। मध्यमं वर्त्तुलाकारं द्विचक्रं वाणविज्ञितम्। बलरामाभिधं श्रेष्ठं शरत्पद्मसमन्वितम्। स्थूलं चतुर्दलचक्रं नवीनजलदप्रभम्। अनन्तास्यकटं विज्ञेयं चतुर्वर्गफलप्रदम्। मध्यमं सप्तचक्रन्तु ऊर्द्धपद्मसमन्वितम्। राजराजेश्वरं श्रेष्ठं राजसम्पत्करं नृणाम्। चक्राकारं द्विचक्रन्तु सश्रीकं जलदप्रभम्। सनोप्यदं मध्यमन्तु विज्ञेयं मधुसूदनम्॥। सुदर्शनं चैकचक्रं शुभ्रचक्रं सदाधरम्। द्विचक्रं हयवक्त्राभं हयग्रीवं प्रकीर्त्तितम्। अतीव विकृताक्षञ्च द्विचक्रं विकटं स्मृतं!। नरसिंहाभिधं श्रेष्ठं सदा वैराग्यदं नृणाम्। द्विचक्रं विकृताक्षञ्च वनमालासमन्वितम्। लक्ष्मीनृसिंहं श्रेष्ठं विज्ञेयं सर्व्वसिद्धिदं सुखदं सदा। द्वारदेशे द्विचक्रन्तु सश्रीकञ्च सुदर्शनम्। वासुदेवञ्च विज्ञेयं सर्व्वकामफलप्रदम्। प्रद्युम्नं चक्रचक्रञ्च नवीननीरदप्रभम्। शुषिरे छिद्रबहुलं सर्व्वसिद्धिप्रदं सुखप्रदम्। हे चक्रे चैकलग्ने तु पृष्ठे यत्र तु पुष्कलम्। बहुर्व्वक्त्रोऽथ विज्ञेयं दुखदं सर्व्वसिद्धिदं सदा। अनिरुद्धञ्च२० पीताभं वर्त्तुलमतिशोभनम्। सुखप्रदं सर्व्वसिद्धानां प्रवदन्ति मनीषिणः" ब्रह्मवै० प्र० १८अ०।

"शालग्रामशिलाहारनतलग्नद्विचक्रयुक्। शुक्लाभो वासुदेवाख्यः१ सोऽव्यात् यः श्रीगदाधरः। लग्नद्विचक्रोरुक्षाभः पूर्वभागे तु पुष्कलः। बहुर्व्वक्त्रोऽथ प्रद्युम्नः२ शुक्लचक्रस्तु पीतकः। सुदीर्घसुषिरच्छिद्रः सोऽनिरुद्धस्तु३ वर्त्तुलः। नीलोहारि स्थिरेखश्च यत्र नारायणोऽसितः। मध्ये गदाङ्कितो रेखा नाभिचक्रमवोच्यतः। पृथुचक्रो महिंसेो(हे)ऽथ कपिलोऽव्यात् त्रिविक्रमः। अथ वा पञ्चविन्दुक्तपूजनं ब्रह्मचारिणाम्। वराहः७ शुभचिह्नोऽव्यात् विषमस्थद्विचक्रकः। नीलरिखः स्थूलोऽथ कूर्ममूर्त्तिः८ सविन्दुमान्। कृष्णः स वर्त्तुलावर्त्तः पातु योऽतिपृथुकः। श्रीधरः९ पञ्चरेखोऽव्यात् वनमाली गदान्वितः। वामनो१० वर्त्तुलो हृस्वः वामचक्रः सुरेश्वरः। नानावर्णोऽनेकमूर्त्तिर्नागभोगी त्वनन्तकः११। स्थूलो दामोदरो१२ नीलो मध्ये चक्रः स नीलकः। संकीर्षद्वारकः सोऽव्यादथ ब्रह्मा१३ सुलोहितः। सदीर्घरेखसुषिर एकचक्राम्बुजः पृथुः। पृथुच्छिद्रः स्थूलचक्रः कृष्णो विष्णुस्तु१४ विन्दुमान्। हयग्रीवो१५ऽङ्कुशाकारः पञ्चरेखः सकौस्तुभः। वैकुण्ठो१६ मणिरत्नाभः एकचक्राम्बुजोऽसितः। मत्स्यो१७ दीर्घाम्बुजाकारो द्वाररेखश्च पातु वः। वामचक्रो द्वाररेखः श्यामो योऽव्यात् त्रिविक्रम१८। एकेन लक्षितो योऽव्यात् गदाधरो सुदर्शन१९। एकद्वारे चतुश्चक्रं वनमालाविभूषितम्। पञ्चरेखासमायुक्तं गोप्यदेन विराजितम्। कदम्बकुसुमाकारं लक्ष्मीनारायणं विदुः" गरुड़ पु० ४५अ० पुराणान्तरेऽपि सप्तचक्रादि पञ्चचक्रादि दृश्यानि। तत्र सप्तचक्रभेदस्तु विकल्पार्थः। वराहपु० भूमिं प्रति वराहोक्तिः "मत्स्ये छिद्रद्वयं नार्य्यं शालग्रामद्वयं तथा। हे चक्रे द्वारकाख्यं नार्य्यं सूर्य्यद्वयं तथा। शालग्रामशिला भद्रा पूजनीया सचक्रिका। खण्डिता स्फुटिता वापि शालग्रामशिला शुभा। शालग्रामो न स्फुटितो हीनवर्णैर्नृसत्तमे!। क्षीणैर्द्विकरसंस्पर्शो वज्रकीटाधिको मतः। मोहात् यः

संस्पृशेत् मूढो योऽपिहापि कदाचन । स याति नरके घोरे यावदाहूतसंप्लवम् । यदि भक्तिर्भवेत्तस्य स्त्रीणां वापि वसुन्धरे ! । दूरादेवास्पृशन् पूजां कारयेत् सुसमाहितः" । तत्पूजने तत्फलं च स्त्रीणां नाधिकरं "न जातुचित् स्त्रियाः कार्यं शालग्रामस्य पूजनम् । भर्तृदीनाश्च सुभगा सर्वलोकहितैषिणी । मेरोरात् स्पृशेत्तु महिला जन्मशीलगुणान्विता । स्थित्वा पुत्रसमूहं तु सत्वरं नरकं व्रजेत्" ब्रह्मवै० पा० २०अ० ।

"अमलं शिवनिर्माल्यं पत्रं पुष्पं फलं जलम् । शालग्रामशिलास्पर्शात् पावनं तत् भवेत् सदा" ।

"दद्यात् भक्त्या च यो देवि ! शालग्रामशिलां नरः । सुवर्णसहितां, पृथ्वी सप्तद्वीपसमन्विता । सप्तसप्तां भवेद्दत्ता सत्पात्रे च वसुन्धरे ! । शालग्रामशिलायास्तु मूल्यसङ्घाटयेत् क्वचित् । विक्रेता क्रयकर्त्ता वा नरके वै पतेत् ध्रुवम्" वराहपु० ।

तत्प्राकारादिभेदे फलभेदो यथा

"छत्राकारे भवेद्राज्यं वर्तुले च लभेत् श्रियम् । दुःखच्च शकटाकारे मूत्राग्रे मरणं भवेत् । विस्तारे च दारिद्र्यं पिङ्गले हानिरेव च । सम्मुखे भवेद्वानिर्विदीर्णे मरणं ध्रुवम्" । तत्पूजनेन मिथ्यादिव्यादिकरणादौ दोषो यथा "शालग्रामशिलां पूजा मिथ्यावाक्यं वदेत्तु च । स याति कूर्मदंष्ट्रेषु यावद्वै ब्रह्मणो वयः । शालग्रामशिलां पूजा स्त्रीकारं यो न याचयेत् । स प्रयात्यधःपतञ्च यावन्मन्वन्तरावधि । तुलसीपत्रविच्छेदं शालग्रामे करोति यः । तस्य जन्मान्तरे काले ! स्त्रीविच्छेदो भविष्यति । शालग्रामञ्च तुलसीं मस्तके यो न धारयेत् । स याति नरकं घोरं यावदिन्द्राश्चतुर्दश" ब्रह्मवै०प्र० १६०अ० । "शालग्रामो हरेर्मूर्त्तिर्जलमग्नायच भारतम् । कलेर्दशसहस्रान्ते याति मुक्तो हरेः पदम्" ब्रह्मवै०प्र० ६५अ० । "शालग्रामाः समाः पूज्याः समेषु हितयं न हि । विषमा नैव पूज्याः स्युरेकैव विषमेष्वपि" पद्मपु०पा०२०अ० । "शालग्रामशिलारूपी यत्र तिष्ठति केशवः । तत्र देवासुरा यक्षा भुवनानि चतुर्दश" पद्मपु० । "यत्र सर्वेषामिध्यादेस्तेषां पूजा प्रतीयते तत्रावाहनविसर्जने न स्तः "शालग्रामे स्थावरे वा नावाहनविसर्जने" इति राघवभट्टधृतवाक्यात्" दीक्षा० रघु० ।

३क्षेत्रभेदे न० तन्माहात्म्यं वराहपु० उक्तं यथा

"अथ दीर्घेण कालेन स(शालङ्कायनः)मुनिः संशितव्रतः । तपसानो यथान्यायं पप्रच्छे शालसत्तमम् । विश्रामं कुरुते तत्र दृष्टुकामोऽथ मां (हरिम्) मुनिः । मायया मम मूढात्मा यतो द्रष्टुं न शक्तभूत् । ततः पूर्वेण पार्श्वेन तस्य शालस्य सुन्दरि ! । वैशाखमासमाहात्म्यां सहर्षेणसमागतः । दृष्ट्वा मां तत्र च मुनिरुपस्थौ संयितव्रतः । तुष्टाव वैदिकैः स्तोत्रैः प्रणम्य च पुनःपुनः । ततोऽहं स्तूयमानो वै ऋषिमुख्येन सुन्दरि ! । प्राप्तोऽस्मि परमां प्रीतिं तमवोचं ततो मुनिम् । वरान्वरय भद्रं ते भद्रभाग ! स्थित्वा त्वं तपसां निधे ! । तुष्टेऽथ परमप्रीतो मत्सेवे मत्समो भव । अन्यच्च गुह्यं वक्ष्यामि शालङ्कायन ! तच्छृणु । तव प्रीत्या प्रवक्ष्यामि नैतत् क्वेवसत्तमम् । शालग्रामशिलेति ख्यातं तन्निबोध मुने ! शुभम् । योऽयं दृष्टस्त्वया दृष्टः सोऽहमेव न संशयः" वराहपु० ।

शालग्रामगिरि पु० पर्वतभेदे वराहपु० "कथयिष्यामि ते गुह्यं शालग्रामगिरिं मुने ! । तस्मिन् क्षेत्रे हरो देवो मत्स्यरूपेण संयुतः । शालग्रामे गिरौ तस्मिन् शिलारूपेण तिष्ठति । अहं तत्रैव तिष्ठामि शिलारूपेण नित्यदा । तस्मिन् शिलाः समस्तास्तु मत्स्यरूपा न संशयः । पूजनीयाः प्रयत्नेन विं पुनश्चक्रलाञ्छिताः । सिङ्कुरूपेण तु हरस्तत्र देवाक्षये गिरौ । शिवनामाः शिलास्तत्र चक्रनाभास्तथा शिलाः । सोमेश्वराधिष्ठितस्तु शिवरूपो गिरिः स्मृतः । शालग्रामगिरिर्विष्णुरहं सोमेश्वराभिधः" वराहपु० ।

शालङ्कायन पु० ऋषिभेदे शालग्रामशब्दे दृश्यम् ।

शा(सा)लज पु० शा(सा)लात् जायते जन-ड । सर्जरसे (धुना) शब्दर० ।

शालनिर्य्यास पु० ६त० । सर्जरसे (धुना) रत्नमा० ।

शालपर्णी स्त्री शालस्येव पर्णान्यस्याः ङीष् । (शालपानी) वृक्षभेदे राजनि० । "शालपर्णी मरुद्वह्निज्वरश्वासातिसारजित् । शोषदोषत्रयहरी दीपनी रसायनी । तिक्ता विषहरी स्वादुः शुक्रकासकफापहा" भावप्र० ।

शालभञ्जिका स्त्री शालेन भज्यते निर्मीयते भञ्ज-ण्वुल् । १काष्ठनिर्मितपुत्तलिकायां, २वेश्यायाञ्च जटा० ।

शालव पु० शाल: तस्मिन्यौति इव वसति वसिगच्छति वस-ड । ओघे शब्दर० ।

शालवेष्ट पु० शालस्य वेष्ट इव । सर्जरसे (धुना) त्रिका० ।

शालसार पु० शालस्य सारः । १स्थिरुनि शालेषु सारः । २वृक्षभेदे विश्वः ।

शाला स्त्री शाल-अच्। १गृहे अमरः। ततश्च २स्कन्धशाखायाञ्च। ३गृहवर्त्तिदेशे (चाल) मेदि०।

शालाङ्क पु० पाणिनौ मुनौ जटा०। [वर्त्तिके हेमच०।

शालाजिर पु० न० शालस्याजिरमिवाकारोऽवयवश्च अच्।

शालाद्रि पु० शाल इवाकृतिरस्य बहुव्री-इन्। शालभेदे (शाखू) शब्दच०।

शालातुरीय पु० शालातुरे भवः। तदधीतवाक्षिणि पाणिनिमुनौ जटा० शालोत्तरीय इति पाठान्तरम्।

शालानी स्त्री शालमानयति आ+नी-ड गौरा० ङीष्। विदार्य्याम् शब्दच०। [स्त्रियां ङीष्।

शालामृग पुंस्त्री०शालायां सञ्जे मृग इव। मृगाले शब्दर०।

शालावृक पुंस्त्री० शालायां सञ्जे, शालायां वा वृक इव वा। १कुक्कुरे २मृगाले अमरः। ३विड़ाले ४मृगे राजनि० ५वानरे च शब्दच०। सर्व्वत्र स्त्रियां ङीष्।

शालि पु० शल+इञ्। कलमादिधान्ये, २व्रतिकादिधान्ये, अमरः। ३गन्धमाञ्जीरे च मेदि०। शालिभेदादिकं "कलमेन विना शुक्लाः शेषलाः शालयः स्मृताः" इत्यादि भावप्र० उक्तम्। धान्यशब्दे दृश्यम्।

शालिका स्त्री शालिरिव कायति कै-क। विदार्य्याम्।

शालिञ्च पु०शालिं चषति चम-ड पृषो०सुम्। शालभेदे शब्दर०

शालिनीकरणम् अशालीनः शालीनः सम्पन्नः क्रियतेऽनेन शालीन+च्वि-कृ-करणे ल्युट्। तिरस्कारे त्रिका०।

शालिपर्णी स्त्री शालेरिव पर्णान्यस्याः ङीष्। माषपर्णाम् राजनि०।

शालिपिष्ट न० शालेः पिष्टमिव शुभ्रत्वात्। स्फटिके त्रिका०

शालिवाहन पु० विक्रमादित्यं हत्वा शकाब्दप्रवर्त्तके नृपभेदे शककर्त्तृशब्दे दृश्यम्।

शालिहोत्र पुंस्त्री० शालयो हूयन्तेऽत्र ड-इत्र। १घोटके त्रिका० स्त्रियां ङीष्। २अश्वशास्त्रप्रवर्त्तके ऋषिभेदे पु० राजनि०।

शाली स्त्री शाल-अच् गौरा० ङीष्। क्षुद्रशालौ राजनि० शालीन त्रि० शालामर्हति छ। १वृत्ते अमरटीकायां, अमरः। २मित्रेयायां स्त्री राजनि०।

शालु न० शाल-उण्। १शालूके शब्दर०। २कषायद्रव्ये, ३चोरनामगन्धद्रव्ये च मेदि०। ४भेके पु० ५वृत्ते हेमच०। [तत्रार्थे अमरः। २जातीफले राजनि०।

शालु(लू)क न०शाल-वुञ्। कुसुदादिमूले शब्दर०। ऊकञ्।

शालूर पुंस्त्री० शाल-उरच्। १भेके अमरः स्त्रियां ङीष्।

शालेय पु० शालायां भवः ढक्। १मधुरिकायाम् अमरः। २मिश्रेयायां स्त्री राजनि० टाप्।

शालोत्तर पु० ग्रामभेदे। [जटा०।

शालोत्तरीय पु० शालोत्तरे ग्रामे भवः छ। पाणिनिमुनौ

शाल्मल पु० शाल-मलच्। (शिमुल) १वृक्षे शब्दर० २तद्विशिष्टद्वीपभेदे च विष्णुपु०

"शाल्मलेश्वराधीशो वपुष्मांस्तत्सुतान् शृणु। तेषान्तु नामसञ्चारैः सप्त वर्षाणि तानि वै। श्वेतोऽथ हरितश्चैव जीमूतो लोहितस्तथा। वैद्युतो मानसश्चैव सुप्रभश्च महामुने!। शाल्मलेन समुद्रोऽसौ द्वीपेनेक्षुरसोदकः। विस्तरो द्विगुणेनायं सर्व्वतः संवृतः स्थितः। तत्रापि पर्व्वताः सप्त विज्ञेया रत्नयोनयः। रसाभिव्यक्तकाश्चैव ते तथा सप्तैव निम्नगाः। कुमुदश्चोन्नतश्चैव तृतीयश्च बलाहकः। द्रोणो यत्र महौषध्यः स चतुर्थो महीधरः। कङ्कस्तु पञ्चमः षष्ठो महिषः सप्तमस्तथा। कुमुदात् पर्व्वतवरः सरित्तामानि मे शृणु। योनितो या विहग्या च चन्द्रा शुक्ला विमोचनी। निवृत्तिः सप्तमी तासां श्रुतास्ताः पापशान्तिदाः। श्वेतस्य लोहितश्चैव जीमूतस्य हरितं तथा। वैद्युतं मानसस्यैव सुप्रभं नाम सप्तमम्। सप्तैतानि तु वर्षाणि चातुवर्ण्ययुतानि वै। शाल्मलेऽपि च ये वर्षा वसन्त्येते महामुने!। ऋषिवाचारुषाः पीताः कृष्णाश्चैव पृथक् पृथक्। ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव यजन्ति तम्। भगवन्तं समस्तस्य विष्णुमात्मानमव्ययम्। वायुभूतं मखश्रेष्ठैर्वह्निनो यज्ञसंस्थितिम्। देवानामत्र सान्निध्यमतश्चैव सुमेरुमे। शाल्मलिश्च महाद्वीपो नाम निर्वृतिकारकः। एष द्वीपः समुद्रेण सुरोदेन समावृतः"।

शाल्मलि(ली) पुंस्त्री० शाल-मलिच् वा स्त्रीत्वे वा ङीष्। (शिमुल) १वृक्षे २मोचरसे हेमच०।

शाल्मलिगुणादिकं भावप्र० उक्तं यथा

"शाल्मली शीतला स्वाद्वी रसे पाके रसायनी। वृष्या स्निग्धवीर्य्या च हृद्या रक्तपित्तजित्। शाल्मलीपुष्पमाक्तु हतसैन्यव्यवस्थितम्। प्रदरं नाशयत्येव दुःसाध्यञ्च न संशयः। रसे पाके च मधुरं बलायं शीतलं गुरु। कफपित्तास्रजित् स्वादि वातलं च प्रकीर्त्तितम्। २नरकभेदे यत्र शाल्मलीवृक्षकैर्नारकिणः पीड्यन्ते नरकशब्दे दृश्यम्। [राजनि०।

शाल्मलिक पु० शाल्मलिरिव कायति कै-क। रोहितवृक्षे

शाल्मलीकन्द पु० ६त०। तद्वृक्षमूले राजनि०। [राजनि०।
शाल्मलीफल पु० शाल्मल्या इव फलमस्य। तेजःफलवृक्षे
शाल्मलीवेष्ट पु० शाल्मलीं वेष्टयति वेष्ट-घञ्। शाल्मली-
निर्य्यासे शोचरसे रत्नमा०। एषु च्। तत्रैव। [इयत्रम्।
शाल्व पु० शाल-व। १देशभेदे हेमच०, तस्य २वपे च भारते
शाल्वण पु० "काकोल्यादिः स वातघ्नः सर्वाम्लद्रव्यसंयुतः।
शालपोदकसंसक्तः सर्वाम्लेन समन्वितः। स चोष्णः खट्ट
नवणः शाल्वणः परिकीर्त्तितः" सुश्रुतोक्ते औषधभेदे।
शाव पु० शव-घञ्। १शिशौ शब्दर०। स्वार्थे क। तत्रैव
शावस्येदम् अण्। २शवसम्बन्धे त्रि० "त्रिरात्रं शावमा-
शौचम्" इति स्मृतिः।
शावर पु० शावयति विनाशयति शव-णिच् अरन्। १पापे
२अपराधे ३लोध्रद्रुमे च मेदि०। शवरेण प्रोक्तमण्।
४शवरस्वामिकृते मीमांसाभाष्ये। शवरस्येदम् अण्।
५शवरसम्बन्धिनि त्रि०।
शावरभेदाद्य न० शावरभेदस्याद्यौव अचसमा० स्वार्थे अण्।
ताव्यं हेमच० तस्य तत्तुल्यरत्नवर्णत्वात्तथात्वम्।
शावरी स्त्री शवरस्य प्रिया अण् ङीप्। १यूथिकाभिद्यां
मेदि०। २विद्याभेदे तन्त्रसा०। [ङीष्।
शाश्वत त्रि० शश्वद् भवः अण्। सतते नित्ये अमरः स्त्रियां
शाष्कुल त्रि० शष्कुलमिव मांसं भक्ष्यमस्य अण्। मांसा-
शिनि हेमच०। [अमरः।
शाष्कुलिक न० शष्कुलीनां समूहः ठञ्। शष्कुलीसमूहे
शास आशीर्वादे अदा० आत्म० सक० सेट् क्ङा वेट्। शासे-
र्धाङ् पूर्वः। आशास्ते आशासिष्ट "इदं कविभ्यः पू-
र्वेभ्योनमोवाकं प्रशास्महे" उत्तरचरितोक्तेरन्यपूर्वोऽपि।
शास शासने अदा०पर०द्विक०सेट् क्ङा वेट्। शास्ति अशासत्
शासन न० शास-ल्युट्। निग्रहस्य हितसाधनादौ १प्रवर्त्तने
२राजदत्तभूमौ ३राजदेयभेदे ४शास्त्रे च मेदि०।
शासनहर पु० शासनं हरति हृ-अच्। आज्ञाहारके दूते।
शासिट त्रि० शास-इटच् डिट्। शासनकर्त्तरि।
शास्तृ त्रि० शास-इच् डिदभावः। १शासनकर्त्तरि
त्रिका०। २बुद्धे अमरः ३उपाध्याये ४ऋषौ ५पितरि
संक्षिप्तसा०।
शास्त्र न० शिष्यतेऽनेन शास-ष्ट्रन्। १चिन्तानुशासने यन्त्रे
शास्त्रं च वेदमूलकं सद्भिरादरणीयं नात्यत् यद्योक्तं
"अतो वेदविरुद्धार्थशास्त्रोक्तं कर्म वर्जयेत्। स्वबुद्धि-
रचितैः शास्त्रैः प्रतार्यन्ते च बालिशाः [illegible] शै-
वशो मार्गं लोकनाशाय केवलम्। निन्दन्ति देवतां वेदांश्चयो निन्दन्ति सद्द्विजान्। तेन ते निरयं यान्ति
स्वस्वशास्त्रनिषेवणात्। श्रुतिस्मृतिसदाचारविहितं कर्म
शाश्वतम्। स्वं स्वं धर्मं प्रयत्नेन त्रयोऽप्येते समा-
चरेत्। स्वबुद्धिरचितैः शास्त्रैर्मोहयित्वा जनं नराः।
तेन ते निरयं यान्ति युगानां सप्तविंशतिम्" पद्मपु०
१७ अ०। "पुराणं भारतं वेदधर्मशास्त्राणि यानि
च। आयुषः क्षपणायैव धर्मतत्त्वेन चाचरेत्। पुत्र-
दारादिसंसारः पुंसां संमूढचेतसाम्। विदुषां शास्त्र-
सम्भारः सद्योगाभ्यासविघ्नकृत्। इदं श्रेयमिदं श्रेयं
यः सर्वं ज्ञातुमिच्छति। अपि वर्षशतेनापि शास्त्रान्तं
नाधिगच्छति। विज्ञायाचरतत्तस्मात् जीवितस्यापि
संशयम्। विहाय शास्त्रजालानि पारलौकिकमाच-
रेत्। पण्डितोऽपि हि मूर्खोऽसौ यश्चिरयुक्तोऽप्यशा-
श्वतः। यः संसाराय चात्मानं सस्तारयिषुं क्षमाः"
वह्निपु०। तामसशब्दे २२७१ पृ० दृश्यम्।
"बहुशास्त्रानालोकनेऽपि सारादानं षट्पदवत्" सांख्यप्र०सू०
शास्त्रकृत् पु० शास्त्रं करोति कृ-क्विप्। मन्वादिषु ऋषिषु
त्रिका०।
शास्त्रगत पु० शास्त्रे गत इव। प्रघट्टादिवि त्रि०।
शास्त्रचारण पु० शास्त्रं चारयति प्रचारयति चर-णिच्-
ल्यु। शास्त्रोक्ताचरणप्रचारकर्त्तरि शब्दर०।
शास्त्रतत्त्वज्ञ त्रि० शास्त्रतत्त्वं जानाति ज्ञा-क। १शास्त्र-
तात्पर्यवेत्तरि २ज्योतिषज्ञे शब्दर०।
शास्त्रदर्शिन् त्रि० दृश-णिनि ह्रस्व०। शास्त्रज्ञे शब्दर०।
शास्त्रविदादयोऽप्यत्र।
शास्त्रनिष्णिन् त्रि० शास्त्रं तज्ज्ञानं निष्णमिवाऽस्यस्य
इनि। १शास्त्रज्ञानोपजीविनि २काश्मीरदेशे पु० त्रिका०।
शास्त्रिन् त्रि० शास्त्रं वेत्त्यधीते वा इनि। शास्त्रज्ञे।
शास्त्रीय त्रि० शास्त्रेण विहितः छ। शास्त्रोक्ते धर्मादौ।
शास्य त्रि० शास-ण्यत्। अनुशासनीये शिष्यादौ।
शि तेजने भ्वा० उभ० सक० अनिट्। शिनोति शिनुते अशै-
षीत् अशेट।
शिंशपा स्त्री शिवं शाति शा-क पृषो०। (शिरु) वृक्षे अमरः
"शिंशपा कटुका तिक्ता क्षमाया मोक्षकारिणी। क्षय-
रोगार्त्त हरेत्क्षिप्तकुपथिक्वमभिक्रमीत्। वस्तिशूलव्रण-
दाहास्रपित्तनाशनमेधातिनी" भावप्र०।
शिक्षु त्रि० शिक्ष-कु लस्य नेत्वम्। शास्त्रव्यवसायिनि त्रिका०।

शिक्षिक्य न० शिक्ष-यक् कुक् च पृषो० सस्य शोवा। (मोम) मधूच्छिष्टे अमरः। स्वार्थे क। तत्रैव।

शिक्य न०शि-यत् कुक् च। (सिका) रज्जुजाते पदार्थे भरतः

शिक्षित त्रि० शिक्षां शिक्षस्यं करोति शिक्षा+णिच्-कर्मणि क्त। शिक्षाधारे स्थापिते पदार्थे।

शिक्ष धातौ भ्वा० आ० सक० सेट्। शिक्षते अशिक्षिष्ट।

शिक्षा स्त्री शिक्ष-भावे अ। १अभ्यासे २वर्णोच्चारणप्रदर्शके वेदाङ्गे ३ग्रन्थभेदे अमरः। ४श्लोकाकड्क्षे भट्टः। "वर्णस्वराद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षा तथा च तैत्तिरीया उपनिषदारम्भे समामनन्ति। शिक्षां व्याख्यास्यामः। वर्णः स्वरः मात्रा बलं साम सन्तान इत्युक्तं शिक्षाध्याय इति" सा०भा०। "अथ शिक्षां प्रवक्ष्यामि पाणिनीयमतं यथा। शास्त्रानुपूर्वं तद्विद्याद् यथोक्तं लोकवेदयोः। प्रसिद्धमपि यद्वर्णमविज्ञातमनुद्विभिः। पुनर्व्याकरिष्यामि वाच उच्चारणे विधिम्। त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः। प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयम्भुवा। सप्तविंशतिरेकश्च स्वर्णानां पञ्चविंशतिः। यादयश्च स्मृता हल्दो चत्वारश्च यमाः स्मृताः। अनुस्वारो विसर्गश्च+कूपौ चापि पराश्रितौ। दुःस्पृष्टेति विज्ञेय लकारः प्लुत एव च। आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया। मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्। मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम्। प्रातःसवनयोगेन मन्द्रोगावत्तमाश्रितम्। कण्ठे माध्यन्दिनयुतं मध्यमं त्वौष्णमाहुतम्। तारं तार्तीयसवनं शीर्षण्यं जागतागमम्। सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः। वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः। स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः। इति वर्णविदः प्राहुर्निपुणाक्षं निबोधत। उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः। ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अपि। उदात्ते निषादगान्धारावनुदात्ते ऋषभधैवतौ। स्वरितप्रभवा ह्येते षड्जमध्यमपञ्चमाः। स्पृष्टो स्थानानि वर्णानामुरः कण्ठः शिरस्तथा। जिह्वामूलञ्च दन्ताश्च नासिकोष्ठौ च तालु च। जीभावश्च विवृतश्च स्पृष्टश्चेषत्स्पृष्ट एव च। जिह्वामूलमुपाध्मानं नासिक्यो यमौ स्मृतौ। यद्योभागप्रसन्नास्यसकारादि परं पदम्। स्वरान्तं तालव्यं विद्याद् यदन्तश्चक्रमूष्मणः। हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम्। औरस्यं तं विजानीयात् कण्ठ्यमाङ्करसंयुतम्। कण्ठ्यावकारादिचुयशास्तालव्या ओष्ठजावुपू। रुर्मूर्ध्न्या ऋटरषा-दन्त्या ल-त-स-साः स्मृताः। जिह्वामूले तु वः प्रोक्तो दन्त्यौष्ठ्यो वः स्मृतो बुधैः। एऐ तु कण्ठतालव्यावोष्ठौ कण्ठौष्ठजौ स्मृतौ। अर्द्धमात्रा तु कण्ठ्या स्यादेकारैकारयोर्भवेत्। ओकारौकारयोर्मात्रा तयोर्विवृतसंवृतम्। संवृतं मात्रकं ज्ञेयं विवृतन्तु द्विमात्रकम्। घोषा वा संवृताः सर्वे अघोषा विवृताः स्मृताः। स्वराणामूष्मणाञ्चैव विवृतं करणं स्मृतम्। तेभ्योऽपि विवृतावेव ताभ्यामैचौ तथैव च। अनुस्वारयमानाच्च नासिका स्थानमुच्यते। अयोगवाहा विज्ञेया आश्रयस्थानभागिनः। अलाबुवीणानिर्घोषो दन्त्यमूष्मस्वरानुगः। अनुस्वारस्तु कर्त्तव्यो नित्यं स्तोः शषसेषु च। अनुस्वारो विवृत्तस्तु विरामे चाक्षरद्वये। हिरोष्ठ्यौ तु विसर्जनीयाद् यत्रौकारवकारयोः। व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत्। भीतापतनभेदाभ्यां तद्वत् वर्णान् प्रयोजयेत्"। "अघोऽस्वरावयस्त्रयोऽन्त्यमस्पृष्टाः यमास्तथा। शेषाः स्पृष्टाश्चतुः प्रोक्ता निबोधानुप्रदानतः। यमोऽनुनासिका न स्तो नादिनो हकारः स्मृताः"।

"ईषन्नादाय नक्षत्र स्वासिनश्च शकादयः। ईषच्छ्वासाश्वरो विद्यात् गोदौमैतत् प्रचक्षते। दाक्षीपुत्रपाणिनिना येनेदं व्याप्तिं भुवि। छन्दःपादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते। ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते। शिक्षा घ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम्। तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते"। "मन्त्रोहीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रं यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्। "अनक्षरं हतायुष्यं विस्वरं व्याधिपीडितम्। अच्छन्दसं हतं यज्ञं यजति मन्त्रवित्। हस्वहीनन्तु योऽधीते स्वरवर्णविवर्जितम्। अग्नयजुःसामभिर्ग्रन्थो विद्योनिमधिगच्छति" पाणिनिशिक्षा। नारदशिक्षा व्यासशिक्षादयो ग्रन्थाः सन्ति विस्तरभयान्नोक्ताः।

शिक्षाकर पु० शिक्षां करोति क्र-अच्। १व्यासे भट्टमा० २शिक्षकशिक्षाकर्त्तरि।

शिक्षागुरु पु० विद्यादातरि।

शिक्षित त्रि० शिक्षा जाताऽस्य तारं० इतच् शिक्ष-क्त वा। १ज्ञताभ्यासे २निपुणे ३विज्ञे च अमरः।

शिखिताण्डव पु० शिखितामण्डवमिव यत्र । १ताण्डे २शिखादानरि पुरौ च त्रिका० ।

शिखि गतौ भ्वा०पर०सक०सेट् इदित् । शिखिति अशिखीत् ।

शिखण्ड पु० शिखामस्यति अस-ड तस्य नेत्वम्, ह्रस्व० । मयू० वा । १मयूरशिखे अमरः । २चूड़ावाञ्च मेदि० ।

शिखण्डक पु० शिखण्ड एव कन् । १बाणपुङ्खे अमरः । (बाणपुङ्खो) स्त्रीत्वमपि तत्र । टाप् च २चूड़ावाञ्च हेमच० । [स्त्रियां ङीष् ।

शिखण्डिक पुंस्त्री० शिखण्डोऽस्यास्ति ठन् । हिजड़े हेमच० ।

शिखण्डिन् पु० शिखण्डोऽस्यास्ति इनि । १मयूरे २हुपद-राजस्य पुत्रभेदे मेदि० ३मयूरपुच्छे ४हिजड़े ५बाणे च हेमच० । ६द्रुद्रावां ७अर्धमृगिद्रावां राजनि० ८विष्णौ विष्णु० ९मृगिद्रावां स्त्री ङीष् मेदि० ।

शिखर न० शिखा अस्त्यस्य अरच् वाऽलोपः । १पर्वताग्रे २बाणाग्रे च । ३दशाग्रे ४-५ अमरः । ६दन्ते ७नख-स्याग्रे ८पक्षादक्षिणशाखे ९रत्नभेदे ७अस्त्रदशाग्रे मेदि० ८ओष्ठे त्रिका० १०मूर्वायां स्त्री शब्दच० ।

शिखरवासिन् त्रि०शिखरे वसति वस-णिनि ७त० । पर्वता-वस्थायिनि स्त्रियां ङीष् । "देवी शिखरवासिनी" दुर्गटः तां च शिवाशब्दवाच्यां २दुर्गायां त्रिका० ।

शिखरिन् पु० शिखाऽस्त्यस्य इनि । १पर्वते २दन्ते ३नख-भागे मेदि० ४ओड्रे ५ओषधौ हेमच० । ६वन्द्याके ७कु-मुदवृक्षे ८बाणवृक्षे ९कर्कटशृङ्ग्यां राजनि० १०रत्ना-दायां जातौ ङीष् । ११षड्दशाक्षरपादके वृत्तभेदे स्त्री "रसैर्नद्वौ भ्रिखा यमनसभला गः शिखरिणी" ह०र० १२यष्टिकायां १३रोमावल्यां १४नारीरत्ने च स्त्री मेदि० वर्णस्य ङीष् । [(हड़रहड़ा) वृक्षभेदे रत्नमा० ।

शिखलोहित पु०शिखाऽस्त्यस्य कप् तथाभूतः सन् लोहितः ।

शिखा स्त्री शी-कप् तस्य नेत्वम् ह्रस्वः । १अग्निज्वालायां २मस्तकमध्यवेशवृक्षे च अमरः । "उच्छ्रयेत् पर्व मात्राणि यत्रोपरिष्टिद्यां वहिः" प्राक्त० । ३ज्वालायां ४अर्हिचूड़ायां ५बाणशिखायाम् ६बन्धमात्रे ७चूड़ा-मात्रे ८प्रपदे च मेदि० । ९प्रभाने शिखायां १०दत्तौ हेमच० । ११खरज्वरे शब्दच० ।

"शिखौ विद्यौ वर्म कुर्यात्" इत्या शिखावत एव वर्म-ण्यधिकारः तत्रापि यद्यधिकस्य वर्मण्यधिकारः न तत्र-शिखस्य यथोक्तं "नाबद्ध्वा तु शिखां यद्वा नेक्षेतां शस्त्रसञ्चयः । मूर्धिवाऽपि तथो यद्वा ततः कर्म समा-रभेत्" । "निबद्धशिख आचामेत्" इत्यत्र आचमनं चरेत् । ब्रह्मोपवीतं बध्नीते वाङ्मनःकायसंयतः" । शुक्लशि-खाबन्धनमने दोषो यथा "शिरः प्रावृत्य कण्ठं वा शुक्ल-वस्त्रशिखोऽपि वा । कृत्वा पादयोः शौचमाचामे-दशुचिर्भवेत्" आ०त० ।

शिखाकन्द न० शिखेव कन्दोऽस्य । लशुने राजनि० ।

शिखातरु पु० शिखाया इवोर्ध्वशिखाकारतरिव । दीपवृक्षे (रेवको) त्रिका० ।

शिखाधर पुंस्त्री० शिखां चूडां धरति ४-अच् । १मयूरे रत्नमा० स्त्रियां ङीष् । २शिखाधारके त्रि० स्त्रियां टाप् । ३मञ्जुघोषे पु० त्रिका० ।

शिखामूल न०शिखेव मूलमस्य । गृञ्जने (गाँजर) राजनि०

शिखालु पु०शिखाऽस्त्यस्य आलुच् । मयूरशिखावृक्षे राजनि०

शिखावत् पु० शिखा ज्वालाऽस्त्यस्य मतुप् मस्य वः । १वह्नौ २चित्रवृक्षे च अमरः । ३वेतसवृक्षे शब्दच० । ४शिखायुते त्रि०स्त्रियां ङीप् । टाप् च ५मूर्वायां शब्दच०

शिखावर पु० शिखां वृणोति वृ-अच् । धनवृक्षे शब्दच०

शिखावल पुंस्त्री० शिखाऽस्त्यस्य वलच् । १मयूरे अमरः । स्त्रियां ङीष् । २मयूरशिखावृक्षे स्त्री राजनि० टाप् ।

शिखावृत्ति स्त्री प्रतिदिनमाहृतो हविर्भक्षे यज्ञम् ।

शिखिकण्ठ न० शिखिनो मयूरस्य कण्ठस्येवोऽस्त्यस्य अर्शआद्यच् । शुभ्रे (ढुँते) रत्नमा० ।

शिखिग्रीव पु० शिखिनो मयूरस्य ग्रीवा तद्वर्णोऽस्त्यस्य अच् । शुभ्रे (ढुँते) अमरः ।

शिखिध्वज शिखिनो वह्नेर्ध्वज इव । १धूमे त्रिका० । शिखी मयूरोध्वजो यस्य । २वार्त्ताकेये शब्दच० ।

शिखिन् पु०शिखा अस्त्यस्य इनि । १मयूरे २वह्नौ ३चित्र-वृक्षे अमरः । ४वेतसवृक्षे ५कङ्कटे ६द्रुद्रुमे ७द्रुमे ८धूपे च मेदि० । ९धूमे हेमच० १०खञ्जनेऽपि रत्नमा० ११पर्वते १२ब्राह्मणे १३सितावरे १४मेथिकावां राजनि० १५शि-खायुक्ते त्रि० १६मयूरशिखावृक्षे राजनि०स्त्री ङीष् ।

शिखिप्रिय पु०शिखिनं प्रीणयति प्री-क । वसुदेवे राजनि० ।

शिखिमण्डल पु० शिखिनां मण्डलमिव यत्र । वस्त्रभेदे शब्दर० । [अग्नेर्दायां राजनि० ।

शिखिमोदा स्त्री शिखिनः अग्नेरिव मोदो यस्याः ।

शिखियूप पु०शिखी शिखावान् यूप इव । औदारिके सूने राजनि० । [वृक्षभेदे शब्दर०

शिखिवर्द्धक पु० शिखिनं वर्द्धयति वृध-णिच्-ण्वुल् ।

शिखिवाहन पु० शिखो मयूरो वाहनं यस्य। कार्त्तिकेये अमरः।

शिखिव्रत न० "प्रतिपदोऽभक्षणी समाख्ये कपिलाप्रदः। वैश्वानरपदं याति शिखिव्रतमिदं कृतम्" मत्स्यपु० १२८ अ० उक्ते वह्निपदप्रदायके व्रतभेदे।

शिग्रु पु० शि-रक् गुक् च। (सजिना) १वृक्षे २शोभाञ्जने च अमरः। "शोभाञ्जनो मोचशिग्रुस्तीक्ष्णगन्धो जनप्रियः। सुखमोदः कृष्णशिग्रुवह्निर्वृक्षराजनः। शोभाञ्जनस्तीक्ष्णकटुः स्वादुपाकः शिखिप्रियः। जन्तुघातार्त्तिशूलघ्नः वह्निवो रोचनः परः। श्वेतशिग्रुः सुवीरस्तः स्वाम्रवृक्षभङ्गः सितास्रवः। वह्नेः श्वेतमरिचो रोचनो मधुशिग्रुकः। श्वेतशिग्रुः कटुस्तीक्ष्णः शोकानिलनिबर्हणः। रक्तव्यत्याहरो रक्तो दीपनो रक्तशोधनः। रक्तो रक्तशिग्रुः स्वाम्रघरो वह्निवृक्षदः। कृमिघ्नः केसरी सिंहो नमारिश्च प्रकीर्त्तितः। रक्तशिग्रुर्मेहशोथौ मधुरश्च रसायनः। शोफाध्मानप्लीहार्त्तिपित्तश्लेष्मापहारकः" राजनि०।

शिग्रुज न० शिग्रुतो जायते जन-ड। श्वेतमरिचे शोभाञ्जनबीजे अमरः ३त०। शिग्रुबीजमध्यस्थे मज्जनि०।

शिघ आघ्राणे स्वा० पर० सक० सेट् इदित्। शिङ्घति अशिङ्घीत्।

शिङ्घाण न० शिघि-आनच् पृषो० णत्वम्। १आघ्राणे २खाङ्गभेदे ३नासिकामले श्लेष्मणि च मेदि०। स्वार्थे क। नासिकामले न०।

शिञ् शब्दे भ्वादि० पर० सक० सेट्। शिञ्जयति ते शिञ्जते अशिञ्जयत् त अशिञ्जिष्ट। भ्वादिरयं पर० दृश्यते तेन शिञ्जति अशिञ्जीत्

शिञ्जा स्त्री शिञ्ज-भावे अ। १मधुरशब्दे मुग्धबो०। शिञ्ज-अच्। २धनुर्गुणे हेमच०।

शिञ्जित न० शिञ्ज-भावे क्त। मधुरशब्दे अमरः।

शिञ्जिनी स्त्री शिञ्जति शिञ्ज-णिनि। धनुर्गुणे अमरः। २नूपुरे हेमच०।

शिट अनादरे भ्वा०पर०सक० सेट्। शेटति अशेटीत्।

शिण्डाकी स्त्री खाद्यद्रव्यभेदे यथा "शिण्डाकी राजिकायुक्तैः स्वाम्लकटवदुग्धैः। समैश्चारैश्च संयुक्ता शर्करा पित्तसंयुतैः। शिण्डाकी रोचनी तृप्तिं पित्तश्लेष्मकरी स्मृता" राजनि०।

शित त्रि० शो-क्त। १तीक्ष्णे २शाणिते च मेदि० ३क्रमे विधः

शितद्रु पु० शितं द्रवति द्रु-कु-नि०। (शतद्रु) नदीभेदे अमरः। [२शोधमे त्रिका०।

शितशूक पु० शितस्तीक्ष्णः शूकोऽग्रं यस्य। १यवे अमरः।

शिति पु० शो-क्तिच्। १मुक्तेपक्षदले २शुक्लवर्णे ३क्षणवर्णे च मेदि० शितद्वर्णवति त्रि०। ४सारे पु स्त्री० मल्लर०।

शितिकण्ठ पु० शितिः नीलः कण्ठो यस्य। १शिवे अमरः। २टाल्कविशेषे स्त्री० त्रिका० स्त्रियां ङीष्।

शितिचार पु० शितिः यत् चरति चर-ण्वुलां वृत्तेरित्वम्। (शुनि) श्वभेदे शब्दा०।

शितिच्छद पु० शितिः शुक्लः छदो यस्य। हंसे मल्लर०।

शितिसारक पु० शितिः शुक्लः सारो यस्य कप्। तिन्दुकवृक्षे राजनि०।

शिथिल त्रि० श्लथ-किलच् पृषो०। १श्लथे २अदृढे संयोगभेदे ३मन्दे च "शिथिलसंयोगश्च प्रश्वयः। "प्रश्वयः शिथिलाख्यो यः संयोगस्तेन लभ्यते" भाषा० "भूयोऽवयवावच्छेदेनावयवान्तरसंयोगित्ववत्ये वर्त्तमानः संयोगः प्रश्वयः" इति दीनकरी तथा तृचकादौ।

शिनि पु० शि-निक्। यदुवंश्ये अक्रियभेदे यस्य माल्यकिर्नाम्ना

शिपि पु० शो-किप् तां पाति पा-कि पृषो०ह्रस्वः। १रश्मौ २जले न० "शैत्यात् श्रवणयोगाच्च शिपि वारि प्रचक्षते। तत् पानाद्रक्षणाच्चैव शिपयो रक्षसो मताः। तेषु प्रवेशात् विष्णोः शिपिविष्ट इतीर्य्यते" व्याघः।

शिपिविष्ट पु० ७त०। १श्वक्रतौ २दुष्टमक्षि च ३महेश्वरे अमरः। ४विष्णौ शिपिशब्दे दृश्यम्। "नैकरूपो हरिर्यस्मात् शिपिविष्ट प्रकीर्त्तितः" विष्णुस०। पृषो० शिविष्ट तत्रार्थे रमानाथः।

शिप्र पु० शि-रक् पुक् च। १सरोवरभेदे २नदीभेदे स्त्री। "एवं विवाह्य विधिवत् सोमवंशे मानसाचले। अत्रिस्तु मोदमाप तथा यज्ञ। तत्र यत् पतितं तोयं मानसाचलकन्दरे। विवाहाग्निसहतायां मान्यर्थं वसुधातले। ब्रह्मविष्णुमहादेवपार्थिवैः सप्तधोत्थितम्। तत्तोयं सप्तधा भूत्वा पतितं मानसाचलात्। छिन्नाद्रेः कन्दरे यानो सरस्याच पृथक् पृथक्। तत्तोयं पतितं शिप्रे देवभोग्ये सरोवरे। तेन शिप्रा नदी जाता विष्णुना प्रेरिता क्षितिम्" कालिका० २३अ०। "ततो विनतसः पश्चे प्रतीच्यां तत्पुरस्य च। शिप्रं नाम सरः पुण्यं दशयुङ्निष्पादयः। तद्दक्षः स्यानना-स्याद्य ब्रह्मगङ्गादयः सुराः। चतुर्विधा वृक्षान्यायुं

शिरस्त्राण मङ्गेश्वरम्। तं शिरसंत्रकाकारं मनोज्ञं सर्व-देहिनाम्। शीतातपजलञ्च सर्वं पुंसोमानसशान्तिम्। इदं छत्रं शरत्कालेषु सौदत्तक्षोऽसृदेवच्छे। शिरसां नाम नदीं तत्राद्रिःस्तुतां दधिषोदधिम्। मज्जनीषु ददर्शासौ पावयन्तीं जगज्जगात्। तत्रैव ४६ अ०।

शिफा स्त्री शि-फक्। इक्षाद्यां २जटाकारे मूले। (शिकड़) अमरः। २लक्ष्यां ३मांसिकायां ४मातरि मेदि०। ५अतपुष्पायां ६हरिद्रायां राजनि०। ७पद्मकन्दे सङ्गटः। जटाकारे मूले पु० विद्याविनोदः।

शिफाक पु० शिफेव इवार्थे कन्। पद्ममूले शब्दच०।

शिफाकन्द पु० शिफेव कन्दः। पद्ममूले अमरः।

शिफाधर पु० शिफा धरति धृ-अच्। मांसायां शब्दच०।

शिफारुह पु० शिफायां रोहति रुह-क। वटवृक्षे राजनि०

शिमुड़ी स्त्री (चड़ोनि) ख्याते क्षुपभेदे राजनि०।

शि(सि)म्बा स्त्री शाम्यति समति वा शम-समु-वा बा० डम्बच् पृषो०। (छिमी) ख्याते इपदार्थे शब्दच०। २चक्रमर्दे पु० शब्दच०।

शि(म्बि)म्बी स्त्री शम-बि नि० वा ङीष्। इशिम्बायां (शिम) लतायां शेमच० "मङ्गाणाकरी शिम्बी" तिल० २एरण्डायाञ्च भावप्र०। स्वार्थे क। तत्रैव।

शिम्बीधान्य न० शिम्बीजातं धान्यं मा० त०। सदृगादौ धान्यभेदे भावप्र०। [शब्दर० कप् तत्रैव।

शिम्बीपर्णी स्त्री शिम्बीव पर्णमस्याः ङीप्। सुद्गपर्णां

शिर न० शॄ-क। इमस्तके लटा० "शिरः दद्यात् गवाशिरे" वायुपु०। २शिम्बीमूले मेदि०। ३यज्ञायाम् ४यज्ञगरे च संक्षिप्तसा०।

शिरःफल पु० शिर इव फलमस्य। नारिकेले त्रिका०। [गारुड़े

शिरःशूल न० शिरसः शूलमिव तापकत्वात्। शूकरोगभेदे

शिरक्त पु० शिरे जायते जन-ड। केशे शब्दच०।

शिरस न० शॄ-असुन् नि०। इमस्तके २शिखरे अमरः। ३प्रधाने ४सेनाग्रे मेदि०।

शिरसिज पु० शिरसि जायते जन ड वा अलुक् समा०। केशे जटाध० लुकि शिरोजोऽप्यत्र। [केशे शब्दच०।

शिरसिरुह पु० शिरसि रोहति रुह-क वा अलुक् समा०।

शिरस्क न० शिरसि कायति प्रकाशते के-क। शिरस्त्राणे शेमच०

शिरस्त्र न० शिरस्त्रायते त्रै-क। शिरोरक्षके छत्त्रोपे अमरः

शिरस्त्राण न० शिरस्त्रायते अनेन त्रै-करणे ल्युट्। शिरोरक्षणे छत्त्रोपे शेमच०।

शिरस्य पु० शिरसि भवः यत्। इनिर्मलतेजे अमरः २शिरोभवमात्रे त्रि०। [अस्य दन्त्यादित्वमपीत्यन्ये।

शिरा स्त्री शॄ-क। नाड्यां (शिर) मेदि०। सृ-किरच् डित्। शिरापत्त्र पु० शिरेव पत्त्रं यस्य। छिन्नाख्यवृक्षे राजनि०।

शिराल न० शिरोऽस्यास्ति अच्। इकमरङ्गे शब्दच०। तत्फलस्य शिरायुक्तत्वात्तथात्वम्। २शिरायुक्ते त्रि०।

शिरालक पु० शिरायामस्यति क्षिप्यति अस-ण्वुल्। (छाड़योड़ा) वृक्षभेदे शब्दच०।

शिरावृत्त न० शिरेव वर्त्तते वृत-क। सीसके राजनि०।

शिरि पु० शॄ-कि। इवज्रे २शरे ३क्षिप्ते त्रि० तुदादि०। ४शबले त्रि० कौ०।

शिरीष पु० शॄ-ईषन् किच्च। वृक्षभक्षाते वृक्षे अमरः। "शिरीषो मधुरोऽम्लश्चिक्कश्च त्रुवरो लघुः। दोषशोथविषश्लेष्मकासव्रणविषापहः" भावप्र०।

शिरीषपत्त्रिका स्त्री शिरीषस्येव पत्त्रमस्या कप् टाप् अत इत्त्वम्। श्वेतकिणीवृक्षे राजनि०।

शिरोगृह न० शिरःक्षतपरिक्षां गृह्यम्। (चिकेदर) चन्द्रशालायां हेमच०।

शिरोग्रह पु० "रक्तमारुतौ प्रथमः कुर्यात् ग्रहधराः शिराः। रुजाः सवेदनाः कृष्णाः सोऽभ्यः स्याच्छिरोग्रहः" भावप्र० उक्ते वातरोगभेदे "ग्रहधरा योगमताः स पवनः शिरोग्रहः स्यादित्यन्ये" भावप्र०। [हेमच०।

शिरोधरा स्त्री शिरोमस्तकं धरति धृ-अच्। ग्रीवायां

शिरोधि स्त्री शिरो धीयतेऽत्र धा-कि। ग्रीवायाम् अमरः

शिरोमणि पुंस्त्री० शिरसि भाग्यौषधि मा० त०। शिरोभाग्य रत्ने चूड़ामणौ शब्दच०। स्त्रीपक्षे वा ङीष्। शिरोरत्नादयोऽप्यत्र न०।

शिरोमर्मन् पु० शिरसि मर्म यस्य। शूकरे हेमच०।

शिरोरुजा स्त्री शिरो रुजति व्यथयति रुज-क। इसन्नष्टदृष्टे त्रिका०। हृत०। २मस्तकरोगे च।

शिरोरुह पु० शिरसि रोहति रुह-क। केशे अमरः।

शिरोरोग पु० हृत० सुश्रुतोक्ते मस्तकरोगभेदे तल्लक्षणं यथा "अथातः शिरोरोगविज्ञानीयमध्यायं व्याख्यास्यामः। शिरो रुजति मर्त्यानां वातपित्तकफैस्त्रिभिः२। सन्निपातेन४ रक्तेन५ क्षयेण६ क्रिमिभिः७तथा। सूर्य्यावर्त्तार्द्धभेदाश्च८ शङ्खके९॥ एकादशप्रकारस्य लक्षणं संप्रवक्ष्यते। यस्यानिमित्तं शिरसो रुजश्च भवति क्षीणस्य क्षिप्रं घातिषातासु। मन्योपतापेन च मर्दितेन्द्रियः शिरो-

ऽभिताप: स वमीरवेग:। यस्योष्णमङ्गारचितं यस्य च मर्मच्छिरो धूमयती च माषा। शीतेन रात्रौ च भवेदहेम: शिरोऽभिताप: स तु पित्तकोपात्२। शिरोगतं यस्य कफोपदिग्धं गुरु प्रतिश्यायपरो हिमस्तु। भुनक्ति किञ्चिद्वदनं च यस्य शिरोऽभिताप: स कफप्रकोपात्३। शिरोऽभितापे त्रिदशप्रदुष्टे४ सर्वाणि लिङ्गानि यथास्वमुक्तानि। रक्तात्मक:५ पित्तसमानलिङ्ग: सूर्यांशुतप्तस्य शिरो भवेत्तु। यस्यावगाढव्रणसम्भवानां शिरोगतानामभिघातजानाम्। जायेत्तु६ शिरोऽभिताप: स तो भवेदुपक्रोऽतिमात्रम्। संक्लेदनच्छेदनघूमनस्यैरक्तस्रिभोजैव विद्वद्भिरेति। निस्तुद्यते यस्य शिरोऽतिमात्रं सन्तप्यमाणं स्फुरतीव चान्त:। आघाट्य मर्माण्यभिनं शिरं शिरोऽभिताप: क्रिमिभि:७ स घोर:। सूर्योदयं वा प्रतिमन्दमन्दमधिष्ठितं यस्तपतीति गाढम्। विवर्धते चांशुमता सहैव सूर्यापदो विनिवर्तते च। शीतेन शान्तिं यमति कदाचिदुष्णेन जन्तु: सुखमाप्नुयाच्च। तं प्राक्तरावर्तदशदोषरूपं सर्वाक्षिरोगं कुशलो विचारम्। दोषास्तु दुष्टास्त्रय एव कर्म्मा संदीप्य वाढां वदनां सुतीव्राम्। कुर्वन्ति सार्त्तिमथोत्तमाङ्गे स्थितिं करोत्याशु विशेषतस्तु। मन्यास्तु पार्श्वं पुरत: करोति कर्म्म स्तब्धपूर्वं शोषणभञ्जने च रोगान्। यस्मन्नातंर तदहर्दिशन्ति दोषत्रयोत्थं शिरसोविकारम्। यस्योत्तमाङ्गार्द्धमतीव जन्तो: सम्भेदतोदध्मनपूरणैस्तु। यच्चाद्धशीर्षादथ वाप्यशीर्षात्तत्सार्द्धभेदं० त्रितयादुदेति। यस्याश्रितो वायुरदीर्णवेगः क्षतानुवात्रः कफपित्तरक्तैः। वक्त्रं सुतीव्राः प्रतनोति मूर्द्धि विद्रे यथापि हि यन्त्रयोक्तु। तदुत्तमेनं खलु यन्त्रकाख्यं११ मर्म्मज्ञो वेदविदः पुराणाः। व्याधिं वदन्त्युत्तमसत्त्वयुक्तं भिषक्प्रवरैरपि दुर्निवारम्।

शिरोवस्ती स्त्री शिरसा वस्तीव। मयूरचूड़ायां शब्दच०।

शिरोवृत्त न० शिर इव वृत्तं यस्य। बदरे राजनि०।

शिरोवृत्तफल पु० शिरोवृत्तं बदरमिव फलमस्य:। रक्तबालायां भावप्र०। [त्रिका० खुट्। तत्रैव म०।

शिरोवेष्ट पु० वेष्ट-घञ् शिरसो वेष्ट:। (पागड़ी) उष्णीषे

शिल उञ्छे कथय आदाने तुदा० पर० सक० सेट्। शिलति अशैलीत्।

शिल न० शिल-क। स्फटीतपलाद् चेलात्तपलोमङ्गल्यां दानकृपायां १हृतौ उञ्छवृत्ते १०३० पृ० द्रष्टव्यम्। २पाषाणे २शरावाधःस्थितकाष्ठपट्टके च (गोबराट) स्त्री अमर:। ३लम्बशीर्षे ४जन:शिलायां स्त्री मेदि० ५ऋषौ राजनि०। [पाषाणभेदवृक्षे स्त्री राजनि०।

शिलगर्भज: पु० शिलाया गर्भे जायते जन-ड। शुक्ले शब्दच०।

शिलाकर्णी स्त्री शिलेव कर्णमस्य ङीप्। शङ्खपुष्पीवृक्षे शब्दच०

शिलाकुट्टक पु० शिलां कुट्टयति कुट्ट-ण्वुल्। १पाषाणभेदे वृक्षभेदे शब्दच०। शिलया कुट्टति विदलीकरोति। २शङ्खकुट्टके यानमस्त्रभेदे।

शिलाज न० शिलातो जायते जन-ड। १शैलेये गन्धद्रव्ये शब्दच०। २लौहे राजनि०।

शिलाजतु न० शिलाजातं जतु। १पर्वतजाते उपधातुभेदे अमर:। तदुत्पत्त्यादिकं भावप्र० उक्तं यथा

"गिरौ ग्रीष्मे घर्मसन्तप्ता धातुसारम्बराधरा:। निर्यान्ति यत् प्रस्रवन्ति तच्छिलाजतु कीर्त्तितम्। कीर्त्यं राजबलाग्निवयस्तम्भवृद्धिकरम्। शिलाजतुद्रिजतु च शैल निर्यास इत्यपि। गैरेयमद्रिजश्चापि गिरिज शैलधातुजम्। शिलाजं कटु तिक्तोष्णं कटुपाकं रसायनम्। छेदि योगवहं वृष्यं कफमेदोऽनिलापहम्। मूत्रकृच्छ्रं क्षयं श्वासं वातार्शांसि च पाण्डुताम्। अपस्मारमतोऽन्यादं शोथकुष्ठोदरक्रिमीन्। शीतवीर्यन्तु जयाद्गुणवत्त्वं भवति तद्रसात्। मधुरं कटुतिक्तञ्च शीतलं कटुपाकि च। राजतं पाण्डुरं शीतं कटुकं क्षारपाकि च। ताम्रं मयूरवर्णाभं तीक्ष्णमुष्णञ्च जायते। लौहं कटायुपक्षाभं तत्तिक्तं क्षयकृत् भवेत्। विपाके कटुकं शीतं सर्वमेतदुदाहृतम्। [क्लीव्। जाङ्गलीढके राजनि०।

शिलाजतुनी स्त्री शिला जयत्यनया जतृ-ल्युट्-ङीप्

शिलाटक पु० शिलेव अटति शिलामटति वा अट-ण्वुल्। १अर्के २बिल्वे च मेदि०।

शिलात्मज न० शिलाया आत्मज इव। लौहे राजनि०।

शिलात्मिका स्त्री शिलेव आत्मा यस्य कप्। (भूमि) भूम्यां शब्दच०।

शिलादृढ पु० शिलाया दृढ़रिव। शैलेये गन्धद्रव्ये राजनि०

शिलाधातु पु० शिलाया धातुरिव गुणत्वात्। १खेतोपले (खड़ी) त्रिका०। २पीतवर्णे गैरिकभेदे च राजनि०। [प्रस्तरखण्डभेदे शब्दच०।

शिलापुत्र पु० शिलायाः पुत्र इव। (लोढ़ा) मेषशृङ्गाख्ये

शिलापुष्प न०शिलायाः पुष्पमिव। शैलेये गन्धद्रव्ये राजनि०

शिलाभव न०शिलायां भवति भू-अच् ७त०। शैलेये जटाध०

स्फटिकलिङ्गमुदीरितम्"। लिङ्गं च द्विविधमकृत्रिमं कृत्रिमञ्च। अकृत्रिमं स्वयम्भुबाणलिङ्गादि स्वयम्भूतम्। कृत्रिमं धातुलिङ्गादिनिर्मितम्। सिद्धान्तशेखरे "तल्लिङ्गं द्विविधं प्रोक्तमचलञ्च चलं तथा। प्रत्येकं त्रिविधं प्रोक्तं लिङ्गं तदुभयात्मकम्। प्रासादे स्थापितं लिङ्गमचलं तल्लिङ्गादिजम्। स्थापितमचलं गेहे स्थिरं लिङ्गमुदीरितं। षड्धा तत्स्थितं लिङ्गं स्वयम्भु दैवपात्रितम्। आर्षञ्च मानसं लिङ्गं तेषां लक्षणमुच्यते। नानाच्छिद्रसमायुक्तं नानावर्णसमन्वितम्। बहुरूपं यल्लिङ्गं कर्कशं भुवि दृश्यते। तल्लिङ्गन्तु स्वयम्भूतमपरं लक्षणच्युतम्। स्वयम्भुलिङ्गमित्युक्तं तच्च नानाविधं भवम्। शङ्खाभमस्तकं लिङ्गं वैष्णवं तदुदाहृतम्। पद्माभमस्तकं लिङ्गं ब्राह्मं स्वाभं शाक्तमुच्यते। शिरोयुग्मं तथाग्नेयं त्रिपदं वाय्यमीरितम्। खड्गाभं नैर्ऋतं लिङ्गं वारुणं कलशाकृति। वायव्यं ध्वजवल्लिङ्गं कौबेरन्तु मदान्वितम्। ऐशानञ्च त्रिशूलाभं लोकपालादि निःसृतम्। स्वयम्भुलिङ्गमाख्यातं सर्वशास्त्रविशारदैः"। अतएवोक्तं "ब्रह्मा लिङ्गं महेशस्य स्वयम्भूतस्य पार्वति!। सर्वपापविनिर्मुक्तः परे ब्रह्मणि लीयते"। एतेषां पूजाफलन्तु तत्रैव "विप्रेणाप्यथ लिङ्गं सक्त्यै भुक्तये चातुषङ्कृतः। पार्थिवं भुक्तये शस्तं सक्त्यै चातुषङ्कृतः। एवं वै दारुजं प्रोक्तं धातुलिङ्गं तथा पुनः। स्फटिकोद्भवमित्यादि हैमं राज्यप्रदञ्च तत्। पुत्रवृद्धिकरं ताम्रं राजपायुःप्रवर्द्धनम्" पद्मपु० "पारदस्तु महाभुक्त्यै सौभाग्याय च मौक्तिकम्। चान्द्रकान्तं सदा भुक्तिं स्फाटिकं सर्वकामदम्"। वीरमित्रोदयेऽपि "सर्वा फलप्रदा भूमिर्मन्त्रयन्त्रदेव हि। अनलाद्याः स्मृता दोषा मन्त्रयो विदुषस्त्वजाः। रात्रौ प्रकाशकाः सर्वे विषाद्याघातकारिणः। नानावर्णास्तु विप्रेन्द्रा रत्नैरन्यैश्च रूपतः। वज्राद्याः स्फाटिकाद्याश्च गुडाद्यादिविनिर्मितम्। सर्वकामप्रदं पुंसां लिङ्गं तात्कालिकं शृणु"। लक्षणसङ्ग्रहे "नाम्नं सौभाग्यदं लिङ्गं पौष्यं मुक्तिप्रदायकम्"। तथा "नानागुणोद्भवं लिङ्गं नानाकामप्रदायकम्। रौक्तं गुणप्रदं लिङ्गं सौभाग्याय च भावकम्। स्फाटिकं तु पाशार्थं भाग्यं शत्रुक्षयावहम्। तात्कालिकं दरिद्रस्य ज्ञात्वा भक्त्या समर्चयेत्"। तथा "कुङ्कुमिकाजा द्वौ भागौ चत्वारश्चन्दनस्य च। कृष्णस्य तगरस्यैव घनेना च चतुःसमम्। एतद्वै गन्धलिङ्गन्तु कृत्वा संपूज्य भक्तितः। शिवसायुज्यमाप्नोति बन्धुभिः सहितो नरः। कार्यं पुत्रमयं लिङ्गं दृषन्मन्त्रसमन्वितम्। नवखण्डां धरां भुक्त्वा गणेशोऽधिपतिर्भवेत्। रजोभिर्निर्मितं लिङ्गं यः पूजयति भक्तितः। विद्याधरपदं प्राप्य पश्चात् शिवसमो भवेत्। श्रीकामो गोशकृल्लिङ्गं कृत्वा भक्त्या प्रपूजयेत्। खड्गेन कपिलेनैव गोमयेन प्रकल्पयेत्। कार्यं च घृतजं लिङ्गं यवगोधूमशालिजम्। श्रीकामः पुष्टिकामश्च पुत्रकामश्चकर्षयेत्। सिताखण्डमयं लिङ्गं कार्यमारोग्यवर्द्धनम्। वश्ये त्वक्षजं लिङ्गं तले त्रिकटुकान्वितम्। गव्यदुग्धमयं लिङ्गं संपूज्य वृद्धिवर्द्धनम्। नवनीतेन च सौभाग्यं पार्थिवं सर्वकामदम्। कामदं तिलपिष्टोत्थं दध्युत्थं मारणे स्मृतम्। भक्षोत्थं सर्वफलदं गुडोत्थं प्रीतिवर्द्धनम्। गव्योत्थं गुणदं भूरिशर्करोत्थं सुखप्रदम्। वांशाङ्कुरं वंशकरं गोमयं सर्वरोगदम्। क्षेत्राक्षिसम्भवं लिङ्गं सर्वशत्रुविनाशनम्। क्षौमजे मारणे पिष्टसम्भवं लिङ्गमुत्तमम्। दारिद्र्यदं दुग्धोद्भूतं पैष्टं मारणप्रदम्। दधिदुग्धोद्भवं लिङ्गं कीर्तिलक्ष्मीसुखप्रदम्। धान्यदं धान्यजं लिङ्गं फलोत्थं फलदं भवेत्। इक्षूत्थं दिव्यभोगायुर्लक्ष्मै धात्रीफलोद्भवम्। नवनीतोद्भवं लिङ्गं कीर्तिसौभाग्यवर्द्धनम्। दूर्वाङ्कुरसमुद्भूतमपमृत्युविनाशनम्। कर्पूरसम्भवं लिङ्गं कषायैर्मुक्तिसिद्धिदम्। चायक्षान्तं चतुर्दा तु प्रोक्तं सामान्यसिद्धिदं" गरुडपु०। "सर्वं मणिभवं प्रोक्तं तत्र वाजमरिष्टदे। यमलिङ्गं महाभुक्त्यै सौभाग्याय च मौक्तिकम्। पुष्टिमूलं महानीलं ज्योतिष्कोरसमुद्भवम्। सर्वकं कुलसम्भूत्यै तैजसं सर्वकामजम्। चन्द्रापीडं सदा भुक्तिं स्फाटिकं सर्वकामदम्। मूलाख्यमणिजं शत्रुक्षयार्थं मौक्तिकं तथा। चापलं क्षीरकं प्रोक्तं रोगघ्नौक्तिकोद्भवम्। शुभकृत् पुष्कलं नीलं वैदूर्यं शत्रुदर्पहृत। नीलं कल्पोद्भवं प्रोक्तं स्फाटिकं सर्वकामदम्"। सारसंग्रहे "महाभुक्तिप्रदं हैमं राजतं भूतिवर्द्धनम्। आरकूटं तथा कांस्यं ह्यणु सामान्यसिद्धिदम्। त्रपुसीसायसं लिङ्गं शत्रूणां नाशने स्थितम्। कीर्तिदं कांस्यजं लिङ्गं राजतं पुत्रवर्द्धनम्। पैत्तलं भुक्तिमुक्त्यर्थं मिश्रजं सर्वसिद्धिदम्" कालोत्तरतन्त्रम्। तत्रैव शिवनारदसंवादे "पितॄणां मुक्तये लिङ्गं पूज्यं रजतसम्भवम्। हैमजं सर्वलोकस्य पा-

प्रवे पूजयेत् पुमान्। पूजयेत्तामृजं लिङ्गं पुष्टिकामो हि मानवः"। मत्स्यसूक्ते "ताम्रजं कलो मान्यं रैत्यस्य शोषकस्य च। रक्तचन्दनलिङ्गस्य शङ्खलिङ्गायसं तथा"। मातृकाभेदतन्त्रे १२पटले "पार्थिवे शिवपूजायां सर्वसिद्धिर्भुतो भवेत्। धात्वादे शिवपूजायां द्विगुणं फलमीरितम्। सर्वलिङ्गे च पूजायां शतगुणं गायनं मतम्। सर्वसिद्धेश्वरो रौप्ये फलं तस्माच्छतगुणम्। ताम्रे पुष्टिं विजानीयात् कांस्ये च धनसंक्षयः। शङ्खवाद्ये शतगुणं वाद्यायां रोगवान् भवेत्। स्फाटिके सर्वसिद्धिः स्यात् तथा मारकते प्रिये!। सौवर्णलिङ्गे रिपोर्नाशं कामदं मणिलिङ्गकम्। वालुकायां वाग्यसिद्धिर्भौमे रिपुविनाशनम्। सर्वलिङ्गेषु माहात्म्यं धर्मकामार्थमोक्षदम्। संस्कारेण विना देवि! पाषाणादौ न पूजयेत्"। "मृत्तिकातोलकं याद्यमथ वा तोलकद्वयम्। एतदन्यत्र कुर्वीत कदाचिदपि पार्वति!" मातृकाभेदतन्त्रे ७प०। "मृत्तिकातोलकं याद्यमथ वा तोलकद्वयम्। लिङ्गस्य प्रमाणेन घटनं कारयेद् बुधः। अकुर्वन्विधानन्तु कृत्वा लिङ्गं प्रपूजयेत्" विश्वसारतन्त्रम्। लिङ्गलोकरणस्तु कालान्तरे "लिङ्गे वेद्यां तथा पीठे समस्तत्रिधातनात्। समस्तैव विजानीयात् लिङ्गलोकरणस्त्विदम्"। ब्राह्मणादीनां मृत्तिकाभेदेन पूजाफलप्रशंसा तत्रोक्ता यथा "शुक्लं हि पार्थिवं लिङ्गं निर्माय यस्तु पूजयेत्। स एव विष्णो देवेशि! त्रिवर्गफलभाग्भवेत्। क्षत्रियस्तु वरारोहे! रक्तं निर्माय पार्थिवम्। पूजयेत् सततं यस्तु त्रिवर्गफलभाग्भवेत्। पीतं तु पार्थिवं देवि! निर्माय यस्तु पूजयेत्। स च वैश्या महेशानि! त्रिवर्गफलभाग्भवेत्। कृष्णं हि पार्थिवं लिङ्गं निर्माय यस्तु पूजयेत्। स शूद्रः परमेशानि! त्रिवर्गफलभाग्भवेत्। त्रिलोकी च महेशानि! स्फटिकं फलदायकम्। कृष्णवर्णं देवेशि! यदा क्षेमाभिवर्धनम्। क्रमेण देवदेवेशि! फलं सप्तविधं स्मृतम्। स्थूलात् स्थूलतरं लिङ्गं रक्षाच्च परमेश्वरि!। पूजनाद्वारणादापि फलं बहुविधं स्मृतम्"। स्थूलतरलिङ्गं पार्थिवलिङ्गेतरपरम् मृत्तिकातोलकं याद्यमित्यादिवचनात्। शिलास्फाटिकमरकतादीनां पञ्चलोकरणस्थलम् लेङ्गे "शिवलिङ्गस्य यन्मानं तन्मानं दश बल्वयोः। योन्यपमपि यन्मानं तदर्धेऽपि तथा भवेत्। "लिङ्गस्य बाहल्यविस्तारः परिणाहोऽपि तादृशः। लिङ्गस्य तिसृषा वेदी योनिस्तदर्धसंमिता। कुर्वीतानुक्रमतो लुप्तं न कदाचिदपि क्वचित्। रत्नादिशिवनिर्माणे मानमित्थमवाप्नुयात्"। तन्त्रान्तरम्। लिङ्गशब्दव्युत्पत्तिर्यथा "आकाशं लिङ्गमित्याहुः पृथिवी तस्य पीठिका। आलयः सर्वदेवानां लयनाल्लिङ्गमुच्यते" स्कन्दपु०।

"एकहस्तेन निर्माय पार्थिवं लिङ्गमर्चयेत्। सर्वलिङ्गपूजनस्य फलमाप्नोत्यसंशयम्। तदेव स्याच्छतगुणं वामहस्तेन निर्मितम्। सहस्रगुणमेवादि शोधनस्यैव पार्थिवे। "एवं ज्ञाते तु सृष्टिस्थां संसारात् स विमुच्यते। द्वाभ्यामेवं यतिपत्नीभ्यां लिङ्गं प्रयत्नतः। लिङ्गं निर्माय देवेशि! पूजयेद्भक्तिसंयुतः" तन्त्रसारः।

शिवलोक पु० ६त०। कैलासनामके स्थाने।

शिववल्लभ त्रि० ६त०। १महादेवप्रिये २शतपत्र्यां स्त्री राजनि०। [२श्रीवल्ल्यां च राजनि०।

शिववल्ली स्त्री० शिवप्रिया वल्ली मा०त०। १लिङ्गिनीलतायां

शिववाहन न० शिवं वाहयति वह-णिच्-ल्यु। वृषभे राजनि०। [२शिवस्य एके च।

शिववीज न०६त०। १पारदे राजनि०। शिववीर्यादेवोऽप्यत्र।

शिवशेखर पु० शिवस्य शेखर इव। १धुस्तूरे राजनि०। २वकपुष्पे च जटा०।

शिवसुन्दरी स्त्री ६त०। दुर्गायां तन्त्रसा०।

शिवा स्त्री शो-वन् नि०। १मङ्गलवल्ल्यां स्त्रियां २दुर्गायां "शिवा सिद्धिः समाख्याता योगिनां मोक्षदायिनी। शिवाये या वजेद्देवी शिवा लोके ततः स्मृता" देवीपु० ३५अ०। ३सप्तसु शृङ्गारे पुरोतक्यां हृषीकेशे ७तामसकल्पस्य स्मरः। ८अभयकल्पां मेदि०। ९हरिद्रायां १०दुर्वायां ११गोरचनायाञ्च राजनि० १२शृङ्गाख्यां स्मरः। [राजनि०।

शिवाटिका स्त्री शिवायाटति अट-ण्वुल्। वंशपत्र्यां

शिवात्मक न० शिवो मङ्गल आत्मा यस्य कप्। १सैन्धवे लवणे राजनि०। २शिवमये त्रि०।

शिवानी स्त्री शिवं कल्याणमनयति या+नी-ड गौरा० ङीष्। १जयन्तीवृक्षे शब्दच० २दुर्गायाञ्च।

शिवाप्रिया पु० ६त०। १आगे त्रि० २तस्याः शिवभक्ते त्रि०।

शिवापीड पु० ६त०। धत्तूरवृक्षे राजनि०। [राजनि०।

शिवाफला स्त्री शिवाया इव फलं यस्याः। शमीवृक्षे

शिवाबलि पु० शिवाभ्यो देयो बलिः मा०त०। तत्तद्वा-

रविछिते कन्यायां शिवाभ्यो देये मांसादिवस्तौ तद्धि-
धिस्तन्त्रसारे दृश्यः ।

शिवारति पु० शिवाया मृगालस्यारातिः । शुक्लुरे शब्दमा० २शिवशिवयोर्हरिहरयोरपत्ये च ।

शिवारुत न० तृ० । मृगालीशब्दे दिग्भेदे वस्तु शुभाशुभ-फलं वसन्तराजशाकुने उक्तं यथा
"शोभनं शुभफलाभिसूचकं कथ्यते खचितं शिवारुतम् ।
शान्तदीप्तकुभां विभेदतो ज्ञानमत्र च वदापशुध्यते ।
दग्धा दिशुक्ला दिनाधयुक्ता विवक्षताप्ता भवति प्रदीप्ता ।
सा धूमिता यां खचिता प्रयातः मेघा दिशन्ताः किल पञ्च शान्ताः । दग्धा दिशैशी ज्वलिता दिशेन्द्री धूमिता वानलदिक्क्रमेण । आद्ये दिनस्य प्रहरे प्रहत्ते मङ्गेश-देवेशशुक्रतारादिषु । शिवा रटन्ती कुरुते नराणां संवा-सकार्यव्यवसायनानि । अन्ते द्वितीये प्रहरस्य भागे सङ्गमनेत्रानलकालदिषु । शिवा रटन्ती कुरुते इत्यादि । मध्याह्ने तृतीये प्रहरे दिनस्य क्षतारवेशक्षतवाहदिषु । शिवा रटन्ती कुरुते इत्यादि । समागतेऽस्ताः प्रहरे तुरीये प्रेतेशरक्षःपतिपाशिदिषु । शिवा रटन्ती कुरुते इत्यादि । आद्ये निशायाः प्रहरे प्रहत्ते रक्षाधिपादः-पतिवातदिषु । शिवा रटन्ती कुरुते इत्यादि । ततो द्वितीयप्रहरे रजन्याश्चोद्याधिनाथानिलसोमदिषु । शिवा रटन्ती कुरुते इत्यादि । यामे तृतीयेऽपि च यामवत्याः शशोरदोषाकरभस्मदिषु । शिवा रटन्ती कुरुते इत्यादि । समागते रात्रितुरीययामे निशाकरेशानलरेशदिषु । शिवा रटन्ती कुरुते इत्यादि । दृतीरितं दिक्त्रय-यामयोगात् फलं विरुद्धं विदुषैः शिवायाः । भूमोऽथ दिक्पञ्चकयामयोगात् फलानि पुंसां क्रमतः शु-भानि । क्रतान्तरक्षोवरुणानिलेन्दुदिक्षाद्ययामे रविजैः मृगाख्याः । खादिष्टवार्त्तासुतिरित्यृक्षैर्दिङ्नामभः स-हितं शिवलोकसङ्ज्ञैः । रक्षःप्रचेतोऽनिलयोमशम्भुदिषु द्वितीये प्रहरे क्रमेण । खादिष्टवार्त्तासुतिरित्यादि । खखेशवातेन्दुशिवामरेशदिक्षारवैश्च प्रहरे तृतीये । खादिष्टवार्त्तासुतिरित्यादि । यमोरशोमेशसुरेशवह्निदिषु स्वरैश्च प्रहरे चतुर्थे । खादिष्टवार्त्तासुतिरित्यादि । यमा-कुबेरेन्द्रहुताशकालदिक्षारवैः पञ्चमयामभागे । खादि-ष्टवार्त्तासुतिरित्यादि । ईशानयक्षाग्निसुतान्तरक्षोदिषु स्वरैश्च प्रहरे च षष्ठे । खादिष्टवार्त्तासुतिरित्यादि । इन्द्राग्निकालाम्बुपयोधिपाणिदिक्षारवैः सप्तमयामकाले । खादिष्टवार्त्तासुतिरित्यादि । खखनलक्षैर्ऋतपाग्निवात-दिक्षस्मे च प्रहरे रवेश्च । खादिष्टवार्त्तासुतिरित्यादि । "एकादिकानां निधनाष्टमानां शिवारुतानामधुना यद्-धर्म्म । प्राच्यादिकाक्षस्तु दिक्षुक्रमेण यद्यत् फलं तत्तदुदीरयामः । धनान्वभीष्टाग्निमभीष्टलाभं ध्रुवं ततोऽर्थस्य फलं शुभञ्च । भयं प्रवासं सकलञ्च मो-क्षमेकादिशब्दैः कुरुते प्रयाणे । भयान्वितिस्तुति-रवेष्टानिरिष्टैर्वियोगो मरणं च भीतिः । खादि-मङ्गाग्निभैरथञ्च टोग्रे खेकादिना चेत् क्रतसम्प्रहेण । ऐशाग्नि निनादे प्रथमेऽर्थलाभो भवेद्द्वितीये निधिदर्शनञ्च । कन्यां तृतीये लभते चतुर्थे तथागमं पञ्चमकेऽथ सिद्धिम् । षष्ठे रवे कुर्यति भूमिनाथा भोः सप्तमे खादिफ-लोऽष्टमस्तु । त्रासोऽग्निभागे प्रथमे द्वितीये नराधिपः कुर्यति भोक्तृतीये । चातश्चतुर्थे नगरस्य शब्दे शिवा-क्रते पञ्चमके च युद्धम् । वदन्ति तज्ज्ञाः कलहञ्च षष्ठे भोः सप्तमे खादिफलोऽष्टमस्तु । आद्ये शुभं खादशुभं द्वितीये वाच्ये मङ्गाध्यधिपं तृतीये । स्वरे चतुर्थे स्व-जनागमः स्यात् पुत्रा भवेत् पञ्चम फेरुतेषु । जायेत कन्या रटिते च षष्ठे भोः सप्तमे खादिफलोऽष्टमस्तु । ग्रामस्य चातो दिशि राजधानामाद्ये द्वितीयेऽपि च गोकुलस्य । स्वयुक्तृतीये द्विचतुष्पदानां क्षतिश्चतुर्थेऽपि च पञ्चमेऽब्ज । चोरादुभयं राजभयञ्च षष्ठे भोः सप्तमे खादिफलोऽष्टमस्तु । शब्दे शिवाया वरुणस्य भागे आद्ये भयं क्षतिरथ द्वितीये । खाद्राजदूतागमनं तृतीये वादश्चतुर्थे खलु चौरभीतिः । स्यात् पञ्चमे राजभयञ्च षष्ठे भोः सप्तमे खादिफलोऽष्टमस्तु । वायव्यभागे भय-मेकशब्दे भयातिरेको भवति द्वितीये । दृष्टिस्तृतीये मरुतो चतुर्थे मेघागमे वर्षति पञ्चमे च । क्रोधं वि-धत्ते रुपतेच षष्ठे भोः सप्तमे खादिफलोऽष्टमस्तु । दिग्भूत्तरस्यां विकृते विरावे क्वचित् प्रथमे द्वि-तीये । मङ्गाभयं, विप्रवधस्तृतीये शुभं चतुर्थे खलु कन्यते च । विट्पञ्चमे वरुणे च शूद्रा भोः सप्तमे खा-दिफलोऽष्टमस्तु । राक्षोक्तया दक्षिणसाद्यशब्दे क्रमेण द्वितीये च तथोत्तरेण । सङ्ग्रामपातस्त्रिषु दुर्दिनञ्च चतुर्थं भद्रं खलु पञ्चमे च । वक्षो भवेद्वैरिजनेन षष्ठे भोः सप्तमे खादिफलोऽष्टमस्तु । आद्ये भवेद्दुर्दि-नमोग्रदेशे दृष्टिर्द्वितीये च रवे शिवायाः । चातस्तृतीये तथानिचतुर्थे क्वचित् खलु पञ्चमे च । क्षमेत

पृच्छीं निमई च शब्दे भीः सप्तमे स्वादिफलोऽष्टमस्तु "क्षेमलाभपुनरागमनानां निश्चयं वमधिगम्य विमङ्गः। येन याति पथिकः परदेशं तं शिवारुतमथ प्रथयामः। यं यं देशं गन्तुमभ्युद्यतानां पुंसां शब्दानुच्चरन्ती शृगाली। शान्तायां सा सिद्धये वाञ्छितानां दीप्तायान्तु स्वादभीष्टक्षयाय। प्राचीं दिशं सम्मुखभानुबिम्बं प्रतिष्ठमानस्य नरस्य वस्य। शब्दं शृगाली पुरतः करोति वस्तुं वधं वा प्रकरोति तस्य। प्राचीदिगीशाभिमुखस्य पुंसः प्रस्थानकामस्य शिवा सशब्दा। भिक्षेऽर्थनाशाय च दक्षिणा स्यादामा पुनर्वाञ्छितकार्यसिद्धै। प्रत्यर्कभागां चलितस्य पूर्वां शिवा विरावं पुरुषस्य वस्य। करोति पृष्ठे प्रकरोति तस्य सर्वप्रकारामभिलाषसिद्धिम्। प्रस्थायिनो वस्य च दक्षिणाशां शिवा रतं सङ्कुति दक्षिणेन। स्वादित्यशक्ता यदि नो तदानीं ध्रुवं भवेत्तस्य महीपतित्वम्। वैवस्वताशाचलितस्य वस्य दिवाकरस्तिष्ठति दक्षिणेन। शिवा च वामा कुरुते विरावं सम्पद्यते तस्य समस्तमिष्टम्। पुमान् यदा वाम्यकुकुप्रयायी करोति शब्दं पुरतः शृगाली। स्याच्चे विरुद्धानपि सम्मुखस्थे भवेत् तदानीमचिरेण क्षयुः। नरस्य वाम्यां ककुभं यियासोः शृगालभाषौ यदि पृष्ठभागे। फेत्कारमासङ्कुति मानवस्य क्षयुस्तु पृष्ठेन भवत्यवश्यम्। दिशं प्रतीचीं व्रजतः शृगाली नरस्य वस्याभिमुखी विरौति। शान्तास्थिता शान्तफलप्रदात्री दीप्तास्थिता दीप्तफलं तनोति। प्राचेतसीं सङ्कुचितस्य काशां शृगालिका जल्पति दक्षिणेन। यदा तदानीं सुखजननघातं करोति चार्थानपि हन्ति पुंसः। दिशं प्रचेतःपरिपाल्यमानां नरस्य वस्य व्रजतः शृगाली। वामा विरावं प्रकरोति शान्ता भवन्त्यभिप्रेतफलानि तस्य। यो वारुणीं याति दिशं मनुष्यः शृण्वन् शिवायारटितानि पृष्ठे। मतस्य तस्याशु कृताभयीतिरसंशयं स्यात् सुविचक्षणत्वच। यक्षोत्तराशां चलितस्य पुंसः प्राच्यां शिवा सङ्कुति फेत्कृतानि। भानुः प्रतीच्यां विहितस्थितिश्चेदपेक्षितं सिध्यति तत्क्षणेन। सङ्कल्पुदीचीं चलितस्य पृष्ठे शिवा विरावं पुरुषस्य यस्य। स्याच्चे च मध्ये नभसो विरुद्धांस्तत्क्षार्थघातिभैरवं प्रदिष्टम्। कुबेरकाशां प्रति यः प्रयाति व्याघ्रास्थो वामिसस्थो विरौति। तस्याध्वगस्याभिमतार्थसिद्धिर्भवेच्च सम्यक् पुनरागमश्च। तिष्ठति तीव्रकरो दिशि वस्यां फेत् कुरुते यदि तस्य शृगाली। तद् व्रजतः पथिकस्य भवेतां निश्चयतो धनजीवितनाशौ। दक्षिणतः प्रथमं यदि पश्चात् वामगता पथिकस्य शृगाली। फेत् कुरुते कुरुते तदवश्यं क्षेमधनाप्तिर्गृहगमनानि। अथास्य शान्तां ककुभं नरस्य वामा शृगाली यदि वा रटन्ती। तदार्थलाभं विनरत्नवस्त्रमर्थक्षयं दक्षिणतो रटन्ती। वामा प्रदीप्ते ककुभः प्रदेशेऽलाभं तथानर्थसुखादिशन्ति। शिवा रटन्ती पथि दक्षिणा तु क्षिपत्यनर्थानथसङ्कटेषु। ग्रामे दिगन्ते यदि वा प्रदीप्ते पृष्ठे प्रयाणे प्रतिषेधयित्री। शब्दायमाना तु शिवा पुरस्तात् निमज्जयत्यापदगाधसिन्धौ। वामेऽपसव्ये पुरतोऽथ पृष्ठे पुंसः शिवा जल्पति यत्र तत्र। धावन्ति चौराः प्रथमे विरावे द्वयोर्भवेत्तस्करदर्शनञ्च। रूपादरोऽर्थागमनं हतौ वे तृतीये क्षतिः पञ्चमकेऽर्थलाभः। वाग्भिस्त्वेवादिफलाय पृष्ठे भीः सप्तमे स्वादिफलोऽष्टमस्तु। फाङ्कारवं सङ्कुति रूक्षभावा फाङ्कं तु तस्मात्तदुदाहरन्ति। कर्षेश्वरा वा पथि या शिवासोः सा द्विप्रकारापि मनोरथाप्त्यै। रूपस्य यात्रासमये पुरस्तात् प्रयाति चेद्वर्जनि वेदवन्ती। कुर्याच्छिवा वैरिपराभवं तज्जयस्त्रियश्चाभिमतं विदध्यात्। काष्ठान्तरेष्वप्यनुगम्यमाना श्वेवःप्रदा शान्तदिशि प्रदिष्टा। शिवा प्रदीप्ते तु दिशि प्रदीप्ते समारटन्ती भवते भयाय। अथोद्गमे दीप्तदिशि प्रदीप्तैर्नादैर्वदन्ती हरति भयानि देवी। भद्राणि सर्वाण्यपि, शान्तनादा शान्तस्थिता सर्वभयप्रदात्री। यदा च भद्रोत्तरगा नराणां शब्दं शृगाली कुरुते कदाचित्। तटदवे तत्परिरक्षणीयं भद्रङ्गवं भावि जलेचरेभ्यः"। "स्थानस्थितानामपि योगभाजां नैमित्तिकानामुपदिश्यते तु। शिवाविरावैरशिवं शिवञ्च सुनिश्चितार्थं सुनिरूपणेन। करोति फे फे इति सर्वदिक्षु यदा तदा स्थानविघातयुक्ते। शिवा विधत्ते क्षुधिता त्वसंख्यान् रौद्रान् खरान् सङ्कति चेदुपेक्षाम्। निरन्तरं रौति विदिक्षु दिक्षु समन्दकाकखरातुरा चेत्। क्षयत्वभोक्षेण यदा शृगाली सञ्जल्पकृता सा कथितेह तज्ज्ञैः। स्थित्वा प्रदीप्ते ककुभो विभागे व्याघ्रास्थो फेत्कृतेऽतिरौद्रम्। यामस्य तस्य प्रकरोति नाशं तस्याथ वा तिष्ठति यस्य मध्ये। यामस्य मध्यं समवाप्य यस्य व्याघ्रास्थो सङ्कुति फेत्कृतानि। स शून्यतां गच्छति निश्चयेन क्षोभस्य वा स्यादसुखं प्रभूतम्। यामान्तिके सम्प्रदिशानि यावत् भद्राभयोत्पादितफेत्कृतानि। विरौति चेत्तु कुरुते शृगाली तद्वाधिलोकस्य भद्रं

अभूतम्। मध्यंदिने यावदहानि पञ्च शिवा समीपे नगरस्य यस्य। विरौति घातं विदधाति तस्य भवेच्च वह्निप्रभवं भयम्। पश्चार्द्धरात्रेऽपि कथञ्चिदेषा क्रूरा-रवा व्याहरते श्मशानी। यस्यालिके तं वसतो दहेन शब्दायते चौरा जनसन्निवेशे। स्थानस्य यस्योपगता समीपं दिनानि पञ्चोच्चरति प्रभाते। स्वरेण रौद्रेण श्म-शानभाषां स्वात्तत्र हानिमेकदा नराणाम्। सुरक्षित-स्थापि मनुष्यसङ्घैर्यामस्य शीघ्रं हरणं विधत्ते। त्रयं दिनानां दिवसावसाने शिवा रटन्ती पथ्यस्वरेण। दिक्षा-रटन्ती सकलासु रौद्रं भयसन्निधा परितः पुरस्थेत्। श्मशानभाषां खलु तद्विदीति युद्धं महत्तत्र महाभि-घातम्। ज्वालां विसृज्यतिरौद्रनादा समाकुला धावति या वमन्तात्। कौमारकं या जनयत्यकस्मात् कुर्याच्छिवा सा युवराजघातम्। रोमोद्गमं वा जनयत्य-कस्मात् फेत्कृतिक्रूररवा नराणाम्। मूत्रं पुरी-षन्तु तरङ्गमाणां सा सर्वदा स्यादशिवा शिवेह। तरङ्गिणीरोधसि सौम्यरूपांस्त्रीन् पञ्च वा सप्त वा निनादान्। शिवां शिवां तां शपतित्वदार्त्तां वन्देत देवीमभिवन्दनीयाम्। श्मशानभूमौ दिनमध्यभागे मध्ये रजन्याः स्वदहप्रदेशे। या रौति तस्यै बलिमर्घ्य-युक्तं भक्त्या प्रदद्याद्यदि भद्रमिच्छेत्। सर्वेषु कार्येषु सदाप्यतेषु बलिः शिवाया विनिवेदनीयः। स्फुरति यस्मिन् विषयेऽभ्युपेत्य देवी बलिं जल्पति तत्र सिद्धिम्" "कथ्यते बलिविधानमिदानीं शाकुनागममतेन शिवायाः। दिव्यमन्त्रबलिवाधितदोषं साधिताखिलसदुद्यतकार्यम्। शून्यालयं रुद्रदहं श्मशानं चतुष्पथं मातृदहं जलान्तम्। बन्ध्यावनिश्चत्वरमेवमाद्या बलिप्रदानाय मताः प्रदेशाः। तेषान्तु मध्यादुचितप्रदेशे विशो-धितं मण्डलिकं विदध्यात्। पौराणिकश्लोकपरी-क्षितत्वाः संस्कृत्य गोमयमलरीत्या। अलञ्जलौर्ध-देहावा बन्ध्यायाच्च विशेषतः। रोगार्त्तनवस्तावा न गोमयमाहरेत्। तस्मिन् विचित्रं वितनं विदध्यात् पिष्टाक्तकेनाष्टदलं सरोजम्। संपूजयेत् तत्र सुरादि-पादीन् क्रमेण सर्वानपि लोकपालान्। मध्ये सुनेः सप्तभिरभ्युपेता शिवान्विता पिष्टमयी प्रसन्ना। पूजा शिवा तृप्यति भक्तियोगात् प्रभूतदुग्धाज्यगुडौदनैः। साज्यगुडौदनमाषकुलत्थैर्यावकपूपलिकाभिषक्तैः। संस्थ-पितस्य नराधिपस्य बुद्धिमता बलिकर्मणि कार्या। प्राप्याष्टमीं वामचतुर्दशीं वा संमन्त्र्य मन्त्रेण च सप्त वत्याः। बलिं शिवाया निशि निश्चयेन दद्यान्मनुष्यो यदि भद्रमिच्छेत्"।

शिवालय न०शिव आलीयतेऽत्र ली–अच्। श्मशाने तारा०। ६त०। २रुद्रतुलस्यां मञ्जर०। ३महादेवस्थले च पु०।

शिवालु पु० शिवायालति अल–उनृ। शृगाले राजनि०।

शिवास्मृति स्त्री शिवायाः स्मृतिर्यस्याः ब्रु०। जयन्तीवृक्षे शब्दच० तन्नामोच्चारणे हि जयन्तीनामकदुर्गायाः स्मर-णमिति तस्यास्तथात्वम्।

शिवाह्लाद पु० शिवमाह्लादयति आ+ह्लद–णिच्–अण्। १वकवृक्षे राजनि०। ६त०। २तत्फलोपे च।

शिवाह्वा स्त्री शिवस्येवाह्वा यस्याः। रुद्रजटावृक्षे राजनि०। ६त०। २महादेवाह्वाने च।

शिवि पु०शि–वि नि० न गुणः। १क्षिप्रपक्षी त्रिका०। २भू-जंघदेशे ३तद्देशीनरराजभेदे च मेदि०।

शिविका स्त्री शिवं करोति शिव+च्वि–कन्+टाप् अत इत्त्वम्। यानभेदे (डुली) अमरः।

शिविर न० शी+किरच् कुक् च। कटके सैन्यनिवासस्थाने। शिविरलक्षणमुक्तं यथा

"शिविरं परिखायुक्तप्राकारवेष्टितम्। युक्तद्वादश-द्वारं सिंहद्वारपुरस्कृतम्। युक्तं चित्रैर्विचित्रैश्च ध्वजैश्चैव कपाटकैः। निश्छिद्रशरणं प्रसिद्धैश्च पुरस्कृतम्। शतत्रयं चन्द्रवेश्म प्राङ्मुखञ्च तथैव च"। तत्र सिद्धिनिश्छिद्रत्वादि यथा "आश्रमे नारिकेलस्य स्थिरणाञ्च धनप्रदः। शिविरञ्च यदीशाने पूर्वे पुत्र-प्रदस्तरुः। सर्वत्र मङ्गलार्थञ्च तरराजो मनोहरः। रसालश्चः पूर्वस्थिरणां सम्पत्प्रदस्तथा। शुभ-प्रदश्च सर्वत्र सुरकारो! निशामय। बिल्वश्च पन-सश्चैव जम्बीरो बदरी तथा। प्रजाप्रदश्च पूर्वस्थिन् दक्षिणे धनकस्तथा। सम्पत्प्रदश्च सर्वत्र यतो हि वर्द्धते स्थिरी। जम्बुश्चश्च दाडिम्बः कदल्यामलकस्तथा। बन्धुप्रदश्च पूर्वस्थिन् दक्षिणे मित्रदस्तथा। सर्वत्र शुभ-दश्चैव धनधान्यशुभप्रदः। कर्पूरो गुवाकश्च दक्षिणे पश्चिमे तथा। ईशाने स्थिरदश्चैव सर्वत्रैव निशामय। सर्वत्र चम्पकः शुद्धो भुवि भद्रप्रदस्तथा। अलाबुपाणि कुष्माण्डं मायाम्बुश्च सुकासकः। खर्जूरी कर्कटी चापि शिविरे मङ्गलप्रदाः। वास्तूकः कारवेल्लश्च वार्त्ता-कुश्च शुभप्रदाः॥ सताफलश्च शुभदं सर्वं सर्वत्र सिद्धि

तम्। प्रशस्तं कथितं कारो! निषिद्धञ्च निशामय। वन्यद्वया निषिद्धञ्च शिविरे नगरेऽपि च। वटो निषिद्धः शिविरे नित्यं चोरभयं ततः। नगरेषु प्रसिद्धञ्च दर्शनात् पुण्यदस्तथा। हे कारो! तिन्तिड़ीद्वयो वज्रात्तं परिवर्जयेत्। घरेषु धनहानिः स्यात् प्रजाहानिर्भवेत् ध्रुवम्। शिविरेऽतिनिषिद्धञ्च नगरे किञ्चिदेव च। न निषिद्धः प्रसिद्धञ्च ग्रामेषु नगरेषु च। इक्षवः सक्तकादीनां धान्यञ्च भक्ष्यप्रदम्। ग्रामेषु नगरे चापि शिविरे च तथैव। इक्षुद्वयञ्च शुभदः सन्ततं शुभदस्तथा। ओषधयश्च शिरीषश्च कदम्बश्च शुभप्रदाः॥ कट्वी हरिद्रा शुभदा शुभदार्द्रकसंज्ञका। हरीतकी च शुभदा ग्रामेषु नगरेषु च। न वाह्यां भक्षदा नित्यं तथा ग्राम्यकी ध्रुवम्। गव्यानामस्थि शुभदमश्वानाञ्च तथैव च। कल्याणकृद्भिरवश्यं वास्तौ स्थापनकारिणाम्। न शुभप्रदमन्येषामश्वोष्ट्रकारणं परम्। वानराणां नराणाञ्च गर्दभानां गवामपि। कुक्कुराणां शृगालानां मार्जारीणामभद्रकम्। भेटकानां सूकराणां सर्वेषाञ्चा शुभप्रदम्। ईशाने चापि पूर्वस्मिन् पश्चिमे च तथोत्तरे। शिविरस्य जलं भद्रमन्यत्राशुभमेव च। दीर्घं प्रस्थे समानञ्च न कुर्यान्मन्दिरं बुधः। चतुरस्रे गृहे कारो! गृहिणां धननाशनम्। दीर्घप्रस्थः परिमितो नेत्राङ्गैरपि संयुतः। शून्येन रहितं भद्रं शून्यं शून्यपदं त्यजेत्। प्रस्थे दण्डद्वयात् पूर्वं दीर्घं दण्डत्रयं तथा। गृहिणां शुभदं द्वारं प्राकारस्य गृहस्य च। न मध्यदेशे कर्त्तव्यं किञ्चिन्न्यूनाधिके शुभम्। चतुरस्रं चन्द्रवेधं शिविरं भद्रवर्धनम्। अभद्रं सूर्यवेधञ्च प्राङ्मुखञ्च तथैव च। शिविराभ्यन्तरे भद्रा स्थापिता तुलसी त्यजेत्। धनपुत्रप्रदात्री च पुण्यदा हरिभक्तिदा। प्रभाते तुलसीं दद्या त्सर्वदानफलं लभेत्। मालती यूथिका कुन्दोमाधवी केतकी तथा। नागेश्वरं मल्लिका च काञ्चनं वकुलं शुभम्। अपराजिता च शुभदा तेषामुद्यानमीप्सितम्। पूर्वे च दक्षिणे चैव शुभदं नात्र संशयः। अर्द्धं षोड़शदण्डेभ्यो नैवं कुर्यादृ गृहं गृही। अर्द्धं विंशतिदण्डेभ्यः प्राकारं न शुभप्रदम्। खड्गधारं तैलकारं सर्षकारञ्च क्षीरकम्। वाटीमूले ग्राममध्ये न कुर्यात् स्थापितं बुधः। ब्राह्मणं क्षत्रियं वैश्यं सच्छूद्रं गणकं शुभम्। भद्रं वैद्यं पुष्पकारं स्थापयेत् शिविरान्तिके! प्रस्थे च परिखामानं शतदण्डं प्रशस्तकम्। परितः शिविराणान्तु गम्भीरं दण्डसप्तकम्। सङ्क्षेपपूर्वकञ्चैव परिखाद्वारभीप्सितम्। शतोरगम्यं त्रिशत्या गम्यमेतं सुखेन च। शाङ्खनीनां तिन्तिड़ीनां छिन्नानानां तथैव च। निम्बानां सिन्धुवाराणां उड़म्बराणामभद्रकम्। धुस्तूराणां वटानाञ्चाप्येरण्डानामवाञ्छितम्। एतेषामतिरिक्तानां शिविरे काष्ठमीप्सितम्। दण्डञ्च वज्रदण्डं दूरतो वर्जयेद् बुधः। पुत्रदारधनं हन्यादित्याह कमलोद्भवः" ब्रह्मवै० ख० १०२अ०।

शिविष्ट पु० इत०। [वक्रदण्डे २दूर्वायां स्त्री राजनि०। ३महादेवभिदे त्रि०। [वाचस्पत्ये हारा०।

शिवीरथ शिवेर्भुजेदण्डस्य ईः शोभा यत्र तादृशो रथः।

शिशिर न० शश-किरच् नि०। १ऋतौ माघफाल्गुनमासद्वयात्मके २दण्डभेदे अमरः। तत्र ऋतौ वर्णादिवर्णनं "करीषः धूमः कुन्दः पद्मदाहः शिशिरोत्कर्षः" कविक०ल० ३शीतले स्पर्शे च न० ३तद्वति त्रि० अमरः। [च।

शिशु पु० शो-कु सन्वद्भावः हित्वम्। १बालके अमरः २अल्पे

शिशुक पुंस्त्री०शिशुरिव इवार्थे कन्। १जलजन्तुभेदे (सुसुक) राजनि०स्त्रियां ङीष्। २बालके मेदि० ३दण्डभेदे हेमच० "जातमात्रः शिशुस्तावत् यावद्दन्तो समा यदः। स हि गर्भसमोज्ञेयो व्यक्तिमात्रप्रदर्शकः। भक्ष्याभक्ष्ये तथा पेये वाच्यावाच्ये तथाऽस्पृते। तस्मिन् काले न दोषः स्यात् स यावद्योपनीयते" मनुः। [ब्रह्मा०।

शिशुगन्धा स्त्री शिशुः अल्पो गन्धो यस्याः। मल्लिकाभेदे

शिशुचान्द्रायण न० "चतुरः प्रातरश्नीयात् पिण्डान् विप्रः समाहितः। चतुरोऽस्तमिते सूर्ये शिशुचान्द्रायणं स्मृतम्" मनूक्ते व्रते। [ताऽत्यन्त स्त्री।

शिशुत्व न० शिशोर्भावः त्व। बाल्ये तल्। शिशुः

शिशुपाल पु० चेदिदेशीयराजभेदे दमघोषात्मजे त्रिका०।

शिशुपालहन् पु० शिशुपालं हतवान् हन-भूते क्विप्। श्रीकृष्णे हेमच०।

शिशुमार पुंस्त्री०शिशुं मारयति मृ-णिच्। १जलजन्तुभेदे अमरः स्त्रियां ङीष्। गगनस्थे २तारापुञ्जभेदे च "शिशुमारस्तु यः प्रोक्तः स ध्रुवो यत्र तिष्ठति। सन्निवेशश्च तस्यापि शृणुष्व मुनिसत्तम!। यदङ्गा कुरुते पार्श्वं दक्षा तच्छिरसि स्थिते। तावत्यश्चैव ताराद्याः शिशुमाराश्रिता दिवि। तावत्यश्चैव तु वर्षाणि जीवन्त्यधिकानि तु। उत्तानपादसंस्थाच्च विष्णोरप्युत्तरो हनुः। यत्रो-

ऽक्षरत्व विज्ञेयो धर्मो मद्भानमाश्रितः। रुद्रि नारायण-स्यास्ते अश्विनौ पूर्वपादयोः। ब्रह्मणार्थमा चैव यक्षिमे तस्य वक्षिणी। शिश्नं संवत्सरस्तस्य मित्रोऽपानं समाश्रितः। पुच्छेऽग्निश्च महेन्द्रश्च कश्यपोऽथ ततो ध्रुवः। तारकाः शिशुमारस्य नासामेति चतुष्टयम्" विष्णुपु० २य अं० १२अ०। भाग० २२अ० अन्यत्रोक्तं यथा "केचिदेतत् ज्योतिरनीकं शिशुमारसंस्थानेन भगवतो वासुदेवस्य योगधारणायामनुवर्णयन्ति। यस्य पुच्छाग्रेऽवाक्शिरसः कुण्डलीभूतदेहस्य ध्रुव उपकल्पितः तस्य लाङ्गूले प्रजापतिरग्निरिन्द्रो धर्म इति। पुच्छमूले धाता विधाता च कट्यां सप्तर्षयः यस्य दक्षिणावर्त्त-कुण्डलीभूतशरीरस्य वान्युद्गमनानि दक्षिणपार्श्वे नक्षत्राणि उपकल्पयन्ति। दक्षिणानि तु सव्ये यथा शिशु-मारस्य कुण्डलाभोगसन्निवेशस्य पार्श्वयोरुभयोरवयवाः समसंख्या भवन्ति। पृष्ठे त्वजवीथी आकाश गङ्गा चोदरतः। पुनर्वसुपुष्यौ दक्षिणवामयोः श्रोण्योः दाहौंश्लेषा च दक्षिणवामयोः पादयोरभिजिदुत्तरा-षाढे दक्षिणवामपार्श्वावश्रिषु युञ्जीत। तथैव मृगशीर्षा-दीन्युद्गमनानि दक्षिणपार्श्वे प्रातिलोम्येन प्रतियुञ्जीत। अतभिषाज्येष्ठे स्कन्धयोर्दक्षिणवामयोर्न्यसेत्। उत्तरा-फल्गुनावस्योः अधराफल्गुनौ यमः सख्ये बाहुरकः अग्नेः स्वर उपस्थे हस्तर्क्षतिः ककुदि चित्रास्वातिलो हृदये नारा-यणो मनसि चन्द्रोऽभ्यासयनालानयोरश्विनौ बुधः प्राणापानयो राहुर्गले केतवः सर्वाङ्गेषु रोमसु सर्वे तारागणाः। एतद्वै भगवतो विष्णोः सर्वदेवतामयं रूपम् अहरहः सन्ध्यायां प्रयतो वाग्यतोनिरीक्षमाण उपतिष्ठेत"।

शिशुवाह पुंस्त्री०शिशुं वहति वह-ण्वुल्। वनच्छागे हेमच० स्त्रियां ङीष्। शिशुवाह्यौ तत्रार्थे त्रिका०

शिश्न पु० शश-नक् नि०। मेढ्रे पुंचिह्नभेदे अमरः।

शिश्विदान त्रि० शिद-कानच् द्वित्वम्। पापकारके अमरः

शिष वधे भ्वा० पर० सक० सेट्। शेषति अशेषीत्।

शिष परिशेषीकरणे वा चु० उभ० पक्षे भ्वा० पर०सक०सेट्। शेषयति ते शेषति अशिशेषत् त अशेषीत्। [शेषा।

शिष विशेषे क्रया०पर०सक०अनिट्। शिनष्टि क्षदित्अशिषत्

शिष्ट त्रि०शास-क्त शिष-क्त वा। १शान्ते २वेदवाक्ये विद्या-सयुते ३सुबोधे ४धीरे च "न पाणिपादचपलो न नेत्रचपलो मुनिः। न च वाग्वक्रचपल इति शिष्टस्य लक्षणम्" भा०आश्व० "धर्मो नातिगतोयेषु वेदः स परिरक्षितः। ते शिष्टा ब्रह्मणा प्रोक्ता लिङ्गमात्मगुणान्विताः" कूर्म० उप० २४अ०। "विशेषमवलम्बिष्यु शेषः शिष्ट इतीर्य्यते। मन्वत्रेर्ये शिष्टाः इह तिष्ठन्ति धार्मिकाः। मनुः सम्पर्यये चैव लोकसन्तानकारणात्। तिष्ठन्तीह च धर्मार्थं तान् शिष्टान् परिचक्षते। तैः शिष्टैः स्थापितो धर्मः स्थाप्यते वै युगे युगे" मत्स्यपु० १२० अ०। प्रकृत-शासने हेयवर्जिते च।

शिष्टाचार पु० शिष्टानामाचारः। सदाचारे "ततः स्मार्त्तः स्मृतो धर्मो वर्णाश्रमविभागशः। एवं वै विविधो धर्मः शिष्टाचारः स उच्यते। त्रयी वार्त्ता दण्डनीतिः प्रजा वर्णाश्रमेच्छया। शिष्टैराचर्य्यते यस्मात् शिष्टाचारः स शाश्वतः। दानं सत्यं तपोऽलोभो विद्येज्या पूजनं दमः। सप्तैते तानि चरितानि शिष्टाचारस्य लक्षणम्। शिष्टमप्याचरन्त्येनं मनुः सम्पर्यये ये। मन्वन्तरेषु सर्वेषु शिष्टाचारस्ततः स्मृतः। स्मृतिस्मृतिभ्यां विहितो धर्म्मो वर्णाश्रमाणकः। शिष्टाचारविहस्तु धर्मः स साधुसम्मतः" मत्स्यपु० १२५अ०। "आचारश्चैव साधूनामिति" मनुना तस्य धर्मे प्रामाण्यमुक्तं स च वेदाविरुद्ध एव प्रमाणम् स्मृतिस्मृत्योर्मिश्रविषयत्वे सदाचारेण तत्र धर्म-निर्णयः। स्मृतिविरोधे श्रुतेरप्रामाण्यवत् स्मृतिविरोधे सदाचारस्य न धर्मनिर्णायकत्वम्। तेन दाक्षिण्यात्यानां मातुलकन्याविवाहस्य शिष्टैराचर्य्यमाणत्वेऽपि न प्रमा-णता। तदेतत् "विरोधे त्वनपेक्षं स्यादसति ह्यनुमानं लैमि० सूत्रेण निर्णीतम्। वसिष्ठेनापि "तद्भावे शिष्टाचारः प्रमाणम्" इत्युक्तम्। ततश्च शिष्टाचारेण मूलस्मृतिरनुमीयते यथा श्रोत्रियाद्याचारात्। ततः स्मृत्या मूलश्रुतिरनुमातव्येति अधिकरणमाला। अत-एव अविगीतशिष्टाचारपरम्पराप्राप्तं मन्वादौ मङ्गला-चरणं मङ्गलवादादौ व्यवस्थापितम्।

शिष्टि स्त्री शास-क्तिन्। १आज्ञायां २शासने अमरः। ३ताडने च "शिष्यशिष्टिरवधेन" श्रुतिः।

शिष्य त्रि० शास-क्यप्। १शिक्षणीये २छात्रे अमरः ३उप-देश्ये च। शिष्यप्रशंसादि तन्त्रसा० उक्तं यथा

"शान्तो विनीतः शुद्धात्मा श्रद्धावान् धारणे क्षमः। समर्थश्च कुलीनश्च प्राज्ञः सच्चरितो धनी। एव-मादिगुणैर्युक्तः शिष्यो भवति नान्यथा। शुश्रूषता शिष्यता यापि तयोर्वृत्तमवासतः" तथा चोक्तं सारसंग्रहे "सद्-

गुरुः स्नात्वा शिष्यं वर्षमात्रं प्रतीक्षयेत् । वर्षैकेन भवेद्योग्यो विशेषगुणसमन्वितः । वर्षद्वयेन राजन्यो वै शूद्रस्तु वत्सरैस्त्रिभिः । चतुर्भिर्वत्सरैः मूढः कथिता शिष्ययोग्यता" तत्रैव "रात्रि चामात्यजो दोषः पत्नी पापं स्वभर्त्तरि । तथा शिष्यार्जितं पापं गुरुः प्राप्नोति निश्चितम् देव्यागमे शिववाक्यं "गुरुशय्यासनं यानं पादुकोपानहं पीठम् । स्नानोदकं तथा छायां चक्रुवेश्म कदाचन । गुरोरग्रे पृथक् पूजामौद्धत्यञ्च विवर्जयेत् । दीक्षां व्याख्यां प्रभुत्वञ्च गुरोरग्रे परित्यजेत्" । अथ निषिद्धशिष्याः अगस्त्यसंहितायामुक्ता यथा "अलसा मलिनाः क्लिन्नाः दाम्भिकाः कृपणास्तथा । दरिद्रा रोगिणो रुष्टा रागिणो भोगलालसाः । अस्त्रयामत्सरग्रस्तास्तथा परुषवादिनः । अन्यायोपार्जितधनाः परदाररताश्च ये । अदम्भताश्च ये कष्टदुःखयः पिशुनाः खलाः । वह्वाशिनः क्रूरचेष्टा दुरात्मानश्च निन्दिताः । इत्येवमादयोऽन्ये पापिष्ठाः पुरुषाधमाः । एवंभूताः परित्यज्या शिष्यत्वेनोपकल्पिताः । पापिने क्रूरचेष्टाय कृपणाय तथैव च । दीनायाचारशून्याय मन्त्रद्वेषकराय च । निन्दकाय च मूर्खाय तीर्थद्वेषपराय च । भक्तिहीनाय देवेशि ! न देया मन्त्रिणश्च वै" "आचारे स्थापयेद्यस्तु स आचार्य उदाहृतः । य आचार्यपरार्थीनत्वादाचार्यं धार्य्यते हृदि । आसने स्थिरदृष्टिश्च शिष्यः सन्निरुदाहृतः । एवं लक्षणसंयुक्तं शिष्यं सर्वगुणान्वितम् । अध्यापयेद्विधानेन मन्त्ररत्नमनुत्तमम्" पद्मपु॰ उ॰ २५ अ॰ ।

शि(सि)क्त पु॰ सिच्-क्त नि॰ सस्य शो वा । (शिकारख) गन्धद्रव्यभेदे शब्दच॰ । स्वार्थे क । तत्रैव अमरः ।

शी शयने अदा॰ आत्म॰ अक॰ सेट् । शेते शेरते अशयिष्ट । ओत् वर्त्तमाने क्त शयितः । शयित्वा ।

शी स्त्री शी-भावे क्विप् । १शयने २शान्तौ च शब्दर॰ ।

शीक सेके सर्पणे च भ्वा॰ आत्म॰ सक॰ सेट् । शीकते अशीकिष्ट । अदित् चक्रे न तुस्वः ।

शीक आमर्षे सेके च वा चु॰ उभ॰ पक्षे भ्वा॰ पर॰ सक॰ सेट् । शीकयति ते शीकति अशीशिकत्-त अशीकीत् ।

शीकर न॰ शीक-करन् । १सरलद्रुवे २वायौ पु॰ मेदि॰ । ३जलकणे अमरः ।

शीघ्र न॰ शिघि-रक् पृषो॰ । १विलम्बाभावे २त्वरिते च ३तदति त्रि॰ अमरः । ४दन्तीद्रुवे स्त्री राजनि॰ ।

शीघ्रचेतन पुंस्त्री॰ शीघ्रा चेतना यस्य । १क्षुद्रे शब्दमा॰ स्त्रियां ङीष् । २द्रुतचेतनायुते त्रि॰ ५त॰ । ३कर्कटशृङ्गे पु॰ । ४अतिबलायां स्त्री राजनि॰ । [शब्दच॰ ।

शीघ्रजन्मन् पु॰ शीघ्रं जन्म यस्य । करञ्जभेदे (काँटाकरमचा)

शीघ्रपुष्प न॰ शीघ्रं पुष्पं यस्य । वकवृक्षे राजनि॰ ।

शीघ्रवेधिन् पु॰ शीघ्रं विध्यति विध-णिनि । शीघ्रलक्ष्यवेधनकर्त्तरि हेमच॰ ।

शीत न॰ शी-क्त सर्वं सम्॰ । १शीतले स्वर्गे २जले शब्दमा॰ ३हिमे च अमरः ४त्वचे राजनि॰ ५वकुलवृक्षे ६श्वेतखदिरे च पु॰ अमरः । ७अलसपर्ण्यां शब्दर॰ । ८पर्पटे ९निम्बे १०कर्पूरे राजनि॰ । ११हिमर्त्तौ च पु॰ १२शीतस्पर्शयुते त्रि॰ अमरः । १३अलसे त्रि॰ मेदि॰ । १४कथिते शब्दच॰ ।

शीतक पु॰ शीतमिव करोति कृ-ड । १दीर्घसूत्रिणि आलस्यहेतुना कार्य्याकरणाय शीतवाधामभिनीय २सुखिते मेदि॰ । शीत+स्वार्थे क । ३शीतपदार्थे ४शीतकाले मेदि॰ ५हरिद्रे शब्दमा॰ ६अलसपर्ण्यां शब्दर॰ ।

शीतकर पु॰ शीतः शीतलः करो यस्य । १चन्द्रे २कर्पूरे च शीतकिरणादयोऽप्यत्र त्रि॰ । शीत करोति कृ-अच् । ३शीतकारके ।

शीतकाल पु॰ ६त॰ । हिमर्त्तौ मार्गशीर्षमासद्वयात्मके काले

शीतकुम्भ पु॰ शीतं स्कुम्भाति स्कुभ-अच् नि॰ । १करीरे रत्नमा॰ २जलजन्तुभेदे स्त्री राजनि॰ गौरा॰ ङीष् ।

शीतकृच्छ्र पु॰ "त्र्यहं शीतं पिबेत् तोयं त्र्यहं शीतं पयः पिबेत् । त्र्यहं शीतं घृतं पीत्वा वायुभक्षपरस्त्र्यहम्" यमोक्ते व्रते ।

शीतक्षार न॰ कर्म॰ । श्वेतटङ्कणे राजनि॰ ।

शीतगन्ध न॰ शीतः शीतलः गन्धो यस्य । श्वेतचन्दने राजनि॰

शीतगु पु॰ शीता गावः किरणाः यस्य । १चन्द्रे २कर्पूरे च

शीतचम्पक पु॰ शीतश्चम्पक इव । १दर्पणे २प्रदीपे च मेदि॰

शीतपर्णी स्त्री शीतं पर्णं यस्याः ङीष् । अर्कपर्णिकायां रत्नमा॰ ।

शीतपल्लवा स्त्री शीतः पल्लवो यस्याः । भूमिजम्बां रत्नमा॰

शीतपाकिनी स्त्री शीते पाकोऽस्यस्याः इनि ङीष् । काकोल्यां शब्दच॰ ।

शीतपाकी स्त्री शीतेन पाको यस्याः ङीष् । १वाटग्रालके शब्दच॰ । २काकोल्यां राजनि॰ ।

शीतपुष्प पु॰ शीतं शीतवीर्यकरं पुष्पं यस्याः । १शिरीषवृक्षे

राजनि०। २क्षतिवल्लायां स्त्री टाप्। शैलेये न० कर्कटके पु० राजनि०।

शीतप्रभ पु० शीतस्य हिमस्येव प्रभा यस्य। कर्पूरे राजनि०

शीतप्रिय पु० ६त०। पर्पटे राजनि०। [च राजनि०।

शीतफल पु०शीतं शीतवीर्यकरं फलमस्य। १चटुम्बरे २श्वेतौ

शीतबला स्त्री शीतं बलं वीर्यं यस्याः ५ब०। महाबलभक्तायां राजनि०। [च शब्दर०।

शीतभानु पु० शीताः शीतलाभानवोऽस्य। १चन्द्रे २कर्पूरे

शीतभीरु स्त्री ५त०। १घनिकायाम् अमरः। २शीतभीते त्रि०

शीतमञ्जरी स्त्री शीतकाले मञ्जरी यस्याः न कप्। शेफालिकायां राजनि०।

शीतमयूख पु० शीता मयूखा यस्य। १चन्द्रे २कर्पूरे च मेदि०। शीतमरीच्यादयोऽप्यत्र शब्दर०।

शीतमूलक न० शीतं शीतवीर्यकरं मूलमस्य कप्। १तथीरे (तेवारमूल) राजनि०। २शीतलमूलयुते त्रि०।

शीतरश्मि पु०शीतारश्मयोऽस्य। १चन्द्रे २कर्पूरे च ज्यो०त

शीतल पु० शीतं वाति वा-क शीतमस्यस्य वच् वा। १शीतस्पर्शे २तद्वति त्रि०। ३मल्लयोद्धरि चन्दने न० ४शैलेये-५पुष्पकाशीसे च मेदि०। ६पद्मके ७मौक्तिके राजनि०। ८क्षीरशमूले न० शब्दच०। ९असनपर्ण्यां अमरः। १०चटुवारटके ११चम्पके १२राले १३चन्द्रे १४कर्पूरे पु० राजनि०। [पु० राजनि०।

शीतलक न० शीतलमिव इवार्थे कन्। १श्वेतोत्पले २मरुवके

शीतलच्छद पु० शीतलः शीतलस्पर्शवान् छदोऽस्य। १चम्पके-राजनि०। कर्म०। २शीतले पत्रे पु०।

शीतलजल न० शीतलं जलं यस्मात् ५ब०। १उत्पले राजनि०। कर्म०। २शीतले वारिणि न०।

शीतलवातक पु० शीतलोवातो यस्मात् कप्। असनपर्ण्यां शब्दच०। ततःसेवने हि वायोः शीतलता।

शीतला स्त्री १देवीभेदे "नमामि शीतलां देवीं रासभस्थां दिगम्बरीम्। मार्जनीकलशोपेतां शूर्पालङ्कृतमस्तकाम्" स्कन्दपु०। सा च विस्फोटकभेदनाशिनी। २लक्षलक्षचटुभेदे रत्नमा० तस्य ङीप्। ३क्षुद्रचिनीवृक्षे ४आरामशीतलायां ५बालुकायां स्त्री राजनि० टाप्।

शीतवल्क पु०शीतः शीतकरः वल्कोऽस्य। चटुम्बरे राजनि०

शीतवीर्य्यक पु० शीतं शीतलकरं वीर्यं यस्मात् ५ब०। कप्। १प्लक्षवृक्षे राजनि०। २शीतलवीर्यकरे त्रि०।

शीतशिव न०शीतं शीतलमपि शिवम्। १कैलासवृक्षे २शैलेयनामगन्धद्रव्ये अमरः। ३मिश्रेलायां ४यमीवृक्षे च स्त्री राजनि० ५सक्षुफलवृक्षे मेदि० ६मधुरिकायां पु०अमरः।

शीतसह पु० शीतं सहते सह-अच्। १पीलुवृक्षे शब्दच०। २नीलसिन्धुवारे ३वासन्त्यां स्त्री राजनि० टाप्।

शीता स्त्री शो-क्त सम्प्र०। १जानकीजनकतौ भरतः २रामपत्न्यां शब्दच० ३क्षतिवल्लायां ४कुटुम्बिन्यां ५दूर्वायां ६शिल्पिकावृक्षे राजनि०।

शीतांशु पु०शीताः अंशवो यस्य। १चन्द्रे २कर्पूरे च राजनि०

शीताङ्गी स्त्री शीतमङ्गमस्याः ङीप्। १हंसपदीवृक्षे राजनि० २शीतलदेहयुते त्रि० स्त्रियां ङीष्।

शीताद पु० शीतमादत्ते आ+दा-क। दन्तमूलगते रोगभेदे दन्तरोगशब्दे ३३६६ पृ० दृश्यम्।

शीतार्त्त त्रि० शीतेन आर्तः। शीतालौ जटा०।

शीतालु त्रि०शीत+अस्यर्थे आलुच्। शीतबाधायुक्ते जटा०।

शीतावला स्त्री शीतमावलयति आ+बल-णिच्-अच्। महाबलभक्तायां राजनि०।

शीताश्मन् पु० कर्म०। चन्द्रकान्तमणौ राजनि०।

शीतीभाव पु० शीत+अभूततद्भावे च्वि-भू-भावे घञ्। मोक्षे त्रिका०। तस्य तापत्रयध्वन्यत्वात्तथात्वम्।

शीतोत्तम न० शीतमुत्तमं यस्य। जले शब्दच०।

शीत्कार पु० शीदित्यस्य कारः शीत्+त-घञ्। स्त्रीणां रति काले अव्यक्ते ध्वनिभेदे जटा०। [अमरः।

शी(सी)त्य त्रि०शी(सी)तामृ अर्हति यत्। कुलजाते सेवादौ

शीधु पु०न०। शी-धुक्। इक्षुरसजाते मद्यभेदे अमरः।

शीधुगन्ध पु० शीधोरिव गन्धोऽस्य। वकुलवृक्षे त्रिका०।

शीन त्रि०शी-क्त सम्प्र० तस्य नः। १घनीभूते हतादौ २मूर्खे ३अजगरे च पु० मेदि०। [शीभते अशीभिट।

शीभ वचने भ्वा०आत्म०सक० सेट् कदित् चङि न ह्रस्वः।

शीर पुंस्त्री० शी-रक्। अजगरसर्पे शब्दच० स्त्रियां ङीष्।

शीरिन् पु० शीरस्तदाकारोऽस्त्यस्य। इरिदर्भे राजनि०।

शीर्ण त्रि० शॄ-क्त। १क्षये २शुष्कतामाप्ते च मेदि०। ३स्थौ षेयवे भावप्र०।

शीर्णपत्त्र पु० शीर्णं पत्त्रमस्य। १कर्णिकारवृक्षे शब्दच०। २निम्बे ३पट्टिकालोध्रे च राजनि० ४विशीर्णपत्त्रयुक्ते त्रि०। कर्म०। ५विशीर्णं पर्णं न०।

शीर्णपर्ण पु० शीर्णं पर्णमस्य। १निम्बे राजनि० २विशीर्णपत्त्रयुक्ते त्रि० कर्म०। ३विशीर्णं पत्त्रे न०।

शीर्णपाद पु० शीर्णः पादोऽस्य मादृग्यादृ। मन्दचरे

त्रिका० तत्कथा ज्ञायाशब्दे २८८६ पृ० दृश्या । शीर्षः-क्ति पृष्ठतयोऽप्यत्र ।

शीर्णपुष्पी स्त्री शीर्णं पुष्पमस्याः ङीप् । अवाक्पुष्प्यां शब्दच० वा कप् । शीर्णपुष्पिका तत्रैव ।

शीर्णमाला स्त्री शीर्णानां माला यत्र । १पृष्ठ्यपर्णां शब्दच० । कर्म० । २विशीर्णे माल्ये ।

शीर्णवृन्त न०शीर्णं वृन्तमस्य । (तरबुज) फलवृक्षे शब्दच० ।

शीर्वि त्रि० शृ-क्विन् न वलोपः । १अपकारके २हिंसके च त्रि०कौ० ।

शीर्ष न० शिरस्+पृषो० शीर्षादेशः शृ-क सुक्च वा । १मस्तके अमरः । २लक्षाधुरधि राजनि० । अवादौ शीर्ष्णः शीर्ष्णा इत्यादि ।

शीर्षक न० शीर्षे कायति के-क । १शिरस्त्राणे (टोपर) २शिरोऽस्थि राजनि० । ३जयपराजयपत्रत्राणदण्डभेदे "शीर्षकस्थेऽभियोक्तरि" वाच० स्मृतिः । स्वार्थे क । ४मस्तके न० । तेन कायति के-क । ५राङ्गपक्षे शब्दर०

शीर्षच्छेद्यादिक त्रि० शीर्षच्छेदमर्हति यत् ठन् वा । वध्ये "शीर्षच्छेद्यमतोऽहं त्वामृं भट्टिः ।

शीर्षण्य पु० शीर्षे भवः यत् शीर्षादेशः । १शिरस्त्राणे अमरः । शीर्षे भवः यत् । २विशदकेशे पु०अमरः ३विशदकेशयुते त्रि० ।

शीर्षरत्न न० शीर्षे रत्नति रत्न-अच् । शिरस्त्राणे हारा०।

शील समाधौ भ्वा० पर०सक० सेट् । शीलति अशीलीत् । "सरसीः परिशीलितु मया" नैषधम् । समाधिरत्र सेवा तत्र सक० प्रवृत्तिभेदो वा तत्र अक० ज्ञोत्र वर्त्तमाने च । [शीलयति ते अभिशीलत् त ।

शील अभ्यासे अतिशायने च चट० चु० उभ० सक० सेट् ।

शील न० शील-अच् । १स्वभावे २सद्वृत्ते मेदि० ३चरित्रभेदे ४अजगरसर्पे पुंस्त्री०शब्दच० स्त्रियां ङीष् । सद्वृत्तशीलत्वादर्थविधं द्वारीतोक्तं यथा "ब्रह्मण्यता१ देवपितृ-भक्तता२ सौम्यता३ अपरोपतापिता४ अनसूयता५ मृदुता६ अपारुष्यं७ मैत्रताट प्रियवादिता९ कृतज्ञता१० शरण्यता११ कारुण्यता१२ प्रशान्तेति १३लक्षणोदर्थविधं शीलम् । ६रागद्वेषपरित्यागे मनुटी० गोविन्दराजः । ५कौण्डिन्यसुनिपत्न्यां स्त्री ।

शीलन न० शील-ल्युट् । १अभ्यासे २अतिशायने ३प्रवर्त्तने च

शीलित त्रि० शील-क्त । १अभ्यस्ते २शीले च त्रिका० ।

शीलिन् पु० शील-इनिप् । अजगरसर्पे त्रि०को० ।

शुक गतौ भ्वा० पर० सक० सेट् । शोकति अशोकीत् ।

शुक न० शुक-क । १यन्त्रिपर्णे अमरः । २वस्त्रे ३वस्त्राङ्गुले ४शिरस्त्राणे हेमच० । ५व्यासशुके "पराशरकुलोत्पन्नः शुकोनाम महातपाः । व्यासादरण्यां संभूतो विधूमोऽग्निरिव ज्वलन्" वह्निपु० । (शुआ) दृति ख्याते हरितभेदे पु० स्त्री स्त्रियां ङीष् । शुकदर्शनशुभादिकं वसन्तराजशाकुने उक्तं यथा "वामः पठन् राजशुकः प्रयाणे शुभं भवेद् दक्षिणतः प्रवेशे । वनेचराः काशशुकाः प्रयाहुः क्षुत्क्षिद्दिदाः सप्तसमापतन्तः" । ७रावणमन्त्रिभेदे दशिरोवधके (मेयाकाँटा) वृक्षे रत्नमा० १०कश्यपत्न्यां ताम्रायाः कन्याभेदे स्त्री ङीष् । "काकीं श्येनीं तथा भासीं धृतराष्ट्रीं तथा शुकीम् । ताम्रा तु सुषुवे देवी पञ्चैता लोकविश्रुताः" भा०आ० ६६अ० ।

शुकच्छद न०शुकस्य छदरव छदो दलमस्य । यन्त्रिपर्णे जटा०

शुकजिह्वा स्त्री शुकस्य जिह्वेव पर्णमस्याः । (गुआठाँटी) वृक्षे रत्नमा० । [दर्वोऽत्यत्र ।

शुकतरु पु० शुकप्रियस्तरुः । शिरीषवृक्षे रत्नमा० । शुकद्रुमा-

शुकदेव पु० व्यासपुत्रे मुनिभेदे । [शुकजिह्वावृक्षे रत्नमा० ।

शुकनामन् पु० शुकः शुकजिह्वा नामास्य मध्यपदलोपः ।

शुकनाशन पु० शुकं नाशयति नश-णिच्-ल्यु । दहुरे वृक्षे राजनि० ।

शुकनास पु० शुकस्य नासेव पत्रमस्याः । अश्वोषाकवृक्षे अमरः । २शुकतुल्यनासायुक्ते त्रि० । ३कादम्बरीप्रसिद्धे तारापीड़मन्त्रिभेदे पु० । [शब्दच० ।

शुकपिण्डी पु० शुकानां प्रिया पिण्डीव । शुकशिम्बयां

शुकपुच्छ पु० शुकस्य पुच्छइव । १गन्धके हेमच० । इतच् । २शुकस्य पुच्छे पु० । [राजनि०।

शुकपुष्प पु० शुकइव हरित् पुष्पमस्य । १शिरीषवृक्षे

शुकप्रिय पु० इतच् । १शिरीषवृक्षे भावप्र० । २जम्बां स्त्री राजनि० ।

शुकफल पु०शुकस्य फलमस्य । कर्कन्धुवृक्षे राजनि० [शब्दच०

शुकवर्ह न० शुकस्येव वर्होऽस्य । गन्धद्रव्यभेदे (गाँटियाला)

शुकवल्लभ पु० इतच० । १दाड़िमवृक्षे राजनि० इतच० । तत्र २प्रिये त्रि० । [शब्दर० ।

शुकशि(सि)म्बी स्त्री शुकस्येव शि(सि)म्बी । कपिकच्छां

शुकादन पु० शुकैरद्यते खद-ल्युट् । दाड़िमे शब्दच० ।

शुकानना स्त्री शुकस्याननमिव पत्रमस्याः । (गुआठाँटी) वृक्षे रत्नमा० ।

शुक्रोदर न० शुक्रमोदरमिव । १तालीशपत्रे राजनि० । ६त० । २शुक्रस्योदरे च ।

शुक्ल न० शुच–क्त । १मांसे शब्दच० । २काञ्जिके शारा० । ३अभिभूतद्रव्यद्रव्यभेदे "कन्दमूलफलादीनि मद्येऽवयवाश्चि च । यद्द्रव्ये अभिलयन्ते तच्छुक्लमभिधीयते" "शुक्लं तोच्छोष्णवर्यं पित्तलत् कटुकं च यत् । रूक्षं कफ्युदरानाहशोथार्शोविषकृमिप्रणुत्" राजनि० "शुक्लं यन्मधुरं कालशाकाद्बलत्वमागतम्" रत्नमा० ४पदार्थे च ।

शुक्लभक्षणनिषेधो यथा "अपूपाश्च करम्भाश्च शालयटकसक्तवः । शाकं मांसमपूपं च क्षीरमेव च । यवागूः पायसश्चैव यच्चान्यत् क्षेरसम्भवम् । सर्वं पर्युषितं भक्ष्यं शुक्लञ्च परिवर्जयेत्" यमः । तत्प्रतिषेधो यथा "दधि शुक्लेषु भोक्तव्यं सर्वेषु दधिसम्भवम्" मनुः । ६निर्दोषे त्रि०मेदि० ७पूते ८रक्ते त्रि०विश्वः । ९सिते १०निर्जने शब्दच० ११चुक्रिकायां स्त्री शब्दर० ।

शुक्ति स्त्री शुच–क्तिन् । १जलजन्तुभेदे (झिनुक) राजनि० २कपालखण्डे ३शङ्खे ४मङ्गनखे ५नख्याम् ६अर्शोरोगे ७अश्मावर्त्तके मेदि० ८नेत्ररोगभेदे हेमच० । चक्षूरोगशब्दे २८४४ पृ० दृश्यम् । ९कर्णहयपरिमाणे शब्दमा० १०चतुष्कर्षमाने वैद्यकम् । [२चुक्रिकायाञ्च शब्दर० ।

शुक्तिका स्त्री शुक्तिरेव कन् । (झिनुक) १तत्तत्स्फोटे जटा०

शुक्तिज न० शुक्तौ जायते जन–ड । सुक्तायां हेमच० ।

शुक्तिमत् पु० शुक्तिरस्त्यस्य मतुप् । १कलाचलपर्वतभेदे २नदीभेदे स्त्री ङीप् ।

शुक्र न० शुच–रक् नि० कुत्वम् । १मद्यजाते २वरमधातौ अमरः । ३नेत्ररोगभेदे २८४४ पृ० दृश्यम् । ४दैत्यगुरौ ५ग्रहभेदे अमरः । ६अग्नौ ७चित्रकवृक्षे ८रक्तवर्णासे अमरः विष्कम्भादिषु योगेषु मध्ये ९चतुर्विंशे योगे च पु०ज्यो०त० । धातुभेदशुक्रोत्पत्तिसारत्वरूपादिकं भावप्र० उक्तं यथा "रसाद्रक्तं ततो मांसं मांसान्मेदः प्रजायते । मेदसोऽस्थि ततो मज्जा मज्ज्ञः शुक्रस्य सम्भवः" ।

"ततः स्थूलो भागो रसो मांसेन पुंसां शुक्रं स्त्रीणामार्त्तवं शुक्रञ्च भवति । चक्रञ्च सुश्रुते "एवं मांसेन रसः शुक्रो भवति" "स्त्रीणाञ्चेति" । चकारात् स्त्रीणामपि शुक्रं भवति । अतएवोक्तं सुश्रुते "यास्तिलोऽपि स्त्रवत्येव शुक्रं पुंसः समागमे । तत्र गर्भस्य किञ्चित्तु करोतीति न चिन्त्यते" । गर्भस्य शुक्रस्य विकृतस्य तु गर्भस्य कारणं तदपि भवति । यत उक्तम् "यदा नार्यावुपेयातां हृष्टमन्यौ कथञ्चन । सृष्टमन्यो शुक्रमन्योऽन्यमनस्कि तत्र जायते" इति । एतेन स्त्रीणां सप्तधा धातोरार्त्तवं शुक्रमेव इति बोधितम् आयुर्वाधिक्यात् । "स्त्रीणां गर्भोपयोगि यादार्त्तवं सर्वसम्मतम् । तासामपि बले वर्षे शुक्रं पुंसि करोति हि" । एवं रस एव केदारकुल्यान्यायेन सर्वान् धातून् परवत् मांसेन मयटपक्षोत्तरेण शुक्रमार्त्तवं च भवतीति सिद्धान्तः । एवं सति रसादृक्तमिति सङ्गतमेव । ततो मांसक्लतो रक्तोत्पत्तेरनन्तरं मांसं जायते रसादेवेत्यर्थः । मांसान्मेदः प्रजायत इति । मांसादनन्तरं मेदः प्रजायते रसादेवेत्यर्थः । मेदसोऽस्थि जायते रसादेवेत्यर्थः । एवं ततो मज्जा अपि रसाद् शुक्रं सन्भवतीत्यर्थः । रसः शरीरे त्रिधा सञ्चरति । तथा चोक्तम् "रसः शरीरे शब्दाचिर्जलसन्नानवत् त्रिधा । सञ्चरत्यनुरूपोऽयं नित्यमेव हि देहिनाम्" । अस्यायमभिप्रायः । दुग्धात्तीक्ष्णाग्नयो मध्यमाग्नयो मन्दाग्नयश्च भवन्ति । तत्र तीक्ष्णाग्नीनां स रसः शब्दसन्नानवत् शीघ्रं सञ्चरति । मध्यमाग्नीनामर्चिःसन्नानवन्मध्यवेगेन चरति मन्दाग्नीनां जलसन्नानवन्मन्दं चरति । तेन मासेन रसः शुक्रं भवतीति यदुक्तं तन्मध्यवेगेन चरति । मन्दाग्नीनां जलसन्नानवन्मन्दं चरति । तेन मासेन रसः शुक्रं भवतीति यदुक्तं तन्मध्यमाग्नीनधिकृत्योक्तम् । दीप्ताग्नीनान्तु रसः किञ्चिन्न्यूनेन मासेन शुक्रं भवति । मन्दाग्नेः किञ्चिदधिकेन मासेनेति सिद्धान्तः । तर्हि वाजीकरणानामोषधीनां किं प्रयोजनमित्याह "वाजीकरिणस्त्वाद्यः स्वप्रभावगुणोच्छ्रयात् । विरेचयन्ति ताः शुक्रं विरेकिद्रव्यवद्भृशम्" । वाजीकरिणयः याभिः ओषधीभिः पुरुषः शुक्राधिक्यात् स्त्रीषु वाजिवत् सामर्थ्यं प्राप्नोति ताः वाजीकरिणयः स्वप्रभावगुणोच्छ्रयात् । तत्र काश्चिदोषध्यः स्वप्रभावाधिक्यात्, काश्चित् स्वगुणाधिक्यात्, काश्चित् स्वप्रभावगुणाधिक्यात् । तत्र सङ्कल्पादेवेप्सितकान्तास्पर्शादयः स्वप्रभावाधिक्यात् शुक्रं विरेचयन्ति । इतक्षीरादयः स्वगुणाधिक्यात् । स्निग्धत्वाधिक्यात् माषादयः स्वप्रभावस्निग्धत्वादिगुणाधिक्यात् । वाजीकरणा इति बहुवचनमाद्यावांहुवर्त्तनम् । बल्यं हृद्यं क्षीरनीरसगवादयः तद्दृढ्यास्याः । विरेचयन्ति स्वप्रभावगुणाधिक्यात् क्षीरमेव रसादुत्पादनपूर्वकं शुक्रं जनयित्वा प्रवर्त्तयन्ति । यत आह "दुग्धं

ज्ञाधाच्च भङ्गारभवमज्जामज्जानि च। जनकानि निगद्यन्ते रेचनानि च रेतसः"। ननु बालानां कथं शुक्रं न दृश्यते इत्यत आह "बालानां शुक्रमस्त्येव किन्तु सौक्ष्म्यान्न दृश्यते। पुष्पाणां सुकुमारे गन्धो यथा सन्नपि नाधते। तेषां तदेव तारुण्ये पुष्टत्वाद्दृश्यमिति हि। कुसुमानां प्रफुल्लानां गन्धः प्रादुर्भवेद्यथा। रोमराज्यादयः पुंसां नारीणामपि यौवने। जायतेऽत्र च यो भेदो श्रेयो व्याख्यानतः स च"। व्याख्यानं यथा पुंसां रोमोराजीश्मश्रुवृषतयः नारीणान्तु रोमराजीस्तनकन्यार्त्तवप्रभृतयः। ननु, अक्षरसो दृढस्य धातुर्दृढिं कथं न करोतीत्याह "बाढ़के वर्द्धमानेन वायुना रसशोषणात्। न तथा धातुदृढिः स्यात्ततस्तत्रानिलं जयेत्"। अथ शुक्रस्य स्वरूपमाह "शुक्रं सौम्यं सितं स्निग्धं बलपुष्टिकरं स्मृतम्। गर्भबीजं वपुःसारो जीवस्थाश्रय उत्तमः"। जीवस्थाश्रय उत्तम इत्याह "जीवो वसति सर्वस्मिन् देहे तत्र विशेषतः। वीर्य्ये रक्ते मले यस्मिन् क्षीणे याति क्षयं क्षणात्"। अथ गर्भसञ्जननशुक्रस्य लक्षणमाह "स्फटिकाभं द्रवं स्निग्धं मधुरं मधुगन्धि च। शुक्रमिच्छन्ति केचित्तु तैलक्षौद्रनिभन्तु तत्"। अथ शुक्रस्य स्थानमाह "यथा पयसि सर्पिस्तु गूढश्चेष्टौ रसो यथा। एवं हि सकले काये शुक्रं तिष्ठति देहिनाम्"। अथ सर्पिर्दृष्टान्तो बहुशुक्रेऽल्पमथनेन सर्पिःशुक्रयोर्बोधात्। इक्षुरसदृष्टान्तस्तु स्वल्पशुक्रे पुंसि अतिपीड़नेनेक्षुरसशुक्रयोर्बोधात्। अथ शुक्रस्य चरणमार्गमाह "हृद्गुहे दक्षिणे पार्श्वे वसिद्वारस्य चाधतः। मूलस्रोतपटे शुक्रं पुरुषस्य प्रवर्त्तते"। हृद्वागभटोऽप्याह "सप्तमी शुक्रधरा हृद्गुहे दक्षिणे पार्श्वे वसिद्वारस्य चाधोमूलमार्गमाश्रिता सकलशरीरव्यापिनी शुक्रं प्रवर्त्तयतीति। सप्तमी कला। अथ शुक्रचरणकारणमाह "हृत्सङ्क्षेङ्क्षितं शुक्रं प्रसन्नमनसक्रिया। स्त्रीषु व्यायच्छतश्चापि क्षणात्तत् सम्प्रवर्त्तते"। स्त्रीसुरतरूपं व्यायामं कुर्वतः। अन्यच्च "शुक्रं कामेन कामिन्या दर्शनात् स्पर्शनादपि। शब्दसंश्रवणात् ध्यानात् संयोगाच्च प्रवर्त्तते"।

दैत्यगुरोः शुक्रनामकारणं काशीख० १७अ०उक्तं यथा "नन्दिनाऽपहृते शुक्रे निर्गिते च विषादिना" इत्युपक्रमे "तेन शब्देन महता शुक्रः गर्भोदरे स्थितः। जिह्वाग्रेणी भवन् योग्य विनिर्गतो यतोनिशम्। यस्मा दोषात् समयातायात् रुद्रदेहे विशोकवत्। ब्रह्मनारायणेन्द्राणां सादित्याप्सरसां तथा। भुवनानि विचित्राणि वृद्धस्य प्रभवाद्गुरम्। सर्वार्थाणां शतं कृत्वो भक्ष्य परितो भ्रमन्। ततः स दृष्ट्वे रन्ध्रं शुचेरन्ध्रं खलो यथा। शाम्भवेनाथ योगेन शुक्ररूपेण मार्गवः। चस्कन्द च सनासापि ततो देवेन भाषितः। जठराग्निगते शुक्रे देवोऽपि सुसदेतराम्। भूयः श्रेयो भवेदु यस्मे न स्थितो जठरे द्विजः। शुक्रवन्निःसृतो यस्मात्तस्मात्त्वं भृगुवन्दन। कर्मणानेन शुक्रोऽपि मम पुत्रोऽसि गम्यताम्"।

शुक्रपक्षरूपादि दृष्ट्व्यातत्वे पक्षयोरध्याये उक्तं दृश्यम्। तत्कृत्यादिमानं खगोलशब्दे २४२६पृ०दृश्यम्।

शुक्रकर पु०शुक्रं वीर्यं करोति कृ-अच्। मज्जधातौ हेमच० अस्त्रकरशब्दे ५५८पृ० दृश्यम्। वीर्यकारके त्रि०।

शुक्रभुज् स्त्री शुक्रं भुङ्क्ते भुज-क्विप्। मयूरजातिस्त्रियां गौरादिच०। [अस्त्रकरशब्दे तद्वत्ता दृश्या।

शुक्रभू पु०भवत्यस्मात् भू-अपादाने क्विप्। मज्जधातौ शब्दच०

शुक्रला स्त्री शुक्रं लाति ला-क। अष्टवर्षाख्ये अमरः।

शुक्रशिष्य पु० दैत्य०। दैत्ये असुरे अमरः।

शुक्रिय त्रि० शुक्रोदेवताऽस्य तस्येदम् या घ। १शुक्रसम्बन्धिनि २तद्दैवते यजुर्वेदीये "ऋचं वाचमिंत्यादिके षट्त्रिंशत्तमे २शान्त्यध्याये न०।

शुक्ल न० शुच-लक् कृत्वम्। १रजते मेदि०। २नवनीते शब्दच०। ३अक्षिरोगभेदे चक्षूरोगशब्दे २८४४पृ०दृश्यम्। ४श्वेतवर्णे ५श्वेतवर्णयुते त्रि० अमरः। ६शुद्धे च त्रि०। ७विष्कम्भादिषु योगभेदे मेदि०। ८श्वेतैरावते राजनि०। १०शुक्लपक्षे ज्यो०त०। "तत्र पक्षावुभौ मासे शुक्लकृष्णौ क्रमेण हि। चन्द्रवृद्धिकरः शुक्लः कृष्णश्चन्द्रक्षयात्मकः" षट्त्रिंशन्मतम्। शुक्लवर्णपदार्थास्तु कविकल्पलतायां कतिचित् उक्ता यथा "सुधांशुशैःश्रवाः शम्भुः कीर्त्तिर्ज्योत्स्ना शरद्घनाः। प्रासादसौधगरमन्दारदुग्धिकाहयः। कुर्वेन्दुकान्तकर्पूरकरम्भा रजतं हली। निर्मोकभस्मक्षिखीरचन्दनं करका हिमम्। हारोर्णनाभकाम्बस्थि खगैकुं भरदाभकम्। शेषाङ्घिः शर्करा दुग्धं दधि गङ्गा सुधा जलम्। सृणालसिकताहंसबककैरवचामरम्। रत्नागर्भं पुष्करीकं केतकीशङ्खनिर्झराः। बोधश्चिंह ध्वजच्छत्रं चूर्णशुक्तिकपर्दका। कक्षाकुसुमनक्षत्र-दन्तदण्डोशनोशुणाः। कैलासकासकाशांसहासवासव-

कञ्जराः । नारदः पारदः कुन्दखटिकास्फटिकादयः" ।
शुक्लकण्ठ पुंस्त्री० शुक्लः कण्ठो यस्य । दात्यूहखगे शब्द-मात्रा० । स्त्रियां ङीष् ।
शुक्लकन्द पु० शुक्लः कन्दो यस्य । १महिषकन्दे २अतिवि-षायां स्त्री राजनि० । कर्म० । श्वेते कन्दे ।
शुक्लक्षीरा स्त्री शुक्लं क्षीरं निर्यासो यस्याः । काकोल्यां राजनि० । [जटा० ।
शुक्लकर्मन् त्रि० शुक्लं शुद्धं कर्म यस्य । पवित्रे शुभचरित्रे
शुक्लकुष्ठ न० कर्म० । श्वेतकुष्ठे (धवल) । [नियोंसयुते त्रि० ।
शुक्लदुग्ध पु० शुक्लं दुग्धमस्य । १श्वेताकाटके शब्दच० २श्वेत-
शुक्लधातु पु० कर्म० । कठिन्यां (खड़ि) हेमच० २श्वेतधातौ च
शुक्लपक्ष पु० कर्म० । १शुक्लशुक्लचन्द्रकाश्रिवापञ्चदशकालके चान्द्रमासार्द्धे श्वेतपक्षे २वके पुंस्त्री० । स्त्रियां ङीष् ।
शुक्लपुष्प पु० शुक्लं पुष्पमस्य । १अकाकटके २कुन्दवृक्षे ३मरु-वके च रत्नमा० । ४श्वेतपुष्पयुते त्रि० । ५नागदन्त्यां ६शी-तकन्द्यां स्त्री रत्नमा० ङीष् । कर्म० । ७शुभ्रे पुष्पे न० ।
शुक्लपृष्ठक पु० शुक्लं पृष्ठमस्य कप् । सिन्धुकटके शब्दच० ।
शुक्लयजुस् न० कर्म० । शुक्लेत्यादि चत्वारिंशदध्यायात्मके यजुर्वेदभेदे । [२तद्वति त्रि० । ३तथाभूतवृक्षे पु०राजनि० ।
शुक्लरोहित पु० वर्णौवर्णेनेति कर्म० । १श्वेतरक्ते वर्णे
शुक्ला स्त्री शुक्लं जातिर्ला-क । श्वेतटायां रत्नमा० ।
शुक्लवायस पुंस्त्री० कर्म० । १वके त्रिका० २श्वेतकाके च । स्त्रियां ङीष् ।
शुक्लशाल पु० कर्म० । १गिरिनिम्बे राजनि० २श्वेतवर्णवृक्षे च
शुक्ला स्त्री शुक्ल+अर्श आद्यच् टाप् । १सरलायां त्रिका० । २शर्करायां शब्दच० । ३काकोल्यां ४विदार्यां ५क्षुद्रायां राजनि० । ६श्वेतवर्णवत्यां स्त्रियाच ।
शुक्लाङ्गी स्त्री शुक्लमङ्गमस्याः ङीष् । १श्वेताश्विकायां रा-जनि० । २श्वेताङ्गयुक्ते त्रि० । [स्त्रियां ङीष् ।
शुक्लापाङ्ग पुंस्त्री० शुक्लः अपाङ्गो यस्य । मयूरे हेमच० ।
शुक्लाम्ल न० कर्म० । अम्लवेतसे राजनि० ।
शुक्लार्शस् न० नेत्ररोगभेदे भावप्र० ४३२८पृ० दृश्यम् ।
शुक्लिमन् पु० शुक्लस्य भावः इमनिच् । श्वेतवर्णे ।
शुक्लोपला स्त्री कर्म० स अस्यास्याः उच् । शर्करायां रत्नमा०
शुङ्ग पु० शुच-ग तस्य नेत्वं नि० अत उत्त्वञ्च । १वटवृक्षे २व्याघातके ३शूके च मेदि० । ४पर्पटीवृक्षे ५धान्या-दिशूके च स्त्री राजनि० ।
शुङ्गाकर्शन् न० शुङ्गैः वटपल्लवैः आ समन्तात् कर्म० यत्र । गर्भमात्रसंस्कारभेदे "पुंसवने चन्द्रनामा शुङ्गाकर्मण्य शोभनः" ति०त० । [२शुङ्गवति त्रि० ।
शुङ्गिन् पु० शुङ्गोऽस्त्यस्य इनि । १वटवृक्षे २अश्वत्थवृक्षे जटा०
शुच शोके क्लेदे च दिवा० चुरा० अक० सेट् । शुच्यति ते इदित् अशुचत् अशोचीत् अशोचिष्ट इदित् शुक्षः । अव+किञ्चिदुद्देशेन पश्चात्तापे सक० । अनुशोचति ।
शुच शोके भ्वा० पर० सक० सेट् । शोचति अशोचीत् ।
शुच् स्त्री शुच-क्विप् । शोके अमरः । वा टाप् । तत्रैव ।
शुचि पु० शुच-कि । १अग्नौ २चित्रकवृक्षे ३आषाढ़मासे ४अङ्गारकरसे अमरः । ५ज्यैष्ठमासे मेदि० ६शुङ्गारकरसे ७शौचे दक्षतौ ८शुक्लमन्त्रेऽपि मेदि० । १०अग्निभेदे "पावकः पवमानश्च शुचिरग्निश्च ते त्रयः । निर्मथ्यः पवमानः स्यात् वैद्युतः पावकः स्मृतः । यस्माच्छौ तपते सूर्यः शुचिरग्निस्ततौ स्मृतः" कूर्मपु० १२अ० ११श्वेत-वर्णे १२तद्वति त्रि० अमरः । शुचित्वञ्च शौचं शुद्धता वैदिककर्माहत्वप्रयोजकः संस्कारविशेषः । "शुचिस्तत्-कालजीवी कर्म कुर्यात्" स्मृतौ शौचस्य कर्माङ्गत्वं, स च स्नानादिजन्यः पुण्यभेदो वा । १३सूर्ये च "तपनस्तापन-श्चैव शुचिः सप्ताश्ववाहनः" सूर्यस्तवः । १४अर्कवृक्षे १५काश्यपपत्न्यास्तासायाः कन्यासेदे स्त्री "घृतव्रताद्या महा-सत्त्वास्ताम्रायाः परिकीर्त्तिताः । शुकी श्येनी च भासी च सुग्रीवी शुचिरप्रिये" गरुडपु० १अ० । १६शुद्धे १७अशपक्षते त्रि० मेदि० ।
शुचिद्रुम पु० कर्म० । अम्लवृक्षे राजनि० ।
शुचिमल्लिका स्त्री कर्म० । नवमल्लिकायां राजनि० ।
शुच्य स्राने अक०अभिषवे सम्भ्रमे पीड़ने सन्धाने च सक०भ्वा० पर० सेट् इदित् निष्ठा अनिट् । शुच्यति अशुचीत् ।
शुटीर पु० शौटीर+पृषो० । वीरे त्रिका० ।
शुठ गतिविघाते भ्वा०पर०सक० सेट् । शोठति अशोठीत् ।
शुठ आलस्ये चु०उभ०सक०सेट् । शोठयति ते अशूशुठत् त ।
शुठ शोधने वा चु० उभ० पक्षे भ्वा०पर० सक० सेट् इदित् । शुण्ठयति ते शुण्ठति अशुशुण्ठत् त अशुण्ठीत् ।
शुण्ठि(ण्ठी) स्त्री शुठि-इन् वा ङीष् । (शुंठ) शुष्कार्द्रके "शुण्ठी रुच्यामवातघ्नी पाचनी कटुका लघुः । स्निग्धोष्णा मधुरा पाके कफवातविबन्धनुत् । हृद्या स्वर्या च निश्वासशूलकासहृदामयान् । हन्ति स्रोपदशोदार्श-सोवार्गं परिशोधयेत्" भावप्र० ।
शुण्ठ्य न० शुठि-यत् । शुण्ठ्याम् शब्दच० ।

शुण्ड पु० शुन-ड तस्य नेत्वम् । १मदनिर्झरे हेमच० । २गज-हस्ते पुंस्त्वे० स्त्रीत्वे टाप् । ३मद्यपानस्थले ४वेशद्वारयां ५छदायां ६जलहस्तिन्यान्तु स्त्री मेदि० । ७नद्यन्तरे विश्वः । ८कुक्कुरिण्यान्तु स्त्री शब्दमा० ।

शुण्डापान न० शुण्डा छदा पीयतेऽत्र पा-आधारे ल्युट् । १मद्यपानस्थले अमरः । २तत्० । ३मद्यपाने च ।

शुण्डार पु० शुण्डा अस्त्यर्थे र । १शौण्डिके शब्दच० २हस्तिनि च । अपकर्षे र । ३अपकृष्टशुण्डायाम् स्त्री । ङीष् । शुण्डाल हस्तिनि धनञ्जयः । [शब्दच०।

शुण्डिक् पु० शुण्डाऽस्त्यस्य इनि । १हस्तिनि २शौण्डिके

शुण्डिमूषिका स्त्री शुण्डिनी मूषिकेव । छुछुन्दर्य्यां (छुँछ) राजनि० । [(छातिशुँड़ा) इत्ये राजनि० ।

शुण्डी स्त्री शुण्डाकारोऽस्त्यस्याः अच् गौरा० ङीष् ।

शुद्ध न० शुध-क्त । १मैत्र्यवलम्बे २मरिचे च राजनि० । ३केवले ४निर्दोषे ५पवित्रे मेदि० । ६शुभ्रे च त्रि० ।

शुद्धशुद्धी शास्त्रतात्पर्य्ये संस्काररूपे यथोक्तं "शुद्धशुद्धोः संस्काररूपत्वेन एकपुरुषस्यैकदोभयस्थिति घटते । शुद्धेर्भावरूपत्वे अशुद्धेस्तदभावरूपत्वे नैतत् विरोधात् । अतएव शङ्खः "ततः प्राङ्मरणाद्यौ तु कुर्य्यादेकादशे तथा । कर्त्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः" अशुद्धौ चतुर्थाहादौ । कथमशुद्धौ प्राद्धं ? आद्धाशौचयोरधिकारिविशेषधर्मत्वादत्र कर्त्तुस्तात्कालिकी शुद्धिरिति । प्राद्धविधानात्तेषां तन्मात्रनिष्ठा शुद्धिः कल्प्यते "च पुनरशुद्धः कर्मार्हेरे" प्रा० वि० । शुद्धितत्त्वे च "एवं शुद्धेर्भावरूपत्वे अशौचस्य तदभावरूपत्वे विरोधः तथात्वे अशौचस्वरोऽपि न स्यात् । एकस्मिन् शुद्धभावरूपे अशौचे सत्यपरस्य तद्रूपस्य तदानीं तत्पुरुषीयशुद्धिरूपप्रतियोग्यन्तराभावात् अनुपपत्तेः । तस्मात् शुद्धशुद्धोर्भावरूपत्वम् ।

पद्मपु० उत्त०ख०१६अ० कतिचिदशुद्धा उक्ताः । तल्लक्षणं च शुद्धता यथा

"स्नाते स्नातेऽस्नाते जलौकोभिः क्षते तथा । अपविद्धो द्विजातीनां देहः सन्ध्यादिकर्मसु । अप्यूतत्व कल्पे नरो मूत्रपुरीषयोः । अस्पृश्यस्पर्शने चैव ब्रह्मयज्ञजपादिषु । रक्तपाते नखच्छेदनखड्गादिभिः क्षते । विप्रादेरशुचिः स्यात् शस्त्रास्त्रैः कण्टकादिभिः । भुक्ता क्षालनोच्छिष्टेऽपवित्रः क्षतमैथुने । शयने स्नाह्मणादीनां शरीरं क्षुरकर्मणि । ज्वरादिभिर्व्रतैः प्रदिरोगैश्च द्विजन्मनाम् । वसुरप्यत्र पूजादानहोमजपादिषु । धूमोद्गारे वमौ स्नाद्यपतितास्नादिभोजनैः । तथा च रेतःस्खलने सर्व्वदेहाऽपवित्रता । अपवित्रं द्विजातीनां वपुः स्नाद्यावदर्शने । सङ्क्षिप्तदानयज्ञेषु पतिते पातकादिभिः । अशौचान्तेन शुद्धिः स्यात् स्नातके स्नतकेऽपि च । सर्व्वेषामेव सर्व्वादौ तपोः सन्ध्यादिकर्मसु । स्नतकादिभिरे स्नानमनेयतेति । अशौचशब्दे द्रव्यशुद्धिशब्दे च दृश्यम् । [ङीष् ।

शुद्धजङ्घ पुंस्त्री शुद्धा जङ्घा यस्य । मर्दने त्रिका० स्त्रियां

शुद्धमांस न०२१८२ष० ऋतास्नशब्ददर्शिते पक्वमांसभेदे [शब्दच०।

शुद्धवल्ली स्त्री कर्म० । १शुद्धायां शब्दच० २पविन्नायां वतायाञ्च

शुद्धान्त पु० शुद्धः निर्दोषः अन्तः पर्य्यन्तो यस्य । १स्त्रीणां अन्तःपुरे उपचारात् तत्र स्थितायां २राजयोषिति पुंस्त्री० "शुद्धान्तसन्ध्यागमितान्तहेतु" रिति नैषधम् । शुद्धं शुद्धिः ३त० । ४अशौचान्ते ।

शुद्धापङ्क्ति स्त्री कर्म० । "शुद्धापङ्क्तिरन्यसारोपाद्यौ धर्मनिह्नवः" चन्द्रालोकोक्ते अर्थालङ्कारभेदे ।

शुद्धि स्त्री शुध-क्तिन् । १मार्जने जटा० २नैर्मल्यसम्पादने ३वैदिककर्मयोग्यत्वासम्पादकसंस्कारभेदे च । ४दर्शायां "स्मरणाच्चिन्तनाद्यापि शोध्यते येन पातकात् । तेन शुद्धि समाख्याता देवी रुद्रतनौ स्थिता" देवीशब्दतत्त्वासनिरुक्तिः

शुद्धोदनसुत पु० बोधभेदे हेमच० ।

शुध शौचे शोधने सक० निःशेषभवने अक० च दि० पर० अनिट् । शुध्यति अशुधत् । "भक्तोदरः शुध्यति यद्यशुधः स्यादिति लोका० ।

शुन गतौ ह० पर० सक० सेट् । शुनति अशोनीत् ।

शुन पु० शुन-क । कुक्कुरे । कि । तत्रैव वाचस्पतिः ।

शुनःशेफ पु० शुनइव शेफोऽस्य अनुकम्पा० । विश्वामित्रपुत्रे मुनिभेदे । [राजनि० ।

शुनक पु० शुनइव कन् । १मुनिभेदे स्वार्थे क । २कुक्कुरे

शुनकचक्षुका स्त्री शुनकस्येव चक्षुः पत्रे यस्याः कप् । क्षुद्रचक्षुःपुष्पभेदे राजनि० ।

शुनकप्रिया स्त्री शुनकस्य प्रिया । शाकभेदे राजनि० ।

शुनासीर पु० शुनाशीरं यस्य पृषो० । १इन्द्रे २वेधसे च पृषो० तस्य रूपकत्वम् द्विरूपकोषे उक्तं यथा

"शुनाशीरो हितास्यः शुनासीरो द्विदन्त्यकः । तालव्यादिर्दन्त्यमध्यः शुनासीरस्य दृश्यते" ।

शुनी स्त्री शुन+स्त्रियां ङीष् । १कुक्कुरयोषिति अमरः ।

२कक्षाख्यां लतायां राजनिघण्टुकोषः ।

शुनीर पु० शुनी+संघातें र । कुक्कुरीसमूहे त्रिका० ।

शुन्ध शुद्धौ अक० शोधने सक०चु० उभ० सेट् । शुन्धयति ते अशुशुन्धत् त ।

शुन्ध शुद्धौ अक० शुद्धीकरणे सक० भ्वा० उभ० सेट । शुन्धति ते अशुन्धीत् अशुन्धिष्ट । "आपः शुन्धन्तु मैनसः" इति मन्त्रामन्त्रः ।

शुन्ध्यु पु० शुन्ध-युच तस्य न आदेशः । वायौ उणा० ।

शुन्भ दीप्तौ अक० मर्दने सक० तु० पर० सेट् । शुम्भति अशुम्भीत् "प्राणप्राप्तनिशुम्भाम्बधनुं"रिति वो०च०

शुन्य न०शुनीनां समूहः यत् । १कुक्कुरीसंघे त्रिका०शून्य+पृषो० । २रिक्ते जटा० । [अशोभीत् ।

शुभ दीप्तौ अक० क्षिप्तौ सक०तु०तुदा० पर० सेट् । शुम्भति

शुभ दीप्तौ भ्वा०आ०अक०सेट् । शोभते लटित अशुभत शुशुभे

शुभ न०शुभ-क । १मङ्गले २शुभयुक्ते त्रि० अमरः । २पद्माक्षे राजनि० ३विष्कम्भादिषु मध्ये त्रयोविंशयोगे पु० ५खेचरपुरभेदे न० मेदि० । [शुभंयुः"इति भट्टिः ।

शुभंयु त्रि०शुभम्+अस्यर्थे युस् । शुभान्विते अमरः "क्षितिपः

शुभगन्धक न०शुभोगन्धोऽस्य कप् । १बोले राजनि० २शुभगन्धयुते त्रि० [अङ्गोधिकवृक्षे वाघण्टवृक्षायुर्वे बुधे च ।

शुभग्रह पु०शुभः शुभदायकः ग्रहः । १सौम्यग्रहे २गुरौ शुक्रे

शुभङ्कर त्रि०शुभं करोति कृ-खच् मुम् च । २मङ्गलकारके २दुर्गायां स्त्री शब्दमा० ङीप् । [२मङ्गलदातरि त्रि०]

शुभद पु० शुभं ददाति दा-क । १अश्वत्थवृक्षे राजनि० ।

शुभदन्ती स्त्री शुभा दन्ता अस्याः ङीप् । १हरिद्रायां स्त्रियां २पद्मदन्तदिग्गजयोषिति च मेदि० ।

शुभपत्री स्त्री० शुभानि पत्राण्यस्याः ङीप् । (शालपान) क्षुपे वा कप् । शुभपत्रिका तत्रार्थे राजनि० ।

शुभम् अव्य० शुभ-कर्त्तृ । मङ्गले "शुभंयुः" ।

शुभवासन पु० शुभं वासयति सुखम् वासि-ल्यु । सुखवासने द्रव्ये शब्दच० ।

शुभसूचनी स्त्री देवीभेदे (सुवचनी) "रक्ता पद्मचतुर्भुजी त्रिनयना चामीकराभद्युता पीनोत्तुङ्गकुचा दुकूलवसना हंसाधिरूढा परा । ब्रह्मानन्दमयी जपस्रगमृतं करात्राभीतिहस्ता शिवा ध्येया सा शुभसूचनी त्रिजगतामन्वापदुद्धारिणी" । सा च स्त्रीभिः पूज्या ।

शुभा स्त्री शुभ-क । १शोभायां २कान्तौ ३दीप्तायां मेदि० । ४राचनायां ५गोरोचनायां ६लक्ष्म्यां ७प्रियङ्गौ ८श्वेतदूर्वायां राजनि० । ९देवसभायां शब्दच० १०सभास्त्रो भेदे शब्दच० । [स्त्रीभेदे स्त्री शब्दमा० ।

शुभाचार त्रि०शुभ आचारोऽस्य । १शोभनाचारयुते २सभा-

शुभाञ्जन पु० शुभ-क शुभम् अञ्जनं यस्मात् ५ब० । शोभाञ्जनवृक्षे शब्दर० ।

शुभ्र न०शुभ-रक् । १अभ्रके मेदि० २रौप्ये ३कासीसे ४शुभ्रवर्णे राजनि० । ५चन्द्रे शब्दच० । ६श्वेतवर्णे पु० ७तद्वति त्रि० अमरः ।

शुभ्रकर पु० शुभ्राः करोऽस्य । १चन्द्रे २कर्पूरे च । शुभ्रकिरणशुभ्रांशुप्रभृतयोऽत्र । [ज्योषिति अमरः

शुभ्रदन्ती स्त्री शुभ्रो दन्तो यस्याः ङीप् । पद्मदन्तदिग्ग-

शुभ्रालु पु० कर्म० १महिषकन्दे राजनि० । २श्वेतालौ च ।

शुभ्रि पु० शुभ-क्रि । चतुर्थे मन्वन्तरे त्रि०को० ।

शुम्भ पु० शुन्भ-अच् । दानवभेदे । शुम्भश्च प्रह्लादपुत्रविरोचनाजगर्वेदिनः पुत्रः एकः "विरोचनश्च प्राह्लादिः पञ्च तस्यानुजाः कृताः । गवेष्ठी कालनेमिश्च जम्भो वाष्कल एव च । शुम्भश्चैव निशुम्भश्च विख्यातौ सैन्यनायकौ । गवेष्ठिनः सुता ह्येते वह्निपुत्रा अपरे च "कश्यपस्य दनुर्नाम भार्यासीत् द्विजसत्तम ! । तस्यास्तु द्वौ सुतावास्तां महाबाहुबलाधिकौ । ख्यातः शुम्भ इति ख्यातो निशुम्भश्चापरोऽसुरः" वामनपु० । देवीभाङ्गा० अपरोऽपि देव्या निहतः । तदन्योऽपि तत्रैव १२अ० "शुम्भो निशुम्भश्चैवान्यावुपतस्थेते महासुरौ । ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी" इत्युक्तः ।

शुम्भमर्दिनी स्त्री शुम्भं मृद्नाति मृद-णिनि । दुर्गायां ङीप्च० । इन-णिनि । शुम्भघातिनी शब्दच० ।

शुम्भपुरी स्त्री ङीप्त० । (शम्भलपुर) एकचक्राख्ये पुरे त्रिका० ।

शुर भारणे हिंसने च दि०आ०सक०सेट् । शूर्यते अशारिष्ट ।

शुल्क कथने, वर्जने, वर्जने च चु०उभ०सक० सेट् । शुल्कयति ते अशुशुल्कत् त ।

शुल्क पु०न० शुल्क्यते अतिसृज्यते कर्मणि घञ् । १षट्टादिदेये राजकरे मेदि० २राजग्राह्यकरभेदे अमरः । वरपक्षात् कन्यापक्षोद्यैः स्याद्धे धने ३स्त्रीधनभेदे "भगिनीशुल्कं षोटर्यांशाम्"इति स्मृतिः । सम्भोगार्थं स्त्रीभ्यः देये ५धने "अशुल्कोपहृतायास्तु पित्र्यदायोद्धरेच्च ते" इति स्मृतिः ६पण्ये च । [द्रव्यकरादानस्थाने ।

शुल्कस्थान न०ङीप्त० (घाटि) २षष्ठे भूपानां क्रयविक्रययोग्य

शुल्ब न० शुल्ल-अच् पृषो० १ताम्रे २रज्जौ च अमरटीका ।

शुल्व माने दाने च भ्वा०उभ०सक०सेट्। शुल्वयति ते अशु-शुल्वत् त। [४आचारे ५यज्ञकार्य्ये च मेदि०।

शुल्व न०शुल्व-अच्। १ताम्रे २रज्जौ च अमरः ३जलसमीपे

शुल्वारि पु० ह्रस्व०। १गन्धके हेमच० तस्य ताम्रादिजारकत्वात् तथात्वम्।

शुश्रू स्त्री मातरि "शिशोः शुश्रूषयात् शुश्रूः" भा०शा०अ०

शुश्रूषण न० शु-सन्-ल्युट्। १सेवायां शब्दच०। युच्। तत्रैव स्त्री २अवश्येच्छायाञ्च। [च।

शुश्रूषा स्त्री शु-सन्-अ। १अवश्येच्छायाम् २उपासने ३श्रवणे

शुष शोषणे दि०पर०सक०अनिट्। शुष्यति अशुषत्।

शुष पु० शुष-क। १शत्रौ २बिले च अजयपालः।

शुषि स्त्री शुष-कि। १पाषाणे २बिले च मेदि०।

शुषिर न०शुष-किरच्। १छिद्रे २वंशादिवाद्ये ३सच्छिद्रे त्रि० अमरः ४मूषिके पुंस्त्री० मेदि० स्त्रियां ङीष्। ५अग्नौ पु० विश्वः। ६चित्रकवृक्षे ७नद्यां स्त्री धरणिः। वनलोनामगन्धद्रव्ये स्त्री अमरः। [२शोषणे न०।

शुष्क त्रि०शुष+क। आतपादिना १जलशोषणे। भावे क्त। शुष्कपत्र न० शुष्कं पत्रमस्य। (नालता) १शाकभेदे। "शुष्कपत्रं पयोमिश्रं पित्तश्लेष्मज्वरापहम्। तत् शुष्कपत्रं जलदोषनाशनं विशेषतः पित्तकफज्वरापहम्। जलजन्तु तद्यपि च पित्तहारकम् सुरोचनं व्यञ्जनयोगकारकम्" राजवल्लभः। कर्म०। २शुष्के पर्णे न० शुष्कमांस न० कर्म०। आतपादिना शुष्कमांसे तद्गुणा भावप्र० उक्ता यथा "त्रिदोषजन्तु व्याजुष्टं शुष्कं शूलकरं गुरु" मांसमिश्रतुषक्षुः।

शुष्करेवती स्त्री मातृकाभेदे "अस्थिभक्षा तथा चान्त्री स्रुटा पूर्वं महालना। तथा तद्रुधिरं पीतमन्त्रकानां महालनाम्। सा चाग्निनु कथिता बोधे नामतः शुष्करेवती" वह्निपु० १६४अ०।

शुष्कास न० शुष्कं शोषणं स्रोति सा-क। १शुष्कमांसे। शुष-कसच् किच्च। २व्याधिभेदे उणादि०।

शुष्कवृक्ष पु० कर्म०। अग्रवृक्षे राजनि०।

शुष्कवैर न० शुष्कं फलशून्यं वैरम्। वृक्षेऽफलशून्ये कलहे।

शुष्कव्रण पु० कर्म०। (घँटा) किण्वरूपे व्रणे त्रिका०।

शुष्काक्षिपाक पु० नेत्ररोगभेदे तल्लक्षणं भावप्र०उक्तं यथा "यत् कुपितं दारुणरूक्षवर्त्मं सन्दह्यते चाविलदर्शनं यत्। स्तब्धं यत्प्रतिबोधने च शुष्काक्षिपाकोपहतं तदाहुः"। कुपितं सङ्कोचितं स्तब्धमिति यावत्। दारुणरूक्षवर्त्मं दारुणं विहतं रूक्षं च वर्त्म यस्य तत्। दृष्टमज्ञाविशेषेण सन्दह्यते यदाक्षि भवति। आविलदर्शनम् आविलस्य अनच्छस्य दर्शनं येन तत्। तत्प्रतिबोधने उद्घाटने, स्तब्धत्वम् अतिशयेन विहतम्।

शुष्काङ्ग पु० शुष्कमङ्गमस्य। १धववृक्षे (धमाछ) २शुष्कावयवयुते त्रि०स्त्रियां ङीष्। सा च ३गोधिकायां शब्दच०

शुष्काद्रुक न० शुष्कमार्द्रकम्। शुण्ठ्यां (शुंठ) शब्दच०।

शुष्म न० शुष-मन् किच्च। १तेजसि मेदि० २पराक्रमे हेमच०। ३स्वर्भे पु० मेदि० ४अग्नौ त्रिका० ५चित्रकवृक्षे ६वायौ ७पक्षिणि संक्षिप्तसा० दर्व्यर्चिषि च पु० भरतः।

शुष्मन् न०शुष-डुमसिन्। १तेजसि जटा०। २शौर्य्ये हेमच० ३अग्नौ ४चित्रकवृक्षे च पु० अमरः।

शूक पु० न० शू-कक् सम्प्र०। (शुकुा) १तीक्ष्णाग्रे अमरः। २शिखायां ३दंशायां मेदि० ४सविषजलजमलोद्भवे जन्तुभेदे भावप्र० तद्रोगाधिकारेण तज्जातरोगाश्च दर्शिता यथा "अथ शूकदोषाधिकारः। तत्र शूकदोषञ्च निदानमाह "अक्रमाच्चैकसो दष्टं योऽभिवाञ्छति मूढधीः। व्याधयस्तस्य जायन्ते दश घोरा न शूकजाः"। अक्रमात् अनुचितदष्टिक्रमात्। अनुचिता च दष्टिः भूरिविकारजनकत्व योगेन शूकजाः शूकोजलशूकः सविषो जलजन्तुविशेषः स च जलमलोद्भवः जलकुक्कुभ इत्यादिकः। तथा शूकप्रधानो लिङ्गदष्टिकरो वातश्लेष्मजनाद्युक्तो रोगः शूक उच्यते"। शूकदोषा दश घोरा न भवन्ति। तेषादौ सर्षपिकामाह "सौरसर्षपसंस्थाना शूकदुर्भगहेतुका। पिडका श्लेष्मवाताभ्यां ज्ञेया सर्षपिका इह सा। शूकदुर्भगहेतुका शूकदुष्टयोनिनिमित्ता च। अथाष्टीलिकामाह "कठिना विषमैर्भुग्नैर्वायुनाष्टीलिका भवेत्"। अष्टीला लौहकारस्य भाण्डविशेषः (निहार) इति लोके। तथा कठिनेत्यष्टीलिका विषमैर्भुग्नैरिति वक्रकाण्डशूकविशेषणम्। विषमैर्दुःस्पर्शैः। भुग्नैः वक्रैः। अथितमाह "शूकैर्यत् पूरितं शक्तदूषितं नाम तद्भवेत्"। यद्विद्धं यदा शूकैः पूरितं तदूषितत्वादूषितम्। कुम्भिकामाह "कुम्भिका रक्तपित्तात् स्याच्छ्याववाम्बुनिभा सिता" कुम्भिका कुम्भीफलतुल्यत्वात्। अलजीमाह "अलजी श्यावतो यादक्प्रमेहपिडका तथा। सा च रक्ताऽसिता स्फोटाचिता च कथिता बुधैः"। एषा रक्तपित्तनिमित्ता ज्ञेया। स्फुटितमाह "स्फुटितं पीडितं अत्यु संरब्धं वातकोपतः।

शूकदोषे जाते पीड़ितं सद्यत् संरब्धम् सशोथं भवति तच्छिङ्गं स्फोटितमुच्यते। संमूढपिड़कामाह "पाणिभ्यां मुखसंमूढे समूढपिडका भवेत्"। शूकदोषे जाते पाणिभ्यां मुखसंमूढे पिडिते सिङ्गे"। अत्रापि वातकोपत इत्यनुवर्त्तते। अथावमन्थमाह "दीर्घा बहुत्व पिडका दीर्घमूले मध्यतस्तु याः। सोऽवमन्थः स कष्टास्तृग्भ्यां वेदना रोमहर्षकृत्"। दीर्घा दीर्घाङ्कुराः। पुष्करिकामाह "पिड़का पिडकाव्याप्ता पित्तशोणितसम्भवा। पद्मकर्णिकसंस्थानाः पद्मेव पुष्करिकेति सा"। पिडकाव्याप्ता पार्श्वतः क्षुद्रपिडकाव्याप्ता। अतएव पद्मकर्णिकसंस्थाना। सर्षपानिमाह "सर्षपानिव्। लक्षयेच्छोणितं शूकदूषितम्" अत्र सर्षपसदृशमेव लक्षणम्। उत्तमामाह "सूक्ष्माधोपमा रक्ता रक्तपित्तोद्भवा च या। एषोत्तमाख्या पिडका॥ शूकाजोषसमुद्भवा"। अतपोनकमाह "क्षिद्रैरणुमुखैर्लिङ्गं चिरं यस्य समन्ततः। वातशोणितजो व्याधिः विज्ञेयः शतपोनकः॥२"। शतपोनकवालतुल्यत्वाच्छतपोनकः। त्वक्पाकमाह "वातपित्तकृतो घोरस्त्वक्पाको॥२ ज्वरदाहकृत्"। शोणितार्बुदमाह "कृष्णैः स्फोटैः सरक्ताभिः पिडकाभिर्निपीडितम्। सिङ्गं वासुरुजाचोपा शोणितार्बुदम्॥३"। वासुरुजः स्फोटपिड़काधिष्ठानवेदनाः। अथ मांसार्बुदमाह "मांसदुष्टं विजानीयादर्बुदं मांससम्भवम्॥१"। मांसपाकमाह "शीर्यन्ते यस्य मांसानि यस्य सर्वाश्च वेदनाः। विद्यात्तं मांसपाकन्तु॥६ सर्वदोषकृतं भिषक्"। शीर्यन्ते गलन्ति। सर्वाश्च वेदनाः वातपित्तकफजाः। अथ विद्रधिमाह "विद्रधिः॥७ सन्निपातेन यथोक्तमभिनिर्दिशेत्"। यथोक्तं सान्निपातिकं विद्रधितुल्यं कथयेत्। तिलकालकानाह "कृष्णानि चित्राण्यथ वा शुक्लानि सविषाणि तु। पतन्ति पातयन्त्राशु भेदं निरवशेषतः। कालानि मूत्वा मांसानि शीर्यन्ते यस्य देहिनः। सन्निपातसमत्वाच्च तान् विद्यात्तिलकालकान्॥८"। चित्राणि नानावर्णानि। शुक्लानि शुक्लवर्णानि मक्षाः क्षोणनीति वत्। सविषाणि सविषशूकाख्यजन्तुविशेषकृतत्वात्। शीर्यन्ते गलन्ति। कृष्णातिलतुल्यत्वात्तिलकालकाः। अथामाध्यमाह "तत्र मांसार्बुदं यत्र मांसपाकश्च यः कृतः। विद्रधिश्च न विध्यन्ति ये च सुस्तिलकालकाः"। [२रो च भेदः।

शूकक पु॰ शूकैः अलङ्कृतो भेदे कायति कै-क। १प्राप्तशूके

शूककीट पु॰ शूकाकाररोमयुक्तः कीटः मा॰त॰ (युयापोका) कीटभेदे अमरः। स हि शूकाकारोमवान्।

शूकधान्य न॰ शूकयुक्तं धान्यम् मयू॰। यवादौ धान्ये अमरः। "ब्रीह्यादिकं यदिह शूकसमन्वितं स्यात् तत् शूकधान्यमथ सूक्ष्मकुलत्थकादि। शिम्बीनिगूढमिति तत् प्रवदन्ति शिम्बीधान्यं तथोद्भवमधो तृणधान्यमन्यत्। तत्र विशेषमनं लघु शूकधान्यं तेजोबलातिशयवीर्य्यं विदाह्यादि। देशे देशे शूकधान्येषु संख्या ज्ञात्वा यथा गो नरैर्दैवतवैद्यो" राजनि०। "शूकधान्यं शमीधान्यं समातीतं प्रचक्षते। परतो वातलद्रव्यं प्रायेणामिनवं गुरु" राजवल्लभः। [शब्दच०।

शूकपिण्डी स्त्री शूकस्य पिण्डीव। शूकशिम्ब्यां

शूकर पुंस्त्री॰ शू दलञ्चलं शब्दं करोति क-अच् शूक+अस्यर्थे र वा। वराहमख्याते पशौ अमरः स्त्रियां ङीष्।

शूकरकन्द पु॰ शूकर इव रामठः कन्दोऽस्य। वाराहीकन्दे राजनि०।

शूकदंष्ट्रक पु॰ शूदभवे क्षुद्ररोगभेदे "सदाहो रक्तपर्य्यन्तस्त्वक्पाकी तीव्रवेदनः। कण्डूमान् ज्वरकारी च स ज्ञेयः शूकदंष्ट्रकः" भावप्र॰ तल्लक्षणञ्च।

शूकरपादिका स्त्री शूकरस्येव पादाः मूलान्यस्याः कप् अत इत्त्वम्। कोलशिम्ब्यां राजनि०।

शूकराक्रान्ता स्त्री शूकरेणाक्रम्यते स्म या+क्रम-क्त टाप्। वराहक्रान्तायां शब्दच०।

शूकरी स्त्री शूकर आकारसाम्येनास्त्यस्याः अच् गौरा॰ ङीष्। १वराहक्रान्तायां शब्दच०। शूकर+जातौ ङीष्। २तज्जातिस्त्रियाञ्च। [द्वयो त्रि०।

शूकरेष्ट पु॰ इष्ट॰। १कसेरुनामकन्दे राजनि०। २वराहप्रिय-

शूकवती स्त्री शूकशीक्ष्णसस्यप्रशस्ता मतुप् मस्य वः ङीष्। १कपिकच्छ्वां शब्दच०। २शूकयुते त्रि० स्त्रियां ङीष्।

शूकशिम्बा स्त्री शूकयुक्ता शिम्बा शाक०। कपिकच्छ्वां शब्दच०।

शूकशिम्बि(म्बी) पु॰ शूकयुक्ता शिम्बिः शाक० वा ङीष्। कपिकच्छ्वां शब्दच०।

शूका स्त्री शूकोऽस्त्रयाः अच्। कपिकच्छ्वां शब्दच०।

शूकापुष्ट पु॰ शूकमधिभेदे धारा०। [शब्दर०।

शूतिपर्ण पु॰ शि-क्विप् शूति स्फीतं पर्णं यस्य। वारणवृक्षे

शूद्र पुंस्त्री॰ शुच-रक् पृषो॰ चस्य दः दीर्घश्च। १चतुर्थे वर्णे स्त्रियां टाप्। शूद्रा शूद्रजातिस्त्रियाम्। पुंयोगे ङीष्। शूद्री शूद्रभार्य्यायाम्। शुचा द्रवति द्रु-ड पृषो॰। २शोकहेतुकगतियुक्ते शूद्रादिकरणशब्दे दृश्यम्।

अथ शूद्रधर्मादि "विप्राद्यासनं नित्यं शूद्रधर्मो विधीयते। तद्देशो तद्वनव्याप्तो शूद्रचाण्डालतां व्रजेत्। दष्ट्वः कोटिसहस्राणि शतजन्मानि शूकरः। श्वापदः शतजन्मानि शूद्रो विप्रधनापहृत्। यः शूद्रो ब्राह्मणो-मासो मातृगामी स पातकी। कुम्भीपाके पच्यते स यावद्वै ब्रह्मणः शतम्। कुम्भीपाके सप्ततैले दग्धः सर्पैर-हर्निशम्। शब्दञ्च विकृताकारं कुरुते यमताडनात्। ततश्चाण्डालयोनिः स्यात् सप्तजन्मसु पातकी। सप्त जन्मसु सर्पश्च जलौकाः सप्तजन्मसु। जन्मकोटिसहस्रञ्च विष्ठायां जायते कृमिः। योनिक्रिमिः पुंश्चलीनां स भवेत् सप्तजन्मसु। गवां ब्रध्नकृमिः स्याच्च पातकी सप्तजन्मसु। योनौ योनौ भ्रमत्येवं न पुनर्जायते नरः" ब्रह्मवै० पु० ८२अ०। "द्विजानां पादशुश्रूषा शूद्रैः कार्या सदा त्विह। पादप्रक्षालनं मन्त्रैर्भोज्यसुच्छिष्टमात्मकम्। ते तु चक्रुस्तदा चैव तेभ्यो भूयः पितामहः। शुश्रूषार्थं मया यूयं सृष्टास्तु पदे क्षणात्। द्विजानां चात्म-वर्णीयां वैश्यानान्तु भवद्विधाः। विप्रैः शुश्रूषया कार्या दत्त्वाद्योच्छिष्टकं सदा" पद्मे ६ख० ६२अ०। "शुश्रूषैव हि-जातीनां शूद्राणां धर्मसाधनम्। कारुकर्म तथाऽऽजीवः प्राकृतस्योऽपि धर्मतः" मार्कण्डे ३८अ०। "तथा मद्यस्य पानेन ब्राह्मणोगमनेन च। वेदाक्षरविचारेण शूद्रयो-यत्वं व्रजेत्" इति शूद्रकल्पकारधृतपराशरवाक्यम्। ब्राह्मणस्य तदन्नभोजननिषेधो यथा "शूद्रान्नं ब्राह्मणो-ऽश्नन् वै मासं वासार्द्धमेव वा। तदुयोनावभिजायेत तत्समेतहिदुर्बुधाः। अयोदरस्थशूद्रान्नो मृतः श्वा चैव जायते। दादश दश चाष्टौ च षट्त्रिंशूकरयुक्कारः। उदरस्थितशूद्रान्नो ब्राह्मणोऽपि नित्यशः। जुह्वन् वापि जपन् वापि नरिमूर्द्धो न विन्दति। भक्षते ब्रा-ह्मणस्यान्नं क्षत्रियान्नं पयः क्षतम्। वैश्यस्य चान्नमे-वान्नं शूद्रान्नं रुधिरं क्षतम्। तस्मात् शूद्रं न निषेवे-वेन्नार्थं सद्द्विजातयः। प्रज्वलानमिव यज्ञेऽग्निं परिवर्जयेत्। कथामपि तथा भिक्षां कुर्याच्छूद्रात्विकर्मितः। शब्दशूद्रां भटे कुर्वन् तत्क्षणेन न लिप्यते। विप्रवाग्वयजातो निहतो मद्यभांडतः। द्विजसेवी भवेच्छूद्रः शूद्र एव परिकीर्त्तितः" ब्रह्मवैवरामरः। शूद्रकल्पविचारधृतत्वे मत्स्यपुराणम्

"एवं शूद्रोऽपि सामान्यं द्विजाद्यान्तु सर्वदा। नमस्का-रेण मन्त्रेण कुर्याद्दामात्मबन्धुषु। दासप्रेषणः शूद्रः स्वादिज्याश्च भगवान् प्रभुः। दानेन सर्वकामाप्तिरस्य संजायते यतः"। ततो दानमेवामेक्षित न तु भोजन-मपि। सामान्यं सर्वजनकर्त्तव्यत्वेन प्रातिस्वतन्त्र्यप्रत्याह-दिविक्षितश्राद्धम् आभ्युदयिकश्राद्धञ्च एवं द्विजातिवत् शूद्रोऽपि कुर्यादित्यन्वयः। नमस्कारेण मन्त्रेण न तु पाठतमन्त्रेण। आमश्राद्धवदित्यनेन जलसेकमिश्राक्षव्याद्धतिः "स्निग्धमन्नमुदाहृतम्" इति वक्ष्यमाणेन स्निग्धस्यैवान्नस्याभिधानात् कन्दुपक्वस्य घटत्वं न तु स्निग्धत्वं द्वारीतेन स्वेदनभर्जनयोः पृथक्करणात् यथा "दादीपनतापनस्वे-दनभर्जनपचनादिभिः पञ्चधेति"। अस्यार्थः दादीपनं काष्ठानां, तापनं लोहादेः, स्वेदनं धान्यादेर्भर्जनं यवादेः, पचनं तण्डुलादेः इति पञ्चमी कल्पना इति कल्पतरुः। अतएव स्निग्धान्नेन श्राद्धमुक्तम्। "कन्दुपक्वानि तैलेन पायसं दधिसक्तवः। द्विजैरन्नानि भोक्तव्यानि शूद्रेरुद्धृतान्यपि" इति कूर्मपुराणवचने शूद्रकर्तृकं कन्दुपक्वा-देर्ब्राह्मणभक्षत्वेन श्राद्धे देयत्वमुक्तम्। कन्दुपक्वं ज-लाद्यसेकं विना केवलपाकेन यदाज्येन पक्वम्। पायसं पाकेन काठिन्यविकारापन्नं दुग्धं परमान्नपरत्वे पुंलि-ङ्गनिर्देशानुपपत्तेः तथा चामरः "परमान्नन्तु पायसः" इति। "दिनैकवोदये प्राप्ते पाकेन भोजयेद्द्विजान्। अयं विधिः प्रयोक्तव्यः शूद्राणां मन्त्रवर्जितः" इति श्राद्धचिन्तामणिधृतवराहपुराणवचनमपि कन्दुपक्वपरम् एवन्तु एतद्वचनं सच्छूद्रपरं भोग्यभोक्तृ ज्ञेयम्। एवम् श्यामसंस्कारेऽपि श्राद्धे देयत्वं श्यामशब्दात्तत्वेऽनुमन्त्रे-यम्। तत्र दुष्टदेवतायकाग्रार्थं ब्राह्मणेन मन्त्राः पाठ्याः "अयमेव विधिः प्रोक्तः शूद्राणां मन्त्रवर्जितः। अम-न्त्रञ्च तु शूद्रस्य विप्राभन्त्रेण भक्षते" इति वराहपुरा-णात् अयं श्राद्धेतिकर्त्तव्यताकविधिः शूद्रकर्त्तृकमन्त्र-पाठरहितः शूद्रस्य मन्त्रपाठेनधिकारराहित्यो यदमन्त्र-केति पुनर्वचनं तत्स्त्रियाप्रकृष्यर्थं परिभाषार्थञ्च ततश्च तत्कर्मकस्वन्त्रिमन्त्रेण विप्रवदौपासनकारयितृब्राह्मणो भक्षते तेन ब्राह्मणेन तत्र मन्त्रः पठनीय इति तात्पर्यं तत्र यजुर्वेदीया मन्त्राः तथा च स्मृतिः "आर्षक्रमेण च सर्वत्र शूद्रो यजनमेयिनः। तस्माच्छूद्रः स्वयं कर्म यजु-र्वेदेन कारयेत्"। आर्षक्रमेण शुक्लयजुर्मन्त्रेण यजुर्वेदि-मन्त्रनिष्टशब्दादिना "चतुर्णामपि वर्णानां यानि प्रो-क्तानि वेधसा। धर्मयुक्तानि राजेन्द्र! शृणु तानि नरोत्तम!। विप्रेभ्यस्तु शूद्राणां दानानि मनीषिभिः।

अष्टादश पुराणानि चरितं राघवस्य च। रामस्य कृष्णस्यापि धर्मकामार्थसिद्धये। तथोक्तं भारतं वीर! पाराशर्येण धीमता। वेदार्थं सकलं योज्य धर्मशास्त्राणि च प्रभो!" इति भविष्यपुराणवचनान्नेषां पौराणिकादिविधिः। योज्य योजयित्वा। अत्र च "आद्ये वेदमन्त्रवर्जं शूद्रस्य इति वचने वेदेष्वुपादानात् श्राद्धे पुराणमन्त्रः शूद्रेण पठनीय इति मैथिलोक्तं तत्र वराहपुराणे शूद्राणां मन्त्रवर्जित रत्नेन मन्त्रमात्रनिषेधात् मत्स्यपुराणे नमस्कारेण मन्त्रेण रत्नोपादानाच्च पौराणिकस्यापि श्राद्धे निषेधः प्रतीयते। एवं स्नानेऽपि "ब्रह्मक्षत्रविशामेव मन्त्रवत् स्नानमिष्यते। तूष्णीमेव हि शूद्रस्य नमस्कारेण मन्त्रतः" रत्नेन नमस्कारविधानात् पञ्चयज्ञेऽपि। "शूद्रस्य द्विजशुश्रूषा तया जीवनवान् भवेत्। शिल्पैर्वा विविधैर्जीवेत् द्विजातिहितमाचरन्। भार्यारतिः शुचिर्भृत्यभरणे श्राद्धकृद्वारतः। नमस्कारेण मन्त्रेण पञ्चयज्ञान् न हापयेत्" इति नमस्कारमात्रविधानात् श्राद्धादिषु पौराणिकमन्त्रनिषेधः। ततश्च स्नानश्राद्धतर्पणपञ्चयज्ञेतरत्र शूद्रस्य पौराणिकमन्त्रवाहु प्रतीयते। अत्र "अष्टेऽब्दे ब्राह्मणं सर्वि यजेत मन्त्रं कुले" इति मनुवचनात् "चूडा कार्या यथाकुलम्" इति याज्ञवल्क्यवचनाच्च संस्कारमात्रे कुलधर्मौचित्येन कालान्तरस्य मासविशेषोद्धारस्यानभिधानाच्च शूद्रादीनां नामकरणे चतुर्थोत्थानिकषष्ठतियुक्तनामकरणस्य च प्रतीतेर्वैदिकलौकिकेषु शूद्राणां षष्ठतियुक्तानामाभिधानं क्रियते इति। शूद्रस्नानमने दैवतीर्थेन ओष्ठौ जलं सकृत्पिबेत् न पिबेत् तथा च याज्ञवल्क्यः "शूद्रवद्व्रतानुग्राह्यस्तु यथाक्रमं द्विजातयः। शुक्लेरन् स्त्री च शूद्रश्च सकृत् सृष्टाभिरद्भिः" इति। अन्ततो मूर्धादिशब्दौषेण ओष्ठेन उत्तरोत्तरमपकर्षात् सकृत्पदस्य मूर्धाभिरिक्तुं न तु भक्षितताभिरिति "स्त्रीशूद्रः शुध्यते नित्यं याज्ञवल्क्यवचनाच्च मरीचयोः" इति ब्रह्मपुराणवचनाच्च। याज्ञवल्क्यः "ग्राम्या ग्राम्येण तीर्थेन द्विजो नित्यमुपस्पृशेत्" अत्र द्विजस्याचमने ग्राम्यतीर्थोपादानात् स्त्रीशूद्रयोर्न तेनाचमनम् एतेन मिताक्षरायां याज्ञवल्क्यं मरीचिना "स्त्रियाश्चैवमिदं तीर्थं शूद्रजातेस्तथैव च। ब्रह्मादीनामनाद्यन्तं विरेतसां च योनयः" इति। एतद्वचनस्य इन्द्रियादिस्खलनस्तु ब्राह्मणवदेव प्रमाणान्तरस्तु याज्ञवल्क्यविज्ञानेश्वरादिभिरङ्गीकृतत्वयोरनुसन्धेयम् आन्तं रघु०।

शूद्रकर्मन् न० शूद्रस्य शास्त्रविहितं कर्म। शूद्रवर्त्तव्ये द्विजसेवादौ शूद्रशब्दादोऽत्र।

शूद्रप्रिय पु० ६त०। पलाण्डौ राजनि०।

शूद्राधिकरण शूद्रस्य विद्यायामधिकारोऽस्ति नवेति सन्देहे नाधिकार इति निर्णायके शारीरकसूत्रोक्ते अधिकरणभेदे तच्चाधिकरणं तत्र दर्शितं यथा

"शुगस्य तदनादरश्रवणात्तदाद्रवणात् सूच्यते हि" सू० "यथा मनुष्याधिकारनियमसमयोद्य देवादीनामपि विद्याखधिकार उक्तस्तथैव द्विजात्यधिकारनियमसमयादेव शूद्रस्याप्यधिकारः स्यादित्येतावाशङ्क्य निवर्त्तयितुमिदमधिकरणमारभ्यते। तत्र शूद्रस्याप्यधिकारः स्यादिति तावत् प्राप्तम्, अर्थित्वसामर्थ्याभ्यां समत्वात्, "तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः" इतिवत् शूद्रो विद्यायामनवक्लृप्त इति निषेधाश्रवणात्। यच्च कर्मणि अधिकारकारणं शूद्रस्यानित्यं न तद्विद्याखधिकारस्यापादकम्। न श्रावणत्वमीयादिरहितेन विद्या वेदितुं न शक्यते। भवति च शिक्षं शूद्राधिकारस्योपोद्बोलकं, संवर्गविद्यायां हि जानश्रुतिं पौत्रायणं शुश्रूषुं शूद्रशब्देन परामृशति "अह हारे त्वा शूद्र! तवैव सह गोभिरस्तु" इति। विदूरभूतस्य शूद्रयोनिप्रभवा अपि विशिष्टविद्यासम्बन्धाः श्रूयन्ते, तस्मादधिक्रियते शूद्रो विद्याक्रियेषु प्राप्ते ब्रूमः। न शूद्रस्याधिकारो वेदाध्ययनाभावात्। अधीतवेदा हि विदितवेदार्थाः वेदार्थेष्वधिक्रियन्ते, न च शूद्रस्य वेदाध्ययनमस्ति, उपनयनपूर्वकत्वाद्वेदाध्ययनस्य उपनयनस्य च वर्णत्रयविषयत्वात्। अस्त्वर्थित्वं न तदस्ति सामर्थ्यं त्वधिकारकारणं भवति। सामर्थ्यमपि न लौकिकं लेखनमधिकारकारणं भवति श्रावणीयेऽर्थे श्रावणीयस्य सामर्थ्यस्यापेक्षितत्वात् श्रावणीयस्य च सामर्थ्यस्याध्ययनविरोधेन निराकृतत्वात्। यच्चेदं शूद्रो यज्ञेऽनवक्लृप्त इति तत् न्यायमूलत्वाद्विद्यायामध्यनवक्लृप्तत्वं द्योतयति न्यायस्य साधारणत्वात्। यत् पुनः संवर्गविद्यायां शूद्रशब्दश्रवणं शिक्षं मन्यसे न तद्विद्धम्, न्यायाभावात्। न्यायोक्ते हि शिक्षदर्शने द्योतके भवति, न चात्र न्यायोऽस्ति कामश्चायं शूद्रशब्दः संवर्गविद्यायामेवैकस्यां शूद्रमधिकृत्यात्, तद्विषयत्वात् न सर्वासु विद्यासु, अर्थवादश्रवणात् न तु क्वचिदप्ययं शूद्रमधिकर्तुं समर्थयते। श्रूयते चायं शूद्रशब्दोऽधिक्षतविषये योजयितुम्। कथमित्युच्यते। "क्वेर एनमेतत् सन्तं

स्वयुग्वानमिव रैक्कमात्वेति कक्षाङ्गवाक्यादाक्षनोऽनादरं श्रुतवतो जानश्रुतेः पौत्रायणस्य शुश्रुवांसं तार्क्ष्यो रैक्क शूद्रशब्देनानेन क्षत्त्वाम्बुवाक्षनः परोक्षज्ञानस्य स्वापनायेति गम्यते, जातिशूद्रस्यानधिकारात् । कथं पुनः शूद्रशब्देन शुश्रुत्या क्षत्त्यते इति, उच्यते, तदा द्रव्याच्छुचमभिदुद्राव शुचा वाभिदुद्रुवे शुचा वा रैक्कमभिदुद्रावेति शूद्रावयवार्थसम्भवात् रूढ्यर्थस्य चासम्भवात् । इदमत्र चायमर्थोऽस्माभिराधिकरणाधिकरणावाम्" ।

शूद्रार्त्ता स्त्री शूद्रेणार्त्ता पीड़िता । प्रियव्रतौ शब्दच० ।

शूद्रावेदिन् स्त्री शूद्रां विन्दति विद्–णिनि उप० । शूद्रजातिस्त्रिया विवाहकर्त्तरि । "शूद्रावेदी पतत्यत्रेः" मनुः "कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशोऽवराः । शूद्रैव भार्य्या शूद्रस्य सा च स्वा च विशः स्मृते । ते च स्वा चैव राज्ञश्च ताश्च स्वा चाग्रजन्मनः" इति मनुना कामतस्तत्र वैश्यस्य विवाहे विहितेऽपि शूद्रावेदीत्यस्याधिकदोषार्थता द्विजातिस्त्रीत्वाभे शूद्रस्त्रीविवाहनिषेधार्थता च । स च विवाहः युगान्तरविषयः कलौ अस्वयंस्त्रीविवाहनिषेधात् कलिशब्दे १८०२ पृ० दृश्यम् ।

शूद्रान्न न०तृत० । शूद्रस्वामिकान्ने तस्य द्विजैरभक्ष्यत्वं यथा हारीतः "शूद्रान्नेन तु भुक्तेन चतुरस्येन यो मृतः । स वै खरत्वसूकरत्वं शूद्रत्वञ्चाधिगच्छति" मन० धृत वाक्यं शूद्रान्नं शूद्रस्वामिकान्नं रघु० । "स्वामं शूद्रस्य पक्वान्नं पक्वसंसृष्टमुच्यते" इति तत्पक्वान्नस्य सर्व्वथा निषेधात्तत्र किञ्चित्त्वमेव शूद्रस्वामिकान्नं गृह्यते । तद्दत्तमपि भोजनकाले तद्गृहावस्थितं तदपि शूद्रान्नं तदाङ्गिराः "शूद्रवेश्मनि विप्रेण क्षीरं वा यदि वा दधि । निवृत्तेन न भोक्तव्यं शूद्रान्नं तदपि स्मृतम्" तेन शूद्रवेश्मस्थितक्षीरदध्यादिभक्षणमपि शूद्रान्नं पारिभाषिकमिति बोध्यम् । निवृत्तेन शूद्रान्नानिवृत्तेन । तदपीति अपिशब्दात् साक्षाद्दत्तदत्तखण्डादि न तु तद्गृहपक्वेक्षादिना क्रीतमपि । गृहागते शूद्रान्ने अङ्गिराः "यथा यतस्ततो वापः शुद्धिं यान्ति नदीं गताः । शूद्रादिगृहेष्वन्नं प्रविशन्तु सदा शुचि" प्रविशं स्वस्वापादकप्रतिग्रहादिनेति शेषः । अतएव पराशरः "नाश्नन्ति शूद्रान्नं यावत्तु स्मृणति द्विजः । द्विजातिकरसंसृष्टं सर्वं तद्विद्यते" । स्मृणति प्रतिगृह्णातीति कल्पतरुः । तत्र संप्रोक्ष्य यान्नमित्याह विष्णुः "संप्रोक्ष्य प्रतिगृह्णीयाच्छूद्रान्नं गृहमागतम्" तत्र पातालान्तरे याज्ञवल्क्याङ्गिराः "श्राद्धान्ने यत्तु विन्यस्तं शूद्रो यच्छति नित्यशः । पातालान्तरगतं यान्ति दुग्धं श्वगृहमागतम् । एतेन श्राद्धागतस्यैव शूद्रत्वं प्रतीयते ततश्चैतादृगपि सुभुक्षुणा शूद्रान्नं सर्व्वथा न भोक्तव्यम् प्रागुक्तहारीतवचने तन्निन्दाश्रवणात्" शुद्धितत्त्व । "नाद्यात् शूद्रस्य विप्रोऽन्नं क्षीद्राद्वा यदि वान्यतः । स शूद्रयोनिं व्रजति यस्तु भुङ्क्ते ह्यनापदि । अन्नमासान्तु यो द्विजो भुङ्क्ते शूद्रस्यान्नं विगर्हितम् । जीवन्नेव भवेत् शूद्रो मृतः श्वा चाभिजायते । ब्राह्मणक्षत्रियविशां शूद्रस्य च मनीषिणः । यस्मान्नेषोदरस्थेन मृतस्तद्योनिमाप्नुयात्" व्यासवाक्यम् "श्रोत्रियज्ञः कुलमित्रञ्च गोपालो दासनापितौ । एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत् । क्षीरविक्रयः कुम्भकारः तैलकर्म्मक एव च । एते शूद्रेषु भोज्यान्ना दत्त्वा स्वल्पफलं बुधैः । पायसं घृतपक्वञ्च यावकञ्चैव सक्तवः । पिण्याकश्चैव तैलञ्च शूद्राद्यान्नं द्विजातिभिः" कूर्म्मपु० ७अ० भागे १६अ० । "कन्दुपक्वानि तैलेन पायसं दधिसक्तवः । द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपि" । "कुलमित्रादीनां भोज्यान्नता तु कलौ तत्परा । शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणाम् । भोज्यान्नता सदृस्यस्य तीर्थसेवाऽतिदूरतः" पराशरेण कलौ वर्জ্যप্রোক্তেঃ शूद्रोऽपि ब्राह्मणद्वारा पक्वान्नेन नैवेद्यं दातुमर्हति इत्युत्सर्गकुचरूपाकादिवत् तत्रापि तस्याधिकार इति तिथ्यत० दुर्गोत्सवप्रकरणे रघुनन्दनेन व्यवस्थापितम् तत्र द्रष्टव्यम् ।

शूद्रासुत पु० शूद्रायाः द्विजातिभिः जडायाः सुतः । द्विजातिजाते शूद्रजातिस्त्रियाः सुते पुत्रभेदे ।

शूना स्त्री शि–अधिकरणे–क्त स्वार्थे–दीर्घः ।।प्राणिवधस्थाने कक्षा० "पशु शूना सदृस्यस्य सूनौ मेषस्य पुष्करः । कण्डूनौ चोदकुम्भश्च बध्यते यास्तु वाहयन्" मनुः । तद्दोषनिवृत्तये कार्य्या मनुना पञ्च यज्ञा विहिता यथा "अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् । पञ्चैतान् यो महायज्ञान् न हापयति शक्तितः । स सदृेऽपि वसन्नित्यं सूनादोषैर्न लिप्यते" । (यज्ञविधि) २अधोनिष्क्रान्तायां स्त्रियां स्त्रीर० ।

शून्य त्रि०शूनायै प्राणिवधाय हितम् रक्षत्यस्थानत्वात् यत् । १निर्जनस्थाने मेदि० । २आकाशे शब्दच० । ३बिन्दुमात्रे हेमच० । ४अभावे च अमरः । ५असम्पूर्णे ६जने ७तुच्छे च त्रि० अमरः । [२शून्यमध्यगुप्ते त्रि० ।

शून्यमध्य पु० शून्यमाडाभो मध्ये यस्य । १नले राजनि० ।
शून्यवादिन् पु० शून्यमभावमात्रं सर्वंकारणतया वदति वद-णिनि । बौद्धभेदे वृहच्छब्दे ४५८१ पृ० दृश्यम् ।
शून्या स्त्री शून्यमस्त्यस्याः अच् । १नद्यां विश्वः । २मङ्गाकण्टकिन्याम् । (फणिमनसा) राजनि० । [ईदित् शूर्णः
शूर क्षिप्रे क्षये च टि०आ०सक०सेट् । शूर्णते अशूरिष्ट ।
शूर विक्रमे ऋदि० चु० उभ० सक० सेट् । शूरयति ते अशुशूरत् त ।
शूर पु० शूर-अच् । १वीरे विक्रमवति अमरः । २यदुदेवनामके यादवे मेदि० ३क्षये त्रिका० ४कर्कटके ५सिंहे ६शूकरे पुंस्त्री० स्त्रियां ङीष् । ७चित्रकवृक्षे दक्षाके ८निकुचे १०मस्तरे च पु० राजनि० ।
शूरण पु० शूर-ल्यु । (ओल) १मूलभेदे अमरः "शूरणो टोपनो रुक्षः कषायः कण्डुलत्वक् कटुः । विष्वक्षी विशदो रुच्यः कफार्शःघ्नश्च सक्षुः । विशेषादर्शसे पथ्यः प्लीहगुल्मविनाशनः । सर्वेषां कन्दजातानां शूरणः श्रेष्ठ उच्यते । दष्टूर्णा रक्तपित्तानां कुष्ठानां न हितो हि सः । मन्दानलोगसंघातः शूरणो गुणवत्तमः" भावप्र० । २मोचावृक्षे च शब्दमाला । [च ।
शूरसेन पु०शूरा सेना यस्य, यस्य वा । १देशभेदे २नृपभेदे
शूर्प माने चु०उभ० सक० सेट् । शूर्पयति ते अशुशूर्पत् त ।
शूर्प पु०शूर्पते धान्यादिकमनेन शूर्प-घञ् । (कुला) धान्यादिस्फोटने १वंशमयपात्रे २दोषहस्तपरिमाणे च शब्दच० ।
शूर्पकर्ण पुंस्त्री० शूर्प इव कर्णौ यस्य । १गजे त्रिका० । स्त्रियां ङीष् । २शूर्पश्रुतिरक्षस्य स्त्रियाम् ।
शूर्पणखा(की) स्त्री शूर्प इव नखा अस्याः अत्वम् वा ङीष् । रावणभगिन्यां शब्दमा० । [शब्दच० ।
शूर्पपर्णी स्त्री शूर्प इव पर्णान्यस्याः ङीष् । भिन्नीभेदे
शूर्पवात पु० ६त० । शूर्पजवातौ फुफ्फुसे त्रिका० ।
शू(सू)र्प पु०सुष्ठु अर्पितरसत्रस्याः अच् वा पृषो०सस्य शः । सौवर्चलमितभाषायाम् अमरः । [सौवर्चलादिप्रतिभाषां शब्दच० ।
शू(सू)र्मि(र्मी) स्त्री सुष्ठु अर्पितः यस्याः वा अत्वम् वा ङीष् ।
शूल क्षजायां स्वा०पर० सक० सेट् । शूलति अशूलीत् ।
शूल पु०न० शूल-क । १रोगभेदे २त्रिशूले च अमरः । ३व्यथायां ४व्यथो ५सुतीक्ष्णे खदिरसारे धरणिः । ६चिह्ने मेदि० । ७सन्धिभेदे विश्वप्रकाशादिषु दशमे योगे च पु० । ८विक्रान्तराज्ये "शतशूला जनपदाः शिवशूलाश्चतुष्पथाः । देवशूलाः स्त्रियो राजन् ! भवन्ति युगक्षये" भा०व० १८८ अ० । वृहच्छब्दे ४५४ पृ० दृश्यम् । शूलरोगभेद निदानादिकं भावप्र० उक्तं यथा
"अथ शूलाधिकारः । तत्र शूलस्य सन्निकृष्टं निदानमाह "दोषैः पृथक्समस्तैश्च शूलोऽष्टधा भवेत् । सर्वेष्वेतेषु शूलेषु प्रायेण पवनः प्रभुः(कर्त्ता)" । अथ वातिकस्य विप्रकृष्टं निदानं सम्प्राप्तिपूर्वकं लक्षणमाह "व्यायामयानादतिमैथुनाच्च प्रजागराच्चोत्तरजन्तिमानात् । कषायतिक्तातिविरूक्षभोजनाद्वेगग्रहाध्यशनाभिघातात् । कषायतिक्तातिविरूक्षभोजनाद्वेगग्रहाध्यशनाभिघातात् । विट्क्षुत्क्रमूत्रानिलसन्निरोधाच्छोकोपवासादतिकर्षणेन । वायुः प्रदुष्टो जनयेद्धि शूलं कुक्षौ पुरीषस्य च सन्निवेशे । जीर्णे प्रदोषे च घनागमे च शीते च कोपं सहसैति सद्यः । सङ्कोचटोपप्रभवप्रकोपी विण्मूत्रसंस्तम्भनतोदभेदैः । संस्वेदनाभ्यञ्जनमर्दनाद्यैः स्निग्धोष्णभोज्यैश्च शमं प्रयाति" । व्यायामो मल्लयुद्धादिः यानं तुरगरथादि मैथुनं स्त्रीसेवा प्रजागरो रात्रौ, एषामतियोगात् शीतलक्षप्रभृतयानात् कषायस्निग्धः वातदुष्टः तुवरो कोरदूषः कोद्रवः । अतिरूक्षगुरुभोजनं, अध्यशनं भुक्तोपरि भोजनम् अभिघातो लोष्टादिभिः, कषायतिक्तरससेवा विरूक्षशाकम् विरूक्षपक्वशिम्बिधान्यम् कषायचणकादि तच्छाकं भक्ष्यम् । यद्भूरकं शुष्कपालंक्यम् । तस्य शूलस्य देशमाह वृद्धादिषु तत्र वृद्धशूलस्य पृथगपि लक्षणं पठन्ति "कफपित्तावरुद्धस्तु मारुतो रक्तवर्द्धितः । वृद्धिस्थः कुरुते शूलमत्यर्थावरोधजम् । स वृद्धशूल इति ख्यातो रक्तमारुतकोपजः" । अथ पार्श्वशूलस्यापि लक्षणमाह "कफं निष्टभ्य पवनः सूचीभिरिव निस्तुदन् । पार्श्वस्थः पार्श्वयोः शूलं कुर्यादाध्मानसंयुतम् । तेनोच्यते पार्श्वशूल इत्येष नरोऽस्तु न कालुष्टि । निद्राक्षयात्प्रसादेव पार्श्वशूलः प्रकीर्त्तितः" । वस्तिशूलस्यापि लक्षणमाह "वंक्षणोरुकुक्षिवृषणवङ्क्षणेषु संक्षिप्य तिष्ठति । वस्तेरध्वनि नाडीषु ततः शूलोऽस्य जायते । विण्मूत्रवातसंरोधी वस्तिशूलः स उच्यते" । प्रकृतमनुसरति क्षीणे भुक्ते प्रदोषे रात्र्यागमे रात्रि भवशीतेन वातप्रकोपात् । घनागमे वर्षासु मेघोदये च तथैव । पैत्तिकमाह "क्षारातितीक्ष्णोष्णविदाहितैलनिष्पावपिण्याकतिलतैलैः । कट्वम्लशीतैरतिदारुणैश्च क्रोधानलायासरविप्रतापैः । व्याध्यातियोगादशनैर्विदग्धैः पित्तं प्रदुष्याथ करोति शूलम् । दह्यमोक्ष-

दाहार्तिकरं हि नाभ्यां संस्वेदमूर्च्छाभ्रमशोषयुक्तम् । मध्यंदिने कुप्यति चार्द्धरात्रे निदाघकाले जलदात्यये च । शीते च शीतैः वसुपैति शान्तिं सुखाद्यशीतैरति भोजनैश्च" । निष्पावो राजमाषः । सौवीरं सन्धानभेदः । सुराविकारैः "परिप्लवासन्धानसक्तपाना सुरा मता" । तथा विकारैः । रविप्रतापः घातपः । व्यायामयोगो मैथुनाधिक्यम् । विदाह्यौषधाद्यापि यमनैर्विदग्धैरिति बोधयति अविदाह्यवसुनोऽपि पित्तवशाद्विदाहित्वं भवति । जलदात्यये शरदि । शीतैर्वातादिभिः । सैद्धिकमाह "क्षानूपवारिजक्षिराटपयोविकारैर्मांसैक्षुपिष्टजमरातिलशाकशीलैः । अन्यैर्बलासजनकैरपि चेद्विशिष्य स्नेहा प्रकोपमुपगम्य करोति शूलम् । कृच्छ्रासकासवदनाक्षिसमसैकैरालस्ये क्षितिकोऽग्निरोगुरुत्वैः । मुक्ते सदैव हि रुजं कुरुते ऽतिमात्रम् कूर्चोदरेऽथ शिशिरे कुसुमागमे च" । क्षानूपं वह्नजलदेशजं मांसम् । वारिजं शालूकादि "पक्वं दग्धा समं क्षीरं पिण्डेया दधिकूर्चिका । तक्रेण तक्रकूर्चीं स्यात्तयोः पिण्डः किलाटकः" । पयोविकारः पायसादिः पिष्टं माषादिः । अन्नैः गुर्वादिभिः । क्षितिमाद्रंपटावगुण्ठितमिव यत्कोष्ठं शिरश्च तयोर्गुरुत्वैः सह । कूर्चोदरं इति लिखा विभक्तदिवस प्रथमभागशोषजन्यम् । शिशिरे तत्र कफस्यातिसञ्चयात् । कुसुमागमे वसन्ते । इक्षुजमाह "दिदोषलक्षणैरेतैर्विद्याच्छूलं दिदोषजम् । सर्वेषु देशेषु च सर्वलिङ्गं विद्याद्भिषक् सर्वभवं हि शूलम् । कष्टतमेनं विषमज्वरकल्पं विबन्धनीयं प्रवदन्ति तज्ज्ञाः" । सर्वेषु देशेषु कृतपृष्ठपार्श्वोदरवस्तिनाभ्यामाशयेषु । सर्वं भवं त्रिदोषजम् । क्षामजमाह "क्षाटोपहृल्लासवमी गुरुत्वक्षौत्क्षिप्यमाणाङ्गकफप्रसेकैः । कफस्य लिङ्गेन समानलिङ्गमामोद्भवं शूलमुदाहरन्ति" । क्षामाशये जाते पश्चाद् दोषसम्बन्धः अतएवास्य शूलस्याष्टमत्वमुक्तम् । स च प्रथमभागाशये भवति पश्चात् सम्बन्धिभिर्दोषैर्वेष्टिताभिहत्वार्द्धकुक्षिषु भवति यथा दोषसम्बन्धः । क्षामशूलस्य दोषविशेषेण देशविशेषमाह "वातात्मकं वस्तिगतं वदन्ति पित्तात्मकञ्चापि वदन्ति नाभ्याम् । हृत्पार्श्वकुक्षौ कफसञ्चिविष्टं सर्वेषु देशेषु च सन्निपातात्" । हृत्पार्श्वकुक्षौ हृत्पार्श्वाभ्यां सहिते कुक्षौ । कफसञ्चिविष्टं कफेनाविष्टम् "वस्तौ हृत्कटिपार्श्वेषु स शूलः कफवातिकः। कुक्षौ हृन्नाभिमध्ये तु स शूलः कफपैत्तिकः । दाहज्वरकरो घोरो विज्ञेयो वातपैत्तिकः" । तत्रान्तरोक्षमाह शूलमाह "अतिमात्रं यदा भुक्तं पावके मन्दतामुते । क्षिरीक्षतन्तु तत्कोष्ठे वायुराहत्य तिष्ठति । यदाशं न मलं याति तच्छूलं कुरुते ऽत्यम् । मूर्च्छाध्मानं शिरादाहं हृत्कण्ठं स विजृम्भिकम् । कर्म वान्तिमतीसारं प्रमेहं जनयेदपि । अविपाकोद्भवं शूलमेतमाहुर्मनीषिणः" अविपाकोद्भवम् आमोद्भवमित्यर्थः । अथ शूलस्योपद्रवानाह "वेदनाति तृषा मूर्च्छा आनाहो गौरवारुची । कासः श्वासो वमिर्हिक्का शूलस्योपद्रवाः स्मृताः" । अथासाध्यत्वादिकमाह "एकदोषानुगः साध्यः कृच्छ्रसाध्यो द्विदोषजः । सर्वदोषान्वितो घोरस्त्रसाध्यो मर्त्यपद्रवः" । अथारिष्टमाह "वेदनातितृषा मूर्च्छा आनाहो गौरवं ज्वरः । श्वासो ऽरुचिः क्षयत्वञ्च बलवर्णविनाशनम् च । उपद्रवा दशैवैते यस्य शूलेषु नास्ति सः" । अथ शूलस्यैव भेदं परिभाषयाह "स्वैर्निदानैः प्रकुपितो वातः सञ्छिद्रितो यदा । कफपित्ते समाहत्य शूलाकारो भवेद्बली । भुक्ते जीर्यति यच्छूलं तदेव परिणामजम्" । स्वैर्निदानैरित्यादिना निदानपूर्विका संप्राप्तिरुक्ता भुक्ते जीर्यतीत्यादिना लक्षणमुक्तम् । समाहत्य व्याप्य । तस्य लक्षणमध्येतत् समासेनाभिधीयते । "क्षाध्मानाटोपविष्मूत्रविबन्धारतिवेपनैः । स्निग्धोष्णोपशमप्रायं वातिकं तद्विदेद् भिषक् । तस्मादाहार्तिस्वेदकृच्छ्रत्वशीतरम् । शूलं शीतशमप्रायं पैत्तिकं लक्षयेद् बुधः । छर्दिहृल्लासमम्लोद्गारं दीर्घसन्तति । कटुतिक्तोपशान्तौ च विज्ञेयञ्च कफात्मकम् । संसृष्टलक्षणं बुद्ध्वा द्विदोषं परिकल्पयेत् । त्रिदोषजमसाध्यं स्यात् क्षीणमांसबलानलम् । अथास्य दुर्बलाभ्यां शूलविशेषमाह "क्षीणे क्षीर्यति चाध्यक्षे यच्छूलमुपजायते । प्रज्ञापथ्यप्रयोगेण भोजनाभोजनेन वा । न शमं याति नियमात्तदुक्तं बुधसत्तमैः । नेदं शूलमसाध्यं चिकित्साभिधानात्" ।

अथ शूले पथ्यापथ्ये आवश्यं दर्शयते यथा "कलायतवगोधूमाः श्यामाकाः कोरदूषकाः । राजमाषाश्च कुलत्थाः कटुकाम्लयः । दधिसुरसं क्षीरं सर्पिर्गव्यं समाहिषम् । वास्तुकं कारवल्लो च कर्कोटकफलानि च । वर्द्धनो हरिणामत्स्या रोहिताद्याः कपिञ्जलाः । एतत्प्रशमने मन्त्रामतासन्निचिकित्सकैः ।

दधिगुप्तरसं दत्त्वा गुप्तः क्षतो रसो यस्य तत्क्षीरं दधियुक्तं क्षीरमित्यर्थः। "व्याघ्रं सैधुनं मद्यं लवणं कटुकं रसम्। वेगरोधं शुचं क्रोधं विदलं शूलवान् त्यजेत्"। स च उपपातकचिह्नं यथोक्तं याता० कर्त्तव्ये

"जलोदरयकृत्प्लीहशूलरोगव्रणानि च। श्वासाजीर्णज्वरक्षयार्शोभगन्दरपङ्गवः। रक्तार्बुदविसर्पाद्या उपपापोद्भवा गदाः"।

शूलक पुंस्त्री० शूल+संज्ञायां कन्। १दुर्विभाव्ये क्षेमच०। स्त्रियां ङीष्। स्वार्थे क। २शूलशब्दार्थे।

शूलग्रन्थि पु०शूलाकारः ग्रन्थिरस्य। मांसादुर्नामनि राजनि०

शूलवातन न० शूलं रोगभेदं तनोति तन्-णिच्-ल्यु। मयूरे शब्दच०।

शूलघ्न पु० शूलं हन्ति हन-क। तण्डुलीये रत्नमा०।

शूलछिद् पु० ६त०। छिद्रौ रत्नमाला। [शब्दच०।

शूलधन्वन् पु० शूलं धनुरायुधमस्य अनङ् समा०। शिवे

शूलधर पु०शूलं धारयति धारि-अच् मुम्। शिवे शब्दच०। भृ-किप्। शूलभृद्वत्स। [स्त्री ङीप् शब्दच०।

शूलधारिन् पु० शूलं धरति धृ-णिनि। १शिवे २दुर्गायां

शूलधृष् पु० शूलेन धर्षति दैत्यान् धृष-किप्। १शिवे २दुर्गायां स्त्री। शूल-किन्। शूलधृङ् तत्रार्थे।

शूलनाशन न० शूलं नाशयति नश-णिच्-ल्यु। सौवर्चलवणे क्षेमच०। [राजनि०।

शूलपत्री स्त्री शूलमिव पत्रं यस्याः ङीप्। शूलोद्भवे

शूलपाणि पु०शूलं पाणौ यस्य। शिवे शूलहस्तादयोऽप्यत्र।

शूलप्रभु पु० शूलस्य रोगस्य प्रभुः। एरण्डवृक्षे शब्दच०।

शूलहन्त्री स्त्री शूलं रोगं हन्ति हन-टच् ङीप्। यवान्यां राजनि०।

शूलहृत् पु० शूलं रोगं हरति हृ-किप्। छिङ्गुलि त्रिका०।

शूला स्त्री शूलं तदाकारोऽस्त्रमस्त्यस्याः शूलं नवौवनविकारतयाऽस्त्यस्या वा अच्। १दुष्टव्रणार्थशोफके २वेश्यायाञ्च त्रिका०।

शूलाक्त त्रि० शूलेन विद्धा क्तं पक्वम् शूल+डाच्+क्त। कोद्रादिकीलवेन विद्धे पक्वे मांसे (कावाब) अमरः

शूलिक त्रि० शूलं पाकसाधनत्वेनास्त्यस्य ठन्। १शूलाक्ते शब्दच० २शूलयुक्ते क्षेमच० ३शूलयुते त्रि०।

शूलिन् पु० शूलमस्त्रमस्य इनि। १शूलरोगयुक्ते २शूलास्त्रधारके त्रि० ३शिवे पु० ४यमके भावप्र०। [ङीप् शब्दच०।

शूलिन पु० शूलं तदाकारं फलमस्त्यस्य इनच्। मांसोरशूली स्त्री शूलं पक्वाकारे अस्त्यस्य अच् गौरा० ङीष्। शूलाकारपक्वयुते अनामख्याते तृणभेदे राजनि०।

शूलोत्खा स्त्री शूलं रोगभेदमुत्खनति उद्+खन-ड। शब्दरत्नाव्यां शब्दच०।

शूल्य त्रि० शूले संस्कृतं यत्। शूलाक्ते मांसे भावप्र० क्तान्तशब्दे तत्पाकादि २१८२ पृ० दृश्यम्।

शूष प्रसवे भ्वा० पर० सक० सेट्। शूषति अशूषीत्।

शृङ्गाल पुंस्त्री० अस्त्रं जाति ला-क पृषो०। (शेयाल) १पशौ अमरः स्त्रियां ङीष्। २दैत्यभेदे मेदि०। ३शास्त्रदेवे ४निष्ठुरे ५क्लीबे च पु० शारदातिलकाभिधानम्। पृषो०। शृङ्गाल तत्रार्थे शब्दच०। ६क्षीरी अमरार्थकोशः। शृगालशब्दशाकुनं शिवाशतशब्दे दृश्यम्।

शृगालकण्टक पु० शृगालस्येव कण्टको यस्य। (शेयालकाँटा) क्षुपभेदे शब्दच०।

शृगालकोलि पु० शृगाल इव कण्टकितः कोलिः। (शेयाकुल) क्षुपभेदे रत्नमाला। [ताम्बे क्षुपभेदे राजनि०।

शृगालघण्टी स्त्री शृगाल इव कण्टकिनी घण्टी। कांकि-

शृगालजम्बु स्त्री शृगालप्रिया जम्बुरिव। १गोदुम्बे (गोस्तन) २क्षीरोदुम्बफले मेदि०। [राजनि०।

शृगालविद्या स्त्री शृगालैर्विद्यते विद्-क। पृश्निपर्ण्यां

शृगालिका स्त्री शृगालस्य भार्या ङीप् स्वार्थे क। १शृगालयोषिति शृगालीव इवार्थे कन्। २भवात् पलायने मेदि०।

शृगाली स्त्री शृगालस्तत्पलायनं वादत्यनेनास्त्रमस्य अच् ङीप्। १पलायने त्रिका०। २कोकिलायां २विदार्य्यां राजनि०।

शृङ्खल पु० शृङ्खात् प्राधान्यात् खलयतेऽनेन पृषो०। निगडे २लौहमये १पादबन्धने च क्षेमच०। ४कक्षाभरणे अमरः ५पुंस्कटीवस्त्रबन्धने मेदि०। तत्रार्थे स्त्रीत्वमपि टाप्।

शृङ्खलक पुंस्त्री० शृङ्खल इव कायति कै-क। १उड्रे राजनि० स्त्रियां जातित्वात् ङीष् स्वार्थे क। २शृङ्खलशब्दार्थे।

शृङ्खलित त्रि०शृङ्खला जातास्य इतच्। बद्धनिगडे धनञ्जयः

शृङ्खली स्त्री शृङ्खलः तदाकारोऽस्त्रमस्याः अच् गौरा०ङीष्। १कोकिलायां ३पुंस्कटीवस्त्रबन्धने च राजनि०।

शृङ्ग न० शृ-नन् पृषो० सस् नुगच। १पर्वतोपरिभागे ज्ञानौ अमरः। २प्रभुत्वे ३श्रेष्ठे ४जलक्रीडार्थयन्त्रभेदे (पिचकारी) ५पशुादीनां विषाणे (शिङ्गा) ६उत्कर्षे च मेदि०। ७अग्रे ८तीक्ष्णे ९पक्षे च शब्दर० १०अहिफ-

शृङ्गनिर्मितवाद्यभेदे (शिङ्ग) ११कामोद्रेके सा०द० शृङ्गारशब्दे दृश्यम् । १२कूर्चशीर्षवृक्षे पु० मेदि० १३तन्निर्भेदे पु० ।

शृङ्गक पु० शृङ्गमिव कायति कै–क । जीवशृङ्गे जटा० ।

शृङ्गकन्द पु० शृङ्गमिव कन्दोऽस्य । शृङ्गाटके (पानीफल) राजनि० ।

शृङ्गज न० शृङ्गे पर्वताग्रे जायते जन–ड । १श्वेतचन्दने रत्नमा० । २वाद्यभेदयुक्ते पु० संज्ञिप्रसा० २शृङ्गजातमात्रे त्रि० ।

शृङ्गमूल पु० शृङ्गमिव मूलमस्य । शृङ्गाटके राजनि० ।

शृङ्गमोहिन् पु० शृङ्गाय कामोद्रेकाय मोहयति मुह–णिच्–णिनि । धत्तूरे राजनि० ।

शृङ्गला स्त्री शृङ्गं तदाकारफलं लाति ला–क । अज० शृङ्गाां (गाड़रशिङ्गी) शब्दच० ।

शृङ्गवत् पु० शृङ्गं प्राशस्त्येनास्त्यस्य मतुप् मस्य वः । श्वेतपर्वतभेदे तन्नामादिभाग० १६।१६ अ० उक्तं यथा

"उत्तरोत्तरभेषाढ्यं नीलः श्वेतः शृङ्गवान् इति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्यादागिरयः प्रागायता उभयतः क्षारोदावधयः द्विसहस्रयोजनपृथव एकैकशः पूर्वस्मात् पूर्वस्मादुत्तरोत्तरं दशांशाधिकांशेना दैर्घ्ये एव भवन्ति" । २शृङ्गयुते त्रि० ।

शृङ्गवेर न० शृङ्गमिव वेरमवयवो यस्य । १आर्द्रके अमरः । २गुण्ठ्यां २रामठे शृङ्गबेरशब्दे उदाहृते च । स्वार्थे क । आर्द्रके हेमच० । [एरकाशब्दे भावप्र० ।

शृङ्गवेराभमूलक पु० शृङ्गवेरेण तुल्यं मूलमस्य कप् । शृङ्गाट पु० शृङ्गं प्राधान्यमटति अट–अच् । १उत्तरस्थपर्वतभेदे २चतुष्पथे ३जलकण्टकिवृक्षे च ४तत्फले न० । "शृङ्गाटकं हिमं स्वादु गुरु दृष्यं बलावहम् । पाकि शुक्रानिलघ्नञ्च प्रवरं पित्तरक्तदाहनुत्" भावप्र० । स्वार्थे क । तत्र, चतुष्पथे उच्चशृङ्गारोच्चे वस्त्रभेदरूपे शब्दाच्छृङ्गारे च । स च पर्वतः कामाख्यादेशस्थः यथोक्तं कालिकापु० ८२अ० यथा

"द्वीपवत्यां पूर्वतस्तु शृङ्गाटो नाम पर्वतः । तत्र मर्गस्य देवस्य लिङ्गमेकं प्रतिष्ठितम् । सरित्तु विद्या विमोक्षा दक्षिणोदधिगामिनी । शृङ्गाटस्य सततं स्रवन्ती यावधि पातलः । दक्षिणं सागरं याति भर्गस्य प्रियकारिणी । पङ्कमांसभेदे तत्प्राप्तिविधिर्यथा "शुष्कमांसं तनूकृत्य कर्त्तितं क्षेदितं जले । लवङ्गं क्षिप्तसहितं चतुर्थांशसंयुतम् । एलाजीरकधान्याकनिम्बूरसमन्वितम् । इते रसम्बे तद्भक्षं पूरणं प्रोच्यते बुधैः । शृङ्गाटकं समितया कृतं पूरणपूरितम् । पुनः सर्पिषि संभृष्टं मांसं शृङ्गाटकं वदेत् । मांसं शृङ्गाटकं रुच्यं दृष्यं बलकरं गुरु । वातपित्तहरं हृद्यं कफघ्नं वीर्यवर्द्धनम्" भावप्र० ।

शृङ्गार पु० शृङ्गं कामोद्रेकमुज्ज्वलनेन कर–अण् । १रसभेदे अमरः । २लाक्षे ३सिन्दूरे ४धूर्त्ते च मेदि० । शृङ्गं कारयत्येन आच्छति अण् । ५कामागुरुणि राजनि० ६आर्द्रके शब्दच० । शृङ्गं प्राधान्यमुज्ज्वलनेन अण् । ७भूषणे ८गजभूषणे च । स्वार्थे क । सिन्दूरे "पुंसः स्त्रियां स्त्रियः पुंसि संयोगं प्रति या स्पृहा । सा शृङ्गार इति ख्याता रतिक्रीड़ादिकारणम्" इत्युक्ते ९स्त्रीपुंसयोरन्योन्यसंयोगं प्रतीच्छाभेदे च रसभेदलक्षणादिकं सा०द० उक्तं यथा

"शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः । उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यते । परोढा वल्लविप्रायाः वेश्याश्चानुसरासिधीम् । आलम्बनं नायिकाः स्युर्दक्षिणाद्याश्च नायकाः । चन्द्रचन्दनरोलम्बराकाद्युद्दीपनं मतम् । भ्रूविक्षेपकटाक्षादिरनुभावः प्रकीर्त्तितः । लज्जौग्र्यमरणालस्यजुगुप्साव्रीड़ादयः । स्थायी भावो रतिः प्रायश्चौडयं विष्णुदैवतः" । "शून्यं वासगृहमित्यादि" । अत्र उत्तमप्रकृतिरूपा परोढा च बाला आलम्बनविभावौ । शून्यं वासगृहमुद्दीपनविभावः । चुम्बनमनुभावः । लज्जाद्यास्त्रयस्त्रिंशद्व्यभिचारिणौ । एतैरभिव्यक्तः सम्भोगरतिभावः शृङ्गाररूपतां भजते । तद्भेदाश्च । विप्रलम्भोऽथ सम्भोग इत्येष द्विविधो मतः" । तत्र विप्रलम्भो विप्रलम्भशब्दे उक्तः सम्भोगस्तु "दर्शनस्पर्शनाद्यैस्ते सेवेते विषयिणौ । यत्रानुरक्तावन्योन्यं सम्भोगोऽयमुदाहृतः" । आदिशब्दादन्योन्याधरपानचुम्बनादयः । यथा "शून्यं वासगृहमित्यादि" । "संक्षिप्तमथ सङ्क्षिप्ततया चुम्बनपरिरम्भणादिवक्ष्यभेदात् । अयमेक एव धीरैः कथितः सम्भोगशृङ्गारः । तत्र आदिशब्दात् चन्द्रादिग्रहः तथोक्तमयः । अमलेषिवनविहारप्रायमधुपानयामिनीप्रभृतिः । आलेपनभूषाद्या वाच्यं शुचि मेध्यमन्यच्च" । तथा च भरतः "अस्मिन्लोके शुचि मेध्यमुज्ज्वलं दर्शनीयं वा तत्सर्वं शृङ्गारेणोपमीयते उपयुज्यते" । किञ्च "अधिकपदुर्विशेषाद्यानलक्षणात्तु पूर्वरागादेः" । वक्ष्यम् "न विना वि प्र-

जन्मैव सम्भोगः पुरिमनुते । कथयिते हि वस्तादौ भूयानादरो विधत्ते" ।

शृङ्गारभूषण न० शृङ्गारे तदर्थं भूषणम् । सिन्दूरे हेमच० ।

शृङ्गारयोनि स्त्री इत० । कामदेवे हला० ।

शृङ्गारिन् पु० शृङ्गारः उद्दीप्यत्वेनास्त्यस्य इनि । १पूगे तत्फलभक्षणे हि कामोद्रेक इति तस्य तथात्वम् । २गजे मेदि० । ३सुवेशे त्रि० । ४माक्षिके पु० राजनि० ।

शृङ्गिक न० शृङ्गं तदाकारोऽस्त्यस्य ठन् । १विषभेदे २अतिविषायां स्त्री शब्दर० । [स्त्रियां ङीष् ।

शृङ्गिण पु०शृङ्गं युद्धसाधनत्वेनास्त्यस्य इनन् । मेषे हेमच०

शृङ्गिन् पु० शृङ्गमस्त्यस्य इनि । १मेषे २कुलाचलभेदे शृङ्गवच्छब्दे इश्यम् । ३पर्वतमात्रे ४सुनिभेदे ५दर्भे च । ६शृङ्गयुक्ते त्रि० मेदि० । ७धेन्वां स्त्री ङीप् । ८लोभ्रीवृक्षे ९अलिकायां १०ज्योतिष्मत्यां च स्त्री मेदि० । सुनिभेदस्य शमीकर्षिपुत्रः स हि परिक्षितं प्रति तक्षक-दंशनशापमदात् इति विष्णुपु० स्थितम् ।

शृङ्गी स्त्री शृङ्गमस्त्यस्या अच् गौरा० ङीष् । १महुरस्य प्रियायाम् अमरः । पृषो० हुस्वः । शृङ्गिरित्यपि तत्रार्थे शब्दर० । २अतिविषायां ३हरभेषज्यौ अमरः । ४कर्कट-शृङ्गाम् ५दुग्धे हविषे च राजनि० । ७भूषणवस्त्वर्थे रत्नकोषः "महुरस्यप्रिया शृङ्गी इत्यमरे महुरसी अप्रियेति नामद्वयम् । तेन (शिङ्गी) मतस्यस्यैवेदं नाम इति भरतः ।

शृङ्गीकनक न० अलि-कि वा० सम्प्र० ङीष् शृङ्गी अलङ्कारस्तदर्थं जनकम् । भूषणार्थस्वर्णे अमरः । [मरः ।

शृङ्गिणि स्त्री शृङ्ग-इन् वा ङिनि तस्य निः पृषो० । अङ्गुले अ-

शृत त्रि० शृ-क्त । १पक्वे अमरः २क्वथिते जलादौ च "दृष्ट्वादृष्ट्वापितात्तोयात् वह्निना परितापितात् । निःसृतो यो रसः पूतः स शृतः सद्वदाहृतः" वैद्यकोक्ते शृतद्रव्यजातभेदे रसे पु० ।

शृध शब्दशब्दे भ्वा० आ० इता० लुङि सृटि सृजि च उभ० अक० सेट् ङावेट् । शर्द्धते अशृद्धत शर्त्स्यति शर्द्धिष्यते ।

शृध क्षेदने भ्वा० उभ० सक० सेट् ङावेट् । शर्द्धति ते अशर्द्धीत् अशर्द्धिष्ट ।

शृध शब्दे चु०उभ०सक० सेट् । शर्द्धयति ते अशशर्द्धत् त ।

शृधु पु०शृध-कु । १वृद्धौ विश्वः । २क्लिष्टे ३अपाने संक्षिप्तसा०

शृ हिंसने क्र्या० पर० सक० सेट् । शृणाति अशारीत् शीर्णः ।

शेखर पु० शिखि-अच् पृषो० । १शिखायां २मूर्द्धस्थितमाल्ये च अमरः । ३चन्द्रावां स्त्री शब्दर० ङीप् । ४गीताङ्के ध्रुवभेदे पु० तल्लक्षणं यथा "द्वादशाक्षरपादः स्यात् स चाद्यगुरुकस्तु प्रभोः । द्वाविंशे च रसे वीरे गीयते शेखरो ध्रुवः । चतुर्थकर्मवेद्यश्च स भवेल्लघुशेखरः" संगीतदा० । [त्रि०

शेप पु० शी-पन् । १शेफे शिश्ने शब्दच० । २शयनकर्त्तरि

शेपाल पु०शेपः शयित इवालति अल-अच् । शैवाले शब्दर०

शेफ पु०न० । शी-फन् । १शिश्ने अमरः २शयनकर्त्तरि त्रि० । शुक्रपाते सति शेते शी-अधि फुक् च शेफोऽस्त्र न० "गोलिङ्गं चिह्नशेफसोः" अमरः । शेफशेफसी शेफ शेपौ शेवमिति पञ्चशब्दात्मकार्थे तत्र पृषो० साधुतेति भरतः । [ङीप् । शेफालिकायां शब्दमा० ।

शेफालि(ली) स्त्री शेफाः शयनशालिनः अलयो यत्र वा

शेफालिका स्त्री शेरते इति शेफाः अलयो यत्र वा कप् । (शिउलि) पुष्पवृक्षे अमरः "शेफालिका कटुष्णा च तिक्ता रूक्षा च वातकृत् । कफाङ्गमन्थिवातघ्नी स्मृता-तादिदोषकृत्" राजनि० । [अमरः ।

शेमुषी स्त्री शी-विच् शेः मोऽन्तं सण्याति सो-क । बुद्धौ

शेल गतौ चालने च भ्वा० पर० सक० सेट् । शेलति अशे-लीत् । अदित् चङि न हुस्वः ।

शेलु पु० शेल-उण् । बहुवारवृक्षे अमरः ।

शेव पु० शुक्रपाते सति शेते शी-वन् । पुंचिह्ने २वञ्चके ३अर्द्धे च उज्ज्वलदत्तादिकोषः ।

शेवधि पु० शेः धनादिनोऽस्त्य अवधिः । "पद्मोऽस्त्रियां महापद्मः शङ्खोमकरकच्छपौ । मुकुन्दकुन्दनीलाश्च निधयो नव शेवधिः" इत्युक्ते नवविधे निधौ अमरटीका ।

शेवल न० शी-विच् तथाभूतः सन् वलते वल-अच् । शैवाले (शेवला) शब्दच० ।

शेवाल न० शेते विच् शेः-सन् वलते वल-संज्ञायां कर्त्तरि घञ् । १शैवाले शब्दर० । २आकाशमांसयां स्त्री राजनि० ।

शेष पु०शिष-अच् । १अनन्ते सर्पराजे सर्पभेदे २बलदेवे च मेदि० । ३अवशेषे अमरः । ४गजे ५उपयुक्ततरवस्तूनि अजयपालः । ६भगवतो बालसंज्ञमूर्त्तौ "एका भगवतो मूर्त्तिर्ज्ञानरूपा शिवात्मिका । वासुदेवाभिधाना सा शुद्धा-शीता शुनिष्कला । द्वितीया कालसंज्ञा च तामसी शेष-संज्ञिता । निहन्ति सकलांश्चान्ते वैष्णवी परमा तनुः" कूर्मपु० ४८अ० । "शेषे मही" मा०स्त० "उच्चादन्यः

शेषः" भाष्यादयः। परोक्षेण प्रवर्त्तमाने ऽगुणीभूते अस्य लक्षणविषयादि मीमांसाकृत्यभाष्यादौ दर्शितं यथा "शेषः परार्थत्वात्" सू० "इह खल्वे शेषस्य लक्षणम्, येन च हेतुना शेष इत्युच्यते, तदुभयमाख्यायते। यः परस्योपकारे वर्त्तते, स शेषः इत्युच्यते, यद्वा, ये परार्थाः, ते वक्तारो भवन्ति, शेषभूता वयमिह इति। ननु योऽपि प्रधानभूतः सोऽपि कदाचित् परार्थे वर्त्तते, यथा उपाध्यायः प्रधानभूतः शिष्याणां विद्याविनियोगाधाने वर्त्तते। सत्यं वर्त्तते, यस्तु खल्वन्यं परार्थः, तं वयं शेषः इति ब्रूमः, यथा, गर्भदासः कर्मार्थं एव स्वामिनोऽनड्वांश्च क्रीयते, वक्ष्यति इत्येव। ननु गर्भदासस्यापि स्वामी संविदधानो गुणभावमापादयति। न इति ब्रूमः, आत्मन एवासौ संविदधानो गुणभावं गच्छति, नान्तरीयकत्वात् गर्भदासस्योपकरोति, अनड्वाहो वा, यस्त्वन्यं परार्थः, तं वयं शेषः इति ब्रूमः। अथ तत्र किं दृष्टम्? यैस्तु द्रव्यं चिकीर्ष्यते गुणः तत्र प्रतीयेत इति, तत्र अपूर्वार्थता व्यावर्त्तिता, दृष्टप्रयोजनानामाख्यातानाम्। इह तु सर्वेषामेव शेषाणां लक्षणमुच्यते" शब० भा०। तस्य लक्षणाय तत्राह "द्रव्यगुणसंस्कारेषु बादरिः" सू० "बादरिराचार्यः अत्र द्रव्यगुणसंस्कारेष्वेव शेषशब्दः इति मेने, न यागफलपुरुषेषु। द्रव्यं क्रियार्थं, यदि प्रयोजनवती क्रिया, अथ सा द्रव्येण निर्वर्त्तयितव्या, तस्मा निर्वृत्तिर्द्रव्याद्ते न भवति इति तन्निर्वृत्तये द्रव्यमेषितव्यं भवति, तस्मात् क्रियार्थं द्रव्यम्। गुणः शक्नोति विशिष्टं द्रव्यं चोदितं लक्षयितुम्, लक्षितेन च तेन प्रयोजनम्, विशिष्टस्य क्रियासाधनत्वात्, तस्मात् सोऽपि द्रव्यद्वारेण क्रियायां उपकरोति इति क्रियार्थ एव। संस्कारो नाम स भवति, यस्मिन् जाते पदार्थो भवति योग्यः कस्यचित् अर्थस्य, तेनापि क्रियार्था कर्मज्ञार्था प्रयोजनम् इति सोऽपि परार्थः। तस्मात् द्रव्यगुणसंस्काराः परार्थत्वात् शेषभूताः। न तु यागफलपुरुषाः। यागः तावत् कर्त्तव्यः पुरुषस्य, न हि, तस्मिन् निर्वर्त्तिते किञ्चित् अपरमस्ति कर्त्तव्यम्। न हि पुरुषार्थः, यदन्यत् द्रव्यादि, तत् तदर्थं तस्य शेषभूतम्, न तु न किञ्चिदभिनिर्वर्त्तयितुम् क्रियते। फलमपि न तेन क्रियते, तस्मिन् तु कृते स्वयमेव तत् भवति। तस्मिन् कृते फलमस्य भवति इत्येतावत् गम्यते, नाप्यसौ यागेन क्रियते फलमिति। तस्मात् यागो न शेषभूतः कस्यचित् अर्थस्य। फलमपि न पुरुषं प्रत्युपदिश्यते, यः स्वर्गं कामयते, स यागं कुर्यादित्येतावत् यज्ञेनोपदिश्यते, नात्मनः परस्य वा इति, स्वर्गं प्रतीच्छामात्रेण स्वर्गकामः इति भवति, तस्मात् पुरुषं प्रति गुणभावेन न श्रूयते स्वर्गः, तस्मात् सोऽपि न शेषभूतः। न चेत् फलवानो गुणभावेन चोद्येते, कस्य पुरुषः प्रधानमूतो भवति? प्रत्यक्षत्वात् द्रव्यत्वात् कर्म प्रति गुणभावः। तस्मात् द्रव्यगुणसंस्कारेष्वेव शेषभावं बादरिर्मेने" शब०भा०। "कर्मण्यपि जैमिनिः, फलार्थत्वात्" सू० "जैमिनिस्तु खल्वाचार्यः कर्मण्यपि शेषभूतानि मन्यते स्म, न बादरिरिवावधारणमनुमेने, स हि दर्शे, न यागः कर्त्तव्यतया चोद्यते, फलकामस्य तु तत्साधनोपादेयेन इति। एवं श्रुतोऽर्थः परिगृहीतो भविष्यति, अर्थवांश्चोपदेशः। एतमेवार्थं षष्ठेऽध्याये स्वयमेव साधयिष्यति। इह तु तत्सिद्धमेव फलार्थत्वेन शेषभावं यागस्यापादयति स्म। तस्मात् अनवधारणा द्रव्यगुणसंस्काराः शेषभूताः यागोऽपि शेषभूतः फलस्यति" भा०। "फलं च पुरुषार्थत्वात्" सू०। "फलमपि पुरुषं प्रत्युपदिश्यते, यः, स्वर्गो मे भवेत् इत्येवं कामयते, तस्य यागः न यः स्वर्गः, स आत्मानं लभेत इति। आत्मनेपदप्रयोगात्, कर्त्तृभिप्राये एतत् भवति, क्रियाफलमनुभवेत् कथं पुरुषः? इति यागः प्रयुज्यते। तस्मात् फलं पुरुषार्थं यागात् श्रूयते नात्मनिर्वर्त्त्यत्वम्। तस्मात् शेषभूतम् इति" भा०। "पुरुषस्य कर्मार्थत्वात्" सू०। "पुरुषोऽयौदुम्बरीसम्मानादिषु गुणभूतः श्रूयते। तस्मात् अनवधारणा एषा, द्रव्यगुणसंस्कारेषु शेषत्वं बादरिर्मेने इति"। "अथ इदानीमत्रानुशयवान् इत्तिकारः परिनिष्ठिकाय, द्रव्यगुणसंस्कारेष्वेव नियतो यजिष्यति शेषभावः, आपेक्षिक इतरेषाम्। यागस्य द्रव्यस्यति प्रधानभावः, फलस्यति गुणभावः, फलस्य यागस्यति प्राधान्यम्, पुरुषस्यति गुणता, पुरुषस्य फलस्यति प्रधानता, औदुम्बरीसम्मानादि प्रति गुणत्वम् तस्मात् सम्मता अवधारणा, द्रव्यगुणसंस्कारा यागस्यति नियमतो गुणभूता एव" भा० क्वचित् शेषत्वनिषेधो यथा "अश्वशेषं गवि शेषं गवशेषं तथैव च। पुनःपुनः प्रवर्त्तन्ते तस्मात् शेषं न कारयेत्" गरुडपु० "प्रसादाच्चिक्कनिर्माल्यदाने शेषेति कीर्त्तिता" विष्णोक्ते स्वामिना प्रसादत्वे दत्ताख्ये श्री "तवेति शेषामिव भक्तराजम्" कुमारः।

शैवरात्रि स्त्री॰शैवं रात्रेः एकदेशिस॰। रात्रिभेदे शब्दच॰

शैवशयन पु॰ शेवः अनन्तः शयनमस्य। नारायणे तच्छयन-प्रकारकाख्यादि आह्निकादुः २७अ॰ उक्तं यथा "अनन्तस्तत्र गत्वा तु यत्र क्षीरोदसागरः। तत्र स्वयं श्रिया युक्तं सुप्तमन्तं जनार्दनम्। तल्पोपधानमकरोदनन्तो दक्षिणां कृशाम्। उत्तरां पादयोश्चक्रे उपधानं महाबलः। तावदन्तं तदा चक्रे च शेषः पश्चिमां कृशाम्। स्वयन्तु शेषयामास शेषरूपी जनार्दनम्। शङ्खं चक्रं नन्दकादिनिधी इे महाबलः। ऐशान्या कृशया चाथ स दध्रे गरुडं तदा। गदां पद्मञ्च शार्ङ्गं च तथैव विविधायुधम्। यानि चान्यानि तल्पास्तान्यन्येद्या कृशया दधौ। एवं कृत्वा स्वकं कार्यं शयनीयं तदा हरेः। भूतभव्यजगन्नाथं परापरगतिं हरिम्। दधार शिरसानन्तः स्वयमेव स्वकां तनुम्। एवं ब्रह्मादिनस्तेव प्रभावेण श्रियं हरिः। सन्ध्यां च समधिप्राप्य शेते नारायणोऽव्ययः"। मनुना "शर्वरी तस्य तावतीं" इत्युक्तम्। "यदा स देवोजागर्त्ति तदेदं चेष्टते जगत्। यदा स्वपिति शान्तात्मा तदा सर्वं प्रलीयति" इत्युक्तं तेन प्रलयकाले एव तस्य शयनम्।

शैव पु॰ शिवां तन्त्रमधीयन्वधीते वेत्ति वा अण्। १शिवा-गमाध्यायिनि २तद्वेत्तरि च। वुञ्। शिवकोऽप्यत्र।

शैखरिक पु॰ शिखरे प्राचीरावयवे भवः ठक्। उपमार्गे अमरः।

शैखरेय पु॰ शिखरे भवः ढक्। उपमार्गे रत्नकोषः।

शैत्य न॰ शीतस्य भावः ष्यञ्। शीतलत्वे।

शैथिल्य न॰ शिथिलस्य भावः ष्यञ्। ढीलत्वे संयोगभेदे।

शैनेय पु॰ शिनेर्गोत्रापत्यम् ढक्। सात्यकिनाम्नि यादवे।

शैरीष पु॰ शिरा+ऋष्। नीलझिण्ट्यां रत्नमा॰। ढक्ञ् शैरीषक तत्रार्थे।

शैल न॰ शिलायां भवः अण्। १शैलेये गन्धद्रव्यभेदे। २ताक्ष्यशैले मेदि॰। ३शिलाजतुनि च राजनि॰। शिलाः सन्त्यस्य प्रज्ञा॰ अण्। ४पर्वते पु॰ अमरः। [राजनि॰।

शैलगन्ध न॰ शैलस्य शैलजस्येव गन्धोऽस्य। शालरचन्दने

शैलज न॰ शैले पर्वते जायते जन-ड। १खनामख्याते गन्धद्रव्यभेदे रत्नमा॰। २गजपिप्पल्यां ३शैलेयाख्यायां ४दुर्गायाञ्च स्त्री राजनि॰। [शैले शिखा॰।

शैलधन्वन् पु॰ शैलं गिरितुल्यं धनुरस्य अनङ्ग॰। महा-

शैलधर पु॰शैलं गोवर्द्धनं धरति धृ-अच्। श्रीकृष्णे धनञ्जय।

शैलपत्र पु॰शैलमिव सुगन्धि पत्रमस्य। बिल्ववृक्षे राजनि॰

शैलभित्ति पु॰ शैलं भिनत्ति भिद्-क्तिच्। टङ्के पाषाण-दारणास्त्रे जटा॰। [शैलाधिराजादयोऽप्यत्र।

शैलराज पु॰ शैलानां नगानां राजा टच् समा॰। हिमालये

शैलराजसुता स्त्री ङीप्। हैमवत्यां पार्वत्यां "जाता शैलेन्द्रगेहे सा शैलराजसुता ततः" देवीपु॰ ३१अ॰।

शैलवीज पु॰ शिलां तत्पर्यन्तं दूरं धावति अण् शैलं वीजं यस्य। भल्लातके राजनि॰।

शैलशिविर न॰शैलानां नगानां शिविरमिव। वस्तुदे त्रिका॰।

शैलसार न॰ पु॰न॰शैलस्य सार इव। शिलाजतुनि राजनि॰

शैलसुता स्त्री ङीप्। १पार्वत्याम् २गङ्गायां च।

शैलाग्र न॰ शैलस्याग्रम्। पर्वतशृङ्गे त्रिका॰। [राजनि॰।

शैलाज न॰ शिलायां जायते जन-ड स्वार्थे अण्। शैलजे

शैलाट पुंस्त्री॰ शैलं पर्वतमटति अट-अण्। १सिंहे २किराते च स्त्रियां ङीष्। ३शुक्लवर्षकाले ४देवले च पु॰ मेदि॰।

शैलादि पु॰ शिलादस्यापत्यम् इञ्। शिवपार्श्वचरे नन्दिनि

शैलालिन् पु॰ ब॰व॰ शिलालिना मुनिना प्रोक्तं नटसूत्र-मधीयते विनि। शैलूषेषु नटेषु अमरः।

शैलिक्य पु॰गर्हितं शीलमस्यास्ति ठन् शौलिकः स्वार्थे ष्यञ्। सर्वलिङ्गिनि पाषण्डे जटा॰।

शैली स्त्री॰ शीलमेव स्वार्थे अण् ङीपि वलोपः। १चारित्रे २सङ्केतभेदे च त्रिका॰ "आचार्याणामियं शैली यत्-सामान्येनाभिधाय विशेषेण विवृण्वीतेति" प्राचः।

शैलूष पु॰ शिलूषस्यापत्यम् अण्। १नटे २बिल्ववृक्षे अमरः ३धूर्ते ४ताक्षधारके च शब्दर॰।

शैलूषिक पु॰ शैलूषं तद्वृत्तिमन्वेष्टा ठक्। "इत्यन्येषो नटानान्तु स तु शैलूषिकः स्मृतः" ब्रह्मवै॰ उक्ते १नट-इत्यन्वेषिणि नटप्रधाने २तत्पत्न्यां स्त्री ङीष् "नटीं शैलूषिकीं चैव रजकीं वेणुजीविनीम्। गत्वा चान्द्रा-यणं कृच्छ्रं तप्तं चर्मोपजीविनीम्" संवर्त्तः।

शैलेन्द्र पु॰ शैलः इन्द्र इव। हिमालये। इत्त॰। शैलेशा-दयोऽप्यत्र। [राजनि॰।

शैलेन्द्रस्थ पु॰ शैलेन्द्रे हिमालये तिष्ठति स्था-क। भूर्जवृक्षे

शैलेय न॰ शिलायां भवः ढक्। १शैलजाख्ये गन्धद्रव्यभेदे हेमच॰। "शैलेयं शीतलं हृद्यं कफपित्तहरं लघु। कण्डूकुष्ठाक्षरोदाक्षविषकृद्गुदरक्तहृत्" भावप्र॰। २पर्वतजातमात्रे त्रि॰। स्त्रियां ङीष्। ३सिंहे ४भ्रमरे

च पुंस्त्री० अक्षरः स्त्रियां ङीष्। ५शिवातुल्ये अक्षरः। ६पार्वत्यां स्त्री ङीष्।

शैलोद्भवा स्त्री शैलं पर्वतमुद्भिद्य भवति उद्+भू-अच्। १क्षुद्रपाषाणभेदिनि वृक्षे राजनि० २पार्वत्याञ्च।

शैव न० शिवमधिकृत्य कृतो ग्रन्थः अण्। वेदव्यासप्रणीते शिवप्रभाववर्णनात्मके १महापुराणभेदे। शिवो देवताऽस्य अण्। २शिवभक्ते त्रि०। तत्रेदमण्। ३शिवसम्बन्धिनि त्रि० ४शैवले न० शब्दच०।

शैवञ्च महापुराणं वायुना प्रोक्तत्वात् वायवीयनाम्नाख्यातम् अतएव "अष्टादश पुराणानि पुराणज्ञाः प्रचक्षते। ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा" हेमा० ब्र० विष्णु०"शैवं यदायुना प्रोक्तम्" तत्रैव कालिकापु० उक्तम्। हेमा०दा० मत्स्यपुराणे तु चतुर्थं वायवीयत्वेन पठित्वा "श्वेतकल्पप्रसङ्गेन धर्मान् वायुरिहाब्रवीत्। तत्र यद्वायवीयं स्याद्वृत्रमाहात्म्यसंयुतम्। चतुर्विंशतिसाहस्रं पुराणं तदिहोच्यते। आवण्यां आवणे मासि गुडधेनुसमन्वितम्। यो दद्याद्विधिसंयुक्तं ब्राह्मणाय कुटुम्बिने। शिवलोके स गूढात्मा कल्पमेकं वसेच्चरः" तथा च शिवमाहात्म्यवेदकत्वाच्चैवमिति तस्य नामान्तरं विष्णु पु०उक्तम्। वायुना प्रोक्तत्वाच्च वायवीयमिति नामान्तरमिति बाध्यम्। तत्प्रतिपाद्यविषयाच्च नारदीयपु० उक्ता यथा "ब्रह्मन्! प्रवक्ष्यामि पुराणं वायवीयकम्। यस्मिन् श्रुते लभेद्धाम रुद्रस्य परमात्मनः। चतुर्विंशतिसाहस्रं तत्पुराणं प्रकीर्त्तितम्। श्वेतकल्पप्रसङ्गेन धर्मान्वक्ष्यति मारुतः। तद्वायवीयमुद्दिष्टं भागद्वयसमाचितम्" तत्र पूर्वभागे "सर्गादिलक्षणं यत्र प्रोक्तं विप्र! सविस्तरम्। मन्वन्तरेषु वंशाश्च राज्ञां ये तत्र कीर्त्तिताः। भवासुरस्य हननं विस्तरात् यत्र कीर्त्तितम्। मासानां चात्र माहात्म्यं मासधर्मोक्तं फलाधिकम्। दानधर्मा राजधर्मा विस्तरेणोदिताश्चया। भूपातालकृतव्योमचारिणां तत्र निर्णयः। प्रेतादीनां च पूर्व्वोऽयं विभागः समुदाहृतः"। उत्तरभागे "उत्तरे तस्य भागे तु नर्मदातीर्थवर्णनम्। शिवस्य संहिताख्या वै विस्तरेण सनीश्वर!। यो देवः सर्वदेवानां दुर्विज्ञेयः सनातनः। स तु सर्वात्मना यस्मात्क्षीरे तिष्ठति सन्ततम्। इदं ब्रह्मा हरिरिदं चाचार्येदं परो हरः। इदं ब्रह्म निराकारं कैवल्यं नर्मदाजलम्। ध्रुवं लोकहिताथाय शिवेन स्वयमीरितः। शक्तिः कापि हरिरूपा लेखेऽस्मिन्नवतारिता। ये वसन्त्युत्तरे कूले रुद्रस्यानुचरा हि ते। वसन्ति याम्यतीरे ये लोकं ते यान्ति वैष्णवम्। ओङ्कारेश्वरमारभ्य यावत् पश्चिमसागरम्। सङ्गमाः पञ्च च त्रिंशदधीनां पापनाशनाः। दशैकस्तरे तीरे त्रयोविंशतिर्दक्षिणे। पञ्चत्रिंशत्तथः प्रोक्तोरेवासागरसङ्गमः। सङ्गमैः सहितान्येवं रेवातीरद्वयेऽपि च। चत्वारिंशतानि तीर्थानि प्रसिद्धानि च सन्ति हि। षष्टितीर्थसहस्राणि षष्टिकोट्यो सनीश्वर!। सन्ति चान्यानि रेवायास्तीरयुग्मे पदे पदे। संक्षिप्तेयं मया प्रोक्ता शिवस्य परमात्मनः। नर्मदाचरितं यत्र वायुना परिकीर्त्तितम्। लिखित्वेदं पुराणन्तु गुडधेनुसमन्वितम्। श्रावण्यां यो ददेत् भक्त्या ब्राह्मणाय कुटुम्बिने। रुद्रलोके वसेत् सोऽपि यावदिन्द्राश्चतुर्दश। यः श्रावयेद्वा शृणुयात् वायवीयमिदं नरः। नियमेन हविष्यासी स रुद्रो नात्र संशयः"। ५वसुके ६धनूरे पु० राजनि० ७आचारभेदे पु० "अष्टाङ्गयोगसंयुक्तो यजेद्देवौं विधानतः। यावद् ध्यानं समाधिञ्च तावत् शैवं प्रचक्षते" आचारभेदतन्त्रम्। तदुपासकभेदाश्च शिवलिङ्गशब्दे वामनपु० उक्ता द्रष्टव्याः।

शैवल न० श्री-वलच्। १पङ्काङ्गे २शैवाले च पु० मेदि०। "वहतो वङ्गशैवलच्छलाम्" नैषधम्।

शैवलिनी स्त्री शैवलानि सन्त्यस्याः इनि। नद्याम् अमरः

शैवाल न० श्री-वालच्। (शेवोयाला) जलजाते पदार्थभेदे अमरः। अस्य पृषो० दन्त्यादित्वमपि "सैवालकाङ्कुरलतामधुना बिभर्त्ति" इति श्रुतेः।

शैव्य पु० शिवेर्गोत्रापत्यम् अञ्। १शिविगोत्रजे राजभेदे "शैव्यश्च नरशुक्रवः" इति गीता। शिवितोऽधिगतः अञ्। २घोटकमात्रे ३स्त्रीक्लीबयोश्च घोटके च त्रिका०।

शैशव न० शिशोर्भावः अण्। शिशुकाले अवस्थाभेदे अमरः

शैशिर पुंस्त्री० शिशिरं प्रियत्वेनास्त्यस्य अण्। १ग्रामभटके राजनि० स्त्रियां ङीष्। शिशिरे भवः अत्रण्। २शिशिरजाते त्रि०। स्वार्थे अण्। ३शिशिरे न०। "तपस्तपस्यौ शैशिरावृतुः" श्रुतिः। [ध्यापभायां स्त्रि०कौ०]

शैष्योपाध्यिका स्त्री शिष्योपाध्याययोः कर्म वुञ्। शिष्योपाध्यायकर्म्मणि

शो तीक्ष्णीकरणे दि०प०सक०अनिट्। श्यति अशात् अशासीत्।

शोक पु० शुच-घञ्। इष्टवियोगजाते दुःखानुगुणे चित्तवृत्तिभेदे अमरः। ल्युट् शोचनमप्यत्र न०।

शोकनाश्य पु०शोकं नाशयति नश-णिच्-अण्। १अशोकवृक्षे राजनि०। नश-भावे घञ् वृत० २शोकध्वंसे।

शोकहारी स्त्री० शोकं हरति हृ-अण् ङीप्। वनवर्वरि-कायां राजनि०।

शोकारि पु० ६त०। कदम्बवृक्षे शब्दच०। [च अमरः।

शोचिष्केश पु० शोचिः केशवद् यस्य। १वह्नौ २रक्तवृक्षे

शोचिस् न० शुच-इसि। १प्रभायां २रोचिषि च अमरः।

शोच्य त्रि० शुच-ण्यत्। १क्षुद्रे २अवरे शब्दच० ३अनुकम्पनीये च। स्वार्थे क। तत्रैव। [इत्येव पाठः साधुः।

शोटीर्य्य न० शुटोरस्य भावः यत्। वीर्य्ये शब्दच०। शौटीर्य्य

शोठ त्रि० शुठ-आचष्टे स्फोटने वा अच्। १मूर्खे २अलसे मेदि०। ३धूर्त्ते ४नीचे ५वाराहते पुंस्त्री० शब्दच०। स्त्रियां ङीप्। [ऋदित् चङि न लुक्।

शोण गतौ सक०सर्व० ऊक०भ्वा०पर०सेट्। शोणति अशोणीत्

शोण न० शोण-अच्। १सिन्दूरे २रुधिरे च राजनि०। ३रक्तौ ४शोणाकभेदे राजनि०। ५अङ्गुले यदे हेमच० ६चित्रके पुनर्भेदे स च अमरकण्ठकदेशगतः पाटलि-पुत्रसन्निहितं गङ्गायां मिलितः। ७रक्तवर्णे पु० १०त-दति त्रि० मेदि०। ११सप्तदशभेदे धरणिः।

शोणक पु० शोणवर्ण आयति के-क। शोणाकवृक्षे अमरः।

शोणभिण्टिका स्त्री० कर्म०। १शोणभिण्टयां २रक्तझैरेये राजनि०। [न्याङ्क राजनि०।

शोणभिण्टी स्त्री० शोणा भिण्टीव। १कुरण्टे २कण्टकि-

शोणपत्र पु० शोणं पत्रमस्य। १रक्तपुनर्नवायां राजनि०।

२रक्तपत्रयुते त्रि०। [२रक्तकुसुमान्विते त्रि०।

शोणपुष्पक पु० शोणं पुष्पमस्य कप्। १कोविदारे राजनि०

शोणपुष्पी स्त्री० शोणं पुष्पमस्याः ङीप्। सिन्दूरपुष्प्यां राजनि०

शोणरत्न न० कर्म०। पद्मरागमणौ अमरः। [शब्दमा०।

शोणाक्ष न० शोणं रक्तवर्णमक्षति अच्। (शोणा) क्षुपभेदे।

शोणित न० शोण-इतच्। १रुधिरे तद्वर्णे २रक्तवर्णे पु० श्रवति त्रि० अमरः। ३कुङ्कुमे न० राजनि०।

शोणितचन्दन न० शोणितं रुधिरमिव चन्दनम्। रक्त-चन्दने राजनि०। [त्रिका०।

शोणितपुर न० शोणितमिव रक्तं पुरम्। बाणासुरनगरे

शोणोपल पु० कर्म०। माणिक्ये मणौ राजनि०।

शोथ पु० शु-घञ्। हस्तपादादेः स्फीततारकारके रोगभेदे तस्य सम्प्राप्त्यादिकं भावप्र० उक्तं यथा

"अथ शोथाधिकारः। तत्र शोथस्य विप्रकृष्टं निदान-माह "गुरुग्राम्याम्ललवणाभक्तानां शारीरतोऽशोथ गुरूपचेयत्वात्। दध्यामरूक्षाकविरोधिपिष्टगरोपसृष्टान्न-निषेवणाच्च। अर्शांस्यजीर्णे वसुधोक्षशुद्धिर्मर्माभिघातो विषमा प्रसूतिः। मिथ्योपचारः प्रतिकर्मणाच्च निजस्य हेतुः श्वयथोः प्रदिष्टः"। शुद्धिर्वमनविरेकादिः। आमयाः पाण्डुरोगादयः। अभक्तम् अभोजनम्। आमः अपक्को भुक्तस्य रसः। पिष्टगरोपसृष्टान्नम् पिष्टो यो गरः संयोगजं विषं तेन संसृष्टमन्नम्। वसुधोक्षशुद्धिः शोधनार्हस्य वसुधोःशोधनम्। मर्मोपघातः दोषजत एव ज्ञेयः। बाह्यहेतुजस्तु मर्मोपघात आगन्तुजशोथ हेतुरेव। विषमा प्रसूतिः आमगर्भपतनादिका। प्रति-कर्मणां वमनादिपञ्चकर्मणाम् मिथ्योपचारः अस-म्यक्करणम्। श्वयथोः शोथस्य निजस्य स्वात्मीयस्य सञ्ज-ज्ञस्य हेतुर्दोषाक्रान्तरक्तोक्तः। अथ शोथस्य संप्राप्तिपूर्वकं सामान्यं लक्षणमाह "रक्तपित्तकफान् वायुर्दुष्टो दुष्टान् बहिःसिराः। नीत्वा रक्तमतिस्निग्धं कुर्य्यात्स्वगुणसंश्रयम्। उत्पिण्डं संहतं शोथं तमाहुर्निचयादतः। सगौरवं स्वादनवस्थितत्वं शोफेषु तस्माच्च सिरातनुत्वम्। सशोफरूपेषु विपर्ययेण च सामान्यमिष्टं श्वयथोः प्रदिष्टम्"। उत्पिण्डं उन्नतत्वम्। किंविशिष्टमुत्पिण्ड-मतः पूर्वोक्तात् निचयात् रक्तपित्तकफक्रमाणां सङ्घ-दाघात् संहतम् घनम्। तमुत्पिण्डं शोथमाहुरित्यन्वयः। तस्य शोथस्य किं स्वादिष्यादाह्यु.यामाह। अनवस्थितत्वं स्यात् अनियता स्थितिः स्वादिष्यर्थः चिकित्साव्यतिरेकेणापि निहतेः। सञ्जानवस्थितत्वं सगौरवं स्याद्गौरवमप्यनवस्थितं स्यात्। अथ च शोफेषु स्यात्। उन्नतत्वमप्यनवस्थितं स्यादित्यर्थः। वार्तिकं शोथमाह "चरत्नतुल्यरूपोऽरुणोऽसितः प्रसुप्तिरुर्मि-र्स्पियुतो निषिक्ततः। प्रसार्यति प्रोद्यति प्रपीड़ितो दिवा बली स्यात्सवसुः समीरणात्"। चरः सञ्चारी। प्रसुप्तिः सर्वाङ्गता। रुर्मिऽत्र (क्रिनि क्रिनौ) रोगाणो वा। आर्त्तिः पीड़ा एतद्युतः दिवा बली विक्रतिविषम समवायारब्धत्वाद्। अतएवोक्तम् "श्लेष्मोष्मवातदौर्ब-प्रसार्यते स वातिकः। यथास्वरूपवर्णः स्याच्छोथो रक्तं प्रसार्यति"। अथ पैत्तिकमाह "क्षुद्रः सगन्धो-ऽसितपीतरागवान् सवल्परुग्दाहरुजामदान्वितः। य उच्यते सर्षपकोऽसिरागवान् स पित्तशोथो भृशदा-हरुग्वान्"। उच्यते मन्यते। भृशदाहरुग्वान् भृशं पाक्तयुक्तः। श्लैष्मिकमाह "गुरुः स्थिरः पाण्डुर-रीचकान्वितः प्रसेकनिद्रावमथाङ्गमार्दवयुत्। सकच्छु-

लक्षणमयमो निर्दिष्टो नचाग्निसिद्धान्निवृत्तो ज्वरा-तीसारः"। इन्द्रजमाह "पिदाशान्तिर्लंघनात् क्षेयः शोथो त्रिदोषजः"। सान्निपातिकमाह "सर्वोक्तिः सन्निपाता-त्सर्वशोथाभिसम्भवः"। आभिघातजञ्च रक्तजुष्टैः सर्वो-क्तिरिति ज्वरातीसारादिशोथसम्भवलक्षणनिदर्शनार्थम्। अथाभिघातजमाह "अभिघातेन यस्यादिच्छेदभेदघता-दिभिः। क्षिप्तानिलोदध्यनिलैर्भग्नावयवसन्धिजैः। रक्तं भूतैव संस्पर्शान्मुच्यतः स्राविषर्ययात्। अशोथ शोणिताभासः प्रायशः पित्तलक्षणः"। छेदः खड्ग-दिना भेदः पाषाणादिना। क्षतं शरादिना शाङ्गीव-ष्यादि च। आदिशब्देन लगुडप्रहारादि गृह्यते। भग्नजैः रक्तैः कफिक्लिन्नैः शूनैः विसर्पणात् प्रसरणशोफः पित्तलक्षणः पैत्तिकशोफलक्षणः। अथ विषजमाह "विषजः सविषप्राणिपरिसर्पणमूलकात्। दंष्ट्रादन्त नखाघाताद्विषप्राणिनामपि। विषमूलशुक्लोपदंश-मूलवद्दलशूकरात्। विषदूषितसंसर्गैरशोगावधूनना-त्। लूतवलीकश्चलभी च शीघ्रो बहुरुजाकरः"। परिसर्पणात् शरीरोपरि सञ्चरणात्। दंष्ट्रा हिंस्रजीवता दन्तावलिः। (चोड) इति लोके। दन्ता वास्ये भवाः। सविषप्राणिनामपीत्यनेन दंष्ट्रादन्तवतामपि समानादेव सविषत्वं किन्तु सर्पादिविषं मारकं भवति सविषप्रा-णिनां दंष्ट्रादिविषं शोथमात्रादिकरं भवतीति वि-शेषः। विषदूषितेत्यादि। विड्वराहादिपुरीषं मक्षिकास्तु यद्वत् तद्वा शूकरः शूकाग्रैर्नोभिः क्षिप्तो धूल्यादिः तेषां सम्पर्कात्। शरयोगावधूननात् शरः संयोगजं विषं तस्य योगो यस्य तेन वस्तुनाऽवधूननात्। लव-लभी लवमानः। लूतमक्षागन्तुजन्तवापि सामान्या गन्तुजशोफाश्चिकित्सातोऽस्य विशिष्टचिकित्साभिधा-नाय पृथक् पाठतः। यत्र स्थिता दोषा यत्र शोथं कुर्वन्ति तदाह "दोषाः क्षयमुखं हि कुर्वन्त्यामाशये स्थिताः। पित्ताशयस्था मध्ये तु वक्षःस्थानगताश्चधः। क्षतस्थं देहमतुराव्य क्षुद्रः सर्वसरं तथा। ऊर्ध्वं शरःप्रकाण्डं च। मध्ये शरःपक्वाशयमध्ये। अधः पक्वाशयादधः। उपद्रवानाह "हृदिश्वासोऽरुचिश्छर्या क्षुरोतीसार एव च। सम्यक् ज्ञानदौर्बल्यं शोथ एते उपद्रवाः"। तत्र शोथसाध्यत्वमाह "श्लक्ष्णः पित्तात्-दौर्बल्यं ज्वर एव च। यस्य चाङ्गे दृश्यन्ते शोथिनस्तं विवर्जयेत्"। स्वार्थे क। तत्रार्थे शब्दच०।

शोथघ्नी स्त्री शोथं हन्ति हन-टक् ङीप्। १पुनर्नवायाम् अमरः। २शाकपर्णीवृक्षे राजनि०। ३शोथनाशके औष-धमात्रे त्रि०।

शोथजित् पु० शोथं जयति जि-क्विप्। भल्लातके रत्नमा०। [वाच्यं त्रिका०।

शोथविघ्न पु० शोथे विघ्नः विपरीताचरणशीलो। पुनर्न-

शोधन न० शुध-णिच्-ल्युट्। १शोधे २विद्यायां शब्दच०। ३काशीशे राजनि०। ४व्रणादेर्विरेचने ५दोषनिवारणे ६क्षयादिचिकित्सिते च। शुध-णिच्-ल्यु। ७शिवक्षुपे ८ राजनि०। ९दोषनिवारके त्रि०। शुध्यत्यनया करणे ल्युट् ङीप्। १०सम्मार्जन्याम् स्त्री अमरः। ११ताम्रचू-डायां १२नीलाञ्जे स्त्री ङीप्। १३विच्छिन्नाविच्छिन्नमा-त्रादिविचारणे न० "सूर्यपक्षपक्षाभ्यां समानो मासि कथन। तत्र यदुक्तं क्षतं सर्वमनलफलदमवेत्। न व्रणशिरावारादिशोधनं सूर्यपर्वणि मलतः। दोष-निवारणञ्च धातुविशेषस्य द्रव्यान्तरेण संयोजनम् "पत्र-शोभाञ्जनपत्राणि हेम्नो वल्लो प्रतापवेत्। निम्बस्य तप्तप्तानि तैले तक्रे च काञ्जिके। शोभाञ्जे च कल-ल्यानां कषाये तु त्रिधा त्रिधा। एवं हेम्न परेषाञ्च धातूनां शोधनं भवेत्" इत्यादिप्रकारेण वात्यादीनां दोषनिवारणम्। १४व्रणादेः क्लेदपूयाद्युपचारे च "व्रणस्य त्रिफलाक्षारः शुद्धिकरः क्षतः। पटोल-निम्बपत्रस्य सर्वत्रैव प्रयुज्यते। वातिके दशमूलानां क्षीरिणां पैत्तिके व्रणे। श्लेष्मजेऽरुषादेः कफजे व्रणस्य शोधनं मतम्"। १५पाण्डुरोगादेर्दोषनिवारणे भाषा-शब्दे दृश्यम्। १६भाञ्जाङ्गात् भाजकस्य क्षरणे।

शोधनीबीज न० क्लीव०। जयपाले राजनि०।

शोधित त्रि० शुध-णिच्-क्त। मलाद्यपहारणेन १कृतसं-स्कारे २मार्जिते अमरः।

शोफ पु० शु-फन्। शोथे अमरः। शोथशब्दे दृश्यम्।

शोफघ्नी स्त्री शोफं हन्ति हन-टक् ङीप्। १शाकपर्ण्यां २रक्तपुनर्नवायाञ्च राजनि०। [राजनि०।

शोफनाशन पु० शोफं नाशयति नश-णिच्-ल्यु। नीलवृक्षे

शोफहृत् पु० शोफं हरति हृ-क्विप्। भल्लातके भावप्र०।

शोभन न० शोभते शुभ-ल्यु। १पद्मे शब्दमा०। विल्वस्या-दिपु २पद्मसे शोणे पु० ज्यो०त०। ३शोभायुक्ते त्रि०। ४सुन्दरे त्रि० ५यज्ञे पु० धरणि।

शोभनक पु०शोभनाय कायति के-क। शोभाञ्जनवृक्षे शब्दच०

शोभना स्त्री शोभते शोभनात् शुभ-णिच्-ल्यु । १हरिद्रायां २गोरोचनायाञ्च राजनि० ।

शोभा स्त्री शुभ-अ । १दीप्तौ "या शोभा रूपभोगादौर्यत स्यादङ्गविभूषणम् । शोभैव कान्तिराख्याता मनसा-प्यायनोज्ज्वला" उज्ज्वलमण्डनाङ्गे च २गोपीभेदे ब्रह्मवै०प्र० ८अ० । ३हरिद्रायां ४गोरोचनायां राजनि० ।

शोभाञ्जन पु० शोभायै अञ्जते अञ्जु-ल्युट् । (सजना) वृक्षे अमरः "तद्वोजं श्वेतमरिष्टं मधुशिग्रुः स बोधितः । शिग्रुः कटुः कटुः पाके तीक्ष्णोष्णो मधुरो लघुः । दीपनो रोचनो रूक्षः कफवित्तो विदाहजित् । संग्राह्यगुल्मजो लघ्वः पित्तरक्तप्रकोपणः । चक्षुष्यः कफवातघ्नो विद्रधि व्रणशूलजित् । मेदोऽपचीविषश्वोष्णगुल्मनप्लवान् हरेत् । श्वेतः शोभाञ्जनो श्रेयो विशेषात् दाहजित् भवेत् । शोभाञ्जनं विद्रधिं घ्नन्ति व्रणघ्नः पित्तरक्तजित् । रक्तशिग्रुः शोभाञ्जनो विशेषाद्दीपनः सरः । शिग्रुवत् कफपक्षाघां सरसः परमाभिधृत् । चक्षुष्यं शिग्रुजं बीजं तीक्ष्णोष्णं विषनाशनम् । गुल्मघ्नं कफवातघ्नं तद्वल्लं च शिरोरुजित् । शिग्रुशाकं हिमं स्वादु चक्षुष्यं वातपित्तजित् । दंशघ्नं शुक्रजित् स्निग्धं हृद्यं मदकफापहृत् । शिग्रोः पुष्पन्तु कटुकं स्निग्धोष्णं वायुशोथहृत् । कृमिघ्नं कफवातघ्नं विद्रधिव्रणशूलजित् । शोभाञ्जनफलं स्वादु वयस्यं कफपित्तजित् । मूलत्वक्षयशोषघ्नं शुक्रघ्नं दीपनं परम् भावप्र० । अधिकं शिग्रुशब्दे द्रष्टव्यम् ।

शोलो स्त्री शूल-अच् पृषो० ङीष् । वनहरिद्रायां राजनि०

शोष पु० शुष-घञ् । १धातादिना रसादिपरिचये च कठिनताकरणे । शोषयति शुष-णिच्-अच् । २यक्ष्मरोगे मेदि० ।

शोषण न० शुष-ल्युट् । १शोषयतेन रसाकर्षणे हेमच० । २शोषणकर्त्रर्थे च शोषयति शुष-णिच्-ल्यु । "उच्चाटनः शोषणश्च तापनं स्तम्भनस्तथा । मारणश्चेति विज्ञेयाः कर्मणां षट् प्रकीर्तिताः" इत्युक्ते ३अरारमेदे जटा० । ४शोषणकर्त्रे भावप्र० । ५शुष्कत्वां राजनि० ।

शोषसम्भव न० शोषात्सम्भवात् सप्त०+भू-अप् त० । पित्तजी मले राजनि० । [राजनि० । २शोषजन्यरोगे त्रि० ।

शोषापहा स्त्री शोषमपहन्ति अप+हन-ड । १क्षीतनके

शोक न० शुचाते सञ्ज्वरः अच् । १शुक्रसदाद्ये अमरः । शुकोऽस्यत्र यः । स्त्रियां २करणभेदे राजनि० ।

शोकर न० शूकरस्य वराहस्येदम् अण् । १शौकरे तीर्थभेदे वराहदैवत्ये त्रि० । २शूकरसम्बन्धिनि त्रि० स्त्रियां ङीप् ।

शौकरव न० तीर्थभेदे "परं शौकरवं ज्ञानं सर्वसंसारमोक्षदम् । यत्र संस्था च मे देवि शुद्धतात्त्वि रसातलात् । तत्र मानोरथी भद्रा यत्र शौकरवं स्थितं" वराहपु० ।

शौक्तिकेय न० शुक्तिकायां भवम् ढक् । मुक्तायां राजनि०

शौक्तेय न० शुक्तौ भवम् ढक् । मुक्तायां राजनि० ।

शौक्ल्य पु० शुक्लस्य भावः ष्यञ् । श्वेततायां श्वेतत्वे ।

शौच न० शुचेर्भावः अण् । १शुद्धौ पवित्रतायाम् "अभक्ष्यपरिहारश्च संसर्गाद्यनिन्दितैः । स्वधर्मे च व्यवस्थानं शौचमित्यभिधीयते" इति हरिवंशोक्ते २धर्मविशेषे च "सर्वेषामेव शौचानामर्थशौचं विशिष्यते । योऽर्थेशुचिः शुचिः शौचान्न मृद्वा वारिणा शुचिः । मनःशौचं मनःशौचं शौचमिन्द्रियनिग्रहः । सर्वभूतदया शौचं जलशौचन्तु पञ्चमम् । यस्य सत्यञ्च शौचं च तस्य स्वर्गो न दुर्लभः" गारुडे ११० अ० ।

मृदादिशौचप्रकारस्तु आ०त० दर्शितो यथा देवलः "धर्मविद्भिश्च कलशैः शौचे न योजयेत् । तत्रैव वामहस्तेन नाभेरधस्तु न शोधयेत् । प्रकृतिस्थितिरेषा स्यात् कारयादुभयक्रिया" । कारयाद्गात्रादेः । ब्रह्मपुरा० "उद्धृतोदकमादाय मृत्तिकाञ्चैव वाग्यतः । उदङ्मुखो दिवा कुर्यात् रात्रौ चेद्दक्षिणामुखः । शुचिस्थिते मृदं दद्यात् मृदने त्रय एव च । दातव्यमृदकं तावद् यावत् स्यात् मृत्तिकाक्षय" । कुर्यात् शौचमिति शेषः । शुचिस्थिते भरद्वाजोक्तशोढादिप्रकृते गुदे । उदकपात्राभावे करेण जलाप्लवादुदकमुद्धरेदाह व्यासः "रक्षितव्यं जलं ज्ञात्वा कुर्यात् शौचमतन्द्रितः । पश्चात् शौचक्रियातीर्थमन्यथा न शुचिर्भवेत्" । यस्मिन् प्रदेशे शौचं कर्त्तव्यं तस्मादरक्षितव्यवस्थितं जलं तत् स्वयमेव तीर्थं जलसमीपत्वात् । विष्णुपु० "वल्मीकमूषिकोत्खातां मृदमन्तर्जलां तथा । शौचार्थमिष्टां नैड्याश्च नादद्यात् लेपसम्भवाम् । अतः प्राग्व्यवहाराच्च कृतोत्खातां सकर्दमाम्" । मृद्दानो "एका लिङ्गे गुदे तिस्रो दश वामकरे तथा । उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता" । उभयोः करयोः । विष्णुपु० "एकालिङ्गे गुदे तिस्रो दश वामकरे तथा । कुलटायां च सप्तात्वा मृदः शौचोपपादिकाः" । यमः "लिङ्गे त्वेका गुदे तिस्रो वामहस्ते चतुर्दश । ततः पुनस्तथाभ्यासात् दातव्याः सप्त मृत्तिकाः" । पैठीनसिः "मृत्तिकां संगृह्य एका

लिङ्गस्थाने पञ्च एकस्मिन् हस्ते दश उभयोः सप्त इत्यादि। एतासां संख्यानां दक्षादुत्तराधिक्यं गन्धाद्यपहृत्तिमनुरुध्य व्यवस्थेयम्। वामहस्ते दशदानानन्तरं तत्पृष्ठे षड्दानमाह हारीतः "दश मध्ये च षट् पृष्ठे इति"। शङ्खदक्षौ "तिस्रस्तु मृत्तिका देयाः शुद्ध्यर्थं वै नखविशोधनम्। तिस्रस्तु पादयोर्देयाः शुद्धिकामेन नित्यशः"। नखशोधनं शस्त्रादिना नखान्तर्मलशोधनम्, तिस्र इति हस्तयोरिति शेषः। पादप्रक्षालनं कांस्ये न कर्त्तव्यमित्याह विष्णुधर्मोत्तरम् "दर्भैर्न मार्जयेत् पादौ न च कांस्येन धावयेत्"। दक्षः "लिङ्गे तत्र समाख्याता त्रिपवी पूर्य्यते यया। अर्द्धप्रसृतिमात्रा तु प्रथमा मृत्तिका स्मृता। द्वितीया च तृतीया च तदर्द्धा प्रकीर्त्तिता"। यदा तु उक्तप्रमाणया मृदा गन्धलेपक्षयो न भवति तदा अधिकयापि कर्त्तव्यम्। "गन्धलेपक्षयकरं शौचं कुर्य्यादतन्द्रितः" इति याज्ञवल्क्यात्। मृदादन्यत्र परिमाणमाह यमः "मृत्तिका तु समाख्याता त्रिपवी पूर्य्यते यया"। त्रिपवी तर्जनीमध्यमानामिकानामग्रपर्व्वत्रयम्। मूलमात्रेति स्मृतिः "एतां लिङ्गे मृदं दद्यात् वामहस्ते तु कृत्स्नवत्। उभयोर्हस्तयोर्द्वे च मूलशौचं प्रकीर्त्तितम्"। ब्रह्मपुराणे "पादयोर्द्वे मृदो गृहीत्वा च सुप्रक्षालितपाणिना। हिरण्यं ततः शुद्धः स्मृत्वा विष्णुं सनातनम्"। पादयोर्द्वे एकैका। इदं मूलोद्धरणे, पुरीषोत्सर्गे तिस्रणां विधानात्। दक्षः "यथोदितं दिवा शौचं अर्द्धं रात्रौ विधीयते। आतुरे तु तदर्द्धं स्यात्तदर्द्धं तु पथि स्मृतम्"। यथोक्तकरणाशक्तावेवेदं न तु निशादिपुरस्कारेणैव वाक्यस्वाद्यर्थतापत्तेः। आपस्तम्बः "पथि पादस्तु विण्मेध्ये आर्त्तः कुर्य्याद् यथाबलम्"। एतयोर्विरोध आर्त्तानार्त्ताभ्यां परिहरणयोः। दक्षबौधायनौ "देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनम्। उपपत्तिमवस्थाञ्च ज्ञात्वा शौचं प्रकल्पयेत्"। ब्रह्मपुराणे "न यावदुपनीयेत द्विजः शूद्रसमाकृतिः। गन्धलेपक्षयकरं शौचं तेषां विधीयते। प्रमाणं शौचसंख्या वा न शिष्टैरुपदिश्यते। यावत् शुद्धिं न मन्येत तावत् शौचं समाचरेत्। न्यूनाधिकं न कर्त्तव्यं शौचं शुद्धिमभीप्सता। प्रायश्चित्तं प्रसज्येत विहितातिक्रमे सति। शौचाचारविहीनस्य समस्ता निष्फलाः क्रियाः"। गन्धलेपक्षये सत्यधिकं न कर्त्तव्यं याज्ञवल्क्यविरोधात्। गन्धलेपाक्षये सत्यधिकसंख्ययापि याज्ञवल्क्यवचनमनुपनीतादिपरं वा। व्याघ्रपादः "शौचन्तु द्विविधं प्रोक्तं बाह्यमभ्यन्तरन्तथा। मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्त्वान्तरम्। गङ्गातोयेन मृत्तोयेन मन्त्रैरेव मनोयमैः। बाह्यशौचः स्नातकस्य भावदुष्टो न शुद्ध्यति"। स्मृतिः "धावनञ्च मलस्यैव मूत्रोच्चारक्षतस्य च। भुञ्जानमाचमनार्हञ्च नास्तिकं नाभिवादयेत्। जलप्रवृत्ति यत्किञ्चित् चेतसा धर्ममाचरेत्। सर्वं तन्निष्फलं याति एकहस्ताभिवादनात्"। अत्रिरप्याह "यत्किञ्चित् स्नाने स्नातं शौचं वारिणा तद्विशोधयेत्। न शुद्धिस्तु भवेत्तस्य मृत्तिकां यो न शोधयेत्"। शौचानन्तरं हारीतः "गोमयेन मृदा वा कमण्डलुं प्रक्षाल्य पूर्ववदुपस्पृश्य आदित्यं सोममग्निं वा वीक्षेत" इति। अत्र मार्जनानन्तरं स्नानमन्यत्र तथा दर्शनात्। आचमनानन्तरं सूर्य्यादिदर्शनं यथास्मरणम्"।

शौट गर्वे भ्वा॰पर॰ अक॰ सेट्। शौटति अशौटीत्। अदित् चङि न हुस्वः। [त्रि॰ वि॰को॰]

शौटीर पु॰ शौट–ईरन्। १त्यागिनि २वीरे च ३गर्वान्विते

शौटीर्य्य न॰ शौटीरस्य वीरस्य भावः ष्यञ्। १त्यागे २पराक्रमे ३गर्वे च। [शौडति अशौडीत्।

शौड गर्वे भ्वा॰ पर॰ अक॰ सेट् अदित् चङि न हुस्वः।

शौण्ड त्रि॰ शुण्डायां सुरायामभिरतः अण्। १मत्ते अमरः। २दक्षे च "सप्तमी शौण्डैः" पा॰। ७त॰। दानशौण्ड दानदक्षे।

शौण्डिक पु॰ शुण्डा सुरा पण्यमस्य ठक्। १मद्यविक्रेतरि २जातिभेदे पुंस्त्री अमरः स्त्रियां ङीष्। "ततो गान्धिकन्यायां कैवर्त्तादेव शौण्डिकः" पराशरपद्धतिः।

शौण्डिन् त्रि॰ शुण्डा इरैव अण् शौण्डं तत्पण्यमस्यास्य इनि। शौण्डिके शब्दर॰।

शौण्डी स्त्री शुण्डा करिकरस्तदाकारः अस्त्यस्या अण् गौरा॰ ङीष्। १पञ्चे २गजपिप्पल्यां च विश्वः।

शौण्डीर पु॰ शुण्डा गर्वोऽस्यास्य ईरन् स्वार्थे अण्। गर्वान्विते त्रि॰ धनञ्जयः।

शौद्र पुंस्त्री शूद्रायां द्विजातिभिरूढायां भवः अण्। द्वादशपुत्रमध्ये शूद्राजाते द्विजातिपुत्रभेदे पारस्करादौ अदाग्। स्त्रियां ङीष्। इदमर्थे अण्। २शूद्रसम्बन्धिनि त्रि॰।

शौद्रोदनि न॰ शुद्रोदनस्यापत्यम् इञ्। बोद्धसूनिभेदे अमरः

शौधिका स्त्री शोधः शोधनं मलनिरसनमस्त्यस्यां इतः ठक्। रसकर्म्मणि हेमच॰।

शौनक पु० शुनकस्यापत्यम् अण्। शुनिभेदे "शैनिभेऽनिमिषश्चक्षे ऋषयः शौनकादयः" इति भागवतम् १।१।

शौनिक पु० शुना प्राणिवधस्थानं प्रयोजनमस्य ठक्। १मांसविक्रेतरि (कसाइ) हेमच०। २मृगयायां शब्दमा०। ३मृगयाशीले च।

शौभ न० शोभायै हितम् अण्। १शोभनवासिनि पुरभेदे हरिश्चन्द्रपुरे २देवे पु० स्त्रियाम्। ३गुवाके शब्दमा०।

शौभाञ्जन पु० शोभाञ्जनस्येव स्वार्थे अण्। (सजना) वृक्षभेदे हिरूपकोषः। [शब्दमा०।

शौभिक त्रि० शोभं व्योमपुरं शिल्पमस्य ठक्। इन्द्रजालिके

शौरि पु० शूरस्य यादवभेदस्य वसुदेवस्य सूर्यस्य वा अपत्यम् इञ्। १विष्णौ २शनैश्चरे च अमरः।

शौर्य्य न० शूरस्य भावः ष्यञ्। १वीर्ये २शक्तौ ३वीरभावे च मेदि०। [ठक्। शुल्कादानाधिकृते हेमच०।

शौल्किक पु० शुल्के राजादिदेये करे तदादाने अधिकृतः

शौल्किकीय पु० शुल्किकः देयभेदः तत्र भवः ठक्। विप्रभेदे अमरः।

शौल्विक पुंस्त्री०शुल्वः ताम्रं तन्मयपात्रादि पण्यमस्य ठक्। कांस्यकारे (कासारी) जातिभेदे अमरः स्त्रियां ङीष्।

शौव न० शुनः सङ्कोचः स्वन्+अण् टिलोपः। शुनः सङ्कोचे अन्यत्र न टिलोपः शौवन इत्येव शुनः सम्बन्धिनि संक्षिप्तसा०। [भाविदिनस्थायिनि पदार्थे।

शौवस्तिक त्रि० श्वः परदिने भवः श्वस्+ठक्-तुट् च।

शौवापद त्रि० श्वापदस्येदम् अण्। श्वापदसम्बन्धिनि

शौष्कल पु० शुष्कलं शुष्कमांसं पण्यमस्य अण्। १शुष्कमांसविक्रेतरि मेदि०। तद्भक्षमस्य अण्। २शुष्कमांसभक्षके त्रि० अमरः। [तत् अद्योतीत्।

श्युत क्षरणे भ्वा० पर० अक० सेट्। द्योतति क्षरति अश्नुते

श्युत क्षरणे भ्वा० पर० अक० आमेचने सक० सेट्। श्योतति क्षरति अश्नुते अश्नोतीत्।

श्यौत पु० श्युत-अञ्। स्नानात् सेचने आधारे अमरः।

श्मन् न० शेते शी-मनिन् डिच्च। १पुंसुखे २शवे कालिकापु० अदन्तोऽयम् "सर्वे नामाः अदन्ता. स्युरित्युक्तेः।

श्मशान न० श्मानः शवाः शेरतेऽत्र शी-आनच् डिच्च। "श्मन् शब्देन शवः प्रोक्तः शानं शयनमुच्यते। निर्वचनं श्मशानार्थं सुने! शब्दार्थकोविदाः। महान्त्यपि च भूतानि प्रलये वसन्त्यस्मिन्। शेरतेऽत्र शवो भूत्वा श्मशानन्तत्तोऽभवत्" सङ्घाभूतशवस्थाने महाश्मशाने ३कालग्राम कालिकापुराक्ते ३० अ०। २शवदाहस्थाने अमरः।

श्मशानकाली स्त्री श्मशानस्था काली। कालिकामेदे।

श्मशानवासिन् पु० श्मशाने वसति वस-णिनि। १महादेवे २वटुकभैरवे च। श्मशानवासकर्तरि चण्डालादौ त्रि०।

श्मश्रु न० श्म पुंसुखं श्रूयते लक्ष्यतेऽनेन श्रु-डु। पुरुषमुखस्थे लोमसङ्घे अमरः। "केशश्मश्रुनखादयस्तदवधा भवति स्मृतिः" शु०त०।

श्मश्रुमुखी स्त्री श्मश्रु मुखे यस्याः ङीप्। १पुरुषलक्षणयुक्तायां २पोटाख्यायां स्त्रियां जटा०।

श्मश्रुल पु० श्मश्रु विद्यतेऽस्य अच्। श्मश्रुयुक्ते [चारकर्मकारके।

श्मश्रुवर्द्धक पु० श्मश्रु वर्द्धयति क्षिपति वृध-ण्वुल्। नापिते

श्मील निमेषणे भ्वा०पर०अक०सेट्। श्मीलति अश्मीलीत्।

श्यान त्रि० श्यै-क्त। सङ्कोचविशेषप्राप्ते घनीभूते "पयश्यानकर्दमान्" रघुः।

श्याम पु० श्यै-मक्। १इन्द्रदारुवृक्षे २प्रयागतीर्थस्थे वटे ३कोकिले ४मेघे ५लक्ष्मणार्थे ६हरिद्रवर्णे च। ७वह्नौ त्रि० मेदि०। ८धूम्रवर्णे ९नीलवृक्षे १०श्यामाजे राजनि०। ११अरिष्टे १२सिन्धुलवणभेदे च न० मेदि०। १३दमनवृक्षे १४गन्धद्रव्ये पु० विश्वः।

रैवतेऽपि लक्ष्मश्यामलोद्वादीनामसुराणां पर्य्यायता तत्र लक्ष्मश्यामानि कतिचित् कविकल्पलतायां दर्शितानि यथा "लक्ष्मणि केशवः सीरिचीरं चन्द्राङ्गराङ्गवः। विन्ध्याङ्गनाङ्गिवङ्गाङ्गिवनभैरवराक्षसाः। शिवकण्ठधनर्द्धेपायनरामधनञ्जयाः। यमिः द्रुपदजा काली कल्किकोद्भवमाधवराः। केशवलक्ष्मणशूरीरामपट्टविदुरलक्ष्म। विषकोषकुक्षयस्तागुरुपापतमोनिशाः। मधोपद्मटाओषियमनाधूमघोकिलाः। गोजाङ्गूलाक्षगुञ्जाख्ये कण्टः लक्ष्मनकेकिनोः। श्यामं तालतापिञ्जतिलेन्दीवरवह्नयः। रक्षावङ्गुतक्षङ्कारौ कटाक्षोऽलिः कनीनिका। नीली जम्बूफलं सुक्ष्मा काकजङ्घाकुकीर्त्तयः। भिन्नच्छाया गजाङ्गारखलान्तःकरणादयः"।

श्यामक न० श्याम+संज्ञायां कन्। १रोहिषतृणे राजनि०। २श्यामाजे (शामा) धान्यभेदे पु० हेमच०।

श्यामकण्ठ पु० श्यामः कण्ठोऽस्य। १मयूरे हेमच०। २शिवे ३नीलकण्ठविहगे च।

श्यामकन्दा स्त्री श्यामः कन्दोऽस्याः। अतिविषायां राजनि०। [राजनि०।

श्यामकाण्डा स्त्री श्यामः काण्डोऽस्याः। गण्डदूर्व्वायां

श्यामग्रन्थि स्त्री श्यामो ग्रन्थिरस्याः । गण्डदूर्वायां राजनि०

श्यामपत्त्र पु० श्यामानि पत्त्राणि यस्य । तमालवृक्षे शब्दच०

श्यामल पु० श्यामवर्णं लाति ला–क । १पिप्पले २कृष्णवर्णयुते त्रि० मेदि० । ३यमुनायां ४कटभ्यां ५जम्बौ ६कस्तूर्यांञ्च स्त्री राजनि० । ७श्यामवर्णे पु० अमरः ।

श्यामलचूडा स्त्री श्यामला चूडाऽस्याः । गुञ्जायां राजनि०

श्यामलता स्त्री कर्म० । १स्वनामख्याते शारिवौषधौ शब्दर० श्यामलस्य भावः तल् । २कृष्णवर्णे ३हरिद्रवर्णे च

श्यामलिका स्त्री श्यामलोवर्णोऽस्त्यस्याः ठन् । नीलश्यामौषधौ राजनि० ।

श्यामलेक्षु पु० कर्म० । (काशला) इक्षुभेदे राजनि० ।

श्यामसुन्दर पु० श्यामोऽपि सुन्दरः । श्रीकृष्णे "श्यामसुन्दर ! ते दासाः" इति भागवते १०स्क० २२अ०।

"ध्यायन्ति योगिनस्तत्त्वं शुद्धं ज्योतिःस्वरूपिणम् । रूपपादादिरहितं निर्गुणं प्रकृतेः परम् । वैष्णवाश्चैव मन्यन्ते तत्तत्त्वाः सूक्ष्मदर्शिनः । कुतो बभूव तज्ज्योति रहो तेजस्विनं विना । ज्योतिरभ्यन्तरे नित्यं शरीरं श्यामसुन्दरम्" ब्रह्मवै० गणपतिख० ४१ अ० ।

श्यामा स्त्री श्यै–मन् । १शारिवौषधौ २अप्रसूताङ्गनायां ३प्रियङ्गौ ४यवसनायां ५वागुजौ ६रात्रौ ७कृष्णत्रिवृति दन्त्यौ मेदि० ८गुञ्जायां ९सोमलतायां १०शुक्लायां ११कृष्णायाम् १२अम्बिकायां विश्वः । १३गुडूच्यां १५कस्तूर्यां १६वटपत्त्र्यां १७वन्द्यां १८नीलपुनर्नवायां १९पिप्पल्यां २०हरिद्रायां २१नीलदूर्वायां २२तुलस्यां २३यवबीजे २४रात्रौ २५छायायां २६कृष्णशारिकायां २७स्त्रियपायां २८वस्त्रिभेदे (शामा) राजनि० ।

"शीतकाले भवेद्ग्रीष्मे शीतला । सप्तकाञ्चनवर्णाभा सा स्त्री श्यामेति कीर्त्तिता" इत्युक्तलक्षणे २९स्त्रीविशेषे च । ३०हिमालयसुतायां दुर्गायां च "ततः सा चण्डिका देवी योगनिद्रा जगन्मयी । पूर्वलक्ष्मीरूपा जन्मार्थं मेनकां ययौ । स्वयञ्जातस्वरूपेण मेनका जठरे शिवा । सम्भूय च यथाकालं सा जज्ञौ रिव सागरात् । यस्मिन्समये देवी नवम्यां शुक्लयोगतः । अर्द्धरात्रौ समुत्पन्ना सद्यश्चैव शशिमरुखवात् । तान्तु दृष्ट्वा यथा जातां नीलोत्पलदलद्युतिम् । श्यामां सा मेनका देवी सदयाप्यतिहर्षिता" कालिकापु० ४० अ० ।

श्यामाक पु० श्यामेव कायति कै–क । (श्यामा) धान्यभेदे "श्यामाकः शोषणो रूक्षो वातलः कफपित्तहृत्" भावप्र०

श्यामाङ्ग पु० श्यामं हरिद्वर्णमङ्गमस्य । १बुधपक्षे त्रिका० । २कृष्णदेहे त्रि० स्त्रियां ङीष् । "श्यामाङ्गी विगतश्रमं सुरतम्" तन्त्रम् ।

श्यामाङ्गो स्त्री कर्म० । नीलाङ्गोक्षुपे राजनि० ।

श्यामिका स्त्री श्याम+स्वा० भावे ठन् । १श्यामत्वे २कृष्णदिमात्रिन्ये च "हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा" रघुः ।

श्याल पु० श्यै–कालन् । पत्नीभ्रातरि अमरः । स्वार्थे ठक् । श्यालिकोऽप्यत्र । [पत्नीभगिन्यां शब्दच०।

श्यालिका स्त्री श्यै–कालन वंशायां कन् । श्यत इत्यम् ।

श्याव पु० श्यै–वन् । १कृष्णगोसमिश्रवर्णे २तद्वति त्रि० अमरः

श्यावदत् त्रि० श्यावो दन्तो यस्य दन्तादेशः । श्यामवर्णदन्तयुक्ते स्त्रियां ङीष् ।

श्यावदन्त पु० कर्म० । १कृष्णावयवयुक्ते दन्ते हव० कप् । २तद्युक्ते त्रि० "तुरगाः श्यावदन्तकाः" विष्णुपु०

श्येत पु० श्यै–इतच् । १शुक्लवर्णे २तद्वति त्रि० स्त्रियां ङीप् तस्य नच । श्यैती । [द्वारा० स्त्रियां ङीष् ।

श्येतकोलक पुंस्त्री०श्येतः कोल इव । (पुँटि) मत्स्यभेदे

श्येन पुंस्त्री०श्यै–इनन् । १पक्षिभेदे (बाज) अमरः । २पाण्डुरवर्णे च २तद्वति त्रि० मेदि० ।

तत्पक्षस्य शुभाशुभसूचनं यथा "प्रदक्षिणोऽग्नेः नरं व्रजन्तो यातास्तु वामेन गताः प्रवेशे । श्येनाः शस्ताः प्रकृतस्वरास्ते शस्ताः प्रदीप्ता विकृतस्वरास्ते । श्येनो यदा दक्षिणवामपृष्ठभागेषु भास्वैः स्थितिमाटधाति । तिष्ठन् पुरस्तान्नृपतेः करोति युद्धे जयं स्वस्वरवश्च तस्याः" इति वसन्तराजः । "श्येनेनाभिचरन् यजेत" श्रुतिविहिते २यागभेदे अभिचारशब्दे दृश्यम् ।

श्येनघण्टा स्त्री श्येनी घण्टेव । दन्तीवृक्षे राजनि० ।

श्यै गतौ भ्वा०आ०सक० अनिट् । श्यायते अशयिष्ट ।

श्यैनम्माता स्त्री श्यैनस्य माता यस्य षण् डुप् च । श्येनमातरि अमरः ।

श्यो(श्या)नाक पु० श्यै–श्यो(श्या)नक । (शोणा) शुभेभेदे । "श्योनाको दीपनः पाके कटुकस्तुवरो हिमः । वाताऽतिसारश्लेष्मास्रपित्तकासमनाशनः । कटु तस्य फलं बालं रूक्षं वातकफापहम् । पक्वं कषायं मधुरं रोचनं मधु दीपनम् । गुल्मार्शःक्रिमिहृत् प्रोक्तं शुष्कवातप्रकोपणम्" भावप्र० ।

श्यक्ष वर्णे भ्वा०आ०सक० सेट् उदित् । श्यक्षते अशयिक्षत ।

श्रग गतौ भ्वा० पर० सक० सेट् इदित्। श्रङ्गति अश्रङ्गीत्।

श्रण दाने भ्वा०पर०सक०सेट्। श्रणति अश्राणीत् अश्रणीत् णित् घटादि० श्रणयति।

श्रण दाने चु०उभ०सक० सेट्। आश्रणयति ते अशिश्रणत् त।

श्रत् अव्य० श्रो-डति। श्रद्धायाम्। [अशिश्रयत् त।

श्रथ वधे क्र्या० प्रतिघाते सक० चु०उभ० सेट्। आश्रथयति ते अशश्रथत् त।

श्रथ दौर्बल्ये भ्वा०चु०उ०अक०सेट्। श्रथयति ते अशश्रथत् त।

श्रध वधे भ्वा०पर०सक० सेट्। श्रधति अश्रधीत् अश्राधीत्।

श्रध वध मोक्षे वधे च हा पु० उ० पक्षे भ्वा०पर०सक०सेट्। आश्रधयति ते श्रधति अशिश्रधत् त अश्रधीत्-अश्राधात्।

श्रध मैथिल्ये अक० तत्परत्वे सक० भ्वा० आ०सेट् इदित्। श्रन्धते अश्रन्धिष्ट।

श्रधन न० श्रध-ल्युट्। १वधे २वधे ३प्रतिघाते च।

श्रद्धा स्त्री श्रत्-धा-क्विप्। १आदरे २सुखी शब्दच०। ३सुहृद्वेदान्तवाक्यादिषु विश्वासे वेदान्तवा० ४अन्तःकरणस्य दृढचित्तप्रसादे "श्रद्धया धर्मकार्येषु सा श्रद्धेत्यभिधीयते" इति स्मृत्युक्ते धर्मकार्येषु दृढप्रत्यये च अमरः। "श्रद्धया धर्मकार्येषु तथा श्रद्धेत्युदाहृता। नास्ति श्रद्धावतस्तस्य धर्मलाभे प्रयोजनम्" इति स्मृतिः। सा त्रिविधा यथोक्तं गीतायाम् १७अ०। "त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा। सात्त्विकी राजसी चैव तामसी चेति तां शृणु। सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत!। श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः। यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः। प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः"। "श्रद्धापूतं दृढं धर्मः श्रद्धा मध्यान्तसंस्थिता। श्रद्धा नित्या प्रतिशब्दं धर्मः श्रद्धैव कीर्तितः। ऋषिमात्रस्याः कथिताः प्रधानपुरुषेश्वराः। श्रद्धामात्रेण कथिते न करेण न चक्षुषा। कायक्लेशैर्न बहुभिस्तैर्वाऽपि राशिभिः। धर्मः संप्राप्यते सूक्ष्मः श्रद्धाहीनैः सुरैरपि। श्रद्धाधर्मः परः सूक्ष्मः श्रद्धा ज्ञानं श्रुतं तपः। श्रद्धा स्वर्गश्च मोक्षश्च श्रद्धा सर्वमिदं जगत्। सर्वस्वं जीवितं यापि दद्याद्दत्तश्रद्धया यदि। नाप्नुयात्तत्फलं किञ्चित् श्रद्धादानं ततो भवेत्। एवं श्रद्धान्वयः सर्वं सर्वधर्मः प्रकीर्तितः। केशवः श्रद्धया गम्यो ध्येयः पूज्यश्च सर्वदा" वह्निपु०। देवलः "अर्थोनासादिते पात्रे श्रद्धया प्रतिपादनम्। दानमित्यभिनिर्दिष्टं व्याख्यानन्तस्य वक्ष्यते। श्रद्धिते श्राद्धकर्मणि। देवलेनास्याध्युक्ता यथा "श्रद्धाति-थानसूया च सदा श्रद्धेति कीर्तिता"। अतएव भगवद्गीतासु "श्रद्धया हुतं दत्तं तपस्तप्तं कृतञ्च यत्। असदित्युच्यते पार्थ! न च तत्प्रेत्य नेह च"। हरिव० "अस्मात्पिण्ड आद्धमधोमुखप्रतं त्वदर्थं यन्मन्त्रलिङ्गा हुतम। अश्रद्धया दत्तमसंस्कृतं हविर्भागः कल्पते तव दैत्यदुष्कृत!" शु०त०। शातातपः "श्रद्धाविधिसमायुक्तं कर्म यत् क्रियते नरैः। सुनिर्गुणेन भावेन तदानन्त्याय कल्पते" याज्ञवल्क्यः "विधिहीनं भवेद्दुष्टं श्रुतमश्रद्धया च यत्। तद्वरन्यसुरास्तस्य मूढस्य दुष्कृतात्मनः"

श्रद्धालु स्त्री श्रद्धा+आलुच्। १मृदुस्वभावायां स्त्रियां २श्रद्धायुक्ते त्रि०।

श्रन्थ ग्रन्थने वधे च वा चु० उभ० पक्षे भ्वा०पर०सक० सेट्। अन्थयति-ते अन्थति अशश्रन्थत् त अश्रन्थीत्। [न्थीत्

श्रन्थ भाषने प्रतिघाते च क्र्या०प०सक०सेट्। श्रन्थाति अश्रन्थीत्

श्रन्थ पु० अन्थ-भावे घञ्। १ग्रथने कर्त्तरि अच्। सर्वसोऽनकर्त्तरि २विष्ठायां त्रिका०।

श्रन्थन न० अन्थ-ल्युट्। ग्रन्थने।

श्रपित त्रि०चु० आ-प्रा-क्विप्-क्त सुडभावः। ईषदादिभिन्ने पक्वे मांसादौ जटा०।

श्रम तपसि, खेदे च अक० भ्वा० शमादि० पर०सेट् इदित् ङा वेट्। श्राम्यति इदित् अशमत् अश्रमीत्। श्रान्त्वा श्रमित्वा श्रान्तः। [म्याम्यसे च हेमच०।

श्रम पु० श्रम-घञ् न इट्। १तपसि २खेदे ३आयासे ४श्रमणे पु० श्रम-युच्। १दानिभेदे २भिक्षाजीविनि त्रि०। ३जटामांस्यां ४कक्षोष्ठ्यां ५शबरीभेदे ६सुदर्शनायां स्त्रियां च स्त्री मेदि०।

श्रमिन् त्रि० श्रम-इनि। श्रमयुक्ते। [दक्षे के।

श्रम्भ प्रसादे भ्वा० आ०अक०सेट्। अम्भते अश्रम्भिष्ट। अनुभ

श्रय पु० त्रि-क्यच्। आश्रये। ल्युट्। तत्रैव न० अमरः।

श्रव पु० श्रूयोऽनेन श्रु-अप्। १कर्णे २ख्यातौ च धरतः।

श्रवण न० श्रूयोऽनेन श्रु-करणे ल्युट्। १कर्णे शब्दग्राहकेन्द्रियभेदे अमरः। भावे ल्युट्। २श्रुतौ ३कर्णादिषु दार्ढ्ये ४नक्षत्रे पुंस्त्री० क्लीं० तत्र श्रवसि श्रविष्ठासमूहे क्लीवत्वमपि "श्रवार्कपाते श्रवणे यदि स्यादिति" स्मृतिः। ५सप्तकारिकाङ्गे स्त्री रत्नमा०।

श्रवणद्वादशी स्त्री श्रवणेन युक्ता द्वादशी यत्र०। "आसि भाद्रपदे शुक्ले द्वादशी श्रवणान्विता" इत्युक्तायां भाद्रशुक्लद्वादश्याम्। अतश्चन्द्रे इयम्।

श्रवणशीर्षिका स्त्री श्रवणमिव शीर्षमस्याः कप् अत इत्त्वम्। श्रवणशीर्षे राजनि०। [अमि। २कीर्त्तौ।

श्रवस् न०भूयतेऽनेन श्रु-करणे असि। १अन्ने अमरः। कर्मणि

श्रवाय्य पु० श्रु-आय्य। यज्ञियपशौ मि०कौ०। शब्दकल्पद्रुमे श्रवाय्य इति पाठकल्पनं प्रामादिकमेव।

श्रविष्ठा स्त्री श्रूयते श्रु-यप् अवः प्रकृतिरक्षत्रया मतुप् ङीप् अतिशयेन श्रवती दृष्टा मतुपो लुक्। १धनिष्ठानक्षत्रे अमरः २श्रवणनक्षत्रे च।

श्रविष्ठाज पु० श्रविष्ठायां श्रवणनक्षत्रे जायते जन-ड। बुधपक्षे त्रिका०। भगदैवतशब्दे ४६२१पृ० दृश्यम्।

श्रा विक्लृप्तौ अदा०पर०अनिट्। आति अश्रासीत्।

श्रा पाके अदा०पर०सक० अनिट् घटा०। आति अश्रासीत् अश्नाति। [२यवागूं स्त्री अमरः।

श्राण त्रि० श्रा-क्त। १इष्टादिभिन्ने पक्वे भावादौ लटा०।

श्राद्ध न० श्रद्धा-हेत्वर्थेनात्मनः अण्। "श्रद्धया दीयते यस्मात् श्राद्धं तेन निगद्यते" इत्युक्ते पित्रादिभ्यः श्रद्धया देये १द्रव्ये। अस्यार्थे अण्। २श्रद्धायुक्ते त्रि०।

श्राद्धलक्षणं तत्प्रयोजनञ्च यथाश्राद्धादिपद्धतौ हेमाद्रि श्राद्धकल्पात्समारेषाभिः प्रदर्शितं यथा

"सम्बोधनपदोपेतान् पित्रादीन् चतुर्थ्यन्तपदेनोद्दिश्य द्रव्यादिभिर्मन्त्रद्वारा श्रद्धयात्मादेर्दानं श्राद्धम्" "अचेतनस्तुः श्राद्धशब्दं कर्म प्रोवाचेति" श्राद्धविवेकधृतापस्तम्बवचनेन श्राद्धशब्दस्य कर्मसामान्यवचनतायगमात् "सकृतं व्यञ्जनाद्यं च पयोदधिघृतान्वितम्। श्रद्धया दीयते यस्मात् तेन श्राद्धं निगद्यते" इति श्राद्धतत्त्वधृतपुलस्त्यवचनेन श्रद्धाहेतुकदानरूपकर्मविशेषस्य श्राद्धपदार्थतावगमाच्च। श्राद्धमिति शब्दो वाचको यस्य तत्कर्मत्वमर्थ इति श्राद्धविवेकः। तच्चैव कर्मणि यागादाविन्द्रादीनामिव पित्रादेर्देवतात्वं तदुद्देशेन मन्त्रद्वारा द्रव्यत्यागात्। तथा च यागादौ मन्त्राहुता इन्द्रादयः अग्निमात्रेण तत्तत्स्थले आविर्भूता यजमानत्यक्तद्रव्यदर्शनेन तत्प्रीत्या तत्तत्फलं यथा साधयन्ति तथा श्राद्धेऽपि मन्त्राहुताः पित्रादयः समागताः पुत्रादित्यक्तद्रव्यभोगेन तत्प्रीत्या विशिष्टफलप्रदा इत्येव कल्पनीयम्। किन्तु सर्वो हि लोकः सकले कर्मण्येव प्रवर्त्तते नाफले। तत्र यज्ञादौ यथा देवानां फलदातृत्वमेव श्राद्धे देवानां पित्रादीनां फलदातृत्वे सम्बन्धत्वेन श्राद्धस्य सफलत्वं भवेत्तदेव नोपपद्यते। तथा हि इन्द्रादयो हि देहाद्येतना विशिष्टज्ञानक्रियाशक्तिमन्तो मन्त्रमात्राहूताः अग्निविशेषेण यत्तद्देशे आविर्भवित्वा अन्नबलि आविर्भूय च यत्तदन्नद्रव्यदर्शनमात्रेण तृप्तयो विशिष्टफलदानाय समर्थाः। नैवं पित्रादयो भवितुमर्हन्ति। ते हि स्वस्वकर्मानुसारेण नानायोनिगतयो ऽतिविप्रकृष्टदेशस्थिताः विशिष्टयज्ञिरहिताश्च कथं मन्त्रमात्राहूताः श्राद्धदेशे आगच्छेयुः। आगता वा कुतो न दह्येयुः देवानामिव तेषामतीन्द्रियत्वाभावात् दर्शनमात्रेण तृप्तेरभावाच्च। भोजनेनैव तेषां तृप्तिसम्भवाच्च भोजनमन्तरेण कथं तृप्तेयुः। अतृप्ताश्च कुतो वा फलं दद्युः। पश्चात्तिलता वा कुतो विशिष्टफलप्रदाः स्युः। अपरञ्च दत्तस्य श्राद्धादेरचेतनतया नेतृपुरुषाभावेनान्यत्र गमनासम्भवः। श्राद्धदत्तद्रव्यस्य यथापूर्वमवस्थानाच्च भोक्तृदेशगमनमित्यनुमीयते। एवञ्चेह दत्तेनान्नेनान्यत्र स्थितानां भोगस्तु नैव सम्भवी। पार्वणश्राद्धेन श्राद्धान्नस्य भोजनात्पित्रादितृप्तिसम्भवः भोगतृप्त्योः सामानाधिकरण्यनियमात्। किञ्च देवयोनिगतानामस्मदन्नमश्नतां मानुषयोन्यन्नेन कथं तृप्तिः कथं वा पशुयोनिगतानां तृणाहारयोग्यानां तेन तृप्तिः। तेषां पित्रादिभावभेदेऽपि फलदातृत्वासम्भवस्तु विशिष्टयज्ञैरभावात् सर्वानुभवसिद्धः। एतेन "यथा गोषु प्रनष्टो वै वत्सो विन्दति मातरम्। एवं श्राद्धेऽन्नमुद्दिष्टं मन्त्रः प्रापयते पितॄन्। नाममात्रं पितृस्थान्तु प्रापकं हव्यकव्ययोः। नाममन्त्रैस्तयोर्हेयो भवान्तरगतानपि। प्राणिनः प्रीणयन्त्येते तदाहारत्वमागताः। दैवो वापि पिता ज्ञातः शुभकर्मानुसारतः। श्राद्धान्नमश्नतं भूत्वा देवत्वेऽप्यनुगच्छति। दैत्यत्वे भोग्यरूपेण पशुत्वे च तृणं भवेत्। श्राद्धान्नं वायुरूपेण नागत्वेऽप्यनुगच्छति। पानं भवति यक्षत्वे भक्षत्वं च तथामिषम्। दनुजत्वे तथा मांसं प्रेतत्वे रुधिरोदकम्। मानुषत्वेऽन्नपानादि नानाभोगरसं तथेति च" हेमाद्रिश्राद्धकल्पादिधृतमार्कण्डेयवचनैरिह दत्तश्राद्धादेरेव मन्त्रशक्त्या विप्रकृष्टदेशगमनं पितृप्रायोनियोग्यान्नतादिरूपेण परिणामश्च कल्प्यते इत्यपि न विचारसहं अचेतनानामपि मन्त्राद्यैः चेतनधर्मकल्पनापि तदेव साधीयसी स्यात् यदि दत्तश्राद्धादेरिह यथापूर्वमवस्थितिर्न स्यात् स्याच्च पूर्वरूपान्यथाभावः। तथा च एवमादिवचनानां सुस्वर्ग्यवाटपरतायां अग्रे दर्शयिष्यमाणत्वाच्छ्राद्धिकल्पना। किञ्च पात्र-

प्रेक्षणेन भोगादिना विनष्टस्य वस्तुनः कथं स्थानान्तरगमनं कथं वा तत्तदाहारताद्रूप्येण परिणामः धर्मिणि सत्येव स्थानान्तरगमनादिधर्मयोर्न विनष्टत्वात्। श्राद्धस्य कथं प्रयोजनत्वमित्येवं स्थिते। उच्यते। ब्राह्मणादिसम्प्रदानक्रियाया इव श्राद्धकर्मण एव स्वजन्यपुण्यद्वारा विशिष्टफलजनकतया तत्र च कालान्तरभावितत्तत्फलदानाय तत्कर्मसाध्यिषः परमेश्वरस्यैव तत्साधनत्वम्। अतएव भगवद्गीतायाम् "यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति। तस्यतस्याचलां श्रद्धां तामेव विदधाम्यहम्। स तया श्रद्धया युक्तस्तस्याराधनमीहते। लभते च ततः कामान् मयैव विहितान् हि तान्" इति भक्तानां तत्तदिष्टोत्पादनस्य स्वकर्तृकत्वं भगवतोक्तम्। युक्तश्चैतत् स्तुतिस्मृत्योरीश्वरानुग्राह्यरूपतया तत्तदर्थानुष्ठानेन तदाज्ञाप्रतिपालने ईश्वरस्य सन्तोषरूपा तत्प्रीतत्वाभीष्टलाभः। तथैवोक्तं गीतायाम् "स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः। स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु। यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्। स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः" इति। स्वकर्मणा स्ववर्णाश्रमविहितकर्मानुष्ठानेन, तम् परमेश्वरम् अभ्यर्च्य तदाज्ञाप्रतिपालनेन सन्तोष्य तत्सन्तोषेण च तत्तत्तां सिद्धिम् तत्तदभीष्टसिद्धिं लभते इति तदर्थः। अस्मिन् पक्षे च पित्रादीनां श्राद्धाद्यादेवं न स्थानान्तरगमनतुल्यता। अथ वा देवदत्तादिशब्दस्य यथा न केवलं देहमात्रं, न वा जीवमात्रमर्थः किन्तु तत्तद्देहाभिमानी जीव एवार्थः। तथा पित्रादिशब्दस्य तत्तादृक्देहाभिमानी केवलं जीवोऽपि नार्थः किन्तु वसुरुद्रादित्यदेवाधिष्ठिततादृशजीव एवार्थः, "वसवः पितरो रुद्रा रुद्राः पितामहाः। प्रपितामहाश्चादित्याः श्रुतिरेषा सनातनी। प्रेतान्नहि यत् कर्म क्रियते श्राद्धमैरिह। तृप्यन्ति देवतास्तेन न प्रेताः पितरः स्मृताः"। इति श्राद्धतत्तत्पुरुषदेवतत्वकथने पित्रादिपदानां पारिभाषिकत्वोक्तेः। प्रेताः मृताः न पितरः न केवलं पितृपदाभिधेयाः किन्तु तदधिष्ठितवसव एव पितृपदाभिधेयाश्च एव तृप्यन्तीत्यर्थः। अतएव श्राद्धकाले पित्रादीनां तेन तेन रूपेण ध्येयतादेहाभिधानमानोपपद्यते। एवञ्च यज्ञादिदेवानामिन्द्रादिवत् विशिष्टयज्ञिश्रावणसम्बन्धतया मन्त्रशब्दाद्वाहने यानादाविन्द्रादिदागमनस्मरणाच्च यज्ञदृष्यदर्शनमात्रेण तृप्तिः, "न वै देवा अश्नन्ति पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्तीति" छान्दोग्यवाक्यात्। अतएव भगवद्गीतायाम् "सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः। अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्। देवान् भावयतानेन ते देवा भावयन्तु वः। परस्परं भावयन्तः श्रेयः परमवाप्स्यथेति" प्रजाहुतयज्ञेन तृप्तानां देवानां यजमानफलदातृत्वम् प्रजाः प्रति प्रजापतिवचनत्वेनोक्तम्। अनेन यज्ञेन देवान् भावयत तर्पयत ते च यज्ञतर्पिता देवाः वः युष्मान् भावयन्तु तर्पयन्त्वित्यर्थः। यज्ञपदञ्च कर्ममात्रोपलक्षणम्। एवञ्च यथा कश्चित् गर्भिणी स्वहृदा दत्तं दोहदं भुञ्जाना स्वयं तृप्यति स्वात्मानं गर्भञ्च तर्पयन्ती दोहददातारमप्युपकरोति तथा यज्ञादयोऽपि श्राद्धादर्शनमात्रतृप्ताः स्वाधिष्ठितपित्रादिपुरुषान् तर्पयन्तः श्राद्धकर्तुरपीष्टदातारो भवन्ति। प्राणुक्तवचनजातेष्वपि मन्त्रयज्ञप्राप्त्यादेर्देशान्तरगमनकल्पनस्यापि स्वस्वकर्मानुसारेण पश्वादिभावापन्नपित्रादीनां तदुपभोगयोग्यान्नाद्यादिरूपतृप्तिर्वस्त्रादिवत् तद्विने भवतीत्येतत्सरलत्वात्प्रयासापरत्वयोः कल्पने न वैयर्थ्यम्। यत्र च शास्त्राविसरणेन पित्रादीनां स्वरूपम् तत्र यज्ञादिमात्रस्यैव तृप्तिर्न विशिष्टस्य, विशेषणस्यासत्त्वे विशेष्यस्यैव विशिष्टकारित्वात् कृष्णत्वविशिष्टस्य नरस्य कृष्णत्वापगमेऽपि मनुष्यत्वकर्मकारित्वाच्चाकृतिवत्। तथा च त एव तृप्ता विशिष्टफलं ददतीति सिद्धं श्राद्धस्यार्थवत्ता। श्राद्धभेदाश्च विष्णुमित्राद्युक्ताः प्रा॰वि॰ दर्शिता यथा "नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धं सपिण्डनम्। पार्वणञ्चेति विज्ञेयं गोष्ठ्यां शुद्ध्यर्थमष्टमम्। कर्माङ्गं नवमं प्रोक्तं दैविकं दशमं स्मृतम्। यात्रास्वेकादशं प्रोक्तं पुष्ट्यर्थं द्वादशं स्मृतम्"। एतद्विष्णुपुराणे विस्तृतम्। यथा "अङ्गस्पर्शनि यत् श्राद्धं तन्नित्यमभिधीयते। दैवैर्वैविहीनं तदयज्ञायुदकेन तु। एकोद्दिष्टन्तु यत् श्राद्धं तत्तैत्तिरीयमुच्यते। तदप्यदैवं कर्त्तव्यमयुग्मानामयोद्दिशात्। कामाय तु कृतं काम्यमभिप्रेतार्थसिद्धये। पार्वणेन विधानेन तदप्युक्तं नराधिप!। वृद्धौ यत् क्रियते श्राद्धं वृद्धिश्राद्धं तदुच्यते। सर्वं प्रदक्षिणं कार्यं पूर्वाह्णे तूपवीतिना। मन्त्रोदकतिलैर्युक्तं कुर्यात् पात्रचतुष्टयम्। सव्यांसं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत्। ये समाना इति द्वाभ्यामेतच्छ्रेयं

पर्णिखनम्। निम्बेन हस्तं शेषं क्षारैकोद्दिष्टं क्षिपेत्। अमावास्यां यत् क्रियते तत् पार्वणमुदाहृतम्। क्रियते पर्वणि यत्तत् पार्वणमिति च स्थितिः। गोष्ठ्यां यत् क्रियते श्राद्धं गोष्ठ्याद्धं तदुच्यते। बहूनां विदुषां यत्तत्तुष्ट्यर्थं पितृप्रवे। क्रियते शुद्धये यत्तु ब्राह्मणानां भोजनम्। शुद्ध्यर्थमिति तत् प्रोक्तं वैनतेय! मनीषिभिः। निष्कारणे शोभने च शोभनोदयने तथा। पुत्रे पुंसवने चैव श्राद्धं कर्माङ्गमेव च। देवानुद्दिश्य यत् श्राद्धं तद्दैविकमिहोच्यते। हविष्येण विधिदृष्टेन सप्तम्यादिषु वत्सरः। गच्छन् देशान्तरं यत्तु श्राद्धं कुर्यात्तु वर्षिया। यात्रार्थमिति तत् प्रोक्तं प्रवेशे च न संशयः। शरीरोपचये श्राद्धमन्नोपचय एव च। पुष्ट्यर्थमेतद्विप्रेभ्यो मौपचारिकमुच्यते"।

हरः "नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धं तथैव च। पार्वणञ्चेति मनुना श्राद्धं पञ्चविधं स्मृतम्"। कूर्मपुराणे "अकरणे नित्यं स्यात् काम्यं नैमित्तिकं पुनः। एकोद्दिष्टन्तु पित्रेयं वृद्धिश्राद्धन्तु पार्वणम्। एतत् पञ्चविधं श्राद्धं मनुना परिकीर्त्तितम्"। स्वरूपतो द्वादशविधत्वेऽपि पञ्चविधविधानोपाधिभेदात् पञ्चविधत्वं गोष्ठीश्राद्धादीनां पार्वणाङ्गत्वद्वृद्धिश्राद्धे रूढ्यधिकारात् एतेषामप्राप्तावेव दृढ्यभिप्रायः। सपिण्डीकरणश्राद्धं यतः पार्वणविधानादेवतैकोद्दिष्टविधेरभावाच्चत्वात् न पृथक्त्वं नित्यपार्वणात् काम्यस्य देवतामेदात् पृथग्विधानम्। वस्तुतः प्रयोगार्थमेव द्वादशविधत्वम्। युगादिश्राद्धानामपि सत्त्वात्। वस्तु मत्स्यपुराणे "नित्यं नैमित्तिकं काम्यं त्रिविधं श्राद्धमुच्यते"। इति तत्र नित्यपदमुपलक्षणार्थमेव नैमित्तिकपदमात्रस्तुकनिमित्तोत्पन्नत्वेन पार्वणैकोद्दिष्टयोः परिग्रहार्थम्। काम्यपदं तदफलत्वेन तिथिश्राद्धादीनामप्युदयस्य च सङ्ग्रहार्थमित्यविरोधः। विष्णुना तु नित्यकाम्यरूपतया द्वैविध्यं वक्ष्यते तत्र नित्यपदमावश्यकतया पार्वणैकोद्दिष्टयोरपि परिग्रहार्थम्। काम्यपदमनावश्यकार्थं सर्वेभिलषितोपाधिभेदादविरुद्धम्"।

श्राद्धे विहिता देशाः प्रा० वि० दर्शिता यथा तत्र विष्णुः "पुष्करेष्वयजं श्राद्धं अपरोक्षमतपांसि च"। "पुष्करे स्नातमात्रस्तु सर्वपापेभ्यः पूतो भवति" इत्यभिप्राय "एवमन्येषु तीर्थेषु सरित्सरःसङ्गमेषु प्रभवेषु पुलिनेषु निकुञ्जेषु प्रस्रवेषु उपवनेषु गोष्ठयनेषु गोष्ठेषु मनोज्ञेषु च" आह च। प्रभवोऽत्र नदीनादुत्पत्तिदेशः सरित्तु सङ्गमेषु चेति प्रस्तुत्य प्रभवेत्यभिधानात्। पुलिनं नदीतीरोत्थितप्रदेशः। निकुञ्जोन्नतादिवेष्टितप्रदेशः प्रस्रवणं निर्झरः। उपवनं वृक्षवाटिका मनोज्ञं रमणीयम्। देवलः "श्राद्धस्य पूजितो देशो मया गङ्गा सरस्वती। कुरुक्षेत्रं प्रयागश्च गिरिपृष्ठाश्च। नदीतटेषु तीर्थेषु शैलेषु पुलिनेषु च। विविक्तेषु च तृप्यन्ति दत्तेनेह पितामहाः"। विविक्तं विजनम्। हरिस्मृतिः "काङ्क्षन्ति पितरः पुत्रादरकापातभीरवः। मया यास्यति यः कश्चित् सोऽस्मान् सन्तारयिष्यति। करिष्यति इयोत्सर्गमित्यादूचुं तथैव च। पालयिष्यति यार्द्धे श्राद्धं दास्यति चात्यहम्। गयायां धर्मपृष्ठे च सरसि ब्रह्मणस्तथा। गयाशीर्षेऽक्षयवटे पितॄणां दत्तमक्षयम्। धर्मारण्यं धर्मपृष्ठं धेनुकारण्यमेव च। एतानि पितृतीर्थानि संज्ञानु विमतिस्तरेत्"। गयासंपादाय गयास्थानविशेषोपन्यासोऽधिकफलार्थः। एवं श्राद्धदेशभेदेन कथिता नानादेशीयतीर्थविशेषस्वरूपविशेषास्तद्देशनिवासिभ्योऽवगन्तव्याः। अत्र पुष्करेष्वयजं श्राद्धमित्यादिविष्णुवाक्यैः सामान्यतस्तीर्थप्राप्तिनिमित्तेऽमावास्यादिश्राद्धे च प्राप्ते पुष्करादिदेशास्तुच्छफलश्राद्धविधिः "गोदोहेनापः प्रयतेत् पशुकामस्येति" वत् नतु विशिष्टश्राद्धान्तरविधानं विधिगौरवापत्तेः अतस्तत्र तु "सोमेन यजेतेत्यादौ" तथा। तथा मनुः "शुचिं देशं विविक्तञ्च गोमयेनोपलेपयेत्। दक्षिणाप्रवणञ्चैव प्रयत्नेनोपपादयेत्। अरण्येषु चोञ्छेषु नदीतीरेषु चैव हि। विविक्तेषु च तृप्यन्ति दत्तेन पितरः सदा"। अशुचिमविविक्तमदक्षिणाप्रवणं यत्नतः शुचित्वादिना उपपादयेत्। विविक्तं विजनं चोञ्छेषु मनोज्ञेषु विविक्तेषु वनादिषु। यमः "दक्षिणाप्रवणं स्निग्धं विविक्तं शुभलक्षणम्। शुचिदेशं परीक्ष्यादौ गोमयेनोपलेपयेत्। आरण्येषु विविक्तेषु तीर्थेषु च नदीषु च। विविक्तेषु च तृप्यन्ति देशेषु पितरः सदा। पारक्ये भूमिभागे तु पितॄणां निर्वपेत्तु यः। तद्भूस्वामिभिरिष्टेभिः श्राद्धकर्म विहन्यते। तस्मात् श्राद्धानि देयानि पुण्येष्वायतनेषु च। नदीतीरेषु तीर्थेषु क्षेत्रभूमौ तु यत्नतः। उपशल्यनितम्बेषु तथा पर्वतसानुषु। गोमयेनोपलिप्तेषु विविक्तेषु वनेषु च। स्निग्धं स्निग्धं विविक्तेषु देशेषु स्वभावतो वनादिषु। उपशल्यमत्र पर्वतान्तिकम्"।

श्राद्धनिन्दितदेशास्तत्रोक्ता यथा विष्णु "न म्लेच्छविषये

श्राद्धं कृत्वान्न च गच्छेत्तथा । चातुर्वर्ण्यं व्यवस्थानं यस्मिन् देशे न विद्यते । तं त्यक्त्वादेशं ज्ञानीयादाद्यावर्त्तमतः परम्" । वायुपुराणे "त्रिगव्यूतिर्भवेद्देशं सर्वं ह्यादशयोजनम् । उत्तरेण महानद्या दक्षिणेन तु कौकटात् । देशस्तेषूद्भवोनाम श्राद्धकर्मणि गर्हितः । पारस्करान् कलिङ्गांश्च सिन्धोरुत्तरमेव च । प्रनष्टाग्निमधर्मांश्च देशान्विद्यात् प्रयत्नतः" । पारस्करादेशविशेषाः । कौकटोमगधः । सिन्धुर्नदीविशेषः । ब्रह्मपुराणे "परकीयगृहे यस्तु स्नानं पित्रर्थमाचरेत्ततः । तद्भूमिस्वामिनस्तस्य हरन्ति पितरो बलात् । अयमारभ्यतत्तस्मै दद्यात्कूपं सजीवकम्" । गृह इति भूमागमात्रोपलक्षणं "पितॄणां भूमिभागे च" इति यमवचनात् खभूम्यभावे हि श्राद्धमित्याह अयमारभ्यमिति श्राद्धीयद्रव्यमुद्दिश्येत्यर्थः तद्भूस्वामिस्वामिभ्यः तत्सङ्कल्प दैयं जीवतां स्वामिनां मृत्वा वा देयम । यमः "कटभ्यः पर्वताः पुण्या नद्यस्तीर्थानि यानि च । सर्वेषामेव स्वामिकान्याहुर्न हि तेषु परिग्रहः" । स्वाम्यभावे हेतुमाह न हि तेषामिति । परिग्रहो दानविक्रयधारादिव्यवहारविनियोगलक्षणः । तथा "कृष्णं कृमियुतं छिन्नं संकीर्णानिष्टगन्धिकम् । देशत्यक्तमनिष्टञ्च वर्जयेत् श्राद्धकर्मणि" । कृष्णं घृणियुतं छिन्नं पक्षिघस्रमनिष्टगन्धम् अतएवाभिगन्धम् अनिष्टगन्धं प्रतिकूलगन्धम्" ।

श्राद्धदेव पु० श्राद्धेऽग्रानां पितॄणां देवः श्राक० । १यमे अमरः । २वैवस्वतमनौ हरिव० १५अ० ।

श्राद्धदेवता स्त्री श्राद्धे देवता लक्ष्यद्रव्यस्योद्देश्या । "पितरः श्राद्धदेवता" इति स्मृत्युक्तेषु पितृषु ।

श्राद्धशाक न० श्राद्धयोग्यं शाकम् । शाकशाके भावप्र० ।

श्राद्धिक त्रि० श्राद्धे देयं, श्राद्धं तद्द्रव्यं भक्षत्येनमाक्रोश वा ठन् । १श्राद्धदेये भक्ष्ये २श्राद्धदेयद्रव्यभोक्तरि च ।

श्राद्धिन् त्रि० श्राद्धं तद्द्रव्यं भक्षत्येनमस्त्यस्य इनि । श्राद्धदेयान्नभोक्तरि त्रि०कौ० । [हेमच० । भावे क्त । ३अमेन० ।

श्रान्त त्रि० श्रम-क्त । १श्रमयुक्ते २श्रान्ते ३जितेन्द्रिये च

श्रान्तसंवाह न० श्रान्तस्य श्रमस्य संवाहः दूरीकरणम् । पादाक्षसादिना श्रमनिवारणे । [भर० त० ।

श्राम नन्तादौ चु०उ० श्रम०सक० सेट् । श्रामयति ते अश्रमत् ।

श्राम पु० श्रम-घञ् । १क्लेशे २श्रमजन्ये ३श्रमे च मेदि० ।

श्रावक पु०त्रि० श्रु-ण्वुल् । १श्रवणकर्त्तरि २श्राद्धसंनिधिस्थे सूनिमेदे १काके पुंस्त्री० त्रिका० ।

श्रावण पु० श्रवणेन युक्ता पौर्णमासी श्रावणी सास्मिन् मासे अण् । वैशाखादिषु चतुर्थे श्रावणीयुक्ते चान्द्रे १मासे २तथामूते पक्षे श्रवणनक्षत्रेण पर्वोत्तकाले उदयास्तसम्बन्धात् वार्क्षपत्ये ३वर्षभेदे च । गुरुवर्षशब्दे २६१८ पृ० दृश्यम् उपचारात् कर्कटस्थरविके सौरे ४मासे ५दासखण्डे च मेदि० । श्रवणेन कर्मणा निर्वृत्तः अण् । ६कर्मण्यर्थे प्रत्यक्षभेदे श्रवणनक्षत्रेण युक्ता पौर्णमासी अण् ङीप् । ७चान्द्रश्रावणमासीयपौर्णमास्यां स्त्री । सा च (शुक्लकृष्णि) दृष्टभेदे राजनि० । हृदध्याकीर्णत्वे मेदि० टाप् । १०सस्यतिक्ताद्यत्वे भावप्र० ङीप् । "सस्यतिक्ता कटुः पाके वीर्योष्णा मधुरा लघुः । मेध्याग्नदीपनीरुच्या कृमिदोषविषापहा" । द्वीपदारुण्यस्कारश्लोकमेदोगुदार्त्तिजित् । महाशुण्ठी च तत्तुल्या गुणैरुक्ता महर्षिभिः" भावप्र० ।

श्रावणिक पु० श्रावणी श्रवणनक्षत्रयुक्ता पूर्णिमाऽस्त्यस्मिन् मासे ठन् । १चान्द्रश्रावणमासे अमरः । २तथामूते पक्षे

श्रावन्ती स्त्री श्रु-झिच् पृषो० ङीप् । धर्मपत्तनाख्ये नगरीभेदे त्रिका० ।

श्रि सेवने भ्वा०उभ० सक० सेट् । श्रयति ते श्रयिष्यति ते ।

श्रित त्रि० श्रि-क्त । १सेविते २श्रयान्विते च ।

श्रिय दाहे भ्वा०पर०स० सेट् क्षा वेट् । श्रेयति अश्रेयीत ।

श्री पाके क्र्या०उ०सक०सेट् । श्रीणाति-ते अश्रायीत् अश्रायिष्ट

श्री स्त्री श्रि-क्विप् नि० । १लक्ष्म्यां २लक्ष्म्यां अमरः । ३शोभायां ४शोभायां पूर्वेश्वरचनायां ६सरलवृक्षे ७धर्मांशकात्मेषु ८सप्तमतौ ९प्रकारे १०उपकरणे ११कुबेरे १२विभूतौ मेदि० । १३अधिकारे १४प्रभायां १५ओषधौ धरणिः । १६हरौ १७शिवे शब्दर० १८शमने १९विल्ववृक्षे च २०त्रिदिनाभोषधौ राजनि० "देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्रात्रिदेवताम् । सिद्धं सिद्धाधिकारांश्च श्रीपूर्वं यस्तदीरयेत्" इत्युक्ते देवादीनां २१नामोच्चारणादौ पदाधिभेदे च "सिद्धाधिकारान् स्वर्गगामित्वादिना सिद्धोऽधिकारो येषां नराणां तान् सिद्धाधिकारान् । तेन जीवतां श्रीशब्दादित्वं न मृतानामिति" संस्कारतः रघु० । २२रागभेदे पु० । श्रीरागस्य सुन्दरस्वरूपादिः देवमते ऋषभाङ्गे गेयः । तस्य पत्नी रागिण्यौ मालश्रीः मारवी धनाश्रीः वसन्तरागिणी आशाचरी संगीतदा० ।

पत्ने श्रीशब्दन्यासस्संख्याभेदाः पत्रशब्दे ४३२०पृ० दृश्याः

श्रीकण्ठ पु०श्रीः श्रीभा कण्ठेऽस्य । १शिवे अमरः सर्वतः श्वेतस्य

कण्ठे लक्ष्मीविषयसञ्चिकर्षे शोभाधिक्यात्तद्वत्वम् । २कृ-त्तिनाडीरन्ध्र उत्तरपश्चिमस्थे कृष्णाङ्गुलाख्ये देवे च हेमच०

श्रीकण्ठपदलाञ्छन पु० भस्मभूतौ शब्दमाला ।

श्रीकन्द स्त्री श्रीः शोभा तद्वान् युक्तः कन्दोऽस्याः । वन्द्यां कर्कट्यां राजनि० ।

श्रीकर न०श्रियं शोभां करोति क-अच् । १रक्षोत्पले त्रिका० २विष्णौ पु० ३दायनिबन्धभेदकारके पण्डितभेदे च पु० ४शोभाकारके त्रि० । [शब्दच० ।

श्रीकरण न०श्रीयुक्तं क्रियतेऽनेन वि-कृ-ल्युट् । लेखन्यां

श्रीकान्त पु० ६त० । विष्णौ शब्दच० श्रीनाथश्रीपत्यादयोऽप्यत्र । श्रीपतिस्तु भूमिपाले च मेदि० ।

श्रीकारिन् पु०श्रियं करोति कृ-णिनि । जङ्गमे महाजने १स्वल्पभेदे राजनि० । २शोभाकारिणि त्रि० स्त्रियां ङीप् ।

श्रीखण्ड न०श्रियः शोभायाः खण्ड इव यत्र । चन्दने त्रिका०

श्रीगर्भ पु० श्रीर्गर्भेऽस्य । १विष्णौ त्रिका० २खड्गे च "श्रीगर्भो विजयश्चैव" इति खड्गनामाष्टकम् ।

श्रीगृह पु० श्रियः गृह इव यत्र । पक्षिणां पानीयशालायां हारा० । [जटा० ।

श्रीघन पु०श्रिया युक्तो घनः । १मुस्तभेदे अमरः । २दन्ति न०

श्रीचक्र न० श्रियाः चक्रं यन्त्रभेदः । "बिन्दुत्रिकोणवसु-कोणदशारयुग्मं मन्वस्रनागदलसत्कृतभोड्षारम् । वृत्तत्रयञ्च धरणीसदनत्रयञ्च श्रीचक्रमेतदुदितं परदेवतायाः" इति तन्त्रोक्ते त्रिपुरासुन्दरीपूजाङ्गे यन्त्रभेदे । [यन्त्र ।

श्रीज पु० श्रियो जायते जन-ड । कामदेवे श्रीनन्दनादयोऽ-

श्रीताल पु० श्रीयुक्तस्तालः शाक० । तालवृक्षभेदे शब्दभेदे राजनि० । [दातरि त्रि० ।

श्रीद पु० श्रियं धनं ददाति दा-क । १कुबेरे अमरः २धन-

श्रीधर पु० श्रियं धरति धृ-अच् । १विष्णौ "अतिलुठं हि-यश्चाङ्गे वनमालाविभूषितम् । श्रीधरं देवि ! विज्ञेयम्" इत्युक्ते २शालग्रामशर्करभेदे न० ।

श्रीनिकेतन पु० श्रियं निकेतयति नितरां वासयति नि+कित-णिच्-ल्यु । १विष्णौ शब्दच० ६त० । २श्रीवृक्षे निवासे न० । [त्रि० ६त० । २श्रिय आलये च ।

श्रीनिवास पु० निवसत्यस्मिन् नि+वस-घञ् ६त० । १विष्णौ

श्रीपञ्चमी स्त्री श्रियः पूजार्हः पञ्चमी शाक० । माघशुक्ल-पञ्चम्याम् । माघोपक्रमे "पञ्चम्यां वरदा शुक्ला तत्र गौरी सुपूजिता सौभाग्यमतुलं कुर्यात् पञ्चम्यां श्रीरपि श्रियम्" । वरप्रदोपूजादिनेऽनध्यायश्च गौडाचारः । अत्र श्रीपञ्च-म्यामारभ्य प्रतिमासं पञ्चदशमासं श्रीपञ्चमीव्रतं स्त्रियः कुर्वन्ति तत्प्रमाणं संवत्सरकौसदीष्टतमञ्चपु० । [द्वारा० ।

श्रीपति पु० श्रीयुक्तः पत्याः यच् समा० शाक० । राजपर्णे

श्रीपर्ण न० श्रीर्लक्ष्म्याः पर्णं दलेऽस्य । १पद्मे श्रीयुक्तं पर्ण-मस्य । २अग्निमन्थवृक्षे पु० मेदि० ।

श्रीपर्णिका स्त्री श्रीयुक्तं पर्णमस्याः संज्ञायां कन् यत इत्त्वम् । कट्फलवृक्षे अमरः ।

श्रीपर्णी स्त्री श्रीयुक्तानि पर्णान्यस्याः ङीप् । १शाल्मा-रीवृक्षे अमरः । २कट्फलवृक्षे मेदि० ३शालपर्णीवृक्षे ४कठतरे हेमच० । ५अग्निमन्थवृक्षे राजनि० ।

श्रीपिष्ट पु० श्रियै शोभायै पिष्यते पिष-क्त । सरलवृक्षे रा-जनि० । [२ब्रह्मैःअवसि अथे त्रिका० ३चन्द्रे च ।

श्रीपुत्र पु०६त० । १कामदेवे श्रियः पुत्रो भ्राता सहजत्वात् ।

श्रीपुष्प न० श्रीयुक्तं पुष्पम् शाक० । १खदिरे राजनि० । २पद्मकाष्ठे रत्नमाला ।

श्रीफल पु० श्रीयुक्तं फलमस्य । १बिल्ववृक्षे अमरः । २रा-जादन्याच्च राजनि० । ३नीलां ४क्षुद्रकारवेल्ल्यां स्त्री राजनि० टाप् । स्वार्थे क यत इत्त्वम् । ५तत्सार्थे रा-जनि० । ६आमलक्यां मेदि० स्त्री गौरा० ङीष् ।

श्रीभद्रा स्त्री श्रीयुक्तं भद्रमस्याः । भद्रवृक्षे शब्दच० ।

श्रीभागवत न० श्रीमत् भागवतम् शाक० । अष्टादशपुराणेषु मध्ये द्वादशस्कन्धयुक्ते अष्टादशसाहस्रे व्यासप्रणीते पुराणे भागवतशब्द इयत्रम् । श्रीमद्भागवतमध्यम् "श्रीम-द्भागवते महामुनिकृते" भाग० १।१। [राजनि० २चन्द्रे च ।

श्रीभ्राट पु० श्रियः लक्ष्म्याः भ्राता अनुजत्वात् । १अग्नौ

श्रीमत् पु० श्रीरस्त्यस्य मतुप् । १तिलवृक्षे अमरः । २अश्व-त्थवृक्षे राजनि० । ३विष्णौ शब्दर० । ४शिवे त्रिका० । ५कुबेरे शब्दच० । ६श्रीमायुक्ते ऊर्ध्वलिङ्गे च त्रि० स्त्रियां ङीप् । सा च दशाधिकायां सुखालतायामपि पृथ्वी० राधिकायाम् नारदपञ्चरात्रम् ।

श्रीमलापहा स्त्री श्रिया श्रीमया मलमपहन्ति अप+हन-ड । धूम्रवल्लायां लतायां राजनि० ।

श्रीमस्तक पु०श्रीयुक्तं मस्तकमस्य । रसोने (रसुन)राजनि०

श्रीमूर्त्ति स्त्री श्रीपूर्वकमूर्त्तयोऽस्या मूर्त्तेः । देवताप्रतिमायां राजनि० । विष्णोर्मूर्त्तिभेदाश्चतुर्विंशतिर्मूर्त्तिशब्दे दर्शिताः । श्रीमूर्त्तयश्चाष्टविधाः साम्प्र० ११खण्डे दर्शिता यथा "मैत्री दारुमयी लौही लेप्या लेख्या च मैक्षती । मनो-मयी मणिमयी प्रतिमाष्टविधा स्मृता । शङ्खचक्रेति हि-

विधा प्रतिष्ठा लोपमन्दिरम्। उद्घाघाङ्हने न क्तः स्थिरावासङ्घवार्चने। अस्थिरायां विकल्पः स्यात् स्थिरे तु भवेत् इयम्। स्वपनं सर्विशेषावासन्यत्र परिमार्जनम्। गोपालमन्त्राहितत्वात् तच्छोमूर्त्तिरपेक्षिता। तथापि वैष्णवमौत्वे लेख्याः श्रीमूर्त्तयोऽखिलाः"।

श्रीरङ्गपत्तन न०श्रिया रङ्गस्य पत्तनमिव। दक्षिणस्थे देशभेदे

श्रीरस पु० श्रिये रसोऽस्य। श्रीवेदे गन्धद्रव्ये राजनि०।

श्रीराम पु० श्रीशब्दयुक्तो रामः। दशरथात्मजे भगवतारभेदे शब्दच०। [च अमरः।

श्रील त्रि० श्री+अस्यर्थे लच्। १शोभायुक्ते २सम्पदादियुक्ते

श्रीलता स्त्री श्रीयुक्ता लता। महाज्योतिष्मत्यां राजनि०।

श्रीवत्स पु० वदति महत्त्वं वद-स श्रीयुक्तो वत्सः। १वक्षस्थे महत्त्वलक्षणश्वेतरोमावर्त्तविशेषे। स अस्यास्त्यच्। २विष्णौ ३मेषच०। ४सुरद्रुमभेदे त्रिका०।

श्रीवत्सक पु० श्रीवत्सः चिह्नमेदः तेन कायति कै-क। हृदयस्थश्वेतलोमयुक्ते अश्वभेदे।

श्रीवत्सभृत् पु० श्रीवत्सं बिभर्त्ति भृ-क्विप्। विष्णौ त्रिकाण्ड०

श्रीवत्सलाञ्छन पु० श्रीवत्सोलाञ्छनं यस्य। विष्णौ अमरः श्रीवत्साङ्कादयोऽस्य। [वराहावतारे त्रिका०।

श्रीवराह पु० श्रिया युक्तो वराहः। विष्णोर्दशावतारेषु

श्रीवल्ली स्त्री श्रीयुक्ता वल्ली। कण्टकप्रधानवृक्षभेदे राजनि०।

श्रीवाटी स्त्री श्रिया वाटीव। नागवल्लीभेदे राजनि०।

श्रीवारक पु० श्रियं वारयति कामयते ण्वुल्। सितावरणाके राजनि०।

श्रीवास पु० श्रिये वासयति वस-णिच-अच्। सरलद्रुसरसे (टारपिन)। "श्रीवासः सरलः पूतिः कुन्दुरुर्नखिपर्णकम्। शिल्हकः परमामांसी देवदारु सुरा नखी। सर्वेऽमी परमाऽलक्षीरलोमा ध्वरनाशनाः" राजव०। २तृ०। २पद्मे ३विष्णौ मेदि० ४शिवे शब्दच०।

श्रीवासस् न० श्रिये वासयति वस-णिच् असि। सरलद्रुसरसे अमरः। [तन्त्रसा०।

श्रीविद्या स्त्री श्रिये त्रिवर्गाय विद्या। त्रिपुरासुन्दर्य्यां

श्रीवृक्ष पु० श्रियः शोभायाः वृक्ष इव। १वक्षसि हृदयस्थे श्वेतरोमावर्त्तभेदे २सरलद्रुमे ३मेषच०। श्रीनामकोऽस्यः शाक०। ४विल्लवृक्षे "श्रीवृक्षं बोधयामि त्वाम्" तिथितत्त्व०।

श्रीवेष्ट पु० श्रिये वेष्टतेऽसौ वेष्ट-कर्मणि घञ्। सरलद्रुनिर्य्यासे (टारपिन) राजनि०। [ण्यन्त।

श्रीश पु० ६त०। १विष्णौ २श्रीरामे शब्दच०। श्रीधराद्यो-

श्रीसंज्ञ न० श्रियः संज्ञा संज्ञाऽस्य। खदिरे अमरः। [च।

श्रीसहोदर पु०६त०। १चन्द्रे २रम्भेऽमृते अश्वे च १रत्नपुरे

श्रीहस्तिनी स्त्री श्रीयुक्ता हस्तिनीव। (छातियुड़ा) हस्तिभेदे अमरः।

श्रु गतौ भ्वा० पर० सक० अनिट्। श्रवति अश्रौषीत्।

श्रु श्रवणे भ्वा०पर०सक०अनिट्। शृणोति अश्रौषीत्। श्रिणि श्रुकि अधिश्रवत्। श्रिचि श्रवि शि(शु)श्रावयिषति।

श्रु(शु)घ्न पु० देशभेदे। [ठन्। सर्जिकाक्षारे रत्नमा०।

श्रु(शु)घ्निका स्त्री श्रु(शु)घ्नः देशभेदः कारणत्वेनाऽस्त्यस्याः

श्रुत न० श्रूयते श्रु-क्त। शास्त्रे अमरः २तज्ज्ञाने च "श्रुतान्वितः" इति भट्टिः। ३श्रवणेन गृहीते त्रि० मेदि० ४अवगते च।

श्रुतकीर्त्ति स्त्री १कुशध्वजकन्यायां भरतपत्न्याम्। श्रुता विख्याता कीर्त्तिरस्य। २विख्यातयशस्के त्रि०।

श्रुतदेवी स्त्री श्रुतस्य शास्त्रस्य देवी। सरस्वत्यां हेमच०।

श्रुतबोध पु० श्रुतमात्रं बोधयति बुध-णिच्-अच्। १कालिदासकृते ज्योतिर्ग्रन्थभेदे। २श्रुतमात्रार्थबोधके ग्रन्थे च।

श्रुतश्रवस् पु० श्रुतं श्रवो यशोऽस्य। शिशुपालपितरि "निर्वर्त्तितेऽरिः क्रियया स श्रुतश्रवसः सुतः" इति माघः।

श्रुतसोणि स्त्री श्रुता विख्याता सोणीव। सवर्णायां भावप्र०।

श्रुतादान न० ६त०। ब्रह्मचर्य्यादे द्वारा०।

श्रुतायुस् पुंस्त्री वंश्ये नृपभेदे "नाभागस्याम्बरीषोऽभूत् विष्णुद्रोपस्ततोऽभवत्। ततः श्रुतायुः पुत्रोऽभूत्" भाग०।

श्रुति स्त्री श्रु-क्तिन्। १वेदे वेदस्य सर्वैः श्रूयमाणत्वात् श्रुतित्वम्। २शब्दे शब्दस्य श्रवणेन्द्रियजन्यत्वात् तथात्वम्। ३श्रवणेन्द्रियजन्ये ज्ञाने च। ४कुशध्वजकन्यायां ५तत्कन्यायां भरतपत्न्यां ६सुरायां ७शास्त्रे च। ८कर्णे च। ९अवगतिक्रियायां १०ज्ञप्तौ च मेदि०। ११अवधानजन्ये शब्दे अमरः। १२ऋक्षरागाद्यारब्धप्रबन्धवत्यां शब्दभेदे महिना० "प्रथम अवधाच्छब्दः श्रूयते श्रुतमात्रकः। सा श्रुतिः सम्मितेत्येवा स्वरावयवसंयुतेति"। श्रुतिसंख्यानिरूपणं तत्र दर्शितः "षड्जमध्यमपञ्चमाः। द्वे द्वे निषादगान्धारौ त्रिस्त्रिरृषभधैवतौ"। तत्रैतासु "नान्दी चालनिका दीप्ता चित्रा चित्रवती मता मदन्ती

करसारङ्गा मधुकरी मैत्री शिवा माधवी। बाला शार्ङ्गरवी कला कलरवा माला विशाला जया मालेति श्रुतयः पुराणकविभिर्द्वात्रिंशतिः कीर्त्तिताः", "श्रुतिस्थाने स्वरान् वक्तुं नाहं ब्रह्माऽपि तत्त्वतः। अतो न सुतरां सागौ मीनानां नोपलक्ष्यते। सगने पक्षिणां यद्वत् तद्वत् स्वरगता श्रुतिः। श्रुतिर्नादस्था प्रोक्ता तथाऽष्टा च कलागता। यथा तैलगतं सर्पिर्येथा काष्ठगतोऽनलः। श्रावणेऽश्रोपदेशेन तथा स्वरगता श्रुतिः। वीणादिषु श्रुतिस्थानं स्वरस्थानं तु वंशजम्" संगीतदा०। संगीतरत्नाकरे तु षड्जादिभेदे चतुर्विधाः श्रुतय उक्ता यथा "तीव्रा कुमुद्वती मन्दा छन्दोवत्यस्तु षड्जगाः। दयावती रञ्जनी च रतिका रक्तभे स्थिता। रौद्री क्रोधा च वज्रिका च प्रसारिणी। प्रीतिश्च मार्जनीत्येताः श्रुतयो मध्यमाश्रिताः। क्षितिरक्ता च शान्दीपिन्यालापी च सैव पञ्चमे। मदन्ती रोहिणी रम्येत्येता धैवतसंश्रयाः। उग्रा च क्षोभिणीति ते निषादे वसतः श्रुतौ"।

श्रुतिकटु पुंस्त्री० श्रुतिं कर्णं कटति कट-कञ्। १कर्णे तस्य सुप्रकर्षत्वात् तत्रास्य स्त्रियां ङीष्। २प्राचङ्कोडे ३पापप्रबोधने च पु० मेदि०।

श्रुतिकटु पु० श्रुतौ श्रवणे कटुः कठोरः। अलङ्कारोक्ते कठोरशब्दविशेषरूपे १काव्यदोषभेदे २कठोरशब्दे च।

श्रुतिजीविका स्त्री श्रुतिं जीवयति मूलतयानुसरति जीव-ण्वुल्। श्रुतिशास्त्रे शब्दर०।

श्रुतिधर त्रि० श्रुत्या श्रवणमात्रेण धरति धारयति धृ-अच्। श्रवणमात्रेण धारयितरि।

श्रुतिमूल न० श्रुतिरेव मूलं धर्मप्रमाणत्वे कारणम्। १वेदरूपे धर्मबोधनप्रमाणे ६त०। २यज्ञादौ वेदशास्त्रबोधिते धर्मादौ च ६त०। ३कर्णमूले।

श्रुतिवर्जित त्रि० श्रुत्या वेदाध्ययनेन कर्णेन्द्रियेण वा वर्जितः १वेदपाठहीने २बधिरे च जटा०।

श्रुतिवेध पु० श्रुतेः कर्णस्य वेधो यत्र। कर्णवेधाख्ये संस्कारभेदे कर्णवेधशब्दे १७१० पृ० दृश्यम्।

श्रुतिस्फोटा स्त्री श्रुताविव पत्रे स्फोटो यस्याः। कर्णस्फोटालतायां राजनि०।

श्रुत्यनुप्रास पु० श्रूयते इति श्रुतिः शब्दस्तस्यानुप्रासः। अलङ्कारोक्ते शब्दालङ्कारभेदे अनुप्रासशब्दे १७८पृ० दृश्यम्

श्रुत्य्क्त त्रि० श्रुतौ वेदे उक्त विहितः। वेदविहिते धर्मादौ। **श्रुव** इ०-श्रूयते क।१यागे जटा०श्रुतिविहितत्वात् तस्य तथात्वम्

श्रुस्रुवा स्त्री स्रु(स्रु)क०। यज्ञपात्रभेदे राजनि०। काल्या० श्रौ०। १।१८ अयं दर्व्यादितया पुंस्त्वेन बोध्यः "अरत्निमात्रः स्रुवोऽकुपर्वहस्तपुष्करः" सू०। "अरत्निः प्रमाणलक्षणावरत्निमात्रः स्रुवोऽरत्निप्रमाणो भवति अकुपर्वको हस्तमकुपर्वहस्तम् अकुपर्वहस्तं पुष्करं यस्य यस्मादकुपर्वहस्तपुष्करः पर्वशब्दः सन्धिवाची सन्धिपर्यन्तः तदुक्तम् "अकुष्ठाकुष्ठिमानं तु यत्र यत्रोपदिश्यते। तत्र तत्र हस्तपर्व सन्धिभिर्मितुर्यात् बुधः"। अतोऽकुष्ठस्य हस्तपर्वसन्धिप्रमाणं चतुरस्रं कृत्वा तदेव मण्डलं चतुरस्रं त्रिकोणीकृत्य शुल्बेन हस्तं विधाय तत्प्रमाणं स्रुवस्य पुष्करं नासिकावत् खातं स्यात्" कर्क०। कर्मप्रदीपे काल्या० "खादिरो वाथ पालाशो वितस्तिस्तु स्रुवः स्मृतः। स्रुग्बाहुमात्रा विज्ञेया हस्तस्य प्राग्वदस्रयोः। स्रुवाग्रे प्राग्वत् खातं स्रुकुपरिमण्डलम्"। [दर्व्यां राजनि०।

श्रुस्रुवाहस्त पु० स्रु(स्रु)-वार्थो हस्तः। (वँदटि) विकटतर्वेदी स्त्री श्रेणये राशीकरणाय द्रौकते द्रौक-ड पृषो० गौरा० ङीष्। भिन्नजातीयदूब्यादीनां मिश्रकरणाद् लीला० चक्रे मण्डनाकृतिभेदे।

श्रेढीव्यवहार पु० श्रेढ्या व्यवहारः। श्रेढीगणनार्थे लीलावत्युक्ते व्यवहारभेदे। [अमरः।

श्रेणि(णी) स्त्री श्रि-णि वा ङीप्। विच्छेदरहितायां पङ्क्तौ

श्रेयस् न० अतिशयेन प्रशस्यम् इयसु आदेशः। १धर्मे २मोक्षे अमरः। ३शुभे न०।४अतिप्रशस्ते त्रि० मेदि०स्त्रियां ङीप्। सा च ६श्रीतक्यां ६पाठायां ७गजपिप्पल्याम् अमरः ८राज्ञायां त्रिका०। ९शुभयुक्ते त्रि० अमरः।

श्रेष्ठ पु० अतिशयेन प्रशस्यः इष्ठन् आदेशः। १कुबेरे २रुद्रे ३विष्णौ शब्दर० ४विष्णौ विष्णुस०। ५मोदुम्बरे न० त्रिका० ६अत्यन्तप्रशस्ते त्रि० अमरः। ७अश्वत्थपक्षिण्यां स्त्री ८मेदाख्यायां राजनि०।

श्रेष्ठकाष्ठ पु० श्रेष्ठं काष्ठमस्य। शाकवृक्षे (सेगुण) राजनि०।

श्रेष्ठाक्ष न० श्रेष्ठमक्षमस्य। हस्ताक्षे राजनि०।

श्रेष्ठिन् पु० श्रेष्ठं धनादिकमस्त्यस्य इनि। १श्रिल्पिवणिजां श्रेष्ठे जटा० "य हि श्रेष्ठितरे प्रतिवसतीति" सूत्रवृत्तिटीका। [घटादि० अपवर्तति।

श्रै क्षेपे भ्वा०प०अक०अनिट्। श्रायति अश्रासीत्। विकृतौ

श्रोण संघाते भ्वा० पर० अक० सेट् अदित् चङि न हुस्वः। श्रोणति अश्रोणीत्।

श्रोण पु० श्रोण-अच्। १पङ्गौ अमरः। २कञ्जिरे स्त्री।

श्रोणि(णी) स्त्री श्रोण-इन् वा ङीप्। १कटयाम् अमरः २पथि शब्दर०। [२कटिप्रान्तौ।

श्रोणिफलक न० श्रोणिः फलकमिव। १प्रशस्तकटौ हेत०।

श्रोणिसूत्र न० श्रोणौ स्थितं सूत्रम्। श्रोणिस्थे षड्गादि वस्त्रनद्धसूत्रे।

श्रोतस् न० श्रु-असुन् तुट् च। १कर्णे २नदीवेगे अमरः। ३इन्द्रिये हेमच०। अत्रार्थे टन्त्वादित्वमित्यन्ये।

श्रोत्र न० श्रूयतेऽनेन श्रु-करणे ष्ट्रन्। १शब्दज्ञानसाधने इन्द्रियभेदे अमरः। २तदाधारे गोलके च कर्णशब्दे १७०६पृ० दृश्यम्।

श्रोत्रिय पु० छन्दो वेदमधीते वेत्ति वा छन्दस्+छ श्रोत्रादेशः। १वेदाध्यायवासुरते अमरः। "एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य च। षट्कर्मनिरतो विप्रः श्रोत्रियो नाम धर्मवित्" दक्षः। २विप्रभेदे "जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते। विद्याभ्यासी भवेद्विप्रः श्रोत्रियस्त्रिभिरुच्यते" मनुश्चतुर्थे ३ब्राह्मणभेदे च।

श्रोत त्रि० श्रुतौ विहितमण्। १वेदविहिते धर्मादौ "श्रौतं कर्म स्वयं कुर्यात्" कात्या० श्रुतिः। २आहिताग्न्याधानौदर्शपूर्णमासेषु पु०।

श्रोत्र न० श्रोत्र-स्वार्थे अण्। १कर्णे। श्रोत्रियस्य भावः कर्म वा अण् यलोपः। वैदिकस्य भावे "श्रोत्राङ्गीयपौर्णमासीयाः" सिद्धान्तकौ०।

श्रौषट् अव्य० श्रु-ड्रौषटि। यज्ञादौ हविर्दाने अमरः।

श्लक गर्वे भ्वा०आ० सक० सेट् इदित्। श्लकते अश्लक्षिष्ट

श्लक्ष्ण त्रि० श्लिष-क्ष्ण नि०। १श्लक्ष्णे अमरः २चिक्कणे। संज्ञायां कन्। ३मनोज्ञरे उषा० ४मृदौ राजनि०।

श्लक्ष्णत्वच् पु० श्लक्ष्णा त्वगस्य। अश्लक्षणत्वचि राजनि०।

श्लग गतौ भ्वा० पर० सक० सेट् इदित्। श्लङ्गति अश्लङ्गीत्।

श्लथ दौर्बल्ये चट०पु०ट०सक०सेट्। श्लथयति ते अशश्लथत त

श्लथ पु० श्लथ-अच्। १विरलसंयोगे शिथिले जटा० २दुर्बले च

श्लाघ व्याप्तौ भ्वा०पर० सक० सेट् आदित् अडि न हृस्वः। श्लाघति अश्लाघीत्। [न हृस्वः। श्लाघते अश्लाघिष्ट।

श्लाघ आत्मगुणाविष्करणे भ्वा० आ० अक० सेट् आदित् पक्षे

श्लाघा स्त्री श्लाघ-अ। १प्रशंसायां २परिचर्यायाम् ३शमनाख्ये च मेदि०। ४निजगुणाविष्करणे।

श्लाघ्य त्रि० श्लाघ-ण्यत्। प्रशस्ये "श्लाघ्यस्तृस्तुरावीरिति" देवीभा०।

श्लिकु न० श्लिष-कु नेत्वम् पृषो०। ज्योतिःशास्त्रे उषा०।

श्लिक्कु पु० श्लिष-क्कु नेत्वम् पृषो०। १भल्ले त्रि०कौ० २जारे उषादि०। [श्लेषेत।

श्लिष दाहे भ्वा०पर०सक०सेट् उदित् क्त्वा वेट्। श्लेषति अश्लिष आलिङ्गने संसर्गे च सक० दि० आनिट्। श्लिष्यति ते उदित् अश्लिषत्। आलिङ्गने त अश्लिषत।

श्लिष श्लेषणे चु०उभ०सक०सेट्। श्लेषयति ते अशिश्लेषत् त।

श्लिष्ट त्रि० श्लिष-क्त। १आलिङ्गिते २संसृष्टे ३श्लेषरूपशब्दालङ्कारयुक्ते शब्दे च।

श्लीपद न० श्लीयुक्तं श्लियुक्तं पदमस्मात् पृषो०। (गोद) १रोगभेदे हेम० २तद्रोगयुक्ते त्रि० त्रिश्लीपदशब्दे ५।११ पृ०दृश्यम्।

श्लीपदप्रभव पु० श्लीपदाय रोगभेदाय प्रभवति प्र+भू-अच्। आम्रवृक्षे शब्दमा०। तत्फलसेवने रससञ्जयात् तद्वृद्धिः।

श्लीपदापह पु० श्लीपदं रोगभेदमपहन्ति अप+हन-ड। इक्ष्वाकुवृक्षे त्रिका०। [तद्विपरीतो हि अश्लीवः।

श्लील त्रि० श्लीरस्त्यस्य लच् पृषो० रस्य लः। शोभायुक्ते

श्लेष पु० श्लिष-घञ्। १संसर्गे अमरः। २दाहे ३आलिङ्गने ४शब्दालङ्कारभेदे च अलङ्कारशब्दे ४०५पृ० दृश्यम्।

श्लेष्मन् स्त्री श्लेष्माणं हन्ति हन-क टाप्। १महिलायां २केतक्यां च त्रिका०। ३ज्योतिष्मत्यां लटा० ङीप्। वा च ४मल्लिकायां मेदि० ५त्रिकटुनि शब्दच०।

श्लेष्मघ्न पु० श्लेष्माऽस्यस्य न। कफविशिष्टे अमरः।

श्लेष्मन् पु० श्लिष-मनिन्। कफे अमरः। श्लेष्मलक्षणादिकं भावप्रकाशादुक्तं कफशब्दे १६७६पृ० दृश्यम्। तत्प्रकृतिलक्षणयुक्तम् "गम्भीरबुद्धिः स्थूलाक्षः स्निग्धकेशो महाबलः। सुप्तो बलाशयावासो श्लेष्मप्रकृतिको नरः"। तत्कर्माणि यथा "श्लेष्मो बलः स्थिरत्वञ्च गौरवं दृढ़ता वलम्। समाश्लेषविरोधश्च कफकर्माविकारजम्"। श्लेष्मकरद्रव्याणि कफकरशब्दे १६७७पृ० दृश्यानि। अन्यानि यथा "भोजनानन्तरं स्नानं जलपानं विना तृषा। तिलतैलं स्निग्धतैलं स्निग्धमांसकौद्रवम्। पर्युषिताच्च तक्रञ्च पक्वरम्भाफलं दधि। माषाम्बुशर्करातोयं स्निग्धस्वल्पसेवनम्। नारिकेलोदकं क्वथ्यानं पर्युषितं जलम्। तरुणप्लाक्षफलं सुपक्वकर्कटीफलम्। आतपस्नानञ्च वर्षासु मूलकं श्लेष्मकारकम्। तच्चलं ब्रह्मरन्ध्रे च महावीर्यविनाशनम्"। श्लेष्मनाशकद्रव्याणि कफघ्नीशब्दे १६७७पृ० दृश्यानि। अन्यानि च यथा "बह्विक्षेदं

शटभक्षं पक्वतैलं विशोष्यकम्। भ्रमघं शुष्कमध्यञ्च शुष्कपक्वहरीतकी। पिप्पलारकमपक्वञ्च रम्भाफलमपक्वकम्। वेशवारशिखिवारमनाहारमथानकम्। सहतं रोचनाचूर्णं सहतं शुष्कशर्करम्। मरीचं पिप्पली शुष्कमार्द्रकं क्षीरकं मधु। इत्याद्यैतानि गन्धर्वि! सद्यः श्लेष्मकराणि चैं अग्नि०।१६ अ०। [२८७ पृ० शब्दच०।

श्लेष्मल त्रि० श्लेष्म+अर्शआद्यच्। १कफयुक्ते (बड़वार) २श्लेष्महे पु० श्लेष्माणं हन्ति हन-ड। १कटफलवृक्षे शब्दच० २श्लेष्मनाशके त्रि०। कफश्लोपशब्दे १६७३पृ० दृश्यम्।

श्लेष्मात पु०श्लेष्मणा अतति अत-अच्। श्लेष्मातकवृक्षे शब्दर०

श्लेष्मातक पु०श्लेष्मणा श्लेष्मजनितरुक्षेण अतति अत-ण्वुल् (बड़वार) बड़वारवृक्षे अमरः "बड़वारस्तु शीतः स्यादुद्दालो बड़वारकः। श्लेष्मः श्लेष्मातकश्चापि पिच्छिलो भूतवृक्षकः। बड़वारो विषस्फोटव्रणवीसर्पशुद्धनुत्। मधुरस्तुवरस्निग्धः श्लेष्मलः कफपित्तहृत्। फलमस्यन्तु विष्टम्भि रूक्षं पित्तकफावहम्। तत् पक्वं मधुरं स्निग्धं श्लेष्मलं शीतलं गुरु" भावप्र०।

श्लेष्मान्तक पु०श्लेष्मणा श्लेष्मजनकफलेन अन्तक इव नाशकत्वात् (बड़वार) वृक्षभेदे राजनि०। [श्लोकते अश्लोकिष्ट।

श्लोक शब्दे संघाते च भ्वा०आ०अ०सेट् कदित् चङि न ह्रस्वः।

श्लोक पु०श्लोक-अच्। चतुःपदात्मके कविकृते १वाक्यभेदे २यशसि च अमरः "क उत्तमश्लोकगुणानुवादात्" भाग०१।।

श्लोण संघाते भ्वा० पर० अक० सेट् कदित् चङि न ह्रस्वः। श्लोणति अश्लोणीत्।

श्रः श्रेयस न० श्वः परदिने भाविकाले श्रेयो यस्मात् अच् समा०। १मङ्गले अमरः २सुखे ३परमात्मनि च मेदि० ४कल्याणयुक्ते त्रि०।

श्रक गर्वणे भ्वा०आ० अक० सेट् कदित्। श्रकते अश्रक्षिष्ट।

श्रच गतौ भ्वा०आ०अक० सेट्। श्रचते अश्रक्षिष्ट कदिदयम्

श्रठ गतौ संस्कारे च चु०उभ०गक० सेट्। श्रठयति-ते अशिश्रठत् त। कदिदयम् अश्रठयति। [ठत् त।

श्रठ दुर्वचने अद० चु० उभ०अक०सेट्। श्रठयति ते अशश्रठत्

श्रदंष्ट्रक पु० शुनो दंष्ट्रेव कण्टकोऽस्य कप्। गोक्षुरे क्षुपे राजनि०। [अमरः।

श्रदंष्ट्रा स्त्री शुनो दंष्ट्रेव कण्टकोऽस्यत्वात्। गोक्षुरे क्षुपे

श्रधूर्त्त पु० स्त्री०कनि शुनो वचनार्हं धूर्त्तः। प्रशस्ते शब्दच० स्त्रियां ङीप्। [शुनो।

श्रन् ३०त्रि-कनिन् त्रि०। कुक्कुरे तस्यातिस्त्रियां ङीप्

श्रनिश न० स्त्री शुनां कुक्कुराणां निशा वा ह्रस्वः। कुक्कुरमाटकरात्रौ।

श्रपच पुंस्त्री० श्वानं पचति भोजनाय पच-अच्। श्वपाके जातिभेदे। स च अन्त्यावसायिशब्दः "चण्डालः श्वपचः क्षत्ता क्षतो वैदेहकस्तथा। मागधायोगवौ चैव सप्तैतेऽन्त्यावसायिनः। अन्त्यावसायिनामन्नमन्नीयादृ वस्तु कामतः। स तु चान्द्रायणं कुर्यात् तप्तकृच्छ्रमथापि वा" या०त० अङ्गिराः।

श्रपाक पु० श्वानं पचति कर्त्तरि संज्ञायां वुञ्। जातिभेदे "चण्डालश्वपचौ व्याधौ श्वपाक इति कीर्त्यते" मनुः। तद्धर्म्म चण्डालशब्दे २७८६ पृ० उक्तो दृश्यः।

श्रफल पु० शुनः प्रियं फलमस्य। बीजपूरवृक्षे रत्नमा०।

श्रफल्क पु०। इक्ष्वाकुवंशे अक्रूरपितरि क्षत्रियभेदे विष्णुपु०।

श्रभीरु पु० श्वभ्यो भीरुः। शृगाले शब्दमा०।

श्रभ्र गतौ क्षिप्तकरणे भक० दीप्त्यै अक०चु०उभ० सेट्। श्रभ्रयति ते अशश्रभ्रत् त।

श्रभ्र न० श्रभ्र-अच्। क्षिप्ते अमरः।

श्रयथु पु० श्वि-इथुन् अच्। शोथे अमरः।

श्रयीची स्त्री श्वि-ईचि ङीप्। पीड़ायाम् वि०को०।

श्रल गत्यै भ्वा०पर०अक० सेट्। श्रलति अश्रालीत्।

श्रल्क भाषणे चु०उ०स०सेट्। श्रल्कयति ते अशश्रल्कत् त।

श्रल्ल गत्यै भ्वा०पर० अक० सेट्। श्रल्लति अश्रल्लीत्।

श्रवृत्ति स्त्री शुन इव परायीना वृत्तिः। दास्ये "सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत्" मनुः। "दीनदृष्टिरुन्दर्शनस्मानितर्जनीचक्रियादिधर्मयोगात् श्ववृत्त्यानिति" कुल्लू०। "न श्ववृत्त्या कदाचन" मनुः। [जटा०।

श्रव्याघ्र पु० शुनो व्याघ्रः। कुक्कुरपातके व्याघ्रभेदे (चिते)

श्रशुर पु० शु आशु अश्नुते आशु+अश-उरच् पृषो०। १पत्नुः पितरि २भार्य्यायाः पितरि च अमरः।

श्रशुर्य्य पु० श्वशुरस्यापत्यमु यत्। १देवरे २श्यालके च अमरः।

श्रश्रू स्त्री श्वशुरस्य पत्नी ऊङ् उकारादारश्चोपध। श्वशुरभार्य्यायाम् अमरः। श्रश्रूशब्दोऽत्रिसम्बन्धरूपं वराङ्गं यथा "श्वश्रूस्तां च पोषाय यत्ना नारी सदा धरे!। या श्वश्रूभिः समं यत्ना विश्वासो भवत्र क्वचित्। सा च श्वश्रूः कदाचित् स्यात् या श्वश्रूं जीवतोमिच्छेत्"। [अमरः।

श्रस् अव्य० आगामि अहः पूर्वो० त्रि०। आगामिनि दिवसे

श्रस जीवने अदा० अद्या०पर० सक० सेट्। श्रसिति अश-

यौत। "न विश्वसेदविश्वस्ते दत्वादौ" ७ मयड्व्यवायात् भादित्वम् निष्ठा वेट्। श्वसितः श्वस्तः।

श्वस श्वसे अदा० प० सक० वैदिकोऽयम्। श्वस्ति अश्वसीत्।

श्वसन पु० श्वसित्यनेन श्वस-ल्युट्। १वायौ २भटनद्वये च अमरः। भावे ल्युट्। ३निश्वासे न०मेदि०। [स्त्रियां ङीष्

श्वसनागन पुंस्त्री० श्वसनोवायुरयनमस्य। सर्पे त्रिका०।

श्वसनेश्वर पु० श्वसनो वायुरीश्वरोऽस्य। कार्त्तवीर्यवद्वे शब्दच०।

श्वसनोत्सुक पुंस्त्री० ७त०। सर्पे शब्दर०। स्त्रियां ङीष्।

श्वसित न० श्वस-क्त। निश्वासे सञ्जनाभिधाभ्यां बहिर्गमनरूपे हृदयस्थप्राणवायुव्यापारे।

श्वसुन पु० श्वस-उनन्। (कङ्करगोल्ला) इत्ते शब्दमा०।

श्वस्तन त्रि० श्वोभवः श्वस्-श्वःश्रेयसादिभ्यष्ठञ् च। भाविदिनस्थायिवस्तुनि स्त्रियां ङीष्।

श्वस्त्य त्रि० श्वोभवः श्वस्+त्यप्। भाविदिनस्थायिवस्तुनि।

श्वागणिक पु० श्वगणेन चरति ठञ्। कुक्कुरादिना द्यूतवाक्कर्त्तरि व्याधे त्रि०को०। [युते।

श्वादन्त त्रि०गुण इव दन्तोऽस्य नि०दीर्घः। कुक्करवत्खादनशीले

श्वान पुंस्त्री० श्वेव अण् न टिलोपः। कुक्करे शब्दमा०। तस्यातिस्त्रियां ङीष्। [राजनि०।

श्वानचिल्लिका स्त्री श्वान इव चिल्लिका। शुनकचिल्लूपां

श्वापद पु०गुण श्वापदस्यात् अचश्च०मा०। हिंस्रपशौ क्षेमच० २व्याघ्रे च शब्दर०।

श्वाविध् पु० शुना श्वाविध्यते वा-व्यध् क्विप् दृतन० शल्यके (शजारु)अमरः। क। श्वाविधोऽप्यत्र पु०।

श्वास पु० श्वस-घञ्। १वायुव्यापारे २रोगभेदे ३श्वित्रोक्ते वर्णोत्करभेदे वाङ्मयभेदे च।

श्वासरोगस्य निदानादि भावप्र० उक्तं यथा "श्वासनिदानमाह तैरेव कारणैर्हिक्का देहिनां सम्प्रवर्त्तते। तैरेव बलिभिः श्वासो व्याधिर्घोरः प्रजायते"। श्वासस्य भेदानाह "महोर्ध्वछिन्नतमकक्षुद्रभेदैस्तु पञ्चधा। भिद्यते स महाव्याधिः श्वास एको विशेषतः"। तस्य पूर्वरूपमाह "प्रायूपं तस्य हृत्पीड़ा मूत्रमाध्मानमेव च। श्वासो वक्त्रैरक्षं शङ्खनिस्रोत एव च"। सम्प्राप्तिमाह "यदा स्रोतांसि संरुध्य मारुतः कफपूर्वकैः। विष्वक् प्रजनति संरुद्धस्तदा श्वासं करोति सः"। विष्वक् प्रजति सर्वतो विसार्यति याति संरुद्धः कफादिना रुद्धमार्गः। महाश्वासस्य लक्षणमाह "अह्रीयमानवातोयः शब्दवद्दुःखितो नरः। ऊर्द्ध्वं श्वसिति यस्तस्य मरणं प्रवा-

दिष्टम्। प्रनष्टज्ञानविज्ञानस्तथा विभ्रान्तलोचनः। विस्तब्धाननो बद्धमूत्रवर्चा विशीर्यवाक्। दीनश्च श्वसितश्चास्य दूराद्विज्ञायते भृशम्। महाश्वासोपसृष्टस्य लिङ्गमेव विपद्यते"॥ अह्रीयमानवातः अह्रीं लीयमानो वातो यस्य सः शब्दवत् सशब्दं यथा स्यात्। कीदृक् स शब्दस्तदुच्यतेऽत्राह मरणम इव। ऊर्द्ध्वं श्वसितीत्यस्यवः। सशब्दः आनद्धः आनाहयुक्त इति यावत्। प्राणं तत्तदर्थविनिश्चयः। विशीर्यवाक् स्खलितवचनः। दीनः क्षीणः। मारकत्वायं महाश्वासः। अह्रीश्वासमाह "अह्रीं श्वसिति योऽत्यर्थं न च प्रत्याहरत्यधः। क्षीणाहतसमस्रोतःक्षुद्रश्वासहतादितः। अह्रीदृष्टिर्विभ्रान्तिर्जन्तुः विभ्रान्तात्र दृतस्ततः। प्रसक्तनृ वेदनार्त्तश्च शुष्कास्यो रतिपीड़ितः। अह्रीश्वासे प्रकुपिते श्वासः श्वासो निरुद्ध्यते। सुप्तस्तात्र्यतश्चाह्रीश्वासस्य निरुक्तमुक्तम्॥ सर्वेषु श्वासेषु अह्रीश्वासोऽत्र अत्यर्थमिति विशेषः। न च प्रत्याहरत्यधः न श्वासमधः करोति क्षीणाहतेत्यादिक्षीणाहतं यन्मुखं स्रोतांसि च तैः क्षुद्रो यो मरुद्वहस्तेनादितः। विपद्यते दृतस्ततो विभ्रान्तं यथा स्यादेवं पश्यन् अधःश्वासो निरुद्ध्यते श्वासो नाधः प्रवर्त्तते" इत्यर्थः। सुप्तो मोहं प्राप्नुवतस्तात्र्यतो ग्लानिं प्राप्नुवतश्च अह्रीश्वासः अस्तृ प्राणान् हन्ति। छिन्नश्वासलक्षणमाह "यस्तु श्वसिति विच्छिन्नं सर्वप्राणेन पीड़ितः। न वा श्वसिति दुःखार्त्तो मर्मच्छेदरुजार्दितः। आनाहशूलमूर्च्छार्त्तो दह्यमानेन वह्निना। विप्लुताक्षः परिक्षीणः स्वसन् रक्तैकलोचनः। विचेताः परिशुष्कास्यो विवर्णः प्रलपन्नरः। छिन्नश्वासेन विच्छिन्नः स शीघ्रं विजहात्यसून्"॥ विच्छिन्नं सविच्छेदं सर्वप्राणेन सर्वबलेन मर्मच्छेदरुजार्दितः हृदयशिरःमर्म्मच्छेदनयेव पीड़ितः। दह्यमानेन वह्निना उपलक्षितः। विप्लुताक्षः अस्तुपूर्णनेत्रः। विचेताः अहिर्मग्नचित्तः छिन्नश्वासेन विच्छिन्नः यस्तु श्वसिति विच्छिन्नमित्यादिलक्षणयुक्तो यः स नरः छिन्नश्वासेन विच्छिन्न पीड़ितो बोद्धव्यः। मारकत्वायं छिन्नश्वासः। तमकश्वासमाह "प्रतिलोमो यदा वायुः स्रोतांसि प्रतिपद्यते। शीर्षं शिरश्च संरुद्ध्य श्लेष्माणं सहदोषं च। करोति पीनसं तेन कण्ठे घुर्घरकं तथा। अतीव तीव्रवेगश्च श्वासं प्राणप्रपीड़कम्। प्रताम्यति स वेगेन नश्यते सञ्चरध्यते। प्रमोहं कारमानश्च स मज्जति सङ्कटं॥ श्लेष्मणा सञ्चयमानेन

मुखं भवति दुःखितः। तस्यैव च विमोक्षान्ते सुखं लभते सुखम्। तथाप्रोदृध्वसते वक्त्रः लक्ष्माक्लोति भाषितुम्। न चापि निद्रां लभते शयानः श्वासपीडितः। पार्श्वे तस्यावष्टब्धाति शयानस्य समीरणः। आसीनो लभते सौख्यमतश्चैवाभिनन्दति। उच्छ्वासो बलवाटेन क्षिप्तता भृशमार्त्तिमान्। विशुष्कास्यो मुक्तः श्वासो मुक्तश्चैवावधम्यते। मेघाम्बुशीतप्राम्बातैः श्लेष्मलेष विवर्द्धते। स याप्यसमकः श्वासः साध्यो वा स्वात्रयोत्थितः॥ संसृष्ट व्यथया मुक्तदीर्घं वर्द्धयित्वा। पीनसं नासिकार्धं तेन श्लेष्मणा घुर्घुरं घुर्घुरशब्दं प्राग्रूपीडकम्। प्रताम्यति तमस्यि प्रविशतीव वेगेन श्वासवेगेन सन्निरुध्यते निश्चेष्टो भवतीति चक्रः। सन्निरुध्यते श्वास इति जैज्जटः॥ श्लेष्मणा रुध्यमानेन मुखं सुप्तमिव तद्दृश्यते व्यथितो भवति। शयानः शयनस्थिताक्लोऽवष्टब्धति पीड़यति रुध्यत्यैवाभिनन्दति रुद्धनेन तमको वातकफाभ्यां इति बोद्धव्यः। उच्छ्वासः श्वासः। बलवाटेन क्षिप्तता उपलक्षितः श्वसध्यते गलाद्धृदयेव सर्वगात्रात्क्षयते। तमकस्यैव विस्तारुवस्त्रजनितज्वरादिदोषेण प्रतमकसंज्ञाह "ज्वरमूर्च्छापरीतस्तु विद्यात् प्रतमकं भिषक्"। तस्यैवापरलक्षणमाह "तदावर्त्तरजो जीर्णकफिलकायनिरोधजः। तमसा वर्द्धतेऽत्यर्थं श्लेष्मणैव प्रशाम्यति। मध्यतमक्षयोत्थस्तु विद्यात् प्रतमकन्तु तम्"। तदावर्त्तो रोगविशेषः रजो धूलिः अवश्यायोर्णमादिकलिलं विदग्धं कायनिरोधः अङ्गप्रसादानां निरोधः तस्मादुत्पन्नः। क्षुद्रश्वासमाह "क्षुद्रावासोद्भवः कोष्ठे क्षुद्रोवात उदीरयन्। क्षुद्रश्वासो न सोऽत्यर्थदुःखेनाङ्गप्रबाधकः। क्षिनस्ति न च मर्म्माणि न च दुःखं प्रयच्छति। न च भोजनपानानां निरुणद्धि गतिं मतिम्। नेन्द्रियाणां व्यथाञ्चापि कान्छिद्रुत्पादयेद्बहुम्। स ह्याश्च श्लो यक्ष्मिनः सर्वं चाप्यक्ष्म यत्नवाः"। क्षुद्रः अल्पनिदानलिङ्गः उदीरयन् जन्तुं शब्दन् दुःखः दुःखप्रदः। सर्वं महाश्वासादयोऽपि। अयत्नसाध्याः अल्पः साध्याः। श्वासानां साध्यत्वादिकमाह "क्षुद्रः साध्यतमश्लेषां तमकः कृच्छ्र उच्यते। त्रय श्वासा न सिध्यन्ति तमको दुर्बलश्च यः। कासे प्रायेकरा रोगा बहवो न ह्य ते तथा। यथा श्वासश्च हिक्का च हरतः प्राणमाशु तैः"। बहवो ज्वरादय "यथा यथा श्वासहिक्के हरतो जीवुमाशु ते"।

तेषां निदानकर्मविपाकासु भगुभार० उक्ता यथा "श्वासरोगो महाघोरो देहिदेहाभिघातकः। कर्मणा येन भवति तन्मे निगदतः शृणु। महोर्ध्वश्चिन्नतमकक्षुद्रा-भेदोऽस्य पञ्चधा। श्वासः संजायते नृणां पृथक् कर्मानुसारतः। वस्तु यत्तं समाद्य पथ्यासं निरुध्य च। कृन्ति खादन्ति वातश्च महाश्वासेन मुह्यते। पौराणिक कथा मध्ये यस्तु वाचान्यथा वदेत्। स जन्तुश्वासमाद्य दुनोत्यरुरहर्निशम्२। निषिद्धानपथ्याश्चिन्नश्वासेन मुह्यते२। मर्म्मः शास्त्रार्थनिपीतवाक्यं यो दूषयत्यपि। पीड्यते तमकश्वासैः४ क्षुद्रैः पापस्य पिण्डितः५। परम कर्मतो देही नरकेषु विपच्यते। नरकान्ते पुनर्व्याघ्रयोनिं शूकरयोनिम्। पृथक् कर्मवशाद् योनौ गत्वा संप्राप्य तप्यते। मानुषत्वमनुप्राप्य पूर्वोक्तैरुपद्रुतैः"।

श्वासकास पु० श्वासयुक्तः कासः। श्वासयुक्ते कासरोगे "पिशुनो नरकस्थान्ते जायते श्वासकासवान्। इतं तेन प्रदातव्यं सुवर्णपलसम्मितम्" दाता० कर्म०।

श्वासकुठार पु० श्वासे कुठार इव। श्वासरोगौषधभेदे "रसो गन्धो विषञ्चापि टङ्कणञ्च मनः शिला। एतानि कर्षमात्राणि मरिचञ्चाष्टकर्षकम्। कटत्रयं कर्षयुग्मं पृथगत्र विनिःक्षिपेत्। रसः श्वासकुठारोऽयं सर्वश्वास निवारकः" भावप्र०। [धारणव्यापारे प्राणायामे

श्वासधारण न० श्वासः प्राणवायुः ध्रियतेऽनेन। प्राण-

श्वासहेति स्त्री० श्वासस्य हेतिरिव। निद्रायां हेमच०।

श्वासारि पु० श्वासस्य रोगभेदस्यारिः नाशकत्वात्। पुष्करमूले राजनि०।

श्वासिन् पु० श्वासयति श्वस-णिच् णिनि। वायौ शब्दच०।

श्वि गतौ सक०इदुतौ अक०भ्वा०पर०अला०सेट्। श्वयति अधिश्वत्-अश्वत्-अश्वयीत्। श्वित् श्वयतुः कोदित् निष्ठा तस्य नः शूनः। [श्वेतते अश्वितत् अश्वेतिष्ट।

श्वित शुक्लतापादने भ्वा०आ० वृदित् चुक्षि लभ०सक०सेट्।

श्वित्र न० श्वित-रक्। श्वेतकुष्ठभेदे (धवच) अमरः।

तन्निदानादि भावप्र० उक्तं यथा "कुष्ठैकसम्भवं श्वित्रं किञ्चासं चाप्यथ ब्रवे। निर्दिष्टमपरिस्रावि त्रिधातुद्वन्द्वसंश्रयम्"। कुष्ठैकसम्भवं कुष्ठेन सह समानो निदानं यस्य तत्। अथ श्वित्रस्य भेदमाह किञ्चासञ्चाप्यथ भवेत् श्वित्रमेव रक्तमांसाश्रयात्किञ्चासञ्च भवेदित्यर्थः। नन्वत्र श्वित्रस्य को भेद

दन्यत आह निर्दिष्टमपरिखावीति श्वित्मपरिखावि भवति कुष्ठन्तु खादि कथ च त्रिधातुत्वसंश्रयमिति श्वित्म त्रयोधातवो रक्तमांसमेदांसि संश्रयोऽधिष्ठानं यस्य तत् । कुष्ठन्तु सान्निपातिकं सर्वधातुगतं भवतीति भेदः । दोषभेदेन लक्षणभेदान्याह "वातादूक्षारुणं त्विनात् ताम्रं कफसपत्त्रवत् । सदाहं रोमविध्वंसि कफात् श्वेतं घनं गुरु । मंडलैरूर्ध्वं क्रमाद्रक्तमांसमेदःसु चादिशेत् । वर्णनैवेदनुभयं कुष्ठं तद्धोत्तरोत्तरम्" । वातेनारुणवर्णं श्वित्रम् । कफसपत्त्रवदित्यनेन मध्ये श्वेतमलं चाक्षिप्तं बोधयति । घनं पुष्टम् । क्रमाद्रक्तमांसमेदःसु चादिशेत् । तथा च चरकः "वातेन रक्तगे वाते ताम्रं पित्ते प्रदृश्यते । श्वेतं श्लेष्मणि मेदःस्थे श्वित्रं कुष्ठं परं परम्" इति । उभयं द्विविधमपि श्वित्रं वर्णेन दैहेनैव । वातेन ताम्रं श्वेतच्च दोषभेदात् । द्विविधं दोषजं त्रणजं च । तथा च भोजः "श्वित्रं तु द्विविधं विद्याद्दोषजं त्रणजं तथा" इति । श्वित्रं साध्यमसाध्यत्वाच्च "शुक्लरोमावृतसमसृग्युक्तमग्रो नवम् । अनग्निदग्धजं साध्यं श्वित्रं वर्ज्यमतोऽन्यथा" । कथञ्चित्तु । अन्यच्च "शुक्लपाण्डितलोहेषु जातमप्यचिरन्तनम् । वर्ज्यमेवं विशेषेण त्रिसप्तं सिद्धिमिच्छता" । शुक्लं मेहनम् अनग्नि तत्समत्वं यदनलं सुश्रुतेनाग्नौ जातमिति याचान्यतो निर्दिष्टत्वात् । अथचिरन्तनम् नवमपि" ।

श्वित्रघ्नी स्त्री श्वित्रं हन्ति हन-टक् ङीप् । पीतपर्ण्याम् (विष्णुक्रान्ता) अमरः ।

श्वित्रिन् त्रि० श्वित्रमस्त्यस्य इनि । श्वेतकुष्ठयुक्ते "श्वित्री स्वस्त्रा सर्व च चोरी कुण्डाशकः" यजुः ।

श्विद् शुक्लतापादने भ्वा० आत्म०सक० सेट् इदित् । श्विन्दते अश्विन्दीत् ।

श्वेत पु० श्वित-अच् घञ् वा । १दोषभेदे २पर्वतभेदे ३कपर्दके हेमच० । ४शुक्लपक्षे ५शुक्लार्के अमरः । ६शङ्खे राजनि० । ७जीवके जटा० । ८शुक्लवर्णे हेतदति त्रि० अमरः स्त्रियां ङीप् तस्य नव श्वेती । १०कलियुगीयविष्णावतारविशेषे यथा "वेदप्रणावतारांश्च द्वापरे कथितानि तु । सङ्कर्षणावतारांश्च कल्पे श्वेतान् शृणुत द्विजाः ! । आदौ कलियुगे श्वेतो देवदेवो महाद्युतिः । नाम्ना विप्राय विप्राणामभूद्वत्सतेऽन्तरे । शिखण्डिखरे रम्ये कुमुदे पर्वतोत्तमे । तस्य शिष्याः शिखायुक्ता बभूवुरमितप्रभाः । श्वेतः सुतपसश्चैव श्वेताक्षः श्वेतलोहितः । चत्वारस्ते महात्मानो ब्राह्मणा वेदपारगाः । उभावेतमनन्याय कुशोत्तः कङ्कणस्तथा । लोकाक्षिरथ योगीन्द्रो वैगीभव्यस्तु सप्तमे । अष्टमे दधिवाहः स्यात्तथा नवमे प्रभुः । शतरुस्तु दशमे प्रोक्तस्तस्यादुषः परः स्मृतः । द्वादशेऽत्रिः समाख्यातो वाली चाथ त्रयोदशे । चतुर्दशे गौतमस्तु वेदशीर्षा ततः परम् । गोकर्णवासवत्तस्मात् गुहावासः शिखण्डथ । जटामालिकुडाश्च दारुको लाङ्गली क्रमात् । श्वेतस्तथा परः शूली त्रिखो सप्तमो च वै क्रमात् । सहिष्णुः सोमशर्मा च नकुलीशोऽन्तिमे प्रभुः । वैवस्वतेऽन्तरे शम्भोरवतारास्त्रिलूलनः । अष्टाविंशतिराख्याताश्चन्मे कलियुगे प्रभोः" कौर्म ५० अ० । श्वेतपर्वतस्य परिमाणादि यथा "उत्तरोत्तरवेलाश्च नीलः श्वेतः शृङ्गवान् इति त्रयो रम्यशिरस्त्वमव कुरूणां मर्य्यादागिरयः प्रागायताः उभयतः क्षारोदावधयो द्विसहस्रयोजनपृथव एकैकशः पूर्वस्मात् पूर्वस्मादुत्तरोदधिमाधिक्येन दैर्घ्यं एव हृष्यन्ति" भाग० ५।१६। ११राजभेदे वाच्छा० । संज्ञायां कन् । रूपे न० राजनि० । कपर्दके पु० । [राजनि० ।

श्वेतकण्टकारी स्त्री कर्म० । शुभ्रवर्णकण्टकारिकायाम्

श्वेतकन्दा स्त्री श्वेतः कन्दोऽस्याः । अतिविषायां राजनि०

श्वेतकिणिही स्त्री कर्म० । गिरिकर्णिकायां क्षुपभेदे राजनि०

श्वेतकुञ्जर पु० कर्म० । ऐरावतगजे मल्लि० २श्वेतगजमात्रे च श्वेतगजादयोऽप्यत्र ।

श्वेतकुष्ठ पु० कर्म० । शुक्लवर्णे कुष्ठभेदे राजनि० ।

श्वेतकेतु पु० कर्म० १वाजसनेयशाखाप्रवर्त्तके २छान्दोग्यप्रसिद्धे वाजसनेयऋषिभेदे ३बुद्धे त्रिका० ।

"श्वेतमो ह्यस्य दध्मले वाजसनेय एव ते । ऋषिः श्वेतः श्वेतकेतुर्मकेतुस्तत्तोयकः । श्वेतकेतुर्यदा दध्मुः श्वेताश्वं कृष्णते महीम् । तदा मानुषमांसानि भक्षयन्तीह मानुषाः । युद्धवार्त्ता अभवन् कृष्णं चक्रवदभवते तदा" । अपि च "श्वेतः शस्त्राकृतं कुर्यात् लोहितस्त्वस्त्रिजं भयम् । युद्धवं पीतकः कुर्यात् कृष्णो रोगभयोल्बणम्" । अन्यच्च "अवन्ती पुष्करारण्यं यावद्ब्रह्मात्तयापरान् । देशान् कांश्चित् कांश्चिद्रोगदुर्भिक्षैः परिपीडितान् । श्वेताख्यस्तु जटाधारी यज्ञमो व्योम विभागशः । निवर्त्तेऽपसव्येन विभागो कुरुते प्रजाः" इति समयाचतुष्टयाक्षम् ।

श्वेतकेश पु० श्वेतः केश इव यस्य । १रक्तशिग्रौ जटा० ।

२शुक्लवर्णकेशयुते वृद्धे त्रि०। कर्म०। २शुक्ले केशे पु०।
श्वेतकील पुंक्ली०द्व०। अफरमत्स्ये त्रिका० स्त्रियां ङीष्।
श्वेतखदिर पु० कर्म०। शुक्ले खदिरभेदे।
श्वेतगज पु०कर्म०। १ऐरावते गजे हेमच० २शुभ्रगजे च।
श्वेतगरुत् पु० श्वेतोगरुदस्य। १हंसे अमरः २शुभ्रपक्षयुक्ते त्रि० पृषो० षदलोऽप्यत्र। [२५६पृ० ३कॉ०।
श्वेतगुञ्जा स्त्री कर्म०। शुभ्रगुञ्जायां राजनि०। गुञ्जाशब्दे
श्वेतचिल्ली स्त्री कर्म०। शाकभेदे (शादाचिरट) राजनि०।
श्वेतच्छद पुंक्ली० श्वेतः छदः पक्षोऽस्य। १हंसे त्रिका०। स्त्रियां ङीष्। २शुभ्रपक्षयुक्ते त्रि०।
श्वेतजीरक पु० कर्म०। शुक्लजीरके राजनि०।
श्वेतटङ्कण न० कर्म०। १शुभ्रटङ्कणे २भारतोत्तरदीशोरसम्भवे क्षारभेदे राजनि०।
श्वेतदूर्वा स्त्री कर्म०। शुभ्रदूर्वायां राजनि०।
श्वेतद्वीप पु० कर्म०। वैकुण्ठाख्यविष्णुधाम्नि क्षीरोदवेष्टितरम्ये द्वीपभेदे च "क्षीरोदवेष्टितरतः श्वेतोद्वीपो महाप्रभः। एकान्तिनस्ते पुरुषाः श्वेतद्वीपनिवासिनः" भा० मा० ३१८ अ०।
श्वेतधातु पु० कर्म०। १खटिकायां २शुभ्रवर्णधातुद्रव्ये च।
श्वेतधामन् पु० श्वेतं धाम यस्य। १चन्द्रे २कर्पूरे ३सप्तदृष्टफेने च मेदि०। श्वेतकरादयोऽपि। ४कर्पूरे च।
श्वेतनील पु० "वर्णोवर्णेन" पा०स०। १श्वेतकृष्णवर्णे २तद्वति त्रि०। ३मेघे शब्दर०। [२शुभ्रपद्मवद्भ्यां युक्ते त्रि०।
श्वेतपक्ष पुंक्ली० श्वेतं पक्षं पक्षोऽस्य। १हंसे स्त्रियां ङीष्
श्वेतपद्मरथ पु० श्वेतपद्मो हंसो रथ इव वाहनं यस्य। चतुर्मुखे ब्रह्मणि शब्दच०।
श्वेतपद्म न० कर्म०। सितकमले राजनि०। [अनि०।
श्वेतपर्णी स्त्री श्वेतं पर्णं यस्याः। वारिपर्ण्यां (पाना) रा०
श्वेतपर्णास पु० कर्म०। शुभ्रतुलस्यां रत्नमाला।
श्वेतपाटला स्त्री कर्म०, शुभ्रपाटलावृक्षे (शादापाडल)अटा०
श्वेतपिङ्गल पुंक्ली० देवेन श्वेतः जटया पिङ्गलः "वर्णोवर्णेन" पा०स०। १सिंहे त्रिका० स्त्रियां ङीष्। २श्वेतपिङ्गलवर्णे पु १तद्युते त्रि०।
श्वेतपिण्डीतक पु० कर्म०। महापिण्डीतकवृक्षे राजनि०।
श्वेतपुष्प पु० श्वेतं पुष्पमस्य। १सिन्दुवारवृक्षे जटा० २शुभ्रवर्णपुष्पयुक्ते त्रि० कर्म०। ३शुभ्रे पुष्पे न०। ४नागदन्त्यां ५क्षीरेक्षौ स्त्री राजनि०। ६क्षीरातकयां स्त्री रत्नमा०। ङीष्यां कप्। ७शुभ्रकरवीरे पु० राजनि०।
श्वेतपुष्पिका स्त्री श्वेतं पुष्पमस्याः कप् अत इत्त्वम्। १महाशाखवृक्षे २शुक्लदालूयां च राजनि०।
श्वेतप्रसूनक पु० श्वेतं प्रसूनं यस्य कप्। शाकतरौ राजनि०
श्वेतभण्डा स्त्री कर्म०। श्वेतापराजितायां रत्नमा०।
श्वेतमन्दार पु० कर्म०। शुभ्रमन्दारे राजनि०।
श्वेतमरिच कर्म०। १शाभाञ्जनबीजे अमरः २शुभ्रमरिचे च
श्वेतरक्त पु० श्वेतो रक्तः "वर्णो वर्णेनेति" पा०स०। १पाटलवर्णे २तद्वति त्रि० अमरः।
श्वेतरज्जन न०श्वेतं सितञ्च०रञ्जेरनेन रजे-ल्युट्। सीसके
श्वेतरथ पु० श्वेतो रथो यस्य। १शुक्लपक्षे शब्दच० कर्म०। २शुभ्रे रथे। [ङीष्। चन्द्रेखायां राजनि०।
श्वेतराजी स्त्री श्वेतेन वर्णेन राजते राज-क्विप् गौरा०
श्वेतरोचिस् पु०श्वेतं रोचिरस्य। १चन्द्रे २कर्पूरे च हला०
श्वेतरोहित पु० "वर्णोवर्णेन" पा०स०। १पाटलवर्णे २तद्वति त्रि० पुंस्येव श्वेतःफलेन रोहितः। ३शुक्लरोहिते वृक्षभेदे राजनि०।
श्वेतलोध्र पु० कर्म०। पट्टिकालोध्रे राजनि०।
श्वेतवचा स्त्री श्वेता वचेव। अतिविषायां (आतइच) राजनि० "पारसीकवचा शुक्ला प्रोक्ता हैमवतीति सा। हैमवत्युदिता तद्वच्छुक्लं स्वल्पं विशेषतः" भावप्र०।
श्वेतवल्कल पु० श्वेतं वल्कलमस्य। १वटवृक्षे जटा० २शुभ्रत्वगयुते त्रि०।
श्वेतवाजिन् पु० श्वेतो वाजो यस्य। १चन्द्रे हेमच० २अर्जुने जटा०। श्वेताश्वादयोऽप्यत्र। ३कर्पूरे च।
श्वेतवासस् पु० श्वेतं वासोऽस्य। १सन्यासिभेदे २शुक्लवस्त्रयुक्ते त्रि०।
श्वेतवाह् पु० श्वेतेन श्वेताश्वेन वह्यते वह-क्विप्। १चन्द्रे २अर्जुने ३चन्द्रे च। ४कर्पूरे। भत्वे जठ् श्वेतोहः। क्वचित् ऊधसः श्वेतवाः श्वेतोभिरित्यादि।
श्वेतवाहन पु० श्वेतं वाहनं यस्य। १चन्द्रे २इन्द्रे ३अर्जुने च मेदि०। ४कर्पूरे च।
श्वेतवुक्का स्त्री कर्म०। वनतिक्तायां रत्नमाला।
श्वेतवृक्ष पु० कर्म०। १बकपुष्पवृक्षे राजनि० २शुभ्रवृक्षे च।
श्वेतवृहती स्त्री कर्म०। शुभ्रवर्णवृहद्वृक्षायां राजनि०।
श्वेतशिंशपा स्त्री कर्म०। शुभ्रशिंशपायां राजनि०।
श्वेतशिग्रु पु० कर्म०। सितशोभाञ्जने राजनि०।
श्वेतशुङ्ग पु० श्वेता शुङ्गाऽस्य। १यवे राजनि०। २शुभ्रवर्णशुङ्गायुक्ते त्रि०।

श्वेतशूरण पु० कर्म० । वनशूरणे राजनि० ।
श्वेतसर्प पु० श्वेतः सन् सर्पति रूप-क्विप् । १रूप्यछत्रे जटा० कर्म० । २शुभ्रभुजगे पु स्त्री० । स्त्रियां ङीप् ।
श्वेतसर्षप पु० कर्म० । गौरसर्षपे ।
श्वेतसार पु० श्वेतः सारोऽस्य । शुभ्रखदिरे जटा० ।
श्वेतसुरसा स्त्री कर्म० । शुभ्रमेफालिकायाम् अमरः ।
श्वेतस्यन्दा स्त्री श्वेता सती स्यन्दते स्यन्द-क्विप् । सिताप-राजितायां राजनि० ।
श्वेतहय पु० श्वेतोऽयः । १चन्द्रे अवधि हृषे त्रिका० २सित-वर्णयुक्ते ३हये च । हृष० । ४अर्जुने हेमच० । ५इन्द्रे च
श्वेता स्त्री श्वित-क्विप् । १वराटिकायां २काष्ठपाटलायां ३शङ्खिन्यां मेदि० । ४अतिविषायां रत्नमा० । ५सितापरा-जितायां ६शुक्लकण्टकार्य्यां ७पाषाणभेदिन्यां ८शुभ्र-दूर्वायां ९वंशरोचनायां १०शर्करायां ११गिलायवल्लकलतायां १२श्वेतहरिद्रायां च राजनि० ।
श्वेतार्क पु० कर्म० । शुभ्रवर्णपुष्पके अर्कवृक्षे राजनि० ।
श्वेतावर पु० श्वेतं श्वेतवर्णमावृणोति आ+वृ-क्विप् । सिता-वरणाके राजनि० ।
श्वेताश्वतर पु० वेदशाखाभेदे ।
श्वेतेक्षु पु० कर्म० । शुक्ले इक्षौ राजनि० ।
श्वेतोदर पु० श्वेतमुदरं यस्य । कुबेरे त्रिका० ।
श्वेतोही स्त्री श्वेतोहः पत्नी ङीप् । इन्द्राण्यां शच्याम् ।
श्वैत्य न० श्वेतस्य भावः ष्यञ् । शुभ्रवर्णे ।
श्वोवसीयस न०अतिशयेन वसुः प्रशस्यश्वो वसीयः नि० उच् समा० । १परदिने भाविकाले प्रशस्ते मङ्गले २तद्वति त्रि०

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्य-सङ्कलिते वाचस्पत्याभिधाने शकारादि शब्दार्थसङ्कलनम् ।

अशुद्धशोधनम् ।

६००० पृष्ठावधि ६०२४ पृष्ठपर्य्यन्तपत्राङ्के ६०० नवश-ताङ्काधिकतया: प्रमादाद् मुद्रिताः तत्र तत्र पृष्ठेषु नवभिः शतैरूनिता सङ्ख्या बोध्याः ।

ष

षकारः मूर्द्धन्यः ऊष्मवर्णभेदः । ऊष्मोच्चारणस्थाने मूर्द्धा ऊष्मोच्चारणे आभ्यन्तरप्रयत्नः विवृतमूर्द्धस्पृष्टता "नेम-स्पृष्टाः ऊष्मस्था" शिक्षोक्तेः । बाह्यप्रयत्नश्च विवाराधोषा-महाप्राणत्व । ऊष्मरूपवायुप्रधानत्वादस्य ऊष्मवर्णता । अस्य श्वेतरूपं यथा "षकारं हरिणं वायुं षड्कोणमयं सदा । रक्तचन्द्रप्रतीकाशं स्वयंपरमकुण्डली । चतुर्वर्णमयं वर्णं सुधानिस्यन्दविग्रहम् । पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा । रजःसत्त्वतमोयुक्तं त्रिशक्ति-सहितं सदा । त्रिबिन्दुसहितं वर्णमाद्यादित्यसंयुतम् । सर्वदेवमयं वर्णं हृदि भावय पार्वति !" कामधेनुतन्त्रम् । एतदधिष्ठानदेवताध्यानं यथा "चतुर्भुजां चकोराक्षीं चारुचन्दनचर्चिताम् । शुक्लवर्णां त्रिनयनां वरदाञ्च सुचिस्मिताम् । रत्नालङ्कारभूषाढ्यां श्वेतमाल्योपशो-भिताम् । देवेन्द्रैरभिवन्द्यां सेवितां मोक्षकाङ्क्षिभिः । एवं ध्यात्वा षकारन्तु तन्मन्त्रं दशधा जपेत् वर्णोद्धा-रतन्त्रम् । अस्य वाचकशब्दा यथा "षः श्वेतो वासुदेवश्च पिता प्रज्ञा विनायकः । परमेष्ठी वामबाहुः श्वेतो गर्भविमोचनः । लम्बोदरो यमोऽजेयः कामधुक् कामधूमकः । ऊर्द्धोष्ठा हृदो लज्जा मरुद्वध्यः शिवः शिवः । स्त्र्यात्मा जठरः कोषो माता रक्षोविदारिणी । कण्ठकण्ठो मध्यभिन्ना युद्धाक्षा मरुपूः शिवाः" वर्णाभि-धानम् "षकारः श्वेत आख्यातो मूर्द्धन्यो हृषसंयुतः । पित्तं शक्तिश्च माया च महायोनिः सबिन्दुमत्" मन्त्रा-भिधानम् । मातृकान्यासेऽस्य जठरे न्यासता । काव्यादौ प्रयोगेऽस्य फलम् खेदः "षः दुखं वस्तु खेदम्" इ०र०टी० ।

अत्र षादिशब्देषु षादितया ये धातवः पठितास्तेषां प्रयोगकाले दन्त्यसादित्वं सति च निमित्ते पुनः षत्वम् यथा सिध-सेधति निषेधति "षात्पदान्तस्यानुस्वारस्य" इत्यनुसेः षस्य प्रयोगकाले सत्वे तन्निमित्तटवर्गस्य तवर्गाविर्भावः यथा ष्टु स्तु स्तौति । ष्ठा स्था तस्थौ ष्णा स्ना स्नाति । निमित्ते सति षत्वे च ष्टुत्वे च प्रतिष्टौति प्रतिष्ठा निष्ठा निष्ठाति । तत्र श्वैत्यक्लिवान्तु न सादेशस्तेन श्वात्यति श्वत्यति श्वी-तीत्वे वेतेति भेदः । त्रिपर्युदासे जीवधातोरपि पर्युदासः ।

ष पु०षो-क पृषो०षत्वम् । १जेये मेदि० २गर्भविमोचने मानवे च ३वर्णे ४श्वेते एकाक्षरकोषः । ५विष्णौ च त्रि०मेदि० ।
षकार पु०ष+कारूपे कार । षत्वरूपवर्णे कामधेनुतन्त्रे उदा०
षग संवरणे भ्वा० पर० सक० सेट् एदित् सिचि न इडिः ।
षगति अषगीत् षिक्त षटादि षगयति । अषीषगत् त ।
षघ हिंसायां भ्वा०पर० सक० सेट् एदित् सिचि न इडिः ।
षघ्नोति अषघीत् अषीषघत् त । [षघत् त ।
षच सेचने भ्वा० आत्म० सक० सेट् । षचते अषचिष्ट अषी-

षच समवाये भ्वा०पर०सक० सेट् । सचति । असचीत्-असाचीत्
षट विभाजने भ्वा०प०सक०सेट् । षटति असटीत् असाटीत्
षट्कर्मन् न० षट्प्रकारं कर्म० । १तन्त्रोक्तेषु शान्तिवशीकरणस्तम्भनविद्वेषोच्चाटनमारणरूपेषु षट्सु प्रयोगभेदेषु तानि च कर्माणि तन्त्रसाराद्युक्तानि उच्चाटनशब्दे १०६२ पृ० दृश्यानि । तत्रत्यभूतमण्डलानि च भूतमण्डलशब्दे ४६८५।८६ पृ० दृश्यानि । २यजनयाजनाध्ययनाध्यापनदानप्रतिग्रहरूपेषु षट्सु विप्रकर्मसु च । षट्कर्माणि यस्य । ३वाग्मादियुक्ते विप्रे पु० । षडयोगाङ्गे ४षट्क्रियाभेदे यथोक्तं घेरण्डसं० १अ० ।
"धौतिर्बस्तिस्तथा नेतिर्नौलिकी त्राटकस्तथा । कपालभातिरेतानि षट् कर्माणि समाचरेत् । तत्रादौ तिर्दलधौतिर्हृद्रोगिमलशोधनम् । धौतयस्तत्रिधाः प्राज्ञैः षट् (वड्) कुर्वन्ति निर्मलम् । वातसारं वारिसारं वह्निसारं बहिष्कृतम् । षटस्य निर्मलार्थाय कर्मधौतिस्त्रिधा" । "आकण्ठमुदकं पीत्वा पिबेद्वायुं शनैः शनैः । चालयेदुदरं पश्चाद्भूमौ रेचयेत् शनैः । वातसारं परं गोप्यं देहनिर्मलकारकम् । सर्वरोगक्षयकरं देहानलविवर्द्धकम् । आकण्ठं पूरयेदारि वक्त्रेण च पिबेत् शनैः । चालयेदुदरेणैव क्षोदराद्रेचयेदधः । वारिसारं परं धौतं देहनिर्मलकारकम् । साधयेद्यः प्रयत्नेन देवदेहं प्रपद्यते । नाभिपर्यन्तं मेढ्रपृष्ठं शतवारञ्च कारयेत् । षट्रागवर्जं लङ्घा ऊर्ध्वमधश्च विवर्जयेत् । वह्निसारमिदं धौतं योगिनां योगसिद्धिदम् । कार्पासं सूत्रं साधयित्वा पूरयेदुदरं सूत्रं । धारयेदर्द्धयामन्तु चालयेदथवर्त्मना । इदं धौतं परं गोप्यं न प्रकाश्यं कदाचन । नाभिमग्नजले स्थित्वा शक्तिनाडीं विवर्जयेत् । कराभ्यां चालयेन्नाडीं यावन्मलविशोधनम् । तावत् प्रक्षाल्य नाडीञ्च उदरं रेचयेत् पुनः । इदं प्रक्षालनं गोप्यं देवानामपि दुर्लभम् । केवलं धौतिमात्रेण देवदेहो भवेद्ध्रुवम् । यामार्द्धधारणात् शक्तिं यावच्च साधकेश्वरः । वह्निकृतषडाधौतिस्त्रावस्तैव न जायते । दन्तमूलं जिह्वामूलं रन्ध्रे च कर्णयुग्मयोः । कपालरन्ध्रं पञ्चैते दन्तधौतिर्विधीयते" । "खादिरेण रसेनाथ खल्लिकामिश्र गुडिभिः । मार्जयेद्दन्तमूलञ्च यावत् किल्बिषमाहरेत् । दन्तमूलं परं धौतिर्योगिनां गोपनाधने । नित्यं कुर्यात् प्रभाते च दन्तरोगाय योगवित् । दन्तमूलं धारणादिभ्यो योगिनां मतः । खलातः संप्रवक्ष्यामि जिह्वाशोधनकारणम् । जरामरणरोगादि नाशयेत् दीर्घजीविका । तर्जनीमध्यमानामा अङ्गुलि त्रययोगतः । वेगयेद्गलमध्ये तु मार्जयेच्च मुखामलम् । शनैः शनैर्मार्जयित्वा कफदोषं निवारयेत् । मार्जयेच्चवनीतेन देहयेच्च पुनः पुनः । तदयं लौहयन्त्रेण घर्षयित्वा पुनः पुनः । नित्यं कुर्यात् प्रयत्नेन रक्तेदृश्यते क्षये । एवं कृते तु नित्येऽवलम्बिका दोषतां गता । तर्जन्यङ्गुलयोगेन मार्जयेत् कर्णरन्ध्रयोः । नित्यमभ्यासयोगेन नादान्तरप्रकाशनम् । ङङ्काङ्कुशेन दण्डेन मार्जयेद्वारवज्रकम् । एवमभ्यासयोगेन कफदोषं निवारयेत् । नाडी निर्मलतां याति दिव्यदृष्टिः प्रजायते । निद्रालौ भोजनान्ते च दिवाले च दिने दिने । कुर्यात् त्रिविधां कुर्यात् दण्डवल्लवणाम्बुना । रम्भादण्डं हरिद्रण्डं वेत्रदण्डमथैव च । कृत्वाग्रे चालयित्वा तु पुनः प्रत्याहरेत् शनैः । कफपित्तं तथा क्लेदं रेचयेदूर्ध्वमार्गतः । दण्डधौतिविधानेन कुष्ठरोगं नाशयेत् ध्रुवम्" । हरिद्रण्डं (षट्कारि) "भोजनान्ते विवेदारि आकण्ठपूरितं जलैः । अर्द्धदृष्टिं चथं कृत्वा तज्जलं वमयेत् पुनः । नित्यमभ्यासयोगोऽयं कफपित्तं निवारयेत् । चतुरङ्गुलविस्तारं सूक्ष्मवस्त्रं शनैर्ग्रसेत् । पुनः प्रत्याहरेदेतत् प्रोच्यते धौतकर्मकम् । गुल्मज्वरप्लीहकुष्ठं कफपित्तं विनश्यति । आरोग्यं बलपुष्टिञ्च भवेत् तस्य दिने दिने । कपालरन्ध्रपर्यन्तं यावद्व रोगधयेत् । तस्मात् सर्वप्रयत्नेन वस्त्रशोधनमाचरेत् । प्रीतसूत्रस्य दण्डेन मध्यमाङ्गुलिनापि वा । यत्नेन चालयेद्वस्त्रं वारिणा च पुनः पुनः । नाशयेत् कोष्ठकाठिन्यं मामाजीर्णं निवारयेत् । कारणं कालिपुष्पोत्थं दोषनं वह्निमण्डलम् । जलवस्तिः शुष्कवस्तिर्द्वौ च द्विविधौ स्मृतौ । जलवस्तिं जले कुर्यात् शुष्कवस्तिं स्थितौ सदा । नाभिमग्नजले पायुं न्यसनाकुञ्चनम् । आकुञ्चनं प्रसार्यञ्च जलवस्तिं समाचरेत् । प्रसेकञ्च गुदादर्शं क्रूरवायुं निवारयेत् । भवेत् स्वच्छन्ददेहश्च कामदेवसमो भवेत्" । न्यसनाद्याकुञ्चनम् कुरुते दक्षं दत्त्वा गारुडवदरं कुर्यादिदर्थः । "वस्तिं पश्चिमतानेन चालयित्वा शनैः शनैः । अश्विनीमुद्रया पायुमाकुञ्चेच्च प्रसारयेत् । एवमभ्यासयोगेन कोष्ठदोषो न विद्यते । वर्द्धयेत् जठराग्निञ्च आमवातं विनाशयेत् । वितस्तिमं सूक्ष्मवस्त्रं नाड्यामाले प्रवेशयेत् । मुखान्निर्गमयेत्

पश्चात् प्रोच्यते नेत्रिकमेवम्। साधनाङ्गेतिक्रमेणः क्षेत्रेरीं सिद्धिमाप्नुयात्। कफदोष विनश्यन्ति दिव्यदृष्टिश्च जायते। आनन्दमेघे तन्द्रश्च भवेदेव पार्श्वयोः। अवरोगाश्चिकित्सोक्ता देहानवयविवर्द्धनम्। इति नौलिकी। "निमेषोन्मेषकं त्यक्त्वा सूक्ष्मलक्ष्यं निरीक्षयेत्। यावदश्रु निपतति ताटकं प्रोच्यते बुधैः। एतदभ्यासयोगेन शाम्भवी जायते ध्रुवम्। न जायते नेत्ररोगो दिव्यदृष्टि प्रदायकम्। शीतक्रमेण शीतक्रमेण विशेषतः। भास्त्रिकां विधा कुर्यात् कफदोषं निवारयेत्। दक्षेण पूरयेद्वायुं रेचयेत् विकुलया पुनः। विकुलया पूरयित्वा पुनश्चन्द्रेण रेचयेत्। पूरकं रेचकं त्यक्त्वा खेन न तु धारयेत्। एवमभ्यासयोगेन कफदोषं निवारयेत्। नासाभ्यां जलमाकृष्य वक्त्रेण रेचयेत् पुनः। पायं पायं प्रकुर्वीत श्लेष्मदोषं निवारयेत्। न जायते वार्द्धक्यञ्च व्याधी नैव प्रजायते"।

षट्कूटा स्त्री भैरवीभेदे तन्त्रसा०।

षट्कोण न० षट् कोणा यस्य। १वज्रे राजनि०। तन्त्रोक्ते ऊर्द्धाधःस्थे त्रिकोणद्वयरूपे यन्त्रभेदे २ज्ञातिपोक्ते वस्तुतः षडस्याने च त्रि०त०।

षट्चक्र न० षण्णां चक्राणां समाहारः द्वन्द्वा०। तन्त्रोक्तेषु देहस्थेषु सुषुम्नानाड़ीमध्यवर्त्तिषु हृदयपद्मादिषु षट्सु पद्मेषु चक्रशब्दे २८०८ पृ० दृश्यम्। तदधिकृत्य कृतोग्रन्थः अण् तस्य लुक्। २षट्चक्रनिरूपणादिकग्रन्थभेदे। [३षड्नाभेदे १तत्संख्यान्विते च।

षट्चत्वारिंशत् स्त्री षड़धिका चत्वारिंशत्। (छेचालिस)

षट्चरण पुंस्त्री० षट् चरणा यस्य। १भ्रमरे षष्ठ्या० स्त्रियां ङीष्। षट्पदादयोऽप्यत्र। २यूकायां राजनि०।

षट् निवासेवने च अक० क्षिप्तायां दाने च सक० चुरा० उभ० सेट्। षड़यति ते अषषट्त त। विषट्कयिषति।

षट्तिलिन् पु० षट् तिलाः तिलोदर्त्तनादेः फलमस्यास्य। "तिलोद्वर्त्ती तिलक्षोदी तिलपिण्डो तिलप्रदः। तिलभुक् तिलवापी च षट्तिलो नावसीदति" इत्युक्ते तिलोदर्त्तनादिकारिणि। [स्वामिभेदे १तत्संख्यान्विते च।

षट्त्रिंशत् स्त्री षड़धिका त्रिंशत् षाक०। (छत्तिस) १संख्यायां

षट्त्रिंशदुपचार (छत्तिस) देवपूजाङ्गीभूतोपचारेषु "आसनाभ्यञ्जनं तद्वदुद्वर्त्तनविकल्पके। स्नानाङ्गं वस्त्रिरादि कृष्णवाहनं तथा। पाद्यार्घ्यौ वचनीयञ्च स्नानीयमधुपर्कौ। पुनराचमनीयञ्च वस्त्रयज्ञोपवीतके। अनुलेपो गन्धपुष्पे धूपदीपौ तथैव च। ताम्बूलादिकनैवेद्यं पुष्पमाला तथैव च। नृत्यञ्चैव गीतं च चामरव्यजनं तथा। आदर्शदर्शनञ्चैव नमस्कारोऽथ वर्त्तनम्। गीतवाद्यं च दानानि स्तुतिर्होमप्रदक्षिणम्। दत्तात्मप्रदानञ्च ततो देवविसर्जनम्। उपचारा इमे प्रोक्ताः षट्त्रिंशत् सुरपूजने" एका०त०।

षट्त्रिंशन्मत न० "मनुर्विष्णुर्यमो दक्षो वसिष्ठोऽत्रिर्हरस्तथा। आपस्तम्बोशना च कात्यायनपराशरौ। वशिष्ठव्यासवर्त्ता हारीतगौतमावपि। प्रचेताः शङ्खलिखितौ बाभ्रवल्क्यश्च काश्यपः। शातातपो योगयज्ञ जमदग्निः प्रजापतिः। विश्वामित्रपैठीनसी बोधायनपितामहौ। ज्ञानवैराग्य जाबाली मरीचिर्वह्निरङ्गिराः। अत्रयश्चेति षट्त्रिंशत् स्मृतिकारकाः। एतेषान्तु मतं यत्तु षट्त्रिंशन्मतञ्च्युतं" इति बहुलिखितात्तन्नामभेदवते।

षट्पञ्चाशत् स्त्री षड़धिका पञ्चाशत् षाक०। (छप्पन्न) १सङ्ख्याभेदे २तत्संख्यान्विते च।

षट्पञ्चाशिका स्त्री षट्पञ्चाशत् परिमाणमस्य ठिन् संज्ञायां कन्। वराहमिहिराचार्यपृथुयशोविरचिते ग्रन्थभेदे।

षट्पदप्रिय पु० हृत०। नागकेसरे शब्दमा०। तस्य हि प्रभूतरजधूलत्वात् भ्रमरप्रियत्वम्। [तिमा०।

षट्पदातिथि पु० षट्पदः अतिथिरिव यस्य। आम्रवृक्षे

षट्पदानन्दवर्द्धन पु० षट्पदानन्दं वर्द्धयति वर्द्धि-खिच्-ल्यु त०। आम्रवृक्षे राजनि०।

षट्पदी स्त्री षट् पादा अस्याः पादस्य वाङ्मात्रे ङीषि पृषो०। १यूकायां भ्रमरयोषिति च। स०ह्रस्वः। २षट्चरणयुक्ते छन्दोभेदे च। ३षट् श्लोकात्मकपद्यसंघाते।

षट्प्रश्न पु० षट्सु प्रश्ना यस्य। "धर्मार्थकामसमोक्षेषु मोक्षतत्त्वार्थयोरपि। षट्सु प्रश्ना हि यस्याको षट्प्रश्न परिकीर्त्तितः" इत्युक्ते १धर्मार्थादिभिन्ने २ग्रन्थे ३ग्रन्थके त्रिका०।

षड़ङ्ग न० षण्णामङ्गानां समाहारः द्वन्द्वा०। "अङ्गं वाङ्मयिरो मध्य षड़ङ्गमिदमुच्यते" इत्युक्ते १वेदावयवषट्कभेदेशब्द० तन्त्रोक्ते २हृदयाद्यवयवभेदे यत्र हृदयादिषु षट्सु षड़ङ्गेषु मन्त्रविन्यासोन्यस्यते तेषु। षट् अङ्गानीव यस्य। "शिक्षाकल्पो व्याकरणं निरुक्तं छन्दसां चितिः। ज्योतिषामयनञ्चैव षड़ङ्गो वेद उच्यते" इत्युक्ते २वे

पु० ३तत्पु० रा० स० "गोमूत्रं गोपयः क्षीरं सर्पिर्दधि च रोचना। षडङ्गमेतन्माङ्गल्यं पठितं सर्वदा सवाम्" ब्रह्मपु० रोचनाव्याख्याने ३पदशब्दे न०।

षड़भिज्ञ पु० "दिव्यं चक्षुःश्रोत्रं १ परिचित्तज्ञानं२ पूर्वनिवासानुस्मृतिः३ आत्मज्ञानम्४ विषद्गतिः५ कायव्यूहसिद्धिश्चेत्येतानि षट् अभिज्ञा अभिज्ञायमानानि यस्य। बोधभेदे अमरः। [१।३] कर्मधारयतिः।

षड़वक्त्र न० षण्णां खातवर्त्तिं वाक्त्रे यस्य पात्रभेदे कात्या०

षड़शीति स्त्री षड़धिका अशीतिः शाक०। (छेवाग्नि) १ष ड्यादौ २तत्पुरुषान्विते च। षडशीतिमुखवर्त्तुं मिथुनकन्याधनुर्मीनेषु रवेः संक्रान्तौ च "अयनविष्णुपदौ षडशीतयो विषुवविष्णुपदौषडशीतयः" इति ज्योतिषम्।

षड़शीतिचक्र न० मिथुनकन्याधनुर्मीनराशिस्थरवेः संक्रमे शुभाशुभफलज्ञानार्थं षट्कोष्ठनराकारे चक्रे। यथा "मुखे चैकं करे वेदाः पादयुग्मे द्वयं द्वयम्। क्रोड़े पञ्चतथा वेदाः करे षड्भेतरेऽपि च। द्वयं द्वयं तथा नेत्रे मस्तके त्रितयं तथा। द्वयञ्चैव तथा गुह्ये षडशीत्यां स्थिते रवौ। सुखे दुःखं करे लाभः पादयोर्भ्रमणं हृदि। कान्ता स्याद् बन्धनं धामे हत्ते स्यात् स्त्रीयमे व्रणम्। सम्मानो नेत्रयोश्चैव अपमानश्च मस्तके। गुह्ये चैव भवेन्मृत्युः षडशीतिफलश्रुतिः" ज्यो० त०।

षड़शीतिमुख न० षडशीतेः तत्प्रमाणकालेर्मुखम्। "तस्मात्षडशीतिमुखं क्रमात्। तच्चतुष्टयमेव स्यात् द्विस्वभावेषु राशिषु" "षड्विंशे धनुषो भागे द्वाविंशेऽनिमिषस्य च। मिथुनस्यादये भागे कन्यायास्तु चतुर्दशे" इति सूर्यसिद्धान्तोक्ते तत्तादितः षडशीतिदिनान्तरितकाले।

षड़ष्टक न० ज्यो०त० उक्ते वरकन्ययोः स्वस्वराश्यपेक्षया परस्परषडष्टराशिसम्बन्धे उपयमशब्दे पृ० दृश्यम्।

षड़ानन पु० षट् आननानि यस्य। कार्त्तिकेये अमरः। षड्वदनादयोऽप्यत्र।

षड़ाम्नाय पु० षड्भिर्घटित आम्नायः शाक०। शिवस्य षड्वक्त्रविनिर्गते षट्प्रकारतन्त्रभेदे "अथेदानीं प्रवक्ष्यामि आम्नायकथनं पृथक्। पूर्वाम्नायो वटा मन्त्रसदा प्राच्यां दिशि स्थितः। सदाशिवोऽङ्ग भगवानाचारः परिकीर्त्तितः। एवं वै दक्षिणाम्नायो दक्षिणस्यां दिशि स्थितः। एवं हि पश्चिमाम्नायः पश्चिमायां दिशि स्थितः। एवमेवोत्तराम्नाय उत्तरस्यां दिशि स्थितः। ऊर्ध्वमूर्ध्वगतं देवि! वक्त्रं तस्य सदाशिवे। ऊर्ध्वाम्नायश्च कथितो देवानामपि दुर्लभः। यदा चाधोमुखं देवि! वक्त्रं तस्य महेश्वरि! प्रिये!। अथ चाम्नाय एष्यन्ति सर्वे सर्वे सुमध्यमे!। ऊर्ध्वाम्नायात्तु कथितास्तोत्रक्रियाभिमताः। यस्मिन् यस्मिंश्च ये देवाः कथिताश्च वरानने!। तान्देवांश्च प्रवक्ष्यामि साधकानां हिताय वै। श्रीविद्या भेदसहिता तारा च त्रिपुरा तथा। भुवनेशी चाम्रपूर्णा पूर्वाम्नाये प्रकीर्त्तिताः। वसन्तश्चुक्लो च वशिनी त्वरिता धनदा तथा"। वशिनी वाक्यभैरवीत्यर्थः "महिषघ्नी महाकच्छादयश्चाम्नायकीर्त्तिताः। महासरस्वती विद्या तथा वाग्वादिनी परा। प्रत्यङ्गिरा भवानी च पश्चिमाम्नायकीर्त्तिताः। कालिका भेदसहिता तारा भेदैश्च संयुता। मातङ्गी भैरवी छिन्ना तथा धूमावती परा। उत्तराम्नायकथिताः सर्वे मोक्षफलप्रदाः। समस्तभेदसहिताः सर्विका याः प्रकीर्त्तिताः। द्वाविंशत्यक्षरी तासां दक्षिणाम्नायकीर्त्तिता। एकजटा षडाम्नाये महामोक्षप्रदायिनी। तत्परा परमा विद्या न विद्यान्तरगोपिता। परप्रधानमन्त्राश्च ऊर्ध्वाम्नाये प्रकीर्त्तिताः। ऊर्ध्वाम्नायो ह्यधश्चैव केवलं मोक्षदो भवेत्। धर्मार्थकाममोक्षार्थं आम्नायान्ये प्रकीर्त्तिताः। यथोक्तविधिना भद्रे! कृत्वा फलमवाप्नुयात्। पूर्वाम्नायादिसर्वेषां विधानं शृणु सुन्दरि!। कृत्वा येनापि लभते फलं यदुक्तमोत्तमम्। षट्कर्म फलदा ह्येषां षडाम्नायाः प्रकीर्त्तिताः। उत्तराम्नायो देवेशि! तेषामाशु फलप्रदः" इति समयाचारतन्त्रे २पटले। आम्नायभेदेनाचारभेद उक्तो यथा "पूर्वाम्नायोदितं कर्म पाशवं कथितं प्रिये!। यदुक्तं दक्षिणाम्नाये तदेव पाशवं स्मृतम्। पश्चिमाम्नायजं कर्म पशुवीरसमन्वितम्। उत्तराम्नायजं कर्म दिव्यवीरान्वितं प्रिये!। दिव्योऽपि वीरभावेन साधयेत् शिवकानने। वीरासनं विना दिव्यः पूजयेत् शिवकानने। ऊर्ध्वाम्नायोदितं कर्म दिव्यभावान्वितं प्रिये!" इति निरुक्ततन्त्रे १पटले।

षड़ूर्मि पु० षट् ऊर्मयः बुभुक्षादयोऽस्य। जीवे ऊर्मिशब्दे १२८१ पृ० दृश्यम्।

षड़ूषण न० षट्संख्यम् ऊषणम्। कटुद्रव्यभेदे "षड्कोलं समरिचं षड्ऊषणमुदाहृतम्। पञ्चकोलगुणं तत्तु कफसर्पं विषापहम्" भावप्र०।

षड़्या स्त्री "त्रयागत्रो त्रयादित्यो त्रायत्री च त्रयाधरः।

गया गयासुरस्यैव षड्गया मुक्तिदायिकाः" वायु० पु० । षष्ठे गयागजादि षट्के ।

षड्गव त्रि० षड्भिर्गोभिराकृष्टः शकटः हलो वा शाक० अच् समा० । षड्भिर्गोभिराकृष्टे १हलादौ "अष्टानवं धर्म्यं हलं षड्गवं जीविकार्थिनाम्" इति स्मृतिः । षण्णां गवां समाहारः अच्समा० । २षट्सु गोषु न० ।

षड्गुण पु० षड्भिः गुणिता गुणाः शाक० । राशां सन्ध्यादिषु षट्सु गुणेषु षाड्गुण्यशब्दे दृश्यम् ।

षड्ग्रन्था स्त्री षट् ग्रन्थवः ग्रन्थसा अच् । १पचायां भावप्र० २शठ्यां ३मङ्काकरञ्जे ४श्वेतवचायाञ्च राजनि० ।

षड्ग्रन्थि न० षट् ग्रन्थयोऽस्य । १पिप्पलीमूले वैद्यकम् । २षट्पर्वयुक्ते त्रि० । ३वचायां स्त्री वा ङीप् । संज्ञायां कन् टाप् अत इत्त्वम् । शठ्यां स्त्री अमरः ।

षड्ज पु० षड्भ्यो नासादिस्थानेभ्यो जायते जन-ड । "नासां कण्ठमुरस्तालु जिह्वां दन्तांश्च संस्पृशन् । षड्भ्यः संजायते यस्मात् तस्मात् षड्ज इति स्मृतः" इत्युक्ते स्वरभेदे "षड्जसंवादिनी: केका." इति रघुः ।

"षड्जं रौति मयूरो हि गावो नर्दन्ति चार्षभम् । अजा विरौति गान्धारं क्रौञ्चो नदति मध्यमम्" भरतः ।

षड्दर्शन न० षड्गुणितं दर्शनम् । १आस्तिकमतसिद्धे पूर्वमीमांसावेदान्तसांख्यपातञ्जलन्यायवैशेषिकाख्ये दर्शने शास्त्रभेदे षट्त्व २बौद्धदर्शनेषु च ।

षड्दीर्घ पु० षड्भिर्गुणिता दीर्घाः । तन्त्रोक्तेषु आ, ई, ऊ, ऐ, औ, आः इत्येवं रूपेषु षट्सु दीर्घेषु ।

षड्दुर्ग न० षड्गुणितं दुर्गम् । "धन्वदुर्गं महीदुर्गमवदुर्गं वार्क्षमेव वा । नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत् पुरम्" मनूक्ते दुर्गषट्के ।

षड्धा अव्य० षष्+प्रकारे-धाच् । षट्प्रकारे । [त्रिका० ।

षड्बिन्दु पु० षड्बिन्दवो यत्र । १कीटभेदे मेदि० । २विष्णौ

षड्भुजा स्त्री षट् भुजा इव यस्याः । (खरसुज) फलवृक्षभेदे राजनि० । २षड्भुजयुक्ते त्रि० । ३रौद्रे ज्वरे पु० "श्रीमांस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः" ब्रह्मवै० ।

षड्रस न० षण्णां रसानां समाहारः पात्रा० । "मधुरो लवणस्तिक्तः कषायोऽम्लः कटुस्तथा" इत्युक्तेषु "मधुरं लोल्यमित्याहुरिक्षादौ स च लक्ष्यते । लवणस्तु पटुः प्रोक्तः सैन्धवादौ स दृश्यते । तिक्तस्तु पित्तमदादौ व्यक्तमाचार्यते रसः । कषायस्तुवरशूक्ते स च पूगीफलादिषु । कटुस्तु तीक्ष्णसंज्ञः स्यात् मरीचादौ स चेष्यते" इत्युक्तस्थानेषु लक्ष्येषु षट्सु रसेषु । षड्गुणितोरसः । तत्रार्थे पु० [त्रिका० ।

षड्लवण न० षड्गुणितं लवणम् । सच्चाम्लयुतपञ्चलवणे

षड्वर्ग पु० द्वन्द्व० । १कामक्रोधलोभमोहमदमात्सर्येषु "व्यालेऽप षड्वर्गमिते" भट्टिः । "लेखं होराच द्रेक्काणौ नवांशो द्वादशांशकः । त्रिंशांशकश्च षड्वर्गस्त्रयादिप्राग्घ्रा फलप्रदः" ज्योतिषोक्तेषु लेखादिषु षट्सु । स च द्वो० त० यथा

"कुजशुक्रबुधेन्दुकेजीव्यशुक्रावनीभुवाम् । जीवार्किभानुजेन्द्वानां लेखाधिद्रुरजादयः । विषमर्क्षेषु प्रथमा होराः२ द्युचण्डरोचिषः । द्वितीयाः शशिनोयुक्षु व्यत्ययाद्गण्यते सदा । खपञ्चनवमानां ये राशीनामधिपाग्रहाः । ते द्रेक्काधिपाराशौ द्रेक्काणाश्चैव एव हि । मेषकेसरिधनुषां मेषाद्याश्च नवांशकाः४ । मृगकन्याद्यमाद्याश्च मृगाद्यास्तु नवांशकाः । तुलामिथुनकुम्भानां तुलाद्याः सप्तदाहृताः । कर्किवृश्चिकमीनानां कर्कटाद्या नवांशकाः । चरार्धा प्रथमे चांशे स्थिरार्धा पञ्चमे तथा । नवमे द्व्यात्मकानाञ्च वर्गोत्तम इति स्मृतः । खनवांशस्तु राशीनां वर्गोत्तम इति स्मृतः । सर्वेषां मेषपुरुषां खचांद्या द्वादशांशकाः५ । कुजार्किशुक्रसौम्यानां भागाः शुक्रस्य च क्रमात् । पञ्चपञ्चाष्टसप्तेषु क्षयमोजःसु राशिषु । त्रिंशांशाः व्यत्ययादेते युग्मराशिषु कीर्तिताः" । अत्रधिकशुभाशुभप्राग्घ्रा शुभाशुभद इति बोध्यम् ।

षण(न) सम्भक्तौ भ्वा०पर०सक०सेट् षत्व सत्वे षत्व नत्वम् । सनति असनीत् असानीत् । दन्त्यान्तोऽयमित्येके ।

षण(न) दाने तना०उभ० सक० सेट् षत्व सत्वे षत्व नत्वम् षदित् । दन्त्यान्त इत्येके सनोति सनुते असनोत्-असानीत् असनिष्ट-असात । सिषासति सिसांसति इत्येके ।

षण्ड पु० सम-ड डस्य नेत्वम् पृषो० षत्वं शत्वं वा । १क्लीबे अमरः २नपुंसके जटा० । ३पद्मादिसमूहे पु० न० अमरः । [पाठान्तरम् ।

षण्ढ पु० सम-ढ तस्य नेत्वम् पृषो० षः । नपुंसके अमरे

षण्मुख पु० षट् मुखानि यस्य । १कार्त्तिकेये त्रिका० षड्भुजायां स्त्री राजनि० टाप् ।

षद गतौ चु० उभ० सक० सेट् । सादयति ते असीषदत् ।

षद विशरणे आकृतीभावे अक०हिंसायां गतौ च सक०तु०प० अनिट् । सीदति सेदतुः असदत् । ज्वला० सदः सादः ।

षन्च गतौ भ्वा० पर० सक० सेट् । सञ्चति असञ्चीत् ।

षन्ज सङ्गे सम्बन्धे च भ्वा०पर०सक०अनिट्। सजति असाङ्क्षीत्
षप सम्बन्धे भ्वा०पर०सक०सेट्। सपति असापीत् असपीत्। असीषपत्। [त। सिषप्सति।
षम वैकल्ये चुरा० उभ० सक० सेट्। समयति ते असिसमत्
षस्व सर्पणे भ्वा० पर० सक० सेट्। सस्वति असस्वीत्।
षर्ज्ज सर्जने भ्वा० पर० सक० सेट्। सर्जति असर्ज्जीत्।
षर्ब(र्ं) गतौ स्वा०प०सक० सेट्। सर्ब(र्ं)ति असर्बीत्(र्वीत्)।
षर्षपी स्त्री सर्षप+ङीप्। खञ्जनाङ्गतौ खगभेदे शब्दर०।
षल गतौ भ्वा० पर०सक०सेट्। सलति असालीत् असीषलत्
षष् त्रि० ब० व०। षो-क्विप् पूर्वो०। (छय) सङ्ख्याभेदे व्याकरणोक्ते १इतिप्रत्ययान्तकत्वादौ शास्त्रे नाम्नि सङ्ख्यावाचके च २शब्दे च
*ष्णान्ता षट् "डति च" पा०। "अजभ्यो नुक्" पा० *न षट् स्वादिभ्यः" पा० स्त्रियां न ङीप्। *षट् संख्या स्त्रिषु समावुद्भटश्चक्तिङव्ययम्" अमरः। त्रिलिङ्गाधिकारेण स्त्रिषु समा इति स्त्रिङ्गे पुनः कथनं स्त्रिषु समानरूपताप्रतिपादनार्थम्। तथा हि वैयाकरणमते त्रिङ्गः प्रथमान्तसामानाधिकरण्यनियमात् विशेष्यविशेषणयोः समानलिङ्गत्वे प्राप्ते ततः स्त्रियां टाबादिप्रसक्तौ तन्निषेधः तेन स्त्री षचति इत्यादौ एकान्तरत्वात् न ङीप्। स्त्रियः षचन् इत्यादौ च न ङीप्। स्त्री षचत इत्यादौ न टाप्। कुलं पचते इत्यादौ क्लीवत्वेन न दुष्यः। अव्ययस्य लिङ्गशून्यत्वेऽपि स्त्रुप टाबादिशून्यत्वार्थं स्त्रिषु समानरूपोक्तिः। तेन स्त्रायशब्दस्य निन्द्नीयपरत्वे स्त्रा पार्श्वमित्यादौ न दुष्यः। कल्याण्यपरत्वे अहह संसारपारगतिरित्यादौ न टाप् इति बोध्यम् इत्यन्तस्य कति स्त्रियः इत्यादौ न ङीप्।
षष्टि स्त्री षड्गुणिता दशतिः त्रि०। (साट्) १सङ्ख्याभेदे २ततसङ्ख्यान्विते च।
षष्टिक पु०षष्ठ्या ऋतोभिः पच्यते कन्। (साटिया) १धान्यभेदे अमरः। तत्रार्थं स्त्रीत्वमपि "षष्टिका शालयश्चैव मुञ्जश्चेक्षुरतरत्" तिथ्यत०। षष्ठ्या क्रीतः कन्। २षष्टिसंख्यातद्रव्यक्रीते त्रि०।
षष्टिक्य न० षष्टिकधान्यस्य भक्षणं चेत्यम् यत्। षष्टिकधान्योत्पत्तिक्षेत्रे क्षेत्रे अमरः। [तस्मिन्। स्त्रियां ङीप्।
षष्टितम त्रि० षष्टेः पूरणः तमप्। येन षष्टिसङ्ख्या पूर्यते
षष्टिमत्त पु०षष्ठ्या वर्षैर्मत्तः। षष्ठ्यब्दयुक्ते गजे शब्दमा० तद्धरं हि तस्य मत्ततायोत्पत्तेः तथात्वम्।
षष्टिलता स्त्री षष्ट्या लतेव। भवरनाम्न्यां राजनि०।
षष्टिसंवत्सर पु० ब० व० षष्टिगुणिता संवत्सराः। ज्योतिषप्रसिद्धेषु १प्रभवादिषु षष्टौ वत्सरेषु। प्रभवादिशब्दे ४७३।४७४ पृ० तदानयनं दृश्यम्। २नारायणादिषु षष्टिवर्षेषु गुरुवर्षशब्दे २६२२ पृ० दृश्यम्। षष्ट्र-ब्दादयोऽत्र।
षष्टिहायन पु०षष्टिहायना वयोऽस्य। १षष्टिवर्षवयस्के गजे षष्टिदिनपक्वोहायनो व्रीहिः शाक०। २षष्टिकधान्ये च मेदि०। [पूर्त्ते तस्मिन् स्त्रियां ङीप्।
षष्ठ त्रि० षष्ठ्यां पूरणः षष्+डट् धुक् च। येन षट्संख्या
षष्ठक त्रि० षष्ठो भागः कन्। षष्ठे भागे।
षष्ठांश पु० कर्म०। रक्षणमतिरूपतया प्रजास्थो धान्ये उत्पन्नषष्ठस्य षष्ठांशरूपे नृपकरे।
षष्ठान्न त्रि० षष्ठो दिवसस्य षष्ठकालः अस्य तद्भोजनस्य कालो यस्य। दिवसस्य षष्ठभागे भोजनकालयुते पुरुषे।
षष्ठान्नकाल पु० षष्ठे दिवसे भक्ष्यान्नकालो यत्र। व्रतभेदे।
षष्ठी स्त्री षष्ठ्यां पूरणी डट् धुट् ङीप्। चन्द्रमसः षष्ठकलायां सुधाख्यरूपक्रियारूपे १तिथिभेदे स्कन्दभार्य्यारूपे २मातृकाभेदे "मातृकासु पुरावृत्तमा सा च षष्ठी प्रकीर्त्तिता। शिशूनां प्रतिविश्वेषु प्रतिपालनकारिणी तपस्विनी विष्णुभक्ता कार्त्तिकेयस्य कामिनी। षष्ठांशरूपा प्रकृतेः स्वेन षष्ठी प्रकीर्त्तिता। पुत्रपौत्रप्रदात्री च धात्री विश्वजगतां सती। सुन्दरी युवती रम्या सन्ततं भर्तृसन्निधे। ध्याने शिशूनां परमा दृढरूपा च योगिनी। पूजा द्वादशमासेषु यज्ञा विश्वेषु सन्ततम्। पूजा च सूतिकागारे पुरा षष्ठदिने शिशोः। एकविंशतिमे चैव पूजा कल्याणहेतुकी। यच्चित्रयवित्ता चेष्टा नित्या कान्ता सुतिः परा। मातृरूपा दयारूपा षष्ठसूत्तमरूपिणी। षष्ठे षष्ठे चान्तरीक्षे शिशूनां स्वप्नगोचरे" ब्रह्म० वै०प्र० २अ०। "ब्रह्मणो मानसी कन्या देवसेना हरीश्वरी। दत्ता मां मनसा धाता ददौ स्कन्दाय भूमिप। मातृकासु च विख्याता स्कन्दभार्य्या च सुव्रता। विश्वे षष्ठीति विख्याता षष्ठांशात् प्रकृतेर्यतः" ४०अ०। "प्रसन्ना द्वादशे मासि सम्पूज्याऽपत्यवृद्धये। सुते जाते तथा पूज्या षष्ठी द्वादशरूपिणी। वैशाखे चान्द्री षष्ठी ज्येष्ठे चारण्यसंज्ञिता। आषाढे कार्त्तिकी चेया श्रावणे सुखदा तथा। भाद्रे चपेटा विख्याता दुर्गाख्याश्वयुजी तथा। नाद्याख्या कार्त्तिके मासि मार्गे मूलरूपिणी। पौषे

माश्वरूपा च शीतला तपसि स्मृता। गोरुपिणी फाल्गुने च चैत्रेऽशोका प्रकीर्त्तिता" स्कन्दपु०। षष्ठी-विच्छितकालव्यवस्था तिथिशब्दे दृश्या।

षस स्रंसे भ्वा०पर०अक०सेट् वैदिक। षस्ति अषासीत् अषसीत्

षस्ज सर्जने भ्वा०पर०सक०सेट्। सज्जति अषस्जीत्। अय-मात्मनेपदीत्यन्ये "वचोऽपि परुषाक्षरं न च पदेषु संसज्जते" इति भट्टिः।

षस्त स्रंसे अदा० स्वरा० पर० अक० सेट्। वैदिकः इदित्। संस्ते अषंसीत्। [ते सस्तति अषीषदत अषसीत्।

षह क्षमायां वा क्षु०सक०आत्मे द्वि०पर०सक० सेट्। षाक्षयति

षह क्षमायां भ्वा० चु०आ०सक०सेट्। सहते अषहिष्ट अषत्त। सुषह षाक्षः। "तोस्यसहेति" पा० तकारादावर्द्धधातुके वा इट्। सोढा सहिता। सहितव्यः सोढव्यः। क्त। सोढ इत्येव। सह एव निमित्ते सति न षत्वम् परिसोढा इत्येव पक्षे परिसहितेत्यादौ षत्वम्।

षहसानु पु० सह-सानु अलुक् च पृषो० षत्वम्। १यज्ञे २मथुरे च संज्ञिप्रसारः। [शब्दरत्न०।

षाट् अव्य० सह-खि-पृषो० षत्वं टत्वञ्च। सम्बोधने शब्दा-

षाड्व पु० षड्वति अव-अच् घञर्थे कप्। १माने २रसे च मेदि०तयोः तत्संख्यकखरादिसत्त्वात् तथात्वम्। २षट्-स्वरमिलितरागे च "षोडवः पञ्चभिः प्रोक्ता षड्भिस्तु षाडवः स्मृतः। सम्पूर्णः सप्तभिर्ज्ञेय एवं रागस्त्रिधा-मतः" संगीतदर्पणः।

षाड्गुण्य न० षट्गुणा एव स्वार्थे ष्यञ्। राज्ञां सन्धिविग्रहादिषु षट्सु गुणेषु "षाड्गुण्यसमयुञ्जते" इति माघः। "षाड्-गुण्यमिति यत् प्रोक्तं तन्निबोध युधिष्ठिर!। सन्धा नासनमित्येव यानमासनमेव च। विग्रहासनमित्येव यानं सम्परिग्रह च। द्वैधीभावस्तथान्येषां संश्रयोऽथ परश्च" भा०शा०६९अ० "सन्यासनं सन्धिं कृत्वाऽवस्थितिः यानमासनं यानम्२। विग्रह वैरं कृत्वाव-स्थानं विग्रहः३ यानं सम्परिग्रहासनं यत्नोभयप्रदर्श-नार्थं यानं प्रदर्श्य स्वस्थानेऽवस्थानं४ द्वैधीभाव उभ-यत्र सन्धिकरणं५ परस्याऽन्यस्याश्रयोद्दुर्गादेर्भङ्गा-राजस्व वा" नी० क०।

"सन्धिञ्च विग्रहं यानमासनादि वदामि ते। बलवद्-विग्रहीतेन सन्धिं कुर्याच्छिवाय च। कपाल उप-हारश्च सन्तानः सङ्गतस्तथा। उपन्यासः प्रतीकारः संयोगः पुरुषान्तरः। सदृशनर आदिष्ट आत्मापि च ष-

ष्यग्रहः। परिक्रमस्तथा छिन्नस्तथा च परदूषणम्। स्वस्योपनेयः सन्धिश्च समयः षोड़शेरितः। परस्परो-पकारश्च मैत्रः सम्बन्धकस्तथा। उपहारश्च चत्वारस्तेषु सख्यञ्च समयः। बाढो दृढो दीर्घरोगस्तथा बन्धुविद्वि-ष्कृतः। भीरुको भीरुजनो लुब्धो लुब्धजनस्तथा। विरक्तप्रकृतिश्चैव विषयेष्वतिशक्तिमान्। अनेकचित्तमन्त्रश्च देवब्राह्मणनिन्दकः। दैवोपहतकश्चैव दैवनिन्दक एव च। दुर्भिक्षव्यसनोपेतो बलव्यसनसङ्कुलः। स्वदेशस्थो बहु-रिपुर्दुर्गः कोशेन यश्च हृ। सत्यधर्म्मव्यपेतश्च विंशतिः पुरुषा अमी। एतैः सन्धिं न कुर्वीत विपरीतो यतो हि केवलम्। परस्परापकारेण पुंसां भवति विग्रहः। या-त्मनोऽभ्युदयाकाङ्क्षी पीड्यमानः परेण वा। देशकाल-बलोपेतः प्रारभेतेह विग्रहम्। राज्यस्त्रीस्थानदेशानां स्थानस्य च बलस्य च। अपहारो मदो मानः पीड़ा दैवयिकी तथा। स्थानात्स्वशक्तिधर्म्माणां विघातो दैवमेव च। मित्रार्थस्यापमानश्च तथा बन्धुविनाशनम्। भूमा-तपहरणच्छेदस्तथा सङ्घबलदूषणम्। एकार्थाभिनिवेशि-त्वमिति विग्रहयोनयः। सापत्न्यं वास्तुजं स्त्रीजं वाग्जातमपराधजम्। वैरं पञ्चविधं प्रोक्तं साधनं प्रय-त्नं नवेत्। किञ्चित्फलं निष्फलं वा सन्दिग्धफलमेव च। तदात्वे दोषजननमायत्यांचैव निष्फलम्। आय-त्यान्तु तदात्वे च दोषसूचनं तथा। अपरिज्ञातवीर्य्यञ्च परेण स्त्रीजितोऽपि वा। परार्थं स्त्रीनिमित्तञ्च दोषै-र्ज्ञातं हिंसैः सह। अकालदेययुक्तेन बलोद्वतसखेन च। तदात्वे फलसंयुक्तमायत्यां फलवर्जितम्। आयत्यां फल-संयुक्तं तदात्वे निष्फलं तथा। इतीमं षाड्गुण्यविधिं न कुर्यादेव विग्रहम्। तदात्वायतिसंयुक्तं कर्म राजा स-दाचरेत्। दृष्टं दृष्टं बलं ज्ञात्वा सन्धीयाद् विपरीत-मम्। भिन्नमाक्रन्द आसारो यदा खुर्दलभक्षयः। परश्च विपरीतश्च तदा विग्रहमाचरेत्। विग्रहञ्च समाय तथा सम्भूयाथ प्रसङ्गतः। उपेक्षया च निग्रहैर्यानं पञ्चविध कृतम्। परस्परञ्च सामर्थ्यविघातादासनं कृतम्। परेण विजिगीषोश्च यानवत् पञ्चधा कृतम्। बलिनो-र्द्विषतोर्मध्ये वाचाज्ञानं समर्पणम्। द्वैधीभावेन तिष्ठेत कार्य्यापेक्षवशंगतः। उभयोरपि सम्भाते सेवेत बलवत्तरम्। यदा द्वावपि नेक्षेतां संश्लेषं जातसंविदौ। तदो-पसर्पेत् तच्छत्रुमधिकं वा स्वयं व्रजेत्। उच्छिद्यमानो बलिना निरुपायप्रतिक्रियः। कृच्छ्रोद्वतं सत्यमार्य्यसेवे-

वेत वक्रोत्कटम्। तद्दर्शनोपाक्षिकता नित्यं तद्भावभावितता। तत्कारितप्रत्ययिता इत्तं संप्रत्ययिष्यः श्रुतम्" अग्निपु०२३अ०। अधिकं कामन्द० नीतिशास्त्रे दृश्यम्।

षाण्मातुर पु० षण्णां मातृणामपत्यम् अण् उदादेशे रपरः। कार्त्तिकेये तस्य कृत्तिकात्वेन गङ्गा पृथिवी पार्वती चेति षट् मातरः पुराणेषु प्रसिद्धाः। अग्निकुमारशब्दे तस्य षण्मातृषिपत्नीनां मातृत्वं दर्शितम्।

षाल्वणत्विक त्रि० षल्वस्यापत्ये अधिकृत्य कृतो ग्रन्थः ठक्। षल्वस्यापत्यप्रतिपादके ग्रन्थे स्त्रि० ङी०।

षाण्मासिक न० षण्णां मासे भवः ठञ्। श्रुतस्य एकादशेन षण्मासे कर्त्तव्ये श्राद्धभेदे "आद्यं षाण्मासिके तथेति" स्मृतिः "एकादश्यूनषण्मासे तस्य विधानमृतिन०रघु०।

षाध सिद्धौ स्वा० दि० च पर० सक० अनिट्। साध्नोति साध्यति असाधीत् सिषाधयिषति। [ते असस्वान्वत् त।

षान्त्व सामयुक्तसम्मादने अदं०चु०उभ०सक० सेट्। सान्त्वयति

षि बन्धे स्वा० क्रया० च उ०सक० अनिट्। सिनोति सिनुते सिनाति सिनीते असैषीत्। असेष्ट। [क्त त। सिक्तः

षिच आर्द्रीकरणे तु०स०उभ०सक०अनिट्। सिञ्चति ते असिषिट अनादरे भ्वा० पर०सक० सेट्। सेटति असेटीत्।

षिट्ट पु० षिट-भन् तस्य नेत्वम् पृषो०। षिटि (चम्पट) रकाम्तके शेमच०। [धीत्-असैत्सीत्। सिक्तः।

षिध माङ्गल्ये अक० शासने सक० उदित् वेट्। सेधति असेषिधीत् सेधितः।

षिध गतौ भ्वा०पर०सक० सेट्। सेधति असेधीत् सेधितः।

षिध सिद्धौ दिवा० पर० अक० अनिट् क्त्वा वेट्। सिध्यति असैत्सीत् षिधि साधयति। सिषाधयिषति।

आ+राजाद्यर्थावरोधे सक०। आषेधः।

उद्+उच्चतायाम् अक०। उत्सेधः।

नि+निवारणे सक०। निषेधः।

परि+निवारणे सक०। परिषेधः।

प्रति+निवारणे सक०। प्रतिषेधः।

वि+आ+विशेषेण निषेधे। व्याषेधः।

वि+प्रति+विरुद्धत्वे ख्याप्यते। विप्रतिषेधः।

षिम्भ हिंसने सक० दीप्तौ अक० भ्वा० पर० सेट् क्त्वा वेट्। सिम्भति असिम्भीत्।

षिम हिंसने भ्वा०पर० सक० सेट्। सेमति असेमीत्।

षिल उञ्छे तृणसङ्ग्रहणात् कथम् आदाने तुदा०पर०सक० सेट्। सिलति असेलीत्। [वीत् स्यूतः सीवनं सेवनम्।

षिव तन्तुविसारे दि०प०सक०सेट् क्त्वा वेट्। सीव्यति असे

षु तरादिगमनरूपे सम्माने सोमोदेः पीड़ने मन्थने च भ्वा० उ० सक०स्नाने अक०अनिट् क्तादि पर० सेट्। सुनोति सुनुते असावीत् असोष्ट। सोता

षु गतौ भ्वा०उभ०सक०अनिट्। सवति ते असौषीत् असोष्ट।

षु प्रसवे ऐश्वर्ये च भ्वा०प०सक०अनिट्। सवति असौषीत्।

षु ऐश्वर्ये प्रसवे च अदा० पर० सक० सेट् क्तिटि निष्ठेट्। सौति असावीत्-असौषीत्। सुषुविव।

षु पु० स्तु-वा० डुपृञो०अत्वम्। गर्भविमोचने एकाक्षरकोषः

षुट्ट अनादरे चु०उभ० सक० सेट्। सुट्टयति ते असुट्टत् त।

षुन्भ दीप्तौ अक०हिंसने स०भ्वा०प०सेट्। सुम्भति असुम्भीत्

षुर दीप्तौ अक० ऐश्वर्ये स०तु०प० सेट्। सुरति असोरीत्।

षुह्ल क्रियौ अक०क्षमायां सक०दि०पर०सेट्। सुह्यति सुहित् असुह्लत्। [सुप्ते असविष्ट असोष्ट।

षू प्रसवे गर्भविमोचने च अदा० आत्म० सक० वेट्। सूते

षू प्रसवे दि०आ०स०वेट्। सूयते असविष्ट-असोष्ट सोदित् सूनः

षू क्षेपे प्रेरणे च तुदा० पर० सक०वेट्। सुवति असावीत्।

षूद् निवारणे भ्वा०आ० सक० सेट्। सूदते असूदिष्ट।

षूद् मारणे भ्वा० पर० सक० सेट्। सूदति असूदीत्।

षूद् क्षरणे अक० प्रतिज्ञायां निराशे च सक० अदं०चु० उभ० सेट्। सूदयति ते असूषूदत् त। [रिट इदित् सूर्णः।

षूर क्षये अक० हिंसने स० दि०आ०सेट्। सूर्यते असूर्षीत्

षूर्ख अनादरे भ्वा० पर० सक० सेट्। सूर्खति असूर्खीत्।

षूर्ख ईर्षायां भ्वा० पर० सक० सेट्। सूर्ख्यति असूर्ख्षीत्।

षूष प्रसवे भ्वा० पर० सक० सेट्। सूषति असूषीत्।

षृन्भ हिंसने भ्वा० पर० सक० सेट्। सृम्भति असृम्भीत्।

षृभ हिंसने भ्वा० पर० सक० सेट्। सर्भति असर्भीत्।

षृन्भ षृभधातू पाणिनीयगणपाठे मूर्द्धन्यादितया पठितौ। तेन सोपदेशत्वात् सति निमित्ते त्वत्वम्। क्षविकल्पधातुमे तु दन्त्यादितया पठितौ। तेन सति निमित्ते न त्वत्वम्। तन्मतम् अपाणिनीयत्वादुपेक्ष्यम्।

षेक सर्पणे भ्वा० आत्म० सक०सेट् अदित् चङि न हुझः। सेकते असेकीत्। [हुझः। सेकति असेकीत्।

षेल चालने गतौ च भ्वा० पर० सक० सेट् अदित् चङि न

षेव आराधने उपभोगे आश्रये च भ्वा० उभ०सक०सेट् अदित् चङि न हुझः। सेवति सेवते असेवीत् असेविष्ट।

षै क्षये भ्वा० पर० अक० अनिट्। सायति असासीत्।

षो नाशे दि०पर० अक० अनिट्। स्यति असात्-असासीत्। अव+समाप्तौ अवसानम् स्नाने सक० अवसीयते।

अधि+अव+ वृत्साहे अक०निश्चय स्थाने सक० अध्यवस्यति। वि+अव+विशेषेण निश्चये सक० उद्यमे अक० व्यवस्यति। अनु+वि+अव स्थानस्थाने अनुव्यवसायः घटमहं जानामीत्यादिरूपः। [षड्दर्शनसमुच्चयवृत्तौ हरिभद्रादौ।

षोडत् पु०षट् दन्ता यस्य दन्तस्य दृत्व षत्वञ्च दस्य टुत्वम्।

षोडशन् त्रि० ब०व० षष्ठधिका दश षत्वञ्च दस्य टुत्वम्। (षोल) १संख्याभेदे २ततसङ्ख्यान्विते च।

षोडश पु० षोडशानां पूरणः डट्। येन षोडशसङ्ख्या पूर्यते १तत्रिति। चन्द्रमण्डलस्य २षोडशभागरूपकलायां ३त्रिपुराछन्दस्यां च स्त्री ङीप्। "काली तारा महाविद्या षोडशी भुवनेश्वरी" तन्त्रसा०।

षोडशक न० षोडश परिमाणान्यस्य कन्। षोड़शसङ्ख्याते वस्तुनि "भूम्यासनं जलं वस्त्रं प्रदीपोऽन्नं ततः परम्। ताम्बूलञ्चन्दनञ्चैव माल्यं फलमतः परम्। शय्या च पादुका गावः काञ्चनं रजतं तथा। दानमेतत् षोडशकं प्रेतस्तद्दिनत्र दीयते" गु०त० उक्तेषु प्रेतोद्देशेन दीयमानेषु २षोडशसु भूम्यादिषु "स्वर्णं रौप्यं तथा ताम्रं कांस्यं गावो गजा हयाः। सप्तैते भूमिदोषो यस्य यथा चेतसस्तथा हरौ। दानञ्च पितृयज्ञेषु दानं षोडशकं मतम्" इति वायुपुराणोक्तेषु पितृकार्य्येषु देवेषु ३स्त्र्यादिषु षोडशसु च।

षोडशभुजा स्त्री षोडश भुजा यस्याः। दुर्गामूर्त्तिभेदे "यदा तु षोडशभुजां महामायां प्रपूजयेत्। दुर्गातन्त्रेण मन्त्रेण विधिवत् तत्र वै शृणु। कन्यायां कृष्णपक्षस्य एकादश्यामुपोषितः। द्वादश्यामेकभक्तन्तु नक्तं कुर्य्यात् परेऽहनि। चतुर्दश्यां महामायां बोधयित्वा विधानतः। गीतवादित्रनिर्घोषैर्नानानैवेद्यवेदनैः। अथार्द्धरात्रं बुधः कुर्य्यात् उषसि परेऽहनि। एवमेव व्रतं कुर्य्यात् यावद्वै नवमी भवेत्" कालिकापु० ६८अ०।

षोडशमातृका स्त्री ब०व० षोडशसंख्या मातरः स्वार्थे क। "गौरी पद्मा शची मेधा सावित्री विजया जया। देवसेना स्वधा स्वाहा मातरो लोकमातरः। शान्तिः पुष्टिर्धृतिस्तुष्टिः कुलदेवाऽऽत्मदेवता" इत्युक्तासु गौर्य्यादिषु षोडशसु मातृकासु।

षोडशर्त्विज् पु०कर्म०। होत्रादिषु षोडशसु ऋत्विक्षु ते च यज्ञावाकाशब्दे ८६ पृ०दर्शिताः। तत्साध्यश्च यागः सोमयागादिः सत्रयागश्च।

षोडशाङ्ग पु० षोडश दृश्यानि अङ्गान्यस्य। "गुग्गुलुं सरलं दारु पत्रं मलयसम्भवम्। क्षीरेरसगुरं कृत्वं गुडं सर्जरसं घनम्। हरीतकीं नखीं लाक्षां जटामांसीञ्च शैलजम्। षोडशाङ्गं विदुर्धूपं दैवे पैत्रे च कर्मणि" रत्नमाले गुग्गुल्वादिषोडशद्रव्यरचिते धूपे तन्त्रसा०।

षोडशाक्षि पु०षोडश अक्ष्नयवयवरूपा यस्य। कर्कटे हेमच०

षोडशांशु पु० षोडश अंशवो यस्य। शुक्रपक्षे यज्ञमा०। षोडशार्चिरप्यत्र।

षोडशार न०षोडश अरः कोणाक्ष इव वा यस्य। १षोडशदलयुक्ते कमले तन्त्रोक्ते २यन्त्रभेदे च। तच्चादानाद्यङ्के ३चक्रभेदे षोडशारचक्रनिर्णयप्रकारस्तु तच्चादानादिपद्धतौ विधानपारिजातादुक्तोऽस्माभिर्दर्शितो यथा "गुरुर्वेदिमध्ये त्रिरङ्गदीर्घविस्तारं चतुरस्रं प्रसाध्य तत्र प्राक्पश्चिमयोर्दक्षिणोत्तरतश्च नव नव रेखाः कृत्वा चतुःषष्टिकोष्ठकं मण्डलं कुर्यात्। तत्र च सर्वाणि कोष्ठानि नवाङ्गुलदीर्घायामानि सम्पद्यन्ते। तत्र बाह्यात् षड्भिषु चतुर्दिक्षु मध्ये पार्श्वयोः द्वे द्वे कोष्ठे परित्यज्य चत्वारि कोष्ठानि मार्जयित्वा चतुःकोष्ठानामेकतां सम्पाद्य स्वस्वसंलग्नोपान्त्यषड्भिषु द्वे द्वे मध्यकोष्ठे पार्श्वयोः त्रीणि त्रीणि कोष्ठानि त्यक्त्वा मार्जयेत्तेन चतुर्दिक्षु अष्ट अष्ट कोष्ठात्मकानि चत्वारि द्वाराणि जायन्ते। ततो मध्यस्थानि षोडश कोष्ठानि प्रतिदिशं चत्वारि चत्वारि कोष्ठानि परित्यज्य मार्जयेत्। ततो बाह्यषड्भिषु एकैकं कोष्ठम् कोष्ठस्तृतीयस्य कोष्ठकोष्ठद्वारपीठान्तरालवर्त्तीनि पञ्च पञ्च कोष्ठानि प्रतिदिशं मार्जयेत्। तेन मध्यचतुरस्रपीठस्य पादाः भवन्ति। ततो मध्यपीठद्वारस्थ क्रमयुक्तचत्वारि वृत्तानि कुर्यात्। तन्मध्ये चतुरङ्गुलो द्वितीयेऽष्टाङ्गुलस्तृतीये चतुर्विंशत्यङ्गुलः चतुर्थे च षड्विंशत्यङ्गुलो व्यासः। तन्मध्ये चतुरङ्गुलव्यासकं वृत्तं कर्णिकाख्यं पीतेन रजसा पूरयित्वा कर्णिकावधि रेखां सितेन रजसा विदध्यात्। तद्बहिरष्टाङ्गुलव्यासे द्वितीयवृत्ते क्रमेण पीतरक्तसितरजोभिः सम्पादितमध्यभूषायाम् षोडश केसराणि कृत्वा केसरावधिरेखां सितेनैव रजसाङ्कोलतां कुर्यात्। ततस्तद्बहिश्चतुर्विंशत्यङ्गुलव्यासे तृतीयवृत्ते चतसृषु दिक्षु पत्राणि सितरजसा विधाय रक्तापाणि कुर्यात्। ततो दलान्तरेषु सितेन रजसा रेखां विधाय दलमध्यानि कृष्णेन रजसा पूरयेत्। तद्बहिरेकाङ्गुलान्तरालां बहिर्दलस्य चतुर्थरेखां सितरजसा संपाद्य तृतीयचतुर्थवृत्तद्वयान्तरस्थानेषु

परितोऽष्टदलायतत्वन्विषु षोडशभिः पत्रैः षोडशधा विभज्य प्रतिभागं यवाकारान् षोडशारान् श्यामपीता रक्तेतरजोभिः कल्पयित्वा तन्मध्यं यथायोगं रजोभिः पूरयेत्। तद्बहिः सितपीताऽरुणश्यामहरिताः पञ्च रेखाः क्रमशो लिखेत्। तद्बहिः षोडशेतरचतुरस्रं यथायोगं रजोभिरलङ्कृत्य षोडशदिक्षु सितेन रजसा कृत्वा द्वारचेतस्यपि पूर्ववदितः पीतश्वेतश्यामहरितरजोभिः पूरयेत्। तत आग्नेयादिकोणस्थकोष्ठचतुष्टयं क्रमेण लोहितहरितश्यामधवलैः पूरयित्वा आग्नेयादिपीठपादचतुष्टयं पञ्चकोणात्मकं क्रमात् पितरक्तपीतकृष्णरजोभिः पूरयेत्। ततः सितेन रजसाकुलोल्लेखेन बहिश्चतुरस्रेखां कुर्यात्। ततः प्राच्यां वज्रम्, आग्नेय्यां शक्तिं, दक्षिणे दण्डं, नैर्ऋत्यां खड्गं, पश्चिमायां पाशं, वायव्यां ध्वजं, कौबेर्यां गदाम्, ऐशान्यां शूलं तदग्रे चक्रं, पार्श्वदक्षिणे पद्मञ्च लिखेत्"।

षोड़शिन् पु॰षोडश कला विद्यन्ऽस्य इनि। १सोमे २यज्ञाङ्गे तच्चमसोमरसस्थापनपात्रे च "अतिरात्रे षोडशिनं गृह्णातीति" श्रुतिः "षोडशिनः पात्रं खादिरं चतुरस्रम्" कात्या॰श्रौ॰ १।२ कर्कन्दतिः।

षोडशोपचार पु॰ ब॰ व॰ षोडशसङ्ख्याता उपचाराः। "आसनं स्वागतं पाद्यमर्घ्यं चाचमनीयकम्। मधुपर्कोचमस्नानं वसनाभरणानि च। गन्धपुष्पे धूपदीपौ नैवेद्यं वन्दनं तथा" इत्युक्तेषु षोडशसु पूजाद्रव्येषु।

षोढा अव्य॰ षट् प्रकारार्थे धाच् प्रथमत्वं षष्ठ ट्टुत्वम्। षट्सु प्रकारेषु।

षोढान्यास पु॰ षोढा षट्प्रकारो न्यासः। तन्त्रोक्ते षट्प्रकारन्यासभेदे षोढान्यासप्रकारो यथा वीरतन्त्रे "देवीं बाहुं कृत्वा मातृवर्णं तारसंपुटाम्। मातृकापुटितं तारं न्यसेत् साधकसत्तमः। वीवीजपुटितां तान्तु मातृकापुटितं तु तत्। कामेन पुटितां देवीं तत्पुटं कामभेव च। रमया च पुटितां देवीं शक्तिञ्च तत्पुटां न्यसेत्। क्रीं हृदय तनर्घ्यं च। कवचं तृतीयं तु पूर्ववत्। मूलेन पुटितां देवीं तत्पुटं मनुमेव च। अस्त्रोमविकामेन न्यस्य मन्त्रं यथाविधि। मूलेनाष्टगुणं कुर्यात् व्यापकं तदनन्तरम्"। कात्यायनादिभिरेषोढान्यासाद्यालम्बारे दृश्याः। [क्रीत् घटादि॰ ज्ञापयति।

ष्टक प्रतीघाते भ्वा॰ पर॰ सक॰ सेट्। ष्टकति अष्टाक्षीत्।

ष्टग संवरणे भ्वा॰प॰सक॰ सेट् एदित् सिचि न वृद्धिः घटा॰। ष्टगति अष्टगीत्। [नीत् अष्टगीत् ष्टा(स्त)गयति।

ष्टन शब्दे भ्वा॰पर॰ सक॰ सेट् वा घटा॰। ष्टनति अष्टानीत्।

ष्टभ स्तम्भे चक॰ स्तम्भने सक॰ भ्वा॰ आत्म॰ सेट् दृदित्। ष्टम्भते अष्टम्भिष्ट।

ष्टम वैकल्ये चट॰ चु॰ उ॰स॰ सेट्। ष्टमयति ते अष्टमत् त

ष्टम वैकल्ये चक॰ भ्वा॰ पर॰ सेट्। ष्टमति अष्टमीत्।

ष्टिव व्याप्तिवाप्ते भ्वा॰आत्म॰सक॰ सेट्। ष्टिव्यते अष्टेविष्ट।

ष्टिप क्षरणे भ्वा॰आत्म॰अक॰ सेट् अदित् चङि न वृद्धिः। ष्टेपते अष्टेपिष्ट। अतिष्टेपत् त।

ष्टिम क्षेपे दि॰प॰अक॰ सेट्। ष्टिम्यति अष्टेमीत् ष्टेमनम्।

ष्टीम क्षेपे दि॰प॰अ॰सेट्। ष्टीम्यति अष्टीमीत् ष्टीमनम्।

ष्टु स्तुतौ अदा॰उ॰ सक॰अनिट् विचि सेट् क्विप् नित्यसेट् स्तौति अस्तौति स्तुतः स्तुवोतः स्तुते स्तुवीते स्तिं॰कौ॰ सुग्बोधस्तु अपिति न दैट् स्तुते इत्येवमेव भेदः। अष्टावीत् अष्टोष्ट। तदुविव। तादावर्धधातुके वेट्। स्तोता स्तविता। स्तोष्यति स्तुतः।

ष्टुच प्रसादे अक॰ भ्वा॰ आत्म॰ सेट्। स्तोचते अष्टोचिष्ट।

ष्टुभ स्तम्भे अक॰ स्तम्भने सक॰ भ्वा॰आत्म॰ सेट् क्ङा वेट्। स्तोभते अष्टोभिष्ट। [अतिष्टूपत् त ष्टूपः।

ष्टूप उच्छ्राये चट॰ चु॰ उभ॰ अक॰ सेट्। ष्टूपयति ते

ष्टूप उच्छ्राये दि॰पर॰अक॰सेट्। ष्टूप्यति इरित् अष्टूपत् अष्टूपीत्।

ष्टृच गतौ भ्वा॰उ॰स॰सेट्। ष्टृचति अष्टृचीत् तरीष्टृच्यते

ष्टृह वधे तु॰प॰सक॰वेट्। ष्टृहति अष्टर्हीत् अष्टृहत्।

ष्टृह वधे तु॰आत्म॰सक॰वेट्। ष्टृहते अष्टृहीत् अष्टृहत

ष्टेप क्षरणे भ्वा॰ आ॰ अक॰ सेट् अदित् चङि न वृद्धिः। ष्टेपते अष्टेपिष्ट।

ष्टै शैथिल्ये सक॰ भ्वा॰ पर॰ अनिट्। ष्टायति अष्टासीत्।

ष्ठ्यै संघाते ध्वनौ च अक॰ भ्वा॰ पर॰ अनिट्। ष्ठ्यायति। अष्ठ्यासीत् इत्यादौ। अष्ठ्यायति इत्यादौ इति।

ष्ठग संवरणे भ्वा॰ पर॰ सक॰ सेट् घटा॰ सिचि न वृद्धिः। ष्ठगति अष्ठगीत्।

ष्ठल स्थितौ भ्वा॰प॰अक॰ सेट् क्वला॰। ष्ठलति अष्ठालीत्।

ष्ठस निरासे दि॰प॰स॰सेट्। ष्ठस्यति अष्ठासीत्-अष्ठसीत्।

ष्ठा गतिनिवृत्तौ भ्वा॰पर॰ अक॰ अनिट्। तिष्ठति अष्ठात्।

अधि+आधारतयावस्थितौ अक॰।

अनु+करणे अनुष्ठानम्।

अव+अवस्थाने अवस्थानम्।

श्वट्+ऊर्द्ध चेष्टायां पा० आत्मनादुत्क्षिपति उत्पत्तौ आ० या० मादुत्क्षिपते (उत्पद्यते)।

श्वप+शेवने सक० आ० उपशिपते देवम्।

श्वि+नितरां स्थितौ सक० निशेते शरणे च निशा।

श्वि+गमने सक० प्रस्थानम्।

श्वि+संस्कारभेदे प्रतिष्ठा।

श्वि+अव+प्रतिपक्षतयाऽवस्थाने आत्म० प्रत्यवतिष्ठते।

श्वि+अव+नियमभेदे आ० व्यवतिष्ठते व्यवस्था।

श्वम+सम्यक् स्थितौ नाशे च संस्था संस्थितः।

श्वित्र निरासे (सुखेन क्लेशादेर्वमने) भ्वा० पर० सक० सेट्। श्वीवति अश्वेवीत्। श्वे(श्वी)वनम् उदित् क्ता वेट्। अत्रार्थे दिवादित्वमपि श्वीव्यति। श्वोपदेशपर्युदासे ह्रस्व दीर्घमध्ययोर्यङ्हस्वम्। [श्वीवति अश्वीवीत् श्वीवनम्।

श्वीव निरासे (क्लेशादेर्सुखेन वमने) भ्वा० पर०सक०सेट्।

श्वूत्त त्रि० श्वि-क्त ऊठ्। १निरस्ते २वान्ते च।

श्वस्त्र निरासे दि०पर०सक० सेट् उदित् क्ता वेट् वा घटा० वृदित्। श्वस्यति अश्वस्त्रत्। श्वा(स्त्र)पयति।

श्वा शोधने अदा० पर० सक० अनिट्। श्वाति अश्वासीत्।

श्विङ्क प्रीतौ दि० पर० सक० ऊदित् वेट्। श्विङ्यति ऊदित् अश्वेङ्क्त श्वेङ्किता श्वेङ्ता-श्वेङ्खा। [अश्विङ्क्त त।

श्विङ्क श्वेडयुक्तभक्षणे चु०उभ० सक० सेट्। श्वेङ्कयति ते।

श्वु स्तुतौ अदा०उ० सक०सेट्। श्वौति अश्वावीत् अश्वुविष्ट।

श्वुच शेचने भ्वा०आ०सक०सेट्। श्वोचते अश्वोचिष्ट शुश्वुचे

श्वुस भक्षे दि०प०सक० सेट्। श्वुस्यति अश्वोसीत् शुश्वोस।

श्वुह उद्गारे दि०पर० सक० ऊदित् वेट्। श्वुह्यति ऊदित् अश्वुहत् श्वोढ्ता श्वोढा।

श्वे शेवे भ्वा०पर०सक० अनिट्। श्वायति अश्वासीत्। श्वयौ रत्वे व्यायादति अव्यासीत्। श्व(स्व)पयति उपश्वेट्य प्रश्वापयति।

श्वि वृद्धौ भ्वा०आ०अ०अनिट्। श्वयते अश्वेष्ट शिश्विये। कर्तृजन्ये विषये णिचि इत वात् पुक्च आ० विश्वाययते तद्दृत्यत्र विश्वाययतीत्येव।

श्वक्ष वर्णने भ्वा० आत्म० सक० सेट्। श्वक्षते अश्वक्षिष्ट।

श्वद आरे छेदने च चु० उभ० सक० सेट्। श्वादयति ते अशिश्वदत् त।

श्वद प्रीतौ लेहने च भ्वा०आ०सक०सेट्। श्वदते अश्वदिष्ट।

श्वन्ज आलिङ्गने भ्वा०आ०स० अनिट्। श्वञ्जते अश्वञ्क्त।

श्वप शयने निद्रायाञ्च अदा०श्वपा०जक्षा०पर०सक० अनिट्। श्वापति अश्वाप्सीत् शुश्वाप। [यति ते अशिश्वपत् त।

श्वर्त्त गतौ सक० दुःखेन जीवने अक० चु०उ० सेट्। श्वर्त्तयति ते।

श्वल्क गतौ भ्वा० आत्म० सक० सेट्। श्वल्कते अश्वल्किष्ट। श्वोपदेश पर्युदासे अङ्वत् श्वल्कादिपि षढ्यात् श्वल्कते रत्वे वेत्याहुः।

श्विद मोहे क्ष्वेडे च अक० मोचने सक०भ्वा० आ० लुडि उ० सेट्। श्वेदते अश्विदत् अश्वेदिष्ट। [अश्विदत्।

श्विद गात्रप्रक्षरणे अक०दि०पर० अनिट्। श्विद्यति वृदित्

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्य-सङ्कलिते वाचस्पत्याभिधाने षकारादि शब्दार्थसङ्कलनम्।

स

सकार जप्यवर्णभेदः तस्योच्चारणस्थानं दन्तमूलं तस्योच्चारणे आभ्यन्तरप्रयत्नः विवृतं जिह्वाग्रेण ऊर्द्धदन्तमूलेन घोषार्थमाघातात् ऊष्मवर्णत्वम्। बाह्यप्रयत्नो विवारश्वासघोषाः महाप्राणत्व अस्य ध्येयरूपं यथा "सकारं शृणु चार्वङ्गि! मन्त्रिणीबीजं परात्परम्। कोटिविद्युल्लताकारं कुण्डलीत्रयसंयुतम्। पञ्चदेवमयं देवि! पञ्चप्राणात्मकं सदा। रजःसत्त्वतमोयुक्तं त्रिबिन्दुसहितं सदा" ज्ञानधेनुतः। तस्याधिष्ठातृदेवतारूपं यथा "शुक्लाम्बरां शुक्लवर्णां द्विभुजां रक्तलोचनाम्। श्वेतचन्दनलिप्ताङ्गीं सर्व्वालङ्कारभूषितां। गन्धर्वगीयमानाञ्च सदानन्दमयीं पराम्। अष्टसिद्धिप्रदां नित्यां भक्तानन्दविवर्द्धिनीम्। एवं ध्यात्वा सकारन्तु तन्मन्त्रं दशधा जपेत्" वर्णोद्धारतः अस्य वाचकशब्दाः "सोऽहंसः सुरया विष्णुर्भवोश्वेन्द्रसंज्ञकः। जगद्बीजं यज्ञिनामा सोऽहं वेधवती भगुः। प्रकृतिरीश्वरः शुद्धः प्रभा श्वेता कुलोज्ज्वलः। दक्षपादोऽमृतं ब्राह्मी परमात्मा परोऽव्ययः। सरूपा च सुखेशो गौः कलकण्ठो हकोदरी। प्राणात्मा च परा देवी लक्ष्मीः सोमो हिरण्मयः। दुर्गोच्चारणसम्भेदा ज्ञेयो मूर्त्तिमनोहरः" वर्णाभिधा०। मातृकान्यासे ऽस्य दक्षपादे न्यासता। कामादौ प्रयोगे ऽस्य सप्तमं "सः सोऽस्य ह्रस्व खदम्" इ०रत्नटी०। औपदेशधातूनां प्रयोगे दन्त्यादित्वम् "सकारजः शकारश्चेत्तुक्तः सति निमित्ते पुनः शत्वम्।

स पु० षो-ड। १विष्णौ एकार्थसंग्रहः। २सर्पे ३ईश्वरे शब्दर० ४अभिधाने पुंक्लो० रत्नाकरकोषः। ५वासे मेदिनीकरः

५सङ्घातें ६समानार्थे च यथा सपिण्डकं सङ्घ रत्यादि। "द्वोऽन्तगुरुः कथितोऽन्तलघुर्नः" छन्द० प्रान्तस्थे ७अन्तगुरुत्वे आदिलघुत्ववे ८वर्णगणे पु०। गणोऽत्र।

संक्षेप पु० सम्+क्षिप-घञ्। भूयसोऽर्थस्याल्पवाक्यादिनाप्रकाशने भरतः। ल्युट्। तत्रार्थे न०। सर्वत्र समः स्थाने क्वचित्परे वा परसवर्णः पञ्चमवर्णः।

संक्षोभ पु० सम्+क्षुभ-घञ्। चाञ्चल्ये क्षोभे च वा ङ।

संग्राहिन् पु० सम्+ग्रह-णिनि। १कुटजवृक्षे राजनि०। २सङ्ग्रहकारके ३धारके च। वा ङीष्। सङ्ग्राहीति रूपम्।

संघ पु० सम्+हन-ड नि०। १समूहे २जन्तुसमूहे च अमरः वस्य वा ङ्। सङ्घ इति वा रूपम्।

संघट्ट पु० सम्+घट्ट-भावे घञ्। १अन्योन्यविमर्दे २गठने च "सदाचारसंघट्ट प्रतिजाग्रानमेव च" तिथ्या०। ३लतायां स्त्री शब्दच०। ल्युट्। तत्रार्थे न०।

संघर्ष पु० सम्+घृष-घञ्। १अन्योन्यघट्टसंयोगे २स्पर्द्धायां ३संमर्दने च शब्दर० वा ङ।

संघ्न न० सम्+घ्ना-क। १पीतकाष्ठे कालीयके गन्धद्रव्ये शब्दच०। सम्+घ्ना-अङ्। २चेतनायां ३वृद्धौ ४ख्यातौ ५दक्षादौरवस्तुचने च स्त्री अमरः। ६गायत्र्यां ७स्वर्यपत्न्यां च स्त्री मेदि०। वा ञ्। ८संहतजानुके त्रि० साहसाङ्कः।

संघ्नापन सम्+घ्ना-णिच्-युक् भावे ल्युटः ल्युट्। १मारणे अमरः। २घ्नापने न ल्युटः। क्विप्। संघ्नप्रिरत्यत्र स्त्री क्षेमच० वा ञ्।

संघ्नासुत पु० संघ्नायाः स्वर्यपत्न्याः सुतः। शनैश्चरे।

संघ्नु त्रि० सङ्घते जानुनी यस्य जानुस्थाने घ्नुः। संहतजानुके अमरः। वा ञ्। [ञ्।

संज्वर पु० सम्+ज्वर-अप्। अन्तिजाते तापे अमरः वा

संमर्द पु०सम्+मृद-घञ्। अन्योन्यघट्टसंयोगरूपे संघर्षे वा मः

संय पु० स+यम्-ड। कङ्काले शब्दमा०। [यमे च।

संयत त्रि० सम्+यम-क्त। १बद्धे अमरः २व्रतयागादौकृतनि-

संयत् स्त्री संयम्यतेऽत्र सम्+यम-आधारे क्विप् तुक् च। १युद्धे अमरः। कर्त्तरि क्विप्। २संयमनकर्त्तरि त्रि०।

संयत्वर पु० सम्+यम-करप् तुक्च। १जन्तुसमूहे २वाम्यते त्रि० संक्षिप्तसा०।

संयद्वर पु० हृत०। नियन्तृणां वरे रूपे उणादि०।

संयद्वाम पु०वामं संयाति सम्+या-शतृ पृषो०पूर्वनिपातः। क्वचिद्ग्रन्थे "इतं हि क्वचिषि पुरुषं संयद्वाम इत्या-

चक्षते एतं हि सर्वाणि वामान्यभिसंयन्ति"छान्दोग्योप०।

संयन्तृ त्रि० संयच्छति सम्+यम-तृच्। नियन्तरि।

संयाम पु० सम्+यम-घञ् वा डिद्वा। व्रतादिकृतया पूर्वदिनकर्त्तव्ये १नियमभेदे अमरः २इन्द्रियनिग्रहे ३यत्नने च

संयमन न० सम्+यम-ल्युट्। १यत्नने २व्रतभेदे मेदि० ३यतःशाले गृहे च भरतः। यम-णिच्-ल्यु। ४यमे पु० "वैवस्वतः संयमनः" श्रुतिः।

संयमनी स्त्री संयम्यते बध्यतेऽत्र सम्+यम-आधारे ल्युट्। यमाधिकृतपुर्याम् मेदि० "अन्येऽपि ये संयमिनः संयम्यास्तुर्यन्ति ते" काशीख० ८अ०। यमसभावर्णनं भा०स० ८अ०८श्लो०। संयमनगरपरत्वे न०"एतत् संयमनं पुण्यमतीवाद्भुतदर्शनम्" भा०व० १६३अ०।

संयमिन् पु०सम्+यम-णिनि न डिद्वा। १मुनिभेदे धरणिः २इन्द्रियसंयमयुते त्रि० गीता।

संयाव पु० सम्यक् घृतादिभिर्यूयते मिश्र्यते गोधूमचूर्णाद्यत्र सम्+यु-आधारे घञ्। "संयावस्तु घृतक्षीरगुडगोधूमपाकजः" इत्युक्ते घृतादिना पक्वगोधूमचूर्णे शब्दच०।

संयुज् त्रि० सम्यक् युनक्ति सम्+युज-क्विन्। १सुसादृश्ये त्रिका० २संयुक्ते च। [रिते क्रियावर्णे च पा०।

संयुक्त त्रि० सम्+युज-क्त। १संयोगयुते पदार्थे २व्यवधानर-

संयुग न० संयुज्यतेऽत्र सम्+युज-क व्यङ्का० जस्य गः। युद्धे अमरः। तत्र साधु० खञ्। सांयुगीन रथेसाधौ।

संयुत त्रि० सम्+यु-क्त। संयुक्ते।

संयोग पु० सम्+युज-घञ्। १मेलने क्रियाजन्ये द्रव्याश्रिते गुणभेदे २सम्बन्धमात्रे च "अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः। कीर्त्तितस्त्रिविधस्त्वेष आद्योऽन्यतरकर्मजः। तयोभयोः कर्मजन्यो भवेत् संयोगजोऽपरः। आदिमः श्येनशैलादिसंयोगः परिकीर्त्तितः। मेषयोः सन्निपातोयः स द्वितीय उदाहृतः। कपालतरुसंयोगात् संयोगस्तरुकुम्भयोः। तृतीयः स्यात् कर्मजोऽपि द्विधैव परिकीर्त्तितः। अभिघातो नोदनच शब्दहेतुरिहादिमः। शब्दाहेतुर्द्वितीयः स्यात्" भाषा० "उदयात् प्राक् दशघट्यास्तु शेषः संयोग उच्यते। उपरिष्टात् प्रवेशस्तु तस्मात् तत् परिवर्जयेत्" तिथ्या० उक्ते उदयात् प्राक्दशघट्याः शेषे च।

संयोगपृथक्त्व न० संयोगेन फलसम्बन्धभेदेन पृथक्त्वं नानात्वं यत्र। एकस्यैव कर्मणो नित्यानित्यत्वप्रतिपादके मीमांसकोक्ते न्यायभेदे स च तत्त्वनि० दर्शितो यथा

"अग्नीषोमीयपशौ श्रूयते "खादिरे पशुं बध्नाति खादिरं वीर्यकामस्य यूपं कुर्वीत"। तत्र पशुबन्धनाय यूपोविहितः स च नित्यत्वेनावश्यकः यागसाधनत्वात् पशुकामनावतश्च। अन्योयूपोविहितः स च कामनाधीनत्वान्नावश्यकः। अत्र संशयः किं काम्य एव खादिरो नित्येऽपि स्यात् उत एकः खादिरः कृतपुरुषोभयार्थः उत काम्य एव खादिरो नित्यस्त्वन्यकाष्ठनिर्मित इति। तत्र काम्यनित्यप्रयोगाकृता न सम्भवति कामनाधीनत्वेन तस्यानावश्यकत्वात् नित्यस्यावश्यकः नह्येकस्यावश्यकत्व मनावश्यकत्वञ्च सम्भवति विरोधात्। तस्मात् काम्य एव खादिरः नित्यस्यान्यकाष्ठनिर्मितः। तदुक्तं शाबरदीपिकायाम् एतदधिकरणोदाहरणान्तरे "दध्ना जुहोति दध्नेन्द्रियकामस्येत्यधिकृत्य "पूर्वाधिकरणन्यायात् काम्यत्वेन स्तुतं दधि। अनित्यार्थमुपादेयमतोऽन्यन्नित्यमिष्यताम्"। अन्यद्द्रव्यान्तरं पूर्वाधिकरणन्यायात् प्रागुक्तोपप्लवन्यायात्। बाधबाध्यौऽपि "नित्येऽग्निहोत्रे पूर्वाधिकरणन्यायेन दधि न प्रयोक्तव्यं किन्तु अन्यदेव किञ्चित् द्रव्यम्" इत्याह। ननु नित्येऽपि खादिर एव श्रूयते ततो नित्य एकः खादिरः काम्यश्चान्यः खादिर इति यूपद्वयं विधीयते अन्यथा नित्ये खादिरत्वाभिधानं व्यर्थं स्यात् तथा च क्व विरोधः येनैकस्योभयार्थत्वे विरोधमाशङ्क्य समाहितमिति चेन्न खादिरेण वीर्यं" कर्म्यादित्यर्थकत्वपर्यवसन्नं खादिरत्वाभिधानं व्यर्थमिति तस्मान्नित्ये खादिराविधानात् काम्य एव खादिरः नित्यस्तु काष्ठान्तरीय इति प्राप्ते आह "एकस्य तूभयत्वे संयोगपृथक्त्वम्" सू० संयोगः सम्बन्धः एकस्य खादिरस्य नित्यत्वकाम्यत्वोभयरूपत्वे संयोगश्च पशुसम्बन्धश्च पृथक्त्वं परस्परनिरपेक्षेण पृथगभिधानं नियामकमिति शेषः। अयमाशयः यदि द्वयोरेकस्य वाक्याङ्गत्वं तदा द्वयोरेकवाक्यतया दृष्ट्या उभयत्रैव निराकाङ्क्षं तथा हि नित्यवाक्यं यूपस्य पशुबन्धनसम्बन्धे स्वतोऽसिद्धं किमपि नापेक्षते पशुबन्धनदृष्टफलत्वात् काम्यवाक्यमनुत्पन्नत्वाभिधानात्। काम्यवाक्यमपि यागसम्बन्धकरं किमपि प्रमाणं नापेक्षते सन्निधानादेवाश्वत्थवत्। हि तथा स्यात् पृथक्पृथक् संयोगस्य निरपेक्षेण वाक्यद्वयेनाभिधानात् कामनात्वे च खादिरं दृष्टफलद्वारा क्रतोरुपकरिष्यति पुरुषस्य वीर्यमप्यावक्ष्यति। किन्त्वयं विशेषः कामनात्वे तत्तत्फलकारेण पुरुषार्थत्वादभावेन च कर्त्तव्यं इति। तदुक्तम्

"द्वयोरेकस्य वाकाङ्क्षा भवेद् यदि तयोस्ततः। प्रकल्प्यैकवाक्यत्वं निराकाङ्क्षत्वमेव हि" तस्माद्भयार्थो खादिरेतेति। ननु नित्य एव खादिरोऽस्तु खादिरमित्यादिनाऽऽम्नाय प्रशंसार्थं फलस्तुत्यर्थवादोऽस्तु यथा यस्य पर्णमयी जुहूर्भवति न स पापश्लोकं शृणोति" इत्यत्रेति किमेकस्योभयार्थत्वाङ्गीकारेणेति चेन्न तत्र जुहूवाक्येऽपि तन्निष्पादकद्रव्यविशेषाभावात् तत्परिचायकत्वेनैव स्तुत्यर्थवादौचित्यात् न चात्र तथा पूर्ववाक्यात एव खादिरत्वप्राप्तौ पुनः खादिरपदोपन्यासेनान्यस्य वीर्यसामर्थ्यकत्वबोधनेनैकप्रयोजनकत्वात्। एवं दध्ना जुहोति दध्नेन्द्रियकामस्य जुहूवादित्यादावपि उभयार्थता दध्नो बोध्या उभयत्र दध्नः कीर्त्तनात्"।

संयोगविरुद्ध न० संयोगेन विरुद्धम्। द्रव्यान्तरसंयोगेन विरुद्धगुणाश्रये द्रव्यभेदे तच्च राजवल्लभेन दर्शितं यथा "शाकाखण्डपलपिण्याककुलत्थवराभिषैः। करीरदधिमाषैश्च प्रायः क्षीरं विरुध्यते। प्राणहारी तु हारीतो हरिद्राखण्डैः मृतः। हरीतकीनलैर्भृष्टं विषं मायूरमांसयम्। वराहवसया भृष्टा बलाका तु हरत्यसून्। संयुक्ता सैव वाराह्या कुलत्थैश्च विरुध्यते। यदि लशुनशाकेन मत्स्यतैलैः कथां त्यजेत्। मांसैरिक्षुविकारांश्च काञ्जिकैस्तिलशस्कुलीम्। कपोतः सार्षपे भृष्टो हन्ति कांस्ये दशाहिकम्। विषं हतसमं क्षौद्रं मधुना गगनाम्बु च। मूलकं सावशूकेन मधुना च न भक्षयेत्। एवमन्यान्यपि विरुध्यन्ते परस्परम्। राजन्यबोधवैदग्धोदराणां विरुद्धकोद्रवादिभगन्दराणाम्। मूर्छामदाध्मानमदग्रहाणां पाण्डामयग्रहाऽऽमविषस्य चैव। तिलाम्लकुलत्थहरीतकीनां मोघातिसारज्वरपीनसानाम्। मलानदोषस्य तथैव स्रोतोविरुद्धमन्नं प्रवदन्ति हेतुम्। विरुद्धाहारजान् रोगान् विनिघ्नन्ति विरेचनम्। वमनं शमनं वापि पूर्वं वा स्निग्धमेवनम्"।

संयोजन न० सम्+युज्+णिच्-आधारादौ ल्युट्। १मैथुने हारा०। २सख्यसंयोजने च। [नरेण कृतयोजने पदार्थे

संयोजित त्रि० सम्+युज्-णिच्-क्त। कृतमेलने पदार्थे

संरम्भ पु० सम्+रभ्-घञ्-सुक् च। १कोपे शब्दर० २आटोपे त्रिका०। ३कृतसाहसे मेदि० ४वेगे च "अहिंसंरम्भमास्थाय वासुदेवाश्रयम्" इति कुमारः। [चिन्तने च।

संराधन न० सम्+राध्-ल्युट्। १सम्यक् सेवने २सम्यक्

संराव पु० सम्+रु-घञ्। शब्दे अमरः।

संरूढ त्रि० सम्+रुह-क्त । १प्ररोहे २जाताङ्कुरे च मेदि० ।
संरोध पु० सम्+रुध-घञ् । १रोधने २क्षेपे च मेदि० ।
संलग्न त्रि० सम्+लग-क्त । मिलिते ।
संलय पु० संलीयते इन्द्रियव्यापारोऽत्र सम्+ली-आधारे अच् । १निद्रायां हेमच० । भावे अच् । २प्रलये च ।
संलाप पु० सम्+लप-घञ् । १परस्परकथने अमरः । प्रीत्या अन्योन्याक्षिपत्वक्त्रिभ्यां २भाषणे ३रहसि कथने च ।
संवत्सर पु० संवसन्ति ऋतवोऽत्र सम्+वस-सरन् । १वत्सरे ज्योतिषोक्ते प्रभवादिषष्टिके लगते २वत्सरभेदे च । प्रभवत्सरशब्दे ६०६पृ०३कथम् । [दाब्दावधिके तत्प्रवर्त्तितवत्सरे ।
संवत् अव्य० सम्+वद-क्विप् यत्योगे तुक् । विक्रमादित्य-
संवदन न० सम्+वद-ल्युट् । १आलोचने २वशीकरणे च मेदि० । सम्+वद-ल्युट् । संवदनमण्डल रामाश्रमः ।
संवर न० सम्+वृ-करणे अप् । १जले । कर्त्तरि अच् । २दैत्यभेदे ३शत्रुभेदे ४मुनिभेदे च पुंस्त्री० ।
संवर्त्त पु० सम्यक् वर्त्तते प्रलयोऽत्र सम्+वृत-घञ्-आधारे अच् । १प्रलयकाले अमरः । २क्षतिकारकमेघभेदे ३कर्कशवटक्षे मेदि० ४मेघे शब्दच० ५मेघनायकभेदे च । "त्रिभुते शाकवर्षे तु चतुर्भिः शेषिते क्रमात् । आवर्त्तः विद्धि संवर्त्तः पुष्करः द्रोणमम्बुदम् । आवर्त्तो निर्जलो मेघः संवर्त्तश्च वृहद्वपुः । पुष्करो दुष्करजलो द्रोणः शस्यप्रपूरकः" ज्यो०त० ।
संवर्त्तक न० सम्+वृत-घञ्-स्वार्थे कन् । १प्रलयदेवताङ्गले २ब्राह्मणभेदे पु० हेमच० । ततः अस्त्यर्थे अच् । २वलाहके शब्दर० । [त्रिका० ।
संवर्त्तिन् पु० संवर्त्तक वाङ्गभेदोऽस्त्यस्य इनि । बलरामे
संवर्त्तिका स्त्री संवर्त्तिका सम्+वृत-ण्वुल् टाप् अत इत्वं वा । १दीपादेः शिखायां २पक्षादेः केशरचनोपभेदे हले अमरः ३नवपत्रे मधुसूदनः ।
संवर्द्धक त्रि० सम्+वृध-घञ्-स्वार्थे कन् । सम्मानना-दिषु हेमच० २वर्द्धकारके च ।
संवलित त्रि० सम्+वल-क्त । मिलिते ।
संवसथ पु० संवसत्यस्मिन् सम्+वस-आधारे अथच् । ग्रामे जनसमूहनिवासस्थाने अमरः ।
संवह पु० सम्यक् वहति सम्+वह-अच् । सप्तवायुमध्यवर्त्तिनि वायुभेदे आवहशब्दे १६३पृ० दृश्यम् ।
संवार पु० सम्+वृ-घञ् । शिक्षापसिद्धे वर्णोच्चारणार्थे तत्तद्विवृतसंकोचकाले वाह्यप्रयत्नभेदे ३यत्नोपने च ।
संवास पु० संवसत्यत्र सम्+वस-घञ् । १स्थाने शब्दच० । पुरवासिनां पुराद्बहिर्वासयोग्ये स्थाने अटा० ।
संवाह पु० संवाहयति सम्+वह-णिच्-अच् । अङ्गमर्दने भृत्ये अटा० । ण्वुल् । संवाहक तत्रैव ।
संवाहन न० सम्+वह-णिच्-ल्युट् । १भरादेर्वाहने २अङ्ग संमर्दने च मेदि० । [प्राप्ता भवादिना वा जातौत्कण्ठे ।
संविग्न त्रि० सम्+विज-क्त । १चकिते २दृष्टवस्तुजाभाव तद्-
संवित्ति स्त्री सम्+विद-क्तिन् । १ज्ञाने शब्दमा० २प्रतिपत्तौ ३चेतनायां ४अङ्गीकारे ५वुद्धौ च मेदि० ।
संविद् स्त्री सम्+विद-सम्प० क्विप् । १ज्ञाने २प्रतिपत्तौ मेदि० । ३शपथे ४वुद्धौ ५क्रियाकरणे ६युद्धे ७अङ्गीकारे च अमरः । ८नाम्नि ९आचार्ये १०सत्ये ११समाधौ च शब्दच० ।
संविदा स्त्री संविद्यतेऽनया सम्+विद-क्विप् टाप् । भङ्ग (सिद्धि) "संविदाश्रवणोल्लेख्ये संविदैव गरीयसी" तत्रस्थम् ।
संविदित त्रि० सम्+विद-क्त । १अङ्गीकृते २सम्यग्ज्ञाते च ।
संविधातिक्रम पु० संविदाऽङ्गीकारस्य अतिक्रमो यत्र । अङ्गीकारभोजनादिके विवादभेदे वीरमि०तत्रोदाहरणं यथा "तस्य स्वरूप व्यतिरेकसञ्चेन दर्शयति" नारदः "पाषण्डनैगमाद्यानां स्थितिः समय उच्यते । सुप्रसन्नानपाकर्म तद्विवादपदं स्मृतमिति" । पाषण्डाः वैदिकसार्वहिताः यथा बौद्धादयः । नैगमाः सार्थिका वणिज इति भरतसेने । नैगमाः वेदप्रामाण्याभ्युपगन्तारः पाशुपतादय इति मिताक्षरायाम् । आदिशब्देन विद्वद्-ब्रह्मचर्यमूढादीनां ग्रहणम् । समयस्यानपाकर्म व्यतिक्रमः समयापरिपालनमिति यावत् तद्व्यतिक्रम्यार्थं विवादपदमभवतीत्यर्थः । तद्रूपयोस्यार्थमाह हारीतः "वेदविद्याविदो विप्राः तेषां वृत्तिं प्रकल्पयेत्" इति । याज्ञवल्क्योऽपि "राजा ज्ञात्वा पुरे स्थानं ब्रह्मणं न्यस्य तत्र तु । त्रैविद्यं वृत्तिमद्भ्यः यात् अधर्मः पात्यतामिति" । ब्रह्मणानां समूहो ब्रह्मण्यम् । "ब्राह्मणमानवब्राह्मणाद्यितिण्" पा० स्त्रे यत् । विद्या वेदा तिस्रृणां विद्यानां समाहारस्त्रिविद्यम् । त्रिविद्यमधीते इति । तेषां वृत्तिं प्रकल्पयेदित्यत्रार्थे हारीतस्यैव विवृतः "अनाच्छेद्यकरात्तेभ्यः प्रदद्याद् ब्रह्मभूमिकाः । युक्तभाग्यश्च नृपतिर्लेखयित्वा शासनम्" इति । अनाच्छेद्यकराः अपाङ्क्तेयाः । एतदुक्तमवति । शासनिकनृपतिभिरपाङ्क्त-

करास्तेभ्यो विसृष्टकराच्च सङ्घभूमिकाः प्रदद्यादिति। एवं नियुक्तैर्वक्तव्यं तदाह याज्ञवल्क्यः "निजधर्मा-विरोधेन यस्तु सामयिको भवेत्। सोऽपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च यः" इति। निजधर्माविरोधेन श्रौ-तस्मार्तकर्माविरोधेन सामयिकः समयात्सिद्धो यो धर्मो गोप्रचारोदकरज्जुपदेवसङ्घपालनादिरूपः सोऽपि यत्नेन रक्षणीयः। यश्च राज्ञा कृतो निजधर्माविरोधेनैव यः सामयिको धर्मो व्रातपूगश्रेणिकर्मोजनन्देवमखदरातिम-खुखे वरजादयो न प्रत्यापनीया इत्यर्थः सोऽपि यत्नेन रक्षणीय इत्यर्थः। सङ्घस्तिरपि "नित्यं नैमि-त्तिकं काम्यं यान्निकमौदिध्यलया। पौराणां कर्म कु-र्युस्ते तुन्दिग्धे निर्णयं तवेति"। पौराणां पुरवासि-नामित्यर्थः। एवं राजनियुक्तसङ्घसमयविशेषश्च कार्य-विशेषश्च उक्तः। सर्वसङ्घसमयानाह्य कार्यमाह स एव "पाषण्डैर्विषमस्थानात्तु सङ्घेतः समयक्रिया। दाधाकारे तु या कार्या धर्मकार्ये तथैव च। चाटचौरभये बाधा: सर्वसाधारणाः स्मृताः। तत्रोपयमनं कार्यं सर्वैरेवैक-केनचिदिति"। तत्राभ्युपेत्याह समयः पाषण्डनैग-मादीनां सङ्घस्यार्थः। ततश्च पाषण्डनैगमादीनां समवकरणमन्तरेण यद्युपद्रवो दुःपरिहरः धर्मकार्यं च दुःसाध्यमन्यद्वा पारिभाषिको समयक्रिया सर्वैः संविदः कार्या। चाटोदकः। चाटचौरादिभ्यो भये प्राप्ते तदुपयमनं सर्वैः कार्यमित्यर्थः। धर्मकार्यमपि सङ्घेन कार्यमित्युक्तं तेनैव "सभाप्रपादेवसङ्घतटाकारामसं-स्कृतिः। तथाऽनाथदरिद्राणां संस्कारो यजनक्रिया। कुलायननिरोधश्च कार्यस्तज्ज्ञाभिरंशतः। यत्नेतल्लिखितं प्रश्ने धर्म्यो वा समयक्रिया। पालनीयाः समस्तैस्तैः समयो नित्यमेव सः। सर्वसङ्करणं दण्डस्तस्य निर्वासनं पुरादिति"। सभा मण्डपः। प्रपा पानीयशालिका। आरामः उपवनम्। संस्कृतिः जीर्णोद्धारः। संस्कार उपनयनादिकः प्रेतदहनादिकश्च। यजनक्रिया सोम-यागादिकर्तृभ्यो दानम्। कुलायननिरोधः। कुलायनञ्च दुर्भिक्षादावन्नसम्पर्वनञ्च धारणम्। कुलायननिरोधश्चेति कल्पतरौ पाठः। कुलायननिरोधः कुलायाः प्रवर्त्तन-मप्रतिरुन्धश्च। एवं कृता समयक्रिया न केवलं सङ्घादि-भिरेव पालनीया अपि तु राज्ञापि इत्याह नारदः "पाषण्डनैगमश्रेणिपूगव्रातगणादिषु। संरक्षेत् समयं राजा हुर्गे जनपदे तथेति"। पाषण्डः वेदोक्तविरु-धारणव्यतिरिक्ताः सर्वे लिङ्गिनः। तेषु विहित-भिक्षाचर्याद्याः सन्ति। नैगमाः वार्द्धिका वणिक्-प्रभृतयः। तेषु सकलसमवेशकरपुरुषतिरस्कारिणो दण्ड्या इत्येवमादयोबहवः समया विद्यन्ते। अथ वा नैगमाः आम्नायेतरत्वेन ये वेदाभाक्त्वमिच्छन्ति पाशु-पतादयः। श्रेणयः एकशिल्पोपजीविनः। तान्दिदधनयैव श्रेण्या विक्रेयमित्येवमादिकाः समया वरीवर्त्तन्ते। पूगा इक्षुसारोढादयः। व्रातगणशब्दयोरर्थमाह कात्यायनः "नानायुधधरा व्राताः समवेतास्तु कीर्त्तिताः। कुलानां हि समूहस्तु गणः सम्यगुदीरितः" इति। पूगे व्राते वास्तव्यतुल्यश्च सभरे न गन्तव्यमित्ये-वमादयः समया वर्त्तन्ते। गणे तु पञ्चमे दिने पञ्चमे वर्षे वा कर्त्तव्यः कर्त्तव्य इत्येवमादि समयः समस्ति। ग्रामादीनामादिशब्देन ब्रह्मपुरीनिविष्टस्य महाजनादेः परिग्रहः। तत्र गुरुदक्षिणाद्यर्थमागतो माननीय इ-त्यादिः समयोऽस्ति। दुर्गे तु धान्यादिकं सङ्गोप्य वस्तव्यं न तद्विक्रेयमित्यादिरपि समयः। जनपदे तु क्वचि-द्भिक्षेऽवकाशाच्छुल्कपरिहारमित्यादयनेकविधः समयो वरीवर्त्तते। तदेवं समयजातं यथा न क्षीयते तथा राज्ञा कर्त्तव्यमित्यर्थः। समूहादिषु समयविषये विशेषमाह दक्षस्मृतिः "लोभेन मोहात्क्रियया मध्यस्थैर्वा परस्परम्। विवादं कृत्वा यः कुर्युः कार्याणि समयान्तरम्" इति। लोभेन देवताद्यानोदकपानेन। मोहात्क्रियया समयप-रीक्षया। मध्यस्थैः प्रतिभूभिः कार्याणि समूहकार्याणि। एतदुक्तं भवति। व्रातदाविभिः परस्परं समयातिक्र-माभावाय लोभादिभिर्विश्वासकृत्वा यानि समयकार्याणि कर्त्तव्यानीति। कात्यायनोऽपि "समूहानां तु यो धर्म-स्तेन धर्मेण ते सदा। प्रकुर्युः सर्वकर्माणि स्वधर्मेषु व्यवस्थिताः" इति। सामयिकधर्मनिजधर्मानतिक्रमेण स-र्वकार्याणि समूहादिनः कुर्युरित्यर्थः। याज्ञवल्क्योऽपि "निजधर्माविरोधेन यस्तु सामयिको भवेत्। सोऽपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च यः" इति। निजधर्मावि-रोधेनेत्यनेन निजधर्माविरोधी सामयिको धर्मो यथा सन्ध्यावन्दनवेलायां सर्वैरेव व्यापारपरिहारेण, राज-शासनं मन्त्रागन्तव्यं यो नायाति प्रथमसाहसं दण्ड्यः इति नार्थो रक्ष इत्यर्थोऽक्षम्। कात्यायनोऽपि "व-रोधेन धर्मेण निर्जितं राजशासनम्। तत्रैवाचरणं पूर्वं कर्त्तव्यन्तु कथञ्चनेति"। धर्मेण श्रौतस्मार्तादि

धर्मश्च निर्जितं कृतमित्यर्थः "राज्ञा प्रवर्त्तितान् धर्मान् यो नरो नानुपालयेत् । सर्व्वः स पापी दण्ड्यश्च कोपयन् राजशासनम्" इति । विचित्रबुद्धिभिः सकृदाविर्भूतैरनेकैरेकमत्येन कार्य्यकरणासम्भवात् द्विजाः पञ्च वा कार्य्यचिन्तकाः कर्त्तव्या इत्याह हरीतः "त्रयो ह्यः पञ्च वा कार्य्याः समूहचिन्तवादिनः । कर्त्तव्यं वचनन्तेषां धर्मज्ञैर्विजयादिभिरिति" । कार्य्यचिन्तकेषु हेयोपादेयान्दर्शयति स एव "विद्वेषिणो व्यसनिनः शठीनालसभीरवः । लुब्धातिदुष्टवक्ताश्च न कार्य्याः कार्य्यचिन्तकाः । शुचयो वेदधर्मज्ञाः दक्षा दान्ताः कुलोद्भवाः । सर्व्वकार्य्यप्रवीणाश्च कर्त्तव्यास्तु मनीषिणः" इति । शठीनाः कपटाः कार्य्यचिन्तकाः सकृदायकार्य्यसाधकविचारकाः । कार्य्यचिन्तकानामपि समूहचिन्तवादिनां वचनं सर्व्वैः समूहिभिः कार्य्यमित्याह याज्ञवल्क्यः "कर्त्तव्यं वचनं सर्व्वैः समूहचिन्तवादिनाम्" इति । समूहप्रतिकूलञ्च प्रथमसाहसं दण्ड्य इत्याह स एव "यस्तत्र विपरीतः स्यात् स दाप्यः प्रथमं दमम्" इति । प्रथमं पूर्व्वसाहसम् । कात्यायनोऽपि "युक्तियुक्तं वचो ह्यस्माद् यस्तूर्ध्वमवबाधतः । अयुक्तञ्चैव यो ब्रूयात् स दाप्यः पूर्व्वसाहसम्" इति । हरीतस्तिरपि "यस्तु साधारणं छिन्द्यात् छिनेद्वैविद्यमेव वा । सन्धिक्रियां विहन्याच्च स निर्वास्यस्ततः पुरात्" इति । साधारणम् सकृदायसाध्यं दण्ड्यादि द्रव्यम् । छिन्द्यात् । दण्ड्यादेः साध्यकरणाद्यागयेत् छिनेत् वा तिरस्कुर्य्यादित्यर्थः । समूहिनामप्यधर्म्मेण हेत्वादिना कार्य्यकरणे दण्डमाह स एव "साधां कुर्य्युं एकस्य सम्भूता हेतुसंयुता । राज्ञा तु विनिवार्य्यास्ते साक्षा वैवानुबन्धतः" इति । अनुबन्धतः नियन्तारतस्यात्सारेण । सकृदानामपराधविशेषे दण्डविशेषमाह याज्ञवल्क्यः "गणद्रव्यं हरेद्दृष्टस्तु सविद्यं ब्रह्मवेद्य यः । सर्व्वस्वहरणं कृत्वा तं राष्ट्रादिप्रवासयेत्" इति । सकृद्दण्डने समूहस्यैवाधिकारः । अतएव कात्यायनः "साहसी भेदकारी च गणद्रव्यविनाशकः । सर्व्वे एवते विज्ञाय्यैव रूपे भर्तुरिति" । रूपे विज्ञाय्य मर्म्मोच्छेदा दण्डयः । समूहानाञ्च तत्र दण्डो राज्ञा विधेयः । अतएव मनुः "यो ग्रामदेशसङ्घानां कृत्वा कर्म्मेण संविदम् । विसंवदेन्नरो लोभात्तं राष्ट्रादिप्रवासयेत् । निष्टप्तं दापयेच्चैनं समयव्यभिचारिणम् । चतःसुवर्णांश्च क्षिप्तमाच्छिनमानञ्च राजतम् । एवं दण्डविधिं कुर्य्याद्धार्म्मिकः पृथिवीपतिः । यथाभ्रातिसमूहेषु समवव्यभिचारिणाम्" इति । एतेषां प्रवासनचतःसुवर्णक्षिप्तमानरूपाच्छतसुवर्णां दण्डानाञ्चाति विद्यागुणादापेक्षया व्यवस्था कल्पनीया । यत्तु कश्चिदेतेषाञ्चतसुवर्णां दण्डानां क्रमेण ब्राह्मणादिचतुर्व्वर्णविषयत्वमित्याह तदज्ञानविजृम्भितम् । एतादृशव्यवस्थायाः प्रमाणाभावात् । ब्राह्मणस्य प्रवासनं क्षत्रियादीनाञ्चतःसुवर्णादि दण्ड इत्यनुचितत्वाच्च । मर्म्मोद्घाटकादीनां पुराच्छिरोमुण्डनमेव दण्ड इत्याह हरीतः "अवन्तुरः क्षुचकश्च भेदकश्चैव तत्त्वतः । श्रेष्ठिपूगन्यपहिष्टः क्षिप्रं निर्वास्यते ततः" इति । अवन्तुरः मर्म्मोद्घाटकः । क्षुचकः पिशुनः । पिशुनो खलक्षुचकावित्यभिधानात् । भेदकस्तु सकृदायविषु वैमत्यकृत् । समूहस्यानाश्रितोऽसौ समूहेनेति शेषः । न च समूहस्य दण्डकरणेऽधिकारात् समूहेनेति शेषकरणमयुक्तमिति वक्तव्यम् । पूर्व्वोक्तकात्यायनवचनेन समूहस्यैव सकृद्दण्डनेऽधिकारस्य प्रतिपादितत्वात् "पूगश्रेष्ठिगणाध्यक्षाः पुरदुर्गनिवासिनः । वाग्विगर्हादण्डपरित्यागं प्रकुर्व्वः सापकारिणम् । तैः कृतं यत् सधर्म्मेण नियन्तानुपरुद्ध्य तत्" इति हरीतेनाभिधानाच्च । वाग्दण्डः सापिण्डोऽधौत्यादि भाषणम् । धिग्दण्डोधिक्कारमिति भाषणम् । परित्यागोऽदृष्टवर्त्मत्व करणं निर्वासनं वा । समवत्यापि लोके परित्यागशब्दप्रयोगदर्शनात् । एतच्चार्थदण्डादेरपलक्षणार्थम् । नियन्तानुपरुध्येतेन पुनःसाध्येनाभिधानात् निसृष्टार्थो अप्रातकार्य्यः । नारदोऽपि "पृथग्गणांस्तु ये भिन्द्युस्ते विनेया विशेषतः । आवहेयुर्भयं घोरं व्याधिवत्तेषु पेक्षिता" इति । गणान् श्रेणयादिरूपान् । हरीतस्तिरपि "तत्र भेदमुपेक्षां वा यः कश्चित्कुरुते नरः । चतःसुवर्णं क्षिप्तांश्च दण्डो विधीयते" इति । सुवर्णचतुष्टयक्षिप्तयोः यन्त्रादितारतम्यानुसारेण गुणवद्गुणवद्विषयत्वेन वा व्यवस्था कल्प्या । पाषण्डादिसर्व्वसमूहेषु राज्ञा यथा वर्त्तितव्यन्तदाह नारदः "यो धर्म्मः सर्व्व यज्ञैर्भाषितव्यानविधिश्च यः । यज्ञैर्भां गच्छतादानमनुमन्येत तत्तथेति" । धर्म्मः सत्यवदनादिः । सर्व्व प्रातःपर्युक्षितभिक्षाटनादिः उपस्थानविधिः समूहकार्य्यं मद्यद्यादिध्वनिमात्रार्थं सङ्घ-

पादौ मेलनम् । प्रत्युपादानञ्जीवनाय तापसवेषपरिग्रहः । एषां पाषण्डिनामित्यर्थः । अन्यदपि राजलक्ष्म माह स एव "प्रतिकूलञ्च यद्राज्ञः प्रकृत्या च मतञ्च यत् । बाधकञ्च यदर्थानां तत्तेभ्योऽपि निवर्त्तयेत्" इति । यद्राज्ञः प्रतिकूलम् "यथा यस्य राज्ञस्तु क्रुद्धोधर्म विवेचनम् । तस्य प्रक्षुभ्यते राष्ट्रं बलं कोशश्च नश्यति" इति । एवञ्च सार्थिकादिभूदुर्विवादे धर्मविवेचनं च यद्राज्ञ इत्यस्योदाहरणमन्वेष्यम् । प्रकृत्या स्वभावत एव मतम् अवस्थातार्थं पाषण्डादिषु ताम्बूलभक्षणादिकम् । यच्चार्थानां बाधकञ्चननाशकचौरादिबाधादिकं तत्तेभ्योऽपि निवर्त्तयेत् । यथा ते न कुर्वन्ति तथा कुर्यादित्यर्थः । अन्यदपि निवर्त्त्यमाह स एव "दोषवत्करणं यत्स्यादनाम्नायप्रकल्पितम् । प्रकृत्यापि तद्राजा नैवङ्कार्यो निवर्त्तयेत्" । लोभादिदोषवत्करणं स्मृतिश्रुतिविरुद्धं विधवादौ वेश्यात्वादिकं पाषण्डादिभिः प्रकल्पितम् । तद्बलात्कारप्रवृत्तमपि राज्ञा निवर्त्तनीयमित्यर्थः । त्रैविद्यानां प्रतिपादितं धर्मं नैष्ठादिष्वतिदिशति याज्ञवल्क्यः "अग्निनैगमपाषण्डिगणानामप्ययं विधिः । भेदञ्चैषां व्रजोरक्षेत् पूर्ववृत्तिं च पालयेत्" इति । समूहकार्यार्थमागताय यद्राज्ञा समूह पूजार्थं दत्तमद्यदि समूहायासौ न ददाति तदा तद्दत्तं एकादशगुणं दाप्य इत्याह स एव "समूहकार्यं आयातान् कृतकार्यान् विसर्जयेत् । सदानमानसत्कारैः पूजयित्वा सभोपतिः । समूहकार्यं प्रहिता यञ्चमेत तदर्पयेत् । एकादशगुणं दाप्या यद्यसौ नार्पयेत् स्वयम्" । इति । यञ्चमेत समूहसम्माननार्थमिति शेषः । यतो राजदत्तं सर्वसाधारणमतो यथांशतो विभागं कृत्वा पाद्यं निक्षादिभ्यो वा दातव्यमित्याह हारीतः "ततो लभ्येत यत्किञ्चित् सर्वेषामेव तत्समम् । षण्मासिकं मासिकं वा विभक्तव्यं यथांशतः । देयं वा निःसृष्टद्रव्यस्त्रीबालातुररोगिषु । सान्नानिकादिषु तथा धर्म एष सनातनः" इति । एकस्य दुरध्वस्य षण्मासनिर्वाहाय षण्मासं कुटुम्बस्य वैकस्य षण्मासनिर्वाहाय षण्मासं, लब्धं वा यथांशतः स्वांशानुरूपेण विभजनीयमित्यादिभ्यो वा देयमिति तात्पर्यार्थः राजप्रसादलब्धस्यापि सर्वेषां समत्वाह स एव "यत्तैः प्राप्तं रक्षितं वा यथार्थं वा व्ययं कृतम् । राजप्रसादलब्धञ्च सर्वेषामेव तत्समम्" इति । अयमर्थः । तैः समूहकार्यार्थं प्रहितैर्यल्लोभाविवादादर्थं चेलारामादिकं धर्माधिकरणे न्यायतः प्राप्तम् । यच्च परैरपहृतमार्थं रक्षितं यच्च समूहप्रयोजनार्थमुपात्तद्रव्यम्, यच्च राजप्रसादलब्धं तत् सर्वं सर्वेषां समुदायिनां समभिति । गच्छतस्तृणं सर्वेषां समभित्यस्य क्वचिदपवादमाह कात्यायनः "गच्छतस्तृणमप्येकं यत्किञ्चित् कृत्यमर्थं भक्षितं भवेत् । आत्मार्थं विनियुक्तं वा देयं तैरेव तद्भवेत्" इति । तैः समूहैः । ये तु समुदायात्पलायनादूनभागं प्राप्ताः ये च समुदायद्रोहादिना ततो बहिर्भूतास्तान् प्रत्याह स एव "गच्छतां श्रेणिवर्गानां गताः स्तूर्णंऽपि मध्यताम् । प्राक्कृतस्य धनस्यैव समाप्तिः सर्व एवेति । तथैव भोज्यवैभव्यदानधर्मक्रियासु च । समूहस्योऽशभागी स्यात् प्रागगतस्त्वंशमाङ्नृपतिरिति" । [श्रेष्ठनायाञ्च ।

संविधान न० सम्+वि+धा-ल्युट् । १उपाये २आयोजने

संविधा स्त्री संविदितं विधं यथा प्रा०ब० धात्वर्थस्य उत्तरपदलोपः । अतिविधायाम् (आतश्च) टाप्च० ।

संवीक्षण न०सम्यग्वीक्ष्यते अन्विष्यते वा सम्+वि+ईक्ष-भावे ल्युट् । १सम्यग्दर्शने २इष्टवस्तुलोलाभाय अन्वेषणे च ।

संवीत त्रि० सम्+व्येञ्-क्त । १आवृते २वस्त्रे च अमरः । सम्+वि+इण-क्त । २सङ्गते । [वर्णोद्धारशब्दस्यलयत्वे च

संवृत त्रि० सम्+वृ-क्त । १आवृते २स्तगोपने ३संवाहरूपे

संवेग पु० सम्+विज-घञ् । १भयादिना त्वरायाम् अमरः २सम्यग्वेगे च । [युच् । संवेदनाथात्र स्त्री ।

संवेद पुं सम्+विद-घञ् । ज्ञाने अमरः । स्वार्थे णिच्-

संवेश पु० सम्यक् विशत्यत्र सम्+विश-आधारे घञ् । १निद्रायाम् अमरः । संपूर्वकस्य तस्य निद्रार्थकत्वात्तथात्वम् । यथा "संविष्टः कृशशयने निशां निनायेति" रघुः । २पीठे हेमच० ३स्त्रीरतिबन्धभेदे मेदि० ।

संवेशन न० सम्+विश-णिच्-ल्युट् । रतिक्रियायां हेमच० तदुत्तरं हि निद्राधिक्येन तथा निद्राहेतुत्वात्तथात्वम् ।

संव्यान न० संवीयते सम्+व्येञ्-कर्मणि ल्युट् । १उत्तरीयवस्त्रे अमरः । २वस्त्रमात्रे मेदि० ।

संशप्तक पु० सम्यक् शपथमङ्गीकारो यस्य कप् । प्रतिज्ञाय संग्रामादनिवर्त्तिनि सैन्ये नारायणीये सैन्यभेदे च तेषां प्रतिज्ञा यथा "ब्राह्मणांस्तर्पयित्वा च निष्कन्दत्त्वा पृथक् पृथक् । गाश्च वासांसि च पुनः समाभाष्य परस्परम् । प्रज्ञास्त्र कृष्णवर्त्मानमुपगम्य रणे व्रतम् । तस्मिन्नग्नौ तदा चक्रुः प्रतिज्ञां दृढनिश्चयाः ।

हरतां सर्वभूतानामसत्यैर्वाग्भिरार्यिरे । ते च धनक्षय-बधे प्रतिष्ठाञ्चापि चक्रिरे । ये वै लोकास्तान्नतिनां ये च वै ब्रह्मघातिनाम् । मद्यपस्य च लोका ये गुरु दारस्तल्पस्य च । ब्रह्मस्वहारिणश्चैव राजपिण्डापहारिणः । शरणागतं वा त्यजतो याचमानं तथा मृतः । अगारदाहिनाञ्चैव ये च गां निघ्नतामपि । उपकारिणाञ्च ये लोका ये च ब्रह्मविदामपि । स्त्रीभ्यांसृतुकालेषु यो लोकान्नाभिगच्छति । आत्मैषुनिकानाञ्च ये चात्मोपकारिणाम् । न्यासापहारिणां ये च सुतं नाशयतां च ये । क्लीवेन युध्यमानानां ये च दीनानुसारिणाम् । नास्तिकानाञ्च ये लोका येऽग्निमातृपरित्यजाम् । तानाप्नुयामहे लोकान् ये च पापकृतामपि । यद्यकृत्वा वयं सर्वं निवर्त्तेम धनञ्जयम् । तेन चास्मद्विताद्भ्रंशाद्भवेयुर्हि पराङ्मुखाः । यदि त्वकृत्वा लोके कर्म कुर्याम संयुगे । दृष्टान् लोकान् प्राप्नुयाम वयमद्य न संशयः । एवमुक्ता ततो राजन्नस्यवर्त्मन्न संयुगे । शङ्खयन्तो ऽर्जुनं वीराः पितृजुष्टां दिशं प्रति" भा॰द्रो॰ १७७ अ॰।

संशय पु॰ सम्+शी-अच् । सन्देहे एकस्मिन् धर्मिणि भावाभावयोः, विरुद्धधर्मद्वयस्य वा सन्देहे । यथा पर्वतो वह्निमान् वा, अयं स्थाणुर्वा पुरुषोवेति । "स संशयो भवेद्या धीरेकस्याभावभावयोः । साधारणादिधर्मस्य ज्ञानं संशयकारणम्" भाषा॰ "एकधर्मिकविरुद्धभावाभावप्रकारकं ज्ञानं संशयः तल्लक्षणं" । साधारणेति । उभयासाधारणो यो धर्मस्तज्ज्ञानं संशयकारणम् । यथा उच्चैस्त्वं स्थाणुत्वसाधारणं ज्ञात्वा अयं स्थाणुर्न वेति सन्दिग्धे । एवम् असाधारणज्ञानं तत्कारणम् । यथा शब्दत्वं नित्यानित्यव्याप्तं शब्दे स्मृत्वा शब्दो नित्यो न वेति सन्दिग्धे । विप्रतिपत्तिस्तु शब्दो नित्यो न वेत्यादिशब्दात्मिका न संशयकारणम् । शब्दव्याप्तिज्ञानादीनाम् निश्चयमात्रजनकत्वस्वाभाव्यात् । किन्तु तत्र शब्देन कोटिद्वयज्ञानं जन्यते । संशयस्तु तत्र मानस एवेति । एवं ज्ञाने प्रामाण्यसंशयाद् विषयसंशय इति । एवं व्याप्यसंशयादपि व्यापकसंशय इत्यादिकं बोध्यम् । किन्तु क्वचिद् धर्मिज्ञानं धर्मीन्द्रियसन्निकर्षो वा कारणमिति शि॰सु॰ । "समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः" न्यायसू॰ "समानधर्मोपपत्तेर्विशेषापेक्षो विमर्शः संशय इति स्थाणुपुरुषयोः समानं धर्मसारोपरिणाहौ पश्यन् पूर्वदृष्टस्तु तयोर्विशेषं बुभुत्समानः किंचिदित्यन्यतरत्र धारयति यदवधारयति तदवधारणं ज्ञानं संशयः समानयोर्धर्मयोरुपलब्धौ विशेषमन्यतरत्र नोपलभे रज्ज्वा बुद्धरपेक्षा संशयस्य प्रवृत्तिका वर्त्तते. तेन विशेषापेक्षो विमर्शः संशयः । अनेकधर्मोपपत्तेरिति समानजातीयासमानजातीयत्वानेकं तत्रानेकस्य धर्मोपपत्तेर्विशेषस्योभयथा दृष्टत्वात् समानजातीयेभ्योऽसमानजातीयेभ्यश्चार्थो विशेष्यते । गन्धवत्त्वात् पृथिवी जलादिभ्यो विशेष्यते शुक्लकर्मभ्यश्च, क्वचित् च शब्दे विभागजत्वं विशेषः, तच्चेदं द्रव्यं शुक्लः कर्म वेति सन्देहः विशेषस्योभयथा दृष्टत्वात् किं द्रव्यस्य सतो शुक्लकर्मभ्यो विशेष आहोस्विदशुक्लस्य सत इति अथ कर्मणः सत इति विशेषापेक्षा अन्यतरस्य व्यवस्थापकं धर्मस्योपलभे इति बुद्धिरिति । विप्रतिपत्तेरिति व्याकृतमेकार्थदर्शनं विप्रतिपत्तिः व्याघातो विरोधोऽसद्भाव इति । आप्तात्मेत्यैकं दर्शनम् नाप्तोक्तत्वपरम्, न च सद्भावासद्भावौ सर्वैकत्र सम्भवतः, न चान्यतरसाधको हेतुरुपलभ्यते तत्र तत्त्वानवधारणं संशय इति । उपलब्ध्यव्यवस्थातः क्वचिदपि सद्भोदकमुपलभ्यते तद्वदादित्ये मरीचिषु वाऽविद्यमानमुदकमिति ततः क्वचिदुपलभ्यमाने तत्त्वव्यवस्थापकस्य प्रमाणस्यानुपलब्धेः किं सदुपलभ्यते उताहोस्विदिति संशयो भवति । अनुपलब्ध्यव्यवस्थातः सच्च नोपलभ्यते मृगतृष्णिकोदकादि, असच्चानुत्पन्नं विरुद्धं वा, ततः क्वचिदनुपलभ्यमाने संशयः किं सन्नोपलभ्यते उताहोस्विदिति संशयो भवति विशेषापेक्षा पूर्ववत्, पूर्वः समानोऽनेकश्च धर्मो ज्ञेयस्यः, उपलब्ध्यनुपलब्धी पुनर्ज्ञेयस्थे, एतावता विशेषेण पुनर्वचनम्, समानधर्माधिगमात् समानधर्मोपपत्तेर्विशेषस्मृत्यपेक्षो विमर्श इति, स्थानवतां खल्वपचनमिति समानमेवाभा॰। "संशय इति खल्वनिर्देशः विमर्श इत्यत्र विशब्दो विरोधार्थः स्मृतिज्ञानार्थः एकस्मिन् धर्मिणीति पूरणीयं तेन एकधर्मिणि विरोधेन भावाभावप्रकारकं ज्ञानं संशयः तत्र कारणमुखेन विशेषस्मृत्यन्वाच्च समानेत्यादि उपपत्तिश्चेति तथा च समानस्य विरुद्धकोटिद्वयसाधारणधर्मस्य ज्ञानादित्यर्थः। अनेकधर्मः स्वसाधारणधर्मः तज्ज्ञानादित्यर्थः । तथा च स्वसाधारणधर्मवद्भिन्नज्ञानजन्योऽसाधारणधर्मवद्भिन्नज्ञानजन्यत्वेत्यर्थः, विप्रतिपत्तिर्विरुद्धकोटिद्वयोपस्थापकः शब्दस्यादित्यर्थः यद्यपि शब्दस्य न संशयकत्वं तथापि

ग्रन्यतरकोटिनिश्चयो मानसः संशय इति वदन्ति। उपलब्धेर्नानस्य अनुपलब्धेर्व्यतिरेकज्ञानस्य याऽव्यवस्था सहिष्णुकत्वानिश्चायकत्वं प्रामाण्यं संशय इति फलितोऽर्थः, अन्ये तु उपलब्ध्यव्यवस्था प्रामाण्यसंशयः अनुपलब्धिविरोधिभ्रमः तदव्यवस्था ततः संशय इत्याहुः। वस्तुतस्तु प्रामाण्यभ्रमसंशयस्य न संशयहेतुत्वं किं त्वदृष्टीतापामाण्यकज्ञानस्य विरोधितया इति प्रामाण्यभ्रमसंशये तज्ज्ञानस्याविरोधितया साधारणधर्मदर्शनादित एव संशयोत्पत्तिरिति। उपलब्धीत्यादिकं ताहशस्थले संशयो न भवतीत्येतावन्मात्रपरं चकारो व्याप्यसंशयस्य व्यापकसंशयहेतुत्वं समुच्चिनोतीति वदन्ति विशेषापेक्षः कोटिस्मरणसापेक्षः। वस्तुतस्तु संशयधारावाहिकत्वं बोधयितुं चाह विशेषेति विशेषं विशेषदर्शनम् अपेक्षते निवर्त्तकत्वेन तथा च विशेषदर्शननिवर्त्त्यत्वकथनमुखेन विशेषादर्शजन्यसंशय इत्युक्तम् इति। स च संशयो द्विविधः यथोक्तम् "द्विविधः संशया बहिर्विषयकोऽन्तर्विषयकश्च बहिर्विषयकोऽपि दृश्यमानधर्मिकोऽदृश्यमानधर्मिकश्च तत्र दृश्यमानधर्मिको यथा स्थाणुत्वविशिष्टस्य धर्मिणो दर्शनात् अयं स्थाणुः पुरुषो वेति। अदृश्यमानधर्मिको यथा अरण्ये झाटाद्यन्तरिते गोगवयादिविषाणमात्रादर्शनात् अयं गोगवयो वेति। वस्तुतस्तत्रापि विषाणधर्मिक एव सन्देहो विषाणमिदं गोसम्बन्धि गवयसम्बन्धि वेति विवक्षामात्रादुद्देश्याभिधानम्। यत् सामान्यं संशयहेतुस्तदनेकत्र दृष्टं संशयकृत् एकत्र धर्मिणि वा दृष्टं संशयहेतुरित्यत्र प्रथमो विधामाह" इत्यु इति। "इदन्तु बोध्यं संशयत्व प्रत्यक्षरूपः सन्निकर्षजन्यत्वात् अतएवोक्तं "घटोऽयमनया चाक्षुषं निश्चयवेति शिष्टानादिति"। संशये च उभयप्रकारतानिरूपिता विशेषवृत्ता एकैव। समुच्चये तु विशेषवृत्तादसमिति ग्रदाधरः।

संशयसम पु० जात्युत्तरभेदे "साधर्म्यदृष्टान्तयोरैन्द्रियकत्वे समाने नित्यानित्यसाधर्म्यात् संशयसमः" न्यायसू०। "अनित्यः शब्दः प्रयत्नानन्तरीयकत्वात् घटवदित्युक्ते हेतौ संशयेन प्रत्यवतिष्ठते किं प्रयत्नानन्तरीयकत्वे च घटेऽनित्यत्वेन साधर्म्येणैन्द्रियकत्वसाम्ये च घटेनानित्यत्वेन। अतो नित्यानित्यत्व धर्म्यादनिवृत्तः संशय इति" वात्स्या०।

संशयस्थ त्रि० संशये तिष्ठति स्था-क। संशययुक्ते।

संशयात्मन् पु० संशय आत्मनि यस्य। सन्दिग्धान्तःकरणे "संशयात्मा विनश्यतीति" "संशयात्मा विनश्यते"।

संशयालु त्र० संशय+अस्त्यर्थे आलुच्। संशययुक्ते हेमच०

संशयित त्र० सम्+शी-क्त। संशयकर्त्तरि हेमच०।

संशरण न० संशीर्य्यतेऽनेन सम्+शृ-करणे ल्युट्। रथारम्भे शब्दमा०। [वत्ते २तदति त्रि० सि०कौ०।

संशित त्रि० सम्+शो-क्त। सम्यादितव्रतविषयक-

संशितव्रत त्रि० संशितं सम्यक् सम्यादितं व्रतमनेन। सम्यक्सम्यादितव्रते। [भाजने च रत्नमा०।

संशुद्धि स्त्री सम्+शुध-क्तिन्। १सम्यक्शोधने २देवादि-

संश्रयत् त्रि० सम्+श्रि-शतृ वा०ङीप्। कङ्के उणादि०।

संश्रान त्रि० सम्+शो-क्त न सम्प्र०। सङ्कुचिते।

संश्रय पु० सम्+श्रि-भावे अच्। आश्रये।

संश्रव पु० सम्-श्रु-अप्। अङ्गीकारे अमरः। घञ्। संश्रावोऽप्यत्र पु०।

संश्रुत त्रि० सम्+श्रु-क्त। १अङ्गीकृते अमरः। २सम्यक्श्रुते।

संश्लिष्ट त्रि० सम्+श्लिष-क्त। १आश्लिङ्गिते २सम्बद्धे च।

संश्लेष पु० सम्+श्लिष-घञ्। १आश्लिङ्गने अमरः २सम्बन्धमात्रे च।

संसक्त त्रि० सम्+सञ्ज-क्त। १मिश्रिते २संबद्धे ३व्याप्तिते अमरः ४समन्ताद्विशेषे च "प्रान्तेषु संसक्तमसेरुशाखमिति" कुमारः। [सभायां अमरः।

संसद् स्त्री सीदन्त्यस्यां सम्+षद-क्विप् अधिकरणे क्विप्।

संसरण न० सम्+सृ-ल्युट्। स्वाङ्गनिबद्धदेशस्वीकारकृते १संसारे २कर्म्मबाधयेनागमने ३वस्त्रापणे अमरः। ४रथारम्भे मेदि०। ५सङ्कुतौ शब्दच०।

संसर्ग पु० सम्+सृज-घञ्। १सम्बन्धे विभागानन्तरं "यस्य धनं तस्यैमेति" कृतसमयेन एकव्यवस्थानरूपे २धनसम्बन्धे च याज्ञिकस्मर्त्तस्य प्रायश्चित्तभेदे कारणभेदेन पातित्यादिजनकत्वं प्र०वि० दर्शितं यथा

"तत्र पातकिसंसर्गः प्रायश्चित्तत्वमाह मनुः "अज्ञानाद्याजनं प्राप्य जपेद्वा त्रिरघमर्षणम्। मुच्यते पातकात्तस्मान्हयमेधफलं लभेत्। पतितानि पातकान्याहुः संसर्गोऽपि तैः सह" इति। अत्र तैरिति निर्देशात् महापातकिसंसर्गस्यैव प्रायश्चित्तत्वं गम्यते न तु पातकान्तरसंसर्गस्य प्रायश्चित्तमपि महापातकिसंसर्गे एव मनुना दर्शितं यथा मनुः "एषा प्रायश्चित्तोक्ता व्रतचर्यापि निष्कृतिः। पतितैः सम्प्रयुक्तानामिमाः शृणुत निष्कृतीः। यो येन पतितेनैषां संसर्गं याति मानवः। स तस्यैव व्रतं कुर्यात् तत्पापं संसृजन्नरः" इति

अत्र चतुर्णामित्यनेन ब्रह्महत्यादिमहापातकचतुष्टय-
सदृशं कृत्वा यो येन पतितेनेत्युक्तं महापातकपरमेव ।
उच्यते "प्रायश्चित्तीयतां प्राप्य दैवात् पूर्वकृतेन वा ।
न संसर्गं व्रजेत् सद्भिः प्रायश्चित्तेऽकृते द्विजः । एत-
द्भिरनिषिद्धैर्नार्थं किञ्चित् समाचरेत् । अतनिषेधं
जनांश्चैव न जुगुप्सेत कर्हिचित्" इति मनुना सामा-
न्यतः पापिष्ठसंसर्गस्य निषिद्धत्वात् निषिद्धाचरणात् पा-
पोत्पत्तिः पापिष्ठसंसर्गे एव दर्शिता प्रायश्चित्तमपि सा-
मान्येन दर्शितम् "यो येन पतितेनैषां संसर्गम्" इति
निर्देशात् चतुर्णामिति हिंसाऽभक्ष्यभक्षणयोर्यागस्या-
गमनाख्यप्रकारचतुष्टयानां न तु ब्रह्महत्यादिविशेषाणां
लघीयसामपि हिंसाभक्ष्यभक्षणयोर्यागस्यागमनादीनाम्
मनुना पूर्वमुक्तत्वात् यदि च संसर्गपापमुक्त्वा श्रुतिः
कल्पमाना पापिष्ठसंसर्गी पापी भवतीति सामान्यश्रुति-
रेव कल्पनीया लाघवात् स्तोकाधिकरणन्याय एवात्र
लागर्ति । विष्णुनापि सामान्येनैव स्मृतं "यस्य येन पा
पात्मना सह संसृजेत् स तस्यैव प्रायश्चित्तं कुर्यात्" ।
गौतमोऽप्याह "ब्रह्महरापगुरुतल्पगमातृपितृयोनि-
सम्बन्धिगर्ह्येनाभक्ष्यभक्षकनास्तिकनिन्दितकर्मभ्यासपति-
तात्यागाऽपतितत्यागिनः पतिताः पातकसंयोजकाश्च
तैस्तावदं समाचरन्" । अत्र पतितात्यागेति सामान्येनैव
दर्शयति । तैस्तावदं समाचरन्निति द्वितीयसंसर्गिणोऽ-
पि पतितत्वसाधनम् । नन्वेकस्यामनिवाहादिनापि पति-
तेन संसर्गिणः पतितत्वं स्यात् न संसर्गविशेषाणां नि-
षेधात् निषिद्धपतितसंसर्गात् पततीति श्रुतिः कल्पना ।
के ते संसर्गप्रकारा इत्याह तदुक्तम्—"एकशय्यासन
षड्भिर्भोगैश्चैकान्नमिश्रणम् । याजनाध्यापनं योनि-
स्तथा च सह भोजनम् । नवधा सङ्करः प्रोक्तो न कर्त्त-
व्योऽधमैः सह । उत्तमैरुत्तमैर्नित्यं कर्त्तव्यस्तु समैस्तु वा"
एकशय्यासनयनैकपीठाद्युपवेशनैकषड्भिक्षभोजनपङ्क्त्यादि-
सम्बन्धिभोगैश्चैकान्नमिश्रणाख्याः पञ्च सङ्कर-
संसर्गाः । तथा याजनं पतितेन ऋत्विजा यजनं यज-
मानस्य, पतितयजमानार्त्विज्यकरणमृत्विजश्च । अध्या-
पनं पतितमाणवकवेदाध्यापनमाचार्यस्य, पतिताचार्याद्वा
वेदाध्ययनं माणवकस्य । योनिः योनिसम्बन्धः स च
पतितपुरुषसम्भोगः स्त्रियाः, पतितस्त्रीसम्भोगो वा पुरु-
षस्य, तथा पतितकन्यापरिणयनं वरस्य, पतितवरपरि-
णयनं वा कन्यायाः । तथा च मनुः "नैतैरपूतैर्विधि
वदापद्यपि हि क्वचित् । ब्रह्मणान् यौनांश्च सम्ब-
न्धानाचरन् प्राप्नुयात् सह" । जिजनकल्पनकारादयस्तु
पतितवराय कन्यादानं दातुः, पतितादातुरादानं वा
कन्याया वरस्य, सर्वत्र व्यवहितयोनिसम्बन्ध, योनि-
सम्बन्धस्य स्त्रीपुरुषमात्रनिष्पाद्यत्वात् नात्र दातृवरयोः
साक्षात् योनिसम्बन्धः दानप्रतिग्रहलक्षणोऽप्यं स-
म्बन्धो दातृसम्बन्धादानयोर्जन्यजनकभावात् यौन इत्युच्यते
प्रायश्चित्तगौरवार्थः । किञ्चयमनार्षः प्रायश्चित्तविधे
शास्त्रत्वात् अनुपादेयश्च पतितजाता कन्या पतितैव
वक्ष्यते तत्परिणयनं पतितकन्यापरिणयनमेव नात्र व्यव-
हितयोनिसम्बन्धः । सह भोजनं सङ्घात्तस्य परस्य
वा एकपात्रे भोजनं नोच्छिष्टभोजनम् उच्छिष्टेन
सहोच्छिष्टभोजनात् तस्य लघुत्वात् एते चत्वारो गुरु-
संसर्गाभवन्ति एवं मिलित्वा नव संसर्गाः । नन्वेक
यानासनादिसम्बन्धनिन्द्यासहाध्ययनादिकमपि संसर्गा-
न्तरमस्ति ततश्च नवविधत्व वथा पराशरः "यानासना-
ध्ययनादृयानात् शास्त्रात् सह भोजनात् । संक्रामन्ति
हि पापानि तैलबिन्दुरिवाम्भसि" । शास्त्रमपि सम्बो-
न्यसंक्रमणं सहभोजनमेकपङ्क्तिभोजनं लघुसंसर्गसा-
हचर्यात् । तथा देवलः "सहाध्ययनिन्द्यासहाध्या-
यनाशनात् । याजनाध्यापनात् यौनात् पापं संक्रमते
नृणाम्" । सहाशनमेकपङ्क्तिभोजनम् । तथा ज्ञा-
नेश्वरः "यानात् शास्त्रसंक्रमात् निन्द्यात् सहभोज-
नात् । सहाध्यासनाध्यायात् पापं संक्रमते नृणाम्" ।
सहाध्यायः पतितेन ब्रह्मचारिणा सहैकस्मादुपरोरध्यय-
नम् । यत्र नवधेत्यत्र प्रकारवाचिना धाप्रत्ययेन प्रकारा-
न्तरं सूचितम् अन्यथा नवेत्युक्तं स्यात् । तेन तदन्नभोजन
तत्संस्पृष्टान्नभोजनतत्प्रतियहादीनामुपसंख्यानम् । नन्व-
नेकवचनेषु पापसंक्रान्तिः श्रूयते पूर्वदेशत्यागेन देशा-
न्तरसम्बन्धे संक्रान्तिशब्दस्य मुख्यत्वात् मुख्यापकर्तुः
पापपरिच्छेदे भूते किमर्थं प्रायश्चित्तानुष्ठानमिति ।
तथा हारीतः "हन्यादगुरुः गुरुन्तु गुरोऽगुरून्तु यो-
धयेत् । अगुरुश्च तथोभूतः गुरुवासेन गुरुर्भवति" । तथा
च मनुः "यद्यादे भ्रूणहा भार्यां गत्वा माध्यौपचा-
रिकीं । गुरौ शिष्यश्च याज्यश्च स्नेनो राजनि किल्बिषम्" ।
माध्यीमिति मोक्ष्यति संक्रामयतीत्यर्थः । तथा
यमः "दुष्कृतं हि मनुष्याणामन्नमाश्रित्य तिष्ठति ।
यो यस्यान्नमिहाश्नाति स तस्याश्नाति किल्बिषम्" । तस्

किल्बिषम् अश्नाति दहनेनापि पापाभावो गम्यते। उच्यते न पूर्वपापध्वंसोत्तरप्रायश्चित्तेन आत्मान्तरसम्बन्धः सम्भवति सुरया तदुपादर्शनेनायोग्यत्वात् किन्तु तत्तुल्यव्यक्तिसम्बन्धे गौणोऽयं संक्रान्त्यादिशब्दः। तथा च देवलः "बान्धवोऽपि पृथग् भूत्वा तत्पापं नाप्नुयात् क्वचित्। पृथग्जनोऽपि संयोगात् भजते तुल्यदोषताम्"। तत्पापं तत्प्रायश्चित्तीयं पापमित्यर्थः। तुल्यदोषतां तत्प्रायश्चित्तपापतामित्यर्थः। "शुद्धोऽशुद्धन्तु शोधयेदिति" यत्र ब्राह्मणादिसम्पर्के एव पापक्षयहेतुत्वन्तत्र बोद्धव्यम्। यत्तूशनाः "क्रतवस्त्वष्टैर्दशभिरशनसम्भक्षणानि वर्जयेत्" दृष्ट्वा "सम्भक्षणे ब्राह्मणसम्भक्षणमित्यादि"। क्रतवस्त्वष्टो राज्ञा क्रतपापचिह्नः। किञ्च यदि पापिष्ठसान्यसंसर्गैः पापक्षयहेतुत्वदेतत्प्रायश्चित्तवदिदमपि केनापि स्मृतिना प्रायश्चित्तरूपतया पठितः स्यात् तदुत निषेध एव श्रूयते यथा मनुः "प्रायश्चित्तीयतां प्राप्य दैवात् पूर्वकृतेन वा। न संसर्गं व्रजेत् सद्भिः प्रायश्चित्तेऽकृते द्विजः" इति। किञ्च "भिक्षितस्तेन शोऽवदान्ने क्षयञ्च पतितो भवेदिति" देवलवचने चमड्डान्नूपापकर्तुरपि पापस्थितिरवगम्यते मूलपापकर्त्ता पतितः क्षयमपि पतति दृष्टार्थः। इदानीञ्च कियता कालेन कतमञ्च संसर्गञ्च पतितमाख्यापादनमिति निरूप्यते। तत्र देवलः "पतितेन सहोषित्वा जानन् संवत्सरं नरः। भिक्षितस्तेन शोऽवदान्ने क्षयञ्च पतितो भवेत्। याजनं योनिसम्बन्धं साध्यायं सहभोजनम्। कृत्वा यद्या पतन्त्येते पतितेन न संशयः"। यानादिचतुःसंसर्गैः जानतैः संवत्सरेण पतति याजनादिभिस्तुभिः यद्यः पतनीत्यर्थः। तथा बौधायनः "संवत्सरेण पतति पतितेन सहाचरन्। याजनाध्यापनाद् यौनात् सद्यो न शयनासनात्"। शयनादिना सद्यःपातनिषेधात् साकाङ्क्षं संवत्सरेण पतनीत्यत्र शयनादिना सम्बन्धः। याजनादिपदं सहभोजनमप्युपलक्षयति। विष्णुः। "क्ष्यासंवत्सरात् पतति पतितेन सहाचरन्। सह यानासनाभ्यां यौनात् स्नौनात् सौख्यात् सम्बन्धात् सद्य एव"। यानासनाभ्यामिति चतुःसंसर्गोपलक्षणम्। स्नौनात् दत्तादि सहभोजनोपलक्षणम्। जूर्मुराणे व्यासः "ब्रह्महा सद्यपः स्तेनो गुरुतल्पग एव च। सहापातकिनस्त्वेते यश्च तैः सह संवसेत्। संवत्सरन्तु पतितैः संसर्गं कुरुते तु यः। ज्ञानमश्नासनैर्नित्यं जानन् वै पतितो भवेत्"। एभिर्वचनैर्याजनादिना सद्यः पातो यानादिना ज्ञानतः संवत्सरेणेत्यवगम्यते। नन्वेवं याजनादिना संवत्सरेण पतति न तु यानादिनेत्याह मनुर्विष्णुश्च "संवत्सरेण पतति पतितेन सहाचरन्। याजनाध्यापनाद् यौनात् न तु यानासनाश्नात्"। यानासनाश्नादुत्पन्नसंयोगमाचरन्नित्यर्थः। तथा पैठीनसिः "संवत्सरेण पतति पतितेन सहाचरन्। याजनाध्यापनात् यौनात् नत्वेवं शयनासनात्"। अत्र सर्वदेवकल्पतरुकारादयः देवलबौधायनादिवचनैर्याजनादीनां सद्यः पातहेतुत्वावगतेः मनुपैठीनसिवचनयोर्नेत्यति मध्यपठितस्य पूर्वेण याजनादिना सम्बन्धो न तु परेण यानादिना, याजनाध्यापनात् न तु संवत्सरेण पतति किन्तु यानादिभिरित्याहुः। तदसङ्गतम् सुमन्तुवचनविरोधात् यदा पतितानभिधायाह सुमन्तुः "यश्चैतैर्योनसौख्यसौवाह्यसम्बन्धानामन्यतमेन सह संवत्सरं सम्पर्कमियात् तस्याप्येतदेव प्रायश्चित्तं विदध्यात्" इत्यात् कृत्यात् एतदेवादद्यवार्षिकव्रतम् इत्यर्थः। अत्र याजनादीनामन्यतमेन संवत्सरेण पततीत्यवगम्यते। तथा हारीतः "संवत्सरेण पतति पतितेन सहाचरन्। याजनाध्यापनाद् यौनादेकशय्यैकभोजनात्"। एकभोजनमेकपात्रे कालभेदेन भोजनं जघन्यानञ्च। तथा हरिस्मृतिः "षाण्मासिके तु संयोगे याजनाध्यापनादिना। एकासनशय्याभिः प्रायश्चित्तार्द्धमाचरेत्। तथा वत्सरसंसर्गे योनियुक्ते विशेषतः। पूर्वोक्तेन विधानेन पतितव्रतमाचरेत्"। अनेन याजनादिना षाण्मासिकसंसर्गे प्रायश्चित्तार्द्धं वदता वत्सरेण सम्पूर्णप्रायश्चित्तमर्थादुक्तम् उत्तरवचने पुनः स्फुटीकृतम्। योनियुक्तपदेन याजनादीनामप्युपलक्षणम्। एकासनशय्याभिरिति पाठोऽनाचारः रात्राऽलिखितत्वात्। जिष्णुनादयस्तु यदि प्रत्येकं विभक्तिनिर्देशात् भोजनं कृत्वा पतति योनिसम्बन्धं कृत्वा पततीति एवं सम्बन्धोऽभीष्यते तदा कृत्वा पततीति पदयोरन्वयाद्वितात्पर्याद्वृत्तिभ्याम् चत्वारि वाक्यानि स्युः। अतः कृत्वेति पदेन तत्तत्कर्मचतुष्टयमादाय पततीति सम्बन्धे बोधिते न वाक्यभेदः संवत्सरपदेन पृथगुपनीतानामपि कृत्वेति पदेन तत्तत्कर्मोपनयनात्। दर्शपौर्णमासाभ्यां स्वर्गकामो यजेतेत्यग्नेयादियागषट्कानामिव। अत एकवाक्यानुरोधाद्याजनादीनां तत्तत्क

सङ्कुचितोपनीतानां पतनीत्वेनेन सम्बन्धे बोधिते याजनादीनां सङ्कुचितानां सद्यः पातहेतुत्वं पूर्वोक्तसम्बन्धादिवचनादेकैकेषां संवत्सरेणैव अत्रैव संसर्गत्वे चतुर्भिर्मासैः संसर्गद्वयेऽष्टभिर्मासैर्भोगकारेण पातहेतुत्वमूहनीयम्। तत्र क्लेति पदस्य याजनादिकर्मत्वेऽशक्यत्वात् क्रियान्वितार्थाभिधानलक्ष्यं तत् तदा च निरपेक्षाण्यामेवान्वितार्थाभिधानप्राप्तत्वादनुषङ्गाधिकरणन्यायाच्च तन्त्रता सत्यपि तन्त्रतार्थाभिधाने न सङ्कुचयः सर्वेभ्यो दर्शपौर्णमासाविव्यत्रैव सङ्कुचयबोधकस्य इत्यसमासादेरभावात्। न वा तन्त्रतायां सङ्कुचयो नियतः गर्गौभोज्यानां सप्तदशप्राजापत्यत्वात् पशूनामनेदित्यत्र व्यभिचारात् पततीति पाठस्य राघाङ्कितत्वाच्च कथं पततीति पदाकृतिः। न च स्मन्तुवचने याजनादीनामन्यतमेन वत्सरेण पातावगमादर्थान्निर्णीतैः सद्यः पात इति कल्पनीयं निरपेक्षस्मृतिविरोधात् यज्ञमाषप्रकारेण वचनद्वयसामञ्जस्यसम्भवात्। उच्यते। गुरुलघुभेदेन द्विविधं याजनादिकं भवति तत्र गुरुणा ज्ञानकृतेन याजनादिना एकेन सद्यः पातः तेनैवाज्ञानकृतेन वारद्वयाभ्यासात्। लघुयाजनादावज्ञानकृते वत्सरेण पातः तस्मिन्नेव ज्ञानकृते वत्सरार्द्धेनेति व्यवस्था। तथा हि याजनं योनिसम्बन्धनिमित्तं देवलवचने पतितेन सङ्कीर्त्य पूर्ववचने ज्ञानमिति पदसम्बन्धाज्ज्ञानकृतत्वं दर्शितम्। गुरुत्वं च देवलवचनेनैव याजनाध्यापनयोरुपसंहाराद्दर्शितम्। यथा देवलः "आचार्यादुव्रतनियमशूद्रादिभिक्षयौषिद्योपादानमध्ययनं तस्य चाचारान्वयः प्रक्रमसामर्थ्यभक्तिशीलशुश्रूषोपनताय शिष्याय प्रदानमध्यापनम्। पशुक्षीराज्यपुरोडाशसोमौषधिचरुप्रभृतिभिर्हविर्भिः खदिरपलाशाश्वत्थन्यग्रोधोडुम्बरप्लक्षादिभिः समिद्भिः स्रुक्स्रुवोदुखलमुसलकुठारखनित्रशूर्पादारुचर्मदर्भयावपवित्रपात्रभाजनादिभिर्द्रव्योपकरणैरुद्वाहोपध्वंसब्रह्मादिभिर्वैतानिकैः काम्यनैमित्तिकानां पक्षादिपूर्वकाणां यथोक्तदक्षिणानां वह्नीनां समापनं याजनम् एतेन याजनं व्याख्यातम्" । प्रक्रमः क्रमः। अत उपनयनपूर्वकमध्यापनं ज्योतिष्टोमादिवह्नीनां याजनं च गुरु, तत्राचक्षीद्यौनं परिचयनरूपं गुरु मन्त्रज्योतिष्टोमादिसाध्यत्वात्, स्त्रीयादिना पतितान्नब्राह्मणत्वागमनं वा ब्राह्मणस्य, तदपेक्षया पतितब्रह्मब्राह्मणीगमनपतित शूद्रागमनयोर्गुरुत्वात्। सह भोजनं पतितान्नस्य पतितेन सहैकपात्रे भोजनं गुरु। उपनयनं विना वेदाध्ययनम्, कृष्टादियज्ञयाजनं पतितब्रह्मब्राह्मणीगमनं सपतितान्नञ्च पतितेन सहैकपात्रे भोजनं पतितोच्छिष्टभोजनं वा पूर्वोक्तयाजनाद्यपेक्षया लघु। देवलवचने ज्ञानतो गुरुणा याजनादिना संवत्सरेण पतनमिति गम्यते। ज्ञानतः सकृत्कृतेन येन पतनं तेनाज्ञानतो वारद्वयाभ्यासेन। अज्ञानतो वत्सरेण येन पतनं तेन ज्ञानतः षण्मासैरिति वचनद्वयसामञ्जस्यं तथा च लघुयाज्ञवल्क्ये संवर्त्तः "एभिः संसर्गभावाति यः कश्चित् काममोहितः। षण्मासानवदेकं वा ब्रह्महत्याव्रतञ्चरेत्"। कल्पतरुकारस्त्वाह स्मरतः। अतएव कूर्मपुराणं "याजनं योनिसम्बन्धं तथैवाध्यापनं द्विजः। ज्ञात्वा सद्यःपतेत् ज्ञानन् सह भोजनमेव च। अज्ञानादथ वा मोहात् कुर्य्यादध्यापनं द्विजः। संवत्सरेण पतति सहाध्ययनमेव च"। अत्र पूर्ववचनं गुरुयाजनादिपरं द्वितीयवचनं लघुयाजनाद्यर्थम्। न च ज्ञानाज्ञानाभ्यामेव सद्योवचनसंवत्सरवचनयोः सामञ्जस्यं भविष्यति किं गुरुलघुव्यवस्थापनेनेति वाच्यं ज्ञानकृतादज्ञानकृतस्यार्द्धम् अज्ञानकृताच्च ज्ञानकृतस्य द्वैगुण्यं युक्तं यतः "ज्ञात्वाकामकृते यत्तद्द्विगुणं बुद्धिपूर्वके" इति वचनात् अल्पान्तविप्रकर्षाच्चादरत्वाच्च। देवलेन याजनादिवचनस्य गुरुयाजनादावुपसंहृतत्वान्मनुवचने चाद्यौ लघुयाजनाद्यवगतेस्तस्मादुक्तैव व्यवस्था। अत्र गुरुसंसर्गकालं निरूप्याधुना लघुसंसर्गकालो निरूप्यते। तत्र भवदेवेनोक्तं याजनादिभ्यो लघूनां यानासनशयनैकपङ्क्तिभोजनानां चतुर्णां लघुतरापाङ्क्तेयसंसर्गनिश्वासानां मिलित्वा सप्तानां ज्ञानतो वत्सरेण पातहेतुत्वमज्ञानतो वत्सरद्वयेनेति तदेतत्प्रमाणशून्यं इत्यनिर्देशादेरभावात्। जिकनस्तु "आसंवत्सरात् पतति पतितेन सहाचरन्। सह यानासनाभ्यामिति" विष्णुवचने इवोर्ङ्यनिर्देशात् यानासनादीनामेषां मध्याद्येन केनचित् संसर्गद्वयेन वत्सरेण पात एकेनास्तु वत्सरद्वयेन एषोऽपि संलापादेर्लघुत्वात् सहयानादेर्द्विगुणकालेन सास्राषादकत्वम् एतच्च ज्ञानतः "ज्ञानन् संवत्सरं नरं" इति वचनात् अज्ञानादेतद्द्विगुणकालेनेति। तत्र त्वयाजमपि इत्यनिर्देशात्। यथा मनुः "संवत्सरेण पतति पतितेन सहाचरन्। याजनाध्यापनाद्यौनात् सह यानासनाश्रयात्"। यथा याजनादिना प्रत्येकमज्ञानादेतत्संवत्सरेण पातः तथा न यानादिभिः एभिश्च मिलितैर्ज्ञानादित्यर्थः। तथा च

कूर्मपुराणे "ब्रह्महा मद्यपस्तेनो गुरुतल्पग एव च। महापातकिनस्त्वेते यश्च तैः सह संवसेत्। संवत्सरन्तु पतितैः ससर्गं कुरुते तु यः। यानशय्यासनैर्नित्यं जानन् वै पतितो भवेत्"। तथा हारीतः "आब्दसांवत्सरिके तु संयोगे याजनाध्यापनादिना। एकयानशय्याभिः प्रायश्चित्तार्द्धमाचरेत्"। एकयानशय्यापदेन बहुसंसर्गान्तरं लक्ष्यते अन्यथा बहुवचनानुपपत्तेः। यथा प्रोद्गातॄणां भक्ष्यः फलचमसः इत्यत्र प्रोद्गातृशब्दस्य प्रोद्गात्प्रोद्गातृपरत्वलक्षणम्। यदा त्वेकयानशय्यादिरिति पाठस्तदादिशब्दात् संसर्गान्तरलाभः अयन्त्वपपाठ इत्याशङ्क्याचिन्तितत्वात्। उच्यते। यानादीनां बहुसंसर्गाणां सप्तसङ्ख्यानां पातकेतुत्वं इन्द्वनिर्देशात् लघ्वां इन्द्वनिर्देशो बहुषु बहुवचनेष्वगम्यते। अत्र च यानादीनामनियतत्वात् लाघवात् एभिस्त्रिभिः बहुसंसर्गैर्वत्सरेण पतनीत्येकैव स्मृतिः कल्पनीया सप्त यानासनाभ्यामित्यत्र सप्तशब्दादेककालत्वमवगम्यते एककाले चैकपीठादुपवेशनं स्वर्गनिश्वासाख्यापत्तुतरसंसर्गत्रयनियतमतस्तदव्यवधानेव गम्यते एभिस्त्रिभिर्बहुतरसंसर्गैरेको बहुसंसर्गः समानः अतस्तत्रापि बहुसंसर्गत्रयमेव मन्वादिवचनेषु सप्तशब्दाभावात् कालभेदेन सततपतितोपभुक्तासनाद्युपवेशनं प्राह्मतस्त्रिभिर्बहुसंसर्गैर्वत्सरेण साम्यम् एतच्च ज्ञानतः "जानन् संवत्सरम्" इति देवलवचनात् अज्ञानतो वत्सरद्वयेन एकैकशो ज्ञानादब्दत्रयेण अज्ञानात् वत्सरषट्केन संध्यादीनाम् एकैकयानादिसमानत्वात् ज्ञानतो वत्सरत्रयेण पातः। अज्ञानतो वत्सरषट्केन ज्ञानादेकैकशो वत्सरनवकेन। अज्ञानादेकैकशोऽब्दाद्दशभिर्वत्सरैरित्यर्थः। नन्वेवं संध्यादीनां कथं यानादिभ्यो बहुत्वम्। उच्यते बहु प्रायश्चित्तत्वात् यथोशनाः "क्षतजक्षयकैर्दशनस्पर्शनसम्भाषणादीनि वर्जयेत् दर्शने ज्योतिषां दर्शनं स्पर्शने त्वदयालम्भनं सम्भाषे ब्राह्मणसम्भाषणमां स्पर्शनेति"। क्षतजक्षयकैः पतितैः यदादिचिह्नितैः, दर्शनञ्च न संसर्गः प्रकरणेऽपाठात् पतितस्पर्शनमत्र परम्परया प्राह्मं साक्षात् स्पर्शने ज्ञानत्वयात् तथा मनुः "दिवाकीर्त्तिं सदक्षाञ्च पतितं स्मृतिलोपकम्। अर्थं तत्स्मृत्विजं चैव स्मृत्वा स्नानेन शुध्यति"। पतितान्नभोजनपतितदृष्ट्यप्रतिग्रहयोश्च प्रत्येकं ज्ञानतः षड्भिर्मासैरज्ञानाद्वर्षेण पतितान्नादकत्वं यथा पतितानभिधायाह संवर्त्तः "एभिः संसर्गमायाति यः कश्चित् कामतोऽश्नितः। षण्मासानब्दमेकं वा ब्रह्मकृच्छ्रात्तरेत्"। न चात्र ज्ञानाज्ञानकृतयोर्नसंसर्गविषयत्वम् अविशेषश्रुतेर्यौक्तिकत्वात्तदादेतयोः तथा च पतितान्नभोजनञ्च संवत्सरेण पातहेतुत्वमाह देवलः "संवत्सरेण पतति पतितेन सहाचरन्। भोजनासनशय्यादि कृमिभिः सार्द्धकाकिकम्"। भोजनं तदन्नभोजनं सार्द्धकाकिकमनवच्छिन्नं भोजने च तथा दर्शनात् प्रतिग्रहेऽपि तथात्वमूहनीयं तयोः समानत्वदर्शनात् साध्ये हेतुमाह हारीतः "पतितानां स्पृष्ट्वा गत्वा भुक्त्वा च प्रतिगृह्य च। मासोपवासं कुर्वीत चान्द्रायणमथापि वा"। मासोपवासो ज्ञानाभ्यासे तत्र च पञ्चदश धेनवः। चान्द्रायणमज्ञानाभ्यासे तत्र सार्द्धसप्त धेनवः। स्पृष्ट्वा गत्वेति अनेकसंवत्सरेणेति। तथा मनुः "चाण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च। पतत्यज्ञानतो विप्रो ज्ञानात् साम्यन्तु गच्छति"। तथा रजकादीनभिधायाह यमः "भुक्त्वा चैषां स्त्रियो गत्वा दोलायाः प्रतिगृह्य च। कृच्छ्रमब्दं चरेज्ज्ञानादज्ञानादेन्द्वयम्"। पतितान्नभक्षणप्रायश्चित्तात् पतितस्पृष्टान्नभक्षणप्रायश्चित्तार्द्धेन च्छागदर्शनादब्दार्द्धहानिः तेन ज्ञानतः पतितस्पृष्टान्नभोजने संवत्सरेण साम्यमज्ञानतो वत्सरद्वयेनेति। तथा प्रचेताः "पतितान्नन्तु यो भुङ्क्ते सप्ताहमब्दे वसेत्। पानीयपानतश्चैव कृमयोदकं पिबेच्चाब्दम्"। सप्ताहोदकवासे धेनुद्वयं उच्यते एतत् सकृदज्ञानविषयं सकृज्ज्ञानकृतपतितस्पृष्टान्नभक्षे शङ्खः "भुक्तोच्छिष्टोऽन्यजैः स्पृष्टः प्राजापत्यं समाचरेत्। अर्द्धोच्छिष्टे कृतः पादः पाद श्लेष्मायने तथा"। "श्लेष्मपतितचाण्डालपुक्कशरजस्वलावधूतकृमिकृष्टिकृतच्छिन्नस्पृष्टान्नानि भुक्त्वा कृच्छ्रमाचरेत्"। पातकिस्पृष्टान्नभोजने तु संसर्गस्य किञ्चिद्व्यवधानात् पादहानिः तेन ज्ञानतः षण्मासवत्सरेणाज्ञानतः सार्द्धवत्सरद्वयेन साम्यम्। पातकिश्लेष्मपाकान्नभोजने तु ततोऽपि व्यवहितत्वात्परपादहानिः। तेनात्र ज्ञानकृते सार्द्धवत्सरेणाज्ञानतो वत्सरत्रयेण साम्यम्। पतितावासान्नभक्षणे पतितस्पृष्टान्नभक्षणस्य चतुर्थभागः एवं पतितपानीयपानेऽपि चाण्डालान्नभक्षणे तथा दर्शनात्। "यथा विष्णुः चाण्डालान्नं भुक्त्वा त्रिरात्रमुपवसेत् विड्वराहं भुक्त्वा पराकः"। इति चाण्डालमात्रान्नं सकृत्तत्र विड्वराहदर्शनात् पराके च द्वादशोपवासाः। तथा प्रचेताः "पतितान्नन्तु यो भुङ्क्ते सप्ताहमब्दे वसेत्। पानीयपानतश्चैव कृमयोदकं पिबेच्चाब्दं

त्रिवेत्। त्रिरात्रोपवासे चतुर्विंशतिपलमश्नं कार्षुनं देयम्। एतदेव कृच्छ्रातिकृच्छ्रे किञ्चिदूनं देयम्। पतितोच्छिष्टभक्षणे तु पतितान्नभक्षणादर्द्धसुवर्णेन प्रायश्चित्तम्। यथाङ्गिराः "ब्राह्मणापतितादीनामुच्छिष्टान्नस्य भक्षणे। द्विजः शुध्येत पराकेण मूढः कृच्छ्रेण शुध्यति"। एतत् सकृदज्ञानविषयम्। पराके पञ्च धेनवः। सकृदज्ञानकृतपतितान्नभोजने धेनुद्वयं प्रचेतोवचने व्याख्यातम्। तेन ज्ञानतः पतितोच्छिष्टान्नभक्षणे मासत्रयेण पतितसाम्यम् अज्ञानतो मासषट्केन। उच्छिष्टान्नभक्षणवदुच्छिष्टप्रोक्षणेऽपि व्यवस्था "उच्छिष्टभोजनं चैव तथा तस्य च मार्जनम्" इति देवलवचने साङ्गस्यार्द्धदर्शनादिति। अत्र क्रतानेकपातकयुक्तसंसर्गादेकैव पापव्यक्तिरुत्पद्यते न भिन्ना कल्पनागौरवापत्तेः। गुरुपापराधस्य च संसर्गलक्षणस्य निमित्तकारणस्य तद्विशिष्टात्मनःसंयोगस्याश्रयसमवायिकारणस्यैकत्वात्। प्रायश्चित्तन्तु गुरुसंसर्गस्यैव कर्त्तव्यं गुरुणा प्रायश्चित्तेन लघुनः पापस्य क्षयाभिधानात्। तथानेकमहापातकिगुरुसंसर्गपापव्यक्तिभेदेऽपि देशकालकर्त्तैक्ये तन्त्रतायाः सकृत्वात्तन्त्रेणैव प्रायश्चित्तम्। त्रिकन्तु युगपदनेकब्राह्मणवधवदयुगपदनेकपातकिसंसर्ग एव तन्त्रता। क्रमकृते तु ब्राह्मणवधवदावृत्तिरेव प्रायश्चित्तमिति तत्र ब्रह्मवधेऽपि क्रमकृते प्रायश्चित्ततन्त्रतायाः सकृत्वात्। युगपदनेकब्रह्मवध एव प्राणात्राणाभ्यां विशिष्टमरणयावज्जीवव्रतलक्षणप्रायश्चित्तभेदेन तन्त्रताऽभावस्य श्रीमद्भादेवपादैर्दर्शितत्वात्। इह तु तदेतत् प्रायश्चित्तवैशिष्ट्ये प्रमाणं नास्ति तथा गुरुत्वेन ब्रह्महापातकिनोऽपि पातक्यन्तरसंसर्गे पापक्षयदृष्टत्वादेव आवृत्तब्रह्मवधवद्धेतोः समत्वात्। अन्यथा पातकिनश्चाण्डालान्नभक्षणेऽप्यदोषः स्यात्। तथा प्रतिक्षणं पूर्वपूर्वोत्पन्नपापव्यक्तिसकृतोत्तरोत्तरसंसर्गादन्यान्या एव पापव्यक्तयो भवन्ति तत्तत्क्षणे पूर्वापूर्वा वोत्पद्यन्ते विनश्यन्ति वत्सरेणैव भ्रूणपापकर्त्तुः पापसमानदुरितापूर्वव्यक्तिरुत्पद्यते। सा च सम्भूयैकनरकफला वत्सराभ्यन्तरेऽस्यान्यनरकफलिका अतएव प्रायश्चित्तवाक्यमप्येकम्। न तु भिन्नभिन्नाः समानाः पापव्यक्तयः सकृदायात् सम्भूयैकनरकं फलम्। सम्भूयैकनरकफलत्वं ब्रह्मवधादावेकपापव्यक्तिफलत्वदर्शनादिति"। अत्रेदं बोध्यम्। महापातकिसंसर्गस्यैव कर्त्तरि पापहेतुत्वं नान्यपापिसंसर्गस्य यथोक्तं पराशरेण "कृते समाप्याद् पापं लेताबाद्वैव सर्गतः। द्वापरे चात्मनादाय कर्त्तरि पतति क्रमेण"। कर्त्तरि सम्भाषणादिना न पातित्वं किन्तु कर्त्तुरेव कर्मसाम्येनैव पातित्वं न संसर्गादिना। "ब्राह्मणात् गात्रसंस्पर्शादित्यादि" पराशरवचनं महापातकिविषयमिति पराशरभाष्ये माधवाचार्य आह च।

संसर्गाभाव पु० संसर्गेण सम्बन्धेनावच्छिन्नप्रतियोगिताको भावः। ध्वंसप्रागभावाद्यन्याभावरूपे भेदभिन्ने १क्रमाभे २सम्बन्धाभावे च "प्रागभावस्तथा ध्वंसोऽप्यन्याभाव एव च। एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते" भाषा० संसर्गाभावत्वं च अन्योन्याभावभिन्नाभावत्वं तत्र अन्योन्याभावस्य तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावरूपतया तद्भिन्नस्य संसर्गाभावत्वोक्तेः। तादात्म्यातिरिक्तसंसर्गावच्छिन्नप्रतियोगिताकत्वेन संसर्गाभावस्य यौगिकताऽपि। संसर्गप्रतियोगिकाभावत्वं तु न लक्षणं तथात्वे यत्नकारोक्तं दूषणमापतेत् तथा हि अभावस्य संसर्गप्रतियोगिकत्वे घटादिप्रतियोगिकत्वं बाध्येत द्रव्यगुणकर्मणां समवायिकारणेषु संसर्गस्य समवायसम्बन्धरूपतया तस्य नित्यत्वेन ध्वंसाधारे तत्संसर्गाभावस्याप्यसम्भवात्। समवायावच्छिन्नप्रतियोगिताकत्वेन बोधने तु प्रतियोग्यसत्त्वदशायां समवायस्य नित्यत्वेन तद्बुद्धेरसम्भवात्। संसर्गाभावस्य नञादिनिपातेन धात्वर्थेन च बोध्यते तत्र निपातेन प्रातिपदिकार्थाभावस्य बोधने यत्नयोगिनि सम्प्रत्ययेच्छा यथा गेहे घटो नास्तीति। विशिष्टप्रध्वंसंसर्गाभावस्य धात्वर्थादौ बोधने तु नायं नियमः यथा गगनं न पश्यति न कश्चित् भक्षयेदित्यादौ तत्तद्दर्शने गगनकर्मत्वस्य कश्चिद्भक्षणस्य च सर्वदानिष्टसाधनत्वस्य नञा संसर्गाभावस्य बोधनात्। तत्र सम्प्रत्ययेच्छेति विवेकः। कथा० सू० इत्योन्यान्योक्तं यथा

"नास्ति घटो गेहे इति यतो घटस्य गेहसंसर्गप्रतिषेधः" तथा० स्तु० "गेहे घटस्य यः संसर्गः संयोगस्य प्रतिषेधः स च यदि कदाचिदपि न घटस्यादात्मनाभाव एव भविष्यतः प्रागभावो मूलस्य प्रध्वंसाभावः, तर्हि घटसंसर्गो गेहे नास्तीति प्रतीत्या भवितव्यमिति चेत् प्रतीत्या भवितव्यमित्यस्य कोऽर्थः यदि तद्विषयत्वा प्रतीत्या भवितव्यमित्यापादनार्थस्वेष्टापत्तिः कथ तद्वोधिन्यपेति तदा गेहे इत्यधिकरणोक्तेश्चैव संसर्गोद्देश्यत्वानाधारत्वस्यैव धर्मस्वरूपाकारत्वात् तद् किं घटसंसर्गाच्चैव ? अस्त्येवेति कोऽर्थः स्यात् संयुक्तो वा

नाद्यः समवेतघटस्य तत्राभावात् न द्वितीयः संयोगस्य निषेधात् नन्वेवं घटादीनां केवलान्वयित्वप्रसङ्गः तत्संयोगसमवायान्यतरत्वेव सर्वत्र निषेधादिति चेन्न तदुभयनिषेधस्यैव घटनिषेधात्मकत्वात् तत् किं घटसंयुक्तसंयोगस्यैकं तत्त्वं येन घटसंयोगनिषेधो घटनिषेधः स्यात् तत् किं घटसंयुक्तसंयोगसमवायस्यैकं तत्त्वं येन तन्निधिरेव घटविधिः स्यात् न हि तौ यत्र निषेध्येते तत्र घटान्वयो येन केवलान्वयित्वं तस्य स्यात् तथा च यस्य यो विधिस्तन्निषेध एव तन्निषेध इति । यद्वा घटस्य समवायितया मेहेऽत्यन्ताभाव एव स एव मेहे घटो नास्तीति प्रतीतिविषयः कपाले संयोगितयैव । एवं सति केवलान्वयित्वान्नाभावप्रतियोगितया घटोऽसन् स्यादिति चेत् भवेदेवं यदि संयोगित्वसमवायित्वाभ्यां सर्वत्रासन् स्यादिति ।

संसर्गिन् त्रि० सम्+सृज-णिनि् । १संसर्गयुक्ते विशेषणान्तरम् (यत्तव धनं तन्ममेति) क्रतसमयेन एकत्रावस्थानरूपसंसर्गयुक्ते २भ्रात्रादौ ३समवेते च ।

संसार पु० संसरत्यस्मात् सम्+सृ-घञ् । १मिथ्याज्ञानजन्ये संस्काररूपवासनायां २देहारम्भकाष्टभेदे ३भ्राष्टौपनिबद्धदेहपरिग्रहे च आधारे घञ् । ४विषये । भावे घञ् । ५सङ्कृतौ । संसारगतिप्रकारः शा०सू०भा० दर्शितो यथा "तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्याम्" सू० "पञ्चाग्निविद्यामात्रित्य संसारगतिप्रभेदः प्रदर्श्यते, वैराग्यहेतोस्तस्याध्यात्मशास्त्रेषूपयोगात् इति चान्ते श्रवणात् । जीवो सूक्ष्मप्राणसहितः सेन्द्रियः समनस्को विद्याकर्मपूर्वप्रज्ञापरिग्रहः पूर्वदेहं विहाय देहान्तरं प्रतिपद्यते इत्येतदयमर्थः । "अथैनमेते प्राणा अभिसमायन्ति" इत्येवमादेः "अन्यन्नवतरं कल्याणतरं रूपं कुरुते" इत्येवमन्तात् संसारप्रकारस्यास्याध्यात्मात्, धर्माधर्मफलोपभोगसम्बन्धाच्च । स किं देहयोगैर्भूतसूक्ष्मैरसम्परिष्वक्तो गच्छति आहोस्वित् सम्परिष्वक्त इति चिन्त्यते । जिनाचार्यस्तु प्राग्वत् असम्परिष्वक्त इति । कुतः करणोपादानवदभूतोपादानस्याश्रुतत्वात् । "स एतान्जीवघनान्भूतमात्रासमभ्यादानः" इत्यत्र तेजोमात्रासम्बन्धेन करणानामुपादानं श्रूयतेऽयति, वाक्यशेषे चक्षुरादिसङ्कीर्तनात् । नैवमद्भूतमात्रोपादानसङ्कीर्तनमस्ति । श्रुतमात्र सर्वत्र भूतमात्राः, यतश्चैव देह आरभ्यमाणश्चैव भवति । ततश्च तासां नवनं विक्रियोक्तं, तस्मात्सम्परिष्वक्तो यातीत्येवं प्राप्ते पठत्याचार्यः "तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः" इति । तदन्तरप्रतिपत्तौ देहयोगैर्भूतसूक्ष्मैः सम्परिष्वक्तो रंहति गच्छतीत्यवगन्तव्यम् । कुतः प्रश्ननिरूपणाभ्याम् । तथा हि प्रश्नः "वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" इति । निरूपणञ्च प्रतिवचनं द्युपर्जन्यपृथिवीपुरुषयोषित्सु पञ्चस्वग्निषु श्रद्धासोमवृष्ट्यन्नरेतोरूपा आपोरुक्ता "इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" इति। तस्मादङ्गैः परिवेष्टितो जीवो रंहति व्रजतीति गम्यते" । शां०भा० तत्प्रकारो दर्शितो यथा "संसरति निरूपभोगं भावैरधिवासितं लिङ्गम्" का० "नन्वस्येतदेव शरीरं भोगायतनं पुरुषस्य, क्रतं दह्यमानेन भाट्कौशिकेन शरीरेणेत्यतश्चाह संसरतीति उपात्तमुपात्तं भाट्कौशिकं शरीरं जहाति हातं हातं चोपादत्ते, कस्मात् ? निरूपभोगं यतः भाट्कौशिकं शरीरं विना सूक्ष्मं शरीरं निरूपभोगं, तस्मात् संसरति । नन्वधर्माधर्मनिमित्तः संसारः न च सूक्ष्मशरीरस्यापि तद्योगः, तत्कथं संसरतीत्यत आह भावैरधिवासितं धर्माधर्मनिमित्तानाज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्यादि भावात्मदन्विता बुद्धिः तदन्वितश्च सूक्ष्मशरीरमिति तदपि भावैरधिवासितं यथा सुरभिचन्दनकस्तूरिकादिद्रव्यं तदामोदवासितमन्यत्र तस्मात् भावैरेवाधिवासितत्वात् संसरति । कस्मात् पुनः प्रधानमिव महाप्रलयेऽपि तच्छरीरं न तिष्ठतीत्यत आह लिङ्गम् स्वयं गच्छतीति लिङ्गं हेतुभूतत्वेन यावद् विद्युत्तिष्ठतीति भावः । स्यादेतद्बुद्धिरेव बाह्यैरिन्द्रियैः सहाय संसरति क्रतं सूक्ष्मशरीरेणाप्राप्तार्थिकेनेत्यत आह" "लिङ्गं यथाश्रयमृते स्थाण्वादिभ्योविना यथा छाया । तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम्" का० "लिङ्गनात् ज्ञापनात् बुद्धादयोलिङ्गं तत् यथाश्रितं न तिष्ठति । जन्मप्रयायान्तराले बुद्धादयः प्रत्युत्पन्नशरीराश्रिताः प्रत्युत्पन्नपतन्नात्मवन्त्वे सति बुद्ध्यादित्वात् दह्यमानशरीरबुद्ध्यादिवत् । विना विशेषैरिति सूक्ष्मैः शरीरैरित्यर्थः । आगमश्चात्र भवति "अङ्गुष्ठमात्रं पुरुषं निश्चयेन यमोब्रवादिति" । अङ्गुष्ठमात्रत्वेन सूक्ष्मतामुपलक्षयति आत्मनो निष्क्रियत्वेन सूक्ष्मत्वेन शरीरं पुरुषस्यादि हि पुरि शयनशरीरे शेते" त०कौ०।

संसारगुरु पु० ईश० । १कामदेवे त्रिका० २जगद्गुरौ च ।

संसारचक्र न० संसारस्यचक्रमिव । पुनःपुनर्जन्ममरणात्मके जीवस्य व्यापारभेदे यस्मात्कर्मणा देहप्रहणानन्तरं तत्प्रमुक्तस्यानन्तरभावी नाशे सरूपं तदनन्तरं च सत्तनोतुसा-

रेष देवतिर्यङ्मानुषभावावस्थिरित्येवं सततमतागतप्रचुरत्वात् संसारस्य चक्रवल्लत्वात् तथात्वम् । तदेतत् विष्णुपु० संसारचक्रनिरूपणे निरूपितं तत्र दृश्यम् ।

संसारमार्ग पु० ६त० । योनिद्वारे त्रिका० । तत एव हि बहिर्निर्गमने मायाच्छन्नत्वेति तस्य तथात्वम् ।

संसारिन् त्रि० संसरति अवश्यत्वात् देहभेदमनुगच्छति सम्+सृ-णिनि । शरीराभिमानिनि जीवे ।

संसिद्ध त्रि० सम्यक् स्वभावेन वा सिद्धः सम्+सिध-क्त । १स्वभावसिद्धे २सम्यग्निष्पन्ने च ।

संसिद्धि स्त्री सम्+सिध-क्तिन् । १स्वभावे प्रकृतौ २सम्यग्निष्पत्तौ । सम्यक्सिद्धिर्यत्र । ३स्त्रीत्वे च "कर्मणैव हि संसिद्धिमास्थिता जनकादयः" गीता । [३स्त्रीत्वे शब्दच०]

संसृति स्त्री सम्+सृ-क्तिन् । १संसारे २प्रवाहे च त्रिका० ।

संसृष्ट पु० सम्+सृज-क्त । विभागानन्तरं कैश्चित् पुनः स्वस्वांशेषु कृतसंसर्गवृत्ते भ्रात्रादौ "विभक्तो वा पुनः पित्रा भ्राता चैव तु संसृष्टः । विभक्तेष्वथ वा प्रीत्या स तु संसृष्ट उच्यते" "इच्छतिपरिगणितवस्तुतिरिक्तेषु संसर्गकृतो विशेषो बादरायणः परिगणनानर्हत्वात्" दायभा० । तद्रहितविभागस्तु दर्शितो यथा "विभक्ताः सह जीवन्तो विभजेरन् इत्यपि । तत्रैव विभागः स्यात् त्र्यैक्यं तत्र न विद्यते" मनुः । "तत्रैवेति सपत्नीभ्रातृसंसर्गाभिप्रायेण भ्रात्रादिषु त्रिष्वेवोक्तं पूर्वकृतभागानुसारेण भागत्रयस्य बोद्धव्या । पूर्वकृतभागैक्यनिषेधमात्रपरं हि सत्यवचनम् अतएव हृद्० "विभक्ता भ्रातरो ये तु संसृष्टैवैक्य संस्थिताः । पुनर्विभागकरणे तेषां त्र्यैक्यं न विद्यते" इति त्र्यैक्यांशमात्रं निषेधति न तु भागद्वयम्" दायभा० । तत्र भ्रात्रविभागे विशेषमाह स एव यथा "सत्योदर्यस्तु संसृष्टी नान्यदर्थमृणं हरेत् । असंसृष्टापि चादद्यात् संसृष्टो नान्यमातृजः" याज्ञ० अप्रावसर्गः । "संसृष्टी पुनरन्योदर्यः प्रथमं हरेत न पुनरन्योदर्यजातम् । प्रथमं च हरन् सोदरं वाधित्वैव वा तेन यद्द वैद्यपेक्षाव्यवहारेषु अर्थसंसृष्टापि सोदरो भ्रष्टीयात् सोदरपदमनुवर्त्तते ("सोदरस्य तु सोदरः इति वचनात्) । भ्रात्रजातज एव संसृष्टी भ्रष्टीयात् संसृष्टपदमेव वा सोदरमभिप्रेत्य अतएव हृद्दृश्यात्० "सोदरो भ्रात्रजातजः" इति क्षितेन्द्रियेण लिखितम् । तथा च पूर्वार्द्धेन संसृष्टीत्वमुक्त्वा तु च वैयर्थ्यात् पूर्व एव संसृष्टी भ्रष्टीयात् विभक्तः सोदरो भ्रष्टीयादित्यर्थः । तेन असंसृष्टिना सोदरेण संसृष्टिना चासोदरेण विभक्तश्च यतीत्यमतएवान्यिन्हं प्रयुक्तवान्" दायभा० । "तस्मात् सोदरासोदरसाम्ये सद्भावे सोदराधामेव । सोदराधामेव मध्ये एकस्य संसृष्टत्वे तस्यैव असंसृष्टसोदरसंसृष्टासोदरसद्भावे च द्वयोरेव सापत्नमात्रसद्भावे प्रथमं संसृष्टस्य तदभावे चासंसृष्टासोदरस्येति" दायसा० एवं भ्रात्रपुत्रेऽपि । २असमादिना संयुक्ते भेदि० ३संयुक्ते च । शब्दे क्ष । ४सम्बन्धे ।

संसृष्टि स्त्री सम्+सृज-क्तिन् ।१संसर्गे २व्यवहारभेदे व्यवहारपदे ४०५ पृ०दृश्यम् । ["संसृष्टस्य तु संसृष्टी" याज्ञ०।

संसृष्टिन् पु० संसृष्टमस्येन इति० इनि । संसृष्टयुक्तादौ

संस्कर्त्तृ त्रि०सम्+कृ-तृच्-षुट् च । १संस्कारकारके २पाचके च "संस्कर्त्ता चोपकर्त्ता च यश्चेते घातकाः स्मृताः" मनुः ।

संस्कार पु० सम्+कृ-घञ् षुट् च । मृतोत्पन्नानन्तरोत्पन्ने १मृतियत्ने यथा अवङ्कारादेरस्थादेर्वस्थादेश्च यद्दीपनिमार्जनादयः, दर्पणादेर्निर्मलीकरणादिः ब्रीह्यादेश्च यद्भक्षणासम्पादनाय वैदिकमार्गेण प्रोक्षणादिः । यच्च "संस्कारः पुंस एवेष्टः प्रोक्षणाभ्युक्षणादिषु" कुल्लू० उक्तेः पुरुषस्यैव धर्मः" न्यायसत्वम् । प्रोक्षिता एव व्रीहयः पुरोडाशाय कल्पन्ते नाप्रोक्षिता इति प्रोक्षणादिजन्यसंस्कारोत्पत्त्यानुपरक्षायेत्यपि द्रव्यधर्मः श्रीसंस्काराः । एवं स्नानाचमनादिजन्याः संस्कारा देहे यद्यप्यज्ञाना अपि तदभिमानिजीवे कल्पन्ते इति वेदान्तिनः । २स्मृतिहेतौ अनुभवजन्ये आत्मवृत्तिगुणभेदे पृथिव्यादिचतुष्टयस्थे ३वेगाख्ये गुणे, यथावस्थितत्वापादनप्रयोजके स्थितिस्थापनाख्ये ४गुणभेदे च

"संस्कारभेदो वेगोऽथ स्थितिस्थापकभावने । मूर्त्तमात्रे तु वेगः स्यात् कर्मणो वेगजः क्वचित् । स्थितिस्थापकसंस्कारः क्षितौ केचित्तथापि । अतीन्द्रियः स विज्ञेयः क्वचित् अन्त्येऽपि कारणम् । भावनाख्यस्तु संस्कारो जीवधर्मिरतीन्द्रियः । अपेक्षाबुद्धिकरणं निमित्तः कारणं भवेत् । कारणे ह्यभिधाभावव्यवहारौ हेतूकृते" भाषा० "नित्यः संस्कारो नास्ति वेगस्तु त्रिविधः कर्मजवेगजभेदात् तत्र शरादौ नोदनजनितेन कर्मणा वेगो जन्यते तेन च पूर्वकर्मनाशादुत्तरं कर्म एवमुत्तरोत्तरमपि कर्म जायते । वेगं विना कर्मणः कर्मान्तरानुत्पत्तात् पूर्वकर्मनाशे उत्तरकर्मोत्पत्तिश्च न स्यात् । तत्र वेगवता धनुषेण जनिते घटे वेगो जन्यते तत्

वेगजो वेगः। स्थितिस्थापकसंस्कारखातीन्द्रियः आकृष्टयाखादीनां परित्यागे यत् पूर्वदेशगमनं तत्र स्थितिस्थापकोद्रेकः। उपेक्षानाम्नकनिश्चयेन भावनाख्यसंस्कारो जन्यते स च स्मरणे प्रबन्धित्रायां च हेतुः जीवद्वत्तिरतीन्द्रियश्च स च चरमक्षणनाश्यः क्वचित् रोगादिनाश्यः क्वचित् कालनाश्यः" सि॰मु॰ अन्ये तु समानविषयकं स्मरणमेव संस्कारनामकम् अतएव "जायते च पुनः-पुनःस्मरणादृढतमसंस्कारः" इति दीधितिकृत्प्रभृतयः।

संस्कारत्वं तु न जातिरिति चक्रादौ व्यवस्थापितम्। व्याकरणव्युत्पत्तौ व्याकरणोक्तदिशा शब्दानां साधनकारे, विवाहादीनां वैदिककर्मोद्देशप्रयोजके गर्भाधानादौ क्रियाकलापे च। विवाहादीनां देहसंस्काराश्च अष्टाचत्वारिंशत् तत्रान्ते ५१॰ पृ॰ दर्शिताः। क्षुद्रादीन्द्रियाणां तु गर्भाधानाद्याविद्याकालाः दशविधाः प्रसिद्धाः। तेषां च देह दोषनाशकता यत्तूक्तं हारीतेन "गर्भाधानक्षतेनो ब्रह्मवर्चः संददाति पुंसवनात् पुंसोकरोति जातकर्मणात् मातापितृजन्याप्यानमपोहति रेतोरक्तसमोद्भवः चूडाकरणेन द्वितीयं प्राशनेन तृतीयं चूडाकरणेन चतुर्थं व्रतबन्धेन पञ्चमं वेदव्रतैरष्टाभिः संस्कारैर्नैनोऽप्रशान्तं मृतो भवति"। "व्रतबन्धं समावर्तनम्" उपनयनञ्च वेदव्रतसंस्कारम् विवाहस्याग्निसाध्यत्वात्तस्यौपासनाभिविधिः अतो दशविधाः। "गर्भाधानक्षतो पुंसः करणं जन्मनात् पुरा। षष्ठेऽष्टमे वा सीमन्तः प्रसवे जातकर्म च। चूडान्नप्राशनं सार्धे चूडा कार्या यथाकुलम्। ब्रह्मवर्चः समं याति बीजगर्भसमुद्भवम्" याज्ञ॰। अत्र जातकर्मनिष्क्रमणाधिकौ संस्कारौ बीजादिदोषनिवारणतयोक्तौ। अग्निसाध्यत्वेन प्रबन्धित्रयः मूतसंस्कारः प्रत्यक्षे दर्शितः नैनः प्रभृतिभक्षणप्रवेशनसङ्घेषं विनैतोद्धरणमभ्युपगमेति। दोषनाशकत्वान्निबन्धसंस्काराश्च दशविधाः दीधि॰ उ॰ दर्शिता यथा

भारद्वाजः "मन्त्राणां तत्र तत्रान्ते संस्काराः सिद्धिदायिनः। जननं जीवनं पश्चात्ताडनं बोधनं तथा। पाशाभिषेको विमलीकरणाभ्यर्चने तथा। तर्पणं दीपनं गुप्तिर्दशैता [illegible] मन्त्राणां साधकानान्तु ज्ञातो जननं मृतः [illegible] ज्ञात्वा मन्त्रपदान् सुधीः। एतत्[illegible]न्त्रतन्त्रविशारदाः। मन्त्रवर्णान् समालिख्य ताडयेच्चन्दनाम्बुना। मन्त्रेकं वायुना मन्त्री ताडनं तदुदाहृतम्"। वायुना वायुबीजेन "यस्मिन्नेन तं मन्त्री प्रक्षुनै. करवीरजैः। तन्मन्त्राक्षरसंख्यातैर्न्यस्तैर्वान्तेन बोधनम्"। वान्तेन रविणेन इति "क्षतन्त्रोक्तविधानेन मन्त्री मन्त्रार्थसंख्यया। जपत्यप्पवनैर्मन्त्रमभिषिञ्चेद्धिशुद्धये। क्षतन्त्रो विधानेन मूर्ध्नि तोयेन देशिकः। नमोऽन्तं मन्त्रतच्चार्थं तदन्ते देवताभिधाम्। द्वितीयान्तामहं पदादभिषिञ्चाम्यनेन च। तोयैरक्षविवृद्धैश्चाभिषिञ्चेत् साधकं निम्"। क्षतन्त्रोक्तविधानेन पुरश्चर्याप्रकरणोक्तविधिताक्षविना दत्यभिहितेन "वह्निन्यं मनसा मन्त्रं ज्योतिर्मन्त्रेण निर्दहेत्। मन्त्रे मलत्रयं मन्त्री विमलीकरणाह्वयिदम्"। मलत्रयं मायिकं कार्मिणं मानसरूपम् "तारव्योमाग्निसहचुगुद्दन्तो ज्योतिर्मनुर्मतः"। तारः प्रणवः व्योम हकारः अग्नीरेफः मनुरीकारः तदुयुक्तोदन्तोऽनुस्वारः। तेन ओम् ह्रीं इतिमन्त्रः। "कुशोदकेन मन्त्रेण प्रत्यृचं प्रोक्षणं मतम्"। प्रत्यृचं प्रत्यक्षरम् "तेन मन्त्रेण विधिवदेतदाप्यायनं मतम्। मन्त्रेण वारिणा मन्त्रतर्पणं तर्पणं मतम्"। मन्त्रेण मूलमन्त्रेण। "मूलमन्त्रं समुच्चार्य तदन्ते देवताभिधाम्। द्वितीयान्तामहं पदात्तेजसि नमोऽन्तकम्"। इति पुरश्चर्योक्तक्रमेण लिखितमन्त्राधारकपत्रे। "तारमायारमायोमोमनोदीपनदण्डयते"। तारः ओम् माया ह्रीं रमा श्रीम् "जपमानस्य मन्त्रस्य गोपनान्त्रपञ्चाशनम्। संस्कारा दशसंख्याताः क्षतन्त्रेषु गोपिताः। यान् कृत्वा सम्यगाचार्यो मन्त्री वाञ्छितमश्नुते"।

देवप्रतिष्ठाङ्गसंस्काराश्च देवताप्रतिष्ठाशब्दे ३७२३५-दर्शिताः। अन्येऽपि तत्तत्कृत्यङ्गसंस्काराश्च तत्तत्रे दर्शिताः।

संस्कारवर्जित वि॰ इत॰। १गर्भाधानादिसंस्कारहीने २व्याकरणादौ व्युत्पत्तिहीने च संस्कारहीनादयोऽत्र।

संस्कृत वि॰ सम्+कृ-क्त सुट् च। १व्रतसंस्कारे पदार्थे व्याकरणव्याधीनसाधनयुक्ते २शब्दे ३एके ४भूषिते ५व्याप्तभेदे मेदि॰ ६शोधिते जटा॰।

संस्तर पु॰ सम्+स्तृ-अप्। १यज्ञे २शय्यायां हेमच॰ ३पङ्क्तादिरचितशय्यायां च "नवपञ्चयसंस्तरे यजेति" कुमारः

संस्तव पु॰सम्+स्तु-अप्। १परिचये अमरः २सम्यक्स्तुतौ च

संस्ताव पु॰ संस्तूयतेऽत्र सम्+स्तु-घञ्। यज्ञार्थं संभावनविप्राणां वासभूमौ अमरः।

संसुत त्रि० सम्+सु-क्त। १परिचिते २सम्यक्सुते च।
संस्थाय पु० सम्+स्थै-घञ्। १संघाते २निविड़संयोगरूपे सन्निवेशे अमरः। ३विस्तृतौ ४संस्थाने च मेदि० करणे घञ्। ५गृहे हेमच०।
संस्थ त्रि० सम्+स्था-क। १अवस्थिते मेदि० २स्थिते शब्दर० ३चरे पु० मेदि० ४निधारके ५व्यवस्थिते ६व्यक्तौ ७ऋतुप्रकारभेदे ८समाप्ते च हेमच०। ९प्रकारे "नैमित्तिकः प्राकृतिको नित्य आत्यन्तिकोलयः। संस्थेति कविभिः प्रोक्तश्चतुर्धास्य समासतः" रघुक्ते १०प्रलये च।
संस्था स्त्री सम्+स्था-अङ्। १व्याप्यधावस्थितौ अमरः। २स्थितौ ३नाशे मेदि० ४यज्ञभेदे ५व्यवस्थायां ६व्यक्तौ ७साङ्ख्ये ८प्रान्ते च।
संस्थान न० सम्+स्था-ल्युट्। १चतुरस्रे अमरः। २सन्निवेशे मेदि० ३आकारे ४अवयव्यारम्भकसंयोगभेदे ५स्थलौ ६चिह्ने अजयः। ७सम्यक्स्थितौ च।
संस्थित त्रि०सम्+स्था-क्त। १मृते अमरः २सम्यक्स्थिते च
संस्मर्या स्त्री संस्मृयते सम्+स्मृ-कर्मणि घञ् टाप्। रजनीगन्धायाञ्च अमरः।
संस्काल पु० सम्यक् स्कालः स्फुरणं यस्य। मेघे त्रिका०।
संस्फुट त्रि० सम्+स्फुट-क। विकसिते शब्दच०।
संस्फेट न० सम्+स्फुट-आधारे घञ् पृषो०। युद्धे भरतः
संस्फोट पु० सम्+स्फुट-आधारे घञ्। युद्धे अमरः।
संहत त्रि० सम्+हन-क्त। १दृढ़सम्बद्धे अमरः। २मिलिते दृढ़े मेदि०। ३परार्थं मिलिते "संहतपरार्थत्वादिति" साङ्ख्यसू०। ४दृढ़संयोगयुक्ते ५सम्यग्हते च। भावे क्त। ६संघाते न०। [क्षितपाण्डिदये अमरः।
संहतल पु० संहतं संहननं सङ्घातं लाति-ला-क। मि-
संहतपुष्पिका स्त्री संहतानि दृढ़संयुक्तानि पुष्पाण्यस्याः कप् अत इत्त्वम्। मिश्रेयादां राजनि०।
संहतजानु त्रि० संहते जानुनी यस्य। बन्धजानुके अमरः वा कप्। तत्रार्थे।
संहति स्त्री सम्+हन-क्तिन्। १सङ्घे अमरः। २सम्यग्हनने च। [१देहे अमरः २सङ्घाते ३बले च।
संहनन न० संहन्यते परार्थं संसृज्यते सम्+हन-ल्युट्। संहर्ष पु० सम्यक् हर्षः प्रा० स०। सम्+हृष-घञ् वा। १आनन्दे २लङ्घनाद्यैः संहृष्यजनेन करणे घञ्। ३यागे मेदि०।
संहार पु० सम्+हृ-घञ्। १प्रलये हेमच० २नाशे ३संक्षेपे ४नरकभेदे अमरः। ५विसर्जने ६काश्मिराभैरवभेदे च शटा०। "अथिताक्षोरुरुरुण्डः क्रोध उन्मत्त एव च। कपाली भीमरूपश्च संहारश्च भैरवाः" तन्त्रसा०।
संहारमुद्रा स्त्री संहाराय विसर्जनाय मुद्रा। तन्त्रोक्ते मुद्राभेदे तल्लक्षणम् "अधोमुखे वामहस्ते ऊर्द्धं दक्षहस्तकम्। शिखाकुलीरकुक्षीभिः संलग्नं परिवर्त्तयेत्। प्रोक्ता संहारमुद्रैवमर्पणे च प्रशस्यते" पदार्थो० धृतवाक्यम्। अर्पणे आत्मनि देवार्पणे" तिन्त०।
संहिता स्त्री सम्यक् हितं प्रतिपाद्यं यस्याः। १मन्वादिप्रणीते धर्मशास्त्रे २पुराणे ३प्रतिशाखादौ ४कर्मकाण्डप्रतिपादके वेदभागे च संहितापाठप्रकारेषु तिन्त० मतुरुक्तोक्तः चतुर्थीशब्दे २८५० पृ० दर्शितः। "परः सन्निकर्षः संहिता" पा०सू० ५पूर्ववर्णयोः अत्यन्तसन्निकर्षे तत्र नियमविशेषः कथ्यते "संहितैकपदे नित्या नित्या धातूपसर्गयोः। नित्या समासे वाक्ये तु सा विवक्षामपेक्षते"। [अमरः।
संहृति स्त्री सम्+हृञ्-क्तिन्। बन्धुभिः मृते आत्मनि
संहृत त्रि० सम्+हृ-क्त। १मृतसंहारे २सङ्कुचिते च।
संहृति स्त्री० सम्+हृ-क्तिन्। संहारे।
संह्राद पु० सम्+ह्लद-घञ्। शब्दभेदे।
संह्रादिन् त्रि० सम्+ह्लद-णिनि। शब्दायमाने।
सकण्टक पु०सह कण्टकेन सहस्य सः। १करञ्जभेदे (नाटाकरमचा) रत्नमा०। २गैवाखे शब्दच०। ३कण्टकयुक्ते त्रि०
सकर्ण त्रि० सह कर्णेन श्रवणेन तद्व्यापारेण वा। १श्रुतियोगे जटा० २कर्णयुक्ते च।
सकर्मक त्रि० सह कर्मणा सहस्य सः कप्। व्याकरणोक्ते कर्मयुक्तक्रियाबोधके धातौ "फलव्यापारयोरेकनिष्ठतायामकर्मकः। धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः" रघुक्तदिशा धातोः सकर्मकत्वमवसेयम्।
सकल त्रि० सह कलया अवयवमात्रया चतुरस्रा कलाभिर्वा सहस्य सः। १समस्ते २समग्रे अमरः ३कलायुक्ते च
सकारण त्रि० सह कारणेन। कार्य्ये। [अन्तिके समीपे।
सकाश पु० कशनं पीड़नं काशः घञ-घञ् सह काशेन।
सकुरुण्ड पु०सह समानः कुरण्डेन। शाकरण्डवृक्षे राजनि०
सकुल पुंस्त्री० सह समानं कुलमस्य। १अकुलमतृल्ये (शब) स्त्रीत्वे ङीष्। २सजातीयवंशे त्रि०।
सकुल्य त्रि० समाने कुले भवः यत्। अशौचविभेदे आश्व-श्रौतसूत्रभाष्यधृतस्मृतिमाले "दशाहेन सपिण्डास्तु शुध्यन्ति

प्रेतसूतके । त्रिरात्रेण सकृल्लाभे स्नात्वा शुध्यन्ति बान्धवाः" इत्तः । सपिण्डशब्दे दृश्यम् । [अन्ये ।

सकृत् अव्य० एक+त्रि० । १एकवारे अमरः । २विद्यायां स्त्री

सकृत्प्रज पुंस्त्री० सकृत् एकवारं प्रजायते प्र+जन-ड । १काके अमरः स्त्रियां ङीप् । २एकवारजातापत्ये च ।

सकृत्फला स्त्री सकृत् फलति फल-अच् । कदलीवृक्षे राजनि०

सकृद्गर्भा पु० सकृद् गर्भो यस्य । खेचरे राजनि० एकवार गर्भवत्यां स्त्रियां स्त्री ।

सकृद्वीर पु० कर्म० । एकवीरयुक्ते राजनि० ।

सक्त त्रि० सज्-क्त । १आसक्ते २अविरते च हेमच० ।

सक्तु पु० सज्-तन् किच्च । भक्ष्यधान्यादिचूर्णे (छात) शब्दच० "मेघाटो सक्तवो दैवा वारिपूर्णा च गर्गरी" तिं०त० ।

सक्तुफला(ली) स्त्री सक्तव इव क्षुद्राणि फलान्यस्याः वा ङीप् । श्यामाङ्के अमरः जीवन्तः तत्रार्थे शब्दर० ।

सक्थि न० सज्-क्थिन् । १जरौ अमरः २शकटावयवभेदे च उणादि० । बहु० स्वार्थे अच्-समा० । सृगसक्थ इत्यादि । [इन्द्रियत्वेऽपि त्वादिधर्मः ।

सखण्डोपाधि पु० कर्म० । बहुपदार्थघटिते धर्मे यथा

सखि त्रि० सह समानं ख्यायते ख्या-डिन् नि० । सौहार्द्ययुक्ते अमरः । सखायौ सख्या सख्युरित्यादि ।

सखी स्त्री सखि+स्त्रीत्वे ङीप् । १सहचर्य्यां हेमच० २वयस्यायाम् अमरः ।

सख्य न० सख्युर्भावः यत् । १मित्रतायां २सौहार्दे च ।

सगन्ध पु०सह गन्धेन लेशेन वा सहस्य सः । १घातौ त्रिका० २गन्धयुते त्रि० ।

सगर पु० सह गरेण विषेण जातः । १स्वर्यवंश्ये नृपभेदे "सगरात् सागरोजातः" इति पुराणम् । स च सुबाहुनामराजतः यादव्यां जातः तत्सपत्न्या गरदानेऽपि स न ममार तत्कथा "तस्या (और्वस्या)श्चमे च सा गर्भं सुषुवे ज्वलनप्रभम् । व्यजायत महाबाहुर्गरेणैव सह द्विज !। सगरो नाम तेनासीत् बालको-ऽतिमनोहरः" पद्मपु० १२अ० । २विषयुक्ते त्रि० ।

सगर्भ पु० सह समानो गर्भोऽस्य । १सहोदरे भ्रातरि शब्दर० । सह गर्भेण । २गर्भयुक्ते मध्यवर्त्तिसूक्ष्मपत्रयुक्ते कुशदूर्वादौ त्रि० स्त्रियां टाप् । [भ्रातरि ।

सगर्भ्य पु० समाने गर्भे भवः यत् सहस्य सः । सहोदरे

सगोत्र न० सह समानं गोत्रम् सहस्य सः । १कुले शब्दच० सह समं गोत्रमस्य । २भ्रातरि त्रि० अमरः ।

सन्धि स्त्री सद्-क्तिन् नि०सहस्यसः । सहभोजने अमरः ।

सङ्कट त्रि० सम्+कटच् सम्+कट-अच् वा । १अल्पावकाशे स्थाने अमरः । २संबाधे ३दुःखे "नरोऽसह्येत सङ्कटादिति" देवीभा० । ४देवीभेदे स्त्री ज्योतिषोक्ते दशाभेदे च स्त्री टाप् । दशाशब्दे २४८४पृ० दृश्यम् ।

सङ्ख्या स्त्री सम्+ख्या-भावे अ । परस्परकथने हेमच० ।

सङ्घाट पु०सङ्घटं संबाधमश्नुते अश्-अण् । पथद्वये विश्वः

सङ्घर पु० सम्+हृ-कर्मणि अप् । १सम्मार्जन्यादिभिः क्षिप्ते रजसि अमरः । इतरजातिपुरुषेण इतरजातिस्त्रियां २जाते जातिभेदे । भावे अप् । ३मेलने ४परस्पराभावसाधिकरणके सत्येकाधिकरणवृत्तित्वे च स च जातिबाधकः । "व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः । रूपहानिरसम्बन्धो जातिबाधकसंग्रहः" सि० मु० । यथा भूतत्वाभाववति मनसि मूर्त्तत्वस्य सत्त्वात् मूर्त्तत्वाभाववति च गगने भूतत्वस्य सत्त्वात् भूम्यादिभूतचतुष्टये चोभयोः सामानाधिकरण्यात् तयोर्न जातित्वम् । वर्णसङ्करजातिश्च नानाविधा दिङ्मात्रमत्रोच्यते "वर्णे सङ्करजात्यादि रत्युपक्रमे "विप्रानूमूर्द्धावसिक्तो हि क्षत्रियायां, विशः स्त्रियाम् । जातोऽम्बष्ठस्तु शूद्रायां निषादः पार्श्वदोऽपि च" इत्यादि गरु० ६६अ० । "स्त्रीषु दुष्टासु वार्ष्णेय ! जायते वर्णसङ्करः" गीता । एकालङ्कारभेदे अलङ्कारशब्दे ४०६पृ० दृश्यम् । इसंसर्गे स्वर्गादिसम्बन्धे चण्डालादिसङ्करे भवनादिदहनादि तत्र च प्रायश्चित्तादि प्रा०वि० उक्तं यथा

"अथ चाण्डालसङ्करप्रायश्चित्तम् । तत्र व्यासः "चाण्डालसङ्करेषु भवनदहनं पूरणं सर्वभाण्डभेदनं दारशाणाम् तप्तयं शङ्खशुक्तिरजतचेलानामद्भिः प्रक्षालनं कांस्यताम्राणामाकरशुद्धिः सौवीरपयोदधितक्राणां परित्यागः शैलरसयवसकूरचणं गोमूत्रयावकाहारो मासं जपयेत् बालवृद्धस्त्रीणामर्द्धं प्रायश्चित्तम् आपोऽशादृषलाः सप्तलूर्द्धं स्थविरः पौर्णं प्रायश्चित्ते ब्राह्मणभोजनं गोशतञ्च दद्यादभावे सर्वस्वम्" । पूरणं पूर्वदत्तिकाकर्त्रे खत्तिकान्तरदानम् तप्तयं वास्त्रादिनांगविशोधनम् भाण्डभेदनं मृण्मयभाण्डभेदनम् । आकरे अन्नादिसंयोगात्तादीनासत्यत्वे । शैलरसानां लाक्षादीनां यवसकूल्यानां च धान्यानां रजस्वम् । तथा च पराशरः "आकरे तु मृच्छुद्धिरारकूटे सप्ता-

ब्रजे। जलशौचन्तु वस्त्राणां परित्यागस्तु मृण्मये। कृच्छ्रगुडूकायांसवर्षं सङ्ग उदीरितः। हारि कुर्वीत धान्यानि मृदे दद्याद्धुताशनम्। स्रुताग्यज्वालासंस्पृष्टं शुचि तन्मन्तुरब्रवीत्" । तेन रज्ज्वं स्रुतादीनामग्नि-ज्वालापवित्रीकृतानां कर्त्तव्यम्। एतच्च प्रायश्चित्तं सद्यःपातहेतुयोनादिवर्जितैः संसर्गैश्चानन्तो यावता कालेन पातित्यं भवति तावत्कालसंसर्गे सति वेदितव्यम् इति तेन संवत्सरैकचाण्डालसम्बन्धे मासैक-गोमूत्रयावकाहारः कर्त्तव्यः। अनेन च द्वादश धेनवो मासोपवासात् पञ्चमभागापकर्षात्। गोशतञ्च दक्षिणा। एतच्च प्रायश्चित्तं ब्राह्मणक्षत्रियविषयं तुल्यमेव। तथा चापस्तम्बः "अन्त्यजातिरविज्ञातो निवसेद् यस्य वेश्मनि। स वै ज्ञात्वा तु काले तु कुर्यात्तस्य विशोधनम्। चान्द्रा-यणं पराकं वा द्विजातीनां विशोधनम्। प्राजापत्यन्तु शूद्राणां तथा संसर्गदूषणे। यैस्तस्य भुक्तं पक्वान्नं कृच्छ्रं तेषां विधीयते। तेषामपि च यैर्भुक्तं तदर्द्धं तेषु विद्यते। तेषामपि च यैर्भुक्तं कृच्छ्रपादो विधीयते। कूपैकपानदुष्टानां तथा संसर्गदूषणे। उपवासेन शुद्धिः स्यात् पञ्चगव्येन चैव हि। बालापत्या तथा रोगी गर्भिणी दुष्टएव यः। तेषां नक्तं प्रदातव्यं बालानां प्रकर-द्वयम्। अथवा क्रियमाणे तु तेषामार्त्तिः प्रदृश्यते। श्रेयं सम्पादयेत्तेषां विपत्तिर्न भवेत् यथा"। तत्र पूर्वो-क्तकालादल्पकालसङ्करे चान्द्रायणम्। अल्पतरे पराकः। शूद्रस्य प्राजापत्यम्। कूपैकपानदुष्टानामिति एकस्मि-न्नेव कूपे द्विजानां चाण्डालादीनां सकृज्जलपानं कुर्वतां संसर्गदुष्टानां सोपवासपञ्चगव्यं विशोधनमित्यर्थः। संवर्त्तः "चाण्डालसङ्करे विप्रः श्वपाके पुक्कशेऽपि वा। गोमूत्रयावकाहारो मासार्द्धेन विशुध्यति। एत-दपि अल्पकालसङ्करविषयं मासार्द्धयावकाहारापेक्षो द्वादशेनवः। सुमन्तुः "अगम्यागमनस्तोयचाण्डालसम्ब-न्धेषु कृच्छ्रत्रयम्"। एतदल्पतरकालविषयं कृच्छ्रत्रया-पेक्षया धेनुत्रयम्। तथा "अविज्ञातस्तु चाण्डालो निव-सेद् यस्य वेश्मनि। विज्ञाते तूपसंन्यस्य द्विजाः कुर्यु-रतूपवासम्" इत्युपक्रम्याह पराशरः "दधिसर्पिःपयो मूत्रं यदा गोमूत्रयावकम्। भुञ्जीत सप्त रात्रेषु त्रि-रात्रन्त्वभयोर्नक्तम्। मासार्द्धं न भुञ्जीत भोक्तव्यं गोर-सस्तथा। त्रिपक्षं क्षीरदोषेण पक्षमेकन्तु सर्पिषः"। तथा "न पुनः सप्तरात्रञ्च कुर्याद्ब्राह्मणभोजनम्। अनड्वत्-सहितां गान्तु दद्याद्विप्राय दक्षिणाम्"। दधिसर्पिःपयो भुक्तं यदा गोमूत्रयावकं द्वादशाहं भुञ्जीतेत्यर्थः। तत्र परिमाणमेतेषाम् अयाचायाचकम्। चर्मकारादीनामविज्ञाते सङ्करे तु चाण्डालसङ्करप्रायश्चित्तस्य षष्ठो भागः कर-णीयः चाण्डालसर्गप्रायश्चित्ताच्चर्मकारादिसर्गे प्राय-श्चित्तस्य षष्ठभागदर्शनात्। यथा कल्पद्रुमः "चाण्डालैः श्वपचैः स्पृष्टो विण्मूत्रे च कृते द्विजः। त्रिरात्रं सम्य-क्कुर्वीत अज्ञोच्छिष्टः षडाचरेत्"। चर्मकारादिसर्गे तु संवर्त्तः "एतैः स्पृष्टस्तथोच्छिष्ट एकरात्रं पयः पिबेत्" देवलः "चाण्डालसंयोगे जातचाण्डाल एव स्यात् ब्रह्मक्षत्रोच्छिष्टे प्रायश्चित्तं वार्षिकं षाण्मासिकं कृच्छ्रं वा ब्राह्मणस्य। चतस्रिंशद्दक्षैकमाषाः श्रेयाश्चाम्"। अविज्ञातचाण्डालसम्बन्धे विद्यमान एव दम्पत्योः संयोगे यो जातो ब्राह्मणः स वार्षिकं ब्रह्मक्षत्रव्रतं प्राजापत्यं वा षाण्मासान् कुर्यात् वार्षिकब्रह्मक्षत्रव्रतायक्षौ पञ्च-दश धेनवो देयाः। षाण्मासिकब्रह्मक्षत्रव्रतायक्षावपी-त्यर्थः। अस्मृत्यसर्गेनप्रायश्चित्तमभिहितमिदानीं सर्ग एव निरूप्यते। किं चाचात् सर्ग एव सर्गशब्दस्यार्थः उत परम्परासर्गोऽपि न प्रथमः परम्परया चाण्डा-लसर्गे ज्ञानाद्यभावप्रसङ्गात् नापि द्वितीयः संयोगे संयुक्तसंयोगे चैकसर्गपदप्रवृत्तिनिमित्ताभावात् चाकाशा-दिद्वारेण सर्वेषामेव तत्सम्भवाच्च किञ्चैवम् "औदुम्बरी सर्वा वेष्टयितव्या औदुम्बरीं स्पृशोद्वायेत्" इत्यत्र सर्व-वेष्टनसर्गयोरविरोधः स्यात् उपसर्गस्यापि सर्गशब्दवा-च्यत्वात् तथा च विरोधाधिकरणोदाहरणं भाष्यकार-स्याप्यसङ्गतं स्यात्। तथा च व्रह्मयातातपः "अशुचिं संस्पृशेद् वस्तु एक एव स दुष्यति। तत्स्पृष्टोऽन्योन दुष्येत सर्वदूष्येष्वयं विधिः"। "तथा संस्कृतानान्तु पा-त्राणां यद्येकस्पर्शदूषणम्। तस्यैव शोधनं प्रोक्तं न तु तत्स्पृष्टिनामपि"। उच्यते। सत्यम् उपसर्गो यद्यपि न सर्गशब्दार्थस्तथाप्यत्र वचनादेकावयविहारकपरम्परा-सर्गोऽपि याह्यः। तथा चापस्तम्बः "एकशाखां समारू-ढश्चाण्डालादिर्यदा भवेत्। ब्राह्मणस्तत्र निवसन् ज्ञानेन शुचितामियात्"। आदिशब्दादुदक्यादीनां सङ्ग्रहः। शाखापदमेकावयवोपलक्षणार्थं तेनैकशाखादेरपि सङ्ग्रहः। तथा स एव "एकदेशं समारूढो चाण्डाल-ब्राह्मणो यदि। कथं भवति तत्रस्थं प्रायश्चित्तं कथं भ-वेत्। ब्रह्मणान्यत्तु विज्ञाय स्वयमाः स्नानमाचरेत्। अ-

क्षौराक्षौषितो भूत्वा पञ्चगव्येन शुध्यति"। तथा स एव "एकशाखां समारूढः फलान्यश्नंस्तथा यदि। प्रायश्चित्तं त्रिरात्रं स्यात् पञ्चगव्यं विशोधनम्"। अत्र व्यवधानसन्निधानाभ्यामेकरात्रित्रिरात्रे। ज्ञानविषयं चेतदुभयम्। तथा च ब्रह्मपुराणम् "विप्रश्चाण्डालसंस्थितो यत्रैकस्मिन् वनस्पतौ। अज्ञानात्तु फलं भुङ्क्ते चरेत्तत्राघमर्षणम्"। उपसर्गत्वात्। "पादे चामाशने तथेति" पूर्वोक्तापस्तम्बेन न विरोधः। तथाचापस्तम्बः "मूढः क्षत्तरि वा संस्पृशन् अप्रयतान् प्रयतो मन्येत"। तत्रक्षत्तरादौ चाण्डालादिभिः सहावस्थितोऽपि स्पृश्यमपि तान् प्रयतत्वमात्मनो मूढो मन्येत वस्तुतस्तु अशुचिरेवासौ इति पूर्ववाक्योपात्तं स्नानमेव कुर्यात् तथा "तत्रक्षाडादिषु निखातेषु च"। संक्रमादौ निखातेषुतत्रक्षाडेषु चाण्डालेन सहावस्थितोऽप्यशुचिरेव तथा "प्रोक्ष्य वास उपयोजयेत्"। न त्वेवं स्नानमित्यर्थः। अयमेव विशेषः साक्षात्स्पर्शादस्य। अतोवचनादेकावयविद्वारा परम्परास्पर्शे स्नानादिकमिति। नौकादिषु न दोष इत्याह पराशरः। "रथ्याकर्दमतोयानि नावः पन्थास्तृणानि च। स्पर्शनात्र प्रदुष्यन्ति पक्वेष्टकचितानि च"। तृणसमूहः पक्वेष्टकचितानि मठादीनि। नन्वेवं याज्ञवल्क्यवचनविरोधः तद्यथा "उदक्याशौचिभिः स्नावात् संस्पृष्टस्तैरसंस्पृशेत्। अदृष्टिकानि जपेच्चैव गायत्रीं मनसा सरन्"। अत्र परम्परयोदक्यया अशुचिभिश्च स्पर्शे स्नानमवगम्यते। तथा "एवं तत्संस्पृष्टिनाश्नीयेति" मनुवचने तत्संस्पृष्टीत्यभिधीयते तदनर्थकं स्यात् चाण्डालादिसंस्पृष्टसंस्पृष्टिनोरपि स्नानाभ्युपगमात् "अवस्पृश्यु पस्पर्शे सवैदकस्मार्त्तमुद्विरिति" गौतमविरोधः "अवस्पृशं दिवाकीर्त्तिम्" इत्यादि वृहस्पतिवचन "अवस्पृशन्न स्पृशेत्" इत्यादिविष्णुवचनाभ्याञ्च विरोधः स्यात् तस्मादुक्तेन सर्वेषामेव चाण्डालादीनां परामर्शात् दृष्टे सर्वेषु अवस्पृष्टित्वदृष्टात्। उच्यते। एकशाखां समारूढ इत्याद्यापस्तम्बवचनं वर्त्तमानाशुचिसंसर्गिस्पर्शविषयं याज्ञवल्क्यादिवचनञ्चातीतसंसर्गिस्पर्शविषयमित्यविरोधः। अतएव "संस्पृश्याशुचिसंस्पृष्टं तृतीयं वापि मानवः। क्षत्तो पादौ च प्रक्षाल्य तोयेनाचम्य शुध्यति" इति देवलवचनमपि वर्त्तमानाशुचिसंसर्गिस्पृष्टौ मूलभूताशुच्यपेक्षया तृतीयो भवति तं स्पृष्ट्वा स्नानमनमात्रं चतुर्थं नेत्यर्थः। अतीतविषये द्वितीयमेव स्पृष्ट्वाचमनमिति व्यवस्थितविकल्पवाचिवाशब्दार्थः। तृतीयस्पर्शे न किञ्चित्। चाण्डालादिस्पर्शविषयञ्चैतत् अतीतान्त्यजस्पर्शविषये तु द्वितीय एव नाचमनम्। तथा च यातातपः "अशुचिं संस्पृशेद् यस्तु एक एव स दुष्यति। तत्स्पृष्टोऽन्योन दुष्येत्तु सर्वदृव्येष्वयं विधिः"। एतच्चाशुचिद्रव्याधजङ्घौच्छिष्टस्पर्शविषयमपि। अत्रापि वर्त्तमानान्त्यजसंसर्गिस्पर्शे साक्षात्स्पर्शे दृष्ट्वाचमनमेवेति सर्वमुपपन्नम्"।

पराशरेणाऽत्र कश्चिद्विशेष उक्तो यथा

"उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तः कथञ्चन। अनिधायैव तद्द्रव्यमाचान्तः शुचितामियात्। मार्जनोपाञ्जनैर्वस्त्र प्रोक्षणेन च पुष्कलम्। सम्मार्जनेनाञ्जनेन सेकेनोल्लेखनेन च। दाहेन च भुवः शुद्धिर्वासेनाथ्य वा गवाम्"। अत्रापि लघुगुरुसंसर्गविषयभेदात् व्यवस्था। "नित्यं शुद्धः कारुहस्तः पण्यं यच्च प्रसारितम्। ब्राह्मणान्नरितं भोज्यमाकराः सर्व एव हि"।

सङ्करी स्त्री सङ्कीर्य्यते सम्+कृ-कर्मणि घ गौरा० ङीष्। नवदूषितकन्यायां मेदि०।

सङ्करीकरण न० सङ्करः क्रियतेऽनेन च्वि+कृ-करणे ल्युट्। पापभेदे तत्सदृशप्रायश्चित्तादिके प्रा०वि० दर्शितं यथा

"अथ सङ्करीकरणापात्रीकरणमलावहप्रायश्चित्तम्। तत्र मनुः "खरोष्ट्रारूढगेभानामजाविकवधस्तथा। सङ्करीकरणं ज्ञेयं मीनाहिमहिषस्य च। निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनम्। अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणम्। क्रमिकीटवयोहत्यामद्यानुगतभोजनम्। फलैधःकुसुमस्तेयमधैर्य्यञ्च मलावहम्"। मद्यानुगतभोजनं मद्यपानसमये यदुपस्थापितं फलमूलादि। अधैर्य्यं गौतमवचनादि "अल्पेऽप्यघे अत्यन्तवैरत्वमिति" कल्पतरुः। "सङ्करापात्रकृत्याच्च मासं शोधनमैन्दवम्। मलिनीकरणीये तु तप्तः स्यात् यावकव्यहम्"। तथा विष्णुः "ग्राम्यारण्यानां पशूनां हिंसा सङ्कीर्णकरम्। सङ्कीर्णकरणं कृत्वा मासमग्नौ यावकम्। कृच्छ्रातिकृच्छ्रमथ वा प्रायश्चित्तन्तु कारयेत्। निन्दितेभ्यो धनादानं वाणिज्यं कुसीदजीवनम्। असत्यं शूद्रसेवनमित्यपात्रीकरणं कृत्वा तप्तकृच्छ्रेण शुद्ध्यति। "गीतकृच्छ्रेण वा भूयोभाङ्गासान्तपनेन वा"। "पक्षिणां जलचराणाञ्च घातनं क्रमिकीटघातनं मद्यानुगतभोजनमिति मलावहानि" "मलिनीकरणीये तु तप्तकृच्छ्रं सु-

आचरेत् । कृच्छ्रातिकृच्छ्रमत्र वा प्रायश्चित्तं विशोधनम्" । अत्र सङ्करीकरणे सकृत्करणे मासप्रायश्चम अभ्यासे कृच्छ्रातिकृच्छ्रम् । अज्ञानाभ्यासे चान्द्रायणम् । अपात्रीकरणे च सकृत्करणे तप्तकृच्छ्रं चतुरहसाध्यम् । शीतकृच्छ्रो वा शीतकृच्छ्रे तप्तकृच्छ्रेतिकर्त्तव्यतैव किन्तु तदेव द्रव्यमत्र शीतकमिति विशेषः । अभ्यासे तु महापातकानुपपातकम् अज्ञानाभ्यासे चान्द्रायणम् । महापातके तु सकृटाचरणे तप्तकृच्छ्रम् अज्ञानाभ्यासे कृच्छ्रातिकृच्छ्रमिति यथायोग्यमूह्यम् । एषु च तत्तत् यत्र यत्र प्रायश्चित्तविशेषो नोक्तस्तत्रैव एष वोढव्यः ।

सङ्कर्षण पु० सं क्रष्यते गर्भात् गर्भान्तरं नीयतेऽसौ सम्+कृष-युच् । १बलदेवे अमरः । तत्कथा हरिवं० ५८अ० "सप्तमो देवकीगर्भः योऽयः सौम्यो मयाऽजः । स संक्रामयितव्यस्ते सप्तमे वसि रोहिणीम् । सङ्कर्षणात्तु गर्भस्य स तु सङ्कर्षणो युवा । भविष्यत्यग्रजो भ्राता मम शीतांशुदर्शनः" निद्राम्बिकां विष्णुमायां प्रति भगवदुक्तिः । भावे ल्युट् । २आकर्षणे ३स्थानान्तरनयने च न० ।

सङ्कलन न० सम्+कल-ल्युट् । १एकत्रीकरणे २योजने (ठिकदेना) लीला० ३संपहे च ।

योजनं च नानासङ्ख्यकैकाङ्कानामेकसङ्ख्यापादकाङ्ककरणं तच्च द्विविधं शुद्धसङ्कलनं भिन्नसङ्कलनञ्च तत्र शुद्धसङ्कलनं तु "कार्य्यः क्रमादुत्क्रमतोऽथ वाङ्कयोगो यथास्थानमथान्तरं वा" लीला० उक्त्या यथास्थानम् एकादिस्थाने एकाद्यङ्कयोग एव दशगतादिस्थाने दशगताद्यङ्कयोगः । भिन्नसङ्कलनञ्च छेदसहिताङ्कयोजनम् । तल्लांशसमवर्त्तनं तत्रोक्तं यथा "अन्योन्यहाराभिहतौ हरांशौ राश्योः समच्छेदविधानमेवम्" ।

न्यासः २ १ १ समच्छेदे जातम् ४५ ३ ५
१ ५ २ १५ १५ १५

"योगोऽन्तरं तुल्यहरांशकानां कल्प्यो हरो रूपमहारराशेः" इत्युक्तदिशा योजने जातम् ५२/१५ एवं प्रभागभागानुबन्धभागापवाहेषु समच्छेदकरणं तत्र द्रष्टव्यम् ।

सङ्कलित त्रि० सम्+कल-क्त । १योजिते २रेखादिना संहते अमरः । ३संश्लिष्टे च भावे क्त । ४संयोजने न० ।

सङ्कलितैक्य न० ६त० । "सैकपदघ्नपदार्द्धमेकाद्यङ्कयुतिः किल सङ्कलितैक्यम्" लीला० उक्ते एकाद्यङ्कानां योगे

सङ्कल्प पु० सम्+कृप-घञ् सुखे रस्य लः । १अभीष्टविषये (इदमित्थमेव कार्य्यम्) इत्येवंरूपे मनसोव्यापारभेदे च-मरः । २कर्मसाधनाय अभिलाषवाक्ये "सङ्कल्पेन विनाराजन् ! यत् किञ्चित् कुरुते नरः । फलन्नाप्नोत्यसंकल्पं तस्य धर्म्मार्द्धक्षयो भवेत्" ब्रह्मपु० । धर्म्मस्य अर्द्धक्षयोक्तेः फलस्याल्पत्वकल्पनयार्द्धक्षयत्वं युक्तं धर्म्माधीनत्वात् फलस्य । "आशास्य च शुभं कार्यं सङ्कल्प्य च मनोगतम्" अगस्त्यपूजने उक्तम् "मनोगतं शुभफलमाशास्य मनसा सङ्कल्प्य, उद्दिश्य वाचा अभिलप्य, कार्यं कर्मणा उपपादयामि" ति०त०रघु० । "मनसा सङ्कल्पयति वाचा अभिलपति कर्मणा चोपपादयति" हारीतः । तत्प्रकारो यथा "शुक्लिगङ्गाप्रसङ्गेन कांस्यरूप्यादिभिस्तथा । सङ्कल्पो नैव कर्त्तव्यो मृण्मयेन कदाचन । मट्टीवोदुम्बरं पात्रं वारिपूर्णं सुशोभितम् । दर्भवद्भिः शोभमानं फलपुष्पतिलान्वितम् । जलाशयारामकूपे सङ्कल्पे पूर्वदिङ्मुखः । साधारणे चोत्तरास्य ऐशान्यां निक्षिपेज्जलम्" भविष्यपु० । अत्र केवलफलनिषेधस्तु पात्रान्तरसद्भावविषयः एकफलपरो वा एका०त०रघु० । मानससङ्कल्पश्च द्विविधः भावाभावविषयभेदात् तत्राद्यः मयैतत्कर्त्तव्यमित्येवंरूपः द्वितीयः मयैतन्न कर्त्तव्यमित्येवं रूपः । तत्र पूजादिसङ्कल्पोभावविषय उपवासादिसङ्कल्पोऽभावविषय इति भेदः । श्यम् । "सङ्कल्पमूलः कामो वै यज्ञाः सङ्कल्पसम्भवाः । व्रतानियमधर्माश्च सर्वे सङ्कल्पजाः स्मृताः" एका०त० ।

सङ्कल्पजन्मन् पु० सङ्कल्पात् जन्म यस्य । १कामदेवे हेका० सङ्कल्पजादयोऽप्यत्र । सङ्कल्पजातमात्रे यज्ञादौ च त्रि०

सङ्कल्पयोनि पु० सङ्कल्पोयोनिरुत्पत्तिकारणं यस्य । कामदेवे "सङ्कल्पयोनेरभिमानभूतमिति" कुमारः ।

सङ्कसुक त्रि० सम्+कस-ऊकञ् । १अस्थिरे अमरः । २भ्रान्ते सि०कौ० २दुर्बले चरकादि० । ४सङ्कीर्णे ५अपवादशीले च संक्षिप्तसा० ।

सङ्कार पु० सम्+कृ-कर्मणि वा० घञ् । १सम्मार्জ্জनादिभिः प्रभूलेखादौ मञ्जरः । २नवदूषितकन्यायां स्त्री मेदि० गौरा० ङीष् । भावे घञ् । ३अग्निचटत्कारे मेदि०

सङ्काश त्रि० सम्यक् काशते काश-घञ् । १सदृशे "तरुणादित्यसङ्काशमिति" तन्त्रम् । अत्रार्थे निभादिशब्दस्य नित्यसमासता । २अन्तिके च विश्वः ।

सङ्किल पु० सम्+किल-क । वञ्जुलवृक्षायां त्रिका० ।

सङ्कीर्ण त्रि० सम्+कॄ-क्त । सङ्कलनसङ्कुर्णेच निरवकाशे १स्थाने भरतः । २मिश्रितनानाजातीये चरा० ३व्याप्ते ४मिश्रिते ५सङ्कटे अजयः । एतत्र कृमिश्रितयो : परः

स्वरविजातीयवोच । इतरवर्णेन इतरवर्णस्त्रियां जाते ७जातिभेदे पु० ८अवयवे अमरः । ९मिश्रितरागे सङ्गीत०

सङ्कीर्त्तन न० सम्+कीर्त्त-ल्युट् । १स्तुतौ २देवादेर्नामोच्चारणे ३गानेन देवगुणाद्युत्कीर्त्तने च "श्रीकृष्णरसङ्कीर्तं वीणाध्वनिसमन्वितम् । कुरु वत्सानुगात्रैव भक्षयन्तु शुनयः खराः । गोपीनां वस्त्रहरणं परं रासमहोत्सवम् । ताभिः सार्द्धं जलक्रीड़ां हरेरुत्कीर्त्तनं कुरु । कृष्णसङ्कीर्त्तनस्थाने ये च वर्त्तन्ति वैष्णवाः । तेषां पादरजःस्पर्शात् सद्यः पूता वसुन्धरा" नारदपञ्चरात्रम् ।

सङ्कुचित त्रि० सम्+कुच-क्त । १क्षतसङ्कोचे २संक्षिप्ते ३अप्रफुल्ले च हेमच० । ४लज्जिते राजनि० ।

सङ्कुल न० सम्+कुल-क । १परस्परवराहते "यावज्जीवमहं मौनी ब्रह्मचारी च मे पिता । माता तु मम वन्ध्यैव पुत्रहीनः पितामहः" इत्येवं वाक्ये अमरः । २परस्परहननरूपे युद्धे ३बन्धुजनादिभिः संबाधेन निरवकाशे स्थाने ४सङ्कीर्णे त्रि० अमरः ।

सङ्केत पु० सम्+कित-घञ् । मनोगतभावव्यञ्जनाय कृते कृत्रादिज्ञानरूपे १व्यापारे (इसारा) त्रिका० । "सङ्केतश्चाद्यादयमर्थबोध्यः, अयं शब्दः अमुमर्थं बोधयतु वा" इत्येवंशब्दनिष्ठे २अर्थबोधनानुकूलविशेषे सङ्केतश्च जात्यादिचतुष्के इति वैयाकरणाः ।

"शब्देरेव प्रतीयन्ते जातिद्रव्यगुणक्रियाः । चातुर्विध्यादमीषान्तु शब्द उक्तश्चतुर्विधः" काव्यादर्शः । "सङ्केतो गृह्यते जातौ गुणद्रव्यक्रियासु च" हरिः "जातिद्रव्यगुणसम्बन्धैर्भेदैः सङ्केतवत्तया । जातिशब्दादिभेदेन चातुर्विध्यं परे जगुः" वैयाकरणमतम् शब्दश० प्र० उक्तम् । "रूढ़ं सङ्केतवद्धाम सैव संज्ञेति कीर्त्यते" शब्दश० । भक्तिशब्दे १०७६ पृ० दृश्यम् । ३प्रियसङ्गमार्थं गुप्तस्थाने च ।

सङ्केतित त्रि० सङ्केतो जातोऽस्य तारं० इतच् । सङ्केतयुते वाच्ये अर्थे "साक्षात् सङ्केतितं योऽर्थमभिधत्ते स वाचकः" काव्यप्र० ।

सङ्कोच पु० सम्+कुच-घञ् । बहुविषयकवाक्यस्यात्यविषयकतया १व्यवस्थापने सामान्यशास्त्रस्य २विशेषपरतायाम् श्राद्धवि० ३जड़ीभावे ४बोधे ५बन्धे च मेदि० । सम्+कुच-अच् । ६मत्स्यभेदे पुंस्त्री० मेदि० स्त्रियां ङीष् । ७कङ्कुभे न० अमरः । [तायां रत्नमा० ।

सङ्कोचनी स्त्री सम्+कुच-ल्यु-गौरा० ङीष् । बध्नातुल-

सङ्क्रन्दन पु० सङ्क्रन्दयत्यसुरान् सम्+क्रन्द-णिच्-ल्यु । १इन्द्रे अमरः । भावे ल्युट् । २सम्यक्क्रन्दने न० ।

सङ्क्रमाम पु० सङ्क्रामत्यनेन सम्+क्रम-घञ् वा दीर्घः । १जलबन्धनस्थाने (साँको) अमरः "आत्मानं सङ्क्रमं जलेति" श्रुतिः । भावे घञ् । २रथ्यादेः राजमार्गसञ्चारे धरणिः । "क्रुटेः सङ्क्रमभागो यः सङ्काशो रविसंक्रमः" ति०त० । ३ एकस्थितवस्तुनः तत् स्थानत्यागेनान्यत्रगमने च । [राजमार्गगमने च ।

सङ्क्रमण न० सम्+क्रम-ल्युट् । १सङ्क्रान्तौ २रथ्यादीनां

सङ्क्रान्त त्रि० सङ्क्रान्तिरस्यास्ति अच्, सम्+क्रम-क्त वा । १सङ्क्रान्तियुक्ते २सङ्क्रमणकर्त्तरि ३प्राप्ते दायरूपेण भर्त्रादितः आगते स्त्रिया ४प्राप्तधने च । दायभा० मते स्त्रीणां संक्रान्तधने उपभोगमात्रं तत्करणे स्वपत्यादिदायादानां तद्धनम् "भुञ्जीतामरणात् क्षान्ता दायादा ऊर्द्धमाप्नुयुः" कात्या० वचनात् । मिता० मते स्वदायादानामिति विवेकः ।

संक्रान्ति स्त्री सम्+क्रम-भावे क्तिन् । संक्रमणशब्दार्थे संक्रान्तिपदार्थरविसंक्रान्तिनामभेदफलभेदादि शु० चि० वी०धा० निरूपितं यथा

"घोरा१ऽर्कसंक्रमणसप्तरवो हि मूढान्, ध्वाङ्क्षी२ विशो, वृषविधौ च चरत्यभीमे । चौरान्, मयोदरयुता३ रूपतीन्, क्रमेऽब्धे मन्दाकिनी४ स्थिरगुरौ सुखवेत्र, मन्दा५ । विप्रांश्च, मिश्रभटगो तु पशूंश्च मिश्रा६ तीक्ष्णार्कजेऽन्त्यजसखा खलु राक्षसी७ च । मेषे दिनस्य रूपतीन् प्रथमे निहन्ति मध्ये द्विजानपि विशोऽपरकेऽपि च मूढान् । अन्ते निशाम्बरकेषु पिशाचकादीन्नक्तचरानपि नटान् पशुपालकांश्च । वृश्चोदये सकलडिम्बिजनस्य सौम्यायाम्यायनं मकरकर्कटयोर्निहन्ति । मकरीस्थानसञ्चारपञ्चकुल्याम्बरे भवेत् । तुलाजौ विषुवं, विष्णुपदं सिंहाजिगो घटे । संक्रान्तिकालादुभयत्र नाड़िकाः पुण्या मताः षोड़शषोड़शयोष्यगोः । निशीथतोऽर्कोमपरत्र संक्रमे पूर्वापराह्णान्तिमपूर्वभागकौ । पुण्यं निशीथे यदि संक्रमः स्याद्दिनद्वयं पुण्यमथोदयात्तात् । पूर्वं परस्माद् यदि वास्यसौम्यायने दिने पूर्वपरे तु पुण्ये । सन्ध्या दिनाड़ीप्रमितार्कबिम्बादर्धोदितात्तादधऊर्ध्वगत्र । चेदुत्तरास्यसौम्ये अयने क्रमात्तत्र पुण्यौ तदानीं परपूर्वपक्षौ । याम्यायने विष्णुपदे चाद्या मध्यात्तुषाजयोः । षड़शीतानने सौम्ये परा नाड्योऽतिपुण्यदाः" सु० चि० ।

"तत्र यद्दाणां प्रायशितोऽपरराशौ संक्रमणं संक्रान्तिरिति संक्रान्तिलक्षणं सा च द्विविधा मध्यमा स्पष्टा च। षट्कर्मसंस्कृतो मध्यमग्रहोराश्यन्तरं यदा संक्रामति सा मध्यमसंक्रान्तिरुच्यते। यदा तु स्पष्टीकृतसंस्कारविशिष्टो ग्रहो राश्यन्तरं गच्छेत् सा स्पष्टसंक्रान्तिरुच्यते। तत्र मध्यमानस्य स्पष्टीकरणार्थत्वादेव तत्संस्कारानुपयोगादत्र तत्त्यागेन स्पष्टसंक्रान्तिरेव गृह्यते। सापि द्विविधा सायनांशा निरयनांशा चेति। तत्र यदा सिद्धान्तागतायनांशसंस्कृता ग्रहाराश्यन्तरगमनमुररीकुर्वते सा सायनांशसंक्रान्तिरुच्यते। यदा त्वयनांशसंस्काररहिताग्रहाराश्यन्तरगास्तदा निरयनांशा संक्रान्तिरुच्यते। तत्रान्यासां चन्द्रादिसंक्रान्तीनान्तु "देवह्यङ्गुलवोऽष्टौ नाड्योऽङ्काः खदृशः क्रमात्"। वज्र्याः संक्रमणेऽर्कादेः प्रायोऽर्कस्यातिनिन्दिता" इति वज्र्यघटीत्वमेव विवाहप्रकरणे वक्ष्यति न तु फलकथने आसां संक्रान्तीनां क्वचिदुपयोगः। सूर्यसंक्रान्तीनान्तु नक्षत्रवारसमयभेदेन वज्रादिकरणभेदेन च शुभाशुभफलकथनयोग्यता पुण्यकालता संक्रान्तिविशेषे वज्र्यघटीत्वं नाधिकमासाङ्गीकारोत्तरो बहुवक्तव्यत्वात् स्वतन्त्रमेव सूर्यसंक्रान्तिप्रकरणमारिप्स्यते नक्षत्रवारभेदेन फलं तावत् साङ्गवसन्ततिलकयाऽऽह। घोरेति चर्कस्य सूर्यस्य संक्रमणं निरयनांशा संक्रान्तिरूपरवाद्युपसंग्रहनक्षत्रे रविवारेऽर्कवारे वा स्यात् तदा घोराभ्यो वा शूद्रान् सुखयेत् सुखिन करोत्यादेत्। अत्रार्कसंक्रमणमिति पदोपादानसामर्थ्यात् सूर्यसंक्रान्तिष्वेवायं विचारो नाधिकपरसंक्रान्तिष्विति फलितोऽर्थः।

अथ ध्रुवनक्षत्रे विधौ चन्द्रवारे वा सूर्यसंक्रान्तिर्ध्वाङ्क्षीनाम्नी विप्रो वैश्यान् सुखयेत्। चरर्क्षे चरनक्षत्रे भौमे मङ्गलवारे वा संक्रान्तिर्महोदरयुता महोदरीनाम्नी चोरान् सुखयेत्। क्रमैक्षे बुधे मैत्रसंज्ञनक्षत्रे वा संक्रान्तिर्मन्दाकिनीनाम्नी नृपतीन् राज्ञः सुखयेत्। स्थिरनक्षत्रे गुरुवारे वा संक्रान्तिर्मन्दानाम्नी विप्रान् सुखयेत्। मिश्रनक्षत्रे भृगुवारे वा संक्रान्तिर्मिश्रनाम्नी म्लेच्छान् सुखयेत्। तीक्ष्णनक्षत्रे अर्कजे शनिवारे वा संक्रान्तिः खलु निश्चयेन राक्षसीनाम्नी अन्त्यजांश्चाण्डालान् सुखयतीत्यन्त्यजसुखा स्यादित्यर्थः। यदाह क्रमप्रदः "घोराध्वाङ्क्षीमहोदर्यौ मन्दा मन्दाकिनी तथा। मिश्रा राक्षसिका सूर्यसंक्रान्तिर्वर्कवासरात्"। वसिष्ठः "घोरोध्वाङ्क्षी ध्रुवे चरे महोदरी मृदुमे। मन्दाकिनी चरे मन्दा मिश्रा मिश्रे च राक्षसी तीक्ष्णे"। अत्र ऋक्षोभङ्गस्त्याज्यः। देवीपुराणे "मन्दा ध्रुवेषु विज्ञेया मृदौ मन्दाकिनी तथा। क्षिप्रे ध्वाङ्क्षी विजानीया दुग्रे घोरा प्रकीर्तिता। चरे महोदरी ज्ञेया क्रूरेष्वेषु तु राक्षसी। मिश्रिता चैव विज्ञेया मिश्रर्क्षेषु संक्रमे" इति। रत्नमालायाम् "उग्रक्षिप्रचरे मिश्रध्रुवमिश्राक्षदारुणैः। ऋक्षैः संक्रान्तिरर्कस्य घोराद्या क्रमशो भवेत्"। नारदकश्यपौ "शूद्रतस्करवैश्येभ्यो म्लेच्छादेवमूपगवां क्रमात्। अन्त्यजानान्तु सर्वेषां घोराद्याः सुखदाः स्मृताः"। म्लेच्छादेवाः ब्राह्मणाः अन्त्यजानां चाण्डालादीनाम्। ननूक्तं वक्ष्यमाणं वा शुभाशुभफलं सायनांशसंक्रान्तितः कुतो न विचार्यते इति चेत् उच्यते सायनांशसंक्रान्तेः स्नानदानजपादावेव कार्यं न सर्वत्र यदाह पुलस्त्यः "स्नानदानजपाद्यव्रतहोमादिकर्मसु। सुकृतं चलसंक्रान्तावक्षयं पुरुषोऽश्नुते" इति। चलसंक्रान्तिः सायनांशसंक्रान्तिः। अतश्चलसंक्रान्तेः परिगणितस्नानादिकविषयत्वादेव कृत्यान्तरेषु विवाहादिशुभकर्मसु संक्रान्तिमासाङ्गीकारे शुभाशुभफलकथनञ्च नास्ति उपयोग इति युक्तमुत्पश्यामः। इदं चात्र सम्यक्तया निर्णीयते"। "अथ दिनरात्रिविभागेन संक्रान्त्यशुभफलमुत्तरायणदक्षिणायनसंज्ञाञ्च साङ्गवसन्ततिलकयाऽऽह। त्र्यंशे इति यत्रार्कसंक्रमणमित्यनुवर्त्तते दिनप्रमाणं त्रिभिर्भक्तं यद्यल्लब्धतृतीयांशो भवति तत्र दिनस्य प्रथमत्र्यंशेऽर्कसंक्रमणं नृपतीन् हन्ति मध्ये द्वितीयत्र्यंशे द्विजान् ब्राह्मणान् हन्ति अपरके तृतीयत्र्यंशे वैश्यान् हन्त्येवं सर्वत्र व्याख्येयम्। अस्तं सूर्यास्तसमयेऽर्कसंक्रमणं शूद्रान्। अथ रात्रिसंक्रान्तिफलं तत्र रात्रिप्रथमप्रहरे पिशाचकादीन् आदिशब्देन भूतादीन्। द्वितीयप्रहरे म्लेच्छखरान् राक्षसान्, तृतीयप्रहरे नटान् नर्त्तकान्, चतुर्थप्रहरे पशुपालकान् आभीरान्। सूर्योदयसमयकालेऽर्कसंक्रमणं सकलद्विजजनं पाखण्डादिकं हन्तीत्यर्थः "पाखण्डाः सर्वलिङ्गिन" इत्यभिधानात्। यदाह नारदकश्यपौ "पूर्वाह्णे नृपतीन् हन्ति विप्रान् मध्यदिने विशः। अपराह्णे क्षत्रे शूद्रान् प्रदोषे च पिशाचकान्। निशि रात्रिस्वरान्धकारानपरात्रके। गोचारिणश्च सन्ध्यायां लिङ्गिनं रविसंक्रमः" इति। संक्रान्तेः क्रूरसौम्यवारपरत्वेन फलविशेषमाह वसिष्ठः "रौद्रविज्ञ-

सौम्यवारे संक्रान्तौ दिनकरस्य तन्नामे। पित्तकफानिलजामयमरपतिकलहस्वष्टदृष्टिश्च। बुधगुरुसितचन्द्राहे इति संक्रान्तावनामयं नृणाम्। क्षितिपतिनिकरजेभं सस्य विद्वद्विविधभिषां पीडा"। अत्र मेषसंक्रान्तौ विशेषमाह कश्यपः "यदा मेषगतः सूर्यो भरण्यादिचतुष्टये। सप्तदृग्भंवेत्तत्र दृष्टिरार्द्राचतुष्टये। मघादिदशके क्षानिः क्षेमं चात्युत्तमेषु च"। अस्यार्थः। यस्मिन् दिने मेषसंक्रमस्तद्दिने चन्द्रो यदि भरण्यादिनक्षत्रचतुष्टये स्यात् तदा सप्तदृष्टिः एवमग्रेऽपि व्याख्येयम्। अथ जन्मनक्षत्रे संक्रान्तिफलं दीपिकायां "यस्य जन्मर्क्षमासाद्य रविसंक्रमणं भवेत्। तन्नक्षत्रान्तरे तस्य रोगः क्लेशो धनक्षयः" इति। तत्र शान्तिकमपि दीपिकायामुक्तम् "तमरसरोरुहपत्रैरजनीसिद्धार्थलोध्रसंयुक्तैः। स्नानं जन्मन्यृक्षे रविसंक्रान्तौ नृणां शुभदमिति"। अथ संक्रान्तिषु वृद्धौ जातायां फलमुक्तम् वसिष्ठेन "अजकन्याझषकर्किषु संक्रान्तौ यदि भवेदर्धम्। अतुलं क्षेममुद्दिष्टं नृपसज्जनगोकुलक्षेमम्। घटचापसिंहमिथुनसंक्रान्तौ यदि भवेदर्धम्। व्यायवडामरभूभृद्युद्धमनर्थं त्वदृष्टिश्च। वृषवृश्चिकतुलमकरे वृद्धिः स्यात् संक्रमे समये। विस्फोटामयतस्करपीडावृद्धिः क्रमात्तुभयमिति"। अथ सौम्येति मकरकर्कटयोः संक्रान्तिचेत् तदा क्रमेण सौम्ययाम्यायनं निरुक्तं कथितं मकरे उत्तरायणं कर्कटे याम्यायनं स्यादित्यर्थः। यदाह नारदः "सौम्ययाम्यायने नूनं भवतो मृगकर्किणि" इति। अथावशिष्टताद्यसंक्रान्तीनां षडशीतिमुखादिकाः संज्ञा चतुर्भाह षडशीतीति वृषमिथुनकन्याझषीनेषु संक्रान्तिचेत् तदा षडशीतिमुखानाम्नी संक्रान्तिः, तुलामेषयोः संक्रान्तिर्विष्णुपदानाम्नी। सिंहवृश्चिककुम्भेषु संक्रान्तिर्विष्णुपदाख्या। उक्तञ्च नारदेन "स्थिरमेषार्कसंक्रान्तिर्या विष्णुपदाह्वया। षडशीतिमुखं प्रोक्तं द्विस्वभावेषु राशिषु। तुलाधराजयोर्ज्ञेयं विषुवं सूर्यसंक्रमः"। संज्ञाप्रयोजनञ्च "याम्यायने विष्णुपदे चाद्या मध्यास्तुलाजयोः। षडशीत्यानने सौम्ये परा नाड्योऽतिपुण्यदाः"। इति यमवक्त्रे वक्ष्यति। अत्र मनुः "संक्रान्तौ यानि दत्तानि हव्यकव्यानि दातृभिः। तानि नित्यं ददात्यर्कः पुनर्जन्मनि जन्मनि। रविसंक्रमणे पुण्ये न स्नायाद् यदि मानवः। सप्तजन्मसु रोगी स्यात् दुःखभागी हि जायते" इति यातातपोक्तेः स्नानदानश्राद्धादिलक्षस्य संक्रान्तिकालेऽवश्यकर्त्तव्यता प्रतीयते तत्र चाद्यादेरनेकक्षणसाध्यत्वादनुष्ठानलक्षणप्राप्तिमाशङ्क्याह देवीपुराणे "तुल्ये नरे तुलाशीने यावत् स्यन्दति लोचनम्। तच्च त्रिंशत्तमोभागस्तत्परः परिकीर्तितः। तस्माच्छततमोभागस्तु टित्यभिधीयते। लघुटेः सप्तमभागो यः स कालो रविसंक्रमः" इति। देवलोऽपि "संक्रान्तिसमयः सूक्ष्मो दुर्ज्ञेयः पिशितेक्षणैः" इति पिशितेक्षणैः मनुष्यैः। अतोऽस्यकालानुपलब्धौ गौणकालेऽपि कार्यं वचनप्रामाण्यात्। स च गौणकालः प्रतिनिधिरित्यतो गौणकालमुपजातिकाच्छन्दः पूर्वार्द्धेनाह संक्रान्तीति। गणितमार्गेण यः क्षणगोः सूर्यस्य संक्रान्तिकाल आगतस्तत उभयत्र पूर्वतः परतश्च षोडश नाड्यः पुण्यप्रसम्पादकत्वात् पुण्या मताः सम्मता सूर्यसंक्रान्तिसमयात् पूर्वं षोडश पश्चाच्च षोडशघटिकाः पुण्यकाल इति द्वात्रिंशद्घटिका भवन्तीत्यर्थः। तदाह वसिष्ठः "दिनपतिसंक्रमणात् प्राक् षोडश नाड्यश्च पुण्यकालाः स्मृताः। परतः षोडश नाड्यः सर्वत्र स्नानदानकार्येषु। ब्रह्मसिद्धान्तेऽपि "संक्रान्तेः प्राक्परस्ताच्च स्युर्नाड्यः षोडश नाडिकाः। त्रयस्त्रिंशत् संक्रमस्य पुण्याः सर्वस्य नाडिकाः"। अनेन "संक्रान्तेः पुण्यकालस्तु षोडशोभयतः स्मृतः" इति स्मृतिवाक्ये "यैः पूर्वतः परतश्चाष्टौ घटिकाः पुण्यकाल इत्येवं षोडशेति व्याख्यातं तदपाकृतं भवति। किञ्चायमर्थोवासनासिद्धः सूर्यसिद्धान्तेऽभिहितः "अर्कभानवस्ताः षष्ठ्या गुणिता भुक्तिभाजिताः। तदर्द्धनाड्यः संक्रान्तेरर्वाक् पुण्यं तथा परे"। सिद्धान्तशिरोमण्यावपि "अहिन्नबिम्बं षड्भुक्तिभक्तं संक्रान्तिनाड्योऽखिलधर्मकृत्ये। रवेस्तु ताः पुण्यतमा यदः स्युः संक्रान्तिगोभिश्च फलं विधत्ते"। इति वासना चेयं यदि षड्भुक्तिलब्धकलाभिरहोरात्रमानरूपाः षष्टिघटिकास्तदा षड्बिम्बकलाभिः किमिति त्रैराशिकेन षष्टे बिम्बकलानां षष्टिर्लभ्यते षड्भुक्तिभोजको निष्पन्न इत्यर्थः। एवं सर्वत्रापीयमेव संक्रान्तिः स्यात् तदुक्तं सिद्धान्त एव। अत्र तु विस्तरभयादनुपयुक्तत्वाच्च नाक्षाभिरलेखि। अतएव त्रिंशद् एकत्रिंशत्सार्द्धद्वात्रिंशत्तत्रयस्त्रिंशदादिभेदेन स्मृतिषु पुण्यघटिकाभिधानं स्मृत्वा भेदसंभवाच्चित्रं तदेव सामान्यतः संक्रान्तिषु द्वात्रिंशत् घटिकारूपः पुण्यकालो निर्णीतः। देवीपुराणे तु मन्दादिसंज्ञाभेदात् पुण्यकाल-

विशेष एवोक्तः" द्विचतुःषड्यमप्राष्टनवहादश एव च। क्रमेण घटिकाश्चेतास्तत् पुण्यं पारमार्थिकम्" इति। अस्यार्थः मन्दायामन्तरालवर्त्तिघटिकाद्वयं मन्दाकिन्याश्चतस्रो घटिकाः ध्वाङ्क्षां पञ्च, धोरायां षड्, महोदयामष्टौ, राक्षस्यां नव, मिश्रायां दश" प्रागभिहितदेवीपुराणोक्तमन्दादिसंज्ञावाक्याच्चलनितसंज्ञासु मन्दादिष्वयं विचारो न वारप्रयुक्तास्ववचनात् एवं संक्रान्तिषु पुण्यकालमभिधाय इदानीं रात्रिसंक्रान्तौ विशेषसपलाल्लुकरार्द्धेनाह निशीथत इति। निशीथोऽर्द्धरात्रं तस्मादवाक् पूर्वत्र अपरत्र पश्चाद् संक्रमे संक्रान्तिकाले सति पूर्वापरयोरङ्गोः क्रमेणान्तिमपूर्वभागौ पुण्यौ स्यातां भागकाविति स्यार्थः कः। यद्यर्द्धरात्रात् प्राक्संक्रान्तिस्तदा पूर्वदिनस्योत्तरार्द्धं पुण्यं यद्यर्द्धरात्रादुपरि संक्रान्तिस्तदोत्तरदिनस्य पूर्वार्द्धमेव पुण्यमित्यर्थः। उक्तञ्च ब्रह्मसिद्धान्ते "भवनान्तं बिम्बमध्यं रात्रयर्द्धात् प्रागुदेति चेत्। स्नानदानादि मध्याह्नात् कुर्यादूर्ध्वं गते दिने। रात्रयर्द्धादुपरि चेत्तं याति चेदन्यदार्यमा। अह्नः प्रागिनि मध्याह्नात् पूर्वं स्नानादि पुण्यदम्" भवनं राशिः बिम्बमर्कः, चेत्तं राशिः। दृङ्नवसिष्ठोऽपि यस्मिन् संक्रमणे पुण्यमहः कृत्स्नं प्रकीर्तितम्। रात्रौ संक्रमणे भानोर्दिनार्द्धे स्नानदानयोः। अर्द्धरात्रादधस्तस्मिन् मध्याह्नोपरिक्रिया। ऊर्ध्वं संक्रमणे चोर्ध्वं हृदयात् प्रहरद्वयम्" इति। नतु रात्रौ मेषदिनसंक्रान्तौ वा रात्रावपि पुण्यकालसत्त्वात् तदा स्नानादि कृतो न क्रियते यदर्थमयमुद्यम आरभ्य उच्यते "रात्रौ स्नानं न कुर्वीत दानं चैव विशेषतः" इति सुमन्तुवाक्यादात्रौ स्नानाद्यधिकारासत्त्वात्। यत् तु नैमित्तिकं ग्रहणादिप्रयुक्तं तद्बलवत्त्वेव "नैमित्तिकञ्च कुर्वीत स्नानं दानञ्च रात्रिषु" इति सुमन्तुवाक्यशेषात् "अर्द्धरात्रसमये संक्रमणे मकरकर्कयोश्च विशेषसपलातिकयाह। पूर्वे इति। "अर्द्धरात्रनिशीथौ द्वौ द्वौ यामप्रहरौ समौ" इत्यभिधानादर्द्धरात्रो निशीथशब्दवाच्यः तस्मिन्निशीथे पूर्वे रात्रिस्थितीयप्रहरान्तिमकलावच्छिन्ने यदि संक्रमः स्यात् तदा प्रागपरं दिनद्वये पुण्यमुक्तम्। उक्तञ्च दृङ्नवसिष्ठेन "पूर्वे चेदर्द्धरात्रे तु यदा संक्रमते रविः। प्राह्णः दिनद्वयं पुण्यं सङ्क्रा मकरकर्कटाविति"। ब्रह्मसिद्धान्तेऽपि "यद्यर्द्धरात्र एव स्यात् संपूर्णे संक्रमो रवेः। तदा दिनद्वयं पुण्यं स्नानदानादिकर्मसु"। अत्र सङ्क्रा मकरकर्कटाविति तत्र मकरकर्कटयोस्तु कथमित्यत आहार्केति यथानन्तरसूदयात् सूर्योदयात् सूर्यांशाच्च पूर्वं परस्माच्च यदि वाक्यसौम्ययने कर्कटमकरसंक्रान्तौ भवेत्तदा पूर्वपरदिने पुण्ये स्यातां यदि सूर्योदयात् पूर्वं कर्कटसंक्रमणं स्यात् तदा पूर्वदिन एव पुण्यकालो न परदिने। तदाह हृद्गार्ग्यः "यदास्तमयवेलायां मकरे याति भास्करः प्रदोषे चार्द्धरात्रे वा स्नानं दानं परेऽहनि। अर्द्धरात्रे तदूर्ध्वं वा संक्रान्तौ दक्षिणायने। पूर्वमेव दिनं याह्यं यावच्चोदयते रविः" इति। अस्तमयवेलायां इति पञ्चम्यन्तं पदं वाशब्दश्चार्थे। भविष्योत्तरपुराणेऽपि "कार्श्यन्तु परित्यज्य स्नानं संक्रमते रविः। प्रदोषे चार्द्धरात्रे वा कुर्यादहनि पूर्वतः" इति। प्रदोषलक्षणं स्कन्दपुराणे "त्रिमुहूर्तः प्रदोषः स्याद्यावत्तं गते सति" इति। अथार्द्धोदयात्तादिति वचनस्याप्यवादमिन्द्रवज्राछन्दसाह अर्द्धेति अर्द्धोदितादर्कबिम्बात्तस्यांशाच्च प्राक् अर्द्धं च क्रमात्त्रिंघटिकाभिः प्रमिता सन्ध्यासन्ध्याकालः स्यात् अर्द्धोदितार्कबिम्बात्पूर्वं त्रिघटीप्रमिता प्रातःसन्ध्या तथार्द्धांशादर्कबिम्बादुपरि त्रिनाड़ीप्रमिता सायंसन्ध्येत्यर्थः। तदाह वराहः "अर्द्धांशमितादुदितात् सूर्यादस्तं नभो यावत्। तावत् सन्ध्याकालस्त्रिभैस्तैः फलं ब्रूयादिति"। तत्प्रमाणमाह नारदः "अर्द्धांशमनसन्ध्या हि घटिका त्रयसम्मिता। तथैवार्द्धोदयात् प्रातर्घटिकात्रयसम्मिता" इति। स्कन्दपुराणेऽपि "उदयात् प्राक्तनी सन्ध्या घटिकात्रयमुच्यते। सायंसन्ध्या त्रिघटिका ह्यस्तादुपरि भास्वतः" इति। अत्र सन्ध्याकालेऽर्द्धांशमितादुदितवाक्यस्य स्कन्दपुराणीयवाक्यस्य च प्रौढ्यिवबोधकत्वम्। अथ सन्ध्याकालप्रयोजनमाहाकालेति। अथ सन्ध्यायां प्रातःसन्ध्यायां सायंसन्ध्यायां च क्रमाच्चेद् याम्यसौम्ये अयने दक्षिणोत्तरायणे तदानीं परपूर्वौ यदि दिवसौ पुण्यौ याम्यसौम्ये अयने स्यातां यदि प्रातःसन्ध्यायां दक्षिणायनप्रवृत्तिस्तदा सूर्योदयादनन्तरं सम्पूर्णमहः पुण्यं तथा यदि सायंसन्ध्यायामुत्तरायणप्रवृत्तिस्तदा सूर्यांशात्पूर्वं सम्पूर्णमहः पुण्यं स्यादित्यर्थः। यदाह नारदः "सूर्योदयसन्ध्यायां यदि याम्यायनं भवेत्। तदोदयादहः पुण्यं पूर्वाह्णः पूर्वतो यदि। सूर्यास्तमनसन्ध्यायां यदि सौम्यायनं भवेत्। तदाहः पुण्यकालः स्यात् परतश्चोत्तरेऽहनि" इति। अत्र यद्युदयसन्ध्यातः प्राक्कर्कसंक्रमः

सदा प्रागहनि एव पुण्यकालो नोत्तरदिने। तथा यदा-सन्नत्रामतिक्रम्य मकरसंक्रान्तिस्तदोत्तरदिन एव पुण्यकालोनोत्तरदिने इति निष्कृष्टोऽर्थः। अतो हडगान्यो-दिवाक्यनारदवाक्ययोः प्रदोषसन्नत्रापदोपादानेन सामान्य-विशेषभावोऽवगन्तव्यः। यत्तु हेमाद्रौ स्कान्दपुराणीयं वा-क्यम् "धनुर्भीनावतिक्रम्य कन्यां च मिथुनं ततः। पूर्वापर-विभागेन रात्रौ संक्रमते यदा। दिनान्ते पञ्च नाड्यस्तु तदा पुण्यतमाः स्मृताः। उदये च तथा पञ्च दैवे पित्र्ये च कर्मणि" इति। तदपि सन्नत्राविषयकमेवेत्याशयेनाह-युक्ताः। विष्णवे तु यथाश्रुतमेव, अन्यदपि सन्नत्रा-लक्षणप्रयोजनं प्राक्सन्नत्रागर्जित इत्यादिषु वक्ष्यति। ननु नायनयनपुण्यकालोक्त्युद्यमः सकलः शास्त्रान्तर-विरुद्धत्वात्तथा हि "यद्धि संक्रमणे पुण्यमुक्तः कृत्स्नं प्रकीर्तितम्। रात्रौ संक्रमणे भानोर्दिनार्द्धं स्नानदा-नयोः। अर्द्धरात्रादधस्ताच्च मध्याह्नोपरिक्रिया। अर्द्धं संक्रमणे चोर्द्धमुदयात् प्रहरद्वयम्। पूर्वे चेद-र्द्धरात्रे च यदा संक्रमते रविः। प्राक्तर्दिनद्वयं पुण्यं सङ्क्रा मकरकर्कटौ" इति हडवसिष्ठेनावनव्यतिरिक्तेषु दशसु संक्रमेषु रात्रिगतेषु "यायाः सन्धिक्षिता नाड्य-स्ताः पुण्यतमाः स्मृताः" इति कश्यपोक्तसामान्यवा-क्याद्रात्रावेवाह्नानं प्रसक्तमहः संक्रम इत्यादिनाथेत-देवाह्नानं विहितं तथापि पर्युदासः क्रियते सङ्क्रा म-करकर्कटाविति तयोर्मकरकर्कटयोः संक्रमणे रात्रा-वेवाह्नानं कर्त्तव्यमित्युक्तं भवति अतएवाह याज्ञव-ल्क्यः "रात्रेर्दर्शनसंक्रान्तिविवाहोत्सवहट्टेषु। स्नान-दानादिकं कार्यं निशि काम्यव्रतेषु च" इति वसिष्ठोऽपि "सुतजनने संक्रान्त्युत्सवे चन्द्रसूर्ययोर्ग्रहणे च। रात्रा-वपि कर्त्तव्यं स्नानं दानं विशेषतो नृणामिति" समन्तु "षड्गोदाश्वसंक्रान्तियात्रार्त्तिप्रसवेषु च। अयने चेतिकाश्च रात्रौ दानं प्रशस्यते" इति। एषु वाक्येषु सामान्यवाचिनोऽपि संक्रान्तिपदस्य मकरकर्कटसंक्रान्ति-परत्वमवसीयते यत्तु "रात्रौ स्नानं न कुर्वीत दानं चैव विशेषतः" इति निषेधः स संक्रान्त्यन्तरे व्यवतिष्ठते अत-एवोक्तं कश्यपेन "स्नानं दानं षडशीतिवत् सौम्ययाम्या-यनद्वये" इति। तस्मादयनसंक्रमे रात्रौ सत्यां तत्रैव स्नानदानाद्युत्सवातव्यमिति। अत्राह भास्करेण तत्स-मत्वादिकल्पिकौ तत्तद्देशप्रसिद्धसदाचारेण व्यवस्था द्रष्टव्या। तत्र गौर्जरास्तु कश्यपादिवाक्यमभ्युपेत्य रात्रा-वयनसम्भवे सति रात्रौ एव स्नानदानादिकं कुर्वन्ति। दाक्षिणात्यास्तु हडगान्यौदिवाक्यमङ्गीकृत्य दिवस एव स्नानदानादि कुर्वन्तीत्यलमतिप्रसङ्गेन। यदा तु दिने क-र्कमकरसंक्रमस्तदा क्रमेण पूर्वोत्तरघटिकानियममाह हड वसिष्ठः "अतीतानागते पुण्ये हे तूदग्दक्षिणायने। त्रिंशत् कर्कटके नाड्यो मकरे विंशतिः स्मृता" इति। उत्त-रायणमतीतं सत् पुण्यं कर्कटायनमागामि पुण्यं तत्र कर्कटसंक्रान्तेः प्राक्त्रिंशत् घटिकाः पुण्याः मकरे तूत्तरविंशतिर्घटिकाः पुण्या इत्यर्थः। अत्र वाक्ये यद्यपि दिनपदानुपादानं तथापि यदास्तमयवेलायामिति रात्रि-परविशेषवाक्यालोचनादिदं दिनपरं प्रतिभाति तथा सति केनापि हेतुना सभीपघटीषु आद्यादानुष्ठानासम्भवे परमावधित्वेन त्रिंशदादयो घटिका अत्रानुष्ठायन्ते यदा तु प्रतिबन्धसदा "यायाः सन्धिक्षिता नाड्यस्ताः पुण्यत-माः स्मृता" इति कश्यपोपोक्तेः समीपघटिकास्वेव आद्यादि विधेयं 'सन्धिक्षितपरित्यागे कारणाभावादिति' न्यायविदः। "अथ पूर्वापराः षोडश घटिकाः पुण्या इति पूर्वं सामान्येनोक्तमिदानीं विष्णुपदादिषु संक्र-मेषु विशेषमनुदर्शयन्नाह याज्ञवल्क्य इति। याज्यायने कर्कसं-क्रान्तौ तथा विष्णुपदे हर्षसंज्ञहडविकक्रमसंक्रान्तिकाले चाद्याः नाड्यः प्रथमाः षोडशघटिकाः अतिपुण्यदाः स्नानदानादावनन्तफलदात्र्यः अधिमासे न तत्रेति निष्कृष्टोऽर्थः। तुलाजयोस्तुलामेषयोः मध्या उभयतः षोडश षोडश घटिकाः पुण्याः अथ वा षोडशैव घटिकाः पुण्याः। षडशीत्यानने मिथुनकन्याधनुर्मीनसंक्रान्तिषु तथा सौम्ये मकरसंक्रान्तौ संक्रान्तिकालात्परा अधिमासे षोडश घटिकाः अतिपुण्यदाः प्रथमासु न तत्रेति निष्क-ष्टोऽर्थः। यदाह श्रीपतिः "याम्यायने विष्णुपदे तथादौ दानाद्यनन्तं विषुवे च मध्ये। वदन्त्यतीते षडशीतिवक्त्रे महर्षयः खल्वयने च सौम्ये"। तत्र कर्के प्रागेव मकर-संक्रान्तौ पश्चादेव पुण्यकाल इति तु प्राङ्निरस्तायि। विष्णुपदे तु अधिमासादिघटीनां पुण्यकाले तरतमभावः "पुण्याद्यां विष्णुपद्यां च प्राक्पश्चादपि षोडशेति" हड-वसिष्ठोक्तेः। विषुवे तु सामान्यनिर्णय एवेति केचित् दीपिकाटीकाकारस्त्वेवमाह "मेषे तुलायां संक्रान्ति मध्य एव संक्रान्तिकालात्पूर्वपश्चाद्यौ घटिकाः परतश्चाष्टौ घटिका पुण्या इति"। युक्तं चैतत्। विषुवे च मध्यपदो-पदानात् मध्ये षोडश घटिकाः पुण्याः इत्युच्यते कस्मात्

कालात् मध्य दृश्येष्टायां संक्रान्तिकालादेवेष्यतः पूर्व-
मष्टौ पश्चाच्चाष्टौ घटिकाः पुण्या दृश्यर्थः । यत्तूक्तं ब्रह्म-
स्फुटिना "वर्त्तमाने तत्कालेऽहे नाड्यस्तूभयतो दश" इति।
तत्कालेषसंक्रान्तिकालात् प्राक्पश्चाच्च पञ्च पञ्च घट्यः पुण्या
दृश्यक्रम् यदप्युक्तम् आद्यन्तसापेक्षत्वात् मध्यशब्दस्य
गणितागतपुण्यकालघटिकानां मध्ये विभागः स्थूलदृशा
दशघटिकात्मको भवतीति । "यायाः सन्निहिता नाड्यं
इति कल्पपोक्तेः । षडशीतिसंख्येऽह्यादाद्यन्तिमघटीनां
पुण्यकाले तरतमभावः । यत्तु षडशीत्यां व्यतीतायां घटि-
स्तुल्यास्तु नाडिका" इति ब्रह्मवसिष्ठवाक्यं तत् प्राग्घ-
टीषु प्रतिबन्धवशात् आद्यादेरसम्भवे सत्यन्तिमघटीषु आ-
द्यादिक्रियाभ्यनुज्ञायाः परमावधिकालेयत्तार्थम् । इदं
सर्वं दिनसंक्रान्तिविषयं वेदितव्यम् "अह्नि संक्रमणे
पुण्यमष्टः कृत्स्नं प्रकीर्त्तितम्" इति सामान्यवाक्यस्य
सौम्यायने विष्णुपदे दृश्यस्य च विशेषवाक्यस्यैकवाक्यता ।
अतएव "रात्रौ संक्रमणे भानोर्दिनार्द्धं स्नानदानयोः"
इति रात्रिपरविशेषस्य सत्त्वाच्च । एवं निर्णीते पुण्यकाले
स्नानदानाद्यवश्यं विधेयमिति फलितोऽर्थः । तत्र स्ना-
नदानाद्यकुर्वतश्च प्रत्यवायमाह वसिष्ठः "इति सञ्चिन्त्य-
विनिर्णयमादेयं सदैव दैवज्ञैः । विष्णुवयने षड्शे
संक्रान्तौ पुण्यदिवसेऽपि । पितृन्नग्निं यो न कुरुते
दत्त्वा शापं व्रजति तस्य पिता । आगतगतसमयेऽपि च
करोति यद्दानजपहोमाद्यम् । जघरवापितबीजं यद्वत्
तद्वच्च निष्फलं भवतीति" । अयने अयनप्रवृत्त्याख्ये चत्व-
संक्रमणे आगतसमये निर्णीते पुण्यकालातिक्रमसमये
स्नानादि निष्फलमित्यर्थः । संक्रान्तिषु स्नानदानादेः फ-
लमाह भरद्वाजः "षडशीत्यां तु यद्दानं विष्णुवहितये
तथा । दश्यते सागरस्यान्तस्तस्यान्तो नैव दृश्यते" । ब्रह्म-
वसिष्ठोऽपि "अयने कोटिः पुण्यानि सहस्रं विषुवे फ-
लम् । षडशीत्यां सहस्रन्तु फलं विष्णुपदेषु च" इत्यल-
मतिप्रसङ्गेन । इति सूर्यषड्क्रान्तिनिर्णयः । अत्र नायं
केवलं सूर्यसङ्क्रमण एव पुण्यकालः किन्तु चन्द्रादीनां
षण्णां नक्षत्रसङ्क्रमे राशिसङ्क्रमे च पुण्यकालो
भवति सोऽपि सोपपत्तिकः प्रसङ्गतः प्रोच्यते अस्माभिः
यदाह जैमिनिः "नक्षत्रराश्यो रविसङ्क्रमे स्युरर्वाक्
परत्रापि रवेरिन्दुनाड्यः१६ । पुण्यास्तथेन्दोरिह राशिपर्यै-
र्भुक्तैकनाड्यो३।१२ मुनिभिः शुभोक्ता । नाड्यस्ततः
शशिनः कुजस्य३।१ बुधस्य तिस्रो मनवः पलानि ३।१४।
बृहस्पतेर्नाडयः पञ्चसप्तयुक्ता गुरो च३३।७ शुक्रे शप-
ञ्चाश्वतस्रः४।१ । शनेर्नागनाडयः पञ्चसप्तयुक्ताः ८२।७
अनैश्चरस्यार्भिहिताः सुपुण्याः । आद्यन्तमध्ये जपदा-
नहोमं कुर्वन्नवाप्नोति सुरेन्द्रधाम" । अस्यार्थः सूर्यस्य
नक्षत्रसंक्रमे राशिसंक्रमे च प्राक्परतश्च षोडश घटिकाः
पुण्याः एवं चन्द्रस्यैकघटी त्रयोदश पलानि । भौमस्य
चतस्रो घटिका एकं पलम् । बुधस्य तिस्रो घटिकाश्चत-
र्दश पलानि, गुरोश्चतुश्चत्वारिंशत्घटिकाः षट्ट पलानि
शुक्रस्य चतस्रो घटिकाः पलमेकं, शनेर्द्वात्रिंशतिघटिकाः
सप्त पलानि षोडशतः पुण्यकाल दृश्यर्थः । अत्रोपपत्तिः ।
"भानोर्गतिः खदशभागयुतार्द्धिता या विम्बं विधोश्चिगु-
णिताद्युगयैलभक्ता७४। तिथ्यद्रि७।५हीनयमिभुक्तिरिषु
हि२५ भक्ता नन्दाब्धि२९ युग्भवति वा विधुबिम्बमे-
वमिति" सिद्धान्तशिरोमण्यु क्तप्रकारेण रविचन्द्रयोर्भो-
गकला आनेयाः "व्यङ्गोभवः सचरघा ऋतवक्षिभा-
गयुक्ताद्रयो नव च खत्रिलवेषवश्च । क्रमेण्यशास्तनुकलाः
क्षितिजादिकानां त्रिज्यागुणर्क्षविवरेण पृथग्विनिघ्ना ।
इति तत्रैवोक्ताः भौमादीनां मानकलास्तत क्रमेण्य
मानकलाः । तत्र "अष्टघ्नबिम्बं षड्भुक्तिभक्तं संक्रा-
न्तिनाड्योऽखिलधर्मलब्धे । रवेस्तु ताः पुण्यतमाषड्शः
स्वसंक्रान्तिगोभिश्चफलं विधत्ते" इति भास्करोक्तदिशा
संक्रान्तिनाड्यः स्युः तत्र षड्भुक्तयस्तेनैवोक्ताः "न-
न्दाब्धाभुजगारवेः शशिगतिः खार्काद्रयः खाम्नयस्तुङ्ग-
खाङ्गकलाः कुवेदशिवकलाः पातस्मरामाभवाः । भार्गे-
यस्य महीगुणारसकरा ब्रह्मेन्दुसिद्धारदाः षड्भेज्यस्य खि-
तस्य षड्ग्रहमिता अष्टौ शनेर्द्वे कले" इति बुधशुक्रयोस्तु
संक्रान्तिघटिकानयने सूर्यगतिरेव क्षारः कल्पग्रहगति-
तुल्यत्वात्तयोः, वासनाभाष्ये हि बुधशुक्रौ तु रवेरासन्नौ
नैव कदाचिदप्यतः कदाचित् पृष्ठतस्तस्यानुचरावि वदा-
व्रजन्तौ दृश्येते । ततस्तयोरपि रविभगणतुल्या एव
भगणा इत्युपपन्नमिति भास्करेणाभिहितत्वात् । यद्य-
प्यानानुगतिस्तच्छीघ्रयोः शीघ्रफलानयनार्थं वासनासिद्ध-
त्वेन कल्पिता तथैव षड्गतय इमास्त्रिप्रकारेण सा-
धिताः पुण्यकालघटिकाः सूर्यस्य यथा त्रिंशत् घटिका
एवं चन्द्रस्य द्वे घटिके षड्विंशतिपलानि भौमस्य नव-
घटिकाश्चत्वारिंशत्पलानि बुधस्य षट्घटिकाः विंशतिपलानि
गुरोरष्टाशीतिर्घटिका एवं शुक्रस्य नव घटिका अष्टौ
पलानि शनेः षष्ट्यधिकं शतं घटिकाः । पूर्वोपरकालौ

मिलित्वा पुण्यप्रकाल इत्यर्थः। अत्र वासना प्रागुक्ता एतदर्धं नाड्याः प्राक्परतश्च पुण्या। अत्र गणितागतघटीपलेषु लिखितजैमिनिवाक्ये च क्वचित् किञ्चित्पलभेदो घटिकाभेदश्च सगतिस्पष्टक्रान्तिवशतः। युक्तं चैतत् आकाशे हि वेधादिना स्पष्टा एव खगा दृश्यन्ते न मध्यमाः "दिनदयस्पष्टखगान्तरालकालः स्फुटस्तु स्फुटभुक्तिविम्बैरिति" स्पष्टगत्यैव बिम्बसंक्रान्तिपद्धानवनस्थितम् उक्तञ्च जैमिनिवाक्ये च "कुजादिकानामपि बिम्बभिन्नाः षष्ठ्यानुपाताः स्वगत्या भक्ताः। नाड्यादिकः संक्रमणान्तरालकालः स्फुटस्तु स्फुटभुक्तिबिम्बैरिति" अपिशब्दात् सूर्यचन्द्रमसोर्पर्वणि तथा सति मध्यमापेक्षया स्पष्टगतिबिम्बयोरूपचयापचयाभ्यां साम्ये सत्तद्घटिकानामप्युपचयापचयसाम्यातिक्रमेणापतति तेषां चानियतत्वात्पर्वे ग्रपनिबन्धायोगाज्जीर्णैर्नियतमध्यगत्या सूर्यादीनां ग्रहाणां पुण्यप्रकालघटीरानीयोपनिबन्धः कृतः। अत्र मत्कृतं पद्यम् "नाड्यो रामगुणा३१ रवेरथ विधोः षट्दोः पलैर्युग्गुहयं३।२६ भौमस्याब्धिपलैर्युतानवदृ।४ विदो६।२०युक्ताः पलैः खाब्धिभिः। ब्रह्माद्योऽष्टगजाऽष्ट गुरोरथ भृगोर्नेन्द्रा६।८ पलैरष्टभिः पुण्याः स्युः खलपाः शनेरिह॰ कमयतो राश्यृक्षयोः संक्रमे। अतो यो जैमिनिवाक्ये सार्धांशतमः पलसप्तयुक्ता गुरोरितिपाठो माधवादिभिरपाठि तथा हेमाद्रिधृतेषि द्विनागनाड्यः इति पदे नागा अष्टौ द्विराढत्ता नागा द्विनागाः षोडशनाडिकाः शनैश्चरसंक्रान्तौ पुण्यप्रकाल इति यत् व्याख्यातवान् तदप्ययमपाक्तं भवति तथा रामचन्द्राचार्यैरपि कालनिर्णयदीपिकायां हेमाद्रादिमूलक्रमसमर्थं स्वपद्येनोपनिबद्धात् अतश्चिन्त्योक्तयोर्भेदः। तस्मात्सर्वग्रहाणां राशिनक्षत्रयोः संक्रान्तिषु पुण्यप्रकालतास्थिरा। भास्करोऽपि "रवेस्तु ताः पुण्यतमाः" इतिवदिन्द्वादिसंक्रान्तिषु नाड्यः पुण्या इत्यूचिवत्। अतिशयने तमबिष्ठनाविति पाणिनिवचनात् "यदः खसंक्रान्तिगोमिश्रफलं विधत्ते" इति। सूर्यादिसंक्रान्तिसाधारणं तत्र सकलसंक्रान्तिषु दिनरात्रिविष्णुपदादिभेदेन सूर्यसंक्रमवच्छिर्षोध्वेः। एतत्संक्रान्तिमान्यता हि गुर्जरदेशेऽतीवास्ति ग्रसङ्गतप्रसङ्गेन। इति सकलग्रहसंक्रान्तिनिर्णयः" पी॰धा॰

करणभेदेऽर्कसंक्रान्तिफलं तत्रैव

नारदः "निविष्टो वणिजे विष्ट्यां बालवे च वणे गरे। कौलवे शकुनौ भानुः किंस्तुघ्ने चोर्ध्वसंस्थितः। चतुष्पात्तैतिले नागे सुप्रः क्रान्तिं करोति सः। धान्यार्धहृष्टिपुष्टं स्यात् क्षेमं हीनं भवेत्क्रमात्" क्रान्तिं संक्रान्तिम्। रत्नमालायामपि "चतुष्पदे तैतिलनागयोश्च सुप्तो रविः संक्रमणं करोति। विष्ट्यां ववाख्ये च गराह्वये च स बालवाख्ये वणिजे निविष्टः। किंस्तुघ्ननाम्नि शकुनावपि कौलवाख्ये चोर्ध्वस्थितश्च खलु संक्रमणं रवेः स्यात्। धान्यार्धहृष्टिपुष्टं भवेत् क्रमशस्तनिष्टमध्येष्टेति सूनयः प्रवदन्ति पूर्वे" इति। "संक्रान्तौ षड्गण्डं वा जन्मन्युभयपार्श्वयोः। नेष्टं त्रयं षट्गुभटं पर्यायाच्च पुनःपुनः। क्षानिर्दृष्टिः क्षयानक्षानिस्तथा प्राग्निरिति क्रमात्" नारदेनोक्तम्।

संक्रान्तेर्यन्नक्षत्रं यद्दग्धनक्षत्रं वा यदि जन्मर्क्षं भवेद्दग्धं वा ताभ्यामुभयपार्श्वगतं जन्मर्क्षं भवेत्तदा अनिष्टमेव नक्षत्रत्रयं निषिद्धं ततो नक्षत्रषट्कं शुभं ततस्त्रिकेऽर्कक्षानिस्ततः षट्के दृष्टिः ततस्त्रिके क्षयानक्षानिस्ततः षट्सु दृष्टिः षट्सु क्षयानप्राग्निरिति। अतएव पठन्ति दाक्षिणात्याः "संक्रान्त्यर्धरनक्षत्राद्गणयेज्जन्मभावधि। त्रिकं षट्कं त्रिकं षट्कं त्रिकं षट्कमिति क्रमात्। पन्थाभोगो व्यया वस्तु क्षानिश्च विपुलं धनम्" इति त्रिकं शुभं षट्कमशुभमिति फलितोऽर्थः" पी॰धा॰। अधिकमयनसंक्रान्तिशब्दे २१८५॰ पृष्ठे दृश्यम्। स्थूलतया मेषादौ रविसंक्रान्तेर्वारदग्धाद्यानयनप्रकारः ज्यो॰त॰ उक्तो यथा

"नवाष्टयक्ष१।४८८हीनेन शकाब्दाङ्केन पूरिताः। भूर्वाणचन्द्रावेकाग्नी कुरामो वेदयुग्मके। १।१५।२१।११।२४ अङ्का अतुपदार्देस्तु षड्घ्ना लब्धाङ्कभिश्रिताः। दग्धात् खाग्नी कृतेषु च १०।५७ पलाद्विहृत्य ततः पुनः। सप्तावशिष्टा वाराः स्युः स्युतो दग्धादिकाः परे। मेषसंक्रमणे भानोः सिद्धान्तस्फुटसम्मताः। भुजौ षड्भिपूरामाग्नी २। ५६।११ कालोजातिर्गजावनी। ६।२२।१८ रामचन्द्रोऽग्नियुग्मञ्च ३।१।२१ तर्कोऽङ्कदृक् नवाशुगौ। ६।२८।५८ द्वावङ्कदृग् वेदवाधा २।२८।५४ खब्धिर्वाणशरौ शराः। ४।५५।२१ खाग्नवेदौ शून्येन्दू ६।४८।१० एकं शैलभुवौ शराः। १।१७।५। द्वौ षड्भो तथा काला २।२६। ६ खाब्धीरामः शरावनी। ४।२।१५। पक्षाग्नीषू तथा रुद्रा ५।५१।११। मेषसंक्रमवारतः। अङ्कैर्योज्या ग्रहादेस्तु वाराद्याः संक्रमे रवेः"।

राशिभेदे संक्रान्तिनामभेदं तत्संक्रमकाले स्वनक्षत्रस्य पुण्यातिसंक्रान्तिचक्रस्थानविशेषस्थितौ फलभेदञ्च तत्रोक्तो यथा "मृगकर्कटसंक्रान्तौ ह्ये तदृग्दक्षिणायने। विषुवती तुला

मेषे गोलमध्ये तथापराः । धनुर्मिथुनकन्यासु मीने च षड्गीतयः । दशदक्षिणकर्णेषु सिंहे विष्णुपदी स्मृता । मूर्ध्नि सप्त मुखे त्रीणि हृदये पञ्च विन्यसेत् । त्रितयं करपादेषु मयोविष्णुवतः क्रमात् । नाभं मूर्ध्नि मुखे वैरं हृदये सुखसम्भवः । दोःपदोर्द्वयोर्भोगस्तत्सख वामयोः स्मृतः जलविष्णुफलम् । "शीर्षे पञ्च मुखे त्रीणि कण्ठयोश्च द्वयं त्रयम् । हृदि पञ्च यशो नाभौ गुह्ये च पादयोरघाः । उत्तरायणभाजश्चेयं स्वनक्षत्रस्थितेः फलम् । शीर्षेऽथ लाभो वदने सुखानि दशे करेऽङ्गौ हृदये च सौख्यम् । नाभौ शुभं वामकरेऽर्थनाशो गुह्ये भयं वामपदे प्रवासः" उत्तरायणफलम् । "शीर्षे त्रीणि मुखे त्रीणि हृदये पञ्च कण्ठयोः । अष्टौ पादद्वयेऽष्टौ दक्षिणायनसंक्रमात् । शीर्षे मानो मुखे विद्या हृदये वित्तसञ्चयः । प्रवासः स्यात् करे वामे भिक्षालाभश्च दक्षिणे । निष्फलं वामपादे च क्षिप्तिलाभश्च दक्षिणे" दक्षिणायनफलम् । "अन्ते संक्रमणं यत्र विष्णुपद्यां मुखे तु तत् । चत्वारि दक्षिणे बाहौ त्रीणि त्रीणि पदद्वये । चत्वारि वामबाहौ च हृदये पञ्च निर्दिशेत् । अष्टाविंशं द्वयं योज्यं मूर्ध्नि हे चैकके मुखे" "रोगो भोगस्तथा यानं बन्धनं लाभ एव च । ऐश्वर्यं राजपूजा च यथेष्टमुदिति क्रमात्" विष्णुपदीफलम् "मुखे चैकं करे वेदाः पादयुग्मे द्वयं द्वयम् । क्रोडे वाणस्तथा वेदाः करे सव्येतरेऽपि च । द्वयं द्वयं तथा नेत्रे मस्तके त्रितयं तथा । द्वयञ्चैव तथा गुह्ये षड्गीत्यां क्रमे स्थिते । सुखे दुःखं करे लाभः पादयोर्भयं हृदि । कान्ता स्वादुवचनं वामे हस्ते स्यात् स्त्रीयभेनथाम् । सम्मानो नेत्रयोश्चैव अपमानश्च मस्तके । गुह्ये चैव भवेन्मृत्युः षड्गीतिफलश्रुतिः" षड्गीतिफलम् । गुरुसंक्रान्तिफलञ्च ज्यो० त० यथा "शीर्षे चत्वारि राज्यं जलधिरपि करे दक्षिणे चापि सौख्यं चैकं वक्त्रे विभूतिं मदनशरमितं वक्षसि प्रीतिसङ्गम् । पादस्थाः षट् च पीड़ा पुनरपि जलधिर्वामहस्ते च सत्वं नेत्रे त्रीणि प्रदद्युः सुखमथ निजभे वाक्पतेः संक्रमर्क्षात्" ।

संक्रान्तिपुण्यकालव्यवस्था ति०त० संक्षेपतो दर्शिता यथा "तदयं संक्षेपः । दिनसंक्रमणे लक्षं दिनं पुण्यं षड्गीति मुखे" इत्यादुक्तं पुण्यतरं मन्दामन्दाकिनीत्यादि रूपेण त्रिचतुरादिघटिकाः पुण्यतमाः । दिनद्वयोत्तरायणादिविहितविंशतिदण्डादीनां रात्रिप्रविष्टभागस्यापि पुण्यत्वं रात्रिसंक्रमणे तु कल्याल्पून प्रथमार्द्धगते तद्दिवसीयमेष्यामहयं पुण्यम् । कालद्वयात्मकमध्यरात्रगते तद्दिवसीयतिथेरर्धे तद्दिवसीयमेष्यामहयं पुण्यं भेदे तु तद्दिवसीयमेष्यामहयं परदिवसीयाद्यामहयञ्च पुण्यम् । उभयदिने पुण्यकालेऽपि पूर्वदिनाकरण एव परदिने तद्विहितं कार्यम् । तिथिभेदाभेदयोर्दक्षिणायने तद्दिवसीयमेष्यामहयम् उत्तरायणे तु परदिवसीयाद्यामहयं पुण्यमिति मध्यरात्रीयकोत्तरमेषार्द्धरात्रसंक्रमणमात्रे तु परदिनाद्यामहयं पुण्यमिति मध्यासंक्रमणे तु दिनदण्डे दिनस्य रात्रिदण्डे रात्रेर्व्यवस्थितिः" । तत्प्रमाणं ति०त० दृश्यम् । संक्रान्तौ कालागुद्विदोषादिकं नास्ति,यथोक्तं ति०त०स्कान्दे "एकान्ततो मया प्रोक्ताः कालाः संक्रान्तिसंज्ञकाः । नैतेषु विद्यतेऽनिष्टं यतस्तत्रयसंश्रिताः । अन्यत्रापि यदुक्तं कृपात्रेभ्योऽपि मानवैः । अकालेऽपि हि तत्सर्वं सत्यमच्युतता व्रजेत्" ।

सङ्ख्या न० संख्यायते परस्परनामोच्चारणं क्रियतेऽत्र सम्+ख्या-घञर्थे क । १युद्धे अमरः । अङ्के । २विचारे स्त्री अमरः । एवं ३सम्यग्वृद्धौ राजनि० ४ईक्षायाञ्चिते एकत्वादित्वादौ गुणभेदे च स्त्री टाप् । एकादिसंख्यावाचकस्य संख्यासंख्येयोभयपरता "द्व्येकयोर्द्विवचनैकवचने" इति पा० महाभाष्ये उक्ता । तेन घटानां पञ्चेत्यपि स्यात् "वार्त्ताकुरेका गुणसप्तयुक्ता" इत्यादि वैद्यके संख्यापरतया निर्देशोऽपि साधुः । किन्तु संख्यात्व जातावेव शक्तिः संख्यायुक्ते निरूढलक्षणेति विवेकः । तत्र एकादिदशान्ताः शब्दास्त्रिलिङ्गा विंशत्यादयस्तु नियतस्त्रीलिङ्गादिकाः । तत्रापि विंशत्यादिशब्दानां बहुत्वसंख्यावाचकत्वेऽपि एकवचनान्तत्वेन । तदाहुर्ते बहुवचनान्ता अपि पञ्च विंशतयः षट् शतानीत्यादि । तेषां विशेषसंज्ञा लोका० दर्शिता यथा "एकदशशतसहस्रायुतलक्षप्रयुतकोटयः क्रमशः । अर्बुदमब्जः (शङ्खः) खर्वनिखर्वौ महापद्मशङ्कवस्तस्मात् । जलधिश्चान्त्यं मध्यं परार्द्धमिति दशगुणोत्तराः संज्ञाः संख्याया अव-

धारार्थं कृताः पूर्वैः। ब्रह्माण्डपु० नामान्तराण्युक्तानि यथा "एकं दश शतं चैव सहस्रमयुतं तथा। लक्षं च नियुतञ्चैव कोटिरर्बुदमेव च। वृन्दः खर्वो निखर्वश्च शङ्खपद्मौ च सागरः। अन्त्यं मध्यं परार्द्धं च दशवृद्ध्या यथोत्तरम्"। संख्या च गणनव्यवहारे हेतुः यथोक्तं "गणनव्यवहारे तु हेतुः सङ्ख्याभिधीयते। नित्येषु नित्यमेकत्वमनित्येऽनित्यमुच्यते। द्वित्वादयः परार्द्धान्ता अपेक्षाबुद्धिजामताः। अनेकाश्रयसंख्यात्वा एते तु परिकीर्त्तिताः। अपेक्षाबुद्धिनाशात्तु तेषां नाशो निरूपितः। अनेकैकत्वबुद्धिर्या सापेक्षाबुद्धिरुच्यते" भाषापरिच्छेदग्रन्थेनैव अनेकाश्रिता समवायेन तु मत्वेकाश्रितेति बोध्यम्।

सङ्ख्यात त्रि० सम्+ख्या-क्त। १लब्धसङ्ख्ये २गणिते ३सम्यक्ख्याते च तेन रात्रिशब्दस्य समासे अच् सङ्ख्या०। संख्यातरात्रः। [१परिख्याते अमरः। २संख्यायुक्ते त्रि०।

सङ्ख्यावत् पु० संख्या विचारोऽस्त्यस्य मतुप् मस्य वः।

सङ्ख्येय त्रि० संख्यायतेऽसौ सम्+ख्या-यत्। १गणनीये २संख्याकरणयोग्ये।

सङ्ग पु०सृज्-भावे घञ्। १मेलने २सम्बन्धे ३विषयादिरागे च "ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते" गीता।

सङ्गणिका सम्+गण-भावे ण्वुच्। अप्रतिरूपकथायां स्त्रियां०।

सङ्गत न० सम्+गम-भावे क्त। १मीलने २सङ्गतौ च। कर्त्तरि क्त। ३मिलिते त्रि०। ४सङ्गतियुते युक्तिसंसिद्धे अमरः।

सङ्गति स्त्री सम्+गम-क्तिन्। १सङ्गमे २मेलने न्यायोक्ते अनन्तराभिधानप्रयोजकलिङ्गाख्यजनकज्ञानविषये "सम्बन्ध उपोद्घातो हेतुतावसरस्तथा। निर्वाहकैकवाक्यत्वे थोडा सङ्गतिरिष्यते" दण्ड्युक्ते ३प्रसङ्गादौ पदार्थे च।

सङ्गम पु० सम्+गम-घञ् न ह्रस्वः। १सङ्गतौ २स्त्रीपुंसयोः संभोगे पु०न० अमरः। ३नद्यादेर्नदादियोगस्थाने च "गङ्गासागरसङ्गमः" इति पुराणम्।

सङ्गर पु० सङ्गीर्य्यते सम्+गृ-भावादौ अप्। १व्यापदि २प्रतिज्ञायां ३युद्धे च अमरः। कर्त्तरि अच्। ४क्रियाकारके ५विप्रे मेदि० ६यमीढवंशजाते न० मेदि०।

सङ्गव पु० सङ्गता गावो दोहनायात्र काले त्रि०। "प्रातःकालो मुहूर्त्तस्त्रीन् सङ्गवस्तावदेव तु" इति दक्षोक्ते प्रातःकालानन्तरं मुहूर्त्तत्रयात्मके कालभेदे।

सङ्गिन् त्रि० सृज्-णिनुण्। सङ्गयुक्ते स्त्रियां ङीप्।

सङ्गीत न० सम्+गै-क्त। १दर्शनार्थे नाट्यगीतवाद्यत्रिके हेमच०। २तत्प्रतिपादकग्रन्थे च। कर्मणि क्त। ३सम्यग्गीते त्रि०। सङ्गीतशास्त्राणि च नानाविधानि तत्र मूलग्रन्थकर्त्तारश्चत्वारः भरतकृतमतङ्गेश्वरकृतनाट्यशास्त्र हनूमद्ग्रन्थश्चैव लोकेऽधुना बहुलप्रचारः। तद्ग्रन्थस्य च स्वराध्यायः रागाध्यायः तालाध्यायः नृत्याध्यायः भावाध्यायः लोकाध्यायः कृताध्यायश्चेति सप्ताध्यायाः। सङ्गीतसारादौ विस्तरो द्रष्टव्यः। [कृता०।

सङ्गीति स्त्री सम्+गै-क्तिन्। १सम्यग्गाने २व्यवहारे

सङ्गीर्ण त्रि० सम्+गृ-क्त। स्त्रीजाते अमरः।

सङ्ग्रह पु० सम्+ग्रह-अप्। १सङ्गमे २सङ्कलनवाक्यानामेकत्र सङ्कथने च "विस्तरेणोपदिष्टानामर्थानां सुखमाप्तये। निबन्धनं समासेन संग्रहं तं विदुर्बुधाः"। ३ग्रहणे ४चतुष्के १५ग्रहणे ६मंत्रभेदे मेदि०७ग्रहणे विष्णुः ८स्वीकारे ९महोद्योगे नानार्थरत्नमा०। १०व्याडिप्रणीते व्याकरणग्रन्थभेदे "सङ्ग्रहेऽनुक्तसमानते" वाक्यपदीयम्।

सङ्ग्रहणी स्त्री संहिता ग्रन्थे। ग्रहणीरोगभेदे।

सङ्ग्राम युधे चट०पु०उभ० सक० सेट्। सङ्ग्रामयति ते अससङ्ग्रामत त। अस्याकर्मकत्वेऽपि आ० दृश्यते

सङ्ग्राम पु० सङ्ग्राम-भावे घञ्। युद्धे अमरः।

सङ्ग्रामपटह पु० ६त०। रणवाद्यभेदे त्रिका०।

सङ्ग्राह पु० संगृह्यते सम्+ग्रह-कर्मणि घञ्। मस्तकस्थसंबन्धनस्थाने अमरः।

सङ्ग्राहिन् पु०सम्यक् गृह्णाति मत्स्यं सम्+ग्रह-णिनि। १कुटजवृक्षे राजनि०। २मत्स्यबन्धके ३संग्रहकारके च त्रि०। [अमरः। ४संगृह्णते त्रि०।

सङ्घ पु० संहतं सर्वम्। १समूहातीयजन्तुसमूहे २समूहे च

सङ्घचारिन् पु० सङ्घीभूय चरति चर-णिनि। १मत्स्ये हेमच०। २सङ्घीभूयचारिणि जन्तुमात्रे त्रि०स्त्रियां ङीप्

सङ्घजीविन् पु० सङ्घेन जीवति जीव-णिनि। संघोपजीविनि प्रातीने हेमच०। [च।

सङ्घट्ट पु० सम्+घट्ट-भावे घञ्। १परस्परसङ्घर्षे २गटने कर्त्तरि अच्। ३लतायां शब्दर०। ४चालके त्रि०।

सङ्घट्टन न० सम्+घट्ट-ल्युट्। १मेलने २गठने ३रचनायाञ्च। युच्। तत्रैव स्त्री। [द्वये (योड़हात) अमरः

सङ्घतल पु० सङ्घे संहते मिलिते तले यत्र। संयोजितप्रतले

सङ्घपुष्पी स्त्री सङ्घानि संहतानि पुष्पाण्यस्याः ङीप्। धातकी पुष्पाम् (धाइ फुल) राजनि०।

सङ्घर्ष पु० सम्+हृष-घञ्। १परस्परघर्षणे २सङ्घातयां १संघर्षे च शब्दर०।

सङ्घश्स् अव्य० सङ्घ+तीयसार्थे-शस्। भूरिशः बहुत्वे।

सङ्घाटिका स्त्री सङ्घटयति सम्+घट-णिच्-ण्वुल्। १युग्मे २कङ्कत्यां ३जलकण्टके मेदि०। ४धान्ये विश्वः।

सङ्घात पु० सम्+हन-घञ्। १समूहे २नरकभेदे अमरः। ३सम्यग्घननेमेदि० ४वृद्धसंयोगे ५कफे च राजनि०।

सङ्घातपत्रिका स्त्री सङ्घातयुक्तं पत्रमस्याः कप् अत इत्वम्। मत्स्यघ्न्यां राजनि०।

सचि(ची) स्त्री सच-इन् यो ङीप्। इन्द्राण्यां रामाश्रमः

सचिक्कक पु० सह क्लिन्नेन सङ्घस्य सः कप् नि०। क्लिन्नेत्रे (पिचुडियुक्तनेत्रे) शब्दच०।

सचिव पु० सच-इन् तथा सन् वाति-क। १सहाये २मन्त्रिणि अमरः ३२१ पृ० ३स्तम्भ। ३क्षत्रियजातिभेदे राजनि०। [रोगभेदे राजनि०।

सचिवामय पु० सचिवः सङ्घाय आमयो यस्य। विषमे

सचीनन्दन न० ६त०। वैष्णवसम्प्रदायप्रवर्त्तके नवद्वीपवासिनि वैष्णवाचार्य्यभेदे तदाविर्भावश्च "शाके सनिध्योमयुगेन्दुमाने(१४०७) पुण्ये तिथौ फाल्गुनपौर्णमास्याम्। त्रैलोक्यभाग्योदयपुण्यमूर्त्तिर्जातो जगन्नन्दन आविरासीत्" चैतन्यचन्द्रोदयः। अस्य कथा गुप्तभगवद्वतारत्वं वैष्णवानामन्यत्र तत्र न किञ्चित् प्रमाणसत्त्वभावश्चेति

सचेतन त्रि० सह चेतनया सङ्घस्य सः। विशिष्टज्ञानयुक्ते।

सचेष्ट पु० सचते सच-अच् तथाभूतः सन् रूढः। १आत्मे शब्दमा०। सह चेष्टया सङ्घस्य सः। २चेष्टान्विते त्रि०।

सचारा स्त्री सन् चारो मात्रानुलेपने विश्वमूर्त्तिरस्याः। कस्तूरिकायां शब्दच०।

सच्चिदानन्द पु० सन् नित्यः चित् चैतन्यमानन्दः त्रिपदकर्म०। १नित्यज्ञानसुखमये ब्रह्मणि वेदा०। ईव०। २तद्युते ईश्वरादौ त्रि० न्यायमतम्।

सच्छूद्र पु० कर्म०। गोपनापितादौ शूद्रभेदे "सच्छूद्रो गोपनापितादिरिति" स्मृतिः। [अमरः।

सजम्भाल त्रि० सह जम्भालेन सङ्घस्य सः। पङ्कयुक्ते देशे

सजाति पु० समाना जातिरस्य समानस्य सः। समर्थेन समर्थायां मङ्घायाम् उत्पादिते पुत्रे। २समजातौ त्रि० "सवर्णेभ्यः सवर्णासु जायन्ते च सजातयः" सिता० स्मृतिः।

सजातीय त्रि० समानां जातिमर्हति छ समानस्य सः। समानधर्मयुक्ते अमरः।

सजुष् अव्य० सह जुषते क्विप् सहस्य सः। १सङ्घार्थे जुषादौ र। सजुः चर्च्चा०। "सजुःकृत्य रतिं वसेदिति" भट्टिः। २प्रीतियुक्ते ३सेवायुक्ते च त्रि० ४तापसे मेदिनिश्च०

सज्ज त्रि० सस्ज-क्त्र। १उद्युक्ते २संनद्धे अमरः। ३सम्भृते विश्वः ४निश्चिते शब्दर०। भावे घञ्। ५व्यायोजने ६वेगे च स्त्री मतोऽजादते जन-ड। ७साधुजाते त्रि०।

सज्जन न० सस्ज-णिच्-ल्युट्। १रथार्थं सैन्यस्थापने अमरः २घट्टे (घाटो) मेदि०। ३व्यायोजने। सन् जनः। ४सोऽस्त्यर्थे जने पु० "निजाचारक्रियाढ्येषु ये कुर्वन्ति वेदसम्मतम्। पापाभिलाषरहिताः सज्जनास्ते प्रकीर्त्तिताः" पद्मपु० "कुरु सज्जनरञ्जनमिति" चञ्चटः। ५यज्ञकर्त्तरि च पु०। सस्ज-णिच्-युच्। ६वृद्धपादोनामारोहणार्थं गजभूषाकरणादौ स्त्री अमरः।

सज्जित त्रि० सज्जा जातास्य तारं० इतच् सस्ज् णिच्-कर्मणि क्त वा। १कृतवेशे २भूषिते ३संनद्धे च। [देशेज्ञ०।

सञ्च सञ्चीयतेऽत्र सम्+चि-ड। लेखनार्थं पत्रभेदे (साँच)।

सञ्चत् त्रि० सम्+चत-क्विप्। प्रतारके सि०कौ०।

सञ्चय पु० सम्+चि-अच्। १समूहे अमरः। २संग्रहे च। ल्युट्। सञ्चयन। सङ्ग्रहे न०। [सीदतीति पुरादिषत्वम्

सञ्चयिन् पु० सम्+चि-इनि। सङ्ग्रहकारके "सञ्चयी नाशनं

सञ्चार पु० सञ्चरत्यनेन सम्+चर-घञर्थे करणे क घञ् वा। १सेतौ रत्नमा० २देहे हेमच०। भावे घञ्। ३प्रहारे ४अन्तरगमने ५सञ्चरणे च।

सञ्चाय्य पु० सञ्चीयतेऽग्निरत्र सम्+चि-ण्यत् नि०। यज्ञभेदे।

सञ्चारिका स्त्री सञ्चारयति नायकयोर्वार्त्ताम् सम्+चर-णिच्-ण्वुल्। १दूत्याम् अमरः। २कङ्कत्यां ३वुल्ले ४ग्रामे च मेदि०।

सञ्चारिन् पु० सम्+चर-णिनि। १धूर्त्ते त्रिका० २व्यापी शब्दच०। अलङ्कारोक्ते शृङ्गारादिरसाद्यनुगुणे ३भावभेदे च भावभेदश्च व्यभिचारिभावः। "नानाभिनयसञ्चर्यन्नात् सञ्चरन्ति रसान् यतः। तस्माद्भावा अमी प्रोक्ता स्त्यादिसञ्चारिसाज्ञिकाः"। "व्यक्तः सञ्चारिणा सहितं सा०द०। ४सञ्चारकारके त्रि० स्त्रियां ङीष्। "सञ्चारिणी दीपशिखेवेति" रघुः। सा च ५वंशपत्र्यां राजनि०।

सञ्चाली स्त्री सञ्चलति सम्+चल-ण गौरा० ङीष्। गुडूच्यां वल्लिकल्पतरुः।

सञ्चिका स्त्री प्रा० स०। सूचिकर्मण्यां शब्दर०। [कर्मभेदे च

सञ्चित त्रि० सम्+चि-क्त। १संगृहीते २अनारब्धफलभोगे

सत्र पु॰सद्+त्रन-ड । चतुर्मुखे १ब्रह्मणि २शिवे च मेदि॰ ३ज्ञान्यां स्त्री त्रिका॰ ।

सत्रय पु॰ भारतप्रसिद्धे धृतराष्ट्रकुमारभेदे ।

सत्रवन न॰ सद्+त्रु-युच् । परस्पराभिसख्यतया स्थिते च॰ तःशाले मट्टे अमरः ।

सत्रीवन न॰ सद्+त्रीव-ल्युट् । १चतुःशालमट्टे शब्दर॰। २सम्यक्प्राणधारणे च । संत्रीयति सद्+त्रीव-णिच्-ल्युट् । ३ओषधीभेदे स्त्री ङीप् ।

सट न॰ स्त्री सठ-अच् पृषो॰ ठस्य टः । १व्रतिनां केशसङ्घाते २जटायाम् शब्दर॰ । ३शिखायां ४सिंहादेः केशरे च मेदि॰ "सटच्छटाभिरधनेनेति" माघः । [ङीष् ।

सटाङ्ग पुंस्त्री॰ सटा अङ्गो यस्य । सिंहे शब्दर॰ स्त्रियां

सटि(टी) स्त्री सठ-इन् वा ङीप् पृषो॰। १जटायां शब्दरत्ना॰ स्वार्थे क । २गन्धपत्रवृक्षे राजनि॰ । सठ-इन् ङीप् पृषो॰। सटीत्व । ठान्तः तत्रार्थे राजनि॰ ।

सट्टा स्त्री सठ-च पृषो॰ । १पक्षिभेदे २वाद्ये संक्षिप्तसा॰ ।

सठ श्वठार्थे गतौ संस्कारे अवस्कारे च चुरा॰ उभ॰ सक॰ सेट् । साठयति ते भोपदेवस्त्वसेव न्यायम् ।

सणसूत्र न॰ शणसूत्रम्+पृषो॰ । शणसूत्रे रायमुकुटः ।

सण्डिग्य पु॰ संदंश+पृषो॰। सन्दंशे (सांड़ासि) "सण्डिग्यैरपकृष्यन्ते नरैर्यास्यैर्मुखात्ततः" भारते वपु॰ १अ॰।

सण्डीन न॰ सम्+डी-क्त । पक्षिणां बद्धस्य गमनरूपे गतिभेदे अमरः ।

सत् त्रि॰अस-शतृ । १सत्ये २साधौ ३पूजिते ४धीरे ५प्रशस्ते ६विद्यमाने च अमरः । स्त्रियां ङीप् । सा च ७पतिव्रतायां स्त्रियां दक्षकन्याभेदे "सती सती योगविसृष्टदेहेति" कुमारः । ८सौराष्ट्रमृदि हेमच॰ १०ब्रह्मणि न॰ "ओंतत्सदितिनिर्देशो ब्रह्मणस्त्रिविधः स्मृतः" इति गीता । ११आदरे अव्य॰ "सदसतो आदरानादरयोरिति" पाणिनिः उभ॰स॰ "सतश्च" त्रि॰कौ॰ । प्रतिव्रतापरत्वे संज्ञात्वात् तद्भावः त्व "त्वतलोर्गुणवचनस्य" पा॰न लुक्ः सतीत्वम् "तेन नारद ! नारीणां सतीत्वमपजायते" पुराणम् ।

सतत न॰ सम्+तन-क्त समोऽन्त्यलोपः । १निरन्तरे २सदति त्रि॰ अमरः । ["सततत्वताऽन्यया प्रथा" वेदा॰प॰ ।

सतत्त्व न॰ सच्च सदसं तत्त्वेन । स्वभावे हेमच॰ २यथार्थे

सतानन्द पु॰ गौतमपुत्रे अरुन्धतीगर्भजे मुनिभेदे शब्दच॰ ।

सतीन पु॰ सतीं नयति नी-ड । १संगमे शब्दरत्न॰ (चुड़मटर) २कषायभेदे भरतः । स्वार्थे क । तत्रैव अमरः ।

सतीर्थ्य पु॰ समाने तीर्थे गुरौ वसति यत् समानस्य सः । परस्परैकगुरुके छात्रे अमरः । ह्रस्व॰ निर्धारोऽप्यत्र सत्रार्थे । [आङ्गिः । २वंशे द्वारा॰ श्रायौ रायस्॰ ।

सतील पु॰ सतीं लवयति लच-ड । (चुड़मटर) १कषाये

सतीलक पु॰ सतीलदृव कायति कै-क, सह तिलेन तिलचिह्नेन कप् पृषो॰ दीर्घः । १वंशे (चुड़मटर) २कषायभेदे च अमरः । [दीर्घः । कषायभेदे (तेवोड़ा) अमरः ।

सतीला स्त्री सह तिलेन तिलचिह्नेन सदृश्य सः पृषो॰

सतेर पु॰ सन-एर तान्तादेशः । सतये संक्षिप्तसा॰ ।

सत्कदम्ब पु॰ नित्यक॰ । केलिकदम्बे शब्दच॰ ।

सत्कर्त्तृ पु॰सत्+कृ-तृच् । १विष्णौ विष्णुस॰ २सत्कारके त्रि॰।

सत्कर्म्मन् न॰ कर्म॰ । वेदादिविहिते यागादौ कर्मणि च ।

सत्कर्म्मनार पु॰कर्म॰ । रङ्गकारके शब्दच॰। [स्त्रियां ङीप्

सत्कार पुंस्त्री॰सत्कारः शब्दव्यापारोऽस्य । चिह्ने शब्दच॰

सत्कार पु॰ सत्+कृ-घञ् उप॰स॰ । १सम्माने २पूजने च ।

सत्कार्य्यवाद पु॰ द्वित॰। कार्यं सत्त्वनिर्णायके वादे कथाभेदे स च वादः सत्प्रतिपक्षशब्दे ११०८पृ० दृश्यः ।

सत्कृत त्रि॰ सत्+कृ-क्त । १पूजिते २कृतसम्माने च ।

सत्क्रिया स्त्री सत्+कृ-य । १सत्कारे २सम्माननेऽ३पूजने च

सत्तम त्रि॰ अतिशयेन सत् तमप् । अतिप्रशस्ते अमरः ।

सत्ता स्त्री सतोभावः तल् । १द्रव्यगुणकर्मसंस्थासु २जातिभेदे "द्रव्यादिविकल्पेषु सत्ता परतयोच्यते" भाषा॰। जातिशब्दे २०६१ पृ० दृश्यम् । ३विद्यमानतायाञ्च विद्यमानत्वं च कालसम्बन्धः । आत्मधारणानुकूलव्यापार इति शब्दिकाः "आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते । अस्मर्थाच्च तेनार्थो कर्मणा न सकर्मकः" हरिः । तत्र विद्यमानता च वेदान्तमते त्रिविधा पारमार्थिकी ब्रह्मणः नैकालिकाबाध्यत्वरूपा व्यावहारिकी घटादीनां सा च तत्त्वज्ञाननाश्या प्रातीतिकी शुक्तिरजतादेः सा चाधिष्ठानसाक्षात्कारनाश्या । ब्रह्मसत्तयैव सर्वेषां सद्व्यवहारः सदुत्पन्नत्वात् इति वेदान्तिनः ।

सत्र न॰ सद-ष्ट्रन् । १स्थाने २यज्ञभेदे ३सदादाने ४आच्छादने ५चरणे ६कैतवे मेदि॰ ७धने दम्भे ८दाने १०हरिणि नानार्थकोषः । सदादानञ्च सदक्षिणं सततान्नदानम् । यज्ञभेदश्च द्वादशाहादिसाध्यः ज्योतिष्टोमादिः यथोक्तं काल्या॰श्रौ॰१२।१।४। स्वभाष्यादौ "द्वादशाहः सत्रं सहीनश्च" भू॰ "सत्रस्वरूपः कहीनस्वरूपश्च भवति द्विविधः ।

आसत उपवसतीति सत्त्रस्य विकृं यजते इत्यहीनस्य। अत्र विशेषमाह "द्वादशाहस्याहिकाग्नय उपेयुरिति तथा त्रयोदशरात्रमासीरन्निति सत्त्रविकृम् द्वादशाहेन प्रजाकामं याजयेदित्यहीनविकृम्। अस्यातुकथनप्रयोजनम् सत्त्रे सत्त्रात्मको धर्मो दाक्षत्वेन प्रवर्त्तते अहीने चाहीनात्मकः। "उभयतोऽतिरात्रं सत्त्रमुपरिष्टादहीनस्य" सू० उभयत इत्यादावन्तेऽतिरात्रो यस्य तदुभयतोऽतिरात्रम् उपरिष्टात् अन्तएव। "यजमानाः सर्वे सत्त्रेषु" सू०। कर्त्तारो भवन्ति य ऋत्विजस्ते यजमाना इत्यनेनार्त्विजीनान् पदार्थान् सत्त्रयन्नूद्य यजमानाः कर्त्तृत्वेन विधीयन्ते। "ऋत्विग्वरणं च स्वामियोगात्" सू०। सत्त्रार्थि भवन्ति न हि कश्चिदात्मनैवात्मानं परिक्रीणाति। अत्र हि स्वामिन एवार्त्विज्यम् अतुपयुक्तात्मपरिक्रयः "ब्रह्मणस्पतिर्यजमानमयुक्तत्वात्" सू० यजमानं यत्कर्म तद्ब्रह्मणस्पतिः करोति कर्मान्तरे तस्मायुक्तत्वात् इतरेषां साध्वर्यवादिषु योगात्। "दर्शनाच्च" सू० इयते चायमर्थः तस्माद् यदि बहवो ग्रहीतेयुरिति। "सर्वे संस्कारान्" सू० यदुक्तसंस्कारकं यजमानं यथा वपनादि तत्सर्वं कुर्युः तेन हि यजमानाः संस्क्रियन्ते। "दर्शने वचनात्" सू० यत्तु दर्शनसत्त्रम् तद्वचनम् ब्रह्मणस्पतये एकस्मै दानसत्त्रम् वचनं किमिव न कुर्यात्। "अविभवति ब्रह्मणस्पत्यारम्भः" सू० न संभवत्यनेककर्त्तके पदार्थे वेदवचनान्यनाधानादौ ब्रह्मणस्पतेरन्वारम्भः सर्वैः कर्त्तव्यः। "पदार्थैक्यैकः क्रतुत्वात्" सू० यत् पुनः क्रत्वभिनिर्वर्त्त्यमेव कर्म यथा पात्रासादनमाज्यावेक्षणं वा तत्रावापैव कर्त्तृत्वम् क्रतुत्वात् पदार्थत्वञ्च। परार्थे यजमानकर्त्तके आज्यावेक्षणादौ एको ब्रह्मणस्पतिः कृतः क्रतुत्वात् एकेनापि क्रतः क्रत एव यतः। "अग्निं चेध्यमाणाः समारोहेद् गृहपतिर्ब्रह्मे मन्त्रत्वर्थं इतरे दक्षिणोत्तराः" सू० समारोहेदिति च पूर्वकालतामात्रे ल्यबादेशो न समानकर्त्तकतायाम्। "गृहपत्याहवनीयेऽङ्गारप्राशनम्" सू०। "तत्र प्राजापत्यः पशुः" सू०। तत्र विकारे प्राजापत्यः पशुर्भवति। पुनर्यत्र ब्रह्मणस्पतेर्गुणे प्राजापत्यस्य नियमः तथा चात्रमेधे नियमदर्शनं भवति प्राजापत्यमालभेतेति। तत्र साधारणीकृते विकारे। "ब्राह्मणेन पत्नीसंयाजा गृहपतिवर्जम्" सू०। [त्रार्थे अमरे पाठान्तरम्।

सत्त्रम् अव्य० सद्-त्रक्। १सहार्थे सदा०। त्रा। सत्त्राय-

सत्त्रशाला स्त्री ङीप्। अन्नसत्रादेर्दानार्थे कल्पिते गृहे हेमच०। [श्रीजगन्नाथपुरे सत्त्रभोजनके राजभेदे।

सत्त्राजित् पु० सत्त्रेणाजयति लोकान् आ+जि-क्विप्।

सत्त्रि पु० सद-त्रा० त्रि। १मेषे २गजे ३जयशीले त्रि० उणादिकोषः। [अमरः २गृहस्थे च।

सत्त्रिन् पु०सत्त्रं गृहं यज्ञो वा विद्यतेऽस्य इनि। १गृहपतौ

सत्त्व न० सतोभावः त्व। १सांख्यसिद्धे प्रकाशादिसाधने प्रकृतिपरिणामे पदार्थे प्रकृतिशब्दे दृश्यम्"सत्त्वं बलु प्रकाशकमदः"सां०का०। अयं द्वितीयकारः पृथो० एकतकारः। २द्रव्ये ३प्राणेषु ४व्यवसाये ५बले ६क्षमाये ७पिशाचादौ शब्दच० दर्शिते मेदि० "सत्त्वे तप्यमाने तत्संक्रान्तः दुरपोऽपि तप्यत इव" पात० भा०। ८रसे १०आयुषि ११धने। १२आत्मनि च शब्दच० १३सत्ताख्ये १४जातिभेदे १५विद्यमानतायाञ्च हितकारः। १६जन्तुषु पु०न० अमरः।

सत्पत्त्र न० सत् शोभनं पत्त्रम्। १पद्मस्य नवदले शब्दच०। कर्म०। २सुन्दरदले त्रि०। [विहितआचारे च।

सत्पथ पु० कर्म० अच्समा०। शोभनमार्गे अमरः २वेदादि०

सत्पुत्त्र पु० कर्म०। वेदादिविहितकार्य्यकर्त्तरि पुत्त्रे "पुन्नाम्नो नरकाद् यस्मात्त्रायते पितरं सुतः। तस्मात्पुत्त्र इति प्रोक्तः स्वयमेव स्वयम्भुवा" इत्यस्मात्पुनरकतारकत्वाय "अथमस्मिन् सत्त्रयति अमृतत्वञ्च विन्दति। पिता पुत्त्रस्य जातस्य पश्येच्चेज्जीवतो मुखम्" इति वसिष्ठोक्तौर्ध्वदैहिकाय च यत् पश्येदिति नियमविधानं तत्कृतपुत्त्रकार्य्यपुत्त्रपरम्। सत्पुत्त्रस्तु सन्दर्शनं विनापि नरकनिस्तारकः। तथा च विष्णुपु० "सत्पुत्त्रेण ह जातेन वेनोऽपि त्रिदिवं ययौ। पुन्नाम्नो नरकात्त्रातः स तेन सुमहात्मना"। ब्रह्मपुराणेऽपि "सत्सत्पुत्त्रेण भो विप्राः सत्पुत्त्रेण महात्मना। त्रातः स (वेनः)पुरुषव्याघ्रः पुन्नाम्नो नरकात्तदा" शु०त०।

सत्प्रतिग्रह पु० सत्प्रः प्रतिग्रहः। साधुदत्तधनस्य प्रतिग्रहे "सप्त वित्तागमा धर्म्या दायोलाभः क्रयोजयः। विभागः सम्प्रयोगश्च सत्प्रतिग्रह एव च" इति स्मृतिः।

सत्प्रतिपक्ष पु० कर्म०। तुल्यविरोधिनि १प्रतियोगिनि २न्यायोक्ते हेत्वदोषे हेत्वाभासभेदे। स च बाधोपस्थिति समर्थपरामर्शकालीनसाध्यविशिष्टसमर्थपरामर्शविषयः। यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते सः। यथा शब्दो नित्यः श्रावणत्वाच्छब्दत्ववत्। शब्दोऽनित्यः कार्य्यत्वात्

घटवत्। अन्ये तु अगृहीताप्रामाण्यकसाध्यवत्त्वेनोपस्थितिविषय इति वदन्ति। साध्याभावव्याप्यवत्पक्षः। साध्यवदन्यत्वव्याप्यवत्पक्षः। पक्षनिष्ठः साध्याभावव्याप्यः पक्षनिष्ठः साध्यवद्भेदव्याप्यो वा। साध्यवदवृत्तित्व्याप्यवत्पक्षः। पक्षनिष्ठः साध्यवदवृत्तित्व्याप्यः। पक्षवृत्त्यभावप्रतियोगित्वव्याप्यवत्साध्यम्। साध्यनिष्ठः पक्षवृत्त्यभावप्रतियोगित्वव्याप्यो वा। "विरुद्धयोः परामर्शौ हेत्वोः सत्प्रतिपक्षिता" भाषा०। तुल्यबलयोरेव सत्प्रतिपक्षत्वं नातुल्यबलयोः तेनैकतरत्र तर्कादिबलवत्त्वे तस्यैवान्यतरबाधकतेति बाध्यम्।

सत्फल पु० सन्ति शोभनानि फलान्यस्य। १दाडिमवृक्षे शब्दच०। २शुकवृक्षे त्रि०।

सत्य न० सते हितं यत्। १सत्ययुगे २शपथे ३याथार्थ्ये च ४तद्वति त्रि० मेदि०। "यथार्थकथनं यच्च सर्वलोकसुखप्रदम्। तत् सत्यमिति विप्रेन्द्र यमसत्यं तद्विपर्ययः" पद्मपु० सर्वलोकसुखप्रदमिति न लक्षणघटकं सत्यस्याप्रियत्वे कथननिषेधात् अतएव मनूक्तं "सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम्"। ५अश्वत्थवृक्षे ६नान्दीमुखश्राद्धीयदेवभेदे च पु०"दृष्टिश्राद्धे कृतदेवः सत्यो नान्दीमुखे वसुः" श्रा०त०धृतवचनम्। ७सिद्धान्ते शब्दर०। अफलरूपसत्यापाकने दोषो यथा "ज्ञात्वा अफलरूपं यः सत्यं दूषयति न पालयेत्। स कृतघ्नः कालसूत्रे वसेदेव चतुर्युगम्। सप्तजन्मसु काकश्च सप्तजन्मसु पेचकः। ततः शुद्धो मनुष्येषु सप्तजन्मसु धर्मिकः" ब्रह्मवै० प्र० ३८अ०। ८परमात्मनि "सत्यं ज्ञानमानन्दं ब्रह्मेति" श्रुतिः। ९क्षीरोदे पु० शब्दर०। १०विष्णौ "क्षीरमेऽप्यन्तरे विष्णुः सत्यैः सप्तभिरीश्वरैः। सत्यायामभवत् सत्यः सत्यरूपो जनार्दनः" कूर्मपु० ४८अ०। ११तन्मातरि स्त्री। १२तपोलोकादूर्द्ध्वे लोके सत्यलोकशब्दे दृश्यम्। सन्ति पृथिव्यप्तेजांसि च त्रयो वाय्वाकाशौ च समाहृतिं निगच्छ समाहृतिकारः। १३भूतपञ्चके "सच्च त्यच्च भूतपञ्चकं तत् सत्यमित्याचक्षते" श्रुतिः। सत्यत्वञ्च त्रिकालाबाध्यत्वमिति वेदान्तिनः यथार्थज्ञानविषयत्वं सत्यत्वमिति नैयायिकाः। सन्धिसन्ध्यांशाभ्यां सहितसत्ययुगमानं दैवमानेन १२०० वर्षाः मानुषमानेन १७२८०० वर्षाः।

सत्यङ्कार पु० सत्य+कृ-घञ् त्रि० समा०। "मयैतत् सत्यमेवं कुर्यमित्येवम्" सत्यकरणे सत्यापने (वाक्यादेरोथा) अमरः

सत्यतपस् पु० सत्यं तपोऽस्य। मुनिभेदे तस्यैव दुर्वाससो वरेण वेदव्यासरूपेणाविर्भावः तत्कथा वराहपु०।

सत्यधृति पु० शतानन्दपुत्रे ऋषिभेदे मत्स्यपु० ४८अ०।

सत्यनारायण पु० कर्म०। संकल्पादिषु पूज्ये नारायणमूर्त्तिभेदे स्कन्दपु० रेवा० ३अ० तत्कथा दृश्या।

सत्यपुर न० सत्ययुक्तं पुरम्। विष्णुलोके।

सत्यफल पु० सत्यं सदातनं फलमस्य। बिल्ववृक्षे राजनि०।

सत्यभामा स्त्री सत्राजितोऽपत्यतायां श्रीकृष्णस्य भार्याभेदे शब्दच०।

सत्यभारत पु० वेदव्यासे त्रिका०।

सत्यम् अव्य० सत्+यञ्। स्वीकारे।

सत्ययुग न०सत्यप्रधानं युगम् शाक० त०। सत्यप्रचुरे प्रथमे युगे

सत्ययोवन पु०सत्यं यौवनमस्य। विद्याधरे देवयोनिभेदे जटा०

सत्यरत त्रि० ७त०। सत्यवाक्यासक्ते हरिश्चन्द्रनृपतिवरि पु० मत्स्यपु० १२अ०।

सत्यलोक पु० सत्यप्रचुरो लोकः। ऊर्द्ध्वस्थसप्तलोकमध्ये सर्वोपरिस्थे तपोलोकादूर्द्ध्वे लोके।

"अष्टगुणेन तपोलोकात् सत्यलोको विराजते। अपुनर्मारका यत्र ब्रह्मलोकाभिधः स्मृतः" विष्णुपु०२अं ७अ०

सत्यवचस् पु० सत्यं वचोऽस्य। १मुनौ अमरः। २सत्यवचनयुक्ते त्रि०। सत्यवचनादयोऽस्य।

सत्यवत् पु० सत्यं विद्यतेऽस्य मतुप् मस्य वः। १सावित्रीपतौ नृपभेदे भा०व०२८१अ०। २मुनिभेदे च। ३सत्ययुक्ते त्रि० स्त्रियां ङीप्। सा च ४व्यासस्य मातरि शब्दर०। ५नारदपत्न्यां ६ऋषीकसुनिपत्न्यां मेदि० जाह्निकापु० ८४अ०। [शब्दर०।

सत्यवतीसुत पु० ६त०। सत्यवत्यपत्ये व्यासे मुनिभेदे

सत्यवाच् पु० सत्या वाक् यस्य। १ऋषौ शब्दच०। २काके त्रिका०। तस्य शब्देन हि शुभाशुभनिमित्तेन तस्य तथात्वम। ३सत्यवदनशीले त्रि०। [वक्तरि।

सत्यवादिन् त्रि० सत्यं वदति वद-णिनि। यथार्थवक्तरि

सत्यव्रत पु० सत्यं व्रतमस्य। १त्रिशङ्कुनामके राजभेदे मत्स्यपु० १२अ०। २सत्यतत्परे त्रि०। [२सत्यप्रतिज्ञे त्रि०

सत्यसङ्गर सत्यः सङ्गरः प्रतिज्ञा यस्य। १कुबेरे त्रिका०।

सत्यसन्ध त्रि० सत्या सन्धा सन्धानं यस्य। १सत्याभिसन्धौ सत्यसन्धश्च तत्परशुपञ्चकं छान्दोग्ये दर्शितम्

२श्रीरामे ३तदनुजे भरते ४जनमेजयसर्पे च पु०शब्दर०।

सत्या स्त्री १रामपत्न्यां २व्यासमातरि सत्यवत्यां शब्दर०। ३दुर्गायां ब्रह्मवै०पु० प्र०। ४द्रौपद्यां शब्दच०।

सत्याकृति स्त्री० सत्य+डाच्+कृ-क्तिन्। (सत्यमेतन्नाम्ना-कृत्यम्) दत्तेर्द प्रतिज्ञारूपे सत्यकरणे (शपथादेर्वा) अमरः।

सत्याग्नि पु० द्वि०। अग्निष्टुतौ मन्त्रभे। तच्छ्रवणानन्तरं संसदूर्दिसर्वमन्त्रणेऽपि अग्न्याधित्वात् तथात्वम्। [अमरः

सत्यानृत न० सत्यसहितमनृतं यत्र। वणिग्व्यवहारे वाणिज्ये

सत्यापन न० सत्य+णिच्-ल्युट्। सत्याकृतौ अमरः युच्। सत्यापनाप्यत्र स्त्री।

सत्यीय त्रि० सत्यस्येदं यत्र यद्-छप्। १सत्यवादिनि शब्दमाला। कर्म०। २सत्यवाक्ये न०।

सत्र सत्यन्ते सत्तौ च यद०चु०आ०सक०सेट्। सत्रयते अस-सत्रत। सत्रापयते दत्तवते अनेकाच्कत्वात् अभोपदेशत्वेन सति निमित्ते न सत्वम्।

सत्र न० सत्रयते सत्तन्यते सत्र-अच् घञ्। १यज्ञदर्शनसाध्ये यज्ञभेदे २श्रीकृष्णश्वशुरे नृपभेदे च।

सत्राजित् पु० सत्रेभ्यो जयति ताकान् आ+जि-क्विप्। श्रीकृष्णश्वशुरे राजभेदे।

सत्रिजातक न० पक्वमांसभेदे "मांसं बलवते भद्रं सिक्तं क्षोणाम्बुना सदा। जीरकाद्यैः समायुक्तं परिशुष्कं तदुच्यते। तदेव एततकाढ्यं सस्निग्धं सत्रिजातकम्" [अमरः। शब्दर०।

सत्वर न० सह त्वरया सहस्य सः। १शीघ्रे २त्वरान्विते त्रि०

सत्वूत्कार न० सह त्वूत्कारेण सहस्य सः। अत्वूत्कृते सन्निधेये कर्मणे। [२दंशयुक्ते त्रि०।

सदंशक पु० सह दंशेन सहस्य सः कप्। १कर्कटके राजनि०

सदंशवदन पुंस्त्री० सह दंशेन दंशाकारेण सहस्य सः तथाभूतं वदनमस्य। कङ्कविहङ्गे राजनि० स्त्रियां ङीष्।

सदक्षन न० कर्म०। पुष्पाञ्जने रीतिज्ञाते अञ्जनभेदे शब्दच०।

सदन न० सीदत्यस्मिन्+सद-आधारे ल्युट्। १गृहे अमरः। २जले मेदि०। भावे ल्युट्। ३स्थितौ न०।

सदय पु० सह दयया सहस्य सः। १साधुशुभावहविधौ। सह दयया। सहस्य सः। २दयान्विते अमरः।

सदस् स्त्री न०। सीदत्यस्याम् सद-असि। सभायाम् अमरः

सदस्य पु० सदसि साधुर्भवति वा यत्। यज्ञादौ न्यूनातिरिक्तताविषर्ययपरिहारार्थं १विधानदर्शिनि अमरः। २सभासदि त्रि० अमरः। [दत्तर्द अमरः।

सदा अव्य० सर्वस्मिन् काले दा-क्विप् सादेशः। सर्वस्मिन् काले

सदागति पु० सदा गतिरस्य। १वायौ २सर्वदागतियुक्ते त्रि० ३दक्षर्द ४निर्याणे ५सदाचरे मेदिनिकोषकारः।

सदाचार पु० कर्म० ६त० वा "सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम्। तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते। तस्मिन् देशे य आचारः पारम्पर्यक्रमागतः। वर्णानां सान्तरालानां स सदाचार उच्यते" इति मनूक्तदेशप्रचलिते आचारे "साधवः क्षीणदोषाश्च सच्छब्दः साधुवाचकः। तेषामाचरणं यत्तु सदाचारः स उच्यते" इत्युक्ते साधूनां शुभाचरणे च। सदाचारनिरूपणम् आचारशब्दे ६१२ पृ० दृश्यम्। विप्रस्य चातुराश्रम्यसङ्ख्या "गार्हस्थ्यं ब्रह्मचर्यञ्च वानप्रस्थं तथाश्रमाः। क्षत्रियस्यापि गदिता य आचारो द्विजस्य हि। वैशानसत्वं गार्हस्थ्यमाश्रमहितयं विशः। गार्हस्थ्यादुत्तमं त्वेकं न्यूनस्य सदाचार!। स्नानं वर्णोचितानि धर्मांश्चोक्तान न हापयेत्। यो हापयति तस्यासौ परिकुप्यति भास्करः। कुपितः कुलनाशाय देहरोगविवृद्धये। वह्नौ पतति तस्य नरस्य सदाचार!। तस्मात् स्वधर्मं न हि सन्त्यजेच्च न हापयेच्चापि तथात्मवंशम्। यः सन्त्यजेच्चापि निजं हि धर्मं तस्यै प्रकुप्येत दिवाकरश्च" वामनपु० १४अ०। [२नित्ये त्रि० अमरः स्त्रियां ङीप्।

सदातन पु० सदा भवः सदा+श्युन् तुट्च्। १विष्णौ त्रिका०

सदातोया स्त्री सदा तोयानि पेयानि यस्याम्। १करतोयानद्याम् २एलापर्ण्यां च शब्दच०। सदानीराशब्दे दृश्यम्

सदात्मन् त्रि०बहु० साधुरात्मा चित्तं यस्य। साधुचित्ते।

सदादान पु० सदा दानं मदजलं स्रावो वा यस्य। १ऐरावते गजे २गणेशे ३गजे मेदि० ४सर्वदात्यागिनि त्रि०।

सदानन्द पु० सदा आनन्दो यस्य। १सदाशिवे २अनवरतानन्दयुक्ते त्रि०।

सदानर्त्त पुंस्त्री० सदा नृत्यति नृत-अच्। १खञ्जनविहङ्गे शब्दच० स्त्रियां ङीष्। २सदा नृत्ययुते त्रि०।

सदानीरा स्त्री सदा नीरं पेयमस्याः। करतोयानद्याम् अमरः। "अथादौ कर्कटे देवी तत्रैव गङ्गा रजस्वला। सर्वा रक्तवहा नद्यः करतोयाम्बुवाहिनी" स्मृतेः तन्नदीजलस्य सदापेयत्वात् तद्धास्यात्वम्।

सदापुष्प पु० सदा पुष्पं यस्य। १नारिकेलवृक्षे शब्दमा० २रक्तार्के स्त्री रत्नमा० ङीप्। ३सदापुष्पयुक्ते त्रि०।

सदाप्रसून पु० सदा प्रसूनमस्य। १रोहितकवृक्षे २कर्कटवृक्षे ३कुन्दे च राजनि०।

सदाफल पु० सदा फलमस्य। १नारिकेलवृक्षे २कुष्माण्ड-

ह्वले २क्लान्दफलवृक्षे च मेदि० । ४बिल्वे अटा० । ५वा-
क्षीभेदे स्त्री राजनि० टाप् । "सदाफला त्रिदोषघ्नी
रक्तपित्तप्रसादनी । कण्डूकफ्फूडरी चैव वार्त्ताकी
गुणवत्तमा" राजव० ।

सदाभद्रा स्त्री सदा भद्रमस्याः ५ब० । गाम्भारीवृक्षे रत्नमा० ।

सदायोगिन् पु० सदा युज्यते युज्-घिनुण् । १विष्णौ त्रिका०
२सदायोगयुते त्रि० स्त्रियां ङीप् ।

सदाशिव पु० सदा शिवमस्मात् ५ब० । महादेवे ।

सदुत्तर न० कर्म० । १व्यवहारे प्रतिज्ञापत्त्रानुसारिण्युत्तरे
पृष्टस्य २सम्यगुत्तरे च । ३ब० । ४तद्वति त्रि० ।

सदृक्ष त्रि० समानं दर्शनमस्य दृश+क्स समानस्य सादेशः ।
तुल्यरूपे अमरः । [तुल्यरूपे अमरः ।

सदृश् त्रि० समानं दर्शनमस्य समान+दृश-क्विप् सादेशः ।

सदृश त्रि० समानं दर्शनमस्य समान+दृश-टक् । तुल्यरूपे
स्त्रियां ङीप् । [३ब० । निष्यन्दे त्रिका० ।

सदृशस्यन्दन त्रि०अश-गतौ क सत् ऋशं गतं स्यन्दनं यस्मात्

सदेश पु० सह देशेन सदृश्य सः । १निकटे अमरः २देशा-
न्विते त्रि० ।

सद्धेतु पु० कर्म० । न्यायोक्ते हेत्वाभासदोषरहिते हेतौ ।
पक्षसत्त्वं१ सपक्षसत्त्वं२ विपक्षासत्त्वं३ अबाधितविषय-
त्वं४ असत्प्रतिपक्षितत्वं५ इति पञ्चरूपोपपन्नो हेतुः स-
द्धेतुः "व्याप्त्यादिविशिष्टो हेतुः सः" नीलकण्ठः "प्रमि-
तव्याप्त्यिपक्षताको हेतुः सः" गदा० । २वृत्तिमद्धेतौ च
"अव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिमाशङ्क्याह" दीधितिः ।
अत्र सद्धेतौ वृत्तिमति हेतावित्यर्थः गगनादेः संयोगेन
वृत्तिमत्त्वाभावात् तत्राव्याप्तिर्न सम्भवतीत्युक्तं सदिति ।

सद्भाव पु० सतोभावः, सत् वा भावः । १विद्यमानत्वे २सा-
धुभावे च "सद्भावमागतः" इति भट्टिः ।

सद्भूत न० अस्त सत् भूतम् सत्+क्विप्-भू-क्त । १यथार्थे
२तद्वति त्रि० हेमच० । [च मेदि० ।

सद्मन् न० सीदत्यस्मिन् सद्-मनिन् । १गृहे अमरः २जले

सद्यःकृत त्रि० सद्यस्तत्क्षणात् कृतः कृ-क्त । तत्क्षणकृते ।

सद्यःप्राणकर त्रि० सद्योहठात् प्राणं बलम् आयुर्वा हिंसु
करोति कृ-अच् । "सद्योमांसं नवान्नं च बाला स्त्री
क्षीरभोजनम् । हतस्योदकजीवे सद्यःप्राणकराणि षट्"
इति चाणक्याक्ते द्रव्यसमूहे ।

सद्यःप्राणहर त्रि०सद्यः प्राणमायुर्बलं वा हरति हृ-अच् ।
"शुष्कं मांसं स्त्रियो दृष्ट्वा बालार्कस्तरुणं दधि । प्रभाते
मैथुनं निद्रा सद्यःप्राणहराणि षट्" इति चाणक्योक्ते
शुष्कमांसादिद्रव्यसमूहे । [गन्धच०

सद्यःशोणा स्त्री सद्यः शोणो यस्याः ५ब० । कपिकच्छाम्

सद्यःशौच न० सद्यः शौचमनेनयमशौचम् । १क्षत्त्रियादौ
शौचप्राप्ते अशौचे ६ब० । २तद्वति त्रिलिङ्गपक्षेत्रि-
यादौ त्रि० । अशौचशब्दे ४८८ पृ० दृश्यम् ।

सद्यस् अव्य० समेऽह्नि नि० । १तत्क्षणे अमरः । २समान-
दिवसे एकस्मिन् दिने इत्यर्थे च ।

सद्यस्क त्रि० सद्योभवः कन् कस्का० । सद्योजाते ।

सद्यस्क्री पु० सद्यःक्रीणाति सोमम् यत्र क्री-आधारे क्विप्
कस्का० । सद्यःसोमक्रयसाध्ये यागभेदे "एकरात्रोऽति-
रात्रः सद्यस्क्रीः प्रक्रीरन्यः" अथर्व० ११।७।१०। नाना-
यज्ञोक्तौ । भावे क्विप् । २सद्यस्क्रये स्त्री । तया साध्यः
अण् । साद्यस्क्र सद्यःसोमक्रयेण एकाहसाध्ये यज्ञभेदे ।
"साद्यस्क्राच्च षट्" कात्या०श्रौ०२२।२।८। उक्ता यथा "षट्
साद्यस्क्राः" सू० "स्वर्गकामपशुकामभ्रातृव्यवता प्रथमः"
सू०। साद्यस्क्र एकतन्त्रभवति । "दीर्घव्याधिप्रतिष्ठाकामा-
द्याद्यकामानां द्वितीयः" सू०। साद्यस्क्रोऽ भवति एवा-
मक्षाधिकारः । "क्षीनस्यानक्रीः" सू० अक्रीनांमऽ
साद्यस्क्रः स क्षीनस्य भवति यः कर्मणा क्षीन तस्मात्सो
भवति । "विश्वजिच्छित्यः" सू० नाम साद्यस्क्रः४ ।
"श्येनोऽभिचरतः" सू० श्येनोऽ नाम साद्यस्क्रः पञ्चमः
सोऽभिचरतो भवति । "एकत्रिंशः" सू०षडः६ साद्यस्क्रः ।
तत्र षट् प्रकृतयः दक्षिणा । साद्यस्क्रधर्माः व्याख्या-
स्यन्त इति सूत्रभेदः । दीक्षादि सद्यः सर्वं क्रियते"
भाष्यम् तास्ताम्रा० भाष्ये चोक्तं यथा

अथ साद्यस्क्रा नाम पञ्च एकाहाङ्गेषु प्रथमदितो-
ययोर्दीक्षाप्रभृत्यवभृथान्तं, सर्वमेकस्मिन्नेवाहन्यनु-
क्रमेण क्रतोरस्य तु एकस्मिन् दिवसे दीक्षा परस्मिन्
दिवसे सोमक्रयाद्यवभृथान्तं, चतुर्थपञ्चमयोरप्येवं यद्वा
एका दीक्षा सोमक्रयप्रभृति उपवसथान्तं द्वितीयेऽहनि
सुत्येति एवं सूत्रकारमतं पञ्चस्वपि साद्यस्क्रान्वयात्
सद्य एव एकस्मिन्नेवाहनि दीक्षाद्यवभृथान्तं कर्त्तव्य-
मिति मतान्तरम् । एतत्सर्वं साद्यस्क्रेण यक्ष्यमाणे म-
हाराजे प्रातराहुतिं हुत्वेत्यादिना सूत्रकारेण विस्प-
ष्टीकृतम् । तत्र प्रथमस्य यद्वृत्तं सर्वं सद्योऽनुष्ठेयमिति
तद्विधित्सुराह "आदित्यावाङ्गिरसश्चादीक्षन्त ते स्वर्गं
लोकमायन्त तेऽङ्गिरस आदित्येभ्यः स्व सुत्यां प्राब्रुवं

स आदित्या एतमपश्यंस्ते सद्यः परिक्रीयायाहरन्तद्वा-तारं कृत्वा तेन स्तुत्वा स्वर्गं लोकमायन्नङ्गीरसानाङ्गि-रसः" ताण्ड्य॰ब्रा॰ १६।१२।१। "ऊरा आदित्याश्चाङ्गि-रसश्च यदीजान यज्ञाय दीक्षां ऋतवन्तः ते वयं स्वर्गं लोकं स्वर्गलोकमित्तमस्यर्द्धन्त वयं प्रथमं समिष्ट्यामो वयं प्रथमं समिष्याम इति स्पर्द्धां ऋतवन्तः एवं स्पर्द्ध-मानाश्चाङ्गिरस आदित्येभ्यः स्तुत्वा यः परश्वोदीक्षा-नन्तरदिने क्रियमाणं सोमयागं प्राप्नुवन् प्रोक्तवन्तः यत ते आदित्या एवं वज्रमाणयज्ञमपश्यन् तं यज्ञं सद्यः एकस्मिन्नेवाहनि परिक्रीय सोमं क्रीत्वा यज्ञाय ऋत्विग्वरणं कृत्वा स्तावयित्वा समापयन् दीक्षादारभ्य-यावत् सर्वं कर्म एकस्मिन्नेवाहनि अन्तर्वेदिस्थित्यर्थं। यज्ञसमाप्त्यनन्तरमेव ते स्वर्गलोकमायन् प्राप्नुवन् आ-ङ्गिरसस्तूदीच्यां दीक्षानन्तरदिवसे स्तुवन्ति तैरुक्तत्वात् एतस्मिन् दिने दीक्षादारभ्यावभृथान्तं सर्वस्यानुष्ठानेन स्वर्गप्राप्त्यभावात् दीक्षितैरादित्यैः सद्योऽनुष्ठानेन स्वर्ग-गतैः क्षीणाः भूमावेव परित्यक्ता आसन्" भा०।

सद्योजात पु॰ सद्योजायते जन-कर्त्तरि क्त। १वह्नौ शब्दच॰। २शिवमूर्त्तिभेदे च ३आशुजाते त्रि॰।

सद्योभाविन् पु॰ सद्योभवति भू-णिनि। १वह्नौ शब्दच॰। २आशुजाते त्रि॰। स्त्रियां ङीप्।

सद्रु त्रि॰ सद-गतौ रु। अलरि सि॰कौ॰।

सद्वृत्त न॰ शोभने वृत्ते कर्म॰। १साधुस्वभावे जटा॰ २साधु-वर्त्तने। हेम॰। ३सच्चरित्रयुते त्रि॰। "सद्वृत्तसच्चिकर्षो हि कथार्द्धमपि प्रस्तुते" इति ति॰त॰।

सद्वृत्ति स्त्री कर्म॰। १उत्तमचरित्रे २उत्तमव्याख्यानरूपे पन्थे च सती वृत्तिः यस्य। ३सद्वृत्तियुते त्रि॰ "सद्-वृत्तिः सच्चिकर्षेति" माघः। [सदभे स्त्रियां वा ङीप्।

सधर्मन् त्रि॰समानो धर्मोऽस्य अनिच् समा॰ समानस्य सः।

सधर्मचारिणी स्त्री सह धर्मं चरति चर-णिनि। सह-धर्मकारिण्यां भार्यायां हला॰।

सधर्मिन् त्रि॰ समानं धर्मं चरति इनि। १तुल्यधर्मचरण-कर्त्तरि। स्त्रियां ङीप्। सा च २पत्न्यान्तु हेमच॰ [जटा॰

सधवा स्त्री सह धवेन सहस्य सः। जीवत्पतिकायां स्त्रियां

सधि पु॰ साधयति साधि-इन् पृषो॰ हस्वः। वह्नौ त्रिका॰।

सधिस् पु॰ सह-इसिन् हस्य धश्च। इसमे त्रि॰कौ॰।

सध्र्यच् त्रि॰ सह-अञ्चति अनुच-क्विप् सहस्य सधिः। १सहचरे अमरः मते सधीचः। स्त्रियां ङीप् सधीची सा च २भार्यायां ३समाजे हेमच॰। [समाजे शब्दच॰।

सन पु॰ सन-अच्। १धनदाने त्रिकाण्ड॰। २क्षान्तिकर्त्तरि

सनक पु॰ सन-वुन्। ब्रह्मणो मानसपुत्रे मुनिभेदे

"भगवज्ज्ञानपूतेन मनसाऽन्वांस्ततोऽसृजत। सनकञ्च सनन्दञ्च सनातनमथात्मभूः। सनत्कुमारञ्च मुनीन् नि-ष्क्रियानूर्द्धरेतसः। तान् बभाषे स्वभूः पुत्रान् प्रजाः सृ-जत पुत्रकाः!। तन्नैच्छन्मोक्षधर्मांशो वासुदेवपरायणाः" भाग॰ ३।१२ अ॰ "धर्मस्य भार्यां हिंसाख्यां तस्यां पुत्रचतुष्टयम्। सस्मात्रं मुनिशार्दूलं योगशास्त्रविचा-रकम्। ज्येष्ठः सनत्कुमारोऽभूत् द्वितीयश्च सनातनः। तृतीयः सनको नाम चतुर्थश्च सनन्दनः" वामनपु॰ ५७। ५८अ॰ तत्रैव धर्मपुत्रभेदे। [अस्य॰ रामाश्रमः।

सनत् पु॰ सन-अति। १चतुर्मुखे ब्रह्मणि त्रिका॰ २सदेत्यर्थे

सनत्कुमार पु॰ ६त॰। ब्रह्मणः पुत्रे मुनिभेदे अमरः। तस्य नित्यकुमारत्वादपि तथात्वता यथोक्तम्

"रुद्रैः पूर्वञ्च वयसा यथैव पञ्चहायनः। ऋचूर्द्धोऽनु-पवीतश्च वेदसम्प्लावितोऽकः। ब्रह्मेति मन्त्रं जपति यस्य नारायणो गुरुः। अनन्तकालकल्पञ्च भ्रातृभिश्च त्रिभिः सह। वैष्णवानामग्रगीयो ज्ञानिनाञ्च गुरोर्गुरुः" ब्रह्मवै॰ श्रीकृष्णजन्मख॰ १२६अ॰। [न्दयुक्ते त्रि॰।

सनन्द पु॰ सह नन्दनेन। १सनकशब्दोक्ते मुनिभेदे २आन-

सनपर्णी स्त्री सनस्येव पर्णान्यस्याः ङीप्। अस्य पर्णी शब्दच॰

सनसूत्र न॰ शणस्य सूत्रमस्यस्य अच् पृषो॰। मतङ्गधार-णार्थं शणसूत्रकृते जाले अमरे पाठान्तरम्।

सना अव्य॰ सदा-नि॰ दस्य नः। सदेत्यर्थे अमरः।

सनातन त्रि॰ सदा+भवार्थे खुञ् तुट् च नि॰ दस्य नः। १सदाभवे नित्ये वस्तुनि अमरः। २नित्ये विष्णुः। स्त्रियां ङीप्। सा च ३दुर्गायां "सर्वकाले सना प्रोक्ता विद्य-माने तनीति च। सर्वत्र सर्वकालेषु विद्यमाना सनातनी" ब्रह्मवै॰प्र॰ ५३अ॰। तत्रामनिरुक्तिः। ४सरस्वत्यां ५ब्र-ह्मण्यां च शब्दमा॰। हृत्थिवे ७विष्णौ ८ब्रह्मणि ९दिव्यमनुष्ये ब्रह्मणोमानसपुत्रभेदे १०पितृणामग्निष्वा च पु॰ हेमच॰।

सनात् पु॰ सना नित्यमत्ति अत-क्विप्। विष्णौ विष्णुस॰ सदेत्यर्थे अव्य॰अमरटीकायां रामाश्रमः। [स्त्रियां स्त्री।

सनाथ त्रि॰ सह नाथेन बहुव्री स॰। १युक्ते २ओषद्भूर्ण क॰

सनाभि पु॰ समाना नाभिर्यस्य। १भ्रातरि अमरः। तस्य एकदेहोत्पन्नत्वेन तुल्यनाभितया तथात्वम्। २समा-युक्ते ३सदृशे ४तुल्ये च त्रि॰ मेदि॰।

सनामक पु० सना सदा अमयति अम-ण्वुल्। १शोभाञ्जनवृक्षे शब्दच०। तस्य पत्रादिभोजनस्य रोगहेतुत्वात्तथात्वम्। सह नाम्ना कप्। २नामयुक्ते त्रि०।

सनि पु० सन-भावे क्तिन्। १पूजायां २दाने च त्रि०कौ०। ३सतकारपूर्वकनियोगे पुंस्त्री० अमरः स्त्रियां वा ङीप्। ४जीवनः हस्तिकर्णस्फोटे शब्दर०५दिशि स्त्री शब्दमा०

सनित त्रि० सन-क्त० इत। प्रतिपन्ने हेमच०।

सनिष्ठी(ष्टे)व न० सह निष्ठी(ष्टे)वेन। १सक्तखच्युत्वारिकणे सघूत्कारे अमरः।

सनीड त्रि० समानं नीडं यस्य नीडेन वा सादेशः। १निकटस्थे अमरः। २नीडयुक्ते त्रि०।

सन्त पु० सन-क्त०। संहतले शब्दर०।

सन्तत न० सम्+तन-क्त। १सततते निरन्तरे। २नैरन्तर्ययुते त्रि० अमरः ३विस्तीर्णे च।

सन्तति स्त्री सन्तन्यते सम्+तन-क्तिच्। १ओजे अमरः। २पुत्रे ३कन्यायाञ्च विश्वः। भावे क्तिन्। ४विस्तारे ५प्रबन्धे ६अविच्छिन्नधारायाञ्च विश्वः।

सन्ततिस्तु दैशिकी कालिकी च। तत्र दैशिकी तैलादीनां, कालिकी प्रानसुखादीनाम्। तत्र दैशिकसन्ततित्वं स्वाधिकरणदेशीयनानावच्छेदकवृत्तिधर्मत्वं तच्च मूलांशानामेव कालिकसन्ततित्वन्तु नानाकालीनकार्य्यमात्रवृत्तिधर्मत्वम्, वृक्षत्वादे सङ्गतेः तच्च मूलांशूर्ध्वावरतएव इत्थं दुःखप्रानादिसन्ततिर्भवतीति तदुक्तं तत्रैव "दैवदत्तवृत्तिदुःखत्वं दुःखत्वं वा स्वाश्रयसमानकालीनध्वंसप्रतियोगिवृत्तिकार्य्यमात्रवृत्तिधर्मत्वात् सन्ततित्वादित्युक्ता सन्ततित्वं च नानाकालीनकार्य्यमात्रवृत्तिधर्मत्वमित्युक्तम्।

सन्तप्त त्रि० सम्+तप-क्त। १अध्वगत्वादिना परिश्रान्ते २अग्नितप्ते ३तेन विशुद्धे च "सन्तप्तचामीकरवद्यु वर्ज्जमिति भट्टिः।

सन्तमस न० सन्तं तमः प्रा०स० अच् समा०। १गाढान्धकारे अमरः। २महामोहे च मोहस्य सर्वावरत्वात् तमस्त्वेन महामोहस्य गाढान्धकारकल्पत्वात्तथात्वम्।

सन्तर्पण न० सन्तृप्यत्यनेन सम्+तृप-करणे ल्युट्। "द्राक्षा दाडिमखर्जूरीशर्करामधुसंयुतम्। लाजाचूर्णन्तु साज्यं यत् तच्च सन्तर्पणं विदुः" राजनि० उक्ते द्राक्षादिभिर्युते लाजाचूर्णे खाद्यभेदे। सम्+तृप-णिच् ल्यु। २सम्यक्तर्पके त्रि०। [इत्थे २अपत्ये ४विस्तारे च मेदि०।

सन्तान पु० सम्+तन-घञ्। १वंशे अन्वये अमरः। २कल्पवृक्षभेदे ३यज्ञे ४विस्तारे ५प्रबन्धे ६अविच्छिन्नधारायाञ्च विश्वः। सन्ततिवत् दैशिकी कालिकी च। तत्र दैशिकी तैलादीनां, कालिकी प्रानसुखादीनाम्। तत्र दैशिकसन्ततित्वं स्वाधिकरणदेशीयनानावच्छेदकवृत्तिधर्मत्वं तच्च मूलांशानामेव कालिकसन्ततित्वन्तु नानाकालीनकार्य्यमात्रवृत्तिधर्मत्वम्, वृक्षत्वादे सङ्गतेः तच्च मूलांशूर्ध्वावरतएव इत्थं दुःखप्रानादिसन्ततिर्भवतीति तदुक्तं तत्रैव "दैवदत्तवृत्तिदुःखत्वं दुःखत्वं वा स्वाश्रयसमानकालीनध्वंसप्रतियोगिवृत्तिकार्य्यमात्रवृत्तिधर्मत्वात् सन्ततित्वादित्युक्ता सन्ततित्वं च नानाकालीनकार्य्यमात्रवृत्तिधर्मत्वमित्युक्तम्।

सन्तानिका स्त्री सम्+तन-ण्वुल् टाप् अत इत्वम्। १क्षीरसरे "सन्तानिका गुरुः शीता हृद्याः पित्तास्रवातजित्" राजव०। २मर्कटजाले ३फेने ४क्षुरिकाफले च हारा०। [२सम्यक्तापे च।

सन्ताप पु०सम्यक् तापः प्रा०स०। १वह्निजाते तापे अमरः।

सन्तापन पु० सन्तापयति सम्+तप-णिच्-ल्यु। कामदेवस्य १पञ्चशरान्तर्गते शरभेदे त्रिका०। २सन्तापकारके त्रि०।

सन्ति स्त्री सन-क्ति। १दाने २अवसाने च मुग्धबोधटीका।

सन्तोष पु० सम्+तुष-करणादौ घञ्। १धैर्ये २स्वास्थ्ये च हेमच०। ३सम्यक्तुष्टौ "सन्तोषमूलं हि सुखम्" मनुः।

सन्दंश पु० सम्+दंश-अच्। (सँड़ाशी) यन्त्रभेदे हेमच०।

सन्दंशपतित पु० सन्दंशे तन्मध्ये पतित इव। गोसांबकोक्ते न्यायभेदे न्यायशब्दे ४१६६ पृ० दृश्यम्।

सन्दर्भ पु० सम्+दृभ-घञ्। १रचनायां हेमा०। २ग्रन्थने ३ग्रन्थे त्रिका० "गूढार्थस्य प्रकाशश्च सारोक्तिः श्लेष्वा गिरा। नानार्थवत्त्वं वेदत्वं सन्दर्भः कथ्यते बुधैः" इत्युक्ते ४कथनभेदे ५वक्तृतात्पर्य्यविशेषे च।

सन्दान न० सम्+दो-करणादौ ल्युट्। १दाम्नि २बन्धने अमरः ३सम्यक्खण्डने च। दा-ल्युट्। ४सम्यग्दाने न० ५गजस्कन्धोद्बोधोभागे पु० त्रिका०। [राजनि०।

सन्दानिका स्त्री सन्दानं संबन्धनमस्त्यस्य ठन्। विट्खदिरे

सन्दानित त्रि०सन्दानं जातमस्य तारं० इतच्। बद्धे अमरः "रज्जुसन्दानितधरणे"ति माघविकाम्मिश्रितम्।

सन्दानिनी स्त्री सन्दानं बन्धनं गवामस्य मा० इनि ङीप्। गोबालायाम् हेमच०।

सन्दाव पु० सम्+दु-भावे घञ्। पलायने अमरः।

सन्दाह पु० सम्+दह-करणादौ घञ्। १मुखादिशोषे राजनि०। २सम्यग्दाहे च।

सन्दिग्ध त्रि० सम्+दिह-कर्त्तरि क्त। १सन्देहयुक्ते। कर्मणि क्त। २सन्देहविषये ३सम्यग्लिप्ते च। भावे क्त। ४सन्देहे ५श्लेषे च।

सन्दित त्रि० सम+दो-क्त। बद्धे अमरः।

सन्दिष्ट न० सम्+दिश-भावे क्त। १वाचिकार्थकथने वार्त्तायाम् शब्दर०। कर्मणि-क्त। २उपदिष्टे त्रि०।

सन्दिहान त्रि० सम्+दिह-शानच्। सन्देहयुक्ते जटा०।

सन्दी स्त्री सम्+दो-ड गौरा० ङीप्। बद्धायां त्रिका०।

सन्दीप्य पु० सन्दीप्यतेऽसौ सम्+दीप-कर्त्तरि य। मधूत्थिताह्वे शब्दच०।

सन्देश पु० सम्+दिश-घञ्। वार्त्तिकार्थकथने वार्त्तायाम् अमरः। "सदर्थसन्देशहरश्चालसन्धरः" नैष०।

सन्देशहर पु० सन्देशं हरति अभीष्टस्थानं कथनाय नयति हृ-अच्। दूते "तथैव सन्देशहरादिति" रघुः। खण्। सन्देशहारकोऽप्यत्र।

सन्देह पु० सम्+दिह-घञ्। १संशयशब्दार्थे अमरः। २अलङ्कारभेदे अलङ्कारशब्दे ४०५पृ०दृश्यम्। सन्देहविशेषश्च पक्षतेत्यादौ व्याख्यातः स च प्रकृतपक्षविशेषकसाध्यवत्तानिश्चयप्रतिबन्धकतानिरूपितप्रतिरुध्यताश्रितसंशयः।

सन्दोह पु० सम्+दुह-घञ्। १समूहे अमरः। २सम्यग्दोहे कर्मणि घञ्। ३दुग्धे च "सन्दोहवाहमेऽहनि" मिता०।

सन्द्राव पु० सम्+द्रु-घञ्। पलायने अमरः।

सन्धा स्त्री सम्+धा-कङ्। १स्थितौ २प्रतिज्ञायां मेदि०। ३सन्धाने शरोत्पादनानुगुणे व्यापारभेदे शब्दर० ४अनुसन्धाने ५सन्ध्यायां वाचस्पतिः।

सन्धान न० सम्+धा-ल्युट्। १शरादिसम्पादनानुगुणे व्यापारे २सोमरसकरणनामके अभिषवे ३अनुसन्धाने ४सङ्कुचने च मेदि०। सन्धाने स्त्रीत्वमपि तत्र ङीप्। सा च ५कृष्णशारिवायां शब्दर०। सङ्कुचनं च योजनम्। "यद्वद्वै विच्छिन्नं भवति क्षतसन्धानमिव तत्" शङ्क०। ६काञ्जिके हेमा०। ७मदिरायाम् ७अवदंशे ६सौराष्ट्रे राजनि० ९धनुषि शरस्य योजने च।

सन्धि पु० सम्+धा-कि। १स्थापनां षड्गुणान्तर्गते मेलनार्थे मैत्रीकरणरूपे व्यापारे षाड्गुण्यान्तर्गतसन्धिविग्रहादिकं शुक्रनीतिपरिभाषितं यथा "बलीयसाऽभियुक्तस्तु न्यूनोऽनन्यप्रतिक्रियः। आत्मनः सन्धिमन्विच्छेत् कृत्वोपायपणम्। एक एवोपकारस्तु सन्धिरेव मतो हितः। उपकारस्य भेदास्तु सर्वेऽन्ये मैत्रवर्जिताः। अभियोक्ता बलीयस्त्वादलब्ध्वा न निवर्त्तते। उपकाराद्ते यस्मात् सन्धिरेव न विद्यते। शत्रोर्बलानुसारेण उपकारं प्रकल्पयेत्। सैवा वापि च लोकस्थाद् दद्यात् कन्यां भुवं धनम्। क्षत्रामन्त्रांच सन्त्रोयात् मन्त्रेष्वान्यजयाय वै। सन्धिः कार्योऽनयार्थेन संप्राप्योत्साद्यदेवेति सः। संघातवान् यथा वेणुर्निबिडैः कण्टकैर्वृतः। न शक्यते समुच्छेत्तुं वेणुः संघातवांस्तथा। सन्धिर्बलिष्ठे, युद्धं साम्ये, यानन्तु दुर्बले। बलिना सह सन्धिः स्यात् समे साधारणे यदि"। "आत्मानं गोपयेत् सर्वे सङ्घभेदेषु बुद्धिमान्"। "राज्ञा न गच्छेदिदार्थं सन्धिस्थोऽपि हि बुद्धिमान्। अदृष्टसमयं कृत्वा दृष्टमित्रः सदाऽवधेत्"। "सन्धयान्यत्र यात्रायां पार्ष्णिग्राहेण भूयसा। सन्धाय गमनं प्रोक्तं तज्ज्ञिगीषोः फलार्थिनः"। तद्भेदलक्षणादिकं द्वितीयोदीचे व्यक्तमुक्तं यथा "कपालश्च उपहारश्च सन्तानः सङ्गतस्तथा। उपन्यासः प्रतीकारः संयोगः पुरुषान्तरः। अवदानश्च आदिष्ट आत्मादिष्ट उपग्रहः। परिक्रयस्तथोच्छिन्नस्तथा च परभूषणः। स्कन्धोपनेयः सन्धिश्च षोढ़ायं प्रकीर्त्तिताः। इति षोडशकं प्राहुः सन्धिं सन्धिविचक्षणाः। कपालसन्धिर्विज्ञेयः, केवलं समसंश्रितः। सम्प्रदानाद्भवति य उपहारः स उच्यते। सन्तानसम्बन्धविधिर्यो दारिकादानपूर्वकः। सङ्गस्तु सङ्गतः सन्धिर्मैत्रीपूर्वं उदाहृतः। यावदायुःप्रमाणस्तु समानार्थप्रयोजनः। सम्मतो वा विपक्षो वा कारणैर्यो न भिद्यते। सङ्गतः सन्धिरेवायं प्रकृतत्वात् सुवर्णवत्। तथान्यैः सन्धिकुशलैः कारणः स उदाहृतः। दूयाद्यत्कार्यसिद्धिं तु वस्तुहिस्य क्रियेत यः। स उपन्यासकुशलैरुपन्यासः उदाहृतः। मयाऽयमुपकृतं पूर्वं मम कार्यं च करिष्यति। इति यः क्रियते सन्धिः प्रतीकारः स उच्यते। उपकारं करोम्यस्य ममायं च करिष्यति। अयं चापि प्रतीकारो रामसुग्रीवयोरिव। एकार्थां सम्यगुद्दिश्य क्रियां यत्र हि गच्छति। सुसंहितप्रमाणस्तु स च संयोग उच्यते। आवयोर्बाधसङ्कल्पैस्तु मदर्थः साध्यतामिति। यस्मिन् पक्षे तु क्रियते स सन्धिः पुरुषान्तरः। त्वदैकेन मदीयोऽर्थः सम्यक्साध्यस्त्वयेति। यत्र शत्रुः पणं कृत्वा सोऽवदत्पुरुषः स्मृतः। यत्र मूल्यैकदेशेन पणेन रिपुर्व्रजेत्। सन्धीयते सन्धिविज्ञैः आदिष्टः स उदाहृतः। स्वसैन्येन तु सन्धानमात्मादिष्टः स उदाहृतः। क्रियते प्राणरक्षार्थं सर्वदानादुपग्रहः। कोशांशेनार्द्धकोशेन सर्वकोशेन वा पुनः। शिष्टस्य प्रतिरक्षार्थं परिक्रयः स उदाहृतः। भुवं सारवतीनां तु दानादुच्छिन्न उच्यते। मूल्यतुल्यफलदानेन सर्वेण परभूषणः। परिच्छिन्नं फलं यत्र प्रतिस्कन्धेन दीयते। स्कन्धोपनेयः तं प्राहुः सन्धिं सन्धिविचक्षणाः। परस्परोपकारस्तु मैत्री सम्बन्धकस्तथा। उपकारश्च विज्ञेयस्तारश्चैव सन्नयः। एक एवोपकारस्तु सन्धिरेव मतो मम। उपकारविभिन्नास्तु सर्वे मैत्रविवर्जिताः। अभियोक्ता बलीयस्त्वादलब्ध्वा न निवर्त्तते। उपकाराद्ते तस्मात् सन्धिरन्यो न विद्यते"।

सन्धिलक्षणादिकं युक्तिकल्पतरौ प्रदर्शितं यथा "पक्षवन्ध्या भवेत् सन्धिः स्वयं क्षीणस्तमाचरेत्। मध्यादोङ्कुनं नास्ति यदि शत्रोरिति स्थितिः। मध्यादोङ्कुनं यत्र शत्रौ संगयितं भवेत्। न तं संगयितं कुर्यादित्युवाच हरस्सुतः"। भाद्रशुक्लशब्दे ५।७६५ पृ० दृश्यम् २संयोगे अमरः। ३ऋक्षिहयसंयोगस्थाने ४चौरादिकृत शत्रुकार्य्यां "सन्धिं कृत्वा तु ये चौर्य्यमिति" स्मृतिः। ५भगे ६सङ्कुचने ७नाटकाङ्गविशेषे ८सन्धिकार्य्ये मेदि० ९व्याकरणोक्ते वर्णद्वयजाते १०वर्णविकारभेदे ११भेदे विश्वः। नाटकाङ्ग सन्धिश्च "अन्तरैकार्थसम्बन्धः सन्धिरेकान्वये सति"। एकार्थेन सम्बन्धः सन्धिः। तल्लक्षणाच्च "सुखं प्रतिमुखं गर्भो विमर्शे उपसंहृतिः। इति पञ्चास्य भेदाः स्युः क्रमाल्लक्षणमुच्यते" सा० द०। सुखादिलक्षणम् तत्तच्छब्दे दृश्यम्। १२सन्ध्यादियुगानामाद्यन्तयोः कालयोः सन्ध्याशब्दे दृश्यम् "ससन्धयस्ते मनवः कल्पे ज्ञेयाश्चतुर्दश। कृतप्रमाणः कल्पादौ सन्धिः पञ्चदशः स्मृतः" मनुः। तेन सन्धिसन्ध्यांशसहितं सत्ययुगमानम् ४८०० दैवर्षाः। "कृतादृक्षसन्ध्यान्ते सन्धिः प्रोक्तो जलप्लवः। तत्र युगानामादौ सन्धिः अन्ते सन्ध्यंशः। मन्वन्तराणामादौ सन्धिः कल्पानामन्ते सन्धिरिति भेदः। १३तिथ्यादेरादिमभाग भेदे च उपयमशब्दे १२५८५६ पृ० दृश्यम्।

सन्धिका स्त्री स्वार्थे क। सन्धिसन्धाने शब्दच०।

सन्धिचौर पु० सन्धिना कृतसुरङ्गया चौरः। सन्धिं कृत्वा चौर्य्यकारके (सिँधेल) शब्दमाला।

सन्धिजीवक पु० सन्धिना अभिसन्धिना जीवति जीव-ण्वुल् ण्यर्थेन परार्थहारके त्रिका०। [त्रिते च।

सन्धित त्रि० सन्धा जाताऽस्य तार० इतच्। १कृतसन्धे २मि-

सन्धिनी स्त्री सन्धा इषभसंयोगसञ्जगर्भोऽस्त्यस्याः इनि ङीप्। १इषभसंयोगेन धृतगर्भायां स्त्रीगव्याम् अमरः। २अकालदुग्धायां गवि मेदि०। तद्दुग्धपाननिषेधः "न पिबेत् सन्धिनीक्षीरम्" स्मृतिः।

सन्धिपूजा स्त्री सन्धौ अष्टम्याः शेषे नवम्याश्च आद्ये दण्डे पूजा। आश्विनशुक्लाष्टमीनवमीसन्धिकाले विहितपूजायाम् "अष्टमी नवमीसन्धौ तृतीया यदि लभ्यते। तत्र पूजा तवेह पुत्र! योगिनीगणसंयुता"। ज्योतिषे "अष्टम्यां सन्धियोगे सकलपरिजनैः पूजयेत् सत्यभावैः"। कामरूपीय निबन्धे स्मृतिसागरे च "अष्टम्याः शेषदण्डश्च नवम्याः पूर्व एव च। अत्र या क्रियते पूजा विज्ञेया सा महाफला" मत्स्यसूक्तेऽपि "अष्टमीनवमीयोगो रात्रिभागे विशिष्यते। अर्द्धरात्रे दशगुणं सन्ध्यायां त्रिगुणं भवेत्"। आश्विनाधिकारे "अष्टमी नवमीयुक्ता नवमी चाष्टमीयुता। अर्द्धनारीश्वरप्रायो उमामाहेश्वरी तिथिः"। इति विष्णुधर्मोत्तरीयमध्ये तद्विधं न तु महानवमीपूजापरम्। तस्या अष्टम्युपवासपरदिनविधानेन सप्तमीवद्युग्मानादरात्। ततश्च सप्तमीपूजावन्महाष्टम्यादिलक्षणमपि षष्टिदण्डात्मिकायामेव न तु परदिनेऽपि खण्डतिथौ किन्तु पूर्वोक्तसन्ध्यनुरोधाच्छिवादाविव खण्डतिथावपि सन्धिपूजेति। एवञ्च यस्मिन् दिने महाष्टमीपूजा तस्मिन् दिन एव उपवासः। न तु सन्धिपूजा दिने अष्टमीत्वेनोपवासविधेः पूर्वसूक्तत्वात्। एवञ्च पूर्वाष्टम्यामष्टमीपूजा तत्परदिने अष्टमीनवम्योः सन्धौ सन्धिपूजा तत्परदिने महानवमीपूजा प्रागुक्तनन्दिकेश्वरपुराणाद्युक्तोदयमामितिथ्यनुरोधात् तत्परदिने दशम्यां विसर्जनं पूजानुरोधेनाधिकदिनलाभात्" ति० त०।

सन्धिबन्ध पु० सन्धिं बध्नाति संयुनक्ति सम्+बन्ध-अच्। १भूमिचम्पके शब्दच०। तल्लेपने हि भग्नसन्धियोजनं वैद्यके प्रसिद्धम्। २रूपायां सन्ध्यर्थनियमबन्धने च।

सन्धिला स्त्री सन्धिं लाति ला-क। १नद्यां स्वार्थे कच्। २सुरङ्गायां ३मदिरायाञ्च मेदि०।

सन्धिविग्रहाधिकारिन् पु० सन्धिविग्रहेषु अधिकरोति अधि+कृ-णिनि। रूपायां सन्धिविग्रहाद्यधिकारिणि मन्त्रिभेदे।

सन्धिवेला स्त्री सन्धियुक्ता वेला समयः। अहोरात्रसन्धिसमये। सन्ध्याशब्दे दृश्यम्। ततः सन्धिवेलादि०भवार्थे यत् नकालाट्ठञ्। सान्धिवेल तत्र भवे त्रि०।

सन्धिहारक पु० सन्धिना सुरङ्गया हरति परद्रव्यम् हृ-ण्वुल्। सन्धिचौरे (सिँधेल) हारा०।

सन्धुक्षित त्रि० सम्+धुक्ष-क्त। दीप्ते।

सन्धेय त्रि० सम्+धा-यत्। १संयोज्ये २मेलनीये ३सन्धिकरणयोग्ये च

सन्धेया असन्धेयाश्च स्थितोप० दर्शिता यथा "सत्यार्थौ धार्मिकोऽनार्यौ भावसङ्कातवान् बली। अनेकयुद्धविजयी सन्धेयाः सप्त कीर्त्तिताः। सत्योऽनुपायवान् सत्यं सन्धितो नैति विक्रियाम्। प्राप्तनाशेऽपि सुव्यक्तमार्यो२नार्यात्मनार्यताम्। धार्मिकस्त्वभियुक्तश्च सर्व एव हि युज्यते। प्रज्ञानुरागाद्भावाच्च दुःखक्षेपो

हि धार्मिकः। सन्धिः कार्योऽथनार्थे च विनाशे सत्यपस्थिते। विना तया त्रयेषान्यात्कृत्यात्र कालयापनम्। हंसतत्वादृषया वेणुर्भिविहः कष्टकेर्हतः। न शक्यते सहचेतुं भारसङ्घातवांस्तया। यस्मिन्ह् सह योद्धव्यमिति नास्ति निदर्शनम्। प्रतिघातं न हि घनः कदाचिदुपसर्पति। अमदस्थेः कृतस्येव सर्वः सर्वत्र सर्वदा। अनेकयुद्धजयिनः७ प्रतापादेव भुञ्जते। अनेकयुद्धविजयी सन्धानं यस्य गच्छति। तत्प्रतापेन तस्यापु यशसावाप्ति शत्रवः"। "बालो वृद्धो दीर्घरोगी तथा क्षतिवहिष्कृतः। भीरुको भीरुकजनो लुब्धो लुब्धजनस्तथा। विरक्तप्रकृतिश्चैव विद्वेषेतिरुक्तिमान्। अनेकचित्तसन्धश्च देवब्राह्मणनिन्दकः। दैवोपहतकश्चैव दैवचिन्तक एव च। दुर्भिक्षव्यसनोपेतो बलव्यसनसङ्कुचः। षड्दोषस्तो बहुरिपुर्युक्तः कालेन यश्च न। सत्यधर्मच्युतश्च विंशतिः पुरुषा अमी। एतैः सन्धिं न कुर्वीत विष्टङ्कीयात् त्र केवलम्। एते विष्टङ्कमाख्या हि क्षिप्रं यान्ति रिपोर्वशम्" सन्ध्या स्त्री सम्+ध्यै—क्विप् सन्धौ भवः यत् वा।१एकरूपकालोत्तरभाविपररूपकालयोरवकाशभेदे दिवारात्रस्य २मध्यवर्त्तिकाले अमरः। स च दिवाशेषदण्डसहितरात्रिप्रथमदण्डात्मकःकालः तयोरुभयदण्डात्मकः कालश्च "त्रियामां रजनीं प्राहुस्तत्प्रज्ञाद्यन्तयुग्दये। नाडीनां तदुभे सन्ध्रे दिवसाद्यन्तसंज्ञिते" इति दक्षः। "अहोरात्रस्य यः सन्धिः सूर्यनक्षत्रवर्जितः। सा च सन्ध्या समाख्याता मुनिभिस्तत्त्वदर्शिभिः" सूर्यनक्षत्रवर्जितः अहोरात्रमितार्द्धोदितसूर्यमण्डलप्रहतेजोनक्षत्रवर्जितः। तथा च वराहः "अहोरात्रमयात् सन्ध्रा व्यक्तीभूता न तारका यावत्। तेजःपरिहानिरूपा भानोरर्द्धोदयं यावत्"। अत्र आद्यन्तता चोक्ता परिमाणमाह दक्षः "रात्र्यन्तकाले नाड्यौ द्वे सन्ध्रादिः काल उच्यते। दर्शनाङ्गुलिरेखायास्तदन्तो मुनिभिः स्मृतः"। नाड्यौ दण्डः योगियाज्ञवल्क्यः "घ्राणसङ्घौ च यत्तं दिनरात्रोर्यथाक्रमम्। सन्ध्रा सङ्कर्मणाख्याता घ्राणसङ्घौ समा स्मृता"। अत्रोपासनाया अपि सन्ध्रात्वमाह व्यासः "उषाले सन्धिवेलायां निशाया दिवसस्य च। तामेव सन्ध्रां तस्मात्तु प्रवदन्ति मनीषिणः"। उषाले यद्वक्ष्यमाणप्राणायामादिक्रियेति यावत्। तत्काले उषाख्यापि देवता सन्ध्रा तथा च याज्ञवल्क्यः "सन्धौ सन्ध्रामुपासीत नास्तमे नोद्गते रवौ"। उपासनोपक्रममाह संवर्त्तः "प्रातः सन्ध्रां सनक्षत्रामुपासीत यथाविधि। सादित्यां पश्चिमां सन्ध्रामहोरात्रमितामृषिः"। सनक्षत्रामित्यनेन तदुपक्रमकाले उषक्रम्य प्रातः सन्ध्रामुपासीत एवमेवाहोरात्रमितभास्कारस्यां पश्चिमां सादित्यामित्यनेन तदुपक्रमकाले उषक्रम्य उषोपासीतेत्यर्थः। मध्याह्नसन्ध्राया अष्टममुहूर्त्ते कालमाह स्मृतिः "पूर्वापरे तथा सन्धे सनक्षत्रे प्रकीर्त्तिते। समस्तर्थेऽपि मध्याह्ने मुहूर्त्ते सप्तमोपरि"। याज्ञवल्क्यवचनदृष्टम् "अरण्ये खनित्वाग्निः सन्ध्रामुपासीत नित्यं वाग्यत उत्तरापराभिमुखोऽनुदयास्तमयदर्शनात् अतिक्रान्तायां मध्याह्नतोः सावित्रीं जप्त्वा तदादि कृत्वा एवं प्रातः प्राङ्मुखस्तिष्ठन् आसूर्यदर्शनादिति"। उत्तरापराभिमुखो वायुकोणाभिमुखः कोणं विहायेति अनुदयमभिमुखमिति। उभयदृष्टमुपात-

मिति यावत्" भा०त०। अधिकं गायत्रीशब्दे दृश्यम्। ६युगसन्धिकाले ७नदीभेदे मेदि०। ८चित्रायां १०संश्रये ११सीमायां १२सन्धाने १३पुष्पभेदे हेमच०"चत्वार्याहुः सहस्राणि वर्षाणान्तु कृतं युगम्। तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः। इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु। एकापायेन वर्त्तन्ते सहस्राणि शतानि च"मनुः। चत्वार्याहुरिति चत्वारि वर्षसहस्राणि कृतयुगं कालं मन्वादयो वदन्ति। तस्य तावदेवंशतानि सन्ध्या सन्ध्यांशश्च भवति युगस्य पूर्वा सन्ध्या उत्तरश्च सन्ध्यांशः। तदुक्तं विष्णुपुराणे "तत्प्रमाणैः शतैः सन्ध्या पूर्वा तत्राभिधीयते। सन्ध्यांशकश्च तत्तुल्यो युगस्यानन्तरोहि सः। सन्ध्यासन्ध्यांशयोरन्तर्यः कालो मुनिसत्तम!। युगाख्यः स तु विज्ञेयः कृतत्रेतादिसंज्ञकः" एकापायेनेति। त्रीणि सहस्राणि त्रेतायुगं त्रीणि शतानि तस्य सन्ध्या सन्ध्यांशश्च। द्वे सहस्रे द्वापरयुगं द्वे शते तस्य सन्ध्या सन्ध्यांशश्च। एकसहस्रं कलियुगमेकशतं तस्य सन्ध्या सन्ध्यांशश्च भवतीत्यर्थः।

१४प्रबोधसञ्चयादयोः सन्निधौ स्त्रियां "सन्धे स्थिरार्थे" भा०धृ० "सन्ध्यमिति स्वप्रस्थानमाचष्टे वेदे प्रयोगदर्शनात् "सन्ध्यां तृतीयं स्वप्रस्थानम्" इयोर्लोकस्थानयोः प्रबोधसञ्चयादस्थानयोः सन्धौ भवतीति सन्ध्यम्" भा०। "तस्मिन् सन्धौ स्थाने तिष्ठन्ते यमे स्थाने प्रयन्ति इदञ्च परलोकस्थानञ्च" रत्नप्र० श्रुतिः तस्मूर्धोः सर्वेन्द्रियोपसंहारादेतल्लोकानतुभवे सति वासनामात्रेण इमं लोकं स्मरतः कर्मक्षयात् स्वदेहे मानसं परलोकस्वरूपिरूपः स्वप्नो भवति सोऽयं लोकद्वयसन्धौ भवतीति सन्ध्यः स्वप्नः" रत्नप्र०।

सन्ध्यांश पु० सन्ध्या तत्प्रमाणः सत्ययुगादेरंशः। सत्ययुगादेरंशभेदे तत्प्रमाणम् सन्ध्याशब्दे मनूक्तम् दृश्यम् "सन्ध्यासन्ध्यांशसहितं विज्ञेयं तच्चतुर्युगमिति मनुः।

सन्ध्याचल पु० "सन्ध्यां वन्दितः कृतवान् तस्य यक्षादिधेः सुतः। ततः सन्ध्याचलं नाम तस्य गायन्ति देवताः" कालिकापु० ९० अ० निरुक्ते पर्वतभेदे।

सन्ध्यानाटिन् सन्ध्यायां नटति नट-णिनि। १शिवे त्रिका०

सन्ध्यापुष्पी स्त्री सन्ध्यायां पुष्पमस्याः ङीप्। जातिवृक्षे राजनि०।

सन्ध्याबल पुंस्त्री०सन्ध्यायां सन्ध्योपलक्षिते रात्रिकाले बलं यस्य। रात्रौ बलयुक्ते राक्षसे त्रिका० स्त्रियां ङीप्।

सन्ध्याभ्र न० सन्ध्याकालीनमभ्रमिव। १सुवर्णगैरिके राजनि०। २सन्ध्याकालीनमेघे च।

सन्ध्याराग पु० सन्ध्याया इव रागोऽस्य। १सिन्दूरे राजनि०। २तत्। सन्ध्याकालीने २रक्तवर्णे च।

सन्ध्याराम पु० सन्ध्यायां तदाख्यभार्यायां रमते रमसंज्ञायां कर्त्तरि घञ्। चतुर्मुखे ब्रह्मणि शब्दमा०।

सन्न पु०सीदति सद-क्त। १पियालवृक्षे भरतः। २अवसन्ने त्रि० स्वार्थे क। खर्वे भरतः। [२खर्ववृक्षे च।

सन्नकट्टु पु० सन्न एव सन्नकः कर्म०। १पियालवृक्षे अमरः।

सन्नत त्रि० सम्+नम-क्त। १प्रणते २ध्वनियुते च।

सन्नति स्त्री सम्+नम-क्तिन्। १प्रणामे २ध्वनौ मेदि०। ३नम्रतायाञ्च। ४होमभेदे च च अप०४।३६ एकादिभिरष्टभिर्मन्त्रैर्विधेयः। तैत्तिरीयब्रा०३।८।१८।६विहितत्व।

सन्नद्ध त्रि० सम्+नह-क्त। १कृतसन्नाहे धृतवर्मणि २व्यूहरचनयावस्थिते सैन्यादौ मेदि०। ३आततायिनि रावण४मन्त्रादियुक्ते शब्दर०।

सन्नय पु० सम्+नी-अच्। १समूहे २मृदङ्गस्थिते-वाद्ये च अमरः

सन्नहन न० सम्+नह-ल्युट्। १वर्म्मग्रहणे २सज्जीभवने ३व्यग्बन्धने च। [हेमच०। भावे घञ्। संनद्धने।

सन्नाह पु०सन्नह्यते सम्+नह-कर्मणि घञ् (साँजोया)वर्मणि

सन्नाह्य पु० सम्+नह-ण्यत्। समरोचिते गजे हेमच०।

सन्निकर्ष पु० सम्+नि-कृष-घञ्। १सान्निध्ये हेमच० "सन्निकर्षो हि चक्षुषार्द्धमपि गच्छतीति पुराणम् न्यायमते २विषयेन्द्रियसम्बन्धे ज्ञानलक्षणासामान्यलक्षणायोगजधर्मविशेषाख्ये ३अलौकिकप्रत्यक्षसाधने व्यापारभेदे च। "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षम्" गो० सू०। सन्निकर्षो द्विविधः लौकिकालौकिकभेदात् लौकिकोऽपि षड्विधः अलौकिकस्तु त्रिविधः यथोक्तं भाष्ये० "सन्निकर्षः षड्विधो हेतुरिन्द्रियं करणं मतम्। विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विधः। द्रव्यगुणत्वं संयोगात् संयुक्तसमवायतः२। द्रव्येषु समवेतानां, तथा तद्गुणसमवायतः३। तत्रापि समवेतानां, शब्दस्य समवायतः४। तद्द्वयस्थितानां समवेतसमवायेन५ तु ग्रहः। विशेषणतयाह् तद्गतभावाभावौ ग्रहो भवेत्। यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते। प्रत्यक्षं समवायस्य विशेषणतया भवेत्। अलौकिकः सन्निकर्षस्त्रिविधः परिकीर्त्तितः। सामान्यलक्षणा१ज्ञानलक्षणा२योगजश्चेत्यतो" भाषा० "यद्यपि विशेषणता नानाविधा तथाहि भूतत्वादौ घटाभावः

संयुक्तविशेषणतया सत्त्वादौ रूपाद्यभावः संयुक्तसमवेतसमवेतविशेषणतया, शब्दाभावः केवलश्रोत्रावच्छिन्नविशेषणतया, कादौ खत्वाद्यभावः श्रोत्रावच्छिन्नसमवेतविशेषणतया। एवं कत्वावच्छिन्नाभावे खत्वाभावादिकं विशेषणविशेषणतया। एवं घटाभावादौ पटाद्याभावः संयुक्तविशेषणविशेषणतया। एवमन्यदप्यूह्यं तत्रापि विशेषणतावच्छेदकैकैव सा गण्यते अन्यथा गौरवं सन्निकर्षे इति प्राचां प्रवादो व्याहन्यतेति" सि०मु०।

सन्निकर्षण न० सम्+नि+कृष-ल्युट्। सन्निधाने अमरः।

सन्निकृष्ट त्रि० सम्+नि+कृष-क्त। १निकटस्थे अमरः २इन्द्रियसम्बन्धविषये च। [स्थिते त्रि०।

सन्निधि न० सम्+नि+धा-क। १नैकट्ये वोपालितः। २समीप्ये हेमच०। ३सान्निध्ये च।

सन्निधान न० सम्+नि+धा-ल्युट्। १नैकट्ये सामीप्ये हेमच०। २सान्निध्ये च।

सन्निधि पु० सम्+नि+धा-कि। १सामीप्ये अमरः कर्मणि कि। २इन्द्रियविषये भेदि० कर्म०। ३साधुनिधौ। हृत०। ४सतां निधौ। [२स्थते च।

सन्निपतित त्रि० सम्+नि-पत-क्त। १मिलिते २सन्निपते

सन्निपात पु० सम्+नि+पत-घञ्। १मेलने "सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति" व्या० परि०। २कफादिधातुत्रयस्य वैषम्यरूपविदोषजे ज्वरभेदे ३नाशे ४सन्निपते च। ५तालभेदे "एक एव गुरुर्यत्र सन्निपातः स चेष्यते" सङ्गीतदा०।

ज्वरभेदसन्निपातभेदादिकं भावप्र० उक्तं यथा "तत्र सन्निपातज्वरस्य विपक्षटसन्निपटकारणकथनपूर्विकां संप्राप्तिमाह "त्रिदोषजनकैर्वातपित्तश्लेष्मगुणाः। वह्निर्नरस्य कोष्ठाग्निं रसगाज्वरकारिणः"। पूर्वरूपमाह "प्राग्रूपाणि त्रिदोषाणां स्वस्त्रिदोषज्वरे त्यजेत्"। अथ सन्निपातज्वरस्य सामान्यानि लक्षणान्याह "जृम्भे दाहः क्लमे शीतमस्थिसन्धिशिरोरुजा। साक्षाक्षे रक्ते निर्भग्ने चापि लोचने। सक्थनी सरुजौ कर्णौ कण्ठः शूकैरिवाहतः। तन्द्रा मोहः प्रलापश्च कासः श्वासोऽरुचिर्भ्रमः। परिदग्धा खरस्पर्शा जिह्वा रक्ताकुता परा। छर्दनं रक्तपित्तस्य कफेनोल्लिखितस्य च। शिरसो लोठनं क्षाणा निद्रानाशो दुर्दिवया। स्वेदमूत्रपुरीषाणां चिराद्दर्शनमल्पशः। क्षवत्वं नातिमात्राणां सततं कण्ठकूजनम्। कोठानां स्फोटरक्तानां मण्डलानाञ्च दर्शनम्। मूकत्वं स्रोतसां पाको गुरुत्वमुदरस्य च। चिरात्पाकश्च दोषाणां सन्निपातज्वरातुरः।" लोचने साक्षाक्षे साक्ष्णी कक्षे रक्तच्छे निर्भग्ने निर्गते कुटिले च कण्ठः शूकैरिवाहतः धान्याथैरिवाहतः। जिह्वा परिदग्धा परिदग्धेव भासते।" अथवा परिदग्धा इव क्षणा दह्यते खरस्पर्शा चिचिम्बाकुता। छोदनमित्यादि कफसंयुक्तस्य रक्तस्य छोदनं शिरसो लोठनमितस्ततश्चालनं क्षवत्वमतिमात्राणामिति मात्राणामू अतिभूयितं कार्यं न व्याधिप्रभावात् सततं निरन्तरं कोठः। "घरटीदृक्संस्थानं कोठ इत्यभिधीयते" भावः कपिलो वर्णः। मूकत्वमवचनत्वमल्पवचनत्वं वा स्रोतसां वर्णनादीनाम्।

अथ सामान्यसन्निपातज्वरस्य त्रयोदश विशेषानाह "एकोल्बणास्त्रयस्तेषु द्व्युल्बणाश्च तथेति षट्। द्व्युल्बणश्च भवेदेको विज्ञेयः स तु सप्तमः। प्रवृद्धमध्यहीनेषु वातपित्तकफैश्च षट्। सन्निपातज्वरश्चैवं त्रयोदशविधो मतः। तत्र प्रवृद्धवातः मध्यपित्तो हीनकफः १ मध्यवातः प्रवृद्धपित्तो हीनकफः २ हीनवातः प्रवृद्धपित्तो मध्यकफः ३ प्रवृद्धवातः हीनपित्तो मध्यकफः ४ मध्यवातः हीनपित्तः प्रवृद्धकफः ५ हीनवातो मध्यपित्तः प्रवृद्धकफः ६ इति षट्। तेषां नामानि क्रमादाह "विस्फारकश्चाशुकारी कम्पनो वक्रसंज्ञकः। श्रीव्रकारी तथाभ्रुः सप्तमः क्रूरपालकः। संमोहकः पालकश्च वाक्यः क्रकच इत्यपि। ततः कर्कटकः प्रोक्तस्ततो वैदारिकाभिधः" तन्त्रान्तरे विस्फारक इत्यत्र विस्फोरक इति पाठः। वक्रसंज्ञाने वक्र इतिपाठः क्वापि वह्र इति पाठः भ्रुरित्यत्र पक्षुरिति पाठः वाक्य इत्यत्र संप्राप्त इति पाठः कर्कटक इत्यत्र कर्कोटक इति पाठः। तत्र वातोल्बणस्य लक्षणमाह "श्वासः कासो भ्रमो मूर्छा प्रलापो मोहवेपथू। पार्श्वयोर्वेदना जृम्भा कषायत्वं मुखस्य च। वातोल्बणस्य लिङ्गानि सन्निपातस्य लक्षयेत्। एष विस्फारको नाम्ना सन्निपातः सुदारुणः।" अथ पित्तोल्बणस्य लक्षणमाह "अतिसारो भ्रमो मूर्छा मुखपाकस्तथैव च। गात्रे च बिन्दवो रक्ता दाहोऽतीव प्रजायते। पित्तोल्बणस्य लिङ्गानि सन्निपातस्य लक्षयेत्। भिषग्भिः सन्निपातोऽयमाशुकारीह कीर्तितः"। अथ कफोल्बणस्य लक्षणमाह "जड़ता गुरुता वाक्यो रात्रौ निद्रा भवत्यपि। प्रसक्ते नयने चैव मुख-

माधुर्यमेव च। कफोल्बणस्य लिङ्गानि सन्निपातस्य लक्षयेत्। मुनिभिः सन्निपातोऽयमुक्तः कष्टतमत्वतः२। अथ वातपित्तोल्बणस्य लक्षणमाह "वातपित्ताधिको-ऽयन्तु सन्निपातः प्रकुप्यति। तस्य ज्वरो मदस्तृष्णा सक्थशोथः प्रमीलकः। श्वासानाहश्चितन्द्राश्च कास-श्वासभ्रमश्रमाः। मुनिभिर्वह्निनामार्यैः सन्निपात उदा-हृतः।" अथ वातश्लेष्मोल्बणस्य लक्षणमाह "वा-तश्लेष्माधिको यस्य सन्निपातः प्रकुप्यति। तस्य शीत-ज्वरो मूर्छा छर्दिस्तृष्णा पार्श्वनिग्रहः। गुरुगात्रविद्य-मानस्य तन्द्रा श्वासश्च जायते। असाध्यः सन्निपातोऽयं शीघ्रकारीति कथ्यते। नहि जीवत्यरोगात्मनेना-विष्टविग्रहः।" "अथ पित्तश्लेष्मोल्बणस्य लक्षणमाह "पित्तश्लेष्माधिको यस्य सन्निपातः प्रकुप्यति। अन्तर्दाहो बहिःशीतं तस्य तृष्णा प्रवर्द्धते। हृद्यते दक्षिणे पार्श्वे शरःशीर्षनखग्रहः। छर्दिति श्लेष्मपित्तस्य तस्यात्-कोटश्च जायते। विड्भेदश्वासहिक्काश्च वर्द्धन्ते सप्रमीलकाः। ऋषिभिर्मन्दनामार्यैः सन्निपात उदा-हृतः।" अथ वातपित्तश्लेष्मोल्बणस्य लक्षणमाह "सर्वदोषोल्बणो यस्य सन्निपातः प्रकुप्यति। तस्याशा-न्यपि दोषाणां तस्य कृच्छ्राणि लक्षयेत्। व्याधिभ्यो दारुणश्चैव वज्रगर्ह्यान्मिसन्निभः। जैवलोच्छ्वासपर-मस्तब्धकः स्तब्धलोचनः। त्रिरात्रात् परमेतस्य जन्तो-र्दुरति जीवितम्। तदवस्थन्तु तं दृष्ट्वा मूढा व्याहरते जनः। धर्षितो राक्षसैर्नूनमवेलायां चरन्ति ये। कस्यचा ब्रुवते केचिद् वचिस्या ब्रह्मराक्षसैः। पिशा-चैर्गुह्यकैश्चैव तस्यान्यैर्मस्तके हृतम्। कुलदेवार्षिनागैर्न धर्षितं कुलदेवतैः। नक्षत्रपीडाप्यपरे गरकर्मेति चापरे। सन्निपातमिमं प्राज्ञैर्भिषजः कूटपाशकम्७।" अथ प्रकृतमध्यहीनवातादिजनितसन्निपातज्वराणां लक्षणा-न्याह "प्रकृतमध्यहीनैस्तु वातपित्तकफैश्च यः। तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः। प्रलापायास-संमोहाः कम्पमूर्च्छारतिभ्रमाः। मन्यास्तम्भेन सदृशः स्यात् तस्याप्येतद्विशेषतः। भिषग्भिः सन्नि-पातोऽयं कृच्छ्रः संप्रकीर्त्तितः। मध्यहीनप्रकृतैस्तु वातपित्तकफैश्च यः। तेन रोगास्त एवोक्ता यथादोष बलाश्रयाः। अन्तर्दाहो विशेषोऽत्र न च वक्तुं च शक्यते। रक्तमोक्षकृतेनेव लक्ष्यते सुखमस्तुतम्। पित्तेनाकर्षितः श्लेष्मा हृदयान्न प्रसिच्यते। दूषणे-वाहतं पार्श्वं तृष्यते खन्यते हृदि। प्रमीलकः श्वास-हिक्का वर्द्धते च दिने दिने। जिह्वा दग्धा खरस्पर्शा गलः शूकैरिवाहतः। विसर्गं नाभिजानाति कूजेच्चापि कपोतवत्। अतीव श्लेष्मणा पूर्णः शुष्कवक्त्रोष्ठतालुकः। तन्द्रानिद्रातियोगार्त्तो हतवह्निहतद्युतिः। न रतिं लभते नित्यं विपरीतानि चेच्छति। जायन्ते च बहवो रक्तं जीवति चाल्पशः। एव कर्कटको१२ नाम्ना करिष्यति पित्तन्तु मध्यसमिति यावत् ततृकर्षं ज्वरं करिष्यति यत आह "धातवस्त्वन्यजा दोषाः क्षुनाशाया-ऽसमासतौ। समाः सुखाय विज्ञेया बलायोपचयाय च।" इति उच्यते। अत्र पित्तं मध्यमपि प्रकृतव-देव यतोऽप्रकृतयोर्वातश्लेष्मणोरपेक्षया मध्यं तेन मध्यशब्दितमित्यर्थः। ननु कफक्षीणः स कथं ज्वरं करिष्यति क्षीणशक्तित्वात् उच्यते दोषाः क्षीणा अपि व्याधीन् कुर्वन्त्येव यत आह "वातश्लेष्मोल्बणत्वं मन्द-वाक्त्वं विसंज्ञता। पित्तश्लेष्मोल्बणैः क्षीणा वह्निमन्दः प्रभाक्षयः।" शिथिलाः सन्धयोमूर्च्छारोचकं दाहः कफ-क्षये। इत्यादयश्चाविरुद्धाश्च परत्रापि। "मध्य प्रकृतहीनेषु वातपित्तकफैश्च यः। तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः। मोहप्रलापमूर्च्छाः स्युर्मन्यास्तम्भः शिरोग्रहः। कासः श्वासो भ्रमस्तन्द्रा संज्ञानाशो हृदिव्यथा। खेभ्यो रक्तं विस्रवति संरक्तं लक्षणे तथा। तस्याप्येते विशेषाः स्युर्लक्ष्यन्ते चाक्ष्णि तिमिरात्। भिषग्भिः सन्निपातोऽयं कथितः पाकलाभिधः६। क्षीणप्रकृतमध्येषु वातपित्तकफैश्च यः। तेन रोगास्त-एवोक्ता यथारोगबलाश्रयाः। हृदयं दह्यते चास्य यकृत्प्लीहान्त्रफुप्फुसाः। प्रच्यन्तेऽत्यर्थमूर्द्धाधःपूर्व-शोणितनिर्गमैः। शीर्यदन्तश्च स्रस्यश्च तस्याप्येतद् विशेषतः। भिषग्भिः सन्निपातोऽयं याम्यो नाम्ना प्रकीर्त्तितः। प्रकृतहीनमध्येषु वातपित्तकफैश्च यः। तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः। प्रलापा-यासमोहाः कम्पमूर्च्छारतिभ्रमाः। मन्यास्तम्भेन सदृशः स्यात् तस्याप्येतद्विशेषतः। भिषग्भिः सन्नि-पातोऽयं क्रकचः११ संप्रकीर्त्तितः। मध्यहीनप्रकृतैस्तु वातपित्तकफैश्च यः। तेन रोगास्त एवोक्ता यथादोष बलाश्रयाः। अन्तर्दाहो विशेषोऽत्र न च वक्तुं च शक्यते। रक्तमोक्षकृतेनेव लक्ष्यते सुखमस्तुतम्। पित्तेनाकर्षितः श्लेष्मा हृदयान्न प्रसिच्यते। दूषणे-वाहतं पार्श्वं तृष्यते खन्यते हृदि। प्रमीलकः श्वास-हिक्का वर्द्धते च दिने दिने। जिह्वा दग्धा खरस्पर्शा गलः शूकैरिवाहतः। विसर्गं नाभिजानाति कूजेच्चापि कपोतवत्। अतीव श्लेष्मणा पूर्णः शुष्कवक्त्रोष्ठतालुकः। तन्द्रानिद्रातियोगार्त्तो हतवह्निहतद्युतिः। न रतिं लभते नित्यं विपरीतानि चेच्छति। जायन्ते च बहवो रक्तं जीवति चाल्पशः। एव कर्कटको१२ नाम्ना

सन्निपातः सुदारुणः। शीतमध्यप्रहर्षैस्तु वातपित्तकफैश्च यः। तेन रोगास्त्रयोदशा यथादोषबलाश्रयाः। अल्पमूत्रं कटीतोदो मध्ये दाहो रुजा भ्रमः। भग्नं क्लमः शिरोवक्त्रिमन्याकृद्दवाप्लुतः। प्रलीनकः श्वासकासश्चिक्का जाड्यं विसंज्ञता। प्रथमोत्पन्नमेनन्तु साधयन्ति कदाचन। एतस्मिन् सन्निपाते तु कर्णमूले सुदारुणः। पिड़का जायते तस्मात्तेनार्येणाऽऽशुहन्यते जीवति। सर्वैदारिकसंज्ञोऽयं सन्निपातः सुदारुणः। किराततात परमेतस्य व्यर्थमौषधकल्पनम्।" तन्त्रान्तरे वातोल्बणादीनां सन्निपातज्वरविशेषाणां त्रयोदशानां शीताङ्गादीनि त्रयोदश नामान्तराणि लक्षणान्तराणि चाह "शीताङ्गस्त्रिमलोद्भवज्वरगणे तन्द्री प्रलापी ततो रक्तक्षीवविता च तस्य गदितः सम्भुग्ननेत्रस्तथा। सास्निश्वासकजिह्वकश्च कथितः प्राग्सन्निगोऽन्यान्को दृग्दाहः सहचित्तविभ्रम इह द्वौ कर्णकण्ठपरौ।" तन्द्री तन्द्रिका प्रलापी प्रलापकः रक्तक्षीवविता रक्तक्षीवी संभुग्ननेत्रः भुग्ननेत्रः। सास्निश्वासकः सास्निश्वासः कर्णकण्ठपरौ कर्णपरः कर्णिकः कण्ठपरः कण्ठकुब्जकः। अथ तेषां प्रत्येकं लक्षणानि "स्निग्धशिशिरशरीरः सन्निपातज्वरी यः श्वसनकसनस्निग्धामोदकम्यप्रलापैः। क्लमबहुकफयुक्तो दाहवम्यङ्गपीड़ाः खरविकृतिभिरार्त्तः शीतगात्रः स उक्तः। तन्द्रातीव ततस्तु वातिसरयं श्वासोऽधिकः कासरुक् सन्तप्तातितनुर्नरे श्वयथुना सार्द्धञ्च कण्ठ्यं कफम्। शुष्यास्या रसना क्लमः श्वयथुरोमान्त्यस्य दाहस्तथा यत्र स्यात्सहि तन्द्रिको निगदितो दोषत्रयोत्थो ज्वरः। यत्र ज्वरे निखिलदोषनिदानलक्षणानि प्रलापबहुला सहसोत्थिताश्च। कम्पव्यथापतनदाहविसंज्ञताः स्युर्नष्ट्वा प्रलापक इति प्रथितः पृथिव्याम्। निद्रोरो रुधिरस्य, रक्तसदृशं ज्ञेयं तनौ मण्डलम् लोहित्यं नयने तमाऽरुचिवमिश्वासाति सारम्भमाः। अङ्गानञ्च विसंज्ञता च पतनं क्षिप्ताङ्गपीड़ा भ्रमः। रक्तक्षीविनि सन्निपातजनिते लिङ्गं ज्वरे जायते। भग्नं नयनवक्त्रताम्रसनकासतन्द्रा भ्रमः। प्रलापमदवेपथुश्वयथुरोमहर्षास्तथा। पुरो निखिलदोषजे भवति यत्र लिङ्गं ज्वरे पुरातनविचक्षणैः स दृष्ट भुग्ननेत्रोऽयं मतः। दोषास्तीव्रतरा भवन्ति बलिनः कर्मेऽपि यत्र ज्वरे मोहोऽतीव विचेष्टता विकलता श्वासो भग्नं क्लमता। दाहश्चिक्कणमाननञ्च दृढमोमन्द्रोबलञ्च यः सोऽभिन्यासह इति प्रकीर्त्तितः दृष्ट प्राज्ञैर्भिषग्भिः पुरा। त्रिदोषजनिते ज्वरे भवति यत्र जिह्वा भ्रमम् इता कठिनकण्टकैस्तदनु निर्भरं क्लमता। स्तुतिचतिबलक्षतिश्वसनकासमन्त्रयः पुरातनभिषग्वरास्तमिह जिह्वकण्ठ्यं वदेत्। व्यथातिशयिता भवेत्क्लयथुसंयुता सन्धिषु प्रभूतकफता सख्ये विगतनिद्रता कासरुक्। समस्तमिति कीर्त्तितं भवति लक्ष्म यत्र ज्वरे त्रिदोषजनिते बुधैः सहि निगद्यते सन्निगः। यस्मिन् लक्षणमेददस्ति सकलैर्दोषैरुदीर्णं ज्वरेऽलर्कं मूर्द्धविधूननं सकसनं सर्वाङ्गपीड़ाधिका। हिक्काश्वासवदाहमोहसहिता देहेऽतिसन्तप्तता वैकल्यञ्च दृशा वचांसि सुनिभिः संकीर्त्तितः सोऽलकः। दाहोऽधिको भवति यत्र दृशा च तीव्रा श्वासप्रलापविकृतिभ्रममोहपीड़ाः। मन्दाकृतुव्यथनकण्ठरुजः श्रमश्च दृग् दाहसंज्ञः सदित स्त्रिभवो ज्वरोऽयम्। गायति नृत्यति हसति प्रलपति विकृतं निरीक्षतेसहो वै। सदाहव्यथाभयार्त्तो नरस्तु चित्तभ्रमेऽज्वरे भवति। दोषत्रयेण जनिता किल कर्णमूले तीव्रा ज्वरे भवति तु श्वयथुर्व्यथा च। कण्ठपरो बधिरता श्वसनं प्रलापः प्रस्वेदमोहदमनानि च कर्णिकाख्ये। कण्ठः शूकगतावरुद्धवदतिश्वासः प्रलापोऽरुचिर्दाहोदेहरुजा तृषापि च भृशं तस्मात् शिरार्त्तिस्तथा। मोहो वेपथुना सहेति सकलं लिङ्गं त्रिदोषज्वरे यत्र स्यात् सहि कण्ठकुब्ज इदितः प्राच्चैकित्सानुधैः। सन्निपकेषु साध्यः स्यात् तन्द्रिकचित्तविभ्रमः। कर्णिको लिङ्गकः कण्ठकुब्जः पञ्चापि कष्टतः। दृग्दाहस्त्वतिकष्टेन संसाध्यस्त्रिषु भाषितः। रक्तक्षीवी भुग्ननेत्रः शीतगात्रः प्रलापकः। अभिन्यासोऽन्यकर्मैते षड़साध्याः प्रकीर्त्तिताः।" अथ तन्त्रान्तरे वातोल्बणादीनां सन्निपातज्वरविशेषाणां त्रयोदशानां कुक्षीपाकादीनि त्रयोदश नामान्तराण्याह "कुक्षीपाकः प्रोर्णुनावः प्रलापी क्षामदोषो दण्डपातोऽन्यकश्च। एषोदाहृत्याश्च चारिद्रसंज्ञो भेदा एते सन्निपातज्वरस्य। अजयोभूतहाख्यो वन्यापीडश्च संज्ञायः। संज्ञाश्च विशेषास्त्रयोदशान्यत्र"। अथैषां लक्षणानि "शोषाविपरिभ्रद्दवक्त्रशोषासितशोफितं सान्द्रम्। विलुठन्मस्तकमथितः कुक्षीपाकेन पीड़ितं विद्यात्। उत्क्षिप्य यः समङ्गं क्षिपत्यधस्ताच्छिरोऽन्यङ्ग-

स्थिति। तं प्रोर्णुनाव२ जुष्टं विचिन्वन्तं विजानीयात्। स्वेदभ्रमाङ्गभेदाः कम्पोदवर्त्तवेसिर्ग्रंथा कण्ठे। गात्रस्य गुर्वतोव प्रलापिश्लेष्मस्य जायते लिङ्गम्। अन्नद्वेषः शैत्यं वह्निः, स्वप्नरतिरपि तथा श्वासः। अङ्गमपि दग्धकल्पं सोऽन्नदोषाऽर्दितः कथितः। नक्तं दिवा न निद्रासुपैति स्पृशति मूर्द्धीनमभयः। भ्रमाय दण्डपाणोऽ भ्रमातुरः सर्वतो भ्रमति। नभसो स्पृशति चाकाशात् किञ्चित् यद्वीतं करौ प्रसारयतीत्यर्थः। "संपूर्यते शरीरं सन्धिभिरभितस्तोदरं भरता। श्वासातुरस्य सततं विचेतनस्यालकाङ्क्षत्वं च"। परिधावतीव गात्रे रूक्षपाके भुजङ्गपतङ्गस्फारणगणः। वेपथुमतः सदाऽस्थीदाऽवज्वरार्त्तस्य। रूक्षपाके पीड़ाभाजने गात्रस्य विशेषणमेतत्। "यस्याऽतिपीतमङ्गं नयने सुतरां मलस्तनोऽप्यधिकम्। दाहोऽतिशीतता वर्त्मरस्य स ज्ञारिद्रोद ज्ञेयः। ज्वलकसमानगन्धः स्वेदरजावाविरुद्ध गलरनुप्रः। व्यञ्जनोषद सन्निपाताद्ताच्याः पुमान् भवति। शब्दादीनधिगच्छति न स्वान्विषयान् यदि न्द्रियाणैः। क्षपति प्रलपति पश्यं स ज्ञेयो भूतहासा१०र्त्तः। येन सुरुज्वरवेगात् यन्त्रणेवावपीड्यते गात्रम्। रक्तं पीतञ्च वमेद्दयन्त्रापीड़ा१२ स विज्ञेयः। क्षतिमरति वमति क्रूजति गात्राण्यधिकचिरं नरः क्षिपति। सन्धाम१२सन्निपाते प्रलपत्यधिमस्तको भवति। मेचकपुरतिमेचकलोचनयुगलो मलोत्सर्गात्। संमोहिथि१३सितपिङ्कामण्डलयुक्तो ज्वरे नरो भवति। नारायण एव भिषक् भेषजमेतेषु जाह्नवीनीरम्। नैरुज्यक्षेतरेको नित्यं स्नेहुक्षयो ज्ञेयः।" अथासाध्यस्य सन्निपातज्वरस्य लक्षणमाह "सन्निपातज्वरस्यान्ते कर्णमूले सुदारुणः। शोथः संजायते तेन कश्चिदेव प्रमुच्यते।" सुदारुणः मारकत्वात् यतस्तेन शोथेन कश्चिदेव प्रमुच्यते कोऽपि जीवितं लभते इत्यर्थः। "सन्निपातज्वरान् कष्टसाध्यानपरे जगुः। दोषे प्रबुद्धे नष्टेऽग्नौ सर्वसम्पूर्णलक्षणः। सन्निपात ज्वरोऽसाध्यः कष्टसाध्यस्ततोऽन्यथा।" सर्वाण्यि दाहशीतादीनि सम्पूर्णानि आतुरगतानि प्रोक्तानि यावल्लक्षणानि यस्य सः। ततोऽन्यथा दोषे पक्षे अग्नौ दीप्ते अल्पलक्षणकः कष्टसाध्य इत्यर्थः।

सन्निपातज्वर पु० सन्निपातजो ज्वरः। सन्निपातशब्दोक्ते त्रिदोषप्रकृतिविकारजाते ज्वरे।

सन्निपातनुद् पु० सन्निपातं त्रिदोषजविकारं नुदति नुद-क्विप्। नेपालनिम्बे राजनि०।

सन्निबन्धन न० सम्यक् निबन्धनं प्रा०स०। १नानाख्यानस्यैवाख्यानामेकत्र सङ्घटने २तदुपयोगिग्रन्थभेदे च। ७त०। ३सम्यग्निबन्धनयुते त्रि० "सद्वृत्तिः सन्निबन्धनैति"माघः

सन्निभ त्रि० सम्+नि+भा-क। सदृशे लटा०। निभादिसूत्रस्य नित्यसमासता।

सन्निवेश पु० सम्+नि+विश-घञ्। १पुराटेर्वाङ्गस्थे विष्कारार्हे देशे अमरः। भावे घञ्। २सम्यक्स्थितौ।

सन्निहित त्रि० सम्+नि+धा-क्त। १निकटस्थे "सन्निहितं दुर्विरलन्तरङ्गम्" न्यायः "या याः सन्निहिता नाड्यस्ताः पुण्यतमाः स्मृताः"ति०त०। २सम्यक्स्थापिते च। भावे क्त। ३नैकट्ये न०। [स्यागे ३युक्ते ४अर्पिते च।

सन्न्यस्त त्रि० सम्+नि+अस-क्त। १निक्षिप्ते २त्यक्तसम्यक्-

सन्न्यास पु० सम्+नि+अस-घञ्। "काम्यानां कर्मणां न्यासं सन्न्यासं कवयोविदुः" गीतोक्ते विहितकर्मणां विधानेन १सम्यक्त्यागे २तदुपयोगिचतुर्थाश्रमे आश्रमशब्दे ८४२ पृ० दृश्यम्। ३चैत्रे मासि क्रियादिकर्त्तव्ये पुराणप्रसिद्धे शिवव्रतभेदे च। "चैत्रे शिवोत्सवं कुर्यात् नृत्यगीतमहोत्सवैः। स्नायात् त्रिसन्ध्यं रात्रौ च जपिष्यामी जितेन्द्रियः। शिवस्वरूपतां याति शिवप्रीतिकरः परः। क्रियादिषु यो मर्त्यो देहं संपीड्य भक्तितः। अन्यमेऽफलं तस्य जायते च पदे पदे। सर्वकर्मपरित्यागो शिवोत्सवपरायणः। भक्त्यौत्सवरथं कुर्याद्धात्रो नृत्यकृतूहलैः। नानाविधैर्महावाद्यैर्नृत्यैश्च विविधैरपि। नानावेशधरैर्नृत्यैः प्रीयते शङ्करः प्रभुः। किमत्र्यं भगवति प्रसन्ने नीललोहिते। तस्मात् सर्वप्रयत्नेन तोषणीयो महेश्वरः। शङ्खवाद्यं शङ्खतोयं वर्जयेत् शिवसन्निधौ। यात्रादुर्वारिमं मन्त्रमुत्सवं कारयेन्नृदा। उपोष्य श्रुत्वा संक्रान्त्यां व्रतमेतत् समापयेत्" हरिभक्तिपु० उत्तरख० ४अ०। ४जटामांसी शब्दच०।

सन्न्यासिन् पु० सम्+नि+अस-णिनि। १सन्न्याससयुते २चतुर्थाश्रमयुते तेषां धर्मभेदेन नामभेदो यथा

"तीर्थाश्रमवनारण्यगिरिपर्वतसागराः। सरस्वती भारती च पुरीति दश कीर्त्तिताः"। तेषां लक्षणानि यथा "त्रिवेणीसङ्गमे तीर्थं तत्त्वमस्यादिलक्षणे। स्नायात्तत्त्वार्थभावेन तीर्थनामाः स उच्यते। आश्रमस्थश्च प्रोढ़ आशापाशविवर्जितः। यातायातविनिर्मुक्त एतदा-

श्रमलक्षयम् २ । सरस्ये निर्झरे देशे वने वासं करोति यः । आशाशार्ङ्गविनिर्मुक्तो वनवासः स उच्यते । सरस्ये संस्थितो नित्यमानन्दनन्दने वने । त्यक्त्वा सर्वमिदं विश्वमरण्यत्रयमाश्रयेत् किल । वासो गिरिवरे नित्यं गोतास्यासे हि तत्परः । गम्भीराच्चलवृद्धिश्च गिरिवासः स उच्यते । वसेत् पर्वतमूलेषु प्रौढो यो ध्यानधारणात् । सारात्सारं विजानाति पर्वतान् परिकीर्त्तितः । वसेत् सागरगम्भीरो न च रत्नपरिग्रहः । मर्य्यादाश्च न लङ्घेत सागरः० परिकीर्त्तितः । सरस्तानवशो नित्यं सरवादो कवीश्वरः । संसारसागरे सारमिच्छो यो हि सरस्वती ८। विद्याभारेण सम्पूर्णः सर्वभारं परित्यजेत् । दुःखभारं न जानाति भारतीः परिकीर्त्तिता । ज्ञानतत्त्वेन सम्पूर्णः पूर्णतत्त्वपदे स्थितः । परब्रह्मरतो नित्यं पुरोनासा० स उच्यते" इति ब्रह्मब्रह्मरविजये विद्यारण्यस्वामिधृतम् ।२चैत्रे कर्त्तव्यशिवव्रतकर्त्तरि च । [च

सपक्ष पु० समानः पक्षोऽस्य । १तुल्यरूपे २निश्चितसाध्यके पक्षे

सपक्षाकरण न० सह पक्षेण पक्षेण सपक्षः *तथा क्रियते सपक्ष+डाच्+कृ-ल्युट् । पक्षेण सह शरवेधनरूपे अस्त्रनक्षेपणे । कर्म्मणि क्त । सपक्षाकृतः । तथा पीडिते त्रि० । [अमरः ।

सपत्न पु०सह एकार्थे पतति यतते पत-न सहस्य सः । शत्रौ

सपत्नारि पु०सपत्नस्य अरिरिव । (वेडवाश) वंशभेदे शब्दच० ।

सपत्नी स्त्री समानः पतिर्यस्याः ङीप् न च । १एकभर्त्काायां स्त्रियाम् २समस्वामिकायां भूम्यादौ च । तत्र सपतिरित्यपि ।

सपदि अव्य० सह पद्यते पद-इन् सहस्य सः । तत्क्षणे इत्यर्थे "सपदि सकलितालीमिति" कुमारः । [क्षीरः ।

सपर्य पूजायां कण्ड्वादि० पर०सक० सेट् । सपर्य्यति असपर्य्या स्त्री सपर-क्यप् च टाप् । पूजायाम् "सोऽर्घं सपर्य्याविधिमाजनेनेति" रघुः । [स्त्रियां २चतुर्थांशसहिते च ।

सपाद स्त्री सह पादेन चरणेन चतुर्थांशेन वा । १पादसहिते त्रि० समानः पिण्डः स्वदेहारम्भकांशभेदः आद्ये दैवपिण्डो वा यस्य समानस्य सः । एकदेहारभ्यदेहे ज्ञातिभेदे "सपिण्डा च या मातुरिति" स्मृतिः । ज्ञातीनाञ्च साक्षात् परम्परया अतिपरम्परया वा एकदेहारभ्यत्वात्तथात्वम् मिता० । २दातृत्वभोक्तृत्वेनैकपिण्डयुते दायभा० । एतच्च दायसपिण्डोपयोगिसापिण्ड्यमिति । सपिण्डता हि विषयभेदेन त्रिविधा सप्तमोपयोगिनी विवाहोपयोगिनी दायोपयोगिनी चेति । तत्र समानदेहसम्बन्धे या सपिण्डता सा सप्तमोपयोगार्था विवाहार्था च । आद्ये दैवपिण्डसम्बन्धात् सपिण्डता तु दायसपिण्डोपयोगिनीति विवेकः । यथोक्तं शुद्धितत्त्वे रघुनन्दनेन "मत्स्यपुराणे "लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः । पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम्" । नन्वेवं आत्मादिभिः सह पिण्डतल्लेपभोक्तृत्वासम्भवात् कथं सपिण्डत्वमिति चेदुच्यते तेषामपि पिण्डलेपयोः सम्बन्धोऽस्ति तथाच बोधायनः "प्रपितामहः पितामहः पिता स्वयं, सोदर्य्यभ्रातरः सवर्णायाः पुत्रः पौत्रः प्रपौत्रो वा एतानविभक्तदायादान् सपिण्डानाचक्षते । विभक्तदायादान् सकुल्यानाचक्षते सप्त स्वङ्गेषु तद्गामी ह्यर्थो भवति" इति अस्यार्थः पित्रादिपिण्डलेपेषु सपिण्डनेन भोक्तृत्वात् पुत्रादिभिश्चैषामेतत्पिण्डदानात् । यश्च जीवन् यस्य पिण्डदाता स हतः सन् सपिण्डनेन तत् पिण्डभोक्ता एवं सति मध्यस्थितः पुरुषः पूर्वेषां जीवन् पिण्डदाता हतः सन् तत्पिण्डभोक्ताऽपरेषां जीवतां पिण्डसम्बन्धदाता स्यात् । हतश्च तैः सह दौहित्रादिदैवपिण्डभोक्ता यतो ह्येषां स्वयं पिण्डदाता यश्च पिण्डभोक्तारस्तेऽविभक्तं पिण्डरूपं दायमश्नन्तीति अविभक्तदायादाः सपिण्डा इति । इदञ्च सपिण्डत्वं सकुल्यत्वञ्च दायसम्बन्धार्थम् अयोचाद्यर्थन्तु पिण्डलेपभुजामपि "लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः" इति प्रागुक्तमत्स्यपुराणात् । यच्चमाधवकूर्मपुराणयोर्लिखितवचनात् । पिण्डे व्यापरस्परं भाक्तृत्वं तथा लेपे तुल्यन्यायात् । ज्ञातित्वायां कूर्मपुराणम् "सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते । समानोदकभावस्तु जन्मनाम्नोरवेदने । पिता पितामहश्चैव तथैव प्रपितामहः । लेपभाजश्चतुर्थाद्याः सापिण्ड्यं साप्तपौरुषम्" । लेपभागित्वन्तु यावज्जन्मनाम्नोरवेदनं यावदस्तकनाम्नोऽश्रुतात् पूर्वपुरुषादयं जात इति विशेषः अयमस्मात् कुले जात इति सामान्यतो वा ज्ञायते तावत् समानोदकत्वमिति ज्ञातित्वं । अत्र परवचनेनैव सापिण्ड्यसिद्धौ पूर्ववचनपुनर्दानं जीवत्पितृकत्वादिना अधिकदूरेषु पिण्डलेपसम्बन्धेऽपि सपिण्डतानिवृत्तिज्ञापनाय । सर्वदेशीयाचारोऽपि तथा" । "अथ यः खलु पिण्डान् दत्त्वैव स्वतः परतश्चाप्रापिण्डभावः स कथं सपिण्डः । एकपिण्डदाहत्वभोक्तृत्व

लक्षणसम्बन्धाभावादिति चेत् तदुभोग्यतवेति ब्रूमः। भोग्यतायोजकञ्च सामान्यशास्त्रविषयत्वम्। ततश्चात्र तिद्वद्वप्रपितामहावधिकाधस्तनानां ष्ण्णां पुंसां प्रत्येकापेक्षया सप्तानामेकगोत्राणां स्वावधिपरतनानां सप्तानाञ्च सापिण्ड्यं पिण्डलेपभोदांतृत्वभोक्तृत्वसम्बन्धादिति। स्त्रीणान्तु भर्तृसापिण्ड्येन सापिण्ड्यम् "प्रत्तानां भर्तृसापिण्ड्यमिति" वचनात्। नन्वेवं कन्यायाः कथं सपिण्डतेति चेत् आदिपुराणवचनात् त्रैपुरुषं सापिण्ड्यम्। यथा "सपिण्डता तु कन्यानां सवर्णानां त्रिपौरुषी"। अत्र कन्यानामुद्वानाम् "अप्रत्तानां त्रिपौरुषमिति" वक्ष्यमाणवचनात्। तेन स्वात्मपञ्चमे षष्ठपितामहे सापिण्ड्यं निवर्त्तते इति प्रतिपादितम्। अत एव कन्यायाः प्रपितामहभ्रात्रा तत्सन्ततिभिः सह सापिण्ड्याभावात् कन्यामरणजननयोरेषां सपिण्डाशौचं नास्ति किन्तु समानोदकनिमित्तमेवाशौचमिति एवं तेषामपि जननमरणयोः कन्यावामिति मूलपाणिमहामहोपाध्यायः। यत्तु कूर्मपुराणम् "अप्रत्तानां तथा स्त्रीणां सापिण्ड्यं सप्तपौरुषम्। प्रत्तानां भर्तृसापिण्ड्यं प्राह देवः पितामहः" इति रत्नाकरधृतम्। तदिवाहे पितृपक्षविषयम्। यथा विष्णुपुराणम् "सप्तमीं पितृपक्षाच्च मातृपक्षाच्च पञ्चमीम्। उद्वहेत द्विजो भार्यां न्यायेन विधिना नृप!" सप्तमीं पञ्चमीं क्रियेति शेषः। भर्तृसापिण्ड्यमित्यत्र सप्तपौरुषमित्यनुषज्यते। तेन भर्तृसमानसापिण्ड्यमित्यर्थः। शङ्खलिखितौ "सपिण्डता तु सर्वेषां गोत्रतः सप्तपौरुषी। पिण्डोदकदानञ्च श्रौचाशौचं तदानुगम्"। गोत्रतः गोत्रैक्ये तेन मातामहकुले कदाचित् षट्पुरुषपर्य्यन्तं पिण्डसम्बन्धेऽपि न सपिण्डता। तानू सप्तपुरुषान् या समनात् पिण्डादिकमनुगच्छतीति तदानुगम्। एतेन "सपिण्डता एकशरीरावयवान्वयेन भवति तथाहि पितुः शरीरावयवान्वयेन पित्रा सह एवं पितामहादिभिरपि पितृद्वारेण तच्छरीरावयवान्वयात्। एवं मातृशरीरावयवान्वयेन भ्रात्रादिभिरिति। एवं पत्या सह पत्न्या एकशरीरारम्भकतया सापिण्ड्यम्। तथाच मार्कण्डेयपुराणे "एतत् षाट्कौशिकं शरीरं त्रीणि पितृतः त्रीणि मातृतः अस्थिस्नायुमज्जानः पितृतः, त्वङ्मांसरुधिराणि मातृतश्चेति" तत्र तत्तावयवान्वयप्रतिपादनात्। निर्बीजपिण्डाभावे तु सापिण्ड्ये भ्रातृपितृव्यादिसापिण्ड्यं न स्यात्। अतिप्रसङ्गस्तु सप्तान्यतमत्वेन प्रयोगोपाधिना निरसनीयः। यद्येवं मातामहादीनामपि मरणे सपिण्डत्वेन दशाहाशौचं प्राप्नोति, स्यादेतत् यदि मातामहादीनां मरणे "त्रिरात्रं स्यादशौचकम्" इत्यादिविशेषवचनं न स्यात्। यत्र तु विशेषवचनं नास्ति तत्र दशाहमिति मिताक्षरारत्नाकरादिसमग्रन्थास्तु लेपभाजस्त्वादि वाचनिकेऽर्थे सापिण्ड्ये एकशरीरावयवान्वयरूपकारणोपरचितायामेवकायां निर्बीजपिण्डसम्बन्धेन भ्रात्रादीनां सापिण्ड्यस्य मत्स्यपुराणबौधायनाभ्यां पूर्वमुक्तत्वात् कामधेनुकारकृताकल्पतरुपारिजातकारादिभिस्तथैव व्याख्यातत्वाच्च। रेतःशोणितपरिणामरूपत्वात्पत्न्यशरीरस्य भवतु वा तथा पत्या सह पत्न्या एकशरीरारम्भकतायाः प्रत्यक्षबाधितत्वात् कथं सापिण्ड्यं प्रमातामहादीनां विशेषवचनाभावात् सपिण्डत्वेन दशाहाद्यशौचप्रसङ्गाच्च मातामहादौ सापिण्ड्यस्य लोकविरुद्धत्वाच्च। भवतु वा तथा शरीरद्वारा सापिण्ड्यं तथापि वचनात् यथासप्तान्यतमत्वं तन्त्रं तथा "गोत्रतः सप्तपौरुषीति" वचनात् गोत्रैक्यमपि प्रागुक्तवचनात् कन्यायास्त्रीपौरुषम् उद्वाहाच्च भर्तृसपिण्डनेन सापिण्ड्यमिति चेत् तदेतन्मतेऽपि व्यवस्थार्थं न क्षतिरिति अतएव समन्तुवचनाभिहितं यद्दशमपुरुषपर्य्यन्तमशौचं तत् सप्तमपुरुषाभ्यन्तरायौचाद्यूनं त्रिरात्रं यथा "ब्राह्मणानामेकपिण्डस्थानादशमाद्भवत्यविच्छित्तिर्भवति आसप्तमात् सकुल्यविच्छित्तिर्भवति आतृतीयात् सधाविच्छित्तिर्भवति" अन्यथा पिण्डशौचक्रियादुच्छेदात् ब्रह्मकुलात्तुल्यो भवति" इत्यर्थः। एका समाना पिण्डस्थानेषां ते तथा यत्रैकोद्दिष्ट पिण्डे तु अनुशब्दो न युज्यते इत्यत्रानुशब्देनानुशब्दयुक्तमन्त्रो लक्ष्यते अनुयुक्तमन्त्रस्तु "ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा" इति तथा पिण्डस्थानशब्देन पिण्डसम्बन्धिस्थानशब्दयुक्तमन्त्रकरणकदैयजलं लक्षितम्। तथा च जाबालैः "वह्नीरक्षतं हतं पयःकीलालं परिप्लुतं स्वधास्त्र तर्पयत मे पितॄन्" इत्यनेन पिण्डान् सिञ्चेदित्युक्तम्। ततश्च एकपिण्डस्थानां समानोदकानामित्यर्थः। अतएव मनुः। "जन्मन्येकोदकानान्तु त्रिरात्रात् शुद्धिरिष्यते"। विष्णुपुराणे "मातृपक्षस्य पिण्डेन सम्बद्धाः ये जलेन वा" मातृपक्षस्य मातामहपक्षस्य ये जलेन सम्बद्धाः समानोदका इति" श्राद्धविवेकेऽपि व्याख्यातम्। "असम्बन्धा भवेद् या तु

पिण्डेनैवोदकेन च" इति विवाहेऽप्युक्तम्। अत्र पुत्रिकायाः पार्वणे पिण्डोदकयोः सम्बन्धात् कन्यामात्रेऽपि तद्योग्यतायाः सत्त्वात्। कन्या पिण्डोदकसम्बन्धोच्यते एतदनुसारादपि तस्याः सपिण्डता बोद्धव्या तस्मादेकपिण्डस्वधानामिश्रनेन समानोदकभावः समाख्यातः न तु दशम पर्य्यन्तं, पित्रादिजीवनादिना सापिण्ड्यसम्बन्धेऽपि सापिण्ड्यं विच्छिद्यते प्रायुक्तयुक्तैः स्वधेत्यस्य तदनुप्रयुक्तत्वेन वैयर्थ्यापत्तेः। अशुद्धधनाधिकारस्तु सन्निहिततराभावे सप्तमपुरुषपर्य्यन्तं मृतपितृकस्य स्वधोपलक्षितश्राद्धाधिकारः पुरुषत्रयपर्य्यन्तमिति अत्र स्वधाशब्दो मन्त्रपरः पितृमन्त्रपरोऽपि। तथा च शुद्धविष्णुधृता श्रुतिः "स्वधा वै पितृणामन्नमिति।" दशमपुरुषपर्य्यन्तं समानोदकत्वेऽपि न चिरात्रं किन्तु पञ्चिण्यादि तथाहि षट्कक्रियाभाधिक्यत्व पारस्करः "सर्वे ज्ञातयो भावयन्ति आसप्तमाद्दशमाद्वा समानव्यामवासेन यावत् सम्बन्धमनुस्मरेयुर्वा" इति भावयन्ति निष्पादयन्ति अत्र यावत्सम्बन्धमनुस्मरेयुरेकैकजातावधिमिति स्मरणं भवतीत्यनेनैव सर्वेषामुदकदाने प्राप्ते यद् आसप्तमाद्दशमादिवचनं तत्सन्निकर्षतारतम्येनार्थौचभेदेऽप्युदकक्रमसमाप्त्यर्थमिति। अर्थौचभेदस्तु सप्तमपर्य्यन्तं सपिण्डत्वाद्दशाहः। ततश्च दशमपुरुषपर्य्यन्तं ब्रह्महः। तथाच विष्णुरुदस्यती। "दशाहेन सपिण्डास्तु शुध्यन्ति मृतसूतके। त्रिरात्रेण सकुल्यास्तु स्नात्वा शुध्यन्ति गोत्रजाः।" ततश्चतुर्दशपुरुषपर्य्यन्तं पञ्चिणी ततश्च जन्मनामस्मृतिपर्य्यन्तमेकाहः। तथाच मिताक्षराविवादचिन्तामणयोर्धृतकूर्मः। "सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते। समानोदकभावस्तु निवर्त्तेताचतुर्दशात्। जन्मनाम्नस्तु तेरेके तत्परं गोत्रमुच्यते।" अत्र समानोदकत्वे द्विविधे पूर्वत्र गोतमः "पञ्चिणीमसपिण्डे परत्र हारीतः। "मातामहे त्रिरात्रं स्यादेकाहस्त्वसपिण्डके" इति। अतैव गोत्रजानामहः स्मृतमिति जाबालवचनं ततः परं सर्वथा समानोदकतानिवृत्तेः। स्नानमात्रमिति "स्नात्वा शुद्ध्यन्ति गोत्रजाः" इति हरदत्तोक्तत्वादिति"।

तथा च गोत्रैक्ये सति पिण्डलेपयोर्दातृत्वभोक्तृत्वान्यतरवत्त्वम् अर्थौचसापिण्ड्यम्। साक्षात्परम्परया सप्तमपर्य्यन्तदेहसम्बन्धवत्त्वं विवाहसापिण्ड्यं त्रिपुरुष पर्य्यन्तं देयपिण्डदातृत्वभोक्तृत्वान्यतरवत्त्वं दायभङ्गे सापिण्ड्यमिति विवेकः मिता० मातृसपत्न्या अपि सापिण्ड्यं स्वीकृत्य धनाधिकारोऽभिहितः तत्रापि समानदेहसम्बन्धयोग्यतयैव सापिण्ड्यात्। दायभागमते तु श्राद्धे देयपिण्डदातृत्वभोक्तृत्वाभावात् न तस्याः सापिण्ड्यं तद्योग्यत्वेऽपि स्त्रीमात्रस्य विशेषवचनाभावे धनाधिकारपर्युदासात् इति विवेकः एवं स्नुषाया अपि।

सपिण्डीकरण न० सह पिण्डेन सपिण्डः ततः भूततत्करोतौ च्वि+कृ-ल्युट्। प्रेतत्वविमोचनाय प्रेतोद्देशेन कर्त्तव्ये पित्रादिपिण्डसमन्वयकरणरूपे श्राद्धभेदे

सपिण्डीकरणप्रकारस्तत्कालादिश्च श्रा० त० निरूपितो यथा "अथ सपिण्डीकरणम्। तत्र गोभिलः "पूर्णे संवत्सरे षण्मासेषु त्रिपक्षे यदहर्वा इन्द्रियाण्युद्येत तदहरित्वार्घ्यदकपात्राणि सतिलगन्धपुष्पोदकानि पूरयित्वा त्रीणि पितृणामेकं प्रेतस्य प्रेतपात्रं पितृपात्रेष्वासिञ्चति। ये समानाः समनसः पितरो यमराज्ये तेषां लोकाः स्वधा नमो यज्ञो देवेषु कल्पताम्। ये समानाः समनसो जीवाजीवेषु मामकाः। तेषां श्रीर्मयि कल्पतामस्मिन् लोके शतं समाः" इति एतेनैव पिण्डो व्याख्यातः" इति। पूर्णे संवत्सरे इति सुखः कल्पः। तदङ्गो नवमो मासः "संवत्सरान्ते विप्राणां नवमासमिच्छन्ति" इति पैठीनसिवचनात्। तदङ्गौ यदो मासः। तदाद्यगङ्गौ त्रिपक्षः तदाद्यगङ्गौ अर्धौचापगमे प्रथममासस्य द्वादशभिर्दिनैर्द्वादशमासिकानि श्राद्धानि निर्वर्त्त्य त्रयोदशाहः सपिण्डीकरणकालः मूढस्य द्वादशाहो न तु त्रयोदशाह एव "मासिकार्थंयत् द्वादशाहश्राद्धं कृत्वा त्रयोदशेऽह्नि वा ततूर्ध्वान्मन्त्रवर्जं हि शूद्राणां द्वादशेऽह्नीति" विष्णुवचनात्। मासिकार्थंदिति मासिकार्थौ मासि मासि क्रियमाणश्राद्धप्रयोजनं प्रेताप्ययनादि तदुक्तं द्वादशाहक्रियमाणश्राद्धमित्यर्थः। यत्र त्वेकादशमासाभ्यन्तरेऽधिमासपातस्तत्र त्रयोदशसु दिनेषु त्रयोदश मासिकानि कृत्वा चतुर्दशेऽह्नि सपिण्डनं कार्य्यमिति "संवत्सराभ्यन्तरे यद्यधिमासो भवति तदा मासिकार्थं दिनमेकं वर्द्धयेत्" इति विष्णुवाक्यात् मूढस्य त्रयोदश दिनेषु त्रयोदश मासिकानि त्रयोदशेऽह्नि सपिण्डनं इत्यपरिकल्पनान्यायात्। एवञ्च द्वादशाहेन दिनद्वादशेति सिद्धोक्तं ज्ञेयम्। तद्वृत्तविष्णुवाक्ये दिनमेकं वर्द्धयेदिति श्रुतेः। श्राद्धाधिक्यमाह सत्यव्रतः "संवत्सरस्य मध्ये तु यदि स्यादधिमासकः।

तदा त्रयोदशे श्राद्धं कार्य्यमेवाधिकं भवेत्" । तत्राप्यशक्तौ प्रथममासस्यैकाह एव द्वादशमासिकसहितसपिण्डीकरणकालः । "सुखं श्राद्धं मासिमासि अपर्याप्तौ प्राहुर्व्रतं प्रति । द्वादशाहेन वा कुर्यादेकाहे द्वादशाय वा" इति मरीचिवचनात् । अपर्याप्तौ अशक्तौ ऋतुमांसद्वयम् । अत्र कृष्णे षष्ठमासिकदिने पञ्चममासिकं कृत्वा प्रथममाष्मासिकं कार्यं तदाद्युत्कर्षन्यायात् । न तु तत् पूर्वं षाण्मासिकं व्युत्क्रमापत्तेर्न च पञ्चममासि कमपि पूर्वदिने स्मृतितिथ्यभावात् एवमेव वाचस्पतिमिश्रः । अशक्तत्वनिमित्तमाह व्यासः "आनन्त्यात् कुलधर्माणां पुंसाञ्चैवायुषः क्षयात् । अस्थितेश्च शरीरस्य द्वादशाहः प्रशस्यते" । एतच्च द्वादशाहपदं यावाशौचान्ततृतीयदिनमात्रपरमिति प्राचीनमैथिलाः, अन्यतरस्यार्थलाभेन अन्यान्युक्ताशौचान्ततृतीयदिनमात्रोपलक्षकमिति श्राद्धदीपव्याख्याकृच्चिन्तामणौ । तदेतदसम्यक् "द्वादशाहेन वा कुर्यात्" इति मरीचिवचन "द्वादशाहे श्राद्धं कृत्वा त्रयोदशेऽह्नि वा कुर्यात्" इति विष्णुवचनाभ्यामेकवाक्यतया द्वादशदिनपरत्वात् । कुलधर्माणामिति कुलधर्मज्योतिरागमादिसिद्धानन्तरभाविनाशपरचक्रमयोत्पन्नक्लेशदेशगमनादिभिर्निमित्तैरशौचापगमे द्वादश दिनानि षोडशश्राद्धापकर्षकाल इति भूरिषाग्व्याख्यानात् मरीचिनैव "एकाहे द्वादशाह वेति" सामान्यत एव एकाहविधानाच्च । अतएव एकाहापेक्षया प्राशस्त्याभिधानमपि सङ्गच्छते अतएव प्रथममासस्य एकाह एव द्वादशमासिकसहितसपिण्डीकरणकाल इति श्राद्धविवेकः । अत्र यानि एकाहकर्त्तव्यतया द्वादशमासिकश्राद्धान्युक्तानि तानि मूढे श्राद्धे श्राद्धमासिकदिन एव कार्याणि नत्वाद्यमासिकं कृत्वा तदपरदिने एकादश मासिकानीति ज्ञेयम् । एवञ्च तेषामपकर्षे तन्मध्ये तदन्यतरे च कर्त्तव्यतया षण्मासिकदयसपिण्डीकरणापकर्षः सिद्ध्यतीति सुधीभिर्भाव्यम् । यदपरं दृढिरिति दृढिरग्राह्यमानं पुंसवनादि । यापरेत्व आसन्ना भवति तद्दिनेऽपि सपिण्डीकरणम् । तथाहि "प्रागावर्त्तनादङ्गः कालं विद्यात्" इति गोभिलसूत्रस्थेन पुंसवनादिकरूपछन्देर्योमध्यान्यतरे विधानात् सपिण्डीकरणस्य चापराह्णे विधानात्तयोः कालयोरबाधाय दृढिर्मूर्द्धदिने अपकर्षः । ननु सपिण्डीकरणस्यापराह्णिककाले किं प्रमाणमिति चेत् "अपराह्णे तु पैतृकम्" इत्युत्तरार्द्धवचनम् । किञ्च "यद्यद्यदन्नकः पुमा पैतृमत्ति तदा तदस्य" इन्द्रेश्वरसाधर्म्यात्तस्यैवोदाहरणं विधीयते" इति छन्दोगपरिशिष्टवचने यथा बह्वन्नमतुरोधात्तथैवाल्पान्नकर्त्रैकान्तरोधात् पैठीनसिः "विरुद्धधर्मसम्बन्धे भूयसां स्यात् सधर्मकत्वम्" इति जैमिनिसूत्रात् । तदेवापि बहुदेवताकपार्वणानुरोधात् "एकोद्दिष्टविधानेन कार्यमेतदपि पार्थिव !" इति विष्णुपुराणीयमेकोद्दिष्टांशे तदितिकर्त्तव्यतापरं न तु तत्कालपरम् । तथा च परिशिष्टप्रकाशदृष्टम् "श्राद्धद्वयमुपक्रम्य कुर्यात् सङ्कपिण्डताम् । तत्रोपार्वणवत् पूर्वमेकोद्दिष्टमथापरम्" इति । एवञ्च शुद्धितत्त्वलक्षितशम्बलकोपाख्यानवत् दृढिं निक्षिप्य कृतं सपिण्डीकरणं तदानीं विघ्नेन दृढ्यभावेऽपि दृढ्यारम्भकालान्तरं पूर्णसंवत्सरं वा प्राप्य पितृत्वप्राप्तिकमिति न सपिण्डनान्तरम् । अत्र "अकर्त्तरीति निक्षिप्य दाता विप्रायेति मन्त्रयेत्" इतिवच्चिन्त्येति चतुष्कोटिकसम्भावनोपलक्षणं भविष्यन्निमित्तस्य कर्मणः प्रत्युपकारेत्वात् । एवञ्च दृढिश्राद्धं यदर्थं कृतं तत् कर्म चेत् विघ्नात्तद्दिने न क्रियते तदा दिनान्तरे तत् कर्मणि क्रियमाणे तदङ्गत्वात् पुनर्दृढिश्राद्धं कर्त्तव्यमेव । "प्रधानस्याक्रिया यत्र श्राद्धं तत्क्रियते पुनः । तदङ्गस्याक्रियायान्तु नाङ्गिनं च तत्क्रिया" । इति छन्दोगपरिशिष्टेन श्राद्धकरणाभिधानात् । ज्ञेयाक्षिप्तं "पूर्णसंवत्सरे श्राद्धं षोडशं परिकीर्त्तितम् । तेनैव च सपिण्डत्वं तेनैवाद्यदिकमिष्यते" । अत्र पूर्णसंवत्सरक्रियमाणश्राद्धाद् यथोभयनिर्वाहः तथापकृतसपिण्डनाद्युभयनिर्वाहाय पूर्णसंवत्सरे श्राद्धद्वयान्तरं कार्यम्" । तत्रायं विशेषः तत्रोक्तो यथा "एवञ्च पार्वणे प्रागुक्तवचनेन शेषद्रव्येण पिण्डविधानात् तद्विकृतावपि सपिण्डीकरणे तत्क्रियमात् यद्यपि शेषाभावेऽपि पिण्डनिवृत्तिरायाति तथापि "यथोक्तवस्तुसम्प्राप्तौ श्राद्धं तदनुकारि यत् । यथाग्निहोत्रे गोधूमा व्रीहीणामिव शालयः" इति छन्दोगपरिशिष्टवचनात् "द्रव्याभावेऽपि प्रतिनिधिः श्राद्धार्थः" इति न्यायाच्च मध्याह्नाभावे गुडादिपक्वान्नवत् द्रव्यान्तरेणापि पिण्डदानं शेषद्रव्यनिवृत्तये तत्समभवे द्रव्यान्तरत्यागाय । अन्यथा तदङ्गाभावे कर्मवैगुण्यं स्यात् "सङ्कपिण्डक्रियायाम्" इति मनूक्तेः पिण्डस्य प्रेतपिण्डेन सह मिश्रीकरणं यत्रेति सपिण्डीकरणसमाख्याविशिष्टं कृतरूपं तत्र

तथाचरथं प्रतिपत्तिरूपकर्माङ्ग एव प्रतिपाद्याभावे तन्नि-
ष्ठत्तिः पशुयागे "लोहित निरस्यति सञ्ज्ञिरस्यति" इत्या-
दावुक्ता। अतएव यत्रवासुरूपप्रतिपत्तियागेऽपि यत्रो
यत्र वसति इति यत्रवासुसमाख्यानुरोधेनाङ्गतत्कृत्य-
विनाशेऽपि कृत्यान्तरप्रतिनिधिर्भवतीत्यारायणैर्गोभिलभाष्ये
उक्तः "प्राक् स्विष्टकृत आवापः" इति गोभिलसूत्रस्थ
आख्यानेऽपि आवप्यते इत्यावापः प्रधानहोमः स तु
स्विष्टकृद्धोमात् प्राक् न पश्चादित्यर्थः। एवञ्च सुरुक्होमे
लक्षणे यदि चरुर्नष्टो दुष्टो वा भवति तदान्यः पाक्यः
सुरुक् क्षते चेन्नाशदुष्टौ तदाज्येनैव स्विष्टकृद्धोम इति
सरला। एतेन ग्रेवनाग्ने पिण्डनिदृत्तिरिति वाचस्पति-
मिश्रोक्तं हेयम्। एतेनार्घ्यदानविधानेन पिण्डमिश्रष-
प्रकारो व्याख्यात उक्तः"।

"पितरि पूर्वं मृते तदूर्ध्वमन्तरे पितामहे प्रपितामहे
मृते यथा कर्त्तव्यं तथाह छन्दोगपरिशिष्टे कात्यायनः
"पितुः सपिण्डतां कृत्वा कुर्य्यान्मासानुमासिकम्। असं-
चयेन संस्कार्य्यौ पूर्वौ पोत्रप्रपौत्रकैः। पितरं तत्र
संस्कुर्य्यादिति कात्यायनोऽब्रवीत्। यापिण्डमपि शुद्धेन
शुद्धं पापक्षतापि वा। पितामहेन पितरं कुर्य्यादिति
विनिश्चयः"। पितुः सपिण्डतां कृत्वा प्रेतीभूतयोरपि
पितामहप्रपितामहयोः सत्त्वे प्रतिमासविहितं पार्वणं
पिण्डद्वयप्रपितामहादिद्वयप्रपितामहानां कर्त्तव्यं न तु
तयोः सपिण्डीकरणापेक्षा कार्य्यास्तु सपिण्डनेनासंस्कृ-
ताभ्यां सह पिण्डैः कथं सपिण्डनाख्यसंस्कारस्यकात्तदर्थं
तयोः सपिण्डीकरणमपेक्षणीयं पितुरेव वा सपिण्डन
सत्कर्त्तव्यीयमित्यत आह असंस्कृतेनेति। सत्कर्त्त-
व्यौ न कार्य्यौत्यनेन वचनेनोक्तं कथमसंस्कृतेन सह
संस्कार्य्यत्वाच्च यापिण्डमपीति यापिण्डमकृतसपिण्डी-
करणं शुद्धेन कृतसपिण्डीकरणेन पितामहेन पापक्षता
अकृतसपिण्डीकरणेनापि शुद्धं कुर्य्यादिति शाङ्खनिश्चयः।
अतो वचनबलादोष इति तात्पर्य्यम्। अत्र तु प्रेतीभूत
पितामहेन पितुः सपिण्डने पितामहैकोद्दिष्टमेव। "अस-
पिण्डीकृतं प्रेतमेकोद्दिष्टेन तर्पयेत्" इति प्रागुक्तप्रायश्चि-
वचनात्। एवमन्यत्रापि बोध्यं शुद्धप्रपितामहस्य प्रेतत्वे
तेन सह न कार्य्यमिति तात्पर्य्यम्। अत्र मातुः स-
पिण्डने श्वशुरार्थं श्वशुरयोः पिण्डो कुर्य्यैराश्वादौ। तथा
च मार्क्कः "पतिनैकेन कर्त्तव्यं सपिण्डीकरणं स्त्रियाः।
या मृता हि मृतैकत्वं कुर्य्यैरन्यत्र पितृन्। श्वशुर-
श्वायतो यश्चाच्छिरःप्रच्छादनक्रिया। पुत्रैर्द्वैमेव वा
कार्य्या मातृभ्युदयार्थिभिः"। अन्तरवनीतार्थं अन्तरव-
स्थिति लिङ्गव्यत्ययेन पुंस्त्वमिति रुद्रधरः। परन्त्वेवं
गोभिलसूत्रभाष्यङ्गतापि लिखितम्। अतएव प्रव्र-
जिते पतिते वा पितरि मृतेऽपि न पितामहादिभि-
र्मातुः सपिण्डीकरणं किन्तु पितामहादिभिरेव। "स्वेन
भर्त्रा सहैवास्याः सपिण्डीकरणं स्त्रियाः। एकत्वं या
गता यस्माच्चरमन्त्राद्धतत्रतैः। तस्मिन् सति सुताः
कुर्य्युः पितामहा सहैव तैः। इत्यत्र तस्मिन् सतीति
श्राद्धानर्हभर्तृपरत्वमम्। अतएव "तस्माच्चैव तु जीवन्त्यां
तस्याः श्वश्र्वेति निश्चयः" इति लघुहारीतेन श्वश्रूजी-
वने तस्याः श्वश्रूक्तं न तु श्वशुरेत्येतदप्युक्तम्।
एवं पितामहादिभिर्मातुः सपिण्डीकरणेऽपि सामान्येन
"ये चात्र त्वामनुयांच त्वमनु तांश्चै ते अधा"दिति मन्त्रो
न पाठ्यः मन्त्रलिङ्गविरोधात् अतएव आभ्युदयिके मात-
पक्षे औदवाहादिभिर्मन्त्रान्तरं लिखितं न तु ये चात्रत्वा-
मिति वस्तुतस्तु आभ्युदयिके छन्दोगानां मातरञ्च एव
नास्तीति वक्ष्यते"।

लघुहारीतः "सपिण्डीकरणान्तानि यानि श्राद्धानि
षोड्श। पृथङ्नैव सुताः कुर्य्युः पृथग्दृव्या अपि
क्वचित्। प्रेतसंस्कारकर्माणि यानि श्राद्धानि षोड्श।
यथाकालन्तु कार्य्याणि नान्यथा सुखते ततः"। पृथग्-
दृव्या अपि विभक्तधना अपि पृथक् न कुर्य्युः सुतरा-
मपृथग्धनाः पृथक् न कुर्य्युः किन्त्वपृथक् कुर्य्युः अत्र
विशेषयति मरीचिः। "मृते पितरि पुत्रेण क्रिया
कार्य्या विधानतः। बहवः स्युर्यदा पुत्राः पितुरेकत्र-
वासिनः। सर्वेषान्तु मतं कृत्वा ज्येष्ठेनैव तु यत् कृतम्।
दृव्येण चाविभक्तेन सर्वैरेव कृतं भवेत्"। पुत्रैक्य-
विशेषात् सर्वेषामधिकारे प्राप्ते ज्येष्ठस्य साधात् कर्त्त-
व्यतामाह बहव इति। ज्येष्ठेनापि सर्वेषां भ्रातॄणां
मतकरणेनैव करणं भवतु इति मतं ज्ञानं कृत्वा विभक्त-
त्वे दृव्यसंक्षेपेण च कृतं कर्म सर्वैरेव कृतमेव भवेत्।
तदानीं दृव्यासंक्षेपेण च तस्मात् दृव्यं प्राप्स्यामि इति कृत्वा
कर्त्तव्यम्। यदि तेन तत्र परिशुध्यते तदा स ऋणी
भवति प्रत्यवायी च भवतीति। न तु तेन श्राद्धान्तरं
कर्त्तव्यमिति श्राद्धविवेकोक्तं युक्तम्। "पृथङ्नैव सुताः
कुर्य्युरित्यनेन पृथक्करणस्य पर्य्युदस्तत्वेनानधिकारात्।
यथाकालमिति ऋणोद्धारादिसमासक्षतिः

ऊनेकाब्दन्यूनषण्मासहितोवत्सरेषु । न च विधान-सामर्थ्यादेव तत्तत्कालप्राप्तेरनर्थकमिदमिति वाच्यम् तत्तत्कालानां द्वादशाद्याद्युपेक्षया प्राधान्यबोधनार्थत्वात् अत्र "आनन्त्यात् कुलधर्माणां पुंसाञ्चैवायुषः क्षयात् । अस्थितेश्च शरीरस्य द्वादशाद्याः प्रशस्यते" इति व्यास-वचनोक्तप्रशस्त इत्यनेन कुमाचारव्योतिःशास्त्रादिज्ञात-ऋतिमरणराष्ट्रोपप्लवादिहेत्वदेशादिगमनात्तुषारादेव सपिण्डीकरणापकर्षे द्वादशाद्यापेक्षया प्रागुक्तनवमासा-दिगौणकालपरित्यागः । अथ वा यथाकालमित्यादेर्यदर्थवा द्वद्विरावृत्तेत्यनेनावश्यकनामकरणादिद्वयर्थमेवापकर्षो न त्वनावश्यकेष्टपूर्त्ताद्यर्थोपकर्षः कार्य्य इति तात्पर्य्यम् । अतएव वसुहारीतेन "तथैव कार्य्यं यत् कर्म तत्सवत्सरात् प्रभृत्याहृते" इत्यनेन कार्य्यत्वापकर्षनिमित्तता नास्तीत्युक्तम् यदि त्वावश्यकद्वद्विनिमित्तेनापकर्षः कृतस्तदा इष्टापूर्त्तादि कार्य्यं तत्सवत्सरान्तरेऽपि कर्त्तव्यमिति आद्यविवेकोऽप्येवं यद्यपि गोभिलसूत्रादौ सपिण्डीकरणस्यैवापकर्षः प्रागुक्त-स्तथापि सपिण्डीकरणापकर्षे ततपूर्वकर्त्तव्यश्राद्धानामपि तदादिसदन्यायादपकर्षः । "सपिण्डीकरणान्ता तु प्रेतक्रिया प्रेतक्रिया बुधैः" इति शातातपवचने प्रेतक्रियायाः सपिण्डीकरणान्तत्वं प्रतीयते । अत्र द्वद्विनिमित्तं विना सपिण्डनापकर्षे कृते पूर्णसंवत्सरकालं प्राप्य प्रेतत्वपरी-हारमाह विष्णुधर्मोत्तरम् "कृते सपिण्डीकरणे नरः संवत्सरात् परम् । प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते" द्वद्विनिमित्तकसपिण्डीकरणापकर्षे कृते तत्क्षणादेव प्रेतत्वपरीहारः तदर्थमेवापकर्षात् एवञ्चान्यनिमित्तापः कर्षे द्वद्विकालं प्राप्य प्रेतत्वपरीहारः तत्कालस्य पूर्ण-संवत्सरकालतुल्यत्वात् । "ऊर्ध्वं संवत्सरात् द्वद्धौ पूर्णे संवत्सरेऽपि वा । ये सपिण्डीकृताः प्रेता न तेषान्तु पृथक्क्रिया" इति शातातपवचनात् ।

सपिण्डीकृत त्रि॰ सह पिण्डैः पित्रादिपिण्डैः सपिण्डः ततः च्वि-कर्मणि क्त । यद्वृद्धेन सपिण्डीकरणं श्राद्धं कृतं तस्मिन् मृते जने "ये सपिण्डीकृताः प्रेताः" इति शाता॰ स्मृतिः । [घोषातकीवृक्षे राजनि॰ ।

सपीतक पु॰ सह समानः पीतकेन सहस्य सः । राज-

सपीति स्त्री पा-क्तिन् पीतिः पानम् सह एकत्र पीतिः । ज्ञात्यादीनां सह भोजने शब्दर॰ । [तत्कीडके राजनि॰ ।

सपीतिका स्त्री सह पीतेन कप् अत इत्वम् । कृत्तिघोषा-

सप्तक न॰ सप्तानामवयवसमू कन् । १सप्तसङ्ख्यावयवे । सप्त प्र॰ माणमस्य कन् । २सप्तसङ्ख्यान्विते त्रि॰ । पूरणे कन् । ३सप्तानां पूरणे च । [खदायाम् अमरः ।

सप्तकी स्त्री सप्तभिः स्वरैरिव कायति शब्दायते कै-क । मे-

सप्तचत्वारिंशत् स्त्री सप्ताधिका चत्वारिंशत् मध्य॰ । (सातचल्लिश) १सङ्ख्यायां २तत्संख्यान्विते च । एवं सप्तद-शादयः सप्ताधिकतत्तत्संख्यायां तत्संख्यान्विते च । पूरणे डट् । सप्तचत्वारिंश तत्तत्संख्यापूरणे त्रि॰ स्त्रियां ङीष् एवं सप्तदशादयोऽपि तत्पूरणे एवं तमप् सप्तचत्वारिं-शत्तम तत्पूरणे त्रि॰ स्त्रियां टाप् ।

सप्तच्छद पु॰ सप्त सप्त छदाः पत्रमिव यस्य छदौ संख्या-शब्दस्य दीर्घत्वार्षत्वं भाव्योक्ता । (छातिम) वृक्षे राजनि॰ ।

सप्तजिह्व पु॰ सप्त जिह्वा इव ज्वालादयोऽवयवा यस्य । वह्नौ त्रिका॰ । "काली कराली च मनोजवा च सुलोहिता चैव धूम्रवर्णा । स्फुलिङ्गिनी विश्वरुची च देवी लेलायमाना इति सप्त जिह्वाः" इत्युक्तानां सप्ता-नामग्निज्वालानामेव तत्त्विज्ञानसुकृतम् । यद्विजिह्वानां वर्णभेदः अवस्थाभेदश्च यथेयविमर्शिन्यां दर्शितो यथा "हिरण्या तप्तहेमाभा सूर्यपार्श्वेदिशि स्थिता । वैदूर्य्यवर्णा कनका पार्श्वां दिशि समाश्रिता । तरुणा-दित्यसङ्काशा रक्ता जिह्वाग्निसंस्थिता । कृष्णा नीलाभ्र-सङ्काशा नैर्ऋत्यां दिशि संस्थिता । अतिरक्ता जवा-भासा वायव्यां दिशि संस्थिता । बहुरूपा तथा ख्याता दक्षिणोत्तरसंस्थिता" ।

सप्तज्वाल पु॰ सप्त कालीत्यादयः ज्वाला यस्य । १वह्नौ हेमच॰ । २सप्तार्चिरादयोऽस्यत्र अमरः । [वह्नौ अमरः ।

सप्ततन्तु सप्तभिः भूरादिभिर्मन्त्राक्षरैस्तन्यते तन-तुन् ।

सप्तति स्त्री सप्तगुणिता दशतिः नि॰ । (सत्तर) १संख्यायां २तत्संख्यान्विते च । ततःपूरणे डट् । सप्तत तत्संख्याप्-रणे त्रि॰ स्त्रियां ङीप् ।

सप्ततितम त्रि॰ सप्ततेः पूरणः तमप् । तेन सप्ततिसंख्या पूर्यते तस्मिन् अर्थे स्त्रियां टाप् ।

सप्तद्वीपा स्त्री सप्त जम्बूप्लक्षतयोद्वीपाः यस्याः । जम्बूप्लक्ष-तिसप्तद्वीपयुतायां पृथिव्याम् । जम्बूद्वीपशब्दे २०४३५ पृ॰ दृश्यम्

सप्तधा अव्य॰ सप्तन्+प्रकारे धाच् । सप्तप्रकारे ।

सप्तधातु पु॰ ब॰व॰ सप्तसंख्यिता धातवः । देहस्थेषु "रसाच्च मांसमेदोऽस्थिमज्जानः शुक्रसंयुताः । शरीरस्था इमे ज्ञेयाः पञ्चभूतैः सप्त धातव" इत्युक्तेषु रसादिषु धातुषु राजनि॰ ।

सप्तन् पु० त्रि० । सप—तनिन् । (सात) १संख्यान्विते २ततूर्ध्वसंख्यायां च महाभाष्यम् । [पू० इयत्रम् ।

सप्तनाड़ीचक्र न० इष्टिप्रानार्थे चक्रभेदे चक्रशब्दे २८२१

सप्तनामा स्त्री सप्त नामानि यस्याः डाप् । आदित्यभक्तायाम् राजनि० । [राजनि० । २सप्तच्छदवृक्षे च ।

सप्तपक्ष पु० सप्त सप्त पक्षाणि प्रतिपक्षं यस्य । १ऊहरक्षे

सप्तपदी स्त्री सप्तानां पदानां समाहारः ङीप् । विवाहकाले सप्तलिकासु मन्त्रेषु सप्तसु पदेषु । तत्प्रकारो भवदेवभट्टोक्तो यथा "ततो जामाता प्रागुदीचीं गत्वा वधूं सप्तभिर्मन्त्रैः सप्तसु मण्डलिकासु सप्त पदानि नयेत् । वधूश्च दक्षिणपादं नीत्वा पश्चात् वामपादं मण्डलिकां नयेत् । जामाता च वधूं ब्रूयात् वामेन पादेन दक्षिणं पादमाक्रमयेति" इत्यादि । अस्यैव कर्मणो विवाहनिष्पादकत्वसूचकं मनुना "पाणिग्रहणिकामन्त्रा नियतं दारलक्षणम् । तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे" । तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे" ।

सप्तपर्ण पु० सप्त सप्त पर्णान्यस्य प्रतिपर्वम् । (छातिम) वृक्षे अमरः । "सप्तपर्णो ब्रह्मवृक्षश्छत्रकश्छत्रिवृक्षकः । दीपनः श्वासगुल्मघ्नः स्निग्धोष्णस्तुवरः कटुः" भावप्र० तद्गुणा वक्ष्याः । २चम्पालुलतायां स्त्री रत्नमा० ङीप् । "द्राक्षाटाड़िमखर्जूरसदृक्षत्वात् सशर्करम् । बालाचूर्णं समध्वाज्यं सप्तपर्णसदाकृतम्" शब्दच० उक्ते १खाद्यभेदे न० ।

सप्तपाताल न० समाहारद्विगुः पात्रादि । "अतलं वितलञ्चैव नितलञ्च गभस्तिमत् । महातलञ्च सुतलं पातालं सप्त कीर्त्तितम्" इत्युक्तेषु सप्तसु भूमेरधःस्थलोकेषु ।

सप्तप्रकृतिविकृति स्त्री ब०व०सप्तसंख्याताः प्रकृतिविकृतयः । सांख्यसिद्धे महदहङ्कारसहितसूक्ष्मपञ्चभूतहेतुशब्दादितन्मात्रात्मके पदार्थसप्तके "महदाद्याः प्रकृतिविकृतयः सप्त" इति सांख्यकारिका । भोग्यैकपदार्थहेतुत्वात् प्रकृतित्वम् प्रकृतिकार्य्यत्वाच्च विकृतित्वमासाम् ।

सप्तभद्र पु० सप्तसु स्थानेषु भद्रमस्य । शिरीषवृक्षे शब्दच० ।

सप्तम त्रि० सप्तानां पूरणः मट् । येन सप्तसंख्या पूर्य्यते तस्मिन्नर्थे स्त्रियां ङीप् । सा च चन्द्रस्य सप्तमकलाया छायारूपायां तिथौ च तिथिशब्दे १२८५ पृ० दृश्यम् ।

सप्तरक्त पु० सप्त रक्तानि प्रशस्तान्यस्य । "पाणिपादतले रक्ते नेत्रान्तरनखानि च । तालुकाधरजिह्वाश्च प्रशस्ता सप्त रक्तता" इत्युक्तस्थानेषु रक्ततावति जने ।

सप्तर्षि पु० ब०व० । सप्त ऋषयः संज्ञात्वात् कर्म० । "मरीचिरत्रिः पुलहः पुलस्त्यः क्रतुरङ्गिराः । वशिष्ठश्च महाभाग ! सप्तैते ब्रह्मणः सुताः" इत्युक्तेषु सप्तसु ऋषिषु । मन्वन्तरभेदे तेषां नामभेदा ऋषिशब्दे उक्ता १४५२ पृ० दृश्या ।

सप्तर्षिमण्डल त्रि० ६त० । आकाशे नित्यं ध्रुवनक्षत्रपरिभ्रमके नक्षत्रसप्तकात्मके नक्षत्रमण्डलभेदे "सप्तर्षिमण्डलं तस्माद्दृश्यते सर्वकोपरीति" पुराणम् । तच्चारादि ऋषिशब्दे १४५२ पृ० दृश्यम् ।

सप्तला स्त्री सप्तधा छाति छा-क । १नवमालिकायाम् अमरः २चर्मकषायां २गुञ्जायां ४पाटलावाञ्च मेदि० ।

सप्तशती स्त्री सप्तानां शतानां समाहारः । मार्कण्डेयपुराणान्तर्गतसप्तशतमन्त्रसमुदायरूपे देवीमाहात्म्यबोधके त्रयोदशाध्यायात्मके ग्रन्थभेदे तन्मन्त्रविभागः चण्डीशब्दे २८५५ पृ० दृश्यः । "मध्ये सप्तशती जपेदिति" तत्र दर्शितवाक्यम् ।

सप्तशलाक पु० सप्त शलाकाकारा रेखा यत्र । ज्योतिषोक्ते विवाहादौ वर्ज्यदोषसूचके सप्तशलाकाकारितचक्रभेदे चक्रशब्दे २८२० पृ० दृश्यम् । उपयमशब्दे १२६२ पृ० दृश्यम् ।

सप्तशिरा स्त्री सप्त शिरा यस्याः । ताम्रवल्ल्यां राजनि० ।

सप्तसप्ति पु० सप्त सप्तयोऽस्य वा यस्य । १सूर्य्ये हेमच० २अर्कवृक्षे च । सप्तात्मादयोऽस्य ।

सप्तसागर पु० ब०व० । सप्तसंख्याताः सागराः । "लवणेक्षुसुरासर्पिर्दधिदुग्धजलाकराः" इत्युक्तेषु सप्तसु सागरेषु सप्त इतादिकल्पिताः सागरा एव देवपदार्थोऽत्र कर्म० । मत्स्यपुराणोक्ते खनामख्याते महादानभेदे मत्स्यपु० २८६ अ० तद्विधानं दृश्यम् ।

सप्तांशु पु० सप्त कांशवोऽस्यावयवस्य । सप्तरश्मियुक्ते शब्दे । [यङ्गे लटा० ।

सप्तांशुपुङ्गव पु० सप्तभिरंशुभिः पुङ्गव इव श्रेष्ठत्वात् । सूर्य० ।

सप्तार्चिस् पु० सप्त अर्चींषि यस्य । १वह्नौ अमरः २चित्रक वृक्षे ३शनिग्रहे हेमच० । ४क्रूरनेत्रे त्रि० मेदि० ।

सप्ताश्व पु० सप्त अश्वा यस्य । १सूर्य्ये २अर्कवृक्षे अमरः ।

सप्ताश्ववाहन पु० सप्त अश्वाः वाहनमस्य । १सूर्य्ये २अर्कवृक्षे च "शुचिः सप्ताश्ववाहनः" सूर्य्यस्तवः ।

सप्ति पु० सप—ति । अश्वे अमरः ।

सफर पुंस्त्री० सप—अरन् पृषो० यस्य फः । (पुँटी) मत्स्ये स्त्रीत्वे ङीष् । "सफरी चलसफरीविषद्वितोऽः" माघः अस्य तालव्यादितेलत्वे ।

सफल त्रि० सह फलेन सहस्य सः। १अन्वर्थे २फलयुक्ते च जटा०।

सबल त्रि० सह बलेन सामर्थ्येन सैन्येन वा सहस्य सः। १सामर्थ्यान्विते २सैन्ययुक्ते ३ज्यो०उक्तबलार्थे "सबलेऽङ्गपतौ खस्थे राज्याप्ति सुखकीर्त्तयः" नीलक०ता०।

सब्रह्मचारिन् पु० समानं ब्रह्म वेदपठनकालीनं व्रतं चरति चर-णिनि समानस्य सः। एकगुरुसकाशात् वेदाध्ययनकाले तद्विद्यजनसमानव्रताचारयुते अमरः।

सभर्त्तृका स्त्री सह भर्त्रा पत्या सहस्य सः कप्। विद्यमानपतिकायां स्त्रियाम् अमरः।

सभा स्त्री सह भान्ति अभीष्टनिश्चयार्थमेकत्र यत्र सङ्घे। १बहूनां समावेशनस्थाने २तदधिष्ठायिजनसमूहे च अमरः "यस्मिन् देशे निषीदन्ति विप्रा वेदविदस्त्रयः। राज्ञः प्रतिकृतो विद्वान् ब्राह्मणस्तां सभां विदुः"। विद्वत्संकृतावपि सभापर्य्यायपरिभाषाह "त्रैविद्यो हैतुकस्तर्की निरुक्तो धर्मपाठकः। त्रयश्चाश्रमिणः पूर्वे परिषत् स्याद्दशावरा" मनुः। १दूते ३अट्टे मेदि० ५समूहे हेमच०। समूहपरत्वे हृत० न०। दासीसभं नृपसभमित्यादि। व्यवहारदर्शनार्थसभाख्यानञ्च वीरमि० दर्शितं यथा वृद्धस्मृतिः "दुर्गमध्ये गृहं कुर्याच्चतुरङ्गसमन्वितं पृथक्। प्राग्दिशि प्राङ्मुखीं तत्र कारयेत् प्राङ्मुखार्थिनाम्। प्रतिभालेखदेवैव युक्तामन्यमुखेन तथा" इति कारयेत् वास्तुशास्त्रोक्तलक्षणेन लक्षितम्। कन्यमुखेनेति सभाकारदनुः। सभाया धर्माधिकरणत्वं कात्यायन आह "धर्मशास्त्रानुसारेण कर्त्तव्यं शास्त्रविवेचनम्। यत्राधिक्रियते स्थाने धर्माधिकरणं हि तदिति"। तत्र सभ्योपवेशनमाह मनुः "यस्मिन् देशे इत्यादि" प्राग्वत्। तत्र एव इत्युपलक्षणम् अधिकारिणामपि कृतत्वात्। तत्र वक्ष्यते। अधिकृतो विद्वान् ब्राह्मविवाकः सह प्रविशेत् सभाम् सभामेव प्रविशेत्यादिवचनात् सभा सह्यव्यवहारदर्शनस्थानम्। अन्यान्यसङ्ख्यानि व्यवहारस्थानावाक्यादवगन्तव्यानि। "दश स्थानानि वादानां पक्षं चैवात्रयोदशम्। निर्णयं येन गच्छन्ति विवादं प्राप्य वादिनः। चारणास्तु खलैः कृत्यैः सार्थिकाः सार्थिकैस्तथा। सैनिकाः सैनिकैरेव ग्रामेऽध्यक्षैरधिष्ठिताः। उभयत्रासमस्तत्र वृद्धैर्व्यवहृते स्थानमीप्सितम्। कुलिकाः सार्थसङ्घाश्च पुरग्रामनिवासिनः। ग्रामपौरगणश्रेणीब्राह्मणाद्यैर्विचारणम्। वर्णिनः। कुलानि कुलिकाश्चैव नियुक्ता नृपतिस्तथा"। इति। खलैरारण्यकैः ग्रामेऽपीत्यपिशब्दाद् ये ग्रामेऽरण्यादौ च निवसन्ति ते उभयवासिभिर्निर्णयं कर्त्तुमुभयव्यवहाराभिज्ञत्वात्तेषाम् कुलिकाः कुलश्रेष्ठाः। सार्थो ग्रामदेवयात्रादौ मिलितो जनसङ्घः तन्मुख्याः सार्थवाहादयः। पुरं सह्यनगरम् तत्रादर्शनीनो ग्राम इति पुरग्रामनिवासिनोभेदः सार्थकुलिकादीनि पञ्च स्थानानि तानि चारणकादीनामेव, ग्रामादीनि दश स्थानानि साधारणानि। ग्रामो ग्रामाकारेणावस्थितोजनः। पौरः पुरवासिनां समूहः "श्रेणी रज्जकादशदश हीनजातयः। चातुर्विद्याः आन्विक्षिक्यादिविद्याचतुष्टयोपेताः वर्णिनो गणप्रभृतयः। राज्ञः सभाप्रवेशस्तत्रैव दर्शितः। तत्र मनुः "व्यवहारान् दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः। मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीतः प्रविशेत् सभाम्। तत्रासीनः स्थितो वापि पाणिप्रह्वः प्रदक्षिणम्। विनीतवेषाभरणः पश्येत् कार्याणि कार्य्यिणाम्। प्रत्यहं देशदृष्टैश्च शास्त्रदृष्टैश्च हेतुभिः। अष्टादशसु मार्गेषु निबद्धानि पृथक् पृथक्। धर्मासनमधिष्ठाय संवीताङ्गः समाहितः। प्रथमं लोकपालेभ्यः कार्यदर्शनमारभेत्" इति।

सभाज सेवने दर्शने च सक० प्रीतौ अ०आत्म० उभ० सेट्। सभाजयति ते अससभाजत्-त। अनेकाच्त्वान्न मोपदेशः

सभाजन न०सभाज-भावे ल्युट्। गमनागमनादिकाले सुखानन्दप्रीतिसाधने सम्भाषणे १पूजने च अमरः।

सभासद् पु०सभायां सीदति-क्विप्। सामाजिके सभ्ये अमरः तल्लक्षणमाह याज्ञ० "श्रुताध्ययनसम्पन्नाः धर्मज्ञाः सत्यवादिनः। राज्ञा सभासदः कार्य्या रिपौ मित्रे च ये समाः" इति। श्रुतेन मीमांसाव्याकरणादिश्रवणेन वेदाध्ययनेन च सम्पन्नाः। धर्मज्ञाः सत्यवादिनः सत्यवदनशीलाः रिपौ मित्रे च समाः द्वेषरागशून्याः एतादृशा सभासदः सभायां सदसि यथा सीदन्ति तथा दानमानसत्कारैः राज्ञा कर्त्तव्याः सभ्यत्वेन वरीतव्या इत्यर्थः। अतस्तेषामृत्विगादिवत् स्वाध्यायोऽध्येतव्यो यूपं छिनत्ति पुरोडाशमित्यादिवत् सत्यपि धर्मत्वेऽतद्धेयत्वात् तद्गतैकत्ववद्बहुत्वं विवक्षितम्। तत्र यद्यपि कपिञ्जलन्यायेन त्रित्वमात्रेणापि चरितार्थं तथापि कृत्स्नबहुत्वविकल्पपरम्। तथा च वृद्धस्मृतिः "लोकवेदज्ञधर्मज्ञाः सप्त पञ्च त्रयोऽपि वा। यत्रोपविष्टा विप्राः स्युः सा यज्ञसदृशी सभा" इति। मनुना तु त्रय एवोक्ताः।

"यस्मिन् देशे निषीदन्ति विप्रा वेदविदस्त्रयः" इति। अत्र त्रिभ्योऽन्यूनाः सप्तभ्योऽधिकाश्च न कार्य्या इत्यत्र तात्पर्य्यं सङ्गावैषम्यन्तु "भूयोऽल्पविरोधे भूयसां स्यात् सधर्मकत्वमिति न्यायेन विप्रतिपत्तावधिकसङ्गावचनमादरणीयं गुणसाम्ये। तद्वैषम्ये तु शतमप्यन्यायान्न पञ्चतीति न्यायेन गुणवत्तरवचनमेवेति प्रदर्शनार्थम्। "यत्तु चत्वारो धर्मज्ञाः पर्य्याप्तमेवैतदिमेव वा। सा ब्रूते यं स धर्मः स्यादेको वाऽध्यात्मचिन्तकः" इति योगीश्वरेण विषमसङ्ख्यत्वमपि बहुत्वमपि चानादृतम्। तत्तु पूर्वोक्तानां धर्मकारकत्वापकर्षहेतूनां सन्देहनिर्णयविषयं प्रक्रमात्। व्यवहारविषये तु त्रयवराणां विषमसङ्ख्यानामेव सभ्यत्वं विशेषविधानादित्यवसेयम्। एते च ब्राह्मणा एव। मनुबृहस्पतिभ्यां विप्रपदोपादानात्। न तु सभ्यैः स्त्रियुक्तैः प्राज्ञैर्मौलैर्हितोक्तमैः। धर्मशास्त्रार्थकुशलैरर्थशास्त्रविशारदैरिति" हितोक्तमपदञ्च कात्यायनेनोपादानात्। नारदेन "राजा तु धार्मिकान् सभ्यान्नियुञ्जीत सुपरीक्षितान्। व्यवहारधुरां वोढुं ये शक्ताः पुङ्गवा इव। धर्मशास्त्रेषु कुशलाः कुलीनाः सत्यवादिनः। समाः शत्रौ च मित्रे च नृपतेः स्युः सभासदः" इति। विचार्य्यं त्रैविधिभिः कार्य्यं कुलैर्यत्र विचारितम्। न खैरेव त्रैविद्यातं मयाज्ञातं स्यकुलैः। कुलादिभ्योऽधिकाः सभ्यास्तेभ्योऽध्यक्षोऽधिकः ततः। सर्वेषामधिको राजा धर्मं यत्नेन निश्चितम्। उत्तमाधममध्यानां विवादानां विचारणात्। उपर्य्युपरि बुद्धीनामीश्वरन्नीश्वरबुद्धयः" वर्णभेदोऽनादृतः।

शुक्रनीतिपरिशिष्टेऽपि तथैवोक्तं यथा

"तद्वर्णजो भवेद्राजा योज्यस्तद्वर्णजः सदा। तद्वर्णं एव सुधियः प्रायशः सङ्गच्छन्ति हि। व्यवहारविदः प्राज्ञा दक्षशीलगुणान्विताः। रिपौ मित्रे समा ये च धर्मज्ञाः सत्यवादिनः। निरालस्या जितक्रोधकामलोभाः प्रियंवदाः। राज्ञा ते च नियोज्याः स्युः सभ्याः सर्वासु जातिषु" "राजा तु धार्मिकान् सभ्यान् नियुञ्जीत सुपरीक्षितान्। व्यवहारधुरां वोढुं ये शक्ताः पुङ्गवा इव। लोकवेदशास्त्रधर्मज्ञाः सप्त पञ्च त्रयोऽपि वा। यत्रोपविष्टा विप्राः स्युः सा यत्नसदृशी सभा। श्रोतारो बधिरसत्र कर्त्तव्याः सुविचक्षणाः। अनियुक्तो नियुक्तो वा धर्मज्ञो यत्र भाषते। एकः शास्त्रमधीयानो विन्द्य च कार्यनिश्चयम्। तस्माद् बहुागमः कार्य्यो विवादेषु

त्तमो नृपैः। स ब्रूते यं स धर्मः स्यादेको वाऽध्यात्मचिन्तकः। एकद्वित्रिचतुर्वेदं व्यवहारानुचिन्तनम्। कार्य्यं पृथक् पृथक् सभ्यै राज्ञा चैवोत्तरैः सह। अर्थिप्रत्यर्थिनौ सभ्यान् लेखकप्रेक्षकांश्च यः। धर्मवाक्यैरञ्जयति स सभास्तारताभियात्। नृपोऽधिकृतसभ्यांश्च स्मृतिगणकलेखकौ। हेमाग्न्यम्बु सुं पुरुषः साधनाङ्गानि वै दश। एतद्दशाङ्गकरणं यस्मात्तस्मात् पार्थिवः। न्यायान् पश्येत् कृतमतिः सा सभाऽध्वरसन्निभा"।

सभापति पु० ६त०। सभायाः स्वामिके रूपे "सभायतिश्च रूपतिरेव "दुर्गसभ्ये रूढं कुर्यादित्यादिना ढक्प्रत्ययादिभिः सभानिर्माणतद्रक्षणादेस्तत्र सभ्योपवेशनादेश्च तस्यैव विधानात्" वीरमि०।

सभास्तार पु० सभां स्तृणाति स्तृ-घञ्। १सभ्ये अमरः। "अर्थिप्रत्यर्थिनौ सभ्यान् लेखकप्रेक्षकांश्च यः। धर्मवाक्यैरञ्जयति स सभास्तारताभियात्" शुक्रनीतिपरि० उक्ते २सभ्यभेदे च। [कारके अमरः।

सभिक पु० सभा द्यूतसभा अस्त्यस्त्वेनास्यस्य ठन्। द्यूतसभीक पु० सभा द्यूतं प्रयोजनमस्य ठक्। द्यूतकारे शब्दच०

सभोचित पु० सभा उचिता परिचिता यस्य। १परिचिते धनञ्जयः। २सभायोग्ये त्रि०। [३विचक्षणे त्रि०हला०

सभ्य पु० सभायां साधुः यत्। १सामाजिके २द्यूतकारे च

सम् अव्य०धो-वा०कसु। १सम्यगर्थे २प्रकर्षे ३सङ्गतौ ४शोभने शब्दच०। ५सदृक्षे हेमच०।

सम त्रि० सम-अच्। १समाने तुल्ये २सर्वे अमरः ३साधौ मेदि०। (योड़) ४युक्ते "समेऽर्द्धिते वर्गः" इति बीजा० समतवाख्यातेषु द्वितीयचतुर्थप्रभृतिषु ५राशिषु च। अतल्येऽस्य सर्वनामता। गीतवाद्ययोरेकालभवे गायकवृत्तादिचालनरूपे हृताक्षभेदे न० ७अक्षुण्णविषमिश्रे पथे प्रसिद्धा० अभेदे तृतीया। समेन याति सर्वं यातीत्यर्थः।

समक्ष अव्य० अक्ष्णः समीपमित्यर्थे अव्ययी० अच्। १चक्षुःसन्निकर्षे तदर्थात्ति अच्। २प्रत्यक्षविषये त्रि०।

समकोण त्रि० समः कोणो यस्य। रेखागणितोक्ते समकोणयुक्ते त्रिकोणादौ। क्षेत्रशब्दे २१६० पृ० १५अङ्कचिह्निते दृश्यम्।

समकोल पुंस्त्री० ह्रस्व०। सर्वे त्रिका० स्त्रियां ङीष्।

समगन्धक पु० समासुल्यभागेन निवेशितागन्धाः गन्धयुक्तद्रव्याण्यत्र कप्। क्षत्रियभूपभेदे शब्दमा०।

समगन्धिक पु० समः सर्वदा तुल्यरूपः गन्धोऽस्यस्य ठन्।

उशीरे (वेणारमूल) राजनि०। [३सकले अमरः २पूर्णे च
समग्र त्रि० समं सकलं यथा स्यात्तथा गृह्यते यद्-ग्रह।
समङ्गा स्त्री समज्यतेऽनया सम्+अनूज-करणे घञ् टाप्।
मञ्जिष्ठायाम् अमरः। [तुल्यदर्शके तत्त्वज्ञानिनि।
समचित्त त्रि० समं सर्वत्र समभावं चित्तं यस्य। सर्वत्र
समज न०समजत्यत्र सम्+अज-आधारे घञ् व्यभावः। १वने
मेदि० २समूहे ३पक्षिणां संघे ४युद्धेऽन्दे च अमरः।
समज्ञा स्त्री समज्ञिन् सर्वत्र ज्ञायतेऽनया ज्ञा-क। कीर्त्तौ
अमरः। [अमरः २कीर्त्तौ च रमानाथः।
समज्या स्त्री सम्+अज-क्यप् न दीर्घाभावः। १सभायाम्
समञ्जस त्रि० सम्यक् अञ्ज औचित्यं यत्र अच् समा०। १उ-
चिते अमरः २युक्ते च। प्रा०स०। ३औचित्ये न०।४स-
माधाने त्रिका० ५अवश्ये अमरः।
समठ पु० गण्डीरे हारा०। [गुडत्वचे राजनि०।
समत्रय न० समं त्रयं यत्र। समभागयुते हरीतकीनागर-
समदर्शिन् त्रि० समञ्जिन् सर्वत्र ब्रह्मभावेनाऽभिन्नतया
पश्यति दृश-णिनि। सर्वत्र समदर्शके तत्त्वज्ञानिनि।
"विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि। शुनि चैव
श्वपाके च पण्डिताः समदर्शिनः" इति गीता।
समदृष्टि स्त्री कर्म०। १सर्वत्र तुल्यदर्शने। "दुःखे सुखे च
विप्रेन्द्र! या दृष्टिर्वर्त्तते सदा। तया मित्रे
च मित्रे च समदृष्टिश्च सा स्मृता" पद्मपु०क्रिया०१६अ०। ६व०।
२समदर्शिनि त्रि०।
समधिक त्रि० सम्यक् अधिकः प्रा०। अत्यन्ताधिके अमरः।
समनियत त्रि० समेन नियतः। आपकल्ये इति व्याप्य त्व-
युते गदा०। समव्याप्तादयोऽत्र।
समन्त पु०सम्यक् अन्तः, स यत्र वा ।१सम्यगन्ते २सीमायाञ्च
समन्ततस् अव्य० समन्त+तसिल्। सर्वत्र व्याप्तौ अमरः।
समन्तदुग्धा स्त्री समन्ततो दुग्धमस्याः। क्षुद्रौषधे अमरः।
समन्तपञ्चक न० समन्तात् पञ्चकं क्षुद्रपञ्चकं यत्र। कुरुक्षेत्र
स्थे तीर्थभेदे "निःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां
प्रभुः। समन्तपञ्चके पञ्च चकार रुधिरान् ह्रदान्। स
तेषु तर्पयामास पितॄन् रुधिरकर्दमैः" भा०व०११७अ०।
"तरन्तुकारन्तुकयोर्यदन्तरं रामह्रदानाञ्च समन्तकस्य च।
एतत् कुरुक्षेत्र समन्तपञ्चकं पितामहस्योत्तरवेदिरुच्यते"
भा०व० ८१अ०।
समन्तभद्र पु० समन्तात् भद्रमस्य। बुद्धे अमरः।
समन्तभुज् पु०समन्तात् भुङ्क्ते भुज-क्विप्। वह्नौ त्रिका०
समन्तात् अव्य० समन्त+आति। ३समन्ततस्त्वर्थे शब्दर०।
२सर्वतोव्याप्तौ च।
समन्वित त्रि० सम्+अनु+इण-क्त। सङ्गते।
समपद न० समं पदं यस्मिन्। धन्विनां समपदनिवेशनभू-
मौ "स्थानानि धन्विनां पञ्च" इत्युपक्रम्य "अन्यत्
स्यात् समपदमित्युक्ते अवस्थानभेदे अमरः। २रति-
बन्धभेदे पु०"योषित्पादौ हृदि स्थाप्य कराभ्यां पीडयेत्
स्तनौ। यत्रेष्टं ताडयेत् योनिं बन्धः समपदः स्मृतः"
रतिमञ्ज०।
समभिव्याहार पु० सम्+अभि+वि+आ+हृ-घञ्। १सा-
हित्ये २पूर्वापरीभावे ३शब्दशब्दिवाचकयोः सहोच्चारणे च
मीमांसकाः। [२सहोच्चरिते। ३अव्यवहिते च।
समभिव्याहृत त्रि० सम्+अभि+वि+आ+हृ-क्त। १सहिते
समभिहार पु० सम्+अभि+हृ-घञ्। १पौनःपुन्ये क्रिया
सातत्ये २भृशार्थे मेदि० "क्रियासमभिहारेण विरा-
ध्यन्तं सहेत कः" माघः।
समम् अव्य० सम-अम्। १साहित्ये अमरः। २एकदेशार्थे
"समसेव समाक्रान्तं ह्रदं हिरदगामिना" रघुः।
समय पु० सम+इण-अच्। १काले २शपथे ३आचारे
४सिद्धान्ते ५अङ्गीकारे च अमरः। ६क्रियाकारके
७निर्देशे ८सङ्केते ९भाषायां मेदि० १०सम्पदि ११नि-
यमे १२अवसरे हेमच० १३कालविज्ञाने शब्दच०।
१४नियमबन्धे यस्य शब्दस्येदमभिधेयमित्यभिधानाभिधेय-
नियमबन्धे वात्स्या० १५शास्त्रे च।
समया अव्य० सम+इण-आ। नैकट्ये २मध्ये च अमरः।
समयाकार पु० समयस्य सङ्केतस्याकारः। सङ्केते त्रिका०।
समयाध्युषित न० समयः अध्युषितो यत्र। सूर्य्यतारा-
रहितकाले "तथा प्रभातसमये नष्टे नक्षत्रसप्तके।
रविर्यावच्च दृश्येत समयाध्युषितञ्च तत्" कर्म०काल्या०।
"उदितेऽनुदिते चैव समयाध्युषिते तथा" इति मनुः।
समयाशुद्धि स्त्री इत०। कालाशुद्धौ कालाशुद्धिशब्दे दृश्यम्
समर पु० न० सम्+ऋ-आधारे अप्। युद्धे अमरः।
समरभ रतिबन्धभेदे "खञ्जकुड्यसंयुक्तं कृत्वा योषित्पद-
द्वयम्। स्तनौ धृत्वा रमेत् कामी बन्धः समरभः स्मृतः"
रतिमञ्ज०।
समरमूर्द्धन् पु० इत०। समरशीर्षे।
समर्चन न० सम्यक् अर्चनं प्रा०स०। सम्यक्पूजने।
समर्ण त्रि० सम्+ऋदे-क्त। सम्यक्पीडिते।

समर्थ त्रि० सम्+अर्थ-अच्। १शक्ते २स्थिते च अमरः। सम्यगर्थः प्रा० स०। २प्रशस्तार्थेऽपि पु०। सङ्गतोऽर्थो यस्य प्रा०स०। "समर्थः पदविधिः" पा० परिभाषिते सङ्गतार्थे समासादौ समासशब्दे दृश्यम्।

समर्थन न० सम्+अर्थ-ल्युट्। इदमित्थमेवेति निश्चयहेतूपन्यासेन निश्चायकव्यापारभेदे अमरः। युच्। तत्र, अयक्षेऽध्यवसाये च स्त्री। [तरि देवादौ अमरः।

समर्दक त्रि० समर्दयति सम्+अर्द-ण्वुल्। इदंफलदातरि

समर्य्याद त्रि० सह मर्य्यादया सहस्य सः। १सीमायुते २समीपे पु० मेदि०।

समल न० सम्यक् मलम्। १विष्ठायां शब्दच०। सह मलेन सहस्य सः। २मलयुक्ते त्रि० त्रिका०। [वतरप्सोपाने।

समवतार पु० समवतीर्य्यतेऽनेन सम्+अव+तॄ-घञ्। जङ्घा-

समवर्त्तिन् पु० सम वर्त्तते इत-णिनि। १यमे धर्मराजे अमरः। २सर्वत्र समभावेन वर्त्तिनि त्रि०।

समवकार पु० सम्+अव+कृ-आधारे घञ्। नाटकभेदे सा०द० उक्तो यथा

"इत्तं समवकारे तु ख्यातं देवासुराश्रयम्। सन्धयो निर्विमर्षास्तु त्रयोऽङ्कास्तत्र चादिमे। सन्धी द्वावन्ययोस्तद्वदेक एको भवेत् पुनः। नायका द्वादशोदात्ताः प्रख्याता देवदानवाः। फलं पृथक् पृथक् तेषां वीरसख्योऽखिलो रसः। इत्तयो मन्दकैशिक्यो नात्र विन्दु प्रवेशकौ। पीथाङ्गानि च तत्र स्युर्यथालाभं त्रयोदश। गायत्युष्णिङ्नुखान्यत्र छन्दांसि विविधानि च। त्रिरङ्कारश्चिक्कटः काव्यस्यार्थः त्रिविद्रवः। वस्तु द्वादशनाड्योभिर्निष्पाद्यं प्रथमाङ्कगम्। द्वितीयेऽङ्के च तिसृभिर्द्वाभ्यामङ्के तृतीयके"। नाडिका घटिकाद्वयमुच्यते। विन्दुप्रवेशकौ च नाटकोक्तावपि नेह विधातव्यौ। तत्र धर्मार्थकामैस्त्रिविधः शृङ्गारः कपटः पुनः। स्वाभाविकः कृत्रिमश्च दैवजो विद्रवः पुनः। अचेतनैश्चेतनैश्च चेतनाचेतनैः कृतः"। तत्र शास्त्राविरोधेन कृतो धर्मशृङ्गारः अर्थलाभार्थकल्पितः अर्थशृङ्गारः। प्रहसनशृङ्गारः कामशृङ्गारः। तत्र कामशृङ्गारः प्रथमाङ्क एव। अन्ययोस्तु न नियम इत्याहुः। चेतनाचेतना नायकादयः। समवकीर्य्यन्ते बह्वर्थो ऽत्रेति समवकारः। यथा मालतीमाधवम्"।

समवाय पु० सम्+अव-इण-घञ्। १समूहे अमरः २मेलने न्यायोक्ते नित्यद्रव्यादिषु जात्यादीनां ३संबन्धभेदे च "घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः। तेषु जातेश्च सम्बन्धः समवायः प्रकीर्त्तितः" भाषा०"समवायं दर्शयति। घटादीनामिति अवयवावयविनोः जातिव्यक्त्योर्गुणगुणिनोः क्रियाक्रियावतोर्नित्यद्रव्यविशेषयोश्च यः सम्बन्धः स स समवायः, समवायत्वं नित्यसम्बन्धत्वं तत्र प्रमाणन्तु गुण क्रियादिविशिष्टबुद्धिर्विशेष्यविशेषणसम्बन्धविषया विशिष्टबुद्धित्वात् दण्डसंयोगादिवाधात् समवायसिद्धिः। न च स्वरूपसम्बन्धेन सिद्धसाधनम् अवयवान्तरं वा, अनन्तस्वरूपाणां सम्बन्धत्वकल्पने गौरवात् लाघवादेकसमवायसिद्धिः। न च समवायस्यैकत्वे वायौ रूपवत्ताबुद्धिप्रसङ्गः तत्र रूपसमवायसत्त्वेऽपि रूपाभावात्। न चैवम् अभावस्य वैशिष्ट्यं सम्बन्धान्तरं सिध्येदिति वाच्यं तस्य नित्यत्वे भूतले घटानयनानन्तरमपि घटाभावबुद्धिप्रसङ्गात् घटाभावसम्बन्धस्य तत्र सत्त्वात् तस्य नित्यत्वात् अन्यथा देशान्तरेऽपि तत्प्रतीतिर्न स्यात् वैशिष्ट्यस्य च तत्र सत्त्वात्, मम तु मते घटे पाकरक्तताद्यवयवे श्यामरूपस्य नष्टत्वात् तद्वत्ताबुद्धिः। वैशिष्ट्यस्यानित्यत्वे त्वनन्तवैशिष्ट्यकल्पने तवैव गौरवम् इत्यलं तत्तत्कालीनतत्तद्भूतलादिकं तत्तद्भावानां सम्बन्धः"। अयुतसिद्धयोः सम्बन्धः स इति वैशेषिकाः स च सम्बन्धो नाना नित्यश्चेति नव्यनैयायिकाः प्राभाकराश्चाहुः। समवायस्य प्रत्यक्षः "प्रत्यक्षं समवायस्य विशेषणतया भवेत्" भाषा०। अतीन्द्रियोऽनुमेयश्चेति वैशेषिकाः, स्वरूपश्चैव सम्बन्धत्वोपपत्तेः समवायो न पदार्थान्तरमिति भाट्टाः।

समवायिजनक न० कारणभेदे "यत् समवेतं कार्य्यं भवति तेयं तु समवायिजनकं तत्" "समवायिकारणत्वं द्रव्यस्यैव विज्ञेयम्" भाषा०। इदमेव उपादानकारणमिति सांख्यवेदान्तिनश्चाहुः।

समवायिन् त्रि०समवायोऽस्यत्र। समवायसम्बन्धानुयोगिनि यथा घटादीनां कपालादि गुणक्रिययोर्द्रव्यादि।

समवेत त्रि० सम्+अव-इण-क्त। १मिलिते २समूहान्विते न्यायोक्तेन समवायसम्बन्धेन श्लिष्टे च।

समग्रनीय पु०सम्यगग्रनाय हितं छ। विवाहोत्तरं दम्पत्योः सम्यगग्रनाय हिते स्त्रीपाके" तद्धितान्तादि सं० त० गोभिलोक्ते यथा "श्रोभूते वा समग्रनीयं स्त्रीपाकं कुर्वीत" "यदि विवाहे यज्ञादिना मङ्गलिषा भूता तदा तत्परदिने सम्यगग्रनार्थं क्रियते इति सम्यगग्रनीयं स्त्रीपाकं कुर्वीत" रघु०। तद्धोमविधानादि तत्र दृश्यम्।

समष्टि स्त्री सम्+अश-व्याप्तौ क्तिन्। १सम्यग्व्याप्तौ २समस्ततायाञ्च। कर्त्तरि क्विप्। २संघीभूते समस्ते पदार्थे वेदान्तसा० "समष्टिरीशः सर्वेषां स्वात्मतादात्म्यवेदनात्। तदभावात्तदन्ये तु भ्रान्ते व्यष्टिसंज्ञया" पञ्चद०।

समष्ठीवत् पु० सर्वं तिष्ठति स्था-इवच् पृषो० अत्वं वा दीर्घः। (गुँड़िया) शाके अमरः।

समसन न० सम्+अस-ल्युट्। १समासे २संक्षेपे अमरः।

समसूत्रपातन्याय पु० न्यायभेदे समतया सूत्रस्य पातने यस्य तत्सम्बन्धित्वमेवमुपर्य्यधःस्थितानां यद्दाणां तत्सूत्रसंबन्धैकदेशत्वावच्छेदेन सङ्गावस्यानं तेन ज्ञाप्यते तादृशे न्याये "परः सन्निकर्षः संख्याधीभावापेक्षसमसूत्रपातन्यायेन राश्येकांशवच्छेदेन सङ्गावस्थानरूपः" तिन्त० रघु०।

समस्त त्रि० सम्+अस-क्त। १संक्षिप्ते २सकले अमरः। ३व्याकरणोक्ते क्तसमासे शब्दभेदे च।

समस्थ त्रि०सर्वं तिष्ठति स्था-क। समभावेन तुल्यतया स्थिते

समस्थली स्त्री कर्म०। अत्यर्वेदिदेशे हेमच०।

समस्या स्त्री समस्यते संक्षिप्यतेऽनया सम्+अस-क्यप्। संक्षेपेण उक्तस्य श्लोकपादादेः परकृतेन स्वकृतेन वा अवशेषेण भागान्तरेण संघटनार्थं कृते प्रश्ने अमरः।

समा स्त्री समयति विकलयति भावान् सम-अच-टाप्। वत्सरे अमरकृतास्य नित्यबहुवचनान्तताङ्गीकृता पाणिनिना तु "समांसमां विजायते" इति सूत्रे एकवचनान्तता निर्दिष्टा।

समांसमीना स्त्री समां समां विजायते प्रसूते ख नि० अस्य समांसमादित्वम् कालाधारे द्वितीया। प्रतिवर्षं प्रसूतायां गवि अमरः।

समाकर्षिन् पु०सम्+आ+कृष-णिनि। १अतिदूरगामिनि गन्धे अमरः। २सम्यगाकर्षणकर्त्तरि त्रि०स्त्रियां ङीष्।

समाख्या स्त्री समाख्यायतेऽनया सम्+आ+ख्या-अङ्। १कीर्त्तौ अमरः २संज्ञायाञ्च। ३योगेनार्थबोधने "स्यानं क्रमो योगवलं समाख्या" य स्त्रीदीपिका।

समाघात पु० समाहन्यतेऽत्र सम्+आ+हन-आधारे घञ्। १युद्धे अमरः। भावे घञ्। २सम्यग्घाते च।

समाज पु०सम्+अज-घञ् नदीभावः। पशुभिन्नानां १समूहे अमरः। २सभायां हेमच० ३हस्तिनि नानार्थकोषः।

समादान न० सम्+आ+दा-भावे ल्युट्। १सम्यगादाने कर्मणि ल्युट्। २बौद्धानां निजकर्मणि मेदि०।

समाधा स्त्री सम्+आ+धा-अङ्। १निष्पत्तौ २विवादभञ्जने ३पूर्वपक्षस्य सम्यगुत्तरादानुगुण्यविज्ञानानुकूलतर्कादिना सम्यगवधारणे च। ल्युट्। समाधानमप्यत्र न०। तच्च ध्येयवस्तुनि चित्तस्य निरन्तरस्थापनरूपे समाधौ च।

समाधि पु० सम्+आ+धा-कि। १समाधायां ध्येयवस्तुनि एकायतया मनसःस्थापनरूपे २ध्यानभेदे ३बन्धभावे ४निदमे च अमरः। ध्यानभेदश्च समाधिः यथोक्तं पात० सू० "तत्र प्रत्ययैकतानता ध्यानम्" सू० "तस्मिन् देशे ध्येयालम्बनस्य प्रत्ययस्यैकतानता सदृशप्रवाहः प्रत्ययान्तरेणापरामृष्टो ध्यानम्" भा० "तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः" सू० "ध्यानमेव ध्येयाकारनिर्भासं प्रत्ययात्मकेन स्वरूपेण शून्यमिव यदा भवति ध्येयस्वभावावेशात्तदा समाधिरित्युच्यते" भा० "ध्यानसाध्यं समाधिं लक्षयितुं व्याचष्टे ध्यानमेवेति। ध्येयाकारनिर्भासमिति ध्येयाकारस्य निर्भासो न ध्यानाकारस्येति अतएवाह शून्यमिति। ननु शून्यं चेत् कथं ध्येयप्रकाशकं दृश्यत आह इवेति। अत्रैव हेतुमाह ध्येयस्वभावावेशादिति। अत्रापि पुराणम् "तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत्। मनसा ध्याननिर्ज्ञातं समाधिः सोऽभिधीयते" इति। ध्येयात् ध्यानस्य भेदकल्पना तद्धीनमित्यर्थः" विवर०।

एकायतात्मकसमाधिलक्षणं पुराणान्तरोक्तं यथा "नित्यं शुद्धं बुद्धियुक्तं सत्यमानन्दमद्वयम्। तुरीयमक्षरं ब्रह्म स्वरूपमिति परं पदम्। अहंब्रह्मेत्यवस्थानं समाधिरिति गीयते" गारुडे ४४अ०। "द्वादशध्यानपर्य्यन्तं मनो ब्रह्मणि यो नरः। तत्प्रेत संयतो मुक्तः समाधिः सोऽभिधीयते। ध्येयमेव हि सर्वत्र ध्याता तन्मयतां गतः। पश्यति ह्येतदखिलं समाधिः सोऽभिधीयते" २३०अ०। "इदं गुणसमाकारमनाकारत्वेन पश्यतः। अन्तःशीतलता यत्र समाधिरिति कथ्यते" योगवाशिष्ठे उपशमप्रक०। ५अर्थालङ्कारभेदे अलङ्कारशब्दे ४०६ पृ० दृश्यम्। ६इन्द्रियनिरोधे शब्दर०। ७काव्यगुणभेदे मेदि० "श्लेषः प्रसादः समता माधुर्य्यं सुकुमारता। अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः। इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृतः। एषां विपर्य्ययः प्रायो दृश्यते गौडवर्त्मनि" काव्यादर्शः तल्लौकिकन्यायभावः साहि० उक्तो यथा "श्लेषः समाधिरौदार्य्यं प्रसाद इति वै पुनः। गुणास्त्रिभ्यस्त्रिभ्यस्ते स्युः स्वरूपाणि" । समाधिरारोहावरोहक्रमरूपः।

धारोऽत्र चमत्कारः । अवरोहीऽपकर्षस्तयोः क्रमो वैरूप्यावहो विन्यासः । यथा "चञ्चद्भुजेत्यादि" । अत्र षाड्जर्षभे क्रमेण चत्वस्य गाढता । चतुर्थपादे त्वपकर्षः" ।

समाघ्रात त्रि॰ सम्+आ+घ्रा-क्त । १सम्यग्गर्विते २सम्यक्कृष्टिते च ।

समान त्रि॰ समानयति चल-ल्युट् । १तुल्ये २साधौ ३एकस्मिन्नर्थे "समानतन्त्रसिद्धः" गौत॰ "यत्समानाधिकरणे"ति चिन्तामणिः । सम्+अन-घञ् । भुक्ताद्यादेः समीकरणे नाभिदेशस्थे प्राणादिपञ्चकान्तर्गते ४वायुभेदे पु॰

समानविभक्तिक त्रि॰ समानाविभक्तिर्यस्मात् कप् । स्वप्रकृतिविभक्तिसजातीयविभक्तिके पदे साजात्यञ्च प्रथमात्वादिना । तेन वेदाः प्रमाणमित्यादौ समानविभक्तिकत्वम् ।

समानविषयक त्रि॰ समानो विषयो यस्य यप् । तुल्यरूपविशेष्यविशेषणताशालिनि ज्ञाने च च समाननिरूप्यनिरूपकभावापन्नविषयताशाली बोधः समानाकारकोऽत्र ।

समानाधिकरण त्रि॰ समानमेकमधिकरणं यस्य । एकाधिकरणवृत्तिके स्वाधिकरणवृत्तिमति पदार्थे । २विभिन्नविभक्तिरहित्वे सति स्वभेदैकार्थबोधजनकत्वयुते पदे च "वटः भवतु प्रामाण्यात्प्रथमासमानाधिकरणे" पा॰ वटोऽपि प्रथमासामाधिकरण्यं विभिन्नविभक्तिराहित्यादुद्बोध्यम् । "समानाधिकरणस्तत्पुरुषः कर्मधारयः" पा॰ ।

समानौच न॰ कर्म॰ अवयवद्वितीयाभ्यां तुल्ये अशौचे यथा सपिण्डजननाशौचतुल्यं सपिण्डान्तरजनाशौचम् एवं विरावाङ्गास्पृश्यत्वसहितसपिण्डमरणाशौचतुल्यं तथाविधसपिण्डान्तरमरणाशौचं, जननमरणाशौचयोर्न तुल्यता नापि स्नानापनेयाङ्गास्पृश्यत्वयुक्तपुत्रजननाशौचेन सपिण्डजननाशौचस्य तुल्यता न वा यावदशौचाचारत्वघटिताशुद्धयङ्गास्पृश्यपुत्रमरणाशौचस्य सपिण्डमरणाशौचस्य तुल्यता ।

समानोदक पु॰ समानमेकं तर्पणादौ देवसदकं यस्य । "समानोदकभावस्तु निवर्त्तेता चतुर्दशात्" इत्युक्ते एकादशाधिचतुर्दशपुरुषपर्य्यन्ते ज्ञातिभेदे सपिण्डशब्दे दृश्यम् ।

समानोदर्य्य पु॰ समाने उदरे भवः यत् वा न ङीप्रः । १एकोदरजज्ञात्यादौ २अग्निन्यां स्त्री अमरः । [वि॰कौ॰]

समाप पु॰ सम्यक् आपोयत्र अच् ह्रस्वः नि॰ । देवयजनस्थाने

समापन न॰ सम्+आप-ल्युट् । १समाप्तौ चरमकालसम्बन्धे २परिच्छेदे ३वधे च मेदि॰ ४सम्पादने विश्वः । ५चक्षे धरणिः ।

समापन्न त्रि॰ सम्+आ-पद्-क्त । १समाप्ते २प्राप्ते ३क्लिष्टे ४वधे च विश्वः । भावे क्त । ५समाप्तौ न॰ ।

समाप्त त्रि॰ सम्+आप-क्त । १अवसानप्राप्ते २सम्यक्प्राप्ते च

समाप्तपुनरात्तता स्त्री समाप्ते वाक्यसमाप्तौ पुनरात्तता ग्रहणम् । क्रियान्वयेन निष्ठाकाङ्क्षे विशेषप्रत्ययावच्छेदके विशेषणान्तरार्थान्वयार्थं पुनरुच्चारणरूपे काव्यदोषभेदे दोषशब्दे २७६४पृ॰ दृश्यम् ।

समाप्ताल पु॰ समाप्राय अलति पर्य्याप्नोति अल-अच् । पत्रो संछिन्नपत्रा॰ । [१प्राप्तौ शब्दच॰ ।

समाप्ति स्त्री सम्+आप-क्तिन् । १अवसाने २समर्थने मेदि॰ ।

समायोग पु॰ सम्+आ+युज-घञ् । १संयोगसमवायरूपादिसम्बन्धे "क्षमेर्द्वितीयसमायोगादिति" पुराणम् । २मयो॰ जने मेदि॰ ।

समालम्बिन् पु॰ समालम्बते सम्+आ+लबि-णिनि । भूतले राजनि॰ । २समालम्बनकर्त्तरि त्रि॰ ।

समालम्भ पु॰ सम्+आ+लभ-घञ् सम् च । कण्डूयादिना गात्रलेपने अमरः । ल्युट् । तत्रैवार्थे न॰ ।

समावर्त्तन न॰ समावर्त्तते गुरुकुलादनेन सम्+आ+वृत-करणे ल्युट् । 'वेदाध्ययनानन्तरं गार्हस्थ्याय गुरुकुलादागमनहेतुके संस्कारभेदे तद्विधिः संस्कारतत्त्वे रोधिलोक्तो द्रष्टव्यः ।

समाविष्ट त्रि॰ सम्+आ+विश-क्त । १युक्ते २मनोऽभिनिवेशयुते अभीष्टकर्त्तव्यकर्मणि चित्तैकाग्र्यविशेषयुक्ते च ।

समावृत्त पु॰ सम्+आ+वृत-क्त । कृतसमावर्त्तनसंस्कारे "अतःपरं समावृत्तः कुर्य्याद्दारपरिग्रहम्" याज्ञ॰ ।

समावेश पु॰ सम्+आ+विश-घञ् । १बहूनामर्थानामेकत्र वाक्यादौ व्यवस्थापने २कर्त्तव्येऽभिनिवेशे च ।

समावेशित त्रि॰ सम्+आ+विश-णिच्-क्त । कृतसमावेशने

समास पु॰ सम्+अस-घञ् । १संक्षेपे २समर्थने मेदि॰ । ३समाहारे ४व्याकरणोक्ते द्वादिपदानामेकपदतासम्पादके पदसाधुतार्थके ५संस्कारभेदे च यथा "समर्थः पदविधिः" पा॰ "समर्थः संसृष्टार्थः सङ्गतार्थ इति यावत् । सामर्थ्यञ्च द्विविधम् व्यपेक्षावच्छेदकार्थीभावश्च । तत्र स्वार्थबोधसाधिपदानामाकाङ्क्षादिवशात् यः परस्परं सम्बन्धः सा व्यपेक्षा । राज्ञः पुरुषश्चलतीत्यादौ वाक्ये सत्यामाकाङ्क्षायां यो यो यस्मिन् सन्निहितो योग्यश्च स तेन तेन सम्बध्यते यथा राज्ञः पुरुषोऽश्वञ्च राज्ञो देवदत्तश्च पुरुषः अश्वस्य राज्ञोऽयो धनञ्चेत्यादि । इत्थञ्च नैवम् इत्थीभा-

मेकार्थीभावात्। एकार्थीभावश्च विशेष्यविशेषणभावाद-न्यान्योपस्थितिजनकत्वम्। तथा च राजपुरुषादिश-ब्देन विशिष्टैकार्थबोधकतया न तदेकदेशे षष्ठ्यादेरन्वयः पुरुषांशे विशेषणतयोपस्थितस्य नाद्यादिसम्बन्धिता रा-जादीनाम् जनितान्वयाच्च निराकाङ्क्षतया न देवदत्तादेः ख्यातिकृता पुरुषादावन्वय इति द्रष्टव्यम्। देवदत्तस्य गु-रुकुलमित्यादौ देवदत्तादिषु प्रधानीभूतकुलादिनैवान्वयः सम्बन्धस्योपस्थितगुरुद्वारक एव षष्ठ्यर्थः यथोक्तं हरिणा "षष्ठ्यादेन सम्बन्धो येषां गुरुकुलादिना। संसृष्टाव-यवास्ते तु युक्ष्यन्ते तदता सह" इति। यद्वा सम्बन्धि-शब्दार्थस्य पदार्थैकदेशत्वेऽपि भवत्येव क्वेदाश्रित सम्ब-न्धान्वयः तदुक्तं तेनैव "सम्बन्धिशब्दः सापेक्षो नित्यं सर्वं समश्नुते। वाक्यवत् सा व्यपेक्षापि इत्यादि न दोषते"। अतएव वार्त्तिककृता "अविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणं न प्रयुज्यत इति वक्तव्यमिति" सा-मान्यतो वृत्तिमतो विशेषणस्य ख्यातन्त्र्येण प्रयोगाभाव-मभिप्राय "गुरुकुलपुत्रादीनां वक्तव्यम्" इत्यनेन गुरु-कुलगुरुपुत्रादीनां विशेषणत्वेऽपि पृथक्प्रयोगाय नञा पर्युदासः कृतः। समानाधिकरणविशेषणस्य तु "समा-नाधिकरणसमर्थेनेत्यनेन सर्वथा ख्यातन्त्र्येण सामर्थ्याभावात् प्रयोगाभावो भट्टाद्यभिप्रेतः। एत-न्मूलकमेव प्राचां गाथा "सापेक्षे प्रत्ययो न स्यात् समासो वा कथञ्चन। सापेक्षं तद्विजानीयादसमस्तविशेषणम्। प्रतियोगिपदादन्यत् पदान्यत् कारकादपि। वृत्तिशब्दैकदेशस्य सम्बन्धस्येष्यते" इति। अयमर्थः विशेषः भवति प्रधानस्य सापेक्षत्वेऽपि समास इत्युक्तेः प्रधानस्य वृत्त्युपस्थाप्यविशेषस्य राजपुरुषादेः सुन्दरादिविशेषणापेक्षायामपि समासः। समासे चाव-यवशक्त्यैव तत्तदर्थपदार्थोपस्थित्या विशेष्यविशेषणभावा-द्यभ्युपगमे सापेक्षत्वादौ समासाभावादिकं वाचनिकं कल्प्यम् तस्मान्नाधिककल्पना लाघवतः समुदायशक्ति-कल्पनम् यथोक्तं हरिणा "बहूनां वृत्तिधर्माणां वचनैरेव साधने। लाक्षणिकत्वगौरवं तस्मादेकार्थीभाव आश्रितः। अकारादिनिषेधोऽत्र वक्तव्युत्पत्तिभञ्जनम्। कर्त्तव्यं ते न्यायसिद्धं लक्षणं तदिति स्थितमिति"। तथाहि इ-त्यादिविग्रहवाक्ये अकारादि प्रयुज्यते समस्ते तु न तत्र वचनैरेव तन्निषेधः कल्पनीयः समुदायशक्तिपक्षे तु वृत्त्यर्थानामप्रयोग इत्युक्तन्यायादेव सिद्धम्। लाघवार्थयो-रमेदान्वयः कृद्भिः स च राजपदादुपस्थापितराजादि-पुरुषे स्वस्वामिभावसम्बन्धेनान्वये परिलक्षः स्यात्। सम्बन्धलक्षणायान्तु किमपराद्धम् विशिष्टलक्षणया। प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थः प्रधानमिति नियमेन कृद्भिः स च प्राग्नानन्दादौ भण्यते आनन्दकर्त्रादिप्रतिपाद्यैर्लक्ष्यं-बोधकोभयसम्मतत्वेन कर्त्रादिविशिष्टलक्षणार्थस्य कर्त्तृविशेष्य तौचित्येन प्रकृते तदपरीत्यात् आनन्दसम्बन्ध्यादिलक्ष-णास्वीकारे समुदायशक्तिपक्षे एव प्रवेशः। तथा प्राग् आनन्दो यमिति विग्रहे आनन्दादौ अत्यन्तादिविशेषण-योगवत् समासे तद्व्यवहाराय वृत्तस्य न विशेषणयोग इति वाचनिकत्वकल्पनाऽधिका एतन्मते न्यायसिद्धा इत्यादि बहुविधापत्तिरतः समुदाये शक्तिरित्यन्यत्र विस्तरः। वार्त्तिककृता तु अवश्यं कस्यचित् सञ्ज्ञासमासस्यासमर्थ-समासस्य गमकस्य साधुत्वं वक्तव्यमित्युक्तत्वात् चक्रुर्वस्त्र-पुत्रेत्यादौ असमर्थेन नञा बाधेन कृतमारीचो राम इत्यादौ बाधादेर्विग्रहार्थस्य गमकत्वात् सापेक्षत्वेऽपि तदर्थबोधकतयैव समास इति द्रष्टव्यम् मञ्जूषासरत्नौ। "पदसम्बन्धो यो विधिः स समर्थाश्रितो बोध्यः" सि०कौ० "पदस्य पदयोः पदानां वा विधिः पदविधिरिति वचन-विशेषस्याविवक्षितत्वं द्योतयन्नाह पदसम्बन्धीति। तत्र पदेति किमु वर्णाश्रये कार्येऽसमर्थेऽपि यथा स्यात् तथा च तिष्ठतु दधि आनयान्नमित्यत्र दध्यानयेति पदयोः सामर्थ्याभावेऽपि वर्णाश्रयं यणादिकं भवत्येव। मूले समर्थपदं साधनिकमिति द्योतयन्नाह समर्थाश्रित इति समर्थेति किं पचति कृष्णा श्रितो रामभिक्षादौ समासो मा भूत् वस्त्रं कृष्णस्य अश्वं देवदत्तस्येत्यादौ मा भूच्च कृष्णशब्दादश्वार्थकतद्धितः। इयञ्च परिभाषा समासकृत-तद्धितादिवृत्तिमात्रे प्रवर्त्तते इति बोध्यम् मञ्जूषासरत्नौ। स च समासः षड्विधः।

"सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा। सुबन्तेनेति च ज्ञेयः समासः षड्विधो बुधैः" (सुपां सुपा) पदद्वयमपि सुबन्तम्। राजपुरुष इत्यादिः। (सुपां तिङा)। पूर्वपदं सुबन्तमुत्तरं तिङन्तम्। पर्व-भूयवत्। "गतिमतोदात्तवता तिङापि समासः" इति वार्त्तिकात् समासः। (सुपां नाम्ना) कृष्णकार इत्यादि। "उपपदमतिङिति समासः। स च "गतिकारकोपपदानां कृद्भिः समासवचनं प्राक् सुबुत्पत्तेरिति" परिभाषया भवति सुबुत्पत्तेः प्राक्। अलोत्तरपदे सुबुत्पत्तेः प्राग्-

त्वर्थः। अन्यथा चमेक्रीतीत्यादौ नञोपातुपपत्तेः। (सुपां धातुना) उत्तरपदं धातुमात्रं न तिङन्तम्। कटप्रूः यावतस्तः। "क्विब्वचिप्रच्छ्रायतस्तुकटप्रुजुश्रीणां दीर्घश्चेति" वार्त्तिकात् समासः। "तिङां तिङां पिबतखादता। पचतभव्यतेत्यादि। "आख्यातमाख्यातेन क्रियासातत्ये" इति मयूरव्यंसकादित्वान्नसमासः "तिङां सुबन्तेन" पूर्वपदं तिङन्तमुत्तरं सुबन्तम्। जहित्सम्बः। "जहित्कर्मणा वक्तव्यमाभीक्ष्ण्ये कर्त्तारं चाभि दधातीति" मयूरव्यंसकादित्वान्नसमासः। अयं षड्विधोऽपि समासः, "षष्ठ सुपा" इत्यत्र योगविभागेन भाष्ये व्युत्पादितः स्पष्टः शब्दकौस्तुभादौ। अयं भाष्यादिसिद्धस्तद्भेदं व्युत्पाद्य प्राचीनवैयाकरणोक्तविभागस्याध्याप्रत्यादिभिस्तच्चक्षस्य प्राविकत्वं दर्शयति"।

"समासस्तु चतुर्धेति प्रायोवादस्तथाऽपरः। योऽयं पूर्वपदार्थादिप्राधान्यविषयः स च। भौतपूर्व्यात् सोऽपि रेखागवयादिवदास्थितः"। चतुर्धा अव्ययीभावतत्पुरुषद्वन्द्वबहुव्रीहिभेदात्। अयं प्रायोवादः। भूतपूर्वः इनभूः अयतस्तूः वागर्थाविवेत्यादिसंपत्तात्। तथा पूर्वपदार्थप्रधानोऽव्ययीभावः। उत्तरपदार्थप्रधानस्तत्पुरुषः सर्वपदार्थप्रधानो द्वन्द्वः। अन्यपदार्थप्रधानो बहुव्रीहिरित्यादि लक्षणमपि प्राविकम्। उन्मत्तगङ्गं खुपप्रति सर्वपिप्पली दिवाः कृष्णसर्पमित्यादौ परस्परव्यभिचारात्। तथाहि उन्मत्तगङ्गमित्यव्ययीभावे पूर्वपदार्थप्रधान्यादुपबहुव्रीहिलक्षणाव्याप्तिरव्ययीभावलक्षणाव्याप्तिश्च। "अन्यपदार्थे च संज्ञायामिति" पा० समासः। खुपप्रतीत्यव्ययीभावे उत्तरपदार्थप्राधान्यात् तत्पुरुषलक्षणाव्याप्तिरव्ययीभावाव्याप्तिश्च। "खुपः प्रतिना मात्रार्थे" पा० समासः। सर्वपिप्पलीति तत्पुरुषे पूर्वपदार्थप्राधान्यसत्त्वादव्ययीभावातिव्याप्तिस्तत्पुरुषाव्याप्तिश्च "अर्द्धं नपुंसकमिति" पा० समासः। एवं पूर्वकायद्वन्द्वादौ द्रष्टव्यम्। दिवा इति बहुव्रीहावुभयपदार्थप्राधान्यात् द्वन्द्वातिव्याप्तिः बहुव्रीह्यव्याप्तिश्च स्यादिति भावः। सिद्धान्ते अव्ययीभावाधिकारपठितत्वमव्ययीभावत्वमित्यादि द्रष्टव्यम्। अवश्यवश्यैषामित्याद्यौतपूर्व्यादित्यादि। रेखागवयादिनिदर्शनाद्यादेर्वाक्यस्यापि लक्षणत्वदर्शनेतेषामपि न समासलक्षणत्वम्। बोधकता तु तदेव स्यादिति भावः" वैया०।

शब्दशक्तिप्रकाशिकायाम् अन्यथा समासलक्षणादिकसूत्रं यथा "बादयश्च महावाक्यखण्डत्वादिनिर्जार्थके। बादयार्थश्च धीहेतुः स समासस्तदर्थकः", "बादयश्च महावाक्योत्तरखण्डतादिः स्वार्थस्य बादयार्थावच्छिन्नविषयताशाब्दिबोधे हेतुस्तादृशं तदाख्यं तथाविधार्थं समासः। पाचकादिकन्तु पाककर्त्रादयर्थकं वाक्यमपि स्वघटकानेकनामसमभिव्याहारार्थकत्वविरहान्न महावाक्यं प्रत्ययार्थमात्रावच्छिन्नप्रत्ययार्थखण्डान्वयबोधं प्रत्ययोभयत्वं वा भजते वाक्यस्य महत्त्वं वाच्यं तेन उपकुम्भादौ नाव्याप्तिर्वा नीलघटत्वमित्यादौ नीलघटत्वादिभागेऽतिप्रसङ्गः। क्षीरधात्रीत्यादिकन्तु प्रत्ययार्थावच्छिन्नजन्यदेवखण्डान्वयबोधे समर्थोऽपि न प्रत्ययार्थमात्रावच्छिन्नस्य ततः पानधात्रीसामान्यखण्डप्रत्ययात्। राजन्येव पुरुषभावः प्रतीयते न तु राजपुरुषस्य भावः तद्विस्तानां प्रत्ययार्थमात्रान्वितस्वार्थबोधकत्वादतो राज्ञः पुरुषेत्यादिभागे न प्रवृत्तः। यावं पायमित्यादिषमन्तभागस्तु स्वार्थावच्छिन्नस्य धात्वन्तरार्थखण्डैक्यान्वयबोधको न तु त्वादिप्रत्ययार्थस्य प्रस्तावेत्यादौ समासव्यपदेशोल्यादिशब्दसंस्कारप्रयोजनको नीयः" विभजते "स चायं षड्विधः कर्मधारयादिप्रभेदतः। यस्योपपदसंज्ञोऽन्यस्तेनासौ सप्तधा मतः। "स चायं निरुक्तसमासः कर्मधारयद्विगुतत्पुरुषाव्ययीभावबहुव्रीहिद्वन्द्वभेदात् षड्विधः यत्र कृन्नामकारादिरूपपदसंज्ञकः समासोऽस्ति तेन सप्तमं समासः सप्तविधः। सङ्ख्यानिमनीकाशादीनामिव कारादीनामपि शब्दानामुपपदार्थान्वितस्यैव स्वार्थस्य बोधकतया तथाविधनामत्वमेव चैतस्य समासान्तरादिभेदः। ननु यदि षड्विधः सप्तविधो वा समासस्तदास्य पञ्चविधत्वोक्तिः प्राचामसङ्गतेत्यतस्तासुपपादयति"। "पूर्वमध्यान्तसर्वान्यपदप्राधान्यतः पुनः। प्राच्यैः पञ्चविधः प्रोक्तः समासो वाभटादिभिः। "कचित्समासः पूर्वपदार्थधर्मिकान्वयबोधजनकतया पूर्वपदप्रधान उच्यते यथा प्राग्रजावार्द्धपिप्पलीपूर्वकायादिकस्तत्पुरुषः यथा वा उपकुम्भाद्यव्ययीभावः पुरुषसिंहादिकर्मधारयश्च। कचिन्मध्यपदार्थधर्मिकधीजनकतयैव मध्यपदप्रधानो यथा पटानधिकरणप्रतियोगिताकच्छेदकेत्यादिकस्तत्पुरुषः पटस्य नाधिकरणमित्यादिविग्रहे मध्यपदार्थस्यैव विशेष्यत्वात् बहुपदे बहुव्रीहिरेवेत्यस्य तत्पुरुषादेर्बहुनाममर्थत्वाभावे तात्पर्यसिद्धये व्युत्पाद्यत्वात्। कचिदन्यपदार्थधर्मिकधीहेतुत्वादन्यपदप्रधानः

यथा राजपुरुषादिरुत्तरपदप्रधानो नीलोत्पलादिकः कर्मधारयो दिगाद्यादिरव्ययीभावश्च । क्वचित् सर्वपदार्थधर्मैकबुद्धिहेतुत्वात् सर्वपदप्रधानः यथेतरेतरद्वन्द्वो द्वन्द्वमात्रं वा । क्वचित् स्वघटकान्यपदार्थधर्मिकज्ञानजनकत्वादन्यपदार्थप्रधानः यथा बहुव्रीहिः खलेयवादाव्ययीभावश्च । तदेवं षड्भेदानादायैव षड्विधत्वं प्राच्यैरुक्तमतो न विरोधः । नित्यानित्यभेदेन समासश्च द्वैविध्यमप्यस्ति यदुक्तं जयादित्येन "विभक्तिमात्रप्रक्षेपान्निजान्तर्गतनामसु । स्वार्थस्यानवबोधबोधाभ्यां नित्यानित्यौ समासकाविति ।" स्वान्तर्गतनामसु विभक्तिमात्रप्रक्षेपेण यद्भ्यार्थस्यानवबोधः स नित्यः समासः यथा कृष्णसर्पनर्मक्षिकाहरादि कृष्णः सर्पो मक्षिकाया निः न हर इत्यादितत्तद्भ्यस्य वैजात्यादेरयहात् । यद्भ्यस्य च बोधः सोऽनित्यो यथा राजपुरुषमूर्वकायादिः तद्भ्यार्थस्य राज्ञः पुरुषः पूर्वं कायस्येत्यादिवाक्यादपि प्रतीतेः । स्फुरदाणौ चलजैत्र इत्यादिकः कर्मधारयोऽप्यनित्य एव समासः स्फुरन्नो बाणौ यस्येत्यादिविग्रहस्य वाक्यादौ स्फुरदादिविशेषकबोधाजनकत्वेऽपि स्फुरदभिन्नबाणादावेकत्वादिबोधकत्वमादायैव तदर्थप्रकाशकत्वात् स्फुरन्नौ बाणौ यस्येत्यादिवाक्यस्यैव तत्र विग्रहत्वसम्भवाच्च । विग्रह एव समासस्यार्थस्य बोधकत्वं तन्त्रं न तु समासे विग्रहार्थस्य । विग्रहस्यार्थस्य योनिरङ्गसङ्गत्योर्व्यङ्ग्यवैधुर्ये च प्रायशः समासावबोधत्वात् । अतएव यत्र समासे तयोर्व्यङ्ग्यसङ्गावस्तत्रावगमोऽपि यथा जरतीचित्तरञ्जनः प्रियतमा पुरुष इत्यादौ स्त्रीत्वस्य स्त्रीप्रत्ययवतिस्थादेशयोस्तदभिव्यङ्ग्ययोः सत्त्वात् तथा अत्युपरि प्रियतमा इत्यत्यभिन्नादावेकत्वादेः अत्यन्तायारेकत्व एवाव्ययीभावस्य युष्मदस्मदोर्द्वित्व एव युवावादेशस्य सेनाङ्गानां बहुत्व एव समाहारद्वन्द्वस्य विधानात् । तदुक्तमभियुक्तैः "सङ्ख्या तु व्यङ्ग्याभावाद्व्यङ्ग्या प्रातरादिवत् । यत्र तु व्यङ्ग्यं किञ्चित्तत्र सङ्ख्या प्रकाशते । अत्युपरि इत्यत्र पूर्वकायोऽङ्गेष्विष्यतीति" । पूर्वादेरङ्गस्य च इत्यनैकत्वमनभीप्सितावयवविना तत्पुरुषस्य व्युत्पन्नत्वात् सरसिजादौ कण्ठेकालादौ चानुक्त समासे सुपः सङ्ख्यावगमेऽपि न क्षतिः तत्र व्यङ्ग्यसुपः सत्त्वेऽपि सङ्ख्या न बुध्यते इति समासशक्तिवादिन. पातञ्जलाः । अधिकं तत्र द्रष्टव्यम्

समासक्त त्रि० सम्+आ+सञ्ज-क्त । १संयुक्ते २अत्यन्तासक्ते ३अभिनिविष्टे च ।

समासङ्ग पु० सम्+आ+सञ्ज-घञ् । १संयोगे २सम्यगभिनिवेशे च ।

समासवत् पु० समास+अस्त्यर्थे मतुप् मस्य वः । १व्याकरणोक्तसमाससयुक्ते शब्दे २सक्षेपयुक्ते त्रि० ३तुल्यदृढे पु० शब्दच० । समासेन तुल्यं वति । ४समासतुल्यक्रियायां अव्य० । [०निकटस्थिते ३प्राप्ते त्रि० ।

समासादित त्रि० सम्+आ+सद+णिच्-क्त । १सम्यगाहृते

समासान्त पु० ६त० । व्याकरणोक्तसमासस्य शेषावयवे तत्तत्तोत्तरविहितविधिश्च अनित्यः "समासान्तविधिरनित्यः" परिभा० ।

समासार्था स्त्री समासेन सङ्क्षेपेणार्थोऽभिहितोयस्याः । १सक्षय्यायाम् अमर० । ६त० । २समासबोध्यार्थे पु० ।

समाहार पु० सम्+आ+हृ-घञ् । १समूहे अमरः २अनुक्तावयवभेदे समूहे समाहारे द्वन्द्वे त इवात्रित्यादिनैव समूहस्य बोधात् समूहत्वमेव प्रवृत्तिनिमित्तम् । द्वन्द्वशब्दे ३७६२ पृ० द्विगुशब्दे च ३८१२ पृ० दृश्यम् ।

समाहारद्वन्द्व पु० ब्या० उक्ते समासभेदे ३७६२पृ० दृश्यम् ।

समाहारद्विगु पु० ब्या० उक्ते समासभेदे द्विगुशब्दे ३८१२पृ० दृश्यम् ।

समाहित त्रि० सम्+आ+धा-क्त । १कृतसमाधौ २आश्रिते ३प्रतिज्ञाते मेदि० ४निष्पन्ने धरणिः ५युक्ते शब्दच० । ६कृतसमाधाने । भावे क्त । ६समाधाने न० ।

समाहृत त्रि० सम्+आ+हृ-क्त । १संगृहीते २एकत्रस्थीकृते ।

समाहृति स्त्री सम्+आ+हृ-क्तिन् । १संक्षेपे २समूहे अमरः । ३समाधौ च ।

समाह्वय पु० समाह्वयते सम्+आ+ह्वे-अच् आत्वाभावः । १आह्वाने २प्राणिकरणकद्यूते च "प्राणिभिः क्रियमाणस्तु स विज्ञेयः समाह्वयः" इति मनुः । ३तदाधारे प्रवृत्तविवादभेदे च द्यूतशब्दे ३७७४पृ०दृश्यम् ।

समाह्वा स्त्री समा-आह्वा यस्याः । १गोजिह्वाक्षुपे शब्दच० । प्रा०स० । २समाख्यायाञ्च । [शब्दर० ।

समिक न० सम्-इण-डि संज्ञायां कन् । शेवाले (वड़शा)

समित् स्त्री समीयतेऽत्र सम्+इण्-आधारे क्विप् । युद्धे अमरः

समिता स्त्री सम्+इण्-क्त । १गोधूमचूर्णभेदे "गोधूमा धवला धौताः कृत्तिताः शोषिताश्चतः । पश्चिद्राक्षा विनिष्पिष्टाश्चालिताः समिताः स्मृताः" राजनि० । २कृते त्रि० ।

समिति स्त्री सम्+इण-आधारे क्तिन् । १सभायाम् अमर;

२युद्धे २सङ्गते च मेदि०। आर्हतमतसिद्धे प्राणिपीडापरिहारेण सम्यग्गमने सा च पञ्चविधा अर्हत्शब्दे ३८५ पृ० दृश्या। [३आहुतौ सविप्रसा०।

समिथ पु० सम्+इण-थक्। १यज्ञे २युद्धे च मि०को०।

समिध् स्त्री समिध्यतेऽनया सम्+इन्ध-करणे क्विप्। १काष्ठे २होमीयकाष्ठभेदे च तल्लक्षणं छन्दोग० "नाङ्गुष्ठादधिका नोना समित् स्थूलतया क्वचित्। न निर्ग्रन्थित्वचा चैव न सकोटा न पाटिता। प्रादेशान्नाधिका नोना न तथा स्रुग्दिशाखिका। न वपत्रा न निर्लोमा हेमेषु च विजानता" इति। तस्य निषिद्धलक्षणं यथा "विशीर्णां विदला क्षुद्रा वक्राः स्थूला द्विधाकृताः। कृमिदष्टाश्च दीर्घाश्च समिधो नैव कारयेत्" तत्र दोषो यथा "विशीर्णायुःक्षयं कुर्याद्विदला पुत्रनाशिनी। क्षुद्रा नाशयते पत्नीं वक्रा बन्धुविनाशिनी। कृमिदष्टा रोगकरी विद्वेषकरणी द्विधा। पशून् मारयते दीर्घा स्थूला चार्थविनाशनी" तन्त्रसा०। [त्रिका०।

समिध पु० समिध्यते सम्+इन्ध-क। १काष्ठे २यज्ञे च

समिन्धन पु० सम्+इन्ध-करणे ल्युट्। १काष्ठे शब्दच०। भावे ल्युट्। २सम्यगुद्दीप्तौ च।

समीक न० सम-ईक्। युद्धे अमरः।

समीकरण न०अनयाः समाः क्रियतेऽनेन सम-च्वि+कृ ल्युट्। बीजगणितप्रसिद्धे ज्ञातसंख्यानां यावत्तावदादीनामव्यक्तराशीनां संख्या ज्ञानार्थे १प्रक्रियाभेदे २तल्लक्षणतापादने च।

समीक्ष न० सम्यगीक्षतेऽनेन घञ्। १साङ्ख्यदर्शने त्रिका०। भावे घञ्। २पर्य्यालोचने ३सम्यग्ज्ञाने च पु०। ष० समीक्षान्वय। ४मन्त्रे ५बुद्धौ मेदि० ६मीमांसाशास्त्रे ७वस्तौ च स्त्री शब्दच०।

समीक्ष्यकारिन् त्रि०समीक्ष्य पर्य्यालोच्य करोति कृ-णिनि उप०। वस्तुस्वरूपपर्य्यालोचनपूर्वककार्य्यकारके।

समीच पु०सम्+इण-चट् किच्च दीर्घश्च। १संयुक्ते २दक्षिणायां स्त्री ङीप् उज्ज्वलद०। ३चन्द्रनायां स्त्री त्रिका०।

समीचीन त्रि० सम्यगञ्चः सम्+अञ्च-क्विप् ततः च समः समिः अक्षेरकारलोपे पूर्वपददीर्घः। १यथार्थे २साधौ ३सत्ये न० हेमच०। ४सम्यक्युक्ते त्रि०।

समीनिका स्त्री समां प्राप्य प्रहते च ततः स्वार्थे क। प्रतिवर्षं प्रहतायां समांसमीनायां गवि शब्दच०। [अमर

समीप त्रि०समूहना आयोऽस्य अच् समा०अत ईत्वम्। निकटे

समीर पु० सम्यक् ईरयति गोदयति सम्+ईर-अच्। १वायौ अमरः। २शमीवृक्षे राजनि०। पृषो०। स मरोऽत्र राजनि०। [३यज्ञिये मेदि०। भावे ल्युट्। सम्यग्गतौ न०।

समीरण पु० सम्+ईर-ल्यु। १वायौ २मरुत्पञ्चके अमरः

समीरित त्रि० सम्+ईर-क्त। १कथिते २उच्चारिते "चतुःसंख्यसमीरिता" कुमारः।

समीहित त्रि०सम्+ईह-क्त। १अभीष्टे २सम्यक्चेष्टिते न०।

समुख त्रि० सह सुखेन सुखस्य पारेण वा सहस्य सादेशः। १वादुके हेमच०। २आस्यिनि च।

समुचित त्रि० सम्+उच-क्त। सम्यग् उपयुक्ते समञ्जसे।

समुच्चय पु०सम्+उद्+चि-अच्। १द्वित्वादीनां राशौ अमरः परस्परनिरपेक्षाणामनेकेषामेकस्मिन् शक्रिय इत्यन्वये च यथा देवदत्तो यज्ञदत्तश्च गच्छतीत्यत्र देवदत्तयज्ञदत्तयोः परस्परसापेक्षताभावेऽपि एकस्मिन् गमने अन्वयः। तद्बोधकश्च प्रायेण चकारः क्वचित् तथादिशब्दोऽपि। २सङ्घातहारे शब्दच०।

समुचित त्रि० सम्+उद्+चि-क्त। क्रतसञ्चये "समुचितफलकामनानामिति विधिरूपे भट्टारः।

समुच्चारय पु० सम्+उद्+चर-णिच् घञ् वा। सम्यगुच्चारणे २सम्यक्त्यागे च। [पाठने च।

समुच्छेद पु० सम्+उद्+छिद-घञ्। १विनाशे २समूलोत्

समुच्छ्राय पु० सम्+उद्+श्रि-अच् घञ् वा। १अत्युन्नतौ २अवरोधे ३उत्सेधे च मेदि०।

समुच्छ्रित त्रि० सम्+उद्+श्रि-क्त। अत्युन्नते।

समुच्छ्वलित त्रि०सम्यक्+उच्छ्वलितम् सम्+उद्+श्वल-क्त वा। समन्तात् निर्गतौ (जयन्तेऽपि) "समुच्छ्वलितावष्टम्भा गतिः" काव्यप्र०। [युक्ते २अत्युच्छ्रिते च।

समुच्छ्वसित त्रि० सम्+उद्+श्वस-क्त। १सम्यगुच्छ्वास

समुच्छ्वास पु० सम्+उद्+श्वस-घञ्। सुखनासिकाभ्यां प्राणवायोर्व्यापारे। [गुदमने।

समुज्झित त्रि० सम्+उज्झ-क्त। त्यक्ते अमरः। [२सम्य

समुत्क्रम पु० सम्+उद्+क्रम-घञ् न ह्रस्वः। १ऊर्द्ध्वगमने

समुत्क्रोश पुंस्त्री०सम्यक् उत्क्रोशति उच्चैः शब्दायते सम्+उद्+क्रुश-अच्। १क्षुररविशेषे शब्दच० स्त्रियां ङीप्। भावे घञ्। २अत्युच्चैःशब्दे [स्युत्सवे २उत्सिते च।

समुत्थ त्रि०सम्यगुत्तिष्ठति सम्+उद्+स्था-क सञ्ज्ञायाः। [स

समुत्थान न० सम्+उद्+स्था-करणे ल्युट् सञ्ज्ञायाः। १सद्योगे २उत्साहने ३व्याधिनिग्रहे च मेदि०।

समुत्पत्ति स्त्री सम्+उद्+पद्-क्तिन् । समुद्भवे ।
समुत्पन्न त्रि० सम्+उद्+पद्-क्त । समुद्भूते ।
समुत्पाट प० सम्+उद्+पाट-घञ् । उन्मूलीकरणे ।
समुत्पाटित त्रि० सम्+उद्+पाट-क्त । उन्मूलिते ।
समुत्पिञ्ज त्रि० सम्+उद्+पिञ्ज-घञ् । १व्याकुले हेमच० २राशौ मेदिन्यौ पु० अमरः ।
समुत्सर्ग प० सम्+उद्+सृज-घञ् । सम्यक्त्यागे ।
समुत्सुक त्रि० सम्यगुत्सुकः प्रा०ब० । १अत्यन्तोत्सुके दृष्ट वस्तुलाभाय त्वरान्विते ।
समुत्सृष्ट त्रि० सम्+उद्+सृज-क्त । सम्यक्त्यक्ते ।
समुत्सेध प० सम्+उद्+सिध-घञ् । १अत्युन्नतौ २अतिस्फीततायाञ्च । [अमरः ।
समुदक्त त्रि० सम्+उद्+अञ्च-क्त । कूपादेरुद्धृतजलादौ
समुदय प० सम्+उद्+इण्-अच् । १समूहे अमरः २वृद्धौ ३सङ्गमे मेदि० ४उदये भरतः । ज्योतिषोक्ते ५लग्ने न० । ६षड्वाडीचक्रस्थे जन्मतारवधिके अष्टादशनक्षत्रे चक्रभेदे पु०हेमाद्रिः । घञन्तः सम्पूर्वे युद्धे पु०अमरः । प्रशस्यमैन्ये अजयः अत्युन्नतौ मेदि० ।
समुदागम पु० सम्+उद्+आ+गम-घञ् न वृद्धिः । सम्यगुत्थाने विका० । [विका० । २सम्यगाचारे च ।
समुदाचार पु० सम्+उद्+आ-चर-घञ् । १अभिप्राये
समुदित त्रि० सम्+उद्+इण्-क्त । १प्राप्तसम्भूतौ पदार्थे भाव+उद्-कर्मणि क्त । २सम्यक्कथिते ।
समुदीरण न० सम्+उद्+ईर-ल्युट् । सम्यक्कथने ।
समुदीरित पु० सम्+उद्+ईर-क्त । सम्यक्कथिते ।
समुद्ग पु० सम्+उद्+गम-ड । १सम्पुटे हेमच० २सङ्केतकारकदार्थे ३वृद्धेन सहिते । स्वार्थे क । तत्रैव अमरः
समुद्गम पु० सम्+उद्+गम-घञ् न वृद्धिः । १ऊर्द्धगतौ २समृद्धौ च ।
समुद्गीत त्रि० सम्+उद्+गै-क्त । उच्चैर्गीते । [ते च ।
समुद्गीर्ण त्रि० सम्+उद्+गृ-क्त । विमिते २उक्तोच्चारिते ३कथिते
समुद्दिष्ट त्रि० सम्यक् उद्दिश्य उद्+दिश-क्त । सम्यगुद्दिश्यविधेये पदार्थे "तत्समुद्दिष्टं कर्मेति" सांख्यप्रवचनसारः ।
समुद्देश पु०सम्यक् उद्देशः उद्+दिश-घञ् । सम्यगभिधेयौ । २सम्यगुद्देशे च यथा "वाक्यादौ जातिसमुद्देशे" मञ्जूषा
समुद्धत त्रि० सम्+उद्+हन-क्त । १अत्यन्तप्रगल्भे अत्यन्तविनीते अमरः २समृद्धौ हेमच० ।
समुद्धरण न० सम्+उद्+हृ-ल्युट् । १उत्तोलने कूपादेर्जलोत्तोलने २भुक्तान्नस्य वमने ३उन्मूलने च । कर्मणि ल्युट् । ४वान्ते-अन्नादौ ५समुद्धृते च अमरः ।
समुद्धृत त्रि० सम्+उद्+हृ-क्त । १अपनीते २समुत्कीर्णे मेदि० ३उत्तोलिते ४उन्मूलिते च ।
समुद्धर्त्तृ त्रि० सम्+उद्+हृ-तृच् । १समुत्कारिणि २उन्मूलयितरि ३उत्थापके ४भूतद्रव्यस्य पुनरादानकर्त्तरि च
समुद्भव पु० सम्+उद्+भू-अप् । समुत्पत्तौ ।
समुद्भूत त्रि० सम्+उद्+भू-क्त । समुत्पन्ने ।
समुद्यत त्रि० सम्+उद्+यम-क्त । सम्यगुद्यमयुते ।
समुद्यम त्रि० सम्+उद्+यम-घञ् न वृद्धिः । सम्यक्प्रयत्ने ।
समुद्र पु० सम्+उन्द्-क्रन् क्रोदने रक्, सम्+उद्+रा-क वा । १स्वनामख्याते प्रचुरजले सागरे अमरः । सह सुद्रया २सुद्राया सहिते त्रि० "यमौ मरुत्वान् विजयः समुद्रः यमौ मरुत्वान् विजयः समुद्रः" इति भट्टिः । ३लक्ष्म्यां ४गम्यायाञ्च स्त्री टाप् राजनि० । सागरस्य ब्रह्मणो मेढ्रात् उद्भवः "आद्यात् वाक्, सिन्धो खेढ्रात्" भाग० ३।१२अ० । स च सप्तविधः "लवणेक्षुसुरासर्पिर्दधिदुग्धजलार्णवाः" समुद्रनामनिरुक्तिः तद्यादिकारशब्द शब्दस्तोमे १२२अ० उक्तं यथा "अपाञ्चैव समुद्रेण समुद्र इति संज्ञितः । उदयतोन्दौ पूर्वं तु समुद्रः पूर्यते यदा । प्रक्षोभ्यमाणे सलिले क्षोभितऽक्षमिते च वै । आपूर्यमाणो ह्युदधिरात्मनैवापि पूर्यते । ततो वै क्षोभमाणे तु खात्मन्येव क्षयं क्षयः । उह्यन्ते ऽस्मिन्संयोगा इत्याख्यातो यथा क्षयम् । तथा ऋतः समुद्रोऽपि वर्द्धते शशिनोदये । अम्बूनामतिरिक्तत्वात् वर्द्धन्त्यापो हसन्ति च । उदयेऽस्तमये चेन्दोः पक्षयोः शुक्लकृष्णयोः । यावद्धो समुद्रस्य शशिवृद्धिक्षये तथा । दशोत्तराणि पञ्चाङ्गरङ्गुलानां शतानि च । अयं वृद्धिः क्षयो दृष्टः समुद्राणान्तु पर्वसु" ।
समुद्रकफ पु० समुद्रस्य कफ इव । जलधिफेने विका० ।
समुद्रकान्ता स्त्री ६त० । १पृथ्वायां राजनि० । २नद्याञ्च हेमा० समुद्रप्रियाटवीनद्याम् ।
समुद्रगा स्त्री समुद्रं गच्छति गम-ड । १नद्यां हेमच० । "सर्वा नद्यः समुद्रगा" इति पुराणम् । साक्षात् परम्परया वा सर्वासां जलधिगामित्वात् तथात्वम् । साक्षात् समुद्रगा च गङ्गादिः "सर्वा नद्यो रजोयुक्ता वर्जयित्वा समुद्रगाः" इति प्रा० त० । गङ्गाया एव सप्तधा धारा; सीतालकनन्दावङ्क्षुभद्राख्यतया ख्याताः

जम्बूद्वीपशब्दे १०४४पृ० दर्शिताः । भारतवर्षस्थाः समुद्रनाम "नदीं पिबन्ति दिग्वारणादिना "दक्षिणाद्रौ महानदीमिश्रजलेन" भा०भी०उक्ताः २०४६ पृ० दर्शिताः । क्षुद्रनदीनामपि महानद्यादिमिश्रितानां समुद्रगामित्वं यथोक्तं भावे "सामुद्र्याम्भोधिमभ्येति महानद्या न भाषणा" । [त्रिका० ।

समुद्रशुक्ति न० समुद्र इव प्रचुरजलं शुक्तिरस्य । जलजन्तुभेदे

समुद्रचुलुक पु० समुद्रस्य चुलुकः गण्डूषजलमितजलमिव अगाधासेव पीतत्वाद्यस्य । अगस्त्ये मुनौ त्रिका० ।

समुद्रनवनीत न० समुद्रस्य नवनीतमिव । समुद्रमन्थनोद्भूतसारांशे १अमृते २चन्द्रे च मेदि० ।

समुद्रफल न० ओषधिभेदे "समुद्रनाम प्रथमं पश्चात फल मुदीरयेत् । समुद्रफलमित्यादि नाम वाच्यं भिषग्वरैः । फलं समुद्रस्य कफघ्नकारि वातापहं मूत्रनिरोधकारि । त्रिदोषदावानलदोषहारि कफामयश्वासविरोधकारि" राजनि० तद्गुणाः उक्ताः ।

समुद्रफेन पु० ह्रस्व० । समुद्रस्य फेने अमरः "समुद्रफेनश्चुण्यो लेखनः शीतलश्च सः । कषायो विषपित्तघ्नः कर्फकफहृल्लघुः" भावप्र० तद्गुणा उक्ताः ।

समुद्रमेखला स्त्री समुद्र मेखलेव वेष्टनाकारत्वात् यस्याः । पृथिव्यां त्रिका० । समुद्ररशनादयोऽप्यत्र ।

समुद्रयान न० यायतेऽनेन या-करणे ल्युट् ह्रस्व० । पोते समुद्रतरणसाधने नौकाभेदे वराहपु० ।

समुद्रयात्रा स्त्री ह्रस्व० । समुद्रस्य तीर्थत्वेन गमने । कलौ तन्निषेधः कलिशब्दे १८०४ पृ० दृश्यम् ।

समुद्ररमण स्त्री समुद्रः रमण इव वेष्टनत्वात् यस्याः । पृथिव्यां हेमा० ।

समुद्रलवण न० समुद्रजलजातं लवणम् । (करकच)समुद्रे लवणे राजनि० । "समुद्रं वक्तु लवणमक्षीवं वशिरं च तत् । समुद्रं मधुरं पाके सतिक्तं मधुरं गुरु । नात्युष्णं दोषनं मेदि अक्षीवमविदाहि च । श्लेष्मलं वातनुत्तिक्तमरुच्यं नातिशीतलम्" भावप्र० ।

समुद्रवह्नि पु० ह्रस्व० । समुद्रस्थे वह्नौ वाडवानले हेमा०

समुद्रवेला स्त्री ह्रस्व० । समुद्रस्य कूले ।

समुद्रसभगा स्त्री ह्रस्व० । गङ्गायां राजनि० ।

समुद्रान्त न० समुद्रस्यान्तः पर्य्यन्तदेशः यत्र तिस्थानत्वेनास्त्यस्य यत् समुद्रः अन्तो यस्य वा । १जातीफले शब्दच० २इरायामायां स्त्री अमरः । ३कार्पासे ४पृक्कायां मेदि० ५यवासे स्त्री राजनि० । ह्रस्व० । ६समुद्रपर्य्यन्ते त्रि० ।

समुद्राम्बरा स्त्री समुद्रः अम्बरमिव वेष्टनाकारत्वात् यस्याः । पृथिव्यां त्रिका० । सागराम्बरादयोऽप्यत्र ।

समुद्रार पु० समुद्रमुल्लङ्घति ऋ-कर्त्तरिकरणे वा घञ् । १समुद्रपारे २समुद्रवर्त्मनि ३तिमिङ्गिलमत्स्ये मेदि० । [पदार्थे ।

समुद्रि(द्री)य त्रि० समुद्र+भवार्थे छ ङीप् वा । समुद्रभवे

समुद्यह त्रि० सम्+उद्+यह-अच् । श्रेष्ठे सम्यगुद्यहनकर्त्तरि च । [अमरः ।

समुन्दन न० सम्+उन्द्-ल्युट् । सम्यगार्द्रीभावे (भिजा)

समुन्न न०सम्+उन्द्-क्त । १क्लिन्ने २आर्द्रे अमरः । [धरणिः

समुन्नत त्रि० सम्+उद्+नम-क्त । १अत्युच्चे २सम्यग्भेदे पु०

समुन्नति त्रि० सम्+उद्+नम-क्तिन् । १उच्चतायाम् "प्रायः पयोधरसमुन्नतिरेव हेतुः" उत्पुब्भटः । २उत्कर्षे स्त्रीत्वेऽयां जटा० ।

समुन्नद्ध त्रि० सम्+उद्+नह-क्त । १गर्विते २परिष्कृतसन्नद्धे अमरः । ३प्रभौ अजयः । ४समुद्भूते मेदि० ५उत्क्षिप्य बद्धे हेमच० । ६समुद्भूते च । भावे क्त । ७उत्तोल्यबन्धने न० । [२उत्तरक्षेपणे ४समुद्भावने च ।

समुन्नय पु० सम्+उद्+नी-अच् । १ऊर्द्धनयने २सम्यग्नीतौ

समुपचित त्रि० सम्यक् उपचितम् उप+चि-क्त । १सुष्ठुक्लोकृते २संवर्द्धिते च । [रामाश्रमः ।

समुपजोषम् अव्य० सम्+उप+जुष-क्वसु । अत्यन्तानन्दे

समुपैयिवस् त्रि० सम्+उप+इण-क्वसु । समीपगते ।

समुपोढ त्रि० सम्+उप+वह-क्त । १सङ्गते २समुद्भाते च ।

समुल्लेख पु० सम्+उद्+लिख-घञ् । पादादिना भूम्यादेः खनने ।

समूढ त्रि० सम्+ऊह+वह-वा क्त । १राशीकृते २अनपगते "समूढमस्य पांसुरे" इति ऋग्वेदः । ३भग्ने ४संघीभूते मेदि० ५दमिते ६कृतविवाहे धरणिः ७शोधिते जटा० । सह ऊढेन । ८समूढसहिते त्रि० ।

समूरु पु०सकलौ सन्निहीनत्वात् ऊरू यस्य । मृगभेदे अमरः पृषो० । समूर तत्रार्थे पुंस्त्वेऽपि हेमच० स्त्रियां ङीप् ।

समूल त्रि० सह मूलेन । मूलसहिते "समूले उपपदे कषादिभ्यः खनश्च तत्प्रकृतिधातोरनुप्रयोगश्च "समूलकाषं कषति" "समूलघातं न्यवधीत्" इति च भट्टिः ।

समूह पु० सम+ऊह-घञ् । १समुदये अमरः । समूहत्वञ्च अपेक्षाबुद्धिविषयविषयत्वं त्रित्वादिपर्य्याप्तसंख्याविशेषो वा । २सम्यग् ऊहे तर्के च ।

समूहनी स्त्री समुह्यतेऽनया सम्+ऊह-करणे ल्युट् ङीप्। १सम्मार्जन्यां हेमच०। भावे ल्युट्। २सम्मार्जने परिसमूहनशब्दे ४२५८ पृ० दृश्यम्। ३सम्यगूहकरणे च न०।

समूहालम्बन त्रि० समूहमालम्बते विषयतया आ+लभि-ल्यु। नानाप्रकारतानिरूपितनानाविशेषतताश्रयिणि ज्ञाने। तत्र संशये नानाप्रकारतानिरूपिताया एकविशेषतायाः सत्त्वात् न समूहालम्बनत्वम्। धवखदिरौ द्वावित्यादौ दण्डी कुण्डी च देवदत्त इत्यादौ वाक्यजन्यबाधेऽपि समूहालम्बनत्वं तन्नोभयनिरूपितयोः विशेषतयोर्द्वयोरेवाङ्गीकारात् इत्यादौ परस्परसमभिव्याहृतप्रत्येकान्वयनियमेन प्रथमार्थद्वित्वस्य प्रत्येकवृत्तित्वात् तच्च समवायेनैवेति बोध्यम्। अतएव शब्दचिन्तामणौ अधिकृता धवखदिरपलाशांश्छिनत्तीत्यादौ प्रत्येककर्मतायां एव विभिन्नक्रियायावन्वय इत्युक्तम्। अत एवोक्तस्थले विशेषतात्रयम्। धवखदिरौ द्वावित्यादावपि द्वित्वस्य समवायसम्बन्धेन धवादिवृत्तित्वात् विशेषतादयाङ्गीकारेऽपि नक्षतिभावात्। तेनैव धवखदिरौ न द्वाविति प्रतीतिवारणसम्भवात्। घटं घटश्च पश्यतीत्यादौ च दर्शनक्रियायां घटपटयोरन्वयसम्भवे तु न समूहालम्बनमिति भेदः इत्यादिबोध्यम्। यदि च आत्मघटयोर्नित्यत्वमित्यादि प्रयोगसाधुत्वार्थं षष्ठ्यर्थसम्बन्धेनैव द्वित्वादेर्बोधोऽङ्गीक्रियते तदा तच्च न समूहालम्बनत्वम्।

समूहिन् त्रि० समूहोऽस्त्यस्य इनि सम्+ऊह-णिनि वा। समूहावयवे प्रत्येकवस्तुनि यथा घटपटसमूहालम्बनता घटः पटश्च समूहौ। २सम्यक्तर्कयुते त्रि० स्त्रियां ङीप्

समूह्य पु० सम्+ऊह-यत्। १यज्ञियाग्नौ अमरः २सम्यक् तर्क्ये त्रि० ३यज्ञाग्निसंस्कारभेदे त्रि०को०।

समृद्ध त्रि० सम्यक् ऋद्धः ऋध-क्त। १अधिकसम्पत्तियुक्ते अमरः। २अतिवृद्धे च शब्दमा०।

समृद्धि स्त्री सम्यक् ऋद्धिः सम्+ऋध-क्तिन् वा। १अतिसम्पत्तौ अमरः २सम्यग्वृद्धौ च "मधुसमृद्धिसमेधित या मेधया" माघः।

समेत त्रि० सम्+आ-इण क्त। १समागते २सङ्गते च।

समेधित त्रि० सम्+एध+णिच्-क्त। संवर्द्धिते "मधुसमृद्धि समेधितमेधयेति" माघः।

समोदक न० समम् अर्द्धभागेन तुल्यमुदकं यत्र। यत्राम्बु संयोगेन मथितदधिजाते १तक्रभेदे हेमच०। सह मोदकेन सहस्य सः। २मोदकसहिते त्रिकाण्डशेषः।

सम्पत्ति स्त्री सम्+पद-क्तिन्। १अतिविभवे अमरः २वस्तुस्वरूपात्मभावे यस्य यद्रूपता उचिता तस्य तथाभवने च त्रि०को० ३विभूतौ मेदि०।

सम्पद् स्त्री सम्+पद-सम्प० भावे क्विप्। १विभवे २सम्पत्तौ च अमरः। ३गुणोत्कर्षे। करणे क्विप्। ४हारभेदे पु० मेदि०। यज्ञार्थे क। सम्पद् तत्रार्थे न० शब्दमा०।

सम्पन्न त्रि० सम्+पद-क्त। १साधिते २सम्पद्युक्ते च मेदि०

सम्पराय पु० सम्+परा+इण-आधारे अच्। १युद्धे २आपदि ३उत्तरकाले च अमरः।

सम्परायिक न० सम्परायाय आपदे हितम् ठन्। १युद्धे तदर्थे ठञ्। २साम्परायिकमात्रे अमरः। [मेदि०।

सम्पर्क पु० सम्+पृच-घञ्। १सम्बन्धे २रतौ ३मेलके च

सम्पर्किन् त्रि० सम्+पृच-घिनुण्। सम्बन्धयुक्ते।

सम्पा स्त्री सम्यक् पातीति पत-ड। विद्युति अमरः।

सम्पाक पु० सम्यक् पाको यस्मात् ब०। आरग्वधवृक्षे अमरः तद्भोजने हि भुक्तान्नादेः सम्यक्पाको भवतीति वैद्यके प्रसिद्धम्। २दृढे ३तर्कके मेदि० ४सम्पटे ५चक्षे च त्रि० धरणिः।

सम्पात पु० सम्+पत-घञ्। १पक्षिगतिभेदे जटा० २सम्यक्पतने च। ३रेखाद्वयादेः सम्पतने च।

सम्पाति पु० सम्+पत-णिच्-इन्। जटायुषो ज्येष्ठभ्रातरि पक्षिभेदे रामा०। स्वार्थे क। तत्रैव। साम्पतिरिव कायति कै-क। सम्पातिक गरुडज्येष्ठतनये शब्दमा०।

सम्पुट पु० सम्+पुट-क। १कुड्यकट्टे अमरः। सम्यक् पुटमिव उभयपार्श्ववर्त्ति यस्य। २एकजातीयपदार्थेन भिन्नजातीयस्य उभयतो व्याप्ते त्रि० "सकाशैः सम्पुटोजायः" इति तन्त्रम्।

सम्पुटक पु० सम्पुटयति सम्+पुट-णिच स्वार्थे वुन्। सम्पुटवृक्षे भङ्गाख्ये (भेटारा) पदार्थविशेषे अमरः।

सम्पूर्ण त्रि० सम्+पूर-क्त। १परिपूर्णे २समग्रे च "आदित्योदयवेलायाः प्राङ्मुहूर्त्तद्वयान्विता। एकादशी हि सम्पूर्णेति स्मृत्युक्ते १एकादशीभेदे स्त्री ति०त०। पुष्ये ४यष्टिदण्डात्मकतिथिमाने स्त्री तिथिशब्दे १२८३ पृ०दृश्यम्।

सम्पृक्त त्रि० सम्+पृच-क्त। १मिश्रिते हेमच० २सम्बद्धे च

सम्प्रणयन न० सम्+प्र+नी-ल्युट्। १सम्यग्वक्ष्यमाणादेः शोधनाय संस्कारविशेषे २विधाने च। [अमरः।

सम्प्रति अव्य० सम्+प्रति+समाहारद्वन्द्वः। इदानीमित्यर्थे

सम्प्रतिपत्ति स्त्री सम्+प्रतिपद्यते क्तिन्। १वाद्युक्तार्थवि-

अवलीकरणे "तुलाभियोगं प्रत्यर्थी यदि तं प्रतिपद्यते। या तु सम्प्रतिपत्तिः स्यादिति २कृत्युक्ते व्यवहारे उत्तरभेदे च "मिथ्या सम्प्रतिपत्तिश्च प्रत्यवस्कन्दनं तथा। ब्राह्म्यायश्चोत्तराः प्रोक्ताश्चत्वारः ब्राह्मवेदिभिः" उत्तरशब्दे १०१६ पृ० दृश्यम्।

सम्प्रदात्र त्रि०सम्+प्र+दा-क्त्र। दानकर्त्तरि स्त्रियां ङीप्

सम्प्रदान न० सम्+प्र+दा-भावे ल्युट्। १सम्यक्प्रदाने। सम्प्रदीयतेऽनेन ल्युट्। "कर्मणा यमभिप्रैति स सम्प्रदानमिति" पाणिन्युक्ते २दानकर्मोद्देश्ये। तच्च त्रिविधम्। "अनिराकरणात्कर्तुस्त्यागाङ्गकर्मयोग्यतम्। प्रेरणान्मतिदाच्च लभते सम्प्रदानताम्" इत्युक्तेः। तत्र विप्राय वस्त्रं ददातीत्यादौ अनिराकर्तृ सम्प्रदानम्, याचकाय धनं ददातीत्यादौ प्रेरयितृ सम्प्रदानम्, गुरवे धनं ददातीत्यादौ मतदातृ सम्प्रदानम्। गौणमुख्यसाधारणे सम्प्रदाने चतुर्थी पा०। तच्चेयं व शब्दरत्न० दर्शितं यथा "गत्यादिभिन्ने धात्वर्थे चतुर्थ्या विधेयत्वया। यः स्वार्थो बोधनीयस्तत्सम्प्रदानत्वमीरितम्"। "गत्यादिभिन्ने यद्याद्यर्थस्याप्ये यादृशार्थे विधेयत्वचतुर्थ्या यः स्वार्थो बाधयितुं शक्यते न तद्याद्यर्थव्याप्यतादृशक्रियायां सम्प्रदानत्वमुच्यते। ब्राह्मणाय दानं धनस्वेत्यादौ ददातेः स्वत्वजनकत्यागोऽर्थस्तन्निष्ठे च स्वत्वे ब्राह्मणादेः प्रतियोगित्वं निरूपितत्वं वा चतुर्थ्या बोध्यते इति तदेव तत्र सम्प्रदानत्वं ब्राह्मणप्रतियोगिकं ब्राह्मणनिरूपितं वा यद्यपि स्वत्वं तज्जनकत्यागं इत्येवं तत्र प्रत्ययात् धात्वर्थतावच्छेदकीभूतस्वत्वाश्रयत्वया धनादेर्दानकर्मत्वात्। न चैवं पशुकामनया यागकरणदशायां चैत्रः स्वामिने पशुं ददातीत्यपि प्रयोगापत्तिस्तादृशयागस्य चैत्रीयं यत् पशुनिष्ठं स्वत्वं तज्जनकत्यागत्वादिति वाच्यं स्वत्वध्वंसजनकक्रियापर्यवसन्नस्य त्यागस्यैकदेशे स्वत्वध्वंसेऽपि द्वितीयाद्यर्थस्वामिजेन पशुफलकयागे पशुनिष्ठस्य स्वत्वध्वंसस्य जनकत्वविरहादेव तदाकाङ्क्षाप्रमाणत्वात्। यामाय गां ददाति इत्यादौ विधेयत्वचतुर्थ्या धात्वर्थे बोध्यमपि कर्मत्वं न गत्यादिभिन्ने चतुर्थ्या बोधनीयम्। संवर्द्धयितुमित्यादि तुमर्थौ न विधेयत्वेति न तत्र प्रसङ्गः। सम्प्रदानशब्दस्तु स्वस्वामिगोचरत्यागजन्यस्वत्वस्य प्रतियोगिन्येव शक्त इति स्वत्वप्रतियोगित्वं सम्प्रदानत्वमित्यादिको न प्रयोगः। न च दानस्य स्वत्वहेतुत्वे प्रमाणाभावः। "इह विप्रायेमां धेनुं दातुकामो दाता दानीयं द्रव्यं संकल्पयति तिलोदकं च मुञ्चति तदनन्तरं ब्राह्मणाय तत्प्रतिपादनादिति वाच्यं ब्राह्मणाय त्वत्स्वायं गवि गोरियं ब्राह्मणस्य नेत्यनुमेत्यादिवर्जनीनप्रतीतेरेव तत्र प्रमाणत्वात् "प्रदानं स्वाम्यकारणमिति" वचनाच्च। अतएव विदेयत्वं पात्रमुद्दिश्य त्वत्स्वत्वे स्वीकारमन्तरेणैव पात्रस्य करणत्वे पिण्डदानवत्तेन तदनं पुत्रादिभिर्विभज्य भक्ष्यते अन्यथा तैरिव श्राद्धसोनैरपि तदनस्वीकारणकृत्यादेरिवोपादाने वक्षेपनियोगे च प्रत्यवायो न स्यात्। नन्वेवं दानादेव स्वत्वसिद्धेर्दत्तवस्तुनि स्वीकारो व्यर्थ इति चेन्न "तृप्ता चाहमुभं फलम्" इत्यादिश्रुतेः प्रतिगृहीतद्रव्यदानस्य फलविशेषं प्रतिहेतुत्वेन तादृशफलसम्पत्त्यर्थमेव प्रतिपदस्योपयोगात् "बालनाध्यापनप्रतिग्रहैर्द्रो धनमर्जयेदित्यादि" स्मृत्या प्रागुक्तस्मृत्या च प्रतिपदस्यापि स्वत्वहेतुत्वबोधनाच्च स्वत्वजनकव्यापारस्यैवार्जनपदार्थत्वात्। दासाय भक्ष्यं ददाति स्वकाय वेतनं ददातीत्यादावपि स्वत्वजनकत्वाय प्रतिपादयन् ददातिसंख्य एव पुण्यजनकन्तु न तादृशं दानमेवेत्यलम्। यत्तु स्वीकारजन्यस्य स्वत्वस्य जनकत्यागो दानं मनसा पात्रमुद्दिश्य धनत्यागस्तु न दानं किन्तूत्सर्गमात्रं प्रतिपदजन्यस्वत्वं प्रति हेतुभूतवैधत्यागस्यैव तथात्वात्, उपेक्षा तु स्वत्वध्वंसमात्रजनकत्यागो न तु तत्र स्वत्वजनकत्वज्ञानमस्तीति वैधिलेखकं तन्न युक्तं बाधकेन स्वत्वजनकत्यागस्यैव ददात्यर्थत्वात्। तिलानक्षे प्रतिगृह्णति तुरगमक्षे विक्रीणीते इत्यादौ द्रव्यान्तरग्रहपूर्वकं दानमेव प्रतिदानं मूल्यग्रहपूर्वकं दानमेव च विक्रय इति तत्रापि सूक्ष्ममेव सम्प्रदानत्वं चतुर्थ्या बोध्यते तिलादिकञ्च न मूल्यं पशुपुराणादेरेव शास्त्रे तथालोपदेशात्। अदृष्टार्थं दत्तस्यैव च स्वीकारः प्रतिगृह्ण इति परेण प्रीतिदत्तस्य विक्रीतस्य वा तिलतुरगादेः स्वीकारो न दोषावहः। मैत्राय रोचते मोदक इत्यत्र चतुर्थ्या धात्वर्थान्वितमात्रेयत्वं धातुना च भक्षणप्रकारकेच्छोपस्थाप्यते तिङा तु प्रकाशन इत्यादाविव विषयतत्वलक्षणं कर्तृत्वं तथाच मैत्रनिष्ठाया भक्षणप्रकारकेच्छाया विषयतावान्मोदक इत्याकारकस्तत्र बोधः। गुरवे गां धारयते इत्यत्र दृढा स्वीकारावस्थितिर्द्वितीयया तदन्वितं कर्तृत्वं चतुर्थ्या च तद्विशिष्टस्वीकारान्वितं सम्बन्धितयोपस्थाप्यते तेन गोकर्तृकाया गुरुनिष्ठस्वीकारावि-

क्रियेरतङ्कृत्यापारवानित्याकारकत्वात् बोधः धात्वर्थनिरूपिता आधारबोधनादिति काशिकाः। पाणिनीयास्तु "धारेरुत्तमर्णः" इति सूत्रानुसारेण यैवाय शतं धारयते इत्यादाविव सुरवे मां धारयते इत्यादावपि ऋणत्वरूपं धारयं दत्तत्वञ्च चतुर्थ्यर्थः तथाच गुरुदत्तां मां ऋणत्वेन गृह्णातीत्याकारकत्वात् वाक्यार्थः एवाक्षोध्यत्वेनाङ्गीकृत्य गृहीतत्व द्रव्यसङ्ख्यत्वाच्छः। सुताय राध्यति एतावेच्छते इत्यादौ दैवनिरूपणं धात्वर्थतावच्छिन्नविशिष्टे च दैवे तु प्रकृत्य सम्बन्धस्यान्वयत्वेन पुत्रस्य दैवं निरूपयतीत्येव तत्र बोधः। गुरवे मां प्रतिगृह्णाति आगृह्णातीत्यादौ देयत्वेनाभ्युपगमः ग्रहणेतरवृत्तित्व गोर्विशेष्यत्वेन तदेकदेशे च दाने गुरोरुद्देश्यत्वेनान्वयत्वेन गुरुद्देश्यकदानकर्मत्वेन मानस्यभ्युपगच्छतीत्येवं तत्र बोधः। क्रीत्वे प्रतिगृह्णातीत्यादौ ग्रहणानुकूलव्यापारत्वरूपं क्रीत्वादनं ग्रहणातेरर्थत्वेकदेशे च ग्रहे क्रीत्वादेरन्वयत्वेन क्रीतनिरूपितग्रहणानुकूलव्यापारवानित्याकारकत्वात् बोधः। चैवाय क्रुध्यति क्रुध्यतीत्यादौ धात्वर्थ उत्कटद्वेषत्वात् विषयित्वसम्बन्धं सम्प्रदानत्वं चतुर्थ्या बोध्यते तेन च चैवविषयकोत्कटद्वेषवानित्याकारकत्वात् बोधः। पुत्राय क्रोधो न रुध्यते इत्यादौ क्रोधत्व क्रोधपदस्यैवार्थे पुत्र इत्यस्यान्वया न तु धात्वर्थे। पटाय घटते इत्यादावपि धात्वर्थकृतो रुपा पटस्य विषयित्वं बोध्यते तत्रोद्देश्यत्वमेव चतुर्थ्यर्थः कथमन्यथा पटेच्छया तन्तुनिर्माणदशायां पटाय यतते इत्यादिकः प्रयोगः इत्यपि वदन्ति। मित्राय द्रुह्यतीत्यत्र हिताचरणं द्रोहकर्मत्व मित्रस्य हिताचरतीत्यर्थः। शिष्यायेर्ष्यतीत्यत्रानिष्टानुपेक्षणमेवासूयनं तथाच शिष्यानिष्टं नोपेक्षत इत्यर्थः। पुत्रायासूयतीत्यत्र कथञ्चिद् गुरुद्वेषत्वेन पुत्रस्य गुरुं द्वेष्टीत्याकारकत्वात् बोधः। मित्रं द्रुह्यति शिष्यमीर्ष्यति पुत्रमसूयतीत्यपि प्रयोगात् द्रुहादिकर्मत्व सम्प्रदानत्वं वैकल्पिकमित्युच्यते। क्रोधपूर्वकस्य द्रोहादेर्द्रुहादिधात्वाख्यत्वे तत्कर्मत्वः सम्प्रदानत्वं द्रोहादिमात्रस्य तथात्वे तु कर्मत्वमेवेति पुनः कोभारः। क्रोधसूयोस्तु क्रुधद्रुहोः कर्मत्वः कर्मतेव न तु सम्प्रदानता अतएव शिष्यस्याभिद्रोढेत्यादौ द्रहुयोगे कर्मणि षष्ठ्येव प्रमाणम्"।

सम्प्रदाय पु० सम्+प्र+दा-भावे घञ्। गुरुपरम्परागते सदुपदेशे अमरः। उपचारात् तदुपदेशयुते ज्ञाने च। ईश्वरस्य सर्वसम्प्रदायप्रद्योतकत्वमिति "निर्माणकाय-मधिष्ठाय सर्वसम्प्रदायप्रद्योतक इति पाञ्चरात्राः" कृष्णमन्त्रे। ईश्वरवादे च मणिकृताऽयमर्थः सर्वैव व्यवस्थापितं यथा "नित्यशरीरात् कर्तृ वेदघटादिशब्दत्वेन सम्प्रदायः उच्यते सर्गादावदृष्टोपनीतभूतभेदाभ्यां नित्यशरीरोत्पत्तावदृष्टवदात्मसंयोगाददृष्टसहकृतप्रयत्नवदीश्वरसंयोगाद्वा सकलवेदार्थगोचरज्ञानादृषिवाक्यादिकृतान्योन्यकलेवरकण्ठतालवादिक्रियाजन्यसंयोगाद्वर्णोत्पत्तिः। एवं कुलालादिशरीरावच्छेदेनादृष्टसहकृतप्रयत्नवदीश्वरसंयोगात्तद्बुद्ध्युच्छासहितचेष्टोत्पत्तौ सकलघटादिकुलव्यापारो घटोत्पत्तिः। एवं प्रयोज्यप्रयोजकत्वज्ञानाय व्यापाराभिमतशरीरावच्छेदेनापि अदृष्टसहकृतेश्वरज्ञानेच्छाप्रयत्नादेव व्यवहारः, ततश्चतुर्थीतो बाधो व्युत्पद्यते सोऽय भूतावेशन्यायः। यत्तु यथा क्रियादिना भौमिच्छाकोऽनुमाय पच्यते तथा सर्गान्तरोत्पन्नतत्त्वज्ञानवता भोगार्थं सर्गादावुत्पन्नेन मन्वादिना सर्वज्ञेन, ईश्वराभिप्रायस्यवेदः साक्षात्कृत्यानूद्यते ततोऽयमेव सम्प्रदायः स एव कायव्यूहं कृत्वा वागव्यवहारं करोतीति मतं तच्च प्रतिसर्गोत्पन्नसर्वज्ञकल्पनायां गौरवात् तेषामेव क्रियादिकर्तृत्वसम्बन्धेन ईश्वरानुगमाच्च। एतेन सर्गादौ सर्गान्तरसिद्धयोगिन एव क्षितिकर्तारः सन्तीति निरस्तं सर्गादावनन्त

र्जिताः। शिखी सुखी जटी चैव द्विजिह्वश्च क्रमेण च। एकदण्डी महेशानि! वीरश्चैवत्रसैव च। सप्त पाशुपताः प्रोक्ता दण्डधा वैष्णवा मताः। एतेषां लक्षणं देवि! शृणु यत्नेन साम्प्रति!। वेत्ति सर्वं संत्यज्य यश्चिन्तयति च वैष्णवः। वैखानसादिदक्षादीभूषितः स्मार्त्तवैष्णवः। वीराधावल्लभं देवि! शृणु यत्नेन साम्प्रति!। वैष्णवाचारनिरतो विष्णुतत्त्वैकपरागः। प्रसन्नचेताः शान्तात्मा विष्णुचिन्तापरायणः। वीराधावल्लभो देवि! गोकुलेशं शृणु प्रिये!। नानाभूषणसम्पन्नो नानासुगन्धिभूषितः। सर्वां कलां प्रीप्सयिता केशिकृष्णस्वरूपधृक्। शरीरमर्थं प्राणांश्च संनिवेदनोद्यतः। अन्तःशक्तिपरो देवि! वर्हिवैष्णवरूपधृक्। सत्सङ्गोचारनिरतो भक्तावेशनतत्परः। सम्प्रदायो गोकुलेशः सर्वसिद्धिकरो भुवि। इन्द्रावनाख्यं देवेशि! शृणु यत्नेन साम्प्रतम्। विमलाशः प्रसन्नात्मा विष्णुभक्तिपरायणः। कामिनीसङ्गरूपश्च वनक्रीडाविनोदधृक्। सौगन्धभूषितस्तत्तः श्रीध्यानैकपरायणः। विष्णुसारूप्यतत्त्वज्ञः प्रोक्तो इन्द्रावनी शिवे!। पाञ्चरात्रो महेशानि तथैव वीरवैष्णवः। पूर्वमेव महेशानि कीर्त्तितः परमेश्वरि!। रामभक्तिरिति विख्याता मः शिवः परिकीर्त्तितः। तदानन्दो शान्तचित्तो प्रसन्नात्मा विचारधृक्। सर्वत्र समरूपा च रामानन्दो प्रकीर्त्तिता। हविष्याशी महेशानि! यथावदाचारव्रतः। पापसंहरणासक्तो विष्णुभक्तो जितेन्द्रियः। यमादिनियमैर्युक्तो भक्ताचारपरायणः। स्त्रीप्रयोगफलत्यागी परकार्य्यपरायणः। हविष्याशी महेशानि! शिवभक्तिस्वरूपधृक्। निम्बार्कोक्तं समाश्रित्य शृणु यत्नेन साम्प्रतम्। नित्यार्चनक्रियासक्तः सतन्त्रैकपरायणः। बाह्यपूजादिनिरतो नान्यभक्तः प्रसन्नधीः। आर्य्यपक्षान्वितः सक्षः स्वच्छन्दाचारतत्परः। सतन्त्रः स्मार्त्तविद्वेषी निम्बार्को भगवान् हरिः। अथ भागवतं देवि! कथ्यते शृणु साम्प्रतम्। विष्णुभक्तैकनिपुणो विजितात्मा प्रसन्नधीः। स्मार्त्तसर्वान्वितो देवि! तदन्याचारतत्परः। आर्य्यपक्षान्वितो देवि! तथा स्वरूपवेशधृक्। वैष्णवेभ्यो तस्य सकाशात् पुनः स्नानपरायणः। केवलविष्णुतत्त्वज्ञः प्रोक्तो भागवतः शिवे" भक्तिसङ्गत॰

सम्प्रधारणा स्त्री सम्+प्र+धृ-णिच्-युच्। युक्तायुक्तत्वविवेचनार्थसमर्थने अमरः।

सम्प्रयोग पु॰ सम्+प्र+युज-घञ्। १इच्छादिसाधनेच्छया धनादिविनियोगे "विभाग सम्प्रयोगश्चेति स्मृतिः। २रतौ ३निधुवने ४सम्बन्धे ५स्पर्शने त्रि॰ अजयः इन्द्रियेण ७कार्मणे वशीकरणादौ मेदि॰ ८इन्द्रियविषयसम्बन्धे च

सम्प्रयोगिन् त्रि॰ सम्+प्र+युज-णिनुष्। १कामुके २कलाकेलिकारके २सम्बन्धभाजि धनादिविनियोजके। ३संप्रयोजके त्रि॰ मेदि॰। हिन्दम।

सम्प्रसन्न त्रि॰। १सम्यक्प्रसन्ने २सुप्रसन्ने च सम्प्रसादशब्दे

सम्प्रसाद पु॰सम्+प्र+सद-करणे-घञ्। १योगादिशास्त्रोक्ते चित्तस्य नैर्मल्यसम्पादके प्रयत्नभेदे। भावे घञ्। २सम्यक्प्रसन्नतायाम्। आधारे घञ्। ३सुप्रसन्नो "तद्यथैवंतत्सुप्रसन्नः समस्तः सम्प्रसन्नः स्वप्नं विजानातीति" श्रुतिः। सम्प्रसन्ने च सुप्रसन्ने हेमम्।

सम्प्रसाधन न॰ सम्+प्र+साध-णिच्-करणे ल्युट्। १वटकादौ मुखादौ। भावे ल्युट्। २मुखसंस्कारयोगाम्।

सम्प्रसारण न॰ सम्+प्र+सृ-णिच्-ल्युट्। १सम्यग्विस्तारणे व्याकरणोक्ते यणः स्थाने जायमाने २इक्संज्ञकवर्णे च। "इक् यण् सम्प्रसारणम्" पा॰।

सम्प्राप्ति स्त्री सम्+प्र+आप-क्तिन्। १सम्यक्प्राप्तौ २वैद्यकोक्ते रोगोत्पत्तिभेदे च तल्लक्षणं भावप्र॰ उक्तं यथा "अथ संप्राप्तेर्लक्षणमाह "यथा दुष्टेन दोषेण यथा चानुविसर्पता। सत्पत्तिर्व्याधवस्थानां सम्प्राप्तिर्जातिरागतिः"। यथा दुष्टेन दोषेण यथा कारणभेदेन दोषेण यथा चानुविसर्पता अनेकधा दोषाणां विसर्पता मूर्ध्वाधस्तिर्यगादिगतिभेदेन तथा च विसर्पता। व्याधयश्च या उत्पत्तिः सैषा सम्प्राप्तिः। शास्त्रव्यवहाराय सम्प्राप्तेः पर्य्यायानाह जातिरागतिरिति। संप्राप्तेरेवोपाधिकभेदानाह "सङ्ख्याविकल्पप्राधान्यबलकालविशेषतः। सा भिद्यते यथायत्रैव वक्ष्यन्तेऽष्टौ ज्वरा इति"। सङ्ख्यादिकालविशेषान्तेभ्यः सा संप्राप्तिर्भिद्यते भेदवती क्रियत इत्यर्थः। तत्र सङ्ख्यां विदधाति। यथा ज्वरोऽष्टधा अतीसारः षड्विध इत्यादि विकल्पं विदधाति। 'दोषाणां समवेतानां विकल्पोऽशांश कल्पना" समवेतानां समुदितानां दोषाणाम् अंशांशकल्पनाहीन मध्याधिकभेदैरंशकल्पना विकल्पः। प्राधान्यं विदधाति। "व्याप्तत्वपारतन्त्र्याभ्यां व्याधेः प्राधान्यमादिशेत्"। व्याधेः

स्वातन्त्र्येण प्राधान्यं परतन्त्र्येणाप्राधान्यञ्च वदेति त्यर्थः। यथा स्वतन्त्रस्य ज्वरस्य प्राधान्यं ज्वराधीनानां श्वासादीनामप्राधान्यम्। वक्ष्यं विशेषोति "हेत्वादिकार्यं स्वाश्रयवैलक्षण्यविशेषणम्"। यत्रापि व्याधेरित्यनुवर्त्तते हेत्वादीनां हेतुपूर्वरूपरूपाणाम्। कार्त्स्न्येन साकल्येन व्यवयैः एकदेशेन व्याधेर्बलाबलयोर्विशेषणम्। विशेषणं बोधः। कालं विशेषोति। "नक्तं दिनं भुञ्जानो व्याधिकालो यथासत्म्यं नक्तमत्याल्पं रात्रिवाचकम्। अनेनैतदुक्तं यत्किञ्चित्कालादिरसो यस्य दोषस्य प्रकोप उक्तोऽस्ति सोऽशस्तस्य दोषस्य व्याधेः काल इत्यर्थः। नक्तादेरंशेषु वातादिप्रकोप उक्तो वाग्भटेन "ते व्याधिनोऽपि हृन्नाभ्योरधोमध्योर्ध्वसंश्रयाः। वयोऽहोरात्रि भुक्तानामन्तमध्यादिगाः क्रमादिति" ते वातपित्तकफाः। स्वस्थस्य वातादिको यथा। "वर्षासु शिशिरे वायुः, पित्तं शरदि ग्रीष्मके। वसन्ते तु कफः कुप्येदेषा प्रकृतिरार्त्तवी। कंचाग्निव्याधीनां ज्ञानाय हेतुः, यथा मिथ्याहारविहारकुपितवातादयोऽग्नेरसदृष्णकोष्ठाग्निवह्निरसनरूपं ज्वरोत्पत्तिप्रकारं बोधयति। तथा व्याधीनां सङ्कीर्णादोषांशकल्पना प्राधान्यबलकालांश्च बोधयति।

स(म्रे)म्रेष पु० सम्+म्र+इष-घञ् वा ह्रस्वः। १निवोगे २विधौ हेमच०। विधिशब्दे ४६०७ पृ० दृश्यम्।

सम्रोक्षण न० सम्+म्र+उक्ष-ल्युट्। जलादिसेचनेन संस्कारभेदे श्रम्युक्षणशब्दे ३१२४० दृश्यम्। [क्षारे घटार्थे।

सम्रोक्षित त्रि० सम्+म्र+उक्ष-क्त। जलादिसेचनेन कृतसं-

सम्फाल पु० सम्+फल-घञ्वा० ष। मेधे हेमच०।

सम्फुल्ल त्रि० सम्+फुल्ल-अच्। विकसिते। सम्+फल-क्त पृषो० तस्य लः। सम्यक्तया इति सकारमध्योऽपि तत्रैव।

सम्ब सर्वणे भा०प०स०सेट्। सम्बति असम्बीत् बोऽदेशः साधुः

सम्ब सम्बन्धे चु०उभ०सकं०सेट्। सम्बयति ते असम्बयत त।

सम्ब न०सम्ब-अच्। १लटजेलस्य प्रतिलोमकर्षणे २जले जटा०

सम्बद्ध त्रि० सम्+बन्ध-क्त। १सम्बन्धिनि। भावे क्त। २सम्बन्धने न०।

सम्बन्ध पु० सम्+बन्ध-घञ्। १संयोगादौ २संसर्गे ३समवायादौ ४सम्यग्बन्धने ५स्त्रियां संसर्गभेदे च। स च सम्बन्धस्त्रिविधः "सम्बन्धस्त्रिविधः पुंसां विप्रेन्द्र! जगतीतले। विद्याजोयोनिजश्चैव प्रीतिजश्च प्रकीर्त्तितः। सैवन्तु प्रीतिजं प्रोक्तं च सम्बन्धः सुदुर्लभः" ब्रह्मवै० ब्रह्मख० १०अ०। संसर्गश्च नानाविधः "शेषे षष्ठी" पा० भाष्ये दर्शितस्तत्रावगन्तव्यः। न्यायमते संयोगसमवायादिरूपः। सम्यग्बन्धो यतः। हृद्विते त्रि०अजयः।

सम्बर न० सम्ब-अरन्। १जले अमरः अयं तालव्यादि अजयः। २बौद्धव्रतभेदे मेदि०। ३संयमे त्रि० ४क्षेतौ हेमच० ५टैलभेदे ६मृगभेदे ७मीनभेदे पुंस्त्री० स्त्रियां ङीष्। ८पर्वतभेदे च पु० शब्दर०। ९क्षेत्रभेदे १०लिङ्गमतप्रसिद्धपदार्थभेदे। स च आस्रवनिरोधरूपः गुप्तिसमित्यादिः अर्हत्शब्दे ३८४पृ० तद्धेतुः ३८५पृ० च तद्लक्षणं द्रष्टव्यम्। संवर इत्येव अन्तस्थमध्यः पाठः तत्रार्थे।

सम्बरारि पु० सम्बरस्य दैत्यविशेषस्य अरिः। कामदेवे अमरः

सम्बरी स्त्री सम्ब-अरन् ङीष्। १मूषिकपर्ण्याम् अमरः। २मतावर्य्याञ्च तालव्यादिरयमिति भरतः।

सम्बल न० सम्ब-अलच् सम्यक्बलं यतो वा। १जले शब्दर० २पाथेये पु० न० अमरः तालव्यादि तत्रार्थे भरतः।

स(श)म्बाकृत त्रि०स(श)म्बेन प्रतिलोमेन कृष्टं क्षेत्रं स(श)म्ब+कृष-क-क्त। १यत्तुलोमकर्षणेनान्तरं प्रतिलोमकृष्टे द्विःकृष्टे क्षेत्रादौ अमरः। भावे क्त। २प्रतिलोमकर्षणे न०

सम्बाध न० सम्यक् बाधा यत्र। १नरकवर्त्तभेदे शब्दमा०। सम्+बाध-भावे घञ्। २अन्योन्यसंघर्षे पु० ३सङ्कटे ४भये मेदि०।

सम्बाधन पु० सम्+बाध-ल्यु करणे ल्युट् वा। १द्वारपाले २न्यूनाधे ३मदनद्वारे भगे च मेदि०। भावे ल्युट्। ४सम्यक्पीडने। [त्रि०।

सम्बुद्ध पु० प्रा०स०। १बुद्धावतारे त्रिका०। २सम्यग्बोधान्विते

सम्बुद्धि स्त्री सम्+बुध-क्तिन् सम्यगुद्बुद्धिर्यत्र वा। १सम्यग्बोधे २सम्बोधनशब्दार्थे च। [अजयः ३सम्यक्ज्ञाने च

सम्बोध पु० सम्+बुध-घञ्। १क्षेपे २बोधने मेदि०। ३लाभे

सम्बोधन न०सम्+बुध-ल्युट्। १सम्यक्ज्ञाने। बुध-णिच्-युच्। तत्रार्थे स्त्री भरतः। ल्युट्। २सम्यग्ज्ञापने "स्थितस्याभिमुखीभावमात्रं सम्बोधनं विदुः। प्राप्ताभिमुख्यः पुरुषः क्रियासु विनियुज्यते" इति व्याकरणोक्ते अन्तरासन्नस्याभिमुखीकरणाय अभीष्टक्रियासु विनियोगाय ज्ञापनादिरूपे ३व्यापारभेदे न०

"सम्बोधनपदं यच्च तत् क्रियायां विशेषणम्। व्रजानि देवदत्तेत्यादौ निघातोऽत्र तथा सति" हरिः। समानवाक्ये एव निघातस्य (अनुदात्तस्य) विधानात्। व्रजानि देवदत्त इत्यादौ तस्य निघातः। "सम्बोधनान्तं क्रियायोगे कारकं प्रथमो वदेत्। धातुसम्बन्धाधिकारविहितसम-

मैत्रावरुणाग्निमस्यादब्राह्मणाच्छंसिपोतरसदर्शेन२४
षष्ठभागार्द्धनार्द्धनोऽर्द्धाधिकः, तृतीयेनोऽष्टावाक्षाग्नीध्रोन्नेतृप्रतिहर्तारो षष्ठभागस्य तृतीयांशार्द्धभाजः। पादिनोऽन्याः यावत्पोतृनेष्टृसुब्रह्मण्याख्या षष्ठभागस्य चतुर्थांशार्द्धाधिकाः इत्यर्थः। षष्ठानां चतुर्थांशयोर्विभागस्य समः एवं द्वितीयादीनामपि स एव विभागः। तथा च गोभतं दक्षिणेति पञ्चमाध्याये कात्यायनसूत्रम् "द्वादश द्वादश षष्ठेभ्यः षट्षट् द्वितीयेभ्यश्चतस्रश्चतस्रस्तृतीयेभ्यस्त्रिस्त्रिस्त इतरेभ्यः" इति। संक्षेपोक्तमेतद्भौधायनकारिकाभाष्येऽपि "पञ्चविंशतिधा कृत्वा वर्गौघा दक्षिणा क्रमात्। द्वादशैवाथ षट्कं च चतुष्कं त्रिक एव चेति" द्वादशाधिकगोशतरूपाया दक्षिणायाः प्रथमचतुर्थो भागाः कर्त्तव्याः। तत्रैको भागो होतृवर्गस्यापरो भागो ब्रह्मवर्गस्यापरोऽध्वर्युवर्गस्य परः उद्गातृवर्गस्य। पुनरेकैकस्य भागस्य पञ्चविंशतिर्भागाः कर्त्तव्याः। तेष्वाद्यानां होत्रादीनां द्वादश भागाः, द्वितीयानां षट्, तृतीयानां चत्वारश्चतुर्थानां त्रय इत्यर्थः पशुबन्धादौ तु विषमविभागानभिधानात् "समं स्यादृतुत्वादिति" न्यायेन समत्वेनैव विभाग इति मन्तव्यम्। स्वकीयकर्मकलापांशकर्तृषु कृतानुसारेण भागो देय इत्याह मनुः "ऋत्विगयदि हृतो यज्ञे स्वकर्म परिहापयेत्। तस्य कर्मानुरूपेण देयोऽंश सह कर्तृभिः" इति। सहकर्तृभिः समूहकारिभिरित्यर्थः। यद्वा कर्तृभिः सह देय दक्षिणाकाले देयो यजमाननेनेत्यर्थः। अथ वा कर्म परित्यक्तं सह कर्तृभिरित्यर्थः। यदातु ऋत्विक् कर्मैकदेशं दक्षिणादानानन्तरं त्यजति तदाऽवशिष्टं तद्गणवर्त्तिनां मध्ये सन्निहितेनान्येन कारयेदित्याह स एव "दक्षिणासु च दत्तासु स्वकर्म परिहापयेत्। कृतमेव लभेतांशमन्येनैव च कारयेत्" इति। कर्ममध्ये ऋत्विङ्मरणे कर्त्तव्यमाह नारदः "ऋत्विजां व्यसनेऽप्येवमन्येन कर्म निस्तरेत्। लभेत दक्षिणादानं स तस्मात् सम्प्रकल्पितम्" इति। अन्येन सहगणमध्यवर्त्तिनां मध्ये प्रत्यासन्नेन, येन केनचिदन्येन कार्यमाणे लभ्यांशि समाख्याबाधापत्तेरिति ध्येयम्। यत्तु शङ्खलिखितयोर्वचनम् "अथ चेदनुप्राप्ते सवने ऋत्विक् म्रियते तस्य मनोर्वोऽग्नि म्रियो वा तत्कार्यमनुपरयेत्"। अथ चेदवान्तरसोऽन्यमृत्विजं ब्रूयात्" इति। यच्च ब्रह्मस्तिवचनम्। "एवं क्रियाग्रहणानां यदा कश्चिद्दियते। तदृत्विजा क्रिया कार्या सर्वैर्वा सहकारिभिः" इति। तदेकान्तगणरहितर्त्विक्कर्तृकदर्शपौर्णमासादियागविषयमित्यभिहितं स्मृतिचन्द्रिकायाम्। लौगाक्षिस्तु ऋत्विजि यजमानेन ऋत्विगन्तरकरणे कस्य दक्षिणेति जिज्ञासायामाह भट्टः "अथ ऋत्विजि हते पश्चादन्यं हत्वातपूर्वोक्तस्यैव दक्षिणा पश्चादाहृतः किञ्चिद्भजते" इति। यदा त्वकारणऋत्विग् याज्यं त्यजति याज्यो वा ऋत्विजं, तदा तयोर्दण्डमाह मनुः "ऋत्विजं यस्त्यजेद् याज्यो याज्यऋत्विक् त्यजेद् यदि। शतं कर्षमयो दण्ड्यः शतमेव शतं समम्" इति। नारदोऽपि "ऋत्विक् च त्रिविधो दृष्टः पूर्वजुष्टः स्वयंकृतः। यदृच्छया च यः कृष्यादार्त्विज्यं प्रीतिपूर्वकम्। ऋत्विग्याज्यमदुष्टं यस्त्यजेदनपकारिणम्। अदुष्टस्त्विजं याज्यो विनेयो नानुभावयेति"। ये ऋषिसाधने समानास्तैः सह ऋषिकार्य्येत्याह हारीतः "याज्यकर्मकवीजादौः चेलोपकरणेन च। ये समानास्तु तैः सार्द्धं ऋषिः कार्यो विजानता" इति। याज्याः याजनादिसाध्याः वल्लीवदोः। कर्षकाः क्षेत्रार्थं क्षेत्रिताः पुरुषाः आदिशब्देन ऋषिसाधनानामन्येषां ग्रहणम्। समूहकारिणां क्षेत्रकार्यां कर्त्तव्यमाह हारीतः "पर्वते नगराभ्यासे तथा राजपथस्य च। ऊषरं मूषकव्याप्तं क्षेत्रं वर्जनेन वर्जयेत्" इति। पर्वते पर्वतसमीपे कल्पतरुक्षता तु विवीत इति पठित्वा विवीतशब्देन वप्रसादार्थं रक्षितः प्रदेश इति व्याख्यातम्। नगराभ्यासे नगरसमीपे। राजपथस्य समीप इति शेषः। एतदुक्तं भवति पर्वतादासन्नमनासन्नमपि ऊषरं मूषकव्याप्तञ्च क्षेत्रं वर्जनेदिति। बाह्योऽपि वर्जनीयानाह स एव "क्षयातिदृढं क्षुद्रक्षुरोगिणं प्रपलायिनम्। काणं खञ्जञ्च नादद्याद्वाह्यं प्राज्ञः क्षीवकः" इति। काणः एकाक्षः खञ्जः भग्नचरणः। क्वचित्तैरेवैः क्षानिमाह स एव "बाह्यबीजात्ययाद्यस्य क्षेत्रक्षानिः प्रजायते। तेनैव सा प्रदातव्या सर्वेषां ऋषिजीविनामिति"। समूहकारिणामिति शेषः। बाह्यबीजयज्ञं ऋषिसाधनानामुपलक्षणार्थम्। समूहकारिणां शिल्पिनां स्वरूपं दर्शयंस्तेषां लाभविभागेऽपरिकल्पनाप्रकारमाह स एव "स्थिरशस्त्रास्त्रवाणां काण्डाग्राश्वमेषाम्। संस्कर्त्ता तत्कलाभिज्ञः शिल्पी प्रोक्तो मनीषिभिः। हेमकारादयो

यत्र शिल्पं सम्भूय कुर्वते । कर्मातुरूपं निर्वेशं लभेरंस्ते यथांशतः" इति । कुथं हेमरूप्यखचितरिङ्गलपट्टसीसाटिकम् । हेमरूप्ये इति प्रस्तुत्य ताभ्यां यदन्यत्कुथमित्यमरसिंहेनोक्तत्वात् । निर्वेशो भृतिः । कात्या॰ यनोऽपि "शिल्पकाभिश्चकृशचा आचार्यैरिति शिल्पिनः । एकद्विचतुर्भागान् हरेयुस्ते यथोत्तरम्" इति । ह॰ स्मृतिनिर्मातॄणां मध्ये सङ्घस्य भागदर्शनाच्च हरीतः "कुर्य्यं देवस्वकं वापि वाटिकोपस्करादि च । सम्भूय कुर्वतां तेषां प्रसङ्घो द्रव्यमर्हति" इति । नर्त्तकेष्वपि सङ्घस्यांशग्रहणभागित्वमतिदिशन् विशेषान्तरमाह स एव "नर्त्तकानामेष एव धर्मः सङ्क्षिप्तदर्शितः । कालतो लभते ऽध्यर्द्धं गायनास्तु समांशिनः" इति । अध्यर्द्धम् अर्द्धाधिकमेकमंशम् । सम्भूयकारिणाञ्चौराणां लाभभागेऽंशपरिकल्पनाप्रकारमाह कात्यायनः "परराष्ट्राद्धनं यत्तु चौरैः स्याच्चतुरा हृतम् । राज्ञे दशांशानुद्धृत्य विभजेरन् यथाविधि । चौराणां सङ्घभूतस्तु चतुरोऽंशांस्ततो हरेत् । शूरोऽंशांस्त्रीन् समर्थौ द्वौ शेषास्त्वेकैकमेव च" इति । एतद्धनं दुर्बलवैरिदेशादाहृतविषयम् प्रबलवैरिदेशादाहृते त्वाह हरीतः "स्याच्चतुरा तु यच्चौरैः परदेशात् समाहृतम् । राज्ञे दत्त्वा तु षड्भागान् भजेयुस्ते यथांशतः । चतुरोऽंशान् भजेन्मुख्यः शूरस्त्र्यंशमवाप्नुयात् । समर्थस्तु हरेद् द्व्यंशं शेषास्त्वन्ये समांशिनः" इति । समर्थः शक्तः । एतेषां हानिरर्थवैषम्येवेत्याह कात्यायनः "तेषां चेत् प्रहृतानाञ्च पञ्चत्वं समवाप्नुयात् । तन्मोचयार्थं यद्दत्तं दद्युस्ते यथांशतः" इति । इयमंशपरिकल्पना क्षत्रियशिल्पसम्भूयकारिणां समयाभावविषया ज्ञेया तु समये तदनुसारेणैव । अतएव तेनैवोक्तम् "वणिजां कर्मकाराणाञ्च चौराणां शिल्पिनामपि । अनिबध्यांशकर्तॄणां सर्वेषामेष निर्णयः" इति । अनिबध्य लाभहान्योः समवेन प्रतिपुरुषमंशग्रहणकर्त्तृत्वेत्यर्थः" ।

सम्भृति स्त्री सम्+भृ-क्तिन् । सम्यक् पोषणे ।

सम्भेद पु॰ संभिद्यते संज्ञिभ्यतेऽत्र सम्+भिद्-आधारे घञ् । १नद्योः सङ्गमस्थाने अमरः । भावे घञ् । २सङ्गमे ३सम्यग्भेदने ४स्फुटने ५श्लिष्टने मेदि॰ ६ऐकरूप्ये च "सम्भेदे नान्यतरवैधर्म्यम्" इति मीमांसायां न्यायः ।

सम्भोग पु॰ सम्+भुज-घञ् । १सम्यग्भोगे २सुरते ३शिल्पशासनभेदे मेदि॰ ४हर्षे शब्दच॰ ५केशिनागरे जटा॰ "दर्शनस्पर्शनादीनि विषेवेते विलासिनौ । यत्रानुरक्तावन्योन्यं सम्भोगः स उदाहृतः" उज्ज्वलनीले ६शृङ्गारावस्थाभेदे सा॰द॰ ।

सम्भ्रम पु॰ सम्+भ्रम-घञ् न ह्रस्वः । १भयादिजनिते वेगे अमरः । २त्वरायां ३तद्धेतुके ४भये ५आदरे मेदि॰ । ७अतिशयभ्रमे ७लक्षे जटाधरः ।

सम्मति स्त्री सम्+मन-क्तिन् । १अनुमतौ २अभिलाषे च मेदि॰ । ३ज्ञानज्ञाने जटाधरः । [२हर्षयुक्ते त्रि॰ ।

सम्मद पु॰सम्+मद-घञर्थे क । १हर्षे अमरः । कर्त्तरि अच् ।

सम्मर्द पु॰ संमृद्यतेऽत्र सम्+मृद्-आधारे घञ् । १युद्धे । भावे घञ् । २अन्योन्यसंघर्षे च ।

सम्मातुर पु॰ समीच्याः सत्या मातुरपत्यम् अण् उत् रपरः वा॰ न ह्रस्वः । सतीतनये भाद्रमातुरे हेमच॰ ।

सम्मान पु॰ सम्+मन-घञ् । आदरे । [ङते च ।

सम्मानित स्त्री सम्+मन्-णिच्-क्त । १कृतगौरवे २समाहृते च ।

सम्मार्जन स्त्री सम्+मृज-ल्यु । संशोधने रत्नमा॰ ।

सम्मार्जनी स्त्री संमृज्यतेऽनया सम्+मृज्-करणे ल्युट् ङीप् । धूल्याद्यपसारणार्थे पदार्थे (झाँटा) अमरः । ष्यञ् । सम्मार्जक तत्रार्थे पु॰ शब्दर॰ ।

सम्मित त्रि॰सम्+मा-क्त । १सदृशे २तुल्यपरिमाणे च जटा॰

सम्मुख त्रि॰सङ्कृतं सुखं येन प्रा॰ब॰। अभिमुखागते त्रिका॰।

सम्मुखीन त्रि॰ सम्मुखं पतति च । अभिमुखे पतिनि ।

सम्मूर्च्छज न॰सम्मूर्च्छति जायते जन-ड । तृणादौ हेमच॰

सम्मूर्च्छन न॰ सम्+मूर्च्छ-ल्युट् । १सम्यग्विस्तारे अमरः । २उन्नतौ ३मोक्षे च मेदि॰ । ४सम्यक्मूर्च्छने स्वरभेदे ।

सम्मूर्जनोद्भव पु॰ सम्मूर्जनादुद्भवति उद्+भू-अच् ६त॰ । मत्कुणे हेमच॰ ।

सम्मृष्ट त्रि॰ सम्+मृज-क्त । १कृतमार्जने अमरः । मञ्जिकाद्यपसारणेन २शोधितेऽन्नादौ च भरतः ।

सम्मोद पु॰ सम्+मुद-घञ् । १हर्षे २प्रीतौ च शब्दच॰ ।

सम्यच् अव्य॰ सम्+अञ्च-क्विप् सम्प्रसारणेन । १शोभने २सङ्कृते ३समीचीने च मेदि॰ । ४सत्यवाक्ये न॰ भरतः ५तदिति त्रि॰ मत्वे समीच इत्यादि । स्त्रियां ङीप् समीची ।

सम्राज् पु॰ सम्यक् राजते राज-क्विप् नानुस्वारः । कृतराजसूयवत्ते सर्वभूमीश्वरे नृपतौ अमरः ।

सय्यँम पु॰ सम्+यम-करणे घञ् समो वा परसवर्णोऽनुनासिको यँः पक्षे संयमः । पात॰स्व॰ परिभाषिते धारणाध्यानसमाधिलक्षणे "त्रयमेकत्र संयमः" पात॰सू॰ "तदेतत्त्र

धारणाध्यानसमाधित्रयस्यैकत्र संयमः एकविषयाणि त्रीणि साधनानि संयम इत्युच्यते तदस्य त्रयस्य तान्त्रिकी परिभाषा संयमः इति" भा०।

सर न० सरति सृ-अच्। १सरोवरे शब्दच०। २जले जटा०। ३त्वचे ४वाणे च हेमच०। ५दध्यधे दधिमस्तौ रत्नमा०। ६तप्ताते नवनीते च। भावे अच्। ७भेदने ८गमने च। कर्त्तरि अच्। ९चारके १०भेदके राजनि०।

सरक पु०न० सृ-वुन्। १मद्यपानपात्रे भरतः २मद्यपरिवेषणे १रक्तोत्पलवृक्षे ४तत्पात्रे ५विरलपत्रिकण्टकी च मेदि० ६गतिशीले त्रि० शब्दर०। [कायाम् अमरः।

सरघा स्त्री सरं मद्यभेदं हन्ति हन-ड नि०। मधुमक्षिकायाम्।

सरङ्ग पु स्त्री० सृ-अङ्गच्। १चतुष्पाज्जन्तौ २खगे च संक्षिप्तसा० स्त्रियां ङीष्।

सरज न० सरात् जायते जन-ड। नवनीते हारा०।

सरजस् स्त्री सह रजसा सहस्य सः। १ऋतुमत्यां स्त्रियाम् २रजोयुक्ते त्रि०। अव्ययी० अच् समा०। सरजस्क ३रजःसाहित्ये अव्य० अमरः।

सरट पुंस्त्री० सृ-अटन्। ऊर्णवासे (कांचवास) अमरः। स्त्रियां ङीष्। देहे तत्प्ररोहणादिफलं यथा "वह्नेः प्रपाते च फलं सरटस्य प्ररोहणे। शीर्षे राजर्षियोऽग्निभीते चेन्द्रत्वमेव च। कर्णयोर्भूयादाग्निनेत्रयोर्बन्धुदर्शनम्। नासिकायाञ्च सौमन्यं वक्त्रे मिष्टान्नभोजनम्। कण्ठे चैव स्त्रियोऽग्निर्भुजयोर्विभवो भवेत्। धनलाभो बाहुमूले करयोर्धनसङ्गवः। स्तनमूले च सौभाग्यं हृदि सौख्यविवर्द्धनम्। पृष्ठे नित्यं सभीलाभः पार्श्वयोर्बन्धुदर्शनम्। कटिदेशे वस्त्रलाभो गुह्ये बहुसमागमः। जङ्घे चार्वङ्गयो नित्यं गुदे रोगभयं भवेत्। अण्डौ च वाहनावाप्तिरूरुजङ्घे ऽर्थसञ्चयः। वामदक्षिणयोः पादोर्भ्रमणं नियतं भवेत्। वह्नेः प्ररोहणे चैव पतने सरटस्य च। अल्पायासञ्च फलं चैव तद्देहं प्रजायते। वह्नेः प्ररोहणं रात्रौ सरटस्य प्रपातनम्। निधनार्थाय भवति व्याधिपीड़ाविपर्ययौ। पतनानन्तरं चैवारोहणं यदि जायते। पतने फलसदृशं रोहणेऽन्यत् फलं भवेत्। आरोहणञ्चोर्द्ध-वक्त्रे ऊर्ध्वरन्ध्रे च पातनम्। भवेदिष्टफलं तस्य तत्फलं जायते ध्रुवम्। मृत्युमाप्नोति वा सद्यः सचेलं जलमाविशेत्। पक्षगण्यप्रमाणस्य कृष्णादर्शनोक्तनम्" दिवाकरः

सरट् पु० सृ-अटि। १वायौ २मेघे उणादिकोषः।

२सरणावां सिद्धान्तकौमुदी। ३ऊर्णवासे अमरटीका।

सरटि पु० सृ-अटिन्। १वायौ २मेघे च उणादि०।

सरटु पु० सृ-अटु। ऊर्णवासे उणादिकोषः।

सरण न० सृ-ल्युट्। १गमने २लोहमले हेमच०। (गन्धभादाल) ३लतायां स्त्री अमरः टाप्। ४त्रिवृतायां शब्दमा०।

सरणि(णी) स्त्री सृ-अनि वा ङीप्। १पथि २यज्ञकौ मेदि० ३प्रसारण्यां भरतः। ४त्रिवृतायां स्त्री शब्दमा०।

सरण्ड पु० सृ-अण्डच्। १खगे २कासुके शब्दच० ३धूर्त्ते ४सरटे ५भूषणभेदे मेदि० सर्वत्र जातौ स्त्रियां ङीष्।

सरण्यु सृ-अन्यु। १वायौ २मेघे ३जले शब्दर० ४यज्ञे ५यज्ञौ उणादिकोषः। [न० शब्दमाला।

सरत् त्रि० सृ-शतृ। १गन्तरि स्त्रियां ङीप् सरन्ती। २खगे

सरत्रि पु० सह त्रिणा। त्रिणशब्दार्थे अमरटीका।

सरपत्रिका स्त्री सरे जले पत्रमस्त्यस्याः ठन्। १पद्मपत्रे २पद्मे च शब्दच०।

सरमा स्त्री सह रमते रम-अच्। १कुक्कुरयोषिति २देवशुन्यां ३राक्षसीभेदे विभीषणपत्न्यां च मेदि०। ४अश्वघोषकन्याभेदे "गोलाङ्गूलशकोरूच श्वेन्यापत्यं तथैव च। अपत्यं सरमायाश्च मघो वै अमरादयः" वह्निपु०।

सरयु पु०सृ-अयु। १वायौ त्रिका०। जङ्। २अयोध्यास्थितवाहिनदीभेदे स्त्री। तदुत्पत्तिः वाल्मिकिपु० २३अ० यथा "एवं विवाह्य विधिवत् सौवर्षं मानसाचले। तत्र यत् पतितं तोयं मानसाचलकन्दरे। तत्तोयं सप्तधा भूत्वा मानसाचलकन्दरात्। हेमाद्रेः कन्दरे यस्मात् सरक्षाच्च पृथक् पृथक्" इत्युपक्रमे "तेनाभूत् सरयूर्नाम्ना नदी पुण्यतमा शुभा"। तत्रां भवः अण् त्रि०। सारव तत्र भवे त्रि० अमरः।

सरल पु० सृ-अलच्। १पीतशाले अमरः "सरलो मधुकस्तिक्त कटुपाकरसो लघुः। स्निग्धोष्णः कर्णकण्ठाक्षिरोगरुग्दोषरः स्मृतः। कफानिलक्षेदयूकक्रामकाक्षिव्रणापहः" भावप्र० तद्गुणोक्तिः। २धूपकाष्ठभेदे शब्दर० ३शरे ४ऋजौ च त्रि० मेदि० ५त्रिवृतायां स्त्री अमरः

सरलद्रव पु० द्रुत०। सरलद्रवनिर्य्यासे (टारपीन) अमरः।

सरलाङ्ग पु० सरलो वृक्षोऽङ्गं साधनं यस्य। श्रीवेष्टे गन्धद्रव्ये राजनि०।

सरस् न० सृ-असुन्। १जले शब्दः। २सरोवरे अमरः। गौरा० ङीष्। ३सरसोत्पन्नत्वे स्त्री अमरः "सरसी परिणीतिं यथा" नैषधम्।

सरस न॰ सृ॰ रसेन जलेन आस्वादेन च सहितं सः । १सरोवरे शब्दच॰ २रसान्विते १स्वादूं च त्रि॰ । "सरसां सरसां परिसृज्य ततृप्तं भृङ्गिः । ३श्वेतसिंदुवारां स्त्री रायमु॰ ।

सरसम्मत न॰ सरसि इव नियासं सम्मतनोति सम्+म+तन-ड । त्रिकण्टकवृक्षे (तेकाटासिजु) शब्दच॰ ।

सरसिज न॰ सरसि जायते जन-ड अलुक् समा॰ । १पद्मे राजनि॰ "सरसिजमनुविद्धं शैवलेनापि रम्यं मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति । इयमधिकमनोज्ञा वल्कलेनापि तन्वी किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥" २सारसपक्षिणि पुंस्त्री॰ स्त्रियां ङीष् । लक्षि सरोजमध्यत्व । [स्त्रियां ङीष् ।

सरसीक पुंस्त्री॰ सरसां कायति कै-क । सारसपक्षिणि शब्दर॰

सरसीरुह न॰ सरस्यां सरोवरे रोहति रुह-क । १पद्मे २सारसपक्षिणि च पुंस्त्री॰ अमरः स्त्रियां ङीष् ।

सरस्वत् पु॰ सरांसि जलानि सन्त्यस्य मतुप् मस्य वः । १सरोवरे २सागरे ३नदे ४रश्मिके त्रि॰ मेदि॰ ५नद्यां ६वाक्यां ७गवि ८स्त्रीरत्ने स्त्री मेदि॰ ङीप् । सा च ९ज्योतिष्मत्यां १०ब्राह्म्यां शक्तौ राजनि॰ । ११देवीभेदे मेदि॰ १२योगलतायां शब्दच॰ । १३क्षुद्रशक्तिभेदे त्रिका॰ १४दुर्गायाम् "सरः सरणशीलत्वात् मेधाख्ये सङ्ग कीर्त्तिताः । ख्याति प्रापयदाने वा तेन देवी सरस्वती" देवीपु॰ ४५अ॰ तद्भावनिरुक्तिः । पृषो॰ १५वाग-धिष्ठातृदेव्याम् "आविर्बभूव तत्पश्चात् सरस्वत्याः परात्मनः । एषा देवी शुक्लवर्णा वीणापुस्तकधारिणी । वागधिष्ठातृदेवी सा कवीनामिष्टदेवता । शुद्धसत्त्वस्वरूपा च शान्तरूपा सरस्वती" ब्रह्मवै॰ ब्र॰ख॰ १अ॰ । तत्रैव गणे॰ ७॰अ॰ "वागधिष्ठातृदेवी या देवी शास्त्रज्ञानप्रदा सदा । कण्ठस्थोद्भवा या च सा च देवी सरस्वती" । "बन्धुजीवञ्च द्रोणञ्च सरस्यै न दापयेत् मत्सरुक॰ तत्पूजादिकं तत्रैव॰ द्रष्टव्यम् । १६सरस्याकाशे उपास्यदेवतायां गायत्रीभेदे २५८१ पृ॰ दृश्यम् । सरः ब्रह्मसरः उत्पत्तिस्थानत्वेनास्यास्तीति मतुप् मस्य वः ङीप् । १७नदीभेदे सरस्वतीनद्या तदुत्पत्तिकथा च "ब्रह्मणोऽपि मुखाभागे सरसो ब्रह्मणः पुरा । जातानि यानि सरितस्तेषु सप्तयः संस्थितव्रताः" भा॰ ग॰ ५अ॰ । तस्याश्च सप्तनामत्वं यथा "राजन् ! सप्त सरस्वत्यो याभिर्व्याप्तमिदं जगत् । आकाशगा वसुवहिनि तत्र तत्र सरस्वती । सुप्रभा१ काञ्चनाक्षी२ च विशाला३ च मनोरमा४ । सरस्वती५ चोघवती६ सुरेणु७र्विमलोदका" भा॰ग॰ ३६अ॰ । तासां नामप्रकारश्च तत्राध्याये दृश्यम् तस्या माहात्म्यं तत्रैव सारस्वतोपाख्याने दृश्यम् । [पक्षोभः ।

सरा स्त्री सृ-क्त्च । १प्रसारणयां राजनि॰ २निर्झरे हिङ्॰

सराव पु॰ सरं जलमवति अव-अण् । १जलाधारे मृण्मये पात्रभेदे(शरा)हिरूपकोषः । सृ॰ रावेण । २शब्दे त्रि॰

सरि पुंस्त्री॰ सृ-इन् स्त्रीत्वपक्षे वा ङीप् । निर्झरे हेमच॰ ।

सरिका स्त्री सरोऽस्यास्याः ठन् सृ-नुन् वा । क्षिङ्गपक्षिकायाम् शब्दर॰ ।

सरित् स्त्री सृ-इति । १नद्याम् अमरः २खड्गे शब्दमा॰ । "क्रियाकारकरूपत्वात् सरणाच्च सरिद्गता" देवीपु॰ ४५अ॰ निरुक्तायां २दुर्गायाम् ।

सरित्पति पु॰ ६त॰ । समुद्रे अमरः । सरिदाद्योऽत्यत्व

सरित्वत् पु॰सरित् स्वामित्वेनास्त्यस्य मतुप् मस्य वः तान्तत्वेन पदत्वाभावात् न तस्य दः । समुद्रे ।

सरित्सुत पु॰ ६त॰ । गङ्गायाञ्चे भीष्मे ।

सरिताम्पति पु॰ ६त॰ अलुक् समा॰ । १समुद्रे शब्दर॰ । सरितांनाथादयोऽत्यत्व ।

सरिद्वरा स्त्री सरितश्च वरा श्रेष्ठा । गङ्गायाम् हेमच॰ ।

सरिल न॰ सृ-इलच् । जले अमरटीकायां भरतः ।

सरिसृप पु॰ सृ-इसृपि । १यामौ २गतौ च उणादि॰ ।

सरिसृप पु॰ सृप॰+पृषो॰ । सर्पे त्रिका॰ ।

सरीसृप पुंस्त्री॰ सक्थं सर्पति सृप-क्विप् लुक्, अच् । १सर्पे अमर । २वृश्चिकादौ । ज्योतिषोक्तेषु १मीनवृश्चिककर्कटराशिषु "वृश्चिकराशिर्वृश्चिभिः सरीसृपत्वेन निर्दिष्टः" ज्यो॰त॰ । "सृगपतिवधे तिलन्यस्ते विहाय सरीसृपान्" ज्यो॰त॰ वल्लचनात् भौमकर्कटयोर्ग्रहणम्

सरु पु॰ सृ-उन् । खड्गादिसृष्टौ सारसुन्दरी ।

सरूप त्रि॰समानं रूपमस्य समानस्य सः । तुल्यरूपे सदृशे अटा॰

सरोज न॰ सरसि जले जायते जन-ड । १पद्मे हेमच॰ । २सारसपक्षिणि पुंस्त्री॰स्त्रियां ङीष् । ३सरोजातमात्रे त्रि॰।

सरोजन्मन् न॰ सरसि जले जन्म यस्य । १पद्मे हेमच॰ । २सारसपक्षिणि ३तद्वागजातमात्रे त्रि॰ ।

सरोजिन् पु॰ सरोज विष्णुनाभिपद्मोत्पत्तिस्थानत्वेनास्त्यस्य इनि । चतुर्मुखे ब्रह्मणि त्रिका॰ ।

सरोजिनी स्त्री सरोजानां समूहः सङ्घिजटादेत्वो वा इनि ङीप् । १पद्मसमूहे रत्नमा॰ २तद्युक्तदेशरूपायां पद्मवत्यां ३पद्माधारद्रोणिकायाञ्च भेदः । [स्त्रियां ङीष् ।

सरोत्सव पुंस्त्री॰सरसि जले उत्सवोऽस्य । सारसपक्षिणि शब्दर॰

सरोरुह(ह) सरसि रोहति रुह-किप् क वा । १पद्मे

हेमच०। कान्तलताद्यर्थे रत्नमा० २सारसङ्गे च पुंस्त्री०।

सरोरुहासन पु० सरोरुहं पद्ममासनं यस्य। चतुर्मुखे ब्रह्मणि हेमच० तस्य विष्णुनाभिपद्मस्थितत्वात्तथात्वम्। २पद्मोपविष्टमात्रे त्रि०।

सरोवर पु० सरोभिर्जलैर्वियतेऽसौ ड-खप्। तडागे शब्दर०। तडागशब्दे ३२४०पृ० दृश्यम्। [संक्षिप्तसा०।

सर्क पु० सृ-क तस्य नेत्वम्। १यागे २मनसि ३प्रजापतौ च

सर्ग पु० सृज-घञ्। १स्वभावे २सृष्टौ ३निर्माणे काव्यादेः ४परिच्छेदे "सर्गोऽयमादिर्गतः" इति नैषधम्। ५निश्चये अमरः "यदि सर्ग एष ते" इति रघुः। ६भोगे ७उत्साहे मेदि० ८व्यवसाये हेमच०।

सृष्टिरूपः सर्गश्च नवविधः भाग० ३।१०।अ० उक्तो यथा "सर्गो नवविधस्तस्य प्राकृतो वैकृतस्तु यः। कालद्रव्यगुणैरस्य त्रिविधः प्रतिसंक्रमः। आद्यस्तु महतः सर्गो गुणवैषम्यमात्मनः। द्वितीयस्त्वहमो यत्र द्रव्यज्ञानक्रियोदयः। भूतसर्गस्तृतीयस्तु तन्मात्रो द्रव्यशक्तिमान्। चतुर्थ ऐन्द्रियः सर्गो वस्तु ज्ञानक्रियात्मकः। वैकारिको देवसर्गः पञ्चमो यन्मयं मनः। षष्ठस्तु तमसः सर्गो यस्त्वबुद्धिकृतः प्रभोः। सप्तमे प्राकृताः सर्गा वैकृतानपि मे शृणु। रजोभाजो भगवतो लीलेयं हरिमेधसः। सप्तमो मुख्यसर्गस्तु षड्विधस्तस्य शाखु यः। वनस्पत्योषधिलतात्वक्सारावीरुधो द्रुमाः। एते बुद्धिमतः सर्गाः सर्गोविंशेषिणः। तिरश्चामष्टमः सर्गः सोऽष्टविंशद्विधो मतः। अविदो भूरितमसो ब्राध्नस्य हृद्यवेदिनः। गौरजो महिषः कृष्णः शूकरो गवयो रुरुः। दिशफाः पशवश्चेमे अविरुष्ट्र नवम! । खरोऽश्वोऽन्यतरो गौरः शरभश्चमरी तथा। एते चैकशफाः क्षत्तः! शृणु पञ्चनखान् पशून्। श्वा शृगालो वृको व्याघ्रो मार्जारः शशशल्लकौ। सिंहः कपिर्गजः कूर्मो गोधा च मकरादयः। कङ्कगृध्रबकश्येनभास भल्लूकबर्हिणः। हंससारसचक्राह्वकाकोलूकादयः खगाः। अर्वाक्स्रोतास्तु नवमः क्षत्तरेकविधो नृणाम्। रजोऽधिकाः कर्मपरा दुःखे च सुखमानिनः। वैकृतास्त्वेव एवैते देवसर्गश्च सत्तम!। वैकारिकस्तु यः प्रोक्त औमारस्त्वयात्मकः। देवसर्गश्चाष्टविधो विबुधाः पितरोऽसुराः। गन्धर्वाप्सरसः सिद्धा यक्षरक्षांसि चारणाः। भूतप्रेतपिशाचाश्च विद्याधाः किन्नरादयः। दशैते विदुराख्याता सर्गास्ते विश्वसृक्कृताः"।

सर्गबन्ध पु० बन्ध-भावे घञ् सर्गैर्बन्धः ३त० "ह्रदभिन्नभावो द्रव्यवत् प्रकाशते" इति न्यायात् सर्गबन्धस्य कर्मपरता न कर्मणि घञ् तथात्वे महाकाव्यविशेषतया स्त्रीत्वताप्तेः। महाकाव्ये तल्लक्षणं महाकाव्यशब्देऽस्तुक्तत्वात् यत्र दर्श्यते सा०द० "सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः। सर्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः। एकवंशभवा भूपाः कुलजा बहवोऽपि वा। शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते। अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः। इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम्। चत्वारस्तस्य वर्गाः स्युस्तेष्वेकस्य फलं भवेत्। आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा। क्वचिन्निन्दा खलादीनां सतां च गुणकीर्त्तनम्। एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः। नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह। नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते। सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत्। सन्ध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः। प्रातर्मध्याह्नमृगयाशैलर्तुवनसागराः। सम्भोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः। रणप्रयाणोपयमनमन्त्रपुत्रोदयादयः। वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह। कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा। नामास्य सर्गोपादेयकथया सर्गनाम तु"।

सर्ज भर्जने भ्वा०पर० सक० सेट्। सर्जति असर्जीत् सृष्टिवर्जने सर्जेस्त्यादि वर्जनं तेन क्तोपदेशत्वाभावान्न क्त्वम्। तत्र प्रमाणाभावात् क्तोपदेश एव न्याय्यः। [शाखे शब्दच०

सर्ज पु०सृज-कर्त्तरि घञ्। १शालवृक्षे अमरः। २तद्रसे (धुना) ३पीत-

सर्जक पु०सृज-ण्वुल्। १पीतशाले अमरः २शालवृक्षे लटा०

सर्जगन्धा स्त्री सर्जस्येव गन्धो यस्याः। राज्ञायां रत्नमा०।

सर्जन न०सृज-ल्युट्। १सैन्यपश्चाद्भागे शब्दर० २सृष्टौ च।

सर्जनिर्य्यासक पु० सर्जस्य निर्यास इव कायति कै-क। राले (धुना) राजनि०। [रसे त्रिका०।

सर्जमणि पु० सर्जस्य शालवृक्षस्य मणिरिव। (धुना) सर्ज-

सर्जरस पु० ६त०। शालवृक्षरसे (धुना) अमरः।

सर्जिका(र्जी) स्त्री सृज-इन् वा ङीप्। १नदीभेदे २तत्कूलजे सर्जिकाक्षारे (साजिमाटि) रत्नमा०।

सर्जिका स्त्री सृज-ण्वुल् टाप् अतइत्त्वम्। १सर्जिकाक्षारे "यावशूको यवक्षारो यावशूको यवाग्रजः। सार्जिकोऽपि स्मृतः क्षारः कापोतः शुक्लवर्चकः। कथितः सर्जिकाभेदो विशेषज्ञैः शुक्लिका। यवक्षारो मधुः

स्निग्धः शुक्लो वह्निदीपनः । निष्कलं मूलं वातामश्लेष्मश्वासगुल्मनाशनम् । पाण्डुरोगयकृत्प्लीहगुल्मनाशनः श्वेतपुष्पोऽम्लवान् । सर्जिकाक्षारगुणा तत्काष्ठिकेऽप्यतिगुल्मशूलघ्नत्व । सुवर्चिका सर्जिकावद् बोद्धव्या गुणतो जनैः" भावप्र० । २नदीभेदे च जटा० ।

सर्जिकाचार स्त्री सर्जिकायाः चारः । खनामख्याते चारभेदे (साजिमाटि) राजनि० ।

सर्जिक्षार पु० ६त० । (साजिमाटि) सर्जिकाक्षारे राजनि० ।

सर्जु पु० सृज–उन् । बन्धिसृजने मेदि० ।

सर्जू स्त्री सृज–क्त । १विद्युति मेदि० २अभिसारे शब्दर० ।

सर्ज्य पु० सर्जरसेदं यत् । १सर्जरसे रत्नमा० । सृज–ण्यत् । २सर्जनीये त्रि० ।

सर्प पु० सृप–क्विप् । १नागजातौ स्वनामख्याते जन्तौ० । २भुजङ्गमे पुंस्त्री० अमरः स्त्रियां ङीष् । ३सर्पदैवते अश्लेषानक्षत्रे ज्यो०त० "सर्पेभ्यादभवन् सर्पा क्षीणत्वादृक्षयः स्मृताः" वह्निपु० तन्नामनिरुक्तिः । भावे घञ् । ४गमने सुश्रुतोक्तं तद्भेदादिकम् अष्टिशब्दे ५८१ पृ० दृश्यम् । तद्दंशने तस्य दंष्ट्रभेदेन विषादिकं च भविष्यपु० उक्तं यथा

"दंष्ट्रा शुक्ला च कृष्णा च रक्ता पीता च दक्षिणा । क्रमेण तु वक्ष्यामि यथा वै वर्णतः स्मृताः । शुक्ला तु ब्राह्मणी ज्ञेया रक्ता तु क्षत्रिया स्मृता । वैश्या तु पीतिका ज्ञेया कृष्णा शूद्रा तु कथ्यते । अतःपरं प्रवक्ष्यामि दंष्ट्राणां विषलक्षणम् । दंष्ट्रायान्तु विषं नास्ति नित्यमेव भुजङ्गमे । दक्षिणे नेत्रभागाद्वा विषं सर्पस्य तिष्ठति । कृष्णदंष्ट्रश्च सर्पस्य विषं गच्छति मस्तके । मस्तकाद्गमनीं याति ततो नाड़ीषु तिष्ठति । नाड़ीभ्यो गच्छते दंष्ट्रे विषं तत्र प्रवर्त्तते । तत्सर्वं कथयिष्यामि यथावदनुपूर्वशः । दष्टभिः कारणैः सर्पो दशते नात्र संशयः । आक्रान्तो दशते पूर्वं द्वितीयं पूर्ववैरिणम् । तृतीयं दशते भीतस्तुर्यं मदविमोहितः । पञ्चमन्तु क्षुधाविष्टः पञ्चैते विषोल्बणाः । स्वप्नं सुप्तस्य चार्थाय अष्टमं कालचोदितम् । यस्तु सर्पो दशित्वा तु सदंशं परिवर्त्तयेत् । बलमुन्नामयेद्दंष्ट्रा आक्रान्तं तं विनिर्दिशेत् । यस्य सर्पेण दष्टस्य गम्भीरं दश्यते व्रणम् । वैरदष्टं विजानीयात् कश्यपस्य वचो यथा । एकदंष्ट्रापदे यस्य व्रणमल्पं न च क्षोभितम् । भीतदष्टं विजानीयात् यथोवाच प्रजापतिः । यस्य सर्पेण दष्टस्य रेखा दक्षस्य जायते । क्षुदृष्टं विजानीयात् कश्यपस्य वचो यथा । द्वे च दंष्ट्रापदे यस्य दश्यते च महाव्रतम् । क्षुधाविष्टं विजानीयात् यथोवाच प्रजापतिः । द्वे दंष्ट्रे यस्य दश्येते क्वचिद्रुधिरसंकुले । विषोल्बणं विजानीयाद्दंशं तं नात्र संशयः । अपस्मरस्यार्थाय जानीयान्नात्र संशयः । यस्तु काकपदाकारं त्रिभिर्दन्तैर्विचिह्नितम् । सर्पानाग इति प्रोक्तः कालदष्टं विनिर्दिशेत् । द्विविधं दष्टजातेषु लक्षणं समुदाहृतम् । दष्टं दष्ट्वा तु पीतञ्च दष्टोद्भूतं तथैव च । यस्तु सर्पो दशित्वा तु पिबते तु विचक्षणः । दष्ट्वा तु पीतं विज्ञेयं कश्यपस्य वचो यथा । विषभागो तु सर्पस्य त्रिभागस्तत्र संक्रमेत् । उदरं दर्शयेद् यस्तु उद्भूतं तं विनिर्दिशेत् । अर्दितं विषवेगेन निर्विषः पन्नगो भवेत् । अक्षाभ्यामपि विज्ञेयश्चतुर्दंष्ट्राभिपीड़ितः । श्रोत्राभङ्गो भवेत् किञ्चित् संदष्टो विषयोगतः । श्वाद्रांऽस्त्रेणामवायाम्बुक्षतिकासु विशेषतः । विशाखासु त्रिपूर्वासु मूलाश्लेषातिशतासु च । सर्पदष्टा न जीवन्ति विषं पीतञ्च यैस्तथा । शून्यागारे श्मशाने च शुष्कवृक्षे तथैव च । न जीवन्ति नरा दष्टा नक्षत्रे तिथिसंयुते । दृष्टो दंशस्ततः शुष्कोऽन्नरः परिकीर्त्तितः" भविष्यपु० "अतःपरं प्रवक्ष्यामि कालदष्टस्य लक्षणम् । "जिह्वाभङ्गो भ्रुटिमूलं चक्षुभ्यांञ्च न पश्यति । दंशञ्च दन्दशूकाग्रं पक्वजम्बूफलोपमम् । वैवर्ण्यं चैव दन्तानां श्यामो भवति वर्णतः । सर्वेन्द्रियेषु वैक्लिव्यं पुरीषस्य च भेदनम् । मन्यास्तम्भकटिग्रीवं जृम्भते दृष्टिरीक्षतः । दह्यते वेपते चैव खपते च मुहुर्मुहुः । यस्येष लिङ्गमानस्य रुधिरं न प्रवर्त्तते । दष्टेन तावमानस्य दष्टकालो न जायते । दंशे काकपदे सुनीलमण्डलाभ्यामूर्ध्वाधं घनम् उच्छूनं रुधिराकुलैकवक्त्रं लक्ष्यान्निरोधो भवेत् । क्लिन्नाशयमलपक्वच सुपक्वानु वा दुस्सहा दश्यते संस्थानं प्रवदन्ति शास्त्रनिपुणास्तं कालदष्टं विदुः । दंशे यस्याथ शोथः प्रचलितवलितं मण्डलं वा सुनीलं प्रस्रेदो गात्रभेदः स्रवति च रुधिरं वातुलास्यञ्च लक्ष्येत । दन्तोष्ठाभ्यां विवर्णो भ्रमति च हृदयं सन्निरोधश्च तीव्रो दिव्यानाञ्चेव दंशस्त्रविपुलभयो विद्धि तं कालदष्टम् । दन्तैर्दन्तान् स्पृशति बहुशो दष्टिरायासचिह्ना स्थूलो दंष्ट्रः स्रवति रुधिरं केवलं चातुरेकम् । प्रलापादिः क्षिपति सततं वाहनास्यञ्च भोक्तुं यद् यद् ब्रूते सकलमदितं कालदष्टं तमायुः । वेपते भेदनास्तु रक्तनेत्रश्च जायते । श्रोत्राभङ्गश्च जायते

कालदष्टं विनिर्दिशेत्। दर्वीके सर्पिके वापि कालच्छायां न पश्यति। मन्दरश्मिं तथा दीनं तेजोहीनं दिवाकरम्। वेपते वेदनार्तस्तु रक्तनेत्रश्च जायते। स याति निधनं जन्तुः कालदष्टं विनिर्दिशेत्। अहन्यह्नि कालदष्टे पञ्चदशीम्। नामपक्षोदितानां जीवितस्य च संशयः। आहोऽत्रेषामवाव्यक्तिकासु विशेषतः। दिवाकासु निशूर्वासु मूलाकातिशतासु च। सर्पदष्टा न जीवन्ति विषं पीतश्च यैस्तथा। शून्यागारे श्मशाने च शुष्कवृक्षे तथैव च। न जीवन्ति नरादष्टा नक्षत्रे तिथिसंयुते। अहोरात्रं मर्मगतं प्राणिनां सप्तदाहृतम्। तेषां मध्ये तु मर्माणि दश द्वे चापि कीर्तिते। शङ्खौ नेत्रे स्तनौ मेढ्रे वस्तिभ्यां हृत्तथान्तरे। कण्ठे कक्षे कुकुन्दरे तालुके चिबुके गुदे। एषु दष्टेषु मर्मसु तालुके चिबुके गुदे। एषु दष्टेषु मर्मसु दष्टः शस्त्रेण वा कृतः। न जीवन्ति नरा लोके कालदष्टान् विनिर्दिशेत्"। दूतो वा दण्डकृच्छो भवति च युगवं पाशहस्तस्तथा वा रक्तं वस्त्रञ्च कृष्णम् हाव शिरसि गतम् वैवस्वतश्च दूतः। तेजाभ्यश्च तदत् त्वरितगतियुतो मुक्तकेशश्च याति, यः कुर्यात् घोरयष्टिं करचरणयुगैः प्राणकालस्य दूतः। नागोदयं प्रवक्ष्यामि दैवानेन तु भाषितम्। ब्रह्मणा तु पुरा सृष्टा यक्षा नामाख्यनेकशः। अनन्तं वासुकिं विद्यात् शेषं विद्यात्तु वासुकिम्। तक्षकं भूमिपुत्रन्तु कर्कोटश्च बुधं विदुः। पद्मं हरस्मृतिं विद्यान्महापद्मञ्च भार्गवम्। कुलिकः शङ्खपालश्च द्वावेतौ तु शनैश्चरः। पूर्वपादः शङ्खपालो द्वितीयः कुलिकोऽस्य च। नेत्रभागे यमौ दिष्टौ दिनरात्री तथैव च। शुक्रयोगौ च मध्याह्ने उदये तु बृहत्तमम्। पादः प्रावृड्भवे भागे दिवसस्याभिधीयते। यदाच भुञ्जते दानवं। यदि स्वल्पं व्रजत्यधः। अधो गत्वा भवेत् सर्पो निर्विषो नात्र संशयः" भविष्यपु० "श्रावणादे तथा ज्ञेये ग्रसादानि भुजङ्गमाः। ततो नागो नागिनी च मैथुनं संप्रवर्तते। चतुरो वार्षिकान् मासान् नागी गर्भमधारयत्। ततः कार्त्तिकमासे तु अण्डकानि प्रसूयते। अण्डजानान्तु विज्ञेयं हे मते हे च विंशती। तान्येव भक्षयेत् सा तु भागैकं त्यजेत्। तस्मात्तैर्वर्धते नागात् पुनः संजायतेऽण्डजात्। तानेव खादते सर्पो अहोरात्राभि विंशतिम्। सर्वोदकसुवर्णाभात् दीप्तरोमोपमद्विभात्। तस्मादुत्पद्यते स्त्री वै अण्डाद् ब्राह्मणसत्तम!। शिरोगुप्तास्थिमादण्डकात्सञ्जायते सकम्। ततो भिनत्ति चाण्डानि मुखभागेन हे गौतम!। ततश्चे द्योतिषस्तस्मात् सद्यं वल्गन्ति बालकाः। ततोऽहौ सप्तरात्रेण क्षणो भवति वल्गतः। आयुःप्रमाणं सर्पाणां शतं विंशोत्तरं स्मृतम्। मण्डूकादधिको ज्ञेयः शङ्खपालस्य यथाक्रमम्। मयूरात् नासुखाद्यापि चकोराद्दोखुरात्तथा। विडालाच्छकुलाच्चैव वराहादुद्विकात्तथा। एतेभ्यो यदि रक्षेत जीवेद्विंशोत्तरं शतम्। सप्ताहे तु ततः पूर्वं दंष्ट्राणान्तु विरोहणम्। विषस्यागमनं तत्र विद्यते पुनः पुनः। एवं ज्ञात्वा तु तत्त्वेन विषकर्म समारभेत्। एकविंशतिरात्रेण विषं दंष्ट्रासु जायते। नागो पार्श्वसमावर्त्ती बालसर्पस्तु उच्यते। पञ्चविंशतिरात्रस्तु मध्यः प्राणहरो भवेत्। षण्मासाभ्यन्तरमात्रस्तु कञ्चुकं वै प्रसञ्चति। षोडशाङ्गापि विज्ञेया हे मते हे च विंशती। गोलोमसदृशाः पादाः प्रविशन्ति क्रमन्ति च। कञ्चोनां चाल विज्ञेयं हे मते विंशती तथा। पांशुल्यापि विज्ञेया हे मते विंशतिस्तथा। एकाकिजाता ये सर्पा निर्विषाके प्रकीर्त्तिताः। पञ्चसप्ततिवर्णेषि ज्ञातव्या मुनयो मताः प्रकीर्त्तितम्। रक्तपीतशुक्लदला श्यामोका सन्निवेशिनः। एते सर्वायुधो ज्ञेया सर्वाहारास्च भीरवः। एकद्वारा भवेद्वल्मं हे जिह्वे च प्रकीर्त्तिते। दंष्ट्राश्चतस्रो विज्ञेया प्रजापतिवचो यथा। प्रथमा ब्रह्मदैवत्या द्वितीया विष्णुदेवता। तृतीया रुद्रदैवत्या चतुर्थी यमदैवता। क्रोधा प्रभावतः सा तु दाहनेत्रं समाश्रिता। मन्त्राः मन्त्राः प्रयोक्तव्या नौषधं नैव भेषजम्। वैद्यः पराङ्मुखो याति रुद्रं रुद्रा विशेषतात्। चिकित्सा न बुधैः कार्या तदन्तं तस्य जीवितम्। मकरीं मासिकीं विद्यात् करालीञ्च द्विमासिकीम्। कालरात्री भवेत् त्रीणि चतुरो यमदूतिका। मकरीं मस्तकं विद्यात् करालीं कायपादिका। दंष्ट्राश्चतस्रो मकरी ज्ञेया करालीं वैक्षिकी स्मृता। कङ्कालिका कालरात्री यमदूती त्रिदोषिका। शुक्ला तु मकरी ज्ञेया करालीं रक्तसन्निभा। कालरात्री भवेत् पीता कृष्णा च यमदूतिका" भविष्यपु०। कश्यप उवाच "अविषा दंष्ट्रयोर्मध्ये यमदूती तु चेद्भवेत्। न चिकित्सा बुधैः कार्या तं गतासुं विनिर्दिशेत्। मकरीं दिवारात्रौ एकैकं भुञ्जते सर्पिः। एकस्य च समानस्तु द्वितीयं त्रोड्यं

तथा। नागोदरे च दृष्टो दृतो विद्धो विदारितः। काक-दष्टं विजानीयात् कण्डूयच्च यथा। यस्यास्यः पतते-बिन्दुर्वाक्यस्खलितोद्धृतः। तस्यास्यं खनते दंष्ट्राविषं क्रोधेन दारुणम्। ज्वालाशते तु संपूर्णे देहे संक्रमते विषम्। यावत् संक्रामयेद्दाहं कुत्सितं वा प्रसारयेत्। क्षणेन क्षणमात्रेण विषं गच्छति मर्मसु। एषते विष-वेगस्तु शतयोऽथ सहस्रशः। वर्द्धते रक्तमासाद्य ततो वाते शिखी यथा। तैलबिन्दुर्जलं प्राप्य यथा वेगेन वर्द्धते। शिखण्डो वायुमासाद्य भास्तेन समीरितः। ततस्ता-वान्नरं प्राप्य त्वचास्थानं विवेष्टितम्। त्वचास्थं दिगुणं विद्यात्क्लोथितेषु चतुर्गुणम्। पित्ते तु त्रिगुणं याति क्लेष्मे वै षोडशं भवेत्। वायौ त्रिंशद्गुणश्चैव मज्जे अष्टगुणं तथा। प्राणे चैकार्थवीभूते सर्वस्रोतो निरो-धयेत्। क्षोभता दश्यमानेन याति साध्यमसाध्यताम्। ततोऽहो म्रियते जन्तुर्निश्वासाच्छ्वासवर्जितः। विषक्रान्ते तु ततो जीवे भूते पञ्चत्वमाप्नुते। तानि भूतानि गच्छन्ति यस्य यस्य यथाक्रमम्। पृथिव्यापस्तथा तेजो वायुराकाश-मेव च। एतेषामेव संघातः शरीरमभिधीयते। पृथिवी पृथिवीं याति आपश्चोयेषु लीयते। तेजो गच्छति चा-दित्यं मारुतो मारुतं व्रजेत्। आकाशचैव आकाशे यद्द तेनैव गच्छति। अस्यानं ते प्रवक्ष्यन्ते परस्परनि-योजिताः। न जीवेदागतः कश्चिदिह जन्मनि शुभ्रते!। विषार्तं न त्यजेच्छेत त्वरितं तु चिकित्सयेत्। एकमपि विषं क्रोधे द्वितीयश्चोपपद्यते। यथा अग्निरग्निश्चैव स्या-त्वरन्तु तथैव च। प्रथमे विषवेगे तु रोमहर्षः प्रजायते। द्वितीये विषवेगे तु स्वेदो गात्रेषु जायते। तृतीये विष-वेगे तु कम्पो गात्रेषु जायते। चतुर्थे विषवेगे तु श्रोत्रास्यनिरोधकृत्। पञ्चमे विषवेगे तु शिरा गात्रेषु जायते। षष्ठे तु विषवेगे तु शीर्षाभङ्गस्तु जायते। सप्तमे विषवेगे तु प्राणेभ्यो विमुच्यते। सप्तधातुवहा ह्येते वैनतेयेन भाषिताः। त्वचास्थाने विषप्राप्ते तस्य रूपाणि मे शृणु। कण्डूनि तिलिराबल्गे वतन्ते च शुक्लवर्णकः। एतानि यस्य लिङ्गानि तस्य त्वचगतं वि-षम्। तस्यागदं प्रवक्ष्यामि येन सम्यग्यते सुखम्। कर्क-मूलरसपानार्थं प्रियङ्गुं तगरं तथा। एतद्धात्रीरसं दातव्यं ततः सम्यग्यते सुखम् ततश्चिन्तं न ते विप्र! न विवर्त्तेत वेदिषम्। त्वचःस्थानं ततो हित्वा रक्तस्थानं प्रधावति। विषे च रक्तसंप्राप्ते तस्य रूपाणि मे शृणु। दहते सुप्यते चैव शीतलं बहुमन्यते। एतानि यस्य रूपाणि तस्य रक्तं गतं विषम्। तस्यागदं प्रवक्ष्यामि येन सम्यग्यते सुखम्। उशीरं चन्दनं कृष्णसत्वं तगरं तथा। कङ्कोलस्य मूलानि बिल्वसार-मगस्य च। पिष्ट्वा सारिवचैव पूर्ववेगे तु दापयेत्। दहती हरिवल्ली च इन्द्रवारुणिमूलकम्। सर्पगन्धा इत चैव द्वितीये परिकीर्त्तितम्। बिल्वसारं तथा पिष्ट्वा तृतीये कारयेद्बुधः। नस्यं पानञ्च कुर्वीत अञ्जनं लेपनं तथा। एतैर्नैवोपचारैश्च ततः सम्यग्यते सुखम्। रक्तस्थानं ततो गत्वा पित्तस्थानं प्रधावति। पित्त-स्थानगते विप्र! विषे रूपाणि मे शृणु। तृष्यते दह्यते सुप्यते तथा। मात्रतः पीतता खाद्दै दिशः पश्यति पीतिकाः। धवत्वाश्च भवेन्मूर्छा न चात्मानं विजानते। विषक्रियां तस्य कुर्यात् यथा सम्यग्यते सुखम्। पिप्पलं मधुकं चैव मधुखण्डसंयुतं तथा। मधुसारसमायुक्तं जातिपत्रैरवालुकाम्। इन्द्रवारुणि मूलञ्च गवां मूत्रेण पेषयेत्। नस्यं तस्य प्रयुञ्जीत पान-मालेपमञ्जनम्। एतैर्नैवोपचारैश्च ततः सम्यग्यते सुखम्। पित्तस्थानमतिक्रम्य श्लेष्मस्थानञ्च गच्छति। श्लेष्मस्थाने ततः प्राप्ते तस्य रूपाणि मे शृणु। मात्रायां तस्य दृश्यन्ते निद्रायच न जायते। लाला च स्रवते तस्य कण्ठो घुरघुरायते। एतानि यस्य रूपाणि श्लेष्मस्थान-गतं विषम्। तस्यागदं प्रवक्ष्यामि येन सम्यग्यते सुखम्। त्रिकटुकं क्षोयातकी क्षोद्रञ्च मधुसारकम्। एतेषां चूर्ण-मागानि गवां मूत्रेण पेषयेत्। नस्यं पानञ्च कुर्वीत अञ्जनं लेपनं तथा। एतैर्नैवोपचारैश्च ततः सम्यग्यते सुखम्। श्लेष्मस्थानमतिक्रम्य वायुस्थानञ्च गच्छति। तस्य रूपाणि वक्ष्यामि वायुस्थानगते विषे। आध्मायते च जठरं यच्चयंच न पश्यति। ईक्षणं कुरुते रूपं दृष्टि-भङ्गश्च जायते। एतानि यस्य रूपाणि तस्य वायुगतं विषम्। तस्यागदं प्रवक्ष्यामि येन सम्यग्यते सुखम्। क्षीरमूलं पिवालञ्च रक्ता च मज्जपिप्पली। पिष्ट्वा गुडिकाञ्च कुर्याद्दद्याद्वा तस्याञ्जनलेपादीन्। एषो-ऽगदः सर्वविषाणि हन्यात् अवश्यमुक्ता देवरेण मुक्तः। अञ्जनञ्चैव नस्यञ्च शिरं दद्याद्विमार्ष्टते। वायुस्थानं ततो हित्वा मज्जस्थानं प्रधावति। विषे मज्जगते विप्र! तस्य रूपाणि मे शृणु। दहति शीयते तस्य भग्न-मङ्गानि सुप्यते। एतानि यस्य रूपाणि तस्य मज्जगतं

विषम्। तस्मादहं प्रवक्ष्यामि येन सम्पद्यते सुखम्। हृतं मधु शर्कराश्च उशीरं चन्दनं तथा। एतदालोड्य दातव्यं पानं तस्य च शुभ्रत!। ततः प्रणश्यते दुःखं ततः सम्पद्यते सुखम्। अथ तस्मिन् हृते योगे विषं तस्य निवर्त्तते। मध्यस्थानं ततो गत्वा मर्मस्थानं प्रधावति। विषे च मर्मसंप्राप्ते शून्यं रूपं यथा भवेत्। निश्चेष्टः पतते भूमौ कर्णाभ्यां बधिरो भवेत्। वारिणा सिच्यमानस्य रोमहर्षो न जायते। दह्यमानस्य दण्डराजी न जायते। शस्त्रेण छिद्यमानस्य रुधिरं न प्रवर्त्तते। केशेषु लुञ्चमानेषु नैव क्लेशप्रवेदने। यस्य कर्णौ च पार्श्वौ च हनूपादौ च सन्धयः। शिथिलानि भवन्तीह स मृतासुरिति श्रुतिः। एतानि यस्य रूपाणि विपरीतानि गौतम!। मृतन्तु तं विजानीयात् कश्यप वचो यथा। वैद्याश्चरन्ति न पश्यन्ति ये पश्यन्ति कुशिक्षिताः। विचक्षणास्तु पश्यन्ति मन्त्रौषधिसमन्विताः। तस्मादहं प्रवक्ष्यामि स्वयं दृष्टेन भाषितम्। मयूरपित्तं मार्ज्जारपित्तं नकुलपित्तकम्। मत्स्यवह्निपित्तञ्च धानालीमूलमेव च। कुङ्कुमं भार्गवं कुष्ठं काश्मरी च त्वचं तथा। सप्तपत्रञ्च किञ्जल्कं पद्मस्य कुसुदस्य च। एतानि समभागानि गोमूत्रेण च पेषयेत्। एषोऽगदो यस्य हस्ते दष्टेन म्रियते न वै। कालाहिनापि दष्टोऽपि क्षिप्रं भवति निर्विषः। क्षिप्रमेव प्रदातव्यं मृतसञ्जीवनौषधम्। अञ्जनञ्चैव नस्यञ्च क्षिप्रं दद्यात् विचक्षणः" भविष्यपु०। कश्यप उवाच "अतःपरं प्रवक्ष्यामि नागानां रूपलक्षणम्। सर्पदष्टस्य च तथा समासाद्दिजपुङ्गव!। अथ सर्पेण दष्टस्य अधो दृष्टिः प्रजायते। सर्पो दष्टस्य च तथा अधोदृष्टिः प्रजायते। नपुंसकेन दष्टस्य ऊर्द्धदृष्टिः प्रजायते। दष्टा दष्टस्य वा साम्या दृष्टिर्द्विजवरोत्तम!। कुमारेणापि दष्टस्य दृष्टिश्चा एव जायते। सुविद्यया वाथ दष्टस्य तथा खेदश्च जायते। रोमाञ्चः स्रावः स्फुटिकया वेपथुश्चापि जायते। पन्नगो प्रभवेद्रात्रौ दिवा सर्पो विषाधिकः। नपुंसकस्तु सन्ध्यायां कश्यपेन तु भाषितम्। अन्धकारे तु दष्टानामुदके गहने वने। सुप्तस्य वै प्रमत्तस्य यदि सर्पो न दश्यते। दष्टरूपाण्यजानन् वै कथं वैद्यश्चिकित्सति। चतुर्विधास्तु संप्रोक्ताः पन्नगास्तु मनीषिणा। दर्वीकरा मण्डलिनो राजिला व्यन्तरास्तथा। दर्वीकरा वातविषा मण्डलाः पैत्तिकाः स्मृताः। श्लेष्मणा राजिला ज्ञेया व्यन्तराः सान्निपातिकाः। रक्तं परीक्षेद्दंशाङ्गं सर्पाणान्तु पृथक् पृथक्। कृष्णं दर्वीकराणान्तु जायते वातसञ्चयम्। रक्तं चलञ्च बहुशः शोणितं मण्डलिनिचये। पिच्छिलं राजिले ज्ञेयं तद्वद्व्यन्तरजे तथा। ज्ञेयाः सर्पास्तु चत्वारः पञ्चमो नोपलभ्यते। ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैव चतुर्थकः। ब्राह्मणे मधुरं दद्यात् तिक्तं दद्यात्तथोत्तरे। वैश्ये कषायकं दद्यात् शूद्रे त्रिफलयेव वा। ब्राह्मणेन तु दष्टस्य दाहो गात्रेषु जायते। मूर्च्छा च प्रबला ह्याद्यै न ज्ञानमभिजायते। ग्रामवर्च्चं सुखञ्च ज्ञान्मध्याह्नमाव जायते। तस्य कृच्छ्रात् प्रतीकारं येन सम्पद्यते सुखम्। अश्वगन्धामपामार्गं त्रिकुशारं सुराजयम्। एतत् सर्पिः समायुक्तं पानं नस्यञ्च दापयेत्। एतेनैवोपचारेण सुखी भवति मानवः। क्षत्रियेण तु दष्टस्य श्यामो गात्रेषु जायते। मूर्च्छा मोहश्च ह्याद्यै न ज्ञानमभिजायते। जायते वेदना तस्य ऊर्ध्वश्चैव निरीक्षते। तस्य कृच्छ्रात् प्रतीकारं येन सम्पद्यते सुखम्। अर्कमूलमपामार्गं प्रियङ्गुमथ वाह्लीम्। एतत् सर्पिः-समायुक्तं पानं तस्य प्रदापयेत्। एतेनैवोपचारेण सुखी भवति मानवः। वैश्येनापि हि दष्टस्य शून्यं रूपाणि यानि तु। श्लेष्मकोपो ज्वरा च नवोदर्त्तति वेदना। मूर्च्छा च प्रबला यस्य ज्ञानं नाभिनन्दति। तस्य कृच्छ्रात् प्रतीकारं येन सम्पद्यते सुखम्। अश्वगन्धां च गोमूत्रां स्टङ्गवेरं सगुग्गुलम्। शिरीषार्कपलाशञ्च श्वेतां च गिरिकर्णिकाम्। गोमूत्रेण समायुक्तं पानं नस्यञ्च दापयेत्। एष वैश्येन दष्टानामगदः परिकीर्त्तितः। शूद्रेणापि हि दष्टस्य शून्यं तत्त्वेन गौतम!। कम्पते वेपते चैव ज्वरः शीतश्च जायते। अङ्गानि चुक्कुचायन्ते शूद्रदष्टस्य लक्षणम्। तस्मादहं प्रवक्ष्यामि येन सम्पद्यते सुखम्। पद्मञ्च शोभनञ्चैव शौद्रं मधुरञ्च केवरम्। मधु मधूकसारञ्च श्वेता च गिरिकर्णिका। एतानि समभागानि पेषयेत् शीतवारिणा। पानं लेपाञ्जनं नस्यं सुखी भवति मानवः। पूर्वाह्णे चरते विषो मध्याह्ने क्षत्रियश्चरेत्। अपराह्णे चरेद्वैश्यः शूद्रः सन्ध्याचरो भवेत्। आहारस्तात सुप्राणि ब्राह्मणानां विदुर्बुधाः। मूषिका क्षत्रियाणान्तु आहारो द्विजसत्तम!। वैश्या मण्डूकभक्षाश्च शूद्राः सर्वाशिनस्तथा। अमतो दशते विप्रः क्षत्रियो दक्षिणेन तु। वामपार्श्वे

सदा वैश्यः पवाहे भूद्र आदशेत् । मदक्षाले तु संप्राप्ते पीड्यमाना महाविषाः । क्षत्रियायां दशन्ते वै मैथुनार्त्ता भुजङ्गमाः । पुंश्चल्यां क्षत्रिया विप्राः क्षत्रियाचन्दनावहाः । वैश्याच्च एतयोर्जाता वै भूद्राः सूर्यस्य सन्निधः । वासं तेषां प्रवक्ष्यामि यथावदनुपूर्वशः । नदीकूपतडागेषु गिरिप्रस्रवणेषु च । क्षारामेषु पवित्रेषु शुचिस्थायतनेषु च । वसन्ति ब्राह्मणाः सर्पा ग्रामद्वारे चतुष्पथे । क्षत्रियो वसते नित्यं तोरणेषु पुरेषु च । गोशालाक्षेत्रशालासु पवालेषु तटेषु च । गोष्ठेषु पवित्रेषु विप्र ! वैश्या वसन्ति च । अविविक्तेषु स्थानेषु निर्भरेषु वनेषु च । शून्यागारे श्मशाने च भूद्रा विप्र ! वसन्ति च । श्वेताश्च कपिलाश्चैव ये सर्पास्तप्तजप्रभाः । सन्निधः सात्त्विका ये ब्राह्मणास्ते बुधैः स्मृताः । रक्तवर्णसुवर्णाभाः प्रवालसदृशप्रभाः । सूर्यप्रभास्तथा विप्र ! क्षत्रियास्ते भुजङ्गमाः । नानाविचित्रराजीभिरत्नवीवर्णसन्निभाः । वाणपुष्पसुवर्णाभा वैश्यास्ते च भुजङ्गमाः । काकोदरनिभाः केचित् ये च अञ्जनसन्निभाः । काकवर्णा धूम्रवर्णास्ते भूद्राः परिकीर्त्तिताः । यस्य सर्पेण दष्टस्य दंशमङ्गुष्ठमन्तरम् । बालदष्टं विजानीयात् कनीयस्य वचो यथा । यस्य सर्पेण दष्टस्य दंशं ह्यङ्गुष्ठमन्तरम् । यौवनस्थेन दष्टस्य एतद्भवति लक्षणम् । यस्य सर्पेण दष्टस्य सार्द्धह्यङ्गुष्ठमन्तरम् । वृद्धदष्टं विजानीयात् कनीयस्य वचो यथा" भविष्यपु० । "स्नानान्नादौ प्रवक्ष्यामि यद्यां दष्टो न जीवति । चितावल्मीकयज्ञादौ कूपे च विवरे तरोः । दंशे रेखात्रयं यस्य प्रस्कन्नं स न जीवति । मध्ये च कर्कटे मेषे मूलाश्लेषा मघादिषु । कन्याश्चाश्विनले सन्धौ मङ्गुकर्णोदरादिषु । दण्डी मस्करधरो भिक्षुर्नग्नादः कालदूतकः । वल्मीको वाडवो च जीवायां पृष्ठे च न हि जीवति । पूर्वं दिनपतिर्भुक्ते ह्यर्द्धयामस्ततो परे । शेषाः षड्राः प्रतिदिनं षट्संख्यापरिवर्त्तनैः । नागभोगक्रमो ज्ञेयो रात्रौ वाप्यविवर्त्तनैः । शेषोऽर्कः फणिपचन्द्रस्तक्षको भौम ईरितः । कर्कोटोत्तो बुधः पद्मो महापद्मश्च भार्गवः । शङ्खः शनैश्चरो राहुः कुलिकश्चाष्टयो ग्रहाः । रात्रौ दिवा सुरसुरोभौमे खादश्चरान्तकः । षष्ठोः काली दिवा राहुः कुलिकेन सह स्थितः । यामार्द्धसन्धिसंस्थः स वेलां कालयतीश्वरः । याम्यहिमद्वृश्चिवालियुगनूरेक्षमागतः । दिवा षड्वेदनेत्रादिपञ्चत्रिवसुखांशकैः । पादाङ्गुष्ठे पादपृष्ठे गुल्फे जानुनि विद्रुधे । नाभौ हृदि स्तनतटे कण्ठे नासापुटेक्षणे । कर्णयोश्च भ्रुवोः शङ्खे मस्तके प्रतिपत्क्रमात् । तिथेरिन्द्रश्च जीवेन पुंसो दक्षिणभागके । वामभागे तु स्त्रिया वायुषट्कक्रमात् । अमवस्यन्तको मोक्षो निर्दष्टेन च मर्दनात् नारदे १८अ० । "आषाढादित्रिमासैः स्याद् गर्भो मासचतुष्टये । अष्टवानां शतं हे च चत्वारिंशत् प्रसूयते । सर्पा वसन्ति स्तनौ तान् विना स्त्रीं, पुंनपुंसकान् । उन्मीलनेऽक्षि सप्ताहाद् स्फुटो मासाद्भवेद्विषः । द्वादशाहात् सुबोधः स्याद्दन्ताः स्युः सूत्यदर्शनात् । द्वात्रिंशद्दिनवंशस्था चतस्रस्तेषु दंष्ट्रिकाः । करालो मकरी काकराजी च यमदूतिका । एताश्चाः विषा दंष्ट्रा वामदक्षिणपार्श्वगाः । मध्यानानुसृते लक्षिं जीवेत् मर्त्यसमाहयम् । नाड्याः सूर्योदिवारेशाः सप्त सप्त दिवानिशि । तेषां षट् प्रतिवारेषु कुलिकः सर्वसन्धिषु । शङ्खेन वा मङ्गलेन सह तस्योदयोऽथ वा । द्वयोश्चैव नाडिकयोरन्तरं कुलिकोदयः । दुष्टः सकालः सर्वत्र सर्वदंशे विनिर्दिशेत् । कालिका भरणी जातिर्मूलं पूर्वत्रयाश्विनी । विशाखार्द्रा मघाश्लेषा चित्रा अवधरोहिणी । हस्ता मन्दकजो वारो पञ्चमी चाष्टमी तिथिः । षष्ठी रिक्ता शिवा निन्द्या पञ्चमी च चतुर्दशी । सन्ध्याचतुष्टयं दुष्टं दन्दशूकाश्च राशयः । एकद्विषड्गो दंशा दष्टविद्धश्च खण्डितम् । कर्दमवस्रग्रं स्राहं शमेवं चतुर्विधम् । लघो ह्येकक्षता दंशा वेदना कर्धरं त्रयाम् । मर्म ह्येकाङ्गुलोभा दंशाश्च यमचोदिताः । दाहो पिपीलिकास्पर्शो कण्डूगोरुजान्वितः । सतोदो पञ्चितो दंशः सविषो व्यक्तनिर्दिशः । देवालये शून्यगृहे वल्मीकोद्यानकोटरे । रथ्या सन्ध्या श्मशाने च शून्यगृहे सिन्धुसङ्गमे । होमे चतुष्पथे सौधे स्फोटाङ्गे पर्वतान्तः । विवरारे जीर्णकूपे जीर्णवृक्षनि कुत्रचे । शिशुक्रीडातकाक्षेषु अम्बूदुम्बरकेषु च । वटे च जीर्णप्राकारे शालकृतकजालके । तालो यज्ञे गले मूर्ध्नि चिबुके नाभिपादयोः । दंशोऽशुभः" अग्निपु० । सुश्रुते तद्दंशलक्षणभेदादिर्दर्शितो यथा

"तत्र सर्वेषां सर्पाणां सामान्यत एव दष्टलक्षणं वक्ष्यामः । किं कारणं विषं हि निर्यातनिर्हिंसाशनिश्चतवरदेशकारि शुक्रशोणितमांसरसतिपालयति । न चाव-

काशोऽस्ति वाक् वेमूढमनसर्तम्। प्रत्येकमपि दष्ट-लक्षणेऽभिहिते सर्वत्र त्रैविध्यं भवति। तस्मात्त्रैविध्येन वक्ष्यामः। एतद्वातरहितमसम्मोहकरच। अपि चातैव सर्वसर्पव्यञ्जनावबोधः।

तत्र दर्वीकरविषेण त्वङ्नयननखदशनमूत्रपुरीषदंश-लक्षणं रौक्ष्यं शिरसो गौरवं सन्धिवेदनाकटीपृष्ठ-श्रोणिदौर्बल्यं जृम्भणं वेपथुः स्वरावसादो घुर्घुरको जड़ता शुष्कोद्गारः कासश्वासौ हिक्का वायोरूर्ध्व-गमनं शूलोद्वेष्टनं तृष्णा लालास्रावः फेनागमनं स्रोतो-ऽवरोधस्तोदाश्च वातवेदना भवन्ति।

मण्डलिविषेण त्वगादीनां पीतत्वं पीताभिभावः परि-दूषणं दाहस्तृष्णा मदो मूर्च्छा ज्वरः शोणितागमनमूर्ध्व-मधश्च मांसानामवशातनं स्रवणं दंशकोथः पीतरूपदर्शन-मोक्षोपद्रवाश्च पित्तवेदना भवन्ति।

राजिमद्विषेण शुक्लत्वं त्वगादीनां शीतज्वरो रोमहर्ष-स्तम्भत्वं गात्रावसादोदंशशोफः स्तब्धैकपक्षैकाङ्गदौर्-बल्यमूकत्वं कण्ठः कण्ठे स्वरघुर्घुरक उच्छ्वासनिरो-धस्तमःप्रवेशश्चास्रावे कफवेदना भवन्ति।

पृष्ठमिद्दष्ट ऊर्ध्वं प्रेक्षतेऽधस्तात् क्षिप्त्वा शिरा क्षोभयति ललाटे। नपुंसकाभिदष्टस्त्रियंकम्रेक्षी भवति। गर्भिण्या पाण्डुमुखाभ्रातत्व। क्षुतिकया मुखात्तौ रुधिरं वेदस्युपजिह्विका चास्य भवति। कासार्दितार्द्रं काङ्क्षति। दष्टेन मन्दा वेगाश्च। वातेनाप्यु क्तदत्व निर्विषेणाविषविक्तम्। अन्या-दिष्टेनाक्षतमित्येके। यथाहजगरः शरीरप्राण-क्षरो न विद्यात्। तत्र यद्यप्राक्षरादिष्टः पतति यद्वाग्निदग्ध इव भूमौ सस्ताङ्गः स्वपिति।

तत्र सर्वेषां सर्पाणां विषस्य सप्त वेगा भवन्ति तत्र दर्वीकराणां प्रथमे वेगे विषं शोणितं दूषयति तत्र प्र-दुष्टं क्षतजासृपैति तेन काष्णर्यं पिप्पलिकापरिसर्पणमिव चाङ्गे भवति। द्वितीये मांसं दूषयति तेनात्यर्थं क्षतजा शोफो मन्यास्तब्धत्वं भवन्ति। तृतीये मेदो दूषयति तेन दंशभेदः शिरोगौरवं स्वेदश्चूर्षणच। चतुर्थे कोष्ठमनुप्रविश्य रक्तप्रधानान् दोषान् दूषयति। तेन तन्द्राप्रसेकसन्धिविश्लेषा भवन्ति। पञ्चमेऽस्थीन्यनुप्रवि-शति प्राणमस्मिंश्च दूषयति तेन पर्वभेदो हिक्का दा-हश्च भवति। षष्ठे मज्जानमनुप्रविशति यद्दोषोत्थार्थं दूषयति तेन गात्राणां गौरवप्रतीकारो मूर्च्छा च भवति। सप्तमे शुक्रमनुप्रविशति व्यानस्थानार्थं कोपयति कफश्च स्रोतोभ्यः प्रच्यावयति तेन स्तैम्य-मूर्त्तिप्रादुर्भावः कटीपृष्ठभङ्गश्च सर्वचेष्टाविघातो लाला-स्वेदयोरतिप्रवृत्तिरुच्छ्वासनिरोधश्च भवति।

तत्र मण्डलिनां प्रथमे वेगे विषं शोणितं दूषयति तत्त्व प्रदुष्टं शीततामुपैति तत्र परिदाहः पीतावभासता चाङ्गानां भवति। द्वितीये मांसं दूषयति तेनात्यर्थं पीत-तापरिदाहौ दंशे स्रवणच भवति। तृतीये मेदो दूषयति तेन पूर्ववच्चूर्षणं तृष्णा दंशे क्लेदः स्वेदश्च। चतुर्थे कोष्ठमनुप्रविश्य ज्वरमापादयति पञ्चमे परिदाहं सर्व-गात्रेषु करोति। षष्ठसप्तमयोः पूर्ववत्।

राजिमतां प्रथमे वेगे विषं शोणितं दूषयति तत्प्रदुष्टं पाण्डुतामुपैति तेन रोमहर्षः शुक्लावभासश्च मुखे भवति। द्वितीये मांसं दूषयति तेन पाण्डुतात्यर्थं आस्यं शिरः-शोफश्च भवति। तृतीये मेदो दूषयति तेन चूर्षणं स्वेदो घ्राणाक्षिस्रावश्च भवति। चतुर्थे कोष्ठमनुप्रविश्य सन्तापस्तम्भं शिरोगौरवं छर्दयति। पञ्चमे वाक्-सङ्गं शीतज्वरञ्च करोति षष्ठसप्तमयोः पूर्ववदिति।

भवन्ति चात्र। धात्वन्तरेषु याः सप्त कलाः संपरिकी-र्त्तिताः। तासामेकामतिक्रम्य वेगं प्रकुरुते विषम्। वे-गान्तरेण हि कलां कालकल्पं भिनत्ति हि। समीरणे-नोक्षमाणं तत्तु वेगान्तरं क्षतम्। मूलाङ्कुरः प्रथमे वेगे पद्मध्यायति दुःखितः। लालास्रावो द्वितीये तु कण्ठाङ्कुरः पीड्यते हृदि। तृतीये च शिरो दुःखं कण्ठपीडा च तप्यते। चतुर्थे वेपते मूढः स्वादून् दन्तान् जडान्यस्यन्। केचि-द्वेगत्रयं प्राहुरन्यत्रैतेषु तद्विदः। ध्यायति प्रथमे वेगे पक्षौ सक्तावतः परम्। द्वितीये विह्वलः शोफस्तृतीये स्तब्धसन्धिता। केचिदेकं विषवेगेषु विषवेगमन्ति हि। माञ्जारनकुलादीनां विषं नातिप्रवर्त्तते। "कथातः सर्पदष्टचिकित्सितकल्पं व्याख्यास्यामः। सर्पैरवादितः सर्पः प्राग्दष्टश्च देहिनः। दंशस्योपरि वक्षीवादरिष्टा(ताग्रा)-वतरज्जवे। श्रोत्रचर्मौष्ठजङ्घानां सदृशाऽन्यतमेन च। न गच्छति विषं देहमरिष्टाभिनिवारितम्। दष्टेदंश-मधोत्कृत्य यत्र वस्त्रो न जायते। आचूषणक्षेदटाहाः सर्वत्रैव तु पूजिताः। प्रतिपूर्वं सुखं वस्त्रैर्हितमाचूषणं भवेत्। न दष्टव्योऽथ वा सर्पो क्षोतो वापि हि तत-क्षणम्। अथ मण्डलिना दष्टं न कथञ्चन दाहयेत्। न पित्तविषबाहुल्याद्दाहो दार्व्यादिसर्पति। अरिष्टानपि

मन्त्रैव वक्ष्येऽन्यन्मन्त्रकोविदः। सा तु रक्षादिभिर्वेद्या विषव्याधिकरी मता। देवब्रह्मर्षिभिः प्रोक्ता मन्त्राः सत्य तपोभवाः। भवन्ति मान्त्रया क्षिप्रं विषं हन्युः सदक्षरम्। विषं तेजोमयैर्मन्त्रैः सत्यब्रह्मतपोमयैः। यथा निवार्यते क्षिप्रं प्रयुक्तैर्न तथौषधैः। मन्त्राणां पठनं कार्यं स्त्रीसांसमधुवर्जिना। जिताहारेण शुचिना कुशास्तरणशायिना। मन्त्रमाल्योपहारैश्च बलिभिश्चापि देवताः। पूजयेन्मन्त्रसिद्ध्यर्थं जपहोमैश्च यत्नतः। मन्त्रस्तु विधिना प्रोक्तो होमो वा स्वरवर्णतः। यस्मात्र सिद्धिमायान्ति तस्माद् योज्योऽगदक्रमः। समन्ततः शिरार्तेभ्यादृष्टिदेषु कृशनो भिषक्। शाखाग्रे वा ललाटे वा ज्येष्ठास्ता विशते विषं। रक्ते निर्हियमाणे तु जलवत् निर्हियते विषम्। तस्माद्विस्रावयेद्रक्तं सा ह्यस्य परमा क्रिया"।

सर्पकङ्काली स्त्री०-सर्पस्येव कङ्कालमस्थिविशेषो यस्याः गौरा० ङीष्। सर्पविषघात्न्यां लतायां शब्दच०।

सर्पगन्धा स्त्री सर्पं तद्विषं गन्धयति हिनस्ति गन्ध-अच्। विषहारिण्यां लतायां अटा०। [चरीलतायां रत्नमा०।

सर्पघातिनी स्त्री सर्पं तद्विषं हन्ति हन-णिनि। सर्पविष-

सर्पजृण पुंस्त्री० सर्पस्तृणमिवानायासच्छेद्यो यस्य। नकुले हेमच०।

सर्पदंष्ट्र पु० सर्पस्य दंष्ट्रेव पुष्पमस्य। १नागदन्तीवृक्षे शब्दच०। सर्पस्य दंष्ट्रेव सर्शने दुःखदत्वात्। २वृश्चिकालीलतायां स्त्री (विछाति) रत्नमा०। [क्षां राजनि०।

सर्पदंष्ट्रिका स्त्री सर्पदंष्ट्राऽऽकारेऽस्त्यस्याः ठन्। अजश्रृ-

सर्पदण्डी स्त्री सर्पं तद्विषं दण्डयति दण्ड-अच्। मोरचो-टवृक्षे राजनि०। [ङीष्। नागदन्तीवृक्षे राजनि०।

सर्पदन्ती स्त्री सर्पस्य दन्त इव पुष्पमस्यस्या अच् गौरा०

सर्पनामा स्त्री सर्पस्य नामाख्या वाचकशब्दो। सर्पकङ्काली-भेदे शब्दच०।

सर्पदमनी स्त्री सर्पान् दमयति अनया दम-णिच्-करणे ल्युट् ङीप्। वन्ध्याकर्कोट्यां राजनि०। [राजनि०।

सर्पपुष्पी स्त्री सर्पः सर्पदन्त इव पुष्पमस्याः। नागदन्त्यां

सर्पफणिज पु० सर्पस्य फणे जायते जन-ड। सर्पफणजात-मणौ शब्दर०।

सर्पभुज् पु० सर्पं भक्षके भुज-क्विप्। १मयूरे हेमच०। २सर्पभक्षके गरुडादौ च। [अमरः।

सर्पराज पु० सर्पाणां राजा टच् समा०। वासुकौ नागभेदे

सर्पलता स्त्री सर्पं इव लता। नागवल्ल्यां ताम्बूल्यां राजनि०

सर्पसत्र न० सर्पेण होत्यदृश्येन सत्रायनार्थं वा सत्रम्। जनमेजयानुष्ठिते महाभारतप्रसिद्धे सर्पनाशनार्थे यज्ञ-भेदे भा०आ० ५१अ०५८अ० तत्कथा दृश्या।

सर्पसहा स्त्री सर्पं सहते सह-अच्। सर्पकङ्कालीलतायां राजनि०। [च।

सर्पहन् पु०सर्पं हन्ति हन-क्विप्। १नकुले हेमच० २गरुडे

सर्पाक्षी स्त्री सर्पस्येवाक्षि यस्याः अच् समा०। १नाग-माकल्यां राजनि०। [२मक्षिकाभेदे च राजनि०।

सर्पाख्य पु० सर्पाख्याऽऽख्या यस्य। १नागकेसरे रत्नमा०।

सर्पाङ्गी स्त्री सर्पस्येवाङ्गं यस्याः ङीष्। १सर्पकङ्कालीलतायां रत्नमा०। २सिंहल्यां राजनि०।

सर्पादनी स्त्री सर्पं सर्पविषमत्त्यऽनया अद-ल्युट् ङीप्। नाकुल्यां राजनि०। [प्रश्नयोऽप्यत्र।

सर्पाराति पु० इत०। १गरुडे हेमच० २नकुले च सर्पारि-

सर्पावास न० सर्पाणामावासो यत्र। १चन्दनवृक्षे राजनि०। इत०। २सर्पाणामावासे पु०।

सर्पाशन पु०स्त्री० सर्पमत्ति अश-ल्युट्। १मयूरे हेमच०। स्त्रियां ङीप्। २गरुडे पु०।

सर्पिस् न० सृप-इसि। घृते अमरः।

सर्पिणी स्त्री सृप-णिनि ङीप्। १सर्पयोषिति शब्दर०। २नृपभेदे राजनि० ३गमनकर्त्तरि त्रि० स्त्रियां ङीप्।

सर्पीष्ट न० सर्पींषां भुजगोनामिष्टम्। चन्दने रत्नमा०।

सर्पेष्ट न० सर्पाणामिष्टम्। चन्दने अटा० २सर्पाणामिष्टे त्रि०।

सर्व सर्पते भ्वा०पर०सक० सेट्। सर्वति असर्वीत् अघोपदेश-त्वान्न धत्वमिति केचिदघोपदेश एव न्याख्यः।

सर्व पु० सृ-व तस्य नेत्वम्। १शिवे २विष्णौ च विष्णुस०। "सर्वतश्च सतश्चैव सर्वस्य प्रभवाप्ययौ। सर्वस्य सर्व-दात्सर्वमेतं प्रचक्षते" विष्णुपु० तस्मात्तथात्वम्। तथा च सर्वं शब्देन स्वार्थादात्मादिना वाऽस्त्यर्थे अच्। ३समग्रे ४सकले च त्रि० अमरः। सर्वसायामस्य सर्वना-मसंज्ञा तत्कार्य्यं वा। सर्वशब्दश्चेत्तु स्वार्थान्वयितावच्छे-दकधर्म्मव्यापकताद्यधर्मावच्छिन्नस्वयितावच्छेदकावच्छि-न्नशक्त्याश्रयपर्य्याप्तिप्रकृष्यधर्मावच्छिन्नः गा०भ०। "व्यापकत्वाव-च्छिन्नः दिनकरो। यथा सर्वे घटा रूपवन्त इत्यादौ सर्व-घटार्थः। "बुद्धिविषयत्वावच्छिन्नसमूहत्ववान्" इति शाब्दिका वदन्ति। [२सर्वसोदरि त्रि०।

सर्वसहा स्त्री सर्वं सहते सह-खच् मुम् च। १पृथिव्याम् अमरः

सर्वकर्त्तृ पु० सर्वं करोति कृ-तृच्। १चतुर्मुखे ब्रह्मणि शब्दर०। २परमेश्वरे च।

सर्वकर्मीण त्रि०सर्वकर्मभ्योऽलं ख। सर्वकरणसमर्थे पदार्थे "संघ मे सर्वकर्मीणमिति भट्टिः। [नटे शब्दर०।

सर्वकेशिन् पु० अभिनेतानां सर्वेषामिव केशोऽस्त्यस्य इनि। नटे शब्दर०।

सर्वचार पु०सर्वः चारभटः। (दारोगा)ख्याते पदार्थे राजनि०

सर्वग न० सर्वं गच्छति गम-ड। १ब्रह्मणि २शिवे ३परमेश्वरे पु० मेदि०। ४वायौ ५आत्मनि च पु० शब्दमा०। ६सर्वगामिनि त्रि०। ७प्रियङ्गुवृक्षे स्त्री शब्दच० टाप्।

सर्वगन्ध न०सर्वं गन्धा यत्र। "चातुर्जातककर्पूरकङ्कोलायु कङ्कुमम्। लवङ्गसहितैः सर्वगन्धं प्रकीर्त्तितमृषिभिः" भावप्र० उक्ते १गन्धद्रव्यसमूहभेदे। सर्वान् गन्धयति हिनस्ति संहारकाले गन्धवच् सर्वगन्धा उत्पादयतीति वा। २परमेश्वरे सर्वनामकत्वात् सर्वगन्धहेतुत्वाद्वाऽस्य तथात्वम्।

सर्वग्रन्थि पु० सर्वत्र ग्रन्थिरिवात्र। १पिप्पलीमूले राजनि०।

सर्वङ्कष पु० सर्वं कषति कष खच् मुम् च। १प्राप्ते २सर्वातिरेकिणि त्रि०। [त्रि०कौ०।

सर्वजनीन त्रि० सर्वजनेषु विदितः ख। सर्वत्र विख्याते

सर्वज्ञ पु० सर्वं जानाति ज्ञा-क। १शिवे २बुद्धे अमरः। ३परमेश्वरे च "यः सर्वज्ञः सर्ववित्" श्रुतिः। ४सर्वज्ञानकर्त्तरि त्रि०। ५दुर्गायां स्त्री "सर्वज्ञा सर्ववेत्तृत्वात्" देवीपु० ४८अ०।

सर्वतःशुभा स्त्री सर्वतः शुभं यस्याः। प्रियङ्गुवृक्षे शब्दच०।

सर्वतस् अव्य० सर्व+तसिल्। समन्तत इत्यर्थे अमरः।

सर्वतिक्ता स्त्री सर्वतः तिक्ता। काकमाच्यां राजनि०।

सर्वतोभद्र पु०न० सर्वतो भद्राणि सुखानि यस्य। १चतुर्द्वारयुक्ते १८कोष्ठभेदे प्रतिष्ठादौ पूज्यदेवतानां २मण्डलभेदे सर्वतोभद्रमण्डलशब्दे दृश्यम्। ज्योतिषोक्ते शुभाशुभज्ञानार्थे चक्रभेदे चक्रशब्दे २८।५५ पृ०दृश्यम्। अलङ्कारोक्ते बन्धभेदालङ्के ४चित्रकाव्ये च। अलङ्कारशब्दे ३०७ पृ० दृश्यम् सर्वतो भद्रसङ्गात्। ५निम्बवृक्षे पु० अमरः। ६गन्धाख्यौ ७नटबोषधि च स्त्री मेदि०।

सर्वतोभद्रचक्र न० सर्वतो भद्रं यत्र तादृशं चक्रम्। ज्योतिषोक्ते शुभाशुभज्ञानार्थे चक्रभेदे चक्रशब्दे २८।५५ पृ० दृश्यम्। [भेदे अलङ्कारशब्दे ३०७पृ०दृश्यम्।

सर्वतोभद्रबन्ध पु० सर्वतो भद्राकारेण बन्धः। चित्रकाव्यः

सर्वतोभद्रमण्डल न० सर्वतो भद्रनामकं मण्डलम्। शारदातिलकादुक्ते प्रतिष्ठादौ—पूज्यदेवतामण्डलभेदे तच्चेत्थमुपचारस्तु क्षेमद्रौ स्कान्दे "भागद्वौच्यां गता रेखाः कार्य्यास्तैर्कोनविंशतिम्। चतुष्कोष्ठान्वितं पद्मं कोष्ठे शङ्खं च षड्भिः पदैः। एकादशपदा वृत्तौ मध्यन्तु नवभिः पदैः। चतुर्विंशतिपदा बाह्यौ परिधिरिष्यते पदैः। मध्ये षोडशभिः कोष्ठैः पद्मपत्रदलं कृतम्। श्वेतेन्दुशङ्खजा, कार्य्या वर्त्तौ नीलेन पूरयेत्। मध्यरक्ता सिता बाह्यौ परिधिः पीतवर्णकः। बाह्यान्तरदलैः श्वेता कर्णिका पीतवर्णिका। परिध्यावेष्टितं पद्मं बाह्ये सत्त्वरजस्तमः। तन्मध्ये स्थापयेद्देवान् ब्रह्मादींश्च सुरासुरानिति"। शारदायामन्यथोक्तं यथा "चतुरश्रचतुःकोष्ठे कर्णकेसरसंयुते। चतुर्ष्वपि च कोष्ठेषु कार्यशूलचतुष्टयम्। ततः कोष्ठेषु मतिमान् शूलेषु शूलानि पातयेत्। यावत् शतद्वयं मन्त्री षट्पञ्चाशत् पदान्यपि। तावच्चैव विधिना तत्र शूलानि पातयेत्। षट्त्रिंशता पदैर्मध्ये लिखेत् पद्मं शुभप्रदम्। बाह्यः षड्भिः पदैर्भवेत् पीठं षड्भिर्युग्मेन वीथिका। द्वारशोभोपशोभाश्च शिष्टाभ्यां परिकल्पयेत्। शास्त्रोक्तविधिना मन्त्री ततः पद्मं समालिखेत्। पद्मकेसरसन्धस्थ द्वादशांशं बहिः सुधी। तन्मध्यं विभजेद्भूपैस्त्रिभिः समविभागतः। आद्यं स्यात् कर्णिकास्थानं केसराणां द्वितीयकम्। तृतीयं पद्मपत्राणामुक्तांशेन दलात्मकम्। बाह्यदलान्तरालस्य मानेन विधिना सुधीः। निधाय केसराग्रेषु परितोऽर्कनिशाकरान्। लिखित्वा सन्धिसंस्थानि तत्र शूलानि पातयेत्। दलाग्राण्यङ्गुलान्मानं तन्मानाद्वृत्तमालिखेत्। तदन्तरालसन्धस्थशूलशोभयतः सुधीः। आलिखेद्बाह्यदलेन दलाग्राणि समन्ततः। दलमूलेषु युगशः केसराणि प्रकल्पयेत्। एतत् साधारणं प्रोक्तं पङ्कजं तन्त्रवेदिभिः। पदानि त्रीणि पादार्धं पीठकोणेषु मार्जयेत्। अवशिष्टैः पदैर्विद्वान् पीठगात्राणि कल्पयेत्। पदानि वीथिसंस्थानि मार्जयेत् षड्भागभेदतः। दिक्षु द्वाराणि रचयेत् द्विचतुःकोष्ठकैस्ततः। पदैस्त्रिभिरथैकेन शोभाः क्षुद्रैरपार्श्वयोः। उपशोभाः क्षुद्रेण त्रिभिः कोष्ठैरनन्तरम्। अवशिष्टैः पदैः षड्भिः कोणानां स्थापनं भवेत्। रक्षयेत् पङ्कजमेवं मण्डलं तन्मनोहरम्। पीतं हरिद्राचूर्णं स्यात् सितं तण्डुलसम्भवम्। कृष्णश्चूर्णमरुणं स्यात् दग्धपुलाकजम्। बिल्वादिपत्रजं श्यामं नीलं नीलीभवं वर्णपञ्चकम्। कङ्कोलोत्सेधविस्तारैः शोभारेखा सिताः

शुभाः । कर्णिका पीतवर्णेन केसराग्रहरुचेन च । शुक्लवर्णानि पत्राणि तत्सन्धीनू श्यामलेन च । रक्तेन रक्तवेष्मन्ती यदा पीतैव कर्णिका । केसराः पीतरक्ताः क्षुरस्थानि दलान्यपि । सन्धयः कृष्णवर्णाः स्युः सितेनाप्यसितेन वा । रक्तवेत् पीठभागांश्च पादाः क्षुरस्थप्रभाः । मात्राणि तस्य शुक्लानि वीथीषु चतसृष्वपि । आलिखेत् कल्पलतिकादलपुष्पफलान्विताः । वर्णैर्नानाविधैश्चित्राः सर्वदृष्टिमनोहराः । द्वाराणि श्वेतवर्णानि शोभा रक्ताः समीरिताः । उपशोभाः पीतवर्णा कोणान्यसितभानि च । तिस्रो रेखा बहिः काद्याः सितरक्तासिताः क्रमात् । मण्डलं सर्वतोभद्रमेतत् साधारणं स्मृतम् । अपरञ्च "चतुरस्रं भुवं भित्त्वा दिग्भ्यो द्वादशधा बुधीः । पातयेत् तत्र खण्डानि कोष्ठानां दशमृते शतम् । चतुश्चत्वारिंशदाढ्यं पश्चात् षट्त्रिंशताऽन्वितम् । कोष्ठैः प्रकल्पयेत् पीठं षड्भक्त्वा नैवात्र वीथिकाः । द्वारशोभे तथा पूर्वसदृशोभा न दृश्यते । अवशिष्टैः पदैः कुर्यात् षड्भिः कोष्ठानि तत्त्ववित् । विदध्यात् पूर्ववत् शेषमेवं वा मण्डलं स्मृतम् । "चतुरस्रे चतुःषष्टिं पदान्यारचयेत् बुधीः । पदैश्चतुर्भिः पद्मं स्यात् मध्ये तत् पूरिताः पुनः । वीथीश्चतस्रः कुर्वीत मण्डलान्तरशालिकाः । दिग्गतेषु चतुष्कोषु पङ्क्तीनि समालिखेत् । विदिग्गतचतुष्कांश्च भित्त्वा षोढ़धा बुधीः । मार्जयेत् स्वस्तिकाकारं श्वेतपीताद्यवर्णितैः" । मार्जनमाह राघवभट्टधृतम् "विदिग्गतचतुष्कोष्ठान् भित्त्वा षोढ़धा बुधीः । वक्त्रादिकोष्ठसहितमधोर्ध्वमपि मार्जयेत् । रजोभिः पूरयेत्तानि स्वस्तिकानि शिवादितः । प्राक् प्रोक्तेनैव मार्गेण शेषमन्यत् समाचरेत् । नवनाभमिदं प्रोक्तं मण्डलं सर्वसिद्धिदम् । पञ्चाब्जमण्डलं प्रोक्तमेतत् स्वस्तिकवर्जितम् । दीक्षायां देवपूजायां मण्डलानां चतुष्टयम् । सर्वतन्त्रानुसारेण प्रोक्तं सर्वसमृद्धिदम्" ।

सर्वतोमुख न० सर्वतोमुखमस्य । १जले अमरः २आकाशे मेदि० ३शिवे ४ब्रह्मणि ५परमेश्वरे ६आत्मनि च पु० मेदि० ७ब्राह्मणे शब्दच० ८अग्नौ ९अग्नौ शब्दमा० । "सर्वतःपाणिपादान्तः सर्वतोऽक्षिशिरोमुखः । विश्वरूपो महानग्निः प्रथीतः सर्वकर्मसु" तिं० तस्य रूपेत्यादि तम् । [जलादौ] ।

सर्वत्र अव्य० सर्व-त्रल् । सर्वस्मिन् काले देशे सर्वासां दिशि

सर्वत्रग पु० सर्वत्र गच्छति गम-ड । १वायौ शब्दच० २सर्व-

त्रगामिनि त्रि० । [सर्वत्र गन्तरि त्रि० स्त्रियां ङीप् ।

सर्वत्रगामिन् पु० सर्वत्र गच्छति गम-णिनि । १वायौ २सर्व-

सर्वथा अव्य० सर्वप्रकारम् थाल् । १सर्वप्रकारे २सदृशे ३प्रतिज्ञायां ४हेतौ च शब्दर० ।

सर्वदम पु० सर्वान् दमयति दम-णिच्-अच् । सर्वदमने शाकुनले भरतभेदे हेमच० ।

सर्वदमन पु० सर्वान् दमयति दम-णिच्-ल्यु । १दुष्टनृपभेदे भरतभेदे त्रिका० । २सर्वदमनकर्त्तरि त्रि० ।

सर्वदर्शिन् पु० सर्वं समभावेन पश्यति दृश-णिनि । १बुद्धे २परमेश्वरे च । ३सकलद्रष्टरि त्रि० स्त्रियां ङीप् ।

सर्वदा अव्य० सर्वस्मिन् काले दाच् । सर्वस्मिन् काले रत्नमा० ।

सर्वदुःखक्षय पु० सर्वेषामाध्यात्मिकादिदैविकादिभौतिकानां दुःखानां क्षयः । आत्यन्तिकदुःखक्षयनिवृत्तौ मोक्षे हेमच० "अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः" सां० सू० "समानाधिकरणदुःखासमानकालीनत्वं दुःखध्वंसस्वरूपनिवृत्तेरात्यन्तिकत्वम् ।

सर्वदेवमुख पु० सर्वेषां देवानां मुखं यत्र । अग्नौ रत्नमा० ।

सर्वद्रव्यन् त्रि० सर्वमश्नुते पूजयति अशू-क्विप् वृद्ध्यागमः न लोपः । सर्वस्य पूजके । भवे सर्वद्रव्यश्च रत्नादि । गतत्वस्य नलोपे सर्वद्रव्य इत्येव सर्वगामिनि । भवे सर्वद्रोच इति भेदः ।

सर्वधुरावह त्रि० सर्वेषां धुरं वहति वह-अच् । सर्वभारवाहके वृषादौ अमरः ।

सर्वधुरीण त्रि० सर्वां धुरं वहति च । सकलभारवाहके वृषादौ अमरः ।

सर्वनाम पु० सर्वेषां नाम वाचकं संज्ञात्वेऽपि सुब्भा० न त्वम् । व्याकरणोक्ते कार्यविशेषार्थं कृतसंज्ञायुते सर्वादिशब्दभेदे "सर्वादीनि सर्वनामानि" पा० सर्वनामशब्दार्थेषु वक्तृबुद्धिविषयतावच्छेदकधर्मोपस्थितधर्मविशिष्टः ।

सर्वपूर्णत्व न० सर्वैः पूर्णत्वम् । सकलैः सामग्र्याम् त्रिका० ।

सर्वप्रहरणायुध पु० सर्वेषां प्रहरणानि सर्वाणि वा प्रहरणानि आयुधान्यस्य । विष्णौ "सर्वप्रहरणायुधः" विष्णुस० व्युत्पत्तिद्वयलाभात् नामद्वयम् तेन नामसहस्रपूर्त्तिः" भा० । [अस्त्रे त्रि० १वज्रौ पु० ।

सर्वभक्षा स्त्री सर्व-भक्ष-अच् टाप् । १जलायां हेमच० २सर्व-

सर्वमङ्गला स्त्री सर्वाणि मङ्गलान्यस्याः ५त० सर्वाणि मङ्गलानि देयत्वेनास्त्यस्याः अच् वा । दुर्गायाम् अमरः । "सर्वाणि हृदयस्थानि मङ्गलानि शुभानि च । ददाति

चेष्टितानृ लोके सा तेन सर्वमङ्गला" देवीपु० ४५ अ०।

सर्वमय त्रि० सर्वात्मकः मयट्। १सर्वात्मके २परमेश्वरे पु०।

सर्वमूल्य न० द्वन्द्व०। कपर्दके त्रिका०।

सर्वमूषक पु०सर्वं सुष्णाति सुष-वुन् पृषो० कालेऽपि ह्रस्वश्च०।

सर्वरस पु० सर्वोरसमयः। (धुना) १शालरसे अमरः ७त०। २ओषधिवाद्ये भेदि०। ३पचिष्ठते शब्दच०। कर्म०। ४जलधौ रसे। सर्वाणि रसयति रस-णिच्-अच्। ५परमेश्वरे मेदिन्यादयश्च तस्य सर्वत आनन्दमयत्वात् तथात्वम्।

सर्वरसोत्तम पु० सर्वेषु रसेषु उत्तमः। जलधौ रसे ह्रस्वश्च०।

सर्वरात्र पु० सर्वा रात्रिः अच् समा०। "रात्राह्नाहाः पुंसीति" पा०पुंस्त्वम्। सकलरात्रौ त्रि०कौ०। [दिवसम्।

सर्वरी स्त्री सृ-वनिप् ङीष् र च। रात्रौ धरणि० ताबव्या-

सर्वर्त्तुपरिवर्त्त पु० सर्वर्तूनां परिवर्त्तो यत्र। वत्सरे जटा०

सर्वला ला) स्त्री सर्वं लाति ला-क वा गौरा० ङीष्। लोमराशौ अमरः।

सर्वलिङ्गिन् पु० सर्वेषां लिङ्गानि सन्त्यस्य इनि। वेद-विरुद्धाचारिणां बौद्धादीनां लिङ्गवतसु पाषण्डेषु अमरः

सर्वलोह पु० सर्वः लोहमयोऽवयवो यस्य। लौहमये बाणे ह्रस्वश्च०। [गाम्भारीवृक्षे जटा०।

सर्ववर्णिका स्त्री सर्वं वर्णयति वर्ण-ण्वुल् अत इत्त्वम्।

सर्वविद् पु० सर्वं वेत्ति विद-क्विप्। १परमेश्वरे २सर्वज्ञातरि त्रि०।

सर्ववेद पु० सर्वौ वेदान् अधीते उक्था० ठक्। "सर्वादेः सादेश लुक् वक्तव्यः" वार्त्ति० तस्य लुक्। १सर्ववेदाध्ययनकर्त्तरि। सर्वं वेत्ति विद-अण् उप०। २सर्वज्ञे त्रि०।

सर्ववेदस् पु० सर्वाणि धनानि वेदयते लम्भयति याज्ञाय दक्षिणार्थं ददाति विद-लाभे णिच्-असि। सर्वस्व-दक्षिणकविश्वजिन्नामकादियागकर्त्तरि अमरः।

सर्ववेदस न०सर्वं वेदः सत्ते विद्यमानं धनं नि० बहुव्री०। सर्वस्वे सत्ते विद्यमाने सर्वधने तच्च विश्वजिद्यागे दक्षिणात्वेन विहितम्। "सहस्रं सर्ववेदसं विश्वजितः" कात्या०श्रौ० २२।१।६ सहस्रसर्ववेदसयोर्विश्वजिति विकल्पः। सर्ववेदसपदे ददत्युक्ते। "ज्येष्ठं पुत्रमपि भक्तं भूमिगूढधनं योगाविशेषात् सर्वेषामं" स्मृ०। "ज्येष्ठपुत्रस्य विभागं दत्त्वा भूमिगूढधनं ददाति कृतयत्नं सर्वमनुज्ञाप्यां हि भूत्वा योगोऽविशिष्टः धारणाऽऽक्रमणाद्वारेण, भूतस्य च गुप्तभोपनतेति" कर्क० "भूमेरावाहारणशयनासनचङ्क्रमणादिसम्बन्धः सर्वेषामविशिष्टः यः गूढो धर्मार्थं सेवां कुरुते स सर्वेषामविशिष्ट एव संपद्यते। "गूढदानं वा दर्शनाविरोधाख्यात्" स्मृ० वाशब्दः पक्षव्याहत्तौ गूढस्य दानं च भवति ह्यत्र हि गूढस्य दानं पुरुषमेधे "सप्तरुषं प्राची दिग्धात्रिति" न च विरोधो गर्भदासस्य। तस्माद्गूढो दीयत एव अनेन च न्यायेन भूमेरप्यदेशदानेनैव न विरोधः "परिमाणे सर्वमविशेषात्" स्मृ०। सर्वस्वपरिमाणे यस्य यावत् स्वं तत्सर्वं सत्यते सर्वं वेदः सर्ववेदसमिति तेन प्रागपि सहस्रात् सर्ववेदसं भवति एवं प्राप्ते आह। सर्वस्वपरिमाणे अपेक्षिते सर्वस्वं यस्य यावद्धनं सत्ये सुवर्णादि तत्सर्वं देयम् कुतः अविशेषात् न च सर्वस्वं ददातीति (यत्न) वाक्यशेषः श्रुतः येन सहस्राभ्यूनमतिरिक्तं वेति विशेष आश्रीयते। "अधिकं वा प्रलम्भनुपपत्तेः स्मृ०। "अधिकं वा सहस्रात् सर्ववेदसं सङ्गोत्तव्यम्। प्रलम्भ हि सर्ववेदसं सहस्रेणानुपपन्नं दर्शयति कोऽर्थेति मनुष्यः सर्ववेदसं दातुं तस्मात् सहस्रं देयमिति एतच्च सहस्रादधिकं उपपद्यते नेतरथेति एवं तावदत्र (विद्वांसोति) सहस्रादधिकं सर्ववेदसमित्युक्तम्" कर्कः। "सर्वस्व प्रतिनिधिर्वा" स्मृ० "दीयते अप्रसिद्धत्वादुच्यते" कर्क० "धेन्वनडुत्सारधान्यपल्यदासमिथुनमङ्गानसारोहणविमितशयनानि" स्मृ०। "धेन्वादीनि दासमिथुनान्तानि प्रसिद्धानि सङ्गानसोपयोगिकं द्रव्यं ताम्रकर्वादिसङ्गानसशब्देनोच्यते आरोहणं च युग्यं विमितशयने प्रसिद्धे एव। धेनुः प्रसिद्धा अनड्वांश्चोक्षः सीरं हलम् धान्यं गोधूमादि-पल्यं पलादिमानाढ्यम्। दासमिथुनं दासीदासौ सङ्गानसं ताम्रकर्वादिदोहकरणम् आरोहणं हस्त्यश्वादि विमितं सप्तहस्तं शयनं खट्वादि एतानि ददात्" कर्कः।

सर्ववेदिन् पु० सर्वेषां वेदो धार्यत्वेनास्त्यस्य इनि। भटे ह्रस्वश्च०। [२सर्वज्ञोचिते त्रि०।

सर्वसङ्गत पु० सर्वं सङ्गतमुचितं यस्य। १बहिधान्ये शब्दच०

सर्वसंसर्गलवण न० सर्वसंसर्गेण जातं लवणम्। औषरके लवणे राजनि०।

सर्वसन्नहन न० सर्वेषां सन्नहनं युद्धार्थं सज्जीकरणं यस्य। चतुरङ्गसैन्यसज्जीकरणेन युद्धयात्रायाम् अमरः।

सर्वसह पु० सर्वं सहते अच्। १गुग्गुलौ रत्नमा० २सर्वसहिष्णौ त्रि०। [२सकलार्थसाधने त्रि०।

सर्वसिद्धि पु० सर्वेषां सिद्धिरस्मात्। १श्रीफले शब्दच०।

सर्वस्व न० कर्म०। सकलधने सर्ववेदसशब्दे दृश्यम्।

सर्वस्वदक्षिण पु० सर्वं दक्षिणा यत्र । विश्वजिन्नामकयागभेदे सर्वेदसशब्दे दृश्यम् । [२सकलहितहेतौ त्रि० ।

सर्वहित न० सर्वेषां हितम् । १मरिचे राजनि० ५ व० ।

सर्वाङ्गसुन्दर पु० औषधभेदे "रसगन्धजतुल्यांशो द्वौ भागौ टङ्कणस्य च । मौक्तिकं विद्रुमं शङ्खभवनीयं समांशतः । हेमभस्मार्द्धभागञ्च सर्वं चक्रे निधापयेत् । निम्बूद्रवस्य योगेन पिष्टिकां कारयेद्भिषक् । पश्चात् गजपुटं दद्यात् शीतलञ्च समुद्धरेत् । हेमभस्मसमं तोक्ष्णं तीक्ष्णार्द्धं दरदो मतः । एकीकृत्य समस्तानि चूर्णानि कारयेत् । ततः पूजां प्रकुर्वीत भक्षयेत् दिवसे शुभे । सर्वाङ्गसुन्दरो ह्येष रोगराजनिकृन्तनः । वातपित्तज्वरे घोरे सन्निपाते सुदारुणे । अर्शःसु ग्रहणीरोगे मेहे गुल्मे भगन्दरे । निहन्ति वातजान् रोगान् ह्यौषधांश्च विशेषतः । पिप्पलीमधुसंयुक्तं घृतयुक्तमथापि वा । भक्षयेत् पञ्चमाषेण सितया खादुनेक्षुवा । गुडूचीरस सहितं प्रमेहे च विशेषतः । रसरत्नाकरप्रोक्तः सिद्धयोगो रसोत्तमः । राजिकाहिङ्गुतैलाक्तं लवणाम्लं विवर्जयेत्" भैषज्यरत्नाव० । अत्र हेमभस्मनः सर्वद्रव्यार्द्धत्वमिति मतान्तरम् ।

सर्वाङ्गीण त्रि० सर्वाण्यङ्गानि व्याप्नोति ख । सर्वावयवव्यापके "सर्वाङ्गीणे तरुत्वचे" इति भट्टिः ।

सर्वाणी स्त्री सर्वेभ्य आनयति मोक्षं या-नी-ड पूर्वपदादितिपत्वम् । दुर्गायाम् "सर्वान् मोक्षान् प्रापयति अन्न स्थ्युत्तरादिकम् । चराचरांश्च विश्वस्थान् सर्वाणी तेन कीर्त्तिता" ब्रह्मवै० प्र० ५४अ० तन्निरुक्तिः ।

सर्वानुकारिणी स्त्री सर्वमनुकरोति अनु+कृ-णिनि ङीप् । १आत्मपत्न्यां राजनि० २सकलसदृशे त्रि० स्त्रियां ङीप् ।

सर्वानुभूति स्त्री सर्वेषामनुभूतिर्यत्र । १अतत्त्विकतावादे अमरः २तत्त्वज्ञानिनि त्रि० ३जिनभेदे हेमच० ।

सर्वान्नभोजिन् त्रि० सर्वेषामन्नं सर्वाण्यन्नानि वा भुङ्क्ते भक्ष-णिनि । सर्वान्नभक्षके अमरः । [भक्षके अमरः

सर्वान्नीन त्रि० सर्वेषामन्नं सर्वमन्नं वा भक्षके ख । सर्वान्न

सर्वाभिसन्धिन् पु० सर्वत्र आचरणे अभिसन्धास्यस्य इनि । १सर्वत्राभिसन्धिमति छले २छद्मतापसे त्रिका० ।

सर्वाभिसार पु० अभिक्रियते यत्र अभि+कृ-भावे घञ् ह्रस्व० । चतुरङ्गसैन्यसङ्घेन युद्धयात्रायाम्भेदे ।

सर्वार्थसिद्ध पु० सर्वेषु सर्वेषु सिद्धः । १बुद्धे अमरः ह्रस्व० २अष्टसाभीष्टसिद्धियुते त्रि० ।

सर्वार्थानुसाधिनी स्त्री "धर्मादीन् चिन्तितान् यस्मात् सर्वलोकेषु यच्छति । ततो देवी समाख्याता सा सर्वार्थानुसाधिनी" देवीपु० ४५अ० निरुक्तायां दुर्गायाम् ।

सर्वावसर पु० सर्वेषां कर्मणामवसरोऽपकरणं यत्र । अङ्गराजे त्रिका० । [२सकलावसरयुते त्रि० ।

सर्वास्त्रा स्त्री सर्वाणि अस्त्राणि यस्याः । १देवीभेदे हेमच० ।

सर्वाह्ण पु० सर्वमह्नः टच्समा० ह्नादेशः पत्वम् । सकलदिने

सर्वौघ पु० सर्वेषां चतुरङ्गसैन्यानामोघो वृन्दमभिसारे यत्र । यात्राभूतसर्वसैन्याभिसारे अमरः कर्म० २सर्वजनसमेते मेदि० ।

सर्वौषधि स्त्री कर्म० । "कृष्णमांसीहरिद्राभिर्वचाशैलेयचन्दनैः । सुराचन्द्रकर्पूरैर्युक्तः सर्वौषधिः स्मृता रत्नमुक्ते कृष्णादिद्रव्यवर्गे राजनि० । हेमाद्रौ छन्दोगपरिशिष्टे "कृष्णं मांसी हरिद्रे द्वे सुराशैलेयचन्दनम् । वचा चन्द्रकस्तुलस्य सर्वौषध्यो दश स्मृता" ता एवोक्ताः । शब्दचन्द्रिकायामेता एव सर्वौषधिशब्देनोक्ताः ।

सर्वौषधिगण पु० सर्वासामोषधीनां गणः । "सुरा मांसी वचा कुष्ठं शैलेयं रजनीद्वयम् । शठीचन्द्रकस्तुलस्य सर्वौषधिगणः स्मृतः" शब्दच० उक्ते द्रव्यगणे ।

सर्षप पु० सृ-अप सुट् च । (सरिषा) १धान्यभेदे अमरः । "सर्षपस्तु रसे पाके कटुर्हृद्यः समक्षिकः । तीक्ष्णोष्णः कफवातघ्नो रक्तपित्तास्रविद्रधिनः । रक्षाकरोऽग्नेत् कण्डूकुष्ठकोठक्रिमिप्रदान् । यथा रक्तसखा गौरः किन्तु गौरोवरो मतः" तच्छाकगुणाः "कटुकं सार्षपं शाकं बहुभूतमलं गुरु । अस्रपाकं विदाहि स्यादुष्णं कफपित्तदोषलृत् । सक्षारं लवणं तीक्ष्णं स्वादु शाकेषु निन्दितम् । तीक्ष्णोष्णं सार्षपं नालं वातश्लेष्मविषापहम् । कण्डूकृमिकरं दद्रुकुष्ठघ्नं रुचिकारकम्" भावप्र० । "आत्मानमरणे यानो यस्मात् रक्षते रजः । तेनैतन्मिभैषज्यैश्चिक्ष्या सिक्ष्या षडभिश्च सर्षपः" शब्दच० उक्ते १मानभेदे । २खड्गधिकायां स्त्री त्रिका० ङीप् ।

सर्षपतैल न० सर्षपस्य स्नेहः सर्षप+स्नेहार्थे-तैलच् । सर्षपस्नेहरूपे तैलभेदे "सर्षपतैलं तिक्तं कटुकं वातकफविकारघ्नम् । पित्तासृदोषदं क्रिमिकुष्ठघ्नं तिक्तव्रणघ्नञ्च" राजनि० ।

सल न० सल-अच् । जले भरतः ।

सलिल न० सल-इलच् । १जले अमरः । तद्वैशिष्ट्ये फलं जलवैशिष्ट्यशब्दे २०७२पृ० दृश्यम् । ख्यो०उक्ते २जलदेवताभेदे उत्तराषाढानक्षत्रे सप्तविंशे २चतुर्थक्षणे च

सलिलकुन्तल पु० सलिलस्य कुन्तल इव । शैवाले त्रिका० ।

सलिलज न० सलिले जायते जन-ड । १पद्मे राजनि० । २जलजातमात्रे त्रि० ।

सलिलनिलय पु० सलिलं निलयो यस्य । १जलचरे २मौनकर्कटराशौ च "सलिलनिलयाभिज्ञा यस्याः सरोरुह यज्ञातयः" ज्योत० ।

सलिलराशि पु० ६त० । समुद्रे सलिलनिध्यादयोऽत्र ।

सलिलेन्धन पु० सलिलमिन्धनमिव दाह्यं यस्य । बडवानले त्रिका० ।

सल्लकी स्त्री शल-कृ लुकच पृषो० शल्ल इः गौरा० ङीष् । शल्लक्यां गजभक्ष्यायाम् अमरे पाठान्तरम् ।

सव पु० सूयते सु-अच् । १यज्ञे अमरः । २स्नाने मेदि० । अच् । ४सूर्ये ४अर्कवृक्षे ५जले न० जटा० ।

सवन न०सु-ल्यु-वा ल्युट् । १यज्ञाङ्गे २स्नाने अमरः । सोमनिष्पीडने ४अभिषवे अमरः ५सोमपाने भरतः । ६वधे ७प्रसवे च दमयन्तस्नाने । यज्ञियसवनादि च त्रीणि प्रातर्मध्यन्दिनतृतीयभेदात् । "इषीमि निर्वपत्याग्नेयमैन्द्रं वैश्वदेवं चरुं सवनकालेष्वेकैकम्" कात्या० श्रौ० २४।७।६। सू० "कृतएतत् आग्नेयं प्रातःसवनम्, ऐन्द्रं माध्यन्दिनसवनम्, वैश्वदेवं तृतीयसवनमित्यर्थवादात्" । "प्रातर्मध्यन्दिनापराह्णेषु एकैकं हविर्निर्वपति" कर्कः ।

सवयस् त्रि०समानं वयो यस्य समानस्य सः । वयस्ये अमरः "सवयोभिरन्वितः" इति रघुः ।

सवर्ण पु० समानोवर्णो यस्य । १तुल्यरूपे हेमच० २एकजात्याश्रये यथा विप्रस्य विप्रजातिः क्षत्रियस्य क्षत्रियजातिः "तुल्यास्यप्रयत्नं सवर्णमिति" पा० सूत्रे स्थानप्रयत्नाभ्यां शब्दे वर्णे च यथा वकारस्य स्थानेन तुल्यो मकारादिः, प्रयत्नसाम्येन तकारस्य चकारादिः, जकारस्य शकारः शकारस्य षकारः । हकारस्य वर्ग्यचतुर्थौ वर्णौ । सह वर्णेन । ३वर्णसहिते त्रि० ।

सवर्णन न० सवर्ण+ज्ञतौ णिच्-भावे ल्युट् । तुल्यरूपता सम्पादने "कंसवर्णनं स्यात्" जोता० ।

सवहा स्त्री सह वहेन । स्त्रिवतायां भरतः ।

सवासस् त्रि० सह वाससा । १वस्त्रत्यागविलम्बस्थाने वेगवति "संवासा अनमाद्भवेत्" स्मृतिः ।

सविकल्पक न० सह-विकल्पेन कप् । वेदान्तोक्ते ज्ञातृज्ञेयभेदादिकल्पनासहिते १समाधिभेदे न्यायोक्ते एकस्मिन् धर्मिण्यपरसंसर्गावगाहिनि २ज्ञानभेदे च पात० चक्रे समाख्याते १समाधिभेदे असम्प्रज्ञातशब्दे ४७० पृ० दृश्यम् । निर्विकल्पकशब्दे ४१०२पृ० दृश्यम् ।

सविकाश त्रि० सह विकाशेन । १प्रफुल्ले विकसिते २सहर्षे च "जगलि यस्यां सविकाशमासत" माघः ।

सविचारा स्त्री पात० चक्रे समापत्तिरूपसमाधिभेदे निर्विचारशब्दे ४१०१ पृ० दृश्यम् ।

सवितर्का स्त्री पात० चक्रे समापत्तिरूपसमाधिभेदे "तत्र शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का समापत्तिः" सू० "तद्यथा गौरिति शब्दो गौरित्यर्थो गौरिति ज्ञानमित्यविभागेन विभक्तानामपि यत्रैक्यं इव विभक्तमाभासते सा शब्दधर्मा अन्यो ऽर्थधर्मा अन्यो विज्ञानधर्मा इत्येतेषां विभक्तः पन्थाः, तत्र समापद्यस्य योगिनोयोगबलेन समाधिप्रज्ञायां समारूढः स चेत् शब्दज्ञानविकल्पानुविद्ध एवावर्त्तते सा सङ्कीर्णा समापत्तिः सवितर्केत्युच्यते । यदा पुनः शब्दसङ्केतस्मृतिपरिशुद्धौ श्रुतानुमानज्ञानविकल्पशून्यायां समाधिप्रज्ञायां स्वरूपमात्रेणावस्थितोऽर्थस्तत्स्वरूपाकारमात्रतयैवावभासते सा च निर्वितर्का समापत्तिः तत्र योगिनां परं प्रत्यक्षं, तच्च श्रुतानुमानयोर्बीजं ततः श्रुतानुमाने प्रभवतः । न च श्रुतानुमानज्ञानसदृशं तद्दर्शनं तस्मात् सङ्कीर्णं प्रमाणान्तरेण योगिनो निर्वितर्कसमाधिजं दर्शनमिति" भा० ।

सविट् पु० सु-क्विप् । १जगत्सृष्टरि परमेश्वरे "तत्सवितुर्वरेण्यमि"ति श्रुतिः । २सूर्ये ३अर्कवृक्षे अमरः । ४तद्देवताके कृत्तिकानक्षत्रे ज्यो० । ५मातरि स्त्री हेमच० ङीष् । सवितरिदं य सवितृत्व तत्सम्बन्धिनि त्रि० । स देवताऽस्य अण् । सावित्र तद्देवताकयज्ञादौ त्रि० स्त्रियां ङीष् ।

सविध त्रि० सह विध्यति विध-क सहस्य सः । १निकटे अमरः "सविधेऽपि न लक्ष्मसाक्षिणी" नैषधम् । सह विधया । २प्रकारयुते ३विधानयुक्ते च त्रि० ।

सविस्मय त्रि० सह विस्मयेन । विस्मयान्विते हारा० ।

सवीज पु० पात० चक्रे समाधिभेदे "तावेव सवीजः समाधिः" सू० "तावेतौ समापत्तयो बहिरङ्गं बीजमुपादाय इति समाधिरपि सबीजः तत्र स्थूलेऽर्थे सवितर्का निर्वितर्का सूक्ष्मेऽर्थे सविचारनिर्विचारे इति चतस्रो यथासंख्यातः समाधिरिति" भा० । [२वेशान्विते धरणिः ।

सवेश त्रि० विशन्ति वेशोदेशं सह वेशेन । १निकटे अमरः

सव्य त्रि॰ षू-प्रेरणे यत्। १वामे २दक्षिणे च अमरः। २प्रतिकूले ३सच॰ ४विष्णौ शब्दमा॰।

सव्यभिचार पु॰ सह व्यभिचारेण सहस्य सः। अनैकान्तिके दुष्टहेतुभेदे तल्लक्षणं तु "अनैकान्तिकः सव्यभिचारः" गौ॰सू॰ "व्यभिचार एकत्राव्यवस्था सह व्यभिचारेण वर्त्तते इति सव्यभिचारः निदर्शनं नित्यः शब्दोऽस्पर्शत्वात् वा॰मा॰। तत्त्वन्तु साध्यवन्नावृत्तित्वन्यत्वे सति साध्याभाववन्नावृत्तित्वन्यत्वम् चिन्ता॰। सव्यभिचारग्रन्थदीधित्यादौ दृश्यम्।

सव्यसाचिन् पु॰ सव्येन वामेनापि सचति सन्दधाति बाणं सच-णिनि। अर्जुने हेमच॰ "उभौ मे दक्षिणौ पाणी गाण्डीवस्य विकर्षणे। तेन देवमनुष्येषु सव्यसाचीति मां विदुः" भा॰वि॰ ४४अ॰।

सव्येष्ठ पु॰ सव्ये तिष्ठति स्था-क षत्वम्। सारथौ हेमा॰। [सारथौ अमरः।

सव्येष्ठु पु॰ सव्ये तिष्ठति स्था-ऋन् किञ्च षत्वम्। सारथौ

सशस्या स्त्री सह शस्येन। १नागदन्त्यां रत्नमा॰ २शस्ययुक्ते त्रि॰। [त्रि॰ "न सस्येषु सर्जेच्छिंति मनुः।

ससत्वा स्त्री सह सत्वेन। १गर्भवत्यां स्त्रियां २प्राणियुक्ते

स(श)सन न॰स(श)स-ल्युट्। यज्ञार्थं पशुहनने अमरः

सस्य न॰सस-यत्। १वृक्षादीनां फले अमरः २क्षेत्रगते धान्ये च हेमच॰ "सस्यं क्षेत्रं गतं प्रोक्तम्" स्मृतिः। "सस्यन्तु स्टङ्गागतम्" याज्ञवल्क्यः तालव्यादिरयमित्येके। ३शस्ये ४गुणे विश्वः।

सस्यक पु॰ सस्यमिव कायति के-क। "सस्यको नारिकेलान्तःसस्याभो मणिषड्गयोः" मेदि॰ उक्ते १मणिभेदे २खड्गे च।

सस्यमारिन् पु॰ सस्यं मारयति मृ-णिच् णिनि। १मूषके राजनि॰ २सस्यघातके त्रि॰। [अमरः।

सस्यसंवर पु॰ सस्यं संवृणोति सम्+वृ-अच्। धान्यवृक्षे

सस्यसंवरण पु॰ सस्यं संवृणोति सम्+वृ-ल्युट्। अन्यवर्णवृक्षे राजनि॰। [२वर्णयुक्ते त्रि॰।

सस्वेदा स्त्री सह स्वेदेन सहस्य सः। १दूषितकन्यायां शब्दर॰

सह अव्य॰ सह-अच्। १साकल्ये अमरः २साकल्ये ३योगपद्ये ४विद्यमानत्वे ५सङ्गतौ ६सम्बन्धे मेदि॰। ८सामर्थ्ये शब्दमा॰। सहशब्दार्थस्तु समभिव्याहृतक्रियाकालः क्रियाकालीनक्रिया वा। तत्र यौगपद्यक्रियान्वयिनि तृतीया। पुत्रेण सहागता पिता।

सह पु॰ सहते सह-अच्। १अयनमासे २मासादिषड्विधौ त्रि॰ हेमच॰ ३गन्धवहे ४वले पु॰न॰ मेदि॰।

सहकार पु॰ सह युगपत् किरति सौरभम् दूरात् कृ-अण्। अतिदूरगामिसौरभान्विते १आम्रे अमरः। भावे घञ्। २सहकर्मकरणे पु॰।

सहकारिन् त्रि॰ सह समूय करोति कार्य्यं कृ-णिनि। हेतुभेदे स्वभिन्ने स्वकार्य्यकारके हेतौ। [हेतौ च

सहगमन न॰सह+गम-ल्युट्। १पत्यावसृतपत्न्यामरणे २स-

सहचर पु॰ सह चरति चर-अच्। १पौतभिक्षष्टायां २नीलभिक्षष्टायाञ्च रत्नमा॰। ३वयस्ये ४प्रतिबन्धके ५भिक्षष्टायां हेमच॰। ६सङ्घाते ७बहुचरे त्रि॰ मेदि॰ "सहचरमधुकृत्तत्सचूताङ्कुराक्षः" कुमारः। स्त्रियां ङीप्।

सहचरी स्त्री सह चरति चर-ट ङीप्। १पौतभिक्षष्टायां २वल्लां जटा॰। सह चरति धर्मम् चर-ट ङीप्। धर्मपत्न्यां हेमच॰। [करणत्वविवक्षे।

सहचार पु॰ सह+चर-घञ्। सामानाधिकरण्ये तदधि॰

सहज पु॰ सह जायते जन-ड। १सहोदरे अमरः २निसर्गजे स्वभावसिद्धे च "सहजप्राकृतावपि" माघः। ३सहोत्थिते त्रि॰ मेदि॰ ज्योतिषोक्ते जन्मलग्नात् ३तृतीयस्थाने। तत्र भ्रातृः शुभादिचिन्तनात्तथात्वम्।

सहजमित्र न॰ सहजं स्वभावसिद्धम् मित्रम्। स्वभावतो मित्रे भागिनेयादौ मिता॰।

कतिचित् सहजमित्राणि शुक्रनी॰परि॰ उक्तानि यथा "केचित् स्वभावतोऽमित्राण्यपि सन्ति सर्वदा। माता मातृकुलं चैव पिता तत्पितरौ तथा। पितृपितृव्यालक्कन्या पत्नी तत्कुलमेव हि। पितृभावात्मभगिनी कन्यका सन्ततिस्तथा। प्रजापालो गुरुश्चैव मित्राणि सदशानि तु"। २विद्यादौ च "विद्या शौर्य्यञ्च दाक्ष्यं च वलं धैर्य्यञ्च पञ्चमम्। मित्राणि सहजान्याहुर्वर्त्तन्ति हि तैर्बुधाः" शुक्रनीतिपरिशिष्टम्।

सहजारि पु॰ सहजः स्वभावसिद्धः अरिः। यावत्स्वभातृपितृव्यपुत्रादौ मिता॰।

शुक्रनीतिपरिशिष्टे अन्येऽप्युक्ता यथा "स्वभावतो भवन्त्येतेऽरयो दुर्जन एव च। अपकारी पिता शत्रुर्माता स्त्री व्यभिचारिणी। आत्मपितृभ्रातरश्च तत्स्त्रीपुत्राश्च शत्रवः। क्षुधा चञ्चुः सपत्नी च ननान्दा यातरस्तथा। मूर्खः पुत्रः कुवैद्यश्चारक्षकश्च पतिः प्रभुः। चण्डचण्डा प्रजा शत्रुरदाता धनिकश्च

यः । दुष्टानां भूपतिः शत्रुः कुकटानां पतिव्रता । साधु-चक्षानां शत्रुः स्यात् मूर्खाणां बोधको रिपुः" ।

सहस्रकृत्व न० पञ्चमांशभेदे "छागादेर्मांसमूर्द्धादेः कृत्तितं खण्डितं पुनः । शुद्धमांसविधानेन पचेदेतत् सहस्रकृत्वम्" भावप्र० ।

सहदेव पु० सह दीव्यति दिव-अच् । २माद्रीसुते पाण्डवभेदे मेदि० २वत्सायां २टस्फोटजे ४धारिरोध्रौ च स्त्री मेदि० टाप् । ५सर्पाख्यां स्त्री मेदि० ङीष् ङीषन्तः । ६पीतदन्तोत्पलायां रत्नमा० ।

सहदेव्यादि पु० "सहदेवी बला चैव शतमूली शतावरी । कुमारी च गुडूची च सिंही व्याघ्री तथैव च" शब्द० पु० ३८अ० प्रतिष्ठाकृद्देवस्थानीयवृक्षगणभेदे ।

सहधर्मिणी स्त्री सह समानो वा धर्मोऽस्त्यस्या इनि । १भार्य्यायाम् अमरः "सहधर्मं चरेत्सार्द्धम्" इति मनूक्तेः सहधर्मचारित्वात् "अरीरार्द्धं स्मृता जाया पुण्यापुण्यफले समा" दाक्षमा० उक्तेश्च तस्याः पतिकृतधर्मफलभागित्वाच्च तथात्वम् ।

सहन न० सह-ल्युट् । १क्षमायां तितिक्षायां शोतोष्णादिद्वन्द्वधर्मसहने हेमच० । सह-ल्यु । २सहिष्णौ अमरः ३क्षमाशीले त्रि० मेदि० ।

सहपान न० सह पानम् । एकत्र मद्यादिपाने हेमच० । २तत्पाने अमरः । [शिका० ।

सहपांशुकिल पु० सह पांशुभिः किलति किल-क । वयस्ये

सहभाविन् त्रि० सह भवति भू-णिनि । सहार्थे स्त्रियां ङीप् । [अमरः ।

सहभोजन न० सह एकत्र भोजनम् । एकस्थानेऽन्नादौ

सहम न० नोक्ष०ता० उक्ते दिवारात्रिभेदेन परस्परं योगविलोमयुतपञ्चविधेषेषु युतेन लग्नादिलानीते पुष्यादि शुभादिचिन्तनस्थाने राशिभेदे तानि च पञ्चशत् तदानयनं तत्फलानि च तत्रोक्तानि यथा

"पुण्यं सूर्यन्नैनयशोऽथ मित्रं साध्ये कृते यत्र न योग उक्तः । कस्यापि तत्रैव युतं विलग्नं भाग्यात्ययमाया च समर्थना च । ज्ञाता ततो गौरवराज्यताता भाता सुतो लोवितमम्बु कर्म । मान्द्यं च मन्त्रयकजो परतः सभोक्ता भाग्यस्तु यत्नुसहमं त्रय यत्नकस्तु । खलोच मन्त्र परदेशधनान्यदारा स्वादन्यकर्म सवधिक त्रय का लेखिद्धिः । उद्दाहकृतिसन्नाशचन्द्राप्रीतिर्बलं तनुः । भाग्याव्यापारसहमे यानीवयतर्न रिपुः । मौर्ख्यौपावदरिद्रत्वं गुरुताम्बुपशाभिधम् । यत्नं दृष्टितैतानि पञ्चाग्रत सहमानि हि । सूर्योनचन्द्रान्वितमर्कि ३ सं रवीन्दुयुक्तं निशि पुण्यसंज्ञम् । शोध्यर्क्षशुद्ध्यन्तरमानराशे लग्नं न चेत् सैकमेतदुक्तम् । व्यत्यासमक्षात् गुरु२विद्ययोश्च संसाधनं पुण्यवियुक् सुरेज्यः । दिवा विलोमं निशि पूर्ववत्तु यशोभिधं तत् सहमं वदन्ति । पुण्यस्य गुरुसङ्गतस्यलेत् व्ययो निशि सिताश्रितं च तत् । सैकतात्तत्त्वदुक्तरीतितो मित्रवाचमसहम् जगुर्बुधाः । पुण्याद्धोमं शोधयेदुक्तरीत्या भाग्यात्यं ६ तत्सहमभाग्यहिबोधम् । एकं मन्दाष्टस्थं लग्नं विलोममाभाख्यं७ स्वादुक्तवच्छेषमूह्यम् । सामर्थ्यदमारात्तनुपं विशोध्य लग्नं विलोमं तनुपे कृजे तु । जीवाहिगेहे सततं पुरावत् आताऽर्किहीनात् गुरुतः सदोक्तः । दिने गुरोश्चन्द्रमपाच्च लग्नं रविं क्रमादर्कयुतं च देयौ । रीत्योक्तया गौरव१०मर्कभार्केरपाच्च वाचं निशि राज्यतातो११।१२ । माते१२न्दुतोऽपाच्च सितं विलोमं लग्नं सुतो१३ऽर्कनिशमिन्दुयोक्तात् । भाज्ञीवितारव्यं१४ गुरुभार्किनोऽस्थि वाचं निशोद्यं समसम्ववाम्बु१५ । कर्मे१७ क्षमाराद्यिशि वाचसख्यं रोगाख्य१८मिन्दुं ततुतः सदैव । स्वान्नत्रयो१९ऽस्मत्पमिन्दुतोऽस्थि वाचं निशोक्तं ततुपं सदार्कात् । कलि२० क्षमे२१स्तो गुरुतो विशुद्धे लग्ने विलोमं निशि पूर्वरीत्या । भाख्यं२२ दिने सौरिमपाच्च जीवात् वाचं निशि चन्द्र युते पुरावत् । दिवानिशं भाक्षयिनं विशोध्य लग्नाख्य२३मेतन्निशि लग्नकं२४ स्यात् । वाचं दिवैतत् खति२५रन्ध्रभार्कीन्दुं विशोध्योक्तवदार्कियोगात् । देवान्तराख्यं२६ नवमाहिशोध्य धर्मेश्वरं सन्ततशुद्धवत् स्यात् । सहर्निशं चित्तवर्थभाग्याहिशोध्य पूर्वोक्तवदर्कसंज्ञम्२७ । सिताद्यपार्कैश्चयान्यदाराख्यं२८ सदा प्राग्वदशान्यकर्म२९ । चन्द्राक्षनिं वाचमथो निशायां प्रागुद्वधिख्यं३० दिनलग्नकोक्त्या । मनेर्दिवार्कं निशि चन्द्रभार्कैर्विशोध्य सूर्येन्दुभनाथयोगात् । स्यात् कार्यसिद्धिः३१ सततं विशोध्य मन्दं सितात् स्यात् विवाहसंज्ञम्३२ । गुरोर्बुधं प्रोह्य भसंप्तिः३३वाचं निशीन्दुं शनितो विशोध्य । सहं त्रिपेदुक्तदिशा सदैव लग्नाधसख्या३४ऽऽरभपाच्च शुक्रात् । सख्या३५ सदा प्रोक्तदिशाच पुण्यं विद्याख्यतः प्रोह्य सदा पुरोक्त्या । प्रोक्ताख्य३६सञ्ज्ञे वसु३७वेदख०८ख३८ग्नै यथख३० लाभं समपाच्च भौमात् । यनिं विलोमं

निधि चन्द्रयोगात् व्यापार४१ खाराज्ञसमपाख्य यत्नत्। पानीयपातः४२ शशिनं विशोध्य सौरैर्विलोमं निधि पूर्ववत् स्यात्। भन्द्रं कुजात् प्रोह्य रिपु४३र्विलोमं राज्ञो भवेद्धौमविहीनपुण्यात्। शौर्यं४४ विलोमं निधि पूर्ववत् स्यादुपाय दर्व्यं४५ शनितो विशोध्य। वामं निधिं च तं तु विशोध्य पुण्यात् सवुग् विलोमं निधि तद्धरिद्रम्४६। सूर्योद्गतः सूर्यमपास्य नक्षं चन्द्रं तदुद्यात् सुखता४७ पुरोक्त्या। कर्कार्कतः शनिं प्रोह्य खाज्जलाख्या४८न्यथा निधि। पुण्याच्छनिं विशोध्यार्कि वामं निधिं तं वस्त्रनम्४९। चन्द्रं खितादपास्योक्तं सदा कन्याख्य५०सुक्रवत्। पुण्यादर्कमपास्यायं योगो हृष्टोऽन्यथा निधि। खनाधहीनं सकलं तदंशाः स्वीयोदयघ्ना विहृतास्त्रिघ्नया। ततस्तद्गपाको दिव-सैर्हि लब्धैः स्यात् तदायां तदसम्भवे वा। खलैर्युतं कथनि। क्रोड्रादितत्पदगतो यदि चन्मदर्शी दीर्घान्वितः सकलपो यदि नेक्षतेऽङ्कम्। नाशो बली रवि-शशिश्चितभेभदर्शी पूर्णस्तु चन्मपबलस्य विचारणेयम्। शुक्लश्रमीबलेनोनो न कर्मस्थानमाश्रितः। खबलोऽयं चन्मदर्शी बली खलेऽपि चेत् पदे। खस्वामिना शुभ खगैः सहितं च दृष्टं स्वामी बली च यदि तत्सकलस्य ऋद्धिः। यत्स्वामिना शुभखगैश्च न युक्तदृष्टं तत्सम्भवो न हि भवेदिति चिन्त्यमादौ। खकर्माधिपतिना युते क्षितं पापदृग्युतमथेत्यपि नैः। चन्द्रेऽपि विलयं प्रयाति तत् तेन जन्मनि पुरेदमीक्ष्यताम्। आदौ जन्मनि सर्वेषां सकलानां बलाबलम्। विस्तरात् चन्मपो ज्ञेयो तानि सर्वं विचारयेत्। सबले पुण्यसकले धर्म-सिद्धिर्धनागमः। शुभस्वामीक्षितयुते व्ययवे व्ययं विदुः। तस्मात् षडादिरिष्फस्थं धर्मभाग्यधनोद्भवम्। शुभस्वामिदृशा प्राप्ते सुखधर्मादिसम्भवम्। पापयुक् शुभदृष्टं चेद्शुभं प्राक् ततः शुभम्। शुभयुक्तं पापदृष्टमादौ शुभमतः परे। यत्स्वदृष्टे पुण्यसकले शुभं सो-ऽवदृष्टः शुभावहः। यनिर्देऽक्षिनं शुभो नेति पुण्यप्र-कादौ विचारयेत्। सुतौ षडादिरिष्फस्थमदृष्टे पाप-दृष्टं युतम्। पुण्यधर्मोत्थसौख्यन्नं पत्यौ दग्धे फलं तथा। सकलान्यखिलानीत्थं सुतौ दग्धे च चिन्तयेत्। मान्द्यारिकलिखलूनां व्ययवादादिशेत् फलम्। यशो-ऽभिधाने सकले खलेन युतेक्षिते सदयशसो विनाशः। पापार्जितस्वायशसोऽस्ति नाशो नष्टौजसि स्यात् कुल-कीर्त्तिनाशः। कार्यसिद्धिसकलं युतं शुभैर्दृष्टमूषधि-सकलं जयप्रदम्। सङ्करेऽथ शुभपापदृष्टियुक् क्षतो जय उदीरितो बुधैः। खलिसङ्ग मिश्रखगदृष्टसंयुतं यदि पाप-मूषधिसकलं कलेर्हरिम्। अथ तत्र सौम्यसहितावलो-किते जयमेति मिश्रदृशितः खलिश्चयौ। विवाहसङ्गा-धिपसौम्यदृष्टं युतं शुभैर्लग्नधिकं तदाग्निम्। कुर्यात्-तदा मिश्रसमेतदृष्टं कदाचय क्रूरखतीक्ष्णरैर्न। यात्रा तदीयच षड्दरिपुस्थविवर्जितः सौम्ययुतेक्षितच। खा-द्याच्छिताश्वाम्बरवाहनादिलाभः खलेचायुतितोऽतिदुः-खम्। मान्द्याधिपः पापयुतेक्षितच पापः स्वयं रोग-करो विचिन्त्यः। चेटिल्लयाभो सतिपेन सत्युक्तदा भवेद्धीनबलेऽतिकष्टात्। खस्वामिसौम्येक्षयभाजि-मान्द्ये नाशे सबीर्यंऽतिसुखन्यवर्ज्ये। रोगस्तदा नैव भवेद्विमिश्रं युतेक्षिते रुग्भयमस्ति किञ्चित्। सर्वस्थ शुभनाधदृष्टसहितं द्रव्यागमात् सौख्यदं पापैर्दृयुतं च विनविद्यं कथादयो पापयुक्। सदृष्टं च शुभैत्यगाव-सहितं पूर्वं हि तत्नाशनं पचादर्शसकलं च सुखं व्यया यतो व्ययदः। रिपुदृष्टा रिपोर्भीतस्तस्करादेर्धनक्षयः। मित्रदृष्टा मित्रयोगाद्धनमानौ यशः सुखम्। सत्-स्वामिदृष्टं युतमात्मजस्य नाशं सुखं यच्छति पुत्रसञ्ज। पापान्वितं सौम्यखगेत्यशाच्छं प्रागुदयदं पुत्रसुखाय पश्चात्। पापान्वितं क्रूरखतेश्वराक्षं नाशाय पुत्रस्य गतौजसीक्षे। सुतौ सुतेशः सकलेश्वरोऽन्दे पुत्रस्य सख्यै शुभमित्र-दृष्टः। पित्र्यं यदोचितयुतं पतिदृष्टयुक्तं तातस्य व-क्षति धनाम्बरमानसौख्यम्। पत्यौ गतौजसि मृतौ खलमूषरोफे नाशः पितुश्चरदृष्टे परदेशयानात्। शु-भेत्यशाके खलखेटयोगे गदप्रकोपः प्रथमं महान् स्यात्। पश्चात् सुखं विन्दति पूर्वभोग्यं नाशे सपान्मानयशो-भिवृद्धिः। बन्धाख्यसकलं युतेक्षितं स्वामिना शुभ-खगै सुखाप्तये। राजभौरवयशोवरप्रदः पापयोगखय-युते पदाद्भुतिः। शुभाशुभैर्दृयुतं खलैश्चेत् क्षतेत्यशाकं धनमानभङ्गम्। पूर्वं विधत्ते चरमे शुभेत्यशाके सुखं वाहनशास्त्रलाभम्। कर्मभावसकलाधिपः शुभैः स्वामिना मूषशिलो बलान्वितः। क्षेमवाजिगजभूमिलाभदः पापदृष्टियुतितोऽशुभप्रदः। दग्धा वक्राः कर्म-वैकल्यदास्ते युक्ता दृष्टाः शौरिणा ते विशेषात्। राज्य-भंशः कोणनाथश्च राजकर्मगो चेत् मूषरोफो खलेन। उपदेशा गुरुशीलं विद्या शास्त्रं स्मृतिः स्मृतिः। मोक्षो

जाद्यं वर्त्म सैन्धमङ्गं देहो जलं द्युतिः। धृतता मस्तके शत्वं गौरवं मानशालिता। नियङ्घातुपङ्क्तिविभूराज-चिह्नादिलाञ्छनम्। साङ्गात्यं मन्त्रगाम्भीर्यं धृतिर्बुद्ध्यादिशालिता। सामर्थ्यं देहजा शक्तिः शौर्यं तेजो विनिर्यये। शास्त्रेष्वोक्ता मतिर्धर्मे श्रद्धा, बन्धः परात्ययः। पानीयपतनं दृष्टिर्जलेऽवस्थाच्च मज्जनम्। व्याधिव्याधौ तापमान्द्ये सन्धिस्था बन्धवः स्मृताः। सत्यान्तं वचिरुक्तिरोधानं प्रसवः स्मृतः। दासत्वं परकर्मोक्तमन्यत् स्पष्टं स्वनामतः। निरूप्यापि यथायोगं कुलजातिस्वरूपतः। शुभयोगेक्षणात् सौख्यं पत्युर्नैर्यांतुसारतः। दारिद्र्यमृतिमान्द्यारिकक्षिप्तो विपर्ययः। प्रत्यक्षतोऽपि सङ्गमं विचार्यं प्रष्टुरिच्छया। सर्वेषामुपयोगोऽस्य चिरं वक्ष्यन्ति वक्तनाः"।

सहमरण न॰ सह मृतेन पत्या सह एकचितारोहणेन मरणम्। मृतपतिचितारोहणेन तत्सहितमरणे शु॰त॰ "ऋङ्गिराः "मृते भर्त्तरि या नारी समारोहेद्धुताशनम्। सावन्धतीसमाचारा स्वर्गलोके महीयते। तिस्रः कोट्योऽर्द्धकोटी च यानि लोमानि मानवे। तावत्यब्दानि सा स्वर्गे भर्त्तारं यावतुगच्छति। व्याघ्री यथाक्षं वलाद्धरते विजात्। तद्वद् भर्त्तारमादाय तेनैव सह मोदते। मातरं पैतृकञ्चैव यत्र कन्या प्रदीयते। पुनाति त्रिकुलं नारी भर्त्तारं यावतुगच्छति। तत्र सा भर्त्तृपरमा परा परमलालसा। क्रीड़ते पतिना सार्द्धं यावदिन्द्राश्चतुर्दश"। "ब्रह्मघ्नो वा कृतघ्नो वा मित्रघ्नो वापि यो नरः। तं पुनाति च सा नारी इत्याङ्गिरसभाषितम्। साध्वीनामेव नारीणामग्निप्रपतनादृते। नान्यो धर्मो हि विज्ञेयो मृते भर्त्तरि कर्हिचित्" "या नारीत्यूदानात् सहमरणाभावपक्षोऽपि सूचितः नान्यो धर्म इति तु सहमरणस्तुत्यर्थम्। तथाच विष्णुः "मृते भर्त्तरि ब्रह्मचर्यं तदारोहणं वा" इति। ब्रह्मचर्यं मैथुनवर्जनं ताम्बूलादिवर्जनञ्च यथा प्रचेताः "ताम्बूलाभ्यञ्जनञ्चैव कांस्यपात्रे च भोजनम्। यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत्" स्मृतिः "एकाहारः सदा कार्य्यो न द्वितीयः कदाचन। पर्य्यङ्कशायिनी नारी विधवा पातयेत् पतिम्। गन्धद्रव्यञ्च सम्भोगो नैव कार्य्यस्तया पुनः। तर्पणं प्रत्यहं कार्य्यं भर्त्तुश्चित्तमोदकैः"। एतत्तु तर्पणं पुत्रपौत्राद्यभावविषयमिति मदनपारिजातः। "वैशाखे कार्त्तिके माघे विशेषनियमस्मरेत्। स्नानं दानं तीर्थयात्रां विष्णोर्नामग्रहं सदा"। तत्र साध्वीमाह हारीतः। "भर्त्तारं तु मृतं श्रुत्वा प्रोषितं मलिना कृशा। मृते म्रियेत या पत्यौ साध्वी ज्ञेया पतिव्रता" इति छन्दोगपरिशिष्टीयमिति कल्पतरुः। साध्वीप्रसादेन लोकधारणमयाह मत्स्यपु॰ "तस्मात् साध्व्यः स्त्रियः पूज्याः सततं देववज्जनैः। तासां राज्ञा प्रसादेन धार्य्यते च जगत्त्रयम्"। महाभारते "अवमत्य च याः पूर्वं पतिं दुष्टेन चेतसा। वर्त्तन्ते याश्च सततं भर्त्तृचां प्रतिकूलतः। भर्त्तुर्मरणं काले याः कुर्वन्ति तथाविधाः। कामात् क्रोधात् भयात् लोभात् सर्वाः पूता भवन्ति ताः"। अत्र चैहिकब्रह्मघ्नपतेर्दाहनिषेधात् जन्मान्तरीयतत्पापवत एव सहमरणेनोद्धारः" शु॰त॰। ब्रह्मपु॰। "देशान्तरस्थे पत्यौ साध्वी तत्पादुकाद्वयम्। निधायोरसि संशुद्धा प्रविशेज्ज्वातवेदसम्। ऋग्वेदवादात् साध्वी स्त्री न भवेदात्मघातिनी। तत्रज्ञाशौचे निवृत्ते तु श्राद्धं प्राप्नोति शास्त्रवत्"। ऋग्वेदवादात् "इमा नारीरविधवाः" इत्यादिमन्त्रात्। हरिहारदीपे "बालापत्याञ्च गर्भिण्यो वृद्धत्वक्षतयस्तथा। रजस्वला राजसुते! नारोहन्ति चितां शुभे!" राजसुते! इति सगरमातृः सम्बोधनम्। हरिस्मृतिः "बालसम्बर्द्धनं त्यक्त्वा बालापत्या न गच्छति। रजस्वला सूतिका च रक्षेद्गर्भञ्च गर्भिणी। एवमन्यतरेद्वेतु बालसम्बर्द्धनं त्यक्त्वा तदा तस्याधिकारः। व्यासः "दिनैकगम्यदेशस्था साध्वी चेत् कृतनिश्चया। न दहेत् स्वामिनं तस्या यावदागमनं भवेत्। भविष्यपुराणे "हतोवेऽग्निं यदन्याया मृते भर्त्तरि वै द्विजाः। तस्मात्तमरणार्थाय स्यापयेदेकरात्रकम्"। तस्य भर्त्तुः। तथा "एकां चितां समारुह्य भर्त्तारं यातुमुद्यता। तद्भर्त्तुर्वः क्रियाकर्त्री स तस्याश्च क्रियाचरेत्। एतच्च पिण्डदानम्"। "एवञ्च अङ्गिरोब्रह्मपुराणवचनालोचनया ब्राह्मणादिसकलभार्य्याणां स्वगतभर्तृगतफलविशेषार्थिनीनां गर्भवतीबालाऽपत्यादिव्यतिरिक्तानां सहमरणानुमरणयोरधिकारः न चात्र योगसिद्धान्तविरोधात्र समुचितफलसिद्धिरिति वाच्यम्। योगसिद्ध्यधिकरणे हि "यः पुत्रकामो यः पशुकाम" इत्यादिना यज्ञकर्तृत्वमुपक्रम्य "एकस्मै वा कामायान्ये यज्ञक्रतव आहिताग्नये सर्वेभ्यो दर्शपौर्णमासौ" इत्युक्तं तत्र तत्तद्विधि-

वाक्येषु निरपेक्षफलश्रुतेः कामनाभेदात्र कर्मैक्यं ततश्च सर्वशब्देन प्रकृतवाचिना निरपेक्षाणामेव पुत्रादिफलानां दर्शपौर्णमासप्रसम्बन्धेऽवगते प्रयोगभेदादेव भवतु तत्र तत्तत्फलसिद्धिः तथाच तदधिकरणसिद्धान्तसूत्रं "योगसिद्धिर्वा सर्वशेषत्वयोगित्वात्" जैमि०। अस्यार्थः वाशब्दः सिद्धान्तद्योतनार्थः सर्वेभ्यो दर्शपौर्णमासाविति त्रार्थस्य तत्तत्फलस्य योगेन प्रयोगभेदेन सिद्धिः सत्पत्त्ययोगित्वात् सर्वशब्दात्सर्वशेषाणां यः पुत्रकामो यः पशुकाम इत्यादावुत्पत्तिवाक्ये फलानां युगपदसम्बन्धात्। न चार्थस्य नानाविधस्य सत्पत्त्ययोगित्वात् महेन्द्रादितन्त्रोक्तवत्सादीनां एकदोत्पत्त्यसम्भवादिति व्याख्यानं युक्तमिति वाच्यं, तद्वागोत्सर्गादौ एकस्मात् कर्मणः क्रमिकनानाफलोक्तेः"। "तत्रेदापि सर्वनामपदाभावादार्थवादिकफलानि सङ्गतान्येव कामनाविषयो लाघवात् आर्थवादिकसङ्गतनानाफलविधयश्चविधिरप्येक एव कल्प्यते लाघवात् न हि निमित्तसाधारण्ये बाधकं विना नैमित्तिकानां पर्य्यायता सम्भवति यज्ञिसामीष्टे दाक्षप्रकाशयोः पर्य्यायतावादर्शनात्। तस्मात् सकृदनुष्ठितेन कर्मणा यद्येकं फलं निष्पाद्यते तथा बाधकं विना फलान्तरमपि विनिगमकाभावात्। ज्योतिष्टोमादीस्तु अतिदर्भावच्छिन्नफलश्रुतेः पृथगनुष्ठानादेव पृथक् फलसिद्धिः अन्यथा अष्टसंख्याद्यभिधानं व्यर्थं स्यात्। यत्र तु कर्मफले कालविशेषो नोक्तस्तत्रापि तत्कर्मसम्बादकाहरूपेण कालविशेषो बोध्यः "फलस्य कर्मनिष्पत्तेरेषां लोकवत् परिमाणतः फलविशेषः स्यादिति" न्यायात्। तेषां कर्मणां लोकवत् ज्ञप्यादिवत्। तथाच भवदेवभट्टाः "एकस्मै वा कामायान्ये यज्ञक्रतव आक्षिप्यन्ते" इति संकीर्त्य "सर्वेभ्योदर्शपौर्णमासाविति" प्रयोगभेदविधानाद्भवतु तत्र पृथगनुष्ठानसाध्यत्वं ब्रह्मवधप्रायश्चित्ते तथाभूतपृथगनुष्ठानसाध्यत्वप्रतिपादकवचनाभावात् अनेकफलानान्तु तन्त्रेण दशरात्रन्यायेन एककामनाविषयतासम्भवात् तन्त्रत्वमित्याहुः। हरिनाथोपाध्यायास्तु "उभोत्सर्गफलान्युद्दिश्यैतानि चार्थवादिकफलानि सङ्गतान्येव कामनाविषयः, पुरुषविशेषस्यत्वस्य कल्प्यत्वात् तथाच मिलितानामेककामनाविषयत्वकल्पना अग्नीषोमयोरिव देवतात्वे लाघवन्यायस्य विशिष्टत्वाद्" इत्याहुः। अथ वा "य एता रात्रीरधीयीत तस्य पितरो इतकुल्याः मधुकुल्याः वा क्षरन्ति" इत्यत्रापि वैकल्पिकान्वयोपगमे ज्ञातेष्टिनयभङ्गप्रसङ्गात् लाघवादिकल्पेऽदोषाच्च एकस्य कार्यस्य नियोज्याकाङ्क्षायां सकलार्थवादोपस्थितफलकामो यदेक एव नियोज्यः स्वीकृतस्तथात्रापीति। अथानुत्पन्नब्रह्महत्यादिपातकायाश्चतुष्टयरूपफलबाधात् तत्तत्कामनाविरहेणानधिकारः स्यादिति चेत् उक्तयुक्त्या सङ्गतिफलसिद्धेरनन्यथासिद्धार्थवादबलेन सन्दिग्धपापकामनया एवाधिकारो मङ्गलवत्। सति जन्मान्तरीये तादृशपातके संसर्गादिकृते वा तद्ध्वंसोऽपि जायते असति तु न तथा प्रतियोगिरूपसहकारिविरहात् निर्विघ्नं श्रुतमङ्गलवत् इ०त० रघु०। "सङ्गतिफलकर्मशेषोऽपि प्रत्येकफलकामनया कर्त्रा तत्तत्कामनासहकारेण प्रत्येकफलजनकत्वम्" विधिरहस्ये गदा०। [त्रि०।

सहरसा स्त्री सह रसेन। १सहपर्य्यां शब्दर० २रसान्विते

सहर्ष पु० सह हर्षेण समानो वा हर्षो यत्र। १अङ्गेन २हर्षे च त्रिका०। ३हर्षयुक्ते त्रि०।

सहस् न० सह–असि। १बले २ज्योतिषि च शब्दर० ३मार्गशीर्षे मासे पु० अमर०। "सहसा सहसा ज्ञातमेवमुरिति" माघः।

सहसा अव्य० सह+सो–डा। १हठादित्यर्थे अमरः। २अकस्मादित्यर्थे शब्दर०। ३क्षान्तवति त्रि० "न सहसा सहसा परिरभ्य तम्" माघः।

सहस्य पु० सहसे बलाय हितः यत्। पौषमासे अमरः।

सहस्र न० समानं हसति हस–र। १दशशतसङ्ख्यायां २बहुसंख्यायां ३तत्संख्यान्विते च हेमच०।

सहस्रसंख्याच केचित् पदार्थाः कविकल्प० यथा "शङ्खावल्लां शेषमूर्द्धा पद्मदलम् रविकरः कार्त्तवीर्य्यबाहुः वेदशाखा शक्रनयनम्"। "तत्र बहुसंख्यत्वे सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपाद्"श्रुतिः। बहुशीर्षादिपरत्वमत्र भाष्यादावुक्तम्। संख्यासंख्ययोः परत्वेऽस्य सर्वदैकवचनत्वम् यथा घटानां सहस्रं सहस्रं घटा इत्यादि आदृत्तौ तु द्वित्वादिकं यथा ह सहस्रे स्तोत्रिय सहस्राणीति "चत्वार्यांडुः सहस्राणि" मनुः।

सहस्रकर पु० सहस्रं कराः किरणा अस्य। १सूर्ये सहस्रकिरणादयोऽप्यत्र दृश्याः। २अर्कवृक्षे च।

सहस्रकाण्डा स्त्री सहस्रं सहस्राः काण्डा यस्याः। श्वेतदूर्वायां राजनि०।

सहस्रदंष्ट्र पुंस्त्री० सहस्रं बहुसंख्या दंष्ट्रा अस्य। पाठीनम-

यात्तं दद्यात् वत्सरेऽनि प्रेतः स्यादिति", "अत ऊर्द्धं सपिण्डीकरणात्तदादिनिमित्तादाद्यसंवत्सरादूर्द्धं" संवत्सरे संवत्सरे प्रतिवर्षं वत्सरेऽनि मृतस्यान्नेऽनि मृताय दद्यात्। व्यासः "प्रतिसंवत्सरं चैवमेकोद्दिष्टं मृताहनि"। एतेन सपिण्डीकरणाधर्वं आद्यसंवत्सरेऽपि मृताहे श्राद्धान्तरं कर्त्तव्यमिति मैथिलोक्तं हेयम्। अत्रमाद्र हेमाद्रिधृतवचनम् "पूर्वे संवत्सरे श्राद्धं षोडशं परिकीर्त्तितम्। तेनैव च सपिण्डत्वं तेनैवाद्यदिकमिष्यते"। अत्र पूर्वसंवत्सरक्रियमाणश्राद्धाद् ययोभयनिर्देशत्वापत्तेः सपिण्डीकरणश्राद्धादप्युभयनिर्देशो न पूर्वसंवत्सरे आवृत्तिकालान्तरम्। एवं षष्ठदश श्राद्धेऽप्युह्यम्। मत्स्यपु० "ततः प्रभृतिसंक्रान्तावुपरागादिषूच्यते। त्रिपिण्डमाचरेत् श्राद्धमेकोद्दिष्टं मृताहनि"। ततः प्रेतत्वपरिहारात्, त्रिपिण्डं त्वैपुरुषम्। निरूपपदमृताहशब्दः मृतसम्बन्धिमासपक्षतिथिविशेषपरः। उपपदात्तु क्वचित्तिथिविशेषमात्रपरः। यथा मृताहे प्रतिमासं कुर्यादित्यादौ। शङ्खः "सपिण्डीकरणादूर्द्धं यत्र यत्र प्रदीयते। तत्र तत्र त्रयं कुर्यात् वर्जयित्वा मृताहनि। कृष्णपक्षो यथो यस्य प्रेतपक्ष इव वा पुनः। सपिण्डीकरणादूर्द्धं तस्योक्तः पार्वणो विधिः" श्रा०त०। अधिकम् एकोद्दिष्टशब्दे ४५२१पृ० पार्वणशब्दे ४११८पृ० च दृश्यम्।

सांवादिक पु० सम्यग्वादायातं ठञ्। १नैयायिके जटा०। संवाददातरि च। [अमरः। २संशयविषये च।

सांशयिक त्रि० संशयमापन्नः ठञ्। १सन्दिग्धे संशययुक्ते

सांसारिक त्रि० संसाराय हितम तत्र भवो वा ठक्। १संसारभवे २संसारोपयोगिनि वा पदार्थे।

सांसिद्धिक त्रि०संसिद्धिः स्वभावसिद्धिः तया निर्वृत्तं ठञ्। स्वभावसिद्धे "सांसिद्धिकसदाकृतम्" भाषा०।

साकम् अव्य० सह अकति अक-असु सादेशः। १सार्द्धे २सहार्थे अमरः। तद्योगे तौल्यक्रियान्वयिनि तृतीया।

साकल्य न० सकलस्य भावः ष्यञ्। १समुदाये। स्वार्थे ष्यञ्। २सकले होमार्थं सिद्धितेषु इतिलादिद्रव्येषु च।

साकाङ्क्ष त्रि० सहाकाङ्क्षया सहस्य सः। १सापेक्षे शाब्दबोधोपयोग्याकाङ्क्षायुक्ते २पदभेदे च। [३सावयवे च।

साकार त्रि०सह आकारेण मूर्त्या। १मूर्त्तिविशिष्टे देवादौ

साकरण्ड पु० सकरण्ड एव स्वार्थे अण्। सकरण्डवृक्षे (पनियफले वृक्षे) राजनि०।

साकेत न० साकेतते साकेतः सहाकेतेन। अयोध्यापुरे अमरः० "जनश्च साकेतनिवासिनस्तौ" इति रघुः।

सात्रुक पु० सत्रे हितः वृद्धा० ठञ्। १यज्ञे त्रि०। सत्राणां समाहारः तस्येदम् वा ठञ्। २सत्रसमूहे न० ३ततसम्बन्धिनि च त्रि०।

साचात् अव्य० सह अञ्चति अच-क्विप् सादेशः, सह अञ्च मतिं अत-क्विप् वा। १लौकिकप्रत्यक्षे २तुल्ये च अमरः साचादा०क्विप् वा उप०समासः। साचात्कृत्य कृत्वा वा। ३तदूपे चैतन्ये च "यत्साचात् दपरोक्षाद्ब्रह्म" श्रुतिः।

साचात्कार पु० साचात्+कृ-घञ् साचादि० उप०। लौकिकसन्निकर्षजन्ये प्रत्यक्षे।

साचिन् त्रि०सह-अचि अच इनि "साचाद् दृष्टरिं"पा०इनि वा नि०। १साचाद्दृष्टरि। स्त्रियां ङीप्। २परमेश्वरे पु० "साक्षी चेताः केवलोनिर्गुणश्च" श्रुतिः। अयमेव साक्षिचैतन्यत्वेन वेदान्तपरिभाषादौ स्फोटतोऽनुपदं वक्ष्यते। व्यवहारे साक्षित्वप्रयोजकं वीरमि० निरूपितं यथा "तत्र प्रमाणभेदप्रमाणविषयव्यवस्थे क्रियापादप्रस्तावे विविक्ते। अधुना साक्ष्यिप्रमाणस्यावान्तरभेदः प्रस्तूयते। तत्र साक्षित्वरूपमाह मनुः "समक्षदर्शनात् साक्ष्यं श्रवणाच्चैव सिध्यति"। समक्षदर्शनञ्च साक्ष्यङ्गत्वं याज्ञिनिरपि स्मरति। "साचाद् दृष्टरि संज्ञायामिति"। तत्तु व्युत्पत्तिमात्रमव्यापकत्वात्। श्रुतसाक्ष्यादीनामपि साक्षित्वव्यवहारविषयत्वात्। अतएव श्रवणादिलक्षणं प्रमाणमात्रस्य, विवादविषयप्रमाता साक्षीति विवक्षितम्। साक्षिप्रयोजनमाह नारदः "सन्दिग्धेषु तु कार्य्येषु द्वयोर्विवदमानयोः। दृष्टश्रुतानुभूतत्वात्साक्षिभ्यो व्यक्तदर्शनम्" इति। दृष्टश्रुताभ्यामनुभूतत्वादित्यर्थः। यद्वा दृष्टत्वात् श्रुतत्वादनुभूतत्वाच्चेत्यर्थः। अनुभूतत्वादित्यनेन च गोदर्शनन्यायेन प्रमाणान्तरजन्योऽनुभवो गृह्यते। व्यक्तदर्शनं विवेकज्ञानम्। कात्यायनः "अर्थिप्रत्यर्थिसाक्ष्यादनुभूतन्तु यद्भवेत्। तद्ग्राह्यं साक्षिणो वाक्यमन्यथा न हरुस्मृतिः" अर्थिप्रत्यर्थिसाक्ष्यादनुभूतमिति सूत्रः कल्पः। तदसाक्ष्यिण्यपि अवणादिना साक्ष्यङ्ग वचनान्तरैरनुमतत्वात्। तच्च साक्षिभेदनिरूपणे व्यक्तीभविष्यति। गौतमः "विप्रतिपत्तौ साक्षिनिमित्ता व्यवस्था"। स च साक्षी प्रथमं द्विविधः कृतोऽकृतश्च। साक्षित्वेनार्थिप्रत्यर्थिभ्यामिरूपतः कृतः। अनिरूपितोऽकृतः। पुनश्च कृतश्च

षड्विधत्वादक्षतश्च षड्विधत्वादेकादशविधः। यथाह नारदः "एकादशविधः साक्षी शास्त्रे दृष्टो मनीषिभिः। कृतः षड्विधभेदेषां षड्विधोऽकृत उच्यते। लिखितः स्मारितश्चैव दृष्टश्चाभिमुख एव च। गूढोत्तरसाक्षी च साक्षी षड्विधः स्मृतः" इति। षण्णामपि साक्षायनेन स्वरूपमभिहितम् "अर्थिना स्वयमानीतो यो लेख्ये सन्निवेश्यते। स साक्षी लिखितो नाम स्मारितः पत्रकादृते" इति। स्मारितः पत्रकादृते इत्यपि विवृतं तेनैव "यस्तु कार्यं प्रसिद्ध्यर्थं दृष्ट्वा कार्यं पुनः पुनः। स्मार्यते चार्थिना साक्षी स स्मारित इहोच्यते" इतीति दर्शयित्वेत्यनभीवितपदार्थम्। कार्यं व्यवहारपदं दर्शयित्वा प्रमाणप्रसिद्ध्यर्थं कालान्तरे व्यवहारनिर्णयसिद्ध्यर्थं पुनः पुनः स्मार्यते कार्यते च विस्मरणनिरासाय यः स स्मारितो नाम साक्षीत्यर्थः। यस्तु यदृच्छया प्रसङ्गादागतस्तत्र तत्र साक्षित्वेन निरूपितः स यदृच्छाभिमुखः स्मारितत्वाच्च पत्रानाकृष्टत्वेन साक्ष्येऽपि स्वरूपभेदः स्पष्टोऽपि तेनैव विवृतः "प्रयोजनार्थमानीतः प्रसङ्गादागतश्च यः। द्वौ साक्षिणौ तत्र लिखितौ पूर्वपक्षस्य साधकौ"। गूढमाह "अर्थिना स्वार्थसिद्ध्यर्थं प्रत्यर्थिवचनं स्फुटम्। यः साक्ष्यते स्थितो गूढो गूढसाक्षी स उच्यते" इति। उत्तरसाक्षिस्वरूपमाह "साक्षिणामपि यः साक्षात्सपर्युपरि भाषते। अवधाक्षावधाद्वापि स साक्ष्युत्तरसंज्ञितः" इति। षड्विधत्वाच्चतस्र भेदो नारदेनैव दर्शितः "साक्षाच्च प्रातिभाक्ष्यश्च राज्ञा च व्यवहारिणाम्। कार्यं प्रत्यर्थिनो यः स्यादर्थिना प्रहितश्च यः। कृत्याः कृच्छ्रविवादेषु विप्रेयाक्षोऽपि साक्षिणः"। प्राड्विवाकपदं लेखकस्योपलक्षणम् "लेखकः प्राड्विवाकश्च सभ्याश्चैवानुपूर्वशः। रूपे पश्यति तत्कार्यं साक्षिणः सप्त कीर्तिताः" इति वचनात्। दृष्टश्रुतिस्तु लेखितमधिकृत्यादायैतानेव द्वादश साक्षिण आह "लिखितो लेखितो गूढः स्मारितः कृत्यदूतकौ। वादश्चोत्तरश्चैव कार्यमध्यगतोऽपरः। रूपोऽध्यक्षश्च सभ्यः साक्षी द्वादशधा स्मृतः" इति। तद्वचनान्यपि कानिचिदिदमुपलक्षयन्ति कानिचित्पूर्ववादीन्याह स एव "प्रभेदमेषां वक्ष्यामि यथावदनुपूर्वशः। ज्ञातिनामाभिलिखितं येन स्यं पित्र्यमेव च। निवासश्च स विप्रेयः साक्षी लिखितसंज्ञकः। अर्थिना च क्रियाभेदैश्चक्ष्य कृत्वा स्मार्यादिकम्। प्रत्यर्थं लिख्यते वस्तु लेखितः स उदाहृतः। कृत्यवस्थितो वस्तु स्मार्यते स्मृतिमागतम्। विनिश्चिते यथाभूतं गूढसाक्षी स कीर्तितः। स्मार्यते यः कृतः साक्षी स्वयमर्थक्रियादिके। स्मार्यते यो सदैवेह स्मारितः सोऽभिधीयते। विभागदाने विक्रये ज्ञातिर्यत्रोपदिश्यते। द्वयोः समानो धर्मश्चः स कृत्यः परिकीर्तितः। अर्थिप्रत्यर्थिवचनं श्रुत्वायात् प्रेक्षितस्तु यः। उभयोः समतः साधुर्दूतकः स उदाहृतः। क्रियमाणे च कर्तव्ये यः कश्चित् स्वयमागतः। तत्र साक्षी तमस्माकमक्षो(ऽ) यादृच्छिकस्तु सः। वस्तु साक्षी दिशं गच्छन् समूर्धां यथास्थितम्। अन्यं संभावयेत्तन्तु विद्याद्वत्तरसाक्षिणम्। साक्षिणामपि यः साक्ष्यपर्युपरि भाषताम्। अवधाक्षावधाद्वापि स साक्ष्युत्तरसंज्ञितः। उभाभ्यां यत्र विज्ञप्तं कार्यं वापि निवेदितम्। गूढचारी स विज्ञेयः कार्यमध्यगतश्चरा। अर्थिप्रत्यर्थिनोर्वाक्यं यच्छ्रुतमभूतं स्वयम्। स एव तत्र साक्षी स्यादितरस्तु सहायवत्। निर्णीते व्यवहारे तु पुनर्न्यायो यदा भवेत्। अध्यक्षः सभ्यसहितः साक्षी स्यात् तत्र नान्यथा। दूषितं घातितं यत्र सीमायास्तु समन्ततः। अकृतोऽपि भवेत्साक्षी यामस्तत्र न संशयः" इति। लिखितलेखितयोः स्वपरविषयमात्रभेदादेकादशादशसंख्ययोरविरोधः। सर्वं च यथायथं दृष्टश्रुतरूपद्विविधसाक्षिभेदा ज्ञेयाः। क्रियाभेदैर्व्यवहारप्रकारभेदैः, तस्य प्रत्यर्थिनः। कृत्यादिकमित्यादिशब्दात् यथासमयं सर्वविवादपदनिर्देशनम्। कृत्यपदं व्यवहारोपलक्षणम्। विनिश्चिते इति भावे क्तः निश्चये सम्भावित इति शेषः। अक्ष(ऽ) इत्यक्ष इतीतिशब्दाध्याहारः। दिशं देशान्तरमित्यर्थः। उभाभ्यामर्थिप्रत्यर्थिभ्यां यत्र विज्ञप्तं यदीयो विश्वासः कृत इति सम्बन्धसामान्यविवक्षया षष्ठी, भावेक्तः स्याभ्युपेत्याख्येयम्। गूढचारो कार्यमध्यगतश्चेत्यत्रैव संज्ञाद्वयमिति द्वादशत्वाविरोधः। दूतपदं लेखकस्यापि प्रदर्शनार्थं "दूतकः खटिकादादिति" दक्षस्मृतिवचनादुपात्तमपि पदमुपलक्षणमज्ञातसाक्ष्युपलक्षणम्। येन वोऽर्थः प्रमितस्तत्र साक्षित्वेन प्रागनिरूपितोऽपि पश्चात् साक्षित्वेन विवादोपन्यस्तः पूर्वत्र सभायां साक्ष्यं दातुमर्हतीति फलितोऽर्थः। इतरथा वेतनादानादिषु लिखितादयस्तत्र साक्ष्यभावप्रसङ्गः। इदमेवाभिसन्धायाह मनुः "यत्रानिबद्धो-

ज्योतेत ह्यथवादापि किञ्चन । दृष्टस्तावपि तद्वत्प्रयात् यथादृष्टं यथाश्रुतम्" । अनिबद्धोऽब्रुवन्नरः । कल्पतरुमदनरत्नयोरर्थक्रियां क्रियाभेदैरिति पठितं तत्रार्थक्रियार्थक्रियाभेदैः प्रमाणविशेषैरागमाद्यादिभिस्तत्र कृत्वा तत्सम्बन्धितयावधार्य ऋणादिके विवादविषये यः प्रत्यक्षं प्रत्यक्षसमक्षं लेखतेऽर्थिनेत्यर्थात् स तत्र लेखितः साक्षीति व्याख्येयम् । कालावधिरपि साक्ष्ये स्मर्यते "दृष्टैर्वैकापि कालेन लिखितः सिद्धिमाप्नुयात् । यद्ज्ञानज्ञानतो लेख्यं कुर्यादिति शेषः । अजानन्तं लिख्यनभिज्ञमज्ञानमन्यद्वारा साक्षकमलेति लेखयेत् । स द्विविधोऽपि लिखितः साक्षी चिरकालेनापि सिद्धिसिद्धार्थकतामाप्नुयादित्यर्थः । कात्यायनः "अथ कृष्टेनाकृष्टलिखितैकः स एव तु । न चेत् प्रत्यभिजानीयात् तत्कृष्टैः प्रसाधयेत्" । नारदः "अदृष्टात् दृष्टात् सिद्धिः स्मारितस्येह साक्षिणः । आपञ्चमात् तथा सिद्धिर्लेख्योपगतस्य तु । आ शतीयात् तथा वर्षात् सिद्धिर्मुण्डस्य साक्षिणः" इति । इदन्तु प्रायोवादेन, यतः स एवाह "अथ वा कालनियमो न दृष्टः साक्षिणः प्रति । कूटलेख्यं हि साक्षित्वमाहुः शास्त्रविदो जनाः । यस्य नोपकृता बुद्धिः स्मृतिः श्रोत्रञ्च नित्यशः । दृष्टैर्वैकापि कालेन स वै साक्षित्वमर्हति" । ते च "साक्षिणः कीदृशाः कार्या व्यवहारेष्वसाक्षिणः । तादृशान् संप्रवक्ष्यामि यथा वाच्यस्तथा तैः । सक्षिणः पुत्रिणो मौलाः क्षत्रविट्शूद्रयोनयः । अब्युक्ताः साक्ष्यमर्हन्ति न ये केचिदापदि । आप्ताः सर्वेषु वर्णेषु कार्याः कार्येषु साक्षिणः । सर्वधर्मविदो लुब्धा विपरीतांस्तु वर्जयेत्" । मौलाः प्रख्यातकुलोद्भवा इति कल्पतरुः । मूलं पूर्वदत्तालक्षद्दिन्नीति मौलाः । तदधीते तद्वेदेत्यणिति मदनरत्ने । वक्ष्यमाणवाक्यस्थक्त्यवचनसंवादात् साक्षित्वेनैव पूर्वदत्तालक्षदित्याशेपात्तदर्थकमौलमदानवैक्यप्रदर्शनाच्च कल्पतरुव्याख्यानमेव सम्यक् । रत्नाकरोऽपि "मौलाः कुलीना" इत्येव व्याख्यातम् । मूलं प्रतिष्ठा या येषामस्ति ते मौलाः अर्थकथनमेतत् । तद्वितस्तु भवार्थ एव कर्त्तव्यः, यो हि यत्र भवः सोऽपि तच्छास्त्रीत्यविरुद्धमिति वदन् मेधातिथिरपीदृशमर्थमनुमन्यते प्रतिज्ञानस्य साक्षित्वच्यानुपपत्तेः । पुत्रादिप्रतिज्ञायाः पदान्तरैरेवोपादानात् । अत्र क्षत्रियादिपदं नात्यन्तिकत्वाभ्युदासपरं, किन्तु यति सम्भवेऽनेकाध्यापनाग्निहोत्रादिकार्यव्यग्रत्वं तत्र न साक्षित्वं, साक्षान्तरासम्भवे तत्रापि साक्षित्वं सम्भवत्येव । अतएव "ब्रूहीति ब्राह्मणं पृच्छेदिति" तत्रापि साक्षित्वेन प्रश्नप्रकारविधिरुपपद्यत इति ध्येयम् । अब्युक्ता अर्थिना समेते साक्षिणः सन्तीति निर्दिष्टा न तु वयमेवागत्य वयमत्र साक्षिणः स्म इति वदन्तः । याज्ञवल्क्यः "तपस्विनो दानशीलाः कुलीनाः सत्यवादिनः । धर्मप्रधाना ऋजवः पुत्रवन्तो धनान्विताः । अग्रवराः साक्षिणो ज्ञेयाः श्रौतस्मार्त्तक्रियापराः । यथाजाति यथावर्णं सर्वे सर्वेषु वा स्मृताः" । अग्रवरास्त्रिभ्यो न्यूना न भवन्ति परतस्तु यथेष्टं भवन्तीत्यर्थः । जातयो मूर्धावसिक्तादयः । वर्णा ब्राह्मणादयः । तथा च मूर्धावसिक्तादीनां मूर्धावसिक्तादयो ब्राह्मणादयो ब्राह्मणादीनां साक्षित्वेनोपादेयाः । अस्मिन्पक्षे सर्वे सर्वजातीयाः सर्वेषु जातीयेषु वादिप्रतिवादिषु साक्षिणो भवन्तीत्यर्थः । व्यासः "धर्मज्ञाः पुत्रिणो मौलाः कुलीनाः सत्यवादिनः । श्रौतस्मार्त्तक्रियायुक्ता विगतद्वेषमत्सराः । श्रोत्रिया नगराधीनाः क्षत्रवैश्याश्च साक्षिणः । युवानः साक्षिणः कार्या ऋग्वेदादिषु विज्ञाता" इति । कात्यायनः "प्रख्यातकुलशीलाश्च लोभमोहविवर्जिताः । आप्ताः शिष्टा विबुद्धा ये तेषां वाक्यमसंशयम् । विभाव्यो वादिना वादक् सदृशैरेव भाषते । नोत्तरैश्चावरैश्च कृतस्तु साक्षिभिर्भवेत् सदा" इति । आप्ताः यथार्थवादिनः । विबुद्धा विवादविषयीभूतार्थज्ञानवन्तः शास्त्रार्थज्ञानवन्तश्च "मतिबुद्धिपूजार्थेभ्यश्चेति" पा० कर्त्तरि क्तः । वादिकर्मणीति मदनरत्ने । तेषां वाक्यमसंशयं यथा भवति तथा वादिनो विभाव्योऽङ्गीकारयितव्योऽर्थात् प्रतिवादी । तत्र विशेषमाह वादक् प्रतिवादी तत्सदृशैरेवज्ञातीयैरेव भाषते । वादिनेत्युपलक्षणम् । वाक्यमपि प्रतिवादिना तज्ज्ञातीयैरेव विभाव्यः तथा च नारदः "श्रेणीषु श्रेणिपुरुषाः स्वेषु वर्गेषु वर्गिणः । बहिर्वासिषु वाह्याः स्युः स्त्रियः स्त्रीषु च साक्षिणः" इति । पुनरपि "स्त्रीणां साक्ष्यं स्त्रियः कुर्युर्द्विजानां सदृशा द्विजाः । शूद्राश्च सन्तः शूद्राणामन्त्यानामन्त्ययोनयः" । अत्र पुरुषाणां सत्यपि वर्गित्वे पृथङ्निर्देशो गोदृष्टन्यायेन । प्रयोजनं चात्राप्यदूषितत्वबोधनम् । वर्गिणश्च दर्शिताः कात्यायनेन "सिद्धिनः श्रेणिपूगाश्च व्रजिनज्ञातयस्तथा । अन्ये । समूहस्थ ये चान्ये वर्गीज्ञानमतीह भवेत् ।

दाक्षचारयमङ्गानां कृष्णद्वायुधजीविनाम्। प्रत्ये-
कैकसमूहानां नायका वर्गिणः स्मृताः। तेषां वादः
स्ववर्गेषु वर्गिणस्तेषु साक्षिणः"। अत्र सर्वत्र न्यूना-
धिकविशेषणोपादानन्न दोषाय अन्तर्भावेणोक्तत्वस्य
वक्तव्योक्तत्वस्य च साक्षित्वप्रयोजकस्योपलक्षणार्थत्वात्
तेषाम्। ते च साक्षिणः कियत्सङ्ख्यकाः कुत्र पाह्या
इत्यपेक्षायामाह बृहस्पतिः "नव सप्त पञ्च वा कुलवार
क्षय एव वा। उभौ वा श्रोत्रियौ ख्यातौ नैकं पृच्छेत
कदाचन"। लिखितादिषु स एवाह "लिखितो हौ
तथा गूढो लिखितः पञ्च लेखिताः। दशका विंशतिः
कार्यांसत्या चोत्तरसाक्षिणः। दूतकः खटिकापाढी
कार्यमध्यगतस्तथा। एक एव प्रमाणं स्याद्यो ऽभ्यच-
क्षतैव च"। खटिकापाढी लेखकः एक एवेत्येवकारो
वाक्यपेक्षया "नैकं पृच्छेत् कदाचन" इत्युक्तेः अनावश्य-
कत्वादौ न नियमार्थोऽदृष्टार्थत्वप्रसङ्गात्। अत्रवराः सा-
क्षिणो नैका इति योगीश्वरीयमप्येतदभिप्रायकमेव।
लिखितादीनामभयानुमतत्वे पाङ्क्तत्वमेकस्यापीत्याह योगी
श्वरः "उभयानुमतः साक्षी भवत्येकोऽपि धर्मवित्"।
यद्यपि "श्रोतस्मार्त्तक्रियापरा धर्मप्रधाना" इत्यादिविशे-
षोपादानात् अत्रवरापामपि धर्मवित्त्वं समानत्वापि
तेषामुभयानुमतौ न भवत्येव साक्षित्वं, इतरेषान्तु
क्वोभयानुमत्यैवेति भेद इति मिताक्षरा। नारदोऽपि
"उभयानुमतो यः स्याद्वदयोर्विवदमानयोः। स साक्षि-
कोऽपि साक्षित्वे प्रष्टव्यः स्यात्तु संसदि"। आप्तत्वेन
राजादिभिरवधारितोऽन्येक साक्षीत्याह व्यासः "शुचि-
क्रियश्च धर्मज्ञः साक्षी यस्त्वनुमन्यते। प्रमाणमेकोऽपि
भवेत् साङ्गेषु विशेषतः" इति। अनुमन्ता यथार्थत्वेन
प्रमितवक्ता वाग्यस्त्वेत्यनुमन्यते। कात्यायनः "अभ्य-
न्तरस्तु निःक्षेपे साक्ष्यमेकोऽपि याच्यते। अर्थिना प्र-
हितः साक्षी भवेदेकोऽपि याचितः"। याचित इति
निःक्षेपविशेषणम्। न्यायतोऽन्यत्रापीति वाक्यशक्तिः।
मदनरत्नकारस्तु याचितं विवाहाद्यर्थं याचितं मङ्गोत-
भाभरणादिकं याचितकमिति यावदित्याह। निःक्षेपवि-
शेषणत्वेनैवोदयाचिते तस्मिन्नभ्यन्तरस्यैकस्यासाक्षित्वप्रस-
ङ्गादुभयपक्षितानुमतस्यैवोत्तरत्र व्याख्या प्रपञ्चा। कृष्ण
द्वादिपक्षविवादे तस्मिन्नैकोऽपि साक्षीत्याह स एव
"संकृतं येन यत्पक्षं तत्तेनैव विभावयेत्। एक एव
प्रधानं च विवादे तत्र कीर्त्तितः"। इदञ्च बहुवाद-
सम्बन्धे सत्यवादिनोर्द्वयोरेकस्य वाक्यमतिप्रदर्शनार्थं न
नियमार्थम् अदृष्टार्थत्वप्रसङ्गादिति ध्येयम्। उक्त-
सङ्ख्यासाक्ष्यसम्बन्धे प्रतिषेधरहितानां साक्ष्यनुकूलानां
सूचनार्थमसाक्षिणोऽपि स्मृतिसूक्ताः"।

ते च असाक्षिशब्दे ६४८ पृ०। दर्शिताः।

साक्षिणो मिथ्याकथने शपथने च दोषो यथा
"दृष्टो हि साक्षी यः साक्ष्यं अानक्षयन्यथा वदेत्। स
पूर्वानात्मनः सप्त कुले हन्यात्तथा परान्। यत्र कार्यार्थं
तत्त्वज्ञो जानन्नपि न भाषते। सोऽपि तेनैव पापेन
लिप्यते नात्र संशयः" भा०आ० "ब्रह्मघ्नस्यावहारी
च मिथ्यासाक्ष्यप्रदायकः। मित्रद्रोही कृतघ्नश्च इमान्
दहत्यधस्तात्। एते महापातकिनस्त्रिषु लोकेषु नि-
न्दिताः। कालसूत्रे च नरके पतन्ति ब्रह्मणः शतम्"
ब्रह्मवै०ब्र०ख०३३अ०। "मिथ्यासाक्ष्यं यो ददाति का-
मात् क्रोधात्तथा भयात्। सभायां पार्थिवं वक्ति स
कृतघ्न इति स्मृतः। मिथ्यासाक्ष्यं पार्थिवं वा भारते
वक्ति यो नर!। यावदिन्द्राश्चतुर्दश सर्वकल्पे वसेदधमम्।
कल्पान्ते वेदितैः सर्वैर्भौतैश्च भक्षितस्तथा। भुक्त्वा च
सर्वविण्मूत्रं ततश्चैनं ताडितः। कृकलासो भवेत्पश्चात्
भारते सप्तजन्मसु। सप्तजन्मसु मण्डूकः पित्तभिः सप्तभिः
सह। ततो भवेच्च हंसश्च सप्तजन्मसु च प्राणभिः।
ततो भवेच्छुको मूकस्ततः शूद्रस्ततः शुचिः" ब्रह्मवै०ब्र०३८अ०।

साक्षिणो यथा विवादे कर्तृत्वाद्यभाव एवं लोकसा-
क्षिणो कर्तृत्वाभावः ईश्वरसाक्षिशब्दे १०४८पृ०दृश्यम्
तयोर्दृक्त्वादिप्रकाशकत्वात् तद्वात्वम् अन्तःकरणभावयो-
र्जड़त्वेन विषयावभासकत्वाभावेन चैतन्योपाधित्वमेव न
तु विशेषणत्वं विषयावभासकत्वे तदन्वयायोगात्। अत-
एव अन्तोपाधिवृत्तिचित्तवृत्तिसुखादेरेवावभासकत्वात्ता-
त्पिसङ्गः इति वेदान्तपरिभाषाप्रत्यक्षपरि० दृश्यम्।

सांख्यस्य भाष्यूक्तोक्तस्य साक्षित्वं समर्थितं यथा
"नन्वेवं साक्षित्वस्यानित्यत्वात् पुरुषार्थो कथं सदैकरूपत्वं
तत्राह "साक्षात्सम्बन्धात् साक्षित्वम्" सू० पुरुषस्य यत्
साक्षित्वमुक्तं तत् साक्षात्सम्बन्धमात्रात् न तु परि-
णामत इत्यर्थः। साक्षात्सम्बन्धेन बुद्धिमात्रस्यापि साक्षि-
गम्यते "साक्षाद्द्रष्टरि संज्ञायामिति" प०साक्षिशब्दव्यु-
त्पादनात्। साक्षाद्दृष्टृत्वं चाक्षव्यधानेन दृष्टृत्वम्। पुरुषे
च साक्षात्सम्बन्धः स्वविशिष्टस्यैव भवति। अतो बुद्धे-
रेव साक्षी पुरुषोऽन्येषां तु द्रष्टृमात्रमिति शाङ्करीयो

विभागः। ज्ञानक्रियाभावदार्ढ्याकारतास्वाभौव्यः प्रतिबिम्बरूप एव सम्बन्धो न तु संयोगमात्रमतिप्रसङ्गादित्यलङ्कारेऽदितम्। विष्णोः सर्वसात्त्विकत्वं त्विन्द्रियादिव्यधानाभावमात्रेण गौणम्। अत्यन्तसम्बन्धात् सात्त्विकमिति पाठे त्वयमर्थबुद्धिः करणत्वसामान्यात्। तथा यथोक्तात् प्रतिबिम्बरूपात् सम्बन्धादित्यर्थः" भा०। तत्रैव अन्यत्र "सुषुप्त्याद्यसात्त्विकम्" सुषुप्त्याद्यवस्थात्रयस्य बुद्धिनिष्ठस्य सात्त्विकमेव पुंसीत्यर्थः। तदुक्तम् "जाग्रत् स्वप्नः सुषुप्तं च गुणतो बुद्धिवृत्तयः। तासां विलक्षणो जीवः साक्षित्वेन व्यवस्थितः"। इति तासां बुद्धिवृत्तीनां साक्षित्वेन तद्विलक्षणो जाग्रदाद्यवस्थारहितो निर्धीत इत्यर्थः। तत्र जाग्रद्भावास्थेन्द्रियद्वारा बुद्धेर्विषयाकारः परिणामः। स्वप्नावस्था च संस्कारमात्रजन्यस्तादृशः परिणामः। सुषुप्त्यवस्था च द्विधाऽर्द्धसमपलयभेदेन। तत्रार्द्धलये विषयाकारा वृत्तिर्न भवति। किन्तु स्वगतसुखदुःखमोहाकारैव बुद्धिवृत्तिर्भवति अन्यथोत्थितस्य सुखमहमस्वाप्समित्यादिरूपस्मृत्यनुत्पत्तेः। तदुक्तं व्यासदेवेन "सुखेऽर्द्धसम्पत्तिः परिशेषादिति"। समपलये तु बुद्धेर्वृत्तिसामान्याभावो मरणादाविव भवति। अन्यथा समाधिसुषुप्तिमोक्षेषु ब्रह्मरूपतेत्यागामिसुखानुपपत्तेरिति। सा च समग्रसुषुप्तिर्नित्यभावरूपेति पुरुषस्तत्साक्षी न भवति पुरुषस्य वृत्तिमात्रसाक्षित्वात्। अन्यथा संस्कारादेरपि धर्मस्य साक्षिभास्यतापत्तेः। सुषुप्त्यादिसाक्षित्वं तु तादृशबुद्धिवृत्तीनां प्रकाशनमिति वक्ष्यामः"। [वेदान्तप०।

साक्षिभास्य त्रि० ३त०। साक्षिमात्रप्रकाश्ये बुद्धिवृत्त्यादौ

साक्ष्य न० साक्षिणो भावः कर्म वा ष्यञ्। १व्यवहारविषयवृत्तिवृत्तान्तकथनरूपे साक्षिकर्मणि २तद्भावे च "समग्रदर्शनात् साक्ष्यं अवधार्यैव सिध्यति" मनुः।

सागर पु० सगरेण निर्वृत्तः अण्। १समुद्रे अमरः २सङ्गभेदे पुंस्त्वे शब्दच०। ३संख्याभेदे संख्याशब्दे दृश्यम्।

सागरगामिनी स्त्री सागरं गच्छति गम+णिनि न ङीषत्वम्। १नद्यां २लक्ष्मीलतायाञ्च राजनि०।

सागरनेमि स्त्री सागरः नेमिरिव नेमिराकारो यस्याः। पृथिव्यां हेमच०। [हेमच०।

सागरमेखला स्त्री सागरो मेखलेव यस्याः। पृथिव्यां

सागरालय पु० सागर आलयो यस्य। वरुणे शब्दच०।

सागरोत्थ न० सागरात् उत्तिष्ठति उद्+स्था क। सामुद्रलवणे राजनि०।

साग्नि(क) पु० सह अग्निना वर्त्तते ठेन वा कप्। १श्रौतस्मार्ताग्नियुक्ते २अग्निहोत्रिणि द्विजे।

साङ्कर्य न० सङ्करस्य भावः ष्यञ्। १परस्परभावसामानाधिकरण्ये सत्येकाधिकरणवृत्तित्वरूपे न्यायोक्ते जातिबाधके दोषभेदे सङ्करशब्दे ५।८१ पृ० दृश्यम् २सङ्करस्य धर्मे च। [सि०कौ०।

साङ्कल त्रि० सङ्कलेन निर्वृत्तः सङ्कला अण्। सङ्कलसमाजाते

साङ्कृति पु० वैयाघ्रपद्यगोत्रस्य प्रवरे मुनिभेदे "वैयाघ्रपद्यगोत्राय साङ्कृति प्रवराय च" श्राद्धतर्पणमन्त्रः।

साङ्ग त्रि० सह अङ्गेन। अङ्गयुक्ते "तस्मात् साङ्गधीत्येव" "साङ्गं तत् क्रियते पुनः" इति च स्मृतिः।

साङ्गतिक त्रि० सङ्गत्या निर्वृत्तः ठक्। सङ्गतिसिद्धे युक्ते।

साचि अव्य० सच-इण्। १वक्रे २तिर्य्यग्भावे च अमरः।

साचिवाटिका स्त्री साचि यथा तथा वटति वट-ण्वुल्। १श्वेतपुनर्नवायां रत्नमा०।

साचीकृत त्रि० साचि साचि क्रियते कृ-च्वि-क्त दीर्घः। वक्रीकृते सि०कौ०"साचीकृता चारुतरेण तस्थौ" कुमा०

साट प्रकाशने चट०चु०उ०सं०सेट्। साटयति ते असीसाटत त

साटोप त्रि०सह आटोपेन सङ्कल्पः। १सगर्वे २विकटे च।

सात दाने खण्डने चट० चु० उभ० अक० सेट्। सातयति ते असीसातत त। अयं सौत्र दाने वे। [१भङ्गे च।

सात न० सात-अच्। १सुखे भरतः। सन-क्त। २दत्ते

सातला स्त्री सातं सुखं लाति ला क। १धर्मकामायाम् अमरः। २सेण्डुकभेदे राजनि०।

सातवाहन पु० शातिवाहनस्यापत्ये ढेमच०। [अमरः।

साति स्त्री सन-क्तिन्। १अवसाने २दाने ३तीव्रपीड़ायाञ्च

सातीन(ल)क पु० सतीन(ल)एव स्वार्थे कन्। सतीन(ल) कलचे (चुड़मटर) रावणकुटः।

सात्यकि पु० सत्यकस्य दृष्णिवंशभेदस्यापत्यम् अण्। शिनेर्नप्तरि अनाभख्याते दृष्णिवंशे क्षत्रियभेदे त्रिका०।

सात्वत पु० सत्वतां मत्स्यगन्धायां भवः अण्। १वेदव्यासे त्रिका०। २सत्वतः सम्बन्धिनि च। [हला०।

सात्वतेय पु० सत्वतां अपत्यम् ढक्। सत्वतीसुते व्यासे

सात्वत् पु० सातयति सुखयति सात-क्विप् सात् परमेश्वरः स उपास्यत्वेनास्यास्ति मतुप् मस्य वः। विष्णुसहस्रे "भगवान् सात्वतां पतिः" भागवतम्। श्रीधरेण

सत्त्वेन चरति सात्तः विष्णुरूपाहत्वेनास्यत्व मतुपि अचोपत्यान्दसः रलुक्तम् ।

सात्त्वत त्रि० सत्त्वमेव स्वार्थे तत्त्वेति तत—ङ । १विष्णौ त्रिका० यदुवंशे जंशुपुत्रे २नृपभेदे "अथांशोः सात्त्वतो नाम विष्णुभक्तः प्रतापवान्" ब्रह्मपु० २२ अ० । तद्वंशे १वसुदेवे हेमच० । "सत्त्वं सत्त्वात्मकं सत्त्वगुणं सेवेत केशवम् । योऽनन्यत्वेन मनसा सात्त्वतः स उदाहृतः" रलुक्ते ४विष्णुभक्तभेदे । ५सात्त्वतनृपाधिष्ठितदेशे सोऽभिजनोऽस्य अण् । पित्रादिक्रमेण हृतद्देशवासिनि च त्रिका० । यदुवंशप्रोक्तपञ्चत्वेन ऊर्णायुपालभातरि स्त्री ङीप् । "न दूते सात्त्वतीसूनुः" माघः । सा च नाटकस्य दक्षवृत्तिभेदे च । तथा लक्षणादि सा० द० उक्तं यथा "सात्त्वती बहुला सत्त्वशौर्यत्यागदयार्जवैः । सङ्गर्षा बहुसङ्कारा विशोका सा स्मृता तथा । अत्यापकोऽत्र संघात्यः संघाप परिवर्तकः । विप्लव इति चत्वारः सात्त्वत्या परिकीर्त्तिताः । उत्क्षेपनकरो मन्त्रोदांशुत्थापक उच्यते । मन्त्रार्थदैवयक्त्यादेः संघात्यः सङ्गमेदनम् । संघापः स्याद् गभीरोक्तिनानाभावसमाश्रयः । प्रारब्धस्यकार्य्यस्य करणं परिवर्तकः" । तत्रोपे एकतरु रोऽपि । दशजातिभेदे पुंस्त्री० सुधन्वाचार्यशब्दे दृश्यम् ।

सात्त्विक पु० सत्त्वात् सत्त्वगुणप्रधानात् विष्णोर्भवति ठञ् । १चतुर्मुखे ब्रह्मणि हेमच० । तस्य विष्णुनाभिकमलजत्वात् तथात्वम् । सत्त्वमेव स्वार्थमस्यस्य ठञ् । २विष्णौ । सत्त्वगुणेन तदुद्देश्येन मनसा वा निर्वृत्तः ठञ् । ३सत्त्वगुणजाते ४सत्त्वप्रधानमनोविशेषजाते च । ५हर्षादिरसानुगुणे भावभेदे सा० द०

"उक्ता स्त्रीणामलङ्कारा अकृत्रिमा स्वभावजाः । तदूर्ध्वा सात्त्विका भावास्तथा चेष्टा परा अपि । विकाराः सत्त्वसम्भूताः सात्त्विकाः परिकीर्त्तिताः । सत्त्वभावोद्भवत्वात्ते भिन्ना अप्यनुभावतः । स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः । वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विका मताः" । एतेषां लक्षणानि तत्तच्छब्दे दृश्यानि । स्त्रीणां यौवने सत्त्वजाते ६अलङ्कारभेदे सा० द० "यौवने सत्त्वजास्त्रयस्त्रिंशदिति भावाः" । अलङ्कारशब्दे ४० पृ० दृश्यम् । ७सत्त्वप्रधाने त्रि० । ८देवीपूजाभेदे स्त्री "सा रदी चण्डिकापूजा त्रिविधा परिकीर्त्तिता । सात्त्विकी राजसी चैव तामसी चेति तां शृणु । सात्त्विकी जपयज्ञैश्च नैवेद्यैश्च निरामिषैः" तिं० त० । ९भावभेदे पु० "सत्त्वोत्कटे मनसि ये प्रभवन्ति भावास्ते सात्त्विका इति विदुर्निपुणाः पुरासु" सर्वान० । १०सत्त्वप्रधाने पुराणभेदे "वैष्णवं नारदीयञ्च तथा भागवतं शुभम् । मार्कण्डञ्च तथा पाद्मं वाराहं शुभदर्शने !। सात्त्विकानि पुराणानि विज्ञेयानि शुभानि वै । सात्त्विकेषु पुराणेषु विष्णुमाहात्म्यवर्णनम्" उपपुराणशब्दे दृश्यम् । ११धृतिभेदे स्त्री "वासिष्ठं चैव हारीतं याज्ञं पाराशरं तथा । भारद्वाजं काश्यपञ्च सात्त्विकाः सङ्गिदाः शुभाः" पद्मपु० उत्त० ४१अ० । १२दुर्गायां स्त्री ङीप् । १३गीतोक्तेषु यज्ञादिभेदेषु यथायथं त्रि० यथा "सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत !। श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः । यजन्ते सात्त्विका देवान्" (यज्ञः) "आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः । यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु" रलुपक्रमे "आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्द्धनाः । रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः" (आहारः) "अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते । यष्टव्यमेवेति मनः समाधाय स सात्त्विकः" (यज्ञः) "श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः । अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते" (कायिकादि त्रिविधं तपः) "दातव्यमिति यद्दानं दीयतेऽनुपकारिणे । देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्" (दानम्) "सर्वभूतेषु येनैकं भावमव्ययमीक्षते । अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्" (ज्ञानम्) "नियतं सङ्गरहितमरागद्वेषतः कृतम् । अफलप्रेप्सुना कर्म यत्तत् सात्त्विकमुच्यते" (कर्म) "मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः । सिद्ध्यसिद्ध्योर्निर्विकारः कर्त्ता सात्त्विक उच्यते" (कर्त्ता) "प्रवृत्तिं च निवृत्तिं च कार्य्याकार्य्ये भयाभये । बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ ! सात्त्विकी" (बुद्धिः) "धृत्या यया धारयते मनः प्राणेन्द्रियक्रियाः । योगेनाव्यभिचारिण्या धृतिः सा पार्थ ! सात्त्विकी" (धृतिः) "यत्तदग्रे विषमिव परिणामेऽमृतोपमम् । तत् सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम्" (सुखम्) "कार्य्यमित्येव यत् कर्म नियतं क्रियतेऽर्जुन !। सङ्गं त्यक्त्वाफलं चैव स त्यागः सात्त्विको मतः" (त्यागः) । तत्र सात्त्विकाहारस्य चित्तशुद्धौ हेतुत्वं छान्दो० उक्तं यथा "आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः" । सत्त्वं मनः । "अन्नमयं हि सोम्य ! मनः इत्यादिना" तत्र

सत्त्वमयत्वञ्च तत्रोक्तं सत्त्वात्मम्। सांख्यमतसिद्धे सत्त्वप्रधाने १४महत्तत्त्वे १५अहङ्कारतत्त्वे च "सात्त्विको राजसश्चैव तामसश्च त्रिधाऽहान्" सां०प्र० धृतवाक्यम्। "सात्त्विकमेकादशकं प्रवर्त्तते वैकृतादहङ्कारात्" सां०का० एकादशानां पूरणमेकादशकं मनः षोडशात्मगणमध्ये सात्त्विकम्। अतस्तदैकृतात् सात्त्विकाहङ्कारात्प्रायत इत्यर्थः। "वैकारिकश्चैजसश्च तामसश्चेत्यहं त्रिधा। अहङ्कारादहङ्कारात्मनो वैकारिकादभूत्। वैकारिकाश्च ये देवा सर्वेभिश्चिन्तनं यतः" सा०प्र०४० वाक्यम्। १६अध्यवसायादौ च "अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम्। सात्त्विकमेतद्रूपं तामसमस्मादविपर्ययसम्" सां०का०। "सात्त्विक एकादशकः प्रवर्त्तते वैकृतादहङ्कारात्। भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम्" सां०का० "प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं त्रिगुणं सात्त्विको वैकृतात् सात्त्विकादहङ्कारात् प्रवर्त्तते" तत्त्वकौ०।

साद्नी स्त्री सादयति रोगा अनया सद्-णिच्-करणे ल्युट्-ङीप्। कटुक्यां राजनि०।

सादि पु० सद्-इण्। १सारथौ हेमच० २योद्धरि उणादि० २अवसन्ने त्रि० ३बाजौ पु० संक्षिप्तसारः।

सादिन् पु० सद्-णिनि। १अश्वारोहकर्त्तरि अमरः। २गजारोहिणि ३रथारोहिणि च मेदि०। ४अवसन्ने त्रि० स्त्रियां ङीप्।

सादृश्य न० सदृशस्य भावः ष्यञ्। सद्भिन्नत्वे सति तद्गतभूयोधर्मरूपे उपमानधर्मे। तच्च सादृश्यं सप्तपदार्थातिरिक्तः पदार्थ इति मीमांसकाः। तन्मतन्तु सत्तावल्यां "सादृश्यमतिरिक्तः पदार्थ इति मीमांसकाः"। तन्मतन्तु उपमानचिन्तामणौ निराकृतम् उपमानशब्दे १२३५ दृश्यम्। सादृश्यप्रधाना इवादिनिपाताः सदृशादि शब्दाश्च तत्र इवादिभिः निपातैः सादृश्याभिधाने प्रतियोग्यनुयोगिनोः समानविभक्तिकत्वं, गौरिव गवय इत्यत्र चन्द्रमिव सुखं पद्मतीत्यादि। अन्ये तु सदृशादिशब्दा एव गोसदृश इत्यत्र वाक्यविकाः इवादिशब्दास्तवार्थे तात्पर्यग्राहका इत्याहुः तत्रोपमाभिन्नमात्रा तत्राभिधाने प्रतियोगिनि इतीया षष्ठी च। तत्रोपमाभ्यां योगे तु षष्ठ्येव। सादृश्ये च एकस्य प्रतियोगितान्यस्यानुयोगितेति तत्र प्रतियोगिन उपमानत्वमनुयोगिन उपमेयत्वमिति। उपमानोपमेयभावश्च द्वयोः सदृशयोरपि प्रसिद्धस्यैवोपमानता। तत्र काव्ये केषाञ्चित्कृतानां कुत्रचिदुपमानतया वर्णनं वृत्तं तच्चिरीतं कविकुलतायां यथा "वेधाः सर्गोदिष्टकालः केशवोयञ्च चामरः। नीलकण्ठकलापोऽपि, धम्मिल्लश्च विधुन्तुदः। सीमन्तश्च साधुदण्डो ललाटश्चाष्टमी विधुः। मकरश्च, कपोलश्च चन्द्रः स्यात् सुकरः अलौ। भ्रुवोः खड्गधनुर्वल्ली रेखापल्लवपल्लवयः। दृशश्चकोरहरिणमदिराखञ्जनाञ्जनम्। कुसुमं नीलनम्भोजं, शुतेर्दीपः शशाङ्कः। नासायाः शुक्ल वंशाधोमुखशुकचञ्चवः। तिलप्रसूनदण्डौ चाधरश्च नवपल्लवः। बिम्बीफलं प्रवालं च, दन्तानां मौक्तिकावलिः। कुन्दद्राक्षबीजानि हीरकाश्च, स्मितस्य च। ज्योत्स्ना पुण्यापि पीयूषं, श्वासस्यामोजसौरभम्। जिह्वायाश्चोद्भवो वै वाक्यानां सङ्कुपिकध्वनौ। वीणावाद्यं मधु सुधा, मुखस्य चन्द्रमासवा। अस्योजदर्पणौ चापि चिबुके दर्पणाश्रयम्। कण्ठस्य कम्बूरस्य कुम्भो बाह्वोस्तु वल्लरी। जघनस्तम्भकरीशाखापाशाः, पाणिपल्लवस्य तु। पद्मपाङ्क्तीनां तु पद्मयोरस्योजपल्लवम्। दीपो नवदलं चैव चम्पकं, नखवल्लतेः। रक्ततारेन्दुपुष्पाणि, स्तनयोः कुम्भकौ घटौ। कुम्भिकुम्भौ गिरी चक्रौ बिल्वे, मध्यस्य वेदिका। सिंहमध्यं वज्रमध्यं क्षीणदृश्यस्य कथ्यते। उपमानानि रोमाख्याः रेखाश्चैवावलयः। नीलजालसधीधूमवल्लतादिरदण्डकाः। नाभेरम्भोजमावर्त्तो सुदो विवरकूपको। त्रिवल्या वीचिसोपानत्रिश्रेण्यो, जघनस्य तु। पुलिनं पीठफलके, नितम्बस्य स्थलं पुनः। पर्वतः पृथिवी स्थूलोपलं वस्तु च वस्तुनः। ऊरुः करिकराश्वभकरभस्तथा। जङ्घादण्डस्य कम्भस्य वादण्ड, नवपल्लवः। अस्योजं च गतेर्हंसखञ्जनहिदतां गतिः। दृशान्यान्यापि स्त्रीणां पुंसामपि समानि तु। पुंसां रूपोपमानानां विशेषः कोऽपि कथ्यते। स्कन्धश्च बाहिडवभस्कन्धौ बाह्वोरीश्वर। कक्षिकक्षस्तथा स्कन्धसंलग्नदण्डाश्च, वक्षसः। शिलाकुकपाटे च प्रसक्ताचलतिर्गतेः। यशसः कुन्दचन्द्राद्याः शुभ्रवर्णाश्च यताः। प्रतापस्याग्निसूर्यौ च बालवान्धी रवेः करः। अवापुष्पादयश्चैव रक्तवर्णपदार्थकाः। पुरुषस्य गौर्द्धवीजं संस्कारोऽङ्कुर एव च। शुक्लवर्णैः पदार्थाः ये तेऽत्यन्त परिकीर्त्तिताः। सामर्थ्यस्य महत्त्वस्य पक्षाद्विक्रमादिकम्। नीतेर्न्यायादिः साधीयो ज्वाला दीपस्य कीर्त्तिता। चादेश्चाकोत्कटेक्षादिर्दयाद्यं गुरोर्वचः। मानसस्य स्थिरार्थाच प्रारब्धकर्म कीर्त्तितम्। वायस्य

कर्दमोऽकीर्त्तिः कलङ्कः कृष्णवर्णकः। अन्धकारः वेश-सशोभ्रतिशोपमानकम्। अकीर्त्तेः कृष्णवस्तूनि मा-लिन्यं तमसां ततिः। कस्तूरिकादा भ्रमरो नीलकाल मधिर्घनः। धूमस्निग्धव्यदाहोत्थधूमः कज्जलकं तथा। कृष्णपुष्पवृक्षतयः कामाकीर्त्तिः स्खलानरे। कामिनोरव-यवस्तद्वत् कज्जलस्यापि तानि च। कर्पूरस्य तथा चन्द्रः यशाङ्किरणस्तथा। यूथिकाकुन्दकुसुमं विरञ्चिगण्ड-कस्तथा। क्षिप्तीरपिण्डः प्रथित उपमानतया भवि। मनोरमस्य विज्ञेयः फलपुष्पादियुक्ततरुः। कविबुद्धि-कल्पना स्यादानन्दस्य सुधार्णवः। ब्रह्मणश्च स्तुतिः-स्तद्वत्, कवितोदर्शनस्य तु। अतिप्रियतमप्राप्तिर्ब्रह्म-साक्षात्स्तुतिस्तथा। सुधारसो नित्यसुखसाक्षात्कार-स्तथा मतः। पूर्णचन्द्रादिकस्यापि साक्षात्कारः प्रकी-र्त्तितः। अस्तस्य तु यत्कार्यं कामिन्यधरपानकम्। ब्रह्मसाक्षात्स्तुतिस्तद्वत्, विषस्याथ प्रकीर्त्तते। काश्मीरी विरहः पापं मलिनं दुःखदं च यत्। शीताग्निः शीतकालीनशीतोदं परिकीर्त्तितम्। अभिचारिणी च या नारी सापि तद्वत् प्रकीर्त्तिता। विरहाग्निरा-धिश्च यातना च पयोनिधिः। दुःखदानि च वस्तूनि तत्राणि कथितानि च। पुष्पाणां कामिनी चन्द्रः कर्पूरस्य यशस्तथा। चन्द्रस्य प्रसादाह्लादतिशुभस्य तद्भवेत्। यशः पुष्पादिकं वस्तु चोपमानतयेक्ष्यते। सूर्यस्य शिवनेत्राग्निः कामुकाङ्गारदग्धता। वाड-वाग्निर्जलोत्पन्नं वस्तूत्पन्नाशकः। पद्मस्य कामिनी-वक्त्रं पाटलं रक्तवस्तु च। इन्दीवरस्य कस्तूरी नील-कालमधिस्तथा। कामिनीनयनं तद्वत् कैरवस्य तु चन्द्रमाः। कुन्दादिपुष्पमन्यच्च शुभ्रवर्णस्य यद्भवेत्। राज्ञ इन्द्रः कुबेरश्च चन्द्रमा भास्करस्तथा। नक्षत्रम-तयो ये तु प्रसिद्धाचक्रवर्त्तिनः। मेघस्य काली कृष्णस्य नीलपाषोऽवर्णतिः। इन्दीवरं वनं दाता कृष्णाङ्गी भ्रमराधमी। अन्येषस्य चन्द्रादिशुक्लवर्णपदार्थकाः। कन्दर्पस्य नलचन्द्र आश्विनौ च पुरूरवाः। दोषस्यापि-त्यस्य प्रतापः शाल्वं तथा। वातोः शीघ्रगवस्तूनि कीर्त्तितानि पुरातनैः। अस्तस्य वायुर्हरिणो मनस्य, कृष्णनो गिरिः। मेघस्तमालवृक्षश्च तमसाञ्च वस्तुवयः। शीतकोष्णत्वयोश्चन्द्रः कैलासैरावतौ मतौ। शिवस्य कीर्त्तिवत् सर्वं कृष्णस्य वज्रको घनः। तमालवृक्षो भ्रमरश्चेन्दीवरकं तमः। नीलकालमधिर्नीलपद्मं रामस्य पूर्ववत्। नवदूर्वादलं दृश्यवस्तुं चाधिकं पुनः। लक्ष्मास्तु पार्वतो चन्द्रकान्तिः सीता रतिस्तथा। द्रौपदी पद्मकान्तिश्च पुराणैः परिकीर्त्तिता। सरस्वत्याश्चन्द्र-कला कैलासाचलकान्तयः। शुक्लवर्णपदार्थाश्च, विष-येषु सप्तदृक्। ब्रह्मास्त्रं प्रथितमनस्तथा नारायणो-दरम्। सप्तदृश्य च मेघादि वस्तु कृष्णं च यद्भवेत्। विदूरजा भारतश्च तथापस्मारिरोगवान्। सुरश्च स्वर्गः कैलासो यत् दृश्यत् स्यात् मनोरमम्। रक्तश्च पृथ्वी वैकुण्ठपुरी पीतश्च पुष्पकम्। कामिन्यास्तु तड़िन्तारा स्वर्णवर्णा च केतकी। उपमानतया स्वर्ण-लताऽपि परिकीर्त्तिता। नायकस्य तु कन्दर्पः ऐलचन्द्रो-ऽश्विनौ तथा। सभायास्तु सुधर्मा स्यात् गङ्गा स्वर्गस्य मण्डनम्। गरुडो पर्वतो मेरुरुपमानतया मतः। पण्डितस्य सुराचार्य ऋषिः शुक्रः सरस्वती। क्षीरा-मस्तु विरञ्चिश्च शिवोऽब्धो दुःखितो जनः। उत्तम-चन्दनतरुः शिवश्चेखरचन्द्रमाः। वाड़वाग्नियुताग्निश्च वलभीकोऽङ्गोन्दुशेखरः। दाहः कर्षः कलयद्यः काम-धेनुरधीनरः। रोदनोऽश्रिरुदश्रुश्च जैमिनिश्च युधि-ष्ठिरः। वमनन्तोमनं मद्यसम्भादो मलवानिलः। उभो-ऽग्निर्विष्णवर्षौ च च स्यात् विरञ्चिं प्रति। शीतकोर-ग्निर्विरञ्चोऽङ्गिनिश्वासस्तथा पुनः। विरञ्चिश्चाग्नि निश्वास उपमानतया मतः। वर्षतोरक्षनो व्योम नारा-यणस्तद्वत्काः। यरदः काशपुष्पादिशुभ्रतांशुचामाराः। ऐरावतगजा श्रेष्ठा उपमानतया बुधैः। शीतकोरुप मानं स्यात् राज्यशून्यस्तु भूपतिः। तथापस्मारिरोगार्त्तो विद्वद्भिः परिकीर्त्तितः। शिशिरतोस्तु दुखिनः सप्तदोऽङ्गिधरान्विनौ। रात्रागमनकालश्च मदनोऽपि मतो विदाम्। सचिवस्योपमानं तु सुराचार्यः प्रकी-र्त्तितः"।

साधक त्रि॰साध—ण्वुल्, सिध—णिच्-ण्वुल् साधादेशः वा। १साधनकर्त्तरि २कारके तन्त्रोक्ते ३मन्त्रादिसिद्धिकारके शिवे च "साधकः सिद्धिमाप्नुयात्" इति तन्त्रम्। स्त्रियां टाप् अत इत्त्वम्। साधिका सा च ४दुर्गायां "साधनात् सिद्धिरित्युक्ता साधिका वाऽथ ईश्वरी" देवीपु॰४५ अ॰। ५जन्मतारावधिकेषु वधपञ्चदशत्रि-विंशनक्षत्रेषु पु॰ "जन्मसम्पद्विपत् क्षेम प्रत्यरिः साधको वधः। मित्रं परमसिलञ्च जन्मर्क्षात् गणयेत् त्रिधा" ज्यो॰त॰। ६अनुलोमजे त्रि॰।

साधकतम न० अतिशयेन साधकं तमप् "साधकतमं करणम्" पा० परिभाषिते करणे कारकभेदे।

साधन न० सिध-णिच्-ल्युट् साधादेशे व्यापारे करणे भावे ल्युट् कर्त्तरि ल्यु वा। १करणरूपे कारकभेदे २मारणे ३मृतसंस्कारे अग्निदाने ४गतौ ५द्रव्ये ६धने ७ऋणादाने ८निष्पादने ९उपकरणे १०हस्तस्थादियुद्धसामग्र्याम् ११अनुगमने अमरः। १२सैन्ये १३पापे १४सिद्धौषधे १५मेढ्रे मेदि० १६मैत्रे १७ऊरुसन्धौ १८सिद्धौ धरणिः। १९कारके २०प्रमाणे हेमच०। २१व्याधे त्रिका०। २२मोक्षने २३जये अजयः २४ब्रह्मविद्याहेतौ नित्यानित्य वस्तुविवेकवैराग्यशमादिषट्कमोक्षेच्छात्वरूपे च। युच्। साधनाऽपि उपासनायां निष्पादनायाञ्च स्त्री।

साधनाप्रसिद्धि स्त्री हेत्वदोषभेदे सा च साधने साधनता वच्छेदकधर्मीभावरूपा यथा "पर्वतो वह्निमान् आज्ञान-धूमादित्यादौ धूमनिष्ठः ज्ञाज्ञत्वाभावः साधनाप्रसिद्धिः।

साधर्म्य न० सधर्मणः समानधर्मस्य भावः ष्यञ्। १स्वकीय-साधारणधर्मरूपे उपाधे २अनुगतधर्मे "यदुक्तं यस्य साधर्म्यम्" भाषा०। समानो धर्मो यस्य तस्य भावः ष्यञ्। ३समानधर्मे यथा पद्मस्येव सुन्दरं मुखमित्यादौ सौन्दर्य्यसमयोः समानधर्मः।

साधर्म्यसम पु० साधर्म्येण समः। व्याप्यत्वाभासोद्भावने जात्युत्तरभेदे "साधर्म्येणोपसंहारे तद्धर्मविपर्य्ययोपपत्तेः साधर्म्यसमः" गौ० "वादिनाऽन्वयेन व्यतिरेकेण वा साध्ये साधिते प्रतिवादिना साधर्म्यमात्रप्रवृत्तहेतुना तदभावसाधनम् यथा शब्दोऽनित्यः कृतकत्वाद् घटवत् व्यतिरेकेण वा व्योमवदित्युपसंहृते नैतदेवं यदनित्यघटसाधर्म्यात् नित्याकाशवैधर्म्याद्धाऽनित्यः स्यात् नित्याकाशसाधर्म्यादमूर्त्तत्वात् नित्यः स्यात् विशेषो वा वक्तव्यः इति भाष्ये तन्निदर्शनान्तरेणाख्या व्याख्यातं यथा "क्रियावानात्मा द्रव्यस्य क्रियाहेतुगुणयोगात् द्रव्यं लोष्टः क्रियाहेतुगुणयुक्तः क्रियावान् तथा चात्मा तस्मात् क्रियावानिति एवमुपसंहृते परः साधर्म्येणैव प्रत्यवतिष्ठते। निष्क्रिय आत्मा विभुत्वाद् द्रव्यस्य निष्क्रियत्वात् विभु चाकाशं निष्क्रियं च तथा चात्मा तस्मान्निष्क्रिय इति न चास्ति विशेषहेतुः क्रियावत्साधर्म्यात् क्रियावता भवितव्यं न पुनरक्रिय-साधर्म्यात् निष्क्रियेणेति विशेषहेत्वभावात् साधर्म्यसमः प्रतिषेधो भवति"।

साधारण त्रि० सह धारणया स्वार्थेऽण्। १सदृशे अमरः।

२अनेकसाधारणत्वेकक्रिन् २धर्मे "साधारणं समाश्रित्य यत्-किञ्चिद्वाक्यमादिकम्" स्मृतिः। स्त्रियां गौरा० ङीष्। सा च १कृत्तिकायां ४वेश्यादिनायिकायाञ्च "यः सपक्षे विपक्षे च भवेत् साधारणस्तु सः" भाषा० चक्रे ५हेत्वाभासभेदे पु०। यथा वह्निमान् द्रव्यत्वादित्यादौ द्रव्य-त्वहेतुः सपक्षे पर्वते विपक्षे ह्रदादौ च वर्त्तते इति साधारणः। स चानैकान्तिकभेदः "आद्यः साधारणस्तु स्यादन्योऽसाधारणो मतः। तथैवानुपसंहारी त्रिधा-ऽनैकान्तिको मतः" भाषा०।

साधारणधर्म्म पु० कर्म०। "अहिंसा सत्यमस्तेयं शौचमि-न्द्रियनिग्रहः। दमः क्षमाऽऽर्जवं दानं धर्मं साधारणं विदुः" स्मृतौ अहिंसादौ सर्ववर्णाश्रमतुल्ये १धर्मे। न्यायादौ २संशयहेतौ समानधर्मे च तथाहि रङ्कु रजतं नवेति संशये रङ्करजतयोः साधारण्यधर्मस्याकस्मि-कत्वादिहेतुः। ३प्रजासर्जनरूपे जन्तुमात्रधर्मे च "प्रज-नार्थं स्त्रियः सृष्टाः सन्तानार्थञ्च मानवाः। तस्मात् साधारणोधर्मः श्रुतौ पत्न्या सहोदितः" मनुः। स च धर्मः सर्वेषां जन्तूनां साधारण इति मानवा इत्युप-संहृतम्।

साधारणस्त्री स्त्री कर्म०। वेश्यायां हेमच०। सा च ना-यिकाभेदः। "अथ नायिका त्रिविधा स्वाऽन्या साधा-रणस्त्रीति" सा० द० नायिकाशब्दे ४०४२ पृ० तल्लक्षणं द्रष्टव्यम्। सामान्यस्त्रीप्रभृतयोऽप्यत्र।

साधारणी स्त्री साधयति साधा अरण्यीष्। १कृत्तिकायां हेमच० साधारणस्त्र्यास्त्रे स्त्रीप्रभृतौ स्त्री ङीष् स्वार्थे ष्यञ्। साधारणस्य कृत्तिकायां न०। भावे ष्यञ्। साधर्म्यधर्मे च।

साधिका स्त्री साधयति समयति सर्वोपशमम् गम-णिच्-साधादेशः ण्वुल्। १दुरालभायां हेमच०। सिध-णिच् ण्वुल्। २कार्षासिकायां स्त्रियाञ्च।

साधित त्रि० सिध-णिच्-क्त। १दापिते अमरः २प्रमाणा-दिना उद्भाविते च "साधितात् दयकं मतमिति स्मृतिः ३निष्पादिते ४शोधिते च।

साधिदैव त्रि० सह अधिदैवेन स्वार्थे अण् द्विपदवृत्तिः। अधिदैवतसङ्गते। साधिभूतसाधियज्ञावपि परमेश्वरे।

साधिष्ठ त्रि० अतिशयेन साधुः साढो वा इष्ठन् साधादेशः ढिलोपो वा। १अत्यन्तदक्षे अमरः २अतिसाधौ ३अति-शोभने च। ४अत्यार्द्धे मेदि० ५अत्याढ्ये हेमच०।

साधिष्ठान त्रि० सह अधिष्ठानेन । १सन्निहिते तन्त्रोक्ते षट्चक्रमध्ये सुषुम्णामध्यस्थे चक्रभेदे न० चक्रशब्दे २८०८ पृ० दृश्यम् ।

साधीयस् त्रि० अतिशयेन साधुः साढो वा टिलोपः साधादेशो वा । १साधुतरे च २अत्यन्तदक्षे अमरः । ३न्याय्ये हेमच० स्त्रियां ङीप् ।

साधु त्रि० साध-उन् । १उत्तमकुलजाते अमरः । २सुन्दरे ३उचिते च । स्त्रियां वा ङीप् । ४सती ५जिने च पु० हेमच० "न प्रहृष्यति सम्माने नापमाने च कुप्यति । न क्रुद्धः पुरुषं ब्रूयादेतद्धि साधुलक्षणम्" गरुडपु० उक्तधर्मयुते ६जने ७वार्द्धुषिके ८मनोहरे मेदि० । साधु लक्षयतीति णिच् अण् "यथाशक्त्यपि सन्तुष्टः समचित्तो जितेन्द्रियः । हरिपादाश्रयो लोके विप्रः साधुरितीर्यते । निर्वैरः सदयः शान्तो दम्भाहङ्कारवर्जितः । निरपेक्षो सुनिर्नीतरागः साधुरितीर्यते । लोभमोहमदक्रोधकामादिरहितः सुखी । अध्यात्मनिरतः साधुः सहिष्णुः समदर्शनः" पद्मपु० उत्त० ६६अ० "त्यक्तात्मसुखभोगेच्छाः सर्वसत्त्वसुखैषिणः । भवन्ति परदुःखेन साधवो नित्यदुःखिताः । परदुःखातुरा नित्यं स्वसुखानि बहून्यपि । नाशेयन्ते बहून्यत्र सर्वभूतहिते रताः । परार्थसुद्यताः सन्तः सन्तः किं किं न कुर्वते । तादृगग्रन्थ्यवैरीरि जलदेनेव प्रदीयते । एक एव सतां मार्गो यदक्लीबतपोधनम् । दहन्नमकरोत् क्रुद्धे पावकं यदपांपतिः । आत्मानं पीडयित्वापि साधुः सुखयते परम् । हृदयग्रन्थितानू हृद्यो दुःखच्छेत्ता करोति खलम्" वह्निपु० । ६व्याकरणव्यक्तप्रसाधुताज्ञात्याख्ये शब्दे "अनभ्यंशताऽनादिर्यद्वाऽभ्युदयोन्मता । व्याक्रियाव्यञ्जनौचित्या वा ज्ञातिः साधीह साधुता" हरिः । तथा च अपभ्यंशभिन्नत्वमनादित्वम् अभ्युदयसाधनप्रयोगविषयत्वं व्याकरणव्यक्तप्रज्ञातित्वं साधुता इति तदर्थः । स च ईश्वरसङ्केतान्वयः शब्द इति नैयायिकाः । तथा च यः शब्दो यस्मिन्नर्थे ईश्वरेण सङ्केतितः स शब्दस्तदर्थे साधुः । वैयाकरणमते यः शब्दः यस्मिन्नर्थे व्याकरणे व्युत्पादितः स शब्दस्तत्र साधुः यथा "कर्मणि द्वितीया"पा०हितोया कर्मणि साधुः ।

साधुज त्रि० साधो सद्वृत्ते जायते जन-ड । उत्तमकुलोद्भवे शब्दर० ।

साधुधी स्त्री द्व० । १अग्नौ हारा० । २सुन्दरबुद्धियुते त्रि० । कर्म० । ३साधुबुद्धौ स्त्री । [२उत्तमकुलभवे ।

साधुपुष्प न० साधु पुष्पं यस्य । १खदिरपादपे शब्दमा० । कर्म० ।

साधुवाह पु० कर्म० । विनीते सुशिक्षिते घोटके हेमच० ।

साधुवाहिन् पु० साधु यथा तथा वहति णिनि । १विनीतेऽश्वे अमरः २सुन्दरवहनकर्त्तरि त्रि० ।

साधुवृत्त पु० नित्यकर्म० । १कटम्बदृक्षे शब्दमा० । २वरुणवृक्षे राजनि० । ३शोभनवृत्तमात्रे च ।

साधृत न० सह साधृतेन सहस्य सः । १खाद्यपक्वे २मयूरसमूहे ३पर्णशीर्ष्याञ्च अजयः ।

साध्य पु० सिध-णिच्-यत् । "मनोमनसा तथा प्राणो मरोऽथानश्च वीर्य्यवान् । निर्भयो नरकश्चैव दंशो नारायणो हयः । प्रभुश्चेति समाख्याताः साध्या द्वादश देवताः" इत्युक्ते द्वादशसंख्यके १गणदेवताभेदे स्त्री० उक्ते विष्कम्भादिषु योगेषु २एकविंशे योगे च । ३साधनीये त्रि० मेदि० । ४अष्टादशविवादेषु प्रमाणादिना बोद्धव्ये पदार्थे "प्रतिज्ञादोषनिर्मुक्तं साध्यं सत्कारभाजितम् । निश्चितं लोकसिद्धञ्च एवं पक्षविदोविदुः" इत्युक्ते व्यवहारे साधनार्हे प्रतिज्ञेये ५पक्षे पु० "ऋणादिषु विवादेषु स्थिरप्रायेषु निश्चितम् । छले वाधर्मिके चार्थे प्रोक्तं साध्यं न सिध्यति" कात्या० । ६अनुमित्या साधनीये वह्न्यादौ च यथा वह्निमान् धूमादित्यादौ सिषाधयिषितो वह्निः साध्यः । साध्यमस्यास्ति अर्श आद्यच् । ७साध्यवति पक्षे पु० "साध्यनिर्देशः प्रतिज्ञेति गौ० सूत्रम् । साध्यवत्तया पक्षनिर्देश इति दीधितिकारः तन्त्रोक्ते ७अन्नमात्रे आत्मन्नस्य स्वानुकूलतापादके २८५पृ०उक्ते अक्षयवटकक्षे द्वितीयपङ्क्तिमादिकोष्ठस्थाद्यक्षरके "सिद्धः साध्यः सुसिद्धोऽरिः क्रमात् श्रीवा मनीषिभिः" इत्युक्ते ८मन्त्रभेदे । १०देवमात्रे मेदि० । व्याकरणोक्ते लिङ्गसंख्यानन्वयिक्रियाभेदे क्रियाशब्दे २२१७पृ० दृश्यम् । "साध्यरूपा क्रिया तत्र धातुरूपनिबन्धना" हरिः । "साध्यस्य साधनाकाङ्क्षा" हरिः ।

साध्यता स्त्री साध्यस्यानुमितिविधेयस्य भावः तल् । अनुमितिविधेयतारूपे न्यायोक्ते १विषयताभेदे । २इच्छाविषयतायां च । यथा घटोजायतामित्यत्र घटीया साध्यताख्या विषयता ।

साध्यताघटकसम्बन्ध पु०ह० । कर्म० । येन सम्बन्धेन—साध्यस्य अनुमेयता तादृशे सम्बन्धे यथा पर्वतः संयोगेन वह्निमान् धूमात् रत्नादौ संयोगः ।

साध्यतावच्छेदक पु०साध्यतामवच्छिनत्ति विशेषयति अव+

क्रिद-खुञ्। येन रूपेण सम्बन्धेन वा यस्य साध्यतारूपा विषयता। तस्मिन् १सम्बन्धे २धर्मे। यथा वह्निमान् धूमादित्यत्र वह्निः साध्यः तस्य साध्यतां वह्नित्वमवच्छिनत्तीति वह्नित्वं साध्यतावच्छेदकम्। एवं संयोगसम्बन्धोऽपि।

साध्यसम पु०१हेत्वाभासभेदे "साध्याविशिष्टः साध्यत्वात् साध्यसमः" गौ०सू०। "द्रव्यं ज्ञातेति साध्यम्। गतिमत्त्वादिति हेतुः। साध्येनाविशिष्टः साधनीयत्वात् साध्यसमः। अवयवसिद्धत्वात् साध्यवत् प्रतिज्ञापयितव्यः। साध्यं तावदेतत् किं पुरुषवच्छायापि गच्छति? आहो खिदावरुढ्यं संसर्पत्यावरणसंतानादर्शनविषयसंतानोऽयं तेजसो गच्छत इति? सर्पता खलु द्रव्येण यो यस्मिन्नोभाग आश्रियते तस्य तस्यासंनिधिरेवावच्छिन्नो गच्छत इति। आवरणं तु प्राप्तिप्रतिषेधः" वात्स्या० २जात्युत्तरभेदे "उभयसाध्यत्वात् साध्यसमः" गौ० सू० "हेत्वाद्यवयवसामर्थ्ययोगी धर्मः साध्यः। तं दृष्टान्ते प्रपञ्चतः साध्यसमः। यदि यथा लोष्टस्तथात्मा प्राप्तिस्तर्हि यथात्मा तथा लोष्ट इति। साध्यत्वायमात्मा क्रियावानिति कामं लोष्टोऽपि साध्यः। अथ नैवम्। न तर्हि यथा लोष्टस्तथात्मेति वात्स्या०। तच्च "पक्षदृष्टान्तादेः प्रकृतसाध्यतुल्यतापादनम्" गौ० वृ० दृष्टान्तस्थपक्षतुल्यताकथनम्। यथा, आत्मा सक्रियः क्रियाहेतुगुणवत्त्वादित्यादौ यदि यथा लोष्टस्तथात्मेति त्वयोच्यते तदा यथात्मा तथा लोष्ट इत्यापादनम्। तथा च यदात्मनि क्रियावत्त्वं साध्यते। तर्हि लोष्टेऽपि तत्साधनीयम्। नेति चेत्तर्हि यथा लोष्टस्तथात्मेति न वाच्यम्। लोष्टसदृश आत्मात्मसदृशो लोष्ट इत्यत्र नियामकाभावादिति" नीलकण्ठः।

साध्यसिद्धि स्त्री साध्यस्य सिद्धिः विनिश्चयः। साध्यस्य वक्त्राद्देः वक्तृत्वादिना साधनाधीने १निश्चये २तच्चिन्तनौ। साध्यस्य प्रतिज्ञेयार्थस्य सिद्धिर्निश्चयो यत्र। व्यवहारे प्रतिज्ञातार्थस्य प्राड्विवाकादिभिः विनिश्चयरूपे ३व्यवहारपादभेदे च।

साध्याप्रसिद्धि स्त्री हेत्व० साध्ये साध्यतावच्छेदकधर्मावरूपे हेत्वाभासभेदे। यथा पर्वतः काञ्चनमयवह्निमान् धूमादित्यादौ वह्निनिष्ठः काञ्चनमयत्वाभावः साध्याप्रसिद्धिः।

साध्वस न० साधु+अस्यति अस्-अच्। भये अमरः।

साध्वी स्त्री साधु-ङीप्। १भेदायां रालनि० "आर्त्तार्त्ते सूतिका क्षुद्रे प्रोषिते मलिना क्षया। मृते विपेत वा पत्यौ साध्वी स्त्रेया पतिव्रता" उक्तलक्षणायां २स्त्रियां तस्यार्थे संज्ञात्वात् न पुंवद्भावः। साधुतायुक्ते ३स्त्रीमात्रे च। तस्यार्थे पुंवद्भाव इति भेदः।

सानन्द त्रि० सह आनन्देन। १आनन्दसहिते "सानन्दं नन्दिहस्ताहतसुरजरवाङ्गत्तकौमारवर्हि" मालतीमा०। २ध्रुवकभेदे "अष्टादशाक्षरैर्युक्तो यशोऽर्थप्रदो ध्रुवः। कङ्कणसंज्ञके ताले सानन्दो वीरके रसे" सङ्गीतदा०। ३शुक्लकरञ्जे पु० राजनि०।

सानन्दूर पु० तीर्थविशेषे "सानन्दूरेति विख्यातं भूमेः! गुह्यं परं मम। उत्तरे तु सरस्तस्य मलयस्य च दक्षिणे। तत्र तिष्ठामि वसुधे! सदीर्घां दिशमाश्रितः। प्रतिमा वै सदोयास्ति नात्युच्चा नातिनीचका। आयसीं तां पटन्त्येके अन्ये ताम्रमयीं तथा। कांस्यां रीतिमयीमन्ये केचित् शीसकनिर्मिताम्। शिलामयीमित्यपरे सङ्कीर्णधातुरूपिणीम्" वराहपु०।

सानसि पु० सन दृष्, असुक्च। सुवर्णे उणादिकोषः।

सानिका स्त्री सन-खुञ् टापि अत इत्वम्। वंश्यां शब्दच०

सानु पुंन० सन-अुन्। १पर्वतस्थे समभूमिदेशे प्रस्थे अमरः २वने १वातसमूहे ४पथि ५ऋषे ६कोविदे ७अर्कै मेदि० ८पक्षिणे च जटा०।

सानुज न० सानौ जायते जन-ड। १प्रपौण्डरीके राजनि० २लम्बकुचे पु० राजनि०। सह अनुजेन। ३अनुजसहिते त्रि०

सानुमत् पु० सानुरस्यास्ति मतुप्। पर्वते हेमच०।

सानेयी स्त्री सह आनेयेन स्वरेण सहस्य सः गौरा० ङीष्। वंश्यां शब्दर०। स्वार्थे क प्रत्ययः। सानेयिकोऽप्यत्र।

सान्तपन न० सन्तापयति सम्+तप+णिच् ल्युट्-स्वार्थेऽण् सन्तपनाय साधु अण्-वा।

"गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्। एकरात्रोपवासश्च कृच्छ्रं सान्तपनं विदुः" मनूक्ते कृच्छ्रसाध्ये व्रतभेदे एकदिने गोमूत्रादिषट्कमात्रपानं परदिने उपवास इति कृच्छ्रसाध्यताऽस्य।

सान्तर न० सह अन्तरेण सहस्य सादेशः। १विरले जटा० २व्यवधानसहिते त्रि०। [नसाधने विधानभेदे।

सान्तानिक त्रि० सन्तानः प्रयोजनमस्य सन्ता० ठक्। सन्ता०

सान्त्व आत्मकुलस्वरसे चुरा० उभ० सक० सेट्। सान्त्वयति ते अससान्त्वत् त सान्त्वापयतीत्यत्र अनेकच्कत्वात् न णेरुपदेशः।

सान्त्व न० सान्त्व-अच्। १अत्यर्थमधरे २आनुकूल्ये मेदि०। ३श्रोत्रमनःप्रीतिदवाक्ये प्रियवाक्यादिना क्रोधोपशमनरूपे सामनि च अमरः।

सान्त्वन न० सान्त्व-ल्युट्। १आनुकूल्यकरणे प्रियवादादिना क्रोधाद्युपशमने च। युच्। अत्रैव स्त्री।

सान्दीपनि पु० सन्दीपनस्यापत्यम् इञ्। रामकृष्णयोराचार्ये अवन्तिपुरवासिनि मुनिभेदे।

"विदिताखिलविज्ञानौ तत्तज्ज्ञानमवापतुः। शिष्याचार्यं क्रमं वीरौ ख्यापयन्तौ यदूत्तमौ। ततः सान्दीपनिं काश्यमवन्तिपुरवासिनम्। अस्त्रार्थं जग्मतुर्वीरौ बलदेव जनार्दनौ" विष्णु० ५अंशे २१अ०।

सान्द्र त्रि०अदि-रक् सह चन्द्रेण। १निविड़े अमरः २स्निग्धे मेदि०। ३स्निग्धे ४मनोज्ञे शब्दर०। ५घने न० मेदि०।

सान्द्रपुष्प पु० सान्द्रं पुष्पमस्य। विभीतकवृक्षे शब्दर०।

सान्द्रस्निग्ध त्रि० सान्द्रं स्निग्धः। १अतिस्निग्धे शब्दर०। २अतिमनोहरे च।

सान्धिक पु० सन्धा सुराद्यावनं शिल्पं वेत्ति ठक्। १शौण्डिके शब्दमा०। सन्धिः प्रयोजनमस्य ठञ्। २सन्धिकर्त्तरि त्रि०। [सन्ध्याकालिके।

सान्ध्य त्रि० सन्ध्यायां भवः सन्ध्यावेलाo यण् न ठञ्।

सान्ध्यकुसुमा स्त्री ह्रस्व०। त्रिसन्ध्यिपुष्पवृक्षे राजनि०।

सान्नाय्य न० सन्नीयते सम्+नी-ण्यत् नि०। मन्त्रादिना संस्कार्ये घृतादौ अमरः। [कल्पय" आपाद्यनमन्त्रः।

सान्निध्य न० सन्निधिरेव स्वार्थे ष्यञ्। नैकट्ये "सान्निध्यमिह

सान्निपातिक त्रि० सन्निपातात् त्रिदोषविकारात् आगतः तेन निर्वृत्तो वा ठञ्। सान्निपाताज्जाते रोगे सन्निपातशब्दे ५२१६ पृ० दृश्यम् "विकारे सन्निपातजे" कुमारः।

सान्वयिक पु० सन्वयः प्रयोजनमस्य ठक्। सम्बन्धिनि हेमच०

सापत्न पु० सपत्न एव स्वार्थे अण्। १शत्रौ अमरः; सपत्न्यां भवः तस्या अपत्यं वा अण्। १सपत्नीपुत्रे। ष्यञ्। सापत्नोऽप्यभवत्।

सापिण्ड्य न० सपिण्डस्य भावः ष्यञ्। दायाशौचषड्यादिप्रयोगिनि ज्ञातिधर्मभेदे "सापिण्ड्यं सप्तपौरुषमिति स्मृतिः। सपिण्डशब्दे ५२२० पृ० दृश्यम्।

सापपदीन न० सप्तभिः पदैः शत्रारितैर्निर्वृत्तम् खञ्। सख्ये क्रीडायां अमरः "सापपदीनं सख्यम्" पा०।

सापपौरुष त्रि० सप्त पुरुषान् व्याप्नोति ष्यञ् उभयपदवृद्धिः। सप्तपुरुषव्यापके।

साफल्य न० सफलस्य भावः ष्यञ्। सामर्थ्ये सम्पूर्णतायाञ्च

साम सान्त्वने अद०चु०उ०स०सेट्। सामयति ते अयसामत् त अनेकाक्षत्वात् न षोपदेशः।

सा(षा)म सान्त्वे चु०उभ० सक०सेट्। सामयति अयं षोपदेश एव न्यायः दुर्गादासेन तन्यादित्वमस्योक्तमप्रमाणम्।

सामक पु० साम-स्वार्थे कन्। तर्कशाखे त्रिका०। समकमेव स्वार्थे अण्। २कुद्दिरचिते मूलमात्रे ग्रन्थे मिता०।

सामग पु० साम तद्वेदं गायति। सामवेदाध्यायिनि जटा०।

सामगर्भ पु० साम गर्भे यस्य। विष्णौ शब्दर०।

सामग्री स्त्री समग्रस्य भावः ष्यञ् स्त्रीत्वपक्षे ङीष् ङीषि यलोपः। १समस्ततायाम्। स्त्रीत्वाभावपक्षे सामग्र्य तत्रार्थे न०। "प्रायेण सामग्र्यविधौ गुणानां कुमारः। स्वार्थे ष्यञ्। २करणसमूहे १द्रव्ये च स्त्री।

सामज पुंस्त्री० साम्नो वेदभेदात् जायते जन-ड। १गजे। स्त्रियां ङीष्। तस्य तज्जन्यकथा पालकाव्ये उक्ता तच्च सामयोनिशब्दे दृश्यम्। २सामपाठजे ऋगादौ त्रि०मेदि०

सामञ्जस्य न० समञ्जसस्य भावः ष्यञ्। औचित्ये।

सामन् न० सो-मनिन्। "ऋग्मे वाया हि" इत्यादिके १वेदभेदे तल्लक्षणमधिकृत्य गेये २गानभेदे "ऋच्यध्यूढं साम गीयते" छान्दोग्योप०। साम्नो गानरूपत्वं गानशब्दे २५७२ पृ० दृश्यम् तच्चोदाहृतं वेदगाने ऋग्गानादौ मूलपत्वे च दृश्यं सामवेदस्य विभागादि चरणव्यूहे दृश्यम्। तच्छाखाभेदाः वेदशब्दे ४८२४ पृ० दृश्याः। राज्ञां "सामभेदस्तथा दानो दण्डश्चेत्युक्ते २उपायभेदे तस्य विषयादिकं मत्स्यपु० २२१अ० उक्तं यथा मत्स्य उवाच "सामभेदस्तथा दानो दण्डश्च मनुजेश्वर!। उपेक्षा च तथा माया इन्द्रजालञ्च पार्थिव!। प्रयोगाः कथिताः सप्त तान्मे निगदतः शृणु। द्विविधं कथितं साम तथ्यञ्चातथ्यमेव च। तत्राप्यतथ्यं साधूनामाक्रोशायैव जायते। तत्र साधुः प्रयत्नेन सामसाध्यो नरोत्तम!। महाकुलीना ऋजवो धर्मनित्या जितेन्द्रियाः। सामसाध्या न चातथ्यन्तेषु साम प्रयोजयेत्। तथ्यं साम च कर्त्तव्यं कुलशीलादिवर्णनम्। तथा तदुपचाराणां कृतानाञ्चैव वर्णनम्। अनयैव तथा युक्त्या कृतत्राख्यापनं खलम्। एवं साम्ना च कर्त्तव्या वशगाः धर्मतत्परान्। साम्ना यद्यपि रक्षांसि गच्छन्तीति परा-श्रुतिः। तथाप्येतदसाधूनां प्रयुक्तं नोपकारकम्। अतिसङ्गतमित्येवं पुरुषं सामवादिनम्। असाधवो

विजानन्ति तत्तत्तेषु वर्त्तयेत् । ये शुद्धवंशा ऋजवः प्रणीता धर्मे स्थिताः सत्यपरा विनीताः । ते साम-साध्याः पुरुषाः प्रदिष्टा मानोन्नता ये सततन्तु राजन्" । तत्र मित्रादिसामप्रकारः शुक्रनीतिपरिशिष्टे तत्र विशेष-रूपो यथा

"तत्समस्तु मम नास्ति मित्रे साम इदं श्रुतम् । परस्परमनिष्टं न चिन्तनीयं त्वया मया । सहा-हार्यं च कर्त्तव्यं शत्रौ साम प्रकीर्त्तितम्" । विग्रह-भेदेनोपायभेदात्तल्लक्षणं तत्रोक्तं यथा "सर्वोपायै-स्तथा कृत्स्नैर्नीतिज्ञः पृथिवीपतिः । यथा स्वाम्यधिका न स्युर्मित्रोदासीनशत्रवः । सामैव प्रथमं श्रेष्ठं दानन्तु तदनन्तरम् । सर्वदा भेदनं शत्रोर्दण्डनं पापसंश्रये । प्रबलेऽरौ सामदानौ साम भेदोऽधिके कृतौ । भेददण्डौ समे कार्य्यौ दण्डः पुंसः प्रहीणके । मित्रे च साम-दानौ स्तो न कचित् भेददण्डने । रिपोः प्रजानां सम्भेदः पीडनं स्वजयाय वै । रिपुप्रयोड़िताद्यं च साम्ना दानेन संयुतः । स्वप्रजानां न भेदेन नैव दण्डेन पालनम् । कुर्वीत सामदानाभ्यां सर्वदा यत्नमास्थितः" ।

३शत्रुवशीकरणोपायभेदे ४प्रियवाक्यादिना सान्त्वने च । ५पशुबन्धनरज्ज्वां स्त्री ङीप् ।

सामन्त पु० संश्लिष्टोऽन्तः एकदेशो यस्य समन्तस्तेश्वरः अण् । स्वविषयानन्तरवर्त्तिदेशाधिपे १नृपे अमरः । समन्ताद्भवः अण् टिलोपः । २श्रेष्ठप्रजायाम् (मनुष्ये च) "यं परम्परया भोगाः सामन्ता वा समागतम्" स्मृतिः ।

सामयिक त्रि० समये काले नियमे वा भवः उचितो वा ठञ् । १समयभवे २समयोचिते ३नियमबद्धे च "नि-जधर्माविरोधेन यस्तु सामयिको भवेत्" स्मृतिः ।

सामयिकाभाव पु० अत्यन्ताभावे त०टी० । केचित्तु, तत्पा-दनिष्ठप्रयोज्योऽत्यन्ताभावादतिरिक्तोऽयमभाव इत्याहुः ।

सामयोनि पु० साम सामगानं योनिरुत्पत्तिस्थानं यस्य । इक्ष्वाकौ, तेषाञ्च सामयोनित्वञ्च पालकाप्ये "सूर्य्य-स्याष्टकपाले हे समानीय प्रजापतिः । इक्ष्वाकां परि-दद्यात्र सामान्यगायत । गायतो ब्रह्मणस्तस्मात् सप्तपैतृमतल्लजाः" इति । इत० ३यत्तर्क्षे ब्रह्मणि स्त्री ।

सामर्थ्य न० समर्थस्य भावः ष्यञ् । १देहजे बले २शक्तौ ३योग्यतायां मेदि० । ४शक्तावाधेतायाञ्च । समासशब्दे ५२११ पृष्ठे दृश्यम् । योग्यता च कार्य्यजनयोग्यत्वं यथा परामर्श-स्यानुमितियोग्यत्वम् । ५आकाङ्क्षायोग्यत्वादिमत्त्वे गौ० इ० यथा आग्नेयस्य वचनस्य । सङ्गतार्थतारूपं च सामर्थ्यं द्विविधम् अपेक्षारूपम् एकार्थीभावश्चेति" वैयाक० । तत्राद्यं राज्ञः पुरुष इत्यादिवाक्ये ह्युपयुज्यते, द्वितीयं राजपुरुष इत्यादि समासादावुपयुज्यते" ।

सामवायिक पु० समवाये प्रभवतः ठञ् । १मन्त्रिणि हेमच० तस्येदम् ठञ् । २समवायसम्बन्धिनि त्रि० ।

सामाजिक पु० समाजः समावेशनं प्रयोजनमस्य । १सभ्ये अमरः । २समाजसम्बन्धिनि त्रि० ।

सामानाधिकरण्य न० समानाधिकरणस्य भावः ष्यञ् । १तदधिकरणवृत्तित्व२तद्वदनुयोगिकप्रतियोगिकत्वे सिद्धा-न्तलक्षणे गदा० यथा वह्निधूमयोः सामानाधिकरण्यम् । स्वावच्छेदकीभूतो यः कालस्तदवच्छिन्ना या स्वविशिष्ट-निरूपिता यत्किञ्चिद्वृत्तिनिष्ठाऽऽधेयता सा । यथा यदा सिषाधयिषा नासीत् परं तु सिद्धिरासीत्तदा सिद्धि-सिषाधयिषाविरहयोः सामानाधिकरण्यम् । ३भेदा-न्वयबोधकत्वे । यथा नीलोघट इत्यादौ नीलपदघटपदयोः सामानाधिकरण्यम् ४धर्मितावच्छेदकवदवच्छिन्नवृत्ति-विषयकत्वे यथा पर्वतो वह्निमान् इत्यादौ यत्किञ्चित्पर्वत-वह्निविषयिकानुमितिः सामानाधिकरण्येनानुमितिः ।

सामान्य न० समानस्य भावः ष्यञ् । १साधारण्यप्रयोजकधर्मे यथा सुखं पद्ममिव सुन्दरमित्यादौ सौन्दर्य्यादि । समा-नमेव स्वार्थे ष्यञ् । द्रव्यगुणकर्म्मसु तुल्यतया स्थितायां २जातौ भाषा० । जातिशब्दे २०८२ पृष्ठम् ।

सामान्यञ्च द्विविधं सकलसमखण्डञ्च सामान्यलक्षणा-शब्दे दीधितिकृद्भिः । "सामान्यं विशेष इति बुद्ध्यपेक्षम्" कणा० । अनुगतधर्मत्वम् सामान्यमिति तल्लक्षणं तेन २अनु-गतधर्मस्वरूपं यथा प्रतियोगितासामान्ये यद्धर्मावच्छिन्न-त्वादीति दीधितिः । ३अधिकविषयकत्वे यथा ब्राह्मणाय दधि दीयतां कौण्डिन्याय तक्रम् इत्यादौ दधिदानस्या-धिकब्राह्मणविषयकता । सामान्यविषयकशास्त्रञ्च विशेष-शास्त्रेण बाध्यते यथा "मा हिंस्यात् सर्वभूतानीति" हिंसानिषेधः सर्वविषयः "वायव्यं श्वेतमालभेत" इत्यादि विशेषः हिंसाशास्त्रं तेन सामान्यशास्त्रं वैधेतरविषयएव प्रसरति । ५अर्थालङ्कारभेदे ६०७५० दृश्यम् ।

सामान्यच्छल न० छलभेदे "सम्भवतोऽर्थस्यातिसामान्ययोगा-दसम्भूतार्थकल्पना" गौ०सू० "अहो खल्वसौ ब्राह्मणो विद्याचरणसम्पन्न इत्युक्ते कश्चिदाह । सम्भवति हि ब्राह्मणे विद्याचरणसम्पदित्यस्य वचनस्य विद्यातोऽर्थ-

विकल्पोपपत्त्या सम्भूतार्थकल्पनया क्रियते। यदि ब्राह्मणे विद्याचरणसम्पत् सम्भवति। ब्राह्मेऽपि सम्भवेत्। ब्राह्मोऽपि ब्राह्मणः। सोऽप्यस्तु विद्याचरणसम्पन्न इति। सामान्यनिमित्तं ह्यं सामान्यलक्षणमिति" वात्स्या०। "सामान्यविशिष्टसम्बन्धदर्शनाभिप्रायेणोक्तमिति सामान्ययोगादसम्बन्धदर्शकत्वकल्पनया दूषणाभिधानम्। यथा ब्राह्मणोऽयं विद्याचरणसम्पन्न इत्युक्ते ब्राह्मणत्वेन विद्याचरणसम्पदं साधयति इति कल्पयित्वा परो वदति। कुतो ब्राह्मणत्वेन विद्याचरणसम्पत्? बाल्येऽभिचारात्" इति।

सामान्यतोदृष्ट न० सामान्यतः सामान्यस्य सामान्यात् वा दृष्टं दर्शनम्। १अनुमानभेदे "अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत् सामान्यतो दृष्टं" गौ०सू०। "पूर्ववदिति यत्र कारणेन कार्यमनुमीयते यथा मेघोन्नत्या भविष्यति वृष्टिरिति शेषवत्तत् यत्र कार्येण कारणमनुमीयते पूर्वोदकविपरीतकसदकं नद्याः पूर्णत्वं शीघ्रत्वञ्च दृष्ट्वा स्रोतोऽनुमीयते भूता वृष्टिरिति। सामान्यतो दृष्टम् अन्यापूर्वकमन्यत्र दृष्टस्यान्यत्र दर्शनमिति। तथा चादित्यस्य। तस्मादस्यप्रत्यक्षाभावादित्यस्य अन्येति" अथ वा यत्राप्रत्यक्षे लिङ्गलिङ्गिनो सम्बन्धे केनचिदर्थेन लिङ्गस्य सामान्यादप्रत्यक्षो लिङ्गी गम्यते। यथेच्छादिभिरात्मा। इच्छादयो गुणाः, गुणाश्च द्रव्यसंस्थानाः, तद् यदेषां स्थानं स आत्मेति" वात्स्या०। २कार्यकारणभिन्नलिङ्गके अनुमानभेदे यथा पृथिवीत्वेन द्रव्यत्वानुमानम्। ३अन्वयव्यतिरेक्यनुमाने च। यथा वह्निमान् धूमादित्यादि उभयव्याप्तिसम्बन्धेन अन्वयानुमानसम्भवात् गौ०सू०इ०।

सामान्यप्रत्यासत्ति सामान्यं तज्ज्ञानं वा प्रत्यासत्तिः। अलौकिकप्रत्यक्षसन्निकर्षभेदे सामान्यलक्षणाशब्दे दृश्यम्।

सामान्यलक्षणा स्त्री सामान्यं साधारणधर्मः लक्षणं यस्याः। न्यायोक्ते अलौकिकप्रत्यक्षसाधने ज्ञानभेदे सन्निकर्षशब्दे दृश्यम्। यथा एकघटज्ञाने घटत्वरूपसामान्यधर्मज्ञानात् सकलस्य घटत्ववतो ज्ञानम्।

तस्याः प्रत्यासत्तित्वं मणिकृता व्यवस्थापितं यथा "व्याप्तिपक्षे सामान्यलक्षणाप्रत्यासत्त्या सकलधूमादिविषयकः कथमन्यथा पर्वतोवह्निमान् व्याप्तिपक्षे तस्मादनुमितिः सा चेन्द्रियसम्बद्धविशेषणतातिरिक्तैव वा तद्विशेषकप्रत्यक्षे तदिन्द्रियसन्निकर्षस्य हेतुत्वेनानामतादौ संयोगादेरभावादिति वदन्ति"।

तस्याः अप्रत्यासत्तित्वमाशङ्क्य सिद्धान्तितं तत्रैव चिन्तामणिकृता "उच्यते यदि सामान्यलक्षणया नास्ति तदानुकूलतर्कादिकं विना धूमादौ व्यभिचारसंशयो न स्यात् प्रसिद्धधूमे वह्निसम्बन्धावगमात् कालान्तरीयदेशान्तरीयधूमस्य मानाभावेनाज्ञानात् सामान्येन तु सकलधूमोपस्थितौ धूमान्तरे विशेषादर्शनेन संशयो युज्यते"।

अत्र दीधितिः "अत्र च सामान्यं लक्षणं स्वरूपं यस्या इत्यर्थे सामान्यमेव प्रत्यासत्तिः सामान्यं लक्षणं निरूपकं यस्या इत्यर्थे तु तज्ज्ञानम्। तत्राद्यमाह सा चेन्द्रियेति इन्द्रियेण सम्बद्धं धूमादि तस्य विशेषणं तद्विशेषकज्ञानप्रकारो धूमत्वादिरित्यर्थः। विशेषणतेत्यत्र भावार्थो न विवक्षितः तत्र विशेषणत्वं यस्या इति बहुव्रीहिर्वा सम्बद्धपदस्यैव वा परम्परासम्बन्धस्तत्सम्बन्धविशेषकज्ञानप्रकारोऽर्थः तथाच सैव विशेषणतेत्यर्थः। अत्र च बहिरिन्द्रियस्य लौकिकः सम्बन्धो ज्ञानस्य तदिन्द्रियजन्यत्वस्य नियामकम् एवञ्चाणुत्वेन यत्किञ्चिदणूपस्थितावपि सकलाणुगोचरो मानसो बोध इति वदन्ति एतेन धूलीपटले धूमभ्रमे तत्र च वह्निव्याप्तिग्रहे तत्रावता धूमत्वेन धूमेषु व्याप्तिग्रहाङ्गदर्शनाद्दङ्गानुमितिर्न स्यात् हेत्वभावेन परामर्शानुत्पादात् किञ्च धर्मिणि दोषवशाज्ज्ञानेनाप्रकाशमाने अरण्यप्रकारीभवता सामान्येन स्वरूपेण वा लौकिकसन्निकर्षविरहेऽपि चानुमानापत्तिरिति परास्तम्। सामान्यञ्च सकलखण्डभेदेन द्वेधा सकलेऽपि चाखण्डमेव परम्परया सम्बद्धं प्रत्यासत्तिः येन सम्बन्धेन चेन्द्रियसम्बद्धे सामान्यं ज्ञायते तेन सम्बन्धेनाधिकरणानां प्रत्यासत्तिरिति"।

दीधितिकृता तु खण्डते सामान्यलक्षणायाः प्रत्यासत्तित्वं निराकृतं तत्र द्रष्टव्यम्। तच्च विस्तरभयादिह नोक्तम्।

सामान्या स्त्री समानैव स्वार्थे यञ् अजा० टाप्। साधारणस्त्रियां वेदाङ्गायाम् "धनमात्रलाभार्थं सकलपुरुषाभिलाषा। सा त्रिधा। अत्यन्तसम्भोगदुःखिता मानवती वक्रोक्तिगर्विता च सापि त्रिविधा। प्रेमगर्विता सौन्दर्यगर्विता च" रसमञ्जरी। [२निन्द्यायाञ्च अमरः।

सामि अव्य० अस-इन्। १अर्द्धे "सामिघटितां मैथिलम्। **सामिधेनी** स्त्री सम्-इध-करणे क्युट् नि०। समिन्धनसाधने १ऋग्भेदे अमरः। २समित्काष्ठे मेदि०। सामिधेनीशब्दनिरुक्तिर्यथा शत० ब्रा० १।३।५।१ "समिन्धे सामिधेनीभिर्इति तस्मात् सामिधेन्योनाम"। "इध्मेनाम्ब-

सन्निवन्धेतभूताः सामिधेनीर्विधास्यन् तासां नाम निर्वक्ति सामिधेनीभिः प्रयो वाजा इत्यादिभिर्ऋग्भिः" भा० तात्पर्यं आश्व० श्रौ०१।२।७। "अथ सामिधेन्यः प्रयो वाजा अभिद्युम्नोऽअस्म आवाहि वीतये सुशानः२ ईडेन्यो नमस्यस्तिरोऽअस्मिं दुतं दधीमहेऽ सामिध्यमानो अध्वरेऽ समिद्धो अग्न आङ्गतेनिहोता३ इडे।

सामीप्य न० समीपस्य भावः ष्यञ्। १नैकट्ये २निकटे च "सामीप्यात्ते मविष्यतेव्यात्माधारसप्तविधः" सुग्ध० व्याकरणम्। [२समुद्रभवे त्रि०।

सामुद्र न० समुद्रे भवः अण्। (वरकच) १लवणे हेमच०।

सामुद्रक न०समुद्रे भवमिदं वा मोक्षम् कुण्। हस्तादिरेखादिना स्त्रीपुरुषशुभाशुभलक्षणप्रतिपादके समुद्रशास्त्रे

"वामभागे तु नारीणां दक्षिणे पुरुषस्य च। निर्दिष्टं लक्षणं तेषां समुद्रेण यथोदितम्" "इति सामुद्रकसारसङ्ग्रहात्" नैघ०। सामुद्र स्वार्थे क। २समुद्रलवणे राजनि०

सामुद्रिक त्रि० समुद्रेण प्रोक्तं वेत्त्यधीते वा ठञ्। १स्त्रीपुरुषशुभाशुभलक्षणप्रतिपादकसमुद्राख्येऽरि २तद्वेत्तरि च।

साम्परायिक न० सम्परायाय आपदे परलोकाय वा हितम ठक्। १युद्धे अमरः २परलोकसाधने त्रि०।

साम्प्रतम् अव्य०सम्+प्र+तन-डत। युक्ते। १उचिते २इदानीमित्यर्थे अमरः।

सा या)म्य सम्बन्धे पु० उभ०सक० सेट्। साम्यवति ते असासाम्यत् त। अयं भोपदेशएव न्यायः। [राजनि०।

साम्बर न० सम्बरदेशे भवम् अण्। सम्बरदेशोद्भवे लवणे

साम्भवी स्त्री सम्भोः अपत्यम् प्रज्ञादित्वात् अण् गौरा० ङीष्। रक्तलोध्रे शब्दच०। [धर्मे।

साम्य न० समस्य भावः ष्यञ्। तुल्यसम्बन्धोजके साधारण-

साम्राज्य न० सम्राजो भावः ष्यञ्। १सार्वभौमत्वे "भेजे साम्राज्यदीक्षितम्" रघुः "उच्चाधिपत्यं राज्यं स्यात् साम्राज्यं दशमन्धके" इत्युक्ते २दशमन्धपाधिपत्ये च

साय पु० सो-घञ्। १दिनान्ते अमरः। २वाणे मेदि०।

सायंसन्ध्या स्त्री सायम् दिनान्ते सन्ध्या, तत्र सन्ध्यायते सम्+ध्यै-घञर्थे क वा। १दिनान्तसन्ध्यायाम् अमरः। २दिनान्ते उपास्यदेवताभेदे च। आपे ऋक्। १ततोपासनायाम्।

सायक पु० सो-ण्वुल्। १वाणे २खड्गे च अमरः।

सायकपुङ्खा स्त्री सायकस्य पुङ्खो यत्र। ५व०। अरडुकाख्ये राजनि०।

सायन्तन त्रि०सायमभवः सायम्+ट्युल् तुट् च। दिनान्तभवे। स्त्रियां ङीप्। "सायन्तनीं तिथिप्रान्तः" इति भट्टिः। "सन्ध्यां सायन्तनीं कुर्यात् द्वादश्यादिष्वपि प्रिये!। सकुर्वन्नित्यं याति यतो नित्यामसक्रिया" हरिभक्तिविलासे १पटले।

सायिका स्त्री सो-ण्वुल् टाप्। क्रमस्थितौ शब्दर०।

सायम् अव्य० सो-असुन्। दिनान्ते "सायं सख्यं तवस्तुते" इत्यृक्प्रयोगः।

सायाह्न पु०सायोऽह्नः षष्ठ०त० टच् समा० च ह्नादेशः। १दिनान्ते "सायाह्न स्नसुहूर्त्तः स्यात् स्याद्दं तत्र न सारवेद्" दक्षोक्ते पञ्चधाविभक्तदिनस्य तृतीयमुहूर्त्तभागे पञ्चमे २शेषेऽंशे च।

सायुज्य न० सह युनक्ति-युज-क्विप् सादेशः सयुज् तस्य भावः ष्यञ्। १सहयोगे पञ्चविधमुक्तिमध्ये २एकत्वरूपे मुक्तिभेदे च "सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत। दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः" भाग० ३स्क०२९अ०। [रत्व तत्रैकाच्कत्वात् नोपदेशः

सार दौर्बल्ये भ्वा० पु०उभ०सक० सेट्। सारयति ते असिसार

सार न० सृ-घञ्, सार-अच् वा। १जले २धने ३न्याय्ये त्रि० मेदि० ४नवनीते न०राजनि० ५लौहे मावप्र०। ६वने शब्दर०। ७जले दक्षिरांशे हेमच्यनि पु० अमरः १०सज्जारे ११वाधौ जटा०। १२रोगे धरणिः १३अतिदृढे १४पाशके पु० शब्दर० १५दध्यये पु० हेमच० १६श्रेष्ठे १७वरे च त्रि० अमरः। १८परमेश्वरे "एकं शिवं ज्ञानघनमच्युतं परात्परं ज्ञानमयं विशेषम्। अद्वैत मव्यपदेश्यरूपं सारन्त्वेकं नास्ति सारं ततोन्यत्। यस्मादेतज्जायते विश्वमग्र्यं यस्मिन् लीनं याति पश्चादशेषम्। आकाशवन्नैवजातञ्च हत्वा यद्दृश्यं वै भ्रियते तद्ध सारम्। अष्टाङ्गयोगैर्वेदवाग्भिश्चिन्त्य योगी युनक्त्याकरूपं सदैव। निवर्त्तते प्राप्य यद्वै हि लोके तद्वै सारं सारमन्यन्न चास्ति" कालिकापु० २७अ०।

सारक पु० सारयति रेचयति सृ-णिच्-ण्वुल्। १जलपाषे राजनि०। २रेचकद्रव्यमात्रे त्रि०।

सारखदिर पु० कर्म०। विट्खदिरे राजनि०।

सारगन्ध पु० सारःसंश्लेषगन्धो यस्य। चन्दने शब्दच०।

सारघ न० सरसामिदं तम् अण्। मधुनि धोडे जटा०।

सारङ्ग पुंस्त्री० सृ-अङ्गच्। १चातकपक्षिणि अमरः। २हरिणे ३गजे मेदि० ४भृङ्गे ५खगभेदे विश्वः। ६कृष्णे ७राजहंसे

८चित्रमृगे ९वाद्यभेदे १०पक्षे शब्दर० ११नानार्थे १२मयूरे १३कामदेवे १४चापे १५केशे १६स्वर्णे १७आभरणे १८पद्मे १९यज्ञे २०चन्दने २१कर्पूरे २२दुग्धे २३को-किले २४मेघे २५सिंहे २६राजौ २७भूमौ २८दीप्तौ च नानार्थकोषः । शारमङ्गमस्य अक०। शारङ्गोऽपि चित्र-मृगादौ। चित्रवर्णे त्रि०अमरः। स्वार्थे जातौ स्त्रियां ङीष्

सारङ्गिक पु० सारङ्गं मृगं हन्ति ठक्। व्याधे त्रि०को०।

सारज न० सारात् दध्नयात् जायते जन-ड। नवनीते शब्दच०।

सारण न० सृ-णिच्-ल्यु। १गन्धद्रव्ये धरणिः। २अतीसा-रोगे ३रावणसचिवभेदे च हेमच०। ४भद्रबलायां धरणिः ५व्याख्यातके शब्दच०।

सारणि(णी) स्त्री सृ-णिच्-अनि वा ङीप्। १क्षुद्रनद्यां २प्रसारितायाम् अमरादि० सङ्ज्ञेषाद्यभेद क्षुचितपद्म-गन्धादिबोधके ज्योतिषग्रन्थभेदे च।

सारण्ड पु०सृ-णिच् वा०अण्ड। वर्णाण्डे अटा०। [अवयः।

सारतरु पु० सारप्रधानः जलप्रधानस्तरुः। कदलीवृक्षे धन-

सारथि पु० सृ-अथिण्, षष्ठ रथेन सरथः घोटकः तस्य नियुक्तः दृश्यः वा। रथादिवाहनप्रेरके नियन्तरि अमरः। तल्लक्षणं मात्स्ये १८६ अ० यथा "निमित्तशकुनप्रज्ञो ह्यश्वचित्ताविशारदः। ह्यायुर्वेदतत्त्वज्ञो भूमिभागविभे-दवित्। स्वामिभक्तो महोत्साही सर्वज्ञश्च प्रियंवदः। शूरश्च कृतविद्यश्च सारथिः परिकीर्त्तितः"।

सारदा स्त्री सारं ददाति दा-क। १सरस्वत्याम् शब्दर०। "लिखति यदि गृहीत्वा सारदा सर्वकालम्" भिक्षादः। २सारदातरि त्रि०।

सारद्रुम पु० सारप्रधानो द्रुमः। खदिरवृक्षे राजनि०।

सारपादप पु०सारयति सारः निष्कः। धान्यनिष्कृते रक्षसा०

सारभाण्ड न० कर्म०। १अक्षत्रिमपात्रे २रूपेऽपात्रे च।

सारमिति पु० सारं यथार्थं मिनोत्यनेन मा-अरके क्लिच्। १वेदे हेमच० भावे क्लिच्। २सारज्ञाने स्त्री।

सारमूषिका स्त्री सारे मूषिकेवापहारकत्वात्। देवदाली-वृक्षे राजनि०। [१क्षुद्रमूषे २तद्योषिति स्त्री ङीप्।

सारमेय पुंस्त्री सरमायाः कश्यपपत्न्याः अपत्यम् ढक्।

सारलोह न० लौहेषु सारः राज०। लौहसारे (इस्पात)

सारव त्रि० सरस्यां भवः अण् नि०। सरजनदीभवे अमरः

सारस न० सरो नियतमस्तित्वेऽस्य अण्। १पद्मे अमरः २कट्वाम्लरसे च। षष्ठ रसेन सारौ अण्। ३चन्द्रे ४खनामख्याते पक्षिणि पुंस्त्री० स्त्रियां ङीष्। सरस रदम् अण्। ५सरोवरसम्बन्धिनि त्रि०। "नद्याः शैलवराद्यास्या यत्र संसृत्य तिष्ठति। तत्सरोजं जलं वृत्तं सारसं परिकीर्त्तितम्" भावप्र० पक्षे ६लवणभेदे "सारसं सलिलं वल्यं हृद्यान्नं मधुरं लघु। रोचनं तरुणं वृत्तं वह्निमूत्रमलं स्मृतम्" तल्लोक्तगुणाः।

सारसन न० सारं सनोति सन-अच्। १स्त्रीकट्याभरणे काञ्च्यां कक्षुकटाद्यर्थे मध्यभागे निबद्धे २पट्टिकादौ च अमरः।

सारस्वत पु० सरस्वती देवताऽस्य, सरस्वत्या दृष्टं वा अण्। १वत्सरखण्डे २देशभेदे हेमच०। ३यज्ञौडुमध्ये ४वृक्ष-भेदे ४सरस्वतीप्रतिपादितसुनिभेदे ५ब्राह्मादिनरूप कल्पभेदे च "सारस्वतस्य कल्पस्य इति" मत्स्यपुराणम् ६सरस्वतीसम्बन्धिनि त्रि० "तस्यां पूर्वाह्णसमये कुर्यात् सारस्वतोत्सवम्" नि०त०। ७सरस्वतीदेवताके च त्रि०। "तत्प्रावनाय निर्णीयसरः सारस्वतोहिजैरिति" स्मृतिः। तन्निमेदजन्मकथा च भा०श०३२अ०"ब्रह्मर्षे! (दधीच!) तव पुत्रोऽयं ब्रह्मबन्धुः धारितो मया। इदं तेऽप्यसरं रत्नं यत् वृत्तं प्रागजम्बुषाम्। तत् कृत्विषा वै ब्रह्मर्षे! ब्रह्मबन्धुः भृतस्त्वया" इत्युपक्रमे "तस्मात् सारस्वतः पुत्रो भवांस्ते वरवर्णिनि!। तवैव नाम्ना प्रथितः पुत्रस्ते लोकभावनः। सारस्वत इति ख्यातो भवि-ष्यति यथातथाः। एष द्वादश वार्षिक्यामनावृष्ट्यां द्विजर्षभान्। सारस्वतो महाभागो वेदानध्यापयिष्यति" इति सरस्वतीं प्रति दधीचोक्तिः तस्य वेदाध्यापनकर्त्तृत्वं तत्रैव अध्यायान्तरे "अनावृष्टिरनुप्राप्ता राजन् द्वादश-वार्षिकी। तस्यां द्वादशवार्षिक्यामनावृष्टौ महर्षयः। दुःखार्त्ताः पाण्डवश्रेष्ठ! क्षुधार्त्ताः सर्वतो दिशम्। दिग्-भ्यस्तान् प्रद्रुतान् दृष्ट्वा मुनिः सारस्वतस्तदा। गमनाय मतिञ्चक्रे तपसाच सरस्वती। न गन्तव्यमितः पुत्र! तपोहारयतं वृदा। दास्यामि मत्स्यप्रवरानुष्ट्रतामिह भारत!" ततः तद्दत्तमत्स्याहारेण प्राणानधारयत् वेदां-श्चाधारयत् अतीतायामनावृष्टौ अन्नाभावेन नष्टवेदा अन्ये ऋषयस्तो वेदान् लेभिरे तत्कृपा "तस्मादेतान-नुप्राप्य पुनर्धर्मं प्रचक्रिरे। भरिष्वेनिसृष्टाश्च शिष्यै-स्ते प्रतिपेदिरे। सारस्वतस्य विप्रर्षेर्वेदाध्यायकार-त्वात्"। देशभेदश्च "मध्ये सारस्वता मत्स्याः कुरवोजाङ्गलाश्च ये। पाञ्चालशाल्वमात्स्याश्च कुरवोजगलाश्च यम्"

दत्व्यक्षेमध्यदेशभेदः सोऽभिजनोऽस्य अण्। ततइेयवासिजने। तस्यत्राह्मणभेदश्च "सारस्वताः कान्यकुब्जा गौडमैथिलकोत्कलाः। पञ्च गौड़ा इति ख्याता विन्ध्योत्तरवासिनः" पुराणान्तरम्।

सारस्वतकल्प पु० कर्म०। १तन्त्रोक्ते सरस्वत्या उपासनार्थके विधानभेदे २तद्ग्रन्थके ब्रह्मादिने च। कल्पशब्दे १८।६ पृ० दृश्यम्। [शब्दर० २दुर्गाया अण्च०।

सारा स्त्री सारयति सृ-णिच्-अच्। १क्षत्रियजातायाम्

साराल पु० सारमालाति आ+ला-क। तिलवृक्षे शब्दर०।

सारि(री) पुंस्त्री० सृ-इण् स्त्रीत्वपक्षे वा ङीष्। १पाशके "सारीं चरन्तीं संख! सारयेति" नैषधम्। २पक्षिभेदे च (शालिक) अण्च०। क्षीरलः ३सप्तलायां राजनि०

सारिका स्त्री सरति गच्छति सृ-ण्वुल्। पक्षिभेदे(शालिक) अमरः।

सारिणी स्त्री सृ-णिनि। १सरदेवीलतायां २कार्पास्यां ३दूराह्वभावां ४कपिलगिरिमयायां ५प्रसारिण्यां हरक्षपनर्घवायाञ्च राजनि०।

सारिवा स्त्री सारिरिव वाति वा-क। (अनन्तमूल)लतामेदे सा च दुग्धगर्भा अम्बुवल्लरी सुगन्धा च। सा च कृष्णशुक्लभेदात् द्विविधा "सारिवाद्वयगं स्वादु स्निग्धं शुक्रकरं गुरु। अग्निमान्द्यार्करुचिश्वासकासास्रविषनाशनम्। दोषत्रयास्रप्रदरज्वरातीसारनाशनम्" भावप्र०। [भवः ठक्। विल्वभेदे अमरः।

सारोष्ट्रिक पु० सारः श्रेष्ठ उष्ट्रो यत्र सारोष्ट्रः देशभेदश्चत्र

सार्थ पु० सृ-घञ् स्वार्थे अण्। १समूहे २जन्तुसमूहे अमरः "स त्रयस्त्रिंसार्थसार्थकोत्तनामा" नैषधम्। सह अर्थेन वाच्येन वा। ३अर्थसहिते ४धनिनि त्रि०। कप्। सार्थक। ५अर्थसहिते त्रि० ६शब्दे पु० "सार्थकः स्यादर्थबोधकादिति" शब्दशक्तिप्रकाशिका।

सार्थवाह पु० सार्थं वहति वह-अण्। वणिग्जने अमरः

सार्द्र त्रि० सह आर्द्रेण। आर्द्रतायुक्ते अमरः।

सार्द्धम् अव्य० सह+अर्ध-असु। १आश्लिष्टे अमरः। सह अर्द्धेन। सार्द्धं २अर्धयुक्ते त्रि०।

सार्प न० सर्पोदेवताऽस्य अण्। अश्लेषानक्षत्रे।

सार्पिष्क त्रि० सर्पिषा संस्कृतम् ठक्। घृतसंस्कृते व्यञ्जनादौ हेमच०। [विदिते।

सार्वजनीन त्रि० सर्वेषु जनेषु विदितः खञ्। सर्वलोक-

सार्वत्रिक त्रि० सर्वत्र भवः ठक्। सर्वस्मिन् कालादौ भवे।

सार्वधातुक न० सर्वधातून् व्याप्नोति ठक्। व्याकरणोक्ते सर्वधातुप्रकृतिके लट् लोट लङ् विधिलिङ् रूपाख्ये। चतुर्लकारे [इन्द्रिः। सर्वभूतव्यापके।

सार्वभौतिक त्रि० सर्वाणि भूतानि व्याप्नोति ठञ् द्विपद-

सार्वभौम पु० सर्वस्या भूमेरीश्वरः सर्वासु भूमिषु विदितो वा अण् द्विपदवृद्धिः। १चक्रवर्त्तिनि नृपे २उत्तरदिक्स्थे गजे च अमरः। ३विदुरभ्रातृपुत्रे पु० भाग० ६।२८अ०। ४सकलभूमिसम्बन्धे त्रि०।

सार्वलौकिक त्रि० सर्वेषु लोकेषु विदितः ठञ् द्विपदवृद्धिः। सर्वलोकेषु विदिते "स रामः सार्वलौकिकः" भट्टिः।

सार्वविभक्तिक त्रि० सर्वासु विभक्तिषु तदर्थे भवः-ठञ्। सर्वविभक्त्यर्थे विहिते तसिलादौ प्रत्यये पा०।

सार्षप त्रि० सर्षपस्य विकारः अण्। सर्षपविकारतैलादौ "अदुष्टं सार्षपं तैलम्" स्मृतिः।

साल पु० सल-घञ्। १वृक्षमात्रे "रसालसालः समदग्धतामगा" नैषधम्। २खनामख्याते वृक्षभेदे "सालस्तु सर्जकार्श्यकर्णकः सखसंवरः। अस्यकर्णः कषायः स्याद् व्रणरक्तदरुक्षकृमीन्। व्रध्नविट्छ्लेष्मपित्तयोनिकर्णं गदान् हरेत्। सर्जकोऽन्योऽजकर्णः स्यात् सालो मरिच पत्रकः। अजकर्णः कटुस्तिक्तः कषायोष्णो व्यपोहति। कफपाण्डुकृमिगदान् मेहकुष्ठविषव्रणान्" भावप्र०। एतत्परत्वे सालव्यादिताऽपि। ३प्राकारे मेदि० ४सालभक्षके भरतः ५राले राजनि०।

सालन पु० सालः कारणत्वेनाऽस्त्यस्य प्रज्ञादित्वात् न। सालनिर्यासे (धुना) रत्नमा०।

सालनिर्यास पु० इत०। सर्जरसे (धुना) रत्नमा०।

सालपर्णी स्त्री सालस्येव पर्णान्यस्याः ङीप्। (सालवनि) वृक्षे शब्दर०।

सालपुष्प न० सालस्येव पुष्पं यस्य। स्वनामख्ये शब्दर०।

सालभञ्जिका स्त्री सालं भनक्ति भञ्ज-ण्वुल्। १काष्ठादिनिर्म्मिते क्रीडिभक्रीड़ासाधने पुत्तलिकाभेदे २वेश्यायाञ्च जटा०।

सालरस पु० इत०। (धुना) राले राजनि०।

सालवेष्ट पु० सालं वेष्टयति वेष्ट-अण्। राले (धुना)राजनि०

सा(शा)ला स्त्री सालः प्राकारोऽस्त्यस्याः अच्। वृक्षे भरतः

सा(शा)लावृक पुंस्त्री० सालायां वृक इव। कङ्कुरे। स्त्रियां ङीष्। [शब्दर० स्त्रियां ङीष्।

सा(शा)लूर पुंस्त्री० स(श)ल-ऊरच् णिच्। भेदे मत्स्ये

सा(शा)लेय पु०सा(शा)लायां भवःढक्। मधुरिकायाम् अमरः

सालोक्य न० समानोलोकोऽस्य तस्य भावः ष्यञ्। सायुज्य शब्दोक्ते पञ्चविधमुक्तिमध्ये एकलोकसहवासरूपे मुक्तिभेदे।

सा(शा)ल्व पु० ब०व० सौभदेशे। तेषां राजा अण्। तद्देशाधिपे तत्पभेदे स च श्रीकृष्णेन हतः भा० व० १४अ० दृश्यम्। [हेमच०।

सा(शा)ल्वहन् पु० साल्वं रूपं हतवान् हन-क्विप्। विष्णौ

सावधान त्रि०सह अवधानेन। १सचेतने सतर्के २मनोभिनिवेशयुक्ते च।

सावन न०सवनं यागाङ्गं स्नानं सोमनिष्पीडनं वा तत्रेदमण्। "अहोरात्रेण चैतेन सावनो दिवसः स्मृतः" ब्रह्मसिद्धान्तोक्ते १अहोरात्राक्ते दिवसे, सवनत्रयस्य अहोरात्रसाध्यत्वादङ्गत्वसम्बन्धितम्। तच्चिंशद्दिवसात्मके २मासभेदे च पु० "चान्द्रः शुक्लादिदर्शान्तः सावनस्त्रिंशता दिनैः" विष्णुध०"सावने च तथा मासि त्रिंशत्सङ्ख्योदयाः स्मृताः" म० त०। "सूतकादिपरिच्छेदो दिनमासाब्दसंख्यया। मध्यमग्रहभुक्तिश्च सावनेन प्रकीर्त्तितः" इति सूर्य्यसिद्धान्तः। सावनमासलक्षणानि च विशेषतः कानिचित् म०त० पितामहेनोक्तानि "विवाहादौ स्मृतः सौरो यज्ञादौ सावनो मतः" "आदिपदेन सवभर्तृदृद्धिप्रायश्चित्तादुदीवाहौर्ध्वभौधानपुंसवनसीमन्तोन्नयनजातकरणाद्यप्राशननिष्क्रमणचूडादिपदग्रहम्" म० त० रघु०। एषु सावनेन मानेनैव सर्व्वत्र गणना "सप्ताश्वपाशान्तश्च सावनेन लोकयात्रायत्नं स्नाद्यवहारकर्म विष्णुध० २वर्षभेदे "सौरेणाब्दस्तु मानेन यदा भवति भार्गव!। सावनेन च मानेन दिनषट्कं प्रपूर्य्यते"। "सौरवर्षे दिनषट्काधिकसावनवर्षो भवतीति रघु०। दिनषट्कमिति प्रायिकम् सौरवर्षे सावनस्य ५।१५।२१।३०।२४ दिनाद्याधिक्यस्यैव सिद्धान्तोक्तेः। ३यज्ञाङ्गे ४यजमाने ऋत्विजे च पु० मेदि०।

सा(शा)वर पु० स(श)वरेण निर्वृत्तः अण्। १पापे २व्याधे च विश्वः। २लोध्रे शब्दच०।

सावर्ण पु० सवर्णायां सूर्य्यपत्न्यां संज्ञायां भवः अण्। सवर्णागर्भजे सूर्य्यजे अष्टमे मनौ दृश्यः। सावर्णिरत्र "सावर्णिः सूर्य्यतनयो यो मनुः कथ्यतेऽष्टमः" "सूर्य्यौरजस्य समासाद्य सावर्णिर्भविता मनुः" देवीभा०। "छायासंज्ञा सुतो योऽसौ द्वितीयः कथितो मनुः। पूर्वजस्य सवर्णोऽसौ सावर्णस्तेन कथ्यते" देवीभाग० तन्त्रान्तरेऽन्यत्रैरुक्तम् "विवस्वतश्च द्वे भार्य्ये विश्वकर्मसुते उभे। संज्ञा छाया च राजेन्द्र! ये प्रागुक्ते तव। तृतीया वडवामेके तासां संज्ञासुतास्त्रयः। यमोयमी श्राद्धदेवश्छायायाश्च सुतान् शृणु। सावर्णिश्चपती कन्या भार्य्या संवरणस्य या। शनैश्चरस्तृतीयोऽभूत् खड्गिनौ वडवात्मजौ। अष्टमेऽन्तर आयाते सावर्णिर्भविता मनुः" भाग० ८।१३अ०। कल्पभेदादविरोधः।

सावित्र पु० सविता देवताऽस्य अण्। १विप्रे हेमच०। २ऋग्वेदे स्त्री ङीप्। "सावित्रीमात्रसारोऽपीति" मनुः। सा च ३सत्यवतोभार्य्यायाम् स्त्री ४सवितृदेवताके चर्वादौ त्रि०। ५यज्ञोपवीते न० शब्दच०। स्वार्थे अण्। ६सूर्य्ये पु० शब्दच०। तत्रेदम् अण्। ७मन्त्रदेवे ८दासो च पु० मेदि०। ९गर्भे शब्द० १०ब्रह्मपत्न्यां स्त्री ११दुर्गायां च स्त्री मेदि०। तन्नामनिरुक्तिः देवीपु० ४४अ० "त्रिदशैरर्चिता देवी वेदमातेषु पूजिता। भावशुद्धस्वरूपा तु सावित्री तेन सा स्मृता" वह्निपु०। अन्या निरुक्तिः "सर्वलोकप्रसवनात् सविता स तु कीर्त्यते। यतस्तद्देवता देवी सावित्रीत्युच्यते ततः। वेदप्रसवनाच्चापि सावित्री प्रोच्यते बुधैः"। ब्रह्मपत्नी च यतरूपा "ततः संजपतस्तस्य भित्त्वा देहमकल्मषम्। स्त्रीरूपमभवत्तीव्रं पुरुषरूपवत्। यतरूपा च सा ख्याता सावित्री च निगद्यते। सरस्वत्यथ गायत्री ब्रह्माणी च परन्तप!" यतरूपु० १अ०। गायत्रीशब्दे दृश्यम्।

सावित्रीव्रत न० सावित्रीपूजनसहितं कर्त्तव्यं व्रतम्। ज्यैष्ठकृष्णचतुर्दश्यां सावित्रीपूजनार्थे व्रते तद्विधिर्यथा "शिवाऽघोरा तथा प्रेता सावित्री च चतुर्दशी। कृष्णपक्षे च कर्त्तव्या कृष्णामेव हि पारयेत्" तिं०तं०धृतवचनम् यमः "दत्त्वा लवणकुम्भीनां सप्त ज्यैष्ठे चतुर्दशीम्। धर्मराजं समुद्दिश्य सर्वपापैः प्रमुच्यते"। विष्णुपुराणे उपवासचतुर्दश्यां महापातकनाशकः"। पराशरः "मेषे वा वृषभे वापि सावित्रीं तां विनिर्दिशेत्"। तां चतुर्दशीम् "ज्यैष्ठे कृष्णचतुर्दश्यां सावित्रीमर्चयन्ति याः। वटमूले सोपवासा न ता वैधव्यमाप्नुयुः"। राजमार्त्तण्डकृत्यचिन्तामणयोः "ज्यैष्ठे मासि चतुर्दश्यां सावित्रीव्रतमुत्तमम्। अवैधव्याय कुर्वन्ति स्त्रियः षड्वासमन्विताः"। व्रतभाते तु अनन्तरतृतीयाव्रतोक्तमाचरन्ति दृष्टपरिकल्पनान्यायात् तदुक्तं मत्स्यपुराणे "गर्भिणी सूतिका नक्तं कुमारी च रजस्वला। यदाऽशुद्धा तदा-

स्येन कारयेत् क्रियते यदा"। उपवासाशक्तौ नक्तं भोजनं कुर्यात् "उपवासे त्वशक्तानां नक्तं भोजनमिष्यते" इति तद्वचनान्तरात्। अशुद्धा चेत् पूजां कारयेत्। कायिकस्योपवासादेः सदा शुद्धया अशुद्धया च स्वयं क्रियते। एवं स्मृतिपरिभाषिकायां वर्द्धमानोपाध्यायाः। नारदः "दिवाभागे त्रयोदश्यां यदा चतुर्दशी भवेत्। तत्र पूज्या महाश्वेता देवी-सत्तमता सदा"। दिवाभागे दण्डद्वयमात्रसत्त्वेऽपि स्मृतेव प्रदोषे व्रतमाचरन्ति। पूर्वाह्णे तद्विधत्वेऽपि। पराह्णे त्रिमुहूर्त्तव्याप्तित्वे पराह्ण एव त्रिमुहूर्त्तव्याप्तिरिति वचनात्। यदा तु पूर्वपरयोर्न तथाविधा तदापि पराह्ण एव यथा ज्योतिषे "चतुर्दशग्रामभावाद्या यदा भवति नारद!। उपोष्या पूजनीया सा चतुर्दश्यां विधानतः"। सा सावित्री। ततश्चामावास्यायां सावित्रीव्रतविधानं शिवाघोरेति वचनञ्चैतत्परम्। पराशरः "सावित्रीमर्चयित्वा तु फलाहारा परेऽहनि। ततश्चाविधवा नारी वित्तभोगान् लभेत सा"।

सावित्रीसूत्र न० सावित्रीदीक्षाकार्यिकं सूत्रम् शाक०। यज्ञोपवीते पञ्चत्व०।

सास्युधी स्त्री सास्यु ध्यायति ध्यै-क्विप् सप्त०। स्वड्गाम् त्रिका०।

साह्ना स्त्री० सस-न णित्व। गोगलस्थिते लोमसंघाताञ्जके कम्बले अमरः।

साह्न त्रि० सह एव स्वार्थे अण्। चक्षुर्जलान्विते।

साह्नितास्त्रार्द्ध न० साह्नि अस्त्रिसहितं तास्त्रार्द्धं यत्र। कांस्ये त्रिका० तच्च रङ्गसहितताम्रार्द्धजातत्वात् तथात्वम् साह्नितास्त्रार्द्ध इत्येव पाठः सम्यक् अह्निनांगो रङ्गः

साहचर्य्य न० सहचरस्य भावः ष्यञ्। १समभिव्याहारे, २साहित्ये १शब्दनाधिकरणे च।

साहस न० सहसा बलेन निर्वृत्तम् अण्। बलेन कृते चौर्य्ये स्त्रीसंग्रहादौ दृष्टकर्मणि, "सहसा क्रियते यत्तु तत् साहसमिति स्मृतमिति" स्मृतिः। तद्विधृतिः वीरमि० "तच्च स्वरूपमाह नारदः "सहसा क्रियते कर्म यत्किञ्चिद्बलदर्पितैः। तत्साहसमिति प्रोक्तं शरीरञ्चाभिधीयते" इति। तच्च चातुर्विध्यमाह हरिः "मनुष्यमारणक्षौर्यं परदाराभिमर्शनम्। पारुष्यञ्चसमक्षञ्चेति साहसं स्याच्चतुर्विधम्" इति। समक्षं पारुष्यं वाग्दण्डपारुष्ये। तच्च त्रैविध्यमाह नारदः "तच्चापि त्रिविधं ज्ञेयं प्रथमं मध्यमन्तथा। उत्तमञ्चेति शास्त्रेषु तच्चोक्तं शतकं पृथक्" इति। एतेषां स्वरूपमाह स एव "फलमूलदलादीनां चेलोपकरणस्य च। भङ्गाक्षेपोपमर्दाद्यैः प्रथमं साहसं स्मृतम्। वासःपक्वान्नपानानां मृद्भाण्डस्य च। एतेनैव प्रकारेण मध्यमं साहसं स्मृतम्। व्यापादो विषशस्त्राद्यैः परदाराभिमर्शनम्। प्राणोपरोधि यच्चान्यदुत्तमसाहसम्" इति। भङ्गः फलादेः स्वरूपनाशनम्। आक्षेप आक्रोशः वाक्तिरस्करणमिति यावत्। उपमर्दः स्वरूपावश्लेष पीडनम्। एतेनैवं प्रकारेणेत्यर्थः। त्रिविधेऽपि साहसे दण्डमाह नारद "तत्र दण्डः क्रियापेक्षः प्रथमस्य शतावरः। मध्यमस्य तु शास्त्रज्ञैर्दशः पञ्चशतावरः। उत्तमे साहसे दण्डः सहस्रावर इष्यते। वधः सर्वस्वहरणं पुरान्निर्वासनाङ्कने। तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहसे" इति। ब्राह्मणस्य तु मध्यमापराधे शारीरदण्डाभावमाह स एव "अविशेषेण सर्वेषामेव दण्डविधिः स्मृतः। वधार्हते ब्राह्मणस्य न वधं ब्राह्मणोऽर्हतीति"। यमोऽपि "न शारीरो ब्राह्मणस्य दण्डोभवति कस्यचिद्" इति। मध्यमापराधे ब्राह्मणस्य दण्डमाह स एव "चित्वा तु बन्धने बद्धा राजा भक्तं प्रदापयेत्" इति। नारदोऽपि "शिरोमुण्डनं दण्डस्य निर्वासनं पुरात्। ललाटे चाभिशस्ताङ्कः प्रयाणदुर्भगेन च" इति। परद्रव्यापहरणरूपसाहसस्वरूपं तत्र च दण्डमाह याज्ञवल्क्यः "सामान्यद्रव्यसमहरणं साहसं स्मृतम्। तन्मूल्याद् द्विगुणो दण्डो निष्फले तु चतुर्गुणः" इति। वधभिर्जनैः प्रहरादिकालक्रमेण रक्षमाणस्य द्रव्यस्य बलात्कारेण हरणं साहसमुक्तं भवतीति पूर्वार्द्धार्थः। तन्मूल्यादपहृतद्रव्यमूल्यात्। निष्फले अपलापे। यः साहसं करोति तद्द्विगुणदण्डम्। यस्तु साहसं कृत्वा निह्नुते स चतुर्गुणदण्ड्य इत्युत्तरार्द्धार्थः। साहसिकस्य प्रयोजयितारं प्रमाह स एव "यः साहसं कारयति स दाप्यो द्विगुणदण्डम्। अथवैतच्छाद्धादौ कारयेत्स चतुर्गुणम्" इति। द्विगुणदण्डं साहसिकदण्डाद्द्विगुणं दण्डम्। साहसिकविशेषं प्रमाह स एव "अध्यक्षोशतिक्रमकृद्राजभार्यांप्रधारकः। संदिष्टप्रदाता च वसुहृन्मर्मभेदकृत्। मानच्छलिकादीनामपकारस्य कारकः। एष्वात्मधिको दण्ड एवमिति विनिश्चयः। स्वकन्दं

विषयगामी विक्रुष्टेनाभिधावकः। अकारणेन विक्रोष्टा चाक्षाक्षोत्तमान् स्पृशन्। शूद्रप्रव्रजितानाञ्च दैवे पित्र्ये च भोजकः। व्यृद्धं ग्रथयं कुर्वन् व्ययोन्यो योग्यकर्मकृत्। दुष्टदूषणाच्च पंस्त्वस्य प्रतिघातकृत्। साधारणस्त्रापचारी दासीगर्भविनाशकृत्। पितृपुत्रस्नुषाश्वश्रूस्वाचार्यग्निपुत्रकाः। एषामपतितान्योन्यत्यागी च शतदण्डभाग्" इति। "अज्ञानकृते साङ्कल्पिके पित्रादिबन्धवः। प्रष्टव्या राजपुरुषैः सामादिभिरुपक्रमैः। विद्वेषोऽसाधुसंसर्गाच्चिह्नैर्वेहिंन वा नरैः। एषोदिता घातकानामज्ञानाच्च भावना। कृतोऽकृता मृषा वस्तु न तत्कार्यं प्रपद्यते। अपवेनावबोद्धव्यः सर्ववादेष्वयं विधिः" इति। चिह्नं रक्षलेपादि दाहोद्धृतस्य धनादिकम्। घातानन्तरकर्त्तव्यमाह व्यासः "ज्ञात्वा तु घातकं सम्यक् सभृत्यं सबान्धवम्। हन्याच्चिन्तयन्नुपायैरुद्वेजनकरैर्नृपः" इति। दक्षस्मृतिः "प्रकाशघातका ये तु तथा चोपांशुघातकाः। ज्ञात्वा सम्बन्धनं कृत्वा हन्यात् विविधैर्वधैः" इति। ब्रह्मघ्न क्षत्रियादिविषयमेतत्। यत आह बौधायनः "क्षत्रियादीनां ब्राह्मणस्य वधे वधः सर्वस्वहरणञ्च तेषामेव तुल्यापकृष्टवर्णे यथावयमनुरूपं दण्डञ्च कल्पयेदिति" तेषां क्षत्रियादीनान्तुल्यापकृष्टवर्णे सजातीयहीनजातीयवधे दण्डं शारीरदण्डम्। एकजातावपकृष्टानां बहूनान्तु घातरूपं दण्डमाह कात्यायनः "एकस्मिन्दूषकाश्चत्वारः पुरुषमात्राः। मर्मघाती तु यस्तेषां स घातक इति स्मृतः"। यो मर्मघातकः स एव वधापराधदण्डभागित्यर्थः। स एव "शारीरमतुरूपञ्च दोषवत्तारतुदेयकः। ज्ञात्वयः ग्राहकदाता च भक्तदायी विकर्मिणाम्। युद्धोपदेशकश्चैव तद्विनाशप्रवर्त्तकः। उपेक्षाकार्ययुक्तश्च दोषवत्तारतुमोदकः। अनिच्छेद्यो यमो यः स्यात् सर्वे ते कार्यकारिणः। यथाशक्त्यनुरूपन्तु दण्डमेषां प्रकल्पयेत्" इति। दक्षस्मृतिरपि "एकस्य बहवो यत्र प्रहरन्ति समन्ततः। मर्मप्रहारको यस्तु घातकः स उदाहृतः। मर्मघाती तु यस्तेषां यथोक्तं प्राप्नुयाद्वधम्। शारीरमतुरूपञ्च दोषभागी तदर्द्धतः। घातकालमरक्षत्वञ्च मर्मस्थानञ्च यत्नतः। सामर्थ्यघातुबन्धञ्च ज्ञात्वा चिह्नैः प्रसाधयेत्" इति। विषयविशेषे मनुष्यवधकर्त्तुर्दण्डाभावं दोषाभावप्रतिपादनेनाह मनुः "अस्तं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते। द्विजातीनाञ्च वर्णानां विप्लवे कालकारिते। आत्मनश्च परित्राणे दक्षिणानाञ्च सङ्गरे। स्त्रीविप्राभ्युपपत्तौ च घ्नन् धर्मेण न दुष्यति" इति। यत्र देशे काले च धर्मसङ्कटादिरूपोभेदनच्छेदनादिनोपरुध्यते तथा शूद्रेतरवर्णसङ्करे परदाराक्रमणादिरूपे राजाभावकालकारिते। तथात्मनः परतः प्राणसंशये। तथा दक्षिणानां सङ्गरे गोब्राह्मणनिमित्तके युद्धे। तथा स्त्रीविप्राभ्युपपत्तौ दुर्वृत्तस्त्रीनिवारणे। धर्मादतोऽन्यन्न दुष्यति यतः। अतस्तत्र द्विजातिभिः शस्त्रधर्मोऽयमपरिहार्यैरपि समैः शस्त्रं ग्राह्यमित्यन्वयः। अत्र द्विजातिपदेन ब्राह्मणवैश्यविषयम्। प्रजापालनार्थं क्षत्रियस्य वचनान्तरेणैव शस्त्रग्रहणस्य प्राप्तत्वादित्यभिप्रायेणैव बौधायन आह "ब्राह्मणार्थे गवार्थे च वर्णानां वापि सङ्करे। मृत्योरात्मविमोक्षे च शस्त्रं धर्मव्यतिक्रमे" इति। यत्तु "परोपरोधार्थमपि ब्राह्मण आयुधन्नादद्यात्" इत्यापस्तम्बवचनम्। यच्च बौधायनवचनम् "परोपरोधार्थमपि ब्राह्मण आयुधं नाददीतेति" तदुभयमपि धर्मोपरोधादिभिन्नविषयम्। साहसस्यैवञ्च क्रोधलोभजत्वमाह दक्षस्मृतिः "साहसं साहसस्थेयं स्मृतं क्रोधलोभजम्" इति। स्त्रीसंग्रहणाख्यसाहसस्वरूपमाह स एव "अनिच्छन्त्या यत् क्रियते सम्प्रोक्तमसत्तया। प्रलपन्त्या वा रहसि बलात्कारकृतन्तु तत्" इति। अनिच्छन्त्या परपुरुषेण सहेति शेषः। अनिच्छन्त्या यानि चिह्नानि तस्याः कर्त्तव्यं राजकर्त्तव्यं चाह शंवर्त्तः "नेच्छन्त्या यानि चिह्नानि बलात्कारकृतानि च। परुषैः प्रसह्य नारीणान्तानि ह्यनुवर्त्तनं। नखदन्तक्षतग्रामसक्थ्यसक्थीक्षिता। सद्यो निदर्शिता नारी बलात्कारेण दूषिता। सङ्क्लिष्टकेशवसना च रुदती शोकसङ्गिनी। तस्य नामवदली च यथाङ्गेन दूषिता। आक्रोशैर्विविधैर्निर्भर्त्सनपरायणा। चिह्नाकारकैश्चैव व्याकुलीकृतलोचना। राज्ञा सभ्यैः सभां नीत्वा स्वयमन्विष्य तत्त्वतः। यद् ब्रूयात् सदृशं तत्र तत् कर्त्तव्यं प्रयत्नतः। विवादे साक्षिणामत्र प्रकृतीनां परिग्रहम्। प्राक्कथादभिशस्तस्य न दिव्यं दातुमर्हति" इति। अत्र दण्डमाह मनुः "सदृशं ब्राह्मणो दद्याद्विप्रां सुप्रां बलाद्व्रजन्" इति। सुप्रां स्वनियमेन रक्षिताम्। क्षत्रियादिसवर्णविषये दण्डमाह दक्षस्मृतिः "सदृशा

कामयेद् वस्तु धनलब्धाखिलं हरेत् । चतुरस्त्र लिङ्गस्त्री भामयेद् गर्भभेन तु" इति । कामयेत परस्त्रियङ्गच्छेत् । स्वयमेव दण्डोऽनुलोमप्रतिलोमजात्योः सजातीयपरभार्य्यागमने वेदितव्य इति भट्टनरसिंहे । हीनजातीयपरस्त्रीगमने ब्राह्मणादिस्वेतदर्द्धपरिमितो दण्डः । चतुरस्त्रजातीयपरदारगमने स्वयमेव दण्डो बधसहितः कार्य्य इत्याह स एव "दमोनेयः समायान्तु हीनायामधिकस्ततः । पुंसः कार्योऽधिकायान्तु गमने सप्रमापणम्" इति । दमः सहसा कामयेदिति वाक्योक्तः । नेयः प्रापणीयः । यत्तु बधमात्राभिधायकं कात्यायनवचनम् "स्त्रीषु क्रतोपभोगः स्यात् प्रसह्य पुरुषो यदा । बधे तत्र प्रवर्त्तेत कार्य्यातिक्रमणं हि तद्" इति । तच्चिरुग्णस्य भार्य्यागमने वेदितव्यम्" । सहसा स्वविवेकेन क्रतं कर्म । २स्वविरुद्धक्रतकर्मणि, त्रि० "तेन साहसमनुष्ठितं पुनः" काव्यप्र० ३साहसमनुसरति यत् । ऋत्वादौ १दण्डविशेषे पु० "वाग्दोतिपथमाहस्रोदण्ड उत्तमसाहसः । तदर्द्धं मध्यमः प्रोक्तस्तदर्द्धमधमः स्मृतः" स्मृतिः । "पाकयज्ञे तु साहस्रं हविष्ये ४अग्निभेदे च पु० ।

साहसिक त्रि० साहसे प्रहृतः ठक् । १सहसाप्रारम्भादिरते २चोरे ३परदारिके ४बाहुयुद्धकारिणि च ।

साहस्र न० सहस्राणां समूहः अण् । १सहस्रसमूहे । स्वार्थे अण् । २सहस्रसङ्ख्यायाम् न० । सहस्रं परिमाणमस्य अण् । ३सहस्रसंख्यान्विते त्रि० । ४सहस्रसंख्यकगजसमूहे पु० अमरः ।

साहायक न० सहायस्य भावः वुञ् । साहाय्ये ।

साहाय्य न० सहायस्य भावः ष्यञ् । सहायतायाम् ।

साहित्य न० सहितस्य भावः ष्यञ् । १मेलने २परस्परापेक्षाणां तत्स्वरूपाणामेकक्रियान्वयित्वे शाब्दवि० ३तुल्यपदैकक्रियान्वयित्वे ४एकक्रियान्वयित्वमात्रे ५बुद्धिविशेषविषयत्वे शब्द०प्र० ६पद्यात्मके काव्ये च ।

साह्न न० सहस्य भावः अण् सह-यत् वा । १सहत्वे २मेलने धरणिः ३सहनीये त्रि० ।

साह्वय पु० सह आह्वयेनाभिधानेन । १अभिधानसहिते "अगाम गजसाह्वयम्" भारतम् । मेषादिप्राणिकरणदूतरूपे समाह्वये च शब्दर० ।

सिंह पुंस्त्री० हिनस्ति-अच् पृषो० "सिंहो वर्णविपर्य्यात्" स्मृतेः वर्णविपर्य्ययः । क्षत्रियाख्याते १पशुभेदे अमरः स्त्रियां ङीष् । सुहाशब्दशब्दे सिंहमांसस्पृहा दृश्याः । २रक्तगोभाङ्गने राजनि० ३मेषादित: षष्ठे राशौ ज्यो० सिंहराशिश्च २।६०० कक्षाक्षराशिचक्रस्य ७२०० कक्षोपरि १८०० शतकलात्मकः मघापूर्वफल्गुन्युत्तरफल्गुन्यादिपादात्मकः । "पुमान् स्त्रियोऽग्निर्दिनपित्तकृज्जपीतोष्णपूर्वेण दृढव्रतत्वात् । समोदयो दीर्घरवोऽल्पसक्थप्रजो हरिः शैलदृषोऽथ धूम्रः" बोल० ता० तत्स्वभावादि शब्दम् । तस्य स्वामी सूर्य्यः । ४लिनध्वजे हेमच० । ५उत्तरपदस्थः ६श्रेष्ठार्थे अमरः । नरःसिंह इवेति विग्रहे "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" पा० उपमितसमासे नरसिंहादिशब्दात् सिंहतुल्यशौर्य्यादियुक्तो नर इति बोधात् नरस्य श्रेष्ठत्वं द्योत्यते इति बोध्यम् । ७प्रासादभेदे देवस्थशब्दे १६८१ पृ० दृश्यम् ८सिंहासनभेदे तच्छब्दे द्रष्टव्यम् ।

सिंहकेलि पु० सिंहस्येव केलिरस्य । मङ्कुवृक्षे त्रिका० ।

सिंहकेशर पु० सिंहस्येव केशरोऽस्य । वकुले त्रिका० ।

सिंहतल पु० संहतस्य+पृषो० । करद्वयमेलनरूपे वाद्यभेदे । रामाश्रमः । [राजनि०।

सिंहतुण्ड पु० सिंहस्येव तुण्डः पुष्पमस्य । सेहुण्डवृक्षे

सिंहद्वार न० सिंहचिह्नितं द्वारम् शाक० । पुरप्रवेशनयोग्ये द्वारे हेमच० ।

सिंहध्वनि पु० सिंहस्येव ध्वनिः । १सिंहतुल्यनादे सिंहनादादयोऽत्र अमरः । हृत० । २सिंहस्य शब्दे ।

सिंहनर्दिका पु० सिंह इव नर्दति नर्द-ण्वुल् । (सिङ्गा) वाद्यभेदे हारा० ।

सिंहनादिका स्त्री सिंहमपि नादयति नद-णिच्-ण्वुल् । १दुरालभायाम् शब्दच० । २सिंहनर्दिकायां हारा० ।

सिंहपर्णी स्त्री सिंहस्य पुच्छ इव पर्णमस्या ङीष् । वासकवृक्षे भटा० ।

सिंहपुच्छिका स्त्री सिंहस्य पुच्छ इव पत्त्राण्यस्याः-कप्, अत इत्वम् । चित्रपर्णिकायां (चुदरुकुले) वृक्षे रत्नमा० ।

सिंहपुच्छी स्त्री सिंहस्य पुच्छ इव पुष्पाणि पर्णानि वास्याः ङीष् । १चित्रपर्णां २पृश्निपर्णीञ्च अमरः ३माषपर्णीञ्च रत्नमा० । [पर्णीम् राजनि० ।

सिंहपुष्पी स्त्री सिंहस्य पुच्छ इव पुष्पाण्यस्याः ङीष् । पृश्नि-

सिंहमुखी स्त्री सिंहस्य मुखं मुखवदन्त इव पुष्पमस्याः ङीष् । वासके राजनि० ।

सिंहयाना स्त्री सिंहो यानं वाहनं यस्याः । दुर्गायाम् हेमच० सिंहवाहनादयोऽत्र ।

सिंहल पु० सिंहोऽस्त्यत्र अच्। देशभेदे। तद्देशप्रभवत्वात् २रङ्के धातौ हेमच०। ३रौतौ ४तत्रत्ये च न० राजनि०। सिंहलदेशश्च कूर्मविभागशब्दे २१६८ पृ० दक्षिणस्था-सक्तः। [तायां राजनि०।

सिंहलस्था स्त्री सिंहले तिष्ठति स्था-क। सिंहल्यां ख

सिंहलास्थान पु० सिंहल आस्थानं यस्य। तालवृक्षे वृक्षभेदे शब्दर०।

सिंहलील पु० रतिबन्धभेदे "सिंहोपरि स्थिता नारी भूमौ दत्त्वा पदद्वयम्। हृदये दत्तहस्ता चेत् सिंहलीलः प्रकीर्त्तितः"। सिंहोपरि स्थिता नारी कान्तोरुस्थपदद्वया। हृदये दत्तहस्ता चेत् सिंहलीलोऽप्यसावपि" रतिम०।

सिंहवाहिनी स्त्री सिंहरूपो वाहो विद्यतेऽस्या इनि। दुर्गायाम् "सिंहमारुह्य कल्याणि निहतो महिषो यतः। महिषघ्नी ततो देवी तथा वै सिंहवाहिनी" देवीपु० ४१ अ०।

सिंहविक्रान्त पुंस्त्री० सिंह इव विक्रान्तः। १ऋक्षे हारा० स्त्रियां ङीष् २सिंहतुल्यविक्रमे त्रि०। [राजनि०।

सिंहविद्या स्त्री सिंह इव विद्या विद-क। मायायाम्

सिंहसंहनन त्रि० सिंहस्येव संहननमङ्गबन्धः। १दृढाङ्गयुक्ते अमरः २सिंहतुल्यदृढाङ्गे च। "सिंहसंहननो युवा" रघुः।

सिंहा(ङ्गि)न न० सिंहि-स्वार्थे अच् पृषो०। १लौहमले अमरः। २नासिकामले (सिकनी) शब्दर०।

सिंहावलोक पु० न्यायभेदे न्यायशब्दे ४१६९ पृ० दृश्यम्।

सिंहासन न० सिंहचिह्नितमासनम्। १राजासनभेदे तल्लक्षणं युक्तिकल्पतरौ दर्शितं यथा

"राज्ञो वरासनं नाम श्रीसिंहासनमुच्यते। शुभे मुहूर्त्ते शुभमासवर्षे शुभारवेलातिथिचन्द्रयोगे। काले निरुत्पातनिरीतिभावे सिंहासनावस्थितिं वदन्ति। स्थिरराशिस्थिते भानौ चन्द्रे च स्थिरभोदिते। आसनारम्भसिद्धिनि स्टष्टारम्भोऽपि वेधु च"। एतेन स्टष्टारम्भसिंहासनयोरारम्भ एक एव कालः। तत्र क्रमः "वाणवेदाग्निपक्षाणि सोपानानि युगैः क्रमात्। चत्वारिंशत्तथा त्रिंशत् विंशतिः षोडशैव च। सिंहान्वितानि श्रेयानि वरपानि युगैः क्रमात्। पद्मः शङ्खो गजो हंसः सिंहो भद्रो मृगो वृषः। अष्टौ सिंहासनानीति नीतिशास्त्रविदो विदुः। आदित्यादि दशाजानां भूपतीनां यथाक्रमम्। राज्ञः स्वकुलैरन्यैराभिरायाणपरिषाहवोः। राजपालभिदं नाम सोपानं पुरुषोन्नतम्। तदर्द्धमानं तन्मध्ये राजासनमुदाहृतम्। अर्द्धोन्नतमिदं रम्यं प्रोक्तं बलिमहीभुजाम्। दिगष्टहस्तविस्तीर्णः स्यात् ब्रह्मादीनां यथाक्रमम्"। अथाष्टानां लक्षणानि "गन्धारीकाष्ठघटितः पद्ममालोपशोभितः। पद्मरागविचित्राङ्गः शुद्धः काञ्चनसंवृतः। चरणाग्रे पद्मकोषात् पद्मरागविचित्रिताः। दिक्षष्टौ पुत्रिका राज्ञादशाङ्गुलिसम्मिताः। राजासनं चतस्रश्च एवं द्वादशपुत्रिकाः। रत्नैश्च नवभिः कार्य्यं निर्माणं चान्तरान्तरा। रत्नवस्त्रावृतं श्रीतत् पद्मसिंहासनं१ मतम्। अत्रोपित्वा नरपतिः प्रतापमति विन्दति। भद्रेन्द्रकाष्ठघटितः शङ्खमालोपशोभितः। शुद्धस्फटिकचित्राङ्गः शुद्धरूप्योपशोभितः। चरणाग्रे शङ्खनाभ्यः पुत्रिकाः सप्तविंशतिः। स्थाने स्थाने विधातव्याः शुद्धस्फटिकसंस्कृताः। शुक्लपट्टावृतं श्रीतत् शङ्खसिंहासनं२ मतम्। पनसेनोपघटितो गजमालोपशोभितः। विद्रुमैरपि वैदूर्य्यैः काञ्चनेनापि शोभितः। चरणाग्रे गजशिरःपुच्छादेकैकपुत्रिका। साधिक्यरचितारक्तवस्त्रादिविभूषणम्। गजसिंहासनं३ नाम साक्षाल्लक्ष्मदायकम्। शालकाष्ठेन घटितो हंसमालोपशोभितः। शुभ्ररागैः काञ्चनेन शुक्लविन्दैश्च चित्रितः। चरणाग्रे हंसरूपाः पुत्रिकास्त्वेकविंशतिः। गोमेदकोपघटितः पीतवस्त्रविभूषणम्। हंससिंहासनं४ नाम सर्वानिष्टविनाशनम्। चन्दनेनोपघटितः सिंहमालोपभूषितः। शुद्धहीरकचित्राङ्गः शुद्धकाञ्चननिर्मितः। चरणानां सिंहलेखाः पुत्रिकाश्चैकविंशतिः। सच्छायुक्तिभिरन्यैश्च निर्मलैरेव भूषणम्। शुद्धशुक्लावृतं श्रीतत् सिंहसिंहासनं५ मतम्। अत्रोपित्वा नरपतिः क्रतुकां साधयति क्षितिम्। भद्रमालोपसहितं शुद्धचम्पककल्पितम्। शुद्धैर्मरकतैर्युक्तं पादाग्रे पद्मकोषिकाः। द्वात्रिंशतिः पुत्रिकास्तु नीलवस्त्रादिभूषणम्। भद्रसिंहासनं६ नाम शत्रुक्षयजयप्रदम्। निम्बकाष्ठेन घटितं मृगमालोपशोभितम्। शुद्धनीलैर्नीलनीलैः काञ्चनेनापि चित्रितम्। चरणाग्रे मृगशिरश्चत्वारिंशच्च पुत्रिकाः। नीलवस्त्रादियुक्तन्तु मृगसिंहासनं७ मतम्। लक्ष्मीविजयसम्पत्तिर्नृत्यपदसेवनम्। वेशरेणोपघटितं वृषमालोपशोभितम्। धवलवस्त्रैर्भूषाद्याः पुत्रिकाः षष्ठसप्ततिः। चरणाग्रे वृषशिरश्चित्रवस्त्रादिभूषणम्। वृषसिंहासनं८ नाम सर्व्वसौ

विजयवर्द्धनम्। एतेतत् कथितं सारं महासिंहासनाष्टकम्। यथा भोजेन कथितं यथा चान्यैश्च पण्डितैः। एतस्मातिक्रमं दम्भाद् यः कुर्यात् पृथिवीपतिः। अचिरादेव कुरुते तस्य स्वल्पातिक्रमम्। परासनस्थो यो राजा यो राजा च निरासनः। स परैर्हन्यते सिंहैरिव मत्तगजाधिपः"। चतुरङ्गक्रीड़ायां २जयभेदे चतुरङ्गयन्त्रे २८६२ पृ० दृश्यम्। ३योगासनभेदे च तल्लक्षणं यथा

"गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत्। दक्षिणे सव्यगुल्फन्तु दक्षगुल्फन्तु सव्यके। हस्तौ च जान्वोः संस्थाप्य स्फिचौ संप्रसार्य्य च। व्यात्तवक्त्रो निरीक्षेत नासाग्रं सुसमाहितः। सिंहासनं भवेदेतत् पूजितं योगिभिः सदा। बन्धत्रयस्य सन्धानं कुरुते चासनोत्तमम्" इति हठप्रदीपः। ४रतिबन्धभेदे पु० "ललाङ्गादवबाह्य च जत्वा योषापदद्वये। स्त्रीं हृत्वा रमेत् कामी बन्धः सिंहासनो मतः"। इति रतिमञ्जरी ५चक्रभेदे चक्रशब्दे २८१६ पृ० दृश्यम्।

सिंहास्य पु० सिंहस्यास्यमिवास्यदलं यस्य। वासके अमरः।

सिंहिका स्त्री। काश्यपपत्न्यां राक्षसमातरि। "कश्यपस्य दक्षिणो तु सिंहिका राक्षसासुतनयावजीजनत्। पूर्वजो हरिनिजत्तकन्धरो देवतेरवरजो निपातितः"वासुयागतः। [२वासुपुत्रे च।

सिंहिकासुत पु० ६त०। १राहौ सिंहिकापुत्रादयोऽस्य।

सिंही स्त्री हिनस्ति रोगान् हिंस-कच् पृषो०। वाट्यां अमरः २कण्टकारिकायाम् ३वासके मेदि० ४दन्त्यां राजनि० ५राक्षसमातरि विश्वः हिंस्रहयत्वात् सिंह+जातौ ङीष्। ७सिंह्योषिति।

सिंहीलता स्त्री कर्म०। दन्त्यां भावप्र०।

सिक सेचने सौत्र० पर० सक० सेट्। सेकति असेकीत्। पर्युदासात् न ओपदेशः।

सिकता स्त्री ब०व०। सिक-अतच् स्त्रियां टाप्। बालुकायाम् मेदि०। सिकताः सन्त्यत्र अर्श आद्य० अच्। २सिकतायुक्तदेशे स्त्री अमरः। [अमरः।

सिकतामय त्रि० सिकता+मयट्। बालुकामये तटादौ

सिकतावत् त्रि० सिकताः सन्त्यत्र मतुप् मस्य वः। बालुकायुक्तदेशे अमरः। [भरतः।

सिकतिल त्रि० सिकताः सन्त्यत्र इलच्। बालुकायुक्तदेशे

सिक्थ न० सिच-थक्। १मधूच्छिष्टे (मोम) २नीलाङ्गे हेमच०। स्वार्थे क। तत्सदृशे भक्तपुलाके ग्रासे च पु० मेदि० मधूच्छिष्टे न० अमरः।

सिक्य न० सिक-यत्। (सिके) रज्जुनिर्मिते भदार्थे।

सिच् त्रि० सिच-क्विप्। १सेचनकर्त्तरि कर्मणि क्विप्। २वस्त्रे हेमच०। [सिक०।

सिचय पु० सिच-अयच् किच्च। १वस्त्रे हेमच० २नीवीवस्त्रे

सिञ्चिता स्त्री सिच-इतच् पृषो०। पिप्पल्याम् शब्दच०।

सित न० सो-क्त। १रोप्ये २मूलके राजनि० ३चन्दने रत्नमा० ४शरे ५शुक्लगुणे ६शुक्लवर्णे च पु० अमरः। ७तद्वति दशमाप्ते ८वद्धे १०ध्याते च त्रि० विश्वः। [ङीष्।

सितकण्ठ पुंस्त्री० सितः कण्ठोऽस्य। दात्यूहे खगे स्त्रियां

सितकर पु० सितः करः किरणो यस्य। १चन्द्रे २कर्पूरे च राजनि० सितकरादयोऽस्यत्र। [राजनि०।

सितकर्णी स्त्री सितः कर्ण इव पुष्पमस्याः ङीष्। वासके

सितकुञ्जर पु० सितः कुञ्जरोऽस्य। १इन्द्रे कर्म०।२ऐरावतगजे

सितगुञ्जा स्त्री कर्म०। श्वेतगुञ्जायाम् राजनि०। [अमरः

सितच्छत्रा स्त्री सितं छत्रमिव पुष्पमस्याः। शतपुष्पायाम्

सितच्छद पुंस्त्री० सितच्छदः पक्षो यस्य। १हंसे हेमच० स्त्रियां ङीष्। २श्वेतदूर्वायाम् स्त्री राजनि० टाप्।

सितदर्भ पु० कर्म०। श्वेतकुशे राजनि०।

सितदीप्य पु० दीपयत्यग्निम् दीप-क्विप्-कर्त्तरि यत् कर्म०। श्वेतजीरके राजनि०।

सितदूर्वा स्त्री कर्म०। श्वेतदूर्वायाम् रत्नमा०।

सितद्रु पु० कर्म०। १श्वेतदारुभेदे रत्नमा० २शुक्लवर्णवृक्षे च।

सितधातु पु० कर्म०। १खटिन्याम् (खड़ी) राजनि० २श्वेतधातौ रौप्यादौ च।

सितपक्ष पुंस्त्री० सितः पक्षोऽस्य। १हंसे शब्दर० स्त्रियां ङीष्। कर्म०। चन्द्रस्य वह्निशरदे पञ्चदशतिथ्यात्मके २शुक्ले पक्षे। [वृक्षे रत्नमा०।

सितपर्णी स्त्री सितानि पर्णान्यस्याः ङीष्। श्वेतपुष्पिकायां

सितपाटलिका स्त्री कर्म०। (श्वेतपाटल) वृक्षे राजनि०।

सितपुङ्खा स्त्री सितः पुङ्खोऽस्याः। श्वेतशरपुङ्खवृक्षे राजनि०

सितपुष्प न० सितानि पुष्पाण्यस्य। १केसरीमुस्तके जटा०। २तगरवृक्षे पु० शब्दर० ३काशे ४श्वेतरोहितवृक्षे च पु० राजनि०। ५श्वेतापराजितायां स्त्री ङीष्। ६धवद्रुमायां स्त्री टाप्। कर्म०। ७श्वेते पुष्पे न०।

सितमरिच न० कर्म०। शुभ्रमरिचे राजनि०।

सितमाष पु० नित्यक० । राजमाषे (बरबटी) शब्दर० ।

सितरञ्जन पु० सितमपि रञ्जयति रन्ज-णिच्-ल्युट् । १श्वेतवर्णे हेमच० २तद्वति त्रि० ।

सितवर्षाभू स्त्री वर्षाभु भवति भू-क्विप् कर्म० । श्वेतपुनर्नवायाम् राजनि० । [शरपुङ्खाख्ये राजनि० ।

सि शितसायका स्त्री सितः सायको यस्याः ५ब० । शुभ

सितशिम्बिक पु० सिता शिम्बिर्यस्य कप् । गोधूमे हेमच०

सितशूक पु० सितः शुभ्रः शूको यस्य । यवे भरतः ।

सितशूरण पु० कर्म० । वनशूरणे (वनओल) राजनि० ।

सितसर्षप पु० कर्म० । गौरसर्षपे राजनि० ।

सितसार(क) पु० सितः सारो निर्यासो यस्य वा कप् । शालिधान्ये राजनि० ।

सितसिन्धु स्त्री नित्यक० । गङ्गायां शब्दर० ।

सिता स्त्री सो-क्त । १शर्करायाम् ।

"खण्डन्तु सिकतारूपं शुक्लं शर्करा सिता । सिता शुभ्रपुरा रूक्षा शीतलाम्लदाहजित् । मूर्च्छाच्छर्दिज्वरान् हन्ति सुशीता शुक्रकारिणी" राजव० । २मक्षिकायां शब्दर० ३श्वेतकण्टकारिकायां ४वाकुच्यां ५विदार्य्यां ६श्वेतदूर्वायां ७चन्द्रिकायां ८कुटुम्बिन्यां ९सुरायां १०पिङ्गायां ११लायमाषजतायां १२तेजन्यां राजनि० १३पर्वतजातापराजितायां रत्नमा० ।

सिताखण्ड पु० सिताया इव खण्डः । मधुजातशर्करायाम् "मधुजा शर्करा रूक्षा कफपित्तहरी गुरुः । ऊर्द्ध्वतोसारशर्कराकृच्छ्रतृषा हिमा । यथा यथाऽस्या नैर्मल्यं मधुरत्वं तथा तथा । स्फटिकाभवशैत्यादि परत्वं तथा तथा" भावप्र० ।

सि शि ताग्र पु० वि(शि)तमग्रं यस्य । कण्टके हारा० ।

सिताङ्ग पुंस्त्री० सिता सिताऽङ्गो यस्य । वालुकागर्ड (बत्तिया) मत्स्ये हारा० स्त्रियां ङीप् ।

सिताङ्ग पु० सितमङ्गं यस्य । श्वेतरोहिते राजनि० ।

सितादि पु० सिताया आदिः कारणम् । गुडे राजनि० ।

सितापाङ्ग पुंस्त्री० सितमपाङ्गं यस्य । मयूरे त्रिका० स्त्रियां ङीष् । [ख्याते ।

सिताब्ज न० कर्म० । श्वेतकमले राजनि० सिताम्भोजादयोऽप्यत्र ।

सिताभ पु० सिता आभा यस्य । १कर्पूरे रायमुकुटः २चन्द्रे च ३तक्रे स्त्री राजनि० ।

सिताभ्र पु० अभ्र इव सितः शुभ्रः राज० । कर्पूरे अमरः ।

सिताभ्रक न० अभ्रकमिव सितम् राज० । कर्पूरे राजनि० ।

सिताम्बर पु० सितमम्बरं यस्य । १श्वेतवस्त्रधारिणि प्रतिषिद्धा० २श्वेतवस्त्रधारिमात्रे त्रि० ।

सिताम्भोज पु० सितमम्भोजम् राजनि० ।

सितालक पु० आलयति भूषयति अल-णिच्-ण्वुल् नित्यकर्म० । श्वेतमन्दारे राजनि० । [श्वेतदूर्वायाम् रत्नमा०

सितालता स्त्री सिता सती आलतते आ+लत-अच् ।

सितालिकटभी स्त्री सितेन शुभ्रवर्णेन अलति अल-इन् कर्म० । श्वेतकिणिहीहट्टे राजनि० ।

सितावर पु० सितं श्वेततामाद्रियोति आ+वृ-अच् (बहुलम्) १शाकभेदे २वाकुच्यां स्त्री राजनि० ङीष् । "चाङ्गेरीवटशः पत्रैश्चतुर्दश दलैरितः । शाको जलान्विते देशे चतुष्पत्रोति चोच्यते" भावप्र० । [३गङ्गायवनयोः स्त्री हि०अ०

सितासित पु० वर्णेन सितः बद्धेऽसितः । बलदेवे राजनि०

सिताह्वय पु० सितमाह्वयते आ+ह्वे-अ । १श्वेतशिग्रौ २श्वेतरोहिते च राजनि० । [त्रि० रायमु०

सिति पु० सो-क्तिच् । १शुक्लवर्णे २कृष्णवर्णे च । २तद्वति

सितिमन् पु० सितस्य भावः इमनिच् । शुभ्रतायाम् । "सितं सितिस्त्वं सुतरां सुनेर्बधुः" माघः ।

सितिवार पु० सितिं श्वेततां वृणोति वृ-अण् । सुनिषण्णके (बहुलम्) शाके भावप्र० ।

सितिवासस् पु० सितिं शुक्लं वासोऽस्य । बलदेवे ।

सितेतर पु० सितादितरः । १अग्न्यभावे २कृष्णत्वे च ३शुभेतरवर्णे ४तद्वति त्रि० । [१ङ्गो ङ्गका० ।

सितेतरगति पु० सितेतरा कृष्णा गतिरस्य । कृष्णवर्त्मनि

सितोदर पु० सितमुदरमस्य । कुबेरे हेमच० ।

सितोपल पु० कर्म० । १स्फटिके राजनि० कठिन्यां न० त्रिका० । २शर्करायां स्त्री हेमच० ।

सिद्ध न० षिध-क्त । १मैत्रबलवर्णे राजनि० अवलिमत्वाकृत्वायम् २निष्पन्ने ३पक्वे ४नित्ये च त्रि० शब्दर० । षिद्विरस्यस्य अच् । ५व्यासादौ मुनौ ६देवयोनिभेदे च पु० अमरः तल्लोकश्च चन्द्रलोकादधस्ताद्यो व्योम्नस्थितः यथाह सू० सि० "भन्द्रामारुह्यभूपुत्रशुक्रेन्द्वर्कान्द्रवः । परिस्थमन्त्यधोऽधस्ताः सिद्धविद्याधरा घनाः" ७निश्चिते त्रि० ८विष्कम्भादिषु मध्ये दार्विंशयोगे ज्यो० ९गुडे १०कृष्णधुस्तूरे पु० राजनि० । ११शुद्धे त्रि० हेमच० १२व्यापारे पु० शब्दर० ज्योतिषोक्ते १३योगिनीदशाभेदे सप्तम्यां दशायां स्त्री । दशाशब्दे २१८१ पृ० दृश्यम् । तन्त्रोक्ते अकथहचक्रस्थे साधक-

नामाद्याक्षरयुक्तकोष्ठस्थाद्याक्षरयुक्ते १४मन्त्रभेदे पु० षकथचडशब्दे १८पृ०दृश्यम् ।१५धन्यादिवाच्ये क्रियाभेदे स्त्री १६विद्धियुते मन्त्रे पु० "मन्त्रसिद्धेरुपायश्च गौतमीये "पुनः षोऽनुष्ठितो मन्त्रो यदि सिद्धो न जायते । उपायास्तत्र कर्त्तव्याः सप्त शङ्करभाषिताः । भ्रामणं रोधनं पश्चात् पीड़नं शोषणोष्मणम् । दहनान्तं क्रमात् कुर्य्यात् ततः सिद्धो भवेन्मनुः । भ्रामणं वायुबीजेन यथानुक्रमयोगतः । तन्मन्त्रं यन्त्र आलिख्य चिच्छक्तूरकुङ्कुमैः । शशीरचन्दनाभ्यान्तु मन्त्रं संयथितं लिखेत् । क्षीराज्यमधुतोयानां मध्ये तं सिद्धिखितं भवेत् । पूजनाज्जपनाद्धोमात् भ्रामितः सिद्धिदो भवेत् । भ्रामितो यदि नो सिद्धो रोधनं तस्य कारयेत् । सारस्वतेन बीजेन संपुटीकृत्य संजपेत् । एवं रुद्धे भवेत् सिद्धो न चेदेतदशीकृत । अलक्तचन्दनं कुङ्कुं हरिद्रामादनं शिखा । एतैस्तु मन्त्रमालिख्य भूर्जपत्रे सुशोभने । धार्य्यं कण्ठे भवेत् सिद्धः पीड़नं वाक्षरकारयेत् । अधरोत्तरयोगेन पदानि परिजप्य वै । ध्यायेच्च देवतां तद्वत् अधरोत्तररूपिणीम् । विद्यामादित्यदुग्धेन लिखित्वाकृष्य चाङ्घ्रिणा । तयाभूतेन मन्त्रेण होमः कार्य्यो दिने दिने । पीड़ितो वज्रवाविष्टः सिद्धः स्यादथ शोषयेत् । वाताद्याक्षितयं बीजमाद्यन्ते तस्य योजयेत् । शीरमधुनालिख्य विद्यां पाणौ विभावयेत् । शोषितोऽयं भवेत् सिद्धो न चेत् कुर्य्यात्तु शोष्णम् । ह्राभ्यान्तु वायुबीजाभ्यां मन्त्रं कुर्य्याद्विदर्भिणम् । एषा विद्या गले धार्य्या लिखित्वा वर मन्त्रना । शोषितोऽपि न सिद्धः स्यात् दहनीयोऽग्निबीजतः । आग्नेयेन तु बीजेन मन्त्रस्यैकैकमक्षरम् । दाहनमथ जङ्घान्तं बीजयेद्दाहकर्म्मणि । ब्रह्मदण्डस्य तैलेन मन्त्रमालिख्य धारयेत् । कण्ठदेशे ततो मन्त्रः सिद्धः स्याच्छङ्करोदितम् । दृष्ट्वेतत्कथितं सम्यक् केवलं तव भक्तितः । एवेनैव कृतार्थः स्याद् बहुभिः किम् उच्यते !" तन्त्रसारः । [च राजनि०।

सिद्धक पु० सिद्ध इव इवार्थे कन् । १सिन्धुवारे २शालवृक्षे

सिद्धगङ्गा स्त्री सिद्धानामेकस्या गङ्गा भाक० । मन्दाकिन्याम् अटा० । [जले सिद्धतोयादयोऽत्र ।

सिद्धजल न० सिद्धं पक्वं जलमत्र ।१काञ्जिके कर्म० २पक्वे

सिद्धदेव पु० सिद्धानां पूज्यः देवः । महादेवे शब्दर० ।

सिद्धधातु पु० सिद्धः प्रसिद्धो धातुः । पारदे त्रिका० ।

सिद्धपीठ पुंन० कर्म० । "जातो लक्षजपेनैव होमो वा कोटिसङ्ख्यकः । महाविद्याजपाः कोष्ठाः सिद्धपीठः प्रकीर्त्तितः" इति तन्त्रोक्ते १स्थानभेदे पीठशब्दे ४२४२ पृ० दर्शिते २स्थानभेदे च ।

सिद्धपुर न० कर्म० । "लङ्का कुमध्ये यमकोटिरस्याः प्राक्, पश्चिमे रोमकपत्तनञ्च । अधोगतं सिद्धपुरञ्च वि०शि०चक्रे भूगोलस्थेषु भूवृत्तपादान्तरितदेशस्थेषु चतुर्षु देवनिर्मितेषु पुरेषु मध्ये लङ्काधोभागस्थे पुरभेदे ।

सिद्धपुष्प पु० सिद्धप्रियं पुष्पं यस्य । करवीरवृक्षे राजनि० ।

सिद्धप्रयोजन पु० सिद्धं प्रयोजनं यस्मात् ५व० । मोरसर्षपे राजनि० । २सिद्धार्थयुक्ते न० ।

सिद्धमोदक पु० तवराजोद्भवखण्डे राजनि० ।

सिद्धरस पु० सिद्धः प्रसिद्धो रसः । १पारदे अमरः सिद्धो रसोऽत्र । २धातुमात्रे त्रि० मेदिं० ।

सिद्धविद्या स्त्री सिद्धा सत्सिद्धा विद्या मन्त्रो यस्याः । "काली तारा महाविद्या षोड़शी भुवनेश्वरी । भैरवी छिन्नमस्ता च विद्या धूमावती तथा । बगला सिद्धविद्या च मातङ्गी कमलात्मिका । एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः" इति तन्त्रोक्तासु दशसु कालीप्रभृतिषु देवीषु ।

सिद्धसाधन न० सिद्धस्य निश्चितस्य साधनमनुमानम् । १न्यायोक्ते सिद्धार्थविषयाविरुद्धकाले साध्यधर्म्मेण निश्चितस्य पुनरनुमानरूपे दोषे । सिद्धं साधयति खुञ् । २शैवतन्त्रसंमते पु० राजनि० । सिद्धार्थविषयत्वे तु सिद्धस्यापि अनुमानं भवत्येव "प्रत्यक्षपरिकलितमर्थमनुमानेन बुभुत्सते तर्करसिका" इति वाचस्पत्युक्तेः । तदभिप्रेत्य तु नानुमितिः "न हि करिणि दृष्टे चित्रकारेण तमनुमिमतेऽनुमातारः" इति तत्रैव वचनान्तरात् । सिद्धेच यथाऽनुमितिविरोधित्वम् तथा सिद्धिशब्दे वक्ष्यते । संशयपक्षतावादिमते निश्चयेन संशयस्य प्रतिरोधात् पक्षताऽसम्भवेन नानुमितिरिति बाध्यम् । सिद्धसाधनञ्च पक्षताविघटकत्वेनाश्रयासिद्धावन्तर्भवतीति नित्यकृत्यानान्तरसिद्धान्ते ।

सिद्धसाध्य पु०षकथचडशब्दोक्ते साधकनामाद्याक्षरयुक्तकोष्ठावधिद्वितीयकोष्ठस्थाद्याक्षरयुक्ते तन्त्रोक्ते मन्त्रभेदे षकथचडशब्दे दृश्यम् ।

सिद्धसिद्ध पु० तन्त्रोक्ते षकथचडशब्दोक्ते साधकनामाद्याक्षरयुक्तकोष्ठस्थिताद्याक्षरयुक्ते मन्त्रभेदे षकथचडशब्दे दृश्यम्

सिद्धसिन्धु स्त्री ६त० । गङ्गायाम् त्रिका० सिद्धनद्यादयोऽत्र

सिद्धसुसिद्ध पु० तन्त्रोक्ते मन्त्रभेदे कक्षयन्त्रशब्दे दृश्यम्।

सिद्धान्त पु० सिद्धः निश्चितोऽन्तो यस्मात्। प्रमाणादुपन्यासेन पूर्वपक्षनिरासके सिद्धपक्षस्य स्थापनरूपे। वाक्यशेषे ज्योतिःशास्त्रभेदे च स च सूर्यसिद्धान्तः सोमसिद्धान्तादिः "ब्रह्मादिप्रणयान्नानाकालकलनामानप्रभेदः क्रमाच्चारस्य दृग्सदां द्विधा च गणितं प्रश्नास्तया सोत्तराः। भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते सिद्धान्तः स चतुष्टयोऽत्र गणितस्कन्धप्रबन्धे बुधैः" सि० शि० गो० स्वोक्तसिद्धान्तलक्षणभेदो यथा "तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः" सू०। "सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात्" सू०। "सर्वतन्त्राविरुद्धस्तन्त्रेऽधिकृतोऽर्थः सर्वतन्त्रसिद्धान्तः" सू०। "समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः" सू०। "यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः" सू०। "अपरीक्षिताभ्युपगमात् तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः" सू०।

"तन्त्रं शास्त्रं तदेवाधिकरणं ज्ञापकतया यस्य, तादृशस्य योऽभ्युपगमस्तस्य समीचीनतयाऽसंशयरूपतया स्थितिस्तथाच शास्त्रितार्थनिश्चयः सिद्धान्तः अत्र चाभ्युपगम्यमानोऽर्थः सिद्धान्त इति भाष्यम् "अभ्युपगमः सिद्धान्त इति वार्त्तिकटीका" न चात्र विरोधः शङ्कनीयः आचार्यैः परिष्कृतत्वात् तथाच लिखितो निबन्धः यथाभ्युपगमयोर्मुख्यप्रधानभावश्च विवक्षातन्त्रत्वादर्थाभ्युपगमोऽभ्युपगम्यमानो वार्थः सिद्धान्तेन सूत्रभाष्यवार्त्तिकटीकासु न विरोधः। अत्र च भाष्यानुसारात् सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसिद्धान्तान्यतमः सिद्धान्त इति सूत्रार्थ इति तु न युक्तं यत्तिमसूत्रत्वात्तत्यानापत्तेः तन्त्रसिद्धान्तत्वेन हयमनुगमश्च तन्त्राधिकरणाभ्युपगमान्यतमः सिद्धान्त इति कश्चित्। विभजते। स चतुर्विध इति शेषः सर्वतन्त्रादिसंस्थितीनामर्थान्तरभावात् भेदादित्यर्थः। सर्वतन्त्रसिद्धान्तं लक्षयति। सर्वतन्त्राविरुद्धः सर्वशास्त्राभ्युपगत इति बहवः। वस्तुतो यथाश्रुत एवार्थः अन्यथा तन्त्रेऽधिकृत इत्यस्य वैयर्थ्यापत्तेरतएव च आत्मादेरसदुत्तरत्वमपि सर्वतन्त्रसिद्धान्तः न च तन्त्रेऽधिकृत इति सप्तम्यर्थं लक्षणे तु न देयमेवेति वाच्यं मनस इन्द्रियत्वस्यापि सर्वतन्त्रसिद्धान्ततापत्तेः नव्यास्तु सूत्रस्योपलक्षणमात्रत्वादादिपदादुभयाभ्युपगतः कथानुकूलोऽर्थः स इति वदन्ति। प्रतितन्त्रसिद्धान्तं लक्षयति। समानशब्द एकार्थकस्तेनैकतन्त्रसिद्ध इत्यर्थः स्वतन्त्र सिद्ध इति पर्यवसितोऽर्थः तथाच वादिप्रतिवाद्येकतरमात्राभ्युपगतस्तदेकतरस्य प्रतितन्त्रसिद्धान्त इति फलितार्थः, यथा मीमांसकानां शब्दनित्यत्वम्। अधिकरणसिद्धान्तं लक्षयति "यस्मार्थस्य सिद्धौ आवश्यकायामेवान्यस्य प्रकरणस्य प्रस्तुतस्य सिद्धिर्भवति सोऽधिकरणसिद्धान्त इत्यर्थः यथा तदु द्व्यणुकादिकं पक्षीकृत्योपादानगोचरापरोक्षज्ञानविषीभूतिमत्त्वे साध्यमाने सर्वज्ञत्वमीश्वरस्य, एवं हेतुबलादपि यथा दर्शनस्पर्शनाभ्यामेकार्थग्रहणादिन्द्रियादिव्यतिरिक्त आत्मनि साधिते इन्द्रियनानात्वं तथा च यदर्थसिद्धिं विना योऽर्थः शब्दादनुमानाद्वा न सिध्यति सोऽधिकरणसिद्धान्त इति। वस्तुतस्तु शाब्दत्वमनुमानत्वं चाविवक्षितं प्रमाणमात्रमपेक्षितम् अतएव प्रत्यक्षेण स्थूलत्वसाधनानन्तरसूक्ष्मात्मतत्त्वविवेके "सोऽयमधिकरणसिद्धान्तन्यायेन स्थूलत्वसिद्धौ क्षणभङ्गभङ्ग इति" तत्र च वाक्यार्थसिद्धौ तदनुभङ्गी योऽर्थः सोऽधिकरणसिद्धान्त इति वार्त्तिकव्याख्यां लिखित्वा येन केनापि प्रमाणेन वाक्यार्थसिद्धौ लभ्यमानायां योऽन्यार्थः सिध्यति स तत्रेत्यर्थः इति व्याख्यातं दीधितिकृता। एवं हेत्वरोधः पक्षश्च वाक्यार्थ इति टीकावचने च उपलक्षणमेतदित्युक्तं तत्र तत्र विशिष्यैव लक्षणं कार्यम्। यत्तु जनकीभूतव्यापकतात्राने व्यापककोटावेव विषयः प्रकृतानुसित्या व्यापककोटौ विषयीकृतः शब्दजनकपदार्थज्ञानविषयत्वे सति शाब्दविषयत्वं इयमधिकरणसिद्धान्त इति तन्न इन्द्रियनानात्वादौ भाष्यादुदाहृतेऽव्याप्तेरिति। अभ्युपगमसिद्धान्तं लक्षयति। अपरीक्षितस्य साक्षादसूत्रितस्य विशेषपरीक्षणं विशेषधर्मकथनम्। अभ्युपगमादिति ज्ञापकत्वे पञ्चमी अभ्युपगमज्ञापकमित्यर्थः विशेषपरीक्षणाज्ज्ञायते सूत्रकारतोऽभ्युपगतमिदमिति तथाच साक्षादसूत्रिताभ्युपगमोऽभ्युपगमसिद्धान्तः यथा मनस इन्द्रियत्वमिति उक्तिः। तथाच सिद्धान्तः संस्थितिः सिद्धान्तः संस्थितिश्च इत्यभावव्ययस्था। तत्र तन्त्रसंस्थितिस्तन्त्रार्थसंस्थितिः। अधिकरणसंस्थितिरधिकरणानुप्रवृत्तार्थसंस्थितिः। अभ्युपगमसंस्थितिरनवधारितार्थपरिपक्षे तद्विशेषपरीक्षणायाभ्युपगमसिद्धान्तः वात्स्यायने भाष्ये दृश्यम्। प्रामाणिकत्वेनाभ्युपतोऽर्थः सिद्धान्त इत्यन्ये। मीमांसकोक्ते पञ्चावयवयुक्ताधिकरणाङ्गे २य[illegible]मेऽङ्गे अधिकरणशब्दे १२६ पृ० दृश्यम्।

सिद्धान्ताचार पु० "आत्मानं देवतां मत्वा यजेद्देवञ्च मानवैः। सदा शुद्धः सदा शान्तः सिद्धान्ताचार उच्यते" तन्त्रोक्ते आचारभेदे।

सिद्धारि पु० तन्त्रोक्ते साधकनामाद्याक्षरयुक्तकोऽवधिचतुर्थकोऽस्याद्याक्षरयुक्ते मन्त्रभेदे चक्रवर्त्तिशब्दे २८५पृ०दृश्यम्।

सिद्धार्थ(क) पु० सिद्धः अर्थो यस्मात् ५व० वा कप्। १श्वेतसर्षपे अमरः। २वटीवृक्षे च राजनि०। ३व०। ४शिद्धार्थे त्रि०। "सिद्धार्थं सिद्धसम्बन्धम्" इति प्राघः। ५शाक्यसिंहे पु० मेदि० ६जिनभेदमातरि स्त्री हेमच०।

सिद्धि स्त्री षिध-क्तिन्। १कृद्धिनामौषधे अमरः। २योगभेदे ३स्वल्पज्ञाने ४निष्पत्तौ ५पाके ६पादुकायाम् ७वृद्धौ मेदि० ८मोक्षे हेमच० ९सम्पत्तौ धरणिः १०अणिमाद्यष्टविधैश्वर्य्ये ११वृद्धौ शब्दच० १२साध्यवस्तुया निश्चये च। १३सांख्योक्ते ऊहादिके सिद्धिहेतुभेदे "ऊहादिभिः सिद्धिः" सां०सू०। "ऊहादिभेदैः सिद्धिरष्टधा भवतीत्यर्थः। इदमपि सूत्रं कारिकया व्याख्यातम्। "ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः। दानं च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः" इति। "तत्रा ऊहनमर्थः। तत्राध्यात्मिकादिदुःखत्रयप्रतियोगिकत्वात् त्रयो दुःखविघातास्तत्सिद्धयः। इतरास्तु तत्साधनत्वाद्गौण्यः सिद्धयः। तत्रोहो यथा उपदेशादिकं विनैव प्राग्भवीयाभ्यासभ्यासवशात् तत्त्वज्ञानमूहनमिति। शब्दस्तु यथा शब्दादीवपाठश्रवणं स्वयं वा शास्त्रमाकलय्य यज्ज्ञानं जायते, तदिति। अध्ययनं यथा शिष्याचार्यभावेन शास्त्राध्ययनाज्ज्ञानमिति। सुहृत्प्राप्तिर्यथा। स्वयमनुपदेशार्थं दृष्टान्ततात् परमकारुणिकाज्ज्ञानलाभ इति। दानं यथा धनादिदानेन परितोषिताज्ज्ञानलाभ इति। एषु च पूर्वस्त्रिविध ऊहशब्दाध्ययनरूपो मुख्यसिद्धेरङ्कुश आकरः। सुहृत्प्राप्तिदानबोहादित्रयापेक्षया मन्दसाधनत्वप्रतिपादनायेदमङ्कुशत्वम्। कथित्वेतासामष्टसिद्धीनामङ्कुशो निवारकः पूर्वस्त्रिविधो विपर्ययाशक्तिरूपो भवति बन्धकत्वादिति व्याचष्टे तत्त्व। तत्त्वाभ्यासाशक्तितया व्याधिस्त्यादिवत् सिद्धिविरोधितानामेन तत्त्वज्ञानस्य सिद्धिविरोधित्वानुभवात्। ननूहादिभिरेव कथं सिद्धित्रयोपे मन्त्रतपःसमाध्यादिभिरणिमाद्यष्टसिद्धेः सर्वशास्त्रेषु बहुत्वादिति तत्राह" भा०। "नेतरादितरहानेन विना" सू०। "इतराद्दुःखत्रयादिपञ्चकभिघातात्। तप आदेस्तात्त्विकी न सिद्धिः कुत इतरहानेन विना यतः सा सिद्धिरितरस्य विपर्ययस्य हानं विनैव भवत्यतः संसारापरिपन्थित्वात् सा सिद्ध्याभास एव न तु तात्त्विकी सिद्धिरित्यर्थः। तथा चोक्तं योगसूत्रेषु। "ते समाधावुपसर्गा व्युत्थाने सिद्धयः" इति प्र०भाष्यम्। यत० सू० भाष्ययोश्च एकत्र विषयविशेषे धारणाध्यानसमाधित्रयरूपसंयमविशेषात् कतिचित् सिद्धयो दर्शिताः यथा "परिणामत्रयसंयमादतीतानागतज्ञानम्" सू०। "धर्मलक्षणावस्थापरिणामेषु संयमात् योगिनां भवत्यतीतानागतज्ञानं धारणाध्यानसमाधित्रयमेकत्र संयम उक्तसूत्रेण परिणामत्रयं साक्षात्क्रियमाणमतीतानागतज्ञानं सम्पादयति" भा०। "शब्दार्थप्रत्ययानामितरेतराध्यासात् सङ्करस्तत्प्रविभागसंयमात् सर्वभूतरुतज्ञानम्" सू०। "संस्कारसाक्षात्करणात् पूर्वजातिज्ञानम्" सू०। "प्रत्ययस्य परचित्तज्ञानम्" सू०। "कायरूपसंयमात्तद्ग्राह्यशक्तिस्तम्भे चक्षुःप्रकाशासंप्रयोगेऽन्तर्द्धानम्" सू०। "सोपक्रमं निरुपक्रमञ्च कर्म ततसंयमादपरान्तज्ञानमरिष्टेभ्यो वा" सू०। "मैत्र्यादिषु बलानि" सू०। "बलेषु हस्तिबलादीनि" सू०। "प्रवृत्त्यालोकन्यासात् सूक्ष्मव्यवहितविप्रकृष्टज्ञानम्" सू०। "भुवनज्ञानं सूर्ये संयमात्" सू०। "चन्द्रे ताराव्यूहज्ञानम्" सू०। "ध्रुवे तद्गतिज्ञानम्" सू०। "नाभिचक्रे कायव्यूहज्ञानम्" सू०। "कण्ठकूपे क्षुत्पिपासानिवृत्तिः" सू०। "कूर्मनाड्यां स्थैर्यम्" सू०। "मूर्द्धज्योतिषि सिद्धदर्शनम्" सू०। "प्रातिभाद्वा सर्वम्" सू०। "हृदये चित्तसंवित्" सू०। "सत्त्वपुरुषयोरत्यन्तासङ्कीर्णयोः प्रत्ययाविशेषोभोगः परार्थत्वात् स्वार्थसंयमात् पुरुषज्ञानम्" सू०। "ततः प्रातिभश्रावणवेदनादर्शास्वादवार्त्ता जायन्ते" सू०। "ते समाधावुपसर्गा व्युत्थाने सिद्धयः" सू०। "बन्धकारणशैथिल्यात् प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः" सू०। "उदानजयाज्जलपङ्ककण्टकादिष्वसङ्ग उत्क्रान्तिश्च" सू०। "समानजयाज्ज्वलनम्" सू०। "श्रोत्राकाशयोः सम्बन्धसंयमाद्दिव्यं श्रोत्रम्" सू०। "कायाकाशयोः सम्बन्धसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनम्" सू०। "बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः" सू०। "स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद्भूतजयः" सू०। "ततोऽणिमादिप्रादुर्भावः कायसम्पत्तद्धर्मानभिघातश्च" सू०। "रूपलावण्यबलवज्रसंहननत्वानि कायसम्पत्" सू०। "ग्रहणस्वरूपास्मितान्व-

वार्थवत्त्वसंयमादिन्द्रियजयः" सू०। "ततो मनोजवित्वं विकरणभावः प्रधानजयश्च" सू०।

"परिणामत्रयसंयमादतीतानागतज्ञानम्" इत्यादिकैः "ततः प्रातिभश्रावणवेदनादर्शास्वादवार्त्ता जायन्ते" इत्यन्तसूत्रैरुक्तानां सिद्धीनां समाधावुपसर्गत्वं व्युत्थाने सिद्धित्वमाह "ते समाधावुपसर्गा व्युत्थाने सिद्धयः" सू०। ते प्रातिभादयः समाहितचित्तस्योत्पद्यमानाः उपसर्गाश्चित्तदर्शनप्रत्यनीकत्वात्। व्युत्थितचित्तस्योत्पद्यमानाः सिद्धयः" भा०। एवमग्रे वक्ष्यमाणाः ततोऽणिमादिप्रादुर्भावः इत्यादयोऽपि सिद्धयो व्युत्थानदशायामेव समाधौ त्वपसर्गा एव हेतोरविशेषात्। एवमन्या अपि सिद्धयः कैवल्यपादे दर्शिता यथा "जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धयः" सू०। "देहान्तरिता जन्मना सिद्धिः ओषधिभिरसुरभवने रसायनेनेत्येवमादि। मन्त्रैराकाशगमनाणिमादिलाभः तपसा सङ्कल्पसिद्धिः कामरूपी यत्र तत्र कामग इत्येवमादि समाधिजाः सिद्धयोः व्याख्याताः" भा० तासाञ्च यथाऽन्यव्यापरिणामहेतुत्वं तथा परशरीरेऽपि समर्थितम्"।

तन्त्रोक्तमन्त्रसिद्धिलक्षणं च तन्त्रसा० उक्तं यथा "मनोरथानामगतेः सिद्धिरुत्तमलक्षणा। स्वर्योषे हरणं तदृत देवतादर्शनं तथा। प्रयोगेऽक्लेशतः सिद्धिः सिद्धेषु लक्षणं परम्। परकायप्रवेशश्च पुरप्रवेशनं तथा। खड्गौत्क्रमण एवं हि चराचरपुरे गतिः। खेचरीभोजनं चैव तत्कथाश्रवणादिकम्। भूस्थिद्राणि प्रपश्येत्तु तद्दृष्टममलक्षणम्। स्वातिर्वाङ्मनभूयादिलाभः सुचिरजीवनम्। भूपानां तद्दर्शनाच्च वशीकरणलक्षणम्। सर्वत्र सर्वलोकेषु चमत्कारकरी सुधीः। रोगोपहरणं दृष्ट्वा विषापहरणं तथा। पाण्डित्यं लभते मन्त्री चतुर्विधमयत्नतः। वैराग्यञ्च तदुद्भूतं ज्ञानितां सर्वशास्त्रताम्। अष्टाङ्गयोगाभ्यसनं भोगेच्छापरिवर्जनम्। सर्वभूतेष्वनुकम्पा सार्वज्ञ्यादिगुणोदयः। इत्यादि गुणसम्पत्तिर्मध्यसिद्धेषु लक्षणम्। महैश्वर्यं धनित्वं च पुत्रदारादिसम्पदः। अधमाः सिद्धयः प्रोक्ता मन्त्रग्रामाद्यभूमिका। सिद्धमन्त्रस्तु यः साक्षात् स शिवो नात्र संशयः।

साध्यवस्तुनिश्चयरूपसिद्धिस्तु अस्यामनुमितौ इच्छायां कामिनीजिज्ञासादिवत् अनुमितेः प्रथमं प्रतिबन्धिका अनुमितिस्तु तत्रोत्तेजिका। "विषयाधिविषया शून्या सिद्धिर्यत्र न विद्यते। स पक्षस्तत्र हेत्वित्यज्ञानादनुमितिर्भवेत्" भाषा०। सिद्धिश्च पक्षतावच्छेदकसामान्यावगाहिनी पक्षतावच्छेदकावच्छिन्नयत्किञ्चिद्धर्मावगाहिनी च तत्रावच्छेदकावच्छेदेनानुमितिं प्रति अवच्छेदावच्छेदेन सिद्धिर्विरोधिनी न सामानाधिकरण्येन सिद्धिः। सामानाधिकरण्येनानुमितिं प्रति तु सिद्धिमात्रं विरोधीति विवेकः। संशयपक्षतावादिमते पक्षतायाविघटकत्वेन सिद्धेर्विरोधितेति विशेषः। १४दण्डकन्याभेदे वह्निपु०। [त्रि०।

सिद्धिद पु० सिद्धिं ददाति दा-क। वटुकभैरवे। २सिद्धिदातरि

सिद्धियोग पु० "शुक्रे नन्दा बुधे भद्रा गुरौ रिक्ता कुजे जया। शनौ पूर्णा च संयुक्ता सिद्धियोगः प्रकीर्त्तितः" ज्योतिषोक्ते शुक्रादिवारयुक्तनन्दादितिथौ।

सिद्धिस्थान न० तीर्थभेदे। "अतःपरं प्रवक्ष्यामि सिद्धिस्थानानि यानि तु। यस्मिन्नाराधिता देवी क्षिप्रं भवति सिद्धिदा। हङ्कारं यत्र हङ्कृत्य निकुटं पर्वतं तथा। विन्ध्या गङ्गा सरिद् यत्र रेवातीरमथापि वा। पद्माक्षी वसुराख्या तु अथ वा मरुदेश्वरे। मरुरेश्वररामेशे अथवा अमरेश्वरे। वेलवल्यास्तटे रम्ये हरिश्चन्द्रे तथा पुरे। सरस्वतीतटे पुण्ये सुगन्धायतनेऽपि वा। स्थानेष्वेषु जपं कुर्यात् नन्दाढ्ये संयतमानसः। भैरवं मुखभेदञ्च चण्डीमं त्रिपुरान्तकम्। अष्टचक्रं चक्रोच्चासं कपालाद्याग्यनामकम्। अजाविकं खरोष्ट्राख्यं स्थानान्येतानि वर्जयेत्" देवीपु०।

सिद्धेश्वरी स्त्री देवीविशेषे। "सिद्धां सिद्धेश्वरीं सिद्ध विद्याधरगणैर्युताम्। मन्त्रसिद्धिप्रदां योनिसिद्धिदां सिद्धशोभिताम्" षष्ठमालात० ११ पटले। "कृष्णेन बलभद्रेण गोपैः कंसजिघांसुभिः। सङ्केतं कृतं तत्र मन्त्रनिश्चयकारकम्। तदा सङ्केतकैः सा च सिद्धा देवी प्रतिष्ठिता। सिद्धिप्रदा भोगदा च तेन सिद्धेश्वरी स्मृता। सङ्केतेश्वरीञ्चैव दृष्ट्वा सिद्धिमवाप्नुयात्" इति वाराहपु०।

सिद्धौघ पु०ङ्त०। तारादेव्याः पूजाने पूज्ये गुरुभेदे "दिव्यौघाः सिद्धिदा वत्स! सिद्धौघान् शृणु यत्नतः। वसिष्ठः कूर्मनाथश्च मीननाथो महेश्वरः। हरिनाथो, मानवौघान् शृणु वक्ष्यामि तद्गुरून्" तन्त्रसा०।

सिध्म न० सिध-मन् किच्च। किलासरोगे हेमच०।

सिध्मन् न० सिध-मनिन् किच्च। किलासरोगे अमरः २०५५ पृ० किलासकुष्ठादि दृश्यम्।

सिध्मल त्रि० सिध्मन्+अस्त्यर्थे लच्। १किलासरोगवति अमरः।२मीनविकारे स्त्री हेमच०। [पृषो०नलच्चे अमरः

सिध्य पु० कार्य्यं साधयति सिध-णिच्-कर्त्तरि यत् नि०।

सिध्र पु० सिध-रक्। १साधौ २दक्षे च त्रिका०।

सिध्रक पु० सेधति रोगान् सिध-रक् स्वार्थे क। दक्षभेदे "वनगर्च्चोः" पा० दत्वाटिलुक्षेण सिध्रकशब्दस्य पाणिनिना दीर्घत्व विधानात् पुंस्त्वमेवास्य युक्तम् अमरोक्तं स्त्रीत्वन्त्वार्षिणीयम्। [त्रिका०।

सिध्रकावण न० सिध्रकप्रधानं वनं षत्वम् दीर्घत्व। देवोद्याने

सिन पु० सीयते बध्यते सि-क्त वाधे तस्य नः। १व्याधे तस्य बहुत्वात्त्वात्वम्। [व्याडिः

सिनी स्त्री सिन+ङीप् तस्य नत्व। शुक्लवर्णयुतस्त्रियाम्

सिनीवाली स्त्री सिनीं श्वेतां चन्द्रकलां वलति धारयति वल-अण् ङीप्। १चतुर्दशीयुक्तायाममावास्यायाम् अमरः। कुहूशब्दे २१६२ पृ०दृश्यम्।२दुर्गायां मेदि०।

सिन्दु(न्धु)क पु० स्यन्दते स्यन्द-उ संप्रसारणञ्च पृषो० दस्य वा धः स्वार्थे वा क। सिन्दुवारवृक्षे अमरः (न्धु)मध्यलत्वार्थे शब्दर०।

सिन्दु(न्धु)वार पु० सिन्धुं गजमदं वारयति तिरुत्वात् ड-अण्। १(निसिन्दा) वृक्षे अमरः"सक्षाकलापीकृतसिन्धुवारम्"कुमारः। तस्य च श्वेतपुष्पत्वात् सक्षात्लत्वम्। पृषो० न्धुमध्यलत्वार्थे रत्नको० २वृक्षोत्तमे त्रिका०।

सिन्दूर न० स्यन्द-ऊरन् संप्रसारणम्। स्यनामख्याते रक्तवर्णे १चूर्णभेदे अमरः २वृक्षभेदे पु० मेदि०।

"सीसोपधातुः सिन्दूरं गुणैस्तत् सीसवन्मतम्। संयोगजप्रभावेन तस्माच्चक्षुष्यं गुणाः स्मृताः। सिन्दूरस्थं सीसपेक्षुक्रकचक्लेदविषापहम्। भग्नसन्धानजननं व्रणशोधनरोपणम्" "दुग्धाम्लयोगतस्तस्य विशुद्धिर्गदितो बुधैः" भावप्र०। भर्त्तरायुर्द्वये सधवया तद्धारणस्यावश्यकता यथोक्तं आशौच० ४त० "हरिद्रां कुङ्कुमं चैव सिन्दूरं कज्जलं तथा। कर्पासकञ्चुताम्बूलं सौभाग्याभरणं शुभम्। केशसंस्कारकवरीकरणं विभूषणम्। भर्त्तरायुष्प्रभिक्षन्ती दूरयेत्तु पतिव्रता"।

सिन्दूरकारण न० ६त०। सीसके हेमच०।

सिन्दूरतिलक पुंस्त्री० सिन्दूरवर्णेतिलकवृक्षभेदो यस्य। १वृक्षभेदे मेदि० स्त्रियां ङीष्। २सधवायाम् स्त्री।

सिन्दूरी स्त्री सिन्दूरं तद्वर्णोऽस्त्यस्याः अच् गौरा० ङीष्। १रोचन्यां २धातकीवृक्षे च मेदि०।

सिन्धु पु० स्यन्द-उ सम्प्रसारणं दस्य धत्व। १समुद्रे अमरः २रक्तचेल्लितायां ३नदभेदे मेदि० ४गजभेदे हेमच०। ५सिन्धुवारवृक्षे शब्दच०। ६श्वेतदूर्व्वायां राजनि०। ७रागभेदे सङ्गीत०। ८नद्यां स्त्री मेदि० ९नदीभेदे राजनि०। "शतक्रोर्विपाशायुक्तः सिन्धुनद्याः सुगीतं लघु स्वादु सर्वामयघ्नम्। जलं निर्मलं दीपनं पाचनञ्च प्रदत्ते बलं बुद्धिमेधायुषञ्चैराजनि० तज्जलगुणाः। १०नैर्ऋतीशे देशभेदे पु० कूर्म्मविभागशब्दे २१६८पृ०दृश्यम्। सोऽभिजनोऽस्य तस्य राजा वा अण्। सैन्धव पित्रादिक्रमेण तद्देशवासिनि तद्रूपे च। बहुषु अण्यो लुक्।

सिन्धुकफ पु० सिन्धोः कफ इव। समुद्रफेने शब्दर०।

सिन्धुकार न० सिन्धुदेशे कीर्य्यते क्रियते वा कृ-क-वा अण्। श्वेतदूर्व्वायां राजनि०। [शब्दर०।

सिन्धुखेल पु० सिन्धुसमीपे खेलति खेल-अच्। सिन्धुदेशे

सिन्धुज न० सिन्धुदेशे समुद्रे वा जायते जन-ड। १सैन्धवलवणे अमरः २चन्द्रे ३कर्पूरे पु०।४वत्सनाभ्यां स्त्री अटा० सिन्धुजातादयोऽप्यत्र।

सिन्धुनन्दन पु० ६त०। १चन्द्रे २कर्पूरे त्रिका०। सिन्धुसुतादयोऽप्यत्र। ३लक्ष्म्यां स्त्री। [शब्दच०।

सिन्धुपुष्प पु० सिन्धौ पुष्पमस्ति विकायते पुष्प-अच्। शङ्खे

सिन्धुमन्थज न० सिन्धुमन्थात् जायते जन-ड। १सैन्धवलवणे रत्नमा० २अम्लते च।

सिन्धुर पुंस्त्री० सिन्धुर्मदजलमस्त्यस्मिन् र। हस्तिनि हेमच० स्त्रियां ङीष् "मदान्धसिन्धुरघटा" गङ्गाश्लोकः।

सिन्धुलवण न० सिन्धुदेशजातं लवणम्। सैन्धवलवणे रत्नमा०

सिन्धुवारित पु० सिन्धुः मदजलं वारितस्तिरस्कृतो येन अतितिक्तत्वात्। सिन्धुवारवृक्षे। (निसिन्दा) शब्दर०।

सिन्धुविषण पु० विष-ल्यु ६त०। मालतीवृक्षे शब्दच०।

सिन्धुसङ्गम पु० सिन्ध्वोः नद्योः नदीसमुद्रयोर्वा सङ्गमः। १नद्याः नदीसमुद्रयोर्वा मेलने अमरः। स यत्र। २तदाधारदेशे त्रि०।

सिन्धूद्भव न० सिन्धोः सम्भवति भू+भू-अच् ७त०। सैन्धवलवणे रत्नमा० २समुद्रजातमात्रे त्रि०। [क्षीरभिलम्बे।

सिन्धूपल पु० सिन्धोरुपल इव। १सैन्धवलवणे क्षारा०।

सिप्र पु० सप-रक् पृषो०। १सरोवरभेदे २चन्द्रे त्रिका० ३निदाघजले ४अन्नं च पु० मेदि०। ५उज्जयिनीसमीपस्थे नदीभेदे स्त्री मेदि० "सिप्रातरङ्गानिलकम्पितास्तु रघुः। वसिष्ठारुन्धत्योर्विवाहप्रस्तुतजनस्य सिप्रवरेषि मेलनात्

शिवाप्राद्भवौ यथा "तत्तोयं सप्तधा भूत्वा पतितं मानसाच्चयात्। हेमाद्रेः कन्दरे यानौ सरस्याञ्च पृथक् पृथक्। तत्तोयं पतितं यिम्रे देवभोग्ये सरोवरे। तेन शिवा नदी जाता विष्णुना प्रेरिता क्षितिम्" कालिपु० २३अ०। [नामता।

सिम पु० सि-मन् किच्च। सर्वस्मिन् दृश्यार्थे। तदर्थेऽस्य सर्व-

सिम्बा(म्बि) स्त्री शाम्यति दृष्टिरनया शम-अच् दृन् वा पृषो०। (छुटि)१शिम्बायाम् हिङ्कपको० दृनन्। २नखी-नामगन्धद्रव्ये राजनि० वा ङीप्। ङीबन्तः। शनि-प्राप्यां भावप्र०। [धान्ये कलावादौ भावप्र०।

सि(शि)म्बिजा स्त्री सि(शि)म्बेर्जायते जन-ड। श्मी-

सिर पु० सि-रक्। १पिप्पलीमूले हेमच०। २नाड्याम् ३क्षम्बुवाहिन्याञ्च स्त्री हेमच०। [सङ्कीर्णे भरतः।

सिलकी स्त्री सि-किप् लक-अच् गौरा० ङीष् कर्म०।

सिवर पुंस्त्री० सि-करण्। गजे जटा० स्त्रियां ङीष्।

सिङ्घाण पु० सो-क्वि सिः क्षेदस्तं घ्राणयते कण्टकाद्यतत्वात् ङाडि-यण्। घ्राणीद्रव्ये शब्दर०। [स्वार्थे क तत्रैव।

सिङ्घ पु० सिङ्घ-कक् पृषो०। डकचूपाख्ये गन्धद्रव्ये अमरः

सिङ्घकी स्त्री सिङ्घ-लकक् पृषो० गौरा० ङीष्। सङ्कीर्णे शब्दर०। [शब्दर०।

सिङ्घभूमि स्त्री सिङ्घस्य गन्धद्रव्यस्य भूमिः। सङ्कीर्णे

सीक सेचने भ्वा० या० सक० सेट्। सीकते असीकिष्ट। कृदित् चङि न हृस्वः। पर्युदासेन न षोपदेशः।

सीक स्पर्शे वा चु० उभ० पक्षे भ्वा० प० सक० सेट्। सीक-यति ते सीकति असीसिकत् त असीकीत्। पर्युदासान्न षोपदेशः। [भरतः।

सीकर पु० सीक्यते सिच्यतेऽनेन सीक-अरन्। जलकणे

सीता स्त्री सि-त पृषो० दीर्घः। १लाङ्गलपद्धतौ अमरः २जनकराजदुहितरि ३भद्राश्ववर्षस्थितगङ्गायाञ्च।

"अथ मे कर्षतः क्षेत्रं लाङ्गलादुत्थिता ततः। क्षेत्रं शोधयता लब्धा नाम्ना सीतेति विश्रुता। भूतलादुत्थिता सा तु व्यवर्द्धत ममात्मजा" रामा० बाल० "अथ क्षोणेश्वरो यज्ञक्षीजनाय पुरे स्थितः। शुभक्षेत्रे कृ-षोत्खाते तारे चोत्तरफाल्गुने। अयोनिजा पद्मकरा बालार्कायुतसन्निभा। सीतास्वे वसुमत्या बालभावेन सुन्दरी। सीतास्वोद्भवात् सीता दत्यस्या नाम चाकरोत्" पद्मपु०। भद्राश्ववर्षनदीभेदेच स्वर्गगङ्गाया धारा-भेदः जम्बुद्वीपशब्दे १०४६ पृ० दृश्यः। ४तच्छब्दाम्

५उमायां हृस्वाधिदेवतायां नानार्थमञ्जरी। ७महि-रायां राजनि०।

सीतापति पु० ६त०। श्रीरामे शब्दर०।

सीतायाःपति पु० ६त० अलुक्समा०। श्रीरामे शब्दर०। "सीतायाः पतये नमः" इति पुराणम् अस्मन्नन्ते पत्यौ दृश्येव स्मात्।

सीत्कार पु० सीदित्यव्यक्तस्य कारः सीत्+क-घञ्। अनु-रागजे शब्दे। [शब्दे हेमच०।

सीत्कृत न० सीत्+क-भावे क्त। १सीत्कारे २अनुरागज-

सीत्य न० सीतया लाङ्गलपद्धत्या निर्वृत्तं यत्। १धान्ये हेमच०। सीतामर्हति यत्। २हलकर्षणयोग्ये क्षेत्रादौ त्रि०

सीधु पु० सिध-क पृषो०। १मद्ये २मद्यभेदे च "इक्षोः पक्वै रसैः स्निग्धः सीधुः पक्वरसश्च सः। आमैस्तैरेव यः सीधुः (सेरका) स च शीतरसः स्मृतः। सीधुः पक्वरसः श्रेष्ठः खराग्निबलवर्द्धनः। वातपित्तकरो हृद्यः स्वेदनो रोचनो हरेत्। विबन्धमेदशोफार्शःशोफोदरकफा-मवान्। तस्मादल्पगुणः शीतरसः संक्षेपनः स्मृतः" राजनि०। [शब्दर०।

सीधुगन्ध पु० सीधोरिव गन्धोऽस्य वा न तत्समा०। बकुले

सीधुपुष्प पु० सीधुगन्धयुक्तं पुष्पमस्य। १कदम्बे २बकुले च १धातक्यां स्त्री राजनि० ङीष्।

सीधुरस पु० सीधोरिव रस आस्वादोऽस्य। आम्रवृक्षे राजनि०

सीमन्त पु० सीम्नोऽन्तः शक०। १केशान्तर्गतवर्त्माकारे पदार्थे (सिँथि) हेमच०२केशरचनाभेदे। "षष्ठेऽष्टमे वा सीमन्त" इत्युक्ते गर्भावधिके षष्ठे अष्टमे वा मासि कर्त्तव्ये ३गर्भ-संस्कारभेदे च सीमन्तोन्नयनशब्दे दृश्यम्।

सीमन्तक न० सीमन्ते कायति कै-क। १सिन्दूरे राजनि०

सीमन्तिनी स्त्री सीमन्त+अस्त्यर्थे इनि। नार्याम् अमरः।

सीमन्तोन्नयन न० सीमन्तस्य केशरचनाभेदस्य उन्नयनम् उ-त्क्षेपणमत्र। स्वनामख्याते गर्भसंस्कारभेदे।

तत्कालादि संस्काररत्न० दर्शितं यथा

"यदि पुंसवनं न कृतं तदा तस्मिन्नेव दिने प्रायश्चित्ता-ङ्गमङ्गल्यवृद्धिश्राद्धं कृत्वा पुंसवनं कृत्वा सीमन्तोन्न-यनं कार्य्यम्। तथा च नारदः "येषान्तु न कृताः पूर्वं संस्कारविधयः क्रमात्। कर्त्तव्या श्वाद्यमिस्तेषां पैण्डकादेव तद्दिनात्। अविद्यमाने पित्रर्थे स्त्रीभाद्वृद्ध्य वा पुनः। अथवाग्रजकार्य्यैः संस्काराश्चाद्यमिः पूर्वसंस्कृतैः। क्रमात् स्वसृणां संस्काराश्चाद्य चौलोपनयक्रमात् स्वाद-

क्रमस्तु सोदरविषयः विवाहे तथा दर्शनात्। छन्दो गपरिशिष्टम् "देवतानां विषयोपे जुहोतिषु कथं भवेत्। सर्वं प्रायश्चित्तं हुत्वा क्रमेण जुह्वात् पुनः। संस्कारा अतिपत्तेरनु स्वकालाच्च कथन। छत्रैतदेव कुर्वीत ये हुपनयनादधः"। एतदित्यनेन सर्वं प्रायश्चित्तमनुकृष्टं तच्च प्रागेव विहितम्। उभयकरणे तन्त्रेणैव मातृकापूजादि "गणयः क्रियमाणे तु मातृभ्यः पूजनं सकृत्। सकृदेव भवेत् श्राद्धमादौ न पृथगादिषु" इति छन्दोगपरिशिष्टात्। गोभिलः "अथ सीमन्तकरणं प्रथमे गर्भे चतुर्थे षाष्टमे दशमे वा"। अथ पुंसवनानन्तरं सीमन्तः केशरचनाविशेषः। वाशब्दोऽयं चतुर्थीमासानां तुल्यवद्विकल्पः किन्तु पूर्वः पूर्वः कालः प्रशस्तः "समर्थस्य लोपायोगादिति" न्यायात्। ततो नव मासादौ प्रायश्चित्तं हुत्वैव कर्त्तव्यम् प्रथमगर्भे दर्शनादुपादानात् यदि कथञ्चिदकृत एतस्मिन् संस्कारे गर्भनाशे पुनर्गर्भोत्पत्तौ अयं कालनियमो न किन्तु "गर्भस्यन्दने सीमन्तोन्नयनं यावन्न बालप्रसवः" इति यज्ञलिखितोक्तकालो ग्राह्यः। हरदत्तस्तु "या नार्यकृतसीमन्ता प्रसूते च कथञ्चन। अङ्गे निधाय तं बालं पुनः संस्कारमर्हति"। "अङ्गे मासेऽष्टमेऽक्षीब्यकुलदिनकृतां नन्दभद्रे तिथौ च मैत्रे।७ मूले ह्यगाङ्गे५ करा१२ वितृ१०पवने१५ पौष्ण२७विष्णु२२त्रियुग्मे ११।१२।२०। २१।२५।२६। पुष्यादित्य७रौद्रे६युवतिकरिभषे द्वयस्थिते वापि लग्ने चन्द्रे तारासकूले शुभमपि नियतं स्यात्र सीमन्तकर्म। ह्यगाजरहिते लग्ने नवांशे पुंग्रहस्य च। केचिदत्रैव सीमन्तं तथारिक्षेतरे तिथौ"। अथ सीमन्तमूर्द्धं नयत्यत्रेति गोभिलोक्तेरध्यायः।

सीमन् स्त्री सि-दमनि पृषो० न सुषो दीर्घश्च। १मर्य्यादायाम् अमरः जटा० २स्त्रियां २केशे ३अक्षकोशे मेदि०। "सीम्नि पुष्यूलकोद्गतः" सि०कौ० ५वेलायाञ्च विश्वः।

सीमा स्त्री+सीमन्+या टाप्। १मर्य्यादायां २ग्रामादेरन्यस्मिन् ३सीमन्शब्दार्थे च।

सीमाविवाद पु० सीमायां विवादः। अष्टादशसु विवादेषु मध्ये प्रसिद्धे विवादभेदे

तत्स्वरूपादिकं वीरमि० दर्शितं यथा

"अथ सीमाविवादाख्यव्यवहारपदम् तत्स्वरूपमाह नारदः "क्षेत्रकेदारमर्य्यादाविच्छिन्नाक्षतनिम्नयः। क्षेत्राधिकारो यत्र स्याद् विवादः क्षेत्रजस्तु सः"। अक्षतः क्षेत्रप्रवाहश्चान्यः। केदारः क्षेत्रम्। मर्य्यादा सीमा। विच्छिन्नो लाङ्गलप्रकृतो देश अक्षतस्तदुद्धृतः एतेषां निम्नयो यत्र विवादे स्यात् स क्षेत्राधिकारः क्षेत्रविषयको विवादः क्षेत्रज उच्यत इति। अयं विवादः षड्विधः तथा च कात्यायनः "साधिक्यं न्यूनता सांशे ऽस्तित्वनास्तित्वमेव च। अभोगभुक्तिः सीमा च षड् भूवादस्य हेतवः"। अमैषाधिका भूरस्मीत्युक्तेति विवाद आधिक्यविवादः। एतावती भूरत्व नेत्युक्ते अमैतावतीति यो विवादः स न्यूनताविवादः अत्र ममांशोऽस्मीत्युक्ते यो विवादः सोऽस्तित्वविवादः अत्र तवांशो नास्मीत्युक्ते अत्र विद्यते इत्यंविधो विवादो नास्तित्वविवादः। सीमाविवाद इति षड्विधो विवाद इत्यर्थः। तत्र सीमा चतुर्विधा। देशसीमा ग्रामसीमा क्षेत्रसीमा गृहसीमा चेति। तत्राद्यचतुर्विधाया अपि यथासम्भवं षड्विधत्वमाह नारदः "ध्वजिनी मत्स्यिनी चैव नैधानी भयवर्जिता। राजशासननीता च सीमा षड्विधा स्मृता"। ध्वजिनी वृक्षादिचिह्निता वृक्षाश्च न्यग्रोधादयः। तदाह मनुः "सीमावृक्षांस्तु कुर्वीत न्यग्रोधाश्वत्थकिंशुकान्। शाल्मलीन् शालतालांश्च क्षीरिणश्चैव पादपान्" इति। मत्स्यिनी जलचिह्निता। नैधानी निखातगुप्ताङ्गारादिलक्षिता। भयवर्जिता चिरप्रवृत्तिपरम्परस्मृतिपत्तिनिर्मिता। तथा च व्यासः "ग्रामयोरुभयोः सीम्नि वृक्षा यत्र समुद्भवाः। समुच्छ्रिता ध्वजाकारा ध्वजिनी सा प्रकीर्त्तिता। स्वच्छन्दगा बहुजला झषकूर्मसमन्विता। नित्यप्रवाहिणी यत्र सीमा सा मत्स्यिनी मता। तुषाङ्गारकपालैस्तु कृत्वा रायतनैक्षवा। सीमा प्रचिह्निता कार्या नैधानी सा निगद्यते" इति। नित्यप्रवाहिणीग्रहणेन कूपवाप्यादीनि प्रकाशचिह्नान्युपलक्षयन्ति। तानि च हरदत्तेन दर्शितानि "वापीकूपतडागानि चैत्यारामसुरालयाः। स्वयं निम्नं नदीस्रोतः शरगुल्मनगादयः। प्रकाशचिह्नान्येतानि सीमायां कारयेत् सदा। चिह्नितानि तथान्यानि यानि भूमिं न भक्षयेत्। अङ्गारोऽस्थीनि तोयानां तुषान् भस्मकपालिकाः। करीषशिष्टकाष्ठारग्वकरीषबालुकास्तथा। तानि सन्धिषु सीमायां प्रकाशानि कारयेत्"। चैत्यं देवकादिभिः रचितस्तम्बादिकम्। स्वयम् प्रकृतः भूप्रदेशः। निम्नं परिखा। नगा वृक्षादयो ह्याः। आदिशब्देन

मार्गादीनां कार्यांसवीजानाञ्च षड्विधम्। अस्थीनि पशुमनुष्यादयस्थीनि। तुषाङ्गारकपालैरिति करीषादीनामन्येषां चिह्नानामप्युपलक्षणम् तानि निधापयेत् "तत्र योमन्तु वाक्षाणां प्रत्यक्षेण प्रदर्शयेत्। गर्ह्यके च चिह्नमाने दर्शयेदुभयोश्च च। एवं परम्परागाने सीमा भ्यन्तिर्न जायते" इति। प्रदर्शयेदित्यन्तु छान्दसं बहुत्वे एवकवचनम्। एतेषां चिह्नानां कस्मिन्नभावे निश्चयोपायमाह नारदः "निम्नगापङ्कतोत्खुटनष्टचिह्नासु भूमिषु। तत्प्रदेशानुमानेन प्रमाणैर्भोगदर्शनैः"। निम्नगाया नद्या अपकृतेन अपहरणेन उत्खुटानि स्वस्थानाच्चलितानि चिह्नानि यासान्तासु उक्ताः। प्रमाणैः साक्षिसामन्तादिभिः एवं निरूपितैश्चिह्नैर्निर्णयं कुर्यादित्याह मनुः "एतैर्लिङ्गैर्नयेत् सीमां राजा विवदमानयोः। यदि संशय एव स्यात्साक्षिणामपि दर्शने। साक्षिमत्य एव स्यात् सीमावादविनिर्णयः"। साक्षिप्रत्ययः साक्षिहेतुकः। चिह्नाभावपक्षपरिग्रहार्थोऽपिशब्दः ते च साक्षिणः सीमाविषया सीमाचिह्नविषया वा। साक्षिणः विशेषमाह हरीतः "आगमं च प्रमाणं च भोगकालञ्च नाम च। भूमिलक्षणमेवं च ये विदुस्तेऽत्र साक्षिणः" प्रमाणमित्यत्र। उभयेषामपि साक्षिणामभावे सामन्तसाक्षिणं कुर्यादित्याह मनुः "साक्ष्यभावे तु चत्वारो ग्रामाः सामन्तवासिनः। सीमाविनिर्णयं कुर्युः प्रयता राजसन्निधौ"। यदा पुनश्चिह्नानि न सन्ति वर्त्मभानि वा सन्दिग्धानि तदा निश्चयोपायमाह याज्ञवल्क्यः "सामन्ता वा समग्रामाश्चत्वारोऽष्टौ दशापि वा। रक्तस्रग्वसनाः सीमां दृश्येयुः क्षितिधारिणः"। सामन्ताः सन्निहितग्रामक्षेत्रादयुपभोक्तारः। समग्रामाश्चत्वारोऽष्टौ इत्यादि प्रकारेण समसङ्ख्याकाः। तथा च कात्यायनः "ग्रामो ग्रामस्य सामन्तः क्षेत्रं क्षेत्रस्य कीर्तितम्। सदृशं सदृशस्य निर्दिष्टं समन्तात्परिरक्षणं हि"। ग्रामस्य समन्ताद्यत्तदृशं दिशु परिरक्ष्य सम्बध्य स्थितो ग्रामः सामन्तः क्षेत्रादप्येवं ज्ञेयम्। सामन्तानां यदा रागद्वेषादिना प्रकटदोषसद्भावस्तदा सामन्तसामन्तवशान्निर्णयः कार्यः तदाह कात्यायनः "सार्वसिद्धौ प्रदुष्टेषु सामन्तेष्वन्तरोदयात्। तत्संसक्तेषु कर्त्तव्य उद्धारो नात्र संशयः"। तत्संसक्तैः सामन्तसंसक्तैः। सीमाया उद्धारः सीमावानिर्णय इत्यर्थः। तथा चैतदुक्तं भवति। चतसृषु दिशु स्थितसामन्तग्रामादिभ्योऽनन्तरत्वेन तद्दिग्विस्थितग्रामादिभोक्तारस्तत्संसक्तास्तत्प्रदर्शितसीमाचिह्नैर्ग्रामादेः सीमानिर्णयेयुरिति। यदा तु सामन्तसामन्तानामपि प्रकटदोषस्तदा तत्सामन्तैर्निर्णयस्तदाह कात्यायनः "संसक्तसदोषे तु तत्संसक्ता प्रकीर्तिता" इति। तत्संसक्ताः संसक्तसंसक्तसंसक्ता इत्यर्थः। एवं चैतदुक्तं भवति चतसृषु दिशु स्थितसंसक्तग्रामादिभ्योऽनन्तरत्वेन तद्दिग्विस्थितग्रामादिभोक्तारः संसक्तास्तैः प्रदर्शितसीमाचिह्नैर्ग्रामादेः सीमानिर्णयेयुरिति। यदा पुनरेतेषामपि प्रकटदोषत्वात्तदा सीमादिनिर्णयः कथं स्यादित्याह स एव "कर्त्तव्यो न प्रदुष्टासु राज्ञा धर्मं विजानता। त्यक्त्वा दुष्टांस्तु सामन्तानन्यां सीमादिमिः सह। सन्धिमत्र कारयेत सीमामेवं धर्मविदो विदुः"। अन्यान् सामन्तव्यतिरिक्तान् सीमाचिह्नाभिज्ञान् नगरादीनित्यर्थः। नगरादयश्च दर्शिता नारदेन "नगरग्रामगणेषु च हृद्धतमा नराः"। सीमाचिह्नज्ञातार इति शेषः। सीमादिभिः सीमहद्धृतैः। सन्धिमत्र मेलयित्वा। सीमादीनाञ्च लक्षणं दर्शितं कात्यायनेन "ये तत्र पूर्वं सामन्ताः पश्चाद्देशान्तरङ्गताः। तन्मूलत्वात्तु ते सीमा ऋषिभिः परिकीर्त्तिताः। निम्नाद्युपानं यैर्दृष्टं तत् कार्यं नृगुणान्वितैः। हृद्धा वा यदि वाऽहृद्धास्ते च हृद्धाः प्रकीर्त्तिताः"। नृगुणान्वितैः पुरुषगुणान्वितैः। वाकारोऽनार्ष्यायां वयोऽहृद्धत्वव्यापदोऽजकत्वात्। ये परम्परया कार्यज्ञातारस्ते हृद्धाः इत्यर्थः। तथा च संसक्तसंसक्तेषु स्फुटदोषदुष्टेषु पूर्वसामन्तादुपेतनागरिकपाश्वजनपदेषिवयोऽहृद्धदर्शितैः सम्यक् चिह्नैः सीमानिर्णयः कार्यः। यदा तु प्रतिवादिना सामन्तेषु कश्चिद्दोषो न भावितः ते च न प्रकटदोषयुक्तास्तदोक्तो विशेषो मनुना "सामन्ताः साधनं पूर्वमुक्तो गुणान्विताः। द्विगुणास्तूत्तरा ज्ञेयास्तेऽन्ये त्रिगुणा मताः"। अनिष्टोक्तौ प्रतिवादिना गुप्तदोषाभिधाने तत्सामन्ताश्चतो द्विगुणपर्याप्ताः। तत्रापि तथात्वे सीमहद्धादयः सामन्तत्रिगुणपर्याप्ता इत्यर्थः। बाह्यादीनामेतेषां यदा सर्वाभावस्तदा स्याह मनुः "सामन्तानामभावे तु सीमानां सीम्नि साक्षिणाम्। इमानयनुयुञ्जीत पुरुषान् वनगोचरान्। व्याधान् शाकुनिकान् गोपान् केवर्त्तान् मूलखानकान्। व्यालग्राहान्सहस्तीनन्यांश्च वनगोचरान्"। वनगोचराणां सङ्घं

सीमासन्निहितदेशकर्षकाणामसत्त्वे विज्ञेयम्। अतएवोक्तं नारदेन "सीमासु च बहिर्ग्रामे सुग्रामेऽपि तत्क्षणजीविनः। गोपाः शाकुनिका व्याधा ये चान्ये वनगोचराः" इति। अत्र च सर्वत्र स्थावरविवादे मेत्वादिविवादे च सामन्तादयो निर्णायकाः तथा च कात्यायनः "तेषामभावे सामन्ता भोक्तृहोद्भूतादयः। स्थावरे षट्प्रकारेऽपि कार्या नात्र विचारणा। क्षेत्रवास्तुतडागेषु आरामवनसेतुषु। समेतभावात् सामन्तैः कृत्यादव विनिर्णयम्। ग्रामसीमासु च तथा तद्ग्रामरदेशयोः"। तेषां साक्षिणाम्। वाचस्पतिरपि "आरामायतनग्रामनिपानोद्यानवेश्मसु। एष एव विधिर्ज्ञेयो वर्त्मम्रवणादिषु"। आयतनं चित्रवेशनं चित्रस्थानं यानीयस्थानं वर्त्मम्रवणो हस्त्युद्भूत जलप्रवाहः। पुनः कात्यायनोऽपि "क्षेत्रकूपतडागानां केदारारामयोरपि। षट्प्रमदावसथण्डपदेवण्डेषु च"। केदारः क्षुद्रसेतुयुक्तः क्षेत्रविशेषः। गोवलीवर्दन्यायेन भिन्नोक्तिः प्रमदः प्रासादः। हारीतस्मृतिरपि "सर्वत्र स्थावरे वादे विधिरेष प्रकीर्त्तितः"। राज्ञा ग्रामीणानां वादिप्रतिवादिनोश्च समक्षं सामन्तादयः प्रष्टव्याः तैर्यदुक्तं तत्पत्रे लेखनीयमित्याह मनुः "ग्रामीयकुलानान्तु समक्षं सीम्नि साक्षिणः। प्रष्टव्याः सीमलिङ्गानि तयोश्चैव विवादिनोः। ते पृष्टास्तु यथा ब्रूयुः समस्ताः सीम्नि निर्णयम्। निबध्नीयात्तथा सीमां सर्वांस्तांश्चैव नामतः"। साक्ष्यभिप्रायेण सीमलिङ्गानीत्युक्तम्। सीमासाक्षिणस्तु सीमां ब्रूयुः। तथा च हारीतः "शपथैः शापिताः स्वैः स्वैर्ब्रूयुः सीमाविनिर्णयम्। दर्शयेयुश्च लिङ्गानि तत्प्रमाणमिति स्थितिः"। स्वैः स्वैः। "सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः" इत्यादिनोक्तव्यवस्थानतिक्रमेणेत्यर्थः। यदा तु सीमालिङ्गसाक्षिणः सीमालिङ्गानि दर्शयितुन्न शक्नुवन्ति केवलं सीमामात्रं जानन्ति तदा ते कथं ब्रूयुरित्याकाङ्क्षायामाह मनुः "शिरोभिस्ते स्पृशेयुर्वै क्ष्मिणो रक्तवाससः। सुकृतैः शापिताः स्वैः स्वैर्मन्त्रैर्युक्ते समञ्जसम्" इति। क्ष्मीं स्पृशन्तः। सीमाक्रमणाद्या इति शेषः। नन्वेवमिदं द्वयोर्निरासार्थं बहुवचनञ्चैकस्य, नारदेन "एकश्चेदुद्वयेत् सीमां सोपवासः समुद्वयेत्। रक्तमाल्याम्बरधरो भूमिमादाय मूर्द्धनि" इति एकस्याभ्युपगमात्। हारीतस्मृतिरपि "ग्रामविच्छैर्विना साधुरेकोऽप्युभयसम्मतः। रक्तमाल्याम्बरधरो स्पृष्टमादाय मूर्द्धनि। सत्यव्रतः सोपवासः सीमां तां दर्शयेन्नरः"। ग्रामविच्छैर्विना सीमायाः ज्ञातव्यां लिङ्गासाक्षित्वे। ननु कथमेकस्य सीमानिर्णायकत्वम् "नैकः सत्यवदेत् सीमाक्षरः प्रत्ययवानपि। गुरुत्वादस्य कार्यस्य क्रियेषा बहुषु स्थिता" इत्येकस्य नारदेन निषेधादिति चेन्नैवम् स उभयानुमतधर्मविद्व्यतिरिक्तविषय इति न काप्यनुपपत्तिः। अयञ्च निर्णयः सीमाक्रमणादिनादारभ्य पञ्चत्वपर्य्यन्तं साक्षिसामन्तादीनान्दैविकराजिकोपद्रवाभावे अवश्यः न तु सीमाक्रमणाव्यवस्थितोत्तरमेव। तथा च कात्यायनः "सीमाषड्क्रमणे क्रोशे पादलेखे तथैव च। विपन्नपञ्चसप्ताहं दैवराजिकमिष्यते"। यथासङ्ख्यमिति शेषः। यदा तु साक्ष्यादीनां पञ्चत्वाभ्यन्तरे दैविकराजिकोपद्रवः अन्यथा वा मिथ्यावादित्वनिश्चयस्तदा ते पञ्चशतदण्डं दण्ड्याः। तथा च मनुः "यस्त्वेतेन यथोक्तेन नयेत्सीमां पुरा नरः। सत्यसाक्षिभ्यः। विपरीतन्नयेत्तु दाप्यः स्यादिशतं दमम्"। यथोक्तेन शिरोभिस्ते स्पृशेयुर्वै क्ष्मिणो रक्तवाससः इत्यादिनोक्तप्रकारेण नयन्तो निर्णयं कुर्वन्तः यथाभूतेनार्थेनेति शेषः। द्विशतं पञ्चशतद्वयम् प्रत्येकम् दाप्या इत्यर्थः। सामन्तानां मिथ्यावादित्वे राज्ञा ते मध्यमसाहसाख्येन दण्डेन दण्डनीयाः। तथा चाह वाचस्पतिः "अन्यते तु पृथक् दण्ड्या राज्ञा मध्यमसाहसम्"। सामन्ता यद्यन्यतमं मिथ्याभूतं सीमानिर्णयं कुर्युः तदा मध्यमसाहसं कार्षापणानां चत्वारिंशदधिकानि पञ्च शतानि दण्डनीयाः। नारदोऽपि "अथ चेदन्यतं ब्रूयुः सामन्ताः सीम्नि निर्णये। सर्वे पृथक् पृथक् दण्ड्या राज्ञा मध्यमसाहसम्"। सामन्तव्यतिरिक्तानां तत्सम्बन्धादीनां मिथ्यावादित्वे पूर्वसाहसाख्येन दण्डेन प्रत्येकं ते दण्डनीयाः। तथा च नारदः "क्षेत्राग्रेदन्यतं ब्रूयुर्निबद्धा भूमिहर्मणि। प्रत्येकन्तु लभन्त्यास्ते विनेयाः पूर्वसाहसम्" इति। भोजादेरामन्यतवादित्वे तमेव दण्डं स एवाह "भोजकादेरयज्ञान्ये दण्डनीयाः पृथक् पृथक्। विनेयाः पूर्वसेनैव साहसेनान्यते स्थिताः" इति। आदिशब्देन गोपशाकुनिकादिवनगोचराणां ग्रहणम्। दण्डनीयाः मिथ्यावादित्वेन दण्डयितुमर्हाः भोजकादयः पृथक् पृथक् प्रत्येन साहसेन विनेया दण्ड्या इत्यर्थः।

यद्यपि सामन्तादीनां साक्षात्प्रत्ययेन दण्डाल्लघुत्वञ्च तथापि तेषां वाचनिकं दण्डाधिक्यमिति न कोऽपि दोषः। यद्यपि शङ्कुनिपातादयो बहुधा पापरतत्वात् लिङ्ग प्रदर्शनोपयोगेनान्यथा सिद्धा न साक्षात् सीमानिर्णये उपयुज्यन्ते तथापि इष्टादिलिङ्गप्रदर्शन एव मिथ्याभाषित्वसम्भवात्तदभिप्रायेणैव दण्डविधानम्। सीमादिना भेदेनोक्तौ च साक्षादीनां दण्डभाङ् कात्यायनः "बहवन्तु गृहीतानां न सर्वे निर्णयं यदि। कुर्युर्भयाद्वा लोभाद्वा दाप्यास्तूत्तमसाहसम्"। एवमज्ञानादिना अनृतवचने साक्षादीन् दण्डयित्वा पुनः सीमाविचारः प्रवर्त्तयितव्यः तथा च स एवाह "अज्ञानोक्तौ दण्डयित्वा पुनः सीमां विचारयेत्। कीर्त्तिते यदि भेदः स्याद्दण्ड्यास्तूत्तमसाहसम्"। साक्ष्यादीनां सर्वेषाम् अज्ञानोक्तौ भेदेनोक्तौ च पुनर्विचारणं लेख्यप्रमाणेन कर्त्तव्यम्। अतएव शङ्खलिखितावपि "सामन्तविरोधे लेख्यप्रत्ययः" इति। यदा पुनः सामन्तप्रभृतयो ज्ञातारश्चिह्नानि च न सन्ति तदा राजा स्वेच्छया निर्णयं कुर्यात् तथा च याज्ञवल्क्यः "अभावे ज्ञातृचिह्नानां राजा सीम्नः प्रवर्त्तिता"। ज्ञातॄणां सामन्तादीनां चिह्नादीनाञ्च इष्टादीनामभावे राजैव स्वातन्त्र्येण सीमानं प्रवर्त्तयेत्। नारदोऽपि "यदा च न स्युर्ज्ञातारः सीमायां न च लक्षणम्। तदा राजा द्वयोः सीमासञ्चयेदिष्टतः स्वयम्"। इष्टतः दृष्ट्वा सञ्चयेदिभक्तिकस्तयिः। ग्रामद्वयमध्यवर्त्तिनीं विवादास्पदीभूतामुर्वरं समं प्रविभज्यात्मीयस्वामिरित्युभयोः समर्थं तन्मध्ये सीमाचिह्नानि कुर्यात्। यदा तस्यां भूमावुपकारातिशयो यत्र दृश्यते तदा तत्रैव सा सकला भूर्भोक्तव्या न त्वुभयत्र। तथा च मनुः "सीमायामविषह्यायां स्वयं राजैव धर्मवित्। प्रदिशेद्भूमिमेतेषामुपकारादिति स्थितिः" इति। अविषह्यायां ज्ञातृचिह्नरहितायाम्। प्रदिशेत् प्रवेशयेदित्यर्थः। अयञ्च निर्णयो राज्ञा निर्णयान्तरवद्व्यवस्थितोत्तरमेव न कर्त्तव्यः किन्तु सीमाचिह्नानि यदा स्वयंकाद्यभावात् स्फुटं दृश्यन्ते तदा कर्त्तव्यः। तथा च मनुः "सीमां प्रति समुत्पन्ने विवादे ग्रामयोर्द्वयोः। ज्येष्ठे मासि नयेत् सीमां शुक्लाङ्गेषु सेतुषु"। द्वयोर्ग्रामाधिपयोर्विवादे सीमां प्रति समुत्पन्ने ज्येष्ठे मासीत्युपलक्षणं मासान्तरेऽपि सेतुषु सीमाचिह्नेषु व्यक्तेषु विवादाध्यासितां सीमाम्निर्णयेदित्यर्थः। ग्रामग्रहणं नगरादेरप्युपलक्षणार्थम्। अतएव कात्यायनः "सामन्ताश्चेत्तु सामन्तैः कुर्यात् क्षेत्रादिनिर्णयम्। ग्रामसीमादिषु तथा तद्वन्नगरदेशयोः" इति। यदा पुनः ग्रामादीनां सीमात्वेन परिकल्पिता नदी कदाचित् ग्रामान्तरं भित्त्वा प्रवहन्ती दक्षिणभागे स्थितां पूर्वं काञ्चिद् भूमिं वामभागनिविष्टां करोति तथा तत्रैकग्रामसम्बन्धिनी भूरन्यत्र राज्ञा योज्यते तत्र निर्णयोपायमाह बृहस्पतिः "अन्यग्रामात् समाकृष्य दत्ताऽन्यत्र यदा नदी। महानद्यथ राज्ञा च कथनात्र विचारणा। नद्योत्कृष्टा राजदत्ता यस्य तस्यैव सा मही। अन्यथा न भवेच्छ्रीमो नराणां राजदैविकः। क्षयोदयौ जीवनञ्च दैवराजवशात्नृणाम्। तस्मात् सर्वेषु कार्य्येषु तत्कृतत्रं विचालयेत्"। न च नदीकृतस्य दैवकृतत्वाभावः शङ्कनीयः दैवशब्दस्य भाग्यवाचित्वान्नदीकृतमपि दैवकृतं भवत्येव। तथा चाह स एव "ग्रामयोरुभयोर्यत्र मर्य्यादा कल्पिता नदी। कुरुते दानकरणं भाग्याभाग्यवशान्नृणाम्। एकत्र कूलपातन्तु भूमेरन्यत्र संस्थितिम्। नदी तीरे प्रकुरुते तस्य तत्र विचालयेत्"। तस्य नदीवशात् प्राप्तभूमिकस्य तां प्राप्तां भूमिञ्च विचालयेत् नान्यथा कुर्यात् पूर्वस्वामी नाधश्चिन्त्यादित्यर्थः। एतदुत्तरयत्नतीरविषयम्। उत्तरयत्नविषये पुनः स एवाह "क्षेत्रं यस्यसकाशात्तु भूमिश्चिह्ना यदा भवेत्। नदीस्रोतःप्रवाहेण पूर्वस्वामी लभेत ताम्"। तां यस्यां भूमिं पूर्वस्वामी यावदुत्पन्नस्य यस्यफलप्राप्तिस्तावद्भभेतेत्यर्थः। फलप्राप्तेरूर्द्धं पुनः पूर्ववचनविषय समानता। राजदत्तविषये क्वचित् प्रतिप्रसवमाह स एव "या राज्ञा क्रोधलोभेन अन्यायेन वा हृता। प्रदत्ताऽन्यस्य दुष्टेन न सा सिद्धिमवाप्नुयात्"। स्वत्वहेतुप्रतिपन्नादिलक्षणक्षेत्रविषयमेतत्। स्वत्वहेतुप्रतिपन्नादिप्रमाणाभावे पुनः स एवाह "प्रमाणरहितां भूमिं भुङ्क्ते यस्य या हृता। सुखाधिकाय दैवे दत्ता तस्य तत्र विचालयेत्"। प्रमाणरहितां स्वत्वहेतुप्रतिपन्नादिप्रमाणरहिताम्। स्वत्वादिविषयके निर्णयमाह स एव "निवेशकालादारभ्य स्वत्वस्यौपधादिकम्। येन यावद्यथा भुक्तं तस्य तत्र विचालयेत्"। येन स्वामिना यावत् प्रचारभूम्यादियुक्तं तथा येन पूर्वादिदिगभिमुखद्वारादियुक्तत्वादिरूपेणोपभुक्तं तस्य स्वामिनः सकाशात्र विचालयेत् नान्यथा कुर्यादित्यर्थः।

यत्र निवेशकालादारभ्येत्यभिधानान्मध्ये कृतायां व्यवस्थायां निवर्त्त्यत्वं दर्शितम्। निवेशकालादारभ्य स्थितानि गवाक्षादिकानि प्रातिवेशिकाद्यनिष्टकारीण्यपि न निवर्त्त्यन्ते इत्युक्तं तेनैव "वातायनं प्रणाली च तथा निष्पूंछवेदिकाम्। चतुःशालखन्दनिकां प्राङ्निविष्टां न चालयेत्"। वातायनं गवाक्षः। प्रणाली प्राग्वाहादिनिर्मित जलनिर्गमोपायः। निष्पूंछो द्वारनिर्गतकाष्ठविशेष इति कल्पतरौ। निष्पूंछो मट्टकोष इति क्षतिचन्द्रिकायाम्। वेदिका रथ्यादिप्रदेश संस्कृतोत्तरा भूमिः। चतसृणां शालानां समाहारः चतुश्शालम्। तस्मात् खन्दनिका इष्टिलक्षनिपातः। कात्यायनोऽपि "मेखलाध्वनिष्क्रामगवाक्षोपरोधयेत्। प्रणालीं मट्टवासुंश्च पीड़यन् दण्डभाग्भवेत्"। मेखला कुड्यमूलबन्धः। ध्वनोजलनिर्गमः। निष्क्रामः कुड्यादिभित्तिषु निर्गतं काष्ठादिनिर्मितमल्पभूमिकसुवेशनस्थानम्। नोपरोधयेत् न निरुन्ध्यात्। मट्टवासुः वासभूमिः। पूर्वमविद्यमानाः परानिष्टकारिण एते न कर्त्तव्या इत्याह स एव "निवेशनभवाद्भूमेर्न ते योज्याः कदाचन। इष्टिपातं प्रणालीञ्च न कुर्य्यात् परवेश्मसु"। इष्टिपातो गवाक्षः। परवेश्मसु परवेश्माभिमुखेन। परकुड्यनिकटे पुरीषोत्सर्गादिकमपि न कर्त्तव्यम् तथा च हारीतः "वर्चःस्थानं वह्नि चत्वरगोब्राह्मणाम्बुसेचनम्। काष्ठारात् परकुड्यस्य न कर्त्तव्यं कदाचन"। वर्चःस्थानम् पुरीषोत्सर्गस्थानम्। काष्ठारादतिसमीपे अरत्निदयसम्मितप्रदेश इत्यर्थः। तथा च कात्यायनः "विण्मूत्रोदकमेकस्य वह्निचत्वरनिवेशनम्। अरत्निदयसंस्थस्य परकुड्याद्विवेशयेत्"। संसरणशब्दार्थनिर्वचनपुरःसरन्तत्रानिरोद्धव्यत्वमाह हारीतः "वान्त्यायानि जना येन पथा वस्त्रादिवारिताः। तदुच्यते संसरणमरोद्धव्यन्तु केवचित्"। तथा च सर्व्वगमिवारितं सरन्त्यस्मिन्निति संसरणनिर्वचनमित्यर्थः। चतुष्पथादयोऽपि न निरोद्धव्याः तथा च नारदः "अवस्करस्थलचत्वरश्मशानखन्दनिकादिभिः। चतुष्पथसुरास्थानराजमार्गांश्च रोधयेत्"। अवस्करः पुरीषम्। मट्टादिशोधनार्थं पांशुसमूह इति हरिहरादयः। स्थलं वेदिका श्मशानं चितिः। अम्भो जलनिर्गमार्गः। खन्दनिका पटवप्रान्तः। चत्वरेपि आदिशब्देन तादृशं ग्राह्यम्। रथ्यामार्गो राजमार्गो न तु चतुष्पथ इति कल्पतरुः। न च चतुष्पथराजमार्गयोरभेद इति शङ्कनीयं तयोर्भेदात्। तथा च कात्यायनः "सर्वे जनाः सदा येन प्रयान्ति स चतुष्पथः। अनिषिद्धा, यथाकालं राजमार्गः स उच्यते"। अनिषिद्धा इत्यस्य पूर्वेणान्वयः। यत्र राजकीयैरकाले गमनं प्रतिषिध्यते स राजमार्ग इत्यर्थः। क्षेत्रस्य समीपे मध्ये वा यस्य सर्वदा मार्गोऽस्ति तत्र निरोधो न कर्त्तव्यः। तथा च शङ्खलिखितौ "मार्गक्षेत्रे यदि विसर्गो राजमार्गे रथस्य परिवर्त्तनमिति" पथिविसर्गः पथोविसर्गः। राजमार्गे यावता प्रदेशेन रथैः परिवर्त्तते तावान् प्रदेशस्त्यक्तव्य इत्यर्थः। संसरणानावरोधकारित्वान्तु दण्डो मार्क्को दाक्षः यथाह इन्दुस्मृतिः "यस्तत्र सङ्करं कुर्य्यात् इष्टकारोपणेन च। कामात् पुरीषं कुर्य्याच्च तस्य दण्डस्तु मार्क्कः"। सङ्करोऽत्र मृत्तटादिसङ्कीर्णता इष्टकादीनामधुनत्वकम्। मार्क्कोऽत्र तात्त्विकः, दण्डस्य अपराधानुसारेण कल्पयितुचितत्वात्। ये तु राजमार्गे पुरीषोत्सर्गादिकं कुर्वते तेषामधिको दण्डः तथा च मनुः "सप्तद्रव्यहरेद्राजमार्गे यस्त्वमेध्यमनापदि। स द्वौ कार्षापणौ दद्यादमेध्यं चाशु शोधयेत्"। आपद्गतादिषु तु दण्डस्तेनैवोक्तः "आपद्गतस्तथा वृद्धो गर्भिण्यो बाल एव च। परिभाषणमर्हन्ति तत्र शोध्यमिति स्थितिः"। परिभाषणं क्रूरभाषणम्। तड़ागादौ ततोऽधिको दण्डः। तथा च कात्यायनः "तड़ागोद्यानतीर्थानि योऽमेध्येन विनाशयेत्। अमेध्यं शोधयित्वा तु दण्डयेत् पूर्वसाहसम्"। ये पुनर्लिखितवस्त्रप्रक्षालनादिनातीर्थानि दूषयन्ति तत्राप्ययमेव दण्ड इत्याह स एव "दूषयेत् सिद्धतीर्थानि स्थापितानि महात्मभिः। पुण्यानि पावनीयानि प्राप्नुयात् पूर्वसाहसम्"। मर्य्यादाप्रभेदनादौ दण्डमाह याज्ञवल्क्यः "मर्य्यादायाः प्रभेदे तु सीमातिक्रमणे तथा। क्षेत्रस्य क्षरणे दण्डाः क्रमोत्तममध्यमाः"। अनेकक्षेत्रव्यवच्छेदिका साधारणी भूमर्य्यादा सीमा तस्याः प्रकर्षेण भेदने सीमातिक्रमणे सीमामतिक्रम्य कर्षणे क्षेत्रस्य च मर्य्यादाप्रदर्शनेन क्षरणे यथाक्रमेणाधमोत्तममध्यमसाहसदण्डा वेदितव्याः। यत्तु विष्णुवचनम् "सीमामेत्तारसप्तमसाहसं दण्डयित्वा पुनः सीमां कारयेदिति"। तत्र हि सीमामतिक्रम्य कर्षतः पुनः सीमाकरणे पुनस्तत्र कर्षणेऽकरणेऽपि-

त्वेवं व्याख्येयम्। तेन न पूर्ववचनविरोधः क्षेत्रपञ्चकं सङ्घानुपलक्षणार्थम्। अज्ञानात् क्षेत्रादिहरणेऽधम एव यथाह मनुः "सङ्घं तड़ागमारामं क्षेत्रं वा भीषया हरन्। मतानि पञ्च दण्ड्यः स्यादज्ञानाद्दिशतो दमः"। वृद्धमनुः "स्थापितां चैव मर्यादामुभयो र्यो-मयोत्तया। अतिक्रामन्ति ये पापास्ते दण्ड्या द्विशतं दमम्"। अपह्नियमाणक्षेत्रादिमूल्ये उत्तमोऽपि दण्डः प्रयोक्तव्यः "वधः सर्वस्वहरणं पुराभिर्वासनाङ्कने। तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहसम्" इति स्मरणात्। यत्तु मङ्गुविखितास्वाम् सीमातिक्रमणे दण्डाधिक्यमुक्तम् "सीमाव्यतिक्रमे त्वष्टशतकृच्छ्रमिति" तत् सम्भूयसीमातिक्रमविषयम्। सीमासन्धिभूतपञ्चवृक्षादिफलं नैवैकेन याह्यं यथाह कात्यायनः "सीमासध्ये तु जातानां वृक्षाणां क्षेत्रयोर्द्वयोः। फलं पुष्पञ्च सामान्यं क्षेत्रस्वामिषु निर्दिशेत्"। सामान्यं साधारणं क्षेत्रयोः स्वामिषु क्षेत्रस्वामिषु। तथा चान्यतरस्यैव तद्वृक्षोपयुक्तादिपक्षे तदनुरूपेण दण्ड इति ध्वनितम्। यदा त्वनरन्यक्षेत्रे वृक्षादिस्तम्बोऽन्यक्षेत्रे शाखाः प्रसृताः तत्र कः स्वामीत्याकाङ्क्षायां स एवाह "अन्य क्षेत्रे तु जातानां शाखा यत्रान्यसंस्थिताः। स्वामिनं तं विजानीयाद् यस्य क्षेत्रे तु संश्रिताः। संश्रिताः प्रसृताः। परक्षेत्रे प्रार्थनया क्रियमाणं सेतुकूपादिकं क्षेत्रस्वामिना न निषेद्धव्यं तथाह याज्ञवल्क्यः "न निषेध्योऽल्पबाधस्तु सेतुः कल्याणकारकः। परभूमिं हरन् कूपः स्वक्षेत्रो बहुदकः"। अल्पबाधः अल्पपीड़ाकरः कल्याणकारको बहूपकारकः। स्वक्षेत्रः स्वक्षेत्रवर्त्ती आभ्यां विशेषणाभ्यां यः सेतुः क्षेत्रमध्यवर्त्तितया बहुपीड़ाकरस्तदा दिशु संश्रितक्षेत्रवर्त्तितया अल्पोपकारको वा तत्र निषेद्धव्य इति दर्शितम्। तत्र नारदोऽपि "परक्षेत्रस्य मध्ये तु सेतुर्न प्रतिषिध्यते। महागुणोऽल्पदोषश्चेद् इति रिक्ता क्षेत्रे सदि" क्षेत्रे अल्पक्षेत्रक्षये सत्यपि इतिर्यत इत्या, यतो महागुणः क्षेत्रेऽपि उपकारकरोऽल्पदोषश्चेत्तदा न प्रतिषेद्धव्य इत्यर्थः। अन्यक्षेत्रे सेतुकूपादिवर्त्तनं तत्स्वाम्यादात्तां कृत्वा कर्त्तव्यमित्याह याज्ञवल्क्यः "स्वामिने योऽनिवेद्यैव क्षेत्रे सेतुं प्रवर्त्तयेत्। उत्सृष्टे स्वामिनो भोगस्तदभावे महीपतेः। यस्तु क्षेत्रस्वामिनं तदर्थं तदभावे राजानं वा प्रार्थ्य यथोदानेन वा तत्क्षेत्रे सेत्वादिकं करोति स सेत्वादुत्पन्नफलोपभोगं दृष्टसदृष्टे वा न लभते किन्तु तत्स्वाम्येव लभते तदभावे राजा। अतस्तदात्तां सङ्घीत्वा सेत्वादिकं कर्त्तव्यमित्यर्थः। जीर्णानाम् अन्यदीयसेत्वादीनाम् उद्धारोऽपि तत्स्वाम्यादात्तां सङ्घीत्वा कार्य्य इत्याह नारदः "पूर्वप्रवृत्तसुत्सृष्टमपृष्ट्वा स्वामिनन्तु यः। सेतुं प्रवर्त्तयेद् यस्तु न स तत्फलभाग्भवेत्। मृते तु स्वामिनि पुनस्तद्दद्यो वापि मानवैः। राजानमामन्त्र्य ततः कुर्य्यात् सेतुप्रवर्त्तनम्। अतोऽन्यथा क्षेत्रमायान्न मन्याधनिदर्शनात्"। स्मृत्यन्तरेऽप्युक्तः स्फुटीकृतश्चैव, "दृष्वत्तञ्च नश्यन्ति यो विघ्नमनुविध्यति"। तच्च सुगमम्। कात्यायनोऽपि "अज्ञात्यनुमतेनैव संस्कारं कुरुते तु यः। सङ्घोद्यानतड़ागानां संस्कर्त्ता लभते न तु। दैवं स्वामिनि चायाते तद्विद्येत्तमे यदि। अयाचेद्य प्रयुक्तस्तु तदृतं लभते व्ययम्"। रूपे अनावेद्य कृतं यत्तड़ागादिसंस्कारार्थं व्ययनत् स्वामिनि यामान्तरादागते तेन देयमपि न प्राप्नोति। रूपे निवेद्यसंस्करणे तदर्थं व्ययं प्राप्नोति। फलन्तु स्वाम्यनुमत्यलाभे न प्राप्नोतीत्यर्थः। यः परक्षेत्रमङ्गिदं क्रमाभीलूरीकृत्य पश्चाद् न क्रमति नाथत्वेन कर्षयति तं प्रत्याह याज्ञवल्क्यः "क्रमाक्रान्तमपि क्षेत्रं यो न कुर्य्यात्तु कारयेत्। स क्रमाप्यः क्रमफलं क्षेत्रमन्येन कारयेत्"। यद्यपि क्रमाक्रान्तं किञ्चिद् दृष्ट्या विदारितं सम्यग्बीजावापयोग्यं न भवति तथाप्यक्रमक्षेत्रस्य फलं यावत् तत्रोत्पत्तियोग्यं समलादिकल्पितं तावदसौ स्वामिने दापनीयः तच्च पूर्वकर्षकादाच्छिद्याऽपरेण कारयेत्। व्यासोऽपि "क्षेत्रं सङ्घीत्वा यः कश्चित्र कुर्य्यात्तु च कारयेत्। स्वामिने स दशं दाप्यो राज्ञे दण्डञ्च तत्समम्"। दशं क्षेत्रफलम्। तत्समं तदनुरूपमित्यर्थः। स्वामिपाद्यं क्षेत्रफलमपि क्वचिदित्याकाङ्क्षायां स एवाह "चिरावसन्ने दशमं क्रमाप्ये तथाष्टकम्। सुसंस्कृतेऽपि षड़ं स्यात् परिकल्प्यं यथास्थिति" इति। चिरावसन्ने चिरकालमङ्गिदे क्षेत्रेऽङ्गिदं क्रमाभीलूरीकृत्योपेक्षिते सामन्तैर्यास्थिति क्षेत्रस्थितानुसारेणैतावदवोत्पत्तुं योग्यमिति परिकल्प्य क्षेत्रस्वामिने तस्य दशमभागं, क्रमाप्ये चिरावसन्ने क्रीकृत्यानुपेक्षिते तु अष्टमं भागं सुसंस्कृते तूपेक्षिते षड़ं भागं दाप्य इत्यर्थः। यस्तु क्षेत्रस्वामिनः

सामर्थ्यं वैकल्यादिनाऽऽहिखितावस्थां प्राप्ते क्षेत्रे स्वाम्यनिवारितः सन् स्वयमेव तत्कर्षणादिकं करोति तदा स क्षेत्रस्वामिने फलं न दापयीतः। किन्तु तस्य फलं स्वयमेव दक्षोयादित्याह नारदः "अमत्तप्रेतनष्टेषु क्षेत्रिकेष्वनिवारितः। क्षेत्रं क्षेत्रिणमेवैति कृषिदग्धुरीत स तत्फलम्"। प्रेता मृताः नष्टाः कुत्रचिद्गता इति चिरमपरिचिताः। क्षेत्रिकेषु क्षेत्रस्वामिषु तेन क्षेत्रस्वामिना तत्पुत्रादिना वा समागतेनैवंविधाय कर्षादिखिलभङ्गनार्थं व्ययं दत्त्वैव स्वीयं क्षेत्रं याचामिति स एवाह "विक्रयमाधे क्षेत्रे तु क्षेत्रिकः पुनराव्रजेत् खिलोपचारं तत् सर्वं दत्त्वा क्षेत्रमवाप्नुयात्"। अथ खिलावस्था कदा क्षेत्रस्य भवतीत्याकाङ्क्षायां स एवाह "संवत्सरेष्वार्द्धखिलमीक्षितं वत्सरैस्त्रिभिः। पञ्चवर्षोपरक्तान्तु क्षेत्रं द्वादशवार्षिकम्"। कर्षणरहितं संवत्सरेष्वार्द्धखिलं भवति यत्नसाध्यं भवति वर्षत्रये तु ईक्षितं खिलं महायत्नसाध्यं भवति। वर्षपञ्चके न ईक्षितं क्षेत्रम् अटवीतुल्यं स्यात् अतिदुष्कर्षं भवेदित्यर्थः। खिलभङ्गनार्थं व्ययदानासामर्थ्ये क्षेत्रस्वामिनः क्षेत्रफलस्याष्टमो भागः कर्षकेण वर्षाष्टकं स्वामिने देयः शिष्टं सर्वं स्वयमेव ग्राह्यम्। क्षेत्रं च वर्षाष्टकानन्तरन्तत्स्वामिने देयम्। तथा च कात्यायनः "अशक्तितो न दद्याच्च खिलार्थे यः कृतो व्ययः। तदष्टभागहीनन्तु कर्षकः फलमाप्नुयात्" इति। "वर्षाष्टकं स भोक्ता स्यात्परतः स्वामिने तु तत्" इति"।

सीर पु० सि-रक् पृषो०। १सूर्ये मेदि० २बलदेवे १हले च अमरः संज्ञायां कन्। ३शिशुमारे शब्दमा० [२जलकल्पे।

सीरध्वज पु० सीरोहलः तच्चिह्नितो ध्वजो यस्य। चन्द्रवंश्ये

सीरपाणि पु० सीरः हलः पाणौ यस्य। बलदेवे अमरः।

सीरिन् पु०सीरोऽस्योऽस्त्यस्यार्शआदित्वेन इनि। बलरामे हला०

सीलन्द पु० मत्स्यभेदे (सीलिन्दा) "सीलन्धः स्नेग्धो हृद्यो विपाके मधुरो गुरुः। वातपित्तहरो वृष्य आमवातकरश्च सः" भावप्र०।

सी(से)वन न० सिव-ल्युट् नि० वा दीर्घः। सीव्यते तन्तुसन्ताने (सेलाई) अमरः २स्त्रिङ्गमात्रधर्मसङ्गते स्त्री ङीप्च० ङीप्।

सीस न० सि-क्विप् पृषो० सो-ङ कर्म०। (सीसे) धातुभेदे ङीप्च० भागवृद्धे ४०८१ पृ० तदुपधादि दृश्यम्। स्वार्थे क। तत्रार्थे अमरः।

सीहुण्ड पु० सिंहस्य+पृषो० दीर्घः। स्नुहीवृक्षे राजनि०।

सु अव्य० सु-डु। १पूजायाम् २अतिशये अमरः। ३अच्छे ४अनुमतौ ५सुखे ६सुष्ठौ मेदि० ७अनायासे च अनेकार्थको०। पूजायामस्य नोपसर्गत्वम् तेन सुस्तुतमित्यादौ न षत्वम्। अतिशयादौ तु सुष्ठु दत्त्वादि। गणरत्नेऽर्थविशेषाद्वाक्यक्रमेणोदाहृतम् यथा "सु प्रशंसानुमतिपूजाभद्रअलङ्क्रियासु। सुरूपः सुकृतं सुसाधुः सुतप्रः सुदुःखं सुगन्धिः"।

सुकण्टका स्त्री सुष्ठु कण्टकोऽस्याः। धवकुसुमाख्यौषधे राजनि०

सुकण्डु स्त्री सु+कण्डु+यक् डु। कण्डुरोगे (चुलकाना) शब्दर०।

सुकन्द पु० शोभनः कन्दोऽस्य। १कशेरौ राजनि० २शोभनकन्दयुक्ते त्रि० संज्ञायां क। ३पलाण्डौ अमरः। ४वाराहीकन्दे ५धरणीकन्दे राजनि०।

सुकन्दिन् पु० शोभनः स्थितकरः कन्दोऽस्यास्य इनि। सूरणे (ओल) राजनि०। [८।२ ख०।

सुकन्यका स्त्री शर्यातिनृपकन्यायां च्यवनर्षिपत्न्याम् भाग०

सुकरा स्त्री सुखेन क्रियते दुह्यते वा सु+कृ-खल्। १धेनौ गवि अमरः २सुखसाध्ये त्रि०।

सुकर्णक पु० सुष्ठु कर्ण इव कन्दोऽस्य कप्। १वृक्षिकन्दे राजनि० २शोभनकर्णयुक्ते त्रि०।

सुकर्णिका स्त्री सुष्ठु-कर्णाविव पर्णान्यस्याः कप् अत इत्त्वम्। मूषिकपर्ण्याम् शब्दर०।

सुकर्णी स्त्री सुष्ठु कर्णाविव पत्राण्यस्याः ङीप्। इन्द्रवारुण्याम् (राखाचगया) राजनि०।

सुकर्मन् पु० सुष्ठु कर्म यस्मात् ५ब०। १विष्कम्भादिषु मध्ये सप्तमे योगे ज्यो० २शोभनकर्मयुते त्रि० ३विश्वकर्मणि पु० मेदि०। प्रा०स०। ५शोभने कर्मणि न०।

सुकल पु०सुष्ठु कल्यते ख्याप्यतेऽसौ सु+कलि+अच्। दाक्षत्वभोजयित्वादिना १विख्याते जने अमरः। प्रा०ब०। २सुन्दरमधुराख्यशब्दयुक्ते त्रि०। प्रा०स०। सुन्दरे कलशब्दे पु०।

सुकाण्ड पु० सुष्ठु काण्डोऽस्य। १कारवेल्ले राजनि० २सुन्दरकाण्डयुक्ते त्रिषु च ३काण्डोरुतायां स्त्री ङीप्। स्वार्थे च अत इत्त्वम्। तत्रैव।

सुकाण्डिन् पु० सुकाण्ड+अस्त्यर्थे इनि। भ्रमरे राजनि०।

सुकामा स्त्री सुष्ठु काम्यतेऽसौ सु+कम-कर्मणि घञ्। १वायसमाषाख्यतायाम् राजनि०। २शोभनकामयितरि त्रि०।

सुकालुका स्त्री सु+कल-उच् स्वार्थे क। डोडीपुष्पे राजनि०

सुकाष्ठ न० सुष्ठु काष्ठं यस्य प्रा०ब०। १देवदारुकाष्ठे २काष्ठकदल्याम् ३कट्वङ्गे स्त्री राजनि०। प्रा०स०। ४शोभने काष्ठे च।

सुकुन्दक पु० सु+कुंद-खच्। पलाण्डौ शब्दर०।

सुकुन्दन स्त्री० सु+कुंद-ल्यु। वर्वरे राजनि०।

सुकुमार न० सु+कुमार-अच्। १जातीफले २नवमालिकायाम् ३रुदन्त्यां ४पुत्रे ५मालत्यां च राजनि०। ६अतिकोमले त्रि०। प्रा० स०। ७सुन्दरकुमारावस्थान्विते त्रि०-स्त्रियां ङीष्। ८नवमालिकायां ९पुत्रे पु०मेदि०। १०नवरत्नभेदे ११वंशे १२श्यामालते च पु० राजनि०संज्ञायां कन्। सुकुमारक तमालपत्रे न०। आलौ पु०राजनि०।

सुकृत् त्रि० सु+कृ-क्विप्। १पुण्यकारके जटा० २धार्मिके जने त्रिका०।

सुकृत न० सु+कृ-क्त। १पुण्ये धर्मे अमरः २शुभे २तद्विशिष्टे त्रि० मेदि० ४सुकर्मणि च न०।

सुकृति स्त्री सु+कृ-क्तिन्। १पुण्ये २सत्कर्मणि च

सुकृतिन् त्रि० सुकृतमनेन इष्टा० इनि। १पुण्यशीले अमरः २शुभयुक्ते मेदि०। ३सत्कर्मयुते च स्त्रियां ङीष्।

सुकेसर पु० सुष्ठु केसरो यस्य। बीजपूरे राजनि०।

सुकोली स्त्री प्रा०स०। क्षीरकाकोल्याम् रत्नमा०।

सुकोषक पु० सुष्ठु कोषाऽस्य कप्। कोषाम्रे राजनि०।

सुख सुखसम्पदने अद० चु० उभ० सक० सेट्। सुखयति-ते असुसुखत-त। अनेकाच्त्वेन न योपदेशः।

सुख न० सुख-अच्। १पुण्यजन्ये आनन्दे शुभभेदे अमरः २अतत्त्वबोधजन्ये यदनुभवाय चित्तमनुकूलं भवति तस्मिन् त्रिषु तच्च आत्मधर्मं इति नैयायिकादयः। चित्तधर्मं इति साङ्ख्यादयः। सुखयतीति अच्, सुखमस्यास्ति अच् वा। ३सुखकारके ४सुखिनि च त्रि०। ५वरुणपुत्र्यां स्त्री ६स्वर्गे मेदि०। "यत्र दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम्" उक्त्या दुःखासम्भिन्नसुखत्वेन स्वर्गपदार्थत्वेनाभिधानात् तस्य सुखविशेषात्मकत्वात् तथात्वम्। ७वृद्धिनामोषधौ राजनि०। सुखत्वं तु जातिभेदः तच्च यत्र कार्य्यभावत्वम् अन्येच्छानधीनेच्छाविषयत्वे सति भावत्वमिति यावत् दुःखाभावस्य कार्य्यत्वेऽपि तस्य भावत्वाभावान्नातिव्याप्तिः। "सुखं हि जगतामेव कार्य्यं धर्मेण जन्यते" भाषा०। तथाच धर्मासमवायिकारणजन्यगुणत्वं तच्चत्वमिति फलितोऽर्थः। सुखदुःखयोः परस्परभिन्नत्वे कारणादिकं कथा०सू० इत्योर्दर्शितं यथा "इष्टानिष्टकारणविशेषादिरोधाच्च भिन्नः सुखदुःखयोरर्थान्तरभावः" कथा० सू०। "आत्मगुणानां कारणतोभेदव्युत्पादनं दशमाध्यायार्थः, तत्र "आत्मशरीरेन्द्रियबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्" इति गौतमीये प्रमेयविभागसूत्रे सुखस्यानभिधानात् दुःखाभिन्नमेव सुखमिति भ्रमनिरासार्थं सुखदुःखयोरेव प्रथमं भेदमाह "सुखदुःखयोर्भिन्नः परस्परमर्थान्तरभावोभेदो वैजात्यमिति यावत् कुत इत्यत आह इष्टानिष्टकारणविशेषात् इष्टं इष्यमाणं चक्रचन्दनवनितादि, अनिष्टमनिष्यमाणमहिकण्टकादि, तद्रूपं तत्कारणं तस्य विशेषो भेदात् कारणवैजात्यादीनां कार्यवैजात्यमावश्यकं यतः, भेदकान्तरमाह विरोधात् सहानवस्थानलक्षणात् नहि कस्मिंश्चिदात्मन्येकदा सुखदुःखयोरनुभवः। चकारादनयोः कार्यभेदं भेदकं समुच्चिनोति, तथा हि अनुपहताभिमतचन्दनवनितादि सुखस्य, दैन्यसुखभाक्त्वादि दुःखस्य कार्यमिति ततोऽनयोर्भेदः। तदुक्तं प्रशस्तपादाचार्यैः "अनुपहतलक्षणं सुखं स्वाद्यभिप्रेतविषयसन्निधौ सति इष्टोत्पत्तौ इन्द्रियार्थसन्निकर्षोद्बुद्धात्मप्रसादाद्यपेक्षादात्ममनसोः संयोगाद्यदनुपहताभिमतचन्दनवनितादिप्रसादजनकस्तत्प्रयत्नः तत् सुखम्" इति। तदिदमनीतेषु चक्रचन्दनादिषु स्वतिजननामतेषु सदुल्लसत्। गौतमीये सूत्रे सुखापरिगणनं वैराग्याय सुखमपि दुःखत्वेन भावयतो वैराग्यं स्यादेतदर्थमिति" उ०इ०। "तच्च सुखं चतुर्विधं वैषयिकमाभिमानिकं मानोरथिकम् आध्यात्मिकञ्चेति" कण० वृत्तिः। आद्यं विषयेन्द्रियसन्निकर्षजन्यं, द्वितीयं राजाधिपत्यधार्मिकत्वगर्वादिजन्यं, तृतीयं विषयध्यानजन्यम् चतुर्थं कर्म्मादिनमस्काराद्यासादिजन्यं ज्ञानवस्त्वमिति"।

पात० सू० वैषयिकसुखानां परिणामदुःखत्वादिभिः दुःखत्वं व्यवस्थापितं वैराग्यार्थं यथा

"परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः" सू०। "सर्वस्यायं रागानुविद्धश्चेतनाचेतनसाधनाधीनसुखानुभव इति तत्रास्ति रागजः कर्माशयः तथा च द्वेष्टि दुःखसाधनानि सुहृति चेति द्वेषमोहकृतोऽप्यस्ति। तथा चोक्तम् "नानुपहत्य भूतान्युपभोगः सम्भवतीति" हिंसाकृतोऽप्यस्ति शारीरः कर्माशय इति विषयसुखं चाविद्योत्थम्। या भोगे-

विन्द्रियार्थां तृप्तेरुपशान्तिः तत सुखं वा बौल्यादनुपशान्तिस्तद् दुखम्। न चेन्द्रियार्थां भोगाभ्यासेन वैतृष्ण्यं कर्तुं शक्यं कस्माद् यतो भोगाभ्यासमनुविवर्द्धन्ते रागाः कौशलानि चेन्द्रियाणामिति तस्मादनुपायः सुखस्य भोगाभ्यास इति स खल्वयं दृष्टिविपर्ययोत दृष्टावीविषेण दष्टो यः सुखार्थी विषयानुवासितो मज्जति दुःखपङ्के मग्न इति। एषा परिणामदुःखता नाम प्रतिकूला सुखावस्थायामपि योगिनमेव क्लिश्नाति। अथ का तापदुःखता सर्वस्य हेतुविद्वचेतनाचेतनसाधनाधीनत्वात्तापानुभव इति। तत्रास्ति हेयजः कर्माशयः सुखसाधनानि च प्रार्थ्यमानः कायेन वाचा मनसा च परिस्पन्दते ततः परमनुग्रहाद्यपहन्ति चेति परानुग्रहपीडाभ्यां धर्माधर्मानुपचिनोति स कर्माशयो लोभान्मोहाच्च भवतीत्येषा तापदुःखतोच्यते। का पुनः संस्कारदुःखता। सुखानुभवात् सुखसंस्काराशयो दुःखानुभवादपि दुःखसंस्काराशय इति एवं कर्मभ्यो विपाकेऽनुभूयमाने सुखे दुःखे वा पुनः कर्माशयप्रचय इति एवमिदमनादिदुःखस्रोतोविप्रसृतं योगिनमेव प्रतिकूलत्वादुद्वेजयति कस्मात् व्यक्तिपत्रकल्पो हि विद्यानिति यथोर्णातन्तुरक्षिपत्रे न्यस्तः स्पर्शेन दुःखयति नान्येषु गात्रावयवेषु एवमेतानि दुःखानि व्यक्तिपत्रकल्पं योगिनमेव क्लिश्नन्ति नेतरम् इतरन्तु सकर्माणमकृतं दुःखसुपासप्तसुपाप्तं त्यजन्तं त्यक्तं त्यक्तसुपाददानमनादिवासनाविचित्रया चित्तवृत्त्या सृजन्तोऽनुविद्धमिवाविद्यया कृतव्य एवाहङ्कारममकारानुपातितं जातं जातं बाह्याध्यात्मिकोभयनिमित्तास्त्रिप्रकारापा अनुशयन्ते तदेवमनादिदुःखस्रोतसा व्यूह्यमानमात्मानं भूतग्रामञ्च दृष्ट्वा योगो सर्वदुःखक्षयकारिणं सम्यग्दर्शनं शरणं प्रपद्यत इति गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः। प्रख्याप्रवृत्तिस्थितिरूपा बुद्धिगुणाः परस्परानुग्रहतन्त्रीभूताः शान्तं घोरं मूढं वा प्रत्ययं स्वितुखमेव प्रारभन्ते चलञ्च गुणवृत्तमिति क्षिप्तपरिणामि चित्तसत्त्वरूपातिशयादुत्कर्षातिशयाच्च परस्परेण विरुध्यन्ते सामान्यानि तु धर्मादिभिः सह प्रवर्त्तन्ते एवमेते गुणा इतरेतराश्रयेणोपार्जितसुखदुःखमोहप्रत्यया इति सर्वे सर्वरूपा भवन्ति सुखप्रधानभावलक्षेषु विवेक इति तस्मात् दुःखमेव सर्वं विवेकिनं प्रा०।

"तत्र सुखं नित्यं जन्यञ्चेति वेदान्तिन। तत्र विषयसंपर्कात् वैषयिकं सुखं जन्यम्, ब्रह्मस्वरूपं सुखं नित्यमिति तदेतन्मतं सङ्क्षिप्तादे मक्षिकता निराकृतम् यथा

"न च नित्यसुखाभिव्यक्तिर्मुक्तिः। सा हि न नित्या मुक्तशरीरविशेषापातात् नोत्पाद्या तद्धेतुशरीरादाद्यभावात् ज्ञानमात्रे सुखमात्रे वा तद्धेतुत्वावधारणात् निःसंसारदशायां तद्धेतुसामान्ये बाधकाभावात्। अतएव समाधौ शरीरकल्पना। किं वा तज्ज्ञानकं न तावदात्मनः स्वयोगः तस्याहङ्कारादिनिरपेक्षस्याजनकत्वात् विषयमात्रापेक्षत्वे तु संसारदशायामपि तदभिव्यक्तिप्रसङ्गः नापि योगजोधर्मः षड्कारो तस्योत्पन्नभावत्वेन विनाशित्वेऽपरत्र निहत्त्वापत्तेः न च तज्जन्याभिव्यक्तिरनन्ता तस्या अपि तत एव नाशात्। अथ तत्त्वज्ञानात् स्वासनमिथ्याज्ञाननाशे दोषाभावेन प्रवृत्त्याद्यभावाद्धर्माधर्मयोरनुत्पादे प्राचीनधर्माधर्मक्षयाद्दुःखसाधनशरीरादिनाश एव तत्र हेतुः अतएव तज्ज्ञानस्यानित्येनाभिव्यक्तिप्रवाहोऽप्यनन्त इति चेन्न शरीरं विना तदनुत्पत्तेः तस्य तद्धेतुत्वे मानाभावाच्च। न च मोहादिप्रवृत्तिरेव मानं दुःखहानार्थितया तदुपपत्तेः। न च नित्ये सुखे मानमस्ति "नित्यं विज्ञानमानन्दम् ब्रह्म" "आनन्दं ब्रह्मणोरूपं तच्च मोक्षे प्रतिष्ठितमित्यादि" श्रुतिर्मानमिति चेन्न उपजननापायवतोत्पत्तिसुखयोरहं जानाम्यहं सुखीति व्यभिचारेणानुभूयमानयोर्ब्रह्माभेदबोधने प्रत्यक्षबाधात्। अथ सुखस्य ब्रह्माभेदबोधनादेवाप्यतयाऽनित्यं सुखं विहाय वाक्यार्थत्वेन नित्यसुखसिद्धिः स्वर्गवत् न तु नित्यसुखे सिद्धे तदभेदबोधनं येनान्योन्याश्रयः, यद्वा नित्यं सुखं बोधयित्वा तदभिन्नं बोध्यते न च वाक्यभेदः वाक्यैकवाक्यत्वादिति चेन्न आत्मनोऽनुभूयमानत्वेन तदभिन्नस्य नित्यसुखस्याप्यनुभवप्रसङ्गात् सुखमात्रस्य स्वगोचरसाक्षात्कारजनकत्वनियमात् तदनुभवे बाधकोऽप्यनुभवो न स्यात्। अथात्मानित्यं नित्यसुखमनुभूयत एव सुखत्वं तु तत्र नानुभूयत इति चेन्न सुखानुभवसामग्र्या एव सुखत्वानुभावकत्वात् तस्मादानन्दं ब्रह्मेति सत्यधीवाक्यप्रत्ययात्मत्वेनानन्दं बोध्यते नाभेदः, अन्यथा नपुंसकत्वानुपपत्तेः। एतेन ब्रह्माद्वैतसाक्षात्कारादविद्यानिवृत्तौ विज्ञानसुखात्मकः केवल आत्मापवर्गं वर्त्तत इति वेदान्तिमतमपास्तम् स्वप्रकाशसुखात्मकत्वे-

ज्ञको नित्यत्वे सत्तसंसारिणोरविशेषप्रसङ्गात् पुरुषप्रयत्नं विना तस्य सत्त्वादपुरुषार्थत्वाच्च अविद्यानिवृत्तिः प्रयत्नसाध्येति चेत् अविद्या यदि मिथ्याज्ञाननिमित्तान्तरं वा उभयथापि सुखदुःखाभावसाधनेतरत्वेन तन्निवृत्तेरपुरुषार्थत्वात्" ।

तत्र दुःखाभावस्यैव परमप्रयोजनत्वं न सुखस्येति व्यवस्थापितं यथा

"ननु दुःखाभावो न पुरुषार्थः सुखस्यापि हानिसुल्यायव्ययत्वात् न च बहुतरदुःखानुविद्धतया सुखस्यापि प्रेक्षावद्धेयत्वम् आवश्यकत्वेन दुःखस्येव हेयत्वात् सुखस्य निरुपधीच्छाविषयत्वात् अन्यथा दुःखानुविद्धतया तथात्वेन पुरुषार्थत्वविरोधादिति चेन्न सुखमहिम्नापि दुःखभीरूणां दुःखाभावदशायां सुखमसीत्युद्दिश्य दुःखाभावार्थं प्रवृत्तेः वैपरीत्यस्यापि सम्भवे सुखस्याप्यपुरुषार्थतापत्तेः यतो दुःखाभावदशायां सुखं नास्तीति ज्ञानं न दुःखाभावार्थिप्रवृत्तिप्रतिबन्धकं तस्माद्विवेकिनः सुखमात्रेप्सवो बहुतरदुःखानुविद्धमपि सुखमुद्दिश्य "शिरोमदीयं यदि यातु यात्विति, कृत्वा परदारेष्वपि प्रवर्त्तमानाः "वरं वृन्दावनेऽरण्ये" इत्यादि वटलोलाद्याधिकारिणः । ये च विवेकिनोऽकिञ्चनं संसारापारकान्तारे क्लिश्यन्ति दुःखदुर्दैनानि क्षियतो सुखखद्योतिका कल्पितकथिकथामखण्डलच्छायाप्रतिमसिद्धमिति मन्यमानाः सुखमपि हातुमिच्छन्ति तेऽत्राधिकारिणः । न च भोगार्थिनामप्रवृत्तौ पुरुषार्थता क्षीयते कस्यचिदप्रवृत्तावपि चिकित्सादेः पुरुषार्थत्वात् । अथवा "दुःखाभावोऽपि नावेद्यः पुरुषार्थतयेष्यते । न हि मूर्च्छाद्यवस्थार्थं प्रवृत्तो दृश्यते सुधीः, पुरुषार्थत्वं सुखवज्ज्ञायमानं नियमात् न च सुखिज्ञानं सम्भवतीति न हि दुःखाभावं जानीयामित्युद्दिश्य प्रवृत्तिः किन्तु दुःखं मे मा भूदित्युद्दिश्य ततो दुःखाभाव एव पुरुषार्थः तस्य ज्ञानन्तु सुखकारणाधीनं न तु पुरुषार्थतोपयोगि सुखी स्यामित्युद्दिश्य प्रवर्त्तते न तु सुखं जानीयामिति सुखमेव तस्मात्तु न तदुपगमः तस्यानावश्यकत्वेनान्यथासिद्धत्वात् गौरवाच्च । किञ्च बहुतरदुःखजर्जरकलेवराद्दुःखाभावमुद्दिश्य मरणेऽपि प्रवर्त्तमाना दृश्यन्ते न च मरणे तस्य ज्ञानमस्ति न ते विवेकिन इति चेन्न पुरुषार्थत्वे विवेकानुपयोगात् ।

तच्च सुखं चित्तधर्मोऽपि सन्नपि तया प्रतिबिम्बरूपेण वा आत्मनि वर्त्तते इति सांख्या वेदान्तिनश्च । आत्मगुण इति नैयायिकाः । दुःखाभावे । भारवाहकस्य भारापगमे सुखी संवृत्तोऽहमिति प्रत्ययस्य दुःखाभावविषयतयोपगमात् ।

सुखङ्करी स्त्री सुखङ्करोति-कृ-खच् मुम् च ङीप् । १ज्योत्स्नीयष्टयां राजनि० । २सुखकारके त्रि० ।

सुखङ्गुण पु० सुष्ठु ङ-मुम् । शिवखड्गे त्रिका० ।

सुखचार पु० सुखः सुखकारकश्चारो यस्य । उत्तमाश्वे शब्दमा०

सुखजात त्रि० जातं सुखमस्य परनिपातः । जातानन्दे "सुखजातः सुरापीत" भट्टिः ।

सुखद पु० सुखं ददाति दा-क । १विष्णौ विष्णुस० । "त्रिंशदक्षरसंयुक्तो ध्रुवः सुखदसंज्ञकः । प्रङ्कारवीरयोर्त्तेवो सुरुषैकेन मण्डित" संगी०चक्रे २ध्रुवभेदे । ३सुखदातरि त्रि० ४ऋगवेद्यायां स्त्री शब्दरत्ना० । ५यमीहते स्त्री राजनि० ।

सुखदोह्या स्त्री सुखेन दोह्या दुह-यत् । क्लेशं विना दोहनीयायां गवि हेमच० सुखसंदोह्याप्यत्र ।

सुखभाज् त्रि० सुखं भजते भज-क्विप् । सुखयुक्ते । [राजनि०

सुखमोदा स्त्री सुखः सुखकरो मोदो यस्याः । बहुकीयष्टयां

सुखरात्रि स्त्री सुखा सुखकरी रात्रिर्यस्याम् । स्वाश्विनामावास्यायाम् दीपान्वितामावास्यायाम् । तल्लक्षणञ्च १३७१ पृ० दृश्यम् ।

सुखरात्रिका स्त्री सुखा रात्रिर्यस्याः ३ब०कप् । दीपान्वितामावास्यायां पूज्यायां लक्ष्म्याम् दीपान्वितासपक्षस्य "पूजनीया तदा लक्ष्मीर्विधेया सुखरात्रिका" ज्योतिर्वचनम् । कदभावे सुखरात्रिरत्र "आख्याता भूतले देवि ! सुखरात्रि ! नमोऽस्तु ते" इति दीपान्वितामावस्यायां लक्ष्मीपूजनमन्त्रः ।

सुखवर्चक पु० सुखं वर्चयति दीपयति वर्च-णिच्-ण्वुल् । सर्जिकाक्षारे (साजिमाटी) अमरः ।

सुखवर्चस् पु० सुखं सुखकरं वर्चो यस्य । सर्जिकाक्षारे (साजिमाटि) राजनि० । [फलप्रधानवृक्षे रत्नमा० ।

सुखवास पु० सुखः सुखकरो वासो गन्धो यस्य । (तरसज)

सुखवासन पु० सुखं सुखकरं वासनं गन्धो यस्य । सुखवासनगन्धद्रव्ये शब्दर० । [सुखकरावासे ।

सुखाधार पु० सुखानामाधारः । स्वर्गे शब्दर० । कर्म० ।

सुखायत पु० सुखेनायम्यते या+यम-क्त । विनीताश्वे शब्दमा०

सुखायन पु० सुखेनायतेऽनेन अय-ल्युट् । सुविनीताश्वे शब्दमा०

सुखावह त्रि० सुखमावहति जनयति वा+वह-अच्। सुखजनके।

सुखाश पु० सुखा सुखकरी आशा यस्य। १वरुणे सुखेनाश्यते अश-घञ्। २राजतिनिशे वृक्षे ३सुखभोक्तरि त्रि० मेदि० भावे घञ्। सुखभोजने स्वार्थे क। सुखाशने, (अशा) राजतिनिशवृक्षे च पु०। [प्रधाने वृक्षे शब्दच०

सुखाशन पु० सुखेनाश्यते अश-कर्मणि ल्युट्। (अशा) फले

सुखोत्सव पु०सुखजनकरः उत्सवो यस्मात् ५व०। १पत्नीविका० कर्म०। २आनन्दकारके उत्सवे पु०।

सुखोदक न० कर्म०। सुखकरे उष्णोदके रत्नमा०।

सुखोर्जिक पु० सुखेन ऊर्जः क्षारोऽस्य ठन्। सर्जिकाक्षारे (साजिमाटि) राजनि०। [२सुगमे त्रि०

सुग न० सुष्ठु गच्छति निर्याति गम-ड। १विडायाम् शब्दच०

सुगत पु० सुष्ठु गच्छति जानाति गम-कर्त्तरि-क्त। १बुद्धे अमरः। २सुगतियुते त्रि०।

सुगन्ध पु० सुष्ठु गन्धोऽस्य न द्वतः। १गन्धवृक्षे २चतुर्वीरके रत्नमा० ३नीलोत्पले ४चन्दने राजनि० भावप्र०। ५धान्यिवर्षे ६रास्नायां ७गन्धके ८वकुले ९मूलके च पु० राजनि०। १०सद्गन्धद्रव्ययुक्ते आपणादौ त्रि०। "गन्धस्तेन तदेवात्यर्थात्" वृक्षेः समवायेनैव गन्धवत्त्वे द्रव्यापणश्च गन्धयुक्तद्रव्याधारत्वात् तत्र न द्रव्य"त्रि०कौ०।

सुगन्धक न० सुष्ठु गन्धोऽस्य कप्। १रक्ततुलस्यां २गन्धके रत्नमा० ३नागरङ्गे त्रिका० ४ककटग्रामे राजनि०।

सुगन्धपत्रा स्त्री सुगन्धं पत्रमस्याः। रुद्रजटायाम् राजनि०

सुगन्धभूतृण न० कर्म०। गन्धवृक्षे राजनि०।

सुगन्धमूला स्त्री सुगन्धं मूलं यस्याः। १स्वर्णपद्मिन्याम् २रास्नायाञ्च राजनि०।

सुगन्ध स्त्री सुष्ठु गन्धोऽस्त्यस्याः अच्। १रास्नायां अमरः २शठ्यां शब्दर० ३वन्याककोटग्रामे ४रुद्रजटायां ५नाकुल्यां ६शतपुष्पायां ७नवमालिकायां ८सप्तपर्ण्यां ९पृक्कायां १०वल्कायां गन्धपत्र्याम् ११साधव्यां राजनि० १२वन्यायां १३तुलस्यां १४मातृवृक्षके च रत्नमा०।

सुगन्धामलक न० सुगन्धैः सर्वौषधिगणैर्युक्तमामलकम्। "सर्वौषधिसमायुक्ताः शुष्कास्त्वामलकत्वचः। यदा तदायं योगः स्यात् सुगन्धामलकाभिधः" राजनि० वृक्षे सर्वौषधियुक्ते शुष्के आमलकवल्कले।

सुगन्धि पु० सुष्ठु गन्धः यस्य वा रत्नमा०। १तृणगन्धे सुरभौ अमरः। २सुगन्धयुक्ते अमरः ३एलवालुके ४सुक्तायां ५कशेरौ ६गन्धतृणे ७धान्यके दधिप्रलोमूले च राजनि०। स्वार्थे क। कट्टारे शब्दर० गौरवर्णे पुष्करमूले सुरपर्णे उशीरे राजनि०। महाशालौ हेमच०। गन्धके तुरुष्के च पु० राजनि०।

सुगन्धिकुसुम पु० सुगन्धि कुसुमं यस्य। १पीतकरवीरे राजनि० २सद्गन्धयुक्तपुष्पयुते त्रि० ङीप्। जातीफले पूगफले श्वेतकुन्दकलिकाफले च राजनि०।

सुगन्धिमूल न० सुगन्धं मूलमस्य। उशीरे (वेना) राजनि०

सुगन्धिमूषिका स्त्री सुगन्धिः विरोधिगन्धत्वेन दुर्गन्धिः मूषिका। छुछुन्द्र्यां (छुछ) राजनि०।

सुगहन त्रि०प्रा०स०। १अतिनिविडे कुम्बायां स्त्री रमानाथः।

सुगहनावृति स्त्री कर्म०। यत्नस्थाने दादिदर्शनधारणाय निविड़े वेष्टने कुम्बायाम् अमरः।

सुगृह पुंस्त्री सुष्ठु गृहं यस्य। १चतुःसुचिकसगे (बाबुई) हेमच० स्त्री ङीष् कर्म०। २सुन्दरे गृहे न०।

सुगृहीतनामन् पु० सुगृहीतं प्रातःकाले स्मरणीयं नाम यस्य। प्रातःस्मरणीयनामके पुण्यकीर्त्तौ जने त्रिका०।

सुग्रन्थि पु० सुष्ठु ग्रन्थिर्यस्य। १चोरकवृक्षे राजनि० २सुन्दरग्रन्थियुते त्रि०।

सुग्रीव पु० सुष्ठु ग्रीवाऽस्य। १नीलपलाशे २सूर्यपुत्रे वानरेश्वरे च मेदि०। ३सुन्दरग्रीवायुते त्रि० स्त्रियां ङीष् २कश्यपस्य पत्नीभेदे मरुद्गणे०।

सुग्रीवेश पु० ६त०। श्रीरामचन्द्रे शब्दरत्ना०।

सुचक्षुस् पु० सुष्ठु चक्षुरिव फलमस्य। १वडुम्बरे शटा० २शोभनलोचनयुक्ते त्रि० प्रा०स०। ३शोभने नेत्रे न०।

सुचक्षुका स्त्री सुष्ठु चक्षुरिव शिखा यस्याः कप्। महाचक्षुःशाके राजनि०।

सुचरित्रा स्त्री सुष्ठु चरित्रं यस्याः। पतिव्रतायां स्त्रियाम् अमरः २सच्चरित्रयुते त्रि० प्रा० स०। ३सच्चरित्रे न०।

सुचर्मन् पु० सुष्ठु चर्मेव वल्कलमस्य। १भूर्जवृक्षे राजनि० २सुन्दरचर्मयुते त्रि०। प्रा०स०। ३सुन्दरे चर्मणि न०।

सुचित्रक पुंस्त्री सुचित्रेण कायति कै-क। सुष्ठु चित्रवर्णो यस्य कप् वा। १सतरुवृक्षे २चित्रवर्णे च शब्दर० स्त्रियां ङीष्। ३सुचित्रवर्णयुते त्रि० स्त्रियां टाप्। [राजनि०]

सुचित्रबीजा स्त्री सुचित्रं विचित्रं बीजं यस्याः। विड़ङ्गायां

सुचिवा स्त्री प्रा०स०। १चिर्भटायां राजनि०।२विचिर्भे त्रि०

सुचिर न० प्रा०स०। १चिरकाले २बहुकाले च ३बहुकालभवे त्रि०। [२बहुकालजीविनि त्रि०।

सुचिरायुस् पु० सुचिरं बहुकालिकमायुर्यस्य। १देवे शब्दर०

सुचेलक पु० प्रा०स०। १सुच्छवस्त्रे अमरः। सुष्ठु चेलोऽस्य कप्। २सुच्छवस्त्रधरे त्रि०। [स०।२सुन्दरे जले न०।

सुजल न० शोभनं जलं यस्मात् ५ब०। १कमले राजनि० प्रा०

सुजल्प पु० "यत्रार्जवात् समाम्नायं सदैन्यं सदुपायकम्। श्रोतृकण्डूयनं धीरः स्मृतः स सुजल्पो निगद्यते" यत्र्यवसर्मायुक्तचिते वाक्यभेदे।

सुजाता स्त्री सु+जन-क्त। १सुवर्णायां राजनि० २मनोज्ञे त्रि०

सुजीवन्ती स्त्री प्रा०स०। जीवन्तीभेदे राजनि०।

सु(षु)ट्ट अनादरे चु० उ० सक० सेट्। सुट्टयति ते असुसुट्टत् त। षोपदेश एव ज्ञाप्यः।

सुत पुं क्ली० सु-क्त। १पुत्रे २तनयायां स्त्री अमरः। सा च १३शालभायां भद्रच० ४प्रत्यक्षे ५सम्बद्धे ६निष्पीडिते च त्रि० ७पार्थिवे पु० मेदि०।

सु(सू)तक न० सु-(सू)-भावे क्त सु(सू)तं जननं तस्मादागतम् कन्। १जननाशौचे २अशौचमात्रे च "सूतके मृतके तथा" "मातुश्च सूतकं तत्तु स्यात्" इति च स्मृतिः।

सुतजीवक स० सुतं जीवयति सेवनात् जीव-णिच्-ण्वुल्। पुत्रजीवकवृक्षे राजनि०।

सुतनु (नू) पुं स्त्री० सुष्ठु तनुर्यस्याः वा ऊङ्। १नार्याम् राजनि० "सुतनु! मत्यमलङ्करणाय ते" माघः प्रा०ब०। २सुन्दरकाययुते त्रि०। प्रा० स०। ३सुन्दरे काये स्त्री सुश्रोणः। ४अल्पनरुच्छे त्रि० स्त्रियां वा ङीष्।

सुतपस् पु० सुष्ठु तपति सु+तप-असि। १सूर्ये वि०को० २अर्कवृक्षे सुष्ठु तपोऽस्य। ३शनौ पु०। ४सुन्दरतपोयुक्ते त्रि०। प्रा०स०। ५सुन्दरे तपसि न०।

सुतपादिका सुताः संकृताः पादाः मूलान्यस्याः कप् अत इत्वम्। कुंभपदीलतायां राजनि०।

सुतराम् अव्य०सु+अतिशयेऽर्थे तरप्-आम्। अवधारितार्थस्य अतिशयोक्तिके "धेन्वा तदध्यासितकातराक्ष्या निरीक्ष्यमाणः सुतरां दयालुः" रघुः। अत्र कातराक्ष्या धेन्वा दृश्यमानत्वेन दयालुत्वस्य अतिशयोक्तिकत्वम्।

सुतर्कारी स्त्री सुतर्कयति अ-अण् ङीष्। देवदालीलतायाम् राजनि०।

सुतर्दन पुं क्ली० सुष्ठु तर्दति रवेः विरश्मित्वम् सु+तृद-ल्यु। कोकिले त्रिका० स्त्रियां जातित्वात् ङीष्।

सुतल पुंन० सुष्ठु तलं यत्र। १पातालभेदे पातालशब्दे ४२८६ पृ० दृश्यम्। २अष्टाविंशकावन्यभेदे पु० मेदि०।

सुतवत्करा स्त्री सुता वत्करा इव बहुत्वात् यस्याः। बहुपुत्रप्रसविन्याम् स्त्रियां त्रिका०।

सुतयेणी स्त्री सुता निष्पीड़िता श्रेणीव। १मूषकपर्णाम् अमरः हेम०। २पुत्रपङ्क्तौ च।

सुतर्हिवुकयोग पु० "सुतर्हिवुकविग्रहिसम्बन्धमैत्यमरगुरुर्वा दिदानवार्चितो वा। यदनुभवपथाति तच्छुभं स्यात्" ज्यो० उक्ते वैवाहिकसम्बन्धात् सुतर्हिवुकाऽवलोक्यते षड्भेदरूपे योगे। [१पौत्रे ४दौहित्रे च पु०।

सुताजजा स्त्री हेम०। १पौत्र्यां २दौहित्र्यां च अमरः

सुतिक्त पु० प्रा०स०। १पर्पटे (क्षेतपापड़ा) राजनि० २अत्यन्तितिक्ते त्रि० ३कोशातक्यां स्त्री राजनि० संज्ञायां कन्। पारिभद्रे जटा० निम्बे भूनिम्बे पु० शब्दमा०।

सुतीक्ष्ण पु० प्रा०स०।१शोभाञ्जनवृक्षे जटा०। २श्वेतशोभाञ्जने राजनि०। ३सुनिभेदे च "सुतीक्ष्णसुनिकेतनम्" भट्टिः। ४अत्युग्रे त्रि०।

सुतुङ्ग पु० प्रा०स०। १नारिकेलवृक्षे शब्दार० ज्योतिषोक्ते षड्वाधाम् चक्रराशिस्थेषु २अशभेदेषु च चक्रशब्दे १०५८ पृ० दृश्यम्। २अतिशयोच्चे त्रि०।

सुतेजन पु० सु+तिज-ल्यु। १धन्वनि वृक्षे भावप्र०।

सुतेजस् पु० सुष्ठु तेजोऽस्य। १आदित्यभक्तायाम् राजनि०। २शोभनतेजोयुक्ते त्रि०। ३जैनभेदे पु० हेमच०।

सुतेला स्त्री सुष्ठु तैलं यस्याम् ७ब०। महाज्योतिष्मतीलतायाम् राजनि०। [अमरः। दीर्घादि तत्रार्थे रक्तः।

सु(सू)त्रामन् पु० सुष्ठु त्रायते सु+त्रै-मनिन् पृषो०। इन्द्रे

सुत्वन् पु० सुनोति यज्ञ सु-भूते कनिप्। १क्रतावभिषवे क्रतयज्ञार्थस्नाने अमरः २क्रतोभनिष्पीड़ने च।

सुद शोभायां सौ० प० सक० सेट् इदित्। सुन्दति असुन्दीत्। औत्वत्वेन न शोपदेशः। [राजनि०।

सुदग्धिका पु० सुष्ठु दग्धं दाहोऽस्यस्य ठन्। दग्धानामवृक्षे

सुदण्ड पु० सुष्ठु दण्डो यस्मात् ५ब०। वेत्रे राजनि०।

सुदण्डिका स्त्री सुदण्डयति रोगान् सु+दण्ड+ण्वुल्। १गोरक्ष्यास्। (गोरक्षचाकुले) राजनि० २सुदण्डयुतायां स्त्रियाञ्च।

सुदत् पु० सुष्ठु दन्तोऽस्य यस्मिं दन्तादेशः। १शोभनदन्तयुक्तयस्के गजादौ २युवत्यां स्त्री ङीष्। "सुदतो-

जनमञ्जनार्पितैः" नैष० । वयोभिश्चे तु सुदल इत्येव सुन्दरदलयुते नटादौ वि० कौ० ।

सुदर्भा स्त्री सु+दर्भ-कर्मणि घञ् । १रजुदर्भाढ्ये राजनि० । सुष्ठु दर्भो यत्र । २सुन्दरकुशयुक्ते त्रि० ।

सुदर्शन पु० सुष्ठु दृश्यते यत्नतो युच् । १विष्णुचक्रे २मेरौ ३जम्बुद्वीपे मेदि० । (पद्मगुलुञ्च) ४लताभेदे स्त्री रत्नमा० ५आयुर्वेदोक्ते ६ओषधिभेदे च स्त्री ७इन्द्रपुरे न० मेदि० । टक्कमरावत्यां विष्णुः स्त्री ङीप् । ९जिनभेदे हेमच० । सुदर्शनचक्रं च सर्वदेवतेजोभिः शिवेन निर्मायं विष्णवे दत्तं यथोक्तं पद्मपु०उत्तरख०१४९अ० । "अथ विष्णुसखा देवाः स्वतेजांसि ददुस्तदा । तान्यैक्यं वै गतानीशो दहा स्वास्यसुचस्मरः । तेनाकरोन्महादेवः सहसा यत्नसुत्तमम् । चक्रं सुदर्शनं नाम ज्वालामालातिभीषणम् । ततः प्रीतः प्रभुः प्रादात् विष्णवे प्रवरं वरम् । प्रत्यक्षं तेजसं श्रीमान् दिव्यं चक्रं सुदर्शनम्" वामनपु०७९अ० ।

सुदर्शनचूर्ण न० चूर्णरूपौषधभेदे

"त्रिफला रजनीद्वयं कटुत्रारीद्वयं यदी । त्रिकटु चित्रकं मूर्वा गुडूची धन्वयासकः । कटुका पर्पटो वत्सं त्रायमाणा च बालुकम् । निम्बं पुष्करमूलञ्च मधुयष्टी च वत्सकः । यवानीन्द्रयवो भार्गी विषुवीजं सुराद्वया । वचा त्वक् पद्मकोशीरचन्दनातिविषा बला । शालिपर्णी पृश्निपर्णी विडङ्गं तगरं तथा । चित्रकं देवकाष्ठञ्च चव्यं पत्रं पटोलजम् । जीवकर्षभको चैव शतकं वंशलोचना । पुष्करीकञ्च काकोली पत्रकं जाति पत्रकम् । तान्येतानि समभागानि चूर्णयेत् । सर्वांशं सर्वचूर्णञ्च किराते प्रक्षिपेत् सुधीः । एतत् सुदर्शनं नाम चूर्णं दोषत्रयापहम् । ज्वरांश्च निखिलान् हन्याद्वात कार्श्यं विचारणा । पृथग्द्वन्द्वान्तुत्रांश्च धातुस्थान् विषमज्वरान् । सन्निपातोद्भवांश्चापि मानसानपि नाशयेत् । श्रोतादीनपि दाहादीन् श्रोतं तन्द्रां भ्रमं श्रमम् । कासं श्वासञ्च पाण्डुञ्च हृद्रोगं कामलां तथा । त्रिकशूलकटीजानुपार्श्वशूलञ्च नाशयेत् । शीतास्वुना पिबेदेतत्सर्वज्वरनिवृत्तये । सुदर्शनं यथा चक्रं दानवानां विनाशनम् । तद्वज्वराणां सर्वेषां चूर्णमेतत् प्रणाशनम्" । पुष्करमूलाभावे कुष्ठमपि दद्यात् । भार्ग्यभावे कण्टकारीमूलम् । शीराद्वयभावे ऋद्धिं दद्यात् । तगराभावे कुष्ठं देयम् । जीवकर्षभयोरभावे विदारीकन्दञ्च मात्रदयं दद्यात् । पुण्ड्रेक्षुं श्वेतकमलम् । काकोल्यभावे अश्वगन्धामूलं दद्यात् । तान्येतानि पत्रकाभावे सर्वत्रान्यानि प्रदीयते" भावप्र० ।

सुदल पु० सुष्ठु दलान्यस्य । शोरभोरटाढ्ये रत्नमा० २शाक० पर्णी स्त्री राजनि० ।

सुदामन् पु० सुष्ठु ददाति दा-मनिन् । १मेघे २पर्वतभेदे (दरावत् पर्वत) मेदि० । सुदाम्नी कादिक् अण् ङीप् सौदामनी तड़िति अमरः । २गोपभेदे ४असद्दे शब्दर० ५ऐरावते गजे त्रिका० पुराणप्रसिद्धे श्रीकृष्णमित्रे ६विप्रभेदे च ७शोभनदातरि त्रि० । राजस्टहसमीपस्थे टनदीभेदे स्त्री रामा०अयो०७०सर्गः । तत्र वा ङीप् डाप् च । सुदाम्नी सुदामा वा ।

सुदाय पु० सुष्ठु दीयते सु+दा-कर्मणि घञ् । १यौतुकपरादादिना स्त्रियै देये धने । सौदायिकशब्दे दृश्यम् । सुष्ठु दायो यस्य । २पित्रभ्रष्टतो ज्ञातौ ।

सुदारु पु० सुष्ठु दारु यत्र । परिपात्रपर्वते त्रिका० । [रसा

सुदि अव्य०स्वरा०सुष्ठु दीव्यति सु+दिव-क्विप् । शुक्लपक्षे मनो०

सुदिन न० प्रा०स० । १प्रशस्तदिवसे । २प्रशस्ते त्रि० । [वि०कौ०

सुदिनाढ्य न० सुदिनं प्रशस्तमस्त्यत्र अर्शआद्यच् । प्रशस्तदिवसे

सुदीर्घधर्मा स्त्री सुदीर्घः अतिविस्तीर्णो धर्मो गुणविशेषो यस्याः केवलत्वाभावान्नानिच्समा० डाप् । असनवृक्षौ शब्दच० सुदीर्घो धर्मो यस्याः । सुदीर्घधर्मेति पाठान्तरं तत्रार्थे । [दृक्षम् । वार्ताकभेदे रत्नमा० ।

सुदीर्घफलिका स्त्री सुदीर्घं फलं यस्याः कप् टापि अत

सुदीर्घा स्त्री प्रा० स० । शीनाकर्कट्याम् राजनि० ।

सुदूर त्रि० प्रा०स० । अतिदूरे अमरः ।

सुदृप्त पु० वैवस्वतमनुपुत्रे रङ्गशब्दे ६२१ पृ० दृश्यम् ।

सुधन्वन् त्रि० सुष्ठु धनुर्यस्य अनङ्समा० । १सुन्दरधनुर्द्धरे । २मान्धातृवंश्ये नृपभेदे हरिवं० १२अ० । ३आङ्गिरसे सनिभेदे भा० स० ६६अ० । ४अनन्ते नागे ५विश्वकर्मणि च पु० मेदि० ।

सुधन्वाचार्य्य पु० "वैश्यात्तु जायते ब्राह्मात् सुधन्वाचार्य्य एव च । कारुषश्च विजन्मा च मैत्रः सात्वत एव च" मनूक्ते ब्राह्मवैश्यात्मजवर्णजाते जातिभेदे । [पु०स्त्रि० ।

सुधर्मन् स्त्री सु+धृ-मनिन् । १देवसभायाम् २कटुम्बिनि च

सुधर्म्मा स्त्री सुष्ठु धर्मो यस्याः अनिच्समा०वा डाप् । देवसभायाम् अमरः । गौरा०ङीष् सुधर्मीत्यपि । अमरटीका

सुधा स्त्री सुष्ठु धीयते पीयते अर्च्यते वा धे धा-वा क । १अमृते अमरः २लेपनद्रव्ये (कस्तुरी) ३भूम्यामाम्

४क्ष्वेडां ५गङ्गायाम् ६हरीतक्याम् ७विद्युति ८रसे ९जले १०धात्र्याम् नानार्थको० ११हरीतक्याम् १२मधुनि शब्दच० १३शालपर्णायाञ्च राजनि०।

सुधांशु पु० सुधेवाह्लादकाः अंशवोऽस्य। १चन्द्रे २कर्पूरे च अमरः। सुधाकरादयोऽप्यत्र। [वासिते तैले राजनि०।

सुधांशुतैल न० सुधांशुना कर्पूरेण वासितं तैलम्। कर्पूर-

सुधांशुरत्न न० ६त०। मौक्तिके राजनि० तस्य चन्द्रप्रियत्वात्तथात्वम्। यत्त्वत्तशब्दे २७६२ पृ० दृश्यम्।

सुधाङ्ग पु० सुधेवाप्यायनमङ्गमस्य। १चन्द्रे त्रिका० २कर्पूरे च

सुधाजीविन् पु० सुधां लेपनद्रव्यमाजीवति या+जीव-णिनि पलङ्कषे लेपके (राज) त्रिका०। [पाके च।

सुधाधार पु० ६त०। १चन्द्रे शब्दर० २कर्पूरे ३कङ्कताधार

सुधानिधि पु० सुधा निधीयतेऽत्र नि+धा-आधारे कि ६त०। १चन्द्रे शब्दर० २कर्पूरे च। [ह्रदीष्टचे।

सुधापयस् पु०सुधा लेपनद्रव्यमिव शुभ्रं पयो निर्यासोऽस्य।

सुधाभुज् पु० सुधां भुञ्जानं भुज-भूते क्विप्। देवे हेमच०।

सुधाभ्रसूति पु० सुधा म्रियते प्रथ्यते स्रूयते वाऽनेन भ्रू-धा क्तिच्। १यज्ञे २चन्द्रे मेदि० ३कर्पूरे च।

सुधामय न० सुधात्मकं लेपनद्रव्यात्मकं वा प्राचुर्य्ये मयट्। २राजभवने सौधे शब्दर०। अस्तवदाह्लादकत्वाद्यात्मा त्रि० स्त्रियां ङीप्।

सुधामोदक पु० सुधेव मोदयति सुद-णिच्-ण्वुल्। १घनसारशर्करायाम् २कर्पूरे च राजनि०।

सुधावर्धिन् पु० सुधां वर्धते वृध-णिनि। १चन्द्रे २कर्पूरे ३ब्रह्मणि च शब्दर० ४वृद्धभेदे त्रिका०।

सुधावास पु० ६त०। १चन्द्रे २कर्पूरे च। सुधाया इव वासो गन्धो यस्याः। ब्रह्मण्याम् राजनि०।

सुधासिन्धु पु० सुधामयः सिन्धुः। अस्तसमुद्रे राजनि०।

सुधास्रवा स्त्री सुधां स्रवति स्रु-अच्। १कदलीवृक्षे राजनि० २उपजिह्वायाञ्च (आलजिभ) त्रिका०।

सुधाहर पु० सुधां हरति हृ-अच्। गरुडे शब्दर० भा० आ०२२अ०दृश्यम्। सुधाहारकादयोऽप्यत्र। [रायस०।

सुधिति पुंस्त्री० सु+धा-क्तिच् न द्धादेशः। १कुठारे स्वधितौ

सुधी पु० सुष्ठु धीर्यस्य। १पण्डिते। सुष्ठु धीः प्रा० स०। २सुन्दरबुद्धौ स्त्री। सुष्ठु ध्यायति सु+ध्यै क्विप् नि०। ३सुबुद्धियुक्ते त्रि०। [राजनि०।

सुधूम पु० सुष्ठु धूमः संतापो यस्य। स्वादुनामगन्धद्रव्ये

सुधोद्भव पु०सुधया सह सुधाया वा उद्भवति उद्+भू-अच्। १धन्वन्तरौ वैद्यराजे समुद्रमन्थने हितस्य सुधाकमण्डलु-सहिततयोत्पत्तेस्तथात्वम्। २हरितक्यां स्त्री त्रिका० "ययात विन्दुर्मेदिन्यामिन्द्रश्च पिबतोऽमृतम्। ततो दिव्या समत्पन्ना सप्तजातिर्हरीतकी" भावप्र० उक्ते सप्ताः सुधा-विन्दुजातत्वात् तथात्वम्।

सुनन्द न०सुष्ठु नन्दयति सु+नन्द-अच्। १बलरामसुखड्गे शब्द-मा०।२श्रीकृष्णपार्श्वचरभेदे भाग०१०।८६अ०।३राजसृङ्-भेदे च। ४सत्यानन्दयुक्ते त्रि० शब्दर० ५गोरोचनायाम्, ६उमायाम् स्त्री मेदि० एवम् ७उमासखीभेदे शब्दमा० ८नाम्नीम् विश्वः ९अर्कपत्रोऽपे च (रवेरमूल) स्त्री रत्नमा०।

सुनयन पुंस्त्री० सुष्ठु नयने अस्य। १सृगे शब्दच० स्त्रियां जातित्वात् ङीष्। २नार्य्यां स्त्री टाप्। ३शोभननेत्रयुक्ते त्रि० स्त्रियां बहुच्कत्वात् टाप्। [शब्दच०।

सुनाकृत पु० सुष्ठु न अकृतः नञो नलोपाभावः। कर्पूरके

सुनाभ पु० सुष्ठु नाभिरस्य अच्समा०। मैनाकपर्वते त्रिका०।

सुनामद्वादशी स्त्री व्रतभेदे व्रतशब्दे ५०६६ पृ० दृश्यम्।

सुनार पु० सुष्ठु नासमस्य वस्य रः। १सुवर्णकारे सुनीलन्धे २कलविङ्के खगे पुंस्त्री० मेदि० स्त्रियां ङीष्।

सुनालक पु०सुष्ठु नालेन कायति कै-क। १वकवृक्षे शब्दच० २सुन्दरनालयुक्ते त्रि०।

सुनासिका स्त्री सुष्ठु नासाऽस्यस्य ठन्। १काकनासायाम् राजनि०। प्रा० स०। २सुन्दरनासिकायाम् स्त्री।

सुनासीरीय पु० सुष्ठु नासो(सी)रः अस्मत्सैन्यं यस्य। इन्द्रे अमरः।

सुनासीरीय पु० सुना(सी)सीरो देवताऽस्य यत्। यज्ञ-भेदे। क्ल। सुना(सी)सीरीयोऽप्यत्र। स च चातुर्मास्य-यागपर्वभेदः कात्या० श्रौ० ५।१६ कण्डिकायासुक्तः। कात्यायनशब्दे १८३० पृ० दृश्यम्। "न वैश्वदेवीये न सुनासीर्ये" श्रुतिः। [शाके त्रिका०कप् तत्रैव अमरः।

सुनिषण्ण न० सुष्ठु निषण्णं स्थानं यस्मात् ५त०। (सुसनि)

सुनिष्टप्त त्रि० सु+निस्+तप-क्त षत्वम्। अत्यन्तोद्दीप्ते

सुनीति स्त्री सुष्ठु नीतिः यस्याः। उत्तानपादस्य पत्नीभेदे १ध्रुवमातरि। २सुन्दरनीतियुक्ते त्रि०। प्रा० स०। ३शोभनायां नीतौ स्त्री। [संक्षिप्त०

सुनीथ त्रि० सु+नी-थक्। १धर्मशीले उणादिको०, २विप्रे

सुनील न० प्रा० स०। १मणिभेदे (नीलम) २दाडिमे राजनि० ३सुन्दरनीलवर्णे पु०। ४तद्वति त्रि०। ५अ-

तस्याम् ६तृपराजितायां ७जरतीवृक्षे च स्त्री राजनि०

सुनीलक पु० सुनील इव कायति कै-क। १नीलझिण्टराजे २नीलाशने ३नीलरत्ने च राजनि०।

सुन्द पु० १दैत्यभेदे उपसुन्दशब्दे १२१७ पृ०३०भाग। २वानरभेदे रामा०उ०३७स०। ३राक्षसभेदे रामा०बा०२०स०।

सुन्दर त्रि० सु+उन्द-अरच्-मुक०। १मनोहरे अमरः स्त्रियां ङीष् वा च २उत्तमस्त्रियां शब्दरत्नावल्यां देव्याञ्च। ४कामदेवे ५वृक्षभेदे च (सुन्दरि) पु० मेदि० ६योगिनीभेदे स्त्री तन्त्रम् "अयुजोर्यदि सौ जगौ, युजोः। समरा ल्गौ यदि सुन्दरी तदा" छन्दो० उक्ते ७अर्द्धसमे वृत्तभेदे स्त्री। ८०र० तु स्वं वियोगिनीशुद्धा।

सुपक्व पु० सुन्दरं पच्यते सु+पच-क्त तस्य वः। १शोभनाचे शब्दच०। २सुन्दरपरिपक्वे त्रि०। [पाके द्रव्यमात्रे।

सुपच त्रि०भुक्तं सत् सुखेन पच्यते पच-कर्मणि खल्। सुखपाच्ये

सुपत्र न० सुष्ठु पत्रमस्य। १तेजपत्रे शब्दच० २चादित्यपत्रे पु०। ३पक्षिवाहवृक्षे राजनि० ४सुन्दरपत्रयुक्ते त्रि०। ५रुद्रजटायां ६शतावर्य्यां ७पाठक्षुद्रां ८दर्भ्यां ९शालपर्णीञ्च स्त्री राजनि०।

सुपत्रक पु० सुष्ठु पत्रं पक्षोऽस्य कप्। १शोभाञ्जनवृक्षे २जतुकायां स्त्री राजनि० अत इत्वम्।

सुपथ पु०सुष्ठु पन्थाः प्रा०स०वा अच्समा०। १सदाचारे च सुष्ठु पन्था यत्र अच्समा०। २सुन्दरपथयुक्ते त्रि०।

सुपथिन् पु० प्रा० स० वा समासान्ताभावः। शस्ये शब्दर० सुपन्थाः। [त्रि०।

सुपथ्या स्त्री प्रा०स०। १श्वेतत्रिफलावृक्षे राजनि० २शोभनपथ्ये

सुपद्मा स्त्री सुष्ठु पद्यते पद-म। १पद्माख्यायां शब्दच०। प्रा०ब०। २पद्मिन्यां स्त्री।

सुपर्ण पु० सुष्ठु पर्णं पक्षो वा यस्य। १गरुडे अमरः २सुन्दरपर्णयुक्ते त्रि० ३स्वर्णचूडकृमौ पुंस्त्री० स्त्रियां ङीष्। ४ऋतमाखवृक्षे पु०मेदि० ५नागकेसरे पु०त्रिका०। कप् सुपर्णक। खारशुद्धे वृक्षे सप्तच्छदवृक्षे जटा० गरुडे च हेमच०। शालपर्ण्यां रेणुकायां पलाशे स्वर्णजीवन्त्यां वाकुच्यां स्त्री कापि अत इत्वम्।

सुपर्णकेतु पु० सुपर्णो गरुडः केतुर्यस्य। विष्णौ त्रिका०।

सुपर्णी स्त्री सुष्ठु पर्णान्यस्याः गौरा०ङीष्। १पक्षिण्यां सुपर्णो गरुडोऽस्यास्ति अच् गौरा०ङीष्। २गरुडमातरि च मेदि०

सुपर्णीतनय पु० इत०। गरुडे त्रिका०।

सुपर्वन् पु० सुष्ठु पर्व यस्य। १देवे अमरः २शाके ३संधौ ४धूमे च मेदि०। प्रा०स०। ५सुन्दरे पर्वणि न०। [राजनि०।

सुपर्वा स्त्री सुष्ठु पर्व अस्त्यस्याः अच् टाप्। श्वेतदूर्वायाम्

सुपाक्य न० सुपाकाय हितम् यत्। १विड्लवणे राजनि०।

सुपार्श्व पु० सुष्ठु पार्श्वोऽस्य। १शुद्धदले (पाकुड) वृक्षभेदे २सम्भातिवृक्षे विहगभेदे च राजनि० ३सुन्दरपार्श्वान्विते त्रि०। ४मेरोरुत्तरस्थदिक्स्थपर्वते पु०धान्यवर्गशब्दे १८८२ पृ०३भाग। संज्ञायां कन्। १गर्दभाण्डवृक्षे पु०अमरः।

सुपिङ्गला स्त्री प्रा०स०। १ज्योतिष्मत्यां २लोमश्यां राजनि०

सुपीत न० प्रा० स०। १गञ्जरे (गाँजर) राजनि०। २सुन्दरपीतवर्णे पु० ३तद्वति त्रि०। [राजनि०।

सुपुट पु० सुष्ठु पुटमस्य। १लोकचन्द्रे २विष्णुकन्दे च

सुपुत्रिका स्त्री सुष्ठु पुत्र इव पत्रः यस्याः कप् अत इत्वम्। जतुकायाम् (तेलाँपोका) राजनि०। [राजनि०।

सुपुष्करा स्त्री सुष्ठु पुष्करमस्याः अच्। स्वनामख्यातायाम्

सुपुष्प न० प्रा० स०। १सुपुष्पवृक्षसुमे शब्दच० २प्रपौण्डरीके ३आम्रवृक्षे ४तृणे राजनि० ५स्त्रीणां रजसि च "सुपुष्पैराकीर्णं कुसुमधनुषो मन्दिरमहो" इत्यामालवः। सुष्ठु पुष्पमस्य कप्। (पाकुडमान्दार) वृक्षे। पाटलायां स्त्री राजनि० अत इत्वम्।

सुपुष्पी स्त्री सुष्ठु पुष्पमस्याः ङीष्। १श्वेतापराजितायां २अतसपुष्पायाम् ३मिश्रेयायां ४द्रोणपुष्प्यां ५जीर्णफल्ग्वां राजनि०। ६कटल्यां शब्दच०।

सुपूर पु० सुष्ठु पूर्यते सु+पूर-क। बीजपूरे राजनि०।

सुपूरक पु० सुष्ठु पूरयति पूर-ण्वुल्। वकवृक्षे रत्नमा०।

सुप् स्त्री व्याकरणपरिभाषिते सुप्शब्दतो सुपूर्य्यन्ते प्रत्ययभेदे।

सुप्त न० स्वप-भावे क्त संप्रसारणम्। १निद्रायां २शयने च ३सुप्तो हेमच० कर्त्तरि क्त। ४निद्रिते त्रि०।

"क्षुधितस्तृषितः कामी विद्यार्थी द्वारकारकः। भारवाही च प्रवासी च सप्त सुप्तान् प्रबोधयेत्। मक्षिका अमरः सर्पो राजा वै बालकस्तथा। परस्त्रीऽपि च मूर्खश्च सप्त सुप्तान् न बोधयेत्" नीतिसारः।

सुप्तघातक त्रि० इत०। छिन्ने त्रिका०।

सुप्तजन पु० सुप्तो जनो यत्र। १अर्द्धरात्रे जटा०। कर्म०। २निद्रिते लोके च।

सुप्ति स्त्री स्वप-क्तिन्। १शयने २निद्रायाम् ३स्वप्ने च "करोति सुप्तिर्जनदर्शनादिविसृंभणम्"। ४अशक्तितायां ५विस्मये मेदि०।

सुप्रतिभा स्त्री सुष्ठु प्रतिभा यस्याः ५त०। १सुरायाम् प्रा०

ष० । २शङ्खवणायां वृद्धौ । ङीष् । ३तद्वति त्रि० ।

सुप्रतिष्ठा स्त्री प्रा०ष० । १प्रशंसायाम् । ङीष् २तद्वति त्रि० । ३पद्माक्षरपादके छन्दोभेदे स्त्री । "प्रतिष्ठान्ता सुपूर्विका" ह०र० । [राजनि० । २प्रशंसिते त्रि० ।

सुप्रतिष्ठित पु० सु+प्रति+स्था-क्त मत्वदुत्वे । १चतुष्पथरक्षे

सुप्रतीक पु० सुष्ठु प्रतीकं यस्य । दैवानकोणस्थिते दिग्गजे अमरः । २शिवे ३कामे च ४सुन्दराङ्गे त्रि० । प्रा०ष० । ४सुन्दरे अङ्गे न० ।

सुप्रभा स्त्री सुष्ठु प्रभा यस्याः । १अग्निजिह्वाभेदे तन्त्र० २वाकुच्यां राजनि० । ३सुन्दरदीप्तियुते त्रि० । प्रा० ष० । ४शोभनायां दीप्तौ स्त्री ५शुक्लवर्णे हेमच० । ६सरस्वतीनदीभेदे स्त्री सरस्वतीशब्दे ५।२४६ पृ० दृश्यम् ।

सुप्रभात न० प्रा० ष० । १शुभसूचकप्रातःकाले २तत्र पाठ्यमाङ्गल्यवाक्ये च । [श्यामपाटवयुक्ते हेमच० ।

सुप्रयुक्तशर पु०सुष्ठुप्रयुक्तः शरो येन । शीघ्रहस्ते बाणमोचनासुप्रयोगविशिखि पु० सुष्ठु प्रयोगो निक्षेपो यस्य तादृशो विशिखो यस्य । शीघ्रहस्ते बाणमोचनशीघ्रताकृपटुत्वयुक्ते भरतः ।

सुप्रलाप पु० सु+प्र+लप-घञ् । सुवचने अमरः ।

सुप्रसन्न पु० सु+प्र+सद-क्त । १कुबेरे शब्दच० २अतिप्रसादयुक्ते त्रि० । संज्ञायां कन् । तत्पर्याये पु० राजनि० ।

सुप्रसरा स्त्री सु+प्र+सृ-अच् । १प्रसारिण्यां लतायाम् राजनि० । २विस्तारयुक्ते त्रि० ।

सुप्रसाद पु० सुखेनानायासेन प्रसादो यस्य । १शिवे त्रिका० प्रा०ष० । २सुन्दरप्रसन्नतायाम् ।

सुफल पु० सुष्ठु फलमस्य । १दाडिमे २बदरे ३वृक्षे ४वर्षिकारे राजनि० ५कपित्थे शब्दच० ६सुन्दरफलयुते त्रि० ७रुद्राक्षवृक्षयां दक्षाक्षायां ८कपिलद्राक्षायां ९काश्मर्यां च स्त्री राजनि० ।

सुफेन न० प्रा० ष० । सुखदफेने राजनि० ।

सुबन्ध पु० सुखेन बध्यतेऽसौ बन्ध-घञ् । तिलवृक्षे शब्दच० ।

सुभग पु० सुष्ठु भगः भाग्यादिः यस्य । १चम्पके २सुभगे शरलाख्याने ४टङ्कवृक्षे च राजनि० ५सुदृश्ये हृद्ये मेदि० ७शोभनैश्वर्ययुक्ते च त्रि० । एकैवर्णीलतायां ६शालपर्णाम् १०हरिद्रायां ११नीलदूर्वायां १२सहचरां १३शिग्रवृक्षे १४कङ्कोलयां १५स्वर्णक्षीरयां स्त्री राजनि० १६वनमल्लिकायां शब्दर० १७पतिप्रियायां स्त्रियां च स्त्री । सुभगाया अपत्यं ढक् ढलोपश्च । सौभाग्यनेये तदपत्ये पुंस्त्री०

सुभगम्भावुक त्रि० कस्सुभगः सुभगो भवति भू-ण्वुल् सुक् सुम च । प्रियम्भव्णौ त्रि०कौ० । [अमरः ।

सुभगासुत पु० सुभगायाः पतिप्रियायाः सुतः । सौभाग्यनेये

सुभङ्ग पु० सुखेनानायासेन भज्यते निःसारत्वात् सु+भञ्ज-कर्मणि घञ् । नारिकेलवृक्षे अटा० ।

सुभट पु० प्रा०ष० । सुन्दरयोद्धरि ।

सुभद्र पु० सुष्ठु भद्रं यस्मात् । १विष्णौ शब्दमा० । ङीष् । २राजभेदे हेमच० ३शोभनमङ्गलयुते त्रि० । ४श्यामालतायाम् स्त्री शब्दच० । ५श्रीकृष्णस्य भगिन्यां च स्त्री । कप् । सुभद्रक देवरथे शब्दर० विल्ववृक्षे च पु०शब्दच० ।

सुभद्राणी स्त्री सुभद्रं सुमङ्गलमानयति आ+नी-ड गौरा० ङीष् वलम् । लायन्तीलतायाम् रत्नमा० ।

सुभद्रेय पु० हृत० । अर्जुने हेमच० । सुभद्रापत्यादयोऽस्य ।

सुभाञ्जन पु० सुष्ठु भाति भा-ड कर्म० । शोभाञ्जनवृक्षे द्विरूपकोषः । [प्रचुरान्नयुते देशकालादौ ।

सुभिक्ष त्रि० सुखेन लभ्या भिक्षा यत्र पर्याप्तान्नत्वात् ।

सुभिक्षा स्त्री सुष्ठु भिक्ष्यते याच्यतेऽसौ सु+भिक्ष-च । धान्यपुष्पिकायाम् (धाँइफुल) अमरः ।

सुभीरक पु० सुष्ठु भीः सुभीः तामीरयति विरिङ्चिभम् ईर-ण्वुल् । पलाशवृक्षे त्रिका० ।

सुभूति पु० सुष्ठु भवति सु+भू-क्तिच् । १पण्डितभेदे प्रा०ष० । २सुन्दरविभूतौ स्त्री । ङीष् । ३तद्वति त्रि० कप् । ४विल्ववृक्षे पु० राजनि० । [चक्रवर्त्तिभेदे हेमच० ।

सुभूम पु० सुष्ठु भूमिरस्य बहुव्रीहिमा० । कार्त्तवीर्य्ये जिनारौ

सुभृश न० सुष्ठु भृशम् । १अतिशये दार्ढ्ये । २तद्वति त्रि० ।

सुभ्रु(भ्रू) स्त्री सुष्ठु भ्रुवौ यस्याः वा ऊङ् । १नार्याम् २सुन्दरभ्रुयुक्ते त्रि० ।

सुम न० सुष्ठु भीयतेऽदः सु-मा-घञर्थे क । १शुभे भरतः । सु-मक् । २चन्द्रे शब्दार्थे अनभसि च पु० उणा० ।

सुमङ्गला स्त्री सुष्ठु मङ्गलं यस्याः ५ब० । (मायङ्फलता) वृक्षे रत्नमा० । २सुमङ्गलयुक्ते त्रि० स्त्रियां ङीष् । "सुमङ्गलीरियं वधूः" इति श्रुतिः ।

सुमति त्रि०सुष्ठु मतिर्यस्य । १शोभनबुद्धियुते २कस्तूरिकामातरि विष्णुवधूः पत्न्यां स्त्री । ३कर्दलीमातरि च स्त्री हेमच० । प्रा०ष० । ४सुन्दरायां बुद्धौ स्त्री । [वृक्षे त्रिका० ।

सुमदन पु० सुष्ठु मदयति कोकिलान् मद-णिच्-ल्यु । आम्रवृक्षे

सुमदाम्बजा स्त्री सुमद आम्रस्य दलानीव दलान्यस्याः, कप्सुरादेशः ततो टाप् अत इत्वञ्च । कुमार्याम् ।

सुमधुर न० प्रा०ष० । १अत्यन्तप्रियवाक्ये अमरः २खाण्डव-

वाक्ये च । २अतिमधुररसे १तद्युक्ते त्रि०३जीवमाजे ३० राजनि० । [शब्दमा० ३मनोहरे त्रि० शब्दर० ।

सुमन पु० शुद्ध, मन्यते मन-क्यप् । १सोमलते अमरः । २पुष्पवृक्षे

सुमनःपत्रिका स्त्री सुमनसः जात्या इव पत्रमस्याः कप् अत इत्त्वम् । जातीपत्रिकायाम् राजनि० ।

सुमनःफल पु० शुद्ध, मनो यस्मात् तादृक् फलमस्य । १कपित्थे शब्दच० । ३त० २जातीफले न० ।

सुमनस् न० शुद्ध, मनो यस्मात् यस्य वा । १पुष्पे अमरः । ३०व०रत्नमे "किं सेव्यते सुमनसां मनसापि गन्धः" इति रघुगङ्गाधरः । २मालत्यां स्त्री अमरः ३प्रशस्तचित्तयुक्ते त्रि० ब्रा० ष० । ४प्रशस्ते मनसि न० । ३व० । ५देवे पु० अमरः ।६पण्डिते मेदि० ७मूर्तिकरञ्जे शब्दमा० दनिमे ८मनङ्गकरञ्जे १०सोमलते १।शतपत्र्यां स्त्री राजनि० ।

सुमना स्त्री शुद्ध, मन्यते मन-क्यप् । मालतीवृक्षे शब्दर० ।

सुमनोरजस् न० ३त० । पुष्पचूर्णे परागे अमरः ।

सुमन्तु पु० सु+मन+उन् । १अथर्ववेदाध्यापिनि व्यासशिष्ये मुनिभेदे "अथर्वाङ्गिरसामासीत् सुमन्तुर्दारुणो मुनिः" भाग० १।४च० । अतिशयितो मन्तुरपराधोऽस्य ।२अपराधयुक्ते त्रि० । २दशरथसारथौ रामा० ३कल्किदेवस्य ज्येष्ठभ्रातरि कल्किपु० ।

सुमित्रा स्त्री १अष्टमजनातरि दशरथपत्नीभेदे । २सुन्दरमित्रयुक्ते त्रि० । ३अर्कवृक्षे पु० हेमच० । ४पुरुवंशराजपुत्रे ऋक्षभेदे विष्णुपु० । ५क०२२च० ।

सुमुख पु० शुद्ध, मुखमस्मात् अस्य वा । १गरुडभेदे २मत्स्यभेदे ३नागभेदे ४मनोहरपुत्रभेदे च शब्दर० । ५चित्राङ्गदे ७वर्णवर्णरिकायाञ्च राजनि० । ६सुन्दरमुखवदने १०मनोहरे च त्रि० । स्त्रियां ङीप् । ११नवमतभेदे शब्दर० ।

सुमृष्टि पु० सु+मृज-कर्तरि क्तिच् । विषमृष्टिकृपे राजनि० ।

सुमूल पु० शुद्ध, मूलमस्य । १केतकीवृक्षे राजनि० २मालपर्ण्यां २पृश्निपर्ण्यां च स्त्री राजनि० टाप् । ३सुन्दरमूलयुक्ते त्रि० । संज्ञायां कन् । गर्जरे न० राजनि० ।

सुमेखल पु० शुद्ध, मेखला यस्मात् ५व० । १सङ्गटखे राजनि० ३व० । २सुन्दरमेखलान्विते त्रि० ।

सुमेधस् स्त्री शुद्ध, मेधा अस्याः ५व०अच्प्रत्ययमा० । १ज्योतिष्मत्यां लतायाम् । ३व० । २सुन्दरमेधायुक्ते त्रि०मेदि० ।

सुमेरु पु० मा० ष० । १पर्वतभेदे अमरः । जम्बूद्वीपशब्दे १०४५ पृ० दृश्यम् । २अपमालासोमालसुदिकायाञ्च वत्तम् ।

सुल्वलुण्ठ पु० कर्पूरवृक्षे शब्दच० । [वाहिनि पु० ष०त० ।

सुस्र(स्रु) पु० सुस्र-क्विप् पृषो० । १देवभेदे शब्दर० २तद्देश०

सुषासुन पु० वसुनाथा इदम् शुद्ध, वासुनं शिवलेनास्त्यस्य अच् । १विष्णौ २नक्षत्रराजे ३शाक्षादविशेषे ४पर्वतभेदे हेमच० । ५मेघभेदे च मेदि० ।

सुयोधन पु० सुखेन युध्यतेऽसौ सु+युध-ल्युट् । धृतराष्ट्रराजपुत्रभेदे दुर्योधने त्रिका० । [२सुखं २पण्डिते च ।

सुर पु० शुद्ध, राति ददात्यभीष्टं सु+रा-क । १देवे अमरः ।

सुरक्तता स्त्री ३त० । १गुडूच्याम् राजनि० २देवनिर्मिते त्रि०

सुरक्तक पु० सुरक्त इव आयति के-क । १कोशाम्बे २रक्तपोतेरिके च राजनि० ।

सुरगुरु पु० ६त० । बृहस्पतौ त्रिका० ।

सुरग्रामणी पु० सुराणां ग्रामणीः नेता । इन्द्रे त्रिका० ।

सुरङ्ग न० शुद्ध, रङ्गो यस्मात् ५व० । १छिद्रुवे २पक्षङ्गे (वर्णकमाटि)ब्रा०ष०।३नागरङ्गे ४गर्त्तभेदे (छँच) च पु० राजनि० । [राजनि० ।

सुरङ्गधातु पु० शुद्ध, रङ्गो रञ्जनं यस्मात् ५व० कर्म० गैरिके

सुरङ्गा स्त्री सु-अङ्गच् नि० (खिँच) यस्यो ङ्गा० । २वेश्यर्त्तिकायाम् राजनि० ।

सुरङ्गिका स्त्री शुद्ध, रङ्गो रञ्जनं यस्याः ५व० कप् अत इत्त्वम् । १भूम्यायाम् राजनि० ।

सुरङ्गी स्त्री शुद्ध, रङ्गो यस्याः ५व० गौरा० ङीष् । १काकनासायाम् राजनि० । २रक्तशोभाञ्जने रत्नमा० ।

सुरज्येष्ठ पु० ७त० । बृहस्पतौ त्रयीषि अमरः ।

सुरञ्जन पु० सुरञ्जयति सु+रञ्ज-णिच्-ल्यु । गुग्गुले त्रिका०

सुरत न० सु+रम-भावे क्त । १स्त्रीपुंसयोः सङ्गसुखे रतभेदे मेदि० सु-रम-कर्त्तरि क्त । २सम्भोगरते त्रि० ३स्त्रीलौ वारसुन्दरौ ।

सुरततालो स्त्री सुरतं तालयति तल-णिच्-अच् गौरा० ङीष् । १दूत्यां २शिरःस्थञ्जि च मेदि० ।

सुरता स्त्री सुराणां समूहः भावो वा तल । १देवसमूहे २देवत्वे च मेदि० । सु+रम-क्त । ३सम्भोगरतायां स्त्रियां स्त्री ।

सुरताङ्ग पु० सुरतस्याङ्गमत्र । सुरतप्रधाने राजनि० ।

सुरतोषक पु० ६त० । १कौसुम्भशाके शब्दर० । २देवतोषके त्रि०

सुरथ पु० शुद्ध, रथोऽस्य । चन्द्रवंशे नृपभेदे "सुरथो नाम राजाऽभूत्" देवीभा० । २सुन्दररथयुक्ते त्रि० ।

सुरदारु न० सुरप्रियं सुरलोकपर्य्यन्तलक्षितं वा उत्तमत्वाद् दारु । देवदारुवृक्षे रत्नमा० ।

सुरदीर्घिका स्त्री सुराणां दीर्घिकेव। गङ्गायाम् अमरः सुरवाप्यादयोऽप्यत्र।

सुरदुन्दुभी स्त्री सुराणां दुन्दुभीवाह्लादकत्वात्। तन्त्र्याम् राजनि०। [राजनि०।

सुरद्रुम पु० सुरप्रियो द्रुमः। १देवदारुणि २देवतरौ च

सुरद्विष् पु० सुरान् द्वेष्टि द्विष-क्विप्। १असुरे अमरः २देवद्वेष्टरि त्रि०।

सुरधनुस् न० ६त०। इन्द्रधनुषि जटाधरः।

सुरधूप पु० सुरप्रियो धूपः। राले (धुना) राजनि०। [ऽप्यत्र

सुरन(ण)दी स्त्री ६त०ना चात्र। गङ्गायां सुरधुन्यादयो-

सुरनन्दा स्त्री नदीभेदे शब्दर०।

सुरनाल पु० सुरप्रियं नालमस्य। देवतरुतुल्ये राजनि०।

सुरनिम्नगा स्त्री ६त०। गङ्गायाम् अमरः।

सुरनिर्गन्ध न० सुरेषु निर्गन्धम्। पलाण्डौ राजनि०।

सुरपति पु० ६त०। इन्द्रे अमरः सुरेशादयोऽप्यत्र।

सुरपद्म पु० सुराणां पद्म इव गङ्गाधारत्वात् अच्समा०। आकाशे हेमच०। [राजनि०।

सुरपर्ण न० सुरप्रियं पर्णमस्य। सुगन्धिके ओषधिभेदे

सुरपर्णिक पु० सुरप्रियं पर्णं यस्य कप्। तदस्यास्त्य ठक्। १सुरपद्मागे राजनि० २सुद्मागे स्त्री हेमच०। [राजनि०

सुरपर्णी स्त्री सुरप्रियं पर्णं यस्याः ङीष्। पद्माख्यौषधे

सुरपादप पु० ६त०। कल्पवृक्षे सुरद्रुवादयोऽप्यत्र।

सुरपुन्नाग पु० सुरप्रियः पुन्नागः। पुन्नागभेदे राजनि०।

सुरपुरी स्त्री ६त०। अमरावत्यां त्रिका०। सुरनगर्यादयोऽप्यत्र

सुरप्रिय पु० ६त०। १वृक्षविशेषे राजनि०। २वृक्षविशेषे च। ३जारजे ४जारजातौ ५सर्वकदम्बाच्च स्त्री राजनि०।

सुरभि न० सु+रभ-इन्। १सर्वे २गन्धद्रव्ये च शब्दर० ३सुन्दरे ४साधुगन्धे पु०धरणिः ५सुगन्धे अमरः ६चम्पके ७जातीफले ८घृतभेदे धृतो मेदि० "स सुरभिं सुरभिं सुमनोभरैरिति" माघः। ९यमीवृक्षे १०कदम्बे ११कक्षसुगन्धौ १२गन्धद्रव्ये १३वकुलवृक्षे १४राजे राजनि० १५चैत्रे मासि १६पण्डिते धरणिः १७गन्धद्रव्ये पु० शब्दर०। १८गङ्गायां १९वृद्धजटायां २०मालतीभेदे २१गवि २२धु(सु)रायां स्त्री मेदि० २३वनमल्लिकायां २४वृद्धदारुणां २५प्राच्यां स्त्री राजनि० २६पृथिव्यां २७गवां मातरि च स्त्री वा ङीष्। २८वृद्धदारुयुक्ते २९मनोहरे त्रि० मेदि० ३०विख्याते ३१धीरे च त्रि० धरणिः। सुरभित्व कार्यपद्मोभेदः। "सुरभिर्विनता चैव ताम्रा क्रोधवशा इरा" हरिवं० ३अ० कश्यपपत्नीकथने। तत्रापि हे कन्ये रोहिणी गन्धर्वी च तथा दुहितरौ राजन्! सुरभिर्वै व्यजायत। रोहिणीं चैव भद्रां त गन्धर्वीं चरजतप्रभाम्। रोहिण्यां जज्ञिरे गावः गन्धर्व्यां वाजिनः सुराः" भा० आ० ६६अ०। तत्रापि रोहिणीरूपगोभावजननात् गोभावत्वेन। ब्रह्मवै० प्र० ४४अ०। "गवामधिष्ठातृदेवी गवामाद्या गवां प्रसूः। गवां प्रधाना सुरभी गोलोके वा ससुद्भवा" इति गवाद्यत्वसङ्गतम्। सर्वतः स्त्रियां वा ङीष्। [कदम्बां हस्वे राजनि०।

सुरभिका स्त्री सुरभि+स्वार्थे क। (चाँपाकला) वर्ण-

सुरभित्वच् स्त्री सुरभिः त्वक् यस्याः। त्वचेलायां राजनि०

सुरभिदारु पु० सुरभि दारु यस्य। सरलवृक्षे राजनि०।

सुरभिपत्रा स्त्री सुरभि पत्रमस्याः। १जम्बूवृक्षे २राजजम्बूवृक्षे च राजनि०। [निनि) शब्दर०।

सुरभिवल्कल न० सुरभि वल्कलमस्य। १गुडत्वचि (दार-

सुरभिस्रवा स्त्री सुरभिः स्रवो निष्यन्दो यस्याः। सप्तलायाम् राजनि० सुरभिरसाप्यत्र।

सुरभूरुह पु० सुरप्रियः भूरुहः देवदारुवृक्षे भावप्र०।

सुरमृत्तिका स्त्री सुरप्रिया मृत्तिका। तन्त्र्याम् (वर्णकमाटि) राजनि०।

सुरमेदा स्त्री सुरप्रियो मेदोऽस्याः। महामेदायाम् राजनि०

सुरर्षि पु० सुरप्रियः ऋषिः। नारदादिषु ऋषिषु अमरः। ऋषिशब्दे १४५२पृ० दृश्यम्।

सुरलता स्त्री सुरप्रिया लता। महाज्योतिष्मत्याम् राजनि०

सुरला स्त्री सुरान् लाति श्लेषकत्वेन ला-क। १गङ्गायां धारा०। २सुरवाख्ये नदीभेदे शब्दर०।

सुरलोक पु० सुराणां लोकः वासस्थानादिः। १स्वर्गे अमरः। सुरभुवनादयोऽप्यत्र। [अमरः।

सुरवर्त्मन् न० सुराणां वर्त्मेव गङ्गाधारत्वात्। आकाशे

सुरवल्लभा स्त्री ६त०। श्वेतदूर्वायाम् राजनि०।

सुरवल्ली स्त्री सुरप्रिया वल्ली। तन्त्र्याम् राजनि०।

सुरवैरिन् स्त्री ६त०। १असुरे शब्दर०। २सुरविरोधिनि त्रि० सुरारिपुशब्दवोऽप्यत्र।

सुरशत्रु पु० ६त०। असुरे धरणिः।

सुरशाखिन् पु० ६त०। कल्पवृक्षे जटाधरः।

सुरश्रेष्ठा स्त्री सुरेषु श्रेष्ठा। द्राक्षायां राजनि०।

सुरस न० शोभनं रसोऽस्मै सु+रस-अच्सर्वं समर्थयति क। १शोभने २रसे ३गन्धतृणे ४क्षिप्तुवारे पु० शब्दर०। ५शोभनरसे

राजनि० । प्रा० स० । इक्षादौ रसे । इव० । ७इक्षादुरसयुक्ते त्रि० । पद्मकाष्ठं पुंस्त्री० । इराक्षायां १०नागमातरि स्त्री मेदि० । ११मित्रेयायां शब्दच० । १२त्राक्षायां रत्नमा० १३मङ्गलावत्यां च स्त्री राजनि० । नागमात्रा च कश्यपपत्नीभेदः । "खटितिर्दितिर्दनुश्चैव करिष्टा सुरसा सुरभिः" तत्पत्नीकथने हरिवं० २७० । "सुरसायाः सहस्रन्तु सर्पाणामभितोऽसृजम् । अनेकशिरसां तत्रां खेचराणां महात्मनाम्" । तत्राध्याये तस्या नागमातृत्वसृष्टिः । "सुरसाऽजनयन्नागान् कद्रूः पुत्रांश्च पन्नगान्" भा० आ० ६६अ० । तेनानेकशिरः नागप्रसवं सुरसायाः कद्रूवत् सर्पमातृत्वमिति भेदः ।

सुरसाष्ट पु० सुरसाभिरष्टः व्याप्तः अण-व्याप्तौ कर्मणि क्त । "निर्ऋतौ तनयौ ब्राह्मौ दुष्टौ कष्टकारिका । पुनर्नैर्ऋति सञ्जिभिः सुरसाष्टः प्रकीर्त्तितः" शब्दचन्द्रिकोक्ते दुष्टमेदव्याप्ते औषधभेदे । [जिनीभेदे तन्त्रसा० ।

सुरसुन्दरी स्त्री सुरप्रिया सुन्दरी । १मेनकाद्यप्सरःसु २वो०

सुरा स्त्री सुर-क सु-रक् वा । १मद्ये २चषके च मेदि० । सुरा च मद्यभेदः मद्यशब्दे ३७२६ पृ० दृश्यम् । सोत्रामण्यीशब्दे वैदिकमार्गेण तदभिषवप्रकारादिर्दृश्यः ।

सुराकर पु० सुराया आकरः । मद्योत्पत्तिस्थाने ।

सुराचार्य्य पु० इत० । इक्षस्मृतौ ऋषिः ।

सुराजक सुष्ठु राजते राज-खुल् । १अक्षुराजे शब्दच० । इव० कप् । सुन्दरराजान्विते त्रि० ।

सुराजन् पु० सुष्ठु पूजितो राजा न टच्समा० । १सुन्दरे राजनि० इव० । २सुन्दरराजसम्बन्धिनि देशे त्रि० ।

सुराजीविन् पु० सुरां सुरासम्पादनमाजीवति आ+जीव णिनि । औत्सिकके हेमच० ।

सुराप त्रि० सुरां पिबति पा-क । १मद्यपानकारके "सुराप: श्वावदत्तकः" इति स्मृतौ० [दोऽप्यत्र

सुरापगा स्त्री इत० । गङ्गायाम् जटा० । सुरतरङ्गिण्यां

सुरापान(क) न० सुरा पीयतेऽनेन पा-करणे ल्युट् वा कप् च । १मद्यदंशे (चाटनी) सुरायाः पानं वेषां कप् च । २मद्यदंशयुक्ते जने पु० शब्दच० । भावे ल्युट् । इतत्पाने न० वा कप् । [सुरापभाजोऽप्यत्र

सुराभाग पु० सुराया भागः कर्मधा० । सुरामण्डे शब्दच०

सुरामण्ड पु० इत० । सुराया मण्डभागे अमरः ।

सुरारि पु० इत० । असुरे शब्दर० ।

सुरारिहन्तृ पु० सुराधारिं वृत्रं हन-ट्टच् । विष्णौ ।

सुरार्हं न० सुरान् देवानर्हति अर्ह-अच् । हरिचन्दने: राजनि० ।

सुरालय पु० इत० । १सुमेरुपर्वते अमरः । २स्वर्गस्थाने च ।

सुराष्ट्र पु० इव० । देशभेदे (सुरट) । सोऽभिजनोऽस्य तस्य राज्ञो वा अण् । सौराष्ट्र त्रिकादिकमेण तद्देशवासिनि जने तद्देशे च बहुषु कथो लुक् । तत्र भवः अण् । तद्देशभवे त्रि० स्त्रियां ङीप् ।

सुराष्ट्रज न० स्त्री० सुराष्ट्रदेशे जायते जन-ड । १खपरिभाषायाम्अमरः २कांस्यलवणे राजनि० । ३विषभेदे च पु० शब्दच० । ४तद्देशजातमात्रे त्रि० ।

सुराह्व पु० सुरपूर्विका आह्वा यस्य सुरान् आह्वयति मन्त्रेण वा आ+ह्वे-क वा । १देवदारुवृक्षे शब्दर० । २मरुवके ३हरिद्रावृक्षे च राजनि० ।

सुरुङ्ग पु० सु+रुज-कङ्कच् पृषो० । १चोरभाजनवृक्षे शब्दर० । २सुरङ्गायां (भिँ४) स्त्री जटा० ।

सुरुङ्गाहि पु० सुरङ्गायामहिरिव । वल्मीकचोरे शब्दर० ।

सुरूप न० सुन्दरं रूपमस्य । १तुल्ये राजनि० । २सुन्दररूपयुते त्रि० सुरूपाख्य प्रसिद्धतया कतिचित् कविक० उक्ता यथा "सुरूपाश्चैव विख्याता नकुलस्य पुरुरवाः । कामदेवस्य आम्रस्य विख्याता वाग्मिनौ तथा । नकुलवरः सुरूपेषु लोकेषु च मता इमे" ३पर्णिकृते पु०जटा० । ४शालपर्णयां ५भाम्यां च स्त्री राजनि० प्रा०स० । ६सुन्दरे रूपे न० ।

सुरूहक पु० ईषद्-रुह-कुन् पृषो० । गर्दभाण्डे हेमच० ।

सुरेज्य पु० इज्यते पूज्यते यज-कर्मणि ण्यप् इत० । १इक्षस्मृतौ २तत्रस्थां स्त्री राजनि० ।

सुरेन्द्र पु० सुरेषु इन्द्र ऐश्वर्य्ययुतः । सुरराजे इन्द्रे ।

सुरेन्द्रजित् पु० सुरेन्द्रं जितवान् जि-भूते क्विप् । मेघनादे इक्षा० तत्कथा भा० आ० २२७० दृश्या ।

सुरेभ न० सु+रेभ-कर्मणि घञ् । रङ्गे धातौ (रांग) त्रिका० ।

सुरेवट पु० सुष्ठु रेवटः सु+रेव-अटन् वा । रामपूगे त्रिका० ।

सुरेश्वर पु० सुराणामीश्वरः । १इन्द्रे जटा० २शिवे च । ३स्वर्गगङ्गायां स्त्री शब्दर० ४दुर्गायाञ्च ङीप् ।

सुरेष्ट पु० इत० । १शाले वृक्षे २सुरदेवस्थाने ३शिवमन्त्रान्तरे ४नक्तमालवृक्षे स्त्री राजनि० ।

सुरोत्तम पु० सुरेषूत्तमः । १ब्रह्मणि २देवश्रेष्ठे त्रि० ।

सुरोत्तर पु० सुरेषु तत्पूजनेषूत्तरः श्रेष्ठः । चन्दने शब्दच० ।

सुरोद पु० सुरेव सदृक्षमम्बु उदादेशः । सुराक्षुद्रे जटा० ।

सुलभ त्रि० सुखेन लभ्यते सु+लभ-कर्मणि खल् । १अना-

यामलस्थे ३मायायाञ्च स्त्री राजनि०।

सुलोचन पुं स्त्री०सुष्ठु लोचनमस्य ।१हरिणे राजनि० स्त्रियां ङीष् । २सुन्दरनेत्रयुक्ते त्रि० स्त्रियां बहुव्रीहित्वात् टाप्।

सुलोमया स्त्री सुलोमानि सन्त्यस्याः मत्व० । काकजङ्घाहत्वे राजनि० । २सुलोमयुक्ते त्रि० ।

सुलोमा स्त्री सुष्ठु लोमान्यस्याः टाप् । १तास्रवल्ल्याम् २धर्मशर्कदायाञ्च राजनि० ।

सुलोहक न० प्रा०स० । पित्तले हेमच० ।

सुलोहिता स्त्री प्रा०स० । १यस्मिन्निङ्गुदीवृक्षे शब्दमा० २सुरक्तवर्णे पु० ३तद्वति त्रि० स्त्रियां ङीष् तस्य नच ।

सुवक्त्र पु०सुष्ठु, वक्त्रं सेवनात् यस्मात् ।१वनवर्बर्याम् रत्नमा० हव० २सुन्दराननयुक्ते त्रि० प्रा०स० ३सुन्दरे सुखे न०

सुवचन न० सु+वच-भावे ल्युट् । १सुवक्तावे शोभनोक्तौ कमरः । सूच्यतेऽसौ सु+वच-कर्मणि ल्युट् ङीप् । २शुभसूचनायाम् देवीभेदे स्त्री । [सुन्दरवचने न०]

सुवचस् त्रि० सुष्ठु वचोऽस्य । १शास्त्रज्ञे शठा० । प्रा०स० ।

सुवन पु० सु-क्यु । १सूर्ये २वङ्गे च उणादिको० प्रा०स० । ३रम्ये वने न० । [जारे राजनि०]

सुवर्चक पु०सुष्ठु, वर्चयति सु+वर्च-णिच्-ण्वुल् । सर्जिकाक्षारे

सुवर्चला स्त्री सुष्ठु, वर्चयति सु+वर्च-णिच-कच् । १सूर्यभार्यायाम् त्रिका० २कतकाम् रत्नमा० । ३वादित्र भक्षायां ४ब्राह्मण्याञ्च राजनि० कच् । सुवर्च देशभेदे पु०

सुवर्चिक पु० सुवर्चः देशभेदः अस्त्यर्थाकरत्वेन ठन् । १सर्जिकाक्षारे २जतुकायां स्त्री राजनि० ।

सुवर्चिन् पु० सु+वर्च-णिच्-णिनि । सर्जिकाक्षारे राजनि०

सुवर्ण न० सुष्ठु वर्णोऽस्य । १स्वनामख्याते धातुभेदे अमरः २हरिचन्दने मेदि० ३सुवर्णगैरिके रत्नमा० ४धने हेमच० ५नागकेसरे राजनि० । "वर्णे सुवर्णस्य सुवर्णसंज्ञम्" रत्नके वर्णमिते ६काञ्चने पु० क्लीवा० ७यत्तभेदे ८धुस्तूरे ९कथयुगमुखौ च पु० राजनि० । सुष्ठु वर्णो रूपमक्षरं यस्य । १०सुरूपे ११सुन्दराक्षरयुक्ते च त्रि० । "न सुवर्णमयी लङ्का परं नतु वागपि तावकी तथा" नैष० । १२सुवर्णपरिमाणे वैद्यक० ।

अस्मिन्नेतत् शब्दे ५६ पृ० कनकशब्दे च १६३३ पृ० सुवर्णधातूपधातुगुणादिकं दृश्यम् ।

तस्य शोधनमारणप्रकारादिकं भावप्र० चक्रं यथा "तस्य मारणाय वक्ष्ये सुवर्णमाक्ष्यं टाङ्के रक्तं सितं क्षेत्रे निक्षिप्ते कटुभस्मभम् । तारगुल्लोत्थितं स्निग्धं कोमलं गुरु हेम यत् (यत् उत्तमम्) क्षेत्रे तु कठिनं रूक्षं विवर्णं समलं दलम् । टाङ्के क्षेत्रेऽसितं शीतं रूक्षे त्याज्यं स्फुटं लघु । दग्धं (दीपत) इति लोके स्फुटं यद् घनाहतं स्फुटति । शोधनविधिः "पत्रकोद्धृतपत्राणि क्षेप्यो वह्नौ प्रतापयेत् । निषिञ्चेत् तप्ततप्तानि तैले तक्रे च काञ्जिके । गोमूत्रे च कुलत्थानां कषाये तु त्रिधा त्रिधा । एवं क्षेप्यः परेषाञ्च धातूनां शोधनं भवेत्" । अथागुडस्य दोषः "बलं वीर्यं हरते नराणां रोगप्रजं पोषयतीह काये । अधोऽधःकायेन सदा सुवर्णमगुडमेतन्मारयेच्च कृत्यात् । अथास्य मारणविधिः "अर्धस्य द्विगुणं क्षतजक्षेत्रेण सह मर्दयेत् । तद्गोलकसमं गन्धं निटध्यादधरोत्तरम्" । अर्धस्य अतितन्मूलतपत्रस्य । गन्धम् गन्धकचूर्णम् । "गोलकञ्च ततो दत्त्वा मरावदृढसंपुटे । क्षिपेद्धमनोपलैर्दद्यात् पुटान्येव चतुर्दश । निरुत्थं जायते भस्म गन्धो देयः पुनः पुनः" । दत्त्वा सवस्त्रमृत्तिकाचिक्कणकृत्तिकया वमोपलः (गोवठाः इति लोके) निरुत्थं यत् पुनर्न जीवति । अथान्यप्रकारः "काचने गलिते गन्धं गोड्यांशेन निःक्षिपेत् । चूर्णयित्वा तयक्षेत्रेण सह कृत्वा तु गोलकम् । गोलकेन समं गन्धं दत्त्वा चैवाधरोत्तरम् । मरावसंपुटे धृत्वा पुटेच्चिंशद् वमोपलैः । एवं सप्तपुटैर्भस्म निरुत्थं भक्ष्य जायते" । अन्यापि पूर्ववदुक्तयः । अन्यच्च "काञ्जिकारसदोलाभ्यां समक्षतकसत्त्वयोः । कज्जली क्षेपयत्राणि क्षेपयेत् समया तया । समया क्षेपयत्राणि समया "काञ्जिकारत्वयः कल्कैर्मूषायुग्मं प्रलेपयेत् । धृत्वा ततस्तमुद्धृत्य गोलं सम्पुटसम्पुटे च तत् । निधाय सम्पिरोध्यैव कृत्वा संशोष्य गोलकम् । वह्निं चतुरं कृत्वादेवं दत्त्वा पुटत्रयम् । निरुत्थं जायते भस्म सर्वकर्मसु योजयेत् । काञ्जिकारप्रकारेण काञ्जिकी क्वथ्यते यथा काञ्जिकी (करिहारी) "ज्वालासखी तथा कन्याद् तथा क्वथ्यते यथा । शिखाभिन्दूरवोत्थं समयोरर्कदुग्धकैः । सप्तधा भावनात् दद्याच्छोषयेच्च पुनः पुनः । ततस्तु गलिते क्षिप्ते कल्कोऽयं दीयते समः । पुनर्भेदतितरां यथा कल्को विलीयते । एवं वेलाबलं दद्यात् कल्कं क्षेपसमं क्षिपेत्" । एवं मारितस्य सुवर्णस्य गुणाः "सुवर्णं शीतलं द्रव्यं बल्यं गुरु रसायनम् । स्वादु स्निग्धं च तुवरं पाके च स्वादु स्निग्धकम् । पवित्रं वृंहणं मेध्यं मेधास्मृतिमतिप्रदम् । क्षुद्रामयकुष्ठरक्तविषवातकफक्षयान् । विषहृद्वयसोन्मादश्लीपदोष-

ज्वरशोषजित्। द्रव्यं हयाय कालकाव स्थितम्। "अश्वखड्मारितं स्वर्णं वङ्गं वीर्यञ्च नाशयेत्। करोति रोगान्मूलञ्च तद्भस्माद् यत्नतस्ततः"।

तद्भेदादिकं राजनि० उक्तं यथा

"दाडेऽतिरक्तमथ यद्व स्थितं स्निदावां काश्मीरवर्णानि च विभाति निकाषपट्टे। स्निग्धञ्च गौरवसपेति च यत्नु-लावां जानीत देवजनकं खलु रक्तपीतम्। तत्रैकं रस-वेधजं तदपरं जातं स्वयंभूमिजं किञ्चान्यद्वङ्गलोह-सङ्करभवं चेति त्रिधा काञ्चनम्। तत्राद्यं खिल पीतरक्त-मपरं रक्तं ततोऽन्यत् यथा गौरार्भं तदिति क्रमेण गदितं स्यात् पूर्वपूर्वोत्तमम्"। तत्र रसवेधजस्य करण-प्रकारः "आनीय पारदं देवि! स्थापयेत् प्रस्तरोपरि। तस्योपरि क्षिपेन्मन्त्रं सर्वकल्मषनाशकम्। षाडक्षरञ्च देवेशि! प्रजपेत् साधकाग्रणीः। स्वयम्भूपुष्पसंयुक्ते वस्त्रे चारुचतुष्पथे। संस्थाप्य पारदं देवि! स्तूपाल-युगले शिवे!। पुष्पयुक्तेन स्रवेण बध्नीयात् वङ्ग-मत्रतः। स्फटिकया रजनैव धान्यस्य परमेश्वरि!। लेपयेद्वङ्गयत्नेन रौद्रे शुष्काणि कारयेत्। पुनश्च लेपये-द्धीमान् ततो वङ्गो विनिःक्षिपेत्। अष्टमीनवमीरात्रौ क्षिपेच्चैव सुरेश्वरि!। अथ वा परमेशानि! स्तूपाले स्थापयेद्रसम्। वङ्गोरसेन तद्द्रव्यं शोधयेद् वङ्गवत्ततः। इतनारीरसेनैव तथैव शोधनं चरेत्। एवं कृते तु गुटिका यदि स्यात् दृढवन्धना। धुस्तूरच समानीय मध्ये शून्यञ्च कारयेत्। लक्षाख्यतुलसीयोगे तथा हेतकुमारिका। एवं कृते वङ्गियोगे भक्षणात् जायते ध्रुवम्। भक्षणागे भवेत् स्वर्णं धनदायाः प्रसादतः। विवर्णं जायते द्रव्यं यदि पूजां न चाचरेत्" मातृका-भेदतन्त्रे १५०। वङ्गशोधसङ्करभवस्य करणविधिः गारुडे १८८अ०। "सुवर्णकरणं वक्ष्ये इत्युपक्रमे "पीतं धुस्तूर-पुष्पस्य सौमवल्ल्याश्च पत्रोत्थितम्। पाठालाङ्गुलशाखा च मूल-मावर्त्तनाङ्गवेत्"। सुवर्णं वह्नौ दह्यमानं न क्षीयते यथोक्तं याज्ञ० "अग्नौ सुवर्णमक्षीणम्"। कर्त्तमित-ब्राह्मणस्वामिकाङ्गनरूपसुवर्णहरणं महापातकम्। महापातकनिरूपणे प्रायश्चित्तविवेकः।

सुवर्णक न० सुवर्णमिव कायति कै-क। १पित्तले शेषच०। सुष्ठु वर्णोऽस्य कप्। २सुन्दरवर्णयुक्ते त्रि०।

सुवर्णकदली स्त्री सुष्ठु वर्णो यस्याः कर्म०। स्वर्णवर्ण-कदल्याम्। (चांपाकला) राजनि०।

सुवर्णकार पु०सुवर्णं सुवर्णमयभूषणादि करोति क-अण्। (सेकरा) स्वर्णकारे जातिभेदे स्त्रियां०।

सुवर्णगणित न० सुवर्णस्य वर्णादिज्ञानार्थं गणितभेदे तत्-प्रकारो चौरा० उक्तो यथा

"अथ सुवर्णगणिते करणसूत्रं दृष्टम्। सुवर्णवर्णोऽति योगराशौ स्वर्णैक्यभक्ते फलकैक्यवर्णः। वर्णौ भवस्तोधितहेमभक्ते वर्णौ हृते शोधितहेमसङ्ख्या। उदाहर-णानि। विश्वार्कसूदृष्टसुवर्णमाषाः दिग्वेदलोचन-युगप्रमिताः क्रमेण। आवर्त्तितेषु वद तेषु सुवर्णवर्ण-स्तूर्णं सुवर्णगणितज्ञ! वाक्पटो! भवेत् कः। ते शोधने यदि च विंशतिरुक्तमाषाः स्युः षोडश द्रविणवर्णमिति-स्तदा का। तच्छोधितं भवति षोडशवर्णहेम ते विंशति-कति भवन्ति तदा तु माषाः।

न्यासः १२ १२ ११ १०

१० ४ २ ४

आता आवर्त्तिते सुवर्णमितिः १२। एत एव यदि शो-धिताः स्युः षोडशमाषाः भवन्ति तदा वर्णः १५। यदि तदेव शोधितं षोडशवर्णं स्वर्णं भवति तदा पञ्चदश-माषाः भवन्ति। अथ वर्णज्ञानाय करणसूत्रं दृष्टम्। स्वर्णैक्यनिघ्नाद्युतिजातवर्णात् सुवर्णतद्वर्णवधैक्यहीना-त्। अज्ञातवर्णोन्मितसङ्ख्ययाप्तमज्ञातवर्णञ्च भवेत्प्र-माणम्। उदाहरणम्। दशेश्वर्णा वसुनेत्रमाषा अ-ज्ञातवर्णस्य घडेतदैक्ये। जातं सखे द्वादशकं सुवर्णं-मज्ञातवर्णस्य वद प्रमाणम्।

न्यासः १० ११ ०

८ २ ६

लब्धमज्ञातवर्णमानम् १५। सुवर्णज्ञानाय करणसूत्रं दृष्टम्। स्वर्णैक्यनिघ्नो युतिजातवर्णः स्वर्णैक्यवर्णै-र्वियोजितश्च। अष्टेश्वर्णोऽग्निजयोगवर्णैर्वह्नेर्भक्ता विदि-तोग्निजं स्यात्। उदाहरणम् "दशेन्द्रवर्णा गुण-चन्द्रमाषाः किञ्चित्तया षोडशकस्य तेषाम्। जातं युतौ द्वादशकं सुवर्णं कतीह ते षोडशवर्णमाषाः।

न्यासः १० १४ १६

२ १ ०

लब्धं माषमानम् १। सुवर्णज्ञानायान्यत्करणसूत्रं दृष्टम्। साध्यैक्योनोऽल्पवर्णो विश्लेषः साध्यो वर्ण-ऽल्पवर्णोनितश्च। इष्टघ्नश्च शेषके स्वर्णमाने स्यातां स्वल्पानल्पवर्णवर्णयोगे। उदाहरणम् "द्वाटकघुटके

षोडशवर्षं तद्युतो वर्षे। ज्ञातम्। द्वादशवर्षं सुवर्षं भूयि तयोः सुवर्षमाने मे।

न्यासः १६ १०
० ०

वर्षो वर्षं: १२ कल्पितमिष्टम्।

वर्षे सुवर्षमाने १६ १०
२ ४

अथवा द्विकेनेष्टेन १६ १०
४ ८

चतुर्नेष्टेन वा १६ १०
१ २

सुवर्णगैरिक सुवर्णमिव पीतं गैरिकम्। (स्वर्णकमाटि) गैरिकभेदे राजनि०। "गैरिकं मधुरं पीतं कषायं व्रणरोपणम्। विस्फोटार्शोऽग्निदाहघ्नं वरं सुवर्णादिकं गुणम्" राजनि० तद्गुणा उक्ताः।

सुवर्णजीविक पुंस्त्री० सुवर्णं तत्क्रयविक्रयौ जीविका यस्य। सुवर्णवणिजि जातिभेदे स्त्रियां ङीष्। तल्लक्षणं यथा "गान्धिकः ग्रान्धिकश्चैव कांस्यको मणिकारकः। सुवर्णजीविकश्चैव पञ्चैते वणिजः स्मृताः"। "गन्धजात् रजसुत्राच्च जायते गान्धिको वणिक्। गन्धचन्दनधूपादिक्रयविक्रयकारकः। गान्धिक्यां रजसुत्राच्च संजातः ग्रान्धिको वणिक्। शङ्खं दत्त्वा मुनेः पत्न्यां शङ्खजीवी प्रकीर्त्तितः। ग्रान्धिक्यां गान्धिकाज्जातस्ताम्रकांस्योपजीविकः। ग्रान्धिकात् कांस्यकन्यायां मणिकारः प्रजायते। कांस्यकाराच्च गान्धिक्यां सुवर्णजीविकोऽभवत् परावरजातिभाजा। तस्य पातित्यकारणं ब्रह्मवै० ब्रह्मख० १०अ० उक्तं यथा "कविट् वणिग्विशेषेण संसर्गात् स्वर्णकारकः। स्वर्णचौर्यादिदोषेण पतितो ब्रह्मणापतः"। [त्यात् राजनि०।

सुवर्णनकुली स्त्री सुवर्णमिव पीता नकुली। मङ्गल्यजाति-

सुवर्णपुष्प पु० सुवर्णमिव पुष्पमस्य। राजतरुवृक्षे राजनि०

सुवर्णप्रसर न०सुवर्णस्य प्रसर इव यत्र। एकवालुके वैद्यक०।

सुवर्णवणिज् पु० सुवर्णस्य वणिक् क्रयविक्रयादिकर्त्ता। जातिभेदे (सोनारजाति)। स्वर्णवणिक्शब्दतोऽप्यत्र। सुवर्णजीविकशब्दे दृश्यम्।

सुवर्णबिन्दु पु० सुवर्णस्य बिन्दुरिव। विष्णौ त्रिका०।

सुवर्णयूथी स्त्री सुवर्णमिव पीता यूथी। पीतवर्णयूथिकायाम् राजनि०। "यूथिका मणिशाम्बष्ठा सा पीता हेम-पुष्पिका। यूथीयुगं स्निग्धं तिक्तं कटुपाकं सरं लघु। मधुरं तुवरं रूक्षं पित्तघ्नं कफशोषणम्। व्रणास्रदोष-टनाक्षिशिरोरोगविषापहम्" भावप्र०।

सुवर्णवर्णा स्त्री सुवर्णस्येव वर्णो यस्याः। १हरिद्रायाम् शब्दच०। २सुवर्णतुल्यवर्णयुक्ते त्रि०। ३विष्णौ पु० विष्णुस०। "तस्मात्सर्वस्मात् सर्वमेव सुवर्णमिति श्रुतेस्तथात्वम्। इत०। सुवर्णस्य मूल्यभेदकल्पके ४वर्णे पु० सुवर्णगणितशब्दे दृश्यम्।

सुवर्णा स्त्री सुष्ठु वर्णो यस्याः। १कांस्यगुडूच्यां मेदि०। २वाग्भटोक्ते शब्दमा०। ३सुवर्णयोग्यां ४हरिद्रायाम् राजनि०।५चारुवर्णायां स्त्री राजनि० गौ०ङीष्।

सुवयस् स्त्री सुष्ठु वयोऽस्याः। प्रौढ़ायां स्त्रियाम् राजनि०।

सुवल्लि(ली) स्त्री प्रा०स०। क्षीरकाकोलतायाम् अमरः।

सुवसन्त पु० प्रा०स०। चेलावल्लां त्रिका०।

सुवसन्तक पु० सुवसन्तेन कायति के-क। माधवीलतायां २मदनोत्सवे च मेदि०।

सुवहा स्त्री सुखेन वहते वायुनाऽसौ सु+वह-खञ्। १ग्रेफालिकायां २रास्नायां ३गोधापद्यां ४एलापर्णीम् अमरः ५यवक्षयां ६वीणायां मेदि०। ७क्षितताम्रां शब्दच०। ८कटुजटायां ९कटफलायां १०गन्धनाकुल्यां ११छत्रायां १२नीलसिन्धुवारे च राजनि०। १३सुखवाहे त्रि० मेदि० सम्यग् वहति सु+वह-खच्। १४सम्यग्वाहके त्रि०हेमच०

सुवास पु० सुष्ठु वासः। १सदन्ने २सुखनिवासे च। क्ली०। ३सद्गन्धयुक्ते ४सन्निवासान्विते च त्रि०।

सुवासिनी स्त्री सुखेन पितृभ्रात्रियोगेन वसति सु+वस-णिनि ङीप्। चिरकाटायां चिरं पितृकुलवासिन्यां स्त्रियाम् अमरः

सुविद् पु० सुष्ठु वेत्ति सु+विद-क्विप्। १पण्डिते। सुष्ठु विद्यते लभ्यते सु+विद-लाभे क्विप्। २सुखाढ्यायां स्त्रियां स्त्री रामाश्रमः।

सुविद पु० सु+विद-क। १कम्बुविल्वे राजनि० २सर्पे भरतः।

सुविदत् पु० सुविदं सुखाढ्यां स्त्रियमतति यत-क्विप्। सर्पे राजनि०।

सुविदत्र त्रि० सु+विद-कत्रच्। कुटुम्बे उणादि०।

सुविदत्र पु० सुविदन्तं राजानं त्रायति त्र-क। स्त्रियान्तःपुरे तत्राधिकारे कञ्चुकिनि अमरः। सुविदत्रा राज्ञां त्रायते त्र-क। २अन्तःपुरस्थरक्षायाम् स्त्री राजतरङ्गः।

सुविनीता स्त्री सु+वि+नी-क्त। १सुशीलायां गवि शब्दर० २सुविनययुक्ते त्रि०।

सुबीज पु० सुष्ठु बीज्यतेऽसौ बीज-क० । (चम्पक) वृक्षभेदे राजनि० ह्रस्व० । २सुन्दरबीजयुते त्रि० । प्रा० ब० । ३सुन्दरे बीजे न० ।

सुवीरक न० सु+वीर-स्वुन् । सौवीराञ्जने शब्दच० ।

सुवीराञ्जन न० सुवीरवति सुवीर्यावन्तं करोति सु+वीर-ञच् तादृशोऽस्योऽस्य । काम्पिल्ले लटा० ।

सुवीर्य्य न० सुष्ठु वीर्य्यं यस्मात् ५ब० । १बदरीफले २वनकार्पासां स्त्री शब्दर० । प्रा०ब० । ३उत्तमे वीर्य्ये न० ।

सुवृत्त पु० सुष्ठु वृत्तः वर्त्तुलः । १भूरुहे (बोल) राजनि० २सुन्दरवृत्तान्विते त्रि० ३शतपत्र्यां ४कार्कट्यां ५दुग्धाख्यायां स्त्री राजनि० ६सुवर्त्तुले त्रि० ।

सुवेगा स्त्री सुष्ठु वेगो वायुनिःसारणवेगो यस्याः ५त० । १महाज्योतिष्मत्याम् राजनि० २उत्तमवेगान्विते त्रि० ।

सुवेल पु० सुगतो वेलां मर्य्यादां येन प्रा० ब० । १त्रिकूटपर्वते हेमच० सुष्ठु वेला मर्य्यादा स्थितिः यस्य । २शान्ते ३प्रशस्ते च त्रि० मेदि० ।

सुवेश पु० सुष्ठेन विश्यते उपभुज्यते सु+विश-कर्म्मणि घञ् । १श्वेतार्कवृक्षे राजनि० प्रा०ब० । २सुन्दरवेशयुक्ते त्रि० ।

सुव्रता स्त्री सुष्ठु व्रतं नियमो यस्याः । १मुनीनायां सवि अमरः । २सुन्दरव्रतयुक्ते त्रि० । ३जिनभेदे पु० हेमच० ।

सुव्रह्मन् पु० ब्रह्-मनिन् सुष्ठु ब्रह्म सुखं यस्य । १रुद्रभेदे शब्दचन्द्रिकायुक्ते भा०शा० १८अ० । २सुन्दरमुखयुते त्रि० । ३तृतीयमनुपुत्रभेदे पु० हरिवं० ७अ० । ४कल्पितब्राह्मणभेदे "सुव्रह्मा नाम दुर्मेधाः शौभा यापालनामभूत । यज्ञाम्नायविदां वंशे विप्राणां क्रूरकर्म्मणाम्" पाद्मो० ख० ८अ० ।

सुव्रत्य पु० सुष्ठु हृद् व्रत्यं यस्मात् ५ब० । खदिरे राजनि० ।

सुव्रवी स्त्री सु+व्रश्च-क्विप् गौरा० ङीष् । १कारवेल्ले २कृष्णजीरके च अमरः ।

सुव्राक न० सुष्ठु व्राको यस्मात् ५ब० । १व्राट्टे राजनि० । व्राके तत्संयोगे हि व्राकस्य सुखादुता । सुष्ठु व्राको यस्य । २चञ्चुव्राके २तण्डुलीये (नटेशाक) ३भिक्षुडायां पु० राजनि० ।

सुशिख पु० सुन्दरी शिखा यस्य । १वह्नौ जटा० २चित्रहरे च । ३शोभनशिखायुक्ते त्रि० ४मयूरशिखायां स्त्री राजनि० [३तहति त्रि० । ४सुकुक्कुटे पु० राजनि० ।

सुशीत न० प्रा०ब० । १शीतचन्दने शब्दच० २अतिशीतकर्म्मणि

सुशीतल न० प्रा०ब० । १गन्धद्रव्ये रत्नमा० । २अतिशीतगुणयुक्ते त्रि० । [वत्यां स्त्रियां च ।

सुशीता स्त्री प्रा०ब० । १शतपत्र्याम् राजनि० । २शीतगुण-

सुशीम पु० सु+शो मक् सुश्यशारुच्छ । १शोतवर्षे २तद्वति त्रि० अमरः ।

सुशील पु० सुन्दरं-शीलमस्य । विष्णुपार्षदचरभेदे राजनि० । २शोभनचरितान्विते त्रि० ३क्षयाशब्दपत्नीभेदे स्त्री पद्मपु० उत्तरख० ६८अ० । [चीयुक्ते त्रि० ।

सुशीक स्त्री सुन्दरी शीरस्य कप् । १रक्तकोद्रवे २सुन्दर-

सुश्रुत पु० शुश्रूयते सु+स्तु-कर्म्मणि क्त । १विश्वामित्रसुतभेदे चिकित्साशास्त्रकर्त्तरि मुनिभेदे आयुर्वेदग्रन्थे ७८० पृ० दृश्यम् । २तत्कृतग्रन्थे च । ३सुन्दरश्रुते त्रि० । "देवाकर्ण्य सुश्रुतेन चरकस्योक्तेन जानेऽखिलम्" नैष० । [च ।

सुश्लिष्ट त्रि० सु+श्लिष-क्त । १सुसंयुक्ते २दृढ़मिलिते । सुश्लक्ष्णे

सुषम पु० सुन्दरः समः प्रा०स० सुषमा० अत्वम् । । १शोभने समे २परमायां शोभायां स्त्री अमरः ।

सुषवी स्त्री सु+सु-अच् गौरा० ङीष् । १कारवेल्ले अमरः । २क्षुद्रकारवेल्ले राजनि० ३जीरके ४कृष्णजीरके च मेदि० ।

सुषामन् त्रि० सुष्ठु साम यस्य सुषामादि०अत्वम् । सुसाम्नवति स्त्रियां वा ङीष् ङीप् च ।

सुषि स्त्री सुष-इन् पृषो० यस्य सः । सुषौ छिद्रे भरतः ।

सुषिर न० सुष-किरच् पृषो० यस्य सः । छिद्रे भरतः ।

सुषीम पु० सुशीम+पृषो० । १शीतवर्षे २तद्वति अमरः । ३मनोज्ञे त्रि० मेदि० ।

सुषुप्त न० सु+स्वप-भावे क्त । "यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत् सुषुप्तमिति" श्रुतौ १ज्ञानशून्यावस्थाभेदे । कर्त्तरि क्त । २तदवस्थान्विते त्रि०

सुषुप्ति स्त्री सु+स्वप-क्तिन् । पुरीतति नाड्यां मनसः संयोगरूपे १सर्वज्ञानशून्ये जीवावस्थाभेदे वेदान्तोक्ते २सर्वपदार्थशून्ये लये च ।

सुषुम्णा स्त्री सुष्ठु रूपव्यक्तं शब्दं स्रावयति यत्र स्रा-क । तन्त्रोक्ते मेरुदण्डवाह्यस्थे रुद्राण्यङ्कितनाड्योर्मध्यस्थे सूक्ष्मे नाड़ीभेदे । "मेरोर्बाह्यप्रदेशे यन्निम्नशिरसि स्थिते कन्दस्थे निम्नगे मध्ये नाड़ी सुषुम्णा सितयशुक्लमयी चन्द्रस्वरूपा" षट्चक्रभेदतन्त्रम् । तस्या ऽपरभेदभेदो यथा "सर्वं वामे सर्वं दक्षे यदा वहति मारुतः । सुषुम्णा सा च विज्ञेया सर्वकार्य्यहराऽशुभा । तस्यां नाड्यां स्थितो वह्निर्ज्वलनाख्यस्वरूपधृक् । विघ्नं तं विजानीयात् सर्वकार्य्यविनाशनम् । यदाऽऽक्रमति सङ्क्रूर तस्यां नाड्यां हयं वहेत् । तदा तस्य विजानीयादशुभं वस्तुसंस्थितम्" इति ब्रह्मयामलम् ।

"मेरुवह्नौ दृढा नाड़ी पिङ्गलया समन्विता। सुषुम्णा मार्गमार्गेण ब्रह्मद्वारावधि स्थिता" योगसरोदयः।

सुषेण पु० सुष्ठु सेनयति सेनां करोति अच् णत्वम्। १करञ्जवृक्षे (करमचा) अमरः २वेतसे राजनि० ३चिकित्सके वानरभेदे। ४विष्णौ च मेदि० ५लिङ्गति स्त्री राजनि० ङीष्। स्वार्थे क अत इत्वम्। ऋष्यलिङ्गति स्त्री अमरः।

सुषोमा स्त्री नदीभेदे भाग० ५।१९ अ०।

सुष्ठु अव्य० सु+स्था-कु। १प्रशंसायाम् २अतिशये अमरः। ३साधौ च मेदिनी०।

सुस न० सु-सक् सुक् च। रव्यां चीरस्वामी।

सुसंस्कृत त्रि० सु+सम्+कृ-क्त सुम् च। १प्रयत्नेन कृतादि-मात्रद्रव्येषु पक्वे व्यञ्जनादौ अमरः २उत्तमसंस्कार-युते त्रि०।

सुसत्या स्त्री जनकराजभार्य्यायाम् कालिकापु० ३७ अ०।

सुसम्पद् स्त्री प्रा०स०। १सौभाग्ये त्रिका० सुष्ठु सम्पद् यस्य। २१समृद्धे त्रि०। [सारयुते त्रि०।

सुसार पु० सुष्ठु सारोऽस्य। १रक्तखदिरे राजनि०। २अति-

सुसारवत् न० सुष्ठु सारोऽस्यास्य मतुप् मस्य वः। स्फटिके त्रिका०। [कायाम् ब० व०।

सुसिकता स्त्री प्रा०स०। शर्करायाम् राजनि०। २उत्तमवालु-

सुस्थ त्रि० सुखेन तिष्ठति सु+स्था-क। १आरोग्येण युक्ते २सुखिनि च।

सुस्रा पु० सु+स्रै-क्विप्। (खँसारी) धमीधान्यभेदे राजनि० "सुस्रा दूर्वादलो रूक्षः कषायो विशदो गुरुः" राजनि०।

सुस्नात त्रि० सुष्ठु स्नातः सु+स्नै-क्त। सङ्गतद्रव्येषु कृतस्नाने।

सुस्मिता स्त्री सुष्ठु स्मितमस्य। नारीभेदे हेमच०

सुहित त्रि० सु+धा-क्त। १हृष्टे २विधिक्ते च विश्वः। प्रा०स०। ३सुन्दरविहिते न०। ५ब०। ४अग्निजिह्वाभेदे स्त्री जटा०।

सुहृट् पु० सुष्ठु हृदयं यस्य मित्रार्थे हृदादेशः। १मित्रे २ज्योतिषोक्ते लग्नाच्चतुर्थस्थाने च। [२सुचित्ते न०।

सुहृदय त्रि० सुष्ठु हृदयं यस्य। १प्रशस्तमनस्के अमरः। प्रा०स०।

सुहृद्दल न० सुहृदेव बलम्। मित्ररूपे सैन्ये।

सुहोत्र पु०। चन्द्रवंशीयहस्तिपुराधिपतौ। "हस्तिनोऽपि दायादः सुहोत्रो नाम धार्मिकः। सुहोत्रस्यापि दायादो हस्ती नाम बभूव ह" हरिवं० २० अ०।

सू स्त्री सु-क्विप्। १स्तुतौ २प्रसवे ३क्षेपे ४प्रेरणे च।

सूक न० सू-प्रेरणे क्विप् संज्ञायां कन्। १शस्ये २धान्ये ३खाते च मेदि०।

सूकर पुंस्त्री० सू-इत्यव्यक्तं शब्दं करोति क-अच्। १वराहे २कुत्सितकारे ३मृगभेदे च शब्दर० स्त्रियां ङीष्। ङीषन्तः ४वराहक्रान्तायां शब्दमा०।

सूक्त न० सु+वच-भावे क्त। १सुन्दरकथने २विशिष्टैकार्थ-प्रतिपादके एकदैवत्ये वेदमन्त्रसमुदाये च यथा श्रीसूक्तं पुरुषसूक्तमित्यादि। तानि च वेदे बह्वनि सन्ति तत्र मन्त्रादानोपयोगीनि कति चित् सूक्तानि ब्रह्मादिनादि पद्धतौ अस्माभिः उद्धृतानि तानि च तत्र द्रष्टव्यानि। "जघन्यानि सूक्तानि तथैव वैषाम्" भट्टिः। ३शारिकायां स्त्री त्रिका०। क्लिन्। सूक्ति सुवूचौ स्त्री।

सूक्ष्म न० सूच-मन् सुकच नेट्। १कैतवे २अध्यात्मपदार्थे मेदि० ३अर्थालङ्कारभेदे अलङ्कारशब्दे ४०७पृ० दृष्टम्। ४कनकदत्ते पु० शब्दर०। ५अणुपरिमाणयुते द्रव्यभेदे च त्रि०। [जम्बूद्वीपे रत्नमा०।

सूक्ष्मकृष्णफला स्त्री सूक्ष्मं कृष्णं फलं यस्याः। मध्यम-

सूक्ष्मतण्डुल पु० सूक्ष्मस्तण्डुलोऽस्य। (खसखस) ख्याते क्षुद्रे २पिप्पल्यां स्त्री राजनि०। [कृष्णायोर्वृद्धौ।

सूक्ष्मदर्शिन् त्रि० सूक्ष्मं पश्यति दृश-णिनि। अत्यन्तसूक्ष्मे

सूक्ष्मपत्र पु० सूक्ष्मं पत्रमस्य। १धन्यके २वनजीरके ३देवसर्षपे ४लघुपत्रे ५शरपर्णे हलोक्षितेक्षौ च राजनि०। ७अनवर्ण्यां दर्वाचलक्षे शब्दर०। कप् अत इत्वम्। सूक्ष्मपत्रिका शतपुष्पायां शतावर्य्यां क्षुद्रवाक्ष्यां दुरालभायाम् आकाशमांस्यां च स्त्री राजनि०।

सूक्ष्मपिप्पली स्त्री कर्म०। वनपिप्पल्याम् राजनि०।

सूक्ष्मपुष्पी स्त्री सूक्ष्माणि पुष्पाण्यस्याः ङीप्। यवतिक्तायाम् राजनि०। [२भूकदम्बे राजनि०।

सूक्ष्मफला स्त्री सूक्ष्मं फलमस्याः। १भव्यामलक्याम् रत्नमा०

सूक्ष्मबदरी स्त्री कर्म०। भूमिबदर्य्याम् राजनि०।

सूक्ष्मभूत न० कर्म०। वेदान्तप्रसिद्धे अपञ्चीकृते भूम्यादीनां पञ्चानां भूतानां सूक्ष्मांशभेदे। [मशके राजनि०।

सूक्ष्ममक्षिक पु० सूक्ष्मा मक्षिका तदाकारोऽस्यास्य अच्।

सूक्ष्ममूला स्त्री सूक्ष्मं मूलमस्याः। अजन्यां राजनि०।

सूक्ष्मवल्ली स्त्री कर्म०। १ताम्रवल्ल्यां २लतकायाञ्च राजनि०।

सूक्ष्मबीज पु० सूक्ष्मं बीजमस्य। (खसखस) ख्याते क्षुद्रे राजनि०।

सूक्ष्मशर्करा स्त्री कर्म०। वालुकायाम् राजनि०।

सूक्ष्मशाख पु० सूक्ष्मा शाखाऽस्य। जलवर्षुरे राजनि०।

सूक्ष्मशालि पु० कर्म०। अणुधान्ये श्यामाकादौ राजनि०।

सूच्यषट्चरण पु० सूच्याः षट्चरण इव । पक्षियूके राजनि०

सूच्या स्त्री सूच-मन् सुक्च नेट् टाप् । १यूचिकायां भट्टच० । २चुद्रैलायां २करञ्जां ३वालुकावाञ्च राजनि० ।

सूच्याङ्ग न० कर्म० । "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं सूच्याङ्गं भोगसाधनम्" वेदान्तोक्ते भोगसाधने लोकदयगामिनि लिङ्गदेहे । सूच्यशरीरादयोऽप्यत्र । सांख्यमते त्वन्यविधसप्तदशावयवत्वं यथोक्तं सां० का० तत्त्वकौ० । "सूच्यादेषां नियता मातापित्रजा निवर्त्तन्ते" का० "सूच्यादेहाः परिकल्पिता" तत्त्वकौ० । "परिकल्पिता अनुमिता परलोके कर्मफलभोगः सूच्यादेहं विनाऽनुपपन्नः भोगत्वात् स्थूलदेहारब्धव्यादिजनितस्य सुखस्य स्थूलदेहेनैव भोगवत् स्थूलदेहारब्धकर्मादिफलं यत्तत् स्थूलदेहेनैव भोग्यम् नेतरेण अन्यथा कृतहानाकृताभ्यागमप्रसङ्ग इत्यादिस्तर्कसंस्तावतो वेदः । "पूर्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्यन्तम् । संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्" का० । "प्रधानेनादिसर्गे प्रतिपुरुषमेकैकेन सप्तदशादितम् । अस(श)क्तमव्याहतं शिलामप्यनुविशति नियतम् या चादिसर्गात् या च महाप्रलयादवतिष्ठते महदादिसूक्ष्मपर्यन्तं महदहङ्कारैकादशेन्द्रियपञ्चतन्मात्रपर्यन्तम् एवं सप्तदशावयवः सूच्यशरीरं भावैरधिवासितं लिङ्गैरिन्द्रियैरन्वितत्वादिति" कौ० ।

सूच्यैला स्त्री कर्म० । क्षुद्रैलायाम् (गुजराटी एलाच) रत्नमा०

सूच पैशून्ये (अनर्थोद्भावने) भ्वा० पु० उभ० सक० सेट् । सूचयति ते अमुसूचत् त । बहुसूचत्वाच्च लोपदेशः ।

सूचक वि० सूचयति अनर्थोद्भावयति सूच-ण्वुल् । १पिशुने अमरः अनर्थोद्भावयति २बोधके च । २काके ३कङ्कुरे ४विडाले पुंस्त्री० मेदि० स्त्रियां ङीष् । ५पिशाचे ७अशुभसूचके दर्शके भट्टर० । ८नाटकप्रसिद्धे सूत्रधाराख्ये प्रधाननटे १०कथके हेमच० ११सूच्यग्राही पु० राजनि० १२जीवनसाधनद्रव्ये पु० मेदि० ।

सूचन न० सूच-भावे ल्युट् । १क्षिपने २ज्ञापने च । युच् । तत्र दृष्टौ पीड़ायाम् अभिनये च स्त्री विश्वः ।

सूचि(ची) स्त्री सूच-इन् वा ङीष् । १सीवनसाधने सूनामख्याते लौहमयपदार्थे अमरः २शिखायां ३लतामेदे रत्नको० । [ओविनि (दरजि) भट्टर० ।

सूचिक वि० सूचिः तया सीवनं शिल्पमस्यास्य ठन् । सूच्याजीविनि (दरजि) भट्टर० ।

सूचिका स्त्री सूचि+स्वार्थे क । १सूच्याम् । सूचिरिव कायति कै-क । २क्षिप्तिकायाम् । सूचिकाधरः ।

सूचिकाधर पुंस्त्री० सूचिवत् सूक्ष्मं धरति धृ-अच् । गजे भट्टर० स्त्रियां ङीष् ।

सूचिकाभरण न० वैद्यकोक्ते औषधभेदे तत्पाकादि यथा "विषं पलमितं क्षुतः शाखकपूर्णयेद् दृयम् । तत्पूर्णं संपुटे कृत्वा काचलिप्तपुरावयोः । सुद्रां कृत्वाथ संशोष्य ततश्चूर्णं निवेशयेत् । वह्निं मनैः मनैः कुर्यात् प्रहरद्वयसङ्ख्यया । तत उद्धाटयेत् तन्मुद्रासपरिस्थपुरावकात् । संलग्नो यो भवेद्भस्म सूक्ष्मोयाच्चनैः मनैः । वायुस्पर्शो यथा न स्यात्ततः कूप्यां निवेशयेत् । यावत् सूच्या समे जाते कूप्यां निर्याति भेषजम् । तावन्मात्रो रसो देयो मूर्च्छिते सन्निपातिनि । सुरेण प्रहते मूर्ध्नि तत्राङ्गुल्या च मर्दयेत् । रक्तभेषजसम्पर्कात् मूर्च्छितोऽपि हि जीवति । तथैव सर्पदष्टोऽपि मृतावस्थोऽपि जीवति । यदा तापो भवेत्तस्य मधुरं तत्र दीयते भेषजरत्नम् । "विषं पलं रसं भार्यं तच्चूर्णं काचलेपिते । मृत्संपुटे च संरुध्य चूल्यां संस्थाप्य पाचयेत् । मनैर्वाह्नयं पक्त्वा तं मृत्संपुटं शीतलम् । ऊर्ध्वपातनतं धूमं सङ्गृह्याऽऽहरेत्ततः । यावत् सूच्या समे जाते कूप्यां याति भेषजम् । सुरेण प्रहते शीर्षे तत्राङ्गुल्या च मर्दयेत् । त्रिदोषे मूर्च्छितो जीवो रक्तभेषजसङ्गमात् । सर्पदष्टो मृतावस्थः सोऽपि जीवति तत्क्षणात् । दद्यात्र मधुरं तोयं सूचिकाभरणे रसे" इति रसप्रदीपः ।

सूचिकामुख पु० सूचिवेव क्रमसूक्ष्मं सुखमस्य । १यज्ञे डाराः हृत० । २क्षुद्रास्त्रे न० ।

सूचि(ची)क्षेत्र न० सूच्याकारं क्षेत्रम् । बीजावतीप्रसिद्धे सूच्याकारके क्षेत्रभेदे क्षेत्रशब्दे २४०० पृ० दृश्यम् ।

सूचित वि० सूच-क्त । १कथिते २बोधिते ३क्षिप्तिते च ।

सूचिपत्रक पु० सूचिरिव पत्रमस्य कप् । सितावरशाके राजनि० । सूचीदलादयोऽप्यत्र ।

सूचिपुष्प पु० सूच्याकारं पुष्पं पुष्पाख्यं यस्य । केतकवृक्षे जटा० । सूचीपुष्पादयोऽप्यत्र ।

सूचिरोमन् पु० सूचिरिव रोमाऽस्य । वराहे डाराः सूचीरोमन् तत्रार्थे त्रिका० । [वः । गरुड़े भट्टर० ।

सूचिवत् पु० सूचिरिव तदाकारचञ्चुरस्यास्य मतुप् वत्वं मस्य

सूचिवदन पुंस्त्री० सूचिरिव वदनं यस्य । १मत्स्ये स्त्रियां जातित्वात् ङीष् । २मशके पु० राजनि० ।

सूचिशालि पु० कर्म० । सूक्ष्मधान्ये श्यामाकादौ राजनि० ।

सूचीकटाह पु० न्यायभेदे न्यायशब्दे ४।१७० पृ० दृश्यम्।

सूचीपत्रा स्त्री सूचीव पत्रमस्याः। गरुडदूर्वायाम् राजनि०

सूचीमुख सूचीव मुखमस्य। १खितकृमे राजनि०। २झींरके न० हेमच०। ३तृ०। ४सूच्याकृतौ न०।

सूच्यग्रमूलक पु० सूच्यग्रमिव स्थूलः स्वार्थे क। (जंगुखड़)

तृणभेदे रत्नमा०।

सूच्यास्य पुंस्त्री० सूचीव आस्यमस्य। १मूषिके हेमच० स्त्रियां ङीपभावात् टाप्। ३तृ०। २सूच्या अग्रे न०।

सूच्याह्व पु० सूच्या आह्वा आह्वा यस्य। सितावरके हेमच०।

सूत पु० सू-प्रसवे प्रेरणे ऐश्वर्ये वा क्त। १सूर्ये अनेकार्थको०। २रथकृति २क्षत्रियजाते ब्राह्मणीगर्भजे वर्णसङ्करभेदे ४त्वष्टरि ५सारथौ ७वन्दिनि मेदि० ७अमात्ये ८पारदे पुंन०अमरः। ९प्रसूते १०प्रेरिते च त्रि०। ११सोमहर्षणाख्ये पुराणवक्तरि च तदुत्पत्तिकथा

"सत्राले सूतमासीनं नैमिषीया महर्षयः। पुराणसंहितां पुण्यां पप्रच्छुर्लोमहर्षणम्। त्वया सूत! महाबुद्धे भगवान् ब्रह्मवित्तमः। दृष्टिहासं पुराणार्थं व्यासः सम्यगुपार्जितः। तच्च ते सर्वरोमाणि वचसा कृपितानि यत्। ह्रैपायनस्य भगवांस्ततो वै रोमहर्षणः। भवन्तमेव भगवान् व्याजहार स्वयं प्रभुः। तपोनां संहितां वक्तुं व्यासः पौराणिकीं पुरा। त्वं हि सायम्भुवे यज्ञे सूत्याहे वितते सति। संभूतः संहितां वक्तुं सांशेन पुरुषोत्तम!" लोमे १अ०। "ब्रह्मणः पौष्करे यज्ञे सूत्याहे वितते सति। पृथदाख्यात् सस्तुपद्मः सूतः पौराणिको द्विजः। वक्ता वेदादिशास्त्राणां त्रिकालामलतत्त्ववित्। तीर्थयात्राप्रसङ्गेन नैमिषारण्यमागमत्" वह्निपु० १अ०।

जातिभेदसूतोत्पत्तिकथा "इक्ष्वे तु दक्षिणे पक्षे हृदा तस्य पितामहः। विष्णोरग्रं पृथुं मत्वा परितोषं परं ययौ। तस्य वै जातमात्रस्य यज्ञे वैतामहे शुभे। सूतः सूत्यां सस्तुपद्मः सौत्येऽहनि महामते!। तस्मिन्नेव महायज्ञे ब्रह्मणो मागधः। प्रोक्तौ तदा सनिवरैस्तावुभौ सूतमागधौ। सूयतामेष नृपतिः पृथुर्वैन्यः प्रतापवान्" विष्णुपु० १अंशे १३अ०। "एतस्मिन्नेव काले तु यज्ञे वैतामहे शुभे। सूतः सूत्यां सस्तुपद्मः सौत्येऽहनि पुराणवित्। तेषां यज्ञे पुनस्तेषां सस्तुपद्मौ सूतमागधौ। पृथोःस्तवार्थं तौ तत्र समाहूतौ महर्षिभिः। ते ऊचुर्ब्रह्मणः सर्वं स्तूयतामेष पार्थिवः। तैरियुक्तौ-ऽब्रूतां कर्माणि पृथोर्यानि महात्मनः। तदुभौ संस्तवे सर्वाण्यकार्षीत्तां ततः परान्। तयोस्तुष्टस्तदा प्रीतः पृथुः प्रादात् जनेश्वरः" वह्निपु०। "क्षत्रियादिप्रकन्यायां सूतो भवति जातितः"। "सूतानामश्वसारथ्यमम्बष्ठानां चिकित्सितम्" मनुः।

सूततनय पु० सूतस्य तनयः। भारतप्रसिद्धे राधेये कर्णे हेमच०। सूतपुत्रादयोऽप्यत्र। तस्य सूतपालितत्वात्तथात्वम्

सूति स्त्री सू+क्तिन्। १प्रसवे "प्रसवैः सूतिमाकृतैः" स्मृतिः सूयते कर्मणि सोमोऽस्यां सू-आधारे क्तिन्। २सोमाभिषवभूमौ श्रीधरः।

सूतिका स्त्री सू-क्त स्वार्थे क अत इत्त्वम्। नवप्रसूतायां स्त्रियाम् "उदक्यां सूतिकां विना" इति स्मृतिः।

सूतिकागार न० सूतिकाया निवासयोग्यमगारम्। सूतिकागृहे अमरः। सूतिकागृहादयोऽप्यत्र।

तत्करणप्रकारस्तु हेमाद्रौ यौगु० उक्तो यथा

"उक्तश्च श्रीपतिना पुनर्वसौ च सूतिकागृहस्य निर्मितिः शुभा। विरञ्चिविष्णुभास्करे प्रवेशनं क्षितं भवेत्" इति। विरञ्चिरभिजिन्नक्षत्रम् अन्तरे मध्ये विरञ्चिविष्णुतारयोरित्येव सप्तम्या अधिकरणत्वे बोधिते अन्तरपदाक्षिप्तः सूतार्थः। तदेतदब्राह्मणव्यतिरिक्तवर्णत्रयविषयम्। यदाह लल्लः "पुनर्वसौ नृपादीनां कर्त्तव्यं सूतिकागृहम्। अश्वाभिजितोर्मध्ये प्रवेशं तत्र कारयेत्" इति। आवश्यकत्वे तु अश्वाभिजितोर्बहिर्वा तदुदयो याह्यः वा इत्यर्थः। ब्राह्मणस्य तु मागुक्तनक्षत्रेष्वेव सूतिकागृहनिर्माणप्रवेशौ तत्र सूतिकागृहं नैर्ऋत्यां कार्यम्। यदाह हरिवंशेः "ऐन्द्र्यां तु विक्रमस्थानमाग्नेय्यां पचनालयः। याम्यायां भोजनस्थानं नैर्ऋत्यां सूतिकागृहम्। वायव्यां पशुसंस्थानं वायव्यां पशुमन्दिरम्। कौबेर्यां तु धनस्थानम् ऐशान्यां देवतालयः" इति। सूतिमाक्षरे गर्गः "वारेऽनुकूले राशौ तु दिने दोषविवर्जिते। जातकुक्षिदिने प्रोक्तं सूतिकाभवनं बुधैः" इति। कालनियमश्च तत्रो रत्नकोशे "आसन्नप्रसवे मासि कुर्यादेव विशेषतः। तदत्र प्रसवकाले आदिति प्राज्ञेषु निश्चयः" इति। वराहेणाप्यनेकनक्षत्राणामभिधानं कृतं यथा "इन्द्रादित्यमरुत्तिग्मपवनप्राज्येषमित्रोत्तराश्विन्यश्वेषु हस्तिकघटौ स्थित्वा विरिञ्चे तिथौ। शुक्राचार्यशनैश्चरज्ञ शशिनां वारेऽनुकूले विधौ सद्भिर्लग्नबलान्वितैः सुतिकागृहविधिः क्षेमङ्करः कीर्त्यते" इति। वह्निपु० चतुर्थस्थाने

वृद्धिः शुभग्रहैः। सूतिकागृहप्रवेशे कालविशेषमाह ज्योतिर्विशिष्टः "अथातः सम्प्रवक्ष्यामि सूतिकागार-वेशनम्। मासे तु नवमे प्राप्ते पूर्वपक्षे शुभे दिने। प्रसूतिसम्भवे काले सद्य एव प्रवेशयेत्" इति। पूर्वपक्षे शुक्लपक्षे नक्षत्रादीन्याह गर्गः "रोहिण्यैन्द्रवपौष्णेषु स्वातीवारुणयोरपि। शुभे पुनर्वसौ हस्तधनिष्ठा त्रुत्त-त्तरासु च" इति। "मैत्रत्वाष्ट्रे तथाश्विन्यां सूतिकागार-वेशनम्। सर्वे शुभग्रहाः केन्द्रे पापाश्च त्रिषडायगाः। शुभांशे शुभसंदृष्टौ सूतिकागारवेशनमिति"। तदाकारमाह भावप्र० "अष्टहस्तायतं चारु चतुर्हस्तविशा-लकम्। प्राचीद्वारसदग्द्वारं विदध्यात् सूतिकागृहम्"।

सूतिकारोग पु० ६त०। भावप्र० उक्ते रोगभेदे तन्निदानादि यथा "मिथ्योपचारात् संक्लेशात् विषमा-जीर्णभोजनात्। सूतिकायासु ये रोगा जायन्ते दारु-णाश्च ते"। मिथ्योपचारात् अनुचिताचरणात् प्रवा-तादिसेवनात्। संक्लेशात् संक्लिश्यन्ते दोषा अनेन इति संक्लेशः दोषजनकमन्नं तस्मात्। दारुणाः कष्टसाध्याः। के ते व्याधय इत्याकाङ्क्षायामाह "अङ्गमर्दो ज्वरः कासः पिपासा गुरुगात्रता। शोथः शूलातिसारौ च सूतिका-रोगलक्षणम्। एतेऽङ्गमर्दादयः प्रायेण सूतिकाया भवन्तः सूतिकारोगत्वेन लक्ष्यन्ते। ज्वरादीनां रोग-विशेषाणां निदानविशेषमाह "ज्वरातीसारशोथाश्च शू-लानाहक्लमक्लमाः। तन्द्रारुचिप्रसेकाद्या वातश्लेष्म-सम्भवाः। कृच्छ्रसाध्या हि ते रोगाः क्षीणमांसबला-श्रिताः। ते सर्वे सूतिकानाम्ना रोगास्ते चाप्युपद्रवाः" सूतिकाभवत्वेन सूतिकानाम्ना ते रोगाः आश्रयाश्रित-योरभेदोपचारात् ते चाप्युपद्रवा इति त एव ज्वरादयः उक्तानां रोगानामन्यतमं प्रधानीकृत्योपद्रवाश्च"।

सूतिकाषष्ठी स्त्री सूतिकाष्टके पूज्या षष्ठी शाक०। सूतिका-गारे प्रसवावधि षष्ठे दिवसे पूज्यायां षष्ठीदेव्याम्। व० आह "विष्णुधर्मोत्तरे "सूतिकावासनिलया जन्मदा नाम देवताः। तासां यागनिमित्तार्थं शुद्धिर्जन्मनि कीर्तिता। षष्ठेऽह्नि रात्रियागन्तु जन्मदानाञ्च कारयेत्। रक्षणीया सदा षष्ठी निशां तत्र विशेषतः। राम! जागरणं कार्यं जन्मदानां तथा बलिः"। रामेति सम्बोधनम्। तथा-शौचान्तरदोषोऽपि नास्ति। "अशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत्। कर्तुश्चात्मानिकी शुद्धिः पूर्वा-शौचादिशुध्यति" इति प्रजापतिवचनात्। पुत्रजन्मेति अवधात् पितुरेवाशौचाभावः न तु मातुः कर्तुरिति पुंस्त्वनिर्देशाच्च। कारयेदिति अन्यगोत्रजाभिप्रायेण। तत्रादौ विनायकादिसहितषोडशमातृकापूजनम्। तथा च ऋक्षचिन्तामणौ "जागरन्तु कार्यं षड्गो धार्यः समीपतः। आवाह्य पूजयेद्देवीं गणेशं मातृका गिरिम्"। देवीं षष्ठीम्। गिरिं मन्थानदण्डम्। भोज-राजः "गणेशश्चैव नन्दा च पूतना सुखमण्डिका। विशा-लिका शकुलिका शुष्कनन्दा च जम्भिका। आचार्यका रेवती च पिलिपिच्छा ततः परम्। स्कन्दा च द्वादशैते-ऽत्र्याः रक्षार्थं मातृका मताः" ज्यो०त०। [अमरः।

सूत्थान त्रि० सुष्ठु उत्थानम् उद्योगो यस्य। चतुरे कर्मकुशले

सूत्पर न० सु+उत्+पॄ-अप्। सुरासन्धाने शब्दच०।

सूत्या स्त्री सू-क्यप् नि०। यज्ञाङ्गस्नानभेदे २अभिषवे सोम-रसनिष्पीडने च अमरः।

सूत्याशौच न० सूतिनिमित्तकमाशौचम्। जननाशौचे "भावाशौचं न कर्त्तव्यं सूत्याशौचं विधीयते" स्मृतिः।

सूत्र अन्यने वेष्टने च भ्वा०चु०उभ०सक०सेट्। सूत्रयति ते असूसूत्रत त। बहुच्कत्वात् न धोपदेशः।

सूत्र न० सूत्र-अच्। १वस्त्रसाधने तन्तौ २व्यवस्थायां ३नाट-कोपकरणे प्रस्तावे "अल्पाक्षरमसन्दिग्धं सारवत् विश्व-तोमुखम्। अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः" इत्युक्ते शास्त्रवाक्यभेदे च।

सूत्रकण्ठ पु० सूत्रं यज्ञसूत्रं तदिव वा कण्ठे यस्य। १विप्रे २कपोते ३खञ्जरीटे च मेदि०। [तत्रार्थे त्रिका०।

सूत्रकोण पु० सूत्रवद्वः कोणोऽस्य। डमरौ डाराः कए।

सूत्रगण्डिका स्त्री सूत्रं गण्डयति गण्ड-ण्वुल्। तन्तु-वायोपकरणभेदे एषस्यां शब्दमा०।

सूत्रतन्तु पु० सूत्रमेव तन्तुः। सूत्राकारे तन्तौ हेमच०।

सूत्रतर्कुटी स्त्री सूत्रसहिता तर्कुटी। (टेको) पदार्थे जटा०

सूत्रधार पु० सूत्रं नाट्यसाधनं धारयति धृ-णिच्-अच्। नाट्यसाधनयुक्ते नाटकप्रस्तावके १प्रधाननटे।

"नाट्योपकरणादीनि सूत्रमित्यभिधीयते। सूत्रं धार-यतीत्यर्थे सूत्रधारो मतो बुधैः" इति तल्लक्षणं "पूर्वरङ्ग विधायैव सूत्रधारो निवर्त्तते" सा० द०। "सूत्रधारेण सहिताः संलापं यत्र कुर्वते" दशरूपकम्। २इन्द्रे ३शिल्पिभेदे (छुतार) च। शिल्पभेदसूत्रधारश्च मूढागर्भे विश्वकर्मणा जातो जातिभेदः ब्रह्मवै०ब्रह्मख०१०अ०।

सूत्रपुष्प पु० सूत्रगर्भं पुष्पं यस्य। कार्पासे त्रिका०।

सूत्रभिद् पु० सूत्रं भिनत्ति सूत्रा, भिद-क्विप्। सूत्राजीवे (दरजी) शब्दर०। [शब्दच०।

सूत्रमध्यभू पु० सूत्रमध्यमिव भवति भू-क्विप्। यज्ञधूपे

सूत्रयन्त्र न०सूत्रवयनं यन्त्रम् शाक०। (ताँत) सूत्रवायनयन्त्रे शब्दमा०। [हारा०।

सूत्रला स्त्री सूत्रं लाति-ला-क। तकुटंट्राम (टेकी)

सूत्रवीणा स्त्री सूत्रवद्वा वीणा शाक०। वीणाभेदे हारा०।

सूत्रवेष्टन न० सूत्रं वेष्ट्यतेऽनेन वेष्ट-करणे ल्युट्। तन्तुवायोपकरणभेदे तसरे (तासनी) अमरः।

सूत्रात्मन् पु० सूत्रमिव सर्वानुस्यूत आत्मा स्वरूपं यस्य। समष्ट्युपहितचैतन्ये हिरण्यगर्भे वेदा०सा०। [पक्षिः।

सूत्रामन् पु० रन्द्रे अमरे पाठान्तरम्। सुत्रामन् शब्दे व्युत्

सूत्राली स्त्री ६त०। १सूत्रस्य श्रेणौ २गजमेखलायां हारा०।

सूत्रिन् त्रि० सूत्र+अस्त्यर्थे इनि। १सूत्रविशिष्टे स्त्रियां ङीप्। २काके पु० त्रिका०।

सूद् पु० सूदयति पचनं पाकार्थं सूद-क्विप्। १सूपकारके २व्यञ्जनभेदे सूपे अमरः। ३सारथ्ये ४अपराधे ५क्षोभे ६पापे च अजयः। [च।

सूदन न०सूद-भावे ल्युट्। १हिंसने २निःक्षेपे ३अङ्गीकारे

सूदशाला स्त्री सूदाधिष्ठिता शाला शाक०। पाकशालायाम् पाचकशब्दे ४२४६ पृ० विवरणम्।

सूदाध्यक्ष पु० ६त०। पाकशालाध्यक्षे तल्लक्षणं यथा "अनाढ्यः शुचिर्दक्षश्चित्रिकित्सितविदांवरः। सूदशास्त्रविशेषज्ञः सूदाध्यक्षः प्रशस्यते" पाचकशब्दे तल्लक्षणादि ४२८६ पृ० दृश्यम्।

सून न० सू-क्त तस्य नः। १क्षये २प्रसवे च। कर्त्तरि-क्त। २विनाशिते त्रि० मेदि० ३जाते च।

सूना स्त्री सू-क्त तस्य नः। १प्राण्यिवध स्थाने "पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः। कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन्" मनुः ३तनयायां ३गजाद्यूढायां मेदि० ४मांसविक्रये च मल्लिनाथः। [५कन्यायां स्त्री या जङ् हेमच०।

सून पु० सू-क्त। १पुत्रे २अनुजे ३सूर्य्ये मेदि० ४अर्कवृक्षे च।

सूनृत न० शोभनमृतं यत्र सु-ऋत-अच्प्रत्ययेन क। १सत्ये प्रिये वाक्ये अमरः। २मधुरे च ३तद्वति त्रि० अमरः।

सूप पु० सुखेन पीयते सु+पा-बाहुलकात् क पृषो०। (दालि) व्यञ्जनभेदे जतान्नशब्दे २१८१ पृ० दृश्यम्। सुष्ठु पचति सु+पच-मूलवि० क। २सूपकारे पाचके मेदि०। ३आधारे क। ४भाण्डे। सूद-करणे क पृषो०। ५वायवे शब्दर०।

सूपकार त्रि०सूपं करोति कृ-अण्। पाचके अमरः। पाचकशब्दे ४२८६ पृ० दृश्यम्।

सूपधूपन न० सूपो धूप्यतेऽनेन धूप-करणे ल्युट्। १क्रिक्कौ त्रिका० सूपपाके च क्रिक्कूपदानं पाकशास्त्रे प्रसिद्धम्।

सूपपर्णी स्त्री सूपसाधनस्य सहस्रस्येव पर्णमस्याः ङीप्। सहस्रपर्णायाम् रत्नमा०।

सूपश्रेष्ठ पु० सूपेषु तत्साधनेषु श्रेष्ठः। सहे राजनि०।

सूपाङ्ग न० सूपस्य तत्संस्कारकमङ्गसदृशकरत्वम्। क्रिक्कौ राजनि०।

सूम न० सू-मक्। १आकाशे २क्षीरे मेदि०। ३जले शब्दर०।

सूर पु० सरति प्रेरयति कर्म्मणि लोकानुदयेन सू-क्रन्। १सूर्य्ये २अर्कवृक्षे च अमरः। सूर-क। ३पण्डिते ४अञ्जनभेदे पु० हेमच०। "सूर्योदयं विना नैव स्नानदानादिका क्रिया सत्युक्ते सूर्योदयेन लोकानां सर्वकर्मप्रवर्त्तकत्वात्तथात्वम्।

सूरण पु० सूर-ल्युट्। सूरणे (ओल) शब्दरत्ना०। "मकरे मूलकञ्चैव सिंहे चालावुकं तथा। कार्त्तिके (वृ)सूरणञ्चैव सर्वो गोमांसभक्षणम्" कर्मलो०।

सूरत त्रि० सु+रम-क्त पृषो०। दक्षे अमरः।

सूरसूत पु० ६त०। अरुणे गरुडाग्रजे सूर्य्यसारथौ अमरः। अरुणशब्दे १६१ पृ० दृश्यम्।

सूरि पु० सू-क्रिन्। १सूर्य्ये २अर्कवृक्षे ३क्षादवभेदे ४पण्डिते च अमरः "सदा पश्यन्ति सूरयः" इति श्रुतिः। ४राजवर्य्ये स्त्री ङीप् रत्नमा०।

सूरिन् पु० सूर-णिनि। पण्डिते शब्दर०।

सूर्(षूर्)च(र्च्छ) अनादरे भ्वा०पर०सक०सेट्। सूर्च्छ(र्छ)ति अषूर्छीं(र्छीं)त्व योपदेश एव न्यायः।

सूर्च्छ पु० सूर्च्छ-कर्मणि घञ्। माषे (कलाई) शब्दर०।

सूर्च्छ(र्च्छी)ण न० सूर्च्छ(र्छ) भावे ल्युट्। अनादरे।

सूर्प पुंन०। सूर्प-पृषो० शस्य षः। १सूर्पशब्दार्थे शब्दर०। २कुम्भपरिमाणे ३द्रोणपरिमाणे च हैमकरः।

सूर्पणखा स्त्री सूर्प इव नखा अस्याः पृषो० शस्य षः अलम्। रावणभगिन्याम्।

सूर्म्मि स्त्री सूर्मि+पृषो० शस्य षः। सूर्मिशब्दार्थे वा ङीप्।

सूर्य्य पु० सू-क्यप् निं०। १दिवाकरे २अर्कवृक्षे अमरः। ३दानवभेदे वज्रिपु० ४अर्कपर्णवृक्षे मेदि०।

सूर्य्यषष्ठ्यादिव्रत खगोलशब्दे २४२५ पृ० दृश्यम्। तस्य प्रकृतिस्वरूपादिकं सर्वोक्तिः उक्तं यथा

"भानुर्भास्वान्भास्करोऽर्कः खद्योतः पिङ्गलेक्षणः। पित्तात्मकोऽयं सुमनाश्चतुरः प्रतापयुक् सत्त्वगुणोऽल्परोमा। सञ्चारयुक् सङ्कुचितार्थवाक्यः खड्गप्रियो दैविकबुद्धियुक्तः"। स च प्राच्या दिशः स्वामी। ईषद्रक्तः क्षत्रियजातीयः अस्थिसारः देवस्तेजश्च। इदञ्जातके तद्दोषाद्याश्च मूलं द्रष्टव्यम्। पदवयशब्दे तन्मन्त्रभेदादिकं द्रष्टव्यम्। जन्मकाले लग्नादिकस्थस्य तस्य फलं जातकपद्धतावुक्तं यथा

"लग्ने सूर्ये खलक्षेयः प्रचण्डो मानी क्रोधी नेत्ररुङ् निष्ठुरश्च। शूरोऽज्ञानस्यात्मजः कर्कशाङ्गो नीचे निःस्वो भूपतोऽप्यल्पहीनः। धनेऽर्के दिनेशे वक्रवित्तभ्रष्टश्चतुष्पादाढ्योऽपि नरो भवेत् सः। विनष्टसौभाग्यसुखो व्रणालेखोरेर्हृतार्थो सुखरागदुःखी। सङ्खरज्ञो सङ्गजः स्वकाष्ठा धीविक्रमैर्लोकमनोभिरामः। विनष्टबन्धादरजो नरः स्याद्दृष्टारिपक्षश्च विनाशकश्च। मित्रे मित्रेऽवन्ध्यमर्कोऽनैः स्याद्दीनः सौख्यधीनसौत्यैश्च हीनः। तातास्यादेर्नाशकारी नरो वै सेवाकारो भूपतेः कुत्सितश्च। भानौ भानौ भानुसौख्यैर्हीनो दुर्गारण्यक्षाधरेषूपरक्तः। मेधायुक्तो मन्त्रसस्याग्रगण्यस्तत्सस्यावुर्वे जायते मानवोऽयम्। कुत्सद्गडनशत्रौ शत्रुभावंह् प्रयाते भवति नरपतिर्वा दण्डनेता धनाढ्यः। प्रबलजठरवह्निर्भूरिकामा गुणो वै वनरिपुसहितः स्यात् पूरुषः केचिदेवम्। भार्यांभावे च भास्करे चाग्निभूतो भार्यांभिर्वै हीनकालोऽगाढ्यः। भूगाद्वन्धे पीड़ितोऽर्थागमो स्त्रीहीनो मानवः शीतहीनः। निधनगे च नलिनीदयिते नरो नयनव्याधिकश्चलवृतो भवेत्। तद्धनात्मजशोचितसौख्यमानभिमतेन जनेन वियोजितः। धर्मस्थिते धर्मकरे धनेन जनेन युक्तो वक्रमितपुत्रः। भूदेवेन्द्रारकेन्द्वग्निः पितृप्रियो वैरकरः सदृढः। गगनगे गगनस्थ मर्त्यो नरो मतिधनात्मजवैभवसौख्ययुक्। रतिबलसुतकार्यसङ्गभाग् भवति वाहनवान् नृपसदृसुखः। प्राप्तिस्थाने सप्तगो नरः स्यात् प्राप्ता वित्तस्याद्य दृष्ट्वा समेतः। मन्त्री हेयः सङ्गजः सिद्धकर्मा क्रूरो ज्ञानान्निर्जितो वक्त्रभेदः। व्ययेऽर्के नरः स्याद्यः पितृद्वेषी बन्धोर्ज्ञिवरः। बन्ध्यापतिर्विश्वासाक्रुद्धुस्तु पतितो भवेत्"। मेषादिस्थस्य तस्य फलं जातकशब्दे २०८८ पृ० द्रष्टव्यम्।

सूर्यकान्त पु० सूर्यस्य कान्तः प्रियः। १स्फटिकमणौ हेमा० २सूर्यसम्बन्धात् यत्कान्तिवस्त्वाकर्षिन् (आतशी) मणौ च हेमच०।

सूर्यकान्ति पु० सूर्यस्य कान्तिर्यत्र। यत्रस्थां पुष्परागादिरत्नविशेषे शब्दच०। ६त०। २सूर्यस्य दीप्तौ स्त्री।

सूर्यकाल पु० सूर्यौपलक्षितः कालः शाक०। दिवसे शब्दच०।

सूर्यग्रहण न० सूर्यस्य राहुणा तदाक्रान्तभुक्त्यावया यद्ग्रसनाक्रमणम्। ज्योतिषोक्ते राहुपरिवेष्टभूमिच्छायया सूर्यमण्डलस्य आक्रमणरूपे पर्वणि सूर्यपर्वादयोऽप्यत्र। उपरागशब्दे १२८५ पृ० द्रष्टव्यम्।

सूर्यज पु० सूर्यात् जायते जन-ड। १शनिपक्षे २यमे ३वैवस्वते मनौ ४सुग्रीवेवानरे च अटा०। सूर्यसुतादयोऽप्यत्र। ५यमुनायां स्त्री हेमच०। ६कर्णे पु०।

सूर्यपत्र पु० सूर्यस्य इव रक्तं पत्रमस्य। आदित्यपत्रे राजनि०।

सूर्यभक्त पु० सूर्यस्य भक्त इव प्रियः। १बन्धूकवृक्षे। ६त०। २सूर्यभक्तियुते त्रि० मेदि०। [२पुष्पवृक्षे शब्दच०।

सूर्यमणि पु० सूर्यप्रियः मणिः। १सूर्यकान्तमणौ हेमच०।

सूर्यलता स्त्री सूर्यभक्ता लता। आदित्यभक्तायाम् राजनि०।

सूर्यवल्ली स्त्री सूर्यतुल्यपुष्पिका वल्ली। अर्कपुष्पिकाख्ये वृक्ष०

सूर्यसारथि पु० ६त०। अरुणे गरुड़ापत्ये शब्दच०। सूर्यसूतादयोऽप्यत्र।

सूर्या स्त्री सूर्यस्य भार्या टाप्। १अश्वानुयां संज्ञायाञ्च सूर्यभार्यायाम्। मानुष्यां कृत्यान्तु ङीपि। सूरीत्येव।

सूर्यालोक पु० ६त०। आतपे रौद्रे राजनि०।

सूर्यावर्त्त पु० सूर्यं प्रदक्षिणं वर्त्तते वृत्+घञ्-अच्। (डड़ुङड़िया) २क्षुपभेदे (सुकफिया) २शाके च रत्नमा०। ३आदित्यभक्तायां स्त्री राजनि०।

सूर्याश्मन् पु० सूर्यप्रियः अश्मा। सूर्यकान्तमणौ हेमच०।

सूर्याह्न पु० सूर्यमाह्वयते आह्वते वर्णेन आ+ह्वे-क। १ताम्रे त्रिका०। सूर्यस्य आह्वाऽऽह्वायश्च। २अर्कवृक्षे पु० राजनि०। [वल्लायाम् अमरः २तथामैलने च।

सूर्येन्दुसङ्गम पु० सूर्यस्य इन्दोश्च सङ्गमः कालः। १अमा-

सूर्याढ्य पु० सूर्यं आढ्योऽधिगतो यत्र। १सूर्याक्षसमयकाले हेमच०। "दिवातिथौ तु विसृष्टे गते यत् पातकं भवेत्। तदेवाष्टगुणं विद्यात् सूर्याढ्ये विसृष्टे गते" या० त०। सूर्यश्च सूर्याक्षकालेन आढ्यः प्राप्तिः यत्र-क्त। २ततृकालागतातिथौ "सूर्याढ्यस्तु स संप्राप्तो यः सूर्यस्तं गतेऽतिथिः" हेमच०। [दासान्न ज्योदेयः।

सृ गतौ स्थितौ च भ्वा० उभ० सक० सेट्। सारयति ते अपुं-

सृ गतौ भ्वादि० परस्मै० सक० अनिट् सरति। असरत् असा-र्षीत् पर्युदासान्न शोपदेशः। "नाखानं करिष्यं सखे" इत्यत्र रघुप्रयोगात् खात्म०। [खाद्य शोपदेशः।

सृ गतौ जु० वैदिकः पर०सक०सेट्। ससर्क्ष असरत् पर्युदा-

सृक पु० सृ-कक्। १केरवे २वाणे उणा०। २पद्मे ४यागो च त्रि० को०।

सृकण्डु पु० सृ-किप् पृषो० कर्म० कण्डुरोगे शब्दर०।

सृकाल पु० सृ-कालन् कस्य नेत्वम्। शृगाले शब्दच०।

सृक्क(न्) न० सृज-कनिन् वा कस्य नेत्वम्। ओष्ठप्रान्त-भागे "सृक्कणी परिलेढि च" स्मृतिः। "मङ्गाहृक्काय शोभितो नर्सिंहवर्दति" श्रुतात् कान्तताप्यस्य।

सृक्वन् न० सृज-क्वनिप्। ओष्ठप्रान्तभागे अमरः। पृषो०। सृक्किन् अप्यत्र अमरः। सृक्किणी तत्रार्थे स्त्री राजनि०

सृग पु० सृ-गक् गस्य नेत्वम्। भिन्दिपालास्त्रे अमरः।

सृगाल पुंस्त्री० सृ-गालन् गस्य नेत्वम्। १जम्बुके (शेयाल) शब्दर०। स्त्रियां ङीष्। २दैत्यभेदे हरिवं०।

सृज विसर्गे त्यागे दिवा० आत्म० अनिट् सक०। सृज्यते असृष्ट। पर्युदासान्न शोपदेशः।

सृज विसर्गे तु० पर०सक०अनिट् सृजति असाक्षीत् ससर्जिथ असृष्ट स्रष्टा स्रक्ष्यति। पर्युदासान्न शोपदेशः।

सृजकाचार पु० सृजति वर्षस्त्रितं सृज-क ततः स्वार्थे क सृजका सर्जिका कर्म०। सर्जिकाचारे रत्नमा०।

सृणि पु० सृ-निक्। १यवो शब्दमा०। २अङ्कुशास्त्रे स्त्री अमरः। तत्र वा ङीष्। सृण्यपि।

सृणि(णी) का स्त्री सृणि+कन् ह्रस्वेन वा। खाद्यार्थे अमरः

सृति स्त्री सृ-भावे क्तिन्। १गमने। करणे क्तिन्। २पथि च मेदि०। [सृंचिप्र०

सृत्वन् पु० सृ-क्वनिप्। १प्रजापतौ चक्त्वन०। २विसर्गे शब्दो

सृत्वर त्रि० सृ-क्वरप्। १गमनकर्त्तरि स्त्रियां ङीप्। सा च २मातरि सृंचिप्रमा०।

सृदर पु० सृ-अरक् दुक् च। सर्पे त्रि० को०।

सृदाकु पु० सृ-काक दुक्च। १वायो २वज्रे ३चन्द्रे ४प्रति-सूर्य्यके मेदि०। ५रङ्गे सृंचिप्र०। नद्यां स्त्री उणा०।

सृप गतौ भ्वा० पर० सक० अनिट्। सर्पति असृप्त। पर्युदासान्न शोपदेशः।

सृपाट पुंस्त्री० सृप-काटन्। १परिमाणभेदे २रत्नधारायां गोवर्द्धनः। स्त्रियां ङीष्। स्वार्थे क अत इत्वम्। सृ-पाटिका। चञ्चौ ऐमच०।

सृप्र पु० सृप-क्रन्। चन्द्रे उणा०। [२गमनशीले त्रि०।

सृमर पुंस्त्री० सृ-अरच्। मृगभेदे अमरः। स्त्रियां ङीष्।

सृष्ट त्रि० सृज-क्त। १निर्मिते २युक्ते ३निक्षिप्ते ४वर्जिते मेदि०। ५भूषिते त्रिका०। दृब्धे च।

सृष्टि स्त्री सृज-क्तिन्। १निर्माणे २त्यागे च मेदि० कर्मणि क्तिन्। ३सृज्यमाने "या सृष्टिः सृष्टुराद्येति शाकुन्तले। ४निर्गुणे शब्दर०।

ब्रह्माण्डसृष्टिप्रकारः नानापुराणेषूक्तः तत्र मत्स्यपु-क्तः प्रकारो यथा

"महाप्रलयकालान्ते एतदासीत्तमोमयम्। अप्रज्ञातमलक्षणम्। अविज्ञेयमविज्ञातं जगत् सुप्तमिवाबभौ। ततः स्वयम्भूरव्यक्तः प्रभवः पुरुष-कर्मणाम्। व्यञ्जयन्नेतदखिलं प्रादुरासीत्तमोनुदः। योऽतीन्द्रियः परो व्यक्तादणुर्व्यक्तात्मा सनातनः। नारा-यण इति ख्यातः स एकः सर्वसम्भवः। यः शरीरा-दभिध्याय विसृजत्यविविधं जगत्। सर्वत्र सर्वतोदृष्टो तासु बीजमवासृजत्। तदेवाण्डं समभवद्धैमं सूर्यसमप्रभम्। संवत्सरमसृष्टेन सूर्यांशुसमप्रभम्। प्रवि-भ्रान्तमहातेजाः स्वयमेवात्मसम्भवः। प्रभावादपि तद्व्याप्य विष्णुत्वमगमद्द्विधा। तदर्द्धमगवानेव सूर्यः समभवत् पुरा। आदित्यत्वादिभूतत्वात् ब्रह्मा ब्रह्म षडङ्गभूत्। दिवं भूमिं समकरोत्तदण्डमध्यवर्त्तिनम्। स चाकरोद्दिशः सर्वा मध्ये व्योम च शाश्वतम्। सरा-युमेरुसमुद्राश्च शैलास्तत्राभवंस्ततः। यदुल्बजदभूत्तत्र खण्डितत्वक्शरीरवत्। नद्योऽण्डनाड्यः सम्भूताः पितरो मनवस्तथा। सप्त येऽमी सप्तदीपा तेऽपि चान्त-र्जलोद्भवाः। सवणेशुतरादाश्च नानारत्नसमन्विताः। स विसृजन्नभूद्देवः प्रजापतिरनिन्दिम!। तस्मेजसश्च त-स्यैव मातरिश्वा समजायत। सृतेऽण्डे जायते यस्मा-न्मातरिश्वेरितेन स सृतः। रजोगुणमयं यत्तद्भूत तस्य महात्मनः। चतुर्मुखः स भगवानभूल्लोकपितामहः। येन सृष्टं जगत्सर्वं स देवासुरमानुषम्। तमवेहि रजोरूपं महत्सत्त्वसमाश्रितम्"। मत्स्यश्च "चतुर्मुख-त्वमगमत् ब्रह्मा लोकपितामहः। कथं तु लोकान्सृ-जेत् ब्रह्मा ब्रह्मविदांवरः"। मत्स्य उवाच "तपश्चार प्रथममसरांसि पितामहः। आविर्भूतास्ततो वेदाः साङ्गोपाङ्गपदक्रमाः। पुराणं सर्वशास्त्राणां प्रथमं ब्र-ह्मणा स्मृतम्। नित्यं शब्दमयं पुण्यं शतकोटिवि-

सारम् । अनन्तरञ्च ब्रह्मभ्यो वेदास्तञ्च विनिःसृताः । मीमांसा न्यायविद्याश्च प्रमाणाष्टकसंयुताः । वेदाभ्यास रतास्ताश्च प्रजाकामस्य मानसाः । मनसा पूर्वसृष्टा वै जाता यत्नेन मानसाः । मरीचिरभवत् पूर्वं ततोऽत्रिर्भगवान् ऋषिः । अङ्गिराश्चाभवत्पश्चात् पुलस्त्यश्चाद-नन्तरम् । ततः पुलहनामा वै ततः क्रतुरजायत । प्रचेताश्च ततः पुत्रो वसिष्ठश्चाभवत् पुनः । पुत्रो भृगु-रभूत्तदनन्तरदोऽत्यचिरादभूत् । दशेमान् मानसान् ब्रह्मा सुतान् पुत्रानजीजनत् । मारीरानथ वक्ष्यामि मातृ-हीनान् प्रजापतेः । स्वशरीरात्क्षणाद्दक्षः प्रजापतिरजा-यत । धर्मः स्तनादभवत् हृदयात् कृष्णमायुधः । भ्रू-मध्यादभवत् क्रोधो लोभश्चाधरदम्पयोः । बुद्धेर्मोहः समभवदहङ्कारादभूत्कदः । प्रमोदश्चाभवत् कण्ठात् खलुर्लोचनतो लय ! । भरतः करमध्यात्तु ब्रह्मणस्तु-रभूत्ततः । एते नव ! सुता राजन् ! कन्या च दशमी पुनः । असूया इति विख्याता दशमी ब्रह्मणः सुता । मनुरुवाच "बुद्धेर्मोहः समभवदिति यत्परिकीर्त्तितम् । अहङ्कारः स्मृतः क्रोधो बुद्धिर्नाम किमुच्यते" । मत्स्य उवाच "सत्त्वं रजस्तमश्चैव गुणत्रयमुदाहृतम् । साम्या-वस्थितिरेतेषां प्रकृतिः परिकीर्त्तिता । केचित् प्रधान मित्यु क्त्वाव्यक्तमपरे जगुः । एतदेव प्रजासृष्टिं करोति विकरोति च । गुणेभ्यः क्षोभमाणेभ्यस्त्रयो देवा वि-जज्ञिरे । एका मूर्त्तिस्त्रयो भागा ब्रह्मविष्णुमहेश्वराः । सविकारात् प्रधानात्तु महत्तत्त्वं प्रजायते । महानिति यतः ख्यातिर्लोकानां जायते सदा । अहङ्कारश्च महतो जायते मानवर्धनः । इन्द्रियाणि ततः पञ्च त्रयो बुद्धि-वशानि तु । प्राङ्मर्भवन्ति चान्यानि तथा कर्मवशानि तु । श्रोत्रं त्वक्चक्षुषी जिह्वा नासिका च यथाक्रमम् । पायूपस्थं हस्तपादं वाक् चेतीन्द्रियसंग्रहः । शब्दः स्पर्शश्च रूपञ्च रसो गन्धश्च पञ्चमः । तन्मात्राणीन्द्रियाद्या-न्यान्याहाप्यतत्क्रियाः । मन एकादशं तेषां कर्मबुद्धि-गुणान्वितम् । इन्द्रियावयवाः सूक्ष्मास्तच्च मूर्तिं मनीषिणः । श्रयन्ति यस्मात्तन्मात्राः शरीरं तेन संस्मृतम् । शरीरयोगात्प्रोक्तोऽपि शरीरी मन्यते बुधैः । मनः सृष्टिं विकुरुते चोद्यमानं विभुक्षया । आकाशं शब्दतन्मात्रा दभूच्छब्दगुणात्मकम् । आकाशविक्रियायुः शब्दस्पर्श गुणोऽभवत् । वायोश्च स्पर्शतन्मात्रात्तस्माद्विरभूत्ततः । त्रिगुणं तद्विकारेण तच्छब्दस्पर्शरूपवत् । तेजो विका-रादभवद्वारि राजंस्तद्गुणं यम् । रसतन्मात्रमभूत्तं प्रायो रसगुणात्मकम् । भूमिस्तु गन्धतन्मात्रादभूत पञ्च-गुणान्विता । प्रायो गन्धगुणा सा तु बुद्धिरेषा गरी-यसी । एभिः सम्भादितं भुङ्क्ते पुरुषः पञ्चविंशकः । दैवैरेष्टावशः सोऽपि जीवात्मा कथ्यते बुधैः । एवं षड्-विंशकं प्रोक्तं शरीरं दृष्ट मानवे । सांख्यं संख्यात्मक-त्वाच्च कपिलादिभिरुच्यते । एतत्तत्त्वात्मकं कृत्वा जग-द्वेधा व्यजीजनत् । सावित्रीं लोकसृष्टिं सृष्टि कृत्वा समास्थितः । ततः संजपतस्तस्य भित्त्वा देहमकल्मषम् । स्त्रीरूपमर्द्धमकरोद्द्वं पुरुषरूपवत् । अतरूपा च सा ख्याता सावित्री च निगद्यते । सरस्वत्यथ गायत्री ब्रह्माणी च परन्तप ! । ततः स्वदेहसम्भूतामात्मजा-मित्यकल्पयत् । दृष्ट्वा तां व्यथितस्तावत्कामबाणादितो विभुः । अहो रूपमहोरूपमिति चाह प्रजापतिः । ततो वसिष्ठप्रमुखाः भगिनीमिति चुक्रुशुः । ब्रह्मा न किञ्चिदवदत्तेन तनूसम्भवलोकनात् । अहो रूपमहोरूप-मिति प्राह पुनः पुनः । ततः प्रधावमानान्तां पुनरेवाभ्य-लोकयत् । अथ प्रदक्षिणं चक्रे सा पितुर्वरवर्णिनी । पुत्रेभ्यो लज्जितस्तांश्च तद्रूपालोकनेच्छया । आवि-र्भूतं ततो वक्त्रं दक्षिणं पार्श्वमुच्छ्रयत् । विस्फारितेक्षणं रक्तं पार्श्वात्पश्चदनात्ततः । चतुर्मुखमभवत्पश्चादाद्यं कामशरातुरम् । ततोऽन्यदभवत्तस्य कामातुरतया तया । तत्तस्मात्तदाकारव्यालोकनकृतूहलात् । तदप्रियं यत् कृतं तेन तपः परमदारुणम् । तत्सर्वं नाशयन्नग-मत् स्वतोपगमेच्छया । तेनोर्ध्वं वक्त्रमभवत्पञ्चमं तस्य धीमतः । आविर्भवच्छटाभिश्च तद्भक्ताञ्छादयोत् प्रभुः । ततस्तानब्रवीत् ब्रह्मा पुत्रानात्मसमुद्भवान् । प्रजाः सृज-ध्वमितः सदेवासुरमानुषीः । एवमुक्तास्ततः सर्वे सृजुर्विविधाः प्रजाः । गतेषु तेषु सृष्ट्यर्थं प्रधावमा-नतामिमाम् । उपलेभे स विश्वात्मा मतरूपामनिन्दि-ताम् । सम्बभूव तया सार्द्धमतिकामातुरो विभुः । बलच्छाङ्गमे देवः कमलोदरमन्दिरे । यावद्वृद्धगतं दिव्यं यथान्यैः प्राकृतो जनः । ततः कालेन महता तया पुत्रोऽभवन्मनुः । सायम्भुव इति ख्यातः स विराडिति नः श्रुतम् । स तु तद्रूपसामान्यादधिपूरुष उच्यते । वैराजा यत्र ते जाता बहवः प्रथितव्रताः । स्वायम्भु वा महाभागाः सप्त सप्त तथा परे । स्वारो-चिषाद्याः सर्वे ते ब्रह्मतत्त्वस्वरूपिणः । औत्तमिसमुद्भा

तदुद्देशान्त्यं समभोऽधुना" । सर्गशब्दे ५२५० पृ० तत्स्थानविधत्वं दृश्यम् । [गर्भदात्रीभुपे राजनि० ।

सृष्टिप्रदा स्त्री सृष्टिं तद्देवं गर्भं प्रददाति प्र+दा-क । सृ(सृ)ङ्कायां क्र्या० प० स० सेट् । स्रष्टति असारीत् सीर्ष्टः सीर्ष्टिः । शोपदेश एव न्यायः ।

सेक गतौ भ्वा० आ० सक० सेट् । सेकते असेकिष्ट पर्युटासाद्य शोपदेशः । स्वदित् चक्रि न क्षुधः ।

सेक पु० सिच-घञ् । सेचने जलादिना आर्द्रीकरणे ऐमच० ।

सेकपात्र न० सिच्यतेऽनेन सिच-करणे घञ् कर्म० । (सेकनी) सेचनपात्रभेदे अमरः ।

सेकिम न० सेकेन निर्वृत्तम् सेक-वा डिम । मूलके ऐमच० ।

सेक्तृ पु० सिञ्चति रेतः सिच-तृच् । १पत्नौ ऐमच० । २सेचके त्रि० स्त्रियां ङीप् ।

सेक्त्र न० सिच-करणे ष्ट्रन् । सेकपात्रे त्रि० कौ० ।

सेचक पु० सिञ्चति तोयेन पृथिवीम् सिच-ण्वुल् । १मेघे २सेककर्त्तरि त्रि० मेदि० ।

सेचन न० सिच-भावे ल्युट् । १जलादिना आर्द्रीकरणे २करणे ल्युट् । ३सेचन्यां क्षुद्रसेकपात्र्यां स्त्री ङीप् मेदि० ।

सेटु पु० सिट-उनु । (तरसल) वृक्षे त्रिका० ।

सेतु पु० सि-तुन् । १जलादेर्जलधारणार्थे (आल) (आड़ाल) पदार्थे अमरः । २वरणवृक्षे मेदि० । मन्त्रजपाङ्गे १प्रणवात्मके मन्त्रे च स्वार्थे क । सेतुक वरणवृक्षे शब्दर० । "सेतुप्रदानादिन्द्रस्य लोकमाप्नोति मानवः" कठादि० त० । सेतुभेदश्च । सीमाविवादशब्दे ५३०० पृ० उक्तः ।

"सेतुश्च द्विविधः प्रोक्तः खेयो बन्धस्तथाऽपरः । तोयप्रवर्त्तनात् खेयो बन्धस्तु तन्निवर्त्तनात्" नारदः ।

मन्त्रजपाङ्गसेतुश्च कालिकापु० ५५अ० उक्तो यथा

"मन्त्राणां प्रणवः सेतुस्तत्सेतुः प्रणवः स्मृतः । अन्यथोच्चरितं पूर्वं परस्ताद्विशीर्य्यति । नमस्कारो महामन्त्रो देव इत्युच्यते सुरैः । द्विजातीनामयं मन्त्रः शूद्राणां सर्वकर्मसु । अकारश्चाप्युकारश्च मकारश्च प्रजापतिः । वेदत्रयात् समुद्धृत्य प्रणवं निरमे पुरा । स चतुष्को द्विजातीनां राज्ञां स्यादुदाहृतः । स्त्रियश्चोच्चारयन्तीनां मनसापि तथा स्मरेत् । चतुर्थस्वरो योऽसौ वैदूरोकारसंज्ञकः । स चानुस्वारचन्द्राभ्यां शूद्राणां वैदूरुच्यते । निःसेतुकं यथा तोयं सर्वाश्चिन्नं प्रसर्पति । मन्त्रस्तथैव निःसेतुः क्षयात् चरति सञ्जपात् । तस्मात् सर्वेषु मन्त्रेषु चतुर्थ्यां द्विजादयः । पार्श्वयोः सेतुमाधाय जपकर्म समारभेत् । शूद्राद्यामादिसेतुर्वां द्विसेतुर्वा यथेच्छतः । द्विसेतुः समाख्यातो सर्वदैव द्विजातयः" ।

सेतुबन्ध पु० तृ० । लङ्कागमनार्थं क्षीरार्णवे नलकपिद्वारा कारिते समुद्रोपरि १आब्धौबन्धे २सेतादेरब्धौबन्धे च ।

"ततोऽब्रवीद्रघुश्रेष्ठं सागरो विनयान्वितः । नलः सेतुं करोत्वस्मिन् जले मे विश्वकर्मणः । सुतो धीमान् समर्थोऽस्मिन् कार्ये लब्धवरो हरिः । कीर्त्तिं गायन्तु ते लोकाः सर्वलोकमलापहाम् । इत्युक्त्वा राघवं नत्वा ययौ सिन्धुरदृश्यताम् । ततो रामस्तु सुग्रीवलक्ष्मणाभ्यां समन्वितः । नलमात्तायवल्कीर्त्तं वानरैः सेतुबन्धनात् । ततोऽतिहृष्टः प्लवगेन्द्रयूथपैर्महाबलेन्द्रप्रतिमैर्युतो नलः । बबन्ध सेतुं शतयोजनायतं सुविस्तरं पर्वतपादपैर्दृढम्" अध्यात्मरा० ३ अ० । "सेतुमारभमाणस्तु तत्र रामेश्वरं शिवम् । सङ्कल्पनियतो गत्वा पुरीं वाराणसीं नरः । स्नात्वा गङ्गाजलैः सिक्तं रामेशमभिषिच्य च । क्षिप्रा सस्यं तदुद्धारि लक्ष्म प्राप्नोत्यसंशयः । शतानि प्रथमेनाढ्या योजनानां चतुर्दश । द्वितीयेन तथा चाढ्या योजनानान्तु विंशतिः । तृतीयेन तथा चाढ्या योजनानामेकविंशतिः । चतुर्थेन तथा चाढ्या द्वाविंशतिः तथा शतम् । पञ्चमेन त्रयोविंशद् योजनानां समन्ततः । बबन्ध सागरे सेतुं नलो वानरसत्तमः । तेनैव जग्मुः कपयो योजनानां शतं द्रुतम् । अयंख्याताः सुवेलाद्रिं वरुणः प्लवगोत्तमाः" ४अ० ।

सेतुभेदिन् पु० सेतुं भिनत्ति भिद्-णिनि । दन्तीवृक्षे शब्दर० ।

सेतुवृक्ष पु० सेतुनामको वृक्षः । वरणवृक्षे शब्दर० । २सेतूपरिस्थे वृक्षे च ।

सेत्र न० सि-बन्धने ष्ट्रन् । (बेड़ि) निगड़े त्रि० कौ० ।

सेना स्त्री सि-न, सञ्ज्ञायां ह्रस्वश्च वा । १सैन्ये अमरः । २जिनानां १माहमेदे ऐमच० । [२सेनावा उपकरणे च ।

सेनाङ्ग न० वृत० । १वरूथरथपत्त्यादिसंघाते अमरः ।

सेनाचर पु० सेनायां चरति चर-ट । सेनाहुमालिनि "सेनाचरोमरुदिभानमेति" नैष० । [वैद्ये २सेनाचरौ च अमरः

सेनानी पु० सेनां देवसेनां वा नयति नी-क्विप् । १कार्त्तिकेये २सैन्याध्यक्षे च मेदि० ।

"क्लीवः श्रीवस्तमश्रो धनुर्वेदविशारदः । कृत्तिश्चिन्नाभिधासु कृशश्च दृष्टभाषितः । निमित्ते शकुने ज्ञाता वेत्ता चैव चिकित्सिते । क्षत्ता धर्मज्ञा शूरकृपा

क्लेशसह ऋजुः। व्यूहतत्त्वविधानज्ञः फल्गुसार-विशेषवित्। राज्ञा सेनापतिः कार्यो ब्राह्मणः क्षत्रियो-ऽथ वा" भरतः १८६ च०।

सेनामुख न० ६त०। १सैन्याये संख्याविशेषयुते रथगजादौ रथिनः त्रयः रथाः त्रयः पत्तयः त्रय एते त्रयस्त्रयो दशैते पत्तिसमुदाये अमरः। [भिक्षे सैन्ये अमरः।

सेनारक्ष पु० सेनां रक्षति रक्ष-अण्। सेनारक्षाकारके वा-

सेफ पु० सि-फ। शेफे पुंसोऽवाधस्थचिह्ने जटा०।

सेमन्ती स्त्री सिम-भि गौ० ङीष्। (सेवाँती) पुष्पभेदे।

सेर पु० "पादोनमद्यानकतुल्यटङ्कैर्हिंसप्तभिस्तुल्यैः कथितोऽत्र सेरः। मणाभिधानं खयुगैश्च सेरैर्धान्यादितौल्येषु तदष्टकं स्यात्। १ब्रह्मवैन्दु १६२। सप्तभिः षोडशैः सेरैः पञ्चभिः खाढकैश्च ताभिः। मणोऽष्टभिस्त्वाढकगैरशाढकशतात्र संज्ञा निजराजधान्याम्" लीला० उक्ते मानभेदे।

सेरराह पुंस्त्री०। सेताबे ख्याते स्त्रियां ङीष्।

सेरु त्रि० सि-वरुन् रुक्। बन्धनकर्त्तरि व्या०।

सेलु पु० सि-लु। खेजातकट्वे हिङ्कोल०।

सेव न० सेव-कर्मणि घञर्थे क। सेविफले (सेवो) राजनि०

सेवक पु० सेव्यति सिव-ण्वुल्। १सीवनकर्त्तरि (दरजी) सेव-ण्वुल्। २भृत्ये २दासे ३अनुचरे च त्रि० मेदि०।

सेवकालु पु० सेवं सेविफलमिव कायति कै-क कर्म०। निशाभङ्गाढ्ये (दुग्धपेया) शब्दच०। [निधौ भरतः।

सेवधि पु० सेवं सेवनं दधाति धा-कि। शङ्खप्रभेदे

सेवन न० सिव-सेव-वा ल्युट्। १क्षुद्यादिना वह्न्यादेर्भोजने अमरः। २आस्वादने ३उपभोगे ४अभ्यसने ५पूजने ६भजने च मेदि०। सेव्यतेऽनया ल्युट्। ७दूर्व्यां स्त्री ङीष् हेमच०।

सेवा स्त्री सेव-अ। १भजने २आराधने ३उपभोगे ४आस्वादने च। सेवापराधाश्च अपराधशब्दे २२१ पृ० दर्शिताः वाराहेत्वन्यथोक्ता यथा "कर्म्मणा मनसा वाचा ये पापकृत्यो जनाः। मद्यं दलकाष्ठस्य राजान्नस्य तु भोजनम्। मैथुनं अवसंस्थः पुरीषोत्सर्ग एव च। सूतकमुदक्या-स्पर्शं स्वर्शनं भोजनं तथा। अभाक्ष्यभक्षणं कोपं पिण्याकस्य च भक्षणम्। रक्तपारक्यवस्त्रिनीक्षजा-म्बरधारणम्। सुरोदावीक्षनिर्भ्यः पतितान्नस्य भक्ष-णम्। अभक्ष्यभक्षणञ्चैव तण्डुलीयविभीतकम्। दा-हानं तु वराहस्य जानुपादवराङ्गयोः। भक्षणं दैव-तागारे सोपानत्कोपसर्पणम्। तथैव देवपूजायां नि-षिद्धकुसुमार्चनम्। चतुर्थ्यां च निशायां पूजा जो-ष्णान्धकारयोः। पानं सुरायाः देवस्य चन्धकारे प्रबो-धनम्। वातकर्माचने विष्णोरनमस्करणं तथा। अप-राधास्त्वविंशति समाख्याता मया हरे!। एभिर्युक्तस्तु पुरुषो विष्णुं नैव प्रपद्यते। दूरस्थो न नमस्कारं कुर्यात् पूजां तु राजसीं"।

सेवि न० सेव-कर्मणि इन्। फलभेदे (सेवो) राजनि०।

सेविका स्त्री एकाक्षभेदे लताक्षशब्दे २११३ पृ० दृश्यम्।

सेवित त्रि०सेव-क्त। १आराधिते भक्ते २आश्रिते ३उप-भुक्ते च ४सेविफले न० राजनि०।

सेव्य न० सेव-ण्यत्। १वीरपत्रमूले अमरः। २अश्वत्थे पु० राजनि०। ३शिवलक्षणे पु० भक्त०। ४सेवार्हे त्रि०। ५चन्दाङ्गे स्त्री हेमच०। [राजनि०।

सैंहली स्त्री सिंहले देशे भवा अण् ङीप्। सिंहलिपिप्यलाम्

सैंहिक पु० सिंहिकायां भवः ठक। १राहौ भक्त०। तस्याः अपत्यम् ठक्। सैंहिकेयोऽप्यत्र अमरः।

सैकत न० सिकताः सन्त्यत्र अण्। बालुकाप्रचुरे नद्यादि-तटे अमरः। २सिकताप्रचुरदेशे त्रि० राजनि०।

सैकतिक पु० सह एकतया सैकतं तदस्त्यस्मिन् ठन्। १संन्यस्ते २अपस्वे ३सन्देहजीविनि त्रि० मेदि०। ४भाडयात्रायां ५मङ्गलसूत्रवते न० मेदि०। [२सैकतप्रिये त्रि०।

सैकतेष्ट न० सैकतं स्थानमिष्टं यस्य। १आर्द्रके राजनि०।

सैतवाहिनी स्त्री सितायाः शर्करायाः अयमण् अण् सैतो मधु ररसस्तं वहति वह-णिनि। वाडवायां नद्यां अमरः।

सैद्धान्तिक पु० सिद्धान्तं वेत्ति सिद्धान्त+ठक्। सिद्धान्ताभिज्ञे हेमच०। [२तत्कर्मणि च "सैनापत्यसपेत्य वः" कुमारः।

सैनापत्य न० सेनापतेर्भावः कर्म वा ष्यञ्। १सेनापतिधर्म्मे

सैनिक पु० सेनायां समवेति ठक्। १भिक्षिते क्षत्रियादौ अमरः। प्राग्विवधनियुक्ते भाग०५।६।३७ त्रि०त०रघु०। वस्तुतस्तु सौनिका इव ऋधितिनेत्येव तत्र पाठः साधुः १सेनासम्बन्धिनि त्रि०।

सैन्धव न० सिन्धुनदीसमीपे देशे भवम् अण्। १लवणभेदे अमरः "सैन्धवं लवणं स्वादु दीपनं पाचनं लघु। स्निग्धं रुच्यं हिमं हृद्यं रूक्षं नेत्र्यं त्रिदोषहृत्" भावप्र०। सिन्धोरदूरभवः अण्। २घोटकभेदे पुंस्त्री० अमरः तस्य सप्तदशसमीपस्थसिन्धुदेशसारब्धदेशाङ्गत्वात् तथात्वम्। स्त्रियां ङीप्।

सैन्धवखिल न० सैन्धवमेव खिलम्। सैन्धवशिलाशकलसमे चिदानन्दस्वरूपे परमेश्वरे "स यथा सैन्धवखिलोऽनन्तरोऽबाह्यः कृत्स्नः" बृ० उ० ४।५।१३।

सैन्धी स्त्री तद्धादिनियमे राजनि०।

सैन्य पु० सेनायां समवेति अत्र। १मिश्रिते हस्त्यश्वादौ अमरः। सेनानां समूहः अञ्। २सेनासमूहे न०।

सैरन्ध्री स्त्री सीरं हलं धरति धृ-मूल० क ङीप् च सीरन्ध्रः लक्षणया हेतुः शिल्पकर्म अण् तदस्यास्ति अण् गौरा० ङीष्। परगृहस्थे स्वल्पे शिल्पकारिणि स्त्रीभेदे हेमच० पृथो० सैरिन्ध्रीत्यत्र अमरः।

सैरिक पु० सीरेण लाङ्गलेन खनति भूमिं सीरं वहति वा ठक्। १लाङ्गले हालिके अमरः। २लाङ्गलोदरि हले (हालेर गरु) अमरः।

सैरिभ पुंस्त्री० सीरे हले तद्वहने क्षम इव मूरत्वात् शाक० ततः स्वार्थेऽण्। १महिषे अमरः स्त्रियां ङीष्। "सैरे सैरिभमर्दिनीमिह महालक्ष्मीं महालक्ष्मीध्यानम्। २स्वर्णे त्रिका०। [भिष्टाम् शब्दर० स्वार्थे क तत्रैव।

सैरीय पु० सीरस्येदम् अण् सैरं हलाकारमर्हति छ।

सैरेय पु० सैरं सीराकारमर्हति ढक्। १भिष्टाम् शब्दर० ढकञ्। सैरेयकोऽप्यत्र राजनि०।

सैवाल न० सेवायै सीनादीनामुपभोगाय अलति पर्याप्नोति अण् सेवालं ततः स्वार्थे अण्। शैवाले स्वार्थे क। तत्रैव "या पांशुपाण्डुरवपुर्विरसा पुरासीत् सैवालजाङ्गुरलतामधुना बिभर्त्ति उद्भटपदो ज्ञेषात् दन्त्यादि

सोढ़ त्रि० षह-क्त ढत्वभावः। १क्षान्ते तितिक्षिते अमरः कर्त्तरि क्त। २सोढादिषड्जनयोगे त्रि०। [योगे वेदि०।

सोढृ त्रि० षह-क्वच् ऋ ढत्वभावः। १सहनकर्त्तरि २क्षमा-

सोत्कण्ठ त्रि० सह उत्कण्ठया वर्त्तते सः बौ०ब्रीह्यादित्वात् अभीष्टलाभेच्छया विलम्बासहिष्णुत्वयुक्ते जटा०।

सोत्रास न० उद्+त्र-घञ्-बच् सह अनुप्रासेन वर्त्तते सः बोद्गुरुष्टने अन्यार्थकस्य वाक्यस्य अन्यार्थकत्वकल्पनया तदुत्तरार्थके १वाक्ये २प्रियवाक्ये च शब्दर०। ३शब्दशास्त्रेण सहिते त्रि०।

सोदय त्रि० सह उदयेन प्रादुर्भावेन इष्ट्या वा वर्त्तते सः १प्रादुर्भूते २इष्टि(यज्ञ)युक्ते ३क्षमायुक्ते च अयं दद्याच्च सोदयमृतिः। [भ्रातरि २ताडयभगिन्यां स्त्री शब्दर०

सोदर पु० समानमुदरं यस्य समानस्य वा सः। १एकोदरभवे

सौदर्य्य पु० समाने उदरे भवितरि यत् आदेयः। १एकोदरजाते भ्रातरि। २ताडयभगिन्यां स्त्री अमरः।

सोनह न०सु-क्विप् सवे नह्यते नह बन्धने क। लशुने शब्दर०

सोन्माद पु० सह उन्मादेन आदेयः। उन्मत्ते उन्मादिनी।

सोपप्लव पु० सह उपप्लवेन आदेयः। समाक्रान्तभूच्छायेन राहुणा योगरूपोपप्लवसहिते १चन्द्रे तथाभूतचन्द्रच्छायायोगयुक्ते २सूर्य्ये च अमरः। ३उपद्रवयुते त्रि०। चन्द्रार्कयोर्यावत्कारणसुपरागशब्दे प्रायेणोक्तं देवीपुराणोक्तमधिकमत्रोच्यते।

"ब्रह्मोवाच "यदयं वदते लोको राहुरित्यत्र हास्मते!। तदहं संप्रवक्ष्यामि चन्द्रसूर्य्योपरागिकम्। यदि सत्यमयं यस्ते ज्योतिर्दिवाकरः। तत्कथं सोदरस्येन राहुणा भक्षणात् कृतः। अथ वा राहुणाक्रम्य निजवक्त्रं प्रवेशितः। तत्कथं दृश्यतेसोऽद्यैः यतश्चा न विलक्षितः। विसृष्टश्च पुनर्दृष्टस्तेनाखण्डमण्डलः। न चास्यापहृतं तेजो न स्थानादपसारितः। यदि वा क्षेत्र निर्भीतः कथं दीप्ततरोऽभवत्। तस्माच्च तेजसां राशो राहोरंशं गमिष्यति। भक्षार्थं सर्वदेवानां सोमः सृष्टः स्वयम्भुवा। तत्सममंशतस्त्वापि सम्भूतं सूर्य्यतेजसा। पिबन्त्यमृतमेवं देवाः पितरश्च सुधाऽमृतम्। अयञ्च त्रिंशतश्चैव अवस्त्रिंशत्तथैव च। अवश्च त्रिंशदंशाश्च देवाः सोमं पिबन्ति ये। राहोरथमृतं भागः पुरा सृष्टः स्वयम्भुवा। तस्मात्तद्राहुरत्नत्वं प्राप्तुमिच्छति पर्वसु। उद्भूत्य पार्थिवीं छायामभ्राकारां तमोमयः। प्राप्तुमिच्छन् ततश्चन्द्रमाच्छादयति छायया। एके च चन्द्रमभ्येति ऋषे पर्वणि भास्करम्। सूर्य्यमण्डलमध्यस्थ चन्द्रमेव जिघांसति। तस्मात् पिबति तं राहुस्तमसा विनाशयन्। अविच्छिन्नं यथा पद्मं पिबति भ्रमरो मधु। चन्द्रस्यमृतं तद्वदेवाद्राहुरुच्यते। चन्द्रकान्तो मणिर्यद्वत्तृप्तिं चरते जलात्। चरन्नपि न क्षीयेत तेजसा नैव सुध्यते। यथा सूर्य्यमणिः सूर्य्यादुत्पाद्य पावकं शुभम्। न भवत्यङ्गहीनोऽपि तेजसा नैव सुध्यते। एवं चन्द्रश्च सूर्य्यश्च ग्रहितावपि राहुणा। स्वतेजसा न सुध्येते नाङ्गहीनौ बभूवतुः। पर्वस्वेव च चन्द्रस्य भाविन्यङ्गस्य कालतिः। सोमो दैवतसंयोगात् छाया योगाच्च पार्थिवात्। राहोश्च वरलब्ध्या वै प्रचरेदमृतं शशी। ग्रहोऽङ्गाले समाप्ते वत्सं इष्ट्वा च गौरिवा। लाङ्गलादेव चरेत् सीरं तथेन्दुः चरतेऽमृतम्। पितेव सूर्य्यो देवानां सोमो मातेव सुध्यते। यथा लाङ्गलजं

पीता जीवन्ति सर्वजन्तवः। पीत्वाऽमृतं तथा सोमात् तृप्यन्ते सर्वदेवताः। सम्भृतं सर्वयागेषु तत्रायं चरते यशी। तं चरन्तं यथाभागमुपजीवन्ति देवताः। तस्मिन् काले समभ्येति राहुरप्यवकर्षति। सर्वमर्द्धं त्रिभागञ्च पादं पादार्द्धमेव च। आकृष्य पार्थिवीं छायां यावन्न चन्द्रमण्डलम्। ग्रसतः स भागो राहोस्तु देवभागास्तु शेषकाः। तस्मिं विधाय देवानां राहोः पर्वगतञ्च। चन्द्रो न ग्रस्यमानोऽपि तेजसा नैव मुच्यते। तिथिभागाश्च यावन्तः पुनस्तत्कं प्रमाणतः। पर्वच्छायास्थितः कालस्तावानेव प्रकीर्त्तितः। अतो राहुभुजः सोमः सोमवृद्धिदिवाकरात्। पर्वकाले स्थितिस्त्वेवं विपरीता पुनः पुनः। अतश्छादयते राहुरमावस्यां निशाकरौ। राहुरमावसस्थानः सोममाच्छाद्य तिष्ठति। उद्धृत्य पार्थिवीं छायां भूमेश्च दृश्यते। चन्द्रस्य यदपक्वं राहुणा भास्करस्य च। तत्रावस्थितं तस्य देवत्वं श्यामलोहितम्। कर्दमेन यथा वस्त्रं शुक्लमप्युपलभ्यते। एकदेशोऽथ सर्वं वा राहुणा चन्द्रमास्तथा। प्रक्षालितं तदेवेह पुनः शुक्लतरं भवेत्। राहुमुक्तं भवेत्तद्वत् निर्मलं चन्द्रमण्डलम्। राहुणा ग्रादितौ यापि दृष्टा चन्द्रदिवाकरौ। विप्राः ग्रान्तिपरा भूत्वा पुनराप्याययन्ति तम्। एवं न दृश्यते सूर्यचन्द्रमासावत्र दृश्यते। अबुधास्तं न पश्यन्ति मानुषा मांसचक्षुषः। जगतसम्मोहनञ्चैतत् पर्व चन्द्रसूर्ययोः"।

सोपाधि(क) सह उपाधिना वा कप् सादेशः। उपाधियुक्ते प्रातिलोम्यया जातदानादौ।

सोपान न० उप-अन-भावे घञ् सह विद्यमानः उपानः उपरि गतिरत्र। आरोहणसाधने काष्ठादिनिर्म्मिते (पैंठा) प्रसृतौ पदार्थे अमरः।

सोभाञ्जन पु० शोभाञ्जन+पृषो०। (सजना) वृक्षे भरतः।

सोम पु० सु-मन्। १चन्द्रे २कर्पूरे अमरः। ३कुबेरे ४यमे ५वायौ ६वसुभेदे ७जले ८यज्ञीयलतौषधौ ९देवानरे मेदि० १०औषधरसे हेमच० ११कद्रुते १२दीधितौ उणा०। सह ७(क)मया। १३शिवे १४वानरेऽमौ धरणौ च।

सोमस्य षड्भेदः तत्कल्पादानादिकं खगोलशब्दे ३२२१ पृ०दृश्यम्। तत्प्रकल्पादिकं यथा

"चन्द्रः सिताङ्गसमगात्रयष्टिर्व्योम्नो परिभ्रङ्कविवेकयुक्तः। क्वचित् क्रमः शीतलवाक्ययुक्तः षट्त्वाक्षयो वातकफानिलात्मा सर्वार्थचि० स च वायव्या दैवः वैश्यजातिः स्त्रीषट्कः सवर्णरसङ्गगिरो नक्षत्राधीशः। षड्यन्त्रशब्दे तत्कल्पादिकं दृश्यम्। तस्य जन्मकाले मेषादिराशिषु स्थितिभेदे फलभेदः बृहज्जातकोक्तः २०८७ पृ० जातकशब्दे उक्तः। तस्मादिस्तस्य तस्य फलं जातकपद्धतावुक्तं यथा

"चन्द्रे स्वभाजद्वयगे तनुगे गुणाढ्यो दाक्षिण्यरूपधनवाक्सकले विशेषात्। चन्द्रेषु मेषु तनुगे विकलश्च शूरः प्रोन्नतनीचवधिरः क्षयभाग्यवर्ष्टः। कुटुम्बस्थिते कैरवाणामधीशे भवेत् पतत्रिसार्थशौक्ष्यैः समृद्धः। नरः पूर्णदेहे तु हीने विलोमं खलत्वाक् च बोध्यं फलं तारतम्यात्। द्विजाधिराजे सकलेऽतिशोभः कफोल्बणात् संयतकश्च नीचः। कुधौन्नितो म्लेच्छजनाश्रयश्च प्रकाङ्क्षितः स्यात् मनुजोऽतिहिंस्रः। पातालसंस्थे सति शीतरांशौ जलप्रयाणाभिरतिर्नरः स्यात्। दाता सुहृद्बान्धवसेवकाढ्यः सुखी सुखोत्कर्षयुतः सुमुखः। सुतैः सकलत्रश्च सुते प्रसूतौ धीमित्रपुत्रैर्बहुभिः समेतः। शूरो नरः स्याद् बहुधान्यमित्रसमाकुलः शीघ्रतरः सुखाढ्यः। शत्रौ शत्रौ पद्मिनीनां स्थिते ना शत्रुघातैः संयुतो दारुणश्च। मारांगिन्यामल्पकाभ्यां युक्तोऽनल्पाक्षः स्याच्च नीरोदराढ्यः। शशिनि शशिसखीनिकेतनस्थे भवति सुखी मदनातुरः सदेहः। अतिमतिरनसूयकोऽल्पकुक्षौ गणिततनौ बहुरोगदैन्यतप्तः। मूलौष्ठमृगाङ्के मतिमान्नरः स्यादोजस्विताढ्योऽपि च बन्धनाढ्यः। सुखीषदेहः सति हीनदेहे तस्मिन् भवेदल्पक जीवितश्च। निशाधिनाथे नवमाश्रयस्थे धीपुत्रमित्रद्रविणोपपन्नः। सौभाग्यसौख्यैः सुकृतैर्युतः स्यात् कान्तान्वितोऽतोऽसनुजो दयावान्। दशमोऽब्धिसुतौतवधामनि द्रविणधीसुकृतैः सहितः शुचिः। भवति कर्मपरोऽपि च सिद्धिभाङ्नरवरो न विषादकरो भवेत्। आर्य!!याते यामिनीनायके ना मित्रक्लेशद्रव्यपुत्रायुक्तः। स्यातः शूरो दारुणस्वाभिमानी शिष्टैर्मैत्रैरन्वितो बुद्धिमान् स्यात्। शीतांशौ द्वादशे१२स्थो हीनाङ्गे नेत्ररोगवान्। पतितः परमः क्षुद्रः परिभूतो नरो भवेत्"।

सोमलता च ओषधिभेदः सोमवल्लीरूपा ओषधिशब्दे १२६४ पृ० सुश्रुतवाक्ये तल्लक्षणादि दृश्यम्। सोमेन यजेतेत्यादि शुल्बुक्ते १५यागभेदे पु०। सोमयागेतिकर्त्तव्यतादि कात्या०श्रौ० २५अ०। १०अधिकारादौ दृश्यम्। कात्यायनशब्दे १८७६ पृ० तदप्रतिनिधिद्रव्यादि दर्शितम्।

सोमगर्भ पु० सोमस्य तदाकाङ्क्षितरूपस्योक्षस्य गर्भः स्थानम्। विष्णौ त्रिका०।

सोमज न० सोमात् तत्परितोषधिस्वरसपानात् जायते जन-ड। १दुग्धे हेमच०। २चन्द्रजाते त्रि०। ३बुधे पु०।

सोमतीर्थ न० सोमेन तपस्तप्त्वा लब्धं तीर्थम् शाक०। प्रभास-तीर्थे त्रिका०। "यत्र तप्तं तपस्तेन सोमेन सुमहात्मना। षष्ठं वर्षसहस्राणि तत्रैवाद्यं सुखः स्थितः। एवमभूतः पुनः षष्ठं षष्ठं सोमव्रतक्षया। तत्रैवैकेन पादेन दश षष्ठं च तिष्ठता। एवमुग्रं तपः कृत्वा स्थानमानभवद्वसः। ममापराधात् सकलं ब्राह्मणानां पतिव्रता" वराहपु०।

सोमधारा स्त्री सोमस्य धारेव। धाराशे त्रिका०।

सोमप पु० सोमं तद्रसं पिबति पा-क। १यज्ञे सोमरसपान-कर्त्तरि २पितृगणभेदे च०व०। पा-क्विप् सोमपोवाच्यत्र।

सोमपत्र पु० सोमस्य ओषधिविशेषस्येव पत्रमस्य। (छत्रुवड़) तृणभेदे शब्दच०।

सोमपीति(थि)न् पु० पीतमनेन इनि सोमं पीतौ पृषो० वा तस्य थः। यज्ञे सोमरसपायिनि अमरः। पा-क्विप् सोमपोवाच्यत्र।

सोमबन्धु पु० सोमस्य बन्धुः, सोमो बन्धुरस्य वा। १मूर्खे तद्रङ्डिकरत्वात् तस्य तथात्वम्। २चन्द्रजे बुधे पु० ङीप्० २कुसुदे न०। [वंश्ये क्षत्रिये च शब्दरत्नावली।

सोमभू पु० सोम एव भूरुत्पत्तिस्थानं यस्य। १बुधग्रहे २चन्द्र-

सोमयाग पु० सोमनामको यागः। त्रिवर्षसाध्ये सोमरस-पानाङ्के यागभेदे।

"नारद उवाच "सोमयागविधानञ्च ब्रूहि मां मुनि-सत्तम!। कथं तं कारयामास गुरुश्च किं फलं परम्"। नारायण उवाच "ब्रह्महत्याप्रशमनं सोमयज्ञफलं शृणु!। वर्षं सोमलतापानं व्रतमानः करोति च। वर्षमेकं फलं भुङ्क्ते वर्षमेकं जलं वटा। त्रैवार्षिकमिदं यागं सर्वपापप्रणाशनम्। यस्य त्रैवार्षिकं धान्यं निहितं भूतिदृष्टये। अधिकं वापि क्रियेत स सोमं पातुमर्हति। महाराजश्च देवो वा यागं कर्तुमलं शृणु!। न सर्वसाध्यो यज्ञोऽयं बहुधो बहुदक्षिणः" ब्रह्मवै० श्रीकृष्णख० ६० अ०। सोमशब्दे दृश्यम्।

सोमयाजिन् पु० सोमेन यजते यज-णिनि। सोमयाग-कर्त्तरि। तस्य सौत्रामण्यामधिकारः सौत्रामणीशब्दे दृश्यम्।

सोमयोनि न० सोमः योनिरस्य। चन्दनभेदे शब्दच०।

सोमराजी स्त्री सोमेन राजते राज-क्विप् गौरा० ङीष्। (सोमराज) १ओषधिभेदे। २वाकुच्यां भावप्र०।

"अवल्गुजा वाकुची स्यात् सोमराजी सुपर्णिका" इत्यु पक्रमे "वाकुची मधुरा तिक्ता कटुपाका रसायनी। विष्मन्नहृद्दृशिया रुच्या वरा श्लेष्मास्रपित्तहृत्। कृष्णा हृद्या श्वासकृमिहृज्ज्वरक्रिमिप्रणुत्। तत्फलं पित्तलं कुष्ठ-कफानिलहरं कटु। केश्यं तच्च कृमिश्वासकासशोथ-पाण्डुहृत्" भावप्र०। स्वार्थे क। सोमराजिकायाम्च। राज-णिनि। सोमराजिन् तत्रार्थे पु०अमरः। [राजनि०

सोमलता स्त्री सू-मन् कर्म०। अनामख्यातायां लतायाम्

सोमलतिका स्त्री सोमलतेव स्वार्थे कन् अत इत्त्वम्। १गुडूच्याम् राजनि०। स्वार्थे क। २सोमलतायाञ्च।

सोमवंश पु० सोमस्य वंशः। १चन्द्रवंशे २चन्द्रावधिके गोत्र-परम्परारूपाते क्षत्रिये भाग० ९स्कन्धे ङ्यम्।

सोमवल्क पु० सोमस्येव वल्कोस्य। १करञ्जे जटा०। २रोहा-करञ्जे राजनि० ३श्वेतखदिरे ४कट्फले च मेदि०।

सोमवल्लिका स्त्री सोमवल्लीव कायति कै-क। सोमराज्याम् अमरः। स्वार्थे क। २सोमलतायाम्। सोमवल्लरीशब्दे दृश्यम्।

सोमवल्ली स्त्री सोमायाश्चताय वल्ली। १गुडूच्याम् अमरः। सोमरूपा वल्ली। २सोमलतायाम् भरतः। ३सोमराज्यां शब्दर०। ४ब्राह्मण्यां ५सुदर्शनायां ६पातालगरुड्यां राजनि०। "सोमवल्ली महागुल्मा यज्ञश्रेष्ठा धनुर्लता। सोमाह्वा गुल्मवल्ली च यज्ञवल्ली द्विजप्रिया। सोमवल्ली कटुः शीता मधुरा पित्तदाहहृत्। कृष्णा विशेषात् श्रमनी वामनी यज्ञसाधनी" राजनि०।

सोमवामिन् पु० सोमं तद्रसं वमति वम-णिनि। सोमरस-पानाधिक्ये सुखेन सोमवमनकर्त्तरि तस्य सौत्रामण्या-मधिकारः सौत्रामणीशब्दे दृश्यम्।

सोमवार पु० सोमस्वामिको वारः। चन्द्रस्वामिके दिने।

सोमविक्रयिन् पु०सोमं विक्रीणाति वि+क्री-णिनि। सोम-लतायाः विक्रेतरि "यागो हि सोमविक्रयी" श्रुतिः।

सोमवृक्ष पु० सोम इव वृक्षः। १कट्फलवृक्षे रत्नमा० २श्वेत-खदिरे च राजनि०। [राजनि०।

सोमसार पु० सोम इव सुभ्रः सारोऽस्य। श्वेतखदिरे

सोमसिद्धान्त पु० सोमकृतः सिद्धान्तः। चन्द्रोक्ते ज्यो-तिषसिद्धान्तभेदे वटा०। [त्रिका०।

सोमसिन्धु पु० सोमस्यास्तस्य सिन्धुरिव आधारः। विष्णौ

सोमसुत् पु० सोमं सुतवान् सु–भूते क्विप्। यज्ञार्थं कृत-सोमलतानिष्पीड़ने ऋ० कौ०।

सोमसुता स्त्री इत०। नर्मदानद्याम् राजनि०। २बुधे पु० सोमोद्भवादयोऽप्यत्र वचायत्वम् पुंस्त्री०। [सोमिषवणे

सोमसुत्वन् पु० सोमं सुतवान् सु–भूते कनिप्। कृतसोमर-

सोमसूत्र न०सोमस्य जलस्य सूत्रमिव प्रणाली। १जलनिर्गम प्रणाल्याम् शिवलिङ्गस्यगौरीपट्टस्थ २जलनिर्गमस्थाने च "सोमसूत्रं न लङ्घयेत्" तन्त्रम्। [रङ्गकैरवे रत्नमा०।

सोमाख्य न० सोमं लतामेदमाख्यातिपर्ष्वेन या+ख्या–क।

सोमातिपूत पु० सोमोऽतिपूतो यस्तो सुखभिन्नद्विद्वेष येन अति+पू–कर्मणि क्त। क्ते सोमरसपाने आधिक्यात् सुखभिन्नाधिकादिद्विद्वैः सोमरसवमनकर्त्तरि तस्य सौत्रामण्यामधिकारः सौत्रामणीशब्दे दृश्यः।

सोल्लुण्ठ त्रि० अव उल्लुण्ठेन सादेशः। मूर्खो पार्श्वपरिवर्त्तादियुक्ते १व्यक्तादौ रूढा० २स्तुते निन्दापरतया निन्दायां वा स्तुतिपरतया युक्ते २वाक्ये च।

सोल्लुण्ठन न अव उल्लुण्ठेन सादेशः। अन्यथास्थितस्य अन्यरूपेण परिवर्त्तनरूपिते वाक्ये (स्तुतिपरस्य निन्दा-परता निन्दापरस्य च स्तुतिपरता रूपेवं कल्पिते वाक्ये)।

सोष्यन्तीहोम पु० सोष्यन्तीं सूक्ष्मापत्यामाधत्तप्रसवां कृत्वा कार्य्यः होम०। सोष्यन्त्या आधत्तप्रसवाया हिताय कर्त्तव्ये होमभेदे तत्प्रकारः सं० त० दृश्यः।

सौकर्य्य न० सुकरस्य भावः कर्म वा ष्यञ्। १व्यायास-साध्यत्वे जटा०। २सुकरस्य कर्मणि च।

सौखसुप्तिक त्रि० सुखसुप्तिं सुखेन शयनं प्रच्छति ठक्। प्रातःकाले सुखशयनप्रच्छके वैतालिकादौ ङीप च०।

सौखिक त्रि० सुखं प्रयोजनमस्य ठक्। सुखाभिलाषिणि (सौखिन)।

सौख्य न० सुखमेव स्वार्थे ष्यञ्। सुखे ङीप च०।

सौगत पु० सुगत एव अण्। १सुगते बुद्धभेदे ङीप च० तद्भेद-ग्रन्थ। २सुगतमन्त्रज्ञिनि त्रि०। सुगतमत मधीते अण्। ३सुगतमताध्यायिनि त्रि०। [शब्दर०।

सौगन्ध न० सुष्ठु गन्धोऽस्य स्वार्थे अण्। कर्पूरे रामकर्पूरे

सौगन्धिक न० सुष्ठु गन्धः सुगन्धः सोऽस्यास्य ठन् स्वार्थे अण्। १कह्लारे अमरः। २सुगन्धके पु०अमरः। सुगन्धेन व्यवहरति ठक्। (गन्धी) ३सुगन्धद्रव्यव्यवहर्त्तरि त्रि०मेदि०। ४पद्मभेदे भा० व० सौगन्धिकाहरणपर्व। [२सुगन्धौ।

सौगन्ध्य न० सुगन्धस्य भावः ष्यञ्। १सुगन्धे। स्वार्थे ष्यञ्।

सौचिक पु० सूचौ तत्कर्मसीवनमुपजीवति ठन्। (दरजी) सीवनकारके अमरः। ठन्। सौचि तद्वार्थे शब्दर०।

सौजन्य न० सुजनस्य भावः ष्यञ्। १सुजनतायां २सद्-व्यवहारे च "सौजन्यजन्यं यशः" मल्लिनाथः।

सौण्डी स्त्री शुण्डा तदाकारोऽस्त्यस्याः अण् ङीप् पृषो० शस्य सः। गलपिप्पल्याम् शब्दच०।

सौत्र पु० प्राग्दिव्यादिभिः सूत्रेण कर्मविशेषाय पठितः अण्। भाद्यादिदशगणीवभिन्नेषु सूत्रमात्रे कार्यभेदार्थं पठितेषु १धातुषु। सूत्रं यत्सूत्रमर्हति अण्। २विप्रे ङीमच०।

सौत्रामणी स्त्री सुत्रामा इन्द्रो देवताऽस्य अण् मपूर्वत्वात् न टिलोपः यज्ञम्। दृष्टभेदे तत्र हि सुरापानं विप्रा-णां विहितम्। "सौत्रामण्यां सुरां पिबेत्" श्रुतिः। स च यज्ञः क्षत्रियकामस्य ब्राह्मणस्यैव कर्त्तव्यः तत्राधि कारिविशेषः कात्या०श्रौ०१९।१ कं० भट्टः। "ब्राह्मणयज्ञः सौत्रामण्यृद्धिकामस्य" सू०। "ब्राह्मणपदं क्षत्रियवैश्य-योर्निवृत्त्यर्थम्" कर्कः। "अग्निचित्सोमयाजिसोमातिपूत-सोमयाजिनाम्" "सू०"एभिश्च निमित्तैः सौत्रामणी भवति। तत्राग्निचित्सोमयाजीति यदुक्तम् अग्निमतः सोम-याजं यथा आदिति च हि फलवान् निष्कलोऽग्नि-रिति एवं च सत्यग्निमत्सोमयागान्ते सौत्रामणी भवति। ननु चानग्निमतोऽपि सोमयाजत्वेन सौत्रामणी श्रूयते "सोमेनेड्वा सौत्रामण्या यजेतेति नैतदेवम् अग्निं चित्वा सौत्रामण्या यजेतेत्यस्य वाक्यस्याग्निप्रकरणे श्रुतत्वात् तदङ्गता युक्ता यस्य प्रकरणम् तस्यान्यदधीय-मानं तदङ्गमेव भवतीति न्यायम्। सोमेनेड्वा सौत्रामण्या यजेतेति सौत्रामणीप्रकरणे पाठः तेन प्रस्तुतविपरिहृत्या सोमस्यैव सौत्रामण्यङ्गता भवति न सौत्रामण्याः सो-माङ्गता यथा "वाजपेयेनेड्वा इष्टस्तुतिस्तोमेन यजेतेति" वाजपेयं प्रकृत्य विधानात् वाजपेयाङ्गता इष्टस्तुतिस्तोमस्य, तस्मान्नाग्निमति सोमे सौत्रामणी "सोमेनेड्वा सौत्रा-मण्या यजेतेति किमर्थमर्हति पाठः अग्निमत् सोमस्यानु-वादोऽयमित्यदोषः। यद्वाऽग्निं चित्वेत्यस्यैव शेषोऽयम् अग्निमता सोमेनेड्वेत्येतदुक्तं भवति। सोमातिपूतसोम-यामिनोश्च सौत्रामणी भवति श्राद्धान्तरस्मरणात् सो-मातिपूतः सोमयामी च ब्राह्मण एव न हि क्षत्रिय-वैश्ययोरेतद्विधेयमिति ननु च सोमकार्ये तयोरपि न्यायोपविधानम् तेन तदतिपवने तदमने च किमिति न भवति नैतदेवं यदि नाम कार्यापत्त्या धर्मप्राप्तिर्भवति न

चार्यं सोमधर्मः, किं तर्हि तदतिपवने यागान्तरविधानमिति। अग्निचितस्तु वर्षत्रयस्थापि भवति अग्निसंयोगविधानात्। अग्निचितः तथा सोमवाजिनः तथा सोमातिपूतस्य तथा सोमवामिनः सुखव्यतिरिक्तेभ्यो नासिकाकर्षणगुदादिछिद्रेभ्यः यस्य सोमः स्रवति स सोमातिपूत इत्युच्यते सुखेन यः सोमं वमति स सोमवामी" सं०व्या०। "राज्ञोऽपरुद्धस्य च सौत्रामणी भवति" सू०। "दुष्टरोगदुर्यौ सायनो रुद्र आसेति तद्विधानात्। अराज्यात् प्राच्यावितस्य राज्ञः अराज्यप्राप्त्यर्थम्" कर्कः। "यवमयोरपयोः" सू०। "सौत्रामणी भवति पशुयोग्यः सनृयो नाम पशुञ्च विन्दते सोऽस्यमुरपशुः" कर्कः।

तत्र सुरापच्यवनप्रकारः तत्रैवोक्तः

"दक्षिणेन हृत्वा नग्नहुचूर्णानि हृत्वा तांश्च व्रीहियवाभ्यामौदनयोः पृथगाचामौ निधिच्य चूर्णैः संसृज्य निदधाति तन्नासरम्" सू०। "दक्षिणेन द्वारेण प्रवेश्याग्न्यगारम् नग्नहुचूर्णादि हृत्वा नग्नहुः किण्व उच्यते तांश्च यवादींश्चूर्णयित्वा व्रीहियवाभ्यामौदनयोः पृथगाचामौ निधिच्य चूर्णैः संसृज्य निदधाति तन्नासरमुच्यते व्रीहियवाभ्यां च सुरा निष्पाद्यते सा च यागसाधनम्। तेन सा तद्धर्मैरभिसम्बध्यते अतस्तयोरतत्संस्कारपूर्वकम् पृथगादनौ निष्पादयेत्" कर्कः। "नग्नहुचूर्णानि हृत्वा नग्नहुशब्दार्थमाह "सर्ज्जत्वक् त्रिफला चैव गुण्ठो चैव पुनर्नवा। चतुर्जातकसंयुक्ता पिप्पली गजपिप्पली। वंशोऽवका हरिद्रत्वा चित्रकं चेन्द्रवारुणी। अजगन्धा सप्तपाद्य मूलान्येतानि निर्दिशेत्। धान्यकं च यवानी च जीरकं कृष्णजीरकम्। हे हरिद्रे वचा चैव विरुढा व्रीहयो यवाः" इति। ऋत्वानन्तरं तानि शब्दादीन्यादाय दक्षिणेन हृत्वाऽग्न्यगारं प्रवेश्य पूर्वं नग्नहुचूर्णानि हृत्वा सर्ज्जत्वमाद्यौषधानि तूष्णीं पिष्ट्वा तान् शब्दतोक्तलाजान् चूर्णीकृत्य दर्शपूर्णमासवत्संभृत्य पात्रावादनादि ग्राम्यामाकतत्संस्कारपूर्वकं फलीकरणान्तं समन्त्रकं कृत्वा बहुतरोदके पृथक् पृथक् चरू पक्त्वा श्रपितस्थानानन्तरं व्रीहियवाभ्यामौदनयोः पृथगाचामौ निधिच्य पृथग्भिन्नयोः पात्रयोर्वर्षैर्मध्यादतिरिक्तसुखोदकमवमाद्य तदुदकं नग्नहुप्रभृतिभिस्तत्तद्भिन्नचूर्णैः संसृज्य निदधाति स्थापयति तन्नासरम्। तच्च चूर्णसंसृष्टस्याचामस्य नासरमिति संज्ञा" सं०व्या०। "ओदनौ चूर्णनासरैः संसृज्य खादौ त्वा खादु नेति तिरात्रं निदधाति" सू०। "चूर्णनासरसंसृष्टावोदनौ "खादौ त्वेति" अंशुना ते इति मन्त्राभ्यां क्रमशः प्रक्षिपति जिह्वा च तिरात्रं निधेया सुरा" कर्कः। "एवमाचामयोश्चूर्णसंसर्गानन्तरमोदनौ चतुर्भिश्चूर्णैः संसृज्य खादौ त्वा खादु नेति यजु० १९।१ "अंशुना ते यजु० २०।२७ द्वाभ्यां मन्त्राभ्यामेकस्मिन् मन्थति पात्रे चूर्णसंसृष्टावोदनौ नासराभ्यां च संसृज्य तिरात्रं निदधाति सुगुप्ते देशे स्थापयति शालाया नैर्ऋतकोणे गर्तं कृत्वा तत्र स्थापयतीति जीर्णैः समुदायः" तिस्रो रात्रीस्यादिश्रुतेः "एकस्याः पयसापाक्तेनाग्निना परिषिञ्चति परीतोषिञ्चतेति" सू०। सुरां परिषिञ्चति "एकस्मै परिषिञ्चतीति वचनात्। अग्निनादुहिस्थापाकरणं कर्त्तव्यम् तच्चापूर्वत्वादप्रधानत्वाच्च पयसः अग्निभ्यःमपाकरोमीति गोस्पर्शनमात्रमेवेति सम्प्रदायः। अपरे तु धर्मवदपाकरणमिच्छन्ति" कर्कः "शब्दचूर्णानि चावपति" सू० "शब्दात् सुरायाम्" कर्कः। "सारस्वतेन द्वयोः प्रातः" सू०। "प्रातःशब्देन च द्वितीयमहरभिधीयते तत्रापि च रात्रावेवाभिषेकः प्रथमां रात्रिं परिषिञ्चतीति प्रकृत्य "द्वयोर्द्वयेन द्वितीयामित्याह द्वितीयाम् रात्रिमिति गम्यते" कर्कः। "प्रातःशब्देन त्रीरभिधीयते" सं०व्या० "तीक्ष्णचूर्णानि च" सू०। "'आवपति' ऐन्द्रो घोक्तमे तिरिक्तयाम" सू० "गवां दुग्धेनैन्द्रेण परिषिञ्चति" कर्कः उक्तमे इतीवेऽनेन संज्ञा। "लाजचूर्णानि च" सू० "आवपति यत्र चूर्णानां पयसश्च संस्कारकत्वम् साधनं तु व्रीहियवाभ्यामेव अतस्तयोरेव देवतोद्देशेन प्रकृतम्" कर्कः। यजु० १९अ० वेददीपे तु तदङ्गसुराच्यवनप्रकारः स्पष्टः दर्शितो यथा "अथ सौत्रामणीमन्त्राभिरध्यर्धैः। अविद्यमानाग्निचितो सुखेतरच्छिद्रसोमवामिनो सुखेन सोमवामिनो राजच्युतस्य पशुकामस्य च सौत्रामणीयागः। अनःपात्रस्थाने सोमपात्रेण एतानि स्थापयेत् सोमं सुराविक्रयिणः क्रीत्वा क्रीत्वा सोमेन शब्दं क्रीत्वा अथाभिक्रीणन् क्रूरेण लाजान् येनचिद्दूर्वेण च नग्नहुम् विरुढा व्रीहयः शब्दम् विरुढा यवाश्लोकाः सर्ज्जत्वक्त्रिफलागुण्ठो पुनर्नवाचतुर्जातकपिप्पलीगजपिप्पलीवंशवकाहरिद्रत्वाचित्रकेन्द्रवारुणत्वगजा धान्यकयवानीजीरकहयहरिद्राद्वयविरुढद्वयव्रीहय एकीकृता नग्नहुः। शब्दतीक्ष्णलाजानग्नहून् दक्षिणद्वारेणाभिहृत्य नीत्वा संचूर्ण्य

दर्शपौर्णमासधर्मेण व्रीहिश्यामाकयोश्च बहुत्वे पक्षा ग्नावाज्यभागानन्तरं तयोश्चरोर्निःस्रावसृष्टं पृथक्पात्रयो-राद्याय श्यामादित्वतुर्थां चरुभिः संसृज्य स्रापयेत् इदं चरूणामरूपं मासराख्यम्। "ओदनौ चरुमासरैः सं-सृज्य स्राहीं त्वा श्रंशुना इति त्रिरात्रं निदधाति"का-एवमाचामयोश्चरुसंसर्गे मासरत्वनिष्पादनानन्तरमोदनौ व्रीहिश्यामाकचरू चतुर्भिश्चरुभिः संसृज्य स्राहीं त्वेति मन्त्रेण श्रंशुना ते इति विंशाध्यायसप्तविंशया ऋचा चैकस्मिन् पात्रे चरुसंसृष्टावोदनौ मासराभ्यां संसृज्य त्रिरात्रं शालानैर्ऋतकोणे गर्त्ते कृत्वा तत्र स्रापयेत्। अयमर्थः चरू बहाम्बयोः पृथगाचामयश्चरुम् ततः श्यामतोऽन्नाजचूर्णानां पृथग् त्रिधा कृतानां तृतीयांशं द्वेधा कृत्वाचामयोः क्षिपेत् ततो नग्नहुचूर्णं द्वेधा कृत्वैकमर्धं द्विधा विभज्याचामयोः क्षिपेत्। एवं चूर्णसंसृष्टाचामयोर्मासरसंज्ञा। ततः श्यामतोऽन्नाज-चूर्णानां द्वितीयं तृतीयांशं द्विधा कृत्वैकैकं भागमोद-नयोः क्षिपेत् नग्नहुचूर्णद्वितीयार्द्धं द्वेधा कृत्वोदनयोः क्षिपेत् तत ओदनावेकपात्रे कृत्वा तत्राचामौ क्षिपेत् ततः "स्राहीं त्वा" "श्रंशुना ते" इति मन्त्राभ्यां चूर्णमासरैः स-हौदनयोराड्वालेन संसर्गः कार्यः ततश्चिरात्रनिधा-नम् श्यामतोऽन्नाजचूर्णं तृतीयांशानां प्रतिदिनं सुरायां निवापार्थं रक्षणमिति। एकस्या पत्न्याः कृतेनाग्नि-नेन परिस्तृणति परीतो षिञ्चतेति श्यामचूर्णानि चावपति स्वारस्कृतेन स्रुवेण प्रातरोदनचूर्णानि पैन्द्रोषोत्तमे तिसृभ्यः श्यामचूर्णानि च। सायं होमान्ते इन्द्राग्नि-भ्यामवाक्रोमीति करेण गां स्पृष्ट्वा एवां तां दुग्ध्वा तत्-पयसाध्वर्युः सुरां सिञ्चति परीत इति मन्त्रेण। रक्षितं श्यामचूर्णानां तृतीयांशं सुराभाण्डे क्षिपेत्। द्वितीये-ऽह्नि निधाने सरस्वत्या अवाक्रोमीति गावौ स्पृष्ट्वा दोहितेन तयोर्दुग्धेन तेनैव मन्त्रेण सुरां सिञ्चति तोक्म-चूर्णतृतीयांशक्षेपश्च। तृतीयेऽह्नि रात्रौ इन्द्राय सु-त्रामणेऽवाक्रोमीति तिस्रो गाः स्पृष्ट्वा ता दुग्धैकीकृत तत्पयसा सुरां सिञ्चति तेनैव मन्त्रेण तत्र श्यामचूर्ण-तृतीयांशक्षेपश्चेति"। (आचामोभक्षमन्त्रः)

सौदामनी स्त्री सुदामा पर्वतभेदस्तेनैका दिक् तत्प्राप्ति-भवत्वात् अण्। १विद्युति अमरः। या हि स्फटिक-मयश्च सुदाम्नः पर्वतस्यैकदेशे जाता। २अप्सरोभेदे च हेमच०। सुदामा ऐरावतमजत्वात् पत्नी ङीप्। ३ऐरा-वतयोषिति शब्दर०। तत्र ङीपि अतोऽङोपे सौदा-म्न्यपि शब्दर०।

सौदायिक न० सुदायात् बन्धुकृत्यात् आगतः ठञ्। "अ-ढ्वा कन्यया वापि पत्युः पितृमृतेऽथ वा। अर्द्धः स-काशात् पित्रोर्वा लब्धं सौदायिकं कृतम्" कात्या० कृत्युक्ते स्त्रीधनभेदे "सौदायिकं धनं प्राप्य स्वातन्त्र्यं परिकीर्त्तितम्" स्मृतिः। स्त्रीधनशब्दे दृश्यम्।

सौदास पु० सूर्य्यवंश्ये कल्माषपादे नृपतौ।

सौध पुंन० सुधया लेपनदृश्येऽस्य रक्षम् अण्। १राजसदनभेदे अमरः। सुधां तदर्हमर्हति अण्। २कृष्णे न० २दुग्धपाषाणे पु० राजनि०। ३सुधासम्बन्धिनि त्रि०।

सौनन्द न० सुनन्द+स्वार्थे अण्। बलदेवसख्ये हेमच०।

सौनिक पु० सूना वध्यस्थानं तदुपलक्षितमांसादि पण्यमस्य ठञ्। मांसक्रयविक्रयोपजीविनि व्याधे (कसाइ)। हेमच० सैनिकशब्दे उदा० दृश्यम्।

सौन्दर्य्य न० सुन्दरस्य भावः ष्यञ्। १चारुतायां "अङ्ग-प्रत्यङ्गकानां यः सन्निवेशो यथोचितम्। सुश्लिष्टः सन्धि-बन्धः स्यात् तत्सौन्दर्य्यमुदाहृतम्" उज्ज्वलमण्डने २अङ्गादीनां सन्निवेशभेदे।

सौपर्ण न० सुपर्णं गरुडं तदर्थमर्हति अण्। १मरकतमणौ २शस्त्र्यां राजनि०। सुपर्णमधिकृत्य कृतो ग्रन्थः अण्। भा०आ० २०अध्यायादयो २४अध्यायपर्य्यन्ते २अवान्तर-पर्वभेदे न० ४पातालगरुडोक्तायां स्त्री राजनि० ङीप्। तच्छेदमर्ह ५गरुडसम्बन्धिनि त्रि०।

सौपर्णेय पु० सुपर्णी विनतायाः अपत्यम् ढक्। १गरुडे हेमच० २गायत्र्यादिछन्दसु "गायत्र्यादीनि छन्दांसि सौपर्णेयानि पाक्षिणः" वह्निपु०।

सौप्तिक त्रि० सुप्तिकाले रात्रौ भवम् ठञ्। १रात्रियुद्धे भट्टा०। सुप्तानधिकृत्य कृतो ग्रन्थः ठञ्। २महाभार-तान्तर्गते पर्वभेदे।

सौभ न० सुष्ठु सर्वत्र शोभे भाति भा-क स्वार्थे अण्। १शाल्वचारिणि पुरे २हरिश्चन्द्रनगरे भट्टा०। तत्र राजा अण्। ३राजभेदे स च वासुदेवेन निहतः तत्कथा भा० द्र० १३अ० अवधि २२अ० पर्य्यन्ते दृश्या।

सौभद्र पु० सुभद्रायां भवः अण्। १सुभद्रापुत्रे अभिमन्यौ भीता। सुभद्राय हितः अण्। २विभीतकवृक्षे शब्दच०।

सौभद्रेय पु० सुभद्रायाः अपत्यम् ढक्। सुभद्रासुते अभिमन्यौ

सौभरि पु० मुनिविशेषे भाग० १०।७४ अ० ज्ञोन्त०।

सौभागिनेय पु० सुभगाया अपत्यम् ढक् ढिनङ् च द्विपदवृद्धिः। १सुभगापुत्रे। २तत्कन्यायां स्त्री ङीप्।

सौभाग्य न०सुभगाया भावः ष्यञ् द्विपदवृद्धिः।१पतिप्रियत्वे तदर्थं व्रतं सौभाग्यव्रत व्रतशब्दे ५०६८ पृ०दर्शयम्। सुभगाये सुभगाय वा हितं ष्यञ्। २सिन्दूरे २टङ्कणे च राजनि०। विष्कम्भादिषु मध्ये ४चतुर्थे योगे पु०ज्यो०त०।

सौभाग्यचिन्तामणि पु०औषधभेदे। तद्यथं सारको०उक्तं यथा "सौभाग्यास्तनजोरपङ्खवचव्योषाऽभयाजानखानिचन्द्राभ्रकगुडगन्धकरसानेकीकृतान् भावयेत्। निर्गुण्डीयुगभृङ्गराजकटुपामार्गपत्रोद्भवत् प्रत्येकं स्वरसेन सिद्धवटिका भ्रमि त्रिदोषोदयम्। येषां शीतमतीव देहमखिलं खेदज्वरादीन्वितं निद्रा घोरतरा समस्तकरणव्यामोहमूढं मनः। शूलश्वासवलासकासरहितं मूर्च्छारुचिं तद्ज्वरं तेषां वै परिहृत्य कीर्तिमतुलां स्वर्गातिं याति सत्पोर्षणात्"। [चिन्तामणिके शब्दे दृश्यम्।

सौभिक पु० सौभं कामचारिपुरं तद्विद्यामधिकृत्य कृतो ग्रन्थः ठक्।

सौमनस्य न० सुमनसो भावः ष्यञ्। प्रसन्नचित्तत्वे तत्र हितं यत् । २श्राद्धे दत्तस्य पुष्पस्य प्रसादयुक्तचित्तसाधनत्वे "सौमनस्यमस्तु" श्राद्धमन्त्रः।

सौमनस्यायनी स्त्री सौमनस्यमयतेऽनया अव-ल्युट् ङीप् इत०। १मालत्याम् २तत्कलिकायाञ्च त्रिका०।

सौमिकी स्त्री सोमस्तद्दीक्षा प्रयोजनमस्य ठक् ङीप्। सोमयागार्थदीक्षणीयेष्टौ हेमच०। [दीक्षणीय शब्दे दृश्यम्।

सौमित्र(त्रि) पु० सुमित्रायां भवः यत्र वाह्वादि० इञ् वा

सौमेधिक पु० सुमेधसा निर्वृत्तः ठक्। १विद्वियुते त्रिका०। २शोभनमेधायुते च त्रि०।

सौम्य त्रि० सोमो देवताऽस्य तत्रेदं वा यत्। १सोमदेवताके २ऋष्यादौ। ३तत्सम्बन्धिनि। टित्त्वात् स्त्रियां ङीप्। सोम इव श्राद्धादित्वात् य स्वार्थे अण्। ४मनोहरे ५प्रियदर्शने ६चतुरे च त्रि० मेदि० ७बुधे पु० अमरः। ततः स्वार्थिकाण्प्रत्ययाभावे सौम्याऽप्यत्र। "सदैव सौम्येदमय आसीत्" इति श्रुतिः। ज्योतिषोक्ते ७शुभग्रहे दृष्टादिसमराशौ च ८बुधस्वरूपे राजनि०। १०भास्करे त्रि० धरणिः। ११सोमयागिनि विप्रे पु०शब्दमा० अष्टाविंशतिदीपमध्ये १२द्वीपभेदे पु० "मन्वर्थो वरुणः सौम्यः वरुणः वरुण एव च। कुशदत्त कुमुदश्च नाभो भद्रारुणस्था। चन्द्रेन्द्रसत्यवाङ्कुशमक्षिमान्। तान्यङ्कुश कुमारी च तत्र दीपा दशाष्टभिः" शब्दमा०। १३सौम्यव्रते व्रतभेदे। "अतिकृच्छ्रः पर्णकृच्छ्रः सौम्यः कृच्छ्रोऽतिकृच्छ्रः" प्रा० त०। सौम्यकृच्छ्रशब्दे दृश्यम्।

सौम्यकृच्छ्र पु० कर्म० सोमदेवताके कृच्छ्रसाध्ये व्रतभेदे। "पिण्याकाचामतक्राम्बुसक्तूनां प्रतिवासरम्। एकैकमुपवासश्च कृच्छ्रः सौम्योऽयमुच्यते" याज्ञ०। पिण्याकः खलिः काचामः भक्तमण्डः। एष षड्रात्रसाध्यः प्रा०वि०।

सौम्यगन्धी स्त्री सौम्यः सुरभिः गन्धो यस्याः गौरा० ङीष्। शतपत्त्र्याम् राजनि०।

सौम्यग्रह पु० कर्म०। ज्योतिषोक्ते पूर्णचन्द्रपापायुतबुधगुरुशुक्ररूपे शुभग्रहे "सूर्यौनैश्चरौरारा पापाः सौम्यास्तथाऽपरे। पापयुक्तो बुधः पापो राहुकेतू च पापकौ" ज्यो० त०। [तथात्वम्।

सौम्यधातु पु० कर्म०। कफे राजनि० तस्य सोमजत्वात्

सौम्या स्त्री सोमो देवताऽस्य यत् सोम इव गौरा० य स्वार्थे अण् वा। १दुर्गायां देवीभा०। २महेन्द्रवारुण्यां ३रुद्रजटायां ४महाज्योतिष्मत्यां ५महिषवल्ल्यां ६गुडूच्यां ७शालपर्णी ८ब्राह्म्यां ९शठ्यां १०मल्लिकायां च राजनि० मृगशिरोनक्षत्रशिरस्यासु षड्तारकासु विष्णुः।

सौर पु० सूरस्य इदम् सूरो देवताऽस्य वा अण्। १सूर्यपुत्रे शनैश्चरे २रवौ च। ३सूर्यदेवताके त्रि० स्त्रियां ङीप्। सूरेण निर्वृत्तः अण्। ४एकैकराशौ तद्भोगेषु वा सूर्यगतिसाध्ये ५दिनमासादौ त्रि०। "अध्यायनञ्च षड्वारकर्म सौरेण मानेन सदाऽध्यवस्येत्" ज्यो०त०। "विवाहादौ स्मृतः सौरः" इति स्मृतिः। ६ऋक्षभेदे पु०राजनि० ७सूर्योपासके त्रि०८गुरुभेदे "गौड़ाः सारस्वता द्रविडाः सौराः मागधाः कोङ्कणास्तथा। कोल्लाश्च दशैवाश्च गुरवः सप्त मध्यमाः" तन्त्रसा०।

सौरज पु० सूरस्यायम् अण् सौर आत्मोऽस्तीति जन-ड। तस्मिन्दृश्ये राजनि०।

सौरभ न० सुरभेर्भावः अण्। १सुरभित्वे सौरभमस्त्रियाम् अण् सुरभिरस्त्रियाम् अण् वा। कुङ्कुमे त्रिका० २खोडे च राजनि०।

सौरभेय पु० सुरभेरपत्यम् ढक्। १गवि स्त्रियां ङीप्। "सौरभेयीभ्य एव च" गोदानमन्त्रः। तस्मा इदम् ढक्। २सुरभिसम्बन्धिनि त्रि०।

सौरसेय पु० सुरसाया अपत्यम् ढक्। स्कन्दे शब्दमा०।

सौराष्ट्र पु० शुभ राष्ट्रमस्यास्ति प्रशा० अण्। (सुरट) १देशभेदे जटा०। सुराष्ट्रे भवः अण्। २सुराष्ट्रदेशभवे त्रि०

इन्दरके पु० राजनि० ४तां० न० ५तत्पु० स्त्री० राजनि० टाप्। सुगन्धिसूत्तिकाभेदे स्त्री रत्नमा० ङीप् संज्ञायां कन्। सौराष्ट्रक पक्षौषे न० हेमच०।

सौराष्ट्रिक न० सुराष्ट्रेषु भवः ठक्। विल्वभेदे शब्दर०।

सौरि पु० सूरस्यापत्यम् इञ्। १शनैश्चरे "सौरिश्चारेऽस्तता-नीति" ज्यो०त०। २यमे २रेवत्यं ४सुग्रीवे च पु०। ५यवन-देशे हृत्यादिलक्षणायां राजनि०।

सौरिक पु० सुराणां देवानामधिवासाय हितः ठक्। १स्वर्गे स्वार्थे क। २सूर्य्योपत्ये शनैश्चरादौ।

सौरिरत्न न० सौरिप्रियं रत्नम् शाक०। नीलके मणौ राजनि०

सौरेय पु० सुरायै हितम् ठक्। गुल्मभिदाम् स्वार्थे क तत्रैव। "सौरेयः कुटवातालुकफकण्ठविषापहः। तिक्तोष्णो मधुरो दन्त्यः सुरभिः केशरञ्जनः" भावप्र०।

सौल्विक त्रि० ताम्रं ताम्रपात्रादिनिर्माणं शिल्पमस्य ठक्। ताम्रमयपात्रनिर्माणकर्त्तरि (कासारि)। वणिग्भेदे

सौव त्रि० सवेदम् स्वौ रदम् यत् अव्यवहितोपो न हस्वः वात्पूर्वमौत्। १आत्मसम्बन्धिनि २स्वसम्बन्धिनि।

सौवग्रामिक त्रि० सभामे भवः ठक् न हस्वः वात्पूर्वमौत्। सभाग्रभवे पदार्थे।

सौवर्चल पु० सुवर्चलदेशे भवम् अण्। लवणभेदे अमरः।

सौवर्णमेदिनी स्त्री सुवर्णस्य विकारः अण् सौवर्णमिव भिनत्ति प्रकाशते भिद्-णिनि। प्रियङ्गौ शब्दमा०।

सौवस्तिक पु० स्वस्तिकरणे कुशलः ठक् न हस्वः वात्पूर्वमौत्। पुरोहिते हेमच०। [रक्षके अमरः।

सौविद् पु० सुवेत्ति सु+विद्-क्विप् स्वार्थेऽण्। अन्तःपुर-

सौविदल्ल पु० सुष्ठु विदन् ल्यति तं लाति वा-क स्वार्थेऽण्। अन्तःपुररक्षके अमरः।

सौवीर न० सुष्ठु वीरो यत्र सुवीरो देशभेदः तत्र भवम् अण्। १स्रोतोऽञ्जने २वदरफले "सौवीरन्तु यवैरामैः पक्वैर्वा निस्तुषैः कृतम्। गोधूमैरपि सौवीरम्" इत्यादुक्ते २काञ्जिके अमरः "सौवीरन्तु पञ्चवर्णः कफघ्नं भेदि दोषनम्। उदावर्त्तकृमर्हृल्लिशूलानाहेषु शस्यते" भावप्र०। वदरवृक्षे पु० राजनि०।

सौवीरसार पुंन० कर्म०। स्रोतोऽञ्जने राजनि०।

सौवीराञ्जन न० सौवीराख्यमञ्जनम्। अञ्जनभेदे अमरः स्वार्थे क। काञ्जिकभेदे न०।

सौष्ठव न० सुष्ठु भद्रं तस्य भावः अण् न टिलोपः। शोभनत्वे "स सौष्ठवोदार्य्यविशेषशालिनीम्" किरा०।

सौहार्द न० सुहृदो भावः अण् हृदयादेर्हृदः। १क्लेदे २मित्रत्वे हेमच०। [सौहित्यमाचरेत्" स्मृतिः।

सौहित्य न० सुहितस्य तृप्तस्य भावः ष्यञ्। तृप्तौ "नाति-

सौहृद न० सुहृदो भावः अण्। मित्रत्वे बन्धुतायाम् हेम०

स्कद् भ्वादु० गतौ अक० सेट्। आप्लावे च सक० भ्वा० आ० सेट् इदित्। स्कन्दते अस्कन्दिष्ट। [स्कन्दत् त।

स्कन्द् समाहारे चुरा० उभ० सक० सेट्। स्कन्दयति ते अच-

स्कन्द् गतौ शोषणे च भ्वा० पर० सक० अनिट्। स्कन्दति स्म स्कन्दत् अस्कान्त्सीत् चस्कन्द। आ+आक्रमणे

स्कन्द पु० स्कन्दते अतिशुल्क गच्छति अच्। कार्त्तिकेये अमरः अग्निकुमारशब्दे ५३ पृ० तत्रोत्पत्तिरुक्ता। स्कन्दषड-स्कन्दषष्ठीव्रते षष्ठशब्दे २७३५ पृ० तत्कृत्योक्तौ दर्शितौ। २महादेवे जटा० ३देहे त्रिका० ४पारदे राजनि० ५बाल-ग्रहभेदे सुश्रुतः। [४शोणके च।

स्कन्दन न० स्कन्द्-ल्युट्। १रेचने त्रिका० २क्षरणे ३गतौ

स्कन्दांशक पु० स्कन्दस्यांश एवांशो यस्य कप्। पारदे। तयोः शिववीर्य्यजत्वादेकांशत्वम्।

स्कन्ध पु० स्कन्द्यते आरुह्यतेऽसौ सुखेन यात्रया वा कर्मणि घञ् पृषो०। १कंधे (कांध) २वृक्षस्य काण्डे (गुँड़ि) अमरः। ३सर्पे ४वृद्धे ५समूहे ६काव्ये ७महादौ षडन्दो-भेदे मेदि० सौगतमतसिद्धेषु हेतुविज्ञानादिषु पञ्चसङ्ख्येषु "सङ्घाङ्गस्कन्धपक्षकम्" माघः ॥०पचि शब्दर० ११ग्रन्थ-परिच्छेदे च। "स्कन्धैर्दशभिर्युक्तम्" इति भागवत-विशेषणम्। १२मूले हेमच०। [चिकित्सिकायां द्वारा०।

स्कन्धचाप पु० स्कन्धे चाप इव। बंशादिनिर्मितशिक्षाधाने

स्कन्धज पु० स्कन्धात् जायते जन-ड। स्कन्धारूढे वल्कलादौ "पर्वयोनय एवाद्याः स्कन्धजाः मूलजोत्तराः" हेमच०।

स्कन्धतरु पु० स्कन्धप्रधानः तरुः। नारिकेलवृक्षे राजनि०।

स्कन्धफल पु० स्कन्धे फलमस्य। १नारिकेलवृक्षे राजनि०। २वृन्ताकवृक्षे च शब्दच०। [शब्दच०।

स्कन्धबन्धना स्त्री स्कन्धे बन्धनमिवास्याः। मधूरिकायाम्

स्कन्धरुह पु० स्कन्धात् रोहति रुह-क। वटवृक्षे राजनि०।

स्कन्धवाह पु० स्कन्धेन वाहयति वह-णिच्-अच्। स्कन्धेन शकटादिवाहके हलादौ व्हारा०खुक्। स्कन्धवाहक तत्रैव हेमच०। [शाखायाम् अमरः।

स्कन्धशाखा स्त्री स्कन्धात् पश्चिमे शाखा। वृक्षस्य प्रधान-

स्कन्धशृङ्ग पुंस्त्री० स्कन्धपर्य्यन्तं शृङ्गमस्य। महिषे स्त्रियां ङीष्।

स्तन्याग्नि पु०स्तन्यजातोऽग्निः। उदरस्थाऽजाते वह्नौ शटा०।
स्तन्यावार पु० स्तन्यार्थमावारः आ+ऋ-घञ्। युद्धार्थं सद्यःकृतसन्धानां १स्कन्धावारे २तदाधारे कटके च ३राजधान्यां शब्दच०। [दिगादौ ङीषन्च०।
स्तन्यिक पु० स्तन्यधेनु वहनमस्यास्य ठन्। स्तन्यवाहके
स्तन्यिन् पु० स्तन्यधेनु वहनमस्यास्य इनि। स्तन्येन वाहके इभादौ रत्नमा०।
स्तब्ध त्रि० स्तन्द्-क्त। १च्युते अमरः २गलिते ३अरिते ४शुष्के ५गते च। भावे क्त। ६थरथे न०।
स्तन्भ प्रतिघाते क्रया० आ० प० सक० सेट्। स्तब्नाति स्तम्नोति स्तब्नोति स्तब्नुते। अस्तब्नीत् अस्तब्निष्ट। चस्तम्भ चस्तब्(भ)ध्वे। [ब्निष्ट।
स्तभ स्तम्भे भ्वा० आ० सक०सेट् इदित्। स्तम्भते अस्तब्धेत्।
स्तु शब्दौ आप्रावने च क्रया० आ०उ०सक० अनिट्। स्तुनाति स्तुनीते स्तुनोति स्तुनुते। अस्तौषीत् अस्तोष्ट। तुष्टुवाव तुष्टुवे। [स्तुन्दते अस्तुन्दिष्ट।
स्तुद आप्रावने शब्दौ च भ्वा० आ० सक० सेट् इदित्।
स्तुभ् रोधने सौ० क्रया० आदि० कार्त्स्न्यभागी प० सक० सेट् स्तुभ्नाति स्तुभ्नोति। अस्तुभ्नीत्। उदित् क्त्वा वेट्।
स्तुद विदारे दि० आ० सक० सेट्। स्तुद्यते अस्तुदिष्ट घटादि० स्तुदयति। [स्तुदयति स्तोदयति।
स्तुल चले भ्वा० प०सक०सेट्। स्तुलति अस्तुलीत् वा शटा०
स्तुलन न० स्तुल-भावे ल्युट्। १चलने २पतने अमरः।
स्तुलित न० स्तुल-भावे क्त। १कूटयुद्धादौ प्रहृत्या वीरभञ्जीतातः १पतने २स्खलनमात्रे च अमरः। कर्त्तरि क्त। ३चलिते त्रि०।
स्तन मेघशब्दे भ्वा० चु० उभ० सक० सेट्। स्तनयति ते अतस्तनत् त। वहुलकत्वान्न णोपदेशः।
स्तन प०स्तन-घञ्। (थाए) स्त्रीणामङ्गभेदे पयोधरे अमरः। "अरोमशौ स्तनौ पीनौ घनावविरलौ शुभौ" स्तनयोः शुभलक्षणं गारुडे ३६अ०। [शब्दे च मेदि०।
स्तनन न० स्तन-ल्युट्। १ध्वनिमात्रे २मेघशब्दे ३कूजने
स्तनन्धय पुंस्त्री० स्तनं धयति धे-खश मुम् च। अतिशिशौ धेटष्टित्त्वात् स्त्रियां ङीष्। [अमरः। स्त्रियां टाप्।
स्तनप पुंस्त्री० स्तनं पिबति पा-क। अतिशिशौ बालके
स्तनभर पु० ष० त०। १स्थूलस्तनभारे २तदाभोगे च त्रिका०।
स्तनयित्नु पु० स्तन-इत्नु। १मेघे २मुस्तके अमरः ३मेघशब्दे मेदि० ४विद्युति शब्दर०। ५स्फोटे ६रोगे च हेमच०।
स्तनरन्त पु० स्तनस्य इव रवोऽस्य। १स्तनाग्रे चूचुके हेमच० स्तनसदृशिवादयोऽप्यत्र हेमच०। [च।
स्तनान्तर न० स्तनयोरन्तरम्। १हृदये हेमच० २स्तनमध्ये
स्तनाभोग पु० ष० त०। स्तनस्य परिपूर्णतायाम् त्रिका०।
स्तनित न० स्तन-भावे क्त। १मेघशब्दे अमरः। २सुरतादिशब्दे च। कर्त्तरि-क्त। ३शब्दिते त्रि०।
स्तनितफल पु० स्तनिते मेघशब्दे फलति फल-अच्। विकङ्कतवृक्षे राजनि०।
स्तन्भ रोधने क्रया० आ० प० सक० सेट् चदित् क्त्वा वेट्। स्तब्नाति स्तम्नोति दरित् अस्तब्नत् अस्तब्नीत्। दरित्त्वन्यो मोपदेश एवन्याथः सौत्रोऽयमिदन्यो तेन न मोपदेशः।
स्तन्य न०स्तने भवम् यत्। स्तनजाते दुग्धे हेमच०। [भूते च
स्तब्ज त्रि०स्तम्भ-कर्मणि कर्त्तरि वा क्त। १जडीभूते २जडीरोमाणि त्रि० स्त्रियां वा ङीष् ङीप् च।
स्तब्करीमन् पु० स्तब्धं रोमास्य। १शूकरे अमरः जडीभूतरोमणि त्रि० स्त्रियां वा ङीष् ङीप् च।
स्तम्ब पु० स्था-अम्बच् किच्च पृषो०। काण्डरहिते क्षिप्तकाटो दृढे २दृढमुस्ते ३दृष्टादौ गुच्छे च अमरः।
स्तम्बकरि पु० स्तम्बं गुच्छं करोति ञ-इन्। ब्रीहिधान्ये अमरः। [मूलके खनिनादौ अमरः।
स्तम्बघन पु० स्तम्बो हन्यतेऽनेन हन-क नि०। स्तम्बो-
स्तम्बघ्न त्रि० स्तम्बो हन्यतेऽनेन हन-घञर्थे क। स्तम्बो-न्मूलके खनिनादौ अमरः। स्तम्बहननमस्यत्र।
स्तम्बपुर स्त्री० स्तम्बप्रधानाः पूः न समासान्तः। ताम्रलिप्ते पुरभेदे हेमच०।
स्तम्बेरम पुंस्त्री० स्तम्बे दृक्षादीनां काण्डे गुच्छे गुल्मे वा रमते रम-अच् सुडागमः। गजे अमरः स्त्रियां ङीष्।
स्तम्भ प० स्तम्भ-अच्। (थाम) १स्थूणायाम् अमरः। भावे घञ्। २जड़ीभावे पु०।
स्तम्भन पु० स्तम्भयति स्तम्भ-णिच् ल्यु। कन्दर्पस्य पञ्चसु बाणेषु मध्ये १बाणभेदे शटा०। भावे ल्युट्। २जड़ीकरणे न०। करणे ल्युट्। षट्कर्मान्तर्गते तन्त्रोक्ते ३अभिचारकर्मभेदे
स्तम्भित त्रि० स्तम्भ आदौ णिच्-कर्मणि क्त। जड़ीकृते
स्तरिमन् पु० स्तृ-कर्मणि इमनिच्। तल्पे उणा०।
स्तरी स्त्री स्तृ-कर्मणि ङीष्। घृते हेमच०।
स्तव पु० स्तु-अप्। १प्रशंसायाम् २स्तुतौ च।
स्तवक पु० स्तु-वुन् स्था-अवक पृषो० वा। गुच्छे अमरः। २पल्लवपरिच्छदे ३समूहे च मेदि०।
स्तवेय पु० स्तु-एय। रुद्रे उणा०।

स्तावक त्रि० स्तु-ण्वुल्। स्तुतिकारके प्रशंसाकारके।

स्तिमित न० ष्टिम-भावे क्त। १आर्द्रतायाम् अमरः। २अचाञ्चल्ये च मेदि० कर्त्तरि क्त। ३अचञ्चले ४आर्द्रे च त्रि०।

स्तिम्भि पु० ष्टिम-इन् मुक् च। १सन्तुष्टे २वायौ च उणा०।

स्तीर्वि पु० स्तृ-किन् न वेरित्त्वम्। १आकाशे २रुधिरे ३तृप्तजातौ ४अध्वर्यौ ५प्रवर्षि ६मन्त्रौ संक्षिप्तसा०।

स्तुत पु० स्तु-कर्म्मणि क्त। स्तुतिकर्म्मणि अमरः।

स्तुति स्त्री स्तु-क्तिन्। स्तवे अमरः। [अमरः

स्तुतिपाठक पु० स्तुतिं पठति पठ-ण्वुल्। राजादेर्वन्दिनि

स्तुभ रोधने सौ० क्रया० स्वा० कार्य्यभागी पर० सक० सेट् अदित् क्त्वेट्। स्तुम्नोति स्तुम्नाति। अस्तुम्नीत्। सौत्रा त्वादधोपदेश इत्यन्ये।

स्तुतिव्रत पु० स्तुतो व्रतमस्य। स्तुतिपाठके जटा०। २६८पृ०दृश्यम्

स्तुत्यर्थवाद पु० ३त०। प्रशंसया अर्थवादभेदे अर्थवादशब्दे

स्तुनक पुंस्त्री० स्तु-नक्क्। काके शब्दच० स्त्रियां ङीष्।

स्तुभ पुंस्त्री० स्तुभ-मूलक। कर्मे भरतः स्त्रियां ङीष्।

स्तूप उच्छ्राये अद० चु० उभ० सक० सेट्। स्तूपयति ते अतस्तूपत् त। बहुच्कत्वात् अधोपदेश एव। ५।७२ पृष्ठे ष्टूप इति धातोः धोपदेशतया प्रमादात् लिखितः।

स्तूप पु० स्तु-पक् पृषो० स्तूप-अच् वा। १राशीकृते स्तूपिकादौ २संघाते ३वृक्षे ४निष्प्रयोजने च संक्षिप्त०।

स्तृ विस्तारे स्वा० उ० सक० अनिट्। स्तृणोति स्तृणुते अस्तार्षीत अस्तृत अस्तरिष्ट। पर्य्युदासान्न धोपदेशः।

स्तृ प्रीतौ अक० रक्षणे सक० स्वा० प० अनिट्। स्तृणोति अस्तार्षीत्। पर्य्युदासेन अधोपदेश एव।

स्तृ आच्छादने क्रया० पु० उ० सक० सेट्। स्तृणाति स्तृणीते अस्तारीत् अस्तरिष्ट अस्तरीष्ट अस्तीर्त्त। अयं धोपदेश एव न्यायः।

स्तेन चौर्य्ये अद० चु० उभ० सक० सेट्। स्तेनयति-ते अतिस्तेनत्-त। बहुच्कत्वात् अधोपदेशः।

स्तेन न० स्तेन-भावे अच्। १चौर्य्ये। कर्त्तरि अच्। २चोरे त्रि० अमरः।

स्तेपृ(टृ)प लेपे चु० उभ० सक० सेट्। स्तेपयति-ते अतिस्तिपत्-त। अधोपदेशत्वे मूर्द्धं चिन्त्यम्।

स्तेम पु० ष्टिम-घञ्। १आर्द्रीभावे २स्नेहे च अमरः।

स्तेय न० स्तेनस्य भावः यत् नलोपः। १चौर्य्ये अमरः। "प्रच्छन्नं वा प्रकाशं वा रात्रौ वा यदि वा दिवा। यत् परद्रव्यहरणं स्तेयं तत्परिकीर्त्तितम्" दक्षोक्तेः परद्रव्यापहारः स्तेयं तच्च अष्टादशविवादान्तर्गतविवादपदभेदः तत्स्वरूपादिकं वीरमि० उक्तं चोरशब्दे २८६९ पृष्ठादौ दृश्यम्। [ङीप्।

स्तेयिन् त्रि० स्तेयमस्यास्ति इनि। परद्रव्यापहारके स्त्रियां

स्तैन्य) न० स्तेनस्य भावः ष्यञ्, अञ् वा। १चौर्य्ये परद्रव्यापहरणे। स्तेन एव स्वार्थे ष्यञ्। २चोरे त्रि०भरतः।

स्तैमित्य न० स्तिमितस्य भावः ष्यञ्। १आर्द्रे २स्नेहे ३आर्द्रीभावे च। [३जलबिन्दौ ४श्लक्ष्णे त्रि० अमरः।

स्तोक पुंस्त्री० स्तुच-घञ्। १घातके मेदि० स्त्रियां ङीष्।

स्तोकक पुंस्त्री० स्तोकाय अल्पबिन्दवे कायति शब्दायते कै-क। घातके अमरः स्त्रियां ङीष्।

स्तोत्र न० स्तु-ष्ट्रन्। १स्तवे-गुणकर्म्मादिभिः प्रशंसने अमरः। "द्रव्यस्तोत्रं कर्म्मस्तोत्रं विधिस्तोत्रं तथैव च। तथैवाभिजनस्तोत्रं स्तोत्रमेतत्त्रिविधम्" मत्स्यपु० १२१ अ० द्रव्यादुपाधिकतया स्तवस्य चातुर्विध्यसङ्गमः २स्तुतिसाधने वाक्ये सुविद सुधिनसुपसर्जनोक्तेषु तच्छिष्टानां गुणानां प्राधान्येन कथनरूपा ऋग्वेदभाष्ये लक्षिता। यथा यो देवदत्तः स चतुर्वेदाभिज्ञ इत्युक्ते सर्वे जनाः स्तुतिसमवगच्छन्ति यद्यपि दृङ्स्तुतौ मनस्तु स्तुताविच्छार्थौ तथापि प्रतिगीतमन्त्रसाध्यं स्तोत्रम् अप्रतिगीतमन्त्रसाध्यं शस्त्रमिति तयोर्विवेक इति च तत्रोक्ते प्रतिगीतमन्त्रसाध्ये स्तवने गुणकथने च। शस्त्रशब्दे प्रतिगीतमन्त्रे इति यदुक्तं तत्र अप्रगीतमन्त्रे इत्येव बोध्यम्। प्रगीतमन्त्रजातं शस्त्रमिति द्व० उ० भाष्यटीकायामानन्दगिरिवाक्ये ४प्रगीते अप्रगीते च।

स्तोत्रिय त्रि० स्तोत्राय हितं यत्। स्तोत्रसाधने ऋगादौ "कल्पयरुहताऽस्मिन् यज्ञे स्तोत्रियाः स्तोष्यन्तीति तिस्र इति कतमास्तास्तिस्रः इति ह्रोऽनुवाक्या च याज्या शस्यैव च तृतीया इति" द्व०उ०। "स्तोत्रिया नाम ऋक्सामसंस्तुतादयः" भा०भा०। "स्तोत्रिया नाम गौतिमांशिष्टा ऋग्जातयः" शत०ब्रा०१४।६।१।१२ वाक्यव्याख्यायां सायणभाष्यम्। "यथोक्तश्च स्तोत्रं स्तोत्रियां वर्च्च साम वा यजुर्वाऽथवान्यत् क्रत्वा यजेत" काल्या०श्रौ० २४।७ २०। "एकां स्तोत्रियामेका ऋचामन्यां कुर्य्यात्" कर्कः।

स्तोभ पु० स्तुभ-घञ्। १अर्थशून्ये गानादिस्वरपरिपूरणार्थे शब्दभेदे यथा साममेदे इडा ड्रोऽ प्रभृतयः। २स्तेहने ३स्तम्भने च हेमच०।

क्षोभलक्षणादिकं ज्ञानगर्भे २५७१ पृ० दृश्यम्। तच्च लक्षणं वर्षमात्रक्षोभस्य। बाल्यक्षोभस्तु नव विधाः भवन्ति तद्यथा "आशास्तिः स्तुतिसंस्थाने प्रथमः परिदेवनम्। प्रेमसम्भोगयत्नौ च कुटिराख्यानमेव च" एते तु बाल्यक्षोभाः पदक्षोभाश्च यद्यदत्र ज्ञानगर्भेषु दर्शितास्तत एवावगन्तव्याः।

स्तोम आत्मगुणाविष्करणे चुरा० पु० उभ० सक० सेट्। स्तोमयति-ते अतस्तोमत्-त। अङ्चुकत्वात् न णोपदेशः।

स्तोम पु० स्तोम-अच् स्तु-मन् वा। १समूहे अमरः। २यज्ञे हेमच०। ३स्तवे ४स्तुतिभेदे ५यज्ञके ६धने ७यज्ञे ८क्रोडापदण्डे च न० ट्यक्ष० मि०। "नारायणेन स्तोमेन" यजु०२।६२ "अयं स्तोमान् अपजह्यात्" १।१४।८

स्थान न० स्था-भावे ल्युट् तस्य नः। १क्षेत्रे २घनत्वे ३संकटौ ४आवासे ५प्रतिशब्दे च विश्वः। कर्त्तरि ल्युट्। ६संकटिकारके ७ध्वनिकारके च मि०।

स्थेन पु० स्थै-इनच्। १चोरे अजन्ते च त्रिका०।

स्थ्यै संकटौ ध्वनौ भ्वा० पर० अनिट्। स्थ्यायति अस्थ्यासीत् पर्य्युदासान्न णोपदेशः।

स्त्री स्त्री स्तु-ङट्। योषिति नार्य्याम् अमरः।

तद्भेदादिकं रतिम० शब्दे यथा

"पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनी तथा। यथो त्तमोत्तमश्चैव स्त्रीपुंसोर्जातिलक्षणम्। भवति कमलनेत्रा सान्द्रिकाचुम्बना अविरलकुचयुग्मा चारुदेशी कृशाङ्गी। मृदुवचनसुशीला गीतवाद्यानुरक्ता सकलतनुसुवेशा पद्मिनी पद्मगन्धा। भवति रतिरसज्ञा नातिखर्वा न दीर्घा तिलकुसुमसुनासा स्निग्धनीलोत्पलाक्षी। घनकठिनकुचाढ्या सुन्दरी बह्वशीला सकलगुणसमेता चित्रिणी चित्रवक्त्रा। दीर्घातिदीर्घनयना वरसुन्दरी वा कामोपभोगरसिका सुघनीलचुक्ता। रेखात्रयेण च विभूषितकण्ठदेशा सम्भोगकेलिरसिका खिच शङ्खिनी वा। स्थूलाधरा स्थूलनितम्बभासा स्थलाङ्गुली स्थूलकुचा सुशीला। कामोत्सुका गाढरतिप्रिया वा नितम्बखर्वा करिणीऽमता वा। यशके पद्मिनी तथा चित्रिणी रमते सदा। दशमे शङ्खिनी तथा हस्तिनी रमते कदा। पद्मिनी पद्मगन्धा च मीनगन्धा च चित्रिणी। शङ्खिनी शारगन्धा च मदगन्धा च हस्तिनी। बाला च तरुणी प्रौढ़ा वृद्धा भवति नायिका। सुखयोगेन रन्तव्या नारी वशवा भवेत् तदा। बाला षोड़शाद् भवेद् यावत् तरुणी त्रिंशका मता। पञ्चपञ्चाशका प्रौढ़ा भवेदूर्द्धा ततः परम्। लक्षणादिभिर्बाला तरुणी रतियोगतः। प्रेमदानादिभिः प्रौढा वृद्धा च दृढ़ताड़नात्। बाला तु माधवी प्रोक्ता तरुणी प्राणधारिणी। प्रौढ़ा करोति दृढ़तं वृद्धा मरणमादिशेत्। अङ्कुशे चरणे च गुल्फनिम्बे जानुदेवे वस्तिके नाभौ वक्षसि लङ्घयोर्निगदिता क्रमे क्रमोरेऽधरे। नेत्रे कर्णयुगे ललाटफलके मौलौ च वामभ्रुवामूर्द्धपक्षनखमेषु क्षत्रिया चान्द्री कथा पक्षयोः। सीमन्ते नयनेऽधरे च गलके वक्षस्थटे चूचुके नाभौ श्रोणितटे मनोभवगृहे लङ्घातटे गण्डके। शुक्लेपादतले तटद्वयितटेऽङ्गुष्ठे च तिस्रश्रो दक्षिणोत्तमया समं प्रथिकला पञ्चद्वयोर्योषिताम्। शुक्लपक्षे वसेदासे पादाङ्गुलिकनिष्ठके। शुक्लप्रतिपदादौ च कृष्णे पादः प्रलम्बते। पुंसः सख्ये स्त्रियोऽवासे शुक्ले, कृष्णे विपर्य्ययः। एतानि कामस्थानानि प्रेयांसि नागरैः सदा। वयस्था यदा नारी विपरीतरतिर्भवेत्। वक्षास्थ तु कक्षास्थानं रन्तव्या कामिनी तदा। नेत्रे कक्षे कपोले च कुचि पार्श्वद्वयेऽपि च। श्रोणायां नाभिदेशे च कामी चुम्बति कामिनीम्। सक्थे जङ्घे नितम्बे च जघने मदनालये। स्तनयुग्मे सदा प्रीतः कामी चुम्बति कामिनीम्। प्रेम्णा स्त्रियं समाश्लिष्य श्रोत्कारं सुखचुम्बनम्। कण्ठासक्तं पुनः कृत्वा गाढ़ाश्लिङ्गनमाचरेत्। विश्रब्धं कण्ठौ अधोपविष्टः श्रोतृकृत्य वक्त्रे च सदा प्रचुम्बन्। भगे च विङ्गं स्तनमर्दनञ्च दत्त्वापि कृत्वा परमेव कामी। केशकृष्णनखं कृत्वा नखांस्त्रीन् पञ्च चैव वा। पृष्ठे च जघने बाहौ दत्त्वा कामी रमेत् स्त्रियम्। नखरोमाङ्कितं कृत्वा दन्तैराधरपीड़नम्। श्रोणायाञ्च यत्नेन बाहौ विङ्गेन ताड़नम्। विङ्गप्रवेशनं कृत्वा कृत्वा गाढ़प्रयोगतः। पार्श्वद्वयेन संमोह्य निष्कृष्टं ताड़येद्भगम्। समाश्लिष्य स्त्रियं गाढ़ं स्तनयुग्मे च मर्दनम्। बाहौ नाभौ च संमर्द्य निष्ठुरं विङ्गताड़नम्। केशं करेण संगृह्य दृढ़ं सन्ताड़येद्भगम्। वदने चुम्बनं कृत्वा भगं हस्तेन मर्दयेत्। कृत्वं करेण संमर्द्य पीड़येदधरं दृढ़म्। रदेन पद्मवक्त्रेण पद्मिनीरतिमादिशेत्। श्रोत्कार चुम्बनं पीड़ा गले हस्ते च चुम्बनम्। अन्ये चान्ये स्तने हस्तं चित्रिणीरति-

मादिशेत्। स्त्रीपुंसयोस्तथान्योन्यं भगे लिङ्गे च पुंसनम्। रमयन्तु तथा नार्द्दं मङ्क्षवो रतिमादिशेत्। केशं करेच संमृज्य सुदृढं मजवन्धनम्। भगं करेच सनाम्ना कुक्षिनीरतिमादिशेत्। कूर्मपृष्ठं भगस्कन्धं पद्मगन्धं सुगन्धि यत्। अशोभकं सुविस्तीर्णं मङ्क्षैतद् भगलक्षणम्। मीनकं निम्नमल्पं मोलिङ्गाकृतिं परम्। दत्तुकं कामशास्त्रेभगदोषचतुष्टयम्"। स्त्रीशुभाशुभलक्षणन्तु उपरिभागे १२७८पृष्ठादौ द्रष्टव्यम्

स्त्रीगवी स्त्री० स्त्री चासौ गौश्च कर्म्म०। (नारि) रोहिण्याम्।

स्त्रीचित्तहारिन् पु० स्त्रियश्चित्तं हरति हृ-णिनि। १शोभाञ्जने त्रिका०। २शोभनोद्धारके त्रि०।

स्त्रीचिह्न न० स्त्रिया अवाधारकं चिह्नम्। १योनौ जटा०। २स्त्रिया अवाधारके चिह्ने सनादौ २स्त्रीलक्षणे च।

स्त्रीचोर पु० स्त्रिया चोर इव। वासके त्रिका०।

स्त्रीजित पु० स्त्रिया जितः त्रि-क्त। स्त्रीवश्ये।

"स्त्रीजितस्यैमानस्य कर्त्तं पुत्रं प्रचक्षते। न भ्रूणो पातकी यावात् पापिनां स्त्रीजितात् परः" ब्रह्मवै० ज० ब्रह्म० तस्य निन्दोक्ता।

स्त्रीधन न० ङीप्-तत्०। स्त्रीस्वत्वाश्रये द्रव्यमात्रे इति मिताक्षरादयः। "अध्यग्न्यध्यावाहनिकं भर्तृदायस्तथैव च। भ्रातृदत्तं पितृभ्याञ्च षड्विधं स्त्रीधनं स्मृतम्" नारदपरिभाषिते स्त्रीस्वत्वाश्रये धने इति दायभागादयः। स्त्रीधनस्वरूपादिकं मिताक्षरामतानुसारेण वीरमित्रोक्तं यथा

"अथ स्त्रीधनविभागं वक्तुमनूद्यस्वरूपं तावन्निरूप्यते तत्र मनुः "अध्यग्न्यध्यावाहनिकन्दत्तञ्च प्रीतिकर्म्मणि। भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतमिति" षड्विधमित्यनूद्यसंख्याव्यवच्छेदपरत्वाधिक्यनिरासाय। अत एव याज्ञवल्क्येन "पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतम्। आधिवेदनिकाद्यञ्च स्त्रीधनं परिकीर्त्तितम्, इत्यादिग्रन्थ उपात्तः। विष्णुनापि षड्विधानि स्त्रीधनान्युक्तानि। स यथाह "पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतम्। आधिवेदनिकं बन्धुदत्तं शुल्कमन्वाधेयमिति स्त्रीधनम्" इति। नारदः "अध्यग्न्यध्यावाहनिकन्भर्तृदायस्तथैव च। भ्रातृदत्तं पितृभ्याञ्च षड्विधं स्त्रीधनं स्मृतमिति"। षड्विधत्वं मानवत्वेव व्याख्येयम। स्त्रीधनशब्दायं यौगिकः स्त्रीस्वामिकधनमिति न तु पारिभाषिकः योगरूढे परिभाषाया अन्याय्यत्वात्। अत एव योगेश्वरेण रिक्थक्रयादिसाधारणधनस्त्रीधनयोर्व्यवस्थापनायोपपदं प्रयुक्तम्। नन्वेवं क्वचित् स्त्रीधनत्वनिषेधोऽनुपपन्न एव स्यादिति चेन्न हि स्त्रीस्वामिकत्वं तत्र निषेद्धुं शक्यते बाधात्। यथाह याज्ञवल्क्यः "तत्र यौतौ यदन्नं वस्त्रं यौतकेन वा। पित्रा भ्रात्राऽथ वा दत्तं न तत् स्त्रीधनमुच्यते इति। उपरिदत्तत्वादावेदं यदा दत्तं तदा धार्य्यमलङ्कारादिनान्यदेति नियमस्तत्पूर्वकं दत्तं यौतौ यौतकेन दायादानां कन्यायै दत्तमिदन्तद्धनत्वं विभाव्यमिति। भिन्नप्राप्तं यदाद्यभ्यः प्रीत्या प्राप्तन्तदपि न स्त्रीधनमित्यप्याह च एव "प्राप्तं भिन्नेषु यत्किञ्चित् प्रीत्या चैव यदन्यतः। भर्तुः स्वाम्यन्तदा तत्र शेषन्तु स्त्रीधनं स्मृतम्" इति। पारिभाषिकत्वे भ्रात्रादिदत्तत्वेन प्राप्तं स्त्रीधनं प्रतिषिध्यते। तेनैतद्भिन्नमेव पित्रादिदत्तं भिन्नादिप्राप्तभिन्नं वा स्त्रीधनमिति परिभाष्यते इति चेत्। उच्यते। नात्र स्त्रीधनत्वनिषेधः। किन्तु तदुक्तार्थं विभागादि निषेधः। अत एवोत्तरश्लोके तत्रभर्तुः स्वाम्यमिष्टमुक्तम्। भर्तुस्तदिनियोगे स्वातन्त्र्यञ्च स्त्रिया इत्यर्थः। प्रथमश्लोके तु स्त्रीस्वत्वनिषेधोऽपि लभ्यते उपरिदोषपदयोरुपादानात्। तादृशदाने च स्वत्वाभावस्य प्रसिद्धत्वात्। "दोषाधमनविक्रीतं दोषदाय प्रतिग्रहम्। यत्र चाप्युपधिम्यच्चेत्तत्सर्वं विनिवर्त्तयेदिति" मनुवचनात् "भार्य्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः। यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनमित्यपि वचनमार्य्याविषये भिन्नादिप्राप्तपरमेव एकमूलकल्पनालाघवात्। अध्यग्न्यादिलक्षणन्तु स्त्रीधनं याज्ञवल्क्येन "विवाहकाले यत् स्त्रीभ्यो दीयते ह्यग्निसन्निधौ। तदध्यग्न्यागतं यच्च स्त्रीधनं परिकीर्त्तितम्। यत्पुनर्ह्रियते नारी नीयमाना पितुर्गृहात्। अध्यावाहनिकञ्चास्या स्त्रीधनन्तदुदाहृतम्। प्रीत्या दत्तं तु यत्तस्यै श्वश्रूश्वशुरयोश्च वा। पादवन्दनिकञ्चैव प्रीतिदत्तन्तदुच्यते। विवाहात्परतो यत्तु भर्त्रा भर्तृकुलात् स्त्रिया। अन्वाधेयन्तु तत्प्रोक्तं यच्च स्त्रीभ्रातृतस्तथा। मातृपितृपरिष्वङ्गाद्यानां दोलाभरणकर्मणाम्। मूल्यं कन्यन्तु यत्किञ्चित्तच्छुल्कं परिकीर्त्तितम्। अदत्वा कन्यका यापि पशुः पितृगृहेऽपि वा। भ्रातुः सकाशात् पित्रोर्वा लब्धं यौदायिकं स्मृतम्। भर्तुः

वक्षादिति वक्तव्यादौ पाठः। वध्यन्त्यादिशब्दास्तु बोभट्टालाडशस्त्रीधनादावेव प्रयोगात्। स्टष्टोपस्कर-पादीनां यत्स्त्रं कन्यायांयाधिक्येन वरादिभ्यः कन्या-भरणहेतव स्टष्टते तच्छुल्कमिति मदनरत्ने व्याख्या-तम्। मिताक्षरायां तु यदृस्टष्टीत्वा कन्या दीयते तच्छुल्कमित्युक्तम्। उभयत्रापि पित्रादीनां कन्याया स्टष्टित्वहेतो विवक्षितः कन्यया तत्स्वत्वाभावेन स्त्रीधनत्वव्यपदेशत्वानुपपत्तेः। जीमूतवाहनेन तु कर्म-णामिति पठित्वा स्टष्टादिकर्मभिः शिल्पिभिस्तत्कर्म-करणे भर्त्रादिप्रेरणार्थं स्त्रियै यदुत्कोचदानं तच्छु-ल्कं तदेव मूल्यं प्रलभ्यत्वादिति व्याख्यातम्। तदयुक्तम् "यदानेतुं भर्तृस्टष्टे शुल्कत्वपरिकीर्त्ति-तमिति" व्याघोक्तं वा। भर्तृस्टष्टगमनार्थंशुल्कादि यदृत्तं तच्छुल्कमित्यर्थ इति। तदुभयमपि स्त्री स्वामिकं भवत्येव तथा एव दत्तत्वादिति तत्र स्त्री-धनत्वव्यपदेशोऽन्यस्त्रीधनवत् तुल्य एव। आधि-वेदनिकं स्त्र्यन्तरविवाहकाले पूर्वभार्यायै यद्दीयते। यदाह याज्ञवल्क्यः "अधिविन्नस्त्रियै दद्यादाधि-वेदनिकं धनम्। न दत्तं स्त्रीधनं यासां दत्ते त्वर्धं प्रकल्पयेत्" इति। पित्रादिभिस्त्रीधनार्थं स्त्रीभ्यो धनदाने विशेषमाह कात्यायनः "पितृमातृपति भ्रातृज्ञातिभिः स्त्रीधनं स्त्रियै। यथाभक्त्यादिसा-धुस्त्रीहातव्यं स्यावरादते"। स्यावरेतरद्धनं यथाशक्ति आकार्षापणसहस्रपर्यन्तं देयमित्यर्थः। व्याघोऽपि "हिसहस्रः परो दायः स्त्रियै देयो धनस्य तु"। आदि-साधुस्त्रीत्यादिति कात्यायनेन, पर इति च व्याघेनो-क्तोऽधिकमिति धनिनापि न स्त्रीभ्यो देयमिति दर्शितम्। अवश्य नियमः प्रतिवत्सरमसहदर्पणे श्रेयस्त्रे-ज्ञानेवत्सरेषु जीवनार्थं दीयमानमितोऽधिकमपि भवति चेन्न दोषः। जीवनार्थत्वाद्दानस्य यावज्जीवस्य हिसाधनमात्रेण तन्निवर्त्तायोगात्। स्त्रीधनेऽपि भर्त्रनुमतिमन्तरेण स्त्रीणां स्वातन्त्र्यमित्याह मनुः "न निर्हारं स्त्रियः कुर्युः कुटुम्बाद्बहुमध्यगात्। स्वादपि च विभाद्धि स्वस्य भर्तुरनाज्ञया" इति निर्हारो व्ययः। क्वचित्तु स्त्रीधने तासां स्वातन्त्र्य-मित्ति यदाह बौधायनस्वरूपसङ्ग्रा कात्यायनः "बौधायनं धनं प्राप्य स्त्रीणां स्वातन्त्र्यमिष्यते। यस्मात्तदाकस्मिकार्थं तेनैतत्सुमहज्जीवनम्। बौधायनेन यदा स्त्रीणां स्वातन्त्र्यं परिकीर्त्तितम्। विक्रये चैव दाने च यत्रेष्टं स्यावरेष्वपि"। भर्तृदत्ते तु स्यावरेतरत्रैव स्वातन्त्र्यमित्याह नारदः "भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन् मृतेऽपि तत्। सा यथा काम-मश्नीयाद्व्याद्वा स्यावरादृते"। स्यावरे भर्तृदत्ते स्त्रिया निवासाद्युपभोगमात्रं न दानविक्रयादिकमित्यर्थः। यदप्या श्वलं भर्तुरित्यादि कात्यायनवचोऽपि भर्तृ-दत्तस्यावरविषयमेव नारदेनोक्तमेवेति केचित्। अन्यास्त्रिषु पत्नी दुहितर इति व्याख्यानावसरेऽस्य विषयः प्रपञ्चितः। इदमाधाम्यमपि कस्मिंश्चिदपि स्त्रीधने न स्वातन्त्र्यं स्वाम्यासादित्याह कात्यायनः "न भर्त्ता नैव च सुतो न पिता भ्रातरो न च। आदाने वा विसर्गे वा स्त्रीधने प्रभविष्णवः। यदि त्वेतत्तरो-ऽन्येषां स्त्रीधनं भक्षयेद्बलात्। सदर्द्धिकं स दाप्यः स्याद्दण्डं चैव समाप्नुयात्। तदेव यदानुज्ञाप्य भक्षयेत् प्रीतिपूर्वकम्। मूलमेव तदा दाप्यो यदा स धनवान् भवेत्। अथ चेत् स दरिद्रार्थः स्यात् च तां भजते पुनः। प्राप्या विसृष्टमपि चेत् प्रतिदाप्यः स तद्धनात्। आधाध्यादनवाधानासुक्ष्मेदो यत्र योषितः। तत्र क्षमा-दद्यात् स्त्री विभागं रिक्थिनान्तथा"। स्त्रिया धनं स्टष्टीत्वा यद्यपरभार्यया सह बलेनास्त्रावमन्यते तदा स्टष्टीतं तद्धनं राज्ञा बलाद्ग्राह्यः। भक्षाच्छा-दननिवासात् यदि भर्त्ता न ददाति तदा तेऽपि स्त्रिया बलादग्राह्या इत्यर्थोक्तं धनं वा याज्ञवल्क्यमिति श्लोकद्वयार्थः। स्टष्टमपि तथा दोषरहिते बोध्यं दुष्टा पुनः क्षिप्तमपि स्त्रीधनं न लभते रत्नाद्द स एव "अपकारक्रियायुक्ता निर्लज्जा चार्थनाशिका। अभिचाररता वा च स्त्रीधनं न तु याचेति"। नार्हतीत्यनेन तया सह्यमध्याहृत्य याचत्र-मिति स्त्रुचितम्। अपकारक्रियायुक्ता यदा भर्तृप्रतिकूला-चरणपरा "निर्लज्जादर्शनाधिका" रत्नेऽपि पाठः। देवलः "दरिद्राभरणं शुल्कं लाभश्च स्त्रीधनं भवेत्। भुञ्जते तत् स्वयमेवेदं पतिर्नार्हत्यनापदि। इदं भोक्तुं च भोगे च स्त्रियै दद्यात् सदर्द्धिकम्" इति। इदं-मेवार्थं पित्रादिना दत्तमिति स्मृतिचन्द्रिकायाम्। मदनरत्ने तु दरिद्रेरिति पठितम्। दरिद्रस्त्रीतार्थं पित्रादिभिर्दत्तमिति व्याख्यातम्। आधौ गोदोहि-त्रीत्वर्थं यद्भुज्यते कृतचित्। इदं आपदमन्तरेण।

मोक्षस्यामोदानमिति यावत्। अननुज्ञातत्यागभोग-विषयमेतत्। तदनुज्ञया त्वनापद्यपि न दोषः "स्व-मेवैतेषामहंतीत्येवकारः स्त्रीपत्यादीनां व्युदासार्थः। भर्तृव्युदा-सस्य पतिनार्हतीत्यनेनाभिधानात्। भर्तृव्युदासे ततो बहिरङ्गानां भ्रात्रादीनां व्युदासस्यापि दण्डा-नुपपत्तिकया सिद्धत्वात्। अनापदीत्यभिधानादापदि न दोषः। अतएव 'पुत्रार्त्तिहरणे चापि स्त्रीधनं भोक्तु-मर्हतीति' तत्रैव वाक्यशेषः। पतिरित्यनुषङ्गः। पुत्र-पदस्थं कुटुम्बोपलक्षकं तत्रार्त्तिर्भक्ष्याद्यभावनिमित्ता बोद्धा तत्रा हरणे। यत्तदादन्यत्रापि धनाभाव निमित्ते सङ्कटे स्त्रीधनमननुज्ञातमपि पतिरश्नीयात् भो-क्तुमर्हतीत्यर्थः। ननु परधने त्यागभोगयोः स्वाम्यनु-ज्ञातया विना कथमर्हता बाधिताऽनेन बोध्यते। अनु-ज्ञाबाल्यनापद्यपि न विरोधः। उच्यते। वचनबला-दाहरणविषये व्यये स्वत्वमेव तस्य तत्रेत्यदोषः। अत-एव योगीश्वरोऽपि "दुर्भिक्षे धर्मकार्ये च व्याधौ सम्प्रतिरोधके। गृहीतं स्त्रीधनं भर्त्रा नाज्ञप्तो दातु-मर्हति"। धर्मकार्ये यावश्यके नित्ये नैमित्तिके च सम्प्रतिरोधके दण्डाद्यर्थं राज्ञापरोधे सति। वाचस्पतिस्तु सम्प्रतिरोधक इति व्याधिविशेषणं कार्यानुष्ठानबाधके इति च तदर्थं इत्याह। नाज्ञप्तो दातुमर्हतीत्यपि दारिद्र्यादिकृतदानासामर्थ्ये दुर्भिक्षादिगृहीतमध्यवश्यं देयमेतावतैव वचनोपपत्तौ सामर्थ्येऽस्यदानमिच्छयेत्यस्य कल्पितमनर्हत्वात्। पतिरश्नीयादापद्यपि पत्युरेव स्त्रीधनभक्षणाधिकारः प्रतिदानेच्छया नान्यस्येति शेषम्। भर्त्रा दातुं प्रतिश्रुतं भार्यायै तस्मिन् मृते पुत्रादिभिस्तस्यै देयमित्याह स एव "भर्त्रा प्रति-श्रुतं देयमृणवत् स्त्रीधनं सुतैरिति"। सुतग्रहणं पौत्रप्रपौत्रयोरुपलक्षणमृणवदित्यभिधानात्। अनेन स्त्रीधने जीवत्यामप्यां सुतानां जन्मना स्वत्वेऽपि नास्ति विभाग इति गम्यते। एवं स्त्रीधनसङ्ग्रहम्। दाय-भागस्तु पारिभाषिकपरत्वेन एव। अनयोर्युक्ता-युक्तत्वं सुधीभिर्भाव्यम्। उत्तराधिकारिणश्चैते ॥१॥ पु० च तद्विभागो दृश्यः।

स्त्रीधव पु० स्त्रियं धुनाति धू-क्वच्। पुरुषे जटा०।

स्त्रीधर्म्म पु० दृश्य०। स्त्रीतो नारीकुलविषये रक्षति वैमत्य०

स्त्रीधर्म्मिणी स्त्री स्त्रीधर्मोऽस्त्यस्या इनि। सतीयां स्त्रि-याम् अमरः।

स्त्रीपण्योपजीविन् पु० स्त्रीरूपेण पण्येन जीवति जीव-णिनि। धनं गृहीत्वा सम्भोगार्थमन्यस्मै स्त्रियं दत्वा तद्धनोपजीविनि।

स्त्रीपुंधर्म्म पु०स्त्रियाः पुंसश्च धर्मः तमधिकृत्य व्यवहारो वा। स्त्रीपुंसयोः यथाशास्त्राचाररूपे धर्मे तद्विषयके व्यव-हारपदे विवादपदेषु मध्ये विवादपदभेदे स्त्रीपुंसयोगोऽ-यम्। वीर० तत् स्वरूपं यथा "तत्रकृष्णभाट्ट नारदः "विवाहादिविधिः स्त्रीणां यत्र पुंसाञ्च कीर्त्यते। स्त्रीपुंसयोगधर्मं तद्विवादपदमुच्यते" इति। विवा-हादिशब्देन स्त्रीपुंधर्मो दर्शितः। अतएव मनुर्व्यवहारपदोद्देशकाले स्त्रीपुंधर्मोविभागस्तेनैवाग्रे प्रतिज्ञापूर्वकं तेषां निरूपणं चकार "पुत्रस्य हि-यार्थैव धर्म्ये वर्त्मनि तिष्ठतोः। संयोगे विप्रयोगे च धर्मान् वक्ष्यामि शाश्वतान्" इत्यादिना संयोगे अन्यो-न्यसन्निधाने विप्रयोगे देशतः कालतो वा व्यव-धाने। शाश्वतान्नित्यान् अवश्यानुष्ठेयानिति यावत्। के ते धर्मा इत्याकाङ्क्षायामाह स एव "अस्वतन्त्राः स्त्रियः कार्याः पुरुषैः स्वैर्दिवानिशम्। विषयेषु च सज्जन्त्यः संस्थाप्या ह्यात्मनो वशे" इत्यादि। पुरुषैः भर्तृपुरुषैः। विषये दण्डहेतुभूतपापत्यादिविषये। नारदोऽपि "अस्वातन्त्र्यमृतस्त्रीणां प्रजापतिरकल्पयत्" इति। अतोऽन्यैरपि स्त्रीणामस्वातन्त्र्यं यथा भवति तथा कल्पयितव्यमित्याशयः। पुरुषेण स्त्री व्यभिचारादवश्यं रक्षणीया। तथा च हारीतः "एकव्रतत्वकृच्छ्रभावात् परेन्द्रियोपहतत्वाच्च दुराः कृत-सङ्करकारिण्यो भवन्ति लोकतः कारणः कृच्छ्रोक्ते भर्तरि मोक्षस्तस्माद्धेतोपाधातात्स्त्रियां रक्षेत्प्रयत्ना-न्नाशे कुलनाशः कुलनाशे तन्तु नाशस्तन्तुनाशे देवपिर-यज्ञनाशो देवपितृयज्ञनाशे प्राणनाशः प्राणनाशे सर्वनाशः" इति। एकव्रतत्वकृच्छ्रभावात् स्त्रीणां एकभर्तृत्वं नित्यमनाद्यात्। परेन्द्रियोपहतत्वात् परस्मिन् पुंसि इन्द्रियस्य मनसोरागादिना उपह-तत्वात्। कृतसङ्करकारित्वप्रसक्तिस्तत्स्वभावानुगत प्रयो-त्यादनेन कृतसङ्कर्यकारित्वम्। अतएव शङ्खलिखितौ "यस्मिन् भावोऽर्पितः स्त्रीणामार्त्तवे तादृशं तनुजन-यतीति"। तन्तुः पुत्रादिसन्ततिः। मनुरपि "रक्षे-दस्वतन्त्राः स्त्रियो रक्षा विशेषतः। इत्यादि

कृतयो लोकभावेदुररक्षिताः । इमं हि सर्ववर्णानां पश्यतो धर्ममुत्तमम् । यतन्ते रक्षितुं भार्यां भर्तारो दुर्बला अपि । सां प्रस्थितां चरित्रेषु कुलमात्मानमेव च । स्वधर्मं हि प्रयत्नेन जायां रक्षन् हि रक्षितः" इति । इयोः कृतयोः भर्तृविषयकृतयोः । अनेन कृतदण्डैरपि रक्षा इति लोककथनमुखेन दर्शितम् । अतएव हारीतः "सच्छोभ्योऽपि प्रयत्नेभ्यो नित्यां स्त्री स्वबन्धुभिः । स्वपित्रादिभिः पालनीया गुरुस्त्रीभिर्दिवानिशम्" । मनुरपि "बालेऽदाता पिता वाच्यो वाच्य आनुपयन् पतिः । सुते भर्तरि पुत्रस्तु वाच्यो मातुररक्षिता" इति । बाले कन्यादानयोग्ये काले । वाच्यो निन्द्यः । अनुपयन् अननुगच्छन् । स एव "पिता रक्षति कौमारे भर्ता रक्षति यौवने । पुत्रस्तु स्थविरे भावे न स्त्री स्वातन्त्र्यमर्हति" । याज्ञवल्क्योऽपि "रक्षेत्कन्यां पिता, विन्नां पतिः, पुत्रस्तु वार्द्धके । अभावे ज्ञातयस्तेषां स्वातन्त्र्यं क्वचित् स्त्रियाः" इति । विन्ना विवाहिता । पतिपुत्रविहीनायास्तु रक्षणं पतिपक्षान्तर्गतेन प्रत्यासत्त्येन कार्यम् । तथा च नारदः "मृते भर्तरि पुत्राया पतिपक्षः प्रभुः स्त्रियः । विनियोगात्तु रक्षाया भरणेषु च सैव रः । परिक्षीणे पतिकुले निर्मनुष्ये निराश्रये । तत्सपिण्डेषु चासत्सु पितृपक्षः प्रभुः स्त्रियः" । पितृपक्षस्याप्यभावे स एवाह "पक्षद्वयाभावे तु राजा भर्तां स्मृतः स्त्रियः । स तासां भरणं कुर्यात्रिष्टस्त्रीधनवृत्तिताम्" इति । विनियोगः कर्मणि नियोजनम् । भर्ता पोषकः स्त्रीस्वभावं दर्शयति दक्षः "अशौचवत् स्त्रियः सर्वा भूषणाच्छादनाशनैः । दुष्टतापि सता नित्यं पुरुषं हृदयकर्षति । अशौचा रक्षणादत्ते केवलं या तपस्विनी । इतरा तु धनस्निग्धं मांसं वीर्यं बलं सुखम् । बालत्वा बालभावे तु यौवनेऽभिसुखी भवेत् । तृणवन्मन्यते नारी दुष्टभावे स्वकर्मसु । स्वकार्ये वर्तमाना सा स्नेहाच्च निवारिता । अपथ्या तु भवेत् पश्चाद् यथा व्याधिरुपेक्षितः" इति । दुष्टिता तृप्ता कृतापीत्यन्वयः । अपकर्षति ततमात्मामात्रं करोति स्वकार्ये स्नेहावाम् । अपथ्या अत्यन्ताहितहेतुभूता । मनुरपि "नैता रूपं परीक्षन्ते नासां वयसि संस्थितिः । सुरूपं वा विरूपं वा पुमानित्येव भुञ्जते । पौंश्चल्याच्चलचित्तत्वात् नैःस्नेह्याच्च स्वभावतः । रक्षिता यत्नतोऽपीह भर्तृषेता विकुर्वते । अन्यान्यमनसङ्कल्पा कार्मं क्रोधमनार्जवम् । द्रोहभावं कुचर्यां च स्त्रीभ्योमनुरकल्पयत् । नास्ति स्त्रीणां क्रिया मन्त्रैरिति धर्मो व्यवस्थितः । निरिन्द्रिया ह्यमन्त्राश्च स्त्रियोऽनृतमिति स्थितिः । तथा च श्रुतयो बह्व्यो निगीता निगमेष्वपि । स्त्रीलक्षणपरीक्षार्थं नाम्नां ह्यषु निरुक्तयः । यन्मे माता प्रलुलुभे विचरन्त्यपतिव्रता । तन्मे रेतः पिता वृङ्क्तामित्यृक्षेतद्दर्शनम् । ध्यायन्त्यनिष्टं यत्किञ्चित्पापिष्ठाश्च चेतसा । तच्चैव व्यभिचारेण निर्दुष्टः सम्प्रयुञ्जते । एवं स्वभावं ज्ञात्वास्या आत्मजापतिनिसर्गजम् । परमं यत्नमातिष्ठेत् पुरुषो रक्षणं प्रति" इति । निरिन्द्रिया निर्वीर्या पैङ्गलप्रभृतिरक्षिता इति यावत् । स्त्रियोऽनृतमिति प्रायशोऽनृतवदनशीलत्वादुपचारः । श्रुतयः श्रुतिवाक्यानि । निगमेषु वेदेषु स्त्रीलक्षणं स्वरूपं तासां श्रुतीनामध्ये वा निरुक्तिरूपा व्यभिचारपापचित्तरूपाद्याः श्रुतीः ह्यषु स्त्रीस्वभावज्ञानार्थमित्यर्थः । महाभारतेऽपि "कुलीना रूपवत्यश्च नार्यश्चत्य योषितः । मर्यादासु न तिष्ठन्ति स दोषः स्त्रीषु नारद !! अनर्थित्वान्नृशंस्यस्य भयात्परिजनस्य च । मर्यादायाममर्यादाः स्त्रियस्तिष्ठन्ति भर्तृषु । यौवने वर्तमानानां दृष्टामरपतेरपि । नारीणां स्वैरचारीणां भिद्यन्ते कुलस्त्रियः । यदि पुंसामतिक्रान्तं ! कथञ्चिन्नोपपद्यते । अन्योन्यस्य प्रवर्तन्ते न च तिष्ठन्ति भर्तृषु । अधाभात् पुरुषाच्चैव भयात्परिजनस्य च । बधबन्धभयाच्चैव स्वयं गुप्ता भवन्ति ताः । नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः । नान्तकः सर्वभूतानाच्च पुंसां कामलोचना । कामानामपि दातारं दातारं मानसाम्बयोः । रक्षितारञ्च भक्षन्ति भर्तारं यत्नतः स्त्रियः" इति । श्रीरामायणेऽपि "नैवाङ्गनानान्दयितो नापि हेयोऽपि कथन । सर्वमेवावलम्बन्ते सता सङ्गजा इवेति" । अथ रक्षणप्रकारः । तत्र मनुः "न कश्चिद्योषितः सङ्गं प्रसहेत्त परिरक्षितुम् । एतैरुपाययोगैस्तु भक्षाक्षाः परिरक्षितुम् इति । प्रसहेत्र शक्तस्य अवरुद्धेति यावत् । बलाच्चवरोधेन शरीरव्यभिचाराद्रक्षणं शक्यन्तयापि मानसव्यभिचाराद्रक्षणमशक्यमित्याशयेन मनुना न कश्चिद्योषितः सङ्गं प्रसहेत्र परिरक्षितुमित्युक्तम् । न च मानसव्यभिचाराद्रक्षणमनर्थकमन्यजत्वाभावेन प्रजाविशुद्धिविघातासंभवादिति वक्तव्यम् । यत आह स

एव "वाहयं भजते स्त्री हि सुतं सूते तथाविधम्। तस्मात् प्रजाविशुद्ध्यर्थं स्त्रियो रक्षेत् प्रयत्नतः" इति। यादृशं पुरुषसङ्गकामे स्त्री मनसा भजते तत्समानशीलं पुत्रं जनयतीति पूर्वार्द्धार्थः। अतएवाङ्गिरः शङ्खलिखितौ "यद्यत् भावोऽर्पितः स्त्रीणामार्त्तवे तच्छीलं जनयन्तीति"। मानसव्यभिचारादपि स्त्रिय रक्षेदिति शेषः। तथा च मनुना तस्मादित्यादिनोक्त राईनायमेवार्थो दर्शितः। परिरक्षणोपायानाह मनुरेव "अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत्। शौचे धर्मे च पक्वान्नु पारिणाह्यस्य चेश्वरे" इति। अर्थस्य संग्रहे स्वेन समानीतार्थसंविधाने। व्यये स्वेनोक्तव्यये। शौचे स्नानादिशुद्धिकरसंमार्जनोपलेपनादौ। धर्मे अग्निहोत्राद्यनुष्ठानोपकारके व्यापारे। पक्वान्नां पाकव्यापारे। पारिणाह्यं पीठादि स्नानोपकरणं तस्य दैवने विचारणे। निरन्तरगृहव्यापारनियोजनात् पुरुषान्तरचिन्तारहित्यं यथा भवति भार्यायाः तथा कुर्यादिति तात्पर्यार्थः। हरिस्मृतिरपि "व्ययव्यये च संस्कारे गृहोपस्करसंग्रहे। शौचाच्छादनकार्ये संयोज्याः स्त्रीषां गृहिण्यः सततं" इति। एवविधव्यापारासक्तचित्ततया साध्व्य इति व्यपदिश्यन्त इत्याह मनुः "आत्मानमात्मना यास्तु रक्षेयुस्ताः सुरक्षिताः" इति। आत्मना गृहव्यापारासक्तेनान्तःकरणेन सुरक्षिताः साध्व्यः। आप्तपुरुषरक्षितास्तु स्त्रियो न सम्यक्षिता इत्याह स एव "अरक्षिता गृहे रुद्धाः पुरुषैराप्तकारिभिः" इति। आप्तकारिभिः पुरुषैः गृहे रुद्धा इत्यन्वयः। आप्ताश्च ते कारिणश्चाप्तकारिणः। सुरक्षिताः सम्यक्षाविहीना इत्यर्थः। अर्नुद्धमेनिवृत्तमपि स्त्रीणां रक्षणोपाय इति दर्शयितुं स एवाह "वाहगुणेन भर्त्ता स्त्री संयुज्यते यथाविधि। ताहगुणा सा भवति समुद्रेणेव निम्नगा। अक्षमाला वसिष्ठेन संयुक्ताऽधमयोनिजा। शारङ्गी मन्दपालेन जगामाभ्यर्हणीयताम्" इति। भार्यायां भरणमात्रव्यवहारमित्याह स एव "देवदत्तां पतिर्भार्यां विन्दतेनेच्छयात्मनः। तां साध्वीं बिभ्रयाच्चित्यं देवानां प्रिय माचरन्"। देवैर्दत्ता देवदत्ता दैवप्रमादावातेति यावत्। तां भार्यां स्वयंवरे पतिर्विन्दते। तत्र व्यापाराभावाद्देवदत्तामित्यनेन विवाहसंस्कारस्य स्त्रीपुंसयोः समान्यस्य न स्त्रीधनत्वं किन्तर्हि देवदत्तत्वमिति दर्शितम्। देवदत्तत्वञ्च स्त्रीणाम् "सोमोददद्गन्धर्वाय गन्धर्वो दददग्नये। रयिञ्च पुत्रांश्चाददग्निर्मह्यमथो इमाम्" इत्यादिभ्यः श्रुतिवाक्येभ्योऽवगम्यते। तेन देवैर्दत्तायां स्वभरणेन दातव्यां देवानां दृष्ट्वा यां प्रयच्छति इत्यर्थवादे दत्तुक्तं मदनरत्ने। न च साध्वीभिन्नस्य पतिव्रताभिन्नस्यैवरत्वेन व्यभिचारिण्या भरणमनावश्यकमिति वक्तव्यम्। तथा सति कटत्वादिनाऽवश्यभरणीयत्वात्। तथा च नारदः "व्यभिचारे स्त्रियाश्चैवमधःशयनमेव च। कटञ्च कृष्णसर्पं चावस्करोज्झनम्" इति। स्त्रियाश्चारित्रे व्यभिचारे जाते सुखशयनमधःशयनञ्च कार्यम्। कटं कृष्णसर्पञ्च भरणार्थं दद्यात्। अमेध्यशोधनरूपं कर्म कारयेदित्यर्थः। दोषरहितायां भार्यायाः परित्यागिनं प्रत्याह नारदः "अनुकूलामपापाढ्यां दक्षां भार्यां प्रजावतीम्। त्यजन् भार्यामवस्थाप्य राज्ञा दण्डेन भूयसा" इति। विष्णुरपि "निर्दोषां परित्यजन् पश्येदिति चौरवच्चास्य दण्डनमुक्तवान्। निर्दोषात्यागहेतुभूतदोषरहितां। दण्डेन स्त्रीधनित्वभङ्गे त्याह योगीश्वरः "आत्मास्यादिनीं दक्षां वीरघ्नीं प्रियवादिनीम्। त्यजन् दाप्यस्तृतीयांशमदुष्टोभरणं स्त्रियः" इति। तृतीयांशमत्रतृतीयांशम्। राज्ञा भार्यायां दाप्यः। अल्पधनः भरणमात्रपर्याप्तं धनं दाप्य इत्यर्थः"। (स्त्रीपुरुषयोः।

स्त्रीपुंस पु० द्वि० स्त्री च पुमांश्च अत्रसमा०। स्त्रियौ

स्त्रीपुंसलक्षण स्त्री स्त्रीपुंसयोर्लक्षणमत्र। स्त्रीपुरुषयोर्लक्षणग्रन्थे स्त्रीपुरुषविशेषधारिण्यां स्त्रियाम् पीटायाम् अमरः

स्त्रीप्रिय पु० ६त०। १आम्रवृक्षे त्रिका०। २नारीप्रियमात्रे त्रि०

स्त्रीमुखप पु० स्त्रीसुखं पाति पा-क। दोहदशब्दार्थे राजनि०।

स्त्रीरोग पु० ६त०। स्त्रीणां रोगे योनिरोगादौ सुश्रुत।

स्त्रीलिङ्ग पु० स्त्रिया एव लिङ्गं तत्कार्यं यस्य। स्त्रीलिङ्गविशिष्टव्याकरणोक्तसंस्कारयुक्ते शब्दभेदे। ६त० स्त्रीत्वचिह्ने स्तनादौ न०।

स्त्रीवश्य पु० ६त०। स्त्रीवशीभूते।

स्त्रीविधेय पु० ६त०। स्त्रीवशीभूते।

स्त्रीसंग्रहण न० स्त्रियाः संग्रहणं यत्र। परस्त्रीहरणरूपे विवादपदभेदे। तत्कारणादिकं वीरमि० दर्शितं यथा "अथ स्त्रीसंग्रहणाख्यं व्यवहारपदम्। तत्र नारदेनाह हरिस्मृतिः "यामूलं संग्रहणं त्रिप्रकार"

निबोधत। वस्त्रोपधिकृते हे तु तृतीयमनुरागजम्" इति। एतेषां स्वरूपं दर्शयति स एव "अनिच्छन्त्या यत् क्रियते मनोज्ञस्पर्शनन्त्रया। विप्रयन्त्या वा रहसि बलात्कारकृतन्तु तत्। बद्धना मर्दमानीव दत्त्वा स्वं मर्दकारणम्। संयोगः क्रियते यत्र तन्नूपधिकृतं विदुः। अन्योन्यचक्षुरागेण दूतीसंप्रेषणेन वा। कृतं रूपार्थबोधेन प्रेषं तदनुरागजम्" इति। अनुरागज संग्रहस्य त्रिविधत्वं दर्शयति स एव "तत्पुनस्त्रिविधं प्रोक्तं प्रथमं मध्यमोत्तमम्" इति। व्यासोऽपि "संग्रहस्त्रिविधोज्ञेयः प्रथमोमध्यमस्तथा। उत्तमश्चेति शास्त्रेषु लक्षणं च पृथक् पृथक्" इति। एतेषां स्वरूपमाह तत्रैव "कटाक्षावेक्षणं हास्यं दूतीसंप्रेषणं तथा। अर्थोपभोगवस्त्राणां प्रथमः संग्रहः स्मृतः। प्रेषणं गन्धमाल्यानां फलभूषाम्बरस्य च। मध्यमग्रहणं रहसि मध्यमं संग्रहं विदुः। एकशय्यासनं क्रीड़ा चुम्बनालिङ्गनं तथा। यत्तु संग्रहणं प्रोक्तमुत्तमं शास्त्रवेदिभिः" इति। स्त्रीसंग्रहस्य ज्ञानोपायमाह याज्ञवल्क्यः "पुमान् संग्रहणे याह्यः केशाकेशि वरस्त्रिया। मद्यो वा कामजैश्चिह्नैः प्रतिपत्तौ दृशोस्तथा" इति। परभार्यया सह केशाकेशि क्रीड़नेन मद्यः अभिनवैः कामजैः करदष्टदशनादिकृतव्रणादिचिह्नैर्दृशोः प्रतिपत्तौ संग्रहणवान् इति प्रतिपत्तव्य इत्यर्थः। उपायान्तरमाह स एव "श्रीशीलनवयावरणसङ्गवेशावसर्पणम्। अदेशकालसम्भाषः सङ्केतस्थानमेव च" इति। कूर्मोऽपि इति शेषः। सङ्केति करः। मनुरपि "स्त्रियं स्पृशेदेशे यः स्पृष्टो वा मर्षयेत् तथा। परस्परानुमते सर्वं संग्रहणं स्मृतम्"। यत्तु दर्पादिना मर्षयं भुङ्क्ते वदति वोऽपि तथाविधत्वेन याज्ञ इत्याहत्तर्मनुनारदौ "दर्पाद्वा यदि वा मोहात् त्रासद्वा वा भयं वदेत्। पूर्वं मर्षयं भुङ्क्ते तच्च संग्रहणं स्मृतम्" इति। बलात्कारकृतस्य स्त्रीसंग्रहणस्य साहसान्तर्भूतत्वेन तत्रैव दर्शितत्वादुपधिकृते दण्डमाह हरिस्वामिः "दर्पाद्वा कामयेद्यस्तु तस्य सर्वहरोदमः। अङ्गयित्वा भगाङ्केन पुरान्निर्वासयेत्ततः" इति। सर्वहरः सर्वस्वहरः एतत् प्रजातोयविषयम्। हीनोत्तमागमने तु क्रमेणार्द्धं धनं सर्वस्वहरणरूपो वधश्चितसर्वस्वहरणरूपो वा दण्डोऽवगन्तव्यः। "दमानेयः प्रमायान्तिं" साहसवादनिरूपणे दर्शितवचनात्। तत्र वचने पुरुषस्यापकर्षाभावे दुष्टो दण्डो न स्त्रिया इति नोक्तस्थाः दण्डः, तेन साहसस्त्रीसंग्रहणवत् प्रकृतेऽपि प्रजातीयोपभुक्तायाः संग्रहणीयायाः प्रायश्चित्ताचरणानन्तरं पुनरपि तेनोपभुक्तायां इतव्यमित्युक्तं भट्टनरसिंहे। अनुरागजस्त्रिविध संग्रहणे दण्डमाह स एव "त्रयाणामपि चैतेषां प्रथमो मध्यमोत्तमौ। विन्यः कल्पनीयः स्वादधिकोऽर्थविधाधिकः" इति। अधिकः प्रथमसाहसादिभ्योऽधिकः। बलोत्तमे दण्डमाह याज्ञवल्क्यः "प्रजातावुत्तमो दण्ड आनुलोम्ये तु मध्यमः। प्रातिलोम्ये वधः पुंसो नार्याः कर्णादिकर्तनम्" इति। अनुलोमेऽपि वर्णानां बलात्कारेण प्रजातीयपरभार्यागमने स्वामीतिपक्षस्थो दण्डः। यदा त्वानुलोम्येन हीनप्रजातीयागमनं तदा मध्यमसाहसः, उत्तमप्रजातीयागमने मन्तव्यः। तस्याः कर्णादिकर्तनमित्यर्थः। एतच्चानुरागजसंग्रहणविषयं स्त्रिया अपि दण्डाभिधानात्। बलात्कारोपधिकृतयोस्तु स्त्रिया अनपराधित्वेन दण्डाभावात्। अस्मादेव प्रातिलोम्येन गमने पुरुषस्य वधं विधाय स्त्रियास्तदङ्गोत्पत्तकर्तनादिकर्तनविधानात् प्रजातीयागमने पुरुषस्य वाग्दण्डमध्यमसाहसौ दण्डौ तदङ्गं स्त्रियादण्ड इति स्थितम्। अतएव कात्यायनः "सर्वेषु चापराधेषु पुंसोऽङ्गवृद्धमस्तथा। तदङ्गं योषितो दद्युर्वधे पुंसोऽङ्गकर्तनम्"। इति। स्त्रिया इति शेषः। यदा पुनः सवर्णामनुलोम्येन शुश्रूषां वा व्रजति तदा विशेषमाह मनुः "सङ्घं ब्राह्मणो दण्ड्योऽनुशुश्रूषां विप्रां बलाद् व्रजन्। शतानि पञ्च दण्ड्यः स्यादविक्षत्या सङ्गतः। सङ्घं व्रजन्ती दण्ड्यां दाप्यो शुल्कं तु तौ व्रजन्। शूद्रायां क्षत्रियविशोः सङ्घन्तु भवेदमः" इति। तौ क्षत्रियवैश्यौ। एतच्च गुरुसखिभार्यादव्यतिरिक्तविषयम्। तत्र दण्डान्तरविधानात्। तदाह नारदः "माता भ्राता स्वसा भ्रातुश्चानी पितृस्वसा। पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी स्नुषा। दुहिता चार्यभार्या च सगोत्रा गुरुयोषितः। रात्रौ प्रव्रजिता धात्री साध्वी वर्णोत्तमा च या। शिश्नग्रोत्कर्तनात्तत्र नान्यो दण्डो विधीयते" इति। यत्तु प्रातिलोम्येन गमने स्त्रियाश्चेः पुरुषस्य वध इत्युक्तं योगीश्वरवचने। तद्गुणाधिकविषयमन्यथा व्यर्थदण्डः। तथा च मनुः "उशनापि हि तावेव ब्रा-

ब्राह्मणा गुप्तया सह। विप्रतो शूद्राहस्तो दग्धव्यो वा कटाग्निना। ब्राह्मणीं यद्यगुप्तान्तु सेवेतां वैश्यपार्थिवौ। वैश्यमञ्जयत कृत्स्नं क्षत्रियन्तु सहस्रिणम्" इति। पञ्चशतमपशतपञ्चकदण्डभाजमित्यर्थः। एवं सहस्रिणमित्यपि। क्षत्रियञ्च गुप्तवैश्यागमने वैश्यञ्च गुप्तक्षत्रियागमने क्रमेण पञ्चसहस्रपञ्चशतपञ्चकं तयोर्दण्ड इत्याह स एव "वैश्यश्चेत् क्षत्रियाङ्गुप्तां वैश्यां वा क्षत्रियो व्रजेत्। यो ब्राह्मण्यामगुप्तायामुभौ दण्डमर्हतः" इति। शूद्रस्त्वगुप्तेऽक्षतस्त्रीगमने विक्षतक्षेत्रनखत्वापहरणे गुप्तागमने तु वधसर्वस्वापहारौ। तथा च स एव "शूद्रो गुप्तमगुप्तं वा द्वैजातं वर्णमाव्रजन्। क्षुप्रैकाङ्गवधस्त्वगुप्तौ सर्वेण हीयते" इति। अयञ्च वधादुपदेशः ब्रह्मपालनाधिकाराद्ब्राह्मण एव न द्विजातिमात्रस्य। "ब्राह्मणः परीक्षार्थमपि शस्त्रं नाददीतेति" शस्त्रग्रहणस्य निषिद्धत्वात्। यदा तु राज्ञो निग्रहे कालविलम्बेन कार्यातिपातस्तदा द्विजातिमात्रस्यापि शस्त्रग्रहेऽधिकारोऽस्त्येव "शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते। नाततायिवधे दोषो हन्तुर्भवति कश्चन। प्रकाशं वा प्रकाशं वा मन्युस्तं मन्युरृच्छति" इति शस्त्रग्रहणाभ्यनुज्ञानात्। परस्त्रियं वा सह सम्भाषणं कर्तुं दण्डमाह मनुः "परस्य पत्न्या पुरुषः संभाषं योजयेत् सह। पूर्वमाक्षारितो दोषैः प्राप्नुयात् पूर्वसाहसम्" इति। आक्षारितः अभिशस्तः। दोषैः नानास्त्र्युपभोगवाक्छ्रुभिः। पापबुद्ध्या यः सम्भाषणं करोति तद्विषयमेतत्। अतएव "यस्त्वनाक्षारितः पूर्वमभिभाषेत कारणात्। न दोषं प्राप्नुयात् किञ्चित् हि तस्य व्यतिक्रमः" इति। मनुरुक्तस्त्वनुपूर्वसाहसमध्यमसाहसयोरुत्तमसाहसात्सम्भाषणादिविषयत्वेन व्यवस्था परिकल्पनीया। परपुरुषेण सह पित्रादिभिर्निषिद्धं सम्भाषणं वा करोति वा पथभ्रष्टं दण्ड्या परस्त्रिया सह पित्रादिभिर्निषिद्धसम्भाषणं यः पुरुषः करोति पथभ्रष्टदण्डनीयः। द्वयोरपि निषिद्धपरस्परसम्भाषणादि कुर्वतोः समोगे यो दण्डः स एव दण्ड इत्याह याज्ञवल्क्यः "स्त्री निषेधे शतं दद्याद् द्वियन्तु दमं पुमान्। प्रतिषेधे तयोर्दण्डो यथा सङ्ग्रहणे तथा" इति। निषिध्यत इति निषेधः कर्मणि घञ्। चारणादिस्त्रीव्यतिरिक्तविषयमेतत् "नेक्षेत चारणदारेषु विधिनाक्षोपजीविषु। सञ्जयन्ति हि ते नारीर्निगूढाचारचारिणीः" इति मनुस्मरणात् भटाः आक्षोपजीविनः वेशोपजीविनः। एतेषां दारेषु एष विधिर्न अभिभाषणादिनिमित्तदण्डविधिर्न। परनरे नारीः सम्भाषयन्तः सञ्जयन्ति पुरुषान्तरे संयोजयन्ति प्रच्छन्नीकृत्य चारयन्ति वेत्यर्थः। साधारणस्त्रीगमने दण्डमाह याज्ञवल्क्यः "अवरुद्धासु दासीषु भुज्यिष्यासु तथैव च। गम्यासु अपि पुमान्राज्ञः पञ्चाशत्पणिकं दमम्" इति। स्वामिना वा शुश्रूषार्थं रक्षणे एव स्वातन्त्र्यमित्येवं पुरुषान्तरोपभोगतो निरुद्धासाः अवरुद्धाः। पुरुषान्तरेणावरुध्य भुज्यमाना भुज्यिष्याः या दासीः भुज्यिष्या अवरुद्धा वा तासु सर्वपुरुषगम्यासु अपि गमने पञ्चाशत्पणं दण्ड्यः तासामस्वपरिरक्षीतत्वेन परस्त्रीतुल्यत्वात्। चशब्दाद्देश्यास्त्रैरिणीनामपि ग्रहणम्। तासु अपि सर्वपुरुषसाधारणीषु परपरिरक्षीतासु गमनेऽयमेव दण्ड इति मन्तव्यम्। एतदभिप्रेत्याह नारदोऽपि "स्त्रैरिण्यब्राह्मणी वेश्या दासी निष्कासिनी च या। गम्याः क्रूरानुशोच्येन स्त्रियो न प्रतिलोमतः। साध्वेव तु भुज्यिष्यासु दोषः स्यात्परदारवत्। गम्यासु अपि हि लोपेयादाज्ञाः परपरिग्रहाः" इति। अब्राह्मणीति स्त्रैरिण्यादिशेषणम्। स्त्रैरिण्यो स्वतन्त्रा पुंश्चली। निष्कासिनी कुटुम्बाद्बहिर्गतेति मदनरत्ने। साध्वनवरुद्धा दासीति विज्ञानेश्वरमाधवाचार्यप्रभृतयः। भुज्यिष्या सा स्वेति सम्बन्धः। व्यासोऽपि "परोपरुद्धागमने पञ्चाशत्पणिको दमः। प्रसह्य वेश्यागमने दण्डो दशपणः स्मृतः" इति। प्रसह्य वेतनदानं विना बलात्कारेण। अवरुद्धासु वेश्यादिषु गम्यत्वाभिधानञ्च पापाभावप्रतिपादनार्थं किन्तु राजदण्डाभावप्रतिपादनार्थम्। "पशुवेश्यादिगमने प्राजापत्यं विधीयते" इत्यादिवचनैः प्रायश्चित्तस्मरणात्। बलात्कारेण अनवरुद्धादाभिगमने दण्डमाह याज्ञवल्क्यः "प्रसह्य दाराभिगमे दण्डो दशपणः स्मृतः। बन्धनं यदकामासौ चतुर्विंशतिकः पृथक्" इति। पुरुषसम्भोगशीलासु दासीषु स्त्रैरिण्यादिषु शुल्कदानमन्तरेण बलात्कारेणाभिगच्छतो दशपणो दण्डः। यदानिच्छन्त्योमेकाम्बलात्कारेण बहवो गच्छन्ति तर्हि प्रत्येकं चतुर्विंशतिपणात्मको दण्ड इत्यर्थः। यदि पुनः सा स्वेच्छया भाटकं गृहीत्वा पश्चान्नेच्छति तदा बलाद्व्रजतामपि बहूनामदोषः यदि

तथा व्याध्याद्यभिभवो न भवेत्। अतएव नारदः "व्याधिता सत्त्रमा व्यया राजकर्मपरायणा। आमन्त्रिता चेच्छागच्छेददण्ड्या वड़वा स्मृता" इति। पारदार्यं प्रसङ्गात् कन्यावामपि दण्डमाह यास्कवल्क्यः "अलङ्कृतां हरन् कन्यामुत्तमं लभतेऽधमम्। दण्डं दद्यात् सवर्णासु प्रतिलोम्ये वधः स्मृतः" इति। अलङ्कृतां विवाहाभिसर्धी तां सवर्णां कन्यामपहरन् उत्तमं साहसं दण्डनीयः। तदनभिसर्धी हरन् प्रथमसाहसम्। चतुरुत्तवर्णजातां हरतः क्षत्रियादेर्वध इत्यर्थः। आनुलोम्येन सकामाहरणे न दण्डस्तथा च स एव "सकामास्वनुलोमासु न दोषस्त्वन्यथा दमः" इति। कन्यादूषणे दण्डमाह स एव "दूषणे तु करच्छेदः उत्तमायां वधः स्मृतः। शतं स्त्रीदूषणे दद्यात् दे तु मिथ्याभिशंसने" इति। "पशुवत् प्रेक्षन् शतं दाप्यो हीनां स्त्रीक्षाञ्च मध्यमम्" इति। यदाकामां कन्यामलक्षणतादिना प्रसह्य दूषयति तदा करच्छेदः। यदा तु अङ्गुलिप्रवेशेन तामेव योनिसक्थं कुर्वन् दूषयति तदा विशेषमाह मनुः "अभिगच्छन्ति तु यः कन्यां कुर्याद्वैरूप्यमेव मानवः। तस्यापि कन्यैं अकुलो दण्डश्चार्हति षट्शतम्" इति। सकामदूषणेऽप्याह स एव "सकामां दूषयन् कन्यां नाङ्गुलिच्छेदमर्हति। द्विशतं तु दमं दाप्यः प्रसङ्गविनिवृत्तये" इति। यदा कन्या विदग्धा वा कन्यां दूषयति तदाप्याह स एव "कन्यैव कन्यां या कुर्यात्तस्यास्तु द्विशतो दमः। सा तु कन्यां प्रकुर्यात् स्त्री सा सद्यो मौण्ड्यमर्हति। अङ्गुलोरेव वा छेदः खरेणोद्वहनन्तथा" इति कुर्यात् योनिक्षतवतीमिति शेषः। यदा पुनरुत्तवर्णजातीयां कन्यां सकामामकामां वाभिगच्छति तदा हीनस्य क्षत्रियादेर्वधः। यदा सकामां सवर्णामभिगच्छति तदा शुल्कं गोमिथुनं तत्पित्रे दद्यात्। अनिच्छति तस्मिन् दण्डरूपेण राज्ञे दद्यात्। सवर्णामकामाङ्गच्छतो वध एव। तदाह मनुः "उत्तमां सेवमानस्तु जघन्योवधमर्हति। शुल्कं दद्यात् समामिच्छेत् पिता यदि। ओऽकामां दूषयेत् कन्यां स सद्यो वधमर्हति। सकामां दूषयं स्तुल्यो न वधं प्राप्नुयान्नरः" इति। चाण्डाल्यादिगमने दण्डमाह यास्कवल्क्यः "अन्त्याभिगमने त्वङ्गं कृत्वैवं प्रवासयेत्। शूद्रस्यान्त्य एव स्यादन्त्यस्यायोगमे वधः" इति। अन्त्या चाण्डाली तद्गमने त्रैवर्णिकानां प्रायश्चित्तानभिधानात् "सहस्रं तत्समजिनैरिति" मनुवचनानुसारेण पञ्चसहस्रं दण्डयित्वा कृतमितवपनेन भगाकारेणाङ्कयित्वा खराङ्गारिवांसयेत्। शूद्रः पुनश्चाण्डालीकुक्कुरचण्डालयोरेव। अत्र एवेति साधवीये पाठः। चाण्डालस्य तत्तज्जातिस्त्र्यभिगमने वध एवेत्यर्थः। योनिव्यतिरिक्तस्त्रीषु गच्छतो दण्डमाह स एव "अयोनौ गच्छतो योषां पुरुषं वाऽभिमेहतः। चतुर्विंशतिको दण्डस्तथा प्रव्रजितागमे" इति। यस्तु योषां सक्थादावभिगच्छति पुरुषं वाभिमुखं मेहति तथा प्रव्रजितां वा गच्छति तस्यैव चतुर्विंशतिपणो दण्डनीय इत्यर्थः। स्त्रीक्रीते संग्रहणे दण्डमाह हरीतः "गृहमागत्य या नारी प्रलोभ्य स्वर्णादिना। कामयेत तत्र सा दण्ड्या नरस्याद्दमः स्मृतं" इति वचसा स्त्रियं प्रलोभ्य गच्छतः पुरुषस्य यो दण्डस्तदर्धं दण्ड्या"।

स्त्रीसभ न० स्त्रीणां सभा लोपत्वम्। स्त्रीसमाजे।

स्त्रीसेवा स्त्री ६त०। स्त्रीसम्भोगे अवायमधर्मेण नारीसेवने

स्त्रीस्वभाव पु० स्त्रिया इव स्वभावो यस्य। १अन्तःपुररक्षके नपुंसके शब्दमा० ६त०। २स्त्रीणां स्त्रीत्वे च। स्त्रीडुधर्मशब्दे दृश्यम्।

स्त्रैण न० स्त्रिया इदम् अण् नञ्। १स्त्रीस्वभावे "स्त्रैणेन मीता विकृतिं लभिष्या" भट्टिः। २स्त्रीविषये स्त्रिया अपत्यं स्त्रीणां समूहो वा अण्। ३स्त्र्यपत्ये स्त्रीसमूहे न०।

स्थ त्रि० स्था-क। १स्थितिशीले प्रायेण उत्तरपदस्थित एवार्थं प्रयुज्यते यथा पदस्थः मार्गस्थः। २स्थले पु० अमरः।

स्थग संवरणे स्वा० पर० सक० सेट् घटा० सिचि न वृद्धिः। स्थगति अस्थगीत्। अयोपदेशत्वमस्य चिन्त्यमूलम्।

स्थग त्रि० स्थग-अच्। धूर्ते शब्दर०।

स्थगन न० स्थग-ल्युट्। आच्छादने हेमच०।

स्थगित त्रि० स्थग-क्त। १आछादिते २तिरोहिते हेमच०।

स्थगी स्त्री स्थग्यतेऽनया अजर्थे क गौरा० ङीष्। ताम्बूलपात्रे करङ्के हेमच०।

स्थगु न० स्थग-उनृ। गड्ढो (कुंज) "तदेव स्थगु यद्दीर्घं रथचोषमिवायतम्। लक्ष्मणो च प्रतीतो च सेवयिष्यामिते स्थगु" रामा० वा० ६स०।

स्थण्डिल न० स्थड-इलच् नुक् नस्य डः। १चत्वरे उन्नतावनतिशून्ये समीकृते प्रदेशे अमरः। "निर्दृष्टो स्थण्डिल एव देवते" कुमारः। २यज्ञार्थं परिष्कृतस्थाने शब्दर०

श्रौतार्थं कृच्छ्रप्रतिनिधित्वेन बालुकादिभिः कर्त्तव्ये सच्छब्दभेदे च "नित्यं नैमित्तिकं कर्म स्थण्डिले वा समाचरेत्। कृत्स्नमात्रं तु तत् कुर्यात् बालुकाभिः समन्ततः" श्राद्धति०। "अथ वापि सदा सुवर्णभासा करमात्रं चतुरङ्गुलोच्छ्रयमत्यं कृत्स्नोद्धृतः। अथ वा कृच्छ्र करणाशक्तौ। तन्त्रान्तरे च "सदा सुवर्णभासा वा सुवृत्तं बालुकयाऽपि वा। चतुरङ्गुलोच्छ्रयतया वेदाङ्गुलोत्तं स्थण्डिलं विदुः। चतुःकोणसदक्प्राचोऽवमत्यात्तौ शुभम्। पञ्चाङ्गुलोच्छ्रयं वा रम्यं लक्षाङ्गुलसुव्रतम्। तस्मात् सम्यक् परीक्ष्यैव कर्त्तव्यं शुभवेदिकम्। कृत्स्नमात्रं स्थण्डिलं वा संक्षिप्ते होमकर्मणि"। वसिष्ठः "कृच्छ्रमेवविधं न स्यात् स्थण्डिलं वा समाश्रयेत्" क्रियासारे। तत्करण-प्रकारादि सं० त०दृश्यम्।

स्थण्डिलयायिन् पु० स्थण्डिले चत्वरे येते व्रतत्वात् यौ-णिनि। व्रतार्थं चत्वरे शयितरि अमरः। "स्थण्डिल-शायिनश्च" भट्टिः। [चत्वरे शयितरि शब्दर०।

स्थण्डिलेशय पु० स्थण्डिले शेते अच् अलुक्समा०। व्रतार्थं

स्थपति पु० स्था-क तस्य पतिः।१कङ्कुकिनि भेदि० २शिल्पि-भेदे (कुतार) अमरः ३कुबेरे शब्दर्थः ४अधीशे ५हृद्-स्थतिसवनाभक्रयागकर्त्तरि च अमरः।६मन्त्रभे त्रि०भेदि० तत्र अधीशपरत्वे "निषादस्थपतिर्गवेधुकेऽधिकृतः" कात्या० श्रौ० १।१।१२ "निषादस्थपतिर्गवेधुके चरावधि-कृतः अधिकारो भवति"। एवं हि श्रूयते "यस्य दुष्टः प्रजाः शमयेत् वास्तुमध्ये रौद्रं गावेधुकम् चरुं निर्व-पेत्" इत्येतामिष्टिं प्रकृत्य श्रुतम् "एतया निषादस्थपतिं याजयेदिति" निषादस्थपतिर्यजेतेत्यर्थः। तत्रायं सन्देहः किमत्र षष्ठीसमासः निषादस्य स्थपतिर्निषादस्थपतिरिति निषादश्चासौ स्थपतिश्च निषादस्थपतिरिति कर्मधारयो वा। तत्र यदि षष्ठीसमासः तदा यो द्विजातिरेव विद्वान्निषादानामाधिपत्यं करोति तस्यात्राधिकारः यदि च कर्मधारयः तदा निषाद एव यः स्थपतिसंज्ञस्तस्याधि-कार इति। तत्र त्रैवर्णिकस्यैव समर्थत्वाद्विद्वत्त्वादग्नि-मत्त्वाच्चात्राधिकारो युज्यते अन्यजातीयस्य निषादस्या-विद्वत्त्वेनाग्निमत्त्वेन चासमर्थत्वात्, तस्मात् षष्ठीसमास एवायमिति पूर्वपक्षः। विद्वान्तस्तु कर्मधारयोऽयम् निषादश्चायं स्थपतिश्चेति कुतः? षष्ठीसमासपक्षे निषाद-पदे लक्षणाप्रसङ्गः न ह्यत्र षष्ठी श्रूयते यतः सम्बन्धः प्रतीयेत। अतो निषादपदेनैव षष्ठ्यर्थो लक्षयीयः इत-रस्मिंस्तु पक्षे द्वयोरपि पदयोर्मुख्यार्थतैव न लक्षणा तस्माद्विद्वान् एव स्थपतिरत्राधिकारी श्रुतिबलात् अवि-द्वानग्निमानपीति सिद्धम्। अपि चात्र निषादहस्तं दक्षिणा श्रूयेत कूटं दक्षिणा काणो वा गर्दभ इति कूटं हि निषादानामेवोपकारकम् नार्योषामिति" कर्क०। हृदयस्तिसवकर्त्तरि तु "स्थपतिरित्येनं ब्रूयुः" कात्या० श्रौ० २२।५।२८ सू०। "सराजानो ब्राह्मणा यं पुरस्कु-र्वीरन् एतेन यजेत" "हृदयस्तिसवेन" सू०। राज्ञा सहिता ब्राह्मणा यं ब्राह्मणं धर्मस्यापकत्वेन चाङ्गीकुर्वीरन् "एतेन स एतेन यजेत हृदयस्तिसवेन" सं०व्या०। हृदयस्तिसवकर्त्तृ यत् हृगोसवकर्त्तर्यपि यथोक्तं "स्थपतिरित्येनं ब्रूयुः" कात्या० श्रौ० २२।१।१।१सू०। "गोसवयाजिनं जनाः"। राज्ञा सहिता विशः प्रजाः सर्वे पुरुषा यं पुरस्कुर्वीरन् (सख्येनाङ्गीकुर्वीरन्) स गोसवेन यजेत २२।१।१।८कर्क०। "वास्तुमेदस्य लक्षणं यथा "वास्तुविद्याविधानज्ञो बहुदृश्यो जितश्रमः। दीर्घदर्शी च शूरश्च स्थपतिः परिकीर्त्तितः"।

स्थपुट त्रि० तिष्ठति स्था-क स्थं पुटं यत्र। १विषमोन्नत-प्रदेशे हेमच०। "स्थपुटगतमपि क्रव्यमव्यप्रवृत्तिः" मालतीमा०। २विषमस्थाने-सञ्चारिणि-जीवे पु० तिका०।

स्थल स्थाने भ्वा० पर० सक० सेट् ज्वला०। स्थलति अस्था-लीत्। इलधातुनैवायं गतार्थ इत्यन्ये।

स्थल न०स्त्री०स्थल-अच्। जलशून्ये उन्नतभूमे अमरः स्त्रीत्वपक्षे ङीप्। "वनस्थलीमेमरपत्रमोक्षाः"कुमारः। २उन्नतिमात्रोन्नतप्रदेशमात्रे ३उन्नतिमभूभागे तु न०।

स्थलकन्द पु०स्थलजः कन्दः। (वनशोल) वनशब्दे २५मा०

स्थलकमल न० स्थलजात कमलम्। स्थलपद्मे भावप्र०।

स्थलकुमुद पु० स्थले कुमुदमस्यस्य सादृश्येन अच्। करवीरे राजनि०।

स्थलपद्म न० स्थलजातं पद्मं शाक०। स्थलमस्थाने पुष्प-प्रधानवृक्षे त्रि० स्थलजं पद्ममिव। २भानके पु० रत्नमा०

स्थलपद्मिनी स्त्री स्थलपद्मानां समूहः तेषां सन्निकटदेशो वा इनि ङीप्। १स्थलपद्मसमूहे २तदुक्तवृक्षे च। "दृष्ट्वा दूनः स्थलपद्मिनीं नवः" नैष०।

स्थलमञ्जरी स्त्री स्थलस्य मञ्जरीव। अपामार्गे रत्नमा०।

स्थलशृङ्गाट पु० स्थलजातः शृङ्गाटः शाक०।१गोक्षुरे रत्नमा० तस्य कण्टकाकृतित्वात् तथात्वम्।

स्थलेरुहा स्त्री० स्थले रोहति रुह-क वनुक्च०। १इतकुमार्याम् २दग्धाङ्कुरे च राजनि०।

स्थलेशय पु० स्थले शेते शी-अच् वलुक्च०। वराहरूपप्रभवौ पशौ राजनि०। २स्थलशायिनि त्रि०।

स्थवि पु० स्था कि वेर्नेत्व। १तन्तुवाये उज्ज्वलद०। २स्वर्गे ३जङ्घमे च संक्षिप्त०।

स्थविर न० स्था-किरच् स्वयादेशः। १शैलेये गन्धद्रव्ये राजनि० २चतुर्थे ब्रह्मचर्य्ये पु० हेमच०। ३वृद्धे ४जरे त्रि० उणा० ५जडे च त्रि० अमरः। ६मङ्गल्यावगतां स्त्री राजनि०।

स्थविष्ठ त्रि० अतिशयेन स्थूलः इष्ठन् इलोपे गुणः। अतिशयेन स्थूले अमरः। रयसुन् स्थवीयानपि अविहडे त्रि० स्त्रियां ङीष्।

स्थाणु पु० स्था नु पृषो० वत्वम्। १शिवे २शाखाशून्यवृक्षे च अमरः ३आयुधभेदे पु० नीलक०। ४जडे त्रि० धरणि० शिवस्य स्थाणुशब्दवाच्यत्वे कारणमुक्तं वामनपु० ४६च०। यथा "दक्षशप्तेन जलात्तस्मात् प्रजास्ताः सृष्टवानहम्। ततोऽहं ताः प्रजा दृष्ट्वा रक्षिता एव तेजसा। क्रोधेन महता युक्तो विरूपत्वमुपाटव चाक्षिपम्। ततश्चिप्रं सरसो मध्ये जर्द्धमेव यदा स्थितम्। तदाप्रभृति लोकेषु स्थाणुरित्येव विश्रुतम्"।

स्थाणुतीर्थ न० शैवे तीर्थभेदे वामनपु० १३च०।

स्थाण्डिल पु० स्थण्डिले शयिताऽण्। व्रतार्थं स्थण्डिले शयितरि अमरः।

स्थाण्वाश्रम पुंन० इत०। शिवाश्रमस्थिते शिवस्य तपश्चरणाश्रमभेदे "स्थाण्वाश्रमं हैमवतं जगाम" कुमारः।

स्थाण्वीश्वर पु० शिवविशेषभेदे "स्थाणुनाम्ना हि लोकेषु पूजनीयो दिवौकसाम्। स्थाणोरीशः स्थितो यस्मात् स्थाण्वीश्वरस्ततः स्मृतः" वामने ४२च० तन्माहात्म्यादिकम्। तत्र दृश्यम्।

स्थान न० स्था-ल्युट्। १स्थितौ २सादृश्ये ३व्यवसाये मेदि० ४सन्निवेशे ५वसतौ हेमच० ६पन्थसन्धौ त्रिका० ७भाजने हला० समीपे टव्याकरणोक्ते प्रसङ्गे आदिग्रहणस्य यणादेः कारणभूते इगादौ। १० नीतिवेदिनासुपचयापचयहीने साम्यावस्थाने च अमरः। उपचयापचयौ च चतुर्वर्गशब्दोक्तस्य त्रयादेरेव भरतः। वसतिश्च लोकभेदः। स्वस्वधर्मानुष्ठायिनां जनानां लोकविशेषाणां स्थानञ्च अग्निपु० उक्तं यथा "प्राजापत्यं ब्राह्मणानां कृतं स्थानं क्रियावताम्। क्षत्रियाणां तथा चेन्द्रं संग्रामेष्वनुवर्त्तिनाम्। गान्धर्वं शूद्रजातीनां परिचर्यानुकारिणाम्। चतुरशीतिसहस्राणां यतीनामूर्द्धरेतसाम्। ऋतं तेषान्तु यत् स्थानं तदेव गुरुवासिनाम्। सम्प्रदीप्तान्तु यत् स्थानं ऋतं तद्वत् वनौकसाम्। प्राजापत्यं सृष्टस्थानां सृष्टधर्मानुवर्त्तिनाम्। ब्राह्मिनान्तु परं ब्रह्म योगिनामक्षतं ऋतम्। एकान्तवादिनां ब्रह्मध्यायिनां परमं पदम्। तामिस्रमन्धतामिस्रमहारौरव रौरवम्। क्षयिपत्रवनं घोरं कालपत्रमरोचिमत्। वेदस्य निन्दकानान्तु यत्प्रघातकारिणाम्। स्थानमेतत् समाख्यातं स्वधर्मविनिवर्त्तिनाम्" स्मृतिविशेषाधिकरणोक्ते ११क्रमे मीमां०। "स्थानं क्रमो योगवर्त्म समाख्या पार्श्वधारणिः। १२ज्ञापके निष्पन्नस्थानमित्यादि।

स्थानक न० स्थान एव स्वार्थे क ।१स्थानशब्दार्थे। स्थाने कं जलमस्य। २स्थानवति हेमच०।

स्थानचञ्चला स्त्री स्थाने स्थितावपि चञ्चला। १वर्षरीवृक्षे शब्दच०। चञ्चलवातेन चञ्चलत्वात्तस्यास्तथात्वम्।

स्थानच्युत त्रि० स्थानात् स्वस्थानात् च्युतः। पदच्युते "स्थानस्थितस्य पद्मस्य भिन्ने वृन्तमनाकुले। स्थानच्युतस्य तस्यैव क्षीदशोषकारको" गरुडपु० ११५ अ०। स्थानभ्रष्टादयोऽप्यत्र। "स्थानस्थिताश्च पूज्यन्ते पूज्यन्ते च पदस्थिताः। स्थानभ्रष्टा न पूज्यन्ते केशा दन्ता नखा नराः" गरुडपु० ११५अ०।

स्थानाध्यक्ष त्रि० स्थाने अध्यक्षः। स्थानरक्षके हेमच०।

स्थानिक त्रि० स्थानेऽधिकृतः ठक। स्थानाध्यक्षे हेमच०।

स्थानिन् त्रि० स्थानमस्त्यस्मिन् रत्नत्वेन इनि। १स्थानरक्षके स्थानं प्रसङ्गः अस्त्यर्थे इनि। व्याकरणोक्ते आदिग्रहणस्य यणादेः कारणभूते इगादौ "स्थानिवदादेशोऽनल्विधाविति" वार्त्तिनिः।

स्थानीय न० स्थीयतेऽस्मिन् स्था-आधारे अनीयर्। १नगरे अमरः। स्थानं साहस्यं वासं वाऽर्हति स्थानस्थेदम् वा छ।२वासयोग्ये देशे ३सदृशे ४स्थानसम्बन्धिनि च त्रि०।

स्थाने अव्य० स्था-ने। १योग्यत्वे २औचित्ये च "स्थाने भगवानेकनराधिपः सञ्चिति" रघुः। ३अत्यर्थे ४सादृश्ये ५करणार्थे च शब्दर०।

स्थापत्य पु० स्थपतिरेव स्वार्थे ष्यञ्। १अन्तःपुररक्षके कञ्चुकिप्रभृतौ अमरः। तस्य भावः ष्यञ्। २स्थपतिधर्म्मे न०

स्थापक त्रि० स्थापयति स्था-णिच्-ण्वुल्। यथावत्स्थानरुचितं तथा निवेशके। स्थितिस्थापकः।

स्थापन न॰ स्था-णिच्-ल्युट्। १आरोपणे २पुंसवनाख्ये गर्भसंस्कारे च मेदि॰। ३समाधौ। युच्। स्थापनाप्यत्र स्त्री सा च निवेशने वादे भावपक्षस्य प्रमाणादिना व्यवस्थापने च। [ङीप्। पाठायाम् अमरः।

स्थापनी स्त्री स्थाप्यतेऽनया स्था-णिच्-ल्युट् करणे ङीष्

स्थापित त्रि॰ स्था-णिच्-क्त। १निक्षिप्ते २निवेशिते ३न्यस्ते च मेदि॰।

स्थामन् न॰ स्था-मनिन्। १सामर्थ्ये अमरः २बले च।

स्थायिन् त्रि॰ स्था-णिनि। १स्थितिशीले अलङ्कारोक्ते रसाङ्गभूते रत्यादिभावे पु॰। "विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा। रसतामेति रत्यादिः स्थायी भावः सचेतसाम्" "अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः आस्वादाङ्कुरकन्दोऽसौ भावः स्यादीति सम्मतः"। "रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा। जुगुप्सा विस्मयश्चेत्यष्टौ प्रोक्ताः शमोऽपि च" सा॰द॰। एते च क्रमेण शृङ्गारादीनां स्थायिभावाः। [अमरः।

स्थायुक त्रि॰ स्था-उकञ्। १स्थितिशीले २एकस्यामाधिक्षते पु॰

स्थाल न॰ स्थलति तिष्ठत्यत्रात्र आधारे घञ्। (थाल) १अन्नपात्रभेदे। २पाकपात्रे (हाँड़ि) स्त्री अमरः गौरा॰ ङीष्।

स्थालीपाक पु॰ स्थाल्यां पाकः। मध्यदुग्धेन स्थाल्यां क्षते १पाकभेदे। स्थाल्यां पच्यतेऽसौ पच-कर्मणि घञ् २चरौ तत्पाकप्रकारः चरुशब्दे दिङ्मात्रमुक्तः गोभिलोक्तप्रकारः सं॰त॰ दर्शितो यथा

तत्र गोभिलः "अथोदुम्बरसुषवे प्रक्षाल्य स्रुवं च पश्चादग्नेः प्रागग्नान् कृत्वासीर्य उपसादयति अथ स्रुविनिर्वपेदिति। व्रीहीन् यवान् वा कांस्येन चरुस्थाल्या वा चरुसूभ्यां त्वा जुष्टं निर्वपामीति देवतानामोद्देशः सकृद्यजुषा द्विस्त्रीन् अथ पश्चादवघ्नन्नुपक्रमते दक्षिणोत्तराभ्यां पाणिभ्यां त्रिःफलीकृतांस्तण्डुलां स्त्रिदेवताभ्यः प्रक्षालयेत् हिमनद्येभ्यः सकृत् पिष्टभ्य इति। "पवित्रान्तर्हितांस्तण्डुलानावपेत् कृशरग्रहणमिव स्थालीपाकं स्थापयेत् प्रदक्षिणसदायुवन् स्रुतमभिघार्य षट्सुदाभ्य प्रत्यभिघारयेदिति" सू॰। अथार्थः उपसादयति स्थापयति देवतानामोद्देशं देवतानामोच्चारणं यथा स्रुक्तया चरुसूभ्यां त्वा जुष्टं निर्वपामीत्यनेन षट्सुलोपरि व्रीहीन् कांस्यादिना सकृन्निर्वपेत्। अत्रान्तरा इत्यत्र षट्संख्यानामोच्चारणम्। अतएव कात्यायनः "अक्षावितिनाम गृह्णाति"। नारायणीयेऽपि "यदः पदं हि यद्रूपं यत्र मन्त्रे हि दृश्यते। साध्याभिधानं तद्रूपं तत्र स्थाने नियोजयेत्"। अतोऽदः पद एव नामोद्देशो नतु विरूपाक्षजपादाविदमित्यादौ। एवञ्चामन्त्रे त्वा जुष्टं निर्वपामीति सामगानाम् यजुःपदोक्तो गोभिले निर्वपणमात्रश्रुतेः यजुर्वेदिकमन्त्रकस्यैवोच्चारणे सामगेन न कार्य्यं। यजुःपरिभाषाकाच्च जैमिनिः "शेषे यजुःशब्दः इति। शेषे मन्त्रभिन्ने मन्त्रजाते। ततश्च यन्मन्त्रजातं ग्रन्थिपठितं गानपादभेदरहितं तद्यजुरिति। बहुदेवत्ये च बहुदेवतानामभिः प्रत्येकं निर्वपः। अत्रनिर्वापो मन्त्रेषैव होमोऽपि पृथक्। निर्वापपरिमाणन्तु होमसंख्याविशेषस्त्विक्षुसारेखेत्याह छन्दोगपरिशिष्टम् "देवतासंख्ययाऽत्रैव निर्वापांश्च पृथक् क्रमक्। तूष्णीं द्विरेव मन्त्रीयाद्धोमयापि पृथक् पृथक्। यावता होमनिर्वृत्तिर्भवेद्वा यत्र कीर्त्तिता। शेषस्त्वेव भवेत् किञ्चित्तावन्तं निर्वपेच्चरुम्"। यद्यपि देवतासंख्येति वचनं चरुसमश्नीययोः दक्षुपक्षस्य पठितं तथाप्याङ्गयावाधवेन चरुसामान्यपरमिति। चरुविधौ तु विद्याकरवाजपेयी "यत्र प्रयोजनाभावनिश्चयस्त्रैव तदुपादानादिलोपः। यत्रानुष्ठानवेलायामेव पुरुषस्योपेक्ष्य प्रयोजनाभावो ज्ञायते तदा प्राक् तच्चिन्तयात् शास्त्रप्राप्तिः पदार्थो निवसापूर्वमात्रार्थमनुवेद्यं इति। अतएव यदा स्वाचम्यादिना व्रीह्यादिस्थाने तण्डुला गृहीताः तदापि अवघातादि समाचरन्ति याज्ञिकाः पठन्ति च। "घाते न्यूने तथा छिन्ने साद्राव्ये भान्निवेशे तथा। यज्ञे मन्त्राः प्रयोक्तव्यास्तावत्तार्थसाधकाः"। भान्निवेशे मन्त्रशीर्ष्ये अवघातादौ। न्यूने तत्काले मन्त्रपाठाभावेऽपि यत्काले मन्त्राः पाठ्याः। यत्रिंस्तु मन्त्रार्थज्ञानस्य नाङ्गत्वप्रयोगः। चरुस्थालीयपरिमाणमाह छन्दोगपरिशिष्टम्। "तिर्यग्गुह्वसमिन्मात्रा दृढा नातिदृढन्मृदी। अष्टमष्टौङ्गुलश्चरुर्वापि चरुस्थाली प्रशस्यते"। गर्भप्रसारदीर्घाभ्यां प्रादेशप्रमाणा चरुस्थाली औडुम्बरी ताम्रमती अथा पायसचरावपि न निषिद्धा "पयोदृतसारञ्च ताम्रपात्रे न दुष्यति" कृतिसागरधृतवचनात्। अतएव शारदातिलके "ततश्च संस्कृते वह्नौ गोक्षीरेण चरुं पचेत्। मन्त्रेण क्षालिते पात्रे नवे ताम्रमयादिके"। दक्षिणोत्तराभ्यामिति दक्षिण उत्तर उपरि वयोः पाणिभ्यां सुस्रुवं गृहीत्वा इति शेषः। त्रिःफलीकृतान्

त्रिधा विहृतौदनान् कण्डनप्रक्षोटनाभ्यामिति मेधः। पवित्रान्तर्हितान् पवित्रम् अन्तर्हितं व्यवहितं येषां तान्। तेन चरुस्थाल्यासुत्तरार्थं पवित्रं निःक्षिप्य तण्डुलान् निक्षिपेत्। कुशलग्रहतमिवेति कुशलेन पाकनिपुणेन गृहीतं यथा न दग्धं नातिक्लिन्नं न मन्दपक्वं यथा स्यात्तथा स्थालीपाकं श्रपयेत्। अतएव छन्दोगपरिशिष्टम्। "खमाखोल्या चरुः स्निग्धोऽदग्धोऽकठिनः शुभः। न चातिस्निग्धिलः पाको न च वीतरसो भवेत्"। वीतरसोगालितमण्डः। प्रदक्षिणसृटायुवल्लिति प्रदक्षिणावर्त्तं यथा स्यात्तथा मेक्षणेन जुहूसंमक्षिश्रयन्। यु मिश्रणे दृत्यस्य रूपमेतत्। घृतमित्यभिघार्येति स्फुटितम्। चरुमाज्यमेषाद्याज्य उदगग्नेरुत्तरस्याम् उत्तार्थं प्रत्यभिघारयेत् पुनर्घृतेन तथा सेचयेत्। द्योतसंसर्गे तु अभिघारणहयात् पूर्वं ज्वलदङ्गारेण विद्योतनद्वयमाह छन्दोगपरिशिष्टम् "अधिश्रुतमवद्योत्य घृततन्त्राभिघारयेत्। घृतेन सेचयेत् पश्चात् पुनरेवाभिघारयेत्"। मेक्षणादीन्याह छन्दोगपरिशिष्टम् "दर्भा जातीयमिध्माग्रमाज्यं मेक्षणं भवेत्। इध्मं वार्क्षं घृष्यपमवदानक्रियाक्षमम्"। इध्माग्रमाज्यं प्रादेशद्वयमिध्मश्च प्रमाणं परिकल्पितमिति तद्वर्हिः एवैव दर्भा विशेषस्तु मदारुणे। "दर्भौ दात्रकृतौ घृष्यपा स्रुवेण तु मेक्षणम्। स्रुवोदुम्बरे वार्क्षे स्रायते स्रुवे तथा। इध्माग्रमाज्ये भवतः स्रुवे वैष्णवमेव च"। अत्र तिर्यगूर्द्ध्वादि वैष्णवमेव चेत्यनेन चर्वङ्कमभिधाय भूमिग्रपरिकमूहनकृत्तविन्यासं कुर्यादित्युक्तम्"।

स्थाल्यां पाकपात्रे पाकः पच्यमानः। श्पाकभाजने पच्यमाने। चातुर्मास्यादौ तत्त्यागे फलं तिण तं दर्शितं "श्रपते स्थालिं दीर्घां स्थालीपाकमथाचरन्"।

स्थालीपुलाक पु० स्थाल्याः पुलाकाश्चण्डुलाः सन्त्यत्र एकधर्मतोपायकत्वेन अच्। मीमांसकोक्ते "स्थाल्यां स्थाल्यां पुलाकाश्चण्डुला एते सर्वे विकृतिभाजिनः। समकालाग्निसंयोगभागित्वात् प्रतिपत्तव्यं" इत्यनुमानकल्पके न्यायभेदे यथा एकस्य पाकदर्शनेन सर्वेषां पाकज्ञानम् एवं एकरूपाणां सर्वेषामेकधर्मोक्तान्वयमित्येवंरूपोद्भावनम्।

स्थालीविल न० हृत०। स्थालीस्थे भूमध्यभागे तदर्हति छ यत् वा। स्थालीविलीय (स्था) तण्डुलादौ त्रि० स्त्रि०।

स्थालीशुच पु० स्थाल्यै-शुचः। १अम्लवेतसे स्थालीनिर्माणसाधने २शुचभेदे। "स्थालीशुचो लघुः क्षारस्तुवरस्तिक्त एव च। कटुकाम्लरसः पाण्डौ विषपित्तकफापहृत्" भावप्र०

स्थावर त्रि० स्था-वरच्। १अचले २स्थिरे इत्यादौ ३ख्यातौ च अमरः। "स्थावरं जङ्गमञ्चैव यदपि स्वयमार्जितम्" स्मृतिः। श्पर्वते पु० ४धनवृक्षे न० त्रिका०। स्थावरस्कन्धश्च षड्विधः सर्गशब्दे ५२५० पृ० दृश्यः। स्थावरधनं च संसृष्टे क्रेतरि सति असंसृष्टाय न विक्रेयं यथोक्तं मदनरत्ने०१२अ०। "स्थावरं धनमन्यस्मै स्थिते सान्निध्यवर्त्तिनि। योग्ये क्रेतरि विक्रेतुं न शक्यः स्थावराधिपः। सान्निध्यवर्त्तिनां जातिः सवर्णो वा विशेष्यते। तयोरभावे सुहृदा विक्रेतव्या मरीयसी। निर्णीतमूल्ये पण्येन स्थावरस्य क्रयोद्यमे। तन्मूल्यचेत् यथोपस्थो राति क्रेता न चापरः। मूल्यं दातुमशक्तश्चेत् सम्मतो विक्रयेऽपि वा। सन्निधिस्वत्वदान्यस्मै स्वयं शक्नोति विक्रये। क्रीतञ्चेत् स्थावरं देयं। परोक्षे प्रतिवासिनः। अथवादेव तन्मूल्यं दत्त्वाऽसौ ग्राह्यमर्हति। क्रेता तत्र स्वकारामान् विनिर्भोगं भुनक्ति वा। मूल्यं दत्त्वाऽपि नाप्नोति स्थावरं सन्निधिस्थितः। "स्थावरे विक्रयो नास्ति कुर्यादाधिमनुष्यवत्" स्मृतिः। स्थावरस्य केवलविक्रयनिषेधात् विक्रयेऽपि कर्त्तव्ये सन्निधस्वत्वदं दत्त्वा दानरूपेण विक्रयः कर्त्तव्य इति" मिता०। "एकोऽपि स्थावरं कुर्यात् दानाधमनविक्रयम्। आपत्काले कुटुम्बार्थं धर्मार्थं च विशेषतः" स्मृतिः। "संविभागक्रयप्राप्तं पित्र्यं स्थावरं वान्वतः। स्थावरं सिद्धिमाप्नोति भुक्त्वा, दानविक्रयेण"। "मोदाविके यदा स्त्रीणां स्वातन्त्र्यं परिकीर्त्तितम्। विक्रये चैव दाने च यत्नेऽपि स्थावरेष्वपि" कात्या०। "भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन् मृतेऽपि च। सा यथाकाममश्नीयात् दद्याद्वा स्थावरादृते" नारदः। "अविभक्तं स्थावरं यत् सर्वेषामेव तद्भवेत्। विभक्तं स्थावरं याद्यं नान्योदर्यैः कथञ्चन" यमः। "सर्वेषां तुल्यरूपाणां सोदरासोदरा यामिति" श्रीकृष्णः। [राजनि० २स्थावरप्रभृतौ त्रि०]

स्थावरादि पुंन० स्थावरमादिर्यस्य बहु०। १वृक्षनामभिदे

स्थाविर न० स्थविरस्य भावः अण्। वृद्धत्वे अमरः। तच्च सप्ततिवर्षोपगमे भवति "आषोड़शात् भवेद्बालस्तरुणस्तत उच्यते। वृद्धः स्यात् सप्ततेरूर्द्ध्वं वर्षीयान् नवतेः परम्" स्मृतिः। [अमरः २जलबुद्बुदे च मेदि०]

स्थासक पु० स्था-स-स्वार्थे क। १अलङ्कारे २चार्चिक्ये

स्थासु त्रि० स्था-क्नु। स्थितिशीले अमरः "ध्रुवादिवः स्था-

स्तूरिवाचिरप्रभा" भट्टिः। २यात्यते भरतः। ३दृढे त्रीधरः

स्थित त्रि॰ स्था-क्त। १जर्द्धस्थतया दृढावस्थाने "स्थिरावां स्थानमाचरेः" रघुः। २निश्चले ३प्रतिज्ञायुक्ते मेदि॰। ४स्थितिमात्रिणि च।

स्थिति स्त्री स्था-क्तिन्। १मर्य्यादायां मेदि॰ २न्याय्यपथावस्थाने अमरः। ३स्थाने च। स्थानभेदे स्थितिनिषेधो यथा "नास्थिमच्चकपालानि न केशान् वा कपञ्जल। तथाङ्गारकविद्वाद्यं नाधितिष्ठेत् कदाचन" कौर्म्मपु॰१५अ॰।

स्थितिस्थापक स्थितिं स्थापयति स्था-णिच्-ण्वुल्। न्यायोक्ते संस्कारविशेषे "संस्कारभेदो वेगोऽत्र स्थितिस्थापकभावने" "स्थितिस्थापकसंस्कारः क्षितौ केचित्तदर्ज्जपि। अतीन्द्रियोऽसौ विज्ञेयः क्वचित् स्पन्देऽपि कारणम्" भाषाप॰।

तल्लक्षणं पृथिवीमात्रसमवेतसंस्कारत्वव्याप्यजातिमत्त्वम्। संस्कारत्वञ्जातित्वे तु तदव्याप्यधर्म्मवत्त्वम्। तथा च पूर्वसंयोगजनितसंयोगनाशकत्वे सति पूर्वसंयोगजातीयोत्तरसंयोगजनकत्वं तत्त्वम्। स च क्रियाविशेषजन्यः क्रियाविशेषजनकः स्वजन्यक्रियानाशको गुणविशेषः। अन्यथाऽङ्गुष्ठशाखादीनां स्वाने पुनस्तथावस्थितत्वया व स्थापकः। स च अतीन्द्रियः।

स्थिर पु॰ स्था-किरच्। १पर्व्वते २देवे ३दृढे ४कार्त्तिकेये शब्दर॰। ५अनो ६गोत्रे मेदि॰। ७दृढे राजनि॰। ८धवृक्षे भावप्र॰। ज्योतिषोक्तेषु ट्टवसिंहवृषिकुम्भराशिषु च। १०कठिने ११निश्चले च त्रि॰। १२शाल्मल्यां स्त्री शब्दच॰ एवं १३काकोल्यां जटा॰ १४पृथिव्यां १५शालपर्ण्यौषधौ स्त्री अमरः। पृथिव्याः स्थिरत्वं मतभेदेन कणभक्षे ८अ॰ दर्शितम्। स्थिरतया वर्षाः पदार्थाः कपिलक॰ उक्ता यथा युद्धे प्रधानभटः साध्वीपतिः सज्जनमनः। धर्म्मधर्म्मौ मनः भोगः सम्पादनभावे तयोर्वेफल्यावस्थितत्वात् स्थिरत्वम्।

स्थिरगन्ध पु॰ स्थिरो गन्धो यस्य। १चम्पकवृक्षे २पाटलायां ३तगरवृक्षे स्त्री राजनि॰। ४स्थिरगन्धयुक्ते द्रव्यमात्रे त्रि॰

स्थिरच्छद पु॰ स्थिरच्छदा यस्य। भूर्जपत्रवृक्षे रत्नमा॰।

स्थिरच्छाय पु॰ स्थिरानियताच्छाया यस्य। १दृढच्छाये शब्दमा॰ २छायाप्रधाने वटादौ त्रिका॰।

स्थिरजिह्व पु॰स्थिरा अचञ्चला जिह्वा यस्य। अहिवृक्षे हेमच॰।

स्थिरजीविता स्त्री स्थिरं जीवितमायुर्य्यस्याः। १शाल्मलीवृक्षे शब्दर॰। २चिरजीवने त्रि॰।

स्थिरतर त्रि॰ अतिशयेन स्थिरः तरप्। १अत्यन्तस्थिरे अमरः २दृढतरे पु॰।

स्थिरदंष्ट्र पुंस्त्री॰ स्थिरा दंष्ट्रा यस्य। १सर्पे स्त्रियां ङीष् २वराहान्तरविशेषे पु॰ मेदि॰ ३ध्वनौ धनञ्जयः।

स्थिरपत्त्र पु॰ स्थिराणि पत्त्राण्यस्य। छिन्नरुहे राजनि॰।

स्थिरपुष्प पु॰ स्थिरं पुष्पमस्य। १चम्पकवृक्षे २बकुलवृक्षे च राजनि॰। [वृक्षे राजनि॰।

स्थिरपुष्पिन् पु॰ स्थिरं पुष्पमस्यास्त्यस्य बाहुलकात् इनि। तिन्दुक

स्थिरमति स्त्री स्थिरा-मतिः। १स्थिरबुद्धौ स्थिरा मतिर्यस्य। २स्थिरबुद्धियुक्ते त्रि॰। "अनिवेतः स्थिरमतिः" गीता।

स्थिरयौवन न॰पु॰ स्थिरं यौवनमस्य। १विद्याधरादौ देवयोनिभेदे त्रिका॰ २चिरस्थायियौवनयुक्ते त्रि॰।

स्थिरराङ्गा स्त्री स्थिरो रङ्गो रागो यस्याः। नीलाम्। राजनि॰। [द्वाम् राजनि॰] २निश्चलरागयुते त्रि॰।

स्थिररागा स्त्री स्थिरो रागो रङ्गो यस्याः। १दारुहरिद्रायाम् २निश्चलरागयुते त्रि॰।

स्थिरसाधनक पु॰ स्थिरं साधयति ल्यु ततः स्वार्थे क। सिन्दुवारवृक्षे राजनि॰।

स्थिरसार पु॰स्थिरः सारो यस्य। (सेगुण) शालवृक्षे राजनि॰

स्थिराङ्घ्रिप पु॰ कर्म्म॰। छिन्नरुहवृक्षे राजनि॰।

स्थिरायुस् पु॰ स्थिरमायुर्यस्य। १शाल्मलिवृक्षे अमरः दीर्घकालस्थायित्वात्तस्य तथात्वम्। २चिरजीविनि त्रि॰।

स्थुड वरणे तुदा॰ कुटा॰ पर॰ सक॰ सेट्। स्थुडति अस्थुडीत् तस्थोड। थोपदेश एव न्यायः।

स्थूणा स्त्री स्था-नक् ऊदित्वादेशः पृषो॰। (खुँटी) १यज्ञकाष्ठे "स्थूणायामग्नेयं यजमानं" श्रुतिः २गौरवतिभायाञ्च अमरः

स्थूलानिखननन्याय पु॰न्यायशब्दोक्ते ४।७ पृ॰न्यायभेदे।

स्थूर पु॰ स्था-ऊरन् किच्च। १वृक्षे संक्षिप्तसा॰। २मनुष्ये त्रि॰ को॰।

स्थूरिन् पु॰ स्था-ऊरन् किच्च स्थूरो वृक्षादिर्भारवाहकोऽस्त्यस्य स्थूरोऽस्यस्य साढ्यत्वेन इनि। वृक्षादिवत्पुष्टेन भारवाहकेऽन्ये च स्थूरस्य भावः स्वञ् स्थौरं तदस्त्यस्मिन् इनि स्थौरीत्यपि अमरः।

स्थूल वृंहणे चुरा॰ उभ॰ सक॰ सेट्। स्थूलयति-ते अतस्थूलत्-त बहुलकत्वान्न थोपदेशः।

स्थूल त्रि॰ स्थूड-कच्। १थोरे (मोटा) अमरः २क्षुद्रे २दृमूढे च न॰ मेदि॰। ४पनसे पु॰ राजनि॰। ५गवादिप्रसवाम् स्त्री शब्दच॰। एवं ६एरण्डौ राजनि॰। ७दृढेलायाञ्च रत्नमा॰ स्वार्थे क। थोरे त्रि॰।

संज्ञायां कन् (उच्चुड़) वृक्षभेदे पु० रत्नमालाकोषः ।

स्थूलकङ्कु पु० कर्म० । वरकधान्ये (तोरधान) राजनि० ।

स्थूलकणा स्त्री कर्म० । १स्थूलशूकरे राजनि० ६ब० । २धीनकणयुते त्रि० ।

स्थूलकण्टक पु० स्थूलः कण्टकोऽस्य । जालवर्त्तरे राजनि० कप् अत इत्वम् । स्थूलकण्टिका तत्रार्थे स्त्री ।

स्थूलकणा स्त्री स्थूलः कणः कणकोऽस्याः । हरिद्रायाम् राजनि० ।

स्थूलकन्द पु० स्थूलः कन्दोऽस्य । १रक्तलशुने २शूरणे २हस्तिकन्दे ४मानके च राजनि० ।

स्थूलच्छेद पु० स्थूलः छेदो यत्र । बाधे त्रिका० ।

स्थूलचञ्चु पु० स्थूला चञ्चुरिव शिखाऽस्य । १महाबकपक्षिणि राजनि० २ब० बहुव्रीहौ तु अच् समा० ।

स्थूलजीरक पु० कर्म० । जीरकभेदे (काजजिरा) भावप्र० ।

स्थूलताल पु० कर्म० । हिन्तालवृक्षे राजनि० ।

स्थूलत्वचा स्त्री स्थूला त्वचा यस्य । काश्मर्य्याम् राजनि० ।

स्थूलदण्ड पु० स्थूलो दण्डोऽस्य । देवनले राजनि० । स्थूल नालोऽस्यत्र । [राजनि० ।

स्थूलदर्भ पु० स्थूलं दृढं दृश्यतेऽनेन दृभ-घञ् । वृक्षे (वज्र) राजनि० ।

स्थूलदला स्त्री स्थूलानि दलानि यस्याः । वृक्षकर्कट्याम् राजनि० ।

स्थूलनास पुंस्त्री० स्थूला नासाऽस्य । १शूकरे हेमच० स्त्रियां ङीष् । २बहुनासायुते त्रि० स्त्रियां ङीष् । स्त्रियां टाप् स्थूलनासिकोऽप्यत्र ।

स्थूलपट्ट पु० स्थूलं पट्टं यस्मात् । कार्पासे शब्दर० तत्तुल्यत्व पट्टस्य स्थूलत्वात्तथात्वम् । पृषो० स्थूलपट्टक तत्रार्थे पु० शब्दर० ।

स्थूलपाद पुंस्त्री० स्थूलाः पीनाः पादा यस्य नान्त्यलोपः समा० । १गजे शब्दमा० स्त्रियां ङीष् । ७त० । २श्लीपदरोगे च ।

स्थूलपुष्प पु० स्थूलं पुष्पं यस्य । १वकवृक्षे २पर्वतजातापराजितायां स्त्री रत्नमा० ३वर्वतिक्षायां स्त्री राजनि० ङीप् ।

स्थूलफल पु० स्थूलं फलमस्य । १शालमलीवृक्षे राजनि० । २बहुफलान्विते त्रि० । ३शण्डकक्षुपे स्त्री राजनि० ।

स्थूलभूत न० कर्म० । वैदान्तोक्ते प्रत्येकं पञ्चात्मकतामापन्ने पृथिव्यादौ भूते ।

स्थूलमरिच न० नित्यकर्म० । कङ्कोले राजनि० ।

स्थूलमूल न० । हृब० । चाणक्यमूले राजनि० ।

स्थूललक्ष(क्ष्य) त्रि० स्थूलं लक्षयति दानाय संकल्पते लक्ष-अच् स्थूलंलक्ष्यं वाऽस्य । बहुदातरि अमरः ।

स्थूलवर्त्मकृत् पु० स्थूलं वर्त्म करोति क-क्विप् । ब्रह्मदण्डवृक्षायाम् शब्दर० । [२स्थूलत्वयुक्ते त्रि० ।

स्थूलवल्कल पु० स्थूलं वल्कलमस्य । १रक्तशोभाञ्जने जटा० ।

स्थूलवृक्षफल पु० स्थूलश्च वृक्षश्चेव फलमस्य । बिल्ववृक्षपिण्डीतकवृक्षभेदे (भयना) राजनि० । [राजनि० ।

स्थूलवैदेही स्त्री विदेहे भवा यञ् कर्म० । गजपिप्पल्याम् ।

स्थूलशाटक पु० कर्म० । स्थूलवस्त्रे अमरः स्थूलशाटिकादयोऽप्यत्र स्त्री जटा० ।

स्थूलशालि पु० कर्म० । महाशाली राजनि० ।

स्थूलशीर्षिका स्त्री स्थूलं शीर्षं यस्याः कप् अत इत्वम् । क्षुद्रपिप्पलिकायाम् हेमच० । २बहुस्थूलशीर्षकयुते त्रि० ।

स्थूलषट्पद पु० षट्पद इव स्थूलः राज० । भ्रमरायाम् ।

स्थूलस्कन्ध पु० स्थूलः स्कन्धोऽस्य । वृक्षे (भान्दार) राजनि० ।

स्थूलहस्त न० स्थूलः हस्त इवाकारोऽस्य । गजशुण्डे त्रिका० ।

स्थूलांशा स्त्री स्थूलः अंशोऽवयवोऽस्याः । १गन्धपलाशायाम् राजनि० २स्थूलावयवे त्रि० ।

स्थूलाम्ल पु० कर्म० । चाम्लभेदे राजाम्ले राजनि० ।

स्थूलास्य पुंस्त्री० स्थूलमास्यं यस्य । १सर्पे शब्दच० स्त्रियां जातित्वेऽपि बोपधत्वात् टाप् । २बहुस्थूलमुखयुते त्रि० ।

स्थूलैरण्ड पु० कर्म० । बृहदैरण्डवृक्षे राजनि० ।

स्थूलैला स्त्री कर्म० । बृहदेलायाम् (बड़ एलाइच) राजनि० ।

स्थूलोच्चय पु० स्थूलानामुपलानामुच्चयो यत्र । १गजबन्धनैके स्थूलस्य गजस्य चोच्चयः । २गजमध्यगतौ २वरण्डे ४यत्र कस्मे मेदि० ५गजदन्तच्छिद्रे च शब्दमा० ।

स्थेय पु० स्थीयते विवादनिर्णायकतयासौ स्था-कर्मणि यत् । विवादे १संशयनिर्णायके (जुरी) २पुरोहिते च मेदि० ३स्थिरे त्रि० हेमच० ।

स्थेयस् त्रि० अतिशयेन स्थिरः ईयसुन् स्थादेशः । १स्थिरतरे २अतिस्थिते त्रि० भरतः । स्त्रियां ङीप् । इष्ठन् स्थेष्ठोऽप्यत्र त्रि० ।

स्थैर्य्य न० स्थिरस्य भावः ष्यञ् । स्थिरतायाम् ।

स्थौणेय(क) पु० स्थूणायां तत्समीपे भवः ढक् ठक्ञ् वा । यन्त्रिपर्णनामगन्धद्रव्ये (गाठिवाला) अमरः । "स्थौणेयकं बर्हिपत्रं शुकपर्णञ्च कुक्कुरम् । शीर्षं रोमशुकं चापि शुकपुष्पं शुकच्छदम् । स्थौणेयकं कटु स्वादु तिक्तं स्निग्धं त्रिदोषनुत् । मेधाशुक्रकरं लघ्वं रक्तोत्क्लेशज्वरान्तुजित् । कृमिकुष्ठहृद्रोगान्व्यतिसारक्षतान् ।

न्यिपर्यन्तश्चैव भेदो, भक्षिष्ठ वर इति नेपालदेशे भवति। निशाचरो धनकरः कितवो गणकायकः। रोचको मधुरस्निग्धः कटुः पाके कटुर्लघुः। तीक्ष्णो वृद्धो स्निग्धो इति कुष्ठकण्डूकफानिलान्। रक्तोऽग्नीसेदमेदोऽसृक्ज्वरगरविस्फोटान् भावप्र०।

स्नील्य न० स्नूचश्च भावः ष्यञ्। पीवरत्वे।

स्नपन पु० स्ना-णिच्-ल्युट्। जलादिनाऽभिषेककरणे

स्नव पु० स्नु-भावे अप्। १स्रवणे २चरणे च अमरः।

स्नसा स्त्री स्नस-निरासे क्विप्। स्नायौ हेमच०।

स्नातक पु० स्ना-भावे क्त स्नानं वेदाध्ययनानन्तरं समावर्त्तनाङ्गस्नानं तदस्यास्ति कन्, कर्त्तरि क्त स्नाते क वा। वेदाध्ययनानन्तरं गार्हस्थ्याय कृतसमावर्त्तनाङ्गस्नाने स्नातृभेदे तच्च व्रतं मिता० आचाराध्याये दर्शितं यथा "स्नानादारभ्य ब्राह्मणस्नातव्यं कर्त्तव्यानि विधिप्रतिषेधकाम्यकानि मानसंकल्पकृत्यानि स्नातकव्रतान्याह "न स्वाध्यायविरोधीनि कर्माणीहेत न यतस्ततः। न विरुद्धप्रसक्तेन सन्तोषी च भवेत् सदा" याज्ञ०। ब्राह्मणस्य प्रतिषेधादेवोर्द्ध्वप्राप्तापायाः दर्शिताः। अत्र विशेष उच्यते। स्वाध्यायविरुद्धमकर्मप्रतिषिद्धमपि नेहेत नाभिप्सेत्। न यतस्ततो न यतः कुतश्चिदविदिताचारात्, न विरुद्धप्रसक्तेन विरुद्धोऽध्यापनयाजनादिप्रसक्तो व्यलगीतादि विरुद्धं वा तत्र प्रसक्तश्च विरुद्धप्रसक्तः तेन नार्थमीहेत इति सम्बध्यते। तत्र आहृत्तिः प्रत्येकं पर्युदासार्था। सर्वत्राध्यक्षिन् स्नातकप्रकरणे नञ्गणः पर्युदासार्थ एव। किञ्च। "अर्थालाभेऽपि सन्तोषी परिहासो भवेत्। चकारात् संयतश्च "सन्तोषं परमास्थाय सुखार्थी संयतो भवेत्" इति मनुस्मरणात्। कृतस्तर्हि धनमभिप्सेदित्यत आह मिता० "राजान्तेवासिवाणिज्येभ्यः सीदन्निप्सेद्धनं क्षुधा। दम्भि हैतुकपाषण्डवकवृत्तीश्च वर्जयेत्" याज्ञ०। "क्षुधा सीदन् पीड्यमानः स्नातको राज्ञो विदितवृत्तान्ताद्धनं वाणिजो वणिग्भावाच्चतुष्पाद्द्व्याद्व्याजनाद्वा धनमादद्यात्। क्षुधा सीदन्नित्यनेन विभागादिप्राप्तकुटुम्बपोषणपर्याप्तधनो न कथिदर्थमभिप्सेदिति गम्यते। किञ्च। दम्भिहैतुकादीन् वकवृत्तीश्च लौकिकाचारीयेषु वर्जयेत्। लोकरञ्जनार्थमेव कर्मानुष्ठायी दम्भी युक्तियुक्तेन सर्वत्र संशयकारी हैतुकः त्रैविद्यवृद्धापरिगृहीतार्थमिथः पाषण्डिनः। वकवदस्य वर्त्तनमिति वकवृत्तिः। यथाह मनुः "अधो दृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः। शठो मिथ्याविनीतश्च वकवृत्तिरुदाहृतः" इति। प्रतिषिद्धसेविनो विकर्मस्थाः विड्वालभाजारिरसक्त स्वभावो व्रतं चरन्नो वैडालव्रतिकः "धर्मध्वजी सदा लुब्धश्छाद्मिको लोकदाम्भिकः। वैडालव्रतिको ज्ञेयो हिंस्रः सर्वाभिसन्धकः" इति मनुस्मरणात्। चकारादिकर्मस्थवैडालव्रतिकशठान् यथाह मनुः "पाखण्डिनो विकर्मस्थान् वैडालव्रतिकान् शठान्। हैतुकान् वकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत्" इति। शठः सर्वत्र वञ्चकः। एतैः संसर्गनिषेधादेव स्वयं एवंविधो न भवेदिति गम्यते" मिता०। किञ्च "शुक्लाम्बर धरोनीचकेशश्मश्रुनखः शुचिः। न भाष्यादर्शनेऽश्रीया-न्नैकवासा न संस्थितः" याज्ञ०। "शुक्ले धौते अम्बरे वाससी धारयतीति शुक्लाम्बरधरः। केशाश्च श्मश्रुणि च नखाश्च केशश्मश्रुनखानीचं कृतं केशश्मश्रुनखं यस्यासौ तथोक्तः शुचिरन्यैर्वर्जितश्च स्नानानुलेपधूपस्रगादिभिः सुगन्धिश्च भवेत्। यथाह गौतमः "स्नातको नित्यं शुचिः सुगन्धिः स्नानशीलः" इति। सुगन्धत्वविधानादेव निर्गन्धमाल्यस्य निषेधः। तथा च गोभिलः "नागन्धां स्रजं स्वारवेदन्यत्र स्थिरस्वरत्नस्रजः" इति। "सदा स्नातश्च एवम्भूतो भवेत्" एतच्च सति सम्भवे "न जीर्णमलवद्वासा भवेच्च विभवे सती"ति मनुस्मरणात्। न च भाष्यादर्शने तस्यां पुरतोऽवस्थितायां नाश्रीयादवीर्यवदपत्योत्पत्तिभयात् तथा च स्मृतिः "जायायां जन्म नाश्नीयादवीर्यवदपत्यं भवति" इत्यतस्तया सह भोजनं दूरादेव निरस्तम्। न चैकवासाः। नापि संस्थितः स्थित्वा अश्नीयादिति सम्बध्यते मिता०। "न संशयं प्रपद्येत नाक्षयादप्रियं वदेत्। नाहितं नाशुचिर्नैव न क्लेनः स्यान्न वार्द्धुषी" याज्ञ०। "कदाचिदपि संशयं प्राणवित्तसंशयावहं कर्म न प्रपद्येत न कुर्यात्। यथा व्याघ्रचौरादुपद्रुतदेशाक्रमणादि। अक्षयादिकारणं किञ्चिदपि परमप्रियस्य सहसैकारि वाक्यं न वदेत्। न चाहितमशुभं वा प्रियमपि। चकारादन्यं वीभत्सकरञ्चाक्षयं न वदेदिति सम्बध्यते। एतच्च परिहासादिव्यतिरेकेण "गुरुणापि सभं हासं कर्त्तव्यं कुटिलं विना" इति स्मरणात्। न च क्लेनः अन्यदीयस्यादत्तस्य ग्रहीता स्यात् न वार्द्धुषी स्यात् प्रतिषिद्धस्वरूपत्वात्। न वार्द्धुषी न स्यात्" मिता०। "दाक्षायणी ब्रह्मचर्य्यवती वेणुमान् वकवस्त्रवान्। कुर्यात् प्रदक्षिणं देवद्विजविप्रवनस्पतीन्" याज्ञ०। दाक्षायणं व्रतं तदस्यास्तीति दाक्षायणी। ब्रह्मचर्य्यं यज्ञोपवीतं वस्त्रा-

स्नीति ब्रह्मचर्यी वैष्णवदण्डिमान् कमण्डलुमान् स्नादिति सर्वत्र सम्बध्नीयम्। अत्र ब्रह्मचारिप्रकरणोक्तस्यापि यज्ञोपवीतस्य पुनर्वचनं द्वितीयप्राप्त्यर्थम्। यथाह वसिष्ठः "स्नातकानां द्वितीयं स्नादन्यांस्तूत्तरम्। यज्ञोपवीते द्वे यष्टिः सोदकञ्च कमण्डलुः" इति। अत्र च दाक्षायणीति सामान्याभिधानेऽपि कृष्णत्वधारणमेव कार्यम् "त्रैणवीं धारयेद् यष्टिं सोदकञ्च कमण्डलुम्। यज्ञोपवीतं वेदञ्च शुभे रोक्ने च कृष्णले" इति मनुस्मरणात्। देवं देवप्रतिमां स्पृष्ट्वा स्पृशेत्। गां ब्राह्मणं वनस्पतिं चाश्वत्थादिकं प्रदक्षिणं कुर्यात् यतान् दक्षिणतः कृत्वा व्रजेत्। एवञ्चतुष्पथादीनपि "स्पृष्ट्वा गां दैवतं विप्रं घृतं मधु चतुष्पथम्। प्रदक्षिणानि कुर्वीत प्रज्ञातांश्च वनस्पतीन्" इति मनुस्मरणात् मिता०। "न तु मेढ्रेणदीच्छायावर्त्मगोऽग्न्युदकगो। न प्रलम्बकरोमोमस्थ्यास्थ्युच्छिष्टजनः" याज्ञ०। "नद्यादिषु न मेढ्रेत न मूत्रपुरीषोत्सर्गं कुर्यात्। एवं श्मशानादावपि यथाह शङ्खः "न गोमयकृष्टोप्तशाद्वलचितिश्मशानवर्त्मखलपर्वतपुलिनेषु मेढ्रेत् भूताधारत्वादिति"। तथाग्न्यादीन् प्रति कर्म्मादीनामभिमुखं न मेढ्रेत्। नाग्नेयान् पश्यन् यथाह गौतमः "न वाय्वग्निविप्रादित्यापोदेवताश्च प्रति पश्यन् वा मूत्रपुरीषमेध्यानि कुर्याच्च देवताः प्रति पादौ प्रसारयेत्"। एतद्देशव्यतिरेकेण भूमिमयग्निवैष्णवैरन्तर्धाय मूत्रपुरीषे कुर्यादिति यथाह वसिष्ठः "परिवेष्टितशिरा भूमिमयग्निवैष्णवैरन्तर्धाय मूत्रपुरीषे कुर्यादिति" मिता०। "नेक्षेतार्कं न नग्नां स्त्रीं न च संसृष्टमैथुनाम्। न च मूत्रं पुरीषञ्च नाशुचीराक्षतारकाः" याज्ञ०। "नैवार्कमीक्षेतेति यद्यपिसामान्येनोक्तं तथापि स्वच्छाम्बुमयराङ्कवकोदकप्रतिबिम्बमध्यवर्त्तिन एवादित्यस्यैषः निषिध्यते न सर्वदा। यथोक्तं मनुना "नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदाचन। नोपसृष्टं न वारिस्थं न मध्यं नभसो गतम्" इति। उपभोगादन्यत्र नग्नां स्त्रियं नेक्षेत "न नग्नां स्त्रियमीक्षेतान्यत्र मैथुनात्" इत्याश्वलायनः। संसृष्टं मैथुनं कृतोपभोगाम्। उपभोगात्ते चनग्नामपि नेक्षेत। चकाराद्भोजनादिकर्म्मोपरतीम्। तथा च मनुः "नाश्नीयाद् भार्यया सार्द्धं नैनामीक्षेत चाश्नतीम्। क्षुवन्तीं जृम्भमाणाञ्च न चासीनां यथासुखम्। नाश्नन्तीं स्वे नेत्रे न चाभ्यक्तामनावृताम्। न पश्येत प्रसवन्तीं च सेवमानो द्विजोत्तमः" इति। मूत्रपुरीषे च न पश्येत्। तथा ऋषिः सन् राङ्कवारकाच्च न पश्येत्। चकारादुदके स्वप्रतिबिम्बम्। "न चोदके निरीक्षेत स्वरूपमिति धारणा" इति वचनात् मिता०। "अयं मे वज्रदण्डेवं सर्वं कल्मषदोरयन्। वर्षत्यप्राहतो मक्षेत् क्षमेत प्रलकशिरा न च" याज्ञ०। वर्षति सति अयं मे वज्रः पापमानमयन्निति मन्त्रसंस्मरणम् अप्राहतोऽनाच्छादितो न मक्षेत् न धावेत् "न प्रधावेच्च वर्षतीति" प्रतिषेधात्। न च प्रलकशिराः स्यात्। चकाराद्ध्यानो न व्रजेत्। एवञ्च मन्त्रः "न च नग्नः व्रजेतेति" "नैकः स्यात् शून्यगेहे" इति स्मरणात् मिता०। "जीवनाम्बुकृशरेतांस्तु न निक्षिपेत्। पादौ प्रतापयेन्नाग्नौ न चैनमभिलङ्घयेत्" याज्ञ०। जीवनमङ्कुरः यवः। कृशरान्नम्। अन्नं पुरीषं क्षेत्रं प्रसिद्धम्। एतान्यस्तु न निक्षिपेत्। नापः पादेन ताडयेत्। एवन्तुषादीनपि। यथाह शङ्खः "तुषकेशकरीषभस्मास्थिकेशकपालोमान्यप्सु न निक्षिपेत्। न पादेन पाणिना वा जलमभिहन्यादिति"। क्रमौ च पादौ न प्रतापयेत्। नाग्नौ कुर्यात्। चकारात् जीवनाम्बुनी न क्षिपेत्। तुषोपधमनादि चाग्नेर्न कुर्यात् तथा च मनुः "नाग्नौ तुषोपधमेद्गन्धां नेक्षेत च क्षियम्। नामेध्यं प्रक्षिपेदग्नौ न च पादौ प्रतापयेत्। न चैनं पादतः कुर्याच्च प्राणबाधमाचरेत्" इति मिता०। "जलं पिबेच्छुचिना न प्रयानं प्रबोधयेत्। नाद्यैः क्रीडेच्च धर्म्मज्ञैर्व्याधितैर्वा न संविशेत्" याज्ञ०। "जलमञ्जलिना पिबन्ताम्रायाधिभ्यां न पिबेत्। जलपात्रं पेयमाधेयञ्चयम्। विद्वादिभिराक्रान्तोऽधिकं प्रयानं न प्रबोधयेत् नोत्थापयेत् "अन्येनापि प्रबोधयेदिति" विशेषात्। कृत्वादिभिर्न क्रीडेत्। धर्म्मज्ञैः पण्डितब्राह्मणादिभिः कर्म्मभिर्न क्रीडेत्। व्याधितैर्व्याधिभूतैरेकत्र न संविशेत् न शयीत" मिता०। "विकृतं वर्जयेत् कर्म प्रेतधूमं नदीतरम्। वेश्मकर्मतृणाङ्गारकपालेषु च संस्थितिम्" याज्ञ०। "जनपदकुलाचारधामदिवृत्तञ्च कर्म वर्जयेत्। प्रेतधूमं बाहुभ्यां नदीतरञ्च वर्जयेदिति संबध्यते। वेश्मादिषु संस्थितिं वर्जयेत्। चकारादस्थिकार्पासकेशेषु च" मिता०। "नाश्नीत श्वश्रूं गां नाडारेण विशेत् क्वचित्। न राज्ञः प्रतिगृह्णीयाद् अश्लोकस्यवर्त्तिनः" याज्ञ०। "परञ्च गोरादि स्विन्नीं गां परञ्च नाश्नीत न च निवर्तयेत्।

व्हारेण कार्पणेन क्वचिदपि नगरे ग्रामे मन्दिरे वा न प्रविशेत्। न ब्रह्मघ्नस्य शास्त्रातिक्रमकारिणो राज्ञः सकाशात् प्रतिग्रहीयात्" मिता०। "प्रतिग्रहे खनित्रक्रिध्वजिवेश्यानराधिपाः। इहा दशगुणं पूर्वात् पूर्वादेते यथाक्रमम्" याज्ञ०। प्रतिग्रहेषु साध्येषु सूच्यादयः पञ्च पूर्वपूर्वात् परःपरो दशगुणं इहाः। सूना प्राणिहिंसा सा यस्याऽस्तीति सूनी प्राणिहिंसापरः चक्री तैलिकः। ध्वजो सुराविक्रयी। वेश्या पण्यस्त्री। नराधिपः अनन्तरोक्तः" मिता०।

"देवत्विक्स्नातकाचार्यराज्ञां ज्यायां परस्त्रियाः। नाक्रामेद्बहुविघ्नत्वद्भोगोद्वर्तनादि च" याज्ञ०। "देवानां ऋत्विक् स्नातकाचार्यराज्ञां परस्त्रियाश्च ज्यायां नाक्रामेत् नाधितिष्ठेच्च लङ्घयेद् बुद्धिपूर्वम् यथाह मनुः "देवतानां गुरौ राज्ञः स्नातकाचार्ययोरपि। नाक्रामेत् कामतस्त्र्यायां वप्तुर्दीक्षितस्य च" इति। वप्तुर्नक्षत्रवर्षस्य यज्ञ कर्म चिकीर्षतश्च या सोमादेर्वप्तुश्च इति मनुवचनविरुद्धनिर्देशात्। रक्षादोनि च नाधितिष्ठेत्। आदिपदग्रहणात् सोमोदकादेर्ग्रहणम् "यद्वर्त्मनि यः स्नानं विण्मूत्रं रक्तमेव च। श्लेष्मनिष्ठ्यूतवान्तानि नाधितिष्ठेत कामतः" इति मिता०। "विप्राहिक्षत्रियात्मानो नावज्ञेयाः कदाचन। ज्ञात्वयोः श्रियमाकाङ्क्षेत्र क्वचिन्मर्मणि स्पृशेत्" याज्ञ०। "विप्रो बहुश्रुतोऽहिः सर्पः क्षत्रियो ग्रहपतिः। एते कदाचिदपि नावमन्तव्या आत्मा च स्वयं नावमन्तव्यः। ज्ञात्वयोर्वा वल्लीवं श्रियमिच्छेत्र क्वचिन्मर्मणि स्पृशेत्र कस्यचिदपि मर्म दुश्चरितं प्रकाशयेत्" मिता०। "दूरादुच्छिष्टविण्मूत्रपादाभ्यामपि संस्पृशेत्। श्रुतिस्मृतिदितं सम्यक् नित्यमाचारमाचरेत्" याज्ञ०। "भोजनाद्युच्छिष्टं विण्मूत्रे पादप्रक्षालनजलञ्च स्पृष्ट्वा दूरात् संस्पृशेत्। श्रौतं स्मार्तं चाचारं नित्यं सम्यगनुतिष्ठेत्" मिता०। "गोब्राह्मणानलाद्यानि नोच्छिष्टो न पदा स्पृशेत्। न निन्दाताडने कुर्यात् पुत्रं शिष्यं च ताडयेत्" याज्ञ०। गां ब्राह्मणमग्निमन्नमदनीयं विशेषतः पक्वमशुचिर्न स्पृशेत्। पादेन स्पृष्टोऽपि "यदा पुनः प्रमादात् स्पृशति तदाचमनोत्तरकालं मनुरब्रवीत् "स्पृष्ट्वैतानशुचिर्नित्यमद्भिः प्राणानुपस्पृशेत्। गात्राणि चैव सर्वाणि नाभिं पाणितलेन तु" इति एवं प्राणादीनुपस्पृशेत्। कस्यचिदपि निन्दाताडने न कुर्यात्। एतज्ज्ञानपकारिणः "अयुध्यमानस्योत्पाद्य ब्रह्मघस्याङ्गलतः। दुःखं सुमहदाप्नोति प्रेत्याप्राप्ततया नरः" इति। पुत्रशिष्यौ शिक्षार्थमेव ताडयेत्। चकाराद् दासादीनपि। ताडनञ्च रज्वादिनोक्तमार्गव्यतिरेकेण कार्यम् "शिष्यशिष्टिरवधेनायष्टी रज्जु वेणुदलाभ्यां तनुभ्यामन्येन प्रभृ राज्ञा प्राह्यः" इति गौतमवचनात्। "मृदुतस्तु शरीरस्य मोक्षमार्गे क्षयक्षत" इति मनुवचनात्" मिता०। "कर्मणा मनसा वाचा यत्राऽधर्मं समाचरेत्। अकामतः कृतं तत्र पुनर्धर्मेण साधयेत्" याज्ञ०। कर्मणा कायेन यथाशक्ति धर्ममनुतिष्ठेत्। तमेव मनसा ध्यायेत्। वाचा वदेत्। धर्मं विहितमपि लोकविद्विष्टं लोकाभियक्षिजनकं मधुपर्के गोवधादिकं नाचरेत्। यस्मादकार्यमप्योधोमीयवत् स्वर्गसाधनं न भवति" मिता०। "मातृपितृतिथिस्नातृमातुलैः। वृद्धबालाचार्यवैद्यसंश्रितबान्धवैः। ऋत्विक्पुरोहिताप्त्यभार्यादासजनाभिः। विवादं वर्जयित्वा तु सर्वांल्लोकाञ्जयेद् गृही" याज्ञ०। माता जननी। पिता जनकः। अतिथिरभ्यागतः। भ्रातरो भिन्नोदरा अपि। भ्रातरो विद्यमानभर्तृकाः स्त्रियः। सम्बन्धिनो वैवाहाः। मातुलो मातृभ्राता। वृद्धः सप्तत्युत्तरवयस्कः। बालः आषोडशाद्वर्षात्। आतुरो रोगी। आचार्यं उपनेता। वैद्यो विद्वान् भिषग्वा। संश्रित उपजीवी। बान्धवाः पितृपक्षा मातृपक्षाश्च। मातुलस्य पृथगुपादानम् आदरार्थम्। ऋत्विग्याजकः। पुरोहितः शान्त्यादेः कर्त्ता। अपत्यं पुत्रादि। भार्या सहधर्मचारिणी। दासः कर्मकरः। सनाभयः सोदराः भ्रातृव्याः पृथगुपादानं भ्रातृभिरसंसृष्टप्राप्त्यर्थम्। एतैर्मातृादिभिः सह वाक्कलहं परित्यज्य सर्वान् प्राजापत्यादीन् लोकान् प्राप्नोति"। "पञ्चपिण्डानतृद्धृत्य न स्नायात् परवारिणि। स्नायाच्चेदेवखातेषु प्रस्रवणेषु च" याज्ञ०। परवारिषु परसम्बन्धिषु सर्वसाधारणेन खातेषु तडागादिषु पञ्चपिण्डानतृद्धृत्य न स्नायात्। अनेनात्मोद्धृताभ्यनुज्ञातेषु पिण्डोद्धरणमन्तरेणापि स्नानमभ्यनुज्ञातम्। नद्यादिषु कथं तर्हीत्याह स्नायाच्चेदिति। साक्षात् परम्परया वा सगुद्गराः खन्यन्ते नद्यः। देवखातं देवनिर्मितं पुष्करादि। यदकस्मात्साभिघातजलो महानिम्नप्रदेशो ह्रदः। पर्वतादुत्सप्रदेशात् प्रभूतमुदकं प्रस्रवणं एतेषु पञ्चपिण्डानुद्धरणमेव स्नायात्। एतच्च नित्यस्नानविषयम् इति मन्वते

"नदीषु देवखातेषु तड़ागेषु सरःसु च । स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु च" इति नारदस्मरणात् । गोचार्य्यन्तु यथासम्भवं परकीयेषु पिच्छानुद्वरणेऽपि सर्व्वत्र न निषेधः" मिता० । "परमन्नमनोद्यानस्त्रीयानानि वर्जयेत् । अदत्तान्यग्निहोत्रस्य नाश्नमन्नादनापदि" याज्ञ० । यथा कश्यपः । आसनं पीठादि । उद्यानमाराम-स्थादि । स्त्रीं प्रसिद्धां । यानं रथादि परसम्बन्ध्यन्ये-नान्यदत्तान्यननुज्ञातानि वर्जयेन्नापभुञ्जीत : अभो-ज्यान्नान्याह । अग्निहीनस्येति । श्रौतस्मार्त्ताग्न्य धि-काररहितस्य शूद्रस्य प्रतिलोमजस्य वाधिकारवतोऽप्य्गि-रहितस्यान्नमनापदि न भुञ्जीत न प्रतिगृह्णीयाच्च । "तस्मात् प्रयत्नानां सर्व्वेषां शूद्रजातीनां ब्राह्मणो भुञ्जीत गृह्णीयाच्चेति" गौतमवचनात् मिता० । "कदर्य्य बद्धचौराणां क्लीवस्त्रीवतारिणाम् । वैद्याभिशस्तवार्द्धुषि गणिकागणदोषिणाम्" याज्ञ० । कदर्य्यो लुब्धः "आत्मानं धर्म्मलब्धञ्च पुत्रदारांश्च पीड़येत् । लोभाद् यः पितरौ ह्रीयात् स कदर्य्य इति स्मृतः" इत्युक्तः । बद्धो निगड़ा-दिना यात्रा सन्निरुद्धश्च । चौरो ब्राह्मणस्वर्ण्यव्य-तिरिक्तपरस्वापहारी । क्लीवो नपुंसकः । स्त्रीवतारी स्त्रटचारणमङ्गादिः । वैद्यच्छेदजीवी वैद्यः । अभिशस्तः पतनीयैः कर्म्मभिरभियुक्तः । वार्द्धुषी निषिद्धद्विगु-जीवी । गणिका पण्यस्त्री गणदोषी बहुयाजकः । एते-षामन्नं नाश्नीयादित्यनुवर्त्तते मिता० । "चिकित्सकान्तरक्रु द्ध पुंश्चलोन्मत्तविद्विषाम् । क्रूरोग्रपतितव्रात्यदाम्भिकोच्छिष्ट-भोजिनाम् याज्ञ० । "चिकित्सकोभिषग्दुष्टस्त्रीजीवी । आतुरो महारोगोपसृष्टः । "वातव्याध्यश्मरीकुष्ठमेह-ग्रोदरभगन्दराः । अर्शांसि षड्विधो वातो महारोगाः प्रकीर्त्तिताः" इति । क्रुद्धः कुपितः । पुंश्चलो व्यभि-चारिणी । मत्तो विद्यादिना गर्व्वितः । विद्विट् शत्रुः । क्रूरो दुष्टान्तरकोपः । वाक्कायव्यापारेणोद्वेजकः उग्रः । पतितो ब्रह्महादिः । व्रात्यः पतितसावि-त्रीकः । दाम्भिको वञ्चकः । उच्छिष्टभोजी परभुक्तोज्झि-तभोजी । एतेषाञ्चिकित्सकादीनामन्नं नाश्नीयात्" मिता० । "अगीरान्नोऽवकीरन्नोऽजितपामवाजिनाम् । यस्य विक्रयकर्म्मोरुतन्तुवायवृत्तिनाम् याज्ञ० । "अगीरान्नो स्व-तन्त्रा व्यभिचारमन्तरेणापि । पतिपुत्ररहितेत्यन्ये । अवकीरः सुवर्णस्य विकारान्तरञ्च । स्त्रोजितः सर्व्वत्र स्त्रीवशवर्त्ती । यामयाजी यामस्य शान्त्यादिकर्त्ता बहुया-जनेता च । यस्त्वविक्रयो यस्त्वविक्रयोपजीवी । कर्म्मारो लोहकारः तक्षादिश्च । तन्तुवायः सूचीशिल्पोपजीवी । सूचिर्हस्तं लोचनमस्यास्तीति सूचको । एतेषामन्नं ना-श्नीयात्" मिता० । "सूचकराजरजकक्षतघ्नवधजीविनाम् । चैद्यधावकराजोपसेवोपपतिवेश्मनाम् । पिशुनान्धतिनो-श्चैव तथा चाक्रिकवन्दिनाम् । एषामन्नं न भोक्तव्यं श्रोमधिक्रियसत्रां याज्ञ० । "सूचको निर्दयः । राजा भूपतिः । क्षतघ्नश्चर्म्मोत्पुरोहितश्च । यथाह यमः "भीतावगीतरुदिताक्रन्दितावधूतकुधितपरिभुक्तविक्षिप्तो-न्मत्तावधूतराजपुरोहितान्नानि वर्जयेत्" । रजको वस्त्रा-दीनां नीलादिरागकारकः । क्षतघ्न उपक्षतस्य हन्ता । वधजीवी प्राणिनां वधेन वर्त्तकः । सुराजीवी मद्यवि-क्रयजीवी । उपपतिर्जारः सङ्घोपपतिना वेश्म यस्यासौ सङ्घोपपतिवेश्मा । पिशुनः परदोषस्य ख्यापकः । अ-न्धतो मिथ्यावादी । चाक्रिकस्त्रैलिकः । याकटिकश्चेत्येके "अभिशस्तपतितचाक्रिकतैलिकः" इति भेदेनाभिधानात् । वन्दिनः स्तावकाः सामविक्रयी सोमलतायाः विक्रेता । एतेषामन्नं न भोक्तव्यम् । सर्व्वे चैते कदर्य्यादयो द्विजा एव कदर्य्यत्वादिदोषदुष्टा अभोज्यान्ना इतरेषां प्राप्त्य-भावात् प्राप्तिपूर्व्वकत्वाच्च प्रतिषेधस्य । अग्निहीनस्य नाश्न-मन्नादनापदीत्यत्र शूद्रस्याभोज्यान्नत्वसिद्धम् । तत्र प्रति-प्रसवमाह" मिता० । "शूद्रेषु दासगोपालकुलमित्रार्द्धसीर-णिः । भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेत्" याज्ञ० । "दासगोमहिषादयः गोपालो गवां पालकः गवां पाल-नेन यो जीवति । कुलमित्रं पितृपितामहादिक्रमागतः । अर्द्धसीरी हलपर्य्याय सीरोपलक्षितकृषिफलभागग्राही । नापितः स्पृश्यव्यापारकारयिता नापितश्च । यश्च वाङ्-मनःकायकर्म्मभिरात्मानं निवेदयति तवाहमिति । एते दासादयः शूद्राणां मध्ये भोज्यान्नाः । चकारात् कुम्भ-कारश्च । "गोपनापितकुम्भकारकुलमित्रार्द्धसिनिवेदिवा-त्मानो भोज्यान्ना" इति वचनात् ।

स्नातक स त्रिविधः व्रतस्नातकः विद्यास्नातकः उभय-स्नातकश्चेतिभेदात् । तत्र विहितकालपर्य्यन्तं ब्रह्मचर्य्यं कृत्वा वेदमसमाप्यैव व्रतकालोत्तरं व्रतसमावर्त्तनेन याद्यः । विहितकालमध्येऽपि वेदविद्यां लब्ध्वा स्नातो द्वितीयः । विहितकालपर्य्यन्तं ब्रह्मचर्य्यं कृत्वा वेदमलब्ध्वा तं लब्ध्वैव तत्कालोत्तरं व्रतस्नानस्तृतीयः ।

स्नातकव्रत न० द्वृत० । स्नातकस्तव्ये कृत्यके व्रतभेदे

"अन्यत्र चैव कन्यायाः स्नातकव्रतमाचरेत्" स्मृतिः।

स्नान न० स्ना-भावे ल्युट्। १शोधने २अवगाहने ३मज्जने च तच्च मन्त्रादिकारणभेदादष्टविधं या० त० तत्प्रकारभेदादिकं च दर्शितं यथा

"दक्षः "चतुर्थे च तथा भागे स्नानार्थं मृदमाहरेत्। तिलपुष्पकृशादीनि स्नानार्थञ्चाकल्मिके जले"। कुर्यादिति शेषः। तथा च "अस्नात्वा चाप्यकृत्वा च भुङ्क्ते-ऽदत्त्वा च यो नरः। देवादीनामृणी भूत्वा नरकं प्रतिपद्यते"। "अस्नात्वा नाचरेत् कर्म जपहोमादि किञ्चन। जानाश्लेदसमाकीर्णः शयनादुत्थितः शुभान्। अल्पनग्नमलिनः कायो नवच्छिद्रसमन्वितः। अवश्यमेव दिवारात्रौ प्रातःस्नानं विशोधनम्। प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टफलं हि तत्। अर्थमर्हति पूतात्मा प्रातःस्नायी जपादिकम्। अज्ञानाद् यदि वा मोहात् रात्रौ दुश्चरितं कृतम्। प्रातःस्नानेन तत् सर्वं शोधयन्ति द्विजातयः"। दृष्टं मलापकर्षादि अदृष्टं प्रत्यवायपरीहारादि। प्रातः सूर्योदयात् प्राक्कालः "प्रातः स्नायरुषकिरणयुक्तां प्राचीमवलोक्य स्नायात्" इति विष्णूक्तेः। प्रातःस्नाने मध्याह्नस्नानधर्मातिदेशमाह कात्यायनः "यथाकृति तथाप्रावर्नित्यं स्नायादनातुरः। दन्तान् प्रक्षाल्य नद्यादौ गेहे चेत्तदमन्त्रवत्"। यथा तद्देतिकर्त्तव्यतया। सा च "आचरेदुषसि स्नानं तर्पयेद्देवमानुषान्" इति जाबालयुक्ता। वैदिके कर्मणि वामहस्ते बहुतरकुशान् दक्षिणेन पवित्रं धारयेत्। तथा च छन्दोगपरिशिष्टम् "हुत्वाः प्रचरणीयाः स्युः कुशा दीर्घाश्च बर्हिषः। दर्भाः पवित्रमित्युक्तमतः सन्ध्यादिकर्मसु। सख्यः सोमयज्ञः कार्य्यो दक्षिणः सपवित्रकः"। प्रचरणीयाः पार्वणपशुयज्ञादिकर्मोद्धरणार्हाः। बर्हिषः यज्ञाद्यास्तरणार्थाः। यतः कृत्यतत्कर्मसु कुशविशेषा उक्ताः। अतः सन्ध्यादिकर्मसु अवस्थाविशेषशून्याः कुशाः पवित्रम्। सोमयज्ञः बहुतरकुशयुक्तः सपवित्रको विशिष्टदक्षिणयुक्तः। विशेषमाह स एव "अनन्तर्गर्भितं सार्यं कौशं द्विदलमेव च। प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्"। अनन्तर्गर्भितं अनन्तर्गर्भशून्यम्। तथा च शौनकः "अनन्तरूपौ यौ तु कुशौ प्रादेशसम्मितौ। अनन्तश्छेदिनौ साग्रौ तौ पवित्राभिधायकौ"। "एतद्भावे कुशपत्रत्वं त्रयं वा सप्तकरधृतवचनात्। तद् यथा "चतुर्भिर्दर्भपत्रैश्च त्रिभिर्वाप्यथवापि वा। पवित्रं कारयेद्विप्रः प्रशस्तं सर्वकर्मसु"। विप्रादिकरभेदेनेयत्वम् "पवित्रन्तु द्विजः कुर्य्यात् कुशपत्रद्वयेन वा। पत्रत्रयेण वा कार्य्यं नैकपत्रेण कुत्रचित्"। एतद्दर्शनात् दर्भाःपवित्रमित्यत्रैवमपि व्याख्येयम् मार्कण्डेयः "सर्वकालं तिलैः स्नानं पुण्यं व्यासोऽब्रवीन्मुनिः। श्रीकामः सर्वदा स्नानं कुर्वीतामलकैर्नरः। अग्नौ नवमीञ्चैव पर्वकालञ्च वर्जयेत्"। विष्णुधर्मोत्तरे "त्वराक्रोधौ तथा दर्पौ देवकर्माथ पर्वतैः। दूरायः पथश्चैव ताम्बूलं फलमौषधम्। भक्षयित्वा तु कर्त्तव्याः स्नानदानादिकाः क्रियाः"। भविष्योत्तरे "स्नातस्तु वरुणश्चो जुहुतोऽग्निः श्रियं हरेत्। भुञ्जानस्य यमस्त्वायुस्तस्मात्त्रयं विवर्जयेत्"। स्नातः स्नानं कृतः। अशुचेरवगाहनानन्तरं स्नानमाह योगियाज्ञवल्क्यः "तस्मान्नैवावगाहेत यदा चेदशुचिर्नरः। आचम्य तु ततः पश्चात् स्नानं विधिवदाचरेत्"। वामनपुराणम् "नाभिमात्रजले गत्वा कृत्वा पादौ शुचिर्द्विजः। निरुध्य कर्णौ नासाञ्च त्रिःकृत्वो मज्जनं ततः"। तत्रैव दक्षयाज्ञवल्क्यः "स्रोतसां संसृष्टो मज्जेत् यत्रापः प्रवहन्ति वै। स्थावरेषु च सृष्टेषु चैव कूपमुखे खनेत्"। हारीतः "नातुरो न भुक्त्वा न जीर्णवासा न वस्त्रवासा न नग्नो नाग्नौ नावस्कन्दिको नाकृतो नाजले नाक्षाते जले नाकूले नाशुचौ न प्रभूतजले न नाभेरल्पजले न चत्वरे नोपद्वारे न सन्ध्यायां न निशायां स्नायादिति"। चत्वरे स्नाकादिवर्जिस्थले इति श्रीदत्तः। उपद्वारे द्वारसमीपे। अत्रैवेन शुनिना नग्नत्ववस्त्रवासोनिषेधस्याभिधानात् स्नाने द्विवासस एवाधिकारः प्रतीयते। एकवस्त्रस्नाने दोषमाह सप्तकरधृतमदित्रे गोतमः "एकवस्त्रेण यत्स्नानं भूम्या खिद्वेन चैव हि। स्नातस्तु न भवेत् शुद्धः श्रिया च परिहीयते"। अतएव "स्नानं तर्पणपर्य्यन्तं कुर्य्याद्देवेन वाससा" इति यदि मूलं तदा प्रेततर्पणपरमिति "तत्रैकवस्त्रा स्नातयः" इत्यादिना एकवस्त्रत्वविधानात्। "एकेन एकजातीयेन" इति वाचस्पतिमिश्राः। "येन वाससा स्नानं कृतं जलस्थञ्च तेनैव तर्पणम्" इति कल्पतरवार्थवः। न च "स्नानशाट्यान्तु दातव्या मृदश्चिस्रो विशुद्धये। जलमध्ये तु यः कश्चित् द्विजातिर्स्नानदुर्बलः। निष्पीड्यति वस्त्रं स्नानं तस्य तथा भवेत्" इति वशिष्ठवचने स्नानशाट्यामिति तद्वस्त्रमिति एकवचननिर्देशेन च स्नानेऽप्येकवस्त्रमिति

वाच्यम् अत्र विष्णुवय दत्यभिधानेनाधोधृतवस्त्रत्वेव सत्त्व वेष प्रशस्तत्वं नतुशरीरस्य एतदर्थमेकवचनम्। अतएव "मन्त्रवेषाधरीवस्त्र" प्रशस्तं वशिष्ठवचनैकवाक्यतया। इत्याह्निकचिन्तामणिः। "स्नातो नाङ्गानि निर्घृष्यात् स्नानशाट्या न पाणिना" इति विष्णुपुराणीयेनाधरीवस्त्रेणैव गात्रमार्जनं निषिध्यते। "एतेन निर्मोक्ष स्नानवस्त्रमिति"काल्यायनवचने एकत्वमविवक्षितमिति निरस्तम्। अतएव सर्वत्रैकत्वं निर्दिष्टम्। शिष्टानाम् आचारोऽपि तथा दृति। "नाञ्जसमिति पुनः पुनः स्नाननिषेधः रागप्राप्तस्नानविषयो दृष्टार्थकत्वात्। एवचैकस्मिन् दिने नानातीर्थादिनिमित्तप्राप्तस्नानाद्यधिकभावस्यैव वैधत्वात्। अत्रापि तन्त्रप्रसङ्गयोः सत्त्वे सङ्कल्पेति। अङ्गः स्नानप्रधानकालमाह दक्षः "चतुर्थे च तथा भागे स्नानार्थं मृदमाहरेत्। तिलपिण्याकशाल्यादीनि सा च ह्यत्रिमे जले"। विष्णुः "कृत्स्नाभावे कृत्स्नस्नाने कार्यं दूर्वा वा दृष्टादिति विद्याकरधृतम् "तर्जनी कृष्यसंयुक्ता क्षेमयुक्ता त्वनामिका। दैव युक्ता तु दर्भेण कार्या विप्रेण सर्वदा"। मत्स्य सूक्ते "शक्ताः समूला दर्भाश्च शुक्लेन चाधिकं फलम्। सव्यः गोपयङ्गः कार्यो दक्षिणः सपवित्रकः" इति रोगिणश्चाशक्तादिस्नानेऽपि न दोषोवेत्याह रत्नाकरे हरदत्तः "तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे। नगरग्रामदाहे च मृदाप्यृष्टि न दुष्यति। आपद्यपि च कष्टायां कण्डूयने च दन्तधावने सदा। मातापित्रोर्गुरोश्चैव निदेशे वर्त्तने तथा। मृदाप्यृष्टीलब्धव्यम क्रियाव्यतिहारे। तथेति न दुष्यतीत्यर्थः। मारुते "सर्वतीर्थाभिषेकादि पवित्रं विदुषां वचः। धर्मस्यवचनेलायां विप्रो व्याससमः स्थितः"। तथाविधातुरं प्रति जाबालः "अशिरस्कं भवेत् स्नानं स्नानशक्तौ तु कर्मिणाम्। आर्द्रेण वाससा वापि दैहिकं मार्जनं स्मृतम् कर्मिणाम् "शिरः स्नातस्तु कुर्वीत दैवं पैत्रमथापि वा" इति मार्कण्डेयपुराणोक्तकर्म चिकीर्षूणां मार्जनमिश्रप्रोक्षणं, योगियाज्ञवल्क्यः "असामर्थ्यशरीरस्य कालशक्त्याद्यपेक्षया। मान्त्रस्नानादितः सप्त केचिदिच्छन्ति सूरयः। मान्त्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव च। वारुणं मानसचैव सप्त स्नानं प्रकीर्त्तितम्। "आपो हिष्ठेति वै मान्त्रं महाव्याहृत्यापार्थिवम्। आग्नेयं भस्मना स्नानं वायव्यं गोरजः स्मृतम्। वस्तु स्नातयवर्षेण स्नानं तद्दिव्यमुच्यते। वारुणञ्चावगाह्यस्तु मानसं विष्णुचिन्तनम्। समस्तं स्नानमुद्दिष्टं मन्त्रस्नानक्रमेण तु। कालदोषादसामर्थ्यात् सर्वं तस्य फलं स्मृतम्"। आपो हिष्ठेति आपो हिष्ठादि ऋक्त्रयमत्र विवक्षितम्। एवच "कालदोषादसामर्थ्यात् न शक्नोति यदाम्भसि। तदा स्नात्वा तु ऋग्भिर्मन्त्रैर्दद्यात् मार्जनम्। यत्र आपस्तु दुष्टदाः आपो हिष्ठाश्चमर्षणम्। एभिस्तत्रभि र्व्यङ्गमन्त्रैर्मन्त्रस्नानमुदाहृतम्। इति योगियाज्ञवल्क्योक्तं मन्त्रस्नानान्तरं तत् प्राधान्यख्यापनाय। अतएव पितृदयितायां सन्ध्यातः पूर्वं तल्लिखितम्। मृदाहरणन्तु गङ्गामृत्तिकातिलकल्पः। भस्मना संकृतभस्मना इति छन्दोगाह्निकः। अवगाह्यं मन्त्राद्यङ्गशून्यावगाहनमात्रं विवक्षितम् अतो मुख्यावगाहनकल्पस्नानादुत्कृष्टत्वमप्युक्तम्। कालदोषोऽतिवृष्ट्यादिः असामर्थ्यं शरीराघाटवैद्यैः अल्पत्वेन सम्भूयंवारुणस्नानविधिकालायोग्यत्वं वेति। एतन्मूलकं "मेघे क्षेत्रदमन्त्रवदिति" छन्दोगपरीशिष्टीयं प्रागुक्तम् अन्यथा मूलभूतशुल्बनरकल्पनापत्तेः सामर्थ्ये तृतीयेनापि समन्त्रकस्नानमाह पराशरभाष्ये व्यासः "शीतास्वपो निरेध्योष्णा मन्त्रसंस्कारसंस्कृताः। मेघेऽपि सकृते स्नानं तद्दीनमफलं स्मृतम्"। पद्मपुराणम् "नैर्मल्यं भावशुद्धिश्च विना स्नानं न जायते। तस्मान्नरोविशुद्ध्यर्थं स्नानादौ विधीयते। अतश्चतैश्चतुर्वा जलैः स्नानं सदाचरेत्। तीर्थं प्रकल्पयेद्विद्वान् मूलमन्त्रेण मन्त्रवित्। नमो नारायणायेति मूलमन्त्र उदाहृतः। दर्भपाणिस्तु विधिना आचान्तः प्रयतः शुचिः। चतुर्भिरुत्तमायुक्तं चतुरस्रं समन्ततः। प्रकल्प्यादावृचेदृग्भ्यां एभिर्मन्त्रैर्विचक्षणः"। कार्योऽत्र चतुष्प्रकारो दर्शितो यथा

"प्रातःस्नानं चरित्वाथ शुद्धयै तीर्थं विशेषतः। प्रातःस्नानाद् यतः शुद्धयेत् कार्योऽयं मलिनः सदा। क्षिप्तो नवभिरिच्छद्रैः खलोव दिवानिशम्। चतुर्धाङ्गमेधाशौभाग्यरूपसम्पत्प्रवर्त्तकम्। मनःप्रसत्तातेद्वैः प्रातःस्नानं विधिष्यते। प्रस्वेदलालाद्याक्लिन्नो निद्राधीनो यतो नरः। प्रातःस्नानात्ततोऽङ्गः स्वाङ्गस्नेहजपादिषु। प्रातः प्रातस्तु यः स्नानं कुर्जाते चारणोदये। प्राणायामक्रमं प्राहुस्तत्कृत्वाविधातवत्। प्रातःस्नानं चरेत् पापमकृत्वा ग्लानिमेव च। कृत्वाचिरन्तु दुःखम्रं हृष्टिं पुष्टिं प्रयच्छति। नोपसर्पन्ति वै दुष्टाः प्रातःस्नायिजनं क्वचित्। दृष्टादृष्टफलं तस्मात् प्रातः-

स्नानं समाचरेत्। प्रसङ्गतः स्नानविधिं वक्ष्यामि कमलोद्भव!। विधिस्नानं यतः प्राहुः स्नानाच्छतगुणोत्तरम्। विगुणां स्रुचमादाय वह्नींश्च तिलगोमयम्। शुचौ देशे परिस्थाप्य चाचम्य स्नानमाचरेत्। उपस्पृशेद्वह्निशेषो जलमध्ये समाविशेत्। ऊर्ध्वमाहीति मन्त्रेण तोयभावस्थं स्पृशितः। वे ते शतं ततो जप्यात् तोयस्थो मन्त्रमाय च। सन्निधायानो मन्त्रेण पूर्वं कृत्वा जलाञ्जलिम्। क्षिपेद् देयं समुद्दिश्य जपन् दुर्मतिया इति। इदं विष्णुरिदं जप्त्वा क्षिप्येदङ्गानि मन्त्रवित्। मूर्ध्नि देवेन शिरः पार्श्वं दाभ्यां नाभेस्तथोपरि। नाभेरधस्तु तिसृभिः पादौ षड्भिर्विशोधयेत्। मन्त्रेण प्रणवाभिस्तु आपो अस्मानिमं जपन्। उदित्याभ्यः शुचिरिति मन्त्र उत्पञ्जने मतः। यानस्तोकमिमं जप्त्वा क्षिप्येदङ्गात्रयि तोयैः। इमं मे वरुणेत्यादिमन्त्रैः स्नानाभिषेचनम्। तत्त्वा यामि तथा त्वन्नः सत्त्वन्नयाप्युत्तमम्। धाम्नाधाम्नस्तथामापो ओषधीरिति मंजपेत्। यदा इरन्मा सुवन्तु सेतिभाश्चेति च। अष्टावेता इमे मन्त्राः प्रोक्ताः स्नानाभिषेचने। प्रणवेन ततो विप्रो महाव्याहृतिभिस्ततः। स्नानं पावमेरिद्वान् गायत्र्या च ततः क्षती। आपो हिष्ठेति तिसृभिः प्रत्यृचं पावनं स्मृतम्। एते वै पावना मन्त्रा इदमाप्रोहयिष्यतो। देवीरापो देवा इत्युदादिवसंज्ञकः। यज्ञो देवी रयो देवीरपाश्च वरमित्यपि। पुनर्नवेति च नव पावमान्य प्रकीर्तिताः। ततोऽघमर्षणं जप्त्वा इत्युदां च ततो जपेत्। प्राणायामं च विधिवदथ वाग्यतं जपेत्। प्रणवं त्रिर्जपेदापि विष्णुं वा संस्मरेत् सुधीः। सावित्र्यं वक्ष्यमापोद्य स्पृष्ट्वाद्भोतवाससी"।

स्नानलक्षण न० स्नानार्थं लक्षम्। कृपे शब्दर०।

स्नानीय त्रि० स्नानाय हितम् छ। स्नानसाधने तैलोद्वर्त्तनादौ

स्नायु स्त्री स्नाति-शुध्यति दोषोऽनया स्ना बाहु। शरीरादिबन्धननाड़ीभेदे तत्स्वरूपसंख्यादि भावप्र० उक्तं यथा "तत्र स्नायोः स्वरूपमाह। मेदसः स्नेहमादाय शिरा स्नायुत्वमाप्नुयात्। शिराणां हि रूक्षः पाकः स्नायूनान्तु ततः खरः। स्नायवो बन्धनानि स्युर्देहमांसास्थि मेदसाम्। सन्धीनामपि बलास्तु शिराभ्यः सुदृढाः स्मृताः। नीलंधा फलकाकारा बध्नते बन्धभिर्युता। निर्लोमाऽसाधरक्षिते भवेद्वारमहा भृशम्। एवमेव शरीरेऽस्मिन् यावन्तः सन्धयः स्मृताः। स्नायुभिर्बन्धभिर्बद्धा स्नेन धारयन्ति नराः"। फलके काष्ठैः सशीर्षा व्याप्ताः "शतानि नव जायन्ते शरीरे स्नायवो नृणाम्। तासां विस्तरणं मूलं शिराः प्रत्यृत यत्नतः। बाहावष्टशतानि स्युः कोष्ठे त्रिंशत् शतद्वयम्। ग्रीवायां मूर्द्धदेशे तु स्नायूनां सप्ततिः स्मृताः"। तत्र बाह्यगताः प्राह। एकैकस्यां प्रदोर्ष्ण्यां षट् षट् तान्त्रिंशत्। तावन्त्य एव तलकूर्चंगुल्फेषु। तावन्त्य एव जङ्घायां दश जानुनि। चत्वारिंशदूरौ। दश वङ्क्षणे। एवं सार्द्धशतमेकस्मिन् सक्थनि भवन्ति। एतेनेतरसक्थि बाह्यं च व्याख्यातौ। अथ कोष्ठगताः प्राह षष्टिः कट्यां तावन्त्य एव पार्श्वयोः। अशीतिः षट्त्रिंशदुरसि। अथ ग्रीवोर्द्धगताः प्राह षट् त्रिंशद् ग्रीवायाम्। चतुस्त्रिंशत् मूर्ध्नि एवं स्नायूनां नवशतानि भवन्ति"।

स्नायुरोग पु० ६त०। स्नायुस्थे रोगभेदे तच्चिदानादि भावप्र० उक्तं यथा

"तत्र स्नायुरोगस्य विप्रकृष्टं सामान्यलक्षणमाह "शाखासु कुपितो दोषः शोथं कृत्वा विसर्पवत्। भित्त्वैव तं क्षते तत्र शोणितं विशोष्य च। कुर्यात्तन्तुनिभं स्रावं ततस्तिष्ठेत्सकृच्छ्रजैः। अनैः अनैः चताद् याति क्षेदात्तत्कोपमावहेत्। तत्मात्तोवशान्तिः स्यात् पुनः स्थानान्तरे भवेत्। स्नायुरोग इतिख्यातः क्रियोक्ताव विसर्पवत्। बाहुशोर्यादि प्रमादेन त्रुटयते जङ्घयोरपि। सङ्कोचं खञ्जतान्वापि क्षिप्रो नूनं करोत्यसौ"।

स्नायुर्मन् न० नेत्ररोगभेदे "स्थिरं प्रसारिसंबाद्यं शुक्लं स्नाय्वं पञ्चमम्" माधवनिदानम्।

स्निग्ध त्रि० स्निह-क्त। स्नेहयुक्ते वस्तुनि २मसृणे चिक्कणे अमरः। ३रक्तरक्ते ४सरलदारुणि च पु० राजनि० ५भक्तमण्डे न० ६मेदायां स्त्री राजनि०।

स्निग्धतण्डुल पु० ६त०। सदिधान्ये राजनि०। [शब्दर०।

स्निग्धता स्त्री स्निग्धस्य भावः। १स्नेहे राजनि० २प्रियत्वे च

स्निग्धदारु पु० स्निग्धं दारु कर्मध०। १सरलवृक्षे अटा० २देवदारुवृक्षे च राजनि०।

स्निग्धपत्रक पु० स्निग्धं पत्रमस्य कप्। १धृतकरञ्जे २गुच्छकरञ्जे ३सजंरवृक्षे च राजनि० ४वर्द्धमानवृक्षे अटा०। ५पाचकाम्लवृक्षे स्त्री राजनि०। [च राजनि०।

स्निग्धपिण्डीतक पु० कर्म०। १मदनवृक्षभेदे २पिण्डीतकवृक्षे

स्निग्धफला स्त्री स्निग्धं फलमस्याः। नागबलायाम् राजनि०।

स्निट क्ष्वेडे चु० उभ० सक० सेट्। स्नेटयति-अस्निस्निटत्-

त। दन्त्यान्तस्तादितयायं भोपदेश एव न्यायः।

स्नु पु० स्नात+स्नु आदेशः स्ना-डु वा। १पर्वतस्य समभूभागे अमरः २स्नायौ च। "स्निट्पृ सांवात् स्नुतोऽनुट्पृ" भाग० ३।१२अ०। "स्नुतः स्नायुतः" इति त्रिकाण्डशेषः।

स्नुक्क्षद पु० स्नुक्षति स्नुक्ष-क्विप् कृत्वम् स्नुक् क्षदोऽस्य। घीरकच्छुकीडक्षे रत्नमा०।

स्नुत पु० स्नु-क्त। चरिते जलादौ अमरः। [गद्गद०]

स्नुषा स्त्री स्नु-षक्। १पुत्रवध्वाम् अमरः २स्नुहीक्षे च

स्नुह(हा) स्त्री स्नुह-क्विप् वा टाप्। स्नुहीक्षे अमरः।

स्नुहि(ही) स्त्री स्नुह-इन् वा ङीप्। (मनसासिज्) क्षे अमरः "स्नुहीविटपसंश्रिताम्" तिं०त० देवीपु०।

स्नेह पु० स्निह-घञ्। १प्रेमणि अमरः २तैलादिरसभेदे न्यायोक्ते गुणभेदे च यद्गुणात् दाहात्कृत्यम्। स च गुणः जलस्य चूर्णादिपिण्डीभवहेतुः। "जले मधुरशीतत्वौ। स्नेहस्तत्र द्रव्यत्वन्तु सांसिद्धिकमुदाहृतम्" भाषा०। "एतादावपि तदन्तर्वर्त्तिजलस्यैव स्नेहः जलस्य स्नेहसमवायिकारणत्वात् तेन जल एव स्नेह इति मन्तव्यम्" तर्कसं०। "स्नेहो जले च नित्योऽपाकनित्योऽप्यविन्धनौ। तैलान्तरे तत्प्रकर्षात् दहनस्यानुकूलता" भाषा०। "नतु पृथिव्यामपि तैले स्नेह उपलभ्यते न चासौ जलीयः तथा सति दहनप्रतिकूलं स्यादत आह तैलान्तरे इति तत्प्रकर्षात् स्नेहप्रकर्षात्। तैले उपलभ्यमानः स्नेहोऽपि जलीय एव तस्य प्रकर्षादग्नेरनुकूलम्। अपजलस्नेहं हि जलं वह्निं नाशयतीति भावः" तर्कसं०। प्रेमरूपस्नेहस्य वसुसंख्यरसस्य स्नायिभावः स च रतिः भरतस्मार्त्तः वाग्भ० उक्तो यथा "स्नेहं चमत्कारितया वदन्ति रसं विदुः। स्नायो वसुसंख्यता स्नेहः पुत्राद्यालम्बनं मतम्। उद्दीपनानि तस्येष्टा विद्याशौर्यादयो दयः। आलिङ्गनाङ्गसंस्पर्शशिरश्चुम्बनमीक्षणम्। पुलकानन्दबाष्पाद्या अनुभावाः प्रकीर्त्तिताः। सञ्चारिणोऽनिष्टशङ्कासूयादयो मताः। पद्मगर्भच्छविर्वर्णो दैवतं लोकमातरः"। "अमेहन्ते न च स्नेहं न पात्रं न दशान्तरम्। परोपकारनिरतामधिदोषा हवोत्तमाः" उद्भ०।

स्नेहन पु० स्निह कनिन् नि० गुणरामभेदे उणा०।

स्नेहन न० स्निह-णिच्-ल्युट्। १तैलादिमर्दने अभ्यङ्गे राजनि० २स्निग्धतासाधने क्रियाभेदे भावप्र० तत्प्रकार उक्तो यथा "स्नेहनविधिः "स्नेहश्चतुर्विधः प्रोक्तो घृतं तैलं वसा तथा। मज्जा च तं पिबेन्मर्त्यः क्रियाद्यभ्युदिते रवौ। स्नायरो अङ्गमर्दश्च दिवोनिः स्नेह उच्यते। तिक्ततैलं स्नायरेषु अङ्गमेषु इष्टं वरम्। दाभ्यां त्रिभिश्चतुर्भिर्वा यमकस्निग्धतो महान्"। अस्यायमर्थः दाभ्यां स्नेहाभ्यां घृततैलाभ्यां यमकाख्यः स्नेहः स्यात्। त्रिभिः स्नेहैः घृततैलवसाख्यैः स्निग्धताख्यः स्यात्। चतुर्भिस्तु घृततैलवसामज्जाभिर्महान्महास्नेहः स्यादित्यर्थः। "पिबेत् त्रयहं चतुरहं पञ्चाहं षड्डहानि वा"। मृदुमध्यक्रूरकोष्ठापेक्षया त्रयहं चतुरहं पञ्चाहं षड्डहानि पेति। यदुक्तम् "मृदुकोष्ठस्त्रिरात्रेण स्निग्धस्नेहोपसेवया। मध्यकोष्ठश्चतुर्भिश्च दिवसैः स्निह्यति ध्रुवम्। पञ्चभिर्वाथ षड्भिर्वा दिनैः क्रूरो विशुद्ध्यति। पञ्चरात्रात्परं स्नेहः सात्म्यीभवति देहिनः"। मृदुमध्यक्रूरकोष्ठानां सर्वेषां पञ्चरात्रात्परं सात्म्यीभवति वातातङ्कोष्माग्निदोषविकोपभ्रंशिस्रंसनाक्षमत्वमलाक्लमाद्यपद्रवानुत्पादनादुत्पन्नेष्वपि तेषां निर्हरणात्। अक्षमत्वं न तु मलहरे वातानुलोम्यादीन् करोति। "दोषकालबलयोर्विज्ञायान्योन्यं योजयेत्। हीनाङ्गे मध्यमां ज्येष्ठां मात्रां स्नेहस्य वर्द्धयन्। अमात्रया तथाऽकाले मिथ्याहारविहारतः। स्नेहः करोति शोकार्त्तसन्त्रासिद्वाविसंज्ञिताः। देया दोषाग्नये मात्रा स्नेहस्यैकपलोन्मिता। मध्यमाय त्रिकर्षा स्याज्जघन्याय द्विकार्षिकी"। मध्यमाय मध्यमाग्नये जघन्याय हीनाग्नये "अथ वा स्नेहमात्राः स्युस्तिस्रोऽन्याः सर्वसम्मताः। अहोरात्रेण महती ज्येष्ठमिह तु मध्यमा। जीर्णलक्षा दिनार्द्धेन सा विज्ञेया तु लघ्वहः"। अयमर्थः याहोरात्रेण जीर्यति सा मात्रा महती। एवं मध्यमा कनिष्ठा च ज्ञेया "अक्षा स्याद् दीपनी द्रव्या सक्षदोषे प्रपूजिता। मध्यमा स्नेहनी ज्ञेया द्व्यंहणी भ्रमहारिणी। ज्येष्ठा कृमिविषोन्मादपङ्क्षापस्मारनाशिनी"। पुनरेवमाह "या मात्रा प्रथमे यामे याते जीर्यति वासरे। सा मात्रा दोषबलमिश्रसक्षदोषे च पूजिता। या मात्रा वासरस्यार्द्धं व्यतीते परिजीर्यति। सा द्रव्या द्व्यंहणी च स्यान्मध्यदोषे प्रपूजिता। या मात्रा चरमे यामे स्विन्नेऽङ्गे परिजीर्यति। सा मात्रा स्नेहनी ज्ञेया वक्षदोषेषु पूजिता। केवलं वैत्तिके सर्पिर्वातिके लवणान्वितम्। देयं वक्षकफे वह्निव्योषक्षारसमन्वितम्। रूक्षक्षतविषार्त्तानां वातपित्तविकारिणाम्। हीनमेधाकृतीनाञ्च सर्पिःपानं प्रश-

स्नते। कफिकोदानिलाविष्टाः प्रदुष्टकफमेदसः। पिबेयु स्नेहसंयुक्ते तैलं दार्ढ्यार्थिनस्तु ये। व्यायामाकर्षिताः शुष्करेतोरक्षामकोष्ठकाः। क्रूराशयाः क्रूरकोष्ठाः स्नेहयेत् सर्वथात् स्नेहात्। "शीतकाले दिवा स्नेह उष्णकाले पिबेन्निशि। वातपित्ताधिके रात्रौ वातश्लेष्माधिके दिवा। नस्याभ्यञ्जनगण्डूषमूर्धकर्णोचितर्पणे। तैलं हृतं वा युञ्जीत दृढा दोषबलाबलम्। हृते स्नेहं जलं पेयं तैले यूषः प्रशस्यते। वसामज्जे पिबेन्मद्यं मनुष्यानं हृषावहम्। स्नेहहिमः शिशून् वृद्धान् सुकुमारान् कृशानपि। तस्मात्सुकालेष्वेतेषु सद्य भक्तेन पाययेत्। सर्पिष्मती वह्नितिला यवागूः स्नेहतर्पणा। उष्णोष्णा पेयमाना तु सद्यः स्नेहनकारिणी। शर्करापूर्वसंयुक्ते दोहनस्थे घृते तु गाम्। दुग्ध्वा क्षीरं पिबेद्दूष्णः स्नेहनसत्तमम्। मिथ्याचाराद् बद्धत्वाच्च यस्य स्नेहो न जीर्यति। विष्टम्भो वापि जीर्यन्त वारिणोष्णेन वामयेत्। स्नेहस्याजीर्णशङ्कायां पिबेदुष्णोदकं नरः। तदोद्गारो भवेच्छुद्धो भक्तं प्रति रुचिस्तथा। स्नेहेन पैत्तिकस्याग्निर्यदा तीक्ष्णतरीकृतः। तदास्योदीर्यते तृष्णा विष्मा तस्य पाययेत्। शीतलं पायसं, तेन तृष्णा तस्य प्रशाम्यति। दुर्बलोऽरोचकी स्यूतो मूर्च्छाभ्रमैरभीहितः। दत्तवस्तिर्वमेद्रिक्तश्च वान्तः क्षुण्णाश्रमान्वितः। अकालप्रसवा नारी दुर्दिने च विवर्जयेत्। स्नेहसंशोध्यमद्यस्त्रीव्यायामक्लान्तचित्तकाः। दृढव्याधिक्रमा रूक्षाः क्षीणाम्बुः क्षीणरेतसः। वातातपाग्निरात्री ये तेषां स्नेहनसत्तमम्। वातानुलोम्य दीप्तोऽग्निर्वर्चः स्निग्धमसंहतम्। मृदुस्निग्धाकृता स्नानिः स्नेहस्नेहोऽस्य लाघवम्। विमलेन्द्रियता सम्यक् स्निग्धे रूक्षे विपर्ययः। मन्दस्नेहो सुखस्नायो मृदे दाढ्यः प्रवाहिका। तन्द्रातीसारसदनं भयं स्निग्धस्य रूक्षणम्। रूक्षस्य स्नेहनं स्नेहैरतिस्निग्धस्य रूक्षणम्। श्यामाकचणकादीश्च तिलपिण्याकवल्लभिः। दीप्ताग्निः शुद्धकोष्ठश्च दृष्टधातुर्दृढेन्द्रियः। निर्जरो बलवर्णाढ्यः स्नेहसेवी भवेन्नरः। स्नेहे व्यायामसंशीतवेगाघात प्रजागरान्। दिवास्वप्नमभिष्यन्दं रूक्षान्नञ्च विवर्जयेत्"।

करणे-ल्युट्। स्नेहसाधने त्रि०। स्त्रियां ङीप्। उदा० रूक्षैव द्रष्टव्यम्।

स्नेहप्रिय पु० स्नेहः तैलादिः प्रियोऽस्य। प्रदीपे हेमच०।

स्नेहभू स्त्री हृत०। १स्नेहाख्ये देवस्थे धातुभेदे हेमच० २स्नेहपात्रे च शब्दर०। [शब्दच०।

स्नेहरङ्ग पु० स्नेहेन रज्यते रञ्ज-कर्मणि घञ्। तिले

स्नेहवत् त्रि० स्नेहोऽस्यास्ति मतुप् मस्य वः। १स्नेहयुक्ते स्त्रियां ङीप्। सा च २मेदायां पुंस्त्वोक्तौ राजनि०।

स्नेहविद् न० स्नेहेन विद्धम्। देवदारुणि जटा०।

स्नेहवस्ति स्त्री स्नेहपूरिता वस्तिः। तैलादिस्नेहयुतद्रव्यपूरिते अनुवासनाख्ये पदार्थे (पिचकारी) वस्तिशब्दे ४८६४ पृ० दृश्यम्। [हृत०। २स्नेहकारणे न०।

स्नेहवीज पु० स्नेहार्थं बीजमस्य। पियालवृक्षे राजनि०।

स्नेहाग्न पु० स्नेहमश्नाति अग-अण्। प्रदीपे त्रिका०।

स्नेहिन् पु० स्नेह-इनि। १वृक्षे वृक्षो त्रिका०। २स्नेहयुक्ते त्रि० स्त्रियां ङीप्।

स्नेहु पु० स्निह-उन्। रोगभेदे उषा०। २चन्द्रे संक्षिप्त०

स्पद देत्कम्पे भ्वा० आ० अक० सेट् रदित्। स्पन्दते अस्पन्दिष्ट स्पन्दितम्।

स्पन्द पु० स्पदि-घञ्। १ईषच्चलने ईषत्कम्पे २क्रियाभेदे च। ल्युट्। तत्रार्थे न० नेत्रस्पन्दादौ शुभाशुभविवेचनं मत्स्यपु० २३१ अ० यथा

"ब्रूहि मे त्वं निमित्तानि अशुभानि शुभानि च। सर्वधर्मज्ञतां श्रेष्ठ! त्वं हि सर्वविदुच्यसे" मत्स्य उवा च "वक्षदक्षिणभागे तु शस्तं प्रस्फुरणं भवेत्। अशस्तं तत्तथा वामे पुंसस्य हृदयस्य च"। मत्स्य उवा च "वक्षानां स्पन्दनञ्चैव शुभाशुभविचेष्टितम्। तन्मे विस्तरतो ब्रूहि येन ज्ञास्यन्ति दोषतो भुवि"। मत्स्य उवा च "पृथ्वीनाथो भवेन्मूर्ध्नि ललाटे रविनन्दन!। स्पन्दं विद्युद्विमायाति भ्रूनासोः प्रियसङ्गमः। अक्षत्रियाणि देशे तु शुभपाने धनागमः। अक्षकण्ठोपागमो मध्ये दृष्टं राजन्! विचक्षणैः। दक्षबन्धने सङ्करे च जयं शीघ्रमवाप्नुयात्। योनिस्त्रीगोऽपाङ्गदेशे अवश्याने प्रियास्मृतिः। नाभिकायां प्रीतिभोज्यं प्रजाग्निरधरोष्ठजे। कण्ठे तु भोगलाभः स्याद्भोगवद्भिरथांसयोः। सङ्कुचकोच्च बाहुभ्यां रुक्षे चैव धनागमः। मुखे पराजयः सद्योऽजयो वक्षःस्थले भवेत्। कुक्षिभ्यां प्रीतिरुद्दिष्टा स्त्रियाः संजननं स्तने। स्याम्भंगो नाभिदेशे वस्तौ चैव धनागमः। जानुभ्यो जातसन्धिर्बलवद्भिर्भवेन्नृपः। दिवैकदेशगमोऽस्य सङ्घायां रविनन्दन!। सक्थं स्यान्नाप्नोति यद्यत्रं प्रस्फुरणान्नृप!। वलाभश्चाध्वगमनं भवेत् पादतले नृप!। वाल्हनं पिटकस्यैव ग्रैवं स्फु-

रथवत्तया । विपर्ययेण विद्धिता सर्वस्त्रीषां फलागमः । दक्षिणेऽपि प्रशस्तेऽङ्गे प्रशस्तं स्पन्दितमेवतः । अतोऽन्यथा विद्विषज्जल्पनात्तु फलस्य प्रशस्य च निन्दितस्य । अनिष्टचिह्नोपगमे द्विजानां कार्यं सुवर्णेन तु तर्पणं स्यात् । [स्पर्शते अस्पर्शिष्ट ।

स्पर्ह संहर्षे (पराभिभवेच्छायाम्) भ्वा० आत्म० अक० सेट् ।

स्पर्हा स्त्री स्पर्ह-अ । संहर्षे २पराभिभवेच्छायां ३साध्ये ४कर्मोद्यतौ च मेदि० । [स्पर्शते ।

स्पर्श पदृषे क्षये च चु० या० सक० सेट् । स्पर्शयते अपस्पर्शि

स्पर्श पु० स्पर्श-स्पृश-वा घञ् घञ् वा । न्यायोक्ते त्वगिन्द्रियग्राह्ये गुणभेदे २स्पर्शने "मात्रास्पर्शास्तु कौन्तेय" गीता । ३रोगे ४वृक्षे ५गुप्तचरे मेदि० ६चपटप्रे अमरः । ७वायौ पु० टस्पर्शके त्रि० मेदि० । स्पृश-णिच्-घञ् । ८दाने मेदि० स्पृशन्ते वायुना जिह्वाद्याद्य चञ्चारणाय घञ् । १०कादिषु मावसानेषु वर्णेषु पु० कादयोमावसानाः स्पर्शः स्त्रि० को० । "स्पर्शस्त्वनिन्द्रियग्राह्यत्वचः स्यादुपकारकः । अनुष्णाशीतशीतोष्णभेदात् स त्रिविधो मतः । काठिन्यादिः क्षितावेव नित्यतादि च पूर्ववत् । एतेषां पाकजत्वन्तु क्षितौ नान्यत्र कुत्रचित् । तथापि परमाणौ स्यात् पाको वैशेषिके नये । नैयायिकानान्तु नये द्व्यणुकादावपीष्यते" भाषा० । "उपकारक इति स्पर्शनप्रत्यक्षे स्पर्शः करणमित्यर्थः । अनुष्णाशीतेति । पृथिव्या वायोश्च स्पर्शोऽनुष्णाशीतः । जलस्य शीतः । तेजस उष्णः । काठिन्येति । कठिनसुकुमारस्पर्शौ पृथिव्या एवेत्यर्थः । कठिनत्वादिकन्तु न संयोगनिष्ठो जातिविशेषः चक्षुर्ग्राह्यत्वापत्तेः । पूर्ववदिति । जलतेजोवायुपरमाणूनां स्पर्शो नित्यादणुकादेस्त्वनित्या इत्यर्थः । एतेषामिति । एतेषां रूपरसगन्धस्पर्शानाम् । नान्यत्रेति । पृथिव्या हि रूपरसगन्धस्पर्शपरावृत्तिः पावकसंयोगादुपलभ्यते । न हि तथापि भ्रियमाणे जलादौ रूपादिकं परावर्त्तते । नीरे क्षीरमोष्णत्व अन्वयव्यतिरेकाभ्यामौपाधिकमेवेति निर्णीयते पवनपृथिव्योः शीतस्पर्शादिवत् । तथापि पृथिवीत्वपि मध्ये परमाणावेव पाक इति वैशेषिकादयः । तेषामवमाशयः । अवयविनाश्यत्वेऽवयविषु पाको न सम्भवति । परन्तु वह्निसंयोगेनावयविषु विनष्टेषु सत्सु परमाणुषु पाकः । पुनश्च पक्वपरमाणुसंयोगाद्द्व्यणुकादिक्रमेण पुनर्महावयवियंन्त्रोत्पत्तिः तेजसामतिशयितवेगवशात् पूर्वव्यूहनाशो झटिति व्यूहान्तरोत्पत्तिश्चेति । अथ द्व्यणुकादिविनाशमारभ्य कतिभिः क्षणैः पुनरुत्पत्त्या रूपादिसङ्क्रमतीति शिष्यबुद्धिवैशद्याय प्रक्रिया । "तत्र संयोगविभागयोरनपेक्षकारणं कर्म" इति वैशेषिकसूत्रम् । क्षोत्तरवृत्तिभावान्तरानपेक्षत्वं तदर्थः । अन्यथा कर्मणाद्युत्तरसंयोगस्य जनने पूर्वसंयोगनाशापेक्षत्वाद्व्याप्तिः स्यादिति । तत्र विभागजविभागानङ्गीकारे नव क्षणाः । तदङ्गीकारेऽपि विभागः किञ्चित्सापेक्षो विभागं जनयेत् निरपेक्षस्य तस्य कर्मत्वं स्यात् । तत्र यदि द्व्यारम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागजविभागः स्यात् तदा दश क्षणाः । अथ द्व्यनाशविशिष्टं कालमवयवं चापेक्ष्य विभागजविभागः स्यात् तदा एकादश क्षणाः । तथा हि वह्निसंयोगात् परमाणौ कर्म । ततः परमाण्वन्तरेण विभागः । तत आरम्भकसंयोगनाशः । ततो द्व्यणुकनाशः१। ततः परमाणौ श्यामादिनाशः२। ततो रक्तादुत्पत्तिः३। ततो द्व्यारम्भानुगुणक्रियाः४। ततो विभागः५। ततः पूर्वसंयोगनाशः६ । तत आरम्भकसंयोगः७। ततो द्व्यणुकोत्पत्तिः८। ततो रक्तादुत्पत्तिः९। ननु श्यामादिनाशक्षणे रक्तोत्पत्तिक्षणे वा परमाणौ द्व्यारम्भानुगुणक्रियाऽस्तीति चेत् । न । अस्मिन्संयुक्ते परमाणौ यत् कर्म तद्विनाशमन्तरेण शुणोत्पत्तिमन्तरेण च तत्र परमाणौ क्रियान्तराभावात् कर्मवति कर्मोत्पत्तेः निर्गुणे द्रव्ये द्व्यारम्भानुगुणक्रियानुपपत्तेश्च । तथापि परमाणौ श्यामादिनिवृत्तिसमकालं रक्तादुत्पत्तिः स्यादिति चेत् न । पूर्वरूपादिध्वंसस्य रूपान्तरे हेतुत्वात् । इति नव क्षणाः । अथ दश क्षणाः । या च आरम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागेन विभागस्य जनने इति स्यात् । तथा हि वह्निसंयोगाद् द्व्यणुकारम्भके परमाणौ क्रिया । ततो विभागः । ततः आरम्भकसंयोगनाशः । ततो द्व्यणुकनाशविभागजविभागौ१। ततः श्यामनाशपूर्वसंयोगनाशौ२ । ततो रक्तोत्पत्त्युत्तरसंयोगौ३। ततो वह्निजोदनजन्यपरमाणुकर्मणो नाशः४।

ततोऽदृष्टवदात्मसंयोगाद् द्रव्यारम्भानुगुणक्रियाः। ततो विभागः६। ततः पूर्वसंयोगनाशः७। तत आरम्भकसंयोगः८। ततो द्व्यणुकोत्पत्तिः९। ततो रक्षादुत्पत्तिः१०। अथैकादश चणाः। वह्निसंयोगात् परमाणौ कर्म। ततो विभागः। ततो द्व्यारम्भकसंयोगनाशः। ततो द्व्यणुकनाशःविशिष्टं कालमेक्ष विभागजविभागः२। ततः पूर्वसंयोगनाशः३। तत उत्तरसंयोगः४। ततः परमाणुकर्मनाशः५। ततोऽदृष्टवदात्मसंयोगाद् द्रव्यारम्भानुगुणक्रियाः६। ततो विभागः७। ततः पूर्वसंयोगनाशः८। ततो द्व्यारम्भकसंयोगः९। ततो द्व्यणुकम्१०।ततो रक्षादि११। मध्यमगुरुत्वदेकत्वादग्निसंयोगाच्च रूपनाशरक्षोत्पादौ। तावत्कालमेकत्वस्थैर्यात्। किंतु यदुत्पादको नाशकस्तदा नष्टे रूपादावग्निनाशे नीरूपदिरं परमाणुः स्यात्। नाशकत्वेदुत्पादकस्तदा रक्षोत्पत्तौ तदग्निना रक्षता न स्यात्। एवं परमाण्वन्तरे कर्मचिन्तनात् षड्भादिचणेऽपि गुणोत्पत्तिः। तथा हि एकत्र परमाणौ कर्म। ततो विभागः। तत आरम्भकसंयोगनाशपरमाण्वन्तरकर्मणी। ततस्तु द्व्यणुकनाशः। परमाण्वन्तरकर्मजश्च विभाग इत्येकः कालः१। ततः श्यामादिनाशः विभागश्च पूर्वसंयोगनाश इत्येकः कालः२। ततो रक्षोत्पत्तिर्द्व्यारम्भकसंयोगश्चेत्येकः कालः३। अथ द्व्यणुकोत्पत्तिः४। अथ रक्षोत्पत्तिरितिषड् चणाः। द्रव्यनाशसमकालं परमाण्वन्तरे कर्मचिन्तनात् षड्भे गुणोत्पत्तिः। तथा हि परमाणुकर्मणा परमाण्वन्तरविभागः। तत आरम्भकसंयोगनाशः। अथ द्व्यणुकनाशपरमाण्वन्तरकर्मणी। अथ श्यामनाशः परमाण्वन्तरकर्मजश्च विभागः२। ततो रक्षोत्पत्तिः परमाण्वन्तरे पूर्वसंयोगनाशश्च३। ततः परमाण्वन्तरसंयोगः४। ततो द्व्यणुकोत्पत्तिः५। अथ रक्षोत्पत्तिरितिषड्। एवं श्यामनाशचणे परमाण्वन्तरे कर्मचिन्तनात् सप्त चणाः। रक्षोत्पत्तिसमकालं परमाण्वन्तरे कर्मचिन्तनात् अष्ट चणाः" इति। नैयायिकानामिति। नैयायिकानां मते द्व्यणुकादौ अवयविन्यपि पाको भवति। तेषामयमाशयः। अवयविनां सच्छिद्रत्वाद्रन्ध्रैः सूक्ष्मावयवैरन्तः प्रविष्टैरवयवेष्वपि पाको न विरुध्यते। वैशेषिकमते त्वनन्तावयवतन्त्वाश्रयत्वे गौरवात्। इत्यत्र शेषं घटे रक्षादिप्रत्यभिज्ञापि सङ्गच्छते। अत्र तु न प्रत्यभिज्ञा तदावयविनाशेऽपि स्वीक्रियते" सङ्ग०।

सर्गतन्मात्र न० सांख्यमतसिद्धे वायूपादानकारणे सर्गमात्रगुणके सूक्ष्मभूतभेदे तन्मात्रशब्दे पृ० दृश्यम्।

सर्गन न० सर्ग-सृज-वा ल्युट्। १पक्षिणे २सर्गे च। क्विप् ल्युट्। १दाने च मेदि०। सृज-कर्त्तरि ल्यु। ४वायौ पु० अमरः। [तन्मात्रशब्दे शब्दर०।

सर्गलज्जा स्त्री सर्गमात्रेण लज्जते इड्डोचात् लज्ज-कच्।

सर्गशुद्धा स्त्री सर्गे शुद्धा। ततस्तूल्याम् शब्दच०।

सर्ग्या स्त्री सर्गं यज्ञे-कर्मणि घञ्। कुशटायां अरणिः तस्याः सर्वेष्टसाधनत्वात्तथात्वम्। [अस्त। सृज्यायत।

सर्ग्याग्नता स्त्री त्वक्शून्यत्वाख्ये वातरोगभेदे "सृज्यमाना त्वचा या तु शीतोष्णं सहते कर्कशम्। न जानाति सुखं दुःखं सा तु त्वक्शून्यतेति परिकीर्त्तिता" भावप्र०।

सर्ष्टृ त्रि० सृज-तृच्। १उपतापयितरि स्त्रियां ङीष्। २रोगे पु० भरतः। ऋतोरम् रूपम् तत्रार्थे त्रि०।

सर्ज्ज धन्धे बाधने च स्वा० उभ० सक० सेट्। सर्जति-ते असर्जीत्-असार्जीत्। असर्जिष्ट।

सर्ज्ज पु० सर्ज-कच्। १वरणाख्ये २अभिसरे (युद्धे) ३गुडवरे च अमरः "राजनीतिरसर्जा" माघः।

सर्ज्ज त्रि० सर्ज-क्त त्रि० रुडभावः। १व्यक्ते २स्फुटे अमरः

सर्ज्जी स्त्री सर्ज-ङीष्। १क्षारमृत्तिकायां २सर्जिकाक्षारे च अमरः। ३सर्जरसे च रत्नमा०।

सर्ज्जिका स्त्री सर्ज्जी-कन्। १क्षारमृत्तिकायां २सर्जिकाक्षारे च। ३सर्जरसे च रत्नमा०।

सर्ज्जिकाक्षार पु० सर्जिकाया क्षारः। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारक पु० सर्जिकाक्षार-स्वार्थे कन्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारिका स्त्री सर्जिकाक्षारक-टाप्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारी स्त्री सर्जिकाक्षार-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीय न० सर्जिकाक्षारी-छ। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयक न० सर्जिकाक्षारीय-स्वार्थे कन्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयिक न० सर्जिकाक्षारीय-स्वार्थे ठक्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयिका स्त्री सर्जिकाक्षारीयिक-टाप्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयिकी स्त्री सर्जिकाक्षारीयिक-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयी स्त्री सर्जिकाक्षारीय-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीय न० सर्जिकाक्षारीयीय-छ। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयक न० सर्जिकाक्षारीयीय-स्वार्थे कन्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयिक न० सर्जिकाक्षारीयीय-स्वार्थे ठक्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयिका स्त्री सर्जिकाक्षारीयीयिक-टाप्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयिकी स्त्री सर्जिकाक्षारीयीयिक-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयी स्त्री सर्जिकाक्षारीयीय-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीय न० सर्जिकाक्षारीयीयीय-छ। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयक न० सर्जिकाक्षारीयीयीय-स्वार्थे कन्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयिक न० सर्जिकाक्षारीयीयीय-स्वार्थे ठक्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयिका स्त्री सर्जिकाक्षारीयीयीयिक-टाप्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयिकी स्त्री सर्जिकाक्षारीयीयीयिक-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयी स्त्री सर्जिकाक्षारीयीयीय-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीय न० सर्जिकाक्षारीयीयीयीय-छ। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयक न० सर्जिकाक्षारीयीयीयीय-स्वार्थे कन्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयिक न० सर्जिकाक्षारीयीयीयीय-स्वार्थे ठक्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयिका स्त्री सर्जिकाक्षारीयीयीयीयिक-टाप्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयिकी स्त्री सर्जिकाक्षारीयीयीयीयिक-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयी स्त्री सर्जिकाक्षारीयीयीयीय-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीय न० सर्जिकाक्षारीयीयीयीयीय-छ। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयक न० सर्जिकाक्षारीयीयीयीयीय-स्वार्थे कन्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयिक न० सर्जिकाक्षारीयीयीयीयीय-स्वार्थे ठक्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयिका स्त्री सर्जिकाक्षारीयीयीयीयीयिक-टाप्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयिकी स्त्री सर्जिकाक्षारीयीयीयीयीयिक-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयी स्त्री सर्जिकाक्षारीयीयीयीयीय-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीय न० सर्जिकाक्षारीयीयीयीयीयीय-छ। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयक न० सर्जिकाक्षारीयीयीयीयीयीय-स्वार्थे कन्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयिक न० सर्जिकाक्षारीयीयीयीयीयीय-स्वार्थे ठक्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयिका स्त्री सर्जिकाक्षारीयीयीयीयीयीयिक-टाप्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयिकी स्त्री सर्जिकाक्षारीयीयीयीयीयीयिक-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयी स्त्री सर्जिकाक्षारीयीयीयीयीयीय-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीय न० सर्जिकाक्षारीयीयीयीयीयीयीय-छ। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयक न० सर्जिकाक्षारीयीयीयीयीयीयीय-स्वार्थे कन्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयिक न० सर्जिकाक्षारीयीयीयीयीयीयीय-स्वार्थे ठक्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयिका स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयिक-टाप्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयिकी स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयिक-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयी स्त्री सर्जिकाक्षारीयीयीयीयीयीयीय-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीय न० सर्जिकाक्षारीयीयीयीयीयीयीयीय-छ। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयक न० सर्जिकाक्षारीयीयीयीयीयीयीयीय-स्वार्थे कन्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयिक न० सर्जिकाक्षारीयीयीयीयीयीयीयीय-स्वार्थे ठक्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयिका स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयिक-टाप्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयिकी स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयिक-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयी स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीय-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीय न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीय-छ। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयक न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीय-स्वार्थे कन्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयिक न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीय-स्वार्थे ठक्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयिका स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयिक-टाप्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयिकी स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयिक-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयी स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीय-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीय न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीय-छ। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयक न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीय-स्वार्थे कन्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयिक न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीय-स्वार्थे ठक्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयिका स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयिक-टाप्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयिकी स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयिक-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयी स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीय-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीय न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीय-छ। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयक न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीय-स्वार्थे कन्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयिक न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीय-स्वार्थे ठक्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयिका स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयिक-टाप्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयिकी स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयिक-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयी स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीय-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीय न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीय-छ। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयक न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीय-स्वार्थे कन्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयिक न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीय-स्वार्थे ठक्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयिका स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयिक-टाप्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयिकी स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयिक-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयी स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीय-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीय न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीय-छ। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयक न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीय-स्वार्थे कन्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयिक न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीय-स्वार्थे ठक्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयिका स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयिक-टाप्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयिकी स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयिक-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयी स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीय-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीय न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीय-छ। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयक न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीय-स्वार्थे कन्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयिक न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीय-स्वार्थे ठक्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयिका स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयिक-टाप्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयिकी स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयिक-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयी स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीय-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीय न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीय-छ। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयक न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीय-स्वार्थे कन्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयिक न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीय-स्वार्थे ठक्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयिका स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयिक-टाप्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयिकी स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयिक-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयी स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीय-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीय न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीय-छ। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयक न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीय-स्वार्थे कन्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयिक न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीय-स्वार्थे ठक्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयिका स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयिक-टाप्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयिकी स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयिक-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयी स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीय-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीय न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीय-छ। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयक न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीय-स्वार्थे कन्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयिक न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीय-स्वार्थे ठक्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयिका स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयिक-टाप्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयिकी स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयिक-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयी स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीय-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीय न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीय-छ। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयक न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीय-स्वार्थे कन्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयिक न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीय-स्वार्थे ठक्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयिका स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयिक-टाप्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयिकी स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयिक-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयी स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीय-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीय न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीय-छ। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयक न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीय-स्वार्थे कन्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयिक न० सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीय-स्वार्थे ठक्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयिका स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयिक-टाप्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयिकी स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयिक-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयी स्त्री सर्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीय-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीय न० सर्जिकाक्षारीय-छ। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयक न० सर्जिकाक्षारीय-स्वार्थे कन्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयिक न० सर्जिकाक्षारीय-स्वार्थे ठक्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयिका स्त्री सर्जिकाक्षारीयिक-टाप्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयिकी स्त्री सर्जिकाक्षारीयिक-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयी स्त्री सर्जिकाक्षारीय-ङीष्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीय न० सर्जिकाक्षारीय-छ। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयक न० सर्जिकाक्षारीय-स्वार्थे कन्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयिक न० सर्जिकाक्षारीय-स्वार्थे ठक्। सर्जिकाक्षारशब्दे दृश्यम्।

सर्ज्जिकाक्षारीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयीयी

सृष्टासृष्ट न० सृष्टेन वा सम्यक् सृष्टम् । परस्परसर्गने
सृष्टासृष्टि न० सृज-भावे-क्तिन् कर्मव्यतिहारे दृश्समा० पूर्वपददीर्घः । परस्परसर्गने "तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे । नगरग्रामदाहे च सृष्टासृष्टि न दुष्यति । आपद्यपि च कष्टायां कृच्छ्रे पीड़िते तथा । मातापित्रोर्गुरोश्चैव निदेशवर्त्तने तथा" हरिस्वामिः ।
सृष्टि स्त्री सृज-क्तिन् । सर्गे अमरः । [अपसृष्टवत् ।
सृह रक्षायां चुरा० उभ० सक० सेट् । सर्हयति-ते
सृहणीय त्रि० सृह-अनीयर् । वाञ्छनीये २लाभ्ये च "अहो बतासि सृहणीयवीर्यः" कुमारः ।
सृहयालु त्रि० सृह-आलुच् । सृहाशीले ।
सृहा स्त्री सृह-अङ् । इच्छायाम् अमरः । "मिथुने सृहावती" कुमारः ।
वर्षभेदे विषयभेदे सृहोचित्यं यथा
"तपोधनं ब्राह्मणानां तपः कल्पतरुस्तथा । तपस्या कामधेनुश्च मन्ये तपसि सृहा । ऐश्वर्यं क्षत्रियाणाञ्च वाणिज्ये च तथा विशाम् । शूद्राणां विप्रसेवायां सृहा वेदेष्वनिन्दिता । क्षत्रियाणाञ्च तपसि सृहा-तीव प्रशंसिता । ब्राह्मणानां विवादेषु सृहातीव विनिन्दिता । क्षत्रियाणां रणोद्यमौ रणे मृत्युर्न गर्हितः । रणे सृहा ब्राह्मणानां लोके वेदे विडम्बना । ब्रह्मवै० ग० ख० ३५ अ० । [नीवेत्रि० ।
सृङ्क पु० सृज-कर्मणि यत् । मालतङ्कटङ्के चक्षा० २लाञ्छ
स्फट विशरणतायाम् चक० भ्वा० पर० सेट् । स्फटति अस्फटीत्-अस्फाटीत् । इदित्त्वात्कार्थे स्फण्टति अस्फण्टीत् ।
स्फट पुंस्त्री० स्फट-अच् । सर्पफणायाम् अमरटीका ।
स्फटि(टी) स्त्री स्फट-इन् वा ङीप् । (फट्किरी) वणिग्द्रव्यभेदे भावप्र० । स्वार्थे क । तत्रार्थे "स्फटिका तु कषायोष्णा वातपित्तकफव्रणान् । निहन्ति त्रिदोषीसर्पान् योनिसङ्कोचकारिणी" भावप्र० ।
स्फटिटीक पु० स्फटि(टीव)रिव कायति कै-क । १खनामख्याते मणौ इला० स्वार्थे क वा ह्रस्वः । २स्फटेर्भावप्र० । स्वार्थेऽण् । स्फाटिकमयत्व न०मन्दर० । "स्फटिकः समधीर्यश्च पित्तदाहार्त्तिदोषजुत् । तस्माच्च मालां जपतां दत्ते कोटिगुणं फलम्" । तत्परीक्षा यथा "बहुगङ्गाजोयबिन्दुच्छविविमलतमं निस्तुषं नेत्रहृद्यं स्निग्धं गुणालङ्कारं मधुरमतिहिमं पित्तदाहार्त्तहारि । पाषाणे यन्निघृष्टं स्फुटितमपि निजां स्वच्छतां नैव जह्यात् तच्चान्यं जातु सख्यं शुभगुणचिनुते नैव रत्नञ्च रत्नम्" राजनि० ।
"शुक्लाविद्रुमवज्रेन्द्रवैदूर्यस्फटिकादिकम् । मणिरत्नं वरं शीतं कषायं स्वादु लेखनम् । चक्षुष्यं धारणात्तच्च पाषाणश्लीपिनाशनम्" राजवल्लभः । तस्य उत्पत्तिकथादिकं यथा "क्षीरोदीमथ्यमाने मन्थनीभूते । शङ्खो व्यकिरन्मेदो दानवस्य प्रयत्नतः । आकाशगुहं तेनाथ सत्वं स्फटिकं ततः । सप्त सप्तङ्गवत्तं किञ्चिदपीलरान्वितम् । न तत्तुल्यं हि रत्नानामथ वा पापनाशनम् । संस्कृतं शिल्पिना सद्यो मूल्यं किञ्चिन्नमेत्ततः" गारुड़े ७६अ० । तथा "हिमाचले सिंहले च विन्ध्याटविवटे तथा । स्फटिकं जायते चैव नानारूपं समप्रभम् । हिमाद्रौ चन्द्रसङ्काशं स्फटिकं तत् द्विधा भवेत् । सूर्यकान्तञ्च तत्रैकं चन्द्रकान्तं तथाऽपरम् । सूर्यांशुसंगमात्तेज वह्निं वमति यत् क्षणात् । सूर्यकान्तं तदाख्यातं स्फटिकं रत्नवेदिभिः । पूर्णेन्दुकरसंस्पर्शादद्रवत स्रवति क्षणात् । चन्द्रकान्तं तदाख्यातं दुर्लभं तत् कलौ युगे । अशोकपल्लवच्छायं दाडिमीबीजसन्निभम् । विन्ध्याटवीतटे देशे जायते मन्द्रकान्तिकम् । सिंहले जायते लक्षणाकरे गन्धशीलके । म्लेच्छरागमवस्थाने विविधं स्फटिकं भवेत् । अत्यन्तनिर्मलं स्वच्छं स्रवतीव जलं शुचि । ज्योतिर्व्यंजनसंश्लिष्टं तच्छ्वेतोरसं द्विज ! । तदेव लोहितकारं राजावर्त्तसमोद्भवम् । नीलं तत्तु पाषाणं प्रोक्तं राजमयं शुभम् । ब्रह्मरत्नमयं यत्तु प्रोक्तं ब्रह्ममयं द्विज !" युक्तिकल्प० ।
स्फटिकाचल पु० स्फटिक इव शुभ्रत्वात् अचलः । १कैलासपर्वते २स्फाटिकमयपर्वते च । स्फटिकाद्रिप्रभृतयोऽप्यत्र
स्फटिकाद्रिभिद् (द्) पु० स्फटिकाद्रिं स्फटिकपर्वतं भिनत्ति भिद-क्विप् क वा । कर्पूरे राजनि० ।
स्फटिकाभ्र पु० स्फटिकवर्णः अभ्र इव । कर्पूरे राजनि० ।
स्फटिकारि पु० ६त० । (फट्किरि) वणिग्द्रव्यभेदे तस्य स्फटिकतुल्यदीप्तिमत्त्वात्तथात्वम् रत्नमा० ।
स्फड परिहासे चुरा० उभ० सक० सेट् इदित् । स्फण्डयति-ते अपस्फण्डत्-त । [रोत् ।
स्फर चले स्फूर्तौ च तुदा० प० अक० सेट् । स्फरति अस्फा-
स्फरण न० स्फर-भावे ल्युट् । स्फुरणे । [अस्फारीत् ।
स्फल चले स्फूर्तौ च तुदा० पर० अक० सेट् । स्फलति
स्फाटिकोपल पु० स्फटिकमेव उपलः । स्फाटिके त्रिका० ।

स्फाति स्त्री स्फाय-भावे क्तिन् यलोपः। वृद्धौ अमरः।
स्फाय वृद्धौ भ्वा० आ० अक० सेट्। स्फायते अस्फायि-ष्टास्फायिष्ट। निष्ठायामनिट् यलोपे ईत् स्फीतः।
स्फार पु० स्फाय-रक्। १खर्षबुद्बुदे २विपुले ३विकटे मेदि० ४प्रचुरे च त्रि० संचिप्र०।
स्फारण न० स्फुर-णिच्-स्फारादेशः ल्युट। विकाशने।
स्फाल पु० स्फल-घञ्। स्फूर्त्तौ। [कट फले शब्दच०।
स्फिग्घातन पु० स्फिगं घातयति हन-णिच्-ल्यु।
स्फिच् स्त्री स्फाय-डिच्। १कटिप्रोथे अमरः उपचारात् तद्रूपे वातजे २रोगभेदे च। [यति ते अपिस्फिटत् त।
स्फिट हिंसे अनादरे च चु० उभ० सक० सेट्। स्फेटयति ते अपस्फिटत् त।
स्फिर त्रि० स्फाय किरच्। १प्रचुरे अमरः २वृद्धे च।
स्फीत त्रि० स्फाय-क्त स्फीभावः। १वृद्धे २समृद्धे च।
स्फुट भेदे चु० उभ० सक० सेट्। स्फोटयति ते अपुस्फुटत् त।
स्फुट विकाशे भ्वा० प० अक० सेट्। स्फोटति इरित् अस्फुटत् अस्फोटीत्। [पुस्फोट।
स्फुट विकाशे तु० कुटा० प० अक० सेट्। स्फुटति अस्फुटीत्
स्फुट विदलने भ्वा० आत्म० अक० सेट्। स्फोटते अस्फोटिष्ट। [ते अपस्फुण्टत त।
स्फुट परीक्षायां चुरा० उभ० सक० सेट् इदित्। स्फुण्टयति
स्फुट हिंसे चु० उभ० सक० सेट् प्रावेषाङ् पूर्वः। आस्फोटयति ते आपुस्फुटत् त। [अपुस्फुटत त।
स्फुट विकाशे अद० चु० उभ० सक० सेट्। स्फुटयति ते
स्फुट त्रि० स्फुट-क। १विकसिते २व्यक्ते मेदि० ३भिन्ने ४शुक्ले च अजयः। ५ज्योतिषोक्तेषु मेषादिराशिषु अंशविशेषस्थितेषु सूर्य्यादिग्रहेषु पु० तेषां हृत्तत्तदंशकलादिषु गतौ स्त्री। ७अतप्ततण्डुलाया द्योतने न०। ८सर्षपफलायां स्त्री रानायाम्। यद्वाणां स्फुटताकरणप्रयोजनं त्रि० शि० उक्तं यथा "आत्मविद्याविवृद्ध्यर्थं तन्त्रादौ खेटैः स्फुटैरेव फल स्फुटत्वम्। स्यात् प्रोच्यते तेन नभश्चराणां स्फुटक्रिया दृग्गणितैक्यसिद्ध्यै" इत्युपक्रमे स्पष्टाधिकारे प्रपञ्चितं यद्वाणां स्फुटादिकसाधनम् "स्फुटेन हीनो यहो मन्दकेन्द्रं चक्रोद्धृतं यद्गतभोग्यभक्तम्। तत्खाद्रिकेन्द्रे फलं खर्णमेवं स्फुटं ग्रहेष्यमखाद्रिकोनं च भोग्यम्। त्रिभिर्भैः पदं तानि चत्वारि चक्रे क्रमात् खादयुग्मसंज्ञा च तेषाम्। अयुग्मे पदे यातभोग्यं तु युग्मे भुजो बाहुहीनं त्रिभं कोटिरुक्ता" इत्युक्ता भुजकोटिफलादिकसंज्ञा। "स्यात् संस्कृतो मध्यफलेन मध्यो मन्दस्फुटः स्यात्तनकेन्द्रसंज्ञम्। विधाय तै-रेव फलेन चैव खेटः स्फुटः स्यादसकृत् फलाभ्याम्। दलीकृताभ्यां प्रथमं फलाभ्यां ततोऽखिलाभ्यां मनसा कृतासु। स्फुटौ रवीन्दू स्फुटनेन तेषां भोग्याख्यतद्भुक्त्योरभावात्" सि० शि०। आदौ यद्वस्य मन्दफल-मानीय तेन संस्कृतोऽसौ मन्दस्फुटः स्यात्। तं शी-घ्रोद्धृतिशोध्य शीघ्रकेन्द्रं कृत्वा ततः शीघ्रफलम्। तेन संस्कृतो मन्दस्फुटो ग्रहः स्यात्। तस्मात् स्फुटा-न्मध्यांश्च विशोध्य मन्दमानीय तेन गणितागतो मध्यसंस्कृतो मन्दस्फुटः स्यात्। तेन पुनस्तत्केन्द्रं ततस्तत्फलं तेन मन्दस्फुटसंस्कृतः स्फुटः स्यात् एवमसकृत् यावदविशेषः। तत्तु दलीकृताभ्यां प्रथमं फलाभ्यामित्यादिना कुजस्य विशेष उक्तस्तत्रोपपत्तिरेव वासना प्रमिता०। यद्वाणां तत्रोक्तः स्पष्टगत्यानयन-प्रकारस्तु खगोलशब्दे २४१२ पृ० दृश्यः।
स्फुटन न० स्फुट-ल्युट्। १विकसने अमरः २विदलीभावे च।
स्फुटबन्धनी स्त्री स्फुटं बन्धनं यस्याः गौरा० ङीष्। कपोतपद्याम् रत्नमा०।
स्फुटित त्रि० स्फुट-क्त। १विकसिते हेमच० २भिन्ने "दग्धे वा स्फुटितेऽथ वा" पुराणम्। ३व्यक्तीकृते ४परिक्षासिते च
स्फुटिटी स्त्री स्फुट रन् वा ङीष्। १पादस्फोटरोगे (फोड़ा) २कर्कटीफले च (फुट) शब्दर०। [ङ्त त।
स्फुट्ट अनादरे चु० उ० सक० सेट्। स्फुट्टयति ते अपुस्फु-
स्फुड वरणे तु० कु० पर० सक० सेट्। स्फुडति अस्फु-डीत् पुस्फोड। [अस्फुण्डिष्ट।
स्फुड विकाशे भ्वा० आत्म० अक० सेट् इदित्। स्फुण्डते
स्फुड परिक्षासे चु० उ० सक० सेट् इदित्। स्फुण्डयति ते अपुस्फुण्डत त। [शब्दच०।
स्फुत्कर पु० स्फुदित्यव्यक्तं शब्दं करोति कृ-अच्। अग्नौ
स्फुर स्फूर्त्तौ तु० कुटा० प० अक० सेट्। स्फुरति अस्फु-रीत् पुस्फोर। "चाद पुस्फोर व छः" भट्टिः। णिचि-स्फारयति। [२सुस्फुरथे अमरः।
स्फुर पु० स्फुर-क। फलके हेमच०। १भावे घञ्।
स्फुरण न० स्फुर-ल्युट्। ईषच्चलने अमरः। युच्। तत्रैव स्त्री। अङ्गभेदे स्फुरफलसूत्रं यथा "भ्रूगोऽधराक्षस्फुरितञ्च सम्यक् प्रत्येकमव्यक्तफलप्रदम्। सर्वत्र यत्रावगते ऽदेहाद्भवते कर्मविपाक-जंवित्। मूर्द्ध स्फुत्याद पृथिव्याप्तिः स्थानग्रहश्चिव

ललाटदेशे । भ्रू घ्राणमध्ये प्रियसङ्गमः स्यात् नासाक्षि-मध्ये च कलहोदयनाशः । हनुललाटस्फुरणेऽर्थनाशोत्कण्ठे क्रमाद्दिस्फुरिते हनादौ । जयो हनाश्च स्फुरणे रणः स्यात् प्रियच्युतिः स्यात् स्फुरिते च कर्णे । योषित्सस्फुरिः स्फुरिते च गण्डे घ्राणे तु मौख्यसुदौ भवेताम् । भोक्ष्येऽसङ्गावधरोष्ठयोश्च स्कन्धे गले भोगविवृद्धिलाभौ । स्यन्दो भुजस्थेऽसमागमाय स्यन्दः करस्थ इष्टाप्तिहेतुः । स्यन्दश्च पृष्ठस्थ पराजयाय स्यन्दो जयाद्योरसि मानवानाम् । पार्श्वप्रकम्पे विषयस्य लाभः कटिप्रकम्पे तु बलप्रमोदौ । नाभिप्रकम्पे निजदेशनाशः धनर्द्धि बस्तिभुविप्रकम्पे । दुखं धनान्तं हृदयस्य कम्पे स्फिक्पायुकम्पेऽपि च वाहनाप्तिः । वराङ्गकम्पे वरयोषिदाप्तिर्वृक्के सकम्पे तनयस्य जन्म । वस्तौ स कम्पे युवतिप्रवृत्तिः दोषस्य कम्पे पुनरुद्गतृष्टे । वरः-प्रकम्पे सुखदायनाशः स्याज्जानुकम्पे त्वचिरेण सिद्धिः । जङ्घाप्रकम्पे निजदेशनाशः स्यानाप्रिरुद्धा चरणस्य कम्पे । यात्रा सभाभाङ्गुलप्रकम्पे पुंसां सदा दक्षिणदेहभागे । स्त्रीणान्तु वामावयवे प्रजातः । स्यन्दः फलानि प्रदिशत्यवश्यम् वसन्तराजशाकुने ४थंप्र० ।

स्फुर्च्छ विस्तरणे भ्वा० प० सक० सेट् । स्फूर्च्छति अस्फूर्च्छीत् आदित् स्फूर्च्छितं स्फूर्च्यम् ।

स्फुर्ज वज्रशब्दे भ्वा० प० अक० सेट् । स्फूर्जति अस्फूर्जीत् द्वित्वे स्फूर्जेतुः । आदित् स्फूर्जितं स्फूर्ज्यम् ।

स्फुर्जथु पु० स्फुर्ज-अथु नि० न दीर्घः । वज्रनिर्घोषे अमरटीका ।

स्फुल स्फूर्त्तौ चले च भ्वा० अक० सचये सक० तुदा० कटा० प० सेट् । स्फुलति अस्फुलीत् । पस्फोल । [युते त्रि० ।

स्फुल न० स्फुल-क । १वस्त्रागारे (ताँबु) शब्दर० । २स्फूर्त्ति-

स्फुलन न० स्फुल-भावे ल्युट् । स्फुरणे मौलकण्ठः ।

स्फुलिङ्ग पुंस्त्री० स्फुल-रङ्गच् । स्फुल्यते अग्निरनेनेति व्युत्पत्त्या च तस्य सार्थकनामता बोध्या समर्थितश्चैष एव पक्षः पातञ्जलभाष्ये व्यासचरणैः "तदेतेषामर्थसङ्केतेनावच्छिन्नानामुपसंहृतध्वनिक्रमाणां य एको बुद्धिनिर्भासस्तत्पदं वाचकं वाच्यस्य संकेतयते तदेकं पदमेकबुद्धिविषय एकप्रयत्नाभिव्यमानमक्रमवर्णं बौद्धमन्यवर्णप्रत्ययोपस्थापितं प्रतीयते इत्यत्रैव । अत्र चानेकवर्णानां शक्तावच्छेदकतापेक्षयैकस्यैव जातिरूपस्फोटत्वस्य शक्तावच्छेदकत्वकल्पने लाघवमपि दृष्टव्यम् । उक्तञ्च शब्दकौस्तुभे कोण्डभट्टचरणैः "शक्तित्व एव शक्तित्वे जातेर्लाघवमीक्ष्यताम् । औपाधिको वा विकारः । २प्रतिभायुक्ते ३विकाशयुक्ते च त्रि० स्त्रियां ङीप् ।

स्फेयस् त्रि० अतिशयेन स्फिरः, पचाद्यच् स्फादेशः । अतिपचुरे स्त्रियां ङीप् । रथन् । स्फेयोऽस्यास्ति इनि० ।

स्फोट पु० स्फुटत्यर्थोऽनेन स्फुट-करणे घञ् । व्याकरणोक्ते वर्णातिरिक्ते पूर्वपूर्ववर्णानुभवसंस्कृतचरमवर्णानुभवग्राह्ये अर्थप्रत्यायके अवयवे शब्दभेदे स्वार्थे क तत्रार्थे । व्याकरणमते वर्णसमुदायानां नार्थबोधकत्वं किन्तु स्फोटस्यैवेति प्रपञ्चितमस्माभिः शब्दार्थरत्ने यथा

"तत्र वर्णानां प्रत्युच्चारणमन्यथाप्रतीयमानतया अनित्यत्वेन आशुविनाशिनाञ्च तेषां मेलनासम्भवेन तत्समुदायस्यापि सम्बन्धित्वाभावेन प्रत्येकं वर्णेषु दृष्टो व्यभिचारेण च पूर्वपूर्ववर्णानुभवाहितसंस्कारसचिवेन अन्त्यवर्णजनितपरिपाकशालिनि हृदये झटिति समुदीयमानस्य स्फोटरूपस्यैव शब्दस्य नित्यतया तस्यैव नित्यसम्बन्धस्य योग्यतया इत्थमर्थप्रतिपत्तिसिद्धाकरे स्पष्टम् । तथाहि । वर्णा यदि वाचकाः स्युः स्युरेव तेभ्यो व्यक्तेभ्योऽर्थावगतिः । न च तथा । प्रत्येकं इत्थमर्थाभावेन तत्समुदायस्य इत्थमर्थं सुदूरपराहतम् । आशुविनाशिनां वर्णानां मेलनासम्भवेन तत्समुदायत्वासिद्धेः पूर्वपूर्ववर्णानुभवाहितसंस्कारसहितस्य चरमवर्णस्य वाचकत्वन्तु समर्थितमपि दिनान्तरीयताडशसंस्कारानादाय वर्त्तमानचरमवर्णमात्रानुभवेन अर्थावगत्यापत्त्या निरासितम् । अन्त्यवर्णपर्य्यन्तानामनुभवानन्तरं समुदायानां संस्कारोदयकल्पनया पुनः समुदितवर्णानां स्मरणात्मकज्ञानतोऽर्थावगतिरित्यपि न सङ्गतं जारराजेत्यादावविशेषेण तत्तदर्थसंस्कारसद्भावादुभयवैलक्षण्यानुपपत्तेः । अतोऽवश्यं वर्णातिरिक्तोऽन्त्यवर्णानुभवव्यङ्ग्यः स्फोटनामा शब्दः स्वीकार्यः स्फुटति प्रकाशतेऽर्थोऽनेनेति व्युत्पत्त्या च तस्य सार्थकनामता बोध्या समर्थितश्चैष एव पक्षः पातञ्जलभाष्ये व्यासचरणैः "तदेतेषामर्थसङ्केतेनावच्छिन्नानामुपसंहृतध्वनिक्रमाणां य एको बुद्धिनिर्भासस्तत्पदं वाचकं वाच्यस्य संकेतयते तदेकं पदमेकबुद्धिविषय एकप्रयत्नाभिव्यमानमक्रमवर्णं बौद्धमन्यवर्णप्रत्ययोपस्थापितं प्रतीयते इत्यत्रैव । अत्र चानेकवर्णानां शक्तावच्छेदकतापेक्षयैकस्यैव जातिरूपस्फोटत्वस्य शक्तावच्छेदकत्वकल्पने लाघवमपि दृष्टव्यम् । उक्तञ्च शब्दकौस्तुभे कोण्डभट्टचरणैः "शक्तित्व एव शक्तित्वे जातेर्लाघवमीक्ष्यताम् । औपाधिको वा

मेदोऽस्तु वर्णानां तारमन्द्रादिति"। तथा "श्रुणोति य इमं स्फोटं तस्मै शोत्रे च सूत्रदक्। येन वाक्व्यक्तते यच्च व्यक्तिराकाश कालस्य" इति भट्टभूषणभाष्यतत्त्वचन्द्रे स्फोटात्मकशब्दश्रवणस्याभिव्यङ्ग्यो न स्फोटरूप शब्दोऽर्थात् दत्यवगम्यम्। हरिणाऽपि "अत्र राधामकारस्य स्फोटस्य वर्णसंज्ञया" इति स्फोटस्य व्यङ्ग्यवर्णाश्रयत्वमभिहितम्। एतन्मताभिप्रायेणैव "स्फोट दत्याहेति" शारीरकभाष्ये रूपटव्यतपाटन्म "वर्णा एव तु शब्द इति भगवानुपवर्ष इति" निराकरणमूलमवर्ण यदुक्तात् तन्मताभिप्रेत्य। "न स्फटः प्रतीतप्रतीतिभ्यामिति" सांख्यसूत्रेऽपि स्फोटखण्डनमुपलक्षणतामभिप्रायेणेति सर्वं तुल्यम्। स च स्फोटोवर्णपदादि भेदेन अनेकविधो बाहुल्यभयात् न प्रपञ्चितः। तस्य स्फोटस्याभिव्यक्तौ प्राक्तस्य ध्वनेः कारणत्वं चिरचिरतरस्थितौ तु प्राक्तनध्वनिजातयैक्यध्वनेरिति विवेकः। तथा च वाक्यपदीये "स्फोटस्य यस्य हेतुः प्राक्तनो ध्वनिरिष्यते" इति। "स्थितिभेदे निमित्तत्वं वैकृत प्रतिपद्यते" इति च स्थितिभेदे चिरचिरतरकालस्थितौ ध्वनिस्तु पूर्वसंज्ञितः। तस्य च स्फटस्य नित्यतया ध्वनेश्चतुस्वदीर्घादिकालस्य तत्रोपचारः। प्रतिपादितञ्च तत्रैव वाक्यपदीये "स्फोटस्याभिव्यक्तेश्च ध्वनिर्व्याप्रियतेः। स्वभावस्तु नित्यत्वात् हृस्वदीर्घप्लुतादिषु। प्राक्तस्य ध्वनेः कालः शब्दस्येत्युपचर्यते"। शब्दस्य स्फोटस्य नित्यतया अभिव्यक्तेश्च हृस्वदीर्घादिषु प्राक्तध्वनेः कालः तारत्वादिधीहेतुरुपचर्यते इति तदर्थः। एवञ्च विसर्जनीयोकारयकारे तत्तद्वर्णानां तद्धोधजनितस्य संस्कारस्य वा बहुक्षणपर्यन्तस्थायित्वकल्पनमपेक्ष्य एकस्यैव शब्दस्याभिव्यञ्जनानन्तरं जायमानेन वैकृतेन ध्वनिना बहुकालस्थितिकल्पने लाघवमित्यपि द्रष्टव्यम्। भेरीशब्दादौ च ध्वन्यभिव्यञ्जनानन्तरं जायमानप्राक्तनध्वनेर्बहुकालस्थायित्वदर्शनेन अत्रापि तथाकल्पनौचित्यात्। अतएव च महाभाष्ये "एवं तर्हि स्फोटः शब्दो ध्वनिः शब्दगुणः" इत्यादिनाऽभिव्यञ्जकत्वेन ध्वनेः स्फोटरूपशब्दगुणत्वमभिहितमभिहितञ्च ध्वनेश्चतुस्वदीर्घत्वेनापि भानम् यथा "ध्वनिः स्फोटस्य शब्दानां ध्वनिस्तु खलु लक्षते। हृस्वो मङ्गाय केषाञ्चित् स्वयं नैव स्वभावतः" इति न स्वभावतस्तत्रूपेण स्फोटोऽवगम्यत इत्यर्थः। ध्वनिविकारे च वायुसंयोगविशेषस्य हेतुत्वं तस्य बहुक्षणस्थायित्वे विलम्बितत्वमल्पकालस्थायित्वे द्रुतत्वमिति विवेकः। एवं बहुविधेषु स्फटेषु वक्ष्यमाणस्फोटस्यैव सिद्धान्ते निश्चलतया तस्यैव बोधकत्वं तदुटकपदादीनान्तु पदमध्यवर्त्तिवर्णवत् निरर्थकत्वं विशिष्टार्थद्योतनायैव तेषां प्रयोगात। तथा च "ब्राह्मणार्थो यथा नास्ति कश्चित् ब्राह्मणकम्बले। देवदत्तादयाकाक्षे तथैव स्फुरिरर्थकाः" इति। "पदे न वर्णा विद्यन्ते वर्णेष्वयवया न च। वाक्यात् पदानामत्यन्तं प्रविवेका न कश्चनेति" च वाक्यपदीये पदादेमत्वाभाव दर्शयति। तथा "वाक्यस्फोटोऽतिनिष्कर्षं तिङन्तेति मतस्थितिरिति" हरिकारिकायां सिद्धान्ते वाक्यस्फोटस्यैव सिद्धिरिति प्रतिपादितम्"। २अवभेदे च (फाड़) राजनि०।

स्फोटक पु० स्फुट-ण्वुल्। (फाड़ा) १अवभेदे हेमच० २विदारके च।

स्फोटन न० स्फुट-ल्युट्। १विदारणे २विकाशने च भरतः

स्फोटनी स्त्री स्फुट्यतेऽनया स्फुट-ल्युट् ङीप्। मधिरवभेदकरणे शस्त्रभेदे (भोसरी) हिरुपका०।

स्फोटबीजक पु० स्फोटस्य अवभेदस्य बीजम् ततः स्वार्थे क भल्लातके राजनि०। तत्फलं चार्शोदर्शनाशात् अर्शोतपांसकीकासहा।

स्फोटायन पु० स्फोट एवायनं अर्थबोधकत्वमस्त्यस्य। अर्थबोधकत्वेन स्फोटाभ्युपगन्तरि वैयाकरणे मुनिभेदे "यङ्ङ् स्फोटायनस्य" पाणिनि। [विका०।

स्फोटिका स्त्री स्फुट-ण्वुल टापि अत इत्वम्। छायपुत्रिकायां

स्फ्या न० स्फय-यत् णिच्। खड्गाकारे यज्ञार्थे कालभेदे ति०त०

स्फ्याग्निष्टेव्याधिकरण न० अधिकरणभेदे ति० त०

"स्फ्याग्निष्टेव्याधिकरणञ्च स्फ्यस्य खड्गाकारकालस्य अग्नाग्नेयनिमित्तकेज्यायामिष्टित्वेन प्रकृतवद्विकृतिरित्यतिदेशेन दर्शोक्तयज्ञलिधर्माणां प्राप्तौ पूर्वदिनप्रातःकालीनं श्वनीयदेवतायाहनमपि प्राप्तं तच्च तदानीं न विधीयते नैमित्तिके निमित्तनिश्चयतोऽधिकारितया प्रकृते स्वाभाविकञ्च क्षेत्रूपनिमित्तत्वं मत्वेन प्रधानानधिकारिणाऽङ्गानधिकाराकदुत्तरदिने च निमित्तनिश्चये तदधिकारसिद्धावपि नाग्नाहनानुष्ठानम् आग्नाहनस्य पूर्वदिनप्रातःकालनैयत्यादितीज्याया आग्नाहनं विनैवानुष्ठानम्"

स्म अव्य० ष्मि-ड। १खतौ २पादपूरणे च अमरः।

स्मय पु० ष्मि-अच्। १गर्वे २अद्भुतरसस्थायिभावे च मेदि०।

स्मर पु० स्मरति प्रियमनेन स्मृ-करणे अप्। १कामदेवे अमरः। भावे अप्। २स्मरणे। [त्रिका०

स्मरकूपक पु० स्मरस्य कूप इव कायति के-क। कामरन्ध्रे

स्मरगृह न० स्मरस्य गृहमिव। १स्त्रीचिह्नभेदे भगे जटा० स्मरमन्दिरादयोऽप्यत्र।

स्मरचक्र पु० "धृत्वा वामकरेणोरुं जघादक्षोरक्षितम्। दृष्ट्वा रमते कामी स्मरचक्रः प्रकीर्तितः" स्मरदीपकोक्त रतिबन्धभेदे।

स्मरण न० स्मृ-ल्युट्। ज्ञातवस्तुनोऽनुभवाधीनसंस्कारजन्ये तदुबोधकमङ्कारेण जायमाने १ज्ञानभेदे स्मृतिशब्दे दृश्यम्। आध्याने हेमच०। २चिन्तने जटा०। ३कर्णालङ्कारभेदे सा० द० अलङ्कारशब्दे ४०७ पृ० दृश्यम्।

स्मरदशा स्त्री स्मरजन्या दशा। कामिनां स्मरजन्यासु अङ्गाशोषादिषु दशसु दशासु।

"अङ्गौत्सुक्यं तापः पाण्डुता जडताऽरुचिः। अदृष्टिः स्मादालम्बनानाभ्यादमूर्च्छनाः। मृतिश्चेति क्रमात्तेषां दश स्मरदशा दृढ। असौख्यं मदापत्तिस्तासु विरहज्वरः। अरुचिर्वस्तुवैराग्यं सर्वसारनिताऽधृतिः। अनालम्बनता चापि शून्यता मनसः स्मृता। तत्रैव तत्प्रकाशा हि बाह्याभ्यन्तरतस्तथा। रवविच्छेदहेतुत्वात् स्मरं नैव त्यजन्ति ते। त्यजन्तेऽपि यदि प्रत्युज्जीवनं स्यादतुरतः" इति सा०द०।

स्मरध्वज न० ह्रस्व०। स्त्रीचिह्ने शब्दर०। २भगे पु०हेमच०

स्मरप्रिया स्त्री ह्रस्व०। स्मरभार्यायां रतौ जटा०।

स्मरलेखनी स्त्री स्मरस्य लेखनीव। स्मरेण कामोद्दीपके शारिकाख्ये शब्दर०। [वाम्रराजनि०।

स्मरवीथिका स्त्री स्मरस्य वीथिकेव प्राप्तिहेतुत्वात्। नेत्रा

स्मरवृद्धि पु० स्मरस्य वृद्धिर्यस्मात्। १कामवृद्धिकृते राजनि० ह्रस्व०। २कामवृद्धौ स्त्री। [शब्दर०।

स्मरस्तम्भ पु० स्मरस्य तद्व्यापारस्य स्तम्भ इव। वपस्ये

स्मरस्वर्य पु० स्मरः स्वर्यो यस्य। मदमे त्रिका०।

स्मरहर पु० स्मरं हरति नाशयति हृ-अच्। १महादेवे अमरः। स्मरमर्दनादयोऽप्यत्र।

स्मराङ्कुश पु० स्मर तत्कार्येऽङ्कुश इव उत्तेजकत्वात्। नखे शब्दर० नखाघातेन हि स्त्रीणां स्मरोद्दीपनं प्रसिद्धम्।

स्मरास्त्र पु० स्मरप्रिय आस्त्रः। राजास्त्रे राजनि०।

स्मरासव पु० स्मरोद्दीपक आसव इव। आचारभे त्रिका० कामिनां तत्पाने हि स्मरोद्दीपनात्तथात्वम्।

स्मार्त्त त्रि० स्मृतौ विहितः, स्मृतिं वेत्त्यधीते वा अण्। १स्मृतिविहिते दानादौ "यत्नोऽपि स्मार्त्तमाचरेत्" इति "स्मार्त्तं वैदिकवत् चरेत्" च स्मृतिः। २स्मृतिशास्त्राभिज्ञे च

स्मि स्मि) अनादरे भ्वा०विरामे अक०चु० आ० सेट्। स्मापयते अस्मिप्पत। अत्र णोपदेश एव। अन्यतो विरामे स्मायतीत्येव। अय भ्वादिरपि अनिट्। अयते अस्मेट अन्यत्र णोपदेशत्वात् अत्मम्। [ते अस्मिस्मिटत् त

स्मिट अनादर भ्वा० अक० चु० सम० सेट्। स्मेटयति।

स्मित न० स्मि-भावे क्त। ईषद्धासे अमरः "मुखे विकसितस्मितम्" मालतीमाधवम्। कर्त्तरि क्त। २विकसिते ईषद्धास्यान्विते च त्रि०।

स्मील निमेषणे भ्वा०पर०अक० सेट्। स्मीलति अस्मीलीत्।

स्मृ स्मरणे भ्वा० प० अनिट्। स्मरति अस्मार्षीत् संस्मारसूस्मूर्षति। अणापदेशत्वात् न अत्वम् एत्यागे कर्माण्यणो। अयमौनादिकः अक० चटा० स्मरयति।

स्मृत त्रि० स्मृ-क्त। १ज्ञातस्मरणे २स्मृतिविषये च।

स्मृति स्त्री स्मृ-क्तिन्। अनुभूतवस्तुन उद्बोधकसङ्कारेण संस्काराधीने १ज्ञानभेदे। स्मर्यते वेदधर्मोऽनेन करणे क्तिन्। २धर्मशास्त्रे वेदार्थानुभवजन्ये वेदार्थानुवादके मनिप्रणीते वाक्यरूपे शास्त्रे। "वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्" मनुः।

ज्ञानभेदस्मृतिरूपत्वमादिकं पात० स्मृ० भा० विस्तरेणोक्तम् तत्र यथा

"अनुभूतविषयासंप्रमोषः स्मृतिः" सू०। "किं पुनरयं स्मर्त्तव्यं स्मरति। आहोस्वित् विषयस्मृतिः। यद्यपरः प्रत्ययो यावत्यक्षणोभवाकारनिर्भासः तावानालोचकः संस्कारमारभते न संस्करः स्वव्यञ्जकाञ्जनं तदाकारमेव यावत्यक्षणोभवात्मिकां स्मृतिमुत्पादयति। तत्र यदक्षणाकारपूर्वा बुद्धिः यावाकारपूर्वा स्मृतिः। सा च द्वयी, भावितस्मर्त्तव्या अभावितस्मर्त्तव्या च तत्रे भावितस्मर्त्तव्या जात्यन्तरमेव स्वभावितस्मर्त्तव्येति। सर्वाः स्मृतयः प्रमाणविपर्ययविकल्पनिद्रास्मृतीनामनुभवात् प्रभवन्ति भा०। "अनुभूतविषयासंप्रमोषः स्मृतिः प्रमाणादिभिरनुभूते विषयेऽसंप्रमोषः कर्त्तव्यः सा स्मृतिः संस्कारमात्रजन्यस्य हि ज्ञानस्य संस्कारकारणानुभावभासितो विषय आत्मीयस्तदधिकविषयपरिप्लवस्तु संप्रमोषः ज्ञेयः कस्मात् यावद्ग्राह्यात्। सुप्तोत्थ इत्यस्मात् संप्रमोषपदव्युत्पत्तेः। एतदुक्तं भवति।

र्थं प्रमाणादर्थोऽधिगतमर्थं सामान्यतः प्रकारतो वाधिगमयति, स्मृतिः पुनर्न पूर्वानुभवमर्थादतिक्रामति तद्विषया तदूनविषया वा न तु तदधिकविषया सोऽयं ज्ञात्वन्तरादिभ्रेदः स्मृतेरिति। विस्मरति विस्मरत्यस्मिन्निति वाह्यप्रकरणत्वात् अनुभवस्य बाह्यवासनाजन्यः संस्कारो बाह्यमेव स्मारयतीति। प्रतिभासयति अनुभवमात्मजनितत्वाद्बाह्यमनुभवमेवेति। विस्मृत्योपचित उभयस्मरणमवधारयति बाह्यप्रकरणतया बाह्योपरक्तः परमार्थतस्तु बाह्यशून्ये एव उभयं तयोराकारं स्वरूपं निर्भासयति प्रकाशयति। स्वव्यञ्जकं कारणमञ्जनमाकारो यस्य स तथोक्तः। सकारणाकार इत्यर्थः। व्यञ्जकस्तद्बोधकं तेनाञ्जनं फलाभिमुखीकरणं यस्येति वेत्यर्थः। ननु यदि कारणविचारेण बुद्धिस्मरणयोः साङ्कर्यं कस्मादिदं भेद इत्यत आह तत्र यदुक्तमिति। यदुक्तमुपादानं न च स्मृतौलक्षणोपादानं सम्भवति तदनेनानधिगतबोधनं बुद्धेरित्युक्तं यदाकारो यदुक्तरूपं पूर्वं प्रधानं यस्याः सा तथोक्ता विकल्पितत्वायम् अभेदेऽपि गुणप्रधानभाव इति बाह्याकारः पूर्वः प्रथमो यस्याः सा तथोक्ता, इदमेव च बाह्याकारस्य बाह्यस्य पूर्वत्वं यदुक्तान्तरविषयीकृतत्वमर्थस्य तदनेन ज्ञात्वन्तरविषयीकृतगोचरा स्मृतिरित्युक्तं भवति सोऽयमसम्मोष इति। ननु चक्षि स्मृतेरपि असम्मोषः दर्शयति हि पित्राद्यैरतीतस्य देशकालान्तरानुभूतस्यानुभूतचरदेशकालान्तरसम्बन्धं स्मृत्वे इत्यत आह सा च द्वयीति भावितः कल्पितः स्मर्त्तव्योयया सा तथोक्ता। अभावितोऽकल्पितः पारमार्थिक इति यावत्। नेयं स्मृतिरपि तु विपर्ययज्ञानलक्षणोपपन्नत्वात् स्मृत्याभासतया तु स्मृतिरुक्ता प्रमाणाभासमिवेति भावः। कस्मात् पुनरन्ये स्मृतेरुपन्यास इत्यत आह। सर्वाः स्मृतय इति अनुभवप्राप्तिपूर्वा इति स्मृतिसारः स्मृतीनामन्ये निवेश इत्यर्थः"।

धर्मशास्त्रशब्दे स्मृतिभेदादिकं १८६१ पृ० दृश्यम्।

स्मृतिहेतु पु० ६त०। १संस्कारे वासनारूपे गुणभेदे जटा०।

स्मेर त्रि० स्मि-रन्। १विकसिते फुल्लेच० २ईषद्धास्यान्विते च संक्षिप्त० "महाजनः स्मेरमुखो भविष्यति कुमारः"।

स्यद पु० स्यन्द-वञ्जर्थे क। वेगे अमरः।

स्यन्द अवणे भ्वा० आ० कुडि, खटि, खडि च सम० अक० अदित् वेट्। स्यन्दते खदित् अस्यदत् अस्यन्दिष्ट अस्यत्। अमोपदेशत्वेऽपि विधिबलात्क्विप्स्यन्दते इत्यादौ पत्वम्।

स्यन्द पु० स्यन्द-भावे घञ्। द्रवद्द्रव्यचरणे प्रस्रवे।

स्यन्दन न० स्यन्द-भावे ल्युट्। १चरणे। "स्यन्दनस्तु गच्छिद्रव्यस्य द्रवद्रव्यस्य च संयोगानुकूलो व्यापारः गमनत्वव्याप्यजातिभेदो वा "भ्रमणं रेचनं स्यन्दनोर्द्ध्वज्वलनमेव च। तिर्य्यग्गमनमप्यत्र गमनादेव लभ्यते" भाषा०। कर्त्तरि ल्यु। २जले न०। ३रथे मेदि०। ४तिनिशवृक्षे च पु० अमरः।

स्यन्दनद्रुम पु० कर्म०। तिनिशवृक्षे शब्दर०।

स्यन्दनारोह पु०स्यन्दनमारोढुमिति युद्धार्थम् आ+रुह घञ्। रथारोहेच योद्धरि अमरः। [आत्मायां स्त्री अमरः।

स्यन्दनि पु० स्यन्द-अनि। तिनिशवृक्षे रत्नमा० ङीप्।

स्यन्दिन् त्रि० स्यन्द+णिनि। १प्रस्रविणि। २आत्मायां स्त्री अमरः ङीप्।

स्यव त्रि० स्यन्द-क्त। स्रुते जलादौ अमरः।

स्यवीष त्रि० स्यवा वीणा यस्य। स्रुते ज्ञेयच०।

स्यम ध्वनने भ्वा० पर० अक० सेट् क्वा वेट् फलादि०। स्यमति अस्यमीत् स्यमितुं स्यमितः।

स्यम वितर्के चु०उ०सक० सेट्। स्यामयति ते अस्यिस्यमत् त।

स्यम ध्याने अद० चु० उभ० सक० सेट्। स्यमयति अस्यिस्यमत् त।

स्यमन्तक पु०स्यम-झच् संज्ञायां कन्। १श्रीकृष्णस्य कण्ठस्थे मणिभेदे ज्ञेयच०। २तन्मणिभेदे पु० मेदि०। ३सूर्य्यदत्ते सत्राजितो मणिभेदे तत्कथा भाग० १० ५६ अ०। "यावीत् सत्राजितः सूर्य्योभक्तस्य परमः सखा। प्रीतस्तस्मै मणिं प्रादात् स च तुष्टः स्यमन्तकम्" इति। "दिने दिने स्वर्णभारानष्टौ स सृजति प्रभो!। दुर्भिक्षमार्य्यरिष्टानि सर्पाधिव्याधयोऽशुभाः। न सन्ति यावित्तस्तत्र यत्रासेऽभ्यर्चितो मणिः" एतदुपाख्यानं स्यमन्तकोपाख्यानं तच्च गौरभाद्रचतुर्थीचन्द्रदर्शने श्राव्यम्" तिथितत्त्वरघु०।

स्यमीका स्त्री स्यम-ईकक्। १वल्मीके २काले ३मेघे च पु० ४नीलोपधौ स्त्री मेदि०।

स्यूत त्रि० सिव-कर्मणि क्त। १सूच्यादिना यथिते वस्त्रादौ अमरः। सूत्रचितपात्रे (धोकड़ी) पु० अमरः। ग्रहो० ओत्। स्रोतोऽत्र भरतः।

स्यूति स्त्री सिव-भावे क्तिन्। सूच्यादिना वस्त्रादिसीवने।

स्यून पु० सिव-नक्। १सूत्रे २किरणे मेदि० ३सूच्यादिसूत्रसण्डवस्त्रनिर्मिते पदार्थे (टुकड़ी) च शब्दर०।

स्यूम न० सिव-मक्। १जले २किरणे संक्षिप्त०किरणे पु०उषा०

स्तोन पु० स्तून+पृषो०। १धौतवटे (धुकड़ी) अमरटी०भरतः २स्तर्वे ३करभे मेदि०। ४क्षुद्रे निघण्टुः। ५क्षुद्रकरे त्रि० "स्तोना पृथिवी नोभवान्वरा" यजु० ३५।२१।

स्तंसन न० स्तन्स-घिञ्-ल्युट्। अर्द्धगतसाधोनवने वस्त्रे वुच्। स्तंसनाथस्त्री। [२पीवुदरे पु०अमरः।

स्तंसिन् त्रि० स्तन्स-घिनि। १अधःपतनशीले स्त्रियां ङीप्

संसिफल पु० स्तंसि फलमस्य। शिरीषवृक्षे शब्दमा०।

स्तक गतौ भ्वा० आत्म० सक० सेट् उदित्। स्तकते अस्तकिष्ट

स्तग्वत् त्रि० स्तक् मालामस्त्यस्य मतुप् मस्य वः। मालावति। विनि। स्तग्वीत्यत्र। उभयत्र स्त्रियां ङीप्।

स्तज् स्त्री स्तज्यते स्तज-क्विप् नि०. माल्ये अमरः।

स्तज्वा स्त्री स्तज-वा नेत्वम् नि०। १प्रजापतौ २तन्तुसंघाते २रज्वाञ्च संघिप्रसारः।

स्तन्स पतने भ्वा० आत्म० लुङि उ० अक० सेट् उदित् ङा वेट्। स्तंसते अस्तंसिष्ट। "नास्तंसत करिष्यां यैवम्" रघुः। [सते अस्तंसिष्ट।

स्तन्स प्रसादे भ्वा० आ० अक० सेट् उदित् ङा वेट्। स्तंस्तन्भ विस्रामे भ्वा० आत्म० स्तदित् लुङि उ०सक०सेट् उदित् ङा वेट्। स्तम्भते अस्तम्भत अस्तम्भिष्ट।

स्तव(स्ता)व पु० स्तु-अप् वच् वा। १चरभे अमरः। कर्त्तरि अच्। २निर्झरे हेमच०। [भावे ल्युट्। ३चरभे।

स्तवन न० स्तु-ल्यु। १मूलजले राजनि० २धर्मे च शब्दर०

स्तवन्ध्या स्त्री स्तवन् गर्भो यस्याः। १दैववशात् पतितगर्भायां गवि अमरः। २तथाभूतस्त्रियाञ्च।

स्तवद्रङ्ग पु० स्तवन् रङ्गो यत्र। पक्षयन्त्रो (छड़े) रारा०।

स्तवन्ती स्त्री स्तु-झिच् ङीप्। १नद्याम् अमरः। २ओषधिभेदे ३गुल्मस्थाने च मेदि०। शब्द। स्तवविशिष्टे त्रि०। स्त्रियां ङीप्।

स्तवा स्त्री स्तु-अच्। १मूर्वायाम् राजनि० २चरभयुते त्रि०

स्तष्ट पु० स्तक्ष-टच् निपात्यते। १जगत्कर्त्तरि चतुर्मुखे अमरः ३शिवे हेमा०। ४सर्जनकर्त्तरि त्रि० स्त्रियां ङीप्।

स्तस्त त्रि० स्तन्स-क्त। च्युते पतिते अमरः।

स्तस्तर पु० स्तन्स-तरच् किच्च। आसने शु०त० रघु०।

स्ताक् अव्य० स्तु-डाक्। त्वरिते ङानिपात्यते अमरः।

स्तावक न० स्तावयति स्तु-णिच्-एवुल्। १स्तरिके शब्दच० २निःस्तावके त्रि०। [चस्मिन्नीत्।

स्तिभ क्षिपे भ्वा० प० सक० सेट् उदित् ङा वेट्। स्तिभति स्तिभ क्षिपे भ्वा०प०सक०सेट् उदित् ङा वेट्। स्तेभति अस्तेभीत्।

स्तिव शोके अक० दिवा०प० गतौ सक० सेट् उदित् ङा वेट्। स्तीव्यते अस्तेवीत्। [स्तुवत्।

सु गतौ सक० स्वरणे अक० भ्वा० प० अनिट्। सुवति असुषाव।

सुग्दारु पुंक्ली वृक्षभेदाय दारु यस्य। विकङ्कतवृक्षे शटा०।

सुघ्न पं०देशभेदे। स उत्पत्तिस्थानत्वेनास्त्यस्याः अच् गौरा० ङीष्। २सर्जिकाक्षारे स्त्री हेमच०।

सुच्चा स्त्री सु-किप् चिट् च वा टाप्। यज्ञपात्रभेदे शतपथब्राह्मणे वृक्षनाम्नि वृक्षभेदे शब्दच०। [स्त्री शब्दच०

सुत त्रि० सु-क्त। १स्नाते जलादौ २गते च। ३विष्णुपत्न्याञ्च

सुष पुंक्ली० सु-क। १खदिरकाष्ठमये कुशमिते यज्ञपात्रभेदे यज्ञपात्रशब्दे दृश्यम्। २अङ्कुशाम् ३मूर्वायाञ्च स्त्री मेदि०

सुवाहस्त पु० सुवायाः साधनं हस्तः। विकङ्कतवृक्षे (कँदचि) अमरः।

सू स्त्री सु-किप् नि०। १यज्ञपात्रभेदे २निर्झरे च हेमच०।

सै शब्दे भ्वा० पर० अक० अनिट्। स्तायति अस्तासीत्।

स्तोत न० सु-तन्। स्तोतन्ति क्षरेण स्रवोजलनिःसरणे भरतः

स्तोतस् न० सु-तसि। १क्षरेण स्रवो जलनिःसरणे अमरः। २रेतसि च अर्द्धस्तोताः। ३देहस्थछिद्रे च।

स्तोतरीय पु० ६त०। यज्ञे हेमच०।

स्तोतस्वत् त्रि० स्तोतोऽस्त्यस्य मतुप् मस्य वः। १स्तोतोयुक्ते २नद्यां स्त्री अमरः ङीप्। [२स्तोतोयुक्ते त्रि०।

स्तोतस्विनी स्तोतस्+अस्त्यर्थे विनि ङीप्। १नद्याम्

स्तोतोऽञ्जन न० स्तोतसि यत्नात्स्तोतो जलसंचलत्सौवीरदेशे भवम् अञ्जनम्। सौवीरदेशजेऽञ्जने अमरः। "वल्मीकशिखराकारं स्निग्धं नीलाञ्जनप्रभम्। दृष्टे च गैरिकाकीर्णं श्रेष्ठं स्तोतोऽञ्जनञ्च तत्" राजनि०। "स्तोतोऽञ्जनं तत्र श्रेष्ठं स्निग्धं स्निग्धसमप्रभम्। दृष्टेः कण्डूमलहरं दाहक्लेदरुजापहम्। अक्ष्णो व्रणवतश्चैव सहते मारुतातपौ। नेत्ररोगा न जायन्ते तस्मादञ्जनमाचरेत्"। "अञ्जनं यामुनञ्चापि कापोताञ्जनमित्यपि। तत्र स्तोतोऽञ्जनं कृष्णं सौवीरं श्वेतमौरितम्। स्तोतोऽञ्जनसमं श्रेयं सौवीरं तत्तु पाण्डुरम्। स्तोतोऽञ्जनं भवेत् स्वादु चक्षुष्यं कफपित्तहृत्। कषायं लेखनं स्निग्धं व्याधिविषापहम्। विधानयासकृत्-गीतं सेवनीयं सदा बुधैः। स्तोतोऽञ्जनसमाः सर्वे सौवीरेऽपि मता बुधैः। किन्तु द्वयोरञ्जनयोः श्रेष्ठं स्तोतोऽञ्जनं स्मृतम्" भावप्र०। [जटा०

स्तोतोवहा स्त्री स्तोतसा वहति सरति वह-अच्। नद्याम्

स्व न० स्वन–ड। १धने अमरः। २आत्मनि ३ज्ञातौ च पु० अमरः। ४आत्मीये त्रि०। आत्मनि आत्मीये चार्थेऽस्य सर्वनामता।

स्वकम्मन पु० स्वेनैव पराप्रयुज्यमान एव कम्मते कमि–युच्। वायौ शब्दर०। [सदा" गीता

स्वकर्म्मन् न० स्वस्य कर्म। स्वधर्मोचिते क्रमे "स्वकर्मनिरतः

स्वकीय त्रि० स्वस्येदम् छ कुक् च। आत्मीये। अत्र नित्यमेव कुक्, अकुक्युक्तप्रयोगस्तु अपाणिनीयः।

स्वग सर्पणे भ्वा० प० सक०सेट् इदित्। स्वगति अस्वगीत्।

स्वगत त्रि० स्वस्मिन् मनसि आत्मनि वा गतम् गम–क्त। १मनोगते २आत्मगते च। नाटकाभिनये प्रतिपाद्यपुरुषाश्राव्ये रङ्गभूमिस्थसामाजिकजनश्रवणयोग्ये वाक्ये न०। "अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतम्" सा०द०।

स्वगुप्ता स्त्री स्वेनैव गुप्ता। १भूकदम्बवृक्षाम् शब्दर०। २छन्दोभेदे तस्या राजनि०।

स्वगृह पुंस्त्री० स्वस्तं सृष्टं यस्य। १कलिकारवृक्षे जटा० ङीप्। २निजमन्दिरे ३निजरायौ च क्ली०।

स्वच्छ त्रि० सुष्ठु अच्छः मा०। १अतिनिर्मले २शुद्धायां ३स्फटिके च पु० राजनि०। ४श्वेतदूर्व्वायाम् स्त्री राजनि०। ५विमलोपरसे न० ६रोगविमुक्ते त्रि० शब्दर०। ७शुक्ले च। [अमरः।

स्वच्छन्द त्रि० स्वस्य छन्दोऽभिप्रायः अस्ति यस्य। स्वाधीने

स्वच्छपत्त्र न० स्वच्छं पत्त्रं यस्य। अम्बष्ठे शेमुष्यां०।

स्वच्छमणि पु० कर्म०। स्फाटिके मणौ राजनि०।

स्वच्छवालुक न०स्वच्छा वालुकेव यत्र। विमलोपरसे राजनि०

स्वज न० स्वस्मात् देहात् आत्मनो वा जायते। १रुधिरे मेदि० २पत्ये पु० ४कन्यायां स्त्री मेदि०। ५आत्मजाते त्रि०।

स्वजन पु०स्वस्येव जनो जननमेककुले यस्य। १ज्ञातौ अमरः। ङीप्। २आत्मसम्बन्धिलोके। [यति–ते अधिस्वठ्–त।

स्वठ गतौ संस्कारेऽपसंस्कारे च चु० उ० सक० सेट्। स्वठयति

स्वतन्त्र त्रि० स्वस्य तन्त्रं वशीकारः मूलत्वे यस्य। १स्वाधीने अपराधीने अमरः। तत्त्वञ्च इतरव्यापारानधीनव्यापारवत्त्वम्। २कर्त्तरि च सहि समभिव्याहृतक्रियाकारकानन्यापारव्यापारवान् इति भाट्टिकाः "स्वतन्त्रः कर्त्ता" पा० कर्त्तृशब्दे १७१६ पृ० दृश्यम्।

स्वतस् अव्य० स्व+तसिल्। आत्मतः स्वत्वे।

स्वता स्त्री स्वस्य स्वकीयस्य भावः तल्। स्वकीयत्वे "कामः स्वतां गच्छति" शकुनला।

स्वतोग्राह्य न० स्वयाहकस्वसमवायीयाहो ज्ञानग्रामाण्ये वेदान्तादिमतम् "ग्रामाण्यं न स्वतोग्राह्यं संशयानुपपत्तितः" भाषा० शब्देन तत् स्वतोग्राह्यमिति न्यायमतम्।

स्वत्व न० स्वस्य भावः त्व। द्रव्यार्थं यत्नेऽक्रयविक्रयादिक्रियासु विनियोजके १धर्म्मभेदे २स्वामित्वे च, तच्च सम्बन्धभेदेन द्रव्यगतमात्मगतञ्च। स्वत्वपदार्थस्तु दायभा०टीकायां श्रीकृष्णतर्कालङ्कारेण निरूपितो यथा

"स्वत्वञ्च यत्नेऽविनियोगहेत्वेन शास्त्रबोधितत्वमिति प्राचः। अतिरिक्तः पदार्थ इति शिरोमणिः। स्वामित्वञ्च तन्निरूपकत्वं निरूपकतया तदेव वा तच्च द्रव्यगतं गुणगतञ्च द्रव्यस्य दानादिश्रुतेः नीलं वा द्रवत्वजन्यादित्वादौ नीलत्वादिगुणविशिष्टपारिभाषिकनीलद्रव्योत्पत्तेश्च। वस्तुतस्तु आत्मसमवेतं स्वामित्वमतिरिक्तः पदार्थः विक्रयदानादीनां तदायकत्वे तद्धेतुत्वे च सम्बन्धबाधात् तदेव निरूपकतया स्वत्वव्यवहारहेतुः विषयतया ज्ञाततायाञ्च राजनि०।

स्वगृह पुंस्त्री० स्वस्तं सृष्टं यस्य। १कलिकारवृक्षे जटा० ङीप्। २निजमन्दिरे ३निजरायौ च क्ली०।

स्वच्छ त्रि० सुष्ठु अच्छः मा०। १अतिनिर्मले २शुद्धायां ३स्फटिके च पु० राजनि०। ४श्वेतदूर्व्वायाम् स्त्री राजनि०। ५विमलोपरसे न० ६रोगविमुक्ते त्रि० शब्दर०। ७शुक्ले च। [अमरः।

स्वच्छन्द त्रि० स्वस्य छन्दोऽभिप्रायः अस्ति यस्य। स्वाधीने

स्वच्छपत्त्र न० स्वच्छं पत्त्रं यस्य। अम्बष्ठे शेमुष्यां०।

स्वच्छमणि पु० कर्म०। स्फाटिके मणौ राजनि०।

स्वच्छवालुक न०स्वच्छा वालुकेव यत्र। विमलोपरसे राजनि०

स्वज न० स्वस्मात् देहात् आत्मनो वा जायते। १रुधिरे मेदि० २पत्ये पु० ४कन्यायां स्त्री मेदि०। ५आत्मजाते त्रि०।

स्वजन पु०स्वस्येव जनो जननमेककुले यस्य। १ज्ञातौ अमरः। ङीप्। २आत्मसम्बन्धिलोके। [यति–ते अधिस्वठ्–त।

स्वठ गतौ संस्कारेऽपसंस्कारे च चु० उ० सक० सेट्। स्वठयति

स्वतन्त्र त्रि० स्वस्य तन्त्रं वशीकारः मूलत्वे यस्य। १स्वाधीने अपराधीने अमरः। तत्त्वञ्च इतरव्यापारानधीनव्यापारवत्त्वम्। २कर्त्तरि च सहि समभिव्याहृतक्रियाकारकानन्यापारव्यापारवान् इति भाट्टिकाः "स्वतन्त्रः कर्त्ता" पा० कर्त्तृशब्दे १७१६ पृ० दृश्यम्।

स्वतस् अव्य० स्व+तसिल्। आत्मतः स्वत्वे।

स्वता स्त्री स्वस्य स्वकीयस्य भावः तल्। स्वकीयत्वे "कामः स्वतां गच्छति" शकुनला।

स्वतोग्राह्य न० स्वयाहकस्वसमवायीयाहो ज्ञानग्रामाण्ये वेदान्तादिमतम् "ग्रामाण्यं न स्वतोग्राह्यं संशयानुपपत्तितः" भाषा० शब्देन तत् स्वतोग्राह्यमिति न्यायमतम्।

स्वत्व न० स्वस्य भावः त्व। द्रव्यार्थं यत्नेऽक्रयविक्रयादिक्रियासु विनियोजके १धर्म्मभेदे २स्वामित्वे च, तच्च सम्बन्धभेदेन द्रव्यगतमात्मगतञ्च। स्वत्वपदार्थस्तु दायभा०टीकायां श्रीकृष्णतर्कालङ्कारेण निरूपितो यथा

"स्वत्वञ्च यत्नेऽविनियोगहेत्वेन शास्त्रबोधितत्वमिति प्राचः। अतिरिक्तः पदार्थ इति शिरोमणिः। स्वामित्वञ्च तन्निरूपकत्वं निरूपकतया तदेव वा तच्च द्रव्यगतं गुणगतञ्च द्रव्यस्य दानादिश्रुतेः नीलं वा द्रवत्वजन्यादित्वादौ नीलत्वादिगुणविशिष्टपारिभाषिकनीलद्रव्योत्पत्तेश्च। वस्तुतस्तु आत्मसमवेतं स्वामित्वमतिरिक्तः पदार्थः विक्रयदानादीनां तदायकत्वे तद्धेतुत्वे च सम्बन्धबाधात् तदेव निरूपकतया स्वत्वव्यवहारहेतुः विषयतया ज्ञाततायाञ्च राजनि०।

तच्च स्वत्वं लौकिकमिति मिता० व्यवस्थापितं यथा "स्वत्वमेव तावन्निरूप्यते किं शास्त्रैकसमधिगम्यं स्वत्वमुत प्रमाणान्तरसमधिगम्यमिति। तत्र शास्त्रैकसमधिगम्यमिति तावदुक्तं गौतमवचनात्। "स्वामी सचक्षुरयं विभागपरिपाट्यधिगमेषु ब्राह्मणस्याधिकं द्रव्यं स्वत्वञ्च विद्यते निर्विष्टं वैद्यशूद्रयोरिति" प्रमाणान्तरगम्ये स्वत्वे नेदं वचनम्। तथा स्नानातिदेशे मनुः "शोऽदत्तादायिनो हस्ताद्विप्रेत ब्राह्मणो धनम्। याजनाध्यापनेनापि यथा तेनास्तथैव सः" इदत्तादायिनः सकाशात् याजनादिकरणेन द्रव्यमर्जयतां दण्डविधानमनुपपन्नं स्यात् स्वत्वस्य लौकिकत्वे। अपि च। लौकिकं चेत् स्वत्वं मम स्वमपहृतमनेनेति न ब्रूयात् अपहर्त्तैव स्वत्वादयान्यस्य स्वमेनापहृतमिति नापहर्त्तव्यम्। एवं तर्हि सुवर्णरजतादिस्वरूपवदयं वा स्वमस्यस्य वा स्वमिति संशयो न स्यात् तस्माच्छास्त्रैकसमधिगम्यं स्वत्वमिति। उच्यते। लौकिकमेव स्वत्वं लौकिकार्थक्रियासाधनत्वात् ब्रीह्यादिवत्। आहवनीयादीनां हि शास्त्रगम्यानां न लौकिकक्रियासाध-

त्वमस्ति। नन्वाहवनीयादीनामपि पाकादिसाधनत्व मस्त्येव। नैतत्। न हि तत्राहवनीयादिरूपेण पाकादिसाधनत्वं किं तर्हि प्रत्यक्षादिपरिदृश्यमानान्यादिरूपेण। इह तु स्वर्णादिरूपेण न क्रयादि साधनत्वमपि तु स्वत्वेनैव। न हि यस्य यत्स्वं न भवति तत्तस्य क्रयादावङ्गक्रियां साधयति। अपि च प्रत्यक्षवादिनामयमदृष्टशास्त्रव्यवहाराणां स्वत्वव्यवहारो दृश्यते क्रयविक्रयादिदर्शनात्। किञ्च। नियतोपायकं स्वत्वं लोकसिद्धमेवेति न्यायविदो मन्यन्ते। तथा हि लिपिसाक्षके तृतीयवर्णके द्रव्यार्जननियमानां क्रत्वर्थत्वे स्वत्वमेव न स्यात् स्वत्वस्यौकिकत्वादिति पूर्वपक्षसम्भवमाशङ्क्य द्रव्यार्जनस्य प्रतिग्रहादिना स्वत्वसाधनत्वं लोकसिद्धमिति पूर्वपक्षः समर्थितो गुरुणा। ननु द्रव्यार्जनस्य क्रत्वर्थत्वे स्वमेव न भवतीति याग एव न संभवेत्। प्रकल्पितमिदङ्केनापि कर्मणं स्वं नापादयतीति विप्रतिषिद्धमिति वदता। तथा सिद्धान्तेऽपि स्वत्वस्यौकिकत्वमङ्गीकृत्यैव विचारप्रयोजनमुक्तम्। अतो नियमातिक्रमः पुरुषस्य न कृतोरिति। अस्य चार्थं एवं विदुषः। यदा द्रव्यार्जननियमानां क्रत्वर्थत्वं तदा नियमार्जितेनैव द्रव्येण क्रतुसिद्धिः। नियमातिक्रमार्जितेन द्रव्येण न क्रतुसिद्धिरिति न पुरुषस्य नियमातिक्रमदोषः पूर्वपक्षे। सिद्धान्ते तु यजनियमस्य पुरुषार्थत्वाच्चदतिक्रमेणार्जितेनापि द्रव्येण क्रतुसिद्धिर्भवति। पुरुषस्यैव नियमातिक्रमाद्दोष इति नियमातिक्रमार्जितस्यापि स्वत्वमङ्गीकृतम् अन्यथा क्रतुसिद्ध्यभावात् न चैतावता चोर्यादिनाप्यस्य स्वं स्यादिति मन्तव्यम् लोके तत्र स्वत्वसिद्ध्यभावाद् व्यवहारविसंवादाच्च। एवं प्रतिग्रहाद्युपायके स्वत्वे लौकिके स्थिते ब्राह्मणस्य प्रतिग्रहादय उपायाः। क्षत्रियस्य विजितादय उपाया वैश्यस्य क्रयादयः शूद्रस्य शुश्रूषादय इत्यदृष्टार्था नियमाः। अक्रय्यद्रव्यं तु सर्वसाधारणाः "स्वामी अक्रय्यक्रयसंविभागपरिग्रहाधिगमेष्वित्यक्तः। अत्यक्तप्रतिबन्धो दायो रिक्थम्। क्रयः प्रसिद्धः संविभागः स प्रतिबन्धो दायः। परिग्रहोऽनन्यपूर्वस्य जलस्थलकाष्ठादेः स्वीकारः। अधिगमो निधादेः प्राप्तः। एतेषु निमित्तेषु सत्सु स्वामी भवति। क्षीणेषु क्षीयते स्वामी। ब्राह्मणस्याधिकं कर्त्तमिति ब्राह्मणस्य प्रतिग्रहादिनाऽर्जनं तदधिकमसाधारणम्। क्षत्रियस्य विजितमित्यत्राधिकमित्यनुवर्तते क्षत्रियस्य विजयदण्डादिरूपमसाधारणम्। निर्दिष्टं वैश्यशूद्रयोरिति। अत्राप्यधिकमित्यनुवर्तते वैश्यस्य कृषिगोरक्षादिरूपं निर्दिष्टं तदसाधारणं शूद्रस्य द्विजशुश्रूषादिना धृतिरूपेण यदुक्तं तदसाधारणमेवमनुलोमजानां प्रतिलोमजानां तु लोकप्रसिद्धेषु स्वत्वहेतुषु यदुदसाधारणमुक्तम् "स्वतामसाधारण्यम्" इत्यादि तत्तत् सर्वं निर्दिष्टशब्देनोच्यते सर्वस्यापि धृतिरूपत्वात् "निर्वेशो धृतिभोगयोरिति" विकल्पोक्तेश्च। तत्तदसाधारणं वेदितव्यम्। यदपि पत्नीदुहितरश्चेत्यादिकारणम्। तत्रापि स्वामिसम्बन्धितया बहुत्वं दायविभागितया प्राप्तेषु लोकप्रसिद्धेऽपि स्वत्वे व्यामोहनिवृत्त्यर्थं स्मरणमिति सर्वमनवद्यम्"।

तच्च स्वत्वं जन्मनैवेति मिताक्षरादयः। पित्रादिस्मरणादिनैवेति दायभागादयः। तत्रापि यस्मिन्द्रव्ये स्वत्वमिति मिताक्षरादयः। प्रेतभेदे इति दायभागादयः। तत्तद्ग्रन्थे विस्तरो द्रष्टव्यः। [इष्ट, यदनम्, २सप्तमस्थे ऐमचन्द्रे।

स्वदन न॰ स्वद-भावे ल्युट्। १आस्वादे २खेदने च राजनि॰।

स्वधर्म्म पु॰ स्वस्य वेदादिविहितो धर्मः। स्वानुरूपे वेदादुक्ते आचारादिधर्मे। "यो यस्य विहितो धर्मः स तस्यातिप्रकीर्त्तितः। तस्मात् स्वधर्मं कुर्याच्च द्विजो नित्यमनापदि" नरसिंहपु॰। "श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्। स्वधर्मे निधनं श्रेयः परधर्मो भयावहः" गीता।

स्वधा अव्य॰ स्वद-घा पृषो॰ दस्य धः। १पितृदेवोद्देशेन हविस्त्यागे अमरः। स्वेन धर्मेण धीयते धे-क आप्। २आहुतामेदे स्त्री "नमःस्वधायै स्वाहायै" इति पितृगाथा। "निपातसमुदायोऽयं चतुर्थी पितृभ्यःस्वधेत्यादौ पितृद्देश्यकत्वात्म इति बोधः। तदर्थत्वं विषयतया यत्र दानत्वं तत्र निपातत्वेन तदर्थत्वं भेदान्वयस्य व्युत्पत्तिसिद्धत्वात्। इदमत्र पित्रे स्वधेत्यादौ पितृद्देशकत्वागविषय इदमत्रमित्यादि बोधः। मानसेदत्तस्वधा च दक्षकन्या ब्रह्मणो मानसी कन्या च पितृपत्नी। तन्नामोच्चारणे पित्रादिश्राद्धकरणकर्त्तृणामक्षयो ब्रह्मणा दत्तः। "ब्रह्मा च मानसीं कन्यां ससृजे तां मनोहराम्" "स्वधाभिधानां तनयां लक्ष्मीलक्षणसंयुताम्" "पितृभ्यस्तां ददौ ब्रह्मा तदेभ्यस्तद्दिदंपयोम्। ब्राह्मणानासदत्तेयं चकार लोकनायकः। स्वधान्तं मन्त्रमुच्चार्य पितृभ्यो देहि चेति च। क्रमेण तेन विप्राय पित्रे दानं ददुः पुरा" ब्रह्मवै॰ प्र॰

स्वधानामकस्वधाशब्दस्यापि पितृदाने विनियोग इति बोध्यम् ।

स्वधाप्रिय पु० स्वधाभिनां प्रियः शाक० । १कव्यतिले शब्दर० २स्वधोपलक्षितश्राद्धादिप्रिये पित्रादौ च । स्वधा प्रिया यस्य । ३पितृलोके स्वधाशब्दे मूलं दृश्यम् । [गन्धे २देवे च

स्वधाभुज् स्वधेत्यनेन यत्किञ्चिद्व्यं भुङ्क्ते भुज-क्विप् । १पितृ-

स्वधि(ती)ति स्त्री स्वेन धीयते धा-क्तिच् वा ङीप् । कुठारे परश्वधे अमरः भूमो० । स्वधितिरप्यत्र ।

स्वन शब्दे भ्वा० पर० अक० सेट् । स्वनति अस्वनीत् अस्वा-नीत् । कर्त्रा०-स्वनितुः अस्वनतुः । अयं भूवधे वा घटा० (स्वा)स्वनयति । [स्वनत्-त ।

स्वन ध्वाने चद० चु० उभ० अक० सेट् । स्वनयति-ते अस-

स्वन पु० स्वन+अप् । शब्दे अमरः ।

स्वनि पु० स्वन+इन् । शब्दे हेमच० ।

स्वनित त्रि० स्वन-कर्त्तरि-क्त । १शब्दिते अमरः । भावे क्त । २शब्दे ३मेघगर्जिते च न० हेमच० ।

स्वनिताह्वय पु० स्वनितमाह्वयते आ+ह्वे अ । तण्डुलीय-शाके राजनि० । [स्त्रियां ङीष् ।

स्वनोत्साह पुंस्त्री० स्वने उत्साहो यस्य । गण्डके शब्दर०

स्वपन न० स्वप-ल्युट् । १शयने २निद्रायाञ्च शब्दर० ।

स्वपिण्डा स्त्री स्वेनैव पिण्डः पिण्डाकारोऽस्यस्याः अच् । पिण्डखर्জ্জूर्याम् राजनि० ।

स्वप्न पु० स्वप-भावे नङ् । १निद्रायाम् अमरः २शयने ३मान-सिकज्ञानभेदे ४दर्शने च मेदि० आर्षे न० । स्वप्नदर्शनपटा-र्थस्य मायामात्रत्वं शा० सू० भाष्ययोर्व्यवस्थापितं यथा "सन्ध्ये सृष्टिराह हि" सू० ।

"अतिक्रान्ते पादे पञ्चात्मिविद्यासुदाहृत्य जीवस्य संसा रगतिप्रभेदः प्रपञ्चितः, इदानीं तस्यैवावस्थाभेदः प्रप-ञ्चयते । इदमामनन्ति "स यत्र प्रस्वपिति" इत्युपक्रम्य "न तत्र रथा न रथयोगा न पन्थानो भवन्ति अथ रथान् रथयोगान् पथः सृजते" इत्यादि । तत्र संशयः किं प्रबोध इव स्वप्नेऽपि पारमार्थिकी सृष्टिराहोस्विन्मायामयीति । तत्र तावत् प्रतिपद्यते । सन्ध्ये सृष्टिरिति । सन्धयमिति स्वप्नस्थानमाचष्टे वेदे प्रयोगदर्शनात् "सन्ध्यं ललीयं स्वप्नस्थानम्" इति । इयोर्लोकस्थानयोः प्रबोध स्वप्नस्थानयोर्वा सन्धो भवतीति सन्ध्यं तस्मिन् सन्ध्ये स्थाने तथारूपैव सृष्टिर्भवितुमर्हति । कुतः, यतः प्रमाणभूता श्रुतिरेवमाह "अथ रथान् रथयोगान् पथः सृजते" इत्यादि । न हि कर्त्तेति चोपसंहारादेव-मेवावगम्यते भा० । "निर्मातारं चैके पुत्रादयश्च" सू० "अपि चैके माध्यन्दिनोऽस्मिन्नेव सन्ध्ये स्थाने कामानां निर्मा-तारमात्मानमामनन्ति "य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः" इति । पुत्रादयश्च तत्र कामा अभिप्रेयन्ते काम्यन्त इति । ननु काम-शब्देनेच्छाविशेषा एवोच्येरन्, न, "शतायुषः पुत्र-पौत्रान् वृणीष्व" इति प्रकृत्य "स्वप्ने कामानान्त्वा कामभाजं करोमि" इति प्रकृतेषु तत्र पुत्रादिषु काम-शब्दस्य प्रयुक्तत्वात् । प्राप्तं चैनं निर्मातारं प्रकरण-वाक्यशेषाभ्यां प्रतीमः । प्राप्तस्य खल्वपि प्रकरणम् "अ-न्यत्र धर्मादन्यत्राधर्मात्" इत्यादि । तस्मिंश्च एव च वाक्यशेषोऽपि-"तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते । तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन" । इति प्राप्तकर्तृका च सृष्टिस्तथारूपा समधिगता यथा जाग-रितावस्था तथा स्वप्नावस्थापि सृष्टिर्भवितुमर्हति । तथा च श्रुतिः "अथो खल्वाहुर्जागरितदेश एवास्यैष इति यानि ह्येव जागत् पश्यति तानि सुप्तः" इति स्वप्नजागरितयोः समानन्यायतां श्रावयति । तस्मात् तथारूपैव सन्ध्ये सृष्टिरित्येवं प्राप्ते प्रत्याह । "मायामात्रन्तु कात्स्न्र्ये-नानभिव्यक्तस्वरूपत्वात्" सू० । "तुशब्दः पक्षं व्यावर्त्तयति । नैतदस्ति यदुक्तं सन्ध्ये सृष्टिः पारमार्थिकीति । मायामय्येव सन्ध्ये सृष्टिर्न परमार्थतोऽस्ति । कुतः कात्स्न्र्ये नानभिव्यक्तस्वरूपत्वात् । न हि कात्स्न्र्ये न परमार्थवस्तुधर्मैरभिव्यक्तस्वरूपः स्वप्नः । किं पुनरत्र कात्स्न्र्यमभिप्रेतं, देशकालनिमित्तसम्बन्धिरहितत्वञ्च । न हि परमार्थवस्तुविषयापि देशकालनिमित्तानि अबाधेन स्वप्ने रथादीनासुचितो देशः सम्भवति, न तावत् संहते देहदेशे रथादयोऽवकाशं लभेरन् । स्यादेतत्, बहि-र्देशात् स्वप्नं द्रक्ष्यति देशान्तरितद्रव्यदर्शनात् । दर्श-यति च श्रुतिः बहिर्देशात् स्वप्नं "बहिःकुलायाद-मृतश्चरित्वा स ईयते यत्र कामम्" इति । स्थितिगतिप्रत्ययभेदश्च नाभिरुद्धानो जनो बाह्यमर्थमनुधावतीति । नेत्युच्यते, न हि स्वप्नस्थ जनोः चक्षु-र्मात्रेण योजनशतान्तरितं देशं पश्येत् विपश्येत्तु ततः सामर्थ्यं सम्भाव्यते । क्वचिच्च प्रत्यागमनवर्जितं स्वप्नं श्रावयति "कृत्स्नञ्च ह्यस्यां शयानो निद्रयाभिभूतः स्वप्ने पश्यान्नभिरतवाहिनं प्रतिबुद्धश्च" इति । देहा-

चेदमेवात् पश्चादेवैव प्रतिबुध्यते तावतावभिगत इति कश्चैव तु प्रतिबुध्यते। येन चायं देहेन देशान्तरमनुभवानो मन्यते तमस्थो यावन्तमेव एव पश्यति। यथाभूतानि चायं देशान्तराणि स्वप्ने पश्यति न तानि तथाभूतान्येव भवन्ति, परिधावंश्चेत् पश्येच्चायदस्तुभूतमर्थमाकलयेत्। दर्शयति च श्रुतिः "अन्तरेव देहे स्वप्नं स यत्रैतत् स्वप्नायचरति" इत्युपक्रम्य "क्षे शरीरे यथाकामं परिवर्त्तते" इति। अतश्च श्रुत्युपपत्तिविरोधाद्वह्निःकुलायश्रुतिर्गौणी व्याख्यातव्या वह्निरिव कुलायादस्तचरित्वा, इति वो हि यस्त्वपि शरीरे न तेन प्रयोजनं करोति स वह्निरिव शरीराद्भवति इति। स्थितिगतिप्रलयभेदोऽप्येवं सति विप्रलम्भ एवाभ्युपगन्तव्यः, कालविसंवादोऽपि च स्वप्ने भवति रजन्यां स्वप्नो वासरं भारते वर्षे मन्यते तथा सुहूर्तमात्रप्रवर्त्तिनि स्वप्ने कदाचिद् बहून् वर्षपूगानतिवाहयति। निमित्तान्यपि च स्वप्ने न बुद्धेः कर्मणो वोचितानि विद्यन्ते, अरण्योपसंहारादि नास्य रथादिपदर्शाय चक्षुरादीनि सन्ति, रथादिनिर्वर्त्तनेऽपि कुतोऽस्य निमेषमात्रेण सामर्थ्यं दार्ढ्यं वा। बाध्यन्ते चैते रथादयः स्वप्नदृष्टाः प्रबोधे, स्वप्न एव चैते सुखबाधा भवन्ति जाग्रत्समयोर्व्यभिचारदर्शनात्, रथोऽयमिति हि कदाचित् स्वप्ने निर्द्धारितः क्षणेन मनुष्यः सम्पद्यते, मनुष्योऽयमिति वा निर्द्धारितः क्षणेन हस्तः। अतश्चाभावं रथादीनां स्वप्ने आवयति शास्त्रम् "न तत्र रथा न रथयोगा न पन्थानो भवन्ति" इत्यादि। तस्मान्मायामात्रं स्वप्नदर्शनम्" भा०। "सूचकश्च हि श्रुतेराचक्षते च तद्विदः" सू०। "मायामात्रत्वात् तर्हि न कश्चित् स्वप्ने परमार्थसत्य इति, नेत्युच्यते। सूचकश्च हि स्वप्नो भवति भविष्यतोः साध्वसाधुनोः। तथा हि श्रूयते "यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति। समृद्धिं तत्र जानीयात् तस्मिन् स्वप्ननिदर्शने" इति। तथा "दुष्टं दृष्ट्वा दृष्टमात्रं पश्यति स एनं हन्ति" इत्येवमादिभिः स्वप्नैरचिरजीवित्वमावेद्यत इति आह्वयति। आचक्षते च स्वप्नाध्यायविदः "कृष्णरोहणादीनि स्वप्ने धन्यानि खरयानादीन्यधन्यानि" इति। मन्त्रदेवताद्रव्यविशेषनिमित्तानि केचित् स्वप्नाः सत्यार्थसन्धिनो भवन्तीति मन्यन्ते। तत्रापि भवतु नाम सत्यमानस्य वस्तुनः सत्यत्वं, सूचकस्य तु स्वोदर्शनादेर्भावत्वेन वैतथ्यं बाध्यमानत्वादित्यभिप्रायः। तस्मादुपपन्नं स्वप्नस्य मायामात्रत्वम्। यदुक्तमाह कौति तदेवं सति भाक्तं व्याख्यातव्यं यथा लाक्षणिकं गवादीनुद्वहतीति निमित्तमात्रत्वादेवमुच्यते न तु प्रत्यक्षमेव लाक्षणिकं गवादीनुद्वहति, एवं निमित्तमात्रत्वात् स्वप्नो रथादीन् सृजते स हि कर्त्तेति चोच्यते न तु प्रत्यक्षमेव स्वप्नो रथादीन् सृजति। निमित्तत्वन्त्वस्य रथादिप्रतिभाननिमित्तनोदनादर्शनात् तन्निमित्तभूतयोः सुकृतदुष्कृतयोः कर्त्तृत्वेनेति वक्तव्यम्। अपि च जागरिते विषयेन्द्रियसंयोगादादित्यादिज्योतिर्व्यतिकराद्यात्मनः स्वयं ज्योतिष्ट्वं दृष्टमुदीर्विवेचनमिति तद्विवेचनाय स्वप्न उपन्यस्तः, तत्र यदि रथादिसृष्टिवचनं श्रुत्वा नीयेत स्वयं ज्योतिष्ट्वं न निर्णीतं स्यात्। तस्माद्रथाद्यभाववचनश्रुत्या रथादिसृष्टिवचनं भाक्तमिति व्याख्येयम्। एतेन निर्माणप्रकरणं व्याख्यातम्। यदप्युक्तम् "प्राज्ञमेनं निर्मातारमामनन्ति" इति, तदप्यवत् श्रुत्यन्तरे स्वयं विहृत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रक्षपिति" इति जीवव्यापारश्रवणात्। दृश्यते च "य एष सुप्तेषु जागर्त्ति" इति प्रसिद्धानुवादाज्जीव एवायं कामानां निर्माता सङ्कल्प्यते, तस्य तु वाक्यशेषे "तदेव शुक्रन्तद्ब्रह्मेति" जीवभावं व्यावर्त्य ब्रह्मभाव उपदिश्यते, "तत्त्वमसि" इत्यादिवदिति न ब्रह्मप्रकरणत्वं विरुध्यते। न चाज्ञाभिः स्वप्नेऽपि प्राज्ञव्यापारः प्रतिषिध्यते, तस्य सर्वेश्वरत्वात् सर्वाध्यक्षत्वात्सुषिष्टादृष्टोपपत्तेः। पारमार्थिकस्तु नायं सन्ध्याश्रयः सर्गो वियदादिसर्गवदित्येतावत् प्रतिपाद्यते। न च वियदादिसर्गस्यात्यन्तिकं सत्यत्वमस्ति, प्रतिपादितं हि "तदनन्यत्वमारम्भणशब्दादिभ्यः, इत्यत्र समस्तस्य मायामात्रत्वम्। प्राक् च ब्रह्मात्मदर्शनात् वियदादिप्रपञ्चो व्यवस्थितरूपो भवति, सन्ध्याश्रयस्तु प्रपञ्चः प्रतिदिनं बाध्यत इत्यतो वैशेषिकं सन्ध्यस्य मायामात्रत्वमुदितम्" भा०। "पराभिध्यानात् तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ" सू०। "अपि स्यात् परश्चैव तावदात्मनोऽंशो जीवोऽग्नेरिव विस्फुलिङ्गः। तत्रैवं सति यथाऽग्निविस्फुलिङ्गयोः समाने दहनप्रकाशनयत्नौ भवतः एवं जीवेश्वरयोरपि ज्ञानैश्वर्यशक्ती, ततश्च जीवस्यैश्वर्यवशात् लाक्षणिकी स्वप्ने रथादिसृष्टिर्भविष्यतीति, अत्रोच्यते। सत्यपि जीवेश्वरयोरंशांशीभावे प्रत्यक्षमेव जीवेश्वरविपरीतधर्मत्वं, किं पुनर्ज्ञौ-

ब्रह्मेश्वरसमानधर्मत्वं नास्त्येव न नास्तीति, विद्यमानमपि तु तत् तिरोहितं, अविद्यादिव्यवधानात्। तत् पुनस्तिरोहितं सत् परमेश्वरमभिध्यायतो यतमानस्य जन्तोर्विधूतध्वान्तस्य तिमिरतिरस्कृतस्येव दक्शक्तिरौषधवीर्यादिनेश्वरप्रसादात् संसिद्धस्य कस्यचिदेवाविर्भवति न स्वभावत एव सर्वेषां जन्तूनां, कृतश्चतो हि ईश्वराद्वैतोरस्य जीवस्य बन्धमोक्षौ भवतः, ईश्वरस्य स्वरूपापरिज्ञानाद् बन्धः तत्स्वरूपपरिज्ञानात्तु मोक्षः। तथा च श्रुतिः "ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः"। तस्माभिध्यानात् तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकामः इत्येवमाद्या भा०। "देहयोगाद् वा सोऽपि सं०। "कस्मात् पुनर्जीवः परमात्मांश एव सन् तिरस्कृतज्ञानैश्वर्यो भवति युक्तन्तु ज्ञानैश्वर्यतिरस्कृतत्वं विस्फुलिङ्गस्येव दहनप्रकाशयोरिति। उच्यते सत्यमेवैतत्, सोऽपि तु जीवस्य ज्ञानैश्वर्यतिरोभावो देहयोगाद्देहेन्द्रियमनोबुद्धिविषयवेदनादियोगाद्भवति। अस्ति चात्रोपमा यथाग्नेर्दहनप्रकाशनसमन्वयाद्यरणिगतस्य दहनप्रकाशने तिरोभवतः, यथा वा मणेराकरस्थस्य, एवमविद्याप्रत्युपस्थापितनामरूपकृततदेहाद्युपाधियोगात् तदविवेकभ्रमकृतो जीवस्य ज्ञानैश्वर्यतिरोभावः। यावद्धि जीवेश्वरयोरन्यत्वाशङ्काव्याहत्यर्थः। नन्वन्य एव जीव ईश्वरादस्तु तिरस्कृतज्ञानैश्वर्यत्वात् किं देहयोगकल्पनया। नेत्युच्यते, न ह्यन्यत्वं जीवस्येश्वराद्युपपद्यते "सैवं देवतैक्षत" इत्युपक्रम्य "अनेन जीवेनात्मनानुप्रविश्य" इत्यात्मशब्देन जीवस्य परामर्शात्। "तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो" इति च जीवस्योपदिशतीश्वरात्मत्वम्, अतोऽनन्य एवेश्वरात् जीवः सन् देहयोगात् तिरोहितज्ञानैश्वर्यो भवति, अतश्च न सांसिद्धिकी जीवस्य स्वप्ने रथादिसृष्टिसिद्धिर्घटते। यदि च सांसिद्धिकी स्वप्ने सृष्टिसिद्धिः स्यात् नैवानिष्टं कश्चित् स्वप्नं पश्येत्। न हि कश्चिदनिष्टं सङ्कल्पयते। यत् पुनरुक्तं जागरितदेशश्रुतिः स्वप्नस्य सत्यत्वं ख्यापयतीति न तत्साम्यवचनं सत्यत्वाभिप्रायं स्वयंज्योतिष्ट्वविरोधात्, श्रुत्यैव च स्वप्ने रथाद्यभावस्य दर्शितत्वात्, जागरितप्रभववासनानिमित्तत्वात् तु स्वप्नस्य तत्तुल्यनिर्भासत्वाभिप्रायं तत्। तथा दुपपन्नं स्वप्नस्य मायामात्रत्वम्।

स्वप्नेदृश शुभाशुभसूचकत्वं नानापुराणेषूक्तं तत्र वि.ध. मात्रं मत्स्यपुराणे २४२ अध्याये उक्तमत्र प्रदर्श्यते यथा "इदानीं कथयिष्यामि निमित्तं स्वप्नदर्शने। नाभिं विनान्यगात्रेषु हस्वदीर्घसमुद्भवः। चूर्णनं मूर्ध्नि कांस्यानां खण्डनं नम्रता तथा। मलिनाम्बरधारित्वमभ्यङ्गः पङ्कदिग्धता। उच्चात् प्रपतनञ्चैव दोलारोहणमेव च। अञ्जनं पङ्कतोयानां क्षयानामपि भारणम्। रक्तपुष्पद्रुमाणाञ्च मण्डलस्य तथैव च। वराहर्क्षखरोष्ट्राणां तथा च रोहणक्रिया। मद्यं पङ्कमांसानां तैलस्य लवणस्य च। नर्त्तनं हसनञ्चैव विवाहो गीतमेव च। तन्त्रीवाद्यविभिन्नानां वाद्यानामभिवादनम्। स्रोतोऽवगाहगमनं स्नानं गोमयवारिणा। पङ्कोदकेन च तथा मक्षीतोयेन चाप्लवः। मातुः प्रवेशो जठरे चितारोहणमेव च। यष्टिध्वजाभिपतनं पतनं यष्टिस्थयोः। दिव्यान्तरिक्षभौमानामुत्पातानाञ्च दर्शनम्। देवद्विजातिभूपालगुरूणां क्रोध एव च। आलिङ्गनं कुमारीणां द्रुमाणाञ्च मैथुनम्। स्नानञ्चैव खगात्राणां विरेकवमनक्रिया। दक्षिणाशाभिगमनं व्याधिनाभिभवस्तथा। फलापहानिश्च तथा पुष्पहानिस्तथैव च। स्पृष्टाणाञ्चैव धातूनां स्पृष्टसम्मार्जनन्तथा। क्रीड़ा पिशाचक्रव्यादवानरैर्नरैरपि। परादभिभवश्चैव तस्माच्च व्यसनोद्भवः। काषायवस्त्रधारित्वं तद्वत् स्त्रीक्रीड़नन्तथा। क्षेत्रपानावगाहौ च रक्तमाल्यानुलेपनम्। एवमादीनि चान्यानि दुःस्वप्नानि विनिर्दिशेत्। एषां सङ्कथनं धन्यं भूयः प्रक्षपनं तथा। कल्पकस्यानं तिलैर्होमो ब्राह्मणानाञ्च पूजनम्। स्तुतिश्च वासुदेवस्य तथा तस्यैव पूजनम्। नागेन्द्रमोक्षश्चार्थं श्रेयं दुःस्वप्ननाशनम्। स्वप्नेषु प्रथमे यामे संवत्सरविपाकिनः। षड्भिर्मासैर्द्वितीये तु त्रिभिर्मासैस्तृतीयके। चतुर्थे मासमात्रेण पञ्चमे नात्र संशयः। अरुणोदयवेलायां दशाहेन फलं भवेत्। एकस्यां यदि वा रात्रौ शुभं वा यदि वा शुभम्। प्रथाद् दृष्टेषु यत्तत्र तस्य पार्के विनिर्दिशेत्। तस्माच्छोभनके स्वप्ने पश्चात् स्वप्नं न पश्यति। शैलप्रासादनागस्कन्धमारोहणं हितम्। द्रुमाणां श्वेतपुष्पाणां गमने च तथा द्विज!। द्रुमतृणोद्भवो लाभो तथैव वडवाश्वता। तथैव वृषभत्वं फलितोद्भव एव च। शुक्लमाल्यधारित्वं शुक्लाम्बरधारिता। चन्द्रार्कतारासङ्घस्य परिमार्जनमेव च। ध्वजध्वजालिङ्गनञ्च तदुच्छ्रायक्रिया तथा। मूत्रस्थूलीनां यजनं शत्रूणाञ्च

वर्जयेत्। जयो विवादे द्यूते च संग्रामे च तथा द्विज!। भक्षणञ्चार्द्रमांसानां मत्स्यानां पायसस्य च। दर्शनं रुधिरस्यापि स्नानं वा रुधिरेण च। सुरारुधिरमद्यानां पानं क्षीरस्य वाथ वा। अन्धैर्वा वेष्टनं भूमौ निर्मलं गमनं तथा। सुखेन दोहनं गर्त्ता महिषीणां तथा गवाम्। सिंहीनां हस्तिनीनाञ्च वडवानां तथैव च। प्रसादो देवविप्रेभ्यो गुरुभ्यश्च तथा शुभः। अम्भसा स्वभिषेकस्तु गवां शृङ्गाम्बितेन वा। चन्द्रात् सूर्य्येण वा राजन्! श्रेयो राज्यप्रदो हि सः। राज्याभिषेकश्च तथाच्छेदनं शिरसस्तथा। मरणं वह्निदाहश्च वह्निदाहो गृहादिषु। लब्धिश्च राज्यसिद्धानां तन्त्रीवाद्याभिवादनम्। तथोदकानां तरणं तथा विषमसङ्क्रमम्। हस्तिनोवडवानाञ्च गवाञ्च प्रसवो गृहे। आरोहणमयानां रोदनञ्च तथाशुभम्। वरस्त्रीणां तथालाभस्तथालिङ्गनमेव च। निगडैर्बन्धनं धन्यं तथा विद्यातुलेपनम्। जीवतां भूमिपालानां सुहृदामपि दर्शनम्। दर्शनं देवतानाञ्च विमलानां तथात्मनाम्। शुभान्येतानि नरस्तु दृष्ट्वा प्राप्नोत्यवश्याद् ध्रुवमर्थलाभम्। स्वप्नानि वै धर्मभृतां वरिष्ठ! व्याधेर्विमोक्षञ्च तथातुरोऽपि" आर्षे न०।

स्वप्नकृत् न० स्वप्नं निद्रां करोति कृ-क्विप्। (हड़ताल) गाढ़े शब्दच०।

स्वप्नज् त्रि० स्वप-नञ्जिङ्। शयनशीले अमरः।

स्वभाव पु० स्वस्य भावः। १निसर्गे अजन्ये स्वतःसिद्धे भावे च अमरः। "वह्निर्हेतुमपेक्षी तु स्वभावोऽयं प्रकीर्त्तितः। निसर्गश्च स्वभावश्च इत्येष भवति द्विधा। निसर्गः सूदृष्ट्यानजन्यः संस्कार उच्यते। अजन्यस्तु स्वतः सिद्धः सद्रूपो भाव उच्यते" उज्ज्वलद०।

स्वभावोक्ति स्त्री स्वभावस्योक्तिरत्र। १यथोक्तालङ्कारभेदे अलङ्कारशब्दे ४०८ पृ० दृश्यम् इत०। २स्वभावस्य कथने।

स्वभू पु० स्वेनैव भवति भू-क्विप्। १ब्रह्मणि मेदि० २विष्णौ अमरः। ३शिवे ४ईश्वरे ५कामे च।

स्वयंवर पु० स्वयमात्मना वरो वरणम्। कन्ययात्मनैव स्वपतेर्वरणे "सदसि स्वयंवरः" नैष०। स्वयं वृणुते पतिम्। वृ-अच्। आत्मनैव पतिवरणकर्त्री २कन्यकायां स्त्री।

स्वयंहारिका स्त्री ब्रह्मणो मानसस्वप्नपुत्रस्य दुःसहस्य निमोच्यां माद्र्यांजातेऽपत्ये कन्याभेदे मार्कण्डेयपु०। तत्कन्याजातो निर्मोचिकादयः तासां कर्माणि तत्रोक्तानि तत्र "एतासां कर्म वक्ष्यामि द्रव्यप्रजननञ्च यत्" इत्युपक्रमे "धान्यं खलात् गृहात् गोष्ठात् पथःसर्पिश्चया परा। सस्यैरिवद्रव्यमपहन्ति च कन्यका। या स्वयंहारिकेत्युक्ता सदान्नदानतत्परा" इति तद्धाः कर्मोक्तम्।

स्वयङ्कृत पु० स्वयमात्मना कृतः। १कृत्रिमे पुत्रे "माता पितृविहीनस्तु कृत्रिमः स्यात् स्वयंकृता" स्मृतिः। २आत्मकृते त्रि०। "पूर्वजुष्टः स्वयंकृतः" (पुरोहितः) स्मृतिः।

स्वयङ्गुप्ता स्त्री स्वयमात्मनैव गुप्ता। शूकशिम्बाम् शब्दच०।

स्वयन्दत्त पु० स्वयमात्मनैव न तु पितृमातृभ्यां दत्तः उपनतः दत्तात्मके पुत्रभेदे "दत्तात्मा तु स्वयन्दत्तः" याज्ञ०। "दत्तात्मा तु पुत्रो मातापितृविहीनाभ्यां विसृष्टो वा तवाहं पुत्रो भवामीति स्वयंदत्त उपनतः" मिता०।

स्वयम् अव्य० सु+अय-असु। आत्मनेत्यर्थे अमरः।

स्वयम्भु पु० स्वयम्+भू-डु। ब्रह्मणि त्रिरूप०। [राजनि०।

स्वयम्भुवा पु० स्वयम्भाति भू-मूलवि० क। धूलकच्छायाम्

स्वयम्भू पु० स्वयं भवति भू-क्विप्। १चतुर्मुखे ब्रह्मणि अमरः २कृष्णे च। ३काले शब्दर० ४कामदेवे ५विष्णौ हरिवं० च। ७भावप्रधाने दक्षिणन्यासे राजनि०। ८जिनभेदे हेमच०। १०परमेश्वरे "ततः स्वयम्भूर्भगवान्" मनुः। [असस्वरत्-न।

स्वर आक्षेपे कट० चुरा० उभ० सक० सेट्। स्वरयति-ते

स्वर् अव्य० सृ-विच्। १स्वर्गे अमरः "यत्र दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतञ्च तत्सुखं स्वःपदाभिदम्" इत्युक्ते दुःखासंभिन्ने २सुखसन्ताने ३परलोके ४आकाशे ५शोभने च शब्दच०। दुःखासंभिन्नत्वं च स्वावच्छेदकशरीरावच्छिन्नत्वं तेन दुःखसमानकालीने सुखे नातिव्याप्तिः।

स्वर पु० स्वर-अच् सृ-अप् वा। १उदात्तानुदात्तस्वरितरूपे वर्णोच्चारणप्रयत्नभेदे ताडयस्वरवत्त्वाच्च २व्यञ्जनभिन्नवर्णेषु अकारादिषु शिक्षा। तन्त्रोक्ते ३प्राणादिवायोर्व्यापारभेदे ४काकादिकृते वर्णोच्चारणध्वनिविशेषे ५निषादादिषु तन्त्रोक्तसप्तोत्थेषु गानजध्वनिषु च अमरः।

"उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः" शिक्षा० अकारादीनां स्वयंराजमानत्वात् स्वरत्वाच्च स्वरसंज्ञाभिधेयता, "ऋचः स्वयं विराजन्ते हरन्ति परमामिषः" इत्युक्तेः "उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः। ह्रस्वो दीर्घः प्लुतश्चेति कालतो नियमा अपि" शिक्षोक्तेश्च। निषादादिस्वराणां प्राणिभेदस्वरतुल्यता नारदेनोक्ता यथा "षड्जं रौति मयूरो हि ऋषो नर्दति चर्षभम्। अजा

विरौति गान्धारं क्रौञ्चो नदति मध्यमम्। पुष्पसाधारणे काले कोकिलो रौति पञ्चमम्। ऋषभं धैवतं रौति निषादं रौति कुञ्जरः" इति। "ऋषभन्तु धैवतं वोऽपि सप्तः पञ्चमसंज्ञकम्। निषादन्तु गजो गर्जेत्तुरङ्गोऽसौ सप्तमम्" इति। भरतोऽप्याह "षड्जञ्च पञ्चमश्चैव मयूरो नदति द्विधा। ऋषभाद्या धैवतादीश्च प्राङ्मन्द्राच्च यथाक्रमम्" इति। निषादादिशब्दनिरुक्तिश्च "निषीदन्ति स्वरा अस्मिन्निषादस्तेन हेतुना। अत्रेयमन्निविषयं न हि व्याख्यावतिष्ठते"। "वायुः समुद्गतो नाभेः कण्ठशीर्षसमाहतः। नदत्यृषभवद् यस्मात्तेनैष ऋषभः स्मृतः" "वायुः समुद्गतो नाभेः कण्ठशीर्षसमाहतः। नानागन्धवहः पुष्टो गान्धारस्तेन हेतुना। "नासां कण्ठस्तरसालुञ्जिह्वां दन्तांश्च संश्रितः। षड्भ्यः संजायते यस्मात्तस्मात् षड्ज इति स्मृतः"। "तद्वदेवोत्थितो वायुरुरःकण्ठसमाहतः। नाभिमाप्नो मद्रामादौ मध्यमत्वेन स स्मृतः"। "अभिसन्धत्ते यस्मात् स्वरांस्तेनैष धैवतः। स तु तावत् प्रधानत्वात् ललाटे व्यवतिष्ठते। "वायुः समुद्गतो नाभेरुरोहृत्कण्ठमूर्द्धसु। विचरन् पञ्चमस्थानप्राप्त्या पञ्चम उच्यते"। "स स्वरो यः श्रुतिस्थाने स्वरन् हृदयरञ्जकः। षड्ज ऋषभगान्धारा मध्यमः पञ्चमस्तथा। धैवतश्च निषादश्च स्वराः सप्त प्रकीर्त्तिताः" भरतः।

वाद्यादिस्वराश्च चक्रशब्दे २८।१ पृ० दृश्याः।

स्वरघ्न पु० स्वरं हन्ति हन-क। गलरोगभेदे "अष्टादशगलरोगोपक्रमे" वक्ष्यमाणः "श्वसिति प्रसक्तं भिन्नस्वरः शुष्कविच्छुष्ककण्ठः। कफोपदुष्टेष्वनिलायनेषु ज्ञेयः स्वरोघः स्वसनात् स्वरघ्नः"। ताम्यमानः तमः पश्यन् शुष्को विच्छोऽस्वाधीनकण्ठो यस्य सः अस्वाधीनता भङ्गं गिलितमशक्यत्वात् अनिलायनेषु वातवर्त्मसु श्वसनाद्धातोर्भावप्र०

स्वरचक्र न० स्वरोदयोक्ते चक्रभेदे चक्रशब्दे २८।१ पृ० दृश्यम्।

स्वरपत्तन न० स्वराणां निषादादीनां गानध्वनिविशेषाणां पत्तनमाश्रयः। सामवेदे त्रिका०।

स्वरभङ्ग पु० स्वरस्य कण्ठध्वनिभेदस्य भङ्गो यस्मात्। रोगभेदे स्वरभेदोऽत्र तच्चिकित्सादि सुश्रु० उक्तं यथा "अथातः स्वरभेदप्रतिषेधमध्यायं व्याख्यास्यामः। अत्युच्चभाषणविषाध्ययनाभिघातशीतादिभिः प्रकुपिताः पवनादयस्तु। ते शब्दवाहिधमनीषु गताः प्रतिहता दुष्टुः स्वरं भवति चापि हि षड्विधः सः। वातेन क्षयतो ननानानमूत्रवर्चो भिन्नं ग्रथितं शब्दं भवत्स्वरश्च। पित्तेन पीतवदनाक्षिपुरीषमूत्रो मूर्च्छाज्वरेण च विदाहसमन्वितेन। श्लेष्मात्मकेन सततं कफरुद्धकण्ठो मन्दं ग्रथितं वदति वापि दिवा विशेषात्। सर्वात्मके भवति सर्वविकारसम्भवव्यक्तता च वचसस्तमसाध्यमाहुः। धूमेत वाक्क्षवथते क्षयमाप्नुयाच्च वाग्वेश वापि हृतवाक् परिवर्जनीयः। अन्तर्गतस्वरमलक्ष्यपदं चिरेण भेदोऽन्वयाद्वदति दिग्धगोऽतताहुः। चीयेत वक्त्रं क्षयश्च चापि चिरोत्थितो दुष्ट कफोपजातः। भेदक्षयः सर्वसमुद्भवश्च स्वरामयो यो न स सिद्धिमेति। स्निग्धात् स्वरात्तरुणरानपक्वदोषान् संशोधयेद्मनरेचनवस्तिभिश्च। नस्यावपीडकवधावनधूमलेहैः सम्यग्विधैः कवलग्रहैश्च"।

स्वरमण्डलिका स्वराणां मण्डलमस्त्यस्य ठन्। वीणायाम् हेत०। २स्वरसमूहे।

स्वरलासिका स्त्री स्वरैः निषादादिभिः लसति लसतीव अस-ण्वुल्। १वीणायां २वंशयष्ट्याञ्च शब्दर०।

स्वरस पु०स्वेन स्वभावेन रसः आस्वाद्यः। १त्रिफलापिप्पलीकल्कभेदे शब्दर० २क्वाथभेदे च। "सद्यः सुखादार्द्रद्रव्याहृत्स्वयन्त्रादिपीडनात्। यो रसस्त्वभिधीयते स्वरसः सः प्रकीर्त्तितः" वैद्यक०। स्वश्च रसः रागः। ३स्वाभिप्राये ४स्वतात्पर्य्ये ५वाक्यादौ रचनाभङ्गीभेदे च।

स्वरसन्धि पु० स्वरनिमित्तकः सन्धिः। व्याकरणोक्ते स्वरनिमित्तके दीर्घादौ कार्य्ये। [शब्दे २५६३ पृ०दृश्यम्।

स्वरसामन् पु० गवामयनस्थीयषडहसाध्ये यदिनभेदे गवामयन-

स्वरा स्त्री ब्रह्मणः प्रथमपत्न्यां पद्मपु०।

स्वरापगा स्त्री स्वः स्वर्गस्यापगा। गङ्गायाम् हेमच०। स्वर्गापगादयोऽप्यत्र।

स्वरालु पु० स्वराय अलति पर्य्याप्नोति अल-उप्। वर्णायां शब्दच० तत्सेवने हि स्वरस्योज्जनात्तस्यात्तथात्वम्।

स्वराज् पु० स्वेनैव राजते राज-क्विप्। ईश्वरे "अर्थेष्वभिज्ञः स्वराडिति" भागवतम् १।१।१।

स्वरित पु० स्वरो जातोऽस्य इतच्। १जातस्वरे २उदात्तानुदात्तसमाहारात्मके स्वरभेदे पा० "ऊचैरनुदात्तः" "नीचैरनुदात्तः"। "समाहारः स्वरितः" पा० "उदात्तानुदात्तत्वे वर्णधर्मौ समाक्षिप्येते यस्मिन् सोऽच् स्वरितसंज्ञः स्यात्" सि०कौ०। "तस्मादित उदात्तमर्द्धहलम्" पा० "हलन्त्यमन्त्यम् स्वरितञ्चादितो-ऽर्द्धमुदात्तम्योध्यम् उत्तरार्द्धन्तु परिशेषादनुदात्तम्। तच्च

दात्तस्वरितपरत्वे अयमेकादेशः" सि० कौ०। स्वरितः शब्दाच्च पाणिनिना फिट्सूत्रेषु च अनुशिष्टा यथा। "तित् स्वरितम्" पा० तकारेत् प्रत्ययः स्वरितः स्यात्। "बिल्वतिल्वयोः स्वरितो वा" फिट्सू० १पादः। "अनयोरन्तः स्वरितो वा पक्षे उदात्तः" सि० कौ०। "उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य" पा० "उदात्तस्थाने स्वरितस्थाने च यो यण् ततः परस्यानुदात्तस्य स्वरितः स्यात्। अग्न्यभि हि। स्वरितस्य यणः। अग्न्याग्ना। अस्य स्वरितस्य त्रैपादिकत्वेनासिद्धत्वाच्छेषनिघातो न" सि० कौ० "स्वरितो वाऽनुदात्ते पदादौ" पा० "अनुदात्ते पदादौ परे उदात्तेन सहैकादेशः स्वरितो वा स्यात्। पक्षे पूर्वसूत्रेणोदात्तः। द्यौर्द्यो ज्योतिर्दृशे। अस्य द्यौको दिवीयते। व्यवस्थितविभाषात्वादिकारयोः स्वरितः टीर्ङयबेशे तूदात्तः। किञ्च एङः पदान्तादिति पूर्वरूपे स्वरित एव। तेऽवदन्। योऽयमागात्। उक्तञ्च प्रातिशाख्ये "रकारयोश्च प्रश्लेषे जैपाभिनिहतेषु चेति" सि० कौ०। "उदात्तादनुदात्तस्य स्वरितः" पा० "उदात्तात् परस्यानुदात्तस्य स्वरितः स्यात्। अग्निमीळे। अस्यापि त्रैपादिकत्वेनासिद्धत्वाच्छेषनिघातो न। "तमीशानासः" सि० कौ०। "नोदात्तस्वरितपरोऽगार्ग्यकाश्यपगालवानाम्" पा० उदात्तपरः स्वरितपरश्चानुदात्तः स्वरितो न स्यात्। गार्ग्यादिमते तु स्यादेव। प्रय आदः। क्व योऽद्याः २। का २ भीशयः" सि० कौ०। "न्यङ्स्वरौ स्वरितौ" फि० "एतौ स्वरितौ। न्यङ्कुतानः। व्यचयत् मुः" सि० कौ०। "न्यङ्व्यच्कयोरादिः" फि०। स्वरितः स्यात्। "तिल्यशिक्यशाक्यर्धान्यकल्याराजन्यामनुष्याणामनः" फि०। स्वरितः स्यात्। "तिलानां भवनं क्षेत्रं तिल्यम्। यतोऽनाव इति प्राप्ते" सि० कौ०। "बिल्वभल्लयोर्व्याप्तौ छन्दसि" फि० ४पादः। "अनस्वरितानि" सि० कौ०। "स्वरितेनाधिकारः" पा० "स्वरितत्वयुक्तशब्दस्वरूपमधिकृतं बोध्यम्" सि० कौ० "स्वरितेनेति इत्थंभावे तृतीया स्वरितत्वस्याथोऽधिकार इत्यर्थः स्वरितत्वञ्च दोषविशेषजन्यमज्ञत्वसाधारण्यात्स्वयम् अधिक्रियमाणषण्णवटकाजाश्रितं वा बोध्यम्। तच्चात्र नासिक्यवत् प्रतिज्ञयैव निर्णीयते अधिकारश्च क्रियद्दूरमित्यत्रापि बाधके व्याख्यानमेव शरणम्" शब्देन्दु०। "स्वरितञित ञाकाङ्क्षेऽदं कर्त्रभिप्राये क्रियाफले" पा० स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात् कर्त्रभिप्राये क्रियाफले" सि० कौ०। स्वर-क्त। ४स्वरयुक्ते त्रि०।

स्वरु पु० सृ-उ। १वज्रे अमरः २शूरणवृक्षे ३वाद्ये ४यज्ञे मेदि०। ५स्वर्गकिरणे ६वह्निकणभेदे च उणा०।

स्वरुचि त्रि० स्वयमेव रुचिः प्रवर्त्तिका स्वत्वे यस्य। १स्वतन्त्रे हेम० ६त०। २स्वयमभिलाषे स्त्री।

स्वरूप न० स्वस्य रूपम्। १स्वभावे अमरः। स्वमेव रूपम्। २स्वात्मके पदार्थे। स्वं यथा स्वं रूपयति रूप-अण्। ३यथास्वरूपाभिज्ञे पण्डिते पु० अमरः। स्वेन स्वभावेनैव रूपमस्य। ४मनोज्ञे त्रि० अमरः।

स्वरूपसंबन्ध पु० स्वरूपं सम्बन्धः स्वरूपयोर्वा सम्बन्धः। न्यायोक्ते स्वात्मके सम्बन्धे षट्पदार्थातिरिक्ते पदार्थभेदे यथा प्रतियोगित्वम् विषयत्वमित्यादि।

स्वरोदय पु० स्वरस्यासतो शुभादिज्ञापकतया यत्र। स्वरस्य श्वासविशेषस्य शुभाशुभत्वज्ञानसाधने तन्त्रशास्त्रभेदे चक्रशब्दे २८१० पृ० दृश्यम्।

स्वर्ग पु० स्वरिति गीयते गै-क सु+खज-घञ् वा। १द्यौलोकाभिधे सुखे २देवानामावासस्थाने च अमरः। स्वर्गकारणस्वरूपादिकं भा० व० २६० अ० उक्तं यथा "उपरिष्टाच्च खर्लोको योऽयं स्वरिति संज्ञितः। ऊर्द्ध्वगः सत्पथः शश्वद्देवयानपरो मुने!। नातप्ततपसः पुंसो नामखायज्वयाजिनः। नास्तिका नास्तिकाद्यैश्च तत्र गच्छन्ति सुव्रत!। धर्मात्मानो जितात्मानः शान्ता दान्ता विमत्सराः। दानधर्मरताः लोका शूराश्चाहवलक्षणाः। तत्र गच्छन्ति धर्मांश्च कृत्वा शमदमात्मकम्। लोकान् पुण्यकृतान् ब्रह्मन्! सङ्किराचरितान्नृभिः। देवाः साध्यास्तथा विश्वे तत्रैव च महर्षयः। यामा धामाश्च सोदक्ष्य! गन्धर्वाप्सरसस्तथा। एषां देवनिकायानां पृथक् पृथगनेकशः। भास्वतः कामरूपस्य लोकाल्लोभयाः शुभाः। त्रयस्त्रिंशतमङ्काश्च योजनानि हिरण्मयः। मेरुः पर्वतराट् यत्र दिव्योद्यानानि सुव्रत!। नन्दनादीनि पुण्यानि विहाराः पुण्यकर्मणाम्। न क्षुत्पिपासे न ग्लानिर्न शीतोष्णे भयं तथा। बीभत्सममुमं वाऽपि तत्र किञ्चन विद्यते। मनोज्ञाः सर्वतो गन्धाः सुखस्पर्शश्च सर्वगः। शब्दाः स्तुतिमनोज्ञाश्च सर्वतस्तत्र वै मुने!। न शोको न जरा तत्र नायासपरिदेवने। दैवतः स मुने! लोकः स्वकर्मफलहेतुकः। सुकृतैस्तत्र पुरुषाः सम्भवन्त्यात्मकर्मभिः। तेजस्वीनि शरीराणि भवन्त्यत्रोपपद्यताम्। कर्म्मजान्येव सोदक्ष्य! न मातृपितृजान्युत। न संस्वेदो न दौर्गन्ध्यं पुरीषं मूत्रमेव

च। तेषां न च रजो वस्त्रं बाधते तत्र वै क्वचित्। न स्रवन्ति सुखस्रोतां दिव्यगन्धा मनोरमाः। संतुष्टाश्चैव विमानैश्च ब्रह्मन्नैर्विविधैश्च ते। दैवांशोद्भवमाप्नेता मोदमात्मर्द्धिसंयुताः। सुखं स्वर्गेतिसञ्ज्ञं वर्त्तयन्ते महामुने!। तेषां तथाविधानान्तु लोकानां मुनिसत्तम!। सर्व्वोपरि लोकस्य लोका दिव्या गुणान्विताः। सुरसाद्म तृणात्तत्र लोकास्तोयमयाः शुभाः। यत्र यान्त्यमयो ब्रह्मन्! पूताः स्वैः कर्म्मभिः शुभैः। ब्रह्मणो नाम तत्स्थो देवानामपि देवताः। तेषां लोकाः परतरे यान् यजन्तीह देवताः। स्वयम्प्रभास्ते भासन्तो लोकाः कामदुघाः परे। न तेषां स्त्रीकृतस्तापो न लोकैर्व्यथमन्तरः। न वर्त्तयन्त्याहुतिभिर्लोकानामृतभोजनाः। तथा दिव्यशरीरास्ते च च विग्रहमूर्त्तयः। न दुःखे सुखकामास्ते देवदेवाः सनातनाः। न कल्पपरिवर्त्तेषु परिवर्त्तन्ति ते तथा। जरा मृत्युः कृतस्तेषां हर्षः प्रीतिसुखं न च। न दुःखं न सुखञ्चापि रागद्वेषौ कुतो मुने!। देवानामपि सौदग्ध्य! काङ्क्षिता या गतिः परा। दुष्प्रापा परमा सिद्धिरगम्या कामगोचरैः। तत्रस्थांश्चादितेः देवा तेषां लोका मनीषिभिः। गम्यन्ते नियमैः श्रेष्ठैर्नरैर्वा विधिपूर्व्वकैः। सेयं दानकृता व्युष्टिरनुप्राप्ता सुखं त्वया। तां भुङ्क्ष्व सुकृतैर्लब्धां तपसाद्योतितप्रभः। एतत् स्वर्गसुखं विप्र! लोका नानाविधास्तथा। गुणाः स्वर्गस्य प्रोक्तास्ते दोषानपि निबोध मे। कृतस्य कर्म्मणस्तत्र भुज्यते यत् फलं दिवि। न चान्यत् क्रियते कर्म्म मूलच्छेदेन भुज्यते। लोकत्रयोषो मम मतस्थानात् पतनञ्च यत्। सुखव्याप्तमनस्कानां पतनं यच्च मुद्गल!। अक्षयोषः परीतापो दृष्टा दीप्ततराः स्त्रियः। यच्चान्यत्तत्र स्थाने स्थितानां तत् सुदुष्करम्। संज्ञा मोहश्च पतनं रजसा च प्रधर्षणम्। प्रस्थानेषु च भाण्डेषु ततः विपतितोभवम्। एतद्ब्रह्मभवनादेते दोषा मौदग्ल्य! दारुणाः। नाकलोके सुकृतिनां गुणास्त्वयुतशो मताः। अयं तत्तो गुणः श्रेष्ठ्यो नृणां स्वर्गेतो मुने!। शुभानुभययोगेन मनुष्येषूपजायते। तत्रापि स महाभागः सुखभाग्भिजायते। न चेत् सम्बुध्यते तत्र ब्रह्मत्वमगतां ततः। इह यत् क्रियते कर्म तत् परत्रोपभुज्यते। कर्म्मभूमिरियं ब्रह्मन्! फलभूमिरसौ मता"। इति च लोको भूरादिभुवर्लोकस्थितीयः।

स्वर्गङ्गा स्त्री ६त०। मन्दाकिन्यां गङ्गरः।

स्वर्गनाथ पु० ६त०। इन्द्रे स्वर्गपत्यादयोऽप्यत्र हेमच०।

स्वर्गवधू स्त्री ६त०। अप्सरसि हेमच०।

स्वर्गाचल पु० स्वर्गलोकस्याऽचलः। सुमेरुपर्वते स्वर्गगिर्यादयोऽप्यत्र हेमच०।

स्वर्गिन् पु० स्वर्गोऽस्त्यस्य भोग्यत्वेन इनि। १देवे त्रि० २देवलोकगामिनि च त्रि० स्वर्गगामित्वहेतुकपुण्यभेदा मरङ्गु०उक्ता यथा "समाभूतेषु संवादः परलोकं प्रति क्रिया। मतां परस्थितानां योक्तिर्वेदानामप्रदर्शनम्। गुरुदेवर्षिपूजा च केवलं साधुसङ्गमः। सत्क्रियाध्ययनं मैत्री स्वर्गिणां लक्षणं विदुः"।

स्वर्गौकस् पु० स्वर्गं ओको यस्य। देवे त्रिका०।

स्वर्जिक पु० सु+अर्ज-घञ् ततः अस्त्यर्थे ठन्। सर्जिकाक्षारे राजनि० २यवक्षारे स्त्री भावप्र०।

"कथितः सर्जिकाभेदः विशेषैः सुवर्चिका। यवक्षारो लघुः स्निग्धः सुरुच्यो वह्निदीपनः। निहन्ति शूलं वातासृग्गुल्मप्लीहगदानपि। सर्जिकाक्षसुधा तस्मात् विशेषात् गुल्ममूलहृत्"भावप्र०। कर्म०सर्जिकाक्षारोऽपि तत्रार्थे राजनि०। णिनि सर्जिन् तत्रार्थे राजनि०।

स्वर्ण न० सुष्ठु अर्च्यो वर्णो यस्य। १काञ्चने २धुस्तूरे अमरः ३नागकेसरे ४गौरवर्णभाजे च राजनि०। सुवर्णशब्दे दृश्यम्। [राजनि० ६त० २सुवर्णस्य लेखे पु०।

स्वर्णकण न० स्वर्णमिव पीतत्वात् कणोऽस्य। १कणगुग्गुलौ

स्वर्णकदली स्त्री स्वर्णमिव कदली (चाँपाकला)कदलीभेदे।

स्वर्णकाय पु० स्वर्णमिव पीतत्वात् कायोऽस्य। १गरुडे हेमच०। २स्वर्णवर्णदेहयुते त्रि०।

स्वर्णकार पु० स्वर्णं स्वर्णमयमलङ्कारादि करोति क-अण्। (सेकरा) जातिभेदे। "विश्वकर्मा तु शूद्रायां वीर्याधानं चकार सः। ततो बभूवुः पुत्राश्च नवैते शिल्पकारिणः। मालाकारः कर्मकारः शङ्खकारः कुविन्दकः। कुम्भकारः कंसकारः षडेते शिल्पिनां वराः। सूत्रधारशिल्पकरः स्वर्णकारस्तथैव च। पतितास्ते ब्रह्मशापादयाज्या वर्णसङ्कराः। स्वर्णकारः स्वर्णचौर्यात् ब्रह्मघ्नानां द्विजोत्तम! बभूव सद्यः पतितो ब्रह्मशापेन कर्मणा" ब्रह्मवै०ब्रह्मख०८ अ०। "तैलचौरसहस्रकोटी भूमिकोटिस्त्रिजन्मसु। ततो भवेत् स्वर्णकारो जन्मैकं दुष्टमानसः" ब्रह्मवै०जन्मख०८ अ०। तच्चातिसाहसकर्म।

स्वर्णकृत् पु० स्वर्णं तत्सदृशभूषादिकं करोति क-क्विप्। स्वर्णकारे शब्दर०।

स्वर्णकेतकी स्त्री स्वर्णमिव पीतत्वात् केतकी। पीतकेतक्याम् राजनि०। तत्पुष्पादिगुणाः "केतकीकुसुमं वर्ण्यं केशदोषगन्धनाशनम्। हेमाभं मदनोन्मादव ल्लभौख्यकारि च। तस्याः स्वादुतिक्तशिशिरः कटुः पित्तकफापहः। रसायनकरो वर्ण्यो देहदार्ढ्यकरः परः" राजनि०।

स्वर्णचीरी स्त्री स्वर्णमिव पीतत्वात् चीरं निर्यासो यस्याः गौरा० ङीष्। ओषधिभेदे सा च हिमालये जायते। "हेमवर्णा रसस्तस्या हिमवद्भूमिसम्भवा। सा नागलिङ्गिकाकारा तन्मूलं वाजिनौषधम्। स्वर्णचीरी हिमा तिक्ता ज्वरिपित्तकफापहा। मूलच्छाल्लरी शीतदाहस्वरहरा परा" राजनि०।

स्वर्णगैरिक न० स्वर्णमिव पीतं गैरिकम्। (वर्णकमाटि) पदार्थभेदे राजनि०।

स्वर्णग्रीवा स्त्री नदीभेदे। "या निःसृता पूर्वभागात् तस्मात् गिरिवरात् (माटकमैलात्) नदी। स्वर्णग्रीवेति विख्याता सा गङ्गासङ्गमीफले" काशिकापु० ८२अ०।

स्वर्णचूड पुं स्त्री० स्वर्णमिव पीतत्वात् चूडा यस्य। पक्षिणि जटा० स्त्रियां ङीष्। [जातमात्रे त्रि०।

स्वर्णज न० स्वर्णात् जायते जन-ड। १वङ्गे हेमच० २स्वर्ण०

स्वर्णजीवन्ती स्त्री० स्वर्णमिव पीतत्वात् जीवन्ती। पीतपुष्पजीवन्त्याम् राजनि०।

स्वर्णदी स्त्री स्वर्णं द्यति खण्डयति तत्सदृशवर्णत्वात् दो-क गौरा०ङीष्। १हरिद्रायाम् राजनि०। हृत० खत्वम्। २गङ्गायाम् अमरः। [२चित्रकवृक्षे च त्रिका०।

स्वर्णदीधिति पु०स्वर्णमिव भास्वरा दीधितिरस्य। १वह्नौ, **स्वर्णद्रु** पु०स्वर्णमिव पुष्पे पीतो द्रुः। आरग्वधे राजनि०।

स्वर्णपक्ष पु० स्वर्णमिव पीतः पक्षोऽस्य। गरुडे त्रिका०।

स्वर्णपाटक पु०स्वर्णं पाटयति पट-णिच्-ण्वुल्। टङ्कखे (सोहागा) शब्दर०।

स्वर्णपुष्प पु० स्वर्णमिव पीतं पुष्पमस्य। १चम्पके २आरग्वधे पुंस्त्री० राजनि० स्त्रीत्वे ङीष्। सा च ३स्वर्णकेतक्याञ्च राजनि०। ४मातृकायाम् ५कलिकारी स्त्री राजनि० टाप्। [स्वर्णकदल्याम् राजनि०।

स्वर्णफला स्त्री स्वर्णमिव पीतं फलमस्याः। (आंवाकला)

स्वर्णवणिज् पु० हृत०। सुवर्णवणिजि जातिभेदे।

स्वर्णसङ्कार पु० स्वर्णमिव स्वर्णमयो वा सङ्कारः। १पीतसङ्करजे राजनि०। २स्वर्णमयकवचभेदे च।

स्वर्णमाक्षिक न० स्वर्णमिव पीतं माक्षिकम्। खनामख्याते उपधातुभेदे "किञ्चित् सुवर्णमाक्षिकात् स्वर्णमाक्षिकमीरितम्। उपधातुः सुवर्णस्य किञ्चित्सुवर्णगुणान्वितम्। तथा च काञ्चनाभावे दीयते स्वर्णमाक्षिकम्। किन्तु तदातुकल्पत्वात् किञ्चिद्धीनगुणात्मतः। न केवलं स्वर्णगुणा वर्त्तन्ते स्वर्णमाक्षिके। द्रव्यान्तरस्य संसर्गात् सन्त्यन्येऽपि गुणास्ततः। सुवर्णमाक्षिकं स्वादु तिक्तं द्रव्यं रसायनम्। चक्षुष्यं वह्निरुक्कण्ठपाण्डुमेहविषोदरम्। अर्शःशोथं विषं कण्डूं त्रिदोषमपि नाशयेत्"। अथ सुवर्णमाक्षिकस्य दोषमाह "मन्दानलत्वं बलहानिसर्पां विष्मिश्रतां नेत्रमदान् सकण्डान्। भावं तथैव व्रणपूर्विकाञ्च कुर्यादशुद्धं खलु माक्षिकञ्च"। तद्दोषशान्त्यर्थं शोधनमाह "माक्षिकस्य त्रयो भागा भागैकं सैन्धवस्य च। मातुलुङ्गद्रवैर्याम जम्बीरस्य द्रवैः पचेत्। चाक्रवेल्लोज्झिते पात्रे यावत् पात्रं सुलोहितम्। भवेत्तत्तु संशुद्धं स्वर्णमाक्षिकमीरितम्"। तन्मारणं यथा "कुलत्थस्य कषायेण द्रवैः तैलेन वा पुटेत्। तैलेनैवाजमूत्रेण म्रियते स्वर्णमाक्षिकम्" भावप्र०।

स्वर्णयूथी स्त्री स्वर्णमिव पीता यूथी। पीतयूथिकायाम् शब्दच०

स्वर्णलता स्त्री स्वर्णमिव पीता लता। ज्योतिष्मत्याम् राजनि०

स्वर्णवर्ण स्त्री स्वर्णमिव वर्णोऽपमस्याः। १हरिद्रायाम् राजनि०। २सुवर्णवर्णे त्रि० ३हेममूल्यद्रव्यापेक्षे वर्णे च।

स्वर्णवल्कल पु० स्वर्णमिव पीतं वल्कलमस्य। शोनाकवृक्षे शब्दच०।

स्वर्णवल्ली स्त्री स्वर्णमिव पीता वल्ली। लताभेदे "स्वर्णवल्ली रक्तफला काकायुः काकवल्लपि। शिरःपीड़ा त्रिदोषघ्नी दुग्धदात्री च सा मता" राजनि०।

स्वर्णशेफालिका स्त्री स्वर्णमिव पीता शेफालिका। १पीतशेफालिकायाम्। २आरग्वधे राजनि०।

स्वर्णाङ्ग पु० स्वर्णमिवाङ्गं पुष्पं यस्य। १आरग्वधे राजनि० २पीतवर्णदेहयुते त्रि० स्त्रियां ङीष्।

सुवर्णारि पु० हृत०। गन्धके तस्य स्वर्णमारकत्वात्तथात्वम्।

स्वर्णुली स्त्री स्वर्णं तद्वर्णं जीवते पुष्पेऽस्य नी-आधारे क्विप् पृषो०। स्वर्णी चेमपुष्पी च स्वर्णपुष्पाधवत्रा तथा। सा कषाया कटुः शीता व्रणदाह परिशोषिता" राजनि० चक्रे लतायाम्। [यति ते ऋक्षवर्त्तनी त।

सुर्च्छ गतौ सक० दृ खेन जीवने सक० चु० उ०सेट्। **स्वर्त्स्** शीतौ सक० शीघ्रने खेदने च सक० भ्वा०चाक० सेट्।

अर्हते अवहिंद्द। [गोमेदमणौ राजनि०।
सुभानव पु० निश्चभानो राज्ञोः प्रियः अण् नि०नादिदृद्धिः।
सुभानु पु० सः स्वर्गे भातुर्दीप्तिरस्य। राहौ अमरः। तस्य भूमिच्छायारूपतया भूमिस्थैर्भानुमत्त्वेनादर्शनात् दिवि दीप्तिमत्त्वात्तथात्वम्। [लोके शब्दच०।
सुर्लोक पु०सुरैव लोकः भुवनम्। १स्वर्गे इत०। २स्वर्गस्थे
सुर्वापी स्त्री सः स्वर्गस्य वापीव। १गङ्गायाम् हेमच०।
सुर्वेश्या स्त्री सः स्वर्गस्य वेश्या। मेनकाद्यप्सरसु अमरः।
सुर्वैद्य पु० द्वि०त०। सः स्वर्गस्य वैद्यो। अश्विनीकुमारयोः अमरः। आयुर्वेदशब्दे ७७६पृ० दृश्यम्।
सुलीन पु० दानवभेदे पद्मपु०।
सुल्प त्रि० सुष्ठु अल्पम् प्रा० स०। अत्यल्पे वृद्धे।
सुल्पकेशरिन् पु०सुल्पः केशरो नित्यमस्यास्य इनि। कोविदारवृक्षे राजनि०।
सुल्पकेशिन् त्रि० सुल्पः केशो नित्यमस्यास्य। १अत्यल्पकेशयुते स्त्रियां ङीप्। २पिशाचभेदे पु०शब्दच०। [रत्नमा०
सुल्पपत्रक पु० सुल्पं पत्रमस्य कप्। गौरशाके मधूकभेदे
सुल्पफला स्त्री सुल्पं फलं यस्याः। क्षुपसाभेदे राजनि०।
सुवासिनी स्त्रीसुखिन् पितरावे वसति वस-णिनि ङीप्। चिरं पितृगृहादिवासिन्यामूढायामूढायां वा स्त्रियाम्। सुवासिनीत्वस्य स्थाने अमरे पाठान्तरम्।
सुवीज पु० सुमेव वीजं यस्य। १आम्रे शब्दर०। २पुत्रे ३कन्यायां स्त्री ङीप्। ४निम्बकारवे न० ५सुस्य वीर्ये च न०।
सुस्त स्त्री सु+वस-क्तन्। भगिन्याम् अमरः।
सुस्क गतौ भ्वा० आ० सक०सेट्। सुस्कते असुस्कीष्ट।
सुस्ति अव्य० सु-अस-क्तिच्, अस्तीति विभक्तिप्रतिरूपकम् अव्ययं प्रादि०वा। १क्षेमे २आशिषि ३पुण्याहादौ अमरः ४स्वीकारसूचने च। एतद्योगे क्षेमादिसम्बन्धिनि चतुर्थी।
सुस्तिक पुंन०। सुस्ति शुभाय हितम् ठन्। "सुस्तिकं प्राङ्मुखं यत् स्यादस्तिन्यानुगतं भवेत्। तत्पार्श्वानुगतौ यान्यौ तत्पर्यन्तगतोऽपरः" इत्युक्तलक्षणे स्वस्तिभेदे वास्तुः। २सितावरणाके पु० राजनि० ३आसनभेदे तल्लक्षणम् आसनशब्दे ८८६ पृ० दृश्यम्। ४तण्डुलपूर्वनिर्मिते त्रिकोणाकारे द्रव्यभेदे च "हतं सुस्तिकसिन्दूरम्" इत्यधिवासनद्रव्यप्रकरणोक्तम् ५चतुष्पथे पु० मेदि०। ६जिनध्वजभेदे हेमच०। ७रततालिके विष्णुः
सुस्तिमुख पु० सुस्ति मुखे यस्य वा यस्य। १लेखे पत्रादौ २विघ्ने पु० ३सुस्तिवादिनि त्रि० मेदि०।
सुस्तिवाचन न० सुस्ति शुभस्य विग्रहारा वाचनम्। कर्मारम्भे विघ्नोपशान्तये ब्राह्मणद्वारा कर्त्तव्यकर्मणां शुभतावाचने। "संपूज्य गन्धपुष्पाद्यैर्ब्राह्मणान् सुस्ति वाचयेत्। धर्म्ये कर्मणि सर्वत्र सर्वं मेऽद्भुतदर्शनं" व्यासः।
सुस्तिवाचनिक त्रि० सुस्तिवाचनाय हितं तत आगतम् तत्र भवं वा ठन्। १सुस्तिवाचनसाधने २तदुल्लिखे ३तत्सम्बन्धिनि च।
सुस्त्ययन न० सुस्ति शुभस्यायनं लाभो यस्मात्। शुभार्थे क्रियमाणे वेदादिविहिते यज्ञयागादौ।
सुस्थ त्रि० सः परलोके तिष्ठति सुखेन स्वभावेन सुखेन, वा वा तिष्ठति स्था-क वा विसर्गलोपः। स्वभावस्थे २स्वर्गस्थिते ३विनायासेन सुखेनावस्थिते च। "सुस्था भवन्तु मयि जीवति धार्त्तराष्ट्राः" वेणीसं०।
सुस्वीय पु० सुस्वसुरपत्यम् छ। १भागिनेये अमरः २भागिनेय्यां स्त्री टाप्।
सुागत न० सुखेन आगतम् सु+आ+गम्-भावे क्त। १सुखेनागमने "सुागतं सुानधीकारान्" कुमारः तदस्यास्ति अर्च् २कुशले ३कुशलप्रश्ने च।
सुापनञ्च षोड़शोपचारमध्ये द्वितीयोपचारः आसनं स्वागतं पाद्यमित्यादि। उपचारशब्दे दृश्यम्।
सुाङ्किक पु० सुाङ्कमर्हति ठक्। १सुटङ्के २तदादके शब्दर०।
सुाच्छन्द्य न० सुच्छन्दस्य भावः ष्यञ्। १स्वाधीनत्वे २सुास्थ्ये च।
सुातन्त्र्य न० सुतन्त्रस्य भावः ष्यञ्। १स्वाधीनत्वे २परानधीनत्वे। व्या० उक्ते इतरव्यापारानधीनव्यापारवत्त्वरूपे कर्त्तृत्वे कर्त्तृशब्दे १७१६ पृ० दृश्यम्।
सुाति(ती) पुंस्त्री० सुनैव अतति अत-इन् स्त्रीत्वपक्षे ङीप्। १अश्विन्यादिषु पञ्चदशे नक्षत्रे अमरः "सुस्वाति: अवधा अक्षीवे" तिं०त० उक्ते ऋभवश्चिकृताश्च। २सुर्यपत्नीभेदे स्त्री त्रिका० ३खगे धरणिः।
सुातिनक्षत्राधिष्ठातृदेवयोगतारासुरूपादिकम् ऋक्षशब्दे ३८७ पृ० दृश्यम्।
सुातियोग पु०आषाढशुक्लपक्षे ऋक्षं तिथ्यं तिथौ माघकृष्णपक्षसप्तम्यां तिथौ च सुातिनक्षत्रस्थचन्द्रस्य शुभफलादिप्रापके योगभेदे यथोक्तं ह० सं० २५अ०
"यद्दोहित्रीयोगफलं तदेव सुातावषाढासहिते च चन्द्रे।

च चन्द्रे । आषाढशुक्ले निखिलं विचिन्त्य बोडशिनृविशेषमन्त्रं प्राप्ते । स्वातौ निशांशे प्रथमेऽभिहते मन्त्राणि सर्वाण्यनुष्ठानानि हविष्यम् । भागे द्वितीये तिलसङ्गमाषा यैश्च तूलैरेऽस्ति न शरदानि । हते ऽस्मिन् भागे प्रथमे सुहृदि सदद्वितीये तु सकीटसर्षा । दृष्टिस्तु मध्यापरभागसङ्गे निस्विद्वृष्टिर्दुनिशं प्रहृष्टे । समस्तसंख्य तारा चित्राया: कीर्त्यते शुभांशत्वः । तस्मात्ते चन्द्रे स्वातेर्योगः शिवो भवति । सप्तम्यां स्वातियोगे यदि पतति दिनं माघमासान्धकारे वायुर्वा चण्डवेगः सजलजलधरो वापि गर्जेत्यजस्रम् । विद्युन्माकुलं वा यदि भवति नभो नष्टचन्द्रार्कतारं विन्द्येत्तो प्राहुरेषा सुदितजनपदा सर्वशस्यैरुपेता । तथैव फाल्गुने चैत्रे वैशाखस्थितेऽपि वा । स्वातियोगं विज्ञानीयादाषाढे च विशेषतः" । [पेट् । स्वादते आस्वादिष्ट ।

स्वाद प्रीतौ भक्ष० प्रीणने सेवने च सक० भ्वा० आ० सेट् । स्वादते आस्वादिष्ट ।

स्वाद पु० स्वद-स्वाद-वा घञ् । १रसानुभवे २प्रीतौ ३प्रीणने ४सेवने च । ल्युट् । स्वादनमप्यत्र न० । रसानुभवप्रकारः सा० द० उक्तो यथा

"न जायते तद् स्वादो विना 'रत्यादिवासनाम्' वासना चेदानीन्तनी प्राक्तनी च रसास्वादहेतुः । तत्र यदि स्वाद्या न ब्रह्मविदयजरन्मांसकादीनामपि स्यात् । यदि द्वितीया न स्वाद् यद्वासिद्धानामपि केषाञ्चिद्रसास्वादबोधो न दृश्यते तत्र स्यात् । यत्तु धर्मदत्तेन "सवासनानां सभ्यानां रसस्यास्वादनं भवेत् । निर्वासनास्तु रङ्गान्तःकाष्ठकुड्याश्मसन्निभाः" ।

स्वादिष्ठ त्रि० अतिशयेन स्वादुः । इष्ठन् डिच्च । अतिमधुरे ई स्त्रियां ङीप् । स्वादीयस् तत्रार्थे त्रि० स्त्रियां ङीप् ।

स्वादु पु० स्वद-उण् । १मधुररसे हेमच० २गुडे त्रिका० ३जोवन्तौषधौ जटा० । ४रटे ५मधुरे हृद्यनोज्ञे च त्रि० मेदि० स्त्रियां वा ङीप् । वा च ७द्राक्षायां अमरः ८क्षुद्रकसारे मत्स्यभेदे पु० राजनि० ।

स्वादुकण्टक पु० स्वादुः कण्टकोऽस्य । विकङ्कतवृक्षे राजनि० ।

स्वादुकन्दा स्त्री स्वादुः कन्दोऽस्याः । विदार्याम् राजनि० ।

स्वादुका स्त्री स्वादुना मधुररसेन कायति कै-क । नागदन्त्याम् राजनि० [२मधुरे भावे ।

स्वादुखण्ड न० स्वादुः मिष्टः खण्डोऽस्य । गुडे शब्दर० कर्म० ।

स्वादुगन्धा स्त्री स्वादुरिष्टगन्धोऽस्याः । १रक्तशोभाञ्जने रत्नमा० । २भूमिकुष्माण्ड्याञ्च जटा० ।

स्वादुपर्णी स्त्री स्वादूनि पर्णान्यस्याः ङीप् । दुग्धिकायाम् राजनि० ।

स्वादुपाका स्त्री स्वादुः पाकोऽस्याः । काकमाच्याम् राजनि० ।

स्वादुपिण्डा स्त्री स्वादुः पिण्डः पिण्डाकारफलमस्याः । पिण्डखर्जूर्याम् राजनि० ।

स्वादुफला स्त्री स्वादुफलमस्याः । १बदरीफले शब्दर० कर्म० । २मिष्टे फले न० । ३कोलौ स्त्री शब्दर० टाप् ।

स्वादुमज्जन् पु० स्वादुः मज्जा यस्य । पर्वतले पीलौ जटा० ।

स्वादुमांसी स्त्री स्वादु मांसमिव फलमस्याः गौरा० ङीष् । काकोल्याम् राजनि० ।

स्वादुमूल न० स्वादु मूलमस्य । गर्जरे (गाँजर) राजनि० ।

स्वादुरसा स्त्री स्वादुः रसो यस्याः । १काकोल्याम् अमरः २मदिरायाम् हेमच० ३शतावर्याम् ४द्राक्षायाम् ५आम्रातके च शब्दर० ।

स्वादुलता स्त्री स्वादुर्लता । विदार्याम् राजनि० ।

स्वादुपुष्प पु० स्वादु पुष्पं यस्य । वटभ्यां राजनि० ।

स्वादूदक पु० स्वादु उदकं यस्य । सप्तद्वीपेषु वि० शि० ।

स्वादुरुह पु० स्वादुः रुहः । दाडिमे त्रिका० ।

स्वाधिष्ठान न० स्वकीयमूलस्थे सुषुम्णान्तर्गते षड्दलपद्मभेदे । "षड्दले वेद्युतनिभे स्वाधिष्ठानेऽब्जसंविधि । बभमैर्यरलैर्युक्ते वर्णैः षड्भिश्च संयुत !" तन्त्रसा० । "सिन्दूरपूरचिरारुणपद्ममध्यतलौकृमध्यमध्यघटितं ध्वजमूलदेशे । चक्रद्वयैः परिवृतं तडिताभवर्णैर्बोधैः सविन्दुलसितैश्च पुरन्दराद्यैः (वाद्यैः) । तस्यान्तरे प्रविलसद्विगदप्रकाशमम्भोजषड्दलमयो वरुणस्य तत्त्वम् । यद्वेन्दुरूपवलितं शरदिन्दुशुभ्रं वह्नारबीजसमलं मकराधिरूढम् । तस्याङ्कदेश वसितो हरिरेव साक्षाद्बीजप्रकाशरुचिरश्रियमादधानः । पीताम्बरः प्रथमयौवनगर्वधारी श्रीवत्सकौस्तुभधरो धृतवेदशङ्खः । तत्रैव भाति सततं खलु राकिणी सा नीलाम्बुजद्युतिसहोदरकान्तिशोभा । नानायुधोद्यतकरैर्वलिताङ्गलक्ष्मीर्दिव्याम्बराभरणभूषितमत्तचित्ता । स्वाधिष्ठानाख्यमेतत् सरसिजममलं चिन्तयेद्विद्वानो सुनीन्द्रसङ्घाद्वारदोषादिकसकलरिपुः जीयते तत्प्रसादेन" पूर्णानन्दः षट्चक्रम् ।

स्वाधीन त्रि० स्वकीधीनः । स्वायत्ते स्वतन्त्रे ।

स्वाधीनपतिका स्त्री स्वाधीनः पतिर्यस्याः कप् । नायिकाभेदे स्वाधीनभर्तृकादयोऽत्र ।

"कान्तो रतिगुणाकृष्टो न जहाति यदन्तिकम् । वि-

चित्तविभ्रमा सत्ता सा स्यात् स्वाधीनभर्तृका" सा०द० । सा च पञ्चविधा "मुग्धा मध्या प्रौढ़ा स्वकीया सामान्या चेति" रसमञ्जरी ।

स्वाध्याय पु० स्वः स्वर्गोवर्त्तेन विहितः अध्यायः द्विजानाम्, अधि+इङ्-कर्मणि घञ् । १द्विजैः पाठ्ये वेदभागभेदे "स्वाध्यायोऽध्येतव्यः" इति श्रुतिः । सु+आ+अधि इङ भावे घञ् । २अवश्यपाठ्यवेदाध्ययने "स्वाध्यायो जप इत्युक्तो वेदाध्ययनकर्मणीति" स्मृतिः ।

स्वान्त न० स्वन-क्त । १मनसि अमरः २मङ्गले मेदि० ३शुद्धिते त्रि० । [४स्वार्थोन्नतायां च मेदि० ।

स्वाप पु० स्वप-घञ् । निद्रायाम् अमरः । २शयने ३शयाने

स्वापतेय न० स्वपतेरागतः ढञ् । धने अमरः ।

स्वाभाविक त्रि० स्वभावादागतः ठञ् । स्वभावसिद्धे स्त्रियां ङीप् (स्वाभाविकी" स्वच्छनेत्रुत्पटः) ।

स्वामिन् पु० स्व+अस्यर्थे मिनि दीर्घः । १भर्त्तरि पत्यौ अमरः । २कार्त्तिकेये मेदि० ३राजनि अमरः ।४विभौ ५हरे ६हरौ च शब्दर० । ७यातुस्वावनसनौ तिकान् । दक्षधिषणौ त्रि० अमरः । ८जैनभेदे पु० हैमच० । १०परिग्रहकोपाधिभेदे पु० । तस्य भावः त्व स्वामित्व अत्यनिरूपिते क्रयाद्यधीने आत्मवृत्तौ पदार्थभेदे अत्यशब्दे दृश्यम् ।

स्वामिपालविवाद पु० स्वामी च पालौ च तयोर्विवादः विवादभेदे तत्स्वरूपादिकं वीरमि० उक्तं यथा "अथ स्वामिपालविवादाख्यव्यवहारपदम् । तत्र मनुरुदभिधानप्रतिज्ञां करोति । "पशुषु स्वामिनां चैव पालानाञ्च व्यतिक्रमे । विवादं संप्रवक्ष्यामि यथावद्धर्मतत्त्वतः" इति । स्वामिपालयोः प्रतिदिनकृत्यमाह नारदः "वपानयेद्वा गोपाय प्रत्यहं रज्जुमोक्षणे । दोग्धां पीताञ्च तां गोपः सायाह्ने प्रत्युपानयेत्" इति । दोग्धां दुग्धादिकं भक्षितवतीः । पीताः पीतवतीः । स्वामिना प्रातर्यावत्यः समर्पितास्तावत्यो गोपालेन सायं प्रत्यर्पणीया इत्यर्थः । गोपदत्तं पशुमात्रोपलक्षणार्थम् । तथा च याज्ञवल्क्यः "यथार्पितान् पशून् गोपः सायं प्रत्यर्पयेत् तथा" इति । गवादिपरिपालनञ्च श्रुतिपरिमाणमाह नारदः "गवां शतादूर्द्धतरो धेनुः स्याद् द्विशतादृतः । प्रतिसंवत्सरं गोपे वृद्धोऽष्टाष्टमेऽहनि" इति । प्रतिसंवत्सरं संवत्सरे संवत्सरे गोशतपरिपालने यत्तरी द्विशावती गौर्भवति । द्विशतपरिपालने चेद्दौगुण्यी यत्तरैति यावत् । अष्टमे दिवसे वृद्धोऽवर्षां गवान्दोऽश्च श्रुतित्वेन कल्पनीय इत्यर्थः । हृदयस्मृतिरपि "तथा धेनुशतः क्षीरं लभेताष्टमेऽहनि" इति । धेनुशतः धेनुशतः द्विशतपालक इत्यर्थः । तथा च वृद्धो धेनुः यत्तरीयते न यत्तरत्यर्थेति भरतसेने । कल्पतरौ तु धेनुशतो गोपाल इति व्याख्यातत्वेन यत्तरत्यर्थेऽपि यत्तरीयत इति गम्यते । गोपदत्तं महिष्यादीनामुपलक्षणम् । न्यूनाधिकपरिपालने तु तदनुसारेण श्रुतिकल्पना द्रष्टव्या । दृश्यञ्च यत्तरत्यर्थेऽपि श्रुतिकल्पना परिभाषितसूक्ष्मभावविषया । परिभाषिते तु परिभाषानतिक्रमेणैव देया । मनुस्तु प्रकारान्तरेण श्रुतिपरिमाणमाह "गोपः क्षीरभृतो यस्तु न दुह्याद्दशतो वराम् । भागाभ्यनुमतो भृत्यः सा स्यात् पालेऽभृते भृतिः" इति । दशानान्दोग्ध्रीणां मध्ये वरामुत्तमां क्षीरवतीमभृतो भृत्यो गोपः दशदोग्ध्रीपालनरूपं भृत्योद्यादृ भत्यर्थम् । सैषा भृतिः पूर्वं द्रव्यान्तरेणाभृते धेनौ । यस्तु द्रव्यान्तरेण भृतः तत्र तदेव भृतिरित्यर्थः । यस्तु भृतिं गृहीत्वा पशूनारण्येत् विनाशयति वा तं प्रत्याह याज्ञवल्क्यः "प्रमादकृतनष्टञ्च प्रदाप्यः क्षतवेतनः" इति । प्रमादग्रहणं प्रत्युपालक्षणोपलक्षणार्थम् मनुना प्रमादनाशः अङ्गीकृतः "नष्टं विनष्टं कृमिभिः कृतं विषमे कृतम् । हीनं पुरुषकारेण प्रदद्यात् पाल एव तं" इति । कृतम् शुना कृतम् । विषमे दुर्गमप्रदेशे । पुरुषकारः पुरुषप्रयत्नः । यत् पुरुषप्रयत्नेन हीनं सत्तादादिकं प्राप्तं गृहीतव्यमित्यर्थः । पुरुषकारञ्च वृद्धश्रुतिना दर्शितः "कृमिचौरव्याघ्रभयाद्धरीक्षञ्च पालयेत् । व्यापद्येक्षितः क्रोशे स्वामिने वा निवेदयेत्" इति । व्यापद्येत् व्यसनाभावाय यतेतेत्यर्थः । चौरैर्बलात्कारेणापहृते न दाय इत्याह मनुः "विघुष्य तु हृतञ्चौरैर्न पालोदातुमर्हति । यदि देशे च काले च स्वामिनः स्वञ्च शंसति" इति । विघुष्य वृद्धकादिभिर्घोषं कृत्वा । देशे स्वाम्यवस्थानदेशे । काले अपहरणकालाव्यवहितकाले । विषयविशेषे पशुपालस्य दण्डमाह व्यासः "दृष्टोनष्टो गोपालस्तांश्चान्वेष्टा निर्जने वने । यामचारी नरैर्बाध्यः शलाकी च धनेश्वरः" इति । शलाकी नापित इति कल्पतरौ । पुरुषप्रयत्नाकरणे दण्डमाह नारदः "आर्द्रे होव्यमनं गोपो व्यापद्येत तत्र शङ्कितः । अव्यक्तलूनमाज्ञाय स्वामिने च निवेदयेत्" । अव्यापद्यन्निक्षोगन् स्वामिने वा-

निनेदयत्। शोढुमर्हति शोपस्तं विनयञ्चैव राजनि" इति। तद्धनादिकम्। पशूनां दैवात् मरणे पालकस्य दोषाभावज्ञानोपायमाह व्यासः "क्षतेषु च विपद्यत्सु स्वादु क्रोशह्रदादिदर्शनात्"। आदिशब्देन कर्णादीनां ग्रहणम्। तथा च मनुः "कर्णौ चर्म च वालांश्च वस्तिं स्नायुञ्च रोचनाम्। पशुषु स्वामिनां दद्यान्मृतेष्वङ्गानि दर्शयेत्" इति। अङ्गादि दर्शयेदिति क्वचित् पाठः। अङ्गः अङ्गकर्णादिरूपचिह्नम्। आदिशब्दः स्वामिसंबन्धार्थः। पशुषु मृतेष्वङ्गादिकं स्वामिने दर्शयेत्। रोचनादिकं यत्प्रयोजनं तत् तस्मै दद्यादित्यर्थः। मृतगवादिदानञ्च तत्स्वामिने मूल्यद्वारेण ज्ञातव्यम्। अतएव विष्णुः "दिवा पशूनां हरणादुपघाते पालेऽनायति पालकदोषो विनष्टपशूनां मूल्यं स्वामिने दद्यादिति"। अनायति अनागच्छति। विनयङ्ग्रहणमसमाप्त याज्ञवल्क्यः "पालदोषविनाशे तु पाले दण्डो विधीयते। अर्द्धत्रयोदशपणः स्वामिनो द्रव्यमेव च" इति। अर्द्धत्रयोदशपणः अर्द्धरहितत्रयोदशपणः। साढ़ेबारहपण इति यावत्। उत्तरपदलोपी कर्मधारयः। यत् तु केनचिदर्द्धाधिकत्रयोदशपणो दण्ड इति व्याख्यातं तत् सार्द्धद्विमाषादिषु अर्द्धत्रिमाषादि मङ्गा भाष्यकारशब्दप्रयोगदर्शनादुपेक्ष्यम्। पालदोषमाह मनुः "अजाविके तु संरुद्धे हतैः पाले त्वनायति। यां प्रसह्य हतो हन्यात् पाले तत् किल्बिषं भवेत्" इति। अनायति अपहरणनिवारणाय अनागच्छतीत्यर्थः। यां अजाविकजातीयाम्। सुगमस्वस्वस्वविषयमेतत्। दुर्गमस्वस्वविषये त्वाह स एव "तावा छेदवरुद्धानां चरन्तीनां स्विधोवने। वासतश्चैव हतो हन्यान्न पालस्तत्र किल्बिषी" इति। अवरुद्धानां पालकेन स्थापितानामित्यर्थः। गवादिप्रचारार्थं भूमिमाह याज्ञवल्क्यः "राज्येच्छया गोप्रचारो भूमीराजवशेन वा"। राज्येच्छया स्वामीच्छाजनवशेन राजेच्छया वा। गोप्रचारो गवां तृणादिभक्षणार्थं क्रियानपि भूभागोऽङ्गुष्टः परिकल्पनीय इत्यर्थः। गवां स्थानासनसौकर्य्याय ग्रामक्षेत्रयोरन्तरमाह स एव "अन्तः ग्रामपरीणाहो ग्रामक्षेत्रान्तरं भवेत्। द्विगुणं खर्वटस्य स्यात्तस्य चतुःशतम्" इति। परीणाहशब्देनात्र सर्वतो दिक्षु अन्तप्रमाणस्यैव ग्रहणे। एतादृशं धनुः शतं परिमितं ग्रामक्षेत्रयोरन्तरं कार्यम्। खर्वटस्य शतद्वयपरिमितमित्यर्थः। खर्वटः अनेकशारीरजीवनयुक्तो ग्राम इति मदनरत्ने। माधवाचार्य्यैस्तु प्रचुरकण्डकमन्नानो ग्राम इति व्याख्यातम्। तत्र गवोत्सर्गे प्रागेवावरणं कार्य्यमित्याह कात्यायनः "अजातेष्वेव गर्भेषु कर्णादावरणं भवेत्। दुःखेन विनिवार्य्यन्ते चर्मस्थादरवा यतः" इति। एवं पशुनिवारणार्थं क्षतेऽप्यावरणे तमतिक्रम्य पशुभिः शस्यादिविनाशे क्षते कर्त्तव्यमाह मनुः "परिक्षिप्ते परिहृते ग्रामान्तीयेऽथ वा पुनः। स पालः शतदण्डार्हो विपालं धारयेत् पशुम्" इति। परिक्षिप्ते मार्गसमीपे क्षेत्रे। ग्रामान्तीये ग्रामसमीपवर्त्तिनि। सपालः पशुः पशुशतदण्डार्हः तत्पशुपालः पशुशतं दण्डनीय इत्यर्थः। अयञ्च दण्डः पशुपालने समर्थेन मता ग्रामान्तरार्थमाणे वेदितव्यः। अतएव नारदः "क्षतकर्म तु हृतिं यः स्वाच्छस्यघातो गवादिभिः। पालः शास्यो भवेत् तत्र न चेच्छक्तो निवारयेत्" इति। आवरणाभावेनापरिहार्य्ये शस्योपघातेऽपि न पालस्य दण्डः। तथा च मनुः "तत्रापरिवृतं धान्यं विहिंस्युः पशवो यदि। न तत्र प्रणयेद्दण्डं नृपतिः पशुरक्षिणाम्" इति। अनेनाहतक्षेत्रशस्योपघाते पशुरक्षिणां दण्ड इत्यर्थोऽपि भवति। अदीर्घकालप्रचारविषयमेतत्। दीर्घकालप्रचारे तु अपरिहृतेऽपि पशुपालो दण्डार्हो भवति। अतएवाल्पकालप्रचारे दोषाभावं दर्शयति विष्णुः "पशौ ग्रामविशीतानां न दोषोऽल्पकालमिति"। पशुविशेषे दण्डपरिमाणमाह याज्ञवल्क्यः "माषानष्टौ तु महिषो शस्यघातस्य कारिणी। दण्डनीया तदर्द्धं तु गोस्तदर्द्धमजाविकम्। भक्षयित्वोपविष्टानां यथोक्तादू द्विगुणो दमः। समेषां विनीतेऽपि खरोष्ट्रं महिषीसमम्" इति। परशस्यघातकारिण्या महिष्याः स्वामी अष्टौ माषान् दण्ड्यः। गोः स्वामी चतुरः। अजास्वामी मेषस्वामी च द्वौ। एतेषां पशूनां शस्यभक्षणादारभ्य तत्रैव उपविष्टानां स्वामी यथोक्तदण्डाद् द्विगुणं दण्ड्यः। विनीतस्यतृणाद्युपघातेऽपि शस्योपघातवद्दण्डनीयः। खरस्वाम्युष्ट्रस्वामी च महिषीस्वामिवद्दण्डनीयः। अत्र पशुस्वामिनो दण्ड इत्यभिधातव्ये महिष्यादिपदं प्रतिपशुदण्डप्राप्त्यर्थम्। भक्षयित्वोपविष्टतत्स्वामिविषये यथोक्तद्विगुणो दण्डः। तथा च स्मृत्यन्तरम् "यस्तां द्विगुणः प्रोक्तः सतृस्नानां चतुर्गुणः" इति। अपराधानुसारेण दण्डनार्थं तान्त्रिकमाहो याज्ञः न पुनः

सौवर्णो राजतो वेति स्मृतिचन्द्रिकायाम् । तात्त्विक-मात्रस्य कर्षपरिमाणितस्य षोडशो भागो भवति । अयमेव "पञ्चाशत्पञ्च यापि प्रकीर्त्तिताः इति याज्ञवल्क्योक्तपञ्चाश-त्कर्षपरिमितताम्रपले पञ्चचत्वारिंशस्य विंशतिभागात्मकस्यार्ध-पलस्य "माषो विंशतिभोभागः पलस्य परिकीर्त्तितः इति नारदोक्तो विंशो भागोऽपि भवति । एतेन स्मृतिचन्द्रि-कायाम् अपराधानुसारेण दण्डनार्थं माषो "विंशतिभो भागः पलस्य परिकीर्त्तित" इति नारदोक्तो माषः कैश्चित् स्वीकृत इत्येकदेशमतत्वेनोपन्यस्य "यद्यूना रजसोभूना मनुनाऽसदृशाकृता । कार्षापणात्मा सा दिव्ये नियोज्या विनये तथा" इति हरदत्तस्मृतिवचनविरोधेन दूषितं तदप्यर्था-र्थभेदाभावेन विरोधाभावान्निरस्तं मन्तव्यम् । यत् तु, मनूक्तम् "सपादं पणमर्हतीति तत् स्वामिनो मतिपूर्वं पशुव्यतिक्रमविषयम् । याज्ञवल्क्यवचनन्त्वज्ञतिपूर्वविष-यमिति न तयोर्विरोधः । यत् तु "पणस्य पादो द्वौ मान्तु द्विगुणं मक्षिकौ तथा । तथाजाविकवत्सानां पादो दण्डः प्रकीर्त्तितः" इति स्मृत्यन्तरं तदप्यज्ञतिपूर्वो-पविष्टमवादिविषयम् । यत् पुनर्नारदेनाभिहितम् "मा-षकृां दापयेद् दण्डं द्वौ माषौ मक्षिकौ तथा । तथा जाविकवत्सानां दण्डः स्यादर्द्धमाषिकः" इति । तन्मू-लकर्त्तृमात्रभक्षणविषयम् अतएवाल्पतः शङ्खलिखितौ । "राज्ञो चरन्तो गोः पञ्चमायां दिवा क्षेत्रे मूलकर्त्तृं माषं खादे त्स्वदण्डमिति" । खादे त्स्वदण्ड इत्यस्यायमर्थः । मक्षिकादिभिः परक्षेत्रे कवचमात्रभक्षणे कथञ्चित् ज्ञाते पालस्य स्वामिनो वा स्वल्पोऽपि दण्डो नास्तीति । अल्प-पशुविषये वस्तुतस्त्वनादेश्यमेव दण्डाभावप्रतिपादन-मुखेनाह नारदः "राजपरिगृहीतो वा वज्राशनिहतोऽपि वा । स्वयं मृतो दग्धो वा दष्टाद् वा पतितो भवेत् । व्याघ्रादिभिर्हतो वापि व्याधिभिर्वाथ पीडितः । न तत्र दोषः पालस्य न च दोषोऽस्ति गोस्वामिनामिति । गोस्वामिनां गोस्वामिनाम् । अल्पतराणामनिवार्यत्वादित्य-भिप्रायः । अनल्पतराणामपि केषाञ्चित् पशूनां दण्डा-भावमाह स एव "गोः प्रसूता दशरात्रं तु मङ्गल्या वाजिकुञ्जराः । न निवार्याः प्रयत्नेन तेषां स्वामी न दण्डभाग्" इति । दशदिनपर्य्यन्तं प्रसूताया निरोद्धु-मशक्यत्वात्र स्वामी दण्डभाक् । मङ्गल्यत्वञ्च सर्वसाङ्ग-त्योपायार्थं सर्वदा बन्धनायोगात् तत्स्वामी न दण्डभाक् । वाजिकुञ्जराणां स्वामिनोऽदण्डभागित्वे हेतुमाहोशनाः

"अदण्ड्या दक्षिणो राज्ञा प्रजापालाद्धि ते स्मृताः" स्वामिपदञ्च पालकस्योपलक्षणार्थम् । यदाह मनुः "अनिर्दशाहां गां सूतां दशाहं देवपशूंस्तथा । वृषभान् वा विषाणान् वा अदण्ड्यान्मनुरब्रवीत्" इति । इमाः मङ्गल्याः । यद् वा इमोक्तकर्मविधानेनोत्सृष्टाः । देव पशवः देवालयेषु देवोपभोगार्थं स्थापिताः पशवः । याज्ञ-वल्क्योऽपि "मङ्गल्योत्सृष्टपशवः सूतिकागन्तुकादयः । पालोवेशाच्च ते मोक्ष्या दैवराजपरिप्लुताः" । अनिर्दशाहा आगन्तुकः स यूथात्परि भ्रष्टः यत् देशान्तरात् समा-गतः । येषां पालो नास्ति तेऽपि दैवराजोपप्लुताः शस्यादिनाशकारिणो न दण्ड्या इत्यर्थः । आदिशब्देन सूतवत्सादीनां सङ्ग्रहः । सूतवत्सोक्तिः "अदण्ड्या सूतवत्सा च संज्ञा रोगवती तथा । अदण्ड्याः काण-कुब्जाश्च इत्याह भगवान् मनुः । अदण्ड्यागन्तुका गौश्च सूतिका चाभिसारिणी" इति । कुब्जः एकशृङ्गः । सूतवत्सादयः प्रायेण सूतवात्सल्यादयः । अभिसारिणी यूथात् प्रच्युता पुनः स्वयूथगामिनी । परशस्यविनाशे न केवलं पशुस्वामी दण्डनीयः यदपि दापनीय इत्याह हरदत्तः "शस्यादिवारयेद्यस्तु चौर्यं दोषो हयोर्भवेत् । स्वामी यदर्धं दाप्यः पालस्ताडनमर्हति" इति । यदर्ध यदपि यदर्धम् । समूलशस्यनाशविषयमेतत् । अतएव नारदः "समूलशस्यनाशे तु तत्स्वामी प्राप्नुयात् यदम् । यत्नेन गो र्योंसयेद दण्डं स्वामिनि पातयेत्" इति । तत्स्वामी शस्यस्वामी यदं प्राप्नुयात् । पशुस्वामिनः सकाशादिति शेषः । वधोऽत्र कशादिना ताडनम् । न प्राणच्छेदः । पालस्ताडनमर्हतीति वचनात् । यदप्य मरलादिभिः परिकल्पितो देयः । अतएव स एवाह "गोभिस्तु भक्षितं शस्यं यो नरः प्रतियाचते । सामन्ता-दमतं देयं धान्यं यत् तत्र वापितम्" इति । यत् तु यदयाचननिषेधनम् "गोभिर्विनाशितं धान्यं यो नरः प्रतियाचते । पितरस्तस्य नाश्नन्ति न वापि त्रिदिवौकसः" । इत्यशनोदयनन्तु यामादिसमीपस्थनाहतक्षेत्रविषय-मिति माधवाचार्याः । आद्धकालदो गोभक्षितविषय-मिति मदनरत्नकृतः । सर्वसाङ्गत्यासत्त्वे आद्धादिसे आदण्ड्यत्वमाह स एव "अदण्ड्या दोहसूये गावः आद्ध-काले तथैव च" इति । गोभिः आद्धकालादौ भुक्तमति-त्यैवस्करमित्याशयेनाह । व्यासः "आत्मस्थं च द्विजै-र्भुक्तं परिशेषञ्च बान्धवैः । गोभिश्च नरशार्दूल !

वाजमेयाहिग्नियते" इति एतत्पदसमभिव्याहरति मनुः "एतद्विधानमातिष्ठेद्वार्षिकः पृथिवीपतिः। स्वामिनाञ्च पशूनाञ्च पाल्यानाञ्च व्यतिक्रमे"।

स्वायम्भुव पु० स्वयंभुवोऽपत्यम्, तस्येदम् वा अण् ओरोदिति वृद्धौ ओर्गुणे रत्वुक्त्रा संज्ञापूर्वविधेरनित्यत्वज्ञापनात् गुणः अवङ्। १स्वयम्भुपुत्रे मनौ २स्वयम्भुसम्बन्धिनि त्रि० "धाम स्वायम्भुवं यजुः" श्रुतिः। स्त्रियां ङीप्। सा च १ब्राह्मम्। "भार्गवी नारदी वा च वाहेस्त्याङ्गिरसापि। स्वायम्भुवस्य शास्त्रस्य श्रुतयः संहिता मताः" इति तद्धर्मशास्त्रसंहिताश्रुतयम्। तदुत्पत्त्यादिकं यथा

"ततः कालेन महता तस्याः पुत्रोऽभवन् मनुः। स्वायम्भुव इति ख्यातः स विराडिति नः श्रुतम्। तद्वपुषा सामान्यादधिपूरुष उच्यते। वैराजा यत्र ते जाता बहवः संयितव्रताः। स्वायम्भुवान् महाभागाः सप्त सप्त तथापरे। स्वारोचिषाद्या ते सर्वे ब्रह्मतत्त्वस्वरूपिणः। औत्तमिप्रमुखास्तद्वद् येषान्वं सप्तमोऽधुना" मत्स्यपु० ३अ०। "ऋषींस्तेषां प्रवक्ष्यामि पुत्रान् देवगणांस्तथा। मरीचिरत्रिर्भगवानङ्गिराः पुलहः क्रतुः। पुलस्त्यश्च वसिष्ठश्च सप्तैते ब्रह्मणः सुताः। उत्तरस्यां दिशि तथा राजन्! ब्रह्मर्षयः स्मृताः। यामा नाम तथा देवास्त्रायन्त स्वायम्भुवेऽन्तरे। आग्नीध्रवाग्निबाहुश्च मेधा मेधातिथिर्वसुः। ज्योतिष्मान् द्युतिमान् हव्यः सवनः पुत्र एव च मनोः स्वायम्भुवस्यैते दश पुत्रा महौजसः। एतत्ते प्रथमं राजन्! मन्वन्तरमुदाहृतम्" हरिवं० ७अ०।

स्वाराज् पु० स्वः स्वर्गे राजते राज-क्विप्। इन्द्रे अमरः।

स्वाराज्य न० स्वराजः भावः ष्यञ्। ब्रह्मत्वे स्वाराज्यसिद्धिः।

स्वारोचिष पु० द्वितीये मनौ। "ओर्वी वसिष्ठपुत्रश्च स्तम्बः काश्यप एव च। प्राणो दत्तोलिरेवैव दत्तो निधिपवनस्तथा। एते सप्तर्षयस्तात! वायुमोक्षा महाव्रताः। देवाश्च तुषिता नाम सुताः स्वारोचिषेऽन्तरे। हरिर्विभुः सुकृतिज्योतिरापो मूर्तिरव्ययः। प्रथितश्च नभश्चैव नभ ऊर्जस्वलश्च ह। स्वारोचिषस्य पुत्रास्ते मनोस्तात महात्मनः। कीर्तिता पृथिवीपाल! महावीर्या पराक्रमाः। द्वितीयमेतत् कथितं तव मन्वन्तरं मया" हरिवं० ७अ०।

स्वार्थ पु० स्वश्च असौ अर्थः प्रयोजनम् अभिधेयो वा। १स्वप्रयोजने २स्वाभिधेये च "स्वार्थिकः स्वार्थबोधकइति" शब्दर०

स्वार्थिक त्रि० स्वार्थे विहितः ठण्। स्वार्थविहिते व्याकरणोक्ते प्रत्यये। "स्वार्थिकाः प्रत्ययाः प्रकृतितो लिङ्गवचनान्यनुवर्त्तन्ते" महाभाष्यं यथा बह्वृग्वृद्धोक्षा। "क्वचित् स्वार्थिका अपि प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते" महाभाष्यम्। देवता अपक्षपक्षा गुरुकोर इत्यादि।

स्वास्थ्य न० स्वस्थस्य भावः ष्यञ्। १आरोग्ये २स्वस्थोपे अमरः।

स्वाहा अव्य० सु+आ+हु-डा। १देवोद्देशेन हविस्त्यागे अमरः। २अग्निभार्यायां स्त्री "स्वाहेव हविर्भुजम्" रघुः। ३मन्त्रकाभेदे च स्त्री "नमः स्वधायै स्वाहायै" इति पितृगाथा। "प्रकृतेः कलया चैव सर्वशक्तिस्वरूपिणी। बभूव दाहिका शक्तिरग्नेः स्वाहा सुरार्चिनी। दीप्तमध्याह्नमार्त्तण्डप्रभाच्छादनकारिणी। तप्तकाञ्चनदीप्तिश्च शक्तिर्भवपत्नी च सुन्दरी। दग्धुं न शक्नुवन्ति स्म हुताशश्च त्वया विना। त्वन्नामोच्चार्य मन्त्रान्ते यो दास्यति हविर्नरः। सुरेभ्यस्तत्प्राप्नुवन्ति सुराः स्वानन्दपूर्वकम्। अग्नेः सम्पत्स्वरूपा च श्रीरूपा सा गृहेश्वरी। देवानां पूजिता यस्मात् वरदानां भवाम्बिके!" ब्रह्मवै० प्र० २७अ०। ४दुर्गायां शक्तिभेदे "दुर्गा शिवा क्षमा धात्री स्वाहा स्वधा नमोऽस्तु ते" दुर्गापूजामन्त्रः।

स्वाहाप्रिय पु० ६त०। अग्नौ स्वाहापत्न्यादयोऽप्यत्र।

स्वाहाभुज् पु० स्वाहेतिमन्त्रेण त्यक्तद्रव्यं भुङ्क्ते भुज-क्विप्। देवे अमरः। [च मेदि०

स्विद् अव्य० स्विद-क्विप्। १पक्षे २वितर्के अमरः ३पादपूरणे

स्विन्न त्रि० स्विद-क्त। १घर्मयुक्ते २खेदान्विते च ३पक्के "स्विन्नमन्नमुदाहृतम्" स्मृतिः। [अङ्गीकारे।

स्वीकार पु० अञ्चश्च सश्च कारः करणं सु+च्वि+कृ-घञ्।

स्वीय त्रि० स्वस्येदम् छ अयादिनीयैरत्र न कुगिति मन्यते। १निजसम्बन्धिनि २नायिकाभेदे स्त्री नायिकाशब्दे दृश्यम्। [आदित् सूर्यं सूर्च्छितम्।

सुर्च्छ विस्तौ भ्वा० प० सक० सेट्। सूर्च्छति असूर्च्छीत्

सृ गन्धे अक० उपतापे सक० भ्वा० प० सेट्। सरति असारीत् असार्षीत्।

सृ हिंसने क्र्या० पु०प० सक० सेट्। सृणाति असारीत्।

सेक गतौ भ्वादि० आत्म० सक० सेट् अदित् चङि न छुसः। सेकते असेकिष्ट।

सेच्छा स्त्री ६त०। स्वाभिलाषे हेमच०। [धीनसत्यु युक्ते त्रि०।

सेच्छासत्यु प०सेच्छया सत्युर्यस्य। १भीरौ त्रिका० २सेच्छा-

सेद पु० सिद्- भावे घञ्। १पाकभेदे (सेका) २धर्मे गालादितो जलादेः निष्क्रन्दने। क्विप् भावे अण्।

वर्मनिर्णयाध्याये तत्प्रकारादिकं चरकेणाभिहितं यथा "अतः स्वेदाः प्रवक्ष्यन्ते वैद्येयावत् प्रयोजिताः। स्वेदसाध्याः प्रशाम्यन्ति गदा वातकफात्मकाः। स्नेहपूर्वं प्रयुक्तेन स्वेदेनावर्जितैऽनिले। पुरीषमूत्ररेतांसि न सज्जन्ति कथञ्चन। शुष्काण्यपि हि काष्ठानि स्वेदं स्वेदोपपादनैः। मनयन्ति यथान्यायं किं पुनर्जीवतो नरान्। रोगर्तुव्याधितामेद्योनात्युष्णोऽतिसुदुर्दनं च। द्रव्यवान् कल्पितो देशे स्वेदः कार्यकरो मतः। व्याधौ शीते शरीरे च महान् स्वेदो महाबले। दुर्बले दुर्बलः स्वेदो मध्यमे मध्यमो हितः। वातश्लेष्मणि वाते वा कफे वा स्वेद इष्यते। स्निग्धरूक्षतया स्निग्धोरूक्षया व्युपकल्पितः। आमाशयगते वाते कफे पक्वाशयाश्रिते। रूक्षपूर्वो हितः स्वेदः स्नेहपूर्वस्तथैव च। द्रवौ हृदयं हृदौ स्वेदयेत् मृदुनैव वा। मध्यमं वङ्क्षणौ श्रोणिमङ्गावयवमिश्रितः। तृणैर्मेङ्गकैः पिण्ड्या माधुमाराकथापि वा। पक्वोत्पलपलाशैर्वा स्वेदः संहत्य चक्षुषी। सक्तावकोमिः शीताभिः शीतैर्भाजनैरपि। अलाबूनैर्जलजैर्वृक्षैः पिण्डतो हृदयं मृदेत्। शीतमूलाम्बुपरमे सम्यग्गौरवनिग्रहे। सङ्गाते मार्दवे स्वेदे स्वेदनाद् विरतिर्मता। पित्तप्रकोपो मूर्च्छा च शरीरस्यदनं तृषा। दाहः स्वेदातिपीडायामतिस्निग्धस्य लक्षणम्। उक्त लक्षाश्रितोयो यौक्तिकः सम्यग् विधिः। सोऽतिस्निग्धस्य कर्त्तव्यो मधुरः स्निग्धशीतलः। कषायमद्यनिद्यानां मर्मिणां रक्तपित्तिनाम्। पित्तिनां क्षतिसारार्शा रूक्षाणां मधुमेहिनाम्। विदग्धभक्तनाड्यानां विषमद्यविकारिणाम्। आन्तानां मदमूर्च्छानां स्त्रीणां पित्तमेहिनाम्। तृषार्तानां क्षुधितानाञ्च क्षतानामाशरोगिणाम्। दुर्बलातिविशुष्काणामपथ्यौजसां तथा। भिषक् तैमिरिकाणाञ्च न स्वेदमवतारयेत्। प्रतिश्याये च कासे च हिक्काश्वासेष्वजीर्णके। कर्णमध्यां शिरःशूले सरभेदे मदेषु च। अर्दितैकाङ्गसर्वाङ्गपक्षाघाते विनामके। कोष्ठानाहविबन्धेषु शुक्राघाते विजृम्भके। पार्श्वपृष्ठकटीकुक्षिसंग्रहे मन्यास्तम्भे च सुप्तिषु। मूत्रकृच्छ्रे महत्त्वे च शुक्रसारक्षयेऽनिले। पादोरुजानुजङ्घास्फिक्संग्रहे त्वयथावपि। खञ्जीपाङ्गेषु शीते च वेपथौ वातकण्टके। सद्योव्रणाभग्नेषु सम्यग्गौरवसुप्तिषु। सर्वाङ्गेषु विकारेषु स्वेदनं हितमुच्यते। तिलमाषकुलत्थास्नदशतैरामिषौदनैः। पायसैः क्षीरसंसैः पिण्डस्वेदं प्रयोजयेत्। गोखरोष्ट्रवराहाश्वमद्गुभिः सतुषैर्यवैः। सिकतापांशुपाषाणकरीषसपुटैः। स्नेहिकान् स्वेदयेत् पूर्ववैतिकान् सप्रपाचरेत्। द्रव्याण्येतानि सङ्कल्पे यथास्वं प्रसरेष्वपि। भूस्टेषु च जेलाटेषूष्मगर्भस्टेषु च। विधूमाङ्गारतप्तेष्वभ्यक्तः स्विद्यति नाशुभम्। माम्सानूपोदकं मांसं पयोवस्तिशिरस्तथा। वराहमध्यपित्तास्रवस्तिचर्मतण्डुलान्। दत्वैतानि सतक्रान्याद्यो नाड्योस्वेदं प्रयोजयेत्। देशकालविभागज्ञो युक्तप्रेक्षी भिषक्तमः। वारुणार्कतरक्षीरियुमूलकसर्षपैः। वासावंशकरञ्जार्कपत्रैरण्डस्य च। शोभाञ्जनकमैरेयमालतीसुरसार्जकैः। पत्रैरेतैरुपाकृत्य सक्षिप्तं नाड्यस्वेदं प्रयोजयेत्। भूतीकपद्मपूलाभ्यां सुरया दधिवस्तुना। पत्रैरण्डस्य सक्षैर्नाड्यस्वेदं प्रयोजयेत्। अतएव च निर्मूढाः प्रयोज्या जानुकोपरे। स्वेदनार्थं हतक्षीरतैलकोष्टांश्च कारयेत्। गोधूमयवकोलैर्भैरवसानामम्लसंयुतैः। सक्षैरश्वत्थपत्रैरुपनाहः प्रशस्यते। गन्धैः सुरावाः किण्वेन जीवन्त्या मतपुष्पया। उष्णया कुशतैलाभ्यां युक्तया पोपनाहयेत्। चर्मभिश्चोपनद्धव्यः सक्षौमैरपूतिभिः। उष्ट्रोर्ध्वैरजामे तु कौशेयाविकशाटकैः। रात्रौ वद्धं दिवा सक्षेद्दात्रौ दिवाकृतम्। विद्राधपरिहारार्थं स्यात् प्रकर्षस्तु शीतले। सङ्करः प्रसरोऽनाड्योः परिषेकोऽवगाहनम्। जेलाकोऽवभञ्जनः कर्षुः कुटोटमूः कुम्भिकैवा च। कुपोऽवटाकोऽस्रवते स्वेदवन्ति त्रयोदश। तान् यथावत् प्रवक्ष्यामि यथानेवानुपूर्वशः इति। तत्र वस्त्रान्तरितैरवस्त्रान्तरितैर्वा पिण्डैर्यत्रोष्मस्वेदनं सङ्करस्वेदः इति विद्यात्। मृदुमधीधान्यपुलाकानां वेणुवारवसङ्करोत्कारिकादीनां वा प्रस्तरे कौशेयाविकोत्तरप्रच्छदे पक्वाम्लकोलकार्कपत्रप्रच्छदे वा सम्यक्प्रस्वेदगात्रस्य यवानस्योपरि स्वेदनं प्रसरस्वेदः इति विद्यात्। स्वेदनद्रव्याणां पुनर्मूलफलपत्रभङ्गादीनां स्नेहशुष्कपिण्डशतशिरस्कादीनामप्यसम्भवानां वा यवाद्यैर्मस्तुलवणस्नेहोपसंहितानां मूत्रक्षीरादीनां वा कुम्भ्यां वाष्पवदुदमन्यासेतकथितानां नाड्या शरीरोष्मायदलकरञ्जार्कपत्रास्तृतमल्लतया गजायतनसंस्थानवा व्यामदीर्घवा व्यामार्द्धदीर्घवा वा व्यामचतुर्भागाष्टभागमूलाग्रपरिणाहकोतया सर्वतो वातहरपत्रसंवृतच्छिद्रया छिद्रवती विवा-

मितया पातङ्गरसिद्धस्वेदाभ्यङ्गाभ्यो वाष्पमवहरेत् । वाष्पो ह्यनूर्ध्वगामी सिद्धतण्डुलमेदसवमविदहन् शुष्कं स्वेदयतीति नाड्योस्वेदः ३। वातिकोत्तरवातिकानां पुनर्मूषादीनासतक्राद्यैः सुखोष्णैः कुम्भीर्वा पूरयित्वा प्रनाड्यो वा-पूरयित्वा यथार्हसिद्धस्वेदाभ्यङ्गगात्रं वस्त्रावच्छन्नं परिषेचयेदिति परिषेकः ४। वातङ्गरोत्कायक्षीरतेलघृतपित्तरसोष्णसलिलक्षोद्रावगाहस्तु यथोक्त एवावगाहः ५। "अथ जेलाकं चिकोर्भूमिं परीक्षेत इत्यादि"।

(जेलाकशब्दे २१४४ पृ०अस्य लक्षणादुक्तप्रायम्६।)

"अथानस्य प्रमाणेन घनाम्लस्नेहौ शिलाम्। तापयित्वामृतम्लैर्दोषभेषजसम्मतैः। व्योषोष्णैर्वा सर्वाङ्गारान् प्रोक्ष्य चैवोष्णवारिणा। तां शिलामथ कुर्वीत कौशेयाविकसंस्तराम्। तस्यां स्वभ्यक्तसर्वाङ्गः शयानः स्विद्यते सुखम्। रौरवाजिनकौशेयप्रावारादौ सुसंवृतः। एवञ्चोष्णस्वेदः७। कर्षूस्वेदः प्रवक्ष्यते। खानयेच्चयनस्याधः कर्षूं स्थानविभागवित्। दीर्घैरधूमैरङ्गारैस्तां कर्षूं पूरयेत् ततः। तस्योपरि शय्यायां स्वपन् स्विद्यति वा सुखम्८। अनल्पतृणमेधविस्तारां दत्ताकाशमोचनाम्। घनभित्तिं कुटीं कृत्वा कुड्यादौः धूमप्रवेशयेत्। कुटीमध्ये भिषक् शय्यां स्वास्तीर्णोपकल्पयेत्। प्रावाराजिनकौशेयकृत्स्नकम्बलगोलकैः। एवन्तिकाभिरङ्गारपूर्णाभिस्तासु सर्वशः। परिवार्यान्तरारोहेदभ्यक्तः स्विद्यते सुखम्९। य एवाग्निचयस्वेदविधिर्धूमो य एव तु। प्रशस्तायां निवातायां सभायामुपदिश्यते१०। कर्षूं वातङ्गरोत्कायपूर्णां भूमौ निखातयेत्। यद्भागं खिलभागं वा शयनं तत्र चोपरि। स्याच्चयेदासनं वापि नातिसान्द्रपरिच्छदम्। अथ कुम्भ्यां सुखनप्रान् प्रक्षिपेदवसोदकान्। पाषाणान् वोष्मणा तेन तत्स्थः स्विद्यति वा सुखम्११। सुसंवृताङ्गः स्वभ्यङ्गः स्वेदैरिन्द्रियवायनैः। कूपं शयनविस्तारं द्विगुणञ्चापि वेधतः। दैवे निवाते शस्ते च कुर्यादेनः समाचितम्। कृत्स्नशरीरावयवां करोतेरन्धपूरिते। स्वभ्यक्तः सुसंवीतेऽभ्यङ्गः स्विद्यति वा सुखम्१२। वीर्योक्तान्तु करीषाद्यां क्रियाणां यदीपयेत्। शयनान्तः प्रमाणेन शय्यासुपरि तत्र च। तदग्न्यां विधूमायां यथोक्तासुपकल्पयेत्। स्वभ्यक्तः सर्वसम्भाभ्यङ्गः स्विद्यति वा सुखम्। दोषाग्निस्वेदाः स्वेद्येषु सुखः प्रोक्तो महर्षिभिरिति"। इति त्वादृग्विधः स्वेदोऽग्निगुणसंश्रयः। व्यायाम उष्णसदनं गुरुप्रावरणं क्षुधा। वस्तुपानं भयक्रोधावुपनाड्यादयस्तथाः। स्वेदयन्ति दशैतानि नरमग्निगुणाहते। द्रव्यं त्रिविधः स्वेदः संयुक्तोऽग्निगुणैर्न च। एकादृग्वाङ्मनसतः स्निग्धो रूक्षस्तथैव च। द्रव्येतत् त्रिविधं प्रोक्तं स्वेदैरुद्दिश्य कीर्त्तितम्। स्निग्धं स्वेदैरुपक्रम्यः स्निग्धः पथ्यादनो भवेत्। तदङ्गं स्निग्धगात्रस्तु व्यायामं वर्जयेन्नरः" इति। तत्र श्लोकाः "स्वेदा यथा कार्यकरास्तथा वेद्यस्य यद्विधः। यत्र देशे यथायोग्या देशो रक्षश्च यो यथा। स्निग्धादिस्निग्धरूपाणि तथादिस्निग्धभेषजम्। अस्वेद्याः स्वेदयोग्याश्च स्वेदद्रव्याणि कल्पना। त्रयोदशविधः स्वेदो विना दण्डविधोऽग्निना। संप्रवेशश्च षट्स्वेदाः स्वेदाध्याये निदर्शिताः। स्वेदाधिकारे यदाद्यसुश्रुतमेतन्महर्षिणा। स्निग्धेषु प्रतिपत्तव्यमपदेशा पुनर्यतिः"।

स्वेदज पु० स्वेदाज्जायते जन-ड। १स्वेदजाते दंशादिजन्तौ अमरः २स्वेदजातमात्रे त्रि०।

"संस्वेदजविकाराश्च यथा देशेषु भवन्ति च। मानुष्यस्वेदमलजा मक्षिकाद्या भवन्ति च। नवमेघप्रसिक्तायां पिपीलिकगणादयः। संस्वेदजास्तु विज्ञेया दंशमशकजन्तवः। सस्यिदभ्यो धान्यबीजेभ्यः फलेभ्यश्चैव जन्तवः। जायन्ते किमयो विषाः! काष्ठेभ्यो घुणकादयः। तथा शुक्रविकारेभ्यः पूतिकाः प्रभवन्ति च। संस्वेदजाश्च जायन्ते इन्द्रियाः शुक्रगोमयात्। गोभ्यो हि महिषेभ्यश्च मानुषेभ्यश्च जन्तवः। मत्स्यादिभ्यश्च विविधा जलःकृमयो विशेषतः। अण्डान्यपि च सूक्ष्माणि क्षुद्रजन्तूकानि चैव च। गोभ्योऽश्वेभ्यश्चया चैव अष्टादशविधौकसः। माक्षिकाद्या विकाराश्च चतुरुद्देशकर्दमैः। शरावति विकाराश्च करीषेभ्यो भवन्ति हि। एवमादिरसंख्यातो गणः संस्वेदजो मया। सर्वसाक्षिहितो ह्येष प्राक्कर्मवशगः स्मृतः" वाग्भट०।

स्वेदन न० स्विद-णिच्-ल्युट्। गात्रादितो घर्मादेर्निःसारणव्यापारे (भाषरा)। स्वेदशब्दे दृश्यम्।

स्वेदनी स्त्री स्विद्यते पच्यतेऽनया स्विद-ल्युट्। कौड़ियाभेदे (ताकोवा) अमरः। संज्ञायां कन् टाप् च सुश्रुतः स्वेदनिका कन्दुरूपे पात्रे क्षेमच० भर्जनपात्रे शब्दमा०

स्वेर न० स्वस्य ईरन ईर-अच् इडभावः। १स्वेच्छायाम् २स्वइति शब्दे च त्रि० मेदि०।

स्वेरिन् त्रि० स्वेनैव ईरितुं शीलमस्य ईर-णिनि इडभावः। १स्वेच्छाचारिणि स्वतन्त्रे। २व्यभिचारिस्त्रियां स्त्री

स्त्रीप । श्वशुरश्वश्रूस्वसृभगिनीभ्यां स्त्रियां च । "मातृष्वसृयं प्रसवमापद्यन्ति पदन्युत । अतःपरं स्त्रैरिणी स्यात् वन्ध्यौ पञ्चमे भवेत्" भा० आ० १२३ अ० ।

स्त्रीपार्जित त्रि० स्त्रीभ्यः उपार्जितम् । स्वयमर्जिते धनादौ । तस्य विभागो दायभागे दर्शितो यथा

"सम्प्रति विभाज्यमविभाज्यञ्चोच्यते । तत्र कात्यायनः "पैतामहञ्च पित्र्यञ्च यद्धान्यत् स्वयमर्जितम् । दायादानां विभागे तु सर्वमेतद्विभज्यते" । "यद्धान्यदिति चकारः स्वयमित्यनेन संबध्यते स्वयमर्जितमिति चकारादन्यस्यापि तदर्जनं साधारणधनद्वारेणेत्यर्थः । अनुपघातोपघातसम्भवविभाज्यमाह बृहस्पतिर्विष्णुः "अनुपघ्नन् पितृद्रव्यं श्रमेण यदुपार्जयेत् । स्वयमीहितलब्धं तद्यदि कामो दातुमर्हति" । पितृद्रव्योपघाताभावेन द्रव्यद्वारेण नेतरेषां व्यापारः, स्वचेष्टालब्धत्वेन शारीरोऽपि व्यापारो नेतरेषामिति अर्जकस्यैव तदसाधारणं स्वयमीहितलब्धं तदिति हेतुत्वेनोपन्यासात् । तथा च व्यासः "अनाश्रित्य पितृद्रव्यं स्वयङ्गाप्नोति, यद्धनम् । दायादेभ्यो न तद्दद्याद्विद्याधनन्तु यद्भवेत्" । स्वशक्त्यभावेन यत् प्राप्नुमिति सामान्येनाभिधानात् सर्वमेवंविधं स्त्रीधनमसाधारणं द्रष्टव्यम् । स्वशक्त्याप्तस्यापि विद्याधनस्य समाधिकविद्यैः साधारणत्वात् न्यूनविद्याविद्यनिराकरणार्थं विद्याधनत्व पदम् । तथा याज्ञवल्क्यः "पितृद्रव्याविरोधेन यदन्यत् स्वयमर्जितम् । मैत्रौद्वाहिकञ्चैव दायादानां न तद्भवेत्" । मैत्रादिपदं प्रदर्शनार्थं, एवमादिषु प्रायेणानुपघातसम्भवात् । तथा मनुः "विद्याधनन्तु यद्यस्य तत्तस्यैव धनं भवेत् । मैत्रौद्वाहिकञ्चैव साधुपर्विकमेव च" । तथा व्यासः "विद्यायाप्तं यौर्ध्वधनं यच्च यौदायिकं भवेत् । विभागकाले तत्तस्य नान्येऽस्यं सरिक्थिभिः" । पितृपितृव्यादिभ्यः सुदायसम्बन्धिभ्यः प्रसादादिना लब्धं यौदायिकम् । तथा नारदः "यौर्ध्वमाद्यौधनं, हित्वा, यच्च विद्याधनं भवेत् । लौकिकान्यविभाज्यानि प्रसादो यच्च पैतृकः" । आद्यौप्राप्तिकाले लब्धं आद्यौधनम् औद्वाहिकमित्यर्थः, एतानि वर्जयित्वा अन्यदिभजेदित्यनुवर्तते वाक्यान्तरीयम् । तदेवमादिभिः यौर्ध्वादिधनत्वमविभाज्यत्वे कारणं नोक्तं यौर्ध्वाद्यर्जितस्यापि विभागश्रुतेः । तथा च व्यासः "साधारणं समाश्रित्य यत् किञ्चिदुपनायुधम् । यौर्ध्वादिनाप्नोति धनं भ्रातरश्चास्य भागिनः । तस्य भागद्वयं देयं शेषास्तु समभागिनः । साधारणद्रव्येणार्जितस्य धनस्य विभागं वदति । तथा नारदः "कुटुम्बं बिभ्रयाद्यो भ्रातुर्यौ विद्यामधिगच्छतः । भागं विद्याधनात्तस्मात् स लभेतांशतोऽपि सत्" । बिभ्रयादित्यनेनैवचननिर्देशात् यदि विद्याभ्यासतो भ्रातुः कुटुम्बभरो भ्राता स्वधनव्ययशरीरायासाभ्यां संबध्नीयति तदा तद्विद्योपार्जितधने तस्याप्यधिकारः । तथा "वैद्योऽविद्याय नाकामो दद्यादंशं स्वतो धनात् । पित्र्यं द्रव्यं समाश्रित्य न चेत्तेन तदर्जितम्" । पत्रपदं साधारणधनपरं तदनाश्रित्यार्जितं वैद्योऽविद्याय अनिच्छन्न दद्यात् वैद्याय विदुषे पुनः साधारणधनव्यतिरेणार्जितं दद्यादेव । तथा च गौतमः "स्वयमर्जितमवैद्येभ्यो वैद्यः कामं न दद्यात्" । असाधारणधनशरीरव्यापारार्जितं स्वयमर्जितं अविद्वद्भ्यो दातुमनिच्छन् न दद्यात् विद्वद्भ्यः पुनर्दद्यादेव । एतच्च विद्याधनमात्रविषयम् । तदाह कात्यायनः "नाविद्यानान्तु वैद्येन देयं विद्याधनं क्वचित् । समविद्याधिकानान्तु देयं वैद्येन तद्धनम्" । तन्त्रोक्तरीतविद्यापदम् समाभ्यां समाधिकपदाभ्यां संबध्यते तेन समविद्याधिकविद्यानां दातव्यं न्यूनविद्याविद्ययोः पुनरनधिकारः । "तदेवमादिवचनैर्विद्यौर्ध्वादिधनेष्वपि साधारणधनोपघातानुपघाताभ्यां विभागाविभागयोरवगमात् तस्यैव प्रयोजकत्वात् तत्पदवत्त्वेव स्मृतिः कल्पनीया, उपघातार्जितं विभजेदिति, न पुनः यौर्ध्वादिपदवत्त्वपि, अवश्यकल्पनीयसामान्यस्मृतिकल्पनयैवोपपत्तेः । लोकाकाधिकरणन्यायस्यायमेव विषयः । यद्वा न्यायप्राप्त एवायमर्थः, यद्धनेनार्जितं तत् तस्मिन् जीवति तस्यैव, असति विशेषवचने, यत्र पुनः साधारणधनमात्रैकस्य व्यापारोऽपरस्य धनशरीराभ्यां तत्रैकस्यैको भागोऽपरस्य भागद्वयं न्यायावगतमेवं स्थितम् । एतेन चैतदपि सिध्यति, यत् साधारणधनोपघाते सति यस्य यावतोऽंशस्य खलस्य महतोपघातः, तस्य तदनुसारेण भागकल्पना कार्या । किञ्च कात्यायनवचनम् "विभक्ताः पितृविक्ताश्चैकत्र प्रतिवासिनः । विभजेयुः पुनर्द्रव्यं यत्नमेतोदयो यतः" ।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्यसङ्कलिते वाचस्पत्ये सकारादिशब्दार्थसङ्कलनम् ।

ह

हकारः व्यञ्जनेषु ऊष्मवर्णभेदः। कण्ठस्थानोच्चार्यः। "हकारं पङ्कजैर्युक्तमनलःस्वामिना संयुतम्। औरसं तं विजानीयात् कण्ठमाकुरसंयुतम् शिवोक्तेः पञ्च मात्रिवर्णसंयोगे वरबीजार्थश्च। तद्बीजारम्भे आभ्यन्तर-प्रयत्नः जिह्वाग्रेण कण्ठस्थानस्य स्पर्शनमर्थः। "अघोऽस्पृष्टायणक्षीषङ्क्षमस्पृष्टाः शलसहेति" शिवोक्तेः। बालप्रयत्नास्तु घोषसंवारनादा महाप्राणश्च। अस्य ध्येयरूपं कामधेनुतन्त्रोक्तं यथा "हकारं शृणु पार्वेन्द्रि! चतुर्भुजमहायकम्। कण्ठलीढयुतं रक्तविद्युल्लोपम। रजःसत्त्वतमोयुक्तं पञ्चदेवमयं सदा। पञ्चप्राणात्मकं वर्णं त्रिशक्तिसहितं सदा। त्रिबिन्दुसहितं वर्णं कुरु भावय पार्वति!"। अस्याधिष्ठातृदेवताध्यानञ्च वर्णोद्धारतन्त्रे यथा "करवीरसमारूढां सादृहासां दिगम्बराम्। अक्षमाल्याभयभुजां वरदामम्बुजेक्षणाम्। नागेन्द्रहारभूषाढ्यां जटासंकटमण्डिताम्। सर्वसिद्धि-प्रदां नित्यां धर्मकामार्थमोक्षदाम्। एवं ध्यात्वा हकारन्तु तन्मन्त्रं दशधा जपेत्"। मालतीमाधवस्य दशमाङ्केऽस्यवक्तव्यता काव्यादौ प्रथमप्रयोगे खेदःफलं इ॰र॰टीकायामुक्तं यथा "मः मोक्षं कुरु खेदस्य विनयमपि च लं वः सम्पदं करोति"। अकारादिवर्णानां प्रयोगे फलादिकं यत्र भवतीति तत्रैवोक्तं यथा "व्याद्यौ गद्यपद्ये वचसि च सकले प्राक्तनादौ समोऽयम्" इति। एतेषां फलाधार-निरूपणप्रकारे "नायको वर्णते यत्र फलं तस्य समादिशेत्। अन्यथा तु कृते काव्ये कवेर्दोषावहं फलम्" तस्य प्रतिप्रसवो यथा "देवता वर्णते यत्र क्वापि काव्ये कवीश्वरैः। मित्राभित्रविचारो वा न तत्र फल-कल्पना। देवतावाचकाः शब्दा ये च भङ्गादिवाचकाः। ते सर्वे नैव निन्द्याः स्युर्लिखिता गणतोपि वा"। अस्य वाचकशब्दाः तन्त्रोक्ता यथा "हः शिवो गगनं हंसो नागलोकोऽग्निकायपतिः। नक्षत्रीशो जगत्प्राणः प्राणेशः कपिलामलः। परमात्मात्मजो जीवः वराकः शान्तिदोऽक्षजः। सर्गोऽभयोऽरुणश्चास्यात् कुटकुण्डनिवा-रकाः। लक्ष्मीर्हरिहरः शम्भुः प्राणशक्तिर्बलाटजः। खकोपवारणः सूची चैतन्यं पादपूरणम्। महालक्ष्मीः परं नादो मेघनादो विमर्दनः। विन्दुर्दुर्गा प्रिया देवी मेनकाख्यः महेश्वरः। दक्षपादः सदा शम्भुः शत्रुनाशो यः सोमसञ्ज्ञकम्" वर्णाभिधानम्। "शुक्लश्च हकारो-ऽंशुः प्राणः प्राणः शिवो विधुः। अक्षरो नक्षत्रीशश्च हंसः शून्यञ्च शाम्भवी। अनन्तो नक्षत्री जीवः पर-मात्मा ललाटजः" इति बीजवर्णाभिधानम्। "हकारो नक्षत्रीशोऽपि हंसः प्राणोऽङ्कुशः प्रिये। महेशो नक्षत्री चैव वराको गगनं रविः। बिन्दुः शून्या-महाशून्यः प्राणश्च परमेश्वरि!" रुद्रयामले ८पटले।

ह अव्य॰ हा-ड। १पादपूरणे अमरः २सम्बोधने ३निश्चये ४खेदे ५निन्दायां मेदि॰ ७आमन्त्रणे च। ८शिवे पु॰ हलन्ते १०शून्ये ११आकाशे १२रक्षे १३अग्नौ १४धारणे पु॰ मेदि॰। १५पापहरणे १६चन्द्रे शब्दर॰ १७सकोप-वारणे २०शब्दे च एकाक्षरकोषः।

हंस पुंस्त्री॰ हस-अच्-पृषो॰ वर्णोत्तमः। स्वनामख्याते १पक्षिभेदे अमरः स्त्रियां ङीष् २निर्लोभत्वे ३विष्णौ ४ब्रह्मणि ५परमात्मनि "हंसे तनौ सच्चरिते चरन्तम्" नैष॰। ६यतौ ७अतिभेदे ८मन्त्रभेदे ९देहस्थवायुभेदे १०अश्वभेदे मेदि॰ ११गुरौ १२पर्वते शब्दर॰। १३शिवे अमरः १४कर्णस्थिते १५श्वेते हेमच॰। १६विष्णुहे अमरः। १७अजपामन्त्ररूपे वर्णे च "हंकारेण बहिर्याति सकारेण विशेत् पुनः। हंसेति सततं मन्त्रं जीवो जपति सर्वदा" इति तन्त्रम्। अजपाशब्दे ८६ पृ॰ दृश्यम्।

हंसवाक्य भेदाः तल्लक्षणञ्च यथा "हंसाः स्निग्धाः मधुरा गुरवो हिमाः। वातश्लेष्मप्रदाश्चापि बल-शुक्रकरा मताः" भावप्र॰ तद्धिम्बगुणाः "हंसडिम्बं परं बल्यं हृद्यं वातनाशनम्। पाके लघुतरं प्रोक्तं सर्वामय-विनाशनम्" राजनि॰। अस्य दर्शनादेः शुभाशुभत्वं वसन्त-राजशाकुने उक्तं यथा "काशासु सर्वासपि दर्शनेन हंसस्य शब्दस्य तु सर्वसिद्धिः। नामानि हंसस्य गृ-ह्णोति यस्तु प्रयाति नाशं दुरितानि तस्य। चौरैः समं दर्शनमात्रशब्दे निर्धिर्हितोदेऽथ भयं रतीशे। युद्धं चतुर्थे नृपतिप्रसादः स्यात् पञ्चमे हंसरवे नराणाम्। यतिभेदहंसलक्षणं परमहंसशब्दे ४२१७ पृ॰ दृश्यम्। प्राणस्य हंसपदार्थत्वे हेतूक्तिः पदार्थादर्शे "अक्षरासे चैव श्वासे च हंस इत्यक्षरद्वयम्। तस्मात् प्राणस्तु हंसाख्य आत्माकारेण संस्थितः। नामेरुच्छ्वासनिश्वास स्तुटवा-म्रेऽर्धं व्यवस्थितिः"।

हंसक इ॰ हंस इव कायति कै-क। १पादकटके नूपुरादौ

अमरः । संज्ञायां कन् । २राजहंसे शब्दच० स्वार्थे क । ३हंसशब्दार्थे "लघुर्गुरुर्लघुर्दत्त स्तालो हंसकः स्मृतः" स्यात्तदा० चक्रे ४तालभेदे ।

हंसकीलक पु० "नारीं पादहयं कृत्वा कालक्रीडयुगोपरि । कटिभान्दोलयेत् यत्र बन्धोऽयं हंसकीलकः" सुरतोपि० कोक्ते रतिबन्धभेदे । [भाषिण्यां स्त्रियां त्रिका० ।

हंसगद्गदा स्त्री हंसस्येव गद्गदः स्वरो यस्याः । मधुर

हंसगामिनी स्त्री हंस इव गच्छति गम–णिनि । १हंसतुल्यगतिगामिन्यां स्त्रियाम् । हंसेन गच्छति णिनि ङीप् । २ब्रह्मशक्तौ । ३हंसेन गन्तरि त्रि० ।

हंसदाहन न० हंस इव श्वेतं सुरभित्वात् दाहनमस्य । अगुरुचन्दने शब्दच० ।

हंसनादिनी स्त्री "गजेन्द्रगमना तन्वी कोकिलालापसंयुता । नितम्बे गुर्विणी या स्यात् सा ज्ञेया हंसनादिनी" इत्युक्तलक्षणायां नार्याम् शब्दमाला ।

हंसपदी स्त्री हंसस्येव पादाः मूलान्यस्याः पद्मादित्वात् ङीषि पक्षे ह्रस्वः । गोधापदीलतायाम् राजनि० । [इत्या० ।

हंसपाद न० हंसस्य पादः तद्वर्णोऽस्यास्य अच् । चिह्नभेदे

हंसपादिका स्त्री हंसस्येव पादाः मूलान्यस्य कप् कापि अत इत्वम् । हंसपदीलतायां राजनि० ।

हंसपादी स्त्री हंसस्येव पादा मूलानि सन्त्यस्याः अच् गौरा० ङीष् । हंसपदीलतायां रत्नमा० ।

हंसमाला स्त्री ६त० । षड्ज्यामारेण स्थिते १हंसयूथे २कादम्बे हंसे च शब्दच० । [भाषणशीलम् राजनि० ।

हंसमाषा स्त्री हंसा विशुद्धः माषः तदाकारः पर्णं यस्याः । हंसरथ पु० हंसः रथो वाहनं यस्य । १ब्रह्मणि २तच्छक्त्यां त्रिका० हंसवाहनादयोऽप्यत्र । [वपधातौ राजनि० ।

हंसलोमन् न० हंस इव लोमशं लोमयुक्तम् । कार्पासे

हंसलोहक न० हंस इव लोहकम् । चित्रके धातौ हेमच०

हंसवती स्त्री हंसस्तत्पदाकारः मूले यस्यस्याः मतुप् मस्य वः ङीप् । २हंसपद्याम् अटा० । ३हंसयुक्ते त्रि० ।

हंसबीज न० हंसस्य बीजमस्य । हंसडिम्बे राजनि० ।

हंसाद्रि पु० हंसस्याद्रिरिव लोहितत्वात् । चिह्नभेदे ।

हंसारूढ पु० हंसमारूढः या+रूढ–क । १ब्रह्मणि २तच्छक्त्यां ब्रह्माण्यां स्त्री हंसाधिरूढ उभयत्र सरस्वत्यां स्त्री । [हेमच०

हंसाभिख्य न० हंसस्येवाभिख्या शुभ्रत्वात् यस्य । रूप्ये

हंसी स्त्री हंसस्य भार्या ङीप् । १हंसयोषिति शब्दर० हारिणत्वचरपादके २छन्दोभेदे च "नौ नौ नागत्यारा गो गो वसुभुवनयतिरिह भवति हंसी" छन्दो० । ३हंसजातिस्त्रियाञ्च ।

हंसोदक न० । "नादेयं नवसद्दूर्वेषु निहितं सल्लघ्वम्बु शुभः यामिन्याञ्च निविडमिन्दुकिरणैर्मन्दानिलान्दोलितम् । एलाद्यैः परिवासितं त्रिदशकैः पित्तोष्णदाहे हिते मूर्च्छारक्तमदात्ययेषु च हितं हंसन्ति हंसोदकम्" राजनि० उक्ते जलभेदे ।

हंहो अव्य० हंसित्यव्यक्तं जहाति हा–डो । १सम्बोधने "हंहो चिन्तयचित्तचन्द्रमणयः" चन्द्रालोकः । २दर्पे ३दम्भे ४प्रश्ने च शब्दर० ।

हक पु० हक् रलयोरक्यं कायति कै–क । गजसमाह्वाने जटा०

हक्के(क्का) अव्य० हंसित्यव्यक्तं जयतेऽत्र जप–डे डा वा । नाट्यक्रियायां नटाभिनेयवृत्ते चेटीसम्बोधने अमरः टाबन्तस्तावर्थे भरतः आदनोऽव्ययम् वसन्तराजः ।

हक्कि पु० हंसित्यव्यक्तं अयति जि–डि । क्षुधायां जटा० ।

हक्किका स्त्री हक्कौ क्षुधायां कायति शब्दयते कै घञर्थे कर्मणि क । भाव्यां भावप्रत्ययः क्षुधः हेतुत्वात्तस्यास्तथात्वम् ।

हट दीप्तौ भ्वा० प० अक० सेट् । हटति अहटीत्–अहाटीत् ।

हटपर्णि न० हटं दीप्तिं पिपर्ति पॄ० ब० नि । शैवाले शब्दर० ।

हट्ट पु० हट–ट टस्य नेत्वम् । क्रयविक्रयस्थाने (हाट) अमरः । "प्रतिहट्टपथे घरट्टशालिति" नैष० ।

हट्टचौरक पु० हट्टे प्रकाशिते स्थाने एव चौरः स्वार्थे क । (डाटचोर) चौरभेदे शब्दर० ।

हट्टविलासिनी स्त्री हट्टं विलासयति वि+लस–णिच्–णिनि ङीप् । १गन्धद्रव्यभेदे अमरः । २हरिद्रायाञ्च भावप्र० । [हठति । अहाठात्–अहठात् ।

हठ बीभत्से सक० अन० त्कारे स्तुतौ च अक० भ्वा० पर० सेट् ।

हठ पु० हठ–अच् । बलात्कारे अमरः २प्रश्नाञ्च भेदः ।

हठपर्णी स्त्री हठते स्तूयते हठ–अच् हठं स्तूयमानं पर्णं यस्याः ङीप् । १शैवाले त्रिका० २कुम्भिकायाञ्च ।

हठयोग पु० हठेन बलात्कारेण योगः । प्राणायामादिक्रियाभ्यासजे राजयोगे विनैव परमात्मसाक्षात्कारहेतौ चित्तवृत्तिरोधात्मके योगे ।

योगश्च द्विविधः हठयोगः राजयोगश्च । तत्र हठयोगः क्रियाविशेषसाध्यः हठदीपिकादावुक्तप्रकारः । राजयोगस्तु भावनाविशेषसाध्यः पातञ्जलादावुक्तः । स च पतञ्जलिशब्दे ३२०३पृ० दर्शितः । हठयोगोऽत्र साङ्गोऽभिधीयते तत्साधनमासनादिः उभययोगयोरपि परस्परसापेक्षतया

एककार्यकरत्वम्। "हठं विना सिध्यति राजयोगो नर्ते हठाच्चापि न राजयोगः। तदाभ्यसेत् पूर्वमतः सुनिष्पन्नत्वं हठं सद्गुरूक्तोऽभिलक्ष्यम्। अभ्यासेन विना हठेन सुचिरं साङ्गस्य योगस्य वा योगी याति न राजयोगपदवीं मध्येऽन्तरालेर्युतां। हठो वा तस्याः सरक् च मनकैर्योगेऽक्षतन्त्रः क्रियायुक्तः सिद्धिसुपैति शास्त्रपठनाद्वा योगसिद्धिमेवेत्। यो नास्तिकोऽभ्यासविहीन श्रद्धयैवाधिको वै बहुभाषितो यः। अपथ्यभोजोऽमितभग्नदरिद्रो न योगसिद्धिं लभते कदाचित्। योगस्य बीजं परमं क्रियैव क्रियैव योगस्य फलप्रदात्री। सङ्केतविद्योगगुरोः प्रलभ्या सुधीरतो योगपरस्य नान्यत। स्यात् सङ्गः सिद्धतीर्थैर्वटि सुकृतवशात् प्राग्भवाभ्यासजोऽयं यद्द्वारा पश्चिमेन त्वरितमिह फलं ह्यश्नते कापि लोके। तत्सर्वं नान्य माद्या शिरसि परिगतेनानिलेनेच्छतेऽदस्तस्मादभ्यास एव त्वरितसुचिदायोगतत्त्वीर्थलब्धात्। अङ्गत्वकल्पात्मनि शास्त्रवाङ्मयेऽस्मादनार्थं मनसः प्रयत्नः। अभ्यास एवं चिरकालः सेवितः सत्कारवान् स्याद् दृढभूमिरेष। जितो भवति मारुतोऽभ्यसनभूरिदार्ढ्यान्ततः लघानुरभिवर्द्धते सततकुम्भकाभ्यासतः। गते क्षुतभुजोद्गतामशनमेति पाके सुखं रसादिकसुधातपः स्फुरतु याति देहो बलम्। अहाभ्यासबन्धो बलात् सहसा तदा जारयं स्याच्च दोषा अशेषाः। विशुष्यन्ति विण्मूत्ररागादयो वै रुजां कोटिजन्मार्जितव्याधयश्च। नाड़ीविशुद्धिश्च सञ्जायते तां विना स्यादयं चिरकुम्भसंभृतिः। गुरूक्तो युक्तविशेषतो ध्रुवेऽग्निसे सुषुम्णा कुरुतेऽग्निदीपनम्। प्रत्याहारात् प्राग्जिताऽऽधिवर्योगीन्द्रोऽयो चालयेत् कण्ठकूपीं स्वाम्। सङ्कल्पाभ्यासतश्चित्ताऽऽकाशचक्षुर्हृदं ब्रह्म रन्ध्रान्तरे स्यात्" हठस०।

योगदण्डे खलैव "सुविधये सुधार्मिकमुपतेर्वक्तुमिच्छतीतमथे शुचौ। सुकृतमाचिनि माचिनि वेभवैर्मनसि योगविधौ मतिमाश्रयेत्। अतिनिगूढपदं मयकोऽब्रवीत् तदिह नाप्यविजितमन्दरा। उपरकण्ठकुण्डदयोऽब्रवीत् विगतमानमणीऽवहते मलम्। यमनियमसदासनचतुष्प्रयत्नजमन्त्राभ्यासोऽब्रवीत् विगतसंभ्रमं विजन्तु। बाह्याभिघातरहित गतभूतरक्षा योगार्थमेवमथवाऽऽह मठा विधेयः। धनुःसमाश्रयहते मिथाग्निजलवर्जिते। एकान्तमठिका मध्ये स्वास्थ्यं हठयोगिनां हठसङ्केतः। "अल्पाहार मरण्यगतविटपं नात्युच्चनीचायतं सम्यग्गोमयशान्द्रिप्तमयनं निःशेषजन्तूज्झितम्। बद्धे मण्डपकूपवेदिरुचिरं प्राकारसंवेष्टितं प्रोक्तं योगमठस्य लक्षणमिदं सिद्धैरभ्यासिभिः" हठप्रदीपिका। "द्वारं क्षुद्रं योगमठस्य तत्तं व्यायामतस्तुरुरमार्द्यम्। विस्तारतश्चापि रवीन्द्रभूपाङ्गुलं सुरम्यं रमणीयमध्यम्। निर्वातमुन्मिरसच्छमाद्यदोषरहितं भारतदोषशोभि। विशोध्य नाड़ीमलषट्कमन्दने विकाशं हृदि सुस्थिरे च" हठस०।

तत्रोचितकालः "एकाहे वाऽथ द्विकालं त्रिकालं प्राणायामं मध्यरात्रे भजेत। यामे रात्रेः पश्चिमे पूर्व एव पूर्वाह्णे वाऽथ मध्ये प्रदोषे" हठस०।

निषिद्धावस्थादि "न शीते नात्युष्णे अनधिकलहे न हि तथा सुधायामाघाने विकलवपुषाऽऽचेतसा वा। अजीर्णेऽम्लेऽजीर्णे न च विहितवानावसितहृते प्रभुक्तौ व्यामङ्गाकुलहृदि न युञ्जादनिलघृतः। चिन्ताक्रोधौ मूत्रफलपुरीषोऽभ्यासं न योगस्य कदापि कुर्यात्। कार्यान्तिसक्तौ रतिकार्यतत्परौ नानेकरोगाधियुतौ जनालौ। रथ्यान्तरे सिन्धुसरित्तटान्तरे चिरन्तने देवसदने चैत्यदेशे। योगं विदध्यान्न कदापि साधकः सुदीर्घसूत्रादि भवेत् क्षतेऽत्र। अनादृत्य यः साधको देशकालौ प्रयुञ्जीत योगं हि दोषास्तु तस्य। प्रकुप्यन्ति देहेऽन्तरायाः प्रदोषैर्जडत्वं मूकत्वबाधिर्यमुख्याः। जृम्भितया जड़ता च विमूकता बधिरताऽन्धत्वमहादहनज्वराः। कुविधेऽङ्गमये परियुञ्जता बहुधि योगमयी भव दोषकाः" हठस०।

वर्ज्यमाना-सदोषाः "कामोदय क्षुत्प्रमतीव लोभः प्राग् योगदोषानतिकोपयुञ्जान्। विहाय युक्तः सुसमाहिताक्षो युञ्जीत योगं मनसा स्थिरेण" हठस०।

तद्दोषजयोपायाः "निद्रा सत्त्वनिषेवणेन दलयेद्धृत्वा च मिश्राहारे रहेद् दोषरघौ हृषा धृतिहरौ चित्तेन चेतो गिरौ। रक्षेत् संहितया प्रमादत रतक्षासं तृदंभं धिया सङ्कल्पक्षय जयेन कामभिति वै क्षो योगदोषान् जयेत्" हठस०।

वर्ज्यमेवे "अत्याहारः प्रयासश्च प्रजल्पो नियमाग्रहः। जनसङ्गश्च लौल्यश्च षड्भिर्योगो विनश्यति। "सदाचारश्चित्तयाद्वैर्यो तत्त्वज्ञानाच्च निश्चयात्। जनसङ्गपरित्यागात् षड्भिर्दोषैश्च सिध्यति। अहिंसा सत्यमस्तेयं ब्रह्मचर्यं क्षमा धृतिः। दयार्जवमिताहारः शौचं चैव यमा दश। तपःसन्तोष आस्तिक्यं दानमीश्वरपूजन-

नम्। सिद्धान्नस्यैव होममेतिच तथोक्तम्" हठप्र०।
आहारः "आहारशुद्धौ सत्त्वशुद्धिरिति श्रुतेः मिताहारस्य योगाङ्गत्वात् योगाङ्गाहारो यथा "न जीवनं देहस्थितिश्च अन्नेनान्नेऽस्वपानं न मद्यैर्विना क्वचम्। योगे तदर्कं सद्यजिद्वल्लभादं भक्ष्याद्यदुग्धं मितमत्र सेवयेत्। न कन्दमूलानि गुरूणि शीतोष्णान्यत्र पानानि वल्लभदानि। सक्तप्रदायुर्बलवह्निदानि पूतानि च क्षीणि हितानि योगे। हठप्रदीपकादिभिः सुपथ्यवर्गं ईरितः। सुनाड़िशोधनादतु भजेन्नतं पुरा शुभम्" हठस०। न च वर्गो यथा "गोधूमशालियवषष्टिकशोभनान्नं क्षीराज्यखण्डनवनीतसितामधूनि। शुण्ठीपटोलफलकानि च पट्टशाकं मुद्गादि चाल्पमुदकं च सनौद्भपथ्यम्। क्षीरधात्री च जैवन्ती मृत्काशी च पुनर्नवा। मेघनादो च पर्वैते शाकवर्गः प्रकीर्तितः। मिष्टं सुमधुरं स्निग्धं पथ्यं धातुप्रपोषणम्। मनोऽभिलषितं योग्यं योगीभोजनमाचरेत्" सुस्थं हृतं क्षीरमिति हृद्यं स्यात् नाड़ीविशुद्धावेव मूलबन्धे। योगो बलं ह्यग्निमतीव धत्ते सत्त्वान्वितोऽल्पास्थितमाड़िशुद्धिः" हठस०। "कन्दं च शाकादिकमूलभक्ष्यं विहाय दध्यन्नघृतावतिक्तम्। हतौ दनक्षीरसपूरितोदरं यमी च गोधूमविकारमाश्नेत्" हठच०। अन्यान्तरे "पीत्वा क्षीरं पयोभिश्च योगी बलमवाप्नुयात्। सितांशयुक् च एकं च हितं क्षीरं न केवलम्। गोधूते च हविष्यान्नं भुक्त्वाभ्यासं समाचरेत्। एवं वाढं भजेदत्राप्यमेऽङ्गि मलशोधनम्।
निकृष्टभक्ष्यवर्गः "सक्तेऽ रैवतुवरीजकूपः काथी भृशं शुष्कथिता ह्यनन्ता। क्षीरोषधाद्यवचणा हितात्मा हविष्यभुक्तं यतिनिक्षपथ्यम्। आरण्यके सैन्धवमल्पसक्तं सदार्द्रकं केऽपि वदन्ति भक्ते। आक्षाजसक्तुः ससिताज्यदुग्धं पयोऽथ वा केवलमग्निपक्वम्" हठस०।
वर्ज्याहारः "स्निग्धं भृशं वाऽभ्यशमेव रूक्षं क्षीरप्रभूताम्ल विदाहिभोज्यम्। दध्ना च तक्रेण रजाऽदलाम्लं च मूर्याम्लमपथ्यसक्तम्।। पुंस्वापहाः सुरुचका अपथ्या आमाश्च बल्या कफपित्तदोषाः। सितातियोगः क्षमिकत्व नेहो गुरुर्विकारी सह फाणितेन। अत्यल्पमिष्टाशनतो न योगः स्यात् साधकस्यात्यवलस्य नूनम्। योगानुगुप्त्यैन ततोऽन्नजन्यविकृतोदितान्यत्तरा न भूरिः" हठस०। "कट्वम्लतीक्ष्णलवणोष्णहरिच्च शाकं सौवीरतैलतिलसर्षपमत्स्यमद्यम्। आजाविमांसदधितक्रकुलत्थकोलपिण्याकविष्टभुवराहमहिष्यमाद्यः। भोजनमहितं विद्यात् पुनरुष्णीकृतं तथा रूक्षम्। अतिलवणादिकयुक्तं कटशनशाकोत्कटं वर्ज्यम्" हठप्र०।
वर्ज्यानि "वर्जयेद्दुर्जनप्रीतिं वह्निस्त्रीपथसेवनम्। प्रातःस्नानोपवासादिकायक्लेशादिकं तथा" हठप्र०।
"मद्यं गर्भोच्छ्रयानं सुतल्पतिष्टद्वारामपाखिलवेदशास्त्रालोकः सुगीतं सततमतिरूक्षं क्षेमरूप्याम्बराणि। सत्यं राज्ये च सङ्गः कुसुममलयजे सम्पदः स्फीतिशोर्वे ताम्बूलं चेति सर्वं विषयसुखमयाकर्षकं वर्जयेत्तत्। नित्यस्नानाद्यं व्रतं शौचसक्रियाध्यानं ध्येयं मन्त्रजाप्यं च दानम्। नेड़ारामाद्यास्तथा कल्पना वै धर्मा एते योगविघ्नः प्रदिष्टाः" हठस०।
आहारमानम् "स्वाक्षाभिसङ्ख्यादिकसङ्ख्यिकद्वयं प्राक् प्राग्पूर्वोदरेऽशनस्य। स्नाग्नो विधेयो ह्यतु साधकेन दुग्धाद्यभावे क्रमकृच्छ्रभङ्ग्या" हठस०। अत्र ह्यक्षकेन स्वस्वाहारः प्राणायामे विधेयः। यथोक्तं सनातनसिद्धान्ते "अभावे शालिमुद्गादिभोजनं सुस्निग्धद्वयम्। ततो ह्यामः मनैः कुर्यात् प्राणे पूर्णे तथोदरे" अक्षार्द्धाभावे हतदुग्धयोरभावे मितभोजने कुम्भकवृद्धिक्रमानुरूपः मन्दमन्दमशनस्य चयितः। न हि प्रथमाभ्यासे यथा यथा कुम्भकवृद्धिर्भवति तथा तथा कुम्भकपूर्वोदरत्वात् कुम्भजाग्निना क्रमजितवायुवेगतया जिताग्निर्भवति तथा तथाऽशनस्यायः। साधकस्य योगानुसारेणाङ्कुरः आरोग्यौजसतत्साहबलौजःप्रभृतिकरश्च भवति न प्रथमम्" हठस०। अन्यत्र "आहारं चतुरोद्योगी क्षणपक्षे कलाक्रमात्। शुक्लपक्षे यथा चन्द्रस्तथा कुम्भोऽस्य वर्द्धते"। योगसारसङ्ग्रहे। "ततो येन केनाप्युपायेन पित्तं सदाभ्यासिना पालनीयं प्रयत्नात्। विशुद्धो हि यस्मिन्नरे द्योत एषः शुभो ज्ञानवह्निस्वरूपः प्रकाशी। सुखं प्रसरे पवनेऽमनं सहन्द्रप्रवेशे शयनान्नुपानम्। इत्यादि चान्यत् सुधिया विचार्यं पथ्यानि योगाभ्यसने हितानि"।
योगनिषेधावस्थादिभक्षाः सद्यः पुरातनत्वाच्च क्रिमियुक् मरुक् क्षोदरं गौरवं चाऽलसत्वम्। यदैतदुभयेषु विद्यते साधकेन तदा प्राणरोधोऽङ्गि तस्मिन्न कार्यः" हठस०।
योगारम्भकालः "अत्यन्नतैलाः सान्द्रतमा विशुष्काः शाकद्रवाः पक्वमलादयोऽपि। अभ्यासिनां प्राणनिरोध एष तदा विधेयः शुभयोगसिद्धिदः" हठस०।

नित्यकर्म व्याकर्तव्ये। "न चालस्येन करणं निपीड़येत् भ्रुवं मितायो मितनिद्रयोक्तिः। प्रातःशिरःस्नानमयो न रोचयेदाकृदयोगोऽपि कदापि योगी। आवश्यके तृष्णजलैविधेयं स्नानं न कार्यं किमरारिणा तत्। स्नानं प्रगेनिष्टमिदन्तु कण्ठस्नानं स्मृतं बैरिह मध्यमेऽह्नि। व्यायामभावपरुषं भ्रुवमेत्यदेशमलम्बु पानमतिबिम्बमयं :- देव। निद्रां दिवा निशि च जागरणं च चिन्तां क्लेशावहं यदखिलं तदिहापि जह्यात्। यत् स्वाल्पमप्य दुःखाऽक्षमपि न भजेत् तदुगिरा मानसेन कायेनाधीप्रदग्धे नेहि न हि वनितायाश्च सेवां विदध्यात्। छित्वा हृदं तथाकृतिमथनमति प्राप्तिपीड़ां विरोमं भित्वाभित्वत्वगुद्धिं स्नानमनमतां सकृति संत्यजेच्च। यायामकस्यश्च ततोऽङ्गमर्दनं कुर्याद् वरिष्ठोत्तरसाधकस्य। स्यादङ्गमर्दनेन तथा दृढत्वं वायोर्जयो देहरुदोः समाप्तिः। पानाशने कर्म सुखावहं यद्योगस्य विघ्नो न हि तेन किञ्चित्। सेव्यं तदेकं परमार्थवस्त्वैर्यं मनःक्लेशकरं त्यजेत्तु। अभ्यासिना भूमिस्थे मठे वा न तैलदीपः प्रविधेय दैवचे। अधिकृत्य ज्वलत्येव सुकल्पितो दृक् प्राणो विकाशं दृतीत्यसुं त्यजेत्। अतो योगमठे घृतदीप एवोप युज्यते" हठप्र०। "प्रत्याय प्राङ्मुखाये रङ्गसि च परितः साधकः प्रत्यरोधस्य व्यासं प्रातरङ्गैर्मितघटिकमयो पीठमुद्वादि कुर्यात्। आयामं चात्र सार्द्धप्रहरयुगलकान्तं ततः पश्चमल्पं मुञ्जीयादल्पतोऽल्पोऽप्यलवणविदाहुञ्जितं चाज्यदुग्धम्। प्राणायामसमाचरेत् प्रथमके यामे निशः साधको यामैकं यदनं भजेदनुक्रमी प्राणावरोध अयेत्। शोधादां घटशोधनादिकमयो यामे निशायां अयेत्तुर्ये नाडिविशोधनं त्वतिदृढोऽभ्यासस्तु याममाक्षकः। मध्ये मध्ये चित्तविभ्रान्तिक्षेतोः साम्यं सदा संभजेदासनम्। अभ्यासान्तेऽभ्यासिना खलमलं संभोक्तव्यं भूरिवारं घृतम्। मध्ये मध्ये चारणं मेरुचालनमभ्यासादौ संभजेतामिदृढः। सर्वाङ्गीणा नाडिका दोषपूर्णा आभ्यां सदृः शुभंयन्त्वध्यमाक्षाः" हठप्र०। (आभ्यां चारणमेरुचालनाभ्यां दोषा दृढाचरणमक्षाः)

गजकरणी "दृढ़ नाटकाभ्यासतः कूर्मवायोर्जये मूलबन्धेन चापानसिद्धिः। जये खादुदानस्य जालन्धरेण समानस्य चालेन च प्राणवायोः। भवेत् गजकरणेषा समानोदानयोर्जयम्। पक्वामाशयगजीर्णनाड्यादिखिलशोधिनी। क्षोभकृत्कफपित्तकृमिवातकफापनी। वाजं बलं कृत्प्रसादं वह्निदीप्तिं सदृद्धनम्। धत्ते लाघवमङ्गेषु प्राणस्य सुखवाहिताम्। कृमिकण्ठकोदर्दगुल्मा मूलाजीर्णादिरोगहृत्। इन्ति गजकरणेषा नामेरूर्ध्वमधोमलान्। पक्वापक्वान् रोगहेतून् वह्निः प्रज्वाल्य पातयेत्। कोष्णदादाशयान्तं गलान्तं क्षालयेत् भ्रुवम्। आभ्यां विशुद्धकोष्ठो यः समाधापानयोर्गतिम्। सूक्ष्मां देहस्थितां सूतिकामतिवत्सुधीः वैनीयिकासमां चित्ते कोष्ठान्तः परिवर्तयेत्। नाड़ीसञ्चारविज्ञानमनयोः सकलं यथा। जानाति साधकः गुह्यो नाड़ीसंस्थानसंविदम्। (एवं धौत्यामपि नास्त्यूर्ध्वमङ्गं शेषम्)

"मत्स्याक्रमादौ विरुध्यात् सम्यग् भजेद्वन्धसङ्गमयो खेचरीं च। ततो वारिपानं प्रकुर्यात् सुधांशोः सुधां साधयेयां प्रयागे श्रुतिज्ञ। विना ग्रन्थिभेदं विना चक्रभेदं विना ब्रह्मरन्ध्रप्रवेशं जितस्य। खगस्याजना कार्यसिद्धिं विनाऽसौ न सिद्धिर्न योगो न शून्यत्वाभः" हठप्र०।

आसनफलम् "संप्राप्तबीजभावो यमनियमाभ्यासयं योगः। प्राणायामासनकैरङ्गवान् साधकस्य भवेत्। स्यादासने स्थैर्यमरोगितङ्गे लाघवं दुःखसुखोष्णशीतैः। द्वन्द्वैरजितोऽखिलभूयते नाऽनन्ते समापत्तिरतो यमाभ्याम्। साधनत्रयमिदं मरुज्जये प्रोदितं प्रमितजल्पिरिष्टदा। शक्तिचालनमथ साधनद्वयम् नाभिवायुधृतिनाडिचालनम्। नियमेव यमैर्विनापि रोगाः प्रविनश्यन्ति सुसंयतस्य पीठैः। चिरकालपदान्तरा असाध्याः यमिनः साधुजितासनस्य पुंसः" हठप्र०। (यमाभ्यां यमनियमाभ्याम्)

कुक्कुटासनम् "संस्थाप्य पद्मासनमत्र सम्यक् करौ तु जानूरुयुगान्तरे दृढम्। निवेश्य संस्थाप्य तले धरायां व्योमस्थ उक्तं स्थिति कुक्कुटासनम्" हठप्र०।

उत्तानकूर्मासनम् "कुक्कुटासनबन्धस्थो दोर्भ्यां संबध्य कन्धरे। भवेत् कूर्मवदुत्तान एतदुत्तानकूर्मकम्" हठप्र०।

धनुरासनम् "पादाङ्गुष्ठौ पाणियुग्मेन धृत्वा कर्णावाकर्षेत् धनुर्यत्। कुर्याच्चापाकर्षणं प्रोक्तमेतदासनं दोषजिद्व्याधिशुद्धौ" हठप्र०।

मत्स्येन्द्रासनम् "वामोरुमूलार्पितदक्षपादं जान्वोर्बहिर्वेष्टितवामदोष्णा। प्रगृह्य तिष्ठेत् परिवर्तिताङ्गो मत्स्येन्द्रनाम्नोदितमासनं स्यात्। मत्स्येन्द्रपीठे जठरं प्रदीप्तं प्रचण्डरुग्मण्डलखण्डनाच्च। अभ्यासतः कुण्डलिनी प्रबोधं दत्ते स्थिरत्वं हि ददाति पुंसाम्" हठप्र०।

पश्चिमतानासनम् "प्रसार्य पादौ भुवि दण्डरूपौ दोर्भ्यां च पादद्वितयं सृदीत्वा। जानूपरि न्यस्तललाटदेशोऽभ्यासेदितं पश्चिमतानमाहुः। इति पश्चिमतानमासनाख्यं पवनं पश्चिमवाहिनं करोति। उदयं जठरानलस्य कुर्यात् उदरे कार्श्यमरोगतां च पुंसाम्" हठप्र०।

मयूरासनम् "धरामवष्टभ्य करद्वयेन तत्कूर्परे स्थापितनाभिपार्श्वः। उच्चासने दण्डवदुत्थितश्च मयूरमेतत् प्रवदन्ति पीठम्। हरति सकलरोगानाशु गुल्मोदरादीनभिभवति च दोषानासनं वै मयूरम्। वह्निकदग्धभुक्तं भस्म कुर्यादशेषं जनयति जठराग्निं जारयेत् कालकूटम्" हठप्र०।

शवासनम् "उत्तानशववद्भूमौ शयनं तु शवासनम्। शवासनं श्रान्तिहरं चित्तविश्रान्तिकारकम्" हठप्र०।

सिंहासनम् "गुल्फौ च वृषणस्याधः सीवन्याःपार्श्वयोः क्षिपेत्। दक्षिणे सव्यगुल्फं तु दक्षगुल्फं तु सव्यके। कक्षौ तु जानुनोः स्थाप्य स्फिचौ संपस्पृशेत् च। व्यात्तवक्त्रो निरीक्षेत नासाग्रे न्यस्तलोचनः। सिंहासनं भवेदेतत् पूजितं योगिभिः सदा। बन्धत्रयस्य सन्धानं कुरुते चासनोत्तमम्" हठप्र०।

भद्रासनम् आसनशब्दे ८८६पृ० दृश्यम् तत्फलम् "भद्रं कफक्लेशमीरकारि" हठप्र०।

कूर्मासनम् "गुल्फद्वयेनापरिपीड्य पायुं जातद्वयं भूमितले निधाय। कूर्मासनं स्यादिति योगिवर्यैरयोतिवातामयहारि चोक्तम्" हठप्र०।

बद्धपद्मासनम् "स्थित्वा समं वरसिजे ऋजवङ्घ्रियोर्युग्मं रधःपुरकूर्परकौ विधाय। बद्धोर्ध्वपाणितलयुग्म तदुत्तमाङ्गमाङ्गुष्ठयुगे ललाटं न्यस्येद्दृशौ नासिकाग्रे। उत्तान एव चिबुकं हृदयेऽर्प्य तिष्ठेत् कुर्वन् समीरणनिरोधनमेकचित्तः। काये यदोदर चदेति च भूरिदाहोऽधोवायुनिःसृतिरदेति तदा क्रमेण। संमोचनीयमिदमासनमाद्यधीभिर्मन्दं विनाशयति घोरतरव्यराधिम्। सन्दीपने ऽनलबलस्य च वह्निरोगे संघं प्रभञ्जनपरिपाचनमासनं स्यात्" हठप्र०।

वृश्चिकासनम् "धरामवष्टभ्य करद्वयेनोरः पार्श्वयोः स्थापितस्वकूर्परः। इषीव पृष्ठप्रतिमाङ्घ्रिपाणी धृत्वाऽऽस्य पीठे चिबुकं विधाय। यत्रेति मन्निष्ठति साधकस्तत् विधापूर्वं वृश्चिकसंज्ञमासनम्" हठप्र०।

मूलबन्धासनम् "सामाङ्घ्रिपाण्यूर्ध्वमथ तदुच्चकैर्युंदानमालम्ब्य भूरि निगीर्य साधकः। अक्षं विधायास्यपदं सुगुल्फतो ऽधो दक्षपादं वसु वामजानुनि। विन्यस्य वह्वा सवलेऽनुजानन्वरं समं स्थापितसर्वगात्रः। मङ्गल्यवत्स्याच्चुरनल्पचेता भ्रूमध्यदृग् दोर्युगसंधृतोरः। इदं मूलबन्धासनं योगसिद्धिप्रदं दीपनं जाठराग्नेरतीव। ध्रुवं प्रकुरुतेन्दीपनं मूलवर्चोजिदर्शोपहृल्लासमेहानां विनाशि। समवाहनमाशु मारुतस्य विदधात्यूर्ध्वगतिं जयं च सिद्धेः। विहिते किल विष्टरेऽत्र पायौ भवती वह्निशिखा सदोपयाति। भुजगी परिभासराद्यवस्था विबुधैरूर्ध्वगतिस्त्वपानवायोः" हठप्र०।

गोमुखासनम् "सव्ये क्षिप्त्वा दक्षगुल्फं तु पूर्वं पार्श्वे यत्र स्याप्यते सव्यमेव्य। दत्त्वा वामं गुल्फकं पृष्ठपार्श्वे तत् पीठं स्यात् गोमुखं गोमुखाभम्। अपानसिद्धिं विदधाति मूलबन्धाभिधमेव मन्दरार्थः। धौताश्च नोलेर्वितनोति सिद्धिं सुसाधकस्यासनमेतदग्र्यम्" हठप्र०।

कुक्कुटासनम् "किञ्चित् तिर्यक् साध्यमास्याथ जानूर्ध्वं धृत्वा संपरावर्त्तितेन। क्षिप्त्वा मूले बाहुमाधाय तिष्ठेदेतत् पीठं कुक्कुटं वह्निकारि" हठप्र०।

पार्श्वावधानासनम् "समानभूमौ शयनं विधायोत्तानौ करौ पार्श्वयुगान्तराले। पृष्ठे मिथः साधु निबध्य यत्र पार्श्वावधानासनमुक्तमेतत्" हठप्र०।

उत्कटासनम् "युजा स्फिचोः स्थीयत अर्द्धजानुर्यत्रासने पादतलद्वयोपरि। स्फिगभ्यां मनागुत्कटकं धरित्रीमस्पृश्य पीठं खलूत्कटाख्यम्" हठप्र०।

पद्मासनम् "वामोरूपरि दक्षिणं च चरणं संस्थाप्य वामं तथा दक्षोरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां दृढम्। अङ्गुष्ठौ हृदये निधाय चिबुकं नासाग्रमालोकयेदेतद्व्याधिविनाशकारि यमिनां पद्मासनं प्रोच्यते" हठप्र०।

प्राणायामाङ्गपद्मासनम् "उत्तानौ चरणौ विधाय विधिवत् संस्थितौ योगिराजानौ सकरौ विधाय च मिथो अङ्गे समाहृत्य च। नासाग्रे दृगभावधाय चिबुकं चोत्तम्य वक्षस्यलं मूले साधु वरत्रयाऽभिकलयेदेतत् सरोजासनं मत्। अपानसंस्थाप्य मनैः स्वशक्तितः प्राणं समाहृत्य च कुम्भकं चरेत्। धृत्वा यथा शक्त्यनुरेचयेन्मरुदं सदं कृतमम्बुजासनम्। समस्तदोषज्वरदाहमोहपित्तामयघ्नं सकलं सुखावहम्। प्राणः समोऽस्थिं चलति क्षणेन सुनेरनुष्ठानविधौ सरोरुहे" हठप्र०।

करसंपुटपद्मासनम् "कृत्वा संपुटितौ करौ दृढतरं बद्धा तु पद्मासनम्। गाढं वक्षसि संविधाय चिबुकं ध्यानञ्च

नश्येन्नहि । सारंसारमपानमूर्ध्वमनिलं प्रोज्झ्याधयन् पूरयन् सक्तन् प्राणसुपैति रोधमतुलं शक्तिप्रभावाद्तः" हठयोगः ।

सिद्धासनम् "योनिस्थानकमङ्घ्रिमूलघटितं कृत्वा दृढं विन्यसेन्मेढ्रे पादमथैकमेव हृदये कृत्वा हनुं विन्यसेत् । स्थाणुः संयमितेन्द्रियोऽचलदृशा पश्येद् भ्रुवोरन्तरं चैतन्मोक्षकपाटभेदजनकं सिद्धासनं प्रोच्यते" घेरण्डसंहितायाम् ।

वीरासनभद्रासनस्वस्तिकासनानि आसनशब्दे दृष्टव्यानि ।

सुखासनम् "येन केन प्रकारेण हृदं स्थैर्यं च जायते । तत् सुखासनमित्युक्तमशक्तस्तु समाश्रयेत्" घेरण्डसंहिता । इदमेव "स्थिरसुखमासनमिति" पात० सूत्रितम् ।

षट्कर्मोपक्रमः "सुखासने दृढो योगी वशी हितमिताशनः । गुरूपदेशमार्गेण प्राणायामं समभ्यसेत् । यावद्वायुः स्थितो देहे तावज्जीवितमुच्यते । मरणं तस्य निष्क्रान्तिस्ततो वायुं निरोधयेत् । चले वाते चलं चित्तं निश्चले निश्चलं तथा । योगी स्थाणुत्वमाप्नोति ततो वायुं निरोधयेत् । मलाकुलासु नाडीषु मारुतो नैव मध्यगः । कथं खादुन्मनीभावः कर्मसिद्धिः कथं भवेत् । शुद्धिमेति यदा सर्वं नाड़ीचक्रमनाकुलम् । तदैव जायते योगी प्राणसंग्रहणे क्षमः" इत्युपक्रम्य "यदा तु नाड़ीशुद्धिः स्यात्तदा चिह्नानि बाह्यतः । कायस्य कृशता कान्तिस्तदा जायेत निश्चितम् । जठराग्नेर्विवृद्धिः स्यात् नादाभिव्यक्तिरारोग्यं जायते नाड़िशोधनात् । मेदश्लेष्मादिनाशार्थं षट्कर्माणि समाचरेत् । अन्यथा नाचरेत्तानि दोषाणां समभावतः । धौतो वस्ती तथा नेती लाटकं नौलिकं तथा । कपालभाती चैतानि षट्कर्माणि प्रचक्षते । कर्मषट्कमिदं गोप्यं घटशोधनकारकम् । विचित्रगुणसन्धायि पूज्यते योगिसङ्घैः" हठा० ।

धौती "चतुरङ्गुलविस्तारं हस्तपञ्चदशायतम् । गुरूपदिष्टमार्गेण सिक्तं वस्त्रं शनैर्ग्रसेत् । पुनः प्रत्याहरेच्चैतदभ्यासाक्लेन्नकर्मवित् । कासश्वासप्लीहकुष्ठं कफरोगाश्च विंशतिः । धौतीकर्मप्रभावेण शुध्यन्त्येव न संशयः" हठप्र० "हृद्रोगाः प्लिहदोषाश्च पञ्चदशप्रकारा रोगाश्च विंशतिरेते धौतिकर्मणः क्षयं यान्ति । चतुरङ्गुलविस्तृतं सुमृदुलं सिक्तं सुवस्त्रं तनु । स्नात्वा गोक्षुरविष्टरे सुमनसैरेतत् ग्रसेत् साधको मन्दं चानु विनिर्हरेत् कफगदव्याप्तेषु धौती स्थिता" हठप्र० ।

वस्ती "नाभिदघ्ने जले प्रायुक्तनाभ्युत्कटासनः । आधाराद् कृष्णं कृत्वोदग्रं वस्तिकर्मविदु । गुह्यमङ्घ्रीकोदरं चापि वातपित्तकफोद्भवम् । वस्तिकर्मप्रभावेण क्षोभन्ते सकलामयाः । धात्विन्द्रियान्तःकरणप्रसादं दद्याच्च वह्निं दहनप्रदीप्तिम् । अशेषदोषोपचयं हि हन्यात् कुर्यमानं जलवस्तिकर्म" हठप्र० ।

"जलं पायुविन्यस्तनालस्य मार्गात् जले नाभिदघ्ने समाकृष्य चार्द्रम् । चलत्युत्कटे विष्टरेऽपानकोषात् जलं याति तन्देह्यम्बुना वस्तिकर्म" (नालं वंशादिसुच्छिद्रनालिका) । घटावुत्कटविष्टरे परिगतः प्रोत्थाय सम्यग्जलं पायुद्वारविकाशकोचविधिना वायूद्वाकर्षयेत् । आपूर्यं हृतिवत्तु तन्दमितो मौल्या प्रचाल्यानिलं कृत्वाऽधोमलसंकुलं विसृजेत् सक्तिं योगी बहिःकोडगम् । अत्र वस्तिकर्मणि गोसुखमेव प्रशस्तमनुभूतमिति सङ्केतः । अत्र सर्वकोष्ठमलानां कोष्ठशोधनपूर्वकदूरत्वेन बहिःक्षेपित्वेन वा भवति । तदुपायसङ्केतेन वस्तिकर्म कर्त्तव्यम् । पूर्वोक्तविधिना गोसुखे चोत्कटासने स्थित्वाऽपानद्वारोर्ध्वमजलं किञ्चिदुदहेत् । तदूर्ध्वं शङ्खासने स्थित्वा समाकृष्य नाभेरुपरि हृदग्रान्तं कर्त्तव्यम् । पुनरुत्कटासनेन जलं मुहीत्वा प्राग्वच्चाधो विरेच्यं वस्तिकेन स्वेयं विधेयम् । एवं वस्तौ वस्तिकेन चैवं सर्वं कोष्ठं जलपूर्णं कृत्वाऽभितः कोष्ठं विभाव्यान्त्रसन्धिगतमन्त्रादिदोषपङ्कपटलघनमलादि दूरीकृत्य पश्चाद्बहिस्तज्जलं कृत्वा क्रमेण न त्वरयेत् । तदाऽनेन विधिना कोष्ठः प्रक्षालितवस्त्रवद्दोषान्तदोषो भवति" हठप्र० ।

नेती "सूत्रं वितस्ति सुस्निग्धं नासानाले प्रवेशयेत् । मुखाच्निर्गमयेत् साऽपि नेती सिद्धैर्निगद्यते । कपालशोधनी कार्या दिव्यदृष्टिप्रदायिनी । जत्रूर्ध्वजातरोगौघं नेतिराशु निरस्यति च" हठप्र० ।

"स्निग्धसूक्ष्मसदृशं सुनिर्मलं षड्वितस्तिमितसूत्रमद्भुतम् । संप्रवेश्य लघुनासिकाबिले वक्त्रतो रहसि निर्गमयेच्च तत् । नेतीति कर्मोदितमेतदार्यैर्जत्रूर्ध्वजातामिलरोगहारि । कपालसंशोधनकारि कार्यं दिव्यदृशञ्च धत्ते" हठप्र० ।

लाटकम् "निरीक्षेत निश्चलदृशा सूक्ष्मलक्ष्यं समाहितः । अश्रुसंपातपर्यन्तमाचार्यैर्लाटकं स्मृतम् । स्फोटनं नेत्ररोगाणां तन्द्रादीनां कपाटकम् । प्रयत्नात् लाटकं गोप्यं यथा हाटकपेटकम्" हठप्र० । अस्य फलान्तरं हठप्र० उक्तं

यथा "सिद्धे सक्थिन् नासिकायैचषद्दततनुरुक्कोगवान् साधकः स्याद् भ्रूमध्यं च क्रमेणाकलयति सतताभ्यासतः खेचरीञ्च। दिव्यां दृष्टिञ्च धत्ते जनयति यमिनो योगनिष्पत्तिसिद्धिं मूर्ध्वस्थान्मोरुहे वै पवनहृदयोरक्रमेणानुलोम्यम्" प्रकारान्तर यथा "प्रातः सप्तत्याय सुखासने गतः समभ्यसेत् त्राटकमेक एव। प्रसार्य दृष्टिं नतु लक्ष्मीलेत सुलक्ष्यलं तत् रहस्योत्तिष्ठः। कथ्यमतोऽक्षात् स्थिरतां समृतः सधीरनेत्रे इति लक्ष्यदीक्षा। विधाय किञ्चित समये विलोचने संसद्य पश्चात् झटिति प्रसार्य। पश्येत् परोनिश्चलमेकधीः सं पश्येत्तु यावत पुरतोऽर्कबिम्बम्। समभ्यसेत्तावदिमां क्रियां चेत् सुनिर्मला दृष्टिरनेन वै स्यात्" हठप०।

नौलीकर्म तच्च द्विविधं वाह्यमान्तरं च तत्र बाह्यं यथा "द्रव्यापसव्यं जघु नासिकाभिर्व्यावर्त्य वेगैः क्षतदोर्युगः कौ। कृत्वा भ्रमं सर्वतिक यावतांसस्तुन्दस्थनाकोत्थितमेवमीक्षेत" हठप०। "क्षमन्दामन्दवेगेन तन्दं सव्यापसव्ययोः। यतयो भ्रामयेदेव नौलीयोगः प्रचक्षते। मन्दाग्निसन्दीपनपाचकाग्निसन्धानमानन्दकरी सदैव। अशेषदोषामयशोषणी च हठक्रियाऽसौ जयतीह नौली" हठप्र०। आभ्यन्तरकुक्कं हठरत्नावल्यां यथा "रङयावर्त्य वेगेन तथा विलोमया पुनः। उभाभ्यां भ्रामयेदेषा वृत्तान्तरा कीर्त्तिता मया"।

कपालभाती "लोहकारस्य भस्त्रावत् कृत्यात् सव्यापसव्यतः। कपालभाती विख्याता कफामयविशोधिनी" हठप्र०। "सहोहकारधमनीव च संप्रपूर्य्यैकं नासिकापुटमरं सुविरेचयच्च। योगी द्वितीयमिति भस्त्रिकयेव शश्वत् सव्यापसव्यरिचालनमत्र कार्य्यम्" हठप०।

चक्रीकर्म "सक्थिग्रं मसृणेन वा सुहविषा मध्याङ्गुलीयुग्मकं सार्द्रं न्यस्य प्रसार्य वनकैः वायुं घृटन्ले क्रियात्। ऊर्ध्वं सर्वमिहाभितोऽत्र नलकाद्यं भ्रामयेदन्तरे यावत् प्रायुविकाश चङ्क्रवति संयोक्तेति चक्री बुधैः। कृत्वेति चक्रीविधिमादरेण प्रक्षालयेत्तद्विधं ततो हठम्। आमार्दितोणान्मिति प्रकृत्यात् यथा सुदाक्षं त्रयविंशं भवेत्। तथाङ्गुलीनां त्रिचतुःक्रमेण संख्या भवेत् प्रायुविकाशनावधि। नलान्त्रगाढ़ाहतिदुर्मलान्तः स्यान्मूत्रचक्रस्य विकाशनं च" हठप०। "प्रायुक्कं प्रसार्यान्तरङ्गौ भ्रामयेत् भृशम्। यावद् गुदविकाशः स्यात् चक्रीकर्म निगद्यते। मूलव्याधिगुल्मरोगो नश्यत्येव न संशयः। मलगुल्मदीपनं च जायते चक्रिकर्मेदं हठरत्नावली।

गिलिकर्म "यदृच्छिष्टकामलक्ष्योः विधानमथो खलली कथितोपजिह्वा। तदयकं तर्जनीमध्यमाभ्यां संमन्थयेद् घ्रो सुकराकलय। गिलीति कर्मोदितमार्यवर्यैः सन्धिप्रलीनामयफोदशारि" हठप०।

गजकरणीकर्म "यदगतपदार्थानुद्दमेदेव नित्यं पवनगमनमार्गेकण्ठनालप्रवेशात्। क्रमपरिचयपक्षो वायुमार्गो भवेद् गजकरणमितीव प्राहुरार्याहठज्ञाः। (अपानवायोरूर्द्धकरणात्। पवनोर्द्धकरणेनवा। पाच्याकर्षणेन यद्वस्तु तदुद्दमेत्। कण्ठनालप्रवेशात्। कण्ठे नालस्य प्रवेश परण्डनालस्य प्रवेशकरणात्। तदा क्रमपरिचयक्रमेण वस्तुपरिचयः स्यादित्यर्थः) हठप०। "प्राक् स्थितोत्कटविष्टरे समतनुर्नौल्यानकोत्थापनं कृत्वाऽधानमनूर्ध्वमीरयपथा गल्यौ विधायोद्दमेत्। यत् प्राग्भक्षितमन्नपानमथ वा नालप्रवेशाद्वले तत् पश्चादमितं वमेदनुविधिः प्रोक्तो हठज्ञैरिह। आसने गोरुखे स्थित्वा कृत्वा भूमौ करौ दृढम्। नच ऊर्ध्वं वायुकृष्टिं नाडादुत्थाप्य चालयेत्। वक्त्रापमेवं विहिते दोषाभक्षितसंयुतः। एवं गजकरण्युक्ता भक्षितोद्दमनक्रियेति"। वायुकर्षणं अपानेन सह प्राणस्य प्रकाममूर्ध्वाकर्षणम्। नाडोत्थानसमकालं कार्य्यमिति भावः। अस्यार्थः उत्कटे आसने स्थित्वा वक्त्रयुग्मं वङ्क्षणद्वयं जानुद्वयोपरि संस्थाप्यानुन्नताधोमुखः आस्यमुत्कटिपृष्ठ आश्रिताङ्गोनालं कृत्वादातु पश्चादायुमूर्ध्वं विधाय सादरवेगैरग्नितदुद्दमेत्। यदि कदाचिन्नोर्ध्वमशित याति तदोत्थायानमुत्कटिपृष्ठो जानुद्वयं तिष्ठन् दोर्भ्यां धृत्वा प्राग्वदुद्दमेत्" हठप०।

शङ्खप्रक्षालनम् "नासपुटेन सलिलं परिपीय वक्त्रमार्गेण तद्बहिरुद्धो वमयेत् सुधीरः। पीत्वैकवेन पुटेन च नासिकाया वक्त्रेण वारि वनकैर्बहिरुद्दमेद्या। शङ्खप्रक्षालनमिदं कफपित्तहरं परम्" हठप०।

वायुसाधनम् "इदानीं खेचरीसाधनं कर्त्तव्यं वायुसाधनम्। येन संसारचक्रेऽस्मिन् रोगहीनो भवेद् ध्रुवम्"। शिवसंहिता "राजदन्तयुगलान्तमस्पृशन् संक्षिपेत् रसनां तदन्तिके छिद्र (काक) चञ्चुपुटमारुतं पिबेत् प्राणसंयममेतदुत्तमम्"। "जिह्वां क्षत्वाऽऽकृष्य लम्बे दन्तैर्दन्तौ गाढमापीड्य सद्यः। मन्दं मन्दं यः पिबेद् गच्छवाहं योगी। पूर्णः सोमलः सर्वदुःखैः त्रिपुरा-

सारसमुच्चये। एतदभ्यासप्रकारः "नलिकासदृशीं काकीं विधाय पूरयेत् तया। श्वसनं कुम्भयेद्वाऽथ रेचयेत् काकचञ्चुकम्" कुम्भकपद्धतिः। "हिक(काक) चञ्चुवदास्येन वायुं परिपूर्य्यातु निरोधयेद्धि वायुम्। रसनामुपरिभ्रुवं विधायामृतधारां पिबतीह यः सुधीः। अर्धं रेचयेद् प्राण ऊर्ध्वेन कृता शीतली काकचञ्चाख्य एषः। सद्दृन्दयोगप्रवीणोऽत्र मर्त्यो भवेदेव संसाधनात् सिद्धिभाग् द्राक्" कुम्भकपद्धतिः। आस्ये स्थिरीभूते प्राणायामं कुर्य्यात् तत्प्रकारः प्राणायामशब्दे ४५१२ पृ० उक्तप्रायः अधिकमत्रोच्यते।

"मात्राप्रमाणयुक्तात् प्राणायामोऽयमोङ्कारात्। रेच्यः प्राणापानावूर्ध्वमधः सन्निरुध्य यत्नेन। प्राणायामे पद्मपीठे स्वच्छाकूर्चादौ सन्निरुध्येन्दुनाड़ीम्। वायुं नासिकाङ् अनैर्नातियुक्त्या व्याकोशोर्ध्वं पूरयेत् कोटरान्ते। यथा खगवक्त्रा लघु धारयित्वा नाड़ीं ततः पिङ्गलया विरेचयेत्। निरोधकोशं विपरीतमध्यं हृदास्थिरेणाभ्यसनं सुनिश्चरेत्। येन लक्षेत् तेन निरोधकोशं कृत्वा पुरान्येन विरेचयेत् अनैः। यान्येवमभ्यासरतस्य पुंसः स्थितं स्वरूपे चलचित्तहत्तयः। यथाशक्त्याकृष्य काकीं पूरयेदुदरं अनैः। यथाशक्त्याकृष्टं पश्चाद्रेचयेदविरोधतः"। कठयोगे "प्राणं चेड़िकया पिबेद्विधिवतं भूयोऽन्यया रेचयेत्। पीत्वा पिङ्गलया समीरणमथो बद्ध्वा त्यजेदन्यया। सूर्य्यं चन्द्रमसोरनेन विधिनाऽभ्यासं समातन्वतां शुद्धा नाड़िगणा भवन्ति यमिनां षण्मासतश्चोर्ध्वतः" कठस०।

"तत्र भूतिशुद्धिप्राणायामं कृत्वा तदनेऽभ्यासक्रमसंख्यासहितकुम्भकत्रयाभ्यासिप्रथमत्रयध्यानाभ्यां सार्द्धमासत्रयं कृत्वास्याग्नेयोपपातकपातकसहितपापपुरुषनिरासनद्वारा मनोवहनाड़ीगतमानसकामक्रोधादिमलशुद्धये यथोक्तपथ्येकान्तसेवापूर्वकं विधायान्तु शारीरनाड़ीमलशुद्धिः षण्मासं विधेया" कठस०। सनातनसिद्धान्ते "निरालम्बमनाभूत्वा प्राणायामं समभ्यसेत्। अनैरेव शतपर्य्यन्तं चतुर्वारं समभ्यसेत्। प्रातःसायञ्च मध्याह्ने अर्द्धरात्रौ विशेषतः। याममात्रं यदा पूर्णं भवेदभ्यासयोगतः। एकवारं प्रकुर्वीत तदा योगीन्द्रजन्मभम्। षड्भिर्मासैश्च शतैकञ्च प्राणायामांश्च निश्चयः। 'षण्मासमभ्यसेत्यैव शुद्धा नाड़ीगणास्तथा। ततो दृढिक्रमेणैव प्रयत्नेन च धीरधीः। बद्धपद्मासनो योगी प्राणं चन्द्रेण धारयेत्। धारयित्वा यथाशक्ति पूरयेत् सूर्य्यनाड़िका। पुनः सूर्य्येण विधिवत् रेचयेत् शनकैः शनैः। यथा सूर्य्येण पूरयेत् तथा कुम्भेन धारयेत्। ततः शशिनाड़िकया रेचयेत् शनकैः शनैः। पुनः सूर्य्यनाड़िकया पूरयेत् शनकैः शनैः। यथाशक्त्या धारयित्वा पुनः शशिनाड़िकया रेचयेत्। एवं

योगी प्राणायामपरो भवेत्" इति योगचन्द्रिकायाम्। "प्राणायामाक्षरः षष्टिं कुर्यादेवमहर्निशे। चत्वारिंशच्च मध्याह्ने सन्ध्यायां विंशतिर्भवेत्। अर्द्धरात्रे विंशतिः स्यादेवं प्राणविनियहः" इति। "रङ्ध्रा वायुमाकृष्य परपित्तोदरस्थितम्। मनैः षोड़शमात्राभिरकारं तत्र संस्मरेत्। पूरितं धारयेत् पश्चाद्दक्षाच्छ तु मात्रया। उकारमूर्त्तिमत्रापि स्मरन् प्रणवं जपेत्। यावद्दु वा शक्यते तावद्धारयन् जपसंस्थितः। पूरितं रेचयेत् पश्चान् मकारेणानिलं बुधः। मनैः पिङ्गलया विप्र! द्वात्रिंशत्मात्रया पुनः। प्राणायामो भवेदेष ततश्चैनं समभ्यसेत्। प्रस्वेदजनको यस्तु प्राणायामेषु सोऽधमः। कम्पनं मध्यमं विद्यादुत्थानं चोत्तमं तथा। पूर्वं पूर्वं प्रकुर्वीत यावदुत्तमसम्भवः। उत्तमे तु सुनिष्पन्ने प्राणायामे सुखी भवेत्। प्राणो जयति तेनैव देहस्थान्मलतोऽधिकः। देहस्योच्यते तेन जितासनपरिग्रहः"। योगसारावल्याम्। "सरेचपूरैरनिलस्य कुम्भैः सर्वासु नाड़ीषु विशोधितासु। अनाहताख्यो बहुभिः प्रकारैरन्तः प्रवर्त्तते सदा निनादः" इति। "अक्लिन्नमाकृते प्राणादि कृत्वा मनः स्थिरम्। निर्भयं साधकः कुम्भद्वाभ्यासमाश्रयेत्। ध्यायेन्मूले कर्णिकान्तः कुण्डलीरूपमीश्वरम्। नादासंक्रमणं शान्तं शिवध्याने क्रमात्। मूर्त्तिध्यानानन्दपीने नादानन्दे प्रलीयते। यथा यथा मनः शुद्धं लीयते ध्याननादयोः। तथा तथा वायुजय सिद्धिकृत् कुम्भ एधते। अङ्गोराभिति ध्यात्वादाक्रमतिर्सुनिः। दृढ़ाभ्यासपरः शीघ्रं योगसिद्धिमवाप्नुयात्। यावन्न शृणुते नादस्तावच्चित्तमिदं चलम्। नादे लीनं मनो ध्याने विना यत्नं हि युज्यते। खेदनिद्राकुमोटाद्याः क्षयं यान्ति साधके। सपादघटिकोर्ध्वं स्यात् कम्भो जलजमेव च। आनन्दः स्यात् सदाभ्यासादारभ्भे कुम्भकाग्निना। शुष्के नाड़ीजले दग्धे कुहिकारे जयाग्निना। मूलस्थितपटोभेदे प्रथ्वाद्यम्बुविलयोद्भवे। अपाने ऊर्द्धं क्रमशः प्राणेनाकृष्यते यदा। मूलाख्यपृथिवीभेदेऽपाने नाद्यातमो जलम्। ऊर्ध्वं ततोऽग्निकृष्टाग्रणानाधाराङ्कुरम्। चक्तिं नित्यं निरालम्बं भवेत्कन्दस्वरे। तदासनोत्थानसक्तं वायोर्जयजलक्षणम्। एतत् जलप्रसिद्ध्याद्यः स्थितिचक्रविभेदने। वक्ष्यमाणाभ्यासमति कुर्यात् योऽप्यनालसः। षड्भुक्तु खड्जुसृष्टाङ्विधिवत्सया। पृष्ठवंशानलगतङ्गुल्फार्द्धस्थे पदम्। त्रिकोणं दक्षस्थानं तदधः स्थितिरिक्षतौ। कन्दाग्नेन जितापानं प्राणेनोर्द्धमुदीरते। पूर्वाङ्गं निराकर्त्तुं प्रतीचीपश्चिमम्। समवाहेन सुमतिर्नेतुं स्थितिसस्थानरे। स्थित्यारभेदभ्यसनं कुर्यात् षट्पुरुषोदितम्। विधिपद्मप्रभेदेन सर्वं चारभ्यसिद्धयः। तावत्कालं साधकस्य योगोक्तनियमग्रहः। स्वाधिष्ठानं विधिद्योर्द्धमपानः प्रगतः स्वयम्। तिर्यग्गतेन प्राणेन निरावरण अर्द्धगः। अधः स्थितः सन्भवति त्रिकोणं वह्निमण्डलम्। घ्रातो भवेद्दक्षनो दृढ़ाभ्यासो सुनेर्हि सः। क्रमेण दीप्तो भवति सुषुम्णाध्वमलं क्षति। कुण्डलीं तापयत्येष चालितां प्राणवायुना। सतकर्षणायामेन शक्तिचालेन चालयताम्। ततः परिचयावस्थाग्रन्थीबोधकरो भवेत्। दीप्तोनलोऽपानजाद्यं शिष्टं दहति वैकृतम्। प्रकाशावरणे नाड्यो दग्धेऽङ्गे कफजो मलाः। प्राणाग्निः स तदा सत्वप्रकाशक उपाधिहा। तथा योगाग्निना दग्धो देहो योगिवरस्य हि। न ह्रियते योगिदेहो देवैरपि महाबलः। एवंरूपस्तदा योगि देहः स्यादजरामरः। सुषुम्णाचक्रनिलया प्राणापानौ यमेद्यदा। तदा केवलकुम्भः स्यान्नेस्त्रैलोक्य सिद्धिकृत्। जलूका रुधिरं यद्वच्चादाकर्षेद्दु ध्रुवम्। ब्रह्मनाड़ी तथा धातून् सतताभ्यासयोगतः। तदा नद्यः पुष्कराद्याश्चदाः शुध्यन्ति पुद्गले क्व दोषाः क्षुत्पिपासाद्या सर्वे नश्यन्ति योगिनः"। हठस०

प्राणायामकालमानम् "अथ प्रमाणमेतेषां रङ्ध्रमपि कथ्यते अङ्गरन्ध्रादशभिः क्रमाद्दाद्याः पलैस्त्रयः। ततः षड्दशोन्मानपलैरष्टादशोन्मितः। परस्ततश्चतुर्विंशत्पलोद्वेद्वरिङ्गेरितः। निसर्गाद्दशगुणाः प्रत्याहारस्ततः परम्" हठस०।

निसर्गप्राणायामकालः कुम्भकपञ्चकौ "षड्गुर्वक्षरैर्युक्तः कालः पलमितो हि यः। निसर्गतः कुम्भकोऽयमतोऽर्द्धं रेचकः स्मृतः। अर्द्धः पूरक इत्युक्तो मात्राकुम्भविशारदैः। षड्विंशतिभिः प्रोक्तः पलैर्हादशमात्रिकः"। अयमेव नाड़ीशोधनोऽभ्यासप्राणायामः। "षड्गुणद्विर्द्वितीयस्तु सपादोद्घटिकोन्मितः। तृतीय इति निर्दिष्टो दृष्टान्तेयमतं यथा"। तदयं संक्षेपः "कनिष्ठे प्राणायामे एकस्मिन् कालमाने चत्वारि पलानि भवन्ति तदा द्वादशप्राणायामे सर्वकालमानं ४८ पलानि यतो प्रथम द्वितः खेद

कुम्भकालः। एवं द्वितीये मध्यमेरौ कालमानमहो ८ प-लानि तदा द्वादशभिः ६६ पलानि। अत्र सर्वकालः ११६ घटिकादि मध्यमेरौ कालः। तीव्रमेरौ काल-मानं १२ पलादि तदा द्वादशभिः १४४ पलानि २ २४घ-टयादि एवमुत्तमोत्तमो वायुसाधकालो ज्ञेयः" हठप०। तत्र अधमसाधके खेदादिरिक्तस्याद्यभावः। उत्तमसाधके यमादिगुणसम्पन्नो कामसंकल्पादिपापे कर्मासनोत्थाना-दिसिद्धिसम्पन्नः" हठप०। "तदा विध्वस्तपापस्य भवेदा-रम्भसम्भवः। चिह्नानि योगिनो देहे इमानि शृणु नाडि-शुद्धितः" इत्युपक्रमे "बलीयसि भवेत् खेदो देहे सुनेः प्रयत्नोद्यमे। यदा संजायते खेदो मर्दनं कारये-त्तदा। विमूढा सह भिन्नेन श्रमजातास्त्वनाऽनया। अन्यथा विग्रहादायुर्नरो भवति योगिनः। दृढता लघुता देहे खात् श्रमजास्वङ्गमर्दनात्। कम्पो हितीये भवति दार्दुरी मध्यमे तत." (दार्दुरी दर्दुरो भेक-स्तस्येव चतुष्पादोत्प्लुत्य गतिः)। ततोऽधिकतराभ्या-दृगमने साधको हि सः। योगी पद्मासनस्थोऽपि भूमित्यक्त्वा वर्त्तते। वायुसंक्षिप्तदा ज्ञेया संचार-ध्वनिवर्जिनी" कुम्भकपक्षे "एवं नाडीविवेकेन चतुःकालेषु स्थितिम्। कुम्भकात् यदि कुर्यात नाडी शुद्धस्तदुच्यते। योगमध्यदिनार्कौघं नाभौ सविह-मण्डलम्। मूर्धनाड्या क्षते कुम्भे ध्यात्वा शुध्यन्ति नाडिकाः। चन्द्रेण पित्तदोषाग्निमितरेषां परेण तु। नाडीशुद्धिस्तना भूयात्तिमर्मासैर्न संशयः। नादवृत्ति-र्वपुःकाग्र्यं मारोग्यं वह्निदीपनम्। नैर्मल्यमस्यावदनप्र-साटो विन्दुविजयः। हितप्रमितसक्षाणां नाडीनां मल-शोधनम्। अशेष धारणं वायोर्विकाराभाव एव च" हठप०

कुम्भकः "मात्राः षोडश पूरे स्युतदर्धेषु कुम्भके। द्वात्रिंशद्धे चके प्रोक्ताः मात्राकुम्भः समीरितः। मात्रा कुम्भो दृढतनुः प्रोक्तः संपत्तिकारितः। खाधिष्ठानात् समारभ्य ब्रह्मनाडीसमेवनः। दक्षनो नाभिसस्थानो मात्राकुम्भः प्रकीर्त्तितः। मूलाधारे कृतस्थायं कठिनी करणो मतः। पुनः कण्ठानुगो यत्र व्यूहनः स्यात् स कुम्भकः। ब्रह्मध्याने नियोगेन सहितः परिकीर्त्तितः"। अथमाग्रतः। पूर्वाभ्यासे स्थानाप्रकोष्ठनचिन्तनाभ्यां मनसा दृग्भ्यां तादृत्येन नासाग्रनाभिमूलमध्यहृदयकण्ठा-दिनिश्चलशरीरावलंबनप्रदेशेषु स्थानात् स्थानान्तर साधकेन कुम्भकस्य वायोर्यत्रानयनं स्थापनं च पुनर्यातः सम्भितस्य वायोः प्रदेशान्तरे नयनमिति चतसाश्च प्राणस्य चालनं कर्त्तव्यं गुरूपदेशेनेति मात्राकुम्भः। सूर्यभेद सूर्य कुम्भनात् तदूर्ध्वं रसवहानां नाडीनां रसशोषणं भवति। एवं नाभौ सर्वशिरामूलत्वात् सूर्यमण्डल-प्रदत्वात् अग्निवायादल्पोष्मत्वं नाडिगतमलदाहः। एवं खाधिष्ठाने स्थितौ तस्य सौम्यापानचन्द्रप्रदत्वात् कफतरसपेचनक्षतसंपादिवांगतशोऽपायहारा ग्लानिर्भ-वति। कठिनीकरणं मृदुतापधानं देहेन्द्रियेषु" हठप०।

मात्रामानम् "प्रदक्षणोत्क्षेप जानुं नातिद्रुतविलम्बितम्। अकुर्वन्विकसतो मात्रा क्षोटिकाकरणाद् भवेत्"।

"मात्रा नवविधा प्रोक्ता योगिभिस्तत्त्वदर्शिभिः। नि-मेषोन्मेषणं मात्रा कालो ह्यक्षरोच्चितः। गोदोह-नासनपाणिस्फोटनोत्क्षेपणप्रदारणोन्मिताः। चतुरो लघुमात्राः स्युस्तास्त्र संख्याः शनैः शनैः। देशकालानुसारेण प्राह्य-योगीश्वराः पुरा। पूरकुम्भकरेचेषु निमज्जनितेषु यः। कालः स मात्रासंज्ञः स्यात् सर्वमात्राः क्रमादिमाः। अथवा रतिताश्चैव महामात्राः पुरादिताः। जानुं प्रदक्षणीकृत्य विवारं क्षोटिकामतु। करणात् सुख-मात्रेयं मध्यमा षड्भिरीरिता। जान्वोः प्रदक्षणक्र-तिर्नवधारमसौ वरेति" हठप०।

षट्कर्मणां प्राणायामकालः "सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह। त्रिर्जपेदायतप्राणः प्राणायामः स उच्यते" गीता। अयञ्च प्राणशुद्धये षट्कर्मणः योगसिद्धये च योगिभिश्च कार्यः। तादृशमसदायस्य त्रिजपे पञ्चदशं भवतीति तस्य कुम्भकालसंख्यावेदकत्व बोध्यम्। योग-दीपिकायाम्" हठप०।

प्राणस्वरूपम् "समस्तेन्द्रियवृत्तिश्च प्राणो वायुः प्रकी-र्त्तितः। तस्मिन्यादिन्द्रियाणीव विलितानि भवन्ति हि। अतः प्राणमनःस्पन्दयोः सहभावित्वात् प्राणनिग्रहे मनो निग्रहीते" हठप। योगवासिष्ठे "बाह्याभ्यान्तर-स्पन्दचित्तजो वातजोऽथ वा। न यस्य विद्यते तस्य दूरस्थो विलतिक्षयो"। अयं भावः प्राणायामोपायोपे-तस्य इतरस्मादल्पः श्वासप्रश्वासो भवति यथा खनन-च्छेदनादिषु व्यायामयुक्तस्य पर्वतमारोहतः शीघ्रं धावतो वा श्वासवेगो यावान् भवति न तावान् स्थितस्या-सीनस्य वा भवति। यथा दुष्टैरश्वैरुपेतो रथो मार्गे त्यक्तो क्वापि नीयते स च सारथिना दृढरज्जुग्रहणः सन्मार्गे पुनर्धार्यते तथेन्द्रियैर्वशनादिभिरितस्ततो नीय-

भाव चित्तं प्राणश्चञ्चो हठयोगिनावां खात्मतत्वे धार्यते इत्येवं चित्तविकारप्राणचञ्चो प्रकृतेऽभिप्रेतो" हठव०।

कुम्भकक्रमः "प्रथमे दिवसे कार्यं कुम्भकानां चतुष्टयम्। प्रत्येकं दशसंख्याकं द्वितीये षड्भिः षट्। विंशतिं च ततोऽष्टभिः षष्टिरेवं दिने दिने योगदीपिका।

प्राणायामफलं हठदीपे गोरक्षनाथः। "द्वाराणां सवकं निरुध्य मरुतं पीत्वामृतं धारित भीत्वाकाशमथापवह्नि-सहितं शक्त्या ससञ्चालितम्। आत्मध्यानयुतो हृदेन विधिना विन्यस्य मूर्ध्नि ध्रुवं यावत्तिष्ठति तावदेव महताऽसङ्कल्पेन संयुज्यते"।

प्राणायामप्रकारः "प्राणायामं ततः कुर्यात्सित्यं सत्त्वसमाधिया। यथा सुषुम्णानाडस्थामलाः शोषं प्रयान्ति च। बद्धपद्मासनो योगी प्राणं चन्द्रेण पूरयेत्। धारयित्वा यथाशक्ति भूयः सूर्येण रेचयेत्। प्राणं सूर्येण चाकृष्य पूरयेदुदरं शनैः। विधिवत् कुम्भकं कृत्वा पुनश्चन्द्रेण रेचयेत्। येन त्यजेत् तेन पूर्यं धारयेत्तु निरोधतः। रेचयेच्च ततोऽन्येन शनैः पवनवेगतः। प्राणं चेदिडया पिबेच्छियसितं भूयोऽन्यया रेचयेत् पीत्वा पिङ्गलया शनैः रयमथो बध्वा त्यजेदन्यया। सूर्याचन्द्रमसोरनेन विधिना विंशदयं ध्यायतामृ शुद्धा नाड़िगणा भवन्ति यमिनां मासत्रयादूर्ध्वतः। प्रातर्मध्यं दिने सायमर्द्धरात्रे च कुम्भकान्। शनैरशीतिपर्यन्तं चतुर्वारं समभ्यसेत्। हठेयापि च षाण्मासैः पवनं कुरुते वशे चतुष्टयमनल्पम्। त्यज पिङ्गलया शनकैः शनकैः दशभिर्दशभिर्मन्त्रैर्धिकैः। अधमे जायते स्वेदः कम्पो भवति मध्यमे। उत्तमेत्वमृते प्राणो वहे पद्मासने हठे। ततोऽधिकतराभ्यासाद् भवतः स्वेदलक्षणौ। ततोऽधिकतराभ्यासाद् दार्दुरी जायते गतम्। यथेव दर्दुरोमच्छेदुत्प्लुत्योत्प्लुत्य भूतले। पद्मासनस्थितो योगी तथा गच्छति भूतले। त्यजेन्न मलमूत्रादि तेन गात्रमदेनमाचरेत्। दृढता लघुता चापि तेन गात्रस्य जायते। अभ्यासकाले प्रथमे शस्तं क्षीराज्य भोजनम्। ततोऽभ्यासे दृढीभूते न तादृक् नियमग्रहः। यथा सिंहो गजो व्याघ्रो भवेद् वश्यः शनैः शनैः। तथैव सेवितो वायुरन्यथा हन्ति साधकम्। प्राणायामेन युक्तेन सर्वरोगक्षयो भवेत्। अयुक्ताभ्यासयोगेन सर्वरोगसमुद्भवः। हिक्का कासस्तथा श्वासः शिरःकर्णाक्षिवेदनाः। भवन्ति विविधारोगाः पवनस्य प्रकोपनात्। युक्तं युक्तं त्यजेद्वायुं युक्तं युक्तञ्च पूरयेत्" हठप्रदीपिकायाम्।

प्राणायामाभ्यासफलम् "एवमभ्यसतो नित्यं योगीन्द्रो विगत-श्रमः। अल्पमेदाल्पिपुष्टिं च सद्यादिपवनक्रियाम्" हठव०। "क्रियायुक्तस्य सिद्धिः स्यादक्रियस्य कथं भवेत्। क्रियैव कारणं सिद्धेः सत्यमेतन्न संशयः। न मन्त्रपाठमात्रेण योगसिद्धिः प्रजायते। प्राणायामैरेव सर्वे प्रयुञ्जन्ति-मनीषिणः। आचार्यास्तेन कथितन्तत् कर्म न संशयः। षट्कर्मयोगमाप्नोति प्रथमाभ्यासतत्परः। अभ्यासान्लभिवत्तस्मात्पवनमभ्यसेत्। ब्रह्मादयोऽपि विदुषः पवनाभ्यासतत्पराः। सर्वसिद्धिं गताः सर्वे तस्मात् पवनमभ्यसेत्। यावद्वायौ मरुद्देहे तावत् चित्तं निरा-कुलं। यावद्दृष्टिर्भ्रुवोर्मध्ये तावत्कालभयं कुतः। विधिवत् प्राणसंयामैर्नाड़ीचक्रे विशोधिते। सुषुम्णा वदनं भित्त्वा सुखाविशति मारुतः। मारुते मध्यसञ्चारे मनः स्थैर्यं प्रजायते। यो मनःसुस्थिरीभावः सैवा-वस्था मनोन्मनी। तत्सिद्धये विधानार्थमिमान् कुर्वन्ति कुम्भकान्। विधिवत्कुम्भकाभ्यासाद् विधिना सिद्धि-माप्नुयात्। सूर्यभेदनसञ्चायी तथा शीतकरः शीतली। भस्त्रिका भ्रमरी मूर्च्छा केवलान्तकुम्भकाः। पूरकान्ते तु कर्त्तव्यो बन्धो जालन्धराभिधः। कुम्भ-कान्ते रेचकादौ कर्त्तव्यस्तूड्डियानकः। अधस्तात् कुञ्चनेनैव कण्ठसङ्कोचने कृते। मध्यपश्चिमतानेन शनैः प्राणो मध्यनाड़ीगः। ब्रह्मरन्ध्रं तत्याज्य प्राणः कण्ठादधो नयेत्। योगी जराविनिर्मुक्तो षोड़शो वयसा-भवेत्" हठप्र०।

सूर्यभेदनम् "आसनं सुखादेव बद्धा सुखं समन्ततः। दक्ष-नाड्या समाकृष्य बहिस्थं पवनं शनैः। आकेशाग्रं नखाग्रं च शिरोधावधिकुम्भकम्। ततः शनैः सव्य-नाड्या रेचयेत् पवनं पुनः। कपालशोधनं वातदोषघ्नं कृमिनाश-नम्। पुनः पुनरिदं कुर्यात् सूर्यभेदनमुत्तमम्" हठ०।

शीत्कारी "सुखं संयम्य नाड्याभ्यामास्यपूत्र पवनं शनैः। यथा लगति कण्ठान्तं देशानलविवर्द्धनम्। पूर्ववत् कु-म्भकं कृत्वा रेचयेदिड़या ततः। क्षोभदोषहरं कण्ठे दाधानलविवर्द्धनम्। नाड़ीजालोदरधातुगतदोषविनाश-नम्। गच्छता तिष्ठता कार्य्यं सुखयाख्यं च कुम्भ-कम्" हठप्र०।

अथ शीतकारः "कुम्भं कृत्वात् यदा पश्चात् प्राणेनैव विसर्जयेत्। एवमभ्यासयोगेन कामदेवो द्वितीयकः।

योगिनीचक्रसामान्यसृष्टिसंहारकारकः। न क्षुधा न तृषा निद्रा नैवालस्यं प्रजायते। भवेत् स्वच्छन्ददेहस्तु सर्वोपद्रवर्जितः। अनेन विधिना सम्यं योगीन्द्रो भूमिमण्डले। स भवेत् सर्वसिद्धीनां भाजनं नात्र संशयः। नासिकामूलरन्ध्रेण यः प्राणं सततं पिबेत्। स भवेत् सर्वसिद्धीनां भाजनं नात्र संशयः। रसनातालुमूलेन यः प्राणं सततं पिबेत्। अर्द्धाब्देन भवेत्तस्य सर्वरोगपरिक्षयः" हठप्र०।

शीतलीकुम्भकः "जिह्वया वायुमाकृष्य पूर्ववत् कुम्भसाधनम्। अनेनैव प्रकारेण रेचयेदनिलं सुधीः। गुल्मप्लीहोदरं चापि ज्वरपित्तं क्षुधां तृषाम्। एताश्च शीतली नाम कुम्भकोऽयं निहन्ति च" हठप्र०।

भस्त्रिका "ऊरोरुपरि संस्थाप्य उभे पादतले तथा। पद्मासनं भवेत् सम्यक् सर्वपापप्रणाशनम्। सम्यक् पद्मासनं कृत्वा समग्रीवोदरः सुधीः। मुखं संयम्य यत्नेन प्राणं घ्राणेन रेचयेत्। यथा लगति हृत्कण्ठे कपालावधि पूरयेत्। वेगेन पूरयेत् सम्यक् हृत्पद्मावधि मारुतम्। पुनर्विरेचयेत् तद्वत् पूरयित्वा पुनः पुनः। यथैव लोहकारेण भस्त्रा वेगेन चाल्यते। तथैव स्वशरीरस्थं चाल्यते पवनो बलात्। यदा श्रमो भवेद्देहे तदा सूर्येण तेजयेत्। अधोदरे भवेत् पूर्णं पवनेन यथा लघुः। धारयेद्वायुकामध्ये तर्जनीभ्यां तथा दृढम्। कुम्भकं पूर्ववत् कृत्वा रेचयेदिडयानिलम्। वातपित्तश्लेष्महरं शरीराग्निविवर्द्धनम्। कुण्डलीबोधनं कुम्भे रोगघ्नं सुखदं शुभम्। ब्रह्मनाड़ीमुखे श्लेष्मकपाटार्गलनाशनम्। सम्यग्भस्त्रा समाख्यातमृग्यजुःसामभेदिका। विशेषेणैव कर्त्तव्यं भस्त्राख्यं कुम्भकं त्विदम्" हठप्र०।

भ्रमरीकुम्भकम् "वेगाद्घोषं पूरकं भृङ्गनादं भृङ्गीनादं रेचकं मन्दमन्दम्। योगीन्द्राणां नित्यमभ्यासयोगाच्चित्ते जाता काचिदानन्दलीला" हठप्र०।

मूर्च्छाकुम्भकः "पूरकान्ते बद्धतरं बद्धा जालन्धरं शनैः। रेचयेत् मूर्च्छनाख्योऽयं मनोमूर्च्छासुखप्रदा। अन्तःप्रवर्त्तिताधारमारुतापूरितोदरः। साधात्मयन्त्रगाधे तु विशेत् पद्मपत्रवत्" हठप्र०।

संक्षितकुम्भकः "प्राणायामस्त्रिधा प्रोक्तो रेचपूरकुम्भकैः। संक्षितः केवलेति कुम्भको द्विविधो मतः। रेचकं पूरकं कृत्वा यः स्वयं संक्षितकुम्भकः। यावत् केवलसिद्धिः स्यात् तावत् संक्षितमभ्यसेत्" हठप्र०।

केवलकुम्भकः "रेचकं पूरकं त्यक्त्वा सुखादायुनिरोधनम्। प्राणायामोऽयमित्युक्तः स वै केवलकुम्भकः। केवले कुम्भके सिद्धे रेचपूरविवर्जिते। न तस्य दुर्लभं किञ्चित्त्रिषु लोकेषु विद्यते। सहजेवलकुम्भोऽयं यत्रेष्टं वायुधारणम्। राजयोगपदं चैव लभते नात्र संशयः। आहारः क्रीयते योगे क्रमपक्वे यथा क्रमी। शुक्लपक्षे यथा चन्द्रस्तथा स्वाभोऽमृतोपमः। हठं विना राजयोगो राजयोगं विना हठः। न सिध्यति ततो युग्ममिष्यत्त्वे च समभ्यसेत्। कुम्भकप्राप्तरेचान्ते कुर्याच्चित्तं निराश्रयम्। एवमभ्यासयोगेन राजयोगपदं व्रजेत्। कुम्भकात् कुण्डलीबोधः कुण्डलीबोधतो भवेत्। अनर्गला सुषुम्णा च हठसिद्धिश्च जायते। वपुःकृशत्वं वदने प्रसन्नता नादस्फुटत्वं नयने सुनिर्मले। आरोग्यता बिन्दुजयोऽग्निदीपनं नाड़ीविशुद्धिर्हठयोगलक्षणम्" हठप्र०।

उपदेशः "यमेश्वरनधात्रीणां यथाधारोऽखिलावनेः। सर्वेषां योगतन्त्राणां तथाधारोहि कुण्डली। सुप्ता गुरुप्रसादेन बोधिता सुखदा भवेत्। तदा षट्चक्रपद्मानि भिद्यन्ते ग्रन्थयस्तथा। प्राणश्च शून्यपदवीं तथा राजपथायते। तदा चित्तं निरालम्बं तदा कालस्य वञ्चनम्। सुषुम्णा शून्यपदवी ब्रह्मरन्ध्रं महापथम्। अनामनी शाम्भवी मध्यमार्गश्चैकेवाचकाः। तस्मात् सर्वप्रयत्नेन प्रबोधयितुमीश्वरीम्। ब्रह्मद्वारमुखे सुप्तां मुद्राभ्यासेन बोधयेत्" हठप्र०।

दण्डमुद्रोपदेशः "महामुद्रा महाबन्धो महावेधश्च खेचरी। उड्डियानं मूलबन्धो बन्धोजालन्धराभिधः। करणी विपरीताख्या वज्रोली शक्तिचालनम्। इदं हि मुद्रादशकं जरामरणनाशनम्। आदिनाथोदितं सर्वसिद्धैरष्टधा प्रदायकम्। वल्लभं सर्वसिद्धानां दुर्लभं महतामपि। गोपनीयं प्रयत्नेन यथा रत्नकरण्डकम्। कस्यचित् नैव वक्तव्यं कुलस्त्रीसुरतं यथा। वज्रोली तमरोली च सहजोली त्रिधा मता। एतेषां लक्षणं वक्ष्ये कर्त्तव्यञ्च विशेषतः"।

महामुद्रा ! "पादमूलेन वामेन योनिं संपीड्य दक्षिणम्। पादं प्रसारितं कृत्वा कराभ्यां धारयेद्दृढम्। कण्ठे बन्धं समारोप्य धारयेद्वायुमूर्द्धनि। यथा दण्डहतः सर्पो दण्डाकारः प्रजायते। ऋजुर्भूत्वा तथा शक्तिः कुण्डली सहसा भवेत्। तदाऽसौ मरणावस्थां प्राप्ते द्विपुटा-

स्थिता। ततः शनैः शनैरेव रेचयेन्न च वेगतः। इदं खलु महामुद्रा महासिद्धैः प्रगम्यते। महाक्लेशादयो दोषाः क्षीयन्ते मरणादयः। महामुद्रां तेनैव वदन्ति विबुधोत्तमाः। चन्द्राङ्गे च समभ्यस्य सूर्याङ्गे पुनरभ्यसेत्। यावत्तुल्या भवेत् संख्या ततो मुद्रां विसर्जयेत्। न हि पथ्यमपथ्यं वा रसाः सर्वेऽपि नीरसाः। अपि भुक्तं विषं घोरं पीयूषमिव जीर्यति। क्षयकुष्ठगुदावर्तगुल्माजीर्णपुरोगमाः। दोषाः सर्वे क्षयं यान्ति महामुद्रां च योऽभ्यसेत्। कथितेयं महामुद्रा महासिद्धिकरी नृणाम्। गोपनीया प्रयत्नेन न देया यस्य कस्यचित्" इठप्र०।

महाबन्धः २ "पार्ष्णिं वामस्य पादस्य योनिस्थाने निवेशयेत्। वामोरूपरि संस्थाप्य दक्षिणं चरणं तथा। पूरयित्वा मुखे वायुं हृदये चिबुकं दृढम्। निष्पीड्य योनिमाकुञ्च्य मनोमध्ये नियोजयेत्। धारयित्वा यथाशक्ति रेचयेदनिलं शनैः। वामाङ्गे पूरयेन्मध्य दक्षाङ्गे पुनरभ्यसेत्। संख्यान्तरे तु वेधादि कण्ठबन्धं विसर्जयेत्। राजदन्तस्य जिह्वायां बन्धः श्रेष्ठो भवेदिति। अयं खलु महाबन्धो महासिद्धिप्रदायकः। कालपाशमहाबन्धविमोचनविचक्षणः। अयं च सर्वनाड़ीनामूर्ध्वगमनरोधकः। निःवेधोऽसुभं धत्ते बेदारं प्राप्नुयान्नरः। रूपलावण्यसम्पन्ना यथा स्त्री पुरुषं विना। महामुद्रामहाबन्धो निःफलो वेधवर्जितौ" इठप्र०।

महावेधः ३ "महावेधे स्थितो योगी त्यक्त्वा पूरकमेकधीः। वायुना गतिमाक्रम्य निभृतं कण्ठसङ्कुचा। समहस्तयुगे भूमौ स्फिजौ सन्ताड़येत् शनैः। पुटद्वयं समाक्रम्य वायुः स्फुरति मध्यगः। सोमसूर्याग्निसम्बन्धात् जायते च गतिक्षयः। मृतावस्था समुत्पन्ना ततो वायुर्यं कृतः। महावेधोऽयमभ्यासात्महासिद्धिप्रदायकः। वलीपलितनिर्मुक्तैः सेव्यते साधकोत्तमैः। एतत् त्रयं महामुद्रा जरामृत्युविनाशिनी। वक्त्रदुर्गकरश्चैवमस्मिन्मुद्रादशप्रदम्। अष्टधा क्रियते चैव यामे यामे दिने दिने। पुण्यसञ्चारसन्धायि पापौघभिदुरं सदा। सम्यक् शिक्षा सतामेव सर्वं प्रथमसाधनम्। वक्ष्यिष्योपदेशेना सादौ यत्नेनमाचरेत्" इठप्र०।

खेचरी ४ "छेदनचालनदोहैः जिह्वां क्रमेण वर्धयेत्तावत्। यावद्भ्रूमध्यं स्पृशति तदा च खेचरीसिद्धिः। कुण्डीपत्रनिभं शस्त्रं सुतीक्ष्णस्निग्धनिर्मलम्। समादाय ततस्तेन रोममात्रं समुत्क्षिपेत्। कृत्वा सैन्धवपथ्यादिचूर्णं तस्यां प्रघर्षयेत्। पुनः सप्तदिने प्राप्ते रोममात्रं समुत्क्षिपेत्। एवं क्रमेण षण्मासं नित्ययुक्तः समाचरेत्। षण्मासाद्रसनामूलनाड़ीबन्धो विनश्यति। अथ वागीश्वरीधाम शिरोवक्त्रेण वेष्टयेत्। शनैरुत्कर्षयेद्योगी कालवेलाविधानवित्। वितस्तिप्रमितं दैर्घ्ये विस्तारे चतुरङ्गुलम्। मृदुलं धवलं पात्रं वेष्टिताम्बरलक्षणम्। पुनः षण्मासमात्रेण पुनः सङ्कर्षणात् प्रिये!। भ्रूमध्यादधि यद्वैतं तिर्यक् कर्णबिलावधि। अधस्तात् चिबुकं मूलं प्रयाति क्रमकारिता। केशादुर्ध्वं तु क्रामति तिर्यक्कपालयोरधि प्रिये!। पुनः संवत्सरादूर्ध्वं! द्वितीया चैव जीवता। ब्रह्मरन्ध्रान्तमासाद्य तिष्ठत्यमरवन्दिते!। खतालुमूलं सङ्कृत्य सप्तवासरमात्रतः। क्षुरकल्पकारेण मलं सर्वं विशोधयेत्। अङ्गुल्यग्रेण सङ्कृष्य जिह्वां तत्र निवेशयेत्। शनैः शनैश्चलत्काष्ठं महाबन्धं कपाटवत्। पूर्ववोर्ध्वयुतां विद्यां व्याख्यातामतिदुर्लभाम्। अस्याः षड़ङ्गं प्रकुर्वीत तथा षट्चक्रभिन्नया। खे निरालम्बसकलक्रियाक्रमा चित्ततत्परति शाश्वतोदरे। सा शिवत्व समवायकारिणी खेचरी च भवखेदहारिणी। क्रमेणैव प्रकर्त्तव्याभ्यासेन वरवर्णिनि!। युगपद्वर्धते तस्य शरीरं विषयं व्रजेत्। तस्मात् शनैः शनैः कार्योभ्यासेन युगवत् प्रिये!। एवं वर्षत्रयं कृत्वा ब्रह्मद्वारं विशेद्ध्रुवम्। षट्चक्राणि विभिद्य शक्तिभुजगीं प्रोत्थाप्य मूलस्थितां भित्त्वा ग्रन्थित्रयं च पश्चिमसिराप्राकारूपं महत्। नीत्वा प्राणमतः सिराविवरगं निर्भेद्य चित्तेन तत् चिद्रूपः यः पिबतीन्दुमण्डलगलत् सुधां स साक्षात् शिवः"। "नीरुजं कुरुते व्याधिं कटुकं कृमिनाशनम्। कृतघ्नादुघ्नं चैवाकरत्वं लभते ध्रुवम्। मधुघ्नादुघ्नं चैव पालितघ्नादिकं वदेत्। सहस्रखण्डकं पापानि पञ्चाशानि शतानेकशः। दिव्यरूपं क्रीड़ेच्चित्य सुतल्पगो जायते ध्रुवम्। तन्मद्यमद्यप्रोक्तं कायकारीव कीटकः। कपालकुहरे जिह्वा प्रविष्टा विपरीतगा। भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी। काकचञ्चुविधानेन पीतं सलिलं पिबेत्। प्राणायामयोगेन च योगी भवति निर्जरः। कलां परावृत्तमुखीं कृत्वा त्रिपथे परिवर्त्तयेत्। सा भवेत् खेचरी मुद्रा व्योमचक्रं तदुच्यते। रसनामूर्ध्वगां कृत्वा घण्टाद्वं यदि तिष्ठति। विषमैर्मुच्यते योगी व्याधिमृत्युजरादिभिः। न रोगो

मरणं तस्य न निद्रा न क्षुधा तृषा। न च मूर्च्छा भवेत् तस्य यो मुद्रां वेत्ति खेचरीम्। रोगाते न च रोगेण न लिप्यते च कर्मणा। बध्यते न च कालेन यो मुद्रां वेत्ति खेचरीम्। चित्तं चरति खे यस्मात् जिह्वा चरति खे गता। तेनेयं खेचरीमुद्रा सर्वसिद्धैर्नमस्कृता। खेचर्या मुद्रितं येन विवरं लम्बिकोर्ध्वतः। तस्य नाक्षरते बिन्दुः कामिन्यालिङ्गितस्य च। चलितोऽपि यदा बिन्दुः संप्राप्तश्च हुताशनम्। व्रजत्यूर्ध्वं हठात्कृत्वा निबद्धो योनिमुद्रया। कपालकुहरे जिह्वा प्रविष्टा विपरीतगा। भ्रुवोरन्तर्गता दृष्टिरेषा मुद्रा च खेचरी। तस्मादिदं प्रयत्नेन नित्ययुक्तः समाहितः। नित्यं सोमकलापूर्णं शरीरं तस्य योगिनः। तावद्वेषादि दस्य विषं तस्य न सर्पति। जर्जिह्वाग्रिखरो भूत्वा सोमपानं करोति यः। मासार्द्धेन न सन्देहो मृत्युञ्जयति योगवित्। रन्ध्रमाप्नोति यथा वह्निर्वर्तिं च दीपकः। तथोर्ध्वगकलापूर्णं देही देहं न मुञ्चति। रसनां वेगयेदूर्ध्वं खिवेत्तत् चरितं क्रमम्। सोमांशं मक्षयेन्नित्यं खिवेदमरवारुणीम्। कृशोऽपलक्षणं मन्ये दृतरे कृतचेतसः। सोमग्रहेणोदिता जिह्वा तत्प्रवेशो हि तालुनि। सोमांशभक्षणं तस्य महापातकनाशनम्। जिह्वाप्रवेशसंभूतवह्निनोत्पादितः खलु। चन्द्रात्स्रवति यः सारः स स्यादमरवारुणी। नाभिदेशे भवेत्सोम भास्करो दक्षनाडगः। ब्रह्मरन्ध्रा स्थितो नित्यं तालुमध्ये तु चन्द्रमाः। सर्वसंधौसुधासंघैर्दुःखी रविः। ज्ञातव्यं कारणं तस्य तेन पीयूषमाप्यते। मुहुः सोमग्रहासक्तं जिह्वाग्रं प्राणदाग्निना हठात् जाग्रतो रसनां नित्यं विवरे शक्तिं परां चिन्तयेत्। उत्कल्लोलकलाजालं च विमलं धाराहतं यः पिबेत् निद्रोषः स हठाच्छकोमलवपुर्योगी चिरञ्जीवति। भ्रुवलो यदि लम्बिकाग्रमनिशं जिह्वारसस्यन्दिनी संसारादुकटुकास्यदुग्धसदृशं मध्वाज्यतुल्यं यथा। व्याधीनां हरणं जराक्षरकरं शास्त्रागमोदारकं तस्य स्यादमरत्वमक्षुण्णितं सिद्धाङ्गनाकर्षणम्। सुखिनं ज्ञानजनकपङ्कदोषःसमन्वितः। तिष्ठति खेचरीमुद्रा तस्मिन् शून्ये निरञ्जने। यत्प्रलयं चापि गतं सुखिनं मेरुमूर्द्धतः। तस्मिंस्तत्त्वं प्रवर्तति सुधीकृत्सखं निम्नगानां चन्द्रात्सारः स्रवति च सुधा तेन मृत्युंजरा णाम्। तं बध्नीयात् सुकरणमथो मान्यता कायसिद्धिः दृष्टा सैषा भुवनविदिता खेचरी योगमुद्रा। एकं सूक्ष्मं द्वितीयमेतत् मुद्रा च खेचरी। एको देवो निरालम्ब एकावस्था मनोन्मनी" हठप्रदीपे नाभास्याने।

षडङ्गोयानमुदीरयति यज्ञाचने पादौ कराभ्यां धारयेद् दृढम्। गुल्फदेशसमीपे च कन्दं तत्र निपीडयेत्। पश्चिमानसदरं कृत्वा चिबुकं हृदि। मनः मनैर्यथा प्राणः कन्दमध्यं निगच्छति। "षडङ्गोयानाख्येन बन्धेन वायुः प्रोड्डीयाख्ये ब्रह्मनाड्यां यतोऽसौ। षडङ्गायानाख्यः कृतो बन्ध आद्यैः सेव्यत्वात् योगिभिः सिद्धपेभ्यः। अविश्रान्तः प्राणवायुः सदैव यस्मादुड्डीनं हठं संविधत्ते। षडङ्गायान ख्यातबन्धं धीरो नित्यं साधकः संविधत्ते" हठप्र०।

मूलबन्धः "गुदं पार्ष्ण्या तु संपीड्य वलादाकुञ्चयेत् तथा। वारंवारं यथा चोर्ध्वं समायाति समीरणः। प्राणापानौ नादबिन्दू मूलबन्धेन चैकताम्। गच्छतो योगसंसिद्धिं कुरुतो नात्र संशयः। अपानप्राणयोरैक्यं क्षयो मूत्रपुरीषयोः। युवा भवति हड्डोऽपि सततं मूलबन्धनात्" हठप्र०। "पादमूलेन संपीड्य गुदमार्गं सुयन्त्रितः। वलादपानमाकृष्य क्रमादूर्ध्वं प्रचालयेत्। कथितोऽयं मूलबन्धो जरामरणनाशनः"। "रेचके प्राणापानयोर्मूलमुपक्षेपाद्दृढः स्यात् वयस्योऽपि मूलात्। भित्त्वा द्वारं याति ऊर्ध्वं कपाले कुण्डल्यः। स्यादायुनेता शिखोत्था। ततो वह्न्युत्थानो हुत प्राणसंस्थं ततोऽन्ते प्रदीप्यतदा देहगेहम्। घटे तेन निश्चय सा निद्रिता स्यात् मतप्रा समत्वात् क्रमेणैव प्राणः। परिचये सहजो मनसः स्थितौ झटिति दण्डइतेव भुजङ्गी। प्रयत्नात्कुरुते सुधिता कृपा कथयन्धरानिरुद्धमूर्ध्वम्। विशे प्रविष्टे पवने ऋजुत्वं प्रजेत् सुषुम्णान्तसंचारणात्मा। प्रसिद्धतो योगिभिरेव नित्यं श्रीमूलबन्धोऽभ्यासनीय आदरात्" हठप्र०।

जालन्धरबन्धः "खेचरी चित्तपीयूषप्रवाहपरिबन्धिनी। जालन्धरोऽस्तमरुत्प्रवाहपरिरोधकः। आकुञ्च्य कण्ठं हृदये निदध्यात् चिबुकं दृढं। बन्धो जालन्धराख्योऽयं जरामरणनाशकः। अयं करोत्यव्ययमर्चबन्धो यतस्सुधावा वपुषोऽमरत्वम्। प्रयाति यत् कण्ठसिरासमूहं नाधस्ततो याति नभःस्थचक्रम्। जालन्धरत्वेन ततः सुसिद्धैः स्यात् कण्ठदुःखौघविनाशहेतुः"। "कण्ठं कण्ठबहोचनेन नाड्यादृधे चक्रमेतेन मध्यस्थचक्रम्। इदं षोडशारं च नाम्नोत्तमाशु गते खिद्यवायोः सुधापानमग्नौ। अमृतमधिमनुः क्षमेव नाभिस्थितदहनः प्रविशत् ज्वलत्यनलम्। नि.

खिलकमलतश्च्युतं तदग्निर्न पिबति याति वह्निमेव भक्षे'
विपरीतकरणोऽत "यत्किञ्चित् स्रवते चन्द्रादमृतं दिव्यरूपि
च। तत्सर्वं ग्रसते सूर्यस्तेन पिण्डो विनश्यति। त-
स्मात्ति कारणं दिव्यं सूर्यस्य मुखबन्धनम्। गुरूपदेशतो
ज्ञेयं न तु शास्त्रार्थकोटिभिः। ऊर्ध्वपादोऽधो मस्तकः
स्यात् क्षणं वासरेऽभ्यासयोगेन। एवमभ्या-
सतो याममात्रं यदा स्खलित स्वाक्षरादिञ्च षण्मा-
सतः। आरोह्य भूमाविति मस्तकं यो यामत्रयं तिष्ठति
योर्ध्वपादः। विध्युक्तकुंभसमीरवेगो मासत्रयात्
स्यादि तदाऽमरः सः। ऊर्ध्वं सोमकलाजलं सुविमलं
कण्ठस्थलादूर्ध्वगो नासान्ते सुधिरे नयेच्च गगनद्वारं ततः
सर्वतः। ऊर्ध्वाधो भुवि सन्निधत्य नितरां तत्तानपादः
प्रियेदेवं यः कुरुते जितेन्द्रियवरो नैवास्ति तस्य क्षयः।
नित्याभ्यासवशस्य हि जठराग्निर्वह्निमावाति। आ-
हारोऽतसाध्यो सम्यादः साधकाय भूरिशैः। जितेन्द्रियो
यत्नवचित्तदक्षो प्राणावरोधेन कृतेऽचिन्तनः विनिश्चेतो
ऽर्धोक्षियुगस्तु तूष्णीं दोर्भ्यां भजत्येव तदाऽमरो भवेत्।
वक्षितं पक्षितं चास्य षण्मासाच्चैव दृश्यते। याममात्रा-
भ्यासतोऽयं कालजित् स्यादिति क्रमः" घेरण्ड०।

खेचरी घेरण्डोक्ते प्रसङ्गादत्रैव खेचरीविधिर्दर्शितः तत्रादौ जिह्वायास्त्वनाय विधिर्यथा
"तालुमूलगतां यत्नात् जिह्वयाकृष्य यष्टिकाम्। ऊर्ध्वरन्ध्रगते वायौ प्राणस्तम्भो निरुध्यते" तत्करण-
प्रकारादि "षष्ठदृष्टयेत्तालुमूलं रसनाशिरामूलसंश्चैव
सम्प्राछसेनैः। शिराच्छिन्नीच्छेः सहैवङ्गुलीभिर्मलं सर्व-
माशोधयेत् तत्समत्वम्" घेरण्ड०।

छेदनम् "सक्थट्वक्त्रो षडङ्गुलपत्रनिभं सुतीक्ष्णं भृगतीक्ष्ण
धारम्। अङ्गुष्ठपर्वार्धसुविस्तृतं तदर्धेन्दुतुल्यं विमलं
शस्त्रम्। दक्षेण पाणिना तच्च गृहीत्वा षडङ्गुलोर्ध्वे सस्नि-
ग्धेन च रोममात्रम्। छेदं गतोत्संप्रतिबन्धहेतोर्न्न ग-
च्छेत्सहसैव रक्तम्। अधोध्वतस्तूत्सरणक्रमाभ्यां
बन्धः कलायाः क्षपिताभनाड्याः। मध्ये गतस्योद्धव
पीठतोऽस्य छिन्देत् यथाधोपरि नित्यमेव। छेदनात् प्राग्लु-
ब्धोऽक्षचूर्णानाघर्षयेज्जो रसनातलाग्रम्। घटीद्वयं याव
मिति त्रिवारं छेदनादूर्ध्वमतन्द्र आचरेत्। छेदकर्मो-
त्तरमस्ततन्द्रः सञ्चालनं दोहनमाविदध्यात्। षड्भिर्दिनं
तदगतचित्तवृत्तिः कार्यात् घटीतोऽक्षचूर्णात्तु भेदे।
दीर्घं वितन्द्रिप्रमितं च विकृतं वेदाङ्गुलं स्यान्मृदुलं
सितञ्च। सूक्ष्मं कलावेष्टनवल्लवच्यं श्लक्ष्णं शरीरे
रसनाभिचालने। स्यादेव चानेन कलां सुयुक्त्या सं-
वेद्य चाङ्गुष्ठकतर्जनीभ्याम्। दोग्धोः सदाकर्षणचालने
क्रमाभ्यासमाक्रम्य बहिर्विदध्यात्। एवं दृढाभ्यासत
एव जिह्वा लम्बा भवेद् भ्रूवुगा सुपक्वा। आकर्षणेनैव
वदेत किञ्चित् सुसाधकः स्थिर एकमानसः" घेरण्ड०।
"जिह्वां समाविध्य मधूपमन्त्रयोदोन सञ्चालनदोहने
यदा। कार्या रसज्ञा विधिनेति शीघ्रं स्यात् खेचरी
साधकपुङ्गवस्य। छेदक्रियाचालनदोहनानां षण्मासमभ्यास-
युतः यदैव। नश्येत् कलामूलशिरोपबन्धो नासाग्र-
सन्धे रसना सृगेत् क्षम्। जिह्वं कलामूलमलं यदा-
खिलं छिन्द्यात् क्रमेणात्तु मनैस्तदान्तिके। सिद्धे
विलीनाक्षयवर्त्मके हे युक्त्या यदा छेदनयुक्तितो
बुधः। यदा लम्बिका कर्मणि स्यं रसज्ञा सृगेत्
नासिकाग्रं तदा साधकस्य। अयं लम्बिकाकर्मणाऽतु
क्रमेण कला प्रलम्बं जिह्वमूलेति दैर्घ्यम्" घेरण्ड०।
"छेदनचालनदोहैः क्रमशः कलां वर्द्धयेत्तावत्। सा या-
वद् भ्रूमध्यं विशति तदा खेचरी सिद्धिः। एवं कृते-
ऽस्य रसना प्रयात्यूर्ध्वभ्रुवस्तान्तिवरम्। तिर्यक् कपो-
लावधि हि चिबुकावधि सा स्वयं याति। अभ्यास एति
वश्यत्वमस्य कृतसादा रसज्ञेयम्। ब्रह्मद्वारं प्रविशति
भित्त्वा भ्रूमध्यमूर्ध्वं गता" घेरण्ड०।

वज्रोली ६ "प्राणपानध्वनोर्ध्वं समाकुञ्चनं सुन्दरं सुन्दरी
वामभ्रूसेत् पुरुषः। याति वज्रोलिकासिद्धिमस्मा-
दावश्यिद्धैः प्रथं विन्दुसिद्धिर्यथा। अलाकया धातुगत्या-
न्तरोत्थवा कनीनिकान्तः परिस्रच्छ्यात्स्वकम्। रन्ध्रे स्व-
स्यैव मनैः प्रवेशनाभ्यासक्रमाद्वायुगतिक्षमश्चरेत्"।
अस्यार्थः आदौ मूत्रेरीषेण दुष्पूतिकृथितौष्ण
मेढ्दोषोज्झितं विशुद्धसाधनं विधाय ततस्तदल्पविल-
मध्यान्तरं द्वादशाङ्गुलां कनीनिकायसमां सरलां
विशुद्धसीसकस्य पत्तलां शलाकां मनैर्वामहस्तेन लिङ्ग-
द्वारे क्रमेण समाहितः सततं विधाय तया तद्द्वारं
वायुगतागतक्षमं गुदापान एव कृत्वा प्रथमाभ्यासे
पात्रनिहितशीराक्तिसूर्ध्वानिलाकर्षणविधिना शोकं
शोकं मन्दमूर्ध्वमाचरेत्" घेरण्ड०।
"इति क्रमाभ्यासवशेन वीरपाने भगाख्यतः। दृढे तु
कामिनीयोनिपुष्पाकर्षणमभ्यसेत्। स्थानात् संचलितं
विन्दुमूर्ध्वमाकर्षयेदिति। अभ्यसेत् साधकः सम्यक् या-

वत स्थिरपदं भवेत्। वन्हितः शरनालेन फूत्कारं वज्रकन्दरे। शनैः शनैः प्रकर्तीत वायुसञ्चारकारणात् अस्वासमाश्रयः। "शोडशाङ्गुलमानं तु प्रकुर्यात् वंश मानितम्। सुच्छिद्रमूर्ध्वं तं लिङ्गसन्धे दत्वाऽऽ तन्मुखम्। धृत्वा फूत्कारमन्त्रेऽस्याः कुर्यात् वाद्यं शुद्धसंयुतः। प्रत्यहं तेन विहतं लिङ्गद्वारं क्रमाद्भवेत्। ततो नाल्पाऽनया तोयमल्पं फूत्कारतोऽन्तरे। लिङ्गरन्ध्रेण सङ्गीयात् क्रमवृद्ध्या समाधकः। लिङ्गच्छिद्रेऽथ विहते क्षीराक्तं ततो भक्षेत्" वज्रकन्दरे लिङ्गद्वारे। "अपानमाकृष्य ततो वह्नेरोर्ध्वं दुग्धमाकर्षविधिक्रमेण। समभ्यसेन्नित्यमलस्यमूलं भगे पतद्विन्दुमथोर्ध्वमाहरेत्" हठप्र०।

शङ्खोदः सङ्खोली "अथ हि कुरुमितावां ध्यमूर्द्धं चमूर्ध्नि क्रमेण उपरि कुर्यात् कुक्षितात् लिङ्गनाखात्। निज उपगतविन्दुं सञ्चिबध्यातकुर्यात् सुरतरसनिमग्नो लिङ्गयुक्त्या मनसि। विन्दुः पाण्डुर एष चन्द्र उदितः सूर्यो भवेदात्मवं सिन्दूरप्रतिमं रवेः पदगतं शुक्रं शशिस्थानके। ऐक्यं साधनयोः स्ववर्त्मथि स्थां नो जायतेऽतो सुतिरन्योन्यं स्वधुरते निजमहिम्नैक्यं द्वयोर्विपक्षे। अभ्यासपाटवतया विदधाति योगिदेवं तदूर्ध्वपरिकर्षणतः सुविन्दुम्। वज्रास्यं समधिरुहति योगिनी सा वज्रो लिङ्गेत्यखिलसिद्धिपदं प्रयाति। शक्तीरजो विन्दुरयं महेशो हवोः सुयोगात् परिचक्षतेऽखिलम्। वीर्यं निजम् शार्ङ्गधनेतरोक्तनावैक्यं हि वज्रोल्लुदिदा सुसिद्धिदा। सङ्खोली त्वमरोली वज्रोल्ला भेदतो मतः। विन्दुं दैवे विस्मयाद् येन च केन प्रकारेण। वज्रोली मिथुनोत्तरं मरवशूत्वा शाङ्खसंयोगनात् सदभ्यासयोगेन्द्रियाण्यात्मवृतवा भूत्वा चर्यं संस्थितः। सैमोक्षा सङ्खोलिका सरहतैराद्यादिनाथैः गुप्ता वज्रोलीति स्थां वनोति नित्यं भोगेऽतिमुक्तेऽस्तम्। आज्ञयोर्ध्वं मूलमात्मकं तद्वारंवारं संक्षोभेणूत्थनात्। आज्ञयोर्ध्वं वायुना यो दृढेन नित्यं धत्ते विन्दुसिद्धिं स याति। इति वज्रास्याभ्यासनाद् गुरूपोक्तपथेन सन्तं योगी। शान्तिं गतः संभोगेन तस्य विन्दुः क्षयं व्रजति" हठप्र०।

शक्तिचालनम्:-"कुटिलाङ्गी कुण्डलिनी भुजङ्गी शक्तिरीश्वरी। कुटिलान्त्यनी वैधीमदाः पर्यायवाचकाः। कन्दोर्ध्वं कुण्डली शक्तिरधा कुण्डलाकृतिः। ब्रह्मद्वारमुखं नित्यं मुखेनाच्छाद्य तिष्ठति। येन मार्गेण गन्तव्यं ब्रह्मस्थानं निरामयम्। मुखेनाच्छाद्य तद्द्वारं प्रसुप्ता परमेश्वरी। उद्घाटयेत् कपाटं तु यथा कुञ्चिक्या दृढात्। कुण्डलिन्या तथा योगी मोक्षद्वारं विभेदयेत्। कन्दोर्ध्वं कुण्डलीशक्तिर्बुद्धा मोक्षाय योगिनाम्। बन्धनाय च मूढानां यस्तां वेत्ति स योगवित्। सम्पोषिद्वीपमैलानामाधारः शेषकुण्डली। समोमयोगतन्त्राणामाधारः कुण्डली तथा। कुण्डली कुटिलाकारा सर्पवत् परिकीर्तिता। सा शक्तिचालिता येन स मुक्तो नात्र संशयः। शक्तायसनयोर्मध्ये बालरण्डा तपस्विनी। बलात्कारेण मुद्घीयात् तद्विष्णोः परमं पदम्। इड़ा भगवती गङ्गा पिङ्गला यमुना नदी। इड़ापिङ्गलयोर्मध्ये बालरण्डा सरस्वती। पुच्छं प्रगृह्य भुजगीं सुप्तामुद्बोधयेच्च ताम्। निद्रां विहाय सा ऋजी मूर्द्धसुक्तिष्ठते हठात्। परिरिता चैव फणावती सा प्रातच मार्गं प्रहराद्वमात्मम्। प्रसुप्तं सौषुम्नं परिधानयुक्ता प्रगृह्य निद्रोत्थितचालिता सा। वितस्तिप्रमितं दीर्घं विस्तारं चतुरङ्गुलम्। मृदुलं धवलं श्लक्ष्णं वेष्टनाम्बरलक्षणम्। वज्रासनस्थितो योगी चालयित्वा तु कुण्डलीम्" हठप्र०।

तदङ्गुष्ठमेदनम् सुखादनन्तरं भस्मा कुण्डलीमारु बोधयेत्। भानोराकुञ्चनं कुर्यात् कुण्डलीं चालयेत्ततः। सत्वुच्छ्वासगतत्वापि तस्य सत्वभयं कुतः। नासादक्षिणमार्गवाक्षिपवनात् प्राणोऽतिदीर्घीकृतः चन्द्रात्मः परिपूरितास्ततनुः प्राग्वत्कटकामसङ्का। भिन्दन् द्वारविवाबवक्षिप्रभगात् शूरन्ध्रशैलोगधात् तत्कार्यं कुरुते पुनर्नवतरं लीलेन्दुमक्षन्वयत्। कुण्डलीं चालयित्वा तु कुर्यात्क्रियां विशेषतः। एवमभ्यासतो नित्यं शक्तिनः शक्तते बलः। सदाभ्यसेत् सुखंभेदमुद्रामीं चापि शीतलीम्। एवमभ्यासयुक्तस्य बलस्तु वह्निनः कृतः। सङ्कटद्वयमध्यस्थं निर्मलं चालनादसौ। ऊर्ध्वमाक्रम्यते किञ्चित् सुषुम्नागतकुण्डली। सङ्कटद्वयमध्यस्थं निर्मलं चालनादसौ। ब्रह्मचर्यरतस्यैव नित्यं क्षितमिताशनैः" हठप्र०।

समाधिक्रमः "अथेदानीं प्रवक्ष्यामि समाधिक्रमलक्षणम्। सहजं च सुखोपायं ब्रह्मानन्दकरं परम्। सखिले सैन्धवं यद्वत् साम्यं भजति योगतः। तथात्ममनसोरैक्यं समाधिः सोऽभिधीयते। राजयोगस्य माहात्म्यं कोवा जानाति तत्त्वतः। ज्ञानान्मुक्तिस्थितेः सिद्धिः गुरुवाक्येन लभ्यते। दुर्लभो विषयत्यागो

दुर्लभं तत्त्वदर्शनम्। दुर्लभा सहजावस्था सद्गुरोः करुणां विना। विविधैरासनैः कुम्भैर्विचित्रकरणैरपि। प्रबुद्धायामादिशक्तौ प्राणः शून्ये विलीयते। तत्पश्चात् शक्तिबाधश्च स्वतन्त्रनिःशेषकर्मणः। योगिनः सहजावस्था स्वयमेव प्रकाशते। सुषुम्णावाहिनि प्राणे शून्ये विशति मारुते। तदा समस्तकर्माणि निर्मूलयति कर्मवित्। यमतो निर्मलः शून्यं जगदेतच्चराचरम्। चित्ते समत्वमापन्ने वायुं व्रजति मध्यमे। एषाऽमरोली च लोलो सहजोली मताऽपि च। प्राणं कृतो मनसि जीवति देवि! तावत् प्राणेऽपि जीवति मनो म्रियते न तावत्। प्राणमनोद्वयमिदं विलयं प्रयाति मोक्षं स गच्छति नरो न कथञ्चिदन्यः। रसस्य मनसश्चैव चञ्चलत्वं स्वभावतः। रसो बद्धो मनो बद्धं किं न सिध्यति भूतले। मूर्च्छितो हरते व्याधिं मृतो जीवयति क्षयम्। बद्धः खेचरतां धत्ते रसो वायुश्च भैरवि!। इन्द्रियाणां मनो नाथो मनोनाथश्च मारुतः। मारुतश्च लयो नाथः स लयो नादमाश्रितः। लयमेव तु मोक्षाख्यो वस्तु वापि मतान्तरे। मनःप्राणलयौ नादमेकीकृत्य प्रवर्त्तते। मनसोच्छ्वासनिःश्वासप्रध्वस्तविषयग्रहः। निर्वेष्टा निर्विकाराश्च लयं यान्ति च योगिनः। चक्षुश्चन्द्रसूर्यबद्धस्तो निःशेषाशेषचेष्टितः। श्रावणस्यो लयः कोऽपि मनोवाचामगोचरः। यत्र दृष्टिर्लयस्तत्र भूतेन्द्रिय सनातनी। स्यात् शक्तिः सर्वभूतानां दृष्टिर्लक्ष्ये न संशयः। वेदशास्त्रपुराणाद्याः सामान्यगणिका इव। एकैव शाम्भवी मुद्रा वरतन्त्रेषु गोपिता। यत्र लक्ष्यं बहिर्दृष्टिर्निमेषोन्मेषवर्जिता। एषा तु शाम्भवी मुद्रा सर्वतन्त्रेषु गोपिता। यत्र लक्ष्यविलीनचित्त पवनो योगी यदा वर्त्तते दृष्ट्वा निखिलतारया बहिरसौ पश्यन्न पश्यत्यपि। मुद्रेयं खलु शाम्भवी भवति सा युष्मत्प्रसादाद्गुरोः शून्याशून्यविवर्जिते स्फुरति यत्तत्त्वं पट् शाम्भवम्। अर्द्धोन्मीलितलोचनः स्थिरमना नासाग्रदत्तेक्षणः। चन्द्रार्कावमिलौ समसुषवेत्तिषद्भावान्तरे। ज्योतीरूपमगम्यवाङ्मनरहितं दृश्यायमानं परम् तत्त्वं तत्पदमेव वस्तु परमं वाच्यं किमत्राधिकम्। शोभा सा भ्रुवोश्च खेचर्याश्च अवस्थाभेदतः। तारे ज्योतिःषु संयोज्य किञ्चिदुन्मीलयेद् भ्रुवौ। पूर्वयोगस्य मार्गोऽयमुन्मनीकारलक्षणः। केचिदागमजालेन केचिन्मननबन्धुराः। केचित्तर्केण सङ्कलिं नैव जानन्ति कारणम्। वातास्याद्दक्षिणोवामिखरे मेरुमूले तदस्तितत्त्वं चैतत् प्रवदति बुधैः सन्मुखं सिद्धगानाम्। चन्द्रात् क्षारः स्रवति वपुषस्तेन मृत्युर्नराणां बध्नीयात् तत्करणमिदं मुख्यया कायसिद्धिः। दिवा न पूजयेल्लिङ्गं रात्रौ नैव प्रपूजयेत्। सततं पूजयेल्लिङ्गं दिवारात्रौ च पूजयेत्। सुस्थिरं ध्यानजनकपञ्चस्रोतःसमन्वितम्। तिष्ठते खेचरी मुद्रा तच्चित्तं स्थाने न संशयः। चित्तं चरति खे यस्माच्चेष्टा चरति खे गता। तेनैव खेचरी नाम मुद्रा सिद्धैर्निगद्यते। दृष्टिश्चित्तञ्चयोर्योगे शून्ये चैवानिले यदेत्। तिष्ठते खेचरी मुद्रा तत्र बन्धं पुनः पुनः। सुधांचन्द्रमसोर्मध्ये निरालम्बे तले पुनः। संस्थिता व्योमचक्रेषु सा मुद्रा नाम खेचरी। सा भवोद्भेदिता वामा साक्षाच्छिवबल्लभा। पूरयेन्मारुतं दिव्यं सुषुम्णावर्त्मगे सुखे। पुरस्ताच्चैव पूर्यंत निचिता खेचरी भवेत्। अभ्यसेत् खेचरीमुद्रामनमनी सा प्रजायते। अभ्यसेत् खेचरीं ताद्दृग्यावत् स्यादुन्मनीसहितः। संप्राप्तयोगनिद्रस्य कालो नास्ति कदाचन। भ्रुवोर्मध्ये शिवस्थानं मनस्तत्र विलीयते। ज्ञातव्यं तत्पदं तत्त्वं तत्र कालो न विद्यते। चन्द्रसूर्यद्वयोर्मध्ये मुद्रां दद्याद्वखेचरीम्। निरालम्बे महाशून्ये व्योमचक्रे व्यवस्थिताम्। निरालम्बं मनः कृत्वा न किञ्चिदपि चिन्तयेत्। पदमाकाशे व्योम्नि षटपदं तिष्ठति ध्रुवम्। बाह्यवायुर्वहेत् सोमः खस्य मध्ये न संशयः। खस्थानं गच्छति प्राणः सुषुम्णे पवने तथा। एवमभ्यसमानस्य वायुमार्गे दिवानिशम्। अभ्यासाज्जीर्यते वायुर्मनस्तत्रैव लीयते। अमृतं स्रावयेद्देहमाद्यादन्तसमस्तकम्। सिध्यते च महायोगी महाबलपराक्रमः। शक्तिमध्ये मनः कृत्वा मनः शक्तेस्तु मध्यगम्। मनसा चित्तमाकोच्य धारयेत् परमं पदम्। खमध्ये कुरु चात्मानमात्ममध्ये च खं कुरु!। आत्मानं खमयं कृत्वा न किञ्चिदपि चिन्तयेत्। बाह्यचिन्ता न कर्त्तव्या तत्रैवान्तरचिन्तनम्। सर्वचिन्तां परित्यज्य न किञ्चिदपि चिन्तयेत्। बहुलभावकरणाज्जगत् समयं बहुलभावकरणाद्विमनोविलीनम्। बहुलभावविसृतेस्तु निर्विकल्पमाश्रित्य निश्चलमवाप्नुहि कालयानिम्। कर्पूरं ज्वलिते यद्वत् सैन्धवं सलिले यथा। तथा सञ्जीयमानं च मनस्तत्त्वे विलीयते। श्रेयं सर्वमतीत्य ज्ञानञ्च मन उच्यते। ज्ञानं ज्ञेयं मनश्चैव नान्यः पन्था द्वितीयकः। मनो

हठस्थितिं सर्वं यत्किञ्चित् सचराचरम्। मनसोन्मन्यवस्थाभावे द्वैतभावः प्रणश्यति। ज्ञेयवस्तुपरित्यागादद्वैतं याति मानसम्। मानसे विलयं याते कैवल्यमपि कल्पते। लयो लय इति प्राहुः कीदृशं लयलक्षणम्। स पुनर्बन्धनोत्थानो लयोविष्णुर्विचिन्तितः। एवं नानाविधोपायाः सन्त्यकृत्रानुभवान्विताः। समाधिभागाः कथिताः पूर्वाचार्यैर्महात्मभिः। सुषुम्णायै कुण्डलिन्यै सुधायै चन्द्रजन्मने। मनोन्मन्यै नम स्तुभ्यं सङ्गायक्त्रै चिदात्मने। आसक्षतत्त्वबोधानां मूढनामग्रि सत्कृतम्। प्रोक्तं गोरक्षनाथेन नादोपास नसञ्ज्ञकम्" हठप्र०।

नादानुसन्धानप्रशंसा यो आदिनाथेन यदादकोटिप्रकाराः कथिता जवन्ति, नादानुसन्धानकमेव कार्यं मन्यामहे नान्यतमं लयानाम्। सञ्जातनश्चितो योगी सदा सन्त्याय शाम्भवीम्। शृणुयाद्दक्षिणे कर्णे नादमेकाग्रमानसे सुधीः। दोषैः प्रवर्त्तितो वह्निः कालेन सह शाम्यति। नादे प्रवर्त्तितं चित्तं नादेन सह लीयते। अवश्यसञ्जनयेन्नादान्निरोधेनैव कुम्भजः। सुषुम्णामार्गेण क्रुद्धयमरुतः श्रूयते नादः" हठप्र०।

"आरम्भश्च घटश्चैव तथा परिचयस्तथा। निष्पत्तिश्चेति योगेषु स्यादवस्थाश्चतस्रयम्। विष्णुग्रन्थेः सकाशं बाह्यं नादे दुग्धाम्बुवत्तरः। एकीभूयाथ सहसा चिदाकाशे विलीयते। औदासीन्यपरो भूत्वा सदाभ्यासेन संयमी। शनैः शनैरथं सद्यो नादमेवावधारयेत्"। शीतकाले चौषटी वा कटी वा पद्मासनेऽथवा पद्मे वा भद्रके भित्वाद्वारमुखन्द्रं पायौ द्रोणीकरं भोज्य पालम्। सर्वचिन्तां परित्यज्य सर्वकाले च सर्वदा। नाद मेवानुसन्धत्ते नादे चित्तं विलीयते" हठप्र०।

प्रथमावस्था "ब्रह्मग्रन्थिभवेद्भिन्न आनन्दः शून्यसम्भवः। विचित्रश्चित्रिणीदेहे श्रूयतेऽनाहतो ध्वनिः। सम्पूर्णहृदये शून्ये प्रथमो योगवान् भवेत्" हठप्र०।

घटावस्था "द्वितीयायां घटीकृत्य वायुर्भवति मध्यगः। दृढासनो भवेद्योगी प्राणो देवसमस्तथा। विष्णुग्रन्थिर्यदाभिन्नः परमानन्दसूचकः। अतिशून्यविभेदश्च भेरीशब्दस्तदा भवेत्" हठप्र०।

परिचयावस्था "रुद्रग्रन्थिस्ततो भिन्ने तु जायते सहसा ध्वनिः। महाशून्यं तथा याति सर्वसिद्धिसमाश्रयम्। चिदानन्दं ततो भित्वा सहजानन्दसम्भवः। दोषदुःखक्षुधानिद्राजराव्याधिविवर्जितः। ब्रह्मग्रन्थिं ततो भित्वा सर्वपीठगतोऽनिलः" हठप्र०।

निष्पत्त्यवस्था "निर्वातो वैष्णवः शब्दः क्षणद्वीपाक्षणो भवेत्। एकीभूतं तदा चित्तं राजयोगाभिधायकम्। सृष्टिसंहारकर्त्तासौ योगीश्वरसमो भवेत्। अस्तु वा मास्तु वा सिद्धिरत्रैवाखण्डितं भवेत्। अयमेवाग्रिमं सौख्यं राजयोगादवाप्यते। राजयोगपदं प्राप्तं सुखोपायश्च चेतसाम्। हठं विना राजयोगो राजयोगं विना हठः। सद्यः प्रत्ययसम्भावी जायते नादजो लयः" हठप्र०।

नादानुसन्धानं तत्फलञ्च "नादानुसन्धानसमाधिभाजां योगीश्वराणां हृदये प्रकाशम्। आनन्दमेकं वचसामगम्यं जानाति तत्त्वं गुरुनाथ एव। कर्णौ विधाय हस्ताभ्यां यं शृणोति ध्वनिं मुनिः। तत्र चित्तं स्थिरीकुर्याद्यावत् स्थिरपदं व्रजेत्। सर्वचिन्तां परित्यज्य सावधानेन चेतसा। नादमेवानुसन्धत्ते योगसाम्राज्यमश्नुते। मकरन्दं पिबन् भृङ्गो गन्धाज्ञामेवते यथा। नादासक्तं तथा चित्तं विषयान्न हि काङ्क्षति। नादश्रवणतश्चित्तमलरुद्धभुजङ्गमः। विक्षिप्तः सर्वमेवाशु कुत्रचिन्न हि धावति। मनोमत्तमतेन्द्रस्य विषयोद्यानचारिणः। निगृहणसमर्थोऽयं निनादो निशिताङ्कुशः। नादोत्कलरङ्गसारङ्गबन्धने वागुरायते। चलत्कुरङ्गसंरोधे बाधायतेऽपि च। चलत्कुरङ्गसंविनो वाजिनः परिधायते। नादोपासिरतो नित्यमवधार्यापि योगिनः। अभ्यस्यमानो नादोऽयं बाह्यमावर्त्तयेत् ध्वनिम्। पक्षादिक्षेपमखिलं त्यक्त्वा योगी सुखी भवेत्। श्रूयते प्रथमाभ्यासे नादो नानाविधो महान्। वर्द्धमाने ततोऽभ्यासे श्रूयते सूक्ष्मसूक्ष्मतः। आदौ जलधिजीमूतभेरीनिर्झरसम्भवः। मध्ये मर्दलशङ्खोत्थघण्टाकाहलसम्भवः। अन्ते तु किङ्किणीवंशवीणाभ्रमरनिस्वनः। इति नानाविधो नादः श्रूयते देहमध्यतः। महति श्रूयमाणेऽपि मेघभेर्यादिके ध्वनौ। तत्र सूक्ष्मतरं ध्यानं नादमेव परात्परेत्। यत्र कुत्रापि वा नादे लगति प्रथमं मनः। तत्रैव तत् स्थिरीभूय तेन सार्द्धं विलीयते। घण्टानिनादसदृशं मेघगम्भीरकस्य तु। अमाहतस्य शब्दस्य तस्य शब्दस्य यो ध्वनिः। ध्वनेरन्तर्गतं ज्योतिर्ज्योतिषान्तर्गतं मनः। तन्मनो विलयं याति तद्विष्णोः परमं पदम्। तावदाकाशसङ्कल्पो यावत् शब्दः प्रवर्त्तते। निःशब्दं तत्परं ब्रह्म परमात्मा समीर्यते। यत् किञ्चि-

ग्रामरूपेण श्रूयते शक्तिरेव सा। यस्तच्छ्रोता निराकारः स एव परमेश्वरः। नादः शक्तिरिति श्रेयं नादस्थानं कण्ठादिकः। श्रेयस्थाने विलीने च सोऽप्यभेदायधिगम्यते। नादोयावान् मनस्तावच्छादाने तु मनोन्मनी। सशब्दं कथितं ज्योतिर्निःशब्दं ब्रह्म कथ्यते। यदा नादानुसन्धानात् भंक्षोणाः सर्ववासनाः। निरञ्जने विलीयन्ते तिचित्तं मारुतात्मनः। नादकोटिसहस्राणि बिन्दुकोटिशतानि च! सर्वं तत्र लयं यान्ति यत्र देवो निरञ्जनः" हठप०।

हठोपलक्षणम् ईश्वरगीतासंवादे "यदा परिचये शक्तिचिन्तोर्ध्वमुपैति यम् षट्चक्राणि क्रमाद्भित्त्वा तदा खुरक्षिमादयः। पुरा सन्धित्रयं भित्त्वा ब्रह्मरन्ध्रं महतो रवो। स्फुटन्ति पुष्पवंशास्त्रियन्थयो योगिनस्तदा। वायुस्तदैव सर्वाङ्गे योगोभवति सङ्गतः। धीरैः सैव सहजा सा उच्यते सर्वसिद्धिदः। मूलाधारं यदाऽपानो भित्त्वोर्ध्वं याति वेगतः। तदातीतानागतज्ञो योगी भवति तत्त्वधीः। स्थितिं भित्त्वाऽर्द्धगाऽपानचोभिता स्वाद्यदोरवो। तदा नादोत्थितिरुच्चै जायते योगिनो हृदि। यदा नादोत्थितिस्तु मणिपूरभिदा भवेत्। अनाहतविभेदेन षडाध्वनिरुदीरितः। विष्णुग्रन्थिभेदेन घण्टानादः प्रजायते। यदा त्वाज्ञाचक्रभेदस्तदोपैति मनोलयम्। षडङ्गयोगसंसिद्धं वायुना शक्तिराव्रजेत्। यदा तदा सुनिश्चिन्तोऽकलं सङ्गजेऽव्ययम्"। पवनयोगसंसिद्धे "सङ्गासङ्गा समभ्यस्य सङ्गावन्मतः परम्। सङ्गावेधस्तु नियत प्रकृत्यौक्लिष्टवासनम्। ज्ञानं सुदृढं बद्धा मूलबन्धं विधाय च। उड्डियानं तथा बन्धं ततो जालन्धराभिधम्"। "बध्यसेदिति सम्बन्धः।

"प्राणे सुषुम्णां सम्प्राप्ते नादोऽन्तः श्रूयतेऽद्भुधा। घण्टादुन्दुभि शङ्खाब्धिमेघवेणवादितावत्। तनूनपात्तिलारातारेफतपनोपमम्। ब्रह्मनाडीं गते प्राणे विम्बरूपं प्रकाशते। तथाच विष्णुपाख्यायाः "यदा संक्षीयते प्राणो मानसं च प्रलीयते। तदा समरसत्वं तत्समाधिः सोऽभिधीयते। मनःस्थैर्यात् स्थिरो वायुस्ततो बिन्दुः स्थिरो भवेत्। बिन्दुस्थैर्यादवत्यं सिद्धस्थैर्यं प्रजायते"। सैषा निष्पत्तिदशा साधकस्य राजयोगारम्भ इति तथा च हठप्रदीपिकायाम्। "प्रनष्टोच्छ्वासनिःश्वासःप्रध्वस्तविषयग्रहः। निश्चेष्टो निर्विकारश्च लवो भवति योगिनः। तथा चोक्तं मन्त्रान्तरे "शुष्के मले तु वायोः कालाग्निरुद्दीपितो ततः। अधोगतिं विहायाशु भवत्यूर्ध्वं सुखात्मतः। अपानस्त्वूर्ध्वगो भूत्वा वह्निना सह गच्छति। प्राणस्थानं ततो वह्निः प्राणापानौ च सत्वरम्। मिलित्वा कुण्डलीं नीत्वा प्रसुप्तां कुण्डलीं पुनः। प्रबुद्ध विशतिस्थानं सुषुम्णा वक्त्रगन्धिकम्। ब्रह्मग्रन्थिं ततो भित्त्वा रजोगुण समुद्भवम्। सुषुम्णा वदनस्थाना प्रयात्यूर्ध्वं च सत्वरम्। विष्णुग्रन्थिं च सालभ्य रुद्रैः सत्त्वसमुद्भवैः। वेगेन महता गच्छेद्विष्णुग्रन्थिं विभिद्य सा। ऊर्ध्वं गच्छति वत्साख्ये रुद्रग्रन्थिसमोभवः। तत ऊर्ध्वं सुषुम्णाया याति शीतांशुमण्डलम्। आकाशाख्यं तत्त्वं दले षोडशभिर्दलम्। तत्र शीतांशुसम्भूतं द्रावं श्रोवयतेऽनिशम्। चलिता प्राणवेगेन रुद्रग्रन्थिरवेद्भिदम्" हठप०।

"योगिनः कालवञ्चनोपायो यथा "ज्ञात्वा कालं निजं योगी लयस्थानं समाश्रितः। युञ्जीत योगं कालस्य वञ्चनाय यथाक्रमम्। बद्धसिद्धासने देहं परयेत् प्राणवायुना। कृत्वा दण्डस्थिरं बुद्धा दश द्वाराणि रोधयेत्। बद्धा च खेचरीं मुद्रां शोधयाद्ध जत्रुगाम्। अपाने मूलबन्धञ्च कुर्यादग्नेस्तथोदरे। कृत्वाथ भुजगीं शक्तिं मूलाधाराम्बुजे स्थिताम्। सुषुम्णावर्त्मगां पञ्चचक्राणां भेदिनीं शिवाम्। कौलं कृत्वाथयं नीत्वा यावन्नीं बुद्धिमनोयुताम्। षडम्बुजसमध्यस्थशिवे नीत्वा सुधारवेत्। ततः सुधाकरोद्भूतमस्तं तेन मूलतः। विसृजन्तीं सकलं देहं प्राणवन्तीं विचिन्तयेत्। तया सार्द्धं ततो योगी शिवेनैकात्मतां व्रजेत्। परानन्दमयो भूत्वा चिद्वृत्तिमपि संत्यजेत्। ततोऽजमनाभासमद्वयावस्थितम्। सर्वाङ्गकल्पनातीतं स्वयं कालो निरूपति तम्। स एव कालः सञ्चिन्त्यः समर्थो नान्यतःपरः। कः केन म्रियते तत्र क्षियते नापि कश्चन। ततो व्यतीते समये कालस्य भयनिरूपिणि। योगी सुप्रोक्षित इव प्रतिबोधे प्रबोधितः। एवं सिद्धो भवेद्योगी वञ्चयित्वा विधानतः। कालं कलितसंसारपीडनेशाद्भुतं हितम्। ततश्चिन्तयने योगी विचरत्येव एव सः। यद्यत् संसारवैचित्र्यं खेच्छया निरङ्कुशः" हठप०।

हठालु पु० हठः प्रवर्त्तमानः आलुरिव। कुम्भिकायाम्। (पाना) शब्दच०। [धरणिः।

हठी स्त्री हठ-अच् गौरा० ङीष्। वारिपर्ण्याम् (पाना)

हड्डि पु० हड-इन् पृषो०। यमुमारणसाधने काष्ठयन्त्रभेदे (हाड़िआठ) शब्दर०। [शब्दमा० स्त्रियां ङीष्।

हड्डिक पु० स्त्री० हड-इकक् पृषो०। नीचजातिभेदे (हाड़ि)

हड्ड न० हड-ड डस्य नेत्त्वम् पृषो०। अस्थि (हाड)। संज्ञायां कन्। नीचजातिभेदे (हाड़ि) शब्दमा०। इन् हड्डिरप्यत्र। [शब्दच०।

हड्डज न० हड्डात् जायते जन-ड। अस्थिसारे मज्जायां

हड्डिक पु० हड्डिक-स्वार्थे क। (हाड़ि) जातिभेदे स्त्रियां जातित्वात् ङीष्। स च यथाः "मद्यपाण्डालकन्यायां नेटीर्थेण गोनक!। वभूवतुर्द्वौ पुत्रौ हड्डिकः गौण्डिकस्तथा" ब्रह्मवै० ब्र०ख० १०अ०।

हण्डा स्त्री हन-डा डस्य नेत्त्वम्। १डङ्कति सत्यालभेदे (हाँड़ा) नाटयोक्तौ नीचसम्बोधने अव्य०। हड्डावत् आबन्तोऽपि शेषार्थे स्त्री भरतः।

हण्डिका स्त्री क्षुद्रा हण्डा कन्। क्षुद्रे स्थालीपात्रे (हाँड़ि)।

हण्डिकासुत पु० हण्डिकायाः सुत इव। क्षुद्रे स्थालीपात्रे हण्डिकाकारे (हाँड़ि) शिवा०। [अमरः।

हण्डे अव्य० हन-डे डस्य नेत्त्वम्। नाटयोक्तौ नीचसम्बोधने

हत त्रि० हन-क्त। १नाशिते २प्रतिहते ३प्रतिबद्धे ४आशारहिते अमरः ५गुणिते च। भावे क्त। ६हनने ७गुणने च न०।

हतक त्रि० हत इव नष्टप्रायत्वात् कन्। नष्टप्राये (मड़ा)।

हताश त्रि० हता आशा यस्य। १आशाशून्ये २निर्दये ३विगुणे च मेदि० ४बन्ध्ये शब्दर०।

हति स्त्री हन-भावे क्तिन्। १हनने २मारणे ३व्याघाते ४अपकर्षे ५गुणने च।

हत्नु पु० हन-क्नु। १व्याधौ २शस्त्रे च उणा०।

हत्या स्त्री हन-भावे क्यप्। १मारणे वधे प्राणवियोगानुकूलव्यापारे "ब्रह्महत्या सुरापानम्" स्मृतिः २हनने च।

हत्थ त्रि० हन-क्थ। विघ्ने उणादि०।

हद विशेषगतौ भ्वा० आ० अक० अनिट्। हदते अहत्त।

हद्दा स्त्री ताजकोक्ते पञ्चवर्गविचारनयोपयोगिनि अहर्भेदस्वामिकराशिभेदखण्डभेदे यथोक्तं नीलक०ता०

"मेषेऽङ्गुलकौटमरेषभागा जीवास्फुजित्सारथनैश्चराणाम्। वृषेऽष्टपञ्चाग्नियमानलांशाः शुक्रस्य जीवार्किकुजेशहद्दाः। युग्मे षडङ्कैर्दनगाङ्कभागाः सौम्यास्फुजिज्जीवकुजार्किहद्दाः। कर्केऽद्रिवेदार्कदनगाश्विभागाः कुजास्फुजिज्जेज्यशनैश्चराणाम्। सिंहेऽङ्कभूताद्रि-रसाङ्कभागा देवेज्यशुक्रार्किकुजारिहद्दाः। स्त्रियां नगाग्न्यश्विनगाश्विभागाः सौम्योमनोजीवकुजार्किनाथाः। तुले रसाद्रिदनगाश्विभागाः शोभास्फुजिज्जीवास्फुजिदारनाथाः। कीटे नगाब्ध्यद्रिशराङ्कभागाः सौमास्फुजिज्जेज्यशनैश्चराणाम्। चापे रवीज्यस्फुटिजज्ञवेदा जीवास्फुजिज्जारशनैश्चराणाम्। मृगे नगाद्र्यब्धियुगस्तुतीनां सौम्ये व्ययुक्तार्किकुजेशहद्दाः। कुम्भे नगाङ्काद्रिशरेषुभागाश्चशुक्रजीवारशनैश्चराणाम्। मीनेऽर्कवेदानलनन्दपक्षाः खितेज्यसौम्यारशनैश्चराणाम्। त्रिंशत्पदे त्रिंशतिरङ्गभे स्वे हद्देश्वरश्चन्द्रादगर्कद्विकाणे"।

हन वधे गतौ च भ्वा० प०सक० अनिट्। हन्ति प्रथिहन्ति प्रहन्त्व (स्वः) जहि अवधीत्। जघान कर्मणि अघानि अवधि। णिच् घातयति जिघांसति अघन्यते "हन्तेः हन्ति कृगोदरि" इत्यादावालङ्कारिकाः गतौ निहतार्द्रतामाहुः।

अभि+आघातभेदे केनचित् पदार्थेन संयोगभेदे अभिघातः। अव+वृणाद्यपसरणव्यापारभेदे त्रोणीनवहन्ति। [घातः। आ+केनचित् पदार्थेन संयोगानुकूलव्यापारे आहन्ति आस्त्राङ्कर्मणि अकर्मत्वे च आत्म० वक्ष आहते।

प्रति आ+प्रत्याघाते प्रतिबन्धे प्रत्याहन्ति। [व्याघातः वि+आ परस्परेण विरोधे विशेषेण ताडिते च व्याहन्ति उद्+ऊर्ध्वं गतौ उत्क्षेप्ये हनने च।

उप+उद्+आरम्भे उपोद्घातः आरम्भार्थः सङ्कृतिभेदः। नि+निःशेषेण हनने खरान्तरघातेन उदात्तस्वरसम्पादने च निर्+निःशेषेण हनने वज्रादिशब्दे च। "निघाते भूमिखनने मनुः।

परा+प्रतिबन्धे निरोधे।

प्रति+प्रतिरोधे प्रतिकूलगतौ च। [प्रत्नि योधाः।

वि+अति+परस्परहनने व्यतिहारेऽपि न आत्म०। व्यतिसम्+सम्यक् हनने समूहभावे अक०।

हन् अव्य० हन-भावे क्विप्। १हत्यायां २अनुनये च मेदि०। कर्त्तरि क्विप्। २हननकर्त्तरि त्रि० हन्ता ब्रह्महा।

हन त्रि० हन कर्त्तरि अच्। हननकर्त्तरि त्रि० को०।

हनन न० हन-भावे ल्युट् "स्यात् प्राणवियोगफलव्यापारो हनन" इतमर्थस्यपक्षे १व्यापारभेदे २गुणने च। [रत्नमा०।

हनील पु० हन-इन् ङीष् हन्यां नीयते नी-ड। केतकीवृक्षे

हनु(नू) पु० स्त्री० हन-उन् स्त्रीत्वे वा-ऊङ्। १कपोलद्वयोपरिस्थे मुखभागभेदे २मुखविवाधिन्यां स्त्री अमरः।

शरोगे ४अक्षभेदे ५स्तवौ च स्त्री जटाधरकोषः ।

हनुग्रह पु० हनुजाते रोगभेदे तन्निदानादि "जिह्वा निर्लेखनाच्छुष्कभक्षणादभिघाततः । कुपितो हनुमूलस्था संक्षिपत्याऽनिलो हनुम् । करोति विहताक्षत्वमथ वा संहताक्षताम् । हनुग्रहः स तेन स्यात् लक्ष्म सर्वत्र भाषणम् । संक्षिपत्या अधःकृत्वा विहताक्षत्वं आतसंक्षत्वम् । निर्लेखनं कर्कशस्य शुष्कं चणकादि संहताक्षत्वं दन्तसंहतताम्" भावप्र० हनुस्तम्भोऽत्र ।

हनु(नू)मत् पु० हनु(नू)+अस्त्यर्थे मतुप् । रामस्य अतुचरे अञ्जनागर्भजाते पवनतनये वानरभेदे त्रिका० ।

हनूष पंल्लो० हन-ऊषन् । राक्षसे त्रिका० स्त्रियां ङीप् ।

हन्त अव्य० हन-त । १हर्षे २अनुकम्पायां ३विषादे अमरः । ४वाक्यारम्भे ५आर्द्रौ हर्षादे ७अस्मिन् शब्दच० । दण्डादेशेदि० ६अनुकम्पने च अजयपालः ।

हन्तकार पु० हन्तेत्यस्य कारः करणं उच्चारणम् वा ज-घञ् । १क्षतिपत्रे अभयदाने २हन्तशब्दप्रयोगे च ।

हन्तु पु० हन-तुन् । १हत्तौ २दण्डे च ।

हन्तृ त्रि० हन-तृच् । १हननकर्त्तरि २सततहननात्तुगीचवितरि च स्त्रियां ङीप् । "महिषासुरहन्त्र्याच प्रतिष्ठा दक्षिणायने" देवप्र०त० ।

हन्त्र त्रि० हद-क्त्र । अतपुरीषोत्सर्गे अमरः ।

हपुषा स्त्री हेति पुष्यति पुष-क । मरीचदलचट्टीचक्षण्यवर्षवस्तुनि वणिग्द्रव्यविशेषे । पृषो० अस्य षः तत्रार्थे । "हपुषा हपुसा विम्बा परारुष्कफला स्मृता । मत्स्यगन्धा शीतहन्त्री विम्बी धान्वनवासिनी । हपुषा दीपनी तिक्ता स्तम्भनी मुखशोधनी । पित्तोदरप्रमेहार्शो व्रणशोथगुल्मशूलहृत् । पराप्येतद्गुणा प्रोक्ता रूपभेदो द्वयोरपि" भावप्र० ।

हम् अव्य० हा-डम । १हर्षे २अनुनये च मेदि० ।

हम्भा(म्भा) स्त्री हम्+भा-हम्भ-अङ् वा । गवां ध्वनौ त्रिका० पृषो० । हम्भाशब्दे हेमच० ।

हम्म गतौ भ्वा० प० सक० सेट् । हम्मति । अहम्मीत् ।

हय गतौ सक० क्वान्तौ अक० भ्वा० प० सेट् । हयति अहयीत् ।

हय पुंस्त्री० हय-हि-वा अच् । १घोटके अमरः स्त्रियां योषधर्थेऽपि हयगवेत्यादिना ङीप् । अश्वशब्दे दृश्यम् । तत्र वर्णपदार्थः कविस० उक्ता यथा "औत्तमं वेगसेजश्च तथा सङ्गतपस्थितिः । खुरोत्खातरजो रूपं जातिर्गतिविचित्रता" । तस्य शङ्खनावुक्तं रसनराजशाकुने यथा "हेषारवं सृजति वामतोयः शुभ्र चतिर्दक्षिणपादघाते । कण्डूयते दक्षिणमङ्गभागं वक्रं तरक्षः स पदं ददाति" ।

हयकातरा स्त्री हयः कातरो यस्याः ५त० । अश्वकातराख्यछन्दे "कातरा हयपर्य्यन्तैः कातरान्तैः प्रकीर्त्तिता । अश्वकातरिका तिक्षा वातघ्नी दीपनी परा" राजनि० ।

हयगन्ध पु० हयस्येव गन्धोऽस्य । १काचलवणे २अश्वगन्धायाम् ३अश्वमोदायाञ्च स्त्री राजनि० ।

हयग्रीव पु० हयस्येव ग्रीवा यस्य । १विष्णोरवतारभेदे २दैत्यभेदे च "हयग्रीवेण युयुधे तत्र देवो जगत्पतिः । हयग्रीवं यत्र हत्वा मधिकूटं तथागमत्" हरिवं० ८२अ० । ३दुर्गायां स्त्री तन्मूर्त्तिलक्षणं अश्वशिरस् शब्दे ५।१४पृ० दृश्यम् । ४राजभेदे "बहवः पूर्वराजर्षे हयग्रीवश्च पार्थिव !" भा० शा० २४अ० ।

हयग्रीवहन् पु० हयग्रीवाख्यं दैत्यं हतवान् हन-क्विप् । विष्णौ हेमच० ।

हयङ्कष पु० हयसङ्घैःअयं कषति कष-खच् । १मातलौ इन्द्रसारथौ त्रिका० । २अश्वचालके च ।

हयन न० हि-गतौ करणे ल्युट् । कर्णीरथे अमरः ।

हयपुच्छी स्त्री हयस्य पुच्छाकारोऽस्त्यस्याः अच् गौरा० ङीष् । भाण्डपर्ण्याम् अमरः ।

हयप्रिय पुं० ६त० । १यवे हेमच० । २अश्वगन्धायां ३अश्वजूर्ण्यां स्त्री राजनि० ४अश्वयुक्ते त्रि० । हयेष्टादयोऽप्यत्र

हयमार पु० हयं मारयति निर्बन्धात् मृ-णिच्-अण् । करवीरे राजनि० एयुच् । तत्रैव अमरः । [शब्दच०

हयमारण पु० हयं मारयति मृ-णिच्-ल्यु । अश्वत्यागे

हयवाहन पु०हयो वाहनमस्य । सूर्य्यपुत्रे रेवन्ते हेमच० । २अश्ववाहनयुक्ते त्रि० । ६त० । ३अश्वस्य चालने न० ।

हयवाहनसङ्कर पु० हयस्य वाहनं चालनं सङ्करति सम+कृ-अच् । रङ्गकाञ्जने शब्दच० ।

हयशाला स्त्री ६त० । अश्वशालायां तत्करणप्रकारादि मत्स्यपु० १९१अ० उक्तं यथा "गवां स्थानं तथैवात्र तुरगाणां तथैव च । उत्तराभिमुखी श्रेष्ठी तुरगाणां विधीयते । दक्षिणाभिमुखी वाथ परिग्रहास्तु गर्हिताः । तुरगास्तु तथा धार्य्याः प्रदीपे सार्वरात्रिके । कुक्कुटान् वानरांश्चैव मर्कटांश्च नराधिप ! । धारवेदश्शालायां सर्वत्सां धेनुमेव च । अन्नाच्च धार्य्या यत्न

तरणाथां स्त्रितैषिणा । गोगजाश्वादिशालासु तत्पुरीषस्य निर्गमम् । अस्तं याते न कुर्वीत देवदेवे दिवाकरे । अधिकमन्यशास्त्रादिशब्दे ५२४ पृ० अन्यशब्दे च दृश्यम् ।

हयशीर्ष पु० हयस्येव शीर्षमस्य । १विष्णुमूर्त्तिभेदे हयशीर्षपञ्चरात्रे तत्पूजादिकं दृश्यम् । २शालग्रामभूर्त्तिभेदे शालग्रामशब्दे ६···१ पृ० दृश्यम् ।

हया स्त्री हयः हयगन्धोऽस्त्यस्याः अच् । अश्वगन्धायाम् राजनि० । घोटक्यां च हयीत्येव ।

हयाध्यक्ष पु० हयेषु तद्रक्षणेषु अध्यक्षः । अश्वरक्षणाधिकृते

हयानन्द पु० हयमानन्दयति आ+नन्द-णिच्-अण् । सद्गे राजनि० ।

हयारि पु० ६त० । करवीरे रत्नमा० ।

हयाशना स्त्री हयैरश्यते अश-ल्युट् । बल्लीवल्ले शब्दच०

हयोत्तम पु० हयेषु उत्तमः । अश्वरत्ने आजानेयेऽश्वे त्रिका०

हर पु० हृ-अच् । १रुद्रे अमरः २अग्नौ ३गर्हणे ४विभाजके च "अनोन्यहारमिश्रितौ हरांशाविति" लीला० । हृ-भावे अप् । ५हरणे ६विभाजने च ।

हरगौरी स्त्री हरदेहार्द्धहरा गौरी या० त० । अर्द्धनारीश्वररूपे १शिवपार्वत्योर्मूर्त्तिभेदे तल्लक्षणम् । २७०१ पृ० दृश्यम् । द्वन्द्व० । २शिवपार्वत्योः हि० व० ।

हरचूडामणि पु० हरस्य चूडामणिरिव । चन्द्रे ।

हरण न० हृ-भावे ल्युट् । १स्थानान्तरकरणे २विभाजने च कर्मणि ल्युट् । ३योतृकादौ देये धने भा० आ० हरणाहरणपर्व २२१अ० । ४भङ्गे मेदि० ।

हरतेजस् न० ६त० । १पारदे राजनि० २शिववीर्य्ये च । हरवीर्य्यादयोऽप्यत्र । [गङ्गायां हेमच० ।

हरशेखरा स्त्री हरस्य शेखरमाशास्त्यनयाख्यायां अच् ।

हरि पु० हृ-इन् । १विष्णौ २सिंहे ३सूर्य्ये ४वानरे ५भेके ६शुकपक्षिणि अमरः । ७चन्द्रे ८स्वर्णे ९वायौ १०अश्वे ११यमे १२हरे १३ब्रह्मणि १४शिरसि जम्बुद्वीपस्य १५वर्षभेदे १६इन्द्रे च मेदि० । १७मयूरे १८कोकिले १९हंसे २०सर्पे शब्दर० । भट्टहरिनामके वाक्यप्रदीयग्रन्थकारके २१पण्डिते त्रिका० । २२पिङ्गलवर्णे २३हरिद्वर्णे हेमच० २४तद्वति त्रि० । "हरिं विदित्वा हरिभिश्च वाजिभिः" रघु । २५पीते अनेकार्थको० ।

हरिक पु० हरि+संज्ञायां कन् । पीतहरिद्वर्णाक्ते हेमच० ।

हरिकेलीय पु० हरिकेलिमर्हति छ । बङ्गदेशे हेमच० ।

हरिकेश पु० हरिः पिङ्गलः केशोऽस्य । १शिवे २शिवभक्तयक्षभेदे च । स एव तत्प्रसादात् काश्यां दण्डपाणित्वमाप्तवान् इति काशीखण्डे २२अ० स्थितम् । बहुव्री० १५८अ० दृश्यम् । [ग्राम् अपराजितायां राजनि० ।

हरिक्रान्ता स्त्री हरिरिदमर्थः क्रान्तो येन । विष्णुक्रान्ता०

हरिगृह न० ६त० हरेर्विष्णोर्गृहमिव गृहम् । १हरिमूर्त्तिगृहे २एकचक्रपुरीभेदे च त्रिका० ।

हरिचन्दन न० हरेरिन्द्रस्य प्रियं चन्दनम् चन्द्यतेऽनेन चदि-ल्युट् ६त० वा । १देवतरुभेदे अमरः । हरेर्विष्णोः प्रियं चन्दनम् । २श्वेतचन्दने ३गोशीर्षनामके मलयोद्भवे देशजाते चन्दनभेदे ४ज्योत्स्नायां ५कङ्कुमे मेदि० । ६पद्मकेशरे हला० । ७चन्द्रराङ्के च न० शब्दर० । "हरिचन्दनन्तु दिव्यं स्यात् हिमं तदिह दुर्लभं मनुजैः । पित्तातीसारविषविषमज्वरवमथुप्रशान्तिमेदोघ्नं राजनि० । "हरं च तुल्यौशीरं कर्पूरागुरुयोगतः । अथ वा केशरैर्युक्तं हरिचन्दनमुच्यते" पद्मा० पा० ख० १२अ० उक्ते दशयुक्तद्रव्यगणे च ।

हरिण पुंस्त्री० हृ-इनन् । स्वनामख्याते १पशौ अमरः स्त्रियां ङीष् । २शिवे ३विष्णौ ४हंसे ५शुक्लवर्णे ६पाण्डुवर्णे च । ७तद्वति त्रि० अमरः । "हरिणः शीतलो बद्धविष्मूलो दीपनो लघुः । रसे पाके च मधुरः सुगन्धः श्लेष्मपित्तहरो राजन० तन्मांसगुणाः । "हरिणस्यापि विज्ञेयः षड्भेदोऽत्र भैरव ! । कृष्णः कृष्णो रुरुश्चैव पृषतश्च मृगस्तथा । एते बलिप्रदानेषु धर्मदाने च कीर्त्तिताः" कालिकापु० ६६अ० । [शब्दर० ।

हरिणनर्त्तक पु० हरिण इव नृत्यति नृत-ण्वुल् । किन्नरे

हरिणहृदय पु० हरिणस्येव भीतं हृदयमस्य । भीरौ शब्दर०

हरिणाक्षी स्त्री हरिणस्येवाक्षि यस्याः ५त० ङीप् वा समा० ङीष् । १कङ्कविलासिनीनामगन्धद्रव्ये शब्दच० । २हरिणतुल्यनेत्रयुते त्रि० स्त्रियां ङीष् । "हरिणाक्षि ! कटाक्षेण यात्मानमवलोकय इत्यु ङ्गटः ।

हरिणाङ्क पु० हरिणः मृगनामको मृगोऽङ्कचिह्नमस्य बहु० क्रोडे वा अच् । १चन्द्रे शब्दर० २कर्पूरे च ।

हरिणी स्त्री हरितवर्णा स्त्री ङीष् तस्य नः । १हरितहरीतक्यां स्त्रियां मेदि० २स्वर्णप्रतिमायाम् अमरः । ३स्वर्णयूथ्यां ४मञ्जिष्ठायां राजनि० ५तरुण्यां ६वरस्त्रियां शब्दर० "वसुयुगहयवेदैर्यौ स्नौ स्नौ गो यदा हरिणी तदा ह० र० वृत्तरत्नाकरे ७७प्रदमाक्षरपादके छन्दोभेदे हरिणक्ष स्त्री ङीष् । दन्त्यान्त हयघरोमेदे ।

"चरतः किल दुश्चरं तपः शशिनो हरिणस्य पुरा। प्रणिधाय समाधिमेदिनीं हरिरक्षै हरिणीं सराङ्गनाम्" रघुः।

हरित् पु० हृ-इति। १नीलपीतमिश्रितवर्णे (पातारङ्ग पलाशवर्णे च अमरः २तद्वति त्रि०। ३सूर्य्याश्वे त्रिका० ४सुदृशे हेमच०। ५सिंहे हलायु० ७दिग्भेदे स्त्री अमरः। ८हरिद्रायां राजनि० १०अश्वे न० मेदि०।

हरित्पर्ण न० हरित् पर्णमस्य। मूलके राजनि०।

हरित पु० हृ-इतच्। १सिंहे २मन्थानतृणे राजनि० ३हरिद्वर्णे ४तद्वति त्रि० अमरः स्त्रियां ङीप् तस्य नत्वं। ५दूर्वायां मेदि० ६जयन्त्यां ७हरिद्रायां ८कपिलद्राक्षायां ९पाट्यां १०नीलदूर्वायाञ्च स्त्री राजनि० टाप्। ११स्त्रीणेयके न० राजनि०। [आर्के न० राजनि०

हरितक न० हरितेन वर्णेन कायति प्रकाशते कै-क।

हरितपत्रिका स्त्री हरितं पत्रं यस्याः कप् कापि अत इत्वम्। पाट्यां राजनि०।

हरितशाक पु० हरितं शाकमस्य। शोभाञ्जने राजनि०।

हरिताल न० हरिवर्णश्च पीतवर्णश्च तालः प्रतिष्ठा यत्र। १पीतवर्णे उपधातुभेदे "च हरितालसमाननवांशुकः" माघः। २पीतवर्णपक्षिभेदे पुंस्त्री० राजनि०। स्त्रियां ङीष्। स्वार्थे क। हरितालेन० अमरः।

"हरितालं द्विधा प्रोक्तं पत्राख्यं पिण्डसंज्ञकम्। तयोरद्यं गुणैः श्रेष्ठं ततो हीनगुणं परम्। स्वर्णवर्णं गुरु स्निग्धं सपत्रं चाभ्रकत्वचत्। पत्राख्यं तालकं विद्याद् गुणाद्यं तद्विपर्ययम्। स्निग्धं पिण्डसमं श्लक्ष्णमसत्वं तद्विपर्ययम्। स्त्रीपुंप्रकारकं स्वल्पगुणं तत् पिण्डतालकम्। हरति च हरितालस्थहरितां देहजातां हन्ति च बहुतापामङ्गसङ्कोचपीडाम्। वितरति कफवातौ कुष्ठरोगं विदध्यादिदमधिकमशुद्धम् मारितञ्चाप्यसम्यक्"। "तालकं कफवातघ्नं तद्वर्णं कान्तिकृत् पचेत्। दोषान्यच्चैव यत्किञ्चित् ततः कुष्ठाष्टकञ्चरेत्। तिलतैले पचेद्वापि यामञ्च स्निग्धताजले। एवं यन्त्रे चतुर्यामं पक्वं शुद्धति तालकम्"। अथ तालस्य मारणविधिः "शुद्धं तालं गुडं पीत्वा नवनीतेन तु। खल्वे विमर्दयेद्यत्नं दिनं पर्यादिवाप्नुयेत्। ततः पुनर्नवाचारैः स्वात्यामूलं प्रपूरयेत्। तत्र तद्गोलकं कृत्वा पुनस्तेनैव पूरयेत्। आकण्ठं पिठरं तत्र पिधानं धारयेन्मुखे। स्वार्कौ चुल्यां समारोप्य क्रमाद्वह्निं विवर्द्धयेत्। दिनान्तरञ्चान्यानि पञ्च वह्निं प्रदापयेत्। एवं तन्म्रियते तालं भावा तस्यैकरक्तिका। चतुर्थानन्यतोऽन्यानि यथायोग्यं प्रयोजयेत्"। एवं शोधितस्य मारितस्य तालस्य गुणाः। "हरितालं कटु स्निग्धं कषायोष्णं हरेद्विषम्। कण्डूकुष्ठव्रणरोगाश्चकफपित्तकृमीन्। "तालकं हरते रोगान् कुष्ठमृत्युज्वरापहम्। शोधितं कुरुते कान्तिं वीर्य्यवृद्धिं तथायुष्यम्" भावप्र०।

हरितालस्य गन्धगुणाः "हरितालोऽल्पविट्कः स्यात् कषायो मधुरो लघुः। रक्तपित्तश्रमश्लेष्मतृष्णाघ्नो व्रणशोधनः" राजनि०।

हरितालिका स्त्री हरेस्तालो इवतालो यस्यां कप् अत इत्वम्। १शैरभाद्रशुक्लचतुर्थ्याम् हरितवर्णाय अलति पर्य्याप्नोति अल-ण्वुल्। २दूर्वायाम् त्रिका०। ण ङीप्। हरितालौ दूर्वायाम् सा च आकाशरेखायां मेदि० खड्गलतायाम् हरितालिकायाञ्च।

"भाद्रे मासि सिते पक्षे हस्तदैवतसंयुता। हरितालो चतुर्थी स्यात् सर्वाघौघप्रणोदिता सदा। भाद्रे मासि सिते पक्षे चतुर्थ्यां स्नानियोगतः। ददाति लिखितं घोरं दुष्टस्वप्नो न संशयः। करचित्रानलचैत्रे हरौ स्वर्णे चतुर्थिका। हरितालीति समाख्याता सद्भाग्यप्रीतिदा सदा" राजमार्त्तण्डः

हरिताश्म न० हरितवर्णमश्म अश्नोते वा अश्मसमा० (पेरीज्ञा) १मणिभेदे २तत्ये (तुँत) उपधातुभेदे च राजनि०।

हरिद्भ पु० हरिर्हरिद्वर्णो दर्भः। हरिद्वर्णे कुशे अमरः।

हरिदश्व पु० हरिरश्वनोऽश्वो यस्य। १सूर्य्ये २चक्रवर्त्तिनि च अमरः।

हरिदेव पु० हरिर्देवोऽधिष्ठाता यस्य। श्रवणानक्षत्रे।

हरिद्गर्भ पु० हरिद्वर्णौ गर्भौ यस्य। हरिद्वर्णे कुशे राजनि०।

"दर्भौ द्वौ च गुणे तुल्यौ तथापि च सितोऽधिकः। यदि श्वेतकुशाभावस्तत्स्थानेऽन्यं योजयेद्धरिद्गर्भकम्" राजनि०। "दर्भद्वयं त्रिदोषघ्नं मधुरं तुवरं स्थिरम्। मूत्रकृच्छ्राश्मरीहृद्यं विशेषाद्विषरक्तप्रदरान्नुदेत्" भावप्र०। तन्मूलगुणाः "कुशमूलं स्थिरं रुच्यं मधुरं पित्तनाशनम्। रक्तज्वरदाहशमनं वातोदावर्त्तजित्" राजनि०।

हरिद्रव पु० हरिवर्णः पिङ्गलवर्णो द्रव इव। नागकेसररक्षसि त्रि०।

हरिद्रा स्त्री हरिं पीतवर्णं द्रवति द्रु-गतौ ड। प्रसिद्धे ओषधिभेदे।

"हरिद्रा कटुका तिक्ता रूक्षोष्णा कफपित्तनुत्। वर्ण्या त्वग्दोषमेहास्रशोथपाण्डुव्रणापहा"। (वनहरिद्रा) "अरण्यहरिद्रीकन्दः कुष्ठवातास्रनाशनः"। (कर्पूर-हरिद्रा) "दार्वी भेदाख्यगन्धा च सुरभिश्चारुदारु च। कर्पूरा पद्मपत्रा स्यात् सुरभिः सुरनायिका। आख्यगन्धि-हरिद्रा वा सा पीता वातला मता। पित्तरक्तक्षुरा-तिक्ता सर्वकण्डूविनाशिनी" भावप्र०।

हरिद्रागणेश पु० हरिद्रावर्णयुक्तो गणेशः। पीतवर्णे गणेशभेदे तन्त्रसारः। [स्त्रियां ङीष्।

हरिद्राङ्ग पुंस्त्री०हरिद्रेव अङ्गमस्य। हरितालवृक्षे शब्दच०

हरिद्राभ पु० हरिद्रेव आभाति आ+भा-क। १पीतवासे (पियावास) २वर्णरके ३पीतवर्णे च। ४तद्वति त्रि० अमरः।

हरिद्रारात त्रि० हरिद्राया इव रागः रञ्जनमस्तुरागः। अस्थिरानुरागे धौकृदे। "क्षणमात्रानुरागच हरिद्रा-राग उच्यते" हेमा०।

हरिद्रु पु० हरिः हरिद्वर्णौ दवादिद्वारा द्रुः। १दारुहरिद्रायाम् हेमच०। २दारुहरिद्रायाञ्च अमरः। [तीर्थभेदे

हरिद्वार न० हरेस्तत्प्राप्तेः द्वारं सेवनात्। स्वनामख्याते

हरिनामन् न० हरेर्नाम तदाख्यानं वा। १विष्णुनामनि २तदाख्याने च हरेरिव नामास्य। ३सद्गे पु० त्रिका०।

हरिनेत्र न० हरेर्नेत्रमिव। १श्वेतपद्मे राजनि०। २त० विष्णोर्लोचने। हरेः सिंहस्येव नेत्रमस्य दीर्घत्वात्। ३पेचके पुंस्त्री० त्रिका० स्त्रियां ङीष्।

हरिन्मणि पु० हरिद्वर्णो मणिः। मरकते मणौ अमरः।

हरिन्मुद्ग पु०हरिद्वर्णो मुद्गः। मरदि पक्वे मुद्गे राजनि०।

हरिप्रिय न० हरेर्विष्णोः प्रियम्। १काकोलीवृक्षे चन्दने शब्दच०। २जलीरे राजनि०। ३कदम्बे पु० शब्दच०। ४पीतभेकराजे ५विष्णुकन्दे ६करवीरे ७शङ्खे ८वल्लूके पु० राजनि०। ९शिवे २०वासुके च पु०। ११चक्षुषां स्त्री १२तक्षणां १३पृथिव्यां १४द्वादश्यां तिथौ च स्त्री। १५हरिवल्लभे त्रि०। [अमरः।

हरिवालुक न० हरेर्विष्णोः प्रिया वालुकास्य। एलवालुके

हरिभक्त त्रि० हरौ विष्णौ भक्तः। १विष्णुभक्तियुते "सर्व जीवेषु यो विष्णुं भावयेत् समभावतः। हरौ करोति भक्तिञ्च हरिभक्तः स च स्मृतः" ब्रह्मपु० ३५अ० उक्ते २सर्वजनसमदृष्टिपूर्वकहरिसेवके पु०। [शब्दर०।

हरिभद्र न० हरिं भद्रयति सेवयतीति अच्। हरिवालुके

हरिभुज् पु० हरिं मेघं भुङ्क्ते भुज-क्विप्। सर्पे शब्दच०।

हरिमन्थ पु०मन्थते मन्थः हरिर्मन्थ एकदेशो यस्य। १चणके राजनि० तस्य बहुमन्थनेऽपि पीतत्वमपाकात्तथात्वम्। हरिं सर्पं मन्थति मन्थ-अच्। २गण्डिकारिकायाम् शब्दच०। ३देशभेदे पु० भरतः। [१चणके भरतः।

हरिमन्थक पु० हरिः पीतो मन्थ एकदेशो यस्य कप्। चणके अमरः। २कृष्णसर्षपे च हेमच०। [हेमच०।

हरिय पु० हरिं हरिवर्णं याति या-क। पीतवर्णघटके

हरिलोचन पुंस्त्री०हरेरिव लोचनमस्य। १कर्कटे (केँकड़ा) त्रिका०। २पेचके।

हरिवंश पु० ६त०। १विष्णुवंशे हरेर्वंशो वर्ण्यतेऽनेनाख्यत्व अच्। महाभारतान्तर्गते खिलरूपे ग्रन्थभेदे। तत्प्रतिपाद्यविषयाश्च हरिवं० ३२५ अ० उक्ता यथा "हरिवंशेऽत्र दृष्टान्ताः कीर्त्यन्ते क्रममोदिताः। तत्रा-द्यमादिसर्गस्तु भूतसर्गस्ततः परः। पृथ्वीवंश्यस्य चा-ख्यानं मनूनां कीर्त्तनं तथा। दैवस्वतकुलोत्पत्तिर्वृद्धं स्व-मारकथा तथा। गान्धर्वोत्पत्तिरिक्ष्वाकुवंशाख्यानुकी-र्त्तनम्। पितृकल्पस्योत्पत्तिः सोमस्य च बुधस्य च। ग्रहाणामादिरत्रैव कीर्त्तनं कीर्त्तिवर्द्धनम्। द्युतिमत्तिष्ठ यज्ञस्य प्रसवः सत्त्वदक्षिणः। दिशोदासप्रतिष्ठा च त्रिशङ्कोः सत्यिवस्य च। ययातिचरितञ्चैव पुरुवंशस्य कीर्त्तनम्। कीर्त्तनं कृष्णजन्मादेः समस्तक्रमवेक्षया। संक्षेपात् कीर्त्तिता विष्णोः प्रादुर्भावास्ततः परम्। तारकामयमुद्धञ्च ब्रह्मलोकस्य वर्णनम्। योगनिद्राक्षय-स्त्वं च विष्णोर्वाक्यञ्च वेधसः। पृथ्वीवासञ्च देवानामंशा-वतरणं तथा। ततो नारदवाक्यञ्च स्वप्नगर्भविधिस्तथा। आर्य्यास्तवः पुनः कृष्णसप्तत्पत्तिः प्रपञ्चतः। गोव्रजे गमनं विष्णोः शकटस्य निवर्त्तनम्। पूतनाया वधो भक्षो यमलार्जुनयोरपि। वृषभेदनञ्चैव वृन्दावन-निवेशनम्। प्रावृषो वर्णनञ्चापि यज्ञनाशोदकर्षणम्। कालियस्यापि दमनं धेनुकस्य वधस्तथा। प्रलम्बनिधन-ञ्चैव शरद्वर्णनमेव च। गिरियज्ञप्रवृत्तिञ्च गोवर्द्धन-विधारणम्। गोविन्दस्याभिषेकञ्च गोपीसंक्रीड़नं तथा। अन्यस्य च वाक्यानि केशिनो निधनं तथा। अक्रूरग-मनञ्चैव नागलोकस्य दर्शनम्। धनुर्भङ्गस्य करणं कंस-वाक्यतः परम्। कुवलयापीड़वधाच्चाणूरान्ध्रवधस्तथा। कंसस्य निधनञ्चापि विलापः कंसयोषिताम्। उग्रसेना-

भिषेकश्च वादशाहासनं तथा। प्रत्यागतिर्युद्धकृता-दशोक्ता रामकृष्णयोः। मथुरायाश्चोपरोधो जरासन्ध-निवर्त्तनम्। विकद्रुवाक्यं रामस्य दर्शनं भाषणं तथा। गोमन्तारोहणञ्चापि जरासन्धगतिस्तथा। गोमन्तस्य गिरेर्दाहः करवीरपुरे गतिः। मृगाजस्य वधश्चात्र मथु-रागमनं ततः। वसुनाकर्षणञ्चैव मथुरापक्रमस्तथा। कपालेन वधः कालयवनस्य प्रकीर्त्तितः। निर्माणं द्वार-वत्यास्तु रुक्मिण्याहरणं तथा। विवाहश्चैव रुक्मिण्या रुक्मिणो निधनं तथा। बलदेवार्क्षिकं पुण्यं वलभाहा-रत्यमेव च। नरकस्य वधः पारिजातस्य हरणं तथा। निकुम्भस्य वधाख्यानं प्रद्युम्नेन कीर्त्तितम्। प्रभावत्याश्च हरणं वज्रनाभवधस्तथा। द्वारवत्या विशेषेण पुनर्नि-र्माणकीर्त्तनम्। द्वारकायां प्रवेशश्च समाधाय प्रवेशनम्। नारदस्य च वाक्यानि हरिवंशानुकीर्त्तनम्। षट्पुरस्य वधाख्यानमन्धकस्य निबर्हणम्। वसुदेवाच्या जन्मस्य जलक्रीड़ाकुतूहलम्। तथा भैमप्रवीराणां मधुपान-प्रवर्त्तनम्। ततस्त्वार्क्षिकागान्धर्वसुदाहरणं हरेः। भागोष दुर्विदग्धानुमत्या हरणकीर्त्तनम्। अम्बरस्य वधश्चैव धन्योपाख्यानमेव च। वासुदेवस्य माहात्म्यं वाणयुद्धं प्रपञ्चितम्। भविष्यं पुष्करस्यैव प्रपञ्चेनैव कीर्त्तितम्। वाराहं नारसिंहञ्च वामनं वहुविस्तरम्। केशावतारा जन्मस्य पौण्ड्रकस्य वधस्ततः। कृष्णस्य डि-म्भकस्यैव वधश्चैव प्रकीर्त्तितः। पुरत्रयस्य संहार इति हरिवंशसंग्रहः। कथितो मुनिशार्दूल! सर्वपापप्रणाशनः। हरिवंशं शृणुयाद्यस्तु सायं प्रातः समाहितः। स याति वैष्णवं धाम सत्यकामः कृकृद्वह!। धन्यं यशस्य मायुष्यं भुक्तिमुक्तिफलप्रदम्"।

हरिवल्लभा स्त्री। १जयायां २तुलस्यां राजनि० ३लक्ष्म्याञ्च।

हरिवात् पु० हरिणा घोटकेन उच्चैःश्रवसा वाति गच्छति वा-गतौ। इन्द्रे हरायुधः।

हरिवर्ष न० हरिनामकं वर्षम्। जम्बुद्वीपस्य नववर्षमध्ये वर्षभेदे त्रिका०।

"एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादश्वोयुतयोजनोत्सेधा हरि-वर्षकिंपुरुषभारतानां यथासंख्यम्" भाग ५स्क०१६अ०

हरिवासर न० हरिप्रियं वासरम्। १एकादशीदिवसे २द्वा-दशीप्रथमपादे च। "अद्यमाश्रित्य पापानि तिष्ठन्ति हरिवासरे" इति। "द्वादश्याः प्रथमः पादो हरि-वासरसंज्ञकः" इति च एकादशीतत्त्वे विष्णुधर्मो०।

हरिवाहन पु० हरिं वाहयति स्वामानं नयति वह-णिच्-ल्यु। १गरुडे हारा०। २हरिवाहनमयत्र न०।

हरिवीज न० हरेर्वीजमुत्पत्तिकारणमस्येवास्यस्य कच्। हरि-तालं "हरितालं हरेर्वीजं वज्रद्रावीजं मनःशिला" इति वैद्यकम्।

हरिशयन न० हरेः शयनं निद्रा। १विष्णुनिद्रायाम्। हरेः शयनं यत्र। २तदुपलक्षिते काले। स च "मेषादिगते सवितीव विष्णुः" इत्युपक्रम्य "प्रबुध्यते भाद्रपदेन" इत्यनेन दर्शितः भाद्रशुक्लद्वादश्यधिकार्त्तिकशुक्ल-द्वादशीपर्य्यन्तरूपो भाद्रपदद्वयात्मकः। तत्यानैकादशी-शब्दे १०७१ पृ० दृश्यम्।

हरिश्चन्द्र पु० हरिः चन्द्र इव रूपो यस्य। सूर्य्यवंश्ये त्रिशङ्कुपुत्रे राजभेदे। ऋषिभिदे च न तत्। हरि-चन्द्र एव।

हरिश्चन्द्रपुर न० त्रि०। सौभनगरे त्रिका०।

हरिषेण पु० जिनचक्रवर्त्तिविशेषे हेमच०। हरिवंशोऽत्र।

हरिसङ्कीर्त्तन न० हरेर्हरिनाम्नः संकीर्त्तनं कथनम्। आदिपुराणोद्धारे "सकलं निष्फलं राजन्! हरि-सङ्कीर्त्तनं विना" इति कर्म्मलोचनम्।

हरिहय पु० हरिनामा हरिवर्णो वा हयो यस्य। इन्द्रे अमरः "हरिं विदित्वा हरिभिश्च वाजिभिः" इति रघौ तस्य हरिवर्णहयत्वमुक्तम्।

हरिहर पु० हरिश्चासौ हरः। हरिहरयोः संश्लिष्टार्द्ध-देहतया स्थिते मूर्त्तिभेदे देवप्रतिमाशब्दे १७०१ तन्मूर्त्ति-लक्षणं दृश्यम्। द्व०। २श्रीनारायणशिवयोः द्वि० व०।

हरिहरक्षेत्र न० हरिहरयोः प्रियं क्षेत्रम्। गङ्गागण्डकी-सङ्गमान्तिकदेशस्थे पाटलिपुत्रादुत्तरस्यां दिशि स्थिते तीर्थभेदे।

हरिहरात्मक पु० १गरुडे २शिवहरे च शब्दर०।

हरीतकी न० हरिं हरितवर्णं फलहारा इता प्राप्ता रक्ष-ण संज्ञायां कन् गौरा० ङीष्। १प्रसिद्धे वृक्षे तस्याः फलम् अण् तस्य लुप्। २हरीतकीफलेऽपि अमरः। "कदाचित् कुपिता माता नोदरस्था हरीतकी" इति वैद्यकम्। हरीतकीशब्दे २८६२ पृ० दृश्यम्।

हरेणु स्त्री हृ-ऐनु। १रेणुकानामगन्धद्रव्ये अमरः। २कुल-स्त्रियां। ३घण्टीवे (भटर) पु० मेदि०। स्वार्थे क तत्रैव।

हर्त्तृ त्रि० हृ-तृच्। १हरणकारिणि २चौरे ३क्षये च पु०

हर्मन् न०हृ+मनिन्। जृम्भणे (हाइतोला) शब्दर०।
हर्मित त्रि० हर्मन्+तारक० इतच्। १जातजृम्भणे शब्दर० २दग्धे ३ चिह्ने च मेदि०।
हर्म्य न० हृ-बत सुट् च। इष्टकादारुदिरचिते धनिनां गृहभेदे अमरः "रम्यं हर्म्यतलम्" इति प्रबोध०।
हर्य्य क्रमे भ्वा० पर० सक० सेट्। हर्यति अहर्यीत्। [अमरः। स्त्रियां ङीष् २कुबेरे च जटा०।
हर्य्यक्ष पुंस्त्री० हरि पिङ्गलमक्षि यस्य बहुव्री०। १सिंहे
हर्य्यश्व पु० हरिनामा हरिवर्णो वाऽश्वोऽस्य। इन्द्रे।
हर्ष पु० हृष-घञ्। १सुखे अमरः २इष्टाधिगमजन्यानन्दे। ३कन्दर्पपितरि "पुत्रस्य उवाच। "कन्दर्पो हर्षतनयो योऽयो कामो निगद्यते। स मद्धरंश संदग्धो हनङ्गत्वमुपागतः"। वामनपु० ५अ०। ४कलियुगीयनृपभेदे हर्षचरिते तत्कथा दृश्या। [भट्टमा०।
हर्षक त्रि० हृष-णिच् ण्वुल्। १हर्षकारके। २पर्वतविशेषे
हर्षण पु० हर्षयति अभीष्टदानात् हृष-णिच-ल्यु। १विष्णुसहस्रादिमध्ये चतुर्दशे योगे ज्यो०। २हर्षकारके त्रि०। ३नेत्ररोगभेदे ४श्राद्धभेदे ५श्राद्धदेवभेदे पु० शब्दच०। हृष-भावे ल्युट्। ६हर्षे न०।
हर्षपद न० ६त०। नीच० तालकोक्ते षड्विंशेषस्य लग्नादिस्थानभेदे। यथोक्तम् "लग्नत्रिषड्लग्नभाच्चपुत्र-व्यया इलाद्धर्षपद खमोदुम्। त्रिभं त्रिभं लग्नभतः क्रमेण स्त्रीणां नृणां रात्रिदिनेषु तेषु"। हर्षस्थानादयोऽत्र। "न हर्षस्थानमाश्रितः" नीलक०।
हर्षमाण पु० हृष-शानच्। हृष्टचित्ते अमरः।
हर्षयितृ पु० हृष णिच्-तृच्। १हर्षे २सुखे न० मेदि०। ३हर्षयुक्ते त्रि०। [२हर्षकारके त्रि०।
हर्षिणी स्त्री हृष-णिच्-णिनि ङीप्। १विश्रब्धायाम्
हर्षित त्रि० हर्षो जातोऽस्य इतच्। १जातानन्दे। २हर्षस्थानगते षड्के च।
हर्षुल पुंस्त्री० हृष+उलच्। १हर्षे स्त्रियां ङीप्। २हर्षयुक्ते त्रि०वि०को०। ३हर्षयुक्ते त्रि०। [आदि० इतः हालः
हल विलेखे भ्वा०पर०सक० सेट्। हलति अहालीत् अहल न० हल्यते लक्ष्यतेऽनेन हल-घञर्थे करणे क। लाङ्गले अमरः। क्रियाशब्दे २१८८पृ० दृश्यम्।
हलद्दी स्त्री हल-शद-हलन्तं लवकमपि दारयति शोधयति दे-क गौरा०ङीष्। हरिद्रायाम् राजनि०।
हलधर पु० हलं धरति आयुधत्वेन क्रियासाधनत्वेन वा धृ-अच्। १बलरामे शब्दर०। २लवके त्रि० "उन्मूलिता हलधरेण यदावशातैः" भट्टिः।
हलभृति स्त्री हलेन हलसाध्या भृतिः। क्रयिकृतौ शब्दर०
हलभृत् पु० हलं बिभर्त्ति भृ-क्विप्। १बलदेवे त्रिकाण्ड० २लाङ्गलधारके च। [२क्रयिकार्य्ये च।
हलभृति पु० उपपदे १सुनिभेदे त्रिका०। २हलस्य धारणे
हला अव्य० हेति लीयते ला-क। नाटयोक्तौ १सखीसम्बोधने अमरः। २सख्यां जटा०३पृथिव्यां स्त्री ४जले च स्त्री अजयपालः।
हलायुध पु०हलेन आयुध्यति आ+युध क। १बलदेवे अमरः २ब्राह्मणसर्वस्वादिग्रन्थकारके विद्वद्भेदे च।
हलाह पुंस्त्री०। चिलिताये हेमच० स्त्रियां ङीष्।
हलाहल पु०हलेनेव आहलति विलिखति आ+हल-अच्। १विषभेदे २ब्रह्मणपर्ण २जलनाथायां मेदि०। ४वृक्षभेदे त्रिका०।
हलि पु० हल-इन्। हलवहे शब्दर०।
हलिन् पु० हलोऽस्यास्त्रायुधत्वेन क्रियासाधनत्वेन वा इनि। १बलरामे अमरः २लवके त्रि०। हलस्य आकारो विद्यते यस्या ङीप् हलिनी (विषलाङ्गला) २लाङ्गलीवृक्षे रत्नमा० इनि। हलानां समूहः ङीप् ४हलसमूहे स्त्री। [राजनि०।
हलिप्रिय पु० ६त०। १कदम्बवृक्षे अमरः। २मदिरायां स्त्री
हली स्त्री हल-इन् ङीप्। कलिकारीवृक्षे राजनि०।
हलीन पु० हलाय हितः ख। शाकवृक्षे (शेगुन) शब्दच०।
हलीम(मी)सक पु० पाण्डुरोगभेदे "यदा तु पाण्डोर्वर्णः स्याद्धरित स्यात्पीतकः। बलोत्साहः अवसन्नोसन्दाग्निर्मरुच्चरः। स्त्रीप्रवर्त्तोऽङ्गमर्दश्च तदा हलीमसंज्ञकः। हली(मी)सकं तदा तस्य विद्यादनिलपित्ततः" भावप्र०।
हलीषा स्त्री हलस्य ईषा शक०। लाङ्गलदण्डे।
हल्य त्रि० हलं हलकर्षणमर्हति तस्मै दं वा यत्। १हलकर्षणयोग्ये बीजादौ अमरः। २हलसम्बन्धिनि च। हलानां समूहः यत्। २हलसमूहे स्त्री अमरः। [अहल्लीत्।
हल्ल विलासे भ्वा० पर०अक० सेट्। भावदीक्षितः। हल्लति
हल्लक न० हल्ल-ण्वुल् भावदीक्षितः। हल-सम्भ०भावे क्विप् हलं लाति ला-क। संज्ञायां कन् वा। रङ्गकुठारे (हेला) अमरः।
हल्लीष न० हल-क्विप् लष-अच् पृषो० कर्म०। स्त्रीणां मण्डलिकाकारनृत्ते। ततः स्वार्थे क। तत्रैव। "मण्डलेन तु यन्नृत्तं स्त्रीणां हल्लीषकन्तु तत्" हेमच०

२रासक्रीड़ायाञ्च तद्यथं यथा "पुनं सुरतं मद्यं वितस्तिमात्रोन्नतं को विनिखन्य मद्दुकम्। आक्रम्य पद्भ्यामितरेतरन्तु हस्तैर्मयोऽयं खलु राघवोऽहं" इरिवं०टी०नीलकण्ठः। [३होमे ४आह्वाने च अमरः।

हव ह०-ड-अप् ङे-अप् संप्र० पूर्वो० वा। १यज्ञे २आह्वाने

हवन न० हु-भावे ल्युट्। होमे देवाद्युद्देशेन मन्त्रपूर्वकं यज्ञो हविःप्रक्षेपे भट्टच०। [शिक्षा०

हवनी स्त्री ह्रयतेऽस्यां हु-आधारे ल्युट् ङीप्। वज्रकण्डे

हवनीय त्रि० हु-कर्मणि अनीयर्। होमीयद्रव्ये।

हवा अव्य० ह च वा च हन्द०। प्रश्निद्यार्थे।

हविरशन पु०हविरत्ति अद-युच्। १यज्ञे होमच०। २चित्रकवृक्षे च। भावे ल्युट्। ३हुतभोजने न०। [राजनि०

हविर्गन्धा स्त्री हविषो गन्धो यस्याम्। यस्यां (माँद)

हविर्गेह न० हविषो गेहम्। यज्ञसम्बन्धिपर्णशिलटरूपे हवनीयद्रव्यस्थापनार्थे गेहभेदे होमच०। [कारीहरूपे रत्नमा०।

हविर्मन्थ पु० हविषे मथ्यतेऽसौ मन्थ-कर्मणि घञ्। गवि-

हविष्य न० हविषे हितम् यत्। १हते होमच०। खल्लाटे होमलिङ्गादावस्ते च "केरहविष्यं भुञ्जानाः" भाग० १०। "नारिकेलफलञ्चैव कदलीं लवलीं तथा। आम्रमामलकञ्चैव पनसञ्च हरीतकीम्। प्रतान्नरप्रभक्षञ्च हविष्यं मनवे विदुः" ति० त० अग्निपुराणम्।

हविष्यान्न न० कर्म०। "हैमन्तिकं सितारक्तिं धान्यं सङ्गाल्य यत्नतः। कलायकङ्गुनीवारा वास्तूकं हिलमोचिका। वटिका कालशाकञ्च मूलकं वेसवेतरत्। लवणे सिन्धुजातञ्च गव्ये च दधिसर्पिषी। पटोलकृतसारञ्च पनसाम्रहरीतकी। तिन्तिड़ी जीरकञ्चैव नागरङ्गञ्च पिप्पली। कदली लवली धात्री फलान्यगुड़मैक्षवम्। घृतैश्चपक्वं सलवणं हविष्यान्नं प्रचक्षते" रत्नमाला। व्रतादौ भक्ष्यद्रव्यभेदे।

हविस् न० ह्रियते हु-कर्मणि असुन्। १हते अमरः २हवनीयद्रव्यमात्रे च "यथाग्नौ मेदसो हविषोऽनुब्रूहीति" श्रुतिः। "सुसम्भृतानि पयः सोमो मांसं यज्ञानुपस्कृतम्। अचारलवणञ्चैव प्रकृत्या हविरुच्यते" श्रा० त० उक्ते ३द्रव्यभेदे। भावे असुन्। ४होमे।

हव्य न०-हु-कर्मणि यत्। १देवयोग्यान्ने अमरः। २हवनीयद्रव्ये त्रि०। भावे यत्। ३होमे न०।

हव्यपाक पु० हव्याय होमाय पाको यस्य। होमार्थं दुग्धघृतादिभिश्चिते खण्डे घरौ अमरः।

हव्यवाह पु०हव्यं वहति देवान् वह-अच्। १अग्नौ रत्नमा० २चित्रकवृक्षे च। [अमरः। २चित्रकवृक्षे च।

व्यहवाहन पु० हव्यं वाहयति वह-णिच्-ल्यु। १यज्ञे

हव्याश्य पु० हव्यमश्नाति अश-अच्। १यज्ञे भट्टर० २चित्रकवृक्षे। ल्यु। हव्याशनोऽप्यत्र पु०भेदच०।

हस हासे भ्वा० प० अक० सेट् एदित् सिचि न इट्। हसति अहसीत्। दोषदर्शनपूर्वकहासे तु सकर्मकः "स्त्रियावहसेव पुरं मनोभवः" इति भट्टिः। [अमरः।

ह(हा)स पु० हस-अप् घञ् वा। हास्ये सुखविकाशनभेदे

हसन न०हस-भावे ल्युट्। प्रीत्याद्युद्भवकपोलादेर्विकाशने हास्ये

हसन्ती स्त्री हस-झ ङीप्। अङ्कारधानिकायां अमरः। २मल्लिकाभेदे ३शाकिनीभेदे च मेदि०। हस-शतृ-ङीप्। ४शत् ४हासिनि त्रि० स्त्रियाम् ङीप्।

हसित न० हस-भावे क्त। १हास्ये कर्त्तरि क्त। २हतहास्ये ३विकसिते च त्रि०। हास्यशब्दे दृश्यम्।

हस्त पु०हस-तनू न ह्रस्व। १देहावयवभेदे (हात) अमरः। २सप्तर्विंशत्यङ्गुलपरिमाणे "यवोदरैरङ्गुलमष्टसंख्यैर्हस्तोऽङ्गुलैः षड्गुणितैस्तवद्भिः" बीजा०। ३हस्तिशुण्डे च। ४अश्विन्यादिषु त्रयोदशे नक्षत्रे पुंस्त्री० मेदि० अत्रैवाशब्दे पु० दृश्यम्। "आङ्गी हस्तयोगे" इति पुराणम्। "पृथ्वी हस्ता तथा ज्ञातिः" ज्यो० क्षेत्रबाधकात् परः। ५समूहे। क्षेत्रहस्तः।

"हस्तदत्तास्तु ये लोका यत्नं व्यक्षनानि च। दातारं नोपतिष्ठन्ते भोक्ता भुङ्क्ते तु किल्बिषम्। तस्मादन्नरितं कृत्वा पर्णेनाथ तृणेन वा। प्रदद्यात् न तु हस्तेन नाग्रसेन कदाचन" श्रा० त०। [हस्ते राजनि०।

हस्तजोड़ि पु० हस्तं जुड़ति जुड़ क्विप्। (हातजोड़ा)

हस्तपुच्छ न०हृत०। हस्तावयवभेदे (हातेर पोँछा)। शिक्षा०

हस्तवारण न० ३त०। मारणोद्यतस्य निवारणे अमरः।

हस्तविल्व न० हस्तस्य विल्वं यत्। खाद्यके चन्दनादिना देहविलेपनविशेषे हेमच०। [श्रीधरः।

हस्तसिद्धि स्त्री हस्तस्य तत्कर्मणः सिद्धिर्यतः। नैपुणे

हस्तसूत्र न० हस्तस्य सूत्रमिव। वलये हेमच०।

हस्तामलक न० हस्तस्थितमामलकम् आमलक्याः फलं तद्वि वा। १करावस्थितामलकफले तद्वत् २अनायासलभ्ये पदार्थे च। करामलकादयोऽत्यन्त। ३वेदान्तप्रसिद्धग्रन्थभेदे च।

हस्तिक न० हस्तिनां समूहः कन्। हस्तिसमूहे भट्टर०।

हस्तिकन्द पु० हस्ती तत्पदमिव कन्दोऽस्य । खनामख्याते कन्दभेदे (हातिकाँदा) राजनि० ।

हस्तिकरञ्ज पु०हस्तीव महान् करञ्जः । महाकरञ्जे राजनि०

हस्तिकर्ण पु० हस्तिनः कर्ण इव पर्णमस्य अच् । १एरण्डवृक्षे २पलाशभेदे ३गन्धदेवतानेदे मेदि० । ४हस्तिकन्दे ५रास्नैरण्डे च राजनि० । स्वार्थे क तत्रार्थे । हेत० । हस्तिसदृशे कर्णे । [अमरः ।

हस्तिकर्णदल पु० हस्तिनः कर्ण इव दलमस्य । पलाशभेदे

हस्तिकोलि पु० हस्तीव कोलिः । बदरीभेदे रत्नमा० ।

हस्तिघोषा स्त्री हस्तीव हस्तिनी घोषा । हस्तिध्वनायाम् भटनपाक्षः । [घोषायाम् रत्नमा०।

हस्तिघोषातकी स्त्री हस्तीव हस्तिनी घोषातकी । हस्ति-

हस्तिचारिणी स्त्री हस्तीव चरति चर-णिनि ङीप् । महाकरञ्जे राजनि० ।

हस्तिदन्त पु० हेत० । १करिदन्ते । तदाकारोऽस्यास्ति अच् । २मूलके न० राजनि० तत्रार्थे पु० शब्दर० । ३यष्टिभित्तिनिखातार्हे काष्ठनिर्मितकवितकाकारे यष्टयर्थे नागदन्ता-दयोऽस्य । [कण्टकीभेदे राजनि० ।

हस्तिदन्तफला स्त्री हस्तिदन्त इव फलमस्याः । एवांरौ

हस्तिन् पु० हस्तः शुण्डादण्डोऽस्त्यस्य । १गजे २चन्द्रसंज्ञे नृपभेदे च ।

"हस्तोऽस्त्यापि दावादो हस्ती नाम बभूव ह । तेनेदं निर्मितं पूर्वं पुरैव हस्तिनापुरम् । हस्तिनश्चैव दावादा स्त्रियः परमधार्मिकाः । अजमीढो द्विमीढश्च पुरुमीढ-स्तथैव च" हरिवं० २० अ० ।

हस्तिनख पु० हस्तिनो नख इव हस्तिना न खन्यते नञ्+खन-ड वा । १पुरद्वारस्थे लतागुल्मे अमरः । २गन्धद्रारावरोधनार्थं निम्नोन्नते खातोद्भूते खड्गाग्रे च भरतः ।

हस्तिनापुर न० हस्तिना तदाख्यनृपेण चिह्नितं तत्प्रततत्वात् पुरम् अलुक्स० । (दिल्ली) पुरभेदे ।

हस्तिनी स्त्री हस्तिनः योषा ङीप् । १करिण्याम् गजयोषिति चतुर्विधस्त्रीभेदे २स्त्रीविशेषे तल्लक्षणं यथा "स्थूलाधरा स्थूलनितम्बभागा स्थूलाङ्गुली स्थूलकुचा सुशीला । कामोत्सुका गाढरतिप्रिया च नितम्बखर्वा खलु हस्तिनी स्यात्" "हस्ते तुल्या च हस्तिनी" रति-मञ्जरी । ३वृत्तविशेषे स्त्रियां शब्दच० । [स्वार्थे क तत्रैव ।

हस्तिप पु० हस्तिनं पाति पा-क । हस्त्यारोहे अमरः ।

हस्तिपत्र पु० हस्ती तत्तुल्यं इव पत्रमस्य । हस्तिशुण्डवृक्षे राजनि० । [इत्यम् । राजकोषातक्यां राजनि० ।

हस्तिपर्णिका स्त्री हस्ती तत्कर्णं इव पर्णमस्याः कप् अत

हस्तिपर्णी स्त्री हस्ती तत्कर्णं इव पर्णमस्या ङीष् । १मोर-टायां रत्नमा० । २कण्टकार्याञ्च राजनि० ।

हस्तिमद पु० हेत० । १करिकरनिःसृतमदजले । स इव । २गन्धद्रव्यभेदे च राजनि० ।

हस्तिमल्ल पु० हस्तिषु मल्लः । १ऐरावतगजे । २गणेशे ३शङ्खे ४नागे च मेदि० । [राजनि०।

हस्तिरोहणक पु०हस्तीव रोहते रुह स्वार्थे क । महाकरञ्जे

हस्तिलोध्रक पु०हस्तीव व्याघ्रः स्वार्थे क । व्याघ्रभेदे राजनि०

हस्तिविषाणी स्त्री हस्तिविषाणं गजदन्तसदाकारः मध्य-भागः (थोड़) यस्याः गौरा०ङीष् । १वदन्याम् राजनि०।

हस्तिशुण्डा(ण्डी) स्त्री हस्तिशुण्डसदाकारोऽस्त्यस्याः अच् वा गौरा० ङीष् । (हातिशुड़ा) वृक्षे राजनि० ।

हस्तिश्यामाक पु० हस्तीव श्यूनः श्यामाकः । श्यूनश्यामाके राजनि० । [अत्य क्वचा वा ।

हस्ते अव्य० हस्त+ए । १पाणौ द्रव्ये २क्षीरे च हस्त-

हस्त्य त्रि०हस्तेन मुष्टीकृतः दत्तः क्रीतो वा यत् । १हस्तमुष्टीकृते २पाणिदत्ते ३पाणिक्रीते त्रि० को० ।

हस्त्यध्यक्ष पु० ७त० । गजाध्यक्षे गजरक्षणादौ नियुक्ते "हस्तिशिक्षाविधानज्ञो वन्यजातिविचारदः । क्षेमचर-क्षणा राज्ञो गजाध्यक्षः प्रशस्यते" मत्स्यपु० २८६अ० ।

हस्त्यारोह पु० हस्तिनमारोहति आ+रुह अण् । हस्ति-पके अमरः ।

हस्र त्रि० हस-रक्। मूर्खे शब्दा० । [शब्दच० ।

हहल अव्य० हेति हलति । हालाहले स्थावरविषभेदे

हहा पु० हेति शब्दं जहाति हा-किप् । गन्धर्वभेदे शब्दमा०

हा त्यागे जु० प० स० अनिट् । जहाति जहतु अहाषीत् हीयते ओदित् निष्ठातस्य नः हीनः हानिः ।

हा गतौ जु० आ० स० अनिट् ओदित् निष्ठातस्य नः । जिहीते अहासिष्ट अहे हानम् ।

हा अव्य० हा-का । १विषादे २शोके ३पीडायाम् अमरः ४कृत्यायाञ्च मेदि० । हाशब्दस्य निन्दापरत्वे तद्योगे षष्ठ्यर्थे द्वितीया "हा धिक् मे वैशसमिदम्" गोपदेवः । निन्दायोगपरत्वे न, "हा पितः ! त्रासि वैरेभि !" भट्टिः ।

हाङ्कर पुंस्त्री हा विषादाय पीडायै वा अङ्कं राति रा-क । खनामख्याते जलजन्तुभेदे शब्दच० स्त्रियां ङीष् ।

हाटक न० हट-ण्वुल् । १स्वर्णभेदे २तत्तुल्ये स्वर्णे तद्वाम-

नामके धनुषे च अमरकोषः। ४स्वर्णनिर्मिते त्रिविष्टपः।
हाटकेश्वर पु०गोदावरीतीरस्थे शिवलिङ्गभेदे यथा "एतस्मिन्नन्तरे प्राप्ताः सर्व एवर्षिपार्थिवाः। द्रष्टुं त्रैलोक्यभर्तारं शम्भुं हाटकेश्वरम्। ततः कपिवरः प्राप्तो दत्ताच्च सह सुन्दरि!। स्नात्वा गोदावरीतीर्थे दिदृक्षुर्हाटकेश्वरम्" वामनपु० ६२अ०।
हाद न० हा-करणे घञ्। वेतने त्रि० को०। पुंसो०। हान्त। मरणे उणादि०। [कथन" भट्टिः।
हान न० हा-भावे ल्युट्। परित्यागे"हिमहानकृता न कृता
हानि स्त्री हा-क्तिन् तस्य निः। १क्षतौ २अपचये च जटाधरः।
हापुची स्त्री हा इति रवः पक्षाय यस्याः ङीप्। पक्षिभेदे हारा०। स्वार्थे क हुस्वः। तत्रार्थे त्रिका०।
हायन पु० अम्बु जहाति हा-ल्यु-नि०। १व्रीहौ भावे जहाति हा-ल्यु-नि०। २वत्सरे पुंस्त्री० अमरः। ३अग्निशिखायां स्त्री मेदि०।
हार पु० हृ-कर्मणि घञ्। १मुक्तामालाभेदे अमरः "हारो नारोपितः कण्ठे" इति नीतावाक्यम्। २युद्धे मेदि०। हरतीति कर्तरि घञ् च वा। ३भाजके "अन्योन्य हाराभिहतौ हरांशौ" इति लीला०।
हारिका स्त्री जङ्घायां (हाटतोडा) हारा०।
हारक पु० हृ-ण्वुल्। १चोरे २क्षितवे ३गन्धभेदे ४विज्ञानभेदे मेदि०। ५आखोठकभेदे शब्दच०। ६भाजकाङ्के च। ७हरणकर्तरि त्रि०। [कपिलहारायाम् राजनि०
हारहारा स्त्री हार इव हरति आस्वादनात् हृ-ण। हारलता स्त्री हृ-क्विप् हृः हार इव छत्रं राति रा-क। १हारलतायाम् हेमा०। २मद्ये पु० मेदि०।
हारावली स्त्री हार इवावली। मुक्तावल्याम्"मुक्तहारावली" इति गङ्गास्तवः। २पुरुषोत्तमक्षेत्रे कोलभेदे च।
हारि(री) स्त्री हृ-णिच्-इन् वा ङीप्। १द्यूतादिमङ्के २तत्परायणे ३पक्षिसमूहे च मेदि०। ङीषन्तः ४मुक्तायां स्त्री शब्दमा०। [कोकिले मेदि० स्त्रियां ङीष्।
हारिकण्ठ पुंस्त्री० हारी मनोहरः कण्ठोऽस्यास्तीति यस्य।
हारित पुंस्त्री० हृ-णिच्-क्त। हारीते पक्षिभेदे जटा०। स्त्रियां ङीष्। हरिदेव स्वार्थे अण्। हरिद्वर्णे पु०।
हारितक न०हारितेन हरिद्वर्णेन कायति कै-क। शाके शब्दर०
हारिद्र पु० हरिद्वा रक्तः अण्। १कदम्बवृक्षे तद्वृक्षस्य पीतप्रायत्वात् तथात्वम्। २हरिद्वा रक्ते त्रि०मेदि०।
हारिन् त्रि० हारोऽस्यास्ति इनि हृ-णिनि वा। १हारके २हारविशिष्टे ३मनोहारिणि च। "हारीणवबलानां हारीणवबलानाम्" भट्टिः। स्त्रियां ङीप्।
हारिल पुंस्त्री० हृ-णिच् इलच्। खनामख्याते खगभेदे राजनि०। स्त्रियां जातित्वात् ङीष्।
हारीत पु० हृ-णिच्बा०-इतच्। स्मृतिकर्तरि मुनिभेदे। २पक्षिभेदे शकितवे च मेदि०। स्वार्थे क। हारिलक्षणे (हरेल) राजनि०।
हार्द न० हृदयस्य कर्म युवा० अण् हृदादेशः। १स्नेहे २प्रेमणि अमरः। हृदि भवः विदितो वा अण्। ३हृदयस्थे ४हृदयभेद्यो च त्रि० हार्दविद्या भा०भा०।
हार्य्य पु० हियतेऽसौ हृ-ण्यत्। १बिभीतकवृक्षे २हरणीये त्रि० मेदि०।
हाल पु० हलोऽस्यास्य अण् हल एव वा अण्। १बलरामे त्रिका०। २हले च मेदि०। ३शालिवाहनकवौ हेमच०।
हालक पु०हाल+संज्ञायां कन्। पीतहरितवर्णयोः हेमच०।
हालह(हा,ल) न०हलाहल पृषो०। हालाहलविषे शब्दर०
हाला स्त्री हल-घञ्। १मद्ये अमरः २ताम्बरसजे (ताड़ि) मद्ये च राजनि०।
हालाहल पुंन०हालेव हलति हल-अच्। १स्थावरविषभेदे शब्दर०। २कीटभेदे च पु० राजनि०। ३मद्ये स्त्री तस्य ङीष् राजनि०। "गोक्षनामफलो गुच्छस्तालपत्रकदम्बवत्। तेजसा यस्य दह्यन्ते समीपस्था द्रुमादयः। अतो हालाहलो ज्ञेयः किञ्चिन्न्यायां त्रिमालवे। दक्षिणाब्धितटे देशे कोङ्कणेऽपि च जायते" भावप्र०।
हालिक त्रि० हलेन खनति हलः प्रहरणमस्य तदेदं वा ठक् ठञ् वा। १हलकर्षके २हलेन वोढरि ३हलसम्बन्धिनि च अमरः।
हालिनी स्त्री हल-घिनि ङीप्। स्थूलपक्षुद्यां हेमच०।
हाली स्त्री हल-इच् ङीष्। कनिष्ठायां अङ्गालिकायाम् हेमच०।
हालु पु० हल-उच्। दन्ते त्रिका०।
हाव पु० हृ-भावे घञ् नि०सम्प्र०-कर्मणे घञ्। १आङ्गिके २स्त्रीणां शृङ्गारभावजे चेष्टाभेदे च अमरः। "युवानोऽनेन हृयन्ते नारीभिर्मदनालसे। अतो निरुच्यते हावस्ते विलासादयो मताः" भरतधृतवाक्यम्। "मीवारेफसंयुक्तो भ्रूनेत्रादिविकाशकृत्। भावादीषत्प्रकाशो यः स हाव इति कथ्यते" उज्ज्वलमणिः।
हास पु०हस-भावे घञ्। हास्यस्थायिभावजे रसभेदे तत्स्वरूपं

ख०ट०"विकृताकारवाग्वेशचेष्टादेः कुहकाद्भवेत् । हास्यो हास्यस्थायिभावः श्वेतः प्रमथदैवतः । विकृताकारवाक्वेषं यदालोक्य हसेज्जनः । तदत्रालम्बनं प्राहुस्तद्दोषोद्दीपनं मतम् । अक्षिनासोदरास्यशोधनदशनौष्ठकपोलतादिकः । निद्रालस्यावहित्थाद्या अत्र व्यभिचारिणः" ।

हासस् पु० हस-घिञ् असुन् । चन्द्रे वेदनि० ।

हासिका स्त्री हस-भावे ण्वुल् । हास्ये हेमच० ।

हास्तिक न० हस्तिनां समूहः वुञ् ।१हस्तिसमूहे अमरः । हस्तिनमारोहति ठक् । २हस्त्यारोहे ।

हास्तिन न० हस्तिना रूपेण निर्वृत्तम् नगरम् अण् संयोगपरत्वादिनो लोपः । हस्तिनापुरे त्रिका० ।

हास्तिना दृष्टं हस्तिनः परिमाणं वा अण् । २हस्तिसम्बन्धिनि ३हस्तिपरिमाणे च त्रि० ।

हास्य न० हस-ण्यत् । १हासे हसने अमरः २अलङ्कारोक्ते रसभेदे च । "अवस्थं हसितं श्रेष्ठं मौखिताश्रु मनाप्यहम् । अक्षलक्ष्यहसितं हसेत् तत् षोन्मादस्य नैकधा" साहसे ६ऽ०० ।

"व्यङ्गानां स्मितहसिते मध्यानां विहसितावहसिते च नीचानामपहसितं तथाऽतिहसितस्तु षड्भेदाः" । "दैवहिकादि नयनं स्मितं स्यात् स्पन्दिताधरम् । किंचित् लक्ष्यदिशं तत्र हसितं कथितं बुधैः । मधुरस्वरं विहसितमाकुलशिरःकम्पमपहसितम् । अपहसितं वाक्याद्यं विविधप्राकृं भवत्यतिहसितम्" सा० द० ।

हाहा पु०हेति शब्दं जहाति क्विप् ।१देवगन्धर्वभेदे अमरः । अस्तु हाहस् शब्दोऽपि तदर्थे भरतः । हा-हिंसम् २विस्मयशब्दे ३शोकशब्दे च अव्य० मेदि० ।

हाहाकार पु०हाहा इत्यस्य कारः क-भावे घञ् ।१युद्धशब्दे २शोकध्वनौ च । [लिखावः ।

हि वर्द्धने गतौ च स्वा०पर०सक०अनिट् । हिनोति अहैषीत्

हि अव्य० हा-डि-वा डि वा १हेतौ २अवधारणे अमरः । ३विशेषे ४प्रश्ने ५स्मरणे ६हेत्वपदेशे ७अस्तुवायां च मेदि० ८पादपूरणे ९योगे च मेदिनी० ।

हिंसक पु० हिंस-ण्वुल् । १व्याघ्रादौ हिंसे प्रभौ २प्रभौ च २अवाचंयमे विप्रे ३हिंसाकारके त्रि० मेदिनी० ।

"मोक्षानुमन्ता संस्कर्त्ता क्रयविक्रयिहिंसकाः । उपकर्त्ता घातयिता हिंसकाघातका मताः" आशौच० ।

हिंसा स्त्री हिंस-अ । १वधे मेदि० २चौर्यादिकर्मणि च अमरः । "हिंसा चैव न कर्त्तव्या वैधहिंसा तु राजसी ब्राह्मणैः स न कर्त्तव्या यतस्ते सात्त्विका मताः" इत्युक्तेः । वैधहिंसाशब्दे ४८७१ पृ० दृश्यम् ।

हिंसारु पु० हिंस-आरु । व्याघ्रे त्रिका० ।

हिंसालु पु० हिंसा+अस्त्यर्थे आलु । १हिंसाशीले त्रिका० । २कुक्कुरे पु० शब्दर० ।

हिंसीर पु० हिंसा-ईरन् । १व्याघ्रे २खगे च त्रिका० ।

हिंस्र त्रि० हिंस-र । १हिंसाशीले अमरः । २शौरे ३भये ४भीमसेने पु०हरे पु०त्रिका० ।इमांसां ७काक्षादन्यां दन्तटांसास्थ्नां ९एलवालुकायां १०गवेधुकायां ११शिरायाम् १२नाड्यां च स्त्री शब्दच० । [अहिंक्किट ।

हिंक्क क्रूजने भ्वा० उ०अ० सेट् । हिंक्कति ते अहिंक्कीत्

हिंक्क हिंसायां चु०आ०सक० सेट् । हिंक्कयते अजिहिंक्कत ।

हिक्का स्त्री हिमिति शब्दं करोतीति पृषो० रोगभेदे (हेचकी) अमरः ।

तन्निदानादिकं भावप्र० उक्तं यथा

"अथ हिक्काधिकारः । तत्र हिक्कायाः विप्रकृष्टं निदानमाह "विदाहिगुरुविष्टम्भिरूक्षाभिष्यन्दिभोजनैः । शीतपानाशनस्नानरजोधूमातपाऽनिलैः । व्यायामकर्मभाराध्ववेगाघातावपतर्पणैः । हिक्का श्वासश्च कासश्च तथा वक्त्रोपजायते" । अपतर्पणमनशनादि । संप्राप्तिमाह "वायुः कफेनानुगतः पथ हिक्काः करोति हि । अन्नजां यमजां क्षुद्रां गम्भीरां महतीं तथा" । सामान्यलक्षणमाह "सङ्कर्षः क्षुब्धवायुरुदेति वदनः यस्तु-ह्यिङ्कान्वयि तस्मादिवाधिपत्न । यदोष्मणामायु हिनस्ति मूलतस्तस्तु हिक्केत्यभिधीयते बुधैः" । वायुरत्र दोषाणां प्राणो वोढव्यः । उदेति ऊर्द्धं याति । वदनः शब्दवान् । ऊर्द्धगमनविशिनष्टि यद्यदित्यादि ह्यिङ्क इति शब्दोऽयमि दीर्घत्वनिष्कृतः । तस्मादिति ल्यब्लोपे पञ्चमी तेन यद्यत्स्थौल्यान्वयि तस्मादनेन यान्त्यपन निःसारवत् दर्शयन्नाह । वायुः दोषत्वात् दोषोऽत्र कफः तद्वान् वायुः कफेनानुगत इति तस्मात्रिः । हिनस्तीति हिक्का पृषोदरादित्वाद्रूपसिद्धिः हिमिति शब्दं करोतीति वा । पूर्वरूपमाह "कण्ठोरसोर्ध्वस्तम्भश्च वदनस्य कषायता । हिक्कानां पूर्वरूपाणि कुक्षेराटोप एव च" । वदनस्य कषायता वातात् । अरिष्टमाह "यानान्नैरतिसंयुक्तैः सहसा पीडितोऽनलः । हिक्कयत्यूर्द्धगो भूत्वा तां विद्यादरिष्टजां भिषक्" अनिलः प्राणो वायुः । चरकोऽप्याह "चिरेण यम-

लैर्वेगैर्या हिक्का समवर्त्तते । कस्यवली शिरोयीवां समवां तां विनिर्दिशेत्" । चुड्डामाह "विलष्टकालैर्या वेगैर्मन्दैः समभिवर्त्तते । क्षुद्रिका नाम सा हिक्का जन्तुमूलं प्रधावति" । विलष्टकालैः चिरेण । जन्तुः कण्ठो रवोः सन्धिः । गभीरामाह "नाभिप्रदेशा या हिक्का घोरा गम्भीरनादिनी । अनेकोपद्रववती गम्भीरा नाम सा स्मृता" । अनेकोपद्रववती लक्षाद्यरादियुक्ता । महतीमाह "मर्माणि पीड़यन्तीव सततं वा प्रवर्त्तते । महाहिक्केति सा ज्ञेया सर्वगात्रप्रकम्पिनी" । मर्माणि वस्तिहृदयशिरःप्रभृतीनि । असाध्यत्वमाह "यस्य स्यते हिक्कितो यस्य देहो दृष्टिश्चोर्द्धं" तास्यते नित्यमेव । चीणोऽक्षिदृट् चोति यथातिमात्रं तौ द्वौ चान्यौ वर्जयेद्धिक्कमानौ । यायस्यते विस्तार्य्यत इव तौ द्वाविति यायस्यत इत्यादिना नित्यमेवेत्यन्तेनैको हिक्कमानः । क्षीण इत्यादिनाऽतिमात्रमित्यन्तेनापरः । तौ द्वौ चान्यौ च गम्भीरया महतीहिक्कया हिक्कमानौ वर्जयेत् । अपरञ्च "अतिक्षुत्कृतदोषस्य भक्तद्वेषे क्षयस्य च । व्याधिभिः क्षीणदेहस्य हृद्व्याप्तिव्याधिनः । आवाधाच्च बस्तिस्था हिक्का हन्याशु जीवितम् । यस्यिका च प्रलापार्तिमोहलक्षणसंयुता" । साध्यत्वमाह "यक्षीणक्षाण्यदोषस्य स्थिरधात्विन्द्रियस्य च । तस्य साधयितुं शक्या यमिका हन्यतोऽन्यथा" ।

हिङ्गु न० हिङ्गं गच्छति गम-डु नि० । (हिङ्) रामठदेशोद्भवे वृक्षे अमरः यस्य निर्यासो हिङ्गुद्रवम् । "हिङ्गूष्णं पाचनं रुच्यं तीक्ष्णं वातबलासहृत् । रसे पाके च कटुकं स्निग्धञ्च वह्निदीपनम् । शूलगुल्मोदरानाहकृमिघ्नं पित्तवर्द्धनम्" भावप्र० । "हिङ्गु तीक्ष्णं कटुरसं शूलाजीर्णविबन्धजित् । लघूष्णं पाचनं स्निग्धं दीपनं कफवातजित्" राजव० । २वंशपत्रे भावप्र०

हिङ्गुनाड़िका स्त्री हिङ्गुन नाड़ी इव नाड़ी यस्याः कप् । नाडीहिङ्गौ राजनि० ।

हिङ्गुनिर्यास पु० हिङ्गुन इव निर्यासोऽस्य । १निम्बवृक्षे अमरः हेम० । २हिङ्गुवृक्षनिर्यासे च (हिङ्) ।

हिङ्गुपत्र पु० हिङ्गुन इव पत्रमस्य । १वृक्षभेदे राजनि० (हिङ्पात्र) २वृक्षभेदे स्त्री ङीप् भरतः ।

हिङ्गुपर्णी स्त्री हिङ्गुन इव पर्णमस्याः गौरा० ङीष् । वंशपत्र्याम् रत्नमाला ।

हिङ्गुल पुंन० हिङ्गु तद्वर्णं लाति ला-क । रक्तवर्णे वर्णकद्रव्यभेदे अमरः २वार्त्ताक्यां १वृक्षवाच्च स्त्री ङीप् वर्णकभेदे तस्य शोधनादिकं भावप्र० उक्तं यथा "मेषोष्ट्रोरेण दरदमस्तवर्गेण भावितम् । सप्त वारान् प्रयत्नेन शुद्धिमायाति निश्चितम्" । एवं शोधितस्य हिङ्गुलस्य गुणाः । "तिक्तं क्षयार्शः कटु हिङ्गुलं स्यात् श्लेष्मामवह्नं कफपित्तहारि । कुष्ठामकण्डूव्रणकामलांश्च श्वासामगतो च गरं निहन्ति" । अथ हिङ्गुलाद्रसार्कघर्षविधिः "निम्बूरसैर्निम्बपत्ररसैर्वा यामसात्रकम् । दृढा दरदमूढ़न्तु यातयेत् घृतयुक्तिवत् । तत्तोर्द्धपिठरीकर्म स्वल्पोवाद्यसत्तमम् । शुद्धमेव हितं घृतं सर्वकर्मसु योजयेत्" । तत्तच्छब्दे ३४७।पृ० दृश्यम् । सतीदेहत्यागस्थानभेदे १देशविशेषे स्त्री (हिङ्लाज्) "ब्रह्मरन्ध्रं हिङ्गुलायां देवता भीमलोचना । कोटवी सा महामाया त्रिगुणा या दिगम्बरी" पीठमा० ।

हिङ्गुलु पुंन० हिङ्गु तद्वर्णं लाति ला-डु । (हिङ्गुल) वर्णकद्रव्ये अमरः ।

हिङ्गुसिराटिका स्त्री हिङ्गुन इव सिरां पत्त्रविरामटति अट-ण्वुल् अत इत्त्वम् । वंशपत्र्याम् रत्नमा० ।

हिङ्गूल न० हिङ्गुल+पृषो० । मधुरमूले (आलु) शब्दच० ।

हिञ्ज पु० हिनोति हि-किप् तथा सन् जायते जन-ड कर्म० । हिञ्जडवृक्षे शब्दर० । [भेदे (हिजल) जटा०

हिञ्जल पु० हि-किप् हिञ् हितकारि अलं यस्य । वृक्षभेदे

हिञ्जीर पु० वृक्षिपाटवृक्षे हेमच० । [वर्षिञ्जिड ।

हिड गतौ भ्वा० आ० सक०सेट् इदित् । हिण्डते

हिडिम्ब पु०१राक्षसभेदे स हि भीमेन हतः २तद्भगिन्यां स्त्री

हिडिम्बजित् हिडिम्बं राक्षसभेदं जितवान् जि-किप् । भीमसेने हिडिम्बशत्रुप्रभृतयोऽत्र । [भार० आ०।

हिडिम्बापति पु० ६त० । १हनुमति शब्दर० २भीमसेने

हिण्डन न० हिडि-ल्युट् । १भ्रमणे २रमणे मेदि० ३लेखने च विश्वः । [चार्व्यं शब्दार्थ०

हिण्डिक पु० हिडि-इन् हिण्डौ कायति कै-क । जम्बा-

हिण्डि(ण्डी)र पु० हिडि-इरन् डीरन् वा । १वस्त्रप्रक्षेने अमरः । २वार्त्ताकौ २पुरुषे मेदि० ४रमणे च उणा० ।

हिण्डी स्त्री हिडि-इन् ङीप् । दुर्गायां निघ० ।

हिण्डीप्रियतम पु० ६त० । शिवे शब्दर० हिण्डीपदार्थोऽत्र । [मन्त्रे च ।

हित त्रि० धा-क्त हि-क्त वा । १गते २पथ्ये ३इष्टसाधने

हितक पु० हित+स्वार्थे क । शिशौ राजनि० ।

हितकारिन् त्रि० हितं करोति कृ-णिनि। शुभकारके।
हितप्रणी पु० हितं प्रणयति प्र+णी क्विप्। चारे शब्दर०।
हितावली स्त्री हितम् आवहति वा+वह-इन् ङीप्। ओषधिभेदे अमरः। [कारिणि स्त्रियां ङीप्।
हितैषिन् त्रि० हितमिच्छति इष-णिनि। हितेच्छा-
हितोपदेश पु० हितस्य इष्टसाधनस्य उपदेशः। १हितस्य उपदेशे विष्णुधर्मोक्ते २नीतिग्रन्थभेदे च।
हिन्ताल पु० हीनस्तालो यस्मात् पृषो०। (हेंताल) इक्षे अमरः "हिन्तालो मधुराम्लश्च कफक्लत् पित्तदाहहृत्। त्रिदोषघ्नोपहारी च शिशिरो वातदोषजित्" राजनि०।
हिन्दोल पु० हिन्दोल+घञ् पृषो०। १आवश्यशुक्लपक्षविहिते दोलनवस्त्रेण भगवतो दोलनरूपे २उत्सवभेदे ३रागभेदे च सङ्गीतद०। ४दोलायां स्त्री स्वार्थे क। यानभेदे जटा०।
हिन्दु पु० हीनं दूषयति दुष+डु पृषो०। जातिभेदे। "पश्चिमाम्नायमन्त्रास्तु प्रोक्ताः पारशवाभिधा। अष्टोत्तरशताशीतिर्येषां संसाधनात् कलौ। पञ्च खानाः सप्तमीरा नव शाक्ता महाबलाः। हिन्दुधर्मप्रलोप्तारो जायन्ते चक्रवर्त्तिनः। हीनञ्च दूषयत्येव हिन्दुरित्युच्यते प्रिये!। पूर्वाम्नाये नवशतं षड्गीतिः प्रकीर्त्तिताः। शिरश्छभाख्या मन्त्रास्तेषां संसाधनात् कलौ। अधिपा मण्डलानान्तु संग्रामेष्वपराजिताः। इरेला नवघट्पञ्च लक्ष जाताश्च भाविनः" मेरुतन्त्रे २१प०। अप्रमाणमिदम्।
हिम न० हि-मक्। १आकाशच्युते जलकणे २शीतलगुणे ३तद्वति त्रि० अमरः। ४क्षुद्रक्षेत्रायां ५रेणुक्षायां ६भद्रमुस्तायाम् ७नागरमुस्तायां ८पृक्कायां ९त्वचिकायां च स्त्री राजनि०। १०अयनाद्वयघटीप्रमासात्मके ऋतुभेदे ११चन्दनवृक्षे पु० हेमच० १२कर्पूरे पु० राजनि०।
हिमक पु० हिमेन कायति कै-क। विकङ्कतवृक्षे राजनि०।
हिमकर पु० हिमः करः किरणो यस्य हिम करोति निशेषत्वात् कृ-अच् वा। १चन्द्रे २कर्पूरे च राजनि०। हिमकिरणादयोऽप्यत्र।
हिमकूट पु० हिमस्य कूटं यत्र। १शिशिरर्त्तौ राजनि० हिमप्रचुरं कूटमस्य। २हिमनिचये हिमालयपर्वते।
हिमगिरि पु० हिममयो गिरिः हिमप्रधानो वा गिरिः। हिमालयपर्वते हिमपर्वतादयोऽप्यत्र।
हिमज पु० हिमात् हिमालयात् जायते जन-ड। १मैनाकपर्वते। २पार्वत्यां ३शटयां स्त्री मेदि०। हिमे हिमकाले जायते जन-ड। ४चोरिण्यां लतायां स्त्री राजनि०।
हिमझण्टि पु० झण्टि इन् इत०। कुब्जटौ धारा०।
हिमतैल पु० हिमवीर्य्यं तैलम्। कर्पूरजाते तैले राजनि०।
हिमदुग्धा स्त्री हिमवीर्य्यकरं दुग्धमस्याः। चोरिण्याम् राजनि०।
हिमदुर्दिन न० हिमहेतुकं दुर्दिनम् शाक०। हिमपातेन दुःखकरे दिने कुज्झटिकायुक्तदिने त्रिका०। [राजनि०
हिमद्रुम पु० हिमप्रधानो जायमानः द्रुमः। निम्बवृक्षे
हिमप्रस्थ पु० हिमः शीतलः प्रस्थो यस्य। हिमालयपर्वते हेमच०। [राजनि०।
हिमबालुक पु० हिममयी बालुकेव अंशो यस्य। कर्पूरे
हिमबालुका स्त्री हिमस्य बालुकेव। कर्पूरे अमरः।
हिमवत् पु० हिमानि प्राचुर्य्येण सन्त्यस्य मतुप् मस्य वः। हिमालयपर्वते हेमच०।
हिमवत्सुत पु० इत०। १मैनाकपर्वते २गङ्गायाम् ३उमायाञ्च स्त्री। "गङ्गा हिमवतो जज्ञे सर्वलोकैकपावनी। स योगाग्निवलाद्देहं तेने पुत्रीं महेश्वरीम्" देवीपु०१२अ०।
हिमशर्करा पु० हिमप्रधाना शर्करा शा०त०। वायनाले राजनि०।
हिमशैल पु० हिमप्रधानः शैलः। हिमाचले।
हिमशैलजा स्त्री हिमशैलाज्जायते जन-ड। १उमायां शब्दर० २गङ्गायाम्। [(वरफ) पदार्थे च अमरः।
हिमसंहति स्त्री इत०। १हिमसमूहे २हिमेन कृतसङ्घाते
हिमहासक पु० हिमं हसति शीतवीर्य्यत्वात् हस-ण्वुल्। हिन्नावृक्षे जटा०। [राजनि०।
हिमांशु पु० हिमा अंशवोऽस्य। १चन्द्रे अमरः २कर्पूरे च
हिमांशुभिख्य न० हिमांशोरिवाभिख्या शोभा यस्य। रौप्ये हेमच०। तस्य अतिशुभत्वात् तथात्वम्।
हिमागम पु० हिमस्यागमो यत्र। हेमन्ते ऋतौ षड्ऋतूनां षण्णां षण्मासात्मके ऋतौ राजनि०।
हिमाद्रिजा स्त्री हिमाद्रौ हेमाद्रेर्वा जायते जन-ड। १चोरिण्यां राजनि०। २पार्वत्यां ३गङ्गायाञ्च।
हिमाद्रितनया स्त्री इत०। १दुर्गायां २गङ्गायाञ्च हिमाद्रिसुतादयोऽप्यत्र। ३मैनाके पु०।
हिमानी स्त्री हिमानां संहतिः हिम+ङीप् आनुक् च। हिमसमूहे अमरः "आगता वत अरेव हिमानी" शकुटः
हिमारति पु० इत०। १ऋतौ २शङ्खे मेदि० ३अर्कवृक्षे ४चित्रवृक्षे च।

हिमालय पु० हिमानामाश्रयः। १हिमवत्पर्वते त्रिका०। हिमप्रधान आलया यस्य। २शुक्लपर्वते शब्दच०। श्यामलत्वाच्च स्त्री राजनि०। स च नगः भारतवर्षस्य सीमापर्वतः। जम्बूद्वीपशब्दे दृश्यम्। [राजनि०।

हिमाज न० हिमकृते अण्डु-जायते जन-ड। घृते

हिमावती स्त्री हिमं हिमरोधं विद्यतेऽस्य सेवने मतुप् मस्य वः वैद्यायां दीर्घः। अर्कक्षीरीम् अमरः।

हिमाश्रया स्त्री हिमं हिमरोधमाश्रयति आ+श्रि-अच्। अर्कक्षीरवल्याम् राजनि०। [कपिकच्छायाम् राजनि०।

हिमोत्तरा स्त्री हिमसुत्तरं यस्याः सेवने शीतरोधकरत्वात्।

हिमोत्पन्ना स्त्री हिमे उत्पन्ना। यावनाल्यां राजनि०।

हिमोद्भवा स्त्री हिमे तत्प्रधानस्थाने उद्भवति उद्-भू-अच्। शठ्याम् राजनि०। [मेदि०।

हिरण न० हृ-ल्युट् नि०। १रेतसि २स्वर्णे ३धराटके च

हिरण्मय त्रि० हिरण्यात्मकम् मयट् नि०। १हिरण्यात्मके स्त्रियां ङीप्। "हिरण्मयी शालवतेव जङ्घा" भट्टिः। जम्बूद्वीपे नववर्षमध्ये २वर्षभेदे न० त्रिका०। "उत्तरेषेलावृतं नीलः श्वेतः शृङ्गवान् इति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्य्यादागिरयः प्रागायता उभयतः क्षारोदावधयो द्विसहस्रयोजन पृथव एकैकशः पूर्वेषात् पूर्वेभ्यात्तदुत्तरोत्तरं दशांशाधिकांशेन दैर्घ्यं एव भवन्ति" भाग० ५।१६अ०।

हिरण्य न० हिरण्यमेव स्वार्थे यत्। १सुवर्णे २धुस्तूरे अमरः। ३रेतसि शब्दर०। ४दूर्व्ये ५धराटके ६धनवृक्षे ७मानभेदे ८कच्छपे मेदि० ९रजते १०धने च।

हिरण्यकशिपु पु० दैत्यविशेषे। स च कश्यपात् दित्यां जातः "दितेः पुत्रद्वयं जज्ञे कश्यपादिति नः श्रुतम्। हिरण्याक्षश्च दुर्वृत्तो हिरण्यकशिपुस्तथा" "हिरण्यकशिपु दैत्यश्चचार परमं तपः। ततो वर्षसहस्राणि निराहारो ह्यधःशिराः। तं ब्रह्मा छन्दयामास दैत्यं तपो परेण तु। वरोमरत्वं वव्रे स ब्रह्मास्त्रेण दिवा निशम्। अहं सर्वं विनिर्जित्य सर्वदेवत्वमाप्नुयाम्। अस्त्रिनाद्रिगुणैर्वध्यं नैव मे दीयतां वरः। तेनैवमुक्तो ब्रह्मा तु तस्मै दत्त्वा वरेप्सितम्। दत्त्वा चास्य सभां दिव्यां तत्रैवान्तरधीयत। हिरण्यकशिपुर्दैत्यैः स्त्रीभिर्गीतैः पुरातनः। राजा हिरण्यकशिपुर्दैत्यो यां यां निषेवते। तस्यां तस्यां नमश्चक्रुर्दैवता ऋषिभिः सह। सर्वप्रभावो दैत्योऽभूत् हिरण्यकशिपुः पुरा। स्वयमग्निश्च चन्द्रश्च वायुरिन्द्रो जलं स्वयम्। भूत्वा चकार राज्यं स मन्वन्तरचतुष्टयम्। तस्यासीत् नरसिंहस्तु स्वयमेव विनिर्मितो ब्रह्मणा। शुक्ला नखाः कृताः" वह्निपु०।

हिरण्यकशिपुहन् पु० हन-क्विप् ह्रस्व०। विष्णौ।

हिरण्यकामधेनु स्त्री विधानेन हिरण्यप्ररचिता कामधेनुः। तुलादिषोडशमहादानमध्ये दानार्थं हिरण्येन कल्पितायाम् १धेनौ उपचारात् २तद्दाने च। तद्दानविधिः "अथातः संप्रवक्ष्यामि कामधेनुविधिं परम्। सर्वकामप्रदं नृणां सङ्कटापत्तिनाशनम्। कोशेयाच्छादनं तद्वोमः कार्योऽधोवासनम्। तुलापुरुषवत् कुर्यात् कृष्णमण्डपवेदिकाः। स्वस्थेवैकाग्निमत् कुर्यात् गुरुरेव समाहितः"। कृष्णमण्डपवेदिका इत्युपलक्षणम्। दृष्ट हि देशकालवह्निब्राह्मणादिपूजाग्राह्मणवाचनगुरु ऋत्विग्वरणमधुपर्कदानवेदीपरिषङ्कलेखनपञ्चपल्लवितानतोरणपताकादिकं सर्वं मत्स्यपुराणोक्तहिरण्यपुरुषदानविधिवत् वेदितव्यम्। स्वस्थेवैकाग्निमदिति, एकाग्निमत्करणं आख्यानम्। "कार्षापणशतिगुडस्य धेनुं यत्नेन कारयेत्। उत्तमा पलसाहस्रैस्तदर्द्धेन तु मध्यमा। कनीयसी तदर्द्धेन कामधेनुः प्रकीर्त्तिता। अशक्तस्त्रिपलाद्दुग्धशोऽपीह कारयेत्"। अत्र यद्यपि बल्वपरिमाणमुक्तं तथापि कामधेनुविधानस्य तन्त्राख्यानचतुर्थांशेन ब्रह्मः कल्पनोक्तः। समस्तपुराणपरिमितद्रव्यनिष्पन्नहेमकामधेन्वादिदर्शनादिहापि धेनुदानस्याविशेषात् तथैव निर्णीयते। तथा च गुरुधेन्वादिषु "तन्तुर्वाशेन ब्रह्मः स्यादिति" तत्र तत्र दृश्यते। "वेद्यां कृष्णाजिनं न्यस्य गुरुपल्लवसंयुतम्। न्यस्येदुपरि तां धेनुं सप्तधान्यैरलङ्कृताम्। कुम्भाष्टकसमोपेतां नानाफलसमन्विताम्"। कल्पतरुदाने, पक्वो व्याख्यातः। "सप्तधान्यानि यद्यप्यागमप्रसिद्धानि, "यद्वै दधे तु विन्यसेदिति" क्वचित्पाठः, नानाफलानि मागलवाजिखोपुरुषप्रभृतीनि शोभनानि कल्पतरुदानोक्तानि। "तथाष्टादश धान्यानि समभागात् परिकल्पयेत्। दद्यादष्टाष्टकं तद्वन्नानाफलसमन्वितम्। भाजनं वासनं तद्वत् ताम्रदोहनकं तथा"। अष्टादश धान्यानि परिभाषायां दृष्टव्यानि नानाफलानि मातुलिङ्गादीनि। "कोशेयवस्त्रद्वयसंयुक्तां दीपान्तपत्राभरणाभिरामाम्। सुधाकरां कृष्णतिलैर्मयूखां गन्धस्त्रिकाधातुकरीषपादाम्।

रत्नैश्च सर्वैः परितोऽभिलक्षां हरिद्वा पुष्पकैरनेकैः। व्रजाजिकुस्तुम्बुरुगर्करामिः वितानकं चापरि पञ्च वर्णम्। स्नातस्ततो मङ्गलवेदघोषैः पदक्षिणीकृत्य सपुत्रदत्तः। आवाहयेत् ताम्रकुम्भेनमन्त्रैः हिरण्यं दशादश दर्भपाणिः" हेमा० दा०मत्स्यपु०। [हेमच०।

हिरण्यकोष पु० हिरण्यस्य कोष इव। क्षतात्क्षतार्थैरौषे

हिरण्यगर्भ पु० हिरण्यं सर्वमयाण्डं गर्भ इत्यभिधानमस्य। १सर्गादौ ब्रह्मणि तस्य हैमाण्डप्रभवत्वात्तथात्वम् "तदण्डमभवद्हैमं सहस्रांशुसमप्रभम्। तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः" मनुः। तुलादिषोडशमहादानमध्ये दानार्थं स्वर्णादिना कल्पिते २हिरण्यगर्भाख्ये पात्रे ३उपचारात्तद्दाने ४शास्त्रान्तरमूर्त्तिभेदे च। तत्प्रकाशशब्दे दृश्यम्। तत्प्रदानविधिः हेमा० दा०मत्स्यपु० "स्नातः संपूजयेद्विप्रं महादानमनुत्तमम्। हेत्वा हिरण्यगर्भाख्यं महापातकनाशनम्। पुत्रवं दिनमवाप्नोति तुलापुरुषदानवत्। क्षत्रियस्यैवमुद्दिष्टं वैश्यानामर्द्धमात्रया। कृत्वादुपोषितस्तद्वद्दोषेभ्यश्चाऽर्चनं बुधः। पुनश्चार्चनं कृत्वा तदनु कृत्वाधिवासनम्। अत्र देशकालौ पूर्ववत्। ब्रह्मविष्ण्वादिपूजा ब्राह्मणवाचनगुरुऋत्विग्वरणमधुपर्कदानकुण्डमण्डपवेदिसम्भारकामाधिवासनादि सर्वं हिरण्यगर्भोदरमहादानप्रकृतिभूतं मत्स्यपुराणोक्ततुलापुरुषदानविधिना वेदितव्यम्। "ब्रह्मणैरानयेत् पुण्यं तपनीयमयं शुभम्। द्रोणप्रस्थकृताच्छ्रायं हेमपङ्कजसंयुतम्। त्रिभागकर्णविस्तारं प्रयत्नं सरजाजिनं" इति। कृत्वेति, हिरण्यगर्भाख्यं पात्रं, तपनीयमयं, स्वर्णमयं हेमपङ्कजम् तदेव नाभिशब्दवाच्यं, त्रिभागकर्णविस्तारमिति, चतुरङ्गुलविस्तारमित्यर्थः। सरजाजिनं, सदक्षाजिनं। व्याघ्रचौरातिपूरितमिति क्वचित्पाठः। तत्र व्याघ्रचौरे तुलापरिमाणे, यद्यपि व्याघ्रातिपूरितमिष्यते तथापि यजमानप्रवेशेन यथा तत्र वह्निरुच्छ्रयति तथा पूरणीयम्। "दशान्वाहि सरजानि दाम्नां सूत्रैः समैव च। हेमनालं वपिटकं बहिरादित्यसूत्रम्। तथैवावरणं नाभेरुपवीतन्तु काञ्चनम्। पार्श्वतः स्थापयेत् तद्वदण्डं कमण्डलुम्"। दशान्वाहि, दशखण्डानि, अन्वाहीति क्वचित्पाठः। तानि काञ्चनानि अन्वाहारतया, अन्वाहीति। अत्र खनित्रमिति केचित्, रत्नानि पञ्च प्रसिद्धानि, वपिटकं, मञ्जूषान्वितं बहिरिति। हेमकुम्भादु बाह्यप्रदेशे पार्श्वतः स्थापयेदित्यनेन सम्बन्धः। बह्निमाहारसंयुतमिति च पठनीयम् "बह्निमाहारयोर्जघं ब्रह्माण्डदाने वक्ष्यते। बह्निमाघ्यपसंयुतमिति वा पाठ तदा चाध्यः वक्ष्यः"। तच्चाण्डमपि तत्रैव, नाभेरावरणमिति, नाभ्यावरणार्थं सौवर्णं वस्त्रं दाक्षादोन्यपि सुवर्णमयान्येव ज्ञातव्यानि। "पद्माकारं विधानं स्यात् समन्तादङ्गुलाधिकम्। सप्तावलोभयोपेतं पद्मरागदलान्वितम्। तिलद्रोणोपरिगतं वेदीमध्ये ततोऽर्चयेत्"। द्रोणः परिभाषायां व्याख्यातः। इदञ्च हिरण्यगर्भनिर्माणसुवर्णपरिमाणज्ञानात्तावता यजमानस्य प्रवेशावारणोपयिकं कृण्डं भवति तावता वटनीयं, तच्च वेदिकामध्ये लिखितचक्रोपरि तिलद्रोणं निधाय तदुपरि संस्थाप्य पूजयेत्। अत्र तुलापुरुषदानतदधिवासनदिनादन्यद्दानाङ्गहोमवास्तुशान्तिं विधाय पूर्णाहुतिपर्यन्तकर्मशेषसमाप्तिं कुर्यात्। ततश्च कृण्डमण्डपवर्त्तिकलशजलैः पूर्ववदभिषेकः, तदुच्यते। "ततो मङ्गलशब्देन ब्रह्मघोषरवेण च। सर्वौषध्योदकस्नानं स्नापितो वेदपारगैः"। सर्वौषध्यः, व्याख्याताः, "शुक्लमाल्याम्बरधरः सर्वालङ्कारभूषितः। दध्यक्षतैरर्चयेन्नत्वं सदर्भतिलपाणिभिः। नमो हिरण्यगर्भाय हिरण्यकवचाय च। सप्तलोकगुरोश्चैव! जगद्धात्रे नमो नमः। भूर्लोकसुखा लोकास्तव गर्भे व्यवस्थिताः। ब्रह्माद्यस्त्वां देवा नमस्ते विश्वधारिणे। नमस्ते भुवनाधार! नमस्ते भुवनाश्रय!। नमो हिरण्यगर्भाय गर्भे यस्य पितामहः। यतस्त्वमेव भूतात्मा भूतेभूते व्यवस्थितः। तस्मात् मामुद्धराशेषदुःखसंसारसागरात्। यस्मात्त्वन्तु तस्मात्त्वमेवासि सदक्षसखः। सृष्टिस्थितिविनाशेषु ब्रह्मविष्णुशिवात्मकः। त्रयीमयो हिरण्यात्मा यतस्तस्मात्प्रसीद मे। अनन्तशक्तिरूपाय तुभ्यं ब्रह्मात्मने नमः। इति मन्त्रेण गन्धपुष्पादिभिः पूजयित्वा परिक्रम्य धर्मराजचतुर्थो। जानुमध्ये शिरः कृत्वा निपेदुश्चासपञ्चकम्"। धर्मराजोऽत्र सुवर्णमयः, तच्चतुष्टयं च तुलापुरुषेऽभिहितं चतुर्दशोऽपि दोषघ्नः, तच्चैतत्सर्वं ब्रह्माण्डदाने वक्ष्यते। तत्र दक्षिणस्तो धर्मराजः, वामस्तो चतुर्थश्च इति। "गर्भाधानं पुंसवनं सीमन्तोऽवनं तथा। कृत्वा हिरण्यगर्भञ्च ततस्ते द्विजपुङ्गवाः"। अनवलोकनमध्यत्र विशेषं, एतेषु, गर्भादानादिषु वक्ष्यमाणेषु जातकर्मादिषु, मन्त्रयुक्तमनुष्ठानमात्रमाचरणीयम् "सीमन्तकुलधाम्नेषु गुरुं सन्तोषयेत् ततः। जातकर्मादिकाः कृत्यं क्रियाः षोडश चापराः"। तान्वाभिधीयन्ते। जातकर्म१ नामकरणं२ निष्क्रमणं३ अन्नप्राशनं४ चूडाकर्म५ उपनयनं६ गोदानं७ वैवृं

आग्नेयंदं सौम्यं॰इति,चत्वारि४ वेदव्रतानि गोदानं५ केशान्ता६चेति द्वादश,पूर्वोक्तञ्च इत्यु भयेषु षोड़शत्वम्। "भक्त्यादिकञ्च गुरवे दत्त्वा मन्त्रमिमं जपेत्। नमो हिरण्यगर्भाय विश्वगर्भाय ते नमः। चराचरस्य जगतो ब्रह्मभूताय वै नमः। मन्त्रोऽयं जनितः पूर्वं मर्त्यधर्मा-द्विजोत्तमः। स्वर्गभोगप्रदोनित्यं दिव्यदेहो भवाम्यहम्। चतुर्भिः कलशैर्भूयस्तत्ते द्विजपुङ्गवाः। स्नानं कुर्युः प्रसन्नाय सर्वाभरणभूषिताः"। कलशैः कुशडसमीप-स्थितैरेव, स्नानं कुर्युर्वेजयानस्थेति शेषः "देवस्यत्वेति मन्त्रेण स्थितस्य कनकासने। ब्रह्म जातस्य तेऽङ्गानि अभिषेक्ष्यामहे वयम्। दिव्येनानेन वपुषा चिरञ्जीव सुखीभव। ततो हिरण्यगर्भं तं तेभ्यो दद्याद्विचक्षणः"।

हिरण्यनाभ पु॰ हिरण्यं नाभौ यस्य यच्छमा॰। मैनाक-पर्वते हेमच॰।

हिरण्मय हिरण्यस्य विकारः तदाकृतिं वा मयट् वेदे निपा-तात् मलोपः। १हिरण्यात्मके २सुवर्णविकारे च "हिर-ण्मयेन सविता रथेना" यजु॰। ४२अ॰ सूर्यमन्त्रः "अथ य एष हिरण्मयः पुरुषो दृश्यते" छान्दो॰ उ॰।

हिरण्यरेतस् पु॰ हिरण्यं रेतो यस्य। १वह्नौ २चित्रक-वृक्षे च अमरः। अग्निरेतसशब्दे दृश्यम्। २शुक्रे मेदि॰ ३सुवर्णवृक्षे ५शिवे जटा॰।

यज्ञेशत्वमाह यथा "यत्तीतं वीतिहोत्रेण वीर्यं रुद्रं पिनाकिना। तेनाक्रान्तोऽभवत् ब्रह्मन्! मन्दरेजा ऽतायनः"। "ऽतायनोऽपि च भयाद् यत्र तत्र परि-धमन्। पञ्च वर्षसहस्राणि क्षुध्यार्तो दुःखमुक् ततः। मांसमस्रोणि रक्तानि मेदोमज्जवपाः सुरा। रोमाणि चाखिलैश्चाद्याः सर्वे जाता हिरण्मयाः। हिरण्य-रेता लोकेऽस्मिन् विख्यातः पावकोऽतः"वामनपु॰५४अ॰।

हिरण्यवर्ण स्त्री हिरण्यस्येव वर्णो यस्याः।१लक्ष्मीदेवे हेमच॰ २हेमतुल्यवर्णयुते त्रि॰"हिरण्यवर्णां हरिणीम्" श्रीसू॰

हिरण्यवाह(हु) हिरण्यं वाहयति प्रापयति भक्तान् हिरण्यवर्णो वाहुरिव वा यस्य। १समुद्रदेवे २शोणे नदभेदे च अमरः।

हिरण्याक्ष पु॰ कश्यपस्य पुत्रे दैत्यभेदे। हिरण्यस्येव अक्षिणी यस्य दृश्यम्। स च वराहरूपेण विष्णुना हतः। "हतो हिरण्यक्षमिषुः हरिणा किरुरूपिणा। हिरण्याक्षो धरां हारे विभ्रता शौकरं वपुः" भाग॰ ७।१अ॰।

हिरण्याम्ब पु॰ हिरण्यनिर्मितोऽम्बा। ब्रह्मादिशोड़शमहा-दानमध्ये दानार्थं सर्वादिना १कल्पितेऽन्ये २तद्दाने च। "अथातः संप्रवक्ष्यामि हिरण्याम्बविधिं परम्। यस्य प्र-सादाद्धनमनन्तफलमश्नुते। पुण्यं तिथिमथासाद्य कृत्वा ब्राह्मणवाचनम्। शोभेशावाहनं कुर्यात् तथापुरुष-दानवत्। ऋत्विगमण्डपसम्भारभूषणाच्छादनादिकम्। सर्वमेकाग्निमत् कुर्याद्धेमवाजिमखं बुधः"। आदि-शब्देन दैवकार्यतद्विघ्नाद्रिपूजागुरुऋत्विग्वर-ण-मधुपर्कदानवेदिकोपरिचक्रलेखनवितानतोरणपताकाधि-वासनादि मत्स्यपुराणोक्तसर्वापुरुषदानविधिश्च संगृह्यते, सर्वमेकाग्निमदिति, व्याख्यातं, "व्याघ्रवेदिमध्ये तु कृष्णाजिनतिलोपरि" कृष्णाजिनविधिस्तोषपरिमित-तिलोपरीति विज्ञेयम्। "कौशेयवस्त्रसंवीतं कारयेद्धे-मवाजिनम्। शक्तितस्त्रिपलाद्दूर्ध्वमाषट्पलपलाद् बुधः। पादुकोपानहच्छत्रचामरासनभाजनैः। पूर्णकुम्भाष्टको-पेतं माल्यैश्चफलसंयुतम्। शय्यां सोपस्करान्दद्यद्धेमार्क-खड्गसंयुतम्"। अथोपस्करा विविधाकारशोपधानवस्त्र-फलपुष्पकुङ्कुमकर्पूरागुरुचन्दनताम्बूलदर्पणकङ्कतिकाचा-मरव्यजनासनपत्रदण्डस्थितपात्रासिसृष्टिकोपानद्युगल-ताम्रघटिकादिजलपात्रदीपिकावितानादयः। मार्क्ण्ड-संयुतामिति,चपर्यन्तदृश्यं सौवर्णमश्वं कुर्यादित्यर्थः। सर्वमेतच्चतुष्कं ब्रह्माण्डदाने "ततः सर्वौषधि-स्नानस्थापितो वेदपुङ्गवैः। दमस्तुम्बरवेल्लन्तं स्टङ्गोत-कुसुमाञ्जलिः"। दृष्ट्वापि पूर्वेद्युरधिवासनं विधाय द्वितीयदिवसे पूर्ववत् पुण्याहवाचनादिपूर्णाहुतिपर्यन्तं कर्म, गुरुः समापयेत्। अथ सर्वौषधिजलस्नातः गुरो-श्वरो यजमानस्त्रिःप्रदक्षिणीकृत्य वक्ष्यमाणमन्त्रमुदी-रयेत्। "नमस्ते सर्वदेवेश! वेदाङ्गयज्ञसम्भव! । वाजिरू-पेण भास्कर्यात् पाहि संसारसागरात्। त्वमेव सप्तधा भूत्वा छन्दोरूपेण भास्करम्। यस्मात् भ्रमयसे लो-कानतः पाहि सनातन!। एवमुच्चार्य गुरवे तमश्वं विनिवेदयेत्। दत्त्वा प्रणम्य ब्राह्मणांश्चाशीर्वादमभ्येति शास्त्र-तम्। गोभिर्विभवतः सर्वोक्तविजयाभिपूजयेत्। सर्व-धान्योपकरणं गुरवे विनिवेदयेत्। सर्वं यथादिकं दत्त्वा मुच्यतेनात्रसंशय इह। पुराणश्रवणं सम्यक् कार-येद्ब्राह्मणानादृत"। दानवाक्यात्तु पूर्ववदनुसन्धेयम्, अनु-कल्पदक्षिणेषु सुवर्णं दक्षिणेति, यथाशक्ति सुवर्णदक्षिणा, विभवतः अविभवानुसारेण सर्वान् सदस्यादीन्ऋत्विजश्च गोभिः पूजयेत्, सर्वधान्योपकरणमिति विनियोगात्

पूर्वं धान्यावादनं गम्यते, गुरवे निवेदयेदिति, सकल द्रव्यदाने चाचार्यायैव सर्वं प्रदाय ऋत्विग्भ्यो यथाशक्ति सुवर्णादि दद्यात्। सङ्कल्पवाक्यादिद्रव्यदाने तु प्रकृतिवद्व्यवस्था, सकलतिलैकाम्बिरोऽपि द्रष्टव्या" हेमा०दा०

हिरण्याक्षरथ पु० हिरण्येन निर्मितः अक्षः तद्युक्तरथः। तुलादिषोड़शमहादानमध्ये दानार्थं सुवर्णादिना १कल्पिते सुवर्णमयाक्षयुक्तरथे २तद्दाने न०। तद्विधिर्यथा "अथातः संप्रवक्ष्यामि महादानमनुत्तमम्। हिरण्याक्षरथं नाम महापातकनाशनम्। पुण्यं दिनमथासाद्य कृत्वा ब्राह्मणवाचनम्। क्षौद्रेशावाहनं कुर्यात् तथा० पुरुषदानवत्। ऋत्विग्भ्यश्चोपस्कारभूषणाच्छादनादिकम्"। तत्र पुरुषदानवदिति, यत्पुराणोक्ततत्र पुरुषदानवद्देयमित्यर्थः, आदिशब्दात्तत्रापि पूर्ववदेव व्याख्या "क्रमेण जिने तिलान् कृत्वा कार्षुकं कारयेद्दृढम्। अष्टारं चतुरस्रं वा चतुश्चक्रं सकूबरम्। इन्द्रनीलेन कृष्णेन ध्वजरूपेण संवृतम्। लोकपालाष्टकोपेतं पद्मरागदलान्वितम्"। अत्र तिलानां रत्नस्य च परिमाणापेक्षायां पुरुषेच्छया नियमः प्रकृतौ परिमाणाश्रवणात्, केचित्तु सन्निधानात् हेमहस्तिरथादिदानस्थितं तिलानां द्रोणपरिमाणत्वमिह वदन्ति। कूबरं युगाधारकाष्ठम्। ध्वजो दण्डः, स च रत्नञ्च सौवर्णत्वात् सौवर्ण एव तथा चोपरिस्थितेन इन्द्रनीलमणिमयेन कलशेन युक्तः कर्त्तव्यः। लोकपालाश्चाष्टौ चक्रं ब्रह्मा खड्गदाने, "चत्वारः पूर्वकथिता धान्यान्यष्टौ दशैव तु। क्षौमेयवस्त्रसंयुक्तशरिष्टादितानकम्। माल्येचुफलसंयुक्तं पुरुषेण समन्वितम्। यो यद्ब्रूयः पुमान् कुर्यात् स तत्प्राप्नोधिवासनम्"। वितानमत्र पद्मार्थं, पुरुष इष्टदेवताकारः सौवर्णस्तत्रे स्थापनीयः। यत्तोपानत्फलाद्युक्तम्। "सोभिर्वेभवतः सार्द्धं दद्याच्च शयनासनम्। आभरात्रिरात्रादूर्द्धं यक्षितः कारयेद्बुधः"। भारः पञ्चसहस्रद्वयम्, एतच्च सुवर्णमानं ध्वजपुरुषलोकपालाद्यष्टचक्ररत्नकलशसहितस्य वेदितव्यम्। "अष्टभीरथसंयुक्तं चतुर्भिरथ वाजिभिः। ध्वजाग्रथ युतं दद्याद्धेमसिंहध्वजान्वितम्"। हैमेन सिंहाङ्कितेन युक्तमिति अष्टाश्वपक्षे, चतुरश्वपक्षे च इन्द्रनीलमयकुम्भो ध्वजे कार्य्यः, अश्वद्वयपक्षे हेमसिंह इति व्यवस्था। "चक्ररत्नाङ्गभौ तस्य तुरगस्यावधारिणौ। पुण्यं वाहं ततः प्राप्य पूर्ववत् स्थापितो द्विजैः। शुक्लवस्त्रधरो दद्यादिमं मन्त्रमुदीरयेत्"। हेमा० दा० मत्स्यपुराणीयम्।

हिरुक् अव्य० हि-रा०उकिक् रुट् च। १वर्जने २त्यागे मनो० २विनार्थे ३मध्यार्थे ४खाभीष्ये च अमरः।५क्षये मेदि०

हिल भावकरणे तु०प०अक०सेट्। हिलति अहेलीत्।

हिलमोचि(ची) स्त्री हिल-क ङीष्-इन् कर्म० वा ङीष् (हेलेञ्चा) शाके शब्दर० आर्द्धे क तत्रैव शब्दच०। "शोथ कृत् कफ पित्तं हरते हिलमोचिका" भावप्र०।

हिल्ल पुंस्त्री० हिल-कन्। मत्स्यविशेषे शब्दच०। स्त्रियां ङीष्

हिल्लोल दाहने भ्वा०चु०उभ०अक०सेट्। हिल्लोलयति ते अजिहिल्लोलत् त।

हिल्लोल पु० हिल्लोल-अच्। १तरङ्गे "छूते लता स्त्रियः पादौ करास्यां धारयेत् करौ। वदेत् ताडयेद् योनिं वक्षो हिल्लोलसंज्ञकः" रतिम० उक्ते २रतिबन्धभेदे। घञ्। ३दोलने।

हिल्वला स्त्री रल्वला+पृषो०। मृगशिरानक्षत्रशिरोदेशस्थे पञ्चतारात्मके मृगव्याधे शब्दर०। [स्रोत्।

हिव प्रीणने स्वा० प० अक० सेट् इदित्। हिन्वति अहिन्वीत्।

हिवुक न० हिवि-उकक् नि०। लम्बाङ्गुलौ स्थाने ख्या०।

हिंस वधे वा चु० उ० पक्षे रुधा० प० सक० सेट् इदित्। हिंसयति ते अजिहिंसत् त। हिनस्ति हिंसति ते अहिंसीत् अजिहिंसत् त।

ही अव्य० हि-डी। १विस्मये अमरः। २दुःखे ३विषादे ४हेतौ मेदि०। ५शोके च शब्दर०।

हीन त्रि० परि० हा-क्त तस्य नः दैत्वम्। १त्यक्ते २निन्द्ये अमरः। ३अधमे त्रि०। व्यवहारे ४प्रतिवादिभेदे पु० लटा० "अन्यवादी क्रियाहीनो नोपन्यासी निरुत्तरः। आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः" नारदः।

हीनवादिन् पु० कर्म०। "पूर्वपक्षं परित्यज्य योऽन्यमालम्बते पुनः। वादसंक्रमणज्ञेयो हीनवादी स वै नरः" स्मृक्ते व्यवहारे १वादिभेदे। २मूर्खे हेमच०।

हीनाङ्ग त्रि० हीनमङ्गं यस्य। अभावतो न्यूनाङ्गयुते "हीनाङ्गं विकलाङ्गं च" इति स्मृतिः। स्त्रियां वा ङीष् सा च। २क्षुद्रपिप्पल्यां हेमच०। [तान्त्र] भरतः।

हीन्ताल पु० हीनस्तालो यस्मात् पृषो०। हिन्तालवृक्षे (हेँ-

हीर न० हृ-क नि०। १वज्रे २हीरके च। २शिवे ३सर्पे पु० हेमच० ४हारे ५मिश्रे च पु० ६चक्षुषां ७तैलाम्बुके स्त्री मेदि०। ८पिण्डीतिकायां हेमच० ९काञ्जीवांशे स्त्री रत्नमि० स्वार्थे क। हीरक (हीरा) मणिभेदे शब्दर०। वज्रशब्दे ८७४१ पृ० दृश्यम्।

हीराङ्क पु० हीरमिव दृढमङ्कमस्य । रत्नस्य वज्रे शब्दमा० ।
हील न० हो-विस्मयं लाति ला-क । रुक्षे धातौ रेतसि ।
हीलुक न० हिल-उक पृषो० । गौड़ीमद्ये शब्दच० ।
हीही अव्य० ही+हिलम् । १विस्मये २हासे च मेदि० ।
हु होमे अदने च जु० प०सक० अनिट् । जुहोति अहौषीत् जुहाव । प्रीणने च । "जुहुधीह यावकम्" किरा० ।
हुङ्कार पु० हु(ङ्क)मित्यव्यक्तशब्दस्य कारः क-घञ् । हुमित्यव्यक्तस्य प्रतिषेधसूचकशब्दस्योच्चारणे । "मौनव्रतं मखाकर्षे हु(ङ्कु)ङ्कारेष्वपि नक्षति" इति पुराणम् दीक्षमध्येऽपि ।
हुड रोगीकरणे सक० मज्जने संघाते च चक० तु० क० प० सेट् । हुड़ति अहुड़ीत् जुहोड़ कर्दित् चङि न ह्रस्वः ।
हुड रोगीकरणे भ्वा० आ० सक० सेट् कर्दित् । हुण्डते अहुण्डिष्ट । [जोडते अजोडिष्ट ।
हुड गतौ भ्वा० आ० सक० सेट् कर्दित् चङि न ह्रस्वः ।
हुड पु० हुड-क । १मेषे हेमच० । चौरनिवारणार्थं भूमौ निखाते २कीलके च ३वैद्यनाथयजमाने ४रथोपरि विष्णुमूलस्थानमञ्चके च "पुरो समन्तादिखिता मयताका मनोरमा । सचक्रा सहुड़ा चैव सयन्त्रखनका तथा" भा० व० १५अ० । "चक्राणि योधगणाः हुडाकाराश्मस्थानानि भाषायां (पुकुज)संज्ञानि । अन्ये तु विष्णुमूलोत्सर्जनस्थानमञ्चकाश्च हुड़ा इत्याहुः । चटाकरणि च । "कल्पद्रुमे हुडमञ्चकाश्च रथोपरि स्थिरिभिः विष्णुमूलसमर्पणार्थकराटिमयं चक्षानः इति नीलकण्ठः
हुडुक्क पु०क०हुड़-वा०उक्क ।१वाद्यभेदे २टालू वृक्षे ३भटभक्षे मेदि० (हुड़क) इति ख्याते ४कपाटदण्डे शब्दर० ।
हुडुत् न०क०हुड़-उति ।१हुण्शब्दे २अव्यक्ते शब्दे कायीक० ।
हुडुम्ब पु० कु० हुड-डम्ब । भट्टचिप्टे शब्दमा० ।
हुण्ड पंस्त्री०हुंड्-अच् । १व्याघ्रे २दासभूकरे ३राक्षसे च स्त्रियां ङीष् ।४मूर्खे त्रि० । [अमरः । भावे क्त । २होमे न० हुत त्रि० हु-क्त । देवाद्देशेन मन्त्रद्वाराऽग्नौ प्रक्षिप्ते इत्यादौ
हुतभुज् पु० हुतं मन्त्रेण प्रक्षिप्तं इत्यादि भुङ्क्ते भुज-क्विप् । १अग्नौ २चित्रकवृक्षे च अमरः ।
हुतवह पु० हुतं इत्यादिकं वहति प्रापयति देवान् प्रीत्यर्थम् वह-अच् । १अग्नौ हेमच० २चित्रकवृक्षे च अमरः ।
हुताश पु० हुतमश्नाति अश-अण् । १वह्नौ शब्दर० २चित्रकवृक्षे च । ल्यु हुताशोऽप्यत्र । स च कर्मविशेषविहितवह्नौ च । "कोटिहोमे हुताशनः" तिथ्या० ।
हुताशनी स्त्री हुताशनस्तद्दीपनमस्त्यस्या अच् गौ० ङीष् । फाल्गुनपूर्णिमायां होलाकाख्ये उत्सवे ।
हुम् अव्य० हु-डुमि । १स्मरणे २प्रश्ने ३अनुज्ञायां च ४निवारणे मेदि० । "गुरुं हुङ्कृत्य तूष्णीं स्यात्" स्मृतिः ।
हुर्च्छ कौटिल्ये भ्वा० प० सक० सेट् । हुर्च्छति अहुर्छीत् हुर्छयाटश्यात् क्विप् ह्रस्वोपे हूः हुरो हुर इत्यादि ।
हुल हलौ संवरणे च भ्वा० प० सक० सेट् । होलति अहोलीत् व्यवा० हुलः होलः ।
हुलहुली स्त्री हुल-क वाभीक्ष्ण्ये द्वित्वम् यौरा० ङीष् । स्त्रीणां मङ्गलध्वनिभेदे (उलुध्वनु) । त्रिका० ।
हुहु(ह्) हे-डु नि० । गन्धर्वभेदे पृषो० ह्रस्वश्चित्यत्र ।
हूङ्कार पु० हूय+क-घञ् । अवज्ञाहेतुके शब्दभेदे "हूङ्कारेणैव तं भक्षं स चकारास्विदा ततः" देवीभा० ।
हूड गतौ भ्वा० आ० सक० सेट् कर्दित् चङि न ह्रस्वः । हूडते अहूडिष्ट ।
हूत त्रि० हे-क्त संप्रसारणम् । आहूते लताङ्काने ।
हूति स्त्री हे-क्तिन् संप्रसारणम् । आह्वाने अमरः ।
हून पु० हे-क्त सम्प्रसारणं च । १म्लेच्छजातिभेदे २तद्वासस्थानभेदे च "हूनवङ्गखसेष्वेव नान्यदेशे कदाचन" स्मृतिः । इतश्च प्रचलिते अर्वाक्तद्भेदे रत्नम्बे । "शकाश्च तुरुष्काश्च हूनो यवन एव च । लोकवाह्यास्तु यो वाह्लिमवाग्व्यवहारवर्जितः । म्लेच्छः किरात बर्बर पुलिन्दाद्यास्तु तद्विदा" भटाद्य० ।
हूम् अव्य० हु-वा०डूमि । १प्रश्ने २वितर्के अमरः ३समतौ ४क्रोधे ५भये निन्दायाम् अवज्ञायाञ्च मेदि० ।
हूर्च्छन न० हूर्छ-ल्युट् । कौटिल्ये । [ङीष् ।
हूरव पंस्त्री० हू इति रवो यस्य । शृगाले हेमच० स्त्रियां
हूहु(ह्) पु० गन्धर्वविशेषे शब्दर० ।
हृ हरणे भ्वा०उ०दि०अनिट् । हरति ते अहार्षीत् अहृत अहार अहृे हरिष्यति ते । हृस्वे कर्मणि अकारादि । हियते अहारि अहारिषाताम् अहृषाताम् जिहीर्षति ते
अनु+अनुकरणे आ० अनुहरते पैङ्गलमद्यः ।
अप+दूरीकरणे अपहरति अपहारयतीत्यर्थः चौर्ये च ।
अभि+आभिमुख्येन हरणे ।
सम्+अभि+पौनः पुन्येन सम्यादाने ।
अभि+अव भोजने अभ्यवहरति भुङ्क्ते रत्नार्थः ।
सम्+अभि+वि+आ+नैकट्यसम्बन्धसम्यादाने ।
अव+दूरीकरणे सैन्यावहारः ।

वि+यम विवादे शयनभोजनादिना संसर्गे उपभोगे च। आ+भोजने आहारः। नानास्थानस्थितानामेकत्रसङ्कर्षणे च अधि+आ+तर्के अन्यत्रस्थितपदस्यान्वयार्थमाकर्षणे च। अभि+आ+आभिमुख्येनाहरणे। उद्+आ+दृष्टान्ततयोपन्यासे कथने च। प्रति+उद्+आ=प्रतिरूपतया उपन्यासे। परि+आ+परित आहरणे [विषयेभ्यो मनसो निवारणे च प्रति+आ+तन्त्रेण पठितानामेकैकस्य सकृत्वे प्रत्याहारः वि+आ=कर्षणे शब्दोच्चारणव्यापारे। सम्+आ=संयुक्तानानास्थानस्थितानामेकत्रोपन्यासे संघाते च उद्+आ+ऊर्ध्वीकरणे उत्क्षेपणे च। अभि+उद्+आभिमुख्येन उद्धरणे। अभितो वा उत्क्षेपणे। प्रति+उद्+प्रतिकूलतया प्रतिरूपेण वा उद्धरणे। उप+स्वामीप्येन स्थानीकरणार्थं दाने उपढौकने। प्रति+उप+प्रतिरूपतया उपढौकने। नि+नितरां हरणे हिंसनिश्चयने च। निस्+(र)बहिष्करणे अपसारणे च। परि+दोषादिनिवारणे। प्र+ताडने निघाते। प्रति+प्र+प्रतिरूपतया ताडने। प्रति+प्रत्येकहरणे प्रतिरूपतया हरणे च। वि+देयविशेषेण मन्त्रादिना मनोरञ्जनार्थव्यापारे विहारः। वि+अति परस्परमेकजातीयक्रियाकरणे आ०। सम्+आरणे ताडने च। [भोजने यथा गुरोपसंहारः। उप+सम्+प्रकरणपठितस्य समापने अन्यत्र पठितस्यान्यत्रा हृ बलात्कारहरणे जु०पर०सक० अनिट् वैदिकः। जहर्त्ति अड्डार्षीत्। [दयस्विते वि०।

हृच्छय पु० हृदि शेते शी-अच्। १कामदेवे डिला०। २हृद्-

हृच्छूल न० ष० त०। शूलरोगभेदे वैद्यकम्।

हृणी लज्जायां कण्ड्वा०आत्म०अक०सेट्। हृणीयते अहृणीयिष्ट "हृणीयते वीरवती न भूमिः" भट्टिः।

हृणीया स्त्री हृणीय-भावे अ। निन्दायाम् अमरः।

हृत्(द्) वि० हृ-क्विप् तुक् च। १हारिणि। पृषो०तस्य दः, हृदयस्य हृदादेशो वा। २हृदये ३मानसे च न० अमरः।

हृत्कम्प पु० ष० त०। भयादिहेतुके हृदयकम्पे।

हृत वि० हृ-क्त। १अपहृते २स्थानान्तरं गमिते च ३विभक्ते

हृदय न०हृ-कयन् दुक् च। १मनसि २वक्षसि च त्रिका०। हृद् एति दय-अच्। परब्रह्मणि "हृदयं तच्चाद्वयम्" ज्ञा०उ०

हृदयग्रन्थि पु० हृदयस्य ग्रन्थिरिव। अविद्यासम्बन्धरूपे संसारबन्धे "भिद्यते हृदयग्रन्थिः" इति भागवतम्।

हृदयङ्गम वि० हृदयं गच्छति गम-ख मुम् च। १युक्तियुक्ते २मनोहरे वि० अमरः "हृदयङ्गममुक्तिस्तम्" भट्टिः।

हृदयस्थान न०हृदयस्य मनसः स्थानम् हृदयरूपं वा स्थानम् यत्र स्थले ते मध्य०। [दनि। हृदयिन् तत्रार्थे अटा०

हृदयिक त्रि० हृदयं प्रयत्नं मनोऽस्यास्ति ठन्। प्रयत्नचित्ते

हृदयेश पु० ष० त०। १भर्तरि २भार्यायां स्त्री ङीष च०।

हृदावर्त्त पु० हृदिस्थ आवर्त्तः। अन्नस्य हृदयस्थे आवर्त्ताकारे रोगावस्थाभेदे त्रिका०। [रिव०१ट्य०।

हृदिक पु० अन्धकाज्जाताज्जे कृतवर्म्मपितरि यादवभेदे

हृदिकात्मज पु० ष० त०। कृतवर्म्मणि यादवे।

हृदिस्पृश् त्रि० हृदि हृदये स्पृशतेऽसौ कर्म्मणि क्विन् सकुक्च०। १हृद्ये मनोज्ञे। कर्त्तरि क्विन्। २मर्म-स्पृशि दुःखदे च। [क्रमेण तद्देशवासिनि त्रि० स्त्री०।

हृद्रोल पु०पर्वतभेदे सोऽभिजनोऽस्य ञ। हृद्रोलीय तिबादि-

हृदयन्य पु० हृद् यद्यति यन्य-यच्। हृद्ग्रहे राजनि०

हृद्य न० हृदि स्पृश्यते मनोऽत्रात् हृद्+यत्। १सुवर्णेऽपि (दारचिनि) शब्दर०। २मनोज्ञे त्रि०अमरः। ३दाडिमीवृक्षौ स्त्री। ४यज्ञभेदे पु० मेदि०।

हृद्यगन्ध न०हृद्यो गन्धोऽस्य। चुचुन्दरीरोगे क्षेमच०। २बिल्ववृक्षे पु० जटा०। ३जात्यां स्त्री राजनि०। ४तुलस्याम्। हृद्यगन्धीत्यपि ४चुचुन्दरीरोगे न० राजनि०।

हृद्रोग पु० ष० त०। हृदयस्थे रोगभेदे हृदामयोऽप्यत्र। भावप्र० तस्य निदानादि तल्लक्षणं चोक्तं यथा "हृद्रोगस्य विप्रकृष्टनिदानमाह "अत्यम्बुगुर्वन्नकषायतिक्तरूक्षाभिघाताध्यशनप्रसङ्गैः। सञ्चिन्तनैर्वेगविधारणैश्च हृदामयः पञ्चविधः प्रदिष्टः"। प्रसङ्गः सततं सेवा। सञ्चिन्तनम् अतिचिन्ता राजभयादिजमिति। हृदामयः स च पञ्चविधः वातिकः पैत्तिकः श्लैष्मिकः सान्निपातिकः क्रिमिजश्चेति। तस्य संप्राप्तिपूर्वकं लक्षणमाह। "दूषयित्वा रसं दोषा विगुणा हृदयश्रिताः। हृदि बाधां प्रकुर्वन्ति हृद्रोगास्ते प्रचक्षते"। विगुणाः दुष्टाः बाधां दोषभेदेन नानाविधां व्यथाम्। भक्षयत्योजोऽभिति शब्दार्थः। वातिकं हृद्रोगमाह "व्यायम्यते भाक्तजे हृदयन्युद्यते तथा। निर्भ्रंश्यते दीर्य्यते च स्फोट्यते पाट्यतेऽपि वा"। भोक्तजे हृद्रोग इति शेषः। व्यायम्यते व्यथया विलाप्यते इव। त-

ह्यते कृषीमिरिव विध्यते। निर्मथ्यते मथनेनेव दीर्यते करपत्रेण द्विधाक्रियत इव। स्फोट्यते वस्त्रेणेव पाट्यते कुठारेण वस्तुधाक्रियत इव। अथ वैत्तिकमाह "हृष्योद्भटहर्षोषः क्षुः वैत्तिके हृदये क्रमः। धूमायनस्तु मूर्च्छा च खेदः शोषो रसस्य च"। तत्रा शीत गात्रस्येव शीतवातादिसंस्पर्शहेतुः किञ्चिदिवोष्णम्। दाहः सर्वस्वेन वह्निनेव दुःखहेतुर्गात्रस्य सन्तापः। शोषः शुष्कतेनेव पीड़ा। हृदये क्रमः हृदयाकुलत्वं ग्लानिवदितव्यः। धूमायनम् कण्ठाद्धूमनिर्गमः। क्लेदः किञ्चिदुर्द्रस्व घटित इव। वातश्लैष्मिकमाह "गौरवं कफसंस्रावोऽरुचिस्तन्द्रोऽग्निसादश्च। माधुर्यमपि चास्यस्य वसास्रावतते हृदि"। वसास्रावतते हृदि कुपित कफस्यास्रे गौरवं हृदयस्य। तन्द्रो जड़ता। माधुर्यं लवणद्युतमिव माधुर्यं सुखे। त्रिदोषजमाह "विद्यात्त्रिदोषमप्येवं सर्वलिङ्गसमागमम्"। क्रिमिजमाह क्रिमयो जायन्ते अस्मिनिति क्रिमिज इति निरुक्तिः। तस्य विप्रकृतनिदानपूर्विकां सम्प्राप्तिमाह "त्रिदोषहेतुहृद्रोगे यो दुरात्मा निषेवते। तिक्तोरगुड़ादींश्च पित्तस्यस्योपजायते। मर्मैकदेशे संक्लेदं रसश्चाप्युपगच्छति। संक्लेदात् क्रमवत्वाच्च पतन्त्युपहतात्मनः"। मर्मैकदेशे हृदयैकदेशे संक्लेदं घटितत्वं रस उपगच्छति। संक्लेदात् रसस्य घटितत्वात् उपहतात्मनः तिक्ताद्यहिताहारेण। तस्य लक्षणमाह "तत्क्लेदः क्षीवनस्योदः मूर्च्छं हृद्ग्रहकस्तमः। अरुचिः ष्ठीवने लत्वं शोषश्च क्रमिजे भवेत्"। तत्क्लेद वमनविशेषः स्थितम्। शोषो यक्ष्म। हृद्रोगसोपद्रवानाह "क्लोमसादो भ्रमः शोषो श्वेयात्वेषासदूषाः। क्रमिजे तु क्रमीणां ये लैङ्गिकाणां हि ते मताः"। क्लोमः पिपासास्थानस्य सादः शोषः। शोषो रसस्य। तेषां हृद्रोगाणां, क्रिमिजे तु हृद्रोगे लैङ्गिकाणां क्रमीणाम् ये उपद्रवा हृद्ग्रहात् स्वप्नात्ता विपाकादयस्ते मताः" २कुञ्जरार्णवे गुह्यदीपिका।

हृद्रोगवैरिन् पु० ६त०। अर्जुनवृक्षे शब्दर०।

हृदण्टक पु० ६त०। हृदयस्य विभाजके जठरे शब्दर०।

हृल्लास पु० हृदयस्य लासो यत्र हृदादेशः। हिक्कारोगे हेमच०। तेन हि हृदयस्य स्फूर्त्तिरिव भवति।

हृल्लेख पु० हृदयं लिखति स्पृशति लिख-घञ् हृदादेशः। १ज्ञाने राजनि०, २तर्के त्रिका०। ३तन्त्रोक्ते मन्त्रभेदे च।

४कौतुकयोः स्त्री हला०। [ऊदित् हृषित्वा हृढ़ा हृष्टः।

हृष चित्तोद्वाहे भ्वा० पर० सक० सेट्। हर्षति अहर्षीत्।

हृष हर्षे चित्तोद्वाहे दि० प० स० सेट्। हृष्यति हरित् अहृषत् अहर्षीत् ओत् हृष्टोऽस्ति। [हर्षति अहर्षीत्।

हृष मिथ्याकरणे भ्वा० पर० सक० सेट् ऊदित् क्त्वा वेट्।

हृषित त्रि० हृष-क्त वा० इट्। १प्रीते २विस्मिते ३प्रहृते ४जातरोमाञ्चे च मेदि०। [अमरः।

हृषीक न० हृष-ईकक्। विषयग्राहके चक्षुरादौ इन्द्रिये

हृषीकेश पु० ६त०। विष्णौ अमरः। अन्तर्यामिब्राह्मणे तस्य सर्वनियन्तृत्वोक्तेः सर्वेन्द्रियप्रवर्त्तकत्वादीश्वरत्वम्।

हृष्ट त्रि० हृष-क्त। १प्रीते २जातहर्षे अमरः। ३जातरोमाञ्चे ४विस्मिते च मेदि०।

हृष्टमानस त्रि० हृष्टं प्रीतं मानसमस्य। हृष्टचित्ते शब्दर०

हृष्टरोमन् त्रि० हृष्टमिव जाताङ्कुरं रोम यस्य। जातरोमाञ्चे पुलकिते त्रिका०। [धरणिः।

हृष्टि स्त्री हृष-क्तिन्। १आनन्दे २हर्षे ३ग्राने च हे अव्य०हा-डे। १सम्बोधने २आह्वाने ३वस्त्वादौ च मेदि०

हेक्का स्त्री हिक्का+पृषो०। हिक्कारोगे हेमच०।

हेठ विघाते भ्वा० प० सक० सेट्। हेठति अहेठीत्।

हेठ भूतौ सत्तायां च सक० पविबीकरणे सक० तु०प० सेट्। हेठति अहेठीत्। [हेठते अहेठिष्ट।

हेठ बाधने भ्वा० आ० सक० सेट् ऊदित् चक्रि न हुस्वः।

हेठ पु० हेठ-घञ्। १बाधायाम् २विघाते च मेदि०।

हेड अनादरे भ्वा०आ०सक० सेट् ऊदित् चक्रि न ह्रस्वः हेडते अहेडिष्ट।

हेड वेष्टने भ्वा० प० सक० सेट् घटा०। हेडति अहेडीत्।

हेड़ावुक पु० अन्नविक्रयकारके त्रिका०।

हेति स्त्री हन-क्तिन् वधे क्तिन् वि०। १अस्त्रे २अग्निशिखायां ३स्त्रर्थकिरणे अमरः। ४तेजोमात्रे भरतः ५बाधने च श्रीधरः।

हेतु पु० हि-तुन्। १कारणे अमरः २अनुमितिसाधने व्याप्ये ३फले च। हेतुत्वञ्च तत्पदकत्वापकान्यतरत्वम्। मृदो घटो जायते इत्यादौ तत्पदकत्वं पर्वतो वह्निमान् धूमादित्यादौ ज्ञापकत्वं तत्र ज्ञापकमेव लिङ्गशब्देन व्यवह्रियते। ४न्यायावयवभेदे तच्च लिङ्गपरामर्शात्मकतृतीयान्तपञ्चम्यन्तपदजन्यं तत्तच्चतन्त्र अनुमितिकारणीभूतलिङ्गपरामर्शप्रयोजकत्वाज्ज्ञानजनकसाध्यविषयकत्वाद्बोधजनकहेतुविभक्तिमच्छब्दत्वम्। हेत

त्वप्रतिपादकविभक्तिमत्त्वाद्यावयवत्वं वा। यदाकारकप्रयोजकाकाङ्क्षाजनकत्वाद्ज्ञानजनकत्वाद्यावयवत्वं वा। साध्याविषयकज्ञानजनकहेतुपञ्चम्यन्तार्थमितिपरामर्शत्वं वा। प्रतिज्ञावाक्यबोधजन्यकारणाकाङ्क्षानिवर्त्तकज्ञानजनकहेतुविभक्तिमत्त्वं वा" चिन्तामणिः। ४अवहार-भेदे अवहारशब्दे ४०८ पृ० दृश्यम्।

हेतुता स्त्री हेतोर्भावः तल्। १हेतुत्वे कार्य्यावच्छिन्नपूर्ववृत्तित्वे नियतकार्य्याधिकरणवृत्तित्वरूपे कारणत्वे २सङ्गतिविशेषे च "हेतुतावसरत्वात्" इति प्राञ्चः।

हेतुमत् त्रि० हेतुरस्यास्य मतुप्। कार्य्ये स्त्रियां ङीप्।

हेत्वपह्नुति अवहारभेदे अवहारशब्दे ४०८ पृ० दृश्यम्।

हेत्वन्तर गौतमोक्ते निग्रहस्थानभेदे। "अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम्" गौ०सू०तद्लक्षणसूत्रं "परोक्तदूषणोद्धोषणया तत्रैव हेतौ पूर्वोक्तहेतुतावच्छेदकातिरिक्तहेतुतावच्छेदकविशिष्टवचनम्। यथा शब्दोऽनित्यो बाह्येन्द्रियप्रत्यक्षत्वादित्युक्ते सामान्ये नैकान्तिकत्वेन च प्रत्युक्ते सामान्यत्वे सतीति विशेषणम्। प्राचस्तु, हेतौ विशेषणदान एव हेत्वन्तरमिलाहुः" गौ०इ०

हेत्वसिद्धि स्त्री असिद्धिभेदे स्वरूपासिद्धिरूपहेत्वाभासभेदे

हेत्वाभास पु० हेतुरिव आभासते आ+भास-घञ्, हेतोर्वा आभासः आ+भास-घञ्। न्यायोक्ते १दुष्टे हेतौ २हेतुदोषे च। स च दोषः पञ्चविधः व्यभिचारः विरुद्धता असिद्धिः सत्प्रतिपक्षता बाधश्च। तादृशदोषेषु सत्सु अनुमितिर्नोदेति। यस्य हि ज्ञानमनुमितिप्रतिबन्धकं स हेत्वाभासः। अत्र हेतुश्चासावाभास इति व्युत्पत्त्या हेत्वाभासपदस्य हेतुदोषपरत्वम्। तल्लक्षणन्तु हेत्वाभासत्वम् तच्च अनुमितिकारणीभूताभावप्रतियोगिव्याप्यत्वज्ञानविषयत्वम्। यद्विषयकत्वेन सिद्धज्ञानस्यानुमितिविरोधित्वं तत्त्वम्। ज्ञायमानं सद् यदनुमितिप्रतिबन्धकं तत्त्वम्। यद्विषयकनिश्चयस्य विरोधिविषयताप्रयुक्तस्तदुत्तरमनुमितावनाकाङ्क्षीयमानत्वज्ञाने वा पक्षतावच्छेदकविशिष्टपक्षे साध्यतावच्छेदकविशिष्टसाध्याभावशून्यत्वमाश्रित्यस्य साध्यतावच्छेदकविशिष्टसाध्यनिरूपितव्याप्तिविशिष्टहेतुतावच्छेदकविशिष्टहेतुमत्त्वावगाहित्वस्य च द्वयोर्व्यतिरेकस्तत्त्वम्। केचित्तु, यादृशपक्षकयादृशसाध्यकयादृशहेतौ यावतो दोषाः सम्भवन्ति तावदन्यान्यत्वमिति प्राहुः" दीधि०। "हेतुलक्षणाभावादहेतवोऽसामान्याद्धेतुवदाभासमानः" वा-

त्स्या० "पक्षधर्मत्वादीनां पञ्चानां रूपाणां मध्ये एकेनापि रूपेण हीनोहेतुः। योऽपि कतिपयहेतुरूपयोगाद्धेतुवदाभासमानः" त० भा०। अप्रयोजको हेतुत्वेनाभिमतः। यथा वायुर्गन्धवान् स्पर्शादित्वादौ स्पर्शो हेत्वाभासः। स च हेत्वाभासः। पञ्चधा सव्यभिचारः। विरुद्धः। प्रकरणसमः। साध्यसमः अतीतकालः" गौ० सू० पर्य्यायान्तरेण हेत्वाभासः पञ्चधा "असिद्धः विरुद्धः। अनैकान्तिकः। प्रकरणसमः। कालात्ययापदिष्टः। पर्य्यायान्तरेणापि हेत्वाभासः पञ्चधा। सव्यभिचारः। विरुद्धः। असिद्धः। सत्प्रतिपक्षितः बाधितः इति।

हेम न० हि-मन्। १स्वर्णे २धुस्तूरे अमरः ३नागकेशरे राजनि०। ४माषकपरिमाणे च पु०विश्वः ५क्षण्यवर्णान्वे। ६बुधग्रहे च पु० ज्यो०।

हेमकन्दल पु० हेमवर्णं कन्दं यस्य बा-क। प्रवाले हेमच०

हेमकान्ति स्त्री हेम्न इव कान्तिरस्याः। दारुहरिद्रायाम् राजनि०। २स्वर्णतुल्यद्युतियुक्ते त्रि०। ३तृ०। ४स्वर्णस्य दीप्तौ स्त्री।

हेमकार पु० हेम तन्नाम्नं भूषणं करोति ञ-अण्। स्वर्णकारे वर्णसङ्करजातिभेदे (सेकरा)। [राजनि०।

हेमकिञ्जल्क न० हेमेव पीतं किञ्जल्कं यस्य। नागकेशरे

हेमकूट पु० हेममयः कूटो यस्य। किंपुरुषवर्षस्थे हिमालयादुत्तरस्थे पर्वतभेदे अमरः। [राजनि०।

हेमकेतकी स्त्री हेमेव पीतकेतकी। स्वर्णकेतक्याम्

हेमकेलि पु० १अम्लो शब्दमा०। २चिलकहृक्षे च [राजनि०

हेमक्षीरी स्त्री हेम इव पीतं क्षीरं यस्याः। स्वर्णक्षीर्याम्

हेमगन्धिनी स्त्री हेम्नः नागकेशरस्येव गन्धोऽस्यस्याः इनि ङीप्। रेणुकाख्ये गन्धद्रव्ये रत्नमा०।

हेमगिरि पु०हेममयो गिरिः १सुमेरुपर्वते २नैर्ऋतस्थे देशभेदे व०स०। कूर्मविभागशब्दे २१६८ पृ० दृश्यम्।

हेमगौर पु० हेमेव गौरः पीतः पुष्पेऽस्य। १स्वर्णवृक्षे राजनि० २स्वर्णतुल्यपीते त्रि०। [वकवृक्षे च

हेमज्वाल पु० हेमेव ज्वालाऽस्य। १अम्लो शब्दमा०। २चि-

हेमतार न० हेम तारयति उत्कृष्टं करोति तृ-णिच्-अण्। तत्रे हेमच०।

हेमदुग्धक पु० हेमवर्णं दुग्धं निर्यासोऽस्य कप्। १छत्रस्वरे वृक्षे अमरः। २स्वर्णक्षीर्यां स्त्री लटा० ख्या

भावे तत्रार्थे स्त्री जटा०टाप्। ङीप् राजनि०।

हेमदुग्धिन् पु० हेमवर्णं दुग्धं निर्यासोऽस्य इनि। उडुम्बरे वृक्षे शब्दर०। [वैद्यरे राजनि०।३।हिमे च माधवः

हेमन् न०हि—मनिन्। १स्वर्णे धातौ २धुस्तूरे अमरः ३नाम०

हेमन्त पुंन०। हि—झ सुट् च। अग्रहायणपौषमासात्मके ऋतौ कालभेदे अमरः। कर्त्तरि शब्दच०।

हेमन्तनाथ पु० हेमन्ते नाथ्यते याच्यते नाथ—कर्मणि घञ्। हेमपुष्पे

हेमपुष्प न० हेमेव पीतं पुष्पमस्य। १अशोकवृक्षे २जवापुष्पे च मेदि०। ३चम्पकवृक्षे पु० कप्। तत्र वाच्ये च शब्दच०

हेमपुष्पी स्त्री हेमेव पीतं पुष्पमस्याः ङीप्। १सह्यिडायाम् शब्दर०। २स्वर्णजीवन्त्याम् २रुद्रवारुण्याम् ४सुवल्याम् ५कण्टकार्य्यां च राजनि०। संज्ञायां कन् हुस्वः। स्वर्ण-यूथिकायाम् स्त्री। [(चाँपाकला) राजनि०।

हेमफला स्त्री हेमेव पीतं पक्वफलमस्याः। स्वर्णवल्ल्याम्

हेममालिन् पु० हेमेव किरणानां मालास्त्यस्य इनि। १स्वर्णं ति० त०। २चक्रवर्त्तिनि च [राजनि०।

हेमयूथिका स्त्री हेमेव पीता यूथिका। स्वर्णयूथिकायाम्

हेमरागिणी स्त्री हेम इव रागोऽस्त्यस्या इनि ङीप्। हरिद्रायाम् त्रिका०।

हेमल पु० हेम तदर्थं निर्मेयत्वेनाऽस्त्यर्थमध्यात्, तद्वर्थं वा लाति ला-क। १कलाये स्वर्णकारे २कपोताण्डे ३कङ्कपक्षिणि पुंस्त्री० मेदि० स्त्रियां ङीष्।

हेमलता स्त्री हेमेव पीता लता। स्वर्णजीवन्त्याम् राजनि०।

हेमवल न० हेम्ना वलते शोभते वल-अच्। सौवर्चिके राजनि० हिमवलमित्यपि पाठान्तरं तत्रार्थे हिमवल्य-गुणत्वात्तथात्वम्।

हेमशङ्ख पु० हेमेव शुचिः शङ्खोऽस्य। विष्णौ त्रिका०।

हेमशिखा स्त्री हेमेव पीता शिखा यस्याः। स्वर्णजीवन्त्याम् शब्दर०। [तत्रे रत्नच०।

हेमसार न० हेम सारयति निर्मलीकरोति सृ—णिच्-अण्। तत्रे

हेमहस्तिरथ पु० हेमनिर्मितहस्तियुक्तो रथः। तत्रापुरु-षादिषोडशमहादानमध्ये दानार्थं कल्पिते १स्वर्णमय-हस्तियुक्ते हेममयरथे २तद्दाने न०। तद्विधिः हेमा०दा० "अथातः संप्रवक्ष्यामि हेमहस्तिरथं शुभम्। यस्य प्रदानाद्गच्छेत्तु वैष्णवं याति मानवः। पुरुषां तिथिमथा वाद्य तत्रापुरुषदानवत्। विप्रवाचनकं कृत्वाद्यौकेशवा-दनं बुधः। कृत्तिम्रक्षणसम्भारभूषणाच्छादनादि-कम्। अन्नाद्यपोषितस्तद्वद् ब्राह्मणैः सह भोजनम्"। हस्त्याद्यादिशब्देन देशकालदक्षिणाद्यादिसर्वमनुक्तं मत्स्यपुराणोक्ततत्तापुरुषस्थितं वेदितव्यम्। उपोषित इति, उपवासाशक्तौ नक्तमपि वेदितव्यम्। "कृत्वात् पुष्प-रथाकारं काञ्चनं मणिमण्डितम्। वस्त्रैर्भिर्विचित्रा-भिश्चतुष्कलसमन्वितम्। लोकपालाष्टकोपेतं शिवार्कब्रह्म-संयुतम्। मध्ये नारायणोपेतं लक्ष्मीपुष्टिसमन्वितम्"। पुष्परथः, क्रीड़ार्थो रथः, स च चतुष्काकारेणोपर्य्याच्छा-दितो भवति वस्त्रैर्लोकपालाश्रयाः। लोकपालब्रह्म-शिवार्कलक्षणसूक्तं ब्रह्मखण्डादौ। मध्यशब्दः पूर्वापराभ्यां संबध्यते, शिवादीनामपि स्थानापेक्षायास्तेनैव निर्देशः। नारायणादिलक्षणं पञ्चरात्रात् "नारायणश्चतु-र्बाहुः शङ्खं चक्रं तथोत्तरे। दक्षिणे तु गदापद्मं नीलश्रीभूतसन्निभे। वामे श्रीर्वृक्षसंस्था पुष्टिः पद्म-करा परा" इति। "कृष्णाजिने तिलद्रोणं कृत्वा संस्थापयेद्बुधः। तदर्धादग्धान्यानि भाजनासनच-न्दनैः। दीपिकोपानच्छत्रोपानदुपस्करसंयुतम्। ध्वजे तु गरुडं कुर्यात् कुबेराग्रे विनायकम्। नानाफल-समायुक्तं उपरिष्टाद्वितानकम्। कोणेषु पञ्चवर्णं च वस्त्रानकुसुमान्वितम्। चतुर्भिः कलशैः सार्द्धं गोभि-रष्टाभिरन्वितम्। चतुर्भिर्हेममातङ्गैर्वस्त्राद्यामविभू-षितैः। खड्गपतः करिभ्याश्च युक्तं कृत्वा निवेदयेत्। कुर्यात् पञ्चपलादूर्द्धभाराद्यपि शक्तितः"। ध्वजे तु गरुडं कुर्यादित्यादि, ध्वजो दण्डः। गरुडलक्ष-णन्तु नारदीये "अथेन्द्रस्याग्रतः पक्षौ गुरुत्मेशः कृताञ्जलिः। सव्यजानुनतो भूमौ मुखौ च कृत्रिम-स्थितः। पक्षिराजो नरयोर्वस्तुकुनाभो नराकृतिः। द्विबाहुः पक्षयुक्तश्च कर्त्तव्यो विनतासुतः"। अथ विना-यकस्तु "चतुर्भुजस्त्रिनेत्रश्च कर्त्तव्योऽथ गजाननः। नागयज्ञोपवीतश्च शशाङ्कृतशेखरः। दन्तं दक्षकरे दद्या-द्वितीये चाक्षसूत्रकम्। तृतीये परशुं दद्याच्चतुर्थे मोदकं तथा"। उपर्य्यधोऽष्टयोर्दलादि, देवसिति, कू-वरो व्याख्यातः। वस्त्रानकुसुमं, पुष्पविशेषः रूढ-यौगिकमपहरतीतिन्यायात् महासहेति प्रसिद्धमेव गृह्यते। भारो व्याख्यातः। ध्वजगतदेवताश्च पञ्चपला-दिपरिमितेन रथवत्कृतसुवर्णेनैव निष्पादनीयाः एवं सम्भारानुपकल्प्य पूर्ववदधिवासनं विधाय परदिवसे पुण्याहवाचनादि सकलं कर्मकाण्डं समाप्य सर्वौषधि-जलैराचार्य्यो यजमानस्य स्नापनं कुर्यात्। "ततो मङ्गल-

शब्देन स्थापितो वेदपुङ्गवैः । त्रिःप्रदक्षिणमाहृत्य मद्भी-तस्तुमाञ्जलिः । इमस्तवारवेन्नत्वं ब्राह्मणेभ्यो निवेद-येत्। नमो नमः शङ्करपद्मजाकेलोकेशविद्याधरवासुदेवैः । त्वं मैव्यमे देव ! पुराण ! यत्ततेजोभव सन्दन ! पाहि यस्मात् । यत् तत्पदं गुह्यतमं सुरारेरानन्दहेतुर्गुरुरूप-मनः । योगैकमानसदृशोसुनयः समाधौ प्रपश्यन्ति तत्त्व-मसि नाथ ! रथेऽधिरूढ ! यस्मात्त्वमेव भवसागर-संस्थितानामानन्दभाण्डभृतमध्वरपानपात्रम् । तस्मादहो-घशमनेन कुरु प्रसादं चामीकरेभरथसाधनसम्प्रदानात्" । मन्त्रेणानेन प्रथम यथाशक्ति सुवर्णदक्षिणासुपकल्प्य पूर्ववत प्रयोगसङ्ख्यं तं गलस्थं प्रत्यङ्गगलाभ्यां संयुतं ब्राह्मणेभ्यः प्रतिपादयेत्, आचार्यादीनामर्द्धचतुर्भागा-दिव्यवस्था तदनुसारा चान्येभ्योऽपि दानं, दीनानाथपूरणं चेति, प्रकृतिवदाचरणीयं, ततः पुण्याहवाचने कृते यजमानो वेदिसमीप गत्वा देवतापूजां विदध्यात् । आचार्यस्तु आहृतदेवान् विसर्जयेत्" ।

हेमाङ्ग पु० हेमेव पीतमङ्गं यस्य । १गरुडे २सिंहे ३सुमेरौ ४ब्रह्मणि मेदि०।५चम्पकवृक्षे शब्दर०। ६विष्णौ च वि-ष्णु० ७सुवर्णवर्णाङ्गयुक्ते त्रि०। कर्म०। हेमाङ्गल्येऽङ्गे न०।

हेमाद्रि पु० हेममयोऽद्रिः । १सुमेरौ पर्वते अमरः । चतुर्वर्गचिन्तामणिसङ्ग्रहकल्पादिग्रन्थकारके २विद्वद्भेदे ।

हेमाद्रिजरण पु० हेमाद्रौ जीर्यति ज़ॄ-ल्यु । सुवर्णजीर्याम रत्नमा० । हेमारण्ययोरप्यत्र त्रि० ।

हेमाह्व पु० हेम सदृशमाह्वयते स्पर्द्धते सुवर्णेन वा+ह्वे-क । १धत्तूरवृक्षे राजनि० हेम आह्वा आह्वा यस्य ।२धुस्तूरे शतावरीश्वरे च अमरः ४सुवर्णजीवन्त्यां स्त्री राजनि० ।

हेय त्रि० हा-यत् । त्याज्ये "हेयं दुःखमनागतम्" पात०भू० ।

हेर न० हि-रन् । १दरिद्रतायाम् २सङ्कटभेदे च ।

हेरम्ब पु० हे शिवे रम्बति रबि-अच् अलुक्समा० । १गणेशे अमरः २महिषे ३शौर्यगर्विते त्रि० मेदि० ४बुधभेदे पु०त्रिका० ।

हेरम्बजननी स्त्री ६त० । दुर्गायाम् शब्दर० ।

हेरम्बहट्ट पु० बक्सरस्थे देशभेदे शब्दर० ।

हेरिक पु० हि-रक रट् च । चरे हेमच० ।

हेरुक पु० हि-रुक रट् च । १बुद्धभेदे २महाकालगणे मेदि० ३कामाख्यापीठस्थे शिवलिङ्गभेदे "शिवलिङ्गस्य तत्रास्ति शिलायां हेरुकाह्वयम् । नदीदक्षिणपूर्वायां नायकं तन्तु पूजयेत्" कालिकापु० ८१अ० ।

हेलञ्जी स्त्री हिल-अञ् हेलं किरोति कि-ड पृषो० गौरा० ङीष् । हिलमोचिकायाम् शब्दच० ।

हेलन न० हिल-ल्युट् । अवज्ञायाम् शब्दर० ।

हेला स्त्री हेड-अनादरे भावे अ ङीष् वा० । १अनादरे स्त्रीणां शृङ्गारभावजे "प्रौढेच्छा दाढिनिरूढानां भावानां सुरतोत्सवे । शृङ्गारशास्त्रतत्त्वज्ञैः हेला सा-परिकीर्तिता" इत्युक्ते २चेष्टाविशेषे । "हेलाजनकं भवेत् सत्त्वं सत्त्वात् भावः समुत्थितः । भावात् समुत्थितो हावो हावात् हेला समुत्थिता" हाव एव भवेद्धेला अन्यं शृङ्गारसूचकः" उज्ज्वल० २ज्योत्स्नायाञ्च ।

हेलावुक पु० अन्नविक्रयोपजीविनि डाराः ।

हेलि पु० हिल-इन् । १सूर्ये २अवज्ञायां हृडहच्छन्दः ४सूर्ये ब्यो०त०णिनि हेलिन् सूर्ये ब्यो० ।

हेष अश्वशब्दे भ्वा०आ० अ० सेट् वदिव् चङि न हुस्वः । हेषते अहेषिष्ट ।

हेषा स्त्री हेष-भावे अ । घोटकानां शब्दे अमरः ।

हेषिन् पु० हेष-णिनि । अश्वे त्रिका० ।

हेहै अव्य० हेच हैच ह० । १सम्बोधने २आह्वाने मेदि० ।

हे अव्य० हा-के । १सम्बोधने २आह्वाने च मेदि० ।

हैतुक त्रि० हेतौ प्रभवः ठक् । हेतुवादरते सयुक्तिक-वाक्यवादिनि "त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्मपा-ठकः" पर्युदासे मनुः ।

हैम त्रि० हिम भवम् अण् । १हिमजातमात्रे २प्रातःका-लीनहिमजाते जले न० राजनि० । ३भूनिम्बे पु०राजनि० । हेमो विकारः अण् टिलोपः । ४सुवर्णविकारे ५सुवर्ण-मयपदार्थे च त्रि० ।

हैमन पु० हेमन्त एव हेमन्ते भवो वा अण् तलोपः । १हेमन्ते काले शब्दर० ।२तत्र जाते त्रि० । हेम्न इदमण् न टिलोपः । सुवर्णसम्बन्धिनि त्रि० स्त्रियां ङीष् ।

हैमन्तिक त्रि० हेमन्ते काले भवः ठञ् । हेमन्तकालभवे शालिधान्यभेदे (आमनधान) "हैमन्तिकं सितादक्षिणं धान्यं सदृगास्थिका यवाः" हविष्यान्नोक्तौ तिथ्या० ।

हैमल पु० हिमस्य एव स्वार्थे अण् । हेमन्ते ऋतौ शब्दर० ।

हैमवत न० हिमवतोऽदूरभवो देशः तस्येदं वा अण् । १भारतवर्षस्य वर्षभेदे त्रिका० "एतद्धैमवतं वर्षं भारतो यत्र सन्ततिः" विष्णुपु० । २हिमालयसम्बन्धिनि त्रि० शब्दर० भेदे पु० हेमच० । तस्यापत्यं तत्र भवो वा अण् । ३पार्वत्यां ४हरीतक्यां अमरः स्त्री ङीष् । ७अण्ड्यौ

त्वेतवर्णायाञ्च स्त्री मेदि० ङीष् हरङ्गायां १०रेणुकायां स्त्री धरणिः ङीष्। [सर्वयूथिकायां शब्दर०।

हैमा(मी) स्त्री हेम तद्वर्णोऽस्त्यस्य अण् वा ङीष्।

हैयङ्गवीन न० ह्योगोदोहाद् भवम् ह्यस्+गो+ख निο। १नवनीते रत्नमा०। पूर्वदिनदुग्धोद्भवे २हते च अमरः।

हैरिक पु० हिर-र हेरः तत्र प्रहृतः ठक्। चौरे धरणिः।

हैहय पु० पश्चिमस्थे देशविशेषे हंसः कूर्मविभाग २१६८ पृ० हयम् तेषां राजा अण्। २क्षत्रियेश्वरे कार्त्तवीर्य्ये हेमच० पृथा० हैहेय तत्रार्थे शब्दर०।

हो अव्य० हु-डो नि०। १सम्बोधने २आह्वाने च मेदि०।

होड गतौ अनादरे च भ्वा० आ० सक० सेट् ऋदित् चङि न वृद्धिः। होडते अहोडिष्ट।

होड पु० होड-अच् डुड-अच् वा। १वस्तुद्गामिनौकाभेदे (डुडि) त्रिका० २चौरभिक्षौ च मिता०।

होत्र पु० हु-ष्ट्रन्। १ऋग्वेदाभिज्ञे अमरः। २होमकर्त्तरि त्रि० स्त्रियां ङीष्। "या हविषो च होत्री" शकुन्तला

होत्र न० हु-ष्ट्रन्। १होमे हेमच०। २हविषि हुतादौ च त्रिका० ३स्तुतौ स्त्री टाप्।

होत्रीय न० होत्राय हितम् होत्रर्हिं वा छ। १हविर्मट्टे हेमच०। २होत्रसम्बन्धिनि त्रि०।

होम पु० हु-मन्। देवतोद्देशेन द्रव्यस्य मन्त्रद्वारा हुतादित्यागरूपे हवने नित्यं गृहस्थकर्त्तव्येषु पञ्चसु यज्ञेषु मध्ये २देवयज्ञे अमरः। ३ब्राह्मीयविप्रपाचौ ब्राह्मीयाग्यभागश्च मन्त्रेण दाने च श्रा० त०।

होमकुण्ड पुंन० होमार्थं कुण्डम्। होमार्थे कुण्डे त्रिका०

होमधान्य न० होमोपयुक्तं धान्यम्। १तिले २यवे च राजनि०।

होमधूम पु० होमजः धूमः। होमार्थाग्निजाते धूमे हेमच०

होमभस्मन् न० होमजं भस्म। हुतद्रव्यजाते भस्मनि हेमच०

होमाग्नि पु० हुत०। यज्ञियाग्नौ हेमच०।

होमि पु० हु-इन् सेट् च। १अग्नौ २हते च मेदि० ३जले शब्दर०। ४शिवकटके।

होमिन् पु० होमोऽस्त्यस्य इनि। होमकर्त्तरि। [राजनि०

होम्य त्रि० होमाय हितम् यत्। होमोपयुक्ते हुतादौ

होरा स्त्री हु-रन्। ज्योतिषोक्ते १लग्ने २राश्यर्द्धभागे ३होराशास्त्रप्रकाशनभेदे ४रेखायाञ्च मेदि०।

"विषमर्क्षेषु प्रथमा होराः सूचयतेरोचिषः। द्वितीयाः अग्निनो युगु अन्त्यादृगयेत् सदा" ज्यो० त०।

"चतुर्भिर्घटिकाभिरहोरात्रं प्रचक्षते। पश्चिमादर्द्धरात्रादि होराणां विद्यते क्रमः" वह्निपु०।

होलक पु० हु-विच् लक-अच् कर्म०। "अर्द्धपक्वे शमीधान्यैस्तृणभट्टैश्च होलकः" रत्नमा० तृणादिना अर्द्धपक्वे शमीधान्ये "होलकोऽल्पानिलो मेदःकफदोषश्रमापहः। भवेद् यो होलको यस्य स च तत्तद्गुणो भवेत्" भावप्र०।

होलाक पु० खेदविशेषार्थव्यापारभेदे चरकः तत्र होलाक इत्यत्र होलाक पाठान्तरम्।

होलाका स्त्री हु-विच् तं लाति ला-क संज्ञायां कन्। १वसन्तोत्सवभेदे उपचारात् तत्काले फाल्गुनपौर्णमास्याञ्च। पृषो० होली होलिका होलकाऽप्यत्र। होलाकाविधिश्च आचारप्राप्त इति माधवादयः। पुराणादिप्रसिद्धः शास्त्रमूलोऽयम् आचार इति हेमाद्रिनिर्णयसिन्धुप्रभृतयः। तद्विधिकालौ निο सिο उक्तौ यथा "फाल्गुनपौर्णमासी होलिका सा च सायाह्नव्यापिनी ग्राह्या "सायाह्ने होलिकां कुर्य्यात् पूर्वेद्युः क्रीडनं यतः" इति वचनादिति निर्णयाख्यते उक्तम्। ज्योतिर्निबन्धे तु "प्रतिपद्भूतभद्रासु यदि स्यात् होलिका दिवा। संवत्सरञ्च तद्राष्ट्रं पुरं दहति साद्भुतम्। प्रदोषव्यापिनी ग्राह्या पूर्णिमा फाल्गुनी सदा। तस्यां भद्रामुखं त्यक्त्वा पूज्या होला निशामुखे" इति नारदवचनात् प्रदोषव्यापिनीत्युक्तम्। हेमाद्रौ भविष्ये च भविष्ये "अस्यां निशामुखे पार्थ! संरक्ष्याः शिशवो गृहे। गोमयेनोपलिप्ते च सचत्वरे गृहाङ्गणे" इत्यादिना तत्रैव तद्विधानाच्च। तेनेयं पूर्वविद्धा "आश्वयुजी दुर्गानवमी दूर्वा चैव हुताशनी। पूर्वविद्धैव कर्त्तव्या शिवरात्रिर्बलेर्दिनम्" इति हरदत्तभट्टवैवर्त्तोक्तेश्च। दिनद्वये प्रदोषव्याप्तौ परैव पूर्वदिने भद्रासत्त्वात् तत्र च होलिकानिषेधात् तदुक्तं निर्णयाख्यते भद्रानले च पुरं वसतेऽत्र "भद्रायां दीपिता होली राष्ट्रभङ्गं करोति वै। नगरस्य च नेतारं तस्मात् तां परिवर्जयेत्"। तथा "भद्रायां द्वे न कर्त्तव्ये श्रावणी फाल्गुनी तथा। श्रावणी श्रपयति हन्ति चार्द्धं दहति फाल्गुनी"। तथा "दिनार्द्धात् परतोऽपि स्यात् फाल्गुनी पूर्णिमा यदि। रात्रौ भद्रावसाने तु होलिका दीप्यते तदा" इति। यदा तु पूर्वदिने चतुर्दण्डो प्रदोषव्यापिनी परदिने च अल्पत्वात् सायाह्नात् प्रागेव पूर्णिमा समाप्यते तदा पूर्वदिने संपूर्ण

रात्रौ भद्रासत्त्वात् तत्र च तन्निषेधात् परेऽहनि प्रतिपद्येव कुर्यात्। "सार्द्धयामत्रयं वा स्याद् द्वितीयादिवसे यदा। प्रतिपद्दृश्यते तु तदा सा होलिका स्मृता" इति भविष्यवचनादिति निर्णयामृतकारः। मदनरत्नेऽप्येवम्। यत् तु "वह्नौ वह्निं परित्यजेदिति" भविष्यम्। वह्नौ होलिकायां वह्निं प्रतिपदं वर्जयेदित्यर्थः तदुक्तभिन्नविषयमिति तन्नैवोक्तम्। अन्ये तु तस्यां भद्रामुखं त्यक्त्वा कार्या। "प्रदोषव्यापिनी चेत् स्याद् यदा पूर्वदिने तथा। भद्रामुखं वर्जयित्वा होलिकायाः प्रदीपनम्" इति नारदवचनात्। "निशागमे प्रपूज्येत होलिका सर्वदा बुधैः। न दिवा पूजयेद्धोलां पूजिता दुःखदा भवेत्" इति दिवोदासीयवचनात्। "यामत्रयोर्ध्वयुक्ता चेत् प्रतिपत्तु भवेत्तिथिः। भद्रामुखं परित्यज्य कार्या होला मनीषिभिः" इति विद्या विनोदेऽभिधानाच्च। भद्रामुखं विहाय पूर्वदिन एव कार्येत्याहुः। भद्रामुखन्तु नाड्यस्तु पञ्चदण्डं गणकास्त्वेके" इति रत्नमालोक्तं ज्ञेयम्। शिष्टाचारोऽप्येवमेव। अत्र चेन्द्रपक्षं तदा ततोऽर्वाङ्निशि भद्रायां पौर्णमास्यां होलिकादीपनम् अथ परेऽह्निपक्षोदयस्तदा पूर्वदिने भद्रावर्जं रात्रौ चतुर्दण्डेऽपि विद्धपुञ्जे वा होलिका कार्या। अहोत्तरं प्रतिपत्सत्त्वात् तत्पूर्वत्र दिवा होलानिषेधादिति दिवोदासचन्द्रप्रकाशौ। वस्तुतस्तु परदिने प्रदोषे पौर्णमासीसत्त्वे कर्मकालसत्त्वे चतुर्दण्डादि गौणकालसत्त्वे नानाभावाद्भद्राभावाच्च प्रदोषकाल एव होला कार्या। न च "सर्वेषामेव वर्णानां सूतकं राहुदर्शने। स्नात्वा कर्मणि कुर्वीत ग्रहणं विषजेदिति" निषेधात् कथं सूतके होलेति वाच्यम् तस्योत्तरार्द्धशेषत्वात्। पूजामन्त्रस्तु "ढुण्ढाभयसन्त्रस्तैः कृता त्वं होलि! बालिशैः। अतस्त्वां पूजयिष्यामि भूते भूतिप्रदा भव" इति। यत्तु वार्त्तिककारैर्होलिका आचारप्राप्तेत्युक्तम्। तत्र हेमाद्र्याद्युदाहृतभविष्यवचनान्यखिलानि हित्वा चिन्त्या सेयं व्यर्थाधिकरणवत्। कृताग्नौ मलमासे न भवति" नि०सि०।

होलाकाधिकरण न० जैमि० प्रथमस्य द्वितीयपादे दर्शिते न्यायभेदे तच्च तत्त्वबोधन्यायम् संक्षिप्य दर्शितं यथा "होलाका प्राच्याभिमानिभिरनुहोयते होलाका चैवम्लोत्सवविशेषः ऊलोतिप्रसिद्धः। एवमादीनेतुकादिकं दक्षिणात्यैः, आदीनेतुकं स्वस्वकुलाचारतः करङ्काकोटिस्थावरदेवतापूजादिकं तद्देशप्रसिद्धम्। उद्दण्डभयत्रादिकमुदीच्यैः क्रियते उद्दण्डभयत्रञ्च ज्यैष्ठस्य पौर्णमास्यां बलोद्दीनभ्यर्च्चधारवन्ति यत् सः तद्देशप्रसिद्धः एवं हारीतादयुक्तस्तयोऽपि कांश्चित् कांश्चिद्देशविशेषे दृश्यन्ते स्वोक्तकर्माणि तत्तच्छाखीक्तृकानीत्येषां मूलभूताः स्मृतयः कल्पनीयाः। तत्र किं प्राच्यैर्होलाका कर्त्तव्येत्यादिरूपा प्राच्यादिपदघटिता व्यवस्थितविषया उतहोलाका कर्त्तव्या इति तत्तत्पदाघटिता सामान्यविषया इति संशयः तत्र प्राच्यादिपदघटितैव कल्प्या देशविशेषाचाराचारदर्शनात् लिङ्गव्यवस्थया हि लिङ्गप्रतीयते यथा यत्र धूमोऽवगतस्तत्रैव वह्निरनुमीयते नान्यत्र तथा च सूत्रम् "अनुमानव्यवस्थानात्तत्संयुक्तं प्रमाणं स्यात्" अस्यार्थः। अनुमानव्यवस्थानात् धूमादिव्यवस्थया वह्न्याद्यनुमानव्यवस्थादर्शनात् तत्संयुक्तं प्राच्यादिपदघटितम् अनुमेयस्मृतिवाक्यं प्रमाणं स्यादिति प्राप्ते राद्धान्तायोक्तम् "विशेषाभावमात्रेण प्रसिध्येत् सर्वधर्मता। विशेषत्वात् व्यवस्था स्यात् तत्र नेहोपपद्यते"। अस्यार्थः विशेषाभावमात्रेण हारीतस्मृतिमोभिनन्दादौ यागविशेषप्रतिपादकपदाभावेन तत्तत्कर्त्तृकस्य सर्वधर्मता सर्वसाधारणी कर्त्तव्यता प्रसिध्येत्। तथा हि छन्दोगोऽपि गोभिलादिः स्वशिष्यानध्यापयामास तेऽप्यन्यान् छन्दोगानेवमन्यत्रापि स्वस्वगुर्वादिकमुक्तमुक्तं अतस्तत्तत्कर्त्तृकतत्तत्कर्त्तृकोक्तमाचरन्ति इति स्मृतिवाक्यानुसारिणी स्मृतिः कल्पनीया। आचारे त्वाह विशेषत्वात् प्राच्यादीनां विशेषव्यवहारदर्शनेनानुमेयस्मृतौ प्राच्यादिविशेषपदानर्थभावात् व्यवस्था स्यात् प्राच्यादीनामेव तदाचरणमिति विधानव्यवस्था स्यात् तत्र नेहोपपद्यते। अयमाशयः सर्वाचरितत्वमूलगतम् अनाचरितत्वञ्च व्याहतम् आकृतिव्यक्तिगुणादिकं किंचित् विशेषणं न लभ्यते यद्यपादाय होलाकाद्यधिकरणं स्यात्। न च प्राचीभवत्वादिरूपप्राच्यादिपदसमाख्या तद्देशभवानामपि केषांचिदनाचरणात् चिरविनष्टस्य तत्तद्देशीयस्य पुत्रपौत्राणां समाख्यायामसत्यामपि होलाका कर्त्तव्येति सामान्यस्मृत्यैवोपपत्तौ प्राच्यादिपदघटितस्मृतिकल्पनमन्याय्यं गौरवात् न चाप्राच्यानामननुष्ठानार्थं प्राच्यादिपदवती कल्पनीया अनाचरणरूपस्याननुष्ठानस्यास्मृतिकल्पकत्वात् तस्येच्छाविरहेणैव सम्भवात्। न हि यदि स्मृतिविहितं स्यात् तदा अप्राच्यैरपि स्व-

हसितं स्यादिति तर्कयितुं शक्यते क्रोडाकाया नित्यत्वे मानाभावेन कास्यत्वात् । न हि सर्वमेव श्रुतिविहितं काम्यं सर्वैः सङ्किरनुष्ठीयते न वैकस्य कर्तुर्विधानमन्यस्य तन्निषेधयति येनाप्राप्यानां निषिद्धाचरणेनानिष्टजनकत्वात्प्रापणार्थं तत्प्रदर्शकवत् स्यात् । अत्र च शाखदीपिकाधिकरणमालादायभागप्रभृतिषु प्राच्यानामिति पाठः । प्राच्याश्च प्राक्षीयाः ते च सुमेरुसङ्कटयोर्मध्ये या रेखा ज्योतिः शास्त्रादौ प्रसिद्धा तस्याः पूर्वदेशीयाः प्राच्याः न तु गौड़देशावधिकपूर्वदेशीयाः । तस्याः पश्चिमदेशीयाश्च पाश्चात्याः । एतेन प्रतीच्यानां तथाचरणमिति स्वदेशाभिप्रायेणैव गौड़ीयेनोदीच्येन लिखितं तच्चेयं गौड़ीयानामेव श्रुतिकल्पनम् अग्रजत्ववेदानां तथा चाव्यवस्थितश्रुतिकल्पना स्यात् न चायमपि दोषः विशेषकल्पने भविष्यति तथा सति पार्थसारथिमिश्रादिभिर्निबन्धृभिरयमप्युल्लावितः स्यात् न चैवम् । तस्माच्ज्योतिरादिशास्त्रप्रसिद्धप्राच्यादिग्रहादायैवेयमाश्रयितेति" ।

ह्री अव्य० ह्रे–डौ नि० । १सम्बोधने २व्याह्वाने च मेदि० ।

ह्रीड़ अनादरे गतौ च भ्वा० या० सक० सेट् अदित् चङि न ह्रसः । ह्रीडते अह्रीडिष्ट ।

ह्रीच वि०ह्रीतरिदम् उड्डा० यञ् । तस्य भावः कर्म वा युवा० यण् वा । १ह्रीतसम्बन्धिनि २तत्कर्मादौ न० ।

ह्रु चौर्ये अदा० आत्म० सक० अनिट् । ह्रुते अह्रोष्ट ।

ह्रुल चलने भ्वा० प० अक० सेट् । ह्रुलति अह्रुलीत् । घटा० । ह्रुल्लयति अनुपसर्गस्य वा ह्रुलः ।

ह्रस् अव्य० गतेऽर्थनि वि० । गतदिवसे अमरः ।

ह्रस्तन वि० ह्रस्+भवार्थे ट्युल् तुट् च । गतदिवसभवे त्रिप् । ह्रस्योऽप्यत्र वि० । [ह्रस्वः । ह्रुगति अह्रुगीत् ।

ह्रग संवरणे भ्वा० पर० सक० सेट् घटा० एदित् सिचि न

ह्रद पु० ह्राद–अच् नि० । १अगाधजलाशये अमरः । २किरणे राजनि० । "ह्रदवारि वह्निजनकं मधुरं कफवातहारि पथ्यञ्च" राजनि० तज्जलगुणा उक्ताः ।

ह्रदिनी स्त्री ह्रदोऽस्त्यस्याम् इनि । नद्याम् अमरः ।

ह्रप भाषणे चुं० उ० सक० सेट् । ह्रापयति ते अजिह्रपत् त ।

ह्रस रवे भ्वा० प० सक० सेट् । ह्रसति अह्रसीत् अह्रासीत्

ह्रसिमन् पु० ह्रस्वस्य भावः इमनिच् ह्रादेशः । ह्रस्वतायाम्

ह्रसिष्ठ वि० अतिशयेन ह्रस्वः इष्ठन् ह्रादेशः । अतिह्रस्वे । स्त्रियां ङीप् ।

ह्रस्व न० ह्रस–क्वन् । १परिमाणभेदे २तद्वति ३खर्वे च वि० अमरः । एकमात्राकालोच्चार्यं ४तद्वर्णं पु० राजनि० । ५सङ्कुचितायां ६नागवल्लायां भूमिजम्बूवृक्षे स्त्री राजनि० ।

ह्रस्वकुम्भ पु० नित्यकर्म० । श्वेतकुम्भे राजनि० ।

ह्रस्वगर्भ पु० ह्रस्वो गर्भो यस्य । कुम्भे रत्नमा० ।

ह्रस्वगवेधुका स्त्री नि० कर्म० । नागबलायाम् अमरः ।

ह्रस्वजम्बू स्त्री कर्म० । क्षुद्रजम्बूवृक्षे रत्नमा० ।

ह्रस्वदर्भ पु० नित्यकर्म० । श्वेतकुम्भे राजनि० । [क्याम् राजनि०

ह्रस्वदा स्त्री ह्रस्वैरपि दीयते छिद्यते दो–खण्डने क । शङ्ख०

ह्रस्वपत्रक पु० ह्रस्वं पत्रमस्य कप् । १नगजम्भूवृक्षे (मौ०) २अश्वत्थाम् स्त्री राजनि० टापि अत इत्त्वम् ।

ह्रस्वफला स्त्री ह्रस्वं फलमस्याः । भूमिजम्बूवृक्षे राजनि०

ह्रस्वमूल पु० ह्रस्वं मूलमस्य । रक्तेचौ राजनि० । [अमरः ।

ह्रस्वशाखाशिफ पु० ह्रस्वा शाखा शिफा च यस्य । क्षुपे

ह्रस्वाग्नि पु० ह्रस्वः अग्निरस्मात् ५ब० । अर्कवृक्षे शब्दच० ।

ह्रस्वाङ्ग पु० ह्रस्वमङ्गमस्मात् ५ब० । १क्षीवकौषधे अमरः । ६ब० । वामने २खर्वे त्रि० । कर्म० । ह्रस्वे अङ्गे न० ।

ह्राद अने भ्वा० या० अक० सेट् । ह्रादते अह्रादिष्ट ।

ह्राद पु० ह्राद–भावे घञ् । १शब्दे हेमच० अच् । २शब्दकारके त्रि० ३स्थिरयत्नकर्मिपुरुषभेदे पु० पुराणम् ।

ह्रादिनी स्त्री ह्राद–णिनि ङीप् । १विद्युति २वज्रे अमरः २नद्याम् राजनि० ४गङ्गायाञ्च शब्दर० ५ह्रादयित्रिष्टे त्रि०

ह्रास पु० ह्रस–घञ् । १शब्दे त्रि० २अपचये च ।

ह्रिणी लज्जायाम् कण्ड्वा० या० सक० सेट् । ह्रिणीयते अह्रिणीयिष्ट ।

ह्रिणीया स्त्री ह्रिणी–यक् भावे अ । लज्जायाम् अमरः । पृषो०ह्रिणिया इत्यपि तत्रार्थे भरतः । [ह्रेषयति ते ।

ह्री लज्जायां जु० प० सक० अनिट् । जिह्रेति अह्रैषीत् । णिचि

ह्री स्त्री ह्रीं–मन्म० भावे क्विप् । लज्जायाम् अमरः ।

ह्रीका स्त्री ह्री–कन् । १लज्जायाम् उषा० । २लज्जायां वि०कौ वा रक्त वः तत्रार्थे ।

ह्रीकु त्रि० ह्री–उनु कुक्च । १लज्जिते । २मज्जने ३जडके ५वपुषि च उषा० । वा रक्त वः । [क्षीत् ।

ह्रीच्छ लज्जायाम् भ्वा० प० अक० सेट् । ह्रीच्छति अह्रीच्छीत्

ह्रीजित त्रि० इत० । लज्जाशीले जटा० ।

ह्री(त)ण त्रि० ह्री–क्त वा तस्य नः । लज्जिते अमरः ।

ह्रीवेर(ल) न० ह्रिये लज्जाये वेरमङ्गमस्य क्षुद्रत्वात् पृषो० वा रक्त वः (वाला) तृणभेदे पृषो० । ह्रिवेर तत्रार्थे रक्त

चः ह्रीवेश तत्रार्थे अमरटीकायामाङ् च भरतः।

ह्रुड गतौ भ्वा० आ० सक० सेट् ऋदित् चङि न ह्रुचः। ह्रोडते अह्रोडिष्ट। [ह्लुडति अह्लुडिष्ट

ह्रूड गतौ भ्वा० आ० सक० सेट् ऋदित् चङि न ह्रुचः।

ह्रेप गतौ भ्वा० आ० सक० सेट्। ऋदित् चङि न ह्रुचः। ह्रेपते अह्रेपिष्ट।

ह्रेष अव्यक्तशब्दे अक० वर्णने सक० भ्वा० आ० सेट् ऋदित् चङि न ह्रुचः। ह्रेषते अह्रेषिष्ट।

ह्रेषा स्त्री ह्रेष-भावे अ। अव्यक्तशब्दे अमरः।

ह्रोड गतौ भ्वा० आ० सक० सेट् ऋदित् चङि न ह्रुचः। ह्रोडते अह्रोडिष्ट। [डिः। ह्लुगति अह्लुगीत्।

ह्लग संवरणे भ्वा० प० सक० सेट् घटा० एदित् णिचि न

ह्लप भाषणे चु०उ०इक०सेट्। ह्लापयति ते अजिह्लपत् त।

ह्लस रवे भ्वा० प० अ० सेट्। ह्लसति अह्लसीत् अह्लासीत्।

ह्लाद शब्दे भ्वा० आत्म० अक०मोदने सक० सेट् ईदित् निडावामनिट्। ह्लादते अह्लादिष्ट। ह्लादः।

आ+आमन्दे अक० आह्लादः।

ह्लादिनी स्त्री ह्लाद-णिनि ङीप्। १विद्युति २शक्तौ अमरः पाठान्तरम् ३ईश्वरशक्तिभेदे च श्रीधरः ४ह्लादविशिष्टे त्रि०

ह्लल चलने भ्वा० प० अक० सेट्। ह्ललति अह्लालीत्। घटा० प्रह्ललयति अतुपसर्गस्य वा ह्लुचः ह्लुचयति ह्लाचयति।

ह्लान न० ह्लै-ल्युट्। आह्लाने। [अह्लरत्।

ह्लृ कटीकरणे भ्वा०प०सक०अनिट्। ह्लरति अह्लार्षीत्।

ह्लै अव्यक्तशब्दे च अक० आह्लानार्थे सक०भ्वा० उभ०यजा० अनिट्। ह्लायति अह्लत्-अह्लत अह्लास्त अस्य-ह्लाव आह्लतः आह्लतिः।

आ+अव्यक्तशब्दे आत्म० अस्य मा ह्लवते। शिवम्।

ओं तत्सत्।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्यसङ्कलिते वाचस्पत्ये हकारादिशब्दार्थसङ्कलनम्।

ग्रन्थकर्तृवंशादि।

राढ़ीयश्रेणीविख्यातकुलजिडियामिकः किल। यशोहरप्रदेशस्थसारलावसथे स्थितः॥
सार्वभौमोपाधियुक्तः कमलाकान्तसंज्ञकः। सच्छोत्रियः चितौ ख्यातो वात्स्यवंशावतंसकः॥
मुकुन्दरामनामासीत् तदन्वयसमुद्भवः। तत्प्रदेशस्यवैचण्डीग्रामवासी स्वकार्यतः॥
तर्कसिद्धान्तोपनामा रामरामस्तदात्मजः। सदा शिवशिवेत्युक्त्वा प्राप्तः शिवशिवाभिधाम्॥
नानाविद्याधरत्वेन प्राप विद्याधराश्रयम्। भागीरथीतीरवासी भवबन्धजिहीर्षया॥
वर्द्धमानप्रदेशस्याम्बिकाग्रामेऽवसच्चिरम्। अन्ते काशीं समासाद्य पञ्चत्वं प्राप्य मुक्तिभाक्॥
अम्बिकावासकालेऽस्य जातौ वंशधरौ सुतौ। तर्कपञ्चाननोपाधिर्दुर्गादासस्तु मध्यमः॥
सार्वभौमोपाधियुतः कनीयांस्तु तदात्मजः। कालिदासाभिधो नानाशास्त्रविद्याविशारदः॥
तस्याहं प्रथमः पुत्रस्तारानाथाह्वयो द्विजः। तर्कवाचस्पत्युपाधिं गुरुतो लब्धवान् स्वतः॥
नगरे कलिकाताख्ये गवर्मेण्टनिवेशिते। संस्कृतपाठशालाख्ये मठे पूर्वमधीतवान्॥
काश्यादिनानास्थानेषु लब्धविद्यस्ततः क्रमात्। तत्रैव पाठशालायां तदध्यक्षेण पूर्वतः॥
पाणिन्यादिव्याकरणपाठनायै नियोजितः। पश्चात् दर्शनशास्त्रस्याध्यापनायापि योजितः॥
प्रायश्चित्तशब्दस्तोमं तत्कर्मानुष्ठितं मया। सिद्धान्तकौमुदीव्याख्या सरलाख्या तदा कृता॥
तदैव तत्त्वकौमुद्या व्याख्याऽपि यत्नतः कृता। सिद्धान्तबिन्दुसारोऽपि शब्दस्तोममहानिधिः॥

आशुबोधं व्याकरणं शब्दार्थरत्ननामकः। धातुरूपादर्शनामा ग्रन्थोऽपि रचितो मया ॥
गायत्र्यर्थो विनिर्णीतः गयात्राद्धादिपद्धतिः। वादो बहुविवाहस्य तुलादानादिपद्धतिः ॥
राजप्रशस्ती रचिता काव्यस्वर्ण्याश्च टिप्पनी। वेणीसंहारमुख्येषु विद्वतिर्नाटकेषु च ॥
एते ग्रन्था विनिर्माय मुद्रिता बहुयत्नतः। गवर्मेण्टानुकूल्यञ्च क्वचिदेषु च मुद्रणे ॥
तत्पदापस्तेनापि गवर्मेण्टप्रकल्पिताम्। अर्द्धवृत्तिं समासाद्य वाचस्पत्यं समापितम् ॥
मुद्रणे व्ययबाहुल्यात् गवर्मेण्टे निवेदिते। तद्दत्तव्ययसाहाय्यं लब्ध्वेदं मुद्रितं मया ॥
अष्टादशभिरानायि वर्षैः पूर्तिं मयाधुना। शब्दरत्नमयः कोषो मोषदोषविवर्जितः।
नानाधातुरव्ययाख्यो नानार्थोऽयं विराजताम्। वाचस्पत्याभिधो नानाशास्त्रार्थानां प्रदर्शकः ॥
वाचस्पत्युपनाम्नायं श्रीतारानाथशर्म्मणा। निरमायि प्रयत्नेन मुद्रायन्त्रैश्च मुद्रितः ॥
वाणशून्यदन्तिचन्द्रविमिते शकवत्सरे। सौरपौषे षोड़शांशे मुद्रा तस्य समापिता ॥
यदत्र स्खलितं किञ्चित् प्रमादेन भ्रमेण वा। तत्सर्वं शोधयन्त्वार्याः कस्य न स्खलितं मनः।
बहुच्छिद्रं परित्यज्य गुणलेशग्रहिष्टया। परिगृह्णन्त्वदोविज्ञा ऋजवो दम्भवर्जिताः ॥
एतस्य मुद्रणविधौ परिशोधनार्थं यत्ने कृतेऽपि बहुले भ्रमतः मादात्।
दृष्टेर्विकारवशतो यदशुद्धमस्ति संशोधयन्तु सुधियो नतियाचितास्तत् ॥
अनुद्बोधाद्विस्मृता ये शब्दाः केचित् प्रमादतः। परिशिष्टे प्रकाश्यास्ते इत्याशा पूरको विभुः ॥
ये शब्दाम्बुधिपारमापुरमलप्रज्ञातरीवैभवात् तानुद्दिश्य नमस्क्रियैव सततं तेभ्यो न चैषा क्रिया।
ये शास्त्रेऽकृतबुद्धयो निजधिया व्युत्पित्सवो मानवाः नानाकोषनिरीक्षणे श्रमभियस्तेभ्यो ममैषा क्रिया ॥
पदानुशासने रतं मुनिचयं हृदा नतम्। तदस्य भूमिमण्डले करोतु सुप्रचारणम् ॥ शिवम्।
ओं तत्सत्।

इति कलिकातास्थगवर्नमेण्टसंस्कृतपाठशालीयदर्शनव्याकरणाध्यापकवर श्रीतारानाथतर्कवाचस्पति-
भट्टाचार्येण विरचितं वाचस्पत्याभिधमभिधानं समाप्तम्।
१८०५ शालिवाहन वत्सरे, १८४० विक्रमादित्यसंवत्सरे, १८८४ खृीष्टाब्दे,
कलिकातानगरे मुद्रितमभूत्।

CENTRAL ARCHAEOLOGICAL LIBRARY New Delhi.

(1952) 7

OFFICE OF THE DIRECTOR GE
Library Reg No
INDIA

OFFICE OF THE DIRECTOR GENERAL
Library Ref No
INDIA

Archaeological Library,
19589
Call No. R 5a 4K/Tar.
Author— Taranatha
Tarkavachaspati
Title— Vachaspatya Vol. 4

Borrower No.	Date of Issue	Date of Return

"A book that is shut is but a block"

CENTRAL ARCHAEOLOGICAL LIBRARY
GOVT. OF INDIA
Department of Archaeology
NEW DELHI

Please help us to keep the book clean and moving.